श्रीकृष्णः शरणं मम

श्रीमद्वल्लभाचार्यचरणा विजयन्तेतमाम्

श्रीकृष्णद्वैपायन-वेदव्यास-महर्षिप्रणीतमनेकव्याख्यासमलङ्कृतम्

श्रीमद्भागवतमहापुराणम्

सात्वतसंहिता

दशमस्कन्धः—पूर्वार्द्धः

जन्मप्रकरणं-तामसप्रकरणञ्च एकादशाध्यायाः

एकादशं फलम्

आचार्यवर्याणां-प्राचेतसाञ्च विविधाष्टीकाः

* * *

कर्दमक्षमा (अन्वयः), श्रीधरस्वामिविरचिता—भावार्थदीपिका, श्रीवंशीधरकृतः—भावार्थदीपिकाप्रकाशः, श्रीमज्जीवगोस्वामिकृता—वैष्णवतोषिणी, श्रीमज्जीवगोस्वामिकृता—बृहद्वैष्णवतोषिणी, श्रीसुदर्शनसूरिकृतशुकपक्षीयम् , श्रीमद्वीरराघवाचार्यकृता—भागवतचन्द्रचन्द्रिका, श्रीमद्विजयध्वजतीर्थकृता—पदरत्नावली, श्रीमज्जीवगोस्वामिकृतः—क्रमसंदर्भः, श्रीमज्जीवगोस्वामिकृतः—बृहत्क्रमसन्दर्भः, श्रीनाथचक्रवर्तिपादविरचिता—चैतन्यमतमञ्जूषा, श्रीमद्विश्वनाथचक्रवर्तिकृता—सारार्थदर्शिनी, श्रीमच्छुकदेवकृतः—सिद्धान्तप्रदीपः, श्रीबलदेवविद्याभूषणकृता—वैष्णवानन्दिनी, श्रीसत्याभिनवयतिकृता—दुर्घटभावदीपिका, श्रीपांधरीनारायणाचार्यकृतः—विरोधोद्धारः, श्रीछल्लारिनारायणाचार्यविरचिता—श्रीभागवततात्पर्यटिप्पणी, श्रीसत्यधर्मकृता—श्रीभागवतटिप्पणी, श्रीमद्वल्लभाचार्यचरणविरचिता श्रीसुबोधिनी, (१) श्रीप्रभुचरणविरचिता—श्रीटिप्पणी, (२) श्रीपुरुषोत्तमचरणप्रणीतः—श्रीसुबोधिनीटिप्पण्योः प्रकाशः, (३) श्रीमद्वल्लभमहाराजकृतः—श्रीसुबोधिनीलेखः, (४) श्रीमद्दीक्षितलालुभट्टयोजिता—श्रीसुबोधिनीयोजना, (५) भगवदीयनिर्भयरामभट्टनिर्मिता,—श्रीसुबोधिनीकारिकाव्याख्या, बुभुत्सुबोधिका, श्रीमातृपितृतोषिणी—श्रीसुबोधिनीजी, गोस्वामिश्रीगीरिधरलालकृता बालप्रबोधिनी, श्रीगङ्गासहायप्रणीता—अन्वितार्थप्रकाशिका, श्रीगोपालानन्दमुनिविरचित—निगूढार्थप्रकाशव्याख्यानम्, श्रीभगवत्प्रसादाचार्यविरचिता—भक्तमनोरञ्जनी, श्रीहरिसूरिविरचितम्—श्रीभक्तिरसायनम् इत्येताभिर्व्याख्याभिः, कृष्णशङ्करशास्त्रिनिवर्तित—कृष्णप्रियाभाषानुवादेन—च समलङ्कृतम् ।

संकलनकर्ता—

कर्दमऋषिः

विक्रम संवत्सरः २०४२

प्रकाशकः

श्रीभागवतविद्यापीठः

सम्पादकः परिवेषकश्च

कृष्णशङ्कर शास्त्री

शालिवाहनः

दशमस्कन्धः पूर्वार्द्धः

अध्यायसूची

अध्याय	विषयाः	पृष्ठा
१.	जन्मप्रकरणे भक्तिदु:खनिरूपणम्	१
२.	समुद्यमः	२१
३.	कृष्णजन्म	४०
४.	कंसस्य मन्त्रणा	६४
५.	नन्दमहोत्सवः	७४
६.	पूतनावधः	८१
७.	तृणावर्तमोक्षः	९०
८.	गुरुणा गर्गेण कृष्णरामयोर्द्विजातिसंस्कारः	९७
९.	गोपीप्रसादः	१०८
१०.	नलकुवरमणिग्रीवमुक्तिः	११४
११.	वत्सबकवधवर्णनम्	१२२

श्री हरिः

❀ श्री गणेशाय नमः ❀

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः पूर्वार्धः—जन्मप्रकरणम्

⁂

अथ प्रथमोऽध्यायः

श्लोक	अनु०	मि०	उ०	उपे०	वसंत	वंशस्थ	उवाच	अध्याय-अक्षर	उवाच अक्षर	श्लोक अक्षर	संक० अक्षर	संक० अ० श्लोक
६९	५८	७	१	१	२		६	८९	५४	२३७७	२५२०	७८॥

राजोवाच—कथितो वंशविस्तारो भवता सोमसूर्ययोः । राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥ १ ॥

यदोश्च धर्मशीलस्य नितरां मुनिसत्तम ।

श्री कर्दमक्षमा

अन्वयः—राजा उवाच, मुनिसत्तम भवता सोमसूर्ययोः वंशविस्तारः कथितः च, उभयवंश्यानां राज्ञां परमाद्भुतं चरितं (कथितं) च (मुनिसत्तम) नितरां धर्मशीलस्य यदोः (चरितं कथितम्) ॥ १½ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीगणेशाय नमः

विश्वसर्गविसर्गादिनवलक्षणलक्षितम् । श्रीकृष्णाख्यं परं धाम जगद्धाम नमाम तत् ॥ १ ॥
दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहम् । क्रीडद्यदुकुलाम्भोधौ परानन्दमुदीर्यते ॥ २ ॥
दशमे कृष्णसत्कीर्तिवितानायानुवर्ण्यते । धर्मग्लानिनिमित्तस्तु निरोधो दुष्टभूभुजाम् ॥ ३ ॥
प्राकृतादिश्चतुर्धा यो निरोधः स तु वर्णितः । तत्तत्प्रसंगतः सृष्टिसंहारादिनिरूपणैः ॥ ४ ॥
कृता नवतिरध्याया दशमे कृष्णकीर्तये ।
आदौ चतुर्भिरध्यायैर्ब्रह्मप्रार्थनयाऽवनेः । भारं हर्तुं हरेर्जन्म सप्रसङ्गं निरूप्यते ॥ ५ ॥
गोकुले मथुरायां च द्वारवत्यां ततः क्रमात् । कृष्णलीला त्रिधा प्रोक्ता तत्तद्भेदैस्त्वनेकधा ॥ ६ ॥
सपञ्चत्रिंशदध्यायैर्बृहद्वृन्दावनादिषु । गोकुले वसतो लीला वर्ण्यते सुरदुष्करा ॥ ७ ॥
एकेन यमुनावारिण्यक्रूरेण कृता स्तुतिः । एकादशभिराख्याता लीला मधुवने कृता ॥ ८ ॥
शेषैर्द्वारवतीलीला तन्निर्माणादि वर्ण्यते । एवं नवतिरध्याया दशमे विशदार्थकाः ॥ ९ ॥
तत्र तु प्रथमे कंसः स्वमृत्युं देवकीसुतात् । श्रुत्वा भीतोऽवधीत्तस्याः षड्गर्भानिति वर्ण्यते॥ १० ॥
कृष्णावतारचरितश्रवणामृतनिर्वृतः । उक्तानुवादेनौत्सुक्याद्राजा पृच्छति तत्पुनः ॥ ११ ॥

कथितो वंशविस्तार इति ॥ १½ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ॐ स्वस्ति श्रीगणेशाय नमः

वन्दे देवं पार्वतीजं महेशं वाचं सूर्यं मां गुहं राधिकेशम् । विद्यातीर्थान् सर्वतश्च प्रणम्य व्याख्यां कुर्वे श्रीधरस्वामिवृत्तेः ॥ १ ॥
हरिविधिवशिष्ठशक्तिपराशरव्यासशुकदेवान् । वैशम्पायनमुग्रश्रवसं च नुमः पुराणगुरुमुख्यान् ॥ २ ॥
त्रय्यारुणि कश्यपं च सावर्णिमकृतव्रणम् । रोमहर्षणहारीतौ मैत्रेयं च मृकण्डजम् ॥ ३ ॥

शेषं सांख्यायनं चाथ चतुरः सनकादिकान् । सर्वांष्टीकाकृतश्चार्यान् कणादं जैमिनि मुनिम् ॥ ४ ॥
पतञ्जलिमक्षपादं व्यासञ्च कपिलं हरिम् । छन्दःकृतः कोशकृतः साहित्यकृतिनोऽखिलान् ॥ ५ ॥
श्रीनृसिंहं प्रणम्यैव श्रीधरस्वामिनः कृतेः । विवृति श्रीधरस्यैव प्रसादादधुना ब्रुवे ॥ ६ ॥
श्रीधरस्वाम्यभिप्रायं श्रीधरो वेत्ति सर्वथा । भविष्यति तत्कृपया तदभिव्यक्तिराशु मे ॥ ७ ॥
क्वचिच्च श्रीधरत्यक्तपदानामपि वर्णनम् । यथामति माथुराणां प्रेरणाऽतो मुहुर्मुहुः ॥ ८ ॥
करिष्यामि विदां प्रीत्यै क्षमन्तां ते मम त्वराम् । पूर्वाचार्यानुग्रहान्मे सर्वेऽर्थाः प्रतिभान्तु वै ॥ ९ ॥
वृन्दारण्यान्तर्गते नंदजेन सेवाकुञ्जे संयुता कीर्तिजाताम् । नत्वा तस्याः प्राप्य चाज्ञां स्वबुद्धया कुर्वे व्याख्यां श्रीधरस्वामिवृत्तेः ॥ १० ॥
प्रथमं दशमस्कंधव्याख्यां कुर्वे कुतूहलात् । श्रीकृष्णलीलामाधुर्यसेवनासक्तचेतसः ॥ ११ ॥
वंशीधरः कौशिकगोत्रगौडवंश्यः कृती श्रीधरवृत्तिवृत्तिम् । करोम्यहं कृष्णपदप्रसादात्तथा गुरूणामनुकम्पयैव ॥ १२ ॥

अथ स्कंधादौ प्रतिस्कंधव्याख्यावसरनमस्कृतश्रीरामप्रणतिं चेतस्यागतातिरम्यश्रीकृष्णलीलास्मृतिविभ्रमेण विहायैव श्रीदशमस्कंधमुख्यवर्णनीयश्रीकृष्णं श्रीधरस्वामी प्रणौति—**विश्वसर्गेति** । वयं तदनिर्वचनीयमियत्तया गुणरूपादिना वेयदीदृगिति वक्तुमशक्यं धाम तेजो रूपं ब्रह्म नमाम बहुत्वं शिष्याभिप्रायम् । नमतेः "विधिनिमंत्रणामंत्रणाधीष्टप्रश्नप्रार्थनेषु लिङ् लोट् च" इति प्रार्थनायां लोट्, नमनेन प्रार्थयाम इत्यर्थः । न तु यत्तदोर्नित्यसंबंधादत्र यच्छब्दोपादानं कथं न कृतमिति चेत्तत्राह "तत्त्वमसि" इति श्रुतौ तच्छब्दस्य ब्रह्मवाचकत्वदर्शनात्तच्छब्दोऽत्र ब्रह्मवाचको प्रसिद्धः 'सोहं हंसः' इत्यत्र च । ततश्चात्र यच्छब्दोपादानं नापेक्षते प्रक्रांतप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते" इति काव्यप्रकाशोक्तेः । यथा कुमारसंभवे "कला च सा कांतिमति कलावतः" इत्यत्रेति 'गृहदेहत्विट्प्रभावा धामानि' इत्यमरः । किंभूतं श्रीयते सेव्यते ब्रह्मादिभिः श्रीकृष्णेन वेति श्रीराधा । "सर्वैराप्यूज्यते देवी राधा वृंदावने वने" इति ब्रह्माण्डे ब्रह्मोक्तेः, "यच्चिन्त्यमखिलेश्वरैः" इति तत्रैव नारदोक्तेश्च, 'राधैवाराध्यते' इति श्रीकृष्णोक्तेश्च "राध्यते सा भगवता राधा इत्यभिधा स्फुटम्" इत्यादिपुराणोक्तेश्च श्रीशब्दो राधार्थकः । यद्वा—श्रयति राध्नोति सर्वदा वृंदावननिकुंजगं श्रीनंदनंदनमिति श्रीराधा । "वृंदावने निकुंजस्थो राध्यते सर्वदा यया । नंदसूनुरतो राधा सोच्यते मुनिसत्तम ॥" इति पुराणांतरात् । कृषति निजसमीपमाकर्षति वेणुरवेण वल्लवीगणमिति कृष्णो यशोदानन्दनः । ननु मधुरगीतादिना त्वन्येऽपि प्रमदागणमाकर्षन्ति तत्र को विशेष इत्यरुच्याह—कृषति विलिखति निजानां संसारमिति कृष्णः । सदानंदस्वरूपो भक्तजनपापौघनाशकश्च । "कृषिर्भूवाचकः शब्दोऽणश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" । इति श्रुतेः सदानंदरूपः । "कोटिजन्मकृतं पापं कृषिरित्युच्यते बुधैः । तन्नाशनकरो देवः कृष्ण इत्यभिधीयते" इति ब्रह्मवैवर्तात्पापनाशकरूपश्च कृष्णपदार्थः । श्रिया सहितः कृष्णः श्रीकृष्णः यद्वा—"श्रीश्च ते लक्ष्मीश्च ते पत्न्यौ" इति श्रुतौ श्रीशब्देन राधा लक्ष्मीशब्देन रमा चात्सरस्वती ग्राह्या, 'केशवस्य प्रियां देवीम्' इति बृहस्पत्युक्तेः । तथा च श्रीश्च श्रीश्च श्रीश्चेत्येकशेषसमासेन श्रिय इति स्यात्, ततः श्रीभिः राधारमागोभिः सहितः कृष्ण श्रीकृष्णः । स आख्याऽभिधा यस्य तच्छ्रीकृष्णाख्यम् । पुनः विश्वसर्गविसर्गादिनवलक्षणलक्षितम् । सर्गश्च विसर्गश्च सर्गविसर्गौ विश्वस्य सर्गविसर्गौ विश्वसर्गविसर्गौ । तौ आदी एषां स्थानादीनां तानि विश्वसर्गविसर्गादीनि तानि च नव लक्षणानि विश्वसर्गविसर्गादिनवलक्षणानि तैर्नवभिर्लक्षितं लक्ष्यत्वेन ज्ञापितम् । यद्यपि "अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः । मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः" । इति लक्षणानि दशोक्तानि, तथापीहाश्रयरूपस्य दशमस्य लक्ष्याभिप्रायेण नवेत्युक्तिर्बोध्या । नामरूपत्वेऽपि माया तत्कार्यास्पृष्टत्वमाह—**परमिति** । परं सर्वस्मात् परतमं "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" । इति श्रुतेः । यद्वा—परं निर्भयम् अन्येषां देवानां गृहीतशस्त्रत्वेन सभयत्वप्रतीतेः श्रीकृष्णस्य वंशीविभूषितकरत्वान्निर्भयत्वं स्फुटमिति । पुनः जगतो धामेति सत्पुरुषस्तु जगदधिष्ठानत्वेन लक्ष्यरूपतामाह—जगन्ति स्थावरजंगमात्मकानि सर्वाणि धामानि यस्येति तत्तथेति समासस्तु सर्वांतर्यामितामाह । अत एव वक्ष्यति "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" इति । यद्वा—परं धामेति मुक्तप्राप्यत्वमाह "यद्गत्वा न निवर्तन्ते तद्धाम परमं मम" इति श्रीमुखोक्तेः । यद्यपि "तस्मा इदं भागवतं पुराणं दशलक्षणम्" इत्युक्तेः सर्गादीनि दशमहापुराणलक्षणानि श्रीमद्भागवतस्यैव सन्ति कथं तानि श्रीकृष्णस्य संजाघटति, तथापि "इदं भागवतं नाम पुराणं ब्रह्मसंमितम्" इत्युक्तेः "तेनेयं वाङ्मयी मूर्तिः श्रीकृष्णस्य न संशयः" इति पाद्मोक्तेश्च श्रीकृष्णश्रीभागवतयोर्भेदाभावेनैकरूपत्वात्तत्रापि तानि न विरुद्धानीति । किञ्चैतानि च सर्गादीनि सर्वमहापुराणसाधारणलक्षणानि श्रीभागवतस्य संति यत्साधारणलक्षणं तत्तु प्रथमस्कंधे "ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कंधसंमितः" इत्यनेन स्वामिचरणैः प्रथमस्कंधे प्रथमश्लोकव्याख्याने प्रपञ्चितमेव । लक्षणत्वं च लक्ष्यतावच्छेदकसमनियतत्वं लक्ष्यं च यदुद्दिश्य लक्षणं प्रवर्त्तते इति । इह च महापुराणं लक्ष्यं तत्र लक्ष्यतावच्छेदकं महापुराणत्वं तत्समनियतत्वं सर्गादिदशकस्येति समन्वयः । श्रीभागवतस्य महापुराणत्वं तु द्वादशे वक्ष्यति—"श्रीमद्भागवतं नाम सर्गादिदशलक्षणम् । महापुराणमल्पञ्च पञ्चलक्षणमिष्यते" इति यत्त्वमरसिंहेन 'पुराणं पंचलक्षणम्' इत्युक्त्वा पञ्चलक्षणस्यैव पुराणत्वं प्रतिपादितं तदल्पपुराणविषयमेवान्यथा "दशलक्षणसंयुक्तं पुराणं कवयो विदुः । केचित्पंचविधं ब्रह्मन्महदल्पव्यवस्थया" । इति व्यासोक्तिर्व्याकुप्येतेति ॥ १ ॥

अथ दशमस्कन्धवर्णनीयमाह–**दशम इति**। दशमे दशमस्कंधे। दशमं लक्ष्यमुदीर्यते किंभूतम् आश्रितानां जगतामाश्रयः "आभासश्च निरोधश्च यतश्चाध्यवसीयते। स आश्रयः परं ब्रह्म" इत्युक्तलक्षणो विग्रहः स्वरूपं यस्य तत्तथा। एतादृग् लक्ष्यं श्रीकृष्ण एव इत्येतदप्यतो लभ्यते। तथाहि–अं वासुदेवमाश्रिताऽऽश्रिता रमा राधा गीर्वा तस्या आश्रयो विग्रहो देहो यस्य लक्ष्यस्य तत्तथा। यद्वा–वीनां पक्षिणामाश्रय आश्रयविर्गरुडः। राजदंतादिवत्समासः। आश्रित आश्रयविर्येन स आश्रिताश्रयविर्वैकुण्ठनायको विष्णुरूपलक्षणमेतन्नृसिंहयज्ञनरनारायणरामचन्द्राणाम्। तं गृह्णाति स्वस्मिन्प्रविलापयतीत्याश्रिताश्रयविग्रहम्। प्रथितमेतद्वृत्तं गर्गसंहितागोलोकखंडे। अनेन नंदनंदनस्यैव लक्ष्यत्वमायातम्। अत एव परान्ब्रह्मरुद्रादीनानंदयति निजलीलया तद्विपदाहरणेन वेति परानंदम्। सृष्ट्याद्याख्यानवृकासुराद्याख्यानैरेतत्प्रसिद्धमत्रान्यत्र वेति। यद्वा–"को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इत्यादिश्रुतेः परानंदस्वरूपम् यद्वा–पिपर्ति पालयतीति परः पिता स चात्र नंदराजस्तमानंदयति निजलीलयेति परानंदम् "नंदः प्रमुदितो मेने आत्मानं पूर्णमाशिषाम्" इत्यादि बहुशो वक्ष्यमाणत्वात्। पुनः यदुकुलमेवांभोधिरित्युपमानोत्तरपदसमासस्तत्र क्रीडतीति क्रीडन् 'क्रीड्–विहारे' शतृप्रत्ययः। प्रसिद्धांभोधौ शशिवदिति व्यज्यते। नंदगोपकुलमपि यदुकुलमेव। तथाहि–अथ सर्वश्रुतिपुराणादिकृतप्रशंसस्य यदुकुलस्यावतंसः श्रीदेवमीढनामा परमगुणधामा। मथुरामध्यासामास तस्य भार्याद्वयमासीत् प्रथमा द्वितीयवर्णा द्वितीया तृतीयवर्णेति। तयोश्च पुत्रद्वयं प्रथमं बभूव शूरः पर्जन्य इति च तत्र शूरस्य श्रीवसुदेवादयः। अत एवोक्तं श्रीमुनिना "वसुदेव उपश्रुत्य भ्रातरं नंदमागतम्" इति श्रीपर्जन्यस्तु 'मातृवद्वर्णसंकरः' इति न्यायेन "प्रायेण हि जनाः सर्वे यांति मातामहीं तनूम्" इति न्यायेन च वैश्यतामेवाविश्य गोवृत्तिपूर्वकं बृहद्वनं एवासांचकार। स च बाल्यादेव ब्राह्मणदर्शी पूजयति। मनोरथपूरो देयानि वर्षति। वैष्णववेदं स्निह्यति। यावज्जीवं हरिमर्चयति स्म। तस्य मातुर्वंशश्च व्याप्तसर्वदिशां विशामवतंसतया परमशंसनीय एवमेव च गोपवंशोऽपीति पाद्मे सृष्टिखंडे स्पष्टीकृतः। स च श्रीमान्पर्जन्यो वैश्यांतरसाधारण्यं निजैश्वर्येणातीयाय। यस्य भार्या नाम्ना वरीयसीत्यासीत् यस्य च श्रीमदुपनंदादयः पञ्चात्मजा जगदेवानंदयामासुः। तथा च वंदिन उपगांति स्म "उपनंदादयश्चैते पितुः पंचैव मूर्त्तयः। यथानंदमयस्यामी वेदांतेषु प्रियादयः" इति। तस्य पुत्रसंपत्तिस्तु परमरमणीयतामवाप मध्यमसुतसंपत्तिस्तु सुतराम्। तदेवं सुमुखनाम्ना केनचिद्गोपमुख्येन श्रीपर्जन्यमध्यमसुताय श्रीनंदाय परमधन्या कन्या दत्ता। या खलु स्वगुणवशीकृतस्वजना यशांसि ददाति शृण्वद्भ्यः पश्यद्भ्यः किमुततरां भक्तिमद्भ्यः। ततश्च तयोर्दांपत्येन सर्वेषामपि सुखसंपत्तिरजायत किमुत पित्रादीनाम्। तदेवमानंदितसर्वजनः पर्जन्यः स्वयमपि सुखमनुभूय श्रीगोविंदपदारविन्दभजनमात्रान्वितां देहयात्रामभीष्टां मन्यमानः सर्वज्यायसे सुताय स्वकुलतिलकतां दातुं श्रीवसुदेवादिनरदेवगर्गादिभूदेवकृतप्रभायां सभायां स्वजनानाहूतवान्। स च ज्यायांस्तत्र सदसि मध्यमं निजानुजं नंदनामानं पितुराज्ञया कृतकृत्यः सन् गोकुलराजतया सभाजयामास। अथ संकुचिते तत्रानुजे सविस्मये सर्वजने पितरि रोचमानलोचने च स प्रोवाच मयेदं स्नेहसद्गुणपराधीनेनाचरितमिति राजाऽयमस्माकम्। ततो देवैस्तदुपरि पुष्पवृष्टिरकारि सदस्यैश्च। ततोऽसौ पर्जन्यः श्रीगोविंदमाराधयितुं सभार्यो वृन्दावनं प्रविवेश। तत्काले शास्त्रसारं पृच्छतः पुत्रानुपदिदेश। तथाहि–कि भयमूलमदृष्टं किं शरणं श्रीहरेर्भक्तः। किं प्राप्यं तद्भक्तिः किं सौख्यं तत्परप्रेम"॥ इति। श्रीमानुपनंदः श्रीनंदव्रजमहेंद्रसदसि मंत्रितया तस्थिवान् तस्य च श्रीनंदराजस्य श्रीगोलोकेशश्रीकृष्णो द्वादशीव्रतचर्यातुष्टः पुत्रतामआपेति। इत्थं नंदगोपकुलं यदुकुलमिति। अथ प्रकृतमनुसरामः–एतद्विशेषणसार्थक्यायाश्रितेत्यादेरर्थान्तरमाह—आश्रितभक्ष्यत्वेन आश्रयो येन स आश्रिताशयोऽग्निः आश्रयाशो बृहद्भानुः' इति कोषादग्नेराश्रयाशत्वप्रसिद्धेः। यद्वा—आश्रितः आश्रयो येन निरधिष्ठानाग्नेरदृष्टत्वात्। आश्रिताश्रयोऽशने यस्य आश्रिताश्रयाशनः। स चासौ विः आश्रिताश्रयविश्चकोरः मध्यमपदलोपी समासः। तेन गृह्यते प्रियत्वेन सेव्यत इत्याश्रिताश्रयविग्रहं चन्द्ररूपमित्यर्थः। 'आश्रिताश्रयलक्षणम्' इति पाठस्तूत्तानार्थः। किञ्चाश्रयस्य दशमस्य लक्ष्यत्वे सूक्तत्वेऽपि पुनर्लक्ष्यत्वेऽपि कथनं तु क्वचिल्लक्ष्यलक्षणयोरभेदेऽपि छंदोग्रन्थेषु वृत्तरत्नाकरादिषु 'मो नारी रो भृङ्गी' इत्याद्युदाहृत्य लक्ष्यलक्षणभेदव्यवहारवद्बोध्यम्। किञ्च—अवसरसंगतिप्राप्तमष्टमं निरोधरूपलक्षणवर्णनं विहायेहाश्रयरूपस्य दशमस्य वर्णनं तु यदुवंशवर्णनप्रसंगसंगत्या कृतमिति बोध्यम्। संगतिश्च अनंतराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ह्यर्थः संगतिरित्युक्तलक्षणा। सा च "सप्रसंग उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैककार्यत्वे षोढा संगतिरिष्यते। इत्युदयनोक्तेः षोढा। स्मृतस्योपेक्षानर्हत्वं प्रसंगत्वम्॥ १॥ वर्णनीयमर्थं मनसि निधाय तदर्थमर्थांतरकल्पनमुपोद्घातत्वम्॥ २॥ वर्णितार्थे कारणजिज्ञासोत्पादकत्वं हेतुत्वम्॥ ३॥ शुश्रूषांतरराहित्यपूर्वकप्रकृतग्रंथे शुश्रूषोत्पादकत्वमवसरत्वम्॥ ४॥ उक्तार्थसाधकत्वं निर्वाहकत्वम्॥ ५॥ द्वयोरेककार्यकरत्वेनैकत्र वर्णनमेककार्यत्वम्॥ ६॥ एषामुदाहरणानि ग्रंथे यथायथमवधेयानि (२)। अथ लक्ष्यवर्णनांतर्गतं सर्गादिवर्णनावसरप्राप्तं भाक्तमवांतरमदर्शनसाम्याद्दुष्टसंहाररूपनिरोधमाह—**दशम इति**। दुष्टभूभुजां कंसादीनाम्। निरोधः संहाररूपोऽनुवर्ण्यते 'निरोधो नाशरोधयोः' इति मेदिनी। किंभूतः धर्मस्य त्रयीविहितस्य ग्लानिः क्षयो निमित्तं यस्य स तथा तेषां धर्मनाशकत्वेन श्रीकृष्णेन ते हता इति तात्पर्यम्। कृष्णस्य रागिमुक्तमुमुक्ष्वादिसकलानंदकरी सती या कीर्तिस्तस्या वितानाय विस्ताराय। दुष्टनाशेन सर्वधर्मप्रवृत्तेः सत्कीर्तेर्विस्तारः स्फुट एव। तुरत्रार्थान्तरे। तच्च लक्ष्यस्य वर्ण्यत्वं प्रतिज्ञाय पुनर्लक्षणवर्णनरूपं चतुर्विधनिरोधवैलक्षण्यरूपं वेति (३)। ननु मुख्यं निरोधं विहाय भाक्तनिरोधः कथमत्र वर्णितस्तत्राह—**प्राकृतादिति**। आदिना नित्यनैमित्तिकात्यंतिकानां ग्रहः। प्रकृतौ तत्कार्यब्रह्माण्डस्य लयः प्राकृतिकः। ब्रह्मणो निद्रां निमित्तीकृत्य जायमानो लोक-

त्र्यप्रलयो नैमित्तिकः । देहस्य प्रतिक्षणमवस्थाभेदेन वर्त्तमानो यः स नित्यः ज्ञानेनाविद्यां सकार्यां छित्त्वा स्वरूपेणावस्थानमात्यंतिक इति विवेकः । स च स चानयोः समाहारस्तत्तत् । तत्तन्नामसौ प्रसंगश्चेति तत्तत्प्रसंगस्तस्मिंस्तथा । सप्तम्यर्थे तसिः । तस्मिंस्तस्मिन् प्रसङ्गे सृष्टिसंहारवादी येषां युद्धविचारादीनां तेषां निरूपणैः । वर्णितः 'वर्ण—वर्णने' अतो भविष्यत्यपि क्त प्रत्ययो बोध्यः, "उणादयो बहुलम्" इति बाहुलकात् । तथा चैकादशे द्वादशे च वर्णितो वर्णयिष्यते इत्यर्थः । सृष्टिसंहारप्रसंगे "सहस्रयुगपर्यन्तम्" इत्यादिना नैमित्तिकः प्रथमे सूचितः । आत्यंतिकोऽपि प्राकृतमिश्रो युधिष्ठिरमहानुगमने तत्रैवोक्तः । तृतीयेऽकादशेऽष्टमे चाध्याये नैमित्तिक एवोक्तः । 'चतुर्युगानां च सहस्रमप्सु' इत्यादिना, 'तमेवान्वपि धीयते लोकाः' इत्यादिना च सप्तमेऽप्यवधूताख्याने आत्यंतिक एवोक्तस्तत्रैवानावृत्तिप्रकारोऽपि । स एव चतुर्थे पृथूपाख्याने पृथोरपि प्राकृतमिश्र आत्यंतिक एव । अष्टमे मत्स्यावतारप्रसंगे 'यावद्ब्राह्मी निशा' इत्याद्युक्ते नैमित्तिक एव । एवं नवमे सौभर्युपाख्याने हरिश्चन्द्रोपाख्याने चात्यन्तिक एव प्रतीयते । एवमन्यत्रापि ज्ञेयम् (४) ।

ननु कियदध्यायो दशमस्कंधस्तत्राह—कृता इति सार्द्धेन । नवानां दशकं नवतिरिति "पंक्तिविंशति इत्यादिना साधुः" । "विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः" इत्यमरः, 'तासु च नवतेः स्त्रियः' इति च । विंशत्यादीनां नवतिपर्यन्तानां नित्यं स्त्रीत्वम् 'मुखं पुंसः परस्य ये' इतिवत् । यद्वा—वेदाः प्रमाणमभिनिवन्नवतिरध्याया इति सम्बन्धः । 'समानलिंगविभक्तिसंख्याकानामेवान्वयः' इति शिष्टोक्तिस्तूद्देश्यविधेयभावं विनैव चरितार्था भवति । "यत्रोद्देश्यविधेयत्वं तत्रायं नियमो नहि । रामदाराश्च सीतेयं करुणाभाजनं हरिः ।" इत्याद्युदाहृतेः । चतुर्भिराद्यैः प्रथमाच्चतुर्थपर्यंतैः । सप्रसंगं प्रसंगश्च मथुरावर्णनपुरस्सरदेवक्युद्वाहादिरूपः अवनेर्भूमेः 'क्ष्मावनिर्मेदिनी मही' इत्यमरः । हर्तुमपाकर्तुम् । कीर्त्यते वर्ण्यते व्यासाद्यैरिति कीर्त्तिलीला कृष्णस्य कीर्त्तिः कृष्णकीर्त्तिः । तस्यै कृष्णलीलायै । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी । कृष्णकीर्तिं वर्णयितुमित्यर्थः । (५) सा च त्रिधेत्याह—**गोकुल इति**—गोकुललीलामथुरालीलाद्वारकालीलाभेदात् त्रिधा त्रिप्रकारा । ततो हरिजन्मानंतरम् । क्रमाद्गोकुललीलाक्रमात् । गोकुललीला च जन्मोत्सवपूतनावधशकटपातनादिभेदैरनेकधा । मथुरालीलापि धनुर्भंगमल्लवधकुवलयापीडकंसवधपित्रादिमोचनादिभेदैरनेकधा । एवं द्वारकालीलापि द्वारकानिर्माणकालयवनादिवधरुक्मिणीहरणस्यमंतकोपादानादिभेदैरनेकधैव (६) । अथ पुनरध्यायसंख्यया लीलापार्थक्यमाह—सपंचेति त्रिभिः । पञ्चभिः सहिता त्रिंशत्सपंचत्रिंशत्तया । बृहच्च वृंदा च बृहद्वृन्दे ते च ते वने बृहद्वृन्दावने ते आदिनी येषां मधुतालादीनां तानि बृहद्वृन्दावनादीनि तेषु । इह वृन्दाशब्दो वृन्दाख्यदेव्यधिष्ठितवनपरो लक्षणया बोध्यः । वनानि च मधुतालकुमुदबहुलाकाम्यखदिरवृन्दाभद्रभांडीरबिल्वलोहमहावनभेदाद् द्वादश संति व्रजमंडले । उपवनसहितानि चतुर्विंशतिश्च तानि निधुवनकोकिलादीनि ज्ञेयानि । स पञ्चत्रिंशताध्यायैः पञ्चमत एकोनचत्वारिंशदन्तैः । संबंधस्तु पूर्ववत् । गवां कुलानि यूथानि यत्र यद्गोकुलं मथुरां विहाय सर्वं व्रजमंडलं तेन नंदग्रामबृहत्सानुपुरप्रभृतीनामखिलानां ग्रहः । तत्र वसतः कृतनिवासस्य श्रीकृष्णस्येत्यर्थः । सुदुष्करा देवैरपि कर्तुमशक्या गोवर्द्धनोद्धारणाल्पप्रदेशगोगोपीयूथविवेशनादिरूपा (७) पुनरेकेन चत्वारिंशदाख्येन एकादशभिरेकचत्वारिंशत्त एकपञ्चाशदन्तैः मधुपुरे मथुरायाम् । वने स्थापितं वनस्थापितम् । मधोर्दैत्यस्य लवणपितुर्वनं स्थापितं मधुवनस्थापितं तच्च तत्पुरं मधुपुरम् । मध्यमपदलोपी समासः । वनस्थापितपदस्य समासकृतैकपदत्वात्तत्र पदद्वयत्वं साऽऽशक्यं तस्मिंस्तथा । "शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् । हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥ इति नवमोक्तेः मधूनां यदूनां पुरं मधुपुरमिति वा "राजधानी ततः साभूत्सर्वयादवभूभुजाम्" इति वक्ष्यमाणत्वात् । यद्वा 'वीरहा माधवो मधुः' इति भारतोक्तेर्मधोर्विष्णोः पुरं मधुपुरम् "मथुरा भगवान्यत्र नित्यं सन्निहितो हरिः" इति वक्ष्यमाणत्वात् (८) शेषैरेकोनचत्वारिंशदध्यायैर्द्विपंचाशत्तो नवतिपर्यन्तैरित्यर्थः । द्वारवतीलीलामाह—तस्या द्वारवत्या निर्माणं रचना आदि यस्य रुक्मिणीहरणादिरूपलीलावृन्दस्य तत्तन्निर्माणादि "निर्माणं रचनायां च प्रमाणरहिते तथा" इति धरणिदेवः । विशदार्थका स्फुटार्थका । (९) तत्र तेषु तेषु अध्यायेषु मध्ये । स्वमृत्युं निजमृतिम् । तस्या देवक्याः । षट् च ते गर्भा अर्भका षड्गर्भास्तान् "गर्भो भ्रूणेऽर्भके कुक्षौ संधौ पनसकंटके" इति मेदिनी । अवधीत् अहिंसीत् (१०) । कृष्णावतारः कृष्णाविर्भावः "अवतारोऽवतरणे पुष्करिण्यादितीर्थयोः । आविर्भावे तरिण्यां स्त्री क्लीबं ज्ञाने प्लवेऽध्वनिः" इति धरणिदेवः । तस्य चरितं बाललीलारूपं तदेव श्रवणयोः कर्णयोरानंदजनकत्वादमृतं तद्रसस्वादु तेन निर्वृतो जातानन्दः । राजा परीक्षित् । संक्षेपेण कथितस्य व्यासेन कथनमनुवादः । उक्तस्य 'जातो गतः पितृगृहाद्व्रजम्' इत्यादिना नवमस्कंधान्ते संक्षेपेणोक्तस्य कृष्णचरितस्यानुवादेन हेतुना । हेतौ तृतीया । औत्सुक्यात् तत्परायणत्वात् 'इष्टार्थोद्यत उत्सुकः' इत्यमरः । अधिकाभिलाषत इति यावत् (११)

तत्कृष्णचरितं पुनर्द्वितीयवारं पृच्छति—**कथित इत्यादिना** । वंशविस्तारो वंशव्यासः "विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तरः" इत्यमरः । यद्यपि "एकत्वं न प्रयुंजीत गुर्वात्मनि कदाचन" इति स्मृतेः पुराणोपदेष्टरि सर्वगुरुमुख्ये श्रीशुकदेवे भवत्येकवचनप्रयोगोऽनुचितस्तथापि तस्याध्यानन्दकन्दश्रीकृष्णचरितश्रवणव्यग्रत्वेन तदितरानुसंधानवशान्न दोषः **सोमसूर्ययोरिति** । ननु "सूर्याचन्द्रमसौ धाता" इति श्रुतौ, "तस्याक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ इति श्रुतौ च, 'सूर्याचन्द्रमसोर्योगे' इति गर्गस्मृतौ च सूर्यशब्दस्य पूर्वनिपातदर्शनात्, "सैषा त्रय्येव विद्या तपति" इति श्रुतेः सूर्यस्य सर्वधर्ममूलत्रयीरूपत्वात् "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतेः सर्वात्मकत्वेन सर्वधर्मप्रवर्तकत्वात्, "यस्योदयेनेह जगत्प्रबुद्ध्यते प्रवर्तते चाखिलकर्मसिद्धये"

इत्यादिस्मृतेश्च अभ्यर्हितत्वात्, वंशनिरूपणावसरेऽपि प्रथमं सूर्यवंशस्यैव निरूपितत्वाच्च सूर्यशब्दस्य पूर्वनिपात उचितस्तथापि "पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः" इति रसवद्द्रव्यकत्वात्सोमस्य रसशोषकरवेः प्रधानत्वात्। ब्रह्मणो मरीचिस्ततः कश्यपस्ततो रविरिति ब्रह्मप्रपौत्रत्वाद्रवेर्ब्रह्मणोऽत्रिस्ततश्चन्द्र इति ब्रह्मपौत्रत्वेन 'सोमोऽभूद्ब्रह्मणांशेन' इत्युक्तेः सर्वस्रष्टृब्रह्मांशत्वेन सूर्यवंशस्यापि श्रीभगवद्रामेण स्वीकृतत्वेऽपि "कृष्णस्तु भगवान् स्वयम्, स्वयं त्वसाम्यातिशयस्त्र्यधीशः" इति "अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल" इति च "अर्जुने तु नरावेशः कृष्णो नारायणः स्वयम्" इत्यादि बहुश उक्तत्वात्स्वयं भगवता श्रीकृष्णेन स्वीकृतवंश्यताकत्वेन "सोमोऽस्माकं ब्राह्मणानां राजा" इति श्रुतेः, सर्ववेदाधिकरणविप्रकुलराजत्वेन सर्वदेवगुरुणा श्रीशिवेन उमया सह वर्तत इति सोमः शिवः। सोऽस्याधारत्वेन यस्य स सोमः। तस्य स्वमूर्द्ध्नि धृतत्वाच्च सोमस्यैवाभ्यर्हितत्वात्पूर्वनिपातः 'आत्मानं श्लाघते सर्वः' इति न्यायेन "सर्वेषामेव लोकेषु स्वेष्टदेवः परो मतः" इति न्यायेन च राज्ञस्तदिष्टदेवस्य श्रीकृष्णस्य च सोमवंश्यत्वाद्वा पूर्वनिपातः। (उभयोः सोमसूर्ययोर्वंशौ उभयवंशौ तत्र भवाः, उभशब्दस्य द्विवचनपरत्वाभावे वृत्तिविषये स्वार्थे नित्यमयच् 'उभयोऽन्यत्र' इत्युक्तेः) यद्वा—उभाववयवौ यस्य स उभयः, स चासौ वंशश्च जातित्वादेकत्वम् उभयवंशः तत्र भवाः उभयवंश्याः। तेषाम्। परमाद्भुतं श्रोतॄणां सुद्युम्नैलादिचरिताकर्णनेनात्याश्चर्यकरम्॥ १॥ च पुनर्यदोश्चरितं कथितमिति लिङ्गव्यत्यासेनान्वयः। यद्यपि "उत्तमश्चिन्तितं कुर्यात्प्रोक्तकारी च मध्यमः। अधमोऽश्रद्धया कुर्यादकर्त्तोच्चरितं पितुः॥" इत्युक्तेः पित्राज्ञोल्लंघिनो यदोर्धर्मशीलत्वं न प्रतीयते, तथापि "स्नातं तेन समस्ततीर्थसलिले दत्ता च सर्वावनिर्यज्ञानां च कृतं सहस्रमखिला देवाश्च संपूजिताः। संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात्" इत्युक्तेस्तस्य श्रीदत्तात्रेयादाप्तात्मतत्त्वत्वाद्धर्मशीलत्वमेव। किञ्च—अन्यथाकारिपित्राज्ञोल्लंघनस्य दोषत्वे प्रह्लादस्याप्यधर्मितापत्तेः। यद्वा—मद्वयसा मन्मातरं भोक्ष्यतीत्यतो मम मातृगामितापत्तिर्भविष्यत्यतो न दास्यामि वयस्तेन धर्मशीलत्वमेव। यद्वा—'धर्मो धर्मविदुत्तमः' इत्युक्तेर्धर्मो विष्णुस्तत्र शीलं समाधिर्यस्य स तथा तस्य। 'शील—समाधौ' पचाद्यच्। हरिभक्तस्येत्यर्थः। नितरामतिशयेन धर्मशीलस्येति संबन्धः। मन्तारो वेदार्थावगन्तारो मुनयो भृग्वादयस्तेषु सन्तः श्रेष्ठा वेदोक्तकारिणः कर्दमादयो मुनिसन्तस्तत्रापि तदुपदेष्टारः पराशरादयो मुनिसत्तरास्तत्रापि भगवन्निष्ठा भवदादयो मुनिसत्तमाः सन्ति 'वैयासकिश्च भगवान्वासुदेवपरायणः' इत्युक्तेर्भवान्मुनिसत्तमोऽस्तीति राज्ञः संबुद्ध्यभिप्राय इति॥ १३॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रिका

श्रीरुक्मिणीसत्यभामासमेतश्रीकृष्णपरब्रह्मणे नमः

श्रीमते रामानुजाय नमः॥

अतिक्रान्तस्कंधान्ते—जातो गतः पितृगृहाद् व्रजमेधितार्थो हत्वा रिपून् सुतशतानि कृतोरुदारः।
उत्पाद्य तेषु पुरुषः क्रतुभिस्समीजे आत्मानमात्मनिगमं प्रथमं जनेषु॥

इत्यादिश्लोकद्वयेन संगृह्य प्रदर्शितं श्रीकृष्णावतारचरितं विस्तरेण शुश्रूषुः अतिक्रान्तस्कन्धार्थानुवादपूर्वकं पृच्छति राजा—कथित इत्यादिना श्लोकदशकेन। तत्र पूर्वस्कन्धार्थमनुवदति—**कथित इति सार्द्धेन**। सोमसूर्ययोस्तदुभयवंशजातानाञ्च राज्ञां वंशविस्तारस्तेषां परमाद्भुतं चरित्रञ्च कथितम्॥१॥ हे मुनिसत्तम। नितरां धर्म एव शीलं वृत्तं यस्य तस्य यदोर्वंशविस्तारः कथितः॥१३॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

श्रीमदानन्दतीर्थपादेभ्यो नमः॥ नवमस्कन्धान्ते संक्षिप्तं श्रीविष्णुचरितं विस्तरतः श्रोतुं राजा वृत्तमनूद्य वक्तुं प्रार्थयते—**कथितो वंशविस्तार इत्यादिना**। विद्यया जन्मना चैकलक्षणः सन्तानो वंशस्तत्र भवो वंश्यः, "व्यासः प्रपञ्चो विस्तारः" इत्यभिधानम्। राज्ञां चरितञ्च कथितम्। कथने निमित्तमाह—**परमेति**॥ १॥ अत्र विशेषमाह—**यदोरिति**। यदोर्ययातिपुत्रस्य वंशो नितरां कथितः। धर्मो भगवांस्तत्समाधियुक्तस्य "शील समाधौ" इति धातुः, अस्तु नाम ततः किमपेक्षितमिति॥ १३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषणी

ॐ नमः श्रीकृष्णाय

श्रीमन्मदनगोपालं वृन्दारण्यपुरन्दरम्। श्रीगोविन्दं प्रपद्येऽहं दीनानुग्रहकातरम्॥ १॥
वन्दे श्रीकृष्णचैतन्यं भगवन्तं कृपार्णवम्। प्रेमभक्तिवितानार्थं गौडेष्ववततार यः॥ २॥
श्रीमाधवपुरीं वन्दे यतीन्द्रं शिष्यसंयुतम्। लोकेष्वङ्कुरितो येन कृष्णभक्तिसुराङ्घ्रिपः॥ ३॥
श्रीभागवतसिद्धयर्था टीका दृष्टिरदायि यैः। श्रीधरस्वामिपादांस्तान् वन्दे भक्त्येकरक्षकान्॥ ४॥
भट्टाचार्यं सार्वभौमं विद्यावाचस्पतीन् गुरून्। वन्दे विद्याभूषणञ्च गौडदेशविभूषणम्॥ ५॥

वन्दे श्रीपरमानन्दं भट्टाचार्यं रसालयम् । रामभद्रं तथा वाणीविलासञ्चोपदेशकम् ॥ ६ ॥
नमामि श्रीमदद्वैताचार्यं श्रीवासपण्डितम् । नित्यानन्दावधूतञ्च श्रीगदाधरपण्डितम् ॥ ७ ॥
दामोदरस्वरूपादीन् वन्दे चैतन्यपार्षदान् । येषां पादरजःस्पर्शविभवोऽप्युत्तमो भवेत् ॥ ८ ॥
श्रीवासुदेवदत्तञ्च श्रीगोविन्दं मुकुन्दकम् । मुरारिगुप्तमन्यांश्च वन्दे चैतन्यसेवकान् ॥ ९ ॥
वृन्दावनप्रियान् वन्दे श्रीगोविन्दपदाश्रितान् । श्रीमत्काशीश्वरं लोकनाथं श्रीकृष्णदासकम् ॥ १० ॥
स्वामिपादैर्न यद्व्यक्तं यद्व्यक्तञ्चाऽस्फुटं क्वचित् । टिप्पणी दशमे तत्र सेयं वैष्णवतोषणी ॥ ११ ॥
वैष्णवाऽपरितोषः स्याद् यत्र यत्र ततस्ततः । लेख्यं वैष्णवसिद्धान्तदाक्षिण्येनैव किञ्चन ॥ १२ ॥
श्रीमद्भागवतव्यक्तभक्त्येकपुरुषार्थिनाम् । साभिवाद इत्येव नार्थिभि क्षम्यतामिदम् ॥ १३ ॥
पूर्वपूर्वात्र च व्याख्या पूर्वपक्षतया मता । सर्वान्तिमा तु विज्ञेया स्वसिद्धान्ततया मता ॥ १४ ॥
येषां प्रोत्साहनेनाऽस्मि प्रवृत्तोऽत्यन्तसाहसे । ते दीनाऽनुग्रहव्यग्राः शरणं मम वैष्णवाः ॥ १५ ॥
राधाप्रियप्रेमविशेषपुष्टो गोपालभट्टो रघुनाथदासः । स्यातामुभौ यत्र सुहृत्सहायौ को नाम सोऽर्थो न भवेत् सुसिद्धः ॥ १६ ॥
श्रीमच्चैतन्यरूपस्य प्रीत्यै गुणवतोऽखिलम् । भूयादिदं यदादेशबलेनैव विलिख्यते ॥ १७ ॥
स्वयं विलिखितं किञ्चित् किञ्चिद्योग्यैर्विलेखितम् । छिद्रं यदस्ति तच्चात्र शोध्यं वैष्णवपण्डितैः ॥ १८ ॥
श्रीचैतन्यकृपाव्यक्तश्रीकृष्णप्रेमलिप्सुभिः । सम्यग्रसयितुं भव्या सेयं वैष्णवतोषणी ॥ १९ ॥
श्रीमद्भागवतं यद्धि स्वादु स्वादु पदे पदे । तस्य प्रतिपदव्याख्या कार्या तत्प्रतिपत्तये ॥ २० ॥
आद्यः पाठोऽत्र गौडीयो द्वितीयोऽलेखि काशिकः । नानादेशीयमूलश्रीटीकानामनुवादतः ॥ २१ ॥
पुरा महापुराणस्य दश प्रोक्तानि यानि हि । लक्षणान्यखिले स्कन्धे तानि सन्ति तथेरिव ॥ २२ ॥
तत्र प्राधान्यतः स्कन्धे दशमेऽत्र निरूप्यते । आश्रयो भगवान् कृष्णः स्वपूर्णत्वप्रकाशकः ॥ २३ ॥
तत्र यद्यपि सामान्याकारेणाश्रयलक्षणम् । तथापि कृष्ण एव स्यात् तस्य पर्य्यवसायिता ॥ २४ ॥
ब्रह्मणो हि प्रतिष्ठाहमिति तद्गीः सतां मता । आत्मारामाश्च मुनय इत्यादिसचिवा च सा ॥ २५ ॥
परिभाषा च तत्र स्यादेते चांशेति सूतगीः । तदेतद्विवृतं भावि ब्रह्मस्तवमनु स्वयम् ॥ २६ ॥
अथात्र परिभाषेयं ज्ञातव्या यद्यपेक्ष्यते । मूलं सटीकमङ्काद्यैः परिच्छेद्यं सहानया ॥ २७ ॥
अङ्का वाक्यान्त एवात्र ज्ञेयाः पद्यान्ततो न तु । बहुपद्यैकवाक्यत्वे गर्भाङ्का विन्दुमस्तकाः ॥ २८ ॥
यस्मिन् वाक्ये नास्ति टीका तदप्यङ्केन योजयेत् । टीका तदङ्कशून्या वा तदङ्कान्तयुतापि वा ॥ २९ ॥
तद्युतत्वन्तु पूर्वाङ्कसन्निधौ पृथगाचरेत् । विधिरेवं गौडकाश्योर्गुर्ज्जराद्यौ यथामति ॥ ३० ॥
एकपद्यान्यवाक्यत्वे सङ्ख्याशब्दास्तु कान्तकाः । यथार्द्धकं युग्मकञ्च त्रिकमित्याद्युदाहृतिः ॥ ३१ ॥ इति ।

श्रीयुक्तो राजा श्रीराजेति श्रीशब्दप्रयोगोऽत्र श्रीकृष्णलीलारम्भे अतिशयेन प्रेम्णा विराजमानत्वात् टजभावः समासान्तविधेरनित्यत्वात् राजोवाचेति पाठस्तु साधारणः ॥०॥ सर्वथैकमूलं श्रीकृष्णचरितं विस्तरेण श्रोतुं वक्तुः श्रीबादरायणेः प्रहर्षणार्थं तदुक्तमभिनन्दति वा **कथित इति सार्द्धकेन** । कथितः प्रायस्तज्जन्मकथाप्रबन्धेनाभ्युक्तः न तूद्देशमात्रेणेत्यर्थः । तत्रापि वंशानां विस्तारः प्रत्येकं पुत्रपौत्रादिप्रपञ्चः भवतेति परमादरात् सोमस्य पूर्वनिपातस्तद्वंशे साक्षात् श्रीभगवदवतरणेनाऽभ्यर्हितत्वात्, उभयवंश्यानां चन्द्रसूर्य्यवंशोद्भवानां दिग्विजयादिचरितञ्च कथितम् । परमद्भुतं विस्मयावहम्, श्रीपुरूरवःककुत्स्थादीनाम् ऊर्व्वशीपरिग्रहेन्द्राऽऽरोहणादिनात्यन्तालौकिकत्वात् यद्यपि स्वायम्भुवमन्वादिवंशतद्वंश्यचरितान्यपि तृतीयस्कन्धादौ कथितानि सन्ति, तथापि सोमसूर्य्ययोरिति उभयवंश्यानामिति सर्व्वावतारश्रेष्ठयोः श्रीयदुनाथरघुनाथयोस्तत्र तत्र सम्बन्धात् ॥ १ ॥ यदोश्च वंशविस्तारस्तद्वंश्यानां चरितं परमाद्भुतं नितरां सम्यक्तया कथितम्, तत्र हेतुः—धर्मशीलस्येति । धर्म्मोऽत्र श्रीभगवद्भक्तिलक्षणः, "धर्म्मो मद्भक्तिकृत्प्रोक्तः" इति श्रीभगवदुक्तेः । श्रीयदोर्भक्तिनिष्ठत्वमेकादशस्कन्धप्रबन्धेन वक्ष्यते । अत एवोक्तं श्रीकुन्तीदेव्या "यदोः प्रियस्याऽन्ववाये" इति । पृथक्त्वेन तस्योक्तिस्तद्वंशे श्रीयदुदेवावतरणेन सर्वतः श्रैष्ठ्यात् । क्रमेणाभीष्टप्रश्नेच्छातश्च; मुनिषु सन् उत्तमः श्रीभगवद्भक्तः सत्तरः श्रीकृष्णे रतः सत्तमस्तत्पदाब्जयोः प्रेमविशेषवानित्येवं सम्बोधनेन कथिते कथ्ये च समर्थतोक्ता ॥ १½ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ॐ नमः श्रीकृष्णाय ॥ दशमे क्रमसन्दर्भे सन्दर्भाणां समाहृतिः । क्रियते यन्निदेशेन स मेऽनन्यगतेर्गतिः ॥

नवमे द्वादशस्कन्धसम्बन्धिदशलक्षणानुसारेण वंशवंश्यानुचरितद्वारा द्वितीयस्कन्धसम्बन्धितदनुसारेण तत्तद्रूपमन्वन्तरकथा भेदद्वारा दशमपदार्थमधिगत्य तस्य च तदन्ते निजाऽभीष्टश्रीकृष्णरूपत्वपर्यालोचनेन सुखविशेषमुपलभ्य तथाऽनुवदंस्तल्लक्षणविशिष्टेऽत्र कथाद्वारा साक्षात्तमेवाधिगन्तुमौत्कण्ठ्येन पृच्छति कथित इत्यादिभिः ॥ १½ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नित्यानन्दः कृष्णचैतन्यचन्द्रोऽद्भुतः पृथ्व्यामेघयन् प्रेमसिन्धुम् । सन्तप्तं वै स्तेमयंश्चेतयन्मां धिन्वन् भूयात् स्वैःकृपारश्मिलेशैः ॥ १ ॥

श्रीमद्गदाधर ! नमो नृहरे ! नमस्ते श्रीरामराय ! नम एव नमः स्वरूप ! ।
श्रीरूप ! सानुग ! नमोऽस्तु नमोऽस्तु तुभ्यं श्रीमत्सनातन ! नमोऽस्तु नमो नमोऽस्तु ॥ २ ॥
श्रीमद्भागवतीयदिव्यदशमस्कन्धाऽमृताम्भोनिधौ खेलन् यः स्वकरोद्धृतै रसकणैरार्द्रीस्तटस्थानपि ।
चक्रे यस्य महत्त्वमीलितमहः श्रीरूपविख्यापितैः सर्वैर्दृश्यत एव नाटकवरे साश्चर्यमेतद्यथा ॥ ३ ॥
वक्तुं पारमहंस्यपद्धतिमिह व्यक्तिं गतानां हि यः सिद्धानां भुवने बभूव सनकादीनां तृतीयः पुरा ।
साङ्गं भक्तिरसं रहस्यमधुना भक्तेषु सञ्चारयन् एकः सोऽवततार विश्वगुरवे शुद्धाय तस्मै नमः ॥ ४ ॥
व्याख्या वैष्णवतोषणी प्रकटिता येनैव यस्या रसः प्राप्यप्याऽतिचमत्कृतीः सुहृदयानाह्लादयन् भ्राजते ।
तस्माद्द्वित्रिकणास्तदीयमुखतो ये निःसृताः स्वादितास्तानाचित्य कृतार्थयानि जनुरित्याशा वरीवर्त्ति मे ॥ ५ ॥
गोपालभट्टरघुनाथपदाब्जरेणून् श्रीलोकनाथचरणानथ जीवपादान् ।
वन्दे यदीयकरुणासुरदीर्घिकायां स्नातो धृताऽधृततिरोहितुमाप्तुमीशे ॥ ६ ॥
तमश्छन्नदृशां यैर्नः कृते भावार्थदीपिका । कृता कृपालवस्तेऽत्र श्रीधरस्वामिनो गतिः ॥ ७ ॥
व्याख्या लेख्या तदीया या भक्तचित्तप्रमोदनी । काचित् प्रभूणां काचित्तु श्रीमद्गुरुकृपोदिता ॥ ८ ॥
प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् । लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥ ९ ॥
गोपरामाजनप्राणप्रेयसेऽतिप्रभूष्णवे । तदीयप्रियदास्याय मां मदीयमहं ददे ॥ १० ॥
दशमेऽनुक्रमप्राप्तं निरोधं परिहाय यत् । आश्रयं वक्ति मुनिराट् तेनेदं प्रतिपद्यते ॥ ११ ॥
प्रथमः पीठतां स्कन्धद्वयं चरणयुग्मताम् । चतुर्थादिकटीनाभिवक्षोदोर्युगकण्ठताम् ॥ १२ ॥
द्वादशैकादशं शीर्षमालादित्वमगात् क्रमात् । श्रीभागवतकृष्णस्य दशमो मञ्जुहास्यताम् ॥ १३ ॥
ध्येयसर्वाङ्गमुख्यं यद्धास्यं नान्तेऽस्य संस्थितिः । यथा तथाश्रयः स्कन्धो नैवान्ते स्थातुमर्हति ॥ १४ ॥
अतः श्रीदशमे ब्रह्मपरमात्मादिनामभाक् । आश्रयो वर्ण्यते कृष्णो नवलक्षणलक्षितः ॥ १५ ॥
ईशानुवर्त्तिनामम्बरीषादीनां कथोदिता । नवमे दशमे साक्षादीशस्यैव कथोच्यते ॥ १६ ॥
स चेश्वरो गोप एव कृष्णः पूर्णतमो व्रजे । पुरद्वये पूर्णतरः पूर्णः क्षत्रिय उच्यते ॥ १७ ॥
एवं स्थलस्य त्रैविध्याल्लीलाऽस्य त्रिविधोदिता । बाल्यादितत्तदालम्बिभक्तभेदात् सहस्रधा ॥ १८ ॥
आद्यैः पञ्चभिरध्यायैर्जन्मप्रासङ्गिकी कथा । जन्म चाऽस्य ततो बाल्यलीला नवभिरीरिता ॥ १९ ॥
षड्भिः पौगण्डलीलान्तःकैशोररसचर्चिता । ततः कैशोरलीलोनविंशत्या व्रजमण्डले ॥ २० ॥
एकेन स्तुतिरक्रूरकृतैकादशभिस्ततः । लीला स्यान्माथुरी शेषैर्द्वारकायां निरूपिता ॥ २१ ॥
तदेवं दशमेऽध्यायैर्नवत्या वर्णिता हरेः । लीला नित्यकिशोरस्य निखिलाकर्षिणी क्षितौ ॥ २२ ॥
तत्र तु प्रथमे श्रोतृवक्त्रोर्वागितिमाधुरी । देवाज्ञाकाशवाक् कंसाद्वक्याः षट्सुताऽत्ययः ॥ २३ ॥

वाचयितव्येष्वर्थेषु वक्तुरुत्साहं वर्द्धयितुं तदुक्तमभिनन्दति; **कथित इति** । ब्रह्मप्रपौत्रात् सूर्यात् ब्रह्मपौत्रत्वेन ब्रह्मांशत्वेन मनोऽधिष्ठातृत्वेन स्वयं भगवदङ्गीकृतवंश्यताकत्वेन च सोमस्याऽभ्यर्हितत्वात् पूर्वनिपातः । स्वायम्भुवमनोस्तद्वंश्यानां च परमाद्भुतचरित्राणां चतुर्थादिषु कथितत्वेऽपि, तस्य वंशो न पर्यवसानमधुरः । सोमसूर्ययोर्वंशस्तु श्रीकृष्णरामचरित्राऽन्तिमत्वात् पर्यवसानमधुर इति तयोरुत्कर्षेणोल्लेखः ॥ १ ॥ यदोश्चरितं कथितम् । तस्य पित्राज्ञालङ्घित्वेऽपि शुद्धभक्तिमत्त्वात् नितरां धर्मशीलत्वं नवमे व्याख्यातम्, एकादशे व्याख्यास्यते च मुनिसत्तमेति । मुनित्वात् सर्वज्ञत्वं, भक्तमुख्यत्वात् भक्त्युत्कर्षस्थापकत्वमित्युभयं त्वय्येव दृष्टमिति भावः ॥ १½ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

श्रीमते मङ्गलमूर्त्तये निम्बार्काय नमः

श्रीनिम्बार्कं नमस्कृत्य दशमे दशमप्रदे । नवत्यध्यायसंयुक्ते प्रदीपोऽयं विरच्यते ॥

आश्रयकथाऽमृतपाने प्रोत्यतिशयेन क्रमप्राप्तान्निरोधात्प्रागृराजर्षिराश्रयस्वरूपगुणादिवर्णने ब्रह्मर्षिं प्रवर्तयितुमिदमाह— **कथित इति** । सोमसूर्ययोरिति श्रीकृष्णाऽख्याश्रयप्रादुर्भाववंशप्रवर्तकतया सूर्यपितृव्यत्वेन चाऽभ्यर्हिततया सोमस्य पूर्वनिपातः । राज्ञामुभयवंश्यानां सोमसूर्यवंशभवानां दिगादित्वाद्यत् अम्बरीषादीनां सूर्यवंश्यानां ययातिप्रभृतीनां सोमवंश्यानां परमं मुक्त्युपायतया श्रेष्ठमद्भुतमाश्चर्यभूतं चरितं च कथितमिति लिङ्गविपरिणामेनाऽन्वयः । उभयवंश्यानां भागवतानां चरितं मुमुक्षुभिः शिक्षणी-

यमतः पृथगुक्तिर्युक्तैव। उभयत्र भगवच्चरितं चोक्तमपि मुनिना तदनुवादाऽकरणे राज्ञोऽयमाशयः, अहो भवता यस्य श्रवणेन पुनरहंममाभिमानः स्यात् स वंशविस्तारः कथितः यस्य श्रवणेन परमानन्दप्राप्तिः स्यात्तद्धरिचेष्टितं मम वितृष्णाऽनुरूपं नोक्तमिति ॥ १ ॥ यदोश्च वंशविस्तारः कथित इत्यन्वयः। कथम्भूतस्य ? नितरां धर्म्मशीलस्य; अयमर्थः, पूरुः पित्राज्ञानुवर्तित्वाद्धर्मशीलः न च पुत्रतारुण्येन तन्मातृसंयोगस्यात्यन्तमयुक्तत्वात् स अधार्मिक इति वाच्यम्। ऋषिवाक्यप्रचोदितेन अतिसङ्कलब्धदोषदर्शनपूर्वकपुत्रकलत्रादित्यागकामेन ययातिना स्ववार्द्धक्येन विशेषतः विक्रीते पुत्रतारुण्ये पुत्रसंसर्गाभावात्। अन्यथा राजर्षेस्तादृशवरग्रहणे मुनेश्च तद्दाने प्रवृत्त्यसम्भवाच्च यदोश्च भगवद्भजनौपयिकस्वतारुण्याविक्रयित्वराज्यसुखानपेक्षत्वादिना नितरां धर्मशीलत्वसिद्धिः। न च वाच्यं पित्राज्ञालङ्घनादधर्मशीलत्वं तस्येति "मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः" इत्यादिषु पित्राज्ञाऽवलङ्घनस्य तु का कथा भागवतानां सर्वोपेक्षत्वं भूषणत्वेन निरूप्यते। हे मुनिसत्तम ! कर्मतपोव्रतादिमननशीलाः मुनयः ज्ञानभक्त्यादिपराः मुनिसत्तराः तेष्वपि सर्वपरित्यागपूर्वकभगवद्विषयकज्ञानध्यानादिपरतया हे सर्वमुनिश्रेष्ठ ॥ १½ ॥

श्रीसुबोधिनीकारिकाः (जन्मप्रकरणम्)

नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम्। लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधिम् ॥ १ ॥
चतुर्भिश्च चतुर्भिश्च चतुर्भिश्च त्रिभिस्तथा। षड्भिर्विराजते योसौ पञ्चधा हृदये मम ॥ २ ॥
दशमार्थः प्रकरणाध्यायार्थश्च विचार्यते। नवलक्षणलक्ष्यो हि कृष्णस्तस्य निरूपणात् ॥ ३ ॥
आश्रयः क्रमभावित्वान्निरोधो वेति संशयः। लीलानिर्धारको ह्यर्थः क्रममात्रं तु दुर्बलम् ॥ ४ ॥
यथाकथञ्चिच्छ्रवणं सफलत्वाय कल्पते। निरोधः प्रलयो लोके प्रसिद्धः प्रकृते न सः ॥ ५ ॥
प्रतीतो द्वादशेन्यत्र महत्त्वाच्छुद्धलीलया। सहितो ह्याश्रयः स्कन्धे प्रतिपाद्य इहेति चेत् ॥ ६ ॥
न हि सापेक्षरूपस्य प्रथमं सुनिरूपणम्। नवलक्षणसापेक्षो ह्याश्रयो रूप्यते कथम् ? ॥ ७ ॥
अग्रे लीलाद्वयकथा फलसिद्धौ वृथा भवेत्। पूर्वोत्तरस्कन्धयोश्च नश्येत्कारणकार्यता ॥ ८ ॥
कृष्णस्त्वेकादशेप्यस्ति क्रमश्च स्वीकृतो भवेत्। निरोधोस्यानुशयनं प्रपञ्चे क्रीडनं हरेः ॥ ९ ॥
शक्तिभिर्दुर्विभाव्याभिः कृष्णस्येति हि लक्षणम्। नैमित्तिको निरोधोन्यो धर्मग्लानिनिमित्ततः ॥ १० ॥
स चात्र नैव सद्ग्राह्यो हरिणा दुष्टभूभुजाम्। आद्यन्तयोरिहाभावान्मुक्तावप्यनुवृत्तितः ॥ ११ ॥
लक्षणस्याप्रवेशश्च लीलाधिक्यं तथा भवेत्। तदर्थं जन्मकथनं पृथास्तोत्रविरोधि हि ॥ १२ ॥
कार्यकारणहानिश्च प्रक्रान्तत्याग एव च। भक्तत्वादस्युत्र उद्धारो भारहारान्निरूपितः ॥ १३ ॥
प्रकटः परमानन्दो यदा भूमेस्तदैव हि। मर्दनक्लेशहानिः स्यादिति तस्याः समुद्यमः ॥ १४ ॥
ब्रह्मरुद्रादिदेवानामत एवान्यसंश्रयः। भक्तानामेव निस्तारः कृतः कृष्णेन संसृतेः ॥ १५ ॥
अतो निरोधो भक्तानां प्रपञ्चस्येति निश्चयः। यावद्बहिः स्थितो वह्निः प्रकटो वा विशेष हि ॥ १६ ॥
तावदन्तःस्थितोप्येष नः दारुदहनक्षमः। एवं सर्वगतो विष्णुः प्रकटश्चेन्न तद्विशेत् ॥ १७ ॥
तावन्न लीयते सर्वमिति कृष्णसमुद्यमः। रूपान्तरं तु नटवत्स्वीकृत्य त्रिविधान्निजान् ॥ १८ ॥
प्रपञ्चाभावकरणादुज्जाहारेति निश्चयः। पञ्च प्रकरणान्यत्र चतुर्भिर्जन्म सत्पतेः ॥ १९ ॥
अष्टाविंशतिभिः पूर्वं तामसत्वाद्व्रजोद्धृतिः। तथैव राजसानां च यादवानां विशेषतः ॥ २० ॥
सात्त्विकानेकविंशत्या निःप्रपञ्चांश्चकार ह। भगवानेव नान्योत्र तदर्थं षड्भगाभिधाः ॥ २१ ॥
चतुर्मूर्तेर्जन्मतोत्र तथाध्याया निरूपिताः। तत्तत्प्रकरणे तेषामुपयोगस्तु वक्ष्यते ॥ २२ ॥
हेतूद्यमस्वीकरणकापट्यैः प्रथमो महान्। प्रद्युम्नश्चानिरुद्धश्च वासुदेवस्तथापरः ॥ २३ ॥
हेतुश्च त्रिविधो ह्यत्र गुणा भक्ताहितप्रदाः। कंसादेः कालतोऽज्ञानात्त्रिधा दुःखं तु तद्गतम् ॥ २४ ॥
भूमिर्माता तथा चान्ये दुःखभाजो हरिप्रियाः। यथायोग्यं दुःखमेषामत्रैवेति निरूप्यते ॥ २५ ॥
त्रयं भगवता शक्यं दूरीकर्तुमितीर्यते। प्रश्नोप्यत्राधिकः प्रोक्तः स्कन्धद्वितयवर्तनः ॥ २६ ॥
अनुवादः स्तुतिः प्रश्ने भक्तस्वज्ञापकावुभौ। अन्यथा ह्यतिगुप्तार्थं श्रीशुको वर्णयेत्कथम् ॥ २७ ॥
अज्ञानमन्यथाज्ञानं कृष्णगं विनिवार्यते। प्राणनत्वं कथायाश्च दयासिद्ध्यै शुकस्य हि ॥ २८ ॥
एवं प्रश्नो द्वादशभिः समतो गुणदोषगः ॥ २८½ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

श्रीगोपीजनवल्लभाय नमः

नमः श्रीकृष्णपादाब्जतलकुङ्कुमपङ्कयोः । रुचे यदरुणं शश्वन्मामकं हृदयाम्बुजम् ॥ १ ॥
पितृपदसरसिजनतितितिविनिहतविश्वाशुभैर्निरोधस्य । विवृतौ संशयवंशच्छेदः श्रीविट्ठलैः क्रियते ॥ २ ॥

दशमस्कन्धविवरणं चिकीर्षवोऽत्र स्कन्धार्थरूपोऽपि भगवानेवेति ज्ञापनाय तद्रूपं तं नमस्यन्ति—**नमामीति**। "निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः' इति वाक्यात्। तद्रूपं तं विवृण्वन्तो यथा नारायणो दास्योपयोगिशय्यादिसर्वार्थरूपत्वेन प्रभोः शेषभावं प्राप्तत्वेन तत्त्वेनैव प्रसिद्धे वेदात्मकत्वेन प्रमाणरूपे शेषे लक्ष्म्या सेव्यमानः क्षीराब्धौ शेते, तथा सर्वात्मभावेन दासत्वं प्राप्तत्वेन शेषरूपेऽस्मद्हृदये पुष्टिरसप्रेप्सुपेयोऽत्यन्तागाधो यो लीलाक्षीराब्धिस्तत्र शयानत्वेनान्यत्र गतिरहितो यस्तं नमामीत्यर्थः। लक्ष्मीसहस्रैस्तल्लीलाभिश्च सेव्यमानं चतुःषष्टिकलानिधि तद्रसपोषणेऽतिचतुरम्। अथवा स्वांशकलानिधानत्वेन पूर्णं पुरुषोत्तममित्यर्थः। एतेन नारायणाद्वैलक्षण्यमुक्तं भवति। तत्रैका लक्ष्मीरत्रापरिमितास्ताः। तत्र क्षीराब्ध्यधिकरणके शेषे शेते, अत्र तु हृदयात्मकशेषाधिकरणकलीलाक्षीराब्धौ शेते। अत्रेदमाकूतम्—सर्वात्मभाववति हृदये सततभावनया प्रकटो यो रसात्मकः पुष्टिमार्गीयो लीलाब्धिः स्वयमेव कृतो यथा वृन्दारण्यप्रवेशवेणुकूजनादिः, तत्र पुष्टिमार्गीयैर्भक्तैः स्वस्वरूपेण स्वलीलाभिः कटाक्षादिरूपाभिश्च सेव्यमानस्तादृशम्। तेन नायिकानामपि प्रभुलीलामध्यपातित्वात् पृथक्तदुक्तिरनुपपन्नेति शङ्का निरस्ता। यथा पुरि शयनं पुरुषस्योच्यते, तथात्र तत्तल्लीलानुरूपा स्थितिः शयनपदेनोच्यते, न तु निद्रा। तथा सति विविधनायिकालीलानामनुपयोगात्सेवनोक्तिर्विरुध्येत। नारायणे कमलवत् स्थायिभावात्मके स्वस्मिन् विचित्रान् भावानुत्पाद्य ब्रह्मवत्तादृशं कञ्चन प्रचुरं भावमुत्पादितवान् येन [1]तल्लीलाविवरणात्मकमखिलरसात्मकं जगदाविरभूदिति। तेन मूले शयनपदोक्त्या नारायणे तत्प्रसिद्धमिति तद्धर्मसाम्यमाचार्यैर्निरूपितम्। मूलेऽनुशयनशब्दस्य भावार्थकत्वपक्षे त्वनुशय्यतेऽनेनेत्यनुशयनमिति करणव्युत्पत्त्या ताभिः महात्मनो निगूढभावकरणं येन स निरोधः। स्वकीयेषु स्वविषयकभावोत्पादनं यया लीलया क्रियते सा निरोधशब्दवाच्येत्यर्थः ॥१॥ अथ प्रकरणार्थरूपं नमस्यन्ति—**चतुर्भिरिति**। दशमस्कन्धे पञ्चप्रकरणानि सन्तीति पञ्चधा प्रकरणार्थरूपो मम हृदये यो विराजते तं नमामीति सम्बन्धः। पञ्चरूपत्वं प्रकटयन्ति। आद्यं चतुर्भिरध्यायैः। द्वितीयं प्रमाणप्रमेयसाधनफलात्मकैश्चतुर्भिः प्रकरणैः तथैव तृतीयम्। चतुर्थं त्रिभिः प्रकरणैः। पञ्चमं षड्भिरध्यायैः। एवं पञ्चधा यो विराजत इति सम्बन्धः ॥ २ ॥ **पूर्वोत्तरेति**। अशरीरस्य विष्णोः पुरुषशरीरस्वीकारः सर्गः। पुरुषात् ब्रह्मादीनामुत्पत्तिर्विसर्गः। उत्पन्नानां तत्तन्मर्यादया स्थापनं स्थानम्। स्थितानामभिवृद्धिः पोषणमितिप्रकारकः कार्यकारणभावः। प्रकृते च पूर्वस्कन्धे भक्तानां निरूपणात् तेषां चित्तवृत्तिनिरोधे कथ्यमाने स तिष्ठति। अन्यथा मुक्तानामाश्रयत्वेनाश्रयनिरूपणान्मुक्तिमनिरूप्य तन्निरूपणमशक्यमिति तदसंगतं स्यात्। निरोधः प्रलयत्वेन तेऽभिमत इति मुक्त्यनन्तरं तन्निरूपणे मुक्तानां प्रलय इति संगतिर्भवेत्। सा चायुक्ता। अनेवंकथने कार्यकारणभावक्षतिरित्यर्थः ॥ ८ ॥ **आद्यन्तयोरिति** प्रकरणयोरिति शेषः। तत्र दुष्टमारणाभावाल्लक्षणस्याप्रवेश इत्यव्यापकं लक्षणमिति भावः। **मुक्तावपीति**। स्कन्धान्तरे तन्निरूपणादतिव्यापकं तदिति भावः। एवं सति तस्या लीलाया दशविधलीलामध्यपातित्वाभावेन भागवतेऽप्रवेशः ॥११॥ अथ ग्रहिलतया प्रवेशो वाच्यस्तदा दशविधलीलाभ्यो भिन्नत्वेन भागवतमध्यपातित्वेन चैकादशी सा भवेदित्याहुः **लीलाबीजमिति** ॥ १२ ॥ नवलक्षणज्ञानं ह्याश्रयज्ञाने कारणम्, तथा सति तयोस्तथात्वहानिश्चेत्याहुः—**कार्येत्यादि**। 'दशमस्य विशुद्ध्यर्थं नवानामिह लक्षण'मित्युपक्रान्तत्वात्तेभ्यः पूर्वमाश्रयोक्तौ तत्त्यागश्च भवेदित्याहुः—**प्रक्रान्तेति** ॥ १३ ॥ **ब्रह्मेति**। तेषां भक्तत्वेऽप्यधिकारित्वात् केवलभक्ताया भूमेराधिक्यं तदपेक्षयेति भावः। **अन्यसंश्रय इति**। भक्तेष्वेवाविश्य सेवितवन्तो, न स्वातन्त्र्येणेत्यर्थः। यद्वा, प्रभोराविर्भावस्य स्वस्यापीष्टत्वेऽपि न स्वयं विज्ञापयितुं शक्तास्तादृगार्त्यभावात्, किन्तु तादृशीं भुवमग्रे कृत्वेत्यर्थः ॥ १५ ॥ **प्रद्युम्न इति**। अत्र निबन्धानुरोधादयं क्रमो न विवक्षित इति ज्ञेयम् ॥ २३ ॥ हेतोर्द्वैविध्ये तात्पर्यमाहुः—**गुणा इति**। सत्त्वादय इत्यर्थः। **तद्गतम्**। भक्तगतमित्यर्थः ॥ २४ ॥ द्वादशभिः प्रश्ने हेतुमाहुः—**गुणदोषम इति**। षड्गुणा, लोके दोषत्वेन प्रसिद्धा धर्माश्च षड्देशान्तरगता गर्भमातुलमारणादयः उभयविषयकत्वात्तस्य तथात्वमित्यर्थः। गुणवाक्यसाम्यं दोषवाक्यानामयुक्तमित्याशङ्क्याहुः—**समत इति**। यथा गुणा उत्तमास्तथा लोके दोषा अप्युत्कटा इत्युभयोः साम्येन राज्ञा प्रश्नः कृत इति तथेत्यर्थः। **समत** इति भावप्रधानः ॥ २८½ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः।

श्रीनिःसाधनजनोद्धारकाय नमः

नमामि श्रीमदाचार्यचरणाब्जरजांस्यहम् । लाभाभिलाषमात्रेण येषां कृष्णः प्रियो भवेत् ॥ १ ॥
अग्नेस्तत्सूनुं ननु जन्तुहेतोराविष्कृतस्वं सततं प्रणम्य । दृष्ट्वा तदाज्ञां च विचारयेऽहं सुबोधिनीस्थानगमान्पदार्थान् ॥ २ ॥

तत्र पूर्वं टिप्पण्याम्। तत्र प्रथमश्लोके **नम इत्यादि**। श्रीश्च कृष्णश्च श्रीकृष्णौ तयोः पादाब्जतलकुङ्कुमसंबन्धिनौ यौ पङ्कौ तयो **रुचे नमः**। अत्रोभयोः परस्परसंबन्धेन सात्त्विकभावात् कुङ्कुमस्यार्द्रतां गतत्वेन पङ्कभावः। वैलक्षण्यबोधनार्थं

---

१. विचारणात्मकमिति क।

द्विवचनम्। हृदयारुण्यजनकतायां विशेषाभावाद् रुच इत्येकवचनञ्च बोध्यम्॥ १॥ **पितृपदेत्यग्रिमश्लोके** कान्तिश्छन्दः। यस्याभार्यायामक्षरेषु षोडश गुरूणि पञ्चविंशतिर्लघूनि एवमेकचत्वारिंशदक्षरा कान्तिरिति पिङ्गलप्रदीपे तल्लक्षणात्। **विनिहतविश्वाशुभैरिति**। विशेषेण निहतं विश्वेषां स्वीयानामशुभं यैरित्यर्थः। नमामीत्यस्याभासे स्कन्धार्थरूपोऽपि भगवानेवेति। अपिशब्दात्तत्कर्तृत्वमपि संगृह्यते। **तद्रूपं तमिति**। स्कन्धार्थकर्तृत्वे सति स्कन्धार्थरूपम्। अत्रेदं विचार्यते—मूलस्थनिरोधलक्षणगतमनुशयनपदं भावव्युत्पत्त्या द्वितीयस्कन्धसुबोधिन्यां श्रीमदाचार्यचरणैर्व्याख्यातम्। अस्य भगवतोऽनु पश्चाच्छयनं शक्तीः शाययित्वा तद्भोगार्थं स्वस्य शयनमिति। इदमेव च "निरोधोऽस्यानुशयनं प्रपञ्चे क्रीडनं हरेः। शक्तिभिर्दुर्विभाव्याभिः कृष्णस्येति हि लक्षणम्" इति कारिकया स्फुटीकरिष्यते। "यथा पुरि शयनम्" इत्यादिना विवरिष्यते[1]। चास्मिन् पद्यविवरणे। एवं सति विलक्षणस्थितिक्रियाया एव स्कन्धार्थत्वं वक्तुमुचितम्, न तु तस्य भगवत्त्वम्। अथ श्रीभागवतस्य लीलाविशिष्टभगवद्वाचकत्वाददोष इति चेद्विभाव्यते, बाढं तदापि महावाक्यस्यैव वाचकत्वमायाति न त्ववान्तरवाक्यानाम्। यदि च क्रियायां प्रविष्टो यज्ञ इव लीलायां प्रविष्टोऽनुशयनात्मार्थत्वेनाभ्युपेयते, तदापि शायितमिति प्रयोगः कथं संगच्छत इति चेत्, उच्यते—अत्र हि शयनं लीलाधिकरणकमुच्यते। तेन लीलायां प्रविष्टो भगवान् स्कन्धार्थत्वेन प्रत्याय्यत इति प्रयोगः सूपपन्नः। न च मूलविरोध इति वाच्यम्, स्कन्धार्थस्य नान्तरीयकारणरूपत्वेन लक्ष्यसहभावेनैव स्फुरणात्। न चेदमप्रयोजकम्, लोकेऽपि यत्र चेष्टादिभिर्नान्तरीयकैर्लक्ष्यबुद्धिस्तत्र लक्षणानां लक्ष्यव्याप्तानामेव निश्चायकत्वदर्शनात्। अत एव तादृशं लक्षणमाहात्म्यं ज्ञापयितुं भगवतः स्वभावं 'लीलायां तिष्ठन् लीलामन्तरो यमयति' इति रूपं ज्ञापयितुमेवमाचार्यैर्निरूपितमिति न कोऽपि चोद्यावसरः। अयमेवार्थोऽस्येति पुरोवर्त्तीत्यनेन द्वितीयसुबोधिन्यामुक्तः। स एव चार्थः प्रभुचरणैः 'यथा पुरि शयनम्' इत्यादिना ध्वनितः। पुरुषसूक्ते तादृशस्थितेः पुरुषे सिद्धत्वादिति दिक्। अतः सुष्ठूक्तं स्कन्धार्थरूपोऽपि **भगवानिति**। अत एव स्कन्धान्तरारम्भे नमनानुक्तिरत एव च मूलेऽत्र प्रथमतो जन्मप्रकरणमुक्तमन्यथा यत्र क्वचनैव वदेत्। नवमस्कन्ध एव भगवत्प्राकट्यस्य राजानं प्रत्युक्तत्वेन प्रयोजनाभावात्। राजप्रश्नानुसारेणापि प्रथमतो वीर्याणामेव वक्तव्यत्वादिति। नमामीत्यस्य विवरणे। **तद्रूपं तं विवृण्वन्त इति**। अनुशयनरूपं भगवन्तं व्यक्तीकरिष्यन्तः। नमन्तीति शेषः।

तदेतत् व्यक्तीकुर्वन्ति—**यथेत्यादि**। तत्त्वेनेति शेषत्वेन। एवं व्याख्यायैतत्प्रयोजनमाहुः—**एतेनेत्यादि**। एतेनेति। व्यतिरेकालङ्कारगर्भेणानेन वाक्येन। तदेव व्युत्पादयन्ति—**तत्रैकेत्यादि**। व्यतिरेकं स्फुटीकृत्य विशेषणानां तात्पर्यं वदन्तः प्रथमं द्वितीयस्याहुः—**अत्रेत्यादि**। तेनेति पुनर्लीलापदकथनेन तथा च प्रथमविशेषणस्थलीलापदेन नायिकाप्राप्तावपि विवक्षितरूपतया प्राप्तिर्न स्यादतस्तथेत्यर्थः। **प्रथमस्य तदाहुः—यथा पुरीत्यादि**। तथा सतीति निद्रार्थकत्वे सति। तथा च द्वितीयविशेषणस्य शङ्कानिरासः शयनशब्दार्थनिश्चयश्चेति प्रयोजनद्वयमित्यर्थः। एवञ्चात्र जाग्रच्छयनमेव विशेषतो निरूप्यत इति ज्ञापितम्। तत्तल्लीलानुरूपपदेनेतरे स्वप्नसुषुप्तिरूपे अपि सूचिते ज्ञेये। अतो न द्वितीयस्कन्धसुबोधिनीविरोधः। ननु स्कन्धार्थरूपत्वेन भगवति निरूपणीये व्यतिरेकमुखेन निरूपणस्य को वाऽऽशय इत्याकाङ्क्षायामाहुः—**नारायण** इत्यादि। **स्थायिभावात्मके स्वस्मिन्निति**। यद्यज्जनकं तत्तद्गुणकम्, यद्यद्गुणकं तत्तदविनाभूतम्, यद्यदविनाभूतं तत्तदात्मकमिति व्याप्तेः समन्वयाधिकरणे सूचितत्वात्तादृशभावोत्पादकत्वेन रत्यात्मकस्थायिभावात्मके पुरुषोत्तमे। तथा च लीलाविवरणात्मककार्येण तादृशभगवत्स्थितिः श्रीमदाचार्यहृदयेऽनुमेयेति स्वीयानां बोधनार्थं तथा भावनीयमिति स्वीयशिक्षणार्थं च व्यतिरेकमुखेन कथनं चमत्काराधानार्थमित्यर्थः। नन्वेवं सति कृष्णावतारस्य सर्वावतारश्रेष्ठत्वेन तापनीये श्रावणात् कृष्णावतारसाम्यमेव स्कन्धार्थात्मके रूपे निरूपणीयं किं नारायणसाम्यनिरूपणेनेत्यत आहुः—**तेनेत्यादि**। तथा च मूलानुरोधेन तथा निरूपणमित्यर्थः। ननु यद्यपि मूले लक्षणवाक्ये भावव्युत्पत्त्यानुशयनपदेन स्थितिक्रियाविशेषो वक्तुं शक्यस्तथापि स्कन्धे तु नानाविधा लीला एव स्फुटं प्रतीयन्ते इति सा व्युत्पत्तिः कथं संगच्छत इत्यत आहुः—**मूलेऽनुशयनेत्यादि**। तुरप्यर्थे। स निरोध इति। ग्राह्य इति शेषः। 'मूलेऽनुशयनशब्दस्य भावार्थकत्वपक्षेऽपि' इत्यस्य 'स निरोध' इत्यनेनान्वयः। 'अनुशाय्यत' इत्यादिनोक्तकरणव्युत्पत्त्या **ताभिः शक्तिभिः सह निगूढभावकरणं येन** क्रियाविशेषेण स निरोधः। तथा चात्र लिङ्गोपहितलैङ्गिकभानवत् करणोपहितैव क्रियोच्यते, क्रियोपहितं वा करणमिति व्युत्पत्तिद्वयेऽप्यदोषः। तदेतन्निगमयन्ति—**स्वकीयेष्वित्यादि**। सेति करणरूपा फलरूपा च। अतो न कोऽपि दोषः। इदमेव करणोपधानं द्वितीयसुबोधिन्यां "शक्तीः शाययित्वा तद्भोगार्थं स्वस्य शयनम्" इति भोजनक्रियायाः संग्रहेण अत्रत्यटिप्पण्यां **तत्तल्लीलानुरूपा स्थितिरिति** विशेषणेन च सूच्यत इति न कोऽपि दोषलेशः॥ १॥ **सुबोधिन्यां**—स्वोक्तो दशमार्थः सर्ववादिसम्मतो नेति वादिनिरासाय विचारं प्रतिजानते—**दशमार्थ** इत्यादि। इदं निबन्धे स्पष्टम्। ननु कथमत्र संशय इत्यत आहुः—**नवेत्यादि**। यः कृष्णो नवलक्षणलक्ष्य उक्तः 'आभासश्च निरोधश्चे'त्यादिना तस्यात्र निरूपणात्॥ २॥ **क्रमभावित्वादिति**। 'अत्र सर्गो विसर्गश्चे'त्यत्रोक्तः क्रमः। यद्यपि स्वबुद्ध्या निर्णीतापेक्षया महापुरुषोक्तक्रमस्य प्रबलत्वान्निरोध एव दशमार्थत्वेनायाति तथापि प्रलयात्मकस्य तस्य परिदृश्यमानत्वाभावात्सन्देह इति भावः। पूर्वपक्षी अत्र चोदयति—**लीलेत्यादि**॥ ४॥ अत्र दौर्बल्यं साधयति—**यथेत्यादि**। अथवा महापुरुषोक्तत्वात्क्रम एवादरणीय इत्यत आहुः—**यथेत्यादि**। अर्थानिर्धारे किं विश्वासमात्रेण फलं भवत्यपि तु नेति काकुः परिहासार्थः। दूषणान्तरमाहुः—

---

[1] विचारयिष्यते इति **ग**।

निरोध इत्यादि ॥ ५ ॥ फलितमाहुः—**महत्वादित्यादिना** ॥६॥ समादधते—**न हीत्यादि** ॥७॥ ननु अयं न नियमः इत्यत आहुः—**अप** इत्यादि । तस्याः फलार्थं श्रवणमस्त्विति चेत्तत्राहुः—**पूर्वेत्यादि** ॥ ८ ॥ ननु स्वोक्तकार्यकारणभावो नादर्तव्य इति ग्रहिलवादेऽतिप्रसङ्गं दूषणान्तरमाहुः—**कृष्ण** इत्यादि । स्वोक्तसमर्थनायाहुः—**क्रम** इत्यादि । ननु भवत्वेवं तथापि लक्षणसमन्वयः कथं कार्य इत्याकाङ्क्षायां लक्षणं विवृण्वन्ति—**निरोध** इत्यादि । तथा च लक्ष्यनिरूपके स्कन्धे क्रीडनस्य दर्शनार्थमेव लक्षणार्थो नान्य इति न दोष इत्यर्थः । एवञ्च द्वितीयसुबोधिन्यां यदुक्त'मनुशयनं नाम शक्तीः शाययित्वा तद्भोगार्थं पश्चात्स्वस्य शयनं तच्च, जाग्रदादिभेदेन त्रिविधं शक्तयश्च द्वासप्ततिनाडीरूपा देहस्य तावत्यः, आत्मनश्च श्रीप्रभृतयो द्वादश तेन सप्ताशीत्यध्याया इति' तदप्येतेन सारितं ज्ञेयम् । प्रपञ्चस्य देहत्वात्तेन दैहिकीनां दुर्विभाव्यपदाच्छ्रयादीनां च संग्रहात् । तेनाभेदः फलिष्यति ॥ ९ ॥ ननु किमित्येवं व्याख्यायते, भगवता दुष्टराजानोपि मारिता इति तमादाय प्रलय एवार्थः कुतो नोच्यत इत्यत आहुः—**नैमित्तिक** इत्या'दि । **अन्य** इति प्रासङ्गिक इत्यर्थः ॥ १० ॥ कुतो न ग्राह्य इत्याकाङ्क्षायां दूषणानि आहुः **आद्यन्तयोरित्यादि** । एषामर्थष्टिप्पणीतो ज्ञेयः । **टिप्पण्यामेवं सतीति** । मारणलक्षणस्यार्थस्य स्कन्धद्वयव्यापकत्वेनातिरिक्तत्वे सतीत्यर्थः । **तस्या** इति । नैमित्तिकत्वेनागन्तुकया इत्यर्थः ॥११॥ **सुबोधिन्याम्**—'भूमिभारावताराय यदर्थं जन्म मापते'रिति बोपदेवमतं दूषयन्ति **तदर्थमित्यादि' पृथास्तोत्रेति** । तथा हि—'तथा परमहंसानां मुनीनाममलात्मनाम् । भक्तियोगवितानार्थं कथं पश्येम हि स्त्रिय' इत्युक्तं, तद्विरोधीत्यर्थः ॥ १२ ॥ दूषणान्तरमाहुः—**कार्येत्यादि** । अर्थोऽस्य टिप्पण्यां स्फुटः । **टिप्पण्यां तथा सतीति** नवभ्य आधिक्ये सतीत्यर्थः । **त्यागश्चेति** । चकारः प्रस्तुतपक्षेपि तद्दूषणज्ञापनार्थः । "दशमस्ये"ति वाक्ये हि नवानामेव लक्षणत्वमभिप्रेतं न तु दशानामिति हृदयम् । **सुबोधिन्याम्**—ननु मारणलक्षणनिरोधश्चेन्न दशमार्थस्तदा 'भूमिर्दृप्तनृपे'त्याद्युक्तकथायाः कथं सङ्गतिरित्यत आहुः—**भक्तत्वादिति** । **उद्धार** इति दुःखोद्धारः । तथा च तत्रापि भक्ताया एव निरोध इति सुकरैव सङ्गतिरित्यर्थः ॥ १३ ॥ ननु भूभारभूता हि राजानस्ते च न जन्मप्रकरणे मारिता इति कथं दुःखोद्धारो जन्मप्रकरण इत्यत आहुः—**प्रकट** इत्यादि । भूमेर्हि पापबाहुल्येन भारो, न तु नरबाहुल्येन । अन्यदापि तेषां पर्वतादीनां च सत्त्वात् । प्रकटे च प्रभौ सूर्ये तम इव पापं नष्टमतस्तथेत्यर्थः । "दिष्ट्या हरेस्या" इति द्वितीयाध्यायपद्ये स्पष्टमिदम् । प्रथमाध्यायेऽव्याप्तिमाशङ्क्य तत्परिहारायाहुः—**इतीत्यादि** । **समुद्यम** इति सफल उद्यम इत्यर्थः । तथा चोद्यमसाफल्यकथनात्तत्रापि क्लेशहानिरुक्तैवेति न दोष इति भावः ॥ १४ ॥ ननु भक्तनिरोध एव चेद्भगवतः कर्तव्यस्तदा प्रह्लादयोपि भक्ताः सात्त्विकाश्चेति त एव कुतो न निरुद्धास्तत्राहुः **ब्रह्मे**त्यादि । एतदर्थष्टिप्पणीतो ज्ञेयः । ननु "तदात्मानं सृजाम्यहम्" इति वाक्यस्वारस्यान्नैमित्तिकोपि निरोधः प्रलयात्मा भगवत्कर्तृक एवेति, लक्षणवाक्यार्थविमर्शे निरोधस्य प्रलयलीलात्वेन व्यवस्थापनाच्च नैमित्तिकस्य कुतो न स्कन्धार्थरूपतेत्याशङ्कायां पूर्वस्कन्धार्थस्वारस्यमादाय स्वोक्तार्थं दृढीकुर्वन्त आहुः—**भक्तानामित्यादि** । नवमे हीशानुकथायां भक्तनिष्ठस्यैव संसारस्य लय उक्तः, तेनापि तेषामेव प्रपञ्चस्य लयो वाच्योऽतो न नैमित्तिकस्य स्कन्धार्थतेत्यर्थः ॥ १५ ॥ ननु भक्तप्रपञ्चलयो नात्र स्फुट इत्याकाङ्क्षायां तल्लयस्वरूपमाहुः—**यावदित्यादित्रिभिः** । किञ्च, नन्वप्रकट[2] एव भगवान् स्वभक्तान् कुतो न निरुद्धवानित्याशङ्कायामपीदमुच्यते । तत्र हेतुर्वस्तुस्वभाव एवेति । किञ्च, द्वितीयाध्याये समुद्यमरूपाङ्गनिरूपणादव्याप्तिरपि निवारिता ज्ञेया । तृतीयाध्यायेऽव्याप्तिं निवारयन्ति **रूपान्तरमित्यादि** । एतेनैव कापट्यस्याप्यङ्गता व्याख्यातप्राया समानन्यायादेव बोध्या । एवञ्चात्रेदं सिद्ध्यति । प्रपञ्चे क्रीडनं दशमार्थस्तत्फलं च भक्तप्रपञ्चलयः । स च 'यावदि'त्यादिकारिकोक्तलक्षणको, न तु लोकप्रसिद्धप्रलयात्मकस्तेनैवास्य प्रलयलीलात्वं ब्रह्मलक्षणत्वं च । सोयं सम्पूर्णे स्कन्धेनुस्यूतः । "प्रपञ्चविस्मृतिः कृष्णात् कृष्णासक्तिश्च वर्ण्यते" इत्यनेनोक्ता तु क्रीडनव्यापारभूता । सापि भरतसूत्रे निरोधपदेनोच्यते । "या तु व्यसनसंप्राप्तिर्निरोधः स तु कथ्यत" इति । एवं सति करणव्यापारफलानां निरोधता । पदार्थान्तरनिरूपणविशेषस्तु प्रसङ्गादिसङ्गतिविशेषप्राप्त इति न कोपि चोद्यावसर इति ॥१६–१८॥ तदेतद्धृदि कृत्याहुः—**इति निश्चय** इति । स्कन्धार्थं निश्चित्य प्रकरणानि विभजन्ते—**पञ्चे**त्यादि ॥ १९ ॥ **नान्य** इति । अन्तर्याम्यधिदैवरूपोंऽशो नेत्यर्थो निबन्धानुसारेण ज्ञेयः ॥ २०–२१ ॥ चतुर्मूर्तिप्राकट्यस्य किं प्रयोजनमत आहुः—**सत्त्वदित्यादि** ॥ २२ ॥ **प्रथम** इति । आद्यप्रकरणार्थ इत्यर्थः । **टिप्पण्यां निबन्धानुरोधादिति** । निबन्धे हि प्रथमे वासुदेवस्ततः संकर्षणस्ततः प्रद्युम्नस्ततोऽनिरुद्ध इत्येवं सोपपत्तिकमुक्तमतस्तथेत्यर्थः ॥ २३ ॥ न केवलं गुणा एव तथा किन्त्वन्येऽपि तदनुरोधिन इत्याशयेन दृष्टान् पीडकानाहुः—**कंसादेरित्यादि** । **अज्ञानादिति** कंसमौर्ख्यादित्यर्थः ॥ २४ ॥ **त्रयमिति** दुःखत्रयमित्यर्थः । **ईर्यत** इति प्रथमाध्याय उच्यत इत्यर्थः । एतेन त्रयाणां भगवन्नाश्यत्वरूपं हेतुतावच्छेदकमेकमिति हेत्वननुगमोपि परिहृतः ॥२६॥ **द्वादशभिरिति** । प्राणनवाक्यस्य प्रश्नरूपत्वाभावात्तथेत्यर्थः । **गुणदोषग** इत्यत्र **टिप्पण्यां दोषत्वेनेति** । ऐश्वर्यादिगुणविरुद्धदोषत्वेन । **आदय** इति आदिपदेन असंज्ञातिसहभावबहुकालद्वारकावासबहुपरिग्रहाणां प्रश्नस्थानां सङ्ग्रह इति । अत्राद्यस्य वीर्येण, द्वितीयस्यैश्वर्येण, तृतीयस्य यशसा, तुरीयस्य श्रिया, पञ्चमस्य ज्ञानेन, षष्ठस्य वैराग्येण विरोधः स्फुट एव । तथा वार्ता **द्वादशभिः प्रश्नो** न तु पुरःस्फूर्तिकैर्वीर्यादिभिः । प्रश्नस्य स्कन्धद्वितयविषयकत्वादितिभावो बोध्यः ॥ २८½ ॥

---

१. इदं वोपदेवमतं ज्ञेयमिति **च० ज०** ।　　२. जन्मप्रकरणे **क** ।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

श्रीगोवर्धनधारिणे नमः

यत्कृपादृष्टिपातेन भावार्थो हृदि भासते । तानहं श्रीमदाचार्यान्नमामि करुणाकरान् ॥ १ ॥
नुमः शयितगोपीशलीलाब्धिहृदयान्प्रभून् । ततः श्रीकृष्णपादाब्जतलरुग्रक्तमानसान् ॥ २ ॥

दशमस्कन्धे **नमामीत्यत्र** । लीलायामस्मद्धृदये प्रकटायां शायिनं तदनुरूपतया तत्परतया स्थितम् । यैव लीलाऽस्माभिर्भाव्यते तामेव कुर्वन्नस्मद्धृदये प्रकटो भवति । "यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय" इति वाक्यादिति भावः । अत्र शयनपदार्थः स्थितिरिति टिप्पण्यामुक्तम् । एवं कारिकाद्वयेन स्कन्धार्थप्रकरणार्थरूपस्तत्कर्ता वा भगवानस्मद्धृदये विवरणहेतुभूतं प्रचुरं भावमुत्पादितवानतो ग्रन्थोऽयं क्रियत इति स्वस्य ग्रन्थकरणे हेतुरुक्तः । अस्मद्धृदयानुरूपलीलायां स्थितः सन्नस्मद्धृदये विवरणहेतुभूतं प्रचुरं भावमुत्पादितवान् इत्यर्थष्टिप्पण्यां स्फुटीकृतः । का० ॥१-२॥ **दशमार्थ** इति । **विचार्यंते** । एतासु कारिकास्विति शेषः । दशमार्थविचारेण संशयनिवृत्तिस्ततोऽर्थद्वयविचारेण दार्ढ्यं भवतीति विशेषबोधनाय **प्रकरणाध्याये**तिसमासश्चकारश्च । अर्थत्रयस्यैव विचारे हेतुमाहुर्न**वे**ति । "अर्थत्रयं तु वक्ष्यामी"तिप्रतिज्ञानाद्यद्यपि वाक्यपदाक्षराणामर्था अग्रे वाच्यास्तथापि **हि** यत **इति संशयो**ऽतः कारिकास्वर्थत्रयमेव विचार्यते, निबन्धे उक्तमपि परिशील्यत इत्यर्थः । का० ॥ ३-४ ॥ **प्रतीत** इति । दशमा**दन्यत्र** द्वादश इत्यर्थः । फलितमाहु**र्महत्वा**दिति । दशमस्कन्धस्थाशिलीलानिरूपकत्वेन महत्त्वात् । सत्त्वाद्यव्यवधानेन प्रकटस्य **शुद्धस्य** कृष्णस्य **लीलया** प्राकट्यादिरूपया **सहित आश्रयः** परब्रह्मपरमात्मेतिशब्दवाच्य इह प्रतिपाद्य इत्यर्थः । एतादृशलीलासहितस्याश्रयत्वं युक्तं न तु द्वादशस्कन्धीयलीलासहितस्येति **हि** शब्दः । का० ॥ ५-६ ॥ **फलसिद्धावि**ति । "अग्रे पि ये भविष्यन्ति कीर्तनात्तेपि तादृशा" इति सिद्धान्तात्तत्तल्लीलाश्रवणेन तत्तल्लीलामध्यपातित्वं भवति । तथा चाश्रयसिद्धौ तदेव भागवतश्रवणफलमभयरूपमिति राज्ञो भागवतश्रवणफलसिद्धा**वग्रे लीलाद्वयकथा** व्यर्था स्यादित्यर्थः । **पूर्वोत्तरे**ति । पूर्वपूर्वस्य कारणत्वमुत्तरोत्तरस्य कार्यत्वम् । अधिकारिणां साधनानि (१) साधनयुक्तानां श्रवणम् (२) तत्रादौ सर्गलीला (३) सृष्टानां धर्मादिपुरुषार्थसाधनं (४) सिद्धपुरुषार्थानां तत्तन्मर्यादया स्थापनं (५) ततस्तन्मध्ये केषांचिदनुग्रहः (६) पुष्टौ प्राप्तस्य वैषम्यदोषस्य निवृत्त्यर्थं वासनाः (७) ततो वासनानिवृत्त्यर्थं सद्धर्माः (८) ततो निवृत्तदोषाणां भक्तिः (९) ततो भक्तानामासक्तिः (१०) आसक्तानां स्वरूपेण व्यवस्थितिः (११) तथाव्यवस्थितानां भगवदाश्रयः (१२) एवं कारणकार्यतेत्यर्थः । इदं निबन्धे तत्तत्स्कन्धे स्फुटम् । का० ॥ ८ ॥ **क्रीडनमि**ति । स्थितिर्लीला चेति द्वयमपि क्रीडनपदेनोच्यते । "प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिस्तु निरोधो यौगिक" इति निबन्धे विवृतम् ॥ का० ॥ ९ ॥ **नैमित्तिक** इति । निमित्तमाहुः—**धर्मे**ति । धर्मग्लानिनिमित्ताद्धरिणा कृतो दुष्टभूभुजां नैमित्तिको **निरोधः** प्रलयरूपो दशलीलाभ्योन्यः सङ्कर्षणकार्यरूप इत्यर्थः । का०॥१०॥ **स** निरोधश्चकाराद् व्यूहान्तरकार्यधर्मरक्षादिरूपश्च निरोधोत्र स्कन्धार्थत्वेन न सद्भिर्ग्राह्यः । भगवत्सम्पादितयौगिकनिरोधाङ्गभूतः स इति भावः । अग्राह्यत्वे हेतुमाहु**राद्यन्तयो**रिति । का० ॥ ११ ॥ **कार्यकारणे**ति । भावप्रधानमिदम् । आश्रयज्ञानस्य कार्यत्वं नवलक्षणज्ञानस्य कारणत्वं तयोर्हानिरित्यर्थः । अत्र निबन्धे "भक्ताः पूर्वत्र निर्दिष्टास्ते रोद्धव्या विमुक्तय" इत्यनेन कार्यकारणभावसङ्गतिर्निरूपिता । सङ्गतिं सूचयन्तोत्र भूम्युद्धरणमपि भक्तत्वादेवेत्याहुः—**भक्तत्वा**दिति । **उद्धारो** दुःखादिति शेषः । भारहरणाद्धेतोर्दुःखाद्**भूमेरुद्धारो** भक्तत्वान्निरूपित इत्यर्थः । का० ॥ १३ ॥ **अत एवे**ति । भूमिर्भगवन्मात्रनिवर्त्यदुःखा, अतस्तस्या अधिकभक्तत्वादेवेत्यर्थः । प्रलयरूपनिरोधोप्यङ्गत्वेनोच्यत इत्याहुः—**भक्तानामेवे**ति । एतेषामेव निस्तारकरणादेतेषामेव प्रपञ्चस्य निरोध आत्यन्तिकप्रलयरूप इति भावः । का० ॥ १५ ॥ ननु "तत्सृष्ट्वा तदेवानुप्राविशदि"ति श्रुतेः सर्वत्रानुप्रविष्ट एव भगवान् प्रपञ्चाभावं साधयतु किं विशेषावतारेणेत्याशङ्क्य दृष्टान्तपूर्वकं साधयन्ति **याव**दिति । का० ॥ १६ ॥ तर्हि "तमद्भुत"मितिरूपेणैव तावत्कार्यसिद्धौ रूपान्तरस्वीकरणं किंप्रयोजनकमित्यत आहुः—**रूपान्तरं त्वि**ति । यथा वेषान्तरधारणेपि नटः स्वरूपतः स एव तथा रूपान्तरधारणेपि भगवान् स्वरूपतः स एवेति, त्रिविधा भक्तास्तत्तद्भावानुकृत्यैव साध्या भवन्तीति रूपान्तरस्वीकरणम् । वक्ष्यन्ति च पञ्चमाध्याये, "स्वभावस्यान्यथाभावो न वै शक्यः कथंचन । अतस्त्रिविधजीवेषु त्रिधा भगवतः कृतिरि"ति । प्रपञ्चाभावकरणाद्धेतोः संसारादुज्जहारेत्यर्थः । एवं दशमार्थं विचार्य प्रकरणार्थं विचारयन्ति **पञ्चे**ति । का० ॥ १८-१९ ॥ **भगवानेव नान्योत्रे**ति । बहिर्मुखाशङ्काप्राप्तमायाप्राकृतगुणसंबन्धवान् न इत्यर्थः । इदं षड्विंशाध्याये "इति विक्लवितं तासा"मित्यत्र टिप्पण्यां स्फुटम् । एवं प्रकरणविभागादपि निरोधस्य स्कन्धार्थत्वे संशयो न कार्य इति भावः । का० ॥ २१ ॥ अध्यायार्थं विचारयन्ति—**चतुर्मूर्ते**रिति ॥२२॥ एवमर्थत्रयनिरूपणेन स्कन्धार्थसंशयो निराकृतः । प्रथमाध्यायार्थमाहुः—**हेतुश्चे**ति । भक्तदुःखं हेतुः । तस्य त्रैविध्यं विवृण्वन्ति—**कंसादे**रिति । **अज्ञाना**दिति । "नन्दाद्या ये व्रजे गोपा याश्चामीषां च योषित" इतिवाक्यश्रवणानन्तरं कंसेन कृतं भगवदवताराज्ञानाज्जातम् । **अनेन दुःखेन** भगवानवतरिष्यतीति ज्ञाने तु दुःखं न भवेदिति भावः । का० ॥ २४ ॥ दुःखत्रयाधिकरणान्याहु**र्भूमि**रिति । कंसादिकृतं दुःखं भूमेः । कालरूपाकाशवाणीकृतं दुःखं मातुः । भगवदवताराज्ञानकृतं दुःखमन्येषां सर्वेषामिति विभागः । अज्ञानकृतं पूर्वयोरपि परं कंसादिकृतत्वं कालकृतत्वं च विशेष इति **तथा चे**त्युक्तम् । तद्दुःखनिवृत्तिप्रकारोपि निबन्धे निरूपितः "कालजं प्रभुसम्बन्धात् कंसजं

हेतुवारणात् । वाक्यैरज्ञानसंभूतं शक्यं तत् त्रितयं हरे”रिति । तृतीयाध्याये स्वस्यावतारेण पृश्निसम्बन्धज्ञापनेन चाकाशवाणीजनितं मातुर्दुःखं निवारितवान् । ततः कंसादिकृतं दुःखं कंसवधान्तेष्वध्यायेषु कंसादिमारणेन निवारितवान् । ततः “सभाजितान्समाश्वास्ये”तिश्लोकोक्तसभाजनसमाश्वासनवाक्यैः स्वावतारज्ञापनेन तदज्ञानजं दुःखं निवारितवान् । “त्वमेव पूर्वसर्गेऽभू”रितिश्लोके देवक्यां स्नेहातिशयो विवृतः । अतः क्रममपहाय पूर्वं मातुर्दुःखं निवारितवानिति ज्ञेयम् । व्रजस्याधिदैविकदुःखनिवृत्तेस्त्ववतारकार्यत्वाभावादत्र तदकथनम् ॥ २५ ॥ **अनुवाद** इति । सार्धेनानुवादो, ‘निवृत्ततर्षैरि’त्यनेन चरित्रस्तुतिश्चेत्यर्थः । **अन्यथेति** । भक्तत्वाभावे इत्यर्थः । **अज्ञानमिति विनिवार्यते** ‘पितामहा मे’ इत्यादिना भगवन्माहात्म्यकथनेनेति शेषः ॥ २८½ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

श्रीयशोदोत्सङ्गलालिताय नमः

श्रीगोवर्धनधारिणं शुभकरं शृङ्गारमूर्तिं भजे, वन्दे नन्दपुराणपुण्यफलितं श्रीबालकृष्णं प्रभुम् ।
श्रीमद्वल्लभविट्ठलेश्वरविभुं ध्यायामि सद्वन्दितौ, कुर्वे तत्कृपया निरोधविवृतौ सन्देहविध्वंसनम् ॥ १ ॥

अथ निरोधस्य स्कन्धार्थत्वात्प्रथमं तत्स्वरूपं विचार्यते । तत्र “निरोधोस्यानुशयनमात्मनः सह शक्तिभि”रितिवाक्यादात्मनः पुरुषोत्तमस्य शक्तिभिरनुशयनं निरोधः । आत्मपदान्निर्गुणं परं ब्रह्म ग्राह्यम् । “गौणश्चेन्नात्मशब्दादि”त्यत्रात्मशब्दस्य परवाचकताया निर्द्धारितत्वात् । तत्र “कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते” इति श्रुतेः, “कृष्णस्तु भगवान्स्वय”मित्यादिवाक्याच्च परमात्मत्वं कृष्णस्य सिद्धम् । अतः कृष्णस्यानुशयनं निरोधः । अनुशयनं नाम लीलानुरूपा स्थितिः । “विष्णुः सर्वगुहाशय” इत्यादौ शीङ्धातोः स्थित्यर्थकत्वात् । न हि गुहायां शेत इति व्युत्पन्नेन गुहाशयशब्देन निद्रातात्पर्यं सिध्यति, निद्राया अविद्यावृत्तित्वात् । अतः शीङ्धातोस्तादृशस्थितिरत्रार्थः । एवं सति शक्तिभिः सह भगवतः स्थितिः शयनम् । अनुरूपतोपसर्गार्थः । कस्यानुरूपेत्याकाङ्क्षायां स्थितेर्लीलाप्रयोजनकत्वाल्लीलानुरूपेति बोध्यम् । एवञ्च कृष्णस्य लीलानुरूपा स्थितिरनुशयनमिति सिद्धम् । स्थितिरपि लीलाविशेषोनेकविधलीलासाधकः । अतः सर्वलीलासाधिका स्थितिरूपा लीला निरोधपदार्थो भगवद्धर्मः । स च प्रपञ्चमध्य एव स्फुटः । कृष्णावतारस्य प्रपञ्च एव जातत्वात् । तदुक्तं निबन्धे “स एव कदाचिज्जगदुद्धारार्थमखण्डः पूर्ण एव प्रादुर्भूतः कृष्ण इत्युच्यत” इति । अतोनेकशक्तिभिः सह कृष्णस्य प्रपञ्चे क्रीडा निरोध इति फलितम् । तदुक्तं सुबोधिन्याम् “**निरोधोस्यानुशयनं प्रपञ्चे क्रीडनं हरेः । शक्तिभिर्दुर्विभाव्याभिः कृष्णस्येति हि लक्षणमि**”ति । इह कारिकायां **कृष्णस्येति**पदं मूलस्थात्मपदव्याख्यानरूपम् । भागवतमते कृष्णस्यैवात्मत्वेन निरूपणात् । अत एवावतारान्तरलीलायां स्कन्धान्तरप्रतिपाद्यायां नाव्याप्तिरितिभावः । एवं निरोधशब्दोनुशयने रूढ इत्युक्तम् । किञ्च, प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिर्निरोधः, नितरां रोधो निरोध इति व्युत्पत्तेः । रोधः कस्येत्यपेक्षायां भक्तानामिति पूर्वस्कन्धार्थसङ्गत्या लभ्यते । कस्माद्रोध इत्यपादानापेक्षायां प्रपञ्चो ग्राह्यः । तथा सति प्रपञ्चाद्रोध इति सिद्ध्यति स्म । प्रपञ्चाद्रोधेपि “कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् । इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते” इतिवत्प्रपञ्चस्मरणं चेत्तदा भगवल्लीलानुभवे मुख्योऽधिकारो न स्यादतः प्रपञ्चविस्मरणमपेक्षितं, तदुपसर्गेण लभ्यते । नितरां रोधः प्रपञ्चविस्मरणपूर्वकः स निरोध इति । कस्मिन्निरोध इत्यपेक्षायां भगवति निरोध इति ज्ञेयम् । स हि परमरुच्युत्पादकलीलाजन्यत्वेन परमसुखरूपत्वादासक्तिरूपो भवितुमर्हति । एवं यौगिकव्युत्पत्त्या प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिर्निरोध इति फलितम् । “या तु व्यसनसम्प्राप्तिर्निरोधः स तु कथ्यते” इति भरताचार्यवाक्ये व्यसनपदवाच्याया आसक्तेरेव निरोधत्वकथनाच्च । सा च “इति नन्दादयो गोपाः कृष्णरामकथां मुदा । कुर्वन्तो रममाणाश्च नाविन्दन्भववेदनामि”त्यत्र, “शय्यासनाटनालापस्नानक्रीडाशनादिषु । न विदुः सन्तमात्मानं वृष्णयः कृष्णदेवता” इत्यत्र च स्फुटमभिहिता । एवमुभयं निरोधपदवाच्यम् । “समुदायो जन्मवाची क्रीडायुक्तस्य वै हरेः । प्रपञ्चविस्मृतिः सक्तिर्भक्तानां चापि योगत” इति निबन्धान्निरोधशब्दस्य यौगिकत्वपक्षे भक्तकर्मकनिरोधवत्कृष्णकर्मको निरोधोपि गोप्यतया विवक्षितः । यथा भगवता लीलाभिर्निरुद्धा भक्ता भगवद्वशे भवन्त्येवं पुष्टिभक्तैर्लीलाभिर्निरुद्धो भगवान्भक्तवश्यो भवति । अत एव भगवता भक्तेतरविषयकज्ञानाभावः स्वस्मिन्प्रदर्शितो “नाहं तेभ्यो मनागपी”त्यनेन । इममर्थं सूचयितुं स्वहृदयशेषे भगवतः शयनमाचार्यैरुक्तम् ‘नमामि हृदये शेष’ इत्यनेन । “अन्यत्र गतिरहितो य” इति टिप्पण्यां व्याख्यातं च । अन्यच्च, “आभासश्च निरोधश्च यतश्चाध्यवसीयते । स आश्रयः परं ब्रह्म परमात्मेति शब्द्यत” इत्यादौ प्रलयो निरोधपदवाच्यः, स च प्रपञ्चप्रतियोगिकः । एवं च सुबोधिन्युक्तया टिप्पणीव्युत्पादितया पूर्वोत्तरस्कन्धार्थसङ्गत्या नवमदशमार्थसङ्गतिविचारे भक्तानां प्रपञ्चप्रलयो निरोध इत्यायाति । अत एव द्वितीयस्कन्धसुबोधिन्यां ‘भक्तानां प्रपञ्चाभावो निरोध’ इत्युक्तम् । इहापि सुबोधिन्याम् “अतो निरोधो भक्तानां प्रपञ्चस्येति निश्चय” इत्यभाणि । तथा च भक्तानां प्रपञ्चस्य प्रलयस्तिरोधानं नित्यलीलौपयिकदेहत्वफलको जाड्यात्मकप्रपञ्चभावलय इति यावत् । सूतोक्तलक्षणेषु निरोधस्थाने संस्था पठिता । संस्था च “नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः । संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावत” इत्यनेन प्रलयरूपा व्याख्याता । अतो निरोधशब्देन प्रलय उच्यते । ‘निरोधोस्यानुशयनमि’त्यस्य सुबोधिन्यामपि ‘शक्तीः शाययित्वा तद्भोगार्थं भगवतः शयनमि’ति व्याख्यातम् । तत्रापि शक्तिशयनानन्तरं शयनकथनेन प्रलय

---

१. योजनाग्रन्थो नवमकारिकात एव प्रारभ्यते श्रीलालुभट्टै रिति विदांकुर्वन्तु भगवदीयविद्वांसः ।

उक्तः । अतो भक्तप्रपञ्चसंपादिकाः शक्तीः स्वस्वरूपे तिरोहिताः कृत्वा तिष्ठति ततो भक्तान्प्रति प्रपञ्चस्तिरोभवत्यतो भक्तानां प्रपञ्चनिवृत्तिरिति सिद्ध्यति । एतदभिसंधायोक्तमत्र **यावद्बहिःस्थितो वह्निः प्रकटो वा विशेन्न हि । तावदन्तस्थितोप्येष न दारुदहनक्षमः । एवं सर्वगतो विष्णुः प्रकटश्चेन्न तद्विशेत् । तावन्न लीयते सर्वमिति कृष्णसमुद्यम** इति । इदमत्र ज्ञेयम् । स्वच्छन्दलीलाभिर्भगवान्निरोध्यभक्तानां देहादिसकलप्रपञ्चे स्वानन्दं प्रवेशयंस्तिरोहितानन्दमप्याविर्भावयति, ततो भगवदानन्दानुभवयोग्यालौकिकदेहत्वप्राप्तौ जाड्यादिरूपपूर्वप्रपञ्चभावो लीयते । अयमेव प्रलयपदार्थः । अतो भक्तानां प्रपञ्चप्रलयो निरोध इति फलति स्म । तथा च प्रपञ्चे शक्तिभिर्भगवत्क्रीडनं, भक्तानां प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिः, भक्तानां प्रपञ्चाभावश्चेति त्रयं निरोधपदवाच्यम् । तत्र भगवत्क्रीडनं करणं, भगवदासक्तिर्व्यापारः, भक्तानां प्रपञ्चाभावः फलमिति त्रितयरूपो निरोधः स्कन्धार्थः । एवमत्रेदं सिद्धम् । भगवाननेकशक्तिभिः करणरूपनिरोधात्मिकां क्रीडां कुर्वन् प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपनिरोधात्मकव्यापारेण प्रपञ्चाभावरूपफलात्मकनिरोधं सेवकानां संपादयतीति त्रिष्वपि निरोधपदव्यवहारः सुबोधिनीनिबन्धादिषूपलभ्यत इति सर्वमदुष्टम् । किञ्च, "लौकिकेषु तु भावेषु यत्रैव हरिवेशनम् । निवर्तते तदेवात्र वह्नेर्दारुमयं यथे"तिकारिकायां फलात्मको निरोध उक्तः । तथा हि लौकिकेषु भावेषु पदार्थेषु यत्र यत्र भगवान् प्रविशति तत्र तत्र चिदानन्दयोस्तिरोभूतयोराविर्भावात्तदेव पूर्वस्थितस्वरूपं तिरोहितानन्दकं निवर्तते, ब्रह्मात्मकं भवति । प्रकटसच्चिदानन्दकं भवतीति यावत् । तत्र दृष्टान्तः वह्नेरित्यादि । यथा वह्निप्रवेशे दारूणां वह्निरूपत्वं तद्वदित्यर्थः । एवं भक्तानां प्रपञ्चप्रलयो बोध्यः । अन्यच्च, शक्तिशयनानन्तरशयनवाचकेनानुशयनशब्देन गोप्योर्थोऽपि विवक्षितः । तदनुसारेण स्कन्धारम्भे स्कन्धार्थरूपं नमस्यद्भिः श्रीमदाचार्यचरणैः "नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् । लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधिमि" त्युक्त्या रहस्यलीलानां निरोधपदवाच्यत्वं सूचितम् । तदनुसारेण प्रभुचरणैष्टिप्पण्याम "नुशय्यते अनेने"तिकरणव्युत्पत्तिं प्रदर्श्य 'निगूढभावकरणं येन स निरोध' इत्युक्त्वा स्वकीयेषु स्वविषयकभावोत्पादनं यया लीलया क्रियते सा निरोधपदवाच्ये'त्युक्तवद्भिर्गुप्तलीलायाः स्कन्धार्थता प्रतिपादितेति विद्वद्भिर्विभावनीयम् । एवं च शुकोक्तिसुबोधिनीटिप्पणीषु सर्वत्राविरोध इत्येक एवाशयस्तिसृणामिति प्रादुर्भवति स्म । तथा सतीदं सिद्धम्, देहादौ चिदानन्दयोः प्राकट्येन जाड्यादिप्रपञ्चभावप्रलयः फलरूपो निरोधः सिद्धः । तस्मिन्सति जाड्याभावेन प्रपञ्चे विद्यमानानामपि भक्तानां कृष्णानन्दानुभवयोग्यदेहत्वं सिद्ध्यति । इदमेव यमुनाष्टके "ममास्तु तव सन्निधौ तनुनवत्वमेतावता" इत्यनेन प्रार्थितम् । ततो नित्यलीलाप्रवेशः स मुक्तिपदवाच्यः । निरोधलीलायां भक्तानां साधारणमायागुणरहितत्वेपि लीलास्थभक्तनियामकान्तरङ्गमायागुणव्याप्तत्वेन लौकिकसादृश्यव्यवहारः पुराणादौ तेषाम् । अन्तरङ्गयोगमायागुणनिवृत्तौ नित्यलीलाप्रवेशरूपा मुक्तिरतो मुक्तिलीलायां शुद्धनिर्गुणत्वमिति विवेकः । "मुक्तिर्हित्वान्यथारूपमि'तिवाक्यात् । सगुणत्वस्यान्यथारूपत्वात् । का० ॥ १६–१७ ॥

हेतूद्यमस्वीकरणकापट्यै रिति । हेत्वादयश्चत्वारः क्रमेण चतुर्णामध्यायानामर्थाः हेतूद्यमस्वीकरणकापट्यैरध्यायार्थैरवयवैः कृत्वा प्रथमो जन्मप्रकरणार्थरूपो जन्मलीलात्मको भगवान्महानवयवीत्यर्थः । इह स्कन्धे पञ्च प्रकरणानि तेषां जन्मादयोर्थाः । तेषु जन्मरूपोर्थः **प्रथमः**, स च हेत्वादिभिरवयवैर्महत्वं प्राप्नोतीत्यर्थः सम्पद्यते । तत्र पूर्वाध्याये जन्मनो हेतुर्निरूप्यते स चाङ्गतया जन्मप्रकरणे सङ्गतिं प्राप्नोति । द्वितीये जन्मोद्यमः, सोपि जन्मसम्बन्धितया जन्मन्यन्वेति । तृतीये रूपान्तरस्वीकारः, स च भगवतो जन्मबोधकः । अन्यथा "तमद्भुतं बालकमि"त्यादिविशेषणोक्तभगवद्रूपतत्त्वावगतिसम्पन्नयोर्देवकीवसुदेवयो "रूपं यत्तत्प्राहुरव्यक्तमाद्यम्" "विदितोसि भवान्साक्षात्पुरुषः प्रकृतेः पर" इत्यादिभिः स्तुवतोर्जन्मज्ञानं न स्यात् । तथा सति सर्वापि स्नेहलीला बाध्येत । रूपान्तरस्वीकारे तु ममायं बाल इतिबुद्ध्या "तदा तु स्वत एवासीद्भगवद्भावसङ्गतिरि"त्यादिवाक्योक्ता भावना सिद्धाभूत् । अतो रूपान्तरस्वीकारस्य जन्मबोधकत्वाज्जन्मप्रकरणे निरूपणं सङ्गतमेव । चतुर्थे कापट्यमुक्तं, तन्मायाकार्यं, तदप्यावश्यकं, माययैव भगवतो जन्म । वस्तुतो ब्रह्मणि जन्माभावात् । 'राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडम्बनमवेहि तथा नटस्य' देवकीजन्मवाद" इत्यादिवाक्येभ्यः । अतो जन्मप्रकरणे मायाकार्यस्य नाट्यस्य निरूपणमुचितम् । नाट्यस्य जन्मसाधकत्वात् । एवं हेत्वादीनां जन्मप्रकरणे निरूपणं संगच्छत एव । वस्तुतस्तु परब्रह्मणः पुरुषोत्तमस्य प्रादुर्भावो न तु जन्म । प्रादुर्भावप्रयुक्ता जन्मोत्सवादिलीला । अत एव "सिंचन्त्योऽजनमुज्जगु"रित्यत्राजनपदं श्रीशुकेनोक्तम् । देवकीनन्दनयशोदानन्दनादिनामान्यपि प्राकट्यप्रयुक्तान्येव । स च प्रकरणार्थरूपो भगवांश्चतूरूप इत्याहुः—**प्रद्युम्नश्चानिरुद्धश्च वासुदेवस्तथापर** इति । तथा च प्रद्युम्नादिचतूरूपो भगवानेव जन्मलीलात्मक इह प्रकरणे प्रतिपाद्य इत्यर्थः सम्पन्नः । 'चतुर्मूर्तेर्जन्मतोत्र तथाध्याया निरूपिता' इति वाक्यात् । अत एकैकस्मिध्याये प्रद्युम्नादेर्निरूपणम्, न तु प्रद्युम्नादयोऽध्यायार्थाः । किन्तु प्रद्युम्नादिचतुर्व्यूहो भगवाञ्जन्मप्रकरणप्रतिपाद्य इति भावः ॥२३-२८½॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

श्रीरासरसिकाय नमः

श्रीकृष्णास्यवचो वन्दे दुर्बोधं विदुषामपि । तद्व्याख्यातृवचो वन्दे तत्सुबोधत्वसाधनम् ॥ १ ॥
सुबोधिन्याः समुद्धृत्य प्रायः सकलकारिकाः । तत्र पूर्वं विरोधस्था विवृणोमि समासतः ॥ २ ॥
टिप्पणीलेखमाश्रित्य प्रकाशं पौरुषोत्तमम् । गोस्वामिवल्लभीयं च किञ्चिद्वक्तुं समुत्सहे ॥ ३ ॥

श्रीमदाचार्यवर्या दशमस्कन्धविवरणं चिकीर्षवोऽत्र स्कन्धार्थरूपोऽपि भगवानेवेति ज्ञापनाय स्कन्धार्थरूपं भगवन्तं नमस्यन्ति—नमामीति । सर्वात्मभावेन दासत्वं प्राप्तत्वेन शेषरूपेऽस्मद्धृदये यो लीलाक्षीराब्धिस्तत्र शायिनं लक्ष्मीसहस्रै-

सहस्रलीलाभिश्च सेव्यमानं कलानिधिं पूर्णं पुरुषोत्तमं नमामि। अत्र लक्ष्मीसहस्राणि च लीलाश्च ताभिर्लक्ष्मीसहस्रलीलाभिरिति द्वन्द्वसमासः लक्ष्मीसहस्राणां लीला इति तत्पुरुषाश्रयणे तु लीलाक्षीराब्धिशायिनामित्यत्रोक्तलीलापदेन प्रभुलीलामध्यपातिनायिकानामपि प्राप्तत्वात्पुनस्तदुक्तिरनुपपन्ना स्यादिति व्याख्यातं टिप्पण्याम्। तथा च लीलाक्षीराब्धिशायिनमित्यत्र लीलापदेन सामान्यतो लीला विवक्षिता। लक्ष्मीसहस्रलीलाभिरित्यत्र तु लक्ष्मीसहस्रपदेन स्वरूपेण सेवा, लीलापदेन कटाक्षादिरूपाभिर्लीलाभिः सेवेति विशेषलीला विवक्षितेति न पुनरुक्तिः। मूले "निरोधोऽस्यानुशयनम्" इति शयनपदोक्त्या नारायणे शयनं प्रसिद्धमिति नारायणधर्मसाम्यमाचार्यैर्निरूपितम्। अत्र टिप्पण्यामनुशयनशब्दार्थौ द्विधा स्वीकृतः—भावव्युत्पत्तिपक्षे तत्तल्लीलानुरूपा स्थितिः, करणव्युत्पत्तिपक्षे तु स्वकीयेष्वेव स्वविषयकभावोत्पादनसाधनीभूता लीला चेति। यदुक्तं टिप्पण्याम्—'मूले अनुशयनशब्दस्य भावार्थकत्वपक्षे तु अनुशय्यतेऽनेनेत्यनुशयनमिति करणव्युत्पत्त्या' इत्यादि। तत्र भावार्थकत्वपक्षे इत्यस्य भावव्युत्पत्तिपक्षे इति नार्थः, किन्तु निगूढभावार्थकत्वपक्षे इत्येवार्थः। तथा च अनुशयनशब्दघटकीभूतशीङ्धातोर्निगूढभावोऽर्थः। ल्युट्प्रत्ययः करणार्थकः। अत एवोक्तम्—"ताभिः सहात्मनो निगूढभावकरणं येन स निरोध" इति। निरोधशब्दस्य यौगिकार्थस्तु प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिः। भरताचार्योऽप्याह—"या तु व्यसनसंपत्तिर्निरोधः स तु कथ्यते" इति ॥ १ ॥ अथ प्रकरणार्थरूपं नमस्यन्ति—**चतुर्भिरिति**। आद्यं जन्मप्रकरणं चतुर्भिरध्यायैः। द्वितीयं तामसप्रकरणं प्रमाणप्रमेयसाधनफलनिरूपकैश्चतुर्भिरवान्तरप्रकरणैः। तृतीयं राजसप्रकरणमपि प्रमाणादिनिरूपकैश्चतुर्भिः प्रकरणैः। चतुर्थं सात्त्विकप्रकरणं प्रमेयसाधनफलनिरूपकैस्त्रिभिः प्रकरणैः। पञ्चमं गुणप्रकरणमैश्वर्यादिगुणप्रतिपादकैः षड्भिरध्यायैः। अत्र सात्त्विकानां प्रमाणबलापेक्षाभावात्त्रीण्येवावान्तरप्रकरणानि। तथा चोक्तं दशमस्कन्धनिबन्धे "प्रमाणानां बलं त्वत्र सात्त्विकानां न मृग्यते ॥ प्रक्रियात्रितयं त्वत्र प्रमेयादि निरूप्यते"। अत्रावान्तरप्रकरणानि प्रायः क्रमेण ऐश्वर्यवीर्ययशःश्रीज्ञानवैराग्यनिरूपकैः सप्तभिः सप्तभिरध्यायैः। तामसप्रकरणीयफलप्रकरणे तु क्रमभेदः। तत्र पञ्चमाध्याये धर्मी। षष्ठाध्याये वैराग्यम्। सप्तमे युगलगीताध्याये ज्ञानमिति। एवं सात्त्विकप्रकरणेऽपि सुबोधिन्यां क्रमभेदः स्वीकृतः। तत्र षड्भिः षड्भिः षड्भिरध्यायैः प्रमेयसाधनफलप्रकरणीयान्धर्मान्निरूप्य संलग्नैरेव त्रयस्त्रिंशदादिभिस्त्रिभिरध्यायैस्त्रयोऽपि धर्मिणो निरूपिताः। निबन्धे तु नैवं क्रमभेदो विवक्षितः। सुबोधिन्यां तु प्रमेयसाधनफलनिरूपकैः षड्भिः षड्भिः षड्भिरध्यायैः क्रमेण धर्मार्थकामान्निरूपयन्ति। धर्मिनिरूपकैस्त्रिभिरध्यायैर्मोक्षो निरूप्यत इति धर्मार्थकाममोक्षप्रकरणान्यपि विवक्षितानीति विवक्षाभेदेन व्यवस्था ॥२॥ एवं प्रकरणार्थरूपं भगवन्तं नमस्कृत्य स्कन्धार्थप्रकरणार्थाध्यायार्थविचारं प्रतिजानते—**दशमार्थ** इति। निबन्धे विचारितोऽपि स्कन्धाद्यर्थः संक्षेपेणात्रापि **विचार्यत** इत्यर्थः। एवं विचारं प्रतिज्ञाय दशमार्थ आश्रयो निरोधो वेति संशयम्, आश्रय इति पूर्वपक्षम्, निरोध एवेति सिद्धान्तं च वक्तुं प्रथमं सोपपत्तिकं संशयमाहुः—**नवलक्षणलक्ष्य** इति। सर्गविसर्गादिनवलक्षणलक्ष्यस्य कृष्णस्य दशमस्कन्धे निरूपणादाश्रयो दशमार्थो, वा क्रमभावित्वान्निरोधो दशमार्थ इति संशयः ॥ ३ ॥

एवं संशयं प्रदर्श्य पूर्वपक्षमाहुः—**लीलानिर्धारक** इत्यादिसार्धद्वयेन। पूर्वमीमांसापञ्चमाध्याये क्रमबोधकानि श्रुत्यर्थपठनस्थानमुख्यप्रवृत्त्याख्यानि षट्प्रमाणानि उक्तानि। तेषामुत्तरोत्तरं दौर्बल्यं चोक्तम्। यथा वा अर्थक्रमात् पाठक्रमो दुर्बलः। एवं सति यथा "अग्निहोत्रं जुहोति" "यवागूं पचति" इत्यत्र अर्थक्रममाश्रित्य पूर्वं यवागूपाकानुष्ठानमङ्गीकृतम्। पाठक्रमेण पश्चाद्यवागूपाके तु प्रयोजनबाधः स्यात्। तथात्रापि पाठक्रमत्यागेन अर्थक्रममाश्रित्य आश्रय एव दशमस्कन्धार्थः। ननु व्युत्क्रमेण श्रवणे फलं न भविष्यति इत्याशङ्क्योक्तं **यथाकथंचिदिति**। किञ्च, लोके निरोधः प्रलय इति प्रसिद्धः, स प्रकृते दशमस्कन्धे न प्रतीयते किन्तु दशमाद्न्यत्र द्वादशस्कन्धे प्रतीतः। तथा च दशमस्कन्धस्य अंशिलीलानिरूपकत्वेन महत्वात् शुद्धस्य कृष्णस्य लीलया प्राकट्यादिरूपया सहित आश्रय इह स्कन्धे प्रतिपाद्य इति पूर्वपक्षः ॥४–६॥ तं दूषयन्ति—**न हीति**। सर्गविसर्गादिनवलक्षणसापेक्षस्य आश्रयस्य प्रथमं निरूपणं सुकरं न भवति। एवं सति नवलक्षणानि अनिरूप्य नवलक्षणसापेक्ष आश्रयः कथं निरूप्यते ॥ ७ ॥ किञ्च, **अग्रे लीलाद्वयेति**। आश्रयश्रवणात् फलसिद्धौ सत्यामग्रे एकादशद्वादशप्रतिपाद्यमुक्तिनिरोधरूपलीलाद्वयकथा वृथा भवेत्। अन्यच्च, पूर्वपूर्वस्कन्धार्थस्य कारणता उत्तरोत्तरस्य कार्यतारूपा सङ्गतिरस्ति। तथा सति मुक्तिनिरोधौ अनिरूप्य पूर्वमेवाश्रयनिरूपणे पूर्वोत्तरस्कन्धयोः कारणकार्यतारूपा सङ्गतिर्नश्येत् ॥ ८ ॥ ननु दशमस्कन्धस्य नवलक्षणलक्ष्यकृष्णनिरूपकत्वादाश्रयार्थकत्वमेव युक्तमिति पूर्वोक्तां शङ्कां परिहरन्ति—**कृष्णस्त्वेकादशेऽप्यस्तीति**। तथा च एकादशस्कन्धेऽतिव्याप्तिः स्यादिति भावः। सिद्धान्ते उपपत्तिमाहुः—**क्रमश्च स्वीकृतो भवेदिति**। निरोधार्थकत्वपक्ष इत्यर्थः। एवं निरोधस्य दशमार्थत्वं निर्णीय निरोधलक्षणमाहुः—**निरोधोस्येत्यादि**। अत्र 'निरोधोस्यानुशयन'मिति वाक्यं द्वितीयस्कन्धदशमाध्यायस्थम्। तस्यैव विवरणं **प्रपञ्चे क्रीडन हरेरिति**। तथा च अस्यानुशयनमित्यत्र इदंशब्देन हरिरेव न तु जीवः। एतेन 'अस्यात्मनो जीवस्य हरेर्योगनिद्रामनु पश्चात् शक्तिभिः सह शयनं लयः निरोध' इति श्रीधरव्याख्या व्यावर्तिता ॥ ९ ॥ एवं स्वसिद्धान्तानुसारेण निरोधं लक्षयित्वा दुष्टभूभुजां प्रलयो निरोधशब्दार्थ इति मतं निराकुर्वन्ति—**नैमित्तिक** इति। धर्मग्लानिनिमित्ताद्धरिणा कृतो दुष्टभूभुजां निरोधः प्रलयरूपो दशविधलीलास्वन्य इत्यर्थः ॥ १० ॥ स निरोधोत्र स्कन्धार्थत्वेन सद्भिर्न ग्राह्यः, किन्तु भगवदासक्तिरूपनिरोधस्याङ्गभूतः स इति भावः। पूतनाकंसादिमारणेन नन्दवसुदेवादीनां भगवता स्वस्मिन्नासक्तिरेव दृढीकृता। तादृशनिरोधस्याग्राह्यत्वे हेतुमाहुः—**आद्यन्तयोरिति**। स्कन्धार्थस्तादृशो वक्तव्यो यः संपूर्णस्कन्धेऽनुस्यूतो भवति। एवं सति **आद्यन्तयोर्जन्मप्रकरणगुणप्रकरणयोर्दुष्टमारणाभावाल्लक्षणस्या-**

प्रवेश इत्यव्यापकं लक्षणमिति भावः। **मुक्तावपि** एकादशस्कन्धेपि दुष्टमारणनिरूपणादतिव्यापकं लक्षणमिति भावः। एवं सति दुष्टमारणात्मकलीलाया दशविधलीलामध्यपातित्वाभावेन **लीलाधिक्यं भवेत्**, एकादशी सा लीला भवेदित्यर्थः ॥११॥ दूषणान्तरमाहुः—**तदर्थं जन्मकथनमिति**। **तदर्थं** दुष्टमारणार्थं प्रथमस्कन्धेऽष्टमाध्याये "तथा परमहंसानां मुनीनाममलात्मनाम्। भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः" इति पृथावाक्ये भक्तियोगविधानार्थमेव भगवदाविर्भावस्योक्तत्वाद्दुष्टमारणस्य भगवदवतारप्रयोजनाङ्गीकारे कुन्तीस्तोत्रविरोध इति दुष्टमारणलक्षणो निरोधो न स्कन्धार्थ इत्यर्थः। यद्यपि कुन्तीस्तुतौ "केचिदाहुरजं जातम्" इत्यादिश्लोकेषु दैत्यवधादिकमपि अवतारप्रयोजनमुक्तं, तथापि पूर्वपक्षत्वेन, न तु सिद्धान्तत्वेनेति व्याख्यातं सुबोधिन्याम् ॥ १२ ॥ आश्रयस्य दशमार्थत्वे दूषणान्तरमाहुः—**कार्यकारणेति**। कार्यकारणेति भावप्रधानो निर्देशः। आश्रयज्ञानस्य कार्यत्वं, नवलक्षणज्ञानस्य कारणत्वं, तयोर्हानिरित्यर्थः दूषणान्तरमाहुः—**प्रक्रान्तेति**। "दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणमि"त्युपक्रान्तत्वात्तेभ्यः पूर्वमाश्रयोक्तौ उपक्रान्तत्यागश्च भवेदित्यर्थः। अत्र निबन्धे "भक्ताः पूर्वत्र निर्दिष्टास्ते रोद्धव्या विमुक्तये" इत्यनेन भक्तिनिरोधयोः कार्यकारणभावसङ्गतिर्निरूपिता। सङ्गतिं सूचयन्तोत्र भूम्युद्धरणमपि भक्तत्वादेवेत्याहुः—**भक्तत्वादिति**। भारहरणाद्धेतोर्दुःखाद्भूमेरुद्धारो भक्तत्वान्निरूपित इत्यर्थः। तथा च कार्यकारणभावसङ्गत्या भक्तानामेव निरोधः स्कन्धार्थो, न तु दुष्टभूभुजां प्रलय इति भावः ॥ १३ ॥ **प्रकट इति**। **यदा परमानन्दः** पुरुषोत्तम एव **प्रकटो** भवति **तदैव भूमेर्दैत्यकृतमर्दनक्लेशहानिः स्यादिति** हेतोस्तस्याः पृथिव्याः **समुद्यमः**, ब्रह्मशरणगमनद्वारा भगवत्समीपगमनम्। तथा चोक्तं सुबोधिन्यां द्वितीयस्कन्धसप्तमाध्याये "भूमेः सुरेतरवरूथविमर्दिताया" इति श्लोकविवरणे 'मर्दनक्लेशाभावार्थं साक्षादानन्दमयः, पुत्रत्वेन जननार्थं प्रद्युम्नः, धर्मरक्षार्थमनिरुद्धो नारायणांशः, भूमिभारनिराकरणार्थं सितकृष्णकेशांश इति ॥ १४ ॥ **ब्रह्मेति**। **अत एव भूमेः** केवलभक्तत्वादेव। ब्रह्मरुद्रादिदेवानामन्य**संश्रयः** भूमिसंश्रयः। ब्रह्मादयो भक्ता अपि अधिकारित्वात् स्वयं विज्ञापयितुमशक्ताः केवलभक्तां भुवमग्रे कृत्वा विज्ञापितवन्त इत्यर्थः। **भक्तानामेवेति**। अतो **भक्तानामेव** निस्तारकरणादेतेषामेव प्रपञ्चस्य निरोधो विस्मृत्यात्मक आत्यन्तिकप्रलयरूपो ग्राह्यः। द्वादशस्कन्धे आत्यन्तिकप्रलयस्य मोक्षात्मकत्वेन स्वीकारात्। तथा च निरोधशब्दस्य प्रलयवाचकत्वेपि भक्तानां प्रपञ्चस्य विस्मृत्यात्मक एव लयः आसक्त्यङ्गत्वेन स्कन्धार्थः स्वीकर्त्तव्यो, न तु दुष्टभूभुजां प्रलयः स्कन्धार्थ इति भावः ॥ १५ ॥ ननु अप्रकट एव भगवान् भक्तनिरोधं कुतो न कृतवानित्याशङ्क्याहुः—**पावकेति**। काष्ठाद्बहिःस्थितो वह्निर्वा मथनादिना प्रकटो वा वह्निर्यावत्काष्ठं न प्रविशेत् तावत्पर्यन्तं एष वह्निः काष्ठमध्यस्थितोपि दारुदहनसमर्थो न भवति, एवं सर्वव्यापकोपि विष्णुः प्रकटो भूत्वा भक्तहृदयादिकं न **प्रविशेत्तावत्पर्यन्तं** सर्वं भक्तदेहेन्द्रियादिकं विलयं न प्राप्नोति। लौकिकत्वपरित्यागेन अलौकिकत्वं न प्राप्नोतीत्यर्थः। **इति हेतोः कृष्णसमुद्यमः** 'आविवेशांशभागेने'त्यादिप्रकारेण अवतारार्थं भगवदुद्यम इत्यर्थः। एतेन कृष्णोद्यमरूपस्य द्वितीयाध्यायार्थस्य स्कन्धार्थप्रकरणार्थाभ्यां सङ्गतिरपि सूचिता। उद्यमस्यावताराङ्गत्वम्। अवतारस्य निरोधाङ्गत्वमिति ॥ १७ ॥ अथ रूपान्तरस्वीकरणस्य तृतीयाध्यायार्थस्य स्कन्धार्थेन सह हेतुत्वरूपां सङ्गतिं दर्शयन्तः प्रयोजनमाहुः—**रूपान्तरं त्विति**। "बभूव प्राकृतः शिशुरि"त्यत्रोक्तं रूपान्तरं नटवत् स्वीकृत्य **त्रिविधान्** तामसराजससात्त्विकभावापन्नान् **निजान्** भक्तान् **उज्जहार** उद्धृतवान्। एवं स्कन्धार्थं विचार्य प्रकरणानि विभजन्ते—**पञ्च प्रकरणानीति**। स्पष्टम्। एवं प्रकरणचतुष्टयाध्यायसंख्यामभिधाय गुणप्रकरणसंख्यां तत्रोपपत्तिं चाहुः **भगवानेव नान्योत्रेति**। अत्र स्कन्धे **भगवानेव** ऐश्वर्यादिगुणवानेव निरोधकर्ता निरूप्यते, न तु **अन्यो** निर्धर्मकादिस्तदर्थं षण्णां भगानामैश्वर्यवीर्ययशःश्रीज्ञानवैराग्याणा**मभिधा** निरूपणम्। तथा च षड्भिरध्यायैर्गुणप्रकरणमित्युक्तं भवति ॥ १८–२१ ॥ एवं प्रकरणानि विभज्य चतुर्भिर्जन्मप्रकरणनिरूपणे हेतुमाहुः—**चतुर्मूर्तेरिति**। वासुदेवसंकर्षणप्रद्युम्नानिरुद्धानां क्रमेण तत्तत्कार्यार्थं चतुर्ष्वध्यायेष्वाविर्भावो ज्ञेयः। तदुक्तं निबन्धे "प्रथमे वासुदेवोभूद्वसुदेवहृदि स्थितः। मृत्युवारणसामर्थ्यमन्यथा न भवेत् क्वचिदि"त्यादि ॥ २२ ॥ अथ जन्मप्रकरणीयाध्यायार्थानाहुः—**हेतूद्यमेति**। भगवदवतारहेतुः भक्तदुःखं प्रथमाध्यायार्थः। अवतारार्थं भगवदुद्यमो द्वितीयार्थः। रूपान्तरस्वीकरणं तृतीयार्थः। मायाकार्यं कापट्यं चतुर्थार्थः। एवं हेत्वादिभिरध्यायार्थैः **प्रथमो** जन्मप्रकरणार्थरूपो भगवान् महानित्यर्थः। प्रथमप्रकरणार्थरूपो भगवांश्चतूरूप इत्याहुः—**प्रद्युम्नश्चानिरुद्धश्च वासुदेवस्तथा पर** इति। परः संकर्षणः। 'अत्र निबन्धानुरोधादयं क्रमो न विवक्षित' इत्युक्तं टिप्पण्याम्। निबन्धे हि "प्रथमे वासुदेवोभूद्वसुदेवहृदि स्थित" इत्यादिना वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्ध एव क्रमेणोपपादिता इति स एव क्रमो ग्राह्यः ॥ २३ ॥ **हेतुश्चेति**। भगवदवतारे भक्तदुःखं हेतुस्तस्य त्रैविध्ये तात्पर्यमाहुः—**गुणा** इति। सत्त्वादयो गुणा एव **भक्ताहितप्रदाः** भक्तदुःखदायका इत्यर्थः। भक्तदुःखहेतोस्त्रैविध्यं विवृण्वन्ति **कंसादेरिति**। भक्तगतं दुःखं त्रिविधमित्यर्थः। अत्र श्रीवल्लभगोस्वामिनः "कंसादिकृतं दुःखं भूमेः। कालरूपाकाशवाणीकृतं दुःखं मातुः। भगवदवताराज्ञानकृतं दुःखमन्येषां सर्वेषामिति विभागः। "नन्दाद्या ये व्रजे गोपा" इतिवाक्यश्रवणानन्तरं कंसेन कृतं दुःखं भगवदवताराज्ञानाज्जातं ज्ञेयं, अनेन दुःखेन भगवानवतरिष्यतीति ज्ञाने तु दुःखं न भवेदिति भाव" इति व्याख्यातवन्तः। श्रीपुरुषोत्तमस्तु आवरणभङ्गे "कालो द्वापरकलिसंधिरूपस्ततो भूमेर्दुःखम्। कंसादेर्मातृदुःखमज्ञानजनितम्। कंसमूर्खत्वजनितमन्येषा"मिति व्याचख्युः ॥ २४ ॥ **यथायोग्यमिति**। भगवदवतारहेतुभूतदुःखनिरूपकेत्राध्याये **एषां** भूम्यादीनां यथायोग्यं दुःखं निरूप्यते ॥२५॥ **प्रश्न इति**। अत्र प्रथमेध्याये प्रकरणत्रयात् **प्रश्नोधिकः प्रोक्त** इत्यर्थः। **स्कन्धद्वितयवर्तन** इति। "देहं मानुषमाश्रित्य कति वर्षाणि

वृष्णिभिरि'तिप्रश्न एकादशस्कन्धीयप्रमेयविषयकः। अन्ये प्रश्ना दशमार्थविषयकाः। तथा च प्रथमाध्याये चत्वारि प्रकरणानि। प्रश्नप्रकरणं भूमिप्रकरणं मातृप्रकरणम् अन्यप्रकरणं चेति। तदुक्तं निबन्धे, "प्रश्नेन सहिताः पूर्वं चतस्रः प्रक्रिया मता" इति। सुबोधिन्यां च 'तत्र दशभिः श्लोकैर्भूमिसान्त्वनं वाचा। उपायेन देवक्याः पञ्चत्रिंशद्भिः। ततोष्टभिः सर्वथा'मिति ॥ २६ ॥ **अनुवाद** इति "कथितो वंशविस्तार" इत्यादिसार्द्धश्लोकेन नवमस्कन्धोक्तचरित्रानुवादः, "निवृत्ततर्षैरि"त्यनेन चरित्रस्तुतिश्चेत्युभौ स्तुत्यनुवादौ श्रोतुर्भक्तत्वज्ञापकौ। पूर्वोक्तानुसंधानेन अनुवादसामर्थ्यं भक्तस्यैवेति भावः। **अन्यथेति** भक्तत्वाभावे इत्यर्थः॥ २७ ॥ **अज्ञानमिति**। 'पितामहा मे' इत्यादिना भगवन्माहात्म्यकथनेन परीक्षिता स्वस्य कृष्णविषयकमज्ञानमन्यथाज्ञानं च विनिवार्यते। तथा च त्वदुक्ते भगवन्माहात्म्ये मम विश्वासो भविष्यतीति परीक्षिता शुकं प्रति स्वाधिकारो बोधितः। **प्राणनत्वमिति**। "नैषातिदुःसहा क्षुन्मामि"त्यनेन हरिकथामृतस्य जीवनसंपादकत्वं यदुक्तं तच्छुकस्य दयासिद्ध्यर्थम्। **एवं प्रश्न** इति। "नैषातिदुःसहे"ति श्लोकस्य प्रश्नरूपत्वाभावात्तं विहाय द्वादशभिरिति भावः। द्वादशभिः प्रश्ने हेतुमाहुः—**गुणदोषग** इति। षड्गुणा ऐश्वर्यादयः। लोके दोषत्वेन प्रसिद्धा धर्माश्च षट् मातुलमारणादयः। उभयविषयकत्वात्प्रश्नस्य गुणदोषविषयकत्वमित्यर्थः। गुणवाक्यसाम्यं दोषवाक्यानामयुक्तमित्याशङ्क्याहुः—**समत** इति। यथा गुणा उत्तमास्तथा लोके दोषा अप्युत्कटा इति गुणदोषयोः साम्येन राज्ञा प्रश्नः कृत इति गुणवाक्यसाम्यं दोषवाक्यानां युक्तमित्यर्थः। **समत** इति भावप्रधानो निर्देशः, समत्वादित्यर्थः॥ २८½ ॥

श्रीकृष्णाय नमः

श्रीगोपीजनवल्लभाय नमः

श्रीमदाचार्यचरणकमलेभ्यो नमः

शास्त्ररीत्या बुभुत्सुबोधिका

सा च श्रीकृष्णास्य–वाक्पति–वैश्वानरावतार–श्रीमद्वल्लभाचार्यप्रकटितश्रीमद्भागवतदशमस्कन्धश्रीसुबोधिन्याः सर्वज्ञ–कृत्यकृत्य–हृदीश्वर–श्रीयोगिगोपेश्वरजिकृता व्याख्या।

प्रथमोऽध्यायः

श्रीकृष्णाय नमः। १०–१–का. १. 'नवमाध्याये चिद्व्यामोहिका शक्तिरुक्ता। तस्यास्तमोरूपमायायाः सर्वथा तरणं वाक्पते'र्धाम्ना स्वेन सदा निरस्तकुहक'त्वात् तदुक्तनिरोधेन भवतीति वस्तुनिर्देशनमस्कारात्मकं द्वन्द्वं 'वेदवेदान्तसारं श्रीभागवत'मिति श्रीभागवतमाहात्म्यान्मङ्गलमाचेरुः **नमामीति**। नमनसिद्धान्तः पञ्चमस्कन्धात्। तापिनीयप्रसिद्धनमनमिति वेदान्तसारम्। वस्तुसारं वैदिकम्। **हृदयं** हृदि अयं हृदयमिति छान्दोग्ये। ङेः सुरिति छान्दोग्यीयव्युत्पत्त्या व्याकरणव्युत्पत्तिबले हृदयमिति साधयति। अत्र हृदयमित्यत्र अकारे लुक्, ङेर्लुक् वा इकारेण गुणः। **हृदयं** शेषः तस्मिन्नित्यर्थः। **हृदय** इति समस्यन्ते तु वेदान्तव्याकरणे ङेर्लुग्वा, हृदि हृदये अय शेषः तस्मिन्। हृदादिव्युत्पत्तिस्तु हरति ह्रियते वा वृह्रोः षुकदुकौ चेति यत्नः बाहुल्कात् केवलोपि दुक् हृत्, तदाहुः **हृदय** इति। कृष्णनिविष्टे मनस्ययं शेषः, तस्मिन् शब्दार्थसाधारणे ब्रह्मणि शेषे शब्दात्मके तदध्यस्तेऽनन्तरूपेर्थे। 'एको रुद्रो न द्वितीयाय तस्थे' इति श्रुतेः। भेदान्वये तु 'यस्यान्तकरणं गिरित्र'मिति वाक्यात् हृदयाधिकरणके शेष इति भवति, स न टिप्पण्याम्, अयं भक्तिजनकव्याख्याने, अभेदान्वयस्तु तदाज्ञया शास्त्ररीत्या बुभुत्सुबोधिकायामपीति ज्ञेयम्। तादृशे श्रीशुकरूपे यो **लीलाक्षिराब्धिः** निर्धर्मकत्ववारकः, तत्र **लीला** निर्धर्मकत्ववारिका। **क्षीरं** सर्वप्रतिष्ठास्थानम्। 'पयसि सर्वं प्रतिष्ठित'मिति श्रुतेः। **अब्धिः** सत्यं व्युत्पत्तेः, आपो धीयन्तेऽस्मिन्नित्यब्धिः। निरुक्ताच्च, निरुक्ते सत्यं जलनामसु पठितम्। 'अम्भस्यपारे भुवनस्य मध्ये' इति महानारायणात्। तत्र **शायिनम्**। ज्ञानं श्रीभागवतरूपम्। 'ज्ञानमात्रं परं ब्रह्मे'तिवाक्यात् इति वेदान्तस्वरूपलक्षणलक्षितम्। अथ 'नित्यो निष्कलङ्को निराख्यातो निर्विकल्पो निरञ्जनः शुद्धो देव एको नारायणो न द्वितीयोस्ती'ति श्रुतेः। एवं धर्मिण एवं धर्मरूपेण आविर्भाव उक्तः भक्तवश्यत्वात्। न वृक्षादिरूपधर्मैः नवमाध्यायसुबोधिनीटीकोक्तैः। तत एव। स च विष्णोरेवंविधत्वाभावे नोपपद्यते, अतो विष्णो रूपत्रये इदं महतः स्रष्टृ। तदुक्तं संहितायां 'विष्णोः कर्माणि पश्यते'ति। तथा चैवं तपोरूपं कर्म विष्णोरिति भगवतोपीति भक्तमनोरथपूर्तिः। अत एव टिप्पण्यां शेषाधिकरणकलीलाक्षीराब्धिः पुष्टिरित्युक्तम्। मङ्गलाचरणे भक्तविशिष्टफलस्य पुष्टिमार्गीयस्य मुख्यत्वात्। किञ्च पुष्टिर्मर्यादातो विपरीता। 'त इमे सत्याः कामा अनृतापिधाना' इति छान्दोग्यदहरविद्यायां मर्यादा। अखण्डब्रह्मभाने क्षीराब्ध्यधिकरणकशेषस्यानृतापिधानश्रुतिप्रतिपाद्यत्वम्। न ह्यनन्तः शेषः परिच्छिन्नक्षीराब्धौ सम्भवति। पुष्टौ त्वनन्ते शेषे परिच्छिन्नः क्षीराब्धिः सम्भवतीति 'त इमे सत्याः कामा' इतिश्रुतिप्रतिपाद्यत्वमस्तीति विवेकस्तेन वेदवेदान्तसारे श्रीभागवते महानारायणज्ञाने 'स्वरूपलक्षणे सत्यं ज्ञान'मित्यत्र लीलाक्षीराब्धिरित्याकारकं ज्ञानं 'सत्यं ज्ञान'मित्यस्यार्थः। निर्विषयकज्ञानाभावात् न चायं घट इति ज्ञाने विषयतासम्बन्धोऽत्र त्वभेदसम्बन्ध इत्यपि सत्यमिति वाच्यम्। स्वयम्प्रकाशत्वार्थमभेदसम्बन्धादेकरसत्वाच्च। ज्ञानात्मकं जगदितिपक्षे घटस्य ज्ञानत्वाच्च। अनन्तं तु 'हृदये शेषे' इत्यत्रोक्तमेव। सन्निवेशस्तु पाठक्रमेण ज्ञानमार्गे 'देवस्तुर्यो विभुः स्मृतः' इति श्रुतेः।

---

१. अत्र शोधपत्रमस्तीतिग्रन्थकर्तृभिर्लिखितम्, परन्तु तच्छोधपत्रमस्माभिर्ग्रन्थपत्रेषु न प्राप्तम्।

भक्तिमार्गे 'सर्वं सर्वमयं सर्वे सर्वार्थवाचकाः' इति श्रुत्यनुसरणात्' त्वनन्तस्य शेषरूपत्वेन शय्यादिरूपत्वाद् यथाभक्ति मुख्यार्थादिक्रममाश्रित्य सन्निवेशः । पुष्टिमर्यादाभ्यां विरुद्धधर्माश्रयत्वं ब्रह्मधर्म उक्तः शिवे पाशुपतशास्त्रं समाप्तम् । नारायणे वेदशास्त्रम् । द्वन्द्वप्रयोगो ज्ञापयत्यनुष्ठाने द्वन्द्वं प्रयोक्तव्यमिति । 'कर्माणि द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ती'ति गृह्यसूत्रवत् । अतः परं सर्वोपनिषदादौ ह्यानन्दमपि स्वरूपलक्षणे निविष्टमिति तद्रूपमाहुः **लक्ष्मी**ति । तेन 'तमेत'मिति श्रुत्युक्तं रूपं पूर्वमुक्तम् । 'यदेव विद्यये'ति श्रुत्युक्तमुत्तरार्धे । लक्ष्मी राधारूपा । 'तावुभौ ब्रह्मसावित्र्यावंशेन जगतीं गतौ । तयोर्गेहे महालक्ष्मी'रिति पाद्मात् । राधाष्टमीनिरूपणे उत्सवप्रतानेऽस्ति । इयं ब्रह्मानन्दरूपा । क्षीराब्धेश्चरणाभ्यां मथने बालत्वादाधिदैविकाभ्याम् आचार्यानन्दाविष्टाभ्यां चरणाभ्यां क्रीडार्थमारोपिताधिभौतिकत्वैर्द्रव्यैः सम्बन्धादाध्यात्मिकाक्षरानन्दरूपा क्षीराब्धेर्जाता । भक्तिभ्यां जाता भक्तापि । अत एव नाक्षरे लयः, भक्तत्वात् सहस्रलीलास्ताभिः **सेव्यमान**मित्यात्मनेपदं ज्ञापयति स्वार्थे स्वलयाभावार्थे सेवत इति अतः परं धर्मीदमित्थतया ज्ञातुमशक्य इति महाचम[1]स्यमतेन चन्द्ररूपतामाहुः **कलानिधि**मिति ध्रुवा षोडशी तस्यामन्याः कला निधीयन्ते इति । पुरुषोत्तमोऽवतारी अधोक्षजत्वेप्युक्तो दृश्यत्वेपि चन्द्रस्य त्रिरूपत्वात् । 'यस्यामतं तस्य मत'मिति श्रुतेश्च । अवतारश्चतुःषष्टिकलानिधिः कला अब्मये निस्तेजसि चन्द्रे निधीयन्ते येनादित्येन सोपि कलानिधिः । 'सूर्य आत्मा जगतस्तस्थुष'श्चेति श्रुतेः । तेन द्वितीयपादस्थे 'अन्तर उपपत्ते'रित्यधिकरणे योऽक्षिपुरुषस्तत्र स्थितिः । छान्दोग्यीयोपकोसलविद्या सङ्गृहीता । एतेन प्रथमतो गुरुरहस्यभजनं भावितं 'लक्ष्मी राधा सत्ता यमुनाजित् श्रीस्वामिन्यो गुरवोत्र न' इत्याचार्याः । पूर्णमपीदं वक्तव्यम् । 'अपश्यत् पुरुषं पूर्ण'मितिवाक्यात् । 'व्यासोऽस्माकं गुरु'रित्याचार्याः **लीलाक्षिराब्धिशायी** स्वयम् । **लक्ष्मीः** स्त्री धनं च । **कलानिधिः** पुत्रः शेषो वा । 'नारायणाद्रुदो जायते' इति नारायणोपनिषदः । कर्माणि भक्तमनोरथपूरकाणि । तथा च बृहदारण्यके साकारं ब्रह्म, 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतेः । 'अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मे'तिश्रुतेश्च ते च महत्प्रतीत्या निश्चीयन्ते । तथा साधनैः सजातीयविजातीयद्वैतरहितम् । स्वगतद्वैतस्य राजसताम[2]सज्ञानविषयस्य सात्त्विकज्ञानेनापाकरणात् सात्त्विकज्ञानमात्रविषयस्याद्वैतस्य सिद्धिः । 'मनसैवानुद्रष्टव्यं' 'नेह नानास्ति किञ्चने'ति बृहदारण्यकात् । ननु कृष्णमूर्तिर्गोपालतापिनीये कृष्णोपनिषदि च, किञ्च द्वितीयस्कन्धे सिद्धान्तनवमेध्याये चतुर्भुजं रूपमुक्तमिति ब्रह्मप्रकरणे च सर्वतः पाणिपादान्तत्वादिरूपमिति तद्विहाय कुत इदं नारायणरूपमुच्यते ? उच्यते । 'कृष्णमूर्ति'रित्यादिनोक्तमस्त्येव । यदुक्तं 'ब्रह्मप्रकरण' इत्यादि तत्तु पुरुषविद्यायामित्यक्षरतुल्यमिति नाचार्यस्थितिः । किन्तु 'सोश्नुत' इति श्रुत्युक्तविपश्चित्त्वेनोपस्थितपरब्रह्मणि । परत्वं न विपश्चित्त्वं, सूर्येतिव्याप्तेः, सत्यज्ञानानन्तविपश्चित्त्वस्य परब्रह्मलक्षणस्य । किन्तु अव्यक्तात् कालकृतं देशकृतं च परत्वम् । तेन पुरुषविद्योक्तेषु पुरा आसेतिव्युत्पन्ने स्थितिः । न तु सहस्रशीर्षिणि । तस्य 'नवाम्बुदानीलमनोहराये'तिग्रन्थोक्तस्य च तथा सप्तस्वरूपाणां च तदुपासकपुराविदनुसृतश्रयाचार्यमार्गीयविशेषपरत्वेन सकलसाधारणरूपत्वाभावात् । 'नमामि हृदये शेषे' इत्युक्तस्य सकलसाधारण्यम् । नन्वेतेष्वेव किञ्चिद्रूपं वक्तव्यम्, मूलस्य 'यतो वाचो निवर्तन्त' इति निषेधादिति चेन्न, 'भक्त्या ग्राह्य'त्वेना 'चार्यवान् पुरुषो वेदे'ति श्रुत्या चात्र विश्रान्तेः । अन्यथाऽक्षरविश्रान्तेः तत्तद्भक्तभावितविशेषरूपविश्रान्तेश्च शास्त्रवैयर्थ्यप्रसङ्गात् । तेन 'यदेकमव्यक्तमनन्तरूप'मितिश्रुताविदं मूलरूपमन्येषु रूपेषु । अत एव 'नारायणसमो गुणै'रिति गर्गवाक्यम् । योगमायाच्छन्नं तु कृष्णत्वेन प्रतीयते । अतः साकारः । तेनाचार्याणां षट्शास्त्रीये रूपे तात्पर्यं ज्ञायते । शेषे पाशुपतं शास्त्रम् । लीलाक्षीराब्धिशायिनि वेदवेदान्तशास्त्रे समाप्ते । 'लक्ष्मीसहस्रलीलाभिः सेव्यमान'मित्यत्र साङ्ख्ययोगौ शास्त्रे पञ्चरात्रं च शास्त्रं समाप्तम् । तथा 'प्रणवो धनुः शरो ह्या[3]त्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवे'दितिश्रुत्या हृदयाभिन्नशेषो धनुः प्रणवत्वात् । स च नवीनभावजनक इति भक्तमनोरथेनान्याचार्यविलक्षणा नूतनाश्च भावास्तदनुभावा इति लीला तद्रूपः क्षीराब्धिः । क्षीरम् । यस्मिन् सर्वं प्रतिष्ठितं भवतीति सर्वाश्रययोग्यः अधिशब्दो रूढः । [4]ततः शायी नारायणः तत्समः कृष्णश्च, स च शक्तीः शाययित्वा स्वप्नयुक्ताः कृत्वा तत्तल्लीलानुकूलस्थितिरूपा वा कृत्वा । अयमर्थः । शर आत्मा[5] । लक्ष्यं ब्रह्म । नारम् अयनं यस्य तत् । अप्रमत्तः प्रमादरहितः तेन अप्रमादेनेति वा । एतद् बलतपसोरुपलक्षणम् । 'नायमात्मा बलहीनेने'तिश्रुतेः । एवं भक्तिमार्गानुसारेण । वेद्धव्यम् । व्यध ताडने तड आघाते । आघात इति हन हिंसागत्योरित्यस्य रूपम् । अतः प्राप्तव्यमित्यर्थः । शरो लक्ष्ये लक्ष्यप्रचुर इव [6]ब्रह्मप्रचुरो भवेत् । ततस्त्वत्यन्तानुग्रहे सम्पद्याविर्भावे [7]पुष्टिलीला आहुः लक्ष्मीत्यत्रे'ति । तेन पुष्ट्यनुभवः । उत्तरार्धे मर्यादायाः । 'यदेव विद्यया करोति श्रद्धयोपनिषदा वे'ति श्रुत्युक्तं सेवनमुक्तम् । पूर्वार्धे तु 'तमेतं वेदानुवचनेने'त्युक्तं ज्ञानमित्युक्तम् । ज्ञानस्य भक्तित्वे तु सेवापि । 'ज्ञानं क्रिये'ति पञ्चरात्रे भक्तिज्ञानयोः सामानाधिकरण्यात् । भक्तिमार्गस्य बहुविधत्वात् । पूर्वार्धे मनसि सर्वतो निवृत्तव्यापारे स्वयमुपलब्धनिजसुखानुभवरूपब्रह्मज्ञानमुक्तम् । तेन 'ज्ञानी त्वात्मैव मे मत' इति ज्ञानी पूर्वार्धे, उत्तरार्धे तु 'ज्ञानी चेद् भजते कृष्ण'मिति भजनमुक्तम् । 'सहस्रलीलाभि'रित्युक्त्या स्वमार्गोपि तदन्तर्गतः । 'भूर्लक्ष्मीः भुवर्लक्ष्मीः सुवः कालकर्णी तथा महालक्ष्मी'रिति सर्वस्य लक्ष्मीरूपत्वात् । तदिदं स्वमार्गभजनं भक्तिहंसे उक्तम् । स्वरूपान्तर्गतो भेदः 'अविभक्तं' च

---

[1] 'महाचमस्यः श्रुतय' इति तैत्तिरीयभाष्ये । [2] 'अभ्यर्हितं पूर्व'मिति राजसपदस्य पूर्वनिपातः । [3] =मनः ।
[4] शक्तिसङ्कोचलक्षणा रूढिः । [5] =मनः । [6] ब्रह्म=आत्मा, मन एव आत्मा । [7] नारोपयोगः, अलौकिकत्वे देहानां नाराणाम् ।

भूतेषु विभक्तमिव च स्थितम्' इत्यक्षरात् परेपि ज्ञेयः। अतः **सेव्यमानम्**। सेव्यसेवकभावस्य क्रीडान्तर्गतत्वात्। 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतेः, सर्वतः पाणिपादान्तत्वेनैकक्रीडासामग्रीरहितं यावत् तावदेकमिति व्यवह्रियते। शास्त्रीयरूपवत्। अतो 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्ये'दित्यादि केन भिन्नेन करणेन कं भिन्नं कर्म आत्मानम्। ननु घटपटकुड्यकुसूलान्युत्पद्यन्त इतिज्ञाने बहुत्वप्रतीतिः। बहुत्वविशिष्टकुड्यादिनिष्ठा वर्तमानोत्पत्त्यनुकूला बहवो व्यापाराः। अकर्मकत्वेन कुड्यादिनिष्ठमेव फलमिति चेन्न। राजसादिज्ञानविषयत्वेन बहुत्वस्य भ्रमसंशयज्ञानविषयत्वात्। सात्त्विकज्ञानविषयत्वे तु एकमेव ज्ञानम्। गीतावाक्यात्। 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इत्यवस्थितमतवाक्ये मिश्रसत्त्वनिषेधेन शुद्धसत्त्वसत्त्वात्। अधुना 'नारायणपरा वेदा' इत्यादिबहुश्रुतिप्रतिपाद्यत्वेपि 'नारायणपरायणः सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुन'इतिवाक्यात् भक्तदौर्लभ्यद्योतितनारायणपरायणदौर्लभ्येन नारायणोत्कर्षेपि 'यतो वाचो निवर्तन्त' इति श्रुतेरधोक्षज इतिनाम्नः अन्योन्यश्च वाक्येभ्यः स्वज्ञातनारायणसमं महाचमस्यमतेन चन्द्ररूपं तैत्तिरीयश्रुतेराहुः। किंचारणप्रत्यक्षाभ्यां सूर्यं स्मृतिप्रत्यक्षानुरोधेनाहुः। ब्राह्मणानुरोधेन सूर्योग्निरित्यग्निमाहुः। विराजमाहुः **कलानिधिमिति**। श्रुत्यनुसारेण कृष्णमाहुः। तद्विदः। 'गूढं ब्रह्मणि वाङ्मय' इतिवाक्यात्। तथा च श्रुतिः 'अविज्ञातं विजानतां विज्ञातमविजानता'मिति केनोपनिषदि।

१०–१–का० २. नन्वाचार्यकृपाभावे आचार्यसन्दर्शितागमत्वम[1]पेयात् तदर्थं कृपाज्ञापकः स्वानुभावो वक्तव्य इति चेत् तत्राहुः **चतुर्भिश्चेति**। **चतुर्भिरध्यायैश्चतुर्भिः प्रकरणैः पुनश्चतुर्भिः प्रकरणैः पुनस्त्रिभिः** सात्विकानामन्तःकरणप्रामाण्यान्न प्रमाणापेक्षा 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति श्रुतौ सावधारणोक्तेः। तर्हि सर्वेषां मनसा दर्शनं स्यादिति चेत्, महतामन्तःकरणं प्रमाणं प्रमाकरणं न त्वन्तःकरणमात्रमिति। यथोद्धवबालक्रीडने एकादशाध्यायसंवादः। **षड्भिरध्यायै गुणप्रकरणमिति**। अत्रेदं ज्ञेयम्। 'लक्ष्मीसहस्रलीलाभिः सेव्यमान'मित्युक्तम्। स चा'त्मानन्दसमुद्रस्थ' इति तं कृष्णं कृपया चिन्तनविषयमुपनिबबन्धुः। ननु दशमे लक्ष्मीः सर्वत्र कथं, वृषभानुगृहे राधारूपास्तु, 'श्रयत इन्दिरा शश्वदत्र ही'ति वाक्यमपि तत्परमस्त्विति चेन्न। नृसिंहतापिनीये 'भूर्लक्ष्मीर्भुवर्लक्ष्मीः सुवः कालकर्णी तता महालक्ष्मी'रिति श्रुतेः। **पञ्चधेत** व्यष्टिभावनार्थम्। तेन गणनेन पञ्चत्वलाभेपि न क्षतिः। **हृदय** इति 'स मानसीन' इति श्रुतेः। **ममेति**पदात् परत्वे पादादौ स्थितत्वेपि न 'मे' आदेशः। अग्रेतनपादादिस्थितत्वं गौणमादाय सूत्राप्रवर्तनात्। कृपया लोकं ग्राहयितुं लक्ष्मीलीलान्तर्गतस्वयोग्यभावविषयस्य कृष्णस्य प्रमाणप्रकरणोक्तप्रातराशवनक्रीडासायमाशसम्बन्धिनो निरोधलक्षणग्रन्थोक्ताधिदैविकसेवया भगवतः स्वद्वारा भुवि प्राकट्यकर्त्र्या सह चिन्तनम्। तदुक्तम् 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति। पाठक्रमेणार्थः। निरोधविधया सर्वतो निवृत्तव्यापारे मनसि स्वयमुपलब्धनिजसुखानुभव इदमेव ब्रह्मज्ञानम्। तदुक्तं 'हृदये शेषे लीलाक्षीराब्धिशायिन'मित्यनेन तदन्वपि श्रवणादिः। 'आत्मारामाश्च मुनय' इति वाक्यात्। अवैधभक्तिश्च। गुणगानेन तदध्याससिद्धिः। 'तत्त्वमसी'त्युक्तस्य तदध्यासस्य सिद्धिः। 'कथामात्रावशेषिता' इतिवाक्यात्। किञ्च पञ्चधोपनिषदि मुण्डके कर्मज्ञानभक्तिमुण्डकोक्तसाधनैः भगवदाविर्भावे प्रश्नोपनिषदा 'संवत्सरकालतज्जन्यसूर्यचन्द्रादित्वरूपेण भगवज्ज्ञाने जन्मप्रकरणाध्यायचतुष्कम्। तत आत्मविद्योपनिषदा रुद्रब्रह्मविष्णुरूपैरुक्तस्वामिनवज्ञातस्य श्रीमन्नन्दराजकुमारस्य क्रीडास्तामसराजससात्त्विकप्रकरणैः। तदनुगुणप्रकरणे 'कृषिर्भूवाचकः शब्द' इत्युक्तः कृष्णः। स च पुराणो भगवानिति गुणप्रकरणे सः। तत एकादशस्कन्धे 'देवस्तुर्यो विभुः स्मृत' इति माण्डूक्योपनिषदुक्तः।

१०–१–का० ३–४, ननु ह्यग्निहोत्रं जुहोति यवागूं पचतीतिवद् आत्मा श्रोतव्यो द्रष्टव्यः इत्यार्थक्रमः, तथा च श्रुतिः 'वेदान्तविज्ञानसुनिश्चितार्था' इति, इति चेत् तत्राहुः **दशमेति**। सत्यं, वेदान्तविज्ञानेन परम्परयात्मदर्शनं परन्तु भूयसामुपनिषद्भागानां वैयर्थ्यापत्त्या वेदान्तविज्ञानं शाब्दं, तच्च स्वव्यापारं कर्मज्ञानभक्तिरूपं मुण्डके निरूपितमपेक्षते इति **दशमार्थः** प्रकरणाद्यर्थाश्च स्वाध्यायवत् स्वाध्यायत्वार्थमपेक्षन्ते, आर्थक्रमे तु पाठक्रमत्यागहेतोरभावः शाब्दापरोक्षं चेति दोषद्वयम्। **विचार्यत** इति 'अविचारिताश्च शब्दा नार्थं प्रत्याययन्ति'। तथा सति 'योन्यथासन्तमात्मान'मिति दोषापत्तिः। ननु दशमार्थे सन्देहाभावाद् विचारः कुत इत्यत आहुः **नवेति**। यथा नवलक्षणलक्ष्य आश्रयस्तथा कृष्णोपि **नवलक्षणलक्ष्य** इति नवलक्षणलक्ष्यत्वात् कृष्णस्य तन्निरूपणं दशमार्थे सन्देहबीजम्, हीति निश्चयेन। 'कृष्णो हि परमं दैव'मिति गोपालतापिनीये, 'अहं सर्वस्य प्रभव' इति गीता। 'समान एवं चाभेदा'दिति व्याससूत्रम्, अतो निश्चय इत्यर्थः। द्वितीयकोटौ पाठक्रमभावित्वान् **निरोधः**। अत्र पाठक्रमः सन्देहबीजम्। पूर्वपक्षमाहुः **लीलानिधिरिति**। लीला दशविधाः तत्र दशविधत्वनिर्धारकोर्थः सर्गादिरूपो न तु पाठक्रमः। अतोत्र **क्रममात्र** क्रम एव दुर्बलः। तुना अर्थसहितक्रमस्तु न दुर्बलः।

१०–१–का० ५. ननु क्रमो ह्यृषिप्रणीतस्तेनैव क्रमेण श्रवणं दर्शनफलसाधकं न यथाकथञ्चिदिति चेत् तत्राहुः **यथेति**। फलं दर्शनम् 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति श्रुतेः। **लोक** इति द्वादशस्कन्धे सप्तमाध्याये लौकिकभाषायाम्। **प्रकृत** इति समाधिभाषोक्तभक्तियोगे निरोधे। नेति प्रथमस्कन्धे वाक्यात्। गौणमुख्यन्यायेन महानन्यायश्च स्यात्। न च लौकिकीभाषात्रापि, ततः पोषको निरोधः कुतो नेति चेन्न। पोष्यनिरोधसापेक्षत्वात् पोषकस्य निरोधस्य शुद्धलीलाबोधकस्कन्धार्थत्वात्।

---

[1] 'इति भारतमाख्यानं कृपया मुनिना कृत'मितिवाक्यात् वक्ष्यमाणागमत्वकृतव्याख्यानरूपयोः कार्यकारणभावः।

[2] सङ्ख्यातात्पर्यमिदम्, यद्वा प्रश्ने परब्रह्मान्वेषणोक्तेस्तद्रूपाणि।

१०–१–का० ६. अतिव्याप्त्या नेत्याहुः प्रतीत इति। अन्यत्रैकादशे। शरीरेण महत्त्वात् स्कन्धस्य। अन्यल्लेखे स्पष्टम्। नन्वाश्रये निरूपयिष्यमाणे लीलाभिधातो मुख्या तात्पर्यवृत्तिः कृष्णमाश्रयं प्रतिपाद्यत्वेन दशमे द्योतयिष्यतीति चेत् तत्राहुः कृष्ण इति। तथा चात्र कृष्णप्राधान्याभावाद् भक्तप्राधान्येन तत्सम्बन्धिनीनां लीलानां वाचकानि बहूनि पदानि सन्ति तानि मुख्यानि। 'सोश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति श्रुतौ स इति भक्तस्वातन्त्र्येण तत्प्राधान्यात्। ब्रह्मत्वप्रधानं ब्रह्मणेत्यप्रधानतृतीयायाः। 'निवेदितात्मा विचिकीर्षितो म' इतिवाक्यात्। नातोन्योर्थः कल्पनीयः।

१०–१–का० ९. अथ निरोधलक्षणं विवृण्वन्ति स्म निरोध इति। 'निरोधो भगवद्रूप' इति द्वितीयसुबोधिन्याम्। अन्यथा लोकन्यायेन 'सच्चिदानन्दता ततो' न स्यात्। विजातीयत्वात्। अस्य हरेः। अनुशयनं निरोधः। टीकान्तरे त्वनुरूपं शयनं लीलानुरूपं शयनम्। ननु गौणमुख्यन्यायः प्रवर्ततां ततो निरोधो भगवद्धर्म इत्यपि सङ्गतं भविष्यतीति चेत् सत्यम्। कारणधर्मस्य कार्ये हरौ निरूपणात्। 'भगवान् भक्तभक्ति[१]मा'नितिवाक्यात् कारणधर्मः। अत उक्तम् अनुशयनमिति। अनुपश्चाच्छक्तिः शाययित्वा स्वप्नयुक्ताः कृत्वा। शीङ् स्वप्ने। शयनं स्वस्य स्वप्नकरणम्। तथा च कल्पः। इषेत्वोर्जेत्वेति शाखां छिनत्तीति। शाखा खशाया। खमाकाशम्। 'आकाशशरीरं ब्रह्मे'ति श्रुतिः। तत्र शेते स्वप्नं कुरुते। शाखृ व्याप्तावतो यथादृष्टं सर्वत्र स्वप्नकरणम्। इति संहितामते। वेदान्ते तु 'भूतानां छिद्रदातृत्वं बहिरन्तरमेव चे'ति छिद्राणि जीवाः बहिरन्तरं देहस्थानीयम्। जाग्रत्स्वप्नसुषुप्तयोऽवस्थाः। ज्ञानत्वाज् जीवानाम्। हरिः कश्चिद् भक्तसम्बन्धी धर्मिधर्मः 'ब्रह्मणीत्थं हरिर्मतः' इति सिद्धान्तमुक्तावल्याः। महानारायणे च वह्निशिखाया धर्मः। हरति दुःखमिति हरिः। यथा प्रपञ्चनिर्माणानन्तरं स्वप्राप्त्यर्थं भक्तिमार्गं निरमासीत्, तथा तद्विषयं हरिरूपमपि वह्निशिखाधर्मं परमात्मानं कृतवानिति। निरोधो लक्ष्यम् अस्यानुशयनं लक्षणम्। तच्चातिव्याप्तं सर्वत्र शक्तीः शाययित्वा शयनात्। 'तत् सृष्ट्वा तदेवानुप्राविश'दितिश्रुतेः। तत् स्वप्नयुक्तं जगत्। तत्परिहाराय विवृण्वन्ति स्म प्रपञ्च इति। प्रपञ्चस्य शब्दात्मकस्य वैदिकस्य ग्रहणम्। तेन सर्वप्रपञ्चनिरासान् नातिव्याप्तिः। किञ्च प्रपञ्च इति वक्तव्यम्। अन्यथा दुर्विभाव्यशक्त्यन्तर्गतविस्मारकशक्तेः स्मरणांशे निर्विष[२]यत्वापत्तेः। तथा च स्मरणस्वरूपालाभे तत्प्रतियोगिकाभावाबोधापत्तेः। न च प्रपञ्चविस्मारकशक्तिर्दुर्विभाव्यशक्तिर्न तु विस्मारकमात्रमितिवाच्यम्। 'ज[३]गद्व्यापारवर्जं'मितिसूत्रविरोधात्। 'मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपी'तिवाक्यात्। क्रीडनमनुश[४]यनसहितमित्यनुशयनविवरणं क्रीडनम्। अन्यत्र स्कन्धार्थेष्वतिव्याप्तिरतो हरेरिति। क्रोडादिरवतारो न तु हरिः। हरिपदं तत्रान्यथा योज्यम्।

१०–१–का० १०. 'निर्धर्मको वा भिन्नो वा निरोधं कुरुते यदि। तदा निरोधो व्यर्थः स्या'दित्यत्रोक्तभिन्नकर्तृकनिरोधापत्त्या व्यर्थत्वं स्यात्, तन्निवारणायाग्रे लक्षणम्। शक्तिभिरिति। तदापि पूतनामारणक्रीडायामव्याप्तिश्चरित्रमात्रे लक्षणगमनं न वीर्ये, अतः दुर्विभाव्याभि'रिति वीर्यरूपाभिः। ननु तथापि ऐश्वर्यादिचरित्रनिरूपकेषूत्सवाध्यायादिष्वव्याप्तिरिति चेन्न। 'दुर्विभाव्याभि'रित्यत्र मुख्ये सम्प्रत्ययात् तेन चरित्ररूपशक्तीनामपि ग्रहणात्। भिन्नकर्तृकनिरोधाभावायात्मपदव्याख्यानम्। कृष्णस्येति हरिणा निर्धर्मकत्वभङ्गः शक्तिभिर्दुर्विभाव्याभिः सह हरिधर्मकस्य कृष्णस्य प्रपञ्चे क्रीडनमर्थः, शक्तिसाहित्यवदभिन्नप्रत्यक्षाभिन्नात्मकर्तृकमनुशयनमिति मूले बोध्यः। दुर्विभाव्यत्वनिवेशेन 'कथितो वंशविस्तार' इत्यादिग्रन्थेनुवादस्तुतिप्रश्ननिरूपकेनाव्याप्तिः प्रतीयेतेति चेन्न। दुर्विभाव्यत्वादेव शक्तीनाम्। ननु प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिः सुबोधिन्यां निरोधत्वेनोदाहृतेति लक्ष्यलक्षणविरोध इति लक्ष्येऽव्याप्तिरिति चेन्न। शक्तिभिर्दुर्विभाव्याभिः क्रीडनाङ्गीकारात्। प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिजनशक्तिमत्त्वेनास्याः उदाहरणत्वात्। स्पष्टोदाहरणं चैकोनाशीतितमेऽध्याये। अत एव निबन्धे 'समुदायो जन्मवाची क्रीडायुक्तस्य वै हरेः प्रपञ्चविस्मृतिः सक्तिर्भक्तानां चापि योगत' इति। 'समुदायो' हि धर्मिणोचिन्त्यत्वात् तद्रूपगोविन्दरूपाणाम् इन्द्रियाणां शरीरस्य चात्मतया स्वीकरणात् सः। स च गोविन्दरूप इति सिद्धम्। अतो 'जन्म त्वात्मतया पुंसः शरीरस्वीकृतिं प्राहु'रिति 'जन्मवाची' जन्मवाचकः समुदायशब्दः। तदाहुः 'क्रीडायुक्तस्ये'ति। धर्मग्लानादिभिर्भक्तक्लेशे भक्तानुग्रहाय प्रणीतः क्रीडायुक्तो हरिर्भवति। भक्तिमार्गप्रणयनवत्। क्रीडामाहुः निरोधरूपां 'प्रपञ्चे'ति। इयं 'योगतो' अवयवशक्त्या निरोधक्रीडेत्यर्थः। तथा च प्रश्नोपनिषदि 'अथोत्तरेण[५] तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्वि[६]ष्यादित्यमभिज[७]यत ए[८]ते एतस्माद् वै प्राणानामायतनमेतदमृतमभयमेतत् परायणमेतस्मान्न पुनरावर्तन्त इत्येष निरोध' इति। 'प्राणा' इन्द्रियाणि। तेषाम्। तथा च भगवत आसक्तिर्भगवदासक्तिरित्यपि समासः। लक्षणव्यापार इति सुबोधिनीप्रकाशे। योजनायां च। योजनायां तु प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिर्लक्षणव्यापारभूता साधिता। हरित्वगुणविशिष्टकृष्णक्रीडनम्। शक्तयश्च परमानन्दमुक्तिदयादयः कलिकामक्रोधादयश्च। तैः क्रीडनं लक्षणं तेन योज्यं लक्ष्यं प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपं[९] सुखेन प्रतीयत इति न साधनापेक्षेत्युक्तम्। तेन भरताचार्योक्तं 'या तु व्यसनसम्प्राप्तिर्निरोधः स तु कथ्यत' इति भगवदासक्त्यपेक्षया व्यसननिरोधः कुतो नोक्त इति शङ्कापास्ता। अजामिलोक्तोपचरितनारायण-

---

१. भक्तिः क्रीडापातो निरोधः। २. विषयस्याभावरूपत्वात् तथा। ३. जगद् प्रपञ्चः। ४. उक्तकल्पोक्तस्वप्नसहितं वेदवेदान्तसारत्वात्। ५. उत्तरायणे न। ६. देहमन्विष्य देहेन्वेषणं कृत्वा। ७. 'बहुवचनस्थले एकवचनम्। ८. एते कर्तारः। ९. लक्षणमितिशेषः।

नामवत् कृतार्थतासम्पादकत्वेन लीलाप्रतिबन्धकप्रसङ्गापत्तेः। 'यत्तु व्यसनमासक्ति'रिति योजनायां तल्लक्षणाप्रस्तम्। क्रीडा च द्विविधा। सप्रतियोगिनी निःप्रतियोगिनी च। निःप्रतियोगिनी 'तदेजति तन्नैजती'ति। सप्रतियोगिन्यां प्रतियोगिनः परमानन्द-मुक्तियादयः कल्पादयश्च तत्सम्बन्धिन्यो दशविधलीलाः 'मल्लानामशनि'रित्याद्युक्ताः रसरूपाः। 'गोप्यः कामादि'त्यादिवाक्यात्। द्वितीयस्कन्धसुबोधिन्यां यदुक्तमनुशयनं नाम शक्तोः शाययित्वा तद्भोगार्थं पश्चात्स्वस्य शयनं तच्च जाग्रदादिभेदेन त्रिविधम्। शक्तयश्च द्वासप्ततिनाडीरूपा देहस्य तावत्यः। आत्मानः श्यादयो द्वादशशक्तयः। तेन सप्ताशीत्यध्याया इति। तदप्येतेन वेदसाररूपं स्मारितम्। एकसम्बन्धि ज्ञानमपरसम्बन्धि स्मारकमितिन्यायात्। प्रपञ्चस्य देहत्वात् तेन दैहिकानां दुर्विभाव्यपदाच्छ्वयादीनां च सङ्ग्रहात्। तदिदं नवाध्यां वेदटीकायामुक्तम्। विराडुत्पत्तौ च तृतीयस्कन्धे स्पष्टम्। तथा सूतोक्तलक्षणेषु निरोधस्थाने संस्थापाठः। संस्था च 'नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः संस्थेति कविभिः प्रोक्तश्चतुर्धास्य स्वभावत' इति प्रलयरूपा व्याख्याता। एवं प्रकृतलक्षणेपि प्रलय इति चेन्न मैवम्। 'संस्थां च पाण्डुपुत्राणा'मित्यत्र संस्थायास्तथात्वेपि नात्र संस्था प्रलयः। 'ब्रह्मसंस्थो अमृतत्वमेती'ति श्रुत्या अमृतत्वफलविरोधात् संस्थामात्रभक्तिरेव, शाण्डिल्योपि भक्तिमीमांसायां संस्थां भक्तित्वेन सूत्रितवान्। 'तत्संस्थस्यामृतत्वोपदेशा'दिति। एवं च निरोधशब्दोत्र यौगिको द्वितीयस्कन्धे योगरूढ इति ज्ञेयम्। नितरां रोध इति। केषामित्याकाङ्क्षायां पूर्वस्कन्धानुरोधाद् भक्तानामिति लभ्यते। कस्मादित्याकाङ्क्षायां प्रपञ्चादित्यवधित्वेन सम्बध्यते। 'यत्र नान्यत् पश्यती'ति श्रुतौ ह्यन्यपदोक्तभेदस्य प्रपञ्चप्रतियोगिकत्वात्। अवयवशक्तिरूपयोगाद् यौगिकः। नितरां रोधः प्रपञ्चदेह एव इति समुदायशक्तिसत्त्वाद् योगरूढः शब्दः अयं भगवन्निष्ठोपि। "प्रपञ्चविस्मृतिः सक्तिर्योगारूढस्य वै हरे"रिति निबन्धात्। उक्तपक्षस्तु 'भक्तानां चापि योगतः' इति द्वितीयचरणपाठान्तरात्। 'तेनेतत् सिद्धम्। भगवन्निष्ठनिरोधो दशमोक्तः। भक्तनिष्ठनिरोधस्तु प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिः। पूर्वोक्तनिरोधासम्भवात्। भगवतः आसक्तिरिति समासेयं भगवन्निष्ठोपि निरोधः। ननु तर्हि घटेपि भक्तनिरोधः स्यात्, तथा योगमायाशक्तिः, देवकीगर्भस्य रोहिण्युदरे सन्निवेशोपि भक्तनिरोधः[2] स्यादिति चेन्न। दशमनिरोधपदस्मारितनिरोधपदार्थान्तरस्य भक्तनिरोधत्वेन विवक्षणात्। [3]तत्र निरोधः प्रलयः सोपि प्रपञ्चस्य न सर्वात्मना लयः किन्तु भावनया, प्रपञ्चस्य नित्यत्वात्। [4]एवञ्च 'मृत्युरत्यन्तविस्मृति'रितिवाक्यात् [5]प्रपञ्चविस्मृतिपूर्विकेत्यंशलाभः [6]'दशमनिरोधपदेन[7]'। तथा निरोधः संस्था, सा न प्रलयोत्र[8] [9]पुनरुक्त्यापातात्, किन्तु प्रलयविलक्षणा भक्तिः संस्थापदार्थः। 'ब्रह्मसंस्थोऽमृतत्वमेती'ति श्रुतेः। सा च भक्तिर्भगवदासक्तिः। 'ततः प्रेम तथासक्तिर्व्यसनं च यदा भवे'दित्यत्र भूमावाधिभौतिकी भक्तिर्वक्तव्या। व्यसनस्यात्र[10] दुर्लभत्वात्। सा च प्रेमरूपा। प्रेम्णि यदा व्यसनं भवेत् तदासक्तिपदवाच्यं प्रेम भवति। आध्यात्मिकं प्रेम।

१०-१-का० १०, एवं च प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिर्निरोधः। समासेन प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिनिरोध इति वोपदेवमतं दूषयन्ति स्म नैमित्तक इति। निमित्तेन निर्वृत्तः। तेन निर्वृत्तमिति ठक्। अन्य इति भरतोक्तत्वात् का[11]मशास्त्रीयः, वेदान्तोक्तादन्यः। व्युत्पत्तिमाहुः **धर्मग्लानीति**। तथा च तृतीयार्थे तसिल्।

१०-१-का० ११. स एवात्रास्तु प्रसिद्धत्वादित्याशङ्क्य प्रसिद्धे दोषत्रयापत्त्यानादरणीयत्वार्थं दोषत्रयमाहुः **स चात्रेति**। वेदवेदान्तशास्त्रे (नैव) सद्ग्राह्य इति सद्भिर'स्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदु'रिति श्रुत्युक्तैर्न ग्राह्यः, कामशास्त्रीयत्वेन 'असन्नेव स भवति असद् ब्रह्मेति वेद चेत्' इति श्रुतिविषयत्वेन प्रच्छन्नबौद्धादिभिः ग्राह्यत्वात्। अयमपि 'शक्तिभिर्दुर्विभाव्याभिः प्रपञ्चे क्रीडनं' कृष्णस्य भवत्येवेत्यत आहुः **हरिणेति**। हरिणा दुष्टभूभुजां कृतोयं निरोधः। कृद्योगे कर्मणि षष्ठी **दुष्टभूभुजामिति**। अक्षमर्थः। हरिर्हि परमात्मा महानारा[12]यणात्। यथा ब्रह्मणि कामचारे हरिर्भवति। तथा दुष्टभूभुजां प्रलयः बलपार्थभीमव्याजाह्वयेन हरिणा कृतः। 'यास्यन्त्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीय'मिति श्रीभागवतवाक्यात्। तथा च तादृशक्रीडने तत्र कृष्णस्येति लक्षणघटकपदाभावादसम्भवग्रस्तं लक्षणं स्यादिति भावः। उक्तदोषत्रयेऽव्याप्तिरूपं दोषमाहुः **आद्यन्तयोरिति**। प्रकरणयोरित्यर्थः। आदिप्रकरणम्, आदिः, प्रकरणमिति प्रयोगत्रयात्। एवमन्तशब्दस्य प्रयोगात्रयम्। आद्यन्तयोः [13]प्रलयाभावादव्याप्तिरित्यर्थः। अतिव्याप्तिरूपं दोषमाहुः **मुक्तावपीति**। ब्रह्मवादतयोपोद्घातेनादिप्रकरणे, गुणप्रकरणे तु विवर्तावशेषभगवान्मात्ररूपेणावशेष इति दुष्टभूभुजां प्रलय इति नाव्याप्तिश्चेन् मुख्यपरिहाराभावेपि तुष्यतु दुर्जनन्यायेनातिव्याप्तिरित्यर्थः।

१०-१-का० १२. तृतीयमसम्भवरूपं दोषमाहुः **लक्षणस्येति**। स्यान् मुख्यपरिहाराभावेपि लक्षणप्रवेशो यदि मुख्यपक्षो न भवेत्, यो हरिणा दुष्टभूभुजां कृतः स तु वाक्यप्रमाणाद् भवत्यतो भवल्लक्षणस्याप्रवेशः। गौणमुख्यन्यायात्। ततश्चासम्भव इत्यर्थः। तथा लक्षणस्य द्वित्वे प्रकारे लीलाया आधिक्यं द्वित्वं भवेदित्यर्थः। लक्षणत्वं खण्डयित्वा विरोधेन निरोध इतरेभ्यो भिद्यते

---

[1] अनुशयनेन पूर्वोक्तप्रमेयेन द्वितीयसुबोधिनीसंस्थाप्रसिद्धार्थवासनादिरूपेण। [2] यस्याः कस्याश्चिद् भगवतः आसक्तेः सम्बन्धरूपायाः सत्याः। [3] दशमस्कन्धसर्वत्रसिद्धवासनावासितार्थे। [4] (परमतीयेन) पोषकेण प्रलयरूपार्थेन (समाधिभाषा) सिद्धपोष्यस्यासक्तिरूपस्यार्थस्य विवक्षितत्वात्। [5] प्रपञ्चस्मरणस्याभावः प्रलयः। [6] शेषमत्र। [7] लभ्यत इति शेषः। [8] विशेष्ये। [9] विशेषणेन। [10] भूमौ। [11] व्यसनं दुःखं तदात्मा नैमित्तिको निरोधः। [12] 'वह्निशिखाया मध्ये परमात्मा व्यवस्थितः स ब्रह्मा स शिवः स हरिः सेन्द्रः सोक्षरः परमः स्वराट्' इति। [13] व्यसना०।

प्रलयत्वात् प्रलयवदित्यस्य विरुद्धत्वमित्याहुः **तदर्थमिति**। दुष्टभूभुजां निग्रहार्थम्। **पृथास्तोत्रे** 'तथा परमहंसानामृषीणाममलात्मनाम्। भक्तियोगविधानार्थ'मिति तस्य विरोध्यतो हेतुः साध्याभावसाधक इति हेतोर्विरुद्धत्वमित्यर्थः। साध्यव्यापकीभूताभावप्रतियोगित्वं विरुद्धत्वम्। साध्यं विमत इतरभेदस्तद्व्यापकीभूताभावः प्रलयत्वात्यन्ताभावः तत्प्रतियोगित्वं प्रलयत्व इति लक्षणसमन्वयः। ननु त्रिया 'त्रयी न श्रुतिगोचरे'ति तत्स्तुतिरन्यमूलेति तया विरोधे किं स्यादिति तदाहितहेतोर्विरुद्धत्वमप्रयोजकमिति चेन्न। वेद्[1]वेदान्तसारे श्रीभागवते कृष्णावैराटीपदयोः सत्त्वात्। कृष्णपदमहिम्ना सर्वज्ञानम्। यतः पृथा पृथ्वीरूपा 'तोयेन जीवान् व्यवसर्ज भूम्या'मिति श्रुतेः भूमिर्भार्या। सा चार्धाङ्गी। 'आत्मनो यदर्धं पत्नी'ति श्रुतेः। हिकारस्तु व्याहृतिरूपत्वात्। अत एव 'भूमिर्दृप्ते'त्यारम्भः। आकाशशरीरं ब्रह्म कृष्णः, सुबस्तु गुणप्रकरणे, 'यदतः परो दिवो ज्योतिर्दीप्यते' इति ज्योतिश्चरणाधिकरणे। 'कृष्णद्युमणिनिम्लोचे' इति वाक्यात्। यद्यपि कुन्तीस्तुतौ 'केचिदाहुरजं जात'मित्यादिश्लोकेषु दैत्यवधादिकमप्यवतारकार्यमुक्तं तथापि पूर्वपक्षत्वेन न तु सिद्धान्तत्वेनेति व्याख्यातं सुबोधिन्याम्।

१०–१–का० १३. प्रलयस्य निरोधत्वे दोषान्तरमाहुः **कार्येति**। ईशानुकथात्वेन निरोधत्वेन कार्यकारणभावः, निरोधत्वेन मुक्तित्वेन कार्यकारणभावः, मुक्तित्वेन प्रलयत्वेन कार्यकारणभावः, तेषां हानिः। भावप्रधानो निर्देशः। यद्वा नवलक्षणज्ञानमाश्रयज्ञाने कारणं, तथा सति तयोस्तथात्वहानिरित्यर्थः। चकारस्तु प्रलयानन्तरं वस्त्वभावात् मुक्तिः कारणं प्रलयः कार्यं तयोर्हानिरवक्तव्यत्वम् अर्थद्वारा हानिर्निरर्थकत्वं चेत्यर्थसङ्ग्राहकः। पाठक्रमत्यागश्चेत्याहुः **प्रक्रान्तेति**। 'अत्र सर्गो विसर्गश्चे'तिवाक्ये। **एवका**रेणार्थक्रमादि व्यवच्छिद्यते। अप्रसिद्धेः। चकारेण पुराणविरोधः सङ्गृह्यते। प्रतीयमानः कश्चित्कोपि प्रलयो भक्तदुःखाभावो न तु प्रसिद्धोतो ह्युपक्रमोपि 'भूमिर्दृप्तनृपे'त्येवंविधोप्यर्थनिर्णायकोपि न तत्पर इत्याहुः **भक्तत्वादिति**। तथा च भारहारत्वेन भक्तत्वेन कार्यकारणभावः न तु भूमित्वेन भारहारत्वेन। तेन भूमिः कृष्णावतारबीजमित्यंशतो भूमित्वेनावतारत्वेन कार्यकारणभावः। 'एतन्नानावताराणां निधानं बीजमव्यय'मितिवाक्यात्।

१०–१–का० १४. नन्वन्तर्यामिब्राह्मणे 'यः पृथिव्यां तिष्ठ'न्नित्यादिषु भुवो दुःखहरणं प्रसिद्धं कुतोयं समुद्यम इत्यत आहुः **प्रकट इति**। सत्यमस्ति दुःखहर्ता, परन्त्वन्तरो, न प्रकटः, अन्तर्यामिब्राह्मणोक्तश्चातो रुद्रोपि सम्भाव्येत 'सोन्तरादन्तरं प्राविश'दितिश्रुतेः। अतः प्रकटो विवक्षितः। सोपि **परमानन्दः** परमश्चासौ आनन्दः, परो मीयते ज्ञायतेऽनेन वीर्येण स परमः अर्शआद्यच् वीर्यवान् पृथिव्या भार्यात्वात्। एतादृश आनन्दोऽलौकिकः भक्तभार्यामनोरथः। गोचारणसम्बन्ध्यपि। **तदा भूमेर्मर्दनक्लेशहानिः स्यात्**। अन्तर्यामी न प्रसिद्ध इति भाष्यादेवकारोन्तर्यामिव्यवच्छेदकः। अनुभवाद्धीति जन्मत्वेन भारापनयनत्वेन कार्यकारणभावः। 'दिष्ट्या हरेस्या भवतः पदो भुवो भारोपनीतस्तव जन्मनेशितु'रित्यत्र द्वितीयेध्याये वक्ष्यते। प्रकटपरमानन्दत्वेन मर्दनक्लेशहानित्वेन कार्यकारणभावात् **इतिशब्दः**, इति हेतोः **तस्याः समुद्यमः** 'गौर्भूत्वो'द्यमः। तदुक्तं महानारायणे 'भूमिर्धेनुर्धरिणी लोकधारिणी'ति। किञ्च 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह'मिति वाक्याद् धर्मरूपवृषभोपि वेदवेदान्तसारत्वान् मूलस्य। 'ऋषभ ते वयं रक्षिता मुहु'रितिफलप्रकरणे श्रुतिवाक्यम्। वकारलोपः। तथा चोक्तं सुबोधिन्यां द्वितीयस्य सप्तमाध्याये 'भूमेः सुरेतरवरूथविमर्दिताया' इतिश्लोकविवरणे मर्दनक्लेशाभावार्थं साक्षादानन्दमय इति।

१०–१–का० १५. **अत एवेति** तादृशार्त्यभावेन तादृशभक्तत्वाभावादेव। तेन 'ॐ मित्येकाक्षरं ब्रह्मे'त्यत्र गायत्र्याद्यावाहनं समर्थितम्। **अन्वसश्चय** इति भक्तेष्वेवाविश्य सेवितवन्त इत्यर्थः। 'निरोधोस्यानुशयन'मित्यत्रानुशब्दार्थनिरूपकानुक्ते लक्षणे न्यूनतारूपनिग्रहस्थानं वारयन्ति स्म **भक्तानामिति**। पूर्वस्कन्धार्थसङ्गत्या निरूपकलाभात् तदुक्त्यभावेपि न न्यूनतेत्यर्थः। अनन्यलभ्यस्य शब्दार्थत्वात्। 'भक्त्याहमेकया ग्राह्य' इतिवाक्यादेवकारः।

१०–१–का० १६–१७. **अत इति** भक्त्येकग्राह्यत्वात्। पूर्वस्कन्धार्थप्रसङ्गेनावधिं सम्बन्धसामान्येनाहुः **प्रपञ्चस्येति**। सम्बन्धसामान्यविवक्षायां षष्ठी। शाब्दबोधविशेषो विवक्षया प्रयोजनम्। अम्बरीषस्यापि भक्तान्तःपातित्वेन सर्वात्मभावे प्रतियोगित्वेन प्रवेशात् प्रपञ्चस्य। तथा च श्रुतिः 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमे'ति। 'अन्यद्' भेदप्रतियोगिप्रपञ्चः। सामान्ये नपुंसकम्। प्रत्येकं प्रपञ्चगतपदार्थानां त्रिलिङ्गत्वात्। इति निश्चयेन विचार्यत इत्युक्तविचारत्वेन कार्यकारणभावः। युक्त्यन्तरोपस्थितावप्यत्र युक्तिसत्त्वात्। 'युक्तयः सन्ति सर्वत्रे'ति वाक्यात्। युक्तिपूर्वकपरमार्थपराणां विश्वस्तानां भक्तानां वा निश्चयः। एवं हेतुं व्यस्योद्यमव्यासाय दृष्टान्तमाहुः **यावद् बहिरिति**। अस्तु चान्तर्यामिब्राह्मणानुरोधस्तथापि प्रकटश्चेन्न भवेत् तदा दृष्टान्तविरोध इति प्रकट आवश्यक इति भावः।

१०–१–का० १८. **सर्वमिति** अविद्याकार्यम्। अयमर्थः। ईशानुकथाया विद्याजननद्वाराऽविद्यानाशकत्वे विद्ययाऽविद्योपमर्दः। विद्याविद्ययोरुपमर्द्योपमर्दकभावबोधकनिबन्धात्। अष्टमोदितसद्धर्मैर्वास[3]नादाहे भगवति शुद्धायां वासनायां स्वतो जातायां भक्तिः कर्तव्येति नवमे स्कन्धे ईशानुकथारूपा भक्तिर्निरूपिता। भक्तिः सेवा सा चाधिदैविकी निरोधः। जन्मानन्तर निरोधः

---

१. श्रीभागवते द्वादशस्कन्धे सर्ववेदान्तसारं श्रीभागवतमुक्तं तथापि श्रीभागवतमाहात्म्ये इदम्। २. कालकृतः। ३. सप्तमस्कन्धार्थः।

कर्तव्य इति दशमे निरोधः। स चाविद्यानुपमर्दः। भजनेनैव तादृश इति निबन्धात्। तत एकादशे मुक्तिरिति। **न लोपत** इति संसारस्याविद्याकार्यत्वादाधिदैविकसेवारूपविद्यानाश्यत्वम्। तदुक्तं निरोधलक्षणग्रन्थे 'सच्चिदानन्दता स्वत' इति, 'तदध्यासोपि सिद्ध्यती'ति च, 'नातः परतरो मन्त्रो नातः परतरः स्तवः। नातः परतरा विद्या तीर्थं नातः परात् परम्' इति। **कृष्णसमुद्यम** इति अन्यकार्यभक्तियोगवितानार्थं मूलरूपस्य सर्वथा संसारलयफलकनिरोधार्थं 'जन्मप्रकरणोक्तजन्मकृतिः **समुद्यमः**। तथा च 'स मे सर्वे'त्याद्युक्तो य उद्यमः जन्मेत्याद्युक्तः इति ज्ञेयम्। वसुदेववरदानमानुषङ्गिकम्। नन्दादिभक्तिनिरोधः। शक्तीः शाययित्वा तदनुकूलतया स्थितिर्जन्मप्रकरणेऽस्त्येव। भगवदासक्तिकरौ हेतूद्यमौ निरूप्य प्रपञ्चाभावकरौ कापट्यस्वीकारौ ह्युद्धारकारणे इत्याह **रूपान्तरं** त्विति। तुशब्द उद्धारं प्रति हेतूद्यमौ अन्यथासिद्धौ भगवदासक्तिमात्रसाधकादित्याह। रूपान्तरस्वीकरणत्वेनोद्धारत्वेन कार्यकारणभावः। एतेनैव कापट्यस्याप्यङ्गता व्याख्याता सामान्यन्यायादेव बोध्या। यतो मुख्यमायाप्राकट्यं तृतीयाध्याये, चतुर्थे तु तत्कार्यमिति सुबोधिन्याम्, कापट्यानुक्तिरध्यायार्थमात्रत्वात्। चतुर्थाध्याये देवक्या उपगूहनरोदनमोचनैरन्यकन्यात्वगोपनं कापट्यम्। त्रिविधानिति त्रिभिः प्रकरणैस्तामसादीन् भक्तान्।

१०-१-का० १९. रूपान्तरस्वीकरणं कारणं **प्रपञ्चाभावकरणं** व्यापारः **उज्जहारेत्युद्धारः** कार्यम्। रूपान्तरं न तादृशोद्धारे कारणमैश्वर्येणान्यथाप्युद्धारसम्भवेन व्यभिचारसम्भवात्। स्वीकृते तु रूपान्तरं कारणमानन्दमयत्वात्। 'तमेव विदित्वा अतिमृत्युमेती'तिश्रुतेः तद्विषयकज्ञानस्य भक्तेर्वा कारणत्वात्। ऐश्वर्येणान्यथाप्युद्धारसम्भवो नास्ति। टीकान्तरेऽनङ्गीकारात्। भक्तमनोरथाविषयत्वात्। 'शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छती'ति वाक्यात्। **प्रपञ्चाभावकरणं** प्रपञ्चत्वाभावेन प्रपञ्चाभावः विशेषणाभावप्रयुक्तो विशिष्टाभावः, ब्रह्मत्वेन तु ज्ञानं तु प्रपञ्चस्यास्त्येव, 'तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात'मित्येकविज्ञानेन सर्वविज्ञाने पृष्टे तदुत्तरात्। विद्वन्मण्डने 'अपि वा तमादेशमप्राक्ष'मित्यादिना। तथा च रूपान्तरज्ञानेन प्रपञ्चभिदापसार्जनम्। भिदायाः मायामात्रत्वात्। गीतायामप्युक्तम्। **निश्चय** इति 'श्रद्धत्स्व सौम्येति' श्रुतेर्निश्चयोऽप्यनुसन्धेय इत्यर्थः; 'अविश्वासो न कर्तव्यः सर्वथा बाधकस्तु सः' इति वाक्यात्। अत्र प्रपञ्चत्वावच्छिन्न[2]प्रतियोगिकाभावोत्यन्ताभावः। दशमार्थं विचार्य प्रकरणार्थं विचारयन्ति स्मोद्देशपूर्वकं **पञ्च प्रकरणानीति**। **चतुर्भिरध्यायैः**। **सत्पतेरिति** [3]'असतां तु देवक्यां विष्णुरूपिण्यां विष्णुः सर्वगुहाशयः' इतिवाक्येन 'कृष्णस्तु भगवान् स्वय'मितिवाक्यं विरु[4]ध्येत, 'विष्णुर्व्यापकः पुरुषोत्तमो यो वेदान्ते ब्रह्मशब्देनोच्यत' इतिसुबोधिनी च विरुध्येत। स[5]त्पतित्वे तु ह्यधोक्ष[6]जे सत्ताश्रये 'विष्णुराविरासी'दित्युक्ते पुरुषोत्तमोऽप्याविरासीदिति शक्यते, अधोक्षजविष्णुसमानयोगक्षेमत्वेन पुराणप्रसिद्धेः। अत एव 'विष्णुः सर्वगुहाशय' इत्यस्य सुबोधिन्यां 'अनेन सर्वेषां भजनार्थ'मित्यादिचत्वारोऽर्थाः सर्वत्र प्रतिपाद्यन्ते।

१०-१-का० २०. ते च प्रत्येकं सप्तविधा इत्याहुः **अष्टाविंशतिभिरिति**। एवं क्रमेण तृतीयमुण्डकोक्तं 'पुरुषान् न परं किञ्चित् सा काष्ठा सा परा गति'रित्युक्तपुरुषोत्तमप्राकट्यमुक्तम्। ततः प्रश्नोक्तं षोडशकलं परब्रह्म वसुदेवसम्बन्धि द्वितीयेऽध्याये, एवमुपनिषद्द्वयोक्तं जन्मप्रकरणे समाप्तम्। तृतीयं ब्रह्मविद्योपनिषदुक्तमाहुः **पूर्वं तामसत्वादिति**। ननु 'यत्रोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरा'दिति ब्रह्मविद्योपनिषच्छ्रुत्या पूर्वं राजसत्वादिति वक्तव्यमिति चेन्न। ब्रह्मणो राजसत्वेऽप्यथर्वशिरसि 'अक्षरात् सञ्जायते कालः कालाद् व्यापक उच्यते व्यापको हि भगवान् रुद्रो भोगायमानो यदा शेते रुद्रस्तदा संहार्यते प्रजा' इति श्रुतेः रौद्रताया महेश्वरत्वमेव प्रथमम्। 'सोरोदीद् यदरोदीत् तद् रुद्रस्य रुद्रत्व'मिति श्रुतेः। युक्तं चैतत्। जन्मानन्तरं यो रुद्रप्रवेशः। तथा च द्वैयत्वापत्तिः। अत्रोच्यते। 'द्वैयत्वावचनाच्चे'ति व्याससूत्रात्। 'सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः स्थितिसर्गनिरोधेषु गृहीता मायया विभो'रित्यत्र निर्गुणसम्बन्धिगुणाः। माययेति पुराणमतं निबन्धात्। इच्छयेति श्रौतं, 'स ईक्षाञ्चक्रे' इतिश्रुतेः। तेन योगमाया। पुराणे 'न यत्र माये'ति निषेधात्, 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इत्यपि व्याख्यातम्। कारणगुणाः कार्यगुणानारभन्त इति निर्गुणे प्राकृतगुणभिन्नप्राकृतगुणसदृशगुणानामङ्गीकारात्। तथा श्रीभगवानुवाच 'परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्। यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः। सर्गेपि नोपजायन्ते प्रलये नो व्यथन्ति च। मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्। सम्भवः सर्वभूतानां ततो भवति भारत। सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः। तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता। सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः निबध्नन्ति महाबाहो देहे देहिनमव्ययम्' इति। देहिनं निबध्नन्ति न माम्। 'न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहे'तिवाक्याज् ज्ञानानन्दमयत्वाच्च। अग्रे उपयोगाय तमःकार्याण्युच्यन्ते। 'तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्। प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारते'ति। 'ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युते'ति तथा। 'अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च तमस्येतानि जायन्ते विवृद्धे कुरुनन्दने'ति। 'तथा प्रलीनस्तमसि मूढयोनिषु जायते' इति। 'अज्ञानं तमसः फल'मिति। तथा 'जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः', 'नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति गुणेभ्यश्च परं वेत्ति मद्भावं सोधिगच्छती'ति। 'परं' गुणकर्तृत्वाशिनं कारणं सगुणम्। उद्वृत्तिरूपा क्रीडा साधारणीत्याहुः

---

१. ममसत्त्वप्रकृतिः। २. =प्रपञ्चत्व०। ३. असत्त्वमजकृष्णजन्मानङ्गीकर्तृत्वेनाग्रहवादित्वम्। ४. समत्वाच्च विरुध्येतेत्यन्वयः, विष्णुकृष्णपदयोः सामानाधिकरण्यात्। ५. सत्त्वं तु उपबृंहणेनाजकृष्णजन्मवादित्वम्। ६. विष्णुकृष्णपदयोरसामानाधिकरण्येनाह **अधोक्षज** इत्यादि।

वजोद्धृतिरिति। 'व्रजे स बालको भूत्वा क्रीडते पुरुषोत्तम' इति श्रुतेः। ननु 'ह्यधो गच्छन्ति तामसा' इति कुत उद्धृतिरिति चेन्न। ताम्यतीति तमः। तमु ग्लानौ। सर्वधातुभ्योऽसुन्, तम आकाङ्क्षायां वा। 'स्तनार्थी चरणावुदक्षिप'दितिवाक्यात्। स्वार्थेण्। प्रपञ्चे ग्लानादेर्हेतोः व्रजस्य स्वनिष्ठस्य स्वासक्तिसम्पादनायोर्ध्वगमनसाधनकर्माणि कृतवान् कारितवांश्च। 'एष उ एव साधु कर्म कारयति यमुन्निनीषती'ति श्रुतेः। तथा च स्यात् सगुणत्वं यदि निरोधो न स्यात्, स तु वर्तते इति निर्गुणत्वम्। 'मन्निष्ठो निर्गुणः स्मृत' इति वाक्यात्। तथा चोद्धृतिप्रतिबन्धकतामसत्वेपि निर्गुणत्वस्योत्तेजकस्य सत्त्वात् नाधोगतिरपि तूर्ध्वगतिरेव। 'लोके विकुण्ठमुपनेष्यति गोकुलं स्व'मितिवाक्यात्। तामसत्वमुक्तधर्मैरुन्नेयम्। यथा मातुर्भगिन्याः पूतनाया मारणम्। प्रमादः। नन्वज्ञानासम्भवात् प्रमादादिकं कुत इति चेन्न। 'विद्याविद्ये मम तनू' इति वाक्यात् तनुरूपधर्मारोपात्। ननु जन्मप्रकरणे चतुर्व्यूहजन्मकथनात् त्रयाणामुपयोगस्य स्पष्टत्वेपि प्रद्युम्नव्यूहजन्मप्रयोजनमस्फुटमिति चेत् तत्राहुः तथैवेति। 'तत्रांशेनावतीर्णस्ये'त्यत्र 'अंशेन' प्रद्युम्नांशेनेति केचिदित्युक्त्या निरोधकर्तृत्वेन प्रकारेण। एवकारोन्यप्रकारो निरोधं निरुणद्धीति अन्यप्रकारं व्यवच्छिनत्ति। राजसानां भक्तानाम्। सम्बद्धानां यदूनां वसुदेवादीनां पूर्वचकारेण प्रासङ्गिकीनाम्। विशेषत इति सम्बन्धात्। निजैश्वर्यबलादेवान्तरानन्ददायकसर्ववेदार्थज्ञानदानादिरूपो विशेषः तस्मात्। द्व्यशीतितमेध्याये स्पष्टम्। तदुक्तं 'गुणातीतं स्वरूपेणे'त्यादिना राजसप्रकरणारम्भे।

१०-१ का० २१. सात्त्विकानीति वसुदेवनृगादीन्। सात्त्विकानां न प्रमाणापेक्षेत्येकविंशत्या सप्ताध्यायाभावात्। निःप्रपञ्चान् मुक्तान्। निष्क्रान्ताः प्रपञ्चत्वात्। 'निरादयः क्रान्ताद्यर्थे पञ्चम्याः' इति सूत्रेण समासः। ननु प्रपञ्चत्वाद् येन केनापि प्रकारेण प्रपञ्चात् निष्क्रान्ताः न तु वसुदेवनृगादिरेवेति चेन्न। वसुदेवनृगादीनामपि प्रपञ्चत्वेन निष्क्रमणात्। तथा च प्रपञ्चत्वप्रविलापनेन ब्रह्मत्वात् प्रपञ्चस्य ब्रह्मत्वेन ज्ञानात् सात्त्विकज्ञानयुक्तानित्यर्थः। 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधन'मितिवाक्यात् तदुक्तं 'सात्त्विकी त्वधुनोच्यते' 'वसुदेवमखावधि' इति च। उत्तरार्धे पञ्चदशे नृगमोक्षो निरूप्यत इति। हेति प्रसिद्धम्। 'तत्तत् सात्त्विकमेवैषां यद्यद् वृद्धाः प्रचक्षते। निन्दन्ति तामसं यद्यत् (तत्तत्) राजसं तदुपेक्षित'मिति। ननु गुणप्रकरणेभ्यः सगुणः कुतो न स्याच् चतुर्थचरणरूपत्वाच्चेति चेत् तत्राहुः भगवानेवेति। उपपादितत्वादेवकारः 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यत' इति वाक्यात्।

१०-१-का० २२. प्रकरणार्थस्य निरूपितत्वादध्यायार्थानाहुः चतुर्मूर्तेरिति। मूर्तिशब्दात् कात्यायन्यपि 'आत्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'ति द्वितीयनवमाध्यायवाक्यात्। 'आत्मैवेदमग्र आसीत् पुरुषविध' इत्यत्र 'स पतिश्च पत्नी चाभवताम्' इत्यात्मनो द्विरूपत्वोक्तेः। स्त्रीप्रत्ययात्। धर्मार्थकाममोक्षाः। धर्मो यज्ञः क्रिया। जगदर्थः 'स्त्रीप्रायमितरत् सर्व'मिति वाक्यात् स्त्रीप्रायम्। कामो लक्ष्मीः। मोक्षः सन्त इति ब्रह्मास्तित्वज्ञानवन्त इति स्त्रीप्रायाः। तथेति चतुष्ट्वेन। 'चतुष्पाद् ब्रह्म विभाती'ति श्रुतेः। तत्र धर्मः सत्तारूपो देवकीस्तुतौ 'सत्तामात्रं निर्विशेष'मित्यत्र। 'सत्तामात्र' वेदटीकायां श्रीयमुनाजित्। धर्मः क्रिया, राधिका 'क्रिया सा राधिकादेवी'ति काचित्कवाक्यात्। ब्रह्मवैवर्ते तस्या उपयोगः। किञ्च युधिष्ठिरयागान्तर्गताग्र्यार्हणीयत्वेन धर्मरूपप्राकट्ये उपयोगः। जगत् जृम्भालीलायाम्। 'सा तत्र ददृशे विश्व'मिति वाक्यात्। लक्ष्म्याः कामरूपायाः फलप्रकरणे 'ता लक्ष्मीरूपाः कृत्वे'त्यत्र। सतां तु स्वरूपनिवेशोपयोगः, 'तस्माद् ब्रह्मऋषीनेतान् ब्रह्मन् मच्छ्रद्धयार्चय एवं चेदर्चितोस्म्यद्धा नान्यथा भूरिभूतिभि'रितिवाक्ये ब्रह्मर्षिषु साक्षात्त्व 'मद्धा' शब्दार्थः तस्य बाधात्। किञ्च मच्छ्रद्धया मम श्रत् सत्यं दधातीति श्रद्धा तयेति। एवं चेदर्चितोस्मीति च। अन्यथर्षीणामर्चने कृते 'एवं चेन्नार्चितोस्मी'त्येव ब्रूयात्। चतुर्मूर्तिप्राकट्यस्य किं प्रयोजनमत आहुः तत्तदिति। यथा भक्तदुःखरूपहेतुर्हेतुत्वेन वासुदेवाविर्भावे उपयुक्तः, तथा कृष्णोद्यमः सङ्कर्षणाविर्भावे उपयुक्तः। प्रद्युम्नाविर्भावे स्वीकरणमुपयुक्तम्। कापट्यं तु ह्यनिरुद्धाविर्भावे। वसुदेवहृदि वासुदेवश्चतुर्धा हेतुनिवारणसामर्थ्यरूपो वासुदेवः। तेन 'पुरुषोत्तमस्तु नन्दगृह एव मायया सह जात' इत्यस्या न विरोधः। चतुर्धोद्यमनिरूपणम्। यद्यपि 'प्रलम्बबकचाणूरे'त्यारभ्य कंसोद्यमः तथापि सहेतुकोद्यमः। हेतावपि कंसीये नित्यलीलास्थकलौ ह्युद्यमः भगवदीयः, 'कर्ता शास्त्रार्थवत्त्वा'दित्यनेन जीवेषु कर्तृत्वमुक्त्वा 'परात्तु तच्छ्रुते'रितिभगवदीयकर्तृत्वोक्तेरुद्यमो भगवदीयो वा। एवमग्रेपि। गर्भसङ्कर्षणाद् देवक्यां रोहिण्यां गर्भस्थापनेन वसुदेवेपि सङ्कर्षणः स्थापितः 'आत्मनो यदर्धं पत्नी'ति श्रुतेः। वसुदेवगृहे व्यूहत्रयप्राकट्यस्य वक्ष्यमाणत्वात्। एवं तृतीयेध्याये जायमाने 'विष्णुराविरासी'दितिवचनव्यक्तस्तत्र सतिसप्तम्याः सामानाधिकरण्यार्थकत्वेन जायमानप्रद्युम्नसमानाधिकरणो विष्णुरिति भवति प्रत्ययः। स च 'देवक्यां विष्णुरूपिण्या'मतो हि प्रद्युम्नोपि देवक्यां ततो वसुदेवे आत्मनोऽर्धत्वात्। अतश्चतुर्भुजत्वादिस्वीकारे प्रद्युम्नत्वम्। हृद्येव, ततो बहिराविर्भावः। चतुर्थे सर्वविमोचकेऽनिरुद्धत्वं तु कापट्ये सति। 'यदा यदा हि धर्मस्ये'ति वाक्यात्। एकादशस्कन्धेऽमाययेत्यस्याकापट्येनेत्यर्थात्। 'धर्मः प्रोज्झितकैतवोत्रे'ति च। पूर्ववत् सतिसप्तम्या देवक्या उपगूहनरोदनमोचनरूपकापट्यं देवक्यां सुभद्रारूपम्। तत्रानिरुद्ध उचितः धर्मरूपत्वात्। पूर्ववद् वसुदेवेपि। ननु कापट्यं न देवक्यां किन्तूपगूहनार्हमन्यत्र धर्मरूपानिरुद्धस्तु हृदये इति वैयधिकरण्यमिति चेदत एव सुबोधिन्यां नोक्तमस्तीत्यनवेहि।

१०-१-का० २३. **हेतूद्यमेति** हेतूद्यमादयस्तु वासुदेवाद्यध्यायार्थ उपयुक्ताः सन्तः समुदिताः प्रकरणार्थाः। 'समुदायो जन्मवाचीति निबन्धात्। **प्रथम** इति प्रथमो जन्मप्रकरणार्थः। **महान्** भगवत्सम्बन्धात्। दशमस्कन्धभरणप्रयोजकत्वं वा महत्त्वम्। 'यस्मिन्न मे पावनमङ्ग जन्मे'ति वाक्यात्। उक्तचतुर्मूर्तीराहुः **प्रद्युम्नश्चेति**। अत्र निबन्धानुसारात् 'क्रमो बहुष्वनियम' इति सूत्रेण विग्रहवाक्येपि न विवक्षितः। **प्रद्युम्नश्चानिरुद्धश्च वासुदेवश्च सङ्कर्षणश्चे**ति विग्रहवाक्यम्। तथा चकारान्वितत्वेनापरः सङ्कर्षणश्चेत्यर्थात्। अत्र निबन्धः 'समुदायो जन्मवाची क्रीडायुक्तस्य वै हरे'रिति। तेन प्रद्युम्नादयोध्यायार्थाः हेत्वादीनां 'समुदायो जन्मवाची'सङ्ख्यातात्पर्येपि तात्पर्यवान्।

१०-१-का० २४. ननु भक्तदुःखं हेतुत्वेन अध्यायार्थ उक्तः स नोपपद्यते नवमस्कन्धोक्तभक्तानां विद्यावत्त्वेनाज्ञानासम्भवादिति चेत् तत्राहुः **हेतुश्चेति**। सत्यमज्ञानासम्भवस्तथापि यदि भक्ता एकविधा भवेयुः, भक्तास्तु यावन्तो जले भेदास्तावन्तः जलभेदवदन्ये प्रसिद्धाः। एवं च स स्यात् पूर्णभगवदीयानां शेषव्यासाग्निमारुतानां, अन्येषां तु स्यादविद्यया विद्योपमर्दः, कृष्णावतारे सुतरां, तदुक्तं 'विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम्। बन्धमोक्षकरी आद्ये मायया मे विनिर्मिते' इति वाक्यात्। तथान्यस्मात् निवर्त्यं स्वस्मिन्निरोधे तु नाविद्योपमर्दः। 'भजनेनैव तादृश' इति वाक्यात्। एवं चाविद्यया विद्योपमर्दान् निरोधसेवाकरणं युक्तमविद्योपमर्दाय इति। अत्राध्याये **हेतुर्भक्तदुःखं त्रिविधः** आधिदैविकादिभेदात्। चकारोनुक्तानुद्यमादीन् समुच्चिनोति। सोपि त्रिविधाः। **हीति** 'अथाध्यात्ममथाधिभौतमथाधिदैव'मितिश्रुतेः। ननु 'भाष्ये साङ्ख्यगुणा नोपबृंहका वेदार्थ इत्युपपादनाद् सत्त्वसञ्ज्ञका गुणाः क उपमर्द्या इति चेत् तत्राहुः **गुणा इति**। सत्त्वादयो न तु विशुद्धसत्त्वमपि। 'प्रवर्तते यत्र रज' इति श्लोके द्वितीयस्कन्धनवमाध्यायस्य तस्याभ्यनुज्ञानात्। ते च भक्तौ सगुणत्वापादकत्वेन प्रपञ्चवत्स्मरणविषयाः, तदभावोपि प्रपञ्चविस्मृतिपूर्वकभगवदासक्तौ विशेषणविधयोपयुज्यते तदाहुः **भक्ताहितप्रदा इति**। **अहितं** भक्तिसगुणत्वसम्पादकम्। अधुना पूर्वाध्याय एवाहुः **कंसादेरिति**। कंसादेराधिदैविकत्वेनाधिदैविकदुःखदातृत्वं कंसकलित्वस्य कृष्णोपनिषत्स्थत्वेन नित्यक्रीडास्थत्वात्। **कालतो** दुःखमाध्यात्मिकम्। जन्यमात्रस्य कालोपाधित्वेन कालाध्यात्मिकजन्यत्वात् **अज्ञानादाधिभौतिकं** स्पष्टम्। अज्ञानं गीतायां स्फुटम्। ज्ञानसम्पदतिरिक्ता सम्पत्। तुरध्यायत्रयार्थव्यवच्छेदकः। **तद्वृत्तं** भक्तगतम्।

१०-१-का० २५. सुखव्यवच्छेदकस्य तोः प्रयोगस्य प्रयोजनमाहुः **भूमिरिति**। भूमेः कालतः। मातुः कंसादेः। **तथान्येषां च**। **अन्य** इत्यादिः 'सत्पीडाव्यग्रलोके'ष्विति वाक्यात्। **यथायोग्यं** सात्त्विकत्वादिरूपं योग्यमनतिक्रम्य। **भूमौ** सात्त्विकत्वं, मातरि राजसत्वं, 'तामात्तयष्टि'रितिवाक्यात्, अन्येषु तामसत्वं 'दुर्भगो बत लोकोय'मितिवाक्यात्। अज्ञानाद् भगवत्त्वेन यदज्ञानं तन्निवारणमत्र निरूपितमिति। **अत्रैवेति** प्रथमाध्याय एव। अन्यत्र न। यद्वा। **अत्र** लोके। तेनाधिभौतिकं दुःखम्। एवकारेण विकुण्ठो व्यवच्छिद्यते। 'अह्नयापृत'मितिवाक्यात्। **निरूप्यत** इति परपक्षनिराकरणपूर्वकस्वपक्षस्थापनं क्रियते। प्रलयनिराकरणाद्यपि द्रष्टव्यम्।

१०-१-का० २६. **त्रयमिति** दुःखत्रयम्। **ईर्यत** इति प्रथमाध्याय **ईर्यते** उच्यते। प्रेर्यते प्रेरकवचनं क्रियते। एतेन त्रयाणां भगवन्नाश्यत्वेन तन्नाशकत्वरूपहेतुतावच्छेदकमेकमिति हेत्वननुगमोपि परिहृतः। नवमस्कन्धोक्तभक्तित्वेन मुक्तित्वेन कार्यकारणभावे विशेषोनेन स्कन्धेन ज्ञाप्यत इत्याहुः **प्रश्नोप्यत्रेति**। अत्र प्रथमेध्याये **प्रकरणत्रयादधिकः प्रश्नः स्कन्धद्वितयवर्तनः** श्लोकः। तथा च यथा पञ्च प्रकरणान्यशेत्युक्त्वा प्रकरणत्रयमधिकं प्रोक्तं तथा प्रश्नोप्यत्राधिकः प्रोक्तः इत्यर्थः। आधिक्यं स्कन्धद्वितयवर्तनत्वं, तथा चोक्तं 'देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभि'रिति प्रश्न एकादशस्कन्धीयप्रमेयविषयकः। अन्ये प्रश्ना दशमार्थविषयकाः। तथा च प्रथमाध्याये चत्वारि प्रकरणानि। प्रश्नप्रकरणम्। भूमिप्रकरणम्। मातृप्रकरणम्। अन्यप्रकरणं चेति। तदुक्तं निबन्धे 'प्रश्नेन सहिताः पूर्वं चतस्रः प्रक्रिया मताः' इति। सुबोधिन्यां च 'तत्र दशभिः श्लोकैर्भूमिसान्त्वनं वाच्या, उपायेन देवक्याः पञ्चत्रिंशद्भिः, ततोष्टभिः सर्वेषा'मिति। तथा च भक्तित्वेन मुक्तित्वेनाधिदैविकनिरोधरूपभक्तित्वेनालौकिकसामर्थ्यभगवत्सेवोपयोगिदेहत्वेन विशेषकार्यकारणभाव इति।

१०-१-का० २७. इमं गुप्तार्थमूलमाहेत्याहुः **अनुवाद** इति। **प्रश्ने प्रश्नप्रकरणेनुवादः सार्धेन**, 'कथितो वंशविस्तार' इति श्लोकेन, नवमस्कन्धोक्तचरित्रानुवादः, **स्तुतिः** 'निवृत्ततर्षै'रितिश्लोकेन चरित्रस्तुतिः। एतौ स्तुत्यनुवादावुभौ **भक्तत्वज्ञापकौ** ज्ञेयौ। पूर्वोक्तानुसन्धानेनानुवादसामर्थ्यं भक्तस्यैवेतिभावः। 'इदं ते नातपस्काये'तिवाक्यादाहुः **अन्यथेति**। भक्तत्वाभावे। भक्तिर्गुप्तार्थो निरोधोतिगुप्तार्थोनधिकारात्। हिकारस्तु कृत्स्नभावात्तु गृहिणोपसंहारः। **श्रीशुकः** सभगवान्।

१०-१-का० २८. 'पितामहा मे' इत्यादितात्पर्यमाहुः **अज्ञानमिति**। 'पितामहा म' इति द्वाभ्यां दृष्टश्रुतमाहात्म्यप्रतिपादनेन देवत्वविशिष्टज्ञानं **निवार्यते**। 'वीर्याणि तस्ये'त्यनेनान्यथाज्ञानं मनुष्यत्वन ज्ञानं तत् पुरुषोत्तमस्य मायावरणेन 'मायामनुष्यत्वमिति ज्ञानेन **बार्यते** इति। **विशेषेण निवारणं तु** दृष्टत्वात्। **कृष्णगमिति** कृष्णविषयकमन्यथाज्ञानं कृष्णविशेष्यकमज्ञानम्।

---

[१] 'स्मृत्यनवकाश' सूत्रे।

विषयतासम्बन्धेन ज्ञानं तदभाववान् कृष्ण इति यथा घटवद्भूतलं संयोगेन घटाभाववद्भूतलं विशेषणविशेष्यताख्यसम्बन्धेनेति। पञ्चश्लोकी त्वग्रे सन्दिग्धयुक्तिविरुद्धप्रश्ननिरूपिका 'रोहिण्यास्तनय' इत्यादिका।

१०–१–का० २८½ **एवं द्वादशभिः प्रश्नाः**। '**नैषे**'ति श्लोकोऽकथने बाधकनिरूपकस्तत्कथनाभिप्रायमाहुः **प्राणनत्वमिति**। ननु कथा शब्दरूपा प्राणनत्वमपां धर्म इति कथायाः प्राणनत्वं कथमिति चेदित्थम्। कृष्णस्य चन्द्रसूर्यात्मकत्वोक्तेरपां पुष्पत्वादद्रूपत्वेन चन्द्रसूर्ययोश्चान्तर्यामिब्राह्मणोक्तरीत्या शरीरत्वेन शरीरस्यारूपत्वेन च तत्प्रतिपादककथाया अपि प्राणनत्वं परम्परया। न चैवं घट इत्युक्ते मुखपाटनपूरणाद्यापत्तिरिति वाच्यम्। प्रस्थानरत्नाकरेस्य विचारात्। **दोष** इति न चाकाशशरीरं ब्रह्म न चन्द्रसूर्यशरीरं तयोर्नेत्रत्वादिति वाच्यम्। चन्द्रवंशीयत्वात् प्रकृते। 'यदेकमव्यक्तमनन्तरूप'मिति श्रुतेः। 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसि पङ्कजसन्निविष्टः। केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः' इति श्रुतेः। चकारोऽनुक्तस्यार्थस्य समुच्चायकः। अतो न प्राणनत्वधर्मविरोधः। नन्वस्त्वेवं परं त्वत्र कस्मै प्रयोजनायेत्याकाङ्क्षायामाहुः **दयेति**। **यथा** कृपा ज्ञानकारणम्। कृपात्वेन ज्ञानत्वेन कार्यकारणभावः 'इति भारतमाख्यानं कृपया मुनिना कृत'मित्यत्र सिद्धः। कृपायां जातायां श्रीमद्भागवतज्ञानं दृष्टं सिध्यति। 'ज्ञानमात्रं परं ब्रह्मे'ति। ततश्च 'वैयासकिः सभगवा'नित्यत्र सः भगवानिति नार्थः किन्तु भगवता सह वर्तमान इत्यर्थो वक्ष्यते। **हीति** व्याख्यानात् निश्चयार्थकः कृपापात्रत्वं दैवीसृष्ट्युत्पन्नत्वे सति स्निग्धशिष्यत्वम्। 'ब्रूयुः स्निग्धस्य शिष्यस्ये'तिवाक्यात्। अन्यस्माच्च प्राणनत्वं स्निग्धो वक्ति यतः। कृपापात्रत्वेन दयासिद्धित्वेन कार्यकारणभावः। एवमिति दयासिद्ध्यर्थत्वेन प्रश्नाप्रतिपादकत्वप्रकारेण। 'नैषे'त्यस्य प्रश्नरूपत्वाभावात् तं विहाय **द्वादशभिः**। ब्रह्मणो गुणदोषसमत्वेन समः प्रश्न. **गुणदोषगः**। सप्तमस्कन्धात्। सङ्ख्यातात्पर्यमिदम्। गुणाः षट् दोषाः षट्। मातुलमारणादयः। समत्वं तु यथा गुणा उत्कटास्तथा दोषा अपीति। गुणविरुद्धा धर्मा दोषाः। देशान्तरगतो गर्भः असज्जाति सहभावः, मातुलमारणं, बहुकालद्वारिकावासः, बहुपरिग्रहः, प्रश्नस्था इमे। अन्येपि प्रश्नस्थाः। व्रजगमनप्रश्नः कालप्रश्नश्च साधारणौ नोत्कटौ। एवं षट् वीर्यैश्वर्ययशःश्रीज्ञानविरुद्धाः। ननु 'निर्दोषपूर्णगुणविग्रह आत्मतन्त्र' इत्यादिवाक्यैर्निर्दोषत्वे ब्रह्मणः कुतः षड् दोषा इति चेन्न। 'ज्ञानमात्रं परं ब्रह्मे'त्यादिभिर्ज्ञानात्मकस्य स्वरूपनिर्वाहका दोषा इव दोषाः। अस्थूलत्वादिवत्। तथा च श्रुतिः 'नो एवासाधुना कनीया'निति। अत्रासाधुकर्मप्रसक्तौ 'नो एवे'ति निषेधानुपपत्तिरिति। अतो भगवान् स्वधामनि क्रीडन् न दोषभाग् भवतीति। 'न मां कर्माणि लिम्पन्ती'ति गीतायाम्। सर्वत्र साम्यं भगवद्धर्मः, 'समः सुहृ'दिति सप्तमस्कन्धात्॥ २८½ ॥

श्रीसुबोधिनी

पूर्वस्कन्धे भक्तेः प्रतिपादितत्वादुत्कण्ठापूर्वकमुक्तानुवादमाह सार्धेन—**कथितो वंशविस्तार** इति।

भक्तत्वादेव तत्रत्यानां वंशयोर्विस्तार उक्तः अभ्यर्हितत्वात्सोमस्य पूर्वनिपातः वंशविस्तारप्रश्नभ्रमं वारयति-**विस्तार** इति। अन्यतमकथननिवारणायोभयग्रहणम्। रात्रिन्दिवं **सर्वेषां** सर्वान्धकारनिवारकत्वाद्**वंशविस्तारकथनं** युक्तमिति पूर्वोक्ताभिप्रायं च वदन् स्वस्य श्रोतृत्वं च समर्थयति–**उभयवंश्यानां राज्ञां चरित्रमपि कथितमिति**। उत्पत्त्यैव भक्ताः। चरित्रमपि तेषामन्येषां भक्तिजनकमित्यम्बरीषादेश्चरित्रस्य तथात्वात्पृथगनुवादः। अत्र षष्ठी जननसम्बन्धप्रतिपादिका। चकारस्तत्र भगवतोऽपि चरित्रं प्रतिपादितमित्युक्तम् विशेषतोभिप्रायेण कथने श्रवणे च हेतुः **परमाद्भुतमिति**। परमेण भगवता, परमया भक्त्या वा॥ १॥ यदोः पितुरादेशोल्लङ्घनादधर्मपरत्वेन कथनायुक्तत्वमाशङ्क्य जराया भगवद्भजनप्रतिबन्धकत्वान्मुख्यपितुः सेवार्थं गौणपितुराज्ञोल्लङ्घनं युक्तमित्याह—**यदोश्चेति**। **धर्मशीलस्येति** पृथगनुवादे हेतुः। जरया च धर्मनाशः। **शीलपदेन** पितुर्धर्माज्ञानमुक्तम्। पुत्रवयसा तन्मातृसम्बन्धस्यात्यन्तमयुक्तत्वात्। अतो भगवदवतारात्पूर्वमेव पूरोर्वंशो निवर्त्तितः। अन्यथा तैः सह भगवत्सम्बन्धोऽपि न युक्तः स्यात्। भीष्मस्य वस्ववतारत्वात् सम्बन्धोऽपि। दोषस्तु तत्कृत एव। अग्रे च तेषां तिमिङ्गिलत्वं वक्ष्यति। अतो यदुःस्वभावत एव धर्मरूपः। अत एव तद्वंशस्य च **नितरां** कथनमुक्तम्। मननशीला मुनयः। तत्रापि प्राप्तज्ञानाः सन्तः। तादृशा अपि भक्ता अतिशयिताः। अनुवादप्रश्नयोर्मध्ये **मुनिसत्तमे**तिसम्बोधनमुभयहेतुत्वार्थम्॥ १½ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

राज्ञामित्यत्र षष्ठी जननसम्बन्धप्रतिपादिकेति। राज्ञामिति या षष्ठी सा चरित्रेषु जननसम्बन्धप्रतिपादिका। तथा च तत्कृतं चरित्रं, न तु तत्सम्बन्ध्यन्यकृतमित्यर्थः॥ १॥ **यदोश्चेत्यत्र तत्कृत** इति वंशकृत इत्यर्थः॥ २॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

कथित इत्यत्र **पूर्वोक्ताभिप्रायं** चेति। विध्रियमाणादुत्तरवाक्यात्पूर्वमुक्तस्य 'सोमसूर्ययोरि'तिपदस्य 'रात्रिन्दिवमि'त्यनेन निरूपितमभिप्रायं वंशे उभयसम्बन्धकथनेनानुवदन्नित्यर्थः। **श्रोतृत्वं** चेति। यथार्थानुवादेन स्वस्य शक्तितात्पर्यनिर्धाररूपश्रवणकर्तृत्वं समर्थितमित्यर्थः। **उत्पत्त्यैवेति**। भक्तवंश्यत्वकथनादिति भावः। **पृथगनुवाद** इति। वंशात्पृथक् चरित्रानुवाद इत्यर्थः।

अत्र षष्ठीति । **राज्ञामिति** कर्तरि षष्ठी । तथा च राजकृतं चरित्रं न तु राजसम्बन्ध्यन्यकृतमित्यर्थः । **परमयेति** । परो मीयतेऽनया कर्येति परमा भक्तिरित्यर्थः ॥ १ ॥ **यदोश्चेत्यस्याभासे इत्याहे**ति । इति धर्मशीलपदेन सूचयन्निति शेषः । **व्याख्याने अत** इति । अधर्मजनकवयोदानकर्तृत्वादित्यर्थः । पाण्डुप्रभृतीनां तु क्षेत्रजत्वमिति भावः । **अन्यथेति** । तद्बीजजवंशनिवृत्त्यभावे तादृशवयोदातृवंशीयैः पाण्डुप्रभृतिभिः सह कुन्तीसुभद्रादिदानेन भगवत्सम्बन्धो न युक्तः । तेषु जीवत्सु पाण्डुद्वारा तेऽपि भगवत्सम्बन्धित्वेन व्यपदिश्येरन्निति भावः । ननु भीष्मस्तु जीवतीति कथं सम्बन्ध इत्यत आहु**र्भीष्मस्यै**ति । वस्ववतारत्वात्तस्य सम्बन्धित्वेन व्यपदेशेऽपि न दोषः । **अपिशब्दाद्भक्तिः** । **दोषस्त्विति** । असुरावेश इत्यर्थः । **उभयहेतुत्वार्थमिति** । तादृशवक्तुः सकाशाच्छ्रवणे यथार्थज्ञानात्तथाऽनुवादो भवति, भगवद्वीर्यप्रश्नश्च तादृशवक्तर्येव संभवतीति उभयत्रापि हेतुत्वं मुनिसत्तमत्वस्येत्यर्थः । **विष्णो**रित्यस्यार्थमाहुः—**व्यापकस्येति** । **अंशेनावतीर्णस्ये**त्यर्थमाहुः 'सर्वत्रे'त्यारभ्य 'प्रकटितपरमानन्दस्ये'त्यन्तेन । **एतत्समर्थितमिति** । दशलीलाविशिष्टत्वपूर्णत्वकथनेनांशत्वमेतादृशमेव सिद्धमिति भावः ॥ १½ ॥

बुभुत्सुबोधिका

१०-१-१. **कथित** इत्यत्र **भक्तत्वा**दिति भक्तिरत्रानन्दधर्मः, तेन शास्त्रार्थस्यानन्दस्य हरेर्लीलारूपस्य स्कन्धार्थस्याधिदैविकसेवारूपनिरोधस्य भक्तिशब्दार्थस्य शुके बोधनात् तयोरव्याप्तिर्वारिता । **रात्रिन्दिवमिति** 'आत्मा वै पुत्रनामासी'तिश्रुतेस्तद्वंश्यानामपि । साधनं तु 'सच्चिदानन्दता तत' इति निरोधलक्षणग्रन्थोक्तदिशा । मुक्तत्वाच्च 'कथामात्रावशेषिता' इति चिद्रूपत्वं वा । **सर्वेषामि**त्यादि पुराणगतत्वेन स्त्रीशूद्रयोरपि । **सर्वान्धकाराः** सत्येन निवर्त्याः ज्ञानेन शब्दानन्तेनानन्देन च । **इति पूर्वोक्तेति** पूर्वं यत् पूर्वोक्तं तस्य स्वस्य निरोधे**भिप्रायं च वदन्** निरुद्धत्वादेव श्रोतृत्वस्य समर्थनम् । श्लोकोत्तरार्धे राज्ञो निरोधः । चरितानुवादस्य निरोधकार्यत्वात् । अन्यथा राज्ञां चरित्रे स्पर्धादि स्यात् । प्रकरणार्थमव्याप्तिं परिहर्तुं सङ्क्रमयन्ति स्म त इति । **वंश्या** वंशे साधवः जन्मपरम्परायां कृष्णजन्मघटितायां साधवः भक्ता एव, प्रकरणार्थो व्याप्तिर्वारिता । उत्पत्तेः कारणत्वं शरीराणामात्मतया स्वीकरणोत्तरमेव भक्तत्वात् । **तच्चानुमेयम्** । अयमर्थः । प्रथमसुबोधिन्यां नवमाध्याये "स्वस्य समानाकृतिं शरीरं पुरुषविधं सम्पाद्य स्वसेवां त्याजयित्वा तत्सेवायां नियुक्ताः । तत्र चान्यभजनं मा भवत्विति स्वयमेव हृदि हृदि प्रत्येकपर्यवसायित्वेन धिष्ठितम् अधिष्ठाय स्थितमधिष्ठातृदेवतात्वेन न तु जीववत् । ननु के ते जीवा इति चेन्न । आत्मनैव कल्पिताः । 'अवस्थितेरिति काशकृत्स्न' इति भगवतोवस्थाविशेषो जीवः प्राकृतभोगार्थं तामवस्थां सम्पादितवा"निति । 'तमिममहमज'मितिश्लोकेस्ति । **तथात्वा**दिति अनुभवेन तथात्वात् । **पृथगिति** विस्तारात् पृथक् । राज्ञामित्यत्र कारकषष्ठी न शेष इत्याहुः **अत्र षष्ठीति** । अत्र बोधेपि न शेषसम्बन्धप्रतीतिः किन्तु राजकर्तृकं चरितमित्यत्र बोधे जननसम्बन्धप्रतिपादिका । न च तृतीयापत्तिः दण्डेन घट इत्यादौ तथा दर्शनादिति वाच्यम् । कर्तृत्वसम्बन्धसामान्यविवक्षायां जननसम्बन्धोक्तेः न तु तृतीयार्थद्योतनाय । **इत्युक्तमिति** राज्ञां महत्त्वं भगवत्सम्बन्धादेव यत **अद्भुतम्** आश्चर्यवद् द्रष्टव्यम् । अध्यायार्थो हेतुस्तस्याव्याप्तिस्तु स्वोपोद्घातसम्बन्धेन हेतुसत्त्वात् । हेतुतासम्बन्धेन वा । एवमग्रेपि । एवमुपक्रमः मृत्युवारणसामर्थ्यं वसुदेवे वासुदेवाविर्भावज्ञापकमिति वासुदेवाविर्भावसामग्रीबोधकः । भक्तदुःखमर्थः ।

१०-१-२. **यदोश्चेत्यत्र कथनेति** भगवदवतारार्थं शुद्धपरम्परायां **कथनायुक्तत्वम्** । **मुख्येति** 'अहं बीजप्रदः पिते'तिगीतायाः । **पुरोरिति** यदुकनिष्ठभ्राता पुरुः । **वस्ववेति** 'वसुपुङ्गव'मिति वाक्यात् 'कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः आत्मन्यात्मानमावेश्य सोन्तःश्वास उपारम'दितिसर्वात्मभावोक्तेः । नन्दादिवसूनां सर्वात्मभावदर्शनात् । ब्रह्मणि निष्कले सम्पत्त्या शेषोपि । **तत्कृत** इति वंशकृतः । दोषमाहुः **अग्र** इति । **प्राप्तज्ञाना** इति 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदु'रितिश्रुतेः । **भक्ता** इति 'रुद्रे तु ज्ञानेन भक्ता' इत्यथर्वश्रुतिः । **केचिदिति** विरलाः ॥ १½ ॥

श्रीसुबोधिनीकारिकासु जन्मप्रकरणे

चाचाश्रीगोपेशानां स्यादिति प्रतिभाति

: १ :

श्रीहरिः । **नम इति** । श्रीकृष्णस्य यत्पादाब्जे तयोस्तले तत्र यद्रञ्जिते कुङ्कुमपङ्के तयोः रुचे नमः । श्रीकृष्णपदेन भक्तसहितलीलारसाविष्टत्वं सूचितम् । तादृशस्य चरणयोरब्धत्वोक्त्या लीलायां परस्परसम्बन्धेन उभयोस्तापहारकत्वं सुखदत्वञ्च च ज्ञापितम् । किञ्च अब्जं विकसितं भवति अत्रापि तत्तद्बन्धादिषु तत्तथैव भवति । अब्जे अरुणत्वं भवति । सहजमपि विशेषतः कुङ्कुमपङ्केन तादृशम् । पद्मिनीनां तलमप्यारक्तं भवति । शृङ्गारादिषु कुङ्कुमपङ्केन रञ्जितमपि क्रियते । अत एव रुचे नम इत्युक्तम्, न तु पङ्काय तदभावादिति । तत्कान्तेः सर्वोत्कृष्टत्वज्ञापनाय । नमनमेवोक्तम् । तदेवाहुः यदरुणमिति । मदीयं हृदयाम्बुजं यतः सम्बन्धेन शश्वदारक्तं जातम् । निरन्तरं तत्कान्तेः स्थित्या तदात्मकतया तादृशमेव जातमिति भावः । यद्वा । अत्र प्रभुचरणसरोजतलसम्बन्धि कुङ्कुमपङ्कमुक्तम् । तन्नायिकानामेव सम्भवति, न तु नायकस्येति कथमुपपद्यत इति चेत् । तत्रोच्यते । श्रीकृष्णपदेन गूढभावात्मकत्वम् । तेन तद्भावात्मकस्य विरचितप्रियावेषोचितसकलशृङ्गारस्य प्रभोश्चरणतलमपि तेन रञ्जितं क्रियत इति तत्स्मृत्या तथोक्तम्

प्रियायास्तु पूर्वं तादृशमेवेत्युभयोश्चरणतलस्यारुणत्वमुक्तम्। अत एव पङ्कयोरिति द्विवचनं चोक्तम्। अन्यथा पङ्कस्यैकरूपत्वात् कथमेवं वदेयुः। तयो रुचे नम इति। तत्तलशोभां दृष्ट्वा प्रणयभरेणात्यातुरतया रसेन नमनम्। अन्यथा चरणं विहाय रुचे नम इति कथमुक्तं स्यात्। किञ्च। यस्सम्बन्धेन मामकं हृदयाम्बुजं सततमरुणं जातम्। रसात्मकतत्सम्बन्धेन हृदयमपि तल्लीलारसात्मकं जातम्। तादृशलीलासमये प्रियासहितप्रभुचरणतलं स्वकरतलेन यदा लालितं क्रियते, तदा तच्छोभादर्शनेन परमरसावेशेन तदात्मकतया तच्चरणतलं हृदये स्थाप्यते। तदा तदा तद्धृदयं पूर्वमप्यम्बुजत्वेन सरसं तथापि तदानीन्तनप्रचुरभावेनान्तलीलारसभरेण पुष्टं विशेषतो जातमिति तथोक्तम्। अत एव तादृग्लीलाविवरणमभूत्। सर्वदा तल्लीलात्मकमेव तिष्ठतीति शश्वदित्युक्तम्। किञ्च। यथा रविसम्बन्धेन कमलं विकसितं भवति, तथा तदरुणकान्तिसम्बन्धेनैतद्धृदयाम्बुजमपि विकसितम्। पुनस्तस्य तद्रसात्मकतया तद्रूपत्वमेव जातमिति तथोक्तम्। किञ्च। यथा प्रियमिलने तदात्मकतया प्रियरूपत्वं भवति, तथा तलस्यारुणत्वे तत्सम्बन्धेन हृदयस्याप्यरुणत्वं युक्तमित्यारक्तादिपदानि विहायारुणपदोपादानादवगम्यते ॥ १ ॥

श्रीहरिरायाणामिति प्रतिभाति

: २ :

नमामि हृदये शेष इत्यस्य **टिप्पण्याम्**। **मूलेनुशयनशब्दस्येत्यत्र**। मूले 'निरोधोऽस्यानुशयन'मिति वाक्येऽनुशयनशब्दो भावार्थक एव प्रतिभाति। यतोऽनुशयनं नाम भगवतो भावात्मकस्य सर्वात्मभाववति भक्तहृदये तथाविधाखिललीलाविशिष्टस्य प्रभोर्निगूढभावरूपेण स्थायितया स्थितिः। तथा चात्र स्कन्धे क्रियमाणाखिललीलायाः कथं निरोधशब्दवाच्यता। अन्यथा 'प्रपञ्चे क्रीडनं **हरे'रित्याचार्य**विवृत्तिविरोध इत्याशङ्क्य तस्योभयार्थकत्वनिरूपणायाहुः **करणव्युत्पत्त्ये**ति। पक्षे त्वित्यत्र तुरप्यर्थे। तथा मूले भावार्थकत्वपक्षेऽपि अनुशय्यतेऽनेनेति करणव्युत्पत्त्या तथाविधस्वरूपस्थितिसम्पादकलीलायामपि तद्रूपत्वमुच्यत इत्युभयार्थकोऽयमनुशयनशब्द इत्यर्थः। अत **एवाचार्यवर्यै**रग्रे तथैव निरूप्यते। 'प्रपञ्चविस्मृतिः सर्वा तदासक्तिश्च वर्ण्यते' 'प्रपञ्चे क्रीडनं हरे'-रित्यादि। प्रपञ्चविस्मृतियुतासक्तिर्व्यसनमिति निरोध एव, भरतेन 'या तु व्यसनसम्प्राप्तिर्निरोधः स तु कथ्यत' इति तथैव तल्लक्षणाभिधानात्। तथा च भगवतो निरोधो भक्तेषु तत्परतया लीला, भक्तानां प्रपञ्चस्मृत्या भावरूपस्य प्रभोः स्थायित्वं हृदये निरोध इति बोधितम्। यद्यप्येवं तथास्थितिर्निरोध इति सिध्यति। अत एवोद्धवेऽपि व्रजसीमन्तिनीचरणरेणुसम्बन्धिगुल्मलतादिषु स्वजननाभिलाषसञ्चितातुलभाग्यसन्ततावेवैव स्थितिरुक्ता। स्वामिनीसम्बन्धितया तद्द्वारकतद्विषयकप्रसादवता प्रभुणा स्वामिनी, यतो विदुरसविधे तेना'प्यात्मनः परमां स्थिति'मित्यनेन सामान्यतः सा तथैवानूदिता। तथापि स्थितेर्धर्मान्तरवन्न स्वरूपतो भिन्नत्वं लेशतोपीति तादृगवस्थापन्नं स्वरूपमेव स्थितिशब्देनोच्यते। अत एव **प्रभुभिराभासो निरोधरूपं भगवन्तं विवृण्वन्ती**-त्येवमेव निरूपित इति नानुपपत्तिः काचित्। 'रसो वै स' इति श्रुतेः 'स्थायिभावो रसः स्मृत' इत्यादिवाक्यैर्भगवतो रसरूपस्य स्थायिभावात्मकत्वं तच्छास्त्रप्रसिद्धमिति न तथाभासनिरूपणेऽपि रसस्वरूपविद्भिः संशयितव्यमिति दिक् ॥

अयमर्थो निजाचार्यचरणाम्बुजभावनात्।
भासते भाग्यराशीनां सततं हृदि तिष्ठति ॥ १ ॥

जन्मप्रकरणोपरि अमुद्रितस्वतन्त्रलेखाः

श्रीहरिः। **नम इति** श्रीकृष्णस्य यत्पादाब्जे तयोस्तले तत्र यद्रंजिते कुकुमपङ्के तयो रुचे नमः। **श्रीकृष्णपदेन** भक्तसहितलीलारसाविष्टत्वं सूचितम्। तादृशस्य चरणयोरब्जत्वोक्त्या लीलायां परस्परसंबंधेन उभयोस्तापहारकत्वं सुखदत्वं च ज्ञापितम्। **किञ्च**। अब्जं विकसितं भवति। अत्रापि तत्तद्बंधादिषु तथैव भवति। अब्जे अरुणत्वं भवति, तदत्र सहजमपि विशेषतः कुंकुमपंकेन तादृशम्। पद्मिनीनां तलमप्यारक्तं भवति। शृङ्गारादिषु कुंकुमपङ्केन रंजितमपि क्रियते। **अत एव रुचे नम** इत्युक्तम्, न तु पंकाय तदभावादिति। तत्कान्तेः सर्वोत्कृष्टत्वज्ञापनाय नमनमेवोक्तम्। **तदेवाहुः यदरुणमिति**। मदीयं हृदयाम्बुजं यतः संबंधेन शश्वदारक्तं जातम्, निरंतरं तत्कान्तेः स्थित्या तदात्मकतया तादृशमेव जातमिति भावः। यद्वा; अत्र प्रभुचरणसरोजतलसंबंधि कुंकुमपङ्कमुक्तम्। तन्नायिकानामेव संभवति, न तु नायकस्येति कथमुपपद्यत इति चेत्, तत्रोच्यते श्रीकृष्णपदेन गूढभावात्मकत्वम्, तेन तद्भावात्मकस्य विरचितप्रियावेषोन्वितसकलशृङ्गारस्य प्रभोश्चरणतलमपि तेन रंजितं क्रियत इति तत् स्मृत्वा तथोक्तम्। प्रियायास्तु पूर्वं तादृशमेवेत्युभयोश्चरणतलस्यारुणत्वमुक्तम्। अत एव पङ्कयोरिति द्विवचनं चोक्तम्। अन्यथा पङ्कस्यैकरूपत्वात् कथमेवं वदेयुः। **तया रुचे नम इति**। तत्तलशोभां दृष्ट्वा प्रणयभरेणात्यातुरतया रसेन नमनम् अन्यथा चरणं विहाय **रुचे नम** इति कथमुक्तं स्यात्। किञ्च। **यत्संबधेन मामकं हृदयांबुजं सततमरुणं जातम्**। रसात्मकतत्संबंधेन हृदयमपि तल्लीलारसात्मकं जातम्। तादृशलीलासमये प्रियासहितप्रभुचरणतलं स्वकरतलेन यदा लालितं क्रियते, तदा तच्छोभादर्शनेन परमरसावेशेन तदात्मकतया तच्चरणतलं हृदये स्थाप्यते। तदा तदा तद्धृदयं पूर्वमपि अंबुजत्वेन सरसं तथापि तदानींतनप्रचुरभावेनांतलीलारसभरेण पुष्टं विशेषतो जातमिति तथोक्तम्। अत एव तादृग्लीलाविवरणमभूत्। सर्वदा तल्लीलात्मकमेव तिष्ठतीति

रत्यादित्युक्तम्। किञ्च। यथा रविसम्बन्धेन कमलं विकसितं भवति, तदा तदरुणकान्तिसम्बन्धेनैतद्धृदयांबुजमपि विकसितं पुनस्तस्य तद्रसात्मकतया तद्रूपत्वमेव जातमिति तथोक्तम् । किञ्च, यथा प्रियमिलने तदात्मकतया प्रियरूपत्वं भवति, तथा तस्यारुणत्वे तत्सम्बन्धेन हृदयस्याप्यरुणत्वं युक्तमित्यारक्तादिपदानि विहायारुणपदोपादानादवगम्यते ॥ इति टिप्पण्याः प्रथमश्लोकस्य केषांचिद्व्याख्यानम् ॥

सुबोधिन्या भाषानुवादः

श्रीमद्वल्लभाचार्य महाप्रभुजी श्रीसुबोधिनीजी व्याख्या द्वारा श्रीमद्भागवतजी के दशम स्कंध के विवरण के प्रारंभ में प्रथम एक कारिका में कलानिधि भगवान् श्रीकृष्णचन्द्रजी को नमस्कार करते हैं।

—मङ्गलाचरण—

नमामि— **का. १**

भगवान में सर्वात्मसिद्ध होने से दासभाव को प्राप्त मेरे हृदय–रूप–शेष पर विराजमान जो प्रभु लीलारूप क्षीर–सागर में (दशम स्कंध के अर्थरूप निरोधस्वरूप) शयन करते हैं, याने सो रहे हैं, और जिन प्रभु की अनन्त लक्ष्मी हूँ स्वरूप तथा अनेक प्रकार के माधुर्यवचनादि लीलाभावों से सेवा कर रही हैं, वैसे कलानिधि रसात्म भगवान् श्रीकृष्ण को मैं नमस्कार करता हूँ।

श्रीमदाचार्यचरण निजभक्तों को शिक्षा देने के लिये शिष्टाचार के अनुसार श्रीसुबोधिनी जी व्याख्याविवरण का प्रारंभ करते हुए स्वयं मङ्गलाचरण करते हैं। "नमामि" क्रियापद से कारिका का प्रारंभ किया। व्याख्या प्रारंभ में प्रथम प्रभु का दर्शन पाया और भावविभोर श्रीवल्लभजी ने श्रीठाकुरजी के श्रीचरणों में "नमस्कार" स्वरूप भेट समर्पित की इसलिये "नमामि" क्रिया से कारिका आरम्भ हो गया।

अब इस कारिका का अर्थ करने के पूर्व कुछ प्रस्ताव के रूप में यह जानना उचित होगा। जो दशम स्कंध है उसका नाम है निरोधलीला। और दशमस्कंध भगवान श्रीकृष्णजी का हृदय है। तात्पर्य यह हुआ कि दशम स्कंध का प्रतिपाद्य विषय निरोध है। अब यह समझना आवश्यक होगा कि दशमस्कंध में "निरोध स्वरूप श्रीकृष्ण" प्रभु निरोधात्मक दशमस्कन्ध की लीलाओं द्वारा, निःसाधजीवों को प्रभु के स्वरूप में और प्रभु की सेवा में निरोध का दान करते हैं और स्वयं भक्तों के हृदय में निरुद्ध होते हैं।

इस कारिका में चार उपमान और चार उपमेय हैं शेष-क्षीराब्धि-लक्ष्मी और शेषशायी नारायण ये चार उपमान हैं। और हृदय-लीला-लक्ष्मीसहस्रलीला एवं (निरोधस्वरूप श्रीकृष्ण) कलानिधि ये चार उपमेय हैं। श्रीनारायणप्रभुजी क्षीरसागर में शेषजी पर सोते हैं और श्रीलक्ष्मीदेवी चरणारविन्दों की सेवा करती हैं। यहाँ पर श्रीनारायण प्रभु धर्मनिधि हैं यहाँ श्रीठाकुरजी धर्मी रसात्मस्वरूप एवं सर्वकलाओं के निधि हैं। वहाँ शेषजी हैं, यहाँ पर भगवद्भाव से सभर सुकोमल सेवारत श्रीमदाचार्यचरण का हृदय है। वहाँ पर क्षीरसागर हैं यहाँ भगवान श्रीकृष्णचन्द्रजी की अनन्त एवं रससभर लीलाएँ ही अनन्तसागर स्वरूप हैं। वहाँ हृदय प्रदेश को छोड़कर श्रीलक्ष्मीदेवी भगवान् नारायण के श्रीचरणों की दैन्य भाव से सेवा करती हैं यहाँ पर अन्यपूर्वा-अनन्यपूर्वा-नित्यसिद्धा-पुष्टपुष्टि भक्त गोपिकाएँ अनन्तसंख्या में अनन्त प्रकार की लीलाओं से श्रीश्यामसुन्दरजी की सेवा करते हैं।

इस कारिका में प्रमाण मार्ग और प्रमेय मार्ग दोनों मार्गों में सेवा का प्राधान्य और लक्ष्य बतलाया गया है। भगवान वेद ने धर्मनिधि भगवान श्रीनारायणजी की सेवा के लिये शेषरूप बनकर शय्या का स्वरूप बना दिया और भगवान को शयन कराये। श्रीलक्ष्मीजी प्रभु के वक्षःस्थल से उतर कर श्रीचरणों में आ बसी और भगवद्भक्ति में दास्यधर्म ही श्रेष्ठ है वह बतलाया। वैसे प्रमेयमार्ग में–पुष्टिमार्ग में सर्वात्मभाव प्राप्त होने के अनन्तर दास्यभाव स्वतःसिद्ध हो जायेगा और भगवत् सेवा ही फलात्मक बन जाती है यह जताया है। अब अधिक विस्तार न करते हुए क्षीराब्धि और लीलाब्धि का कुछ सामञ्जस्य समझने की चेष्टा करें। क्षीर-दूध में (१) शुद्ध याने निर्दोष (२) स्निग्ध (३) मधुर एवं (४) पुष्टिकर चार गुण होते हैं वैसे श्रीठाकुरजी की लीला प्रत्येक लीला निर्दोष-स्नेहसभर-मधुर एवं भावपोषक होती हैं। जैसे दूधपान से देह की और वीर्यबल की पुष्टि होती है वैसे हरिलीलामृत पान से आत्मा पुष्ट होती है भक्ति एवं भाव का पोषण होता है।

इस कारिका में लीलाशब्द दो बार आया है। "लीलाक्षीराब्धि" पद में जो लीला शब्द है वह तो भगवल्लीलाओं का द्योतकलीला शब्द है। भक्त के हृदय में सर्वात्मभाव होने के बाद भगवान की अगाध लीलाओं का आविर्भाव होता है। और भक्त के हृदय में प्रादुर्भूत इस लीला महोदधि में निरोध स्वरूप प्रभु स्वयं विराजते हैं। "लक्ष्मी-सहस्र-लीलाभिः" इस पद में

जो लीला शब्द है वह तो व्रजभक्तन की सेवा मार्गीय जो लीलाओं का निर्देश किया है वे वाणी माधुर्य-हाव-भाव कटाक्ष दैन्य सेवोपयोगी सामग्री सम्पादन आदि लीला शब्द से लिये जायेंगे।

यहाँ पर जो शयन लिया गया है वह "स्थिति" अर्थक है शयनार्थक नहीं है। शेष नारायण पर विराजते हुए भगवान् नाभि से कमल उत्पन्न कर और कमल से विधाता का प्राकट्य कर उसी ब्रह्माजी के द्वारा जगत् की रचना करते हैं। उसी प्रकार निरोधात्मक प्रभु भक्त के हृदय में विराजमान होकर नवीन, मधुर और अजीब भावों द्वारा भक्तिरस स्वरूप जगत् की रचना करते हैं॥ १॥

प्रथम कारिका में मङ्गलाचरण को करते हुये स्कन्धार्थरूप कलानिधि प्रभु को नमस्कार कर अब श्री आचार्यचरण द्वितीय कारिका में बताते हैं कि प्रकरणार्थ रूप प्रभु मेरे हृदय में विराजते हैं।

चतुर्भिश्च चतुर्भिश्च चतुर्भिश्च त्रिभिस्तथा। षड्भिर्विराजते योऽसौ पञ्चधा हृदये मम॥ २॥

जो यह प्रकरणार्थरूप प्रभु, चार अध्यायों के जन्मप्रकरण २८ अध्यायों के चार प्रकरणों के तामसप्रकरण २८ अध्यायों के चार प्रकरणों के राजस प्रकरण २१ अध्यायों के तीन प्रकरणों के सात्विक प्रकरण एवं छ अध्यायों के गुण प्रकरण इसी प्रकार पांच प्रकार से मेरे हृदय में विराजते हैं उनको मैं नमस्कार करता हूँ॥ २॥

(१) चतुर्भिः—उपर की कारिका में जो प्रथम चतुर्भिः पद है उसका अर्थ आरम्भ के चार अध्याय हैं। इन चार अध्यायों में प्रथम अध्याय में प्रभु प्राकट्य का हेतु, द्वितीय अध्याय में अविलम्ब से प्रकट होने का उद्यम, तृतीय में चतुर्भुज स्वरूप को बालरूप में तिरोहित करके द्विभुज बालस्वरूप से प्रकट होना और चतुर्थ अध्याय में कापट्य याने माया का कार्य करना इन चार प्रसङ्गों का चार अध्यायों में वर्णन है।

(२) चतुर्भिः—कारिका में जो दूसरा चतुर्भिः शब्द है उसका अर्थ है तामस प्रकरण के प्रमाण, प्रमेय, साधन और फल इस प्रकरण में हैं। भगवान के ऐश्वर्य-वीर्य-यश-श्री-ज्ञान और वैराग्य छ धर्म और स्वयं धर्मी इस प्रकार सात अध्याय का प्रमाण प्रकरण सात अध्याय का प्रमेय प्रकरण सात अध्याय का साधन प्रकरण एवं सात अध्याय का फल प्रकरण इस प्रकार से चार प्रकरण बताये हैं। उन चार प्रकरणों को चतुर्भिः पद से बताते हैं।

(३) चतुर्भिः—तृतीय पद जो चतुर्भिः है वह तामस प्रकरण के भांति राजस प्रकरण के लिये समझ लेने का हैं। राजस प्रकरण में भी प्रमाण, प्रमेय, साधन और फल सात सात अध्यायों के चार प्रकरण हैं और २८ अध्याय हैं।

(४) त्रिभिः—जो त्रिभिः यह चतुर्थ पद है इसका अर्थ प्रमेय-साधन-और फल नाम के तीन प्रकरण सात्विक प्रकरण के हैं। इस सात्विक प्रमाण नाम का अवान्तर प्रकरण नहीं हैं क्योंकि सात्विक जीव शुद्ध अन्तःकरण वाले होते हैं। उनके हृदय में श्रद्धा होती है इसलिये उनके हृदय में शङ्काएँ नही होती है इससे उनको प्रमाण की आवश्यकता नहीं रहती हैं।

(५) षड्भिः—छह अध्यायों का गुण प्रकरण का षड्भिः पद से उल्लेख किया है। इस प्रकरण में क्रम अनुसार ६ अध्यायों में ऐश्वर्य-वीर्य-यश-श्री-ज्ञान और वैराग्य भगवान के ऐश्वर्यों का वर्णन है।

इन पांच प्रकरणों में जन्मप्रकरण के ४, तामस प्रकरण के २८, राजस प्रकरण के २८, सात्विक प्रकरण के २१ और गुण प्रकरण के ६ अध्यायों को जोड़कर ८७ अध्याय होते हैं और कल्पान्तर कथा के तीन अध्यायों को जोड़ देने से ९० अध्याय होते हैं।

कारिका—दशमार्थः प्रकरणाध्यायार्थश्च विचार्यते॥ २½॥

अब श्रीमद्भागवतजी का दशम स्कंध का अर्थ, दशमस्कन्ध के प्रकरणों का अर्थ एवं दशम स्कंध के अध्यायों का अर्थ प्रस्तुत किया जायगा।

प्रथम और द्वितीय कारिका में मङ्गलाचरण एवं प्रकरण विभाग करने के बाद श्री आचार्यचरण स्कन्धार्थ पर विचार करते हैं। स्कन्ध का अर्थ स्पष्टरूप से समझ में आ जाय इसी लक्ष्य को लेकर प्रकरणों के अर्थ का एवं अध्यायों के अर्थ का विचार करना अनिवार्य जानकर इस पर भी विचार करते हैं। आचार्यचरणों ने शास्त्र-स्कन्ध-प्रकरण-अध्याय-वाक्य पद और अक्षर इन सातों प्रकारों से जो समन्वित एक ही अर्थ अविरोध से मिलाना वही भागवतार्थ है ऐसी प्रतिज्ञा की है और इन सातों में से श्रीसुबोधिनीजी में वाक्य-पद-अक्षर इन तीन विषयों का विचार करना था लेकिन कितने टीकाकारों ने स्कन्धार्थ में कुछ संदिग्धता पैदा की इस संशय की निवृत्ति के कारण आचार्यचरण स्कन्ध-प्रकरण-एवं अध्यायों के अर्थ की भी समालोचना करेंगे।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्रीकृष्णाय नमः

श्रीकृष्णचरणद्वन्द्वपद्मसङ्गिरजःस्रजः । कृपया मुकुरस्वान्तं स्वच्छं कुर्वन्तु मे सदा ॥ १ ॥
ब्रह्मादिनर्तको यस्तु गोपिकाभिर्ननर्त ह । भक्तानां तामसादीनां परमानन्दफलप्रदः ॥ २ ॥
श्रीमुकुन्द इति ख्यातः सर्वसाधनसत्फलम् । दशमस्कन्धटीकायां स करोतु सहायताम् ॥ ३ ॥
चतुर्विंशतिभिः शुद्धा कथा हीशस्य वर्णिता । अत्र स्कन्धे नवतिभिर्निरोधो विनिरूप्यते ॥ ४ ॥

यद्यपि सर्वेष्वेव स्कन्धेषु सर्वासां सर्गविसर्गादिलीलानां निरूपणं स्पष्टतरमेवास्ति, तथापि तत्र तत्र तत्तल्लीलानां बाहूल्येन वर्णनात् प्राधान्याभिप्रायेण तत्तत्स्कन्धानां तत्तल्लीलार्थत्वं बोध्यम् । तत्र निरोधो नाम जीवस्य देहेन्द्रियान्तःकरणादिस्वशक्तिभिः सह भगवति स्थितिः । यथोक्तं द्वितीयस्कन्धे—"निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः" इति । सा च द्विधा । प्रलये भगवति लयात्मिका, प्रपञ्चदशायां तु भगवल्लीलागुणस्वरूपमाधुर्याद्यनुभवेन प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिरूपा च । यथोक्तं द्वादशस्कन्धे–'नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः । संस्थेति कविभिः प्रोक्ता चतुर्धाऽस्य स्वभावतः' इति । तत्र प्राकृतादिचतुर्धा प्रलयात्मको निरोधस्तु तृतीयादिस्कन्धेष्वेवोक्तः । स्वभावतो भगवत्यासक्तिरूपः पञ्चमो निरोधस्त्वत्र निरूप्यते ॥ 'भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत्' इति स्पष्टतया वक्ष्यमाणत्वात् 'श्रवणस्मरणार्हाणि करिष्यन्निति केचन । कलौ जनिष्यमाणानां दुःखशोकतमोनुदम् ॥ अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः' इत्युक्तत्वाच्च स निरोधो भगवल्लीलाश्रवणादिभिरेव सम्पद्यते । अतो लीला अत्र नवतिभिरध्यायैर्निरूप्यन्ते ॥ तत्र वासुदेवादिचतुर्मूर्तेर्भगवतः प्राकट्यसूचनायादौ चतुर्भिरध्यायैर्जन्मप्रकरणनिरूपणम् । ततः शास्त्रीयाचारशून्यानामपि तामसानां व्रजभक्तानां निरोधार्थमष्टाविंशतिभिरध्यायैस्तामसप्रकरणम् । तत्रापि प्रमाणप्रमेयसाधनफलानां निरूप्याणां चतुर्विधत्वात्तन्निरूपकाणि चत्वार्यवान्तरप्रकरणानि । तत्राप्यैश्वर्यादिषड्गुणविशिष्टस्य लीलेति सूचयितुं सप्तभिरध्यायैस्तेषां निरूपणम् । तत्राप्यघासुरवधादिनिरूपकमध्यायत्रयं तु प्रक्षिप्तमेवेत्याहुराचार्याः ततश्च राजसभक्तानां निरोधार्थमष्टाविंशतिभिरध्यायै राजसप्रकरणम् । तत्राप्यवान्तरप्रकरणान्यध्यायतात्पर्यं च पूर्ववज्ज्ञेयम् । ततश्च सात्विकभक्तानां निरोधार्थमेकविंशतिभिरध्यायैः सात्त्विकप्रकरणम् । तत्र 'सत्त्वात् सञ्जायते ज्ञानम्' इति वाक्यात्तेषां प्रमाणापेक्षाभावात् प्रमेयादित्रितयनिरूपकाणि त्रीण्येवावान्तरप्रकरणानि । अध्यायतात्पर्यं तु पूर्ववदेव ज्ञेयम् । ततश्च "ऐश्वर्यादयः षड्गुणाः परमेश्वरे श्रीकृष्ण एव पूर्णाः, नान्यत्र । ब्रह्मादौ तु भगवच्छब्द औपचारिक" इति सूचयितुं षड्भिरध्यायैर्गुणनिरूपणप्रकरणम् । इत्येवं नवतिरध्याया ज्ञेयाः । तत्र तु प्रथमेऽध्याये भूमेर्मातुर्विशेषतः ॥ दुःखं भगवतः प्रादुर्भावहेतुर्निरूप्यते ॥ १ ॥ अथ परमभागवतस्य भगवच्चरितामृतानेकमानस्य राज्ञः सकलकलांशावेशावतारावतारि श्रीकृष्णचरितं सङ्क्षेपतो नवमस्कन्धे श्रुतवत एवं शङ्का जाता—"मुनिसत्तमेन अयं मदुक्तं सम्यगवधारयति नवास्य भगवद्भक्तिरस्ति नवेति' ममाधिकारसन्देहादनधिकारिणं प्रत्यप्रकाश्यं भगवच्चरितं विस्तरेण नोक्तम्" इति । तत्र श्रुतावधारणस्याधिकारित्वाङ्गत्वादवधारणज्ञापनार्थं नवमे श्रुतमनुवदति–कथित इति सार्द्धेन । सोमसूर्ययोर्वंशविस्तारो भवता कथितो नवमस्कन्धे समयावधारित इति शेषः । एवमग्रेऽपि । उभयवंश्यानां सोमसूर्यवंशोद्भूतानां राज्ञां परमाद्भुतं विस्मयावहं चरितं च कथितम् । तत्र सन्तानप्रबन्धो वंशस्तस्य विस्तारः परम्परारूपः । तत्र प्रथमं सूर्यवंशस्य कथितत्वेऽपि सोमवंशे श्रीकृष्णावतारेणाभ्यर्हितत्वात्सोमस्य पूर्वनिपातः । चरितस्याद्भुतत्वं च दुर्वासश्चक्रतापेन्द्रवृषककुदारोहणादिना बोध्यम् ॥ १ ॥ वक्तुः स्तुतिरपि कथने हेतुरतस्तं स्तुवन् सम्बोधयति—मुनिसत्तमेति । तत्र मननशीला मुनयः, तत्रापि प्राप्तज्ञाना मुनिसन्तः, महानुभवप्राप्ता मुनिसत्तराः, ततोऽपि श्रेष्ठो भगवद्भक्तो मुनिसत्तमः । नितरां धर्मशीलस्य यदोश्च वंशविस्तारश्चरितं च कथितम् । सोमवंशानुवादेनैव तदवान्तरभूतयदुवंशानुवादस्यापि जातत्वात् पुनस्तदनुवादस्तत्र भगवदवतारेणादरसूचनार्थः । नच यदोः पितुराज्ञोल्लङ्घनात्कथं धर्मशीलत्वमिति शङ्कनीयम् । धर्मो मुख्यो भगवद्भक्तिलक्षणः, 'धर्मो मद्भक्तिकृत्प्रोक्त' इति भगवदुक्तेः । पितुराज्ञया जराङ्गीकारे तया ग्रस्तस्य भगवद्भजनलोपमाशङ्क्य मुख्यजनकस्य भगवतो भजनसिद्ध्यर्थं स्वयौवनदाने तेन पित्रा स्वमातृसम्बन्धस्य करिष्यमाणस्यात्यन्तानुचितत्वमाशङ्क्य तन्निरासार्थं च गौणपितुर्ययातेराज्ञोल्लङ्घनेनाधर्मः । धर्मस्य हि फलं भक्तिरतो धर्मान्तरापेक्षया तस्याः प्रबलत्वात् । यद्वा कञ्चिद्ब्राह्मणं प्रति त्वद्याचितमहं सम्पादयिष्यामीत्यनिर्दिष्टा नामविशेषनिर्देशरहिता प्रतिज्ञा कृता जराङ्गीकारे च तत्सम्पादनसामर्थ्याभावे दोषः स्यादतः पितृवचनं नाङ्गीकृतम् । यथोक्तं हरिवंशे—'अनिर्दिष्टा मया भिक्षा ब्राह्मणस्य प्रतिश्रुता ॥ अनपाकृत्य तां राजन्न ग्रहीष्यामि ते जराम्' इति तस्य धर्मशीलत्वम् । 'नोत्सहे' इति नवमस्कन्धवाक्यमपि यथार्थत्वेन तद्धर्मशीलत्वद्योतकमेव । नच तर्हि कथं श्रीशुकेन 'प्रत्याचख्युरधर्मज्ञा' इत्युक्तमिति शङ्कनीयम् । यदुव्यतिरिक्तानां तुर्वस्वादित्रयाणामेवैतद्विशेषणं ज्ञेयम् । अन्यथा 'यदुः पप्रच्छ धर्मवित्' इत्येकादशस्कन्धे वक्ष्यमाणभगवद्वाक्येन विरोधापत्तेः ॥ एवं पूर्वस्कन्धोक्तमनूद्य प्रश्नस्य श्रवणाङ्गत्वाद्भगवच्चरितं पृच्छति ॥ १½ ॥

अन्वितार्थप्रकाशिका

श्रीराधामाधवाभ्यां नमः

आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन्पदेऽस्तु मम चित्तमगोचरेऽपि ।
यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥
यावन्निरञ्जनमजं पुरुषं जरन्तं संचिन्तयामि निखिले जगति स्फुरन्तम् ।
तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥
प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ।
गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽन्वयाय कुरुते दशमे प्रयत्नम् ॥ ३ ॥

प्रथमे देवकीसूनोः कंसः स्वमरणं विदन् ॥ तस्याः षड्बालान् जघान श्लोकास्तत्र तु नंदषट् (६९) ॥ उवाचेत्यष्टौ (८) सपादाश्चतुःशैला (७४।) अनुष्टुभः ॥ १ ॥ श्रीराजोवाचेति ॥ श्रीशब्दः मङ्गलार्थो राज्ञः स्तुत्यर्थश्च । आर्षत्वान्न टच् । क्वापि पाठे श्रीशब्दो न दृश्यते । कथित इति सार्द्धम् ॥ हे मुनिसत्तम ! भवता सोमसूर्ययोः वंशानां पौत्रादीनां विस्तारः कथितः स्वकुलरक्षकश्रीकृष्णावतारेण सूर्यपितृव्यत्वेन चाभ्यर्हितत्वात् सोमस्य पूर्वनिपातः । तथा उभयोः सोमसूर्ययोः वंश्यानां वंशभवानां राज्ञां पुरूरवःककुत्स्थादीनामुर्वशीपतित्वेन्द्रारोहादिना परमाद्भुतं चरितं च कथितम् । धर्मे शीलं यस्य तस्य यदोर्वंशविस्तारस्तच्चरितं च नितरां सम्यक्कथितम् । यदोः पित्राज्ञोल्लङ्घितत्वेऽपि स्ववयसा मातृभोगानौचितीपर्यालोचनादेकादशेऽवधूतसंवादे यदोः सन्निष्ठावर्णनाच्च धर्मशीलत्वम् ॥ १ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

श्रीहरिकृष्णभगवते नमो नमः

श्रीभक्तिधर्मतनयस्य पदाब्जयुग्मं चित्ते ममास्तु मुनिमण्डलहृद्विचिन्त्यम् ।
यत्रस्थषोडशसुलक्षणचिन्तनस्था मुक्तिं प्रयान्ति जनसंसृतिनाशशक्ताः ॥ १ ॥
अन्यं सतामवनहेतव एव देहं धास्ये प्रतिश्रुतमितीह बलाग्रतो यत् ।
सत्यं विधातुमुदभूद्दयया स कृष्णो धर्मस्य सद्मनि पुनस्तममुं नमामि ॥ २ ॥
यः पूर्वरूपमदधान्नृपभावयुक्तमन्यत्तु साधुजनभावयुतं सदीशः ।
तं च द्विरूपधरमेकगुणस्वभावं कृष्णं पितामहमहं शरणं गतोऽस्मि ॥ ३ ॥
नवभिर्विश्वसर्गादिलक्षणैरुपलक्षितम् । श्रीकृष्णाख्यं जगद्धाम परं तत्त्वं नमाम्यहम् ॥ ४ ॥
आश्रयत्वेन निर्दिष्टो दशमे दशलक्ष्मसु । यदुवंशाम्बुधौ क्रीडन् यः कृष्णः स उदीर्यते ॥ ५ ॥
वितत्यै दशमे कृष्णसत्कीर्तेरनुवर्ण्यते । निरोधो धर्मविग्लानिनिमित्तो दुष्टभूभृताम् ॥ ६ ॥
निरोधो यश्चतुर्धाऽस्ति प्राकृतादिः स वर्णितः । प्रसङ्गात् सृष्टिसंहारद्वारा तत्तन्निरूपणैः ॥ ७ ॥
अध्यायाः कृष्णसत्कीर्त्यै दशमे नवतिः कृताः । एतद्व्याख्यातृभिः कैश्चित्त्वधिका अपि कीर्तिताः ॥ ८ ॥
चतुर्भिरादावध्यायैर्ब्रह्मप्रार्थनया भुवः । हरेर्जन्म भरं हर्तुं प्रसङ्गेन निरूप्यते ॥ ९ ॥
कार्ष्णी लीलोदिता त्रेधा गोकुले मथुरापुरे । द्वारवत्यां क्रमात्तत्तद्विशेषैर्बहुधा तथा ॥ १० ॥
वृन्दावनादावध्यायैः सपञ्चत्रिंशता शुभा । वसतो गोकुले लीला दुष्करा वर्ण्यते सुरैः ॥ ११ ॥
स्तुतिः कलिन्दजावारिण्येकेनाक्रूरभाषिता । आख्यातैकादशाध्यायैर्या लीला मथुराकृता ॥ १२ ॥
लीला शेषैः कृता प्रोक्ता द्वारकायां च तत्कृतिः । अध्याया दशमस्कन्ध एवं तेऽत्र स्फुटार्थकाः ॥ १३ ॥
कंसस्तु प्रथमे तत्र देवकीतनयान्मृतिम् । भीतः श्रुत्वाऽवधीद्गर्भान् षट् तस्या इति वर्ण्यते ॥ १४ ॥
कृष्णचारित्रपीयूषश्रवणस्वादनिर्वृतः । पृच्छत्यौत्सुक्यतो राजोक्तानुवादेन तत्पुनः ॥ १५ ॥

नवमस्कन्धान्ते 'जातो गतः पितृगृहाद्व्रजम्' इत्यादिश्लोकद्वयेन समासतः संप्रदर्शितं श्रीकृष्णभगवच्चरितं विस्तरतः शुश्रूषुरतीतस्कन्धार्थानुकथनपूर्वकं राजा पृच्छति **कथित इत्यादित्रयोदशभिः** श्लोकैः । तत्र पूर्वस्कन्धार्थमनुवदति ॥ **कथित इति** ॥ हे मुने, इति शेषः । भवता, सोमश्च सूर्यश्च तयोः, वंशविस्तारः कथितः । उभौ च तौ वंशौ च तयोर्भवा उभयवंश्यास्तेषामुभयवंशजानां, राज्ञां, परमाद्भुतमत्याश्चर्यरूपं, चरितं चरित्रं च, कथितम् । चरित्रस्य क्लीबत्वात् कथितमित्यत्र लिङ्गभेदोक्तिः । ननु नवमस्कन्धे सूर्यवंशः प्रागभिहितस्ततः सोमवंशोऽतः सूर्यसोमयोरिति वक्तुं युक्तं, कथमत्र वैपरीत्येनोक्तिरिति चेत्तत्र सोमवंशप्रवृत्तेर्मूलभूताया इलायाः जन्मनः सूर्यवंशप्रवृत्तेः प्रागभिधानादस्य पूर्वोक्तिः । यद्वा, सोमवंशे श्रीकृष्णप्रादुर्भावः स श्रीकृष्णः परीक्षितः स्वेष्टदेवत्वेनाभ्यर्हितस्तत् प्रादुर्भावकथोपेतत्वेन सोमवंशस्य परीक्षितोऽभ्यर्हितता तत्पूर्वताभिधायकं 'अभ्यर्हितं पूर्वम्' इति शास्त्रं,

तदीक्षया सोमशब्दस्य पूर्वनिपातः। यद्वा। सोमस्य हिमांशुत्वेन शान्तिकरत्वं धर्मः। सूर्यस्य तपनपर्यायपेक्षया संतापकरत्वं धर्मः। सर्वेषां संतापकरत्वतः शान्तिकरत्वस्याभ्यर्हितत्वेन शान्त्यर्थद्योतकसोमस्य पूर्वोक्तिः ॥ १ ॥ **यदोरिति**। हे मुनिसत्तम, नितरामत्यन्तं, धर्म एव शीलं सद्वृत्तं यस्य तस्य, यदोश्च यदोरपीत्यर्थः। वंशविस्तारः, कथितः, परमाद्भुतं चरित्रं च कथितम्। 'उत्तमश्चिन्तितं कुर्यात् प्रोक्तकारी तु मध्यमः। अधमोऽश्रद्धया कुर्वन्नकर्त्तोच्चरितं पितुः' इति नवमस्कन्धोक्तवाक्यदृशा तदप्रत्याख्यानप्रतीतेस्तथापि स्वयौवनोपादानेन स्वपितृकृतस्वमातृसङ्गस्यानुचितत्वात् स्वपितुरुक्तेरनुपादानं यदोर्धर्मशीलत्वमिति ॥ १½ ॥

॥ श्रीहरिः ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

॥ मङ्गलाचरणम्, उपक्रमश्च ॥

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः।

श्रीशं वन्दे भक्तकल्याणदीक्षं लक्ष्यं वेदैर्दक्षमात्मीयकृत्ये। वक्षःपद्मं शिक्षकं दुष्टजातेर्मोक्षस्थानं रक्षकं स्वाङ्घ्रिभाजाम् ॥ १ ॥
साधूनामवनाय दुष्टदितिजध्वंसाय योऽनादिरप्यद्धा मीनमुखावतार-चरितान्यङ्गीचकाराऽऽदरात्।
सर्वागःसहनाय यश्च समभूत् सर्वंसहेशः क्षमाशाली पूर्णकृपार्णवो दिशतु वः श्रीश्रेयसी श्रीपतिः ॥ २ ॥
भक्त्युद्रेक - नमत्सुरेन्द्रमुकुटाऽनर्घ्येन्द्रनीलप्रभम्, भूषानूपुर - पद्मरागरुचिरच्छायं लसच्छ्रीपदम्।
ज्योत्स्नाकन्दनखेन्दुकान्तिललितं यस्याङ्घ्रिदेशं सदा स्वोत्कृष्टं मनुते प्रयाग इह तं वन्दे रमावल्लभम् ॥ ३ ॥
श्रीमद्रमाऽवनिसमाश्रितपार्श्वभागस्तार्क्ष्यध्वजो विधिमुखामरवन्दिताङ्घ्रिः।
कौमोदकी - दर - सुदर्शन - पद्मराजद्धस्ताम्बुजो विजयते भुजगाद्रिराजः ॥ ४ ॥
राजत्स्कन्धमनेकशाखममिता मोदामृतोद्यत्फलं श्रीमद्भागवताभिधं सुरतरुं निर्माय निर्यत्नतः।
तद्भाजः सुखिनः करोति विबुधानाहूय तापत्रयं यस्तं नित्यमहं नमाम्यमृतदं श्रीव्यासविद्योदधिम् ॥ ५ ॥
यश्चक्रे पितरं सुतैर्बहुविधैर्वृक्षादिभिः पुत्रिणं यद्वृत्तिर्ललिताङ्गनासु न मनाङ् नग्नासु मग्नाऽभवत्।
यद्वाणीश्रुतिराशु कं वितरति प्रोच्छिन्नदुःखं नृणां तं वन्दे मुनिनायकं शुकमहं सर्वान्तरस्थं सदा ॥ ६ ॥

दृष्ट्वा यस्य निरत्ययामहरहर्गोदोहमात्रस्थितिं गोसन्दोहनिवासमेव विदधे नारायणोऽपि स्वयम्।
कर्णे लग्नमिहैकवारमपि चेन्मोक्षार्पणे लग्नकं पुंसां यद्वदनामृताक्तवचनं तं व्याससूनुं नुमः ॥ ७ ॥
अंशानां जगदीशितुस्त्रिभुवने संख्यावतां शेखरा ये स्युः सन्तु भवन्तु वा सुकृतिनस्ते वन्द्यमाना जनैः।
यः ख्यातोऽत्र पवित्रकीर्तिरवनौ प्रस्तावनासूत्रधृक् वन्देऽहं तु तमादिदेशिकवरं श्रीरामकृष्णाभिधम् ॥ ८ ॥
कर्ता शेषवचः प्रवृत्तिविवृतेः संन्यायमान्यश्च यो मीमांसाऽप्युभयी यदाश्रयवशान्मीमांसतेऽर्थं सदा।
योगोद्भासितसत्पदः श्रुतिमुखः संख्यावदेकेडितस्तं लक्ष्मीपतिमानतोऽस्मि सदयं श्रीबालकृष्णं गुरुम् ॥ ९ ॥
श्रीमत्सरस्वती–प्रेमरसनिक्षेप-भाजनम्। सभाजननुतं वन्दे धुण्ढिराजगुरुं परम् ॥ १० ॥

श्रीमद्भागवतप्रधानदशमस्कन्धस्थितानि क्रमात्, प्रत्यध्यायनिरूपितेशचरितान्यादाय सारांशतः।
श्रीगोविन्दकृपासुधारसलसत्स्वादं सदानंदकृत् कुर्वे भक्तिरसायनं निखिलहृद्रोगापनोदक्षमम् ॥ ११ ॥
यन्नामश्रुतिरेव सङ्कुलयति श्रुत्यर्थमत्यूर्जितं कृत्स्नस्मृत्युजितार्थबोधजननोल्लासा तथा यत्स्मृतिः।
यत्पूजाविधिरप्यलं किल फलं वैधं प्रसुतेऽखिलं यत्संकल्पनियन्त्रितोऽखिलजनाचारस्त्रिकालेऽपि च ॥ १२ ॥
तस्येशस्य चरित्रजातमनभिप्रायं कथं वा भवेन्नाबीजं कुरुतेऽल्पधीरपि जनः क्षुद्रोपि किञ्चित् क्वचित्।
आलोच्येत्यखिलार्तिहारिहरिणा श्रीशप्रसादोल्लसच्चित्तेन क्रियते रसायनमिदं प्रव्यक्तबीजोदयम् ॥ १३ ॥
स्वभावात् क्वापि तर्केण कुत्रचिद्रूपकादिभिः। ज्ञेयं विज्ञैरिह श्रीशक्रीडाबीजविवेचनम् ॥ १४ ॥
कृत्स्नं यद्यपि नालमीशचरितं प्रादातुमन्तोज्झितं स्याद् सौख्यं तु तथापि पूर्णमतुलं तल्लेशलेशादपि।
आब्रह्माचल-मासमुद्रमुदिता-ऽखण्डप्रवाहस्थितेर्गोदाया जलमल्पमप्यघभिदानन्दाय सञ्जायते ॥ १५ ॥

सौभाग्यास्पदमेकमस्ति महिलाभालेषु चेत् कुङ्कुमं सौभाग्यप्रतिपादनाय तदलं किं तत्र भूषान्तरैः।
एवं मत्कविता- प्रगल्भवनिता- सौभाग्यसन्धायकं मुख्यं श्रीपतिभूषणं विजयतेऽन्याऽऽस्तां न वालंकृतिः ॥ १६ ॥
देव त्वद्गुणवर्णने किल सहस्रास्योऽपि नेशो भृशं त्वत्सौन्दर्यविवेचनेऽपि च सहस्राक्षः क्षणं न क्षमः।
सेवायां न सहस्रबाहुभिरलं युक्तोऽपि शक्तोऽर्जुनस्तत्राहं जगदीश्वरैकवदनो द्व्यक्षो द्विबाहुः कियान् ॥ १७ ॥
इत्थं भूरि समर्थितः स भगवान् प्रोत्साहने मे ह्यदाद् यद्यद्बीजमहं निधाय हृदये क्रीडामकार्षं तदा।
तत्सर्वं तव बुद्धिगोचरमनायासं करिष्येलिख त्वं निःशङ्कमिहार्भकेति समभूदत्र प्रवृत्युद्गमः ॥ १८ ॥

वेदाशेष-प्रमेयाद्भुतचरिततरो-बीज-निर्णेतुकामं दृष्ट्वाल्पं मामनल्पं परिहसतु जनो बाढमाश्चर्यचित्तः ।
सर्वान्तर्यामिता स्वां स्वयमथ विहितामस्य तत्र प्रवृत्तिं स्मृत्वा नित्यं प्रसन्नो भव भुवि भवितास्मीश तेनैव धन्यः ॥१९॥
किञ्चिद्वक्रमवक्रमुद्धतमथ स्निग्धं सहासं क्वचित्, सक्रोधस्फुटमस्फुटं क्वचिदुपालम्भि क्व चार्थान्वयि ।
एवं स्वीयशिशोर्वचोऽपि परमाह्लादाय पित्रोरिति ज्ञात्वा सम्प्रति विश्वतातसरणिस्ताद्दृङ्मयाऽऽलम्ब्यते ॥ २० ॥
अन्याभिः किमु तत्पुराणतरणि - श्रेणीभिरारोहणं यातो यासु न धीवरोऽपि लभते पारं भ्रमन्मानसः ।
शक्ता यच्छ्रुतिरेव दुस्तरभवाकूपारपारङ्गतौ तां श्रीभागवताभिधां न तरणिं कः संतितीर्षुः श्रयेत् ॥ २१ ॥
युक्ताहारविहारशालिभिरपि प्रोच्छिन्नदुर्वासनैः पुम्भिर्योगविशारदैरपि सदा वेदान्तदान्तात्मभिः ।
दुर्दर्शं भगवत्सुदर्शनमिहास येन गर्भेऽपि तन्मातुस्तन्मुनिवामदेववदसौ राजाऽपि वन्द्यः सदा ॥ २२ ॥

कथित इति : १०–१–१

प्रोक्तं सर्वसुधांशुवंशमखिलं तद्वंशतेजोजुषां राज्ञां चारुचरित्रजातमवशाद्ब्रूयात् पुनश्चेदसौ ।
तन्मे स्यात् तदनादरोऽच्युतयशःश्रुत्युल्लसच्चेतसश्चक्रे स्पष्टमतः स तादृगुचितप्रश्नोक्तितः स्वाशयम् ॥ १ ॥

हिन्दी अनुवाद (कर्दमक्षमा)

राजर्षि परीक्षित जी कहने लगे मुनिवरों में परमश्रेष्ठ शुकाचार्य जी ! आपने सोम एवं सूर्यवंश का विस्तार से वर्णन किया, और उन दोनों वंशों में उत्पन्न हुए नृपों के परम अद्‌भुत चरित्र भी कहे । विशेष में स्वभाव सहज धर्मशील श्रीयदुराजा का सम्पूर्ण चरित्र कहा ॥ १½ ॥

तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥ २ ॥
अवतीर्य यदोर्वंशे भगवान् भूतभावनः । कृतवान् यानि विश्वात्मा तानि नो वद विस्तरात् ॥ ३ ॥
निवृत्ततर्षैरुपगीयमानाद् भवौषधाच्छ्रोत्रमनोऽभिरामात् ।
क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नात् ॥ ४ ॥

कर्दमक्षमा

अन्वयः – तत्र अंशेन अवतीर्णस्य विष्णोः वीर्याणि नः शंस । भूतभावनः विश्वात्मा भगवान् यदोः वंशे अवतीर्य यानि (वीर्याणि) कृतवान् तानि नः विस्तराद् वद ॥ निवृत्ततर्षैः उपगीयमानात् भवौषधात् श्रोत्रमनोभिरामात् उत्तमश्लोकगुणानुवादात् पशुघ्नात् विना कः पुमान् विरज्येत ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अंशेनेति प्रतीत्यभिप्रायेणोक्तम् ॥२॥ ननूक्तानि "जातो गतः पितृगृहाद्व्रजमेधितार्थः" इत्यादिना । सत्यम् । पुनर्विस्तरेण वदेत्याह । अवतीर्येति ॥ ३ ॥ अत्र लोके त्रिविधा जनाः मुक्ता मुमुक्षवो विषयैषिणश्चेति । तेषां मध्ये न कस्याप्यलं प्रत्यय इत्याह । निवृत्ततर्षैः गततृष्णैर्मुक्तैरित्यर्थः । मुमुक्षूणामयमेवोपाय इत्याह । भवौषधादिति । विषयैषिणां परमो विषयोऽयमेवेत्याह । श्रोत्रमनोभिरामादिति । अपगता शुक् शोको यस्मात्तमात्मानं हंतीत्यपशुघ्नस्तस्मात् पशुघातिन इति वा ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र यदुवंशे । अंशेनेति प्रतीत्यभिप्रायेण सुज्ञेतरप्रतीत्यभिप्रायेण । सा च प्रतीतिरहो यतोऽनेन सर्वथा नरैः कर्तुमशक्यं पूतनावधाधकारि ततोऽयं नारायणांश इत्येवंरूपोन्नेया यद्वा—योंऽशेन विष्णुस्तस्य परिपूर्णतमस्येत्यर्थः । "रमा राधांशतो ज्ञेया विष्णुः कृष्णांशतः स्फुटम्" इति ब्रह्मवैवर्त्ते । तथाहि "विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितम् ॥ तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते ॥" इति । "पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् । 'ततोभवन्महत्तत्वम्' इत्याद्युक्तेः । "एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः" इत्युक्तेः । "पुरुषोंऽडं विनिर्भिद्य यदादौ स विनिर्गतः" इत्युक्तेश्च त्रिष्वेवांशता प्रतीयते । वक्ष्यति च "नारायणोंऽगं नरभूजलायनात्" इत्यादिना । यद्वांशानां मत्स्यादीनामिनः स्वामी अंशेन स चासाववतीर्णोंऽशेनावतीर्णस्तस्य वीर्याणि प्रभावप्राकट्यकराणि कंसहननादीनि । यद्वा–अंशेष्विनः सूर्य इव प्रकाशकोंऽशेनः पुनः कर्मधारयः । यद्वा–अंशेनैकदेशरूपेण वीर्याणि साकल्येन तु न कोपि श्रोतुं वक्तुं वा प्रभुरिति भावः "अंशः स्यादेकदेशेऽपि वस्तुनो वंटके त्वणौ" इति धरणिदेवः । यद्वा—अंशेन बलदेवादिना 'वासुदेवकलानंतः' इत्याद्युक्तेः 'आदिष्टा प्रभुणांशेन' इत्याद्युक्तेश्च । 'अंशः शक्तिसमावेशः'

---

१. विनातिमुग्धात् विज० ।

इत्यादिपुराणात्। विष्णोः सर्वव्यापकतया परिपूर्णतापर्यवसानस्य स्वयं भगवतः श्रीकृष्णस्येति यावत्। वीर्याणि महाप्रभावमयचरितानि। न इति बहुत्वं तच्छुश्रूषयात्मनो बहुमननात्। यद्वातोऽस्माकं पांडवानां विष्णोर्वीर्याणीति अनेन तत्र स्वस्य भक्तिश्च सूचि ॥ २ ॥ अवतीर्याविर्भूय ॥ ३ ॥ अत्र मानुषे। अलंप्रत्ययोत्र श्रवणारुचिरूपो ज्ञेयः। निवृत्तस्तर्षोऽभिलाषो येषां ते तथा तैः 'कामोऽभिलाषस्तर्षश्च' इत्यमरः। भवौषधात्संसारव्याधेरौषधरूपात्। निवृत्ततर्षैर्यदेव निषेव्याविगततृष्णाव्याधिभिस्तृष्णैव संसारस्तस्मान्मुक्तैरुपाधिक्येन गीयमानाद्भोभो वयमिवैतन्निषेव्यनिरामया भवतेत्युच्चैरुपदिश्यमानात्। निवृत्ततर्षशब्देन शुद्धभक्ता एव ज्ञेया न तु ज्ञानिनस्तेषां निदिध्यासननिष्ठत्वेन गानासंभवात्। मुमुक्षूणां मोक्षमिच्छतामयमेव श्रीकृष्णगुणानुवाद एव भवः संसारस्तस्यौषधान्निवर्तकात्। "संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यं प्लवो भगवतः पुरुषोत्तमस्य। लीलाकथारसनिषेवणमंतरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ॥" इत्युक्तेः। विषयस्तुच्छपरमभेदाद्द्विधा क्षयिष्णुफलकस्तुच्छो विनाशिफलकः सर्वकर्मफलरूपो वा परमः "इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः। अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् ॥" इत्याद्युक्तेः। अथ वा स्वसंबद्धेन्द्रियानुरागजनको विषयः परमविषय इत्यभिप्रेत्याह—श्रोत्रेति। श्रोत्रमनसोरभिरामोतीव प्रियस्तस्मात्। "अविनाश्यरे अयमात्मा" इति श्रुतेः "नैनं छिन्दन्ति शस्त्राणि" इत्यादिस्मृतेश्चात्मनो नाशासंभवेऽपि देहोत्पत्तिनाशादिनात्मन्यपि तथात्वोक्तिः। "निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान् गुणान्। अंतः प्रविष्ट आधत्त एवं देहगुणान्परः ॥" इति "म्रियते चामरो भ्रान्त्या यथाग्निर्दारुसंयुतः" इति च वक्ष्यति स्वयं भगवान् किञ्च "तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जनाः" इह श्रुतावप्यात्महन इति पदमात्मनाशं वक्ति यत् तदात्मज्ञानमेवात्मघात इति वक्ति। "न चेदवेदीर्महती विनष्टिः" इति श्रुतेर्न हि निरंशस्य साक्षान्नाशः संबोभवीतीति। एतदभिप्रेत्याह अपगत शुगित्यादि। ननु त्रिविधजनानुक्त्वा पुनरात्मघातिपशुघातिनौ द्वावुक्तौ ततश्च पञ्चविधा जाता अपि नैतेन त्रिविधप्रतिज्ञाहानिः शंक्या तयोर्विषयिष्वंतर्भावात्कथमिति तत्राह—विषयिणोऽपि विषयभेदाद्द्विधैव परमविषयिणस्तुच्छविषयिणश्च। भगवत्यनुरागिणः परमविषयिणोऽत्र ज्ञेयाः। देहाद्यात्मदर्शिनः कर्मिणश्च तुच्छविषयिण इति। परमरागिणस्तु न विरज्यंते "को नाम लोके पुरुषार्थसारवित्पुरा कथानां भगवत्कथासुधाम्। आपीय कर्णांजलिभिर्भवापहामहो विरज्येत विना नरेतरम्" इत्युक्तेः। तुच्छविषयिणस्तु विरज्यंत एवेत्यभिप्रायेणाहापशुघ्नात्पशुघ्नाद्वेति। पशुघ्नः स्वर्गकामी कर्मी ततो विना स तु विरज्यत एव तदुक्तम् "त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः" इति। पुमानित्यनेन स्त्री न स्वातन्त्र्यात्क्लीबश्चांगवैकल्याद्विरज्येतां नामेत्यर्थः। यद्वा—पुमान् जीवस्तेनाधिकार्यपेक्षा निरस्ता। यद्वा—पशुघ्न व्याधात्। तस्य हि विषयत्वसंभवेऽपि हिंसादिक्लेशविद्धबुद्धिः तेन लोकद्वयसुखविवेकासिद्ध्या विषयितया अप्यभावः। अत एवोक्तं "राजपुत्र चिरंजीव मा जीव ऋषिपुत्रक। जीव वा मर वा साधो व्याध मा जीव मा मर" इति। तस्माद्यो विरज्यते स लोकद्वयेऽप्यात्मक्लेशित्वेन तद्विरागात्परेष्वपि शल्यवदर्पणेन व्याध एवेति गालिप्रदान एव तात्पर्यम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषणी

अभीष्टमाह—तत्रेत्यर्द्धकेन। धर्म्मशीलत्वादेव तत्र यदोर्वंशेऽवतीर्णस्य श्रीगोलोकाख्यनिजपरमलोकात् स्वयं प्रपञ्चेऽभिव्यक्तिमागतस्य, अंशेनेति श्रीधरस्वामिचरणैरेव व्याख्यातम्। तत्र प्रतीतिः साधारणजनानामेव ज्ञेया—"नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीभगवद्गीतातः। ततश्चांशेनावतीर्णस्येति, असर्वसुबोधस्वभावस्येत्यर्थः। यद्वा, अंशेन श्रीबलदेवेन सहेति तस्यापि वीर्य्याणि शंस्यानीति भावः। अर्थान्तरे,—

दर्शयामास लोकं स्वं गोपानां तमसः परम्। कृष्णश्च तत्रच्छन्दोभिस्तूयमानं सुविस्मिताः ॥

इत्यनेन सुष्ठु निरूपयिष्यमाणव्याख्याविशेषमयवचनेन "कृष्णस्तु भगवान् स्वयम्" इत्यनेन च विरोधापत्तेः, उक्तञ्च ब्रह्मणा स्वसंहितायाम् "गोलोकनाम्नि निजधाम्नि तले च तस्य देवीमहेशहरिधामसु तेषु तेषु। ते ते प्रभावनिचया विहिताश्च येन गोविन्दमादिपुरुषं तमहं भजामि" इति। "रामादिमूर्तिषु कलानियमेन तिष्ठन्नानावतारमकरोद्भुवनेषु किन्तु। कृष्णः स्वयं समभवत् परमः पुमान् यो गोविन्दमादिपुरुषं तमहं भजामि" इत्यादि। तत्र तत्र सन्देहास्तु निरसिष्यन्ते। एवमन्यत्रापि विष्णोः सर्वव्यापकतया परिपूर्णतापर्यवसानस्य स्वयं भगवतः श्रीकृष्णस्येत्यर्थः। नः अस्मान् प्रति वीर्य्याणि महाप्रभावमयचरितानि शंस स्तुतिवत् सोत्कर्षं वर्णय इति श्रीकृष्णस्य चरितानां तु परमपरमाद्भुतत्वं सूचितम्, न इति बहुत्वं तच्छुश्रूषयाऽऽत्मनो बहुमानात्। स्वसङ्गिजनापेक्षया वा सा च कृपया विनयेनैव वा। यद्वा, नोऽस्माकं पाण्डवानां यो विष्णुस्तस्य इत्यात्मनस्तस्मिन् भक्तिस्तद्वीर्य्यश्रवणे लालसा च सूचिता ॥ २ ॥ ननु, सर्वाण्यपि तस्य कर्म्माणि परमाद्भुतानि, इति चेत्तर्हि तानि सर्वाण्येव कथयेत्याह—अवतीर्य्येति। अवतारप्रयोजनमुद्दिशति, भगवान् सर्वैश्वर्य्यपूर्णोऽपि कृपया भूतानि सर्वाण्येव भावयति पालयति तथा सः, यतो विश्वात्मा चेतनादिशक्तिप्रेरकत्वेन स्वभावत एव हितकारी परमस्वरूपत्वेन प्रेमविशेषपर्यवसानरूपश्चेत्यर्थः। अतो यानि यावन्ति कर्म्माणि तानि सर्वाण्येव वद संकीर्त्तय तत्र च विस्तराद् विस्तरेण, प्रयोजनादिनिर्द्देशेन, न तु पूर्ववत् संक्षेपेणेत्यर्थः। इत्यसंभवेऽपि लालसत्वेनोक्तम् ॥ ३ ॥ न च विस्तरेण तत्र श्रुते मम तृप्तिराशङ्क्येत्याशयेनाह—निवृत्ततर्षैर्भक्तैरप्युप अधिकं सर्वोपरितनत्वेन वा गीयमा-

नादिति परमफलत्वेन सदोपगानात् परमानंदमयत्वं तत्र मुक्ताः ज्ञानिनः शुद्धभक्ताश्चेति द्वैविध्ये पुनर्जीवन्मुक्ताः प्राप्तसालोक्याद्यश्चेति चतुर्विधा ज्ञेयाः। भवौषधादिति। अर्थान्मुमुक्षूणां सर्वदुःखनिवर्त्तकत्वम्. श्रोत्रमनोऽभिरामादिति, शब्दमात्रेण श्रोत्राणि अर्थेन मनांसि चाभितो रमयतीति तथा तस्मादिति, पारिशेष्याद्विषयेच्छूनामपि सुखप्रदत्वम्. तथा भक्तिच्छूनान्तु उत्तरद्वयमधिकं प्रथमञ्च यथोचितं ज्ञेयमिति चतुर्थोऽप्यधिकारी कल्प्यः। एवं साध्यत्वं साधनत्वञ्च अतः सदा सर्वसेव्यत्वमुक्तम्। अत एव उत्तमः श्लोको यशो यस्य तस्य श्रीभगवतो गुणानां निरतिशयनित्यसत्स्वाभाविकानन्तानामौदार्य्यवात्सल्यादीनामनुवादः, निरन्तरा पुनः पुनः प्रवर्त्तिता वा कथा तस्मात् को विरज्येत विरतस्तृप्तो वा स्यात् तत्राऽऽद्यानां निरन्तरं मनसि तल्लीलानन्दो ब्रह्मानन्दादप्यधिकतया स्फुरति। अत्यन्तोच्छलिततया तादृशगानत्वेन परिणमते च अतः स्वतस्सिद्धत्वात्तेषु गानस्यैव प्राधान्यं दर्शितम्। स्वतस्सिद्धतादृशभावत्वेन त एव च प्रथमं निर्दिष्टाः भुक्तिमुक्तीच्छुषु तादृशस्फूर्त्यभावात् न स्वतः सिद्धत्वम्। अत औषधरूपत्वं श्रोत्रद्वारैव मनःप्रवेशित्वञ्चोक्तम्, तस्मात् श्रवणस्यैव प्राधान्यं दर्शितं पूर्वतो न्यूनत्वञ्च; तत्र द्वितीयेषु परमार्थसाधनरूपत्वेन स्फुरति, वस्तुस्वभावत्वेन श्रोत्रमनोऽभिरामत्वञ्चास्त्येव, तृतीयानान्तु केवलं श्रोत्रमनोऽभिरामतयेति तारतम्यम्, चतुर्थानान्तु प्रथमेभ्य एव न्यूनत्वमन्येभ्यस्त्वाधिक्यम्, शास्त्रेऽस्मिन् पदवाक्यानां क्रमस्त्रिविधो ज्ञेयः। पूर्वपूर्वन्यूनः, उत्तरोत्तरन्यूनः, यादृच्छिकन्यूनश्च। तत्र प्रथमद्वयं कैमुत्यविवक्षया। उत्तरस्त्वभिधेयार्थस्य नात्यादरेण प्रेमावेशेन चेति। अत्र तु त्रयाणां यथोत्तरं न्यूनता। चतुर्थानान्तु यादृच्छिक्येव। तथोक्तिस्तु मुक्तत्वमुमुक्षुत्वाभावेऽपि मम विषयितया श्रोत्रमनोऽभिरामत्वेनापि तत्र विरक्तिर्न युक्तेति विनयात्। पुमानिति स्त्रीवदस्वतन्त्रः क्लीबवत् विकलेन्द्रियश्च तदात्मयोग्यत्वासम्भावनया विरज्यतां नामेत्यर्थः। यद्वा, पुंस एव सर्वत्र प्राधान्यात् पुमानित्युक्तम्। यद्वा; पुमान् जीवः तेन चाधिकार्यपेक्षापि निरस्ता। पशुघ्नात् व्याधात्। तस्य हि विषयित्वसम्भवेपि सततं हिंसादिक्लेशविद्धबुद्धित्वेन लोकद्वयसुखविवेकासिद्ध्या विषयिताया अप्यभावः। अत उक्तम्—"राजपुत्र! चिरञ्जीव माजीव ऋषिपुत्रक! जीव वा मर वा साधो! व्याध! मा जीव मा मर" इति। तस्मात् यो विरज्येत, स लोकद्वयेऽप्यात्मक्लेशित्वेन तद्विरागात् परेष्वपि शल्यवदर्पणेन व्याध एवेति गालिप्रदाने तात्पर्य्यम्। अन्यद्भगवद्भक्तिविलासटीकायां कथामाहात्म्ये विस्तरितमेवास्ति तदेवं सामान्यतः श्रीभगवद्गुणानुवादस्यैतादृशत्वे सति किमुत श्रीकृष्णरूपतद्गुणानुवादस्येति भावः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अधुना तत्र यदोर्वंशे अंशेन बलरामेण सहावतीर्णस्य, यद्वा, सङ्कल्परूपज्ञानेन वा दिव्यविग्रहांशेन वा, अन्यथा "एते चांशकला विष्णोः कृष्णस्तु भगवान् स्वयम्" इति पूर्वोत्तरव्याघातापत्तेः, विष्णोः श्रीकृष्णस्य वीर्याणि वीर्यगुणप्रकारकाणि चरित्राणि नः शुश्रुषुभ्योऽस्मभ्यं शंस विस्तरतः कथय ॥ २ ॥ कानि वीर्याणि? इत्यत्राह—अवतीर्येति। यद्वा, न परव्यूहादिरूपेणावस्थितस्य वीर्याणि; किन्तु यदोर्वंशेऽवतीर्य्य भगवान् यानि वीर्याणि कृतवान्, तानि वीर्याणि विस्तरतो नोऽस्मभ्यं वद शंस, अवतरणप्रभृतीनि स्वर्लोकगमनपर्य्यन्तानि वीर्याणि विस्तरेण कथयेति भावः। अत एव पुनरवतीर्येत्युक्तम्, अवतारप्रयोजनं तन्निमित्तञ्च विस्तरेण वदेत्यभिप्रायेण विशिनष्टि, भूतभावनः भूतानि साधुभूतानि भावयति विभावयति त्रायते इति तथा विश्वात्मा विश्वस्य अन्तरात्मा विश्वमात्मा शरीरं यस्येति वा विश्वात्मा ॥ ३ ॥ ननु, विष्णोर्वीर्याणि अभीक्ष्णशः श्रुतान्येव, किं पृच्छसि? इत्यत्राह—निवृत्ततर्षैरिति। क उत्तमश्लोकगुणानुवादादित्यस्याऽमृतादिति शेषः उत्तमश्लोकस्य भगवतो गुणानुवादरूपादमृतात् पशुघ्नं विना कः पुमान् विरज्येत? न कोऽपीत्यर्थः। प्रसिद्धामृतवैलक्षण्यं सूचयितुं विशिनष्टि, निवृत्तस्तर्षो विषयेष्वनलम्बुद्धिर्येषां तैः विगतविषयस्पृहैर्योगिभिरुपगीयमानात् प्रसिद्धं त्वमृतमनिवृत्ततर्षोपगीयमानमित्यर्थः। भवौषधात् भवस्य संसारस्य रोगरूपस्यौषधम् औषधमिव प्रतीकाररूपात् प्रसिद्धन्तु भववर्द्धनमिति भावः। श्रोत्रयोर्मनसश्चाभिरामात् प्रसिद्धन्तु रसनेन्द्रियमात्राभिराममिति भावः। गुणानुवादो गुणकथा पशुं हन्तीति पशुघ्नो गोघ्नस्तं विनेत्यर्थः। यद्वा, पशुवद्धन्ति गच्छति व्याप्रियत इति पशुघ्नः तं विनेत्यर्थः। पशुतुल्यवृत्तिः केवलमूर्ख इति यावत्, यद्वा, अपशुघ्नादिच्छेदः पश्विति सम्यगर्थकमव्ययम्, न पशु असम्यक् हन्ति गच्छति बुद्ध्यतीति तथा "हन हिंसागत्योः" गत्यर्थास्सर्वे ज्ञानार्थकाः। सम्यगुपकारमविद्वान् कृतघ्न इति यावत्। उत्तमश्लोककृतोपकाराभिज्ञस्तद्गुणानुवादात् कः पुमान् विरज्येतेत्यर्थः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तत्राह—तत्रेति। यदोर्वंशे वीर्याणि पराक्रमान् ॥ २ ॥ तात्पर्यात् पुनरुक्तमेवाह—अवतीर्येति। यानि भूकण्टकदितिसुतहननादीनि कर्माणि, विश्वात्मा विश्वव्यापीत्यनेन ब्रह्मत्वं ध्वनयति। विस्तरतः न केवलमर्थतः प्रपञ्चनम् अपि तु शब्दतः अल्पबुद्धीनामवगन्तुशक्यत्वात्। "स च शब्दस्य विस्तरः" इत्यभिधानम् ॥ ३ ॥ अतीतस्कन्धे हरिकथाश्रवणेनालम्बुद्धिर्नाभूत् इति तत्राह, निवृत्तेति। निवृत्ततर्षैर्विषयालम्बुद्धिसहितैः। भवौषधात् संसाराख्यरोगपरिहारहेतुभूतौषधात् अतिमुग्धात् अन्यथाज्ञानिनः पशुघ्नादिति वा पाठः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्र सार्द्धेन तदनुवादः । तत्रेत्यर्द्धेनाभीष्टविज्ञप्तिः । अंशेन श्रीबलदेवेन सह ॥ १–३ ॥ निवृत्तेति सामान्यतस्तत्प्रशंसा । पितेत्यादिभिर्विशेषत इति ज्ञेयम् निवृत्ततर्षैः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तत्राऽवतीर्णस्य वीर्याणि कथय । कस्य, अंशेन विष्णोः यः खल्वंशेन वैकुण्ठे विष्णुर्भवति, यस्यैकांशो विष्णुः तस्य पूर्णस्येत्यर्थः । यद्वा अंशेन शंस, सामस्त्येन वक्तुं न कस्याऽपि शक्तिरिति भावः ॥ २ ॥ ननु, "जातो गतः पितृगृहाद्व्रजमेधितार्थः' इत्यादिना अंशेनोक्तान्येव सत्यं, सामस्त्येन तद्वीर्य्याणि संक्षिप्तीकृत्यापि वक्तुमशक्यान्येव । त्वया त्वंशेन यान्युक्तानि तान्यपि संक्षिप्तीकृत्य श्लोकाभ्यामुक्तान्यतो बहुभिः श्लोकैस्तान्येव विस्तृतीकृत्य ब्रूहीत्याह–अवतीर्य्येति । भूतानि भाववन्ति प्रेमवन्ति करोतीति प्रयोजनमुक्तम् "नृलोकं रमयामास मूर्त्त्या सर्वाङ्गरम्यया" इति "अवितृप्तदृशां नृणाम्' इति "स्वमूर्त्त्या लोकलावण्यनिर्मुक्त्या" इत्यादिभ्यस्तथैवावगमात् । यतो विश्वात्मा देहजीवाभ्यां सकाशादपि परमात्मा प्रेमास्पदीभवितुमर्हत्येवेति ब्रह्मस्तवान्ते व्यक्तीभविष्यति विस्तरात् अस्मदादिमन्दबुद्धिसुगम्यार्थं विस्तारं शब्दबाहुल्यं प्रापय्येत्यर्थः । "विस्तरो विग्रहो व्यासः स च शब्दस्य विस्तरः" इत्यमरः ॥ ३ ॥

श्रीधरस्वामिभिः श्रीमत्प्रभुभिश्च सनातनैः । ऋजुत्वात्त्यक्तमुच्छिष्टं भुजिष्योऽहमुपाददे ॥

अस्मदादयस्तु संसाररोगग्रस्ताः परमभाग्यलब्धैर्भिषक्शिरोमणिभिस्तत्र भवद्भिर्गीयमानात् कृष्णलीलाऽमृतमहौषधात् कथं विरता भवितुमर्हन्तीत्याह—निवृत्तेति । भवौषधात् संसारव्याधेरौषधरूपात् निवृत्ततर्षैर्यदेव निषेव्य विगततृष्णाव्याधिभिस्तृष्णैव संसारस्तस्मान्मुक्तैर्ज्ञानादिभ्योऽपि उप आधिक्येन गीयमानात् भो भो वयमिव एतन्निषेव्यैव निरामया भवतेत्युच्चैरुपदिश्यमानात्, अन्यौषधवन्नास्य कटवादिरसत्वमित्याह—श्रोत्रमनःसुखप्रदात् । श्रोत्रमनोभ्यामेवैतदौषधं पीयत इति भावः । पशुघ्नः स्वर्गसुखाभिलाषी कर्म्मी तस्माद्विना; स एव विरज्येत नान्यः । यदुक्तम् "त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः । कथायाम्" इत्यादि, यद्वा, अत्र वक्तृश्रोत्रोरुभयोरेवानन्द इत्याह–निवृत्तेति । उत्तमश्लोकस्य गुणानामनुवादात् गुरोर्मुखादाकर्ण्य पश्चादनुकीर्त्तनात् कः पुमान् वक्ता विरज्येत ? न कोऽपि यतो निवृत्ततर्षैरुपगीयमानात्, कृष्णस्य गुणानामनुकीर्त्तनमपि उप सर्वाधिक्येन गीयते । किं पुनस्तेषामास्वादनमिति भवादृशो वक्ता तेषामास्वादकोऽपीति भावः । अत्र वर्त्तमानप्रयोगादाधिक्यवाचकोपशब्दोपन्यासाच्च निवृत्ततर्षशब्देन शुद्धभक्ता एव व्याख्येयाः, न तु ज्ञानिनः । तेषां निदिध्यासनस्यैव शाश्वतिकस्तुतिदृष्टेर्न त्वनुकीर्त्तनस्य, तथैव गुणाऽनुवादं प्राप्य कः खलु मादृशः सांसारिकः श्रोता विरज्येत, यतो भवौषधात् । द्वयोरेव विरागाभावे हेतुः, श्रोत्रमनोऽभिरामात् कथञ्चिद्धनादिककामनया यदि कर्मी वक्ता श्रोता वा स्यात्तदा स विरज्येदेवेत्याह—पशुघ्नाद्विना पशुघ्नो व्याधस्तस्मात् तस्य हि विषयित्वसम्भवेऽपि सततं हिंसादिक्लेशविद्धबुद्धित्वेन लोकद्वयसुखवति स्वात्मनि संसारमोचनेच्छुत्वमारोप्य विवेकाऽसिद्ध्या विषयिताया अप्यभावः । अत उक्तम् "राजपुत्र ! चिरञ्जीव मा जीव ऋषिपुत्रक ! । जीव वा मर वा साधो ! व्याध ! मा जीव मा मर" इति तस्माद्यो विरज्येत स लोकद्वयेऽप्यात्मक्लेशित्वेन तद्विरागात्परेष्वपि शल्यवदर्पणेन व्याध एवेति गालिप्रदाने तात्पर्यम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र यदोर्वंशेऽवतीर्णस्य विष्णोर्व्यापकस्य वीर्याणि चरित्राणि नोऽस्मभ्यं शंस कथय ननु, व्यापकस्यावतारः कथं सङ्गच्छते ? इति चेच्छृणु, व्यापकस्यावतारोऽनावृतस्य कुक्ष्याद्यावृतत्वमचलस्य चलनमदृश्यस्य दृश्यत्वादि च परमेश्वरे सर्वज्ञे सर्वशक्तौ सर्वाश्चर्यमये ब्रह्मशिवादिदुरूहप्रभावे भगवति सर्वं सम्भवति । एतच्चाग्रे स्फुटीभविष्यति तत्र तत्र ननु, विष्णोर्वीर्यकथने मम का शक्तिः 'विष्णोर्नुकं वीर्याणि प्रावोचं यः पार्थिवानि विममे रजांसि' इत्यादि श्रुतेः । तेषामानन्त्यादत आह–अंशेनेति लेशामात्रेण कथय ॥ २ ॥ ननु, "जातो गतः पितृगृहात्" इत्यादिना विष्णोरेव वीर्य्याण्यंशेनोक्तानीत्यत्र सत्यमंशेन तान्युक्तानि तदपेक्षया विस्तरतो वद इत्याह–अवतीर्येति । यदोर्वंशेऽवतीर्य भगवान् स्वाभाविकपूर्णषडैश्वर्यसम्पन्नः भूतभावनः सर्वभूतहेतुर्विश्वात्मा सर्वात्मा "एतदात्म्यमिदं सर्वम्" इत्यादिश्रुतिगणवेद्यः स यानि कृतवान् तानि विस्तराद्वद; यद्वा, तत्रांशेनावतीर्णस्येति बलदेववीर्यप्रश्नः । अवतीर्येति श्रीकृष्णचरित्रप्रश्नः ॥ ३ ॥ सर्वेषामतिप्रियाणि सर्वार्थदानि स्वदासानां समर्थानामसमर्थानाञ्च बहिश्च गर्भादौ च दृष्टादृष्टाच्च भयाद्रक्षकस्य करुणाक्षीरनिधेर्वीर्य्याणि वदस्वेति प्रीत्यतिशयात्पुनराह—निवृत्ततर्षैरिति चतुर्भिः । निवृत्तः स्वभावत एव तर्षः तृट् येषां भगवदवताराणां सङ्कर्षणसनत्कुमारादीनां तैः साधनसम्पत्त्या गततृष्णैश्चोपसमीपे समीपवर्तिजनकल्याणार्थमात्मकल्याणार्थञ्च गीयमानात् । स्वतः शुद्धानां साधनसम्पत्त्या शुद्धानां च परिकराणां कल्याणावहाद्भवौषधाद्भवस्य जन्ममरणप्रवाहस्यौषधं निर्मूलकात् तस्मात् संसारतापतप्तानां सर्वेषामौषधवत् सर्वतापहरादित्यर्थः । औषधं सेवनसमये नियमेन नेत्रमनोऽभिरामं न

भवति अयन्तु तद्विपरीत इत्याह-श्रोत्रमनोऽभिरामादिति। श्रोत्राणि मनांसि च अभितः परितो रमयतीति स तथा तस्मात् उत्तमाः श्लोकाः यशांसि यस्य तस्य विष्णोर्गुणानां वेदप्रसिद्धानामनुवादादपशुघ्नादपगता शुक् यस्मात्तमात्मानं हन्तीति स तथा तस्मादात्मघ्नात् "असुर्या नाम ते लोका अन्धेन तमसावृताः। तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः" इति श्रुतिप्रसिद्धान्नित्यबद्धादृते कः पुमान् विरज्येत ? पुमानित्युपलक्षणं स्त्र्यादीनाम् ॥ ४ ॥

श्रीसुबोधिनी

एवमनूद्य, भगवतो वीर्याणि चरित्राणि च पृच्छति सार्द्धेन—**तत्रांशेनेति**। **तत्र** वंशे। **विष्णो**र्व्यापकस्य। सर्वत्रोद्गमने प्रयोजनाभावात्, प्रपञ्चविलयप्रसङ्गाच्च तत्रैव वंशे देवकीगृहदेशे मायोद्गमेन प्रकटितपरमानन्दस्य तावति देशे तेन प्रकारेण मायां दूरीकृतवानिति अंश एव स भवति। द्वितीयस्कन्धविवरणे चैतत् समर्थितम्, 'अदीनलीलाहसितेक्षणोल्लस'दित्यत्र। शास्त्रार्थापरिज्ञानादंशभगवत्पदाभ्यां लोको भ्राम्यति। अंशावतारप्रसिद्ध्या वा प्रश्ने तथोक्तम्। प्रद्युम्नांशेनेति केचित्, वंशसम्बन्धस्तस्यैवेति। अवतरणं वैकुण्ठादत्रागमनम्। तच्च तत्त्वद्वारापि भवतीति तन्निवारणार्थं साक्षात्त्वकथनाय **विष्णो**रित्युक्तम्। माहात्म्यज्ञानार्थं वीर्याणां प्रश्नः। अचिन्त्यैश्वर्यबोधकानि चरित्राणि **वीर्याणि**। **शंस** कथय। सूक्तसाधारण्येनानुशासनरूपेण कथयेत्यर्थः। न इति विशेषतः स्वस्य तदाकाङ्क्षित्वं निरूपितम् ॥ २ ॥ स्वतन्त्रपुरुषार्थत्वाच्चरित्रमात्रमेव पृच्छन् मत्स्याद्यवतारेष्वप्ययमेव भगवानवतीर्ण इति, तस्य च वीर्याणि चरित्रं चोक्तमिति व्यर्थः प्रश्न इति शङ्कां निवारयति—**अवतीर्येति**। **यदोर्वंशे भगवानवतीर्य यानि कृतवांस्तानि** सर्वाण्येव कथयेतिसम्बन्धः। वीर्याधिक्यास्तित्वकथनाय बहुकालावस्थानं सूचयति **वंश** इति। तच्चरित्रं सर्वमेव धर्मात्मकमपीति वक्तुं यदुसम्बन्धः। असमासस्तु ततोऽप्याधिक्यसूचकः। व्यसनावेशतया अप्रयोजककरणं वारयति–**भगवानिति**। अवतारप्रयोजनं सामान्यतः स्वज्ञातमाह—**भूतभावन** इति। भूतानि भावयत्यनुभावयतीति। भगवानेव संसारे स्थितो न बद्ध्यते। अन्ये तु बद्ध्यन्त इति निर्धारितत्वाद्भगवद्भावेनान्येऽपि चेद्भावितास्ते कृतार्था भवन्तीति भगवदवतारः। एवमवतीर्य यानि कृतवान्, इच्छयापि तत्रत्यानां मुक्तिदानसामर्थ्ये विद्यमानेऽपि यत्कार्याणि कृतवांस्तदग्रिमप्रयोजनार्थमेवेत्यवसीयते। अत एव व्यासावतारः। ज्ञातानि तान्युपयुज्यन्त इति। एतज्ज्ञापयति **विश्वात्मेति**। भगवानेव स्वतन्त्रतया यदि हितं न कुर्यात्तदान्योन्याश्रयः प्रसज्ज्येत। स्वतःकरणे विश्वात्मत्वं हेतुः। **तानि सर्वाण्येव पूर्ववन्नो वद**। यद्यपि 'जातो गतः पितृगृहा'दित्यत्र, द्वितीयस्कन्धादिषु च चरित्रमुक्तं, तथापि विस्तरेण कथयेत्याह—**विस्तरादिति** ॥ ३ ॥ एवं भगवद्वीर्याणां चरित्रस्य च प्रश्नमुक्त्वा चरित्रस्य भगवतश्च माहात्म्यमाह त्रिभिः। भगवतो माहात्म्यं द्विविधम्। अदृष्टदृष्टभेदेन। तत्र प्रथमं चरित्रमाहात्म्यमाह—**निवृत्तेति**।

स्वरूपात् फलतश्चापि महापुरुषयोगतः। विषयोत्तमतश्चापि चरित्रं परमं मतम् ॥ १ ॥
मुक्तस्य कार्यमेतद्धि मुमुक्षोर्भवनाशकम्। अनिन्द्यविषयश्चायं विरक्तोऽस्मिन् यतेद्ध्रुवम् ॥ २ ॥
आत्मघाती कर्मजडो निन्दितार्थरतः सदा। पशुघ्नीव्यतिरिक्तश्चेद्विरक्तो न ततः पृथक् ॥ ३ ॥

प्रथमतः फलरूपं चरित्रमेतदित्याह—**निवृत्ता तर्षा** तृड् येषाम्। तृष्णा अन्तःकरणदोषोपलक्षिका। निवृत्ताः सर्व एव दोषा येषामिति। नह्यल्पदोषवतापि भगवद्गुणा गातुं शक्याः। उप समीपे **गीयमानाद्**गमनप्रयासो निवारितः। श्रवणानन्दत्वेन च विषयानुभवेपि प्रयासो निवारितः। बहुवचनेनावृत्त्या निवार्यदोषनिवृत्तिरपि सूचिता। अनिवार्यास्त्वग्रे फलिष्यन्ति। स्वतन्त्रफलत्वादेव सर्वत्रागत्य गानम्। अनेन रसाभिनिवेशो ज्ञापितः। एवं वक्तुः फलरूपत्वं, श्रोतुर्दोषनिवारकत्वं चोक्तम्। चरित्रस्य फलसाधकत्वमाह—**भवौषधादिति**। भवस्य संसारस्यौषधं निवर्त्तकम्। अत उपकारस्मरणाद्गानम्। श्रोतुस्तु कर्मज्ञानभक्तिभ्य इदं परमं साधनं मोक्षस्य। औषधं हि रोगनिवृत्तौ न पुरुषव्यापारमपेक्षतेऽन्तःप्रवेशनातिरिक्तम्। अत्र चान्तःप्रवेशः श्रवणद्वारा। अतः फलत्वसाधनत्वे एव यद्यपि वक्तव्ये, तथापि श्रवणस्य प्रविष्टग्राहकमनसश्च यदि सुखकरं न भवेत्तदा पूर्वोक्तं न सम्भवतीति जघन्यत्वेपि विषयत्वेन पश्चान्निरूपयति—**श्रोत्रमनोभिरामादिति**। श्रोत्रं मनश्चाभितो रमयतीति। प्रविष्टमेव तथा करोतीति ज्ञातव्यम्। अनिवर्त्यदोषेण चाप्रवेशः। उपेत्यप्राप्तिदोषो निवारितः। तृष्णाभावेन धनार्पणदोषः। गानेन शब्दमाधुर्यम्। जन्ममरणदुःखस्य बहुधानुभूतत्वात्तन्निवारकमौषधमत्यादरेण सेव्यम्। कर्णाकटुत्वं परिणाममनोहरत्वं चोक्तम्। परलोकमभिव्याप्य रमयतीत्यभिशब्दार्थः। एवं स्वरूपगुणकार्यैश्चरित्रस्योत्कृष्टत्वमुक्त्वा सम्बन्धतोऽपि तस्योत्कर्षमाह—**उत्तमश्लोकेति**। उत्तमैः श्लोक्यन्ते ये गुणाः, उत्तमश्लोकस्य वा माहात्म्यख्यापकास्तेषामनुवादः कथनं यत्रेति वा भागवतादिरूपात्। गतदोषाणामप्युत्कर्षो भगवता। भगवतोऽप्युत्कर्षज्ञापका गुणाः। अनुवादस्तेषामप्युत्कर्षहेतुरिति समभिव्याहारादवगम्यते। **पुमानिति**। ये पश्चवतारास्त्र्यवतारास्तेऽत्र नाधिकारिणः। या अपि स्त्रियः श्रवणाद्यासक्तास्ता अपि निमित्तवशादेव स्त्रियः, स्वभावतः पुरुषा एव। अतः पुमान् कोपि न विरज्येत। इत उत्कृष्टरसस्य वैराग्यजनकस्याभावात्। निवर्तमानानां दैत्यत्वमिति वक्तुं दैत्यलक्षणपुरःसरमाह–**विना पशुघ्नादिति**। ये हि पशुघातिनस्ते दैत्याः। दित्युपाख्याने दैत्यानां दयाभावः स्वभावतः प्रतिपादितः। ते च नित्यं भगवत्प्रत्यनीका एवेति न तद्दोषः परिहार्यः। दैत्यानां च मुक्तिर्दोषस्यात्यन्तनिवृत्तिख्यापनाय। आविष्टानामपि मुक्त्यभावे पुनरन्यत्राविश्य तथा कुर्युरित्याधारभूतास्तु मुच्यन्त एव। अपुनरावृत्ति तम एव तेषां मुक्तिः। विरक्तं दृष्ट्वाऽन्यो विरक्तो मा भवत्वित्येतदर्थमुक्तम् ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अग्रिमप्रयोजनार्थमिति। अनवतारसामयिकजीवोद्धारार्थमित्यर्थः ॥ ३ ॥ **श्रवणानन्दत्वेनेति** गानतात्पर्यम्। **अनिवार्या** इति। भगवद्विषयकत्वेन निवारयितुमयोग्याः कामादय इत्यर्थः। **तथापि श्रवणस्येति।** आद्या प्रवृत्तिर्विषयत्वेनैवेति तथाप्रवृत्तस्याखिलपुरुषार्थसाधकेऽर्थे प्रवृत्तिप्रयोजकं विषयान्तरसमानधर्मवत्त्वं जघन्यमेवेति तथोक्तम्। **अनिवर्त्यदोषेण चेति** सहजासुरत्वेनेत्यर्थः। **वैराग्यजनकस्येति।** गुणानुवादे वैराग्यजनकस्येत्यर्थः। दैत्यानां मुक्तिस्वरूपमाहुः—**अपुनरावृत्तीति** ॥ ४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः।

निवृत्ततर्षैरित्यत्र कारिकासु। गुणानुवादविशेषणानां तात्पर्यं वक्तुं पूर्वं गुणरूपस्य चरित्रस्योत्कर्षमाहुः—**स्वरूपादित्यादि।** **महापुरुषयोगत** इति। महापुरुषो भगवान्, तत्सम्बन्धात्। **विषयोत्तमत** इति। विशेषेण सिनोतीति विषयः। विषयश्च तत् उत्तमं च विषयोत्तमं, विषयेभ्यो वा उत्तमम्। इदं यथा तथा "परिनिष्ठितोऽपि नैर्गुण्य" इत्यत्र द्वितीयस्कन्धे सिद्धम्। विषयोत्तमत इति भावप्रधानः। **परममिति।** परः पुरुषोत्तमो मीयते ज्ञायते येनेति तादृशम्। "अत्र मां मार्गयन्त्यद्धे"त्येकादशस्कन्धे सप्तमाध्याये भगवद्वाक्यात्। एवं चरित्रोत्कर्षमुक्त्वा तदनुवादोत्कर्षमाहुर्मुक्तस्येत्यादि। एतच्चरित्रकथनं जीवन्मुक्तस्य कार्यम्, 'तदहं तेऽभिधास्यामी'ति द्वितीयस्कन्धे शुकवाक्यात्। **स्वभावतस्तस्येयमेव कृतिरित्यर्थः।** तथा च ब्रह्मानन्दादप्यधिकतररसरूपत्वात्स्वरूपोत्कर्षः। भवनाशकत्वात्फलतः। ननु चरित्रगानाधिकारो मुक्तानामेवेति चेदन्येषां श्रवणादिकं न स्यात्। तेषां दुर्भिक्षत्वादित्यत आहुर्मुमुक्षोरित्यादि। नन्वस्यैवमुत्कर्षे को हेतुरत आहुरनिन्द्यविषयश्चेति। च पुनः अनिन्द्यश्चासौ विषयश्च। अन्ये हि रूपादयः संसारे बध्नन्ति, इदं तु भगवति बध्नातीति तथेत्यर्थः। तत्र प्रकारमाहुः **विरक्त** इत्यादि। संसाराद्विरक्तः **अस्मिन्** गुणगाने ध्रुवं यत्नं कुर्यात्। तथा चात्र राजशुकयोः श्रवणे कथने च प्रवृत्तिं बोधयता शास्त्रकारेणास्मिन्पद्ये प्रकारो बोध्यत इति भावः। पतेदितिपाठे तु **अस्मिन्** गुणानुवादे रतिरहितोऽयं जीवः स्थानाद्भ्रष्टोऽधः पतेदित्यर्थः। अस्मिन् पक्ष उत्तरार्द्धस्य इदं तात्पर्यम्। ननु गुणानुवादे विरक्तिरेव कथमित्याकाङ्क्षायां पशुघ्नपदतात्पर्यमाहुरात्मघातीत्यादि। अत्र केचिदकारप्रश्लेषं कृत्वा अपगता शुक् यस्मादित्यपशुक् आत्मा, तं हन्तीत्यपशुघ्न आत्मघाती'त्याहुः। तन्न, अपशुक्त्वस्य सुषुप्तौ मुक्तौ वा भवनात्तादृशस्य 'नायं हन्ति न हन्यत' इतिश्रुत्यादिभिर्घात्यत्वायोगात्। अतः सङ्घाताभिमानिन एव तथात्वं युक्तम्। तच्चाकारप्रश्लेषं विनापि पशुं हन्तीति पशुघ्न इति मूलविभुजादित्वात्कप्रत्यये कृतेऽपि प्राप्यते। एवञ्च 'पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम्', 'शिवस्य पशवः सर्वे जीवाः संसारवर्तिन' इतिश्रुतिस्मृतिभ्यां संसारिणां द्विपदां चतुष्पदां च पशुत्वे सिद्धे अवैधप्रकारेण तद्घातिन आत्मघातित्वं स्वारसिकम्। तथा एकादशस्कन्धीयेषूक्तं चमसवाक्येषु 'कर्मण्यकोविदाः स्तब्धा मूर्खाः पण्डितमानिन' इत्यादिना, 'ये कैवल्यमसम्प्राप्ता ये चातीताश्च मूढताम्। त्रैवर्गिका ह्यक्षणिका आत्मानं घातयन्ति ते', 'एत आत्महनोऽशान्ता अज्ञाने ज्ञानमानिन' इत्यनेन कर्मजाड्यान्निन्दितार्थरत्या च तेषामध्यात्मघातित्वं सिद्धम्। बर्हिषदुपाख्यानश्रवणेन राज्ञापि तेषां तथात्वं ज्ञातं, तदभिसन्धाय त्रिविधसङ्ग्रहार्थं पशुघ्नपदमेव राज्ञोक्तं ज्ञेयम्। यदि तु 'श्रोतव्यादीनि राजेन्द्र! नृणां सन्ति सहस्रशः' इत्यादिद्वितीयस्कन्धारम्भवाक्यानुरोधान्निर्बुद्धिरपि गुणानुवादरतिशून्यत्वेनाद्रियते तदा तु हन्तीति घ्न इति घञर्थे कं विधाय तेन त्रिविधानात्मघातिनः सङ्गृह्य पशुसहितो घ्नः पशुघ्न इत्येवं व्युत्पत्त्या पशुपदेन पशुं, हन्तेः सकर्मकत्वात्समभिव्याहारतोऽर्थतस्त्रिविधान् पशुघ्नानादाय पशुघ्नपदेन चत्वारः सङ्ग्राह्याः। किञ्चात्र पुमानितिपदेन पशुघ्नव्यतिरिक्तानां पुंसां श्रवणाधिकारबोधनात् स्त्रीजीवोपि श्रवणाधिकारशून्यत्वेन बोध्यते। स च मायापरिगृहीतः सूक्ष्मदेहविशिष्टो ज्ञेयः। यो गीतायामासुरीसम्पत्तियुक्त उक्तः। एवमेते पञ्चापि कारिकया सङ्गृहीताः। तथा चायमन्वयः—आत्मघाती कर्मजडो निन्दितार्थरतः सदा विरक्तः ततः पृथक् चेन् पशुस्त्रीव्यतिरिक्तो नेति शेषः। अत्र यत्पशुस्त्रियौ त्रिभ्यो भिन्नतयोक्तौ तत्पशुघ्नपदस्य व्युत्पत्तिद्वयबोधनार्थम् ॥ का० ३ ॥ एवं कारिकाभिस्तात्पर्यं सङ्गृह्य श्लोकं व्याकुर्वन्ति—**प्रथमत** इत्यादि। **निवार्यदोषेति।** ते चक्षुरादयो ज्ञेयाः। आवृत्तेस्तन्निवारकत्वं च 'परस्परं त्वद्गुणवादे'ति कर्दमस्तुतौ तृतीये स्फुटम्। अत्राप्यग्रे स्फुटम्। ननु कारिकायां पशूनामनधिकारकथनमसङ्गतं, तेषां श्रवणयोग्यताया एवाभावादित्यत आहुः—**ये पश्ववतारा** इति। तथा च स्तनपानजनकसंस्कारवदेषां पशुत्वसंस्कारस्तत्र गृह्यन्त इत्यदोषः। ननु स्त्रीणामनधिकारः प्रत्यक्षबाधित इत्यत आहुः—**या अपीत्यादि।** ननु घञर्थे कविधानं संज्ञायां भवति, अत्र च घ्न इति कस्यापि संज्ञाभावात् पशुघ्नशब्दस्य द्वितीयाव्युत्पत्तिरसङ्गतेत्यत आहुः—**ये हीत्यादि।** तथा च दित्युपाख्यानसिद्धत्वात् घ्नत्वं दैत्यानां संज्ञात्वेन सिद्धमित्यदोषः। **न तद्दोषः परिहार्य इति।** गुणश्रवणविरागरूपस्तद्दोषो गुणानुवादपरिहार्यो नेत्यर्थः। ननु दैत्यानां तथामुक्तिप्रतिपादनस्य किं तात्पर्यमत्राहुः—**आविष्टानामित्यादि।** **मुच्यन्त इति,** आविशतां निवृत्तत्वे मुच्यन्त इत्यर्थः ॥ ४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अंशभगवत्पदाभ्यामिति। अत्रांशपदं 'कृष्णस्तु भगवान् स्वयं'मित्यत्र च भगवत्पदमतो भ्राम्यति। अंशः पूर्णो वेत्युत्कटकोटिकसंशययुक्तो भवतीत्यर्थः। 'भ्रमु अनवस्थाने' इतिपाठात्संशयोपि भ्रम एवेति भावः। अत्र वीर्यप्रश्नोऽग्रिमश्लोके चरित्रप्रश्नस्तत्र

वीर्यचरित्रयोर्भेदमाहुः—**अचिन्त्यैश्वर्ये**ति ॥ २ ॥ **अवतीर्ये**त्यत्र **व्यसनावेशतये**ति । व्यसनानां क्षुत्पिपासारोगकर्मद्यूतपानस्त्रीसङ्गानामावेशो यस्य तत्तयेत्यर्थः । षड्भिर्गुणैर्धर्मिणा च सप्तव्यसनाभावः सिद्ध इति भावः । **भगवद्भावेने**ति । अवतारे सति चरित्रश्रवणादिना तद्द्वारा भगवत्सम्बन्धे सति भगवतो भावेन संसाराबद्धत्वलक्षणधर्मेण भक्ता भाविता भवन्ति, पुष्पसम्बन्धे तिला इव **कृतार्था** मुक्ता भवन्ति । अबद्धत्वधर्मो जीवेष्वागतो मोक्षपदेनोच्यते । भगवतस्तु बन्धाभावात्तत्र स्थितस्य न मोक्षपदवाच्यत्वमत एव 'न मे मोक्षो न बन्धन'मितिभगवद्वाक्यम् । **इच्छयापी**ति **तत्रत्यानां** अवतारसामयिकानां सर्वे मां पश्यन्त्वितीच्छया साक्षात्कारे मुक्तिः संभवतीत्यर्थः । **पूर्ववच्चो वदे**ति । सूक्तसाधारण्येनेत्यर्थः ॥ ३ ॥ **निवृत्ततर्षै**रित्यत्र मूले उत्तमश्लोकगुणानुवादमाहात्म्यमुक्तमिति श्रवणकीर्तनमाहात्म्यमेव वाक्यार्थो न तु चरित्रमाहात्म्यमित्याशङ्क्य तत्साधयन्तो विशेषणत्रयतात्पर्यमाहुः—**स्वरूपादि**ति । आद्येन स्वतन्त्रफलत्वसूचकेन स्वरूपतो महापुरुषयोग उक्तः । द्वितीयेन फलसाधनत्वसूचकेन फलतो महापुरुषयोग उक्तः । तृतीयेन श्रोत्रमनोरमणकथनाच्छ्रोत्रविषयस्य चरित्रस्य विषयोत्तमत्वं निरूपितम् । **विषयोत्तमे**तिभावप्रधानं, कथनविषयेषूत्तमत्वात् । चरित्रस्येति शेषः । गुणानुवादस्य तथात्वं गुणसम्बन्धादेवेति चरित्रमाहात्म्यमेवोक्तं भवतीति भावः । इदं त्रयं विशदयन्ति **मुक्तस्ये**ति । एतद्गुणकीर्तनमित्यर्थः । तृतीयविशेषणस्यार्थमाहुः **अनिन्द्ये**ति । अयं चरित्ररूपोऽनिन्द्यो विषयः । 'को विरज्येते'तिकथनादस्मिन्विरक्तस्य पातः सूचित इत्याशयेनाहु**रस्मिन्विरक्तो ध्रुवं पते**दिति । एतेनापि चरित्रमाहात्म्यमेवोक्तं भवतीत्याभासोक्तो वाक्यार्थः । **आत्मे**ति । 'पुमानि'तिपदेन पशुजीवानां स्त्रीजीवानां च चरित्रे विराग उक्तः । तद्व्यतिरिक्तश्चेद्विरक्तस्तदा आत्मघात्यादिभ्यः पृथक् न, किन्तु तदन्तर्गत एव । तथा च यो गुणानुवादे विरक्तः स आत्मघात्यादीनां पञ्चानामन्यतम एव ज्ञेय इति भावः । आत्मघातीत्यादि पदत्रयं विशेषणत्रयस्यार्थः । निर्दुष्टान्तःकरणैर्गीयमानान्निवृत्तो दुष्टान्तःकरण एव भवतीत्यन्तःकरणदोषेणात्मानं हन्तीत्यर्थः । **पशुस्त्रीव्यतिरिक्त** इति पुमानितिपदस्यार्थः । स्वलग्नेति । चरित्रस्य फलरूपत्वमाभासे पदस्यार्थ उक्तः सोनेन समर्थित इत्येवकारः । **दोषनिवारकत्वमि**ति । निवृत्ततर्षगीतचरित्रश्रवणेन स्वस्यापि तर्षनिवृत्तिर्भवतीति भावः । **अतःफलत्वे**ति । अन्तःप्रवेशस्यापेक्षितत्वादेवेत्यर्थः । **पूर्वोक्तमि**ति । चरित्रस्यान्तःप्रवेशनमित्यर्थः । **उपेत्यप्राप्नोती**ति । मूले उपेत्युपसर्गेणाप्राप्तिरूपो दोषो निवारितः, किन्तु अनिवर्त्यं सहजासुरत्वमेव दोष इति भावः । **धनार्पणदोष** इति । 'निवारित' इति पूर्वेणान्वयः । **उत्तमैः श्लोक्यन्त** इति । उत्तमश्लोकगुणानामनुवादः शुकादिकर्तृकं सर्गादिक्रमेणोपनिबन्धनं निवृत्ततर्षैरन्यैर्गीयत इत्यर्थः । अत एव शौनकेन शुकसंवादः पृष्टः, राज्ञापि तृतीयस्कन्धारम्भे मैत्रेयोक्तं पृष्टम् । 'तस्माद्भारते'त्यत्र श्रोतव्यविषयतावच्छेदकधर्मनियमकथनात्तत्पुरःसरं शुकादिकृतो गुणानुवादः श्रोतव्यः । अत एव निवृत्ततर्षैरपि स एव गीयत इति भावः । **आद्यपक्षेऽनुवादः** सर्गादिक्रमेणोपनिबन्धनम् । बहुव्रीहिपक्षे नायं विशेषः किन्तु कथनमात्रमनुवाद इत्यर्थः । **गतदोषाणामपी**ति । भगवानुत्तमश्लोक, उत्तमानां गतदोषाणां स्वश्लोकनेनोत्कर्षसम्पादकः । तथा च तेषामुत्कर्षज्ञापको भगवान्, भगवत उत्कर्षज्ञापका गुणाः, गुणानामुत्कर्षज्ञापकोनुवाद इत्यर्थः । **नाधिकारिण** इति । एते स्वरूपत एवानधिकारिणः । आत्मघात्यादयस्त्रयस्तु दोषनिवृत्तावधिकारिणो भवन्त्यपीति भावः । **निमित्तवशा**दिति, तादृग्देहसम्पादककर्मवशादित्यर्थः । **स्वभावत** इति । जीवनिष्ठपुंस्त्ववत्य इत्यर्थः । जीवनिष्ठस्त्रीयत्वपुंस्त्वे एकोनविंशेऽध्याये टिप्पण्यां विवृते । तदुपलक्षणेन पशुत्वादिकमपि ज्ञेयम् । **निवर्तमानानामि**ति । आत्मघात्यादिपञ्चानां दैत्यत्वं साधारणधर्म इति भावः । ननु 'मन्येऽसुरा'नित्यत्र दैत्यानामपि मुक्तिरुक्तेत्यत आहु**र्दैत्यानां चे**ति । तथा च कार्यार्थं मुक्तिं ददात्यपि गुणानुवादे तु नाधिकार इति भावः । अत एव 'मुक्तिं ददाति कर्हिचित्स्म न भक्तियोग'मित्युक्तम् । **आविष्टानामि**ति सहजासुराणां कालनेमिप्रभृतीनामपीत्यर्थः । **आधारभूता** इति । आवेशिनः कंसादय इत्यर्थः । **अपुनरावृत्ती**ति । न पुनरावृत्तिर्यस्मात्तादृशतमःप्राप्तिरेव । तेषां देहादिविशिष्टानां सहजासुराणां **मुक्तिः** । सहजासुराणां केवलजीवानां भगवत्प्राप्तिः । 'मन्येऽसुरा'नित्यत्र तथानिर्णयात् । देहेन्द्रियादिविशिष्टानां तु तमःपर्यन्तमेव गमनमित्येवकारः । ततस्तमसा सङ्घातं विहाय भगवन्तं प्राप्नुवन्ति । अत एव 'कालं प्राप्य भगवन्तं प्राप्नुवन्ती'ति तत्रोक्तम् । अत्रायमभिसन्धिः । सहजासुराणां देहेन्द्रियादिसामग्र्या दैव्या अभावात्कालेनासुरसङ्घातं विहाय स्वरूपमात्रेण भगवत्प्राप्तिः । अन्येषां तु 'द्वया ह प्राजापत्या' इत्यत्रोक्तोभयविधसामग्रीसत्त्वात्कालेनासुरीं सामग्रीं विहाय दैव्या सामग्र्या विशिष्टमलौकिकदेहं प्राप्य भगवता सह सर्वकामाशनम् । यथा कंसादीनामाधारभूतानां स्वयोग्यदेहप्राप्त्या स्वयोग्यलीलानुभवः । आविष्टानां कालनेमिप्रभृतीनां तु स्वरूपमात्रेण भगवत्प्राप्तिः । देहेन्द्रियादिविशिष्टानां तु तमःपर्यन्तगतिरेवेति 'तम आसीत्तमसा गूढमग्रे प्रकेत'मितिश्रुतेः कालरूपतमसः परो भगवानिति ज्ञेयम् ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

निवृत्ततर्षैरुपगीयमानादित्यादि । इह भगवद्गुणस्य मुक्तमुमुक्षुसेव्यत्वादिना श्रवणस्य परमोत्कर्षः प्रतिपादितस्तथा सति सर्वोत्तमत्वात्कथं न सर्वेषां प्रवृत्तिरित्याशङ्क्य अत्राप्रवृत्तौ दोषाणां हेतुत्वं वक्तुं श्रीमदाचार्यचरणाः श्लोकाशयं विशदयन्ति **आत्माघाती कर्मजड** इत्यादिना । पशुस्त्रीव्यतिरिक्तश्चेद्विरक्तस्तदा ततः पृथक् नेत्यन्वयः । पशुजीवाः स्त्रीजीवा भगवद्गुणानुवादाद्विरक्ता भवन्ति । तेषां तत्स्वभावप्राधान्यात् । जीवद्वयाद्भिन्नेषु जीवेषु तु आत्मघातिकर्मजडनिन्दितार्थरतेष्वन्यतम एव गुणानुवादविरक्तो भवेन्नान्य इत्यर्थः । तथा च पशुजीवाः, स्त्रीजीवा, आत्मघातिनः, कर्मजडा निन्दितार्थरताश्चेति पञ्च विरक्ता भवन्ति ।

अस्मिन्मूलश्लोके 'कः पुमान्विरज्येते'ति पुंपदेन पुमान्न विरज्येत स्त्री तु विरज्येतेत्यर्थः स्फुटितः। स्त्रीत्वपशुत्वे च न देहगते भगवद्गुणानुवादवैराग्यकारणे, "मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेपि यान्ति परां गति" मित्यादिवाक्यात्। कुन्तीप्रभृतिस्त्रीणां भक्तत्वस्मरणाच्च। मनुष्याधिकारकं शास्त्रमिति सर्वतन्त्रसिद्धान्ताद्देहपशूनामसम्भावितत्वात्। अतो जीवधर्मावेव स्त्रीत्वपशुत्वे विवक्षिते। अत एव 'पुमान्विरज्ये'त्यस्य व्याख्याने 'ये पश्ववताराः स्त्र्यवतारा' इत्यादि व्याख्यातमाचार्यैः। अतः स्त्रीजीवानां पशुजीवानां च भगवद्गुणविरागः। तत्र जीवे स्त्रीत्वं तु विषयासक्तिहेतुप्रकृतिपरवशत्वम्, 'स्त्रीजीवाः प्रकृतिपरवशा' इति तत्त्वदीपप्रकाशात्। अत एवोक्तं गीतासु 'राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिता' इति। एवं च तेषां प्रकृत्यधीनतया प्रकृतेः संसारैकसाधकतया गुणानुवादे युक्तो विरागः। पशुत्वं सर्वत्र विवेकराहित्यम्, 'श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः। न यत्कर्णपथोपेतो जातु नाम गदाग्रज' इत्यत्र तथा निर्णयात्। एवं स्त्रीजीवपशुजीवयोर्गुणानुवादवैराग्यम्। तत्र लौकिकचातुर्यवत्त्वे सति पारमार्थिकसाधनशून्यत्वं स्त्रीजीवत्वम्। लौकिकालौकिकचातुर्यशून्यत्वं पशुजीवत्वमिति विशेषः। मूले विना पशुघ्नादित्यनेन आत्मघातिकर्मजडनिन्दितार्थरतानां ग्रहणम्। तथा हि, अपगता शुक् यस्मादित्यपशुक् आत्मा, तं हन्तीति तथा, आत्मघाती। तल्लक्षणं तु पारमार्थिकसाधनविवेकादिवत्त्वे सति भगवदानन्दाप्तिसाधनशून्यत्वम्। 'मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महे'ति भगवद्वाक्यात्सोपि विरज्येत। पशून्हन्तीति पशुघ्नः, केवलसकामत्वेन श्रुतितात्पर्यभ्रमात्परप्राणघाती कर्मजडः, 'नानाकामो यथा भवानि'तिनारदवाक्यात्। एवंभूतोपि चरित्राद्विरक्तो भवति। किञ्च, पशून्हन्ति अविहितप्रकारेण जिह्वालौल्येन पशून्हन्ति स पशुघ्नः, 'देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितम्। भूतध्रुक्तत्कृते स्वार्थं किं वेद निरयो यत' इतिवाक्यात्, 'स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः खल' इति निन्दितत्वाच्च। स पशुघ्नो ह्यत्यन्तनिन्दित इति निन्दितार्थरतोपलक्षको भवति। तथा सति निन्दितार्थरतोपि विरक्तः स्यादित्यर्थः। एभ्यः पञ्चभ्यो भिन्नः सर्वथा न विरज्यत इति सर्वसदुपादेयतया समस्तसाधनोत्कर्षः प्रतिपादितो मूले, तथैवाचार्यवर्यैरनया कारिकया विशदीकृतः ॥ का० ३ ॥ **श्रोत्रमनोभिरामादित्यस्याभासे जघन्यत्वेपीति।** चरित्रीयाभ्यां गतसर्वदोषगेयत्वभवौषधत्वगुणाभ्यां श्रवणसुखकरत्वरूपगुणस्य हीनकक्षत्वेपि तस्य गुणस्य **श्रोत्रमनोभिरामादिति** पदेन यन्निरूपणं तच्चरित्रस्य गतसर्वदोषगेयत्वभवौषधत्वसिद्ध्यर्थमित्यर्थः। यदि भगवच्चरित्रं श्रवणमनआल्हादकं न स्यात्तर्हि तज्ज्ञानं श्रवणं च न स्यादिति भावः ॥ ४ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

निवृत्ततर्षैरित्यत्र गुणानुवादविशेषणत्रयतात्पर्यमाहुः—**स्वरूपादित्यादि।** **निवृत्ततर्षैरुपगीयमानादिति**विशेषणेन फलरूपत्वसूचकेन स्वरूपत उत्तमत्वम्। **भवौषधादिति**विशेषणेन दोषनिवृत्तिरूपफलसाधनत्वसूचकेन **फलत** उत्तमत्वम्। **श्रोत्रमनोभिरामादिति**विशेषणेन विषयोत्तमत्वादुत्तमत्वम्। **महापुरुषयोगत** इति 'उत्तमश्लोकगुणानुवादादि'त्यस्य तात्पर्यार्थः। अत एवैतदाभासे 'एवं स्वरूपगुणकार्यैश्चरित्रस्य उत्कृष्टत्वमुक्त्वा सम्बन्धतोपि तस्योत्कर्षमाहे'त्युक्तं सुबोधिन्याम्। अत्र महापुरुषो भगवान् तद्योगतस्तत्सम्बन्धत इत्यर्थः। एतदेव विशदयन्ति अत्र **मुक्तस्येति।** आद्यविशेषणार्थोयम्। द्वितीयस्यार्थमाहुः—**मुमुक्षोरिति।** तृतीयस्यार्थमाहुः **अनिन्द्यतेति।** अयं चरित्ररूपोऽनिन्द्यो विषयः। मूले को **विरज्येतेति**कथनादस्मिन्गुणानुवादे विरक्तस्य पातः सूचित इत्याशयेनाहुरस्मिन् **विरक्तो ध्रुवं पतेदिति।** **आत्मघातीति।** अत्र श्रीवल्लभगोस्वामिनः "पुमानितिपदेन पशुजीवानां स्त्रीजीवानां च चरित्रे विराग उक्तः तद्व्यतिरिक्तश्चेद्विरक्तस्तदा आत्माघात्यादिभ्यः पृथक् न, किंतु तदन्तर्गत एव। तथा च यो गुणानुवादे विरक्तः स आत्माघात्यादीनां पञ्चानामन्यतम एव ज्ञेय इति भावः। आत्मघातीत्यादिपदत्रयं विशेषणत्रयस्यार्थः। निर्दुष्टान्तःकरणैर्गीयमानाद्विमुखो दुष्टान्तःकरण एव भवतीत्यन्तःकरणदोषेणात्मानं हन्तीत्यर्थः। **पशुस्त्रीव्यतिरिक्त** इति पुमानितिपदस्यार्थ" इति व्याचख्युः। एवं भवौषधान्मोक्षसाधनाद्गुणानुवादाद्विरक्तः कर्मजड एव। श्रोत्रमनोभिरामादनिन्द्यविषयाद्विरक्तो निन्दितार्थरत एवेति स्फुटम्। तथा च मूले 'गुणानुवादाद्विरक्तः पशुघ्न' इत्युक्तं, तस्य पशुघ्नस्य 'निवृत्ततर्षैरि'त्यादिगुणानुवादविशेषणैरात्मघात्यादिभेदेन त्रैविध्यं सूचितं, तदेव कारिकायां स्फुटीकृतम्। पुमानितिपदेन पशुजीवानां स्त्रीजीवानां च स्वभावत एव गुणानुवादाद्विरागो बोधितः ॥४॥

बुभुत्सुबोधिका

तत्त्वेति 'विशुद्धसत्त्वं वसुदेवशब्दितं' तत्त्वम्। **विष्णोरिति** इदमित्थतया वाग्व्यापारविषयापेक्षयोक्तं **विष्णोरिति।** तत्सत्त्वगुणाभिमानी विष्णुः। तत्प्रिये तदवतारे परेपि तत्प्रियत्वज्ञानार्थम्। **साक्षात्त्वं** तु 'कृष्णो हि परमं दैवं', 'कृष्णस्तु भगवान् स्वयमिति श्रुतिपुराणाभ्यां वक्तव्यमेव। कथ वाक्यप्रबन्धे, वाक्यप्रबन्धमाहुः **सूक्तेति।** प्रबन्धस्तु सूक्तं तत्साधारण्येनुपयोगापत्तिः 'कथ्यादीनामसत्यत्वान् नोपयोगः कथञ्चने'तिनिबन्धात्। किञ्च प्रबन्धकल्पनाकथेत्यापत्त्या विशेषणमाहुः **अनुशासनेति।** 'वेदमनूच्याचार्योन्तेवासिनमनुशास्ति धर्मं चरे'त्यद्यनुशासनस्वरूपं यत्र। तत्प्रचुरतद्रूपमेव वा सूक्तसाधारण्यम् ॥२॥ **अवतीर्येत्यत्र** स्वतन्त्रेति 'कथा इमास्ते' इतिश्लोकानुसरणं चरित्रमात्रप्रश्ने हेतुः। स्वतन्त्रत्वमवतारानपेक्षत्वम्। **चरित्रमात्रमिति** मात्रं कार्त्स्न्ये। एवकारेण स्वरूपव्यवच्छेदः। 'विष्णोः कर्माणि पश्यते'तिश्रुत्या कर्मणां श्रोतव्यत्वात्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इतिश्रुतेः।

आत्मेदमित्थतयाऽप्रतिपाद्यः । ननुवंशेवतीर्येति नान्वयः वंशे वसुदेवेवतीर्येति, तथा च वंशपदं वसुदेवे लाक्षणिकमत आहुः **वीर्याधिक्येति** । वीर्यमुत्तरार्धीयं, तदत्र मैथिलप्रसंगादधिकं, तत्र द्वयरूप्यमत्र तु यावन्तो धर्मा धर्मिण्युपयुक्तास्तावन्तो वक्तव्याः स्वस्वामिभावसम्बद्धाश्च, ते तु यज्ञादिषु स्वाजितसेवेषु देहे कारितस्वसेवेषु सेव्यात्मसेवासंस्कारकृताः । तत्राप्या'त्मा वै पुत्रनामासी'तिश्रुतेर्यदुप्रभृत्यात्मसु 'कृष्णस्तु भगवान् स्वयं'मित्यत्र स्वयंत्व उपयुक्ताः । ते तु वंशपदस्य लाक्षणिकत्वेन सम्भवन्ति, अतो वंशपदार्थो वंश एव । तथा च यज्ञादिसेवितात्मा कालेन भक्तिविषयः सन् 'कृष्णस्तु भगवान् स्वयं'मिति । एवेति न तु चरित्री धर्मात्मकः । 'प्रकाशाश्रयसूत्रे चरित्राणामेव चरित्रभेदोक्तेः । अपिशब्देन भक्तिजनकं, उक्तरीत्या । **यदुसम्बन्ध** इति ननु यदुसम्बन्धेप्यपाक्षिकधर्मिरूपत्वं कथमिति चेन्न । श्रद्धारतिभक्त्यनुक्रमे यज्ञादिनां धर्मित्वात् । 'योयच्छ्रद्धः स एव स' इति वाक्यात् । वंशपदेनैवार्थाद्यदुलाभादसमस्तयदुपदकृत्यमाहुः **असमास** इति । व्याससूचक इति यदोराधिक्यं वंशे सूचयति । अतः स्वयंत्वेधिकोपयोगः । धातूनामनेकार्थत्वादाहुः **अनुभावयतीति** । भूतान्यनुभवन्ति विषयसुखादीनि, तानि भूतान्यनुभावयती भगवान् । 'एष एव साधुकर्म कारयति यम् उन्निनीषती'ति श्रुतेः 'यमेवैष'इतिश्रुतेश्च । अनुकृत्यधिकरणात् । 'श्रवणे परीक्षिदभव' दित्युक्तेः एतस्यापि श्रवणात् । **न बध्यत** इति 'न मे मोक्षो न बन्धन'मितिवाक्यात् । अविद्या तन्वाः 'धाम्ना स्वेन सदा निरस्तकुहक'त्वात् । **बध्यन्त** इति साधनाभावात् । **निर्वारितत्वा**दिति राजर्षिसत्तमत्वेन बहुपण्डितकत्वात् **भगवद्भावेनेति** भगवतो भावो धर्मो अबन्धरूपो ज्ञानकृत इति तेन भाविताः तदा भवन्ति यदा ध्रुवा स्मृतिः, ज्ञानिभावुकनिष्ठाः सदा तद्धर्माः श्रवणादिनिर्वाह्यविशिष्टा विषयाः स्युः । यथाक्षरांशो जीवः आधिदैविक्या सेवतातिरोहिताविर्भूतानन्दः तदध्यासवांश्च भवति, तदा कृतार्थत्वं सर्वग्रन्थिप्रविमोक्षरूपम् । तथा च श्रुतिः 'आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां प्रविमोक्ष' इति । स्मृतिश्च 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् तं । तमेवैति कौन्तेय सदा तद्भावभावित' इति । एवमन्यभावेष्वपि । निरोधलक्षणग्रन्थे स्पष्टम् । अत्र नारायणोपनिषत् 'अथ नित्यो निष्कलङ्को निराख्यातो निर्विकल्पो निरञ्जनः शुद्धो देव एको नारायणो न द्वितीयोस्ति कश्चित् य एवं वेद स विष्णुरेव भवती'ति तद्भावो बोध्यः । **अग्रिमेति** संहितया तमस्तरणं प्रयोजनम् । **अत एवेति** अग्रिमप्रयोजनार्थत्वादेव, भागवतद्वारा वीर्योपबन्धनार्थम् । उपनिबन्धनं यत्नः, तदर्थं ज्ञानमाहुः **ज्ञातानीति** अन्येन भगवता व्यासेन । जानातीच्छति यतत इति । **अन्योन्याश्रय** इति भगवद्धितकरणे जीवहितकरणं जीवहितकरणे भगवद्धितकरणमित्यन्योन्याश्रयः । **विश्वात्मत्वमिति** विश्वेषां आत्मा समवायी 'अदृश्यत्वादिगुणको धर्मोक्ते' रित्यधिकरणोक्ताक्षराभेदपक्षे घटादीनां मृदिव । **स्वतन्त्रतयेति** कर्ता सूक्तः । 'स्वतन्त्रः कर्ते' तिसूत्रात् । अभिन्ननिमित्तोपादानम् ॥ ३ ॥ **निवृत्ततर्षैरित्यत्र चरित्रस्येति** धर्मिसम्बन्धात् धर्मिणोधोक्षजत्वाच्च । ननु तर्हि 'असन्नेव स भवति असद् ब्रह्मेति वेद चे'दित्यसता भाव्यमिति चेत् तत्राहुः **भगवतश्चे**ति । तथा चा'स्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदु'रितिश्रुत्या सतापि भाव्यमित्यर्थः । नास्तिकवादस्य पातित्यं 'ज्ञानिनामपी'तिवाक्यात् पातित्यस्य सम्पादकत्वेनानादृतत्वात् । 'विष्णोः कर्माणि पश्यते'तिश्रुतेः । **अदृष्टेति** अदृष्टं श्रुतम् । **तत्रेत्यादि** । तत्र तयोः प्रातिस्विकरूपेण ज्ञेयत्वाच्च **चरित्रमाहात्म्य**मित्यर्थः । ईश्वरस्तु 'यद्यद् धिया त उरुगाय विभावयन्ति तत्तद् वपुः प्रणयसे सदनुग्रहाये'ति लीलाप्रतियोगिसापेक्ष इतिभावः । एवं सर्वत्र । पुनरप्याह घटपटादीनामपि विष्णुकर्मत्वाच्च चरित्रे को विशेष इति तत्राहुः **स्वरूपा**दिति । 'आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे कुर्वन्त्यहैतुकीं भक्तिं इत्थंभूतगुणो हरि'रितिवाक्यात् । कीर्तनभक्तिरिव न घटपटादयः कृतिविषया इति । **फलतश्च** इति 'भक्त्याहमेकया ग्राह्य' इतिफलवत् न घटपटादिभिः फलम् । पञ्चम्यन्तपदद्वयाभिप्रायः । चतुर्थपञ्चम्यन्ताभिप्रायः । **महापुरुषेति** तृतीयपञ्चम्यन्ताभिप्रायः । **विषयोत्तमत** इति 'या प्रीतिरविवेकानां विषयेष्वनपायिनी त्वामनुस्मरतः सा मे हृदयान् मापसर्प'त्विति । परो मीयते ज्ञायते येन परमम् । चरित्रं किञ्चिदाश्रितं धर्मत्वात्, स्पर्शवत् । चरित्राश्रयत्वेन परो ज्ञायते । **मतमिति** सर्वेषाम् । इदं लेखादविरुद्धम् । अत्र तृतीयविशेषणतात्पर्यं पश्चादुक्तं तस्याभिप्रायो 'महापुरुषयोगत' इत्यस्य देहलीदीपन्यायेनोभयान्वयित्वद्योतन इत्याशयेन स्वोक्तं प्रपञ्चयन्तश्चरित्रोत्कर्षोक्त्यनन्तरं तदनुवादोत्कर्षमाहुः **मुक्तस्येति** । मुक्तो द्विविधो जीवन्मुक्तः परममुक्तश्च । पूर्वत्र वाक्यमुक्तं, परममुक्तस्य गुणगानादि फलप्रकरणे वक्ष्यते । 'ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता' इति । 'सम्पद्याविर्भावः स्वेनशब्दा'दित्यस्य भाष्यमनवतारदशायाम् । **हीति** निश्चयेन । स्वरूपतश्चरित्रानुवादोत्कर्षमुक्त्वा फलतस्तमाहुः **मुमुक्षो**रिति । फलं भवनाशः । एकं फलं पूर्वमुक्तं तेन 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधन'मितिवाक्यात् । एतेन ननु चरित्रगानाधिकारो मुक्तानामेवेति चेदन्येषां श्रवणादिकं न स्यात् तेषां दुर्मिलत्वादित्याशङ्कापास्ता । 'महापुरुषयोगतो विषयोत्तमत' इत्युक्तं तदाहुः **अनिन्द्येति** । यद्यपि सगुणभक्तिस्तृतीयस्कन्धे निन्द्या, धर्मिणोऽविषयत्वाच्च निन्द्या, तथापि 'पूर्णा भगवदीयास्ते' इत्यत्र जलभेद उक्तास्तेषां विषयाः धर्मित्वाभावेपि 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतिविषयाः उत्तमाः, अतोऽनिन्द्याः । एतादृशानिन्द्यविषयः । अन्ये हि रूपादयः संसारे बध्नन्ति, इदं तु भगवति बध्नातीति तथा । चकार इममर्थमाह । **विरक्त** एतद्विषये यत्नं कुर्यात् । **पतेदि**ति पाठेऽस्मिन् **विरक्तो** भगवत्परत्वाभावेनानैर्गुण्यात् **पतेत्** संसारी भवेत् । 'भस्मन्येव जुहोति स' इतितृतीयस्कन्धात् । **ध्रुवमिति** तादृशवाक्योपलम्भ उभयत्रेति । जलभेदे स्पष्टम् । तेन 'श्रोत्रमनोभिराम'त्वं भगवदीयानां ज्ञेयम् । तेन 'साङ्केत्यं पारिहास्यं च स्तोभं हेलनमेव वा मुकुन्दनामग्रहणमशेषाघहरं विदु'रितिवाक्यं तारतम्यादशेषाघहरमिति बोधितम् । तथा चात्र राजशुकयोः श्रवणे कथने च प्रवृत्तिं बोधयता शास्त्रकारेणास्मिन् पद्ये प्रकारो

बोध्यत इतिभावोनया कारिकया बोध्यते। अत्र श्रवणाङ्गत्वेन ज्ञेयमन्यत्। 'श्रवणानन्दत्वेने'त्यत्रैव वक्ष्यमाणत्वात्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इतिश्रुतेः। उक्तं विरक्तं निश्चिन्वन्तः 'पुमान् विरज्येत विना पशुघ्ना'दित्यस्य चतुर्थचरणस्य तात्पर्यमाहुः आत्मेति। अपगता शुक्। अपेत्यस्य शुक्फलेन्वयः, तस्य कर्तरि। अपशुगाश्रयः आत्मानं हन्तीत्यपशुघ्नः **आत्मघाती**। **पशुघ्न** इति पदच्छेदे **कर्मजडः**, कर्मठः पशुं हन्तीति। **निन्दितार्थरतः** हन हिंसागत्योरत्र हिंसा तामसधर्मः। आत्मघाती न मुकुन्दनामग्रहप्रायश्चित्तवान्। पशुघ्नो न चित्तशुद्धिद्वारा ज्ञानवान् भक्तिमान् वा, स सदा **निन्दितार्थरतः**। उभाभ्यां विलक्षणः। नञर्थोत्यन्ताभावे भेदे वा। पशुघ्नादित्यत्र पशुः पुरुषः पशुस्तं हन्ति प्राप्नोतीति घ्ना स्त्री घञर्थे कः। एवं **पशुस्त्रीव्यतिरिक्तो** हन्तेर्गत्यर्थकत्वे। एवंविधश्चेद् विरक्तोत्र न ततः न 'विरक्तोस्मिन् पतेद् ध्रुव'मित्यत्रोक्ताद्विरक्तात् **पृथक्**। यद्वा कारिकायां न पृथक्त्वावच्छिन्नप्रतियोगिताकाभावः किन्तु विरक्तो नेति विरक्तत्वावच्छिन्नप्रतियोगिको भेदः। तथा च 'कः पुमान् विरज्येते'त्यनेन स्त्री विरज्येतेति व्यञ्जितम्। तदुपलक्षणं पशूनाम्। 'श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशु'रिति ते पश्ववताराः। अत्र यथा आत्मघाती विरक्तो न, कर्मजडो विरक्तो न, सदा निन्दितार्थरतो विरक्तो नेत्यन्वयः, तथानुपदोक्तरीत्या पशुस्त्रीव्यतिरिक्तः विरक्तो नेत्यनन्वयात्। चेदिति न पदच्छेदः। चेदिति यद्यर्थकम्। तथा च पशुस्त्रीव्यतिरिक्तो यदि यस्मिन् काले विरक्तो न तत्त्वावच्छिन्नप्रतियोगिताकाभाववान् तदा ततः प्रथमकारिकोक्तविरक्तात् पृथगित्यर्थः। तथा च **विरक्तो** ह्यात्मघात्यादिविरक्ताद् गौणात् **पृथङ् ने**त्यर्थः। 'स सर्वपूतो भवती'ति नृसिंहतापिनीयात्। प्रकाशे तु पशुस्त्रीव्यतिरिक्तत्वावच्छिन्नप्रतियोगिताकाभावो व्याख्यातः, पशुस्त्रीव्यतिरिक्तो नेति। तदपि व्याख्यानम्। पुष्टौ तु 'यमेवैष वृणुते तेन लभ्य' इति। पशुस्त्रीव्यतिरिक्तो नो विरक्त इति भावः। तथा च पशुस्त्रीव्यतिरिक्तोपि न विरक्तः वरणाभावात् तस्याप्रयोजकत्वात्। वरणमधिकारः। वृङ् सम्भक्ताविति धातुपाठात् तु भक्तिसत्तातिरूपा। वाक्यानि तु 'कर्मणैव तु संसिद्धिमास्थिता जनकादयः' 'नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम्। मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महे'ति। तेन कर्मान्तरङ्गतमं मर्यादाभक्तिरूपं ग्राह्यम्। गुणानुवादेष्टधा भक्तिश्च प्रेमसाधनत्वेन। तथा एकादशस्कन्धीयेप्युक्तं चमसवाक्येषु 'कर्मण्यकोविदाः स्तब्धा' इत्यादिना 'ये कैवल्यमनुप्राप्ता ये चातीताश्च मूढताम् त्रैवर्गिका ह्यक्षणिका आत्मानं घातयन्ति त' इति। ब्रह्मत्वं ब्रह्मेतिसम्बन्धरहितं ज्ञानं 'कैवल्यं', ब्रह्मत्वं ब्रह्मेतिज्ञानं, तयोः सम्बन्धस्यावगाहे आत्मा भगवांस्तत्सेवादिरहिता आत्मघातिनः कैवल्यादिप्राप्ता ज्ञानिनोपीति। 'क्रियावानेष ब्रह्मविदां वरिष्ठ' इतिमुण्डकात्। 'कर्मण्यकोविदाः' पशुघ्नाः। मुण्डकोक्ता एतद्विपरीताः। कर्मजडः पशुघ्नः कर्मण्यकोविदान्तर्गतः। 'अविद्यायामन्तरे वर्तमानाः स्वयं पण्डितंमन्या जघन्यमाना' इतिश्रुतेः। एतद्विपरीतास्तु चित्तशुद्ध्यर्थं कर्माणि ये कुर्वन्ति। एते 'स्तब्धा' अपि। निन्दितार्थरता आपशुघ्नः 'वेदमार्गविरोधेन येषां करणमण्वपि ते हि पाखण्डिन' इतिवाक्यात्। 'यदेव विद्यया करोति श्रद्धयोपनिषदा वे'तिश्रुतेः। तथा च ये कैवल्यमनुप्राप्ताः कर्मठाश्च। एतद्विपरीता निन्दितार्थरताः। 'त्रैवर्गिकाः' धर्मार्थकामपराः। स्त्रीपशुव्यतिरिक्ताः स्त्रियः पशवश्च। तथा च श्रुतिस्मृती। 'पशुपतिः पशूनां चतुष्पदामुत च द्विपदां', 'शिवस्य पशवः सर्वे जीवाः संसारवर्तिन' इति। पशुपतिपदस्य शिवपरत्वे 'भोगाः शिवेने'तिवाक्यात् भोगिनः। एत एव 'ह्यक्षणिका' अन्यथा कर्तृभेदान्न धर्मादिपरत्वं स्यात्। **फलरूपमिति** इतरत्र वैराग्यजनकत्वं फलत्वम्। इत उत्कृष्टस्यात्र वैराग्यजनकस्यान्यस्याभावात्। 'भगवदीयत्वेनैव परिसमाप्तसर्वार्था' इति। 'अत इतरत्न्याय' इतिव्याससूत्रं फलाध्याये। 'इतरत्' तदीयत्वम्। **तृष्णेति**। यद्यपि तृडपि व्याख्यातुं शक्यते, अग्नेर्घोरतनुत्वेन भगवदीये तत्प्राप्तेः द्विपि तत्प्राप्तेरिति परन्तु सर्वदा न प्राप्नोतीच्छाधीना चेति तृष्णैव 'तृष्णा लिप्सापिपासयो'रिति विश्वः। 'न खादन्ति न पिबन्ती'ति छान्दोग्ये भगवदीयानामपि ईषत्खादनादिश्रावणाच्च यथाश्रुतं वार्थः। **सर्वदोषवदोषा** इतिपाठे दोषवन्नित्यलीलास्था दोषाः। इकारलोपः। एतादृशक्रीडाङ्गीकृता निवृत्ततर्षाः। **श्रवणानन्दत्वेने**त्यस्यार्थष्टिप्पण्यामुक्तः। **आवृत्त्येति** भक्तानां वैराग्य[illegible]वृत्त्या वैराग्यदार्ढ्यं आवृत्तिभक्त्या भगवद्रूपवैराग्यप्राप्तेश्च क्षुदादिरूपा **निवार्ये**त्यादिः। आवृत्तेः क्षुदादिनिवर्तकत्वं तु 'परस्परं त्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्मा' इतिकर्दमस्तुतौ। भगवद्विषयत्वेन निरोधलक्षणोक्ताः। येषामिन्द्रियाणां स्पष्टरूपं न दृश्यते तानि निग्रहणीयानीति निरोधलक्षणे। **अनिवार्या** इति भगवद्विषयत्वेन निवारयितुमयोग्याः कामादयः। **अग्र** 'ये ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता' इत्यनेन साधनप्रकरणे उक्ताः फलप्रकरणे फलिष्यन्ति। ब्रह्महृदस्याक्षरात्मकत्वेनास्थूलादिवाक्यप्रतिपाद्यत्वात्। 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् केन कं विजानीयात् केन कं मन्वीते'त्यादि। **स्वतन्त्रेति** स्वातन्त्र्यं मादकत्वमत्र। **रसाभीति** रसोत्र भक्तिरूपः। **वक्तुरित्यादि वक्तुः** शुकस्य 'परिनिष्ठितोपि नैर्गुण्य' इति वाक्यात्। **श्रोतू राज्ञः** 'नैतातिदुःसहे'ति वाक्यात्। **उक्तमिति** चरित्रस्योक्तम्। **निवर्तकमिति** 'पुमान् भवाब्धिं न तरे'दिति वाक्यं द्रष्टव्यम्। **उपकारेति** 'तस्यारविन्दनयनस्ये'तिवाक्योक्तसंक्षोभशामकत्वमुपकारः। 'आत्मारामाश्च मुनय' इति **स्मरणात्**। पानमिति वक्तुः। **श्रोतुस्त्विति** श्रोतृत्वेन श्रोतात्र। कर्मणो व्यापारभूतस्य वक्ष्यमाणस्य प्रायोपविष्टे परीक्षित्यभावात्। **कर्मज्ञानभक्तिभ्य** इति व्यापारेभ्यः। 'आत्मा वा अरे द्रष्टव्यः', 'भिद्यते हृदयग्रन्थि'रिति च **न पुरुषेति** संयोगमात्रेण तदुत्तरक्षण एव रोगोपशमदर्शनात्। **फलत्वसाधनत्वे** इति निवृत्ततर्षाणां गुणानुवादस्य **फलत्वं** प्रथमविशेषणेन, द्वितीयविशेषणेन भवनिवृत्तिसाधनत्वं, ते। **एवेति** अनुभवात्। **प्रविष्टमिति** चरित्रम्। **तथेति** श्रोत्रमनोभिरामत्वेन। **ज्ञातव्यमिति** मर्यादायां शमलाभावस्य

श्रोत्रमनोभिरामकारणत्वात्। **अनिवर्त्येति** सहजासुरत्वेन। तथा च्यानिवर्त्यदोषः प्रवेशप्रतिबन्धकः उपगीयमानत्वात् न तु स श्रोत्रमनोभिरामत्वप्रतिबन्धकः। एवं च स्मृत्योपसर्गार्थं तृष्णार्थात् पूर्वमाहुः **उपेतेति**। उपेति अप्राप्तिदोष इति च्छेदः। **घनार्पणेति निवारित** इति पूर्वेणान्वयः। एवं निवृत्ततर्षपदतात्पर्यमुक्त्वा भवौषधपदतात्पर्यमाहुः **जन्ममरणेति**। जन्ममरणसम्बन्धिदुःखस्य। तदुत्तरं तु दुःखं गरुडपुराणे स्वगतम्। अन्येषां तु क्षीयते। 'श्रोत्रमन' इति विशेषणतात्पर्यमाहुः **कर्णेति**। श्रोत्रं च मनश्च श्रोत्रमनसी तयोरभिरामादिति समासे द्वन्द्वान्ते श्रूयमाणं प्रत्येकमभिसम्बध्यत इति श्रोत्रमनःसम्बद्धाभिरामं स्वीकृत्यार्थ उक्तः। **स्वरूपेति** स्वरूपं फलत्वं गुणः भवौषधत्वं कार्यं श्रोत्रमनोभिरामः तैः। **सम्बन्धत** इति वक्ष्यमाणषष्ठ्यर्थात्। **माहात्म्येति** गुणा इत्यनेनान्वेति। **तेषामनुवाद** इत्यादि तु **उत्तमश्लोकस्य** वेत्यनेनान्वेति। **तेषामिति** गुणानाम्। **समभीति** एतद्विशेषणगतानां पदानां तस्मात्। ननु वैराग्यं भगवानिति तद्विशिष्टस्वरूपं विरक्तत्वं पशुस्त्रीणामसम्भवन् न निषेधार्हमिति चेत् तत्राहुः **य इ त**। अवताराणां सम्भवतीतिभावः। **वैकुण्ठादत्रागमनमवतार** इति। यथा वत्सधेनुकादयः पशवः नित्यक्रीडास्थाः पूतनादयः स्त्रियश्चाविद्यादिरूपास्तत्तदुपाख्याने प्रसिद्धाः। **नाधिकारिण** इति तेषां वैराग्यप्राप्त्या विरक्तत्वरूपाधिकारात् तन्निषेध उपपन्न इत्यर्थः। **या अपीति** पृथाप्रभृतयः। **स्वभावत** इति परिणामो भगवत्सेवानुकूल्यरूपस्तेन तद्धेतोः स्वभावात् पुरुषा एव जीवगतपुंस्त्वस्य भगवत्सेवानुकूल्यरूपत्वात्। **अत** इति जीवदेहोभयगतपुंस्त्वविवक्षणात्। ननु पुमान् विरज्येत गुणानुवादात् गुणानुवादोत्कृष्टस्य रसस्य तेजबिन्दूपनिषदि 'न ध्यानं न च वा ध्याता न ध्येयोऽध्येय एव च। सर्वं तत् परमं शून्यं न परं परमात् पर'मितिश्रावणादिति चेत् तत्राहुः **इत** इति। गुणानुवादात्। **वैराग्यजनकस्येति** गुणानुवादे वैराग्यजनकस्य। स्वोत्कृष्टज्ञानजन्यं स्वस्मिन् वैराग्यं तदभाववत्त्वं गुणानुवाद इति। अयमर्थः तेजबिन्दूपनिषदि साधारणसृष्टिकर्तृब्रह्मव्यवस्था तत्रापि, 'शमूनं कुरुते विष्णुरदृश्यः सन् परः स्वयम् तस्माच्छून्यमिति प्रोक्त' इति व्युत्पत्तिर्महाकौर्म्ये शून्यपदस्यात्र 'स्वानन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इत्युक्ता नित्यलीलासृष्टिकर्तृव्यवस्थात्र तु नादबिन्दूपनिषदुपतिष्ठते। 'तद्भक्तस्तन्मनाः सक्तः शनैर्मुञ्चेत् कलेवरम्। सुस्थितो योगचारेण सर्वसङ्गविवर्जितः॥ ततो विलीनपाशोसौ विमलं केवलं प्रभुः। तेनैव ब्रह्मभावेन परमानन्दमश्नुते परमानन्दमश्नुत' इति। तेन गुणानुवादस्यानन्दप्रतिष्ठत्वेनेत उत्कृष्टाभावो बोध्यः। 'गुणगाने सुखावाप्तिर्गोविन्दस्य प्रजायते' 'तदध्यासोपि सिध्यती'ति च। 'तदध्यासः' सुखाध्यासः। **दैत्यत्वमिति** दयाभाववत्त्वम्। तेनैवात्मघातित्वकर्मजडत्वानिन्दितार्थरतत्वं स्त्रीत्वानि भवन्ति। **दित्युपाख्यानं** द्रष्टव्यम्। तेन ननु घञर्थकविधानं संज्ञायां भवति, अत्र घ्न इति कस्यापि सञ्ज्ञा नास्तीति पशुघ्नशब्दस्य द्वितीयाव्युत्पत्तिरसङ्गतेति प्रयुक्तम्। **न तद्दोष** इति गुणश्रवणविरागरूपस्तद्दोषो गुणानुवादपरिहार्यो नेत्यर्थः। **मुक्तिरिति** 'अन्धं तमः प्रविशन्ति ये सम्भूतिमुपासत' इति श्रुतेः सम्भूतिं मायाम्। **दोषस्येति** निर्दयत्वादेः। तन्निवृत्त्यनन्तरमन्धं तमोवशिष्यते। तन्निवृत्त्युपाये तु न प्रवर्तन्त इति भावः। 'प्रवृत्तिं च निवृत्तिं चे'ति वाक्यात्। ननु दैत्यानां तथामुक्तिप्रतिपादनस्य किं प्रयोजनमत आहुः **आविष्टानामिति**। कंसाद्याविष्टानां कालनेम्यादीनां तथेति भगवत्प्रत्यनीकत्वप्रकारात्। ननु 'सर्वं खल्विदं ब्रह्म' 'द्वया ह प्राजापत्या' इति कुतो मुख्यमुक्तिं निषेधथेति चेत् तत्राहुः **आधारभूता** इति। आविष्टानामाधारभूता दैवीसम्पद्युक्ताः प्रह्लादादयः। आविष्टाधारभूता आसुरीसम्पत्तियुक्ता मुच्यन्त इत्यर्थे तेषां मुक्तिमाहुः **अपुनरिति**। तथा च नोक्तविरोध इति भावः। बहुश्रुतिविरोधादेवकारः **मुक्तिरिति** श्रुतिरुक्ता। **विरक्तमिति** गुणानुवादे विरक्तम्। अन्यट्टिप्पण्यादौ ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र बलभद्रचरितस्य सङ्क्षेपतोप्यनुक्तत्वात्प्रथमं तदेव पृच्छति—तत्रेति। तत्र भगवद्धर्मयुक्ते यदुवंशे विष्णोर्व्यापकस्य भगवतोंशेनावतीर्णस्य बलभद्रस्य वीर्याणि पराक्रमपूर्विका लीला नोऽस्मान् शंस कथय। यथाश्रुतांशावतारत्वाङ्गीकारे तु 'अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल' इति 'कृष्णस्तु भगवान् स्वयम्' इत्यादिवाक्यविरोधापत्तेः। अंशेन बलभद्रेण सहावतीर्णस्य वीर्याणीत्यर्थाङ्गीकारे तु अवतीर्येत्युत्तरश्लोकेन पुनरुक्तत्वापत्तेः ॥ २ ॥ एवं बलभद्रचरितं पृष्ट्वा श्रीकृष्णचरितं पृच्छति—अवतीर्येति। यदोर्वंशे अवतीर्य भगवान् निरतिशयैश्वर्यादिगुणवान् श्रीकृष्णो यानि लीलाप्रधानानि कर्माणि कृतवांस्तानि नोऽस्मान् वदेत्यन्वयः। न इति बहुवचनं स्वस्य मुख्यत्वेन सभ्येष्वात्माभिमानात्। अवतारप्रयोजनं तु 'कलौ जनिष्यमाणानाम्' इत्यादिना त्वयोक्तं तत् सामान्यतोऽस्माभिर्ज्ञातमेवेति सूचयन् विशिनष्टि—भूतभावन इति। भूतानि भावयति स्वैकभावनानिष्ठानि करोतीति तथा सः। यो हि विश्वमेव सर्वमात्मनि निर्मितवांस्तस्य तु न किमप्यशक्यकरणमित्याशयेनाह—विश्वात्मेति। ननु 'जातो गतः पितृगृहाद्व्रजमेधितार्थं' इत्यादिना तच्चरितान्युक्तान्येव, किं पुनस्तत्प्रश्नेनेत्याशङ्क्याह—विस्तरादिति। सत्यम्। परन्तु सङ्क्षेपत उक्तानि, तेषां श्रवणेऽपि तावता शुश्रूषा न निवर्तते। अतो विस्तराद्वदेत्यर्थः। मत्स्यादिचरितान्यपि भगवच्चरितान्येव, तानि तु विस्तरतो वर्णितान्येवेत्याशङ्का तु 'अवतीर्य यदोर्वंशे' इत्यनेनैव निरस्ता ज्ञेया ॥ ३ ॥ ननु भगवच्चरितान्यभीक्ष्णशः शृण्वतोऽपि तव कुतो न ततो विरक्तिरित्याशङ्क्याह—निवृत्ततर्षैरिति। अत्र लोके चतुर्विधा जनाः—'मुक्ता मुमुक्षवो विषयिणो दुर्भगाश्च'। तेषां मध्ये दुर्भगान् विहाय भगवच्चरितश्रवणे न कस्याप्यलंप्रत्ययः। तत्र मुक्ता द्विविधाः—'जीवन्मुक्ताः प्राप्तसालोक्यादयश्च'। तत्र निवृत्ता तर्षा भगवत्यतिरिक्तविषया तृष्णा येषां तैः। तर्षेत्युपलक्षणं क्रोधलोभादिदोषाणाम्, सर्वदोषविनिर्मुक्तैरप्युपसमीप एव

सर्वत्र गीयमानात्। यद्वा उपशब्दोऽधिकार्थे, 'उपोऽधिके च' इति सूत्रात्। अधिकं गीयमानात्। नच तेषां मुक्तानां प्रयोजनाभावात्तद्विना कथं तद्गानं सम्भवतीति शङ्कनीयम्। 'यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः' इति रुद्रगीतवचनात्। तेऽपि भगवद्गुणश्रवणकीर्तनादिनैव निवृत्ततर्षा जाताः। अतः 'पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः' 'एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति ते वै भगवत्प्रपन्नाः' 'अत्यद्भुतं तच्चरितं सुमङ्गलं गायन्त आनन्दसमुद्रमग्नाः' 'आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे। कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः' 'उत्तमश्लोकलीलया' 'गृहीतचेता' इत्यादिवचनेभ्यस्तेषां भगवल्लीलाकृष्टचेतसां लौकिकप्रयोजनाभावेऽपि पूर्वसंस्कारवशाद्भगवद्गुणमाधुर्यवशाच्च भगवद्गुणगानसम्भवात्। एवं मुक्तानां विषयत्वमुक्तम्। मुमुक्षूणां सुलभः सुकरश्च मोक्षोपायोऽयमेवेत्याह—भवौषधादिति। भवस्य जन्ममरणादिलक्षणसंसारमहारोगस्यौषधनिवर्तकादित्यर्थः। औषधं यथा भक्षणद्वारान्तःस्थापनातिरिक्तं प्रयत्नं रोगनिवृत्तौ नापेक्षते, तथायमपि श्रवणादिद्वारान्तःस्थापनातिरिक्तं प्रयत्नं संसारनिवृत्तौ नापेक्षत इत्यस्यौषधत्वं बोध्यम्। विषयिणामपि लौकिकविषयसुखात् परमानन्दजनकः सुलभश्चायमेव विषय इत्याह—श्रोत्रमनोऽभिरामादिति। शब्दमात्रेण श्रोत्रे अर्थेन मनश्चाभिरतो रमयतीति श्रोत्रमनोऽभिरामस्तस्मादित्यर्थः। उत्तमश्लोकगुणानुवादादिति। उद्गच्छति तमः अविद्या यस्मात्स उत्तमः, उत्तमः श्लोको यशो यस्य तस्य भगवतो गुणानुवादात् कः पुमान् विरज्येत विरक्तो भवेत्? न कोपीऽत्यर्थः। अर्थानुसन्धानपूर्वकोच्चारणं वादः। तदननुसन्धानेनाप्युच्चारणमनुवाद इति प्रसिद्धेऽनुवादपदेनार्थाज्ञानेऽप्यानुपूर्व्या भगवद्गुणनामाद्युच्चारणमात्रेणापि वक्तृश्रोतॄणामुक्तं फलं भवतीति सूचितम्। पुमानिति। जीवमित्यर्थः, 'द्वाविमौ पुरुषौ लोके' इत्यादौ जीवमात्र एव पुरुषपदप्रयोगदर्शनात्। विना पशुघ्नादिति। पशून् गवादीन् हन्तीति पशुघ्नश्चाण्डालादिर्महापापी तस्माद्विना को विरज्येतेत्यर्थः। अत्रेदं बोध्यम्—लौकिकमौषधं हि निवृत्तरोगैर्नाद्रियते। इदं भगवद्गुणानुवादरूपमौषधं तु निवृत्तसंसाररोगैरप्याद्रियते॥ तत्तु तुच्छरोगनिवर्तकम्। इदं त्वनन्तकालागतमहादुःखदायिसंसाररूपमहारोगनिवर्तकम्॥ तत्तु न सर्वरोगनिवर्तकम्, एकरोगनिवृत्तौ सत्यामपि रोगान्तरदर्शनात्। इदं त्वशेषसंसारनिवर्तकम्, 'अशेषसङ्क्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः' इति वचनात्॥ तत्तु व्यभिचारि, कृतेऽप्यौषधे रोगनिवृत्त्यदर्शनात्। इदं तु न तथा, श्रोत्रमनोऽभिरामत्वात्॥ तत्तु धनादिसाध्यम्, अभिलाषवदातृकत्वात्। इदं तु धनादिकं विनैव लभ्यते, निवृत्ततृष्णैरुपगीयमानत्वात्॥ तत्तु प्रयत्नसाध्यम्। इदं तु सुलभं, सर्वत्र सर्वदैव स्वत एव महद्भिरुपगीयमानत्वात्॥ अतोऽस्माद्विरक्तो महापातकपुञ्जयुक् आत्मघात्येव ज्ञेयः। "नूनं दैवेन विहता ये चाच्युतकथासुधाम्। हित्वा शृण्वन्त्यसद्गाथां पुरीषमिव विड्भुजः"॥ "नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम्। मयाऽनुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा" इत्यादिवचनैरप्येवं निश्चयात्। अत्र यद्यप्यनेकशो वचनान्युदाहरणयोग्यानि सन्ति युक्तयश्चानेकशः स्फुरन्तीत्येतावता मनसि सन्तोषो नायाति, तथापि विस्तरभयाद्विरम्यते॥ ४॥

अन्वितार्थप्रकाशिका

तत्रेत्यर्द्धम्। तत्र यदुवंशे अंशेन बलदेवेन सहावतीर्णस्य विष्णोः अवतीर्णत्वेऽपि व्यापकत्वच्युतिरहितस्य दामबन्धनादौ तथा व्यक्तेः वीर्याणि नोऽस्मभ्यं शंस स्वसङ्ख्यपेक्षया बहुत्वम्। सा च कृपया विनयेन वा सर्ववर्णनस्याशक्यत्वादंशेन शंसेत्यन्वयो वा। "कृष्णस्तु भगवान् स्वयम्" इति वाक्यविरोधादंशेनैकदेशेनावतीर्णस्येति तु नार्थः॥ २॥ अवतीर्येति। भूतानां भावनः पालकः विश्वस्य आत्मा भगवान् यदोर्वंशे अवतीर्य यानि कर्माणि कृतवान् तानि नवमेऽतिसंक्षेपेण सूचितान्यपि नोऽस्मभ्यं विस्तराद्वद वर्णय। अस्मदादिमन्दबुद्धिसुगमत्वार्थं शब्दविस्तरं कृत्वा वर्णय। यद्वा सर्ववर्णनाशक्यत्वेऽपि लालसयोक्तिः॥ ३॥ लोके त्रिविधा जनाः मुक्ता मुमुक्षवो विषयिणश्च। तेषां मध्ये कस्यापि अलं प्रत्ययोऽत्र नास्तीत्याह—निवृत्तेति। पशुघ्नात् हिंसाव्यापृतात् सर्वनिन्द्याद्व्याधात् स्वर्गप्राप्त्यै यज्ञेषु पशुघातकात् कर्मासक्तात् वा। "अनचि च" इति द्वित्वे गकाराधिकः पाठः अपगता शुक् यस्मात् सोऽपशुक् तमात्मानं हन्ति तस्माद्वा विना निवृत्तास्तर्षा वासना येषां तैर्मुक्तैरपि उप आधिक्येन गीयमानात् मुमुक्षूणां च भवस्य संसारव्याधेरौषधात् निवर्तकात् विषयिणामपि श्रोत्रमनसोरभिरामात् सुखप्रदात् उत्तमश्लोकस्य गुणानामनुवादात् पुनः पुनः कथनात् कः पुमान् जीवमात्रं विरज्येत विरक्तो भवेत् न कोऽपीत्यर्थः॥ ४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्र यदोर्वंशे, अंशेन बलभद्ररूपेण सह, यद्वा। अंशेन पूर्णषाड्गुण्येन, अवतीर्णस्य प्रादुर्भूतस्य, विष्णोर्वीर्याणि गुणादिप्रकाशकानि चरित्राणि, नः शुश्रूषुभ्योऽस्मभ्यं, शंस विस्तरतः कथय। श्रीधरस्वामिचरणैरप्यंशशब्देन पूर्णावतारत्वस्य सर्वशक्तिमत्त्वस्य चोपपादितत्वात् 'कृष्णस्तु भगवान् स्वयम्' इति प्रथमस्कन्धे उक्तत्वाच्चांशशब्दस्य पूर्णषाड्गुण्यरूपोऽर्थः युक्त एव कृतः॥ २॥ ननु कानि कानि वीर्याणि भवता श्रोतव्यानि सन्तीत्यत्राह॥ अवतीर्येति॥ यदोः वंशे, अवतीर्य प्रादुर्भूय, भूतानि भावयति पालयतीति भूतभावनः, भगवान् अवतारधारणे कृतेऽपि षाड्गुण्यपूर्णत्वात्परिपूर्णैश्वर्य एव, विश्वात्मा सर्वान्तर्यामी श्रीहरिः, यानि वीर्याणि, कृतवान् यावन्ति चरित्राणि चकारेत्यर्थः। तानि वीर्याणि, नोऽस्मभ्यं, विस्तरात्, वद। अवतरणप्रभृतीनि स्वलोक-

गमनपर्यन्तानि वीर्याणि विस्तरेण कथयेति भावः। पूर्वश्लोकेऽवतीर्णस्येत्यनेनावतरणोक्तौ सत्यामपि पुनरत्रावतीर्येत्युक्त्या तदवतारद्वयसत्त्वेन पूर्वावतारकृष्णचरितानि मह्यं साकल्येन त्वं श्रावय। भविष्यतो द्वितीयस्य तदवतारस्य चरित्राणि तु त्वत्समानगुणः सुव्रतर्षिः प्रतापसिंहाय मादृशविरक्तिमते सर्वाणि श्रावयिष्यतीत्यपि सूचितम् ॥ ३ ॥ ननु विष्णोर्वीर्याण्यभीक्ष्णशस्त्वया श्रुतान्येव किमिति पुनः पुनः पृच्छसीति न शङ्कनीयमत्र लोके चतुर्विधा जनाः सन्ति, तत्र चतुर्थस्य पशुसमानधर्मत्वात् सदसद्विवेकहीनत्वाच्च तमृते विवेकभाक्त्वेन सत्याः त्रिविधा जनाः सन्ति, मुक्ता मुमुक्षवो विषयिणश्च, तेषां मध्येऽत्र न कस्याप्यलंप्रत्यय इत्याह ॥ निवृत्ततर्षैरिति ॥ निवृत्तस्तर्षो विषयेष्वनलंबुद्धिर्येषां तैः विगतविषयस्पृहैर्मुक्तात्मयोगिभिरित्यर्थः। उपगीयमानात् , भगवद्गुणानुगानश्रवणादात्मारामाणामेवोत्तरोत्तराधिकरसास्वादोक्तेरिति भावः। तथा च प्रथमे 'आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे। कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः' इति। मुमुक्षूणामपि संसृतेर्मोक्षस्यायमेवोपाय इत्याह। भवस्य संसाररूपरोगस्यौषधं औषधमिव वर्त्तमानः तस्मात् , औषधं यथा रोगान्निवर्त्तयति, तथा मुमुक्षूणां संसृतिरूपरोगनिवर्त्तकादित्यर्थः। श्रोत्रयोर्मनसश्च अभिरामस्तस्मात् , विषयिणामपि श्रोत्रमनोऽभिरामतासंपादकतया परमविषयरूपताभाज इत्यर्थः। गुणानुवादो गुणकथा उत्तमश्लोकस्य गुणानुवादस्तस्मात् , पशुवद्धन्ति गच्छति व्याप्रियते इति वा पशुघ्नः पशुतुल्यवृत्तिः केवलमूर्ख इति यावत् तस्मात्। अपशुघ्नादिति पाठे पश्विति सम्यगर्थकमव्ययम्। अपशु न सम्यक् हन्ति गच्छति बुद्ध्यतीत्यपशुघ्नस्तस्मात् , 'हन हिंसागत्योः' गत्यर्थाः सर्वे बुद्ध्यर्था अपि। सम्यगुपकारमविद्वान् कृतघ्न इति यावत्। तस्मात् विना, एतादृशं पशुधर्मभाजं पुमांसं विनेत्यर्थः। केचित्तु अपगता शुक् यस्मात्तमात्मानं हन्तीत्यपशुघ्नस्तस्मात् , आत्मघातिनं विनेत्यर्थः। इति वदन्ति। तन्मते घ्नेत्यक्षरं गकारविशिष्टं बोध्यम्। तन्मते पशुवातिन इति वेति चिन्त्यं, गकारलोपविधायकशास्त्रादर्शनात्। कः पुमान् , विरज्येत। न कोऽपीत्यर्थः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विष्ण्वंशाभ्युदितस्य वीर्यमखिलं रामस्य विष्ण्वात्मनः कृष्णस्यापि तथातिविस्तरमिहाचक्ष्वेति योऽप्योऽन्वयः।
यदोर्वंशज–नन्दवंशगतया यद्यच्च यदन्वयोद्भूतित्वेन चकार तद्द्वयमपि ब्रूह्यच्युत-क्रीडितम् ॥ २ ॥
यातारस्य न यत् प्रियं भवति तत्स्यात्कामिलोकप्रियं यद्वस्त्वस्य न सौख्यशालि भवति प्रेष्ठं च तद्योगिनः।
सत्येवं यदिहावतारचरिते प्रीतिर्द्वयोरुत्कटा हेतुस्तत्र तथा चरित्रसरणिर्नारायणीति स्फुटम् ॥ ३ ॥

हिन्दी अनुवाद (कर्दमक्षमा)

उसी यदुवंश में अंशदेश में प्रकट हुवे भगवान् विष्णु के पराक्रमों को हमें सुनाओ। भूतमात्र (सकलविश्व) का पालन करने वाले एवं विश्व की आत्मा भगवान ने यदुवंश में अवत्तीर्ण होकर जो चरित्र किये वे सब विस्तार से कहने की कृपा करें ॥ २–३ ॥ वह भगवान का गुणानुवाद (कथामृत) कामनारहित पुरुषों से गाया जाता है तथा संसार रोग का औषध रूप है एवं श्रोताओं के श्रोत्र और मन को आनन्ददायक है वैसा उत्तमश्लोक (श्रेष्ठजनों से स्तुति कराते) भगवान श्रीकृष्ण जी के कथामृत से निज जीव की हत्या करने वाले व्यक्तियों को छोड़ कर और कौन पुरुष है जो विरक्त होगा ! अन्य कोई नहीं ॥ ४ ॥

पितामहा मे समरेऽमरञ्जयैर्देवव्रताद्यातिरथैस्तिमिङ्गिलैः।
दुरत्ययं कौरवसैन्यसागरं कृत्वातरन् वत्सपदं स्म यत्प्लवाः ॥ ५ ॥
द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं सन्तानबीजं कुरुपाण्डवानाम्।
जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ॥ ६ ॥
वीर्याणि तस्याखिलदेहभाजामन्तर्बहिः पूरुषकालरूपैः।
प्रयच्छतो [1]मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ॥ ७ ॥
रोहिण्यास्तनयः प्रोक्तो रामः सङ्कर्षणस्त्वया। देवक्या गर्भसम्बन्धः कुतो देहान्तरं विना ॥ ८ ॥

श्री कर्दमक्षमा

अन्वयः – समरे अमरञ्जयैः देवव्रताद्यातिरथैः तिमिङ्गिलैः दुरत्ययं कौरवसैन्यसागरं यत्प्लवाः मे पितामहाः वत्सपदं कृत्वा अतरन् स्म ॥ ५ ॥ कुरुपाण्डवानां सन्तानबीजम् इदं मदङ्गं (यदा) द्रौण्यस्त्रविप्लुष्टं (तदा) शरणं गतायाः मातुः च (मम) मेयः (ज्ञेयः) आत्तचक्रः कुक्षिं गतः जुगोप ॥६॥ विद्वन् अखिलदेहभाजां अन्तःबहिः पूरुषकालरूपैः मृत्युम् उत च अमृतं प्रयच्छतः

---

[1] मृत्युमनामयं च विज।

मायामनुष्यस्य तस्य वीर्याणि वदस्व त्वया रोहिण्याः तनयः सङ्कर्षणः रामः देवक्याः (तनयः) प्रोक्तः देहान्तरं विना कुतः गर्भसम्बन्धः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं चास्मत्कुलदैवतं श्रीकृष्णोऽतोपि तत्कथैव नित्यं श्रोतव्येत्याशयेनाह । पितामहा इति अमराञ्जयंति ये तैः । देवव्रतो भीष्मस्तदाद्यैरतिरथैस्तिमिंगिलैस्तिमिंगिलमत्स्यतुल्यैर्दुरत्ययं दुस्तरं वत्सपदमिव अत्यल्पं कृत्वा तुच्छीकृत्येत्यर्थः । अतरन् स्म । यः श्रीकृष्ण एव प्लवो नौका येषां ते । तस्य वीर्याणि वदस्वेति तृतीयश्लोकगतेनान्वयः ॥ ५ ॥ न केवलं पांडवानेवारक्षदिदं मम शरीरमपि यो रक्षितवानित्याह । द्रौण्यस्त्रविप्लुष्टमिति ॥ द्रोणेरश्वत्थाम्नो ब्रह्मास्त्रेण दग्धमिदं मच्छरीरं च कुरूणां पांडवानां च संतानस्य निदानं मम मातुः कुक्षौ प्रविष्टो धृतचक्रो यो जुगोपेति ॥ ६ ॥ अखिलदेहभाजां सर्वप्राणिनाम् अंतश्च बहिश्च पुरुषरूपेण कालरूपेण । अंशाभिप्रायेण बहुवचनम् । मृत्युं संसारम् उत अपि अमृतमपि प्रयच्छतो वीर्याणि वदस्व ब्रूहि । अयं भावः । अंतर्यामिरूपेण अंतर्दृष्टीनां मुक्तिं बहिर्दृष्टीनां च कालरूपेण मृत्युं ददाति यतोऽतो विषयदृष्टिं विहायांतर्दृष्ट्या तद्वीर्याण्येव श्रोतव्यानीति ॥ ७ ॥ ननु 'बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् । वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत्'' इति रोहिण्यास्तनयो रामः प्रोक्तः "वसुदेवस्तु देवक्यामष्टपुत्रानजीजनत् । कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः । मृदुं संतर्दनं भद्रं संकर्षणमधीश्वरम् । अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल ॥'' इति पुनर्देवक्यां गर्भसंबंधस्तस्यैवोक्तः स कुतो घटत इत्याक्षेपः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्ये विरज्यंतु नामास्माकं तत्र विराग उचित इत्याह—किञ्चेति । यतः कुलदैवतमतस्तत्कथा कृष्णकथा प्लवस्तरणसाधनम् "प्लवः प्लवे प्लुतौ कपौ" शब्दे कारण्डवे म्लेच्छजातौ भेलकभेकयोः । क्रमनिम्नमहीभागे कुलके जलवायसे । जलांतरे प्लवंगे च तृणमुत्तकभित्यपि" इति हैमः । 'अस्त्रियां समरानकरणाः' इत्यमरः । तिमिर्दशयोजनो मत्स्यस्तं गिलति निगरतीति तिमिंगिलः । देवानां विश्वदेवानामिव व्रतं नियमः संतत्यनुत्पादनरूपं यस्य स देवव्रतो भीष्मः । महारथोऽयुतयोद्धातिरथः । वदस्वेति "भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः" इत्यनेनोपसंभाषायामात्मनेपदम् । उपसंभाषा सांत्वनम् । तृतीयश्लोकगतेन वीर्याणीत्यादिश्लोकगतेनेत्यर्थः ॥ ५ ॥ आत्तं स्वीकृतं भ्रामणेन चक्रवद्वर्तुलं गदारूपमस्त्रं येन स आत्तचक्रः । यथाश्रुतार्थे तु 'परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः' इत्युक्तिव्याकोपः स्यादिति "चक्रं रथांगे कोके च सैन्येऽस्त्रे जलसंभ्रमे" इति मेदिन्यादयः । प्रायश्चक्रादानस्य सार्वदिकत्वादात्तचक्र इत्युक्तम् । कुरुचेदिपांडवानां पृथगुक्तिर्ब्राह्मणपरिव्राजकवत् मेयः । इत्येकपदं वा मेयः मदृग्गोचरः इत्यर्थः ॥६॥ कालरूपैरिति । बहुत्वोक्तिः । अंशाभिप्रायेणेति कालस्यांशा युगकल्पवर्षमासादिभेदाद्बहवः संति तदभिप्रायेण मृत्युं मरणं दुःखं वा तत्तत्समये तत्तदृष्टवशाज्जीवानां भवतीति भावः । प्रयच्छतो ददतुः 'दाण—दाने' प्रपूर्वाच्छतरि यच्छादेशः वीर्याणि लोककंटकायमानासुरहननादीनि । एतेन किमायातं तत्रायं भाव इति । अंतर्दृष्ट्या तत्परचेतसेति । मायामनुष्यस्य लीलार्थं धृतमनुष्यशरीरस्य । "माया लीलकृपाशक्तिदंभेष्वथ" इति कोशात् । विद्वन्निति श्रीशुकस्य कथनसामर्थ्यं द्योतयति विश्वनाथस्तु—अखिलदेहभाजां मध्ये येंऽतरंगा भक्ता ये च बहिरंगा भक्तद्रोहिणस्तेभ्योऽमृतं मृत्युं च प्रयच्छतो वीर्याणीति योज्यं तत्रांतरंगेभ्यो वसुदेवादिभ्यः पुरुषरूपैश्चतुर्भुजद्विभुजपुरुषाकारैरमृतं परमानंदं बहिरंगेभ्यः कंसादिभ्यः कालरूपैः । 'कालोऽयमिति विह्वलः' इति 'मृत्युर्भोजपतेर्विराट्' इत्यादिरीत्या मत्स्यंडिकाखंडैः पित्तदूषितरसनया तिक्तरसैरिव साक्षान्मारकत्वेन भातैर्मृत्युमुतानंतरममृतं मोक्षं च प्रयच्छत इति वर्त्तमानसामीप्ये वर्त्तमानत्वं किं वा लीलाया नित्यत्वज्ञापनार्थं वर्त्तमानप्रयोगः । मायया स्वरूपेणैव मनुष्यस्य स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः "अतो मायामयं विष्णुं प्रवदंति मनीषिणः" इति माध्वभाष्यप्रमाणितश्रुतेः ॥७॥ एकस्य देहांतरमंतरेण गर्भद्वयसंबंधो न घटत इत्याह—नन्विति । तस्यैव बलस्यैव । स संबंधः । कुतो हेतोः । घटते चरितार्थो भवेत् । इत्याक्षेप इत्याशंका । संदिग्धपदार्थनिर्णयजिज्ञासादिनानुयोग आक्षेपः "आक्षेपो भर्त्सनाकृष्ट्याशंकालंकृतिषु स्मृतः" इति मेदिनी ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषणी

अथ त्रिकम् । तत्र मया तु विशेषतो निजकुलैकगतेः श्रीकृष्णस्य कथा सदा अवश्यं श्रोतव्येत्याशयेनाह—पितेति । अमराञ्जयैरिति, महाशौर्यमुक्तम् । देवव्रतेति, इच्छामृत्युत्वादिहेतुमहानियमनिष्ठया परमदुर्जयत्वम्, स आद्यः श्रेष्ठो येषामतिरथानां तैरिति तत्पाल्यत्वेन तेषामपि दुर्जयत्वम् । अत एव दुरत्ययं दुस्तरमपि, अतिरथलक्षणं महाभारते—

"एकादश सहस्राणि योधयेद्यस्तु धन्विनाम् ।
अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृतः ॥ अमितान् योधयेद्यस्तु सम्प्रोक्तोऽतिरथस्तु सः'' ॥ इति

कौरवाणां दुर्योधनादीनां सैन्यमेव सागरः अतिविस्तीर्णत्वादिना तं स्मेति प्रसिद्धौ । यत्प्लवा इति । प्लवस्तरणसाधनं तत्साधनत्वञ्च तस्य न वहित्रतुल्यत्वेन वोढृलक्षणत्वं किन्तु प्रभावविशेषेण विलक्षणमेवेत्याह—वत्सपदमिव कृत्वेति ।

अनायासेनैव तरणात् ।। ५ ।। विशेषतो मम जीवनप्रदश्च श्रीकृष्ण एवेत्याह—द्रौणीति । विशेषेण प्लुष्टं दग्धमपि, ब्रह्मास्त्रस्यानन्यनिवार्यत्वाद्दाहकतमत्वाच्च इदमिति जन्मान्तरीणत्वं व्यावर्तितम् । यद्वा, प्रत्यक्षमित्यर्थः । इति तत्र संशयो निरस्तः । कुर्वादीनां सन्तानबीजमिति' तत्करुणायां हेतुः सैव स्वदेहे प्रीतिहेतुश्च अतस्तेषां सर्वेषामपि कुलक्षयदोषनिरसनेन यशो धर्मश्च रक्षित इति भावः । पाण्डवानां कुरुत्वेऽपि पृथगुक्तिस्तेषां तत्र विशेषापेक्षया अत एव कुरवस्तदन्य एव ब्राह्मणपरिव्राजकादिवत् । इति तेषां स्वसन्तानाभाव उक्तः । तेन श्रीभगवतः परमकारुण्यमेवाभिप्रेतम् । दुष्टानां समूलनाशात्, प्रकारान्तरेण तेषामपि बीजरक्षया परलोकहिताचरणाच्च प्रायश्चकादानस्य सार्वदिकत्वादात्तचक्र इत्युक्तं गोपनन्तु गदयैव "अस्त्रतेजः स्वगदया नीहारमिव भास्करः" इति प्रथमे प्रोक्तत्वात्, यद्वा, भक्तवात्सल्येन व्यग्रतया रक्षणार्थं चक्रञ्च गृहीतम् । चकारान्मातुरङ्गञ्च जुगोपेत्यर्थः । गर्भरक्षया तद्देहस्यापि रक्षणात् अन्यथा पत्यनुमरणमेव तस्या अभीष्टमिति अतस्तत्कथायां विरक्त्या नितरामकृतज्ञतापि प्रसज्येतेति श्लोकद्वयतात्पर्यम् ।। ६ ।। ननु, सत्यं निवृत्ततर्षादीनामुपादेय एव तद्गुणानुवादः—तथा भवद्विधानां निजरहस्योऽसौ, किन्तु तद्विमुखजनाशङ्कया गोपयितुमिष्यत इत्याशङ्क्य परमौत्सुक्येन तानपि प्रवर्त्तयन् प्रार्थयते—वीर्याणीति । देहभाजां जीवानाममृतं मरणाद्यशेषदुःखरहितं परममधुरं वा वैकुण्ठलोकं स्वपादाब्जप्रेम वा प्रयच्छतो ददतः चकारादन्यदप्यपेक्षितं वदस्व गुह्यान्यपि प्रकाशयेत्यर्थः । "भासनोपसम्भाषा' (१।३।४७) इत्यादिना लोट्, यद्वा, हे स्व ! हे मदेकबन्धो ! मदेकधनेति वा, अतो मद्धितार्थमवश्यं वक्तुमर्हसीति भावः । हे विद्वन्निति तानि सर्वाणि त्वया ज्ञायन्त एवेति भावः । अन्यत् श्रीस्वामिपादैर्व्याख्यातमेव । भावस्त्वयम् कथाश्रवणादिना अन्तर्दृष्टीनां सतामन्तर्यामिरूपेणामृतं तदभावे च बहिर्दृष्टीनां कालरूपेण मृत्युं ददाति यतः अत अन्तर्दृष्ट्यर्थं तद्वीर्याणि ब्रूहीति, अथवा अन्तर्बहिश्च यानि पुरुषकालयो रूपाणि तैः । अत्र श्रवणादिना अन्तःस्थितैः सद्भिः पुरुषस्य श्रीभगवतो रूपैः श्रीविष्ण्वादिमूर्त्तिभिः परमानन्दं, तदभावेन च कालस्य रूपैर्बहिःस्थितर्यमादिभिर्विविधदुःखं, किम्वा अन्तर्बहिश्चामृतं बहिरन्तश्च मृत्युमपि प्रयच्छत इत्यर्थः । माययैव मनुष्यस्य प्रसिद्धप्राकृतमनुष्यतया प्रतीतस्य स्वतो मनुष्याचारलीलत्वेऽपि प्रकृतिधर्मातीतत्वात्, यद्वा, तादृशमनुष्यप्रकाशिकया माययाप्यमनुष्यस्य मनुष्यलोकातीतस्य कदापि साक्षात् श्रीगरुडारोहणरुद्रजयब्रह्ममोहनादिनैश्वर्यप्रकटनात् 'यद्वा' माया दया "माया दम्भे कृपायाञ्च" इति विश्वप्रकाशात् तया मनुष्यस्य मनुष्याकारं प्रकटयतः । यद्वा माया ज्ञानं "माया स्याच्छाम्बरीबुद्ध्योः" इति त्रिकाण्डशेषात् "माया तु वयुनं ज्ञानम्" इति निघण्टोश्च, तस्यां ज्ञानावस्थायामपि मनुष्यस्य नराकृतिपरब्रह्मत्वात्तद्रूपत्वेनैव स्फुरतः । अथवा, अखिलदेहभाजाम् अनियतानां जीवानां नियमं विनैव तेषां केषाञ्चिद्धिक्कादिमृत्युत्वेन दुर्घटदेहपातानां श्रीभीष्मद्रोणादीनां मृत्युं देहपातं कुर्वतः, केषाञ्चिद्भगवद्विरोधित्वेन दुर्घटमोक्षाणां कंसादीनाम् अमृतं मोक्षमपि, चकारात् पूतनादीनां परमभक्तगतिमपि कुर्वतो यानि तस्य तादृशानि वीर्याणि स्वच्छन्दचरितानि वदस्व । तत्र हेतुः 'विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यानि" इत्याद्युक्तदिशा पुरुषरूपैः परमाण्वादिभेदेन कालरूपैश्चान्तर्बहिश्च स्थितस्येत्यर्थः । ततश्च तेषामन्तर्बहिश्च स्वेच्छानुरूपमेव सम्पादितं यत्तद्युक्तमेवेति भावः । अन्यत् समानम् । एवं मृत्य्वमृतप्रदानेनैश्वर्यविशेषात्, तथा तादृशमनुष्यतया माधुर्यविशेषात् तथा स्वधाम्नि स्वस्वरूपस्यैव सतः प्रपञ्चे पुरुषादिरूपेण स्वयमपि चाभिव्यक्तेः एकस्यैवावतारित्वावतारत्वाभ्यां वैचित्र्यात्तदापूर्वमाहात्म्यश्रवणे स्वकौतुकविशेषोऽपि दर्शितः ।। ७ ।। तत्र विशेषं पृच्छति—रोहिण्या इति चतुर्भिः । सङ्कर्षण इति । श्रीदेवकीपुत्रेषु सङ्कर्षणमहीश्वरमिति "सङ्कर्षणाख्यया यः प्रोक्तः स एव रामो बलाख्यो रामः स एव रोहिणीपुत्रत्वेन त्वया प्रोक्त इत्यर्थः । इति भेदोपि निरस्तः ।। ८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कोऽसौ तत्कृत उपकारः ? यदभिज्ञानात्तद्गुणानुवादान्न विरज्यसे बहुषु भगवदवतारतच्चरित्रेषु सत्स्वपि किं विशेषेण कृष्णावतारतच्चरित्रादिकमेव पृच्छसीत्यत्राह—पितामहा इति द्वाभ्याम् । अमरञ्जयैः देवानपि जेतुं समर्थैर्भीष्माद्यतिरथरूपैस्तिमिङ्गिलैर्हेतुभिः दुःखेनाप्यत्ययेतुं पारं गन्तुमशक्यं कौरवाणां सैन्यमेव सागरस्तं यो भगवान् कृष्ण एव प्लवो नौर्यैषां ते मम पितामहाः युधिष्ठिरादयः वत्सपदङ्कृत्वा गोष्पदतुल्यङ्कृत्वा अतरन् स्म पारं जग्मुः किल श्लोकद्वयस्थयच्छब्दयोर्वीर्याणि तस्येत्यनेनान्वयः ।। ५ ।। द्रौणीति । किञ्च द्रौणेरश्वत्थाम्नोऽस्त्रेण तत्प्रयुक्तब्रह्मशीर्षनामकेनास्त्रेण विप्लुष्टं दग्धमिदं मदङ्गं मच्छरीरं कुरूणां पाण्डवानाञ्च सन्तानस्य बीजं प्रवर्त्तकं वंशद्वयेऽपि स्वस्यैवावशेषितत्वात्तदुभयसन्तानबीजमित्यर्थः । यो जुगोप, कथम्भूतः ? शरणं गतायाः मम मातुरुत्तरायाः कुक्षिं प्रविष्टः आत्तं धृतं चक्रं सुदर्शनं येन तथाभूतः मत्पितामहप्रभृतीनां मत्पर्य्यन्तानामनिष्टपरिहारेष्टप्रापणदीक्षितस्य महोपकर्तुर्गुणानुवादात् कृतज्ञः कथमहं विरज्येयमिति भावः ।। ६ ।। वीर्य्याणीति । यत एवमतो हे विद्वन् ! अखिलानां देहभाजाम् अन्तर्बहिः पुरुषकालरूपैः अमृतं मृत्युञ्च प्रयच्छतः क्षेत्रज्ञानां कालावयवानाञ्च बाहुल्याद् बहुवचनम्, क्षेत्रज्ञकालात्मकैः रूपैः शरीरैः तत्रान्तः पुरुषरूपेणाऽमृतममरणं स्थितिं प्रयच्छतः स्थितिहेतोरित्यर्थः । उतापि च बहिः कालरूपेण मृत्युं प्रयच्छतः विनाशहेतोरित्यर्थः । कृत्स्नजगत्कारणस्येत्यर्थः । "कारणं तु ध्येयः" इति कारणस्यैव वस्तुनो ध्येयत्वश्रवणात् । ध्यानस्य च श्रवणमननादिपूर्वकत्वात् तद्विषयकशुश्रूषा ममास्तीति ज्ञापनायाखिलदेहभाजामित्याद्यमृतञ्चेत्यन्तमुक्तम् । तर्ह्येवम्भूतस्य कथं मनुष्यत्वापत्तिः ? इत्यतो विशिनष्टि, मायामनुष्यस्य सङ्कल्पज्ञानेन मनुष्यस्य प्रच्छन्नमनुष्यस्य वा

तस्य श्रीकृष्णस्य वीर्याणि वदस्व प्रकाशय "भासनोपसम्भाषा" (१।३।४७) इत्यादि सूत्रेण वदेस्तङ् ॥ ७ ॥ अंशेनावतीर्णस्य विष्णोरियंशचरित्रमपि कथनीयमिति सूचितम् । तदेव व्यञ्जयन् पृच्छति—रोहिण्या इति । सङ्कर्षणः भगवदंशसंभूतसङ्कर्षणावतारूपो रामो बलरामः रोहिण्याः तनयः प्रोक्तः । तथा तस्य देवक्या गर्भसन्दर्भश्च स्मृतः । त्वया नवम इति शेषः । तदेतदुभयं देहान्तरं विनैवैकेन देहेनैव तस्य कुतः कस्माद्धेतोरभवत् ? ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

माहात्म्यं हरेरनुभवसिद्धं यस्मादतो वक्तव्यमित्याशयेनाह—पितामहा इति । पितामहा अर्जुनादयः अमरान् देवान् जयन्तीत्यमरञ्जयास्तैः देवानामिव व्रतमप्रजाजननलक्षणं यस्य स भीष्मः स आद्यो येषां द्रोणादीनां ते तथा त एवातिरथा रथयुत्तमास्त एव तिमिर्नाम महामत्स्यः कायेन दशयोजनप्रमाणमावृत्य स्थितः तमपि गिलति ग्रसत इति तिमिङ्गिलः । स्वप्रत्ययनिमित्तं सुमानमः । वत्सपदं गोवत्सपदमिव वत्सपदं लुप्तोपमं यः कृष्णः प्लव उडुपं येषां ते यत्प्लवाः नदीतरणाय निर्मितं वंशचर्मादिना यत्साधनं स प्लव इति ॥ ५ ॥ इतोऽपि तद्वीर्याणि श्रोतव्यानीत्याह—द्रौण्यस्त्रेति । मातुरुत्तरायाः कुक्षिं गतः प्रविष्टः । इदं प्रत्यक्षं चेति भावेनोक्तम् मेय इति । मया मेयः ज्ञेयः मम दृग्विषयः ॥ ६ ॥ "भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः" (१।३।४७) इत्यतो वदस्वेत्यात्मनेपदप्रयोगो मद्धितार्थं वक्तव्यमिति सूचनार्थः । शुकस्य वक्तव्यांशज्ञानपाटवप्रदर्शनार्थं च एतदेव प्रकटितमभूदिद्धनित्यनेन अन्तः पुरुषरूपैः बहिः कालरूपैः अनामयं संसारदुःखनिरासेन सुखं मृत्युं दुःखानुभवलक्षणम् अन्धन्तमः प्रयच्छतो ददतः बहुरूपत्वाद्बहुवचनम् । प्रलयान्त इति शेषः ॥ ७ ॥ एकस्य द्वयोर्योनिसम्बन्धानुपपत्तिः प्रश्नबीजम् ॥ ८–९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पितेति । तस्यासाधारणप्लवत्वमाह—वत्सपदमिव कृत्वेति । ततस्तरणसाधनत्वादेव तस्य प्लवत्वं न तु वहनसाम्यादपीति भावः । येन सहायेन प्लव उत्प्लुतिर्येषां तादृशो वा ॥ ५ ॥ द्रौणीति "अस्त्रतेजः स्वगदया" इति प्रथमोक्तत्वादात्तगदत्वमपि ज्ञेयम् ॥ ६ ॥ पूर्वपूर्वोक्तबहिर्मुखानपि प्रवर्त्तयन् सकौतुकमाह—वीर्याणीति । अखिलदेहभाजाम् अनियतानां जीवानां नियमं विनैव तेषां केषाञ्चिद्दैत्यकादित्वेन दुर्घटदेहत्यागानां भीष्मादीनां मृत्युं देहत्यागं कुर्वतः केषाञ्चिद्भगवद्विरोधित्वेन दुर्घटमोक्षाणां कंसादीनाममृतं मोक्षमपि चकारात् पूतनादीनां भक्तिमपि कुर्वतो यानि तस्य तादृशानि वीर्याणि स्वच्छन्दाचरितानि वदेत्यर्थः । तत्र हेतुः "विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यानि" इत्युक्तदिशा पुरुषरूपः परमाण्वादिभेदेन कालरूपैश्चान्तर्बहिश्च स्थितस्येति तत्तेषामन्तर्बहिश्च स्वेच्छानुरूपमेव सम्पादितमित्यर्थः । तदेवं तस्य नराकृतिपरब्रह्मणः प्राकृतमनुष्यतया प्रतीतिस्तु माययैवेत्याह—मायामनुष्यस्येति । तत एवम्भूतैश्वर्यादिदृष्ट्यापि निजहितैषिभिस्तदेकशरणापत्तिसम्पादकानि तद्वीर्याणि श्रोतव्यान्येवेति ॥ ७–८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

मत्कुलदैवतत्वेनापि कृष्णस्य कथा मम श्रोतव्येत्याशयेनाह–पितामहा इति । अमरान् जयन्तीति तः देवव्रतो भीष्मः तिमिङ्गिलतुल्यैः दुरत्ययं दुष्पारमपि-वत्सपदमिव कृत्वा अतरन् यतो यः श्रीकृष्ण एव प्लवो येषां ते यं समाश्रिता इत्यर्थः । तथाहि "समाश्रिता ये पदपल्लवप्लवम्" इत्यत्र "भवाम्बुधिर्वत्सपदम्" इति तस्य वीर्याणि वदस्वेति तृतीयेनान्वयः ॥ ५ ॥ मदेकरक्षकत्वेनापि तत्कथा अवश्यश्रोतव्येत्याह—द्रौण्यस्त्रेण विप्लुष्टं दग्धमिदमिति, तर्ज्जन्या स्वपक्षः स्पृशति, आत्तचक्रश्चक्रधारी "अस्त्रतेजः स्वगदयानीहारमिव गोपतिः" इति प्रथमोक्तेर्गदयैव जुगोप चकारान्मातुरङ्गं च जुगोप ॥ ६ ॥ सर्वगतिप्रदत्वेनापि श्रोतव्यानीत्याह–वीर्याणीति । अखिलदेहभाजां मध्ये ये अन्तरङ्गा भक्ताः ये च बहिर्बहिरङ्गाः भक्तद्रोहिणः तेभ्योऽमृतं मृत्युञ्च प्रयच्छतस्तस्य वीर्याणि वदेत्यन्वयः । तत्रान्तरङ्गेभ्यो वासुदेवादिभ्यः पुरुषरूपश्चतुर्भुजद्विभुजपुरुषाकारैरमृतं परमानन्दं बहिरङ्गेभ्यः कंसादिभ्यः कालरूपैः "कालोऽयमिति विह्वलः" इति "मृत्युर्भोजपतेः" इत्याद्युक्तरीत्या मत्स्यण्डिकाखण्डैः पित्तदूषितरसनया तिक्तरसैरिव साक्षान्मारकत्वेन मृत्युं पश्चात् अनन्तरममृतं मोक्षं च प्रयच्छत इति वर्त्तमानसामीप्ये वर्त्तमानवत्वं किम्वा लीलाया नित्यत्वज्ञापनार्थं वर्तमानप्रयोगः मायया स्वरूपेणैव मनुष्यस्य स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः "अतो मायामयं विष्णुं प्रवदन्ति मनीषिणः" इति मध्वभाष्यप्रमाणितश्रुतेः ॥ ७ ॥ अत्र विशेषं पृच्छति—रोहिण्या इति चतुर्भिः प्रोक्तो नवमस्कन्धे सङ्कर्षमहीश्वरमिति । देवकीपुत्रत्वापि तस्यैव सङ्कर्षणस्य देवक्या गर्भसम्बधश्च उक्तः स कुतो घटते ? इत्याक्षेपः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मे पितामहाः पाण्डवा अमरान् जयन्ति ये तैः देवव्रतो भीष्मस्तदाद्यैस्तिमिङ्गिलतुल्यैः समरे सङ्ग्रामे दुरत्ययं दुस्तरं वत्सपदमिव कृत्वाऽनायासेनैवाऽतरन् स्म । यः श्रीकृष्णः प्लवो येषां ते तस्य वीर्याणि वदस्वेति सम्बन्धः ॥ ५ ॥ किञ्च, मे मातुः शरणङ्गतायाः कुक्षिङ्गतः बहिःस्थितेन तत्रस्थेनाऽन्तर्यामिरूपेण च निरायुधेन च रक्षा यद्यपि सम्भवति तथापि आत्तचक्रस्य कुक्षौ स्थितोऽयं श्रीकृष्णः सायुधः कुक्षिगतो भवतु मम गर्भरक्षक इति शरणङ्गतायाः सङ्कल्पसिद्धये कुक्षिस्थस्वभक्तध्यानसिद्धये चेति

ज्ञेयम् । कुरूणां पाण्डवानाञ्च सन्तानबीजं द्रौणेरश्वत्थाम्नोऽस्त्रेण ब्रह्मास्त्रेण विप्लुष्टं दग्धमिदं मम शरीरं जुगोप तस्येत्यग्रिमेन
सम्बन्धः ॥ ६ ॥ तस्योक्तप्रकारेण भक्तवत्सलस्य, कथम्भूतस्य ? अखिलदेहभाजां सर्वेषां देहाभिमानिनामज्ञानां तेषामानन्त्याद्बहु-
वचनम् । मृत्युं द्व्यक्षरं मायामनुष्यस्य "माया च वयुनं ज्ञानम्" इति कोशात् ज्ञानयुक्तस्य ज्ञानिनो मनुष्यस्य "मनुष्याणां सहस्रेषु
कश्चिन्मां वेत्ति तत्त्वतः" इति भगवद्वचनादुर्लभत्वादेकवचनम् "मनुष्यत्वे च मां धीराः साङ्ख्ययोगविचक्षणाः । आविस्तरां प्रपश्यन्ति"
इति वचनात् मुख्याधिकारित्वान्मनुष्यस्येत्युक्तम् । मृतमक्षरं पुरुषकालरूपैः पुरुषरूपैरुपदेशादिकर्तृभिः कालरूपः घटीमुहूर्तादिभिः
निमित्तभूतैः प्रयच्छतो भगवतः वीर्याणि वदस्व "द्व्यक्षरन्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् । ममेति तु भवेन्मृत्युर्न ममेति च
शाश्वतम्" इति लक्षणवचनमत्रानुसन्धेयम् । कथम्भूतं मृत्युम् बहिर्हेयत्वात् । कथम्भूतममृतमन्तरुपादेयत्वात् ॥ ७ ॥ एवं भगव-
द्वीर्याणि पृष्ट्वेदानीं सन्दिग्धानर्थान् पृच्छति–रोहिण्या इति पञ्चभिः—

"बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् । वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत्" ॥

इति त्वया रामः रोहिण्यास्तनयाः प्रोक्ताः पुनस्तस्य देवक्या गर्भेष्वपत्येषु—

"वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् । कीर्तिमन्तं सुषेणं च भद्रसेनमुदारधीः ॥
मृदुं सन्तर्दनं भद्रं सङ्कर्षणमहीश्वरम् । अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल" ॥

इति त्वदुक्तः सप्तमत्वेन सम्बन्धो देहान्तरं विना कुतो हेतोः घटेत ? स देहव्यूहहेतुकः एकेनैव देहेन पौर्वापर्यक्रम-
हेतुको वा तत्रापि सङ्कर्षणेच्छया श्रीकृष्णेच्छया वा ? इति प्रश्नः ॥ ८ ॥

श्रीसुबोधिनी

एवं चरित्रं स्तुत्वा पुण्यद्वारमात्रतां वारयितुं भगवन्तं स्तौति—**पितामहा** इति द्वाभ्यां, श्रुतदृष्टभेदेन **मे पितामहाः**
पाण्डवाः **समरे दुरत्ययं कौरवसैन्यसागरं वत्सपदं कृत्वा यत्प्लवा अतरन्निति** संबन्धः । एक एव पौत्र उर्वरितः । पञ्चापि
पितामहाः, त्रयो वा । क्षेत्रजेषु क्षेत्रस्य स्वकीयत्वाभावान्न बीजिनः । यत्र पुनः क्षेत्रं यथाकथञ्चित् स्वकीयं तत्फल बीजिन एव ।
समर इति । मरो मरणं, तत्सहिते । अवश्यं युद्धे मरणमिति । तथा सति कोपि न मृत इति भगवत्सन्निधिमाहात्म्यमुक्तम् ।
अमरञ्जया भीष्मादयः । तेषाममरञ्जयः संज्ञाहेतुरिव जात इति 'संज्ञायां भृतवृजी'त्यादिना खश् । देवानपि जयन्तीतीन्द्रपुत्रत्वा-
दिनापि न निरस्तारसम्भावना, देवदत्तशस्त्रैश्च न प्रतीकारः । न च तेषां कदाचिदपि अमरञ्जयत्वं गच्छतीत्याह—**देवव्रतेति** ।
देववत् सत्यसङ्कल्परूपं व्रतं यस्य । अनेन भीष्मस्य स्वधर्मत्याजनसामर्थ्यमपि तेषां जातमित्युक्तम् । **देवव्रतो** भीष्मस्तथात्वेन
प्रसिद्धः । अन्येपि द्रोणादयस्तथा देवव्रताद्या ये अतिरथाः । स चेदाद्यः, तद्रूपा एवान्ये । तथाभूता अप्यतिरथा अलौकिकसर्व-
सामर्थ्यातिशययुक्ताः । 'अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृत' इतिवाक्यात्तद्भक्षकस्ततोऽप्यधिकः सहस्रांशेन अनेन तत्समुद्रे
पतितस्तत्रत्योपि न जीवति, विजातीयस्य का वार्तेत्युक्तम् । तेषां दैत्यावेशेनातिक्रूरत्वाज्ज्ञातिघाताय तथोक्तम् । ततः सम्बन्धित्वेन
पितामहत्वेन वा त्यक्ष्यतीति निवृत्तम् । अविचारश्चोक्तः । गिलनेनास्थ्यादीनामिव सर्ववंशनाशकत्वं च बहिःस्थितमपि ते मारयन्ति,
किं पुनः स्वसेनापतितमिति समुद्रत्वम् । अत एव दुरत्ययं, साधनघातकत्वान्मकरादेः । कुरुवंशोद्भवाश्च नार्वाञ्चो वर्तन्ते । **सैन्य-**
सागरमिति । चेतनसागरत्वेन स्वरूपतो नाशकत्वमुक्तम् । महानौकादिसाधनानामपि दुःखेनातिक्रमोतिक्रमणं यस्य । यो भगवान्
प्लवो येषामिति । भगवतोल्परूपेण सन्निधिमात्रेण रक्षकत्वम्, अयुद्ध्यमानत्वात् । मनःशङ्कानिवृत्त्यर्थं **वत्सपदं कृत्वेति** । तुच्छ-
करणतरणयोर्भगवदाश्रयत्वमेव हेतुः । गीतायां भीष्मादिमरणज्ञानात्तुच्छकरणम् । तथापि सम्यगाश्रयणाभावात्पाण्डवानां पिपीलि-
कात्वमेव, स्वदृष्ट्या भगवान् गृह्णत इति । भगवद्भावे कथमेवं स्यात् । तेषामवस्थापनात्तुच्छकरणम् । उभयमलौकिकं सकृदेव
जातमिति । अन्ततस्त्रयाणाममारणाद्वत्सपदम् । द्विधा विदीर्णो मुखस्थानीयोऽश्वत्थामा, वारद्वयमकारकरणात् । प्लवमारुह्य तीर्ण तीर्णं
समुद्रांशं शोषयन्ताऽन्ते किञ्चित्स्थापयित्वोत्तीर्णा इत्यर्थः । कीर्तेरपि प्राप्तत्वात्तत्कर्तृत्वम् । इदमत्यन्तमलौकिकम् । एवमेव पूर्वपूर्व-
संसारमपि शोषयित्वा भगवत्सेवामात्रं संसारपदार्थपरिग्रहं स्थापयित्वा पारेस्थितं भगवन्तं भगवदाश्रयाः प्राप्नुवन्तीत्युक्तम् ॥ ५ ॥
एवं श्रुतमाहात्म्यमुक्त्वा दृष्टमाहात्म्यमाह—**द्रौण्यस्त्रेति** । सर्वथा पाण्डवाशक्तौ स्वयमपि कृतवानिति वदन् स्वस्मिन् कृपातिशय-
मप्याह । माहात्म्यमारखोपि पितृनाम्ना द्योतिते । द्रोणो ह्यस्त्रविद्यायां मूलभूतः । पितृमारणं चाप्रतीकार्यं वैरम् । तस्य चानिवर्त्यं-
ब्रह्मास्त्रेण विप्लुष्टं विशेषेण दग्धमिदं मम शरीरम् । अर्जुनस्य वैष्णवत्वाद्वंशात्मकं बीजभावावशिष्टमत एव सन्तानबीजम् ।
कुरूणामपि मुक्तिदानाद्वंशाभावे न मुक्तिरिति कुरुपाण्डवानां ग्रहणम् । कुरुभिः सहिताः पाण्डवाः कुरुपाण्डवाः । कौरवाः पाण्डवा-
श्चेतिपक्षे 'जनपदे लुबि'तियोगविभागाल्लुप् । अन्तर्बीजमात्ररूपेण स्थितं देहं दग्धैरप्यंशैरदग्धभावनयाऽन्यथाप्रतीतः स तु जुगो-
पेत्यर्थः । दाहानन्तरं रक्षणमशक्यम् । दाहो धर्मरक्षार्थः । मोक्षे प्रतिबन्धाभावार्थश्च । इदमित्यविकलत्वायाङ्गुल्या निर्देशः ।
मदङ्गमिति स्वानुभवो दर्शितः । **सन्तानस्य** वंशस्य **बीजमिति** तदानीं रक्षायामिदानीं चारक्षायां हेतुः । कुरुवंशोद्भवा ये पाण्डवा
इति मूलतो भक्तत्वम् **कुक्षिगत** इति प्रकारान्तरेणान्यतो रक्षाभावो दर्शितः । **आत्तचक्र** इति तत्त्वसहितं स्वस्वरूपं दर्शितवान् ।

उत्तरत्र ध्यानार्थ इत्युपकार उक्तः। न तु चक्रेण रक्षा, अस्त्रतेजोदूरीकरणं वा। अत ए'वास्त्रतेजः स्वगदये'त्यनेनाविरोधः। कालनिग्रहार्थं वा चक्रग्रहणम्। अत एवं भगवति सानुभावे निवृत्ते तच्चक्रं परिभ्रान्तमितीदानीमियमवस्था। **मातुर्मेयो** ज्ञेयः। चकारान्ममापि शरणं गतत्वाद्दर्शनं, कुक्षिप्रवेशोपि। माहात्म्यस्यानुभूतत्वाद्भवदुक्ते विश्वासो भविष्यतीति भावः ॥ ६ ॥ एवं **स्वस्य** भगवच्छ्रवणाधिकारं बोधयित्वा पूर्वपृष्टं भगवच्चरित्रं पुनः प्रकारान्तरेण फलसाधकमिति वदन्ननुवदति—**वीर्याणीति**। केचिदिमं प्रश्नं पूर्वस्माद्भिन्नमाहुः—यच्चरित्रं मानुषभावेन कृतं सर्वजनीनं, तत्पूर्वं पृष्टम्। यत् पुनरवतारसम्बन्धरहितं वरुणलोके गत्वा नन्दादिविमोचनरूपं वैकुण्ठप्रदर्शनादिरूपं वा तत्पुनःप्रश्नविषयमिति। तथासत्यस्य चरित्रस्यामृतत्वसम्पादकत्वं वक्ष्यमाणं फलं भवेन्नान्यस्येति चिन्त्यम्। तस्य **कृष्णस्याखिलदेहभाजामन्तर्बहिर्भेदेन** पुरुषरूपैः **कालरूपैश्चामृतं मृत्युं च प्रयच्छतः** पुरुषोत्तमस्यैव **मायामनुष्यस्य** वदस्वेति सम्बन्धः। अनेन भगतात्रावतारे रूपद्वयं प्रदर्शितं **मूलरूपमवताररूपं** च। इदमेव मूलरूपमिति तन्माहात्म्यं वा तस्येति रूपान्तरव्युदासाय माहात्म्यज्ञानाय **वीर्याणीति**। **अखिलेति** प्रकारान्तरव्युदासाय। न हि केषामपि भगवद्व्यतिरेकेणान्यस्मान्मृत्युरमृतं वा भवति। **देहभाजामिति** आत्मत्वेऽपि निमित्तवशात्तेषां तथाकरणमिति सूचितम्। **पुरुषरूपाणि** मत्स्यादीनि **कालरूपाणि** विषया इति केचित्। भगवद्ध्यानरूपाणि पुरुषरूपाणीत्यन्ये। कालरूपाण्याब्रह्मरूपतृणस्तम्बरूपाणि। यद्यपि सर्वाण्येव रूपाणि भगवतस्तथाप्यन्तर्बहिर्भेदकृतो विशेषोऽयमित्याह—**अन्तर्बहिरिति**। अतः कथमपि साधनैर्बहिर्मुखा मृत्युमेव प्राप्नुवन्ति। अन्तर्मुखास्त्वमृतमेव। तथात्वे तस्य किं सामर्थ्यं, किमन्तर्बहिष्ट्वकृतमेव, मर्यादार्थं तथेच्छा वाऽतस्तादृशस्य पराक्रमे ज्ञातेऽयं सन्देहो निवर्त्तत इति तदवश्यं श्रोतव्यम्। एतत्, गोकुलवासिनां वैकुण्ठगमने निर्णीतं भविष्यति। मानुषभावे नैतत्सम्भावितमितिशङ्काव्युदासायाह—**मायामनुष्यस्येति**। बुद्ध्यावरिका सेति पुरुषोत्तमत्वबुद्धिमावृत्य मनुष्यत्वबुद्धिं करोतीति तया कृत्वा तथाज्ञानविषयस्येत्यर्थः। न केवलं भगवद्वीर्यकीर्तनमदुपकारायैव, किन्तु कीर्तनफल तवापि भविष्यतीत्यात्मनेपदम्। **विद्वन्निति** ज्ञानं सर्वत्र हेतुः ॥ ७ ॥ एवं भगवच्चरित्राणि पृष्ट्वा सन्दिग्धान् युक्तिविरुद्धानर्थान् पृच्छति—**रोहिण्या** इति पञ्चभिः। 'बलं गदं सारणं चे'त्यत्र रोहिण्यास्तनयः प्रथमत उक्तः। 'वसुदेवस्तु देवक्यामि'त्यत्र 'कीर्तिमन्तमि'तिगणनायां सप्तमोऽहीश्वरो गणितः, 'सङ्कर्षणमहीश्वर'मिति। यद्यपि तत्र भगवत्प्रभाव एव कारणं, तथापि लौकिकप्रकारविषयः प्रश्नः। **देहान्तरं विनेति**। तस्मिन्नेव जन्मनि कथमुभयत्रोत्पत्तिः? ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पितामहा इत्यस्याभासे **पुण्यद्वारमात्रतामिति**। अत्र हि भगवान् साक्षादेव भक्तदुःखं निवारितवान्न तु केनचिद्द्वारेणोच्यते। तेन तच्चरित्रेपि साक्षात्पुरुषार्थसाधकत्वं; न तु पुण्यद्वारेति ज्ञापितं भविष्यतीति तथेत्यर्थः। **क्षेत्रं** पाण्डोः, **बीजिनो** धर्मेन्द्रादयः। एकस्वामिकक्षेत्रजत्वेन **पञ्चापि**। एकक्षेत्रजत्वेन तु **त्रय** एव पितामहा भवन्ति। **स्वधर्मत्याजनसामर्थ्यमपीति**। भगवदिङ्गितकरणं देवव्रतं, तद्विरुद्धं तद्दैत्यव्रतम्। तथा च देवव्रते भीष्मे तिमिङ्गिलत्वं दैत्यव्रतं कौरवैः संपादितमिति तेषां कौरवाणां तथासामर्थ्यं जातमित्यर्थः। इदमतिसामर्थ्यमिति भावः। **सैन्यसागरपदतात्पर्यमाहुर्बहिःस्थितमपीति**। सैन्यस्था हीतस्ततः स्वसेनाबहिःस्थितं मारयन्ति, न तु स्वसेनाम्। समुद्रस्थास्तु स्ववृन्दमध्यस्थमपि। इह चोभयरूपत्वमुक्तम्। तेनोक्तकैमुतिकन्यायसूचनाय सैन्यत्वं समुद्रत्वं चोक्तमित्यर्थः। पोतमपि गिलन्तीति साधनघातकत्वम्। **चेतनेति**। जलात्मकः समुद्रः, स स्वयं न मारकोऽचेतनत्वात्, किन्तु तत्स्थास्तथा। इह समुद्रस्यैव चेतनत्वात् स्वस्वरूपेणैवान्यनाशकत्वं ज्ञाप्यत इत्यर्थः। प्लवत्वोक्तितात्पर्यमाहुर्**भगवत** इत्यादिना। प्लवो हि समुद्रात् स्वल्पतरस्तत्स्वरूपानन्तःपाती च। स्वाश्रयणमात्रेण तारको, न तु मकरादिनिवारणे स्वक्रियावान्, एवं भगवानपि पाण्डवसैन्यमशेषं रक्षितुं नोद्यत, तदा बृहद्रूपः स्यात्, किन्तु पाण्डवानेव रक्षितुम्। अतोल्परूपत्वमयुद्ध्यमानत्वं तदनन्तःपातित्वम्। **तथापि समर्थमित्यादि**। उक्तसागरं वत्सपदमकुर्वन्नित्येतावतैव चारितार्थ्ये प्रभोः प्लवत्वनिरूपणं तत्तरणोक्तिश्च निरर्था। वत्सपदे मज्जनासम्भवेन प्लवानपेक्षणादित एव तरणस्याप्यसम्भवादुल्लङ्घनस्यैव सम्भवादित्याशङ्क्य तत्तात्पर्यमाहुः—**तथापीति**। वत्सपदं तासामेव मज्जनसम्भवात् प्लवतरणोक्त्या तेषां तथात्वं ज्ञाप्यत इत्यर्थः। तत्र हेतुः **सम्यगित्यादि**। तत्रापि हेतुः **स्वदृष्ट्येति** स्वसामर्थ्येनेत्यर्थः। लौकिकदृष्ट्येति वा। भगवत्त्वेन भगवति ज्ञाने वत्सपदे मज्जनसम्भावना न स्यादित्याहुः—**भगवद्भाव** इति। भगवद्दर्शने उत्तरावच्छरणगमनमेव स्यान्न शस्त्रग्रहणम्। तदा चक्रेण प्रभुणा चेन्न रक्षिताः स्युस्तदा स्वसामर्थ्यस्याप्रयोजकत्वान्नाश एव स्यात्। इदमेव मज्जनरूपम्। स्वसामर्थ्येनास्माकं जय इत्यभिमानेन हि तदा शस्त्रग्रहणम्। एवं सति पूर्वमपि प्रभुणैव रक्षितत्वेन तदुपकाराज्ञानान्माहात्म्याज्ञानाच्च क्षुद्रत्वमेव तेषु **पिपीलिकात्वम्** ॥ ५ ॥ **द्रौण्यस्त्रेत्यस्य** विवरणे **अर्जुनस्येत्यादि**। सर्वात्मना सर्वांशे गोप्यस्याभावाद्गोपनासम्भव इति गोप्यमंशमाहुः—**अर्जुनस्येत्यादिना**। स्थूलांशे दग्धेऽप्युक्तबीजत्वांशात्मको धर्मस्तु सूक्ष्मांशत्वात् स्थित एवेति दग्धानप्यंशान् स्वसामर्थ्येनादग्धान् भावितवानिति तैः सहभूतं बीजभावं जुगोपेत्यर्थः। **योगविभागादिति**। 'जनपदशब्दात् क्षत्रियादञि'तिसूत्रप्राप्ताञ्प्रत्ययस्य लोपस्तु 'जनपदे लुबि'तिसूत्रेण भवति। इह कुरुशब्दस्य जनपदावाचित्वेऽञो लोपासम्भवादेवं प्रयोगासम्भव इत्याशङ्क्य तत्सम्भवप्रकारमाहुः—**योगविभागाविति**। जनपदशब्दे विभक्ते कृते, 'लुबि'त्येतावन्मात्रं सूत्रमिति जनपदावाचित्वेति तत्प्रत्ययलोपात्तथाशब्दसिद्धिरित्यर्थः। **अन्यथाप्रतीतैरिति**। पूर्वं दग्धत्वेन प्रतीता-

नामदग्धत्वेन प्रतीतिरन्यथाप्रतीतिः। **धर्मरक्षार्थं** इति। वेदमन्त्रेणाधिष्ठापितब्रह्मरूपदेवताकं हि ब्रह्मास्त्रम्। तत्कार्यस्य भगवता प्रतिबन्धे भगवतो वेदमार्गरक्षकत्वलक्षणो धर्मो गच्छेदिति तथा। एतेनादाहेऽपि प्रभौ सामर्थ्यं सूचितम्। **मोक्ष** इति। वेदमन्त्राधिष्ठिता देवता हि स्वकार्यं कृत्वा निवर्तते। तदकरणे तदनिवृत्त्या मोक्षप्रतिबन्धः स्यान्मर्यादामार्ग इति तदभावार्थं तथेत्यर्थः। **तत्त्वसहित**मिति। 'तेजस्तत्त्वं सुदर्शन'मितिवाक्यादिति भावः। इह चक्रपदं भगवति स्थितानां सर्वेषां तत्त्वानामुपलक्षकम्। तानि तु द्वादशे स्कन्धे, 'अथेममर्थं पृच्छाम' इत्युपक्रम्य, 'तान्त्रिकाः परिचर्यायां केवलस्य श्रियः पतेः। अङ्गोपाङ्गायुधाकल्पं कल्पयन्ति यथा च यै'रिति शौनकेन पृष्टः सूतो 'नमस्कृत्य गुरून् वक्ष्ये विभूतीर्वैष्णवीरपी'त्युपक्रम्य अङ्गादीनि पूजायां येन रूपेण ध्यायन्त्याचार्यास्तानि रूपाण्यवदत्। तथा चात्र ध्यानार्थमेव तथाप्रदर्शनमिति साधूक्तम्—**उपकार** इति। रक्षार्थं चक्रोक्तावग्निमोक्त्या विरोधः स्यान्न तूक्तरीत्यामित्याहुर**त एवेति**। **कालनिग्रहार्थं** चेति। चक्रं मारकत्वेन कालरूपम्, तद्धृत्वा तिष्ठतीति तत्र स्वकार्यकरणक्षमं भवतीति तथा। चक्रपदोपादानतात्पर्यान्तरमाहुर**त एवेति**। दग्धस्यापि पूर्वभावसम्पादनेन जीवितसम्पादनमनुभावः। तादृशो भगवान् **पूर्णे गर्भे** प्रयोजनाभावात्ततो निवृत्त इति सोऽनुभावोऽपि निवृत्तः। अन्यथा भगवता रक्षित इति कालादेरपि भयाभावादयं देहो नित्य एव स्यात्। तथा च चक्रं भ्रमणशीलमिति व्याघुट्य मत्परितो भ्रमणं कृतवदिति कालाधीनत्वं सम्पन्नमितीदानीं न जीवनसम्पत्तिरित्यर्थः ॥६॥ **वीर्याणी**त्यत्र अनेनेत्यादि। वारद्वयं वीर्यप्रश्नकथनेनेत्यर्थः। यदुवंशे वंशसंबन्धिकार्यकरणार्थं प्रद्युम्नांशेनावतीर्य वीर्याणि कृतवानिभमल्लकंसमागधादिवधरूपाणि प्रवयसामपि यौवनं यदूनां द्वारकानयनवैदर्भीहरणादिरूपाणि चेति। 'तत्रांशेनावतीर्णये'त्यनेनावताररूपं निरूपितम्। 'वीर्याणि तस्ये'त्यनेनोक्तरूपद्वयमुक्तफलदाने चाशीवत् करणभूतं यस्य तन्मूलभूतं रूपं निरूपितम्। **अखिलदेहभाजा**मितिपदादेतदवतारात्पूर्वमपि तेषामुक्तफलदानोक्तेस्तथात्वं ज्ञायते। एवं सत्यवतारकार्यस्य मूलरूपकार्यस्यापि करणादुभयरूपत्वमस्मिन्नवतारे ज्ञाप्यत इत्यर्थः। तेन वीर्यबहुत्वसम्भावनास्तीति तत्प्रश्न इति भावः। अत्रैतदवतारवीर्यं पृच्छंस्तत्कर्तुर्यन्मूलरूपत्वमुक्तवांस्तेनास्यैवावतारस्य मूलरूपत्वोक्त्या माहात्म्यमेवोक्तवानित्याशयेन पक्षान्तरमाहुः—**इदमेवे**त्यादिना। आत्मत्वेन मृत्युदानमनुपपन्नमित्याशङ्क्य समादधते—**निमित्तवशा**दिति। देहभाक्त्वोक्तितात्पर्योक्तिरियम्। 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ'वितितत्त्वसूत्रात्, 'स नैव रेमे, तस्मादेकाकी न रमते स द्वितीयमैच्छ'दित्यादिश्रुतिभ्यश्च जीवानां देहसम्बन्धः स्वक्रीडार्थमेव भगवता कृत इति क्रीडैव निमित्तं, तद्वशात्तथेत्यर्थः। **भगवद्ध्यानरूपाणी**ति। आन्तरत्वादिति भावः। अतः **कथमपी**ति। उतेतिपदादन्तर्मुखेभ्यो रूपद्वयेनाप्यमृतदानम्। विषयपक्षे भजनोपयोगित्वेन तथात्वम्। ब्रह्मादिपक्षे भगवत्क्रीडोपयोगित्वेन विभूतिरूपत्वेन च ज्ञानात्तथात्वम्। बहिर्मुखेभ्यस्तथात्वं स्पष्टम् ॥ ७-८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

पितामहा इत्यस्य **टिप्पण्याम्**। राजपितामहेषु पञ्चत्वत्रित्वे उपपादयितुमाहुः—**क्षेत्र**मित्यादि। **सुबोधिन्यां** टिप्पण्युक्तदिशोक्तसंख्याकेषु पितामहत्वं कथमित्यत उपपादयन्ति—**क्षेत्रजे**ष्वित्यादि। बुधे व्यभिचारमाशङ्क्य समादधते—**यत्रे**त्यादि। तत्र तारायाश्चन्द्रनिगृहीतत्वेन चान्द्रीत्वान्न व्यभिचार इत्यर्थः ॥५॥ **द्रौण्यस्त्रे**त्यत्र **अर्जुनस्य वैष्णवत्वा**दिति। नरांशत्वेन वैष्णवत्वात्। ननु दृष्टमाहात्म्ये वक्तव्य एतस्य देहविशेषणस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः—**कुरूणामपी**ति। भीष्मादिसदृशानां भक्तानामसंन्यस्तानां, **ग्रहण**मिति वंशसद्भावार्थं ग्रहणम्। तथा चेदं देहरक्षाप्रयोजनमपि स्वयं ज्ञातमितिबोधनायेदं विशेषणमित्यर्थः। अत्र कुरुशब्दात्केवलमपत्यप्रत्ययं कृत्वा द्वन्द्वे कृते तेषां मुक्तिप्राप्तिरूपोर्थो न सिद्ध्यति, वंशस्य लोकप्राप्तिमात्रसाधनतायाः शास्त्रेषु स्मरणात्। प्रकृते तु मुक्तिरप्यभिप्रेता पूर्वस्कन्धानुसारात्, 'यास्यन्त्यदर्शनमलं बलभीमपार्थव्याजाह्वयेन हरिणा निलयं तदीय'मिति वाक्याच्च। अतः कुरुशब्दात्पूर्वमपत्यप्रत्ययं विधाय ततो बहुत्वविवक्षायां 'तद्राजस्य बहुष्वि'त्यनेन तल्लुकं विधाय तत 'ओरञि'त्यनेनादूरभवार्थेऽञ्प्रत्ययं विधाय तस्य च लुपं विधाय तादृशः कुरुशब्दो द्वन्द्वविग्रहे निक्षेप्तव्यः। तथा सति केषाञ्चित्कुरूणां लोकप्राप्त्या केषाञ्चिच्च मुक्तिप्राप्त्या, लोकबोधकानि 'धृतराष्ट्रात्मजाः सर्वे यातुधाना बलोत्कटाः। ऋद्धिमन्तो महात्मानः शस्त्रपूता दिवं गता, इत्यादिजातीयकानि स्वर्गारोहणपर्ववाक्यानि, तथा मुक्तिबोधकानि 'सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले' इति प्रथमस्कन्धीयवाक्यं, 'ये लोका मम विमलाः सकृद्विहत्तु ब्रह्माद्यैः सुरऋषभैरपीष्यमाणाः। तान् क्षिप्रं व्रज सतताऽग्निहोत्रयाजिन् मत्तुल्यो भव गरुडोत्तमाङ्गयान' इतिद्रोणपर्वीयं भूरिश्रवसं प्रति भगवद्वाक्यं, तादृशान्यन्यानि च वचनानि सङ्गच्छेरन्। अन्यथा तु कुप्येरन्निति सर्वसामञ्जस्यार्थमाहुः-**कुरुभि**रित्यादि **लुबि**त्यन्तम्। तदेतन्न विग्रहवाक्यं, किन्त्वर्थकथनमात्रमित्यभिसन्धाय प्रभुचरणा व्याकुर्वन्ति—**जनपदशब्दा**दित्यादि। अत्रेतिशब्दः प्रकारवाची। **अञ्प्रत्ययस्ये**ति। अञ्प्रभृतिप्रत्ययस्य, **लोप** इति। 'तद्राजस्य बहुष्वि'त्यनेन सूत्रेण भवतीति शेषः। तुशब्दः पुनरर्थकः। तथा च 'जनपदशब्दात् क्षत्रियादञि'त्येवप्रकारकसूत्रप्राप्तस्याञ्प्रभृतिप्रत्ययस्य लोपः 'तद्राजस्य बहुष्वि'त्यनेन सूत्रेण भवति। तु पुनः अदूरभवार्थस्याणपवादस्य 'ओरञि'सूत्रेण जातस्याञो लोपो 'जनपदे लुबि'तिसूत्रेण भवतीति योजना। यदि तु भाष्ये लक्ष्यैकचक्षुष्कतापक्षस्यैवादरणाद्द्रोणपर्वणि भूरिश्रवसो बाहुच्छेदावसरे 'एवं तु मनसा पार्थ पूजयामास कौरव'मिति, अग्रे च 'स मोघं कृतमात्मानं दृष्ट्वा पार्थेन कौरव' इति पूजागर्हयोः सापिण्ड्यप्रयुक्ततया तत्रापत्यप्रत्ययदर्शनादेवमन्यत्रापि दर्शनाच्च लक्ष्योपलब्धौ उत्सर्गस्याञोऽप्यङ्गीकारे न किञ्चिद्बाधकमित्यङ्गीक्रियते, तदा

'जनपदशब्दात् क्षत्रियादञि'तिसूत्रप्राप्ताऽञ्प्रत्ययस्य लोप' इत्यन्तं यथाश्रुतमेव व्याख्येयम्। शेषं तु पूर्ववदेव योजनीयम्। अदूरभवस्याञो लोपः कथमित्याकाङ्क्षायामाहुः–इह कुरुशब्दस्येत्यादि। अर्थस्तु स्पष्टः। अत्रादूरभवत्वं भक्त्यतिशयेन बोध्यं, न तु [illegible]। तस्यान्येष्वपि तौल्यात्। न च देशानुवृत्त्या चेतनवाचकात्कुरुशब्दादञोऽभावः शङ्क्यः, 'अदूरभवश्चे'त्यतः पूर्वसूत्रत्रय एव काशिकायां तदनुवृत्त्यङ्गीकारात्। 'अदूरभवं नगर'मित्युदाहरणाच्च। एवञ्च निवृत्तायां तदनुवृत्तौ तददूरभवेषु चेतनेष्वप्यञः प्राप्तिर्निराबाधा। किञ्च 'नद्यां मतु'बित्यनेन विहितस्य मतुप इक्षुमतीवेत्रवतीत्यादौ नद्यभिमानिन्यपि यमुनागङ्गादिवत्प्रसिद्धेश्च कुरुशब्देऽपि तथाङ्गीकारे बाधकाभावादिति दिक्॥ ६॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

पितामहा इत्यत्र। **यत्प्लवा अतरन् यश्च जुगोप तस्य वीर्याणि वदस्वेति** तृतीयश्लोकेनान्वयः। **स** इत्येकवचनस्यार्थमाहुरेक एवेति। **यथाकथञ्चिदिति** द्रव्यादिदानेपीत्यर्थः। **तेषामवस्थापनादिति,** अश्वत्थामकृपकृतवर्मणामित्यर्थः। **उभयमिति** त्रयाणामवस्थित्या तुल्यकरणम्, अश्वत्थामनिर्मुक्तपञ्चसायकेभ्यः सुदर्शनेन रक्षया तत्तरणं चेत्यर्थः। **सकृदेवेति** एकप्रकार एवेत्यर्थः। तत्पदसादृश्यं विवृण्वन्ति—**अन्तत** इति॥ ५॥ **द्रौण्यस्त्रे**त्यत्र बीजं देहं जुगोपेत्यस्य देहनिष्ठबीजत्वं जुगोपेत्यर्थः, 'सविशेषणे हि'तिन्यायेनेत्याशयेन 'बीजभावं जुगोपे'तिटिप्पण्यामुक्तम्॥ ६॥ **वीर्याणी**त्यस्याभासे **चरित्रमिति**। वीर्यमपि चरित्रविशेष एवेति भावः। **प्रकारान्तरेणेति**। अनवतारसामयिकजीवोद्धारप्रकारेण। फलसाधकत्वं पूर्वमुक्तं, चरित्रस्य तथात्वोक्तावपि वीर्याणामपि तद्विशेषत्वात्तेषामपि तत्फलसाधकत्वमुक्तं भवति। अत्रामृतसाधकत्वप्रकारेण फलसाधकत्वं वदन्नित्यर्थः। व्याख्याने **अनेनेति**। केचिदितिपक्ष इदं ज्ञेयम्। द्वितीयपक्ष आहुः–**इदमेवेति**। 'वीर्याणि तस्ये'ति पूर्वपरामर्शितच्छब्दकथनाच्च तावद्विभेदसूचनपर्यन्ताशयो ज्ञेय इति भावः। **आब्रह्मरूपेति**। ब्रह्मरूपं तृणस्तम्बरूपाणि च मर्यादीकृत्येत्यर्थः। ब्रह्मपर्यन्तमिति महन्मर्यादा। तृणपर्यन्तमित्यल्पमर्यादा। तत आब्रह्मरूपतृणस्तम्बरूपं वर्तते यत्र तादृशानि कालरूपाणीत्यर्थः। अव्ययीभावानन्तरमर्श आद्यच्। प्रत्यक्षा क्रियेतिवत्। **विशेषोऽयमिति**। पुरुषत्वकालत्वरूपो विशेष इत्यर्थः। **अत** इति द्वैविध्यस्यान्तर्बहिर्भेदमात्रकृतत्वादित्यर्थः। बहिर्मुखानां मत्स्यादिरूपाण्यपि मृत्युदातृत्वात्कालरूपाण्येव। अन्तर्मुखानां विषया अप्यमृतदातृत्वात्पुरुषरूपा एवेत्यर्थः। **निर्णीतं भविष्यतीति**। तत्र बहिर्मुखेभ्योऽप्यमृतदानाद्द्वितीयपक्ष एव निर्द्धारितो भविष्यतीति भावः॥ ७॥

श्रीबुभुत्सुबोधिका

पितामहा म इत्यत्र श्लोकान्वयः सुबोधिन्यामुक्तः। महावाक्यार्थे तु 'यत्प्लवा अतरन् यश्च जुगोप तस्य वीर्याणि वदस्वे'ति-तृतीयश्लोकेनान्वयः। पुण्यद्वारेति श्रवणादिभक्तीनां पुण्यं शुभं तद्द्वारा मुक्तिसाधनत्वं भाष्यतृतीयाध्याये सिद्धम्। 'अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे' इति पुण्यद्वारता। तन्मात्रतां वारयितुं किन्तु टिप्पण्युक्तदिशा'ग्रे भगवानग्रे साक्षादेव भक्तदुःखं निवारितवान् न तु केनचिद् द्वारेणे'त्युच्यते, तेन तच्चरित्रेऽपि साक्षात्पुरुषार्थसाधकत्वं न तु पुण्यद्वारेति ज्ञापितं भविष्यती'ति चरित्रस्य पुण्यद्वारमात्रतां वारयितुम्। किञ्च माहात्म्यज्ञानद्वारा भक्तिमपि साधयितुम्। 'भक्तिजनिकां संहितामारभमाण' इति सुबोधिन्याः। दृष्टान्तार्थं माहात्म्येन भगवन्तं स्तौति। स्तुतिः पुण्यद्वारमात्रतावारणकीर्तनरूपेति माहात्म्यं कार्यम्। त्रयो वेति धर्मेन्द्रवायुरूपा वा। पुत्राः युधिष्ठिरभीमार्जुनाः। पाण्डुकुन्तीमाद्रीक्षेत्रजेषु पञ्चसु त्रयो वेत्यन्वयः। स्पष्टयन्ति स्म क्षेत्रस्येति। क्षेत्रं द्रौपदी पञ्चानाम्। तथापि बीजित्वं त्रयाणामेव। 'अहं बीजप्रदः पिते'तिगीतावाक्यात् क्षेत्रस्य स्वकीयत्वं त्रयाणामेव। अन्ययोस्तु [illegible]। कनिष्ठत्वात्। अतान्ययोः क्षेत्रस्य स्वकीयत्वाभावात् पितामहत्वरूपं फलं कार्यं बीजिनो भगवतः न तयोरिति [illegible] पितामहाः। अन्येषां भगवदाश्रयाणां लोकदृष्ट्या फलसम्भवान् नेवकारः। 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्। अपरस्परसम्भूतं किमन्यत् कामहैतुक'मितिवाक्यात्। एतदेवाहुः यत्र पुनरिति। अत एव तारायां बृहस्पतिस्त्रियां चन्द्रादुत्पन्नो बुधः फलं चन्द्रस्य न तु बृहस्पतेः। चन्द्रपुत्र इतिप्रसिद्धेः। चन्द्रः तुरीय इति 'अहं बीजप्रद' इत्यत्र निविशते। शास्त्रदृष्ट्याहुरेवेति। तदभिप्रेत्य टिप्पण्या'मेकस्वामिकक्षेत्रजत्वेन पञ्चापि। एकक्षेत्रजत्वेन तु त्रय एव पितामहा भवन्तो'त्युक्तम्। राज्ञां वीरप्रकृतिकत्वेन 'मल्लानामशनि'रिति श्लोकोक्तदशरसेषु तादृशमाहात्म्यं स्पष्टमित्याशयेनाभासं त्यक्त्वा प्रतीकमेवोक्तं समर इतीति। माहात्म्यमिति अनुभावरूपं माहात्म्यम्। स्वधर्मेति भगवदिङ्गितकरणं देवव्रतं तद्विरुद्धं तद् दैत्यव्रतं तथा च देवव्रते भीष्मे तिमिङ्गिलत्वं दैत्यव्रत कौरवैः सम्पादितमिति तेषां कौरवाणां तथा सामर्थ्यं जातम्। इदमतिसामर्थ्यमितिभावः। अतिरथलक्षणमग्रे वक्तव्यम्। तद्रूपा [illegible]मिति चन्द्रेण समुद्रवृद्धौ बहिःस्थितं मारयति समुद्रः दृष्टान्ते। दार्ष्टान्तिके तु परैर्युद्धे बहिःस्थितं तथा। साधनं पोतादिकमपि गिलन्तीति साधनघातकत्वम्। कौरवशब्दाभिप्रायमाहुः कुरुवंशेति। यावद् भगवान् प्लवः ततोर्वाङ् न निवर्तन्ते। यदि निवृत्ता तेषु प्लवो विरुध्येत सागराभावात्। चेतनेति 'योऽप्सु तिष्ठ'न्नित्यन्तर्यामिब्राह्मणात्। कौरवसैन्ये सागरदृष्टिः कर्तव्या। समवायित्वेन [illegible], 'आपो वा इदमासन् सलिलमेव स प्रजापतिरेकः पुष्करपर्णे समभवत् तस्यान्तर्मनसि कामः समवर्तत इदं सृजेय'मित्यत्रापां

जगज्जन्मादिकर्तृत्वोक्तेः। तेन लौकिकभाषायामवान्तरप्रलयकारणत्वमिति सुबोधिन्याः। तेनारणाधिकारो राज्ञः प्रायोपवेशे इति
तथा। स्वरूपत इति उक्तरीत्या। महानौकेति करणत्वसम्बन्धाविवक्षायां सम्बन्धसामान्ये षष्ठी। अल्परूपेणेति प्लवशब्दात्। तथा
च श्रुतिः 'पुष्पमग्नि'रित्यारणे। अपां पुष्पमग्निरित्यर्थः। अग्निः सूर्यो वा, ब्राह्मणे तथोक्तेः। प्लवत्वं तु 'योऽप्सु नावं प्रतिष्ठितां
वेदे'तिपूर्वश्रुतेः पृथ्वीवत्। सन्निधीति यतो हि तद्भक्तिरनर्थोपशामिका किमु वक्तव्यं भगवत्सन्निधिस्तथा भवतीति। इदमपि मनसैव
द्रष्टव्यम्। 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यकात्। मनःशङ्केति अत्र चेतनत्वं सागरत्वम्। 'एवमेवे'त्यादिना संसारत्वं
च। स्थलत्रयेपि मनःशङ्का। 'इदं सृजेय'मित्युक्त्वा तस्या अग्रे 'तस्मात् पुरुषो मनसाधिगच्छति तद्वाचा वदती'तिश्रुतिभ्यामत्र
मनउपस्थितिः। मनस्तु यागसम्बन्धि बोध्यम्। 'यक्ष्ये विभूतीर्भवतस्तत्सम्पादय नः प्रभ'वितिवाक्यात्। वत्सपदं कृत्वेत्यन्व-
यार्थम्। 'कृत्वातरन् वत्सपद'मितिक्रियाविशेषणं प्रतीकं मूल उक्तम्। नन्वस्तु मनःशब्दष्टीकायां मूले वत्सपदशब्दः कथमिति चेत्
सत्यम्। वत्सपदं चतुर्थस्कन्धे मुख्ये प्रयुक्तं मनुप्रसङ्गेष्टादशाध्याये। मनुं प्रति पृथ्वीवाक्यानि। 'नूनं ता वीरुधः क्षीणाः मयि
कालेन भूयसा तत्र दृष्टेन योगेन भवानादातुमर्हता'त्युक्त्वा 'इति प्रियहितं वाक्यं भुव आदाय भूपतिः वत्सं कृत्वा मनु'मितिदर्शनात्
मनू राजमुख्यः। अग्रे च 'वत्सं कृत्वा मनुं पाणावदुहत् सकलौषधीः। तथा परे च सर्वत्र सारमाददते बुधा' इति सर्वानुज्ञा। तथा
च वत्सो युधिष्ठिरः तस्य पदं पदनीयं चेतनं सागरं संसारं च कृत्वेत्यर्थः। ननु पाण्डवानां कनिष्ठत्वेन कौरवसैन्यसागरस्य
तुच्छकरणं तरणं वा न सम्भवतीत्यत आहुः तुच्छकरणेति। भगवतः प्लवरूपमाश्रयत्वम्। अत्राश्रयत्वं सामीप्यम्। वटे गावः
सुशेरत इतिवत्। तत् पूर्वमुक्तम्। तत्तुच्छकरणतरणमनःशङ्कारूपत्रयेपि हेतुः। गीतायामित्येकादशे 'अमी च त्वां धृतराष्ट्रस्य पुत्रा'
इत्यादिभिः। तुच्छेति दुरासदातिदुर्धर्षत्वाभावो भगवत्सम्बन्धाभावात् तुच्छत्वरूपो जातस्तस्य करणम्। तथापीति भगवदाश्रयत्वेपि
प्रकारान्तरेण तरणान्यथानुकूले। सम्यगिति 'अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि' 'यच्चावहासार्थमसत्कृतो-
सी'तिवाक्यात् सम्यगाश्रयणे नैवं कुर्युः। अतो महतां बहुमानाद्यकरणात् 'स कर्ता सर्वपापानां योऽभक्तस्तव केशव' इतिवाक्यात्
पापेन मुक्तदेहाभावात् पूर्वं पापभोगार्थं नृगकृकलासवत् पिपीलिकात्वम्। मुक्तौ ब्रह्मदेहत्वं, पापसम्भावनायां तु पिपीलिकात्वम्।
सर्वोपनिषदि ब्रह्मादिपिपीलिकान्तमुक्तम्। इदं च 'नित्यदाह्यङ्गभूताना'मितिद्वादशस्कन्धोक्तनित्यप्रलयपक्षे। पापभोगार्थं पिपीलि-
कात्वेन पाण्डवानां स्वदेहदर्शनमित्याचार्याणां भक्त्या दर्शनम्। एवकारस्तु ब्रह्मभवनपक्षस्य संन्यासाभावात् पुष्टिमर्यादाङ्गीकृत-
पाण्डवानां मर्यादांशत्वाच्च व्यवच्छेदकः। 'वेदान्तविज्ञाने'तिश्रुतौ संन्यास उक्तः। पिपीलिका अमुक्तदेहः। अत्रापि भगवत्प्रति-
पक्षाणां महतां हननं न पापजनकं गीतातात्पर्यात्, तथा भगवताऽवज्ञानमपि, 'अपि चेत् सुदुराचारो भजते मामनन्यभाक्। साधुरेव
स मन्तव्य' इतिवाक्यात्। तत्र हेत्वन्तरमाहुः स्वदृष्ट्येति। न तु दिव्यदृष्ट्या। स्वीयवाची स्वशब्दः स्वीयदृष्ट्या भगवान् गृह्यत
इति हेतोर्भगवदिच्छातो यो मर्यादांशस्तदर्थं पापं वर्तते क्रीडार्थमित्यर्थः। पिपीलिकात्वे युक्तिमाहुः भगवद्भाव इति। भगवति
विषयताभङ्गेन यदुत्वाज्ञाने भगवत्त्वे भगवद्भावरूपे कथं केन प्रकारेण पिपीलिकात्वं स्यात् तेषां प्रसिद्धानां भगवदीयानाम्।
आवृत्त्या तेषामवस्थापनात्। समत्वाद् भगवतः कौरवपाण्डवानामवस्थापनात् व्यथितकरणम्। 'स्वधर्मे निधनं श्रेयः परधर्मो
भयावह' इतिवाक्यात्। यद्यपि क्षत्रियाणामयं धर्म एव तथापि भगवदीयत्वाच्छ्रवणादय एव धर्माः। सर्वथापि त एवेत्यादि,
तार्तीयव्याससूत्रात्। तथा च परधर्माद् भयेन तुच्छकरणम्। दुरासदातिदुर्धर्षातिरिक्ततुच्छब्रह्मप्रवेशात्। 'एष एव तुच्छ' इति
विद्वन्मण्डनान्ते धृतश्रुतेः। 'तोदनात् तुच्छमुच्यत' इति महाकौर्म्यात्। नित्यप्रलये तुच्छसृष्टिकर्तृत्वमपि। अतः तुच्छाज् जातत्वात्
तुच्छस्य तत्करणम्। उभयमिति तुच्छकरणं तरणं च। सकृदेवेति एकप्रक्रम एव। यद्वा तुच्छभगवत्प्रवेशस्य दुराधर्षातिदुर्धर्षत्व-
नाशक्षणे प्रागभाव इह तुच्छभगवत्प्रादुर्भावो भविष्यतीतिप्रत्ययात्, तदुत्तरक्षणे तुच्छाविर्भावः ततस्तरणम्। अत्र तु दुराधर्षादि-
नाशक्षणे तुच्छप्रवेशः। सोऽलौकिकः क्रोडास्थत्वात्। 'सद्यो नष्टस्मृतिर्गोपी'त्यत्रानुभवस्मरणयोर्मध्ये न संस्कारः तद्वत्। तदुक्तं
सकृदेव जातमिति। तथा चोभयं दुराधर्षत्वादिनाशतुच्छभगवत्प्रवेशं सकृदेव जातमिति दुर्धर्षादिनाशस्तुच्छकरणं चेत्युभयं सकृदेव
जातमित्यर्थः। उभयोर्मध्ये न प्रागभाव इति भावः। अनन्तशक्तित्वेनात्र संशययोगव्यवच्छेदक एवकारः। अन्तत इति यादव-
रूपास्वकुलसंहारेऽन्ततः त्रयाणां 'अश्वत्थामकृपकृतवर्मणां त्रयाणा'मिति श्रीवल्लभाः। वत्सपदमिति वत्सस्य युधिष्ठिरस्य पदं पदनीय-
मित्युक्तम्। फलवत् साधनस्यापि पदनीयत्वात् साधनफलैकीकरणम्। तत्र चेतनसागरपक्षे स्पष्टम्। वत्सपदत्वम्। पदेशत्रयम्।
व्यष्टिसमष्टिभेदेन। व्यष्टिरूपौ अश्वत्थामकृतवर्माणा धनुर्वेदसंरक्ष्यधर्मादिरूपत्वात्। समष्टिर्द्रोणः कृपो वा धनुर्वेदश्रद्धत्वात्। 'यो
यच्छ्रद्धः स एव स' इति वाक्यात् धनुर्वेदात्मक इति। तस्य पुत्रोऽश्वत्थामा नित्यलीलायामपकाररूपः कार्यात्। स आत्मा पुत्रनामा
द्विधा विदीर्णः पुत्ररूपत्वेन वृद्धरात्मन इति। वारद्वयमिति 'अवधीन्निशि बालका'निति ब्रह्मास्त्रसन्धानेन च। पूर्वं जातवत्सपदं न
तथा विदीर्णमुखं भवतीति। प्लवमारुह्येति पूर्वं भगवदाश्रयत्वमित्यत्र सामीप्यसप्तमी व्याकृता। वटं गाव इव आरुह्य। तार्णमित्यादरे
वीप्सा। ननु वत्सपदं कृत्वातरन्नित्यत्र पाण्डवानां न कर्तृत्वं किन्तु तरणमात्रेतः क्त्वो दुर्लभत्वमित्याशङ्क्याहुः कीर्तेरिति। 'ततः
स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसी'तिवाक्यात्। तथा च फलप्राप्तिः पाण्डवेष्विति कर्तृत्वमपि पाण्डवेषु फलसाधनयोरैकाधि-
करण्यात्। अन्यथा सैन्यस्येष्वपि कर्तृत्वं परस्येति न वत्सपदकरणे सैन्यानां कर्तृत्वम्। 'परात् तु तच्छ्रुते'रिति व्याससूत्रात्।
गौणं तु कर्तृत्वं सैन्यपाण्डवयोः समानमित्यर्थः। अथवा पाण्डवानां धर्मेन्द्रवाय्वादिरूपत्वेन कर्तृत्वं सूपपादम्। अपिशब्देन

जयः। दृष्टिविरोधमाशङ्क्याहुः इदमिति। अन्यत्र दृष्टं कर्तृत्वमन्यत्रेति। अत्यन्तत्वं शास्त्रमात्रगम्यत्वम्। एवं सैन्यसागरतरणमुक्तम्। जलसागरं समवायिदृष्ट्याक्रम्। तत्तरणमप्यत्र। युधिष्ठिरयागरूपकृत्या मनोपि यागे इति। स चारण्ये 'केतवोरुणासश्चे'त्युपक्रमेऽस्ति, तथा 'दुरत्ययं कौरवसैन्यसागरं' जलधिरूपं वत्सस्य युधिष्ठिरस्य पदं पदनीयं कृत्वातरन्। तदुक्तम् आरण्ये, 'जानुदघ्नोमुत्तरवेदीं खात्वा अपां पूरयित्वा गुल्युदघ्नम् पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च संतीर्य तस्मिन् विहायसे अग्निं प्रणीयोपसमाधाये'तिश्रुतिभागेन। व्याख्यातश्च तत्रैव, 'जानुदघ्नीयुत्तरवेदीं खात्वा अपां पूरयति। अपांसर्वत्वाय पुष्करपर्णं रुक्मं पुरुषमुपदधाति। तपो वै पुष्करपर्णं, सत्यं रुक्मः अमृतं पुरुष' इत्यादिना। 'खात्वे'ति यस्य कस्यचित् पदनीयं कृत्वा। समवायिजलभावनया पूरयति। 'सर्वत्वाय' कार्यकारणरूपत्वाय। अत्र तपोधर्मरूपः कृतवर्मा सत्यं द्रौणिः अश्वत्थामा व्युत्पत्त्याश्वशब्दस्य। यद्वाश्वत्थामापकारस्तथा'प्येकं भगवतः कार्य'मिदमपि। अमृतं द्रोणः कृपो वा। त्रयाणाममारणात्। कार्यकारणसागरावुक्त्वा विषयतासागरमाहुः एवमेवेति। संसारप्रपञ्चयोर्भेदः। नित्यत्वानित्यत्वाभ्याम्। मायाजन्या विषयता हि कार्यकारणसैन्ययोर्विषययोर्वर्तते, यथा दृष्टिः सविषया भवति। अन्यथा ब्रह्मात्मकं जगत् न घटत्वादिप्रकारेण भासेतेति। स्फुटमेतत्, 'ऋतेर्थं यत् प्रतीयेते'त्यस्य सुबोधिन्यां द्वितीयस्कन्धे नवमाध्याये। भगवत्सेवेति भगवत्सेवारूपम्। भगवत्सेवैव भगवत्सेवामात्रम्। संसारपदार्थो न सेवमात्रं क्रियात्वाभावात्। तस्य परिग्रहस्तु भगवत्सेवामात्रं भवत्येव कार्त्स्न्यार्थकमत्रप्रत्यये कृत इत्येतावत्पर्यन्तानुधावनम्। पदार्थशब्दस्तु सेवान्तर्गतः संसारः पदार्थो न तु मायिकः। 'ततोहं नामाभव'दितिश्रुतेः। ततः संसारपदस्यार्थः स न तु मायिकसंसार इत्यर्थः। इति सिद्धान्ते अनुपदोक्तश्रुतिविरोधाद्धीति। पारस्थितमिति चैतन्यसागरे उत्तरार्धोक्तयुधिष्ठिरयागरूपं पारस्थितम्। जलसागरे नारायणरूपं पारस्थितम्। आरण्ये 'अपां रसमुदयं सन् सूर्यशुक्रं समाभृतं अपां रसस्य यो रसः तं वो गृह्णाम्युत्तम'मिति। समुदयन् सन् यतः पदार्थो भवति। सूर्यश्च शुक्रश्च तयोः समाहारः सम्यक् आभृतम्। यच्छब्दार्थे रूपम्। उत्तमं नारायणमित्यर्थात्। संसारसागरे आत्मकार्यमहंनामरूपं पारस्थितमिति ज्ञेयम्। भगवदाश्रया इतिपाण्डववदन्येपि। पाण्डवपदसूचितार्थः। अन्यट्टिप्पण्यादौ स्फुटम्।

१०-१-६ द्रौण्यस्त्रेति श्रुतमिति परीक्षिज्जन्मन्यूषय उक्तास्तेभ्यः श्रुतं प्रायोपवेशे। आहेति परीक्षित् श्रीशुकं प्रत्याह। सर्वथेति 'आत्मा वै पुत्रनामासी'ति श्रुतेर्धर्मेन्द्रवायुवत् कुक्षिप्रवेशसम्भवेपि विशेषेण दग्धं यदङ्गं तद्गोपनेऽशक्तिरुक्ता सर्वथापदेन। तदुक्तं उपनिषदि यक्षःप्रसङ्गे। कृपातिशयमिति कृपात्वेन कुक्षिगतत्वेन न कार्यकारणभावः। कुक्षौ कृमिकीटादिगोपनायाप्रवेशात्। अतोतिशयशब्दः। तत्रापि शरणगमनं हेतुः। सोत्रेवाग्रे वाच्यः कुक्षिगतशब्देनाक्षिप्यतेयमर्थः। आक्षेपोर्थापत्तिः। तदुक्तं 'आर्थिकं तु प्रवक्ष्यामी'ति प्रथमस्कन्धसुबोधिन्याम्। आर्थिकम् अर्थात् आक्षेपात् प्राप्तम्। आगतम्। 'तत आगत' इति ठक्। अश्वत्थामपदं विहाय द्रौणिपददानस्य प्रयोजनमाहुः माहात्म्येति। माहात्म्यस्वरूपमाहुः द्रोणो हीति। अस्त्रविद्यायामिति 'सरहस्यो धनुर्वेद' इति प्रथमस्कन्धात्। तथा चोपवेदसहितयजुर्वेदाध्येतृत्वं माहात्म्यं महात्मनः सप्तचिरञ्जीव्यन्तर्गतस्य भावः। तस्य चेति तादृशस्याश्वत्थाम्नः, चकारेण भगवदिच्छया। सर्वात्मना दाहे गोप्यमंशमाहुः अर्जुनस्येति। नारायणस्य कृष्णस्य विष्णुत्वम्। 'विष्णुः सर्वगुहाशयः आविरासी'दिति वाक्यात्। तत्सम्बन्धी वैष्णवः नरांशोर्जुनः। अर्जुन इति वृक्षनाम्ना 'वैष्णवा वै वनस्पतय' इति श्रुतिस्मरणाद् वैष्णवत्वम्। अर्जुनः कौ इति ख्यातवृक्षस्य नाम। अर्ज अर्जने। अर्ज्यते इत्यर्जुनः। अर्जेर्णि लुक् चेति उनन्। 'सितातपत्रं जग्राह' इत्यत्र सुबोधिन्यां 'अर्जुनस्तेन बुद्धिमा'नित्युक्तम्। अन्यथा कृष्णस्य भगवत्त्वेन शुक्लत्वेपि सितातपत्रग्रहणे न प्रवर्तेत राजत्वात्। अतः सात्त्विकत्वाद् वैष्णवत्वम्। अभिमन्युसुतस्य बीजमिति वक्तव्ये 'सन्तानबीज'मित्यस्य प्रयोजनमाहुः वंशात्मकमिति। तेन वंशः सन्तानः आत्मनि स्वरूपे यस्य बीजस्येति 'सन्तान' शब्दार्थ उक्तः। सम्यक् तन्यते यत् तत् सन्तानं कर्मणि घञ्। तस्य बीजम्। बीजमपि न कर्मणावशिष्टमपि तु बीजत्वेनेत्याहुः बीजभावेति। बीजत्वेनावशिष्टमित्यर्थः। बीजम् 'बीजं तदुच्यते शास्त्रे दग्धं यत्रापि नश्यती'ति दृढांशः। अत एवेति पूर्वोक्तार्थत्वादेव सन्तानबीजं न तु अभिमन्युसुतस्य बीजमित्युक्तमित्यर्थः। अर्जुनाभिमन्य्वोः परीक्षिता मुक्तेः कुरुग्रहणप्रयोजनमाहुः कुरूणामपीति। न मुक्तिरिति 'नापुत्रो जायते लोका'निति वाक्यात्। 'भ्रातृणामेकजातानामेकश्चेत् पुत्रवान् भवेत् सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवी'दिति मनुस्मृतेश्च लोकजये मुक्तिस्तत्तद्देवसायुज्यम्। वंशाभावे आत्मान्तराभावात् कस्य मुक्तिः, आत्ममते तु त्रिविधात्मनामात्मोपनिषदुक्तमुक्तिः स्यादेव। वंशः कर्मात्मकोपि 'कर्मणा जायते जन्तु'रित्यादिना कर्मवादात्। 'आत्मा वै पुत्रनामासी'तिश्रुतेः अग्रे मुक्त्यभावः। कुरूणां तु 'परीक्षिता त्वेतदर्थं विष्णुरातेन वैष्णवी मुक्तिर्विलक्षणा सा' न मुक्तिरितिपदेन निषिध्यते। तदुक्तं बृहदारण्यके वंशब्राह्मणे 'अथ वंशः, तदिदं वय'मिति। 'वय'मित्यस्मत्पदार्था आत्मानः। तथा च कुरवश्च पाण्डवाश्च कुरुपाण्डवाः तेषामितिविग्रहः। तत्र दोषं ज्ञात्वा विग्रहान्तरमाहुः कुरुभिः सहिता इति। सहार्थतृतीया न तु हेत्वादाविति बोधनाय सहिता इति। एतस्य पदस्य 'सुपो धातुप्रातिपदिकयो'रिति वा सूत्रेण भिस्लोपकाले लोपः। सुप्त्वाभावेपि सन्नियोगशिष्टन्यायेन। तथा च कुरूणां मुख्यमोक्षापत्तिर्दोष इति न द्वन्द्वविग्रह इति भावः। गौणी मुक्तिस्तु मुख्यवंशत्वाभावात् परीक्षितः। कुरुपाण्डवेत्यत्र विभक्त्यभावो न लेखकदोषात् किन्तु परमभागवतमतेनालौकिकः। तदुक्तं 'हसन्ति नन्दन्ति वदन्त्यलौकिका' इति 'इत्यलौकिकशब्दानां दिङ्मात्रमिह दर्शित'मिति सिद्धान्तकौमुदीसमाप्तौ। सुबोधिन्यामलौकिकविग्रहो वा। एतादृशस्य लौकिकविलक्षणस्य प्रसिद्धत्वाद् यथा चतुर्थे पृथूपाख्याने रञ्जयतीति

राजेतिव्युत्पत्तेः सूचनात् तथा । पक्षान्तरमाहुः कुरव इति शब्दो नव्यन्तः पाण्डवा इत्यपत्यप्रत्ययान्त इति कौरवाः पाण्डवा इति । अत्र चकार एकः । तेन पूर्वोक्तविग्रहे एकः समुच्चयार्थकः एको द्वन्द्व इति न द्वौ द्वन्द्वौ । चकारद्वये तु द्वन्द्वद्वयापत्तिः । जनपदे लुबिति कुरुशब्दस्य जनपदावाचकत्वेपि 'जनपदे लु'बितिसूत्रं लुबितियोगविभागाल्लुबिति सूत्रेण लुप् । टिप्पण्यादौ विस्तरस्तु द्रष्टव्यः । बीजमात्रेति अविनाशि दृढवस्तुरूपेण । सत्तारूपं गोपनकर्म न सम्भवतीत्यत आक्षेपमाहुः दग्धैरपीति । अदग्धेति शास्त्रदृष्ट्येति बोध्यम् । 'अविप्रणाशः सर्वेषां कर्मणामिति निश्चयः कर्मजानि शरीराणि तथैवाकृतयो नृपे'ति भारते । अन्यथा प्रतीतैरित्यस्यार्थष्टिप्पण्याम् । धर्मरक्षेति टिप्पण्यां स्पष्टोऽर्थः । मोक्षे प्रतीति प्रतिबन्धोऽशुभकृतः । तदुक्तं टिप्पण्यां वेदमन्त्राधिष्ठिता देवता हि स्वकार्यं कृत्वा निवर्तत' इति । स्वकार्यमशुभभोजनेन मोक्षप्रतिबन्धनिवृत्तिः । बीजमिति दृढं दृढमविनाशि वस्तु बीजमित्युक्तम् । अरक्षायामिति सन्तानस्य जातत्वेन प्रयोजनाभावादितिभावः । कुरुवंशेति कुरुपुत्राः 'परीक्षित् सुधनुर्जह्नुर्निषधश्च कुरोः सुता' इत्युक्ताः तदन्वये विचित्रवीर्यक्षेत्रे बादरायणपुत्रौ धृतराष्ट्रपाण्डू । मूलत इति कुरुर्भक्तः मूलं धातारमवधीकृत्य सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात् 'जातस्यासीत् सुता धातुरत्रिः पितृसमो गुणै'रिति नवमस्कन्धचतुर्दशाध्यायवाक्यात् धाता मूलं भक्त इति प्रसिद्धम् । ध्यानार्थ इति ध्यानार्थं ध्यानविषयं 'एष ध्यानार्थं' इत्यस्य सप्तम्यन्तत्वेप्युपपन्नम् । अविरोध इति न च कृतहानिरकृताभ्यागमो दोषः 'अस्त्रतेजः स्वगदये'त्यस्याकृतस्याभ्यागमादिति वाच्यम् । कृतेनास्तचक्र' इत्यनेन तेजस्तत्त्वसुदर्शनेनास्त्रतेजोदूरीकरणे उभे 'वधूधाते' न शान्ते भवतः । अकृताभ्यागमे तु वातेन दीपशान्त्यादिवदस्त्रतेजःशान्त्यादेः सुवचत्वात् । 'वायोरग्नि'रितिश्रुतेः स्वकारणे वायौ लीनश्चक्र आस्त इत्यर्थे गौरवमिति भावः । कालनिग्रहेति कालः परीक्षिन्मारकः तस्य निग्रहः स्ववशे स्थापनं तदर्थम् । कालसत्त्वे गृहीते निःसत्त्वः कालो न परीक्षिदपकर्तेति । अत एवेति प्रयोजनाभावादेव । एवमिति पाठे ध्यानार्थं रूपं दर्शयित्वा । सानुभाव इति अनुभावः प्रथमस्कन्धे सप्तदशाध्याये 'इत्थम्भूतानुभाव' इत्यस्य सुबोधिन्याम् । 'मतोपि जीवन् तिष्ठतीत्थम्भूतानुभाव' इति टिप्पण्यामपि विवृतः । दग्धादग्धभावनम् । तच्चक्रं कालचक्रम् । परिभ्रान्तमिति कालकर्मस्वभावरूपभगवच्छक्त्यन्तर्गतं सत् । इयमिति परिदृश्यमाना । 'पराभिधानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ'वितिसूत्रोक्तजीवावस्थेव । अनुभावतिरोभावात् कालपरिभ्रमणम् । भगवति निवृत्ते श्रीभागवताश्रयणं नामात्मकभगवदाश्रयणम् । तापदुःखाप्रतीकारश्च । मे मातुर्यः कुक्षिं गतः स जुगोपेत्यन्वयो न भवति । कुक्षिगतस्य ध्यानार्थत्वादित्याशयेनाहुः मातुर्मेयो ज्ञेय इति । भवदुक्त इति श्रीशुकोक्तेः । मम परीक्षितः विश्वासो भविष्यतीति भावेन वक्तुः शुकस्य प्रोत्साहनम् ॥ ७ ॥ वीर्याणि तस्येत्यत्र पूर्वपृष्टमिति वीर्यत्वेन रूपेण चरित्रत्वावच्छेदेन च भगवच्चरित्रं पूर्वयो'र्यदोश्चावर्तीर्ये'ति श्लोकयोः पृष्टम् । तत्र पूर्वं पृष्टं वा । प्रकारान्तरेणेति अमृतसाधकत्वरूपेण प्रकारान्तरेण । अनुवदतीति वीर्यमपि चरित्रविशेष एवेतिभावः । तेन वीर्यानुवादेपि चरित्रमनुवदतीत्युक्तम् । प्रश्नमिति 'वदस्वे'ति सम्प्रश्ने लोट् इति भावः । अन्तर्बहिरिति पुरि शेत इति पुरा आसेति पुरमुषतीति व्युत्पत्तिभ्यः पुरुषोन्तः अमृतं प्रयच्छति । यथास्तचक्रो ध्यानम् । गदाधरः सन् मृताभावम् । किं पुनः स्वांशैर्देहानाममृतं प्रयच्छतीति । एतत् पुरुषरूपैरमृतं प्रयच्छतीत्येवमुक्तम् । बहिः कालरूपः यथा मम तक्षकरूपेण, अन्येषां कालकर्मस्वभावान्तर्गतकालरूपेण, केषाञ्चिद्भयाम्ना कालेन । भयेन मृत इति प्रयोगात् । यद्यपि विस्मरणं मनोधर्म आन्तरः तथापि साधनानां बहिष्ठत्वाद् बहिर्मृत्युम् । अत्यन्तविस्मरणरूपं प्रयच्छतीत्युक्तम्, 'मृत्युरत्यन्तविस्मृति'रितिवाक्यात् । यद्वा बहिर्देहेभ्यो मृत्युं प्रयच्छति आन्तराणां जीवानां नित्यत्वात् । मायामनुष्यस्येति राज्ञो ज्ञानम् । यद्वा मायया मनुष्यः मानुषी तनुर्मनोरपत्यमितिबुद्धिविषयः । अग्रे स्पष्टम् अनेनेत्यादिटिप्पण्याम् । स्पष्टम् । तन्माहात्म्यं वेति तस्य भगवतो महात्मनो भावः देवत्वम् । रूपान्तरेति प्रत्यभिज्ञेत्यर्थः । 'ॐ तत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृत' इति गीतायाः । पुरुषरूपाणीति अत्रायं भावः, वेदवेदान्तसारे श्रीभागवते वेदान्तरीत्या पुरुषरूपाणि व्याख्यातानि । कालरूपाणि वक्ष्यन्ति । वेदरीत्यावात्मनारायणस्य पुरुषरूपाणि मत्स्यादीनि मत्स्यपुराणादिप्रसिद्धानि । एवं भोक्तृकोटिरुक्ता । तयाः कालानधीनत्वज्ञापनाय कालरूपभोग्यकोटिमाहुः कालरूपाणीति । कालः संवत्सरः तस्य रूपाणि, आरण्यके प्रसिद्धानि । विषयाः प्रत्यक्षविषयाः । केचिदिति विरलाः । एतेन वेदार्थस्य उत्कर्ष उक्तः । भगवद्ध्यानेति भगवतो ध्याने रूपाणि ध्यानविषयाणि रूपाणि । अन्य इति अस्वरसस्तु 'विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो शृणु प्रथमं महतः स्रष्ट द्वितीयं त्वण्डसंस्थितं तृतीयं सर्वभूतस्थं यज् ज्ञात्वा मुच्यते बुधः' इति वाक्यविरोधः । अत्रोक्तरीत्या 'खिलदेहभाजामन्तः पुरुषरूपै'रित्यस्य विरोधश्च । स्वमते कालरूपाण्याहुः कालरूपाण्याब्रह्मेति । ब्रह्मरूपं तृणस्तम्भरूपाणि च मर्यादीकृत्याभिव्याप्य च । यद्यपि 'कालात्मा भगवान् जात' इति ब्रह्मरूपं कालात्मकं तथापि 'यतो वाचो निवर्तन्त' इति श्रुत्या सन्दिग्धम् । तृणस्तम्भ औषधिविद्येति सोपि । तथेति सर्वोपनिषदि पिपीलिकान्तमुक्तं तत्र न विद्या । विशेषोयमिति पुरुषत्वकालरूपो विशेषः । अत इति द्वैविध्यस्यान्तर्बहिर्भेदमात्रकृतत्वात् । कथमपीत्यादि कथमपीति मूलीयोतशब्दस्य प्रश्नार्थकत्वं स्वीकृत्यार्थः । 'उत प्रश्ने वितर्के स्या'दिति विश्वः । कथमिति मृत्युमित्यनेनान्वेति । कथमिति पुरुषरूपप्रकारेण कालरूपप्रकारेण वा । मृत्युमेव प्राप्नुवन्ति न तु पुरुषरूपेणामृतम् । साधनैरिति पुरुषकालरूपैरित्यत्र हेतुतृतीययोक्तेः पुरुषकालरूपसाधनैः । बहिर्मुखाः बहिरुपाया बहिः कालरूपोपायाः 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् अपरस्परसम्भूतं किमन्यत् कामहैतुक'मिति 'अन्धं तमः प्रविशन्ति ये सम्भूतिमुपासत' इति शारीरब्राह्मणश्रुतेः । 'सम्भूतिं' विषयम् । 'तमो' विस्मरणसाधकत्वाद् विस्मरणं 'मृत्युरत्यन्त-

विस्मृतिः’। ‘भूयस्तमो’मृत्युः। ‘ततो भूय इव ते तमो य उ सम्भूत्यां रता’ इति श्रुतेः अन्तर्मुखा इति अन्तरूपायाः अन्तः पुरुषरूपोपायाः। कथमपि साधनैरमृतमेव प्राप्नुवन्ति न तु कालरूपेण मृत्युम्। पुरुषकालरूपयोर्मृत्यवमृतसाधनत्वे श्रुतिः ‘पराञ्चि खानि व्यतृणत् स्वयम्भूः तस्मात् पराङ् पश्यति नान्तरात्मन् कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छ’न्निति। पराग्विषयदर्शनेन तमः, विमृष्टाग्लानी। अग्रे प्रत्यगात्मदर्शनेनामृतत्वकथनात्। एतदुक्तं भवति। बहिर्मुखानां मत्स्यादिरूपाण्यपि सविशेषत्वेन मृत्युदातृत्वात् कालरूपाण्येव, अन्तर्मुखानां विषया अपि भगवद्विषयकत्वेनामृतदातृत्वात् पुरुषरूपाण्येवेति। तथात्व इत्यादिःसर्वरूपाणां भगवदीयत्वे। तस्येति भगवतः। सामर्थ्यं माया तत् किम् अन्तर्बहिर्दृष्टेन कार्येण कृतम् अनुमितम्। पराक्रम इति मायारूपे इच्छारूपे वा। अयमिति तस्य किं सामर्थ्यं तथेच्छा वेत्ययम्। तत् वीर्यम्। निर्णीतमिति तत्र बहिर्मुखेभ्योऽप्यमृतदानात् सन्देहे तथेच्छा वेति द्वितीयकोटिरेव निर्धारिता भविष्यतीति भावः। एतदिति अखिलदेहभाजां मृत्यवमृतदानम्। ‘इन्द्रो मायाभिः पुरुरूप ईयत’ इति श्रुत्युक्तपुरुरूपेष्वेकतमं रूपं ‘माययान्यदिवे’ति श्रुतेर्याहुः बुद्ध्यावरिकेति। ‘माया च तमोरूपे’तिनृसिंहतापिनीयात् तमः, सा द्रष्टृबुद्ध्यावरिका करणदोष इति भावः। तथा ज्ञानेति मनुष्यत्वप्रकारकमनुष्यविशेष्यकज्ञानविषयस्य स्वयं तु स्वयंप्रकाश इतिभावः। अस्मदुपेति परीक्षिदाद्युपकाराय। तवापीति शुकस्यापि। आत्मने पदमिति ‘स्वरितञितः’ इति सूत्रेणेत्यर्थः। सर्वत्रेति वदनादौ। यथाहुः ‘यन् मनसा ध्यायति तद् वदति यद् वदति तत् करोती’ति श्रुतेः। जानातीच्छति यतत इति नैयायिकप्रवादः॥ ७॥ रोहिण्या इत्यत्र चरित्राणीति शते पञ्चाशदितिन्यायेन वीर्यचरित्रयोः सामान्यचरित्रग्रहणम्। भगवत्प्रभाव इति ऐश्वर्यस्य विद्यमानत्वात् स प्रभावः कार्यविशेषः तत्रेति कार्यान्तरे रोहिण्यास्तनयस्य देवक्यां सप्तमत्वे। कारणम् उभयत्रेति रोहिण्यां देवक्यां च॥ ८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

न केवलं संसारतारकत्वेन भगवच्चरितं श्रोतव्यम्, किंत्वस्मत्कुलरक्षकचरितत्वेनापि तदवश्यं श्रोतव्यमित्याशयेनाह— पितामहा मे इति। मे मम पितामहा युधिष्ठिरादयो यत्प्लवा यो भगवानेव प्लवस्तरणसाधनं नौर्येषां तथाभूताः सन्तो देवव्रताद्यतिरथैस्तिमिङ्गिलैर्दुरत्ययं दुस्तरमयं कौरवाणां सैन्यरूपं सागरं वत्सपदमिवातितुच्छं कृत्वाऽतरन् अनायासेनैव विनिर्जितवन्तस्तस्य वीर्याणि वदस्वेति तृतीयेनान्वयः। देवव्रतो भीष्मः, स आद्यो मुख्यो येषां द्रोणादीनां तैः अतिरथैः ‘एको दश सहस्राणि योधयेद्यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः॥ अमितान्योधयेद्यस्तु स प्रोक्तोऽतिरथस्तु सः’॥ इति लक्षणलक्षितैः तिमिङ्गिलैर्महामत्स्यतुल्यैः। तत्र शतयोजनविस्तृतो मत्स्यस्तिमिः, ‘अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः’ इति वचनात्। तमपि गिलन्ति ते तथा तैः। सैन्यस्य महत्त्वात् सागरोक्तिः। भीष्मादीनां तिमिङ्गिलत्वमेव स्पष्टयति समरेऽमरसहिते सङ्ग्रामे अमरान् देवानपि जयन्तीति तथा तैः। भीष्मस्यार्योदिकभक्तत्वाद्देवव्रतत्वम्, भगवद्भक्तप्रतिपक्षपक्षपातित्वात् ज्ञातिघातकत्वाच्च तिमिङ्गिलत्वं बोध्यम्। यथा प्लवाश्रिता जनाः सागरे न निमज्जन्ति, तथा भगवदाश्रिताः पाण्डवा अपि उर्वरिता इति भगवतः प्लवत्वं ज्ञेयम्। स्मेति इव शब्दार्थे॥ ५॥ न केवलं पाण्डवरक्षत्वेनैव तच्चरितं श्रोतव्यम्, किंतु मम शरीररक्षकत्वेनापीत्याशयेनाह— द्रौण्यस्त्रेति। द्रोणस्यापत्यं पुमान् द्रौणिरश्वत्थामा, तस्य ब्रह्मास्त्रेण विप्लुष्टं दग्धमिदं प्रत्यक्षं ममाङ्गं चकारान्मम मातुश्चाङ्गं मे मम मातुः कुक्षिगतः आत्तं गृहीतं चक्रं येन तथाभूतश्च यो जुगोप रक्षितवांस्तस्य वीर्याणि वदस्वेत्युत्तरेणान्वयः। आत्तचक्र इति तु स्वरूपनिर्देशमात्रम्, रक्षा तु गदयैवेति ज्ञेयम्। ‘अस्त्रतेजः स्वगदया नीहारमिव गोपतिः। विधमन्तम्०’ इति। प्रथमस्कन्धोक्तेः॥ स्वरक्षायां हेतुद्वयम्—मे मातुः शरणागतिः स्वभक्तपाण्डववंशबीजत्वं चेति विशेषणद्वयम्। शरणं गताया इति। कुरूणां पाण्डवानां च सन्तानस्य वंशस्य बीजं कारणमिति॥ ६॥ यथाधिकारं सर्वफलप्रदत्वेनापि तच्चरितमवश्यं श्रोतव्यम्, अन्यथा संसारनिवृत्तिर्न स्यादित्याशयेनाह—वीर्याणीति। अखिलदेहभाजां सर्वप्राणिनामन्तः अन्तःकरणे पुरुषरूपेण बहिश्च कालरूपैः स्थितस्य। कालरूपैरिति कालावयवानां बहुत्वाद्बहुवचनम्। तत्रापि ये बहिर्मुखा विषयासक्तास्तेभ्यः कालरूपैर्मृत्युं जन्ममरणादिरूपं संसारं प्रयच्छतः ये चान्तर्मुखतया तत्कथाश्रवणादिपरास्तेभ्योऽन्तर्यामिरूपेणामृतं मोक्षमपि प्रयच्छतस्तस्य मायया मनुष्यस्य ‘माया दम्भे कृपायां च’ इति विश्वकोशात् जनोद्धारार्थं कृपया स्वीकृतमनुष्याकारस्य श्रीकृष्णस्य वीर्याणि वीर्यप्रयुक्तकर्माणि वदस्व। भाषनोपसम्भाषा०’ इत्यात्मनेपदम्। तेन भगवच्चरितकथनं न केवलमस्मदुपकाराय, किंतु तेन तवाप्युपकारो भविष्यतीति सूचितम्। वद स्वेति सम्बोधनम्, हे स्व गुरो इत्यर्थः। तेन कथनं तवावश्यकमिति सूचितम्। अज्ञातं च तव किञ्चिन्नास्त्येवेति सूचयन् पुनः सम्बोधयति—विद्वन्निति। उतेति अप्यर्थे॥ ७॥ एवं सामान्यतो भगवच्चरित्राणि पृष्ट्वाऽथ सन्दिग्धान् युक्तिविरुद्धांश्चार्थान् पृच्छति—रोहिण्या इति पञ्चभिः। ‘बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम्। वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत्’ इति रोहिण्यास्तनयो रामस्त्वया प्रोक्तः, ‘वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत्। कीर्तिमन्तं सुषेणं च भद्रसेनमुदारधीः॥ ऋजुं संमर्दनं भद्रं सङ्कर्षणमहीश्वरम्। अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल’ इति पुनस्तस्यैव सङ्कर्षणशब्देन देवक्या गर्भसम्बन्धः प्रोक्तः। स देहान्तरं विनैकस्मिन् जन्मनि कुतो घटत इत्याक्षेपः॥ ८॥

अन्वितार्थप्रकाशिका

पितामहा इति ॥ यः श्रीकृष्ण एव प्लवस्तरणसाधनं येषां ते मे मम पितामहाः युधिष्ठिरादयः समरे युद्धे अमरान् जयन्ति तैरमरंजयैः । संज्ञाभावेऽपि खच् आर्षः । देवव्रतः भीष्म आद्यो येषां ते च तेऽतिरथा अमितैः सह योद्धारस्तैरेव तिमिङ्गिलैः महामत्स्यैः दुरत्ययं दुस्तरं कौरवाणां सैन्यमेव सागरं दुष्पारमपि वत्सपदमिवातितुच्छं कृत्वा अतरन् । तस्य वीर्याणि वदस्वेति तृतीयेनान्वयः । स्मेति पादपूर्तौ । तद्योगस्याविवक्षणान्न लट् । एतेन मत्कुलदैवतं कृष्णस्ततोऽपि तद्वीर्याणि श्रव्याणीत्युक्तम् ॥ ५ ॥ मदेकरक्षकत्वेनापीत्याह - द्रौण्यस्त्रेति ॥ आत्तं गृहीतं चक्रं येन सः चक्रायुधो यः श्रीकृष्णः शरणंगतायाः मे मम मातुः कुक्षिं गतः सन् द्रौणेः द्रोणापत्यस्याश्वत्थाम्नोऽस्त्रेण ब्रह्मास्त्रेण विप्लुष्टं दग्धं कुरूणां पाण्डवानां च सन्तानस्य वंशस्य बीजमिव रक्षणीयम् इदं मदङ्गं “भ्रामयन्तं गदां मुहुः” इत्युक्तया गदया जुगोप । चकारान्मातुरङ्गं च जुगोप । पाण्डवानां कुरुत्वेऽपि पृथगुक्तिः प्राधान्याय ॥६॥ सर्वगतित्वेनापि श्रव्याणीत्याह—वीर्याणीति ॥ हे विद्वन् ! अखिलानां देहभाजां मध्ये अन्तर्बहिर्दृष्टीनां पुरुषकालरूपैरंशाभिप्रायेण बहुत्वम् । यथायोग्यम् अमृतम् उत तथा मृत्युं प्रयच्छतः तत्रान्तर्दृष्टीनां पुरुषाख्यान्तर्यामिरूपेणामृतं मोक्षं प्रयच्छतः बहिर्दृष्टीनां च कालरूपेण मृत्युं संसरणं प्रयच्छतः अन्तः अन्तरङ्गा भक्ताः बहिर्बहिरङ्गा अभक्तास्तेभ्यः पुरुषाकाररूपैः कालरूपेण च अमृतं मृत्युं च प्रयच्छत इति वा । पुरुषकालरूपैरन्तर्बहिः स्थितस्येति वा । मायया स्वशक्त्या भक्तेषु कृपया वा । “माया दम्भे कृपायां च” इति विश्वः । मनुष्यरूपस्य तस्य हरेर्वीर्याणि वदस्व प्रकाशय । “भासनोपसंभाषा०” इति तङ् । अतोऽन्तर्दृष्ट्या तद्वीर्याण्येव श्रोतव्यानि ॥ ७ ॥ रोहिण्या इति ॥ यः संकर्षणाख्यो रामः स त्वया पूर्वं नवमस्कन्धे “बलं गदं सारणं च’ इत्यादिना रोहिण्यास्तनयः प्रोक्तः । तस्यैव च संकर्षणमहीश्वरमिति देवकीपुत्रेष्वपि गणनात् । देवक्या गर्भस्य संबन्धः प्रोक्तः स गर्भसंबन्धः देहान्तरमन्यदेहं विना कथं घटते । यद्वा । यो रामः संकर्षणस्त्वया रोहिण्यास्तनयः । प्रोक्तः स एव देवक्या अपि तनयः । अतो देहान्तरं विना द्वयोर्गर्भसंबन्धः कथं घटते ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कोऽसौ त्वत्कृत उपकारो यस्याभिज्ञानात्तद्गुणानुवादान्न विरज्यसे बहुभगवदवताराणां चरित्रेषु च सत्स्वपि कस्माद्विशेषेण कृष्णावतारचरित्रादिकं पृच्छसीत्यत्राह पितामहा इति द्वाभ्याम् । पितामहा इति । समरे संग्रामे, अमरान् जयन्तीत्यमरंजयास्तैः, देवानपि जेतुं समर्थैरित्यर्थः । देवव्रतो भीष्म आद्यो येषां ते येऽतिरथास्तैः, भीष्माद्यतिरथरूपैरित्यर्थः । तिमिंगिलैः तिमिः शतयोजनविस्तीर्णो मत्स्यस्तं गिलन्ति ये तैस्तन्मत्स्यसमानैस्तैर्हेतुभिः, दुरत्ययं दुःखेनाप्यत्येतुं पारं गन्तुमशक्यमित्यर्थः । कौरवाणां सैन्यमेव सागरं तं, यो भगवान् श्रीकृष्णः स एव प्लवः तत्तरणसाधनं येषां ते, मे मम, पितामहा युधिष्ठिरादयः, वत्सपदं गोवत्सपदतुल्यं, कृत्वा, गोवत्सपदोल्लङ्घनवत्तद्गणनां कृत्वेत्यर्थः । अतरन् स्म । तत्पारं जग्मुः किल । तस्य वीर्याणि वदस्वेति तृतीयश्लोकगतेनान्वयः ॥ ५ ॥ इतोऽपि तद्वीर्याण्येव श्रोतव्यानीत्याह । द्रौण्यस्त्रेति । कुरवश्च पाण्डवाश्च तेषां संतानोऽन्वयस्तस्य बीजं प्रवर्त्तकं, यत् इदं मदङ्गं, यद्यपि द्रौण्यस्त्रविप्लुष्टम् अश्वत्थामप्रयुक्तब्रह्मशिरोनामकास्त्रेण दग्धम्, अभवदिति शेषः । तथापि, यः श्रीकृष्णः, शरणं गतायाः, मे मम, मातुरुत्तरायाः कुक्षिं, गतः प्रविष्टः । मन्मातृकुक्षिं प्रविश्येत्यर्थः । आत्तं गदामादाय गृहीतं, चक्रं चक्रवत्परिभ्रमणं येन तथाभूतः सन्, तन्मदङ्गं, जुगोप । चकार एवार्थे । अयं भावः । मत्पितामहप्रभृतीनां मत्पर्यन्तानां सर्वानिष्टपरिहारेणेष्टप्रापणदीक्षितस्य महोपकर्त्तुः कृष्णस्य गुणानुवादात्कृतज्ञः कथमहं विरज्येयमिति । यद्यपि पाण्डवा अपि कुरव एव, तथापि राज्यहेतुकसंजातपरस्परप्रतिभटभावेन प्रतीयमानस्य कुलद्वयस्य नाशे जाते कुलद्वयबीजताया योग्यत्वमेतदङ्गस्यैव प्राप्तं, तत उक्तं कुरुपाण्डवानां संतानबीजमिति । यद्वा । पाण्डवानां संतानबीजं, कुरु । इति प्रार्थयमानाया इति शेषः । मे मातुरिति योजना निर्बाधा । केचित्तु आत्तं चक्रं सुदर्शनं येनेति व्याख्यां चक्रुस्तैः ‘क्षतजाक्षं गदापाणिमात्मनः सर्वतोदिशम् । परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः । अस्त्रतेजः स्वगदया नीहारमिव गोपतिः । विधमन्तं संनिकर्षे पर्यैक्षत क इत्यसौ’ इति प्रथमस्कन्धोक्तिस्मृतिपथमनीत्वोक्तमिति प्रतिभाति ॥ ६ ॥ वीर्याणीति । यत एवमत इति शेषः । हे विद्वन्, अखिलदेहभाजां सकलशरीरिणाम्, अन्तः, उत बहिश्च, पूरुषकालरूपैः अमृतमरणं, स्थितिमिति यावत् । मृत्युं मरणं च प्रयच्छतः । क्षेत्रज्ञानां कालावयवानां च बाहुल्याद्बहुवचनम् । शरीरिणामन्तः पूरुषरूपेण स्थितिहेतोस्तेषां बहिरपि कालरूपेण विनाशहेतोश्चेत्यर्थः । स्थितिविनाशविधानतया कृत्स्नजगत्कारणस्येति भावः । नन्वेवंभूतस्य कथं मनुष्यत्वापत्तिरित्यतो विशिनष्टि । मायामनुष्यस्य स्वसंकल्पमात्रेण मनुष्यभावं नाटयत इत्यर्थः । तस्य कृष्णस्य, वीर्याणि, वदस्व प्रकाशय । ‘भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः’ इति वदेः अत्र उपमन्त्रणार्थत्वात् आत्मनेपदम् । उपमन्त्रणं प्रार्थनम् । केचित्तु अन्तर्यामिरूपेणान्तर्दृष्टीनां मुक्तिं, बहिर्दृष्टीनां कालरूपेण मृत्युं च यच्छत इत्याहुः । श्रीगोपालानन्दस्वामिचरणास्तु, पूरुषरूपैः रामकृष्णाद्यवतारैः, दर्शनश्रवणादिद्वाराऽखिलदेहिनामन्तरन्तःकरणे प्रविश्य मोक्षपर्यायममृतं प्रयच्छतस्तेषां बहिश्च कालरूपसंवत्सरादिपरिवर्त्तैर्मृत्युमपि प्रयच्छत इति व्याचख्युः ॥ ७ ॥ ननु ‘बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् । वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत्’ इति रोहिण्यास्तनयो रामः प्रोक्तः । ‘वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् । कीर्त्तिमन्तं सुषेणं च भद्रसेनमुदारधीः । मृदुं संतर्दनं भद्रं संकर्षणमहीश्वरम् । अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल’ इति पुनर्देवक्या

गर्भसंबन्धस्त्वयैवोक्तः, स न घटते । एवमेकस्य द्वयोर्मात्रोर्योनिसंबन्धानुपपत्तिं प्रदर्शयन्नाह । रोहिण्या इति । संकर्षणः रामः, भगवदंशावतारसंकर्षणापरसंज्ञो बलराम इत्यर्थः । त्वया, रोहिण्याः तनयः, प्रोक्तः । तथा सति, तस्य देहान्तरमन्यदेहधारणं विना, देवक्याः गर्भसंबन्धः कुतः । कथं घटेतेत्यर्थः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सन्तु नाम भुवनेषु देवता यास्तपोभिरपि दूरदर्शनाः । भाति गर्भशिशुरक्षणेऽप्यलं यत्कृपात्वनलसा स मे गतिः ॥ ४ ॥
सच्चिद्रूपतनोः सतामतनुदस्याप्यच्युतस्यात्मनः । सर्वस्यातनुरूपदर्पद-तनुस्वीकार एषोद्भुतः ।
श्रोतुर्मे प्रतिभाति तन्मुनिवराकम्पानुकम्पाम्बुधे । सर्वं ख्यापय सौख्यशेवधिमहो यच्छ्रौतमेव श्रुतम् ॥ ५ ॥

हिन्दी अनुवाद (कर्दमक्षमा)

रणसंग्राम में अमरलोगों को भी जीतने वाले, भीष्म (देवव्रत सत्य एवं ब्रह्मचर्य जैसे दिव्यव्रतवाले) पितामह आदि अतिरथि रूप तिमिङ्गिलो (अपनी जाति वाले बड़े बड़े मत्स्यों को निगलने वाले) के होने के कारण दुस्तर कौरवों के सैन्य महासागर को मेरे पितामह (युधिष्ठिरादि) श्रीकृष्ण स्वरूप नाव के आश्रय से बछड़े के खुर के समान खड्डा मानकर तर गये ॥ ५ ॥ कौरव और पाण्डवों की संतति के बीजरूप यह मेरा अङ्ग, जब द्रोणतनय अश्वत्थामा के ब्रह्मास्त्र से सम्पूर्ण दग्ध हो गया था तब शरण गई हुई मेरी माता उत्तराजी के उदर में प्रविष्ट होकर, जिस सुदर्शन चक्रधारी श्रीकृष्ण भगवान ने मेरी रक्षा की उनके चरित्र कहो ॥ ६ ॥ हे विद्वन् शुकाचार्यजी ! समग्र शरीरधारियों के भीतर और बाहर पुरुष रूप से तथा कालरूप से अमृत एवं मृत्यु देव हैं और जिन भगवान को अज्ञान से मनुष्य समझा जाता है, उन मनुष्याकृतिधारी पूर्णपुरुषोत्तम के वीर्यों का वर्णन करने की कृपा कीजिए ॥ ७ ॥ भगवन् शुकजी ! आपने रोहिणी के पुत्र संकर्षण बलभद्रजी को देवकी जी का पुत्र कहा, परन्तु उनका देवकी के गर्भ से सम्बन्ध दूसरी देह के बिना कैसे हो सकता है ॥ ८ ॥

कस्मान्मुकुन्दो भगवान् [1]पितुर्गेहाद्व्रजं गतः । क्व वासं ज्ञातिभिः सार्कं[2] कृतवान् सात्वतां पतिः ॥ ९ ॥
व्रजे वसन् किमकरोन्मधुपुर्यां च केशवः । भ्रातरं चावधीत् कंसं मातुरद्धातदर्हणम् ॥ १० ॥
देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः । [3]यदुपुर्यां सहावात्सीत् पत्न्यः कत्यभवन् [4]प्रभोः ॥ ११ ॥
एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितम् । वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतम् ॥ १२ ॥

कर्दमक्षमा

अन्वयः—मुकुन्दः भगवान् पितुः गेहात् कुतः व्रजं गतः सात्वतां पतिः ज्ञातिभिः सार्कं क वासं कृतवान् ॥ ९ ॥ केशवः व्रजे च मधुपुर्यां वसन् किम् अकरोत् च मातुः भ्रातरं कंसम् अतदर्हणम् अद्धा (स्वहस्तेनेत्यर्थः) अवधीत् ॥ १० ॥ मानुषं देहम् आश्रित्य वृष्णिभिः सह कति वर्षाणि यदुपुर्याम् अवात्सीत् प्रभोः कति पत्न्यः अभवन् ॥ ११ ॥ मुने ! सर्वज्ञ एतद् च अन्यत् सर्वं कृष्णविचेष्टितं श्रद्धानाय मे विस्तृतं वक्तुम् अर्हसि ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कस्मादिति । भगवतः कंसभयशंकाया असंभवात् इत्यर्थः ॥ ९ ॥ मातुर्भ्रातरं कंसं तस्मादतदर्हणं वधानर्हम् अद्धा साक्षात्कस्मादवधीत् ॥ १०–१२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदप्याक्षिपति—कस्मादिति । कस्माद्धेतोरिति हेतौ पंचमी । पितुर्गेहान्मथुरांतर्गतात् । मुकुंद इति । सर्वमोचनकर्तुर्भगवतः पितृमोचनमकृत्वा गमनानौचित्यमाह । यद्वा—मुकुंदः कंसस्य मुक्तिं दातुं पुर्यामेव स्थानं योग्यो न व्रजं गंतुमिति भावः । पितुर्गेहाद्व्रजमिति जन्मानुकरणदृष्ट्या भगवत्तत्त्वदृष्ट्या तु नंदः स्वपुत्रमादाय प्राप्यागत इति मुनीन्द्रेण वक्ष्यते ज्ञातयो गोपा यादवाश्च को बृहद्वनं परित्यज्य गोपैः समं यत्र वासं कृतवांस्तथा मथुरां परित्यज्य यादवैः समं यत्र तस्य वृंदावनाख्यस्य द्वारकाख्यस्य च वैशिष्ट्यमुच्यताम् । व्रजं गोकुलम् । "व्रजो गोष्ठाध्ववृंदेषु" इति मेदिनी । क कुत्र ज्ञातिभिर्नन्दसजातीयैर्वसुदेवसजातीयैर्वा वासं निवासम् ॥ ९ ॥ केशव इति ब्रह्मेशसेव्यतामाह-को ब्रह्मा को विष्णुरीशः शंभुः कश्चाश्च शश्च केशा ब्रह्मविष्णुशिवास्तेषां वो विंबः

---

[1] पितृगेहा–वीर.   [2] सार्धं–श्री-वंशी सार्कं–विश्व.   [3] मधुपुर्याम्–इति कस्यचिद्   [4] न्विभोः–विज. विभो–वीर.

केशवः ‘वो बिम्बे’ इति सौभरिकोशात्। अर्थाद्ब्रह्मविष्णुशिवानां प्रतिबिंबानां बिंबः कारणं साक्षाद्ब्रह्मसर्वव्यापिनस्तस्य व्रजे मधुपुर्यां च कैमर्थिकी स्थितिरपरिच्छिन्नस्य प्रदेशविशेषस्थितिः संशयहेतुस्स एव प्रश्नबीजम्। यदूनां पुर्यां मथुरायां द्वारकायां च ॥ १० ॥ मानुषं देहमाश्रित्य मनुष्यमानेन कति वर्षाणीत्यर्थः। “परमात्मा नराकृतिः, परं ब्रह्म नराकृतिः, गूढं परं ब्रह्म मनुष्यलिंगम्” इत्यादिषु मनुष्यस्यैव स्वरूपलक्षणात्। कति कियत्संख्याकानि। त्रिलिंगत्वात्पत्नीपदेनापि संबंधो नानुचित इति ॥ ११ ॥ एतद्यत्पृष्टमन्यद्यदपृष्टम्। सर्वज्ञेति संबुद्धिः पृष्टापृष्टकथने हेतुः। “अश्रद्धाय तु नो वाच्यं वाच्यं चेन्मितमेव हि” इत्युक्तेर्मह्यं श्रद्धालवे विस्तारेणैव वाच्यमित्याह विस्तृतमिति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मुकुन्दो मुक्तिदातेति कंसस्य मुक्तिं दातुं पुर्यामेव स्थातुं योग्यो न तु व्रजे गन्तुमिति भावः। अस्योत्तरमष्टमनवमाध्यायौ ज्ञेयौ यद्वा, भक्तेभ्यः स्वैकदानाय सर्वतो मुक्तिं ददातीति मुकुन्दः स कस्मात् पितुर्गेहादिति पितुर्गेहं परित्यज्य व्रजं गतः इत्यर्थः। तस्मात्तत्र किमपि वैशिष्ट्यमासीदिति भावः। अस्योत्तरत्वेन तत्र प्रेमाधिक्यं मुहुर्वर्णयिष्यत एव यद्वा, पृषोदरादित्वादेव मुक्तिसुखं कुत्सितं यस्मात् स मुकुन्दः तं प्रेमानन्दं ददातीति श्लेषेण मुकुन्दो व्रजमेव गन्तुमर्हति किन्तु कं हेतुं व्याजार्थमुदभावयदित्यर्थः। अस्य चोत्तरत्वेन हेतुः पितरौ प्रति भगवता कंसभयोद्भावनमेवोन्नेयः। पितुरिति स्वसम्बन्धस्फुरितया जन्मानुकरणदृष्ट्या भावतत्त्वदृष्ट्या तु “नन्दः स्वपुत्रमादाय प्रोष्यागत उदारधीः” इति मुनीन्द्रेण वक्ष्यते। क किं विशिष्टे स्थाने ज्ञातयोऽत्र तन्मते यादवा एव ततो मथुरां परित्यज्य यादवैः समं यत्र वासं कृतवान् तस्य द्वारकाख्यस्य वैशिष्ट्यमुच्यतामित्यर्थः। “ज्ञातीन् वो द्रष्टुमेष्यामः “इति श्रीभगवन्मते तु गोपा एव ज्ञातयो मुख्या ज्ञेयाः। ततो बृहद्वनपरित्यागपूर्वकं भगवत्कृतावासस्य वृन्दावनस्यैव वैशिष्ट्यं श्रीशुकेन स्वयमेव वर्णयिष्यमाणत्वेनावगतं सात्वतां भक्तानां पतिः पालक इति स्वभक्तपालनार्थं तैः सह वासस्तदुचितलीलायोग्य एवासीदिति भावः। अत्रोत्तरं तत्र तत्र श्रीमदुपनन्दवाक्यं श्रीभगवद्वाक्यञ्च दृश्यम्। एवमुत्तरत्रापि ॥ ९ ॥ किञ्च, तत्र तत्र कृतं सर्वं कथयेत्याह—व्रज इति द्वाभ्याम्। बृहद्वने वृन्दावने व्रजे मथुराख्यायां द्वारकाख्यायां च मधूनां पुर्यामिति तत्तद्वाससमयेऽन्यत्र कृतमपि व्रत तत्रैव पर्यवसायितं कः ब्रह्मा ईशो रुद्रः तौ वयते स्वमहिम्ना व्याप्नोतीति किम्वा अस्त्यर्थे वः तौ सेवकोत्तमतया विद्यते अस्येति परमेश्वरतोक्ता अतस्तत्र तत्राद्भुतान्येव कर्माणि सम्भवन्तीति भावः। किं किमित्यवधीदिति विशेषणभेदेनार्थभेदात् पूर्वेणैवान्वयः। कस्मादिति टीका च तद्व्याख्यैव। कस्मादिति पाठे टीका स्पष्टैव अद्धा स्वयमेवेत्यर्थः। देहं मानुषमिति। मानुषप्रचुरत्वान्मानुषं विराडंशत्वात्तद्देहमिव देहं मर्त्यलोकमित्यर्थः। तदीयसाक्षाद्देहस्य “विराड्विदुषां तत्त्वं परं योगिनाम्” इति विराडंशात् प्राकृतमानुषत्वं निषिध्य परमतत्त्वतया स्थापनात्। अथ व्याख्यान्तरं, मानुषशब्दोऽत्र यादवशब्दवन्मनुवंशप्रादुर्भूततापरः। आश्रित्येति। चक्षुराश्रित्य रूपे स्थित इत्यादिवत् प्रकाशयेत्यर्थः। “स आत्मा स्वाश्रयाश्रयः” इत्यत्र च स्वाश्रयशब्दश्च तथा “योगमायामुपाश्रितः” इत्यत्र च तद्वदिति मानुषं मनुष्याकारं परमसुन्दरं देहमाश्रित्य प्रकटीकृत्य सच्चिदानन्दघनत्वेन तस्य नित्यत्वाद्वृष्णिभिः सहेति वृष्णीनामपि तादृशत्वं व्यञ्जितम्। यदुपुर्यां श्रीद्वारिकायां कतीति प्राकट्यसम्बन्धीनि कियन्ति वर्षाणि मर्यादीकृत्येत्यर्थः। मधुपुर्यामिति पाठे पूर्ववत्। याः पत्न्यः अभवन् ताः कति? कियतीनां तादृशं भाग्यं जातमित्यर्थः। अहो तत्तद्विशेषा मयाऽनभिज्ञेन कति प्रष्टव्याः त्वया स्वयमेव सर्वे कथ्यन्तामित्याह—एतदिति। पृष्टमन्यच्चापृष्टमपि कृष्णस्य नराकृतिस्वयम्भगवत अत एव विचित्रं चेष्टितं तत्तद्वचनसामर्थ्ये हेतुः, हे मुने तत्तल्लीलामननशील! नन्वनन्तत्वात् कथमेकस्य सर्वमननं स्यात्? तत्राह, सर्वज्ञेति। तदतिरिक्तमपि जानासीत्यर्थः ॥ १०–१२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

“कृतवान् यानि विश्वात्मा तानि नो वद” इति सामान्यतः पृष्टानि वीर्याणि विशेषतः पृच्छति-कस्मादिति चतुर्भिः। भगवान् मुकुन्दः कस्माद्धेतोः पितुर्वसुदेवस्य गेहाद्व्रजं नन्दव्रजं गतः? सात्वतां भक्तानां पतिर्भगवान् ज्ञातिभिर्यदुभिः सह क निवासं कृतवान्? ॥ ९ ॥ व्रजे मधुपुर्यां च वसन् किं किमकरोत्? मातुर्देवक्याः अद्धा साक्षाद्भ्रातरम् अत एवातदर्हणं वधानर्हं कंसं कुतोऽवधीत् ॥ १० ॥ मानुषं मानुषवदवभासमानं देहं दिव्यमङ्गलविग्रहमाश्रित्य परिगृह्य वृष्णिभिर्यदुभिः सह यदुपुर्यां द्वारकायां कति वर्षाणि अवात्सीत् ऊषितवान्? तस्य पत्न्यः कति बभूवुः हे विभो! ॥ ११ ॥ एतत्पृष्टमन्यदपृष्टं च यद्यत्सर्वं कृष्णस्य विचेष्टितं हे मुने! श्रद्दधानाय श्रवणोपयुक्तत्वरान्विताय मे शुश्रूषवे मह्यं हे सर्वज्ञ साकल्येन कृष्णचेष्टिताभिज्ञ! विस्तृतं यथा तथा वक्तुमर्हसि ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मधुपुर्यां च वसन् किं कर्म कृतवान्? मातुर्भ्रातरं मातुलमित्यर्थः। अतदर्हणं तस्य वधस्यायोग्यमित्यर्थः ॥ १०–११ ॥ मे मह्यम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कस्मादिति । अत्र राज्ञा जन्मानुकरणदृष्टया पितुरित्युक्तं न तु भावतत्त्वदृष्टया तया तु "नन्दः स्वपुत्रमादाय प्रोष्यागतः" इत्यादिकं मुनिना वक्ष्यते । तत्र भावस्यैव मुख्यत्वेन व्रजेश एव मुख्यपितेति कृष्णसन्दर्भे विवृतं, क कथम्भूते वृन्दावने द्वारकानगरे च ज्ञातिभिः श्रीगोपैर्यादवैश्च पूर्ववदत्रापि "ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम्" इति श्रीकंसमथनोक्तेः ॥९–१०॥ देहमिति । मानुषं मानुषीयं देहं लोकम् ॥ ११–१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

पितुर्वसुदेवस्य गेहाद्व्रजं महावनं गतः, व्रजं गतोऽपि पितुर्नन्दस्य गेहात् ज्ञातिभिर्गोपैः साकं क वासं कृतवान् ॥ ९ ॥ मधूनां पुर्यां मथुरायां द्वारकायाञ्च, मातुर्भ्रातरं कंसं कस्माद्वधीत्? अतदर्हणं मातुलत्वाद्वधाऽनर्हं वृष्णिभिः सह कति वर्षाणि अवात्सीत्? वर्षाणि कथम्भूतानि? मानुषं देहमाश्रित्य वर्त्तमानानीत्यर्थः । ततश्च मनुषमानेन कति वर्षाणीत्यर्थः फलितः "परमात्मा नराकृतिः" इति "नराकृति परं ब्रह्म" इति "गूढं परं ब्रह्म मनुष्यलिङ्गम्" इत्यादिभिर्मनुष्यत्वस्यैव स्वरूपलक्षणत्वाद्व्याख्यान्तरं न घटते ॥ १०–१२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कंसभयात्पितुर्गेहाद्व्रजे गमनं न सम्भवति, यतः, भगवान् कस्मैचिन्मुक्तिं दातुं तत्र गमनमपि न सङ्कुचते, यतो मुकुन्दः सर्वत्र मुक्तिप्रदत्वेन स्थितः, अतः पृच्छति—कस्मादिति । कस्माद्दुर्लक्ष्याद्धेतोः पितुर्गेहादपि सर्वैश्वर्याश्रयादहो व्रजं गवामालयं गतः, क कस्मिन् व्रजविशेषे ज्ञातिभिः सह वासं कृतवान्? "भ्रातरं नन्दमागतम्" इति वक्ष्यमाणाज्ज्ञापकाद्वसुदेवादिवत् नन्दाद्याः भगवज्ज्ञातयः । किञ्च, श्रीवसुदेवेन कन्यां गृहीत्वा श्रीनन्दगृहे स्थापितस्य भगवतो न्यायतः श्रीनन्दोऽपि पिता तद्द्वारेण गोपास्तस्य ज्ञातयः भगवानपि श्रीनन्दभक्तियन्त्रितो ब्रह्मवरं च सत्यं कर्तुमनेन न्यायेन तत्पुत्रोऽभवदिति बोध्यम् ॥ ९ ॥ कस्मादवधीदिति पूर्वेणान्वयः ॥ १० ॥ देहं मानुषमाश्रित्य यानि वर्षाणि तानि यदुपुर्यां द्वारवत्यां कत्यवात्सीत् ॥ ११ ॥ अन्यदः स्पष्टमपि सर्वम् ॥ १२ ॥

श्रीसुबोधिनी

भगवतो मथुरापरित्यागे को हेतुरिति पृच्छति—**कस्मादिति** । कालादिभयनिवारकस्य शुद्धब्रह्मणो भयाभावे व्रजगमने को हेतुरिति मुकुन्दपदेन सूचितम्, सर्वेभ्यो मोक्षदाता मुकुन्दः । बृहद्वनवृन्दावनादिषु मध्ये नन्दादीन् ज्ञातित्वेन परिकल्प्य **ज्ञातिभिः सह क वासं कृतवान्?** अथवा **असञ्ज्ञातिभिः** सम्यग्ज्ञातिभावरहितैः **क्व वा साकं** सहभावं **कृतवान्** । भगवतस्त्ववतारः सतामेव संरक्षार्थः । यतः स **सात्वतां शुद्धसत्त्वे प्रतिष्ठितानामेव पतिः** ॥ ९ ॥ प्रश्नान्तरम्—**व्रजे वसन् किमिति** । तज्जात्यनुकरणतद्भावानुकरणलीलाप्रश्नः । पूर्वोक्तानुवाद एव वा । व्रजे च वसन् किमकरोत्? कंसवधादिकं स्पष्टमपि लोके विगर्हितमिति पृच्छति **भ्रातरमिति** । **मातुर्भ्रातरमद्धा स्वहस्तेन** । मातुलस्य मान्यत्वादतदर्हणं वधानर्हम् । कस्मादिति पूर्वस्यानुषङ्गोऽत्र ज्ञेयः । व्रजे मथुरायां च के के उद्धृताः? कंसस्यापि का व्यवस्थेति प्रश्नः ॥ १० ॥ द्वारकायां कियत्कालं स्थितवानित्याह—**देहमिति** । अत्यन्तनटोऽपि प्रहरमात्रं वेषं करोति, कपटमानुषवेषं कियत्कालमास्थाय स्थित इति कालप्रश्नः । तत्र स्थितस्य विशेषप्रयोजनाभावादेहं मानुषमाश्रित्येति तत्रैवोक्तम् । **वृष्णिभिर्यादवैः सहेति** असमानसमानतापि बहुकालमयुक्तेति सूचितम् । **यदुपुर्यामिति** स्वस्थाने वासः । **अवात्सीदिति** वासे न सन्देहः । लक्ष्मीसमानभाग्यं कियतीनां जातमिति **पत्न्यः कत्यभवन्निति**प्रश्नः । **प्रभोरिति** त्वेन सर्वसामर्थ्यं तस्य वर्तते इति सङ्बोध्य नान्यथा कथनीयमिति सूचितम् ॥ ११ ॥ अन्यदपि युक्तिविरुद्धं सोपपत्तिकं वक्तव्यमित्याह—**एतदन्यच्चेति** । **अन्यदपृष्टं सर्वं भगवत्कृतम्** । **म** इति तदीयत्वान्ममैतदेव कृत्यमिति । **मुन** इति ज्ञानार्थं सम्बोधनम् । **कृष्णविचेष्टितमिति** स्वतन्त्रफलत्वम् । 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' इति सदानन्दः कृष्ण उक्तः । तच्चरित्रमपि सदानन्दरूपमेवेति फलत्वात् सर्वमेव वक्तव्यम् । एतन्मर्माभिज्ञस्त्वमेवेति **वक्तुमर्हसि** । वीर्यरूपेति केवलचरित्रेऽप्यहं श्रद्दधानः । **विस्तृतमिति** तादृशोपि विस्तारो वक्तव्यः । सर्वत्रैव चरित्रे चतुर्विधेपि विस्तारः । वीर्याणि, सर्वगेयचरित्राणि, अलौकिकवीर्याण्यगेयचरित्राणीति चातुर्विध्यम् ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

क्व वासमित्यत्र अथवेत्यादि । अधुनापि 'वयं गोवृत्तयोऽनिशं' श्रूयतां मे पित'रित्यादिवचनानामश्रवणाद्वसुदेवपुत्रत्वेन यादवत्वेन ज्ञानादेवमपि कथनं सम्भाव्यत इत्याशयेनेदमुक्तम् ॥ ९ ॥ **देहं मानुषमित्यत्र तत्रैवोक्तमिति** । **तत्रैव** वृष्णिमानुषदेह स्वाश्रयमत्रोक्तमित्यर्थः । तेषु सर्वेषु भूभारराजपृतनानिरसनसामर्थ्याय भगवानाविष्टस्तिष्ठतीति तथा । वृष्णिभिः सह संव्यवहारे

क्रियमाणो वृष्णिदेहेष्वाश्रयणसंभवादपि तथा। एतज्ज्ञापनायैवाश्रयण उक्तः। अन्यथा तं विनाऽपि प्रश्नसम्पत्तेस्तं न वदेत्। एवं सति 'वृष्णिभिः सह देहं मानुषमाश्रित्य कति वर्षाणि यदुपुर्यामवात्सी'दिति सम्बन्धो ज्ञेयः। अत एवाग्रे प्रभुर्वक्ष्यति 'नैवान्यतः परिभवोऽस्य भवेत् कथञ्चि'दित्यत्र हेतुभूतं विशेषणं 'मत्संश्रयस्ये'ति॥ ११॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

कस्मादित्यत्र भगवतस्त्विति। सद्रक्षार्थमवतारः। एते तु भगवज्ज्ञातिभावरहितास्तामसा न तु सन्त इत्यर्थः॥ ९॥ एतदन्यच्चेत्यत्र वीर्याद्यरूपेऽपीति। चतुर्विधस्यापि चरित्रस्यान्यस्य च **कृष्णविचेष्टितमिति** चेष्टामात्रकथनेनानुवादादिति भावः। **वीर्याणीति**। 'तत्रांशेने'त्यनेन वीर्याणि। 'अवतीर्ये'त्यनेन सर्वगेयचरित्राणि। 'वीर्याणि तस्ये'त्यनेनालौकिकवीर्याणि। 'रोहिण्या' इत्यादिनाऽगेयचरित्राणि पृष्टानीति विभेदः॥ १२॥

श्रीबुभुत्सुबोधिका

कस्मान् मुकुन्द इत्यत्र व्रजगमन इति कारागृहं त्यजतु नाम भक्तदुःखस्मारकत्वात् नित्यसन्निहितहरिकामथुरापुरीं त्यक्त्वा व्रजगमने। मोक्षदातेति मुकुं मोक्षं ददातीति मुकुन्द इति व्युत्पत्तिः। मोक्षः कालादिभ्यो भयनिवारणम्, 'अभयं ह वै जनक प्राप्तोसी'ति बृहदारण्यकात्। 'घोः किन्तु कर्मण्यधिकरणे चे'तिसूत्रैकवाक्यतया कर्माधिकरणयोर्भवति। अतः कर्मणि घञ्। परिकल्प्येति सजातीयविजातीयस्वगतद्वैतवर्जितमिति परिकल्प्येत्युक्तम्। नन्दादीनामाभीरत्वेन यदुज्ञातित्वेन परिकल्पनं नास्तीति पक्षान्तरमाहुः अथ वेति। सम्यक्ज्ञातीति सम्यक्त्वं वर्तमानत्वम्। सम्यक्ज्ञातिभावो यदुषु। तद्रहितैः आभीरैः साकमितिभावप्रधानमित्याशयेनाहुः सहभावमिति। 'इति तु न साम्प्रत'मित्यादौ केवलाव्ययप्रयोगदर्शनात् सार्धमित्यपि मूले पाठः। ऋध्यति ऋध वृद्धौ। बाहुलकात् कम्। सह ऋधं वर्तते। सह अकम्। अम् प्रत्ययः सहस्य सः। 'सहस्ये'ति सूत्रेण। 'आभीक्ष्ण्ये णमुल् वा'। अन्यट्टिप्पण्यां स्पष्टम्। ननु सहभावस्तु यत्र क्वचन गमने भविष्यत्येव किं प्रश्नेन। न च वासाधिष्ठानज्ञानेन मोक्ष इति प्रश्न इति। वाच्यम्। तदपि भविष्यत्यत्रेति चेद् असङ्गश्रुतिविरोधप्रश्न इति चेत् तत्राहुः भगवतस्त्विति। एते नन्दादयः परीक्षिद्बुद्ध्या सगुणाः न तु निर्गुणाः तैः सहासङ्गपुरुषवासप्रश्न इति न श्रुतिविरोधप्रश्नः। न च द्वितीयनवमाध्यायश्रवणेन विशुद्धसत्त्वप्रतिष्ठिता नन्दादय इति राज्ञो ज्ञानं वर्तत इति वाच्यम्। राजत्वात् नापाति वक्तुं शक्यत्वात्। यद्वा असङ्गः पुरुषः क्व सहभावं कृतवानिति प्रश्नो न सम्भवति विरुद्धत्वात्। अत उक्तं 'सात्वतां पति'रित्याशयेनाहुः भगवतस्त्विति। सात्वतां सङ्गो वर्तत इति न सर्वथाऽसङ्ग इति प्रश्नसम्भव इति भावः। सतामेति न तु भक्तानाम्। वासुदेवकार्यत्वाद् भक्तैः सह निगूढभावकरणस्य। संरक्षणेति सङ्कर्षणांशः। स इति पूर्वः। सात् सत्त्वगुणः सोऽस्त्येषामिति सात्वन्तः शुद्धसत्त्वे प्रतिष्ठिताः प्रतिनिधितया स्थिताः तेषाम्। एवेति द्वितीयनवमाध्याये 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इति वाक्यात्॥ ९॥ व्रजे वसन्नित्यत्र तज्जातीति आभीरजात्यनुकरणम्, 'वय गावृत्तयोनिश'मिति वाक्योक्तं तद्भावानुकरणं, 'श्रूयतां मे पित'रिति आभीरभावः पितृत्वभावः तस्यानुकरणं ते एव लाले तयोः प्रश्नः। पूर्वश्लोके अथवेत्यत्राक्तवाक्यद्वयाश्रवणमुक्तं परीक्षित इत्यस्वरसेन पक्षान्तरमाहुः पूर्वोक्तानुवाद इति। पूर्वोक्तपक्षयोगव्यवच्छेदक एवकारः। स्पष्टमिति राजचरित्रं राज्ञा परीक्षितोऽन्यतः श्रुतमेवेति स्पष्टमित्यर्थः। पृच्छतीति स्वेन वध्यबालकहिंसा गर्हितेति न कृतेति गर्हितप्रश्नः आत्मौपम्येन सर्वदर्शनस्य श्रीभागवते स्मरणात्। का व्यवस्यतीति मुक्ता वा संसृता वा। मुक्तेति फलिष्यति। 'कामाद् गोप्यो भयात् कंस' इति वाक्यात्॥ १०॥

देहं मानुषमित्यत्र द्वारकायामिति स्मार्तप्रयोगः। आचार्यवाचां वेदतुल्यत्वाच्छन्दसि सर्वविधिविकल्पान् न द्वारिकायामित्युक्तम्। तत्र स्थितस्येति वृष्णिषु स्थितस्य विशेषस्य भक्तियोगविधानादधिकस्य सङ्कर्षणांशकृतभूभारहरणादधिकस्य च प्रयोजनस्य फलस्याभावात्। अग्रेपि हेतुः। तत्रैवोक्तमिति टिप्पण्यां स्पष्टम्। न सन्देह इति लुङो भूते विधानात् नवमोक्तकृष्णजन्मनो यदुषु स्मारणात् स्वदृष्ट्या न सन्देहः॥ ११॥ एतदन्यच्चेत्यत्र युक्तिविरुद्धमिति उत्तरार्धीयं जरासन्धयुद्धादिकं, गोपालस्य राजयुद्धादिकं युक्तिविरुद्धम्। तदीयत्वादिति म इत्यस्य ममेत्यर्थादस्मत्पदार्थगोपनेन तदीयत्वम्। ज्ञानार्थमिति मन ज्ञाने दि० आत्म० अ० मन्यते। 'मनेरुच्च'तीन्। सदानन्द इति चिद्वाचकः कृष्णशब्द इति न न्यूनता। 'सत्यं परं धीमही'त्यत्र चिदानन्दयोरुपलक्षणात्। 'अर्हसी'त्यत्रार्ह पूजायाम्। अत्र पूज्यो मर्माभिज्ञः इत्याशयेनाहुः एतन्मर्माभिज्ञ इति अत एव 'सर्वज्ञे'ति सम्बोधनम्। सर्वेष्वन्तर्गतानि मर्माणीति। 'सर्वज्ञः शिवः शुकोभूद् वृषध्वज' इति द्वादशस्कन्धात्। श्रद्दधान इति तस्मै। तादृशोपीति कृष्णविचेष्टितं तद् दृश्यते यत्र विस्तारे। 'त्यदादिषु दृशोरनालोचने कञ्चे'ति कञ्। अत्रानालोचनं नास्तीति कञ् दुर्लभ इति चेत् भाष्योक्ता व्युत्पत्तिरत्र महाभाष्ये कर्मकर्तरि व्युत्पत्तिर्दर्शिता। तमिवेमं पश्यन्ति जनाः। स इवायं पश्यति ज्ञानविषयो भवतीत्यर्थात्। तत्र विषयत्वापत्तिमात्रवृत्तित्वेपि विषयीकरणावृत्तित्वादज्ञानादिति सङ्गच्छते इति मनोरमा। भाष्यं च सोऽयं स इव दृश्यमानस्तमिवात्मानं पश्यतीति। यद्वा छन्दोवत् सूत्राणि भवन्तीति। दृशेरालोचनेति कञ्चेति। बाहुलकात्। मनोरमायां अनालोचने किम्। तत्पश्यतीति तद्दर्शः। तादृशादयस्तु रूढिशब्दत्वादसताप्यवयवार्थेन व्युत्पाद्यन्ते। अत एवाज्ञानार्थाद् दृशेरिति सङ्गच्छते इति रूढिमात्रमुक्तम्। भगव-

यौगिके तु रूढिमात्रं नास्ति । पूर्वमीमांसाकारिकासूक्तम् । अतः स्वव्युत्पत्तौ रूढिर्द्रष्टव्या । अतस्तादृशशब्दो योगरूढो मन्तव्यः । वीर्याणीति 'तत्रांशेने'त्यनेन वीर्याणि, अवतीर्येत्यनेन सर्वगेयचरित्राणि, 'वीर्याणि तस्येत्यनेनालौकिकवीर्याणि, 'रोहिण्या' इत्यादिना अगेयचरित्राणि पृष्टानीतिविभेदः । न च 'वीर्याणि तस्ये'त्यत्र वीर्याणामनुवाद उक्तः, स चालौकिकेतिविशेषणं न सोढुमलमिति वाच्यम् । 'विशिष्टं शुद्धान् नातिरिच्यत' इति नैयायिकोद्घोषात् ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मथुरापरित्यागकारणं पृच्छति—कस्मादिति । भगवान् वीर्यादिमान् अत एव मुकुन्दो मोक्षदाता कालादिभयनिवारकोऽतस्तस्य कंसादिभयासम्भवात् कस्माद्धेतोः पितुर्गेहाद्व्रजं गतः ? सात्त्वतां यादवविशेषाणां भक्तानां पतिः ज्ञातिभिः 'अथ कृष्णः परिवृतो ज्ञातिभिर्मुदितात्मभिः' इति वक्ष्यमाणत्वात् गोपैः सार्द्धं सह क वासं कृतवानित्यन्वयः ॥ ९ ॥ को ब्रह्मा, ईशो रुद्रस्तयोरपि कं सुखं यस्मात्स केशवो भगवान् व्रजे मधुपुर्याम्, चकारात् द्वारकायां च वसन् किमकरोत् ? अद्धा साक्षात्स्वयमेव कंसं कस्मादवधीत् ? तद्वधेऽपि को दोष इत्यत आह—अतदर्हणमिति । न वधार्हणमिति । तत्र हेतुमाह—मातुर्देवक्या भ्रातरमिति । चकारः कस्मादित्यनुषङ्गसूचकः ॥ १० ॥ मानुषं देहमाश्रित्य वस्तुतः परब्रह्मत्वेऽपि नराकारमङ्गीकृत्य वृष्णिभिर्यादवैः सह यदुपुर्यां द्वारकायां कति वर्षाणि अवात्सीत् ? प्रभोः सर्वकरणे समर्थस्य तस्य पत्न्यः कति अभवन् ? ॥ ११ ॥ अज्ञेन मया कति प्रष्टव्यम् स्वयमेव कृपया मच्छ्रवणयोग्यं वक्तव्यमित्याह—एतदिति । एतत् यन्मया पृष्टम्, अन्यच्च अपृष्टमपि श्रीकृष्णस्य विचेष्टितं विविधां लीलां विस्तृतं यथा स्यात्तथा सर्वं त्वं मे मह्यं वक्तुमर्हसीत्यन्वयः । कृष्णचरितस्यापारत्वाद्दुर्ज्ञेयत्वाच्च कथमहं वक्तुमर्हे इत्याशङ्कां निरस्यन् सम्बोधयति—हे सर्वज्ञेति । तत्र मननशीलत्वं हेतुं सूचयन् पुनः सम्बोधयति—मुने इति । 'श्रद्धावान् लभते ज्ञानम्' इति वचनेन श्रद्धाया अधिकाराङ्गत्वादात्मनोऽधिकारित्वं सूचयन्नात्मानं विशिनष्टि—श्रद्दधानायेति ॥ १२ ॥

अन्वितार्थप्रकाशिका

कस्मादिति ॥ मुकुन्दः मुक्तिदः सात्वतां पतिर्भगवान् पितुर्गेहात् व्रजं महावनं कस्माद्धेतोर्गतः । भगवतः कंसभयशङ्काया असंभवादिति भावः । तथा ज्ञातिभिर्यादवैः सार्द्धं सह क वासं कृतवान् । यद्वा । व्रजं गतोऽपि ज्ञातिभिर्मित्रादिभिः गोपैः क वासं कृतवान् ॥ ९ ॥ व्रज इति ॥ केशवः व्रजे वसन् किम् अकरोत् । मधूनां पुर्यां मथुरायां द्वारकायां च वसन् किमकरोत् । तं वधमर्हतीति तदर्हणः न तदर्हणः अतदर्हणः वधानर्हस्तं मातुर्भ्रातरं कंसम् । अद्धा साक्षात् स्वयमेव कस्मादवधीत् ॥१०॥ देहमिति ॥ मानुषं मनुष्याकारं देहमाश्रित्य प्रकाश्य यदूनां पुर्यां मथुरायां द्वारकायां च वृष्णिभिः सह कति वर्षाणि अवात्सीत् । मधुपुर्यामिति पाठेऽप्ययमेवार्थः । तथा प्रभोः श्रीकृष्णस्य पत्न्यः कति अभवन् ॥ ११ ॥ एतदिति ॥ हे मुने ? हे सर्वज्ञ ? श्रद्दधानाय मे मह्यम् एतत्पृष्टम् अन्यत् अपृष्टं च कृष्णस्य विविधं चेष्टितं सर्वं विस्तृतं च वक्तुमर्हसि ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं प्रसक्तानुप्रसक्तं प्रश्नं कृत्वा 'कृतवान् यानि विश्वात्मा तानि नो वद' इति सामान्यतः पृष्टानि वीर्याणि विशेषतः पृच्छति चतुर्भिः ॥ कस्मादिति ॥ मुकुन्दः अकिंचिद्रूपालौकिकबन्धनतोऽत्यन्तदुरन्तात् संसृतिबन्धनतः स्वाश्रितानां मुक्तिप्रदः, भगवान् सकलैश्वर्यसंपन्नः श्रीकृष्णः, कस्माद्धेतोः, कस्मादिति भगवतः कंसभयशङ्काया असंभवादित्यर्थः । पितुर्वसुदेवस्य, गेहात्, व्रजं नन्दव्रजं, गतः । सात्त्वतां स्वभक्तजनानां पतिः, स्वयं स एव भगवान्, ज्ञातिभिर्यदुभिः, सार्द्धं सह, क कस्मिन् स्थाने, वासं निवासं, कृतवान् ॥ ९ ॥ व्रज इति ॥ को ब्रह्मा च ईशो रुद्रश्च केशौ पुत्रपौत्रौ स्तोऽस्येति केशवः स्वयं विष्णुः, 'शंभोः पितामहो ब्रह्मपिता शक्राद्यधीश्वरः' इति पाद्मोक्तेः । व्रजे नन्दगोष्ठे मधुपुर्यां मथुरायां च, वसन् सन्, किम् अकरोत् । मातुर्देवक्याः, अद्धा साक्षात्, भ्रातरम् अत एव, अतदर्हणं वधानर्हं कंसं कुत इति शेषः । अवधीच्च मारितवानेव । अद्धेत्यस्य साक्षात् कस्मादवधीदिति वा योजना ॥ १० ॥ देहमिति ॥ कृष्णः, मानुषं मनुष्यवदवभासमानं, देहं दिव्यमङ्गलविग्रहम् आश्रित्य परिगृह्य, वृष्णिभिर्यदुभिः सह, यदुपुर्यां द्वारकायां, कति कियन्ति, वर्षाणि वत्सरान्, अवात्सीत् ऊषितवान् । प्रभोः कृष्णस्य, पत्न्योऽङ्गना इति कियत्यः, अभवन् बभूवुः ॥ ११ ॥ एतदिति ॥ हे मुने, हे सर्वज्ञ साकल्येन श्रीकृष्णचरित्राभिज्ञ, एतत् पृष्टं, अन्यत् अपृष्टं च, यदिति शेषः । कृष्णविचेष्टितं श्रीकृष्णचरित्रं भवेत्, तत्तत्, सर्वं श्रद्दधानाय श्रवणोपयुक्तत्वरान्विताय, मे मह्यं, विस्तृतं यथा भवति तथा, वक्तुम् अर्हसि ॥ १२ ॥

हिन्दी अनुवाद (कर्दमक्षमा)

भगवान् मुकुन्द अपने पिताजी श्रीवसुदेव जी के घर से व्रज में किस लिए पधारे ! शुद्ध सत्त्व गुण वालों के पति उन भगवान ने वहाँ ज्ञातिजनों के साथ कहाँ निवास किया ? ॥९॥ भगवान केशव ने व्रज में और मथुरा में रहते हुए क्या क्या किया ? और निज अम्मा के भैया मामा कंस को मारने जैसा निन्दित कार्य कैसे किया ॥ १० ॥ मनुष्य आकार स्वीकार कर यादवों के

साथ यदुपुरी द्वारका में कितने वर्षपर्यन्त रहे ! और भगवान की पत्नियाँ कितनी थी ! ॥ ११ ॥ हे शुक मुने ! भगवान की सर्व-लीलाओं के ज्ञाता सर्वज्ञ ! मुझे श्रद्धालुओं को जो लीलाएँ मैंने पूछी हैं। तथा अन्य जो कोई भी हो वे सर्व भगवान कृष्ण की लीलाएँ विस्तार से कहने के लिए आप समर्थ हों ॥ १२ ॥

नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते । पिबन्तं त्वन्मु[1]खाम्भोजच्युतं हरिकथामृतम् ॥ १३ ॥

सूत उवाच

[2]एतं निशम्य भृगुनन्दन साधुवादं वैयासकिः स भगवानथ विष्णुरातम् ।
प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः ॥ १४ ॥

श्रीशुक उवाच

सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम । वासुदेवकथायां ते यज्जाता नैष्ठिकी [3]रतिः ॥ १५ ॥
वासुदेवकथाप्रश्नः पुरुषांस्त्रीन् पुनाति हि । वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥ १६ ॥

कर्दमक्षमा

अन्वयः—त्यक्तोदम् अपि एषा दुःसहा क्षुत् त्वन्मुखाम्भोजच्युतं हरिकथामृतं पिबन्तं मां न बाधते ॥ १३ ॥ भृगुनन्दन एतं साधुवादं निशम्य अथ स भगवान् (स भगवान् इत्यप्यर्थः) वैयासकिः विष्णुरातं प्रत्यर्च्य भागवतप्रधानः कलिकल्मषघ्नं कृष्णचरितं व्याहर्तुम् आरभत ॥१४॥ राजर्षिसत्तमः वासुदेवकथायां यत् ते नैष्ठिकी रतिः जाता तव बुद्धिः सम्यग् व्यवसिता ॥१५॥ वासुदेवकथाप्रश्नः यथा तत्पादसलिलं त्रीन् (ब्रह्ममहादेवभगीरथान्) पुरुषान् हि पुनाति (तथा) वक्तारं पृच्छकं श्रोतॄन् (त्रीन्) पुनाति हि ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु क्षुत्तृड्भ्यां पीडितस्य तव कुतः श्रवणावकाशस्तत्राह । नैषेति । त्यक्तोदकस्यापि मम जीवनं हरिकथामृतपाननिमित्तम् । तदुपरमे सद्य एव जीवितं न स्यादिति भावः ॥ ११ ॥ एवं साधुवादं समीचीनं प्रश्नम् । भागवतप्रधानो भागवतेषु श्रेष्ठः ॥ १४ ॥ व्यवसिता कृतनिश्चया । यद्यतो बुद्धेः ॥ १५–१६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एषेति या क्षुद्ब्रह्मण्यमपि मां मुनिकंठेऽहिं न्यधापयदिति द्योतयति त्यक्तोदमाचमनं विनेति बोध्यमन्यथा संध्योपासनादि-विहिताचमनाकरणादशुचेः श्रवणाधिकार एव न स्यादिति । पिबंतमिति वर्त्तमाननिर्देशेन क्षणमपि पानविरमे सैव विवेकहारिणी क्षुत्प्रादुर्भविष्यतीति ज्ञापयति । इहांभोजपदेन कथामृतस्य मधुरत्वमारोपितं तेन च तस्य मादकत्वं व्यज्य स्वस्य मत्तत्वादेव विप्र-शापादिसर्वदुःखविस्मारकत्वं ध्वनितम् । यद्वा—अमृतपदेन मुखांभोजस्य चंद्रत्वमारोपितं तेन मुखस्याम्भोजत्वात्सौरभ्यं चंद्रत्वाद्दाह्लादकत्वं सर्वश्रोतृमनोहारित्वं स्वस्य चकोरत्वं च व्यंजितं सर्वथैव श्रीकृष्णकथासक्तिर्योतितेत्यन्ये ॥ १३ ॥ प्रत्यर्च्य संश्लाघ्य । व्याहर्त्तुं वक्तुम् । भागवता भगवद्भक्ता एव प्रधानानि यस्य स तथा । 'प्रधानं प्रकृतौ मुख्ये' इति कोशात् । 'नित्यं विष्णुजनप्रियः' इत्युक्तेः ॥ १४ ॥ निश्चलतया स्थितिर्निष्ठा तद्वती नैष्ठिकी उत्कर्षवती वा सर्वोत्कृष्टश्रीकृष्णचरितानुयोगात् । 'निष्ठोत्कर्षे व्यवस्थायाम्' इति यादवः ॥ १५ ॥ तत्पादसलिलं श्रीगंगा शालग्रामतीर्थं वा । गंगा तु त्रीन् स्वर्गमर्त्यपाताललोकान्पुनातीति । यद्वा—"गंगेति श्रवणात्प्रश्नात्कथनाच्च शुचिर्भवेत् । किं पुनर्दर्शनात्स्नानान्महिमानं ब्रुवे ततः ॥" इत्यादिपुराणाच्च । एवं "शालग्रामशिलातोयं सर्वेषां सर्वपापहम्" इत्यपि ज्ञेयम् । "शालग्राममणौ यंत्रे स्थंडिले प्रतीमायां वा विष्णुमर्चयेत् । शालग्रामशिलातोयं यः पिबेत्तस्य पापं न विद्यते कोटिजन्माघनाशनं विष्णुपादोदकमवश्यं पेयम् । भूमौ बिंदुपातनादष्टगुणपापवृद्धिः" इति तैत्तिरीयगौतमगृह्यसूत्र-चतुर्दशाध्याये पूजाप्रकरणोक्तेः । शालग्रामः साक्षाद्विष्णुमूर्तिरेवेति तज्जलं गंगावत्पादजलमेव "शालिग्रामशिलातोयं यो ददाति करोति यः । यो वा पिबति विप्रेंद्र न स गर्भगृहे वसेत्" इति त्रिपावनत्वं श्रूयते विष्णुधर्मे गंगावत् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो भगवन् ! मया पूर्वं महानुभावविप्रापराधजन्मानुतापदुःखमच्चिरतः प्राणानां त्याजकतया लब्धं येनैवोदकमपि त्यक्तम् किन्त्वनेन कथामृतेनैव ते रक्षिताः अतस्तद्विनाऽधुनैव मत्प्राणा निर्यास्यन्तीत्याह—नेति । अतिदुस्सहा अतिकृच्छ्रेणैव न तु

---

[1] भोजाच्च्युतं—वीर. भोजसृतं—विज. [2] एवं—श्री. वंशी. जीव. वीर. विश्व. शुक. [3] मति—वीर.

स्वेच्छया सह्येति मुनिगले मृतसर्पनिक्षेपहेतुमदीयतृष्णावत् सर्वानर्थमूलमपि सेत्स्यत्यर्थः । तत्राप्येषा अनशनोत्था तत्रापि हेतुविशेषत्यक्तोदमपि उदकमपि त्यक्तवन्तमित्यर्थः । तादृशतृष्णयापि सहितेति विवक्षितम् । सापि मां न बाधते तथा पीडां नानुभवामीत्यर्थः । यद्वा, अन्यैरतिदुःसहापि मामपि सदा विविधभोगेन मृदुतराङ्गमपि तत्र त्यक्तोदकमपि न बाधते । किम्वा कथाश्रवणादौ किञ्चित् विघ्नमपि कर्तुं न शक्नोतीत्यर्थः । नञः सर्वादौ निर्देशः निषेधस्यात्यन्तापेक्षया, तत्र हेतुः, हरेः सर्वदुःखहरस्य भगवतः कथैवामृतं संसारविस्मरणादिना परममादकत्वान्मधुरतरत्वाच्च तत्पिबन्तं परमासक्त्या सेवमानमित्यर्थः । अतः क्षुधामात्रनिरसनं तस्या किमाश्चर्यमिति भावः । एवं प्रसिद्धामृताद्वैशिष्ट्यमुक्तम्, वर्तमानप्रयोगेण पानाविच्छेद उक्तः । अतस्तद्विच्छेदोऽनुचित इति भावः । यद्वा, पाने प्रवर्त्तमानमात्रं तदारम्भेवारभ्येत्यर्थः । किं पुनरधुना श्रीकृष्णकथां पिबन्तमिति भावः । किञ्च, तव मुखमेवाम्भोजं सुन्दराकारत्वादिना तस्मात् परमामोदयुक्तात् पात्रात् क्षरितमिति गुणप्रकर्षो दर्शितः, श्रीभागवतोत्तममुखेन भागवतकथाया माधुरीविशेषोदयात्, यद्वा, अमृतक्षरणेनाऽऽस्याम्भोजस्यालौकिकत्वं दर्शितम् । तादृगम्भोजं यद्वदमृतमेव स्रवति तद्वत्त्वन्मुखमपि श्रीहरिकथामृतमेव स्रवतीति, एवं श्रीपरीक्षितो गाढरागव्यक्तिर्जाता ॥ १३ ॥ तादृशतदुक्त्या परमप्रीतस्सन् श्रीबादरायणिः प्रवक्तुं प्रवृत्त इत्याह—एवमिति । ईदृशं भृगुनन्दनेति शौनकस्य सम्बोधनं प्रहर्षोदयात् अथ तत्प्रश्नानन्तरमेव सः परमानिर्वचनीयमाहात्म्यः यो वैयासकिः वेदव्यसनात् व्यासः तस्य सर्ववेदतत्त्वज्ञस्य परमसङ्कल्पलब्धः पुत्रः भगवान् "उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति" इति श्रीविष्णुपुराणात् किम्वा भगवद्भागवतयोः समानादरणीयत्वेन "साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्" इति रीत्या चाभेदाभिप्रायात् । विष्णुना गर्भे प्रविष्टेन भगवता रातं ब्रह्मास्त्रतो रक्षित्वा श्रीयुधिष्ठिरादिभ्यो दत्तम्, किम्वा रातं स्वीकृतमिति तस्यापि परमभागवतत्वमुक्तम् प्रत्यर्च्य वक्ष्यमाणप्रकारेण विविधश्लाघया सम्मान्य कृष्णस्य सर्वचित्ताकर्षकस्य भगवतश्चरितम् । किञ्च कलौ यत् कल्मषं सुदुस्तरं पापं तदपि, यद्वा सर्वपापहेतोः कलेरपि किं पुनस्तत्कालीनजनस्य कल्मषं दोषम्, यद्वा "किं तत्त्वं किं फलं किम्वा साधनम्" इत्यादिविषयकः कलिः कलह एव कल्मषं श्रीभगवन्माहात्म्यानिर्धारात् तद्धन्तीति तथा तत् श्रीभगवच्चरितश्रवणादिनैव तन्माहात्म्यविज्ञानादशेषकलहदोषनिवृत्तेः, यद्वा, कलिश्च अत एव कल्मषञ्च सर्वदुःखमूलं च पापं संसारदुःखमेव हन्तीति सर्वदुःखहन्तृत्वमुक्तम्, यद्वा, कथम्भूतं विष्णुरातम् । कलिकल्मषघ्नं कलिरूपकल्मषजयिनम् ननु, राजसभायां विविधवासनमुनिगणाग्रे परमगोप्यं तत्कुतः प्रकाशितं तत्राह भागवतेति । भागवता एव श्रीभागवतशास्त्रमेव वा प्रधानं श्रेष्ठं परमादरणीयं यस्य सः तदुक्तम्, "हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः । अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः" इति । सर्वत्राप्यनन्यापेक्षत्वादिति भावः । अथवा, भागवतश्रेष्ठत्वात्तेषामपि मनः सजातीयं कृतवानिति भावः । यथोक्तं श्रीप्रह्लादमुद्दिश्य "स उत्तमश्लोकपदारविन्दयोर्निषेवया किञ्चन सङ्गलब्धया । तन्वन् परां निर्वृतिमात्मनो मुहुर्दुःसङ्गदीनस्य मनः समं व्यधात्" इति अत्र प्रधानशब्दस्य पुंस्त्वमार्षम् ॥ १४ ॥ व्याहर्त्तुमारभतेत्युक्त्वाऽपि श्रीशुक उवाचेति पुनः पृथक्करणं वचनम् । श्रोतृणामुक्तार्थविष्टानामवधापनार्थम् । तेषां वक्ष्यमाणश्रवणौत्सुक्ये तु क्वचित्तदपि नास्तीति । एवमन्यत्रापि ज्ञेयम् । तत्र श्रीशुक इति प्रेमभरोदयेन शुकवन्मधुरभाषणात् । तथा च ब्रह्मवैवर्त्ते व्यासं प्रति श्रीकृष्णवाक्यम् "व्यास ! त्वदीयतनयः शुकवन्मनोज्ञं ब्रूते वचो भवतु तच्छुक एव नाम्ना" इति । एवमग्रेऽप्यूह्यम् । वक्तृश्रोत्रोरन्योऽन्यं प्रीणनेनैव कथायां रसो जायेतेति राज्ञः प्रश्नं प्रागभिनन्दति – सम्यगिति द्वाभ्याम् । सम्यग्व्यवसिता सम्यक् निश्चया वासुदेवस्य सर्वैश्वर्यप्राकट्यार्थं वसुदेवाज्जातस्य कथायां तच्छ्रवणे इत्यर्थः । नैष्ठिकी परमकाष्ठां प्राप्ता रतिः प्रीत्युत्कर्षस्तच्च युक्तमेवेत्याशयेन सम्बोधयति । राजर्षयो महातापसास्तेषु सत्तमेति मुनिसत्तमेति वत् । यद्यपि सामान्यतो भगवत्कथाश्रवणेन मुहुः प्रेम्णा विवशीभवन्तं राजानमवधापयितुं स्थाने स्थाने तत्सम्बोधनं तथापि तत्तत्प्रसङ्गवशात् कुत्रापि कश्चिद्विशेषो व्याख्यायते ॥ १५ ॥ अतस्त्वयाऽऽत्माऽहं मुनयोऽपि तत्कथनतच्छ्रवणादिहेतुमत्तः शोधिता इत्याशयेन सामान्यत आह—वासुदेवेति । तन्नाम्नः पुनरुक्तिस्तस्यैवोत्कर्षख्यापनेन तत्कथायाः प्रश्नोऽपि त्रीन् त्रिविधान् हि निश्चितं पुरुषानिति तेषामेव प्राधान्यात् । वक्तारं प्रश्नस्यैव पवित्रीकुर्वाणत्वात् वक्तृत्वेन स्थापितं सन्तमेव किमुत वक्तुं प्रवृत्तं किमुततरां स्वजन्मभूमिं प्रच्छकम् । अस्तु तावत्तद्द्वयमपि यत आनुषङ्गिकतया श्रवणमात्रेणापि तत्र वक्तुः प्रष्टुश्चैकत्वं तस्य तस्यानेकत्वायोग्यत्वात् । अधिकारानपेक्षया सर्वेषामेव भगवत्सम्बन्धमात्रेण पावने दृष्टान्तः । तस्य पादसलिलं गङ्गाजलं श्रीशालग्रामादिचरणामृतं वा तद्यथा प्रष्टृस्थानीयं तेन सेक्तारं प्रथमतः पुनाति ततो वक्तृस्थानीयं सिच्यमानञ्च ततः श्रोतृस्थानीयानानुषङ्गिकतया सिच्यमानसङ्गिनोऽपि तथेत्यर्थः । तथा चैकादशे —

श्रुतोऽनुपठितो ध्यात आदृतो वाऽनुमोदितः । सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोऽपि हि ॥ इति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

प्रायोपविष्टस्याशनायापिपासाभ्यामर्दितस्य तव कथं श्रवणोपयुक्तचित्तसमाधानसम्भवः ? इत्यत्राह—नैषेति । त्यक्तमुदकपानं येन तथाभूतमपि मां दुस्सहा सोढुमशक्या एषा क्षुत् न बाधते, तत्र हेतुं वदन्नात्मानं विशिनष्टि, त्वन्मुखाम्भोजाच्च्युतं गलितं हरिकथैवाऽमृतं तत् पिबन्तं मामित्यन्वयः ॥ १३ ॥ इत्थमापृष्टो भगवान् शुकः श्रीकृष्णचरित्रं विस्तरतः कथयितुमारेभ इत्याह सूतः—एवमिति । हे भृगुनन्दन शौनक ! एवमित्थं साधुवादं साधो परीक्षितो वादमुक्तिं प्रश्नरूपं निशम्य स भगवान्

वैयासकिः शुकः ततो विष्णुरातं परीक्षितं प्रत्यर्च्य प्रत्यभिनन्द्य कलिकल्मषघ्नं शृण्वतां वदताञ्च कलिकालकृतपापघ्नं कृष्णस्य भगवतश्चरित्रं व्याहर्तुं विस्तरतो वक्तुं दशमैकादशस्कन्धद्वयेन वक्तुमिति यावत्, आरभत प्रारेभे युक्तं चैतदित्यभिप्रायेण विशिनष्टि, भागवतप्रधानः भागवतं भगवत्स्वरूपगुणाद्यनुसन्धानमेव प्रधानं मुख्यं प्रयोजनं यस्य तथाभूतः ॥ १४ ॥ तावत्प्रत्यर्च्याह–सम्यगिति द्वाभ्याम्। हे राजर्षिसत्तम ! तव बुद्धिः सम्यग्व्यवसिता निश्चिता हेयोपादेयविवेकयुक्तेत्यर्थः। कुत एतज्ज्ञातव्यमित्यत्राह—यद्यस्माद्वासुदेवकथायामेव तव मतिः नैष्ठिकी निष्ठायुक्ता वासुदेवकथाश्रवण एव परिनिष्ठितेत्यर्थः ॥ १५ ॥ किं तच्छ्रवणनिष्ठामात्रेणेत्यत्राह–वासुदेवेति। वासुदेवकथाप्रश्न एव किं पुनस्तच्छ्रवणादिकमित्यभिप्रायेण प्रश्न इत्युक्तम्। यद्वा, प्रश्नप्रतिवचनतच्छ्रवणानां त्रयाणामुपलक्षणार्थः प्रश्नशब्दः। त्रीन् पुरुषान् पुनाति, कान् ? वक्तारं प्रतिवक्तारं पृच्छकं पृच्छन्त श्रोतॄंश्चेति त्रीन्। वक्त्रा प्रतिवक्त्राचैकैकेनैव भाव्यमभिप्रायेण वक्तारं पृच्छकञ्चेत्येकवचननिर्देशः। श्रोतृभिस्तु बहुभिरपीति बहुवचननिर्देशः। यथा तस्य वासुदेवस्य पादसलिलं गाङ्गमम्भः पुनाति तद्वदिति पवित्रीकरणमात्रे दृष्टान्तः। न तु पुरुषत्रयपवित्रीकरणे त्रयाणां तत्रासम्भवात्। यद्वा, यथा गाङ्गं सलिलमुपस्पृशन्तं तत्पितरं पितामहं च पुनाति तद्वदिति दृष्टान्ताभिप्रायः। यथा तत्पादसलिलमुपस्पृशन्तमेकमेव पुरुषं पुनाति न तथा तत्कथाप्रश्नः पुनाति अपि तु त्रीनिति व्यतिरेकदृष्टान्तो वाऽभिप्रेतः ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

क्षुधितस्य तव दौर्बल्यान्मनो नेच्छति श्रोतुमिति तत्राह—नैषेति। त्यक्तोदम् आचमनजलमन्तरेणेति शेषः। ननु, दिव्यमन्त्रौषधादिकमन्तरेण क्षुधादिकं मानुषदेहं बाधत एव अतः कथं न बाधते ? इति तत्राह—पिबन्तमिति। सूनङ्गलितम् ॥ १३ ॥ सूतः शौनकं प्रत्याह—सूत इति। हे भृगुनन्दन शौनक ! प्रत्यर्च्य प्रतिसम्भाव्य राजानमिति शेषः ॥ १४ ॥ कीदृशी प्रत्यर्चा ? इति तामाह—सम्यग्व्यवसितेति। नैष्ठिकी श्रीनारायणोत्कर्षसम्बन्धिनी "निष्ठोत्कर्षे व्यवस्थायाम्" इति यादवः। निश्चलताया स्थितिर्निष्ठा तद्वतीति वा ॥ १५ ॥ न केवलं हरिकथाप्रश्नः प्रष्टारं पुनाति किन्तु वक्तारमपीत्याह—वासुदेवेति। तत्पादसलिलं भागीरथी शालग्रामतीर्थं वा "गङ्गा गङ्गेति यो ब्रूयात्" इत्यादेः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नैषेति श्रीपरीक्षितो गाढरागव्यक्तिः त्यक्तोदमपीति उदकमपि त्यक्तवन्तमित्यर्थः सम्यक् ॥ १३–१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

क्षुधातृषाव्याकुलस्त्वं क्षणं विश्राम्येति भावादीरित्याहनैषेति। या क्षुत् ब्रह्मण्यमपि मां मुनिगले सर्पं न्यधापयदिति भावः। त्यक्तोदं सम्प्रति तु त्यक्तजलमपि तस्या अपि बाधाभावे हेतुः। पिबन्तमिति। वर्त्तमाननिर्देशेन क्षणमपि पानविरामे सैव विवेकहारिणी क्षुधा प्रादुर्भविष्यतीति ज्ञापयति। अत्राम्भोजपदेन कथाऽमृतस्य मधुत्वमारोपितम्। तेन च तस्य मादकत्वमभिव्यज्य स्वस्य मत्तत्वादेव विप्रशापादिसर्वदुःसहदुःखविस्मारकत्वं ध्वनितम्। यद्वा, अमृतपदेन मुखाम्भोजस्य चन्द्रत्वमारोपितम्। तेन मुखस्याम्भोजत्वात् सौरभ्यं चन्द्रत्वादाह्लादकत्वं सर्वश्रोतृजनतमोहारित्वं स्वस्य च चकोरत्वं व्यञ्जितम्। सर्वथैव कथायां गाढासक्तिर्द्योतिता ॥ १३ ॥ हे भृगुनन्दन शौनक ! कलौ जनिष्यमाणानामपि कल्मषं संसारदुःखं हन्तीति तत्, यद्वा कलिरूपं कल्मषं हन्तीति विष्णुरातविशेषणमपि भागवतेषु प्रधान इति पुंस्त्वमार्षम्। यद्वा, भागवता एव मान्यत्वेन प्रधानानि यस्य सः ॥ १४ ॥ सम्यग्व्यवसिता सम्यक्कृतनिश्चया यद्यतो बुद्धेः राजर्षिसत्तमेति भा महामानद ! मुनिसत्तमेति त्वया सम्बोधितात्मनोऽपि त्वयि राजत्वमधिकमस्तीति ज्ञापयति श्लेषेण तु राजदन्तादित्वात् त्वमृषीणां सत्तमानां च राजा श्रीकृष्णप्रियतमत्वादेव यतो जन्ममरणकालयोर्ब्रह्मतेजोऽपि व्यर्थीकरोषीत्यर्थमप्यन्तरुपचिक्षेप ॥ १५ ॥ तत्पादसलिलं श्रीशालग्रामादिचरणामृतं त्रीन् पुरुषान् सेक्तारं सिच्यमानं तदुभयसङ्गिनश्च पुरुषान्, यद्वा, गङ्गा यथा त्रीन् ऊर्ध्वमध्याधोलोकान् पुनाति तथैव वक्त्रादीन् त्रीन् पुरुषान् यथापूर्वं श्रेष्ठयन् ॥१६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीकृष्णवीर्यश्रवणे त्यक्तोदस्यात्मनोऽव्यग्रताहेतुं हरिं हरिकथां गुरुकृपाविशेषं चाह—नैषेति ॥ १३ ॥ श्रीकृष्णलीलाश्रवणे राज्ञः प्रीत्यतिशयमवधार्य दुष्टनिरोधं दूरीकृत्य क्रमप्राप्तान्मुख्यनिरोधात्प्रागाश्रयं वक्तुमारम्भं कृतवान् शुक इत्याशयेनाह शौनकं प्रति सूत–एवमिति। साधुवादं सत्प्रश्नम् ॥ १४ ॥ हे राजर्षिसत्तम ! ते तव नैष्ठिकी रतिः क्षुत्पिपासादिभिरदुष्टा या प्रीतिरस्ति। यत् यथा तव वासुदेवकथायां सम्यग्व्यवसिता सम्यक्कृतनिश्चया बुद्धिर्जाता ॥ १५ ॥ तत्पादसलिलं श्रीगङ्गोदकादिरूपं ब्रह्मशिवभगीरथादीनिव ॥ १६ ॥

श्रीसुबोधिनी

एवं द्वादशभिः प्रश्नं निरूप्य सर्वथा कथनार्थमकथने वा बाधकमाह—नैषेति। आर्तिकथनायैषेति। अप्रयोजकत्वं वारयति–अतिदुःसहेति। क्षुन्मामिति प्रमाणकथनम्। उदकत्यागः प्रकारान्तरेण देहरक्षाभावार्थः। एषा परमोत्तमाधिकारस्थितिः।

स्वकस्योभयनाशकत्वात् तथोक्तम् । क्षुधो भ्रातृव्यत्वश्रवणाद्वश्यबाधकत्वात्तदेवोक्तम् । शीघ्रकथनाय वर्तमानप्रयोगः । अम्भोजत्वममृतस्वादात् । कथाकथने वक्तुः परवशत्वापादकं चरित्रमिति ज्ञापयितुं च्युतमिति । पानमन्तःप्रवेशनमविस्मरणाय । इदानीमपि पूर्वोक्तकथनानुसन्धानाद्वर्तमानप्रयोगः । संभावनयेत्यन्ये । आनन्दत्वचेतनत्वद्योतनायाह—**हरीति** । विशेषतो दुःखनाशकत्वं तत्र प्रसिद्धमिति । विशेषतो हरिकथा अमृतमिवेत्यमृतपदे यौगिकोऽर्थो गृहीतः । असङ्कोचान्मुक्तिरेव फलति । अतस्त्वमेव मोक्षदातेति वक्ता स्तुतः ॥ १३ ॥ शौनकादीन् सावधानतयाभिमुखान् करोति सूतः—**एतमिति** । परस्पराभिनन्दनेनायमर्थः स्फुरतीति तथा प्रतिपाद्यते । एतस्य प्रश्नस्य मूलत्वात् प्राधान्येन निर्देश **एतमिति** । पुनः पुनः प्रश्ने वक्तुरुद्वेगः सम्भवति । आक्षेपे क्रोधः । तदुभयं निरस्यति—**निशम्येति** । नितरां श्रुत्वा, अर्थतोभिप्रायतश्च समीचीनमिति, न तु दाक्षिण्येनेत्यर्थः । विश्वासार्थं **भृगुनन्दनेति** सम्बोधनम् । हेतुभूतं विशेषणं **साधुवादमिति** । शब्दतो वदनं वादः साधूनां वादः साधुवादः, साधवः पदार्था भगवत्सम्बन्धिनोऽस्मिन्नुच्यन्त इति । साधूनां वादा यस्मादिति वा । वीतरागा भगवत्कथामेव कुर्वन्तीति निरूपितप्रमेयस्य साधुवादत्वज्ञापनाय विशेषणम् । भगवद्भक्ताश्चेन्मिलन्ति तदेवं वाक्यं प्रष्टव्यमिति महता कष्टेन व्यासो भगवद्गुणप्रतिपादकमिदं शास्त्रं चकार । तस्य प्रवर्तनार्थं च शुकः प्रवृत्तः । तादृशं प्रश्नरूपं साधुवादमेवापेक्षते । महता प्रयासेन भगवन्मतप्रवर्तकत्वात् । तदाह—**वैयासकिरिति** । तथापि भगवच्चरित्रस्य दुर्ज्ञेयत्वात्कथमुत्तरमत आह—**स भगवानिति** । भगवता सहितः । तदन्तःस्थितो भगवानेवोत्तरं प्रयच्छतीत्यर्थः । तर्ह्येव भगवान् स्वयमुत्तरं प्रयच्छति कथमित्याशङ्क्याह—**विष्णुरातमिति** । अथेति भिन्नोपक्रमे । एतावत्कालं शुकः स्वयमेवाह । इदं चरित्रं तु तत्र स्थितो भगवानेवाऽऽहेति भिन्नः प्रक्रमः । विष्णुना एतदर्थमेव रक्षितः । अन्यथा पुरुषार्थो न सिद्ध्यतीति किं रक्षणेन । श्रवणे निमग्नचित्तत्वात् प्रत्यर्चनम् । पूर्वं शुकः स्तुतः । तेन शुकोऽपि तमग्रे स्तौतीति प्रत्यर्चनम् । पूज्यो हि भगवान्, तद्गुणाश्च । ते चोभयत्र पूर्णा इति परस्परं पूजा । एवमेव भगवत्कथायां परस्परार्चनं शास्त्रसिद्धम्, 'येऽन्योन्यतो भागवता' इति वचनात् एतावदुक्तोऽस्य फलमाह **कृष्णेति** । अवतारचरित्रत्वेनालौकिकत्वमुक्तम् । पापस्य प्रतिबन्धकत्वान्नात्र श्रद्धा भविष्यतीत्याह—**कलीति** । षण्णां शोधकानां देशादीनां धर्महेतूनां चाभावाच्चरित्रमेव शोधकम् । अन्यथा युगे धर्मप्रवृत्तिर्मोक्षो वा न स्यात् । महता प्रक्रमेण समारम्भे हेतुः **भागवतप्रधान इति** । भागवता एव प्रधानं यस्येति । विशेषेणाहर्तुं वक्तुमारम्भं कृतवान् । अत एव मननपरित्यागेन कथामेव कथयति, सभाजयति च तामेव, न ज्ञानादिकमिति भावः ॥ १४ ॥ समानशीलव्यसनं दृष्ट्वा राजानं प्रश्नं चाभिनन्दति द्वाभ्याम् **सम्यगिति** । भगवति लयात्पूर्वं स्थिरप्रज्ञतैव सर्वोत्तमा । सम्यग् व्यवसायं भगवत्कथैव श्रोतव्या, नान्यत्किञ्चिदित्यध्यवसायं प्राप्ता । महर्षीणामप्येतद्दुर्लभं, तव तु जातमित्याश्चर्येण सम्बोधनं—**राजर्षिसत्तमेति** । राजा स्वधर्मनिष्ठः, स च लौकिकः । ऋषिर्वैदिकधर्मनिष्ठः । स चासौ सन् भगवद्धर्मनिष्ठः । तत्राप्युत्कर्षो भगवदङ्गीकारात् । अत एव तवैतादृशो व्यवसाय उचित इति भावः । द्विधा च निश्चयः सम्भवति, शास्त्रार्थनिश्चयात् स्वरुच्या वा । तत्राद्यो मध्यमः । त्वं तूत्तम इत्याह—**वासुदेव इति** । यत् यस्मात् **कथायां रतिर्जाता** । सापि न चञ्चला, न केनाप्यन्यथाकर्तुं शक्या । निश्चयस्य सम्यक्त्वपोषिका रतिः । यस्मान्निश्चयाद्वासुदेवकथायां रतिर्जातेति वा । अथवा हेतुद्वयं राजाभिनन्दन एव । दुर्लभत्वं कथारतेर्वदन् कारणभूतं निश्चयमाह । अध्यवसायनयोनिष्प्रश्नत्वात्सभाजनम् । प्रश्नेन चैवम्भावस्तस्याभिज्ञातोऽतोर्थात्प्रश्न एव स्तुतः ॥ १५ ॥ प्रकारान्तरेणापि साक्षात् प्रश्नं स्तौति—**वासुदेवेति** । वासुदेवस्य मोक्षार्थत्वात् तत्सम्बन्धि यत्किञ्चिद्वस्तु तत् पवित्रयत्येव । तत्रापि कथा तत्सम्बन्धिगुणदोषाभिनिवेशजनिका । तत्रापि प्रश्नस्तज्जिज्ञासाया दार्ढ्यहेतुः । **त्रीन् पुरुषान्** । प्रश्नानन्तरं कश्चिद्वक्ता, कश्चिच्छ्रोता मध्यस्थः, प्रश्नकर्ता च त्रयो भवन्ति । स्वस्थचित्ततया पूर्वं वक्ता भगवद्गुणाभिज्ञोऽपि तूष्णीं स्थितः । तत्र भगवद्गुणेषु तूष्णीम्भावः पापादेवेत्यध्यवसीयते । प्रश्ने च यदुद्गता भवन्ति गुणास्तत्पापनाशादेव । श्रोतृणामपि विद्यमाने पापे भगवत्प्रवणं चित्तं न भवतीति, प्रश्ने च जात इति तत्पापनाशकत्वमपि । प्रश्नं करिष्यामीति यदा मनसि प्रश्न उद्गतस्तदा पापे विद्यमाने मुखान्न निःसरति । यदा पुनर्निःसरति तदा तस्यापि पापं नाशयतीति ज्ञायते । अतस्त्रीन् पुरुषान् पुनातीति युक्तं, तदाह—**हीति** । प्रश्नकर्तुः पितृपितामहादयो भविष्यन्तीति तद्व्यावृत्त्यर्थं गणयति—**वक्तारमिति** । वक्तारमुत्तरस्य । पृच्छकः प्रश्नकर्ता । श्रोता मध्यस्थः । यद्यपि श्रोतृत्वं पूर्वयोरप्यस्ति, तथापि निमित्तं भिन्नमिति तदेव प्रयोजकत्वेनोक्तम् । पुरुषपदं पूर्ववत् । तत्र कार्यान्तरार्थान् वारयति—**त्रीनिति** । पावित्र्यमनेकविधं सम्भवतीति तद्व्यावृत्त्यर्थं पावनत्वं विशिनष्टि दृष्टान्तेन—**तत्पादसलिलं यथेति** । प्रश्नः क्वचिदुद्गतः । कश्चित् प्रेरितवान् । कश्चिदभिमुखीचकार । नैतावता परमः पुरुषार्थः सिद्धः, यदा पुनस्त्रयाणां चित्तं भगवदेकनिष्ठं करोति तदा हि सफलता । गङ्गा च पुनः साक्षाद्भगवत्सेवौपयिकं शरीरमुत्पादयति पूर्वसम्बन्धि पापं तत्कार्यं नाशयित्वा, तथा भगवत्कार्योपयोगि चित्तं यावता भवति तावतीं शुद्धिं करोतीत्यर्थः । **त्रीन्** त्रिलोकस्थान् सात्त्विकादिभिन्नान् वा । कूलद्वयस्थितान्मध्यस्थान् वा । ब्रह्माणं महादेवं भगीरथं च वा ॥ १६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

नैवेत्यत्र सम्भावनयेति । कथयिष्यतीतिसम्भावनया । वर्त्तमानसामीप्याद्वर्त्तमानप्रयोग इत्यर्थः ॥ १३ ॥ **सम्यगित्यत्र** पूर्वार्द्धे व्यवसायशब्देनोक्तं निश्चयं स्तोतुमुत्तरार्द्धं वदतीत्याशयेन तदवतारयन्ति **द्विधेत्यादि** । द्विधा व्याकुर्वन्ति । तत्र **यस्मादि-**

स्यादि रतीत्यन्ता एका व्याकृतिः। तथा च नैष्ठिकरतिपोषितनिश्चयवत्त्वात्त्वद्बुद्धिरुत्तमेत्यर्थः। **यज्जातेति**पदं समस्तमङ्गीकृत्य द्वितीया व्याकृतिः **यस्मान्निश्चया**दित्यादि। तथा च निश्चयोत्पन्ननैष्ठिकरतिमत्त्वात्त्वद्बुद्धिस्तथेत्यर्थः। पूर्वार्द्धे 'तवे'तिपदे सत्यप्युत्तरार्द्धे 'त' इति पदं यदुक्तं ततः प्रकारद्वयेनापि राजैव स्तूयत इत्याशयेन तृतीयं पक्षमाहुः—**अथवे**त्यादि। **पूर्वार्द्धोक्तं** हेतुद्वयं राज्ञो नैष्ठिकरत्याधारतायोग्यत्व एव सम्भवतीति तद्द्वारा राजस्वरूपमेव स्तूयत इति तथेत्यर्थः। तन्मुत्पादयन्ति **दुर्लभत्वमित्यादि कारणभूतमिति**। कथारतिकारणभूतम्। तथा च सभायां यद्यपि देवब्रह्मराजर्षयः सर्वेऽपि तिष्ठन्ति तथापि तवैव जातमिति त्वमेव सभाजनीय इत्यर्थः। एतेन सिद्धमर्थान्तरमाहुः—**प्रश्नेने**त्यादि ॥ १५ ॥ **वासुदेवकथे**त्यत्र **पूर्ववदिति**। 'निवृत्ततर्षै'रितिश्लोके व्याख्यातपुंपदवत्। तथा च प्रश्नोपि आसुरव्यतिरिक्तानेव त्रीन् पुनातीत्यर्थः ॥ १६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नैषेत्यस्याभासे **बाधकमिति** भावप्रधानम्। अकथने सति क्षुधः प्राणबाधकत्वमाहेत्यर्थः। व्याख्याने **उदकत्याग** इति। पाञ्चभौतिके शरीरेऽन्नजलाभ्यां पृथिव्यंशजलांशयोः पोषणं क्रियते, अन्यथा तेजोंऽशस्तावंशौ दहेत्तथाऽन्नाभावे केवलजलेनापि जलांशाभिवृद्ध्या तेजोंऽशसंशमनेन देहरक्षा भवति तेन प्रकारेण रक्षाभावार्थ इत्यर्थः। **एषेति** देहरक्षार्थं सर्वथा यत्नाभाव इत्यर्थः। उभयनाशकत्वादिति। जलं क्षुत्तृषोरुभयोरपि नाशकमतो जलग्रहणे क्षुदपि न बाधेतेत्यर्थः। तर्हि विशेषात्तृण्न बाधत इत्येव कुतो नोक्तमित्यत आहुः—**क्षुध** इति। **त्वन्मुखाम्भोजच्युत**मितिपदस्य तात्पर्यमाहुः—**आनन्दत्वेति**। कथामृतस्यानन्दत्वद्योतनायाम्भोजसम्बन्धश्चेतनत्वद्योतनाय स्वत एव 'च्युत'मिति चोक्तमित्यर्थः। सत्त्वं तु स्वत एव कथाया इति भावः। तेन कथायाः सच्चिदानन्दात्मकत्वमुक्तमिति भावः ॥ १३ ॥ **एतमित्यत्र नितरां श्रुत्वेति**। यद्यप्युपसर्गसहितस्यैव श्रवणार्थत्वं तथापि श्रुत्वेत्यादिपदानि विहायालोचनार्थकशमधातुनिष्पन्नपदोक्त्याऽऽलोचनपूर्वकं श्रवणं सूच्यत इति भावः। तथा च तात्पर्यार्थोऽयमुक्तो न तु वाच्यार्थ इति ज्ञेयम्। **शब्दतो वदनमिति**। **अस्मिन्पक्षे साधूनां** पदार्थानां वादः कथनं यत्रेतिविग्रहः। **उचमन्त** इति स्वर्थकथनम्। **निरूपितेति**। **उत्तरे** शुकेन निरूपितस्य **प्रमेयस्ये**त्यर्थः। पञ्चमीबहुव्रीहिणैतत्प्रश्नहेतुकस्योत्तरस्य वीतरागकथारूपसाधुवादत्वं ज्ञापितमिति भावः। **श्रवण** इति। 'निशम्ये'त्यनेन प्रश्नश्रवणे निमग्नचित्तत्वं शुकस्योक्तमतः प्रश्नं सम्यग्विभाव्य **प्रत्यर्चनं** कृतवानित्यर्थः। **अवतारचरित्रेत्वेनेति**। न तु प्रियव्रतादिवदावेशचरित्रमिदमित्यर्थः। **इत्याहेति**। एवमाशङ्का जायत **इति** हेतोस्तदाशङ्कानिवर्तकं कलीतिपदमाहेत्यर्थः। **अत एवेति** भागवतप्रधानत्वादेवेत्यर्थः ॥ १४ ॥ **सम्यगित्यत्र भगवति लयादिति**। 'यो बुद्धेः परतस्तु स' इतिवाक्याद्बुद्धेः परो भगवान्, तत्प्राप्तेः पूर्वं ततोऽवराया बुद्धेः स्थिरतैवोचिता न तु चाञ्चल्यं, तथा सति भगवत्प्राप्तिर्न स्यादिति भावः। लयानन्तरं तु परप्राप्त्यर्थमलौकिक एव सङ्घातः प्राप्स्यत इति लयात्पूर्वमित्युक्तम्। **अध्यवसायमिति**। संशयाद्यवस्थासु मध्ये निश्चयावस्थां प्राप्तेत्यर्थः। **स्वरुच्येति** उत्तरार्द्धोक्तकथारत्येत्यर्थः। **यस्मात्कथायामिति**। **यस्मादुत्तमत्वाद्धेतोस्तव रतिर्जाताऽतो** रतिज्ञापितस्वरूपसिद्धव्यवसायवत्त्वात्त्वमुक्तम् इत्यर्थः। विधियमाणमेवोत्तमत्वं 'यस्मा'दित्यनेन सामान्यत उक्तं, यस्माद्धूमवांस्तस्माद्वह्निमानितिवत्। अस्मिन्पक्षे व्यवसायस्य न रतिहेतुत्वं किन्तु 'स्वरुच्ये'तिकथनाद्विपरीतमिति ज्ञेयम्। **सम्यक्त्वेति** रतिसिद्ध एव निश्चयः समीचीन इत्यर्थः। **अथवेति** आद्यपक्षे राज्ञ उत्तमत्वे रतिसिद्धव्यवसायो हेतुरुक्तः। अस्मिन्पक्षे व्यवसायो रतिश्चेति द्वयं हेतुरिति भेदः। कार्यकारणभावस्तु 'यस्मान्निश्चया'दित्यनेनोक्त एवात्रापीत्याशयेनाहुः—**दुर्लभत्वमिति** ॥ १५ ॥ **वासुदेवेत्यत्र गुणदोषेति**। प्रतीतिमनुसृत्योक्तम्। लोकेपि गुणत्वेन प्रतीयमानाः पूतनामारणादयो दोषत्वेन प्रतीयमाना मातुलमारणादय उभयोरपि यथार्थज्ञानेन भगवत्यभिनिवेशः कथया जन्यत इत्यर्थः। **मध्यस्थ** इति। साक्षिवत्प्रश्नमुत्तरं च शृणोति न तु स्वयं किञ्चिद्वदतीत्यर्थः। **पूर्ववदिति**। 'निवृत्ततर्षै'रित्यत्र 'पुमा'नितिपदे इव। पश्ववतारस्त्र्यवतारव्यतिरिक्तानित्यर्थः। **कार्यान्तरार्थानिति**। कार्यान्तरमर्थः प्रयोजनं येषां, श्रोतृभिर्वक्त्रा वा सह वाणिज्याद्यर्थं कथास्थले समागतानित्यर्थः ॥ १६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

वैयासकिः सभगवानित्यस्य विवरणे एतावत्कालं शुकः स्वयमेवाह इदं चरित्रं तु तत्र स्थितो भगवानेवाहेति भिन्नः प्रक्रम इति। 'न मे विदुः सुरगणाः प्रभवं न महर्षय' इति वाक्याच्छ्रीकृष्णमहिमा न ज्ञातुं शक्यो महर्षिणा शुकेनापि। दशमस्कन्धे तु तस्यैव कृष्णस्य चरित्रं वाच्यं तत्कथं भवतीत्याशङ्क्य सूतः समाधत्ते—**सभगवानिति**। भगवता सहितः सभगवान्। भगवदाविष्ट इति यावत्। तथा च भगवानेव शुके आविश्य दशमचरित्रं कथयतीत्यर्थः 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'तिवाक्यात्स्वचरित्रज्ञानस्य कृष्ण एव सत्त्वात्। 'वैष्णवानां यथा शम्भु'रिति वाक्याच्छिवस्य परमभगवदीयत्वं, 'द्वैपायनाच्छुको जज्ञे भगवानेव शङ्कर' इति वाक्याच्छुकस्य शिवरूपताऽतो भगवदावेशस्तत्र युक्त एव। एतावतोऽर्थस्य सूचनार्थं मूले सकारः पठितः। अन्यथा सकारं विनापि चारितार्थ्यमिति सकारं न पठेत् ॥ १४ ॥ **वासुदेवकथाप्रश्न** इत्यत्र। ननु 'वक्तारं पृच्छकं श्रोतृ' नित्यनेन त्रयाणां स्फुटमभिधानात् 'त्रीन्पुनाती'युक्तिर्व्यर्थेत्याशङ्क्य तदभिप्रायं विशदयन्ति—**कार्यान्तरार्थान् वारयति त्रीनित्यनेनेति**। त्रिशब्दो मूले त्रीनेव पुनातीति नियमार्थः। तथा च 'व्यर्थं सत्किञ्चिदिष्टं ज्ञापयती'तिन्यायेनेष्टबोधनस्य शास्त्रार्थत्वाच्छास्त्रश्लाघ्यलक्षणयुक्तानेव

त्रीन्पुनाति न तु तदितरान्पुनातीति फलितम्। सति नियमे व्यावर्त्यापेक्षायां ये पुनर्वक्तृपृच्छकश्रोतारः कथनप्रश्नश्रवणादिकार्यं चित्तशुद्धिमुक्तिभक्त्यादिभिन्नधनार्जनादिरूपलौकिककार्यार्थं कुर्वन्ति ते व्यावर्त्यन्ते, तेषां धनार्जनादिप्रयोजनोद्देश्यकश्रवणादिकरणेन दोषविशेषोत्पत्त्या पावित्र्यासम्भवादतः कार्यान्तरार्थान् व्यावर्तयन्ति त्रीनिति सुष्ठूक्तमाचार्यवर्यैः ॥ १६ ॥

बुभुत्सुबोधिका

नैषत्यत्र बाधकमिति बाधत इति बाधकं क्षुद्रूपम्। आर्तोति आर्तिः पीडा। तेन गीतोक्ताधिकारिषु प्रथमाधिकार उक्तः। एषा समीपतरवर्तिनी। अप्रयोजकत्वं क्षुधः। प्रमाणकथनमिति प्रमा परीक्षिदनुभवः तस्याः करणं 'नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधत' इतिशब्दः तस्य कथनम्। इति न प्रमाणतावच्छेदकगौरवात्। किन्तु 'क्षुन्मा'मित्येव प्रमा। विभक्त्युत्पादकक्रियापदस्यापि वाक्यादेव ज्ञानात्, विशेषणवत्। प्रमाणतावच्छेदकं 'क्षुन्मा'मिति शब्दत्वम्। देहरक्षाभावार्थ इत्यत्र देहरक्षाभाव इति पाठे। देहो रक्ष्यतेऽनेनोदकेनेति देहरक्षमुदकम्। तस्याभावस्त्यागः। परमोत्तमेति विदुरोद्धववत्। 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववि'दित्यादिवाक्येभ्यः। यद्यपि शुकपरीक्षितोरुत्तमाधिकारस्तथाप्युत्तमपरमोत्तमयोर्नाधिकतारतम्यमिति परमोत्तमशब्दः। उभयेति क्षुत्तृडुभयनाशकत्वात् तथोक्तं त्यागविषयत्वमुक्तम्। ननूभयनाशकत्वे नास्तूदकस्य बाधकप्राथम्यं क्षुधस्तु कथं बाधकप्राथम्यमत आहुः क्षुधो प्राबल्यत्वेति। तदेवोक्तमिति क्षुद्बाधकमेवोक्तम्। वर्तमानेति 'बाधत' इति वर्तमानप्रयोगः। अस्य शीघ्रकथनार्थत्वं त्वेवम्, क्षुन्निष्ठो मन्निष्ठबाधानुकूलः वर्तमानकालिक एको व्यापार इतिबोधे नव्यर्थो भावः धात्वर्थे बाधेन्वेति। तथा च मन्निष्ठबाधाभावानुकूल इत्यर्थो भवति। एवं च शीघ्रकथनरूपप्रतीकाराभावे वर्तमानकालिकव्यापारो मन्निष्ठबाधानुकूलो भवेत् न तु मन्निष्ठबाधाभावानुकूल इति तत्त्वार्थः। अम्भोजत्वमिति शुकमुखं लालामृतं स्रवति, अमृतपदस्य जलवाचकत्वात्। अम्भोजं कालेमृतं कालेमृतं जलं स्रवतीति। पानमन्तरिति तथा च श्रोत्रद्वारान्तःप्रवेशनानुकूलो व्यापारः पिबतेरर्थः। फलमात्रमुक्तम्। शृण्वन्तमित्युक्त्या 'पिबन्त'मिति यदुक्तं तदाशयमाहुः अविस्मरणायेति। तथा च श्रोत्रेण ग्रहणानुकूलव्यापाररूपे शृणोतेरर्थे श्रुतस्य विस्मरणमपि स्यादतः 'पिबन्त'मित्युक्तम्। कथं शब्दपानमिति चेत् कथाया अमृतत्वं वक्ष्यते। अमृतं जलम्। कथा वायुरपि। वायुः शब्दतामापद्यत इति तेन परीक्षिदम्भक्षो वायुभक्षो वा निरूपितः। इदानीमिति प्रश्नकालेपि पूर्वोक्तकथनस्य 'कथितो वंशविस्तार' इत्यत्रत्यस्यानुसन्धानात्। 'पिबन्त'मिति वर्तमानप्रयोगः। वर्तमानार्थकलटः शतेति। सम्भावनयेति 'कथयिष्यतीति सम्भावनया 'वर्तमानसामीप्ये वर्तमानवद्वे'ति सूत्रेण पास्यन्तमित्यत्र 'पिबन्त'मिति वर्तमानप्रयोगः। अन्य इत्यस्वरसस्तु। स्वारसिकप्रयोगनिर्वाहेत्यकल्पनम्। त्वन्मुखाम्भोजच्युतमितिपदस्य तात्पर्यमाहुः आनन्दत्वेति। कथामृतस्य सत्त्वस्यानन्दत्वद्योतनायाम्भोजसम्बन्धः। चेतनत्वज्ञापनाय स्वत एव च्युतमिति चोक्तम्। सच्चिदानन्दात्मकत्वं कथाया उक्तम्। अमृतं जलं सत्त्वं निरुक्ते। अम्भोजं अमृतजलस्रावात्। आनन्दोऽश्रु स्रावयतीति साम्यात् अम्भोजमानन्दः। 'सर्वं सर्वमयं सर्वे सर्वार्थवाचका' इति श्रुतिवचनात्। यद्यज्जनकं तत्तद्गुणकं, यद्यद्गुणकं तत्तदात्मकमितिन्यायेन मुखाम्भोजमानन्दः। आनन्दोपलक्षणं वाच्युतामृतपदाभ्याम्। इयदवधि कृष्णसम्बन्धः चरित्रेग्रे चेति तद्वाक्यप्रबन्धे हरिसम्बन्धमाहेत्याशयेनाहुः हरिरिति। कथास्थितानामक्षरभेदभूतकालकर्मस्वभावानां नियामको हरिरिति हरिकथामृतम्। किंच 'वेदे रामायणे चैव पुराणे भारते तथा। आदावन्ते च मध्ये च हरिः सर्वत्र गीयत' इति वाग्विषयत्वं हरेरेवेदमित्थतया। ननु तर्हि षड्धर्माः धर्मी च प्रमाणाद्यप्रकरणसप्तकेषु प्रतिपाद्यमानाः कृष्णस्य कथं सङ्गच्छेरन्निति चेत् सत्यम्। इदमित्थतया वाग्विषयेपि महापरमात्मभगवच्छब्दानां प्रवृत्तेः सर्वैरादृतत्वात्। भक्तिवशात् तद्विदां प्रवृत्तेश्च। हरिस्तु अग्निशिखाया मध्येस्ति। 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः स ब्रह्मा स शिवः स हरिः सेन्द्रः सोक्षरः परमः स्वरा'डिति महानारायणादग्निब्रह्मशिखामध्ये हरिः। स भगवदभिन्नोपि। 'प्रकाशाश्रयवद्वा तेजस्त्वा'दितिव्याससूत्रात्। विशेषत इति इदमित्थतया। विशेषत इति परमतभाषया लौकिकभाषया च। ननु कथा चामृतमितिकर्मधारये अमृतं किमित्यत आहुः अमृतपद इति। न मृतं मृतिर्यस्मादिति यौगिकोर्थः। क्षुदादिबाधामृतिनिवर्तकत्वात्। कथामृतताञ्जीवनं वक्तव्यं, तदभावात् किं फलं वक्तव्यमिति चेन् तत्राहुः असङ्कोचादिति। 'अपपुनर्मृत्युं जयती'ति श्रुतेरपमृत्युजयबोधकश्रुत्यसङ्कोचात्, श्रोतृस्वनिकटस्थापनेच्छाऽसङ्कोचाच्च। द्वादशस्कन्धश्रवणानन्तरं मुक्तिरेव न तु तक्षकदंशापमृत्युजयोपि फलतीत्यर्थः। अत इत्यादि। कथामृतस्रावात्। त्वं शुकः न तु फलदो भगवान्। अत्र 'फलमत उपपत्ते'रितिसूत्रविरोधमाशङ्क्याहुः स्तुत इति। असदुत्कर्षाधायकगुणवर्णनरूपस्तुतिविषय इत्यर्थः ॥ १३ ॥ एतन्निशम्येत्यत्र सावधानतयेति अवधानमनन्यचित्तता। शौनको भार्गवः ज्ञानपूर्णो भक्त्या युक्तश्चेत्युत्तरार्धे गुणप्रकरणेस्ति। ज्ञानिनोन्यासक्तिः सम्भवतीत्यतः सावधानतयाभिमुखकरणमुक्तम्। निशम्यप्रत्यचर्यपदयोस्तात्पर्यमाहुः परस्परेति। तेनैतावत्कालोपि नान्यार्थ इति ज्ञापितम्। तथेति परस्पराभिनन्दनप्रकारेण मूले प्रतिपाद्यते। एतन्निशम्येतिपदसमभिव्याहारालब्धमर्थमाहुः एतस्येति। एतदन्यत्रेत्यत्र नितरां श्रवणे प्रसङ्गोक्तकृष्णचरितप्रश्नस्य मूलत्वान्निकुञ्जत्वात्। 'मूलमोघे शिफायां स्यात् भे निकुञ्जेन्तिकेपि चे'ति विश्वः। निकुञ्जमूलेन अनेन निकुञ्जनिरूपणम्। प्राधान्येन निर्देशः निशम्यक्रियाफलाश्रयत्वेन निर्देशः। वक्तुरिति शुकस्य। नितरामिति तथा च शम आलोचने चु० आ० से०। तस्य रूपम्। दाक्षिण्येनेति कौशल्येन। लोककौशल्येन सरलभावेनेतियावत्। विश्वासेन भृगोः परब्रह्मनिष्ठत्वम्। तथा च सुबोधिनी 'तस्य जिज्ञासये'त्यत्र। 'सर्वेषां ब्रह्मशक्तिः ज्ञानात्मिका महत्त्वाद् भृगौ समारोपिता। तदा

भृगुः साक्षात्परब्रह्माविष्टो जातस्ततो विस्मितदेहः अक्षोभ्यपरीक्षार्थं सर्वैर्ब्राह्मणैः प्रेषित' इति । अत्र भृगोर्विश्वासो ब्राह्मणवाक्येषु
निरूपित । हेतुभूतमिति कुतो निशम्येत्याकाङ्क्षायां यतः साधुवादं तत एतं निशम्येत्यर्थाद्धेतुभूतम् । विशेषणविभक्तेः हेतुरर्थः
भावप्रधानः । साधुवादत्वादित्येवं पञ्चम्या हेतुकथनाद्वा । हेतुभूतं षष्ठीतत्पुरुषे प्रश्नेनान्वयासौष्ठव्यात् पञ्चम्यन्तान्यपदार्थघटित-
विग्रहमाहुः साधूनां वाद इति । यस्मादिति प्रश्नात् । प्रमेयस्येति प्रमातुं योग्यं प्रमेयं न तु प्रमाविषयं, तस्य प्रमाणत्वात् तस्येत्यर्थः ।
शाब्दज्ञानयोग्यस्य । यद्वा प्रमाविषयं प्रमेयं, अनधिगतार्थगन्तृत्वम् । प्रमाकरणत्वं वा प्रमाणम् । वैयासकिपदव्याख्यानार्थम् ।
'अपि चेत् सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि स' इति गीतावाक्यात् साधवो भक्ताः ।
मां भजन्ते ते भक्ताः । कर्तरिक्तश्छान्दसः, ते च साधवो मन्तव्या इति । तदाहुः भगवद्भक्ता इति मिलन्तीति वदनार्थं मिलन्ति ।
एवं वाक्यमिति साधुवादस्वप्रकारकवाक्यम् । प्रष्टव्यमिति वाक्यं प्रष्टव्यम् , साधुवादस्य प्रश्नविशेषणत्वात् । अर्थोपि प्रष्टव्य इति
पदजन्यपदार्थोपस्थित्यर्थमुक्तम् । कष्टेनेति द्वैह्यात्मतोषात् पूर्वम् । प्रथमस्कन्धे स्पष्टम् । चकारेति नारदोपदेशेन चकार । प्रवृत्त इति
अपेक्षत इत्यनेनान्वेति । महता प्रयासेनेति 'परिनिष्ठितोपि नैर्गुण्ये उत्तमश्लोकवार्तया । गृहीतचेता राजर्षे आख्यानं यदधीतवा'निति
वाक्यात् परिनिष्ठितस्य गृहीतचेतस्त्वेपि महानेव प्रयासः तेन । तदुक्तं 'स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनि'रिति । वैयासकिरिति
व्यासस्य महता कष्टेन भगवद्गुणप्रतिपादकशास्त्रकर्तुः अपत्यं महता प्रयासेन भगवन्मतप्रवर्तको वैयासकिः । दुर्ज्ञेयेति 'यतो वाचो
निवर्तन्त' इति श्रुतेर्दुर्ज्ञेयत्वात् । भिन्नप्रक्रमस्य विष्णुरातमित्यत्रान्वयाभावं द्योतयितुमथशब्दात् पूर्वं विष्णुरातपदं व्याकर्तुमाहुः नन्वेव-
मिति । तथा च विष्णुरातत्वं न भिन्नप्रक्रमकृतं भिन्नं किन्तु प्रत्यर्चनेपि तदेवेत्युक्तम् । कथमिति केन प्रकारेण विष्णुरातस्वरूपेण
हेतुना किं वा परीक्षित्त्वेन हेतुनेतिप्रश्नः । विष्णुरातमितीति विष्णुरक्षितम् । रा आदाने यमादत्ते तं रक्षतीति । एतदर्थमिति
भागवतप्रकटनार्थं, एवकार इतरयोगव्यवच्छेदकः । अन्यथेति परीक्षिद्रक्षणाभावे । श्रवणे दृष्टान्ताभावादप्रवृत्त्या न सिध्यतीत्यादिः ।
शुकस्येश्वरत्वाद् भगवता किमित्याशङ्का तु न कार्या । 'न मे विदुः सुरगणाः प्रभवं न महर्षय' इति, 'स्वयमेवात्मनात्मानं वेत्थ
त्वं पुरुषोत्तमे'तिवाक्याभ्याम् । 'निशम्ये'तिपदादाहुः श्रवणे निमग्नेति । शुकस्येश्वरत्वेपि क्षत्रियार्चनं मनसोन्यत्र श्रवणे सक्तत्वात् ।
क्षत्रियस्यापीश्वरत्वाद् वा । प्रतेः प्रतिदानमर्थमाहुः पूर्वं शुक इति । 'एतदन्यच्च'त्यत्र मुने इति सर्वज्ञ इति पदाभ्यां स्तुतः । तेनेति
स्तवनहेतुना । शास्त्रेति । वेदवेदान्तशास्त्राभ्यां सिद्धम्'। शास्त्रे एवाहुः येन्योन्यत इति वेदवेदान्तसारत्वाच्छ्रीभागवतस्य ।
एतावदिति अधिकारित्वपूर्वकप्रत्यर्चनपर्यन्तस्योद्योगस्य । फलं सच्चिदानन्दस्य व्याहरणे कीर्तनभक्तौ विषयत्वम् । आहेति चरित्रस्य
शोधकत्वमाह । देशादीनामिति देशकालकर्तृमन्त्रद्रव्यादीनाम् । एवेति 'अकामः सर्वकामो वे'तिवाक्यादेवकारः । कीर्तनभक्तेर्नवसु
मुख्यत्वात् प्रेमसाम्यम् । अन्यथेति भक्तेः शोधकत्वाभावे । न स्यादिति यथाकथञ्चित् कल्मषहन्तुः कीर्तनादिभक्तीतरस्य कलियुगा-
दावभावात् । भागवतप्रधानः व्याहर्तुमारभतेतियोजनयार्थं वक्तुमाहुः महतेति । द्वादशभिः प्रश्नः, द्वाभ्यां प्रत्यभिनन्दनमिति महता
भिन्नप्रक्रमेण । यस्येति प्रलयेधिकृतस्य भक्तुरीश्वरस्य तेन भागवतेषु प्रधान इति विग्रहोपास्तः । अधिकारित्वेन शुद्धभागवत-
प्रधानत्वाभावात् । भागवतलक्षणं निबन्धे 'कृष्णवाक्यानुसारेण शास्त्रार्थं ये वदन्ति हि ते हि भागवताः प्रोक्ताः शुद्धास्ते
ब्रह्मवादिन' इति । ते प्रधाना यस्य स एकादश उक्तः । 'देहेन्द्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः संसारधर्मैर-
विमुह्यमानः स्मृत्या हरेर्भागवतप्रधान' इति आहर्तुमिति शुकस्याप्ययमेवाहारः । 'नैषातिदुःसहा क्षुन्मा'मितिवाक्यात् ।
वायुभक्षोब्भक्षो वा यतिः स्मर्यते इत्यत आहारं विवृण्वन्ति स्म वक्तुमिति । वायुः शब्दतामापद्यन्त इति प्राचां वैदिकानां प्रवादाद्
वायुभक्षणमुक्तम् । अत एवेति भक्ष्यत्वादेव । कथयतीति शुकः कथयति । कथ वाक्यप्रबन्धे । चुरा० सभाजयतीति सभाज प्रीति-
सेवनयोः चुरा०, न च भागवतप्रधानत्वापलापः अब्वायुभक्षणार्थप्रवृत्तेरिति वाच्यम् । भागवतप्रधानत्वार्थमेवाब्वायु-
भक्षणात् ॥ १४ ॥

सम्यग्व्यवसितेत्यत्र श्रीशुकोत्र सभगवान् वृषध्वजः शुकनामा निर्गुणः जन्मप्रकरणेधिकारी, कथायाः प्रकटसच्चिदानन्द-
रूपत्वात् । भगवदाकाङ्क्षाप्रपञ्चग्लानिभ्यां तामससत्ता तद्वान् । श्रीभागवतमाहात्म्ये स्कांदीये 'श्रीमद्भागवतं तस्मा अपि नारायणो
ददौ स तु संसेवनात् तस्य जिग्ये शीघ्रं तमोगुणम् कथा भागवती येन सेविता वर्षमात्रतः लये त्वात्यन्तिके तेनावाप शक्तिं सदाशिव'
इति । समानशीलेति 'राजर्षिसत्तमे'तिसम्बोधनरूपाग्रवाक्यात् । दृष्ट्वेति रूपं दृष्ट्वा शीलव्यसनयोः दर्शनं त्यक्तोदकस्य परीक्षितः
क्षुद्बाधाभावकार्यात् । शीलं स्वभावः परिणामहेतुः व्यसनं यद्विना स्थातुमशक्तिः तत् । द्वाभ्यामित्यभिनन्दनकर्मद्वयेन । भगवतीति
'यो बुद्धेः परतस्तु स' इति वाक्याद्गीताद्वितीयाध्यायाच्च । लयो भगवत्प्राप्तिः, शान्तिश्च, तस्मादित्यर्थः । स्थिरप्रज्ञस्येति । 'प्रजहाति
यदा कामान् सर्वान् पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यत' इति गीता । एवकारेण स्थितधीत्वप्रतिष्ठित-
प्रज्ञत्वयोगो व्यवच्छिद्यते । सर्वोत्तमेति सर्वा चासावुत्तमेति कर्मधारयः पुरुषोत्तम इतिवत् , 'उत्तमः पुरुषस्त्वन्य' इति गीतावाक्ये
कर्मधारय उक्तः । सर्वा पूर्णा । आत्मन्येवात्मनैकादशवृत्तिकमनसा तुष्टः । 'कृत्स्नभावात्तु गृहिणोपसंहार' इत्यधिकरणोक्तरीत्या,
यदात्मन्येवात्मना मनसात्मैकावलम्बनेन तुष्ट इत्यर्थस्तदा मानसी सेवा ज्ञेया । सर्वासामुत्तमा सर्वासूत्तमेति न विग्रहो 'न निर्धारण'
इतिसूत्रेण समासनिषेधात् । स्थितधीलक्षणे 'सुखेषु विगतस्पृह' इति 'पृथक्सूत्रेण वा महा पर्वयात्रामहोत्सवा'नित्यस्य विरोधः ।

प्रतिष्ठितप्रज्ञलक्षणे 'यः सर्वत्रानभिस्नेह' इति भगवत्यपि व्यसननिषेधाद् भक्तिमार्गविरोधः। एवमग्रेपि प्रतिष्ठितलक्षणेषु दोषाः। एकादशोक्तस्य ब्रह्मसम्पत्तेः पूर्वं सिद्धयष्टकस्य कालनियोपकस्यापि स्थिरप्रज्ञतापेक्षया नोत्तमत्वमन्यसङ्गप्रसङ्गात्। अध्यवसायं प्राप्तेति। विषयत्वेन प्राप्ता अध्यवसायविषया बुद्धिः। अध्यवसाये इत्यन्तं विषयः। निर्विषयकज्ञानाभावात्। बुद्धिमानयं पदार्थान् जानातीत्यत्राध्यवसायविषया बुद्धिः। अध्यवसायं ज्ञानम् अधिकं विशेषं अवसिनोतीत्यध्यवसायः तम्। कर्मण्यण्। ब्रह्मर्षीणामिति। मम तु ब्रह्मर्षिसत्तमत्वाज्ज्ञातम्। सन्निति अस्ति ब्रह्मेति वेद भगवद्धर्मनिष्ठ इति राजर्षिसत्तर इत्यर्थः। तत्राप्युत्कर्ष इति श्रवणभक्त्या वशीकारात्। तथा च स राजर्षिसत्तमः। पूर्वार्धे व्यवसायशब्देनोक्तं निश्चयं स्तोतुमुत्तरार्धं वदतीत्याशयेनोत्तरार्धमवतारयन्ति स्म द्विवेत्यादि। स्वरुच्येति यथोद्धवपरीक्षिदम्बरीषाः। सात्त्विकश्रद्धारूपस्वरुच्या। रुचिर्भक्तिः प्रेम चेति प्रथमस्कन्धे नारदस्य। 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यती'ति तृतीये। उत्तम इति स्वरुच्या निश्चयवानुत्तम उक्तः। तत्र 'ये शास्त्रविधिमुत्सृज्ये'त्यादिगीता। अत्र सात्त्विकश्रद्धावन्तोऽम्बरीषोद्धवपरीक्षितः। राजसश्रद्धावन्तो दक्षादयः। तामसश्रद्धावन्तो वृकहिरण्यकशिप्वादयः। तत्र सात्त्विकानामास्तिकत्वं फलम्। तस्य पूर्वमीमांसोक्तविश्वजिन्न्यायेन मोक्षः फलम्। 'अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्त्विक' इति। 'अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्। इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्। विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्। श्रद्धाविरहितं यज्ञं तामसं परिचक्षत' इति। विधिदृष्ट इति पदेन 'ये शास्त्रविधिमुत्सृज्ये'त्यादिगतम्। शास्त्रविधिसङ्ग्रहेण भगवानुवाचेति रामानुजभाष्ये। यदा तु विधिदृष्ट इति पदेन विधिसंवादिरूपार्थो विवक्ष्यते तदा 'ये शास्त्रविधिमुत्सृज्ये'त्यनुसन्धेयम्। दम्भार्थमिति दम्भः परस्य स्वोत्कर्षख्यापकचेष्टादिः। निमित्ताभावे तु नैमित्तिकाभावश्चेत् तदा दम्भः, तदर्थमित्यर्थः। उत्तमत्वार्थं पुष्टिमार्गः कल्पनीयः। यद्वा 'ये शास्त्रविधिमुत्सृज्ये'त्यत्रोक्तसात्त्विकानां यज्ञः शास्त्रीयः, 'यावानर्थ उदपान' इतिवाक्यात्, 'उत ये शास्त्रविधिमुत्सृज्ये'त्युपक्रमानुरोधादशास्त्रीयत्वेपि महतामन्तःकरणं प्रमाणमित्याचार्योक्तेः 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यके महतां मनसेति विशिष्य महान्तः सात्त्विका ग्राह्याः। अन्यथा दम्भकृतयज्ञस्य मोक्षास्तिकत्वे फले स्याताम्। अत्रापि पुष्टिप्रवेशः। पूर्वोक्तश्रुतिसंवादात्। पुष्टिर्भगवदनुग्रहः। अत उक्तं त्वं तूत्तम इति तेजबिन्दूपनिषदि 'न ध्यानं न च वा ध्याता न ध्येयोऽध्येय एव च। सर्वं तत्परमं शून्यं न परं परमात् पर'मित्याद्युक्त्वा 'न भयं सुखदुखं च तथा मानापमानयोः एतद्भावविनिर्मुक्तं तद् ग्राह्यं ब्रह्म तत्परं तद् ग्राह्यं ब्रह्म तत्पर'मित्युक्तं, 'शून्यं' परं ने'त्यर्थः। 'परमात्' शून्यात् 'परं', 'तत् ग्राह्यं ब्रह्म' येन केनापि साधनेन। 'यतो वाचो निवर्तन्त' इतिश्रुतौ वेदलक्षणापि वाग्व्याख्यातेति, अत उक्तं त्वं तूत्तम इति। द्विधा व्याकुर्वन्ति स्म (यत्) यस्मात् कथायामिति, 'य'दित्यव्ययम्। 'यत्' यस्मात्। तत्र यस्मात् कथायामित्यपि पाठः। तत्रेति निश्चयद्वये। रतिरिति रतिपदात् 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यती'तिकपिलदेवोक्तसिद्धान्तान्तरे, रुचिः भक्तिः प्रेम चेति प्रथमस्कन्धसिद्धान्ते पोषके वातः रतिर्भक्तिरित्येकवाक्यतासिद्धान्तसिद्धान्तान्तरयोः। सिद्धान्ते प्रेम सिद्धान्तान्तरे भक्तिरित्येकोर्थः। अत्र रतिपदं स्वरुचिः भक्तिः प्रेमेत्यत्र भक्ती रतीरितिबोधनार्थम्। परीक्षितो रुचिमतो भक्ती रतिरिति। रुचौ प्रेम मेलनाद् रतिवत् भक्तिराध्यात्मिकी। 'नैष्ठिकी'त्यत्र निष्ठाऽचञ्चला, नितरां तिष्ठतीति निष्ठेति कर्तरि क्विप्। निष्ठा निर्धार्यत इति शौनिकमुक्। कृष्णविषयकनिर्धारानुकूलव्यापारवती निष्ठेत्यर्थः। निर्धारविषयानुकूलव्यापारः शुकनिष्ठोर्थः। 'सम्यग्व्यवसायः' तद्विषयिणी निष्ठा भिन्ना रतिर्जातेत्यर्थः केनेति विषयावेशेन। अन्यथेति भगवदतिरिक्तविषया। निश्चयेति सम्यग्व्यवसायस्य सम्यक्कालापेक्षया सम्यक्पोषिका। तथा च नैष्ठिकरतिपोषिनिश्चयवत्त्वाद् बुद्धिरुत्तमेत्यर्थः। 'व्यवसायः' रतिसाधनं फलं च। 'सर्वभूतेषु मन्मति'रिति 'भक्त्या जानाति चाव्यय'मिति श्रुतिस्मृतिभ्याम्! यज्जातेतिपदं समस्तमङ्गीकृत्य द्वितीयां व्याकृतिमाहुः यस्मान्निश्चयादित्यादि। तथा च वासुदेवकथायां यस्मान् निश्चयाज्जाता यज्जाता रतिरिति वेतियोजना। तथा च निश्चयोत्पन्ननैष्ठिकरतिमत्त्वात् तथेत्यर्थः। तेन ज्ञानस्य भक्त्यङ्गत्वमुक्तम्। पूर्वार्धे 'तवे'ति पदं उत्तरार्धे 'त' इति पदं यदुक्तं तत्पुनरुक्तिभिया प्रकारद्वयेन राजा स्तूयते न तु बुद्धिरित्याशयेन तृतीयं पक्षमाहुः अथवेत्यादि। पूर्वार्धे सम्यग्व्यवसितबुद्धेः सुबोधिन्यामार्थिकं हेतुद्वयं राज्ञो नैष्ठिकरत्याधारयोग्यताधारत्वेनोपस्थितावेव सम्भवतीति तद्द्वारा राजैव स्तूयत इति राजाभिनन्दन एव। तद् व्युत्पादयन्ति स्म दुर्लभत्वमिति। दुर्लभत्वं कुतः कारणादितिशङ्कायां कारणं वदन्त आहुः कारणभूतमिति। तथा च ज्ञानं यस्याः साधनं सा रतिर्दुर्लभा भवत्येव। आहेति पूर्वार्धेनाह। जातेति भूतार्थैकान्तप्रयोगान् निष्पन्नत्वं साध्यसाधनयोः रतिबुद्ध्योः। तस्मात् सम्बोधनेन राज्ञः सभाजनं, प्रीणनं, तेन निश्चयाद् रतिरिति भरः सूचितः। किञ्च सभायां देवर्षिराजर्षयः सर्वेपि तिष्ठन्ति तथापि तवैव जातमिति तत्र सभाजनमितिभावः। एतेन सिद्धमर्थान्तरं 'अनुवादः स्तुतिः प्रश्ने भक्तत्वज्ञापकावुभा'विति कारिकायां प्रश्नेनुवाद उक्तः 'कथितो वंशविस्तार' इत्यनेन, स्तुतिस्तु 'पितामहा म' इत्यनेन, तत्रास्याः स्तुतेः सन्निवेशरूपमाहुः प्रश्नेन चेति। द्वादशभिः प्रश्नेन। एवम्भाव इति पूर्वोक्तप्रकारेण भावो रतिः। अत इति साधनभूतप्रश्नस्य एवम्भावरूपफलेनैक्यात्। अर्थात् अभिधेयात् प्रश्न इति सप्तम्यन्तं प्रश्ने एव न तु व्यवधायके सर्वथा कथनादौ त्रयोदशादिश्लोकाभासोक्ते राजा स्तुतः स्तुतत्वविशिष्टः। विशिष्टे राज्ञः। स्तुत्वं स्तुतिः। 'पितामहा म' इत्यत्र भगवान् स्तुतोत्र तु राजेतिविशेषः। स च विष्णुरात इति स्तावकत्वेन स्तुतौ निविष्टः भगवांस्तुत्यत्वेन 'पितामहा म' इत्यत्र। यद्वा द्वितीयपक्षे किञ्चिदाहुः प्रश्नेनेति। एवम्भावः नैष्ठिकी रतिः। तस्य परीक्षितः

निश्चयेनैवाभिज्ञातः । अत इत्यादि पूर्ववत् । प्रश्न इति प्रथमान्तम् । नैष्ठिकरत्येकीभूतः प्रश्न इत्यर्थः । अन्यत् पूर्ववत् । अग्रे प्रश्नस्य साक्षात्स्वार्थं तृतीयपक्षान्ते प्रश्नस्तुतिरुक्ता ॥ १५ ॥

वासुदेवकथेत्यत्र साक्षादिति गतश्लोके तु नैष्ठिकरत्येकीभूतः प्रश्नः स्तुत इति भावः । पवित्रयत्येवेति कथा पवित्रयति न तु प्रश्न इति शङ्कायामत्यन्तायोगव्यवच्छेदकैवकारः । नीलं सरोजं भवत्येवेत्यत्रेव । तत्रापीति वासुदेवसम्बन्धिवस्तुष्वपि । तत्सम्बन्धीति वासुदेवसम्बन्धिगुणदोषाः 'समतो गुणदोषग' इत्यनयोक्ताः तत्राभिनिवेशस्त्रयाणां तस्य जनिका । तत्रापीति कथायामपि तज्जिज्ञासयेति कथाज्ञानेच्छया कृतः । दार्ढ्येति तत्सम्बन्धिगुणदोषाभिनिवेशे कथाकार्ये दार्ढ्यं हेतुः । गणनादेव त्रित्वे लब्धे 'त्री'नित्यस्य पदस्य तात्पर्यमाहुः कश्चिदिति । तथा च मध्यस्थं न पुनाति, समीचीनासमीचीनत्वमात्रदृष्टिमत्त्वात्, इत्येतदर्थं 'त्री'नित्युक्तमिति भावः । त्रय इति पावनाधिकारिणस्त्रयः । पावनफलाश्रयाः कर्मत्वात् स्तब्धचित्तेति तत्तत्कार्यप्रतिबन्धकवस्तुविशेषः । स्तब्धं प्रतिबद्धं चित्तं यस्य । पापादेवेति, 'नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते' इति वाक्याद् भगवद्गुणेषु वक्तव्येषु सत्सु समानाधिकरणपापादेव । अन्ययोगव्यवच्छेदक एवकारः । पितृपितामहेति आदिना मध्यस्थः । तेन प्रेमलक्षणा भक्तिरेव पितृपितामहादीन् पुनातीत्युक्तम् । श्रोतामध्यस्थ इति श्रोता अमध्यस्थः, भगवद्वाचकपदवाक्यानां भगवति शक्तितात्पर्यनिर्धारः श्रवणम्, तत्कर्ता अमध्यस्थो भवति । निमित्तमिति वक्तृत्वपुरुषत्वश्रोतृत्वरूपपदप्रवृत्तिनिमित्तम् । तदेवेति वक्तृत्वादिकम् । पदप्रवृत्तिनिमित्तभेदप्रयोजकत्वेनोक्तम् । वक्तृपुरुषत्वं न शक्यतावच्छेदकम्, गौरवात्, भिन्नपदत्वाच्च । वक्तृत्वादिकं भेदप्रयोजकं पुरुषत्वं शक्यतावच्छेदकम् । पूर्ववदिति 'निवृत्ततर्षै'रिति श्लोके व्याख्यातपुंपदवत् । तथा च प्रश्नोऽप्यासुरव्यतिरिक्तानेव त्रीन् पुनातीतिभावः । कार्यान्तरेति कार्यान्तरमर्थः प्रयोजनं येषां तान् श्रोतृभिर्वक्त्रा वा सह वाणिज्याद्यर्थं कथास्थले समागतानित्यर्थः । अनेकविधमिति आधिभौतिकाध्यात्मिकाधिदैविकादिरूपम् । तद्व्यावृत्त्यर्थमिति आधिभौतिकाध्यात्मिकव्यावृत्त्यर्थम् । कश्चिदिति प्रश्नकर्तरि । कश्चिदिति वक्तारम् । कश्चिदिति श्रोतारम् । न तु मध्यस्थम् । तस्य छिद्रान्वेषणार्थं श्रवणाच्छ्रोतृत्वेपि । करोतीति प्रश्नः करोति । सफलेति । प्रश्नेऽपि कीर्तनभक्तिः तस्य सफलता । कथारूपफले संसारदुःखस्य निवृत्तिः ब्रह्मबोधनं चेति गुणद्वयरूपफलसम्पादनात् तादृशफलेन सह वर्तमानता । उत्पादयतीति । प्रथमस्कन्धसुबोधिन्यां 'या वै लसच्छ्रीतुलसीविमिश्रकृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री'त्यत्रैकोनविंशेस्ति । पूर्वेति पूर्वकर्मसम्बन्धिनं देहम् । तत्कार्यं पापकार्यं स्तब्धत्वम् । चकारोत्र ज्ञेयः । यावत्येति शुद्ध्या । करोतीति प्रश्नः करोति । उत्तरार्धाभासे दृष्टान्ताभासे चास्वरसं सूचयन्तः पक्षान्तरमाहुः त्रीन् त्रिलोकस्थानिति । स्पष्टम् । ब्रह्माणमष्टमस्कन्धे वामनप्रसङ्गे, महादेवं भगीरथं च नवमस्कन्धे गङ्गा पुनाति । दार्ष्टान्तिके च त्रिलोकस्थान् प्रश्नकर्तुः पितृपितामहादीन् सात्त्विकादिभेदभिन्नान् तान् प्रश्नः पुनाति । 'धर्मः प्रोज्झितकैतवोत्रे'ति वाक्यात् हृदयरुद्धेश्वरेणेति । एतद्वाक्यविरोधक एवास्वरसः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु क्षुत्तृड्भ्यां पीडितस्य तव कथं कथाश्रवणश्रद्धा ? क्षणं विश्रामं कुर्वित्याशङ्क्य 'तत्परः संयतेन्द्रियः' इत्युक्तमधिकाराङ्गमपि द्योतयन्नाह—नैषेति । यैषा पूर्वं ममातिदुःसहाऽऽसीत्, ययाभिभूतविवेकोऽहं मुनिगले सर्पं निहितवान् सेदानीं त्यक्तमुदं जलपानं येन तथाभूतमपि मां न बाधते । तत्र हेतुमाह—पिबन्तमिति । त्वन्मुखाम्भोजात् च्युतं निःसृतं हरेः शरणागतदुःखहरणशीलस्य कथारूपममृतं पिबन्तमिति । अतः क्षणमपि कथाविरामे क्षुत्तृड्भ्यां सद्य एव मरणं स्यात् अमृतस्य मादकत्वेन सर्वदुःखविस्मारकत्वात् स्वादुविशेषत्वेन परमानन्दजनकत्वाच्चामृतपदोपादानेन स्वस्य विप्रशापादिदुःसहदुःखविस्मरणं परमानन्दश्च सूचितः । अमृतस्रावित्वेन शुकमुखस्य चन्द्रत्वं तेन श्रोतृजनाह्लादकत्वं तन्मनोगताविद्यान्धकारनिरासकत्वं च सूचितम् ॥ १३ ॥

एवं श्रुतावधारणश्रवणासक्तिवक्त्रादेरजितेन्द्रियत्वप्रश्नादिकमधिकारित्वाङ्गं राज्ञा स्वस्मिन् प्रदर्शितम् । तदा श्रीशुकोऽपि भगवच्चरितवर्णने प्रवृत्त इत्याह सूतः—एवमिति । भृगुणा भगवतो भक्तवात्सल्यादिगुणनिर्णयस्य कृतत्वात्तत्कुलोत्पन्नस्य तवापि भगवत्परता युक्तैवेति सूचयन् शौनकं सम्बोधयति—भृगुनन्दनेति । एवमुक्तप्रकारकं साधुवादं परीक्षित्प्रश्नं निशम्य वैयासकिः शुकः अथ अनन्तरमेव विष्णुरातं परीक्षितं प्रत्यर्च्य सत्कृत्य कृष्णचरितं व्याहर्तुं वर्णयितुमारभत प्रारम्भं कृतवानित्यन्वयः । पुनः पुनः प्रश्ने वक्तुरुद्वेगः क्रोधश्च सम्भवति, तेन प्रश्नावधारणं सम्यङ् न भवति, तत्त्वत्र नाभूदिति निशम्येत्यनेन सूचितम् । तत्र हेतुमाह–साधुवादमिति । वदनं वादः, साधूनां वादः साधुवादस्तम् । साधवो वीतरागा भगवद्भक्ता यत्र मिलिता भवन्ति, तत्र भगवत्कथामेव कुर्वन्ति । परीक्षितोऽपि साधुत्वात्तत्कृतप्रश्नोऽपि तादृश एवेत्याशयः । वैयासकिरित्यनेन व्यासपुत्रत्वात्तस्य स्वपितृकृतग्रन्थप्रचारार्थं कथनमप्यावश्यकमिति सूचितम् । विष्णुरातमित्यनेन कथनावश्यकत्वं सूचितम् । भगवतैतदर्थमेवायं संरक्षितस्तं यदि रहस्योपदेशेन कृतार्थं न कुर्यात्तदा तद्रक्षा व्यर्थैव स्यादित्याशयः । अग्रे जनिष्यमाणानामपि परम्परया श्रवणकीर्तनादिना कृतार्थतार्थमेतत्कथनमावश्यकमिति सूचयन्नाह—कलिकल्मषघ्नमिति । कलियुगे देशकालमन्त्रकर्मदेवतादीनां धर्महेतूनां दुर्लभत्वादिदमेव कल्मषनाशकम् । तत्र हेतुः–कृष्णचरितमिति । 'कृषिर्भूवाचकः शब्दो नश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' इति श्रुतेः ॥ सदानन्दस्वरूपस्य कृष्णस्य चरितमप्येतादृक्प्रभावमिति भावः । ननु तथापि सर्वतो विरक्तस्य शुकस्य

स्वकीयं किं प्रयोजनमित्यपेक्षायामाह—भागवतप्रधान इति। 'हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः' इत्युक्तत्वात्। भागवतं शास्त्रं, भागवता भगवद्भक्ताश्च प्रधाना यस्य सः। तथा च स्वप्रयोजनोद्देशाभावेऽपि भगवल्लीलाकृष्टचित्तत्वाच्छ्रीभागवतप्रचारेण भक्तानामुपकारायेदं कथितवानित्याशयः॥ ननु तथापि भगवच्चरित्रस्य दुर्ज्ञेयतया कथमन्येन कथनं सम्भवति? अन्यकथनेऽपि कथं सफलत्वं सम्भवति तत्राह—सभगवानिति। भगवता सह वर्तमानः, तदन्तः स्थितो भगवानेव चरितं कथितवानित्यर्थः 'कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा। तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा। योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यतः। तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि' इति द्वादशस्कन्धे सूतेन वक्ष्यमाणत्वात्। भगवदुपदिष्टत्वादेव राज्ञस्तत्कालमेव फलं जातम्। अत एवेतरोपदेशे विप्रलिप्सादिदोषेण यथार्थत्वासम्भवादिदानीन्तनानां बहुशः श्रवणेऽपि सद्यो ज्ञानभक्तिवैराग्यादि फलं न दृश्यते। प्रतिपूजनमपि भक्तिमाहात्म्यादेव। लोके सर्वत्र वक्त्रैव पृच्छकैः पूज्यते, न तु प्रष्टा। भगवत्कथाप्रसङ्गे तु भक्तिं विना तत्प्रश्नासम्भवात्प्रष्टाऽपि वक्त्रा सत्क्रियते, सूतनारदविदुरादिष्वपि सत्कारोपलम्भात्। 'एतं निशम्य इति तु पाठान्तरम्॥ १४॥ तत्कृतं सत्कारमाह—सम्यगिति द्वयेन। व्याहर्तुमारभतेत्युक्त्वाऽपि पुनः शुक उवाचेति वचनं श्रोतॄणां सावधानतार्थम्। कचित्तदभावस्तु तेषां सावधानत्वादिति ज्ञेयम्॥ शुक इति नाम तु प्रेमभरेण कीरवन्मधुरभाषणाज्ज्ञेयम्। तथा च ब्रह्मवैवर्ते व्यासं प्रति भगवद्वाक्यम्। 'व्यास त्वदीयतनयः शुकवन्मनोज्ञं ब्रूते वचो भवतु तच्छुक एव नाम्ना' इति प्रजानुरञ्जको राजा, सोऽपि वैदिककर्मनिष्ठो राजर्षिः, तत्रापि। निवृत्तिनिष्ठो राजा सन्, तत्रार्षि सत्, तत्रापि ज्ञाननिष्ठो राजर्षिसत्तरः, परानुरक्तिरूपभक्तिमाँस्तु राजर्षिसत्तम इति त्वया तु महतामपि दुर्लभावस्था प्राप्तेत्याश्चर्येण सम्बोधयति राजर्षिसत्तमेति। सम्यक् समीचीनं व्यवसितं निश्चयो यस्यास्तथाभूता तव बुद्धिः। कुत एवं ज्ञायत इत्यपेक्षायामाह—वासुदेवेति। यत् यस्मात् वासुदेवस्य मोक्षदातुः श्रीकृष्णस्य कथायां ते तव नैष्ठिकी 'तत्कथैव श्रोतव्या, नान्यत्' इति निष्ठां प्राप्ता रतिः प्रीतिर्जातेत्यर्थः॥ १५॥ अनेन प्रश्नेन त्वमहमिमे सदस्याश्च सर्वे एव पाविता इत्याशयेनाह—वासुदेवेति। वासुदेवकथायाः प्रश्नः कथाप्रवृत्तिहेतुत्वात् कथाद्वारा त्रीन् त्रिविधान् पुरुषान् पुनाति परमपुरुषार्थप्राप्तिप्रतिबन्धकपापनिरासेन तत्प्राप्तियोग्यतां सम्पादयति। अत्र सन्देहो न कार्य इत्याशयेनाह—हीति। के ते त्रय इत्यपेक्षायां तानाह प्रश्नोत्तरस्य वक्तारं पृच्छकं प्रश्नकर्तारं तत्सहचरानन्यान् श्रोतॄंश्च। तत्र दृष्टान्तमाह—तत्पादसलिलं यथेति। तस्य भगवतः पादसलिलं गङ्गा यथा त्रीन् पुरुषान् सात्त्विकराजसतामसभेदभिन्नान् त्रिलोकस्थान् वा, कुलद्वयमध्यस्थान् वा, ब्रह्माणं महादेवं भगीरथं वा, श्रोतॄन् द्रष्टॄन् ध्यातॄन् वा, पानकर्तॄन् दर्शनकर्तॄन् स्नानकर्तॄन् वा, पुनाति तथेत्यर्थः। कश्चित्तु तत्पादसलिलमिति शालग्रामादिचरणोदकं त्रीन् पुरुषान् दातारं पातारं द्रष्टारं च यथा पुनातीत्याह। वस्तुतस्तु तत्पादसलिलमिति तत्प्रसादवस्तुमात्रस्योपलक्षणम्, सर्वस्यैव महिमश्रवणात्। दृष्टान्तस्तु पवित्रीकरणमात्र एव, न पुरुषत्रयपवित्रीकरणे सम्बन्धिमात्रम्। बहुपुरुषपवित्रहेतुतया पुरुषत्रयपवित्रीकरणवचनस्यानुचितत्वात्। सम्बन्धिमात्रपुरुषपवित्रीकरणं चोक्तम्—'श्रुताभिलषिता ध्याता पीता दृष्टाऽवगाहिता। गङ्गा तारयते पुंसामुभौ वंशौ भवार्णवात्' इति॥ १६॥

अन्वितार्थप्रकाशिका

नैषेति॥ या ब्रह्मण्येनापि मया मुनिगले सर्पं न्यधापयत् एषा अतिशयेन दुःसहाऽपि क्षुत् त्यक्तमुदकं येन तं त्यक्तोदमपि त्वन्मुखमेवाम्भोजं ततश्च्युतं हरिकथामेवामृतं पिबन्तं मां न बाधते। संज्ञां विनाऽपि उदकस्योद आर्षः। उदशब्द उदकार्थो वा। कथाश्रवणोपरमे तु जीवितं न स्यादिति भावः॥ १२॥ एवमिति॥ हे भृगुनन्दन! शौनक सः भागवतेषु प्रधानः श्रेष्ठः। पुंस्त्वमार्षम्। अद्धं चादित्वेन वा। भागवता भागवतशास्त्रं वा प्रधानं यस्य स इति वा। भगवान् वैयासकिर्व्यासपुत्रः शुकः एवं साधुवाद समीचीनं प्रश्नं निशम्य अथ विष्णुरातं परीक्षितं प्रत्यर्च्य प्रशस्य कलौ जनिष्यमाणानामपि जनानां कल्मषाणां नाशकं कलिकल्मषनाशकं वा कृष्णस्य चरितं व्याहर्तुं वक्तुम् आरभत॥१४॥ अत्र कचिच्छुक उवाचेत्यस्ति। कचिन्नास्ति। सम्यगिति। हे राजर्षिषु सत्तम! तव बुद्धिः सम्यग् व्यवसितं निश्चयो यस्याः तादृशी अस्ति। यत् यतो बुद्धेः ते तव वासुदेवकथायां नैष्ठिकी निश्चला रतिः प्रीतिर्जाता॥ १५॥ त्वया वयमपि पाविता इत्याह—वासुदेवेति॥ यथा तस्य भगवतः पादयोः सलिलं गङ्गा पृथिव्यादि त्रीन् लोकान् पुनाति तथा वासुदेवस्य कथायाः अपि प्रश्नः किं पुनः स्वरूपप्रश्नः वक्तारं पृच्छकं श्रोतॄंश्च इति त्रीनपि पुरुषान् पुनाति॥ १६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रायोपविष्टस्याशनायापिपासाभ्यामर्दितस्य तव कथं श्रवणोपयुक्तचित्तसमवधानसंभव इत्यत्राह॥ नैषेति॥ त्यक्तमुदकपानं येन तथाभूतमपि, तव मुखमेवाम्भोजश्चन्द्रस्तस्माच्च्युतं गलितं, 'अब्जो जैवातृकः सोमः' इति कोशोक्ताब्जाम्भोजयोः समानार्थत्वादम्भोजशब्देनात्र चन्द्र उपादेयः। पद्मेऽमृतसंनिधानाभावाच्चन्द्रे तद्वर्णनस्य सर्वसंमतत्वादुक्तार्थ एव युक्तः। हरिकथैव अमृतं, पिबन्तं मां, अपिदुःसहा सुतरां सोढुमशक्या अपि, एषा क्षुत्, न बाधते। क्षुधो वीक्षणानर्हत्वेऽप्येषेति सर्वनाम्ना प्रत्यक्षनिर्देशः, शरीरग्लानिसंदर्शनात्मना बोध्यः॥ १३॥ एवमापृष्टो भगवान् शुकः श्रीकृष्णचरित्रं विस्तरतः कथयितुमारेभ

इत्याह सूतः ॥ एवमिति ॥ हे भृगुनन्दन शौनक, एवमुक्तप्रकारमित्यर्थः। एतमिति पाठान्तरेऽप्ययमेवार्थः। साधुवादं साधोः परीक्षितो वादं प्रश्नरूपामुक्तिमित्यर्थः। निशम्य, भगवानैश्वर्ययुक्तः, वैयासकिर्व्यासपुत्रः, भागवतं भगवत्स्वरूपगुणाद्यनुसंधानमेव प्रधानं मुख्यं प्रयोजनं यस्य तथाभूतः, स शुकः, अथ तद्वचनश्रवणानन्तरं, विष्णुरातं परीक्षितं, प्रत्यर्च्य प्रत्यभिनन्द्य, कलिकल्मषघ्नं शृण्वतां वदतां च कलिकालकृतपापघ्नं, कृष्णचरितं श्रीकृष्णस्य भगवतश्चरित्रं, व्याहर्तुं वक्तुं, दशमैकादशस्कन्धाभ्यां कथयितुमित्यर्थः। आरभत आरेभे ॥ १४ ॥ प्रत्यर्च्येति यदुक्तं तां प्रत्यर्चां तावदाह सम्यगिति द्वाभ्याम् ॥ सम्यगिति ॥ हे राजर्षिसत्तम, तव बुद्धिः, सम्यक् व्यवसिता कृतनिश्चया। हेयोपादेयविवेकयुक्तेत्यर्थः। कुत एतत् ज्ञातमित्यत्राह। यद्यस्मात्, वासुदेवकथायामेव, ते तव, मतिः, नैष्ठिकी निष्ठायुक्ता, जाता। वासुदेवकथाश्रवणे एव परिनिष्ठितेत्यर्थः ॥ १५ ॥ किं तच्छ्रवणनिष्ठमत्या तत्राह ॥ वासुदेवेति ॥ यथा, तत्पादसलिलं विष्णुपादोदकं, गङ्गाजलमिति यावत्। त्रीन् पुरुषान्, हि निश्चितमेव, पुनाति, गङ्गोदकं यथा उपस्पृशन्तं तत्पितरं पितामहं च पवित्रीकरोतीत्यर्थः। तथा, वासुदेवकथाप्रश्नः वक्तारं, पृच्छकं श्रोतॄन्, इत्येतान् त्रीन् पुरुषान्, पुनाति प्रष्टृप्रतिवक्त्रोरेकैकत्वादेकैकवचनेन निर्देशः। श्रोतॄणां बहुत्वाद्बहुवचनेन तन्निर्देशः ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

या कृत्स्नव्यसनप्रधानचरिता या कार्यमात्रप्रवृत्त्यारम्भप्रविभञ्जिका च सततं सर्वेऽपि यत्किङ्कराः।
सापि क्षुत् क्षतिमेत्यलक्षितगतिस्तृट् चापि सद्यःश्रुतेर्यस्यास्तां शृणुयान्न कः शुकमुखास्वाद्या मुमुक्षुः कथाम् ॥ ६ ॥
चिद्रूपोऽप्याखिलाखलावनकृते नानावतारान् दधात्यस्मिन्नद्भुतपूर्णचारुचरितान् पापापहारव्रतान्।
इत्थं ज्ञातपरेशवास्तवगतिं ज्ञात्वा स भूपं मुदा तत्साध्वारभतावतारचरितं व्याहर्तुमैशं पुनः ॥ ७ ॥
तत्स्वरूपादपि श्रीशः स्वावतारचरित्रतः। कृतार्थयत्यलं साधूनिति धीस्तव सत्पदा ॥ ८ ॥
इच्छामात्रत एव खिन्नवसुधा खेदापनोदक्षमोऽप्यङ्गीकृत्य समुद्भवं स चकमे यल्लोकरम्यां कृतिम्।
तद्बीजं निजरूपमेव सुलभीकर्तुं स्वमात्राश्रितानज्ञातोपनिषत्पदान् कलिमलग्रस्तान् समस्तानपि ॥ ९ ॥
ततस्तच्चरितं श्रोतुं समुत्साहस्तवोचितः। प्रवक्तुं च ममाप्यस्मिन् भक्तिसौख्याभिलाषिणः ॥ १० ॥
ब्रूते पृच्छति यः शृणोति च हरेर्लीलाचरित्रं त्रयः पूताः स्युः सहपूर्वजैः सपदि तत्सादृश्यसंदर्शिनी।
त्वत्पादाम्बुजभूतिका विजयते मन्दाकिनीति प्रभो। वागेषा न मृषा भविष्यति मुनेस्तादृग्विधेयं मयि ॥ ११ ॥

हिन्दी अनुवाद (कर्दम क्षमा)

भगवन्! यद्यपि क्षुधा और तृषा सही नहीं जाति है, फिर भो जल का भी त्याग करने वाले मुझे वह क्षुधा कुछ कष्ट नहीं देती है कारण कि मैं आपके मुख रूप-कमल से निकलते हुए कथामृत को पान कर रहा हूँ ॥ १३ ॥ महर्षि सूतजीने कहा, कि हे महर्षि भृगुजी को आनन्द देने वाले शौनकजी! इस मनोहर भगवान् श्रीकृष्णजी के सम्बन्ध वाले चरित्रों के प्रश्नों को सुनकर, भगवद् भक्तों में श्रेष्ठ व्यासकुमार श्रीशुकाचार्य जी ने, गर्भ में श्रीकृष्णजी से सुरक्षित (विष्णुरात) परीक्षित् जी का आदर कर, कलि के मल को नष्ट करने वाले श्रीकृष्ण जी के चरित्र कहने प्रारम्भ किये ॥ १४ ॥ श्रीशुकदेव जी कहते हैं कि, हे राजर्षियों में सर्वश्रेष्ठ परीक्षित जी ? वासुदेव की कथासुधा में आपकी अतिशय स्थिर प्रीति हुई है, यह आपकी मति ने अच्छा निर्णय किया है ॥ १५ ॥ राजर्षि परीक्षित्! श्री वासुदेवजी की कथा का प्रश्न करने वाले तथा उत्तर देने वाले एवं श्रवण करने वाले इन तीन प्रकार के पुरुषों को वैसे ही पवित्र करता है जैसे श्री गङ्गाजी, ब्रह्माजी, रुद्रजी और भगीरथ इन तीनों को पवित्र कर रही है ॥ १६ ॥

भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः। आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ ॥ १७ ॥
गौर्भूत्वाश्रुमुखी खिन्ना [1]रुदन्ती करुणं [2]विभोः। उपस्थितान्तिके तस्मै व्यसनं [3]समवोचत ॥ १८ ॥
ब्रह्मा तदुपधार्याथ सह देवैस्तया सह। जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥ १९ ॥
तत्र गत्वा जगन्नाथं [4]देवदेवं वृषाकपिम्। [5]पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥ २० ॥

श्री कर्दमक्षमा

अन्वयः—दृप्तनृपव्याजदैत्यानीकशतायुतैः भूरिभारेण आक्रान्ता भूमिः ब्रह्माणं शरणं ययौ ॥ १७ ॥ खिन्ना अश्रुमुखी करुणं रुदन्ती भूः गौः भूत्वा विभोः अन्तिकम् उपस्थिता तस्मै व्यसनं समवोचत ॥ १८ ॥ अथ ब्रह्मा तद् उपधार्य देवैः सह सत्रिनयनः तया सह क्षीरपयोनिधेः तीरं जगाम ॥१९॥ तत्र गत्वा समाहितः देवदेवं जगन्नाथं वृषाकपिं पुरुषं पुरुषसूक्तेन उपतस्थे ॥२०॥

---

[1] क्रन्दन्ती–श्री. वंशी. रुदन्ती–वीर. विज. ज्जीव. [2] यथा–विज. [3] स्वमवोचत–श्रीधरादयः, समवोचत–वीर.
[4] वासुदेवं–इति कस्यचित् [5] पूर्णं–इति कस्यचित्।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र तावत्प्रथमं भगवदवतारकारणमाह । भूमिरित्यादिभिर्नवभिः श्लोकैः । दृप्तनृपव्याजा ये दैत्यास्तेषामनीकशतानामयुतैर्यो भूरिभारस्तेनाक्रांता ॥ १७ ॥ विभोः अंतिके उपस्थिता सती ॥ १८–२० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र तेषु तत्रांशेनावतीर्णस्येत्यादिप्रश्नेषु तावत्सकलप्रश्नेषु "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः । अयुतैरनंतैर्न तु तावन्मात्रसंख्याकैः । "संख्या स्वार्थमनंतत्वं चाह सर्वा शतादिका" इति धरणिदेवः । ब्रह्माणं मेरुमूर्द्धस्थं न तु सत्यलोकस्थं "जगाम धरणी मेरोः समाजे त्रिदिवौकसाम्" इति पराशरोक्तेः । दृप्ता गर्विता ये नृपव्याजा नृपापदेशाः 'व्याजोऽपदेशो लक्ष्यम्' इत्यमरः । शरणं रक्षितारम् 'शरणं गृहरक्षित्रोः' इत्यमरः ॥ १७ ॥ खिन्ना दीना । तस्मै विभवे ब्रह्मणे व्यसनं निजापत्तिम् "व्यसनं विपदि ध्वंसे पानस्त्रीमृगयादिषु" इति मेदिन्यादयः । तद्व्यसनम् ॥ १८ ॥ उपधार्य्य मत्कर्म तु सृष्टिरेव पालनं तु विष्णोः स च क्षीराब्धौ तदपि किंचित्संहारं विना न सेत्स्यतीति सत्रिनयनस्यैव तत्र गमनमुचितमित्यालोच्येत्यर्थः । तया भूम्या ॥ १९ ॥ तत्र क्षीरसागरे । पुरुषं पुरुषसूक्तेन "सहस्रशीर्षा" इत्यादिषोडशर्चमंत्रेणोपतस्थे "उपान्मंत्रकरण" इत्यादिनात्मनेपदम् । जगन्नाथत्वं राजादेरप्यस्ति तद्वारणाय—देवदेवमिति । इन्द्रादिवारणाय वृषाकपिम् । वर्षत्यभीष्टमिति वृषः अकाद्दुःखात्पाति कपिनष्टीति वाऽकपिः स चासावकपिश्चेति वृषाकपिस्तम् । यद्वा—काज्जलाद्भूमिमपादिति कपिः "कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते । तस्माद्वृषाकपिं प्राह कश्यपो मां प्रजापतिम् ॥" इति व्यासोक्तेः । यद्वा—वर्षतीति वृषा 'वासवो वृत्रहा वृषा' इत्युक्तेरिंद्रस्तमकाद्ब्रह्महत्यादुःखात्पातीति वृषाकपिस्तम् 'इन्द्रं च वृत्रवधतस्तमसि प्रविष्टम्' इत्याद्युक्तेः । समाहितः समाधिनिष्ठः । गिरं समाधाविति प्रतिपदं वक्ष्यमाणत्वात् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र तावद्भगवदवतारे प्रसिद्धं कारणमाह—भूमिरिति । दृप्तेति दर्पस्वभावनिर्देशात् स्थानास्थानविवेकाभावेन सदवमाननादिज्ञापकत्वं दैत्यत्वलक्षणम् , शतायुतैरिति अपरिच्छेद्यत्वम् ' शरणं ययौ आश्रितवती ॥ १७ ॥ कथं तदाह—गौरिति । गोरूपेति कृपाविशेषजननार्थम् । तत्रापि खिन्ना दुःखिता अत एव करुणं काकुकम्पादिसंयुक्तं यथा स्यात्तथा रुदन्ती रुदती, क्रन्दतीति कचित् पाठः । अत एवाश्रुमुखी अश्रुव्याप्तानना तथा च श्रीविष्णुपुराणहरिवंशयोः "खेदात् करुणभाषिणी" इति । विभोरिति । भगवदावेशेन जगद्वैभवयोगात् । अतस्तस्मै तं प्रति व्यसनं निजदुःखं सम्यगुक्तवती । स्वमिति पाठे स्वीयम् । तद्विशेषः श्रीविष्णुपुराणे "ये साम्प्रतमिमे दैत्याः कालनेमिपुरोगमाः । मर्त्यलोकं समागम्य बाधन्तेऽहर्निशं प्रजाः ॥ कालनेमिर्हतो योऽसौ विष्णुना प्रभविष्णुना । उग्रसेनसुतः कंसः सम्भूतः स महासुरः ॥ अरिष्टो धेनुकः केशी प्रलम्बो नरकस्तथा । सुन्दोऽसुरस्तथात्युग्रो बाणश्चापि बलेः सुतः ॥ तथान्ये च महावीर्या नृपाणां भवनेषु ये । समुत्पन्ना दुरात्मानस्तान्न सङ्ख्यातुमुत्सहे ॥ अक्षौहिण्या हि बहुला दिव्यमूर्त्तिधरासुराः । महाबलानां दृप्तानां दैत्येन्द्राणां ममोपरि ॥ तद्भूरिभारपीडार्त्ता न शक्नोम्यमरेश्वराः ! । विभर्तुमात्मानमहमिति विज्ञापयामि वः ॥ क्रियतां तन्महाभागाः ! मम भारावतारणम् । यथा रसातलं नाहं गच्छेयमतिविह्वला" ॥ इति ॥ १८ ॥ तदनन्तरं सद्य एवेत्यर्थः । तच्चावतारहेतूपन्यासे माङ्गल्यसूचकम् । त्रिनयनेन सहित इति । तस्य पृथगुक्तिर्भगवत्प्रियतमत्वेन तत्र विशेषतः साहाय्यापेक्षया । क्षीराब्धितीरे गमनं तत्रस्थभगवद्रूपस्यैव विष्णुत्वेन पालकत्वात् । पाद्मोत्तरखण्डे तथा व्याख्यानात् "विष्णुः क्षीराब्धिमन्दिरः" इति बृहत्सहस्रनामस्तोत्रे विष्णुनामगणपाठाच्च । तत्र तीर एव गत्वा न तु तत्रत्यश्वेतद्वीपाख्यश्रीभगवत्पुर्यामिति (१) तस्यापि दौर्लभ्यमभिप्रेतम् । तच्च मोक्षधर्मे नारायणीये व्यक्तमेव, अत्र स्थाने स्थाने दर्शयिष्यमाणवचनानुसारेण प्रक्रियेयं ज्ञेया, प्रथमतः परमगोलोकाधिष्ठाता स्वयं भगवान् वासुदेवाख्यः प्रथमव्यूहः श्रीकृष्णः तदीयद्वितीयव्यूहस्य सङ्कर्षणस्यांशांशः कारणार्णवशायी महत्स्रष्टृपुरुषः सोऽपि सङ्कर्षणाख्यः । तदीयचतुर्थव्यूहस्यानिरुद्धस्यांशो गर्भोदशायी अनन्तकोटिब्रह्माण्डपरमाणुगवाक्षायमाणेषु कारणार्णवशायिरोमविवरतुल्येष्ववकाशेष्वेकैकब्रह्माण्डस्थितः पुरुषः सोऽप्यनिरुद्धाख्यः, तस्यांशः क्षीरोदधामा विष्णुः तथैकैकव्यष्ट्यन्तर्यामी सर्वभूतस्थः पुरुषश्च तृतीयव्यूहस्य प्रद्युम्नस्यांशांशः, प्रद्युम्नस्तु हिरण्यगर्भान्तर्यामीति कश्चित्तु परमगोलोकमध्यवर्ती श्रीकृष्णापरपर्यायः श्रीगोविन्दः वसुदेवादयस्तु तदावरणदेवता इति भेद इति ॥ १९ ॥ पुरुषमिति । महत्स्रष्टृमहापुरुषभेदाभिप्रायेण अतः पुरुषसूक्तेनैवोपतस्थे भक्त्या तुष्टाव तेन च स्तुतिस्तस्य महिमविशेषसूचनार्थं वेदप्रमाणकताज्ञापनार्थञ्च समाहितस्तदेकचित्तः सन् , कुतः ? जगतां नाथं विशेषतश्च देवानां देवं पूज्यं जगत्-पालनार्थं देवैः स्तुत्यत्वादिति भावः । किञ्च वर्षति कामान् आकम्पयति क्लेशानिति वृषाकपिस्तम् इति प्रयोजनञ्चोद्दिष्टम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तमित्थं प्रत्यक्ष्यावतारप्रभृतीनि वीर्याणि विस्तरतो विवक्षुस्तावदवतारनिमित्तभूतां भूप्रार्थनामुपपादयति—भूमिरित्यादिभिश्चतुर्भिः । दृप्ताः गर्विताः नृपव्याजाः नृपवदवभासमानाः ये दैत्यास्तेषामनीकानां सैन्यानां शतानामयुतैर्भूरिभारेण तद्रूपनिरव-

धिकभारेणाऽऽक्रान्ता पीडिता भूमिः ब्रह्माणं चतुर्मुखं शरणं ययौ ॥ १७ ॥ तदेव प्रपञ्चयति—गौर्भूत्वा गोरूपं बिभ्राणा खिन्ना दीना अश्रूणि मुखे यस्यास्तथाभूता करुणं यथा तथा रुदन्ती विभोर्ब्रह्मणोऽन्तिके समीपे उपस्थिता स्तुवन्ती व्यसनं स्वदुःखं तस्मै ब्रह्मणे सम्यगवोचत् विज्ञापयामास ॥ १८ ॥ ब्रह्मा तद्व्यसनमुपधार्य ज्ञात्वा अथ देवगणैस्तया भूम्या च सह सत्रिनयनः सरुद्रः क्षीरसागरस्य तीरं जगाम ॥ १९ ॥ तत्र तीरे गत्वा समाहितचित्तो जगन्नाथं परमपुरुषं वृषाकपिं श्रीमहाविष्णुं पुरुषसूक्तेनोपतस्थे तुष्टाव स्तुतिपूर्वकं निदध्याविविर्त्यर्थः ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

एतदन्यच्चेत्येतत्, यदन्यदिति, तदिदमिति, ध्वनयन् कथामादित उपक्रमते—भूमिरित्यादिना। शतायुतैरित्यनेनासङ्ख्यातत्वं सूचयति। भूरिभारेण पीडितेति शेषः ॥ १७ ॥ यथा करुणं भवति तथा रुदन्ती व्यसनं विविधनिरसनम् ॥ १८–१९ ॥ जगन्नाथत्वं राजादेरप्यस्तीति देवदेवमिति, इन्द्रादिव्यावृत्त्यर्थं वृषाकपिम्, अभीष्टदानादानन्दपानाच्च वृतषड्गुणत्वादकपेर्दुःखपेषणाच्च वृषाकपिः, तं निरूपस्य हरेरिन्द्रियविषयत्वं कथमित्यतः पुरुषमिति "तस्येदमेव शिरः" इत्यादेः उपतस्थे मन्त्रवचनपूर्वकमुपासनां कृतवानिति "उपान्मन्त्रकरणे" (१।३।२५) इत्यात्मनेपदम्। कोऽयं मन्त्रः येन धात्वर्थः समर्थितः स्यादित्यतः पुरुषसूक्तेनेति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ब्रह्मेति। क्षीराब्धेस्तीरगमनं तस्यैव विष्णुत्वेन पालकत्वात् तथैव पाद्मोत्तरखण्डे प्रतिपादितम् "विष्णुः क्षीराब्धिमन्दिरः" इति, बृहत्सहस्रनाम्नि गुणाऽवतारविष्णुनामवर्गे च दृष्टम्" ॥ १९–२० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तत्र तावद्भगवदवतारे प्रसिद्धं कारणमाह—भूमिरिति। दृप्तनृपव्याजाः दितिवंशत्वाभावेऽपि कर्मणैव ये दैत्यास्तेषामनीकशतानामयुतैर्यो भूरिभारस्तेनाक्रान्ता ब्रह्माणं सुमेरुमूर्द्ध स्थितमेव न तु सत्यलोकस्थम्। कृष्णावतारादतिपूर्वमेव ककुद्मिना रेवत्याः कन्यायाः सम्प्रदानप्रश्नार्थं तत्र गतवता तेन सहित एव क्षणानन्तरं ब्रह्मा तं प्रत्याह—सम्प्रत्यवतीर्णाय बलदेवाय कन्या दीयतामित्यतस्तस्य तन्मध्ये क्षीरोदतीरागमनं न वृत्तम् "जगाम धरणी मेरोः समाजे त्रिदिवौकसाम्' इति पराशरेणाप्युक्तम् ॥ १७–१८ ॥ तदुपधार्याथ जगामेत्यथशब्दाधिक्यादिदं लभ्यते। विश्वसृष्टिरेव मत्कर्म, पालनं तु विष्णोरेव कर्म, स च विष्णुः क्षीराब्धिस्थ इति तत्रैव गत्वेदं निवेदनीयमिति परामृश्य ततो जगामेति। तत्र कार्यद्वयमुपस्थितं पृथ्वीपालनं दैत्यसंहरणञ्च; तत्र प्रथमार्थं देवेन्द्रं वा आज्ञापयेत् द्वितीयार्थं रुद्रं वेति देवसाहित्यं त्रिनयनसाहित्यञ्च कृतम्। जगन्नाथमिति तत्र गमने न्यायः। देवदेवमिति, स्वेषां विज्ञापने चाधिकारः। वृषाकपिमिति, वर्षति कामान् आकम्पयति क्लेशानिति प्रयोजनञ्चोक्तम् ॥ १९–२० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र प्रथमं भगवदवतारप्रयोजनविशेषमाह—भूमिरित्यादि नवभिः। "ताः आपः अब्रुवन्" इत्यादिवद्भूमेरचेतनायाः चेतनत्वं देवताप्रवेशाद्बोध्यम्। कृत्स्नायाः गमने भूर्लोकोच्छेदप्रसङ्गादंशमात्रेणैव गोरूपेण शरणं ययौ। गमने हेतुमाह—दृप्तनृपव्याजानां दैत्यानां यान्यनीकानि तेषामयुतैर्यो भूरिभारस्तेन आसमन्तात्क्रान्तेति ॥ १७ ॥ ब्रह्मणोऽन्तिके पुण्यशरीरेणैव स्थातुं योग्यत्वात् गौर्भुत्वोपस्थिता सती व्यसनं दुःखमवोचत ॥ १८ ॥

"ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदम्। शुद्धं सनातनं ज्योतिः परं ब्रह्मेति यद्विदुः ॥"—

इति महाभारते मुद्गलोपाख्याने विष्णुलोकस्य व्यापकस्य ब्रह्मलोकादुपरिस्थत्वेन प्रोच्यमानस्य "दर्शयामास लोकं स्वं गोपानां तमसः परम्" इति वक्ष्यमाणात् प्राकृतमण्डलाद्बहिः प्रकाशमानस्य सर्वैरगम्यत्वात् क्षीरनिधेस्तीरं विष्णोः स्थानम् ब्रह्मा प्रजाकार्ये सर्वदाऽवहितः कार्यगौरवात् जगाम, बलस्य तदानवतीर्णत्वाद्रेवतीवरमनुक्त्वैव गान्धर्वसुखासक्तं ककुद्मिनं विसृज्यैवेति बोध्यम् ॥१९॥ तत्रापि तमदृष्ट्वोपतस्थे स्तुतिं कृतवान् यत्र तत्रापि स्थितेनैकेनापि प्रार्थितः प्रादुर्भवति अयं महाप्रयत्नस्तु साक्षात्परमपुरुषप्रादुर्भावाभिप्रायः। कथम्भूतं पुरुषं स्तुतवानत्राह—जगन्नाथमिति। जगतः चेतनाचेतनसमूहस्यानन्तकोटिब्रह्माण्डात्मकस्य नाथं न तु श्वेतद्वीपस्थमात्रमेकब्रह्माण्डनाथमित्यर्थः। ननु, तर्हि दैत्यवधं न करिष्यतीत्यत आह—देवदेवमिति। देवानां सात्त्विकानां विशेषतो देवो मोदप्रदस्तम्। ननु, दैत्यानां निग्रहरूपं देवानां भूभारहरणादिनाऽनुग्रहरूपं कार्यं तु पुरुषावतारेण केनचिदेव कर्तुं शक्यं, किं पुनः परमपुरुषावतारस्य प्रयोजनं यदर्थोऽयं महान् प्रयत्न इत्यत आह—वृषाकपिमिति। वर्षति भक्तं प्रति भजनीयरसमिति वृषो भक्तियोगलक्षणो धर्मस्तस्य आ सर्वतः कं सुखं पिबतीति तथा तम् स्वदासकर्तृकवात्सल्यादिभक्तिसुखास्वादलुब्धमित्यर्थः ॥२०॥

श्रीसुबोधिनी

एवं भगवत्सम्बन्धित्वेन प्रश्नमभिनन्द्य भगवदवतारप्रयोजनज्ञानार्थं कथामारभते—**भूमिरिति** ।

भक्तानां दुःखनाशाय कृष्णावतरणं मतम् । भूमिर्माता तथा चान्ये भक्ता वै त्रिविधा मताः ॥ १ ॥
सर्वेषां च महद्दुःखं नान्येन विनिवार्यते । यदा तदा हरिः कृष्णः प्रादुरासीदिति स्थितिः ॥ २ ॥
ये भक्ताः शास्त्ररहिताः स्त्रीशूद्रद्विजबन्धवः । तेषामुद्धारकः कृष्णः स्त्रीणामत्र विशेषतः ॥ ३ ॥
येषां निरोधकं शास्त्रं योगादि विनिरूपितम् । शेषभावस्तत्र हरेर्न कदाचिद्भविष्यति ॥ ४ ॥
संसारदुःखव्यावृत्त्यै निरोधोऽत्र निरूप्यते । अतो निरोधो ज्ञानात्मा दुःखरूपा च संसृतिः ॥ ५ ॥
एवमेकं फलं प्रोक्तं द्वयं वा न निरुद्ध्यते । साङ्गस्य प्रक्रिया युक्ता ततः स्कन्धोऽपि युज्यते ॥ ६ ॥
अवतारी निरोधाङ्गं तदङ्गं दुःखमेव च । धैर्यार्थं सान्त्वनं प्रोक्तं भूमिमात्रोर्न चान्यथा ॥ ७ ॥
अन्ते दुःखं भक्तकृतं प्रादुर्भावाय वै हरेः । आकाशवाणीवाग्देवः सर्वमुक्त्यर्थमुद्गतः ॥ ८ ॥
अशक्तः सँस्तथा चक्रे तथा नारद एव हि । दशभिः सान्त्वनं भूमेः पञ्चत्रिंशत्तमैस्तथा ॥ ९ ॥
अष्टभिर्नारदोक्त्यैव सर्वेषां दुःखमञ्जसा ॥ ९½ ॥

तत्र दशभिर्भूमिसान्त्वनं वाचा । उपायेन देवक्याः पञ्चत्रिंशद्भिः । ततोऽष्टभिः सर्वेषां दुःखं भगवदवतारार्थं हेतुभूतमुच्यते । प्रथमः स्वदुःखनिवेदनेन दैन्यम् । ततो भक्तानां भगवत्समीपगमनम् । निवेदनार्थं स्तोत्रम् । ततो भगवद्वाक्यनिवेदनम् । शब्दस्तदर्थश्चतुर्भिर्विवृतः क्रियाजन्मसङ्कर्षणमायाभिः । तत उपसंहार इति । तत्र प्रथमं भूमेरुद्योग उच्यते । व्यापिवैकुण्ठ एव हरिः प्रकटः । अन्यत्र सर्वत्र गुप्त इति । भगवत्स्थाने न गता भूः ब्रह्मणा च जनिता । अत उपायकरणार्थमेव भूम्युद्धरणवदधुनापि करिष्यतीति तत्र गमनम् । भूमिर्वस्तुतो दैत्यानाम् । 'यावदासीनः परापश्यति तावद्देवाना'मलस्तावद्रूपेण देवोपयोगिना गमनम् । शीघ्रं बाधाभावाय । कार्यावश्यकत्वाय च शरणगमनम् । दैत्याः सर्वे मायादेवताः कापट्येनैव भूमिं रसातलं नेतुं राजरूपेणावतीर्णाः । राज्ञां दैत्यत्वज्ञापकं लक्षणं दृप्तत्वमुच्छास्त्रवर्तित्वम् । एतदेव सर्वत्र लक्षणम् । हता अमुक्तास्ते देवेष्वपि प्रविष्टा इति देवा अपि तथा । भक्तेष्वन्ते निराकृताः । अवतारे तद्धर्मा भविष्यन्तीति तद्व्यावृत्त्यर्थमाह—**व्याजेति** । ते च दैत्या नोपभोगार्थमागताः, किन्तु घातार्थमिति ज्ञापयितुमाह—**अनीकेति** । दैत्यानामनीकानि तेषां शतान्यसंख्यातानि तानि चायुतान्यमिलितानि तत्र तत्र पुञ्जीभूय स्थितानि । अत एवासमन्तात् क्रान्ता, यथा सर्वतश्च शीघ्रं निमग्ना भवति । भूरिभारेणाक्रान्ता । दैत्यत्वं भारजनकत्वम् । यथा उन्मत्त एकोऽपि नौकारूढो नौकां मज्जयति । बलाक्रमणे च भारः । पूर्वं ब्रह्मणा उद्धारे उपायः कृत इति **ब्रह्माणं शरणं ययौ** ॥१७॥ रूपान्तरेण गमनं देवानां हितकारि न भवतीति हविर्धानीरूपेण गतेत्याह **गौर्भूत्वेति** । **गौर्भूत्वा अन्तिके उपस्थिता तस्मै व्यसनं समवोचत**ेति सम्बन्धः । अश्रूणि अप्रोञ्छितानि निरन्तरं प्रवृत्तानि मुखे समायान्ति । अन्तःखेदात्मके तापे स्वेद एवाश्रूणि भवन्ति । खेदोऽपि ज्ञानजनितश्च तदा ज्ञानद्वारा नेत्रयोर्निर्गतः स्वेदोऽश्रुशब्देनोच्यते । दैत्यानामभिप्रायज्ञानेन शोकः । अन्तःस्थितधर्मविसंवादि वाक्यमप्रमाणमिति धर्मप्राकट्यपूर्वकं धर्मकथनम् । बहूनां तादृशानां सम्भवान्निर्धारार्थं कथनम् । अधिकारित्वादविचारदशायां न सर्वज्ञतेति युक्तं कथनम् । **खिन्नेति** दुःखसन्ततिरत्यन्तं निरूपिता । दौर्बल्यं कान्त्यभावश्च तस्य ज्ञापकौ । तस्यास्ततोऽन्योपायबोधननिवृत्त्यर्थं तथोक्तम् । रोदनं शब्दात्मकं करुणं यथा भवतीति पितृवियोगजनितखेदाभावाय । अधिकारित्वात् कार्यान्तरज्ञानः । व्यसनमप्रतीकारदुःखम् । स्वं **सम्यगवोचत**ेत्यर्थः ॥ १८ ॥ ततो ब्रह्मा दैत्यसम्बन्धित्वाद्भूमेः सहायार्थमाकारणशङ्काव्यावृत्त्यर्थमालोचनज्ञानेन तदुक्तार्थं निश्चित्य प्रतीकारं कृतवानित्याह—**ब्रह्मे**ति । ब्रह्मत्वात्तथासामर्थ्यं ज्ञानात्मकत्वात् । अथेति स्वनिश्चयानन्तरं, न तु भूमिवाक्यमात्रेण । देवानां नयनमाज्ञापनार्थं, आलोचने प्रतीकारं ससाधनं ज्ञातवानिति । महादेवस्य नयनं दैत्यानामुपायान्तरोपदेशाभावाय । भूमेर्नयनं निमित्तज्ञापनाय । अत एव त्रिनयनपदम् । त्रिष्वपि देवदैत्यमनुष्येषु नयनं यस्येति । श्वेतद्वीपं भगवतः प्रियं धामेति व्यापिवैकुण्ठद्वारस्य तत्र नैकट्याद्वा **क्षीरपयोनिधेस्तीरं जगाम**, भूमावासक्त एव भूम्युपकारं करिष्यतीति ज्ञापनार्थं च ॥ १९ ॥ तत्रापि भगवतस्तिरोभावात् स्तोत्रं कृतवानित्याह—तत्र गत्वेति । गमनमात्रेणैव स्तोत्रं कृतवानिति ज्ञापनार्थं गत्वेत्यनुवादः **तत्र गत्वा समाहितो** योगारूढः **पुरुषसूक्तेन उपतस्थ** इति सम्बन्धः । स्वयं कथं न प्रतीकारं कृतवानिति शङ्काभावायाह—**जगन्नाथमिति** जगतां स एव नाथस्ततः स्वस्याकरणम् । ननु जगन्नाथत्वे दैत्यानामपि नाथ इति प्रतीकारं न कुर्यादित्याशङ्क्याह—**देवदेवमिति** । देवानामपि स एव देवः । देवैर्दीव्यतीति वा । प्रजापतेः 'प्रजापतिरग्नेरग्निः सूर्यस्य सूर्य' इति । अतो देवानां भगवानाधिदैविकरूप इति न दैत्यहितं करिष्यतीति भावः । जगन्नाथो मर्यादया । सांप्रतं दैत्यानामतिक्रमान्न पक्षपातः । ननु भूमे रसातलगमनेपि स्वर्गो देवैः सह क्रीडा देवहिताचरणं च सम्भविष्यतीत्याशङ्क्याह—**वृषाकपिमिति** । वृषो धर्मो यज्ञादिरूपः, तस्यासमन्तात् कं सुखं फलं स्वर्गादि तत् पिबतीति । सर्वयज्ञफलभोक्ता । भूम्यभावे ततो यज्ञभावः । देवानां च देवत्वं यज्ञफलभोगादेव । मन्त्रद्रष्टाऽसंनिहितश्च कथं स्तूयत इत्याशङ्क्याह—**पुरुषमिति** । स हि स्वहृदय एव वर्त्तते । 'पुरुषो वा नारायणः

स्वपिते'ति। ततः कार्यावश्यम्भाव इति ज्ञापनार्थम्। **पुरुषसूक्तेनेति** वैदिकेन भगवत्प्रेरणया प्राप्तेन भगवतोऽतिप्रियेण। पुरुषसूक्तं च तेजोमयम्। उपस्थानविद्यया तेजोमयः परितुष्यतीत्यन्तर्यामिपुरःसरं स्तोत्रकरणात् तत्सूक्तेनैव स्तोत्रमुचितम्॥ २०॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

भूमिर्दृप्तेत्यत्र उद्धारविषयनिर्द्धारमाहुः—**ये भक्ता** इति। शास्त्रीयसाधनरहितानामित्यर्थः॥ का० ३॥ ननु ससाधनानामपि कथं न विषयत्वमित्याशङ्क्य तत्र बाधकमाहुः—**येषामिति**॥ का० ४॥ किञ्च, एतेषां निरोधपदार्थोऽपि पूर्वस्माद्विलक्षणोऽतोपि न विषयत्वमित्याहुः—**संसारेति**। **अत्र** ससाधनेष्वित्यर्थः। **निरूप्यते**। त्वयेति शेषः। तथा च संसारस्याविद्याकार्यत्वेन तन्निवृत्तेश्च ज्ञानैकसाध्यत्वेन तद्रूप एव निरोधस्तेषां वाच्य इत्याह—**अत** इति। तथा च बह्वेव वैलक्षण्यमिति भावः। किञ्च, भक्तानां संसारो लीलोपयोगित्वेन सुखरूपस्तेषां तु दुःखरूप इतीतोपि तद्वैलक्षण्यमित्याहुः—**दुःखेति**॥ का० ५॥ प्रासङ्गिकमुक्त्वा पूर्वोक्तमुपसंहरन्ति—**एवमिति**। **एक** निःसाधनानां भगवत्प्राप्तिलक्षणमित्यर्थः। ननु भगवत्कृतनिरोधो न शास्त्रैर्जनयितुं शक्य इति पूर्वोक्तशेषभावासम्भवात् ससाधनानामपि विषयत्वं वक्तुं युक्तम्। अत एव 'तथा परमहंसानां मुनीनाममलात्मनाम्। भक्तियोगवितानार्थं कथं पश्येमहि स्त्रिय' इति पृथावचनमपि गीयत इत्याशयेन पक्षान्तरमाहुः—**द्वयं वेति**। उभयोर्निरोधस्यैकरूपत्वेनोक्तवैलक्षण्याभावात्तथेत्यर्थः। एवम्प्रकारेण लीलाकरणे कथने च हेतुमाहुः—**साङ्गस्येति**। निरोधस्येति शेषः। अत्रोपपत्तिमाहुः—**तत** इति। यतश्चिकीर्षितनिरोधमवतीर्य स्वयं कृतवानतो हेतोरयं **स्कन्धो** दशमत्वेन **युज्यत** इत्यर्थः। अन्यथाऽनवतीर्यैवाम्बरीषादेरिवात्रापि भक्तदुःखनिवारणोक्तौ भक्तकथैवोक्ता भवतीतीशानुकथैवेयमपि भवेदित्यस्य स्कन्धस्य दशमत्वं न स्यादिति भावः॥ का० ६॥ अङ्गमाहुः—**अवतार** इति। येन विना यन्न सम्भवति तत्तदङ्गमत्रोच्यते। तथा चानाविर्भावे निरोधपदार्थ एव न स्यादिति भावः। यद्वा, यतः संसारभवदुःखव्यावृत्तिरेव निरोधप्रयोजनमतो निरन्तरं भगवत्स्मरणात्मको निरोधो देवासुरसाधारणो निरूप्यत इत्याहुः—**संसारेति**। स्मृतिश्च क्वचित् स्नेहात् क्वचिद्द्वेषादिनेति परं विशेषः। **एकं** पूर्वोक्तमित्यर्थः। अथवा यतो (लीलानुपयोगिसंसारवतां) संसृतिरपि दुःखरूपातोधिकारिभेदेन विरोधाभावाद्दुःखनिवृत्तिः संसारनिवृत्तिश्चेति द्वयमपि फलमित्युक्तमित्याहुः—**दुःखरूपा च संसृतिः, द्वयं वा न विरुध्यत** इति। एवमनुक्तौ 'दुःखरूपे'त्याद्यनर्थकं स्यात्। केषाञ्चिद्भक्तानां दुःखमेव निवारितम्। अहम्ममात्मकः संसारस्तु लीलोपयोगित्वेन स्थापित एव। केषाञ्चिद्भक्तानामन्येषां च संसारोऽपि नाशितः। तेन द्वयमपि फलमित्यर्थः॥का० ७॥ नन्वाधिदैविकप्रवर्तनं विना वाण्युद्गमासम्भवे भक्तदुःखहेतुवाणीं स कथं प्रवर्तितवानित्याशङ्क्य तत्तात्पर्यमाहुः—**सर्वमुक्त्यर्थमिति**। हर्याविर्भावं विना सा न भवतीति स्वयं तं कर्तुमशक्तस्तद्धेतुहेतुं **चक्र** इत्यर्थः। 'तदनुगुणदेवतायास्तदुत्कर्षमसहमानाया' इतिरूपेऽग्रिमग्रन्थे तत्पदाभ्यां कंस एवोक्त इति ज्ञेयम्। मुक्तिहेतुत्वेन तदनुगुणत्वम्। भगवन्मातृदास्यं दैवपक्षे परमोत्कर्षः। अयं चासुर इत्यसहमानत्वम्। एवमविरोधः पूर्वापरयोः। 'कालो ह्यत्र प्रतिबन्धको जात' इत्यत्रापि 'अत्र'पदस्य देवानुगुणत्वे कंसस्येत्यर्थो ज्ञेयः। तथा सति मातुर्दुःखासम्भवेन मातृत्वमेव न स्यादिति भावः॥ का० ८–९½॥ **अतस्तेऽप्यन्त** इति भीष्मादय इत्यर्थः। **तद्धर्मा** इति नृपधर्मा इत्यर्थः॥ १७॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

भूमिरित्यत्राभासे भगवदवतारप्रयोजनज्ञानार्थं कथामारभत इति यदुक्तं तद्व्युत्पादयन्ति कारिकासु। ननु तृतीयस्कन्धे उद्धवैः 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मे'त्यत्रोक्तमवतारप्रयोजनं राज्ञा ज्ञातमेवेति कथायाः किं प्रयोजनमित्याकाङ्क्षायां तदनुवदन्तस्तत्र विशेषमाहुः—**भक्तानामिति** द्वाभ्याम्। **मतमिति** उद्धवैर्विचारितम्। शान्तरूपाण्येव **भूमिरित्यादिनोक्तानि अन्येनेति** साधनान्तरेण स्वरूपान्तरेण वा। **स्थितिरिति** निर्णयः। तथा च भक्तदुःखनिवारणे साधनान्तराद्यशक्तिरेव स्वावतारप्रयोजनमित्यर्थः। नन्विदमवतारप्रयोजनं तृतीयस्कन्धे सिद्धमेवेति किमत्र तदनुवादेनेत्याकाङ्क्षायां **टिप्पण्यां** तत्प्रयोजनमाहुः—**उद्धारेत्यादि**। तथा चेदमनुवादप्रयोजनमित्यर्थः॥ का० १–२॥ 'अन्य' इत्यनेनोक्ता ये त्रिविधा भक्तास्तान्निष्कर्षन्ति—**ये भक्ता** इत्यादि। तथा चात्रारम्भे भुवो गोरूपताकथनाद्ये **शास्त्ररहितास्तेषां** भुवश्च स्त्रीत्वात्। अन्ते च 'माधव्यो लेभिरे परमां गति'मितिकथनान्मध्ये साधनशून्यानामन्येषां च कथनात्तादृशां च तथेत्यर्थः। अग्रिममवतार्य व्याकुर्वन्ति—**टिप्पण्यां नन्वित्यादि**॥ का० ३॥ कारिकायां **शेषभाव** इति। समाध्यादिविषयत्वेन तन्निर्वाहकत्वाच्छेषभावः। एतदग्रिममवतार्य व्याकुर्वन्ति—**टिप्पण्यां किञ्चे**त्यादि। **एतेषामिति**। ससाधनानामित्यर्थः। उपसंहारं व्याकुर्वन्ति—**एवमित्यादि**। तथा च फलस्य वाक्यतात्पर्यनिश्चायकत्वादुक्तदोषाभावाच्च निःसाधना **एवोद्धारविषया** इत्यर्थः॥ का० ४–५॥ **'द्वयं वे'**त्यादिग्रन्थमवतारयन्ति—**ननु भगवदित्यादि**। **द्वयं** वेत्यत्र **वा**शब्दः पक्षान्तरे। **द्वयं** भिन्नविधं भक्तसङ्घद्वयम्। **न विरुद्ध्यते** कर्मकर्त्तरि प्रयोगः। फलैक्याद्विरोधं न प्राप्नोतीत्याशयेन व्याकुर्वन्ति—**उभयोरित्यादि**। तथा चात्र स्कन्धे ससाधनानामप्युद्धारदर्शनात्पूर्वोक्तदोषाभावाच्च ससाधना अपि सङ्ग्राह्या इत्यर्थः। तर्हि पूर्वमेव तथा कुतो नोक्तमित्याकाङ्क्षायामग्रिममवतार्य व्याकुर्वन्ति—**एवम्प्रकारेणेत्यादि**। निःसाधनोद्धारजनकप्रकारेण लीलाकरणे तस्य शुकव्यासाभ्यां च कथने हेतुमाहुरित्यर्थः। **साङ्गस्येत्यादि**। अङ्गं भूमौ प्रादुर्भावस्तत्सहितोऽत्र निरोधो भगवदेकतानत्वं, तस्य।

प्रक्रिया प्रकर्षेण कृतिः। उभयाकाङ्क्षायुतं वाक्यकदम्बकं च सा युक्ता, अनुकम्पाप्रयुक्तत्वादुचिता। यदि हि ससाधनानेव मुख्यतयोद्धरेच्छुकश्चासौ च तदुद्धारं मुख्यतया कथयेताम्, तदा साधनरूपस्योपाधेर्विद्यमानत्वान्निरुपधिपरदुःखप्रहाणेच्छाव्यङ्ग्योनुग्रहोऽनुकम्पात्मा भगवति न सिद्ध्येदतो निःसाधनानामेव मुख्यता युक्तेत्यर्थः। **टिप्पण्यां अत्रेति** औचित्ये ॥ का० ६ ॥ ननूद्धारविषयनिर्धारस्तु 'गमिष्यती'त्यन्तकारिकाभ्यामेव जात इति 'संसारे'त्यादिकमनतिप्रयोजनमित्यरुच्या संसारेत्यस्य व्याख्यानान्तरमाहुः—यद्वेत्यादि। पूर्वोक्तमिति। भगवत्प्राप्तिलक्षणम्। तथा च 'ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं दुरवापमापे'त्यादिवाक्यादसुरा अप्युद्धारविषयत्वेन सङ्गृह्यन्त इतीदं प्रयोजनमित्यर्थः। एवं चात्र सन्दर्भे 'स्वशान्तरूपे'ष्वित्यत्र भगवद्भक्तेषु याऽनुकम्पा उक्ता सा तद्दुःखदासुरमुक्तिपर्यन्ता न तु भक्तमात्रपर्यवसन्नेति तत्सर्वकार्यार्थं भगवदवतार इति पूर्वं राज्ञा न ज्ञातमतस्तत्सर्वज्ञानार्थं कथारम्भ इति सिद्ध्यति ॥ का० ६ ॥ ननु तथापि दुःखान्त एव ग्रन्थो वक्तव्यः सान्त्वनस्य किं प्रयोजनमत आहुः—**सुबोधिन्यां** धैर्यार्थमित्यादि। दुःखसहनार्थं **भूमिमात्रोः** सान्त्वनमाश्वासनं **प्रोक्तमन्यथा** सान्त्वनाभावे दुःखस्य महत्त्वात्स्थितिरेव न स्यात्तथा सत्यवतारोपि न स्यादेवातस्तथेत्यर्थः ॥ का० ७ ॥ ननु यद्येवं तर्हि पश्चान्नारदोक्त्या दुःखं किमित्युक्तमत आहुः—**अन्त** इत्यादि। ननु तदाकाशवाण्याः किं प्रयोजनमत आहुः—**वै** इत्यादि। हरेः सकाशाद्या **आकाशवाणी** सा **वै** प्रादुर्भावनिश्चयाय। यद्याकाशवाणी न स्यात्प्रादुर्भावनिश्चयो न स्यादतस्तथेत्यर्थः। ननु तस्याः किं प्रयोजनं यदेव निश्चायितवतीत्यत आहुः—**वाग्देव** इत्यादि। वाग्देवः **सर्वमुक्त्ययमशक्त उद्गतः सन् तथा चक्रे,** कलहोद्यमेन प्रादुर्भावनिश्चायनं कृतवान्। ननु कथमेतदवगम्यत इत्यत आहुस्तथेत्यादि। हि यतो हेतोः **नारदस्तथैव**। द्वितीयस्कन्धे 'पायुर्यमस्ये'त्यत्र सुबोधिन्यां नारदस्यानुद्भूतकलहानां कलहमुत्पाद्य तदुद्धारा तन्निवर्त्तकत्वं व्याख्यातम्। स नारदस्तथैवात्रापि कलहोत्पादकत्वेनान्ते उक्तः। अत उपसंहारादवगम्यत इत्यर्थः। श्लोकान् विभजन्ते—द्वाभिरित्यादि तथेति। श्रीदेवकीसान्त्वनमाकाशवाण्या मातृदुःखमेव, न सर्वेषामतस्तदर्थं नारदोक्तिः। तथा च शीघ्रमवताराय नारदोक्तिरित्यर्थः। अग्रे स्फुटम् ॥ का० ८–९½ ॥ क्रियेति। 'यदुषूपजन्यता'मित्यनेनोक्ता सेवार्था जननक्रियेत्यर्थः। **भूमिरित्यत्र** यावदासीन इत्यादि। 'असुराणां वा अयमग्र आसीद्यावदासीनः परापश्यति तावद्देवाना'मिति श्रुतौ देवानां भूयाचनोत्तरं कियद्दास्यामीति प्रश्ने, ततः सालावृकी त्रिः परिक्रान्तिमितां याचित्वा धृतसालावृकीरूपेणेन्द्रेण सर्वस्याः परिक्रमणे भूमेः प्राप्त्या वेदित्वमुक्तमिति तदिदानीं नष्टमितिज्ञापनाय तावद्रूपेण हविर्धान्यात्मकेन गमनमित्यर्थः ॥ १७–२१ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

भूमिरित्यत्राभासोक्तं प्रयोजनं विशदयन्ति—**भक्तानामिति**। भक्तदुःखनाशार्थं भगवदवतरणं सम्मतमतो भक्तदुःखमवतारप्रयोजनमिति भावः। 'तद्दुःखं त्रिविधं त्रयाणा'मिति पूर्वोक्तमवसरे स्मारयन्ति—**भूमिरिति**। का० ॥ १ ॥ **इति स्थितिरिति**। इयं प्रादुर्भावमर्यादा, क्वचिदन्यथापि, यथा नारदस्य 'आहूत इव मे शीघ्रं दर्शनं याति चेतसि' प्रह्लादस्य च सर्वदा दर्शनं तृतीयस्कन्धे निरूपितं, सा पुष्टिरिति भावः ॥ का० २ ॥ **स्त्रीणामत्रेति**। अवतारान्तरेष्वपि यत्र शबरकिरातादीनामुद्धारस्तत्र कृष्ण एवोद्धारकः, प्रमेयबलस्य पुरुषोत्तम एव प्राकट्यात्। अत्रावतारे शूद्रद्विजबन्धवपेक्षया **स्त्रीणां विशेषत** उद्धारोग्रे तथैव वक्ष्यमाणत्वात्। अवतारान्तरे तु त्रयाणामपि समतेत्यर्थः ॥ का० ३ ॥ **येषामिति** चित्तवृत्तिनिरोधार्थं भगवद्ध्यानं निरूपितम्। तथा च परार्थत्वाच्छेषतेत्यर्थः। निरोधकं चित्तवृत्तिनिरोधकमित्यर्थः ॥ का० ४ ॥ **निरोधो ज्ञानात्मेति**। **टिप्पण्यां** द्वितीयव्याख्याने ज्ञानपदेन स्मृतिः। तथा च स्मरणात्मेत्यर्थः। भक्तानां संसृतिर्लौकिकाभिनिवेशशङ्कया दुःखजनिका न तु स्वयं दुःखरूपा, लीलापदार्थत्वेनानन्दरूपत्वात्। अतस्तेषां भक्तानां दुःखमेव निवारितवान्न तु संसृतिम्। येषां तु संसृतिर्दुःखरूपा तेषां संसृतिमपि निवारितवान्। तथा च संसृतिः केषाञ्चिद्दुःखरूपापि वर्तते। अतः फलद्वयमपीत्यर्थः ॥ का० ५ ॥ दुःखमेवाध्यायार्थोऽतः सान्त्वनं कुत्रोपयुज्यत इत्यत आहुः—**धैर्यार्थमिति**। धैर्याभावे तादृशदुःखेनान्यथाऽवस्थैव स्यात्तदावतार एव न सम्पद्येतेति तस्य दुःखस्यावतारहेतुत्वमेव न स्यादिति भावः ॥ का० ७ ॥ **शीघ्रमिति** सर्वरूपेण गमने दैत्या जानीयुस्तदा शीघ्रमेव रसातलं नयेयुस्तदभावाय स्वल्परूपेण गमनमित्यर्थः। **मायेति**। माया देवता येषां, मायोपासका इत्यर्थः। दृप्तत्वमिति। एतस्यैव विवरणमुच्छास्त्रवर्तित्वमिति ॥ १७ ॥ **गौर्भूत्वेत्यत्राभासे**। गोरूपभवनस्यावान्तरवाक्यार्थस्य तात्पर्यमुक्तं, मुख्यावाक्यार्थस्तु 'स्वदुःखनिवेदनेन दैन्य'मिति पूर्वोक्त एवानुसन्धेय इति भावः। **गौर्भूत्वेत्यत्र ज्ञानजनित** इति, क्रियाजनितः स्वेदोङ्गान्तरेभ्यो निर्गच्छतीत्यर्थः। **धर्मप्राकट्येति**। **अश्रुमुखी खिन्नेति** पदाभ्यामन्तःस्थितखेदप्राकट्यपूर्वकं बहिःखेदकथनमित्यर्थः। **बहूनामिति**। अश्रुहेतुभूतानां बहूनां दुःखानां सम्भवादित्यर्थः। **तस्या इति**। ततः प्रतीकारादन्य उपायो ज्ञानादिरूपस्तद्बोधननिवृत्त्यर्थं तस्या भूमेः भिन्नत्वमुक्तमित्यर्थः। अन्तःखेदे ज्ञानानधिकार इति भावः। कथनान्यथाऽनुपपत्त्यैवान्तिकोपस्थितेर्लब्धावपि तत्कथनात्प्रकारान्तरेणार्थमाहुः—**उप समीप** इति। तथा च पूर्वमुपस्थिताऽन्तिके स्थितेति शेषः। ततो व्यसनं समवोचतेत्यन्वयः। **इत्यर्थ** इति। अयमत्र वाक्यार्थः। आभासोक्तस्त्ववान्तरवाक्यार्थ इति भावः ॥ १८ ॥ **ब्रह्मेत्यत्र श्वेतद्वीपमिति**। श्वेतद्वीपे व्यापिवैकुण्ठावेशात्तस्मान्नैकट्यं व्यापिवैकुण्ठद्वारस्येति भावः ॥ १९ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

उपस्थिताऽन्तिके तस्मै इत्यत्र **उप समीपे भगवत्येवेत्यादि**। ब्रह्माणं प्रति स्वदुःखं भूर्निवेदयन्ती स्वस्या भक्तत्वाद्ब्रह्मणो हृदयेऽन्तर्यामितया वर्तमानं भगवन्तं प्रति स्ववार्ता निवेदनीयेति विचार्य, नैकट्यं विना तु स्वदुःखनिवेदनमसम्भावितमिति

भक्तिमार्गीयध्यानेन भगवन्नैकट्यं सम्पाद्य स्वक्लेशं निवेदयतीति सूचनार्थं मूल उपस्थितेत्युपोपसर्गः। अन्तिक इति पदेन ब्रह्मसमीपे स्थितिरुक्ता। एवमन्तर्यामिनैकट्यं ब्रह्मनैकट्यं च वक्तुमुपशब्दान्तिकशब्दौ। अन्यथैकेनैव चारितार्थ्ये पदद्वयं न वदेत्, इत्थमाशयं स्फुटीकर्तुमुप **समीपे भगवत्येवेत्यादि** विवृतं **सुबोधिन्याम्** ॥ १८ ॥ **ब्रह्मा तदुपधार्य**ेत्यस्याभासे **दैत्यसम्बन्धित्वाद्भूमे**रित्यादि **सहायार्थमाकारणशङ्काव्यावृत्त्यर्थमिति**। **भूमेः सहायार्थं** ब्रह्मकर्तृकभूमिसहायार्थमित्यर्थः। इदमत्र तात्पर्यम्। **व्यसनं समवोचते**तिवाक्याद्भूमिः सर्ववृत्तान्तं स्वहार्दं च ख्यापितवती। तत्र भूमिर्हि भक्ताऽतो नेयं स्वभारभूतदुःखनिवृत्त्येकप्रयोजनार्थं यत्नवती किन्तु भारनिवारणार्थमपि भगवदाविर्भावोऽस्तु सोप्यभीष्ट इति तदर्थं यतते। दैत्यसम्बन्धित्वात् केवलं दुःखनिवृत्तिर्मेऽस्तु हर्याविर्भावेण किं प्रयोजनमित्यपि भूमिहार्दं सम्भवतीत्युभयोः शङ्का। युक्तं चैतद्द्वयं, भक्तानां हि स्वतः प्रभ्वाविर्भावोऽभिलषितो दुःखनिवृत्तिरपि कृष्णादेवेष्टा न तु यस्मात्कस्माच्चित्। दैत्यसम्बन्धित्वेन तु येन केनापि साधनेन स्वेष्टं सिध्यत्विति बुद्धिः। एवमुभयसम्भवे ब्रह्मणो मनसि मामेव स्वसहायार्थमाकारयति न त्वस्या भगवदभिलाषः एतस्या दैत्यसम्बन्धित्वादित्याशङ्कोत्पन्ना; तन्निवृत्त्यर्थमालोचनं कृतवान्। तेन परमभक्ता भूर्भगवदभिव्यक्त्येकप्रयोजनेति ज्ञात्वा ब्रह्मा भगवत्सन्निधौ भूमिसाहित्येन गमनं भूमिमनोरथानुकूलं कृतवानित्युक्तं मूले **ब्रह्मा तदुपधार्येत्यादिना**। विवृतं च 'दैत्यसम्बन्धित्वाद्भूमे'रित्यादिना **सुबोधिन्याम्** ॥ १९ ॥ **पुरुषं पुरुषसूक्तेनेत्यत्र अन्तर्यामिपुरस्सरं स्तोत्रकरणादित्यादि**। अन्तर्यामित्वरूपधर्मपुरस्सरं स्तोत्रकरणादित्यर्थः। इदमत्राकूतम्। भूदुःखनिवेदनार्थं समागतं वेधसा तत्र 'क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषे'तिवाक्याद्भगवान् सर्वं स्वत एव जानातीत्यभिप्रायेणान्तर्यामित्वं भगवतो विवक्षुरन्तर्यामित्वरूपधर्मपुरस्सरं पुरुषसूक्तस्य प्रवर्तमानत्वात्पुरुषसूक्तेनैव भगवन्तं धाता तुष्टाव ॥ २० ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

भूमिर्दृप्तनृपव्याजेत्यत्र भक्तानां दुःखनाशायेत्यादि। स्पष्टोऽर्थः ॥ का० १–३ ॥ ननु ससाधनानामपि कथं नोद्धारविषयत्वं तत्र बाधकमाहुः—**येषामिति**। येषां योगादिशास्त्रं चित्तवृत्तिनिरोधजनकं निरूपितं तत्र हरेः शेषभावः। अन्यशेषत्वं कदाचिदपि न गमिष्यति किन्तु स्थास्यत्येवेत्यर्थः। योगशास्त्रे हि चित्तवृत्तिनिरोधार्थमेव भगवद्ध्यानं न तु स्वातन्त्र्येणेति तेषां नोद्धारविषयत्वमिति भावः ॥ का० ४ ॥ किञ्च, तेषां निरोधपदार्थोपि पूर्वस्माद्विलक्षणोऽतोपि नोद्धारविषयत्वमित्याहुः—**संसारेति**। अत्रेति ससाधनेष्वपीत्यर्थः। इयमुक्तिः प्रतिवादिनं प्रति ज्ञातव्या, अत एव 'निरूप्यत' इत्यस्यानन्तरं 'त्वये'त्युक्तं **टिप्पण्याम्**। तथा च संसारस्याविद्याकार्यत्वेन तन्निवृत्तेश्च ज्ञानैकसाध्यत्वेन ज्ञानरूप एव निरोधस्तेषां ससाधनानां वाच्य इत्याहुः—**अतो निरोधो ज्ञानात्मेति**। किञ्च भक्तानां संसारोपि लीलोपयोगित्वेन सुखरूपस्तेषां तु दुःखरूप इतीतोपि तद्वैलक्षण्यमित्याहुः—**दुःखरूपेति** ॥ ५ ॥ प्रासङ्गिकमुक्त्वा पूर्वोक्तमुपसंहरन्ति—**एवमिति**। **एकं** निःसाधनानां भगवत्प्राप्तिलक्षणं फलमित्यर्थः। ननु भगवत्कृतनिरोधो न शास्त्रैर्जनयितुं शक्य इत्यनुग्रहे सति ससाधनानामप्युद्धारविषयत्वं वक्तुं युक्तमित्याशयेन पक्षान्तरमाहुः—**द्वयं वेति**। निःसाधनानां फलं ससाधनानां फलं चेति द्वयमप्येकविधमेवेति न विरुद्ध्यत इत्यर्थः। अथ **टिप्पण्युक्ते** 'यद्वे'त्यादिद्वितीयव्याख्याने 'द्वयं वा न विरुद्ध्यत' इत्यस्य संसारदुःखनिवृत्तिः संसारनिवृत्तिश्चेति फलद्वयमप्यधिकारिभेदेन विरोधाभावान्न विरुध्यत इत्यर्थः। केषाञ्चिद्भक्तानां दुःखमेव निवारितमहन्ताममतात्मकः संसारस्तु लीलोपयोगित्वेन स्थापित एव। केषाञ्चिद् भक्तानामन्येषां च संसारोपि नाशितस्तेन द्वयमपि फलमित्यर्थः। **साङ्गस्येति**। अवतारात्मकाङ्गसहितस्यैव निरोधस्य **प्रक्रिया** युक्ता योग्या, ततोऽयं स्कन्धोपि दशमत्वेन युज्यते योग्यो भवतीत्यर्थः। अन्यथाऽनवतीर्याम्बरीषादेरिवात्रापि भक्तदुःखनिवारणोक्तौ भक्तकथैवोक्ता भवतीतीशानुकथैवोक्ता भवतीतीशानुकथैवेयमपि भवेदित्यस्य स्कन्धस्य दशमत्वं न स्यादिति भावः ॥ का० ६ ॥ अङ्गमाहुः—**अवतार इति**। ननु दुःखमेवाध्यायार्थोऽतः सान्त्वनं कुत्रोपयुज्यत इत्यत आहुः—**धैर्यार्थमिति**। धैर्याभावे तादृशदुःखेनान्यथाऽवस्थैव स्यात्तदवतार एव सम्पद्येतेति तस्य दुःखस्यावतारहेतुत्वमेव न स्यादिति भावः ॥ का० ७ ॥ **अन्ते** इति। अन्ते अध्यायान्ते 'नन्दाद्या ये व्रजे गोपा' इत्यादिवाक्यैर्भक्तेन नारदेन कृतं दुःखं हरेः प्रादुर्भावायेत्यर्थः। **आकाशवाणीति**। आकाशवाणीरूपो वाग्देवः सर्वमुक्तिहेतुभूतं हर्याविर्भावं कर्तुमशक्तः सन्नाविर्भावहेतुभूतं भक्तदुःखोपायं चक्र इत्यर्थः। तथैव नारदोपि चक्रे ॥ का० ८ ॥ श्लोकान्विभजन्ते—**दशभिरित्यादि**। दशभिर्भूमिसान्त्वनं वाचा। उपायेन देवक्याः पञ्चत्रिंशद्भिः ॥ का० ९ ॥ श्लो. ॥ १७ ॥

बुभुत्सुबोधिका

भूमिर्दृप्तेत्यत्र। भगवदवतारेति भगवदवतारप्रयोजनं भक्तानां दुःखनाशः। आरभते इति नभस्ये मासे नवम्यामारभते। भूमेरितीति भूमिपदं पुरस्कृत्य कथारम्भस्तु, वेदवेदान्तसारत्वात्। वेदस्य 'मुह्यन्ति यत्सूरय' इति वाक्यान् मोहकत्वेन वेदान्तस्यापि वेदत्वं 'स्मृतेश्चे'ति सूत्रभाष्य उक्तम्। ततस्तस्यापि मोहकत्वं, अतः 'पञ्चरात्रमुपतिष्ठते' श्लोकबद्धत्वेनामोहकत्वात् तत्र च 'अधीताः सकला वेदा साङ्गोपाङ्गाः सविस्तरा' इत्युपक्रम्य 'निश्चयं नाधिगच्छामि मनसा विमृशन्नपि' इत्युक्त्वाग्रे 'एतच्छास्त्रं च दातव्यं शिष्यायानभ्यसूयवेमोक्षमाणाय नान्यस्मै कस्मैचन यदृच्छया त्रैवर्णिकाय दातव्यमध्येतव्यं च वेदव'दित्युक्तत्वात्। तदनुक्रिया-

पादारम्भे 'सुभद्रा भद्रका पूर्णा धूम्रा चेति चतुर्विधा भूमयो लक्षणं तासां क्रमेणोपदिशामित' इति भूमिलक्षणपुरस्कारात् । स्वपदभारदूरीकरणं चावश्यकमिति भूमिपदपुरस्कारः । भगवदवतारप्रयोजनज्ञानार्थं कथामारभत इति यदुक्तं तद् व्युत्पादयन्ति स्म भक्तानामित्यादि । भक्तिमताम् । आधिदैविकविरहदुःखनाशाय कृष्णावतरणम् । आधिभौतिकदुःखनाशाय शब्दरूपसङ्कर्षणव्यूहावतरणम् । भूमिदुःखभाजे । मातृदुःखभाजे प्रद्युम्नः । गर्भसम्बन्धस्तस्यैवेति । आदिशब्दार्थोत्तरापरीक्षित्प्रभृतिदुःखभाजेऽनिरुद्धः, धर्मपुरुषार्थत्वात् । परीक्षिन्मोक्षदानार्थं वासुदेवः । तेनावतारप्रयोजनपञ्चानां न विरोधः । तानि तु 'भक्तियोगवितानार्थं कथं पश्येमहि स्त्रिय' इति । 'मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग'मिति । 'भारावताराय च भुव' इति । 'प्रादुरासं वरदरा'डिति । 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारते'ति । पूर्ववाक्ये भक्तियोगोत्र विरहः । द्वितीयवाक्ये मुक्तिदानं वासुदेवकार्यम् । तृतीयवाक्ये भुवो भारावतारः सङ्कर्षणकार्यम् । चतुर्थवाक्ये वरदराट्प्रादुर्भावः देवकीगर्भसम्बन्धः प्राद्युम्नकार्यम् । पञ्चमवाक्ये धर्मरक्षाऽनिरुद्धकार्यम् । भूमिर्मीतेति भूमेः प्राथम्यमुक्तम् । भूमिः सात्त्विकी भगवत्पत्नीत्वात् । माता राजसी राजपुत्रीत्वात् । अन्ये उत्तरा च तामसी तम आकाङ्क्षायां गर्भाकाङ्क्षावतीत्वात् । परीक्षित् राजसः । तदुक्तं त्रिविधा इति । सर्वेषामिति स्वशान्तरूपाणाम् । 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्थ्यमानेष्वनुकम्पितात्मे'ति तृतीयस्कन्धात् । दुःखे महत्त्वं किमित्यत आहुः नान्येनेत्यादि । तथा चान्याविनिवार्यत्वं महत्त्वमितिभावः । अन्येनावतारान्तरेण साधनेन च । निवारणं ज्ञानादिनापि सम्भवति यदा तदा न कृष्णाविर्भावः, यथा चित्रकेतुप्रसङ्गे । चित्रकेतुं प्रति न भगवदवतारः । भूमेर्ब्रह्मवाक्यमात्रेण दुःखे निवृत्ते परन्तु विशेषेण मर्दनक्लेशादिकं न निवृत्तं तदा कृष्णः प्रादुरासीदिति । हरिरिति हरित्वेन रूपेण । दुःखानि हरतीति हरित्वधर्मपुरस्कारेण न तु भक्तिनिरूढभावकरणत्वधर्मपुरस्कारेण । स्थितिनिर्णयः । अस्मिन् वाक्ये साधारणे व्यष्टिसमष्टिभेदेन कृष्णावतारः । 'आहूत इव मे शीघ्रं दर्शनं याति चेतसी'तिनारदवाक्ये । भक्तियोगविधानार्थं कृष्णाविर्भावः नारदस्य । प्रह्लादस्य सर्वदा दर्शनं, तत्रापि भक्तियोगविधानार्थं कृष्णाविर्भावः । एतयोः पूर्वोक्तावतारप्रयोजनपञ्चस्वन्तर्भावः । तथा च भक्तमहद्दुःखविनिवारणे साधनान्तरावतारान्तरेच्छाशक्तिरेव प्रयोजिकेतिभावः । उद्धारविषयनिर्धारमाहुः ये भक्ता इति । शास्त्रसहितोद्धरणे प्रमेयबलं न स्यादितिभावः । श्रीणामिति जगज्जन्मादिकर्त्री शक्तिः सदानन्दस्येति शक्तिस्त्रीमहिम्ना तथा । 'भूर्लक्ष्मीर्भुवर्लक्ष्मीः सुवः कालकर्णीतथा महालक्ष्मी'रितिश्रुतेः । अत्रेति दशमे । तथा च तृतीयस्कन्धादेष विशेषः ।

ननु ससाधनानामपि कुतो न विषयत्वमित्याशङ्क्य तत्र बाधकमाहुः येषामिति । निरोधकमिति चित्तवृत्तिनिरोधकम् । शेषभाव इति समाध्यादिविषयत्वेन तन्निर्वाहकत्वाच्छेषभावः । 'शेषः परार्थत्वा'दितिजैमिनिसूत्रम् । ननु भक्तिमार्गेपि भक्तिशेषत्वं वर्तते तद्वत् योगादौ शेषत्वं भवत्विति चेन्न 'सोश्नुते सर्वान् सह ब्रह्मणे'ति श्रुतावप्रधानतृतीयया भक्तिमार्गे शेषत्वेप्यदोषात् । हरेरिति उपस्थितिप्रयोजकधर्मार्थं हरिपदम् । हरिः कृष्ण इति घटः पृथिवीतिवत् । किञ्च ससाधनानां निरोधपदार्थोपि पुष्टिस्थाविलक्षणोतोपि न विषयत्वमित्याहुः संसारेति । 'दुःखाभावः सुखं चैव पुरुषार्थद्वयं मत'मित्याशयेनोक्तम् । तथा च सूत्रं 'यद्वा तद्वा तदुच्छित्तिः पुरुषार्थः तदुच्छित्तिः पुरुषार्थ' इति । निरोध इति 'योगश्चित्तवृत्तिनिरोध' इति योगसूत्रम् । अत्रेति ससाधनेषु । निरूप्यत इति अत्र त्वया योगादिशास्त्रनिरुद्धेन । तथा च संसारस्याविद्याकार्यत्वेन तन्निवृत्तेश्च ज्ञानैकसाध्यत्वेन ज्ञानरूप एव निरोधो योगादिशास्त्रनिरुद्धानां वाच्या इत्याहुः अत इति । संसारस्याविद्याजन्यत्वेनाविद्यात्वात् । साङ्ख्ययोगावेकं शास्त्रम् । तत्र 'देशबन्धश्चित्तस्य धारणा' । 'तत्र प्रत्ययैकतानता ध्यानम्' । 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधि'रिति योगसूत्रत्रयम् । कापिलसाङ्ख्यप्रवचनसूत्रवृत्तौ 'समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपत' इति सूत्रम् । अतो ब्रह्मणो ज्ञानत्वाज् ज्ञानात्मेति । दुःखरूपेति 'यद्वा तद्वे'त्युक्तसूत्रात् । भक्तानां तु संसारो लीलोपयोगित्वेन सुखरूप इति बह्वेव वैलक्षण्यमितिभावः । एवं प्रासङ्गिकमुक्तम् । वेदवेदान्तसारे उपनिषदां संशयवारकत्वं, किञ्च कपिलस्मृतीनां तृतीयस्कन्धोक्तानामुपबृंहकत्वम्, न साङ्ख्ययोगशास्त्रयोरिति 'स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गा' इति द्वितीयाध्यायवैयाससूत्रन्याय उक्तः । प्रासङ्गिकमुक्त्वा पूर्वोक्त 'भक्तानां दुःखे'त्यादिनोक्तमुपसंहरन्ति स्म एवमिति । एकं निःसाधनानां भगवत्प्राप्तिलक्षणम् । द्वयं वेति भक्तियोगवितानरूपं, पृथोक्तम् । पुष्टिस्थामलात्ममुन्योर्निरोधस्यैकरूपत्वेन पूर्वोक्तशेषभावाभावान्न विरुध्यत इत्यर्थः । विरुध्यत इति कर्मकर्तरि प्रयोगः । पच्यते फलं स्वयमेवेत्यत्रेव । एवं प्रकारेण निःसाधनोद्धारजनकत्वोक्तावपि शेषभावाभावात् साधारणोद्धारजनकत्वोक्तेरुभयलक्षणविधया ग्रहणप्रकारेण लीलाकरणे तस्य शुकव्यासाभ्यां च कथने हेतुमाहुः साङ्गस्येति । निरोधस्येति शेषः । प्रक्रिया एकत्वमविवक्षितम् । प्रक्रियाः प्रकरणानि पञ्च । अत्रोपपत्तिमाहुः तत इति । यतश्चिकीर्षितनिरोधमवतीर्य स्वयं कृतवानतो हेतोरयं स्कन्धो हि पञ्चप्रकरणसहितो दशमत्वेन युज्यत इत्यर्थः । अन्यथाऽनवतीर्यैवाम्बरीषादेरिवात्रापि भक्तदुःखनिवारणोक्तौ भक्तकथैवोक्ता भवतीतीशानुकथैवेयमपि भवेदित्यस्य स्कन्धस्य दशमत्वं न स्यादिति भावः । अङ्गमाहुः अवतार इति । येन विना यन्न सम्भवति तत्तदङ्गमत्रौचित्ये निरोधे उच्यते । तथा चाविर्भावप्रतिपादकजन्मप्रकरणाभावे निरोधपदार्थ एव न धार्यः स्यादिति भावः । तदङ्गमित्यवताराङ्गम् । 'भक्ताना'मित्यादिना भक्तानां दुःखनिवारकः । ये शास्त्ररहितास्ते भक्तास्तेषामुद्धारक इति 'गोप्यः कामा'दित्यत्रोक्ताः, भयद्वेषवन्तोऽभक्ता दुःखनाशादौ न सङ्गृहीताः, तत्सङ्ग्रहार्थं टिप्पण्यां व्याख्यानानन्तरं संसारेति । अत्रेति

भयादिससाधनेषु। निरोधः मनोनिवेशः। 'तस्मात् केनाप्युपायेन मनः कृष्णे निवेशये'दितिवाक्यम्। तेन भक्तिरहस्यभजनं तदिहामुत्रफलभोगनैराश्यैवामुष्मिन्मनः कल्पनमेतदेव च 'नैष्कर्म्य'मितिश्रुतौ मानसी सेवोक्तोभयसाधारणी। अत इति भयादीनां मानस्यामप्रवेशात्। ज्ञानात्मा स्मरणात्मा। एकं भगवत्प्राप्तिलक्षणम्। तथा च 'ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं दुरवापमापे'त्यादिवाक्यादसुरा अप्युद्धारविषयत्वेन सङ्गृह्यन्ते। द्वयं वेति दुःखनिवृत्तिः संसारनिवृत्तिश्चे'ति। केषाञ्चिद् भक्तानां अम्बरीषादीनां संसारदुःखमेव निवारितम्, न तु संसारम्। लीलोपयोगित्वेन संसारस्य स्थापितत्वात्। केषाञ्चिद् भक्तानां वृत्रासुरप्रभृतीनाम् अन्येषाममलात्ममुनीनां च संसारोपि नाशितः तेन द्वयमपि फलमित्यर्थः। अध्यायार्थं भक्तदुःखमध्याये सङ्गमयितुं व्याप्तिवारणार्थं वाक्यकदम्बं पृथक्कृत्य वाक्यकदम्बार्थमाहुः अवतार इति। ननु दुःखत्वेनावतारत्वेन कार्यकारणभावाद् दुःखान्त एव ग्रन्थो वक्तव्यः। सान्त्वनग्रन्थस्य किं प्रयोजनमत आहुः धैर्यार्थमिति। दुःखसहनार्थं भूमिमात्रोः सान्त्वनमाश्वासनं प्रोक्तम्। अन्यथा सान्त्वनाभावे दुःखस्य महत्त्वाद् दुःखाश्रयस्थितिरेव न स्यात्। तथा सति कारणाभावादवतारोपि न स्यादतः सान्त्वनम्। तथा च भक्तिमार्गीयावान्तरसाधनार्थं सान्त्वनं, 'कश्चिद् धीरः प्रत्यगात्मात्मानमैक्ष'दितिश्रुतेः। ननु यद्येवं तर्हि पश्चान्नारदोक्त्या दुःखं किमित्युक्तमत आहुः अन्त इति। भक्तकृतं नारदकृतम्। ननु तर्ह्याकाशवाण्याः किं प्रयोजनमत आहुः वै हरेरित्यादि। हरेः सकाशाद् या आकाशवाणी सा वै चतुर्थ्या लुक्, निश्चयार्थकात्। प्रादुर्भावनिश्चयायेति 'वै' इत्यव्ययस्यार्थः। यद्याकाशवाणी व्यापिका परिच्छिन्ना न स्यात् तदा मायोद्घाटनाभावाद् व्यापककृष्णः परिच्छिन्नः प्रादुर्भूत इति निश्चयो न स्यात्। मायाशक्तिरहितानां व्यापकदिगादीनामप्याविर्भावस्य सम्भवात्। अतो वै हरेराकाशवाणी भवतीति वाक्यभेदेनान्वयः। 'आकाशवाणी' 'वाग्देव' इति पदद्वयात्। 'सद्यो देव्यम्बरं गते'त्याकाशवाणी आकाशतन्मात्रा तत्र मुक्तेः। वाग्देवः 'अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजे'त्युक्तः। इत्यतो वाग्देवः। ननु तस्याः किं प्रयोजनं यदेवं निश्चायितवतीत्यत आहुः वाग्देव इत्यादि। वाग्देवः सर्वमुक्त्यर्थं 'तमेव विदित्वा अतिमृत्युमेती'ति श्रुतेः। पितुर्गृहाद् व्रजगमनेनान्यत्र स्थितस्यान्यत्र स्थापनरूपेण। उद्गत हर्याविर्भावं कर्तुम् अशक्तः सन् तथा चक्रे नाम कलहोद्यमेन प्रादुर्भावनिश्चायनं कृतवान्। भक्तत्वमस्या भगवत्कार्यसाधकत्वात्। ननु कथमेतदवगम्यते इत्यत आहुः तथेति।

हि यतो हेतोः नारदस्तथैव, वाग्देववदेव अन्ते स्फुटं कलहोत्पादकत्वेनोक्तः। द्वितीयस्कन्धे 'पायुर्यमस्ये'त्यत्र सुबोधिन्यां नारदस्यानुद्भूतकलहानां कलहमुत्पाद्य तद्द्वारा तन्निवर्तकत्वं व्याख्यातम्। तन्निवर्तकत्वं विरोधिनिवर्तकत्वम्। अत उपसंहारात् प्रादुर्भावनिश्चायनार्थत्वं वाग्देव्याः कलहोद्यमकरणमित्यवगम्यत इत्यर्थः। सुबोधिन्यां श्लोकान् विभजन्ते स्म दशभिरिति। तथेति श्रीदेवकीसान्त्वनम्। नारदोक्त्यैवेति एवकारेण मातृदुःखदाकाशवाणीयोगो व्यवच्छिद्यते। अञ्जसा सामस्त्येन। तथा च शीघ्रमवताराय नारदोक्तिरित्यर्थः। तत्रेति अध्यायस्थेषु श्लोकेषु। हेतुभूतमिति अध्यायार्थम्। श्लोकाष्टकार्थमाहुः उद्यम इति। 'शरणं ययावि'ति वक्ष्यते। स्वगृहादन्यत्र स्वाभिप्रायप्रकाशनं शरणमार्गः। षड्विधशरणागतौ कार्पण्यं शरणागतिः, सापि अष्टकेन स्तुवीतेत्यष्टकेन स्वाभिप्रायप्रकाशने स्तवनात्मके सति भवतीति श्लोकाष्टकम्। दैन्यमिति कार्पण्यम्। 'कृपणः स तु विज्ञेयो योनालोचितयाचकः'। भक्त्यन्तर्गतत्वाद् भगवदवतारे साधुकारणम्। 'भक्तानां दैन्यमेवैकं हरितोषणसाधन'मिति। भक्त्यन्तर्गतत्वम् आर्तिरूपाधिकाररूपत्वात्। साङ्गभक्तेर्भगवदवतारकारणत्वात्। शब्दत इति पूर्वान्वयि। श्लोकचतुष्टयार्थः उक्तः। तदर्थं इति भगवद्वाक्यार्थः उक्तः। विवृत इति तत्समानार्थकशब्दैस्तदर्थकथनं विवरणं तत्कर्म न पृथक्। क्रियेति 'यदुषूपजन्यता'मित्यनेनोक्ता सेवार्था जननक्रिया। जन्म द्वाभ्यां श्लोकाभ्यां, मिलित्वा तु नव श्लोकाः। उपसंहार इति 'इत्यादिश्यामरगणा'नित्यनेनोपसंहारः। तत्र प्रथममिति अर्थाष्टके निरूपणीये। उद्योग इति पूर्वोक्तोद्यमलक्षणालक्षितोस्य श्लोकस्यार्थः। शरणगमनरूपः। अयमुद्यमो वा। हरिरिति व्यापिवैकुण्ठेपि हरित्वधर्मेण प्राकट्यमित्युक्तम्। 'वेदे रामायणे चैव पुराणे भारते तथा। आदावन्ते च मध्ये च हरिः सर्वत्र गीयत' इति वाक्यात्॥ भगवत्स्थान इति प्रकटभगवत्के स्थाने मोक्षदशायां गमनाद्गता। जनितेति तृतीयस्कन्धे वाराहप्रसङ्गे स्पष्टम्। तत्रेति ब्रह्मस्थाने। यावदासीन इति 'असुराणां वा इयमग्र आसीद्यावदासीनः परापश्यति तावद्देवाना'मिति श्रुतौ भुवो याचनोत्तरं कियद्वो दास्यामीतिप्रश्ने ततः सलावृकी त्रिःपरिक्रान्तिमितां याचित्वा धृतसलावृकीरूपेणेन्द्रेण सर्वस्याः परिक्रमणे भूमेः प्राप्त्या वेदित्वमुक्तम्, तदिदानीं नष्टं, राक्षामुच्छास्त्रवृत्तित्वादितिज्ञापनाय तावद्रूपेण हविर्धान्यात्मकेन खिन्नेन गमनम्। परापश्यति 'परादिमोक्षप्राधान्यप्रातिलोम्येषु धर्षणे, आभिमुख्ये भृशार्थे च विक्रमे च गतौ वध' इति विश्वः, परिक्रमे पश्यतीत्यर्थः। 'वः' सलावृकीभ्यो 'ह' मसुरो दास्यामीत्यर्थः। 'सलावृकी' शचोन्द्राणी। तदुक्तमारणे 'एतयैवेन्द्रः सलावृक्या सह असुरान् परिवृश्चती'ति 'एतया' शच्या सलावृक्या। 'शालावृकः शृगालेपि सारमेये वलीमुख' इति विश्वः। सलावृकस्य स्त्री सलावृकी, तया। वृश्चति ओ वृश्च छेदने। छिनत्ति। आरम्भे भूमिब्रह्मयोगकथनेन वेदसारत्वम्। ब्रह्मणि मन्त्राः हविर्धान्यां हविर्दुग्धम्। द्रव्यदेवतात्मको याग इति याग उक्तः। संहितारम्भे 'उपायवस्थे'त्यत्र मनुष्याः स्थेत्यर्थे ब्राह्मणानां मन्त्रदेवताधाराणां सत्त्वात्, 'आप्यायध्वमघ्निया' इत्यत्र हविराश्रयाणां गवां सत्त्वादिति। वेदान्ते विराड्रूपम्। 'भूमिः गौः पशुरन्तरिक्षदेवता, अन्तरिक्षदेवा व पशव' इति। 'पुरव पुंसे'ति श्लोके पुमानुक्त इति व्याहृतिरूपो विराट्। तथा च श्रुतिः, 'सर्वं

खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते'ति छान्दोग्ये । अत उक्तं देवोपयोगिनेति । यागो देवोपयोगी । 'देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथे'ति गीतायाः । विराट् दैवीसम्पद्युक्तदेवोपयोगीति । द्वितीये ज्ञानस्कन्धे धारणाश्रयो विराडिति । वेदान्तसारत्वम् । 'वेदवेदान्तसारं हि श्रीभागवतमिष्यत' इति । शीघ्रमिति शीघ्रं निमज्जनाभावाय । कार्येति अष्टकोककार्यावश्यकत्वाय । शरणेति शरणे रक्षकस्य ब्रह्मणः स्थाने गमनम् । शरणपदेन स्वाभिप्रायप्रकाशनम् । तत्र गत्वा सूच्यते । दैवसम्पदा शरणमार्गेण सेवमानाया भूमेः पापवेधः सभारात्मात्रोक्तः दैत्यकृत इति 'दैत्यानीकशतायुतै'रित्येतावता निर्वाहे तदितरवैयर्थ्यमाशङ्क्या दृप्तादिशब्दार्थं वक्तुमाहुः दैत्याः सर्वे इति । 'मायेत्यसुरा' इति श्रुतेः माया देवताः । माया देवता येषां ते । अकापट्येन सा सेवितवतीति भगवत्स्पृष्टा तां स्वदेवतयैव नयनमाहुः कापट्येनैवेति ।

कापट्यं माया, भूभाराप्रयोजिका, विश्वम्भरात्वात् । 'दासवद्यदमायये'त्येकादशे मायाकपटः । देवतया देवताभिभवकरणस्य युक्तत्वादेवकारोन्ययोगव्यवच्छेदकः । रसातले दैत्यमुक्तिस्थाने । अवतीर्णा इति 'मनो यत्र निषक्तमस्ये'तिश्रुतेः । राज्ञामिति अत्र राजानीककृतभूभारो भूमेर्न सम्भवति दैत्यानां देवाभिभावकत्वात् स्पष्टं सह वैयन्नायां बृहदारण्यके छान्दोग्ये च । अत उक्तं राज्ञां दैत्यत्वज्ञापकं लक्षणमिति । दैत्यत्वस्य ज्ञापकमनुज्ञापकम् । दैत्यलक्षणं वक्ष्यते दृप्तत्वमिति । दृप्तशब्दः दृप हर्षमोहनयोः दि० प० से० तस्य कर्मणि क्तप्रत्यये रूपम्, इडभावः । तत्त्वम् उच्छास्त्रवृत्तित्वम् । किं शास्त्रं कोत्रोदर्थः । 'उत् प्रकाशे वियोगे च प्राबल्यास्वास्थ्यशक्तिषु । प्राधान्ये बन्धने भावे मोक्षे लाभोर्ध्वकर्मणी'ति विश्वोक्तेष्वर्थेषु । शास्त्रं गीता त्रयोदशाध्यायोयं 'अमानित्वमदम्भित्व'मित्यारभ्य 'एतज्ज्ञानमिति प्रोक्त'मित्यन्तं, षट् शास्त्राणि वा । उदर्थो वियोगः । शास्त्राणां व्यृद्धिरुच्छास्त्रम् । अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थेति समासो व्ययीभावः । धात्वर्थो मोहनमत्र । क्तप्रत्ययार्थः कर्म, वर्तित्वाख्यम् । एवं च शास्त्ररहितःकर्मत्वमुच्छास्त्रवर्तित्वम् अतिदिशन्ति स्म एतदेवेति । यथा 'दृप्ता केशवमब्रवी'दित्यत्र भगवानस्मदर्थं खेदं न प्राप्नोति, अस्माभिः कथं तदर्थं खेदः प्राप्तव्य इति दृप्तत्वमिति । 'मदर्थेर्थपरित्यागो भोगस्य च सुखस्य चे'ति शास्त्रवियोगः, 'अमानित्व'मितिशास्त्रवियोगः, उच्छास्त्रे वर्तित्वम् । सहसुपेति समासः । हता असुक्ता इति सम्भूत्युपासकत्वेन अन्धंतमःप्रवेशरूपमुक्तित्वेन कार्यकारणभावः । अन्धंतमो माया सम्भूतिरतत्वेन भूयस्तमस्त्वेन । उच्छास्त्रवर्तित्वेन अन्धन्तम आवृतलोकगतित्वेन कार्यकारणभावः । शारीरब्राह्मणश्लोकाभ्याम् । एवं च हताः उच्छास्त्रवर्तित्वेनान्धम आवृतलोकं गताः । प्रविष्टा इति अन्धन्तमःप्रवेशरूपमुक्त्यभावात् तावज्ज्ञानसत्त्वात् प्रविष्ट इत्यर्थः । तथेति दैत्या इत्यर्थः । तेप्यन्त इति भीष्मादय इति टिप्पण्याम् । अवतार इति बुद्धे तद्धर्मास्ते राजधर्मा उच्छास्त्रवर्तित्वादयः । व्याजेतीति बुद्धो दृप्तनृपः न तु दृप्तव्याज इति दृप्तनृपव्याजा अन्ये राजानः । ते च दैत्या इति विशेषणेन बलिप्रह्लादादयो व्यावर्तिताः । घातार्थमिति दृप्तविशेषणेन ज्ञातम् । शतानीति शङ्कथे ये शतपदं नैकवचनान्तमितिज्ञापितम् । तेन न स्मार्तप्रयोगः । भूरिभारेणाक्रान्तत्वं विश्वंभराया न सम्भवतीत्युक्तम् । दैत्यानां लक्षणमाहुः दैत्यत्वमिति । विश्वम्भरायाः विश्वस्मिन् भारः तज्जनकत्वम् । भारो नाम सन्नह्य सहसैवाचारित्वम् । आरणे 'तेऽसुराः सन्नह्य सहसैवाचरन्, ब्रह्मचर्येण तपसैव देवास्तेऽसुरा अमुह्य'न्निति श्रुतेः । श्रुतौ 'देवा' इति आचरन् । लङ् बहुवचनम् । अविद्वत्त्वमबुधत्वं च भारः । शारीरब्राह्मणे 'असुर्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्यापि गच्छन्त्यविद्वांसोऽबुधा जना' इति श्रुतेः, छान्दोग्ये पाप्मवेद्धृत्वं भारः । 'तं हासुराः पाप्मना विविधु'रितिश्रुतेः 'तं' प्राणरूपोद्गीथोपासकम् । ननु 'गामाविश्य च भूतानि धारयाम्यहमोजसे'ति गीतोक्तौजः सत्त्वेन शीघ्रं निमग्ना भवतीत्यत्र बाधकमिति लोकदृष्टिप्रथने तु मारणोक्तं पृथिव्या नौकात्वं दृष्टान्तेनाहुः यथेति । मज्जयतीति अकर्मको धातुः । नौका मज्जति, तां मज्जयति । णिच् । ननु नौकानिमज्जने नौजः प्रतिबन्धकं तथा चिक्रीडिषाभावात् किन्तु रससदभावात् विषमो दृष्टान्त इति चेत् नौकामज्जनमात्रं दृष्टान्तोस्तु नैयायिकमतेन पृथिवीत्वान् नाव्यप्योजः प्रतिबन्धकं मास्तु । नन्वियदवधि दैत्याः स्थिता एवाधनैव भारे किं कारणमत आहुः बलेति । अनीकः सैन्यैराक्रमणे इतस्तत पादविक्षेपे । तथा च बलं भारत्वकारणम् । पूर्वमिति तृतीयस्कन्धे । उद्धार इति वाराहद्वारा उद्धारे । उपाय इति चिन्तादिः ब्रह्माणमिति या प्रापणे द्विकर्मकः । ब्रह्मणः शरणं गृहं शरणमार्गं वा ययौ ॥ १७ ॥

गौर्भूत्वेत्यत्र देवानामिति स्वस्या अपि देवत्वादिति भावः । हविरिति दुग्धं यज्ञैकदेशं धीयतेऽस्यामिति हविर्धानी तद्रूपेणेत्यर्थः । 'करणाधिकरणयोश्चे'ति ल्युट् । गौर्भूत्वेति भक्त्या सामर्थ्यम् । 'भूमिर्धेनुर्धरिणी लोकधारिणी'तिश्रुतेर्भूमेराधिदैविकं रूपं गौः । व्यसनं दुःखम् अश्रूणि मुखे यस्याः सा इत्यत्राश्रवाधारत्वं मुखे न सम्भवतीति तद् व्युत्पादयामासुः अश्रूणीति । न च मुखशब्दो मूर्धनि लाक्षणिक इति वाच्यं 'लक्षणां नैव वक्ष्यामी'ति प्रथमस्कन्धसुबोधिन्यां स्वयं प्रतिज्ञानात् । समायान्तीति अधोमुखीत्वदशायाम् । अन्यदा तु कपोले । अन्तरिति 'सोरोदी'दितिश्रुतेरन्तःप्रसिद्धेः । स्वेद इति 'अग्नेराप' इति श्रुतेः । अश्रूणां ज्ञानद्वारत्वे युक्तिमाहुः खेदोपीति । भारज्ञानजनितः क्रियाजनितः खेदोज्ञान्तरेभ्यो निर्गच्छतीतिभावः । अभिप्राय इति भगवत्सतीत्वेन यशसा ज्ञानं पृथावत् । विसंवादीति विरुद्धः संवादः संवदनमस्यास्तीति विरुद्धसंवादि । इन् । यथा शुक्तौ रजतमिति वाक्यमप्रमाणं अन्तःस्थितो धर्मः शुक्तित्वं तद्विरुद्धः संवादः रजतत्ववदनं रजतमिति, रजतत्वेन शुक्त्युपस्थितिः । सोस्य शुक्तौ रजतमिति वाक्यस्यास्तीतीदं वाक्यमप्रमाणम् । धर्मप्राकट्येति 'अश्रुमुखी खिन्ने'तिपदाभ्यामन्तःस्थितखेदप्राकट्यपूर्वकं रुदनरूप-

बहिःखेदरूपधर्मकथनम । बहूनामिति 'अश्रुहेतुभूतानां बहूनां दुःखानां सम्भवात् । कथनमिति खिन्नेति खेदरूपधर्मकथनम् । ननु ब्रह्मापि सर्वज्ञ ईश्वरत्वात् अतः कथनमयुक्तमित्याशङ्क्याहुः अधिकारित्वादिति । ब्रह्मणोधिकारित्वात् । न सर्वज्ञतेति अत एव द्वितीयस्य नवमाध्याये 'स आदिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत, तां नाध्यगच्छद्दृशमत्र सम्मतां प्रपञ्चनिर्माणविधिर्यया भवे'दित्यनेनाविचारदशायामसर्वज्ञतोक्ता । कथनमिति व्यसनकथनं 'व्यसनं समवोचते'ति । खेदेनाश्रुमुखी खिन्ने'तिपाठक्रमाद् दुःखसन्ततिः । अत्यन्तं परिभाषणपर्यन्तम् । अग्रेपि । ज्ञापकाविति कार्यभूतौ ज्ञातव्यौ । कारणेन कार्यावश्यम्भावात् । न्यूनपूरणमिदं ज्ञेयम् । 'न न्यूनादन्यपूरण'मिति प्रथमसुबोधिन्याः । तस्या इति ततः प्रतिकारादन्य उपायो ज्ञानादिरूपः तद्बोधननिवृत्त्यर्थं तस्याः भूमेः तथा खिन्नत्वमुक्तमित्यर्थः । करुणमिति करुणपदज्ञापितशोकः स्थायिभाव आर्थिक उक्तः । 'आर्थिकं तु प्रवक्ष्यामी'ति प्रथमस्कन्धसुबोधिन्याः । पितृवियोगेति पितृवियोगजखेदस्य भक्तित्वेन सुखसम्भेदात् तदभाव उक्तः । रोदनमिति स्वस्मिन् मनोनिवेशकम् अन्यत्र मनोवारकम् । सामर्थ्यमिति विभुः समर्थः शक्त इति पर्यायाः । उप समीपार्थकं अन्तिक इति समीपार्थकमिति पुनरुक्तिदोषं वारयन्ति स्म उप समीप इति । अन्तर्यामिणीति व्यापकाधारत्वं बोधितम् । सतिसप्तमी वा । अन्तर्यामिणि सति । अन्तिकशब्दस्योपाव्ययस्य समीपार्थे तात्पर्यग्राहकत्वं यदा तदा न्यूनता । वेदान्तसारत्वेनान्तर्यामिब्राह्मणोक्तान्तर्यामिसामीप्यावश्यकत्वात् पत्नीत्वाच्च । अन्तर्यामिसामीप्याबोधात् । यद्यपि उपस्थिता दोषाख्याने स्थितेत्यर्थे न पुनरुक्तिः तथाप्यप्रसिद्धार्थत्वं दोषः एवमारम्भार्थकत्वेपि बोध्यम् । तथा च विश्वः 'उप सामर्थ्यदाक्षिण्यदोषाख्यानात्ययेषु च । आश्चर्यकरणे दाने नाभावारम्भपूजयोः । तद्योगेपि च लिप्सायां रमणार्थोपमार्थयोः उपादानेधिके प्रोक्तमासन्नेषु प्रकीर्तित'मिति । अत आसन्नमात्रार्थकमुपेत्यव्ययम् । श्रीभागवतीयवेदवेदान्तसारत्वार्थं सामीप्यार्थकाव्यद्वयस्यावश्यकत्वात् । अप्रतीकारेति ज्ञानादिभिरप्रतीकारो यस्येत्यप्रतीकारम् । तच्च दुःखमप्रतीकारदुःखम् ॥ १८ ॥

ब्रह्मा तदुपेत्यत्र दैत्यसम्बन्धित्वादिति । भगवत्पत्नीत्वेपि भगवदिच्छया दैत्यसम्बन्धित्वादित्यर्थः । ज्येष्ठत्वाद् दैत्यानाम् । 'यावदासीन' इत्युक्तश्रुतेः । अकारणशङ्केति कारणं देवसम्बन्धित्वमशोके । गीतायां 'मा शुचः सम्पदं दैवीमभिजातोसि पाण्डवे'तिवाक्यात् । अकारणं दैत्यसम्बन्धित्वं तस्य शङ्का तर्कः तद्व्यावृत्त्यर्थम् । ब्रह्मज्ञानमत आलोचनेन तत् भूम्युक्ताष्टकार्थं उपधार्य निश्चित्येतिपदत्रयार्थमाहुः आलोचनेति । प्रतीकारं क्षीरपयोनिधितीरगमनोपस्थानदेवाज्ञापनादिकम् । तथेति अष्टकोक्तषड्गुणैश्वर्ययुक्तष्टार्थाविर्भावनेन प्रतीकारे सामर्थ्यम् । ब्रह्मत्वात् भक्तिमत्त्वात् । ज्ञानात्मकत्वादिति न बृहत्त्वाद् बृंहणत्वाद् ब्रह्मेति हेतुरथशब्दस्य, अथ ब्रह्मा तदुपधार्येत्यन्वयमतिक्रम्य यथाश्रुतान्वयेन अथशब्द आनन्तर्ये इत्याहुः स्वेति । भूमीति सतिसप्तमी । ससाधनमिति आज्ञापने साधनं हेतवो देवास्तैः सह ससाधनम् । अनेनाकारणशङ्काव्यावृत्त्यर्थमित्यपि सुबोधिनीपाठः । देवाकारणशङ्काव्यावृत्त्यर्थमित्यर्थः । उपायेति यथा वृकासुराय वरः । निमित्तन्ति जगन्नाथस्य ! नयनमिति ज्ञानम् भगवत इति तेन तत्र भगवत्प्राकट्यं, मथुरावत् । 'क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वर'मिति राजेन्द्रमोक्षेष्टमस्कन्धे । इतीति इति हेतोः क्षीरपयोनिधेस्तीरं जगामेति सम्बन्धः । अतो यत्र भगवांस्तत्र जगाम । पक्षान्तरमाहुः व्यापिवैकुण्ठेति । तत्रेति क्षीरपयोनिधेस्तीरे । नैकट्यादिति अयमर्थः । क्षीरपयोनिधिः क्रौञ्चपर्वतः क्रौञ्चद्वीपः । क्रौञ्चद्वीपाद् द्विगुणः क्षीरपयोनिधिः, तत्र क्रौञ्चपर्वतः । तस्य पर्वतराजस्य सपूर्वर्षगिरयः शुक्लो वर्धमानो भोजन उपबर्हणो नन्दो नन्दनः सर्वतो भद्र इति । तत्र शुक्लः श्वेतपर्वतः । 'शुक्लो योगान्तरे श्वेत' इतिविश्वात्, 'श्वेतो द्वीपाद्रिभेदयो'रिति विश्वाच्च । श्वेतद्वीपनामनिवर्तकः । क्रौञ्चपर्वतवत् । तदुक्तं पञ्चमस्कन्धे, 'ततो बहिः क्रौञ्चद्वीपो द्विगुणः स्वसमानेन क्षीरोदेन परित उपक्लृप्तः वृतो यथा कुशद्वीपो घृतोदेन, यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिवर्तक आस्ते' इति । एवं सति श्वेतपर्वते स्वप्रियधाम, श्वेतद्वीपनामनिवर्तके भगवतः प्रियत्वं तेन तत्र व्यापिवैकुण्ठाविर्भावस्य जातत्वेन तदधिष्ठानद्वीपावरणक्षीरपयोनिधिस्तदीयतीरस्य नैकट्यादित्यर्थः । क्षीरपयोधिमात्रान्तरितत्वं नैकट्यम् । ननु ब्रह्मणो न दुर्वासापेक्षया न्यूनसामर्थ्यं, अतो वैकुण्ठे कुतो न गतं ब्रह्मणेत्याशङ्क्याहुः भूमाविति । स्वपत्न्याम् । आसक्तो भगवान् । चेति क्षीरपयोनिधेस्तीरं जगामेत्यर्थः ॥ १९ ॥

तत्र गत्वेत्यत्र तिरोभावादिति स्तोत्रकरणाज् ज्ञायते । एतेन ब्रह्मकृतमानससेवायाः कीर्तनभक्तेर्ज्ञापकत्वं द्योतितम् । सायुज्यं फलम् । मध्यकालनिर्वाहकोधिकारः । गमनमात्रेणैवेति एवकारेण मार्गश्रमाहननयोगो व्यवच्छिद्यते । अनुवाद इति 'जगामे'त्यस्यानुवादः । 'समाहित' इतिपदस्यार्थमाहुः समाहितेति । समाधीयते समाधिविषयीक्रियते यो योगः कर्मकौशलरूपः स आरूढो येन, समारूढ इति वा । सहसुपेति समासः । समाहितः इति प्रथमान्तं भिन्नं पदम् । तस्य विवरणं योगारूढ इति । योगः आरूढो येन । न तु योगारुरुक्षुर्ब्रह्मा । स्वयमिति ब्रह्मा एवेति ब्रह्मयोगव्यवच्छेदक एवकारः । स्वस्याकरणमिति । कृद्योगे, कर्तरि षष्ठी । स्वकर्तृककरणाभावः । इत्याहेति इति हेतोराह स एवेति अन्ययोगव्यवच्छेदक एवकारः । देव इति पचाद्यच् । प्रजापतेरिति त्रयाणां ग्रहणेन वेदवेदान्तस्मार्तसिद्धान्ताः । 'प्रजापतिरकामयते' ति संहिता, काठकोपनिषद्यग्निः, आरण्यके 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम्, एतैः सर्वैः आदित्यमण्डलमेव विधास्यत' इति । प्रजापतिः शरीरं, अग्निः आत्मा, सूर्योन्तरात्मेति वा । ऋग्वेदे शरीरम्, आत्मातः प्रजापतिः शरीरम्, 'ब्रह्म तर्हि अग्नि' रित्युत्तरार्धादग्निः परमात्मा, सूर्यश्चक्षुरिन्द्रियाधिष्ठातृत्वादन्तरात्मेति । चतुर्थस्कन्धे

त्रयोविंशाध्याये प्रजापतिर्ब्रह्मेति श्लोकः । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्' इतिवाक्यम् । 'चक्षुषश्चक्षुः' इति सूर्यस्य सूर्य इत्यत्र श्रुतिः, सूर्यस्य चक्षुष्ट्वात् । दैत्यानामिति 'कृद्योगे कर्तरि षष्ठी' । न पच्चेति दैत्येषु न पक्षपातः । 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा अजोपि जात' इति वाक्यात् । तत इति दैत्येभ्यः । स्वशान्तरूपदेवत्वनाशोपीति न पक्षपात इत्याहुः देवानां चेति । अदृष्ट इति भगवान् । पुरि शेत इति पुरुषपदव्युत्पत्त्याहुः सहोति । स्वपितेति ञिष्वप् शये, नित्यस्वप्नकर्ता । तेन नारं नरसमूहः अयनं यस्येति नारायणपदव्युत्पत्तिः । परन्तु महतः स्रष्टेव मणिगणवज् जगद्धारकत्वेन रूपेण वर्ततेन्तर्यामी । महतः स्रष्टुरिदमित्थतया पुरुषसूक्तवागविषयत्वात् । ननु सङ्कर्षणस्य वाग्विषयत्वाद् भूमिनिमित्तदर्शनत्वेन भूमिभारभञ्जकत्वाच्च पुरुषसूक्तेनान्तर्यामिधर्मपुरःसरोपस्थानं कथमिति चेन्न । भूमिपत्न्याः पादत्वात् तद्भारहरणार्थं कृष्णस्यावश्यकत्वात् तस्य च पुरुषसूक्तवागविषयत्वेनान्तर्यामिपुरःसरोपस्थानस्य युक्तत्वात् । उपस्थानं सूर्यस्येति 'य आदित्येतिष्ठन्' इत्याद्यन्तर्यामिब्राह्मणोक्तसूर्यान्तर्याम्यत्र मुख्यः । युक्तं चैतत् । नारायणः स्वपितेत्युक्ते मायिकस्वप्नसृष्टौ दृष्टनित्यपदार्थस्य भगवदाज्ञादिरूपस्यान्तर्यामिकार्यत्वात् । महतः स्रष्टा तु भक्तैः सह निगूढभावं करोतीति । मायासाहित्यस्य श्रुतावदर्शनात् । तेन 'कामं कामं पुरुषो निर्मिमाण' इति श्रुतौ पुरुषान्तर्यामी, सोत्र पुरुषपदार्थः । तेन स्वहृदये वर्तनमप्यन्तर्यामिधर्मः । तत इत्यादि तत इति भक्तैः सह निगूढभावकर्तृत्वेपि ततः कृष्णात् कार्यं स्वपादभारदूरीकरणं सङ्कर्षणसहायात् तस्यावश्यंभाव इति ज्ञापनार्थम् । अन्तर्यामिधर्मपुरःसरप्रतिपादकपुरुषसूक्तेनेत्युक्तमित्यर्थः । पूर्वान्वयित्वे तु ततः कार्यावश्यंभाव इति ज्ञापनार्थं स्वहृदये पुरुषपदेन नारायणोन्तर्यामित्वेन व्याकृत इत्यर्थः । वैदिकेनेति पुरुषस्य सूक्तं पुरुषसूक्तं तेनेत्यत्र षष्ठी प्रतिपाद्यप्रतिपादकभावसम्बन्धे । पुरुषोक्तत्वाद् वेदमर्हतीति वैदिकं, तदर्हतीति ठक् , तेन पुरुषसूक्तेनेत्युक्तं, तत्र संशयः, पुरुषस्य सूक्तं तत्पुरुषप्रतिपादकं सूक्तं तद् भगवत्प्रेरणया प्राप्तं 'तेने ब्रह्म हृदा य आदिकवये' इति वाक्यात् आहोस्वित् ब्रह्मणादिकविं प्रति वाक्येनोक्तम् । तत्र प्रथमपक्षोत्र 'गिरं समाधा'वित्यग्रेतनवाक्यादित्याहुः भगवदिति । 'गिरं समाधौ गगने समेरिता'मितिवाक्ये क्षेपार्थकेरतिधातुनिष्पन्नस्य सम्पूर्वस्य 'समेरिता'मितिपदस्य कथनात् भगवत्प्रेरणयेति । क्षिप प्रेरण इति धातुपाठात् । अतो भगवत्प्रेरणया प्राप्तेनेत्युक्तम् । पुरुषसूक्तेनेत्यत्र सूपसर्गार्थमाहुः भावत इति । अतिप्रियमेव सूक्तं भवतीतिभावः । 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमेति न्यायेनाहुः पुरुषसूक्तमिति । पुरुषपदेन सूर्यतदन्तर्यामिणोर्ग्रहणात् तेजोमयाविर्भावकं पुरुषसूक्तं तेजोमयमित्युक्तम् । उपस्थानेति मध्याह्नसन्ध्यायां प्रसिद्धम् । पुरुषसूक्तं भाष्ये तृतीयाध्याये तृतीयपादे पुरुषविद्याधिकरणे उत्तमाधिकारिस्मितदेवोपासनीयं न विभूतिरूपमित्यनयाऽशेषगुणपूर्णब्रह्मणि विनियुक्तम् । तत् कथमत्र चिन्मात्रे विनियुक्तमनुचितमत आहुः अन्तर्यामीति । एवेति 'कृष्णद्युमणी'तिवाक्यादशेषगुणपूर्णस्य सूर्यतदन्तर्यामित्वादेवकारः । अत एव श्रीभागवते 'पौरुषेणापि सूक्तेने'त्यत्र सत्यज्ञानानन्तानन्दं विषय उक्तम् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ प्रसिद्धं भक्तानां दुःखमेव भगवदवतारकारणम् । तत्र प्रथमं भूमेर्दुःखमाह—भूमिरिति । दृप्ता गर्विता उच्छास्त्रवर्तिनो ये नृपव्याजा नृपवेषेण वर्तमाना दैत्यास्तेषामनीकानां सैन्यानां शतानामयुतैरसङ्ख्यातैर्यो भूरि महान् भारस्तेनाक्रान्ता पीडिता सती भूमिः सर्वदेवाधिदेवं ब्रह्माणं शरणं ययावित्यन्वयः ॥ १७ ॥ तद्गमनप्रकारमेवाह—गौर्भूत्वेति । गौर्भूत्वा दयोत्पादनाय सर्वेषूपकारि गोरूपं बिभ्राणा खिन्ना खेदव्याप्ता अत एव रुदन्त्यत एवाश्रूणि मुखे यस्यास्तथाभूता विभोः ब्रह्मणोऽन्तिके समीप उपस्थिता स्तुवती सती स्वं व्यसनं दुःखं तस्मै ब्रह्मणे अवोचत विज्ञापितवती । तत्प्रकारस्तु विष्णुपुराणे स्पष्टः । तथाहि—त्वत्सम्प्रतमिमे दैत्याः कालनेमिपुरोगमाः । मर्त्यलोकं समागम्य बाधन्तेऽहर्निशं प्रजाः । कालनेमिर्हतो योऽसौ विष्णुना प्रभविष्णुना । उग्रसेनसुतः कंसः सम्भूतः स महासुरः ॥ अरिष्टो धेनुकः केशी प्रलम्बो नरकस्तथा । सुन्दोऽसुरस्तथाऽत्युग्रो बाणश्चापि बलेः सुतः ॥ तथान्ये च महावीर्या नृपाणां भवनेषु ये । समुत्पन्ना दुरात्मानस्तान्न सङ्ख्यातुमुत्सहे । अक्षौहिण्यो हि बहुला दिव्यमूर्तिधराः सुराः । महाबला महाभागा दैत्येन्द्राणां ममोपरि ॥ तद्भूरिभारपीडार्ता न शक्नोम्यमरेश्वराः । बिभर्तुमात्मानमहमिति विज्ञापयामि वः ॥ क्रियतां तन्महाभागा मम भारावतारणम् । यथा रसातलं नाहं गच्छेयमतिविह्वला' इति ॥ १८ ॥ ब्रह्मा तद्भूमिदुःखमुपधार्य श्रुत्वा तन्निराकरणं स्वस्य देवानां वाऽशक्यं मत्वा भगवदधीनं तन्मत्वा । अथानन्तरमेव भगवतः कृपोत्पादनार्थं देवैस्तया भूम्या च सह तथा त्रिनयनो महादेवस्तेन सहितश्च पयोनिधेस्तीरं तीरस्थश्वेतद्वीपाख्यं भगवतो धाम जगामेत्यन्वयः ॥ १९ ॥ तत्र गत्वाऽपि भगवन्तमदृष्ट्वा समाहितस्तदेकाग्रचित्तः सन् पुरुषं भगवन्तं पुरुषसूक्ताख्येन वैदिकस्तोत्रेण उपतस्थे तुष्टावेत्यन्वयः । ननु ब्रह्मणो जगत्स्वामित्वात्तदभिमानं विहाय कथं भगवन्तं तुष्टाव तत्राह—जगन्नाथमिति । मुख्यो जगत्स्वामी भगवानेव, ब्रह्मा तु तत्स्थापित इति भावः । ननु तस्य जगन्नाथत्वे दैत्यानामपि स एव नाथः, अतः कथं देवपक्षपातेन दैत्यान् हनिष्यतीत्याशङ्क्याह—देवदेवमिति । देवैः सह दीव्यति क्रीडतीति तथा तम् । तत्रापि हेतुमाह—वृषाकपिमिति । भक्तानां कामान् वर्षतीतिः वृषः, क्लेशानाकम्पयतीत्याकपिः, वृषश्चासावाकपिश्चेति वृषाकपिस्तम् । तथा च भूम्यादिदेवानां स्वभक्तदैत्यानां विमुखत्वाच्च देवपक्षपातेन दैत्याहननं सम्भवत्येवेत्याशयः ॥ २० ॥

अन्वितार्थप्रकाशिका

भूमिरिति । दृप्ताः गर्विता ये नृपास्तेषां व्याजो मिषं येषां ते च ते दैत्याश्च दितिवंशजत्वाभावोपि कर्मणैव दैत्याः नृपरूपा दैत्यास्तेषामनीकशतानामयुतैः यो भूरिभारस्तेनाक्रान्ता भूमिः ब्रह्माणं प्रति शरणं ययौ । भूमिर्हरेः पत्नी ब्रह्मा च तत्पुत्रः । अतः पुत्रद्वारा स्वपतिं प्रति दुःखसूचनं योग्यं नतु धाष्टर्येन स्वयमेव । अत्र ब्रह्मा सुमेरौ स्थित एव ग्राह्यो नतु सत्यलोकस्थः । कृष्णावतारादतिपूर्वमेव ककुद्मीरेवतीवरप्रश्नार्थं तत्र गतः तेन सहित एव ब्रह्मा क्षणानन्तरं तं प्रत्याह । संप्रति अवतीर्णाय बलाय कन्या देयेति । अतः सत्यलोकेशस्य तन्मध्ये क्षीरोदतीरगमनं न वृत्तम् "जगाम धरणो मेरोः समाजे त्रिदिवौकसाम्" इति पराशरेणाप्युक्तमित्याहुः ॥ १७ ॥ गौरिति । कृपाजननार्थं गौर्भूत्वा खिन्ना दुःखिता करुणं शोकसहितं यथा स्यात्तथा क्रन्दन्ती रुदती अश्रुमुखी सा भूमिः विभोः ब्रह्मणः अन्तिके समीपे उपस्थिता सती स्वं स्वीयं व्यसनं कष्टम् अवोचत । समवोचतेति वा पाठः ॥१८॥ ब्रह्मेति । ब्रह्मा तत् भूमेः कष्टम् उपधार्य ज्ञात्वा अथानन्तरमेव सत्रिनयनः शिवसहितः सन् देवैः सह तया भूम्या च सह क्षीरपयोनिधेः क्षारसमुद्रस्य तीरं जगाम । अत्र हि कार्यद्वयमुपस्थितं पृथ्वीपालनं दैत्यसंहरणं च । तत्राद्यार्थमिन्द्रं वा आज्ञापयेत् द्वितीयार्थं रुद्रं वेति देवै रुद्रेण च सहितो जगामेति ॥ १९ ॥ तत्रेति । तत्र गत्वा समाहितः एकाग्रचित्तः सन् जगतां नाथं देवानां देवं पूज्यं वर्षति कामानिति वृषः आकम्पयति क्लेशानित्याकपिः वृषश्चासावाकपिश्चेति तं पुरुषं भगवन्तं पुरुषसूक्तेन सहस्रशीर्षेत्यादिकेन उपतस्थे तुष्टाव ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमित्थं प्रत्यर्च्य भगवदवतारवीर्याणि विस्तरतो विवक्षुस्तावदवतारनिमित्तभूतां स्वयंभूप्रार्थनामुपपादयति चतुर्भिः । भूमिरिति । भूमिः, दृप्ता गर्विताः नृपव्याजा नृपवदवभासमाना ये दैत्या असुरास्तेषामनीकानां सैन्यानां शतानामयुतानि तैः, जातेनेति शेषः । भूरिभारेण तद्रूपनिरवधिकभारेण, आक्रान्ता पीडिता सती, ब्रह्माणं चतुर्मुखं, शरणं, ययौ ॥१७॥ एतदेव प्रपञ्चयति । गौरिति । सा च, गौः भूत्वा, पृथिव्यभिमानिनी देवतैव गोरूपधारिणी भूत्वेत्यर्थः । खिन्ना खेदयुक्ता, अश्रूणि मुखे यस्याः सा, करुणं यथा तथा, क्रन्दन्ती रुदती सती च, विभोर्ब्रह्मणः, अन्तिके समीपे, उपस्थिता स्तुवन्ता सती च, स्वमात्मीयं, व्यसनं दुःखं, तस्मै ब्रह्मणे, अवोचत कथयामास । समवोचतेति पाठान्तरे सम्यक् विज्ञापयामासेत्यर्थः ॥ १८ । ब्रह्मेति । ब्रह्मा चतुर्वदनः, तद्भूमिव्यसनम्, उपधार्य ज्ञात्वा आकर्ण्य वा । अथ पृथ्व्युक्तदुःखश्रवणानन्तरं, देवैर्देवगणैः सह, तया भूम्या च सह, सत्रिनयनः त्र्यम्बकेन सह च, क्षीरपयोनिधेः क्षीरसागरस्य, तीरं प्रति, जगाम ॥ १९ ॥ तत्रेति । ब्रह्मा तत्र क्षीरनिधितीरे, गत्वा, समाहितः समाधिनिष्ठचित्तः, अन्तर्वृत्त्या भगवत्स्वरूपध्यानप्रसक्तचित्तः सन्नित्यर्थः, जगन्नाथं देवदेवं, वृषाकपिं स्वभक्तकामवर्षुकपापप्रकम्पकं, पुरुषं परमपुरुषं श्रीविष्णुं पुरुषसूक्तेन 'सहस्रशीर्षा' इत्यादिषोडशर्चात्मकसूक्तेन, उपतस्थे तुष्टाव । स्तुतिपूर्वकं निदध्यावित्यर्थः॥२०॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

भूमिरिति : १०-१-१७

सर्वंसहापि समदासदसह्यभारखिन्नाऽजनीति शरणं विधिरेव युक्तः ।
युक्तस्तदर्थमवतार इहाच्युतस्याप्यङ्गीकृतानलसतात्मजनावनस्य ॥ १२ ॥

प्रेयानप्यनिशं वशोऽपि नितरां शान्तोऽपि कान्तः सुतं द्वारीकृत्य तदन्तरङ्गमिह संप्रार्थ्यो न जातु स्वतः ।
सत्स्त्रीलक्षणमेतदित्यविकलं प्रख्यापयित्री तदा धात्री सात्मभुवं ययौ प्रथमतस्तत् साधु मन्यामहे ॥ १३ ॥
तेनान्वर्थजडाभिधेन मम किं तातेन येनानिशं श्रीशः सन्निधिभागपि स्वनिलये नाभ्यर्थ्यते मत्कृते ।
आक्रोश्यवमनादृताब्धिगमना मन्येऽतिखेदाकुला सेला साधु पितामहं स्वजनकस्रष्टारमागादिति ॥ १४ ॥

सपदि यदधिकारिणः प्रवृत्तिर्भवति विना द्रविणार्पणं न लोके ।
ध्रुवमिदमवगत्य भूरुपागाद्विधिसविधं परिगृह्य भूरिभारम् ॥ १५ ॥

गौरिति : १०-१-१८.

गोजातभूतिमथ गोभिमुखं सदैव गोपेडितं च शतगूल्लसिताधिवासम् ।
दृष्ट्वा विधिं तदनुरक्त्यभिलाषिणी सा गोरूपिणी स्वयमभूद्वसुधेति युक्तम् ॥ १६ ॥
गवामबाधस्थितिदानदक्षं चातुर्यमस्यैव मुखे विभाति । तद्युक्तमित्यादृतगोस्वरूपा प्रोवाच तादृग्व्यसनं स्वमस्मै ॥ १५ ॥

ब्रह्मेति : १०-१-१९.

लोके व्यापक एव यद्यपि विभुः सत्यं तथापीष्टदो ध्येयो ध्यानजुषा समेत्य भगवान् प्रासादमेवोज्ज्वलम् ।
सद्धर्मेदमिति व्यबोधि विधिना दुग्धाब्धिमाजग्मुषा नो चेत्स्वस्थल एव सर्वविदसौ चक्रे न योगं कुतः ॥ १८ ॥

यथाकथञ्चिद्यदि सत्कृतामिमां विधाय देवाँश्च निवर्तयाम्यहम् ।
अलीकयोगस्तदनुस्पृशेन्न किं सिन्धुं सनालीकविभूतिरित्यगात् ॥ १९ ॥
सापत्नमातृपदभागहमस्मि यस्मान्मद्दुःखदुःखितमनास्तदयं कुतः स्यात् ।
मैवं विकल्पकलिता किल भूदसावित्यागात्स्वयं किमु तदा स हि सत्यधामा ॥ २० ॥
न चेदुदधिरोधसि प्रभुरसौ मयाऽऽश्रीयते मनागपि तदीप्सितं ननु भुवो न सिद्ध्येदिति ।
विचिन्त्य जगतीपतेः सदवतारकार्योत्सुकः किमम्बुधिमगाद्रजोगुणतनुर्विधाता स्वयम् ॥ २१ ॥
अनुकूलविधावभीष्टसिद्धिर्भवति स्पष्टमविघ्नमित्यभिज्ञः ।
विधिरच्युतभव्यदिव्यकार्येऽप्यनुकूलस्थितिभागभूत् किमब्धौ ॥ २२ ॥
रत्नगर्भोदितं वाक्यं सादरं शृणुयान्न कः । तदार्जवार्जने को वा न यतेतेति तत्स्फुटम् ॥ २३ ॥

सत्रिनयन इति :

भक्ताभक्तजनावनार्दनकृते सत्त्वं तमोऽपेक्ष्यते, तत्राऽऽद्यं तु हरौ सदावनपरे नैसर्गिकं वर्तते ।
अन्यद्योजयितुं ध्रुवं विधिरगात्त्र्यक्षेण सार्धं यतः प्रोक्तं तेन पुरो हरेर्विहरणं शक्त्या स्वकालस्थया ॥ २४ ॥
यदा स्यातां सत्त्वानुसरणचणौ द्वावपि गुणौ तदा योगः सिद्धो भवति भगवत्प्रापक इति ।
स्फुटं यत्क्षीराब्धौ सहर-परमेष्ठि-प्रसरणात् समाधिः सिद्धोऽभूदुदित-हरिसाक्षात्कृतिसुखः ॥ २५ ॥

तत्रेति : १०–१–२०.

वराभयदयोदयां गिरमुदारमूर्धस्थितां निजाधिपमुखाम्बुजादधिगतां समीप्सुः पुमान् ।
स्वयं स्वरुचितत्पदे सदसि सूक्तमेवावदेदिति स्फुटमधादजः पुरुषसूक्ततस्तत्स्तवात् ॥ २६ ॥

कृष्णप्रिया

कपट से अभिमानी राजाओं के रूप में उत्पन्न असंख्य दैत्यों की सेना के दशसहस्र सेनाओं के अतिशय बोझ से पीडित भूमिदेवता ब्रह्माजी के शरण में गई ॥ १७ ॥ खेदपूर्ण, दया उत्पन्न हो इस प्रकार अश्रु पूर्णमुखवाली, रुदन करती हुई गोरूपधारिणी पृथिवी देवी ब्रह्माजी के समीप उपस्थित होकर उन अपने दुःखों का निरूपण करने लगी ॥ १८ ॥ गो स्वरूप-धारिणी पृथ्वी देवीजी के दुःख निवेदन के भावार्थ को निश्चय कर ब्रह्माजी, अपने साथ त्रिनयन शिवजी, एवं अन्य देवगण तथा भूमि देवीजी को साथ लेकर क्षीर सागर के तीर पर पधारे ॥ १९ ॥ वहाँ जाकर समाधि में स्थित ब्रह्माजी ने, देवाधिदेव, जगत् के स्वामी, सर्व यज्ञ के स्वर्गादि फल के भोक्ता (वृषाकपि) श्रीपुरुषोत्तम की पुरुष सूक्त से स्तुति की ॥ २० ॥

गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानु[1]वाच ह ।
गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरम् ॥ २१ ॥
पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यताम् ।
स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद् भुवि ॥ २२ ॥
वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः । जनिष्यते[2] [3]तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः ॥ २३ ॥
[4]वासुदेवकलानन्तः सहस्रवदनः स्वराट् । [5]अग्रतो भविता देवो हरेः प्रियचिकीर्षया ॥ २४ ॥

कर्दमक्षमा

अन्वयः—गगने समीरितां गिरं समाधौ निशम्य वेधाः त्रिदशान् उवाच हे अमराः पौरुषीं गां मे शृणुत पुनः आशु मा चिरम् तथा एव विधीयताम् ॥ २१ ॥ धराज्वरः पुंसा पुरा एव अवधृतः भवद्भिः अंशैः यदुषु उपजन्यतां यावद् उर्व्याः भरं ईश्वरेश्वरः सः स्वकालशक्त्या क्षपयन् भुवि चरेत् ॥ २२ ॥ वसुदेवगृहे साक्षात् भगवान् पुरुषः परः जनिष्यते तत् प्रियार्थं सुर-स्त्रियः संभवन्तु ॥ २३ ॥ हरेः प्रियचिकीर्षया वासुदेवकलानन्तः सहस्रवदनः स्वराट् देवः अग्रतः भविता ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पौरुषीं पुरुषेण भगवता प्रोक्तां गां वाचं मे मत्तः आशु शृणुत मा चिरमविलंबितं तथैव विधीयतां चेति ॥ २१ ॥ विज्ञप्तः पुरैव पुंसान्तर्यामिणा ईश्वरेण धराया ज्वरस्तापोऽवधृतो ज्ञातः ॥ २२–२४ ॥

---

[1] नुवाच–वीर. । [2] ष्यति–इति कस्यचित् । [3] तत्पूजार्थं संभवन्त्वमरस्त्रियः–वीर. । [4] ऋषयोपि तदादेशात्कल्प्यन्तां पशुरूपिणः । पयोदानमुखेनापि विष्णुं तर्पयितुं सुराः ॥ अयमेकः श्लोकः अधिकः वीर. भक्त. । [5] अग्रजो–वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

समाधाविति तादर्थ्ये सप्तमी । देवकार्यसमर्थनार्थम् "समाधिर्ध्यानसंधानप्रतिज्ञासु समर्थने" इत्यभिधानचिंतामणिः । पौरुषीं पुरुषेण भगवता प्रोक्ताम् । गच्छति श्रोत्रमिति गौर्वाक् तां तथैव यथाहं ब्रवीमीति विधीयतां क्रियताम् ॥ २१ ॥ अवधृतो निश्चितः ॥२२॥ वसुना धनेनार्थाद्गोधनेन दीव्यति व्यवहरति द्योतते मोदते इति वा वसुदेवो नंदः यशोदा च "जातं परमबुद्धथत" इत्युक्तेः । "देवभेदे नले रश्मौ वसू रत्ने धने वसु" इत्यमरः । "धनं वित्ते गोधने च" इति मेदिनी । "नृपयादवगोपेशधनिकश्रीनंदगोकुले । समुद्रशशिसूर्येषु वसुदेव उदीरितः ।।" इति निरुक्तात् । आनकदुंदुभिर्वा तस्य गृहे भार्यायाम् "गृहं गृहाश्च पुंभूम्नि कलत्रेपि च सद्मनि" इति मेदिनी । वसुदेवो गृह्यते निरुद्ध्यतेऽत्रेति वसुदेवगृहं कंसकारागृहं तत्र वा ॥ २३ ॥ वासुदेवाय कं सुखं शय्यारूपत्वेन लाति ददातीति वासुदेवकला तच्छय्याभूतोऽनंतः शेषः 'शेषोनंतः' इत्यमरः । अत एव वक्ष्यति 'शेषाख्यं धाम मामकम्' इति स्वेन हरिणा स्वान् वा राजते राजयति वा स्वराट् । प्रियचिकीर्षया प्रलंबादिवधद्वारा श्रीभगवत्प्रतिज्ञाताभूभारहरणरूपप्रियकर्माकरणेच्छयेत्यर्थः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

समाधौ तत्रापि गगने समीरितामदृष्टवक्तृकामित्यर्थः । इत्यदृश्यमानेन श्रीभगवतोक्तां समाधौ श्रुत्वेति, परमादृश्यत्वमुक्तम् । अग्रे श्रीवृन्दावनादौ तस्यापि परमांशिनः स्वयं भगवतः श्रीकृष्णस्य तस्य तादृशक्रीडया तदानीन्तनानां भाग्यविशेषबोधनार्थम्, ह स्फुटं हर्षे वा पौरुषीं स्वयं तद्रूपेण पुरुषेणोक्तामिति तेषां तस्यां विश्वासार्थम् आशु स्तवकोलाहलं परित्यज्य शृणुत, हे अमराः ! इति तदेवामरत्वं नाम सिध्येदिति भावः ॥ २१ ॥ तस्य पुरुषस्यैव वाक्यमनुवदति—पुरेति चतुर्भिः । पुंसा यस्याहमंशांशस्तेनादिपुरुषेण स्वयं भगवता श्रीकृष्णेन पुरैवावधृत इति तद्विज्ञापनार्थं युष्मत्प्रयासेनालं तथाऽहमपि तद्वेत्ता तच्छ्रवणार्थं स्वयं नाविर्भूत इति भावः । अंशैर्निजाशेषांशैः सह उपजन्यताम् "एते हि यादवाः सर्वे मद्गणा एव भामिनि ! सर्वदा मत्प्रिया देवि मत्तुल्यगुणशालिनः" इति पाद्मकार्त्तिकमाहात्म्यरीत्या नित्यतत्पार्षदानां यदूनां पुत्रपौत्रादिरूपेण जनित्वा निकटे स्थीयतामित्यर्थः । यदुष्विति तत्सम्बन्धिनामपि पाण्डवादीनां तदन्तर्भावात् एषामेव स्वर्गागमनमधिकारान्ते च तत्प्राप्तिर्ज्ञेया ईश्वराणां विराडाद्यन्तर्यामिणामस्मदादीनामपीश्वरः सर्वांशी तथा च ब्रह्मसंहितायाम् "ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः । अनादिरादिर्गोविन्दः सर्वकारणकारणम् ॥ यस्यैकनिःश्वसितकालमथावलम्ब्य जीवन्ति लोमविलजा जगदण्डनाथाः ॥ विष्णुर्महान् स इह यस्य कलाविशेषो गोविन्दमादिपुरुषं तमहं भजामि" इति व्याख्यास्यते च तैः "अथाह-मंशाभागेन" इत्यादौ "नारायणोऽङ्गम्" इत्यादौ "यस्यांशांशभागेन" इत्यादौ च ततः सद्यः सर्वं कर्त्तुं शक्तोऽपि स्वकालशक्त्या यदा यत् कर्त्तुं युज्येत तदैव तत् करोतीति यथाकालमित्यर्थः । स्वशब्देन कालस्यापि तदधीनतोक्ता यावत् भुवि चरेत् प्रकटो वर्त्तेतेत्यर्थः । अन्यदा तत्तन्नित्यप्रियजनैः सह नित्यं श्रीवृन्दावनादौ तदप्रकटप्रकाशविशेषत्वेन निरूपयिष्यमाणविचित्रक्रीडां कुर्वतोऽपि तस्यान्यैरदृश्यत्वात्; तथा च स्कान्दे—

"वत्सैर्वत्सतरीभिश्च सरामो बालकैर्वृतः । वृन्दावनान्तरगतः सदा क्रीडति माधवः" ॥ इति ।

वक्ष्यते च 'मथुरा भगवान् यत्र नित्यं सन्निहितो हरिः' इति । एकादशान्ते च द्वारकामधिकृत्य नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः' इति ॥ २२ ॥ ईश्वरेश्वरत्वमेव वदंस्तस्य स्वयमवतारे ईदृशलीलाकैवल्यमेवान्तरङ्गं प्रयोजनमित्याह—वसुदेवेति । गृह इति जीववत् पितुः सकाशादुत्पत्तिर्निरस्ता यः परः पुरुषः यस्मादन्य उत्कृष्टो नास्ति स एव भगवान् प्रकटसर्वैश्वर्ययुक्तस्सन् साक्षात् स्वयमेव जनिष्यते प्रादुर्भविष्यति अतस्तस्य प्रियार्थं परिचर्यया प्रीत्युत्पादनाय, यद्वा, तस्य प्रियाः श्रीरुक्मिण्याद्याः श्रीराधाद्याश्च तासां दास्यार्थमत एव सम्यग् भवन्तु उत्तमप्रकारेण जायन्तामित्यर्थः । यद्वा, सम्भवन्तु योग्याः भवन्त्विति वरप्रदानम्, तथापि जनन एव तात्पर्यम् ॥ २३ ॥ अग्रतो भविता, ज्येष्ठभ्राता भविष्यतीत्यर्थः । अत्र भ्रातृत्वे योग्यतामाह—वासुदेवस्य द्वारकादिप्रसिद्धचतुर्व्यूहप्रधानस्य श्रीकृष्णस्य कला अंशः सङ्कर्षणत्वात् अत एवानन्तः अपरिच्छिन्नः अतः स एव शेषाख्येनांशेन सहस्रवदनः श्रीकृष्णगुणगानेच्छयेति भावः । तथा च वक्ष्यते "यस्यैकांशेन विधृता जगती जगतः पतेः" इति व्याख्यातञ्च तैः एकांशेन शेषाख्येनेति, अतः स्वेन स्वस्वरूपेण श्रीभगवतैव राजत इति स्वराट् अतस्तं विनाऽन्यत्र स्थातुमशक्त इति भावः । देवः तदग्रजत्वात् सुतरां सर्वेषां पूज्य इत्यर्थः । ननु, श्रीलक्ष्मणवदसौ कनिष्ठतामेवार्हति न तु ज्येष्ठत्वम्; तत्राह—हरेः प्रियचिकीर्षयेति, तस्य यन्त्रितताहानाय तेनात्मन इव तस्यात्मनानुगतये च श्रीकृष्णदेवस्य तु भक्तसौहृदविशेष एवायमिति भावः । अतो बृहत्सहस्रनामस्तोत्रे श्रीबलदेवनामसु "पूर्वभक्तिखेदाच्युताग्रजः" इत्यत्रापि खेदः श्रीकृष्णस्यैव ज्ञेयः तेन खेदेन हेतुना अच्युतस्य श्रीकृष्णस्याग्रजो जात इत्यर्थः । पूर्वं पुराऽवतीर्णो लक्ष्मणस्तस्मिंस्तदंशे खेदं परामृश्य स्वांशे तु तथा न कचिदपि कल्पे प्रकटयतीति तात्पर्यम् । अथवा मयि ज्येष्ठे सति लक्ष्मणापराधीनत्वे श्रीरघुनाथ इव स्वैरं दुःखमुररीकर्तुं नायं शक्नुयादिति स्वातन्त्र्येण हरेः सुखं कर्तुमिच्छयेत्यर्थः । अतः श्रीलक्ष्मणस्यापि तद्दुःखनिवारणाशक्तत्वेनैव भक्तौ खेदो ज्ञेयः । हरेरिति तादृशस्नेहेन तस्य मनोहरणात् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तथा गगने समीरितां गिरमशरीरां वाणीं समाधौ निशम्य वेधाः ब्रह्मा त्रिदशान् सुरान् प्रत्यवोचत; तदेवाह—गामित्यादिभिस्सार्धैः पञ्चभिः। हे अमराः! समाधौ मया श्रुतां पौरुषीं परमपुरुषसम्बन्धिनीं गां गिरं मे मत्तः कथयतः शृणुत, यथेश्वरेणाऽऽदिष्टं तथैव भवद्भिर्विधीयतां क्रियतां चिरं बिलम्बं माऽकार्ष्ट ॥ २१ ॥ का नाम गौरित्यत्राह—पुरैवेति। पुरा भगवद्विज्ञप्तेः पूर्वमेव, यद्वा, पुरैव स्वावतारात्पूर्वमेवेत्यर्थः। पुंसा ईश्वरेण धराज्वरो भूक्लेशोऽवधृतः विज्ञातः भवद्भिर्यदुवंशैरुपजन्यतामुत्पद्यतां जीवानामंशेनोत्पत्तिर्नाम धर्मभूतज्ञानेन जीवान्तराधिष्ठातृत्वं स्वरूपस्यागुणत्वेनानेकदेहवृत्त्यसम्भवात्; कदाऽस्माभिरुत्पत्तव्यम्? इत्यत्राह। स ईश्वराणामस्माकमपि ईश्वरो भगवान् स्वसम्बन्धिन्या कालाख्यया शक्त्या कार्य्योपयुक्तापृथक्सिद्धविशेषणभूतया तन्वा उर्व्याः भूमेर्भरं क्षपयन् निरसितुमिति भावः। भुवि यावच्चरेदवतरेत्ततः पूर्वमेव जन्यतामित्यर्थः ॥ २२ ॥ तथा वसुदेवस्य गृहे भगवान् पूर्णषाड्गुण्यः प्रकृतिपुरुषविलक्षणः परमपुरुषः साक्षाज्जनिष्यते अवतरिष्यति न कपिलादिवज्जीवान्तराधिष्ठातृत्वेनावतरिष्यति, किन्त्वद्वारकमेवेत्यभिप्रायेण साक्षादित्युक्तम्। तस्य जनिष्यमाणस्य परमपुरुषस्य पूजार्थं परिचर्यार्थं क्रीडार्थमिति यावत्। अमराणां स्त्रियोऽपि सम्भवन्तु स्वांशैरुत्पद्यन्ताम् ॥ २३ ॥ तथा ऋषयोऽपि तस्य भगवत आदेशादनुशासनात्पशुरूपिणः कल्प्यन्तां गोरूपिणः सम्भवन्तु, किमर्थम्? तत्राह, हे सुराः! पयोदानमुखेन क्षीरप्रदोहनद्वारापि विष्णुं तर्पयितुं तप आदिभिस्तर्पन्त्येवाधुना पयोदानमुखेनापि तर्पयितुं गोरूपिणः कल्प्यन्तामित्यपिशब्दाभिप्रायः ॥ तथा यो वासुदेवस्य कला अंशः, कोऽसौ? योऽनन्तः सहस्रमुख स्वराडकर्मवश्यः सोऽपि हरेः प्रियं कर्त्तुमिच्छया अग्रजो भविता तस्याग्रजो भविष्यतीत्यर्थः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

समाधाविति तादर्थ्ये सप्तमी समाध्यर्थं देवकार्यसमर्थनार्थं समीरितां गिरम् "अत्यर्थोमिति गीर्वाणी वाचि हि सम्प्रतिष्ठितम्" इति श्रुतेः। तां स्तुतिगिरम् संस्तुत्य गुणध्यानसमवस्थायां वा कथिताम् "समाधिर्ध्यानसन्धानप्रतिज्ञासु समर्थने" इत्यभिधानादित्यर्थः। पौरुषीं पुरुषेणोक्तां गमयत्यवगमयति ज्ञापयत्यर्थमिति गौर्वाक् "अथ कस्माद्गौरिति गच्छति" इति निरुक्तकारनिर्वचनमपि वक्तुः श्रोतुः कर्णान्तरगमनाद्युक्तम् ॥ २१ ॥ धराज्वरः भूमेः सन्तापः "ज्वर सन्तापे" इति धातुः, न केवलं जननमेव पुरैव, तावन्तं कालमवस्थानं चापेक्षितमित्याह, स यावदिति स्वकालशक्त्या स्वरूपभूतोपसंहारकालाऽऽख्यशक्त्या ॥ २२ ॥ न केवलं देवानामुर्व्यामवतारस्तदङ्गनानामपीत्याह—वसुदेवेति ॥ २३ ॥ हरेरवताराविनाभूतस्य शेषावतारस्य प्रकारमाह—वासुदेवेति। वासुदेवकलानन्त इत्येकं पदं वासुदेवस्य कलया सितकेशांशेन युक्तः शेषः स्वेन हरिणा राजत इति स्वराट् स्वस्य स्वतन्त्रस्य हरेरधस्ताच्छयनीयत्वेन राजत इति वा स्वमात्मानं सनकादिभ्यो राजयति प्रकाशयतीति वा हरेरग्रतः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गिरमित्यादित्रयम् ॥ २१–२३ ॥ हरेः प्रियचिकीर्षयेति। नात्र श्रीरामलक्ष्मणवद्यथाक्रमं किन्तु तस्य यन्त्रिततताहानाय तेनात्मन इवात्मनाऽनुगतये च भक्तसौहृदविशेष एवायमितिभावः। अतो "भक्तिखेदाच्युताग्रजः" इत्यत्रापि खेदः श्रीकृष्णस्यैव ज्ञेयः। तदंशे खेदं परामृश्य निजांशे तु न कदाचिदपि कल्पते घटयतीत्यर्थः। अथवा ज्येष्ठे सति श्रीरघुनाथ इव लक्ष्मणापराधीनत्वेन स्वैरं दुःखमुरीकर्त्तुं नायं शक्नुयादिति स्वातन्त्र्येण हरेः कर्तुमिच्छयेत्यर्थः। अथ लक्ष्मणस्यापि दुःखनिवारणाशक्तत्वेनैव भक्तौ खेदो ज्ञेयः ॥ २४–४६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

समाधौ तत्रापि गगने समीरितामिति क्षीरोदनाथस्यापि ब्रह्मणापि दुर्लभदर्शनत्वमभिव्यज्य तदादिपरमांशिनः साक्षात् पुरुषोत्तमस्य कृष्णस्यापि प्रापञ्चिकलोकमात्रदृश्यत्वे तदीयकृपातिशयः एव हेतुर्व्यञ्जितः। पौरुषीं पुरुषस्य क्षीरोदनाथस्य गां वाचम् ॥ २१ ॥ पुरुषस्य वाचमेवानुवदति—पुरैवेति चतुर्भिः। विज्ञापनात् पूर्वमेव पुंसा "कृष्णः स्वयं समभवत् परमः पुमान् यः" इत्यनुसारात् स्वयं भगवता श्रीकृष्णेनेत्यर्थः। अवधृतः ज्ञातः अंशस्तदंशभूतपार्षदैरुद्धवसात्यक्यादिभिः सह मिलितीभूय यदुष्वित्युपलक्षणं कुरुष्वपि क्षीरोदनाथादयो वयमीश्वराः अस्माकमपीश्वरः ॥ २२ ॥ सुरस्त्रियस्तत्प्रियांशभूता या उपेन्द्रादिमन्वन्तरावतारस्त्रियस्ता एव तत्प्रियाणां सख्यार्थं कृतचरतद्भजनप्रभाववशात् पृथग्भूतास्तत्प्रियसख्यो भवन्तु। यदुक्तमुज्ज्वलनीलमणौ—

"नित्यप्रियाणामंशास्तु या जाता देवयोनयः। ता अंशिनीनामेवासां प्रियसख्योऽभवन् व्रजे" ॥ इति ॥ २३ ॥

स्वेन भ्रात्रा कृष्णेन सह राजत इति स्वराट् देवो बलदेवः अग्रतः प्रथममाविर्भविष्यति य एवांशेन सहस्रवदनोऽनन्तः "यस्यांशांशेन विधृता जगती जगतः पतेः" इति वक्ष्यमाणात् योऽनन्तो वासुदेवस्य कला ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं पुरुषस्थाने पुरुषसूक्तेन स्तुतः परमपुरुषः स्वच्छयैवावतरिष्यमाणो ब्रह्माणं यदाह, तद्ब्रह्मा देवान् प्रत्युक्तवानित्याह; गिरमिति। समाधौ ध्याने गगने हृदयाकाशे तेन परमपुरुषेण प्रधानत्वाद्वेधसं प्रत्येव समीरितां निशम्य वेधाः त्रिदशानुवाच,

हे अमराः ! पौरुषीं पारमेश्वरीं गां वाचं मे मत्तः आशु शृणुत पुनः श्रवणानन्तरं तथैव विधीयतां चिरं मा विलम्बो न कार्य्यः ॥२१॥ पुंसा भगवता धरापीडानिवेदनात्पुरैव धराज्वरः अवधृतः निश्चितः, तदाज्ञामाह—भवद्भिरिति । ईश्वराणां पुण्यबलेनेश्वरत्वेन आरोपितानां ब्रह्मादीनां स्वावताराणां च सर्वेषामीश्वरः । स्वकालशक्त्योर्वीभरं क्षपयन् यावत् यदुषु चरेत् तावत्पर्यन्तं भुवि भगवतः उप समीपे सामीप्यं यथा स्यात्तथा भवद्भिरंशैर्जन्यताम् । जीवस्याणुस्वरूपस्य स्वरूपतः स्वर्गे भुवि च युगपत्स्थित्यसम्भवात् तत्र कैश्चित् अंशैर्भगवदंशभूतैः स्वरूपैरेव भुवि भगवल्लीलासु सन्निहिततया स्थातव्यं देवलोके योगबलेन देहादिप्रकाशनेनांशेन पुत्रादिरूपेणांशेन वा स्थातव्यमिति कैश्चिद्देवलोके स्वरूपेण स्थातव्यम्, पुत्रादिरूपैरंशैर्भुवि स्थातव्यमिति भक्तितारतम्यतो यथाधिकारं यथासम्भवं कर्तव्यमित्यर्थः ॥ २२ ॥ परः पुरुषः सर्वकारणकारणः समानातिशयशून्यः साक्षादेव वसुदेवगृहे जनिष्यते । तत्प्रियार्थं तद्भक्त्यर्थं सुरस्त्रियः सम्भवन्तु ॥ २३ ॥ वासुदेवकलेति । वासुदेवस्य चतुर्मूर्तेर्द्वितीयः कलाभूतः अनन्तो देवः सहस्रवदनः स्वांशरूपशेषसहितः अग्रतो भविता भविष्यति "शेषाख्यं धाम मामकम्" इति "यस्यैकांशेन विधृता जगती" इति च वक्ष्यमाणात्, तत्प्रादुर्भावप्रयोजनमाह, हरेः व्यूहाङ्गिनः प्रियच्चिकीर्षयेति ॥ २४ ॥

श्रीसुबोधिनी

ननु, पुरुष एव तथा सत्यवतरिष्यतीत्याशङ्क्य तन्निराकरणपूर्वकं भगवत उत्तरं जातं स्वान्तःकरणे उपलभ्यातिसूक्ष्मत्वाद्देवानामगम्यं तान् ज्ञापितवानित्याह—**गिरमिति** । समाधौ यो भावितो भगवान् सलोकः तत्राकाशे भगवद्वाक्यं भगवतोक्तं श्रुतवान्, तत्र प्रमाणमाह—**वेधा** इति । अन्यथा कथं विदधाति भगवदाज्ञाव्यतिरेकेण । ननु, देवा अपि ब्रह्मतुल्याः कथं न श्रुतवन्तस्तत्राह—**त्रिदशा**निति तिस्रो दशा येषां, बाल्यं कौमारं यौवनमिति । अनेन तेषामुत्पत्त्याज्ञापि युक्ता भवतीति ज्ञापितम् । अकस्मात् क्षणं स्थित्वा किञ्चिद् विचार्य उक्तवानिति सर्वेषामाश्चर्यं हेत्याह । स्वतः कथनं वारयति—पौरुषीमिति । गामित्यखण्डनाय तस्या वाचो दोग्धृत्वाय च । म इति प्रमाणार्थम् । न हि ब्रह्मवाक्यमन्यथा भवति । पुरुषसम्बन्धिन्येव मत्तो वा श्रोतव्येति । आदौ भगवत आज्ञापनमाह—अमरा इति । प्रथमतः श्रुत्वा पुनः पश्चाद्विधीयताम् । चिरं मा विलम्बो न कर्तव्यः । सामग्रीमेव सम्पादयितुमादौ बोधयति पश्चाद्वक्ष्यत्याज्ञाम् । अग्रे च वक्तव्यमंशावतरणम् तद् देवानां मरणानन्तरं भवतीतिशङ्काव्युदासाय **अमरा** इति सम्बोधयति । शृणुतेति सावधानार्थं वचनम् । पुनःपदं च पूर्वं रामावतारे रावणभीतेन ब्रह्मणा पूर्वमपि देवा आज्ञप्ता अंशावतरणार्थमिदानीमपि तथैवाज्ञप्तिज्ञापनार्थम् । पूर्वं विलम्बेन कृतं तद्व्युदासायाश्विति । पुनस्तथैवांशावतरणं **विधीयता**मित्यर्थः । **तथैवेति** । यो देवो यावतांशेन जातः पौर्वापर्येण वा । पूर्वं दशरथो नावतीर्ण इत्याज्ञया तमवतार्य षष्टिसहस्रवर्षानन्तरं स्वयमवतीर्णोतो विलम्बः । तां शङ्कां प्रकृते वारयति **चिरं मेति** ॥ २१ ॥ ननु त्वया किमुक्तं किं वा भगवतोक्तमितिशङ्कां दूरीकुर्वन् पूर्वं वानरेष्ववतारं प्राप्य खेदो भूयान् प्राप्त इति देवाशङ्कां च परिहरन् भगवदुक्तमाज्ञापनमाह पुरैवेति । भूमेः पीडाकथनात् पूर्वमेव भगवता **धराधरज्वरोवधृतो** निश्चितः तत्र हेतुः, पुंसेति । पुरुषो हि भार्यां स्पृशति । ज्वरस्तु स्पर्शमात्रेणैव ज्ञायते । अतोऽस्मत्कृतं ज्ञापनं नापेक्षितम् । अतो भगवान् मद्वाक्यात् पूर्वमेव स्वयमेवोक्तवान् । आज्ञामाह **भवद्भिरिति** । भगवानप्यवतरिष्यति ततः पूर्वमेव **भवद्भिरुपजन्यतां** भगवज्जननसमीपे जन्यताम् आवश्यकत्वायांशैरिति । भवन्तो हि भगवदंशा हस्तपादादय इव सेवकाः । प्रभुः ससेवक एव सर्वत्र गच्छति । पूर्वस्माद्वैलक्षण्यं यदुष्विति । भगवानपि यदुष्ववतरिष्यति । अतो लोके प्राकट्याभावाय समीपे जन्यतामित्याज्ञा । इदं जननं सेवार्थत्वात् स्थितिपूर्वकम् । तत्र कियत्कालं स्थातव्यमित्याकाङ्क्षायामाह यावदिति । **यावत् स भगवान् यदुषु चरेत्** तावदुपजन्यताम् । समीपे स्थातव्यम् । जननं पुत्रपौत्रादिरूपेणाऽऽन्तमुत्पत्त्यर्थमुक्तम् । स्थितिस्त्वर्थादेव भविष्यतीति तन्नोक्तम् । भगवानपि कियत्कालं स्थास्यतीत्याशङ्कायामाह **उर्व्या भरं स्वकालशक्त्या यावत् क्षपयंश्चरेदिति** तदपि कियत्कालमित्याशङ्कायामाह **ईश्वरेश्वर** इति । ईश्वर एव स्वच्छन्दचारी । तेषां सर्वेषां कालादीनामपि य ईश्वरः, स कथं नियन्तुं ज्ञातुं वा शक्यत एतावत्कालं स्थास्यतीति ? अनेनैव नियतभोगयुक्तानां देवानामकरणशङ्कापि व्यावर्तिता । दैत्या अस्मान् मारयिष्यन्तीति न शङ्कनीयं यत **स्वकालशक्त्यैव** भारं दूरीकरिष्यतीति । चरेदिति भारभूता दैत्या नैकत्र तिष्ठन्तीति तदर्थं चरणम् । कालनियमस्य चाज्ञानम् । अज्ञातस्तु न भविष्यतीत्याह भुवीति । न हि भूमौ जातोऽलौकिकं करोतीति ॥ २२ ॥ तथापि क्वावतरिष्यतीत्याकाङ्क्षायामाह **वसुदेवगृह** इति । तस्याप्यंशावतरणव्युदासायाह **साक्षाद्भगवा**निति । न तु चक्रादिरूपेण सत्त्वस्य च व्यवधानेन वाऽवतारः **भगवच्छब्दो** गौणेष्वपि वर्तत इति तद्व्युदासार्थं **पुरुष पर** इति । पुरुषोत्तम इत्यर्थः । ब्रह्माण्डात् परस्य कथनादर्थादेव प्रकृतिप्रवर्तक समागतः । ततः परस्तु पुरुषोत्तम एव । स च जनिष्यते । अतस्तत्प्रियार्थं तत्सेवार्थं सुरस्त्रियः सम्यक् सर्वसौन्दर्यपुरःसरं तस्य योग्यस्थानेषु सम्भवन्तु सुरस्त्रियोप्सरसो लक्ष्म्या सहिताः समुद्रादुत्पन्नास्तासां भोगो भगवता न कृत इति स्वजन्मसाफल्यार्थमेव तासामवतरणम् । तत्प्रियार्थमितिवचनाद्देवानां स्त्रीत्वेनावतरणं निवारितम् ॥ २३ ॥ भगवदवतरणात् पूर्वमेव सेवासावधानार्थं भगवच्छय्यारूपस्य शेषस्य सङ्कर्षणसहितस्यावतारमाह वासुदेवेति

सात्त्विकेषु तु कल्पेषु यः शेते सलिले हरिः । वासुदेवः स विज्ञेयस्तस्यांशोनन्त उच्यते ॥ १ ॥
कालात्मा च स विज्ञेयो भूभारहरणे प्रभुः । तत्र सुप्तो हरिश्चापि तदाविष्टो भविष्यति ॥ २ ॥

अतोनुशयनं विष्णोर्बलभद्रेण नात्मनः । एकवत् प्रोच्यते कृष्णो द्विवल्लोकैः प्रतीयते ॥ ३ ॥
देवक्यां शयनस्यैव सम्भवो न हरेः स्मृतः । रोहिण्यामपरस्येति कर्षणान्नैव हीनता ॥ ४ ॥

तं सङ्कर्षणमन्यस्माद्भिन्नतया ज्ञातुं विशिनष्टि **वासुदेव** इति । **वासुदेवस्य** प्रथमतः **कला** धर्मरूपः । सोपि शयनरूप **इत्यनन्तः** कालात्मा । स हि स्वाश्रय एव शेते । तत्राधिदैविकरूपमपि स्थितमिति ज्ञापयितुमाह **सहस्रवदन** इति । सङ्कर्षणो हि सहस्रवदनो वेदात्मा । शेषोऽपि केवलस्तथा भवतीति तद्व्यावृत्त्यर्थमाह **स्वराडिति** । यः स्वर्गेऽपि राजते । सङ्कर्षणरूपो यः "सितकृष्णकेशः" **सोग्रतो भविता** । ननु तेनैव चरितार्थत्वे किं भगवदवतारेणेत्याशङ्क्याह **देव** इति । स हि देवरूपेणावतीर्णो नाधिकं कार्यं करिष्यति । तर्हि किं तदवतारेणेत्याशङ्क्याह **हरेः प्रियचिकीर्षयेति** । स हि भगवान् सर्वेषां दुःखहर्ता । दैत्यानां सुखार्थं भूभारहरणार्थं च साहाय्यकरणाद्भगवतः प्रियं करिष्यतीति ॥ २४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

वासुदेवकलानन्त इत्यस्य विवरणे–**तदाविष्टस्तस्मिन्** सङ्कर्षण आविष्ट इत्यर्थः ॥का०२॥ अत्र पूर्वं शय्यारूपे सङ्कर्षणे शयानस्यावतारदशापन्ने तस्मिन्नावेशरूपा स्थितिरनुशयनं भवति तथा चानुशयनस्यैव स्कन्धार्थत्वाद्बलदेवाविष्टवासुदेवकलाया एव लीला स्कन्धार्थः स्यादित्यत आहुरत इति । यतः शयानस्यावेशोतो हेतोर्विष्णोः सात्त्विककल्पाधिष्ठातुरेव बलभद्रेण कृत्वानुशयनमुच्यते । **नात्मनः** पुरुषोत्तमस्य नेत्यर्थः । 'निरोधस्यानुशयनमात्मन' इति मूलवाक्यादिति भावः । तेन नोक्तदूषणमिति भावः । तर्हि बलदेव एवं निरूपणे किं तात्पर्यं तदाह एकवदिति । पूर्वोक्तवासुदेवस्यांशत्वादंशांशिनोश्च तादात्म्येनाभेदादेकवदेव प्रोच्यते तेन तत्रापि तथानिरूपणमित्यर्थः । अतस्तच्चरित्रमपि मूलचरित्रमेवेतिभावः । नन्वेवं लोके न प्रतीयत इत्यत आह कृष्ण इति । यथांशत्वेनैक्येपि स्वरूपे द्वैविध्यप्रतीतिस्तथा चरित्रेपीत्यर्थः ॥ का० ३ ॥ अत एव यथा चतुर्व्यूहरूपेण प्राकट्यं मथुरायां पुरुषोत्तमस्य व्रजे तथात्रापीत्याह **देवक्यामिति** ॥ का० ४ ॥ २४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

स यावदित्यत्र–आन्तमिति । 'अत्यन्तसंयोगे' द्वितीया । तथा चावतारसमाप्तिमभिव्याप्येत्यर्थः ॥ २२ ॥ **वसुदेवगृह इत्यत्र**—ननु **'पुरुषः पर'** इत्यत्राक्षरपुरुष एव व्याख्यायतां न तु पुरुषोत्तमो मूलेक्षरव्यावर्तकपदाभावाद्ब्रह्माण्डात्परत्वेन पुरुषत्वेनाक्षरस्य गीतायां निरूपणाच्चेत्यत आहुः **ब्रह्माण्डादित्यादि** । अयमर्थः । गीतायां यद्यपि "परस्तस्मात्तु भावोन्यो व्यक्तो व्यक्तात् सनातन" इत्यत्र **व्यक्तात् परत्वमक्षरस्योक्तं परं भावत्वेन** रूपेण न तु पुरुषत्वेन रूपेण वाक्यान्तरे च "द्वाविमौ पुरुषौ लोक" इत्यनेन लोकस्थत्वं पुरुषत्वेन रूपेणोक्तं न तु परत्वं, प्रकृते चांशावतारव्युदासार्थं **भगवत्पदेन** विशेषिते **ब्रह्माण्डात् परस्य** 'नारायणे तुरीयाख्ये भगवच्छब्दशब्दित' इति श्लोकोक्तस्य **कथनात्** तस्य तुरीयत्वेनाक्षरात्मकः **प्रकृतिप्रवर्तको पुरुषोर्थादेव** समागतो न तु व्यक्तात्परोव्यक्त इति **'पुरुषः पर'** इत्यनेनाक्षरात् परः **पुरुषोत्तम एव** प्राप्यतेतः स एवात्राभिप्रेत इत्यर्थः । ननु लक्ष्मीपतेः सुरस्त्रीभिः किं वा प्रियं सेत्स्यतीत्यत आहुः **सुरस्त्रिय** इत्यादि । नन्वयमर्थो मूले कस्माच्छब्दाल्लभ्यत इत्यत आहुः **तत्प्रियेत्यादि** । तथा च **सेवार्थो य आसामवतारः स तत्प्रियार्थं** तस्य पूर्वाभीप्सितस्य **प्रियस्य** निमित्तमित्यर्थादनेनैव शब्देन लभ्यते । न च भगवत्प्रियार्थमिति शङ्कनीयम् । श्रीलक्ष्म्यपेक्षया तासु सौन्दर्याधिक्याभावात् । देवानां स्त्रीत्वेनावतरणेपि तत्सम्भवादिति॥२३॥ **वासुदेवकलेत्यत्र**-पूर्वश्लोके **पुरुषोत्तमनिरूपणा**दत्र तत्कलेत्येतावतैव चारितार्थ्येपि **यद्वासुदेवपदोपादानं** तत्तात्पर्यमाहुः **सात्त्विकेत्यादि** । **य** इति व्यूहमुख्योवताराधिकारी । **अनन्त** इति सप्तमी । तथा **चानन्ते वासुदेवांश** उच्यते । तेनानन्तस्य योंशी स पुरुषोत्तमस्य रूपान्तरं न तु पुरुषोत्तम इति बोधनार्थं **वासुदेवपदमित्यर्थः** ॥ का० १ ॥ ननु तर्हि **वासुदेवकलानन्तपदयोः** सामानाधिकरण्येन कथमुक्तिरित्यत आहुः **कालात्मेत्यादि** । **चोप्यर्थे** । तथा चैकरूप्यादेककार्यकारित्वाच्च तथोक्तिरित्यर्थः । नन्वनन्तस्य तथासामर्थ्ये विद्यमाने तत्र **वासुदेवकलासत्ताकथनस्य** किं प्रयोजनम् ? आहुस्तत्रेत्यादि । तथा **कलाद्वारा** तत्र वासुदेवावेशबोधनार्थं तदुक्तिरित्यर्थः ॥का० २॥ नन्वत्र **वासुदेवांशस्य** किं प्रयोजनमित्याकाङ्क्षायां टिप्पण्यां विवेचयन्त्यत्र पूर्वेत्यादि । **आवेशरूपा स्थितिरिति** । वह्न्ययोगोलकन्यायेन स्थितिः । **लीला स्कन्धार्थः स्यादिति** । तल्लीलात्वेन **रूपेण स्कन्धार्थः** स्यान्न तु पुरुषोत्तमलीलात्वेन रूपेण । तथा सति स्कन्धार्थाननुगम इत्यर्थः । **नोक्तदूषणमिति** । तेन रूपेण स्कन्धार्थत्वाभावान्न प्रतिपाद्याननुगमरूपं दूषणमित्यर्थः । तर्हीत्यादि । यदि **बलदेवेन पुरुषोत्तमस्य** नानुशयन तर्हि बलदेवेनुशयननिरूपणे किं तात्पर्यमित्यर्थः । एकवदिति । यथानन्दमयविद्यासद्विद्याशाण्डिल्यविद्याप्रभृतिषु तत्तत्प्रकारभेदेन भिन्नतया प्रतीयमानमपि सर्ववेदान्तप्रत्ययत्वादेकमेव ब्रह्मोच्यते तद्वदित्यर्थः । एतत् स्फुटीकुर्वन्ति **पूर्वोक्तेत्यादि** । **अंशत्वादिति** । पुरुषोत्तमांशत्वात् । **तत्रापि तथानिरूपणमिति** । बलदेवेपि तदावेशनिरूपणम् । अत इति यतोंशस्यांशितादात्म्येनाभेदस्तस्मात् । **मूलचरित्रमिति** । परम्परया तथा । तथा च न प्रतिपाद्याननुगमेनापि स्कन्धार्थाद्बहिर्भाव इत्यर्थः । तेन तद्द्वारा यो भक्तनिरोधः सोपि मूलचरित्रत्वेनैव फलिष्यतीतितात्पर्यमितिभावः । **एवमिति** । बलदेवचरित्रमूलचरित्रयोरैक्यम् । **यथेत्यादि** । तथा च लोको बाह्यमेव गृह्णाति नान्तरमस्तत्प्रतीत्या न चरित्रैक्यमितिभावः ॥ का० ३ ॥ एकस्यैवानेकत्वे दृष्टान्तं वक्तुमाहुः **अत एवेत्यादि** । यत एकस्यैव द्विधात्वं न तु द्वित्वमत एव । **यथा चतुर्व्यूहरूपेण** प्राकट्यं

मथुरायां व्यूहान् बहिरवस्थाप्यन्तः स्वस्य प्राकट्यं व्रजे चैतद्वैपरीत्येन **पुरुषोत्तमस्य** **तथात्रापि** द्विरूपेण प्राकट्येपि वस्तुतः स्वरूपैक्यमित्यर्थः। **देवक्यामिति**कारिकार्थस्तु—**देवक्यां शयनस्य शेषस्यैव सम्भवो न हरेः** शयानस्य। तत्र प्रमाणमाहुः **स्मृत** इति। 'देवक्या जठरे गर्भं शेषाख्यं धाम मामक'मित्याज्ञास्मरणात्। **रोहिण्यामपरस्य हर्यंशस्य**। **इति अस्माद्धेतोः**। **कर्षणात्** मायाकृताच्छेषांशस्य कर्षणात्। रोहिणीगर्भस्थस्य **हीनता** मायाधीनता नेत्येवं—बोध्यः। एवं चात्र द्वयोः पृथग्गर्भबोधनाच्छ्रीरोहिणीगर्भस्याकस्मिकत्वशङ्काप्रयुक्ता **हीनतापि** वारिता। अतो **गर्भसम्भवोत्तरमेव रोहिण्याः** श्रीगोकुले स्थापनमन्यासामन्यत्रेति बोध्यम् ॥ का० ४ ॥ व्याख्याने—**स्थितमिति**। अविनाभावेन स्थितम्। **स्वर्गेपीति**। **सङ्कर्षणस्य** यत् स्वं स्थानं तस्मिन्नपीत्यर्थः। **दैत्यानां सुखार्थं** इति। तेषां कालं प्राप्यैव भगवत्प्राप्तेस्तथा। तदिदं '**मन्येसुरान्** भागवता'नित्यत्र तृतीयस्कन्ध उपपादितम् ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गिरमित्यत्र तत्र प्रमाणमिति। ब्रह्मणा भावितस्य यथार्थत्वेनान्यथानुपपत्तिः प्रमाणमित्यर्थः। अन्यभावितं तु मनसोऽसद्भावकत्वान्न यथार्थमिति भावः। **पुरुषसम्बन्धिन्येवेति**। वस्तुतः पुरुषोक्ता, मत्तस्तु श्रवणमात्रमितिहेतोर्म इतिपदादादौ भगवत्कर्तृकमाज्ञापनं **पौरुषीमितिपदेना**हेत्यर्थः ॥२१॥ **पुरैवेत्यत्र—त्वया किमुक्तमित्यस्य** परिहार आद्यचरणेन। भगवान् पूर्वमेव ज्ञातवानतो मया स्तोत्रमेव कृतं न त्वन्यत् किञ्चिदुक्तमिति। किं वा **भगवतोक्तमित्यस्य** परिहारार्थं द्वितीयचरणे भगवदुक्ताज्ञापनमुक्तम्। **पूर्वमित्यादि**नोक्ताया द्वितीयशङ्कायाः परिहार उत्तरार्धेन। **पूर्वं** रामावतारे भगवत्प्राकट्यात् पूर्वमवतारसमाप्त्यनन्तरं च बहुकालं स्थितत्वात् **खेदः**। अत्र तु यावद्भगवांस्तावदेव स्थातव्यमतो न **खेद** इत्यर्थः ॥ २२ ॥ **वसुदेवगृह** इत्यत्र—**ब्रह्माण्डादिति**। ब्रह्माण्डाप्यदर्शनादत्र पुरुषपदेन **ब्रह्माण्डात् परः** कथित एव तथापि **परपदकथनात् पुरुषोत्तम एव जनिष्यत** इत्यर्थः ॥ २३ ॥ **वासुदेवे**त्यस्याभासे—**सावधानार्थमिति** भावप्रधानं, सेवायां **सावधान**त्वार्थमित्यर्थः। प्रथममवतीर्णो हि तावत्पर्यन्तं महान् सन् सेवायां यथायोग्यलीलासम्पादने सावधानो भवेदितिभावः। व्याख्याने **सात्त्विकेष्विति**। 'आसीनमुर्व्यां भगवन्तमाद्य'मित्यादिना तृतीयस्कन्धे विवृतमिदम्। **अनन्त** इति शेष इत्यर्थः ॥ का. १ ॥ **कालात्मेति**। **स** शेषः सङ्कर्षणाविष्टत्वात् सङ्कर्षणात्मा चेत्यर्थः। **तत्रेति** सलिलाधारकशेषाधारकसङ्कर्षणे। **सुप्तो हरिर्वासुदेवस्तस्मिन्नवतारदशापन्ने** शेषाविष्टसङ्कर्षणे **आविष्टो भविष्यति**। कलयेतिशेषः। तथा च शेषे सङ्कर्षणावेशः सङ्कर्षणे वासुदेवकलावेश इति बलदेवस्वरूपं सर्वदा। पुरुषोत्तमावेशस्तु कदाचिदतस्तल्लीलांशांशिनोरभेदान्मूलचरित्रत्वेन स्कन्धार्थो न तु स्वातन्त्र्येण स्कन्धार्थ इत्यर्थः ॥ का. २ ॥ **एकवदिति**। **कृष्णो यथेति**। शेषष्टिप्पणीव्याख्यानादवगन्तव्यः। यथा कृष्णस्वरूपं **बलकृष्णभेदेन लोकैर्द्विवत् प्रतीयते** वस्तुतस्त्वंशांशिनोरभेदादेकवदेव **प्रोच्यते** तथा तयोश्चरित्रमपि **लोकैर्द्विवत् प्रतीयते** वस्तुतस्त्वेकमेवेत्यर्थः। अंशांशिनोर्भेदाभेदमभिप्रेत्योभयत्रापि **वति**प्रत्यय उक्तः ॥ का. ३ ॥ **शयनस्यैवेति**। शेषाविष्टसङ्कर्षणस्य न तु **वासुदेवांशस्ये**त्येवकारः। **स्मृतः** 'सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षत' इति वाक्येन 'देवक्या जठरे गर्भं शेषाख्यं धाम मामक'मितिभगवद्वाक्येन चेतिशेषः। वाक्यद्वये देवक्यां निविष्टस्य धामत्वमात्रोक्तेरितिभावः। यद्यपि केवलशेषस्यापि धामत्वं तथापि 'गर्भसङ्कर्षणात्तं वै प्राहुः सङ्कर्षण'मितिवाक्यात् सङ्कर्षणस्यापि देवक्यां सम्भवो ज्ञेयः। **अपरस्येति** वासुदेवांशस्येत्यर्थः। **इति कर्षणसमये** वासुदेवांशस्याभावाद्धेतोर्वासुदेवस्य मोक्षदातुर्मायानिवारकस्य **मायाकृतकर्षणाद्धीनता** मायातो दौर्बल्यं स्यादित्याशङ्का **ने**त्यर्थः। व्यूहत्रयस्य सत्त्वरजस्तमोभेदभिन्नस्य न मायाविरोधित्वं **वासुदेवस्य** तु निर्गुणस्य मोक्षार्थं मायाविरोधित्वात्तत्र तद्दौर्बल्यं परिहरणीयमेवेतिभावः। व्रजलीलायां बलदेवोपयोगस्यापि वक्ष्यमाणत्वाद्व्रजस्योद्धारस्य च 'गुणातीतस्वरूपेण तामसत्वाद्व्रजस्थिता निरुद्धा' इत्यादिना **वासुदेव**कार्यत्वेन वक्ष्यमाणत्वाद्बलदेवे **वासुदेवांश**स्याप्याविर्भावो वाच्यः स रोहिण्यां जात इति ज्ञेयम्। अत्र टिप्पण्यां **चतुर्व्यूहरूपेणेति** यद्यपि **वासुदेव**प्राकट्यं व्रज एवेति वक्ष्यते तथापि व्यापिवैकुण्ठाद्वसुदेवहृद्यवतीर्यादौ स्वकार्यं देवकीमृत्युनिवारणं कृतवानिति निबन्धे निरूपणात् कार्यतोन्तःप्राकट्यं वसुदेवहृदि स्वरूपतो बहिःप्राकट्यमादौ व्रज एवेति ज्ञेयम्। **पुरुषोत्तमस्येति** केवलस्येत्यर्थः। नन्वत्र **वासुदेव**प्राकट्यमप्यस्तीति चेदत्रैवं ज्ञेयम्। प्राकट्यं द्वेधा कार्यतः स्वरूपतश्च। तत्र कार्यतः प्राकट्ये व्यूहचतुष्टयप्राकट्यं मथुरायाम्। पुरुषोत्तमस्य व्रजे। प्राथमिकतत्तत्कार्यस्य तत्र तत्रैव जातत्वात्। स्वरूपतः प्राकट्यं तु व्यूहत्रयविशिष्टपुरुषोत्तमस्य **मथुरायाम्**। **वासुदेव**विशिष्टपुरुषोत्तमस्य **व्रजे**। तत्र कार्यतः प्राकट्यमत्रोच्यते। तथा च वासुदेवस्यादौ व्रज एव बहिःप्राकट्येपि तत्कार्यमादौ मथुरायामेव जातमिति **निबन्धे स्फुटम्**। पुरुषोत्तमकार्यं तु निःसाधनजनोद्धरणमादौ व्रज एव जातमिति।

सुबोधिन्यां सोपीति। अंशरूपोपि स शय्यारूपो भवतीतिहेतोरनन्त इति विशेषणमुक्तमित्यर्थः। आद्यविशेषणकथने हेतुमाहुः स हीति। हि यतः **स भगवान् स्वाश्रयः** शेतेतस्तच्छय्यायास्तत्कलात्वं वक्तव्यमित्यर्थः। अन्यविशेषणेभ्यः **प्रथमत** इत्यर्थः। **वेदात्मेति**। 'सहस्रशीर्षे'त्यादिवेदस्यात्मा तत्प्रतिपाद्य इत्यर्थः। **यः स्वर्गेपीति**। स्वेन राजत इति विग्रहः। शेषो हि स्वफणस्थितमणिना राजते। तदुक्तं **पञ्चमस्कन्धे**। अस्य स्वत एव राजनकथनात् स्वर्गादिलोकेष्वपि राजते न तु शेषवत् पातालमात्र इत्याशयेन स्वर्गेपीत्युक्तम्। तथा च स्वेन राजनकथनान्नायं केवलशेष इतिभावः। **देवरूपेणेति**। साक्षिरूपेणेत्यर्थः। अत एव लीलासु साक्षिवत् तत्स्थितिं वक्ष्यति। लीलां तु भगवदावेशेन। **सर्वेषामिति** दैत्यानां भूमेश्चेत्यर्थः। **सुखार्थं** इति मोक्षार्थं इत्यर्थः। प्रलम्बादीनां मोक्षदाने तद्वधेन **साहाय्यं** भूमेर्भाररूपदुःखहरणे जरासन्धादिभिः सह युद्धेन **साहाय्यं** ज्ञेयम् ॥ २४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गिरं समाधौ गगन इत्यस्याभासे पुरुष एव तथा सत्यवतरिष्यतीत्यादि । पुरुषत्वेन भगवत्स्तोत्रस्य कृतत्वात्पुरि शेत इति श्रुत्या पुरुषस्यान्तर्यामित्वादन्तर्यामिपुरुषस्यैवावतारो भविष्यतीत्याशङ्काभिप्रायः । अन्तर्यामित्वधर्मपुरःसरं पुरुषोत्तमस्य स्तुतत्वात् पुरुषोत्तम एवाविर्भविष्यतीति भगवद्दत्तोत्तराशय इति भावः । वासुदेवकलानन्त इत्यस्याभासे—शय्यारूपस्य शेषस्येति । 'अहीन्द्रतल्पेधिशयान एकः कृतक्षणः स्वात्मरतावनीह' इत्यादिवाक्याच्छेषस्य शय्यारूपत्वम् । सङ्कर्षणसहितस्येति । स्वाधिदैविकसहितस्येत्यर्थः । शेषस्याधिदैविकः सङ्कर्षणः । स च व्यूहरूपः । 'भगवतश्चतुर्मूर्तेस्तुरीयां तामसीं मूर्ति'मिति पञ्चमस्कन्धे शुकवाक्यात् । तत्सहित एव शेषोवततार । अत एव बलदेवस्य शेषत्वेन क्वचिदुक्ति'र्देवक्या जठरे गर्भं शेषाख्यं धाम मामक'मिति । क्वचिद्बलदेवस्यांशत्वेन शेष उक्तो यथा बलदेवस्तुतौ दशमोत्तरार्धे यमुनावाक्यं 'यस्यैकांशेन विधृता जगती जगतः पते'रिति । एकांशेन शेषेणेत्यर्थः । शेषस्तु सङ्कर्षणव्यूहस्यांशः । अतः शेषस्य सङ्कर्षणसहितस्यावतारो बलदेव इति यदुक्तं तद्युक्तमेव ॥ २४ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

वासुदेवकलानन्त इत्यत्र—तस्मिन् शेषे सुप्तो हरिर्वासुदेवोवतारदशायां तस्मिन् सङ्कर्षण आविष्ट इत्यर्थः ॥ का. २ ॥ अत्र पूर्वं शय्यारूपे सङ्कर्षणे शयानस्यावतारदशापन्ने तस्मिन्नावेशरूपा स्थितिरनु पश्चात् शयनं भवति । तथा चानुशयनस्यैव स्कन्धार्थत्वाद्बलदेवाविष्टवासुदेवकलाया एव लीला स्कन्धार्थः स्यादित्यत आहुरत इति । यतः शयानस्यावेशोतो हेतोर्विष्णोः सात्त्विककल्पस्याधिष्ठातुरेव बलभद्रेण कृत्वानुशयनमुच्यते । नात्मनः पुरुषोत्तमस्य नेत्यर्थः । तर्हि बलदेव एवमनुशयननिरूपणे किं तात्पर्यं तत्राहुरेकवदिति । यथा कृष्णस्वरूपं बलकृष्णभेदेन लोके द्विवत् प्रतीयते वस्तुतस्त्वंशांशिनोरभेदादेकवदेव रामे चोच्यते तथा तयोश्चरित्रमप्यंशांशिनोरभेदेर्लोके द्विवत् प्रतीयते वस्तुतस्त्वेकवदेवेत्यर्थः । तथा च बलदेवचरित्रमप्यंशांशिनोरभेदान्मूलचरित्रत्वेन स्कन्धार्थो न तु स्वातन्त्र्येण स्कन्धार्थ इत्यर्थः ॥ का. ३ ॥

देवक्यामिति । शयनस्यैवेति । शय्यारूपस्य सङ्कर्षणस्य न तु वासुदेवस्येत्येवकारः । एवकारार्थं विशदयन्ति न हरेरिति । वासुदेवस्य नेत्यर्थः । अपरस्येति । वासुदेवांशस्य रोहिण्यां सम्भव इत्यर्थः । इतिहेतोः कर्षणसमये वासुदेवांशस्याभावाद्वासुदेवस्य मोक्षदातुर्मायानिवारकस्य मायाकृतकर्षणाद्धीनता मायातो दौर्बल्यं स्यादित्याशङ्का नेत्यर्थः ॥ २४ ॥

बुभुत्सुबोधिका

गिरं समाधावित्यत्र पुरुष एवेति अन्तर्यामित्वेन नारायणः न तु कृष्णत्वेन । स्वान्तःकरण इति 'स मानसीन आत्मा जनाना'मितिश्रुतेः । अतिसूक्ष्मत्वादिति 'यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानैः । तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्त'मितिवाक्यात् सूक्ष्मं केषाञ्चिद् देवानां रम्यं भवतीति 'त्रिदशानुवाच हे'ति ज्ञापनमनुपपन्नमतः अतिशब्दः । ब्रह्मणो मानसोसेवामाहुः समाधौ य इति । सलोक इति एतेन भक्तियुक्तो वेधा उक्तः, अन्तराभूतग्रामवत्, 'स्वात्मनः' इतिसूत्रात् । अन्यथा तु समाधावभेदः । 'ता नाविदन् मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदं यथा समाधौ मुनयोब्धितोये नद्यः प्रविष्टा इव नामरूपे' इतिवाक्यात् । तत्राकाश इति समाधौ यो गगनम् आकाशस्तस्मिन् । 'गिर'मिति गगनतन्मात्रा तद्व्यावृत्त्यर्थमाहुः भगवद्वाक्यमिति । गगनशब्दस्याप्रयोजकत्वात् । तथा सति गगनेन समीरितामिति प्रयुक्तं स्यात् । एवं च 'यद् वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत' इतिकेनोपनिषच्छ्रुतेः । 'समीरिता'मित्यस्यार्थः पूर्वश्लोके भगवत्प्रेरणया [illegible]नेत्यनया सम्यक्प्राप्तामित्युक्तः । 'निशम्ये'त्यत्र 'नि'शब्दार्थमाहुः भगवतोक्तमिति । तच्छ्रुत्वेति निशम्येत्यस्यार्थः । उक्तस्यैव नितरां श्रवणसम्भवात् । श्रुतवानिति कर्तृप्रत्ययान्तेन भावप्रत्ययान्तनिशम्येत्यस्य विवरणम् । धात्वर्थश्रवणकर्ता उवाचेत्येककर्तृकत्वबोधाय । किञ्च अव्ययकृतो भाव इतिवचनं 'कर्तरि कृदि'ति सूत्राद् दुर्बलम् । विशेषवचनत्वेपीत्यभिप्रायः । पूर्वकालो न वाच्यः । 'तद्विशेष्यकबोधापत्ते'रित्यादि बहूक्तं मनोरमायाम् । यद्वा भगवतोक्तमिति 'समीरिता'मित्यस्य विवरणम् । श्रुतवानिति "निशम्ये'त्यस्य । निशम्येति न निपूर्वकशम आलोचे चु० आ० से० इत्यस्य रूपं किन्तु शम उपशमे दि० प० से० इत्यस्य निपूर्वस्य ज्ञानार्थकस्येति न न्युपसर्गस्य पृथगर्थः । एवं च भगवता उक्तमित्यत्र ऐश्वर्यवता उक्तमिति वच परिभाषणे अ० प० अनि० इत्यस्य कर्मणि क्ते रूपम् । परिभाषणाश्रयो भगवद्वाक्यम् । परितः भगवत्प्रेरणया प्राप्तं भाषणं परिभाषणम्, उभयवाक्योक्तम् । वाक्ये तु' तेने ब्रह्म हृदा य आदिकवय' इति, 'भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचि'दिति च । 'समीरिता'मित्यत्र सम् ईरितामिति ईर क्षेपे चु० प० से० इत्यस्य कर्मणि क्ते रूपम् । क्षिप प्रेरणे तु० प० अ० । एवं च सम्यक्प्रेरितां प्रेरणाश्रयाम् । 'तेने ब्रह्म हृदे'तिवाक्यमात्रविषयाम् । द्वितीयवाक्यविषयत्वमुपलक्षणेन । वच भाषण इतिपक्षे पूर्ववाक्यविषयामित्येव । तत्र प्रमाणमिति श्रवणे प्रमाणमनुमानरूपमाह । विदधातीति वेधाः, विधाञो वेध चेति वेधादेशो सिप्रत्ययश्च । ब्रह्मा श्रुतवान् वेधस्त्वात् । यत्र यत्र यत्नः तत्र तत्र तज्जनकं ज्ञानम् । कुलालपुत्रवत् । जानातीच्छति यतत इति प्रवादात् । 'यन् मनसा ध्यायति तद् वाचा वदति यद् वाचा वदति तत् करोती'तिश्रुतेश्च । तत्रेत्यादिसुबोधिन्याः ब्रह्मणा भावितस्य यथार्थत्व इति तत्रेत्यस्यार्थः, अन्यथानुपपत्तिः प्रमाणमिति

प्रमाणमित्यस्यार्थ इति श्रीवल्लभानां लेखे। तुल्या इति देवत्वेन तुल्याः। कथं नेति उत्तरस्यातिसूक्ष्मत्वेपि कथं न श्रुतवन्तः। ज्ञापितमिति तेन मानससेवाभावादधिकाराभावादीश्वरत्वाभावाच्च न श्रुतवन्त इत्यर्थः। 'हे'त्यस्यार्थमाहुः अकस्मादिति। कारणं विना। क्षणमिति अत्यन्तसंयोगे द्वितीया। अकस्मात् क्षणं स्थितिज्ञानं अन्येषां त्रिनयनस्यापि। ईश्वरत्वेपि तत्क्षणे दैत्यनयनमनस्त्वात्। तस्या वाच इति पौरुष्या वाचः, 'वाचं धेनुमुपासीते'ति श्रुतेः। अत्र न वाचि धेनुत्वं गुणवादः यः पूर्वतन्त्रेर्थवादत्वेनोक्तः, 'विरोधे गुणवादः स्या'दिति, किन्तु भूमिर्धेनुर्धरिणीतिवद् वाक् आधिभौतिकी, धेनुराधिदैविकी, त्रिनयनो वत्सः मुख्यत्वात्, गौरपादानं, भूमिः पात्रं, भूमौ भगवदवतारात्, वेधाः दोग्धा, भगवान् पय इति। तथा हि 'भूमिर्दृप्ते'त्यत्र 'गौर्भूत्वा ब्रह्माणं शरणं ययाविं'त्यर्थात् प्राप्ते सति द्रव्यदेवतात्मको याग उक्तप्रायः। गवि हविः, ब्रह्मणि मन्त्रा इति, आरम्भे मङ्गलार्थमुक्तं, वेदसारत्वात्, वेदान्तसारत्वात् तु गौर्भूत्वोपस्थितान्तिके तस्मा' इत्यत्र ब्रह्मान्तर्यामिणि स्थिता ध्यानेनेति गोनिष्ठान्तर्यामिणो गोदोहात् पयो भगवानित्युक्तम्। तथा सत्यन्तर्याम्यवतरिष्यतीति शङ्का पूर्वश्लोक एवापास्ता। दोग्धृत्वायेति वेधसो बोध्यम्। गामिति पूर्वेणान्वयः। पुरुषसम्बन्धिन्येवेति वस्तुतः पुरुषसम्बन्धिनी पुरुषोक्ता, मत्तस्तु श्रवणमात्रं इति हेतोः 'म' इतिपदादादौ भगवत्कर्तृकमाज्ञापनं 'पौरुषी'मितिपदेनाह। 'मे' मत्त इत्यर्थमाहुः मत्त इति। तसिलन्तम्। आज्ञापनमिति जातम् उत्तरम्। अन्तर्यामित्वधर्मपुरःसरं पुरुषोत्तमस्य स्तुतत्वात् पुरुषोत्तम एवाविर्भविष्यति नान्तर्यामिपुरुष इति। 'पुनः' पदार्थमाहुः प्रथमत इति। सामग्रीमेवेति देवानां प्राप्तयज्ञफलानां दैवीं सम्पदं विबुधत्वम्। एवकार आसुरसम्पद्योगव्यवच्छेदकः। दानवारीणां दिवौकसां अमर्त्यानां वा। आदौ अस्मिञ्छ्लोके। बोधयति वेधाः। 'शृणुते'त्यन्तेन। आज्ञामिति 'विधीयता'मित्यादिराज्ञा, ताम्। अग्रे इति श्लोके। बोधयति वेधाः। शृणुतेत्यन्तेन। आज्ञामिति विधीयतामित्यादिराज्ञा ताम्। अग्रे इति श्लोके। तदिति अंशावतरणम्। सम्बोधयतीति देवधर्ममनादृत्य देवधर्मेण सम्बोधयति, मरणं तु देहस्येति भावः। साहित्येनैव श्रवणं सिद्धमिति 'शृणुते'त्यधिकमित्याशङ्क्याहुः सावधानार्थमिति। स्वयमिति रामः। प्रकृत इति कृष्णावतरणे ॥ २१ ॥ पुरैव पुंसेत्यत्र। त्वया किमुक्तमित्यादि त्वया किमुक्तमित्यस्य प्रश्नस्योत्तरमाद्यपादेन। भगवान् पूर्वमेव ज्ञातवानतो मया स्तोत्रमेव कृतं न त्वन्यत् किञ्चिदुक्तमिति। किं वा भगवतोक्तमित्यस्य प्रश्नस्योत्तरार्थं द्वितीयपादेन भगवदुक्ताज्ञापनमुक्तम्। तदुक्तं कृष्णोपनिषदि, 'अङ्गसङ्गं करिष्यामि भवद्वाक्यं करोम्यह'मिति देवान् प्रति भगवद्वाक्यम्। पूर्वमित्यादिनोक्तायाः शङ्काया उत्तरम् उत्तरार्द्धेन। पूर्वं रामावतारे भगवत्प्राकट्यात् पूर्वम् अवतारसमाप्त्यनन्तरं च बहुकालं स्थितत्वात् खेदः। अत्र तु यावद् भगवांस्तावदेव स्थातव्यमिति न खेद इति। पीडेति मत्कर्तृकपीडाकथनात्। भार्यामिति नारदपञ्चरात्रे प्रसिद्धम्। स्पर्शो भक्तैः सह निगूढभावकरणान्तर्गतः आश्चर्यरसत्वात्, विरुद्धधर्माधारत्वाच्च। एवेति कथनादियोगव्यवच्छेदक एवकारः। अस्मत्कृतमिति पञ्चमीबहुवचनान्तम् अस्मात् कृतम् उत्पन्नम्। पूर्वमेवेति पश्चाद्योगव्यवच्छेदक एवकारः, न तु पश्चादिति। स्वयमेवेति एवकारेण गगनयोगव्यवच्छेदः क्रियते, गगनस्याश्रयत्वात्। द्वितीयपादार्थमाहुः आज्ञामाहेति। वेधा आह। न्यूनं पूरयन्ति स्म ततः पूर्वमेवेति। सामीप्यस्य निरूपकसापेक्षत्वान्निरूपकमाहुः भगवज्जननेति। आवश्यकत्वायेति 'यो यदंशः स तं भजे'दिति भजनार्थं जननावश्यकत्वाय। हस्तपादादय इति तत्तदधिष्ठात्र्यो देवताः। हस्तपादौ भये देहरक्षकौ पक्ष्मणी चक्षूरक्षके। तद्वदिन्द्रविष्णू सेवकौ सूर्यश्चेति। ससेवक एवेति हस्तपादादिवत्तदितरैरपि सेवका इतीतरैरपि सेवकैः सह ससेवकः। पूर्वस्मादिति रामावतारे वानरेष्ववतारात्। लोक इति भगवदवताररहिते। उत्तरार्धं व्याकर्तुमाहुः इदं जननमिति। स्थितिपूर्वकमिति कियत्कालस्थितेः पूर्वं जननमज्ञातमित्यज्ञाते कप्रत्ययः। आन्तमिति आ अन्तम्। 'अत्यन्तसंयोगे द्वितीया। तथा चावतारसमाप्तिमभिव्याप्येत्यर्थः'। अभिविधावाङ्। तत्रोक्तमिति तदित्यव्ययम्। सा स्थितिः। तदपीति चरणमपि। कियान् कालो यस्येति कियत्कालम्। अनेनेति स्थितिकालनियमाज्ञानेन। यद्वा 'ईश्वरेश्वर'पदेन। एवं नियतेति पूर्वोक्तजननेन नियताः अनेनैतदेतत् कर्म कारयित्वास्मै जीवायैतदेतत् फलं दास्यामीति प्रतिजीवं विचारितवानिति विचारविषया ये भोगाः तैर्युक्तानाम्। देवानाम्। अत्र अकरणशङ्का एव करणशङ्का इव करणशङ्केति पाठत्रयम्, कर्तुमकर्तुमन्यथाकर्तुं समर्थ ईश्वरो यतः। अस्मानिति देवान्। न शङ्कनीयमिति देवैस्तथा। एवेति एवकारो देवयोगव्यच्छेदकः, न तु देवैरिति। तदर्थमिति दैत्यरूपभारहरणार्थम्। चरणमिति अनेकत्र चरणम्। कालनियमेति चरणे तथा। लिङो वर्तमानादिकालानामर्थत्वाभावात्। ननु भगवज्ज्ञानं कालाधीनचरणेन कालाभावे चरणाज्ञानं 'अनागतमतीतं चे'तिवाक्यात् तत्राहुः अज्ञातस्त्विति। 'भुवि चरे'दिति सर्वं मां पश्यन्त्वितीच्छया चरेदिति तथा। अनागतमितिवाक्येऽतीन्द्रियभगवद्दर्शनमुक्तभगवादिच्छया भवति। अत एव भगशब्दवाच्यषड्धर्मानवतार्य षड्बालकवधे तु षड्धर्माकर्षणं सिध्यत्यध्यायार्थः। सुबोधिन्याम् 'सर्वतः सर्वानंशानाचकर्षे'त्युक्तेः। पूर्णावतारार्थम्। तेन भगवान् मायावरणसहितः। अग्रे मायापसारणम् ॥ २२ ॥

वसुदेवगृह इत्यत्र लौकिकमिति अलौकिककरणेनावतारज्ञानेपि क्व गोपगृहे व्यवहारयोग्ये वावतरिष्यतीति देवतत्स्त्रीसाधारणाकाङ्क्षायाम्। तस्यापीति 'तत्त्वमसी'त्यत्र तच्छब्दार्थस्यापिना कृष्णस्य। पदार्थसम्भावनायामपिः। न तु चक्रादीति चक्रस्यादिः चक्रादिः शङ्खः। चक्रमादिर्ययोः गदाब्जकाण्डयोः ते चक्रादी। चक्रादिश्च चक्रादी च चक्रादयः तेषां रूपेणेत्यर्थः। विष्णुरूपोंशस्तस्य शङ्खरूपेणावतारणम्। गोप्तात्मजोंशः तस्य चक्ररूपेणावतारणम्। कालिकारूपोंशः तस्य गदारूपेणावतारणम्। जगद्बीजमंशस्तस्य अब्जजाण्डरूपेणावतारणम्। यः शङ्खः स स्वयं विष्णु'रिति 'कृपार्थं सर्वभूतानां गोप्तारं धर्ममात्मजं यत्

सुश्रीश्वरेणासीत् तच्चक्रं ब्रह्मरूपधृ'गिति 'गदा च कालिका साक्षा'दिति 'अब्जकाण्डं जगद्बीज'मितिश्रुतयः। शङ्खादीनां 'तस्माद् वा एतस्मादात्मन आकाश' इत्यादिश्रुत्युक्तसृष्टिक्रमे। आकाशादुत्पन्नानां वायुतत्त्वाग्नितत्त्वाप्तत्त्वपृथिवीतत्त्वरूपाणां श्रीभागवतोक्तानां विष्णोश्च सत्त्वव्यवधानेनावतारः। 'विष्णुराविरासी'दिति तु कृष्णाविर्भावो भवतीति सम्भावनार्थम्। वर्तत इति न च घटेपि पटत्वं स्यादिति शङ्क्यम्। भगवत्त्वस्य पटत्ववज्जातित्वेपि भगवाञ्छुकः भगवान् व्यास इत्यादौ गौणप्रयोगे षड्गुणैश्वर्यस्य सत्त्वात् तेनैश्वर्येण गौणेष्वपि वर्तते, नैतावता घटे पटत्वापत्तिः, षड्गुणैश्वर्याभावात्। 'पुरुषः स परः पार्थ भक्त्या लभ्य' इतिगीताया अर्थमाहुः पुरुषोत्तम इत्यर्थ इति। 'ब्रह्मविदाप्नोति पर'मित्यत्र निर्णीतं भाष्ये। नन्दे भक्तिः वसुदेवे तप इति तयो भगवदाविर्भावकत्वं दशमस्कन्धनवमाध्याये श्रीगोपालतापिन्यां नारदपञ्चरात्रे लक्ष्मीतन्त्रेपि। 'अतप्ततनुर्न तदामोश्नुत' इतिश्रुतेः। अशनं भगवदाविर्भावे भक्तावपि। परत्वनिरूपकं वक्तुमाहुः ब्रह्माण्डादिति। 'गिरं समाधा'वित्यनेनोक्तसमाधौ भावितस्येत्यर्थः। प्रकृतिप्रवर्तक इति प्रकृतेर्लयस्थानं प्रकृतेः कारणं स एव प्रवर्तकः। तृतीयसुबोधिन्यां पुरा आसेति पुरुषपदव्युत्पत्तिरलौकिकी। तत इति प्रकृतेः ब्रह्माण्डादिति वा। 'प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् तृतीयं सर्वभूतस्थमितिवाक्यात्। 'अव्यक्तात् पुरुषः पर' इतिश्रुतेश्च वकारः। जनिष्यत इति 'अजायमानो बहुधा विजायत' इतिश्रुतेः, भक्तवश्यत्वाच्च। तत्सेवार्थमिति तेन प्रिया सेवेत्युक्तम्। सम्यगिति तेन सुराणां सौन्दर्यमित्युक्तम्। योग्यस्थानेष्विति गोपस्थानेषु कुब्जास्थाने रुक्मिण्यादिस्थाने। सम्भवन्तु तत्तत्स्थाने स्त्रीभवनेऽन्ते मनःस्थापनेन सम्भवन्तु लक्ष्म्या सहिता इति अष्टमस्कन्धे समुद्रमथनेति। चारितमिति 'गोपान् नः स्त्रीश्च नो कु'र्विति कृष्णोपनिषदि 'न' इत्यनेन सुरान् गोपान्, 'नः स्त्रीः' गोपीः कुर्वित्यर्थात्॥ २३॥

वासुदेवकलेत्यत्र भगवद्देवेति इयं पूर्वश्लोकीया। सम्भवन्त्विति समुपसर्गार्थत्वात् क्वचित् तु अस्य श्लोकस्याभास इत्युक्तम्। भगवच्छय्येति 'अहीन्द्रतल्पेधिशयान एकः कृतक्षणः स्वात्मरतावनीह' इत्यादिवाक्याच्छेषस्य शय्यारूपत्वम्। सङ्कर्षणेति साधिदैविकस्य कृष्णस्य शब्दार्थरूपत्वार्थम्। तदुक्तं द्वादशनिबन्धे 'शब्दार्थरसरूपधृ'गिति। 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध' इति जैमिनिसूत्रम्। औत्पत्तिकमिति नित्यं ब्रूम' इति शाबरभाष्यम्। पूर्वश्लोके पुरुषोत्तमनिरूपणादत्र तत्कलेत्येव चारितार्थ्येपि यद् वासुदेवपदोपादानं तत्तात्पर्यं वेदवेदान्तार्थसामानाधिकरण्यप्रतीतीच्छायोश्चरितत्वरूपमाहुः। यद्वा द्वितीयस्कन्धे नवमाध्याये तप तपेतिशब्दानन्तरं वासुदेवो ब्रह्मप्रार्थनयावतीर्णः। अतो वासुदेवस्य विशुद्धं सत्त्वं धर्मः। अत्र तु वासुदेवस्य शब्दात्मकोनन्त इति संशये नारायणोपनिषदनुसारेणाहुः सात्त्विकेष्वित्यादि सात्त्विका कल्पा ब्रह्मवासराः तेषु। ते च मात्स्ये कल्पानुकीर्तने उपान्त्याध्याये 'प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः। वामदेवस्तृतीयस्तु तथा रथन्तरोऽपरः रौरवः पञ्चमः प्रोक्तः षष्ठः प्राण इति स्मृतः सप्तमोथ बृहत्कल्प कन्दर्पोष्टम उच्यते सद्योथ नवमः कल्प ईशानो दशमः स्मृतः व्यान एकादशः प्रोक्तस्तथा सारस्वतोपरः त्रयोदश उदानस्तु गारुडोथ चतुर्दशः कौर्मः पञ्चदशः प्रोक्तः पौर्णमासी अजायत षोडशो नारसिंहस्तु समानस्तु ततः परः आग्नेयोऽष्टादशः प्रोक्तः सोमकल्पस्तथा परः मानवो विशमः प्रोक्त उदान इति चापरः वैकुण्ठश्चापरस्तद्वल्लक्ष्मीकल्पस्तथा परः चतुर्विंशतिमः प्रोक्तः सावित्रीकल्पसंज्ञितः पञ्चविंशतिमो घोरो वाराहस्तु ततः परः सप्तविंशोथ वैराजो गौरीकल्पस्तथा परः माहेश्वरस्ततः प्रोक्तस्त्रिपुरं तत्र घातितम्। पितृकल्पस्तथैवान्यो या कुहूर्ब्रह्मणः स्मृता इत्येवं ब्रह्मणो मासः सर्वपातकनाशनः सङ्कीर्णास्तमसाश्चैव राजसाः सात्त्विकास्तथा रजस्तमोमयास्तद्वत् त्रयश्च उदाहृताः सङ्कीर्णेषु सरस्वत्याः पितॄणां व्युष्टिरुच्यते अग्नेः शिवस्य माहात्म्यं तामसेषूपवर्ण्यते राजसेषु माहात्म्यमधिकं ब्रह्मणो विदुः सात्त्विकेष्वधिकं तद्वद् विष्णोर्माहात्म्यमुच्यत' इति। पुना राजसतामसयोगव्यवच्छेदः क्रियते। य इति व्यूहमुख्योवताराधिकारी। द्वितीयस्कन्धे नवमाध्याये तप तपेति शब्दानन्तरं वासुदेवोवतीर्ण इति। अयमर्थः। क्षीरसमुद्रतीरे स्थितः 'समुद्रं मनसाध्याये'दिति श्रुतेः ध्यातस्य समुद्रस्य समाधौ गिरं गगने समीरितां श्रुत्वा वेधा इदमुवाच। तद् यदि राजसतामसकल्पेषु यो भवेत् तदा देवान् प्रत्युपदिष्टं सन्दिग्धं विपर्यस्तं वा भवेत्। रजस्तमसोः संशयविपर्यासजनकत्वात्। तदा ज्ञानाभावाद् 'विधीयतामि'त्यादि विरुध्येत। जानातीच्छति यतत इति अनन्तपदसमभिव्याहारात् प्राप्तं वासुदेवस्य नारायणत्वमाहुः शेते सलिल इति। 'देवानन्त नमस्तुभ्यं नमस्ते जलशायिन' इति भविष्योत्तरात्। नारायणे शास्त्रभरः सूचितः। हरिरिति कृष्णो विष्णुरिति नोक्तम्। एकस्याकारकत्वात् द्वितीयस्य सात्त्विकस्य सात्त्विकपुराणादिमात्रविषयत्वाद्धरेः सर्वत्र गानाद्धरिपदम्। अत्र वासुदेवः हरिः कोशात्। महानारायणे तु 'स हरिः सेन्द्रः सोक्षरः परमः स्वरा'डिति स्वराट् हरिरुक्तः। तत्र स्वेनात्मना राजस इति स्वराट्पदव्युत्पत्तिः। वासुदेवकलायां तु स्वेनात्मीयेनात्मना राजत इति व्युत्पत्तिः। एवं नारायणे वेदान्तप्रतिपाद्ये वेदप्रतिपाद्यवासुदेवत्वमाहुः इति ज्योतिषे सौरसिद्धान्ते 'वासुदेवः परं ब्रह्म एष छन्दसि पठ्यते' इति वाक्याद्वेदप्रतिपाद्यः। विज्ञेय इति निश्चयविषयत्वेन विशेषेण ज्ञेयः।

न तु कोशोक्तविष्ण्वादिर्वासुदेवो विज्ञेयः। अनन्त इति सप्तम्यन्तम्। तथा चानन्तोंशावतारः। 'अन्ये चांशकलाः पुंस' इति वाक्यात् अनन्त इति प्रथमान्तं वा, प्रथमाप्रायपाठात्। उच्यत इति तस्यांश इति ज्ञानस्य निश्चयत्वायोच्यते। अन्यथाशुक्ताविमे रङ्गरजते इति वत् शुक्ताविदं रजतमितिवच्च तस्यांश इति ज्ञाने संशयत्वं भ्रमत्वं वा स्यान्न तु शुक्ताविदं शुक्तित्वमितिवन्निश्चयत्वं भवेत्। अनन्तासेति भविष्योत्तरपुराणेऽनन्तव्रतकथा। युधिष्ठिर उवाच 'कोयं कृष्ण त्वयाख्यातो योनन्त इति विश्रुतः। किं शेषनाग आहो-

स्विदनन्तस्तक्षकः स्मृतः । परमात्माथ वानन्त उताहो ब्रह्म उच्यते । क एषोनन्तसंज्ञो वै सत्यं मे ब्रूहि केशव' । कृष्ण उवाच 'अनन्त इत्यहं पार्थ मम रूपं निबोधय । आदित्यग्रहचारेण यः कालः उपपद्यते । कलाकाष्ठामुहूर्तादिदिनरात्रिशरीरवान् । पक्षमासा ऋतुर्वर्षायुगकल्पव्यवस्थया । योयं कालो मयाख्यातः सोनन्त इति कीर्तितः । सोहं कालोवतीर्णोत्र भुवो भारवतारणादिति । 'ख्यातो सोनन्त' इति पाठे अकारो विष्णुः सोऽर्लोपः । 'वतारणा'दित्यत्र भागुरिमतेनावे अकारलोपः । आश्चर्यवद्दर्शनात् साधु । तथापि शास्त्ररीत्या बुभुत्सुबोधिकायां किञ्चिदुच्यते । 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति स्वरूपलक्षणे । अनन्तोऽनन्तानन्द उक्तः 'सोनन्त इत्यहं पार्थे'त्यनेनोक्तः । अर्थः । आदित्यग्रहचारेण यः कालः सदेहः । तथा च कृष्णोनन्तः कलाकाष्ठादिदेहवान् । यथा देवदत्तदेहो मारयति म्रियते च तथा कालः । 'कालात्मा भगवान् जात' इति वक्ष्यन्ति । पक्षदेहः । सत्यं सत्ता । सत्तामात्र'मितिवाक्यात् । तस्याप्यभेदसम्बन्ध इति कालात्मेत्यत्र कर्मधारयः विज्ञेय इति सात्त्विककल्पीयत्वात् । पूर्ववदर्थः । भूभारेति कालशरीरत्वात्तथा, तेन कालात्मेत्यत्र षष्ठीतत्पुरुषः । एवं स्वरूपलक्षणेऽभेदसम्बन्धः, श्रीभागवतमते धारणायां भेदान्वयं वदन्तः परस्परं व्यूहे निरोधलक्षणाव्याप्तिपरिहारमाहुः तत्र सुप्त इति । तत्र साधिदैविकशेषे शय्यारूपेऽनन्ते । हरिरिति पूर्ववत् । वाग्विषयत्वात् । ज्ञानम् । एवं अनन्ते ज्ञानं निरूपितम् । तज्ज्ञानं लीलाधिकरणमिति 'नमामि हृदये शेषे' इत्यत्र निरूपितम् । सत्यं लीलाब्धिरिति लीलां निरूपयन्ति स्म तदाविष्ट इति । 'तस्मिन् सङ्कर्षणे आविष्ट' इत्यादि टिप्पण्यां स्पष्टम् । अतः कालात्मेति भावः । टिप्पण्यामावेशरूपेति सङ्कर्षणस्यावेशित्वादितिभावः । लीलेति भिन्नं पदम् । अत इत्यत्र टिप्पण्यां यत इत्यादि । यतः शयानस्य हरेः कृष्णस्यावेशोतो हेतोः कृष्णस्य तमोऽवैशिष्ट्ये सत्यक्लिष्टकर्मत्वे सति भक्तनिगूढभावकर्तृत्वेन प्रकृतानुशयनेऽसम्भवादित्यर्थः । विष्णोरिति विष्णोः सात्त्विकत्वेन तमोवैशिष्ट्याद्यसम्भवात् कृष्णवत् प्रकृतानुशयनेऽसम्भवमाशङ्क्याहुः सात्त्विककल्पाधिष्ठातुरेवेति । सात्त्विककल्पाः ब्रह्मणो वासराः भविष्योत्तरपुराणोक्तं कृष्णाभिन्नानन्तस्य शरीरं कालरूपं तद्रूपाः इति हेतोः सात्त्विककल्पः कालः तमोवैशिष्ट्यादिविशिष्टः तस्याप्यधिष्ठाता तस्य । एवकारः कृष्णयोगं व्यवच्छिन्नत्ति । बलभद्रेणेति अनन्तमात्रेण कालशरीरेण सहानुशयनं भूभारावतारणरूपम् । एवकारार्थोयमित्याशयेन नात्मन इत्यस्यार्थमाहुः नात्मन इत्यादि । कुत इति चेत् । न । बलदेवाविष्टवासुदेवकलाया या लीला तस्या निरोधजनकत्वाभावात् । 'निरोधोस्यानुशयनमात्मन' इति मूलवाक्यात् । नोक्तदूषणमिति बलदेवाविष्टवासुदेवकलाया एव लीला स्कन्धार्थ इति दूषणं नेत्यर्थः । तल्लीलात्वेन रूपेण स्कन्धार्थः स्यात्, न तु पुरुषोत्तमलीलात्वेन रूपेण । भूभारहरणं ग्रन्थबाहुल्यात् । तथा सति स्कन्धार्थाननुगमः तदपि दूषणं न । भूभारहरणस्य बलाह्वयेन हरिणा परम्परयानन्ताभिन्नकृष्णेन वेत्युक्तदूषणाभावात् । तथा च पुरुषोत्तमलीलात्वेन स्कन्धार्थोऽभेदान् मुख्यत्वाच्चेति भावः । तर्हीत्यादि यदि बलदेवेन पुरुषोत्तमस्य नानुशयनं तमोवैशिष्ट्यादिधर्मभेदात् तर्हि । एवं पूर्वोक्तप्रकारेण बलदेवेनुशयनिरूपण इत्यर्थः । पूर्वोक्तेति नारायणवासुदेवस्य बलभद्रस्यांशत्वादंशांशिनोः प्रतिपाद्यप्रतिपादकयोरपि । तादात्म्येनाभेदादिति तादात्म्येनाभेदो यथा घटानां तादात्म्येन घटात्मधर्मेण घटत्वेनाभेदः, घटो घटो नेत्यप्रयोगात् न तु भेदाभावरूपादभेदात् । भेदाभावरूपमद्वैतं तु सत्त्वेन रजोजये सत्त्वेन ज्ञान ऐक्ये भाते भवति । तत्रापीति बलभद्रेपि । तच्चरित्रमिति बलभद्रचरित्रम् । कृष्णेति कृष्ण इति प्रेमवशान् निकटस्य कृष्णस्य सम्बोधनम् । भ्रमरगीतटिप्पण्यां 'वर्णयाम्यवशः क्वचित्' इति प्रेमविवशतोक्ता । अस्य श्लोकस्य टिप्पण्यामाहेत्येकवचनं तत एव । चरित्रेपीति रासलीलाभूभारहरणचरित्रयोश्चरित्रत्वेनैक्येपि स्वरूपे द्वैविध्यप्रतीतिः । एकस्यैवानेकत्वे दृष्टान्तं वदन्तो देवक्यामित्यस्याभासमाहुः अत एवेत्यादि । यत एकस्यैव द्विविधत्वं न तु द्वित्वम् अत एव यथा चतुर्व्यूहरूपेण प्राकट्यं मथुरायां व्यूहान् बहिरवस्थाप्यान्तः स्वस्य प्राकट्यं व्रजे नन्दगृहे पुरुषोत्तमस्य । यद्यपि वासुदेवप्राकट्यं व्रज एव तथापि व्यापिवैकुण्ठाद् वसुदेवहृद्यवतीर्यादौ स्वकार्यं देवकीमृत्युनिवारणं कृतवानिति निबन्धे निरूपणात् कार्यतोन्तः प्राकट्यं वसुदेवहृदि, स्वरूपतो बहिःप्राकट्यमादौ व्रज एवेति ज्ञेयम् । किञ्च व्रजे वासुदेवप्राकट्यमप्यस्तीति चेत्, अत्रेवं ज्ञेयम् । प्राकट्यं द्वेधा, कार्यतः स्वरूपतश्च तत्र कार्यतः प्राकट्ये व्यूहचतुष्टयप्राकट्यं मथुरायाम् । पुरुषोत्तमस्य व्रजे । प्राथमिकतत्तत्कार्यस्य तत्र तत्रैव जातत्वात्, स्वरूपतः प्राकट्यं तु व्यूहत्रयविशिष्टपुरुषोत्तमस्य व्रजे । तत्र कार्यतः प्राकट्यमत्रोच्यते । तथा च वासुदेवस्यादौ व्रज एव बहिःप्राकट्येपि तत्कार्यमादौ मथुरामेव जातम् । व्यूहचतुष्टयकार्यमादौ मथुरायामेव जातमिति निबन्धे स्फुटम् । पुरुषोत्तमकार्यं तु निःसाधनजनोद्धरणमादौ व्रज एव जातमिति । अत्रापीति सङ्कर्षणेपि । द्विरूपेण प्राकट्ये पि वस्तुतः स्वरूपैक्यमित्यर्थः । सुबोधिन्याम् एकवत् प्रोच्यत इत्युक्तं तत्र हीनोत्तमयोर्नैकवद्भाव इति, हीनतामेकस्य वारयन्ति स्म देवक्यामिति । देवक्यां शयनस्य शेषस्यैव सम्भवो न हरेः शयानस्य तत्र प्रमाणमाहुः स्मृत इति । 'देवक्या जठरे गर्भं शेषाख्यं धाम मामक'मित्यनेन शेषस्य सम्भवः स्मृतः हरेः सम्भवो न स्मृतः । रोहिण्यामपरस्य हर्यंशस्य । यद्वा रोहिण्यां गर्भस्थित्यनन्तरमपरस्य वासुदेवस्यावेश इत्यर्थः, इति अस्माद्धेतोः कर्षणान् मायाकृताद् शेषांशस्य कर्षणात् रोहिणीगर्भस्थस्य वासुदेवांशस्य हीनता मायाधीनता नेत्यर्थः । एकवदित्यत्र कारिकायाम् औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति शब्दार्थावेकवत् । एक इव । द्वाविव द्विवत् । प्रतीयत इति भगवदिच्छया घटादौ तथा व्यवहारात् । एवं चात्र द्वयोः पृथग्गर्भबोधनात् श्रीरोहिणीगर्भस्याकस्मिकत्वशङ्काप्रयुक्ता हीनता मायाधीनतापि वारिता । अतो गर्भसम्भवोत्तरमेव श्रीरोहिण्याः श्रीगोकुले स्थापनम् अन्यासां सप्तदशस्त्रीणामन्यत्रेति बोध्यम् तमिति श्रीबलदेवम् । अन्यस्मादिति अर्थात् आधिभौतिकात् शेषात्

तमसः रजसो देवदेहात् चारितार्थ्यकर्तृरूपाच्च। ज्ञातुमिति देवानां ज्ञानाय। भावे तुमुन्। सोपीति अंशरूपोपि सः शय्यारूपो भवतीति हेतोरनन्त इति सङ्कर्षणविशेषणमित्यर्थः। कालात्मेति कालस्य देहस्य आत्मा सोनन्तः, उक्तभविष्योत्तरात्। हीति निश्चये तत्र एव हेतुः। स्वाश्रयोऽब्धिः तस्मिन्। शेते स्वप्नं कुरुते। पाताले तु कालात्मा व्यापकरूपेण तिष्ठतीत्यर्थः। एवकारेण धराभराक्रान्ते शेषे न स्वप्नः किन्तु स्वदेहभूते काले शेषे स्वप्नः। स्थितमिति अविनाभावेन स्थितम्। अनन्तसहस्रवदनयोः सामानाधिकरण्यात् तत्र स्थितमित्याधाराधेयभावस्तु लोकैः प्रतीयते तथा भवतीति सहस्रवदनो भवति। 'सहस्रशीर्षा पुरुष' इत्यत्र पुरि शेत इति व्युत्पत्तिः व्युत्पत्तित्रये। श्रुतौ सहस्रपात् सहस्रपात् सन्तः। पुरुषेणापि सूक्तेनेत्यर्थे पुरुषविद्यामाशङ्क्याहुः वेदात्मेति। प्रतिपाद्यार्थवत् प्रतिपादकवेदेपीयं विधेत्यर्थः। तथेति सहस्रशीर्षा भवति। स्वर्गपीति सङ्कर्षणस्य यत् स्वं स्थानं तस्मिन्नपि स्वेन स्वीयेन राजत इति लौकिकव्युत्पत्तिः। कर्तरि क्विप्। स्वरूपलक्षणानन्तस्य ज्ञानेनाभेदान्वयात् स्वर्गेपीत्युक्तं 'वेदा यथा मूर्तिधरास्त्रिपृष्ठ' इति वाक्यात्। भवितेति लुट्। अनद्यतनकाले। अष्टप्रहराः अद्यतनकालस्तत्र न भविष्यतीत्यर्थः। भगवदवतारेणेति अनवतारेणादृश्येन निःसाधनजनोद्धरणं भविष्यतीति किमिति प्रश्नः।

स हीति सङ्कर्षणसहितः शेषो हि। देवरूपेणेति साक्षिरूपेण। अत एव लीलासु साक्षिवत् तत्स्थितिं वक्ष्यति। लीलां तु भगवदावेशेनेति बहुस्थले प्रसिद्धम्। एवकारः चरितार्थकर्तृरूपयोरां व्यवच्छिनत्ति। दैत्यानां सुखार्थं इति तेषां कालं प्राप्यैव भगवत्प्राप्तेस्तथा। तदिदं 'मन्येऽसुरान् भागवता'नित्यत्र तृतीयस्कन्ध उपपादितम्। साहाय्येति प्रलम्बादीनां मोक्षदानेन तद्वधेन साहाय्यम्। भूमेर्भाररूपदुःखहरणे जरासन्धादिभिः सह युद्धेन साहाय्यं ज्ञेयम्। प्रियमिति न तु चारितार्थ्यम्। एवमत्र सहस्रवदनदेवदेहे कृष्णाभिन्नानन्तो बलदेवस्वरूपम्। कार्यकाले कृष्णावेशादावेशी। 'वासुदेवकले'तिविशेषणेन तमसः भिन्नतया ज्ञातुं, वासुदेवस्य सात्त्विकत्वेनानन्तस्य तामसत्वेन सात्त्विकतामसत्वात्, 'विशुद्धसत्त्वं वसुदेवशब्दित'मितिवाक्यात्, भगवतश्चतुर्मूर्तेस्तुरीयां तामसीं मूर्तिमिति पञ्चमस्कन्धात्। 'अनन्त' इति रजसो भिन्नतया ज्ञातुम्। 'मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते' इति गीताष्टादशाध्यायात्। 'सहस्रवदन' इति अर्थात् भिन्नतया ज्ञातुम्। वेदात्मेति सुबोधिन्याः। 'स्वरा'डिति आधिभौतिकात् शेषात् भिन्नतया ज्ञातुम्। देव इति चारितार्थ्यकर्तृरूपात् भिन्नतया ज्ञातुम्। 'सहस्रवदनो देव' इति देवदेहाद् भिन्नतया ज्ञातुम्। अत्र प्रथमान्तप्रायपाठे देहदेहिनोर्वासुदेवपदार्थहरिकलयोरभेदः स्फुरति। स एवं परिहरणीयः। वेदत्वेनैकरसत्वात्। 'यस्य यजुरेव शिरः ऋगुत्तरः पक्ष' इत्यादि तैत्तिरीयात्। आनन्दमयवत्॥ २४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा च वेधाः ब्रह्मा समाधौ स्थित एव गगने समीरिताम् अदृष्टवक्तृकां गिरं वाणीं निशम्य श्रुत्वा त्रिदशान् देवान् प्रति ह स्फुटमुवाच। समाधावेव श्रुतत्वाद्देवैः सा न श्रुतेति ज्ञेयम्। ब्रह्मवचनमेवाह—गामित्यादिभिः सार्द्धैः पञ्चभिः। सावधानतार्थं सम्बोधयति—अमरा इति। समाधौ मया श्रुतां पौरुषीं परमपुरुषस्याज्ञारूपामनुलङ्घ्यां गां वाचं मे मत्तः कथयतो यूयं शृणुत। श्रुत्वा च पुनस्तथैव आज्ञानुसारेणाशु शीघ्रमेव विधीयतां युष्माभिः क्रियताम्। चिरं विलम्बं मा कार्ष्ट॥ २१॥ पुंसा पुरुषेण सर्वान्तर्यामित्वात् पुरा अस्मद्विज्ञापनात् पूर्वमेव धराया ज्वरः सन्तापोऽवधृतो निश्चितोऽतो यदुष्ववतरिष्यति। अतो भवद्भिर्देवैरपि स्वांशैर्यदुषु उप तत्प्रादुर्भावसमीपकाले जन्यताम्। तत्र कियत्कालपर्यन्तमस्माभिः स्थेयमित्यपेक्षायामाह—स इति। स भगवान् कालाख्यया स्वशक्त्या उर्व्याः पृथिव्याः भरं क्षपयन् दूरीकुर्वन् यावद्भुवि चरेदिति। भगवानपि कियत्कालं स्थास्यतीत्यपेक्षायामाह—ईश्वरेश्वर इति। ईश्वराणां स्वच्छन्दचारिणामस्माकमपीश्वरो नियन्ता, अतस्तस्याभिप्रायं ज्ञातुं तं नियन्तुं वा नाहं शक्त इत्याशयः। स्वकालशक्त्येत्यनेन तस्य भूभारहरणसहायेऽस्माकं महान् क्लेशः स्यादित्यभयं चेत्याशङ्का निरस्ता। केवलं सेवार्थं वैभवविहारार्थं चावताराज्ञेति सूचितम्॥ २२॥ ननु भगवान् यदुषु क्वावतरिष्यतीत्याकाङ्क्षायामाह—वसुदेवगृह इति। वसुदेवस्य गृहे साक्षाद्भगवानेव जनिष्यते प्रादुर्भूतो भविष्यति। साक्षादित्यनेनांशकलाद्यवतारं वारयति। कोऽसौ भगवानित्यपेक्षायां भगवच्छब्दस्यौपचारिकार्थत्वं वारयन्नाह—पुरुषः पर इति। पुरुषोत्तम इत्यर्थः। एवं देवानुक्त्वा तदङ्गनाः प्रत्याह—तदिति। तस्य भगवतः प्रियार्थं सेवाविहारादिना प्रीत्यर्थं सुराणां स्त्रियः सम्भवन्तु अवतरन्तु॥ २३॥ युष्माकमवतारे कः सन्देहः ? यतो वासुदेवस्य चतुर्व्यूहप्रधानस्य कला अंशः अनन्तः शेषोऽपि तस्य हरेः प्रियचिकीर्षया प्रिय लीलायामुपकारेण सुखं कर्तुमिच्छया तदवतारादग्रतो ज्येष्ठो भ्राता भविता अवतरिष्यतीत्यन्वयः। 'अग्रजो भविता' इति पाठान्तरम्। तदवतारोऽपि दुर्लभ इत्याशयेन तं विशिनष्टि—सहस्रवदन इति। स चास्माभिरपि पूज्य इत्याह—देव इति। तत्र हेतुमाह—स्वराडिति। स्वेनैव राजत इति स्वराट्, न तु कालकर्मादिपरतन्त्र इत्यर्थः॥ २४॥

अन्वितार्थप्रकाशिका

गिरमिति॥ वेधाः ब्रह्मा गगने समीरिताम् अदृष्टवक्तृकां गिरं वाचं समाधौ निशम्य श्रुत्वा समाधिरूपे गगने समीरितामिति वा। त्रिदशान् देवान् उवाच हे अमराः! ह स्फुटं पौरुषीं पुरुषस्य भगवत इयं पौरुषी तां गां वाचं मे मत्तः आशु शृणुत पुनः

मा चिरमविलंबितं तथैव युष्माभिर्विधीयतां चेति ॥ २१ ॥ पुरैवेति ॥ पुंसा भगवता पुरैव विज्ञापनात्पूर्वमेव धरायाः ज्वरस्तापः अवधृतः निश्चितः अतः ईश्वराणामपीश्वरः स यावत् स्वस्य कालशक्त्या यथाकालमित्यर्थः । उर्व्याः भरं क्षपयन् हरन् भुवि चरेत् प्रकटो वर्तेत तावत् भवद्भिः कर्तृभिः अंशैः सह यदुषु उपलक्षणतया कुरुष्वपि उपजन्यताम् । पुरैवेत्यादिचतुःश्लोकी क्षीरोदशायिनो हरेर्वचसोऽनुवादः इति भक्ताः तत्र पुंसा परमव्योमाधिनाथेन वासुदेवेनेत्यर्थः ॥ २२ ॥ वसुदेवेति ॥ वसुदेवस्य गृहे परः पुरुषः भगवान् साक्षात् स्वयमेव जनिष्यते प्रादुर्भविष्यति । अतस्तत्प्रियार्थं सेवया प्रीतिजननार्थं सुरस्त्रियोऽपि संभवन्तु ॥ २३ ॥ वासुदेवेति ॥ वासुदेवस्य भगवतः कला अनन्त बलदेवः देवः स्वेन स्वरूपेण स्वेन भ्रात्रा श्रीकृष्णेन वा राजते स्वराट् सहस्रवदनः संकर्षणः हरेः प्रियचिकीर्षया अग्रतः ज्येष्ठभ्रातृत्वेन भविता प्रादुर्भविष्यति ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गिरमिति ॥ गगने दहराकाशे, समीरितामाकाशशरीरेण भगवतोच्चारितां, गिरं वाचं, समाधौ निशम्य, वेधाः समाधेर्बहिर्यातो ब्रह्मा, त्रिदशान् सुरान् प्रति, ह स्फुटं यथा तथा, उवाच । तदेवाह गामित्यादिभिः सार्द्धैः पञ्चभिः । हे अमराः, समाधौ मया श्रुतामिति शेषः । पौरुषीं परमपुरुषसंबन्धिनीं, मे मम, गां वाचं, मे मत्त इति वा । शृणुत । कथयतो मत्त आकर्णयतेत्यर्थः । तथैव, यथेश्वरेणादिष्टस्तेन प्रकारेणेत्यर्थः । पुनः रामावतारे यथा तथा भूयोऽपीत्यर्थः । विधीयतां यदुकुलादौ जन्मधारणं भवद्भिः क्रियतामित्यर्थः । तदपि, आशु शीघ्रमेव, चिरं मा, विलम्बमत्र मा कार्ष्ट इत्यर्थः ॥ २१ ॥ पूर्वं स्फुटमनुक्तत्वात्का सा गीरित्यत्राह ॥ पुरैवेति ॥ पुंसेश्वरेण, पुरैव भूम्यादिवत् कृतविज्ञापनाकर्णनात्पूर्वमेव, धराज्वरः पृथिव्यास्तापः, अवधृतः अवधारितः बुद्ध एवास्तीत्यर्थः । अतः भवद्भिर्देवैः, अंशैः यदुषु उपजन्यतां युष्माभिः स्वस्वांशैर्यदुकुले जननं क्रियतामित्यर्थः । न केवलं जननमेव, तावन्तं कालमवस्थानं चापेक्षितमित्याह । ईश्वराणामस्माकमपीश्वरः, स भगवान्, स्वकालशक्त्या स्वसंबन्धिन्या कालाख्यया शौर्योपयुक्तया अपृथक्सिद्धविशेषणभूतया तन्वेत्यर्थः । उर्व्या भूमेः, भरं भारं, क्षपयन् निरसितुमिति भावः । भुवि यावत् चरेत् यावद्भुवि चरणं विदध्यात्तावत् कालपर्यन्तं स्थेयमित्यर्थः । केचित्तु भुवि यावदवतरेत्ततः पूर्वमेव उपजन्यतामित्यर्थः इत्याहुः ॥२२॥ न केवलं भवद्भिः पुंप्रकृतिभिर्देवैरेव संभवो विधेयः, किं तु भवदङ्गनाभिरपि भुव्यवतरितव्यमित्याह ॥ वसुदेवगृहे इति ॥ तथा, वसुदेवगृहे वसुदेवपत्न्यां देवक्यामित्यर्थः । भगवान् षाड्गुण्यपूर्णः, परः पुरुषः प्रकृतिपुरुषविलक्षणः परमपुरुष इत्यर्थः । साक्षात्, जनिष्यतेऽवतरिष्यते । न तु कपिलादिवज्जीवान्तराधिष्ठानतयेत्यर्थः । तस्य जनिष्यमाणस्य परमपुरुषस्य प्रियार्थं प्रियविधानार्थं, सुरस्त्रियो देवानां पत्न्योऽपि, संभवन्तु । तत्पूजार्थमिति पाठे पूजार्थं परिचर्यार्थं क्रीडार्थमिति यावत् । सुरस्त्रियोऽपि स्वांशैरुत्पद्यन्तामित्यर्थः ॥ २३ ॥ न केवलं देवैस्तत् स्त्रीभिश्च प्रादुर्भाव्यमपि तु ऋषिभिरपि प्रादुर्भाव्यमित्याह ॥ ऋषयोऽपीति ॥ हे सुराः, तथा, ऋषयः अपि, तदादेशात्तस्य भगवतोऽनुशासनात्, पयोदानमुखेन क्षीरप्रदानद्वारापि, कृष्णं तर्पयितुं, पशुरूपिणः कल्पन्ताम् । गोरूपिणः संभवन्त्वित्यर्थः । तपआदिभिः सर्वदा भगवन्तं तर्पयन्तः सन्तोऽप्यधुना तु पयोदानमुखेनापि तर्पयितुं गोरूपिणः कल्पन्तामित्यपिशब्दाभिप्रायः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गिरमिति : १०.१.२१.

मयोच्यमानं शृणुतेत्यनुक्त्वा गां पौरुषीं मे शृणुतेत्यवोचत् ।
ततोऽजनि व्यक्तमिदं मृषोक्त्या लब्धा प्रतिष्ठापि न भव्यकृत्स्यात् ॥ २७ ॥

निर्दिष्टं प्रभुणा स्वकार्यमचिराचारेण कालान्तरे यद्यत्राचरितं तदा भृशमुदासीनः प्रभुर्जायते ।
तादृक् सम्प्रति मामवत्विति धियाऽसौ दीर्घदर्शी विधिर्युक्तं मा चिरमाश्विति द्विपदतः प्रोवाच तत्केलिदृक् ॥ २८ ॥

पुरैवेति : १०.१.२२.

सामान्योऽपि नृपो धराज्वरपरीहाराय निस्तन्द्रधीस्त्यक्त्वा कार्यशतान्यपीह भवतीत्याराद्यं त्वच्युतः ।
श्रीभूपः श्रितराजहंससमयः श्रीराजराजान्वितस्तद्युक्तं द्विजराजशेखरनुतः प्राग्वेद यद्भूज्वरम् ॥ २९ ॥
धराद्वयज्वरध्वंसो विधेयोऽस्ति ममेति सः । पौर्वापर्यविधावीशो युक्तं पूर्वमचिन्तयत् ॥ ३० ॥

सर्वांशतो यदि गता भुवि सर्व एते स्वस्थोपभोगसुखराशिरनन्तदत्तः ।
प्राह्यस्तदा तु बत कैरिति चिन्तयानो युक्तं जगाद विधिरंशत एव यात ॥ ३१ ॥

वसुदेवेति : १०.१.२३.

सर्वैश्वर्ययुतोऽष्टसिद्धिसहितः पूर्णेष्टकामोऽप्यलं स्वामी स्वोपकृतावनालसमनाः स्याच्चेत्तदा सेवकैः ।
शक्त्याऽऽकल्प्य तदोपदां प्रियतमां सत्कार्य एवादरादेतद्योजयता व्यबोधि विधिना तत्प्रीतये योषितः ॥ ३२ ॥

वासुदेवेति : १०.१.२४.

पुरस्कृत्यैव संग्रामे बलं राजकुलेडिताः । जयन्त्यरनितो युक्तं बलमाधान्निजाग्रगम् ॥ ३३ ॥

कृष्णप्रिया

गगन-आकाश में कही हुई भगवान की वाणी को समाधि में सुनकर ब्रह्माजी कहने लगे कि हे अमरवृन्द ! भगवान् के कहे हुए वाक्यों को सुनो और उसके अनुसार तुरन्त वर्ताव करो। भगवदाज्ञा के पालन में विलम्ब न होना चाहिये ॥ २१ ॥ भूमि देवता का कष्ट भगवान ने हमारे कहने से पहिले जान लिया है और उसने स्वयं आज्ञा की है कि आप देवगण यादवों में अंश द्वारा प्रकट होकर पृथ्वी पर तब तक विराजें, जब तक ईश्वरों के ईश्वर अपनी कालशक्ति से पृथ्वी का भार नाश करते हुए विराजमान रहें ॥ २२ ॥ वसुदेवजी के घर पर परब्रह्म परमात्मा श्रीआनंदकंद श्रीकृष्ण स्वयं ही प्रगट होंगे अतः सेवा द्वारा उनको प्रसन्न करने के लिए देवाङ्गनाएँ अवतरित हो ॥ २३ ॥ श्रीहरि भगवान कृष्णचन्द्र का प्रिय करने की इच्छा से वासुदेव भगवान की कलास्वरूप सहस्रवदन अनन्त स्वरूप बलराम भगवान के बड़े भाई के रूप में अवतरित होंगे ॥ २४ ॥

[1]विष्णोर्माया भगवती यया सम्मोहितं जगत् । [2]आदिष्टा प्रभुणांशेन कार्यार्थे [3]सा भविष्यति ॥ २५ ॥

श्रीशुक उवाच

इत्यादिश्यामरगणान् प्रजापतिपतिर्विभुः । आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ ॥ २६ ॥
शूरसेनो यदुपतिर्मथुरामावसन्[4] पुरीम् । माथुराञ्छूरसेनांश्च विषयान् बुभुजे पुरा[5] ॥ २७ ॥
राजधानी ततः साभूत् सर्वयादवभूभुजाम् । मथुरा भगवान् यत्र नित्यं संनिहितो हरिः ॥ २८ ॥

कर्दमक्षमा

अन्वयः—विष्णोः माया यया जगत् संमोहितं (वर्तते) भगवती प्रभुणा आदिष्टा सा कार्यार्थे अंशेन भविष्यति ॥२५॥ प्रजापतिपतिः विभुः अमरगणान् इति आदिश्य च महीं गीर्भिः आश्वास्य परमं स्वधाम ययौ ॥ २६ ॥ पुरा यदुपतिः शूरसेनः मथुरां पुरीम् आवसन् माथुरान् च शूरसेनान् विषयान् बुभुजे ॥ २७ ॥ ततः यत्र नित्यं भगवान् हरिः सन्निहितः सा मथुरा सर्वयादवभूभुजां राजधानी अभूत् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

देवकीगर्भसंकर्षणयशोदामोहनादिकार्यार्थे यशोदायां संभविष्यति ॥ २५-२६ ॥ भोजेंद्रबंधनागारेऽवताराय प्रस्तावकथामाह । शूरसेन इत्यादिना यावदध्यायसमाप्ति । मथुरामावसन् मथुरायां वसन् । विषयान्देशान् ॥ २७-२८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यशोदामोहनादीत्यत्रादिशब्देन द्वारपनगरस्थकंसादयो ग्राह्याः । मायाशब्देन योगमाया ग्राह्या ह 'योगमायां समादिशत्' इति वक्ष्यमाणत्वात् । प्रभुणा कृष्णेन । अंशेन स्वांशभूतबहिरंगमायासहितैव प्रादुर्भविष्यति यया स्वांशभूतया मायया । जगदपि स्वस्वांशभेदाद्द्विधा तद्विज्ञेयं स्वरूपं जगत्तु ब्रह्मणे दर्शयिष्यति चतुर्दशेऽध्याये स्वांशभूतं सर्वमेव प्रसिद्धं कार्यार्थ इति । कार्यमपि द्विविधं तत्र प्रथमं देवकीगर्भाकर्षणयशोदा स्वापादितयोगमायाया एव न तु मायायाः काल्याः स्वनियंतुर्बलदेवस्याकर्षणे प्रभुत्वायोगात् । यशोदा स्वापस्य राजसत्वाभावात् । तदुक्तम् "व्यतीत्य तुर्यामपि संश्रितानां तां पञ्चमीं प्रेममयीमवस्थाम् । न संभवत्येव हरिप्रियाणां स्वप्नो रजोवृत्तिविजृंभितो यः" इति द्वितीयं तु देवकीकन्यारूपेण कंससंभाषणादिरूपं तन्मायाया एव । कंसादिदुष्टेषु तदनुपयोगादेव सैव कंसहस्तादुत्प्लुत्य विंध्यवासिन्यादिरूपेण "बहुनामनिकेतेषु बहुनामा बभूव ह" तदुक्तं स्वयमेव मायया । "वैवस्वतंतरे प्राप्ते अष्टाविंशतिमे युगे । नंदगोपगृहे जाता यशोदागर्भसंभवा ॥ ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी" इति । तथा रासलीलासिद्ध्यर्थं भगवत्प्रेयसीनां पतिपश्वादिमोहनं योगमायाया एव कार्यं न तु मायायास्तेषां भगवद्वैमुख्यादर्शनात् । मायामोहितत्वे तद्वैमुख्यस्यावश्यंभावात् । 'योगमायामुपाश्रितः' इति तत्रोक्तेश्च । दुर्योधनादिशाल्वाद्यसुरेषु विश्वरूपगरुडवाहनादित्वदर्शिष्वपि नायमीश्वरः किं तु धृष्टो यादव इति मोहनं माययैव न तु योगमाययेति तेषां भगवद्वैमुख्यदर्शनात् । एवं तत्तत्स्थले भगवदभिमुखविमुखमोहनं योगमायातदंशीभूतमायाकृतमूह्यम् । यत्तु वात्सल्यादिमहाप्रेमवतां यशोदानंदादीनाम् । विश्वरूपवरुणलोकादिदर्शनांते वात्सल्याधिक्यैश्वर्यज्ञानेप्यसंभ्रमादैवैश्वर्याननुसंधानलक्षणं मोहनं तन्न योगमायाया नापि मायायाः किंतु प्रेम्ण एव स स्वभाव इति 'वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः' इति तु मोहसाधर्म्यात्तत्र मायाशब्दप्रयोग इति ॥ २५ ॥ प्रजापतीनां मरीच्यादीनां पतिर्ब्रह्मा गीर्भिः गीयन्त इति ग्यः गायतेः क्विपीत्वम् "गीर्वाणी च सुरा पत्नी

---

१. योगमाया- विज. । २. आधिष्टा—इति कस्यचित् । ३. सम्भविष्यति—श्रीधर. वंशी. वीर. विश्व. शुक. । ४. भावसत्पुरी—वीर. । ५. स्वराट्—विज. ।

गी रम्या गीः सुधाभिधा" इति सौभरिः। ईर्य्यन्त उच्चार्यन्त इतीरः। "ईर्वाक् प्रोक्ता तथेरा च भूमौ मद्ये शुभे स्त्रियाम्" इति द्विरूपकोशः। तथा च ग्यो रम्याश्च ता ईरो वाचो गीरस्ताभिः रम्यवाग्भिः। आश्वास्य सांत्वयित्वा। परमं ब्रह्मांडांतर्वर्तिसर्वलोकेभ्यो भूरादिभ्य उत्कृष्टं परतमं परं मा यस्मात्तदिति व्युत्पत्तेः ॥ २६ ॥ शूरसेनः कार्तवीर्यसुतः "तस्य पुत्रसहस्रेषु पंचैवोर्वरिता मृधे। जयध्वजः शूरसेनो वृषभो मधुरूर्जितः" इति नवमस्कंधोक्तेः। मथुरां मथुरायाम् "उपान्वध्याङ्वसः" इत्याधारस्य कर्मत्वाद्द्वितीया। मथुरायाः प्रांते माथुरास्तान्। शूरसेनेनाधिष्ठिताः शूरसेनास्तान्। श्रीवाल्मीकीये तु शत्रुघ्नकृतलवणवधोत्तरं वरदानार्थमागतदेवेभ्यः शत्रुघ्न इमं वरं वव्रे। "इयं मधुपुरी रम्या मधुरा देवनिर्मिता। निवेशं प्राप्नुयाच्छीघ्रमेष मेऽस्तु वरः परः ॥ तं देवाः प्रीतमनसो बाढमित्येव राघव। भविष्यति पुरी रम्या शूरसेना न संशयः ॥" किञ्च—"स पुरा दिव्यसंकाशो वर्षे द्वादशमे शुभे। निविष्टः शूरसेनानां विषयश्चाकुतोभयः" इति तथा च। शूरा सेना यस्यां शूरस्य शत्रुघ्नस्य वा सेना यस्यां सा शूरसेना मथुरैवेति ज्ञायते। तत्प्रान्तदेशश्च तेनैव निवेसितः शूरसेनसंज्ञोऽभूदिति। विषयान्देशान् "नीवृज्जनपदो देशो विषयस्तूपवर्तनम्" इत्यमरः ॥ २७ ॥ ततः शूरसेनमारभ्येत्यर्थः। राजधानी "राज्ञो नित्यं यत्र वासो राजधानी तु सा पुरी" इत्यभिधानात्। यद्वा "राज्ञां प्रधाननगरं राजधानीति कथ्यते" इति शब्दार्णवः। "मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा। तत्सारभूतं यद्यस्यां मथुरा सा निगद्यते ॥" इति तापनीयश्रुतेः। "मथुरायां स्थितिर्ब्रह्मन्सर्वदा मे भविष्यति। मथुरायां विशेषेण मां ध्यायन्मोक्षमश्नुते" इति स्मृतेश्च। यत्र मथुरायां संनिहितः स्थितः। 'नित्यं संनिहितः' इत्यनेन स्वयं भगवान्परिपूर्णः कृष्णस्तत्र स्वधामनि सदा वर्त्तमान एवाविर्भूय प्रपंचगोचरीभवति न तु कुतश्चिद्वैकुंठादिभ्य आगत्यावतरतीति व्यंजितम्। किं च तदाविर्भावसमये वैकुंठश्वेतद्वीपादिभ्यस्तदंशा आगत्य तत्र मिलिता भवंति लीलांते पुनस्तत्रतत्र यान्तीति तेषामेव वैकुंठादिभ्योऽवतरणं चेति प्रसिद्धिर्ज्ञेया "परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान्यथाग्निः" इत्यादिषु तृतीये तथा व्याख्यानात्। इति विश्वनाथः। श्रीसनातनगोस्वामी तु नित्यं कालादिदोषेणान्यत्रैवांतर्द्धानं निरस्तम्। अस्याश्च नित्यत्वं पाद्मनिर्वाणखंडे। "अहो न जानंति नरा दुराशयाः पुरीं मदीयां परमां सनातनीम्। सुरेंद्रनागेंद्रमुनींद्रसंस्तुतां मनोरमां तां मथुरां पराकृतिम्" इति तापिन्यामपि तासां मध्ये साक्षाद्ब्रह्मगोपालपुरी हीति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विष्णोः विश्वव्यापकस्य भगवतो मायाख्या शक्तिः अत एव भगवती सर्वशक्तियुक्ता भगवतीत्वमेव दर्शयन् तामेव कार्यविशेषद्वारा लक्षयति—ययेति। इति चिच्छक्तिर्व्यावर्त्तिता, भगवदिच्छया सम्यग्भविष्यति अन्यथा श्रीयशोदादिमोहनाशक्तेः कार्यार्थ इति श्रीयशोदामोहनादिकार्यस्य सुगोप्यत्वात् सङ्केतेनैवोक्तम्, ननु, वयं त्वदाज्ञाकारिण एव अनन्तश्च हरेः प्रियचिकीर्षयैव भविता सा परमस्वतन्त्रा कुतस्तथा कर्त्रीत्यत्राह—प्रभुणा साक्षात् कृष्णेनैवादिष्टेति। ननु "यया सम्मोहितं जगत्" इत्युक्तं तर्हि तस्यास्तत्र जन्मना अस्मादृशानामपि सम्मोहः सम्भवेदित्यत्राह, अंशेनेति। अंशेन भगवदंशेन तदिच्छारूपेण सम्वलिता अतस्तदिच्छाऽनुसारेणैव मोहयिष्यतीति भावः ॥ २५ ॥ इति श्रीविष्ण्वादेशाऽनुवादप्रकारेण आदेशे योग्यतामाह—प्रजापतीनां मरीच्यादीनामपि पतिः यतो विभुः, उक्तार्थमेवेदं श्लेषेण भगवदवतारसाधनादिदानीमेव प्रजानां तत्पतीनाञ्च पालकत्वं विभुत्वञ्च सिद्धमिति, गीर्भिः त्वमेव धन्यासि अचिरात्तन्मधुरपदैर्भूषिता भविष्यसीत्यादिभिः। परमं सत्यलोकवर्त्तीति विदूरस्थं तत्रत्यमूर्त्तिमहदादिनिजपरिवाराणां साक्षात् श्रीभगवदवतारवार्त्तया सन्तोषणार्थम् ॥ २६ ॥ श्रीमथुरायां भगवदवतरणं वक्ष्यन्नादौ तत्कारणमाह—शूरसेन इति द्वाभ्याम्। मथुराम् "मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा तत्सारभूतं यद्यस्यां मथुरा सा निगद्यते" इति आथर्वणिकगोपालतापनीश्रुतौ येन ब्रह्मज्ञानेन वाशब्दस्य समुच्चयार्थत्वाद्भक्तियोगेन वा सर्वं जगन्मथ्यते तज्ज्ञानिनां तद्भक्तियोगिनाञ्च विलाप्यते तद्यत्प्रसिद्धं ज्ञानादिद्वयं स्वयं भगवच्छ्रीकृष्णनिष्ठत्वात् सारभूतं यस्यां वर्त्तते सा मथुरा निगद्यत इत्यर्थत्वात् मथ्नाति सर्वं तदितरं खण्डयतीति तन्मण्डलं तत्रापि पुरीं तन्मध्यस्थकमलकर्णिकाश्रितां माथुरान् मथुरामण्डलसम्बन्धिनः तद्दक्षिणभागाऽनुगतान् शूरसेनांश्च तत्तन्नाम्नैव प्रसिद्धान् देशान् बुभुजे उपबुभुजे पुरेति तस्य पूर्वपूर्वतरत्वात्। तच्चोक्तमेव नवमस्कन्धे ॥ २७ ॥ ततः तदारभ्य सा सुप्रसिद्धा अनिर्वचनीयमाहात्म्या वा राजधानीति ययातिशापेऽपि शूरसेनादीनां महाप्रभावत्वेन राजदुर्लभव्यवहारत्वात् अतो भूभुजामित्यप्युक्तम्। सर्वेषामेव तेषां राजधानीत्यत्र कैमुत्यमाह—यत्र यस्यां भगवान् स्वयं भगवत्तया विलक्षणसर्वैश्वर्ययुक्तः तथा हरिः विलक्षणरूपगुणलीलामाधुर्येण सर्वमनोहरो यः स श्रीकृष्णोऽपि सन्निहितः। तत्रत्यानां निकटे तिष्ठतीत्यर्थः। तत्र च मथुरेत्येव हेतुर्ज्ञेयः, तया तस्यापि मनोविलोडनात् नित्यमिति कालादिदोषेणान्यत्रैवान्तर्धानं निरस्तम् अस्याश्च नित्यत्वमानीतम्, तथा च पाद्मे निर्माणखण्डे श्रीभगवद्वाक्यम्—

अहो न जानन्ति नरा दुराशयाः पुरीं मदीयां परमां सनातनीम्।
सुरेन्द्रनागेन्द्रमुनीन्द्रसंस्तुतां मनोरमां तां मथुरां पराकृतिम्" ॥ इति।

तथा च गोपालोत्तरतापनी श्रुतिः "मध्ये साक्षाद्ब्रह्मगोपालपुरी हि इति। किञ्च तदप्येते श्लोकाः—

प्राप्य मथुरां पुरीं रम्यां सदा ब्रह्मादिसेविताम्। शङ्खचक्रगदाशार्ङ्गरक्षितां मुसलादिभिः ॥
यत्राऽसौ संस्थितः कृष्णस्त्रिभिः शक्त्या समाहितः। रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः" ॥ इति।

त्रिभी रामादिभिः शक्त्या रुक्मिण्येत्यन्वयः । एवं वैकुण्ठलोकादप्युत्कर्षः सूचितः, अत एवोक्तं पाद्मे पातालखण्डे "अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी" इति तदेवमेकस्य स्वयं भगवत आस्पदत्वाद्गोलोकादीनामेकात्मकतैव ज्ञेया ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तथा विष्णोर्या माया, सा का ? यया मायया इदं जगच्चेतनवर्गः सम्मोहितं साऽपि भगवती श्रीभगवत्परतन्त्रा अन्यैः पूज्या मायाधिष्ठात्री देवता प्रभुणा नियन्त्रा श्रीभगवताऽऽदिष्टा आज्ञापिता सती तस्य कार्यार्थं प्रयोजनार्थम् अंशेन सम्भविष्यति जनिष्यते ॥ २५ ॥ इत्येवं श्रीभगवतोक्तमेवामरगणान् प्रति आदिश्यानुज्ञाप्य प्रजापतीनां दक्षादीनामपि पतिर्विभुर्ब्रह्मा गीर्भिर्महीम् आश्वास्य सान्त्वयित्वा परमं श्रेष्ठं स्वधाम स्वलोकं ययौ ॥ २६ ॥ तदेवमवतारनिमित्तमुपपादितम्, अथावतारप्रकारं पितुर्गेहात् व्रजगमननिमित्तञ्च वर्णयितुं तदुपोद्घातरूपमितिहासमाह—शूरसेन इत्यादिना यावदध्यायसमाप्ति । पुरा पूर्वकाले यदूनां पतिः शूरसेनो राजा मथुरां पुरीमधिवसन् मथुराञ्छूरसेनांश्च विषयान् देशान् बुभुजे इहोपभोगो भुजेरर्थः न तु पालनम् । तत्र "भुजोऽवने (१।३।६६)" इति आत्मनेपदप्रतिषेधादिति ॥ २७ ॥ यतः शूरसेनो राजा अध्यवसत् ततः सा मथुरा पुरी सर्वेषां यादवभूभुजां यादवभूपालानां राजधानी बभूव तत्र पुर्यां हरिर्भगवान् नित्यं सन्निहितः आविर्भावस्थानत्वादिति भावः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

देवकार्यार्थं सहायान्तरं वक्ति—योगमायेति । योगमाया दुर्गा ॥ २५ ॥ महर्लोकादिभ्यः परमम् ॥ २६ ॥ चतुर्मुखे भुवं सान्त्वयित्वा सत्यलोकं गते उत्तरकथां प्रसञ्जयति—शूरसेन इति । कार्तवीर्यसुतः पुरीमावसन्निति सप्तम्यर्थे द्वितीया "उपान्वध्याङ्वसः (१।४।४८)" इतिसूत्रात् ॥ २७–२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च स्वलीलापरिकराणां भक्तानां भक्तद्विषां कंसादीनाञ्च मोहनार्थं योगमायां मायाञ्चादिशदित्याह—विष्णोर्माया "योगमायां समादिशत्" इत्यग्रिमोक्तेः प्रभुणा कृष्णेन आदिष्टा सती अंशेन सह स्वांशभूतबहिरङ्गमायासहितैव कार्यार्थे प्रादुर्भविष्यति यया जगत् संमोहितं स्वांशभूतमाययेत्यर्थः । यद्वा, जगत् अप्राकृतं प्राकृतञ्च स्वेन स्वांशेन च सम्मोहितं मायया योगमायांशत्वं दृष्टं नारदपञ्चरात्रे श्रुतिविद्यासम्वादे—

जानात्येका परा कान्ते सैव दुर्गा तदात्मिका । या परा परमा शक्तिर्महाविष्णुस्वरूपिणी ॥
यस्या विज्ञानमात्रेण पराणां परमात्मनः । मुहूर्तादेव देवस्य प्राप्तिर्भवति नान्यथा ॥
एकेयं प्रेमसर्वस्वस्वभावा गोकुलेश्वरी । अनया सुलभो ज्ञेय आदिदेवोऽखिलेश्वरः ॥
अस्या आवरिका शक्तिर्महामायाखिलेश्वरी । यया मुग्धं जगत्सर्वं सर्वे देहाभिमानिनः ॥ इति ।

एका एकविधैव एकानंशापरपर्यायेत्यर्थः । कार्यार्थे इति कार्यमत्र द्विविधं प्रथमं देवकीसप्तमगर्भाकर्षणयशोदास्वापनादि, तद्धि योगमायाया एव कार्यं न तु मायया स्वनियन्तुर्बलभद्रस्याकर्षणे प्रभुत्वाभावात् यशोदास्वापनस्य राजसत्वाभावाच्च यदुक्तम्—

व्यतीत्य तुर्यामपि संश्रितानां तां पञ्चमीं प्रेममयीमवस्थाम् । न सम्भवत्येव हरिप्रियाणां स्वप्नो रजोवृत्तिविजृम्भितो ये ॥ इति,

तादृशसिद्धभक्तेषु मायायाः प्रभवितुमशक्यत्वाच्च द्वितीयं तु देवकीकन्यारूपेण यत् कंसवञ्चनं तन्मायया एव कार्यं न तु योगमायायास्तादृशदुश्लोकेषु तस्या अनुपयोगादेव सैव कंसहस्तादाकाशमुत्प्लुत्य विन्ध्यवासिन्यादिरूपेण बहुनामनिकेतेषु बहुनामा बभूव ह यदुक्तं स्वयमेव मायया—

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे । नन्दगोपगृहे जाता यशोदागर्भसम्भवा ॥
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥ इति ।

तथा रासलीलादिसिद्ध्यर्थं भगवत्प्रेयसीनां पतिपश्वादिमोहनं योगमायाया एव कार्यं न तु मायायाः तेषां भगवद्वैमुख्यदर्शनात् मायामोहितत्वे तद्वैमुख्यस्यावश्यम्भावात् "योगमायामुपाश्रितः" इति तत्रोक्तेश्च, दुर्योधनादिसाल्वाद्यसुरेषु विश्वरूपगरुडवाहनादिस्वदर्शिष्वपि नायमीश्वरः किन्तु धृतो यादव इति मोहनं माययैव न तु योगमायया तेषां भगवद्वैमुख्यः दर्शनादित्येवं विमुखमोहनं मायया उन्मुखमोहनं योगमाययेति व्यवस्थितिः यत्तु वात्सल्यादिमहाप्रेमवतां श्रीयशोदानन्दादीनां विश्वरूपवरुणलोकादिदर्शनान्ते वात्सल्यादिभावाधिक्यत्वेनैश्वर्यज्ञानेऽप्यसंभ्रमादैश्वर्याननुसन्धानलक्षणं मोहनं तत् न योगमायया नापि मायया किन्तु प्रेम्ण एव स स्वभावः यः खलु भगवदैश्वर्यज्ञानमावृण्वन् चिन्मयममतारशनया श्रीकृष्णं निबध्य प्रतिक्षणं तस्मिन् स्नेहाधिक्यमुत्पादयन् तन्माधुर्यास्वादमहोदधौ भक्तजनं निमज्जयतीत्यसाधारणलक्षणज्ञाप्यो भवत्यत एव तत्रोक्तं "वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः" इति पुत्रस्नेहमयत्वं वात्सल्यप्रेम्णोऽसाधारणं लक्षणं मोहनत्वेन मायासाधर्म्यान्मायामिति ॥२५॥

इति श्रीविष्ण्वादेशानुवादप्रकारेण ॥ २६ ॥ वसुदेवगृहे जन्म वक्ष्यंस्तदुपयोगिनीं कथामाह—शूर इति। विषयान् देशान् ॥ २७ ॥ नित्यं सन्निहित इत्यनेन स्वयं भगवान् परिपूर्णः श्रीकृष्णस्तत्र स्वधामनि सदा वर्त्तमान एवाविर्भूय प्रपञ्चगोचरी भवति न तु कुतश्चिद्वैकुण्ठादिभ्य आगत्यावतरतीति व्यञ्जितम्। किञ्च तदाविर्भावसमये वैकुण्ठश्वेतद्वीपादिभ्यस्तदंशा आगत्य तत्र मिलितीभवन्ति लीलान्त त एव पुनस्तत्र तत्र यान्तीति तेषामेव वैकुण्ठादिभ्योऽवतरणं वैकुण्ठाद्यारोहण चेति प्रसिद्धिर्ज्ञेया 'परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान् यथाऽग्निः" इत्यादिषु तृतीये तथा व्याख्यानात् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विष्णोरनन्तशक्तेः शक्तिरूपा माया देवकीगर्भसङ्कर्षणादिकार्यार्थे यशोदायां सम्भविष्यति अत्रापि मायाशब्देन योगमाया ज्ञेया अग्रे कचिच्च "मायान्तु प्रकृतिं विद्यात्" इति श्रुतेः प्रकृतिः कचित् "माया दम्भे कृपायां च" इति विश्वकोशाद्दम्भवञ्चनाद्यपरपर्याया कचिच्च "माया च वयुनं ज्ञानम्" इति निघण्टुपाठात् ज्ञानसङ्कल्पादिरूपा ॥ २५–२६ ॥ श्रीदेवक्यां भगवदवताररहस्यं निरूपयितुं तावत्तद्विवाहोत्सवमाह शूरसेन इति। विषयान् देशान् ॥२७॥ यत्र यस्यामुपासकजनानुग्रहार्थं नित्यं संनिहितः अत एव ध्रुवं प्रति श्रीनारदेनोक्तम्—

तत्तात ! गच्छ भद्रं ते यमुनायास्तटं शुचि। पुण्यं मधुवनं यत्र सांनिध्यं नित्यदा हरेः ॥ इति ॥ २८ ॥

श्रीसुबोधिनी

एवं ससामग्रीकस्य गमने सर्वमुक्तिर्भविष्यतीत्याशङ्कायामाह **विष्णोरिति**। यो हि **विष्णुर्मायोद्घाटनेनावतरिष्यति सा** तदंशभूता **माया** कार्यार्थे भविष्यति। सापि **भगवती** षड्गुणैश्वर्ययुक्ता भगवत्प्रसादात्। अतस्तस्याः स्वस्थानत्यागेन गमनेपि न दोषः। अत्रापि स्थास्यति कार्यमपि करिष्यतीति। सर्वमुक्त्यभावश्च तत एव भविष्यतीत्याह **यया सम्मोहितं जगदिति**। **कदाचित्** तस्या अनागमनशङ्कां व्यावर्तयति **आदिष्टा प्रभुणेति**। अनेन यत्र सर्वव्यामोहिका भगवदाज्ञयावतीर्णा तत्र के भवन्त इति गर्वाभावोपि ज्ञापितः। **कार्य** यशोदायाः स्तन्यं सङ्कर्षणं कंसादिव्यामोहो वसुदेवादिमोचनमिति ॥ २५ ॥ एवं सर्वान् ज्ञापयित्वा **ब्रह्मा** ततो निर्गत इत्याह **इत्यादिश्येति**। अनेकविधा देवाः ते च स्वस्वमुख्याज्ञाकारिणः अत एव सर्वानेव गणपतीनाज्ञापितवानित्याह **अमरगणानिति**। तर्हि **ब्रह्मणः** कथं नावतार इत्याशङ्क्याह **प्रजापतिपतिरिति**। **प्रजापतीनां** स नियन्ता। **अन्यथा सृष्टिर्न** स्यादित्यर्थः। ननु साक्षाद्भगवता नोक्तमिति देवा न करिष्यन्तीत्याशङ्क्याह **विभुरिति**। ब्रह्मा स्वत एव समर्थो देवानाज्ञापयितुम्। अनेनैव वृत्तान्तेन भूमिः कृतार्था जाता तथापि **गीर्भिरपि महीमाश्वास्य स्वधाम** सत्यलोकाख्यं **ययौ गीर्भिरिति** भूमेः प्रशंसावाक्यानि बहून्युक्तानीति ज्ञायते। **भूमौ** भगवदागमनं **पूर्वं न** सम्भावितमधुना जातमिति तद्भाग्याभिनन्दनं युक्तमिति ॥ २६ ॥ **एवं भूमेः** सान्त्वनमुक्त्वा देवक्याः सान्त्वनं वक्तुं तस्याः प्रथमं दुःखप्रापणोपायमाह **शूरसेन** इति दशभिः। सहस्रार्जुनस्य **पुत्राणां** मध्ये ये पञ्चोर्वरितास्तेषां द्वितीयः **शूरसेनः**। यादवानां राज्यं ययातिना निवारितम्। ततः पुष्ट्यैव राज्यम्। यो महान् भगवदंशो भवति स राजेति। तत्र सहस्रार्जुनो भगवदंशः पुष्ट्या राजा बभूव। स जीवन्नेव **शूरसेनाय** मण्डलद्वयं दत्तवान् मथुराशूरसेनात्मकम्। ज्येष्ठस्तु माहिष्मत्यामेव।

सर्वोत्कर्षे तु यद्दुःखं तद्दुःखं स्वल्पके स्मृतम्। देशतः कालतश्चैव अवस्थातः स्वतोन्यतः ॥ १ ॥
द्रव्यतो मानतश्चेति सप्तैव सुखदाः स्मृताः। तथाभूता शब्दवशात् प्राप्ता दुःखं तदा पतिः ॥ २ ॥
प्रतिक्रियां समारेभे नवभिश्च प्रतिक्रिया ॥ २½ ॥

तत्र प्रथमं देशस्योत्कर्ष उच्यते। पूर्वं शूरसेनः शत्रुघ्ननिर्मितायां मथुरायां तत्रत्यमानन्दमनुभूय निवासं कृतवान्। **स च यदुपतिः**। यादवानां प्रभुः। तन्नाम्ना जातानपि **शूरसेनान् विसृज्य मथुरामेवावसन्** उभयान् देशान् बुभुजे। अनेन यादवानां मथुरा स्वदेश इत्युक्तम् ॥२७॥ **कालभेदेनापि** सा महती जातेत्याह **राजधानीति**। ततः प्रभृति यावन्तो राजानः कंसपर्यन्तं स्वबलाज्जाताः खण्डमण्डलाधिपतयस्तेषां तत्रात्यन्तं सुखानुभवान्मथुरैव **राजधान्यभूत्**। **सर्वे च ते यादवभूभुजश्च**। ततः शूरसेनप्रभृति। राजा धीयते प्रीयते यस्यामिति **सा राजधानी**। निधीयते पट्टाभिषिक्तः क्रियत इति वा। अनेन तत्र राज्यलक्ष्म्या नित्यं **स्थानमित्युक्तम्**। तत्र स्थितानामानन्दे हेतुर्भगवान् **यत्र**। **नित्यं सन्निहित** इति।

सर्वतत्त्वेषु यो विष्टः स भूमावपि सङ्गतः। स नित्यं कचिदेवास्ति तत्स्थानं मथुरा स्मृता ॥ १ ॥
तत्र स्थित्वा द्वयं चक्रे सर्वेषां सकलं हितम्। सर्वदुःखनिवृत्तिं च तत्र चेद्दुःखसम्भवाः ॥ २ ॥
प्रतीकाराः सर्व एव मर्यादामार्गसम्भवाः। व्यर्था जाताः सर्वथेति ज्ञापनार्थं निरूपितम् ॥ ३ ॥

श्रीरङ्गादिष्वपि नारायणस्य ब्रह्माण्डविग्रहस्य सान्निध्यम्।

देशकालादिमध्यस्थः षडङ्गत्वं य आगतः। सान्यत्र सर्वदेशेषु शालग्रामादिषु स्थितः ॥ ४ ॥ २८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

शूरसेनो यदुपतिरित्यत्र—ननु **मातृचरणानां** दुःखप्रापणोपायमात्रं ह्यत्र वाच्यं तत्तु विवाहं कृत्वा गृहगमनसमये तथाकाशवाण्यभूदित्येतावतैवोक्तं भवतीति **देशकालावस्थादिभिः सर्वोत्कर्षवर्णनं** व्यर्थमित्याशङ्क्य तत्तात्पर्यमाहुः **सर्वोत्कर्षं** **स्वित्यनेन**। भगवदाविर्भावस्थानमिति यथा वसुदेवजन्मसमय आनका दुन्दुभयश्च नेदुरिति **सर्वत्रोत्कर्षो** लोके ज्ञातस्तथा स्त्रिया **भर्तृगृह एव** पुत्रजन्म भवति तत्र विवाहो निमित्तमिति तं कृत्वा तद्गृहगमनसमये मातुः **सर्वोत्कर्षे** भगवता सम्पादिते सति **यद्दुःखमुपस्थितं तत्** स्वल्पके निमित्ते शीघ्रमनायासेन भगवता निरसितुं योग्ये सति भवतीति भगवन्मार्गे शास्त्रे निरूपितमित्यत्रापि **न काचिच्चिन्तेति**ज्ञापनाय तद्वर्णनमित्यर्थः। सुष्ठु अल्पकमतिसूक्ष्मं दुर्ज्ञेयमितियावत्। तादृशे **निमित्ते** सतीत्यर्थः। **भक्तदुःखं** विना भगवदाविर्भावो न भवतीति तदर्थं तत्कथनमित्यपि तात्पर्यं ज्ञेयम्। **देशतः कालत** इत्यादि। **सप्तैव सुखदा** इत्युक्त एकस्य द्वयोर्वापि सुखदत्वं सम्भवतीति नायं नियम इत्याशङ्क्य निमित्तानां तावद्रूपत्वात्तथेति बोधयितुं तान्येवोक्तानि **देशत** इत्यादिना। अथवा 'सार्वविभक्तिकस्तसिलिति केचि'दितिवाक्यादत्र प्रथमातस्तसिलिति ज्ञेयम् ॥ २७ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

विष्णोर्माययेत्यत्र—**तदंशभूतेति**। तदंशेति। उद्घाटनेन राशिभूतो योंशस्तदात्मिका। इदं च **अंशेनेति**पदस्य विवरणम् ॥ २५ ॥ **राजधानीत्यत्र**—तत इति पूर्वावधिबोधकं पदं कालत उत्कर्षसमर्पकं बहुकालमारभ्य **राजधानीत्वाद्**बोध्यम्। ननु श्रीरङ्गादिषु देशान्तरेष्वपि भगवत्सान्निध्यस्योक्तत्वादत्र को विशेष इत्यत आहुर्**देशकालादी**त्यादि। तथा चाङ्गभूतात् प्रधानभूतोधिक इति तेनैव चेन्न सुखं तदाङ्गभूतात् कुतः सुखं भवतीविज्ञापनायेदमुक्तम्। तेन तापनीयोक्ताभ्यो द्वादशमूर्तिभ्योपि न सुखमिति ज्ञापितम् ॥ २८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

विष्णोर्माययेत्यत्र—**सा तदंशभूतेति**। उद्घाटितो योंशस्तद्भूतेत्यर्थः। तथा च मानुषाकारकस्वरूपप्राकट्यार्थं तदाकारकतावदंशस्योद्घाटनमतः सा तदाकारकतावत्परिमाणकरूपेत्यर्थः। **न दोष** इति। यथा पुरुषोत्तमो भगवत्त्वेन सर्वसामर्थ्यवांस्तथा सापि भगवतीत्वेन सर्वसामर्थ्यवत्यतोत्रापि व्यापिवैकुण्ठेपि स्थास्यति भूमौ कार्यं यशोदास्तन्यादिकं च करिष्यतीतिहेतोरवतरणार्थं भूमौ गमनेपि स्वस्य प्रकटस्वरूपस्य स्थानस्य व्यापिवैकुण्ठस्य त्यागेन प्राप्तः परिच्छिन्नत्वलक्षणो दोषो नेत्यन्वयः ॥ २५ ॥ **इत्यादिष्टेत्यत्रापि पूर्वं न जातमिति**। अंशकलावतार एवान्यदा जात इति भावः ॥ २६ ॥ **शूरसेन** इत्यस्याभासे—**दुःखेति**। ननु दुःखस्याध्यायार्थत्वात् सान्त्वनस्य दुःखाङ्गत्वं युक्तं न तु दुःखस्य सान्त्वनाङ्गत्वं तत् कथमत्र तथोक्तमिति चेदत्रैवं **ज्ञेयम्**। अध्यायार्थभूतं मातृदुःखमुपसंहारे वक्तव्यं 'देवकीं वसुदेवं चे'त्यनेन। तत्प्रापण उपायोत्रोच्यते। तथा च दुःखस्य न सान्त्वनाङ्गत्वं किन्तूपायस्य। उपायकथनं सान्त्वनकथनार्थमित्यर्थः। तथा चैतत्सान्त्वनपूर्वकमुपसंहारोक्तं महद्दुःखमवतारहेतुत्वादध्यायार्थस्तादृशदुःखाङ्गत्यवतारात्क्षिनिरोधरूपा 'नन्दस्य हरेर्लीला शास्त्रार्थ' इति सप्तार्थसङ्गतिरिति दुःखप्रापणोपाय आकाशवाणी तस्याः स्वल्पकत्वज्ञापनाय पूर्वं सप्त श्लोकास्तत्कार्यं नवमे दशमे सान्त्वनारम्भः। एवं सान्त्वनविशिष्टो भगवन्निरस्यः सकार्यं आकाशवाणीरूप उपायो दशश्लोकानां महावाक्यार्थः।

अवान्तरवाक्यार्थानाहुर्**देशत** इति। **सर्वोत्कर्ष** इत्यस्य टिप्पण्यां **भक्तदुःखमिति**। सर्वोत्कृष्टस्य स्वल्पायमानेपि महद्दुःखकथनार्थमपि सर्वोत्कर्षवर्णनमित्यर्थः। **अवस्थातः स्वतश्चे**त्येकेन **द्वयकृतो** द्वाभ्यामितिविभागः ॥२७॥ **राजधानीत्यत्र**—व्यापकत्वात् सर्वत्रास्ति तस्य मथुरायां विशेषं विवृण्वन्ति **सर्वतस्त्वे**ष्विति। 'त्रयोविंशतितत्त्वानां गणं युगपदाविशदि'तिवाक्याद्भूमावपि भगवानाविष्टः। स तु कस्मिंश्चिदेव देशे तिष्ठति देहाविष्टजीववत्। तथा च कारणरूपेण सर्वत्र स्थितावप्यनुप्रविष्टरूपेण मथुरायामेव तिष्ठतीत्यर्थः। अस्या भूमेः पञ्चीकृतत्वेपि तस्या भूमेरुपादानत्वात् तद्द्वारात्राप्यावेशः। यद्यपि जलादिकमप्युपादानं तथापि भूम्यंशस्याधिकत्वात्तदाविष्टस्यैव स्थितिरुक्तेतिभावः। **भगवान् हरि**रितिपदद्वयस्यार्थमाहुर्**द्वयं चक** इति। **दुःखसम्भव** इति। दुःखस्य सम्भवो यस्मात्तादृशो भगवत्तिरोभावो नित्यसन्निधिदेशेपि चेज्जात इत्यर्थः। **निरूपितमिति**। साम्निध्यमितिशेषः। प्रसङ्गात्तीर्थान्तरसान्निध्यमपि विवृण्वन्ति **श्रीरङ्गादिष्विति**। **ब्रह्माण्डं विग्रहो** यस्य। पूर्वमचेतने ब्रह्माण्ड आविष्टस्येत्यर्थः। तर्हि देशान्तरे भगवत्पूजादिकं न स्यादित्याशङ्क्य तदपि व्यवस्थापयति **देशेति**। तीर्थादन्यदेशेषु 'देशः कालः पृथग्द्रव्यमि'तिवाक्याद्**देशादिषड्**रूपो यो **भगवान् स शालग्रामादिषु स्थितः**। 'ष्ठा गतिनिवृत्तौ' तिरोभावरहितो नित्यसन्निहित इत्यर्थः। मूर्तौ विसर्जनविकल्पादाविर्भावतिरोभाववानिति **शालग्रामे**त्युक्तम्। आदिपदेनैकादश्यादिकाले तुलस्यादिद्रव्ये शमादिगुणवति **कर्तरि** गोपालादिमन्त्रे पूजादिकर्मणि तत्तद्रूपो भगवान् स्थित इत्युक्तम् ॥ २८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

प्रजापतिपतिरित्यस्य व्याख्याने—**प्रजापतीनां स नियन्तेत्यादि**। सर्वे देवा भगवत्सेवका भगवदाज्ञयावतीर्णा इति ब्रह्मणोपि भगवत्सेवकत्वात् तस्य कथं नावतार इत्याशङ्क्य प्रजापतिरित्युक्तं मूले। तथा च प्रजापतीनां सर्वेषां नियमनेन तद्द्वारा सृष्टिकारणार्थं ब्रह्मणोऽवताराभावो युक्त इति भगवता नावतारित इति ज्ञेयम्। अन्यथा भगवदाज्ञाया अनुलङ्घ्यत्वाद्ब्रह्माप्यवतरेत्। तथा सति प्रजानां स्वच्छन्दतापत्त्या सृष्टिकार्यं न चलेदितिभावः ॥ २६ ॥ **सर्वतत्त्वेषु यो विष्ट** इति। अत्रेदं विचार्यते मथुरायां 'नित्यं सन्निहितो हरि'रितिवाक्याद्भगवत्सन्निधानमस्ति तत् केन रूपेणेत्याकाङ्क्षायां सान्निध्यकृतस्वरूपं विवृण्वन्ति **सर्वतत्त्वेष्वि**त्यादिना। तत् सृष्ट्यारम्भे 'तदेवानुप्राविशत्' 'त्रयोविंशतितत्त्वानां गणं युगपदाविशदि'त्यादिश्रुतिपुराणवाक्येभ्यः **सर्वतत्त्वेषु भगवानाविष्ट** इति तन्मध्यपातिन्यां भुव्यपि प्रविष्टः। स चान्तर्यामी। अतोन्तर्यामी यथा देहे प्रविष्टोपि 'गुहां प्रविष्टा'विति श्रुतेर्देहैकदेशेन्तःकरणेभिव्यक्तो भवति तथा सर्वत्र भुवि तिष्ठन्नपि भूम्येकदेशे मथुरायामेवाभिव्यक्तो 'नित्यं सन्निहितो हरि'रितिवाक्यादितिभावः ॥ २८ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

शूरसेनो यदुपतिरित्यत्र—**सर्वोत्कर्षे** त्वित्यादि। **सर्वोत्कर्षे तु यद् दुःखं तद् दुःखं स्वल्पके स्मृतम्। देशकालावस्था**दिभिर्भगवता मातुः **सर्वोत्कर्षे** सम्पादिते दुःखमुपस्थितं तत **स्वल्पके** निमित्ते शीघ्रमनायासेन भगवता निरसितुं योग्ये सति भवतीति भगवन्मार्गे शास्त्रे निरूपितमित्यत्रापि न काचिच्चिन्तेतिभावः। एतदेव ज्ञापयितुं **देशकालावस्था**दिभिर्मातुरुत्कर्षः सम्पादित इत्यर्थः। अथवा **सर्वोत्कृष्टस्य स्वल्पके**प्यपमाने महद् दुःखं भवतीति महादुःखकथनार्थमपि **सर्वोत्कर्ष**वर्णनमित्यर्थः। एतदेवोक्तं टिप्पण्यां **भक्तदुःखं** विनेत्यादिना। तद्देशत इत्यादि। **देशतः कालतश्चैवे**त्यादि। 'शूरसेनो यदुपति'रित्यनेन **देशोत्कर्षः**। 'राजधानी'तिश्लोकेन **कालोत्कर्षः**। 'तस्यां तु कर्हिचि'दित्यर्धेनावस्थोत्कर्षः। 'देवक्या सूर्यये'तिद्वितीयार्धेन **स्वत उत्कर्ष उक्तः**। 'उग्रसेनसुतः कंस' इत्यनेनान्यत उत्कर्षः। 'चतुःशतं पारिबर्ह'मित्यादिश्लोकद्वयेन **द्रव्योत्कर्षः**। 'शङ्खतूर्ये'तिश्लोकेन **मानोत्कर्षः**। **तथाभूतेति**। **तथाभूता शब्दवशात्** प्राप्ता दुःखं तदा पतिः। प्रतिक्रियां **समारेभे नवभिश्च प्रतिक्रिया**। **तथाभूता** भगवता **देशकालाद्युत्कर्षं** प्रापिता देवकी **शब्दवशादाकाशवाणीवशाद्** दुःखं प्राप्ता **तदा पतिर्वसुदेवः प्रतिक्रियां समारेभे**। सा च प्रति**क्रिया** 'श्लाघनीयगुणः शूरै'रित्यादिभिर्**नवभिः** श्लोकैः ॥ २७ ॥ **राजधानी ततः साभूदित्यत्र**—सर्वतत्त्वेष्विति। **सर्वतत्त्वेषु यो विष्ट** इत्यादि। 'त्रयोविंशतितत्त्वानां गणं युगपदाविशदि'तिवाक्यात् **स भूमावपि सङ्गतः। स नित्य क्वचिदेवास्ति तत्स्थानं मथुरा स्मृतेति**। हृदयदेशे देहाविष्टजीववत्। तथा च कारणरूपेण सर्वत्र तथाप्यनुप्रवेशरूपेण मथुरायामेव तिष्ठतीत्यर्थः। **तत्र स्थित्वा द्वयं चक्र** इति। **प्रतीकाराः सर्व एव मर्यादामार्गसम्भवाः। व्यर्था जाताः सर्वथेतिज्ञापनार्थं निरूपितम्। मथुरा भगवान् यत्रे**त्यत्रोक्तस्य भगवानितिहरिरितिपदद्वयस्यार्थमाहुर्**द्वयं चक्र** इति। तत्र नित्यं भगवत्सान्निध्यवत्यां **मथुरायामपि दुःखसम्भवश्चेत्** तदा **सर्व एव प्रतीकारा व्यर्था इतिज्ञापनार्थं निरूपितम्**। सान्निध्यमितिशेषः। वक्ष्यन्ति च 'तस्यां तु कर्हिचिच्छौरि'रित्यत्र 'सर्वानंशान् सर्वतो भगवान् स्वावतारार्थमाचकर्ष'ति। एतट्टिप्पण्यां च 'पूर्वसान्निध्ये सति भक्तदुःखाभावे स्वावतारो न सम्भवतीति तदर्थं तत्सान्निध्यं दूरीकृतवानग्रे च तत्प्रयोजनाभावात् स्वस्मिन्नेव लीनं कृतवानित्यर्थ' इति। पुनरत्रैव चाग्रे **देशकाले**त्यादि। **देशकालादिमध्यस्थः षडङ्गत्वं य आगतः सोन्यत्र सर्वदेशेषु शालग्रामादिषु स्थितः**। एतेन प्रसङ्गाद्देशकालद्रव्यकर्तृ**मन्त्रकर्मरूपेषु षट्सु धर्माङ्गेषु** भगवत्सान्निध्यं विवृतम्। **यो देशकालादिमध्यस्थः षडङ्गत्वं** प्राप्तः स भगवानन्यत्र तीर्थादन्यत्रापि **शालग्रामादिषु स्थितः**। **नित्यं सन्निहित** इत्यर्थः ॥ २८ ॥

श्रीबुभुत्सुबोधिका

विष्णोर्माययेत्यत्र सर्वमुक्तिरिति 'तमेव विदित्वातिमृत्युमेती'तिश्रुतेः। सार्वभौमत्वादितिभावः। सा तदंशेति उद्घाटनमस्या अतो मायातदाकारकतावत्परिमाणकरूपेत्यर्थः। इदं च अंशेनेत्यस्य विवरणम्। यो हि विष्णुरिति सर्वत्र कृष्णस्याकारकत्वात् कृष्णस्थले विष्णुशब्दः हरिशब्दश्च। विष्णौ कृष्णसमानयोगक्षेमत्वाद्धरौ सर्वत्र गीयमानत्वात् योगमात्राद् वा। मायोद्घाटनेनेति वाक्यमप्यत्र 'निशीथे तम उद्भून' इति। विष्णोः सत्त्वरूपा माया तस्या उद्घाटनम्। कृष्णे तु त्रिगुणमायाया इच्छारूपलक्ष्मीरूपमायाया वोद्घाटनम्। षड्गुणैश्वर्येति उक्तार्थः षड्गुणैश्वर्यशब्दः। अयं विशेषः। नारदपञ्चरात्रे मायाया इच्छारूपलक्ष्मीरूपत्वमुक्तम्। 'न यत्र माये'तिवाक्यात्, 'नास्ति श्रुतिषु तद्वार्ते'ति निबन्धाच्च। तस्यै षड्गुणैश्वर्यं कालिन्दीवत् भगवता दत्तम्। अतः षड्गुणा लक्ष्म्यंशस्त्रीषु सन्तु यथा कात्यायन्याम्। 'स्वलक्षणा प्रादुरभूत् किलास्यत' इति वाक्यात् भगवल्लक्षणायां सरस्वत्याम्। तत्र भगवतीत्वं षड्गुणैश्वर्यं विना न गच्छति। घटे पटत्ववत् ऐश्वर्यं कर्तुमकर्तुमन्यथाकर्तुं सामर्थ्यं यतः। तद् भगवदीयं सम्भवति। यत्र स्वात्मसृष्टिः 'कदाचिन् माययाऽभव'दित्युक्ता मायिकसृष्टिः, तत्र मायिकसृष्टौ मायायाः षड् गुणाः सन्ति, अस्मादेव वाक्यात्। अत एव माया भगवतीतिप्रयोगः। तत्रैश्वर्याभावे तिरोहितषड्गुणे जीवे अहं भगवानितिप्रयोगे भगवत्त्वाध्यासो न सम्भवति। मायिक-

षड्गुणैश्वर्याभावात् । अत उक्तं षड्गुणैश्वर्ययुक्तेति । समवेतसमवायेन । द्रव्यत्वपक्षे युक्ता संयुक्ता । परम्परया । इयं कात्यायनी । 'गच्छ देवि व्रजं भद्रे' इति वाक्यात् । तदाहुः भगवत्प्रसादादिति प्रसादरूपा सा शक्तिर्भवतीति साधनप्रकरणसुबोधिन्याम् अतो नाखण्डाद्वैतविरोधः । अत इति प्रसादरूपशक्तित्वात् । स्वस्थानेति स्वस्थानं वैकुण्ठाख्यम् । न दोष इति अवतार्यवतारविनियोगाभावो दोषः परिच्छिन्नत्वेन प्राप्तः स नेत्यर्थः । स्वस्याः व्यापकत्वेप्युत्क्रान्तिगत्यागतीनां सम्भवान्न व्यापकत्वजदोषः । अत्रापीति भूमावपि बोध्यम् । अपिना वैकुण्ठे । कार्यं वक्ष्यमाणम् । इदमत्र ज्ञेयम् । 'विष्णुर्नाम महायोगी महामायो महातपा' इति योगतत्त्वोपनिषच्छ्रुतौ विष्णुमायोक्ता । सा यद्यपि वैकुण्ठे नास्ति 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इति वाक्यात् तथापि विष्णुसम्बन्धिनी माया वागगोचरे कृष्णेपि मायां बोधयति, सा गुणरूपमायाबाधात् प्रसादरूपा शक्तिरूपा मायेति मायेन्द्रियाणीतिसम्प्रदाये निबन्धमते । नृसिंहतापिनीये द्वैते भेदभाननिर्वाहाय माया निरूपिता । भवन्त इति देवाः । वसुदेवादीति वसुदेवस्यांशे मायाव्यामोहं विना कंस एवमपराधिनौ न मोचयेत् । 'यत् तदग्रे विषमिव परिणामेऽमृतोपमं तत् सुखं सात्त्विक'मिति वाक्यात् ॥ २५ ॥

इत्यादिश्येत्यत्र तत इति क्षीरपयोनिधिरिति । गणबहुवचनशब्दार्थमाहुः अनेकेति । प्रजापतीनामिति दक्षादीनाम् । अन्यथेति तथा च सृष्टौ नियुक्तस्तदतिरिक्तं जन्म न प्राप्नोतीत्यर्थः । पूर्वमिति अस्मात् पुष्टावतारात् पूर्वं न सम्भावितम् । मर्यादांशकलावतारा एवान्यदा जाता इति । जातमिति सन्तापात्मकस्य शरणमार्गात्मकस्यान्तर्यामिणो ध्याने पुंसश्च साधनत्वं पृथिव्याम् । द्वितीयस्कन्धनवमाध्याये 'तपो मे हृदय'मिति वाक्यात् , 'ब्रह्माणं शरणं यया'विति वाक्यात् , 'उपस्थितान्तिके तस्मा' इति वाक्यात् , 'पुरैव पुंसावधृतो धराज्वर' इति वाक्याच्च । तद्भाग्येति भूमिभाग्याभिनन्दनम् ॥ २६ ॥

शूरसेन इत्यत्र दुःखशापणेति । 'भूमिर्माता तथा चान्य' इत्युक्तेषु भूमेः शामनमुक्तं, मातुः सान्त्वने मातृदुःखमङ्गं, तथा सति सान्त्वनमध्यायार्थो भवेत् , न तु भक्तदुःखं हेतुरध्यायार्थः । अध्यायार्थसङ्गत्यर्थं तस्याः दुःखप्रापण उपाय उत्कर्षे सत्युपायस्तमाह । उत्कर्षं उच्यत इति सुबोधिन्या अवान्तरवाक्यार्थत्वेनोत्कर्षे सत्युपाय आकाशवाणीव्यक्तवचनरूपोत्र व्यापृतकंसव्यापारकः तस्याः स्वल्पकत्वज्ञापनाय पूर्वं सप्त श्लोकाः, अष्टमे आकाशवाण्या व्यक्तवचनं, तत्कार्यं नवमे भगिनीहननारम्भः, दशमे सान्त्वनारम्भः, एवं सान्त्वनविशिष्टो भगवान्निरस्यः सकार्य आकाशवाण्याऽव्यक्तवचनरूप उपायो दशश्लोकानां महावाक्यार्थ उक्तः । अत्र शूरसेनपदपुरःसरं कथने बीजं भक्तस्य धैर्यमुक्तम् । शूरस्य शूराः सेनायां भवन्ति । शूरो धैर्येधिकारी, विवेकधैर्याश्रये ग्रन्थे धैर्ये शूरस्याधिकारोक्तेः । 'अशूरेणापि कर्तव्यं स्वस्यासामर्थ्यभावना'दित्यनेन । सहस्रार्जुनस्येत्यादि नवमस्कन्धे प्रसिद्धम् । त्रयोविंशेऽध्याये । 'अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् दत्तात्रेयाद्धरेरंशात् प्राप्तयोगमहागुणः । न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः । यज्ञदानतपोहोमश्रुतवीर्यजपादिभिः । पञ्चाशीतिसहस्राणि ह्यव्याहतबलः समाः । अनष्टवित्तस्मरणो बुभुजेऽक्षय्यं षड्वसु । तस्य पुत्रसहस्रेषु पञ्चैवोर्वरिता मृधे । जयध्वजः शूरसेनो वृषभो मधुरूर्जित' इति । यादवानामिति 'ययातिशापाद्यदुभिर्नासितव्यं नृपासन' इति दशमे वाक्यात् । यदुर्हि ज्येष्ठ एवासीत् स चेत् पित्रा निवारितः । ततः प्रभृति न मर्यादाराज्यम् । अर्जुनादयस्तु पुष्ट्या सार्वभौमा जाताः । अत एव हताः, कंसोपि । अत उक्तं ततः पुष्ट्यैवेति । यो महानिति यथार्जुनः । पुष्ट्येति भद्रसेनकस्य द्वौ पुत्रौ दुर्मदधनकौ, तत्र धनकस्य कनिष्ठस्य चत्वारः पुत्राः, कृतवीर्यः कृताग्निः कृतवर्मा कृतौजाः । तत्र वीर्यं यार्जुन इति पुष्ट्या धनकस्य कनिष्ठत्वात् । ज्येष्ठ इति जयध्वजः । माहिष्मत्यामेवेति नवमस्कन्धे पञ्चदशेऽध्याये 'विप्लावितं स्वशिबिरं प्रतिस्रोतः सरिज्जलैः । नामृष्यत् तस्य तद् वीर्यं वीरमानी दशाननः गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः माहिष्मत्यां सन्निरुद्धो मुक्तो येन कपिर्यथे'ति रावणो दिग्विजये माहिष्मत्याः समीपे नर्मदायां देवपूजां कुर्वन् तेन प्रवाहस्यावरोधात् प्रतिस्रोतसः तस्याः तस्याः सरितो जलैः विप्लावितं स्वशिबिरमालक्ष्यार्जुनवीर्यं न सेहे । ततश्च कृतकिल्बिषः क्रीडन्तमर्जुनमभिभवितुं प्रवृत्तः दशाननोर्जुनेन गृहीतः माहिष्मत्यां स्वपुर्यां कपिरिव सन्निरुद्धश्च, पुनश्चावज्ञया येन मुक्त इत्यर्थः । तस्यार्जुनस्य ज्येष्ठपुत्रो जयध्वजः सोपि माहिष्मत्यामेव ज्येष्ठत्वादेवकारः । लोके चोलीमहेश्वर इति पुरीनामेति चोलीग्रामः पृथक् महेश्वरः पृथक् इति द्रष्टव्यम् । माहिष्मती पुरी तस्याम् । सर्वोत्कर्षे त्वित्यादि कारिकार्थस्तु टिप्पण्यां द्रष्टव्यः । टिप्पण्यां तथाकाशवाणीति सर्वोत्कर्षे सति आकाशवाणी व्यक्तवचनयुक्ता बोध्या । भगवदाविर्भावेति श्रीदेवकीति बोध्यम् यद्दुःखमिति यत् प्रसिद्धम् । स्वल्पक इति सर्वोत्कर्षे सति आकाशवाणीव्यक्तवचनरूपे निमित्ते कारणे सति विरुद्धधर्माश्रयत्वात् । शीघ्रमिति विशुद्धसत्त्वे प्रवेशमन्तरापि । भगवन्मार्गं इति श्रीभागवते । स्कन्दपुराणे श्रीभागवतमाहात्म्ये चतुर्थेध्याये 'यथा कथञ्चित् कर्तव्यं सेवनं भगवन्मत'मिति वाक्यात् । सेव्यतेनेनेति सेवनम् , करणे ल्युट् । शास्त्र इति द्वादशस्कन्धे 'पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् उपोष्य संहितामेतां पठित्वा मुच्यते भयात्' इति शास्त्रे । 'भयं' दुःखम् । भक्तदुःखमित्यादितात्पर्यार्थे भक्तदुःखं तपः । भगवन्मार्गः भगवदाज्ञया यत्राऽऽस्थीयते सः द्वितीयस्कन्धनवमाध्यायोक्तः । तत्र तपसा ब्रह्मणो हिरण्यगर्भदर्शनम् । शास्त्रं नारदपञ्चरात्रम् । तत्रेन्द्रस्य तपसा लक्ष्मीदर्शनम् । तयोर्निरूपितमिति टिप्पण्यामर्थः । स्मृतमिति 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा । 'अजोपि जात' इति स्मृतम् । तदुक्तं 'भूमिर्दृप्तनृपे'त्यत्र 'सर्वेषां च महद्दुःखं यान्येन विनिवार्यते । यदा तदा हरिः कृष्णः प्रादुरासीदिति स्थिति'रिति ।

अतोऽल्पकं दुःखं वसुदेवेन निवार्यं न दुःखं महदिति नंतावता भगवदाविर्भाव इति भावः। अन्यथा विशुद्धसत्त्वात्मको वसुदेवः कथं भगवत्प्रादुर्भावप्रतिबन्धिकां प्रतिक्रियां समारभेत। देवकी ब्रह्मविद्या, तस्याः सुखदाः सप्तैव। 'रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख एव च। गरुडो ब्रह्म विष्णुश्च नारसिंहस्तथैव च। आदित्योग्निश्च दुर्गश्च क्रमेण द्वादशाम्भसी'त्युक्ता द्वादश। अम्भसि जले प्रतिपाद्या अर्थाः, अभिशब्दे इति धातोरम्भःशब्दः तदा ते गौणाः अर्थाः सप्तैव मुख्याः तानवान्तरवाक्यार्थानाहुः देशत इत्यादि। सुबोधिन्याम्। सप्तैव सुखदा इति पुरुषोत्तमजन्मप्रकरणात् पुरुषोत्तमयोगाध्यायोक्ताः सप्तैव सुखदाः अत्रैव भागवते गीताविस्तारे स्मृता ग्राह्याः। सङ्क्षेपे। प्रपञ्चे तु 'भूमिरापोनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधे'ति स्मृत्योच्यन्त इति स्मृताः शेषिकोण्। एवकारः द्वादशयोगं व्यवच्छिनत्ति। तत्र त्रिवृत्करणं जीवेषु। पुरुषोत्तमे तु भूम्यादिदेवताः। भूमिः शरीरम्, आपो लीलाः सर्गरूपाः अनलः आत्मा, वायुः प्राणः, खं शब्दः षोडशरूपः, मनः मनसो मनः, बुद्धिर्ब्रह्म आनन्दः। अहङ्कारः सप्तसमष्टिः। अहङ्कारेण सप्तानां व्यतिहारात्। यथाहं स्थूल इति भूमिधर्मव्यतिहार आत्मनि अहङ्कारेण। अहं प्राण इति प्राणधर्मदेहधारणाध्यास आत्मनि अहङ्कारकृतः। अहंशब्द इति शब्दाध्यासः शब्दसृष्ट्यभावकालेहङ्कारकृतः। अहं पश्यामि शृणोमि जिघ्रामि रसामीत्यादयोध्यासा अहङ्कारेण। अहं अप्रमेयं पश्यामीत्यप्रमेयज्ञानाश्रयत्वाध्यासो मनोधर्माध्यास आत्मनि अहङ्कारकृतः। 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यकात्। अहं पदार्थान् जानामीति बुद्ध्यध्यासः। बुद्धिमानयं पदार्थान् जानातीति प्रत्ययात् पदार्थज्ञानं बुद्धिधर्म इति। अत्रावस्थातः स्वतश्चेत्येकेन श्लोकेनोत्कर्षः। द्रव्यकृतो द्वाभ्यामिति विभागः। तथाभूतादिति तकारागमः। तथाभूता सुखदैः सुखिनीभूता ब्रह्मविद्या देवकी। तथाभूता इति पाठे सुखदत्वेन भूता जाताः सप्तैवेत्यन्वयः। ननु दुःखप्रतिक्रिया सङ्कर्षणकार्यं कुतः पतिः प्रतिक्रियां समारेभ इति। तत्राहुः तदा पतिरिति। भगवदवताराहेतौ स्वल्पकभक्तदुःखकाले पतिर्वसुदेवो वेदात्मा स्वप्रतिपाद्यज्ञानजनकः कंसबोधनप्रकारेण ब्रह्मविद्यायां देवक्यां श्रवणद्वारा ज्ञानप्रवेशार्थं प्रतिक्रियां समारेभ इत्यर्थः। नवभिरिति दशमे तु सान्त्वनारम्भ इति प्रतिक्रियातः पदार्थान्तरारम्भः। आरम्भः प्रतिक्रियायां प्रथमप्रवृत्तिः। चकारात् 'श्लाघनीयगुण' इत्यादिनवभिः प्रतिक्रिया कृता भवति। चकारोनुक्तसमुच्चये। तस्येति सर्वस्य सम्बन्धिनः। सम्बन्धो अंशांशिभावः। पूर्वमिति शूरसेनदेशनिवासात् पूर्वम्। शत्रुघ्नेति तदुक्तं नवमे 'शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसं हत्वा मधुवने चक्रे मथुरा नाम वै पुरी'मिति। आर्थिकमाहुः तत्रत्यमिति स चेति शूरसेनाश्च। स्वनाम्ना जातदेशावासे हेतुमाहुः अनेनेति। मथुरावासकथनेन हेतुना। अत्र महावाक्यार्थेऽध्यायार्थसङ्गमने आकाशवाणीव्यक्तवचनं न भगवदवतारे हेतुरतोऽव्याप्तिः, तन्निवारणाय 'तत्प्रयोजको हेतुश्चे'ति सूत्रेण भगवदवतारे भक्तदुःखरूपहेतुप्रयोजकस्याकाशवाणीव्यक्तवचनस्य हेतुसञ्ज्ञत्वान्नाव्याप्तिरतोहेतुरुपाध्यार्थ इति बोध्यम् ॥ २७ ॥

राजधानीत्यत्र कालभेदेनापीति अयं तत इति पूर्वावधिबोधकं पदं कालत उत्कर्षसमर्पकम्। क्रमस्तच्छब्दार्थः। देशभोगानन्तरम्। देशभोगः कालसाध्य इति कालभेदः। आर्थिकः। 'आर्थिकं तु प्रवक्ष्यामी'ति प्रथमस्कन्धकारिकायाः। अपिना विषयभोगः। विषयभोगो महानिति महती जाता। भेदो विशेषः कालविशेषेण। 'भेदो द्वैवे विशेषे स्या'दिति विश्वः। ततः प्रभृतीति शूरसेनादारभ्य। पूर्वोक्त एव वा तच्छब्दार्थः। यावन्त इति अर्जुनस्य पञ्च पुत्रा उर्वरिताः जयध्वजशूरसेनवृषभमधूर्जिताः, तत्र 'जयध्वजात् तालजङ्घस्तस्य पुत्रशतं त्वभूत्। क्षत्रं यत् तालजङ्घाख्यमौर्वतेजोपसंहृतं तेषां ज्येष्ठो वीतिहोत्र' इति प्रथमपुत्रवंश उपसंहृतः। तदनु शूरसेनो मथुरायां कनिष्ठः। तद्भ्राता वृषभः तद्भ्राता मधुः तद्वंशः। 'वृष्णिः पुत्रो मधोः स्मृतः, तस्य पुत्रशतं त्वासीद् वृष्णिज्येष्ठं यतः कुलं माधवा वृष्णयो राजन् यादवाश्चेति सञ्ज्ञिताः'। तत्र माधवा वृष्णयश्च स्पष्टाः। यादवानाह यदुपुत्रेषु 'यदोः सहस्रजित् क्रोष्टा नलो रिपुरिति श्रुता' इति पद्यार्धोक्तेषु 'यदुपुत्रस्य च क्रोष्टुः पुत्रो वृजिनवांस्ततः स्वातिस्ततो रुशेकुर्वै तस्य चित्ररथस्ततः शतबिन्दुर्महायोगी महाभोजो महानभू'दित्याद्युक्त्वा 'कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुहुस्तथा राष्ट्रपालोथ सृष्टिश्च तुष्टिमानौग्रसेनय' इत्येतावन्तो राजानः कंसपर्यन्तम्। स्वबलादिति कनिष्ठभ्रातृपुत्रत्वात् तथा। खण्डमण्डलेति माथुरशूरसेनयोः खण्डमण्डलं मथुरा। मथुरैवेति एवकारः शूरसेनदेशयोगं व्यवच्छिनत्ति। यादवेति तेन माधवा वृष्णयश्च मथुरायां निवृत्ता इत्युक्तम्। तर्हि मथुरायां शूरसेनाभावप्रसक्त्या 'शूरसेनो यदुपतिर्मथुरामावस'न्नित्यस्य विरोध इत्याशङ्क्याहुः शूरसेनेति। तथा च यदुपतित्वाच्छूरसेनोपि यादवभूभुजामित्यत्रास्तीति। तथा च यादवानां भूभुजः यादवभूभुजस्तेषामिति षष्ठीतत्पुरुषः। न तु सर्वे च ते यादवाश्च ते भूभुजः यादवभूभुज इति कर्मधारयं कृत्वा पुनः सर्वपदेन कर्मधारय इति भावः। ध्रीयत इति डुधाञ् धारणपोषणयोः ह्वादिः उ० अ० अत्र पोषणं तर्पणमित्याशयेन लाघवादुक्तम्। प्रीङ् तर्पणे चु० उ० अ० कर्मणि यक्। राजधानीति कारणाधिकरणयोश्चे'तिसूत्रेण अधिकरणे ल्युट्। दधातेर्धारणमर्थमाहुः निधीयत इति। अनेनेति राजधानीपदेन। उक्तमिति व्यञ्जनयोक्तम्। नित्यपदस्वारस्यं कारिकयाहुः सर्वतत्त्वेष्विति। अष्टाविंशतितत्त्वेषु यो विष्टोन्तर्यामिब्राह्मणेन। भूमावपीति तत्त्वान्तर्गतत्वादिति भावः। क्वचिदेवेति यथा पुंसां हृदि। तद्वन्मथुराहृत्पद्मम्। 'मथुरायां विशेषेण मां ध्यायन् मोक्षमश्नुत' इति। अष्टपत्रं विकसितं हृत्पद्मं तत्र संस्थितमिति गोपालतापिनीयात्। 'यत्र ब्रह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स' इति श्रुतेरेवकारः। स्मृतेति अत्र स्मृता द्वादशस्कन्धे च। वेदवेदान्तसारत्वाच्छ्रुतेति नोक्तम्। असारत्वापत्तेः। तथा च कारणरूपेणास्तिभातिप्रियत्वेन सर्वत्र स्थितावप्यनुप्रविष्टरूपेण मथुरायामेव तिष्ठति। 'त्रयोविंशति-

तत्त्वानां गणं युगपदाविश'दितिवाक्यात्। अस्याः पृथिव्यास्त्रिवृत्कृतत्वेन तस्या भूमेरुपादानतद्द्वारात्राप्यावेशः। यद्यपि जलादिकमप्युपादानं 'तस्माद् वा एतस्मादात्मन आकाशः सम्भूत' इत्यादिश्रुतेः 'तदात्मानᳬ स्वयमकुरुते'तिश्रुतेश्च, तथापि भूम्यंशस्याधिक्यात् तदाविष्टस्यैव स्थितिरुक्तेति भावः। भगवान् हरिरिति पदद्वयस्यार्थमाहुः द्वयं चक्र इति। भगवान् वासुदेवः प्रथमाध्यायेर्थ इति मोक्षं चक्रे इति वक्तव्ये भगवतो हरित्वेनोपस्थिते यत् कर्तव्यं तदाहुः सर्वेषामिति। सप्तमस्कन्धे 'समः सुहृद् ब्रह्मे'त्युक्तेः तथा। 'हरिर्हरति पापानी'ति पापहरणैकदेशः सकलं हितं चक्रे। हरिस्तु सर्वदुःखनिवृत्तिं चक्रे, व्युत्पत्तेः। सर्व एवेति अन्येपि देवकेयाः प्रतिकर्तार इति भावः। सन्मानबाहुल्यादेवकारः। मर्यादेति वसुदेवो मर्यादास्थापकः। वेदत्वात्। 'निगमो वसुदेवोऽभूदि'तिश्रुतेः। 'वेदस्य विद्यमानत्वान् मर्यादापि व्यवस्थितेति पुष्टिप्रवाहमर्यादाग्रन्थवाक्यात्। सर्वथेति सर्वे प्रकारा अन्येषामपि वसुदेववत् प्रतीकारकाणां सत्त्वात्। राजत्वादतो न्यूनपूरणम्। निरूपितमिति सान्निध्यं निरूपितम्। कान्तं क्लीबमितिपक्षे दुःखसम्भवो निरूपितम्। प्रथमपक्षे दुःखस्य सम्भवो यस्मात् तादृशो भगवत्तिरोभावो नित्यसन्निधिदेशेपि चेज्जात इत्यर्थः। द्वितीये तु भगवदवतारो भवत्विति ज्ञापनार्थं दुःखसम्भवो निरूपितमित्यर्थः। प्रसङ्गाद् भक्तिदशायां अर्थान्तरसान्निध्यमपि विवृण्वन्ति स्म श्रीरङ्गादिष्वति। आदिना जगन्नाथविठ्ठलेशवेङ्कटेशाः। 'जगन्नाथे विठ्ठलेशे श्रीरङ्गे वेङ्कटे तथे'ति निबन्धे बहुष्वनियम इति द्योतितम्। नारायणस्येति श्रीरङ्गे शालग्रामलेप्या मूर्तिः। शालिग्रामास्तु जलेशया इति नारायणत्वम्। जगन्नाथे दारुविग्रहः। औषधिविद्या। 'अदो यद्दारु प्लवत' इति श्रुतेर्नारायणत्वम्। 'कृष्णस्तु भगवान् स्वय'मितिवाक्याच्च अवतारः। विठ्ठलेशे महाविष्णुः, महत्त्वं भगवत्सम्बन्धादेवेत्याश्रयनारायणत्वम् । वैङ्कटे वैकुण्ठनाथनारायणसमत्वान्नारायणत्वम्। 'नारायणसमो गुणै'रितिवाक्यात्; सर्वेषु न महतः स्रष्टुः सान्निध्यं किन्त्वण्डसंस्थितस्य महत्स्रष्टृद्वितीयरूपस्येत्याहुः ब्रह्माण्डेति। ननु भक्तिमतां सत्त्वात् कुतो न महतः स्रष्टुः सान्निध्यमत आहुः देशकालेति। देशकालद्रव्यमध्यस्थो नित्यः सन् षडङ्गत्वं यज्ञत्वं च आगतः। किञ्च षडङ्गत्वं षड्भावविकारत्वं यो ब्रह्माण्डरूप्यागतः देशकालादिः तन्मध्यस्थ इत्येकदेशान्वयः। अन्यत्रेति मथुराया मुख्यस्थानभूतायाः अन्यत्र पृथ्वीदेहे देवान्तरदेशेषु ये शालग्रामादयस्तेषु स्थितः सान्निध्यं करोतीत्यर्थः। तेन देशकालमध्यस्थत्वान् न महतः स्रष्टेतिभावः। तथा चाङ्गभूतात् प्रधानभूतोऽधिक इति तेनैव चेन्न सुखं तदा अङ्गभूतात् कुतः सुखं भवतीत्यपि ज्ञापनायेदमुक्तम्। तेन तापिनीयोक्ताभ्यो द्वादशमूर्तिभ्यो न सुखमिति ज्ञापितम्। मथुराकर्णिकास्थानापन्नद्वादशवनस्थत्वात्। किञ्च तर्हि देशान्तरे भगवत्पूजादिकं न स्यादित्याशङ्क्य तदपि व्यवस्थापयन्ति स्म देशेति। तीर्थेभ्योन्यदेशेषु 'देशः कालः पृथग् द्रव्य'मितिवाक्यात् देशादिषडङ्गरूपो यो भगवान् 'यज्ञो वै विष्णु'रितिश्रुतेर्विष्णुः स शालग्रामादिषु स्थितः। ष्ठा गतिनिवृत्तौ। तिरोभावरहिते नित्यसन्निहित इत्यर्थः। अस्थिरायां मूर्तौ विसर्जनविकल्पादाविर्भावतिरोभाववान् इति शालग्रामेत्युक्तम्। शालिग्रामशब्दोपि। आदिपदेनोक्तश्लोकैकदेशादिषु देश उक्तः। एकादश्यादिकाले, तुलस्यादिद्रव्ये, शामादिगुणवति कर्तरि, गोपालादिमन्त्रे, पूजादिकर्मणि, तत्तद्रूपो भगवान् विष्णुः स्थित इत्युक्तम्॥ २८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किं बहुना? यया सर्वमपि जगन्मोहितं सापि प्रभुणा भगवता आदिष्टा सती स्वांशेन मोहनोच्चाटनादिना कार्यार्थे भगवल्लीलासम्पादनार्थं सम्भविष्यति यशोदायामवतरिष्यतीत्यन्वयः। कार्यं तु देवकीगर्भसङ्कर्षणयशोदामोहनवसुदेवविमोचनभगवत्प्रेयसीपत्यादिमोहनादिरूपं तत्तल्लीलायां व्यक्तं भविष्यति। तत्संपादने तस्याः कथं सामर्थ्यं तत्राह– भगवतीति। भगवता दत्तैश्वर्यादिषड्गुणयुक्तेत्यर्थः। तत्र हेतुमाह—विष्णोर्मायेति। भगवतो माया लीलासम्पादिकाऽन्तरङ्गा शक्तिरित्यर्थः॥ २५॥ विभुस्तदाज्ञापने समर्थो ब्रह्मा इत्येवममरगणानादिश्य महीं च गीर्भिर्वचोभिराश्वास्य परमं सर्वलोकोत्कृष्टं स्वधाम सत्यलोकं ययौ॥ देवाद्याज्ञापनसामर्थ्ये हेतुमाह—प्रजापतीनां मरीच्यादीनां पतिरिति। भूम्याश्वासनं तु "अहो तव भाग्यम्, भगवत्पादैः सम्भूषिता भविष्यसि शोकं च मा कार्षीः" इति बहुधा बोध्यम्। अतएव बहुवचनम्॥ २६॥ एवं भूमिदुःखं तदाश्वासनं चोक्तम्। देवक्या अपि तद्वक्तुं तत्प्रसङ्गकथामाह—शूरसेन इति। यादवानां पतिः, सहस्रार्जुनपुत्रा ये पञ्चोर्वरितास्तेषां द्वितीयः शूरसेनो मथुरां पुरीमावसन्। माथुरान् तत्सम्बन्धिनः शूरसेनान् स्वेन वासितांश्च विषयान् देशान् बुभुजे। तद्देशैश्वर्यभोगं कृतवानित्यर्थः॥ २७॥ ततो यादवस्य शूरसेनस्य निवासात् शूरसेनप्रभृतिकंसपर्यंता ये यादवेषु भुभुजः खण्डमण्डराजानस्तेषां सा मथुरा राजधानी राजा धीयते पट्टाभिषिक्तः क्रियते यस्यां सा मुख्यस्थानमभूदित्यन्वयः। अनेन मथुराया राजलक्ष्म्या नित्यं स्थानत्वं सूचितम्। तत्र हेतुमाह—यत्रेति। यत्र मथुरायां हरिर्नित्यं सन्निहितो वर्तते। अनेनैव मथनं मथूभावे क्विप् उद्भवार्थकं उसिध्मादिभ्यश्चेति मत्वर्थीयो लच्प्रत्ययः। मथा उद्भूतं सारमस्यामस्तीति नामनिरुक्तिरपि ज्ञेया। 'मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा॥ तत्सारभूतं यद्यस्यां मथुरा सा निगद्यते' इति गोपालतापिनीश्रुतिवचनात्। एतदर्थस्तु येन ब्रह्मज्ञानेन वाशब्दाद्भक्तियोगेन वा सर्वं जगन्मथ्यते बाध्यते तयोर्ज्ञानभक्त्योः सारभूतं फलं यत्प्रसिद्धं श्रीकृष्णाख्यं, यस्यां नित्यं सन्निहितं भवति सा मथुरा निगद्यत इति। अन्यान्यपि बहूनि मथुरामाहात्म्यप्रतिपादकानि पुराणवचनानि सन्ति, तानि विस्तरभयान्न लिखितानि इति ज्ञेयम्॥ २८॥

अन्वितार्थप्रकाशिका

विष्णोरिति । यया जगत् संमोहितं सा भगवती विष्णोर्माया प्रभुणा तेन भगवता आदिष्टा सती अंशेन कलया भगवदिच्छारूपेण वा युक्ता । कार्यार्थे देवकीगर्भसंकर्षणयशोदामोहनादिकार्यार्थे यशोदायां संभविष्यति ॥ २५ ॥ इतीति । प्रजापतीनां पतिर्विभुः ब्रह्मा इति प्रागुक्तवचनेन अमराणां गणान् आदिश्य महीं गीर्भिः आश्वास्य च परमं स्वस्य धाम मेरुस्थं स्थानं ययौ ॥ २६ ॥ शूरसेन इति ॥ पुरा यदूनां पतिः शूरसेनो नाम राजा मथुरां पुरीम् आवसन् मथुरायां वसन् माथुरान् मथुरामण्डलसम्बन्धिनः शूरसेनाख्यांश्च विषयान् देशान् बुभुजे ॥ २७ ॥ राजधानीति ॥ यस्यां मथुरायां भगवान् हरिः नित्यं सन्निहित एव वर्त्तते । सा मथुरा ततः शूरसेननिवासकालादारभ्य सर्वे यादवाः यदुवंशजाः भूभुजः राजानस्तेषां राजधानी अभूत् । ययातिशापेऽपि शूरसेनादीनां महाप्रभावत्वेन राजत्वम् ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु दाशरथित्वेन भगवतः प्रादुर्भावे लक्ष्मणरूपशेषसाहचर्यमभूदत्र जन्मनि तु वसुदेवगृहे साक्षादित्यनेन केवलस्य तस्य कथं प्रादुर्भावोक्तिरित्याशङ्कापनोदायाह ॥ वासुदेवेति ॥ वासुदेवकला वासुदेवस्यांशभूतः, सहस्राणि वदनानि यस्य सः स्वेन भगवता सहैव राजते इति स्वराट् । अनन्तोऽपारबलादिः, देवः स्वयं शेषः, हरेः प्रियचिकीर्षया भगवतः सहायताविधानेन प्रियं कर्त्तुमिच्छयेत्यर्थः । अग्रतः प्रथमत एव, भविता प्रादुर्भविष्यति ॥ २५ ॥ इदानीं देवक्युदरतस्तद्गर्भं संकृष्य तस्य रोहिण्युदरावस्थापनेन देवकार्यसंपादनार्थं सहायान्तरं वक्ति ॥ विष्णोर्मायेति ॥ भगवानुपास्यत्वेन विद्यतेऽस्या इति भगवती, विष्णोः शक्तिरिति शेषः । यया, जगत् संमोहितं, तथाभूता, माया दुर्गा, प्रभुणा विष्णुना, आदिष्टा कृताज्ञा सती, कार्यार्थे देवकीगर्भसंकर्षणयशोदामोहनादिकार्यार्थे, यशोदायामिति शेषः । अंशेन भगवद्दत्तैश्वर्ययुक्ता सतीत्यर्थः । संभविष्यति । एवं सति रोहिणीतोऽनन्तः प्रागवतीर्य विष्णोः साहाय्यं करिष्यत्येवेति भावः ॥ २६ ॥ इतीति । इत्येवं विभुः, प्रजापतिपतिः प्रजापतीनां दक्षादीनामपि पतिर्ब्रह्मा, अमरगणान् प्रति, आदिश्य, स्वं प्रति भगवता समाधौ यदुक्तं तदमरान् कथयित्वेत्यर्थः । महीं पृथिवीं च, गीर्भिः आश्वास्य सान्त्वयित्वा, परमं श्रेष्ठं, स्वधाम स्वलोकं ययौ ॥ २७ ॥ तदेवमवतारनिमित्तमुपपादितमथावतारप्रकारं पितुर्गेहाद्व्रजगमननिमित्तं च वर्णयितुं तदुपोद्घातरूपमितिहासमाह शूरसेन इत्यादिना यावदध्यायसमाप्ति । शूरसेन इति । पुरा पूर्वकाले, यदूनां पतिः, शूरसेनः देवमीढसुतो राजा, मथुरां पुरीं, आवसन् मथुरायां पुरि निवसन् सन्नित्यर्थः । माथुरान् मथुरासंबन्धिनः, शूरसेनान् शूरसेनसंबन्धिनश्च विषयान् देशान्, बुभुजे । तत्रस्थभोगान् बुभुजे इत्यर्थः । न तु केवलं पालनं चक्रे इति भावः । 'भुजोऽनवने' इत्यात्मनेपदप्रतिषेधात् ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विष्णोरितिः १०.१.२५.

दुर्मायिनोऽरिनिवहस्य पराजयः स्यान्निर्मायिकेन हरिणा कथमित्युदीर्यताम् ।
शङ्कां प्रमार्ष्टुमवदत् स हरिः स्वसारमादिष्टवानुचितकार्यकृते स्वमायाम् ॥ ३४ ॥

शूरसेनेतिः १०.१.२७.

श्रीमन्महाविवाहाभिव्यक्ताविर्भावहेतुकः । प्रक्रान्तो मुनिना युक्तं तद्विवाहकथाक्रमः ॥ ३५ ॥

कृष्णप्रिया

श्रीशुकदेवजी कहते हैं—परीक्षित् ! प्रजापतियों के स्वामी भगवान् ब्रह्माजी ने देवताओं को इस प्रकार आज्ञा दी और पृथ्वी को समझा-बुझाकर ढाढ़स बँधाया । इसके बाद वे अपने परम धाम को चले गये ॥ २६ ॥ प्राचीन काल में यदुवंशी राजा थे शूरसेन । वे मथुरापुरी में रहकर माथुरमण्डल और शूरसेनमण्डल के राज्य का शासन करते थे ॥ २७ ॥ उसी समय से मथुरा ही समस्त यदुवंशी नरपतियों की राजधानी हो गयी थी । भगवान् श्रीहरि सर्वदा वहाँ विराजमान रहते हैं ॥ २८ ॥

तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः । देवक्या [1]सूर्यया सार्धं प्रयाणे रथमारुहत् ॥ २९ ॥
उग्रसेनसुतः [2]कंसः स्वसुः प्रियचिकीर्षया । रश्मीन् हयानां [3]जग्राह रौक्मै रथशतैर्वृतः ॥ ३० ॥
चतुःशतं पारिबर्हं गजानां हेममालिनाम् । अश्वानामयुतं सार्धं रथानां च त्रिषट्शतम् ॥ ३१ ॥
दासीनां सुकुमारीणां द्वे शते समलंकृते । दुहित्रे देवकः प्रादाद्याने [4]दुहितृवत्सलः ॥ ३२ ॥

---

[1] भार्यया–विज. [2] कंसो भगिन्याः–वीर. [3] जगृहे–वीर. विज. [4] याने दुहितृ–श्री. वंशी. जीव विश्व. यानैर्दुहितृ–वीर. ।

कर्दमक्षमा

अन्वयः—तस्यां तु कर्हिचित् कृतोद्वहः शौरिः वसुदेवः सूर्यया देवक्या सार्धं प्रयाणे रथम् आरुहत् ॥ २९ ॥ स्वसुः प्रियचिकीर्षया उग्रसेनसुतः कंसः रौक्मैः रथशतैः वृतः हयानां रश्मीन् जग्राह ॥ ३० ॥ दुहितृवत्सलः देवकः दुहित्रे हेममालिनां गजानां चतुःशतम् अश्वानाम् अयुतं सार्धं रथानां त्रिषट्शतं च सुकुमारीणां दासीनां समलंकृते द्वे शते यानैः (सार्धं) पारिबर्हं प्रादात् ॥ ३१–३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सूर्यया नवोढया । प्रयाणे प्रयाणार्थम् ॥ २९ ॥ रश्मीन्प्रग्रहान् ॥ ३० ॥ पारिबर्हमुपस्करम् ॥ ३१–३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सूर्यया "सूर्या स्यादौषधीभेदे सूर्यभार्यानवोढयोः" इति धरणिदेवः । तस्यां मथुरायाम् । कृतोद्वहः कृतविवाहः ॥ २९ ॥ रश्मीन्प्रग्रहान् "रश्मिः पुमान् दीधितौ च पक्ष्मप्रग्रहयोरपि" इति मेदिनी । विवाहकाले रथरश्मिग्रहणमत्यंतबंधूनां कार्यमिति दर्शनार्थं रश्मिग्रहणं कृतवानिति व्यज्यते । रौक्मैः सौवर्णैः । 'रुक्मं तु कांचने लोहे'' इति मेदिनी ॥ ३० ॥ विवाहकाले दुहित्रे यद्दीयमानं राजयोग्यं धनं तत्पारिबर्हम् । "पारिबर्हो राजयोग्यदेयद्रव्यपरिच्छदे" इति मेदिनी । अयुतं दशसहस्राणि । 'अयुतं दशसाहस्रे विविक्ते त्रिषु वैष्णवे" इति धरणिः । त्रयश्च षट् च त्रिषट् तानि शतानि यत्र पारिबर्हे स तथा तम् । यद्वा—त्रिगुणितानि षट् त्रिषट् तानि शतानि यत्रेति वा नवशतान्यष्टादशशतानि वेति ज्ञायते ॥ ३१ ॥ सुकुमारीणां मृद्वीनाम् 'सुकुमारे मृदौ त्रिषु' इति मेदिनी । देवकः कंसपितृव्यः । याने स्वगृहात्कन्यागमने ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्रैव कंसकारागारे श्रीभगवतो जन्म वक्तुं तत्प्रसङ्गमारभते तस्यान्त्वित्यादिना । तु भिन्नोपक्रमे तस्यां मथुरापुर्यां कर्हिचित् चिरकाले प्रयाणे विवाहानन्तरं निजगृहे गन्तुम् ॥ २९ ॥ तत्रापि । उग्रसेनस्य सुत इति निकटस्वसृत्वज्ञापनार्थं तच्च पुनरुक्तनिन्दासूचनार्थं जगद्धिंसया कंसनाम्ना प्रसिद्धोऽपि कसि धातोः शातनार्थत्वात्, हयानां रश्मीन् जग्राह स्वयमेव सारथ्यमकरोदित्यर्थः । जगृहे इति क्वचित्पाठः स्वसुर्देवक्याः भग्न्या इति पाठे स एवार्थः तथा च द्विरूपकोशे "भग्नी च भगिनी चैव" इति तस्याममुष्य महास्नेहः सूचितः । एतदादिकं सर्वं कंसस्य वक्ष्यमाणदुश्चेष्टयाऽत्यन्तखलत्वज्ञापनार्थम् ॥ ३० ॥ किञ्च तादृशमहोत्सवे तादृशं कौर्यं न किल सम्भवेदिति विवाहोत्सवं त्रिभिर्वर्णयन् आदावुपस्करप्रदानमाह—चतुरिति युग्मकेन । हेम्ना माला माल्यं पङ्क्तिर्वा तद्वताम् एतदग्रेप्यनुवर्त्यं त्रिषट्शतं तत्तत्प्रकारभेदेन समवर्गत्रयात्मकमष्टादशशतमित्यर्थः ॥ ३१ ॥ सुकुमारीणां नवयौवनानामित्यर्थः । सम्यक् विचित्रोत्तमवस्त्रभूषणादिना यथाविध्यलङ्कृते प्रकर्षेण परमश्रद्धादिना अदात्, याने प्रयाणसमये यानैरिति पाठे शिबिकादिभिर्विशिष्टे तान्यारूढे इत्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कदाचित्तस्यां पुर्यां शौरिः शूरस्य सुतो वसुदेवः कृतविवाहः देवक्या सूर्यया नवोढयो भार्यया सह प्रयाणे स्वगृहं प्रति प्रयाणे निमित्ते रथमारुरोह ॥२९॥ तत उग्रसेनस्य सुतः कंसः भगिन्याः देवक्याः प्रियं कर्तुमिच्छया स्वयं रौक्मैर्हेममयैः रथानां शतैः परिवृतो भगिनीरथवाहानामश्वानां प्रग्रहान् जगृहे ॥ ३० ॥ तदा देवक उग्रसेनस्य भ्राता दुहितृवत्सलः हेतुगर्भमिदं दुहितृवत्सलत्वाद्दुहित्रे देवक्यै पारिबर्हमुपायनं ददौ, पारिबर्हं दर्शयति, हेममालालङ्कृतानां गजानामयुतं तथाविधानामश्वानां सार्द्धमर्द्धेन पञ्चसहस्रया सहितमयुतं रथानां तु त्रिषट्शतम् अष्टादशशतञ्च यानैर्गमनसाधनैः सह दासीनां सुकुमारीणां समलङ्कृते द्वे शते ॥ ३१–३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ततः किमत्राह—तस्यामिति ॥ २९ ॥ विवाहकाले रथहयानां कर्णिकाग्रहणे अत्यन्तं बन्धुना भाव्यमिति दर्शयितुं तद्ग्राहिणमाह—उग्रसेनसुत इति ॥ ३० ॥ विवाहकाले दुहित्रे यद्दीयमानं धनं तत्पारिबर्हं नाम ॥ ३१–३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सूर्यया नवोढया प्रयाणे विवाहोत्तरदिवसे निजगृहं प्रयातुम् ॥२९॥ भग्न्य इत्यपि पाठः भग्नी भगिनीश्चेति द्विरूपकोशः रश्मीन् प्रग्रहान् ॥ ३० ॥ पारिबर्हम् उपस्करम् ॥ ३१ ॥ याने प्रयाणसमये ॥ ३२–३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृत उद्वाहो येन सः सूर्यया नवोढया सार्द्धं रथमारुहत् ॥ २९ ॥ रश्मीन् प्रग्रहान् जग्राह अग्रहीत् सौत्यं कृतवानित्यर्थः । पारिबर्हमुपस्करं दुहित्रे देवकः प्रादादिति द्वयोरन्वयः ॥ ३०-३२ ॥

श्रीसुबोधिनी

तस्या अवस्थोत्कर्षमाह तस्यामिति । तुशब्दो दुःखपर्यवसानेन भगवत्कृतसुखव्यावृत्त्यर्थः । सर्वानंशान् सर्वतो भगवान् स्वावतारार्थमाचकर्षेतिज्ञापनार्थं वा तुशब्दः । **कर्हिचित्** कस्मिंश्चित्काले पूर्वोक्ते वा । सुमुहूर्तादिकं न भवतीति कर्हिचिदित्युक्तम् । **शौरिर्वसुदेवः** शूरस्य पुत्रः । अन्येपि वसुदेवाः सन्तीति पितृनाम्ना तन्निवृत्तिः । वसुदेवभ्रातरोपि बहव इति वसुदेवपदम् । **कृत उद्वह** उद्वाहो येन **देवक्या सूर्यया** नवोढया सार्धं स्वगृहप्रयाणार्थं श्वशुरदत्तं **रथमारुहत्** । विवाहोत्सवसमयो भर्तृसान्निध्यं चोत्तमावस्था स्त्रियाः । **देवक्या सूर्ययेति** स्वत उत्कर्ष उक्तः । भर्तृप्राधान्यमपि पतिव्रतायामुत्कर्षहेतुः । यद्यपि देवको ज्येष्ठस्तथापि मर्यादाराज्यं न भवतीति उग्रसेन एव राजा कंसो वा ।।२९।। मुख्य एव व्यवहारे सम्बन्धहेतुर्लोकप्रसिद्धः अत उग्रसेनपुत्रोपि कंसो देवकपुत्र्या देवक्या भ्रातृकार्यं कृतवानित्याह **उग्रसेनसुत** इति । **स्वसुर्भगिन्या देवक्याः** सम्माननरूपप्रियचिकीर्षया स्वयं **हयानां रश्मीन् प्रग्रहान् जगृहे** सूतो जात इत्यर्थः । केवलेन प्रतिष्ठा न भवतीति विशेषणम् । **रौक्मैः** सुवर्णपरिकरैः **रथशतैः**रनेकशतरथैर्वृतो वेष्टितः । अनेन वसुदेव एव मुख्यो राजा कृतः । स्वयमपि दासभावं प्राप्त इति महत् सम्माननम् । अन्यत उत्कर्ष उक्तः ॥ ३० ॥ पितृकृतं द्रव्यकृतमुत्कर्षमाह **चतुःशतमिति द्वाभ्याम्** ।३१।। क्षत्रिया हि चतुरङ्गिणीं सेनां विवाहे पारिबर्हं प्रयच्छन्ति वधूवरयोः सन्तोषार्थम् । तत्र पदातीनां स्थाने कन्याप्रीत्यर्थं **दास्यो** दत्ताः । **हेम्नो माला येषां गजानाम्** । अश्वानां पञ्चदश सहस्राणि **रथानां त्रिषट्शतमष्टादशशतम्** ॥ ३२ ॥ दासीनां सखित्वज्ञापनाय **सुकुमारत्वमलङ्करणं** चोक्तम् । दास्यः कन्यायै केवलं दत्ता न तद्भर्त्रे । अतो न यथेष्टं तेन विनियोगः कर्तुं शक्यः । ननु देवक्या एव विवाहे कथमेतावद्दत्तवानित्याशङ्क्याह **देवक** इति । अत्यन्तमयं **देवो** भगवानत्रावतरिष्यतीतिज्ञानयुक्तः । ता अपि दास्यो **यानैर्दोलाभिः** सहिताः । तासां तथाकरणे हेतुर्दुहितृवत्सल इति । स हि दुहितृषु वात्सल्ययुक्तः । तासामपि कन्यात्वाद्देवकीवाक्याद्वा तथा कृतवानित्यर्थः ॥ ३३ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

तस्यां तु कर्हिचिदित्यस्य विवरणे—**सर्वानित्याद्याचकर्षेत्यन्तम्** । **पूर्वसान्निध्ये** सति भक्तदुःखाभावे स्वावतारो न सम्भवतीति तदर्थं तत्सान्निध्यं दूरीकृतवान् । अग्रे च तत्प्रयोजनाभावात् स्वस्मिन्नेव लीनं कृतवानित्यर्थः ॥ २९ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तस्यां त्वित्यत्र—पूर्वोक्ते वेति । यस्मिन् भगवान् स्वावतारार्थं सर्वानंशानाचकर्ष तस्मिन् वेत्यर्थः ॥ २९ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तस्यां त्वित्यत्र—तु शब्दस्य द्वितीयपक्षे **'कर्हिचिदि'**त्यनेनान्वयो ज्ञेय इत्याशयेनाहुः **पूर्वोक्ते वेति** सर्वांशाकर्षणकाल इत्यर्थः ॥ २९ ॥ **उग्रसेनसुत** इत्यत्र—**रथशतै**रितिबहुवचनस्यार्थमाहु**रनेकशतेति** ॥ ३० ॥

बभ्रुसुबोधिका

तस्यां त्वित्यत्र भगवत्कृतेति नित्यसन्निहितभगवत्कृतेत्यर्थः । दुःखपर्यवसानं भगवत्प्राकट्यार्थमैच्छिकम् । तस्यां नित्यसन्निहितायां तु दुःखपर्यवसानेनेत्यर्थात् । एवं वेदान्तीयो भगवान् मानसीनोग्रे वक्तव्यः । वेदीयोत्र 'कृष्णद्युमणिनिम्लोच' इति तृतीयस्कन्धोक्तद्युमणिधर्मेण मानसीनमाहुः सर्वानिति । हरित्वेनाविर्भावात् पूर्वं कृष्ण उक्तः । हरिः शास्त्रप्रतिपाद्यः कृष्णोकारक इति शास्त्रप्रतिपाद्यत्वार्थं कृष्णस्य । योगेन हरिर्द्युमणिरपि अस्तं गच्छन् सर्वानंशानाकृष्यास्तं गच्छति । आरण्यके प्रसिद्धम् ।* भगवत्कृतसुखव्यावृत्तेस्त्वर्थत्वान् नित्यसन्निहितभगवतो हरेः सर्वानित्यर्थः । अंशान् । षड्गुणान् । भगवतः निरोधकर्तृत्वं हरेः । षड्गुत्कटदोषाकर्षार्थमाहुः सर्वत इति । गुणदोषेषु समत्वमुक्तम् । समत्वात् सुहृत्त्वाच्च ब्रह्मणः । स्वावतारार्थमिति । अयमर्थः । समाधिभाषापोषिकेन्यमतभाषा लौकिकी भाषा वा । अत्र 'निष्कलं निष्क्रियं शान्त'मित्यादिश्रुत्युक्तम् । सिद्धान्ते विरुद्धसर्वधर्माश्रयम् । तत्र ब्रह्मणि 'कृष्णस्तु भगवान् स्वय'मिति वाक्यात् 'कृष्णो ब्रह्मैव शाश्वत'मिति श्रुतेश्च परिदृश्यमानयावद्धर्मवैशिष्ट्येन स्वावतारार्थम् । तथा चान्यमतभाषा लौकिकी भाषा ताभ्यां भगवत्कृतसुखव्यावृत्त्यर्थकस्तुशब्द इति भावः । तदेतदाहुष्टिप्पण्यां सर्वानित्यादीत्यादीनाम् । लीनं कृतवानिति सान्निध्यं लीनं कृतवान् । अत एवा'वजानन्ति मां मूढा मानुषीं तनुमाश्रित'मिति गीता । सर्वाकर्षवत्यां स्वावतारार्थं भक्तदुःखाभावसत्तावत्यां 'तस्या'मित्येवम् । एवं त्वर्थमुखेन पूर्वश्लोकसङ्गतिबोधके 'तस्या'मितिपदे विशेषणे उक्ते । सुबोधिन्याम् । कर्हिचिदिति तस्यामित्यस्य त्वर्थे आधाराधेयभावः सम्बन्धः । भगवत्कृतसुखव्यावृत्तिमत्यां तस्यां

मथुरायां स्वसर्वांशाकर्षवत्यां च कर्हिचित् किमः प्रश्नवाचकात् कालेर्हिल् । कुत्सा द्योत्या । तथा च विश्वः 'किं प्रश्नेपि च कुत्साया'मिति । चित् असाकल्येऽव्ययम् । तथा चासकले कस्मिंश्चित्काले विशेषणविशेष्यभावे कामचारो वा । कर्हि च चिच्च तयोः समाहारः कर्हिचित् । पूर्वोक्ते वेति सर्वांशाकर्षणकाले । असाकल्यं किमो द्योत्यायां कुत्सायां चिदव्ययवाच्यायां सुमुहूर्तादिराहित्यमित्याहुः सुमुहूर्तादिकमिति । साकल्यं सुमुहूर्ततदभावाभ्यां काले भवति । सुमुहूर्ताभावमात्रादसाकल्यम् । एतदेवाहुः इति कर्हिचिदित्युक्तमिति । अन्येपीति अष्टवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य इति । पितृनाम्नेति शूरो वसुदेवपिता, शूरस्यापत्यं शौरिः । 'अत इञ्' । प्रकृतिमात्रेण पितृनाम्ना । तन्निवृत्तिरिति विशेषणानां व्यावर्तकत्वादितिभावः । एवं विशेषणत्रयमुक्त्वा विशेष्यवसुदेवपदकृतमाहुः वसुदेवभ्रातर इति । देवभागादयः । 'देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत्, स तस्यां जनयामास दशपुत्रानकल्मषान् । वसुदेवं देवभागं देवश्रवसमानकम् । सृञ्जयं श्यामकं कंकं शमीकं वत्सकं वृक'मिति नवमस्कन्धे । उद्वह इति । षोडशसंस्कारेषु प्रथमः । तेन नान्यसंस्कारोपादानम् । नवोढयेति न वाचा सा ऊढा नवोढा विवाहिता तया । स्वगृहेति पठोनीति लोके तद्दिने । श्वशूरेति देवकदत्तम् । स्वत इति 'पितृनाम्ना तु मुख्यत्व'मितिवाक्यात् । अन्यथा देवकीपदसन्ततिप्रयोजनकं स्यात् । अवस्थोत्कर्षस्य वाक्यार्थत्वे इदमेव हेतुः । देवक्येति सहार्थेऽप्रधान इति तृतीयार्थप्राप्तमर्थमाहुः भर्तृप्राधान्यमिति । अनेन स्वत उत्कर्ष उक्तः देवक्येतिपदेन देवको ज्येष्ठ इत्युत्कर्षः । देवानां स्थानं ब्रह्मविद्या चेत्यप्युत्कर्षः ॥ २९ ॥

उग्रसेनसुत इत्यत्र । व्यावर्तकं हि विशेषणम् । उग्रसेनसुतविशेषणव्यावर्त्याभावात् कंसकृतसुखव्यावर्तकोत्कर्षबोधनाय कंसविशेषणमित्याहुः उग्रसेनसुत इत्यादि । कंसो वेति अस्यां कोटौ बीजं रङ्गादावुत्कर्षप्रतीतिः कंसस्य । एतदेवाहुः मुख्य एवेति । राज्येव व्यवहारो रंगादौ उपवेशनादिस्तस्मिन् । सम्बन्धश्चासौ हेतुरिति कर्मधारयः । लोकप्रसिद्ध इति पुत्रत्वव्यवहारलक्षणः लोकप्रसिद्धो ग्राह्यः, न त्वेकत्वलक्षणः । 'आत्मा वै पुत्रनामासि संजीव शरदः शत'मितिश्रुत्युक्तः । अन्यजे व्यभिचारात् । अत इति संदिग्धराजत्वात् । राजा चेन् कंसो न गृह्णीयाद्रश्मीन् । अतो अभिमानेन जगृहे, न तु सेवकवत् । 'स्वसुः प्रियचिकीर्षये'तिपाठो व्याकृतः, 'भगिन्याः प्रियकाम्यये'ति पाठे कमनेव कामा स्वार्थे ष्यञ् काम्या । तयेच्छया । जगृह इति आत्मनेपदेन विवरणं ग्रहणस्य फलम्, सन्मानसुखं, तस्य कंसगामित्वात् । देवक्याः स्त्रिया ब्रह्मविद्यात्वेन सुखदुःखसाम्यात् । अतो जग्राहेत्यत्र छान्दसं परस्मैपदमितिभावः । केवलेनेति रथोपविष्टेन । विशेषणमिति अनेकशतेति 'विंशत्याद्याः सदैकत्व' इत्यस्यावयवापेक्षया प्राप्तबहुत्वनिषेधपरत्वादवयविनि शते बहुत्वमन्वेति । अनेकत्वावच्छिन्नं यत् शतं तत् समवेतकानेकरथैरित्यर्थः । एवं च 'रथशतै'रित्यत्र रथानां शतैरिति षष्ठीतत्पुरुषे 'विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययो'रित्यमरात् । शतशब्दस्य सङ्ख्येयवाचकत्वे लक्षणापत्त्या 'लक्षणां नैव वक्ष्यामी'ति प्रतिज्ञाविरोधः । सङ्ख्यावाचकत्वे एकवचनान्ततापत्तिरतो रथशतशब्दस्य समासशक्त्यार्थे वक्तव्ये 'रौक्मै'रिति विशेषणस्यासङ्गतत्वापत्तिरतोनेकं शतं तद्युक्तैरथैरिति मध्यमपदलोपी समासः । 'उपसर्जनं पूर्वं' समासशास्त्रे उपसर्जनं प्राक् प्रयोक्तव्यमिति शतशब्दस्य पूर्वनिपाते प्राप्ते 'छन्दसि विभाषे'तिसूत्रे विभाषेतियोगविभागादु'पसर्जनं पूर्व'मिति सूत्रस्य वैकल्पिकत्वाद् रथशतैरित्युपपन्नमितिभावः । दासभावं प्राप्त इति अभिमानेनेति बोध्यम् । अपेक्षितसमर्पणं वा दासभावः । अन्यत इति कंसतो देवक्या उत्कर्षः उक्तः ॥ ३० ॥

चतुःशतमित्यत्र द्रव्यत उत्कर्षे श्लोकद्वयम् । तस्याभासमाहुः पितृकृतमिति । द्रव्यकृतमित्यस्य व्याख्यानम् । आहेति द्वाभ्यामाह । चतुरङ्गिणीमिति चत्वार्यङ्गानि गजाश्वरथपदातयो यस्याः सन्ति सा चतुरङ्गिणी ताम् । पारिबर्हमिति परिबर्हं तु दाने राजार्हं वस्तु । स्वार्थेण । प्रयच्छन्तीति दाण दाने । तस्य यच्छादेशः । चत्वार्यङ्गान्याहुः तत्र पदातीनामिति । 'अयुतं सार्ध'मित्यस्यार्थः । पञ्चदशसहस्राणीति अयुतं दशसहस्रं तत् अर्धेन पञ्चसहस्रेण सह वर्तमानं सार्धम् । त्रिषट्शतमित्यत्र त्रिकृत्वः षट् त्रिषट् । कृत्वसुचो लोपः । त्रिषट् च तत् शतं च त्रिषट्शतमित्याशयेनाहुः अष्टादशशतमिति ॥ ३१ ॥

दासीनामित्यत्र सखित्वेति देवकीसखित्वज्ञापनाय । तेनेति भर्त्रा वसुदेवेन । स्वार्थिककप्रत्ययार्थमाहुः अत्यन्तमिति । देव एव देवकः । असुरयोगव्यवच्छेदकेवकारः । दिवु क्रीडेत्यत्र धातुपाठे, द्युत्यर्थो दिव् तस्य प्रयोगोत्र चन्द्रवंश्यत्वादित्याहुः भगवानत्रेति । आहुकात्मजौ 'देवकश्चोग्रसेनश्चे'ति न पितृकृतदेवकत्वं किन्तु चन्द्रकृतमेव । 'चत्वारो देवकात्मजाः । देववानुपदेवश्च सुदेवो देववर्धन' इति देवकीसन्माननं भगवानत्रावतरिष्यतीति ज्ञानादेव । तासामिति दासीनाम् । वात्सल्येति स्नेहो वात्सल्यं तेन युक्तः ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्यां तु मथुरायां कृत उद्वहो विवाहो येन स वसुदेवः सूर्यया नवोढया भूषणादिशोभातिशयेन प्रकाशबहुलया देवक्या सार्धं सह कर्हिचित् एकदा प्रयाणो प्रयाणार्थं रथमारुहत् । अन्यवसुदेवव्यावृत्त्यर्थमाह—शौरिरिति । शूरपुत्रः । वसुदेवभ्रातृव्यावृत्त्यर्थमाह—वसुदेव इति ॥ २९ ॥ उग्रसेनस्य सुतः कंसः स्वसुः भगिन्याः देवक्याः प्रियचिकीर्षया सन्मानाधिक्यप्राकट्येन तां प्रसादयितुं स्वयं हयानां रश्मीन् प्रग्रहान् जगृहे । वसुदेवं देवकीं च मुख्यस्थान उपवेश्य स्वयं सूतो जात इत्यर्थः । केवलेन तेनैवं स्थितेनापि शोभातिशयो न भवति राजपुत्रत्वादिति रौक्मैः सुवर्णपरिकरै रथशतैरनेकशतरथैर्वृतः वेष्टितः ॥ ३० ॥ तदा च याने

प्रयाणे निमित्ते देवकः दुहित्रे देवक्यै पारिबर्हमुपायनं प्रादादिति द्वयोरन्वयः । दाने हेतुमाह–दुहितृवत्सल इति पारिबर्हं दर्शयति–हेममालालङ्कृतानां गजानां चतुःशतम् । तथाविधानामश्वानां सार्धयुतं पञ्चदश सहस्राणि । तथाविधरथानां त्रिषट्शतमष्टादशशतम् ॥ ३१ ॥ सुकुमारीणां नवयौवनानां दासीनां समलङ्कृते द्वे शते ॥ ३२ ॥

अन्वितार्थप्रकाशिका

तस्यामिति ॥ तस्यां मथुरायां कर्हिचित् काले कृतोद्वहः कृतविवाहः शौरिः शूरसुतो वसुदेवः प्रयाणे विवाहोत्तरदिने स्वगृहं प्रति प्रयाणार्थं सूर्यया नवोढया देवक्या सार्द्धं रथम् आरुहत् "कमद्रुहिभ्यः०" इति छान्दसश्च्लेरङ् ॥ २९ ॥ औग्रसेनेति ॥ रौक्मैः स्वर्णभूषितै रथानां शतैर्वृतः उग्रसेनस्य सुतः कंसः स्वसुर्देवक्या भग्न्या इत्यपि पाठः । "भग्नी भगिनी च" इति द्विरूपकोशः । प्रियचिकीर्षया हयानां रश्मीन् प्रग्रहान् जग्राह स्वयं सारथिरभूत् । इत्यादि सर्वं तस्य सद्यः स्नेहत्यागेन खलत्वसूचनाय ॥ ३० ॥ चतुःशतमिति द्वयम् । दुहितृवत्सलः देवकः देवक्याः पिता याने देवकीयानसमये दुहित्रे देवक्यै हेममालिनां स्वर्णमालाभूषितानाम् एतच्च गजादित्रयेऽन्वेति । गजानां चतुर्गुणं शतं चत्वारि शतानीत्यर्थः । अश्वानां सार्द्धम् अयुतं रथानां च त्रिगुणाः षट् त्रिषट् त्रिषड्गुणं त्रिषट्शतम् अष्टादशशतानीत्यर्थः । सम्यगलंकृते सुकुमारीणां दासीनां द्वे शते पारिबर्हं विवाहे देयं यौतुकाख्यं प्रादात् ॥ ३१–३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

राजधानीति ॥ ततः यतः शूरसेनो राजाऽध्यवसत्तत इत्यर्थः । सा मथुरा, सर्वयादवभूभुजां सर्वेषां यादवभूपालानामित्यर्थः । राजधानी, अभूत् । यत्र पुर्यां, भगवान् सकलैश्वर्ययुक्तः, हरिः स्वयं परमपुरुषः, नित्यं संनिहितः, आविर्भावस्थानत्वादिति भावः ॥ २९ ॥ तस्यामिति ॥ कर्हिचित् कदाचित्, तस्यां पुर्यां तु, तुरवधारणार्थः । शौरिः शूरस्य सुतः, वसुदेवः कृतोद्वहः कृतविवाहः सन्, सूर्यया नवोढया, देवक्या भार्यया, सार्द्धं सह, प्रयाणे स्वगृह प्रति प्रयाणे निमित्ते, रथम् आरुरोह । केचित्तु सूर्ययेत्यभिधया इत्याहुः । तन्मते देवक्या देवकपुत्र्या इत्यर्थः कार्यः ॥ ३० ॥ विवाहकाले रथहयानां कविकाग्रहणेऽऽत्यन्तं बन्धुना भाव्यमिति दर्शयितुं तद्ग्राहिणमाह ॥ उग्रसेनसुत इति ॥ ततः उग्रसेनसुतः कंसः, स्वसुर्देवक्या भगिन्याः, प्रियचिकीर्षया प्रियं कर्त्तुमिच्छया, स्वयं रौक्मैर्हेममयैः, रथशतः रथानां शतैः वृतः परिवृतः सन्, हयानां भगिन्यधिरूढरथाश्वानां, रश्मीन् प्रग्रहान्, जग्राह ॥ ३१ ॥ चतुःशतमिति ॥ दासीनामिति ॥ तदा, देवक उग्रसेनभ्राता, दुहितृवत्सलः, हेतुगर्भमिदं दुहितृवत्सलत्वादित्यर्थः । दुहित्रे देवक्यै, हेममालिनां हेममालालङ्कृतानां, गजानां, चतुःशतं चतुशतमितान् गजानित्यर्थः । अश्वानां स्वर्णालंकृतानां तुरंगमानां, सार्द्धमर्द्धेन पञ्चसहस्रेण सहितं सार्द्धं, अयुतं पञ्चदशसहस्रपरिमितानश्वानित्यर्थः । रथानां च तु त्रिषट्शतं, अष्टादशशतपरिमितान् रथानित्यर्थः । सुकुमारीणां दासीनां, समलंकृते द्वे शते, याने तद्गृहगमनवेलायां प्राप्तायां सत्यामित्यर्थः । पारिबर्हं, प्रादात् । विवाहकाले दुहित्रे दीयमानं यद्धनं तत्पारिबर्हनाम, इति द्वयोरेकान्वयः ॥ ३२–३३ ॥

कृष्णप्रिया

एक बार मथुरामें शूरके पुत्र वसुदेवजी विवाह करके अपनी नवविवाहिता पत्नी देवकीके साथ घर जानेके लिये रथपर सवार हुए ॥२९॥ उग्रसेनका लड़का था कंस । उसने अपनी चचेरी बहिन देवकीको प्रसन्न करनेके लिये उसके रथके घोड़ोंकी रास पकड़ ली । वह स्वयं ही रथ हाँकने लगा, यद्यपि उसके साथ सैकड़ों सोनेके बने हुए रथ चल रहे थे ॥ ३० ॥ देवकीके पिता थे देवकी । अपनी पुत्रीपर उनका बड़ा प्रेम था । कन्याको विदा करते समय उन्होंने उसे सोनेके हारोंसे अलङ्कृत चार सौ हाथी, पंद्रह हजार घोड़े अठारह सौ रथ तथा सुन्दर-सुन्दर वस्त्राभूषणोंसे विभूषित दो सौ सुकुमारी दासियाँ दहेजमें दीं ॥ ३१–३२ ॥

[1]शङ्खतूर्यमृदङ्गानि नेदुर्दुन्दुभयः समम् । [2]प्रयाणप्रक्रमे [3]तावद्वरवध्वोः सुमङ्गलम् ॥ ३३ ॥
पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् । अस्यास्त्वामष्टमो गर्भो हन्ता यां [4]नयसेऽबुध ॥ ३४ ॥
इत्युक्तः स खलः पापो भोजानां कुलपांसनः । भगिनीं हन्तुमारब्धः खड्गपाणिः कचेऽग्रहीत् ॥ ३५ ॥
तं जुगुप्सितकर्माणं नृशंसं निरपत्रपम् । वसुदेवो महाभाग उवाच परिसान्त्वयन् ॥ ३६ ॥

कर्दमक्षमा

अन्वयः– तावत् प्रयाणप्रक्रमे वरवध्वोः तावत् सुमङ्गलं शंखतूर्यमृदङ्गानि दुन्दुभयः समं नेदुः ॥ ३३ ॥ प्रग्रहिणं कंसं पथि अशरीरवाक् आभाष्य आह अबुध अस्याः अष्टमः गर्भः त्वा हन्ता यां नयसे ॥ ३४ ॥ इत्युक्तः भोजानां कुलपांसनः सः खलः

---

१. मृदङ्गाश्च–श्री. वंशी. वीर. शुक. मृदङ्गानि–वी.र. विज. । २. प्रयाणोपक्रमे–वीर. । ३. तात–वीर. विज. । ४. वहसे–श्री. वंशी. नयसे–वीर. विज. उजीव. ।

खड्गपाणिः भगिनीं हन्तुम् आरब्धः कचे अग्रहीत् ॥ ३५ ॥ जुगुप्सितकर्माणं नृशंसं निरपत्रपं तं परिसान्त्वयन् महाभागः वसुदेवः उवाच ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आभाष्य रेरे कंसेति संबोध्य हंता हनिष्यति ॥ ३४ ॥ कुलपांसनः कुलदूषणः आरब्धः उद्युक्तः कचे केशबंधे ॥ ३५ ॥ नृशंसं क्रूरम् । महाभाग इति । अयं भावः । स्वजन्मनि हर्षेण देवतैरानकदुंदुभिध्वनिकरणाद्भाविभगवदवतारेण शक्यप्रतीकारता संभवतीति । सांत्वयन् स्तुत्या कृपाविषयत्वेनोपपत्तिभिश्च साममार्गेण संबोधयन् ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रयाणप्रक्रमे गमनारंभे । तावदादौ । वरवध्वोः सुमंगलं यथा भवति तथा शंखाद्याः सममेकदैव नेदुः ॥ ३३ ॥ प्रग्रहो हयरश्मिः सोऽस्यास्तीति प्रग्रही तम् "प्रग्रहस्तु तुलासूत्रे बद्धा नियमने भुजे । हयादिरश्मौ रश्मौ च सुवर्णालुमहीरुहे" इति मेदिनी । अस्या देवक्याः । अशरीरं वा वसंतम्" इति श्रुतेरशरीरः परमात्मा तद्रूपा वाक् । यद्वाऽस्य वासुदेवस्य शरीरमशरीरं तत्संबंधिनी वाक् यद्वा । न लक्षित शरीरं योगतपोभ्यां विना येषां तेऽशरीरा देवास्तेषां वागशरीरवाक् । पुत्र इति वक्तव्ये गर्भ इत्युक्तस्तु कृष्णस्य सप्तमपुत्रत्वार्थाष्टमगर्भत्वार्थो ज्ञेयेति ॥ ३४ ॥ कुलं पंसति नाशयतीति कुलपांसनः 'पसि–नाशने' कर्त्तरि ल्युट् दीर्घो निपातनात् । पंसतीति पंसनः पसन एव पांसनः कुलस्य पांसनः कुलपांसन इति वा । कुलं पातीति कुलपा उग्रसेनादयस्तानंसति विभजन् इतस्ततः करोतीति कुलपांसनस्तमिति वा । 'अंस–विभागे' अत एव । कुलदूषण इत्येवार्थः स्वामिचरणैः प्रकाशितः । 'कचः केशे गुरोः सुते' इति मेदिनी ॥ ३५ ॥ महाभागास्त्वन्येऽपि महान् भागो भाग्यं शुभाशुभं यस्येति व्युत्पत्तेः 'भागो भाग्यैकदेशयोः' इति रुद्रः । अत आह–इत्ययं भाव इति । यद्वा स्वपत्नीवधे प्रवृत्तमपि दृष्ट्वा क्रोधानुदयान्महाभाग इति । ननु तादृशः क्रूरः कथं सांत्वयितव्यस्तत्राह—महाभाग इति । भाग्यवतः प्रातिकूल्यं तु व्याघ्रादिरपि न करोतीति वा । स्वजन्मनि वसुदेवजन्मनि हेत्वादिभिः संभवदर्थप्रतिपादनमुपपत्तिः । सांत्वयन् साममार्गेण संबोधयन्प्रबोधयन् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

समं युगपत् यद्वा अन्यूनाधिकं यथा स्यात् सुमङ्गलं च शोभनशुभध्वनि यथा स्यात्तथा नेदुः स्वयमवाद्यन्त एतच्च भावि शुभलक्षणं हे तातेति श्रीभगवदवताराऽऽसन्नतादिजातहर्षदर्शनेन वात्सल्योद्दीपनात् सम्बोधनं "तातोऽनुकम्प्ये पितरि" इति नानार्थात् । तावदिति पाठः क्वचित् स च वाक्यालङ्कारे ॥३३॥ प्रग्रहिणं गृहीताश्वपाशं न लक्षितं शरीरं यस्याम् इति मध्यमपदलोपः सा चासौ वाक् चेत्यशरीरवाक् सैवाहेत्युपचारात् शिलापुत्रस्य शरीरमितिवत्, यद्वा, वक्ष्यमाणमर्थमाहेति ज्ञेयं गर्भोऽर्भकः तथा च विश्वः "गर्भो भ्रूणेऽर्भके कुक्षौ" इत्यादि । पुत्रशब्दमनुक्त्वा गर्भशब्दप्रयोगश्चाग्रे कन्यायां दृष्टायां कंसस्य सन्देहाभावाय नयसे यां भर्तृगृहं प्रापयसि वहस इति पाठे स एवार्थः किन्तु वाहनवद्वहसीति श्लेषार्थः, अबुध हे मूर्खेति शत्रुजनयित्रीवहनात् स्वमरणाद्यज्ञानाच्च कंसोऽयं श्रीदेवक्यां स्निग्धतांशे सद्वृत्त इति श्रीभगवदवतारे शैथिल्यशङ्कया तत्कारणोत्थापनार्थं व्यग्राणां देवानामाकाशवाणीयं ज्ञेया श्रीभगवत्सम्बन्धिनं देवक्यादिकं तु नासौ विहन्तुं शक्ष्यतीति निश्चयश्चात्र ज्ञेयः ॥ ३४ ॥ इति उक्त इति तद्वाङ्मात्रेणैव न तु तदर्थविचारणादिनेत्यर्थः । यतः खलः न तु सद्भावयुक्तः पापः तन्मूर्तिर्वान्न कुतश्चित्पापाच्छङ्कमानश्च यतो जन्मत एव भोजानां कुलस्यापि दूषकः किमुत स्वस्य अत एव हन्तुमारब्धः आदिकर्मणि कर्तरि क्तः सद्यः प्रवृत्त अहो तत्रापि न गुप्तविषादिना किन्तु खड्गपाणिः तत्रापि न च वस्त्रादिसावरणां न विगर्हितस्पृष्टां किन्तु कचेऽग्रहीत् ॥ ३५ ॥ जुगुप्सितेति भगिनीवधे प्रवृत्तेः नृशंसं स्वस्यादृशस्नेहत्यागात् निरपत्रपं तादृशोत्सवे सर्वलोकाग्रेऽत्यन्तविकर्मोद्यमात् एवं तस्य महादुश्चेष्टया पुनः पुनर्निन्दा । महाभाग इति तैर्व्याख्यातमेव, तत्र स्वस्य वसुदेवस्य जन्मनि हर्षेण दैवतैर्य आनकदुन्दुभिघोषस्तेन सूचितो य स्वस्माद्वसुदेवात् भावी भगवदवतारस्तेन हेतुना स्वस्माच्छक्यप्रतीकारता सम्भवतीति । तत्र चेति शब्दस्य एतत्प्रकार इत्यर्थः । तेन च एतत् स्वमहाभागत्वं श्रीवसुदेवो जानातीति क्रोडीक्रियते । यद्वा, महाभाग इत्ययं भाव इति श्रीशुकदेवेन श्रीवसुदेवस्यायमभिप्रायोऽभिप्रेयत इत्यर्थः । अयमुक्तो हेतुः, अत एव परिसान्त्वयन् तच्च तैर्व्याख्यातं, यद्वा, सान्त्वनपूर्वकं साम्ना युक्तिभिर्भेदेन स्नेहोत्पादनेन च क्रमेण प्रबोधयन् तत्र पञ्चविधं साम, भेदश्च द्विविधः, तथा चोक्तम्—

"सम्बन्धलाभोपकृतिरभेदो गुणकीर्तनम् । साम पञ्चविधो भेदो दृष्टाऽदृष्टमयं वचः" ॥ इति ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे तात ! वरवध्वोः प्रयाणोपक्रमे मङ्गलार्थं शङ्खादीनि दुन्दुभयश्च समं युगपन्नेदुः दध्वनुः सुमङ्गलमिति क्रियाविशेषणं वा ॥ ३३ ॥ ततो मार्गे प्रग्रहिणं हयरश्मिधरं कंसमुद्दिश्य अशरीरिणी वागाह उत्सृष्टा बभूव, तामेवाह—अस्या इति । यां भगिनीं प्रियचिकीर्षया नयसे भर्तृगृहं प्रापयसि अस्या अष्टमो गर्भः अपत्यपरो गर्भशब्दः, हे अबुध अज्ञ ! त्वां हन्ता हनिष्यति ॥ ३४ ॥

इतीत्थमुक्तः स भोजानां कुलपांसनः कुलमलरूपः कुलाधम इति यावत् खलो मूर्खः पापात्मा कंसः तथाभूतत्वात् खड्गः पाणौ यस्य तथाभूतः भगिनीं स्वप्राणापहारनिदानभूतां भगिनीं हन्तुमुद्युक्तः कचेऽग्रहीत केशपाशं जग्राहेत्यर्थः ॥ ३५ ॥ जुगुप्सितं निन्दितं भगिनीवधोद्योगरूपं कर्म यस्य तत एव नृशंसं क्रूरमत एव निरपत्रपं निर्लज्जं तं कंसं परिसांत्वयन्नुपच्छन्दयन् महाभागो महाभाग्ययुक्तो महाबुद्धिमान् वसुदेव उवाच ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रयाणप्रक्रमे गमनारम्भे ॥ ३३ ॥ प्रग्रहः कविका तद्वन्तं अस्याः देवक्याः ॥ ३४ ॥ कुलपांसनः कुलधुलीकरणशीलः कचे केशपाशे ॥ ३५ ॥ नृशंसं क्रूरकर्माणं परिसान्त्वयन् साम्ना भेदेन च सम्बोधयन् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

प्रग्रहिणं गृहीताश्वपाशम् आभाष्य अरे कंस ! इति सम्बोध्य पुत्र इत्यनुक्त्वा गर्भपदोपन्यासोऽष्टम्यां कन्यायां दृष्टायामपि कंसस्य सन्देहाभावाय, देवक्यां स्वजनन्यामतिस्नेहवन्तं कंसं कथं भगवान् हन्यात् ? इति चिन्ताव्यग्राणां देवानां तस्यां कंसस्यापराधोत्पादनार्थमियमाकाशे दृष्टशरीराणां तेषां वाणी ज्ञेया स्वजन्मनि आनकदुन्दुभिघोषं स्वस्माद्भावि भगवदवतारसूचकं मात्रादिमुखात् श्रुतवतो वसुदेवस्य तदर्थं निश्चयार्थं वसुदेवमुखात् श्रोष्यन्त्या देवक्याश्च हन्त मत्कुक्षौ भगवान् जनिष्यत इत्यानन्दार्थं मरीचिसुतानां षण्णां कंसहस्तवधेन शापोद्धारणार्थञ्च ॥ ३४ ॥ कुलं पांसुं करोतीति कुलपांसनः कुलदूषण इत्यर्थः । आरब्ध इत्यादि कर्त्तरि कर्मणि चेति क्तः कचेऽग्रहीदिति येनैव वामहस्तेन भगिन्याः प्रीत्यतिशयार्थं रथवाहकाश्वपाशं जग्राह तेनैव हस्तेन सहसा तदैव भगिन्या वधार्थं तस्याः केशपाशं जग्राह एवं प्रतोदं त्यक्त्वा दक्षिणपाणिना खड्गं जग्राहेत्यहो खलजनस्नेहस्य लोकलज्जा धर्मभयनिरपेक्षमेव घातुकत्वमिति भावः ॥ ३५ ॥ नृशंसं क्रूरं महाभाग इति स्वसाक्षादेव स्वभार्यां हन्तुं प्रवृत्तमपि तं प्रति क्रोधाऽनुदयात् धैर्यगाम्भीर्यक्षमाचातुर्यादिगुणसमुद्रत्वाच्च यद्वा ननु, तादृशो महाक्रूरः कथं तस्य सान्त्वनं शृणुयात् ? तत्राह—महाभाग इति । भाग्यवतो जनस्य प्रातिकूल्यं व्याघ्रसर्पादिरपि नैव करोतीति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वरवध्वोः सुमङ्गलं यथा भवति तथा प्रयाणस्य प्रक्रमे प्रारम्भे शङ्खादीनि समं युगपत् नेदुः ॥ ३३ ॥ प्रग्रहिणं हयरश्मिप्रग्रहिणम् आभाष्य रे रे कंस ! इत्युक्त्वा अशरीरवाक् अस्या इत्याद्याह—गर्भ इति । सामान्योक्तिः न तु पुत्रादिविशेष उक्तः ॥ ३४ ॥ कुलपांसनः कुलकलङ्करूपः कचे केशबन्धे भगिनीमग्रहीत् पलायनशङ्कया जगृहे पुनः तां हन्तुमारेभे ॥ ३५ ॥ महाभागः महान् भागः भाग्यं यस्य पुण्याऽर्जितविपुलबुद्धिरित्यर्थः । वसुदेवः यद्यप्यशरीरवागन्यथा न भविष्यति तथापि तूष्णींभावे निष्ठुरत्वादिदोषः बलान्निवारणे बहुजननाशकारित्वादिदोषः अनुज्ञाकरणे स्वजनघातकत्वादिदोषः अतः तं साममार्गेण सान्त्वयन् संबोधयन्नेवोवाच, कथम्भूतम् ? जुगुप्सितमतिनिन्द्यं भगिनीवधलक्षणं कर्म करोतीति तम् अत एव नृशंसं क्रूरं निरपत्रपं निर्गता शूरैः अपत्रपा लोकलज्जा यस्मात्तं लोकलज्जातश्च्युतम् ॥ ३६ ॥

श्रीसुबोधिनी

सम्माननामाह शङ्खेति । शङ्खो हि मुखवाद्यम् । तूरी हस्तवाद्यं मृदङ्गानि च दुन्दुभयो दण्डवाद्यम् । सममेकदा । नैमित्तिकं तदित्याह प्रयाणप्रक्रम इति । वरवध्वोः सुमङ्गलं यथा भवति तथा नेदुः अनेन शाकुनमप्युक्तं पर्यवसानस्योत्तमत्वात् ॥ ३३ ॥ कालो ह्यत्र प्रतिबन्धको जात इति वक्तुं तस्याधिभौतिकः कालनेमिः कंसे निविष्टः शेत इति तत्प्रादुर्भावार्थं तदनुगुणदेवतायास्तदुत्कर्षमसहमानाया अकस्माद् वाक्यं जातमित्याह पथीति । शोभातिशयो मध्येमार्गं प्रादुर्भूत इति पथ्येवोक्तवती न तु गृहे नापि गमनानन्तरम् । अनेनाधिभौतिकः कालोस्मिन्मार्गे बाधकः स प्रतिविधेय इति ज्ञापितम् । सर्वप्रकारेण प्रग्रहिणं रश्मिग्राहिणमाभाष्य रे रे कंसेति सावधानपर्यन्तमुक्त्वा अशरीरवागाकाशवाणी । शरीरात् ताल्वोष्ठपुटाघातेन न निर्गता । तस्या वाक्यमाह अस्या इति । अष्टमो गर्भ इति सङ्ख्या निस्सन्दिग्धा । कन्या पुत्रो वेति न विशेष उक्तः । मध्ये भगवता तथा प्रेरिता । स बालक एव त्वां हन्ता हनिष्यति । दासीषु प्रेक्षिकासु वेतिसन्देहव्युदासायाह यां वहस इति । न चेयं मम भगिनी न तथा कर्तुं दास्यतीति वक्तव्यं यतस्त्वमबुधः । कस्यापि तत्त्वं न जानासीत्यर्थः । हे अबुधेतिसम्बोधनं वक्तुर्हितत्वज्ञापनाय ॥ ३४ ॥ ततो यज्जातं तदाह इत्युक्त इति आकाशवाण्यास्त्वभिप्रायः सा स्वगृह एव स्थापनीयान्यदा वा किञ्चित् कर्तव्यमिति कंसस्तु इत्युक्त एव सखलः कालनेमिसहितः । स प्रसिद्धो दिग्विजयी खलः प्रकृत्या । भगिनीं हन्तुं खडगपाणिर्भूत्वा कचे केशपाशे तामग्रहीत् । ननु महत् पापं कथं करिष्यतीत्याशङ्क्याह पाप इति । निरन्तरपापकरणेन स पापात्मैव जातः । तस्मात् तस्य शास्त्रं न बाधकम् । खलत्वाल्लोकोपि न बाधकः । वंशजा अपि न तस्य बाधका जाता इत्याह भोजानां कुलपांसन इति । भोजवंशोद्भवा ये तेषां कुले पांसनो मलरूपः कलङ्करूप इति यावत् । कुले कलङ्कजननं तस्य स्वरूपम् । अतः कुलविचारेणापि न निवर्तत

इति भावः। **कचेषु** किञ्चित् कर्तव्यं नास्तीति सप्तमी। स तु **भगिनीमेव हन्तुं** कालेन **समारब्धः**। आरब्धवान् वा। अपलायनार्थं तस्या ग्रहणम् ॥ ३५ ॥ वसुदेवस्तु शूरोप्यसहायः कंसबलं च जानातीति स्वतो दोषस्तस्य च न भवतीति निश्चित्य सान्त्वनार्थं प्रवृत्त इत्याह **तमिति**। नायं स्त्रीलोभेन तथा करोति किन्त्वनुचितमिति दयाविष्टस्तं **परिसान्त्वयन्नुवाचे**तिसम्बन्धः। लोकलज्जया स्वयमेव न करिष्यतीति ज्ञात्वा कथं न तूष्णीं स्थितस्तत्राह **जुगुप्सितमेव सर्वदा करोतीति** तथा। स्वस्य दयया त्यक्ष्यतीत्यपि न यतो **नृशंसः** क्रूरात्मा। दैत्येष्वपि हीनत्वादपत्रपयापि न करिष्यतीत्यपि न। यतो निर्गता **अपत्रपा** यस्य। 'लज्जा सापत्रपान्यत'। **वसुदेव** इति उपेक्षायामयुक्तः सर्वप्रकारेण मोचयितुं शक्तः। किञ्च **महाभागः**। तस्य जन्मन्यानकादुन्दुभयश्च नेदुरतो महाभाग्यवान् ॥ ३६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पथि प्रग्रहिणमित्यत्र—अनेनाधिभौतिकः काल इति। भगवत्प्रादुर्भावहेतुर्भक्तिमार्गीयविवाहश्चे त्युभयोः साम्यादेतत्सम्बन्धिमार्गे कालकृतप्रतिबन्धकथनेन भक्तिमार्गेपि तथात्वं ज्ञाप्यत इत्याशयेनेदमुक्तम्। एवं सत्यस्मिन्मार्गे भगवत्प्रापकमार्गे इत्यर्थः ॥ ३४ ॥ **खड्गपाणिः कचेग्रहीदित्यत्र**—कचेषु किञ्चिदित्यादि। ग्रहणक्रियाकर्मत्वेपि कचानां कर्तुर्ग्रहणक्रिययेप्सिततमत्वाभावात्तथात्वज्ञापनाय सप्तम्युक्ता न द्वितीयेत्यर्थः ॥ ३५ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

पथीत्यत्राभासे—वाक्यं जातमिति। अशरीरवाक्यात् स्वत एव जातमित्यर्थः। **न तु गृह** इति। **कंसगृहे** रहसीत्यर्थः। गमनानन्तरमिति। वसुदेवगृह इत्यर्थः। पथीत्यनेन गृहद्वयनिषेध उक्त इतिभावः। **आधिभौतिक** इति। कालाधिभौतिका दैत्याः साम्प्रतं यवनाः। तत्कृतः प्रतिबन्धः स्वमार्गे भवति। स उपायेन प्रतिविधातव्यो न तु तदर्थं भगवान् प्रार्थनीयो वसुदेवेनोपायेनैव प्रतिविधानकरणादितिभावः। **स्वयमपि दासभावं प्राप्त** इति पूर्वमुक्तत्वात्। **प्रग्रहिणमित्यत्र** 'नित्ययोगे मत्वर्थीय इनि'रित्याशयेनाहुः **सर्वेति**। सूतत्वमेव स्वस्याङ्गीकृतवानित्यर्थः **शरीरादिति**। यद्यपि **तदनुगुणदेवताया वाक्** तथापि ताल्वाद्याघातेन शरीरान्न निर्गता किन्तु तदाघातव्यतिरेकेण मुखविवरादेवोद्गतेत्यर्थः। तथा च **शरीराद्** या वाक् तद्व्यतिरिक्तेतिविग्रहः। **तद्व्यतिरिक्ता** तद्भिन्नप्रकारिकेत्यर्थः। गर्भस्थेन हननमसम्भावितमित्याशयेनाहुर्**बालक एवेति** ॥ ३४ ॥ **इत्युक्त** इत्यत्र–तत इत्येतावतैव चारितार्थ्येपीत्युक्त इतिपूर्वानुवादस्य तात्पर्यमाहु**राकाशेति**। तथा च तदैव कृतवानितिबोधनार्थमनुवाद इतिभावः। **स खल** इति पदस्यावृत्तिरपेक्षितेति ज्ञेयम्। **न बाधकमिति**। निरन्तरपापेन दुष्टान्तःकरणत्वाच्छास्त्रं तं निवर्तयितुमसमर्थमित्यर्थः। **कचेष्वित्यत्र** टिप्पण्यां कर्मत्वेपीति फलाश्रयत्वेपीत्यर्थः ॥ ३५ ॥ **तमित्यत्र**—नन्वेवमतिक्रमकर्तुर्हितत्वाज्ज्ञानं नोपदेष्टव्यमित्यत आहुर्**नायमिति**। वसुदेवस्य स्त्रीकंसयोस्तुल्या दृष्टिरतो न कंसस्याहिते तात्पर्यं किन्त्वनुचितत्वान्मारणं निवारणीयमत उभयसाधकत्वाज्ज्ञानेन प्रतीकारमुवाचेत्यर्थः। **अपत्रपेति**। लोका मां द्रक्ष्यन्तीति लज्जा, दृष्ट्वा मां दुष्टं वदिष्यन्तीत्यपत्रपेतिविभेदः। **सर्वेति**। शुद्धसत्त्वरूपत्वाज्ज्ञानप्रकारेणापीत्यर्थः ॥ ३६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

पथि प्रग्रहिणं कंसमित्यस्याभासे—**तस्याधिभौतिकः कालनेमिरित्यादि**। **तस्येति** कालस्येत्यर्थः। **कालो हि** सर्वसम्बन्धितया गुणदोषाभ्यां संयुज्यते तदा **गुणी दुष्टश्च** भवति। तत्र दुष्टकालस्याधिभौतिकः **कालनेमिः**। कृष्णावतारे निहतानां दैत्यानामाध्यात्मिकपक्षमर्यादया दोषरूपत्वात्। अस्मिन्नवतारे तृणावर्तादयो यावन्तो हतास्ते सर्वे निरोध्यभक्तानां दोषरूपा 'लोभक्रोधादयो दैत्या' इति कृष्णोपनिषद्वचः। अत एवाचार्यवर्यैर्धेनुको देहाध्यासत्वेनोक्तः। लोभक्रोधादयो दैत्या' इतिश्रुतौ 'आदि' शब्देन सर्वेषां सङ्ग्रहात्। तत्र कस्य दैत्यस्य का दोषरूपतेत्याकाङ्क्षायां तस्य तस्य दैत्यस्य कार्यधर्मनामानि विचार्य तत्तद्दोषसाधर्म्यं विचार्य तत्तद्दोषरूपता वाच्या। यत्कार्यं दम्भः करोति तादृशं कार्यं यो दैत्यः करोति तस्य दम्भरूपता वाच्या। यथा सुबोधिन्यां बकासुरस्य दम्भरूपता निरूपिता। एतावानेवांशष्टिप्पण्यामुपपाद्यते। सर्वत्र दैत्यानां दोषरूपत्वे प्रमाणं तु 'लोभक्रोधादयो दैत्या' इति श्रुतिर्बोध्या। प्रकृते तु कालनेमिरितिनाम्नैवाधिभौतिकरूपत्वं कालनेमेः प्रकाशयति। **पथि प्रग्रहिणमित्यत्र**—आहेत्येतावत्त्वे वक्तव्य आभाष्येतिपदस्य वैयर्थ्यमाशङ्क्य तत्सार्थकत्वायाहू रे रे कंसेति **सावधानपर्यन्तमुक्त्वेत्यनेन**। **अस्यास्त्वामष्टमो गर्भ** इत्यत्र–गर्भेण मरणासम्भवमाशङ्क्य स बाल एव त्वां हन्तेति गर्भपदतात्पर्यमुक्तम् ॥ ३४ ॥ **वसुदेवो महाभाग** इत्यत्र–वसुदेवपदव्याख्यानमुपेक्षायामयुक्त इति। अयुक्तशब्दे **युक्त** इति भावे क्तः। न युक्तं योगो यस्य **सोयुक्तः**। **उपेक्षायां** तस्य सम्बन्धो नास्ति। विवेकित्वेन न दीनस्योपेक्षाकृतिस्तस्योचिता। अतो देवकीं येनकेनाप्युपायेन रक्षितुं यतत इतिभावः ॥ ३६ ॥

बुभुत्सुबोधिका

राजतूर्येति सम्माननामेति मानत इत्यस्यार्थः टिप्पण्यां प्रथमार्थे तसिलङ्गीकारात् तूरीति 'स्वार्थे प्रज्ञाद्यण्'। तूर्यम्। अमव्ययं प्रसिद्धार्थकं वा। मृदङ्गानीति बहुवचनं वाद्यस्य भगवत्प्रियत्वात्, कोशेपि बहुवचनम्। देवकत्वाद् राजकस्य। अनेनेति

मङ्गलद्रव्यप्रापणेन । पर्यवसानस्येति 'कंसः प्रीतमना राजन् प्रहसन्निदमब्रवी'दिति वाक्याद् वरवध्वोः पर्यवसानस्योत्सवसमाप्तेरुत्तमत्वात् । कंसप्रसाद एव जातत्वात् समाप्तेः ॥ ३३ ॥

पथि प्रग्रहिणमित्यत्र एवं सप्तभिर्महावाक्यार्थहेतूत्कर्षनिरूपणेन महावाक्यार्थरूपाकाशवाणीवचनानुकूलव्यापाररूपाऽवान्तरवाक्यार्थं वक्तुमाहुः कालो हीति । गुणक्षोभकः कालः प्रतिबन्धको दृष्ट इत्यत्रापि गुणक्षोभद्वारा जातः । तस्याधिभौतिक इति तस्य कालशक्तिपदवाच्यस्य अधिभूतभवः आधिभौतिकः तत्र भव इतिठक् । उभयपदवृद्धिः । कालनेमिः । नाम्नोधिभूते भवत्वाच्चाधिभौतिकः कंस इति । कंसोऽप्याधिभौतिकः कालस्तथापि नित्यलीलास्थकलिरूपत्वात् कालशक्तेर्नाधिभौतिकः । अतो निविष्टः । आसुरसम्पदा ज्ञायते । शेत इति स्वप्नकरणं न कंसकार्यं हरिप्रियाणां कल्यतिरिक्तकार्याभावात् कंसस्य । 'पुरुषो ह वै नारायणः स्वपिते'त्यत्र नारायणस्य सुरासुरसाधारण्यात् । तत्प्रादुरिति कंसस्यावेशित्वात् कंसधर्मैस्तिरोभूतस्य तस्य कालनेमेः प्रादुर्भावार्थम् । तद् वक्ष्यते 'आत्मानमिह सञ्जातं जानन् प्राग्विष्णुना हतं महासुरं कालनेमि'मिति । कंसे देवत्वमपि तत्रैव वक्ष्यते । तस्याधिभौतिकस्यानुगुणाया आसुरसम्पज्जनकत्वेनानुगुणत्वम् । देवतायाः आध्यात्मिकयाः आकाशवाण्याः देवासुरसाधारण्यात् देववाग्वारणार्थं विशेषणम् । तदुत्कर्षमसहमानाया इति आसुरवाग्रूपायाः । अकस्मादित्यहैतुकम् । न चोत्कर्षासहनं हेतुरिति वाच्यम् । कालनेमिप्रादुर्भावमात्रकार्ये हेतुत्वात् । अशरीरवाक्त्वात् स्वत एव जातमित्यहैतुकं वा । न तु गृहे इति कंसगृहे रहसि न तु । गमनानन्तरमिति वसुदेवगृहगमनानन्तरं वसुदेवगृहे कंसं प्रत्येव । अनेनेत्यादि अर्थष्टिप्पण्याम् । तत्र प्रसंगसंगत्याहुः भक्तिमार्गेपीत्यादि । भगवत्प्रापकमार्ग इति प्रासंगिको मार्गो ब्रह्मस्तुतौ 'शृण्वन् गृण'न्निति श्लोके व्याकरिष्यते । सुबोधिन्याम् । प्रोपसर्गार्थमाहुः सर्वेति । अत्र सर्वे प्रकारा उपसर्गद्योत्या न तु वाच्याः । सूतत्वमेव स्वस्यांगीकृतवानित्यर्थः । नित्ययोगे मत्वर्थीय इति प्रत्ययार्थो वा सर्वप्रकारेणेति । आहेत्येतावत्येव वक्तव्ये आभाष्यपदवैयर्थ्यमाशङ्क्य तत्सार्थकत्वायाहुः रे रे कंसेति । रे रे इति संबोधने वीप्सा । संबोधनमारभ्य सावधानपर्यन्तमाङर्थः । अभिविधावाङिति । तथा च स्वहेतिश्रवणव्यग्रे आहेत्यस्य सार्थक्यायाभाष्येति । पदमितिभावः । न निर्गतेति तथा च शरीरस्य वाक् शरीरवाक्, न शरीरवागशरीरवाक् । वाक्यानीति एकांतङ्वाक्यमिति वाक्यलक्षणमत्र । संख्येति अष्टसंख्या एकत्वसंख्या च । मध्य इति वाक्यमध्ये । प्रेरणस्य भगवद्धर्मत्वात् । 'भोक्ता भोग्यं प्रेरितारं च मत्वे'ति श्रुतेः । गर्भस्य हननानुकूलव्यापारवत्त्वाभावात् । 'हन्ते'ति क्रियापदाच्च दृष्टानुसार्यर्थमाहुः स बालक एवेति । अवस्थानां बाल्यादित्वाद्गर्भावस्था बाल्यावस्था । भविष्यदद्यतनकालासंभवात् सामान्यस्यापि क्वचिद्विशेषबाधकत्वाल्लुडंतस्यापि लृडंतार्थमाहुः हनिष्यतीति । प्रेक्षिकास्विति राजोत्सवप्रेक्षिकासु । न जानासीति ज्ञानप्रतिबंधकं राजतमः 'अंधंतमः प्रविशंति ये संभूतिमुपासत' इति शारीरकब्राह्मणात् । इदं तृतीयं वाक्यम् । हितत्वेति लोके स्पष्टम् । स्वरेणेति बोध्यम् । अत्राकाशवाणीमाया कृपेति यावत् । कृपाया हितत्वम् । तस्य ज्ञापनायेत्यर्थः ॥ ३४ ॥

इत्युक्त इत्यत्र तत इति आकाशवाणीव्यक्तवागनन्तरम् । क्रमवाची तत इति शब्दः आकाशवाणी स्वरूपं द्वितीयस्कन्धनवमाध्याये । 'स चिन्तयन् द्व्यक्षरमेकदाम्भस्युपाशृणो'दिति वाक्योक्तम्, न तु सत्त्वरजस्तमःसाम्यावस्थारूपप्रकृतिरित्याशयेनाभिप्रायमाहुः आकाशवाण्या इति । मायात्वे तु प्रकृतिरूपमायायाः कृपा दंभरूपत्वाभावात् । 'माया दंभे कृपायां च माया पीताम्बरेम्बर' इति विश्वात् । अथवा । तत इत्येतावतैव चारितार्थ्येपि इत्युक्त इति पूर्वानुवादस्य तात्पर्यमाहुः आकाशवाण्या इति । तथा च व्यक्तवचनसमय एव कृतवानिति बोधनार्थमनुवाद इति भावः । स्वगृह एवेति । स्वस्यात्मनः कंसस्य गृहे, एवकारः प्रतिगृहयोगव्यवच्छेदकः तथा च स्त्रीपुंयोगाभावान्न तव मारकपुत्रोत्पत्तिरिति भावः । अन्यदा वेति हठकाले । किञ्चिदिति दुःखादिकम् । 'आत्मानमिह संजात'मिति वाक्यादाहुः कालनेमिसहित इति । देवत्वपक्षेणार्थान्तरमाहुः स प्रसिद्ध इति । सखलपदस्यावृत्तिरभिप्रेतेति ज्ञेयम् । तेन न युगपद्वृत्तिद्वयविरोधः । प्रकृत्येति तमोरूपया । तामिति भगिनीम् । आवृत्त्या योजनीयम् । जात इति तेन द्विग्विजये पापान्येवेति ज्ञापितम् । पापात्मत्वं स्वप्रादुर्भूतम् । अत एव पापान्यस्मिन् संतीति विगृह्य, अर्शाद्यच् न कृतः न बाधकमिति खलसंचये भ्वा० प० से० संचयकत्वात् प्रातिकूल्याभावेन न बाधकम् । अथवा निरन्तरपापेन दुष्टान्तःकरणत्वाच्छास्त्रं तं निवर्तयितुमसमर्थमित्यर्थः । वंशजा इति भोजवंशजाः । भोजवंशोद्भवा इति भोजानामिति पुराणं प्रमाणम् । 'लक्षणां नैव वक्ष्यामी'ति लक्षणा च नास्ति । तथा च भोजश्च भोजश्च भोजश्च भोजश्च भोजास्तेषामित्यर्थो भवति । तथा च नवमस्कन्धे 'महाभोजोपि धर्मात्मा । भोजा आसंस्तदन्वय' इति पुराणप्रामाण्यान्न लक्षणा । तद्राजस्य लुका वा न लक्षणा । अग्रे 'कंसः सुनामा न्यग्रोध' इति श्लोकः । अत उक्तं 'भोजवंशोद्भवा' इति । य इति 'वृष्णेः सुमित्रः पुत्रोभूत् युधाजिच्च परंतप । शिनिस्तस्यानमित्रश्च निम्नोभूदनमित्रतः । सत्राजितः प्रसेनश्च निम्नस्याप्यासतुः सुता'वित्यादिश्लोकोक्ताः वृष्ण्यादयः । स्वरूपमिति 'कलेर्दोषनिधे राज'न्निति वाक्यात् । कचेषु किंचिदित्यादि अत्र टिप्पण्याम् । ग्रहणक्रियेति ग्रहणानुकूलो व्यापारो ग्रहेरर्थः । ग्रहणक्रिया उपादान तदाश्रयत्वेन । कर्मत्वेपि धातूपात्तफलाश्रयत्वेपि । इप्सिततमत्वेति इप्सितत्वेपि तथा तथात्वेति । कालिकसम्बन्धेन । पाण्यौपश्लेषिकाधारेषु कचेषु औपश्लेषिकाधारत्वात् तथात्वज्ञापनाय इप्सिततमत्वाभावज्ञापनाय तथेत्यर्थः । इप्सिततमत्वं उत्पाद्यत्वसंस्कार्यत्वार्थत्वविकार्यत्वसमानाधिकरणं तच्चतुष्टये एकतमाभावान्नेप्सिततमत्वं कचानामिति भावः । तथा च कचे पाण्याधारत्वं तस्यामुपादानं क्रियाफलं, कंसे तदनुकूलो व्यापारो ज्ञेयः । यदा

फलमात्रं धात्वर्थः तदा व्यापारो लकारार्थः। अनुकूलतासम्बन्ध इति मिश्रमतम्। स्वमतेनुकूलं घटं जानातीत्यादिस्थलेपि ज्ञानानुकूलो व्यापारो न स्वाश्रये लक्षणा। 'सर्वस्यापि कारणे पुरुषव्याप्रुति'रिति भाष्यात्। सुबोधिन्याम्। भूतेक्तविधानात् पक्षान्तरमाहुः आरब्धवान् वेति। अत्र कर्मणि क्तवतुप्रत्ययप्रयोगः। तत्रोच्यते। कालः कंसमारब्धवानिति विभक्तिभेदेनान्वय इति। कर्तरि प्रयोग इति न चारब्ध इति मूलविरोध इति वाच्यम्, छान्दसस्य क्त वतु स्थाने क्तस्यांगीकारात्। न च रभेर्भावे क्तं विधायार्शआद्यचि न छांदसत्वमिति वाच्यम्, तत्रापि भूतकालनिवेशादत्र च तदभावात् यद्यपि क्तवतुरपि निष्ठा तथापि 'बहुलं छंदसी'त्यत्र छंदसीति योगविभागादत्र बाहुलकान्न निष्ठा संज्ञा। ततो न भूते निष्ठा किंतु वर्तमान इति। यद्वा भूतकालः शुकोक्त्यभिप्रायेण। तस्य ग्रहणमिति ग्रहणस्य तन्निष्ठत्वेन कचे अभावात्। न च दृष्टविरोध इति वाच्यम्। करादिग्रहणे करादावग्रहीदिति न प्रयोगः, किन्तु करादिमग्रहीदित्येवेति। विवक्षातः कारकाणि भवन्तीति त्वगतिकगतिः। फलाश्रये कर्मत्वे सम्भवति कर्मद्वारा क्रियाश्रयत्वस्य कचे सत्त्वेनाधारत्वात्। अत उक्तं तस्या ग्रहणमिति ॥ ३५ ॥

तं जुगुप्सितेत्यत्र शूरोपीति 'विचिन्त्यानकदुंदुभि'रिति वाक्यात्। एतत्समये शूरत्वं विना विशेषेण चिन्तनासम्भवात्। अपिना ज्ञानी। वसुदेवः सत्त्वं सत्त्वं ज्ञानमिति वसुदेवविषयमाहुः कंसबलं चेति। तथा च ज्ञानस्य विषयाविनाभावात् कंसबलं स्वतो दोषाभावविषयकं वसुदेवरूपं ज्ञानम्। स्वत इति किंत्वाकाशवाणीतो दोषस्तस्य भवति कालनेमिप्रवेशकृतो वा। निश्चित्येति तेन चतुर्षु ज्ञानेषु निश्चयात्मकं ज्ञानं वसुदेवरूपमित्युक्तम्। प्रवृत्त इति भूते क्तविधानाद्भूतकालः शुकोक्त्यभिप्रायेण। नन्वेवमतिक्रमकर्तुः स्त्रीघ्नत्वाज्ज्ञानं नोपदेष्टव्यमित्यत आहुः नायमिति। वसुदेवस्य स्त्रीकंसयोस्तुल्यदृष्टिरतो न कंसस्याहिते तात्पर्यम्। किन्त्वनुचितत्वान्मारणं निवारणीयमतः कंसाहिताभावस्त्रीमारणाभावोभयसाधकत्वाज्ज्ञानेन प्रतीकारमुवाचेत्यर्थः। दयाविष्ट इति दया कृपा मायेति यावत्। आकाशवाणीवाक्ये मनोद्वाराविष्टः तेन दयायां विष्टः दयाविष्ट इति। 'सप्तमी शौंडै'रित्यत्र सप्तमीति योगविभागात् सह सुपे'ति वा समासः। स्वयमिति कंसः। लज्जा सेति अन्यतो या लज्जा सापत्रपेत्यर्थः। अयुक्त इति ज्ञानरूपत्वादिति भावः। 'जीवाभयप्रदानस्य न कुर्वीरन् कलामपी'तिवाक्यात्। उपेक्षायामिति सतिसप्तमी। तस्यां सत्यां उपेक्षासमानाधिकरणमयुक्तत्वं यत् तद्विशिष्ट इत्यर्थः। सर्वप्रकारेण शुद्धसत्त्वरूपत्वाज्ज्ञानप्रकारेणापि मोचयितुं शक्तेऽयुक्तत्वापत्त्या विशेषणाभावप्रयुक्तोऽयुक्तत्वाभावो युक्त इति भावः। 'वसुर्मयूखाग्निधनाधिपेषु योक्त्रे बके स्याद् वसुहट्टके च वृद्ध्यौषधीस्थानधनेषु रत्ने वसु स्मृतं स्यान् मधुरेऽन्यवदि'ति विश्वः। दिवु क्रीडाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिष्विति धातुपाठः। तस्य जन्मनीति नवमस्कन्धे प्रसिद्धम्। समाधानार्थमिति कंसकृतस्त्रीमारणाभावार्थम्। अनेनाकाशवाणी 'वाण्यपि निमित्तसापेक्षेत्युक्तम्। 'निमित्तमात्रं भव सव्यसाचि'न्निति वाक्यात् कालेऽर्जुनसापेक्षत्ववत्। तथा च वसुदेवसान्त्वने निमित्ते स्त्रीमारणाभावाद् 'स्यास्त्वा'मिति स्ववाक्ये आकाशवाण्याः समाधानं कंसशान्तिस्तदर्थम् वसुदेवोपि मायाभक्तः। 'अर्चिष्यन्ति मनुष्यास्त्वा'मिति वाक्यात्। अनेन कृपारूपाया अपि कोपो निमित्ताभाव इति ज्ञापितम्, वसुदेवस्य मायाज्ञानात् ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रयाणोपक्रमे तावद्वरवध्वोः सुमङ्गलं यथा भवति तथा शङ्खादयो वाद्यविशेषा नेदुः ॥ ३३ ॥ असुराणां सम्बन्धस्यानर्थहेतुत्वं तत्स्नेहस्य क्षणिकत्वं च दर्शयंस्ततो यज्जातं तदाह—पथीति द्वयेन। पथि मार्गे प्रग्रहिणं हयरश्मिग्राहकं कंसमाभाष्य रेरे कंसेति सम्बोध्य अशरीरा अदृश्यरूपा वाक् भगवत्प्रेरिता वागभिमानिदेवता सरस्वती आह। तदुक्तमेवाह—यद्यप्युपस्थितं स्वानर्थमहत्त्वं न जानासि, तथाप्यहं त्वां विज्ञापयामीत्याशयेन पुनः सम्बोधयति—अबुधेति। यां स्वभगिनीं वहसे अतिसन्मानपूर्वकं भर्तृगृहं प्रापयसि, तस्या अस्या अष्टमो गर्भस्त्वां हन्ता हनिष्यतीति। पुत्रपदं विहाय गर्भपदोक्तिर्देवकीकन्यायामपि सन्देहार्था। अतएव कन्याहनने कंसः प्रवृत्तो भविष्यति ॥३४॥ इत्येवमुक्तः स कंसो भगिनीं हन्तुमारब्धः प्रवृत्तः, अतः खड्गपाणिः संस्तां कचे केशबन्धेऽग्रहीत्। ननु तस्य महति भोजकुले उत्पन्नस्य महाजनसमाजे कथमेवं निन्दिते कर्मणि प्रवृत्तिर्जातेत्याशङ्क्याह—भोजानां कुले पांसनः कलङ्करूप इति। तत्र हेतुमाह—खल इति। दुष्ट इत्यर्थः। तत्रापि हेतुमाह-पाप इति। निरन्तरं पापाचरणेन पापात्मैव जातोऽतो लोको वेदो वा तस्य न कोऽपि बाधक इत्यर्थः ॥ ३५ ॥ एवमासुरसम्बन्धस्यानर्थहेतुत्वं प्रदर्श्य साधुसम्बन्धस्यानर्थनिवर्तकत्वं सूचयन् वसुदेवस्य देवकीरक्षार्थं कंससान्त्वने प्रवृत्तिमाह—तमिति। तं कंसं परिसान्त्वयन् स्तुत्या कृपाविषयत्वेनोपपत्तिभिश्च साममार्गेण सम्बोधयन् वसुदेव उवाचेति सम्बन्धः। तत्र साम पञ्चविधम्, भेदो द्विविधः। तदुक्तम्—'सम्बन्ध—लाभोपकृतिद्वै-भेदो गुणकीर्तनम्। साम पञ्चविधं भेदो दृष्टादृष्टभयं वचः' इति। तत्र कंसान्न्यूनसम्पत्तिमत्त्वेन दानस्यासम्भवात् अल्पबलत्वेन दण्डस्यासम्भवाच्च सामभेदोपायद्वयमेव कृतवानिति ज्ञेयम्। तद्वधात्तस्य निवृत्तिर्दुष्करेति सूचयन् कंसं विशिनष्टि—जुगुप्सितकर्माणमिति। न केवलमिदं भगिनीहननमेव तस्य जुगुप्सितं कर्म, किन्त्वन्यान्यपि बहूनि जुगुप्सितानि निन्दितानि कर्माणि यस्य तमिति स्वभावतस्तस्य निन्दितकर्मनिष्ठा प्रदर्शिता। तर्हि कदाचिद्दयावशात्तस्य ततो निवृत्तिः स्यात्तदपि न सम्भवति, अतिक्रूरत्वादित्याह—नृशंसमिति। लज्जयापि निवृत्तिर्न सम्भवतीत्याह—निरपत्रपमिति। निर्लज्जमित्यर्थः। तर्हि कथं तं निवर्त्तयितुं वसुदेवः प्रवृत्तस्तत्राह—महाभाग इति। अतिधर्मिष्ठ इत्यर्थः। स्वधर्मसंरक्षणाय तस्य प्रवृत्तिः। अन्यथा दीनोपेक्षया धर्महानिः स्यादित्याशयः। तदुक्तं चतुर्थे—'ब्राह्मणः समदृक् शान्तो दीनानां समुपेक्षकः। स्रवते ब्रह्म तस्यापि भिन्नभाण्डात् पयो यथा' इति ॥ ३६ ॥

अन्वितार्थप्रकाशिका

शङ्खेति । तावद्वाक्यालंकारे । वरवध्वोः प्रयाणस्य प्रक्रमे आरम्भे शङ्खतूर्यमृदङ्गाः दुन्दुभयश्च समं युगपत् सुमंगलं यथा स्यात्तथा नेदुः । भाविमंगलसूचनार्थं स्वयमवाद्यन्त ॥ ३३ ॥ पथीति । पथि प्रग्रहिणं गृहीताश्वरश्मिं कंसमाभाष्य रे कंसेति संबोध्य अशरीरा अलक्षितशरीरा वाक् वक्ष्यमाणं वच आह स्म । हे अबुध ! यां त्वं वहसे भर्तृगृहं प्रापयसि अस्याः अष्टमो गर्भः अपत्यं त्वां हन्ता हनिष्यति । पुत्र इत्यनुक्तिस्तु अग्रे कन्यादर्शने कंसस्य संदेहाभावाय देवक्यां स्वजनन्यामतिस्निग्धं मातुलं कंस कथं हन्यादिति शङ्कया कंसस्यापराधोत्पादनार्थं देवानामियमाकाशवाक् देवकीं हन्तुं स्वयं न शक्त इति तेषां निश्चय एव ॥ ३४ ॥ ल्युट् कर्त्तरि । सः कंसः भगिनीं हन्तुम् आरब्धः प्रवृत्तः । आदिकर्मणि कर्त्तरि क्तः । खड्गपाणिः सन् कचे केशबन्धेऽग्रहीत् ॥३५॥ तमिति । महाभागः भाविश्रीकृष्णजन्मना गाम्भीर्यादिगुणैश्च महाभाग्यः वसुदेवः जुगुप्सितं निन्द्यं कर्म यस्य तं नृशंसं क्रूरं निरपत्रपं निर्लज्जं तं कंसं परिसान्त्वयन् स्तुत्यादिना साममार्गेण बोधयन् उवाच ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शङ्खेति । हे तात, वरवध्वोः, प्रयाणप्रक्रमे प्रयाणोपक्रमे, सुमङ्गलं, शोभनं मङ्गलं यथा स्यात्तदर्थमित्यर्थः । शङ्खाश्च तूर्याणि च मृदङ्गाश्च ते, दुन्दुभयश्च, समं युगपत्, नेदुर्दध्वनुः । सुमङ्गलमिति क्रियाविशेषणम् ॥ ३४ ॥ पथीति । ततः पथि मार्गे, प्रग्रहिणं हयरश्मिधरं कंसम्, आभाष्य रे रे कंसेति संबोध्य, अशरीरवाक् अशरीरिणी वाक्, आह । तामेव दर्शयति । हे अबुध, यां भगिनीं, वहसे प्रियचिकीर्षया भर्तृगृहं प्रापयसि, अस्यास्त्वद्भगिन्याः, अष्टमः गर्भः, अपत्यपरोऽत्र गर्भशब्दः । त्वां हन्ता हनिष्यति ॥ ३५ ॥ इतीति । इतीत्थम्, उक्त आकाशगिराऽभिहितः, भोजानां कुलपांसनः कुलमलरूपः कुलाधम इति यावत् । खलो मूर्खः, पापः पापात्मा, स कंसः, खड्गः पाणौ यस्य तथाभूतः सन्, भगिनीं स्वप्राणापहारनिदानभूतां, हन्तुम्, आरब्ध उद्यक्तः संश्च, कचे अग्रहीत् केशपाशं जग्राहेत्यर्थः ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पथि प्रग्रहिणमितिः १०–१–३४

कृत्वोत्तेजितमेव शत्रुमभितः स्वोक्त्या लसत्संधया हन्तव्यः सहसा न जातुचिदपीत्यालोच्य धर्मस्थितिम् ।
शूराणां स्वयमाजिघृक्षुरचिराज्जन्मापि शूरान्वये श्रीशो युक्तमधान्नृशंसमनिशं कंसं गिरोत्तेजितम् ॥ ३६ ॥
यद्भीतिर्मनसि स्थिता विधिबलात्तच्छिक्षकेनाभयं दत्तं चेत्सहि कीदृशोऽपि गतभीस्तस्याग्रतो गर्जति ।
युक्तं ब्रह्ममुखेन दैवतगणो लब्ध्वाम्बुधावाश्रयं दैत्यारेर्गतसाध्वसं नभसि यत्कंसाग्र एवं जगौ ॥ ३७ ॥
पुरोऽरेः स्वसारं समाधाय कुर्यामहं दुष्टनाशं सतां रक्षणं च ।
अभिप्रायमेनं प्रभोर्व्यञ्जयन्ती तदुद्वाह एवोदिता वाक् तदासीत् ॥ ३८ ॥
जगद्गुरुर्मन्दरसानुकूलः सन्मङ्गलः सूर्यविशेषशोभी ।
योऽसावनिष्टोऽष्टम एव सिद्धो भुवीति युक्तं सुरवागवादीत् ॥ ३९ ॥

कृष्णप्रिया

विदाई के समय वर-वधू के मङ्गल के लिये एक ही साथ शङ्ख, तुरही, मृदङ्ग और दुन्दुभियाँ वजने लगी ॥ ३३ ॥ मार्ग में जिस समय घोड़ों की रास पकड़कर कंस रथ हाँक रहा था, उस समय आकाशवाणी ने उसे सम्बोधित करके कहा—'अरे मूर्ख ! जिसको तू रथ में बैठाकर लिये जा रहा है, उसकी आठवें गर्भ की सन्तान तुझे मार डालेगी' ॥ ३४ ॥ कंस बड़ा पापी था । उसकी दुष्टता की सीमा नहीं थी । वह भोजवंश का कलङ्क ही था । आकाशवाणी सुनते ही उसने तलवार खींच ली और अपनी बहिन की चोटी पकड़कर उसे मारने के लिये तैयार हो गया ॥ ३५ ॥ वह अत्यन्त क्रूर तो था ही, पाप-कर्म करते करते निर्लज्ज भी हो गया था । उसका यह काम देखकर महात्मा वसुदेव जी उसको शान्त करते हुए बोले ॥ ३६ ॥

वसुदेव उवाच

श्लाघनीयगुणः शूरैर्भवान् भोजयशस्करः । स कथं भगिनीं हन्यात् स्त्रियमुद्वाहपर्वणि[1] ॥ ३७ ॥
[2]मृत्युर्जन्मवतां वीर देहेन सह जायते । अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥ ३८ ॥
देहे पञ्चत्वमापन्ने देही [3]कर्मानुगोऽवशः । देहान्तरमनुप्राप्य प्राक्तनं त्यजते वपुः ॥ ३९ ॥
व्रजंस्तिष्ठन् पदैकेन यथैवैकेन गच्छति । यथा [4]तृणजलौकैवं देही कर्मगतिं गतः ॥ ४० ॥

---

१. कर्मणि–वीर. । २. मृत्युर्धर्मवतां–इति कस्यचित् । ३. कर्मवशानुगः–वीर. । ४. जलूकैवं–श्रीधर वंशी. ज्जीव. वीर. विज. शुक. ; जलौकैव–विश्व. ।

कर्वमक्षमा

अन्वयः—शूरैः श्लाघनीयगुणः भोजयशस्करः सः भवान् उद्वाहपर्वणि स्त्रियं भगिनीं कथं हन्यात् ॥ ३७ ॥ वीर जन्मवतां मृत्युः देहेन सह जायते अद्य वा अब्दशतान्ते वा प्राणिनां मृत्युः वै ध्रुवः ॥ ३८ ॥ अवशः कर्मानुगः देही देहे पञ्चत्वम् आपन्ने देहान्तरं अनुप्राप्य प्राक्तनं वपुः त्यजते ॥३९॥ व्रजन् एकेन पदा तिष्ठन् यथा एकेन एव गच्छति यथा तृणजलौका (गच्छति) एवं देही कर्मगतिं गतः गच्छति ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्लाघनीयाः स्तुत्या गुणा यस्य सः । भोजकुलस्य यशःसंपादकः । स्त्रियं तत्रापि भगिनीं तत्राप्युद्वाहपर्वणि ॥ ३७ ॥ ननु मरणभयान्निहन्मीति चेत् तथापि मरणस्यापरिहरणीयत्वाद्देहांतरस्यावश्यं भावित्वात्तत्रापि च भोगप्रेमास्पदत्वादीनामविशेषान्मरणभयेन पापाचरणमयुक्तमित्यभिप्रेत्याह । मृत्युजन्मवतामित्यादिना । देहेन सहेति विधात्रा ललाटे लिखितत्वादिति । तत्रापि कालविलंबार्थं हन्मीति चेत्तत्राह । अद्य वेति । अवश्यंभाविनि मरणे विलंबमात्राय पापाचरणमयुक्तमिति भावः ॥ ३८ ॥ किं च । अस्मिन् देहे गते यदि देहांतरं न स्यात्तदा युज्येत पापेनापि तत्पालनम् । न तु तदस्तीत्याह । देहे पंचत्वमिति । आपन्ने आपन्नप्राये कर्मवशादयत्नत एव प्रथमं देहांतरं प्राप्य पश्चात् प्राक्तनं वपुः पूर्वदेहं त्यजतीत्यर्थः ॥३९॥ अत्र दृष्टांतः । व्रजन्निति यथा व्रजन्पुरुषः एकेन अग्रतो निहितेन पदा तिष्ठन्भुवमवष्टभ्य देहं बिभ्रत्पश्चादन्येन पूर्वप्रदेशादुत्थाप्य पुरोनिहितेन पदा गच्छति तद्वत् । अत्र च स्वीकारपरित्यागौ नात्यंतभिन्नविषयाविति स्पष्टम् । दृष्टांतांतरमाह । यथा तृणजलूकेति । सा हि यथा देहार्धेन तृणांतरमवष्टभ्य पूर्वं तृणं त्यजति एवं कर्मपथे वर्तमानो जीवोपि ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सामप्रकारमाह–"संबंधलाभाभेदाश्च गुणकीर्तनमेव च । उपकारश्च पंचैव सामभेदा इहोदिताः ॥" इति । श्लाघनीयेति । गुणकीर्तनं, भोजेति संबंधः भगिनीमित्यभेदः, स्वहंतृजनन्या अपि स्त्रिया अवधेन धार्मिकत्वयशोरूपलाभः, मम भार्यादानेनोपकारश्च । स्त्रियं तत्रापि भगिनीं तत्राप्युद्वाहपर्वणि तत्रापि भवान्महायशस्वीति हनने ऐहिकं दुर्यशोऽमुत्र नरकपातश्चेति दृष्टादृष्टलक्षणभेदोपि दर्शितः । वास्तवार्थस्तु—विपरीतलक्षणया श्लाघनीयेषु गुणः कोर्थः शून्यः 'गुणः शून्ये च शब्दादौ' इति कोशात् । भोजाः कलहप्रियाः प्रसिद्धास्तेषां यशः कलहाधिक्यम् । स कथं भगिनीं हन्यादपि तु सर्वं कुलमिति ॥ ३७ ॥ तत्रापि देहांतरेपि । अविशेषात्तुल्यत्वात् । तद्भयेन मरणभयेन । अयुक्तमनुचितम् । 'विधात्रा ललाटे' इति "लिखिता चित्रगुप्तेन ललाटेऽक्षरमालिका । आयुः कर्म च वित्तं च विद्या निधनमेव च ॥" इत्युक्तेः । यद्यपि 'जातस्य हि ध्रुवो मृत्युः' इत्याद्युक्तेर्मृत्युरप्रतीकार्य्यस्तथापीति तत्र कालविलंबे अवश्यंभाविनीति । "अवश्यं भाविभावानां प्रतीकारो यदा भवेत् । तदा दुःखैर्न युज्येरन्नलरामयुधिष्ठिराः ॥" इत्याद्युक्तः । इति भाव इत्याशयः । हे वीरेति । त्वं मृत्योर्भेतुं नार्हसि । यद्वा–नहि वीराः स्त्रीषु प्रहरंतीति भावः ॥ ३८ ॥ अत्र विषयेऽन्यदप्याह–किंचेति । तत्पालनं देहपालनम् । तदस्तीति देहांतराभवोस्तीति । अवश इति कर्मानुगत्वात् । यद्वाऽवशो भगवद्वशः । त्यजत इत्यार्षमात्मनेपदम् ॥ ३९ ॥ अत्र पूर्वदेहपरित्यागदेहांतरस्वीकारे । व्रजन् गच्छन्नित्यर्थः । अवष्टभ्य गृहीत्वा । अत्र च भूमिदृष्टांते च । नात्यंतभिन्नविषयौ एकस्या एव पृथिव्या विषयत्वात् । जलूकेति षष्ठस्वरमध्य पाठोपीति । आहितसंस्कारेण स्थापितसंस्कारेण तदेव श्रुतदृष्टं तत्राहमिति मननाच्च । तद्वदत्रापीति । स्वप्नमनोरथवन्मरणावस्थायामपीति । प्राक्तनं पूर्वम् ॥ ४०-४१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्रादौ साम्ना प्रबोधयति—श्लाघनीयेति । भवानित्यादरात् स्त्रियं तत्रापि भगिनीं तत्रापि तद्विवाहोत्सवे कथं हन्यात् ? अपि तु हन्तुं नैवार्हतीत्यर्थः । अन्यथा शौर्ययशसोर्हानिः तत्र श्लाघनीयेति गुणकीर्त्तनं भोजेति सम्बन्धः भगिनीमित्यभेदः कथं हन्यादिति स्त्रीवधनिवृत्त्या यशोलाभः उद्वाहेति सन्ततिवृद्ध्योपकारः श्लेषेण शूरैय श्लाघनीया तेभ्यो गुणो गौणः निकृष्ट इत्यर्थः । यद्यपि भोजा अपि भद्राः किन्तु तेष्वयमेवैकाकी पापिष्ठ इति किंवदन्त्या तेषां यशस्करः स कथं भगिनीं तन्मात्रं हन्यात् ? अपि तु सर्वमपि स्वकुलं हन्यादेवेत्यर्थः ॥ २७ ॥ युक्तिभिः षट्श्लोक्या प्रबोधयन् आदौ मृत्योरपरिहार्य्यत्वमाह—मृत्युरिति । तथाच्योक्तं "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" इत्यादि हे वीर ! इति प्रोत्साहनसम्बोधनं श्लेषेण अत्र तु वीरत्वं नास्तीत्यर्थः । यद्वा, युद्धमात्रे समर्थः न तु विचारादाविति । कथं देहेन सह जायते इति ज्ञायेत ? तत्राह—अद्यवेति, अवश्यं यत्कार्योत्पादकं यत्तत्तदन्तर्भूतमेवेत्यर्थः । वा शब्दाभ्यां पक्षयोर्द्वयोरपि प्राधान्यं बोध्यते वै एतत्प्रसिद्धमेवेत्यर्थः ॥ ३८ ॥ ननु, सत्यं मृत्युर्भवितैव किन्तु देहाभावेन भोगाऽसिद्ध्या कञ्चित्कालं भोगार्थं देहरक्षा युक्तैव, तत्राह—देह इति । पञ्चत्वमिति पञ्चभूतैरारब्धत्वेन कदाचिद्विच्छेदापत्तिश्च घटेतैवेति भावः देहीति देहाद्भिन्नत्वेन तस्य नाशो निरस्तः, देहान्तरप्राप्तौ हेतुः कर्माऽनुग इति कर्म्मणामवश्यभोग्यत्वात् न च तत्र प्रयासोऽस्तीत्याह–अवशः कर्मवशात् स्वत एव तत्सिद्धेरित्यर्थः । अनुत्यजत इत्यन्वयः । आत्मनेपदमार्षम् ॥ २९ ॥ देहीति नित्ययोगे मत्वर्थीयः जलूकेति षष्ठस्वरमध्यः पाठो बहुत्र ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह—श्लाघनीयेत्यादिभिर्नवभिः। शूरैः श्लाघनीयाः स्तुत्याः गुणा यस्य भोजानां भोजवंश्यानां यशः कीर्तिं करोत्यावहतीति तथा स भवानेवम्भूतत्वात् कथं स्त्रियं तत्रापि उद्वाहकर्मणि उद्वाहाङ्गगृहप्रवेशकर्मणि, पर्वणीति पाठे गृहप्रवेशोत्सवकर्मणीत्यर्थः। तत्रापि भगिनीं हन्याः हन्तुमुद्युक्तोऽसि ॥ ३७ ॥ मन्मरणनिदानभूतत्वाद्भगिनीमपि हन्यामीत्यत्राह—मृत्युरिति। हे वीर! जन्मवतामुत्पत्तिमतां देहेनैव सह मृत्युर्जायते मृत्युः छायेव देहमुत्पत्तेरारभ्यानुवर्तत एव किन्तु कालमात्रमपेक्षत इति भावः। अतोऽधुना वर्षशतान्ते वा प्राणिनां मृत्युः ध्रुवः निश्चितः अपरिहार्य इति यावत् ॥ ३८ ॥ नन्वब्दशतान्ते जरया जीर्णशरीरमस्तु मृत्युग्रस्तमधुनात्विदं कल्याणतरं नवयौवनसंपन्नशरीररमुपेति चेत्पुनरेवंविधं दुर्लभमित्यत आह–देहेति। देहे पञ्चत्वं मरणमापन्ने आप्तुमुद्युक्ते सति देही तद्देहस्थो जीवः कर्मवशानुगः प्राचीनकर्मवश्यतामनुप्राप्तः कर्मानुगुणं शरीरान्तरं प्राप्यैव प्राक्तनं वपुस्त्यजते कर्मानुगुणशरीरान्तरस्यायत्नलभ्यत्वात् एवंविधजुगुप्सितं कर्म संपाद्यस्य शरीरस्य निहीनस्यैवापत्तेस्तादात्मिकं मरणभयमपहाय भगिनीप्राणपरित्राणरूपाच्छुभकर्मणः पुनरितोऽपि कल्याणतरदेहप्राप्तेश्चैषा न हन्तव्या इति भावः ॥ ३९ ॥ "देहान्तरमनुप्राप्य प्राक्तनं त्यजते वपुः" इत्येतदेव सदृष्टान्तमुपपादयति—व्रजन्निति। इयं प्रसिद्धा तृणजलूका तृणगतकीटविशेषः स यथा व्रजन् गन्तुमुद्युक्तः एकेन पदा पादेन तिष्ठन् तृणमवलम्बयन्नेव एकेन पदेन गच्छति, एवं देही जीवोऽपि पञ्चत्वमापन्नं देहं त्यजन् कर्मगतिं कर्मानुरूपं शरीरं गतोऽधिष्ठितः प्राक्तनं वपुस्त्यजतीत्यर्थः। अणोर्जीवस्य कथं पञ्चतामापत्स्यमानं देहमधितिष्ठत एव पुनर्देहान्तराधिष्ठातृत्वम्? इति न शङ्कनीयं गेहाद्गेहान्तरं प्रविशत इव स्वोपकरणेन्द्रियप्राणादिप्रापणपूर्वकत्वाद्देहान्तरप्राप्तेर्धर्मभूतज्ञानद्वारा वा देहान्तराधिष्ठातृत्वमिति न विरोधः, यद्वा, देहान्तरपरिग्रहपूर्वकमेव पूर्वदेहपरित्यागे दृष्टान्तस्तृणजलूका छाययेव मृत्युनाऽनुगतत्वाज्जीवद्दशायामपि मृतप्रायत्वे दृष्टान्तान्तरमुच्यते—व्रजन्निति, यथैकेन पादेन व्रजन् गच्छन् पुरुषः पुनरेकेन पादेन तिष्ठन्नेव गच्छति तद्वज्जीवन्नपि पुरुषः पुनर्मृतप्राय एव सन् जीवतीत्यत एव व्रजंस्तिष्ठन्निति पुंस्त्वनिर्देशः यथाशब्दद्वयञ्च ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सम्बन्धलाभोपकृतिरभेदो गुणकीर्तनम्। साम्नः पञ्चविधो भेदो दृष्टादृष्टभयम्वचः ॥

इति पञ्चविधं साम ज्ञायते—श्लाघनीयगुणेत्यादिना। श्लाघनीयगुणेति गुणकीर्तनं भोजयशस्करेति कीर्तिलाभकथनं हन्याः स्त्रियमिति स्त्रीवधादकीर्तिलाभसूचनं भगिनीमिति सम्बन्धवचनम् उद्वाहपर्वणीति अपकृतिसूचनम् उद्वाहपर्वणीतिसूचनाद्विवाहोऽयमेव ॥ ३७ ॥ मृत्युर्जन्मवतामित्यादिना अदृष्टभयम् ॥ ३८ ॥ देहे पञ्चत्वमित्यादिना दृष्टभयं कर्म पुण्यपापविषयम् अवशो विष्णुवशः त्यजते त्यजति ॥ ३९ ॥ पूर्वदेहपरित्यागेन देहान्तरप्राप्तौ दृष्टान्तमाह—व्रजन्निति। यथा व्रजन् पुरुषः एकेन पादेन तिष्ठति एकेन गच्छति पूर्वदेशावियोगेन देशान्तरसंयोगमाप्नोति यथा तृणजलूका तृणान्तरं गृहीत्वा पूर्वतृणं त्यजति एवं देही कर्मगतिं गतो भवतीत्यन्वयः। कर्मणो गतिराप्तिर्यस्मिन् देहे त्यजति तथा तत्तद्देहान्तरमित्यर्थः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सम्बन्धलाभावुपकृत्यभेदौ गुणकीर्त्तनमिति प्रथमं पञ्चविधं सामाऽऽह—श्लाघनीयेति गुणकीर्त्तनं भोजेति सम्बन्धः भगिनीमित्यभेदः स्वहन्तृजनन्या अपि स्त्रिया अवधेन धार्मिकत्वयशोलाभः मम स्वभार्याप्राप्त्या परोपकारश्च स्त्रियं तत्रापि भगिनीं तत्राप्युद्वाहपर्वणि तत्रापि भवान् महायशस्वीति हनने ऐहिकं दुर्यशः पारत्रिकं नरकञ्चेति दृष्टाऽदृष्टभयलक्षणो द्विविधो भेदश्च दर्शितः वास्तवार्थस्तु विपरीतलक्षणया यद्वा श्लाघनीयेषु मध्ये गुणः न्यूनः भोजाः कलहवत्त्वेन प्रसिद्धास्तेषां यशः कलहाधिक्यं स कथमेकां भगिनीं हन्यात् अपि तु सर्वमेव कुलम् ॥ ३७ ॥ तदप्यनिवृत्तं तं युक्त्या प्रबोधयन् भो राजन्! मृत्युभयेन इमां हंसि चेत् स मृत्युरपरिहार्य एवेत्याह—मृत्युरिति। वस्तुतः तावज्जीवानां जन्ममृत्यू नैव स्तः तदपि देहेन स्थूलदेहसम्बन्धेनैव हेतुना जन्मवतां स प्रसिद्धो ह स्पष्टमेव, मृत्युर्जायते, कदा? अद्य वा अब्दशतान्ते वा वाशब्दाभ्यां सर्वथैव कालनिश्चयाभावः अब्दशतमध्ये वेत्यर्थः। तत्र प्रमाणमाह—मृत्युर्वै इति। "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसीति शास्त्रं स्मारयति हे वीरेति त्वं तु तस्माद्विभेतुं नैवार्हसीति भावः ॥ ३८ ॥ देहप्राप्तित्यागावेव जीवस्य जन्ममृत्यू तौ त्वावश्यकावेवेत्याह—देहे पञ्चत्वं मृत्युम् आपन्ने आपन्नप्राये देहान्तरं प्राप्य अनु पश्चात् प्राक्तनं वपुस्त्यजति न च विषयभोगसाधनमेव देवो मे नङ्क्ष्यतीति विषीदितुमर्हसीत्याह—कर्मानुग इति। यदि तव सुखभोगादृष्टमस्ति तर्हि तत्रैव प्राप्तव्ये देह एव भोगो भविष्यतीति भावः। तस्मादिदं स्त्रीवधलक्षणं पापं दुःखभोगसाधनं माऽकार्षीरिति द्योतितम् ॥ ३९ ॥ उत्तरदेहप्राप्त्यनन्तरमेव पूर्वदेहत्यागे दृष्टान्तः—व्रजन् गन्ता पुरुषः यथा एकेनाग्रतो निहितेन पदा उत्तरप्रदेशे तिष्ठन्नेव पूर्वप्रदेशादुत्पाट्य पुरो निहितेनैकेन गच्छति न तु युगपद् द्वाभ्यामेव पद्भ्यां पूर्वप्रदेशं परित्यज्यैव उत्तरं प्रदेशं गच्छतीत्यर्थः। अत्र प्राप्तित्यागौ वस्तुतः पृथिव्या एकस्या एवेत्यपरितुष्यन् दृष्टान्तरमाह—यथा तृणजलौकेति। सा हि तृणान्तरमवष्टभ्यैव पूर्वं तृणं त्यजति जलूकेति षष्ठस्वरमध्योऽपि पाठो ज्ञेयः ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यदि जायमानशत्रुभयाद्भवान् स्त्रियं तत्रापि भगिनीं तत्राप्युद्वाहपर्वणि हन्यात्तदा शूरैः श्लाघनीयगुणः भोजयशस्करश्च स त्वं कथम् ? अत एवं न कर्तव्यमिति फलितोऽर्थः ॥ ३७ ॥ ननु, मृत्युप्रतीकारार्थमेवं करोमीत्यत्र मृत्युरपरिहार्य इत्याह—मृत्युरिति। मृत्युर्नाम देहस्यान्तः स च जन्मवतां देहे जातेऽहमेव जातोऽस्मीत्यभिमानवतां देहेन सह जायते अन्तवानेव देहः उत्पद्यते इत्यर्थः। नन्वेवं लक्षणं मृत्युमहं न जानामि किंतु दण्डादिनिमित्तेन घटनाशवद्देहविनाशं मृत्युं जानामि तदस्या गर्भो मन्मृत्युनिमित्तो यथा न भवेत्तदर्थमेनां हन्मीत्यत आह—अद्यवेति। निमित्तेनाप्यद्य वाब्दशतान्ते वा मृत्युर्ध्रुव एव ॥ ३८ ॥ किञ्च देहनाशेऽपि देहान्तरप्राप्तिर्भविष्यत्येव देहरक्षणार्थं पापाचरणमयुक्तमेवेत्याशयेनाह—देह इति। पञ्चत्वं पञ्चमहाभूततामापन्ने आपन्नप्राये सति कर्माऽनुगः स्वकृतकर्माऽनुयायी अवशः अस्वाधीनो देही देहाभिमानी जीवः देहान्तरं प्राप्य तन्निष्पादककर्मनिरतया लब्धप्रायं कृत्वा अनु पश्चात् प्राक्तनं वपुस्त्यजते ॥ ३९ ॥ उत्तरतनुग्रहणपूर्वकप्राक्तनतनुत्यागे दृष्टान्तमाह—व्रजन्निति। यथा जनो व्रजन् गच्छन् एकेन पदा तिष्ठन्नुत्तरे स्थले स्थितिं कुर्वन् एकेन गच्छति पूर्वप्रदेशं त्यजति गम्यमानभूप्रदेशस्यैक्यप्रतीतिरतः स्फुटं दृष्टान्तान्तरमाह—यथेति। तृणजलूकाऽग्रिमं तृणं गृहीत्वा पूर्वं तृणं त्यजति एवं देही कर्मगतिं कर्मनिबन्धनीं देहाद्देहान्तरगतिं गतः प्राप्तः ॥ ४० ॥

श्रीसुबोधिनी

आकाशवाणीं च श्रुत्वेयं च न मरिष्यतीति निश्चित्य कथञ्चित् प्रतीकारः कर्तव्य इति प्रतियुद्धादिकमकृत्वा कंसं परितः सान्त्वयन् तिष्ठ तिष्ठ मद्विज्ञापनां शृण्विति वदन्नाकाशवाण्याः समाधानार्थं वक्ष्यमाणमुवाच। आकाशवाण्युक्तं न मिथ्या। अयं च प्रतीकारार्थं यतते। तत्र क्रियया प्रतीकारो न भवति ज्ञानेनैव प्रतीकारो भवतीति नवभिः प्राणश्लोकैस्तस्य सर्वं तत्त्वमुपदिशति श्लाघनीयेति। यद्ययं मृत्यौ निरभिमानस्तिष्ठेदक्लिष्टकर्मा भगवान् तं न हन्यात्। अत इदमुपदिश्यमानं देवगुह्यत्वात् प्रतिबन्धकत्वेन फलितम्। वसुदेवोपि भगवता प्रेरित इत्यनधिकारिणमनवसरे बोधयति। आकाशवाणीप्रामाण्येन हि स मारयितुमुद्यतः। सा चेन्मारिता स्यादाकाशवाण्यप्रमाणैव स्यादतोन्य एवोपायश्चिन्तनीयस्तेनापि। अतोनवसरेपि दयया तद्धितमेवोक्तवान्। नवधा एतत्कर्तव्यम्। महतो निन्दितकरणमनुचितम्। नायं च प्रतीकारः। नापि प्रतीकारः कर्तव्यः पूर्वदेहस्य मलत्वात्। नापि देहान्तरं दुर्लभम्। नापि पूर्वदेहस्य त्यागे कश्चन प्रयासः। नापि वस्तुतो देहाध्यासव्यतिरेकेण देहिनः स्वतो जन्मास्ति। देहाध्यासश्चाज्ञानादिति ज्ञानेन निवर्तते। किञ्च यावदन्यस्मै न द्रुह्यति तावन्न तस्य भयं भवति। द्रोहे मया वा मन्निष्ठेन वा भगवता तव हननं निश्चितमाकाशवाण्या अमिथ्यात्वात्। लोकस्वभावविरुद्धश्चायमिति। तत्राद्यमन्त्यौ च लौकिकौ। मध्ये षट् पारमार्थिकाः। तत्र प्रथमं तव विगर्हित**मनुचित**मित्याह। **शूरैर्जरासन्धादिभिः श्लाघनीया** गुणा यस्य। **शूरः** हि युद्धमभिमन्यन्ते कातरा एव मृत्युं विचारयन्ति। अतोस्याः पुत्रो मारयिष्यतीतिश्रवणे शूराणामुत्साह एव युक्तो न तु स्वशौर्यनाशकं तन्मारणमुचितं 'द्वौ सम्मताविह मृत्यू दुरापा'विति वाक्यात्। भवांश्च क्षत्रियधर्मे निष्णात इति सर्वैः श्लाघ्यते। किञ्च **भोजयशस्करो भवान्** भोजवंशे नैतादृशः शूर इति। अतः स्वधर्मकीर्तिजनकत्वाकाशवाणीवाक्यश्रवणेन वधो नोचितः। किञ्चैतादृशयशोधर्मयुक्तो दयापात्रं **भगिनीं** **कथं हन्यात्** यदर्थं लोकाः स्वयं म्रियन्ते ? किञ्च **स्त्रियम्**। स्त्रीवधोनुचितः शूराणाम् भगिन्यपि कदाचित् क्षत्रियवंशोद्भवत्वाच्छौर्यमवलम्बते तादृश्यपीयं न भवति। सा तु पुम्प्रकृतिका भवति। इयं तु स्त्र्येवेति न पुनरुक्तिः। किञ्च वधे कर्तव्येपि कालान्तरे कर्तव्यो न तु विवाहोत्सवे। लौकिका राजानो मारणीयं विषादिनापि मारयन्ति। तस्माच्छौर्यादिधर्मवतस्ते नेदमुचितम् ॥ ३७ ॥
किञ्च यदियं हन्यते तन् मृत्युप्रतीकारार्थं न तु वैरभावेन न च मृत्युरस्यां हतायां प्रतिकृतो भवति सहजत्वादित्याह **मृत्युरिति**।

नापि विलम्बार्थम्। वाणीवचनादेव नेयं हन्ति नापि हनिष्यति। अस्या अप्यष्टमो गर्भः शीघ्रमेव हनिष्यतीतिवाक्यमस्ति। अथ कदाचिद्धनिष्यतीतिशङ्का तन्नित्यमृत्योरनेनान्येन वा हननं सिद्धमिति नायं प्रतीकारः। तदाह **जन्मवतामुत्पन्नानां मृत्युर्देहेन सहैव जायते**। 'मृत्युनैवेदमावृतमासी'दित्युपाख्याने भगवान् मृत्योः सकाशात् प्राणिनो बहिः कृत्वा तेषामन्तर्मृत्युं पातितवान्। 'अशनाया मृत्युरेवे'तिश्रुतेः। अशनायारूपो **मृत्युर्देहेन सहैव जायते**। तस्मात् प्रत्यहमनुभूयमानो मृत्युर्नित्य इति। अद्य वाब्दशतान्ते वा प्राणिनां **मृत्युः** सिद्ध एव। वीरेतिसम्बोधनमेवङ्कथनेपि भयाभावाय। अब्दशतान्ते **मृत्युः** सर्वेषामभिमत इति तदेव आकाशवाणी सत्या भविष्यतीति न मारणमुचितमिति भावः ॥ ३८ ॥ न च देहत्यागे क्लेशो भविष्यतीति क्लेशनिवृत्त्यर्थमौषधपानवदस्या मारणमुचितमित्याह **देह** इति। **देहे पञ्चत्वमापन्ने** पञ्चमहाभूतेष्वंशतो लीने सत्ययं देहाभिमानी जीवो **देहान्तरं** नवीनं कल्याणतरं **प्राप्य प्राक्तनं** मलप्रायं **वपुस्त्यजते** ग्रहणे त्यागे वा नास्य प्रयासोस्ति यतः **कर्मानुगः** कर्मणैव तथोपस्थाप्यते। नाप्यस्य प्रयत्नापेक्षा यतोवशः। **अनुप्राप्त्ये**पि कालविलम्बो निराकृतः। अतः प्रयासाभावादौषधवदप्यस्या मारणमयुक्तम् ॥ ३९ ॥ किञ्च देहान्तरप्राप्तौ विलम्बो भविष्यतीत्यपि न शङ्कनीयमित्याह **व्रजन्निति**। यथा गच्छन् पुरुष **एकेन पदा तिष्ठन्नेकेन गच्छति**। प्रथमतः स्थितिः पश्चाद्गतिस्तथा प्रथमतो देहान्तरग्रहणं पश्चादस्य परित्यागः। गमने देशभेदस्य दुर्ज्ञेयत्वाद् दृष्टान्तरमाह यथा तृणजलौकेति। तृणान्तरे स्थित्वा पूर्वतृणं त्यजतीति प्रत्यक्षसिद्धम्। यथात्र बुद्धिप्रयत्नो तथा देहान्तरे कर्मगतयः। तदाह **कर्मगतिं** गत इति **कर्मगतिं** देवतिर्यगादिदेहम् ॥ ४० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

व्रजन्नित्यत्र—कर्मगतय इति । 'तदेव तत्सहकर्मणैतल्लिङ्गं मनो यत्र निषक्तमस्ये'तिश्रुतेः **कर्मगतय** एव बुद्धिप्रयत्नस्थानीया इत्यर्थः ॥ ४० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अग्रिमश्लोकाभासमाहुराकाशेति । **प्रतीकारार्थमिति** । आकाशवाण्युक्तस्य हननस्य प्रतीकारार्थमित्यर्थः । **कंसेन** क्रियमाणो न प्रतीकारः किन्तु वसुदेवोक्तः । यदि कंस इदमङ्गीकुर्यात्तदा प्रतीकारः स्यादेवेतिभावः । सङ्ख्यातात्पर्यमाहुः **प्राणश्लोकैरिति** । 'नव वै पुरुषे प्राणा इति श्रुतेः प्राणरूपैः श्लोकैः 'प्राणैर्मनो मनसश्च विज्ञानमि'ति श्रुतेर्ज्ञानजनकैरित्यर्थः । 'अर्वाग्बिलश्चमस' इति श्रुत्युक्ताः सप्त द्वावधाञ्चाविति नव प्राणा ज्ञेयाः । **सर्वं तत्त्वमिति** । पारमार्थिकं लौकिकं च सिद्धान्तमित्यर्थः । **श्लाघनीयेत्यत्र—प्राणश्लोकैरपि** तत्त्वोपदेशे मरणानिवृत्तौ हेतुमाहुर्यद्ययमिति । **अक्लिष्टकर्मेति** । **क्लिष्टमिति** भावे क्तः क्लेश इत्यर्थः । ततो 'अर्श आद्यच्' क्लेशयुक्तमित्यर्थः । न तादृशं कर्म यस्येत्यर्थः **देवगुह्यत्वादिति** । **देवो** भगवांस्तत्कृतं **गुह्यम्** । **श्लाघनीयेत्यादि** । प्रशंसया तस्याभिमान एवोत्पन्नो येन ज्ञानरूपप्रतीकारानङ्गीकारोतोभिमानजनकत्वादिदं मरणनिवृत्त्यर्थमुपदिश्यमानं प्रत्युत तन्निवृत्तौ प्रतिबन्धकं जातम् । तथा च श्लोकानां प्राणरूपत्वेप्यस्यानधिकारित्वेन भगवताभिमानजननान्मरणमिति सूचितम् । तर्हि वसुदेवः कथं बोधितवानित्यत आहुर्वसुदेवोपीति । **देवगुह्यत्वाभिमानजननार्थं** भगवता प्रेरित इत्यर्थः । **किञ्चेति** । अन्त्ययोर्लौकिकत्वेन मध्यस्थितषड्भ्यो विभेदसूचनाय किञ्चेत्युक्तम् । **मन्निष्ठेन वा भगवतेति** । मद्धृदयस्थेन **वासुदेवेनेत्यर्थः** । इदं निबन्धे स्फुटम् । नन्वस्याः पुत्रो मारयिष्यतीत्याकाशवाण्योक्तमतोन्यस्मान्मम कथं मरणमित्यत आहुराकाशेति । मिथ्यात्वं तु देवकीद्रोहे सति तत्पुत्रासम्भवाज्जातमेवेत्यर्थः । स **कथं** हन्यादित्यनेन स्वहस्तेन साक्षाद्धननस्य निषिद्धत्वाच्छेषाभ्यनुज्ञान्यायेन प्रकारान्तरमारणमभ्यनुज्ञातमिव जातमित्याशयेनाहुर्लौकिका इति । एवं वा कर्तव्यमित्यर्थः । **नेदमिति** । साक्षाद्धननं नोचितमित्यर्थः ॥ ३७ ॥ **मृत्युरित्यत्र**—वाणीवाक्ये गर्भपदेन बाल्य एव हनिष्यतीति सूचितमित्याशयेनाहुः **शीघ्रमेवेति** । तथा च गर्भपदमुक्त्वा तदर्थोनेन विवृत इति ज्ञेयम् । पञ्चाग्निविद्यायां 'गर्भः सम्भवती'ति छान्दोग्यश्रुतौ 'पुरुषवचसो भवन्ती'तिप्रश्नैकवाक्यतायै 'पुरुषः सम्भवती'तिबृहदारण्यकैकवाक्यतायै च गर्भपदेन बालः पुरुषः उक्तः । 'योनेः शरीर'मितिसूत्रे व्युत्पादितं च । **प्राणिन इति** । अप्राणिनामशनायारूपोन्तर्मृत्युर्न किन्तु बहिर्धर्मैरेव तेषां नाश इति भावः । **तदैवेति** । अब्दशतसन्निहितकाल एवाष्टमो गर्भः सम्भविष्यतीत्यर्थः ॥ ३८ ॥ **व्रजन्नित्यत्र—कर्मगतिमिति** । कर्मणा गतिः प्राप्तिर्यस्य तादृशं देहमित्यर्थः ॥ ४० ॥

श्रीबुभुत्सुबोधिका

श्लाघनीयगुण इत्यत्र आकाशवाण्याः समाधानार्थं यततेऽयं अतो ज्ञानेच्छे पूर्वं वाच्ये । तत्राकाशवाण्युक्तस्त्रीमरणप्रतीकारश्च विषये ज्ञाने तादृशं ज्ञानमिच्छाविषयः । तादृशीच्छा यत्नविषयः । तदाहुः आकाशवाणीत्यादिना । अयमिति कंसः । क्रिययेति वेदरूपवसुदेवस्य क्रिया ज्ञानं वा शक्तिः प्रतिपाद्येति द्वयोरुक्तिः । ज्ञानेनैवेति अत्र ज्ञानयत्नावुक्तौ । तत्र श्रुतिः 'यन्मनसा ध्यायति तत् करोती'ति श्रुतिः । अत्रापीच्छा ज्ञेया । कंसेन क्रियमाणो न प्रतीकारः । देवकीमरणेप्यन्यथा मारयेद् भगवानाकाशवाणी वा । किन्तु वसुदेवोक्तः प्रतीकारः । यदि कंस इदमङ्गीकुर्यात् तदा प्रतीकारः स्यादेवेति भावः । प्राणश्लोकैरिति एकस्य वसुदेवप्राणस्य नव श्लोकाः परिणाम इति स्फुटम् । वायुः शब्दतामापद्यत इति प्राञ्चः । तथा च प्राणात् श्लोकैः । प्राणश्लोकैः । सम्बन्धः जन्यजनकभावः । प्राणात् ते श्लोका इति विग्रहे कर्मधारयः । कुतोत्र प्राणान् नव प्राणश्लोकाः । उच्यते प्रश्नोपनिषदि । 'अथ हैनं भार्गवो वैदर्भिः पप्रच्छ भगवन् कत्येव देवाः प्रजां विधारयन्ते कतर एतत् प्रकाशयन्ते कः पुनरेषां वरिष्ठ इति, तस्मै स होवाचाकाशो ह वा एष देवो वायुरग्निरापः पृथ्वी वाङ् मनश्चक्षुः श्रोत्रं च ते प्रकाश्याभिवदन्ति वयमेतद् बाणमवष्टभ्य विधारयामस्तान् वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद् बाणमवष्टभ्य विधारयामीती'ति । 'एनं' पिप्पलादम् । 'भार्गवो' गोत्रेण विदर्भस्यापत्यम् । 'एतत्' प्रजारूपं कार्यम् । 'स' इति पिप्पलादः । 'त' इति बहुत्वनियमात् वाग्वन्तो द्वन्द्वः । बाणं 'प्रकाश्य' । 'बाण'मिति शरीरम् । 'अहं' वरिष्ठ आसन्यः प्राणः । अत्राकाशादीनि नवैव । यद्यपि दश प्राणाः तथाप्युपदेशाच्छान्दोग्ये नवेति तद्बीजरूपाः प्रश्नोक्ता नवोपात्ताः । 'नव वै पुरुषे प्राणा' इति श्रुतेः । सर्वं तत्त्वमिति स्वस्य वेदत्वेन मोक्षरूपवासुदेवाविर्भावस्थानत्वेन च पारमार्थिकं लौकिकं च सिद्धान्तम् । नवसु त्रयोविंशतितत्त्वानामन्तर्भावात् सर्वमिति पदम् । जन्मप्रकरणत्वात् सङ्ख्यातात्पर्यम् । जातेष्टौ सङ्ख्यातात्पर्यस्योक्तत्वात् । उपदिशतीति प्राणरूपैः श्लोकैरुपदिशति 'प्राणैर्मनो मनसश्च विज्ञान'मितिश्रुतेर्विज्ञानजनकत्वात् । प्राणश्लोकैरपि तत्त्वोपदेशेप्यपमरणानिवृत्तौ हेतुमाहुः यद्ययमिति । मृत्यावित्यपमृत्यौ सतिसप्तमी । 'अप पुनर्मृत्युं जयता'त्यारण्यकात् । अपमृत्युमिति योजना । श्रुत्यां निष्क्रान्तोभिमानादिति निरभिमानः । अक्लिष्टेति क्लिश तापे दि० आ० से० भावे क्तः । न क्लिष्टं तापरूपं कर्म यस्य । निरभिमानं कंसं वृथा न तापयेत् । तं नेति अतप्तं कंसं न हन्यात् । कंसवधः क्लिष्टकर्म स्यादितिभावः । अत इति साभिमानत्वात् । उपदिश्य-

मानमिति युक्तत्वकारकम्। 'नैव किञ्चित् करोमी'ति गीतातः, 'नायं हन्ति न हन्यत' इति वा गीता। देवगुह्यत्वादिति देवस्य भगवतो गुह्यत्वात्। यथा राजगुह्ययोगाध्याये राजगुह्यं तथेदं देवगुह्यम्। गुहू संवरणे भ्वा० उ० वेट् देवसंवरणीयत्वात् असुरावैरिणः कंसस्याज्ञातं सज् ज्ञानप्रतिबन्धकत्वेन फलितम्। मृत्युरूपस्वभावप्रतिबन्धकत्वार्थं न फलितं च। 'श्लाघनीये'त्यादिप्रशंसया तस्याभिमान एवोत्पन्नो येन ज्ञानरूपप्रतीकारानङ्गीकारोऽतोभिमानजनकत्वादिदं मरणनिवृत्त्यर्थमुपदिश्यमानं प्रत्युतापमरणनिवृत्तौ प्रतिबन्धकं जातम्। तथा च श्लोकानां प्राणरूपत्वेप्यस्यानधिकारित्वेन भगवताभिमानजननादपमरणमिति सूचितम्। यर्हि वसुदेवो विपरीतं फलिष्यतीति ज्ञानात्मा कुत उक्तवानित्यत आहुः वसुदेव इति। भगवतेति तन्निष्ठवासुदेवेन प्रेरित इत्युपदिश्यमानत्वेनानुमीयते। वसुदेवस्य वेदत्वाद् वासुदेवस्य प्रतिपाद्यत्वेन वसुदेवस्य ज्ञानत्वे विषयत्वेनेति ध्येयम्। तेनापीति कंसेनापि। 'दैवमप्यनृतं वक्ती'ति कंसवाक्यात् कंसस्यर्तवचनत्वज्ञानं दैवे आकाशवाण्यां यतः। अत इति द्वितीया आकाशवाण्या मिथ्यात्वापत्तेः। एतदिति स्त्रीहननम्। नवश्लोकार्थानाहुः महत इति। अन्त्ययोश्च श्लोकयोर्लौकिकत्वेन मध्यस्थितषड्भ्यो भेदसूचनायाहुः किञ्चेति। अष्टमस्यार्थः। यावदन्यस्मा इति मन्निष्ठेनेति मद्धृदयस्थेन वासुदेवेन। इदं निबन्धे स्फुटम्। नन्वस्याः पुत्रो मारयिष्यतीत्याकाशवाण्योक्तमतो नान्यस्मान् मरणमित्यत आहुः आकाशेति। मिथ्यात्वं तु देवकीद्रोहे सति तद्गर्भासम्भवाज् जातमेवेति। 'अमिथ्यात्वा'दिति पाठे स्पष्टम्। मन्निष्ठेत्युक्तस्य देवकीगर्भत्वं भावि। नवमश्लोकार्थमाहुः लोकस्वभावेति। लोकव्यवहारविरुद्धः। पापमिति पद्यम्। अन्त्याविति श्लोकौ। 'लौकिका' इति पाठे आद्यमन्त्यौ च लौकिका इत्यर्थः। द्वन्द्वे परवल्लिङ्गात् पुंस्त्वम्। षडिति श्लोकाः। तन्मारणमिति स्त्रीमारणम्। 'भवान् भोजयशस्कर' इति व्याकुर्वन्ति स्म किञ्च भोजेति। यशआकारमाहुः भोजवंश इति। विसर्पिगुणो यशः शूरकर्मणः। अतः स्वकर्मकीर्तीति अतः यशोवत्त्वात्, स्वधर्मस्य कर्मणो वा कीर्तिर्यशस्तज्जनकत्वाद् भोजयशस्करत्वादित्यस्यार्थः। वध इति अयशस्करः। 'स कथ'मित्यर्थमाहुः किञ्च एतादृश इति। 'स्त्रिय'मित्यस्यार्थं पुनरुक्त्यभावायाहुः किञ्च स्त्रीति। न पुनरिति भगिनीपदेन तथा। 'उद्वाहपर्वणो'त्यस्यार्थमाहुः किञ्च वध इति। विवाहोत्सव इति पर्वशब्दार्थोयम्। तेन 'पूषा ते ग्रन्थिं ग्रथ्ना'त्वित्यत्र नवार्थ्यो 'ग्रन्थिः पर्वणि कौटिल्ये' इति, 'पर्व सन्धौ उत्सवे चे'ति च विश्वः। लौकिका इति एवं वा कर्तव्यमित्यर्थः। भेदमिति साक्षाद्धननम्॥ ३७॥

मृत्युरित्यत्र नायं च प्रतीकार इति पूर्वभेदेनारभ्यत इत्याहुः किञ्चेति। 'किञ्चारम्भे च साकल्य' इति विश्वः। सहजेति मृत्योः सहजत्वात्। नापीति सहजत्वेपि मृत्योर्विलम्बार्थम्। अयं प्रतीकार इत्यर्थः। वाणीति वाणीवचनादेव नेयं हन्ति। अस्यापीति भागुरिमतेनाकारलोपः। 'वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयो'रितिवाक्यात्। अस्याः पि। इति न पुनर्विसर्गः। क्लिष्टत्वात्। वाणीशब्दे गर्भपदेन बाल्यावस्थोक्तेः तस्यामेवावस्थायां हनिष्यतीति सूचितमित्याशयेनाहुः शीघ्रमेवेति। अथेत्याकाशवाण्या भिन्नप्रक्रमे। कदाचित् कस्मिंश्चित् कंसलालनादिकाले बालः सार्धद्विवर्षः कुमारः पञ्चवर्षः अज्ञत्वात्। युवा ज्ञः। स्थविरः प्राज्ञः। प्रज्ञ एव प्राज्ञः। कंसं कदाचिद्धनिष्यति आकाशवाणीप्रामाण्यात्। तन्नित्येति अपमृत्युजनकं हननम्, नित्यमृत्युरग्निः, बृहदारण्यकात्, तत्सम्बन्धि अत्यन्तविस्मृतिरूपमृत्योरनित्यत्वं औषधादिनाश्यत्वम्। अनेनेत्यादि गर्भावस्था बाल्यावस्थाऽतो बालेन अन्येनापमृत्युकारणेन। नायं प्रतीकार इति किन्तु प्राणश्लोकैर्मृत्य्वतिवहनं प्रतीकारः। 'सा वा एषा देवता दूर्नामा दूरँ ह्यस्याः मृत्युः दूरँ ह वा अस्मान् मृत्युर्भवति य एवं वेदेति श्रुतेः। तदाहेति तत् तस्मात् प्राणश्लोकमाहेत्यर्थः। जन्म उत्पत्तिरित्याशयेनाहुः उत्पन्नानामिति। मृत्युपाख्यान इति बृहदारण्यकेस्ति। अत्र 'मृत्यु'र्नित्यमृत्युः। 'इदं' जगत्। 'यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरन्ती'ति मुण्डश्रुतेराहुः भगवान् मृत्योरिति। मृत्युरत्र 'यथाग्ने'रितिश्रुत्युक्तोऽग्निः। लोकदृष्ट्याहुः तेषामन्तरिति। अशनयेति 'अशनाया हि मृत्यु'रित्यपि पाठस्तदर्थो वा। अशनाशब्दात्सोर्याट्। अशनयेति पक्षे प्रथमार्थे तृतीया। 'हि' निश्चये। मृत्युरिति अशनारूपो न नित्यः, तस्य सर्वतः सत्वात्। अशनारूपो मृत्युर्नित्यमृत्योर्देहः। 'यास्ते अग्ने घोरास्तनवः क्षुच्च पिपासा चे'त्यादिश्रुतेरारण्यके। नित्य इति नित्यधर्मस्य नित्यत्वनियमात्। भगवदैश्वर्यादिवत्। अब्देति अब्दं वर्षम्। सर्वेषामिति। 'शतायुर्वै पुरुष' इति श्रुतेः। तदैवेति अब्दशतांतकाले। आकाशवाणीत्यादिनान्वयः॥ ३८॥

देहे पञ्चत्वमित्यत्र इत्याहेति इति हेतोः समाधानमाह। कल्याणतरमिति बृहदारण्यके शारीरकब्राह्मणेस्ति। नित्यलीलास्थकल्पित्वात् कल्याणान्तरं राजत्वेपि। तथेति देहित्वेन। स्वप्नवत्। एवकारेण विद्यापूर्वप्रज्ञयोर्योगं व्यवच्छिनत्ति। तेनात्र वेदसारत्वं श्रीभागवतस्य। कर्मकाण्डार्थत्वात् कर्मणः। 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति बृहदारण्यके वेदान्ते। कालविलम्ब इति न च गरुडपुराणे 'त्र्यहं वसति तोयेषु त्र्यहं वसति चाग्निषु, एकाह् वायुतो भूत्वे'त्येवं दशाहमृतस्थितिरुक्तेति तस्य विरोध इति शङ्क्यम्। तोयादीनामपि देहत्वात्, दिह उपचय इति धातुपाठात्॥ ३९॥

व्रजन्नित्यत्र किञ्चेति पूर्ववत्। बुद्धीति तृणान्तरे बुद्धिप्रयत्नौ। तृणान्तरविषयिणी बुद्धिः प्रयत्नश्च। कर्मगतय इति 'तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्ये'तिश्रुतेः कर्मगतय एव बुद्धिप्रयत्नस्थानीया लिङ्गस्य ज्ञानकर्मेन्द्रियरूपत्वादित्यर्थः। कर्मणा गतिः प्राप्तिर्यस्य लिङ्गदेहस्य सविशेष कर्मगतिः। गतिर्ज्ञानेच्छे अनुमापयति। कर्मणा गतिः प्राप्तिर्येषां प्रयत्नज्ञानशब्दादीनामिति कर्मगतय इति सिद्धम्। 'तदेव' जीवस्वरूपं 'सत्' वस्तु कर्तृ 'त'ल्लिङ्गं 'कर्मणा सहैति'। 'अथो खल्वाहु'रिति सकामप्रकरणस्य

भिन्नप्रक्रमान्नात्र लिङ्गैक्यं निश्चितं सदुपयुज्यते, किन्तु सन्दिग्धम्। किञ्च विद्याकर्मपूर्वप्रज्ञारब्धं लिङ्गान्तरं वक्तुं शक्यते काममय-पुरुषप्रकरणात् पूर्वप्रज्ञा विषयानुभवः। अतो लिङ्गस्य सत्त्वात् उत्पन्नत्वाद्वा लिङ्गं मनो मनःप्रधानत्वाल्लिङ्गस्येति व्याख्यानं टीकोक्तं न सङ्गतम्। अतस्तल्लिङ्गमेतीति सिद्धम्। कर्मगतिमिति गतिः फलम्। कर्मणा गतिः प्राप्तिर्यस्य लिङ्गदेहस्य सविशेषकर्मगतिः ताम्। तिर्यगादीति देहो लिङ्गादिः। यथासम्भवम् ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्रादौ गुणकीर्तनं करोति—श्लाघनीयगुण इति। शूरैर्जरासन्धादिभिः श्लाघनीया गुणाः शौर्यादयो यस्य सः। अतः स्वसम्बन्धिनां भोजकुलोत्पन्नानां यशः करोतीति तथा सः। एतादृशो भवान् उद्वाहपर्वणि विवाहोत्सवे जनसमाजे कथं भगिनीं हन्यात्? अत्र वधोऽत्यन्तमनुचितो निन्दातिशयहेतुत्वात्। भगिनीमित्यनेनाभेदो दर्शितः। तेन सह स्वसम्बन्धोऽपि सूचितः। स्त्रियमित्यनेन स्वशत्रुजननीवधान्निवृत्त्या तव महद्यशोलाभो भविष्यति, अन्यथा भयसूचकेनैतद्वधेन प्रसिद्धमपि शूरत्वं दूषितं स्यादित्याशयेन सूचितम्। उद्वाह—पर्वणीत्यनेन सन्तानवृद्ध्या मयि महानुपकारस्त्वया कृतः स्यादिति सूचितम् ॥ ३७ ॥ स्वमृत्यु-प्रतीकारायैवेयं हन्यते इति चेत्, "अस्या हननेऽपिमृत्युर्न प्रतिकृतो भविष्यति, तस्य सहजत्वात्" इत्याह—मृत्युरिति। 'मृत्युतोऽपि भयं तव नोचितं, वीरत्वात्' इति सूचयन् सम्बोधयति—वीरेति। जन्मवतां प्राणिनां देहेन सहैव मृत्युर्जायते, जननसमय एव प्रारब्धकर्मानुसारेण विधात्रा ललाटे लिखितत्वात्। 'अद्य वाऽब्दशतान्ते वा' इति वाकारद्वयमनास्थाद्योतकम्। तथा च वर्षशत-मध्ये मृत्युः कदा भविष्यतीति सन्देहेऽपि तदन्ते तु ध्रुवो निश्चित एव। वै शब्देन "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" इति शास्त्रसम्मतिं सूचयति ॥ ३८ ॥ ननु सत्यमब्दशतान्ते मृत्युर्भविता, तथापि देहाभावे भोगासम्भवात्तदर्थं तावद्येनकेन प्रकारेणापि देहरक्षा युक्तैवेत्याशङ्क्य प्रारब्धवशाद्देहान्तरप्राप्तेरावश्यकत्वमाह—देह इति। देहे पञ्चत्वं पञ्चमहाभूतात्मत्वमापन्ने प्राप्तुमुद्युक्ते सति देही तत्रस्थो जीवः कर्मोपस्थापितं देहान्तरमनुप्राप्यैव प्राक्तनं पूर्वसिद्धं वपुस्त्यजते त्यजति। एवं देहत्यागे ग्रहणे वा तस्य स्वतन्त्रता नास्तीत्याह—अवश इति। तत्र हेतुमाह—कर्मानुग इति स्वकृतं कर्मानुगच्छतीति तथा ॥ ३९ ॥ एतदेव दृष्टान्तैरुपपादयति–व्रजन्निति द्वयेन। यथा व्रजन् गच्छन् पुरुष एकेनाग्रतो निहितेन पदा तिष्ठन् भुवमवष्टभ्य देहं बिभ्रन् पश्चादन्येनैकेन पूर्वप्रदेशादुत्पाट्य पुरो निहितेन गच्छति, तथा देहान्तरमनुप्राप्य प्राक्तनं वपुस्त्यजति। अत्र दृष्टान्ते चरणौ द्वौ भूमिस्त्वेका। दार्ष्टान्तिके तु जीव एको देहौ च द्वाविति वैषम्यमाशङ्क्य दृष्टान्तान्तरमाह—यथेति। तृणजलौका कीटविशेषः। सा यथा तृणान्तरमवष्टभ्य पूर्वं तृणं त्यजति, एवं कर्मगतिं गतः कर्ममार्गे वर्तमानो जीवोऽपि देहान्तरमनुप्राप्य प्राक्तनं वपुस्त्यजतीत्यर्थः ॥ ४० ॥

अन्वितार्थप्रकाशिका

तत्र पञ्चविधं सामाह—श्लाघनीय इति। यो भवान् शूरैः श्लाघनीया गुणा यस्य सः भोजानां यशस्करश्च स स्त्रियं तत्रापि भगिनीं तत्रापि उद्वाहरूपे पर्वणि कथं हन्यात्। अत्र श्लाघनीयेति गुणकीर्त्तनं भोजेति संबन्धः। भगिनीमित्यभेदः स्त्रिया अवधेन धार्मिकत्वयशोलाभः मम भार्याप्राप्त्या परोपकारश्चेति पञ्चविधमपि साम दर्शितम्। यशस्वीति स्त्रीहनने इह दुर्यशोऽपरत्र नरक इति द्विविधो भेदो दर्शितः। यदुक्तम्। "सम्बन्धलाभावुपकृत्य भेदौ गुणकीर्त्तनम्। साम पञ्चविधं भेदो दृष्टादृष्टभयं वचः" इति। वाग्देवी तु कंसं निन्दत्येव तथाहि शूरैः श्लाघनीयेषु मध्ये गुणः न्यूनः भोजाः कलहवत्त्वेन प्रसिद्धास्तेषां यशः कलहाधिक्यं तस्य कारकः। यद्वा भोजा महान्तस्तेष्वयमेकः पाप इति तेषां यशस्करः स कथमेकां भगिनीं हन्यात् अपि तु सर्वमेव कुलम् ॥ ३७ ॥ मरणभयेन हन्मीत्याशङ्क्याह—मृत्युरिति ॥ हे वीर भयानर्ह! जन्ममृत्युरहितानामपि जीवानां देहेनैव हेतुना जन्मवतां देहसंबन्धनिमित्तो मृत्युर्देहेन सहैव जायते भाल एव लिखितत्वात्। वै प्रसिद्धौ। अवश्यं मर्तव्ये विलम्बमात्राय पापं न कार्यमित्याह। अद्यैव वा अब्दशतान्ते वा प्राणिनां मृत्युः ध्रुव एव ॥ ३८ ॥ यद्वा देहप्राप्तित्यागावेव जन्ममृत्यू तौ त्वावश्यकावेवेत्याह—देह इति ॥ कर्मानुगः कर्मानुसारः अवशः देही देहे पञ्चत्वं मृत्युम् आपन्न आपन्नप्राये सति देहान्तरं प्राप्य अनु पश्चात्प्राक्तनं वपुस्त्यजते त्यजति। तद्भावार्थः ॥ ३९ ॥ अस्मिन् देहे मृते पुनरपि देहान्तरमपि लभ्येतैवेति देहपालनार्थमपि पापं न कार्यमित्याह—व्रजन्निति ॥ यथा व्रजन् गन्ता पुरुषः एकेनाग्रता निहितेन पदा तिष्ठन्भुवमवष्टभ्य देहं बिभ्रन् पश्चादन्येन पूर्वप्रदेशादुत्थाप्य पुरो निहितेन गच्छति ननु द्वाभ्यामेव युगपत् एवं कर्मगतिं कर्ममार्गं गतः देही जीवोऽपि देहान्तरं प्राप्य प्राक्तनं वपुस्त्यजति। अत्र स्वीकारपरि-त्यागौ नात्यन्तभिन्नावित्याशङ्क्य स्पष्ट दृष्टान्तमाह। यथा वा तृणजलौका सा हि यथा तृणान्तरमवष्टभ्य पूर्वं तृणं त्यजति। जलूकेति पञ्चस्वरमध्योऽपि पाठः। एवं कर्मगतिं गतः अन्यो देही अपि ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति। जुगुप्सितं निन्दितं कर्म भगिनीवधोद्योगरूपं यस्य तम् अत एव, नृशंसमतिक्रूरं, अत एव, निरपत्रपं निर्लज्जं, तं कंसं, परिसान्त्वयन्ननुपच्छन्दयन्, महाभागो महाभाग्ययुक्तः, महाबुद्धिमानिति यावत्। वसुदेवः उवाच। महाभाग इत्यस्याय भावः। स्वजन्मनि हर्षेण देवैरानकदुन्दुभिघोषणाद्भाविभगवतारेण शक्याऽऽसन् प्रतीकारता संभवतीति स्तुत्या कृपाविषयत्वे-

नोपपत्तिभिश्च सामवेदमार्गेण संबोधयन्नुवाचेति । ॥ ३७ ॥ तत्र साम पञ्चविधं, भेदो द्विविधः, तदुक्तम् 'संबन्धलाभोपप्रकृतिरभेदो गुणकीर्त्तनम् । साम पञ्चविधं भेदो दृष्टादृष्टभय वचः' इति । तदादौ गुणकीर्त्तनादिकमाह । श्लाघनीयेति । हे राजन्, भवान्, शूरैः श्लाघनीयाः स्तुत्या गुणा यस्य सः, भोजानां भोजनृपवंश्यानां राज्ञां यशः कीर्तिं करोत्यावहतीति तथाभूतः, भवति । स भवान्, स्त्रियं तत्रापि, भगीनीं उद्वाहपर्वणि, कर्मणीति पाठे, उद्वाहाङ्गभूतगृहप्रवेशकर्मणि कथं हन्यात् । कथमुपयुक्तोऽस्ति श्लाघनीयगुण इति गुणकीर्त्तनं, भगिनीमिति संबन्धकथनं, हन्यादिति स्त्रीवधनिवृत्त्या यशःप्राप्तिरूपो लाभः, केचित्तु भोजयशस्कर इति कीर्तिलाभकथनमित्याहुः । उद्वाहपर्वणीति संतानवृद्ध्युपकारः,, पुत्रिकोपमेति अभेदो वक्ष्यते । एवं पञ्चापि सामभेदाः ॥ ३८ ॥ दृष्टभयभेदं दर्शयन् मन्मरणनिदानभूतत्वाद्भगिनीमपि हन्यामिति चेन्मरणस्यापरिहरणीयत्वाद्देहान्तरस्यावश्यंभावित्वात्तत्रापि भोगप्रेमास्पदत्वादीनामपि विशेषात्तद्भयेन पापाचरणमयुक्तमित्यभिप्रेत्याह । मृत्युरिति । हे वीर, जन्मवतामुत्पत्तिमतां, देहेन सहैव, मृत्युः जायते । उत्पत्तेरारभ्य मृत्युश्छायेव देहमनुवर्त्तत एवेत्यर्थः । तथापि कालविलम्बार्थं हन्मीति चेत्तत्राह । अद्य अधुना, अब्दशतान्ते वर्षशतान्ते वा, प्राणिनां मृत्युः, ध्रुवः, वै निश्चितः । अपरिहार्य इति यावत् । वा शब्दात्कर्मवशाच्छतवर्षनियमोऽपि न तिष्ठति । एतद्दृष्टभयभेददर्शनं अदृष्टभयभेददर्शनं तु 'तस्मान्न कस्यचिद्द्रोहम्' इत्यनेन प्रदर्शयिष्यति । अवश्यं भाविनि मरणे विलम्बमात्राय न पापाचरणं युक्तमिति भावः ॥ ३९ ॥ नन्वब्दशतान्ते जरया जीर्णं शरीरं मृत्युग्रस्तमस्तु, अधुना त्विदं कल्याणतरं शरीरमुपैति तद्रक्षणार्थं हन्मीति चेदेतस्या रक्षणेन न पुनरेवंविधं दुर्लभमित्याह । देह इति । देहेऽस्मिन् शरीरे, पञ्चत्वं मरणं, आपन्ने आपत्तुमुद्युक्ते सति, देही तद्देहस्थो जीवः, कर्मानुगः प्राचीनकर्मवश्यतामनुप्राप्तः, अतः अवशोऽस्वतन्त्रः सन् देहान्तरं कर्मानुगुणशरीरान्तः, अनुप्राप्यैव, प्राक्तनं वपुः, त्यजते । शुभाशुभकर्मानुगुणशरीरान्तरस्यायत्नलभ्यत्वात्, भगिनीहननरूपजुगुप्सितकर्माऽप्राप्य हीनशरीरलब्धिं परित्यज्य भगिनीप्राणपरित्राणरूपाच्छुभकर्मणः फलरूपपुनर्जातकल्याणतरदेहार्थं ह्येषा न हन्तव्येति भावः ॥४०॥

हिन्दी अनुवाद (कर्दमक्षमा)

वसुदेवजीने कहा–राजकुमार ! आप भोजवंशके होनहार वंशधर तथा अपने कुलकी कीर्ति बढ़ानेवाले हैं । बड़े-बड़े शूरवीर आपके गुणोंकी सराहना करते हैं । इधर यह एक तो स्त्री, दूसरे आपकी बहिन और तीसरे यह विवाहका शुभ अवसर ! ऐसी स्थितिमें आप इसे कैसे मार सकते हैं ॥३७॥ वीरवर ! जो जन्म लेते हैं, उनके शरीरके साथ ही मृत्यु भी उत्पन्न होती है । आज हो या सौ वर्षके बाद—जो प्राणी है, उसकी मृत्यु होगी ही ॥ ३८ ॥ जब शरीरका अन्त हो जाता है, जब जीव अपने कर्मके अनुसार दूसरे शरीरको ग्रहण करके अपने पहले शरीरको छोड़ देता है । उसे विवश होकर ऐसा करना पड़ता है ॥३९॥ जैसे चलते समय मनुष्य एक पैर जमाकर ही दूसरा पैर उठाता है और जैसे जोंक किसी अगले तिनकेको पकड़ लेती है, तब पहलेके पकड़े हुए तिनकेको छोड़ती है—वैसे जीव भी अपने कर्मके अनुसार किसी शरीरको प्राप्त करनेके बाद ही इस शरीरको छोड़ता है ॥ ४० ॥

स्वप्ने यथा पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः ।
दृष्टश्रुताभ्यां मनसानुचिन्तयन् प्रपद्यते तत् किमपि ह्यपस्मृतिः ॥ ४१ ॥
यतो यतो धावति दैवनो[1]दितं मनो विकारात्मकमा[2]प पञ्चसु ।
गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते ॥ ४२ ॥
ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते ।
एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागानुगतो विमुह्यति ॥ ४३ ॥
तस्मान्न कस्यचिद् द्रोहमाचरेत् स तथाविधः । आत्मनः क्षेममन्विच्छन् द्रोग्धुर्वै परतो भयम् ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—दृष्टश्रुताभ्यां मनसा अनुचिन्तयन् मनोरथेन अभिनिविष्टचेतनः स्वप्ने यथा ईदृशं देहम् अपस्मृतिः पश्यति (तथा देही) तत् किम् अपि प्रपद्यते ॥४१॥ दैवनोदितं विकारात्मकं मनः आप मायारचितेषु पञ्चसु गुणेषु यतः यतः असौ देही धावति तेन सह प्रपद्यमानः जायते ॥ ४२ ॥ यथा उदकपार्थिवेषु अदः ज्योतिः समीरवेगानुगतं विभाव्यते एवं स्वमायारचितेषु गुणेषु असौ पुमान् रागानुगतः विमुह्यति ॥ ४३ ॥ तस्मात् आत्मनः क्षेमम् अन्विच्छन् स तथाविधः कस्यचिद् द्रोहम् आचरेत् द्रोग्धुः वै परतः भयम् ॥ ४४ ॥

---

१. चोदितं–श्रीधर. वंशी. जीव. वीर. विज. शुक । २. मात्म–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

देहविषयावेव स्वीकारपरित्यागौ दर्शयितुं दृष्टांतांतरमाह । स्वप्न इति । दृष्टं राजादिदर्शनं श्रुतमिंद्रादिश्रवणं ताभ्यामाहितसंस्कारेण मनसा तदेवानुचिंतयन् ईदृशं जाग्रद्दृष्टश्रुतसदृशं देहं राजादिरूपं किमप्यनिरुक्तं पश्यति क्षणांतरे च तदेवाहमिति प्रपद्यतेऽभिमन्यते ततश्च जाग्रद्देहादपगतस्मृतिर्भवति पुरुषो यथा तथेति । जाग्रत्येव तद्दर्शयितुं दृष्टांतांतरमाह । मनोरथेनेति । अत्रापि दृष्टश्रुताभ्यामित्यादि सर्वं योज्यम् । तथा च वक्ष्यति "जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः । जन्म त्वात्मतया पुंसः सर्वभावेन भूरिद ॥ विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः । स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसौ ॥" इत्यादि । तद्वदत्रापि कर्मवशाद्देहांतरं प्राप्य प्राक्तनं त्यजतीति ॥ ४१ ॥ ननु विचित्रदेहहेतूनां कर्मणां कृतत्वाद्देहविशेषप्राप्तौ किं कारणमत आह । यतो यत इति । देहस्य पंचत्वसमये पंचसु गुणेषु भूतेषु मायया नानादेहरूपेण रचितेषु दैवेन फलाभिमुखेन कर्मणा चोदितं प्रेरितं नानाविकारात्मकं मनो यतायतो यं यं देहं देवतिर्यगादिरूपं प्रतिधावति धावच्च सत् यं यम् आप अभिनिवेशेन प्राप्तं तत्रतत्र असौ देही जायते । ननु मनसः कर्तृत्वात्तदेव जायतां न त्वकर्ताऽऽत्मेत्यत आह । प्रपद्यमान इति । तदेवाहमिति मन्यमानस्तेन मनसा सह जायते ॥ ४२ ॥ ननु सत्यं भविष्यत्येव किमपि देहमात्रं तथाप्यस्यातिप्रियस्य राजदेहस्य रक्षणायाकृत्यमपि क्रियत इति चेत्तत्राह । ज्योतिरिति । अदश्चंद्रादिज्योतिः उदकयुक्तेषु पार्थिवेषु घटादिषु यद्वा उदकेषु पार्थिवेषु तैलघृतादिषु प्रतिबिंबत्वेन स्थितं समीरस्य वायोर्वेगमनुगतं कंपादियुक्तं प्रतीयते यथा एवं स्वाविद्यारचितेषु गुणेषु देहेषु रागेणानुगतः प्रविष्टो मुह्यति अभिनिवेशं प्राप्नोति । आत्मनस्तावद्देहाद्यध्यासाज्जन्मोक्तं सह तेन जायत इति । ततश्चान्योन्यधर्माध्यासाद्यथा देहादिधर्माः कार्श्यादय आत्मनि प्रतीयते एवमात्मधर्माः प्रेमास्पदत्वादयोपि देहादिष्विति राजसूकरदेहयोर्विशेषाभावाद्व्यर्थो मृत्युप्रतीकार इति भावः ॥ ४३ ॥ एवमुक्तं सामोपायमुपसंहरन्भेदमाह – तस्मादिति । परतोऽभिद्रुह्यमाणात् । तत्संबंधिनश्च यमादपि इहामुत्र च भयमिति भेदो दर्शितः ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कर्मणा देहमात्रप्राप्तिरवश्यं भाविन्यपि देहविशेषाप्तिः कथमित्याशंकते—नन्वित्यादिना । तत्र कारणमाह—यत इत्यादिना । पंचत्वसमये मृत्युकाले । चोदितं प्रेरितम् । यंयं देहं तत्रतत्र तस्मिंस्तस्मिन्देहे । देही जीवः 'यंयं वापि स्मरन्भावं त्यजत्यंते कलेवरम् । तंतमेवेति कौन्तेय' इत्यादिस्मृतेः । जीवस्य जननमयुक्तमित्याह—नन्वित्यादिना । तदेव मन एव । मनोध्यासेनात्मनो जन्मेति भावः ॥ ४२ ॥ उदकेन युक्ताः पार्थिवा उदकपार्थिवा घटादयस्तेषु तथा घटादीनामस्वच्छद्रव्यत्वात्प्रतिबिंबग्राहित्वं न संगच्छत इत्यरुच्याह—यद्वेति । एवं तद्वत् । अशोभने शोभनाध्यासो रागस्तेन उक्तार्थतात्पर्यमाह—अयं भाव इति । तावत् साकल्येन । ततश्चाध्यासाच्च । विशेषाभावाद्भेदाभावात् । प्रतीकारो निवृत्त्युपायः ॥ ४३ ॥ एवं पूर्वोक्तरीत्या । यस्मादात्मा कर्मफलभोक्ता तस्मादिति । स आत्मा तथाविधः कर्मानुरूपदेहादिगृहीता । परतः परलोके वा भयं दुःखलक्षणम् । भेदस्तु ऐहिकपारलौकिकभयप्रदर्शने स्वीकृतहठान्निवर्त्तनम् । प्रत्युग्रे संस्तुतिसामैवोचितमिति पुनस्तदेवाह—एषेति । नवोढा कृपणा भयेन रोदनादिपरा पुत्रिकोपमा पुत्रीसमेति दयां जनयति । यद्वा—पुत्तलिकासदृशी अचेतना भद्राभद्रानभिज्ञा । इमामेनां कल्याणीं निरपराधां दीनवत्सल इति श्लेषेण दीनं मृतप्रायं वत्समेव लाति विप्रेभ्यो ददाति । यद्वा—दीनादपि वत्समपि लाति गृह्णातीति इमां त्वं हंतुं नार्हसि काकार्हत्येवेति निंदैव ॥ ४४–४५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वप्न इति तैरवधारितं तत्र दर्शयितुं स्वाऽनुभावेन साधयितुमित्यर्थः । हि एव तदेव टीकायां जाग्रद्दृष्टेत्यादौ जागरे प्रयुक्तो जाग्रच्छब्दः एवं देहादात्मनो भिन्नत्वं योजितमपि स्वप्ने मनोरथे च देहाभिमानपरित्यागेन देहान्तराभिनिवेशेनात्मनो देहात् पृथक्त्वाऽनुभवात् एवं कर्मवशाद्देहान्तरं प्राप्यैव प्राक्तनं देहं त्यजतीति देहप्राप्तेरावश्यकता दृढीकृता ॥ ४१ ॥ ननु, सत्यं भविता देहमात्रं किन्तु पुनः राजदेहोऽतिदुर्घटः तत्राह—यतो यत इति । दैवेन चोदितमिति तदर्थं प्रयासान्तरं निरस्तम् असौ अविवेकी देहादेर्भिन्नोऽपीति या प्रपद्यमानः मन्यमानः अतः कर्मण एव प्रबलत्वात् श्रीदेवकया जन्मान्तरपुत्रादप्याकाशवाण्युद्दिष्टो मृत्युस्तवानिवार्य एवेति महादुर्गतिप्रापकमीदृशं पापकर्म त्यक्त्वा तादृशनिजप्राचीनकर्मसन्देहे सति सम्प्रत्यपि पुनरितोपि विभूतिमद्वपुःप्राप्तये मार्कण्डेयवदस्य मृत्युरपि कियत्कालनिवारणाय वा सत्कर्मैव क्रियतामिति भावः । जन्मान्तरेत्यत्र श्रीहरिवंशोक्तषड्गर्भसादृश्यं ज्ञेयम् ॥ ४२ ॥ किञ्च देहाभिनिवेशोऽयमविद्यामय एवेत्याह—ज्योतिरिति, अदः निष्कम्पत्वेन स्वस्थितमपि माया भगवन्माया तयैव रचितेषु ॥ ४३ ॥ ननु, यतो यत इत्यत्राभिप्रेतं तादृशं कर्म दुष्करं तथा तादृशं ज्ञानं चेद्भवतोऽस्ति तर्हि कथं भवानस्या देहरक्षार्थं प्रयतते ? तादृशात्मानुभवज्ञानाभावादिति चेन् ममापि तदभावात् स्वदेहरक्षार्थोऽयं प्रयत्नो युक्त एवेत्याशङ्क्याह—तस्मादिति । यस्मात् सत्कर्मैव श्रेयःसाधनं तस्माद्देहावेशोऽप्यविद्यक एव तस्मात् स तथाविधः पूर्वोक्तप्रकारात् तयोः कृतित्यागौ कर्त्तुमशक्नुवन्नपि तद्विपरीतं परद्रोहं न कुर्यात्, किमर्थम् आत्मनः क्षेममन्विच्छन् इहाऽमुत्र चात्मनः क्षेमार्थं

मित्यर्थः। यतः द्रोग्धुरिति एवं दृष्टादृष्टभयप्रदर्शनेन द्विविधो भेदः अत्र श्रीकृष्णकथारम्भे आत्मज्ञानाऽन्यवैराग्याकार्यनिवृत्तिकथनानि बहिर्मुखानामन्यावेशनिवारणायोपदिष्टानीति शास्त्रप्रयोजनं च ज्ञेयम् एवं सर्वत्र ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, तृणजलूका विद्यमानशरीरेणैव गन्तव्यदेशमवष्टभ्यैव पूर्वदेशं त्यजतीति युक्तं तस्या भयशोकाद्यभाव इति दार्ष्टान्तिके तु न तथा न हि प्राक्तनवपुर्विशिष्टो वपुरन्तरं प्राप्य प्राक्तनं त्यजते वपुरन्तरवैशिष्ट्याकारेण वपुरन्तरप्राप्त्यसंभवात् अपि तु विशेष्याकारेणैव वपुरन्तरप्राप्तिः प्राक्तनवपुस्त्यागश्चातः प्राक्तनकल्याणतरवपुस्त्यागप्रयुक्तभयशोकोपनिपातसम्भावनया तत्परिहारोऽवश्यकर्तव्य इत्यत्र तदनुभवसिद्धस्वप्नदृष्टान्तेन देहान्तरप्राप्तिपूर्वकपूर्वदेहत्यागं तत्प्रयुक्तभयाद्यभावञ्च दार्ष्टान्तिके सङ्गमयति स्वप्न इति। स्वप्ने यथा दृष्टश्रुताभ्यां दृष्टश्रुतमनीषितलाभार्थं मनसाऽनुचिन्तयन् सङ्कल्पविकल्पौ कुर्वन् मनोरथेन देशान्तरगमनराज्याभिषेकादिरूपमनोरथेनाभिनिविष्टा चेतना बुद्धिर्यस्य तथाभूतो जीवः ईदृशं शयानदेहसदृशं तत्किमपि ततो विलक्षणं वा किमपि शरीरं स्वप्नमात्रावस्थायित्वेन स्वप्नद्रष्ट्रैकानुभाव्यत्वेन च स्वाप्नदेहस्य शयानतुल्यदेहतया चिन्तितुमशक्यत्वात्किमपीत्युक्तं तावत्पश्यति ततस्तत्प्रतिपद्यते अपस्मृतिः शयानदेहविषयकस्मृतिरहितश्च भवति अत एव तत्त्यागप्रयुक्तभयशोकादिरहितश्च भवतीति स्वपरानुभवप्रसिद्धिं द्योतयति पश्यति प्रपद्यते इत्यनेन प्रथमं ज्ञानेनाऽनुप्रवेशस्ततः स्वरूपेणेति सूचितम्, एवं दार्ष्टान्तिकेऽप्यवगन्तव्यमिति भावः। न हीदानीमस्मदादीनां प्राक्तनदेहत्यागप्रयुक्तभयशोकादिकमुपलभ्यत इति च भावः। न च स्वप्नेऽपि शयानदेहेनैव देशान्तरगमनादिकमनुभूयत इति युक्तमत् अपवरकादौ शयानस्य देशान्तरगमनाद्यसम्भवात्, ततस्तदवस्थामात्रावस्थायितद्द्रष्टृमात्रानुभाव्यदेहान्तरेणैव तदनुभवः, यद्वा, पूर्वार्द्धं दृष्टान्तपरम्, उत्तरार्द्धन्तु दार्ष्टान्तिकपरम्, तदयमर्थः स्वप्ने देशान्तरगमनादिमनोरथाभिनिविष्टचित्तो जीवो यथेदृशं शयानदेहवदात्माऽभिमानविषयं स्वप्नद्रष्टृमात्रानुभाव्यफलपुण्यापुण्यकर्मानुगुणपरमपुरुषसृष्टं तावत्कालमात्रावस्थायिस्वप्नद्रष्ट्रैकावगम्यं देहं पश्यति ज्ञानद्वाराऽधितिष्ठति ज्ञानद्वाराऽधिष्ठाय देशान्तरगमनराज्याभिषेकशिरश्छेदादीननुभवतीति भावः। अपस्मृतिरपगता शयानदेहविषया स्मृतिर्यस्य तथाभूतश्च भवति तद्वधादिसंभावनाप्रयुक्तभयादिरहितश्च भवति, उत्तरार्द्धस्य तथेत्यादिः एवं दृष्टश्रुताभ्यामिति तादर्थ्ये चतुर्थी दृष्टमैहिकं सुखं श्रुतमामुष्मिकं ताभ्यां तदर्थं मनसाऽनुचिन्तयन् किमपि कर्मानुगुणम् ईश्वरसृष्टं किमपि शरीरं प्रतिपद्यते अपस्मृतिश्च भवति प्रथमं ज्ञानद्वाराऽधिष्ठाय प्राक्तनवपुर्विषयस्मृतिरहितः ततः स्वरूपेण प्रविशति इत्यर्थः ॥ ४१ ॥ किमपि प्रपद्यते इत्येतदेव विवृण्वन् तदेव जीवस्योत्पत्तिर्नामेत्याह—यत इति। दैवमत्र दिष्टं कर्म वासनात्मकं तच्चोदितं तदनुगुणप्रवृत्तं विकारात्मकं सङ्कल्पविकल्परूपविकारप्रकारं सत् मनोमायारचितेषु सत्त्वादिगुणत्रयात्मकप्रकृतिपरिणामरूपेषु पञ्चसु गुणेषु शब्दादिविषयेषु मध्ये यतो यतो धावति यं यं विषयं स्मरति तं तमेव प्रपद्यमानोऽनुप्रविशन् सह जायते इयमेव जीवस्योत्पत्तिर्नामेति भावः—

“यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् तं तमेवैति कौन्तेय सदा तद्भावभावितः” ॥

इति श्रीभगवदुक्तेरिति भावः ॥ ४२ ॥ तेन सह जन्मरूपोपाधिप्रयुक्तमेव जीवस्य देवमनुष्यत्वादिनानात्वं वस्तुतस्तु सर्वत्र शरीरेषु ज्ञानैकाकारत्वेनावतिष्ठत इति सदृष्टान्तमाह—ज्योतिरिति। यथा अदः अन्तरिक्षस्थमेकरूपमेव सूर्यादि ज्योतिरुदकेषु पार्थिवेषु पृथिवीपरिणामरूपेषु दर्पणादिषु च प्रतिबिम्बितं तत् समीरस्य वायोर्वेगेनानुगतमनुवृत्तं सद्विभाव्यते समीरवे शब्दोऽल्पत्वमहत्त्वाद्युपाधिगतधर्मोपलक्षकः विविधं भाव्यते वृद्धिह्रासादिधर्मभाक्त्वेन भाव्यते दृश्यते अस्मदादिभिरिति शेषः। एवमसौ पुमान् जीवः स्वतो देवमनुष्यत्वादिनानात्वरहितोऽपि स्वमायारचितेषु स्वदेहारम्भकप्रकृतिपरिणामरूपभूतसूक्ष्मारब्धेषु गुणेषु गुणपरिणामकेषु शरीरेषु रागानुगतो रागेण शब्दादिविषयस्पृहया वासनात्मिकया हेतुभूतयाऽनुगतोऽनुप्रविष्टः विमुह्यति, देवोऽहं मनुष्योऽहमित्येवं नानाविधं मोहं प्राप्नोति, यद्यपि दृष्टान्ते सूर्यादिज्योतिरुदकाद्युपाधिष्वनवस्थितमेव स्वच्छद्रव्यप्रतिहतिनिवृत्तरश्मिभिर्हेतुभिः समीपस्थजनैर्विभाव्यते दार्ष्टान्तिके तु देहेष्ववस्थित एव सन् पुमान् मुह्यतीति तयोर्वैषम्यं तथापि वस्तुतो नानात्वाभावौपाधिकनानात्वमात्रेण दृष्टान्तदार्ष्टान्तिकभावोऽवगन्तव्यः ॥ ४३ ॥ तस्मादिति। तस्माद्वस्तुस्थितेरेवंविधत्वात्तथाविधः वस्तुतत्त्वाभिज्ञः स पुमानात्मनः स्वस्य क्षेममन्विच्छन्निच्छुः कस्यचिदपि द्रोहं नाचरेत् न कुर्यात् एवं चेत्तस्य न कुतश्चिदपि भयम् अन्यथा तु भयमित्याह-द्रोग्धुर्वै परतोऽन्यस्माद्भयमित्यर्थः। यद्वा, परतः परमेश्वराद्भयं भूतद्रोग्धुर्भयं वै भयमस्त्येव इत्यर्थः ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ननु, देहात्मनोरभेदेन देही पूर्वदेहं परित्यज्य अभिनवदेहान्तरं यातीति कथं सञ्जाघटीतीति तत्राह—स्वप्न इति। जाग्रद्दृष्टश्रुतपदार्थसंस्कारसमुद्बुद्धमनोरथेन अभिनिविष्टचेतनः गाढप्रमत्तबुद्धिरात्मा स्वप्ने ईदृशं जाग्रद्देहसदृशदेहं यथा पश्यति स्वकीयत्वेनाऽनुभवति परकीयत्वेन वा आत्मन एकत्वेन देहयोर्द्वित्वेन दर्शनाद्देहात्मनोर्भेद आनुमानिकः तथा मनसाऽनुचिन्तयन् आत्मा दृष्टश्रुतस्मृतानुसृतं तत्र किमपि देवाद्यन्यतमशरीरं प्रपद्यते कदेत्यत उक्तम् अपस्मृतिरिति उत्तरदेहे अभिमानितया पूर्वदेहस्मरणाभावेन मृत इत्यर्थः। हिशब्दो हेतौ यत एव मृत इत्यर्थः। तदुक्तमाचार्यैः “स्वप्ने यथा दृष्टश्रुतस्मृत्यनुसारिदेहं प्राप्नोत्यप-

स्मृतिर्मृतः। पूर्वदेहस्मरणाभावात् अनभिमानतः" इति ॥ ४१ ॥ एतदेव विवृणोति—यतो यत इति। सार्वविभक्तिकस्तसिरितिवचनाद्यतो यतो यत्र यत्र मायारचितेष्वित्यादिषु सप्तमी षष्ठ्यर्थे भगवदिच्छोद्बोधितप्रकृतिनिमित्तानां प्रकृतेरेकत्वेन सृष्टेर्नानाविध्यं कथमत्राह—गुणेष्विति। कार्यकारणाभेदात् सत्त्वादिगुणविहितानाम् आत्मपञ्चसु देवगन्धर्वपितृमनुष्यासुरभेदेन पञ्चानाम् आत्मनाम्मध्ये दैवेन अदृष्टोद्बोधकेन हरिणा चोदितम्प्रेरितम्मनो धावति विषयीकरोति, मनो विशिनष्टि—विकारात्मकमिति। सङ्कल्पविकल्पनिबद्धमिति यस्य मनः मरणसमये योग्यतानुसारेण यं यं धावति असौ देही तत्र तत्र प्रपद्यमानः प्रवृत्तिं लभमानः तेन दैवेन सह जायते "प्राज्ञेनाऽन्वारूढ उत्सृज्य याति" इति श्रुतेः। उत्पद्यमानोऽपि तेन सह उत्पद्यत इति ज्ञातव्यम् अत्रापि योग्यतामपेक्ष्य तत्तच्छरीरग्रहणं, तदुक्तम्—

"देवादित्वं योग्यतया तत्सकाशस्त्वनुस्मृतेः। श्वेतद्वीपादि तत्रापि योग्यतामप्यपेक्ष्य तु ॥
विष्णोः स्थानं विनाऽन्यत्र वायुराङ्कादिनामपि। त्रैलोक्यदेशभेदेषु योग्यता नत्वपेक्ष्यते" ॥ इति।

अनेन व्याप्तस्यात्मनो गमनं कथमिति चोद्यं परिहृतं परमात्मानमन्तरेण निरुपचरिता व्याप्तिर्नास्ति "अणुर्ह्येष आत्मा" इति श्रुतेः। आलोकवद्गुणेन यथायोग्यव्याप्तिरस्तु नाम तथापि स्वरूपतो नास्त्येव "व्याप्ताह्यात्मानश्चेतनानिर्गुणाश्च" इति स्मृतिः श्रीनारायणविषयेति निरणायि नोचेदुक्ता गतिरेवेति ॥ ४२ ॥ ननु गुणानां नानात्वात्सृष्टेर्वैचित्र्यमस्तु, एकस्यामो नानाविधप्रतीतिः कथम् ? इति शङ्कां सदृष्टान्तं परिहरति—ज्योतिरिति। यथा अदो ज्योतिरादित्यलक्षणं समीरवेगायुतं वायुवेगनिमित्तचलनेन अनुचलितमौदकपार्थिवेषु जलपूर्णशरावाद्युपाधिषु प्रतिबिम्बितं विभाव्यते विविधत्वेन भाव्यते छिन्नभिन्नादिरूपेण प्रतीयते एवमसौ पुमान् स्वमायारचितेषु परस्वोहरिरिति वचनात्स्वस्य विष्णोरिच्छया रचितेषु देहेषु प्रतिबिम्बितः अशोभने शोभनाध्यासो रागः तेनाऽनुगतः तन्मयान्तःकरणो विमुह्यति विविधं छिन्नो भिन्नो मृतोऽस्मीति मोहमज्ञानं प्रतिपद्यते यथा तदेव ज्योतिः पार्थिववद्भवनोभूतपूर्णजले प्रतिबिम्बितं वायुवेगानुगतं विशिष्टं निश्चलं भाव्यते छेदभेदादिरहितं प्रतीयते, एवं योग्यो जीवो गुणेषु प्रतिबिम्बितो रागमनुरागं स्नेहविशेषमनुगतो निर्मुक्तद्वेषो विगतमोहो भवति अज्ञाननिमित्तच्छिन्नोऽहमिति दुःखं न प्राप्नोतीति परिहारपरतया वा योजनीयम्। उभयोरपि समाख्यानसिद्धप्रमाणत्वात्। तदुक्तं "परस्वोहरिरुद्दामः" इति पद्येन गुणयोगयुक्तरूढ्या सिद्धत्वात् मुख्यं च तदुक्तं "स्वतन्त्रत्वात्सुखत्वाच्च स्वनामाविष्णुरुच्यते" इति "रागोऽनुरागे लाक्षायाम्" इति यादवः ॥४३॥ नन्वस्तु नामाऽऽत्मन जन्मादिकं कर्मनिमित्तं प्रकृते ततः किं ? तत्राह—तस्मादिति। यत आत्मा तथाविधः कर्मफलभोक्ता तस्मात्स तादृशः कस्यचिद्द्रोहं हिंसां नाऽऽचरेत् ततः किं ? तत्राह—आत्मन इति। अनर्थं चाह-द्रोग्धुरिति। परतः परलोके दुःखलक्षणं भयं भवतीति शेषः ॥४४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जीवत्यपि देहे प्रतिदिनं देहप्राप्तित्यागावनुभवेन दर्शयति, स्वप्ने यथा ईदृशं जाग्रद्देहतुल्यं पश्यति, स्वप्नं विनाऽपि दर्शयति, मनोरथेन मनोरथे चेत्यर्थः। कः पश्यतीत्यत आह—अभिनिविष्टा अभिनिवेशवती चेतना यस्य सः यद्वा मनोरथेन विषयवाञ्छया चित्ताभिनिवेशाधिक्यवान् पुरुषः स्वप्ने ईदृशं देहं पश्यति अभिनिवेशप्रकारमाह—दृष्टं राजादि श्रुतम् इन्द्रादि ताभ्यामभ्यस्ताभ्यां जनितसंस्कारवता मनसा अनुचिन्तयन् तत् किमपि राजादिरूपमेव प्रपद्यते राजाद्युचितविषयभोगवद्देहमात्मानं पश्यतीत्यर्थः। अपस्मृतिः वास्तवदेहस्मरणशून्यः ॥ ४१ ॥ ननु, दृष्टः श्रुतश्च विषयो दैवप्रेरितेन मनसा स्मर्यमाणत्वात् मनस एवास्तु ततो भिन्नेनात्मना स्वभोगार्थं स कथं लभ्यताम् ? तत्राह - यत इति। पञ्चसु विषयेषु भोग्येषु मध्ये यतो यतो यत्र यत्र विकारात्मकं मनो धावति धावच्च सत् आपतन्तं विषयमेव प्राप्तं भवति, असौ देही जीवः तेन विषयाभिनिविष्टेन मनसा सह साहित्याद्धेतोस्तं तं विषयं प्रपद्यमानो जायते भुञ्जानो भवतीत्यर्थः॥४२॥ततश्च मनःसहितस्य जीवस्य मनोधर्मप्राप्तिं सदृष्टान्तमाह-ज्योतिश्चन्द्रसूर्यादिकिरणः उदकेषु पार्थिवेषु तैलघृतादिषु च प्रतिबिम्बरूपेण स्थितं समीरवेगानुगतं सत् विभाव्यते विविधं कम्पवशाद्दीर्घह्रस्वादिरूपं भाव्यते भावितं भवति एवमेव स्वे स्वीयाश्च ते मायारचिताश्चेति स्वमायारचितास्तेषु गुणेषु देहेषु पुमान् जीवः रागाऽनुगतः रागो विषयभोगेच्छालक्षणो मनोधर्मस्तमनुगतो विमुह्यति तदीयविषयभोगेच्छाव्याप्तो भवति, तेन त्वमपि तथाभूत एव जीवः स्वीयविषयसुखभोगसिद्ध्यर्थं यदेतां हंसि तद्व्यर्थमेव देहनाशेऽपि त्वदीयशुभादृष्टस्यानश्वरत्वाद्देहान्तरस्य सुलभत्वाच्च तत्रैव ते भोगाः सेत्स्यति स्त्रीवधे तु प्रत्युत देहान्तरे दुःखमेव भोक्तव्यं स्यात् किञ्च कर्मणः प्रबलत्वादाकाशवाण्युद्दिष्टो मृत्युर्देवकीजन्मान्तरपुत्रादप्यवश्यंभावीत्यतो वरं मृत्युप्रतीकारार्थं मार्कण्डेयेनेव सत्कर्मैव क्रियतामिति द्योतितम् ॥ ४३ ॥ स तथाविधः अविद्यावृतः द्रोग्धुर्द्रोहकर्तुः पुंसः परतो यमादिभ्यो यस्माद्भयं तस्मादिति भेदो दर्शितः ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उत्तरदेहग्रहणपूर्वकं प्राग्देहपरित्यागं देहग्रहणपरित्यागविषयकाभ्यामेव स्वप्नजागरणाभ्यां दृष्टान्ताभ्यां दृढयति—स्वप्न इति, दृष्टश्रुताभ्यां नृप्वरादिदर्शनश्रवणाभ्याम तत्तदेव दृष्टं श्रुतं वा मनसा चिन्तयन् ईदृशमेव दृष्टश्रुततुल्यं स्वप्ने किमपि परमेश्वरोपस्थापितं नृस्वरादिरूपं पश्यति। न तु स्वेच्छया किञ्चिदपि कर्तुं शक्नोति ईश्वरस्तु कर्मविशेषफलसिद्ध्ये हितमहितं वा स्वप्नेपि

प्रपद्यत्येव, जीवस्य तु जागरेऽपि किंचित्स्वेच्छया निर्मातुमसामर्थ्यात्स्वानुकूलस्वप्नपदार्थकर्तृत्वासम्भवाच्च न स स्वप्नसृष्टिकर्तेति वेदान्तकौस्तुभे स्थितम्। तदनन्तरं तत्तदेव प्रपद्यते नृसुरादिदेहं प्राप्नोति तदनन्तरं प्राग्देहादपस्मृतिः पुरुषो भवति यथा तद्वत् यथा च जागरे दृष्टश्रुताभ्यां मनोरथेनाभिनिविष्टचेतनः दृष्टे श्रुते वा अभिनिविष्टा चेतनाऽन्तःकरणवृत्तिर्यस्य स किमपि पश्यति ततस्तदेव प्रपद्यते तद्वच्च ॥ ३१ ॥ किञ्च मनोनुरूपदेहादिकं दैवयोगात्सर्वत्र सुलभमेवात एकशरीररक्षार्थं दारुणं कर्म न कर्तव्यमित्याशयेनाह—यत इति। पञ्चमहाभूतप्रधानेषु गुणेषु देहगेहादिषु मायारचितेषु भगवता स्वशक्तिभूतया मायया महदादिद्वारा विरचितेषु मनःकरणं दैवचोदितं दैवेन कर्मसापेक्षेण भगवता प्रेरितं विकारात्मकं दैवाऽनुरूपविकारात्मकम् यतो यतो यंयं देहगेहादिकं धावति धावत्-सत् यं यमभिनिवेशेन प्राप्तं भवति तत्र तत्र असौ करणवान् जीवः प्रपद्यमानः अहं ममेतिमान्यमानस्तेन करणेन सह जायते ॥ ४२ ॥ ननु, देहविलक्षणस्य परमेश्वरमायाकार्ये देहे अहन्ता गेहे ममता कुतो भवत्यत आह—ज्योतिरिति। अदः सूर्यादिज्योतिः उदकेषु जलेषु पार्थिवेषु आदर्शादिषु च समीरवेगे धूसरत्वाद्यापादकेनाऽनुगतं सत् विभाव्यते विपरीतं प्रतीयते। एवं देहाभिमानी पुमान् स्वकीयेन कर्मफलदात्रा परमेश्वरेण मायया प्रकृत्या रचितेषु गुणेषु देहगेहादौ रागेण अनादिकर्ममूलकेन संस्कारेण मोहसम्पादकेन मुह्यति, देहे अहमिति गेहादौ ममेति च मोहं प्राप्नोतीत्यर्थः ॥ ४३ ॥ तस्मात्पापाचरणेऽपि मृत्योरवश्यं भावित्वात्पुनर्देहादिलाभसम्भवाच्च च तथाविधः उक्तप्रकारः पुरुषः कस्यचिदपि द्रोहं नाचरेत्। किं कुर्वन् ? द्रोग्धुर्जनस्य परतः प्रतिद्रोग्धुः सकाशात् साक्षाद्राजद्वारा यमद्वारा वा भयं भवति वै इति हेतौ अतो हेतोः आत्मनः क्षेममन्विच्छन् ॥ ४४-४५ ॥

श्रीसुबोधिनी

नन्वधिकप्रयासाभावेपि दृष्टान्तानुरोधेनाल्पप्रयासो भविष्यति सोपि शीघ्रं मा भवत्विति मारणमिति चेत्तत्राह स्वप्ने यथेति। न हि स्वप्नदेहग्रहणे परित्यागे वाणुमात्रमपि प्रयास उपलभ्यते। वैलक्षण्यमपि कदाचिदेव प्रतीयते न सर्वदेत्याहेदृशमिति। ननु स्वप्नदेहः कर्मसाध्यो न भवतीति न प्रयास इति चेत्तत्राह मनोरथेनाभिनिविष्टचेतन इति। मनोरथेन तत्तद्वस्तुभावनया मनोगत्या कर्मणा तादृशे देहे तदुपभोग्ये विषये वाभिनिविष्टा चेतना बुद्धिर्यस्य। मनोरथेनापि स्वप्नो दृश्यते। ज्ञानकर्मणी च तत्र भवतः। यथा लोकान्तरगतौ 'तं विद्याकर्मणी समारभेते पूर्वप्रज्ञा चे'ति। ततः स्वप्नदेहलोकान्तरदेहयोस्तुल्यत्वान्न ग्रहणपरित्यागयोः प्रयासः। न च वक्तव्यं मनोरथस्य तत्र कारणता नास्तीति यतो दृष्टश्रुताभ्यां प्रत्यक्षशास्त्राभ्यां प्रमाणाभ्यां मनसा राजादिदेहमिन्द्रादिदेहं वानुचिन्तयंस्तत्र प्रतिपद्यते स्वप्ने राजाहमस्मीन्द्रोहमस्मीति। पूर्वदेहस्य तु स्मरणमपि नास्ति कुत्र ग्रहणपरित्यागप्रयाससम्भावना ? तदाहापगता स्मृतिः पूर्वदेहस्मरणं यस्य। तत् पूर्वानुभूतमेव किमप्यनिर्वचनीयम्। स्वाप्निकस्य मायिकत्वात्। 'तदुदितः स हि यो यदनन्तर' इतिन्यायेन स्वप्नो मनोरथहेतुक इति ॥ ४१ ॥ किञ्च देहस्योत्पत्तिमरणे न त्वात्मनः। आत्मा तु तदध्यासाज्जायते म्रियते वा। तदाह यतो यत इति। अस्मिन्सिद्धान्ते मन एव देहग्रहणपरित्यागयोर्हेतुस्तच्च मनो विकारात्मकं नानाविकाराः सङ्कल्पविकल्पात्मका आत्मा यस्य। तस्य प्रेरकं कालकर्मभगवदिच्छानामन्यतरद्दैवशब्दवाच्यम्। तेन दैवेन प्रेरितं मनो मायारचितेषु विषयेषु मोहेनोत्तमत्वं प्रापितेषु मध्ये यस्माद्यस्माद्यं यमर्थं विहाय यत्र यत्र लग्नं भवति तत्र तत्रैवासौ देही तदेव प्रपद्यमानोहमिति मन्यमानस्तेन सह जायते न तु स्वतः। मनश्च यदा यद्भावयिष्यति तादृशो देहो भविष्यति यच्च त्यक्ष्यति तद्गमिष्यति। विषयास्तु समा एव। एवमपि सति यमेवार्थं मन उत्कृष्टत्वेन मन्यते तदस्मादुत्कृष्टं भवतीति नोत्कृष्टदेहरक्षार्थं इयं मारणीयेत्यर्थः ॥ ४२ ॥ एवं मनोनुसरणेन देहानुसरणमपि मोहादेव प्रतिबिम्बन्यायेन न त्वात्मनस्तथात्वमस्तीत्याह ज्योतिरिति। उदकयुक्तेषु पार्थिवेषु शरावादिषु तथोदकस्थानीयमन्तःकरणं पार्थिवस्थानीयो देहः। उदकेषु उदकयुक्तेषु पार्थिवेषु काचादर्शादिषु वा समीरवेगाश्चाञ्चल्यमालिन्यादयस्तैरनुगतं सूर्यादिज्योतिर्विभाव्यते। प्रतिबिम्बितस्यैव सूर्यादेस्तत्सम्बन्धो नाकाशादिस्थितस्य। अद इति। सम्बन्धाभावायाकाशादिस्थितः प्रदर्शितः। एवमेव स्वमोहेन रचितेषु सम्यक्तयाभिमतेषु देहेन्द्रियादिष्वसौ जीवः पुमान् भगवानेव रागेणानुगतस्तेन सहैकत्वं प्राप्तः प्रतिबिम्बन्यायेन प्रविष्टो विशेषेण मुह्यति। यस्माद्देहसम्बन्धो भ्रमादतो न तदर्थमात्मनोपकारः कर्तव्यः ॥ ४३ ॥ एवं तत्त्वं निरूप्य देहरागान्नात्मनोपकारः कर्तव्य इति यदुक्तं तल्लोकेपि तुल्यमिति वदन् मारणे भेदात्मकं भयं प्रदर्शयति तस्मादिति। यस्माद्देहो नात्मा तस्माद्देहार्थं कस्यचिदपि द्रोहं नाचरेत्। यतः स तथाविधः। यादृशो हन्यते तादृशः। अनेन स्वसाम्येन दया निरूपिता। यथा स्वरक्षा विचार्यते तथा पररक्षापि विचारणीयेत्युपदेशफलम्। अविचारे बाधकमाहात्मनः क्षेममन्विच्छन्निति। यदि विचारयति तदात्मनोपि क्षेमो भवति सोपि विचारयतीति। यदि न विचारयति तदा द्रोग्धुर्घातकस्य परतो मार्यात् मत्त एव तव भयं भविष्यतीत्यर्थः ॥ ४४ ॥

(२) श्रीपुरुषोत्तमचरणप्रतीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

स्वप्ने यथेत्यत्र—श्रुतिसूत्रविरोधपरिहारायाहुस्तदुदित इत्यादि। तथा च लोकबुद्धिमनुसृत्येदमुच्यतेतो न विरोध इत्यर्थः ॥ ४१ ॥ यतो यत इत्यत्र-कालकर्मभगवदिच्छानामन्यतरदिति। अत्र बहूनां मध्य एकस्यातिशये विवक्षिते तमप्प्रत्ययो-

पेक्षितस्तथापि महाभाष्य 'एतेषु कतरो देवदत्तः कतरो यज्ञदत्त' इति तमबुपाधिमनादृत्यैव तरप्प्रयोगादत्र तदनुसारेणैवमुक्तम्। यत्र लग्नं भवतीति। इदं मूलस्थाया आपेतिक्रियाया व्याख्यानं बोध्यम् ॥ ४२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

स्वप्ने यथेत्यत्र—यथेदं तथा **देही प्राक्तनं वपुस्त्यजत** इति पूर्वेणान्वयः। **मनोगत्ये**ति। कर्मणा जनिता या **मनोगतिस्त**येत्यन्वयः। स्वप्नो मनोरथहेतुको मनोरथस्तु कर्मणेत्यर्थः। **मनोरथेनापी**ति। **अपिशब्दस्य स्वप्न** इत्यनेनान्वयः। **लोकान्तरे**त्यादि यथा तथा **स्वप्नोपि** दृश्यत इत्यर्थः। **मनोरथः पूर्वप्रज्ञास्थानीयो** ज्ञेयः ॥ ४१ ॥ **यतो यत** इत्यत्र—अपादाननिरूपितं विश्लेषं विवृण्वन्ति **यं यमर्थं विहाये**ति। **गुणेषु** मध्ये **यतो** यतो यं यमर्थं विहाय **धावति** यं यं **चाप यत्र यत्र लग्नं भवति तत्र तत्रैव तदेवे**ति यं यमाप तदेव **प्रपद्यमानस्तेनैव सह जायत** इत्यन्वयः। अत्र **गुणपदेन** गुणकार्यमुच्यते। श्रोतुरसुरत्वादासुरसिद्धान्त उच्यत इति ज्ञेयम् ॥ ४२ ॥ **तस्मादित्याभासे—तत्त्वं निरूप्ये**ति। पारमार्थिकमितिशेषः। अग्रे लौकिकं तत्त्वं वक्तव्यमितिभावः। **देहे**ति। मारणे देहरागसिद्धावप्यात्मनोपकारो भवतीत्यर्थः। व्याख्याने **मत्त** इति। देवक्याः सकाशाद्भयासम्भवात् स्वस्य च पतित्वेन तदर्धत्वादहमपि **मार्यस्तत** इत्यर्थः। अत्र परशब्देन शत्रुर्यो मार्यते स इति ॥ ४४ ॥

श्रीबुभुत्सुबोधिका

स्वप्ने यथेत्यत्र सोपीति तृणजलौकादृष्टान्तेन स्वल्पप्रयासोपि। 'मम माता वन्ध्ये'ति वाक्यवद् बाधितार्थत्वं स्यात् तद्वारणाय शीघ्रमितिशब्दः। कदाचिदेवेति शुभसूचनकाले शुभाशुभयोः। असाकल्ये एव न तु साकल्ये। 'असाकल्ये तु चिन्मने'-त्यमरात्। स्वशिरोऽदर्शने शुभफलः स्वप्नः, स्वदर्शनेऽशुभफलः स्वप्न इति। अशुभं मरणम्। ईदृशमितीति 'त्यदादिषु दृशोरनालोचने कञ्चेति कञ्'। इममिवेमं पश्यन्ति जनाः सः अयं अयमिव दृश्यमानः इममिवात्मानं पश्यतीति विग्रहः। दृश्यत इति दृश्यमानः कर्म यगन्ताच्छानच्, अत्र दर्शनविषयो दृष्टान्तीयेदमोर्थः द्वितीये दृशोरनालोचनार्थत्वम्। दृष्टान्ते क्षीणशक्तेर्दृशोरावृत्त्यनङ्गीकारात्। 'मनसः रथ' इत्यत्र मन इन्द्रियम्। तस्य सजातीयमिन्द्रियं न रथः। रथस्य रथ इति प्रयोगाभावात्, किन्तु ज्ञानं, तदाहुः तत्तद्वस्तु भावनयेति। भावना स्मृतिः अनुभवस्य तिरोभावात्। तथा च श्वेताश्वतरश्रुतिः 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण' इति। 'आत्मा इन्द्रियमनोयुक्तं' आत्मा मनोयुक्तः, मन इन्द्रिययुक्तं, तदा 'भोक्ता'। नैयायिकानां आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षमितिप्रक्रिया। न च मनोरथशब्दो हीच्छायां योगरूढ इति वाच्यम्, वेदान्तसारत्वात् प्राणश्लोके योगमात्रात्। न च ज्ञानानन्तरमिच्छापि मनोरथ इत्यत्र मनोरथपदेनेतीच्छाबोधोपि स्यादिति वाच्यम्। इच्छाशक्त्यधीनत्वाद् बोधस्येत्यदोषात्। मनोगतिस्तया। आभ्यां पूर्वप्रज्ञा विद्या चोक्ते। कर्माहुः कर्मणेति। 'तं विद्याकर्मणी समारभेते पूर्वप्रज्ञा चे'ति शारीरब्राह्मणात्। 'तं' देहम्। तथा च कर्मणा जनिता या मनोगतिस्तयेत्यन्वयः, स्वप्नो मनोरथहेतुको मनोरथस्तु कर्मणेति दृष्टान्तेपि त'दृश इति। तादृशशब्दस्य व्युत्पत्तिरीदृशशब्दवत्। मनोरथेनापीति अपिशब्दस्य स्वप्न इत्यनेनान्वयः। अन्यदपीत्यपिशब्दार्थः। यद्वा यथास्थितमन्वयः। अपिशब्देन चिन्तादिना। तत्रेति स्वप्ने। मनोरथः पूर्वप्रज्ञास्थानीयः। यथा लोकेति यथा स्वप्नोपि दृश्यत इत्यर्थः। स्वप्नो वेदे, देहो वेदान्त इति विवेकः। इषेत्वेति शाखां छिनत्ति। शाखा खशाया। खे हृदयाकाशे शेते स्वपितीत्यर्थः। स्वपिति स्वप्नं करोति। 'त विद्ये'तिश्रुतिः शारीरकब्राह्मणे, पूर्वप्रज्ञादृष्टश्रुताभ्यां मनसा तयोश्चिन्तनम्। तत्रेति स्वप्ने। स्वप्न इति प्रतिपद्यत इत्यनेनाप्यन्वेति। श्रुतिसूत्रविरोधपरिहारायाहुः तदुदित इति। यः स्वप्नः यदनन्तरः मनोरथानन्तरः स हि स्वप्नः तत् तस्मात् उदितः इति न्यायनिवेशो लक्ष्ये। अत्र न्याये मृत्तन्त्वादिकारणानन्तरं घटपटादिरुदित इति प्रत्यक्षं मानम्। तथा श्च लोकान्तरगतिरूपदेहप्रकरणीयायाः 'तं विद्याकर्मणी समन्वारभेते' इति श्रुत्या न विरोधः, एकत्र दृष्टः शास्त्रार्थोपरत्रापि तथेतिन्यायात्। सूत्रं तु 'विद्याकर्मणोरिति तु प्रकृतत्वा'दिति तृतीयाध्याये। तस्यापि न विरोधः। यद्वा श्रुतिरपि सूत्रविषयवाक्यरूपा। 'ये वै के चास्माल्लोकात् प्रयान्ति चन्द्रमसमेव ते सर्वे गच्छन्ती'ति कौषीतकिश्रुतिः। अत्र व्यवस्था 'तं विद्याकर्मणी' इत्येनया। 'विद्यया देवयानं कर्मणा सोमभाव' इति भाष्येण। न तावता तृतीययममार्गबाधः। एवं विद्याकर्मभ्यां जन्यः स्वप्नस्तद्धेतुको मनोरथेन जन्यः स्वप्नो मनोरथहेतुक इत्यर्थः। तथा च यथेदं तथा देही प्राक्तनं वपुस्त्यजत इति पूर्वेणान्वयः ॥ ४१ ॥

यतो यत इत्यत किञ्चेति किञ्चेत्यस्यारम्भार्थासम्भवात् प्राणश्लोकसाकल्यमर्थः। अन्यदपि प्राणश्लोकसाकल्यमुच्यत इत्यर्थः। तदध्यासादिति अहं जात इति देहाध्यासाज् जायते। अतस्मिन् तत्त्वारोपोध्यासः। आत्मनि जातत्वरूपदेहधर्मारोपः। एवमहं मृत इत्यत्र मृतत्वाध्यासः। अस्मिन्निति कंसनिविष्टकालनेम्युपदेशरूपे। मन एवेति एवकार आत्मयोगं व्यवच्छिनत्ति। तस्य दैवी सम्पत् तद्विषयत्वात्। अधुना कंसस्यासुरसम्पद्विषयत्वात्। नन्वासुरसिद्धान्ते मन एवेत्यत्र किं मानमिति चेन्न। 'मायेत्यसुरा' इति सिद्धान्ते। सर्वं मायेति तर्केणेति, 'मनोमात्रमिदं ज्ञात्वे'त्यत्र मायामये मनो जायत इत्युच्यते। 'माया मनः सृजती'ति सप्तमस्कन्धात्। 'न च तन्मनोकुरुते'ति बृहदारण्यकाद् वाक्यबाधः शङ्क्यः, तस्य दैवसिद्धान्तविषयत्वात्। तच्छब्देनाग्नेः घोरा तनुरूपाशनाया अपि वक्तुं शक्यत्वात्। निमित्तमात्रत्वमाश्रयस्य। 'नैवेह किञ्चनाग्र आसी'दिति बृहदारण्यक

'इहे'तिपदेनाश्रयोक्तेः। मतभेदेनाश्रयतन्त्वोः कारणतोपपत्तेः। तत्सिद्धान्ते 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्। अपरस्परसम्भूतं किमन्यत् कामहैतुक'मितिवाक्यादाहुः तथेति। सङ्कल्पविकल्पेति 'कामः सङ्कल्पो विचिकित्से'तिश्रुतिर्दैवसिद्धान्ते। अन्यतरदिति अत्र बहूनां मध्ये एकस्यातिशये विवक्षिते जमप् प्राप्तः तथापि महाभाष्ये एतेषु कतरो देवदत्तः कतरो यज्ञदत्त इति तमबुपाधिम् बहुत्वमनादृत्यैव तरब्योगादत्रापि भगवदिच्छाकारणकयोः कालकर्मणोः अन्यतरदित्येवं बहुत्वमनादृत्यैवमुक्तम्। मायाकार्यमनित्यं मनस्तुच्छमेव गृह्णाति सदेत्याशङ्क्य मायाधर्मं मोहमाहुः मोहेनेति। 'पञ्च'स्वित्यत्र पाञ्चभौतिको देह इति। 'यतो यत' इत्यपादाननिरूपितं विश्लेषं विवृण्वन्ति स्म यं यमर्थं विहायेति। गुणेषु मध्ये यतो यतः यं यमर्थं विहाय धावति यं यं च आप, नाम यत्र यत्र लग्नं भवति, तत्र तत्रैव। असौ इति विप्रकृष्टो यः कोऽप्यात्मा देही। अत्र गुणपदेन गुणकार्यमुच्यते। मायारचितेष्विति विशेषणात् 'लक्षणं तेन वक्ष्यामी'ति कारिकायाः। तदेवेति यं यमाप तदेव प्रपद्यमानः तेनैव सह जायत इत्यन्वयः। अत्र तत्र तत्र तदेव प्रतिपद्यमानः तत्र तत्र लोकान्तरे तदेवेति। यत्र लोकान्तरे, यत्र लग्नं भवति तदेव। यच्छब्दद्वयं यत्र यत्रेति तच्छब्दत्रयं तत्र तत्र तदेवेति। अस्यैवार्थोहमिति मन्यमान इत्यध्यासः। अध्यासमाहुः तेन सहेति। तेन देहेन। तथा च देहधर्मो जातत्वं न स्वस्य जीवस्य धर्मः। 'मनो यत्र निषक्तमस्ये'तिश्रुत्याहुः मनश्चेति। समा इति मनोभावनाविषयाः समाः विषयत्वेन। एवमपीति सत्त्वेपि। अस्मादिति परिदृश्यमानात् तव देहात्। उत्कृष्टमेवेति भोजानां कुलपांसवत्वज्ञानं तस्य वसुदेवेन ज्ञातम्॥ ४२॥

ज्योतिर्यथैवेत्यत्र एवमित्यादि पूर्वोक्तप्रकारेणात्मनो मनोनुसरणे ग्रहणपरित्यागहेतुत्वेन मनोहेतुद्वारा तत्कार्यदेहानुसरणतया। अनुगतपदलभ्योर्थः। मोहादेवेति मोहो मायाधर्मः। एवकारोत्र 'ऋतात्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'ति द्वितीयस्कन्धवाक्यात् इदं मायाधर्मेणार्थसम्बन्धं देहसम्बन्धमाह प्रतिबिम्बेति। अयं [illegible] वाच्यः। तथात्वं देहानुसरणमस्ति। उदकेति मध्यमपदलोपीसमासः। अन्तःकरणमिति तत्र कर्मवेगानुगत आत्मा प्रतिबिम्बमिव विभाव्यत इत्यर्थः। अन्तःकरणस्य मालिन्यात् प्रतिबिम्बासम्भवमालोच्याहुः उदकेष्विति। चांचल्येति दृष्टान्तदार्ष्टान्तिकसाधारणम्। मालिन्यम् आसुरबोधनायोपात्तम्, मलिने प्रतिबिम्बासम्भवात्। अत एव सिद्धान्ते जीवो न प्रतिबिम्बः। प्रतिबिम्बः कार्येश्वरः। स्वासाधारस्वभावानुविधायित्वे सति सम्मुखस्थितार्थानुविधायित्वं प्रतिबिम्बत्वम्। 'वेगो जवे प्रवाहे च महाकालफलेपि चे'ति विश्वात् समीरवेगा इत्यत्र वेगश्च वेगश्च वेगश्च वेगा इत्यत्र एको वेगो जवः चांचल्यम्। महाकालफलं मालिन्यम्। आदिपदेन प्रवाहः। अनुगतम् अनु पश्चाद् गतम्। तत्सम्बन्धोनुगमनसम्बन्धः। अद इति 'अदसस्तु विप्रकृष्ट' इति कोशः। प्रदर्शित इति सूर्यादिः प्रदर्शितः, आदिशब्दस्य नपुंसकत्वाभावात्। स्वमोहेनेति आत्ममोहेन। स्वीयमायाधर्मेण। मायारचितत्वे तु तज्जन्यभोगोन्यस्यापि स्यात्। आत्ममोहस्य तु तदीयकर्मसाहित्यान्नान्यस्य तद्देहजन्यभोगः। अभिमतेष्विति स्वप्नस्वाभिमतेष्वहङ्कारविषयेषु। भगवानित्यात्मा। रागेणेत्यनुरक्त्या। अनुगतः पश्चात् प्राप्तः, किं प्राप्त इत्यपेक्षायामाहुः तेन सहेति। देहेन सहैकत्वं प्राप्तः व्यतिरेकेणानुभवाभावात्। तथापि। प्रतिबिम्बेत्यादि प्रतिबिम्बन्यायेनान्तःकरणे प्रविष्टः, 'स मानसीन आत्मा जनाना'मितिश्रुतेः। विशेषेणेति मुह वैचित्र्ये। दि० प० से० परोपि विशेषेण तदैक्येन मनोनिष्ठमोहानुकूलव्यापारवान् भवति। अनुभूतमिदम्। भ्रमादित्यध्यासात्। तद्वशाद्देहवशात्। अपकार इति दयापात्रभगिनीहननेनात्मनोपकारोऽधर्मसम्बन्धः। अधर्मसम्बन्धादात्मनो नरकपातः॥ ४३॥

तस्मान्न कस्येत्यत्र तत्त्वमिति सप्तभिः पारमार्थिकं तत्त्वम्। अग्रे द्वाभ्यां लौकिकं तत्त्वं वक्तव्यमिति भावः। यदुक्तमिति परलोके। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति'श्रुत्युक्तं भयमाहुः भेदात्मकमिति। भेदेन परनिष्ठेनात्मा स्वरूपं यस्य भयस्य तत्तथोक्तम्। न त्वेकाकिकृतं भयं भवति। 'सो बिभेत्तस्मादेकाकी बिभेती'ति पुरुषविधब्राह्मणश्रुत्युक्तम्। कस्यचिदिति कस्यासकृदपि द्रोहम्। स इति देहः। तादृशः हननधर्मवान्। प्रकृतेस्यार्थस्योपयोगमाहुः अनेनेति। उक्तेन। आत्मनोपीति अपिना देहस्य। ननु अर्थी दोषं न पश्यतीति द्रोग्धाहं कथं चेमं विचारयिष्यामीत्यत आहुः सोपीति। द्रोग्धापि। मार्योन्मत्त इति देवक्याः सकाशाद्भयासम्भवात् स्वस्य च पतित्वेन देवक्यर्धत्वादहमपि मार्यस्तस्मादित्यर्थः। श्लोके परशब्देन शत्रुः यो मार्यते सः॥ ४४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

देहविषययोरेव स्वीकारपरित्यागयोर्दृष्टान्तान्तरमाह—स्वप्न इति। दृष्टं राजादि, श्रुतमिन्द्रादिशरीरं ताभ्याम्। तादर्थ्ये चतुर्थी। तल्लाभाय मनसा तदनुचिन्तयन् पुरुषो यथा स्वप्ने ईदृशं जाग्रद्दृष्टश्रुतसदृशं शरीरं राजादिरूपं किमप्यनिरुक्तं पश्यति तदेवाहमिति प्रतिपद्यते मन्यते, ततश्च जाग्रद्देहादपगतस्मृतिर्भवति तथेत्यर्थः। जाग्रत्येव देहस्वीकारपूर्वकदेहत्यागे दृष्टान्तान्तरमाह—मनोरथेनेति। दृष्टश्रुताभ्यां मनसानुचिन्तयन् मनोरथेनाभिनिविष्टा व्याप्ता चेतना बुद्धिर्यस्य स यथेदृशं किमपि देहं पश्यति तत्प्रपद्यते च पूर्वदेहादपगतस्मृतिश्च भवति तथेत्यर्थः। दृष्टान्तानां प्रसिद्धिं सूचयति—हीति॥ ४१॥ ननु 'सत्यं किमपि देहमात्रं प्राप्तं भविष्यति, तथाप्यस्य राजदेहस्यातिप्रियत्वादेतद्रक्षणायाकृत्यमपि क्रियते' इति चेत् "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय सदा तद्भावभावितः" इत्यादिवाक्यानुसारेण चिन्तनमात्रेणेष्टदेहप्राप्तिसम्भवान्न तद्रक्षार्थमपि पापाचरणं युक्तमित्याशयेनाह—यतो यत इति। अस्य देहस्य पञ्चत्वसमये मनः पञ्चसु गुणेषु गुणकार्यपृथ्व्यादिमहाभूतेषु मायया भगवदिच्छया

देवमनुष्यादिनानादेहरूपेण रचितेषु मध्ये यतो धावति यं यं देहं चिन्तयति धावच्च सत् यं यमाप अभिनिवेशेन प्राप्तं भवति तत्र तत्रासौ देही जायते। मनसस्तु धावनं सहजमेवेत्याह—विकारात्मकमिति। नानाविधसङ्कल्पविकल्पात्मकमित्यर्थः। तथापि तदा विशेषतो देवादिस्वरूपचिन्तने को हेतुरित्यपेक्षायामाह—दैवचोदितमिति। देवादिशरीरेषु नानाविधसुखदुःखभोगप्रदानाभिमुखेन दैवशब्दवाच्येन कर्मणा चोदितमित्यर्थः। तथा च नानायोनिगतभोगप्रदेषु कर्मसु सत्स्वपि यद्योनिगतभोगप्रदं कर्म फलाभिमुखं भवति, तेनैव प्रेरितं मनस्तदेव शरीरं चिन्तयतीति ज्ञेयम्। तर्हि मनसश्चिन्तकत्वात्तदेव जायताम्, जीवः किमिति जायते तत्राह—प्रपद्यमान इति। यतो मनसा सहात्मनः अभेदं मन्यमानः अतस्तेन सहैव जायते नानायोनिषु संसरतीत्यर्थः॥ ४२॥ नन्वन्ते स्मरणस्यापि कर्माधीनत्वात् कदाचिद्दुष्टेन कर्मणा तदानिष्टदेहस्मरणं स्यात्तर्हि तस्यैव प्राप्तिः स्यात्, न इष्टस्येत्याशङ्क्याह—ज्योतिरिति। यथा अदः सूर्यचन्द्रादिज्योतिः उदकयुक्तेषु पार्थिवेषु वापीकूपतडागादिषु प्रतिबिम्बितसमीरस्य वायोर्वेगमनुगतं चाञ्चल्यमालिन्यादियुक्तमेव विभाव्यते प्रतीयते, एवं स्वमायया स्वाविद्यया रचितेषु गुणेषु देहेषु असौ पुमान् जीवो रागेणानुगतः प्रतिबिम्बन्यायेन प्रविष्टो मुह्यति आत्माभिनिवेशं प्राप्नोति। तथा च राजदेहवत् सूकरादिदेहस्थस्यापि जीवस्य तत्रात्माध्यासेन प्रेमास्पदत्वादेः सत्त्वात् न ततो राजदेहादेः कश्चिद्विशेष इति भावः॥ ४३॥ एवं सामोपायं निरूपितम्। अथ दृष्टादृष्टभयात्मकभेदमाह—तस्मादिति। वै यस्माद्द्रोग्धुः पुरुषस्य परतो द्रुह्यमानात्तत्सम्बन्धिभ्यो यमाच्च भयं भवति तस्मात् स तथाविधो यादृशो द्रुह्यते तादृशः अज्ञः कर्माधीनः आत्मनः क्षेममभयमन्विच्छन् कस्यचिदपि द्रोहं नाचरेदित्यन्वयः॥ ४४॥

अन्वितार्थप्रकाशिका

देहविषयावेव स्वीकारपरित्यागौ दर्शयितुं पुनर्द्वौ दृष्टान्तावाह—स्वप्न इति। यथा स्वप्ने स्वापावस्थायां वर्त्तमानः यथा वा मनोरथेन अभिनिविष्टा अभिनिवेशवती चेतना बुद्धिर्यस्य सः स्वप्नावस्थागतो मनोरथाविष्टो वेत्यर्थः। देही दृष्टं राजादिदर्शनं श्रुतमिन्द्रादिश्रवणं ताभ्यामाहितसंस्कारेण मनसा तदेवानुचिन्तयन् ईदृशं जाग्रद्दृष्टश्रुतसदृशं देहं राजादिरूपं किमपि अनिरुक्तं पश्यति। यः क्षणान्तरे च तदेवाहमिति प्रपद्यते। ततश्च जाग्रद्देहादपगतस्मृतिर्भवति। पुरुषो यथेति। इममेवार्थमेकादशे द्वाविंशेऽध्याये वक्ष्यति "जन्तोर्वै कस्यचिद्धेतोः" इत्यारभ्य "स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसौ।" इत्यादिकेन केचित्त्वत्र मनोरथेनाभिनिविष्टचेतनः पुरुषः स्वप्ने ईदृशं देहं पश्यति। इत्येकदृष्टान्तत्वेन व्याचक्षते इति। तद्वदत्रापि कर्मवशाद्देहान्तरं प्राप्य प्राक्तनं त्यजतीति॥ ४१॥ यतो यत इति। देहस्य पञ्चत्वसमये दैवेन फलाभिमुखेन कर्मणा चोदितं नानाविकारात्मकं मनो मायारचितेषु मायया नानादेहरूपेण रचितेषु पञ्चसु गुणेषु भूतेषु मध्ये यं यं देहं देवतिर्यगादिरूपं प्रतिधावति धावच्च सद्यो यमाप अभिनिवेशेन प्राप्तं भवति तमेव प्रपद्यमानः तदेवाहमिति मन्यमानः असौ देही तेन मनसा सहैव तत्र जायते। यद्वा तेन विषयाभिनिविष्टेन मनसा सह साहित्याद्धेतोः तं तं विषयं प्रपद्यमानो जायते भुञ्जानो भवति इत्यर्थः॥ ४२॥ ततश्च मनःसहितस्य जीवस्य मनोधर्मप्राप्तिं सदृष्टान्तमाह—ज्योतिरिति। यथा उदकयुक्तेषु पार्थिवेषु घटादिषु यद्वा उदकेषु पार्थिवेषु तैलघृतादिषु च प्रतिबिम्बतया स्थितम् अदः प्रसिद्धं ज्योतिश्चन्द्रादि समीरस्य वायोर्वेगमनुगतं कम्पादियुक्तं विभाव्यते प्रतीयते। एवं स्वस्य मायया अविद्यया रचितेषु गुणेषु देहेषु असौ पुमान् रागेणानुगतः प्रविष्टो मुह्यति अभिनिवेशं प्राप्नोति। अयं भावः। आत्मनो देहाद्यध्यासाज्जन्मोच्यते। अन्योन्याध्यासाच्च देहादिधर्माः कार्श्यादयः आत्मनि प्रतीयन्ते। एवं प्रेयस्त्वादय आत्मधर्मा देहादौ इति व्यर्थो मृत्युप्रतीकारः॥ ४३॥ उक्तं सामोपसंहरन् दृष्टादृष्टभयलक्षणं भेदं दर्शयति—तस्मादिति। तस्मात् मृत्योरपरिहार्यत्वादिहेतोः तथाविधः मृत्युपरिहाराशक्तः स जनः आत्मनः क्षेममन्विच्छन् हेतौ शता। हेतुरत्र फलम् इहामुत्र क्षेमार्थमित्यर्थः। कस्यचिदपि द्रोहं नाचरेत् वै यस्माद्धेतोः द्रोग्धुः जनस्य परतः अभिद्रुह्यमाणात्तत्संबन्धिनश्च यमादपि इहामुत्र च भयमिति॥ ४४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

देहान्तरमनुप्राप्येत्येतत् दृष्टान्तद्वयेनोपपादयति। व्रजन्निति। यथा, व्रजन् गच्छन्, पुमानिति शेषः। एकेन पदा, तिष्ठन्, अग्रतो निहितेन चरणेन भुवमवष्टभ्य देहं बिभ्रदित्यर्थः। पश्चात्, एकेनान्येन पूर्वप्रदेशादुत्थाप्य पुरोनिहितेन पदा, गच्छति, एव। 'एके मुख्यान्यकेवलाः' इति कोशादेकशब्दस्यान्यशब्दार्थत्वम्। अत्र चैकस्य स्वीकारोऽपरस्य परित्याग इत्येतौ नात्यन्तभिन्नविषयाविति बोधयितुं दृष्टान्तान्तरमाह। यथा तृणजलौका तृणान्तरमवष्टभ्य पूर्वं तृणं त्यजति, एवं कर्मगतिं गतः, देह्यपि, कर्मपथे वर्त्तमानोऽन्यो जीवोऽपि, यातनादेहेऽग्रिमपादावष्टम्भसमां स्थूलातिभावनोपेतामहंममतां निबद्ध्य पूर्वदेहगतां तां परित्यजति। तथा चोक्तं मनुस्मृतौ द्वादशेऽध्याये षोडशादिश्लोकेषु। 'पञ्चभ्य एव मात्राभ्यः प्रेत्य दुष्कृतिनां नृणाम्। शरीरं यातनार्थीयमन्यदुत्पद्यते ध्रुवम्। तेनानुभूय ता यामीः शरीरेणेह यातनाः। तास्वेव भूतमात्रासु प्रलीयन्ते विभागशः' इति। एतदर्थो मन्वर्थमुक्तावलेर्बोध्यः। अत्र पापफलभोगार्थकं यथा यातनार्थीयं शरीरं जायते, तथा पुण्यफलभोगार्थकं सुखानुभवार्थीयं शरीरमप्युत्पद्यते इति बोध्यमेतद्वचनस्य तदुपलक्षणत्वात्॥ ४१॥ ननु जलौका तु विद्यमानशरीरेणैव गन्तव्यदेशमवष्टभ्यैव पूर्वदेशं परित्यजतीति तस्याः भयशोकाद्यभावो युक्तः दार्ष्टान्तिके तु न तथा प्रतीयते पूर्वदेहत्यागोत्तरदेहलब्ध्योः श्रवणात्। तथा नावे प्राक्तनकलत्रपुत्रवपुस्त्यागप्रयुक्तभयशोकोपनिपातसंभावनया तत्परिहारोऽवश्यं कर्त्तव्य इत्याक्षेपपरिहाराय स्वप्नमनोरथदृष्टान्ताभ्यां देहान्तरप्राप्तिपूर्वकं पूर्वदेहत्यागं

तत्प्रयुक्तभयाद्यभावं च दार्ष्टान्तिके संगमयति। स्वप्न इति। पुरुषः जाग्रति दृष्टं राजादिदर्शनं च श्रुतमिन्द्रादिश्रवणं च ताभ्याम्, आहितसंस्कारेणेति शेषः। मनसा अनुचिन्तयन् दृष्टश्रुतमेव ध्यायन्, अतः अत्र अभिनिविष्टचेतनः संजाताभिनिवेशयुक्तबुद्धिः सन्, स्वप्ने यथा ईदृशं जाग्रद्दृष्टश्रुतसदृशं, देहं राजेन्द्रादिशरीरं, किमपि विभ्रान्तिमत्तया अनिरुक्तं यथा भवति तथा, पश्यति, क्षणान्तरे इति शेषः। तत् तदेवाहमिति, प्रपद्यते मन्यते, ततश्च अपस्मृतिः। जाग्रद्देहविषयकस्मृतिरहितः भवति। एवं स्वाप्नदृष्टान्तेन पूर्वदेहत्यागजातभयशोकादिराहित्यं प्रदर्शितम्। जाग्रत्यप्येवं मनोरथोद्देशेन दृष्टान्तान्तरमाह। पुरुषः, जाग्रति, यथा दृष्टश्रुताभ्यां राजदर्शनेन्द्रश्रवणाभ्यामित्यर्थः। आहितसंस्कारेण मनसा, कृतेन मनोरथेन, अहमेवंविधो राजा भवेयमिन्द्रो भवेयमिति बहुविहितमनोरथेनेत्यर्थः। तद्दृष्टश्रुतमेवेत्यर्थः। अनुचिन्तयन् भवति। अतः अत्र अभिनिविष्टचेतनः सन्, जाग्रत्येव, ईदृशं दृष्टश्रुतसदृशं, देहं राजेन्द्रादिशरीरं, किमपि विभ्रान्तिमत्तोपेततयाऽनिरुक्तं यथा भवति तथा, पश्यति। क्षणान्तरे च, तत्तदेवाहमिति प्रपद्यते। ततश्च अपस्मृतिः स्वीयब्राह्मणत्वादिस्मृतिरहित इत्यर्थः। जायते। एवं जाग्रद्दृष्टान्तेनापि पूर्वदेहत्यागजन्यभयादिराहित्यं प्रदर्शितम्। केचित्तु केवलस्वप्नदृष्टान्तेन देहान्तरप्राप्तिपूर्वकं पूर्वदेहत्यागं तत्प्रयुक्तभयाद्यभावं च दार्ष्टान्तिके संगमयन्ति। तद्यथा। स्वप्ने यथा दृष्टश्रुताभ्यां दृष्टश्रुतमनीषितलाभार्थं, मनसा अनुचिन्तयंस्तत्संकल्पविकल्पौ कुर्वन्, मनोरथेन देशान्तरगमनराज्याभिषेकादिरूपेण, अभिनिविष्टा चेतना बुद्धिर्यस्य तथाभूतो जीवः, ईदृशं शयानसदृशं, तत् किमपि तद्विलक्षणं वा किमपि शरीरं तावत्, पश्यति। ततः, प्रपद्यते तदेवाहमिति मनुते, ततः, अपस्मृतिः जाग्रत्कालीनदेहविषयकस्मृतिरहितः भवति। अत एव तत्त्यागप्रयुक्तभयशोकादिरहितश्च भवति। हीत्यनेन स्वपरानुभवसिद्धिं द्योतयतीति ॥ ४२ ॥ ननु नानाविधदेहहेतूनां कर्मणां कृतत्वात्पूर्वदेहत्यागानन्तरं देहविशेषप्राप्तौ किं कारणं तत्राह। यतो यत इति देहस्य पञ्चत्वप्राप्तिसमये इति शेषः। दैवनोदितमदृष्टोद्बोधकान्तर्यामिणा कर्मात्मकतद्वासनानुगुणं प्रेरितं, विकारात्मकं संकल्पविकल्परूपनानाविकारयुक्तं, मनः, मायारचितेषु मायया नानादेहरूपेण विरचितेषु, पञ्चसु पञ्चसंख्याकेषु, गुणेषु भूतेषु मध्ये, यतो यतः, धावति। यं यं देहं स्मरतीत्यर्थः। धावच्च सत् यं यम्, आप। अभिनिवेशेन यं यं प्राप्नोतीत्यर्थः। प्रपद्यमानः तदेवाहमिति मन्यमानः, असौ देही, तेनोक्तविधेन मनसा सह, तत्र तत्र, जायते। अत्र मनसः कर्तृत्वात्तस्यैव तत्र भवनं युक्तं, न त्वकर्तुरात्मनस्तथापि तदेवाहमित्यभिमत्या स तत्र जायते इत्युक्तम्। इयमेवास्योत्पत्तिर्नामेति भावः। 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय सदा तद्भावभावितः' इति भगवदुक्तेः ॥ ४३ ॥ 'सह तेन जायते' इति यदुक्तं तत्र जीवस्य तेन सह जन्मरूपोपाधिप्रयुक्तमेव देवमनुष्यत्वादि नानात्वं, वस्तुतस्तु सर्वत्र शरीरेषु जीवा ज्ञानैकाकारत्वेनावतिष्ठन्ते इति सदृष्टान्तमाह। ज्योतिरिति। यथा अदः ज्योतिः अन्तरिक्षस्थमेकरूपमेव सूर्यादितेजः, उदकानि च पार्थिवानि च तेषु, तत्रोदकानि प्रसिद्धानि, पार्थिवानि पृथिवीपरिणामरूपदर्पणादीनि च, केचित्तु पार्थिवानि तैलघृतादीनि इति वदन्ति। प्रतिबिम्बितं सदिति शेषः। समीरस्य वायोर्यो वेगस्तेनानुगतमनुवृत्तं, विभाव्यते। जनैरिति शेषः। समीरवेगोत्थमहदल्पतरङ्गाणां चलनादिना सकम्पत्वानेकतापन्नत्ववद्विबुध्यते। एवमेव, असौ पुमान् जीवः, स्वतो देवमनुष्यत्वादिनानात्वरहितोऽपीति शेषः। स्वमायारचितेषु स्वदेहारम्भकप्रकृतिपरिणामरूपभूतसूक्ष्मारब्धेषु, गुणेषु गुणपरिणामात्मकेषु शरीरेषु, रागानुगतः वासनयाऽनुप्रविष्टः सन्, विमुह्यति देवोऽहं मनुष्योऽहमित्येवं नानाविधं मोहं प्राप्नोति। यद्यप्यत्र दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं प्रतिभाति तथापि वस्तुतो नानात्वाभावोपाधिकनानात्वमात्रेण दृष्टान्तदार्ष्टान्तिकभावोऽवगन्तव्यः। यद्यपि 'अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव' इति श्रुतीक्षया 'ज्योतिर्यथैवास्ति महीरुहेष्वदस्तद्वक्रकुब्जत्वयुतं विभाव्यते' इत्थंभूतमेतत्पूर्वार्द्धं प्रागासीत्तच्च प्रतिबिम्बवादिभिर्जीवब्रह्मणोरभेदद्योतनाय तत् स्फुटताद्योतनायान्यथा कृत्वा पठितमस्ति, न च वाच्यं श्रुतिरपि तदेव दर्शयतीति। अनादिकालतो बद्धस्य स्वरूपतोऽबद्धस्य जीवस्य तथाविधोऽग्निरेव दृष्टान्ताय युज्यते। उक्तपूर्वार्द्धं व्याख्यायते। महीरुहेषु वृक्षेषु, ज्योतिर्वाह्नं तेजः, अस्ति एव अनादिकालत एव वर्त्तते। अद एतज्ज्योतिः, यथा तद्वक्रकुब्जत्वयुतं वृक्षगतवक्रत्वकुब्जत्वादिमत्, विभाव्यते, एवमित्याद्युत्तरार्द्धं पूर्ववदेव। यदि हठात् कैश्चिज्ज्योतिर्यथैवोदक इत्यादिपाठ एव सत्य इत्युच्यते, तर्हि सोऽप्यनयैव दिशा व्याख्याय प्रदर्श्यते। अदः याज्ञिकादिभिरण्यादिरुष्वनुभूयमानं, ज्योतिर्वाह्नं तेजः, उदमुदकं कायन्ते स्ववृत्त्यर्थं शब्दायन्ते प्रार्थयन्त इति उदकाः पृथिव्यां भवाः पार्थिवाः उदकाश्च ते पार्थिवाश्चोदकपार्थिवास्तेषु उदकजीवनेषु पृथिवीजाततरुष्वित्यर्थः। सम्यगीर्यन्ते शाखादिचालनेनेतस्ततः प्रेर्यन्ते इति समीरास्तरवस्तेषां वेगः शाखाप्रशाखानामूर्द्ध्वतिर्यक्प्रसरणप्रवाहस्तेनानुगतं, 'वेगो जवे प्रवाहे च' इति मेदिनी। यथा विभाव्यते। एवमादि पूर्ववदेव। विगीतत्वाद्गोपालानन्दस्वामिभिरुपेक्षितोऽपि दुराग्रहवतः प्रत्युत्तरदानायायं व्याख्यातः ॥ ४४ ॥

हिन्दी अनुवाद (कर्वमक्षमा)

जैसे कोई पुरुष जाग्रत् अवस्थामें राजाके ऐश्वर्यको देखकर और इन्द्रादिके ऐश्वर्यको सुनकर उसकी अभिलाषा करने लगता है और उसका चिन्तन करते-करते उन्हीं बातोंमें घुल-मिलकर एक हो जाता है तथा स्वप्न में अपने को राजा या इन्द्रके रूपमें अनुभव करने लगता है, साथ ही अपने दरिद्रावस्थाके शरीरको भूल जाता है। कभी-कभी तो जाग्रत् अवस्थामें ही मन-ही-मन उन बातोंका चिन्तन करते-करते तन्मय हो जाता है और उसे स्थूल शरीरकी सुधि नहीं रहती। वैसे ही जीव कर्मकृत कामना और कामनाकृत कर्मके वश होकर दूसरे शरीरको प्राप्त हो जाता है और अपने पहले शरीरको भूल जाता है ॥ ४१ ॥ जीवका

मन अनेक विकारोंका पुञ्ज है। देहान्तके समय वह अनेक जन्मोंके सञ्चित और प्रारब्ध कर्मोंकी वासनाओंके अधीन होकर मायाके द्वारा रचे हुए अनेक पाञ्चभौतिक शरीरोंमेंसे जिस किसी शरीरके चिन्तनमें तल्लीन हो जाता है और मान बैठता है कि यह मैं हूँ उसे वही शरीर ग्रहण करके जन्म लेना पड़ता है ॥ ४२ ॥ जैसे सूर्यचन्द्रमा आदि चमकीली वस्तुएँ जलसे भरे हुए घड़ोंमें या तेल आदि तरल पदार्थों में प्रतिबिम्बित होती हैं और हवाके झोंकेसे उनके जल आदिके हिलने डोलनेपर उनमें प्रतिबिम्बित वस्तुएँ भी चञ्चल जान पड़ती हैं—वैसे ही जीव अपने स्वरूपके अज्ञानद्वारा रचे हुए शरीरमें राग करके उन्हें अपना आप मान बैठता है और मोहवश उनके आने-जानेको अपना आना-जाना मानने लगता है ॥ ४३ ॥ इसलिये जो अपनो कल्याण चाहता है, उसे किसीसे द्रोह नहीं करना चाहिये; क्योंकि जीव कर्मके अधीन हो गया है और जो किसीसे भी द्रोह करेगा, उसको इस जीवनमें शत्रु से और जीवनके बाद परलोक से भयभीत होना ही पड़ेगा ॥ ४४ ॥

एषा तवानुजा बाला कृपणा पुत्रिकोपमा । हन्तुं नार्हसि कल्याणीमिमां त्वं [1]दीनवत्सलः ॥ ४५ ॥

श्रीशुक उवाच

एवं स सामभिर्भेदैर्बोध्य[2]मानोऽपि दारुणः । न न्यवर्तत कौरव्य पुरुषादाननुव्रतः ॥ ४६ ॥

निर्बन्धं तस्य तं ज्ञात्वा विचिन्त्यानकदुन्दुभिः । प्राप्तं[4] कालं प्रतिव्योढुमिदं तत्रान्वपद्यत ॥ ४७ ॥

मृत्युर्बु[3]द्धिमतापोह्यो यावद्बुद्धिबलोदयम् । यद्यसौ न निवर्तेत नापराधोऽस्ति देहिनः ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—एषा तव अनुजा बाला कृपणा पुत्रिकोपमा त्वं दीनवत्सलः इमां कल्याणीं हन्तुं न अर्हसि ॥ ४५ ॥ श्रीशुक उवाच—कौरव्य ! एवं सः सामभिः बोध्यमानः अपि पुरुषादान् अनुव्रतः दारुणः न न्यवर्तत ॥ ४६ ॥ आनकदुन्दुभिः तस्य तं निर्बन्धं ज्ञात्वा प्राप्तं कालं प्रतिव्योढुं इदं तत्र अन्वपद्यत ॥ ४७ ॥ बुद्धिमता यावद् बुद्धिबलोदयं मृत्युः अपोह्यः यदि असौ न निवर्तेत देहिनः अपराधः न अस्ति ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुनः सामाऽऽह—एषेति । पुत्रिकोपमा दारुमयीव अचेतनप्रायेत्यर्थः ॥ ४५ ॥ बोध्यमानः उपदिश्यमानः । स्वयं दारुणः पुनः पुरुषादान्दैत्याननुसृत इति ॥ ४६ ॥ आनकदुंदुभिरिति पदं महाभाग इत्यत्रोक्ताभिप्रायम् । प्रतिव्योढुं प्रतिकर्तुं वंचयितुमित्यर्थः । इदं वक्ष्यमाणमपत्यार्पणमन्वपद्यत ज्ञातवान् ॥ ४७ ॥ ननु खलोयमेतदपि न मन्येतेत्याशंक्य स्वस्मिन्नेवाह—मृत्युरिति ॥ ४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यज्ञादिकर्मकर्तृशुद्धकुरुवंशोद्भूतस्य तव तुल्यता तस्य नास्तीत्याह—हे कौरव्येति । पुरुषादाननुव्रतः तत्स्वभावमापन्नः ॥ ४६ ॥ तस्य कंसस्य निर्बंधं हठम् । "निर्बंधो हठमुक्तयोः" इति धरणिः । विचिंत्य इत्थमयं पापो बोधनीय इति विचार्य ॥ ४७ ॥ आर्यविसृष्टाप्यनार्यैर्नांगीक्रियत इत्याशंकते—नन्वित्यादिना । अयं कंसः । एतत् मद्विचारितम् । वक्ष्यमाणसुतार्पणादिना भार्यामोक्षणम् । स्वयमेव वसुदेव इत्यर्थः । प्राह मृत्युरित्यादिना । अपोह्यो निराकर्त्तव्यः । बुद्धिश्च बलं चोदयश्च ते बुद्धिबलोदयाः ज्ञानसामर्थ्यवैभवाः यावंतो बुद्धिबलोदयास्तावंतो मृत्युप्रतीकारा इति यावद्बुद्धिबलोदयम् । "यावदवधारणे" इत्यव्ययीभावः असौ मृत्युः बुद्धिवैभवादिसत्त्वेऽकार्येणापि मृत्युप्रतीकारः कार्योऽन्यथाऽपराधो दोषः स्यादिति । यद्वा—अकार्येणापि मृत्यावनिवृत्तेऽकार्यकरणलक्षणापराधो न भवति प्रतिकर्तुरिति भावः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत्युग्रे संस्तुतिसामैवोचितमिति पुनस्तदेवाह—एषेति । नवोढा कृपणा भयेन रोदनादिपरेत्यर्थः । दीनस्वभावा वा पुत्रिकोपमा तव पुत्रीतुल्येति स्नेहं जनयति, यद्वा, पुत्तलिकासदृशी अचेतना भद्राभद्राऽनभिज्ञेत्यर्थः । अत एव कल्याणीं निरपराधामित्यर्थः । इमामेनां विशेषणानामेषामुत्तरोत्तरं कल्याणोत्वे श्रैष्ठ्यमूह्यम्, दीनवत्सल इति श्लेषेण दीनं मृतप्रायं वत्समेव लाति विप्रेभ्यो ददाति यद्वा दीनादपि वत्समपि लाति गृह्णातीति इमां त्वं हन्तुं नार्हसि काका किन्त्वर्हस्येवेत्यर्थः इति निन्दैव ॥४५॥ पुरुषादा राक्षसा अघादयः तान् अनुव्रतः तेषां परितः स्थितानां मतमनुसृत इत्यर्थः । भक्षकेषु सामादीनां वैयर्थ्यं युक्तमेवेति भावः । सामादि-

---

१. वत्सल—वीर. विज. । २. श्रोध्यमानोपि—वीर. । ३. तु—वीर. । ४. प्राप्तकालं—वीर. विज. ।

भिरप्यनिवृत्तेर्विस्मयेन सम्बोधयति हे कौरव्येति ॥ ४६ ॥ इदं विचिन्त्येदमन्वपद्यतेत्यन्वयः । भूयः तं हननार्थं निर्बन्धम् आग्रहं ज्ञात्वा बुद्ध्वा विचिन्त्य विचार्य कालं समयं मृत्युं वा प्रतिव्योढुं वञ्चयितुमित्यर्थः । तत्र तदानीं सद्य एवेत्यर्थः । अन्वपद्यत उपायत्वेन मनसा निश्चितवानित्यर्थः ॥ ४७ ॥ ननु, तत्र खलोऽयमित्याद्याशङ्कागर्भं विचारमेव दर्शयति–मृत्युरिति अपोह्यः प्रतिकार्यः बुद्धिबलयोरुदयः उत्कर्षः तदवधिः पूर्वा बुद्धिस्तत्सामान्यम् उत्तरात्तद्विशेषः असौ मृत्युः अपराधः उपेक्षादोषः देहिन इति देहतन्त्रस्य जीवस्य ततोऽन्यत्राशक्तेः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं सामान्यतो हिताहितं विविच्याथ विशेषेण विवेचयति एषेति अनुजात्वस्त्रीत्वबाल्यदैन्यपुत्रिकातुल्यत्वकल्याणीत्वादिधर्मयुक्तेयमवध्याऽत इमां त्वं हन्तुं नार्हसि हन्तृत्वानर्हतां सूचयितुं सम्बोधयति, हे दीनवत्सलेति ॥ ४५ ॥ इत्थमिति । इत्थं सामभिः श्लाघनीयगुण इत्यादिगुणकीर्त्तनपूर्वकम् उपलालनैर्भेदैः दृष्टादृष्टभयसूचकवचोभिः चोद्यमानोऽपि वधोद्योगनिवृत्त्यर्थं प्रेर्यमाणोऽपि स कंसो दारुणः क्रूरः हेतुगर्भमिदं दारुणत्वात्तत्र हेतुः पुरुषादान् राक्षसाननुव्रतः असुरसंपत्त्यभिजातः हे कौरव्य ! न न्यवर्त्तत वधोद्योगादिति शेषः ॥ ४६ ॥ तस्य कंसस्य सम्बन्धिनं निर्बन्धमनिवृत्तवधोद्योगरूपं ज्ञात्वा आनकदुन्दुभिर्वसुदेवः प्राप्तं समुपस्थितं कालं पत्न्याः मृत्युं प्रतिव्योढुं परिहर्तुं विचिन्त्य, उपायमिति शेषः तत्र कालपरिहारे इदं वक्ष्यमाणम् अन्वपद्य उपायत्वेनाध्यवस्यत् ॥ ४७ ॥ विचारपूर्वकं प्रतिपत्तिमेव दर्शयति–मृत्युरित्यादिभिः चतुर्भिः । उपस्थितो मृत्युर्बुद्धिमता पुंसा यावद्बुद्धिबलोदयं यथामति यथाशक्ति चापोह्यः परिहार्यः एवमपि यद्यसौ मृत्युः न निवर्त्तेत तर्हि न देहिनोऽपराधोऽस्ति ॥ ४८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

परतोऽन्यस्माद्द्रोह्यात्पुरुषात् द्रोहलक्षणं भयं स्यादिति मत्वा निरन्तरद्रोहलक्षणं दुःखं भवतीति भयसाम प्रदर्श्य भेदसाम प्रदर्शयति एषेति ॥ ४५ ॥ पुरुषादान् राक्षसाननुव्रतः स्वस्वभावमापन्न इत्यर्थः ॥ ४६ ॥ यः शास्त्रनिषिद्धस्तं प्राप्तकालं प्राप्तावसरं व्यसनं प्रतिव्योढुं प्रतिहर्त्तुम् इदं वक्ष्यमाणम् अन्वपद्यत अपश्यत् ॥ ४७ ॥ यावद्बुद्धिबलोदयमित्यव्ययीभावः ‘ यावदवधारणे” (२।१।८) इति सूत्रात् अपराधः शास्त्रविरोधाचरणलक्षणः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

निर्बन्धमिति अन्वपद्यत उपायत्वेन मनसा विचारितवानित्यर्थः ॥ ४७–४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदप्यनिवृत्तं तमत्युग्रं स्तुतिभिरिति न्यायेन पुनः सामाऽऽह एषेति । पुत्रिकोपमा अनुकम्पनीयपुत्रीतुल्या पुत्तलिकावद्भयेन अचेतना वा वास्तवार्थे तु शिरश्चालने नत्व दीनादतिदरिद्रादपि वत्समपि राजकरत्वेन लासि गृह्णासीत्यर्थः ॥ ४५ ॥ चोद्यमान उपदिश्यमानः पुरुषादान् दैत्यान् ॥ ४६ ॥ आनकदुन्दुभिरिति मज्जन्मनि देवैर्दुन्दुभिवादनादिदममङ्गलं न मे भविष्यतीति निश्चिन्वन् प्रतिव्योढुम् यापयितुम् इदम् अन्वपद्यत परामर्श ॥ ४७ ॥ अपोह्यः प्रतिकार्यः यावान् बुद्धिबलयोरुदयो यत्र तद्यथा स्यात्तथा अस्मात् कंसहस्तान्मृत्युप्रतीकारे मम तु बलस्योदयो विफल एव बुद्धेरुदयस्तु सफलो भवितुमर्हतीति भावः असौ मृत्युः ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सामभिः श्लाघनीयगुण इत्यारभ्य दीनवत्सल इत्यन्तेन ग्रन्थेन प्रोक्तैः भेदैः आत्मनः क्षेममन्विच्छन् द्रोग्धुर्वै परतो भयमित्यनेन मध्ये प्रोक्तैर्बोध्यमानः उपदिश्यमानोऽपि स्वयं दारुणः पुनः पुरुषादान् पुरुषभक्षणपरानसुराननुव्रतः न न्यवर्तत भगिनीवधादिति शेषः ॥ ४६ ॥ आनकदुन्दुभिः श्रीवसुदेवः तस्य कंसस्य निर्बन्धं भगिनीवधे हठं तद्दृष्ट्या ज्ञात्वाऽतः परं किं कर्तव्यमिति विचिन्त्य प्राप्तकालं प्रतिव्योढुं प्रतिवारयितुम् इदं वक्ष्यमाणमपत्यार्पणमन्वपद्यत अन्वालोचयत् ॥ ४७ ॥ बुद्धिमता मया मृत्युर्मारकः कंसः अपवाह्यः दूरीकर्तव्य इत्यर्थः । यदि असौ कंसः न निवर्तेत तदा देहिनो मम अपराधो न भवेत् उपेक्षणकर्तुस्तु अपराधो भवेदेवेति भावः ॥ ४८ ॥

श्रीसुबोधिनी

लौकिकव्यवहारेणापि मारणं नोचितमित्याहैषा तवानुजेति । लोके कनिष्ठभगिनी स्नेहपात्रं भवति तत्रापि बालाष्टवार्षिकी लालनयोग्या तत्रापीयं दीना भयविह्वला चातुर्यानभिज्ञा च । पुत्रिकोपमा प्रतिमोपमा । तस्मादेषैव परं नेया न तु मारणमुचितमित्याह हन्तुं नार्हसीति । कल्याणीं विवाहालङ्कारयुक्ताम् । इमामिति । प्रदर्शनेन दयामुत्पादयति । त्वं च दीनवत्सलः । अनाविष्ट-

स्वरूपस्य तथात्वात्। स हि तमनाविष्टमेव मन्यते ॥ ४५ ॥ एवं शास्त्रार्थनिरूपणेन दयाभयादिजननेपि न मारणान्निवृत्त इत्याहैवमिति। भेदा आत्मानात्मविवेकपरमार्थलौकिकभयरूपाः। साम ज्ञानं साम्यं दया च। एवमनेकप्रकारेणापि **बोध्यमानो दारुणो** दैत्यात्मा **न न्यवर्तत**। तस्माद्वधान्निवृत्तो न जातः। तत्र हेतुः **पुरुषादान्** राक्षसाननुव्रतोनुसृतः। पुरुषादाननुमारणलक्षणं व्रतं यस्येति वा। आविष्टो हि तथैव ॥ ४६ ॥ एवं पूर्वप्रयास उपदेशात्मके विफले जाते पुनर्भगवदिच्छया प्रकारान्तरेण समाधानार्थं यत्नं कृतवानित्याह **निर्बन्धमित्यष्टभिः**। अयं लौकिको नालौकिकेन परमार्थेन निवर्ततेतोस्य लौकिक्येव युक्तिर्वक्तव्या। तस्माद्युक्ते स्फूर्तिः प्रथममुच्यते। सा च पुत्रदानात्मिका। तस्याश्चायुक्तत्वमाशङ्क्य युक्त्या युक्तत्वसमर्थनम्। ततः स्फुरितस्योपायस्यानुवादः सोपपत्तिकः। तस्यैव प्रतिकूलतर्कपराहत्या समर्थनम्। अशक्तावदृष्टशरणागतिः। तस्याप्युपायस्य ग्रहणार्थं साधनानुष्ठानम्। तत उद्योगः कथञ्चेति। अलौकिकस्फुरणात् तस्याङ्गीकारः। तेनायमुपाय आपाततः सफलः। पूर्वोपायवैयर्थ्यमनुवदति **निर्बन्धं तस्येति**। तस्य कंसस्य वधरूपं तं निर्बन्धमवश्यक्रियासाधनयत्नं तच्चेष्टया **ज्ञात्वातः** परं किं कर्तव्यमिति विचिन्त्येदमग्रे वक्ष्यमाणमन्वपद्यतेतिसम्बन्धः। विरोधस्त्वनेनाशक्यो दृष्टप्रकारेणालौकिकप्रकारेण च। अन्ये उपाया निवर्तिताः। अतःपरं द्वयमवशिष्यते। इयं वा देया। अस्याः पुत्रा वा। एतस्या दान एतां मारयिष्यत्येव। मत्सम्बन्धिपुत्राणामाकाशवाण्यामश्रुतत्वाद् देवद्वारापि तथात्वशङ्कया मारणमावश्यकम्। इदानीं स्वतो मारयति पश्चान्मारणे तु ममापि दोषः स्यादिति। पुत्रदानं चायुक्तं यतः स पुत्रो भगवद्रूपो भविष्यतीत्यानकदुन्दुभिपदेन ज्ञापितम्। तस्य जन्मन्यानका दुन्दुभयश्च नेदुरिति तत्र भगवदुत्पत्तिरावश्यकी। सापि न भार्यान्तरे। आकाशवाणीप्रामाण्यात्। एवं सङ्कटे पतित **आनकदुन्दुभिः** स्वस्मिन् भगवदुत्पत्तिं निश्चित्यास्यामेवेत्यपि पुत्रदानमेव कर्तव्यत्वेन ज्ञातवान्। तदपि न सर्वथा। भगवद्वैमुख्यप्रसङ्गे सति भगवदवतार एव न स्यादिति। तदाह **प्राप्तं कालं प्रतिव्योढुमिति** कर्तव्यत्वेन मृत्युः प्राप्तःस्तस्याः स दूरीकर्तव्योयुक्तमप्युक्त्वेतीदं पुत्रदानलक्षणं **तत्र** तस्मिन् **समयेन्वपद्यत**। अकस्मादुदय समागतमित्यर्थः ॥ ४७ ॥ ननु 'प्रक्षालनाद्धि पङ्कस्ये'त्यादिन्यायेनेदानीमेव कथं न तूष्णीम्भावस्तत्राह **मृत्युर्बुद्धिमतापोह्य** इति। अन्यथा भगवान् पश्वादिभ्यो विशिष्टानस्मान् किमित्युत्पादितवान्? अतो **बुद्धिमता मृत्युरपोह्यः** स्वस्य परस्य वा। ननु कृत एवैकवारमुद्यम इति चेत्तत्राह **यावद्बुद्धिबलोदयमिति**। **बुद्धेर्बलस्य च यावदभ्युदय** उत्तरोद्गतिः। न तु समता ह्रासो वा। तावद्विवेकवता यत्नः कर्तव्यो बुद्ध्या क्रियया वा। ननु यथा पूर्वमुद्यमो विफलो जात एवमग्रेपि चेद्भविष्यति तदा किमुद्यमेनेतिचेत्तत्राह **यद्यसौ मृत्युर्न निवर्तेत** तदोपेक्षालक्षणोपराधो देहाभिमानिनो नास्ति। देहाभिमानी कालादिदण्डमर्हति। अतो नापराधः कर्तव्यः। शास्त्रञ्च यच्छक्नुयात् तत् कुर्यादिति। फलं तु दैवाधीनमतोयमुपायः कर्तव्य इति निर्धारः ॥ ४८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

निर्बन्धमित्यत्र—अन्वपद्यतेत्यस्य प्राप्तवानित्यर्थः। 'ये गत्यर्थास्ते प्राप्त्यर्था' इति। **दृष्टप्रकारेणेति**। शस्त्रैरस्त्रैश्चेत्यर्थः ॥४६॥

बुभुत्सुबोधिका

एषा तवेत्यत्र अष्टवार्षिकीति अनागतार्तवा, रजोदर्शनात् पूर्वं उद्वाहात्। अष्टवार्षिकीत्वम्। 'गौरी तु नग्निकानागतार्तवे'त्यमरः। बाला तस्याः पर्यायः। अनेन वसुदेवश्चोष्टवर्षः। 'त्रिंशद्वर्षोद्वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्। अष्टवर्षोष्टवर्षां वे'ति मनुस्मरणात्। प्रदर्शनेनेति 'इदमस्तु प्रत्यक्षगे रूप'मितिवाक्यात्। अनाविष्टेति कालनेम्यनाविष्टरूपस्य। स हीति वसुदेवो हि तं कंसम् अनाविष्टं कालनेमिनेति बोध्यम्। तेन शुद्धसत्त्वरूपज्ञानेन मायाकालनेम्युपमर्दो निरूपितः ॥ ४५ ॥

एवं स सामभिरित्यत्र एवमिति वैदिकलौकिकतत्त्वप्रकारेण। दयाभयादीति अव्यवहितोक्ताभ्यां श्लोकाभ्यां दयाभये। आदिना वैदिकतत्त्वज्ञानम्। भेदा इति साम नाम प्रियवचनादिभिः क्रोधोपशमनम्। तेन सहितैर्भेदैः पंचविधैः, तदुक्तं 'परस्परोपकाराणां दर्शनं गुणकीर्तनं, सम्बन्धस्य समाख्यानमापत्त्याः संप्रकाशनम्। वाचा पेशलया साधु तवाहमिति चार्पणम्। इति सामविधानज्ञैः साम पञ्चविधं स्मृत'मिति। प्रथमश्लोके सम्बन्धस्य समाख्यानं 'भोजयशस्करः' 'भगिनीं हन्या'दिति च। द्वितीयस्मिन् आपत्त्या मृत्योः समयस्य, आगामिकालस्य वा संप्रकाशनम्, 'अद्य वाब्दशतान्ते वे'ति। अग्रे वाचा पेशलयेत्यादिः षड्भिः श्लोकैः। नवमे परस्परोपकाराणां दर्शनम्। 'आत्मनः क्षेममन्विच्छन् न कस्यचिद् द्रोहमाचरे'दिति। दशमे श्लोके गुणकीर्तनम्। 'तथानुजा बाले'ति बालत्वं गुणः, ईश्वरत्वज्ञापनात्। प्रथमश्लोके वा, यशस्कर इति पदेन। तं चापि सङ्कलीकृत्याहुः आत्मानात्मेति। आत्मानात्मविवेकश्च परमार्थश्च लौकिकभयं च तैः रूप्यन्ते व्यवह्रियन्ते इति तथा। प्रथमे लौकिकम्, द्वितीयस्मिन् परमार्थः, तृतीयचतुर्थाभ्यां श्लोकाभ्यामात्मानात्मविवेकः, अनात्मा देहः, अग्रेप्यात्मानात्मविवेकः, अन्त्याभ्यां लौकिकं भयमिति। साम ज्ञानमिति साम सान्त्वप्रयोगे, बाहुलकात्, कनीन् ज्ञानं सामलक्षणमपि भगवत्प्रेरणया अनधिकारिबोधनात् प्राप्तम्। साम्यं दया चेति साम्यं ज्ञानत्वात् दया कृपा मायारूपा आसुरसिद्धान्तवक्तृत्वात्। 'माया दम्भे कृपायां चे'ति विश्वात्। भी तु 'न गतभीः प्रभावि'दितिवाक्यात्। आविष्ट इति कालनेम्याविष्टः कंसः तथा नाम अनुव्रतत्वधर्मेणैव वर्तते। न तु दीनवत्सलत्वेन रूपेण ॥४६॥

निर्बन्धं तस्येत्यत्र विफल इति प्राणैः श्लोकैर्मृत्युव्यतिवहनाभावात् तथा। देवक्या अपमृत्युव्यतिक्रमः प्राणैः क्रूरः प्रतिबन्धकाभावात्। कंसस्यापमृत्युव्यतिक्रमो नास्ति, मृत्यौ साभिमानत्वस्य प्रतिबन्धकत्वात्। अनधिकार्युपदेशे भगवदिच्छारूपं

कारणमाहुः भगवदिच्छयेति । प्रकारान्तरेणेति प्राणत्वप्रकारादन्येन प्रकारेण बाह्यप्रयत्नेन प्रकारेण वायुनिष्ठेन। यत्नमिति मृत्यपोहनार्थं वैखरीयत्नम् । अष्टभिरिति वैखरीरूपैर्न तु प्राणरूपैः। कंसावमृत्यपहने तैः कृते पुत्रमृत्युसम्भवात्। कृपणामृत्यपोहनं त्वापाततः। भयादिना मृत्युसम्भवात्। अयमिति परिदृश्यमानोऽसुरो राजा वा। हरिप्रियाणां कलिरूपत्वेपि लौकिकत्वम्। 'जिघांसन्तं जिघांसीयान्न दोषो मनुरब्रवी'दितिस्मृत्या स्मार्तत्वम्। 'लोकवत् तु लीलाकैवल्य'मितिसूत्रात्। परमार्थेनेति भक्त्यभावेन कर्णरन्ध्रद्वारा प्रविष्टेन। उच्यत इति स्फूर्तेर्ज्ञानात्मिकाया विषयीभूतवक्ष्यमाणयुक्त्यविनाभावादिदंपदेन प्रत्यक्षत्वान् मुख्यतयोच्यते। सा चेति युक्तिः। तथा च पुत्रदानात्मिकयुक्तिविषया स्फूर्तिः प्रथमश्लोकार्थः। द्वितीयश्लोकार्थमाहुः तस्याश्चेति। युक्तिस्फूर्तेश्च। अयुक्तत्वमाशङ्क्येति स्वस्यानकदुन्दुभेर्लौकिकत्वापत्त्या स्वयमयुक्तत्वं आ समन्तात् तर्क्यम्। तर्कस्यान्यथाज्ञानत्वाद् युक्त्या वैदिकया युक्तत्वसमर्थनं वेदाविरोधादन्यथाज्ञानं नेत्येवं समर्थनम्। 'जीवाभयप्रदानस्य न कुर्वीरन् कलामपी'तिवाक्यमूलं वेदः। तस्याविरोधात् 'मृत्युर्बुद्धिमतापोह्य' इत्यन्यथाज्ञानम्, 'जातस्य हि ध्रुवो मृत्यु'रितिवाक्यात् तदपि नान्यथाज्ञानम्। ब्रह्मविदि वसुदेवेपराधाभावादपराधज्ञानमन्यथाज्ञानम्। 'एतं᳝ ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरव'मिति श्रुतेः। तृतीयश्लोकार्थमाहुः तत इति। 'मृत्युर्बुद्धिमतापोह्य' इत्यादिसुश्लोकेषु सिद्धमेव, तस्य कथनादनुवाद इत्याहुः अनुवाद इति। उत्तरार्धेनोपपत्तिः। उपपत्तिरेवोपपत्तिकः, उपपत्तिकेन सह वर्तमानः सोपपत्तिकः। चतुर्थस्यार्थमाहुः तस्य चेति। अनुवादस्यैव। न तु विचिंतनांतरम्। प्रतिकूलतर्कः पुत्रदानमयुक्तं आत्मत्वा'दात्मार्थे सकलं त्यजे'दिति वाक्यादित्येवम्। तस्य पराहतिः वाणीवाक्ये विपर्ययविचिन्तनेन। पंचमस्यार्थमाहुः अशक्तावदृष्टेति। षष्ठस्यार्थमाहुः तस्याप्युपायस्येति। तस्येत्यदृष्टस्य, कंसस्येति वा। साधनेति 'पूजयामासे'ति पूजनम्। सप्तमस्यार्थमाहुः तत उद्योग इति। वैखरीरूपः। 'अब्रवी'दितिपदात्। अष्टमस्यार्थमाहुः कथनं चेति। हितमिवानुवादकथनम्। पूर्ववदनङ्गीकारमाशङ्क्याहुः अलौकिकेति। अलौकिकस्य वक्ष्यमाणस्य स्फुरणात् तस्यालौकिकस्योपायस्य कंसेनाङ्गीकारः। यद्यप्ययं लौकिकः नालौकिकेन परमार्थेन निवर्तते, तथापि युक्त्या युक्तत्वसमर्थितकस्य (?) लौकिकस्यालौकिकत्वाङ्गीकारात्। यद्वा कंसे वसुदेवेन स्वदत्ता समारोपितेति भगवत्यलौकिकस्फूर्तेस्तादृशस्य भक्तिविरुद्धस्य कंसस्याप्युपायस्याङ्गीकार इत्यर्थः। आपातत इति अविचारतः देवक्या अपि भयादिना मृत्युसम्भवात्। सफल इति मृत्युनिवारणफलेन सह वर्तमानः सफलः। अवश्यक्रियेति क्रिया हननम्। तदनुकूलं व्यापारम्। यत्नस्य व्यापाररूपत्वात्। तच्चेष्टयेति कंसस्य खड्गपाणेश्चेष्टा उद्यमननिपतनादिरूपा करणम्। अतस्तृतीया। नन्वश्यक्रियासाधकयत्नो नैयायिकमते, वैयाकरणमते व्यापारो यत्नः, अतश्चेष्टयेत्यधिकमिति चेन्न। भगवदधिष्ठानत्वेन सर्वाधारत्वाज्जन्यजनकभावसम्बन्धश्चेष्टाव्यापारयोः। तच्चेष्टयावश्यक्रियासाधकयत्नं ज्ञात्वेत्यर्थः। अन्वपद्यतेति प्राप्तवानित्यर्थः। ये गत्यर्थास्ते प्राप्त्यर्था इति। अमेनेति बलवता कंसेन। दृष्टप्रकारेणेति एकत्वमविवक्षितम्। शक्तैरन्यैश्च। अलौकिकप्रकारः प्राणश्लोकोक्तस्तेन। अन्य इति लौकिका अलौकिकाः च भगवत्प्रेरणया निवर्तिताः। अतः परमिति लौकिकालौकिकोपायेभ्यः परमन्यत्। सामानन्तरं दानरूपं द्वयम्। एवेति स्वगृहे स्थापनयोगव्यवच्छेदक एवकारः। न तु स्वगृहे स्थापयिष्यति। देवद्वारेति यथा सूर्यादिद्वारा कुन्त्याः पुत्रवतीत्वं, तथा। दोष इति क्षात्रधर्मत्यागरूपः। स पुत्र इति अष्टमपुत्रः। आनकदुन्दुभयश्चेति चकारेण शब्दात्मकास्ते। सङ्कट इति सामानन्तरं दानसङ्कटे। उभयोर्दानयोरयुक्तत्वरूपे। आनकदुन्दुभिरिति शब्दसृष्टिरतः स नाम। 'शब्द इति चेन्नातः प्रभवा'दिति व्याससूत्रात्। अयुक्तमिति पुत्रदानम्। अन्वपद्यतेति राजत्वात् सामानु अपद्यतेत्यस्यार्थः। अकस्मादिति कारणं विना। समागतमिति गत्यर्थात् कर्तरि क्तः भूतकाले अतोपद्यतेत्यस्य विवरणमिदम् ॥ ४७ ॥

मृत्युर्बुद्धिमतेत्यत्र इत्यादीति 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वर'मितिन्यायेन। इदानीमित्युपायानङ्गीकारकाले। कथमिति केन प्रकारेण। वसुदेवस्य तूष्णीम्भावो नेति प्रश्नः। पश्वादिभ्यो विशिष्टत्वेनोत्पादितत्वप्रकारेण न तूष्णीम्भाव इत्युत्तरमग्रे। मृत्युः पङ्कस्थानीयः तस्य प्रक्षालनं दूरीकरणं तदपेक्षया दूरान्मृत्योरस्पर्शनं स्पर्शः देवकीविस्मरणप्रतीकारः तस्यास्तापप्रतीकारो वा तस्याभावः वरमितिन्यायसमन्वयः। कालान्तरे देवक्यादिमृत्युरनुसन्धेया। तदेति स्वरार्थं तदापीत्यर्थः। नास्तीति अन्यथा तु तदा उपेक्षालक्षणोपराधः स्यादेव। कालादिदण्डमिति सामदानाभ्यां दण्डानुसन्धानान् नाकस्मिकत्वम्। नापराधः कर्तव्य इति किन्तु मृत्युप्रतीकारः कर्तव्यः ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इमां देवकीं तु त्वं हन्तुं नार्हसीत्यन्वयः। तत्र हेतुं सूचयन् सम्बोधयति—दीनवत्सलेति। एषा तु कृपणा दीना, 'दयाया भगिनीमूर्तिः' इति वचनात् दयापात्रमित्याह—तवानुजेति। तत्रापि बाला लालनयोग्या, तत्रापि चातुर्यहीना इत्याह—पुत्रिकोपमेति। मृन्मयीव कल्याणी निर्दोषाम् ॥ ४५ ॥ एवमुक्तप्रकारेण स कंसः सामभिर्भेदैश्च वसुदेवेन बोध्यमानो देवकीवधान्निवार्यमाणोऽपि न न्यवर्ततेत्यन्वयः। तत्र हेतुद्वयमाह—दारुण इति। यतः स्वयं क्रूरस्वभावः पुरुषादान् हिंसाप्रधानान् राक्षसाननुव्रतः अनुसृतश्चेति। "नाश्चर्यमेतत्, कौरवाणामपि तथात्वात्"। इत्याशयेन सम्बोधयति—कौरव्येति ॥ ४६ ॥ तस्य कंसस्य तं देवकीवधविषयकं निर्बन्धमाग्रहं ज्ञात्वा प्राप्तं कालं मृत्युं प्रतिव्योढुं वञ्चयितुं विचिन्त्य विचार्य आनकदुन्दुभिर्वसुदेव इदं वक्ष्यमाणं तत्र

मृत्युवञ्चने अन्वपद्यत उपायं तथा निश्चितवान् ॥ ४७ ॥ विचारपूर्वकं तं निश्चयमेव दर्शयति—मृत्युरिति चतुर्भिः। स्वस्य परस्य वा उपस्थितो मृत्युर्बुद्धिमता पुंसा यावद्बुद्धिबलोदयं बुद्धिबलयोरुत्कर्षपर्यन्तमपोह्यः परिहार्यः। एवं प्रयत्ने कृतेऽपि यद्यसौ मृत्युर्न निवर्तेत तर्हि देहिनो देहाद्यभिमानिनोऽपराधउपेक्षाजनितो दोषः नास्त्येव, अन्यथादोषप्रसङ्गः स्यादेव। देहिन इत्यनेन देहाद्यभिमानरहितस्य न दोष इति सूचितम् ॥ ४८ ॥

अन्वितार्थप्रकाशिका

अत्युग्रं स्तुतिभिरिति न्यायेन पुनः सामैवाह—एषेति। एषा तव अनुजा भगिनी बाला कृपणा दीना पुत्रिकोपमा कन्यातुल्या दारुमयपुत्तलिका इवाचेतनप्राया वा अतः दीनवत्सलः त्वं कल्याणीं निरपराधामिमां हन्तुं नार्हसि। इमामित्यनुवादरूपत्वाभ्रान्वादेशता। वस्तुतः शिरश्चाल्लेन दीनादपि वत्समपि करत्वेन लातीति दीनवत्सलो निर्दयस्त्वं हन्तुं नार्हसि काकाऽर्हस्येवेति॥४५॥ एवमिति। हे कौरव्य! एवम् इत्यादिभिः सामभिः सान्त्वैर्भेदैश्च बोध्यमानः उपदिश्यमानः स्वयं दारुणः पुनः पुरुषादान् रक्षोदैत्यादीननुव्रतोऽनुसृतः स कंसः स्वसुर्वधान्न न्यवर्त्तत ॥ ४६ ॥ निर्बन्धमिति। आनकदुन्दुभिर्वसुदेवः तस्य कंसस्य तं निर्बन्धं देवकीवधे हठं ज्ञात्वा प्राप्तं कालं समयं मृत्युं वा प्रतिव्योढुं वञ्चयितुम्। प्रतिविपूर्वाद्वहेस्तुमुन् वस्य ओत्वमार्षम्। यद्वा प्रतिविपूर्वात् ऊहेस्तुमुन् इडभावगुणौ आर्षौ। विचिन्त्य विचार्य तत्र इदं वक्ष्यमाणमपत्यार्पणमुपायत्वेन अन्वपद्यत निश्चितवान् ॥४७॥ स्वमनोविचारमाह—मृत्युरिति। बुद्धिमता यावान् बुद्धिबलयोरुदयो यत्र तत् यथा स्यात्तथा मृत्युः अपोह्यः प्रतीकार्यः। तत्र कंसविषये बलोदयो निष्फल एव बुद्धेरुदयस्तु सफलतामर्हति। तत्र यथा बुद्धियत्ने कृतेऽपि यदि असौ मृत्युर्न निवर्त्तेत तदा देहिनः मनुष्यस्य अपराधः उपेक्षादोषो नास्ति ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं साम प्रसक्तमुपसंहरन् द्वितीयं भेदमाह। तस्मादिति। तस्माद्वस्तुस्थितेरेवंविधत्वात्, तथाविधः वस्तुतत्त्वाभिज्ञः सः पुमान्, आत्मनः स्वस्य, क्षेमं अन्विच्छन् सन्, कस्यचित् कस्यापि, द्रोहं, न आचरेत्। न कुर्यादित्यर्थः। यतः, द्रोग्धुः, वै निश्चितमेव, परतः अन्यस्मात्, भयम् अस्ति। इहाभिद्रुह्यमाणात्तत्संबन्धिनश्च अमुत्र यमादपि भयं भवत्येवेत्यर्थः ॥४५॥ पञ्चविधसामगतमभेदं दर्शयन्वदति। एषेति। हे दीनवत्सल राजन्, एषा, तव अनुजा, तत्रापि बाला, तत्रापि कृपणा दीना, पुत्रिकोपमा दारुमयपुत्तलिकासमाना, अस्ति। अतः त्वं कल्याणीं इमां, हन्तुं न अर्हसि। एवमनुजात्वस्त्रीत्वबाल्यदैन्यपुत्रिकातुल्यत्वकल्याणीत्वादिधर्मैर्युक्तेयं तव हन्तुं नार्हेति भावः ॥ ४६ ॥ एवमिति। एवमित्थं, सामभिः श्लाघनीयेत्यादिगुणकीर्त्तनपूर्वकमुपलालनैः, भेदैर्दृष्टादृष्टभयसूचकवचोभिः, बोध्यमानः, चोद्यमान इति पाठे, तथाविधतदुद्योगनिवृत्त्यर्थं प्रेर्यमाणोऽपि, दारुणः क्रूरः, स कंसः, हे कौरव्य, यतः पुरुषादान् राक्षसान्, अनुव्रतोऽनुस्यूतः, आसीत्। अतः, न न्यवर्त्तत। तन्मारणोद्योगादिति शेषः ॥ ४७ ॥ निर्बन्धमिति। तस्य कंसस्य संबन्धिनं, निर्बन्धं स्वनिर्धारितार्थतोऽनिवृत्तिरूपमाग्रहं, ज्ञात्वा, आनकदुन्दुभिर्वसुदेवः, इदं पदं महाभागेत्यत्रोक्ताभिप्रायकम्। प्राप्तं समुपस्थितं, तं कालं पत्न्या मृत्युप्राप्तिरूपावसरं, प्रतिव्योढुं प्रतिकर्त्तुं वञ्चयितुमिति यावत्। विचिन्त्य, उपायमिति शेषः। तत्र कालपरिहारे, इदं वक्ष्यमाणं, अन्वपद्यत प्रत्यपद्यत। उपायत्वेनाध्यवस्यदित्यर्थः ॥ ४८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

निर्बन्धमिति : १०–१–४७

श्रोता शृणोतु वा मा वा पथ्यं पथ्यपथेक्षणः। ब्रूयात् स्वदोषं संमार्ष्टुं शौरिरत्र निदर्शनम् ॥ ४० ॥

हिन्दी अनुवाद (कर्दमक्षमा)

कंस! यह आपकी छोटी बहिन अभी बच्ची और बहुत दीन है। यह तो आपकी कन्याके समान है। इसपर, अभी अभी इसका विवाह हुआ है, विवाहके मङ्गलचिह्न भी इसके शरीरपरसे नहीं उतारे हैं। ऐसी दशामें आप-जैसे दीनवत्सल पुरुषको इस बेचारीका वध करना उचित नहीं है ॥ ४५ ॥ **श्रीशुकदेवजी कहते हैं**—परीक्षित्! इस प्रकार वसुदेवजी ने प्रशंसा आदि सामनीति और भय आदि भेदनीतिसे कंसको बहुत समझाया। परन्तु वह क्रूर तो राक्षसोंका अनुयायी हो रहा था; इसलिये उसने अपने घोर सङ्कल्पको नहीं छोड़ा ॥ ४६ ॥ वसुदेवजीने कंसका विकट हठ देखकर यह विचार किया कि किसी प्रकार यह समय तो टाल ही देना चाहिये। तब वे इस निश्चयपर पहुँचे ॥ ४७ ॥ 'बुद्धिमान् पुरुषको, जहाँतक उसकी बुद्धि और बल साथ दें, मृत्युको टालनेका प्रयत्न करना चाहिये। प्रयत्न करनेपर भी वह न टल सके, तो फिर प्रयत्न करनेवालेका कोई दोष नहीं रहता ॥ ४८ ॥

[1]प्रत्यर्प्य मृत्यवे पुत्रान् मोच[2]ये कृपणामिमाम् । सुता मे यदि जायेरन् मृत्युर्वा न म्रियेत चेत् ॥ ४९ ॥
विपर्ययो वा किं न स्याद् गतिर्धातुर्दुरत्यया । उपस्थितो निवर्तेत निवृत्तः पुनरापतेत् ॥ ५० ॥
अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति ।
एवं हि जन्तोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ॥ ५१ ॥

श्रीशुक उवाच[3]

एवं विमृश्य तं पापं यावदात्मनिदर्शनम् । पूजया[4]मास वै शौरिर्बहुमानपुरःसरम् ॥ ५२ ॥

कर्दमक्षमा

अन्वयः—मृत्यवे पुत्रान् प्रत्यर्प्य इमां कृपणां मोचये यदि मे सुताः जायेरन् मृत्युः वा न वा मृत्युः म्रियेत चेत् ॥ ४९ ॥ विपर्ययः वा किं न स्यात् धातुः गतिः दुरत्यया उपस्थितः निवर्तेत निवृत्तः पुनः आपतेत् ॥ ५० ॥ अग्नेः यथा दारुवियोगयोगयोः अदृष्टतः अन्यत् निमित्तं न अस्ति एवं हि जन्तोः अपि शरीरसंयोगवियोगहेतुः दुर्विभाव्यः ॥ ५१ ॥ शौरिः एवं विमृश्य यावद् आत्मनिदर्शनं बहुमानपुरःसरं तं पापं वै पूजयामास ॥ ५२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्मादुपेक्षादोषपरिहारायैवं करिष्यामीत्याह । प्रदायेति । मृत्यवेऽस्मै कंसाय । नन्विदमपि नैव न्याय्यमित्याशंक्याह—सुता इति । अस्यां यदि सुता मे जायेरंस्तदा यद्भावि तद्भवतु जीवनं तु तावदस्या भवेदेव । तदंतरा यद्ययमेव म्रियेत तदा न किंचिदन्याय्यम् ॥ ४९ ॥ यदि च सुता भविष्यंति न चायं म्रियेत तदा मत्पुत्रादेवास्य मरणमिति विपर्ययो वा किं न स्यात् । ननु प्रौढस्य कंसस्य तव बालकात्कथं मृत्युः स्यात्तत्राह । गतिरिति । "अस्यास्त्वामष्टमो गर्भो हंता" इत्युक्तवतो धातुः । अत इदानीमपत्यार्पणप्रतिज्ञैव मंत्रः । तथा सति उपस्थितो मृत्युरयं तावन्निवर्तेत । निवृत्तः पुनः कालांतरे आपतेच्चेत्तदा नापराधो ममेत्यर्थः । अथ नाऽस्य मत्पुत्रादुपस्थितो यो मृत्युरस्या वधान्निवर्तेत अन्यथा स्यात्तदा स पुनरनेन मम मंत्रेण निवृत्तोप्यापतेत् । भवेदेव तदिष्टमित्यर्थः । यद्वा गतिर्धातुर्दुरत्ययेत्येतस्यैव प्रपंच उपस्थित इति ॥ ५० ॥ प्राणिनामदृष्टं च पुनर्दुर्वितर्क्यमिति सदृष्टांतमाह । अग्नेरिति । वने वृक्षान्प्रदहन्वह्निः सन्निहितानपि वृक्षान्परित्यज्य कदाचिद्दूरस्थानपि दहति ग्रामे गृहान्वा न ह्यस्य प्राण्यदृष्टव्यतिरेकेण किंचिन्नियामकमस्ति यथा । एवं जंतोर्जन्ममरणयोरपि हेतुर्दुर्विभाव्योऽचिंत्यः अत एतदुपर्यस्या अदृष्टमेव हेतुरिति भावः ॥ ५१ ॥ यावदात्मनिदर्शनं स्वप्रज्ञावधि विचार्य ॥ ५२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतो मृत्यूपेक्षणे दोषस्तस्माद्धेतोः । उपेक्षा औदासीन्यम् । एवं वक्ष्यमाणप्रकारम् । अहो पुत्रप्रदानं मारकाया न्याय्यमेवेति चेत्तत्राह—नन्विति । अन्याय्यम् अयुक्तम् ॥ ४९ ॥ विपर्ययो वैपरीत्यम् । विपर्ययोऽसंभव इत्याह—नन्विति । 'प्रौढो युवातिबलयोः' इति मेदिन्यादयः । तत्र बालकादपि प्रौढमरणे धातुर्गतेर्वैचित्र्यमाह— धातुरीश्वरस्य दूरत्ययाऽतिक्रांतुमशक्या यतोऽतः कारणात् । तथा सति अपत्यार्पणप्रतिज्ञामंत्रे सति । उपस्थित इदानीमागतः । 'भक्षितेऽपि लशुने व्याधिर्नो नष्टः' इति न्यायेनापत्यार्पणेपि जीवति दुर्मतिकंसे कालांतरे मृत्युभयं तदवस्थमित्यस्वरसादाह—अथ वेति । अस्य कंसस्य । अस्या देवक्याः । न हि मंत्रौषधाद्यैः कालोऽतिक्रम्यतेऽतः किं मंत्रेणेत्यरुच्याह—यद्वेति । प्रपंचः विस्तारेण कथनम् ॥ ५० ॥ नन्वदृष्टमेव जनिमृतिहेतुस्तच्च ज्ञातुं न शक्यमित्याह—प्राणिनामिति । अदृष्टं शुभाशुभं कर्म दुर्वितर्क्यं ज्ञातुमशक्यं दृष्टांतप्रपंचोग्नेरिति । सन्निहितानिकटवर्तिनः । अस्य दहनस्य । नियामकं विनिगमकम् । एवं वृक्षादिवत् । जंतोः प्राणिमात्रस्य । दुर्विभाव्यः दुर्वितर्क्यः ॥ ५१ ॥ नृशंसं क्रूरम् "नृशंसो घातुकः क्रूरः" इत्यमरः । धूयमानेन तप्यमानेन । विहसन्निति बाह्यानंदमाह । महतां सत्यपि क्लेशे नो विकृतिः (क्रोधादिरूपा) इति भावः ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निश्चयमेव दर्शयति–प्रदायेत्यर्द्धेन । अष्टमे तु जाते लब्धबल एव भविष्यामीति पुत्रान् अष्टमेतरानेति तात्पर्यं तान् सर्वानपि प्रदाय आत्यन्तिकदेयत्वेन प्रतिश्रुत्य मृत्यवे इति तं प्रतिप्रदानेन सद्यो मृत्युप्राप्तेस्तदभेदविवक्षया कृपणामिति तात्कालिकतत्कार्पण्यदर्शनासहिष्णुतायाः प्राबल्यं व्यञ्जयति–तत्र च स्थूणानिखनन्यायेन नन्विदमपीत्याशङ्कागर्भविचारान्तरं दर्शयति—

---

[1] प्रदाय–श्री. वंशी. ज्जीव. वीर. शुक. प्रत्यर्प्य–विज. । [2] न्मोक्षये–वीर. । [3] अन्यत्र "श्रीशुक उवाच" पाठो न दृश्यते । [4] सान्त्वयामास —विज. ।

सुता इति सार्द्धेन। तत्रैव आकाशवाण्यां कुटिलकल्पितत्वमाशङ्क्याह—सुता इति। तस्याः सत्यत्वमाशङ्क्याह—विपर्यय इति। विपर्ययोऽपि सम्भवेदित्यर्थः। यतः उपस्थितोऽपि मृत्युः श्रीमार्कण्डेयाजामिलसत्यव्रतादीनां निवर्त्तते निवृत्तोऽपि कुशनमुचिहिरण्यकशिपुप्रभृतीनां पुनरापतेत् यतो धातुरीश्वरस्य गतिरिच्छा दुरत्यया अनतिक्रम्या दुर्ज्ञेया चेत्यर्थः। अन्यत्तैः तत्र श्लोकद्वयमेकीकृत्यैव व्याख्या, सुता इत्यादिकं मृत्युर्वेत्यादिकं चोभयत्रैव सम्बध्यते किन्तूत्तरं नञा सह तं विना च योज्यते वा शब्दस्योभयपक्षग्राहित्वात् तत्र नञा विना सुता इत्यादिना योजितं तेन सह तु विपर्यय इत्यादिना अत्र वा शब्दः कटाक्ष इति ज्ञेयम्। यद्वा सुता मे यदि जायेरन् मृत्युश्च न म्रियेत तदा यद्भावि तद्भवतु यदि शब्देन लब्धपक्षान्तरेऽपि सुता यदि न जायेरन् मृत्युश्च न म्रियेत तदा न किञ्चिदन्याय्यं सुता यदि जायेरन् मृत्युश्च तत्पूर्वं कथञ्चिन्म्रियेत तदापि न किञ्चिदिति सुता इत्यादि यथा स्थितपक्षेऽपि विपर्ययो वा किं न स्यादिति सरलास्त्वियं योजना प्रदाय दत्वा कदा तत्राह—सुता इति। ततश्च विपर्ययो वा किं न स्यादिति ॥ ४९–५० ॥ हि एवमेव जन्तोः प्राणिमात्रस्यापि हेतुः अदृष्टं दुर्विभाव्यः केनादृष्टेन कस्य कदा किं स्यात्? तत्तर्कयितुमशक्यमित्यर्थः। इति कर्मशक्तेरपि दुर्वितर्क्यतया मद्बालकादप्यस्य मृत्युः सम्भवेदेवेति भावः ॥ ५१ ॥ यावदित्यपि सम्भ्रमे एतावती प्रतिभेति भावः पापमपि बहुलाऽऽदरपूर्वकं पूजयामास स्तुत्यादिना सम्मानितवान् ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अतः पुत्रान् जनिष्यमाणान् मृत्युरूपेणोपस्थिताय कंसाय मृत्यवे प्रदाय प्रदास्यामीति प्रतिज्ञाय दीनामिमां स्त्रियं मोचये त्याजयामि, प्रतिज्ञाया दोषरूपत्वमाशंक्याध्यवस्यति–सुता इति। यदि सुता मम जायेरन् संभावनायां लिङ् यदि मृत्युर्मृत्युभूतः कंसो वा मत्पुत्रोत्पत्तेः पूर्वमेव न म्रियेत न मरिष्यति तर्हि पुत्रान् दास्यामि मम पुत्रोत्पत्तेः कंसावस्थानस्य च पाक्षिकत्वात्पुत्रार्पणप्रतिज्ञा न दोष इति भावः ॥ ४९ ॥ पाक्षिकत्वमेव संभावयति–विपर्ययो वेति। विपर्ययः मम पुत्राः कंसस्य मृत्युर्वा तस्यावस्थितौ मम पुत्राभावो वा किन्न स्यात् अतोऽपि न दोष इति भावः। नन्वशरीरवाण्या ईश्वरवचस्त्वात् नाऽसत्यताऽतोन्वय एव निश्चितो न विपर्ययः इत्याशंक्याध्यवस्यति, धातुरीश्वरस्य गतिर्दुरत्ययाऽर्वाचीनैर्दुर्ज्ञेया धात्रा तथोक्तत्वेपि कदाचित्तद्विपर्ययोऽपि स्यादिति भावः। तत्रोदाहरणमालोच्याध्यवस्यति, उपस्थित इति–उपस्थितोपि मृत्युः कश्चिन्निवर्त्तेत यथा मार्कण्डेयादेर्निवृत्तो वरदानान्निवृत्तोपि मृत्युः पुनरापतेद्यथा हिरण्यकशिपुरावणादेरतः प्रतिज्ञा न दोष इत्यर्थः। यद्यपि कदाचित् विपर्यय एव स्यात्तथापीयं मत्प्रतिज्ञा न दुष्यति न हि मत्पुत्रमृत्युर्मत्प्रतिज्ञापरतन्त्रः तस्य कर्माधीनत्वेन पुरुषाधीनत्वाभावादिति सदृष्टान्तमध्यवस्यति, अग्नेरिति, योगवियोगशब्दाभ्यां शीघ्रविलम्बोत्पत्ती विवक्षिते दारुशब्देनारणिर्यथाऽग्नेर्दारुवियोगयोगयोर्दारुणः सकाशाद्विलम्बशीघ्रोत्पत्त्योर्निमित्तकारणमदृष्टो यजमानादृष्टादन्यन्नास्ति एवं जन्तोर्जीवस्य शरीरसंयोगवियोगयोगयोर्हेतुरदृष्टतः कर्मणोऽन्यो दुर्विभाव्यः दुरूह्यस्तस्य मत्प्रतिज्ञामात्रं न हेतुः किन्तु तेषां कर्मैवेति भावः ॥ ५०–५१ ॥ एवं यावदात्मनिदर्शनमात्माऽत्र बुद्धिः निदर्शनं तस्याः प्रसरः यावद्बुद्धिप्रसरं विमृश्य निश्चित्य शौरिर्वसुदेवस्तं पापं पापोद्युक्तं कंसं बहुमानपुरस्सरं बहुमानपूर्वकं पूजयामास स्वेन विमृष्टमर्थं तत्सम्मतीचकार ॥ ५२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

किमपश्यत्तदाह—प्रत्यर्प्य मृत्यमेव मारकाय कंसाय उपायाभासोऽयं यदपत्यार्पणं तत्राह; वा मम सुतोत्पत्तेः प्राक् न म्रियेत चेत् यदि न मरिष्यति ॥४९॥ विपर्ययो वा मम पुत्राः कंसं वा हनिष्यन्तीति किं न स्यात्? कथमेतदिति तत्राह—धातुरिति। धातुरीश्वरस्य गतिश्चेष्टालक्षणा दुरत्यया अतिक्रान्तुमशक्या अतः किं? तत्राह—उपस्थित इति, सर्वथा तावदुपस्थितो मृत्युरस्या निवर्तेत निवृत्तो यदि रावणादेरिव पुनरापतेत्तर्हि तदानीमस्तु किं तावदिदानीम् ॥ ५० ॥ इतोऽपि धातुर्गतिर्दुरत्ययेत्येतत्सदृष्टान्तमुपपादयति अग्नेरिति, यथाऽग्नेर्दार्वादिदहनस्य दारुवियोगयोगयोः काष्ठानभिव्यक्तिव्यक्तयोः दाह्यवृक्षाभिमानिजीवादृष्टप्रेरकेश्वरात् अन्यन्निमित्तं नास्ति अदृष्ट इत्यादौ हरिनिवेशः, कस्मात्? उच्यते कुण्डस्थाग्नेर्दारुवियोगादौ स्वतः प्रवृत्त्यभावादिति वचनात् (१)—

"यथा कुण्डस्थितस्याग्नेर्दैवाद्दारूपसन्नमेत्। देहयोगवियोगश्च तथा दैवान्न चान्यथा"—

इति वचनाच्च, एवं जन्तोरपि शरीरवियोगसंयोगहेतोर्हरेरन्यो दुर्विभाव्यः केवलादृष्टलक्षणस्य कर्मणः स्वतः प्रवृत्त्यनुपपत्तेः कार्यस्य च दर्शनान्यथाऽनुपपत्त्या श्रीनारायण एव भाव्य इत्यतस्त्वया शास्त्रज्ञेनाऽस्याः हननं नोचितमिति भावः ॥ ५१ ॥ आत्मनि यावद्दर्शनं परबोधलक्षणं ज्ञानं विमृश्याऽऽलोच्य ज्ञात्वा तावता सान्त्वयामास स्वावगतलोकप्रसिद्धदृष्टान्तो यावांस्तावता वा ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आकाशवाण्याः कुटिलकल्पितत्वमाशङ्क्याह—सुता इति ॥ ४९ ॥ सत्यत्वमाशङ्क्याह—विपर्यय इति ॥ ५०–५१ ॥ पूजयामास स्तुत्यञ्जल्यादिना ॥ ५२–५३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तथैव करिष्यामीति स्वगतमाह—मृत्यवे कंसाय नन्विदमप्यनुचितमित्याशङ्क्याह—सुता इति । यदि न जायेरंस्तदा न काचिदपि चिन्ता यदि जायेरन्नथ च मृत्युः कंसस्तावता कालेनाऽपि न म्रियेत तदा अनुचितं स्यादेव देवकी तु सम्प्रति जीवेत, यदि च तावता कालेन कंसो म्रियते तदा न काचिदपि चिन्ता विपर्ययो वेति मया तदानीमस्मै पुत्रे समर्प्यमाणे सति स पुत्र एव सद्यः प्रबलीभूय कंसमिमं वधिष्यति वेत्यर्थः । ननु, प्रौढस्य कंसस्य तव बालकात् कथं वधः सम्भवेत् ? तत्राह—गतिरिति । “अस्यास्त्वामष्टमो गर्भः” इत्युक्तवतो धातुः एवञ्च सति उपस्थितः कंसस्य हस्ताद्देवकीमृत्युर्निवर्त्तेत तथा मत्कर्तृकपुत्रार्पणप्रतिज्ञया निवृत्तोऽपि कंसस्य मृत्युः पुनरापतेत् प्राप्तो भवेत् ॥ ४९-५० ॥ मच्चिन्तितमेतन्नासम्भवं यतः प्राणिनामदृष्टं दुर्वितर्क्यमिति सदृष्टान्तमाह—अग्नेर्वने वृक्षान् प्रदहतो दारुणो यौ वियोगयोगौ कदाचित् सन्निहितस्यापि वियोगः कदाचिद्विप्रकृष्टस्यापि योगः तयोरदृष्टतोऽन्यन्नेति वृक्षाणां दुःखादृष्टमेव कारणमित्यर्थः । एवमेव शरीराणां संयोगवियोगयोर्जन्ममरणयोर्हेतुर्विभाव्योऽविचिन्त्यः ॥ ५१ ॥ यावत् यत् प्रमाणकम् आत्मना बुद्ध्या निदर्शनं ज्ञानं यत्र यद्यथा स्यात्तथा विमृश्य तं पापं कंसं पूजयामास बहिस्तुष्ट इव ॥ ५२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुत्रान् मृत्यवे कंसाय प्रदाय कृपणामिमां मोचये भाविपुत्रार्पणप्रतिज्ञया कृपणायाः अस्या वधप्रतीकारो न्याय्य इति भावः । भाविपुत्रार्पणेऽपि पाक्षिको दोष इत्याह—यदि कन्या जनिष्यति तदा तु प्रायो नायं कंसस्तां वधिष्यति अस्यां मे यदि सुता जायेरन् मृत्युः कंसो वा सुतोत्पत्तेरर्वाक् न म्रियेत चेत्तदा पुत्राऽर्पणापराधप्रसङ्गोऽतोऽस्या रक्षणं न्याय्यमिति भावः ॥ ४९ ॥ भगिनीं हन्तुं प्रवृत्तस्यास्यैव तद्गर्भोद्भवरूपो विपर्ययो वा किं न स्यात् सर्वथा धातुः परमेश्वरस्य गतिर्दुरत्यया दुर्लङ्घ्या तयैवोपस्थितो निवृत्तेत निवृत्तः पुनरापतेत्सर्वोऽपि व्यवहार इति यावत् ॥ ५० ॥ वने यथाऽग्नेः संनिहितेन दारुणा वियोगो दूरस्थेन योगस्तयोरदृष्टतोऽन्यन्निमित्तं नास्ति अदृष्टोऽदृश्यो धातैव एवमदृष्टतोऽन्यः शरीरसंयोगवियोगयोर्जन्ममरणयोर्हेतुर्दुर्विभाव्यो दुर्निरूप्यः कालकर्मादीनां केचित्स्वातन्त्र्ये तद्धेतुमाहुस्ते बालबुद्धयः जडानां तेषामीश्वरमन्तरेणाकिञ्चित्करत्वादतो धातैव सर्वत्र हेतुस्तस्य गतिर्दुरत्ययैवेति योजना ॥ ५१ ॥ यावदात्मनो निदर्शनमालोचनं तत्पर्यन्तमेवं विमृश्य विचार्य तं पापं पापात्मानमपि पूजयामास शौरिः शूरपुत्रः ॥ ५२ ॥

श्रीसुबोधिनी

तमुपायमाह **प्रत्यर्प्येति** । मृत्युरयं कंसे निविष्टः प्रतीयते । तस्य हि सर्वे भक्ष्याः । अप्रतीकार्यश्च । स तु **पुत्रान्** कदाचिद्भक्षयिष्यत्येव । स चेदिदानीं मह्यं दास्यत्येतां तदा पुत्रानपि स एव दत्तवानतो दत्तस्य प्रतिदाने न कोपि दोषः । तथाकरणे विशेषमाह **मोचये कृपणामिमामिति** । इयमिदानीं मोचिता स्यात् । अधिकोस्मिन् पक्षे लाभः । अरक्षायां तु नापि पुत्रा नापीयम् । नन्वेतदप्यनुचितम् । इयमेका पुत्राश्च बहवस्ते च बालका स्वस्यान्तरङ्गा दोषाधिक्यञ्च । अर्पणञ्च न सम्भवति । इदानीं पुत्राणामभावात् । विद्यमानाविद्यमानयोः सिद्धवत्कारेण विषयविभागोप्यसङ्गतः । अतो धर्महानिप्रसङ्गाल्लोकापकीर्तेश्च नायमुपाय इति चेत्तत्राह **सुता मे यदि जायेरन्निति** । तेषां नरकत्राणाभावान्नपुत्रत्वम् । प्रस्वाज्जायन्त इति सुतत्वमस्त्येव । पुत्रोत्पादनं तु स्वाधीनम् । तस्मादियं निश्चयेव स्थापनीया । तथा सति न कोपि दोषो भवेत् । प्राणरक्षाया ऋतुकालगमनापेक्षयाधिकफलत्वात् । नन्वेतदप्यशक्यं ‘कामादेकनयापि वे’ति चेत्तर्हि कः पुत्रो भवतु । नैकः पुत्र पुत्र इतिचेत्तर्हि द्वौ भविष्यतः । पुत्रयोर्जातयोर्नरामनेपि न दोषः । एतावती लौकिक्युपपत्तिः । अथालौकिकी भगवदिच्छयाकाशवाणीप्रामाण्याच्च यदि मे बहव एव सुता जायेरंस्तेपि बहुकालेनोत्पादनीयाः । कालेपि भगवदिच्छा चेत्तदा पुत्ररक्षार्थं मृत्युरेव म्रियेत । प्राणिमात्रे शतं मृत्यवस्तत्रतत्रस्थाने निरन्तरमुत्पद्यन्ते ‘अत्रात्र वै मृत्युर्जायत’ इतिश्रुतेः । तत्रतत्रैव प्रतीकारः कर्तव्यः । ‘यत्रयत्रैव मृत्युर्जायते तत एवैनमवयजत’ इतिश्रुतेः । तस्माद्य उत्पद्यते स म्रियत एव । अत इदानीमुत्पन्नो मृत्युः प्रतीकारे कृते म्रियेत । अन्यस्यान्य उपायः कर्तव्यः । ऐको मृत्युरित्यपि पक्षः । तस्मिन्नपि पक्षे स नियतकालः । स चेदिदानीं निवृत्तः पुनस्तस्य कालाभावात् तं प्रति म्रियेतैव । अतःशब्दनित्यत्ववदस्या मृत्युरेव गच्छेत् । नन्वेकमृत्युमरणपक्षे मृत्योर्मरणं न श्रूयते लोकाल्लोकादेव मृत्युमवग्रजते नैनं लोके लोके मृत्युर्विन्दतीति श्रुतेः । तत्राह **मृत्युर्वा न म्रियेत चेदिति** । तदा नियतत्वात् पुत्रान् समर्पयिष्ये । कंसो मृत्युरित्यपव्याख्यानम् । ‘अत्रात्र वै मृत्युर्जायत’ इतिश्रुतिविरोधात् । मृत्योरधिकरणमेव सः । लक्षणया तत्परः शब्द इतिचेन्मृत्युत्वादेवामरणे सिद्धे व्यर्थोनुवादः प्रसज्ज्येत । अस्तु वा तथा । सोप्याकाशवाणीप्रामाण्यान्न मरिष्यत्येव तथापि दास्यामीतिसम्बन्धः ॥ ४९ ॥

ननु कथमेवमयुक्तं कर्तुं शक्यते तत्राह **विपर्ययो वा किं न स्यादिति** । वाणीप्रामाण्याच्चेत्तस्यामरणं तदा तत एव विपर्यय एव किं न भवेत् मत्पुत्रादेवास्य मरणमिति ? नन्वेतद्युक्तिबाधितं बालस्तव पुत्र इति चेत्तत्राह **गतिर्धातुर्दुरत्यया** । धातुर्भगवतो गतिरुत्पत्तिस्थितिप्रलयरूपा **दुरत्यया** दुःखेनाप्यतिक्रमितुं ज्ञातुमशक्यत्वात् । न हि लौकिकयुक्त्या भगवतो वध्यघातकभावो

निर्णेतुं शक्यः। 'अलौकिकास्तु ये भावा न तांस्तर्केण योजये'दितिवाक्यात्। तस्मात् पुत्रदानकथनेन साम्प्रतमियं रक्ष्या पश्चादेतत्पुत्रैरयञ्च वध्यस्तस्मादेतत्कर्तुमुचितम्। तदाहोप**स्थितोस्या मृत्युरेवं कृते निवर्तते**ति। एतन्मारणेन **निवृत्तो**प्याकाशवाण्योक्तो मृत्युरेतत्संरक्षायां **पुनरापतेत्**। तस्मात् कंसवधार्थमेवैवम्मन्त्रणेन संरक्ष्येत्यर्थः। धातुर्गतिरेव विवृतेति केचित्। एतस्याप्यनङ्गीकारे क्षणविलम्बेनेदानीं निवृत्तः पश्चादापतेच्चेत् तदा 'नापराधोस्ति देहिन' इतिपूर्वेणैव सम्बध्यत इति वा ॥ ५० ॥ ननु यद्यपि परमार्थोयं तथापि लोकविरुद्धं न कर्तव्यं पुत्रदानमनुचितमिति चेत्तत्राहाग्नेरिति। न हि मया समर्पित इत्येव म्रियते किन्तु यदि तथादृष्टं भविष्यति तदेव मरणम्। तत्रोपपत्तिररण्ये दावानलेन दह्यमाने निकटस्थितः कश्चिन्न दह्यते दूरस्थितश्च दह्यते। तस्मादत्र निमित्तमदृष्टमिति। पुत्रादीनां देहवियोगयोगयोरप्यदृष्टमेव **निमित्तम्**। हि युक्तश्चायमर्थो भरतादिषु दृष्टः। स हि हरिक्षेत्रे हरिणदर्शने मृतः कालञ्जरे हरिणो जात इति। किमत्र हरिणशरीरग्रहणे तत्रापि कालञ्जरे निमित्तं दृष्टं सम्भवति ? जन्तुश्च जीवः सर्वत्र जायमानस्तत्र दृष्टस्य बाधितत्वा**च्छरीरसंयोगवियोगहेतुर्दुर्विभाव्यः**। तस्माददृष्टवशात् पश्चात् किमप्यस्तु। इयं तु साम्प्रतं मोचनीयेति ॥ ५१ ॥ निर्धारितमित्याहै**वं विमृश्ये**ति। स्वकर्तव्येयं **विमर्शः**। कंसश्चेत्तदङ्गीकुर्यात्तदा सिध्येत्। तस्य सिद्धिर्दुर्घटा। तस्य दूषणानि वदन् प्रयत्नाधिक्यं **कृत**वानित्याह। **तं** प्रसिद्धं दिग्विजयिनं पापमेतादृशकर्मकर्तारं **पूजयामास**। **पूजायां** हि स्वस्मिन् स्थितो भावादिः पूज्ये समारोप्यते। ततः कार्यं सेत्स्यतीति। अयमलौकिक उपायः। ननु किमर्थमेतावत् कृतवानित्याह **यावदात्मनिदर्शन**मिति। **आत्मनो निदर्शनं ज्ञानं यावद्भवति** दृष्टादृष्टभेदेन तावदुपायकरणं युक्तमिति। प्रथममदृष्टोपायं कृतवानित्याह **पूजयामा**सेति। **वै** निश्चयेनेति। पूजने कार्यसिद्धिं निश्चितां मत्वा। तत्र स्वदेवता समारोपितेति **बहुमानपुरस्सरं** पूजा। इयं पूजा स्तोत्रनमस्कारप्रह्वीभावात्मिका। एवङ्करणे ज्ञानप्राप्तेर्हेतुमाह **शौरि**रिति। **शूरो** वसुदेवस्य पिता ॥ ५२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

प्रत्यर्प्येत्यत्र–**इदानीं** पुत्राणामभावादित्ययं हेतुरर्पणासम्भवेपि ज्ञेयः। **तदा पुत्रसंरक्षार्थं मृत्युरेव म्रियते**ति। अत्र तदापदं **म्रिये**तेत्यनेन सम्बध्यते। तदुपपादयन्ति **प्राणिमात्र** इत्यादि। एकमृत्युपक्षे मृत्युमृत्युमुपपादयन्त्य**येक** इत्यादि। **इदानी**मिति स्वसहकारिणि कालोपाधौ। अस्मिन् पक्षे भाक्तं मृत्योर्मरणमित्याशयेनाहुरतः**शब्दनित्यत्ववदि**ति। शास्त्रतः सिद्धमपि **शब्दनित्यत्वं** यथा नियताभिव्यञ्जकस्य वायोर्नाशाच्छब्दाश्रवणे गतमिव भवत्येवं मृत्युरपि नियताभिव्यञ्जकस्य सहकारिणः कालोपाधेरभावाद्गच्छेदेवेत्यर्थः। **तत्राहे**ति। मृत्योरमरणपक्षे तस्मै प्रत्यर्पणमाहेत्यर्थः। **श्रीधरव्याख्यानं** दूषयन्ति **कंस** इत्यादि। दूषणे विशेषप्रयोजनाभावादनुमन्यन्ते **अस्तु वा तथे**ति। ननु तर्हि कंसस्यामरणे तस्मै बालकार्पणं नोचितमित्यत आहुः **सोपी**त्यादि। **अपि**शब्दाद्बालकः। **तथापी**ति कंसस्यामरणेपि ॥४९॥ **विपर्ययो वे**त्यत्र–अतिक्रमितुमिति। शक्येतिशेषः। **एतन्मारणेन निवृत्त** इति। एतत्प्रत्यर्पणोक्तिरूपप्रतीकारात्मकेन मृत्योर्मारणेन कंसान्निवृत्तः स्थानान्तरे गत इत्यर्थः। **केचि**दिति। श्रीधरस्वामिनः। एतस्य विचारस्य कंसमारणतात्पर्यकत्वे श्रीवसुदेवस्यापि दुराशयत्वं शङ्क्यतेत्यरुच्या पक्षान्तरमाहु**रेतस्यापी**त्यादि ॥ ५० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

प्रत्यर्प्येत्यत्र–प्रत्यर्पणं विवृण्वन्ति **मृत्युरयमित्यारभ्य न दोष** इत्यन्तेन। **सुता मे यदि जायेरन्नि**त्यत्र **यदी**त्यस्यार्थमाहुः– **पुत्रोत्पादनं** त्वित्यारभ्य **लौकिक्युपपत्ति**रित्यन्तेन। **मृत्युरेवे**ति। अस्या इतिशेषः। अस्या मृत्यावचिरकालेन जाता बहवः पुत्रा न संरक्षिताः स्युरितिभावः। **तस्मादि**ति। मृत्योर्जन्मश्रवणादुत्पत्तिमतश्च मरणनियमोतोहेतोर्मृत्युरपि **म्रियत** इत्यर्थः। **अन्यस्ये**ति। सुतमृत्योरित्यर्थः। **एको मृत्यु**रिति। **एक एव सर्वमारक** इत्यर्थः। **नियतकाल** इति। एकवारं तस्य कालः। **स** मृत्युस्तदेवायाति तदा चेन्निवृत्तः पुनः कालाभावान्नायातीत्यर्थः। **अत** इति। यथा तर्कमत 'आकाशः सम्भूत' इत्यादिवाक्यैः 'सविशेषणे ही'तिन्यायेन शब्दनित्यत्वमेव निवर्तते न त्वाकाशनित्यत्वं निवर्तते तथात्रापि आकाशवाणीप्रामाण्येन धर्मिभूताया निवृत्तेर्बाधितत्वादेतद्धर्मरूपो मृत्युरेव गच्छेन्निवर्ततेत्यर्थः। यथा प्रत्यक्षविरोधादेतन्न्यायेन शब्दनित्यत्वमेव निवर्त्तते नाकाशनित्यत्वं तथाकाशवाणीविरोधान्मृत्युरेव म्रियेत न त्वियमिति **मृत्युर्वा न म्रियेत** चेदितिशङ्काया द्वितीया कोटिरिति ज्ञेयम्। **नन्वि**ति। तथा चैतन्मृत्युरेनां प्रति न मृतः किन्तु कालान्तर एनामेव प्रत्यागच्छेन्न तु सुतानित्यर्थः। **नियतत्वादि**ति। एतन्मृत्युः सुतान्न मारयिष्यत्यतो न समर्पणे बाधकमित्यर्थः। **सोपी**ति। कंसोप्यष्टमगर्भजन्मपर्यन्तं मरिष्यति वाणीप्रामाण्यादित्यर्थः। अत्र **वाणीप्रामाण्येन मरणाभावनिश्चयाद्यथा**कथञ्चित्प्रतीकारार्थं नानापक्षा उक्ताः। अतो न तथासाधिका युक्तयो विशेषतोपेक्ष्यन्त इति बोध्यम् ॥ ४९ ॥ **विपर्ययो वे**त्यत्र **तस्यामरण**मिति। कंसस्यामरणमित्यर्थः। **तत एवे**ति। वाणीप्रामाण्यादेवेत्यर्थः ॥ ५० ॥

बुभुत्सुबोधिका

प्रत्यर्प्येत्यत्र शास्त्रमिति पूर्वमीमांसाशास्त्रम्। अयमिति बुद्धिस्थो वक्ष्यमाणः। 'प्रतिरत्र प्रतिनिधिप्रतिदानयो'रिति पाणिनिसूत्रात् प्रतिदान इत्याशयेन प्रत्यर्पणं विवृण्वन्ति स्म मृत्युरयमित्यारभ्य न कोपि दोष इत्यन्तेन। कंसे निविष्ट इति अत्यन्तविस्मरणरूपः देवकीमारणरूपनिषिद्धकर्मणा स जन्यते। कंसो मृत्युरित्यपव्याख्यानमित्यादिनात्रैव स्वयं वक्ष्यते। भक्ष्या

इति गीतैकादशाध्याये 'केचिद् विलग्ना दशनान्तरे'ष्वित्याद्युक्त्वा 'कालोस्मि लोकक्षयकृत् प्रवृद्ध' इत्युक्तेः। अप्रतीकार्यश्चेति औषधादिनापमृत्योरेव प्रतीकारात्। स त्विति मृत्युस्तु। संमृत्युः दोष इति भगवदधिष्ठाने वसुदेवे कथं पुत्रदानदोष इति दोषप्रश्नसम्भवात्। इयमिति देवकी। एतदपीति पुत्रदानेनास्या मोचनम्। बहव इति एकापेक्षया बहूनामनुग्रहो न्याय इति एतदनुचितम्। बालका इति बालकत्वस्यानुचितत्वप्रयोजकत्वं, 'सुप्ता' नित्येतावतैव कर्माकाङ्क्षानिवृत्तेर्बालकानित्यस्य वैयर्थ्यापातात्। 'सुप्तानवधीन् निशि बालका'नित्यत्र प्रथमस्कन्धे। न च विशेष्यं 'बालका'निति। 'माता सुतानां निधनं शिशूना'मित्यत्रैव सुतानां विशेष्यत्वात्। स्वस्यान्तरङ्गा इति आत्मनोंशाः। पत्नी तु अर्धाङ्गी बहिरङ्गा। दोषाधिक्यमिति बहुत्वात् मित्रत्वाच्च। इदानीं पुत्राणामभावादित्ययं हेतुर्देहलीप्रदीपन्यायेनोभयान्वयी। विद्यमानाविद्यमानयोरिति स्त्रीपुत्रयोः। सिद्धवदिति विद्यमानवत्कारेण। करणं कारः तेन। विरयेति देयादेयरूपप्रत्यर्पणविषयविभागः। धर्महानीति क्षात्रधर्महानिप्रसङ्गात्। अयमिति पुत्रदानलक्षणः। नरकेति बालवधान् न श्राद्धादिकर्तृत्वमिति वसुदेवस्य ज्ञानत्वाज् ज्ञानम्। 'यदी'त्यस्यार्थमाहुः पुत्रोत्पादनं त्वित्यारभ्य लौकिक्युपपत्तिरित्यन्तेन। भिन्नतयेति तत्पितृगृहे। एवकारेणैक्ययोगव्यवच्छेदः क्रियते। अनेन सामदानदण्डानन्तरं भेद उक्तः। भेदनम्। भिदिर विदारणे। घञ्, शत्रोरमात्यादीनामुपायेन परतो विश्लिष्यात्मसात्करणं भेदः। अयं भिन्नतया स्थापने भवति तस्याः। न कोपीति पुत्रोत्पादानं स्वाधीनमिति न बहवः पुत्रा उत्पादनीया मयेति न प्रथमदोषः। 'बालका' इत्युक्तदोषोपि न स्यात् तत एव। स्वस्यान्तरङ्गा इत्यपि दोषो न। तथा दोषाधिक्यं दोषो न तत एव। 'अर्पणं च न सम्भवती'त्युक्तदोषोपि न पुत्राणामाहार्यज्ञानविषयबाधकालीनमिच्छाजन्यज्ञानमाहार्यज्ञानम्। अत एव न 'विद्यमानाविद्यमानयो'रित्याद्युक्तदोषः। धर्महानिदोषोपि न, भेदस्य क्षात्रधर्मत्वात्। तत एव लोकापकीर्तिरूपदोषाभाव इत्यर्थः। वसुदेवस्याधिष्ठानत्वादन्यमपि दोषाभावमाहुः प्राणरक्षार्था इति। ऋतुकालेति 'ऋतौ भार्यामुपेया'दितिश्रुत्या विहितं ऋतुकालगमनं, तदपेक्षया। अधिकेति 'जीवाभयप्रदानस्य न कुर्वीरन् कलामपी'ति वाक्यात्। 'न हिंस्यात् सर्वा भूतानी'ति श्रुतेश्च। एतदपीति भिन्नतया स्थापनम्। चोदनयेति उक्तश्रुत्युक्ता चोदनया। नैक इति एकः पुत्रः पुत्रो नेत्यत्र। पुत्रे पुत्रत्वावच्छिन्नप्रतियोगिकाभावो नेति समासेन एकपुत्रे पुत्रत्वावच्छिन्नप्रतियोगिताकाभावो ज्ञेयः। एकपुत्रे समासशक्त्यैकपुत्रत्वे सति पुत्रत्वाभावात्। न दोष इति 'एकं द्वौ वा पुत्रमुत्पादये'दितिशास्त्रे मानवे नवमाध्याये 'एकमुत्पादयेत् पुत्रं न द्वितीयं कथञ्चन द्वितीयमेके प्रजनं मन्यन्ते तेषु तद्विद' इत्यस्ति। भगवन्मते तु 'पुत्रे कृष्णप्रियेरति'रित्युक्तम्। तथेति तथा अलौकिकीति छेदः। आकाशवाणीति 'अस्यास्त्वामष्टमो गर्भ' इत्याकाशवाणीप्रामाण्यात्। बहव एवेति न त्वेको द्वौ वा जायेते। अलौकिकीमुपपत्तिमाहुः तेपीति। उपपत्तिर्न्यायः, सा च लौकिकी एकं द्वौ वोत्पाद्य न कोपि दोष इत्युक्तदोषाभावसम्पादिकोक्ता। अलौकिक्या तु नैको नापि द्वौ पुत्रौ प्राप्तौ किन्तु बहव एव सुताः प्राप्ताः। अतः इयमेका पुत्राश्च बहव इत्याद्युक्तदोषास्तदवस्थाः तदभावाय। तेपि एकः द्वौ वा भवतः। मृत्युं सन्निवेश्य तावता बहुकालेनोत्पादनीयाः। आकाशवाण्यां कालस्याश्रुतत्वात्। अनयोपपत्त्याऽलौकिक्यापि न कोपि दोषो भवेदित्यर्थः। कामान् नोदनयापि वा बहुकालेनोत्पादने भगवदिच्छा न चेत् तदाप्युपपत्तिमाहुः कालेपीति। बहुकालविरुद्धे स्वल्पादिकाले पुत्रोत्पादने भगवदिच्छा चेत् तदा पुनर्दोषापत्तिरित्यर्थः। अस्मिन् पक्षेपि दोषाभावमाहुः तदा पुत्रेति। अन्यद्वारा पुत्ररक्षा देवक्या तु पुत्रसंरक्षा। सा चाकाशवाण्यां 'अस्यास्त्वामष्टम' इत्युक्त्याष्टमत्वस्यापेक्षाबुद्धिजन्यत्वादपेक्षिता। न चापेक्षाबुद्धिराहार्यज्ञानविषयिणीति शङ्क्यम्। आकाशवाण्यां कंसः पुत्रान् मारयिष्यतीत्यश्रुतत्वात्। तस्याः संरक्षयित्र्या देवक्याः मृत्युमारणं कर्तव्यम्। न पुत्राणां बहूनामिति 'इयमेका पुत्राश्च बहव' इत्याद्युक्तदोषाभावः भगवदिच्छया पुत्राणां किमप्यस्त्विति हृदयात्, अत्रोपपत्तिः शास्त्रयोजनम्। 'युक्तिर्न्याये च योजन' इति विश्वात्। मृत्युरेवेति देवक्या मृत्युरेवेत्यर्थः। देवक्या 'मृत्युर्वा म्रियेत चे'दित्यस्य 'प्रत्यर्प्य मृत्यवे पुत्रान् मोचये कृपणमिमा'मिति सम्बन्धो यद्यपि भासते तथापि पूर्वार्धोत्तरार्धयोर्वैपरीत्यापत्त्या वक्ष्यमाण एव सम्बन्धः। तदा पुत्रसंरक्षार्थं 'मृत्युरेव म्रियेते'त्यत्र 'तदे'ति 'म्रियेते'त्यनेन सम्बध्यते, तदुपपादयन्ति स्म। किञ्च देवक्या मृत्युमारणेऽलौकिकीमुपपत्तिमाहुः प्राणिमात्र इति।

तत एवैनमिति तत्र एव एनं मृत्युम्। एनादेशः। अवयजते प्रतिकुरुते। धातूनामनेकार्थत्वाद् बाहुलकाच्च। इमे कल्पने वसुदेवस्याधिष्ठानस्य प्रतीकारे प्रवृत्तत्वात्। तस्मादिति मृत्योर्जन्मश्रवणात्। अन्यस्येति सुतमृत्योः। यद्वा द्वितीयदेवकीमृत्योः। एको मृत्युरिति एक एव सर्वमारक इत्यर्थः। बृहदारण्यके 'मृत्युनैवेदमावृतमासी'दित्यत्रैकत्वविवक्षणात्। नियतकाल इति एकवारं तस्याः कालः। शतायुर्वै पुरुष' इति 'सञ्जीव शरदः शत'मिति चोक्तः। सा मृत्युस्तदैव शतवर्षानन्तरमायाति, अपमृत्यवोन्याः। तदा चेत् निवृत्ता पुनरपमृत्य्वादिकारणकालाभावान्नयातीत्यर्थः। इदानीमित्यस्य स्वसहकारिणि कालोपाधौ। तं प्रतीति म्रियमाणं प्रतीत्यर्थः। म्रियेतैवेति निवर्ततैव। अतः शब्दनित्यत्वेति अत इति सार्वविभक्तिकस्तसिल्। 'आकाशः सम्भूत' इत्यादिवाक्यैः सविशेषणे ही'तिन्यायेन शब्दनित्यत्वमेव निवर्तते, न त्वाकाशनित्यत्वं निवर्तते। इदं 'आकाशवत् सर्वगतश्च नित्य' इति गीतायां आकाशवत् सर्वगतत्वमात्रं न तु नित्यत्वमप्याकाशवदिति व्याख्यानं न तदा बोध्यम्। तद्वदस्या मृत्युरेव गच्छेत्। कंसहननक्रियया विशेषणीभूतो मृत्युरेव गच्छेत् न त्वियं देवकी विशेष्यभूता गच्छेन् मृत्युलोके। यद्वा व्याकरणशास्त्रतः सिद्धमपि शब्दनित्यत्वं यथाभिव्यञ्जकस्य वायोर्नाशाच्छब्दाश्रवणे गतमिव भवति, एवं मृत्युरपि नियताभिव्यञ्जकस्य सहकारिणः कालोपाधेरभावाद् गच्छेदेवेत्यर्थः। म्रियेतेत्यस्य बाहुलकादर्थो निवर्ततेति कुतः अतो मुख्यार्थं वक्तुमाहुः नन्वेकमृत्यविति। लोकाल्लोकादिति लोकात् मृत्युलोकात्

लोकाज्जनात् । मृत्युलोकं प्राप्य यो जनस्तस्मादेव मृत्युं अवयजते प्रतिकुरुते । नैनं मृत्युं स्वलोके मृत्युः एकदेशीभूतः विन्दति लभते इत्यर्थः । विदॢ लाभे । तुदा० आ० अनि० । नियतत्वादिति अस्या मृत्युः कालकारणादस्या एवेति नियतः तस्य भावो नियतत्वं तस्मात् । सुतान् न मारयिष्यत्यतः सुतसमर्पणे न बाधकमित्यर्थः । श्रीधरस्य व्याख्यानमपवदन्ति स्म कंसो मृत्युरिति । स इति कंसः । ननु तर्हि कंसमृत्युप्रसङ्गः । नैवम् । कंसोऽष्टमगर्भजन्मपर्यन्तं न मरिष्यत्याकाशवाणीप्रामाण्यादिति । अत्र वाणीप्रामाण्येन मरणाभावनिश्चयाद् यथाकथञ्चित् प्रतीकारार्थं नाना पक्षा उक्ताः । अतो न तथासाधिका युक्तयो विशेषतोऽपेक्ष्यन्त इति बोध्यम् । श्रौतेर्थे कंसमरणापत्त्या लक्षणेति चेत् तत्राहुः लक्षणयेति । शक्यसम्बन्धो लक्षणाधाराधेयभावस्तया । तत्परः मृत्युशब्दः कंसपरः । सिद्ध इति मृत्युमरणे पुनरुन्मज्जनापत्तिः । अतोऽमरणे सिद्धे । अनुवाद इति न म्रियेतेत्यनुवादः । ननु 'भयात् कंस' इति वाक्यान् मृत्युभ्रातृमति कंसे भगिन्या मृत्योः स्थितिरुचिता, सा च 'इत्युक्तः सखलः पाप' इत्यत्र पापशब्दवन् मृत्युशब्दोपि लक्षणया श्रुत्यविरोधेन कंसपरो भवत्वित्याशङ्क्याभ्युपगममाहुः अस्तु वा तथेति । श्रुत्यविरुद्धा लक्षणा, 'लक्षणां नैव वक्ष्यामी'त्यस्य न विषय इति ज्ञापितम् । आश्चर्यरसत्वाद् वा न लक्षणेत्यपि बोध्यम् । कंसमरणापत्तिं वारयन्ति स्म सोप्याकाशेति । कंसोपि । अपिना मातृचरणाः । बालको वा न मरिष्यत्येव । अत्यन्तायोगव्यवच्छेदकैवकारः । नीलं सरोजं भवत्येवेति । तथापीति मरणाभावेपि सुतान् पुत्रान् वा नरकपालकानपि । दास्यामीति प्रत्यर्प्यैत्यस्य विपरिणामं कृत्वा दास्यामि प्रत्यर्पयिष्यामि मृत्यव इति सम्बन्ध इत्यर्थः । यावत्कालं त्वं कंसभयात् प्राप्तः सुतान् न मारयिष्यस्यत उत्तमर्णाय तुभ्यं सुतप्रतिदानम् । अग्रे सुतान् मारयिष्यतीति यावत्कालं मारणाभावः प्रतिदाने हेतुः ॥ ४९ ॥

विपर्यय इत्यत्र ननु कथमिति ननु कियत्कालं मृत्युः सुतान न मारयिष्यतीति मृत्यवे प्रत्यर्पणं प्रोक्तं तथा कियत्कालं प्रोक्तं तथा मह्यं सुता दत्ता इति तथापि षड्भगवद्धर्मा इति केन प्रकारेणायुक्तं मारणार्थं दानं कर्तुं शक्यत इत्यर्थः । तस्येति कंसस्य । तदा तत एवेति वाणीप्रामाण्यादेव विपर्ययः मत्पुत्रादेवास्य मारणमिति । नन्वाकाशवाण्याष्टमगर्भान् मरणे प्रमाणं न तु षड्धर्मैर्मारणे प्रमाणमित्याशङ्क्याहुः एवेति । न तु धर्मेणामारणं वीर्यकार्यत्वात् । मत्पुत्रादेवेति वीर्यरूपात् । धर्मिणः कारकत्वात् धर्मियोगव्यवच्छेदकैवकारः । तथा च यतो गणने वीर्यस्याष्टमत्वं सोवधिः । अस्य कंसस्य । युक्तिबाधितमिति मारणे कर्तृत्वेन बालयोजनेन बाधितम् । पञ्चविधं कर्म गतावन्तर्भूतमित्याशयेनाहुः उत्पत्तिस्थितीत्यादि । एतेषु दशगण्युक्तक्रियारूपकर्मसमावेशः । दुःखेनेति दुर् दुःखेनाति अतिक्रमितुं मनसाप्याकलयितुमशक्यरचनस्य प्रपञ्चस्य ज्ञानमतिक्रमः इत्याशयेन ज्ञातुमिति विवरणं ज्ञातुं अशक्यत्वात्, दुरत्यया । दुरत्ययशक्या । मूलबलाद्व्याख्यानं सामान्यक्रियापरं विशेषक्रियया णीञ् प्रापणे नश् अदर्शने वा तद्रूपया शक्लृ शक्तौ तद्रूपया च बाध्यत इतोण् गताविव्यस्या य इत्यस्याशक्यक्रियार्थत्वम् । यद्वा । भावाभावरूपक्रिया व्याख्यानं व्याख्येयमपि सैवेति न सामान्यविशेषभावः । पश्चादिति रंगभूमिगमने । एते च ते पुत्रा एतत्पुत्राः तैः एतस्याः पुत्रैरिति वा अयं कंसः वध्यः । कंसवधे यथायोग्यं ऐश्वर्यादिषड्धर्माणां करणत्वं बोध्यम् । एतदेवेति पुत्रदानमेव । वसुदेवस्य ज्ञानत्वादेवकारः । 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुने'ति वाक्यादिदं ज्ञानमक्लिष्टकर्मा भगवान् तद्विषयकम् । वसुदेवरूपम् । एवं कृते इत्यादि कंसवधार्थं निमन्त्रणे कृतेत्यन्तविस्मृतिरूपो मृत्युर्निवर्तेत देवक्या आगतस्मृतिरूपप्रतियोगित्वात् घटे आगते घटाद्भावनिवृत्तिवत् । निवृत्तोपीति 'क्रोधस्यान्तं फलोदया'दिति सप्तमस्कन्धात् । क्रोधे गते वधान् निवृत्तोपि कंस इत्यर्थः । यद्वा निवृत्त इति मृत्युविशेषणम् । मृत्युरिति कंसमृत्युः । एतत्संरक्षायामिति देवकीसंरक्षायां कृतायां तत्पुत्रद्वारा पुनरित्यर्थः । 'न न्यूनादन्यपूरण'मिति कारिकया न्यूनपूरणमाहुः तस्मादिति । उक्तव्याख्यानस्य निर्दुष्टत्वात् । एवेति इतरव्याख्यानयोगव्यवच्छेदकः । एवमिति पूर्वोक्तकारिकया सुतदानेनेत्यर्थः । मन्त्रणेनेति मत्रि गुप्तभाषणे । वसुदेवस्य राजकत्वान् मन्त्रणं कंसाहितम् । आज्ञया कृतत्वात् । केचिदिति श्रीधर्यां श्रीधरस्वामिनः । एतस्य विचारस्य कंसमारणतात्पर्यकत्वे श्रीवसुदेवस्यापि दुराशयत्वं शङ्क्येतेत्यरुच्या । तस्मात् कंसवधार्थमेव एवं संरक्ष्येति शेषपूरणं विनार्थमाहुः एतस्याप्यनङ्गीकार इति । एतस्य यत्नस्येत्यर्थः । निवृत्त इति उपस्थितो मृत्युर्निवृत्तः । पूर्वेणैवेति मण्डूकप्लुत्याऽऽवृत्य पूर्वपूर्वेण पादेन एवकारः शेषपूरणयोगव्यवच्छेदकः । तेन शेषपूरणापेक्षयाऽऽवृत्तिर्जायसीत्युक्तम् ॥ ५० ॥

अग्नेर्यथेत्यत्र अनुचितमिति लोकविरुद्धमनुचितमिति सम्बन्धः । हेतुगर्भं विशेषणम् । उचितमिति पाठे उक्तमुचितम् । पुत्रदाने लोकविरोधस्तु नवमस्कन्धे हरिश्चन्द्रो वरुणमाराध्य तत एव रोहितं पुत्रं प्राप्य स्वपुत्रेण वरुणं नेजे । जातोदरो जातस्ततो 'मुक्तोदरो यजद्देवान् वरुणादीन् महत्कथ' इति पुत्रदानात् । अत्र दुःखं विनादानात् बोध्यः । अदृष्टं धर्माधर्मौ । हरिणदर्शने इति सतिसप्तमी । तदानीमपि पार्श्ववर्तिनमात्मजमिवानुशोचन्तमभिवीक्ष्यमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिममिति वाक्याद्धरिणदर्शनसमानाधिकरणं मरणं तद्विषयः । लोकं देहम् । हरिणशरीरेति निमित्तमिति योजना । कालञ्जर इति पर्वते, शालग्रामपुलस्त्यपुलहाश्रमं 'कालञ्जरात् प्रत्याजगामे'तिवाक्यात् । शालवृक्षोपलक्षितं ग्रामम् । दृष्टं सम्भवतीति मनोनिषेकरूप दृष्टम् । 'मनो यत्र निषक्तमस्ये'तिश्रुतेः । शरीरसंयोगवियोगयोस्त्वदृष्टमेव । जन्तुश्चेत्यादि जायत इति जन्तुः कर्तृप्रयोगः । प्रत्ययः । जनी प्रादुर्भावे धातुः जीवतीति जीव प्राणधारणे धातुः पचाद्यच् । सर्वत्रेति कर्मभूमिषु । जायमान इति जनी प्रादुर्भावे । दि० आ० से० कर्तरि शानच् । ज्ञाजनोर्जाशिति । तत्रेति कर्मभूमिषु । दृष्टस्य मनसः शरीराकृतिविशेषयोर्योगे निमित्तस्य । बाधितत्वात् । कल्पनाया इत्यादि योगे हेतुर्मनः वियोगेपीति कल्पनाया अशक्यत्वात् । प्रारब्धकर्मनिर्वाणवियोगे प्रारब्धकर्म-

नाशस्य हेतुत्वेन तथा। दुर्विभाव्य इति शरीरे विद्याकर्मपूर्वप्रज्ञाः हेतवः। 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति श्रुतेः। शरीरसंयोगे मनो हेतुः 'मनो यत्र निषक्तमस्ये'ति श्रुतेः। शरीरसंयोगवियोगयोर्हेतुर्दुर्विभाव्य इत्यर्थः। ननु प्रत्येकं हेतवः समुदायेपीति चेन्न न, समासे भिन्नशक्तेरेकार्थीभावात्। न च हेतुनामेकार्थीभावं कृत्वा हेतुः सुविभाव्य इति वाच्यम्। व्यपेक्षालक्षणसामर्थ्याभावात् प्रत्येकं हेतुज्ञानस्य दुर्विभाव्यत्वात्। पश्चादिति सुतदानात् पश्चात्। सुतानां मरणममरणं वा किमप्यस्तित्यर्थः॥ ५१॥

एवं विमृश्येत्यत्र पूर्वश्लोके परमार्थे लोकविरोधः परिहृतः। एवं परमार्थे हृद्यागते देवकी ब्रह्मविद्यैव रक्षणीयेति वेदरूपवसुदेवनिर्धाराज् ज्ञापयन्ति स्म इयं त्विति। तस्य सिद्धिरित्यादिदेवकीमोचनस्य सिद्धिः प्राकाश्यरूपा दुर्घटेति हेतोस्तस्य कंसस्य सिद्धिदुर्घटत्वसाधकानि दिग्विजयित्वपापत्वदृष्टादृष्टभेदेन तावदुपायकरणविषयत्वानि दूषणानि वदन्, प्रयत्ने कृते आधिक्यं भावत्पूजनरूपं कृतवान्। बलवत्तरविघ्ननिवारणे प्रचुरतरमङ्गलस्य कारणत्वात्। विद्ययाऽऽसुराविद्योपमर्दात्। कंसोऽङ्गीकरिष्यति। 'सुहृद्भावान् निवर्तते कंसस्तद्वाक्यसारवि'दितिवाक्यात्। भावादिरिति स्वपूज्ये कंसे भेदबुद्धिवारणाय। वासुदेवाधिष्ठानत्वेनैक्यम्। बृहदारण्यके पूज्ये भेदबुद्धिवारणात्। अनेन 'विद्यात्मनि भिदाबाध' इति वाक्यात् भेदाभावरूपमद्वैतं विद्या रक्षिता। देवकी ब्रह्मविद्यात्रैव निविष्टा। आदिनान्तर्यामिज्ञानवाङ्मनांसि। न प्राणः देहरक्षाभावप्रसंगात्। ततः कार्यमिति बृहदारण्यके ततो भावादेः कार्यसिद्धिरुक्ता। सप्तान्नब्राह्मणे 'विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत्किञ्च विज्ञातं वाचस्तद्रूपं वाग्धि विज्ञाता वागेवेनं तद्भूत्वावति। यत्किञ्च विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एन तद्भूत्वावति। यत्किञ्चाविज्ञातम्। प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वावती'ति श्रुतेः। विज्ञातं विजिज्ञास्यं अविज्ञातं च विजिज्ञास्यम्। एत एवेति वाङ्मनःप्राणा एव। वाग्विज्ञाता तावत् विज्ञात वाचस्तद्रूपम्। एवं वाग्विभूतिविदः फलमाह वागेनमिति। वाक् आ एनं वाग्विदं वाक् तद्भूत्वा विज्ञातस्वरूपं भूत्वावति पालयति विज्ञातस्वरूपेणैवान्नत्वमापद्यत इति यावत्। अग्रेप्येवम्। दृष्टादृष्टेति पूर्वश्रुत्युक्तज्ञाताज्ञातभेदेन। युक्तमिति देवक्या भगवदीयत्वादुपेक्षा नोचिता। मत्वेति उक्तबृहदारण्यकान्मत्वा। दृष्टोपायमाहुः 'न चास्यास्त' इत्यनेन वा वक्ष्यन्तीत्यदृष्टोपायमेवायम्। एवं करणे इति ज्ञानप्राप्तौ प्राकाश्यरूपसिद्धिप्राप्तौ। पितेति पितृनाम्ना तु मुख्यत्वमिति मुख्यत्वात् गुरुत्वाच्च। अत इत्थम्॥ ५२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अत उपेक्षादोषपरिहाराय मृत्यवे मृत्युरूपेणोपस्थिताय कंसाय जनिष्यमाणान् पुत्रान् प्रदाय प्रदास्यामीति प्रतिज्ञाय कृपणां दीनामिमां देवकीमस्मान्मोचये त्याजयामि। नन्विदमपि न युक्तम्। इयं चैका कंसेन बलाद्धन्यते, पुत्रास्तु बहवस्तेषां स्वहस्ताद्धननार्थदाने स्वस्यापि दोषाधिक्यं स्यादित्याशङ्क्याह—सुता इति। यदि त्वस्यां मम सुता एव न जायेरन्, सुतोत्पत्तेः पूर्वं कंस एव वा म्रियेत तदा तु नैव काचिच्चिन्ता। यदि मे मम सुता जायेरन् ततोऽर्वाक् मृत्युः कंसः चेन्न म्रियेत॥ ४९॥ तदा विपर्ययो वा किं न स्यात् मत्पुत्रादेवास्य मरणं किं न स्यात्? ननु प्रौढस्य कंसस्य तव बालकात् कथं मृत्युः स्यात्तत्राह—गतिरिति। धातुः 'अस्यास्त्वामष्टमो गर्भो हन्ता' इत्युक्तवतो गतिः शक्तिर्दुरत्यया अनुल्लङ्घ्या। एतदेव प्रपञ्चयति—उपस्थित इति। उपस्थितोऽपि मृत्युर्निवर्तेत, यथा मार्कण्डेयादेः। निवृत्तोऽपि मृत्युः पुनरापतेत्, यथा रावणहिरण्यकशिप्वादेः। यद्वा अनेनोपस्थितोऽपि देवक्या मृत्युर्निवर्तेत। देवकीहननान्निवृत्तो निवृत्तप्रायोप्यस्य कंसस्य मृत्युः पुनरापतेदित्यर्थः। अतो न पुत्रप्रदाने प्रतिज्ञायां मम कश्चिद्दोषशङ्कावकाश इत्याशयः॥ ५०॥ किञ्च "नहि मत्कर्तृकप्रदानमात्रेणैव पुत्राणां मरणं सम्भवति, जन्ममरणादेरदृष्टाधीनत्वात्" इति सदृष्टान्तमाह—अग्नेर्यथेति। वने वृक्षान् ग्रामे गृहान् वा प्रदहन् वह्निः सन्निहितानपि परित्यज्य कदाचिद्दूरस्थानपि दहति तत्र तस्य दारुवियोगयोगयोः प्राण्यदृष्टतः पुण्यपापरूपादन्यन्निमित्तं नियामकं यथा नास्ति, एवं जन्तोर्जीवस्यापि शरीरसंयोगवियोगयोर्जन्ममरणयोर्हेतुर्दुर्विभाव्यः अचिन्त्यः अदृष्टरूप एव। हीत्यवधारणे। अदृष्टवशात् पश्चाद्यद्भावि तद्भवतु, इदानीमियं तु तावद्रक्षिता स्यादिति भावः॥ ५१॥ शौरिर्वसुदेवो यावदात्मनो निदर्शनं ज्ञानं तावदेव विमृश्य विचार्य पुत्रप्रदानप्रतिज्ञातं निश्चित्य पापं पापार्थमुद्युक्तं तं कंसं बहुमानपुरसरः अत्यादरपूर्वकं यथा स्यात्तथा पूजयामास। प्रथमं स्तोत्रनमस्कारादि कृतवानित्यर्थः॥ ५२॥

अन्वितार्थप्रकाशिका

प्रदायेति अर्द्धम्॥ मृत्यवे कंसाय पुत्रान् प्रदाय देयत्वेन प्रतिज्ञाय कृपणां दीनामिमां देवकीं मोचये। तत्राकाशवाण्यां कल्पितत्वशङ्कायां विचारयति सुता इत्यर्द्धम्। यदि मे सुता जायेरन् यदि च तावत्पर्यन्तं मृत्युः कंसो न म्रियेत तदा कंसाय पुत्रान् दत्त्वा इमां मोचयिष्यामि इति पूर्वार्द्धमनुवर्त्य व्याख्येयम्। अर्थसामञ्जस्यान्न वाक्यभेददोषः। तदा सुतमरणदोषे सत्यपि देवकी तु सम्प्रति जीवेत् यदि सुता न जायेरन् जाता वा कंसमेव हन्युः जननात्प्राक् सो वा म्रियेत इति पक्षत्रये तु न कोऽपि दोषः॥ ४९॥ आकाशवाण्याः सत्यत्वनिश्चये विचारयति विपर्यय इति॥ बालेन मत्पुत्रेण प्रौढस्याप्यस्य मृत्युरिति विपर्ययोऽपि किं न स्यात् चरमाद्यपेक्षया प्रथमादेरप्यष्टमत्वात् अष्टानामपि सहैव मरुद्गणवदुत्पत्तिसंभवाच्च। अतोऽपि इदानीमपत्यार्पणप्रतिज्ञैव मन्त्रः। यतो

धातुः अष्टमो गर्भो हन्ता इत्युक्तवतः गतिरिच्छा दुरत्यया दुर्बोधा तया च उपस्थितो देवक्या मृत्युस्तावन्निवर्त्तेत मत्पुत्रार्पणप्रतिज्ञया निवृत्तोऽपि कंसस्य मृत्युः पुनरापतेत् प्राप्तो भवेत्। यद्वा। गतिर्धातुर्दुरत्यया इत्यस्य प्रपञ्च उपस्थित इत्यादि ॥ ५० ॥ अग्नेरिति ॥ यथा अग्नेर्वृक्षान् गृहान्वा प्रदहतो दारुणः काष्ठस्य यौ वियोगयोगौ कदाचित् सन्निहितस्यापि वियोगः कदाचित् विप्रकृष्टस्यापि योगः तयोः अदृष्टतः वृक्षाणां गृहस्वामिनां वा भाग्यात् अन्यत् निमित्तं कारणं नास्ति। एवं हि एवमेव जन्तोरपि शरीराणां संयोगवियोगयोर्जन्ममरणयोर्हेतुर्दुर्विभाव्यः अचिन्त्यः ॥ ५१ ॥ एवमिति ॥ शौरिर्वसुदेवः यावत् यत्प्रमाणकम् आत्मना बुद्ध्या निदर्शनं ज्ञानं यत्र तद्यथा स्यात्तथा आत्मप्रज्ञावधीत्यर्थः। एतेन सम्भ्रमे प्रतिभातिशयः सूचितः। विमृश्य तं पापं कंसं बहुमानपुरःसरं बह्वादरपूर्वकं पूजयामास बहिस्तुष्टाव ॥ ५२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विचारपूर्वकमेव प्रतिपत्तिं दर्शयति चतुर्भिः। मृत्युरिति। उपस्थितः संप्राप्तः मृत्युः, बुद्धिमता पुंसा, यावद्बुद्धिबलोदयं यथामति यथाशक्ति चेत्यर्थः। अपोह्यः परिहार्यः, एवं प्रतिहारे कृते सत्यपि, यदि असौ मृत्युः, न निवर्त्तेत निवृत्तिं न यायात्, तर्हि, देहिनः अपराधः, न अस्ति ॥ ४९ ॥ प्रदायेति। अतः, पुत्रानस्यां जनिष्यमाणान् सुतान्, मृत्यवे मृत्युरूपेणोपस्थिताय कंसाय, प्रदाय दास्यामीति प्रतिज्ञाय, कृपणां दीनां, इमां स्त्रियं, मोचये त्याजयामि। प्रतिज्ञायां दोषरूपत्वमाशङ्क्याध्यवस्यति सुता इति। यदि, मे मम, सुताः, अस्यामिति शेषः। जायेरन् संभावनायां लिङ्। तावता कालेनापीति शेषः। चेद्यदि, मृत्युर्मत्पुत्रादेर्मृत्युभूतः कंसः, न म्रियेत मत्पुत्रोत्पत्तेः पूर्वं न मरिष्यते वा। तर्हि तु पुत्रान् प्रदास्यामि। मम पुत्रोत्पत्तेः कंसावस्थानस्य च पाक्षिकत्वात् पुत्रार्पणप्रतिज्ञा न दोषवहेति भावः ॥ ५० ॥ पाक्षिकत्वमेव संभावयति। विपर्यय इति। विपर्ययो वा मम पुत्रात् कंसस्य मृत्युर्वा कंसस्याऽवस्थानं ममास्यां पुत्रोत्पत्त्यभावरूपो विपर्यासो वा, किं न स्यात्। एवं विपर्ययसत्त्वेऽपि न दोष इति भावः। ननु अशरीरवाण्या ईश्वरवचस्त्वात्तस्या नासत्यता स्यादतोऽन्वय एव निश्चितो न विपर्यय इत्याशङ्क्याध्यवस्यति। धातुरीश्वरस्य, गतिः रीतिः, दुरत्यया दुराकलनीया भवति। धात्राऽऽकाशगिरा तथोक्तत्वेऽपि कदाचिद्विपर्ययोऽपि स्यादिति भावः। तत्रोदाहरणमालोच्याध्यवस्यति उपस्थित इति। उपस्थितः समीपं प्राप्य स्थितोऽपि मृत्युः, कश्चित् निवर्त्तेत। यथा 'शतायुर्वै पुरुषः' इति श्रुतेर्मर्त्यत्वतो मार्कण्डेयस्य प्राप्तोऽपि मृत्युर्निवृत्तः। निवृत्तः वरप्राप्त्यादिना निवृत्तोऽपि मृत्युः, पुनः आपतेत् आपद्यते। यथा हिरण्यकशिपुरावणादेः, अतः पुत्रार्पणे प्रतिज्ञातेऽपि न दोष इति भावः। यद्वा 'सुता मे यदि जायेरन्' इत्यारभ्य 'निवृत्तः पुनरापतेत्' इत्यन्तसार्द्धश्लोकस्यायं भावः। अस्यां यदि मत्तः सुता जायेरन् तदा तु यद्भावि तद्भवतु, तावत् कालपर्यन्तमस्या जीवितं तु भवेदेव, तदन्तरा यदि कंस एव म्रियेत, यदि वैषा वन्ध्या स्यान्न, तदा पुत्रार्पणप्रतिज्ञायां किंचिदन्याय्यं, यदि चास्यां मत्तः सुता भविष्यन्ति, न चायं म्रियेत, तदा मत्पुत्रमारणार्थं प्रवृत्तस्य कंसस्य मत्पुत्रान्मरणरूपो विपर्ययः किं न स्यात्, स्यादेव, यदि कंसस्तप आदिना तावता कालेन निवारितमरणभयः स्यात्तथापि बालादपि मत्पुत्रात्प्रौढस्य कंसस्य मृत्युः स्यादेव, बालादपि सिंहाद्गम्भीरवेदिनः करिण इव, आकाशगिरः सत्यत्वादिति ॥ ५१ ॥ मृत्यवे मारणाय पुत्रार्पणप्रतिज्ञा दुष्यतीति चेन्न दुष्यति, न हि मत्पुत्रमृत्युर्मत्प्रतिज्ञापरतन्त्रस्तस्य कर्माधीनत्वेन पुरुषाधीनत्वाभावादित्येतत् सदृष्टान्तमध्यवस्यति। अग्नेरिति। यथा अग्नेः, दारुवियोगयोगयोः काष्ठात् सकाशाद्विलम्बशीघ्रोत्पत्त्योः, निमित्तं कारणं, अदृष्टतः यजमानादृष्टात्, अन्यत् न अस्ति। अत्र योगवियोगशब्दाभ्यां शीघ्रविलम्बोत्पत्ती विवक्षिते, दारुशब्देनारणिश्च। एवं, जन्तोर्जीवस्य अपि, शरीरसंयोगवियोगयोः हेतुः, अदृष्टतः, कर्मणः, अन्यः दुर्विभाव्यः दुराकलनीयः हि। अतः, मत्प्रतिज्ञामात्रं तन्मरणे न हेतुः, किं तु तेषां कर्मैवेति भावः। यद्वाऽस्येत्थं भावः। वने वृक्षान् प्रदहन्नग्निः संनिहितान् परित्यज्य कदाचित् दूरस्थानपि दहति, ग्रामे गृहान् वा प्रदहन्, सः समीपस्थगृहान् परित्यज्य, ततो दूरस्थानपि दहति, न ह्यस्यैवंविधत्वे प्राण्यदृष्टव्यतिरेकेण किंचिन्नियामकस्ति एवं जन्तोर्जन्ममरणयोरपि हेतुर्दुःखेनापि चिन्तितुं न शक्य इति ॥ ५२ ॥

हिन्दी अनुवाद (कर्दमक्षमा)

इसलिये इस मृत्युरूप कंसको अपने पुत्र दे देनेकी प्रतिज्ञा करके मैं इस दीन देवकीको बचा लूँ। यदि मेरे लड़के होंगे और तबतक यह कंस स्वयं नहीं मर जायगा, तब क्या होगा? ॥ ४९ ॥ सम्भव है, उलटा ही हो। मेरा लड़का ही इसे मार डाले। क्योंकि विधाताके विधानका पार पाना बहुत कठिन है। मृत्यु सामने आकर भी टल जाती है और टली हुई भी लौट आती है ॥ ५० ॥ जिस समय वनमें आग लगती है, उस समय कौन-सी लकड़ी जले और कौन-सी न जले, दूसरी जल जाय और पासकी बच रहे—इन सब बातोंमें अदृष्टके सिवा और कोई कारण नहीं होता। वैसे ही किस प्राणीका कौन-सा शरीर बना रहेगा और किस हेतुसे कौन-सा शरीर नष्ट हो जायगा—इस बातका पता लगा लेना बहुत ही कठिन है' ॥ ५१ ॥ अपनी बुद्धिके अनुसार ऐसा निश्चय करके वसुदेवजीने बहुत सम्मानके साथ पापी कंसकी बड़ी प्रशंसा की ॥ ५२ ॥

[1]प्रसार्य वदनाम्भोजं नृशंसं निरपत्रपम् । मनसा दूयमानेन [2]प्रहसन्निदमब्रवीत् ॥ ५३ ॥

श्रीवसुदेव [3]उवाच

न [4]चास्यास्ते भयं सौम्य [5]यद्धि त्वाऽऽहाशरीरवाक् । पुत्रान् समर्पयिष्येऽस्या यतस्ते भयमुत्थितम् ॥ ५४ ॥[6]

श्रीशुक उवाच

[7]सुहृद्वधान्निववृते कंसस्तद्वाक्यसारवित् । वसुदेवोऽपि तं प्रीतः प्रशस्य प्राविशद्गृहम् ॥ ५५ ॥
अथ काल उपावृत्ते देवकी सर्वदेवता । पुत्रान् [8]प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरम् ॥ ५६ ॥

कर्दमक्षमा

अन्वयः— वदनाम्भोजं प्रसार्य दूयमानेन मनसा प्रहसन् निरपत्रपं नृशंसं इदं अब्रवीत् ॥ ५३ ॥ सौम्य यद् हि अशरीरवाक् तु आह अस्याः भयं च ते न अस्याः पुत्रान् समर्पयिष्ये ते यतः भयं उत्थितम् ॥ ५४ ॥ तद् वाक्यसारवित् कंसः सुहृद्वधात् निववृते वसुदेवः अपि प्रीतः तं प्रशस्य गृहं प्राविशत् ॥ ५५ ॥ अथ च काले उपावृत्ते सर्वदेवता देवकी अनुवत्सरं अष्टौ पुत्रान् प्रसुषुवे एव च कन्यां प्रसुषुवे ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्य विश्वासाय विकसितमुखाम्भोजः प्रहसन्नब्रवीत् ॥ ५३ ॥ यत् यथा अशरीरिणी वागाह तथा हि निश्चितम् । अस्याः सकाशात्ते भयं नास्ति । यतो येभ्यः पुत्रेभ्यस्ते भयमुत्थितम् । अष्टमो हंतेत्युक्तेरन्योन्यापेक्षया सर्वेऽप्यष्टमा भवेयुरिति सर्वानपि तानस्याः पुत्रान्समर्पयिष्ये ॥ ५४ ॥ तद्वाक्ये सारः उपपत्तिः तद्वित् निववृते निवृत्तः ॥ ५५ ॥ प्रसूतिकाले उपावृत्ते प्राप्ते सर्वः सर्वात्मा भगवानेव देवता यस्याः सा तथा । सर्वदेवतामयीति वा भगवदाश्रयत्वात् ॥ ५६–५७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतो येषां पुत्राणां ते तव सकाशाद्भयं मृत्युरूपमागतं तानस्याः पुत्रान्समर्पयिष्ये श्रीकृष्णस्य तद्भयाभावात्तदसमर्पणेऽपि न वसुदेवस्य मिथ्यावादित्वं स्यादिति वास्तवोर्थः प्रतीयते । यद्वा—श्रीकृष्णस्य न कस्यापि पुत्रत्वमस्ति "न माता न पिता तस्य न भार्या न सुतादयः" इत्यग्रे वक्ष्यमाणत्वात् । यथाश्रुतेऽपि न दोषः । 'भगवान्देवकीसुतः' इत्युक्तिस्तु देवक्यां सुतवदाविर्भूतत्वादाविर्भावपरा । आविर्भावमेवाग्रे वक्ष्यति—"आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः" इति ॥५४॥ तद्वाक्ये वसुदेववाक्ये ॥५५॥ न हि तस्या एव भगवान्देवता तस्य सर्वेषां दैवतत्वादित्यरुच्याह—सर्वदेवमयीति । 'सर्वदेवमयो हरिः' इत्युक्तेः सर्वदेवस्वरूपहरेस्तदन्तर्निविष्टत्वात् । कन्यां सुभद्राम् । अनुवत्सरं वत्सरेवत्सरे एकैकम् । अष्टसु वर्षेष्वित्यर्थः । प्रतिवर्षमिति वीप्सा तु न व्याख्येया एकस्मिन्वर्षेऽष्टपुत्रोत्पत्तिप्रसक्तेः । पुत्रसमसंख्यकन्योत्पत्तिप्रसक्तेश्च । ननु वसुदेवेनैतादृशपुत्रनाशदुःखेन गार्हस्थ्यं किमत्यक्तमिति चेदत्रेदं बोध्यम् । हरिर्मदात्मजो भावी तन्मुखदर्शनं मम भविष्यतीत्याशया न तत्याज किञ्चाष्टमपुत्रोत्पत्तिसमयो झटिति भवत्वित्यौत्कण्ठ्येनैव प्रतिवर्षमेकैको गर्भ आधीयते स्मेति भावः ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च क्रूरं निर्दयमपि तं पुनरब्रवीत् इदमब्रवीदिति पाठः क्वचित् प्रत्यग्रवदनाम्भोजः सद्यो विकसितपद्मवत् प्रसादितमुखः सन् प्रहसन् प्रसार्य वदनाम्भोजमिति पाठः स्पष्टः एवं विश्वासाय तं प्रत्यात्मनोऽन्तःप्रसादो बोधितः वस्तुतस्तु दूयमानेन मनसा विशिष्टः ॥ ५३ ॥ हे सौम्य ! हे शान्तप्रकृते ! अन्तः प्रसादबोधनार्थमेव पूर्ववदत्र श्लेषार्थोऽपि न स्पष्टः । यद्वा अत्रापि भयजन्मना सौम्यत्वेन च वीरस्वभावात्त्वय एव दर्शितः पुत्रानिति छलेनाकारप्रश्लेषात् येभ्यः तवाभयमुत्थितं येभ्यो भयं नास्तीति विचारसिद्धतानेव समर्पयिष्ये न तु यस्माद्भयमुत्थितमिति यद्वा यतो यानतिक्रम्य कस्माच्चित्तव भयमुत्थितं भविष्यति तानेव समर्पयिष्यामि ननु भयदानेन प्रवृत्तं तमित्यर्थः "नह्यस्यास्ते भयं सौम्य यद्धि साऽऽहाशरीरवाक् । पुत्रान्समर्पयिष्येऽस्या यतस्ते भयमागतम्" इति

---

१. प्रसन्नवदनाम्भोजो—श्री. वंशी. शुक. प्रहृष्टवदनाम्भोजो—वीर. प्रत्यग्रवदनाम्भोजो—विज. विश्व. । २. विहस—श्री. वंशी. प्रहसन्नुत—वीर. प्रहसन्निद—विज. ज्जीव. । ३. अन्यत्र 'वसुदेव उवाच' पाठो दृश्यते । ४. ह्यस्यास्ते—श्रीधरादयः । ५. यद् वागाहाशरीरिणी—श्री. यद्वै त्वाहाशरीरवाक्—वीर. विज. यद्धि साहाशरीरिणी—इति पाठः यद्धिसाऽऽहाशरीरवाक्—ज्जीव. । ६. प्रथमोऽध्यायः—विज. । ७. स्वसुर्व—श्रीधरादयः सुहृद्वधा—ज्जीव. वीर. विज. । ८. पुत्रान्सा सुषुवे वीर. ।

पाठः क्वचित्, उत्थितमित्यत्रागतमिति क्वचित् ॥ ५४ ॥ सुहृदस्तद्विशेषस्य भगिन्या वधात् सुहृच्छब्दप्रयोगश्च मय्यस्याः सौहृद्यमप्यस्तीति वधनिवृत्तिहेतुं तद्भावनाविशेषमपि सूचयति—किञ्च तद्वधान्निवृत्त्या सुहृदामन्येषामपि वधान्निवृत्त इति सूचयति—देवकादिभिः सह युद्धापत्त्या तेषां वधसम्भवात् स्वसुरिति क्वचित्पाठः तद्वाक्येति तैर्व्याख्यातं तत्रोपपत्तियुक्ततेत्यर्थः । सारशब्दो हि बलवाची बलं च वचनस्य युक्ततेति यद्वा सारं सारत्वम् अव्यभिचारित्वमित्यर्थः । श्रीदेवक्याः वधान्निवृत्त इतीयन्मात्रेणापि प्रीत इति श्रीवसुदेवस्य महामहत्त्वव्यञ्जकं प्रशस्य परमो बुद्धिमान् सारग्राही कृपाशीलोसीत्येवं स्तुत्वा प्रकर्षेण गीतवाद्यादिना विशत् इदमपि तद्विश्वासजननार्थमेव ॥ ५५ ॥ अथेति माङ्गल्ये काले उपावृत्ते कतिपयकाले गते सतीत्यर्थः । "पुरैव वसुदेवो भूद्विहायाभ्यागतां जराम्" इत्यादि श्रीविष्णुपुराणोक्तेः । "वृद्धौ तवाद्यपितरौ" इत्यादि श्रीहरिवंशेप्यक्त रोक्तेरनुसारेण प्रायो वार्द्धक्यान्तिके श्रीभवदाविर्भावात् सर्वेषां देवतादानामपि देवतेति महाभगवच्छक्तित्वात् तथा च श्रीविष्णुपुराणे "त्वं परा प्रकृतिः सूक्ष्मा" इत्यादिबहुतरं सर्वदेवकृतस्तोत्रम् अयं भावः वसुदेवशब्देन तावद्भगवत्प्रकाशहेतुः शुद्धसत्त्वमुच्यते यथोक्तं चतुर्थे श्रीशिवेन—

सत्त्वं विशुद्धं वसुदेवशब्दितम् यदीयते तत्र पुमानपावृतः ।
सत्त्वे च तस्मिन् भगवान् वासुदेवो ह्यधोक्षजो मे नमसा विधीयते" ॥

इति तद्रूप एवाऽयं श्रीमानानकदुन्दुभिः यथोक्तं नवमे "वसुदेवं हरेः स्थानं वदन्त्यानकदुन्दुभिम्" इति अतः श्रीदेवक्यपि तत्सम्पत्तिरूपैवेति कन्यां सुभद्राम् अनुवत्सरमेव प्रत्यब्दमेकैकश इत्यर्थः । तच्च सत्वरश्रीभगवदवतारार्थम् ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवं दर्शयितुं पूजोपयुक्तं वाक्यमाहेत्याह—हृष्टेति । अन्तर्भावितण्यर्थः प्रहृष्टः प्रहृष्टं विकासितं बलाद्वदनाम्बुजं येन तथाभूतः वसुदेवः दूयमानेन उपतप्तेन मनसा प्रहसन् बहिर्हसन् निर्लज्जं कंसं प्रतीदं वक्ष्यमाणं वाक्यमब्रवीत् ॥ ५३ ॥ तदेवाह—नेति । हे सौम्य ! तवास्याः स्त्रियाः सकाशाद्भयं मृत्युभयं नास्ति हि किन्त्वस्याः पुत्रादिति भावः । यत् येभ्योऽन्याः पुत्रेभ्यः ते तव भयमशरीरिणी वागाह यतो येभ्यश्च ते भयमुत्थितं समुपस्थितं तान् पुत्रानहं तुभ्यं समर्पयिष्ये दास्यामीति त्वं तु तान् जहि मा वा न तु तत्र मेऽपराध इति भावः ॥ ५४ ॥ ततस्तस्य वसुदेवस्य वाक्यसारविद्वाक्याभिप्रायं जानन् कंसः सुहृदो भगिन्या वधान्निववृते न्यवर्तत ततो वसुदेवोऽपि प्रीतस्तं कंसं प्रशस्य स्वगृहं प्राविशत् ॥ ५५ ॥ अथ काले गर्भधारणयोग्यकाले उपावृत्ते समुपस्थिते सति सर्वदेवताप्राया देवतांशत्वात्तत्तुल्या देवकी प्रतिवत्सरम् अष्टौ पुत्रान् एकां कन्यां च सुषुवे ॥ ५६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रत्यग्रं सद्यस्कं नूतनं वदनाम्बुजं यस्य स तथा "प्रत्यग्रमुक्तं सद्यस्कम्" इति हलायुधः । दूयमानेन मनसेति अन्तस्तापं च सूचयति–प्रहसन्निति बहिः प्रसादम् इदं महतां लक्षणम् ॥ ५३ ॥ यावद्बोधेनाप्युक्तसंवादं विज्ञाय यथा संवादीस्यात्तथा प्रत्येतुं वक्ति–न ह्यस्या इति । यतो देवक्याः ॥ ५४ ॥ अत्र कंसचरितकथनव्याजेन संसारस्यानर्थरूपत्वं वर्णयति शुकः–सुहृत्सहोदरीभार्यावधोपरमात् प्रीतः कंसं प्रशस्य ॥ ५५ ॥ सर्वा देवता यस्यां सन्निहिताः सा तथा अनुवत्सरं प्रतिवत्सरम् ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यतो येभ्यस्त्वभयमुत्थितं तान् न तु यस्माद्भयमुत्थितं तम् इति गूढोऽभिप्रायः ॥ ५४ ॥ वाक्यस्य सारः स्थिरता तद्वित् ॥ ५५–६२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वान्तः प्रसादज्ञापनार्थं प्रत्यग्रं स्निग्धीकृतं वदनाम्भोजं येन सः दूयमानेन सन्तापपीड्यमानेन मनसा युक्तः ॥ ५३ ॥ अस्याः सकाशात्ते भयं नास्ति किन्त्वस्या अष्टमात् पुत्रात् यद्यथा अहन्तु पुत्रानष्टावेव समर्पयिष्ये यतः पुत्रात्ते भयमुत्थितं स वा वध्यतामष्टावेव वा वध्यन्तामिति भावः ॥ ५४ ॥ वाक्यस्य सारः सत्यत्वं वसुदेवो मिथ्या न ब्रूते इति सर्वथा जानातीत्यर्थः । तवेदं धर्मशीलत्वं भुवि प्रकटीभूतमिति प्रशस्य ॥५५॥ सर्वेषां देवादीनामपि देवता भगवन्मातृत्वात् पूज्यां कन्यां सुभद्राम् अनुवत्सरमष्टसु वत्सरेष्वित्यर्थः । विभक्त्यर्थेऽव्ययीभावः । कन्याञ्च काले प्रतिवर्षमिति वीप्सा तु न व्याख्येया एकैकस्मिन् वर्षे एवाष्टपुत्रोत्पत्तिप्रसक्तेः । अत्र कारणमग्रे व्याख्यास्यते ॥ ५६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वभावात् ज्ञानातिशयाच्च प्रसन्नवदनाम्भोजः दौरात्म्यं ज्ञात्वा प्रहसन् अहो खलानां दौरात्म्यमित्येवमुपहसन् किं भविष्यतीति मनसा दूयमानेन नृशंसं निष्ठुरं निरपत्रपं निर्लज्जं पूज्यात् पूजाग्राहकमिदमब्रवीत् ॥ ५३ ॥ यद्यप्यष्टमादेकस्मात्तव मृत्युर्विहितो नान्येभ्यस्तथापीतरेतरसङ्कलनया सर्वेप्यष्टमाश्च तर्हि पुत्रान् सर्वान् समर्पयिष्ये यतो येभ्यः ॥ ५४ ॥ निववृते निवृत्तः

तस्य श्रीवसुदेवस्य वाक्ये यो सारः सत्यता तद्वित् ॥ ५५ ॥ सर्वस्य विष्णोर्मातृरूपा सर्वो विष्णुर्वोपास्यरूपा देवता यस्याः सा काले प्रसवकाले उपावृत्ते तत्तज्जन्मनिमित्ततया प्राप्ते अनुवत्सरं प्रतिसंवत्सरमेकैकक्रमेण अष्टौ पुत्रान् प्रसुषुवे कन्यां च ॥ ५६ ॥

श्रीसुबोधिनी

पूजयित्वा विज्ञापनां कृतवानित्याह **प्रसार्येति**। स्वस्य **वदनाम्भोजं प्रसार्य** विकसितं कृत्वात्मानमप्रतारकं हितं च ज्ञापयित्वाधिष्ठानस्य दुष्टत्वादारोपिता **देवता** तत्र स्थास्यति न वेति सन्देहाद् **दूयमानेन मनसा** दुःखाविष्टेनान्तःकरणेनोपलक्षितोपि तदाकारसङ्गोपनार्थं **प्रहसन्** तावत्यर्थे किमेतावत् क्रियत इति वदन्नेवेदं वक्ष्यमाणम**ब्रवीत्**। अधिष्ठाने दूषणद्वयं येन देवता न सन्निहिता भवति। क्रौर्यलज्जाभावौ क्रोधकामनिदानभूतौ। तावाह **नृशंसं निरपत्रपमिति**। कामसेवका एव निरपत्रपा भवन्ति। 'पृष्ठीकृतह्रीभया' इतिवाक्यात्। **नृशंसः** क्रूरात्मा तामसक्रोधयुक्तः ॥ ५३ ॥ आत्मीयतया तं गृहीत्वा हितमिवाह **न चास्यास्य** इति। अस्याः सकाशात् ते **भयं न** चास्ति चकारान्मत्तो भविष्यति वा। वाणीप्रामाण्यादेव। अतो निरपराधवधो न कर्तव्यः। **सौम्येति**सम्बोधनं सौम्यो भव विज्ञापितं कुर्विंतिबोधनार्थम्। अत्रार्थे प्रमाणमाह **यद्धि त्वाहेति**। एतदुभयत्रापि प्रमाणम्। अतोस्याः **पुत्रान् तुभ्यं समर्पयिष्ये**। **यतः** पुत्राद्वाक्यतस्ते **भयं** सम्यगुत्थितम्। निवेदिते त्वदीयस्त्वां न मारयिष्यति। कापट्य-शङ्काभावाय बहुवचनम् ॥ ५४ ॥ एवं दृष्टादृष्टोपायस्य कृतत्वादङ्गीकृतवानित्याह **सुहृद्वधादिति**। विवेक उत्पन्ने विचारप्रवणं चित्तं जातमतः सुहृदियं भगिनी किमिति हन्तव्येति **सुहृद्वधान्निववृते**। वसुदेवः प्रतारयतीति तु शङ्का नास्ति यतस्तद्वाक्यस्य **सारं** सत्यमयं जानाति वसुदेवो न कदाचिदप्यनृतवादीति। अत एव भगवदवतारः। निवृत्तः रथं प्रेरयित्वा गृहे नीतावित्यध्यवसीयते। अत एव वसुदेवोपि तन्मनोगतकालुष्यस्य गतत्वात् **प्रीतः सन् प्रशस्य** पुनः स्तुत्वा मार्गस्यातीतत्वाद् **गृहं प्राविशत्**। एवमनर्थ-समाधानं कथञ्चित् कृतम् ॥ ५५ ॥ एतद्भगवतैव कृतमिति वक्तुमग्रिमं कार्यं समीचीनमेव जातमित्याह षड्भिरथेति। **अथ** तदनन्तरमेव शीघ्रमेव। **काल** ऋतुसमये। **उपावृत्ते** जातेष्टवर्षमध्ये सर्वानेव **पुत्रान् सुषुवे**। कन्यायामासक्तिर्जातेति **कन्यां च**। **अनुवत्सरमिति**। प्रतिवत्सरमेकैकः पुत्रो जातः। पूर्णगर्भाश्च ते। एवं निरुपद्रवतया प्रसवे हेतुः **सर्वदेवतेति**। **सर्वदेवता** रक्षणार्थं यत्र। कन्या नवमी। चकारस्तज्ज्ञापकः। प्रसवे न कोपि संवत्सरो व्यवहित इत्युपसर्गः ॥ ५६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः।

न चास्यास्त इत्यत्र—**सम्यगुत्थितमिति**। अत्र सम्यगिति कंसाशयकथनमात्रं न तु मूलस्थपदस्यार्थः ॥५४॥ अथेत्यत्र—आसक्तिर्जातेति प्रथमचकारार्थः। **नवमीति** द्वितीयचकारार्थः। **तज्ज्ञापकः** सुभद्राज्ञापक इति प्रतिभाति ॥ ५६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

प्रसार्येत्यत्र—**उपलक्षितोपीति**। 'लक्ष दर्शनाङ्कनयो' स्तादृशान्तःकरणेनाङ्कितस्तत्सहित इत्यर्थः सहार्थे तृतीया ॥ ५३ ॥ **न चास्या** इत्यत्र—अत्र वसुदेववाचकपदाभावात्तत्समुच्चयो न सम्भवतीति चकारस्यार्थान्तरमाहु**र्भविष्यति वेति**। अधुना नास्त्यग्रेपि न भविष्यतीत्यर्थः। यस्मात्पुत्राद्भय तस्याष्टमस्य समर्पणाभावा**द्यत** इत्यस्यार्थान्तरमाहु**र्वाक्यत** इति ॥ ५४ ॥ अथेत्यस्याभासे—षट्-सङ्ख्यायास्तात्पर्यमाहु**र्भगवतैवेति**। **वसुदेवेवतीर्णेन** वासुदेवेनेत्यर्थः ॥ ५६ ॥

बुभुत्सुबोधिका

प्रसार्येत्यत्र दुष्टत्वादिति नृशंसत्वनिरपत्रपत्वाभ्यां दुष्टत्वात्। संदेहात् दूयमानेनेति न तु भयात् दूयमानेन, 'गतभीः प्रभावि'दिति वाक्यात्। वदन्निवेति 'हासो जनोन्मादकरी च माये'ति वाक्यादुन्मादशब्दं कुर्वन्निव। हासान्तर्गतः शब्दः। क्रोध-कामेति क्रोधकामाभ्यां निधानं ययोस्तौ क्रोधकामनिधानौ। तथाभूतौ। कामसेवका इति कामसेवानन्तरं निरपत्रपत्वम्। 'लज्जा सापत्रपान्यत'' इत्यमरः। क्रूरात्मेति तामसक्रोधयुक्तत्वानंतरं क्रूरात्मत्वम्। आर्थक्रमः। नृशंसपदसूचितं क्रोधविशेषणं तामसेति ॥५३॥ न चास्यास्ते इत्यत्र भविष्यति वेति द्वितीया कोटिः। मत्तोस्ति भविष्यति वेति द्वितीया कोटिः। सौम्यो भवेति 'सौम्ये' त्यस्य दिग्विजयिनि पापे चानन्वयाद्भवेत्यध्याहृत्य वाक्यान्तरं न वाधकम्। सम्बोधनार्थमिति सम्बोधनं च सम्यक्बोधः तत्प्रकृत्यर्थं प्रति विशेष्यं, क्रियां प्रति विशेषणमिति मनोरमायां सिद्धान्तः। राम मां पाहीति वाक्यस्य रामसम्बन्धिसम्बोधनविषयो मत्कर्मकं रक्षणमर्थः। एवं प्रकृते सौम्यसम्बन्धिविज्ञापनाविषयः करणमर्थः। एवं च रामसम्बन्धीत्यादौ स्वविषयरक्षणादिकर्तृत्वं सम्बन्धः। स्वं सम्बोधनम्। यद्धैत्वाहेतीति साहेत्यपि पाठः, त्वाहेति पाठः। एतदिति वाक्यम्। उभयत्रेति पुत्रवाक्याभ्यां भययोः। सम्य-गुत्थितमिति सम्यगिति कंसस्याशयकथनमात्रम्, न तु मूलस्थपदस्यार्थः। तथा च न्यूनपूरणं ज्ञेयम्। 'न न्यूनादन्यपूरणमिति प्रथमस्कन्धसुबोधिनीकारिकायाः, 'लक्षणां नैव वक्ष्यामी'ति च कारिका। निवेदित इति निवेदिते पुत्रे पुत्रस्त्वदीयः। कापट्येति यस्मात् पुत्राद् भयं तस्याष्टमस्य समर्पणाभावात् कापट्यं व्याजः शाठ्यं अनृजत्वमिति यावत्। बहुवचनमिति 'पुत्रा'निति बहुवचनम् ॥५४॥ सुहृद्वधादित्यत्र दृष्टादृष्टेति सामदानदंडभेदशास्त्रे दृष्टं दानात्मकम्। प्रतारयतीति प्रतारको धूर्तः। न्यूनावन्यत्पूरयन्ति

स्म निवृत्तो रथमिति। नन्विदमार्थिकं कुतो नेति चेन्न। प्रपञ्चार्थत्वमुभयोरेकतरस्य न्यूनादन्यपूरणस्यार्थिकस्य वेति। प्रपञ्चो दृष्टः। उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानीति गमनस्य न्यायशास्त्रे यथा। यद्वा 'जगुः किन्नरगंधर्वा' इत्यत्र नार्थापत्तिप्राप्तिरतो न्यूनपूरणं पृथग्वक्तव्यम्। न हि 'जगुः किन्नरे'त्यत्र पीनो देवदत्तो दिवा न भुंक्त इत्यत्र पीनत्वानुपपत्तिवदनुपपत्तिरस्ति। अतो न्यूनपूरणं किन्नरगंधर्वविशेषणं स्वत एवोल्लसितहृदया इति। अध्यवसीयत इति अन्यथा मार्गंगच्छदित्युक्तं स्यादिति भावः। मार्गं उत्तरदेशं प्राविशदिति गृहस्य कर्मतानुपपत्त्या च। पुनः स्तुत्वेति 'पूजयामास तं शौरि'रिति पूजनस्य स्तवनरूपस्य कृतत्वात्। गृहप्रवेशकर्त्रँ ककर्तृकप्रशंसनं दृष्टोपायानंतरं प्रशंसनं पुनःस्तवनम्॥ ५५॥

अथ काल इत्यत्र एवमनर्थेति पूर्वोक्तप्रकारेणानर्थस्य वधार्थं प्रवृत्तेः समाधानं कथञ्चित् परमार्थोपदेशप्रकारेणासकलं कृतम्। असाकल्यं च क्रोधस्यावशिष्टत्वात्। 'क्रोधस्यान्तं फलोदयात्'। शान्तिरूपं फलं युद्धाकरणाञ्च जातम्। भगवतेवेति वसुदेवेवर्तार्णेन वासुदेवेनैवेत्यर्थः। मनसि सर्वतो निवृत्तव्यापारे स्वयमुपलब्धनिजसुखानुभव इदमेव ब्रह्मज्ञानमिति सर्वत्रप्रसिद्धोपदेशाधिकरणभाष्ये ब्रह्मज्ञानं ज्ञानिनामिवात्र वसुदेवे विशुद्धसत्त्वं स्वस्वरूपं, तृतीयोत्पन्ने जीवाभाववशात्र विशुद्धसत्त्वान्तर्गत आत्मा। परमार्थः तु भगवत्प्रेरणया प्राप्तो न स्वरूपं किन्तु भगवान्, स च वसुदेवे वासुदेव इत्युच्यते, अत एवैवकारः। विशुद्धसत्त्वशरीरं तु ब्रह्माण्ड आगमनेन शरीरत्वेन कार्यकारणभावात्। एवं च विशुद्धसत्त्वानुभवो न तु परमार्थस्य स्वत्वेन। समीचीनमेवेति ननु षड्बालकवधः अग्रे कंसवध इति कथं कार्यं समीचीनमिति चेन्न। षड्बालकवधः स्वस्य भगवत्त्वायान्यथा ब्रह्मत्वं परमात्मत्वं वा स्यात्। वेदे ब्रह्मेति पठ्यते स्मृतौ परमात्मेति पुराणे भगवानित्युपपादितत्वं समीचीनस्येति। किञ्च ब्रह्माण्डे आगमनेन शरीरित्वेन कार्यकारणभावात् षण्णां बालकानां शरीरित्वे सिद्धे शरीरस्यांशाकर्षणे प्रतिबन्धकत्वात् षड्बालकवधः। अध्यायार्थत्वाञ्च। कंसवधस्तु वासुदेवे नित्यक्रीडास्थक्लेशः प्रतिबन्धकशरीरनाशेनाग्रिमलीलार्थं मुक्तिः, 'भयात् कंस' इति वाक्यात्। 'वासुदेवः परं ब्रह्म एष छन्दसि पठ्यत' इति ज्योतिषोक्तेः। एवं वेदे वासुदेवः वेदान्ते चतुर्व्यूह' इति सङ्कर्षणे मुक्तिः। भूभारहरणस्य सङ्कर्षणकार्यत्वात्। वेदवेदान्तसारे श्रीभागवते रूपद्वये मुक्तिरुक्ता। एवकारस्तु नित्यक्रीडानिविष्टानां धर्मकल्पादेरप्यभीष्टत्वात्। षड्भिरिति जातेष्वनुकस्य सङ्कर्ष तात्पर्यस्य जन्मप्रकरण आवश्यकत्वात् षट्श्लोकतात्पर्यार्थः। वसुदेवप्राणश्लोकैर्यः परमार्थः शुकेनोक्तः स षड्गुण इति। शुकस्य 'सभगवा'नित्यत्र भगवत्साहित्योक्तेरिदानीं शुकोक्तौ वसुदेवोक्त्यैक्यं भवति प्राणश्लोकैकपरमार्थो भगवान् 'अत एव प्राण' इति व्याससूत्रादिति शुभम्। आसक्तिर्जातेति। बृहदारण्यकसमाप्तौ 'अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलोदनं पाचयित्वा सर्पिष्मन्तमश्नीयात् तामीश्वरौ जनयितवा' इति श्रुतेः। 'तां' दुहितरं 'जनयितवै' जनयितुं 'ईश्वरौ'। प्रथमचकारार्थः। अनुक्तसमुच्चये चकारः। प्रोपसर्गार्थमाहुः पूर्णेति। सर्वेति सर्वा देवता यत्रेति विग्रहः सप्तान्नब्राह्मणोक्ताः वाङ्मनःप्राणाः 'एवं विमृश्ये'तिश्लोकव्याख्याने उक्ताः, ब्रह्मविद्यात्वाद् वा देवक्या ब्रह्मविष्णुशिवरूपा देवता प्रतिपाद्यत्वेन यत्र। चकार इति द्वितीयचकारः। तज्ज्ञापक इति 'पुत्रान् कन्यां चाष्टौ प्रसुषुवे' इत्यन्वयाभावद्योतकः। अष्टपुत्रप्रतिपादकवाक्यविरोधात्। सुभद्राज्ञापक इति वा प्रतिभाति। इत्युपसर्ग इति इत्यनूपसर्ग इत्यर्थः॥ ५६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दूयमानेन भयेन कम्पमानेन मनसा युक्तोऽपि तस्य विश्वासाय प्रसन्नवदनाम्भोजः सन् प्रहसन् वसुदेव इदं वक्ष्यमाणं नृशंसं क्रूरं निरपत्रपं निर्लज्जं कंसं प्रत्यवोचदित्यन्वयः। अत्र 'प्रसार्य वदनाम्भोजम्' इति, 'प्रत्यग्रवदनाम्भोज' इति, 'प्रहृष्टवदनाम्भोज' इति पाठत्रयमन्यदप्यस्ति॥ ५३॥ "आकाशवाणीं श्रुत्वा भयेन त्वमिमां हंसि, तत्र यत् यथा अशरीरवाक् त्वाम् आह तथा वै निश्चितम् अस्याः सकाशात् हि शब्दात् मत्तोऽपि ते तव भयं नास्ति। अतः सौम्यो भूत्वा अस्या हननं मा कार्षीः" इत्याशयेन सम्बोधयति—सौम्येति। नन्वेतद्धननेऽग्रे पुत्रोत्पत्तिर्न स्यात्ततो भयनिवृत्तिः स्यादेव, अन्यथा सा कथं स्यात्तत्राह—पुत्रानिति। वागनुसारेण यतो येभ्यः पुत्रेभ्यस्ते भयमुत्थितं तानस्याः पुत्रान् सर्वानेव तुभ्यं समर्पयिष्ये प्रदास्यामि, त्वं तु तान् जहि मा वा। न तु तत्र ममाग्रहः अष्टमो हन्तेत्युक्ते अन्योन्यापेक्षया सर्वेऽप्यष्टमा भवेयुरिति बहुवचनम्। यतस्ते अभयं भयाभाव उत्थितं निश्चितं तानेव समर्पयिष्ये। न तु यस्मादष्टमाद्भयं तमित्यकारप्रश्लेषादष्टमं भगवन्तमददतोऽपि नानृतत्वमिति ज्ञेयम्॥ ५४॥ तस्य वसुदेवस्य वाक्ये यः सारः उपपत्तिः सत्यत्वं च तं वेत्तीति तथाभूतः कंसः स्वसुः भगिन्याः वधान्निववृते निवृत्तो जातः। 'सुहृद्वधात्' इति पाठान्तरम्। ततो मनोरथस्य जातत्वात् प्रीतः सन् वसुदेवोऽपि तं कंसं 'महाविवेकी सारग्राही भवान्' इति प्रशस्य गृहं प्राविशत् स्वगृहमागतः॥ ५५॥ अथानन्तरं काले गर्भधारणप्रसवयोग्यकाले उपावृत्ते समुपस्थिते सति देवकी अनुवत्सरमष्टौ पुत्रान् नवमीं कन्यां च सुभद्राख्यां सुषुवे। भगवन्मातृत्वेन सर्वेषां ब्रह्मादीनामपि देवतावत्पूज्या साऽतस्तस्या भाग्यं किं वक्तव्यमित्याशयेन देवकीं विशिनष्टि—सर्वदेवतेति॥ ५६॥

अन्वितार्थप्रकाशिका

प्रसन्नेति। दूयमानेन संतप्यमानेन मनसा युक्तोऽपि कंसविश्वासाय प्रसन्नं वदनाम्भोजं यस्य विहसन्निव च सः नृशंसं क्रूरं निरपत्रपं निर्लज्जं कंसम् इदमब्रवीत्। पुनरब्रवीदित्यपि पाठः॥ ५३॥ न हीति। हे सौम्य! यथा अशरीरिणी वागाह

तथा हि निश्चितम् अस्याः सकाशात्ते भयं नास्ति अष्टमगर्भादेव मरणोक्तेः। तत्र यद्यपि अष्टमादेव मरणमुक्तं तथापि अष्टमो हन्ता इत्युक्तेऽन्योन्यापेक्षया सर्वेऽप्यष्टमा भवेयुरिति तव शङ्का चेदतः येभ्यः पुत्रेभ्यः ते तव भयमुत्थितं तानन्यानपि अस्या उद्भूतान् पुत्रान्सर्पयिष्ये। वस्तुतोऽकारप्रश्लेषात् येभ्यस्तवाभयं तानेवार्पयिष्ये इति नानृतोक्तिदोषः। प्राणसंकटेऽनृतोक्तेरपि निषेधाभावाच ॥ ५४ ॥ स्वसुरिति। तस्य वसुदेवस्य वाक्ये सारः सत्यत्वं तद्विद्वसुदेवो मिथ्या न वदतीति जानन् कंसः स्वसुर्वधात् निववृते निवृत्तोऽभूत्। वधनिवृत्त्या प्रीतो वसुदेवोऽपि तं कंसं प्रशस्य गृहं प्राविशत् ॥ ५५ ॥ अथेति। अथ कतिपये काले उपावृत्ते गते सति विष्णुपुराणे वसुदेवस्य वार्द्धके भगवदवतारोक्तेः सर्वेषां देवादीनामपि देवता पूज्या देवकी वसुदेवस्य विशुद्धसत्त्वरूपत्वेन देवक्यास्तत्सम्पत्तिरूपत्वात्। अनुवत्सरम् अष्टसु वत्सरेषु विभक्त्यर्थेऽव्ययीभावः। अष्टौ पुत्रान् कन्यां सुभद्रां च प्रसुषुवे ॥५६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति। एवं, यावदात्मनिदर्शनं यावद्बुद्धिप्रसरं, स्वप्रज्ञाप्रसरावधीत्यर्थः। विमृश्य निश्चित्य, विचार्येति यावत्। शौरिर्वसुदेवः, पापं पापयुक्तं, तं कंसं, बहुमानपुरःसरं बहुमानप्रदानपूर्वकम्, पूजयामास इत्येन वि मृष्टमर्थं तत्संमतीचकार वै ॥५३॥ प्रहृष्टेति। प्रहृष्टं बलात् विकासितं वदनाम्भोजं येन सः, अन्तर्भावितण्यर्थोऽत्र हृषिः। एवंभूतः वसुदेवः, दूयमानेन परितप्तेन, मनसा सहितः सन्नपीति शेषः। विहसन् बहिर्हासमाचरन्, निरपत्रपं निर्लज्जं, नृशंसं क्रूरं, कंसं प्रतीति शेषः। इदं वक्ष्यमाणं वाक्यम्, अब्रवीत् ॥ ५४ ॥ तदेवाह। नेति। हे सौम्य, ते तव, अस्याः स्त्रियः सकाशात्, भयं मरणभयं न च, नैवास्तीत्यर्थः। किं त्वस्याः पुत्रादेवास्तीति भावः। यत्तेभ्योऽस्याः पुत्रेभ्यः, ते तव, भयम् अशरीरिणी वाक्, आह। तत्सत्यतासमीक्ष्ययेति शेषः। यतो येभ्यः, ते भयं समुत्थितं, तान् अस्याः पुत्रान्, समर्पयिष्ये तुभ्यं दास्यामि। 'यद्वि साहाऽशरीरवाक्' इति पाठे, हे सौम्य, यत् हि सा, अशरीरवाक् आह, तत् भयम्, अस्याः सकाशात्, ते तव, न च अस्ति। यतो येभ्यः, अस्याः पुत्रेभ्य इति शेषः। ते तव, भयं समुत्थितम् अष्टमो हन्तेत्युक्तेऽन्योऽन्यापेक्षया सर्वेऽप्यष्टमा भवेयुरित्युद्भूतमुद्भूतं पुत्रं, ते समर्पयिष्ये। कश्चित्तु यद्वै त्वाहाशरीरवागित्यपि पाठः ॥ ५५ ॥ सुहृदिति। ततः, तद्वाक्यसारवित् वसुदेववाक्याभिप्रायं जानन् कंसः, सुहृद्वधाद्भगिनीहननात्, निववृते संन्यवर्तत। ततः, वसुदेवः अपि, प्रीतः सन्, तं कंसं, प्रशस्य, गृहं स्वभवनं, प्राविशत् ॥ ५६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स्वसुर्वधादिति : १०–१–५५

नैतत्कदाचिदपि संभवतीति मत्त्वा कार्ये न जातु विदुषैवमुदासितव्यम्।
यत्ने कृते सति हरेः कृपया सुसिद्ध्यत्येतत्स्फुटं सुफलके वसुदेवकृत्ये ॥ ४१ ॥

हिन्दी अनुवाद (कर्दमक्षमा)

परीक्षित्! कंस बड़ा क्रूर और निर्लज्ज था; अतः ऐसा करते समय वसुदेवजीके मनमें बड़ी पीड़ा भी हो रही थी। फिर भी उन्होंने ऊपरसे अपने मुख-कमलको प्रफुल्लित करके हँसते हुए कहा—॥ ५३ ॥ वसुदेवजीने कहा—सौम्य! आपको देवकीसे तो कोई भय है नहीं, जैसा कि आकाशवाणीने कहा है। भय है पुत्रोंसे, सो इसके पुत्र मैं आपको लाकर सौंप दूँगा ॥ ५४ ॥ श्रीशुकदेवजी कहते हैं—परीक्षित्! कंस जानता था कि वसुदेवजीके वचन झूठे नहीं होते और इन्होंने जो कुछ कहा है, वह युक्ति-संगत भी है। इसलिये उसने अपनी बहिन देवकीको मारनेका विचार छोड़ दिया। इससे वसुदेवजी बहुत प्रसन्न हुए और उसकी प्रशंसा करके अपने घर चले आये ॥ ५५ ॥ देवकी बड़ी सती-साध्वी थी। सारे देवता उसके शरीरमें निवास करते थे। समय आनेपर देवकीके गर्भसे प्रतिवर्ष एक-एक करके आठ पुत्र तथा एक कन्या उत्पन्न हुई ॥ ५६ ॥

कीर्तिमन्तं प्रथमजं कंसा[1]यानकदुन्दुभिः। अर्पयामास कृच्छ्रेण सोऽनृतादतिविह्वलः ॥ ५७ ॥
किं दुःसहं तु[2] साधूनां विदुषां किमपेक्षितम्। किमकार्यं कदर्याणां दुस्त्यजं किं [3]धृतात्मनाम् ॥ ५८ ॥
दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थितिम्। कंसस्तुष्टमना राजन् प्रहसन्निदमब्रवीत् ॥ ५९ ॥
[4]प्रतियातु कुमारोऽयं न ह्यस्मादस्ति मे भयम्। अष्टमाद् [5]युवयोर्गर्भान्मृत्युर्मे विहितः किल ॥६०॥

कर्दमक्षमा

अन्वयः—अनृताद् अतिविह्वलः सः आनकदुन्दुभिः प्रथमजं कीर्तिमन्तं कंसाय अपर्यामास ॥ ५७ ॥ साधूनां तु किं दुःसहं विदुषां किं अपेक्षितं कदर्याणां किं अकार्यं धृतात्मनां किं दुस्त्यजम् ॥ ५८ ॥ राजन् शौरेः तत् समत्वं दृष्ट्वा च सत्ये एव व्यवस्थितिं दृष्ट्वा तुष्टमनाः कंसः प्रहसन् इदं अब्रवीत् ॥ ५९ ॥ अयं कुमारः प्रतियातु अस्मात् मे न हि भयं अस्ति युवयोः अष्टमाद् गर्भात् मे मृत्युः किल विहितः ॥ ६० ॥

---

१. पुत्रमा—विज. । २. नु—श्री. वंशी. । ३. किमृतात्मनां—विज. । ४. यवीयांस्तु—इति कस्यचित् । ५. थोः पुत्रान्मृ—वीर. विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

मृत्यवे पुत्रं कथमर्पितवानित्यपेक्षायामाह–किं दुःसहमिति। साधूनां सत्यसंधानाम्। पुत्रलालनसुखापेक्षा कथं त्यक्तेत्यत आह –विदुषामिति। भगवानेव तत्त्वं नान्यदिति जानतामित्यर्थः। ननु स्वयं नीते सति कंसो बालं न हन्यादिति मत्वा नीतवानिति किं न स्यादिति नेत्याह—किमकार्यमिति। ननु देवकी कथं पुत्रं तत्याजेत्यत आह—दुस्त्यजमिति। चित्ते धृत आत्मा हरिर्यैस्तेषाम् ॥ ५८–६१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

“द्वादशेऽहनि पिता नाम कुर्यात्” इति श्रुतेरजातेऽपि नामकरणे कीर्त्तिमदित्यादीनि तेषां भावीनि कल्पांतरीयाणि वा श्रीयोगिराजशुकदेवेनोक्तानीत्यदोषः। यद्वा—नामकर्मोत्तरं कंसाय ददावित्यर्थः। अतिविह्वलः अतिविक्लवः 'विक्लवो विह्वलः स्यात्तु' इत्यमरः। “वाचा विचलितं येन सुकृतं तेन हारितम्” इति स्मरणात्। “यदुक्त्वा विनिवर्त्तेत न तदास्यं गुदं हि तत्। श्लेशे स्त्यनुगः स्त्री स्याच्चटकेशेन भाषितम्” इत्यभियुक्तोक्तेश्च ॥ ५७ ॥ मारणाय पुत्रार्पणम्। “प्रजासवः प्राणभृतो हि ये ते” इति वक्ष्यमाणत्वादत्यसह्यमित्याशयेनाह—मृत्यवे कंसाय। “साधू रम्ये सज्जने च पुंसि सत्यपरे हरौ” इति धरणिदेवः। सत्यसंधानां सत्यप्रतिज्ञानाम् 'संधा संधिप्रतिज्ञयोः' इति धरणिः। तत्त्वं सत्यम्। अकार्यम् अकर्त्तव्यम्। कदर्याणां कुसंगिनां दरिद्राणां वा ॥५८॥ शौरेर्वसुदेवस्य तत्पुत्रार्पणरूपं समत्वं द्वन्द्वसहिष्णुत्वं पुत्रे ममत्वाभावात्। इदं वक्ष्यमाणम् ॥५९॥ प्रतियातु स्वगृहमिति शेषः ॥६०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कीर्तिमन्तमिति। मरीचित उत्पन्नत्वेन प्राक्तनतृतीयजन्मनि तेषामेतदादीनि नामानि स्मरादीनि चेति षड्गर्भानयने स्वामिभिर्व्याख्यास्यते। यद्वा यदा ते सुतलत आनीतास्तदा श्रीकृष्णेनैव कीर्तिमदादिनामानि कृत्वा वैकुण्ठं प्रस्थापिता इति ज्ञेयम्। नवमे चात्र च श्रीवसुदेवपुत्रत्वावस्थायामेव तथाऽनुवादात् सः कृतप्रतिज्ञः अतिविह्वलः परमभीतः ॥ ५७ ॥ ननु वितर्के किन्दुःसहम्? अपि तु सर्वमेवानायासेन सह्यमित्यर्थः। एवमग्रेऽपि अन्यत्तैः तत्र सत्यसन्धानामिति प्रस्तुतोपयोगित्वात्तदीयधर्मविशेष एव निर्दिश्यते न तु तन्मात्रत्वेन साधुत्वमिति लालनेच्छा तु सुतरामेव नास्तीत्यभिप्रायेणावतारयति पुत्रलालनेति, विदुषां किमपेक्षितमित्यनेन दुस्त्यजमित्यादेः पौनरुक्त्यमाशङ्क्यावतारयति–ननु, देवकीति। यद्वा, साधूनां सर्वसहत्वदार्ढ्यार्थं विदुषामित्यादिकं दृष्टान्ततया ज्ञेयम् (१) अत्रापेक्षादुस्त्यजत्वयोरप्राप्तप्राप्तविषयत्वेन भेदः कल्प्यः ॥ ५८ ॥ समत्वं पुत्रार्पणेन शत्रौ मित्रे च तुल्यतां सत्ये प्रतिश्रुत एव व्यवस्थितिं निष्ठां च दृष्ट्वा अस्मान् मम न किञ्चिदप्य (२) पमानं भविष्यतीति विभाव्येति भावः। समत्वमिति विद्वत्ताया- धृतात्मतायाश्चानुवादः यो हि विद्वान् धृतात्मा भवति स समोभवतीति अममत्वमिति पाठेऽपि स एवार्थः सत्ये व्यवस्थितिमिति साधुतायाः चतुर्थन्तु कंसगतमेवेति नानुदितं प्रहासः सन्तोषात् हे राजन्! इत्याश्चर्येण सम्बोधनम् ॥ ५९ ॥ युवयोरिति अन्यस्यां जातोऽपि व्यावर्तितः विहितो विधात्रा किलेति आकाशवाण्याः प्रसिद्धिं द्योतयति तयैवाज्ञप्त इति वा ॥ ६० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा तावत्स्वप्रतिज्ञां पालयन् वसुदेवः प्रथमजम् अग्रजं कीर्तिमन्तं कीर्तिमान् इति नामकं पुत्रं कृच्छ्रेण दुःखेन कंसायार्पयामास तत्र हेतुं वदन् विशिनष्टि अनृतादनृतभाषणादतीव विह्वलः अनृतभाषणरूपपापभयादत्यन्तं विह्वल इत्यर्थः ॥ ५७ ॥ पुत्राऽनुरागं विहाय कथं समर्पयामास? इत्यत्राह–किमिति। साधूनां दुस्सहं दुःखेनाऽपि सोढुमशक्यं किन्त्वस्ति न किमपि सर्वमपि सुसहमेवेत्यर्थः। पुत्रविपत्तिरपि सुसहैवेति भावः। तथा विदुषां स्वात्मपरमात्मयाथात्म्यज्ञानिनां पुंसां किन्तु अपेक्षितं न किमपि शरीरतदनुबन्ध्यादिकमपेक्षितम् नास्तीति भावः। किमुपेक्षितमिति पाठान्तरं तदा विदुषामिति साधूनां विशेषणं कदर्याणाम् उपेक्षितमकार्यं च किमस्तीत्यन्वयः। कदर्यशब्दः क्षुद्रपर्यायः इदं कंसाभिप्रायकं धृतः स्ववशीकृत आत्मा मनो येषां दुस्त्यजं किं देहतदनुबन्ध्यादिकं सर्वं सुत्यजमेवेति भावः ॥ ५८ ॥ दृष्ट्वेति। व्यवस्थितमिति भावे क्तः शौरेर्वसुदेवस्य तत्समत्वं सुखदुःखयोस्साम्यं सत्ये व्यवस्थितं निश्चलत्वं च दृष्ट्वा कंसः तुष्टं मनो यस्य तथाभूतस्सन् हे राजन्! प्रहसन् इदं वक्ष्यमाणमब्रवीत् ॥ ५९ ॥ तदेवाह–प्रतियात्वित्यादि। अयं तव कुमारः प्रतियातु गृहं प्रतिगच्छतु ममास्मात्कुमारात् भयं मृत्युभय नास्ति हि युवयोरष्टमात्पुत्रादेव हि मम मृत्युर्विहितः किल अशरीरवाचेति शेषः ॥ ६० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नाम्ना कीर्तिमन्तम् ॥ ५७ ॥ स्वात्मनः प्राणनाशेनापि सत्यमेव रक्षन्ति महान्त इत्याशयेनाह—कि दुःसहमिति। कंसोऽसाधुष्वेक इत्याशयेनाह—किमकार्यमिति। कदर्याणाङ्कुत्सितस्वामिनां दरिद्राणां वा वसुदेवः साधुष्वेक इत्याशयेनाह—दुस्त्यजमिति। ऋतात्मनां सत्यस्वभावानाम् ॥ ५८–६० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

कीर्तिमन्तमिति जन्मदिन एव कृतनामकरणमित्यर्थः ॥ ५७ ॥ नन्वनृताद्बिभेतुतमां नाम स्वसाक्षादेव पुत्रवधः कथं सोढव्यः ? तत्राह—किं दुस्सहमिति । नन्वष्टममेकं पुत्रं स्वभार्याप्राणरक्षार्थं समर्पयतुतमां नाम पुत्रान् समर्पयिष्येऽस्या इति निखिलपुत्रार्पणप्रतिज्ञां तदा कंसस्याज्ञां विनैव कथमकरोत् ? गृहस्थस्य तस्य पुत्रमात्रोपेक्षा न युज्यते तत्राह—विदुषामिति । वसुदेवः खलु कर्मिलोक इव नाविद्वानतो भक्तिज्ञानवैराग्यमहोदधेस्तस्य किं पुत्रैरिति भावः । नन्वेतादृशस्य स्वयमेव वधार्थमानीतपुत्रस्य तस्य कंसः कथं पुत्रं हन्तुमर्हतु ? किमत्राप्यार्द्रचित्तो न भवेत् तत्राह—किमकार्यमिति । ननु, तर्हि सर्वदोषपरिहाराय वसुदेवो गार्हस्थ्यमेव किं न तत्याज तत्राह—दुस्त्यजमिति । तेन तद्गार्हस्थ्यमपि त्यक्तुं शक्यमेव केवलं मत्पुत्रत्वं प्राप्स्यतो हरेर्मुखं कदा द्रक्ष्यामीति मनोरथेन गृहे स्थीयते अत एव धृत आत्मा हरिः पुत्ररूपी यैस्तेषां तेनैव हेतुना पुत्रान्तरेष्वपि न स्निह्यते स्म अष्टमपुत्रस्य समयः शीघ्रं भवत्वित्युत्कण्ठयैव प्रतिवर्षमेकैको गर्भ आधीयते स्म बालवधे स्वस्यानुमन्तृत्वलक्षणपापस्वीकारश्चेत्यादि तत्त्वमवधेयम् ॥ ५८ ॥ समत्वं पुत्रेऽपि ममत्वाभावात् सर्वत्र साम्यम् ॥ ५९–६१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुत्रमरणादपि श्रीवसुदेवस्यानृतभाषणं दुःसहमिति सूचयति—सोऽनृतादतिविह्वल इति ॥ ५७ ॥ ननु, पुत्रमरणमपि दुःसहमेवेत्यत आह—किं दुःसहमिति ॥ ५८ ॥ भार्यां पुत्रार्पणप्रतिज्ञया रक्षितवान् पुत्रार्पणेन मम रक्षामपि करोतीति शौरेः समत्वम् ॥ ५९–६१ ॥

श्रीसुबोधिनी

यथैतया पुत्रः प्रसूतस्तथा वसुदेवोपि स्वोक्तं कृतवानित्याह **कीर्तिमन्तमिति** । ज्येष्ठो हि पुत्रः सर्वेषामदेयस्तत्रापि महान् । तादृशमपि दत्तवानिति स्वस्य धर्मनिष्ठतां ज्ञापयितुं **कीर्तिमन्तं प्रथमजमित्युक्तम्** । **कंस** इतिनाम्ना क्रौर्यं ज्ञापितम् । आनकदुन्दुभिरिति सत्यवाक्यत्वे हेतुः । स्वयं गृहीत्वार्पयामास । कृच्छ्रेण कष्टेन शोकं संस्तभ्य । नन्वनृतकथनमप्यधर्मः पुत्रसमर्पणमपि तत्र प्राणसङ्कटेऽनृतं न जुगुप्सितमिति पुत्रमेव कथं न स्थापितवानित्याशङ्क्याह **सोनृतादतिविह्वलः** । यतोयमानकदुन्दुभिः । अस्य पुत्रापेक्षयापि सत्यमेव संरक्ष्यं भगवत्प्रापकम् । पुत्रास्तु देहसम्बन्धिनः । सत्यं तु भगवत्सम्बन्धि । तथा सत्यनृते कृते न भगवत्सान्निध्यं भविष्यतीत्यतिविह्वलः ॥ ५७ ॥ ननु पुत्रसमर्पणं दृष्टं सत्यमदृष्टं कथं दृष्टादृष्टयोर्बाध्यबाधकभाव इति चेत्तत्राह **किं दुस्सहमिति** । पुत्रस्यादाने किं मोहो हेतुर्लौकिकः शास्त्रं वा ? आद्यं दूषयति **साधूनां** शत्रुमित्रोदासीनेषु तुल्यस्वभावानां **किं दुस्सहम्** ? मोहवशादेव पुत्रादिवियोगो दुस्सहस्तदभावे यथा पुत्रस्तथा कंसः । ततश्च कंसघातकः पुत्रो न रक्ष्य इति युक्तं दानम् । अथ 'पुत्रेण जयते लोकान् पुत्रेण स्युतमेति पुन्नाम्नो नरकात् त्रायत' इति 'त्वं यज्ञ' इत्यादिवाक्यैः पुत्रकृतोपकारोपेक्षित इति चेत्तत्राह **विदुषां** ज्ञानयुक्तानां **किं बहिःस्थितमपेक्षितमिति** ? न साधनं नापि फलम् । ननु तथापि वधार्थं स्वतो बालकमज्ञं समर्पयतीत्ययुक्तमिति चेत्तत्राह **किमकार्यं कदर्याणामिति** । असमर्पिते वसुदेवमनृतवादिनं ज्ञात्वा कृतसमयबन्धस्य निवृत्तत्वात् सर्वानेव पुत्रान् सर्वां भार्यां मां च मारयेदुत 'त्यजेदेकं कुलस्यार्थे' इतिन्यायेनार्पणमेवोचितम् । न चैतन्न करिष्यतीत्याशङ्कनीयम् । यतः **कदर्याणां** कंसादीनां **किमकार्यम्** ? सर्वोल्लङ्घनेन लुब्धाः कदर्याः । कुत्सितायां दर्यां हृदयरूपायां सम्भवो येषां स्थितिर्वा । ननु तथापि पलायनमेवोचितं न तु निरपराधबालकस्याज्ञस्य मारणमिति चेत्तत्राह **दुस्त्यजं किं धृतात्मनामिति** । धृत आत्मा वासुदेवो यैः सर्वं गच्छतु हरिस्तिष्ठत्विति येषां बुद्धिस्तेषामन्यत्सर्वं त्यक्तव्यं भगवद्बाधकम् । असमर्पणं च सर्वनाशकत्वाद्भगवद्बाधकमिति भगवदीयानां त्याज्यवस्तुषु कोपि गुणदोषविचारो नास्तीति पूर्वं प्रतिज्ञातस्य समर्पणं युक्तमेव ॥५८॥ भगवत्कृतत्वान्नानिष्टं जातमित्याह **दृष्ट्वेति** । **शौरेर्वसुदेवस्य** पुत्रे स्वस्मिंश्च तुल्यतां दृष्ट्वान्योन्यघातकत्वमुभयोर्ज्ञात्वा स्वस्यौदासीन्येन स्थितिरेव **समता सत्ये** वाक्ये चैव **व्यवस्थितिम**चाञ्चल्यमेवमुभयेनापि सन्तुष्टः । राजन्निति सम्बोधनं राजधर्मस्तथैवेतिज्ञापनार्थम् । प्रकर्षेण हास्यं मुग्धोयमितिज्ञापनार्थम् । **इदं** वक्ष्यमाणम**ब्रवीत्** ॥ ५९ ॥ अनेन पञ्चवार्षिको नीत इति ज्ञायते । षष्ठश्चोदरस्थः । प्रतियात्विति वाक्यादन्यथा 'नये' त्येव वदेत् । पुत्रानितिबहुवचनानेरोधेन तावत्कालं स्थापनम् । **प्रतियातु** व्याघुट्य गृहे यातु । अयं ते **कुमारो** न तु मन्मारकः । अमारणे हेतुर्न ह्यस्मादस्ति मे भयमिति । तर्हि समयबन्धो गत इति नाशङ्कनीयं यस्माद्युवयोरष्टमगर्भान्मे मृत्युर्विहित इति । स समानीय देय इत्यभिप्रायः । अत एव नारदादीनामेतदसम्मतम् । न हि भगवद्भक्तानामन्यनिष्ठाप्युचिता । अतोन्यथाकरणमप्युचितम् । किलेत्याकाशवाणीप्रतिसन्धानम् ॥ ६० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

दृष्ट्वा समत्वमित्यत्र—अनेन पाञ्चवार्षिक इत्यादि । अत्रायं भावः । अग्रे निगडनिग्रहानन्तरमेव 'जातं जातमहन्नि'-ति वक्ष्यमाणत्वात् समर्पणानन्तरं मरणे तन्नोचितिमिति मत्वा नारदेन तथाकथनादेतदनुपदमेव तत्कथनमिति ज्ञायते । तथा च निग्रहे गर्भसम्भव इति । अत एव 'जातञ्जात' मिति 'कालभेदज्ञापक' मित्यग्रे वक्ष्यते । भगवतस्त्वलौकिकी रीतिरिति नानुपपत्तिः ॥ ५९ ॥

॥ इति श्रीप्रथमाध्यायटिप्पणी ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

प्रतियात्वित्यत्र—अन्यनिष्ठेति । भगवद्व्यतिरिक्ते सत्ये निष्ठा ॥ ६० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

कीर्तिमन्तमित्यस्याभासे—यथैतयेति । रक्षार्थं भगवत्कृतसर्वदेवतासान्निध्येनेत्यर्थः । वसुदेवोपि तथैवार्पणं कृतवानत एव **दृष्ट्वेत्यस्याभासे** 'भगवत्कृतत्वा'दिति वक्ष्यन्ति । व्याख्याने **महानिति** । कीर्तियुक्तत्वान्महत्त्वम् ॥ ५७ ॥ **प्रतियात्वित्यत्र—अत एवेति** । अष्टमगर्भानयनकथनादेवेत्यर्थः । **अन्यनिष्ठेति** । भगवद्रूपाष्टमगर्भदानमङ्गीकृत्य पुत्रान्तरनिष्ठेत्यर्थः । **अन्यथाकरणमिति** । नारदादीनामिति कर्तृषष्ठ्यन्तं शेषः ॥ ६० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

किमकार्यं कदर्याणामित्यस्य व्याख्याने—कुत्सितायां दर्यामित्यादि । **कुत्सिता दरी दुष्टं हृदयं तत्र सम्भवो येषां ते** 'हृदयादभिजायत' इतिश्रुतेः प्राणिनां पितृहृदयादुत्पत्तिस्तत्र पितृहृदयस्य दुष्टत्वे तदुत्पन्नस्यापि दुष्टत्वम् । कंसो हि नोग्रसेनवीर्यजः किन्तु दैत्यवीर्योत्पन्न इति प्रसिद्धं हरिवंशे । एवं सति दुर्वीर्योत्पन्नस्य **किमकार्यम्** ? अपि तु सर्वमेव । निषिद्धमपि तैः क्रियत एवेत्यर्थः । क्वचिद् वीर्योत्पन्नस्यापि सद्धर्माचरणदर्शनात् सङ्गकृतावेव गुणदोषाविति सङ्गस्याध्यात्मिकपक्षे मुख्यत्वसूचनार्थं पक्षान्तरमाहुः **स्थितिर्वेति** । कुत्सिता दरी दुष्टं हृदयं तत्र स्थितिर्मित्रतया स्वामित्वादिना वा येषां ते **कदर्याः** । कंसो हि दुष्टानां जरासन्धादीनां मित्रं प्रलम्बादीनां स्वामी । अतो मित्रत्वेन स्वामित्वेन वा दुष्टानां हृदये तिष्ठति । दुष्टमित्रमितियावत् । तथा च दुष्टमित्रप्रेरितः किं किं न कुर्यात् ? तथा च दुःसङ्ग एव सर्वेभ्यो निषिद्धेभ्यः प्रबलोनिष्टकर्तेत्याध्यात्मिकपक्षे लाभः । एवंविग्रहे कदर्यशब्दसिद्धिस्तु निरुक्तमर्यादया ज्ञेया । 'अप्यक्षरसामान्येन निर्ब्रूयान्न संस्कारमाद्रिये'तेतिवाक्यात् प्रायः सुबोधिन्यां नैरुक्ती व्युत्पत्तिर्भागवतशब्दानां यथा पूतनाशब्दे 'पुरुषानप्युत नयती'ति । एवमेव छान्दोग्योपनिषद्भाष्ये 'इत्योमिति सदोपास्यः सोक्षरः पुरुषोत्तम उच्चत्वाद्गीयमानत्वात्स्थानादुद्गीथ उच्यत' इत्यानन्दतीर्थैर्नैरुक्ती व्युत्पत्तिः प्रदर्शिता । आकाशशब्देपि 'आसमन्तात्कामानभाती'ति च । एवं 'देवदेवं वृषाकपि'मित्यत्रापि 'वृषो धर्मस्तस्यासमन्तात् कं फलं स्वर्गादि तत् पिबती'तिव्युत्पत्तिः प्रदर्शिता सुबोधिन्याम् । पञ्चमस्कन्धे निबन्धे जम्बूद्वीपपदान्तर्गतजम्बूपदेन 'जननात् बुध्यते यत्रे'त्युक्त्या नैरुक्ती व्युत्पत्तिः स्फुटीकृता । एवमन्यत्रापि सुबोधिन्यां नैरुक्तीं व्युत्पत्तिं विचार्य व्याकरणविरोधदोषो दूरीकर्तव्यः । **दुस्त्यजं किं धृतात्मनामित्यत्र—धृत आत्मा वासुदेवो यैरिति** । अत्रेदं ज्ञेयम् । ज्ञानिभक्ता एव भगवद्धारणं कुर्वन्ति 'ज्ञानी प्रियतमोतो मे' 'ज्ञानेनासौ बिभर्ति मा'मित्येकादशे भगवद्वाक्यात् । तथा च धृतात्मनामित्यस्य ज्ञानिभक्तानामित्यर्थो ज्ञेयः । 'चतुर्विधा भजन्ते मा'मितिसन्दर्भे भगवदुक्तस्य चतुर्थज्ञानिभक्तस्य 'प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रिय' इतिवाक्याद्भगवत्प्रियत्वेन भगवदितरवैराग्यस्य तस्मिन्नुद्भूतत्वात्तस्य किं दुस्त्यजम् ? सर्वमेव सुत्यजमित्यर्थः । तत्र किंरूपस्य भगवतो धारणमित्याकाङ्क्षायां वासुदेवरूपस्य धारणमिति बोध्यम् । 'ज्ञानवान् मां प्रपद्यते' 'वासुदेवः सर्वमिती'तिभगवद्वाक्यात् । युक्तमेतत् । ज्ञानिभक्तस्य त्रिवर्गापेक्षया राहित्यात् केवलमुमुक्षया वासुदेवस्य मोक्षप्रदत्वात् । एतदभिप्रायेणैव गीतासु वासुदेवपदमुक्तमिति श्रीमदाचार्यैरपि धृत आत्मा वासुदेवो यैरिति वासुदेवपदमुक्तमतो निर्दुष्टमिदम् ॥ ५८ ॥

बुभुत्सुबोधिका

कीर्तिमन्तमित्यत्र यथैतयेति यथा नाम देवक्याः सर्वदेवतेति विशेषणात् रक्षार्थं भगवत्कृतसर्वदेवतासांनिध्येन येन प्रकारेणेत्यर्थः । तथैवेति तेनैव प्रकारेणार्पणं कृतवानत एव 'दृष्ट्वे'त्यस्याभासे 'भगवत्कृतत्वा'दिति वक्ष्यन्ति । देवतासु ब्रह्मविष्णुशिवेषु परमार्थरूपभगवत्सन्निधाने वसुदेवस्यार्पणकर्तृत्वाभावात्, उपदेशवत् । ज्येष्ठो हीति सर्वेषामिति सर्वैः कृद्योगे कर्तरि षष्ठी । न तु दत्तकविधाने दातुः पितुरदेयः । वसुदेवस्तु पुत्रप्रत्यर्पणकर्ता पिताऽपविद्धेन पुत्रेणापुत्रकंसपुत्रित्वकामी । 'मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा । यं पुत्रं प्रतिगृह्णीयादपविद्धः स उच्यत' इति मनुस्मरणात् । अत्रोत्सर्जनं स्वयं गृहीत्वार्पणम् । अत्र कलियुगाभावादपविद्धोपि कर्मलोपाभावाय भवति । भगवत्प्रयाणानंतरं कलेः प्रवृत्तेः । ननु एतस्मिन् समये धर्मविचारो नोचितः स्वास्थ्याभावात्, पथि शूद्रवदाचरेदितिवदिति चेन्न । 'श्लाघनीयगुणः शूरै'रित्यत्र वसुदेवोपि भगवता प्रेरित इत्यनधिकारिणमप्यनवसरे बोधयतीति सुबोधिन्याः । परमार्थमोक्षद्वितीया कोटिः धर्मरूपा उक्ता भगवत्प्रेरितत्वात्, धर्ममोक्षावेका कोटिः अर्थकामावपरेति । महानिति कीर्तियुक्तत्वान्महत्त्वम् । दत्तवानिति त्वदीयस्त्वां न मारयिष्यतीत्यपविद्धं पुत्रं कंसाय कर्मलोपाभावाय दत्तवान्, अत एव ज्येष्ठपुत्रो न देय इति दत्तकविधानवाक्यस्यात्रोक्तिः । धर्मनिष्ठतामिति परमार्थमोक्षानंतरं द्वितीयकोटिनिष्ठताम् । क्रौर्यमिति कसि गतिशासनयोः अदा० आ० से० इदित्वान्नुम् । पचाद्यच् । अतो ज्ञापितम् । हेतुरिति मङ्गलवाद्यनामानृताद्विह्वलस्य भवतीति हेतुः । अर्पणं दानविशेषस्त्रिविधं तत्रेदं कायिकमित्याहुः स्वयं गृहीत्वेति । अनृतकथनमिति 'पुत्रान् समर्पयिष्येस्या' इत्यनृतकथनमसमर्पणे । भगवत्प्रापकमिति 'सत्येन लभ्य' इति श्रुतेः ॥ ५७ ॥

किं दुःसहमित्यत्र विपरीत इति संभवति दृष्टफलेऽदृष्टफलकल्पनाया अन्याय्यत्वं विश्वजिता यजेतेत्यत्र सिद्धम्। स्वर्गो फले दृष्टे संभवत्यदृष्टं फलं न कल्पनीयमिति। अत्र विपरीतः। मोह इति तमो मायाधर्मः। शास्त्रमिति 'पुत्रेण जयत' इति शास्त्रम्। 'साधवः समदर्शना' इति वाक्यादाहुः शत्रु मित्रेति। तदभाव इति भक्तिधर्मतुल्यत्वज्ञानेन मायाधर्ममोहाभावे। अथेति लौकिकहेतुभिन्नशास्त्रहेतुप्रक्रमेथशब्दः। पुत्रोपयोगित्वादाश्रमद्वयस्थाः श्रुतीराहुः पुत्रेणेति। पित्रणापाकरणेन तथा। वसुतां धनसत्ताम्। पुन्नाम्न इति पुत्रशब्दव्युत्पत्तिः। 'त्वं यज्ञ' इत्यादि महानारायणश्रुतिः। पिता संन्यसन् पुत्रं प्रत्याह 'त्वं यज्ञ' इत्यादि। ज्ञानयुक्तानामिति 'मय्येव सकलं जातं मयि सर्वं प्रतिष्ठित'मिति ज्ञानवताम्। अज्ञमिति असंतमिवात्मानं मन्यमानम्। भगवानेवैवमवस्थो जात इति सुबोधिन्याम्। सर्वाः षट्। पुत्राः भगवद्धर्माः तान् भार्याः ब्रह्मविद्याः ब्रह्मविद्यका मां निगमम्। कुलस्येति ब्रह्मात्मककुलस्यापि। एतदिति मारणम्। अलौकिकविग्रहमाहुः कुत्सितायामिति। हृदयाकाशे जीवस्य संभव उत्पत्तिर्न सम्भवतीति पक्षान्तरमाहुः स्थितिर्वेति। अत्र कोः कदादेशः दकारलोपः समासांतः। लौकिकविग्रहस्तु कुत्स गतौ, अचो यत्। कदर्यः। स प्रकृते न सम्भवति। अलौकिकविग्रहः निरुक्तादपि। 'अप्यक्षरसामान्येन निर्ब्रूयान्न संस्कारमाद्रियेते'ति वाक्यात्। एवमन्यत्रापि। अतोर्थे निरुक्तव्याकरणयोरर्थनियामकत्वान्न व्याकरणविरोधः। पलायनादिकमिति आदिना कंसगृहे सा स्थापनीया कामेन्याः संग्राह्याः पत्न्या, किं चापविद्धपुत्रेण कंसपुत्रित्वकरणानंतरं निग्रहे स्थापनीयः पुत्र इति। अज्ञस्येति असंतमिवात्मानं मन्यमानस्येत्यर्थः। हरिरिति सर्वत्र गीतहरेः सामानाधिकरण्याय वासुदेवो वेदे आत्मा हरिरक्षरो वेदान्ते इति। सर्वनाशकमिति पुत्रभार्यावसुदेवनाशकम्। भगवद्बाधकमिति देवकीबाधाद्वसुदेववरत्वेन प्रापयिष्यमाणभगवद्बाधकम्॥ ५८॥

दृष्ट्वा समत्वमित्यत्र भगवदीयानामिति एकादशेस्ति गुणः पुत्रत्वं दोषः मारकत्वं कंसे। कर्मठानां तु गुणदोषदृष्टिरस्ति। पुत्रः संरक्ष्यः। द्वेषो मार्य इति। पूर्वप्रतीति पूर्वप्रतिज्ञापुत्रसमर्पणस्य तद्विषयस्य पुत्रस्य। 'पूर्वप्रतिज्ञातस्ये'त्यत्र विषयः क्तस्यार्थः। विचारस्य कृतत्वादेवकारः। न त्वयुक्तमित्यर्थः। भगवत्कृतत्वादिति परमार्थरूपभगवत्कृतत्वादित्यर्थः। भगवत्संनिधाने वसुदेवकुलस्यायुक्तत्वात्। अनिष्टमिति कंसक्रोधरूपम्। औदासीन्येनेति ताटस्थ्येन। उभयेनेति उभयशब्दस्य द्विवचनं नास्तीति कैयटः। समतासत्यव्यवस्थितिभ्याम्। तथैवेति गुणवत् संतोषप्रकारेण। प्रकर्षेणेति पुत्रपूरणेन हास्यं जनोन्मादकमायावत्त्वम्। माया कृपा। मुग्ध इति अष्टमे गर्भेर्पणीये प्रथमसमर्पणे मोहः कारणमिति॥ ५९॥

प्रतियात्वित्यत्र अनेन पञ्चवार्षिक इत्यादि, टिप्पण्याम्, पञ्चवार्षिको नीतः 'प्रतिया'त्विति वक्ष्यमाणत्वात्, जातमात्रो वा नीतः 'जातं जात'मितिवाक्यादेवं सन्देहे 'कार्तिमन्त'मित्यत्र जातमात्रनयनेप्यर्पणं सम्भवति 'प्रतिया'त्वित्यस्य वसुदेवद्वारा प्रतियात्वित्यर्थस्यापि सम्भवात् 'पञ्चवार्षिक' इत्यस्यानुपपत्तिरित्याशयेनाहुः अत्रायं भाव इति। अग्रे 'नन्दाद्या' इत्यादिवाक्येषु नोचितमिति 'जातं जात'मितिवाक्योक्तं हननं ततोऽहननं नोचितम्। तथा कथनादिति सर्वेषां नन्दादीनां कालनेमिविरोध्यदेवतात्वेन कथनात्। एतदनुपदम् आनकदुन्दुभियानानन्तरमेव तस्य कालनेमिविरोध्यदेवतात्वस्य कथनम्। अनुपपत्त्यन्तरं नेत्याहुः तथा नेति। बीजजत्वे च इतिः समाप्तौ। अत एवेति निग्रहे गर्भासम्भवादेव। 'न कालभेदे'ति भूतकाले क्तप्रत्यय इति न भूतकालप्रकारज्ञापकम्। तथा च भूतकालाविवक्षणेन भूतकालस्य अनुपपत्त्यन्तरं नेत्यर्थः। 'किन्तु मारणे देवक्या'मित्यादि। तथा च सुबोधिनी। 'मारणे देवक्यां जननमेव निमित्तमिति ज्ञापयितु'मिति। अग्र इति तत्रैव श्लोके। अतः पञ्चवार्षिक इति भावः। 'षड्वार्षिको नीतः', 'प्रतियातु किशोरोयमिति कंसप्रत्ययः', पुत्रानिति बहुवचना'दिति तु नापादनीयम्। 'सोऽनृतादतिविह्वल' इति वाक्यात्, पञ्चस्य वैराग्यरूपस्य भगवदात्मकत्वाननुसन्धानापत्तेः, अतो मातापितरौ रामकृष्णौ प्रति मेधाविनौ न पितरौ, तद्वद्वैराग्यरूपषष्ठपुत्रं प्रत्यपि मेधाविनौ मातापितरौ न पितराविति, किञ्च 'पुत्रान् समर्पयिष्येस्या' इति बहुवचनादपि पञ्चवार्षिक इति वक्ष्यन्ति 'पुत्रानिति बहुवचनानुरोधेने'त्यादिना। ननु विग्रहानन्तरं गर्भासंभवेऽ'स्यास्त्वामष्टमो गर्भ' इत्यत्र कथं गर्भपदप्रयोग इति चेत्तत्राहुः भगवतस्त्विति। अलौकिकीरीतिः प्रद्युम्नांशस्य गर्भसम्बन्धात्। नानुपपत्तिरिति पञ्चवार्षिकत्वभूतकालगर्भपदप्रयोगानुपपत्तिर्नेत्यर्थः। सुबोधिन्याम्। षष्ठश्चेति 'पुत्रान् प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सर'मितिवाक्यात्। पञ्चसु वर्षेषु पञ्च पुत्राः, षष्ठे वर्षे षष्ठः, चकारात्तदाधारः प्रद्युम्नः। 'अष्टमो गर्भ' इति वाक्यात्। तावत्कालमिति पञ्चवर्षाणि। सुबोधिन्यनुसरणे तु प्रतियात्वित्यत्र अनेनेति पूर्वोक्तसत्यसमत्वेन कुमारोयमिति कंसप्रत्ययेन कुमारप्रतियातुपदसमभिव्याहारेण चेत्यर्थः। पञ्चवार्षिक इति जातः कुतो नेति चेन्न, कुमारपदात्, अत एव न द्विवार्षिकस्त्रिवार्षिकश्चतुर्वार्षिकश्च, 'प्रतिया'त्वित्यत्र तादृशज्ञानाभावात्, षष्ठे वर्षे कौमारत्वाभावात्। 'पुत्रा'निति वाक्ये पुत्रपदादाहुः षष्ठश्चेति। सप्तमाष्टमौ न पुत्रौ, तस्य माता न माता पिता न पिते'तिश्रुतौ मात्राद्यभावात्। तर्हि मातापितरौ सप्तमाष्टमयोर्मेधाविनौ। मातापितृपदस्य मेधाविनि शक्त्यङ्गीकारात्। निरुक्ते निघंटौ वा न वेदा इत्यस्य मेधाविनामसु पाठात्। नशब्दे घटितपदस्य मेधाविनि शक्त्युक्तेः। 'सोनृतादतिविह्वल' इति वाक्यात् पञ्चवर्षपर्यन्तं स्थापनमनुचितमित्यत आहुः पुत्रानितीति। टिप्पण्यनुसारेण। प्रतियात्वित्यत्र। समयबंध इति समयः पुत्रदानकालः। तस्मिन् बंधः 'पुत्रान् समर्पयिष्येस्या' इति कृतो निर्बन्धः अवश्यक्रियासाधकयत्नः। अत एवेति समयबंधस्य गतत्वात् सत्यत्वादेव। नारदादीनामिति आदिना हरिश्चन्द्रप्रभृतयः। असम्मतम् प्राणसङ्कटे सत्यस्याप्रामाणिकत्वादसम्मतम्। अन्यनिष्ठेति भगवद्व्यतिरिक्ते प्राणसङ्कटेऽप्रामाणिकेसत्ये निष्ठा। अत इति 'स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसङ्कटे गोब्राह्मणार्थे हिंसायां नानृतं स्याज् जुगुप्सित'

मिति शुक्राचार्यवाक्यात्। यद्वा अत एवेति मारकाष्टमगर्भदानाज्ञापनादेव। नारदादीनामित्यत्रादिना वसुदेवदेवक्यादयः। तर्हि
तनयहननमभिप्रेतं स्यान्नारदादीनामत आहुः नहीति। अन्यनिष्ठेति राजान्येषु राज्ञा मारकत्वेन शङ्कितेषु धर्मेषु निष्ठा भक्तिः।
ज्ञानित्वान्न राजमारकविरोधो दोषः। अत इत्यादि 'राज्ञः पट्टाभिषिक्तस्य वधो ब्रह्मवधाद्गुरु'रितिवाक्येन राजहितत्वात्, अन्यथा-
करणम्। जातजातसमर्पणं मारकगर्भस्यासमर्पणमन्यत्र नयनम्। इदं समर्पणं सर्वपुत्रदानमर्पणम्। किलेति निश्चयेऽव्ययम्।
आकाशवाणीति आकाशवाण्याः प्रतिसन्धानम् राजनीतिप्रतिनिधितया संधानं योजनम्॥ ६०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र चानकदुन्दुभिः कीर्तिमन्नामानं प्रथमं जातं पुत्रं कृच्छ्रेण दुःखेन कंसाय क्रूरस्वभावायार्पयामास। तत्र हेतुमाह—
स इति। स सत्यसङ्कल्पतया प्रसिद्धः। अतः प्रतिज्ञानृतादतिविह्वलः भृशं व्याकुलः॥ ५७॥ ननु "सत्यसंरक्षणमदृष्टफलकम्,
पुत्रार्पणं तु तन्मरणजन्यदुःसहदृष्टदुःखफलकम्। दृष्टादृष्टयोर्मध्ये दृष्टस्य बलवत्त्वात् कथं दुःखसहनमङ्गीकृत्य पुत्रमर्पयामास"
इत्याशङ्क्याह—किं दुःसहमिति। साधूनां सत्यसन्धानां किं दुःखं दुःसहमित्यर्थः। ननु 'पुत्रेण जयते लोकान्' 'पुत्रेण वसुतामेति'
'पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः। तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा' इत्यादिवचनैर्दृष्टव्यवहाराच्च पुत्रस्य लोकसुख-
साधनत्वात्सुखस्य सर्वापेक्षितत्वाच्च कथं पुत्रसमर्पणं सम्भवतीत्याशङ्क्याह—विदुषामिति। विदुषां विवेकिनां प्रपञ्चदुःखहेतुत्वेन
पश्यतां किमपेक्षितम्? न किमपीत्यर्थः। ननु 'हिंसायां नानृतं स्याज्जुगुप्सितम्' इति वचनेन हिंसापरिहारार्थस्यानृतस्यादुष्टत्वात्
किमर्थं पुत्रमर्पितवांस्तत्स्तु पलायनेनापि पुत्रसंरक्षणं वरमित्याशङ्क्याह—किमकार्यं कदर्याणामिति। 'आत्मानं धर्मकृत्यं च पुत्रान्
दारांश्च पीडयेत्। पीडयेद्भृत्यवर्गांश्च स कदर्य इति स्मृतः' इति वचनात् कंसस्य चापि कदर्यत्वात् राजत्वेन प्रबलत्वाच्च ततः
पलायनेनापि देशान्तरेऽपि उर्वरितत्वासम्भवात् 'त्यजेदेकं कुलस्यार्थे' इति न्यायेन सर्वकुटुम्बमरणपरिहारार्थं पुत्रार्पणमेव कृतवान्।
अन्यथैनमनृतवादिनं ज्ञात्वा सकुटुम्बमेव हन्यादित्यर्थः। तथापि पुत्रत्यागो दुष्कर इत्याह—दुस्त्यजमिति। धृतः हृदा गृहीत आत्मा
परमात्मा भगवान् यैस्तेषां किं दुस्त्यजमित्यर्थः। सत्यप्रतिज्ञस्य भगवतः सत्यप्रलभ्यत्वात्स्वस्यानकदुन्दुभित्वेन स्वगृहे तदवतारस्य
निश्चितत्वात् अनृतवचनत्वे तदभावमाशङ्क्यापि पुत्रार्पणं कृतवानिति भावः॥५८॥ शौरेर्वसुदेवस्य तत् पुत्रानयनं समत्वं सुखदुःख-
योस्तुल्यत्वं च सत्ये वचन एव व्यवस्थितिं च दृष्ट्वा तुष्टं मनो यस्य तथाभूतः कंसः स्वप्रसन्नतां द्योतयन् प्रहसन्निदं वक्ष्यमाणम-
ब्रवीत्। राजधर्मस्तु तथैवेति सूचयन् सम्बोधयति—राजन्निति॥ ५९॥ तदेवाह— प्रतीति। अयं कुमारः प्रतियातु गृहं प्राप्नोतु।
अत्र हेतुमाह—नहीति। हि यस्मादस्मान्मे मम भयं नास्ति। तत्रापि हेतुमाह—यतो युवयोरष्टमादेव गर्भान्मे मृत्युर्विहितः आकाश-
वाण्या निरूपितः। किलावधारणे॥ ६०॥

अन्वितार्थप्रकाशिका

कीर्त्तिमन्तमिति॥ अनृतात् अतिविह्वलो भीतः सः कृतप्रतिज्ञः आनकदुन्दुभिः प्रथमजं कीर्त्तिमन्तं जन्मसमय एव कृतनामकरणं पुत्रं कंसायातिकृच्छ्रेण अर्पयामास॥ ५७॥ किं दुःसहमिति॥ साधूनां सत्यसन्धानां पुत्रत्यागादिकमपि किं दुःसहं
शेषे षष्ठी। विदुषां भगवानेव तत्त्वमिति जानतां पुत्रलालनादिकं किमपेक्षितम् इति वसुदेवमुद्दिश्योक्तिः। कदर्याणां दुष्टानां
भागिनेयवधादिकमपि किमकार्यम् इति कंसमुद्दिश्य। धृतात्मनां चित्ते धृत आत्मा हरिर्यैस्तेषां पुत्रादिकमपि किं दुस्त्यजम् इति
देवकीमुद्दिश्य॥ ५८॥ दृष्ट्वेति॥ हे राजन्! शौरेस्तत्समत्वं पुत्रार्पणेन हर्षशोकयोः साम्यं सत्ये च व्यवस्थितिं निष्ठां दृष्ट्वा
तुष्टमनाः कंसः प्रहसन् इदम् अब्रवीत्॥ ५९॥ प्रतियात्विति॥ अयं कुमारः प्रतियातु हि यतः अस्मात् प्रथमपुत्रात् मे मम भयं
नास्ति किल। यतः युवयोः अष्टमाद्गर्भात् मे मम मृत्युर्विहितः॥ ६०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथेति॥ अथानन्तरं, काले गर्भधारणयोग्ये समये, उपावृत्ते च, समुपस्थिते सत्येव, सर्वः सर्वात्मा भगवानेव देवता यस्याः सा, भगवदाश्रयत्वात्सर्वदेवतामयीति वा। देवकी अनुवत्सरं प्रतिसंवत्सरं, पुत्रोत्पत्तिकालमनतिक्रम्येत्यर्थः। अष्टौ पुत्रान्, कन्यां च, प्रसुषुवे एव॥ ५७॥ एवं सामान्येनोक्त्वा तदेव किञ्चित् प्रपञ्चेनाह॥ कीर्तिमन्तमिति॥ तदा अनृतात् अनृतभाषणात्, अतिविह्वलः स्वप्रतिज्ञां प्रतिपालयितुमत्याकुलः, स आनकदुन्दुभिर्वसुदेवः प्रथमजं प्रथममुत्पत्तिं प्राप्तं, कीर्तिमन्तं कीर्तिमत्संज्ञं पुत्रं, कृच्छ्रेण दुःखेन, कंसाय अर्पयामास॥ ५८॥ ननु पुत्रानुरागं विहाय मृत्यवे पुत्रं कथमर्पितवानित्यपेक्षायामाह॥ किं दुःसहमिति॥ साधूनां सत्यसंधानां, दुःसहं दुःखेनापि सोढुमशक्यं किं नु किं वा। अस्तीति शेषः। न किमपि, सर्वमपि सुसहमेवेत्यर्थः। पुत्रलालनापेक्षा कथं त्यक्तेत्यत आह। विदुषां स्वात्मपरमात्मयाथात्म्यज्ञानवतां विबुधजनानां, अपेक्षितमपेक्षावत्, किं न्वस्ति। शरीरतदनुबन्ध्यादिषु किमपि अपेक्षितं नास्तीत्यर्थः। ननु स्वयं नीते सति कंसो बालं न हन्यादिति मत्वा नीतवान् इति किं न स्यादिति चेन्नेत्याह। कदर्याणां कुत्सितस्वामिनां, स्वामित्वं प्राप्यापि क्षुद्रतोपेतानामित्यर्थः। अकार्यमविधेयं, किं नु। सकलमपि पापकर्माचरन्तीत्यर्थः। ननु देवकी कथं पुत्रं तत्याजेत्यत आह। धृतः स्ववशीकृत आत्मा मनो यैस्तेषां, यद्वा। धृतश्चित्ते विधृत

आत्मा हरिर्यैस्तेषां, दुस्त्यजं किं नु । देहतदनुबन्ध्यादिकं सर्वं सुत्यजमेवेति भावः ॥ ५९ ॥ दृष्ट्वेति ॥ तदुक्तविधं एव, शौरेर्वसुदेवस्य, समत्वं शत्रु मित्रयोः सुखदुःखयोर्वा साम्यं, सत्ये व्यवस्थितिं च, दृष्ट्वा, हे राजन् , कंसः तुष्टमनाः प्रहसन् संश्च, इदं वक्ष्यमाणम्, अब्रवीत् ॥ ६० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

किं दुःसहमिति : १०–१–५८

साधुः स एव सहतेऽखिलदुःसहं यो निर्वासनं भवति यद्धृदयं स विद्वान् ।
यत्सर्वकृत्यमतिनिन्द्यमसौ कदर्यो या दुस्त्यजं त्यजति स प्रगृहीतचेताः ॥ ४२ ॥

प्रतियात्विति : १०–१–६०

तुल्यदृक् सत्यवाक् कीर्तिमन्तं यो भजते नरम् । तस्यावश्यं द्विषन्तोऽपि वश्याः स्युरिह तत्स्फुटम् ॥ ४३ ॥

हिन्दी अनुवाद (कर्वमक्षमा)

पहले पुत्रका नाम था कीर्तिमान् । वसुदेवजीने उसे लाकर कंसको दे दिया । ऐसा करते समय उन्हें कष्ट तो अवश्य हुआ, परन्तु उससे भी बड़ा कष्ट उन्हें इस बातका था कि कहीं मेरे वचन झूठे न हो जायँ ॥ ५७ ॥ परीक्षित् ! सत्यसन्ध पुरुष बड़े-से बड़ा कष्ट भी सह लेते हैं, ज्ञानियोंको किसी बातकी अपेक्षा नहीं होती, नीच पुरुष बुरे-से बुरा काम भी कर सकते हैं और जो जितेन्द्रिय हैं—जिन्होंने भगवान्‌को हृदयमें धारण कर रक्खा है, वे सब कुछ त्याग सकते हैं ॥ ५८ ॥ जब कंसने देखा कि वसुदेवजीका अपने पुत्रके जीवन और मृत्युमें समान भाव है एवं वे सत्यमें पूर्ण निष्ठावान् भी हैं, तब वह बहुत प्रसन्न हुआ और उनसे हँसकर बोला ॥ ५९ ॥ वसुदेवजी ! आप इस नन्हे-से सुकुमार बालकको ले जाइये । इससे मुझे कोई भय नहीं है । क्योंकि आकाशवाणीने तो ऐसा कहा था कि देवकीके आठवें गर्भसे उत्पन्न सन्तानके द्वारा मेरी मृत्यु होगी ॥ ६० ॥

तथेति सुतमादाय य[1]यावानकदुन्दुभिः । नाभ्यनन्दत तद्वाक्यमसतोऽविजितात्मनः ॥ ६१ ॥[2]
नन्दाद्या ये व्रजे गोपा याश्चामीषां च योषितः । वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥ ६२ ॥
सर्वे वै देवताप्राया उभयोरपि भारत । ज्ञातयो बन्धुसुहृदो ये च कंसमनुव्रताः ॥ ६३ ॥[3]
एतत् कंसाय भगवा[4]ञ्छशंसाभ्येत्य नारदः । भूमेर्भारायमाणानां दैत्यानां च वधोद्यमम् ॥ ६४ ॥

कर्वमक्षमा

अन्वयः— आनकदुन्दुभिः तथा इति सुतं आदाय ययौ असतः अविजितात्मनः तद्वाक्यं न अभ्यनन्दत ॥ ६१ ॥ भारत ! भगवान् नारदः अभ्येत्य कंसाय व्रजे ये नन्दाद्याः गोपाः, च अमीषां योषितः च वसुदेवाद्याः वृष्णयः देवक्याद्याः यदुस्त्रियः उभयोः अपि ज्ञातयः बन्धुसुहृदः च ये कंसं अनुव्रताः सर्वे वै देवताप्रायाः च भूमेः भारायमाणानां दैत्यानां वधोद्यमं एतत् शशंस ॥ ६२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कंसस्य शांतिर्देवकार्यानुगुणा न भवतीति नारदस्य प्रत्यवस्थानमासीत् । तदाह—नंदाद्या इत्यादित्रयेण ॥ ६२ ॥ उभयोर्वसुदेवनंदकुलयोः ॥ ६३ ॥ वधोद्यमं दैवतकृतमिति शेषः ॥ ६४–६५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

असतः खलस्याविजितात्मनोऽव्यवस्थितचित्तस्य । तत् वाक्यम् । 'प्रतियातु कुमारोयम्' इत्यादिरूपम् । नाभ्यनंदत् सत्यं न मेने । "अव्यवस्थितचित्तानां प्रसादोऽपि भयंकरः" इत्यभियुक्तोक्तेः ॥ ६१ ॥ कंसे सुवृत्ते सति देवकार्यं न सेत्स्यतीत्याह—कंसस्येति । शांतिर्दयालुतादिरूपा चित्तवृत्तिः । अनुगुणाऽनुरूपा योग्येति यावत् । इति हेतोः । प्रत्यवस्थानं कंसपार्श्वे गमनम् । तदाह—त्रयेण नंदाद्या इत्यारभ्य वधोद्यममित्यंतश्लोकत्रयेणेत्यर्थः । अमीषां नंदादीनाम् । योषितो यशोदाद्याः ॥ ६२ ॥ केषांचित्कंसकादीनां दैत्यरूपत्वात्प्रायशब्दप्रयोगः । ते गोपा यदवश्च । उभयोर्यदुकुलगोपकुलयोः । ये चाक्रूराद्याः अनुव्रतास्तदनुसाराः

---

[1] यावदानक—इति कस्यचित् । [2] अथ कंसमुपागम्य नारदो ब्रह्मनन्दनः । एकान्तमुपसंगम्य वाक्यमेतदुवाच ह ॥ अयं श्लोकः अधिकः विज. [3] असुराः सर्व एवैते लोकोपद्रवकारिणः । इदमर्धमधिकं. वीर. विज. । गतेथ वसुदेवे तु दैवकार्यार्थमुद्यतः—इदमर्धमधिकं. विज. [4] वाक्श्रावयामास नार.—इति कस्यचित् संशयामास नार.—विज. ।

कंसामंत्रणपक्षे मा ज्ञानं तत्रारत। भारतत्वादेवैतज्ज्ञानं तव नास्तीति भावः ॥ ६३ ॥ एतत् नंदाद्या इत्यादि यदुक्तम्। गोपकुलयदुकुलयोः। द्वेषोत्पत्त्या झटिति भगवदवतारेण कंसस्य मृत्युर्भविष्यतीति ज्ञानवत्त्वाद्भगवानिति। "उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्। वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति" इति लक्षणस्य तत्र सत्त्वादिति। 'चातकानां वामतो गतिः' इतिवद्देवानामपि गतिर्वामैवातः प्रथमस्यैवाष्टमत्वमायाति। यद्वा—द्वितीयतो गणने प्रथमस्य तृतीयतो गणने द्वितीयस्यैवमग्रेपि गणनात्सर्वेषामष्टमत्वमायातीत्थं च शशंसेति संबंधः ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथात तथेत्युक्त्वेत्यर्थः। तथा शब्दस्य च भवान् यथादिशति तथैवास्त्वित्यर्थः। नाभ्यनन्दत न प्रतीयाय कुतः असतः खलस्य मृषैव सौहृद्यं प्रकटयतः अविजितात्मनः अस्थिरचित्तस्य चेत्यर्थः ॥ ६१ ॥ नन्दाद्या इति त्रिकम्। ये च बृहद्वनस्थे व्रजे याश्च तत्र योषितः श्रीयशोदाद्याः उक्तसमुच्चयार्थोऽयं चशब्दः सर्वत्र सम्बन्ध्यः द्वितीयश्चशब्दः कैमुत्यद्योतनार्थमप्यर्थे किं वक्तव्यं ते ताश्चेति अमीषां गोपानां तद्योषितामपि सम्बन्धिनो ये भृत्याद्यास्ते चेत्यर्थः। वृष्णयस्तदुपलक्षिता यादवाः देवताशब्देन श्रीभगवत्पार्षदा अप्युक्ताः ॥ ६२ ॥ प्रायशब्दस्तत्र यदुषु केषांचिद्दैत्यत्वात् हे भारत! इति यथा भरतवंशे। भवत्पितामहादयो देवता इति भावः भोजादयस्तदीया अपि सर्वे देवताप्राया इत्याह—ये चेति। कंसं प्रति अनुव्रता भक्तायमानाः ज्ञातयः सपिण्डाः बन्धवः सम्बन्धिनः सुहृदो मित्राणि ॥ ६३ ॥ भगवान् सर्वज्ञः कंसस्य शान्त्या शीघ्रं भगवदवतारो न स्यादित्यादिकं चिन्तयन्नित्यर्थः। यद्वा, परमदयालुतत्स्मरणो नारदोक्तिरियं शीघ्रं श्रीभगवदवतारकारणोत्थापनेन जगतामेव हिताचरणात् अतस्तं प्रत्यसूया न कार्येति भावः शंसयामास स्वार्थे णिच् शशंस तद्विशेषः श्रीहरिवंशे—

त्रिविष्टपादापतितो मथुरोपवने स्थितः। प्रेषयामास कंसाय स दूतं मुनिपुङ्गवः ॥
स दूतः कथयामास नारदागमनं नृपे। स नारदस्यागमनं श्रुत्वा त्वरितविक्रमः ॥
निर्जगामासुरः कंसः स्वपुर्याः पद्मलोचनः। स ददर्शातिथिं श्लाघ्यं देवर्षिं वीतकल्मषम् ॥
तेजसा ज्वलनाकारं वपुषा सूर्यवर्चसम्। सोऽभिवाद्यर्षये तस्मै पूजां चक्रे यथाविधि ॥
आसनं चाग्निवर्णाभं विसृज्योपजहार सः ॥
निषसादासने तस्मिन् स वै शक्रसखो मुनिः। उवाच चोग्रसेनस्य सुतं परमकोपनम् ॥
पूजितोऽहं त्वया वीर! विधिदृष्टेन कर्मणा। गते त्वेवं मम वचः श्रूयतां गृह्यतां च वै ॥
अनुसृत्य दिवो लोकान् अहं ब्रह्मपुरोगमान्। गतः सूर्यसखं तात! विपुलं मेरुपर्वतम् ॥
सोऽहं कदाचिद्देवानां समाजे मेरुमूर्द्धनि। सङ्गृह्य वीणां संसक्तामागच्छं ब्रह्मणः सभाम् ॥
तत्र मन्त्रयतामेवं देवतानां मया श्रुतः। भवतः सानुगस्येह वधोपायः सुदारुणः ॥

इति पद्मलोचन इति विस्मयेनोत्फुल्ललोचन इत्यर्थः ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः तथेत्यङ्गीकृत्यानकदुन्दुभिर्वसुदेवः सुतमादाय ययौ किन्त्वसतः पापिनोऽनवस्थितचित्तस्याविदितात्मनोऽज्ञस्य कंसस्य तदुक्तं वाक्यं नाभ्यनन्दत् "अव्यवस्थितचित्तस्य प्रसादोपि भयङ्करः" इति न्यायादिति भावः ॥ ६१ ॥ नन्दाद्या इत्यादि सार्द्धश्लोकत्रयमेकान्वयम्। हे भारत! उभयोर्नन्दवसुदेवयोर्ज्ञातयो बन्धवः सुहृदोऽपि देवताप्रायाः देवांशैः जातत्वाद्देवताप्रायास्तत्तुल्या इत्यर्थः। ये तु कंसमनुव्रताः ते सर्वे असुरा असुरसम्पत्त्या जाताः अत एव लोकोपद्रवकारिणः ॥ ६२–६३ ॥ इत्येतद्भूमेर्भारायमाणानां नृपव्याजानां दैत्यानां श्रीभगवत् कर्तृकवधोद्योगञ्च ततो भगवान्नारदोऽभ्येत्यागत्य कंसाय शशंस कथयामास ॥ ६४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अविजितात्मनोऽसतः कंसस्य तद्वचनं न विश्वसनीयमिति नाभ्यनन्दत ॥ ६१ ॥ नन्दाद्या इत्यारभ्य वधोद्यममित्यन्तं नारदवाक्यम् ॥ ६२ ॥ उभयोः यदुकुलगोकुलयोः ॥ ६३ ॥ वधोद्यमं देवैः क्रियमाणमिति शेषः ॥ ६४–६५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

देवताप्राया इति पार्षदमिश्रत्वात् पक्षपा सुरमध्यत्वाच्च ॥ ६३–६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

नन्दाद्या इति श्रीशुकोक्तिः। यद्वा, श्रीनारदोक्तिस्तथा हि अवतरिष्यतः स्वाभीष्टदेवस्य शीघ्रदर्शनेन स्वमानन्दयितुं शीघ्रं तत्प्रादुर्भावकारणं कंसकर्तृकवैष्णवद्रोहं प्रवर्तयन् देवानानन्दयितुं तेन भक्तद्रोहेणैव कंसञ्च घातयितुं कंसदास्यमानखेदानामपि

तेषामभिन्नभक्तानां भगवदाविर्भावनिश्चयज्ञापकाय स्वस्मै प्रीत्यतिशयमाशीस्सहस्रञ्च दास्यमानानां भगवद्दिदृक्षानन्दञ्च प्रवर्द्धयन्
हरिर्नौ पुत्रो भविता न वा ? इति सन्दिहानौ देवकीवसुदेवौ सन्देहोच्छेदनेनानन्दसिन्धुषु निमज्जयन् तेनैव बन्धनक्लेशोत्कर्षमपि
हर्षविशेषं मानयन् सूचकेऽपि स्वस्मिन् सन्तोषयन् मिथ्यासौहार्दाविष्कारेण सानुगं कंसमपि स्वाऽनुकूलीकुर्वन्नारदो मुनिरागत्य
कंसं प्रति रहस्यमाह—नन्दाद्या इति द्वाभ्याम् ॥ ६२ ॥ केषाञ्चिद्दैत्यत्वात् प्रायशब्दप्रयोगः भा तामसी कान्तिस्तस्यां रतेति कंस-
सम्बोधनम् उभयोर्वसुदेवनन्दकुलयोः संशयामास शशंस ॥ ६३–६४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीवसुदेवसंसर्गादसुरे सुरवच्छान्ति प्राप्ते भूभारहरणादिभगवल्लीलायां किञ्चिद्विलम्बो माभूदित्येतदर्थं श्रीनारदेन
कंसप्रबोधनं कृतं तदाह—नन्दाद्या इति त्रिभिः ॥ ६२ ॥ उभयोर्नन्दवसुदेवकुलयोः हे भारत ! एतत् सर्वं देवताप्रायत्वं वधोद्यमं च
शशंस दैत्यानां भूमेर्भारभूतानां भवतां वधोद्यमः विष्णुप्रादुर्भावप्रयत्नरूपो देवैः कृतः विष्ण्वाज्ञया च देवाः सभार्या इहाऽऽगता
इति कंसं प्रत्युक्तवानित्यर्थः ॥ ६३–६५ ॥

श्रीसुबोधिनी

तत्प्रियार्थमेव नयनमिति प्रकारान्तरेणापि तस्मिन् प्रीते पुत्रत्यागो न युक्त इति तद्वाक्यमङ्गीकृत्य पुनरानीतवानित्याह
तथेति । स्वयमेव गृहीत्वा ययौ । अविश्वासे हेतुरानकदुन्दुभिरिति । अतिक्लेश एव भगवदागमनं न स्वास्थ्ये । आनके दुन्दुभयश्च
नेदुर्भगवदागमनार्थम् । तदुभयं विरुध्यते । अतो देवकृतस्य सत्यत्वात् कंसकृतमेवासत्यमिति मत्वा नाभ्यनन्दत तस्य कंसस्य
वाक्यमेनं न मारयिष्यामीत्यभिप्रायपूर्वकम् । तत्र हेतुद्वयमाहासतोविजितात्मन इति । असन् सर्वदा नैकविधः । अस्थिरवाक्च
घातकश्च स्वतोयुक्तिदाढ्यरहितश्च । अतः केनचित् प्रथम एवाष्टम इति ज्ञापिते मारयिष्यत्येव । तस्मादसतो न विश्वासः कर्तव्यः ।
किञ्च नान्यवाक्यमपि तस्यापेक्ष्यते । यदैव राक्षसैर्भक्ष्यार्थं पुरुषाः प्रार्थयिष्यन्ते तदैवैतान् घातयिष्यति । क्रोधोद्गमहेतूनां बहूनां
सम्भवादजितान्तःकरणत्वादुत्पन्ने क्रोधे न विलम्बः ॥६१॥ 'महतामन्तःकरणमेव प्रमाण'मिति तथैव जातमित्याह नन्दाद्या इत्यष्टभिः ।
वसुदेवे कंसकृतं देवानां हितकारि न भवतीति देवगुह्यकर्ता नारदः पर्यवसानानिष्टकर्तारं वसुदेवं पीडयितुं दैत्यरूपं कंसं चोद्वेजयितुं
शीघ्रं भगवदागमनार्थं साधारणान् पीडयितुं वाक्यत्रयमुक्तवांस्तदाह । ये यमुनापारे व्रजे गोपा नन्दादयोमीषां च स्त्रियः यशोदा-
प्रभृतयश्चकारादन्या अपि कुमारिका अस्मिन्नपि कूले वृष्णिवंशोद्भवा वसुदेवादयो देवक्याद्याश्च यदुवंशोद्भवानां स्त्रियः ॥ ६२ ॥
एवमेकेन सर्वाननूद्य देवत्वं विधत्ते सर्व इति । स्त्रियः पुरुषाः सर्व एव देवताप्राया ईषदसमाप्तदेवाः । मानुषभावस्यापि विद्य-
मानत्वात् । अतो देवेषु यत् कर्तव्यं तदेतेष्वेव कर्तव्यमिति ज्ञापितम् । उभयोरिति । रोधसोर्ये केचित् तिष्ठन्ति पश्वादयोपि तेपि
देवांशाः । भारतेतिसम्बोधनमेतदाहेत्यनेन सम्बध्यते । नारदस्य तथाकथनममन्वानस्य विश्वासजनकं देवगुह्यमेतादृशमेवेति । किञ्च
न केवलमुदासीना एव देवाः किन्तु कंसनिकटवर्तिनोप्यक्रूरादयो ये ज्ञातयो गोत्रिणः कंसस्य ये बान्धवः सम्बन्धिनो ये वा सुहृदो
मित्राणि ये च कंसस्य सेवकाश्चकारात् पित्रादयोपि ॥ ६३ ॥ सर्वे देवताप्राया इति कंसाय नारदः प्राहेत्याहैतदिति । नारदस्य
दुष्टत्वं व्यावर्तयति भगवानिति । शंसनमेकान्ते कथनं युक्तिपूर्वकमुपाख्यानपूर्वकम् । तत्रैवोपाख्याने फलितानि वाक्यान्यत्रोपनि-
बध्यन्ते । अत आनुपूर्व्यभावो न दोषाय । एतावतैव कार्यसिद्धेः । ननु देवानामागमने किं स्यादित्याशङ्क्याह भूमेरिति । नाकपृष्ठे
देवानां मन्त्रणं जातं भूमेर्भारायमाणाः कंसादयो दैत्या जातास्ते हन्तव्या इति । तद्धननार्थमेव देवागमनं वधोद्यमरूपं जातम् ।
वधोद्यमं यथा भवति तथैते देवताप्राया इतिवाक्यम् ॥ ६४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नन्दाद्या इत्यत्र—वाक्यत्रयमिति । श्लोकत्रयमित्यर्थः । अत एवोपसंहारेनुवदिष्यन्ति श्लोकत्रयमुक्त्वेति ॥ ६२ ॥
ईषदसमाप्तेति । प्रायःशब्दस्तुल्यपर्यायः । तथा चेषदसमाप्ताविति्यत्रासमाप्तिन्यूनतेत्यभिप्रेत्येषदूनो विद्वानित्युदाहृतत्वादीष-
न्न्यूनदेवा इत्यर्थः । यथा चन्द्रतुल्यं मुखं चन्द्रादीषन्न्यूनमित्यर्थः । न्यूनतांशं विशदयन्ति मानुषेति । एतदाहेत्यनेनेति । शशंसेत्य-
स्यार्थतः कथनमिदम् ॥ ६३ ॥ वधोद्यमरूपमिति । वधोद्यमं रूपयति तादृशं देवागमनं दैत्यहननार्थं जातम् । अत्र देवागमनमिति-
पदाभावेपि नारदेनोपाख्याने तथोक्तमित्यार्थिकं देवगमनपदमादाय वधोद्यमपदस्य विशेषणत्वम् । तथा च मूले वधस्योद्यमो येन
तादृशं देवागमनमिति च शशंसेत्यन्वयः । वधोद्यममिति । तादृशं देवागमनं यथा भवति सम्भवति तथा सात्त्विकत्वप्रकारेणैते
देवताप्रायाः । एतेषां सात्त्विकत्वेन देवतातुल्यत्व एतेषु देवानामागमनमंशतोवतरणं सम्भवतीत्यर्थः । वाक्यमिति । एकमेवेतिशेषः ।
देवागमनसिद्ध्यर्थं पूर्वं तत्तुल्यत्वबोधनमिति सर्वमेकवाक्यमेव । 'अर्थैकत्वादेकं वाक्य'मितिलक्षणादित्यर्थः ॥ ६४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

असतोविजितात्मन इत्यत्र—असन् सर्वदा नैकविध इत्यादि । नास्तीत्यसन्निति व्युत्पत्तौ स्वरूपतः सतोपि कंसस्याभावः
प्राप्तः स च बाधितः कंसस्य प्रमात्मकप्रत्यक्षविषयत्वादतः केनचिद्धर्मेणाभावो विवक्षितस्तमाहुः सर्वदा नैकविध इति । अव्यवस्थित-

चित्त इतियावत्। एवं स्थिरचित्तत्वेन रूपेण कंसस्याभाव इत्यर्थः। असच्छब्दस्य दुष्टवाचकत्वपक्षे नाभावो व्याख्येयो दोषा एव दुष्टस्य निरूपणीयास्तानाहुरस्थिरवाक्च घातकश्च स्वतो युक्तिदार्ढ्यरहितश्चेत्यादिना ॥ ६१ ॥

इति श्रीप्रथमाध्याययोजना।

बुभुत्सुबोधिका

तथेति सुतमित्यत्र आदायेत्यस्यार्थमाहुः स्वयमेव गृहीत्वेति। अविश्वास इति तेन मङ्गलरूपभगवदवतारविरुद्धे योऽविश्वासस्तस्मिन् हेतुरित्युक्तम्। अतिक्लेश एवेति ननु भक्तित्वेन भगवदागमनत्वेन कार्यकारणभावात् कुत एवमिति चेन्न, समाधिभाषापोषकलौकिकभाषात्वात्। लोके महाराजागमनस्य तथात्वात्। किञ्च, भक्तवसुदेवे नन्दादौ च शाब्दसंयोगवति अतिक्लेशाभावे संयोगेऽर्धवृगल इति भगवदागमनहेतुर्न, किन्त्वतिक्लेशरूपविप्रयोगसंमेलनेन पूर्णभक्तौ। 'धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चने'ति व्रजभक्तपूर्णभक्तिवत्। अत एवैवकारः। संतापः सिद्धान्तोक्तो द्वितीयस्कन्धनवमाध्याये यः स तु निःकिञ्चनधनम्। प्रायश्चित्तरूपम्। 'अतप्ततनुर्न तदामोऽश्नुत' इति श्रुतेः। न स्वास्थ्ये इति स्वास्थ्यं हि बहिर्मुखतासम्पादकम्। अत एव 'दोषा हरौ न सन्त्येव तथा भक्ताहिताः क्रियाः स्फुरन्ति बुद्धिदोषेण मूलं तस्य बहिर्दृशि'रितिवाक्यम्, तपो मे हृदय'मिति वाक्यं च। तदुभयमिति अतिक्लेशानकदुंदुभिवादनं उभयम्। देवकृतस्येति नारदकृतस्यासत्यस्य। कंसकृतमिति राजकीयं सत्यम्। हेतुद्वयमिति हेतुगर्भितविशेषणद्वयम्। 'असन्मृत्युरितिश्रुतेः 'असन्नेव स भवति असद्ब्रह्मेति वेद चे'दिति श्रुतेश्चाहुः असदित्यादि। द्वितीयश्रुत्यनुसारिणमविजितात्मन' इत्यस्यार्थमाहुः स्वतो युक्तीति। प्रथम एवाष्टम इति द्वितीयाद्गणने एवं भवति। एवेत्यत्यंतायोगव्यवच्छेदे ॥ ६१ ॥

नन्दाद्या इत्यत्र तस्येति कंसस्य। 'पुरुषादाननुव्रत' इति वाक्यादाहुः यदैवेति। एतानिति सुतान्। क्रोधोद्गमेति यथा रहूगणस्य विषमशिबिकावहनं ब्राह्मणकृतम्। 'अविजितात्मन' इत्युक्तविशेषणादाहुः अजितांतरिति। एकदेशविकृतत्वादविजितान्तःकरणत्वादित्यर्थः। महतामित्यादि वसुदेवादीनाम्। ननु मनसः प्रामाण्यमिन्द्रियद्वारकमिति चाक्षुषं श्रावणं प्रत्यक्षमित्युच्यते, मानसं तु कथमिति चेन्न, बृहदारण्यके 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मित्यप्रमेयदर्शने मन एव करणमित्युक्तत्वात्। अप्रमेयदर्शनं सर्वस्य स्यात्, अत उक्तं महतामिति। एवकारेण प्रमेयाप्रमेयसाधारणमन्तःकरणं प्रमाणम्, प्रमास्थले तथैवेति। कंसवाक्यं सत्यमप्यसत्यत्वेन जातम्। कंसकृतमिति सत्यं 'प्रतिया'त्वितिवाक्योक्तम्। देवानां हितेति छांदोग्ये 'देवासुरा वै यत्र संयेतिरे उभये प्राजापत्याः तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम' इत्यादिनोद्गीथाहरणेनासुराभिभवकर्तृत्वं देवानामुक्तम्। 'सत्यं हि सत्य'मिति श्रुतेः सत्यं देवानामुक्तम्। 'उद्गीथं' सोमयागं 'आजह्रुः' कृतवंत इति व्याख्याने 'उद्गीथ' मक्षरं सत्यप्रधानं सोमयागस्य सत्यत्वादंशद्वयाप्राधान्यात्। अतो देवानां हितकारि न भवतीति देवानां गुह्यं संवरणीयम्। गुह संवरण इति धातुपाठात् तत्कर्ता नारद इत्यर्थः, 'शशंसाभ्येत्य नारद' इति वाक्यात्। पर्यवसानेति अष्टगर्भस्य नयनेन कस्यापि पुत्रस्यामारणादनिष्टदेवभक्तानिष्टकंसक्रोधकरणात्। पीडने कृते तु कृतपीडनकेन वसुदेवेन कृष्णस्यान्यत्र नयनं न कंसक्रोधे हेतुः। यद्वा देवानां हितेति अष्टमगर्भे नीते तेनाकाशवाणीप्रामाण्यात् कंसवधेऽसुरैः सह संग्रामापक्षपातिभगवदाविर्भावाभावाद् देवानां हितकारि न भवतीत्यर्थः। देवभक्तानिष्टे वाक्यत्रयमिति श्लोकत्रयम्। वृष्णिवंशेति नवमस्कन्धे 'वृष्णेः सुमित्रः पुत्रोऽभू'दित्यारभ्य 'देवदुंदुभयो नेदुरानका यस्य जन्मनि। वसुदेवं हरेः स्थानं वदन्त्यानकदुंदुभि'मिति वाक्यात्। यदुवंशेति 'यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते, यत्रावतीर्णो भगवान् परमात्मा नराकृति'रिति वाक्यात्। यादवत्वं वसुदेवादौ सामान्यम् ॥ ६२ ॥

सर्वे वा इत्यत्र सर्वानिति नंदाद्यान्। विधत्त इति यथा दध्ना जुहोतीत्यनेनाग्निहोत्रे दधिगुणः। ईषदसमाप्तेति प्रायशब्दस्तुल्यपर्यायः। तथा चेषदसमाप्ताविल्यत्रासमाप्तिन्यू'नतेत्यभिप्रेत्येषदूनो विद्वानित्युदाहृतत्वादीषन्न्यूनदेवा इत्यर्थः। यथा चन्द्रतुल्यं मुखं चन्द्रादीषन्न्यूनमित्यर्थः। न्यूनतांशं विशदयन्ति स्म मानुषेति। उभयोरिति यमुनापारयोः। एतदाहेति 'एतत् कंसाय भगवान् शशंसे'त्यस्यार्थः। अमन्वानस्य परीक्षितः। भक्तत्वान्नारदस्येति भावः। अष्टश्लोककथायां विश्वासजनकं देवानां गुह्यं वरणीयम्। सम्बन्धिन इति सुनामन्यग्रोधकंकादयः कंसभ्रातरः ॥ ६३ ॥

एतत् कंसायेत्यत्र दुष्टत्वमिति बालकघातकत्वम्। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुने'तिस्मृतेः। 'कलौ कर्तैव लिप्यत' इति पराशरस्मृतेः। 'कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयं आसीना दीर्घसत्रेण कथायां सक्षणा हरे'रितिवाक्यात् कलिकालः। शंस कथन इत्यत्र कथनं कथनविशेष इत्याहुः एकान्ते कथमिति। शंस कथने, कथ वाक्यप्रबन्धे इत्याशयेनाहुः युक्तिपूर्वकमिति। एष एकान्तशब्दार्थः। उपाख्यानेत्यादि प्रबंधार्थः। कथनं भावल्युडर्थः किमुपाख्यानमित्याकाङ्क्षायामाहुः तत्रैवोपेति। अत्रेत्यष्टश्लोक्याम्। आनुपूर्वीति 'आत्मानमिह संजात'मिति विरोधः पूर्वं, 'मातरं पितर'मिति हननज्ञानं विरोधानन्तरं, पश्चा'द्देवकीं वसुदेवं चे'ति निगडनिग्रह इत्यानुपूर्वी तस्या जानातीच्छति यतत इति न्यायसिद्धाया अभाव इत्यर्थः। एतावतैवेति इच्छाभावसहितेनोपनिबन्धेनैव। छांदोग्योक्तोद्गीथाहरणमाहुः नाकपृष्ठ इति। 'देवासुराः' सात्त्विककरणवृत्तयो देवाः 'असुराः' असुरेष्वेव रमणाद् राजसस्तामसश्च करणवृत्तयः 'यत्र' यागे सत्यरूपेऽन्योन्यविषयापहारलक्षणे निमित्ते। 'संयेतिरे'प्रतिदेहमन्योन्यस्य

दृप्युभयाभिभवलक्षणं संग्रामं कृतवन्तः । 'उभये' एते 'प्राजापत्याः' यजमानावस्थस्य कर्मिणः प्रजापतेरन्त्यवस्थिताः, 'तत्' तत्र 'ह' प्रसिद्धे स्वर्गपृष्ठे 'देवा उद्गीथमाजह्रुः' सोमयागं कृतवन्तः । 'अनेना'सुरा'नभिभविष्याम' इति श्रुत्यर्थः । अत्र यागाधिकारो देवानां नाकपृष्ठे इति नाकपृष्ठ इत्युक्तम् । 'अंभस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे' इति महानारायणे उपक्रम्य 'यस्मिन् देवा अधिविश्वे निषेदु'रिति श्रूयते । तत्र 'यस्मिन्' प्रजापतौ 'विश्वे'स्मिन् नाकपृष्ठरूपे 'देवा निषेदु' देवत्वात्, एतदग्रे 'तदेव भूतं तदुभव्यमानमिदं तदक्षरे परमे व्योमन्, येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च । यदन्तःसमुद्रे कवयो वयन्ति यदक्षरे परमे प्रजा' इत्युक्तम् । अत्र 'प्रजा' इति प्रकर्षेण जायन्त इति प्रजाशब्दव्युत्पत्तिः । तत्र प्रकर्षश्चानेकधा । प्रकृते प्रकर्षः स उक्तः । नाकपृष्ठे देवानां मन्त्रणमित्यादि कृष्णोपनिषदि चाहुः 'ते होचुस्तं सुराः सर्वे भगवंतं सनातनं, नोवद्यमवतारान् वै गृह्णन्ते नैव भूतले । आज्ञयावतारांस्ते हि गोपांश्च नो कुरु स्त्रीश्च नो कुरु' इति । अत्र संग्रामोक्तेस्तत्रत्यदेवगुह्यकर्ता नारदादिरार्थिकः । एवं च 'यन्मनसा ध्यायति तद्वाचा वदति, यद्वदति तत् करोती'तिश्रुतेर्नारदेन देवगुह्यकर्त्रा देवानां मन्त्रणम् ऋषयो मन्त्रद्रष्टार इति मनसा ध्यातं तदुत्तरार्धेन वाचोक्तमित्याशयेनोत्तरार्धं विवृण्वन्ति स्म भूमेर्भारायमाणा इत्यादिना । देवानां मन्त्रणं जातमित्यस्यार्थोयम् । देवागमनमिति कृष्णोपनिषदि 'तं होचुः सुराः सर्वे भगवन्तं सनातनम् । नोवद्यमवतारान् वै गृह्णन्ते नैव भूतल' इति श्रुतेः देवप्राया अक्रूरादयोपि । वधोद्यमरूपमिति वधोद्यमं रूपयति तादृशं देवागमनं दैत्यहननार्थं जातम् । अत्र देवागमनपदाभावेपि नारदेनोपाख्याने तथोक्तमित्यार्थिकं देवागमनपदमादाय वधोद्यमपदस्य विशेषणत्वम् । तथा च मूले वधस्योद्यमो येन देवागमनेन तादृशं देवागमनं च शशंसेत्यन्वयः । वधोद्यममिति तादृशं देवागमनं यथा भवति सम्भवति तथा सात्त्विकत्वप्रकारेणैते देवताप्रायाः, एतेषां सात्त्विकत्वेन देवतातुल्यत्वे एतेषु देवानामागमनमंशतोवतरणम् । 'भवद्भिरंशैर्यदुषूपजन्यता'मित्युक्तं सम्भवतीत्यर्थः । उत् अधिकं यमः शरीरसाधनापेक्ष उद्यमस्तम् । 'यमो दंडधरे ध्वांक्षे संयमे यमजेपि च, शरीरसाधनापेक्षे नित्यकर्मणि चोच्यत' इति विश्वः । वाक्यमिति एकमेवेतिशेषः । देवागमनसिद्ध्यर्थं पूर्ववाक्ये तत्तुल्यत्वबोधनमिति सर्वमेकवाक्यमेव । अत्र पूर्वतन्त्रेऽर्थैकत्वादेकं वाक्यं 'साकाङ्क्षं चेद्विभागे स्या'दित्येकवाक्यलक्षणादित्यर्थः । एतत्पदात् पूर्वोत्तरयोः श्लोकयोर्विभागे साकाङ्क्षत्वम् ॥६४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आनकदुन्दुभिस्तथेत्यङ्गीकृत्य सुतमादाय स्वगृहं ययौ, परन्तु तस्य कंसस्य वाक्यं नाभ्यनन्दत यथार्थं नामन्यत । तत्र हेतुमाह—असत इति । असत्त्वमेव स्पष्टयति—अविजितात्मन इति । अनवस्थितचित्तस्येत्यर्थः ॥ ६१ ॥ हे भारत ! एवं कंसस्य शान्तिर्देवकार्यानुगुणा न भवति, भगवतोऽवतारे हि भक्तानां दुःखस्य हेतुत्वात् । अतो देवकार्यार्थमुद्यतः प्रयत्नवान् भगवान् सर्वोपायाभिज्ञो नारदः वसुदेवे गते सति । अथानन्तरमेवाभ्येत्यागत्य कंसायेतच्छशंस एकान्ते कथयामासेति सार्धत्रयस्यान्वयः । एतच्छब्दार्थमेव स्पष्टयति – ये व्रजे नन्दादयो गोपाः, याश्च यशोदाद्या अमीषां नन्दादीनां योषितः स्त्रियः, तथा ये वसुदेवाद्या वृष्णयो यादवाः, याश्च देवक्याद्या यादवानां स्त्रियः, तथोभयोर्नन्दवसुदेवयोर्ज्ञातयः गोत्रिणः, बन्धवः सम्बन्धिनः, सुहृदो मित्राणि, तथा ये चाक्रूरादयः कंसमनुव्रताः सेवमानास्ते सर्वे एव देवताप्रायाः । तत्र मनुष्याणामपि सत्त्वात् प्रायग्रहणम् ॥ ६२–६३ ॥ भूमेर्भारायमाणानां भारवद्वर्तमानानां दैत्यानां वधोद्यमं च पूर्वोक्तप्रकारेण भगवत्प्रार्थनादिरूपं ब्रह्मादिभिः कृतं शशंस ॥ ६४ ॥

अन्वितार्थप्रकाशिका

तथेति ॥ आनकदुन्दुभिः तथा इति उक्त्वा सुतम् आदाय स्वगृहं ययौ । असतः मृषा सौहार्दं दर्शयतः अविजितात्मनः अस्थिरचित्तस्य कंसस्य तद्वाक्यं नाभ्यनन्दत विश्वासाभावात् । तत्कार्षः ॥ ६१ ॥ कंसस्य शान्तिर्देवकार्यानुगुणा न भवतीति नारदस्य प्रत्यवस्थानं तदाह—नन्दाद्या इति । अत्रादिद्वयं नारदवाक्यं तृतीयं शुकवाक्यम् । हे भारत ! कंसव्रजे ये नन्दाद्याः गोपाः याश्च अमीषां गोपानां योषितः यशोदाद्याः ये च वसुदेवाद्याः वृष्णयः याश्च देवक्याद्याः यदुस्त्रियः सन्ति ॥ ६२ ॥ सर्वे इति ॥ ये च उभयोर्नन्दवसुदेवकुलयोः ज्ञातयः सकुल्याः बन्धवः सुहृदश्च ये च कंसमनुव्रताः ते सर्वे वै निश्चितं देवताप्रायाः प्रायेण देवतांशाः । प्रायग्रहणात्कंसादीनां दैत्यांशत्वम् ॥ ६३ ॥ एतदिति ॥ भगवान्नारदः अभ्येत्य कंसाय एतत्पूर्वोक्तं वचः शशंस तथा भूमेर्भारायमाणानां भारभूतानां दैत्यानां वधोद्यमं पृथ्वीप्रार्थनया ब्रह्माद्यैः कृतमपि शशंस नारदेन कंसकर्तृकवैष्णवद्रोहप्रवर्तनं शीघ्रं भगवत्प्रादुर्भावाय ॥ ६४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह । प्रतियात्विति । अयं तव कुमारः, प्रतियातु गृहं प्रति गच्छतु । मे मम, अस्मात्कुमारात्, भयं मृत्योर्भीतिः, न अस्ति हि । युवयोः, अष्टमात् पुत्रात्, मे मम, मृत्युः विहितः, किल । अशरीरवाचा कथितोऽस्ति हीत्यर्थः ॥ ६१ ॥ तथेति ॥ आनकदुन्दुभिर्वसुदेवः, तथेति ओमित्यङ्गीकृत्य, सुतम् आदाय, ययौ । स्वगृहं प्रतीति शेषः । किं तु । असतः पापिनः, अविदितात्मनः अज्ञस्य, अविजितात्मन इति पाठेऽनवस्थितचित्तस्य, कंसस्येति शेषः । तत् वाक्यं, न अभ्यनन्दत । 'अव्यवस्थितचित्तानां प्रसादोऽपि भयावहः' इति न्यायं संचिन्त्येदमेतस्य वाक्यं विश्वसनीयमिति नामन्यतेत्यर्थः ॥ ६२ ॥ कंसस्य शान्तिर्देवकार्यानुगुणा

न भवतीति नारदस्य यत्प्रत्यवस्थानं तदाह नन्दाद्या इति त्रयेण ॥ नन्दाद्या इति ॥ व्रजे, ये नन्दाद्या नन्दप्रभृतयः गोपाः, याश्च अमीषां नन्दादीनां, योषितः, ये वसुदेवाद्याः, वृष्णयो यदवः, याः देवक्याद्याः, यदुस्त्रियश्च ॥ ६३ ॥ सर्वं इति हे भारत हे नार्पत्यदीप्तिप्रसक्त, उभयोर्नन्दवसुदेवयोः, ज्ञातयः, बन्धुसुहृदः, बन्धवः सुहृदश्चेत्यर्थः । सर्वेऽपि देवताप्रायाः, ये च कंसं त्वां, अनुव्रताः तेऽपि, देवताप्रायाः वै ॥ ६४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नन्दाद्या इतिः १०–१–६२

यद्दर्शनं जगति तत्त्वदृशोऽप्यलभ्यमागात् स कंसमसदग्र्यमृषिस्तदेतत् ।
चित्रं न चित्रमथवा भुवि सिद्धमेव यत्पुण्यपाक-सुमनः–फलमीदृगर्थम् ॥ ४४ ॥
यत्साहाय्येन शत्रुर्भवति सुबलवाँस्तद्विनाशे प्रयत्नः कार्यो विज्ञैरितीमं नयमनुगुणमालोचयन् कार्यसिद्धौ ।
आगत्यागण्यपुण्यप्रचयविघटनायैव कंसं नु देवा एवेमे यादवाः खल्विति समकथयद्देवमानी मुनीशः ॥ ४५ ॥
देवांशो वसुदेव एष इति चेत्तेनात्मसख्यं कथं नन्दस्य व्रजवासिनो मम प्रजारूपस्य नैसर्गिकम् ।
स्याद्धेतस्य कथं सवृष्णिनिवहः स्वज्ञातिबन्ध्वात्मकस्तस्मादुक्तमिदं न सङ्गतमिति श्रद्धालुरस्मद्गिरि ॥ ४६ ॥
न स्यात्ततो न भविता सुरवर्यकार्यसिद्ध्यर्थयत्नमनसः सफलागतिर्मे ।
आलोचयन्निति स तेष्वखिलेषु देवभावं शशंस लिखनं कथमन्यथेदम् ॥ ४७ ॥ (युग्मम्)

हिन्दी अनुवाद (कर्दमक्षमा)

वसुदेवजीने कहा—'ठीक है' और उस बालकको लेकर वे लौट आये। परन्तु उन्हें मालूम था कि कंस बड़ा दुष्ट है और उसका मन उसके हाथमें नहीं है। वह किसी क्षण बदल सकता है। इसलिये उन्होंने उसकी बातपर विश्वास नहीं किया ॥ ६१ ॥ परीक्षित् ! इधर भगवान् नारद कंसके पास आये और उससे बोले कि 'कंस ! व्रजमें रहनेवाले नन्द आदि गोप, उनकी स्त्रियाँ, वसुदेव आदि वृष्णिवंशी यादव, देवकी आदि यदुवंशकी स्त्रियाँ और नन्द, वसुदेव दोनोंके सजातीय बन्धु-बान्धव और सगे-सम्बन्धी—सब-के-सब देवता हैं; जो इस समय तुम्हारी सेवा कर रहे हैं, वे भी देवता ही हैं।, इन्होंने यह भी बतलाया कि 'दैत्योंके कारण पृथ्वीका भार बढ़ गया है, इसलिये देवताओंकी ओरसे अब उनके वधकी तैयारी की जा रही है ॥ ६२–६४ ॥

ऋषेर्विनिर्गमे कंसो यदून् मत्वा सुरानिति। देवक्या गर्भसम्भू[1]तिं विष्णुं च स्ववधं प्रति ॥ ६५ ॥
देवकीं वसुदेवं च निगृह्य निगडैर्गृहे । जातं जातमहन् पुत्रं तयोरजनशङ्कया ॥ ६६ ॥
मातरं पितरं भ्रातॄन् सर्वांश्च[2] [3]सुहृदः सखीन् । [4]घ्नन्ति ह्यसु[5]तृपो लुब्धा राजानः प्रायशो भुवि ॥ ६७ ॥
आत्मानमिह संजातं जानन् प्राग् विष्णुना हतम् । महासुरं कालनेमिं यदुभिः स व्यरुध्यत ॥ ६८ ॥
उग्रसेनं च पितरं [6]यदुभोजान्धकाधिपम् । स्वयं निगृह्य बुभुजे शूरसेनान् महाबलः ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमे[7] स्कन्धे प्रथमे जन्मप्रकरणे
भक्तदुःखनिरूपणं नाम प्रथमोऽध्यायः ॥ १ ॥[8]

कर्दमक्षमा

अन्वयः—ऋषेः विनिर्गमे कंसः यदून् सुरान् इति मत्वा च स्ववधं प्रति देवक्याः गर्भसम्भूतिं विष्णुं मत्वा देवकीं च वसुदेवं निगडैः गृहे निगृह्य तयोः जातं जातं पुत्रम् अजनशंकया अहन् ॥ ६५–६६ ॥ भुवि प्रायशः लुब्धाः असुतृपः राजानः हि मातरं पितरं भ्रातॄन् सुहृदः सखीन् च सर्वान् घ्नन्ति ॥ ६७ ॥ प्राग् विष्णुना आत्मानं कालनेमिं महासुरं हतं (पुनः) इह संजातम् आत्मानं जानन् सः यदुभिः व्यरुध्यत ॥ ६८ ॥ महाबलः यदुभोजान्धकाधिपं च पितरम् उग्रसेनं निगृह्य स्वयं शूरसेनान् बुभुजे ॥ ६९ ॥

इति श्रीमद्भागवते दशमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

निगडैः शृंखलैः अजनो विष्णुस्तच्छंकया ॥ ६६–६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कंधे टीकायां प्रथमोऽध्यायः ॥ १ ॥

---

१. तं—श्रीधरादयः । २. न्पुत्रांश्च—वीर. । ३. सुहृदस्तथा—श्रीधरादयः । सुहृदः सखीन्—विज. । ४. निघ्नन्त्यसु—विज. । ५. तृपा—वीर. । ६. यदुनामन्धका—इति कस्यचित् । ७. पूर्वार्धे श्री कृष्णावतारोपक्रमे—इति कस्यचित् । ८. द्वितीयोऽध्यायः- विज.

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ऋषेर्नारदस्य । विनिर्गमे गमने सति । स्ववधं प्रति मत्वा च ॥६५॥ निगडैरंदुकैः 'अंदुको निगडोऽस्त्री स्यात्' इत्यमरः । निगृह्य निरुद्ध्य । अयमेव मत्संहर्ता विष्णुरिति शंकया । जातं जातमुत्पन्नमुत्पन्नम् । हतवान्न तु जन्मकाल एव । तथा सति नामकरणासंभवे कीर्त्तिमंतमित्युक्तेरसांगत्यं स्यादिति भावः । युग्मम् ॥ ६६ ॥ परप्राणैः स्वप्राणांस्तर्पयंति ये तेऽसुतृपः । राजानस्तु प्रायशो बाहुल्येन "मा राज्यश्रीरभूत्तु सः श्रेयस्कामस्य मानद । सुजनानुत वा बंधून् पश्यति ययांधदृक् ॥" इति वक्ष्यमाणत्वात् ॥ ६७ ॥ प्राक्पूर्वजन्मनि जानन् नारदोक्तेरिति शेषः । स कंसः ॥ ६८ ॥ चात्तत्संबाधनोपि । स्वयं बुभुजे न केनचिदभिषिक्त इत्यर्थः ॥६९॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ऋषेरिति युग्मकम् । इति अनेन प्रकारेण विशेषेण पुनर्निवृत्तिशङ्कापगमनादिना पुरीतो निर्गमे सति ऋषेः साक्षात्तत्प्रियेह लज्जाद्युत्पत्तेः किंवा तेन तन्निवारणस्य शङ्कया मत्वा ज्ञात्वा स्वस्य कंसस्य वधं प्रति तदर्थं विष्णुं च देवक्या गर्भे सम्यक् सर्वैश्वर्यपरिपूर्णतया भूतमाविर्भूतं भविष्यत्यपि भूतनिर्देशः सामीप्यात्तन्निर्द्धारणाद्वा यद्वा गर्भे सम्भूतं सम्भूतिर्यस्य तं मत्वा सम्भूतिमिति पाठोपि क्वचित् तद्ज्ञानं च "अस्यास्त्वामष्टमो गर्भः" इति पूर्वोक्तेन समुदितात् "दैत्यानां च वधोद्यमम्" इति श्रीनारदवचनादेव ज्ञेयं, तथा च तत्रैव—

"तत्रैषा देवकी या ते मथुरायां पितृष्वसा । योऽस्या गर्भोऽष्टमः कंसः ! स ते मृत्युर्भविष्यति ॥
देवानां चैव सर्वस्वं त्रिदिवस्य गतिश्च सः । परं रहस्यं वेदानां स ते मृत्युर्भविष्यति ॥
परतोऽपि परस्तेषां स्वयम्भूश्च दिवौकसाम् । ततस्त्वेतन्महद्भूतं दिव्यं ते कथयाम्यहम् ॥
श्लाघ्यश्च स हि ते मृत्युर्भूतपूर्वश्च तं स्मर" इति

तत्र पितृष्वसेति पितृसम्बन्धेन स्वसेत्यर्थः । देवकजनकेनाऽऽहुकेन पौत्री देवकी स्वपुत्रीत्वेन पालितेति केचित् निगृह्य बद्ध्वा निजगृहे अजनेति जीववज्जन्मरहितस्यापि प्राकृतज्जन्मशङ्कयेति कंसस्य मौढ्यं सूचितं किं वा अजनाद्या शङ्का भयं तया ॥ ६५–६६ ॥ ननु, बालान् घ्नन् कंसः कथं न लज्जते ? तत्राह—मातरमिति । मात्रादीनां यथोत्तरं स्निग्धत्वेन न्यूनता मातरमपि घ्नन्ति किमुत पितरमित्येवं हि निश्चये यतो ये असून् निजप्राणानेव तर्पयन्तीत्यसुतृपः राज्यादिलुब्धाः ते मात्रादीन् घ्नन्ति प्रायश इति तेऽपि न सर्वे इति तस्याऽत्यन्तावमत्वविवक्षया ॥ ६७ ॥ विष्णुना निजशक्त्या जगद्व्यापकेनेति हनने सामर्थ्यमुक्तं जानन्निति भूतपूर्वं च तं स्मरेति श्रीनारदवचनादेव पूर्वजन्मस्मरणात् ॥ ६८ ॥ न केवलं तैः सह स्वपित्रापीत्याह—उग्रेत्यादि । यदुभोजाद्यधिपमपि निगृह्य बद्ध्वा अतिक्रम्य वा स्वयं बुभुजे यतो महद्बलं सामर्थ्यं दैत्यसेना वा यस्य सः भोजादीनां यदुत्वेऽपि पृथगुक्तिः तेषां तेषु प्रधानानामप्यधिप इति विवक्षया शूरसेनानिति माथुरांस्तत्पूर्वमेव तदनुज्ञामतिक्रम्य बुभुज इति द्योतितम् ॥६९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत ऋषेर्नारदस्य विनिर्गमनानन्तरं कंसो यदून् सुरांशसम्भवान् स्ववधं प्रत्युद्दिश्य देवक्या गर्भे सम्भविष्यमाणं विष्णुञ्च ज्ञात्वा इत्यर्थः ॥ ६५ ॥ देवकीं वसुदेवं च निगडैः शृङ्खलैर्गृहे कारागृहे निगृह्य निग्रहपूर्वकमावध्य अजनशङ्कया अरिष्टशङ्कया अर्दनशङ्कयेति पाठे स्वपीडाशङ्कया तयोर्देवकीवसुदेवयोः पुत्रं जातञ्जातमहन् जघान ॥ ६६ ॥ निर्घृणः कथमहन्नित्यत्र लोकपरिपाटीं दर्शयति—मातरमिति भुवि राजानः प्रायशोऽसुतृपाः परप्राणैरात्मप्राणतर्पकाः लुब्धाः निषादसदृशाः मात्रादीनपि घ्नन्ति हि निश्चयार्थद्योतकः ॥ ६७ ॥ आत्मानं प्राक् पूर्वजन्मनि विष्णुना हतं महासुरं कालनेमिम् इहास्मिन् जन्मनि आत्मरूपेण जातं जानन् नारदवाक्याज्जानन् स कंसः यदुभिः सह व्यरुध्यत विरोधञ्कृतवान् ॥ ६८ ॥ भोजानामन्धकानां च यादवानामधिपं पितरमुग्रसेनं निगृह्य स्वयं महाबलः कंसः शूरसेनान् जनपदान् बुभुजे उपभुक्तवान् ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां प्रथमोऽध्यायः ॥ १ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अहन् हतवान् अजनो विष्णुरवतीर्ण इति शङ्कया ॥ ६६ ॥ परप्राणैः स्वानसून् प्राणांस्तर्प्पयन्तीत्यसुतृपः ॥ ६७ ॥ प्राक् पूर्वजन्मनि ॥ ६८ ॥ शूरसेनान् विषयान् ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां प्रथमोऽध्यायः ॥ १ ॥

(विजयध्वजतीर्थपाठेन द्वितीयोऽध्यायः)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विष्णुश्च स्ववधं प्रतीति पूर्वशत्रुर्विष्णुर्देवक्यामाविर्भूय त्वां वधिष्यतीति नारदेनोक्तं तत्तत्सर्वं एव शुश्रुपुश्चेत्यपि ज्ञेयम् अजनो विष्णुस्तच्छङ्कया ॥ ६५–६६ ॥ कंसादीनां दुर्जनानामेतन्न चित्रमित्याह—मातरमपि किमुत पितरमित्येवं यथापूर्वं गुरुत्वाधिक्यम् ॥ ६७ ॥ जानन् नारदवचनात् ॥ ६८ ॥ शूरसेनान्तर्गतत्वान्माथुरानपि ॥ ६९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमे प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निगडैः शृङ्खलैः अजनशङ्कया श्रीनारदोक्तविष्णुप्रादुर्भावशङ्कया ॥ ६६–६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे प्रथमाऽध्यायार्थप्रकाशः ॥ १ ॥

श्रीसुबोधिनी

एवं श्लोकत्रयमुक्त्वर्षौ गते कंसो यत् कृतवांस्तदाह पञ्चभिः **ऋषेर्विनिर्गम** इति । अनुवादेपि येऽर्थास्ते पूर्वं नारदेनोक्ता इति ज्ञातव्यम् । ऋषिणैव निवारितमिति नर्षेरग्रे किञ्चित् कृतवान् । द्वयं ज्ञातवान् । चतुष्टयं कृतवान् । ज्ञातं द्वयमाह **यदून् सुरान्** देवान् **मत्वा देवक्या गर्भेऽष्टमे सम्भूतिर्यस्य** तादृशं च **विष्णुं स्वस्य कंसस्य वधं प्रत्येव** देवकीगर्भसम्भूतिं विदित्वा ॥ ६५ ॥ प्रथमतो **देवकीं वसुदेवं चकारा**दन्यांश्च तदन्तर्गतान् स्वगृह एव **निगडैर्निगृह्य जातञ्जात**मानुपूर्व्येण जातमष्टमसङ्ख्याया अपेक्षाबुद्धिजन्यत्वाद्गणनायामनियमसम्भवा**दजनशङ्कया** विष्णुसन्देहात् षट् पुत्रानहन् । **जातञ्जात**मिति न कालभेदज्ञापकं किन्तु मारणे देवक्यां जननमेव निमित्तमितिज्ञापयितुमन्यथा क्षत्रियाणां त्रयोदश एवाह्नि नामकरणसम्भवादुत्पन्नमात्राणामेव मारणे 'कीर्तिमन्तं सुषेणञ्चे'त्यादिनामोक्तिराद्यस्कन्धेनुपपन्ना स्यात् ॥ ६६ ॥ नन्वेवं कथमतिदुष्कृतं कृतवानित्याशङ्क्याह **मातर**मिति । अयं तु दैत्य एव । येऽप्यन्ये **राजानस्तेऽप्यसुतृपः** केवलं प्राणपोषकास्तत्रापि **लुब्धाः** । लोभः सर्वगुणनाशकोऽतस्तेषां गुणा न सन्तीतिज्ञापनार्थमुक्तम् । **प्रायश** इति **लुब्धा** इति च पदद्वयेन केचन धर्मात्मानो व्यावर्तिता अम्बरीषादयः । **भुव्येव** व्यवस्था । अतो युधिष्ठिरादयोऽपि पितामहादीन् मारितवन्तः । **स्वस्य** यत्रैव मरणसन्देहस्तानतिमान्यानपि मात्रादीन् पञ्चविधान् घ्नन्त्येव ॥ ६७ ॥ नन्वस्य स्वस्यापि देवत्वसम्भावनया तद्धिताचरणमेव कथं न जातमित्याशङ्क्याहा**त्मान**मिति । पूर्वममृतमथने भगवता **महासुरः कालनेमि**र्हतो देवपार्ष्णिग्राहेण स एवायं कंस इत्या**त्मानं जानन्** पुनर्दैवप्रेरणयैव मारणार्थमायातीति यदूनां देवत्वात् तैः सर्वैरेव सह विरोधं कृतवान् ॥ ६८ ॥ अन्यदप्यत्यन्तायुक्तं कृतवानित्याहो**ग्रसेन**मिति । नाम्नैव महत्त्वं निरूपितम् । **स्वस्य पितरं** सर्वसहाययुक्तम् । **यदुभोजान्धकाधिपं** यदवो भोजा अन्धकाश्च । उपलक्षणमेतत् षड्विधानामपि यादवानाम् । तदाज्ञया ते सर्वे विपरीतं करिष्यन्तीति विशेषतस्तस्य बन्धनम् । बन्धकः स्वयमेव जात इत्याह **स्वयं निगृह्येति** । शूरसेनदेशस्तस्य भोगार्थं स्थितः । अतस्तस्य पुनर्वचनं **शूरसेनान् बुभुज** इति । एतत्सर्वकरणे सामर्थ्यं **महाबल** इति । एवं सर्वेषां देवांशानां भक्तानां महानुपद्रवो निरूपितो भगवदवतारहेतुभूतः ॥ ६९ ॥

इति श्रीभागवतसुबोधिन्यां श्रीवल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे प्रथमोध्यायः ॥ १ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

जातञ्जातमित्यत्र—ननु लक्षणप्रतिपदोक्तयोर्मध्ये प्रतिपदोक्तस्यैव ग्रहणं न लाक्षणिकस्येतिवैयाकरणाभियुक्तोक्तनियमात् कथं नास्य कालभेदज्ञापकत्वमितिशङ्कायां तन्निवर्तकं तर्कमाहुरन्यथेत्यादि । तथा च यत्र लक्षणस्य सावकाशता तत्रैव प्रतिपदोक्तस्य ग्रहणं 'यावद्वचनं हि वाचनिक'मितिन्यायात् । यत्र तु लक्षणस्य निरवकाशता तत्र न तत्प्रवृत्तिर्यथा पतिताग्निहोत्रप्रतिपत्तिस्मृत्या-'हिताग्निमग्निभिर्दहती'ति श्रुतौ यथा च तल्लिङ्गादिभिर्हेतुभिराकाशादिशब्दानां ब्रह्मवाचकत्वे । तथा च मीमांसाद्वयसिद्धत्वादत्र लाक्षणिकग्रहणं नायुक्तमित्यर्थः ॥६६॥ **आत्मानमित्यत्र—देवपार्ष्णिग्राहेणेति** 'ये ये हताश्चक्रधरेण राजंस्त्रैलोक्यनाथेन जनार्दनेन ते ते गता विष्णुगतिं प्रपन्नाः क्रोधो हि देवस्य वरेण तुल्य' इतिपाण्डवगीतावाक्यविरोधपरिजिहीर्षयेदमुक्तम् । पार्ष्णिग्राहस्यानुग्राहकत्वेन मार्ये क्रोधाभावात् । तथार्जुनेन भूरिश्रवसो बाहुच्छेदेर्जुनस्य तथात्वं प्रसिद्धम् । वस्तुतस्तु 'कृतप्रयत्नापेक्ष' इतिन्यायेन तथेत्यापाततो मर्यादाविरोधो न दोषः । यद्वोक्तवाक्ये 'प्रपन्ना' इतिकथनाद्यत्र तदेकतानतारूपा प्रपन्नता तस्यैव मुक्तिर्नान्यस्येति 'क्रोधः' तु 'वरेण तुल्य' इति लौकिकभोगं दत्वापि चरितार्थो भवतीति न कोपि विरोधः । हिरण्यकशिपुवधे क्रोधस्यापि कथनादिति ॥६८॥

॥ इति श्रीप्रथमाध्यायप्रकाशः ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

मातरमित्यत्र—एषैवेति । लुब्धा घ्नन्त्येवेत्यर्थः । अम्बरीषादयस्तु लोभाभावान्न तथेतिभावः ॥ ६७ ॥

॥ इति श्रीप्रथमाध्यायलेखः ॥

बुभुत्सुबोधिका

ऋषेर्विनिर्गम इत्यत्र अनुवादेपीति 'एतत् सर्वं समाचष्ट कंस आहूय मन्त्रिणः अन्यथानुपपन्नं स्यान्निग्रहादिकमग्रिमम्'। अत्र कंसकृते नारदशंसितस्य मन्त्रिणः प्रत्यनुवादे। अनुक्तत्वादननुवादोपिशब्दार्थः। पूर्वमिति पूर्वपद्योत्तरार्धे। ननु सत्यं स्वकर्त्र्युक्तं कुतोनूदितवान् कंस इति चेत्, तत्राहुः ऋषिणेवेति, इतरयोगव्यवच्छेदकैवकारः। निवारितमिति सत्यं राजकार्यम्। निवारितम् असत्यीकृतम्। नोत 'ऋषेर्विनिर्गम' इतिवाक्यात्। चतुष्टयमिति अग्रेतनचतुःश्लोकोक्तं चतुष्टयं निगडनिग्रहादिकम्। यदूनिति यादवान्। बहुषु तद्राजस्य लुक्। तादृशं चेति कंसस्य राजत्वाद्बुद्धिः। विष्ण्वंशं 'स्ववधं प्रति' स्वस्य वधं प्रतीति स्पष्टम्। एवं 'देवक्या गर्भसम्भूति'मितिपाठे व्याख्यानमुक्तम्। चकारात् 'देवक्या गर्भसम्बन्ध'मितिपाठे श्रीशुकबुद्धिस्थं देवक्या गर्भे प्रद्युम्ने सम्बन्ध आधाराधेयभावो यस्य सङ्कर्षणस्य तं विष्णोर्ज्ञानस्य वेदमतेऽनिरुद्धस्य धर्मस्यांशं स्वस्य कंसस्य वधं प्रत्येव अपि न तु भूभारहरणमात्राय। वासुदेवस्तु मोक्षमात्रदाता कंसस्य। किञ्च विष्णोरंशं तावतीं मायां दूरीकृत्य प्रकटोंशस्तम्। विष्णुं अंशेऽव्याकृतवृत्तेर्विष्णुमात्रमुक्तम्, न त्वंशः। 'मत्वे'ति सम्बन्धः। 'प्रही'दिति उत्तरश्लोके मुख्यक्रियापदम्॥ ६५॥

देवकीं वसुदेवं चेत्यत्र विदित्वेति पूर्वानुवादः। प्रहीदिति सम्बन्धः। लुङ्। अडभावश्छान्दसः। एवं प्रहीदिति पूर्वश्लोकान्वयि सूचयित्वान्यपदानामर्थानाहुः प्रथमत इति। तदन्तर्गतानिति स्मृत्युक्तसूचकानुमोदकादीन् वसुदेवान्तर्गतान्। कलेः प्रवृत्त्यभावान्नैकस्य हन्तुरेव दोष इति, 'कलौ कर्तैव लिप्यत' इति। स्वगृह एवेति 'भोजेन्द्रगेहेऽग्निशिखेव रुद्धे'ति वक्ष्यमाणत्वात्। 'प्रही'दित्यत्र णिजभावादिति भावः। एकवचनाच्च। अजनशङ्कायां हेतुमाहुः अष्टमेति। अयमेकोयमेक इत्यपेक्षाबुद्धिः। तज्जन्यत्वमयमष्टम इत्यष्टसत्वसङ्ख्यायाम्। तस्मात्। द्वितीयाद्यारभ्यगणनायाम्। अजनशङ्कयाजनतर्केणान्यथाज्ञानरूपेण। वासनया च एवं सन्देहबीजाभ्यां विष्णुसंदेहादित्यर्थः। षट् पुत्रानहनदिति ननु भगवदैश्वर्यरूपानहनदिति किं सामर्थ्यं कंसस्येति चेच्छृणु। ब्रह्माण्डसमायातस्यैश्वर्यादितिरोधानजपरिदृश्यमानलोकनाट्यदुःखादिषूपपत्तिरुक्ता। तथा हि अत्र षड् धर्मा हताः, ते प्रद्युम्ने उपयुज्यन्ते। कृष्णो तु युक्त भगैः स्वैरितरत्र चाध्रुवै'रिति वाक्यात्, नित्याः। ते च 'विराड्जीवस्तु भोगभुगिति' विराड्जीवे तिरोहिताः, कृष्णे समायाते उत्पन्नाः 'जातस्य हि ध्रुवो मृत्यु'रिति वाक्यात् ते कंसेन हता इति लीलामर्यादा। कालभेदेति प्रथमज्ञप्तिकालभेदस्य शरीरस्वीकरणकालभेदस्य वा ज्ञापकम्। जननमेवेति एवकारेण जननविषयव्यवच्छेदः 'जातं जात'मिति भावे क्तो वा षड्धर्माणां नित्यानां जातं जननमहनदिति। न च प्रत्यक्षविरोधः। आश्चर्यत्वादतो न जातपदस्य जनने लक्षणा॥ ६६॥

मातरमित्यत्र एषैवेति लुब्धा घ्नन्त्येवेत्यर्थः। अम्बरीषादयस्तु लोभाभावान्न तथेति भावः। यत्रैव मरणसन्देह इति यन्निमित्तो मरणसंदेहः। निमित्तमिह कारणम्। पञ्चविधानिति 'तद्भार्या' इत्यत्र 'तत्सर्वा'निति पाठे। 'सुहृद' इति सखिविशेषणं वा॥ ६७॥ आत्मानमिहेत्यत्र देवत्वसम्भावनयेति कलिः कंसो नित्यक्रीडास्थ इति तथा। यद्वा, वसुदेवेन स्वभावादिः कंसे स्थापित इति 'पूजयामास तं शौरि'रित्यत्र निरूपितम्। तेन देवत्वसम्भावना तया। तद्धिताचरणं भगवतः षड्धर्महिताचरणम्। नित्यलीलास्थत्वात्। पार्ष्णिग्राहेणेति प्रद्युम्नग्रहेण। पार्ष्णिग्राहस्यानुग्राहकत्वात्॥ ६८॥

उग्रसेनं चेत्यत्र निरूपितमिति उग्रा सेना यस्येति नामविग्रहान् निरूपितम्। सर्वसहायेति कंसस्यापि सहायत्वात् सर्वसहायत्वम्। षड्विधानामेति यदुभोजांधकमधुवृष्णिप्रभृतीनां, यद्वा यदुवंशानुकथने त्रयोविंशेऽध्याये 'तेषां तु षट्प्रधानाना'मितिवाक्यात् 'पृथुकीर्तिः पृथुश्रवा' इत्यादयः षट् प्रधानानि श्रेष्ठा येषां दशलक्षसहस्रमहाभोजपुत्राणां तेषां षट्प्रधानानां षड्विधानाम्। न च लक्षणाप्रसङ्गः। काकेभ्यो दधिरक्ष्यतामित्यत्र तात्पर्यवत् तात्पर्यात्। व्यञ्जनावृत्तेरिष्टत्वात्, वृत्तेस्त्रैविध्यात्। तदाज्ञयेति उग्रसेनाज्ञया। ते षड्विधाः। तस्येत्युग्रसेनस्य। स्थित इति माथुरशूरसेनयोर्मध्ये माथुरस्तु शूरसेननिवासस्थानम्। अत इति शूरसेनमाथुरयोर्विभज्यार्थात्, तस्येति शूरसेनदेशस्य। अध्यायार्थमाहुः एवमिति। हेतुभूत इति भक्तदुःखरूपः हेतुभूतः। ततोपि मुख्यः षड्धर्मवधः सोत्राध्यायार्थः उक्तः। षड्बालकवधो नाम प्रथमोध्याय इति। इति श्रीभागवत इत्यादि भागवतलक्षणं प्रथमस्कन्धसुबोधिन्यामुक्तम्। महापुराण इति पुराणं 'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितं चैव पुराणं पञ्चलक्षण'मित्युक्तम्। महत्त्वं दशलक्षणत्वम्। तस्मिन् महापुराणे। अध्यायः इक् स्मरणे, एरच् कर्मणि। इक्किकावध्युपसर्गं न व्यभिचरत इति आयः, आङ्पूर्वकोऽयः। वाक्यस्मरणविषयः। पारमहंस्यां संहितायामितीति श्रियां दर्शनात् परमहंसः शुकः, तेनाधीता पारमहंसी 'तदधीते तद्वेदे'ति ञः। हिरण्यगर्भस्यैकप्राणयोगिकायामिति संहितायामित्यर्थः। 'वायुः शब्दतामापद्यत' इति प्राचां प्रवादात्। सम्यग्घिता संहिता॥ १॥

इति श्रीमद्वल्लभचरणैकतानश्रीगोपेश्वरविरचितायां शास्त्ररीत्या बुभुत्सुबोधिकायां प्रथमाध्यायव्याख्यानम्।

मातृपितृतोषिणी–सुबोधिनीजी (पृष्ठ ३० से आगे)

कारिका—नवलक्षणलक्ष्यो हि कृष्णस्तस्य निरूपणात्॥ २॥ आश्रयः क्रमभावित्वान्निरोधो वेति संशयः॥ २½॥

दशम स्कन्ध का अर्थ "आश्रय' है अथवा 'निरोध' है यह संशय है। कितनेक विवेचकों का यह मन्तव्य है कि "नवलक्षणलक्ष्यो हि कृष्णस्तस्य निरूपणात् आश्रयः" दशम स्कन्ध का अर्थ आश्रय है। क्योंकि उस स्कन्ध में सर्ग-विसर्ग-

"स्थान-पोषण-ऊति-मन्वंतर-ईशानुकथा-निरोध और मुक्ति आदि नव लीलाओं से जानने योग्य भगवान् श्रीकृष्ण चन्द्र जी की लीलाएँ है। और इन दशम स्कन्ध की लीलाओं से भगवान् श्रीकृष्ण का स्वरूप जाना जाता है इससे इसलिये दशम स्कन्ध का अर्थ आश्रय है। तब अन्य चिन्तकों का मन्तव्य है कि "क्रमभावित्वात् निरोधः" द्वितीय स्कन्ध के 'अत्र सर्गो विसर्गश्च' इस श्लोक में बताये हुए सर्ग-विसर्ग-स्थान-पोषण-ऊति-मन्वन्तर-ईशानुकथा-निरोध-मुक्ति और आश्रय इस क्रमानुसार प्रत्येक स्कन्ध की लीलाओं का क्रम दर्शाया गया है। उस क्रम में "निरोध" लीला का विषय दशम स्कन्ध में आया है इसी कारण को लेकर दशम स्कन्ध का अर्थ "निरोध" है आश्रय नहीं।

इस प्रकार दशम स्कन्ध के अर्थ में दो मन्तव्य होने से सन्देह है कि दशम स्कन्ध का अर्थ आश्रय है अथवा निरोध है। अब आचार्यचरण प्रथम पक्षकार है जो आश्रय अर्थ को मानते है उन विचारकों का मन्तव्य इन कारिकाओं में प्रस्तुत करते हैं ॥ ३½ ॥

आश्रय पक्ष की कारिकाएँ—

कारिका—लोला निर्धारको ह्यर्थः क्रममात्रं तु दुर्बलम् । यथा कथञ्चिच्छ्रवणं सफलत्वाय कल्पते ।
निरोधः प्रलयो लोके प्रसिद्धः प्रकृते न सः । प्रतीतो द्वादशेऽन्यत्र महत्वाच्छुद्धलीलया ॥
सहितो ह्याश्रयः स्कन्ध प्रतिपाद्य इहेति चेत् ॥ ४-५-६ ॥

जो महानुभाव दशमस्कन्धार्थ को "आश्रय" मानते हैं उनका मन्तव्य है कि जिस जिस स्कन्ध में जिस २ लीला का वर्णन हो या किया गया हो उससे ही स्कन्ध का अर्थनिर्णय करना चाहिये। लेकिन "अत्र सर्गो विसर्गश्च" यह जो द्वितीय स्कन्ध के दशमाध्याय के श्लोक में जो क्रम का उल्लेख किया है उस क्रम से निर्णय करना उचित नहीं होगा क्योंकि लीलाओं की अपेक्षा से "क्रम" निर्बल माना है। वेद में भी अर्थ का निर्णय करने की विधि दी है। उस विषय में दृष्टान्त को बताते हैं कि यागीय प्रक्रियायें पूर्वमीमांसा के अनुसार क्रम को गौण मान कर विषय सामग्री पर निर्णय करने की पद्धति है। "अग्निहोत्र जुहोति" अग्निहोत्र याने अग्निहोत्र के अग्नि में होम करता है यह वाक्यक्रम में यद्यपि प्रथम आया है और "यवागू पचति" होम की सामग्री "पायस" को सिद्ध करते है यह वाक्य पीछे आया है फिर भी प्रथम "पायस" ही सिद्ध किया जाता है और बाद में होम करते हैं। यदि यहाँ पर क्रम को मुख्य मान लिया जाय तब कार्य ही सिद्ध नहीं होगा इसलिये क्रमपक्ष दुर्बल है और अर्थपक्ष सबल है।

इसी न्याय से श्रीमद्भागवत में भी पूर्व मीमांसा के अनुसार पाठक्रम को दुर्बल मानकर लीलाओं के अर्थ को प्रधान जानकर दशम स्कन्ध का "आश्रय" ही अर्थ लेना चाहिए। और इस प्रकार श्रीमद्भागवत शास्त्र के श्रवण का फल सिद्ध होगा। श्लोक क्रम से यद्यपि दशम का निरोध हो सकता है लेकिन "निरोध" शब्द का प्रलय अर्थ लोक में प्रसिद्ध है इसलिये निर्बल क्रम से प्राप्त दशम स्कन्धार्थ निरोध को स्वीकार न कर श्रवण का फल देने वाला आश्रय ही ग्रहण करना उचित होगा ॥ ४ ॥ और निरोध याने प्रलय वह द्वादश स्कन्ध में देखा भी गया है। दूसरा भी हेतु है कि "महत्वाद्" द्वादश स्कन्धों में दशम स्कन्ध महत्व का स्कन्ध है कारण कि दशम स्कन्ध में पूर्ण पुरुषोत्तम भगवान श्रीकृष्ण की शुद्ध लीलाओं का ही वर्णन किया है। निरोध शब्द का जो लोकप्रचलित अर्थ प्रलय है वह प्रलय स्पष्ट रूप से नित्य-नैमित्तिक-दैनिक और आत्यन्तिक प्रलय निरूपण के स्वरूप में द्वादश स्कन्ध में देखा गया है और भगवदाश्रय दशम स्कन्ध में मिलता है इसलिए दशम का अर्थ आश्रय है यह पूर्वपक्षकारों का मत है।

संशयनिवृत्ति के साथ जो सिद्धान्त स्थापित किया जाय उसी को उत्तरपक्ष कहते हैं। इसी उत्तरपक्ष की कारिकाओं को आचार्यचरण उपस्थित करते हैं।

कारिका—नहि सापेक्षरूपस्य प्रथमं सुनिरूपणम् । नव लक्षणलक्ष्यस्तु ह्याश्रयो रूप्यते कथम् ॥ ७ ॥
अग्रे लीलाद्वयकथा फलसिद्धौ वृथा भवेत् । पूर्वोत्तरस्कन्धयोश्च नश्येत् कारणकार्यतः ॥ ८ ॥
कृष्णस्त्वेकादशेप्यस्ति क्रमश्च स्वीकृतो भवेत् ॥ ८½ ॥

कारिकार्थ—सर्ग-विसर्ग आदि नव लक्षण की अपेक्षा रखने वाला जो आश्रय है उस आश्रय का प्रथम निरूपण कैसे हो सकेगा। क्योंकि जो "आश्रय" है वह तो आश्रय है। उस आश्रय का दशम स्कन्ध में श्रीशुकाचार्यजी ने कैसे वर्णन किया होगा। आश्रय तो अन्तिम लक्ष्य है और आश्रय ही फल है। यदि मध्य में ही फलप्राप्ति हो गई तो इसके अनन्तर मुक्ति एवं निरोध याने एकादश और द्वादश स्कन्ध की लीलाओं का कोई भी हेतु ही न रहा इससे दो स्कन्ध की दोनों लीलाएँ व्यर्थ हो जायेगी। और दूसरी यह भी बात है कि दशम स्कन्ध को आश्रयलीला माना जाय तो आश्रयलीला के अनन्तर मुक्ति और निरोध के वर्णन करने में द्वादश स्कन्धों की कार्य-कारण भाव की संकलना भी नष्ट हो जायगी। यदि ऐसा कहा जाय कि

दशम स्कन्ध में भगवान श्रीकृष्णजी की लीलाएँ हैं इस कारण से दशम स्कन्ध का अर्थ आश्रय होना सङ्गत है तब तो एकादश स्कन्ध में भी भगवान श्रीकृष्ण की लीला है तब मुक्ति स्कन्ध को भी आश्रय स्कन्ध कहना होगा। इन सब विषयों का परामर्श करने पर यही फलित होता है कि "अत्र सर्गो विसर्गश्च" इस व्यासोक्ति के अनुसार श्रीमद्भागवतजी में क्रमार्थ ही लेना अर्थ और क्रम सङ्गत होगा ॥ ७–८ ॥

अधिकार—द्वादश स्कन्धों का कार्य-कारण भाव का जरा सा अवलोकन करें। प्रथम स्कन्ध में तीन प्रकार के श्रोताओं का और वक्ताओं के लक्षण बतलाये हैं। इसलिये प्रथम स्कन्ध की अधिकार संज्ञा हुई। किसी भी कार्य के लिये अधिक योग्य बनना याने "कार्यक्षम" होना यह अधिकार है। यहाँ तक श्रवणादि के अधिकार का कथन है।

ज्ञान—अधिकारी को ज्ञान मिलता है और अधिकारी ही ज्ञानोपदेश कर सकते हैं इस न्याय से प्रथम स्कन्ध में अधिकार सिद्ध होने के अनन्तर "साधन ज्ञान का वर्णन द्वितीय स्कन्ध में आया है, इसलिए साधन युक्तों का श्रवण द्वितीय स्कन्ध में है।

सर्ग—साधन ज्ञान के अनन्तर स्वरूप ज्ञान होगा। अब भगवान का स्वरूप कैसा हो यह विमर्श होने लगा तब तृतीय स्कन्ध में सर्ग का निरूपण आया। इस स्कन्ध की लीला का नाम है सर्गलीला। कारण शरीरी पुरुषोत्तम का भूतादि शरीर से व्यक्त होना यह सर्गलीला है।

विसर्ग—चतुर्थ स्कन्ध में विसर्ग लीला है। पुरुष रूप से ब्रह्मादिकों की उत्पत्ति होना और उत्पन्न हुए के कर्तव्य-पुरुषकार निरूपण करना यह विसर्ग लीला है धर्मादि चतुर्विध पुरुषकार प्रत्येक के लिये आवश्यक है।

स्थिति—उत्पन्न किए हुये सर्व जीवों की और भूतों की मर्यादा से स्थापना के लिये पञ्चम स्कन्ध में देशस्थिति और स्वरूपस्थिति का वर्णन आया।

पोषण—पोषण का अर्थ है पुष्टि। वह पोषण ही भगवान का अनुग्रह है जिसको पुष्टि कहते हैं। कभी किसी जीव ने कुछ प्रमाद किया तब भगवान किस प्रकार अनुग्रह करते हैं यह कथन पुष्टि लीला में आयगा।

ऊति—ऊति का अर्थ होता है वासना। भगवान में वैषम्य दोष और निर्दयता का अभाव बताने के लिये सप्तम स्कन्ध में "वासना" का निरूपण किया गया है।

मन्वंतर—अष्टम स्कन्ध में मन्वंतर लीला है। चतुर्दश मन्वंतरों में सद्धर्मों का निर्देश किया जाता है। उन सद्धर्मों का अनुष्ठान ही वासना का विशोधन करता है।

ईशानुकथा—नवम स्कन्ध में ईशानुकथा लीला बतायी गई है। जीवों की दोष निवृत्ति होने के लिये भक्ति होना आवश्यक था इसलिये नवम स्कन्ध में श्रीराम, श्रीपरशुराम और श्रीघनश्याम एवं तदनुयायियों के चरित निरूपित किये गये है।

निरोध—ईशानुकथा से भक्ति हृदय में आने के अनन्तर पूर्ण पुरुषोत्तम भगवान श्री कृष्ण चन्द्र जी की रसात्म-लीलाओं के आस्वादन से प्रपंच की विस्मृति और अखंड रूप से भगवत् स्वरूपासक्ति की सिद्धि हो जाती है इसी को निरोध कहते हैं।

मुक्ति—भगवत्स्वरूप में आसक्त जीवों के प्रपञ्च निवृत्त हो जाने से स्वस्वरूप और भगवत् स्वरूप का ज्ञान होना मुक्ति है वह एकादश स्कन्ध में है।

आश्रय—स्वस्वरूप ज्ञान की प्राप्ति के अनन्तर जीवों की भगवल्लीलाओं में, भगवत्स्वरूप सेवा में ब्रह्म स्वरूप से स्थिति आश्रय है इसलिये इस प्रकार कार्य कारण भाव के कारण क्रम ही आदरणीय है।

यदि दशम को आश्रय मानेंगे तब इस प्रकार स्कन्धों में जो परस्पर कार्यकारण भाव का सम्बन्ध है वह नष्ट हो जायेगा अतः दशम स्कन्ध का अर्थ निरोध मानना ही युक्ति-प्रमाण-उपपत्ति से सर्वथा संगत होगा। और दशम स्कन्ध को निरोध लीला स्वीकार करने से श्रीशुक महाराज के कहे हुए क्रम का भी आदर होगा।

कारिका—निरोधोऽस्यानुशयनं प्रपञ्चे क्रीडनं हरेः। शक्तिभिर्दुर्विभाव्याभिः कृष्णस्येति हि लक्षणम् ॥ ९½ ॥

"निरोध" का अर्थ बतलाते हैं कि—इस पूर्ण पुरुषोत्तम भगवान श्रीकृष्णचन्द्रजी की याने श्रीहरि की कल्पना में न आने वाली शक्तियों सहित जगत में क्रीडा करना ही निरोध है ॥ ९½ ॥

"निरोध" शब्द का अर्थ वा लक्षण, द्वितीय स्कन्ध के दशम अध्याय के श्लोक ६ के पूर्वार्द्ध में "निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः" श्रीशुकाचार्यजी ने स्वतः समझाया है। उस अर्थ को आचार्यचरण स्पष्ट कर रहे हैं कि "अस्य आत्मनः" का अर्थ "इस जीवात्मा की शक्ति" ऐसा नहीं है लेकिन "अस्य आत्मनः" का अर्थ भगवान श्रीकृष्ण की अचिन्त्य

शक्तियाँ ऐसा है। और निरोध शब्द का अर्थ दुष्ट दैत्यों का प्रलय करना यह भी भगवान् श्रीकृष्णजी का कार्य नहीं है लेकिन वह कार्य तो भगवान् श्रीकृष्ण अपने चार व्यूहों से करते हैं। भगवान् ने तो केवल रसात्मक लीलायें की है जिससे भक्तजनों की अविद्या निवृत्त हो जाय और भगवान् में आसक्ति हो जाय यह सिद्धान्त है इसलिये यहाँ जिस निरोध शब्द का अर्थ दुष्टों का प्रलय करना यह भी उचित नहीं।

कारिका—नैमित्तिकनिरोधोऽन्यो धर्मग्लानिनिमित्ततः ॥ १० ॥

इस कारिका के उत्तरार्ध से आचार्य चरण संदेह निवृत्ति करते हैं कि जिस धर्मग्लानि के कारण से जिन दुष्ट राजाओं, दैत्यों आदि का नाशरूप निरोध है वह सर्ग आदि दश लीलाओं से अलग है। इस निरोध-नाश-प्रलय के साथ "अत्र सर्गो विसर्गश्च" इस श्लोक में बताई हुई लीलाओं का कोई सम्बन्ध नहीं।

कारिका—स चात्र नैव सद्ग्राह्यो हरिणा दुष्टभूभुजाम्। आद्यन्तयोरिहा भावान् मुक्तावप्यनुवृत्तितः ॥ ११ ॥
लक्षणस्याप्रवेशश्च लीलाधिक्यं तथा भवेत् ॥ ११½ ॥

भगवान् श्रीहरिने दुष्ट राजाओं का नाशरूप जो निरोध किया है वह निरोध सज्जनों को यहाँ ग्रहण नहीं करना चाहिये। यहाँ आदि और अन्त के प्रकरण में दुष्ट राजाओं का प्रलय-नाशात्मक निरोध का अभाव है। और अग्रिम स्कन्ध एकादश में मुक्तिलीला में दुष्ट राजाओं का विनाशरूप निरोध बताया है। इस प्रलयरूप निरोध में निरोध के लक्षण नही है और "प्रलयरूप निरोध का अर्थ मानें तब दश की जगह एकादश लीला हो जायेगी इस नाशरूप लीला अलग होने से इस स्कन्ध में वह प्रलयरूप निरोध कहना व्यर्थ है ॥ ११–११½ ॥

कारिका—तदर्थं जन्मकथनं पृथास्तोत्रविरोधि हि ॥ १२ ॥

निरोध शब्द का अर्थ प्रलय और नाश आदि करना और दुष्टों के लिये रसात्मा श्रीकृष्ण का जन्म है यह कहना श्री कुन्तीजी ने की हुई स्तुति के अर्थ से विरुद्ध है। श्रीवोपदेवजी ने भागवतजी की कारिकाओं को भागवत का अर्थ करते हुए लिखा है कि भगवान श्रीकृष्णजी ने खलों को मार कर धरणी का भार दूर करने के लिये अवतार लिया है यह जो कहते हैं वह संगत नहीं है क्योंकि प्रथम स्कन्ध के अष्टम अध्याय में श्रीकृष्णचन्द्रजी की स्तुति करते हुए श्रीकुन्ती माताजीने कहा है कि—

'तथा परमहंसानां मुनीनाममलात्मनाम्। भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥ १।८।२० ॥

यह श्लोक त्रिविध स्तुति के प्रकरण में आता है। पूर्व पक्षों को उपस्थित करते हुए श्रीकुन्ती माताजी सिद्धान्त पक्ष को कहती है कि—निर्मल मन वाले परमहंस मुनियों में भक्तियोग की स्थापना करने के लिये या भक्तियोग का विस्तार करने के लिये नहीं होता तब हम स्त्रीजनों को, निःसाधन जनों को आपका दर्शन कैसे होता। इस प्रमाण से यह निश्चय होता है कि प्रभु का अवतार पुष्टिभक्ति का केवल विधान या विस्तार के लिये ही है। इस लिये दुष्टवध मुख्य प्रयोजन नहीं है ॥ १२ ॥

कारिका कार्यकारणहानिश्च प्रक्रान्तत्याग एव च। भक्तत्वाद् भुव उद्धारो भारहारान्निरूपितः ॥ १३ ॥

यदि दशम स्कंध में "आश्रय" लीला को मान लें तो कार्य एवं कारण भाव की और जिस विषय का उपक्रम किया है उस उपक्रम का त्याग होगा। इस दशम स्कंध में श्री भूमिदेवी भक्तों में श्रेष्ठ भक्त है। श्रेष्ठ भक्त का उद्धार करना चाहिए। भूभार हरण करने से भूमिका उद्धार का वर्णन किया है।

श्रीमदाचार्य चरण इसी विषय को इस कारिका से अधिक स्पष्ट करते हैं। आगे द्वितीय स्कंध में श्रीशुकाचार्यजी ने यह बात बताई है कि "दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्" क्रम से प्रतिपादित दसवीं "आश्रय" लीला की विशेषतया शुद्धि के लिये सर्ग-विसर्ग आदि लीलाओं का प्रारंभ कर द्वादश स्कन्ध में आश्रयलीला कही गई है। द्वितीय स्कन्ध के इस श्लोक में दो बातें महत्व की कही है। एक बात तो यह है कि सर्ग आदि दश लीलायें उत्तरोत्तर क्रमबद्ध है एवं प्रथम दूसरी लीला में दूसरी तिसरी लीला में वैसे उत्तरोत्तर कारणकार्यसम्बन्ध से सम्बन्धित है। अब आश्रय लीला को दशम स्कन्ध की लीला माना जाय और निरोध को द्वादश स्कन्ध की लीला मानी जाय तब क्रमभङ्ग एवं अर्थसंकल-अर्थसङ्गति न होने से भागवतजी का स्वरूप विकृत बनेगा। भागवतजी का तात्पर्य तो यह है कि सर्ग से लेकर मुक्ति लीला पर्यन्त, तृतीय स्कन्ध से लेकर एकादश स्कन्ध पर्यन्त नव लीलाओं का ज्ञान होने के बाद ही आश्रय का ज्ञान अथवा ज्ञान की प्राप्ति होती है। जैसे सर्ग याने सृष्टि की रचना के बाद विसर्ग की याने पुरुषकार की चारों प्रकार के पुरुषार्थों की संभावना हो सकती है वैसे ही उत्तरोत्तर लीलाओं में प्रथम प्रथम लीला कारण बनती है और दूसरी दूसरी लीला कार्य बनती जाती है। अन्त में दसवीं आश्रय लीला बनती है उसमें पूर्व की नव लीलाओं का ज्ञान सर्वथा अनिवार्य है। इस सब दृष्टि से विचार करने से निरोध शब्द का अर्थ प्रलय अथवा शत्रुओं का वध करना एवं दशम में आश्रय लीला को मानना ग्रन्थकर्ता को अभीष्ट नहीं है और सङ्गत भी नहीं हैं। सब निरोध का अर्थ यही अभिप्रेत है कि प्रपञ्च की विस्मृति होना और भगवच्चरणों में आसक्ति होना यही अर्थ सुसङ्गत है।

कारिका—प्रकटः परमानन्दो यदाभूमेर दैव हि । मर्दनक्लेशहानिः स्यादिति तस्याः समुद्यमः ।। १४ ।।

यदि साक्षात् श्रीविग्रह लेकर परमानन्द श्रीकृष्णचन्द्रजी का प्राकट्य हो तब जिन दुष्ट राजाओं की ओर से भूमिदेवता को मर्दनक्लेश हुआ है उस क्लेश की निवृत्ति होगी। जब भगवान का दर्शन होगा तब परमानन्द होगा और परमानन्द होने पर ही दुःख दूर हो जायगा इस लिये भगवती भूमि भगवान के पास पधारी और भगवान को अपने क्लेश का निवेदन किया यह उद्यम सफल हुआ।

यह बात निश्चित है कि भूमि को दुष्टतापूर्ण मनुष्यों की वृद्धि से पीडा नहीं होती है। न तो पर्वतों का, सरिताओं का एवं सागरादिओं का बोझ लगता हैं। वह तो सब भूमि देवी सह लेती है लेकिन पाप के बोझ को नहीं सह सकती है। और पाप-निवृत्ति भगवद् दर्शन से ही होगी। अन्धकार निवृत्ति अनायास ही तब हो जायगी जब सूर्य का दर्शन होगा। वैसे निरोध रूप भगवान् प्रगट होंगे और पाप हट जायगा पुनः भूमि परमानन्द को प्राप्त कर लेंगी ।। १४ ।।

कारिका— ब्रह्मरुद्रादिदेवानामत एवान्यसंश्रयः । भक्तानामेव निस्तारः कृतः कृष्णे संसृतेः ।। १५ ।।
अतो निरोधो भक्तानां प्रपञ्चस्येति निश्चयः ।। १५½ ।।

क्षीर सागर के तट पर भगवान की स्तुति करने और भगवान को भूतल पर पधारने का निवेदन करने के लिये "ब्रह्मा भवश्च तत्रैत्य" ब्रह्माजी श्रीरुद्रजी, और देवलोग श्रीभूमिदेवीजी को आगे कर उनका आश्रय लेकर पधारे थे। और भगवान् श्रीकृष्ण ने पधार कर स्वरूपदर्शन एवं लीलाओं से केवल भक्तजनों का संसार निवारण किया। संसार सागर से पार कराया। अब यह निर्णय होता है कि प्रपञ्च से निवृत्ति पूर्वक भगवान में आसक्ति रूप निरोध भक्तों का ही हुआ है। श्रीमदाचार्य ने कहा है कि "या तु व्यसनसम्प्राप्तिनिरोधः स तु कथ्यते"। निरोध उसी को कहा जाय जिससे व्यसन दशा की पूर्णरूप से प्राप्ति हो। पहले प्रेम फिर आसक्ति उसके अनन्तर व्यसन दशा ही भक्ति-पुष्टि भक्ति का अभीष्ट निरोध माना है ।। १५½ ।।

कारिका—यावद् बहिःस्थितो वह्निः प्रकटो वा विशेन्न हि ।।१६।। तावदन्तःस्थितोऽप्येष न दारुदहनक्षमः ।। १६½ ।।
एवं सर्वगतो विष्णुः प्रगटश्चेन्न तद्विशेत् ।।१७।। तावन्न लीयते सर्वमिति कृष्णसमुद्यमः ।। १७½ ।।
रूपान्तरं तु नटवत् स्वीकृत्य त्रिविधान्निजान् ।।१८।। प्रपञ्चाभावकरणादुज्जहारेति निश्चयः ।। १८½ ।।

जब तक बाहर रहने वाली अग्नि प्रकट होकर काष्ठ में प्रविष्ट नहीं होगी तबतक काष्ठ में रही हुई अग्नि दारु याने काष्ठ को जलाने में सक्षम नहीं बनेगी। वैसे ही भगवान् विष्णुजी के सर्वत्र व्यापक रहने पर भी जब तक भगवान् भक्त जनों के लिये आकृति-स्वरूप लेकर बाहर प्रकट होकर पुनः भक्तजनों के हृदय में प्रविष्ट नहीं होंगे तब तक भक्तजनों का चित्तादि निरोध संभव नहीं होगा। फिर प्रपञ्च की निवृत्ति नही होगी। अतः जैसे अग्नि काष्ठ में प्रवेश कर काष्ठ को जला सकती है वैसे भगवान् भी प्रथम प्रकट होकर मधुर लीलाओं और सुमङ्गल स्वरूप मधुर वाणी विलासादि से भक्तजनों के मन-इन्द्रियादि में प्रवेश करते हैं तब जीव के लौकिक देह आदि सर्व दिव्य सेवोपयोगी अलौकिक बन जायेंगे और प्रपञ्च की निवृत्ति भी होगी। श्रीकृष्ण प्रभु का प्राकट्य केवल भक्तजन के मनोनिरोध के लिये ही है। इसी कार्य को भगवान उद्यम कहते हैं। प्राकट्य के समय भगवान् चतुर्भुज थे फिर नट की तरह मनुष्याकृति द्विभुज स्वरूप को स्वीकार भी इसलिये किया जिससे तामस-राजस-सात्विक तीन प्रकार के निजजनों का अनायास निरोध हो और प्रपञ्चनिवृत्ति सिद्ध हो जाय ।। १८½ ।।

श्रीमदाचार्य चरणों ने इन कारिकाओं में दो शङ्काओं का प्रत्युत्तर दिया है। प्रथम तो कई टीकाकारों का यह कहना है कि दशम स्कन्ध में भक्तों के प्रपञ्च का नाश भगवान् ने किया है यह स्पष्ट देखने में नहीं आता है और भगवान् हृदयस्थ हैं और अन्तःकरण में रहकर प्रपञ्च का नाश करेंगे फिर अवतार का प्रयोजन क्या था। जो अन्तःकरण का कार्य है वह तो भीतर रहकर हो सकता है। लेकिन असुर समूह भूतल को सताता है उसके नाश के लिये प्राकट्य आवश्यक है।

आचार्य चरणों ने इन दोनों शङ्काओं का समाधान इन कारिकाओं में बताया है। दोनों का समाधान यह है कि अग्नि काष्ठ के भीतर रहती है लेकिन जला सकती नहीं वैसे अन्तर्यामी स्वरूप से हृदय में निविष्ट भगवान् की सन्निधि कभी प्रपञ्च निवारण नहीं करेगी। इसलिये तो भगवान को स्वरूप लेना होगा और निरोध लीलाओं से निरोध करना होगा। दशम स्कन्ध दैत्यादि वध प्रक्रिया प्रमुख नहीं है। पूतनादि बध में पूतना का प्राण लेना मुख्य नहीं है लेकिन अविद्या निवृत्ति के माध्यम से व्रजजनों का निरोध कार्य मुख्य है। फिर भी जो दैत्यादि बध का कार्य है वह धर्मी लीला नहीं है अपनी कलाओं का संकर्षणादि व्यूहलीला है।

अब जो दशम स्कन्ध में निरोध का निरूपण है वह तीन प्रकार का निरोध है। इन तीन निरोधों की साधन निरोध, व्यापारनिरोध और फल निरोध वैसी तीन श्रेणियाँ और तीन संज्ञाएँ है। यहाँ भगवान् का शक्तियों के साथ प्रपञ्च में खेलना

साधन रूप निरोध है। साधननिरोध का ही अर्थ "**कारणरूप**" निरोध है। भगवान में भक्तों की आसक्ति होती है वह आसक्ति रूप निरोध "**व्यापार**" है। एवं आसक्ति से प्रपञ्च की निवृत्ति हो गई और प्रपञ्च का अभाव सिद्ध हुआ वह ही फलात्मक निरोध है। इसलिये दशम का विषय निरोध ही है आश्रय नहीं है एवं निरोध का अर्थ दुष्टों का नाश नहीं लेकिन भक्तों का भगवत्सेवा से भगवल्लीलाओं के पान से प्रपञ्च को भूल जाना एवं भगवत्स्वरूप में तन्मय होना है।

श्रीमदाचार्य चरणों ने कारिका में एक विषय अच्छा स्फोट किया है कि "**रूपान्तरं तु स्वीकृत्य नटवत्**" नट की तरह रूपान्तर का भगवान ने श्रीदेवकीजी के निवास में चतुर्भुज स्वरूप से प्रकट होकर पुनः बालक स्वरूप अङ्गीकार किया। इसका भाव यह है कि रङ्गभूमि में नट वेश बदलता है लेकिन स्वरूप का परिवर्तन अथवा स्वरूप में स्वल्प भी विकार नहीं होता है और जो सामर्थ्य आदि नट में पूर्व था वही सामर्थ्य आदि रहता है वैसे भगवान भी भक्तों के मनोरथों के अनुकूल रूप स्वीकार करते हैं लेकिन जो स्वयं सर्व समर्थ सर्वज्ञ सच्चिदानन्द विग्रह है वही है।

कारिका– पञ्च प्रकरणान्यत्र चतुर्भिर्जन्म सत्पतेः ॥ १९ ॥ अष्टाविंशतिभिः पूर्वं तामसत्वात् व्रजोद्धृति ॥
तथैव राजसानां च यादवानां विशेषतः ॥ २० ॥ सात्विकानेकविंशत्या निःप्रपञ्चांश्चक र ह ॥
भगवानेव नान्योऽत्र तदर्थं षड्भगाभिधाः ॥ २१ ॥

इस दशम स्कन्ध के पाँच प्रकरण हैं। सत्पति श्रीकृष्ण भगवान का चार अध्यायों में प्रथम जन्म प्रकरण है। और सबसे तामस भक्त व्रजजनों का अट्ठाईस अध्यायों की तामस लीलाओं से उद्धार करने वाला दूसरा तामस प्रकरण है। उसी प्रकार राजस भक्तों का और विशेष कर यादवों का निरोध किया है इस प्रकरण की 'राजस प्रकरण' संज्ञा है एवं अट्ठाईस अध्याय का यह तृतीय प्रकरण है। और इक्कीस अध्यायों की लीलाओं से सात्विक भक्तों के निरोध की कथा आती है इसलिये सात्विकों की प्रपञ्च मुक्ति के २१ अध्यायों का चतुर्थ सात्विक प्रकरण है। और अन्तिम छह अध्यायों में भगवान के ६ भगों का–ऐश्वर्यों का–भगवान का ही गुणरूप से वर्णन है इसलिये इस पञ्चम प्रकरण की "**गुण प्रकरण**" नाम को संज्ञा है ॥ १९–२१ ॥

विवेचन—श्रीमदाचार्य चरणों ने इन कारिकाओं में प्रकरणों के विभाग दर्शायें हैं।

(१) **जन्म प्रकरणः**—अध्याय १ से ४ इन जन्मप्रकरण के चार अध्याय हैं। भगवान् श्रीकृष्ण वासुदेव-संकर्षण-प्रद्युम्न-अनिरुद्ध चार व्यूह स्वरूपों से प्रकटे हैं। भगवान् पूर्ण आनन्दमात्र करपादमुखोदरादि स्वरूप हैं। और सर्व के स्वामी होने से खल निग्रह भूभार हरण आदि कार्य करने पड़ते हैं। इन कार्यों के लिये भगवान् के चार व्यूह स्वरूप हैं। वे चार स्वरूप प्रभु के परिवार के रूप माने जाते हैं। धर्मी स्वरूप भगवान् स्वतंत्र है और अपने चारों व्यूहों के स्वरूप से भगवान् कार्य करते हैं। प्रथम अध्याय में वसुदेव व्यूह स्वरूप से कंस को ज्ञान देकर भगिनी वध से लौटाया यह लीला की है। द्वितीय अध्याय में गर्भ को ले जाकर श्री रोहिणी जी के उदर में बसाया यह संकर्षण व्यूह लीला है। तृतीय अध्याय में जन्म कथा के प्रसङ्ग से प्रद्युम्न व्यूह लीला वेश विस्तार लीला का प्रकरण है। चतुर्थ अध्याय में अनिरुद्ध व्यूह लीला है। धर्म रक्षा अनिरुद्ध लीला कार्य है।

(२) **तामस प्रकरण**– अध्याय ५ से ३५ उसमें १२–१३–१४ ये तीन अध्याय कल्पान्तर कथा के हैं। तामस आदि तीनों प्रकरणों में अवान्तर प्रमाण-प्रमेय-साधन-और फल संज्ञक चार प्रकरण हैं। और प्रत्येक प्रकरण में सात सात अध्याय हैं। इन सात अध्यायों में ऐश्वर्य-वीर्य-यशः-श्री ज्ञान-वैराग्य आदि षड् भगवद्धर्मों के छह अध्याय एवं सातवाँ धर्मी अध्याय। इन अध्यायों के संकलन से सात सात अध्यायों के चार चार प्रकरण बनेंगे। इससे चारों प्रकरणों के संकलित अट्ठाईस अध्याय होते हैं। अतः तामस प्रकरण में प्रमाण ५ से ११, प्रमेय १५ से २१, साधन २२ से २८ और फल २९ से ३५ चार प्रकरण के २८ अध्याय हैं।

(३) **राजस प्रकरण**—अध्याय २८ = यह राजस प्रकरण पूर्वार्द्ध एवं उत्तरार्ध दो दो प्रकरणों में विभक्त हैं। उन चारों प्रकरणों में प्रमाण ३६ से ४२, प्रमेय ४३ से ४९, साधन ५० से ५६ और फल ५७ से ६३ चार प्रकरण के २८ अध्याय हैं।

(४) **सात्विक प्रकरण**—अध्याय २१=इस सात्विक प्रकरण में अवान्तर तीन प्रकरण हैं इनमें प्रमाण प्रकरण नहीं है। जो सात्विक भक्त हैं उनके लिये प्रमाण की आवश्यकता नहीं है। कारण यह है कि सात्विक जीव शुद्ध अन्तःकरण वाले होने से श्रद्धा एवं विश्वाससम्पन्न होते हैं और संशय रहित होते हैं। इसलिये उनको प्रमाण का प्रयोजन नहीं रहता इससे प्रमेयादि तीन प्रकरण है। इन तीन प्रकरणों में प्रमेय ६४ से ७०, साधन ७१ से ७७ और फल ७८ से ८४ तीन प्रकरण के २१ अध्याय है।

(५) **गुण प्रकरण**— ६ अध्याय—इस गुण प्रकरण के छह अध्याय इसीलिये है कि भगवान् ने इन अध्यायों में अपने ऐश्वर्यादि छ धर्मों के स्वरूपों से लीला की है इसका तात्पर्य यह है कि एक एक अध्याय में एक एक ऐश्वर्यादि गुण से लीला की है। इसलिये ८५ से ९० अध्यायों में गुण प्रकरण समाप्त होता है। इस विषय का वर्णन आचार्य चरणों ने १९ वी कारिका से

२१ कारिका में किया है। और एक विषय का ध्यान रखना आवश्यक है कि भगवान् के छ धर्म भी भगवत्स्वरूप है। अन्तिम कारिका में "भगवानेव नान्योऽत्र" ऐसा जो निर्देश किया है उसमें यह कहना है कि यहाँ मायाशबल ईश्वर का निरूपण नहीं है लेकिन शुद्ध-परात्पर-लौकिक-प्राकृत गुणों से रहित श्रीकृष्ण सच्चिदानन्द श्रीनन्दनन्दन यशोदोत्संगलालित भगवान् ही निरोधकर्त्ता है।

कारिका—**चतुर्मूर्तेर्जन्मतोत्र तथाऽऽध्याया निरूपिताः। तत्तत्प्रकरणे तेषामुपयोगस्तु वक्ष्यते ॥ २२ ॥**
हेतूद्यमस्वीकरणकापट्यैः प्रथमो महान्। प्रद्युम्नश्चानिरुद्धश्च वासुदेवस्तथापरः ॥ २३ ॥
हेतुश्च त्रिविधो ह्यत्र गुणा भक्ता हितप्रदाः। कंसादेः कालतो ज्ञानात् त्रिधा दुःखं तु तद्गतम् ॥ २४ ॥

शब्दार्थ—इस जन्मप्रकरण में वासुदेवादि चतुर्मूर्ति भगवान के जन्म-प्राकट्य के कारण के चार अध्याय हैं। इन चारों अध्यायों के चारों प्रकरणों में भगवान् ने किस स्वरूप से कौन सी लीला की है और कौन सी लीला का उपयोग यह सब उन अध्यायों में कहा जायगा ॥ २२ ॥

इन चारों अध्यायों में प्राकट्य का हेतु (१) उद्यम प्राकट्य का प्रयत्न (२) स्वीकरण चतुर्भुज स्वरूप को छिपाकर द्विभुज स्वरूप का स्वीकार (३) कापट्य याने मथुरा से गोकुल में पधारना, द्वारों का खुलना और सबको निद्राधीन करना यह माया का कार्य है इसलिये चतुर्थाध्याय में कापट्य (४) कार्य है। इन चारों व्यूहों के साथ पूर्णावतार श्रीकृष्णजी के प्राकट्य के कारण-प्रभुजी के प्रादुर्भाव से यह विभाग महान् श्रेष्ठ है वासुदेव-संकर्षण-प्रद्युम्न अनिरुद्ध ये चार व्यूह हैं ॥ २३ ॥

भगवत्प्रादुर्भाव का हेतु भी तीन प्रकार का है। और भक्तों के अहित दुःख देने वाले तीन गुण है। इन तीन गुणों के कारण दुःख भी तीन प्रकार के हैं। प्रथम कंसादि दुष्टों से दुःख हुआ, दूसरा काल से दुःख हुआ है और तीसरा अज्ञान से दुःख हुआ है। इस तद्गत दुःख तीन प्रकार का है ॥ २४ ॥

कारिका—**भूमिर्माता तथा चान्ये दुःखभाजो हरिप्रियाः। यथायोग्यं दुःखमेषामत्रैवेति निरूप्यते ॥ २५ ॥**
त्रयं भगवता शक्यं दूरीकर्तुमितीर्यते। प्रश्नेऽप्यत्राधिकः प्रोक्तः स्कन्धद्वितयवर्तनः ॥ २६ ॥

शब्दार्थ—भूमि को कंसादि दुष्टों से दुःख था देवकी माताजी को आकाशवाणी के कारण दुःख सहना पड़ा और अन्य नन्द यशोदाजी यादव आदि भक्तजनों को भगवान के अज्ञान से दुःख था। ये तीन श्रीहरि के प्रिय हैं। इन तीनों को कैसे कैसे दुःख मिला इस विषय का प्रथम अध्याय में स्पष्टीकरण किया जायगा ॥ २५ ॥

और यह जो तीन प्रकार का दुःख है इस दुःख का निवारण भी भगवान् के बिना अन्य किसी से संभवित नहीं है। नवम स्कन्ध और दशम स्कन्ध को ठीक से ध्यान में रखकर यहाँ श्रीपरीक्षितजीने विशिष्ट प्रकार से प्रश्न किया है इसलिए और प्रश्नों से यह प्रश्न अधिक श्रेष्ठ प्रकार का प्रश्न है ॥ २६ ॥

कारिका—**अनुवादः स्तुतिः प्रश्ने भक्तत्वज्ञापकावुभौ। अन्यथा ह्यतिगुप्तार्थं श्रीशुको वर्णयेत् कथम् ॥ २७ ॥**
अज्ञानमन्यथाज्ञानं कृष्णगं विनिवार्यते। प्राणनार्थं कथायाश्च दयासिद्ध्यै शुकस्य हि ॥ २८ ॥
एवं प्रश्नो द्वादशभिः स मतो गुणदोषतः ॥ २८½ ॥

शब्दार्थ—अब इस कारिका में प्रश्न का श्रेष्ठत्व दिखाते हैं। श्रीपरीक्षित् दशम स्कन्ध के प्रारंभ में १२ अथवा १३ श्लोकों में प्रश्न किये हैं। उन श्लोकों में प्रारंभ में १½ श्लोक से नवम स्कन्ध का अनुवाद किया है और भगवान् के चरित्र की स्तुति कर भगवान में अनुराग भी दिखाया है ये दो बातें राजा परीक्षितजी को भक्त बतातीं है। यदि उत्तम श्रेणी के परीक्षितजी भक्त है यह ज्ञान परीक्षितजी के लिये श्रीशुकाचार्यजी को नहीं होता तब भगवान की गुप्त लीलाओं का शुकाचार्यजी वर्णन नहीं करते ॥ २७ ॥ इन दोनों प्रश्नों से राजा परीक्षितजी के अज्ञान का निवारण हुआ है। परीक्षितजी को भगवान के स्वरूप का ज्ञान बताया है और मायाशबल कृष्ण है इस प्रकार का अन्यथा ज्ञान भी नहीं है यह भी परीक्षितजी बताते हैं। और सच्चिदानन्द पूर्ण ही श्रीकृष्ण है और इसलिये भगवत्कथा ही पीयूष है वही मेरा जीवनप्रद है यह जानते हैं और कहते हैं। और वहीं राजा की निष्ठा श्रीशुकदेवजी के हृदय में दया को उत्पन्न कराती है। इस अध्याय के प्रारंभ में १३ श्लोक है। इन श्लोकों में ६ श्लोकों से लोक के दोष भी उत्कट है और भगवान के ६ गुण भी उत्कट है। उन उत्कट ६ दोषों का नाश भगवान के ६ गुणों के सिवाय संभवित नहीं है इसलिए १२ श्लोकों में प्रश्न और एक श्लोक में मुझे दुःसह क्षुधा का कोई क्लेश नहीं है यह निवेदन किया है ॥ २८½ ॥

कारिकार्थ समाप्त

श्रीसुबोधिनीजी मातृपितृतोषिणी (प्रथम श्लोक से प्रथमाध्यायपर्यन्त)

नवम स्कन्ध में सोमवंश एवं सूर्यवंश के राजे भगवान के परम भक्त थे इसलिये उनके चरित्रों का और वंशों का विस्तार से वर्णन किया है। यद्यपि नवम स्कन्ध में प्रारम्भ में तो सूर्य वंश की कथा है। तदुत्तर सोमवंश का वर्णन है फिर भी राजा परीक्षित "सोमसूर्ययोः" ऐसा उल्लेख इसलिये करते हैं कि पूर्ण पुरुषोत्तम आनन्दमात्र करपादमुखोदरादि भगवान श्रीकृष्ण जी का प्रादुर्भाव सोमवंश में है इसलिये सोमवंश विशेष सम्माननीय है और परीक्षितजी श्रीकृष्णजी के चरित्र का प्रधान रूप से वर्णन कराना चाहते हैं। इन कारणों से परीक्षितजी ने प्रश्न करने के अवसरपर **"सूर्य सोमयोः"** न कहकर **"सोमसूर्ययोः"** कहा है। **'विस्तारः'** यहाँ विस्तार शब्द से राजा ने यह निर्देश किया कि आपने नवम स्कंध में सोमवंश सूर्यवंश चरित्र विस्तार से कहा है। अब श्रीकृष्ण प्रभुजी के चरित्रों का विस्तार से वर्णन मैं चाहता हूँ अब श्रीकृष्ण प्रभुजी के चरित्रों का विस्तार इसलिये शुकाचार्यजी ने नहीं किया कि राजा पुनः वंश विस्तार को सुनना चाहते हैं। **'उभयवंश्यानाम्''** इस वाक्य में उभय पद से यह कहा कि इन दोनों के वंश के भक्तवरों के चरित्रों के सिवाय अन्य तृतीय की वार्ता सुनना नहीं चाहता हूँ। आपने जो इन दोनों के वंशज महान् भगवदीयों के चरित्रों का श्रवण विस्तार से कराया वह आप की कृपा ही है। कारण कि सूर्य दिवस में अंधकार का नाशक है और चन्द्र रात्री में अंधकार का नाशक है। दोनों मिलकर सम्पूर्ण अंधकार का नाश करते हैं वैसे दोनों वंश के भक्तों के चरित्र भी सर्व मनुष्यों के मोहादि अज्ञानादि अन्धकार का निवारण करते हैं एवं भक्ति का प्रकाश करते हैं। इस बात से राजा ने भी दोनों कुल के भगवदीयों की ओर आदर दरसाया और अपने में श्रवण की योग्यता का निवेदन किया। **"उत्पत्यैव भक्ताः"** उन उभय वंश के जो भक्त थे वे स्वयं भक्त बने थे यह बात नहीं है लेकिन वे जन्म से ही सहज भक्त थे। इसलिये **'वंश्यानां'** पद में षष्ठी विभक्ति का निर्देश किया है। और वे महानुभाव स्वयं भक्त थे इतनी बात नहीं परन्तु उनके चरित्रों के श्रवण से अन्य को भी भक्ति प्राप्ति होती है। राजा अम्बरीष रन्तिदेव आदि के चरित्र वैसे भक्तिप्रद होने के कारण पृथक् कहे गये हैं। **"राज्ञां च उभयवंश्यानां"** इस वाक्य में जो **'च'** अव्यय का उल्लेख है इससे यह कहा कि केवल अपने भक्त चरित्र का श्रवण नहीं कराया है परन्तु श्रीराम, परशुराम और भगवान् श्याम सुंदरजी के चरित्र भी सुनाये हैं। और वे चरित्र परम अद्भुत हैं परंतु श्रीकृष्णकथा केवल तीन श्लोकों में कही है इसलिये मैं अधिकतम कृष्ण कथा सुनना चाहता हूं। क्योंकि भगवान के चरित्रों के श्रवण से जो अद्भुतता प्रकट होती है उससे भक्त हृदयों में अलौकिक आनन्द की स्फूर्ति होती है तथा उसके श्रवण से वह भक्ति प्रकट होगी जिससे परब्रह्म का स्वरूप और भगवल्लीला समझ में आने से आनन्द उमड़ता है। **'परमाद्भुतम्'** की व्युत्पत्ति दो प्रकार से होगी **'परमेण भगवता अद्भुतं"** और परमया **'परमया भक्त्या वा लीलया वा अद्भुतं परमाद्भुतम्''** ये दो प्रकार की व्युत्पत्ति होगी **यदोश्च**–अब **'यदोश्च धर्मशीलस्य नितरां'** पद का भाव बताते है कि राजा ययाति ने यदु आदि पुत्रों से यौवन की याचना किया तब कई एक ने मना किया और उनमें मुख्य यदु थे तब पिता की आज्ञा का उल्लंधन करने वाला "अधर्मी" माना जाय फिर परीक्षित **'धर्मशीलस्य'** विशेषण यदुजी को कैसे देते हैं इस शंका का आचार्यचरण समाधान करते हैं कि पिता की यौवनाभिलाषा की आज्ञा का अनादर यदु के लिये अधर्मित्व का प्रतिपादन नहीं करता लेकिन धर्मोत्पादन का ज्ञापन करता है। यदु यह जानते थे कि पिता देह सम्बन्ध से पिताजी है और भगवान आत्म सम्बन्ध से परम पिता है। अब मैं भगवान की सेवा करना चाहता हूं यदि यौवन लौकिक पिता को यौवनदान करूंगा तब वार्धक्य आ जायेगा तब परम पिताजी की सेवा कैसे होगी? और मेरे यौवन से पिताजी विषय सेवन करेंगे तब मैं ही यौवन से मातृगामी बनूंगा यह भारी अधर्म होगा। यदि पिताजी भगवत्सेवा परार्थ कार्य के लिये यौवन चाहते तब मैं असंकोच और आनन्द से यौवन प्रदान करता यह विमर्श कर यौवन नहीं दिया इसलिये यदुराजा को धर्मशील बताते हैं। यदु में स्वभाव से ही धर्मानुराग था इस से वे धर्मशील हैं। अतो **भगवदवतारात्'** इसी बात का समर्थन करते हुए कहते है कि पुरु राजा ने पिता को यौवन दान किया इस अपराध से भगवान ने पुरु वंश की समाप्ति कर दी जिससे भगवान का इस वंश से अपना जन्म सम्बन्ध न हो। तब यह शंका होगी कि भीष्म भी इस वंश में हैं तब उनसे सम्बन्ध कैसे होना चाहिए! तब कहा कि भीष्म से सम्बन्ध इसलिये अयोग्य नहीं है कि अष्टवसुदेवों में से भीष्म का अवतार है और स्वयं भक्त भी है। केवल पुरुवंश का भीष्म में आया है वह बीजगत दोष है लेकिन स्वतः भीष्म में दोष नहीं है। उसी बीजगत दोष को लेकर आगे भीष्म को तिमिङ्गल अपने सजातीय मत्स्यों को निगलने वाला मत्स्य कहेंगे। इससे यह निर्णय हुआ कि यदु राजा स्वभाव से बीज से जीवन से धर्मनिष्ठ है और धर्मरूप है। इसलिये यदुवंश का विस्तृत वर्णन भी आवश्यक है।

"मुनिसत्तमः—श्री शुकाचार्य जी को मुनि सत्तम कहा उसका तात्पर्य यह है कि (१) मुनि का अर्थ है कि जो स्वयं मननशील है वे मुनि मुनयः मुनिलोक हैं। (२) मुनिसत् उन मुनियों में जो ज्ञान को भी प्राप्त कर चुके हैं वे मुनिसत् मुनियों **श्रेष्ठ है**। ३ मुनिसत्तर अब तीसरी श्रेणी मुनिसत्तर की है मनन शील है ज्ञान शील भी है और जो विरक्त-परमहंस है वह

"मुनिसत्तर" ज्ञानश्रेष्ठ है। और परम भागवत है और मननशील-ज्ञानशील-वैराग्यशील भी है यह ही **'मुनिसत्तम'** है। श्री शुकाचार्य तीनों कक्षाओं से पर है इसलिये राजा ने मुनिसत्तम संबोधन किया है ॥ १½ ॥

एव मनूश—इस प्रकार नवम स्कन्ध में जो विषय सुना था उसका निर्देश डेढ श्लोक में कहकर अब आगे डेढ श्लोक से परीक्षितजी श्रीकृष्ण भगवान के वीर्य एवं चरित्र पूछते हैं **'तत्रांशेनावतीर्णस्य'** इस श्लोक में विष्णु भगवान के वीर्यो की पृच्छा करते हुए राजा ने **'अंशेन'** अंश से अवतार लिया ऐसी जो पृच्छा की है उसका तात्पर्य नहीं जानने वालों की शंका है कि भगवान ने कृष्ण का अंशावतार लिया है इस विषय की समालोचना सुबोधिनीजी में करते हुए आचार्य चरण कहते हैं कि व्यासजी का 'अंस' शब्द का आशय यह है कि श्रीवसुदेवजी और देवकीजी जिस कारागृह प्रदेश में थे उस देश की माया को, अंश देश की माया को दूर कर पूर्ण पुरुषोत्तम प्रकट हुए हैं। यदि सर्वत्र रही हुई माया को हटा दे और प्रकट हो जाय तब तो सारे विश्व की व्यापक माया हटने के कारण प्रलय हो जाता और फिर प्राकट्य का प्रयोजन नहीं रहता कारण कि लीला ही नहीं हो सकेगी और लीलाओं से तो प्रभु परमानन्द देना चाहते हैं। अतः आवश्यक प्रदेश भाग की माया को दूर कर भगवान पूर्ण पुरुष विष्णु प्रकट हुए। यह विषय द्वितीय स्कन्ध के सप्तम अध्याय में **'अवीनलीलाहसिते-क्षणोल्लसत्'** श्लोक के विवरण में आचार्यचरणों ने स्पष्ट किया है कि भागवत शास्त्र के अर्थ के अज्ञान के कारण लोग "अंश" पद और भगवत् पद का अर्थ करने में भ्रमित होते हैं। सारस्वत कल्प के सिवाय अन्य कल्पों में भगवान् अंशावतार से पधारते हैं। इस प्रसिद्ध वार्ता के अनुरूप राजाने प्रश्न कर दिया है। कितनेक महानुभाव **"अंशेन"** पद से प्रद्युम्न अंश के साथ भगवान पूर्ण पुरुषोत्तम पधारे, ऐसा भी आशय बताते हैं। कारण कि यदुवंश से भगवान का प्रद्युम्न अंश का सम्बन्ध है। कितनेक विद्वान् **'अंशा ईना भजनीया यस्य स. अंशेनः। अंशेनश्चासौ अवतीर्णस्तस्य अंशेनावतीर्णस्य'** यह भी अर्थ करते हैं कि जिस भगवान के अन्य अंशावतार सेवनीय है और ऐसी भी व्युत्पत्ति करते हैं। अवतरणे-अवतीर्ण पद का तात्पर्य है कि भगवान् वैकुण्ठ से पृथ्वी पर पधारते हैं उसको अवतार कहते हैं। वह अवतरण तत्त्वों के द्वारा भी हो सकता है लेकिन यहाँ पर तत्त्वों का कोई अवतरण नहीं है लेकिन **'विष्णोः'** विष्णु पद का श्लोक में उल्लेख किया है इससे यह स्पष्ट किया कि साक्षात् सर्वत्र व्यापक विष्णु भगवान् स्वयं पधारे हैं। **वीर्याणि**—भगवान के चरित्र अचिन्त्य ऐश्वर्यों के बोध करने वाले होते हैं भगवान के ये पराक्रम भगवान के माहात्म्य का ज्ञान कराते हैं इसलिए **'वीर्य'** पद का उल्लेख किया है। **'नः'** भगवन्, अन्य लोग इन चरित्रों के श्रवण के लालयित अवश्य होंगे लेकिन शुकाचार्य मैं ज्यादातर उत्कण्ठित हूँ। भगवन्, इन चरित्रों का सर्व श्रवण करूँ यह भी मेरी अभिलाषा है ॥ २ ॥

चारों पुरुषार्थों की समान भगवच्चरित्र श्रवण भी सर्वोत्तम और स्वतंत्र पुरुषार्थ ही है और मत्स्यादि अवतारों में ये ही भगवान प्रकट हुए हैं तब यह चरित्र श्रवण का प्रश्न व्यर्थ ही है ऐसी शङ्का न हो इसलिए तृतीय श्लोक **'अवतीर्य यदोर्वंशे'**—श्लोक का प्रारम्भ करते हैं कि भगवन्, मैंने मत्स्यादि चरित्रों का श्रवण किया है अब तो श्रीमुख से यदुवंश में अवतीर्ण भगवान् श्रीकृष्णने जो चरित किये हैं उन चरित्रों का श्रवण करना चाहता हूँ तो कृपया वह सर्व चरित्र सुनाओ यह ही लालसा है। **'वंशे'**—वंश शब्द का भी तात्पर्य है कि यदुवंश में किये हुए चरित्रों में वीर्य-षड् ऐश्वर्यों की अधिकता है और पूर्ण पुरुष श्रीकृष्ण यदुवंश में अधिक समय तक विराजे थे। यदुवंश में होने के कारण सर्व चरित केवल इन्द्रियादि की क्रिया नहीं है लेकिन ऐश्वर्य-वीर्य आदि धर्मरूप है।

"यदोः वंशे"—यहाँ पर दो पृथक् पृथक् पदों का उल्लेख किया है उस के स्थान में "यदुवशे" ऐसा समास कर एक पद कहते तो क्या हानि थी! तब कहते है कि यदु के चरित्र सामान्य धर्मरूप हैं किन्तु श्रीकृष्ण चन्द्र के चरित्र उनमें भी विशेष धर्मरूप है। वे विशेष धर्म भगवदैश्वर्य है। "भगवान्" शब्द का मर्म यह है कि जीव के जीवन में सात प्रकार के जो व्यसन होते हैं जैसे क्षुधा-तृषा-रोग-कर्म-द्यूत-मदिरा-वाराङ्गना सात व्यसन मनुष्यों को सताते हैं वे सात भगवान में निरर्थक हो जाते हैं और भगवान के सामने व्यर्थ बन जाते हैं। इस का कारण भी यह है कि भगवान में छ ऐश्वर्य विराजते हैं और भगवान् स्वयं सातवाँ धर्मी है इसलिए सातों व्यसनों का भगवान के सामने नहीं चलता है। **'भूतभावनः'** पद का अर्थ यह है कि भूतों को आनन्द देने वाले भगवान हैं। भगवान् का अवतार जीवों के कल्याण के लिये है कारण यह कि प्रपञ्च में रहने पर भी भगवान् प्रपञ्च से पर है बन्धन भगवान को नहीं जीव के लिये अवश्य है। यदि बन्धनयुक्त जीव भगवच्चरित्रों का श्रवण कर भगवद् भाव युक्त होगा तब मुक्त हो जायेगा। भगवान् चाहते तो अपनी इच्छा से मुक्ति का दानकर सकते थे फिर अवतार लेकर चरित्रों को करने का कोई श्रम आवश्यक न था यह सत्य होते हुए भी अनवतार दशा के जीवों का निरोध और कल्याण नाम का अग्रिम कार्य को करने का भगवदनुग्रह निश्चित होता है और भगवल्लीलामृत का पान कराने के लिये तो व्यासावतार है। भगवान् के चरित्र तब सफल होंगे जब उनको पूर्ण रूप से जान लेंगे। **विश्वात्मा**—भगवान् का पूर्ण स्वरूप का ज्ञान क्या है तब इसका समाधान करते हैं कि भगवान् विश्व की आत्मा है। भगवान् जीवों का हित स्वयं स्वतन्त्र रूप से करते हैं। इसलिये

अनेक प्रकार की लीलाएँ कर जीवों की अविद्या का नाश करते हैं जिस से उन जीवो में स्वतः विना साधन भगवान् में प्रेम होने से उनका हित हो जाता है। यदि भगवान् इस प्रकार स्वतंत्र रूप से स्वतः जीवों का कल्याण न करें तो अन्योन्याश्रय दोष हो होगा। अन्योन्याश्रय दोष इस प्रकार का है कि यदि भगवान जीव का हित न करें तो जीव को अपने हित के लिये भक्ति का आश्रय लेना पड़े और भगवान् तब हित करे जब जीव भक्त हो इस ढंग से जीव को अपने हित के लिये भक्ति का आश्रय लेना पड़े याने साधन करना पड़े और भगवान को भक्त का आश्रय करना पड़े जिससे भगवान् का आश्रय लेना पड़े इससे विश्वात्मा होना एवम् स्वातन्त्र्य अन्योन्याश्रय दोष युक्त हो जायगा अतः भगवान में यह दोष न हो इसलिये स्वयं स्वतन्त्र होने से जीवों का हितकर अपने विश्वात्मापन तथा स्वातन्त्र्य का परिचय देते हैं। यह ज्ञान जब जीव को दृढ हो तब भगवल्लीला लाभ दायक होती है। इसलिये आप सम्पूर्ण तीन चरित्र कहने की कृपा करें। यद्यपि द्वितीय तृतीयादि स्कन्धों में और नवम स्कंध के २४ अध्यायों में अन्तिम श्लोकों में **'जातो गतः पितृगृहात्'** यद्यपि कृष्ण चरित्र सुनाया है लेकिन वह संक्षेप में है अब विस्तार से सुनाइए ।।२।।

तीन श्लोक पर्यन्त भगवद्-वीर्यों की और भगवच्चरित्र की पृच्छा की अब तीन श्लोकों से भगवच्चरित्रों को और भगवान् के माहात्म्य को कहते हैं। माहात्म्य दो प्रकार का है। एक माहात्म्य तो अदृष्ट था जो देखने में नहीं आता है और दूसरा माहात्म्य दृष्ट है जो देखने में आता है अब प्रथम **'निवृत्ततर्षैः'** श्लोक से चरित्र का माहात्म्य कहते हैं—

कारिकार्थ— स्वरूप से, फल से, महापुरुष के सम्बन्ध से और विषय की उत्तमता ऐसे चार प्रकार से श्रीकृष्ण भगवान् के चरित्र परम श्रेष्ठ है ।। १ ।।

मुक्त पुरुष का कर्तव्य है कि वे महा पुरुष मुमुक्षु-मोक्ष की कामना वाले जन्मों का भव नाश करें। यह भगवत् चरित्र अनिन्द्य है, इसलिए निन्दा न हो सके बल्कि प्रशंसा की जाय वैसे हैं। उचित है कि विरक्त को भी गुणों के गान में निश्चय-पूर्वक प्रयत्न करना चाहिए ।। २ ।।

जो कोई भी यदि भगवान् के चरित्रों के गुणगान से उपरत-विमुख हो तो समझना चाहिए कि वह (१) आत्मघाती, (२) कर्मजड़ (३) निन्दित विषयों में रस वाला (४) पशु वा (५) स्त्रीजीव, इन पाँच में से कोई भी एक होना चाहिये। वैसे जीवों के सिवाय अन्य भगवान् के गुणगान से प्रेम करते ही हैं ।। ३ ।।

व्याख्या—भगवान् के चरित्र **'निवृत्ततर्षैरुपगीय मानात्'** इस विशेषण से बताया है कि ये चरित्र फल रूप होने के कारण ब्रह्मानन्द से भी अधिक रसरूप हैं अतः स्वरूप से उत्तम हैं।

'भवौषधात्' इस विशेषण से यह बताया है कि भगवान् के चरित्र अविद्या से उत्पन्न होने वाले अहन्ता ममता आदि संसार रूप दोष की औषध है जिसका उत्तम फल इन दोषों की निवृत्ति है।

'महापुरुषयोगतः' इस विशेषण से यह बताया कि इन चरित्रों से महापुरुष (भगवान) से सम्बन्ध होता है। अतः चरित्र का भी महत्व है। कारिका में चरित्र का विशेषण 'परमं' दिया है उससे तो स्पष्ट चरित्र की विशेष उत्तमता बताई है। क्योंकि इन चरित्रों के श्रवण से व गुणगान से, पर पुरुषोत्तम स्वरूप का पूर्ण ज्ञान (अनुभव) हो जाता है ।। १ ।।

द्वितीय कारिका में 'अनुवाद' का उत्कर्ष (बड़ाई) बताते हैं। यह अनुवाद करना अर्थात् भगवान् के चरित्र स्वयं सुनकर व पढ़कर पुनः दूसरों को सुनाना एवं समझाना जीवन्मुक्त अर्थात् जिसकी अहन्ताममता नाश होकर भगवान् में आसक्ति हो गई है उन पुरुषों का कर्त्तव्य है। इसलिए भागवत के श्लोक में **'निवृत्ततर्षैः'** कहा है। ऐसा कहने से यह शङ्का हो सकती है कि तब जिनका संसार नाश नहीं हुआ हो क्या वे नहीं सुन सकते हैं? इस शङ्का के निवारण के लिए दूसरा विशेषण **'मुमुक्षोः'** दिया है जिसका तात्पर्य यह है कि संसार नाश न भी हुआ हो परन्तु मन में यह चाहता हो कि मैं इस संसार से छूट जाऊँ, मेरा मोक्ष हो; वैसा चाहने वाले भी श्रवण कर सकते हैं। कारण कि ये चरित्र संसारनाशक औषधि है। अतः संसार नाश के लिए उनको भी अवश्य सुनना चाहिये। चरित्रों का उत्कर्ष इसलिए है कि चरित्र का 'विषय' भगवान् में आसक्ति कराने में 'अनिन्द्य' है।

स्वरूप और फल से उत्तम तथा अनिन्द्य विषय होने से संसार से विरक्त अर्थात् भगवान् के रस में आसक्त पुरुषों को इसमें (भगवान् के चरित्रों के गुणगान में) निश्चय-प्रयत्न करना चाहिए ।। २ ।।

तृतीय कारिका में कहते हैं कि प्रभु के चरित्रों का गुणगान अन्तःकरण के दोषों का नाश करने वाला है। जो मनुष्य उस गुणगान से प्रेम नहीं करता है अर्थात् उदासीन रहता है वह 'आत्मघाती' (अपनी हत्या करने वाला) है।

गुणानुवाद, मोक्ष का साधन है, जो इस साधन रूप गुणानुवाद से दूर रहता है वह 'कर्मजड़' (कर्तव्य का पालन नहीं करने वाला) है।

चरित्र, कर्ण तथा मन को आनन्द देने वाला अनिन्द्य विषय है। जो इस अनिन्द्य विषय में आसक्ति नहीं करता है वह 'निन्दितार्थरत' है।

'आत्मघाती', 'कर्मजड़' और 'निन्दितार्थरत' अर्थात् निन्द्य लौकिक विषयों का स्नेही इन तीनों के सिवाय 'स्त्री-जीव' और 'पशु-जीव' गुणानुवाद से विरक्त रहते हैं। आत्मघाती, कर्मजड़ और निन्दितार्थरत ये तीन ही पशुघ्न (जीव-हत्यारे) हैं। स्त्री-जीव प्रकृति के अधीन होने से और पशु-जीव विवेक-शून्य होने के कारण गुणानुवाद से विरक्त रहते हैं। इसलिए इन दोनों को पशुघ्न नहीं कहा है॥ ३॥

प्रथमत: फलरूपं चरित्रमेतदित्याह—भगवान् के चरित्र फलरूप हैं उनका वर्णन करते हैं, जिनकी तृष्णा अन्तःकरण के सर्व प्रकार के दोष पूर्णरूप से नाश हो गये हैं, जिनमें थोड़े भी दोष नहीं रहे हैं, वैसे ही निर्दोष व्यक्ति भगवान् के गुणों का गान उनके समीप में कर पाते हैं—समीप कहने से यह बताया है कि वैसे भक्तों को अन्यत्र जाने का परिश्रम भी नहीं करना पड़ता है, गुणगान से एवम् श्रवण से ही आनन्द की प्राप्ति हो जाती है, इसलिये जैसे अन्य विषयों से आनन्द की प्राप्ति तब होती है जब विषय के अनुभव के लिए प्रयास व परिश्रम किया जाय, यहाँ वह प्रयास भी नहीं करना पड़ता है। श्लोक में 'निवृत्ततर्षै' बहुवचन कहने का रहस्य यह है कि भगवान् के गुणों को गाते हैं एवं बारबार गाते ही रहते हैं जिससे जो दोष नाश होने योग्य हैं वे नाश हो जाते हैं। शेष जो दोष आगे फल रूप होने वाले हैं, उनका नाश नहीं होता है। भगवान् के चरित्र स्वतन्त्र फलरूप हैं, इसलिए भगवद्भक्त जहाँ भी कीर्त्तन होता है वहां आकर स्वयं गुणगान, बिना संकोच के करते हैं। क्योंकि कथा के स्थल पर जाकर सब साथ में मिल के जब गुणगान करते हैं तब रस का अन्तःकरण में सर्वतोगामी प्राकट्य होता है जिससे गुणगान करने वाले आनन्द रसमहोदधि में निमग्न हो जाते हैं। इससे यह बात स्पष्ट हो गई है कि गुणगान करने वालों के लिए यह गुणगान फलरूप होता है और जो श्रवण करते हैं उनके दोषों का नाश करने वाला होता है।

चरित्रस्य फलसाधकत्वमाह—चरित्र फल को सिद्ध कर देता है इस बात को बताने के लिए **'भवौषधात्'** विशेषण दिया है जिसका अर्थ यह है कि गुणगान संसार को नाश करने वाला औषध है। और यह गुणगान हमारा उपकार करने वाला है ऐसा समझ कर गुणों का गान करते हैं। श्रोता के लिए तो कर्म, ज्ञान और भक्ति से भी विशेष, मोक्ष के लिये सर्वोत्तम साधन है। औषध, रोग नाश के लिए केवल उसको उदर में भेजने का ही मनुष्य से प्रयत्न चाहता है, शेष रोग का नाश तो स्वयं औषध स्वतः कर देता है। लौकिक औषध मुख द्वारा भीतर उदर में जाता है किन्तु यह औषध कर्ण द्वारा सुनकर अन्तःकरण में पहुँचता है। **अतः फलत्वसाधनत्वे एव यद्यपि**—यद्यपि यहाँ केवल फलत्व फलपन और साधनत्व साधनपन कहने चाहिए विशेष कहने की आवश्यकता नहीं है। तो भी **'श्रोत्रमनोभिरामात्'** कान और मन को आनन्द देने वाला है यह क्यों कहा? इसका भावार्थ श्रीमहाप्रभुजी कहते हैं कि यह औषध जघन्य कटु और कठिन होगा तब जिन कानों द्वारा यह भीतर प्रवेश करेगा उनको तथा जिस मन में प्रवेश करेगा उसको यदि अरुचिकारक बन जाएगा तब तो कोई भी मनुष्य इसको लेना पसन्द ही नहीं करेगा। इसलिए कहा है कि यद्यपि यह विषय जघन्य है तो भी कान और मन को आनन्द देने वाला है और आनन्द के साथ-साथ रोग का भी नाश करने वाला औषधि है और इस औषधि का श्रवण द्वारा मन में प्रवेश होते ही सर्व प्रकार के दोष जो कहीं भी हों, वे अन्तःकरण के सर्व दोष नष्ट हो जाते हैं। जिनके मन में इस औषध का प्रवेश नहीं होता है उनके दोष आसुरी हैं जिससे औषधि का भीतर प्रवेश नहीं होता है।

'उपगीयमानात्' इस विशेषण में 'उप' शब्द देकर यह समझाया है कि श्रवण करने के लिए न कोई परिश्रम करना है और न कहीं जाना है अर्थात् किसी प्रकार से भी श्रवण अप्राप्य नहीं है क्योंकि वहाँ समीप में भी श्रवण हो रहा है। श्रवण के लिए धन की भी आवश्यकता नहीं है क्योंकि गुणगान, करने वाले वक्ता वे शुकदेवजी हैं, जिनकी तृष्णा नष्ट हो गई है। 'गीयमान' 'गान करना कहा है। इसका तात्पर्य यह है कि गान से शब्दों की मधुरता प्राप्त होती है। जन्म और मरण के समय जो दुःख होता है उसका जीव ने बहुत बार अनुभव किया है अतः उसको दूर करने के लिये यह औषधि, जो उस दुःख को निवारण करने वाली है, उसे विशेष आदर के साथ लेना चाहिये क्यों कि यह कर्णों को कड़वी नहीं लगती है और परिणाम में लाभ देने वाली है। श्लोक में **'अभिरामात्'** पद में 'अभि' देने का तात्पर्य यह है कि परलोक में भी आनन्द कराने वाली है। वहाँ परलोक में भी भगवान् में आसक्ति होती है।

इस प्रकार, रूप, गुण तथा कर्म से भगवान् के चरित्रों की उत्कृष्टता बताई अब संबन्ध से भी उसकी उत्तमता कहते हैं, **'उत्तमश्लोकगुणानुवादात्'** इस पद से उसको समझाते हैं! वे गुण कैसे हैं? जिन गुणों का गान उत्तम पुरुष करते हैं। भगवान् के माहात्म्य को बताने वाले हैं जिनका वर्णन भागवतादि शास्त्रों में है। जिनके दोष पूर्णतया नाश हो गये हैं वैसे भक्तों का उत्कर्ष (बड़ाई) भी भगवान् के कारण है। भगवान् महान् हैं, यह भगवान् का उत्कर्ष करने वाले भी उनके गुण ही हैं। गुणों की

उत्तमता अनुवाद करने से होती है। इस प्रकार सवों का उत्कर्ष 'उत्तम श्लोक, गुण और अनुवाद' इन तीनों को एकत्र कहने से सिद्ध होता है।

पुमानिति—श्लोक में 'पुमान्' शब्द आया है उसके देने का जो तात्पर्य है वह बताते हैं कि जिन पुरुषों का पशु अवतार है या स्त्री अवतार है वे पुरुष आकार, में होते हुए भी श्रवण के अधिकारी नहीं हैं। जो स्त्रियाँ श्रवण में आसक्त है वे चाहे किसी भी निमित्त से स्त्री देह में प्राप्त हुई हो पर वास्तव में वे पुरुष जीव ही हैं। अतः कोई भी पुरुष इस श्रवण से उदासीन नहीं होगा। कारण कि श्रवण के सिवाय कोई भी साधन ऐसा नहीं है जो इस प्रकार के उत्कृष्ट रस तथा वैराग्य को सिद्ध कर सके।

निवर्त्यमानानां दैत्यत्वमिति—आत्मघाती आदि पाँचो प्रकार के दैत्यपन को बताने के लिये दैत्यों का लक्षण बता कर उनका दैत्यपन सिद्ध करते हैं। जैसे कि–'पशुघ्न' उसे कहते हैं जो अपनी जिह्वा के रस के लिये पशुओं की हत्या करते हैं। वैसे मनुष्य, मनुष्य आकृति में होते हुए भी दैत्य हैं। दैत्य, स्वभाव से, दयाहीन होते हैं इस बात को दिति के चरित्र में सिद्ध किया गया है। दैत्य, सदैव, भगवान् के शत्रु होते हैं, इसी कारण से उनके दोषों की निवृत्ति नहीं होती है। दैत्यों की मुक्ति तब होती है जब उनके दोष पूर्णतः सर्वथा नष्ट हो जाते हैं।

जो जैसे कालनेमि आदि जन्म से सहज दैत्य है वे स्वभाव से ही असुर हैं। लेकिन कंस तो सहज असुर कालनेमि का आधार रूप आवेश स्थान है। इसलिये आवेशी कंस की मुक्ति तो आवेश नष्ट होने से दोष भी नाश हो जाते हैं इसलिये हो सकती है किन्तु सहज दैत्य की नहीं हो सकती क्योंकि उनकी मुक्ति तो अन्धःतम है जहाँ से वह लौटकर नहीं आते हैं। यदि कंसादि जैसे अनिष्टों की इस प्रकार की मुक्ति नहीं की जाय तो वे कालनेमि आदि सहज दैत्य लौटकर पुनः कंसादि में प्रवेशकर वैसे ही उपद्रव करने लग जायेंगे। अतः कंसादि आविष्टों की मुक्ति की जाती है। इन पांच प्रकार के पुरुषों को श्रवण से विमुख देखकर दूसरे भी वैसे न हो जाय, इसलिए इस श्लोक में उनके स्वरूपों का वर्णन किया है ॥ ४ ॥

एवं चरित्रं स्तुत्वा पुण्यद्वारमात्रतां वारयितुं भगवन्तं स्तौति—पितामहा इति द्वाभ्यां, श्रुतदृष्टभेदेन।

इस प्रकार भगवान् के चरित्रों की स्तुति की। अब वे चरित्र स्वतः पुरुषार्थ सिद्ध करने वाले हैं, न कि पुण्यों के कारण पुरुषार्थ सिद्ध करने वाले हैं। इस वस्तु को स्पष्ट करने के लिये अब दो श्लोकों में भगवान् की स्तुति करते हैं। दो श्लोकों में इसलिये करते हैं कि वे दृष्ट याने देखे हुए और श्रुत याने सुने हुए भेद से दो प्रकार के हैं।

मे पितामहाः—मेरे दादे पाण्डव, भगवत् रूप नाव के आश्रय से युद्ध में जिसको पार करना कठिन है ऐसे दुस्तर कौरवों के सैन्यरूप सागर को बछड़े के खुर के समान खड्डा बनाकर तिर गये। पाण्डवों के वंश में एक पौत्र परीक्षित ही बचा था। परीक्षित के पितामह पांचों पाण्डव थे अथवा कुन्ती के संबन्ध से युधिष्ठिर, भीम तथा अर्जुन तीन पितामह थे। क्योंकि दूसरे के क्षेत्र में बीज डालने से उस बीज से उत्पन्न सन्तान, क्षेत्र के पत्नी के पति का होता है। कुन्ती का पति पाण्डु है उसमें बीज डालने वाले धर्म, वायु और इन्द्र थे किन्तु उनका सन्तान पर इसलिए अधिकार नहीं है क्योंकि कुन्ती उनकी पत्नी क्षेत्र नहीं थी। अतः पाण्डु और कुन्ती दोनों से सम्बन्ध होने से युधिष्ठिर, भीम तथा अर्जुन तीनों पितामह हैं। जहां फिर क्षेत्र जैसे तैसे जिसके अधिकार में आ गया हो तो, उस समय बीज डालने से, जो सन्तान पैदा हो वह संतान बीज डालने वाले की होती है जैसे बुद्ध को चन्द्रमा का पुत्र माना जाता है। यद्यपि वह बृहस्पति की स्त्री से पैदा हुआ था।

'पितामहा मे समरे' इस श्लोक, में युद्ध के लिये समर शब्द दिया है उसका तात्पर्य बताते हुए श्री मदाचार्यचरण कहते हैं कि मर शब्द का अर्थ मरना है और "स" विशेषण देकर कहा कि जिसमें मरना अवश्य होता है उसको समर कहते हैं वैसा होने पर भी पांच पाण्डवों में से कोई नहीं मरा। कारण कि उनके साथी भगवान् थे, यह भगवान के सान्निध्य का यश कहा।

इस समर में सामने लड़ने वाले कैसे है उनको बताते हैं कि वे भीष्मादि देवताओं को भी जीतने वाले थे, इस विशेषण से यह समझाया कि यद्यपि पाण्डव देवताओं के पुत्र थे और उनके पास देवों के दिये हुए शस्त्र भी थे किन्तु वे उन कौरवों को जीत नहीं सकते थे कारण कि जो देवों को जीतने वाले हैं उनको देवों के पुत्र कैसे जीत सकेंगे ? उनका अमरञ्जयत्व देवों पर विजय पाना कभी भी नाश नहीं होता कारण कि वह उसका व्रत सत्य सङ्कल्प वाला है किन्तु उसमें अपने धर्म के त्याग करने की सामर्थ्य भी है। क्योंकि जो विचार आवे उसको पूर्ण करना वह भी एक प्रकार का सत्यव्रत है अतः भीष्म देवव्रत होते हुए भी कौरवों के संसर्ग से, भगवान् की इच्छा के विरुद्ध कार्य कौरवों को सहाय करने से दैत्यव्रत कहलाये भीष्म आदि का अमरंजय तो केवल संज्ञामात्र संकेत मात्र है। क्योंकि "संज्ञायां भृतृवृजीन्धारिना खश्" प्रत्यय करके अमरञ्जय शब्द बनाया है। भीष्म देवव्रत है यह प्रसिद्ध है। दूसरे द्रोणादिक भी भीष्म के मुख्य होने से देवव्रत हुए। समस्त योद्धा

अतिरथ होने से अलौकिक एवं अत्यन्त सामर्थ्य वाले थे। समुद्र में एक सौ योजन लंबा तिमि नाम वाला मत्स्य रहता है, ऐसे को भी जो निगल जाय वह तिमिङ्गिल कहलाता है वह जिस समय समुद्र में पड़ता है तो वहां का कोई भी मत्स्य जीवित नहीं रहता है, जब वे ही नष्ट हो जाते हैं तो दूसरी जाति वालों का नाश हो इसमें कहना ही क्या है ? उस तिमिङ्गिल में इतना बल दैत्य आवेश के कारण है कि वह अपनी ज्ञाति का नाशक होता है और क्रूर भी इसलिये है। इसी प्रकार ये देवव्रत भीष्मजी भी तिमिङ्गिल है क्योंकि उनमें भी दैत्यांश है जिससे वे अति क्रूर हैं, ऐसा होने से वे अपने सम्बन्धियों अथवा पौत्रों को जीवित छोड़ दें वह उनके स्वभाव से विपरीत है। क्योंकि दैत्य आवेश होने से उनमें विचार या विवेक रहा ही नहीं था। जैसे तिमिङ्गिल समुद्र में पड़े हुए अपनी जाति वालों का भी नाश करता है तो दूसरों को कैसे छोड़ेगा ? वैसे ये भी तिमिङ्गिल के समान दैत्यावेशी होने से जो भी इस समर रूप समुद्र में आवे वह चाहे कौरव पक्ष का ही क्यों न हो उसको भी नष्ट कर देवे वैसे थे तो दूसरों को नाश करने में उनको कौन सी देरी लगेगी। अतः कहा है कि यह कौरव सैन्य सागर दुस्तर है। जिस प्रकार समुद्र को पार करने के जहाज आदि साधनों को समुद्र के जीव मगर आदि नष्ट कर देते हैं उसी प्रकार ये कुरुवंशी भी, लड़ाई में शत्रु का नाश करने के सिवाय कभी भी शान्त नहीं होते हैं। समुद्र अचेतन होने से स्वयं जहाज आदि साधनों को नष्ट नहीं कर सकता है किन्तु उसमें रहने वाले चेतन मकरादि जीव करते हैं यहाँ तो ये कौरव लोग स्वयं चेतन होने से साधनों का नाश करने में सर्वथा समर्थ हैं। ये चेतन हैं इसलिये स्वरूप से भी नाशक हैं। इतना सब होते हुए भी जिसके रक्षक भगवान् हैं अर्थात् इस कौरव सैन्य सागर से पार उतारने वाला जहाज भगवान् स्वयं हैं उस जहाज को कौन नष्ट करने की सामर्थ्य रखता है ? कोई नहीं। यहां प्लव शब्द इसलिये दिया है कि भगवान् श्रीकृष्ण केवल पाण्डवों के सान्निध्य में रहकर उनके रक्षक बने थे परंतु आप युद्ध नहीं करते थे। ऐसे महान् सेनारूप सागर को बछड़ा के पद के समान छोटा बनाकर पार हो गये, उसका कारण केवल श्रीकृष्णाश्रय है। गीता में भगवान् ने अर्जुन को कहा है कि अर्जुन ! तू इनको मारने के लिये निमित्त मात्र केवल नाम मात्र निमित्त बन, क्योंकि इनको तो मैंने प्रथम ही मार दिया है।

इस प्रकार भगवान् के वचनों को सुनने से पाण्डवों के लिये कौरव सैन्य सागर बछड़े के खुर के सदृश खड्डे के जैसा बन गया, किन्तु तो भी पाण्डवों को दृढ़ और सम्पूर्ण आश्रय न होने से उनको वह खड्डा भी जैसे पीपिलिकाओं चीटीओं को महान् देखने में आता है वैसे दुस्तर देखने में आया। कारण कि वे पितामह भगवान् को अपनी दृष्टि से देखते थे जिससे उन्होंने श्रीकृष्ण को अपने समान मान लिया। यही कारण था कि उनको दृढ़ विश्वास न हुआ। यदि कृष्ण में भगवद्भाव होता तो वत्स पद समान खड्डे को पार करने में संशय क्यों रहता ? तथा शस्त्र ग्रहण करने का भी कौन सा प्रयोजन था ? लेकिन ये सब आश्रय के अभाव से हुए हैं। यदि श्रीकृष्ण को अपने समान न मानकर भगवान् मानते तो उत्तरा के समान भगवान् के शरण जाते और शस्त्र ग्रहण कर हम शस्त्रों द्वारा शत्रुओं का वध करेंगे वैसा अहंकार मेरे पितामहों को न होता। इतना होने पर भी कृपानिधि श्रीकृष्ण ने अपने चक्र से उनकी रक्षाकर निजत्व बताया। यदि श्रीकृष्ण भगवान् इस प्रकार रक्षा नहीं करते तो, पाण्डवों की शक्ति शत्रुनाश में किसी भी प्रकार काम कर सकने वाली नहीं थी, और मेरे पितामहों का अवश्य नाश हो जाता। उस छोटे गड्ढे में डूबना ही यहाँ नाश था। भगवान् ने पहिले भी मेरे पितामहों की रक्षा की थी, वह उपकार भी पाण्डव भूल गये और भगवान् का सामर्थ्य भी भूल गये, यही पाण्डवों में क्षुद्रपन था अर्थात् चींटीपन था। युद्ध में अन्य सर्व वीर नाश हो गये शेष अश्वत्थामा, कृपाचार्य और कृतवर्मा ये तीन बचे इस कारण से कौरव सैन्य सागर तुच्छ जैसा हो गया, तो भी अश्वत्थामा ने पाण्डवों पर ब्रह्मास्त्र छोड़े उनसे भी सुदर्शन चक्र द्वारा भगवान् ने रक्षा की तथा इस कौरव सैन्य सागर का पार किया ये दोनों कार्य अलौकिक साथ में हुए हैं। मेरे तीनों पितामह मरे नहीं यही कौरव सैन्य सागर का वत्सपद के समान होना है।

द्विधा विदीर्णो मुखस्थानीयोऽश्वत्थामा - अश्वत्थामा अग्रभाग के समान है, उसने दो बार अपकार किया एक बार पाण्डवों के पुत्रों का नाश किया, दूसरी बार उत्तरा तथा पाण्डवों पर ब्रह्मास्त्र फेंक कर अपकार किया था उनका दोनों ही बार निवारण भगवान् ने किया। पाण्डव भगवद्रूप नाव का आश्रय कर इस समुद्र को तरते तरते पार कर गये, ज्यों-ज्यों आगे बढ़ते जाते थे त्यों त्यों पार किये सागर को सुखाते जाते थे। अन्त में पाण्डव कुछ शेष छोड़कर सैन्य सागर को पार कर गये और यश प्राप्त किया। यह अत्यन्त अलौकिक है। कारण कि कौरवों का नाश तो कालरूप से भगवान् ने कर ही रखा था किन्तु विजय की माला पाण्डव पहनकर यश के भागी बने यही भगवान् का अलौकिक प्रभाव तथा कृपा है।

एवमेव पूर्वपूर्वसंसारमपि—भगवान् के आश्रित भक्त भी इसी प्रकार अपने अहन्ता ममता रूप संसार से प्राप्त धनादि पदार्थों का त्याग कर संसार शोषण करते हैं और केवल भगवत्सेवा के कार्य में आने वाले दैवी द्रव्य का ही कुछ संग्रह कर भगवत्सेवा द्वारा संसार के उस पार स्थित भगवान् को प्राप्त करते हैं ॥ ५ ॥

एवं श्रुतमाहात्म्यमुक्त्वा दृष्टमाहात्म्यमाह-दौण्यस्त्रेति—

पूर्व श्लोक में श्रुत माहात्म्य का वर्णन किया अब स्वयं देखे हुए भगवान के माहात्म्य का परीक्षितजी वर्णन करते हैं—

सर्वथा पाण्डवाशक्तौ स्वयमपि कृतवान्—जिस कार्य को पाण्डव नहीं कर सकते थे उन कार्यों को कृपानिधि भगवान श्रीकृष्णने स्वयं किया। यह मेरे ऊपर भगवान् की बहुत बड़ी कृपा है यह बताते हैं—पहली बात तो यह है कि अश्वत्थामा ने मुझ पर ब्रह्मास्त्र का प्रयोग क्यों किया ? अश्वत्थामा के पिताजी दोणाचार्यजी का मेरे पितामहों ने वध किया था, पिता के वैरी से बदला लेना पुत्र का कर्त्तव्य है अतः अश्वत्थामा ने मुझ पर ब्रह्मास्त्र चलाया था। इसलिये अश्वत्थामा नाम न लेकर द्रौणि याने श्रीद्रोणाचार्य का पुत्र ऐसा कहा। द्रौणि शब्द का उल्लेख का श्रीद्रोणाचार्यजी की मृत्यु और महत्त्व दोनों बताये हैं। श्रीद्रोणाचार्य अस्त्रविद्या के अद्वितीय जानकार थे अतः सर्व योद्धाओं के आचार्य थे। और अश्वत्थामा का ब्रह्मास्त्र कोई भी लौटा नहीं सके अथवा वह जिस पर फेंका जाय उसको नाश करने में असफल न हो, वैसा था, जिससे मेरा शरीर तो जल गया किन्तु मेरे पितामह श्रीअर्जुन वैष्णव थे क्योंकि नर के अवतार थे उनके वंश बीज रूप में लिङ्ग शरीर नष्ट नहीं हुआ अतः कुरु याने पाण्डवों का सन्तान बीज मेरा वह शरीर बच गया। यद्यपि परीक्षित पाण्डवों का वंश है किन्तु कौरवों को भी पिण्डदानादि से मुक्ति दिलाने वाला परीक्षित् ही है क्योंकि कौरवों के वंश में कोई नहीं बचा है इसलिए यह परीक्षित् कुरु और पाण्डवों के वंश का शेष बीज कहा गया है। '**कुरुपाण्डवानां**' इस पद में जब '**कौरवाश्च पाण्डवाश्च**' ऐसा समास किया जाय, व्याकरण की दृष्टि से '**जनपदे लुविति**' योग विभाग करके प्रत्यय लोप करके "कुरु पाण्डव" पद बनेगा। और '**कुरुभि सहिताः पाण्डवा इति**' ऐसी व्युत्पत्ति करने में कोई हानि नहीं है।

अन्तर्बीजमात्ररूपेण—देह के भस्म हो जाने के बाद उसकी रक्षा करना सर्वथा अशक्य है। इस पर कहते हैं कि ऊपर से देह जल तो गई थी किन्तु भीतर से बीज रूप से नष्ट नहीं हुई थी अतः जले हुए हिस्से भी बिना जले हुए जैसे दीख पड़ते थे। ऐसे मेरे शरीर की भगवान् ने रक्षा की। भगवान् ने शरीर के जल जाने के पहिले ही ब्रह्मास्त्र को रोककर रक्षा क्यों नहीं की ? इस शङ्का के निवारण के लिये श्रीसुबोधिनीकार आज्ञा करते हैं कि '**दाहो धर्मरक्षार्थ.**' स्थूल शरीर को जलाये जितना, ब्रह्मास्त्र का कार्य था वह धर्म रक्षार्थ, करने दिया क्योंकि ब्रह्मास्त्र में वेद मन्त्रों से, ब्रह्मरूप देवता की स्थापना की जाती है, अतः यदि भगवान् ऐसे ब्रह्मास्त्र को रोक दें तो, वेद मार्ग की रक्षा करने वाले भगवान् हैं। अतः उनका यह धर्म नष्ट हो जाता है, इसलिए भगवान् ने इस अपने धर्म के रक्षार्थ ब्रह्मास्त्र को बीच में न रोककर स्थूल शरीर को जलने दिया जिससे मोक्ष में भी प्रतिबन्ध न हो और केवल स्थूल शरीर ही जला। यह भी भगवान् की महिमा है। इस प्रकार सूक्ष्म शरीर बचाकर उसको पुनः पूर्ववत् बनाकर इसलिए भी रक्षा की, कि कुरु पाण्डव वंश के मोक्ष में किसी प्रकार का प्रतिबन्ध न हो। '**इदं मदङ्गम्**' परीक्षित ने यहाँ पर '**इदम्**' शब्द देकर अपने शरीर का अङ्गुली से निर्देश किया है कि यह मेरा शरीर है जिसको ब्रह्मास्त्र ने जलाया था भगवान् ने उसको कृपया बचाया है। श्रीकृष्ण द्वारा रक्षा होने से शरीर में किसी प्रकार की कमी नहीं रह गई है। और मदङ्ग यह मेरा अंग यों कहने से यह बताया कि यह मेरा प्रत्यक्ष अनुभव है।

संतानस्य वंशस्य बीजम्—भगवान् ने गर्भ में तो रक्षा को अब ब्राह्मण के शाप से आपकी रक्षा क्यों नहीं की ? इस शङ्का के उत्तर में कहते हैं कि उस समय यदि रक्षा नहीं करते तो कुरु बीज पाण्डवों के सन्तान का बीज नष्ट हो जाता। भगवान् को इस वंश के सन्तान बीज की रक्षा करने की आवश्यकता इसीलिये थी कि कुरु भक्त थे उनके वंश में पाण्डव हुए थे वे भी भक्त थे। परम्परा से यह कुल भक्त है भक्तों की रक्षा करना भगवान् अपना प्रथम कर्त्तव्य मानते हैं इसीलिए रक्षा की है, अब मेरे घर सन्तान हो गई है, वंश चालू रहेगा अतः रक्षा की कोई आवश्यकता नहीं है। उस समय मेरी रक्षा का यही कारण था कि जो भगवान ने मेरी माता के पेट में गर्भ प्रकट हो, भगवान ने चक्र धारण कर, तेजस् तत्व सहित, अपने स्वरूप को दिखाने की कृपा की, यह कृपा इसलिए भी की है कि उस स्वरूप का पीछे ध्यान किया जा सके। उस समय न तो चक्र से रक्षा की और न उससे ब्रह्मास्त्र के तेज को दूर किया था। अस्त्र के तेज को तो अपनी गदा से नष्ट किया था इसलिए कोई विरोध नहीं है। भगवान् ने काल को रोकने के लिए कालरूप चक्र को हस्त में धारण किया था जिससे काल अपना मारने का कार्य इस समय न कर सके। इस प्रकार भगवान् ने गदा से ब्रह्मास्त्र के तेज को दूर किया और कालरूप सुदर्शन चक्र को अपने हस्त में लेकर काल की गति रोकली, जिससे मेरी रक्षा पूर्ण रूप से हो गई। तदनन्तर उत्तरा के गर्भ में विराजमान होने की आवश्यकता न होने से आप तिरोहित हो गये।

भगवान के तिरोहित हो जाने के अनन्तर काल चक्र सर्वत्र परिभ्रमण करने लगा है। अब मैं भी इस समय काल चक्र द्वारा बन्धा हुआ हूँ। जो प्रभु मेरी माता के अनुभव में आये थे उन्होंने मुझे भी अनुभव कराया था। मेरी माता उनके शरण में गई थी अतः उसको प्रभु ने दर्शन दिये और उसकी कोख में प्रवेश किया।

हे शुकाचार्य, भगवान् के माहात्म्य का मुझे प्रत्यक्ष अनुभव है अतः आप कृपया भगवान् के जिन चरित्रों को सुनाओगे उनमें मेरा विश्वास होगा। कारण कि आपके कथन में भी मेरी अचल श्रद्धा है ॥ ६ ॥

एवं स्वस्य भगवच्छ्रवणाधिकारं बोधयित्वा पूर्वपृष्टं भगवच्चरित्रं पुनः प्रकारान्तरेण फलसाधकमिति वदन्ननुवदति—वीर्याणीति।

इस प्रकार राजा परीक्षित भगवान् के चरित्रों के श्रवण में अपना अधिकार बताकर, प्रथम पूछे हुए भगवच्चरित्रों को, पुनः प्रकारान्तर से पूछते हैं। अर्थात् जिस समय भगवान् का प्राकट्य नहीं है, उस समय के जीवों का भी, ये चरित्र साधन-रूप से उद्धारक हैं। यह बात अब इस श्लोक में बताते हैं।

केचिदिमं प्रश्नं पूर्वस्माद्भिन्नमाहुः—कितनेक इस प्रश्न को प्रथम पूछे हुए प्रश्न से भिन्न मानते हैं। और वे विद्वान् कहते हैं कि जो चरित्र मनुष्यरूप से किये जाते हैं वे चरित्र तो ऐसे हैं जो मनुष्यों की समझ में आ जाते हैं। इस प्रकार के प्रश्न पूर्व ही पूछे गये हैं। अतः अब दूसरे प्रकार के प्रश्न पूछते हैं जिनका अवतार से सम्बन्ध नहीं है, जैसे कि वरुण लोक में जाकर नन्दादि को छुड़ाना, वैकुण्ठ आदि का दिखाना ये चरित्र मनुष्यों की समझ से ऊपर है अतः इस प्रकार के प्रश्न अब पूछते हैं। इसी भाँति विश्लेषण करने से याने प्रत्येक भाग को अलग अलग कर उसके भाव बताने से इस चरित्र का जो फल कहा जाने वाला है उसका अमृत पान सिद्ध होगा दूसरों का नहीं होगा। इस अभिप्राय पर विचार करना चाहिये।

तस्य कृष्णस्याखिलदेहभाजाम्—किन्तु यहाँ तो समग्र देहधारियों के अन्दर पुरुषरूप से तथा बाहर काल रूप से विराजमान होकर अमृत और मृत्यु देने वाले उस पुरुषोत्तम श्रीकृष्ण के चरित्रों को कहो, इस प्रकार दो श्लोक का अन्वय है। श्लोक में **'तस्य'** पद देकर यह बताया है कि यह वही मूल रूप है, जिसका वेदों में भूमा तथा रस स्वरूप से वर्णन किया गया है। यदि वही है तो मनुष्य जैसे क्यों दिखते हैं? इस शङ्का को मिटाने के लिए कहा है कि **'मायामनुष्यस्य'** अर्थात् वही पूर्ण रस स्वरूप है किन्तु अज्ञान से हम उसको मनुष्य समझते हैं। आपने अपनी इच्छा से भक्तों को दर्शन देने के लिए यह रसमयी मनुष्याकृति धारण की है। और भगवान् ने अपनी माया से मनुष्यों की बुद्धि पर माया का आच्छादन डाल दिया है जिससे लोग उस परम तत्त्व को मायिक वा कल्पित मनुष्याकृति मानते हैं। और भगवान् की इच्छानुकूल प्रत्येक जीव अपने अधिकार के अनुसार भगवान् के उसी स्वरूप में विविध प्रकार से दर्शन करते हैं। इससे यह समझना चाहिए कि इस अवतार में भगवान् ने मूलरूप और अवतार रूप दोनों को प्रकट किया है। इस श्लोक में यही श्रीकृष्ण रूप मूलरूप कहा है और उसके ही माहात्म्य का वर्णन किया गया है।

वीर्याणीति—भगवान् का अनन्त माहात्म्य है इसको प्रकट करने के लिये 'वीर्याणि' बहुवचन दिया है।

'अखिलदेहभाजां' इस पद में 'अखिल' पद से सब कहे हैं, इसका रहस्य यह है कि भगवान् श्रीकृष्ण के सिवाय कोई भी अन्य देवादि किसी को भी मृत्यु अथवा अमृत फलदान करने में समर्थ नहीं हैं। दोनों ही फल सबको भगवान् श्रीकृष्ण ही देते हैं, भिन्न-भिन्न दाता नहीं हैं। कारण कि भगवान् श्रीकृष्ण ही प्रत्येक प्राणी के देह में अन्तर रूप से याने अन्तर्यामी रूप से वा व्यापक रूप से विराजमान है। समस्त देहधारी जीव भगवान् के ही आत्मरूप अंशरूप हैं उन्हीं को उन जीवों को कारणवश याने लीला करने के लिये भिन्न-भिन्न देह आदि दिये हैं। इसीलिए हरएक को पृथक्-पृथक् मृत्यु वा अमृत की प्राप्ति होती है।

पुरुषरूपाणि मत्स्यादीनि कालरूपाणि विषया इति केचित् श्रीमदाचार्यचरण कहते हैं कि इस पुरुषरूप और कालरूप का स्वरूप कितनेक इस प्रकार से बताते हैं—१–भगवान् ने जो मत्स्य आदि अवतार लिये हैं, वे भगवान् के पुरुषरूप हैं और शब्द, स्पर्श, रूप, रस और गन्ध ये विषय भगवान् के 'काल-रूप' हैं।

२—भगवान् के जिन रूपों का ध्यान किया जाता है वे भगवान् के 'पुरुष-रूप' हैं और ब्रह्म से लेकर तृण पर्यन्त रूप भगवान् के 'काल-रूप' हैं। इस प्रकार अन्य दर्शनकारों के मन्तव्य को कह कर अब आचार्य चरण कहते हैं कि सब रूप भगवान् के ही हैं तो भी अन्तर और बाहिर इस प्रकार अन्य मत कहकर भी आप श्री कहते हैं कि भेद के कारण उनमें इस प्रकार पुरुष रूप और काल रूप से विशेषता रहती है। जैसे कि किसी प्रकार भी साधनों से जो बहिर्मुख होते हैं वे मृत्यु को पाते हैं तथा जो अन्तर्मुख होते हैं वे अमृत को ही प्राप्त करते हैं।

बहिर्मुख जीवों को मत्स्यादि रूप मृत्यु देते हैं अतः वे भी तब 'काल-रूप' बन जाते हैं और अन्तर्मुखों को विषय भी अमृत देते हैं, वे विषय भी पुरुष रूप होते हैं। इस श्लोक में **'मृत्युमुतामृतञ्च'** इस पद में 'उत' शब्द का भाव यह है कि भगवान् अन्तर्मुखों को पुरुष रूप तथा काल रूप दोनों रूपों से अमृत का ही दान करते हैं उनमें अन्तर्मुखों के लिये काल रूप भी पुरुष रूप हो जाते हैं यही भेद है। इससे मृत्यु और अमृत के तारतम्य भेद को जानना चाहिये। ऐसा करने की भगवान् में किस प्रकार की अपनी सामर्थ्य है। क्या इसी भांति भगवान् श्रीकृष्ण खेल खेलते हैं? वह आपकी स्वाभाविक सामर्थ्य है, या अन्तर्भाव के बहिर्भाव का फल है? अथवा मर्यादा की रक्षा के लिये वैसी भगवान् की इच्छा है। इन सब सन्देहों का निवारण तब होगा जब हम उस श्रीकृष्ण के पराक्रमों का ज्ञान प्राप्त करेंगे। वह ज्ञान तब प्राप्त होगा जब उनके चरित्रों का श्रवण किया जायगा। अतः भगवान् के चरित्र अवश्य श्रवण करने चाहिये। इस सन्देह का निर्णय गोकुलवासियों के वैकुण्ठ गमन प्रसङ्ग सुनने पर हो जायगा।

मनुष्यरूप से वैसा होना असम्भव है। इस शङ्का का निवारण करने के लिये भगवान् को मायामनुष्य कहा है, अर्थात् वह पूर्ण पुरुषोत्तम प्रभु है हम अज्ञान से उनको मनुष्य समझते हैं, अतः वह मनुष्य न होने से किन्तु कर्तुं, अकर्तुं, अन्यथा कर्तुं प्रभु होने के कारण सर्व करण में सामर्थ्यवान् है जिससे उसके किये हुए कार्य में असम्भवता समझनी हमारी अज्ञानता है।

हे विद्वन्! इस सम्बोधन से यह बताया कि आप जानकार ज्ञानी हो भगवान् के वीर्यों का कीर्तन जो आप करोगे उससे हमारा तो उपकार होगा ही किन्तु साथ में कीर्तन करने का फल आपको भी प्राप्त होगा और 'विद्वन्' विशेषण का यह भी आशय है कि आपको भगवान् के सर्व चरित्रों का ज्ञान है ॥ ७ ॥

एवं भगवच्चरित्राणि पृष्ट्वा सन्दिग्धान् युक्तिविरुद्धानर्थान् पृच्छति—रोहिण्या इति पञ्चभिः।

पूर्व श्लोक में राजा परीक्षित इस प्रकार भगवान् के चरित्रों को पूछकर अब ५ श्लोकों से जिन चरित्रों का वर्णन युक्ति के विरुद्ध देखने में आता है तथा जिसमें संशय होता है उनको पूछता है।

नवम-स्कन्ध के २४ वें अध्याय के 'बलं गदं' इस ४६ वें श्लोक में बलरामजी को रोहिणी का पुत्र कहा है और वहीं पर '**वसुदेवस्तु देवक्यां सङ्कर्षणमजीजनत्**' ५४ वें श्लोक में सङ्कर्षण श्रीबलराम को वसुदेव ने देवकी से उत्पन्न किया है। यह परस्पर विरुद्ध वर्णन है। लोक में दूसरी देह के सिवाय दो स्थान पर प्रकट होना बन नहीं सकता है। इसका राजा ने प्रश्न किया है अन्यथा ईश्वर के प्रभाव से सर्व कुछ हो सकता है। अतः यों होने में भी भगवान् का प्रभाव ही कारण है ॥ ८ ॥

भगवतो मथुरापरित्यागे को हेतुरिति पृच्छति-कस्मादिति।

अब यह प्रश्न करते हैं कि भगवान् का मथुरा छोड़ने का क्या कारण था ?

कालादिभयनिवारकस्य—जो भगवान् अन्यों के कालादि के भय को दूर करने वाले हैं और सबको मुक्ति देने वाले हैं वे स्वयं अभय स्वरूप है उनको वैसा कौन सा कारण आया जिसके लिये पिता का घर त्यागकर व्रज में पधार गये ? और महावन तथा वृन्दावन में नन्दादिक गोपों को अपना कुटुम्बी बनाकर उनके साथ वहाँ निवास किया ? अथवा जिनसे अन्य वर्ण के कारण कोई संबंध नहीं, पहचान नहीं उनके साथ सहकार कर व्रज में कहाँ और कैसे निवास करने लगे ? [परीक्षित ने जो इस प्रकार कहा कि नन्द के साथ कोई सम्बन्ध नहीं, यह इसलिये कहा कि उसने अभी तक दशमस्कन्ध की कथा नहीं सुनी थी, इसलिये अज्ञान के कारण यह प्रश्न किया भगवान् का तो नन्दादि के साथ वैसा ही सम्बन्ध है जैसा वसुदेव के साथ, इसीलिये श्रीकृष्ण ने गोवर्धन याग के प्रसङ्ग में कहा है कि '**वयं गोवृत्तयोनिशम्**' हम सदैव गौ चराने वाले हैं, और **श्रूयतां मे पितः** हे पिता मेरा वचन सुनो, इन वचनों के न सुनने से राजा भगवान् को केवल यदुकुल में प्रकट हुआ ही समझता था। इसलिये नन्दादिकों को अन्य समझ इस प्रकार कहा] जब आप शुद्ध सतोगुण में स्थित सत्पुरुषों के ही पति हैं और आपका अवतार वैसे सत्पुरुषों के लिये ही है तब आप भगवद्भाव रहित तथा अन्य ज्ञाति वाले, तामसों के वहाँ जाकर कैसे निवास करने लगे ? ॥ ९ ॥

प्रश्नान्तरं व्रजे वसन् किमिति।

अब राजा परीक्षित जी पूछते हैं कि व्रज में रहते हुए श्रीकृष्णचन्द्रजी ने और भी क्या किया ?

तज्जात्यनुकरणतद्भावानु—इस श्लोक में दो प्रश्न हैं, एक प्रश्न तो व्रज में रहकर श्रीहरि ने क्या किया ? और दूसरा प्रश्न मथुरा में रहकर प्रभु ने क्या किया ? इनमें व्रज में रहकर क्या किया यह प्रथम प्रश्न स्पष्ट नहीं है, अतः आचार्यचरण उसको स्पष्ट करते हुए कहते हैं कि क्या व्रज में रहकर उन व्रजवासियों के समान सब प्रकार के वस्त्र आदि धारण सम्भाषण और गोपालन आदि कार्य करते थे। दूसरा प्रश्न तो स्पष्ट है जो यद्यपि राजा कंस ने श्री वसुदेव देवकी जी को अनेक प्रकार के अनेक कष्ट दिये थे। किन्तु अपने हाथ से मातुल को मारने का काम लोक में निन्दित गिना जाता है, क्योंकि मामा मानदेने योग्य अर्थात् पूजनीय है अतः वह मारने योग्य नहीं है। ऐसा होते हुए भी वैसा निन्दित कार्य भगवान श्रीकृष्ण जी ने किसलिये किया ? यह पहले किये हुए प्रश्नों का अनुवाद ही है। इस दशवें श्लोक के उत्तरार्ध में कंस को क्यों मारा ? ऐसा प्रश्न बताने वाला कोई शब्द नहीं है इसलिये आचार्यचरण सूचित करते हैं कि ऊपर के श्लोक में दिये हुए '**कस्मात्**' पद का अनुवर्तन करने से '**कस्मात् अवधीत**' किस कारण से क्यों मारा ऐसा अर्थ बन जायगा और प्रश्न बनेगा। इन प्रश्नों का सार यह है कि व्रज में और मथुरा में रहकर भगवान श्री कृष्णजी ने किन २ का उद्धार किया ? तथा कंस की भी क्या व्यवस्था की गई ॥ १० ॥

द्वारकायां कियत्कालं स्थितवानित्याह-देहं-ति।

अब राजा परीक्षित जी इस श्लोक से द्वारका में भगवान् ने कितना समय निवास किया ? यह प्रश्न करते हैं।

अत्यन्तनटोऽपि प्रहरमात्रं वेषं करोति—राजा ने प्रथम, समय का प्रश्न किया है, साधारण नट तो थोड़े समय के लिये ही रूप बदल सकता है। किन्तु विशेष कुशल नट एक प्रहर तक भी रूप बदल कर रह सकता है, तो आप बतलावे कि भगवान् ने जो नटवत् नट के समान मानुष देह धारण की वह कितने समय तक धारण कर रखी थी ? द्वारका में रहने का भगवान् का कोई विशेष प्रयोजन भी नहीं था तो भी मानुष देह धारण कर वहाँ कब तक रहे ? और जो व्यक्ति किसी प्रकार भी भगवान् के समान नहीं थे उनके साथ विशेष समय तक क्यों एवं किस प्रकार रहे, जो रहना योग्य भी नहीं था। भगवान् का वहाँ विशेष समय तक रहने का कारण यह है कि आप पृथ्वी पर जो दुष्ट राजाओं द्वारा किये हुए पापों का भार बढ़ गया था उसको यादवों द्वारा उतारना चाहते थे। अतः कोई भी लीला छिपाकर, अन्य प्रकार से न कहें। आप दुष्ट राजाओं को नाश करने के निमित्त सामर्थ्य का दान करने के लिये यादवों में प्रविष्ट होकर वहाँ उस समय तक रहे जब तक आपने दुष्ट राजाओं का नाश यादवों द्वारा नहीं कराया यही **'देहं मानुषमाश्रित्य'** का भाव है। इसीलिये ही भगवान ने एकादश स्कन्ध के प्रथम अध्याय के चतुर्थ श्लोक में कहा है कि **'नैवान्यतः परिभवोऽस्य भवेत् कथंचित्'** इस यादव वंश का कैसे भी किसी दूसरे से पराजय नहीं हो सकेगा। इसका कारण यह है कि वे भगवान् के आश्रित हैं और आपने यादवों में प्रविष्ट होकर उनको आश्रय सामर्थ्य दे दिया है। श्लोक में **'अवात्सीत्'** जो पद दिया उससे वहाँ आप रहे यह तो निश्चय ही है और रहे भी दूसरों के स्थान में, यह भी यदुपुरी शब्द से सिद्ध होता है। वहाँ जब तक रहे तब तक कितनी पत्नियों को लक्ष्मी के समान भोग द्वारा भाग्यशाली बनाया गया ? अब प्रभु पद का तात्पर्य कहते हैं कि—यहाँ भगवान् का नाम प्रभु कहकर यह बता दिया कि वह सर्व सामर्थ्यवान् है अतः उनके लिये कोई भी समान-महान् सामान्य अपना वा पराया नहीं लेकिन सब समान है। आप तो यह सब लीलाएँ, कर रहे हैं ॥ ११ ॥

अन्यदपि युक्तिविरुद्धं सोपपत्तिकं वक्तव्यमित्याह—एतदन्यच्चेति।

अब परीक्षित् आगे के श्लोक से पूछना चाहते हैं कि दूसरा भी कोई चरित्र युक्ति से विरुद्ध देखने में आवे तो युक्तियुक्त उसका समाधान करें।

राजा परीक्षित् ने शुकदेवजी को हे मुने ऐसा सम्बोधन देकर यह बताया है कि आप ज्ञानवान् हो इसलिये आपको भगवान् की लीलाओं का पूर्ण ज्ञान है, अतः मैंने जो लीलाएँ पूछी हैं वे, और अज्ञानवश जो नहीं पूछी है वे भी कहिये, कारण कि मैं भगवान् का दास-आश्रित हूँ इसलिये, भगवान के चरित्र सुनना, यही मेरा कर्त्तव्य है। अब श्लोक में जो **'कृष्णविचेष्टितम्'** पद दिया है उसका भावार्थ बताते हैं कि—कृष्ण सदानन्द स्वरूप होने से 'स्वतन्त्र' फलरूप है। वे स्वयं तथा उनकी लीलाएँ भी फलरूप हैं यही बात श्रुति भगवती ने कही है कि **'कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते'**। 'कृष्ण' शब्द में जो 'कृष्' धातु है उसका अर्थ तो है सदा ही रहना और 'ण' शब्द का अर्थ है 'आनन्द' अब दोनों के मिलाने से शब्द हो जाता है सदानन्द जिसका भाव यह है कि जो स्वरूप सदा ही आनन्द रूप है वही 'कृष्ण' परब्रह्म है यह वेदो में कहा गया है। अब कृष्ण सदानन्द है तब श्रीकृष्ण की लीलाएँ भी सदानन्द रूप ही हैं जिससे वे भी फलरूप ही है, अतः सब चरित्र कहिये। आपसे इस प्रकार इसलिये पूछता हूँ कि आप ही चरित्र के रहस्य के जानकार हैं और भगवन्, मैं तो भगवान् के चरित्रमात्र में श्रद्धा रखने वाला हूँ। भगवान् के वह चरित्र वीर्य आदि से रहित हो तो भी उसके सुनने में मेरी पूर्ण श्रद्धा है। अतः भगवान् कृष्ण का जो भी चरित्र हो और यदि वीर्य रहित हो वह भी विस्तार के साथ कहिये। वीर्य, सर्वगेय, अलौकिक वीर्य और अगेय ये श्रीकृष्ण के चार प्रकार के चरित्र हैं, वे सब विस्तार से कहिये ॥१२॥

एवं द्वादशभिः प्रश्नं निरूप्य सर्वथा कथनार्थमकथने वा बाधकमाह—नैषेति।

परीक्षित् राजाने प्रथम इस प्रकार १२ श्लोकों में भगवान् के चरित्र विषयक प्रश्न किये और यह निवेदन किया कि आपको वे चरित्र मुझे सुनाने चाहिये, यदि नहीं सुनाओगे तो भगवन् मेरे प्राणों में बाधा पहुंचेगी। अब इस बात का इस श्लोक में निवेदन करते हैं।

आर्तिकथनाय नैषेति—अब परीक्षितजी यह बताते हैं कि मुझे जो सर्वथा सहन नहीं की जा रही है, और जिस दुःसह क्षुधा ने ऋषि के गले साँप डालने का महा पाप कराया ऐसी क्षुधा भी आज मुझे नहीं सताती है, यह कहने का भावार्थ यह है कि राजा को भगवान् के चरित्र सुनने की अन्तःकरण में अत्यन्त आर्ति (तडपन) थी, जिससे यह बताया कि मुझे देह-रक्षा का विचार नहीं है, इसलिए अन्न के अभाव में, जल, क्षुधा और प्यास दोनों को शान्त करता है, तथा देह की भी रक्षा कर सकता है। मैंने तो वह जल भी छोड़ दिया है। यह कहना सूचित करता है कि राजा परम उत्तम अधिकारी है।

प्यास न कहकर केवल क्षुधा कहने का यह आशय है कि श्रुति में **"क्षुध् वै भ्रातृव्यः"** क्षुधा शत्रु है, क्योंकि शत्रु के समान अवश्य दुःख देने वाली है, अतः शीघ्र बाधा करती है। इसलिए **'बाधते'** क्रियापद में वर्तमान काल का प्रयोग किया है। **"पिबन्तं त्वन्मुखांभोजं"** शुकदेवजी के मुख को अम्भोज कमल कहने का तात्पर्य यह है कि श्रीमुख से अमृत बह रहा है।

कथा कहने वाले शुकदेवजी आप उस अमृत को समझकर नहीं बहाते हैं किन्तु भगवान् के चरित्र ही ऐसे हैं जो कहने वाले को परवश कर देते हैं। जिससे कथा कहने के समय कथारस में मग्न होने से, क्या हो रहा है ? या क्या कर रहा हूँ ? यह ज्ञान वक्ता को नहीं रहता है अतः श्लोक में च्युत माने स्वयं निकलने वाला ऐसा शब्द दिया है जिसका भाव यह है कि वह कथारूप अमृत रस, मुख से स्वयं बहा जा रहा है। जैसे परिपक्व फल पेड़ से स्वयं गिर पड़ता है। ऐसा रस मैं पान कर रहा हूँ, अर्थात् केवल श्रवण नहीं करता हूँ किन्तु पानकर अन्तःकरण में धारण कर रहा हूँ जिससे सदैव स्मरण रहे। यहाँ भी **'पिबन्त'** वर्तमान काल के कृदन्त का प्रयोग करने का आशय यह है कि मैंने जो चरित्र पहिले सुने हैं वे भी मुझे पूर्ण रीति से अब स्मरण है। **सम्भावनायेत्यन्ये**—अन्य विद्वानों की भी यह सम्मति है कि यह वर्तमानकाल की क्रिया परीक्षित ने इस आशा से दी है कि शुकदेवजी शीघ्र भगवान् के चरित्र सुनायेंगे। **आनन्दत्वचेतनत्वद्योतनायाह** यद्यपि बहुत करके भगवान् का 'हरि' नाम दुःख दूर करने वाला अर्थ प्रसिद्ध है तो भी यहाँ हरि शब्द आनन्द रूप और चेतनरूप के प्रकाशक है, यह बताने के लिए दिया है। अर्थात् भगवान् एवं उनके चरित्रों में आनन्द और चेतन, दोनों गुण उपस्थित है। विशेषता यह है कि हरिकथा अमृत ही है। किञ्च यहाँ अमृत से रूढि अर्थ वाला अमृत जो देव पीकर अमर बने हैं, वह अमृत नहीं समझना चाहिए किन्तु उसका यौगिक अर्थ समझना चाहिए। जिसके पान करने से मोक्ष प्राप्त होता है उस मोक्ष से जन्म मरण सदा के लिए नष्ट हो जाते हैं। अतः आप ही सच्चिदानन्दात्मक कथा सुनाने से हमारे मोक्षदाता हो। राजा परीक्षित ने इस प्रकार वक्ता श्रीशुकदेवजी की स्तुति की है ॥ १२ ॥

शौनकादीन् सावधानतयाभिमुखान् करोति सूतः—एतमिति।

अब सूतजी हरि कथा सुनाने में डूब गये हैं ऐसे शौनक आदि ऋषियों को कथा सुनाने के लिये सावधान करते हैं–

परस्पराभिनन्दनेनायमर्थः— श्रोता तथा वक्ता परस्पर जो अभिनन्दन करते हैं उससे हृदय में अर्थ की स्फूर्ति होती है, कारण कि श्रोता को वक्ता की योग्यता का ज्ञान होने से उसको निश्चय है कि यह वक्ता जो कहेंगे वह सत्य ही कहेंगे। इस प्रकार वक्ता भी श्रोता की योग्यता देखकर जानता है कि मैं जो कुछ कहूँगा वह पूर्ण रूप से समझकर यह धारण करेगा। इसलिए वक्ता गुह्य बात भी कहने में संकोच नहीं करता है और श्रोता दत्तचित्त होकर श्रवण करता है। श्रीशुकदेवजो जो चरित्र वर्णन करने लगे उनका मूल कारण परीक्षित का प्रश्न है इसलिए श्लोक में 'एतं' इस प्रश्न ऐसा शब्द कहा है। बार बार पूछने से वक्ता के चित्त में व्याकुलता होती है, यदि वह प्रश्न आक्षेप से किया जाय तो वक्ता को क्रोध भी आता है। **'निशम्य'** पद देकर व्याकुलता एवं क्रोध इन दोनों को मिटाया है। **'निशम्य'** पद में दो शब्द है एक 'नि' उपसर्ग और दूसरा **'शम्य'** कृदन्त जिनके कहने का भावार्थ यह है कि श्रीशुकदेवजी ने परीक्षित के प्रश्न को शान्ति से सुना और प्रश्नों के अर्थ तथा अभिप्राय को समीचीन प्रकार से समझा। और यह भी जाना कि परीक्षित ये प्रश्न कपट दुराव छल से नहीं करता है किन्तु चरित्र श्रवण की उत्कट इच्छा से भाव एवं श्रद्धा पूर्वक करता है। **विश्वासार्थं भृगुनन्दनेति सम्बोधनम्**— शौनक को भृगुनन्दन सम्बोधन कहा उसका भाव यह है कि उससे शौनक को सूचित किया कि मैं जो कहता हूँ उसमें विश्वास रखना, क्योंकि भृगु विश्वास रखते थे आप भी उसके पुत्र हो अतः आपको भी विश्वास रखना चाहिए।

शुकदेवजी ने परीक्षित के प्रश्न-प्रेम से शान्तिपूर्वक सुनें। उसका कारण **'साधुवाद'** विशेषण से बताते हैं कि परीक्षित के जो प्रश्न थे उनमें भगवच्चरित्ररूप सुन्दरवाद था। जिन महानुभावों के हृदय से संसार का प्रेम निकल गया है, वैसे लोग जब परस्पर मिलते हैं तो भगवान् के चरित्रों के कहने के सिवाय अन्य किसी प्रकार की बातचीत नहीं करते हैं। **साधुवादम्**– परीक्षित ने भी जो प्रश्न किये हैं वे भी भगवच्चरित्र से सम्बन्ध रखने वाले होने से **'साधुवाद'** ही है। भगवद्भक्त जब जब भी मिलें तब उनको ऐसे ही प्रश्न पूछने चाहिए। व्यासजी ने भी महान् कष्ट से भगवान् के गुणों की प्रतिपादन करने वाला यह शास्त्र बनाया है और ऐसे शास्त्र के प्रचार करने के लिए श्रीशुकदेवजी प्रवृत्त हुए हैं। इस प्रकार महान् कष्ट से जिन भगवान् के गुणों और चरित्रों का प्रतिपादन हुआ है और जिनके प्रचार के लिए शुकदेवजी जैसे वीतराग, निरपेक्ष मुनि कटिबद्ध बने है, उन चरित्रों को 'साधुवाद' की अपेक्षा होती ही है अर्थात् उनका 'साधुवाद' करना ही चाहिये।

वैयासकिः सभगवान् शुकदेवजी के लिए यहाँ दो विशेषण दिये हैं, एक **'वैयासकिः'** दूसरा **'सभगवान्'** उनके देने का भाव बताते हैं कि जब भगवान् के चरित्र सहज समझ में आ जावें वैसे नहीं हैं, तब उनका उत्तर किस प्रकार दिया जायँगा ? ऐसी शङ्का करना व्यर्थ है क्योंकि उनका उत्तर देने वाले श्रीशुकाचार्यजी जिन्होंने समाधि में अनुभव कर चरित्रों का निरूपण किया है वैसे व्यासजी के पुत्र हैं। और इसीसे श्रीशुकदेवजी उत्तर दे सकते हैं और आप के साथ भगवान् भी है वे ही अन्तःकरण में स्थित होकर उत्तर दे रहे हैं। **नन्वेव भगवान् स्वयमुत्तरं प्रयच्छति किमिति ?**— स्वयं भगवान् शुकदेवजी के हृदय में विराजमान होकर उत्तर देते हैं, उसका क्या कारण है ? इस शङ्का निवारण के लिए श्लोक में प्रश्नकर्त्ता परीक्षित के लिए **'विष्णुरात'** विशेषण दिया है, जिसका भाव है कि जिसकी भगवान् ने गर्भ में इसलिए रक्षा की थी कि

इसको मैं अपने चरित्रों को सुनाकर अपना पूर्ण ज्ञानी भक्त बनाकर मुक्त करूँगा। तात्पर्य यह है कि गर्भ में शत्रु से जैसे रक्षा कर परीक्षित को बचाया वैसे ही अब भगवान् ने संसार रूप शत्रु से बचाकर सदा के लिए उसको अमर बनाते हुए अपना ब्रह्मानन्द दिया।

श्लोक में 'अथ' पद देकर यह बताया है कि अब तक तो श्रीशुकदेवजी कह रहे थे। इसके बाद जो चरित्रों का वर्णन होगा वह भगवान् करेंगे। यदि भगवान् वैसे स्वयं चरित्र कहकर परीक्षित की रक्षा नहीं करते तो पुरुषार्थ की सिद्धि नहीं होती जिससे रक्षा करनी व्यर्थ सी हो जाती। परीक्षित के प्रश्नों के भाव को विचारते हुए शुकदेवजी उसमें मग्न हो गये जिससे प्रश्नों की उत्कृष्टता समझ राजा की प्रशंसा करने से उसका बहुमान किया, परीक्षित ने तो प्रथम ही शुकदेवजी का अभ्यर्चन किया है इस प्रकार श्रोता तथा वक्ता का परस्पर सम्मान शास्त्र से सिद्ध है। भगवान् के गुण तथा भगवान् दोनों पूजा के योग्य हैं। वे भगवान् के गुण, दोनों, राजा तथा श्रीशुकदेवजी में प्रविष्ट हुए हैं। अतः दोनों ने परस्पर बहुत आदर किया। और ऐसा करने की 'योऽन्योऽन्यतो भागवता' इस वाक्य में आज्ञा है। इस उद्योग का फल 'कृष्ण' ही है। इसलिये फलरूप श्रीकृष्ण के चरित्र जो भी फलरूप होने से अलौकिक हैं, उनको ही राजा ने पूछा है। **पापस्य प्रतिबन्धकत्वात्तत्र श्रद्धा भविष्यतीत्याह 'कलिकल्मषघ्नं'** राजा ने पूछा वह तो अच्छा किया, किन्तु उसके सुनने में यदि पाप प्रतिबन्धक होंगे जिससे श्रवण में श्रद्धा नहीं होगी। इस शङ्का के निवारण के लिए **'कलिकल्मषघ्न'** पद श्लोक में दिया है जिसका तात्पर्य यह है कि कलियुग के दोष भगवान की कथा के श्रवण में प्रतिबन्धक होते हैं उनको भगवान् के चरित्र नाश करने वाले हैं। अन्य उपाय तो इस युग में प्रतिबन्धों को नाश करने में असमर्थ है केवल भगवच्चरित्र उनको नाश कर सकते हैं। यदि वे भी असमर्थ होते तो इस युग में धर्म में प्रवृत्ति तथा मोक्ष की प्राप्ति सर्वथा न हो सकती। यह कहने का सारांश यह है कि भगवच्चरित्र, कलि के सर्व प्रकार के मल नष्ट करने वाले हैं जिससे भगवच्छ्रवण में पापादि प्रतिबन्धक नहीं होते हैं और श्रद्धा बनी रहती है। शुकदेवजी ने महान् उत्साह से एवं उत्तम ढंग से जो चरित्र वर्णन का प्रारम्भ किया उसका कारण यह है कि कथा के श्रोताओं में भगवद्भक्त ही मुख्य थे। शुकदेवजी ने भी उनसे विशेष रस पाने की इच्छा से उत्साह पूर्वक विशेष रूप से चरित्र वर्णन करने का प्रारम्भ किया। इस कथारस में मग्न श्रीशुकदेवजी मनन का त्याग कर मात्र भगवान् के चरित्रों का वर्णन ही करने लगे। और ज्ञानी परमहंस ने भगवद्गुणानुवाद को ही प्रधानता दी; ज्ञानादिक को प्रधानता नहीं दी ॥ १४ ॥

समानशीलव्यसनं दृष्ट्वा राजानं प्रश्नं चाभिनन्दति द्वाभ्याम्—सम्यगिति।

अब श्री शुकदेवजी राजा को अपने समान शील तथा व्यसन वाला देखकर दो श्लोकों से राजा और उसके प्रश्नों का अभिनन्दन करते हैं।

भगवति लयात्पूर्वं स्थिरप्रज्ञतैव सर्वोत्तमा भगवान् में लय हो जाने से पहिले ही यदि बुद्धि स्थिर हो जाय उसकी चञ्चलता मिट जावे तो यह सबसे उत्तम है। आपकी बुद्धि ने जो यह दृढ़ निश्चय कर लिया है कि, भगवान् की कथा के सिवाय दूसरा कुछ भी नहीं सुनना वह उत्तम है। आपकी बुद्धि के दृढ़ निश्चय जैसा निश्चय ब्रह्मर्षिओं को भी दुर्लभ है अतः आप राजर्षिसत्तम हो। अपनी प्रजा के पालन रूप धर्म में निष्ठा वाला लौकिक रीति से केवल राजा कहलाता है। प्रजापालन के साथ वैदिक धर्म में निष्ठावान् को राजर्षि कहते हैं। इन दोनों गुणों के साथ साथ यदि वह भगवत् धर्म में निष्ठावान् होता है तो उसको राजर्षिसत्तम कहते हैं। आपका तो उससे भी उत्कर्ष है क्योंकि भगवान् ने आपका अङ्गीकार भी किया है। इस कारण से भगवान् में लय होने से प्रथम आपकी ऐसी दृढ बुद्धि होनी योग्य ही है। बुद्धि के दृढ हुए बिना भगवान् की प्राप्ति नहीं होती है। स्थिर बुद्धि से भगवत्प्राप्ति होती है तब इस बुद्धि का लय भगवान् में हो जाता है और भगवद्भक्त को अलौकिक देह की प्राप्ति होती है इसलिये आचार्यश्री ने कहा है कि भगवान् में लय होने से पूर्व ही अचल मति होनी चाहिये। मनुष्य के जीवन में निश्चय दो प्रकार से होता है, एक शास्त्र में कहे हुए जीव को भगवान् की भक्ति करनी चाहिये ऐसे उपदेश को सुनकर, और दूसरा अपनी (स्वभावगत) रुचि से निश्चय होता है। अब इन दोनों में पहिला शास्त्र सुनने से निश्चय होना 'मध्यम' मर्यादा मार्गीय वैदिक निश्चय है। और सहज रुचि से दृढ बुद्धि होना, यहाँ उत्तम पुष्टिमार्गीय निश्चय है। आप तो उत्तम हो कारण कि आपकी रति भगवान् की कथा के श्रवण में दृढ बुद्धि वाली स्वभावगत है। जिसको कोई बदल नहीं सकता है क्योंकि प्रेम उस निश्चय को अच्छे प्रकार से स्थिर करने वाला है। उस स्थिर निश्चय से कथा श्रवण में रति बढ़ती रहती है। श्लोक के पूर्वार्द्ध में **'सम्यग् व्यवसिता बुद्धिस्तव'** कहे हुए दोनों कारण राजा के अभिनन्दन के लिये कहे गये हैं। भगवान् के चरित्रों के श्रवण में रति का होना प्रेम का होना सर्वथा दुर्लभ है। दुर्लभ होते हुए भी आपका जो श्रवण में प्रेम हुआ है उसका कारण बुद्धि की स्थिरता है। सभा में यद्यपि देवर्षि, ब्रह्मर्षि और राजर्षि ये सब उपस्थित हैं तो भी आपको ही वैसा प्रेम कथा श्रवण में हुआ है और साधन तथा फल भी आपको सिद्ध हो गये हैं अतः आप सत्कार करने योग्य हैं। राजन्, आप का स्वरूप क्या है? इसका ज्ञान तो आपके किये हुए प्रश्नों से सहज हो जाता है। राजन्, आपका धन्यवाद आपकी प्रशंसा नहीं है लेकिन आप के प्रश्नों की स्तुति है सचमुच प्रश्नों की ही प्रशंसा की है ॥ १५ ॥

प्रकारान्तरेणापि साक्षात् प्रश्नं स्तौति—वासुदेवेति ।

अब इस श्लोक से श्री शुकदेवजी दूसरे प्रकार से प्रत्यक्ष प्रश्न की स्तुति करते हैं ।

वासुदेवस्य मोक्षार्थत्वात्—वासुदेव शब्द का अर्थ मोक्ष है अतः उनसे सम्बन्ध वाले जो भी पदार्थ हैं वे सब, पवित्र करने वाले ही होते ही हैं । उसमें भी वासुदेव की कथा तो उनसे सम्बन्ध रखने वाले गुण तथा दोषों वाली होते हुए भी. भगवान् में आग्रह पूर्वक विश्वास उत्पन्न करती है । जैसे कि लोक दृष्टि में पूतना वध आदि गुण है और कंसादि मातुल वध दोष है । तथापि प्रश्न जिज्ञासा इन चरित्रों की श्रवण जिज्ञासा भी उस श्रद्धा को दृढ करने में कारण होती है । क्योंकि उन चरित्रों के श्रवण से, यथार्थ ज्ञान होता है, जिससे भगवान् में श्रद्धायुक्त और आग्रही मन होता है । **त्रीन् पुरुषान्**—जहाँ कथा का प्रसङ्ग होता है वहाँ एक प्रश्नकर्त्ता, कोई श्रोता और कोई उत्तरदाता इस प्रकार तीन पुरुष होते ही हैं । यदि वक्ता भगवान् के गुणों का ज्ञाता होकर भी जब तक मौन धारण करता है, समझना चाहिये कि यह मौन पापों के कारण है, पाप उसको बोलने नहीं देते हैं । भगवान् की कथा से सम्बन्ध वाला प्रश्न पापों का नाश करता है तथा गुणों का उदय करता है किन्तु यह प्रश्न वह कर सकता है जिसके पाप नष्ट हो गये हैं । श्रोताओं में जब तक पाप विद्यमान हैं तब तक उनके मन की भगवान् में आसक्ति नहीं होती है । जब कथा संबन्धी प्रश्न होते हैं तब उनके सुनने से श्रोताओं के पाप नष्ट हो जाते हैं और कथा में मन लगता है । मन में प्रश्न करने की इच्छा हो किन्तु जब तक मुख से वह प्रश्न नहीं निकलता है समझना चाहिये कि तब तक पाप का अस्तित्व है । जब प्रश्न मुख से बाहर निकलता है तब उसके पापों को भी नष्ट करता है । अतः तीन पुरुषों को पवित्र करता है, यह कहना योग्य है । **प्रश्नकर्तु पितृपितामहादयो भविष्यन्तीति**—तीन पुरुष कहने का तात्पर्य प्रश्नकर्त्ता, वक्ता और श्रोता से है, न कि पिता, पितामह और प्रपितामह इन तीन पुरुषों से हैं ।

यद्यपि वक्ता और प्रश्नकर्त्ता भी श्रवण करने से श्रोता ही हैं, किन्तु निमित्त कारण सब के भिन्न भिन्न हैं । इसलिये निमित्त ही प्रयोजक कहा गया है । कथा तीन पुरुषों को पवित्र करती है, पुरुष शब्द का अर्थ यहाँ भी वह लेना चाहिए जो आगे **'निवृत्ततर्ष'** श्लोक में कहा है । उस श्लोक में पुरुष उसको कहा है कि जो पशु तथा स्त्री जीव नहीं होवे, शेष सर्व पुरुष हैं । इस प्रकार के पुरुष ही श्रवण करने से पवित्र होते हैं असुर पवित्र नहीं होते । अन्य किसी कार्य करने के लिए आते हैं, वे भी पवित्र नहीं होते हैं । पवित्रता अनेक प्रकार की होती है, यहाँ कथा श्रवण से जिस प्रकार की पवित्रता होती है वह गङ्गाजी का दृष्टान्त देकर समझाते हैं । जैसे भगवत्पदी गंगाजी का पावन सलिल पावन करता है वैसे ही प्रश्न भी पावन करता है । किस स्थल पर आकस्मिक प्रश्न उत्पन्न हुआ हो और कुछ पूछा गया हो फिर किसी वक्ता को प्रेरणा हुई हो, अथवा कोई सुनने की इच्छा से सन्मुख आ गया हो, केवल इतना ही बनने से फल की संभावना नहीं है । लेकिन फल की सिद्धि तब होगी, जब कि वह कथा तीनों के चित्त को भंगवन् निष्ठ करती है तब ही सफलता मिलती है । गङ्गाजी पहले के सम्बन्धी पापों को तथा उनके कार्यों को नाश कर साक्षात् भगवान् की सेवा के योग्य शरीर को बनाती है । तात्पर्य यह है कि जिस शुद्धि से भगवान् की सेवा के लिये उपयोगी चित्त बने, तनुनवत्व सिद्ध हो शुद्धि करती है । हरि कथा की भाँति गङ्गाजी भी तीन लोक के पुरुषों को पवित्र करती है तात्पर्य यह है कि तीन लोको में स्थित जीवों को पवित्र करती है, (१) अथवा सात्विक आदि भेद तीन या नव भेद करके भिन्न-भिन्न पुरुषों को पवित्र करती है, (२) दोनों तीरों पर स्थित, जीवों को जलमध्य में स्थानार्थ आये जीवों को एवं पानार्थ स्थित, जीवों को वैसे तीन को पवित्र करती है, एवं ब्रह्मा, महादेव और भगीरथ तीनों को पवित्र करती है । इसी प्रकार कथा भी त्रिविध दैवी जीवों को शुद्ध कर उनकी तनु को श्रीकृष्ण सेवोपयोगिनी तनु बना देती है ॥ १६ ॥

एवं भगवत्सम्बन्धित्वेन प्रश्नमभिनन्द्य भगवदवतारप्रयोजनज्ञानार्थं कथामारभते—भूमिरिति ।

अब श्रीशुकाचार्यजी इस श्लोक से भगवान् से इस सम्बन्ध होने के कारण पूर्व श्लोकों में प्रश्न की प्रशंसा कर भगवान् के अवतार धारण के प्रयोजन का ज्ञान हो इसलिए कथा का प्रारम्भ करते हैं ।

कारिका - १ **भक्तानां दुःखनाशाय कृष्णावतरणं मतम् । भूमिर्माता तथा चान्ये भक्ता वै त्रिविधा मताः ॥ १ ॥**

कारिकार्थ सकल शास्त्रों की यह सम्मति है कि परब्रह्म श्रीकृष्ण भगवान का पूर्णावतार स्वरूप से पधारना केवल भक्तों के दुःख का नाश करने के लिये होता है । वे भक्त तीन प्रकार के माने गये हैं । भूमि माता देवकीजी और अन्य भक्त ये तीन प्रकार के भक्त है ॥ १ ॥

कारिका— २ **सर्वेषां महद्दुःखं नान्येन विनिवार्यते । यदा तदा हरिः कृष्णः प्रादुरासीदिति स्थितिः ॥ २ ॥**

कारिकार्थ— समस्त भक्तों को जो महान् दुःख था वह दूसरे साधनादि नहीं मिटा सके तब दुःख हरण करने वाले श्रीकृष्णस्वरूप भगवान् श्रीहरि स्वयं प्रकट हुए । यही प्रादुर्भाव की व्यवस्था मर्यादा है ॥ २ ॥

कारिका—३ **ये भक्ताः शास्त्ररहिताः स्त्रीशूद्रद्विजबन्धवः । तेषामुद्धारकः कृष्णः स्त्रीणामत्र विशेषतः ॥ ३ ॥**

कारिकार्थ— जो भक्त शास्त्रों में लिखे हुए साधनों को नहीं कर पाते इसलिये शास्त्ररहित हैं उनका तथा स्त्री, शूद्र और द्विज बन्धुओं का उद्धार करने वाले तो केवल भगवान् श्रीकृष्ण ही हैं और उन्होंने इस पूर्णपुरुषोत्तम श्रीकृष्ण अवतार में स्त्रियों का उद्धार विशेषरूप से किया है ॥ ३ ॥

कारिका—येषां निरोधकं शास्त्रं योगादिविनिरूपितम् । शेषभावस्तत्र हरेर्न कदाचिद् गमिष्यति ॥ ४ ॥

कारिकार्थ—जिन जीवों का निरोध करने वाले योगादि शास्त्र साधन हैं, उन साधनों में भी हरि साधन रूप होते हैं उनसे वह साधनपन याने गौणता कभी भी नष्ट नहीं होगी ॥ ४ ॥

कारिका—संसारदु.खव्यावृत्यै निरोधोऽत्र निरूप्यते । अतो निरोधो ज्ञानात्मा दुःखरूपा च संसृतिः ॥ ५ ॥

कारिकार्थ— साधन द्वारा निरोध चाहने वालों के मत में, संसार के दुःखों के नाश के लिए, निरोध कहा गया है। अहन्ता ममतात्मक संसार अविद्या के कारण उत्पन्न होता है। अतः उस अविद्या के नाशार्थ ज्ञान की आवश्यकता है, क्योंकि अज्ञान का नाश ज्ञान से ही होता है। इसलिए इस मत में 'निरोध' ज्ञानरूप है। किन्तु भक्तिमार्ग में संसार भी लीलारूप होने से सुखरूप है। इस कारण से भी इनमें वैलक्षण्य किसी एक प्रकार की अद्भुतता है। इस प्रकार भिन्नता के कारण निःसाधन ही भगवान् के लिए उद्धार के विषय हैं। निःसाधन फलात्मा पुरुषोत्तम का प्राकट्य निःसाधन भक्तों के लिए ही है ॥ ५ ॥

कारिका—एवमेकं फलं प्रोक्तं द्वयं वा न विरुद्ध्यते । साङ्गस्य प्रक्रिया युक्ता ततः स्कन्धोऽपि युज्यते ॥ ६ ॥

कारिकार्थ— इस प्रकार एक फल कहा अथवा दो फल हो तो भी कोई विरोध नहीं है। अङ्ग सहित जो क्रिया कही गई है वह योग्य ही है। इससे दशम स्कन्ध की योजना पूर्ण हो सकती है ॥ ६ ॥

कारिका— अवतारो निरोधाङ्गं, तदङ्गं दुःखमेव च । धैर्यार्थं सान्त्वनं प्रोक्तं भूमिमात्रोर्न चान्यथा ॥ ७ ॥

कारिकार्थ—भगवान श्री कृष्ण का अवतार होना निरोध का अङ्ग है और उस अवतार का अङ्ग दुःख ही है। पृथ्वी तथा माता को धीरज देने के लिए ही सान्त्वन-आश्वासन दिया है अन्यथा नही ॥ ७ ॥

कारिका— अन्ते दुःखं भक्तकृतं प्रादुर्भावाय वै हरेः । आकाशवाणी वाग्देवः सर्वमुक्त्यर्थमुद्गतः ॥ ८ ॥

अशक्तः संस्तथा चक्रे तथा नारद एव हि ॥ ८½ ॥

कारिकार्थ—भगवान् श्री कृष्ण जी का शीघ्र प्राकट्य हो इसी लिये भक्तवर नारदजी ने कंस को कहा कि व्रज में 'नन्दादिक', सब देव प्रकट हुए हैं जिन वचनों को सुनकर कंस भुलावे में पड़ गया और पुनः दुःख देने लगा तथा आकाशवाणी भी इसलिये ही हुई, उस नभो वाणी ने समझा कि मैं तो भगवान् के प्राकट्य कराने में अशक्त हूँ और सर्व की मुक्ति के लिये भगवत्प्राकट्य की आवश्यकता है। अतः मैं जब इस प्रकार कंस को कहूँगी तब वह भक्तों को दुःख देगा, जिससे भगवान् शीघ्र प्रकट होंगे ॥ ८½ ॥

कारिका— दशभिः सान्त्वनं भूमेः पञ्चत्रिंशत्तनेस्तथा ॥९॥ अष्टभिर्नारदोक्त्यैव सर्वेषां दुःखमञ्जसा ॥ ९½ ॥

कारिकार्थ—दश श्लोकों से भूमि को और पैंतीस श्लोकों से माता को आश्वासन–मन संतोष दिया है और आठ श्लोकों में नारदजी के कहने से उपलब्ध दुःखों का कथन है ॥ ९½ ॥

इस प्रकरण में दश श्लोकों से भूमि देवता को वाणी द्वारा सान्त्वन दिया गया है, और पैंतीस श्लोकों से देवकीजी की सान्त्वना उपाय द्वारा की गई है। पश्चात् आठ श्लोकों से भगवान् के प्राकट्य का कारण बताया है। वह कारण जो सर्व का दुःख है वह कहा जायगा। अब आचार्य चरण भूमि के दश श्लोकों का पृथक् करण करते हुए विवेक बतलाते हैं कि उद्यम, १८ वें श्लोक में दर्शाया है। उस उद्यम का स्वरूप अपने दुःख का वर्णन करते हुए गौ ने दीनता दिखाई है। १९ वें श्लोक में भक्त भगवान् के पास गये थे उसका वर्णन है। तत् पश्चात् २० वें श्लोक में निवेदन पूर्वक उन्होंने भगवत्स्तुति की है, २१ वें श्लोक में भगवान् ने जो आज्ञा ब्रह्मा जी को दी थी वह आज्ञा ब्रह्माजी ने सर्व देवताओं तथा अन्य भक्तों को सुनाई। अब २२ से २५ तक इन ४ श्लोकों में भगवान् के शब्दों का भावार्थ बताया है जैसे कि उनमें २२ वें श्लोक में क्रिया देवता, यादवों में प्रकट होवे वैसी क्रिया २३ वें श्लोक में जन्म भगवान् का प्राकट्य २४ वें श्लोक में संकर्षण तथा २५ वें श्लोक में माया इन चारों के विषय का विवरण है। इसके अनन्तर उपसंहार है।

उपरोक्त वर्णन से ज्ञात होता है कि पहिले भूमि ने उद्यम-ब्रह्मा के पास जाने का प्रयत्न किया। प्रभु सर्वत्र गुप्त हैं। केवल व्यापि वैकुण्ठ में साक्षात् विराजते हैं। भूमि ने सोचा कि वराहावतार में भी मेरे उद्धार के लिए ब्रह्माजी ने उपाय किया था। अब भी उनके द्वारा ही मेरे दुःख की निवृत्ति होगी। अतः मुझे ब्रह्मा जी के पास ही चलना चाहिए। इस विचार से वह

ब्रह्माजी के पास गई लेकिन भगवान् के पास न गयी। भूमि, वास्तविक दैत्यों की है, देवताओं 'की भूमि तो केवल इतनी है कि मनुष्य बैठकर पीछे देखे तो उसके देखने में जितनी आवे, उतनी भूमि देवताओं की है, शेष असुरों की है। अतः भूमि देवताओं के उपयोग में आने वाला छोटा गौ का स्वरूप धारण कर ब्रह्माजी के पास गई। जो गौ रूप धारण न कर यदि अपने ही विशाल रूप से जाती तो दैत्य बाधा करते। इसलिए उस बाधा के न होने के लिए गौ रूप से शीघ्र गई। अपने और दूसरों के दुःख मिटाने की तुलना में अन्य कोई कार्य आवश्यक नहीं है। अतः इस आवश्यक कार्य को पूर्ण कराने के लिए पृथ्वी ब्रह्माजी की शरण में गई। माया के उपासक सर्व दैत्य, पृथ्वी को रसातल में ले जाने के वास्ते राजाओं के रूप में जन्मे हैं। ये राजा दैत्य हैं इसका प्रमाण यह है कि ये अभिमानी तथा शास्त्र विरुद्ध आचरण करने वाले हैं। इसलिए शुकदेवजी ने इनको 'दृप्त' विशेषण दिया हैं। असुरों का यह शास्त्र विरुद्ध आचरण एवम् अभिमान' ही सर्वत्र कहा गया है।

जिन दैत्यों का वध तो हुआ किन्तु मुक्ति नहीं हुई, वे दैत्य देवताओं में घुस गये हैं। इस प्रकार देव भी वैसे बन गये हैं। अतः उन देवों में मिले हुए दैत्यों के आवेश वाले भीष्मादिकों का निराकरण किया गया है। मूल श्लोक में '**व्याज**' शब्द देकर यह बताया है कि ये दैत्य यद्यपि राजाओं के रूप में उत्पन्न हुए हैं तो भी उनमें प्रजा पालन रूप राजधर्म तो नहीं है किन्तु प्रजा का घात करना, यह दैत्य धर्म है। अतः यह राजाओं का रूप उन दैत्यों ने छल से धारण किया है।

ये दैत्य, राजा का रूप धारण कर प्रजा को सुख देने और स्वयं सुख भोगने के लिए नहीं जन्मे हैं किन्तु प्रजा का घात करने के लिए आये हैं। इसलिए कहा गया है कि असंख्य सेना रूप में इकट्ठे हो गये हैं, जिसके भार से भूमि इतनी पीड़ित होकर दब गई है कि चारों तरफ से शीघ्र डूबती हुई दिख पड़ती है। अत्यन्त भार से इसलिए दुःखी हुई है कि जो दैत्यपन भार को पैदा करता है, वह पाप भार डुबाने वाला है। जैसे एक ही उन्मत, नौका को डुबा देता है। यहाँ तो असंख्य उच्छृङ्खल सेनानियों की सेना के आक्रमण का भार पृथ्वी पर था। वह क्या नहीं कर सकता है! अतः पृथ्वी यह सोचकर ब्रह्माजी के पास गई क्योंकि पहले भी ब्रह्माजी ने उद्धार का उपाय किया था और अब भी वे ही करेंगे॥ १७॥

प्रकाशकार दशदिगन्त विजयी श्री पुरुषोत्तमजी इस विषय को स्पष्ट समझाने के लिए श्रुति का प्रमाण देते हैं। **असुराणां वा अयमग्र आसीद्यावदासीनः पराश्यति तावद्देवानाम् इति, देवानां भूवाचनोत्तरं कियद्दोदास्यामीति प्रश्ने, ततः सालावृकीत्रिः परिक्रान्तिमितां याचित्वाधृतसालावृकोरूपेणेन्द्रेण सर्वस्याः परिक्रमणे। भूमेः प्रास्था वेदित्वमुक्तमिति श्रुतिः।**

रूपान्तरेण गमनं देवानां हितकारि न भवतीति हविर्द्धानीरूपेण गतेत्याह—गौर्भूत्वेति।

भूमि, हविर्द्धानी का रूप धारण कर ब्रह्माजी के पास गई। हविष्य के पदार्थ दूध घी आदि को देने वाली को हविर्धानी कहते हैं इसका आशय यह है कि सब पशु आदि जीवो में गौरूप ही दीनता का है। जिसको देखकर सबको दया आ जाती है। अतः इस रूप से ही देवताओं का हित होगा। दूसरे देवता के रूप से जाने में देवताओं के हित में बाधा होने की सम्भावना थी इसका वर्णन इस श्लोक में करते हैं।

गौर्भूत्वा अन्तिके उपस्थिता—भूमि, गौ का रूप धारण कर ब्रह्माजी के समीप उपस्थित होकर अपना दुःख विधाता को सुनाने लगी। जिस समय भूमि, गौ रूप से ब्रह्माजी के पास पहुँची। उस समय गौ के अन्तःकरण में जो दुःख था उस दुख के ताप से उत्पन्न हुआ पसीना, अश्रुरूप से आँखों में से अविरत बहता हुआ मुख में आ रहा था।

दुःखकर किसी बात के जानने से जो अन्तःकरण में क्लेश उत्पन्न होता है उस दुःख से उत्पन्न पसीना आँखों से निकल आता है। उस पसीने को 'अश्रु' कहते हैं। भूमि को भी दैत्यों के अभिप्राय का ज्ञान होने से खेद हुआ था। वाक्य वह प्रमाण माना जाता है कि जिसके भाव का अन्तःकरण के धर्म के साथ मिलन होवे, यदि वाक्य के भाव का अन्तःकरण के धर्म के साथ मिलाप न हुआ तो वह वाक्य प्रमाण नहीं है।

भूमि के अन्तःकरण में दैत्यों के अभिप्राय जानने से जो दुःख हुआ था वह दुःख अन्तःकारण के धर्म से मिल गया था अतः भूमि ने उस धर्म को अश्रुद्वारा प्रकट करके दिखाया। किन्तु एक धर्म को तो केवल अश्रुद्वारा भी समझाया जा सकता है किन्तु जहाँ बहुत से दुःख हों वहां अश्रुओं से ही न समझाने में आने के कारण मुख से कहने की भी आवश्यकता होती है। इसलिये गौ रूपधारी पृथ्वी अपने दुःख मुख से कहने लगी। **अधिकारित्वादविचारदशायाम्**—ब्रह्माजी सर्वज्ञ होने से बिना कहे

भावार्थ— यह पृथ्वी पहिले असुरों की थी, केवल उतना भाग देवों का था जितने को बैठकर मनुष्य पीछे देख सके। किसी समय इस पृथ्वी को देवताओं की करने के लिए इन्द्र ने कुत्ती का रूप धारण कर दैत्यों से पृथ्वी को माँगा। तब दैत्यों ने कहा कि कितनी पृथ्वी तुझे चाहिए? कुत्ती रूपधारी इन्द्र ने कहा कि मैं जितनी पृथ्वी की तीन बार में परिक्रमा कर आऊँ, उतनी पृथ्वी दीजिये। दैत्यों ने उस कुत्ती का कहना मान लिया। कुत्ती का रूप धारण करने वाला इन्द्र समग्र भूमि की प्रदक्षिणा कर आया। तब से पृथ्वी देवताओं की हुई।

हुए भी दुःख को जान सकते हैं, तो फिर कहने की क्या आवश्यकता है ? इस पर कहते हैं कि यों तो ब्रह्माजी ब्रह्म रूप होने से सर्वज्ञ हैं किन्तु अब यहाँ ब्रह्माजी की अधिकारी दशा है अर्थात् अधिकारी हैं इस कारण से इस समय वे सर्वज्ञ नहीं हैं इसीलिये भूमि को अपने दुःख का मुख से वर्णन करना पड़ा जो योग्य ही है। **खिन्ने ति**—'**खिन्ना**' शब्द से यह बताया कि भूमि को एक ढंग से दुःख नहीं था किन्तु अनेक प्रकार से दुःख था अर्थात् खेदपूर्ण अन्तःकरण वाली थी। खेद पूर्ण थी इसका प्रमाण क्या है ? वहां कहते हैं कि खेद के कारण शरीर में एक तरफ दुर्बलता आ गई है और दूसरी तरफ उसका तेज नष्ट हो गया है। यह दोनों प्रकट चिन्ह उसके दुःख के साक्षी हैं। पुत्री का दुःख जैसे पिता शीघ्र दूर कर सकता है वैसे अन्य नहीं कर सकता है, अतः भूमि ने अपने दुःख की निवृत्ति के लिये पिता के पास जाना ही उचित समझा। भूमि उस समय करुणा युक्त रोदन करती हुई ब्रह्माजी के समीप गई, इस प्रकार के रोदन का कारण यह था कि भूमि ब्रह्माजी को बताना चाहती थी कि पिताजी, मुझे आपके वियोग का वैसा कष्ट नहीं है जैसी दैत्यों के दुःख का है। आपके वियोग में इस प्रकार करुण रोदन हो नहीं सकता है यह रोदन तो दैत्यों के दुःखों के कारण मुझे आ रहा है, अतः आप पिता हो इसलिये शीघ्र मेरे दुःखनिवृत्ति का उपाय करो। इस प्रकार के रोदन का गौण कारण यह भी था कि अपने पिताजी श्रीब्रह्माजी अधिकारी हैं। उनको अधिकारवश अनेक अन्य कार्य करने पड़ते हैं इसलिये कहीं मेरे दुःख निवृत्ति के उपाय में विलम्ब न कर देवें यह सोचकर कि दूसरे काम को पहले कर लूं पुत्री का काम है पीछे ही कर लूंगा, कहीं यों न हो जाय इसलिये भी करुणक्रंदन किया गया था।

भूमि ने सोचा कि पिताजी कदाचित् कह न देवें कि मुझसे यह तुम्हारे दुःख की निवृत्ति नहीं होगी, इसलिये पिता को 'विभो' विशेषण देकर सावधान करती है कि मुझे मालूम है कि आप सब कुछ करने में समर्थ हो अतः मैं आपकी शरण में आई हूँ।

मूल श्लोक में 'उपस्थिता' इस पद में 'उप' उपसर्ग देने का आशय बताते हैं कि 'उप' कहने से समझना चाहिये कि 'भूमि' ब्रह्मा जी के अन्तःकरण में अन्तर्यामि रूप से विराजमान प्रभु भगवान् श्रीकृष्ण के पास आकर अपने दुःख सुनाती है। कारण कि भूमि भक्त है वह अपने दुःख भगवान् को ही सुनाना चाहती है। समीप होने के सिवाय तो अपने दुःख सुनाये नहीं जा सकते हैं अतः भूमि भक्तिमार्गीय ध्यान द्वारा भगवान् की समीपता प्राप्त कर अपने क्लेश भगवान् को ही सुनाती है। श्लोक में 'उप' शब्द देकर उपरोक्त आशय को सिद्ध किया है कि भीतर तो भगवान् के पास प्रार्थना है और बाहर केवल ब्रह्माजी के समीप खड़ी रही इसलिये '**अन्तिके**' शब्द दिया है दुःख शब्द न देकर मूल में '**व्यसन**' शब्द दिया है। उसका आशय यह है कि यह दुःख ऐसा है जिसको भगवान् श्रीकृष्ण के सिवाय कोई नहीं मिटा सकता है। अतः अपने दुःख प्रभु के पास स्पष्ट प्रकार से वर्णन करने लगी ॥ १८ ॥

ततो ब्रह्मा दैत्यसम्बन्धित्वाद्भूमेः सहायार्थमाकारणशङ्काव्यावृत्त्यर्थमालोचनज्ञानेन तदुक्तार्थं निश्चित्य प्रतीकारं कृतवानित्याह ब्रह्मे ति।

जब गो रूपवाली पृथ्वी ब्रह्माजी के सामने खड़ी होकर अपना दुःख प्रकट करने लगी तब ब्रह्माजी के हृदय में शङ्का हुई कि क्या यह अपने दुःखों को मिटाने के लिए मुझे बुला रही है ? इस शङ्का को ब्रह्माजी ने विचार'पूर्वक ज्ञान से मिटाया और उस ज्ञान से गौ के वचनों का भाव समझकर उपाय करने लगे। उसका वर्णन निम्न श्लोक में करते हैं।

ब्रह्मत्वात् तथासामर्थ्यं ज्ञानात्मकत्वात्— ब्रह्माजी ब्रह्म हैं, इसलिए ज्ञान स्वरूप भी हैं, भूमि के वचन सुनकर श्रीब्रह्माजी के मनमें जो तर्क उत्पन्न हुए थे, उनका भूमि के वचनों से नहीं किन्तु अपने ज्ञान से समाधान कर भूमि के अन्तःकरण के भाव का निश्चय कर लिया, पुनः देवगण भूमिदेवी आदि को साथ में लेकर क्षीर सागर के तीर पर पधारे। देवताओं को साथ में इसलिए ले गये थे कि जो कुछ भगवान् आज्ञा करेंगे वह इनको वहाँ ही सुना दें। ब्रह्माजी ने अपने मनमें जब तर्कों के समाधान के लिए समालोचन किया तो उस आलोचन से उपाय तथा उसके साधनों को भी जान लिया। त्रिनयन शंकरजी को साथ ले जाने का कारण यह था कि शिवजी सरल हैं दैत्य उनके भक्त हैं, कभी उनकी भक्ति के कारण दैत्यों को कुछ और उपाय भी बता दें तो कार्य में विघ्न आ जायगा लेकिन शिवजी को यदि साथ ले चलें तब शिवजी हमारे साथ

---

(१) योजनाकार लालू भट्टजी इस विषय को स्पष्ट करने के लिए कहते हैं कि, भूमि के वचन सुनकर ब्रह्माजी के मन में दो प्रकार के तर्क पैदा हुए—(१) प्रायः श्रीभूमिदेवी भगवद्भक्ता है अतः यह केवल अपना दुःख दूर करना नहीं चाहती है लेकिन दुष्ट राजाओं के भार उतारने के लिए भगवान् का प्राकट्य चाहती है। (२) अथवा दूसरी शङ्का यह भी हुई कि दैत्यों से सम्बन्ध होने के कारण भूमि को स्वार्थ बुद्धि हो गई होगी जिससे वह अपना दुःख ही मिटाना चाहती होगी। और भगवान् के प्राकट्य की आवश्यकता नहीं चाहती होगी। इन दोनों शङ्काओं पर ब्रह्माजी ने पूर्ण रीति से विचार किया, जिससे ब्रह्माजी को निश्चय हुआ कि भूमि परम भक्त है, अतः दैत्य संग होने पर भी इसमें स्वार्थ नहीं आया है इससे यह भगवान् का ही प्राकट्य चाहती है।

रहेंगे तब तो दैत्यों को दूसरा उपाय नहीं बता सकेंगे। पृथ्वी को साथ में ले जाने का कारण यह था कि भगवान् को प्रकट होने के लिए निमित्त कारण चाहिए तो उस निमित्त कारण को प्रत्यक्ष दिखाने के लिए भूमि को भी ले गये। यहाँ मूल श्लोक में महादेवजी का नाम **'त्रिनयन'** दिया है। उसका रहस्य बताते हैं कि देव, दैत्य और मनुष्य इन तीनों पर महादेवजी की दयादृष्टि रहती है। इस कारण से भी महादेवजी को साथ में ले जाना आवश्यक था। श्वेत द्वीप भगवान् का प्रिय धाम है एवम् व्यापि वैकुण्ठ का द्वार इस द्वीप के क्षीर सागर के समीप ही है। इसलिए क्षीर सागर के तीर पर गये। भूमि भगवान् की भक्त है। अतः भक्तों में आसक्त चित्त वाले भगवान् भूमि में भी आसक्त होकर ही उसका उपकार करेंगे, इसको जताने के लिए तीर पर ठहर गये ॥ १९ ॥

तत्रापि भगवतस्तिरोभावात् स्तोत्रं कृतवानित्याह—तत्र गत्वेति।

यदि शंका हो कि क्षीर सागर तीर जाकर स्तुति करने की क्या आवश्यकता थी ? इस पर कहते हैं कि जब ब्रह्माजी वहाँ गये तब भगवान् वहाँ भी तिरोहित थे, उनका आविर्भाव कर प्रार्थना करने के लिए स्तुति की है। उसका कथन **'तत्र गत्वा'** इस श्लोक में कहते हैं।

गमनमात्रेणैव स्तोत्रं कृतवान्—उपरोक्त श्लोक में 'जगाम' गये यह क्रियापद है। पुनः इस श्लोक में **'गत्वा'** कहने का भाव यह है कि जाते ही बिना विलम्बन के ब्रह्माजी स्तुति करने लगे। इसलिए यहाँ **'गत्वा'** पद दिया है। ब्रह्माजी ने वहाँ जाते ही समाधि लगाकर पुरुष सूक्त से भगवान् की स्तुति की। इस प्रकार श्लोक के पदों का सम्बन्ध लगाकर अन्वय और अर्थ करना चाहिए। ब्रह्माजी ने स्वयं दुःख का सामना नहीं किया। इसका कारण बताते हुए है कि भगवान् जगन्नाथ जगत् के स्वामी हैं। और उनको ही यह अधिकार है, ब्रह्माजी को नहीं है। यदि ऐसा है कि भगवान् जगत् के नाथ हैं। इसलिए उनको यह अधिकार है तो जगत् के नाथ होने से दैत्यों के भी तो नाथ हुए तो फिर केवल देवों का ही हित क्यों करते हैं ? इसका उत्तर देते हुए कहते हैं कि भगवान् स्वतन्त्र रूप से क्रीडा करते हैं इसलिये भगवान् का नाम **'देवदेव'** कहा है। भगवान् कृष्ण केवल देवों से ही क्रीडा करते हैं दैत्यों से नहीं। यद्यपि भगवान् दैत्यों के भी स्वामी हैं किन्तु वह स्वामित्व मर्यादानुरूप है। इस समय दैत्य मर्यादा का भी उल्लङ्घन कर चुके हैं। अतः वे मर्यादा से भी हित करने योग्य नहीं हैं इसके सिवाय भगवान् देवों के आधिदैविक स्वरूप भी हैं। इसलिए भी भगवान् को देवों का हित करना आवश्यक है।

अब आचार्य चरण, वृषाकपि पद का तात्पर्य बताते हैं—यदि दैत्य भूमि को रसातल में ले जाय तो कोई चिन्ता नहीं है क्योंकि भगवान् स्वर्ग में देवों से क्रीड़ा कर सकते हैं और देवों का हित भी कर सकते हैं। इसलिये दैत्यों के अपकार और देवों के उपकार के लिये स्तुति कर बुलाना योग्य नहीं है। इस शङ्का को मिटाने के लिये श्लोक में भगवान् कृष्ण को **'वृषाकपि'** विशेषण दिया है। यदि भगवान् प्रकट होकर देवताओं की रक्षा न करें और दैत्यों का नाश न करें तो यह नाम निरर्थक हो जाय। क्योंकि वृषाकपि पद का अर्थ है यज्ञादिरूप धर्म के सम्पूर्ण फल का भोक्ता भगवान् है। यदि भूमि रसातल में चली जाय तो यज्ञ कैसे होंगे। यज्ञ न होने से देवों का देवत्व चला जायगा क्योंकि देवों का देवत्व यज्ञ के फल के भोग से ही है। अब आचार्यचरण पुरुष पद का तात्पर्य कहते हैं जो देखने में नहीं आता है एवं जो समीप में नहीं है। उसकी स्तुति कैसे की जाती है ? इस शङ्का के उत्तर में कहते हैं कि भगवान् पुरुष हैं अतः वह सदैव ब्रह्माजी के हृदय में भी विराजते हैं, और भगवान् नारायण ब्रह्माजी के पिता भी हैं। पिता के नाते से ब्रह्माजी का कार्य अवश्य करेंगे। पुरुष सूक्त से स्तुति इसलिये की है कि वह एक तो वैदिक स्तोत्र है और दूसरे भगवान् की प्रेरणा से प्राप्त हुआ है, जिससे भगवान् को अतिप्रिय है। और पुरुषसूक्त तेजोमय है भगवान् भी तेजोमय हैं जो सूर्य के अन्तर्गत नारायण रूप से स्थित हैं वह इस उपस्थान विधा के द्वारा स्तोत्र होने से प्रसन्न होंगे अतः अन्तर्यामिपने के धर्म को धारण करने वाले भगवान् पुरुषोत्तम का इस पुरुष सूक्त से ही उपस्थान करना योग्य है ॥ २० ॥

ननु पुरुष एव तथा सत्यवतरिष्यतीत्याशङ्क्य तन्निराकरणपूर्वकं भगवत उत्तरं जातं स्वान्तःकरणे उपलभ्यातिसूक्ष्मत्वाद् वानामगम्यं तान् ज्ञापितवानित्याह—गिरमिति।

अब इस श्लोक में ब्रह्माजी भगवान का संदेश सुनाते हैं—पुरुषसूक्त में पुरुष रूप की स्तुति की है अतः पुरुष ने ही अवतार लिया होगा परंतु पुरुषोत्तम प्रकट हुए नहीं होंगे। यदि ऐसी शंका हो तब इसका समाधान भगवान् ने सूक्ष्म रूप से कहा था ब्रह्माजी ने उसको हृदय में जान लिया था वह बहुत सूक्ष्म होने के कारण देवों की समझ में नहीं आया, इसलिये ब्रह्मा आगे के श्लोक में देवों को कहते हैं।

समाधौ भावितो भगवान्—ब्रह्माजी ने समाधि में लोक सहित भगवान् के स्वरूप की भावना की थी। उस समय समाधि में ही उस स्थान के आकाश में जो भगवान् ने वाक्य कहे वे ब्रह्माजी ने सुने, कारण कि ब्रह्माजी का नाम वेधाः हैं।

विधाता और इस जगत् के रचने वाले तथा धारण करने वाले भी हैं इसलिये उनकी भावना सत्य स्वरूप है जिससे वह भगवद्वाणी सुनकर समझ सके, यदि वैसे नहीं होते तो भगवान् की आज्ञा के बिना देवों को आज्ञा कैसे करते ? इससे जाना जाता है कि वे गुण ब्रह्माजी में हैं जिनसे भगवान् की वाणी सुन सके। यदि शंका हो कि देवगण भी ब्रह्माजी के समान ही हैं उन्होंने क्यों नहीं सुनी ? तब इस शंका के समाधान में इस श्लोक में देवताओं का स्वरूप प्रकट करते हुए कहा गया है कि वे देव त्रिदश हैं । त्रिदिश शब्द का अर्थ है कि उनकी मनुष्यों के समान बाल, यौवन तथा वृद्ध तीन दशाएँ होती हैं । ब्रह्माजी की नहीं होती है अतः देव ब्रह्माजी के समान नहीं हैं । जब देवों की ये तीन दशाएँ होती हैं तब ही तो उनको जन्म लेने की आज्ञा करनी योग्य हुई है ।

ब्रह्माजी अचानक क्षणमात्र के लिये चुप हो गए। फिर कुछ विचार करने लगे, विचार करने के अनन्तर कहने लगे। उस समय सब देवता चकित हो गये कि ब्रह्माजी यकायक चुप क्यों हो गये ? यह आशय श्लोक में जो 'च' अव्यय बताया है, उसका है । ब्रह्माजी ने अपनी ओर से कुछ नहीं कहा, इसलिये ब्रह्माजी ने स्पष्ट शब्दों में कहा है कि हे देवों । भगवान् ने जो वाणी कही है वह सुनो । वह वाणी सत्य है तथा खण्डन करने योग्य नहीं है । जैसे गौ दोहन कर, सार रूप दूध निकाला जाता है वैसे यह वाणी भी साररूप फलरूप सब का हित करने वाली है, और यह वाणी आपको सुनाने वाला मैं ब्रह्मा हूँ । मेरी वाणी अन्यथा कभी नहीं होती है । अथवा यह वाणी भगवान् के सम्बन्धवाली है मैं तो केवल सुनाने वाला हूँ, अतः यह वाणी सर्वथा सत्य है यों समझो ।

भगवान् ने जिस प्रकार आज्ञा की उस प्रकार ब्रह्माजी अब देवों को सुनाते हैं। हे अमर ! देवगण ! प्रथम भगवदाज्ञा को श्रवण करें फिर बिना विलम्ब तदनुसार आचरण करें उसमें देरी नहीं करनी चाहिये। पहले सामग्री तैयार करने के लिये कहकर पश्चात् तदनुकूल कार्य करने को कहा। अंश से आप जन्म लो उसके करने में देरी न करें यह सब समझाकर पश्चात् जो करना है वह बतायेंगे ।

शायद देवों के मनमें यह शंका होगी कि दूसरी देह धारण तो मरने के अनन्तर होती है तो क्या हम इस देवलोक और देवयोनि को छोड़कर मनुष्य योनि में जावें । इस शङ्का के समाधान के लिये, 'हे देवाः' ! ऐसा सम्बोधन न कह कर 'अमराः' ! ऐसा कहा कि आप अमर हो इसलिए आपकी यह देवयोनि नष्ट न होगी आपको अंशरूप से मनुष्य में प्रकट होना है इसलिए चिन्ता न करें । श्लोक में **'शृणुत'** है ऐसे क्रियापद के प्रयोग से सावधान होकर सुनने की सूचना दी गई है । मूल श्लोक में **'पुनः'** अव्यय पद इसलिए दिया है कि पूर्व त्रेता युग में भी रामावतार में रावण से डरे हुए देवों को अंशरूप से अवतार लेने की आज्ञा की थी, वैसे ही फिर इस पूर्णावतार में आपको आज्ञा दी जाती है । लेकिन आप देव लोगों ने उस आज्ञा पालने में तब विलंब किया था अब भी कहीं देरी न करदें इसलिये श्लोक में **'आशु'** अव्यय देकर सूचन किया है कि अब विलंब नहीं करना साथ ही आज्ञा का पालन करना । रामावतार में जिस प्रकार जो देव जितने अंश से आगे पीछे प्रकट हुए थे उसी प्रकार अब भी होना, यह **तथा** और **एवं** इन दोनों अव्यय कहने का आशय है । रामावतार में प्रथम दशरथजी ने अवतार नहीं लिया था जिससे पुनः आज्ञा देकर दशरथजी को अवतार धारण करवाया था जिस कारण से साठ हजार वर्ष का विलम्ब हो गया था । अब भी वैसा न हो जाय इसीलिए श्लोक में **'आशु'** माने अविलम्ब ऐसा कहा है फिर भी उसको दृढ करने के लिए और पूर्व की तरह शायद विलंब न हो जाय । अतः **'मा चिरम्'** ऐसा दो अव्यय पद देकर देरी मत करना, यह स्पष्ट पुनरावर्तन कर दृढ किया ।

ननु त्वया किमुक्तं किं वा भगवतोक्तमितिशंकां दूरीकूर्वन् पूर्वं वानरेष्ववतारे प्राप्ते खेदो भूयान् प्राप्त इति देवाशंकां च परिहरन् भगवदुक्तमाज्ञापनमाह पुरैवेति ।

पूर्व रामावतार में प्रकट होकर देवगण ने महान् कष्ट पाया था । इसलिए वे देव ब्रह्माजी को निवेदन करते हैं कि हमको आप बताइए कि आपने भगवान् को कौन सी प्रार्थना की है और उसके उत्तर में भगवान् ने क्या आपको कहा ? इस प्रकार की देवताओं की शङ्का के समाधान में ब्रह्माजी इस श्लोक को कहते हैं—

भूमेः पीडाकथनात् पूर्वमेव भगवता—भूमि की पीड़ा की कथा कहकर सुनाने से पहिले ही भगवान् ने पृथ्वी का कष्ट निश्चित रूप से जान लिया था, कारण कि भगवान् पृथ्वी के स्वामी हैं । और पुरुष याने पति ही स्त्री को स्पर्श करता है । स्पर्श मात्र से ज्वर का पता चल जाता है । अतः हम लोगों के द्वारा उसके क्लेश को बताने की कोई आवश्यकता नहीं थी जिससे मैंने केवल पुरुष सूक्त से भगवान् की स्तुति ही की है । इसलिए मेरे, पृथ्वी के दुःख को कहने से पूर्व ही भगवान् ने स्वयं ही आज्ञा की है । ब्रह्माजी उसी आज्ञा को देवताओं को सुनाते हैं कि भगवान् श्रीकृष्णजी भी प्रकट होंगे, उससे पूर्व भगवान् के प्रकट होने के समय के आस पास आप सर्व भी यादवों में प्रकट हो जाओ । प्रकट होंने में आपकी भी आवश्यकता है, कारण कि आप देवता लोग भगवान् का अंश होंने के कारण सहज ही सेवक हो, जैसे हाथ पैर आदि शरीर के अवयव होते

हैं। और स्वामी सदा ही सब जगह परिकर के साथ ही जाते हैं। अब **'यदूषूपजन्यतां'** का तात्पर्य कहते हैं कि रामावतार से इस अवतार में विलक्षणता है इसलिए कहा है कि 'यादवों में' जन्म लेना। उस अवतार में भगवान् ने मनुष्ययोनि में और आप लोगों ने बानर योनि में जन्म लिया था परन्तु अब भगवान् और आप लोग यादवों में ही प्रकट होंगे। यह ही रामावतार और इस अवतार में आपके प्राकट्य की विलक्षणता है। अङ्ग तथा सेवक पास में ही रक्खे जाते है। वैसे तो आप भूतल में कहीं अन्य स्थान में भी प्रकट हो तो, इसलिए पास में ही प्रकट होने के लिए स्पष्ट संकेत किया है कि जहाँ मेरा प्राकट्य होगा, वहाँ ही यादवों में आप भी प्रकट होवें। कारण कि आपसे इस प्रकार की सेवा लेनी है। इसलिए उसमें जरा भी रुकावट न पड़े। देवता रामावतार में बहुत समय तक रहने से दुःखी हुए थे। इसलिये उनकी इस शङ्का को दूर करने के लिए कहते हैं कि जब तक भगवान् यादवों में विराजेंगे तब तक आप भी भगवान् के समीप ही रहना। आप प्रभु के साथ स्थिति करोगे तब यदुकुल में पुत्र पुत्रादि रूप से भी स्थिति होगी। इसलिए मूल में **'उपजन्यताम्'** पद दिया है। यों करने से स्थिति तो स्वतः होगी ही, अतः 'स्थिति' न कहकर 'जनन' शब्द कहा है। भगवान् स्वयं कितने समय तक विराजेंगे, इस शङ्का के निवारण के लिए कहते हैं कि वे ईश्वरों के ईश्वर हैं। जब ईश्वर ही स्वतन्त्र होते हैं तो ईश्वरों के ईश्वर कितने समय तक रहेंगे वह कौन कह सकता है और उसका नियमन भी कौन कर सकता है ?

भगवान् ईश्वरों के ईश्वर होने से जो जो कार्य जब तक करेंगे तब तक ये देव कार्य कर सकेंगे या नहीं यह शङ्का भी इससे हो मिटा दी। यद्यपि देवता लोग ईश्वर द्वारा नियमित स्वर्गीय सुख भोगने वाले हैं तो भी हस्त पादादि के समान सेवक होने से ईश्वर की आज्ञानुसार सर्व कार्य कर सकेंगे।

दैत्या अस्मान् मारयिष्यन्तीति न शङ्कनीयम्— ब्रह्माजी कहते हैं हे देवों! दैत्य हमको मारेंगे, इस प्रकार की शङ्का भी आपको मन में नहीं लानी चाहिए; क्योंकि भगवान् अपनी काल शक्ति से ही भूमि का भार दूर करेंगे। भगवान् एक जगह न रहकर तब तक विचरते ही रहेंगे जब तक सब दैत्यों का नाश नहीं करेंगे। दैत्य एक स्थान पर नहीं हैं इसलिये भगवान् चारों ओर घूमकर जहाँ भी दैत्य होंगे वहाँ जाकर उनका नाश करेंगे। प्रभु पृथ्वी पर कब प्रकट होंगे और कब तक विचरण करेंगे, यह तो मैं भी नहीं जान सकता हूँ। तो भी भगवान् का प्राकट्य तथा उनकी लीला अलौकिक होने से गुप्त नहीं रहेगी। पृथ्वी पर जन्मा हुआ साधारण जीव लौकिक कार्य ही कर सकता है। अलौकिक कार्य तो सर्वेश्वर प्रभु ही कर सकते हैं॥ २२॥

तथापि क्वावतरिष्यतीत्याकाङ्क्षायामाह वसुदेवगृह इति।

यद्यपि ब्रह्माजी ने भगवान् के प्राकट्य काल का अपने लिये अज्ञान प्रकट किया, तो भी कहाँ प्रकट होंगे ? वैसी देवों की जिज्ञासा जानकर 'भगवान् जहाँ प्रकट होंगे' उस स्थान का वर्णन इस श्लोक में करते हैं—

तस्याप्यंशावतरणव्युदासाय—इस श्लोक में साक्षात् तथा भगवान् इन दो पदों के कहने का तात्पर्य यह है कि भगवान् वसुदेवजी के घर में अंश से, चक्रादि रूप से अथवा सत्वगुण में अपने स्वरूप को गुप्त रख कर प्रकट नहीं होंगे, किन्तु प्रत्यक्ष रूप से प्रकटेंगे। यदि यह शङ्का हो कि भगवान् तो नारदादि ऋषियों को भी कहते हैं इसलिये यहाँ भी वह शब्द गौण है ऐसे क्यों न समझा जाय ? इस शङ्का को मिटाने के लिये मूल में "पुरुष" "**पर**" ये दो विशेषण दिये हैं। जिनका रहस्य यह है कि यहाँ भगवान् शब्द गौण अर्थ में नहीं है किन्तु पुरुषोत्तम वाचक कहा है न कि 'अक्षर' ब्रह्म परक समझें,। कारण कि "**पर**" और पुरुष ये दोनों ही पद "भगवान्" के विशेषण हैं। **'नारायणे तुरीयाख्ये भगवच्छब्दशब्दितः'** इस प्रमाणानुसार भगवान् शब्द तुरीयस्वरूप नारायण के लिये ही प्रसिद्ध है। और उसकी पुष्टि **परः** और **पुरुषः** इन दो विशेषणों से की गई है। गीता में जो व्यक्त ब्रह्मांड से परे अक्षर ब्रह्म को कहा गया है वह भाव रूप से कहा गया है पुरुष रूप से नहीं कहा गया है, पुरुष रूप से तो, ब्रह्माण्ड से परे पुरुषोत्तम ही है जिनको ब्रह्माजी भी नहीं देख सकते हैं। वे ही प्रकृति प्रवर्तक रूप हैं। उनका ही यहाँ वर्णन है। समग्र कहने का भावार्थ यह है कि वसुदेवजी के गृह में प्रकट स्वरूप, अक्षरातीत पूर्ण पुरुषोत्तम ही है अतः उनकी सेवा के लिये सुरस्त्रियां जो कि लक्ष्मी के साथ समुद्र से उत्पन्न हुई थी, जिनका भोग भगवान् ने नहीं किया था, वे अपना जन्म सफल करने के लिये प्रकट हो जाय। अब किस प्रकार और कहाँ प्रकट होना ? वह बताते हुए कहते हैं कि सर्व प्रकार की मनोहर सुन्दरता से अपने को विभूषित कर अपने योग्य स्थान में प्रकट होवें। अब इस श्लोक में जो तत् प्रियार्थं पद कहा है उसका हार्दिक भाव यह है कि देवता लोग स्त्रीरूप धारण न करें॥ २३॥

भगवदवतरणात् पूर्वमेव सेवासावधानार्थं भगवच्छय्यारूपस्य शेषस्य सङ्कर्षणसहितस्यावतारमाह वासुदेवेति।

अब इस श्लोक में, भगवान् के प्राकट्य से प्रथम ही, निज सेवा में पूर्ण व्यवस्था करने के लिए, सङ्कर्षण के साथ भगवान् के शय्या रूप शेषजी के प्रकट होने का वर्णन करते हैं।

अब आगे की कारिकाओं में यह कहते हैं कि भगवान् के प्रकट होने से पहिले, लीला के सम्पादन कार्य में यथा योग्य सावधानी हो। इसलिए, सङ्कर्षण के साथ शय्या रूप शेषजी का प्राकट्य होगा, उनके स्वरूप का स्पष्ट एवं पूर्ण परिचय आचार्यचरण इन चार कारिकाओं में कराते हैं।

कारिका—**सात्विकेषु तु कल्पेषु यः शेते सलिले हरिः। वासुदेवः स विज्ञेयस्तस्यांशोऽनन्त उच्यते ॥ १ ॥**

कारिकार्थ— जो हरि सात्विक कल्पों में, जल में शयन करते हैं, वह वासुदेव कहलाते हैं, उनका अंश 'अनन्त' में है शयन का अर्थ निद्रा नहीं है लेकिन 'स्थित रहना' इतना अर्थ है ॥ १ ॥

विवरण—**'वसुदेव गृहे साक्षात्'** श्लोक में पुरुषोत्तम स्वरूप का वर्णन करने के अनन्तर वासुदेव कलानन्त श्लोक में 'तत्कला' इतना कहने से विषय स्पष्ट हो जाता था फिर यों न 'वासुदेवकला' इतना दीर्घ पद तात्पर्य इस कारिका में समझाते हैं। इस कारिका में यः शब्द कहकर बताते हैं कि व्यूहों में मुख्य जो अवताराधिकारी है, वह वासुदेव है। इस वासुदेव हरि का अंश 'अनन्त' में है इससे समझना चाहिए कि जिस अंशी रूप हरि का अंश अनन्त में है। वह पुरुषोत्तम का दूसरा रूप है अर्थात् वह मूल रूप पुरुषोत्तम नहीं है। इसको समझाने के लिए मूल श्लोक में 'तत्कला' उसकी कला न कहकर 'वासुदेवकला' वासुदेव की कला अनन्त में है ऐसा कहा है। तात्पर्य यह है कि श्री बलभद्रजी में उस पुरुषोत्तम के रूपान्तर वासुदेव का अंश है। न कि **'कृष्णस्तु भगवान् स्वयं'** इस मूल स्वरूप का अंश है ॥ १ ॥

कारिका—**कालात्मा स विज्ञेयो भूभारहरणे प्रभुः। तत्र सुप्तो हरिश्चापि तदाविष्टो भविष्यति ॥ २ ॥**

कारिकार्थ—वह कालात्मा है, एवं भूमि के भार हरण में भी समर्थ है। शेष पर सोया हुआ हरि भी उस अनन्त में आविष्ट है।

विवरण— अब वासुदेव कलानन्तः श्लोक में जो 'वासुदेवकला' और 'अनन्त' दोनों पद साथ दिये हैं उसका तात्पर्य कि दोनों का रूप एक है तथा कार्य भी एक है इसीलिये समास कर साथ में कहे हैं और कालात्मा भी होने से, उनका साथ में कहना आवश्यक था। यदि अनन्त में स्वतः सामर्थ्य है तो फिर वासुदेव के आवेश के बताने का क्या रहस्य है। इस पर समाधान है उस समय वासुदेव की कला अनन्त में प्रवेश होती है। इसके ज्ञात कराने के लिये यह उक्ति है। अनन्त रूप शेष में सङ्कर्षण का आवेश है, और सङ्कर्षण में वासुदेव की कला का आवेश है यह ही श्री बलभद्रजी का स्वरूप सर्वदा है। बलभद्रजी में तो पूर्ण मूल पुरुषोत्तम का आवेश तो कभी कभी विशेष लीला के अवसर पर होता है। और बलभद्रजी के उस स्वरूप से की हुई लीला भी मूल रूप से की हुई लीला समझनी चाहिये कारण कि अंश और अंशी का परस्पर भेद नहीं है वे एक ही है।

कारिका—**अतोऽनुशयनं विष्णोर्बलभद्रेण नात्मनः। एकवत् प्रोच्यते कृष्णो द्विवल्लोकैः प्रतीयते ॥ ३ ॥**

कारिकार्थ— इस कारण से बलराम में वासुदेव कला का ही आवेश है न कि श्री पुरुषोत्तम प्रभु का आवेश है। कृष्ण और बलराम एक ही कहे जाते हैं किन्तु लोक में दो की प्रतीति होती है।

विवरण—जो संकर्षणजी है वह तो शेषजी का आधिदैविक स्वरूप है और वह व्यूह रूप है। जब संकर्षणाविष्ट अनन्त शेषजी अवतार लेते हैं तब उस स्वरूप में सात्विक कल्प में जल में स्थिति करने वाले वासुदेव ही अपनी कला से उनमें प्रविष्ट होते हैं। अतः इससे यह नहीं समझना चाहिये कि दशम स्कन्ध का अर्थ बलदेवजी में आविष्ट वासुदेव कला की ही लीला है। ऐसी शङ्का के निवारण के लिये ही आचार्य श्री ने इस कारिका में 'न आत्मनः' कहकर बताया है कि अनन्त में पुरुषोत्तम का आवेश न होने से वह (वसुदेव की लीला) दशम स्कन्ध का अर्थ (निरोध लीला) नहीं है। तब बलरामजी की लीला, निरोध लीला, कैसे कही जाती है? इस शङ्का को कारिका के उत्तरार्ध से मिटाया गया है। जैसे कि उसमें कहा कि बलारामजी में वासुदेव का अंश सदैव रहता है और कृष्ण अंशी है, अंश अंशी का सदा ही अभेद है। अतः दोनों एक ही रूप है इसलिये वहां भी एकत्व का ही निरूपण है जिससे जैसे रूप एक है वैसे सर्व चरित्र भी उसी मूल स्वरूप के ही किये हुए समझने, इस प्रकार समझने से दशम स्कन्ध का अर्थ पुरुषोत्तम की निरोध लीला ही सिद्ध है। लोक में तो इस प्रकार देखने में नहीं आता है—इसको समझाकर कहते हैं, कि एक रूप होते हुए भी लोक में कृष्ण-बलराम जैसे दो प्रतीत होते हैं वैसे ही चरित्र भी पृथक् प्रतीत होते हैं, किन्तु है एक ही। जिस भाँति आनन्दमय विद्या, सद्विद्या तथा शाण्डिल्य विद्याओं में ब्रह्म के रूप भिन्न भिन्न वर्णन किये गये हैं किन्तु शास्त्रदृष्टि से वे सब एक ही ब्रह्म के रूप हैं वैसे ही यहाँ भी जुदे २ होते हुए भी वास्तव में अंशांशि भेद से उनका चरित्र एवं रूप एक ही है ॥ ३ ॥

अब इस कारिका में देवकीजी के उदर में रहे हुए एवं रोहिणीजी के उदर में रहे हुए स्वरूपों का स्वरूप बताते हैं—

कारिका—**देवक्यां शयनस्यैव सम्भवो न हरेः स्मृतः। रोहिण्यामपरस्येति कर्षणान्नैव हीनता ॥ ४ ॥**

कारिकार्थ—देवकीजी के गर्भ में से शय्या रूप संकर्षण का प्राकट्य हुआ है न कि वासुदेव का। वासुदेवांश का रोहिणी में से प्राकट्य है अतः माया के कर्षण से उसकी कोई हीनता नहीं हुई है ॥ ४ ॥

विवरण—इस कारिका में देवकीजी के गर्भ को माया ने खींचकर रोहिणीजी में स्थापन किया है जिससे वासुदेव, जो मोक्षदाता हैं, उनकी हीनता प्रकट होती है। इस शंका का निवारण करते हुए कहते हैं कि देवकीजी के गर्भ में वासुदेवांश नहीं था। केवल संकर्षणाविष्ट शेषजी थे। वासुदेवांश तो रोहिणीजी के गर्भ में पहिले ही था। रोहिणीजी इस गर्भ की स्थिति के अनन्तर नन्दरायजी के घर में रही थी, जिससे रोहिणीजी में अचानक गर्भ होने की शंका को भी मिटा दी है। और माया ने देवकीजी के गर्भ से शेषजी को ही लेके रोहिणीजी के गर्भ में स्थापित किया था। इससे वासुदेवजी की हीनता की शंका का प्रश्न ही निरर्थक है।

तं संकर्षणमन्यस्माद्भिन्नतया ज्ञातुं विशिनष्टि—उस संकर्षण को वासुदेव से पृथक् बताने के लिए मूल श्लोक में 'वासुदेव' शब्द दिया है। संकर्षण, वासुदेव की कला की रूप तथा धर्म रूप है, न कि स्वयं वासुदेव है। वह सङ्कर्षण का रूप शय्या रूप अनन्त-शेष रूप होने के कारण कालात्मक है। वह वासुदेव भगवान् अपने आश्रय रूप शय्या पर ही स्थिति करते हैं और स्थिति को ही शयन कहते हैं। अतः वह शय्या उनकी कला रूप है। वहाँ कला रूप शेष का आधिदैविक सङ्कर्षण स्वरूप भी विराजमान है। इसलिए श्कोक में उसको **'सहस्रवदन'** स्वराट् कहा है। सहस्रवदन सङ्कर्षण वेदात्मा वेद रूप भी है। सङ्कर्षण के सिवाय केवल शेप भी उसके समान होगा। उसका विरोध करते हुए कहते हैं कि सङ्कर्षण श्रेष्ठ है। कारण कि स्वर्ग में भी वे प्रकाश करते हैं। सङ्कर्षण का जो 'सितकृष्ण केशरूप' है वह प्रथम व्रज में प्रकट होगा। यदि वह प्रथम प्रकट होगा तो अनन्तर भगवान् के अवतार की क्या आवश्यकता है? इस शंका को मिटाने के लिये मूल में संकर्षण का विशेषण 'देव' शब्द दिया है। जिसका भाव यह है कि वह संकर्षण साक्षी रूप से वहाँ कार्य करेंगे। विशेष कार्य नहीं करेंगे अतः प्रभु के प्राकट्य की आवश्यकता है। यदि केवल साक्षी रूप से प्रकट होते हैं तो उससे कौनसा लाभ होगा? वा क्या कार्य सिद्ध होगा? इस शंका के उत्तर में कहते हैं कि भगवान् का प्रिय करने की इच्छा से प्रकट हुआ है। सर्व प्रकार के कार्य का प्रबन्ध करेंगे। समय पर युद्धादि में भी सहायता करेंगे। संकर्षण भगवान् सबों का दुःख हरने वाले हैं। दैत्यों के सुख के लिए तथा भूमि के भार के हरण के लिए जो कार्य श्रीकृष्णचन्द्र करेंगे, उसमें सहायता देकर उनकी सेवा करेंगे ॥ २४ ॥

एवं ससामग्रीकस्य गमने सर्वमुक्तिर्भविष्यतीत्याशङ्कायामाह विष्णोरिति।

यदि सर्वसामग्री सहित यदि भगवान् सम्पूर्ण माया का तिरोधान कर प्रकट होंगे तो सबकी मुक्ति हो जायगी। सबकी मुक्ति होने से सृष्टि क्रम बन्द हो जायगा? इस शंका का समाधान इस श्लोक से करते हैं।

यो हि विष्णुर्मायोद्घाटनेन—विष्णु, जो सर्व व्यापक हैं तो भी जहाँ प्रकट होंगे वहाँ की ही माया का संकोच करेंगे। और जो माया कार्य सिद्ध करने के लिये प्रकट होगी, वह इसी माया का अंश है जिसको आपने अपने प्राकट्य स्थान से हटाया है। यह माया अंश रूप होते हुए भी भगवान् की कृपा से भगवती, ऐश्वर्य आदि छः गुणों वाली है। अतः वह अपने स्थान को छोड़ने से दोष वाली नहीं होती है। वह माया व्यापि वैकुण्ठ में रहते हुए भी यहाँ का कार्य सिद्ध करेगी। उस माया ने सम्पूर्ण जगत् को मोह में डाल दिया है जिससे सबों की मुक्ति नहीं होगी। यह भी शङ्का मन में नहीं लानी कि कदाचित् वह माया प्रकट न होवे तो? वह अवश्य प्रकट होगी, कारण कि प्रभु ने उसको आज्ञा देदी है। जब सारे जगत् को मोहित करने वाली माया भी आज्ञा मानती है, तो आप सुरवरों को गर्व नहीं करना चाहिये। माया से आप बड़े नहीं हो। अब आचार्यचरण माया के कार्य का वर्णन करते हैं—१—यशोदा में दूध उत्पन्न करना, २—सप्तम गर्भ को देवकीजी से खींचकर, रोहिणीजी में स्थापना करना, ३—कंस को भुलावे में डाल देना, ४—वसुदेवजी तथा देवकीजी का कारागृह से छुटकारा कराना ॥ २५ ॥

एवं सर्वान् ज्ञापयित्वा ब्रह्मा ततो निर्गत इत्याह इत्यादिश्येति।

पुनः ब्रह्माजी इस प्रकार देवों का समाधान कर वहाँ से पधार गये। उसका निर्देश करते हुए श्रीशुकाचार्यजी कहने लगे—

अनेकविधा देवाः— देव अनेक प्रकार के हैं अतः उनके पृथक् पृथक् गण थे, और सर्व गण अपने नेता की आज्ञा का पालन करते थे। अतः ब्रह्माजी को प्रत्येक गण के गणपति को सर्व विषय समझाना पड़ता था। श्लोक में **'अमरगणान्'** पद में गण शब्द दिया है और बहुवचन भी दिया है। अतः ब्रह्माजी ने सब आगेवानों को सर्व विषय अलग अलग समझाये। ब्रह्माजी भी देव है तो भगवान् ने उनको क्यों नहीं अवतार लेने का आदेश दिया? इस शङ्का का निवारण करने के लिये शुकदेवजी ने ब्रह्माजी को 'प्रजापति पति' कहा है कि ब्रह्माजी साधारण देवता नहीं है किन्तु सृष्टि करने वालों के भी स्वामी हैं। अतः भगवान् ने ब्रह्माजी को अवतार लेने के लिये आदेश नहीं दिया। यदि आदेश देते तो सृष्टि के निर्माण में विघ्न आ जाता।

देवताओं को भगवान् ने साक्षात् आज्ञा नहीं की है किन्तु ब्रह्माजी द्वारा की है। ब्रह्माजी की आज्ञा देव लोग नहीं मानेंगे यह शङ्का संभव नहीं है क्योंकि ब्रह्माजी 'विभुः' समर्थ-स्वामी है। देवताओं को कार्य करने की आज्ञा देने का अधिकार ब्रह्माजी को है। यद्यपि देवताओं को दी हुई आज्ञा को सुनकर भूमि सन्तुष्ट हो गई थी, फिर भी ब्रह्माजी ने पृथ्वी की विशेष प्रसन्नता के लिये अनेक प्रशंसावचन कहकर आश्वासन दिया। भूमि को यह निश्चय नहीं हुआ था कि भगवान् स्वयं प्रकट होंगे। किन्तु अब ब्रह्माजी के आश्वासन के वचनों से निश्चय हो गया अतः भूमि के भाग्य का अभिनन्दन करना समुचित था ॥ २६ ॥

एवं भूमेः सान्त्वनमुक्त्वा देवक्याः सान्त्वनं वक्तुं, तस्या प्रथमं दुःखप्रापणोपायमाह शूरसेन इति दशभिः ।

इस प्रकार भूमि को सान्त्वना दिया, अब श्रीदेवकीजी की भी सान्त्वना करनी है वह करेंगे लेकिन प्रथम देवकीजी को दुःख हुआ, उसके उपाय का प्रकार बताते हैं। अर्थात् देवकीजी को किस कारण के और कैसा दुःख हुआ उसका दश श्लोकों से निरूपण करते हैं—

अब इन कारिकाओं में सात प्रकार का उत्कर्ष बताते हैं—

कारिका– **सर्वोत्कर्षे तु यद्दुःखं तद्दुखं स्वल्पके स्मृतम् । देशतः कालतश्चैव अवस्थातः स्वतोन्यतः ॥ १ ॥**
द्रव्यतो मानतश्चेति सप्तैव सुखदाः स्मृताः । तथाभूता शब्दवशात् प्राप्ता दुःखं तदा पतिः ॥ २ ॥
प्रतिक्रियां समारेभे नवभिश्च प्रतिक्रिया ॥ २३ ॥

कारिकार्थ—देवकीजी को सर्व प्रकार से उत्कर्ष होने पर जो दुःख स्वल्प आकाश वाणी श्रवण के कारण होने से हुआ वह स्वल्प था। देवकीजी को देश, (१) काल, (२) अवस्था, (३) अपने, से (४) दूसरे, से (५) द्रव्य (६) और बहु मान, (७) ऐसे सातों प्रकार से उत्कर्ष हो रहा था किन्तु जब शब्द सुनने से दुःख को प्राप्त हुई, तब उनके पति वसुदेवजी दुःख के निवारण का उपाय करने लगे ॥ २३ ॥

विवरण—भगवद्भक्तिमार्ग का सहज नियम है कि भूतल पर भगवत्प्राकट्य तब होता है, जब भक्त दुःखी होता है। देवकीजी का सातों प्रकार से उत्कर्ष सिद्ध हो गया था। जिसमें उन देवकीजी को अल्प दुःख भी बहुत देखने में आया है। पूर्ण प्रसन्न तथा सुख सम्पन्न देवकीजी आकाशवाणी सुनते घबरा गई थी–स्वल्प कारण से प्राप्त दुःख को भी भगवान् शीघ्र तथा अनायास ही नाश करेंगे। क्योंकि भगवन्मार्गीय शास्त्रों में इस प्रकार का वर्णन है। अतः इस विषय की किसी प्रकार से भी चिन्ता नहीं करनी चाहिए। यहाँ तो श्री देवकी माताजी के दुःख प्राप्ति के उपाया का ही केवल वर्णन करना चाहिए। वह विवाह कर ससुराल जाते समय आकाशवाणी होने से हो गया। शेष दोषादि से उत्कर्ष का वर्णन करना व्यर्थ है। इस शंका का निवारण उपरि निर्दिष्ट चार कारिकाओं से किया गया है। देवकीजी के सात प्रकार के उत्कर्ष का वर्णन करते हैं। प्रथम तो जैसे वसुदेव का जन्म समय आनक तथा दुन्दुभि का वाद होने से उत्कर्ष हुआ। वैसे देवकीजी विवाह कर जब श्वसुर गृह जाती थी उस समय जो सम्मान हुआ उससे उसका भी उत्कर्ष प्रकट देखने में आया था। अब सात प्रकार के उत्कर्ष का वर्णन करते हैं। **'शूरसेनो यदुपतिः'** इस श्लोक में उत्तम देश में निवास करने के कारण 'देश' का उत्कर्ष बताया (१) **'राजधानीततः'** इस श्लोक से वह नगर उस समय यादवराजाओं की राजधानी था। इसलिए 'काल से' भी उत्कर्ष बताया (२) **'तस्यां तु कर्हिचित्'** आगे श्लोक द्वारा विवाह होने से अवस्था का उत्कर्ष बताया (३) **'देवक्या सूर्यया सार्धः'** इस पीछे आये श्लोक से स्वतः श्री देवकीजी का ही अपना उत्कर्ष बताया (४) **'उग्रसेनसुतः कंसः'** इस श्लोक में कंस रथ का सारथी बनकर पहुँचाने चला। जिससे भी देवकीजी का अन्य से उत्कर्ष हुआ है (५) **चतुःशतं तथा दासीनां'** इन दो श्लोकों से द्रव्य का उत्कर्ष देखने में आया है (६) **'शङ्खतूर्य'** इस श्लोक से मान का उत्कर्ष दिखाया है (७) आचार्यचरण कहते हैं कि इस प्रकार सात प्रकार के सुखों से सम्पन्न श्री देवकीजी को आकाशवाणी से प्राप्त थोड़ा भी दुःख असह्य होने लगा। आकाशवाणी से दुःखित देवकीजी के दुःख का निवारण और प्रतीकार श्री वसुदेवजी करने लगे।

सहस्रार्जुनस्य पुत्राणां मध्ये– सहस्रार्जुन से उत्पन्न हुए पुत्रों में से पाँच पुत्र बचे थे उनमें से शूरसेन द्वितीय थे। यादवों का राज्य ययाति ने शाप द्वारा निवृत्त कर दिया था तदनन्तर वह राजा राज्य कर सके जो भगवद्वंश हो। इससे भगवान् के अनुग्रह से ही राज्य चलता था अर्थात् जिस व्यक्ति वा वंश पर भगवान् की कृपा होती थी वह राज्य करता था। सहस्रार्जुन में भगवान् का अंश था अतः भगवान् के अनुग्रह से वह राजा हुआ। उसने जीते ही अपने द्वितीय पुत्र शूरसेन को माथुर और शूरशेन देश ये दो मण्डल राज्य करने के लिये दे दिये, बड़ा पुत्र तो माहिष्मती में ही राज्य करता था।

सातों उत्कर्षों में से इस श्लोक में प्रथम देश के उत्कर्ष का वर्णन करते हैं। शत्रुघ्न की बनाई हुई मथुरा नगरी में सहस्रार्जुन के द्वितीय पुत्र शूरसेन रहकर सर्व प्रकार के सुख भोगने लगे। वह शूरसेन यादवों के स्वामी थे। और यद्यपि

शूरसेन राजा के नाम से वह देश 'शूरसेन देश' कहलाता था तो भी उसको त्याग कर अपना निवास स्थान उन्होंने मथुरा को बनाया। वहाँ रहकर शूरसेन राजा तथा माथुर दोनों मण्डलों के राज्य को भोगते थे। इससे यादवों का स्वदेश मथुरा नगर हुआ॥ २७॥

कालभेदेनापि सा महती जातेत्याह राजधानीति।

ततः प्रभृति यावन्तो राजानः—राजा शूरसेन से लेकर कंस पर्यन्त जितने भी राजा हुए, वे अपनी शक्ति से ही राजा बने थे। लेकिन वे अपने बल से खण्ड मण्डल के अधिपति बने थे, समग्र मण्डल के नहीं बन सके थे उनको वहाँ ही अत्यन्त सुख की प्राप्ति हुई थी। जिससे उनकी मथुरा ही राजधानी हो गई। वे सब राजा यादव ही थे! जहाँ राजा आनन्द से रहते हैं वह नगरी राजधानी कही जाती है। अथवा जिस नगरी में राजा का राज्याभिषेक होता है वह नगरी राजधानी मानी जाती है। इससे उस नगरी में राज्यलक्ष्मी नित्य विराजती है। जिससे वहाँ रहने वाले आनन्द में रहते हैं! उस आनन्द में रहने का कारण भगवान् हैं। क्योंकि भगवान् नित्य 'मथुरा' में विराजते हैं॥ २८॥

मथुरा, भगवान् यत्र नित्यं सन्निहितो हरिः—अब इन कारिकाओं में विमर्श किया जायगा कि सर्वत्रनिवासी भगवान् मथुराजी में नित्य सन्निहित है इसका रहस्य क्या है?

कारिका— सर्वतत्त्वेषु यो विष्टः स भूमावपि सङ्गतः। स नित्यं क्वचिदेवास्ति तत्स्थानं मथुरा स्मृता॥ १॥
तत्र स्थित्वा द्वयं चक्रे सर्वेषां सकलं हितम्। सर्वदुःखनिवृत्तिं च तत्र चेद्दुःखसम्भवः॥ २॥
प्रतीकाराः सर्व एव मर्यादामार्गसम्भवाः। व्यर्था जाता सर्वथेति ज्ञापनार्थं निरूपितम्॥ ३॥
देशकालादिमध्यस्थः षडङ्गत्वं य आगतः। सोन्यत्र सर्वदेशेषु शालग्रामादिषु स्थितः॥ ४॥ २८॥

कारिकार्थ—जब कि सृष्टि के आरम्भ से तत्सृष्ट्वा **'तदेवानुप्राविशत्' 'त्रयो विंशतितत्त्वानां गणं युगपद् आविशत्'** इन श्रुति तथा श्रीमद्भागवत पुराण के वाक्यों से निर्विवाद सिद्ध है कि परमात्मा सर्व तत्त्वों में प्रविष्ट हुए जिससे उनकी मध्यपाती पृथ्वी में भी प्रविष्ट हुए। वह स्वरूप अन्तर्यामी स्वरूप है अर्थात् सबसे व्याप्त होकर विराजते हैं। तो भी **'गुहां प्रविष्टौ परमे परार्धे'** इस श्रुति के अनुसार देह के एक देश 'अन्तःकरण' में ही विशेष रूप से व्यक्त हैं। वैसे सर्वत्र भूमि में व्याप्त होते हुए भी भूमि के देश मथुरा में नित्य विशेष रूप से अभिव्यक्त होकर विराजते हैं। मथुरा में विराजमान होकर भगवान् ने दो कार्य किये। सर्व का सर्व प्रकार सम्पूर्ण हित और सर्व जन की दुःखों की निवृत्ति।

यदि ऐसा संशय होगा कि जब भगवान् ने वहाँ विशेष रूप से विराजमान होकर ये दो कार्य किये तब देवकीजी को दुःख क्यों हुआ? तब इस संशय का समाधान यह है कि भगवान् को शीघ्र अवतार लेकर प्रकट होना था और साथ २ यह भी दिखाना चाहते थे कि मर्यादा मार्ग के सर्व साधन व्यर्थ हो जाते हैं जबकि मेरी इच्छा वा कृपा न हो अथवा मेरी सन्निधि न हो। इसलिए भगवान् ने उस समय अपना नित्य सन्निहित स्वरूप भी तिरोहित कर दिया था।

श्रीरङ्गादिष्वपि नारायणस्य ब्रह्माण्डविग्रहस्य सान्निध्यम्।

अब आचार्यचरण अन्य क्षेत्रों से मथुराजी में भगवत्सान्निध्य का वैशिष्ट्य बताते हैं कि श्रीरङ्ग आदि धामों में भी भगवान् का सान्निध्य है किन्तु वहाँ नारायण का सान्निध्य है। तात्पर्य यह है कि वहाँ रङ्गादि धामों में अङ्ग रूप से अनुप्रविष्ट हैं और मथुरा में अङ्गी रूप से अनुप्रविष्ट हैं। अङ्ग से अङ्गी अधिक है। उन अङ्गी से ही जब सुखप्राप्ति नहीं है तो अङ्गभूत से कैसे होगी? इससे यह भी बता दिया है कि तापनीय उपनिषद् में जो द्वादश स्वरूप कहे हैं उनसे भी सुख की प्राप्ति नहीं हो सकती है।

मथुरादि के सिवाय अन्यत्र दूसरे स्थान पर भगवत्पूजादि नहीं करनी चाहिए! इसका समाधान चतुर्थ कारिका में करते हैं।

देश, काल, द्रव्य, कर्त्ता, मन्त्र और कर्म इन यज्ञादि धर्म के ६ अङ्गों में भी भगवान् विराजमान है। वह भगवान् तीर्थ से अन्य देश, शालग्राम, तुलसी, एकादशी व्रतों में भी अङ्ग रूप से विराजते हैं। अतः समयानुसार वहाँ पूजादि की जा सकती है किन्तु मथुरा में नित्य अङ्गी रूप से विराजते हैं।

तस्या अवस्थोत्कर्षमाह तस्यामिति।

इस प्रकार श्रीदेवकीजी का देश तथा काल से उत्कर्ष बताया अब आचार्यचरण इस श्लोक से श्रीदेवकीजी की अवस्था का 'उत्कर्ष' बताते हैं।

तस्यां तु कर्हिचित् शौरिः—इस सातों प्रकार के श्लोकों में कहे हुए 'तु' अव्यय का तात्पर्य यह है कि अब तक तो देवकीजी को सुख था पर अब सब सुख, दुःख में पलटते हैं, जिससे सिद्ध होता है कि यह 'सुख' भगवान् ने नहीं दिया है।

'तु' शब्द का भाव दूसरे प्रकार से बताते हैं कि 'तु' कहने का यह भी आशय है कि भगवान् जो सुखरूप हैं उनके अंश भी जहाँ प्रकट विराजते हैं, वहाँ सुख ही होता है। किन्तु अब स्वयं भगवान् को अवतार लेकर पूर्ण आनन्द दान करना है और भगवान् का प्राकट्य तब होता है, जब भक्त आदि सब दुःखी होते हैं। अतः अपने अंशों को उन्होंने खींच लिया। जिससे सुख तिरोहित हो गया और दुःख का आविर्भाव हुआ। श्लोक में 'कर्हिचित्' अव्यय देने का रहस्य यह है कि जिस समय वसुदेवजी जा रहे थे, उस समय कोई सुन्दर मुहूर्त देखकर तैयारी नहीं की थी लेकिन एकाएक लग्न हुआ और जाने की तैयारी कर ली। वसुदेव नाम वाले बहुत हैं और और वसुदेव के भाई अन्य भी हैं इसलिये वसुदेव के साथ '**शौरि**' विशेषण दिया है जिससे किसी प्रकार भ्रान्ति न होने पावे। केवल 'वसुदेव' नाम देने से, यह शङ्का रह जाती कि कौनसा वसुदेव है? और यदि केवल '**शौरि**' कहते तो शूर के अनेक पुत्रों में से कौनसा पुत्र विवाह करके जा रहा है यह भ्रान्ति होती परन्तु शौरि, वसुदेव, इन दोनों पद देने से भ्रान्ति को अवकाश न रहा। नवविवाहिता भार्या देवकीजी के साथ अपने गृह जाने के लिये श्वशुर के दिये हुए रथ में बैठे। स्त्री की उत्तम अवस्था यह है जब विवाह का समय हो और अपने पति का साथ हो। इसलिये इस समय देवकीजी को ये दोनों प्राप्त थे अतः देवकीजी का अवस्था से भी उत्कर्ष है। तथा '**सूर्यया**' पद से सूर्या नवविवाहिता थी। इसलिये 'स्वतः' भी उत्कर्ष हुआ। पति की प्रधानता भी पतिव्रता स्त्रियों के उत्कर्ष होने में कारण है। यद्यपि देवकीजी का पिता देवक बड़ा था तो भी वह ऐसा समय था जिससे मर्यादा के अनुकूल राज्य प्राप्ति नहीं होती थी जो बलिष्ठ होता था वह राजा बन बैठता था निर्बल शांति से रहकर व्यवहार चलाता था। इसी कारण से इस विवाह प्रसंग में देवक का नाम नहीं आया है उस समय उग्रसेन अथवा कंस राज्य की कार्यवाही करते थे ॥ २९ ॥

मुख्य एव व्यवहारे सम्बन्धहेतुर्लोकप्रसिद्धः। अत उग्रसेनपुत्रोऽपि कंसो देवकपुत्र्या देवक्या भ्रातृकार्यं कृतवानित्याह उग्रसेनसुत इति।

लोक में यह प्रथा प्रसिद्ध है कि कुटुम्ब में जब कोई भी व्यवहार का कार्य होता है तो वह कार्य कोई पारिवारिक बड़ा व्यक्ति ही करता है। अतः उग्रसेन का पुत्र कंस इस समय मुख्य होने से देवकी के भ्रातापन का सर्व कार्य करने लगा। जिसका वर्णन इस श्लोक में करते हैं।

स्वसुर्भगिन्याः—बहिन देवकीजी के सम्मान पूर्वक प्रिय कार्य करने की इच्छा से कंस, राजा होते हुए भी स्वयं घोड़ों की बागडोर को लेकर सारथि बन गया। यदि कंस अकेला ही घोड़ों की लगाम ले रथ को चलाकर वसुदेव को अपने घर पहुंचाने के लिये जाते तो न शोभा होती और न उनका, वसुदेव-देवकी का बहु मान भी होता फिर भी वे प्रसन्न न होते, तथा कंस राजा होकर इस साधारण रीति से बहिन को अकेला छोड़ने गया। यह कंस के लिये भी शोभास्पद नहीं था। अतः कहते हैं कि '**रौक्मैः रथशतैः वृतः**' सुवर्ण मण्डित सैकड़ों रथ चारों तरफ थे, जिनके मध्य में वसुदेवजी जिस रथ में बैठे थे वह 'रथ' था। कंस ने उसी रथ का सारथि बनकर अश्वों की बागडोरें पकड़ रक्खी थी। इस दृश्य से सिद्ध होता था कि 'वसुदेव' ही मुख्य राजा बन गये हैं, और कंस जो राजा थे वे दास हो कर बैठे थे। इस प्रकार यह अधिक सम्मान है। इस श्लोक से देवकी जी का दूसरों से अधिक उत्कर्ष बताया गया है ॥ ३० ॥

पितृकृतं द्रव्यकृतमुत्कर्षमाह चतुःशतमिति द्वाभ्याम्—

अब निम्ननिर्दिष्ट दो श्लोकों में पिता देवक से और द्रव्य से देवकी का उत्कर्ष बतलाते हैं।

क्षत्रिया हि चितुरंगिणीं सेनां—क्षत्रिय लोग विवाह में वधू तथा वर के सन्तोष के लिये चतुरङ्गिणी सेना दहेज में देते हैं। किन्तु देवक ने पैदल सैनिकों के स्थान में कन्या की प्रसन्नता के लिये दासियां दी थी। सुवर्ण माला से सुशोभित चार सौ हाथी, पन्द्रह हजार घोड़े और अठारह सौ रथ दिये ॥ ३१ ॥

दासियां जो देवक राजा ने दी थी उसका कारण यह था कि ससुराल में देवकी के मन उल्लास के लिये सखियां अवश्य चाहिये, नहीं तो वहाँ उदास रहेगी अतः उसके समान सुकुमार एवं अलंकृत दासियां भी दी। वे दासियां कन्या, देवकी को दी थी उनमें वसुदेव का कोई अधिकार नहीं था जिससे वसुदेव उन दासियों से कोई भी सेवा न ले सके। देवक ने देवकी के विवाह में ही इतना दहेज क्यों दिया? इस शङ्का का निवारण उससे '**देवक**' नाम से हो जाता है। देवक का अर्थ है '**ज्ञानवान्**' ज्ञानवान् होने से इसको पता था कि देवकी के गर्भ से भगवान् का प्राकट्य होगा, इस हेतु से विशेष दहेज दिया था। कन्या को जो दासियाँ दी थी उनके आने जाने की सवारी के लिये पालकियां भी दी थी। उनके लिये भी पालकियाँ क्यों दी? इस शङ्का के निवारण के लिये कहते हैं देवक '**दुहितृवत्सलः**' कन्याओं में प्रेमवाले थे, वे दासियां भी कन्याएँ ही थीं। अथवा देवकी के कहने से उनको पालकियां दी थी ॥ ३२ ॥

सम्माननामाह शङ्खेति।

इस निम्न श्लोक में प्रयाण समय में जो सम्मान से विदा किया उसका वर्णन करते हैं।

शङ्खो हि मुखवाद्यम्—शङ्ख मुख से बजाया जाता है तुरही और मृदङ्ग हाथ के बाजे हैं, दुन्दुभि डण्डों से बजाई जाती है। ये सब साथ में ही बजने लगे। ये क्यों और कब साथ में बजने लगे? जब वर और वधू के जाने का प्रारम्भ हुआ तब बजने प्रारम्भ हुए और मङ्गल सूचना देने के लिये बजने लगे। इनके बजने से यह मालूम हुआ कि शकुन अच्छे हैं, इसका फल उत्तम होगा॥ ३३॥

कालो ह्यत्र प्रतिबन्धका जात इति वक्तुं तस्याधिभौतिकः कालनेमिः कंसे निविष्टः शेत इति तत्प्रादुभावार्थं तदनुगुणदेवतायास्तदुत्कर्षमसहमानाया अकस्माद् वाक्य जातमित्याह पथीति।

अब इस श्लोक में काल की असहिष्णुता बताते हैं कि जब आनन्द मङ्गल के साथ वर वधू विदा हो रहे थे तब आनन्द युक्त प्रयाण के समय काल ने आनन्द में रुकावट डाली। कैसे रुकावट डाली? वहाँ कहते हैं कि काल के आधि भौतिक स्वरूप कालनेमि ने कंस में आकर निवास किया। वह काल, देवकी के उत्कर्ष को सहन नहीं कर सका अतः काल के अनुरूप देवता काल को प्रकट करने के लिये, अचानक रास्ते में आकाशवाणी हुई। जिससे कालनेमि के आवेश के प्रकट होने से कंस की बुद्धि विकारवाली होने लगी।

शोभातिशयो मध्येमार्गम्—मार्ग में अतिशय शोभा हो रही थी जिससे देवकी का भी उत्कर्ष प्रकट देखने में आरहा था, घर में पहुँच जाने के बाद होता तो ये दो तो उस समय नहीं होते। परन्तु आकाशवाणी को तो रंग में भङ्ग और हर्ष में दुःख पैदा करना था अतः वह आकाशवाणी मार्ग में ही हुई। इससे यह बताया कि भक्तिमार्ग और विवाह मङ्गल में यह आधिभौतिक काल बाधक होता है। आकाशवाणी लगाम पकड़े हुए-कंस को, सावधान करने के लिये प्रथम रे अबुध! कंस! संबोधन करती है, जब वह सावधान हो जाता है तब आवाज आती है वह आवाज तालु, होठ आदि के मिलाप से नहीं निकल रही थी, योंही वायु में मिश्रित होकर आरही थी इसलिये श्लोक में '**अशरीरवाक्**' पद दिया है जिसका अर्थ वह वाणी जो शरीर से न निकली हो। उस वाणी से सुनने में आया कि जिसको तूँ प्यार से पहुँचाने ले जारहा है उस देवकी का आठवां गर्भ तुझे नष्ट करेगा। इस प्रकार स्पष्ट कहने से यह बता दिया कि दासी आदि का गर्भ तुझे नष्ट नहीं करेगा। संख्या तो निश्चय बता दी किन्तु पुत्र व पुत्री यह स्पष्ट नहो कहा। यों भी न समझना, कि यह मेरी बहिन है और इसकी सन्तान भागीनेय भाञ्जा मुझे कैसे मारेगा, यदि यों समझ लिया तो तूँ सर्वथा अबुध हो अरे कंस। बुरा मत मानना कि मैं ऐसा स्पष्ट तुझे अबुध इसलिये कहती हूँ कि मैं तेरा हित करना चाहती हूँ॥ ३४॥

ततो यज्जातं तदाह इत्युक्त इति।

अब आकाशवाणी होने के अनन्तर जो कुछ हुआ उसका निरूपण करते हैं—

आकाशवाण्यास्त्वभिप्रायः सा—आकाशवाणी का इस प्रकार कहने का तो आशय था कि वाणी सुन कर राजा कंस देवकी जी को घर में रख लेंगे अथवा अन्य कोई दूसरा उपाय करेगा। किन्तु यह कंस दिग्विजयी था तथा स्वभाव से खल तो पूर्व से था ही और विशेष यह हुआ कि कंस में आधिभौतिक कालस्वरूप कालनेमि ने प्रवेश किया था, इससे वाणी सुनते ही हाथ में खड्ग उठाया और भगिनी को मारने के लिये मस्तक के केशों को पकड़ लिया। **ननु महत् पापम्**—केवल वाणी सुनने से इतना बड़ा भारी पाप करने के लिये कैसे तत्पर बना? तब कहते हैं कि वह निरन्तर पाप कर्म करता हो रहता था जिससे पाप का पुञ्ज बन गया था। इससे शास्त्रवचनों की भी उसने दरकार नहीं किया और खल होने के कारण उसको लोक भी नहीं रोक सके। इसी प्रकार बान्धव भी रोकने में असमर्थ थे कारण कि वह कुलकलङ्क था। अतः उसको अपने कुल की मानमर्यादा भी इस निन्दित लज्जास्पद कार्य से नहीं हटा सकी। बालों को कुछ भी करना नहीं था इसलिये कच शब्द सप्तमी विभक्ति में दिया है यदि बालों को कुछ करना होता तो सप्तमी विभक्ति न देकर दूसरी देते। उस कंस को तो बहिन को ही मारने के लिये काल ने तैयार किया था। देवकीजी भाग न जावे केवल इसलिये बाल पकड़ रखे थे।

वसुदेवस्तु शूरोऽप्यसहायः कंसबलं च जानातीति स्वतो दोषस्तस्य च न भवतीति निश्चित्य सान्त्वनार्थं प्रवृत्त इत्याह तमिति।

यदि शंका हो कि शूरवीर शौरि वसुदेव जी ने प्रतीकार क्यों न किया। तब कहते है कि यद्यपि वसुदेव शूरवीर थे और साथ में कंस का पराक्रम भी जानते थे, इसके सिवाय स्वयं उस समय शस्त्र तथा सेना आदि नहीं होने से असहाय थे। एवं यह भी समझते थे कि कंस का स्वतः दोष नहीं है जो कुछ कर रहा है वह कालप्रेरित है ऐसा निश्चय कर कंस को शान्त करने का ही उपाय करने लगे। यह बात इस श्लोक में कहते हैं—

नायं स्त्रीलोभेन तथा करोति—वसुदेवजी कंस की सान्त्वना स्त्रीलोभ से नहीं करते हैं कि देवकी मर जायगी तो मैं दुःखी हो जाऊंगा वा मेरी हानि होगी, किन्तु यह कंस का कर्तव्य अयोग्य है इससे वसुदेवजी के हृदय में दया उत्पन्न हुई कि कंस ऐसा पाप कर्म करेगा तो कंस का भारी अनिष्ट होगा और देवकी भी विना दोष मारी जाती है। इसी दया के कारण वसुदेव जी ने कंस को शान्त करने का निश्चय किया। भगिनी की हत्या से मेरी लोक में अपकीर्ति होगी तो मैं समाज में मुख ऊपर कर कैसे चलूंगा, इस प्रकार लज्जा आने से स्वयं यह कार्य न करेगा, यों समझ कर वसुदेवजी को चुप रहना चाहिये था। इस पर कहते हैं कि लज्जा उसको आती है जिसने कभी भी निन्दित कार्य न किया हो, यह कंस तो सदैव निन्दित कर्म करने वाला है। उसको कैसे लज्जा आवेगी ? यदि लज्जा से नहीं तो **'दयाया भगिनीमूर्तिः'** बहिन दया की मूर्ति है यों मानकर छोड़ देगा। इस पर कहा गया है कि वह कंस निर्दय है अतः उसको कभी दया नहीं आयेगी और देवकी को छोड़ेगा नहीं इसके सिवाय वसुदेवजी यह भी जानते थे कि कंस, दैत्यों में भी अधम दैत्य होने से निर्लज्ज है, इन सब विषयों का विचार कर वसुदेवजी ने सोचा कि इसकी उपेक्षा करनी अयोग्य है अतः किसी भी प्रकार समझौता करा के देवकी को छुड़ाना चाहिये, यह करने की वसुदेवजी में शक्ति थी क्योंकि उनके जन्म के समय देवों ने बड़े नगाड़े इसलिये बजाये थे कि यह महाभाग्यवान् हैं ॥ ३६ ॥

आकाशवाणी च श्रुत्वेयं च न मरिष्यतीति निश्चित्य कथञ्चित् प्रतीकारः कर्तव्य इति प्रतियुद्धादिकमकृत्वा कंसं परितः सान्त्वयन् तिष्ठ तिष्ठ मद्विज्ञापनां शृण्विति वदन्नाकाशवाण्याः समाधानार्थं वक्ष्यमाणमुवाच। आकाशवाण्युक्तं न मिथ्या। अयं च प्रतीकारार्थं यतते। तत्र क्रियया प्रतीकारो न भवति ज्ञानेनैव प्रतीकारो भवतीति नवभिः प्राणश्लोकस्तस्य सर्वं तत्त्वमुपदिशति श्लाघनीयेति।

वसुदेव जी सत्वनिष्ठ पुरुष होने के कारण ज्ञानवान् हैं उन्होंने आकाशवाणी सुनकर मन में निश्चय कर लिया कि श्री देवकी जी की मृत्यु होगी नहीं फिर भी व्यवहारानुसार इसका प्रतीकार करना चाहिये। परस्पर शस्त्रों से संग्राम न करके कंस को संपूर्णतया शान्त करने तथा आकाशवाणी के वचनों के समाधान करने के कारण कहने लगे कि, राजन् ! राजन् ! ठहरो ठहरो ! प्रथम मेरी प्रार्थना को सुन लो। वसुदेवजी ने समझ लिया था कि कंस को निश्चय हो गया है कि आकाशवाणी ने जो कहा है वह मिथ्या नहीं है अतः उसका प्रतीकार करने का वह प्रयत्न कर रहा है। अब शस्त्र व्यवहार से मेरा कार्य सिद्ध नहीं होगा अतः इस कार्य की सिद्धि ज्ञान रूप उपाय से ही होगी यों निश्चय कर नव श्लोकों में कंस को सर्वप्रकार से ज्ञान का तत्व जताकर शान्त करते हैं। नव श्लोकों से उपदेश करने का तात्पर्य भी यह है कि 'प्राण' नव हैं जिनकी रक्षा करनी है।

यथायं मृत्यौनिरभिमानस्तिष्ठेत्—आकाशवाणी सुनकर कंस को निश्चय हो गया कि इसके आठवें गर्भ से मेरी मृत्यु होगी। यदि मैं देवकी का ही नाश कर दूंगा तो मेरी मृत्यु नहीं होगी। इस प्रकार के मृत्यु का निश्चय कंस के हृदय से निकालने के लिये श्री वसुदेवजी प्रयत्न करने लगे। यदि श्री वसुदेवजी के कथन से कंस के मन से मृत्यु का भय अज्ञान जिसका मूल कारण वैसा देहाध्यास निकल जाता तो अक्लिष्टकर्मा भगवान् कंस को मारते नहीं। किन्तु यह वसुदेवजी का उपदेश, देवगुह्य, श्रीकृष्ण करके गुह्य है, जिससे कंस समझ न सका। न समझने के कारण उसका मृत्यु में वही अभिमान रहा, अतः उपदेश भी प्रतिबन्धक हो गया। वसुदेवजी का उपदेश देवगुह्य था उसका आशय यह भी था कि यदि देवकी मारी जायगी तो आकाशवाणी का कहना मिथ्या हो जायगा अतः देवकी की मृत्यु भी न हो और आकाशवाणी भी सत्य हो इसके लिये कोई दूसरा उपाय सोचना चाहिये। वसुदेवजी भी भगवान् की प्रेरणा से, उपदेश का अवसर एवं अपना अधिकार न होने पर भी करने लगे। कंस के कृत्यों को देखते हुए उसपर दया करने का अवसर नहीं था तो भी उसके हित के वसुदेवजी दया के कारण उसको उपदेश देने लगे।

हे कंस ! यह जो आप भगिनी-वध का कार्य कर रहे हो वह नव नव प्रकार के विचार से सिद्ध होता है कि नहीं करना उचित नहीं है।

१—बहिन का वध जैसा निन्दित कार्य महापुरुषों के योग्य नहीं है, एवं यह पाप कर्म मृत्यु से बचने का उपाय भी नहीं है।

२—मान लीजिए बहिन का वध मृत्यु से बच जाने का उपाय भी हो तो भी नहीं करना चाहिये कारण कि मृत्यु के अनन्तर, देह से जीव के चले जाने के पश्चात् यह देह मलरूप गिनी जाती है। जिसका कोई भी स्पर्श करना नहीं चाहता।

३—दूसरा शरीर मिलने में अथवा न मिलने में किसी प्रकार की दुर्लभता नहीं है।

४—पूर्व देह के त्याग में किसी प्रकार का प्रयास नहीं है।

५—तात्विकदृष्टि से चिन्तन किया जाय तो जीव का जन्म ही नहीं होता है। केवल देह के अध्यास से जीव समझता है कि मेरा जन्म हुआ है।

६—देह में जो अध्यास हुआ है वह अज्ञान से हुआ है। वह अज्ञान, ज्ञान से मिटाया जा सकता है।

७—कोई भी जब तक दूसरे से द्रोह नहीं करता है तब तक उसको कोई भय नहीं है।

८—यदि आकाशवाणी सत्य ही समझते हो तो इस प्रकार के द्रोह करने पर भी मुझसे व मेरे भीतर विराजमान प्रभु के द्वारा तेरी मृत्यु निश्चय होगी ही।

९—आपने अपने आपको बचाने के लिए जो उपाय सोचा है वह लोक तथा स्वभाव के विरुद्ध है।

इन उपदेशवाक्यों में पहला, आठवाँ और नववाँ ये तीन लौकिक दृष्टि से कहे गये हैं। शेष और छह उपदेश पारमार्थिक हैं।

अब उस प्रथम प्रारम्भ किये निन्दित कर्म भगिनी-वध को छोड़ने के लिए कंस को उपदेश देते हैं—

हे कंस! आप अल्प भी विचार करें तब अच्छा है क्योंकि जरासन्ध जैसे शूरवीर भी आपका यश गाते हैं कि आप महान् शूरवीर हैं। शूर तो युद्ध ही चाहते हैं। वे मृत्यु से नहीं डरते हैं। कायर ही मृत्यु का विचार करते हैं। अतः शूरवीर होने से आपको तो इसका पुत्र मुझे मारेगा। यह सुनकर शूरवीरता आनी चाहिए। शूरवीर तो संग्राम सुनकर उत्साहित होते हैं पर आप तो भयभीत बन गये हो। यह आपके लिये उचित नहीं है और बहिन का वध कर अपनी वीरता को नाश करना भी योग्य नहीं है। रण संग्राम में 'मरने वाले तथा मारने वाले' की मृत्यु दोनों की इच्छा के अनुकूल है किन्तु वैसी मृत्यु क्षत्रियों के लिए दुराप अर्थात् कष्ट से कभी मिलती है। आप तो क्षात्र धर्म को अच्छी तरह जानने वाले हो इस प्रकार आपकी प्रशंसा करते हैं और कहते हैं कि आप भोज के यश को फैलाने वाले हो तथा भोज वंश में आप जैसा शूर दूसरा कोई नहीं हुआ है। अतः आकाशवाणी सुनने मात्र से बहिन का वध करना उचित नहीं है। इसको छोड़ने से आपका धर्म और यश बढ़ेगा। ऐसे धर्म तथा यश वाले आप, दयापात्र भगिनी को कैसे मारोगे? अरे राजन्, बहिन के लिए मनुष्य अपना शरीर भी दे देते हैं। बहिन का विचार छोड़ा जाय तो भी आखिर में 'स्त्री' जाति तो है। शूरवीरों को स्त्री का वध करना अनुचित नहीं है। यदि आप समझो कि यह मेरी बहिन भी क्षत्रिय होने के कारण शूरता आने से मुझसे लड़े वा मुझे मार डाले? तब ऐसी शंका को मिटाने के लिए कहते हैं कि यह तो तब हो सकता है कि वे पुरुष प्रकृति की होती है लेकिन देवकी स्त्री प्रकृति वाली है। यदि आपको इसको मारना ही है तो भी अब विवाहोत्सव के समय में तो मत मारो पीछे मार देना। लौकिक राजा लोग जिसको मारना चाहते हैं उसको विषादि से मरवा देते हैं। इन कारणों से शौर्य आदि धर्म वाले आपको इसका वध करना योग्य नहीं है॥ ३७॥

किञ्च यदियं हन्यते तन् मृत्युप्रतीकारार्थं न तु वैरभावेन न च मृत्युरस्यां हतायां प्रतिकृतो भवति सहजत्वादित्याह मृत्युरिति।

अब बताते हैं कि मृत्यु तो काया से लगी ही है राजन् आप जब इस भगिनी को इसलिये मारते हो, कि मैं मरने से बच जाऊँ परन्तु बहिन से तो किसी प्रकार का बैर है नहीं जिसके लिये उसको मारते हो। तब आपको सोचना चाहिये कि इसको मारने से क्या आपकी मृत्यु टल जायँगी? यह तो कदापि नहीं होगा, कारण की मौत तो जन्म के साथ जन्म लेती है यह बात इस श्लोक में बताई है—

नापि विलम्बार्थम्—हे कंस! इसको मारने से तेरी मृत्यु जो अवश्य होने वाली है, वह टलेगी नहीं। इसका गर्भ या किसी दूसरे का गर्भ तुझे मारेगा तो अवश्य ही। यदि कहो कि मृत्यु टलेगी नहीं, किन्तु कुछ समय रुकने से उसमें विलम्ब तो होगी। इस पर कहते हैं कि विलम्ब तो यों भी है ही। यह देवकी तो तुझे नहीं मारती है तथा न मारेगी और मारने वाला इसका आठवाँ गर्भ भी अब जन्म नहीं लेता है। इसलिये विलम्ब के कारण मारना भी व्यर्थ है। अतः इसका बध करना तो आप को बच जाने का उपाय नहीं।

मृत्यु तो प्राणियों के जन्म के साथ जन्म लेती है, **'मृत्युनैवेदमावृतमासीत्'** ऐसा बृहदारण्यक के इस श्रुति में कहा गया है कि यह सब मृत्यु से घिरा हुआ था। भगवान् ने प्राणियों को उस मृत्यु से बाहिर निकाला और मृत्यु को प्राणियों की भीतर स्थापन किया, वह भीतर स्थित मृत्यु का रूप अशना क्षुधा है। यह क्षुधा रूप मृत्यु देह के साथ पैदा होती है इसलिये अशना या मृत्युरेव इस श्रुति में कहा है कि मृत्यु का रूप क्षुधा है। अतः प्राणियों को वह मृत्यु नित्य होती है। इसका प्रत्येक प्राणी को अनुभव है। जब भोजन नहीं मिलता है, भूख सताती है तो प्राणी के मुख से ये शब्द निकलते हैं कि मैं भूखों मरता हूँ जल्दी भोजन दो नहीं तो मेरे प्राण निकल जायेंगे। इससे निश्चय होता है कि आज या कल सौ वर्ष के अनन्तर मृत्यु तो होने वाली ही है। वसुदेवजी ने राजा कंस को हे वीर! ऐसा संबोधन देकर यह बताया कि आप तो शूरवीर है आप को भय नहीं करना चाहिये। सौ वर्ष के बाद भी तो मृत्यु सब मानते ही हैं। तब ही आकाशवाणी सत्य होगी। अतः इस प्रकार विचार पूर्वक समझ लेने से आपको इसका वध करना उचित नहीं है॥ ३८॥

न च देहत्यागे क्लेशो भविष्यतीति क्लेशनिवृत्त्यर्थमौषधपानवदस्या मारणमुचितमित्याह देह इति ।

यदि राजन् कंस ! यह भी नहीं समझना चाहिए कि देह के त्याग करने में जो दुःख होगा वह इसके वध से निवृत्त हो जायगा इसके लिये इसका वध मेरे दुःख निवृत्ति की औषधि जानकर यह कर्म करता हूँ । निम्न श्लोक से कंस को समझाते हैं कि देह त्याग में कोई क्लेश नहीं होता है ।

देहेपञ्चत्वमापन्ने—जब जीव इस देह के त्याग की तैयारी करता है तब देह के पाँचों तत्त्व पृथ्वी आदि पञ्चमहाभूतों में क्रमशः लीन होने लगते हैं । उसके पश्चात् देहाभिमानी जीव, कल्याणकारी नवीन दूसरी काया को पाकर पहिली मलरूप बनी हुई काया को त्याग देता है । पुरानी देह के त्याग तथा नयी देह के ग्रहण करने में जीव को परिश्रम नहीं करना पड़ता है । कारण कि जीव कर्म के अधीन है । कर्म जहाँ जीव को ले जाते हैं वहाँ उसको जाना ही पड़ता है । कर्म ही उसको पहिली देह छुड़ाता है और नवीन देह दिलाता है । जीव को परिश्रम करने की भी अपेक्षा नहीं है क्योंकि वह कर्म के अधीन है । '**अनुप्राप्य**' शब्द से यह बताया है कि इस एक देह को छोड़कर दूसरी लेने में काल का कुछ भी विलम्ब नहीं होता है । देह के त्याग तथा ग्रहण करने में परिश्रम न होने से, औषध लेने की तरह भी इसका वध करना अयोग्य है ॥ ३९ ॥

किञ्च देहान्तरप्राप्तौ विलम्बो भविष्यतीत्यपि न शङ्कनीयमित्याह व्रजन्निति ।

पहिली देह छोड़कर दूसरी देह की प्राप्ति में विलम्ब होगा, यह भी शङ्का मनमें नही लानी चाहिये । यह बात इस श्लोक में कहते हैं ।

यथा गच्छन् पुरुषः— जैसे पैदल जाने वाला मनुष्य प्रथम एक पैर से अगली भूमि पर स्थित होने के बाद, पीछे की भूमि से दूसरा पैर उठाता है, इससे यह सिद्ध हुआ कि पहले ठहरने का स्थान स्थिर कर पीछे आगे वाला स्थान छोड़ा जा सकता है, यों करने से ही चलने वाला मनुष्य चलने में सफल हो सकता है अन्यथा नहीं । विशेष समझाने के लिये दूसरा दृष्टान्त देते हैं जैसे तृण कीट घास के तिनके का कीड़ा दूसरे तिनके पर ठहरने के पश्चात् पहिले तृण का त्याग करता है यह प्रत्यक्ष सिद्ध है ।

जिस प्रकार इस लौकिक कार्य में प्रयत्न तथा बुद्धि की आवश्यकता है वैसे ही देह धारण करने में कर्म की गति की आवश्यकता है । अर्थात् जीव कुछ नहीं कर सकता है वह कर्म के वश है । कर्म अनुसार देह का त्याग तथा देव तिर्यग् आदि देह की प्राप्ति होती है ॥ ४० ॥

नन्वधिकप्रयासाभावेपि दृष्टान्तानुरोधेनाऽल्पप्रयासो भविष्यति सोपि शीघ्रं मा भवत्विति मारणमिति चेत्तत्राह स्वप्ने यथेति ।

यदि कंस कहे, कि अधिक प्रयास नहीं होगा किन्तु दृष्टान्त के अनुसार थोड़ा प्रयास तो होगा, वह भी जल्दी न हो इसलिए इसका वध करता हूँ । तो इसका उत्तर निम्न श्लोक से देते हैं ।

स्वप्न के समय देह के ग्रहण तथा परित्याग में अल्प भी प्रयास नहीं होता है और विलक्षणता भी कभी-कभी ही प्रतीत होती है, सदा नहीं होती है । स्वप्न की देह में इसलिए प्रयास नहीं होता है क्योंकि वह कर्म द्वारा प्राप्त नहीं की जाती है, बिना कर्म के ही मिलती है । इस पर कहते हैं कि वह भी यों ही नहीं देखने में आती है किन्तु उनके लिए एक प्रकार का कर्म करना पड़ता है । वह कर्म है 'मनोरथ' । जीव मनोरथ से जब जिस-जिस देह वा वस्तु की भावना करता है तब उस जीव की बुद्धि उस देह अथवा उससे भोग्य विषय का रूप बन जाती है । उस ज्ञान और कर्म से ही 'स्वप्न' आते हैं । जैसे दूसरे लोक देह की प्राप्ति में विद्या, ज्ञान तथा कर्म सहायक होते हैं । उनके द्वारा ही उसका प्रारम्भ होता है । वैसे ही स्वप्न में देहादि का आरम्भ भी ज्ञान एवम् कर्म से युक्त मनोरथ से ही होता है । इस प्रकार दोनों देहों की समानता है और इसलिए दोनों के स्वीकार एवं परित्याग में कोई प्रयास या परिश्रम नहीं है । यों भी आप नहीं कह सकते हो कि स्वप्न की देह में मनोरथ कारण नहीं है क्योंकि प्रत्यक्ष अथवा शास्त्र श्रवण द्वारा जो कुछ विषय मन में स्थित होते हैं उनका चिन्तन होता रहता है । जो दिन का चिन्तन किया जाता है वही प्रायः स्वप्न में देखने में आता है यह प्रत्येक का अनुभव है ही । कभी-कभी पूर्व जन्मों में संस्कारों का भी मनमें स्मरण हो आता है कि मैं राजा था वह इन्द्र था अथवा युद्ध में सिर कट गया वा किसी कर्म से फाँसी हुई वे संस्कार भी जागृत हो जाते हैं और उनका अनुभव भी स्वप्न में होता है । अतः स्वप्न में मनोरथ-रूप कर्म ही कारण है । यदि आप कहो कि पूर्व जन्म की स्मृति ही नहीं है तो ग्रहण और त्याग की सम्भावना कैसे होगी ? इस पर कहते हैं कि '**अपगतस्मृतिः**' जीव को देह सम्बन्धी स्मृति नहीं रहती है । 'स्वप्न' तो वह है जो पूर्व काल में कभी भी अनुभव किया गया है । अतः इसको अनिर्वचनीय कहा जाता है । मनमें पहिले मनोरथ पैदा होता है, उससे स्वप्न उत्पन्न होता है, इससे स्वप्न का कारण मनोरथ है । उस मनोरथ का कारण केवल दृष्ट या श्रुत है और वह स्वप्न निद्रा के समय

आने से, मनोरथ किये हुए विषय पूरी तरह से दिखने में नहीं आते हैं, कारण कि निद्रा भी माया का रूप है, उसमें आने से स्वप्न को भी मायिक कहते हैं ॥ ४१ ॥

किञ्च देहस्योत्पत्तिमरणे न त्वात्मनः । आत्मा तु तदध्यासाज्जायते म्रियते वा । तदाह यतो यत इति ।

'यतोयत:' इस श्लोक में कुछ और भी समझाते हैं । जैसा कि जीव न उत्पन्न होता है और न नष्ट होता है, उत्पत्ति तथा नाश देह का होता है, जीव का तो देह में अध्यास होने से अपना जन्म और मरण होना मान लेता है ।

अस्मिन् सिद्धान्ते मन एव—देहात्मवादिओं के इस सिद्धान्त में मन ही देह के ग्रहण तथा त्याग का कारण है । सङ्कल्प तथा विकल्प रूप, अनेक प्रकार के विकार रूप आत्मावाला मन है । उस मन को प्रेरणा करने वाला दैव है । काल कर्म और भगवदिच्छा प्रत्येक को दैव कहा जाता है । तीनों में से अधिकारानुसार किसी एक से प्रेरित होकर मन, माया से रचित विषयों में, मोह से जिन जिन विषयों को उत्तम समझता है उन २ विषयों में से किसी का त्यागकर, जिनको ग्रहण करना चाहता है उनमें आसक्त हो जाने से उनमें ही मन के साथ जीव जन्म लेता है अपने आप जन्म नहीं लेता है । मन जैसी भावना करता है वैसा ही शरीर बनता है और जिस भावको छोड़ देता है वह देह नष्ट हो जाती है । यद्यपि सब विषय समान हैं तो भी मन जिसको उत्तम समझता है वह उसके लिये उत्तम है वही विषय उस मन को प्राप्त होगा और वा वह मन उस विषय को ग्रहण करता है । आपके मन को यह देह उत्तम जची इसलिये उसने यह ग्रहण की है । अतः इस उत्तम देह की रक्षा के लिये इस देवकी का वध नहीं करना चाहिये ॥ ४२ ॥

एवं मनोऽनुसरणेन देहानुसरणमपि मोहादेव प्रतिबिम्बन्यायेन न त्वात्मानस्तथात्वमस्तीत्याह ज्योतिरिति ।

जीव जैसे मन के पीछे चलता है वैसे ही देह का भी अनुसरण मोह से करता है । वह अनुसरण आत्मा का नही है किन्तु वह प्रतिबिम्ब या परछाई के समान है । अर्थात् जैसे बिम्ब के चलने से ही प्रतिबिम्ब चलता है अपने आप नहीं चलता है वैसे ही जीव अपने आप जन्म आदि ग्रहण नहीं करता है मन के पीछे घसीटता जाता है । जीव का वास्तविक रीति से देहादि में कोई सम्बन्ध नही है । इस प्रकार उसका जन्म आदि होता है उसका प्रतिपादन इस श्लोक से करते हैं ।

जैसे आकाश में स्थित सुर्य वा चन्द्रमा का प्रतिबिम्ब नदी के जल में अथवा जल भरे हुए मिट्टी के पात्रों में पड़ता है, तब वायु से जल को हिलते देखकर अज्ञजन समझते हैं कि सूर्य वा चन्द्र हिलता है और न कि प्रतिबिम्ब हिलता है यों समझना अज्ञजनों की अज्ञानता है । केवल जल हिल रहा है पर उसके द्वारा भ्रम से समझा जाता है कि वे हिलते हैं । वैसे ही यहाँ अन्तःकरण, जल है और मृतिका का बर्तन, देह है मोह, वायु है उस मोहरूप वायु से अन्तःकरण चलायमान होकर देहादि द्वारा अनेक कार्यों में मन को आसक्त कराता है । यों तो जीव भगवद्रूप है किन्तु मोह के कारण मन का अनुगामी होने से देहादिकों में एकत्व को प्राप्त होता है अर्थात् मोह के तथा अज्ञान अथवा अध्यास के कारण अपने को देह इन्द्रियादि समझकर भ्रम में पड़ जाता है । अतः इससे समझना चाहिये कि देह का सम्बन्ध भ्रम से है अतः उस भ्रम के वशीभूत होकर आत्मा की हानि नहीं करनी चाहिये ॥ ४३ ॥

एवं तत्त्वं निरूप्य देहरागान्नात्मनोऽपकारः कर्तव्य इति यदुक्तं तल्लोकेपि तुल्यमिति वदन् मारणे भेदात्मकं भयं दर्शयति तस्मादिति ।

वसुदेवजी कंस को इस प्रकार तत्व समझाकर अब आगे के श्लोक में कहते हैं कि देह में प्रेम होने से आत्मा की बुराई नहीं करनी चाहिये लोक में भी, इस देह के कारण आत्मा की बुराई करने को अच्छा नहीं कहते हैं । यों कहते हुए वसुदेवजी अब देवकी के वध से भेदात्मक भय होना दिखाते हैं । अर्थात् वध तब किया जाता है जब जिसका वध किया जाता हो उसको अपने से पृथक् दूसरा समझा जावे । यह भेददृष्टि भयावह है तथा अपकार करने वाली है ।

यस्माद देहो नात्मा जब यह देह आत्मा नहीं है तब उस देह की रक्षा के लिए किसी से भी द्वेष-वैर नहीं करना चाहिये । अपनी देह भी वैसी ही है जैसी अन्य की नाश की जाने वाली देह है अतः उस देह को अपनी देह के समान समझकर उस पर दया ही करनी चाहिये । यों उपदेश करने का फल यह है कि जैसे अपनी रक्षा का विचार किया जाता है कि मेरा कोई भी वध न करे किसी प्रकार भी मैं वध से बच जाऊँ तो अच्छा है, इसी प्रकार दूसरों की रक्षा के लिये भी विचार करना चाहिये । जो मनुष्य दूसरे की रक्षा का विचार नहीं करता है तो उसमें जो बाधक बन कर आते हैं अब उनको बताते हैं । जब मनुष्य अपने रक्षण सुख को चाहता हुआ दूसरे की रक्षा का विचार करता है तो वह अपना भी क्षेम होगा यों विचार करता है अर्थात् दूसरे की रक्षा से मेरी भी रक्षा होगी । नहीं तो द्रोह करने वाले को दूसरे से भय होगा । अर्थात् वह भी इसका द्रोह करेगा अर्थात् उसको मारेगा । इसलिये यदि तुम इसका वध करोगे तो वह मेरा ही वध है कारण कि यह मेरी पत्नी होने से मेरा आधा भाग है अतः मुझसे तुझे भय होगा अर्थात् कभी भी मैं तुझे मार दूँ ॥ ४४ ॥

लौकिकव्यवहारेणापि मारणं नोचितमित्याहैषा तवानुजेति ।

लोक के व्यवहार से इसका वध करना योग्य नहीं है । इसका वर्णन नीचे बताये हुए श्लोक से करते हैं ।

लोके कनिष्ठभगिनी स्नेहपात्रम्—राजन् ! आप जानते हैं कि लोक में छोटी बहन तो पुत्री के समान स्नेह करने के योग्य है, उसमें भी वह आठ वर्ष की होने के कारण दुलार करने योग्य है तथा यह भय से व्याकुल है और इसमें कोई चातुर्य भी अभी तक नहीं आया है । अतः काष्ठ की पुतली जैसी अबोध है । अतः अपने को वध से छुड़ाने के लिये कुछ प्रार्थना भी नहीं कर सकती है । इसके सिवाय आप से छुड़ा के भाग जाय वह भी शक्ति वा युक्ति इसमें नहीं है और अभी तक विवाह के आभूषण शरीर पर होने से मङ्गल स्वरूप लक्ष्मी है । इसलिए ऐसी छोटी बहिन का वध करना योग्य नहीं है । इसको तो अब श्वसुरगृह ही लेजाकर छोड़ आना योग्य है कारण कि आप दीनों पर दया करने वाले हो वसुदेवजी इस समय कालनेमि का आवेश कंस में समझकर कहते हैं कि आप दीनों पर दया करने वाले हो ॥ ४५ ॥

एवं शास्त्रार्थनिरूपणेन दयाभयादिजननेपि न मारणान्निवृत्त इत्याहैवमिति ।

अब तक वसुदेवजी ने कंस को शास्त्रों का तत्व बताया और दया, भय आदि भी उस कंस में पैदा किया, किन्तु कंस ने मारने का निश्चय छोड़ा नहीं । यह बतलाते हैं—

वसुदेवजी नीति के ज्ञाता थे इसलिये उन्होंने साम और भेद से कंस को समझाया । प्रथम भेदनीति समझाया जिसको कहा कि आत्मा का स्वरूप यह है और अनात्मा, का स्वरूप यह है और पाप कर्म से परलोक नरकादि की प्राप्ति तथा लोक में अपकीर्ति होती है इत्यादि भय बताये । उसके पश्चात् साम नीति से समझाया जिसमें ज्ञान, समानता तथा दया का उपदेश दिया । ऐसे अनेक प्रकार से भेद और साम नीति द्वारा समझाने पर भी वह कठोर चित्तदैत्यात्मा इस वध के कार्य करने से रुका नहीं । कारण कि उसने राक्षसों के समान वध का व्रत धारण कर रखा था । कंस में कालनेमि आविष्ट था अतः उसके तुल्य यह भी करेगा ही ॥ ४६ ॥

एवं पूर्वप्रयास उपदेशात्मके विफले जाते पुनर्भगवदिच्छया प्रकारान्तरेण समाधानार्थं यत्नं कृतवानित्याह निर्बन्धमित्यष्टभिः ।

अयं लौकिको नालौकिकेन परमार्थेन निवर्ततेतोस्य लौकिक्येव युक्तिर्वक्तव्या । तस्माद्युक्तेः स्फूर्तिः प्रथममुच्यते । सा च । पुत्रदानात्मिका । तस्याश्चायुक्तत्वमाशङ्क्य युक्त्या युक्तत्वसमर्थनम् । ततः स्फुरितस्योपायस्यानुवादः सोपपत्तिकः । तस्यैव प्रतिकूलतर्कपराहत्या समर्थनम् । अशक्तावदृष्टशरणागतिः । तस्याप्युपायस्य ग्रहणार्थं साधनानुष्ठानम् । तत उद्योगः वचनश्चेति । अलौकिकस्फुरणात् तस्याङ्गीकारः । तेनायमुपाय आपाततः सफलः ।

इस प्रकार उपदेशरूप प्रथम प्रयास जब सफल न हुआ तब भगवान् की इच्छा से वसुदेवजी फिर अन्य प्रकार से समाधान करने के लिए प्रयत्न करने लगे । उसका वर्णन (निबंधं तस्य) श्लोक से आठ श्लोकों में करते हैं—

यह कार्य लौकिक है इसलिए पारमार्थिक एवं अलौकिक युक्तियों से इस कार्य को कंस छोड़ेगा नहीं अतः अब लौकिक युक्ति ही करनी चाहिये । वह युक्ति जिसके मनमें स्वतः स्फूर्ति हो आई प्रथम उसको कहते हैं । उसकी युक्ति यह थी कि, जो पुत्र उत्पन्न होगा वह तुझे उसी समय दे दूँगा । पुत्र दे देना अयोग्य देखने में आता है, किन्तु उसका समर्थन युक्ति से करते हैं कि पुत्र देना योग्य है फिर जो उपाय ध्यान में आया उसका उपपत्ति पूर्वक अनुवाद करेंगे । उसके बाद के श्लोक में प्रतिकूल तर्क देकर उसका खण्डन करते हुए प्रथम दी हुई युक्ति का समर्थन करेंगे । पाँचवें श्लोक में अशक्त होने पर अदृष्ट बलवान है उसके ऊपर भरोसा रखना चाहिये यों कहकर समझाया है । उस प्रारब्ध के उपाय को ग्रहण करने के लिये साधन छठे श्लोक में बताए गए हैं । सातवें श्लोक में उद्योग कहे हैं । आठवें श्लोक में वसुदेवजी के मनमें अलौकिक शक्ति की स्फुरणा से आये हुए वचनों की अङ्गीकृति का वर्णन है । तात्पर्य यह है कि वसुदेवजी का यह प्रयत्न भगवान की प्रेरणा से होने के कारण सफल हो गया ।

पूर्वोपायवैयर्थ्यमनुवदति निर्बन्धं तस्येति ।

इस श्लोक में प्रथम किये हुए उपाय की विफलता बताते हैं—

तस्य कंसस्य वधरूपं तं—वसुदेवजी ने, कंस की आवश्यक क्रिया साधन और प्रयत्न रूप चेष्टा से जान लिया कि यह देवकी का वध अवश्य करेगा ऐसा इसका आग्रह ही है, अब मुझे इसको बचाने के लिये क्या उपाय करना चाहिये । यह जो आगे कहा जायगा उसकी मन में स्फूर्ति हुई । इस कंस के साथ लौकिक व अलौकिक प्रकार से विरोध करना मेरी शक्ति से बाहर है । दूसरे उपाय कर चुका हूँ जो विफल हुए हैं । अब शेष दो उपाय हैं— (१) एक तो देवकी इसे देदूं अथवा (२) इसके जो पुत्र होंगे वे इसे देदूंगा । इस देवकी को देदूंगा तो कंस अवश्य इसका वध करेगा । क्योंकि आकाशवाणी के जो शब्द सुने गये हैं

उनमें यों तो नहीं कहा गया है कि वसुदेव से उत्पन्न हुआ, आठवां गर्भ तुझे मारेगा। किन्तु देवकी का वह गर्भ, देव द्वारा होने वाला समझकर, कंस इसको अवश्य मारेगा। अब तो वह स्वतः मारता है पीछे मारने में मैं भी दोषी ठहरूंगा। पुत्र देना भी योग्य नही, कारण कि वह आठवां पुत्र तो भगवद्रूप होगा। यह ज्ञान इन वसुदेवजी को इसलिये हुआ कि इनके जन्म के समय इस लिये आनक और दुन्दभि बजने रागे थे कि इनके यहां भगवान् का प्राकट्य अवश्य होगा और वह भी देवकीजी से, न कि दूसरी स्त्री से, देवकीजी से ही होगा उसमें आकाशवाणी प्रमाण है। इस प्रकार विचार करते हुए वसुदेवजी संकट में थे कि क्या करना चाहिये ? वसुदेवजी को यह निश्चय हो गया कि, मेरे द्वारा इस देवकी से ही आठवां गर्भ भगवान् होगा। वह दूंगा ऐसा कहने से मैं भगवद्विमुख होता हूँ जिससे भगवान् अवतार ही न लेवें तो विशेष आपदा होंगी, यों विचार करते हुए अचानक मन में यह युक्ति, जो पीछे कही जायगी स्फुरित हुई कि अभी तो इस अवसर को टालने के लिये कह दूं कि पुत्र होंगे वे आपको दे दूंगा। जब उनसे ही आपको भय है तो देवकी का वध क्यों करते हो। यद्यपि पुत्र दे दूंगा यह कहना भी योग्य नहीं है तो भी इस समय अयोग्य भी बोलकर मृत्यु को तो टाल ही देना चाहिये ॥ ४७ ॥

ननु 'प्रक्षालनाद्धि पङ्कस्ये' त्यादिन्यायेनेदानीमेव कथ न तूष्णीम्भावस्तत्राह मृत्युर्बुद्धिमतापोह्य इति।

'कीचड़ में पर डालकर पीछे उसको धोना' यो करने से पहले ही शान्ति क्यों नहीं की, इस पर कहते हैं कि बुद्धिमान् को मृत्यु किसी भी प्रकार टालनी चाहिये, यह वर्णन निम्न श्लोक में करते हैं।

यदि मनुष्य होकर भी मृत्यु को टालने का प्रयत्न हम नहीं करते हैं तो भगवान् ने हम मनुष्यों को पशु आदिकों से जो विशेष बुद्धिमान् बनाया है वह किस लिये बनाया है। अतः बुद्धिमान् मनुष्य को चाहिये कि अपनी अथवा दूसरे की मृत्यु को प्रयत्न कर टाल दे। एक बार यत्न करने पर मृत्यु नहीं टली, तो फिर हम क्या करें ? इस पर कहते हैं कि नहीं, एक बार प्रयत्न कर रुक न जाओ, लेकिन जहाँ तक बुद्धि का बल चले वहाँ तक प्रयत्न करते रहो। बुद्धिमान् को क्रिया से तथा बुद्धि से प्रयत्न करते रहना ही योग्य है। जैसे पहला प्रयत्न विफल हुआ वैसे आगे के प्रयत्न भी विफल होंगे तो बार बार उद्यम करने से क्या लाभ ? इस पर कहते हैं कि यदि बार बार उद्यम करने पर भी मृत्यु नहीं टली तो लोग इस मनुष्य के लिये यों नहीं कहेंगे कि उसने उपेक्षा कर इसको मृत्यु से नहीं बचाया, परन्तु यही कहेंगे कि इसने तो भरसक प्रयत्न किया इसका कोई दोष नहीं है। शास्त्र तो कहते हैं कि जितना बन सके उतना प्रयत्न करो। फल तो दैव के अधीन है। देहाभिमानी तो काल के दण्ड के योग्य होता ही है। वसुदेवजी ने इस प्रकार विचार कर, यह उपाय करना चाहिये ऐसा निर्णय किया ॥ ४८ ॥

तमुपायमाह प्रत्यर्प्यति।

इस श्लोक में यह उपाय बताते हैं—

मृत्युरयं कंसे निविष्टः—विश्वास किया जाता है कि मृत्यु कंस में प्रवेश हो गयी है, मृत्यु तो सबको खा जायगी, और वह मृत्यु टाली नहीं जा सकती है वह तो कभी न कभी पुत्रों को खायगी ही। इसने मुझे अब देवकी दी, तो मैं समझूंगा कि पुत्र भी दे दिये। अतः जो देता है उसको फिर लौटा देने में कोई दोष नहीं हैं। यों करने से पुत्र दूंगा ऐसा कहने मात्र से इस दीन देवकी को अब छुडालूं। इस तरह का कार्य करने में ही विशेष लाभ है। यदि इसको नहीं छुडाता हूँ तो, न यह रहेगी और न पुत्र होंगे। इस प्रकार करना भी अनुचित है, क्योंकि यदि इसको छुडाऊंगा तो यह एक बचेगी और पुत्र बहुत देने पड़ेंगे तथा वे मेरे अपने अन्तरङ्ग अंग है, उनको देना विशेष दोष है। और पुत्रों का अर्पण करना भी कठिन है तथा अब तो पुत्र नहीं है। विद्यमान और अविद्यमान दोनों को समान समझ कर विषय का निर्णय कर लेना भी असङ्गत है अर्थात् जो पदार्थ मौजूद नहीं है उसका अस्तित्व मानकर वह दूंगा यह कहना भी योग्य नहीं है। ऐसा करने से धर्म की हानि का प्रसङ्ग उपस्थित होगा तथा लोक में अपकीर्ति भी होगी। कारण की यदि पुत्र हुए उस समय मोह के कारण न दे सका तो प्रतिज्ञा लोप होने से अधर्म लगेगा अथवा पुत्र नहीं हुआ तो देने की प्रतिज्ञा की पूर्ति न होने से भी अधर्म होगा जिससे लोक में अपकीर्ति होगी। अतः यह भी उपाय ठीक नहीं है। इसके उत्तर में दो प्रकार की युक्ति १—'लौकिकी, २—अलौकिकी' देकर कहते हैं कि १—लौकिकी—जो मुझे बहुत 'सुत' पैदा होवें तो अर्पण करदूं कारण कि वे सुत तो केवल पैदा होते हैं और पिता के जीवित होते ही मर जाते हैं अतः वे पिंडादिदान न देने से नरक से नहीं बचाते हैं जिससे वे पुत्र नहीं कहे जाते हैं केवल उत्पन्न होने से 'सुत' कहे जाते हैं उनको देने में मन भी निषेध नहीं करेगा। अथवा पुत्र पैदा करना तो अपने आधीन है कैसे कि इस देवकी को अपने से अलग रखलूंगा। यों करने से कोई दोष नहीं लगेगा। दोष तो लगेगा क्योंकि शास्त्र कहता है कि ऋतु के समय पति को स्त्री के पास जाना चाहिये यह शास्त्राज्ञा का न मानना भी दोष है इसका समाधान करते हुए कहते हैं कि ऋतु काल में जाने से प्राण रक्षा करना विशेष धर्म है। कह तो देते हो किन्तु यह भी करना कठिन है कारण कि एक तो शास्त्र की आज्ञा न मानना और दूसरा काम को रोकना दोनों को मनुष्य कर नहीं सकता है। एक पुत्र हो तो वह पिता पुत्रवान् नहीं अतः जब दो पुत्र हो जावें तब

पिता पुत्रवान् माना जाता है उसके पश्चात् यदि स्त्री के पास न जावे तो दोष नहीं है। इस प्रकार लौकिक युक्ति कही, अब अलौकिक युक्ति देते हैं—

भगवान् की इच्छा से और आकाशवाणी की प्रामाणिकता से, जो मेरे यहां बहुत सुत होंगे तो भी उसमें विशेष समय लगेगा। इतने समय में यदि भगवान् की इच्छा होगी तो मृत्युरूप कंस ही मर जावे। श्रुति में कहा है कि प्राणिमात्र को नित्य मृत्यु लेने आती है उसको टालना प्राणी मात्र का कर्त्तव्य है। जहाँ २ से भी मृत्यु आवे वहाँ २ से उसको रोकने का प्रयत्न करना चाहिये। प्रकृति का नियम है कि जो उत्पन्न होता है उसका नाश भी होता है। प्रकृति के इस नियमानुसार उत्पन्न होने वाली मृत्यु भी उपाय करने से नाश होती है। अब आई हुई मृत्यु का प्रतीकार से नाश किया जाय। फिर दूसरी बार आयगी तो दूसरा उपाय किया जायगा। एक पक्ष है कि मृत्यु एक है वह मृत्यु एक बार आती है और नियत समय पर आती है कारण कि वह अपने आने के काल के सिवाय दूसरे काल में नहीं आती है, अतः फिर काल के अभाव में नहीं आवेगी। तात्पर्य यह है कि जिस काल में मृत्यु होने वाली हो उस समय में वह न मरे, मृत्यु से छूट जाय तो समझना चाहिये कि उसके लिये मृत्यु की मृत्यु हो गई अर्थात् मृत्यु टल गई। इस कारण से जैसे शब्द नित्य है तो भी वह अभिव्यक्ति करने वाले वायु के समय निकल जाने से सुनाई नहीं देता है वैसे ही देवकी की मृत्यु भी समय निकल जाने पर अपना कार्य नहीं कर सकेगी अर्थात् देवकी को नहीं मार सकेगी।

(मृत्यु एक है) उसकी मृत्यु होती है ऐसा कहीं भी सुनने में नहीं आया है। श्रुति कहती है कि, मनुष्य जहां से भी मृत्यु आती है वहां से वह उसको हटा देता है, अतः मृत्यु मनुष्य के पास सब स्थानों में पहुँच नहीं सकती है। इस श्लोक में कहा है कि **मृत्युवान् म्रियेत चेत्** जो मृत्यु न मरे तो, अर्थात् देवकी की मृत्यु न टल सके तो पुत्र देने ही योग्य है क्योंकि मृत्यु तो निश्चित ही है। कंस मृत्यु है वह मर जाय, ऐसा अर्थ करना (**अत्रात्र वै मृत्युर्जायत**) इस श्रुति के विरुद्ध है। आचार्य श्री कहते हैं कि कंस तो मृत्यु का अधिकरण यदि लक्षणा से कंस की मृत्यु माना जाय तो भी मृत्यु मरती नहीं है इसलिये वैसा अनुवाद करना व्यर्थ है। वैसा अनुवाद कंस मृत्यु है वह मरजाय मान भी लिया जाय तो भी आकाशवाणी के वचन प्रमाण होने से कंस मरेगा नहीं क्योंकि उसको देवकी का आठवां गर्भ मारेगा। अतः मृत्यु का अर्थ कंस करना सर्व प्रकार से विरुद्ध है। जब यो है तो मैं दूंगा ॥ ४९ ॥

ननु कथमेवमयुक्तं कर्तुं शक्यते तत्राह विपर्ययो वा किं न स्यादिति ।

पुत्रदान, पुत्र को मारने के लिये कंस को देने जैसा अयोग्य कार्य वसुदेवजी कैसे करते हैं ? इसके उत्तर में निम्न श्लोक कहते हैं—कि—

वाणीप्रामाण्यात् चेत् आकाशवाणी के कहने के अनुसार कंस का तो जब तक इसका मारने वाला आठवां गर्भ उत्पन्न न हो तब तक मरण होगा नहीं अतः इससे विपरीत कार्य ही क्यों न हो जाय ? अर्थात् मेरे पुत्र से कंस का वध क्यों न हो जाय। यह वसुदेवजी का कहना युक्तिविरुद्ध है कारण कि कंस जैसे शूर को उनका पुत्र बालक होने से कैसे मार सकेगा ? इस पर कहते हैं भगवान् की गति को कोई नहीं जान सकता है। किस प्रकार वह उत्पत्ति, स्थिति, और प्रलय करता है उसका ज्ञान किसी को नहीं है कितने भी प्रयत्न करने पर उसका पता लगाना कठिन है। किसी भी लौकिक युक्ति से यह नहीं जाना जा सकता है कि भगवान् किसको मरवाना चाहता है और किसको उसका मारने वाला बनाना चाहता है। अतः शास्त्रों में कहा है कि **अलौकिकस्तु ये भावास्तांस्तर्कण योजयेत्** अलौकिक भावों को तर्कों की सहायता से समझने का प्रयत्न नहीं करना चाहिये। क्योंकि वे तर्क से नहीं समझे जा सकते हैं। इस कारण से पुत्र दूंगा यों कह कर अब इस देवकी की रक्षा की जाय। पीछे इसके पुत्रों द्वारा वह मारा जायगा। इसलिये यों करना योग्य है। इससे आई हुई इसकी मृत्यु टल जायगी। इसके मारने से छूटी हुई मृत्यु फिर इसकी रक्षा करने वाली हो जाय और कंस की घातक बन जाय। इस विचार से भी यह देवकी रक्षा के योग्य है।

श्रीधर स्वामी का कहना है कि श्लोक के पूर्वार्द्ध में **गतिर्धातुर्दुरत्यया** जो कहा है वाक्य का विवरण उत्तरार्ध में किया गया है। आचार्यश्री इस विचार से सम्मत नहीं है।

आचार्यश्री इस उत्तरार्द्ध का सम्बन्ध **नापराधोऽस्ति देहिनः** इस ४८ वें श्लोक से बताते हुए कहते हैं कि—जो पुत्र देने का विचार छोड़ा जाय तो जो देवकी की मृत्यु थोड़े समय के लिये भी टाली जाती है वह नहीं टलेगी अतः पुत्र देने का कहकर इसकी मृत्यु अब टाली जाय यदि पुनः आजायगी तो—४८ वें श्लोक में कहे हुए के अनुसार देही का कोई अपराध नहीं है अर्थात् फिर मैं अपराधी नहीं बनूंगा ॥ ५० ॥

ननु यद्यपि परमार्थोयं तथापि लोकविरुद्धं न कर्तव्यं पुत्रदा मनुचितमिति चेत्तत्राहाग्नेरिति ।

जोकि यह विचार पुत्र देने का कह कर देवकी को बचा लेना उत्तम है, तो भी लोक के विरुद्ध है और पुत्र देना भी उचित नहीं है अतः यह नहीं करना चाहिये। इसके उत्तर में नीचे का श्लोक कहते हैं कि—

में कंस को पुत्र दूंगा इससे ही वह मरेगा, यों नहीं है क्योंकि यदि पुत्र के भाग्य में कंस के हाथ से मरना लिखा होगा तो मरेगा ही। नहीं लिखा होगा तो वह इसको मार नहीं सकेगा। इस कथन का दृष्टान्त देकर समर्थन करते हैं कि, जैसे दावाग्नि जंगल में स्वतः लगी हुई अग्नि पास के पेड़ों को तो नहीं जलाती है किन्तु दूर खड़े हुए वृक्षों को भस्म कर देती है, कारण कि जिनके भाग्य में जलना लिखा था वे जल गये जिनके भाग्य में जलना नहीं लिखा था वे बच गये। यह सब अदृष्ट का खेल है जिसका जैसा अदृष्ट हो उसको वैसा ही फल मिलता है। इसी प्रकार पुत्र आदि के जन्म तथा मरण में अदृष्ट ही कारण है। श्लोक में हि शब्द से बताया है कि अदृष्ट ही कारण है ऐसा कहना योग्य ही है। अदृष्ट ही कारण है, इसका प्रत्यक्ष अनुभव भरतादिकों के चरित्र से किया हुआ है जैसा कि भरत ने हरिक्षेत्र में मरण समय में पाले हुए हरिण को देख उसका ही ध्यान रहने से शरीर त्यागा था जिससे वह कालिञ्जर में हरिण हुआ। कालिञ्जर में जन्म और हरिण देह प्राप्ति ये दोनों क्या दृष्ट कारण से प्राप्त हुए ? नहीं, इन दोनों का कारण पूर्व जन्म में किया हुआ कर्म, जिसको भाग्य, अदृष्ट वा प्रारब्ध कहते हैं, वह है। जीवका जन्म सर्वत्र होता है। वहाँ जन्म क्यों हुआ ? इसका कोई प्रत्यक्ष प्रमाण दिखने में नहीं आता है। अतः उसके जन्म तथा मरण का क्या कारण है उसका पता लगाना कठिन है। इसलिये प्रारब्ध के वश पीछे, जो होने वाला होगा, वह भले हो, अब तो इसको छुड़ाना ही योग्य है ॥ ५० ॥

निर्धारितमित्याहैवं विमृश्येति ।

वसुदेवजी न यह विचार कर जो कुछ करने का निर्णय किया उसको श्री शुकदेवजी निम्न श्लोक में कहते हैं— कि

वसुदेवजी ने यही विचार स्थिर किया कि देवकी को बचाना मेरा कर्त्तव्य है। किन्तु यह तब सफल होगा जब कंस मेरी प्रार्थना स्वीकार करे। इसकी सफलता होनी तो कठिन दिखने में आती है। क्योंकि एक तो यह प्रसिद्ध दिग्विजयी है जिससे इसमें अहङ्कार भी है और दूसरा पापी भी है जो बहिन को मारने से नहीं डरता है। अतः इसको शान्त कर अपनी प्रार्थना स्वीकार कराने के लिये वसुदेवजी विशेष प्रयत्न करने लगे। उस प्रयत्न को कहते हैं कि—उसकी पूजा करने लगे। पूजा करना यह अलौकिक उपाय है कारण कि पूजा में अपने हृदय में स्थित भाव को जिसका पूजन किया जाता है उसमें स्थापित करना पड़ता है तब उस पूजा से कार्य सफल होता है। इतना बड़ा प्रयत्न क्यों किया ? इस पर कहते हैं कि कार्य की सिद्धि कराने के लिये, मनुष्य को चाहिये कि जहाँ तक अपनी बुद्धि से उपाय हो सके वहाँ तक उपाय करते रहना चाहिये। वह उपाय दृष्ट तथा अदृष्ट कारण को जानने में असमर्थ हो तब तक करना ही चाहिये। प्रथम अदृष्ट का अलौकिक उपाय पूजन किया। पूजन से कार्य-सिद्धि अवश्य होगी ऐसा समझकर पूजन किया इसलिये श्लोक में "वै" शब्द दिया है जिसका अर्थ है 'निश्चय से'। वह पूजा भी साधारण रीति से नहीं की थी किन्तु अत्यन्त मान के साथ पूजन किया जैसे कि अपने देवता को कंस में स्थापित करने के पश्चात् देववत् उसका पूजन किया। यह पूजा स्तोत्र तथा नमस्कार एवं नम्रता से भाव पूर्वक की गई थी। इसी प्रकार की पूजा का ज्ञान वसुदेवजी ने कहाँ से प्राप्त किया था ? इसके उत्तर में कहते हैं कि 'शौरि' वसुदेवजी शूरसेन के पुत्र हैं अतः यह ज्ञान उनको पिता से प्राप्त हुआ था ॥ ५२ ॥

पूजयित्वा विज्ञापनां कृतवानित्याह प्रसार्येति ।

पूजा करने के अनन्तर प्रार्थना करने लगे उसका वर्णन निम्न श्लोक में करते हैं—

वसुदेवजी ने अपने मुख कमल को इसलिये प्रफुल्लित किया कि जिससे कंस समझ जावे कि वसुदेवजी मुझे धोखा नहीं देते हैं और मेरा हित ही करते हैं। वसुदेवजी ने अपन इष्ट देवता को कंस में स्थापित तो कर दिया परन्तु मन में सन्देह रह गया था कि इस दुष्ट में मेरे देवता विराजेंगे वा निकल आवेंगे। इस कारण से वे वसुदेवजी दुःखित मन वाले थे, तो भी उस दुःख को छिपाने के लिये अच्छे प्रकार से हँसते हुए यह वक्ष्यमाण वचन कहने लगे। वसुदेवजी ने अपने देवता को जिस अधिष्ठान कंस में स्थापित किया था उसमें मुख्य दो दोष थे जिससे उसमें देवता का विराजना जचता नहीं। वे दो दोष क्रोध तथा काम के कारण रूप 'निर्दयता' और 'निर्लज्जता' है। जो काम के सेवक अर्थात् कामी होते हैं वे निर्लज्ज होते हैं और निर्भय भी होते हैं। तथा जो निर्दयी होते हैं वे क्रूर एवं तामस क्रोध वाले भी होते हैं ॥ ५३ ॥

आत्मीयतया त गृहीत्वा हितमिवाह न चास्यास्त इति ।

कंस को अपनापन दिखाते हुए मानो उसके हित की बात कह रहे हों, इस प्रकार वसुदेवजी निम्न श्लोक में कहते हैं–

इससे अथवा मुझसे भी आपको भय नहीं है। क्योंकि आकाशवाणी ने स्पष्ट कहा है कि इसका आठवां गर्भ तुझे मारेगा। जब वाणी ने यों कहा है तब इस बिना अपराध वाली का वध क्यों करते हो, ऐसा नहीं करना चाहिये। आप सौम्य बनो और मेरी प्रार्थना स्वीकार करो। जिनसे आप को भय है मैं उन पुत्रों को आपको समर्पित करूंगा। वे आपके पुत्र हो जायेंगे आपके होने पर आपको नहीं मारेंगे। मैं कपट से नहीं कहता हूँ किन्तु आपके हित के लिये कह रहा हूँ और वाणी ने तो आपकी

मृत्यु केवल आठवें गर्भ से कही है मैं तो इतना निष्कपट होकर आपका भला चाहता हूँ जो भी पुत्र होंगे वे आपको दूंगा। क्योंकि आप मेरे सम्बन्धी हो, सम्बन्धी का हित करना सम्बन्धी का कर्त्तव्य है ॥ ५४ ॥

एवं दृष्टादृष्टोपायस्य कृतत्वादङ्गीकृतवानित्याह सुहृद्वधादिति ।

इस प्रकार दृष्ट एवं अदृष्ट उपाय करने से कंस ने वसुदेवजी का कहना स्वीकार किया, जिसका वर्णन निम्न श्लोक में श्री शुकदेवजी करते हैं—

विवेक उत्पन्ने विचारप्रवणं चित्तम्—वसुदेवजी के उपदेशों को सुनकर कंस के मन में विवेक विचार शक्ति जिससे क्या करना और क्या नहीं करना इसके तत्त्व को जान लेना उत्पन्न हुआ जिससे उस कंस को यह ज्ञान हुआ कि यह बहिन है इसका वध कैसे किया जाय। यों समझकर बहिन के वध से हट गया।

कंस के मन में इस प्रकार की शङ्का ही उत्पन्न न हुई कि वसुदेवजी मुझे धोखा देते हैं, क्योंकि उसने वसुदेवजी के वचनों का सार समझलिया जिससे उसने जाना कि यह जो कहते हैं वह सत्य है और उसको यह भी पता था कि वसुदेवजी सत्यवक्ता होने के कारण ही वसुदेवजी के यहां भगवान् प्रकट हुए। तदनन्तर कंस ने दोनों बहिन तथा बहिनोई को घर पहुँचाने के लिये रथ को चलाया। रथ को चलाते देखकर वसुदेवजी ने भी समझ लिया कि कंस के मन से अब वह कालापन निकल गया है जिससे प्रसन्न होकर मार्ग में तब तक कंस की प्रशंसा करने लगे जब तक घर में प्रवेश किया। इस प्रकार वसुदेवजी ने अनर्थ को कैसे भी शान्त करा दिया ॥ ५५ ॥

एतद्भगवतैव कृतमिति वक्तुमग्रिमं कार्यं समीचीनमेव जातमित्याह षड्भिरथेति।

यह कार्य वसुदेवजी के कहने से कंस का देवकी के वध से हट जाना भगवान् ने ही किया। यों कहने के लिये कहते हैं कि आगे का कार्य बिना विघ्न के श्रेष्ठ प्रकार से होगा। इसका वर्णन छः श्लोकों से करते हैं।

इसके अनन्तर शीघ्र ही ऋतुकाल आया जिससे देवकीजी गर्भ को धारण करने के योग्य हो गई। ऐसे समय होने पर उसने आठ ही वर्षों में आठ पुत्र उत्पन्न किये तथा उनको कन्या होने की आसक्ति थी। अथः एक कन्या को भी जन्म दिया। प्रति वर्ष एक-एक पुत्र हुए। वे सब पूर्ण गर्भ थे अर्थात् पूरे दिन होने पर जन्मे थे। किसी बालक के उत्पन्न होने में किसी प्रकार का विघ्न नहीं हुआ। कारण कि देवकीजी में सर्व देवता विराजमान थे। वे जहाँ रक्षक होवें वहाँ विघ्न कैसे आवेंगे आठ पुत्र हो गये अनन्तर आसक्ति के कारण नवमी कन्या भी हुई। श्लोक में आये हुए 'च' शब्द का यह आशय है और प्रसव में कोई वर्ष खाली नहीं रहा। यह 'अनु' उपसर्ग से जाना जाता है। प्रकाशकार दशदिगन्तविजयी श्रीपुरुषोत्तमजी कहते हैं कि श्लोक में आये हुए पहले 'च' का आशय है देवकी को कन्या उत्पन्न हो, ऐसी इच्छा हुई। दूसरे 'च' का आशय है नवमी कन्या हुई और 'तज्ज्ञापकत्व' का आशय है कि वह कन्या सुभद्रा थी ॥ ५६ ॥

यथंतथा पुत्राः प्रसूतास्तथा वसुदेवोपि स्वोक्तं कृतवानित्याह कीर्तिमन्तमिति।

ज्यों-ज्यों देवकीजी ने पुत्र उत्पन्न किये, त्यों-त्यों वसुदेवजी भी अपनी प्रतिज्ञानुसार कंस को पुत्र अर्पण करने का कार्य करने लगे। उसका निम्न श्लोक में वर्णन करते हैं—

वसुदेवजी ने अपने धर्म में श्रद्धा तथा स्थिरता बताते हुए पहला उत्पन्न हुआ कीर्तिमान पुत्र, जो ज्येष्ठ और महान् होने के कारण, कोई भी नहीं दे सकता है उसको भी दे दिया। श्लोक में कंस नाम देने का आशय यह है कि वह क्रूर स्वभाव वाला है और आनक दुन्दुभि नाम देकर यह बताया गया है कि यह नाम प्रतिज्ञापालन रूप सत्यधर्म का कारण है। पुत्र को दूसरे के द्वारा कंस के पास न भेजकर स्वयं वसुदेवजी ने ले जाकर अर्पण किया। उस समय वसुदेवजी के मनमें स्वाभाविक कष्ट तो हुआ किन्तु कष्ट से उस शोक को मन में ही दबा दिया। यह श्लोक में आये हुए 'कृच्छ्रेण' पद का भाव हैं।

जैसे असत्य बोलना अधर्म है। अतः वैसे ही मृत्यु के लिए पुत्र का देना भी अधर्म है। ऐसी अवस्था में प्राणों पर जब सङ्कट आता हो तो झूठ बोल देना निन्दित नहीं है, इस विचार से पुत्र को न देना ही ठीक था। इसके उत्तर में कहा गया है कि 'अनृतात् अतिविह्वलः' मैं असत्यवादी न बन जाऊँ, इस भय से वसुदेवजी बहुत व्याकुल थे। कारण कि उन वसुदेवजी के जन्म के समय देवों ने इसलिए बड़े नगारे और नौबत बजाई थी कि वे सत्यवादी हैं। अतः इनके यहाँ भगवान् प्रगट होंगे। वसुदेवजी को तो पुत्र से भी सत्य की ही रक्षा विशेष अच्छी लगी क्योंकि वह सत्य भगवत् प्राकट्य कराने वाला है। पुत्रों का तो केवल देह से सम्बन्ध है और सत्य का भगवान् से सम्बन्ध है। जब वैसा है तो सत्य की ही रक्षा करना योग्य है। यदि अनृत कहूँगा तो भगवान् का प्राकट्य हमारे यहाँ नहीं होगा। इससे विह्वल थे ॥ ५७ ॥

ननु पुत्रसमर्पणं दृष्टं सत्यमदृष्टं कथं दृष्टादृष्टयोर्बाध्यबाधकभाव इति चेत्तत्राह किं दुस्सहमिति।

पुत्र का समर्पण दृष्ट है तात्पर्य कि इस समर्पण से जो फलरूप जो पुत्र की मृत्यु होने वाली है वह तो प्रत्यक्ष देखने में आता है और सत्य अदृष्ट है अर्थात् सत्य की रक्षा के लिए पुत्र दे देने से जो उस सत्य का फल होगा वह अदृष्ट अर्थात् देखने में नहीं आता है कि क्या होगा ? इस शङ्का निवारण के लिये निम्न श्लोक कहते हैं :—

पुत्रस्यादाने किं मोहो हेतुः – पुत्र कंस को न दिया जाय। इस विचार के करने में लौकिक मोह कारण है अथवा शास्त्र कारण है। पहला कारण जो मोह है उसमें जो दूषण आते हैं उनका वर्णन करते हैं। साधु पुरुषों के लिए शत्रु, मित्र तथा उदासीन सब समान हैं। अतः उनको सब कुछ सहन करने में किसी प्रकार का कष्ट नहीं होता है। वे जैसे लौकिक मनुष्य शत्रु का त्याग कर सकते हैं, उसके लिये उनको कोई कष्ट नहीं होता है। वैसी ही सत्पुरुषों को पुत्र आदि के त्याग में भी कोई कष्ट नहीं होता है। कारण कि वे समदृष्टि वाले होते हैं, उनमें मोह का अभाव हो जाता है। इसलिए सत्पुरुष होने के कारण वसुदेवजी ने पुत्र का त्याग कर दिया। वसुदेवजी के लिए जैसा पुत्र है वैसा ही कंस है। अतः कंस का घात करने वाला पुत्र नहीं बचाना चाहिए। इसलिए पुत्र दे देना योग्य है।

यदि पुत्र दोगे तो जो शास्त्रानुसार पिता को पुत्र की अपेक्षा होती है वह रह जायगी। जैसा कि कहा है "पिता पुत्र के द्वारा लोगों को जीतता है, पुत्र से धन की प्राप्ति की जाती है, पुत्र पुंनाम नरक से बचाता है और पुत्र यज्ञ है"। पुत्र के अभाव में उस अपेक्षा की पूर्ति न होगी अपेक्षा रह जायगी। इसका उत्तर देते हैं कि ज्ञानी पुरुषों को कैसे बाह्य पदार्थों की अपेक्षा नहीं रहती है। वे न तो साधन की तथा न ही फल की अपेक्षा वाले होते हैं। यदि अपेक्षा नहीं भी हो तो भी मरवाने के लिए अपने आप अज्ञ बालक को देना तो योग्य नहीं है। इस तर्क के उपस्थित करने पर उत्तर देते हैं कि मैं यदि बालक को न देकर मिथ्यावादी भी बन जाऊ, तो भी यह निश्चय नहीं है कि बालक आदि को वह नहीं मारेगा, क्योंकि वह मुझे मिथ्यावादी समझ न केवल बालकों को किन्तु स्त्री देवकी को तथा मुझे भी मार डालेगा। कारण कि कंस कदर्य है। कदर्य का स्वभाव ही है सबको सर्व प्रकार से पीड़ा देना और लोभ के कारण वे लोग सर्व प्रकार की धार्मिक तथा नैतिक मर्यादा का उल्लङ्घन कर सकते हैं। क्योंकि कदर्यों की हृदय रूप गुफा में ऐसे ही विचार भरे रहते हैं तथा कंस की उत्पत्ति ही वैसे दुष्ट हृदय से हुई है। '**त्यजेदेकं कुलस्यार्थे**' कुल का नाश होने वाला हो तो उसकी रक्षा के लिए यदि एक की बलि देनी पड़े तो दे देनी चाहिए। इस शास्त्राज्ञा के अनुसार पुत्र का दे देना ही योग्य है। यदि आप कंस ऐसा समझते हो तो आपको वसुदेवजी को भाग जाना ही उचित है। न कि निरपराध अज्ञ बालक को मरवाना योग्य है। इसका उत्तर देते हैं कि जिन्होंने हृदय में भगवान् को पधरा रखा है, उनको भगवान् के सिवाय सब कुछ त्याग देना सरल है। कारण कि दूसरे पदार्थ पुत्र आदि उनके लिए बाधक हैं। पुत्र न देना, यह सर्व का नाश करने वाला होने से भगवान् के प्राकट्य में रुकावट करने वाला है। अतः जो भगवदीय हैं उनको किसी भी वस्तु के त्याग करने में गुण अथवा दोष के विचार करने की कोई आवश्यकता नहीं है। इससे प्रथम की हुई प्रतिज्ञा के अनुसार प्रतिज्ञात पुत्र को देना ही उचित है ॥ ५८ ॥

भगवत्कृतत्वान्नानिष्टं जातमित्याह दृष्ट्वेति।

वसुदेवजी ने यह सर्व कार्य भगवदिच्छा से ही किया। अतः आगे होने वाले कार्य में कोई विघ्न न आया। यह निम्न श्लोक में कहते हैं—

कंस ने विचारपूर्वक देखा कि वसुदेव की दृष्टि समान है जैसा पुत्र को वैसा ही मुझे समझता है, वसुदेव यह भी जानता है कि मैं इसके पुत्र का घातक हूँ और इसका पुत्र मेरा घातक होगा ऐसा जानते हुए भी समता तथा सत्य पर इनकी दृढ़ स्थिति है, अर्थात् वसुदेव का मन डिगा नहीं जिससे मेरे पास पुत्र को ले आया है। इनको देख कर प्रसन्न हुआ उपरोक्त श्लोक में परीक्षित को 'राजन्' सम्बोधन करके यह बताया कि राजा का धर्म ऐसा ही है। कंस अपना भोलापन दिखाने के लिये जोर से अच्छे प्रकार से हँसने लगा और निम्न वाक्य कहे ॥ ५९ ॥

अनेन पञ्चवार्षिकोनीत इति ज्ञायते—श्लोक के '**प्रतियातु**' शब्द का आशय स्पष्ट करते हुए आचार्यचरण बताते हैं कि यह कीर्तिमान् पुत्र जब वसुदेवजी ले आये थे तब पाँच वर्ष का था, पाँच पुत्र हो चुके थे छठा गर्भ में था, यदि वसुदेवजी छोटा ही बालक ले आते तो कंस कहता '**नय**' इसको ले जा किन्तु छोटा न होने से कंस ने '**प्रतियातु**' लौट जावे कहा। वसुदेवजी ने ५४वें श्लोक में कहा था कि '**पुत्रान् समर्पयिष्ये**' यहाँ इस बहुवचन के कारण जब पाँच पुत्र हुए तब ले आये, तब तक नहीं लाये थे अपने पास ही रखे। इस प्रथम बार एक ही पुत्र इस लिये लाये कि कंस क्या करता है ? पश्चात् दूसरों को लाऊँगा। इसके लाने पर कंस प्रसन्न होकर कहने लगा कि यह बालक लौट कर घर चला जावे यह तेरा कुमार मेरा घातक नहीं है। इसको नहीं मारा। उसका कारण बताया कि इससे मुझे भय नहीं है। यों कहने से यह भी शङ्का नहीं करना कि आपने जो प्रतिज्ञा की है उसके बन्धन से आप छूट गये हैं। नहीं, वह तो ज्यों की त्यों ही है कारण कि आप दोनों का आठवाँ बालक मेरा घातक कहा गया है उससे मुझे भय है, अतः कंस का इस प्रकार कहने का अभिप्राय है कि उसको लाकर देना।

कंस ने जो इस प्रकार कहा वह नारदजी आदि को सम्मत नहीं था अर्थात् अच्छा नहीं लगा। कारण कि भगवान् के भक्तों को भगवान् के सिवाय दूसरे में निष्ठा करना योग्य नहीं है। अतः नारदजी ने कंस के विचार को बदलने के लिये जो कुछ किया वह योग्य ही था। श्लोक में आया हुआ 'किल' शब्द आकाशवाणी के अभिप्राय को सोचना चाहिये यह जताता है ॥ ६० ॥

तत्प्रियार्थमेव नयनमिति प्रकारान्तरेणापि तस्मिन् प्रीते पुत्रत्यागो न युक्त इति तद्वाक्यमङ्गीकृत्य पुनरानीतवानित्याह तथेति।

यदि कंस किसी अन्य प्रकार से पुत्र देने के सिवाय प्रसन्न हो सकता तो पुत्र देना उचित नहीं था किन्तु ऐसा होना असम्भव समझ कर ही वसुदेवजी कंस को प्रसन्न करने के लिये पुत्र को कंस के पास ले गये। पुनः कंस का वाक्य मान कर घर ले आये। इसका वर्णन निम्न श्लोक में करते हैं—

स्वयमेव गृहीत्वा ययौ वसुदेवजी आप ही पुत्र को अपने साथ घर ले गये। कंस के वचनों पर विश्वास क्यों नहीं आया? इसके समाधान के लिये वसुदेवजी को यहाँ आनकदुन्दुभि कहा है। जिससे वह जान गये कि भगवान् का प्राकट्य तो तब होता है जब बहुत क्लेश दुःख प्राप्त होता है, सुख की अवस्था में भगवान् का प्रादुर्भाव नहीं होता है, मेरे जन्म के समय बड़े नगारे इसीलिये बजे थे कि मेरे यहाँ भगवान् प्रकटेंगे। देवताओं और कंस दोनों का कहना परस्पर विरुद्ध है। देवताओं के वचन सत्य हैं। कंस ने जो अब कहा है वह असत्य है। यों समझकर कंस के वाक्यों का अभिनन्दन नहीं किया। कारण कि कंस असत्यवादी है तथा स्थिर बुद्धि वाला नहीं है इसलिये जो कहा कि इसको मैं नहीं मारूँगा इस पर मुझे विश्वास नहीं है। जूठा मनुष्य सदा एक जैसा नहीं होता है और जिसकी बुद्धि स्थिर नहीं है वह घातक एवं अपनी युक्ति अथवा कहने पर पक्का नहीं रहता है। अतः किसी ने कह दिया कि यह पहला ही आठवाँ है तो इसको मार देगा। इसी कारण से झूठे पर विश्वास नहीं करना चाहिये। जिस समय इससे राक्षस खाने के लिये पुरुष मागेंगे, उस वक्त किसी दूसरे के वचन की अपेक्षा न कर इनका घात करेंगे। ऐसे लोगों में क्रोध की उत्पत्ति अनेक प्रकार से हो सकती है क्योंकि उन्होंने अन्तःकरण को अपने वश में नहीं किया है अतः क्रोध आते ही मारने में क्षणमात्र भी विलम्ब नहीं करेगा ॥ ६१ ॥

महतामन्तःकरणमेव प्रमाण'मिति तथैव जातमित्याह नन्दाद्या इत्यष्टभिः।

महान् पुरुषों का अन्तःकरण ही प्रमाण है। जैसे वसुदेवजी ने समझा वैसा ही हुआ, उसका वर्णन निम्न आठ श्लोकों से करते हैं।

उन आठों में से प्रथम के तीन श्लोक में नारदजी ने आकर कंस को समझाया है कि तुमने बालक को छोड़कर भूल की है, व्रज में सर्वत्र देव, दैत्य वधार्थ उत्पन्न हुवे हैं। वसुदेवादि सब देव हैं इत्यादि।

नारदस्य दुष्टत्वं व्यावर्तयति—कंस ने वसुदेव से जो शिष्टाचार किया अर्थात् उसको कहा कि, इस तेरे पुत्र से मुझे भय नहीं है यह घर जावे। उसके कंस के कहने पर वसुदेवजी पुत्र को मन में अप्रसन्न होते हुए ले गये। किन्तु नारदजी को यह कंस का कृत्य अच्छा न लगा। कारण कि नारदजी ने जाना कि यह कार्य देवताओं के लिये हितकर नहीं हुवा क्योंकि देवता चाहते हैं कि भगवान् शीघ्र प्रकट होवे। भगवान् शीघ्र तब प्रकट होंगे जब वसुदेव देवकी आदि भक्तों पर विशेष संकट होगा। अतः देवताओं के गुप्त मनोरथ की पूर्ति के लिये नारदजी कंस के पास आये। वसुदेवजी का प्रसन्न रहना अनिष्टकारक है, अतः मैं ऐसी युक्ति करूँ जिससे वसुदेवादि सर्व साधारण भी पीड़ित होंवे जिससे भगवान् शीघ्र प्रकट हों यह विचार कर नारदजी ने कंस को बहकाने के लिये तीन वाक्य कहे।

यमुनाजी के उस पार जो व्रज में नंदादि गोप हैं, और उनकी यशोदा प्रभृति स्त्रियां हैं, तथा और भी कुमारिकाएं हैं, तथा इस किनारे पर यादव वंश में उत्पन्न वसुदेवादि तथा यदुवंश में जन्मी हुई देवकी आदि स्त्रियां हैं। यों प्रथम श्लोक में सबकी पहचान कराके अब दूसरे श्लोक में उनका देवपना बताते हैं। ये सब स्त्रियां तथा पुरुष आदि सर्व बहुत करके सब देवता तुल्य हैं। देखने में मनुष्य हैं किन्तु इनमें देवपना छिपा हुवा है, अतः जो बर्ताव आप देवताओं से करते हो वैसा ही इनसे भी करो। अर्थात् आप देवताओं को सदैव पीड़ा देते हो वैसा ही व्यवहार इनसे करो। आप असावधान मत रहो न केवल मनुष्य देवांश है किन्तु दोनों तीरों पर रहने वाले पशु आदि भी देवांश हैं। यह आशय श्लोक में आये हुए च अव्यय से निकलता है। इस श्लोक में जो परीक्षित को भारत यह सम्बोधन दिया है उसका सम्बन्ध (६४) श्लोक के **'एतत कंसाय भगवान शशंस'** से है। नारदजी ने विचारा कि मेरा यह कहना कंस न माने तो उसका विश्वास कराने के लिये देवों की गुह्य बात एकान्त में ही युक्ति पूर्वक कही जाती है, इसलिये एकान्त में कंस को समझाया गया है। नारदजी ने कंस को कहा कि आप यों भी मत समझो कि जो मुझसे उदासीन हैं वे केवल देव हैं। नहीं, आपके निकट रहने वाले अक्रूर आदि, जो ज्ञातिवाले तथा गोत्रवाले हैं, एवं जो आपके बान्धव सम्बन्धी तथा मित्र हैं और सेवक हैं विशेष क्या कहें। च अव्यय से यह भी बताया

है कि आपके पितादि भी देवांश हैं। इस तीसरे श्लोक में नारदजी ने कंस को आदर पूर्वक उपाख्यान के समान सब बात समझा दी है।

कंस को मन में यह शङ्का हो कि नारदजी दुष्ट हैं इसलिये मुझे बहकाकर दुष्कर्म कराते हैं तो इस शङ्का को दूर करने के लिये श्लोक में नारदजी को भगवान् विशेषण दिया है जिसका भाव यह है कि नारदजी दुष्ट तो नहीं है किन्तु ऐश्वर्य आदि छ गुणों वाले हैं अतः वह जो कुछ कहते हैं वह हितकर ही है। अतः कंस ने जो कुछ एकान्त में नारदजी से सुना उसका सार यह हुआ कि कंस को मालूम हो गया कि स्वर्ग में देवों ने मन्त्रणा कर हम दैत्यो का नाश करने के लिये पृथ्वी पर जन्म लिया है और हमारे वध के लिये उद्यम कर रहे हैं। और निश्चय ये मनुष्य रूप में देवांश ही हैं ॥ ६२–६३–६४ ॥

एवं श्लोकत्रयमुक्त्वार्षौ गते कंसो यत् कृतवांस्तदाह पञ्चभिर्ऋषेर्विनिर्गम इति ।

इस प्रकार तीन श्लोक कहकर नारदजी पधार गये अनन्तर जो कुछ कंस ने मन्त्रणा कर कार्य प्रारम्भ किया उसका वर्णन पाँच श्लोकों से करते हैं—

अनुवाद में भी जो अर्थ कहे गये हैं वे प्रथम नारदजी के कहे हुए है यों समझना चाहिये। ऋषि की उपस्थिति में कंस ने कुछ नहीं किया उनके जाने के अनन्तर किया, उसका कारण आचार्यचरण कहते है कि नारदजी ने कंस को अपने सामने कुछ भी करने का निषेध कर दिया था। अतः उस समय कुछ न कर ऋषि के जाने के अनन्तर कार्य करना प्रारम्भ किया ऋषि के समझाने से कंस ने जो सार निकाला, उससे दो बात जानने की थी और चार करने की थी।

कंस ने दो बात जानी वे ये हैं। एक तो यादवादि सर्व देव हैं। और दूसरी देवकी के आठवें गर्भ से मेरी मृत्यु होगी अब शेष चार जो करनी हैं वे ६६ वें श्लोक में कही हैं।

प्रथम तो देवकीजी और वसुदेवजी को तथा उनके सम्बन्धी यादवों को अपने घर में ही बेड़ी डाल कर कैद में रक्खा। जिस क्रम से उनके बालक जन्मे थे उस क्रम से उन ६ को इसीलिए मार डाला कि इनमें कौन विष्णु है इसका निश्चय नहीं है कारण कि गणना का कोई नियम नहीं है **'जातं' 'जातं'** कहने का भाव मारने के काल का ज्ञान कराना नहीं था किन्तु देवकी से उत्पन्न होना ही मारने का कारण था यह बताना था अतः जन्म होते ही नहीं मारे गये थे किन्तु पीछे कुछ बड़े हो जाने पर ५ वर्ष के बाद वे मारे गये थे। जन्मते ही न मारे गये उसका प्रमाण यह है कि क्षत्रियों का नामकरण संस्कार १३ वें दिन होता है। अतः जन्मे हुए बालकों के 'कीर्तिमान्' और सुषेण आदि जो प्रथम स्कन्ध में लिखे कहे गये हैं। वे युक्तियुक्त न होते ॥ ६६ ॥

नन्वेवं कथमतिदुष्कृतं कृतवानित्याशङ्क्याह मातरमिति ।

कंस ने वैसा दुष्कर्म कैसे किया ? इस शङ्का निवृत्ति के लिये (मातरं) यह श्लोक कहते हैं—

यह कंस तो दैत्य ही है, किन्तु जो भूपति दैत्य नहीं है वे भी लोभ से अपने प्राणों के पोषण कर्त्ता होते हैं, लोभ सर्व प्रकार के गुणों को नाश करने वाला है। अतः प्राणपोषक लोभी राजा ही जब, माता पिता, भ्राता, सर्व प्रकार के बान्धव तथा मित्रों का घात करते हैं तो कंस तो दैत्य और प्राणपोषक लोभी होकर बहिन के पुत्रों का वध करे तो उसमें क्या आश्चर्य है ? श्लोक में प्रायशः पद देने का आशय यह है कि कोई २ अम्बरीष आदि धर्मात्मा राजा लोग वैसे नहीं होते हैं। किञ्च पृथ्वी पर यह ही व्यवस्था देखने में आती है अतः युधिष्ठिर आदि ने भी पितामह आदि को मार डाला। राजाओं की जहां कहीं भी किसी से मारे जाने की शङ्का होती है तो चाहे वे माता और भ्राता आदि ही क्यों न हो उन सबको मारने में नहीं हिचकते हैं ॥ ६७ ॥

नन्वस्य स्वस्यापि देवत्वसम्भावनया तद्धिताचरणमेव कथं न जातमित्याशङ्क्याहाऽमानमिति ।

इस कंस को अपने देवत्व होने की सम्भावना थी तो क्यों नहीं अच्छे कर्म किये ? इस शङ्का को मिटाने के लिये कहते हैं कि—

पूर्वकाल में अमृत मन्थन के समय, देवताओं की सेना के पृष्ठ भाग के रक्षक भगवान् ने महान् असुर कालनेमि को मारा था, वह ही यह कंस है, यों अपने को कंस जानता हुआ भी तथा भगवान् देवताओं की प्रेरणा से ही दैत्यों के वध के लिये आते हैं और ये सब यादव देव हैं इसलिये इन सर्व यादवों से वैर करने लगा ॥ ६८ ॥

अन्यदप्यत्यन्तायुक्तं कृतवानित्याहोग्रसेनमिति ।

इसके सिवाय दूसरा कार्य जो किया वह भी अत्यन्त अयोग्य है—यह निम्न श्लोक में कहते हैं।

(उग्रसेन) नाम ही से महत्त्व प्रकट हो रहा है। विशेष महत्त्व उसके विशेषण **यदुभोजान्धकाधिपम्** कहने से जाना गया है। विशेषण में यदु, भोज और अन्धक ये तीन नाम उपलक्षण रूप में दिये गये हैं। वास्तव में वह छ प्रकार के यादवों का अधिपति है। इसकी आज्ञा से ये सब मेरे विपरीत कार्य करेंगे अतः वैसा होने से पहले ही इनको बन्धन में डालना चाहिये, यह विचार कर स्वयं कंस ने अपने हाथ से पिता को बन्धन में डाल दिया। अनन्तर शूरसेन देश का राज्य करने लगा और सर्व प्रकार से राज्य का सुख भोगने लगा। इतना बड़ा भारी साहस का कार्य अकेले कंस ने कैसे किया? वैसी शङ्का नहीं करनी चाहिये। क्योंकि वह कंस 'महाबल' महान् बलवान् है प्रत्येक बड़ा कार्य अपनी शक्ति से कर सकता है।

इस प्रकार सब उत्पन्न देवांश भक्तों का महान् उपद्रव का निरूपण हुआ, जो उपद्रव भगवान् के प्राकट्य का हेतुभूत है ॥ ६९ ॥

इति श्रीमद्भागवत पुराण, दशम स्कन्ध, (पूर्वार्ध) प्रमथ आध्याय की श्रीमद्वल्लभाचार्यचरणविरचित
सुबोधिनी टीका का हिन्दी अनुवाद समाप्त ॥ १ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

प्रथमोऽध्यायः ॥

श्रीमते रामानुजाय नमः

॥ १–४ ॥ अमरञ्जयैर्देवानपि जेतुं समर्थ्यैः वत्सपदं कृत्वा गोष्पदतुल्यं कृत्वा यत्प्लवा इति बहुव्रीहिः यच्छब्दो भगवद्विषयः ॥ ५–६ ॥ पुरुषकालरूपैः क्षेत्रज्ञकालाख्यरूपैर्विशिष्टस्य क्षेत्रज्ञानां कालावयवानां बाहुल्याद्बहुवचनम् अन्तःपुरुषरूपेणाऽमृतं प्रयच्छन् शरीरस्थितिहेतुः बहिः कालरूपेण मृत्युं प्रयच्छन् शरीरविनाशहेतुरित्यर्थः। मायामनुष्यस्य आश्चर्यभूतमनुष्यस्य सङ्कल्परूपज्ञानेन मनुष्यस्य वा प्रच्छन्नमनुष्यस्य वा ॥ ७ ॥ देहोऽवताररूप इति ॥ ८–११ ॥ त्यक्तोदम् अम्बुपानरहितम् ॥ १२–२० ॥ पौरुषीं परमपुरुषसम्बन्धिनीं गाङ्गिरम् ॥ २१ ॥ धराभरः भूभारः धाराज्वर इति पाठे क्लेशः पुंसः पुरुषस्य अवतारात्पूर्वमेवेत्यर्थः ॥ २२–२३ ॥ कला अंशः अनन्तः शेषः अग्रतः पूर्वकाले ॥ २४–३० ॥ पारिबर्हं दम्पत्योरुपचारसम्बन्धि ॥ ३१–३९ ॥ व्रजंस्तिष्ठन्निति गच्छन् पुरुषः एकेन पादेन तिष्ठन्नपि गच्छत्येव तद्वदित्यर्थः। देहान्तरग्रहणेन पूर्वदेहत्यागे दृष्टान्तस्तृणजलूका ॥ ४० ॥ दृष्टश्रुताभ्यां दृष्टश्रुतमनीषितलाभार्थम् अपस्मृतिः अपगतबोधः ॥ ४१–४५ ॥ साम पञ्चविधं सम्बन्धो लाभ उपकृतिरभेदो मत्कीर्तनञ्चेति भेदो दृष्टादृष्टभयं चेति। तत्र गुणकीर्त्तनादयः प्रकाराः श्लाघनीयगुण इत्यादिना दर्शिताः। एषा तवानुजा त्वया बाल्ये दैन्योपलालितेनाऽहन्तव्येत्यर्थः। पुरुषादाननुवृतः राक्षसतुल्यः ॥ ४६ ॥ प्रतिव्योढुं समाधातुम् ॥ ४७ ॥ यावद्बुद्धिबलोदयं यथामति यथाशक्ति च मृत्युपरिहारे यतितव्यम् एतावता मृत्युरनिवृत्तोऽपि पुरुषस्य नापराधः इत्यर्थः ॥ ४८ ॥ सुता मे इति मृत्युर्वा मृत्युभूतः कंसो न मरिष्यति मम पुत्रोत्पत्तेः पूर्वं किं? मम पुत्रोत्पत्तेः कंसाऽवस्थानस्य च पाक्षिकत्वात् पुत्रार्पणप्रतिज्ञा न दोष इत्यर्थः ॥ ४९ ॥ विपर्ययो वा मत्पुत्रः कंसहन्ता कथं न स्यात्? अतोऽपि न दोष इत्यर्थः। उपस्थित इति उपस्थितोऽपि मृत्युः कश्चिन्निवर्त्तते यथा मार्कण्डेयादेर्निवृत्तः वरदानान्निवृत्तोपि मृत्युः पुनराव्रजेत् यथा हिरण्याक्षरावणादेः अपमृत्युनिवृत्तिसम्भावनया च न प्रतिज्ञादोष इत्यर्थः ॥ ५० ॥ दारुसंयोगवियोगशब्दाभ्यां शीघ्रविलम्बोत्पत्ति विवक्षिते अदृष्टतः यजमानादृष्टतः मृत्युः कर्माधीन। न पुरुषाधीनः अतोऽपि न भेतव्यमिति भावः ॥ ५१ ॥ यावदात्मनिदर्शनं स्वज्ञानारूपस्वाऽवगतादृष्टानुगुणम् ॥ ५२–५७ ॥ ऋतात्मनामिति पाठे स्वतः सत्यप्रतिज्ञानामित्यर्थः। शौरेः वसुदेवस्य ॥ ५८–६२ देवताप्राया देवतांशत्वात् तत्तुल्याः ॥ ६३ ॥ एतत् वक्ष्यमाणम् ॥ ६४ ॥ गर्भसम्भूतं मत्वेत्यन्वयः ॥ ६५ ॥ अजनशङ्कया भगवच्छङ्कया विष्णोरर्दनशङ्कयेति पाठे स्वान्तःसत्यपीडाशङ्कयेत्यर्थः ॥ ६६ ॥ असुतृपः आत्मप्राणतर्प्पकाः ॥ ६७ ॥ स व्यरुध्यत विरोधं कृतवान् ॥ ६८ ॥ अधिपम् उत्कृष्टम् ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धपूर्वार्द्धव्याख्याने श्रीसुदर्शनसूरिकृतशुकपक्षीये प्रथमोऽध्यायः ॥ १ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततः ऋषेर्नारदस्य विनिर्गमे सति कंसो यदून् सूरान् मत्वा स्ववधं स्वस्य वधार्थं देवक्या गर्भे सम्भूतं जनिष्यमाणं विष्णुं च मत्वा। इति शब्दः पादपूरणार्थः ॥ ६५ ॥ देवकीं वसुदेवं च निगडैः श्रृङ्खलैर्निगृह्य पादयोर्बद्ध्वा गृहे कारागृहे रुद्ध्वा अजनः प्राकृतजनवत् कर्मवशाज्जन्मरहितो विष्णुस्तस्य शङ्कया सोऽयमेव स्यादिति सन्देहेन तयोर्जातं जातं पुत्रमहनत्। यद्यप्याकाशवाण्याऽष्टमस्यैव विष्णुत्वं निश्चितं, तथापि सङ्ख्याया अपेक्षाबुद्धिजन्यत्वात् पर्यायेण सर्वस्यैवाष्टमत्वसम्भवात् सन्देहः। जातं जातमिति। उत्पन्नमुत्पन्नमित्यर्थः। न तु जन्मकाल एव हननमन्यथा क्षत्रियाणां त्रयोदशे दिने नामकरणस्य शास्त्रसिद्धतया 'कीर्तिमन्तं सुषेणं च' इत्यादिनामोक्तिरनुपपन्ना स्यात् ॥ ६६ ॥ ननु कथमेवमतिदुष्कृतं कृतवानित्याशङ्कायां दुर्जनानां नैतच्चित्रमिति कैमुत्यन्यायेनाह

मातरमिति। भुवि ये असुतृपः स्वप्राणपोषकाः लुब्धाः विषयकामुका राजानस्ते मात्रादीनपि घ्नन्ति, काऽन्यस्य वार्तेत्यर्थः। एवंविधाश्च बहव इत्याह-प्रायश इति ॥ ६७ ॥ प्राक् पूर्वजन्मनि विष्णुना हतं महासुरं कालनेमिमिह जातमात्मानं जानन् स कंसो यदुभिर्व्यरुध्यत यादवानां देवतात्वेन श्रुतत्वात्तैः सह विरोधं कृतवान्। जानन्निति। शुकेनानुक्तमप्यनुवादे सत्त्वात् नारदवचनादेव जानन्नित्यर्थः ॥ ६८ ॥ उग्रसेनं च पितरं चकारान्मातरं च निगृह्य निरुध्य शूरसेनान् देशान् स्वयं बुभुजे। तन्निरोधेन यादवानां महद्दुःखं जातमिति सूचयन्नाह—यदुभोजान्धकाधिपमिति। तन्निग्रहे सामर्थ्यमाह—महाबल इति ॥ ६९ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र सोमवंशनिरूपणे। प्रथमो विवृतोऽध्यायो जन्महेतुनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

ऋषेरिति ॥ इत्येवमुक्तवतः ऋषेर्नारदस्य विनिर्गमे सति तद्वचनात् कंसः यदून् सुरान् मत्वा तथा विष्णुर्देवक्यामाविर्भूय त्वां वधिष्यतीति नारदवचनादेव स्ववधं प्रति स्ववधार्थं देवक्या गर्भे संभूतमाविर्भूतं विष्णुं च मत्वा संभूतमिति सामीप्यात् भविष्यत्यपि क्तः। गर्भे सम्भूतं सम्भवो यस्येति वा। त्वत्पूर्वशत्रुर्विष्णुर्देवक्यामाविर्भूय त्वां वधिष्यतीति नारदोक्तं तत्सर्वं एव शुश्रुवुश्चेत्यपि ज्ञेयम्। गृहे देवकीं वसुदेवं च निगडैः शृङ्खलैर्निगृह्य अजनो विष्णुस्तच्छङ्कया जातं जातं तयोः पुत्रम् अहन् ॥ ६५–६६ ॥ मातरमिति ॥ ये भुवि प्रायशः प्रायेण असुतृपः स्वप्राणमात्रर्पका लुब्धाश्च भवन्ति ते राजानः मातरं पितरमित्यादीन् घ्नन्ति ॥ ६७ ॥ आत्मानमिति ॥ सः कंसः आत्मानं च प्राग्जन्मनि कालनेमिं नाम महासुरं विणुना हतम् इह सञ्जातं जानन् भूतपूर्वं च तत्स्मरेति नारदोक्त्या पूर्वजन्मस्मरणात् यदुभिर्व्यरुध्यत वैरं कृतवान् ॥ ६८ ॥ उग्रसेनमिति ॥ महाबलः सः यदुभोजान्धकानामधिपं पितरम् उग्रसेनं निगृह्य वशीकृत्य शूरसेनान् देशान् उपलक्षणतया माथुरानपि बुभुजे ॥ ६९ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्। गङ्गासहायो दशमस्यादिमे निरमादमुम् ॥
इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां प्रथमोऽध्यायः ॥ १ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एतदिति। भूमेः भारायमाणानां भूभारभूतानामित्यर्थः। दैत्यानां, वधोद्यमं देवकृतवधोद्योगं, एतत् पूर्वश्लोकोक्तं सर्वमपि च भगवान् नारदः, अभ्येत्य कंससमीपं प्राप्येत्यर्थः। कंसाय, शशंस। ततोऽन्तरधीयतेत्यर्थः ॥ ६५ ॥ ऋषेरिति। ऋषेर्नारदस्य, विनिर्गमे, अन्तर्द्धानानन्तरमित्यर्थः। कंसः, यदून् सुरान् इत्येवं मत्वा, देवक्याः, गर्भसंभूतं देवकीगर्भद्वारा भृतजन्मानमित्यर्थः। विष्णुं मत्वा, तं च स्ववधं प्रति, मत्वा, स्ववधकर्त्तारं विबुद्ध्येत्यर्थः ॥ ६६ ॥ देवकीमिति। देवकीं वसुदेवं च, निगडैः शृङ्खलैः, गृहे कारागृहे, निगृह्य निग्रहपूर्वकमाबद्ध्य, कारागार आस्थाप्येत्यर्थः। अजनशङ्कया तज्जातपुत्रे विष्णूत्पत्तिशङ्कयेत्यर्थः। अर्दनशङ्कयेति पाठे स्वपीडनाशङ्कयेत्यर्थः। तयोः देवकीवसुदेवयोः, जातं जातं पुत्रं, अहन् जघान। इति द्वयोरेकसंबन्धः ॥ ६७ ॥ ननु यत्तत्पुत्रहननं कर्म त्वतिजुगुप्सितं तदयं कथं कृतवानित्यत्राह। मातरमिति। भुवि, राजानः प्रायशः, असुतृपः परप्राणैरात्मप्राणतर्पकाः, लुब्धाः व्याधसदृशाः, 'लुब्ध आकाङ्क्षिणि व्याधे' इति मेदिनी। भवन्ति। अतः, मातरं स्वजननीं, पितरं स्वजनकं, भ्रातॄन् स्वसहोदरान्, स्वसुहृदः निजसुहृद्वर्गान् च घ्नन्ति हि। तद्भार्याः सुहृदस्तथेत्यपि पाठः। तत्त्वे तद्भार्या भ्रातृपत्नीरित्यर्थः ॥ ६८ ॥ आत्मानमिति। इह लोके, संजातमुत्पन्नं, आत्मानं स्वं, प्राक् पूर्वजन्मनि, विष्णुना हतं, कालनेमिं कालनेमिनामानं, महासुरं महान्तमसुरं, जानन्, सन्, स कंसः, यदुभिः व्यरुद्धयत विरोधं कृतवान् ॥ ६९ ॥ उग्रसेनमिति। यदवो यदुवंशजाश्च भोजा भोजान्वयजाश्च अन्धका अन्धकान्वयजाताश्च तेषामधिपः स्वामी तं, पितरं स्वपितरं, उग्रसेनं च, निगृह्य, महाबलः स्वयं कंसः, शूरसेनान् जनपदान्, बुभुजे उपभुक्तवान् ॥ ७० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे पूर्वार्द्धे प्रथमोऽध्यायः ॥ १ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

देवकीमिति : १०.१.६६.

ग्रामान्तरस्थितितयाऽब्दकरार्पणाच्च तत्सम्मतस्थितितया च न चाप नन्दः।
तत्क्लेशमित्यनुगतार्थमिहाप्यलेखादक्लेशभाक् तदनुरोधितया स्थितो यः ॥ ४८ ॥
प्रवृत्तोऽत्र स्वैरं भवति सति कर्मण्यसति वा न वै जन्तुः किन्तु भ्रमयति भवानेव ननु तम्।
शिशुप्राणत्राणप्रसृतकरुणः सन्नपि विभो नृशंसो यत् कंसोऽसकृदधिकृतो नारदगिरा ॥ ४९ ॥

यो हन्ति द्वेष्टि वा जाल्मो हिंस्रधीः कीर्तिमजनम् । सिद्धामेवास्य दुष्कीर्तिवारिधौ कीर्तिमज्जनम् ॥ ५० ॥
लोकोत्तरं यस्य सुखं भविष्णु स्यादेव पूर्वं स विपत्सहिष्णुः ।
आनन्दयिष्यन् सदलङ्करिष्णुर्युक्तं तथा तान् विदधे स विष्णुः ॥ ५१ ॥

मातरमिति : १०.१.६७.

असुधर्मैकवृत्तिर्यो यश्चाप्यजनशङ्कितः । विश्रृङ्खला गतिस्तस्य परस्येत्यभवत् स्फुटम् ॥ ५२ ॥

उग्रसेनमिति : १०.१.६९.

उग्रसेनोऽपि तातोऽपि निगृहीतो हि येन सः । प्राक्पुण्यफलके युक्तमासीत्काले महाबलः ॥ ५३ ॥
श्रीराकल्पतरु-क्रीडाफल-भक्तिरसायने । मुदे भवतु साधूनामध्यायार्थनिरूपणम् ॥ ६४ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने प्रथमोऽध्यायः ॥ १ ॥

हिन्दी अनुवाद (कर्दमक्षमा)

जब देवर्षि नारद इतना कहकर चले गये, तब कंस को यह निश्चय हो गया कि यदुवंशी देवता हैं और देवकी के गर्भ से विष्णु भगवान ही मुझे मारने के लिए पैदा होने वाले हैं। इसलिए उसने देवकी और वसुदेव को हथकड़ी-बेड़ी से जकड़कर कैद में डाल दिया और उन दोनों से जो-जो पुत्र होते गये, उन्हें वह मारता गया। उसे हर बार यह शंका बनी रहती कि कहीं विष्णु ही उस बालक के रूप में न आ गया हो ॥ ६५–६६ ॥ परीक्षित् ! पृथ्वी में यह बात प्रायः देखी जाती है कि अपने प्राणों का ही पोषण करने वाले लोभी राजा अपने स्वार्थ के लिए माता-पिता, भाई-बन्धु और अपने अत्यन्त हितैषी इष्ट-मित्रों की भी हत्या कर डालते हैं ॥ ६७ ॥ कंस जानता था कि मैं पहले कालनेमि असुर था और विष्णु ने मुझे मार डाला था। इससे उसने यदुवंशियों से घोर विरोध ठान लिया ॥ ६८ ॥ कंस बड़ा बलवान् था। उसने यदुभोज और अन्धक वंश के अधिनायक अपने पिता उग्रसेन को कैद कर लिया और शूरसेन-देश का राज्य वह स्वयं करने लगा ॥ ६९ ॥

पहला अध्याय समाप्त

* * *

अथ द्वितीयोऽध्यायः

श्लोक	अनु.	इ. व.	वं.	इ. वं.	वसंत	उ. मि.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. अ.	सं. श्लो.	अ.
४२	२१	१	२	१	१	१६	२	१६७१	१२	५१	१७३४	५२।	६

श्रीशुक उवाच

प्रलम्बबकचाणूरतृणावर्त[1]महाशनैः । मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ १ ॥
अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः । यदूनां कदनं चक्रे [2]बली मागधसंश्रयः ॥ २ ॥
ते पीडिता निविविशुः [3]कुरुपाञ्चालकैकयान् । शाल्वान् विदर्भान् निषधान् [4]विदेहान् कोसलानपि ॥ ३ ॥
एके तमनुरुन्धाना ज्ञातयः पर्युपासते[5] । हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ॥ ४ ॥

कर्दमक्षमा

अन्वयः—प्रलम्ब-बक-चाणूर-तृणावर्त-महाशनैः मुष्टिक-अरिष्ट-द्विविद-पूतना-केशि-धेनुकैः च अन्यैः बाण-भौम आदिभिः असुरभूपालैः युतः बली (कंसः) मागधसंश्रयः यदूनां कदनं चक्रे ॥ १–२ ॥ पीडिताः ते कुरु-पाञ्चाल-कैकयान् शाल्वान् विदर्भान् निषधान् विदेहान् कोसलान् निविविशुः । अपि अनुरुन्धानाः के एके ज्ञातयः तम् परि उपासते ॥ २–३½ ॥ औग्रसेनिना देवक्याः षट्सु बालेषु हतेषु ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

द्वितीये कंसघाताय देवक्या गर्भगो हरिः । ब्रह्मादिभिः स्तुतः सा च सांत्विततेति निरूप्यते ॥ १ ॥

यदुभिः स व्यरुध्यतेत्युक्तं तमेव विरोधं प्रपंचयति त्वरया देवकीगर्भस्यान्यत्र संचारेण भगवतः प्रवेशं वक्तुं प्रलंबेत्यादिसार्धश्लोकत्रयेण महाशनोघासुरः ॥ १–२–३ ॥ अनुरुंधाना अनुवर्तमानाः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गर्भगः तदंतः (चित्ते) प्रविष्टः "गर्भो भ्रूणे ध्वनौ धाष्ट्र्यं सेक्तरि ज्ञानबालयोः । मध्ये कुक्षौ हंतुसंध्योपनसस्य च कंटके । चित्ते गर्त्ते मुखे चापि" इति धरणिः । सा च देवकी च । सांत्विता निर्भया कृता इति (१) त्वरया वेगेन । अन्यत्र रोहिण्याम् । संचारेण प्रापणेन । सार्द्धश्लोकत्रयेण प्रलंबेत्यारभ्य पर्युपासत इत्यंतेन ॥ १–२ ॥ ते यदवः । निविविशुः निवेशं चक्रुः । परस्मैपदमार्षम् "नेर्विशः" इत्यात्मनेपदे प्राप्ते ॥ ३ ॥ एकेऽक्रूरादयः । तं कंसम् । औग्रसेनिना कंसेन ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रलम्बेति युग्मकम् ॥ १ तैर्युतत्वे बलीति ॥ २ ॥ निभृतं विविशुः तत्तद्वेषादीनां हालिकगोपादिग्रामेषु इत्यर्थः ॥ ३ ॥ एक इत्यर्द्धकम् अनुरुन्धानाः चातुर्येण वशीकुर्वन्तः यद्वा एके भक्ताः श्रीकृष्णवतारदर्शनरूपं स्वार्थमपेक्षमाणा इत्यर्थः एतच्चाग्रे अक्रूरयाने व्यक्तं भावि पर्य्युपासते पर्य्युपासत हतेष्विति सार्द्धकम् जातं जातमहन्निति पूर्वमुक्तं ते कति हता इत्यपेक्षायामाह—हतेष्विति । ते हि पुरा मरीचेः पुत्राः देवाः श्रीब्रह्मण्यापराधेनासुरत्वप्राप्त्या हिरण्याक्षपुत्रात् कालनेमेरुत्पन्नाः षड्गर्भा इति ख्याताः स्वं परित्यज्य ब्रह्मोपासकास्ते जाता इति क्रुद्धस्य हिरण्यकशिपोः पिता युष्मान् वधिष्यतीति शापं स्मृत्वा श्रीदेवकीगर्भे योगमायाद्वारा श्रीभगवता नियोज्य तत्पितृकालनेम्यवतारकंसहस्तेन घातिका इत्यादिकमत्र श्रीहरिवंशाद्युक्तमनुसन्धेयं यत्त्वग्रे हिरण्यकशिपोर्जाता इति तेषामाख्यानं ते नैकवाक्यत्वाय कालनेमिक्षेत्रे तस्मादेव जाता इति ज्ञेयं जाता इत्यत्र पुत्रा इत्यनुक्तत्वात् भारद्वादिषु च तथा श्रवणात् अथवा कल्पभेदं व्यवस्थेयं यातनं च तेषां विमुक्तय एवेत्यग्रे पञ्चाशीतितमाध्याये व्यक्तं भावि एवं तेषां हनने श्रीभगवत्कृतोपेक्षापि परिहृता स्यात् औग्रसेनिनेति येष्व्ययुक्तं साक्षात्तन्नामाग्रहणात् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

मागधो जरासन्धः ॥ २–३ ॥ अनुरुन्धाना अनुवर्त्तमानाः ॥ ४–६ ॥

---

१. महासुरैः—इति कस्यचित् २. बलि—वीर. ३. पञ्चालकेकयान्—श्रीधरादयः ४. मगधान् कोसलानपि—वीर. विदेहान् कौसलानपि—इति कस्यचित् ५. मथुरायां स्थिताश्चैव येऽक्रूराद्या विशां पते—इदमर्धमधिकं विज.

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यदुभिः स व्यरुद्धयतेत्येतदेव प्रपञ्चयन् श्रीभगवतो देवकीगर्भप्रवेशप्रकारं तत्प्रवेशप्रयुक्तप्रभातिशययुक्तदेवकीदर्शनोद्विग्नस्य कंसस्यावस्थानप्रकारं श्रीगर्भस्थं श्रीविष्णुमुद्दिश्य ब्रह्मादीनां स्तुतिप्रकारञ्चाह— द्वितीयाध्यायेन प्रलम्बेत्यादिना। प्रलम्बादिभिरन्यैश्चासुरप्रकृतिभिः भूपालैर्बाणादिभिः परिवृतः कंसः भौमो नरकासुरः बलिमागधौ संश्रयौ यस्य तथाभूतः बलीतिमागधविशेषणं वा मागधो जरासन्धः यदूनां कदनम् उपद्रवं चकार ॥ १–२ ॥ तथा ते यदवः केचित्पीडिताः कुर्वादीन् जनपदान् निविविशुः ॥ ३ ॥ एके तु ज्ञातयः तं कंसमनुरुन्धाना अनुवर्त्तमानाः पर्युपासते पर्यचरन् तत औग्रसेनिना कंसेन षट्सु देवक्याः पुत्रेषु हतेषु सत्सु यद्वैष्णवं विष्णोः सम्बन्धि धाम तेजोऽश इति यावत्, कोऽसौ ? यमंशमनन्तं प्रचक्षते स देवक्याः सप्तमो गर्भो बभूव, कथम्भूतः ? तस्याः हर्षशोकौ विवर्द्धयतीति तथा कंसभयाच्छोकः श्रीभगवत्कलासम्बन्धात् पुत्रो भविष्यति किं समर्थोस्माकमपीति हर्षः इति भावः ॥ ४–५ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अवताररूपं हरेर्न किञ्चिदपि भिन्नं साक्षात्स्वरूपमेव तज्ज्ञानस्य मुक्तिहेतुत्वादित्यभिप्रायेण निरूपणमस्मिन्नध्याये, तत्र दुष्टेन्द्रियैः सदिन्द्रियनिग्रह इव कंसः प्रलम्बादिभिः सहितो यदुनिग्रहमकृतेत्यादिकं निरूपयति—प्रलम्बेत्यादिना ॥ १ ॥ कदनं कलहं मागधो जरासन्धः संश्रयो यस्य स तथा तं संश्रयतीति वा ॥ २ ॥ ते यादवा निविविशुः निवेशनं चक्रुः ॥ ३ ॥ अनुरुन्धानाः अनुवर्तमानाः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

गर्भं सञ्चार्य रोहिण्यां देवक्या योगमायया। तस्याः कुक्षिं गतः कृष्णो द्वितीये विबुधैस्स्तुतः ॥ १ ॥

यदुभिः स व्यरुध्यत इत्युक्तं तमेव विरोधं प्रपञ्चयति–प्रलम्बेति सार्द्धत्रयेण। महाशनोऽघासुरः ॥ १–३ ॥ एकेऽक्रूरादयः श्रीकृष्णावतारदर्शनोत्कण्ठावन्तः तं कंसमनुरुन्धानास्तदाज्ञावर्तिनः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं प्रथमाध्याये ब्रह्मादिप्रार्थनया भूभारहरणञ्चिकीर्षया श्रीवसुदेवगृहे सम्भविष्णोर्विष्णोः पितृविवाहोत्सवः श्रीवसुदेवसाधुता कंसदौर्जन्यञ्चेति वर्णितमिदानीं श्रीदेवकीगर्भवासलीला ब्रह्मादिभिः कृता भगवत्स्तुतिश्च निरूप्यते। तत्र तावत्पूर्वोऽध्यायान्ते यदुभिः स व्यरुध्यतेति यदुक्तं तदेव विरोधं प्रपञ्चयति–प्रलम्बेतिसार्द्धैस्त्रिभिः। महाशनोऽघासुरः यद्वा महदशनं भोजनं येषां ते महाशना इति प्रलम्बादीनां विशेषणम् अघासुरस्य व्योमादिवदुपलक्षणतया ग्रहणम् ॥ १ ॥ स्वयं बली तथापि मागधसंश्रयः जरासन्धसहायः ॥ २–३ ॥ एके ज्ञातयः सगोत्राः अनुरुन्धानाः अनुवर्तमानाः सन्तस्तं कंसं परितः उपासते ॥ ४ ॥

श्रीसुबोधिनी

कारिका:—एवं हेतुं निरूप्याथ कृष्णोद्यम उदीर्यते। महत्त्वज्ञापनार्थाय द्वितीये सविशेषणः ॥ १ ॥
दुःखं हेतुरिहागन्तुमितिबोधाय तत्कथा। पुनर्निरूप्यते स्पष्टा शीघ्रागमनहेतुका ॥ २ ॥
सर्वेषां ज्ञापनार्थाय कंसवाक्यं तथा स्तुतिः। अन्यथा भगवानेव प्रादुर्भूतः कथं भवेत् ॥ ३ ॥

पूर्वं सामान्यतो विरोधमुक्त्वा शीघ्रं भगवदागमनार्थं लोके कंसकृतमत्युपद्रवमाह सार्धैस्त्रिभिः प्रलम्बेति।

प्रलम्बो दैत्यो दैत्यरूपेणैव वर्तते। **बको** दैत्यः पक्षिरूपेण। **चाणूरो** दैत्यो मनुष्यरूपेण। **तृणावर्तो** राक्षसो वात्यारूपेण। **एत** एव **महाशना** बहुभक्षकाः। अनेन **'यदूनां कदनं चक्र'** इत्यत्र **यादवा** भक्षिता इत्यपि ज्ञापितम्। **महाशनोघ** इति केचित्। तत्र नामसु यौगिकप्रवेशश्चिन्त्यः। **मुष्टिकश्चाणूरवत्**। यथा प्रलम्बो बलभद्रेण हतः प्रथमनिर्दिष्टस्तथा मुष्टिकोपि। **अरिष्टो** वृषरूपो **बकवत्**। **द्विविदो** वानरः। **पूतना** राक्षसी। **केश्यश्वात्मकः**। **धेनको** गदर्भात्मकः ॥ १ ॥

अन्ये चैवंविधाः शतशः सन्त्यसुरा भूत्वा ये **भूपालाः**। **बाणो बलिसुतः नरको भौमः**। **आदि**शब्देन जरासन्धादयः। **गुप्तान् यदून् प्रलम्बादयो** बाधन्ते। प्रकटान् **बाणादयः**। एवमेतैर्यदूनां **कदनमन्यायनाशं चक्रे**। एतेषामाज्ञाकारित्वे **हेतुर्बलीति**। **मागधो जरासन्धः** श्वशुरः सहायभूतः। तेनापि दिग्विजये पराजितेन सुते दत्ते। एतेषामन्यतरेणाप्याज्ञोल्लङ्घने कृते जरासन्धः **पाश्रयतीत्याश्रयः** ॥ २ ॥

पीडितानां कृत्यमाह **ते पीडिता** इति। **पूर्वोक्तैः पीडिताः कुरु**देशान् हस्तिनापुरदेशान् **विविशुः**। **तथान्ये पाञ्चाल**देशान् कम्पिलादिदेशान् **केकयान्** चित्रकूटादिदेशान् **शाल्वान्** पाश्चिमदेशान् **निषधान्**उत्तरदेशान् **विदर्भान्** दक्षिणदेशान्

विदेहांस्तरैभुक्तदेशान् कोशलानयोध्यादेशान् नितरां विविशुर्गुप्ततया स्थिताः। एते धर्मात्मानो राजानः। अतः **स्वदेशं** परित्यज्य सकुटुम्बास्तत्रैव स्थिता इत्यर्थः॥ ३॥

ये पुनर्निर्गन्तुं न शक्तास्ते कंससेवका एव भूत्वा स्थिता इत्याह **एक** इति। **एके** क्रूरादयस्तमनुरुन्धानास्तं **संवेष्ट्य** तत्सेवकत्वेन स्थिता **ज्ञातयो** गोत्रिणः **परित उपासते**। एवं सर्वेषां महद्दुःखमुद्यमार्थं हेतुत्वेन निरूपितम्॥ ३½॥

भगवत उद्यमं वक्तुं देवक्या बन्धनावधि चरित्रमाह **हतेष्विति**सार्धेन।

देवक्याः षट्सु बालेष्वौग्रसेनिना हतेषु सत्सु। भागिनेयान् हन्तीति पितृनाम्ना निर्देशः। अन्येषां हननमर्थसिद्धमेव। लोके हि भागिनेयोतिमान्यः॥ ४॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

द्वितीयाध्यायार्थोक्तौ—**कृष्णोद्यम** इत्यादि। भगवदुद्यमे हेतुमाहुर्**महत्त्वेति**। हेतोरितिशेषः। अत एव तावन्तमपि विलम्बमसहिष्णुर्गर्भसङ्कर्षणमाज्ञप्तवान् न ह्येवमन्यत्रेतिभावः। अथवान्येभ्योवतारेभ्योत्र **महत्त्वज्ञापनाय** **मायाज्ञापनवसुदेवादि**-मनःप्रवेशलक्षणः स उच्यत इत्यर्थः। अथवा **महत्त्वं** पुरुषोत्तमत्वं **तज्ज्ञापनाय सविशेषणः** स उच्यत इतिसम्बन्धः। असाधारणत्वेनेतरेभ्यो व्यावर्तको धर्मो हि **विशेषणम्**। तदत्र **मायाज्ञापनमेकम्**। न हि ब्रह्मादिव्यामोहिकां तामन्य आज्ञप्तुमर्हति सान्याधीना वा भवति। वसुदेवदुरासदत्वादिकं देवक्यां स्वहन्तृज्ञानेप्यासुरभावत्याजनं **कंसस्य** **ब्रह्मादिस्तुतिश्च**। का.॥ १–३॥ **हतेष्वित्यस्याभासे**—**देवक्या बन्धनावधीति**। अत्रेदमाकूतम्। सप्तमे गर्भे जाते ‘नन्दाद्या ये व्रज’ इत्यादि नारदेनोक्तं तदा षट्पुत्रहतिर्मातृबन्धनं च जातम्। तदत्र ‘हते’ष्वित्येकेनानूद्य स **गर्भो देवक्या हर्षशोकविवर्धनो** बभूवेत्यर्धेन शीघ्रं भगवदुद्यमे हेतुरुक्तः। पूर्वं **शोकविवर्धनो** नासीद्धतेषु तेष्वयमपि तथा भविष्यतीतिज्ञानेन तथा **बभूव**। तथा चेदं सर्वं बन्धनानन्तरं जातमिति तदेव पूर्वावधिर्यस्य तादृशं चरित्रमाहेत्यर्थः। अत एवाग्रे वक्ष्यन्ति ‘षट्पुत्रवधात् पूर्वमेव सङ्कर्षणगर्भं’ इत्यासुरहनन-सङ्कर्षणगर्भविषयकं दुःखं च भगवच्चरित्रमेव॥ ४॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः।

द्वितीयाध्यायतात्पर्यं निरूपयन्त उपजीवकत्वमत्र **सङ्गति**रित्याहुर्**एवमिति**। ननूद्यमनिरूपणस्य किं प्रयोजनमित्याकाङ्क्षायां टिप्पण्यां विवृण्वन्ति **भगवदित्यादि**। तथा चैवं भक्तवात्सल्यस्वभावं भगवतो ज्ञापयितुं **हेतोर्महत्त्वज्ञापनमित्यर्थः**। यद्यप्येवंविधं **हेतोर्महत्त्वं** ऽह्लादेपि वर्तते परं ज्ञानविशिष्टया मर्यादाभक्त्या परिरक्षितः प्रकृते तु तथा नास्तीति प्रयोजनान्तरमेवोद्यमस्य वक्तव्यमित्याशयेन प्रकारान्तरमाहुर्**अथवान्येभ्य** इत्यादि। एतावतापि न पूर्तिरध्यायतात्पर्यस्येति प्रकारान्तरमाहुर्**अथवा** **महत्त्वमित्यादि**। एते त्रयोपि पक्षा **मूलश्लोकेभ्यः स्फुटं** प्रतीयन्त इति त्रयाणां **समुच्चय** एव न तु **विकल्पस्तेनाथवेत्यत्र वाशब्दोव**-धारणे ज्ञेयः। तथा च पूर्वं **हेतुमहत्त्वं** ज्ञात्वा तदनन्तरमुक्तप्रकारेण **महत्त्वद्वयमवधारणीयमिति** बोधयितुमाचार्यैरयमर्धश्लोक उक्त इत्यर्थोथवाशब्दस्य बोध्यः। सुबोधिन्यामेतदेव स्पष्टीकुर्वन्ति **दुःखं हेतुरित्यादिना**। **इह प्रपञ्च आगन्तुं** भगवदागमनाय भक्तानां **दुःखं हेतुरितिबोधाय तत्कथा शीघ्रागमनहेतुका** शीघ्रागमनकारणजन्या पुनः **स्पष्टा निरूप्यत** इत्यर्थः। एतेन **महत्त्वे**-त्यर्थस्य प्रथमोर्थः स्फुटीकृतः। द्वितीयार्थं स्फुटीकर्तुमाहुः **सर्वेषामित्यादि**। तथा च **सर्वेषां** दैत्यानां भगवदवतारज्ञापनार्थं ‘प्राहैष मे प्राणहरो हरिर्गुहा’ मित्यादिकंसवाक्यमवतारान्तरेभ्योत्राधिक्यबोधकमित्यर्थः। तृतीयं स्फुटीकुर्वन्ति **तथा स्तुतिरित्यादि**। **स्तुतिर्ब्रह्मादिकर्तृका**। **तथा** पुरुषोत्तमत्वज्ञापिका। **अन्यथा स्तुत्यादिकं न कृतं** स्यात् तदा **पुरुषोत्तम एव प्रादुर्भूत** इति **कथं निश्चितं भवेदित्यर्थः**॥ का.॥ १–३॥ **हतेष्वित्यत्र**—**टिप्पण्यामासुरहननमिति** षट्पुत्रहननम्। तेषां हिरण्यकशिपुपुत्रत्वेनासुरत्वादिति॥ ४॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

द्वितीयेध्याये **महत्त्वेत्यस्य** तृतीयव्याख्याने—**सविशेषण उद्यमः** पुरुषोत्तमत्वज्ञापक उक्तः। तत्पक्षे तान्येव विशेषणानि विवृण्वन्ति **सर्वेषामिति**। “आहैष मे प्राणहरो हरि”रितिवाक्यं **ब्रह्मादिस्तुतिश्च** **सर्वेषां** भक्तानां पुरुषोत्तमत्वज्ञापनाय। स्वसन्निधिमात्रेण दैत्यस्यापि तादृशं ज्ञानम्। ‘अवतारो हरेर्यावांस्तत्र ब्रह्मा स्वयं व्रजेत्। वरादनुक्तेप्येवं हि स्तुतिः पूर्णे तु सर्वत’ इति तृतीयस्कन्धीयनिबन्धवाक्याद् ब्रह्मस्तुतिश्च पुरुषोत्तम एव सम्भवतीतिभावः। अन्यथेति। एतद्द्वयाभावेत्र **भगवान्** पुरुषोत्तम **एव प्रादुर्भूत** इतिज्ञानं **कथं भवेदि**त्यर्थः॥ का.॥ १–३॥ **प्रलम्बेत्यत्र**—**चाणूरवदिति**। मनुष्य इत्यर्थः। **बकवदिति**। बक इव भगवद्धत इत्यर्थः॥ १॥ **हतेष्वित्यत्र**—**अन्येषामिति**। यदूनामित्यर्थः। **बुद्ध्या हता** इति। ‘अजनशङ्कये’त्युक्तत्वाद्धर्मि-**बुद्ध्या हता** इतिहेतोर्धर्मी समागत इत्यर्थः। **प्रकटो बभूवेति**। एतादृशः सप्तमो गर्भो यः प्रकटो बभूव स **औग्रसेनिना बालेषु हतेषु देवक्या हर्षशोकविवर्धनो** जात इति मूले सुबोधिन्यां च टिप्पण्यनुसारेणान्वयः॥ ४–५॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

द्वितीयाध्यायार्थोक्तौ—षड्गुणास्तेन बुद्ध्या हृता इति। इहेदं ज्ञेयम्। कृष्णावतारसमये सर्वोपि परिकरो वैकुण्ठादागत इति स्थितं कृष्णोपनिषत्सु। तथा चैतेषामपि स्वरूपं तादृशं वैकुण्ठीयं वाच्यम्। तत्राष्टमगर्भस्य पूर्णपुरुषोत्तमत्वात् सप्तमस्याक्षरात्मकत्वादेतेषां षण्णामैश्वर्यादिषड्गुणात्मकत्वं युक्तं षट्सङ्ख्याया नियामकत्वाद् 'देवकी सर्वदेवते'तिवाक्यात् सर्वदेवतारूपाया देवक्या भगवज्जनन्या उदरे साधारणानां प्रवेशासम्भवाच्च। अत एते षड्गुणानामवतारभूता इति निश्चयः। पुरुषोत्तमावताराक्षरावतारयोर्जातयोः षड्गुणावतारस्यावश्यकत्वात्। न च गुणत्वे कंसकृतमारणासम्भव इति वाक्यम्। जीवविशेषेषु गुणानामावेशात्। अत एते जीवा गुणानामावेशावताराः पृथ्वादयो भगवत इव। अत एवा"सन् मरीचेः षट् पुत्रा" इत्यादिना पूर्वजन्मनि जीवन्मुक्तं ब्रह्मापराधजन्यहिरण्यकशिपुवीर्योत्पत्तिरूपा दुरवस्था चोक्ता। ततः "पीतशेषं गदाभृत" इतिवाक्याद्भगवत्पीतशेषप्रसादलाभेन मुक्ता जाता अत इमे पुष्टिमार्गीया जीवा वैकुण्ठस्थास्तेषां भगवदिच्छया जन्मानि ततो भगवदैश्वर्यादिषड्गुणानामेतेष्वावेशस्ततो मुक्तिः ॥ ४ ॥

(५) भगवदीयनिर्भयराममनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एवं हेतुं निरूप्येत्यादि। एवं पूर्वाध्याये भक्तदुःखरूपं भगवदवतारहेतुं निरूप्य तस्य हेतोर्महत्त्वज्ञापनार्थाय द्वितीयाध्याये **सविशेषण कृष्णोद्यम उदीर्यत** इति। अत्र टिप्पण्यां महत्त्वज्ञापनायेतिपदं त्रिधा व्याख्यातं हेतोर्महत्त्वज्ञापनायाथवान्येभ्योवतारेभ्योत्र महत्त्वज्ञापनायाथवा महत्त्वं पुरुषोत्तमत्वं तज्ज्ञापनाय सविशेषण उद्यम उच्यत इति सम्बन्धः। अत्र समानविभक्त्यन्तपदोपस्थापितं विशेषणं न ज्ञेयं किन्त्वसाधारणत्वेनेतरेभ्यो व्यावर्तको हि धर्मो विशेषणम्। तदत्र मायाज्ञापनादिकम्। नहि ब्रह्मादिव्यामोहिकां मायामन्य आज्ञप्तुमर्हति सान्याधीना वा भवति ॥ का. १ ॥ **दुःखं हेतुरिति।** इह प्रपञ्चमागन्तुं भगवदागमनाय भक्तानां दुःखं हेतुरितिबोधाय तत्कथा 'प्रलम्बबकचाणूरे'त्यादिश्लोकेदुःखकथा शीघ्रागमनहेतुका शीघ्रभगवदागमनफलिका पुनः स्पष्टा निरूप्यत इत्यर्थः। अत्र हेतुशब्दः प्रयोजनवाची। विदुषां हेतुशब्दस्य कार्येपि प्रयोगात् ॥ का. २ ॥ **सर्वेषामिति।** 'आहैष मे प्राणहरो हरि'रिति कंसवाक्यं ब्रह्मादिस्तुतिश्च सर्वेषां भक्तानां पुरुषोत्तमत्वज्ञापनाय। स्वसन्निधिमात्रेण दैत्यस्यापि तादृशं ज्ञानं ब्रह्मस्तुतिश्च पुरुषोत्तम एव सम्भवतीतिभावः। **अन्यथेति।** एतद्द्वयाभावे भगवान् पुरुषोत्तम एव प्रादुर्भूत इति ज्ञानं कथं भवेदित्यर्थः ॥ का. ३ ॥

बुभुत्सुबोधिका

एवमिति पूर्वाध्यायोक्तप्रकारेण। तथा चाध्याययोर्हेतुयासङ्गतिरुक्ता भक्तदुःखं विना कृष्णोद्यमाभावात् कृष्णोद्यमः कार्यम्। भगवदाविर्भावश्च। महत्त्वेति टिप्पण्यामन्यत्रेति प्रह्लादेपीत्यर्थः। अक्षरप्राकट्यात्। तथा चैवं भक्तवात्सल्यस्वभावं भगवतो ज्ञापयितुं हेतोर्महत्त्वज्ञापनमित्यर्थः। भक्तयाहुरथवेति। वसुदेवादीति आदिना देवकी। पुरुषोत्तमत्वं भक्तवश्यत्वमत्र। तज्ज्ञापनायेति महत्त्वज्ञापनाय। तज्ज्ञापनायेति वक्तव्ये स्मार्तः प्रयोगः। सविशेषण इति मायाज्ञापनविशेषणेन सह वर्तमानः। एते त्रयोपि पक्षा मूलश्लोकेभ्य एव स्फुटं प्रतीयन्त इति त्रयाणां समुच्चय एव न तु विकल्पः। तेनाथवेत्यत्र वाशब्दोवधारणे ज्ञेयः। तथा च पूर्वं हेतुमहत्त्वं ज्ञात्वा तदनन्तरमुक्तमहत्त्वमवधारणीयमिति बोधयितुमिदं गोस्वामिभिर्वाशब्दद्वयं प्रयुक्तमिति बोध्यम्। सुबोधिन्याम्। एतदेव स्फुटीकुर्वन्ति दुःखं हेतुरिति। यद्वा 'प्रलम्बबके' त्यादिप्रक्रमज्ञापितार्थमाहुः दुःखं हेतुरिति। अयमर्थः। दुःखं कृष्णागमने हेतुरुक्तः। स सव्यापारो निर्व्यापारश्च, उद्यमादीनां व्यापारत्वे हेतुः सव्यापारः उद्यमस्यागमने महादुःखस्य हेतावन्तर्भावे निर्व्यापारश्चेतिबोधाय प्रथमाध्यायोक्त'प्रलम्बबके'त्यादिकथा। प्रलम्बादीनां नित्यलीलास्थक्रोधादिरूपत्वेन कृष्णोपनिषद्युक्तत्वात् तादात्म्याद्वैतेन परम्परया प्रद्युम्नप्रादुर्भावे योग्यता भक्तदुःखहेतुत्वात्। 'प्रलम्बबके'ति प्रक्रम इति भावः। अत एवाहुः पुनर्निरूप्यत इति। प्रथमाध्याये निरूपणात् पुनरित्युक्तम्। शीघ्रागमनेति नित्यक्रीडास्थत्वाद् भक्तदुःखहेतूनां शीघ्रपदम्। कृष्णाविर्भावहेतुत्वात् एवं हेतुं निरूप्येति श्लोकार्धार्थमुक्त्वा सर्वेषामित्यादिनोत्तरार्धार्थमाहुः सर्वेषामित्यादि। सर्वेषां दैत्यानां भगवदवतारज्ञापनार्थं 'आहैष मे प्राणहरो हरिर्गुहा'मित्यादि कंसवाक्यमवतारेभ्यः कृष्ण आधिक्यबोधकमित्यर्थः। तृतीयार्थं स्फुटीकुर्वन्ति तथा स्तुतिरिति। स्तुतिर्ब्रह्मादिकर्तृका तथा पुरुषोत्तमत्वज्ञापिका। अन्यथेत्यादि स्तुत्यादिकं न कृतं स्यात् तदा एतद्द्वयाभावे पुरुषोत्तम एव प्रादुर्भूत इति कथं निश्चितं (ज्ञातं) भवेत्। स्वसन्निधिमात्रेण दैत्यस्य कंसस्यापि तथाविधं ज्ञानम्। 'अवतारो हरेर्यावांस्तत्र ब्रह्मा स्वयं व्रजेत् वरादनुकल्प्येवं हि स्तुतिः पूर्णे तु सर्वत' इति तृतीयस्कन्धनिबन्धवाक्यात् स्तुतिः।

विरोधमिति उपद्रवणोत्सुकानां भयाविष्टानां च विरोधम्। उक्तानां निरोधकम्। चाणूरवदिति मनुष्य इत्यर्थः। पूर्वार्धोक्तार्थप्रक्रमाभिप्रायमाहुः यथा प्रलम्ब इति मुष्टिकोपीति बलभद्रहतः उत्तरार्धे प्रथमनिर्दिष्ट इत्यर्थः। प्रलम्बशब्देनोपक्रमः सङ्कर्षणप्राकट्यार्थं सङ्कर्षणः प्रलम्बघ्न इति। उद्यमोध्यायार्थः ॥ १ ॥

अन्यैश्चेत्यत्र जरासन्धादय इति आदिना यवनादयः। गुप्तानिति कुरुपाञ्चालादिदेशैर्गुप्तान्। प्रलम्बादयो नित्यक्रीडास्थत्वादधिकज्ञाना इति बाधन्ते। सुते इति अस्तिः प्राप्तिश्च। अन्यतरेणेति महाभाष्यप्रयोगाद् द्वयोर्निर्धारे उतरच् बहूनां निर्धारणेपि। आश्रय इति मागधः संश्रय आश्रयो यस्य। श्रयतीति श्रयः एरच्॥ २॥

ते पीडिता इत्यत्र तीरभुक्तदेशानिति तीरं भुक्तं यैः तान् देशान्। तीरसम्बद्धदेशान्। 'नितरा'मित्यस्यार्थमाहुः गुप्ततयेत्यादि। धर्मात्मान इति 'आत्मार्थे सकलं त्यजे'दिति वाक्योक्तो धर्म आत्मन्यन्तःकरणे येषां ते। तत्रैव देशान्तर एव। आ समन्तात् स्थिताः॥ ३॥

एकेतमित्यत्र एवेति परीत्यस्यार्थः। अक्रूरादय इति आदिना सुनामन्यग्रोधादयः कंसभ्रातरः। तं संवेष्टयेति रुधिर् आवरण इति धात्वर्थः। भावे क्त्वो ल्यप् अनुः समीपेर्थे सम्यक् समीपे क्रोधानुत्पादकं वेष्टनं कृत्वा। वेष्ट वेष्टने। भ्वा० आ० से० एतस्यैवार्थः। सेवकत्वेनेति सेवनं समीपे कर्तरि ण्वुल्। संवेष्टय स्थिताः, संवेष्टनकर्तारः। संवेष्ट्येत्यत्र वेष्टनं कृत्वेत्यत्र करणं प्रकृतिः पुनःकरणं प्रत्ययार्थः। करणं कृतिः, कृत्रिमत्वं कर्तृत्वम्। कृत्रिमत्वं च कृतिरेव। सा स्वाश्रयं कर्तारमाक्षिपति। तथा च संवेष्टनकरणकृत्याश्रयाः संवेष्ट्येत्यस्यार्थः। स्थिता इत्यत्र 'गत्यर्था कर्मके'ति सूत्रेण कर्तरि क्तः। संवेष्ट्य तिष्ठन्तीति स्थिताः। अनुरुन्धाना रोधे तिष्ठन्तीति रुन्धानाः करोतिना विवरणस्य बहुषु स्थलेष्वभावात्। नोत्पद्यत इत्यस्य नोत्पत्तुमर्हतीति गदाधर्यां विग्रहदर्शनात्। न च रोधं तिष्ठन्तीति प्रयोगापत्तिः। धातोः फलसमानाधिकरणव्यापारवाचकत्वेन फलस्य ज्ञातिरूपकर्तृनिष्ठत्वात् तत्सेवकत्वेनेति तत्सेवकत्वेन स्थिता इति यावत्। गोत्रिण इति प्रधानकुलमस्त्येषां ते गोत्रिणः। परित इति भीतत्वात् सर्वतः। हतेषु षट्स्वित्यत्र देवक्या बन्धनावधीति टिप्पण्यां स्फुटम्। तथा भविष्यतीति शोकविवर्धनो भविष्यति। तथेति हर्षशोकविवर्धनो बभूव। चरित्रमिति सङ्कर्षणगर्भभवनादि। अग्र इति 'ततो जगन्मङ्गल'मितिश्लोके। आसुरहननमिति षट्पुत्रासुरहननम्। 'तेषां हिरण्यकशिपुपुत्रत्वेनासुरत्वा'दिति पुरुषोत्तमाः लेखे। सुबोधिन्याम्। पितृनाम्नेति राजधर्मत्वात् पितृनाम्ना तु मुख्यत्व'मिति वाक्यात् मुख्यत्वार्थं पितृनाम्ना निर्देशः। अन्येषामिति ज्ञातीनाम्। यदूनां वा 'ज्ञातयो बन्धुसुहृदो ये च कंसमनुव्रता' इत्युक्तनारदवाक्यात्। अतिमान्य इति भगिन्या दयापात्रत्वादन्येभ्यो मान्येभ्योतिमान्यः॥ ४॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

कारिकार्थ—प्रथम अध्याय में भगवान का प्राकट्य हेतु दुःख को बताया। भूमिमाता, देवकीमाता और भक्तवृन्द इन तीनों के दुःख हेतु रूप कहे गयें। अब श्रीमदाचार्यचरण द्वितीय का अर्थ श्रीकृष्णजी के उद्यम को बताते हैं। और कंसपीडित भक्तजनों के उद्यम का भी निरूपण हैं। भगवानने जो उद्यम किया वह विशिष्ट प्रकार का था। यह तीन प्रकार से असाधारण था। किसी भी अवतार में माया को आदेश नहीं किया और माया को आदेश भी नहीं कर सकते। आज भगवानने माया को सप्तम गर्भ को देवकी के उदर से लेकर रोहिणीजी के उदर में स्थापित करने की आज्ञा की वह एक महत्व हुआ। दूसरा महत्व यह था। कि वसुदेवजी के मन से देवकीजी में पधारे हुवे भगवान के सान्निध्य से कंस स्वयं देवकी जी के वध से निवृत्त हुआ। और तीसरा महत्व यह था पुरुषसूक्त द्वारा पूर्ण पुरुषोत्तम की ब्रह्मादि देवों ने स्तुति की। ये सब उद्यम की बातें द्वितीय अध्याय में जताई है॥ १॥

भगवान् के शीघ्र प्रकट होने में भक्त का दुःख ही प्रधान कारण है इसी विषय की स्पष्टता करने वाली कथा द्वितीयाध्याय में आती है। और भक्तजनो के दुःख का कथन प्रलम्ब चाणूर आदि साढ़े तीन श्लोकों में करते हैं॥ २॥

इस अध्याय में २० श्लोक से २३ श्लोक के कंस के वाक्य और ब्रह्मादि देवों की स्तुति भी है। इन दोनों से ही सबको यह ज्ञान हुआ कि भगवान् प्रकट हुए हैं, यदि ये राजा कंस के वाक्य और ब्रह्मा, नारद, महादेव आदि की स्तुति नहीं होती हो तो भगवान् के प्राकट्य का ज्ञान नहीं होने वाला था॥ ३॥

पूर्वं सामान्यतो विरोधमुक्त्वा शीघ्रं भगवदागमनार्थं लोके कंसकृतमत्युपद्रवमाह सार्धैस्त्रिभिः प्रलम्बेति।

प्रथम अध्याय में कंस का यादवों के साथ सामान्य विरोध बताया है; पुनः भगवान् के शीघ्र पधारने के लिए कंस ने लोक में जो अत्यन्त उपद्रव किये उन उपद्रवों का साढ़े तीन श्लोकों में वर्णन करते हैं।

अब आचार्यचरण दो श्लोकों में बारह संख्या में जो व्यासजी ने दैत्यों के नामों का उल्लेख किया है उनका स्वरूप और स्वभाव बताते हैं—उनमें प्रथम जो कि प्रलम्ब है वह दैत्य-रूप में, है। बक पक्षिरूप में है, चाणूर मनुष्य के रूप में है और तृणावर्त-वायु के रूप में रहता था। ये चारों बहुभोजी थे इसलिये श्लोक में इनको 'महाशनैः' कहे हैं। बहुभक्षी होने से इन्होंने आज पर्यन्त बहुत यादवों का भक्षण किया था। कई एक विद्वान् 'महाशन' का अर्थ 'अघासुर' करते हैं। उस पर आचार्यचरण स्वमत कहते है कि नामों का यौगिक अर्थ करना विचारणीय है। मुष्टिक दैत्य मल्ल था चाणूर का भक्त और समान था।

वैसे प्रथम बताये हुए प्रलम्ब को बलराम जी ने मारा वैसे ही मुष्टिक को भी बलरामजी ने ही मारा है। अरिष्ट दैत्य वृषरूप था, और बक दैत्य पक्षी रूप था। द्विविद नामक दैत्य वानररूप था। पूतना राक्षसी थी। केशी दैत्य का रूप अश्व का सा था। धेनुक का रूप गर्दभ का था। और दूसरे भी इसी प्रकार के सैकड़ों असुर थे जो राजाओं के रूप में भी थे। जैसे कि बलि का पुत्र बाणासुर था और भौमासुर था। भौमासूर का नरकासुर दूसरा है। द्वितीय श्लोक में दिये हुए आदि शब्द से जरासन्ध इत्यादि असुर भूप भी समझ लेने चाहिये। जो यादव गुप्त होकर रहते थे उनको प्रलम्ब आदि असुर तथा जो यादव प्रकट रहते थे उनको बाणासुरादि राजा दुःख देते थे। इसी प्रकार कंस इन राक्षसों द्वारा यादवों का अन्याय से नाश कराता था। ये सर्व राक्षस, राजा थे फिर भी कंस के आदेश को इसलिए मानते थे कि कंस बलवान् था। और राजा कंस का श्वसुर जरासन्ध भी कंस की सदा सहायता करने वाला था। जरासन्ध ने अपनी दो कन्याएँ कंस को इसलिये दी थी कि वह दिग्विजय में कंस से हार गया था। इन असुर राजाओं में से कोई भी यदि कंस की आज्ञा का उल्लङ्घन करता था तो जरासन्ध उस समय कंस की सहायता करता था जिससे वे राजादि दब जाते थे। इस प्रकार कंस को जरासन्ध का आश्रय तथा सहायता थी ॥ १-२ ॥

पीडितानां कृत्यमाह ते पीडिता इति ।

अब डेढ़ श्लोक में इस प्रकार दुःखी हुए उन यादवों ने जो किया उसका निरूपण करते हैं—

पूर्वोक्तः पीडिताः—कंस के अनुचरों से पीड़ित हुए हैं। पूर्व में कहे हुए सर्व यादव राजगण धर्मात्मा थे अतः स्वदेश छोड़कर सकुटुम्ब पृथक् पृथक् प्रदेशों में आश्रय के लिये चले गये। उनमें कितने ही कुरु देश में, अन्य पाञ्चाल, कैकय, शाल्व, कोशल आदि देशों में जाकर अत्यन्त गुप्त प्रकार से वहां पर ही रहने लगे। और जो यादव राजा मथुरा से निकल न सके, वे कंस के अनुयायी होकर वहां ही रहने लगे, एवं कितने ही अक्रूरादि एवं ज्ञातिवाले और सगोत्री भी उसके चारों तरफ ऊपर से सेवक बनकर उसकी आज्ञा का पालन करते थे। इस प्रकार प्रभु के प्राकट्य के लिये सर्व को उद्यम करना पड़ा। उन्होंने दुःख सहन रूप उद्यम किया ॥ २½ ॥

भगवत उद्यमं वक्तुं देवक्या बन्धनावधि चरित्रमाह हतेष्विति सार्धेन ।

उपरोक्त प्रसङ्ग में भक्तों के उद्यम का निरूपण करके अब आगे भगवान् के उद्यम का वर्णन कथन के लिये देवकी के बन्धन तक, जो चरित्र हुए उनका वर्णन करते हैं।

'षड्गुणास्तेन बुद्ध्या हता' आचार्यचरण कहते हैं कि इस श्लोक में कंस का नाम न देकर, उग्रसेन के पुत्र ने देवकी के छः पुत्रों को मारा। ऐसा कहने का तात्पर्य यह है कंस इतना क्रूर है कि देवकी, अपनी भगिनी है, तो भी उसने उसके पुत्रों को मार डाला। लोक में भगिनी पुत्र भानजे अतीव पूज्य माने गये हैं। इससे यह सिद्ध हुआ कि कंस दुष्ट और क्रूर है, जो बहिन के पुत्रों को भी मार डालता है, तो उसको दूसरों को मारने में तो कुछ भी संकोच नहीं होता होगा। वह अर्थ सिद्ध ही है ॥४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

द्वितीये योगमायाया निदेशो बलकर्षणम् ॥ ब्रह्मादिभिः स्तुतः कृष्णो गर्भे तिष्ठन्नितीर्यते ॥ १ ॥

'यदुभिः स व्यरुध्यत' इत्युक्तं, तमेव विरोधं प्रपञ्चयति प्रलम्बेत्यादिसार्धत्रयेण। प्रलम्बो दैत्यस्तेनैव रूपेण वर्तते, बको दैत्यः पक्षिरूपेण, चाणूरमुष्टिकौ दैत्यौ मनुष्यरूपेण, तृणावर्तो दैत्यो वात्यारूपेण। एते महाशना बहुभक्षकाः। महाशनोऽघासुर इति वा, तैररिष्टो वृषभासुरः, द्विविदो वानरः, पूतना राक्षसी, केशी दैत्योऽश्वरूपः, धेनुको दैत्यो गार्दभरूपस्तैः ॥ १ ॥ अन्यैश्चासुरप्रकृतिभिर्भूपालैः बाणो बलिपुत्रः, भौमो भूमिपुत्रो नरकश्चादिर्येषां तैर्वृतः मागधो जरासन्धः संश्रयः सहायो यस्य सः स्वयं च बली कंसो यदूनां कदनं दुःखं चक्रे ॥ २ ॥ ते यादवाः सकुटुम्बाः कंसेन पीडिताः कुर्वादीन् देशान् निर्विविशुः तत्र तत्र गुप्ततया स्थिता इत्यर्थः ॥ ३ ॥ एके ज्ञातयः अक्रूरादयः तं कंसमनुरुन्धाना अनुवर्तमानाः पर्युपासते पर्यचरन्। एवं यदुभिः सह विरोधं निरूप्य जातंजातमहन्निति यदुक्तं तत्र सञ्जयमाह—हतेष्विति। औग्रसेनिना कंसेन षट्सु देवक्या बालेषु हतेषु सत्सु ॥ ४ ॥

अन्वितार्थप्रकाशिका

द्वितीये देवकीगर्भगतो विष्णुः सुरैः स्तुतः। देवकी सान्त्विता तत्र श्लोकाः सार्द्धाः द्विसिन्धवः (४२॥) ॥
द्वे (२) उवाचेति पादाढ्या द्वापञ्चादनुष्टुभः (५२।) ॥ २ ॥

यदुभिः स व्यरुध्यत इत्युक्तं विरोधं प्रपञ्चयति—प्रलम्बेति द्वयम्। प्रलम्बादिभिः मुष्टिकादिभिश्च वृतः अत्र महाशनोऽघासुरः अन्यैश्च बाणभौमादिभिः असुरभूपालैर्दैत्यराजैर्वृतः बली मागधसंश्रयः जरासन्धाख्यस्वश्वशुरसाहाय्यवान् बली सः कंसः

यदूनां कदनं नाशं चक्रे ॥१–२॥ ते पीडिताः इति । ते च यादवाः पीडिताः सन्तः कुरुपाञ्चालादिदेशान् निर्विविशुः । निभृतं हलिकगोपादिवेषेण गुप्ता विविशुः । तङ्भाव आर्षः ॥ ३ ॥ एके इत्यर्द्धम् । एके केचित् ज्ञातयः अक्रूराद्याः अनुरुन्धानाः अनुवर्त्तमानाः सन्तः तं कंसमेव पर्युपासत अवतारदर्शनापेक्षया ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कंसं हन्तुं हि देवक्या द्वितीये गर्भगो हरिः । स्तुतो ब्रह्मादिभिः सम्यक् सान्त्विता सेति चोच्यते ॥ १ ॥

यदुभिः स व्यरुद्ध्यतेति प्रपञ्चयन् भगवतो देवकीजठरप्रवेशप्रकारं तत्प्रवेशप्रयुक्तप्रभातिशययुक्तदेवकीदर्शनोद्विग्नकंसस्यावस्थानप्रकारं च गर्भस्थं कृष्णमुद्दिश्य ब्रह्मादीनां स्तुतिप्रकारं चाह ॥ प्रलम्बेति ॥ प्रलम्बश्च बकश्च चाणूरश्च तृणावर्त्तश्च महाशनोऽघासुरश्च तैः, मुष्टिकश्च अरिष्टश्च द्विविदो वानरश्च पूतना च केशी च धेनुकश्च तैः ॥ १ ॥ अन्यैरिति ॥ अन्यैरुक्तेतरैः, बाणो बाणासुरश्च भौमो नरकासुरश्च तावादी येषां तैश्च, असुरभूपालैरसुरप्रकृतिभी राजभिः, युतो युक्तः, बलिर्बलिनामा नृपश्च मागधो जरासंधश्च तौ संश्रयौ श्वशुरादिभावेन समाश्रयौ यस्य सः । यद्वा । बली चासौ मागधश्च तस्य संश्रयः सहाय्यं यस्य सः, पाठान्तरे बली स्वतो बलवान्, कंसः, यदूनां यादवानां, कदनमुपद्रवं पीडनमिति यावत् । चक्रे ॥ २ ॥ त इति ॥ ते यदवः, पीडिताः कंसेन कृतातिपीडनाः सन्तः, कुरवश्च पाञ्चालाश्च केकयाश्च तान्, शाल्वान्, विदर्भान्, निषधान्, विदेहान्, कोसलान् अपि, विषयानिति शेषः । निर्विविशुः । प्रच्छन्नं तानाश्रित्यावसन्नित्यर्थः । एके केचित्, ज्ञातयः सगोत्राः, 'ज्ञातिस्तातसगोत्रयोः पुमान्' इति मेदिनी । तं कंसं, अनुरुन्धाना अनुवर्त्तमानाः सन्तः, पर्युपासते पर्यचरन्निति भावः । 'यस्य यस्य हि यो भावस्तेन तेन हि तं नरम् । अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत्' इति स्मृतेः ॥ ३ ॥ हतेष्विति ॥ ततः, औग्रसेनिना कंसेन, देवक्याः, षट्सु बालेषु, हतेषु सत्सु, यम् अनन्तं प्रचक्षते, यत् वैष्णवं विष्णोः संबन्धि, धाम तेजः, अंश इति यावत् । सः, हर्षश्च शोकश्च तौ विवर्द्धयतीति तथाभूतः, गर्भसंभावनामात्रेण हर्षः, तत्प्रस्रवणेन शोकः । आनन्दरूपस्यावतीर्णत्वाद्धर्षः पूर्वगर्भसाधारणदृष्ट्या शोक इति वा । देवक्याः सप्तमः गर्भः, सम्भूव ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

प्रलम्बेति : १०.२.१.

अशेषबलशालिनो ध्रुवमिमे प्रलम्बादयः परे मदनुरागिणो भुवि भवन्ति मल्लादयः ।
इमे मदसुसौख्यदाः सकलबाणभौमादयोऽसुरा इति कृताशयः स युत आस तैरेव किम् ॥ १ ॥

ते पीडिता इति : १०.२.३.

स्वकरैर्यत्र राजैव क्लेशदस्तन्निवासिनाम् । युक्तैव भुवने काममन्याशाभिमुखस्थितिः ॥ २ ॥

कृष्णप्रिया

अतिशय आहार करने वाले प्रलम्बासुर-बकासुर-चाणूरमल्ल-तृणावर्त दैत्य-मुष्टिकमल्ल-अरिष्टासुर-द्विविद नामक वानर-पूतना-केशी धेनुक असुर एवं बाणासुर और भौमासुर आदि अनेक असुर रूप राजाओं से संयुत स्वयं बलवान् राजा कंस मगध देश नरेश जरासन्ध का आश्रय लेकर यादवों का अन्याय से और अनीति से नाश करने लगा ॥१–२॥ और कंस राजा से पीडित वे यादव लोग कुरु-पांचाल-केकय-शाल्व-विदर्भ-निषध-विदेह-और कोशल देशों में चले गये। और जो यादव मथुरा से निकल न सके वे कितनेक कंस के आदेशानुसारी होकर राजा कंस की सेवा करने लगे। ॥ ३½ ॥ जब राजा कंस ने श्रीदेवकी जी के छ पुत्रमार डाले ॥ ४ ॥

सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते । गर्भो बभूव देवक्या हर्षशोकविवर्धनः ॥ ५ ॥
भगवानपि विश्वात्मा विदित्वा कंसजं भयम् । यदूनां निजनाथानां [1]योगमायां समादिशत् ॥ ६ ॥
गच्छ देवि व्रजं भद्रे गोपगोभिरलङ्कृतम् ।
रोहिणी वसुदेवस्य भार्याऽऽस्ते नन्दगोकुले । अन्याश्च कंससंविग्ना विवरेषु वसन्ति [2]हि ॥ ७ ॥
देवक्या जठरे गर्भं शेषाख्यं धाम मामकम् । तत् संनिकृष्य रोहिण्या उदरे संनिवेशय ॥ ८ ॥

---

१. निद्रां–इति कस्यचित् । २. याः–इति कस्यचित् ।

कर्दमक्षमा

अन्वयः—यं-अनन्तं प्रचक्षते-(तत्) वैष्णवं धाम, देवक्याः हर्ष-शोक-विवर्धनः सप्तमः गर्भः बभूव ॥ ५ ॥ विश्वात्मा भगवान् निजनाथानां यदूनां कंसजं भयं विदित्वा योगमायां समादिशत् ॥ ६ ॥ हे देवि ! हे भद्रे ! गोपगोभिः अलंकृतं व्रजं गच्छ ॥ ६½ ॥ वसुदेवस्य भार्या रोहिणी नन्दगोकुले आस्ते च कंससंविग्नाः अन्याः हि विवरेषु वसन्ति ॥ ७ ॥ देवक्याः जठरे शेषाख्यं मामकम् धाम (वर्तते) तत् सन्निकृष्य रोहिण्याः उदरे सन्निवेशय ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

धाम कला तदेव सप्तमो गर्भो बभूव । किं तद्धामेत्यत आह्—यमनंतमिति । हर्षशोकविवर्धनः । आनंदरूपस्यावतीर्णत्वाद्धर्षः पूर्वगर्भसाधारणदृष्ट्या च शोक इति ॥ ५–७ ॥ ननु सा गोकुले किमित्यास्ते अत आह्—अन्याश्चेति । न केवलं सैव अन्यापीति । विवरेषु अलक्ष्यस्थानेषु । जठरे संतम् । ननु गर्भ आकृष्यमाणः कथं जीवेदत आह्—मामकं धामेति । तत्ततः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कला अंशः । शयनीयत्वाद्वा धामेति ॥ ५ ॥ निज आत्मैव नाथो येषां ते तथा तेषाम् ॥६॥ नंदगोकुले बृहद्वनाख्ये ॥७॥ मम धामत्वेन तस्याविनाशित्वमेवेत्याह्—मामकं धामेति 'भवानेकश्शिष्यते शेषसंज्ञः' इत्यग्रे वक्ष्यमाणत्वात् । ततो गर्भात् । ननु शुद्धस्वरूपायां भगवत्प्रकाशिकायां महाशक्तौ देवकीदेव्यां प्राकृतानां षड्गर्भाणां कथं प्रवेशस्सत्यं शुद्धस्वरूपे श्रीभगवति समष्टिव्यष्टीनां प्रविष्टत्वेऽपि यथा न तद्योगस्तथैव देवक्यामपि षड्गर्भाणामित्यर्थः । तदुक्तम् 'मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः । न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्' इति । किन्तु जनेषु भक्तिपरिपाटीप्रदर्शनार्थैवेयं लीलेत्यवगम्यते । तथाहि भक्तजने श्रवणकीर्तनादिरूपा भक्तिस्तिष्ठति तद्गर्भ एव तदानुषंगिकफलभूतत्वात् षड्विषयभोगाश्च तिष्ठंति हत एतैरेव संसारांधकूपे पतिष्यामीति । ततः प्रकटीभूताद्भयात्कालेन ते निवर्त्तंते च ततो भगवद्यशः श्रवणकीर्त्तनपरिचर्यादिमयी भक्तिरतिप्रवृद्धा भवति तस्यां च भगवान्रूपगुणमहोदधिः प्रादुर्भवति भक्तेर्भगवत्प्रकाशकशुद्धसत्त्वस्वरूपत्वात् "भक्तिरेवैनं दर्शयति" इति श्रुतेः । एवमेव 'मरीचिर्मनसोऽभवत्' इति श्रवणान्मरीचेर्मनोऽवतारत्वं तत्पुत्राणां षण्णां षड्विषयावतारत्वं देवक्या भगवत्प्रादुर्भावकत्वाद्भक्त्यवतारत्वं 'भयात्कंसः' इत्युक्तेर्भयमयत्वेन कंसस्य भयावतारत्वम् अतो भक्तिगर्भगतानां षड्विषयानां संसारभयमेव निवर्त्तकं तथैव षड्गर्भाणां कंसो हंता विषयनिवृत्तौ सत्यां यथा भक्तिगर्भे भगवद्यशः परिचर्यादिमयी प्रेमभक्तिरेव भवेत्तथैव देवक्यां षड्गर्भनिवृत्त्यनंतरं सप्तमो गर्भो भगवद्यशोनिवासशय्यासनच्छत्रादिरूपोऽनंतः ततः प्रेमभक्त्याविर्भावानंतरं यथा भगवत्साक्षात्कारो भक्तेरष्टमो गर्भस्तथैव 'देवक्याश्चाष्टमो गर्भो भगवान्' इति तत्त्वमत्र द्रष्टव्यमिति विश्वनाथः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वैष्णवं श्रीकृष्णमयं मद्धाम अनन्तं सङ्कर्षणं चतुर्व्यूहद्वितीयं प्रचक्षते वदन्त्यभिज्ञाः ॥ ५ ॥ भगवान् स्वयमेव नित्यरूपः श्रीकृष्णः विश्वात्मा सर्वांशी अपिशब्दः क्षीरोदशाय्यपेक्षया पूर्वं स वै ब्रह्मादीन् समादिशत् अधुना स्वयमसावाप योगमायामिति विदित्वा निवेदनं विनापि यदूनां भयं ज्ञात्वा तद्भयनिरासार्थमित्यर्थः । सम्यक् प्रोत्साहनादिपूर्वकमादिशत् कुतः निजाः श्रीवसुदेवादयो नाथा येषां तेषां भक्तवात्सल्यादिति भावः । स्वीयेषु श्रेष्ठानामिति वा योगो भगवच्छक्तिविशेषः स एव ब्रह्मादीनामपि मोहनान्माया तां जगत्कारणशक्तितोऽपि परावस्थामेकानांशाख्यां यद्वात्रापिशब्दोयं श्रीभगवतः परमोत्कर्षं सूचयित्वा तस्यास्तादृशात्वेपि ततोऽतिनिकर्षं सूचयति तादृशोपि तादृशीं तां समादिशदिति तु तस्य निजेषु वात्सल्यातिशयम् ॥ ६ ॥ गच्छेत्यर्द्धकं हे देवि जगत्पूज्ये ! भद्रे ! सर्वमङ्गले एतत्सर्वं तस्याः प्रोत्साहनार्थं यद्वा तत्र गमने योग्यतोक्ता, पुनर्विशेषेण प्रोत्साहयति; गोपेति । अनेन तेषां गोपानां गवां च तस्या अप्यगम्यं परमाश्चर्यरूपत्वं दर्शितं अन्या वसुदेवभार्य्याः ॥ ७ ॥ गर्भं भ्रूणं शेषाख्यं शिष्यत इति शेषांशः स आख्या ख्यातिर्यस्य तं ममांशत्वेन ख्यातमित्यर्थः । मामकं सङ्कर्षणसंज्ञं धाम रूपं आधारशक्तिमयत्वेनाश्रयं वा सम्यक् अलक्षितं सुखपूर्वं च नितरां कृष्टा ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

विवरेषु गिरिगुहासु ॥ ७—१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

ततः भगवान् विश्वात्मा हेतुगर्भमिदं कंसाज्जातं निज आत्मा नाथो येषां तेषां यदूनां भयं ज्ञात्वा योगमायां स्वमायाधिष्ठात्रीं देवतामादिशदाज्ञापयामास ॥ ६ ॥ तदेवाह्—गच्छेत्यादिना सन्दिष्टैवमित्यतः प्राक्तनेन । हे देवि ! भद्रे ! त्वं गोपैर्गोपीभिश्चालङ्कृतं श्रीनन्दव्रजं गच्छ तत्र गत्वा किं विधेयम् ? इत्यत्राह्—नन्दगोकुले नन्दस्य गोकुले व्रजे वसुदेवस्य भार्या आस्ते

तथाऽन्याश्च तस्य भार्याः कंसात्संविग्ना भीताः तत्र तत्र विवरेषु पर्वतबिलादिषु प्रच्छन्ना वसन्ति ॥ ७ ॥ अधुना मामकं मदीयं शेषाख्यं धाम अंशं देवक्याः जठरे गर्भरूपेणावस्थितं तस्माद्देवकीजठरात्सन्निकृष्य सम्यग्बहिर्निष्कास्य रोहिण्या जठरे सम्यक् निवेशय अनेन रोहिण्यास्तनयः प्रोक्त इत्यादिप्राक्तनप्रश्नस्योत्तरमुक्तं भवति ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वैष्णवं धाम विष्णुतेजः सन्निहितं हर्षशोकविवर्धन इति उत्पत्तिप्रस्रवणाभ्यामितिशेषः। हर्षं समेधयन् शोकमेधयन्निति वा ॥ ५—६ ॥ पर्वतविवरेषु ॥ ७—८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

शेषाख्यं ममांशत्वेन प्रसिद्धमित्यर्थः। तं सङ्कर्षणं मामकं धाम स्वरूपमाश्रयं वा ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सप्तमो गर्भो बभूव यं गर्भमनन्तं प्रचक्षते कीदृशं वैष्णवं धाम कृष्णस्यांशमित्यर्थः। साक्षादानन्दस्य कुक्षिङ्गतत्वाद्धर्षः कंसो वधिष्यतीति बुद्ध्या शोकः ॥ ५ ॥ इदानीं स्वयं भगवान् कृष्णोऽपि योगमायां विमलादीनां चिच्छक्तिवृत्तीनां पञ्चमीम् ॥६॥ नन्दगोकुले रोहिण्यास्ते इति षड्गर्भवधानन्तरं रोहिण्या अपि जातं गर्भमालक्ष्य रहसि लोकद्वारा वसुदेवेनैव सा प्रेषिता कंसात् संविग्ना भीताः विवरेषु रहस्यस्थलेषु ॥ ७ ॥ मामकं धाम मदंशभूतं बलदेवस्वरूपं, कीदृशम् शेष इत्यंशेन आख्या यस्य "यस्यैकांशेन विधृता जगती जगतः पतेः" इत्यग्रिमोक्तेः। अत एव तस्य रोहिणी नित्यमातृकत्वेऽपि देवक्या गर्भमत्प्रवेशानुरोधेनैव प्रथमं तेन प्रविष्टं ततः स्वांशं मन्निवासशय्यासनाद्यात्मकं शेषं तत्र देवकीगर्भे स्थापयित्वैव स्वमातृ रोहिण्या गर्भे स्थापयेत्यर्थः। ननु, शुद्धसत्त्वस्वरूपायां भगवत्प्रकाशिकायां महाशक्तौ देवकीदेव्यां प्राकृतानां षड्गर्भाणां कथं प्रवेशः समुचितः ? भवति सत्यम् शुद्धसत्त्वस्वरूपे श्रीभगवति समष्टिव्यष्टीनां प्रविष्टत्वेऽपि यथा न तद्योगस्तथैव देवक्यामपि षड्गर्भाणामित्यर्थः। यदुक्तं "मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः। न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्" इति किन्तु जनेषु भक्तिपरिपाटीप्रदर्शनार्थमेवेयं लीलाऽवगम्यते, तथाहि, भक्तजने श्रवणकीर्तनादिलक्षणा भक्तिस्तिष्ठति तद्गर्भे एव तदानुषङ्गिकफलभूतत्वात् षड्विषयभोगाश्च तिष्ठन्ति हन्त एतैरेव संसारान्धकूपे पतिष्यामिति ततः प्रकटीभूताद्भयात् कालेन ते निवर्त्तन्ते च ततो भगवद्यशःश्रवणकीर्त्तन-परिचर्यादिमयी भक्तिरिति प्रवृद्धा भवति तस्यां च भगवान् रूपगुणमहोदधिः आदुर्भवति भक्तेर्भगवत्प्रकाशकशुद्धसत्त्वस्वरूपत्वात् "भक्तिरेवैनं दर्शयति" इति श्रुतेः। एवमेव मरीचिर्मनसोऽभवदिति श्रवणान्मरीचेर्मनोऽवतारत्वं तत्पुत्राणां षण्णां शब्दादिति षड्विषयावतारत्वं देवक्या भगवत्प्रादुर्भावकत्वाद्भक्त्यवतारत्वं भयात् कंस इति श्रवणाद्भयमयत्वेन कंसस्य भयावतारत्वम् अतो भक्तिगर्भगतानां षड्विषयाणां यथा संसारभयमेव निवर्त्तकं तथैव देवकीषड्गर्भाणां कंसो हन्ता विषयनिवृत्तौ सत्यां यथा भक्तिगर्भे भगवद्यशः परिचर्यादिमयी प्रेमभक्तिरेव भवेत् तथैव देवक्यां षड्गर्भनिवृत्त्यनन्तरं सप्तमो गर्भो भगवद्यशो निवासशय्यासन-च्छत्रादिरूपोऽनन्तः ततः प्रेमभक्त्याविर्भावानन्तरं यथा भगवत्साक्षात्कारो भक्तेरष्टमो गर्भस्तथैव देवक्याश्चाष्टमो गर्भो भगवानिति तत्त्वं द्रष्टव्यम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वैष्णवं विष्णोर्व्यापकस्य परमपुरुषस्य धाम कला यं जनाः अनन्तं प्रचक्षते स वासुदेवस्य कलाभूतः श्रीसङ्कर्षणः षट्सु गर्भेषु हतेषु सप्तमो गर्भो बभूव साधूनां हर्षविवर्द्धनः असाधूनां शोकविवर्द्धनः। यद्वा श्रीदेवक्या एवं संसर्गमात्रेणानन्ददातृतया बालघ्नं कंसं भयेन च हर्षशोकविवर्धनः ॥ ५–६ ॥ विवरेष्वलक्ष्यस्थानेषु ॥ ७ ॥ शेष इत्याख्या नाम यस्य तं मामकमित्यनेन सोऽपि सर्वं निर्गमनप्रवेशादिकं कर्तुं शक्त एव तथापि ममेच्छया देवकीगर्भप्रवेशानन्तरं भक्तवत्सलतया देवकीवसुदेवादिरूपैर्वर्त-मानानां स्वभक्तानां नियोज्यरूपेण मल्लीलां बालपौगण्डादिविहारात्मिकां संवर्द्धयितुं गुप्तैश्वर्यो देवकीगर्भेऽस्तीति सूचितम्। रोहिण्या उदरे सम्यक् वसुदेवसंयोगजः पाञ्चमासिकः षाण्मासिको वेति जनप्रत्ययकरणपूर्वकं निवेशयेत्यर्थः ॥ ८ ॥

श्रीसुबोधिनी

षड् गुणास्तेन बुद्ध्या हता इति धर्मस्थानभूतोक्षरात्मा समागतस्तस्यापि मारणमाशङ्क्य परिहरति वैष्णवमिति। विष्णो-र्व्यापकस्य सर्वरक्षकस्य स्वरक्षायां सन्देहो नास्तीति ज्ञापितम्। **सप्तम** एव परमावधिः। षड् गुणाः। सप्तमो धर्मी च तदाधारभूताः। पुरुषोत्तमस्तु ततो महान्। अतस्तद्व्यावृत्त्यर्थं धामेति। यतो लोका यमनन्तं कालात्मकमाचक्षते सोनन्तः सप्तमे पर्याये गर्भः प्रकटो **बभूव**। स चार्धप्रकटितानन्द इति **देवक्या** हर्षशोकविवर्धनो जातः। महानिति **हर्षः**। तादृशोपि मारणीय इति **शोकः**। प्रभावस्यादर्शनात् ॥ ५ ॥ एवं सति भक्तेषु दया स्थापितेति दयापरीतो भगवान् शीघ्रमुपायं कृतवानित्याह

भगवानिति । षड्गुणैश्वर्यसम्पन्नः पूर्वापराधे प्रतीकारं कर्तुं सप्तमे स्पृष्टे तेनैव हननसम्भवात् प्रतीकारो न भविष्यतीति शीघ्रं च स्वयमागन्तुं तं गर्भमन्यत्र नेतुं **योगमायां समादिशत्** । या जगत्कारणभूता भगवच्छक्तिः सा **योगमाया** । लोकानां दुःखपरिज्ञानार्थं विश्वात्मेति । यदूनां **कंसजं भयं विदित्वा** । सर्वस्यैव स्वरूपं जानाति किं पुनर्यादवानाम् ? तेषामेव दुःखे सति प्रतीकारे हेतुर्निजनाथानामिति । **निजः** स्वयमेव नाथो येषाम् । केवलमिच्छयैव सर्वं न भवतीति दृष्टकारणार्थं **योगमायादेशः** ॥ ६ ॥ आज्ञामेवाह **गच्छ देवीति** नवभिः । प्रथमतो व्रजं गच्छ । तत्र गता स्वास्थ्यं प्राप्स्यतीति । **मथुरायां** दैत्यावेशात् । तेषां च भगवान् मायारूप इतीयमपि तत्र प्रविष्टा तेषामेव कार्यं साधयेत् । अतः केवलं देवाश्रितं गोकुलमेव गच्छेत्याज्ञा । यतस्त्वं देवतारूपा न दैत्यहितकारिणी । अतस्तथा सम्बोधयति । व्रजपदेन जङ्गमत्वमुक्तम् । अतः स्थावरान्नगरादुत्कर्षः । ननु तत्र स्थितानां देवानां मायागमने व्यामोहसम्भवाद् वैपरीत्यं स्यादितिशङ्कां वारयति भद्र इति । त्वं कल्याणरूपा । देवानां या देवता कल्याणरूपा । ऐहिकसुखदा । सा मुग्धैरत्यन्तं सम्मान्यत इति तदर्थमाह **गोपगोभिरलङ्कृतमिति** । गोपाश्च गोप्यश्च **गोपाः** । गोपाश्च गावश्च । ते उभये तस्य स्थानस्यालङ्करणभूतास्तैरेव तत्रत्या शोभा । योन्यस्तिष्ठति स तु तदनुगुण एवेति तेषामप्रतिबन्धो निरूपितः । अतो दर्शनादेव तत्र सुखं निरूपितम् ॥ तत्र गतायाः किं प्रयोजनमित्याकाङ्क्षायामाह रोहिणीति । **वसुदेवस्य भार्या रोहिणी तत्रास्ते** । स्थितौ कः सम्बन्ध इत्यत आह नन्दगोकुल इति । नन्दसम्बन्धि**गोकुले** । अनेन नन्दवसुदेवयोर्भ्रातृत्वं द्योतितम् । अत्र पादद्वयमधिकं किमिति तिष्ठतीत्याकाङ्क्षायां निरूपितम् । **अन्याश्च** स्त्रियो वसुदेवस्यान्येषां वा । याः **कंससंविग्नाः** सत्यो **विवरेषु** गुप्तस्थानेषु **वसन्ति** । भयदशायां तथैव स्थितिर्युक्तेति हिशब्दार्थः ॥ ७ ॥ ततः किमत आह **देवक्या** इति । **जठर** इति । इतरगर्भवैलक्षण्यार्थम् । तदिति प्रसिद्धम् । ततः **सन्निकृष्य रोहिण्या उदरे** सम्यक् **निवेशय** । किं तद्गर्भरक्षायामित्याकाङ्क्षायामाह **शेषाख्यमिति** । **शेष** इत्याख्या यस्य । तस्मिन् नष्टे भूमिरेव निमग्ना भविष्यतीति । ननु तस्याकर्षणे नाशाशङ्का स्यादित्यत आह **मामकं धामेति** । भगवत्तेजोरूपं भगवतोपि स्थानभूतं वा न नश्यतीति ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

तर्हि हर्षवर्धनत्वमनुपपन्नमित्याशङ्क्य तत्रोपपत्तिमाहुः **स चार्धमित्यादिना** । पुरुषोत्तमस्यैव पूर्णानन्दत्वान्मातुर्मनसि तदागमने तत्रानन्दाविर्भाव एवाभूत् । परस्य परं तादृशी नाभून्निरोधवशादिति **सरस्वतीदृष्टान्तेन** वक्ष्यते । अस्यानन्दमयत्वेपि प्रभुसङ्गम एव पूर्णानन्दप्राकट्यकरणं भवतीति तथा ॥ ५ ॥ **गच्छ देवीत्यत्र—स्थावरान्नगरादिति** । न गृणातीति **नगरमतः** स्थावरतुल्यम् । अभिमानेन स्तब्ध एव तिष्ठतीति तथा ॥ ७ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

सुबोधिन्यां **वैष्णवमित्याभासे—बुद्ध्येति** । भगवद्बुद्ध्या । **धर्मस्थानभूतो धर्माणां स्थानभूतः** । एतेन तेषामक्षरधर्मत्वं बोधितम् । पुरुषोत्तमधर्माणामनिवार्यत्वादिति । न 'चासन् मरीचेः षट् पुत्रा' इत्यादिगुणप्रकरणीयसन्दर्भविरोधः । 'तदेव ब्रह्म कार्याकारेण 'भवतीति श्रुतेर्मत'मितिसिद्धान्तात् क्षरस्याक्षरधर्मतयाक्षरत्वेनादोषाद् । **विवृतौ परमावधिरिति** । आनन्दमीमांसायुक्तोत्कर्षस्य **परमावधिरित्यर्थः** । तदेव विवृण्वन्ति **षडित्यादि** । **महत्त्वज्ञापनपरिकरमिदं ज्ञेयम्** ॥ ५ ॥ **भगवानित्याभासे—दया स्थापितेति** 'प्रपन्नैर्पितया भृश'मिति तृतीयस्कन्धे स्पष्टमिदम् । **प्रतीकारो न भविष्यतीति** । परमानन्दप्राकट्याभावे सर्वदुःखनिवृत्तेरभावादित्यर्थः । **या जगदिति** । द्वितीयस्कन्धनवमाध्यायसुबोधिन्यां स्पष्टमिदम् । **केवलमिच्छयैवेत्यादि** । 'स वै नैव रेमे' इत्यादिश्रुतिषु 'स तपोतप्यते'त्यादिसाधनान्तरनिर्देशदर्शनाद् भगवान् समर्थोपि स्वीयेच्छायां दृष्टं द्वारमन्यत् सम्पादयतीति निश्चितं तथात्र योगमायासमादेश इति नानुपपत्तिः काचित् ॥ ६ ॥ **गच्छ देवीत्यत्र—नवभिरिति** । अत्र प्रथमश्लोकः षट्पदीरूपो ज्ञेयः । **रोहिणीत्यत्र—किमिति तिष्ठतीति** । रोहिणीति शेषः । **आकाङ्क्षार्थमिति** । **अर्थो** निवृत्ति'र्मशकार्थो धूम' इतिवत् । आकाङ्क्षाया अर्थो निवृत्तिर्यस्मात् तादृशमित्यर्थः ॥ ७ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

भगवानित्यत्र—प्रतीकारं कर्तुमिति । पूर्वेषां कीर्तिमदादीनामपराधे कृते सति प्रतीकारं तद्धन्तुः **कंसस्य** वधं कृत्वा'म्ब तातेतिसम्बोधनपूर्वकं वाक्यान्युक्त्वा 'मोहितावङ्कमारोप्य परिष्वज्यापतुर्मुद'मितिश्लोकोक्तपुत्रपरिष्वङ्गादिमुज्जननं **कर्तुं योगमायां समाविशदित्यग्रिमेणान्वयः** । **भगवच्छक्तिरिति** । न तु संविच्छक्ती क्रियाव्यामोहिके इत्यर्थः । इदं शक्तित्रयं द्वितीयस्कन्धनवमाध्याये सुबोधिन्यां स्फुटम् ॥ ६ ॥ सुबोधिन्यां **गच्छ देवीत्यस्याभासे—आज्ञामेवाहेति** । शुक इति शेषः । 'सन्दिष्टैव'मितिश्लोकोक्तकृतिराज्ञाकार्यत्वादाज्ञा । 'गर्भं' इतिश्लोकोक्ताकोशो'प्यथाह'मित्यत्रोक्ताथशब्दविवरणमिति टिप्पण्यां विवृतत्वावातैवेत्येवकारः । मध्येर्धमिति तु तत्रैव वक्ष्यते । तथा च **नवभिः श्लोकैः** शुको भगवत्कृतामाज्ञामेवाहेत्यर्थः । व्याख्याने तत्र गतेति द्वितीयचरणस्य तात्पर्यार्थः सामान्यत उक्तः । इममर्थमग्रे विशदयन्ति **तदर्थमाहेत्यादिना** । एतादृश्यैहिकसुखदा मुग्धैरेव मान्यत इतिहेतोस्तस्याः सम्माननसिद्ध्यर्थं तत्रस्थाने मुग्धानां गोपगवां स्थितिमाहेत्यर्थः । पदस्यार्थमुपसंहरन्त्यत इति । मुग्धानां

तत्र स्थितत्वात् तत्स्थानदर्शनादेव सुखं स्वास्थ्यं तव भविष्यतीति निरूपितमित्यर्थः। **पादद्वयमधिकमिति** नवसंख्यातोधिकमित्यर्थः ॥ ७ ॥ **देवक्या** इत्यत्र—**जठर इतीति**। **इतरेषां** षड्गर्भाणां जरायौ स्थितिरस्य त्वन्तर्वर्त्याकाशे जठरे निर्लेपतया स्थितिरितिवैलक्षण्यबोधनार्थं **जठर** इति पदमुक्तमित्यर्थः। **प्रसिद्धमिति**। धामत्वप्रकारकप्रसिद्धवाचकत्वं तत्पदस्याभिप्रेत्य **धाम**विशेषणत्वेन नपुंसकलिङ्गोक्तेर्धामत्वेन **प्रसिद्ध**मित्यर्थः ॥ ८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गोपगोभिरलङ्कृतमित्यत्र—गोपा गोप्यश्च गोपा इति। "पुमान्स्त्रिये" त्यनुशासनादेकशेषः। **गोपैर्गोपीभिर्गोभिश्चा**लङ्कृतमित्यर्थः। व्रजे ह्यभिस्त्रिभिरलङ्करणम्। तत्र गोपा गावश्च स्वव्यवहारेण स्फुटं भूषयन्ति गोप्यस्तु साक्षाच्छ्रुतयो भगवतो लब्धवरा रासोत्सवसङ्गमाशया व्रजे स्थिताः परस्परं गुणकथनचङ्क्रमणादिना घोषं भूषयन्ति। ता हि मुख्यतया व्रजस्य भूषणरूपाः। तदर्थमेव भगवदर्थमेव—भगवदाविर्भावस्य भावित्वात्। तासां व्रजभूषणत्वमपि गुप्तयैव गुप्तमेव श्रृङ्गाररसपद्धत्या ताभिः सह लीलानां भगवता चिकीर्षितत्वात्। इममर्थं गोपयितुमेकशेषवृत्त्या शुकेनोक्तं **गोपगोभिरलङ्कृतमिति**। **गोपा गोप्यश्च गोपा** इति विग्रहप्रदर्शनेन श्रीमदाचार्यैः सूच्यते स्म। तथा च मायामाज्ञापयन् भगवान् प्रकारं बोधयामास यैर्यथा व्रजो भूष्यते तत्र त्वं तदनुगुणीभूयाधिकं भूषयेति। एवं सति गोपीभिर्गुप्ततया व्रजो भूषणीयस्त्वयापि तदनुगुणीभूय गुप्ततयाधिकं व्रजोलङ्करणीयः। तथा च मध्यस्थदूतीरीत्या गुप्ततया तदनुगुणीभूय स्थेयमितिगूढाशयो भगवतः। अतोयमर्थः सुबोधिन्यां सूचितो '**योन्यस्तिष्ठती**'त्यादिना ॥ ७ ॥

बुभुत्सुबोधिका

बुद्ध्येति अजनशङ्कया हताः। राजभ्रमबुद्ध्या हताः। श्रीशुको वक्ति बुद्ध्येति। बुद्धिमानयं पदार्थान् जानातीत्यादिप्रतीत्या कंसबुद्धौ पदार्था हन्तव्यत्वेनोक्ताः। प्रतियोग्यभावयोः सामानाधिकरण्याद् धर्मस्थानभूतो व्यापकधर्मेषु गतेषु तदभावात्मा दर्शनाविषयः धर्मस्थानभूतः अशेषविशेषशून्यः अक्षरः शब्दात्मा। परमावधिरिति आनन्दमीमांसोक्तोत्कर्षस्यापि परमावधिः। शब्दार्थयोर्नित्यसम्बद्धयोर्वैलक्षण्यमाहुः पुरुषोत्तमस्त्विति। तत इति शब्दात्मकादक्षरात्। महान्, 'उत्तमः पुरुषस्त्वन्य' इतिवाक्यात्। कालात्मकमिति काल उपदेशे, काल आत्मा देहो यस्य। पर्याय इति निर्माणे। 'पर्यायस्तु प्रकारे स्यात्, निर्माणेवसरे क्रमे' इति विश्वः। स चार्थेति टिप्पण्यां स्फुटम्। एवेति अक्षरयोगव्यवच्छेदक एवकारः परं तादृशीति आनन्दमयी। वक्ष्यत इति 'सा देवकी'तिवाक्ये। अस्येति अक्षरस्य। प्रभुसङ्गम एवेति न तु विरहे। विप्रलम्भस्य विरहेर्ष्याप्रवासोपालम्भादिपञ्चभावात्मकत्वात्। गणितानन्दप्राकट्यकरणमेव। तथेति अर्धप्रकटितानन्द इत्यर्थ प्रभावस्येति सर्वरक्षकस्य। सुबोधिन्यां, स्वरक्षायां सन्देहो नास्तीति प्रभावस्य देवक्याऽदर्शनात् ॥ ५ ॥

भगवानित्यत्र एवं सतीति सप्तमस्य शब्दस्य हर्षशोकविवर्धनत्वेन भूभारहरणावश्यकत्वे सति, अर्थात्मा भगवानपीत्यन्वयः। ईक्षामनोहङ्कारातिरिक्तमायायाः श्रुतिविरुद्धत्वात् तद्ग्रहणं विना शरीराभावस्या 'त्ममायामृते राजन् परस्यानुभावात्मनः न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे' तिवाक्ये सिद्धान्ते मायाभावेर्यस्य देहस्य सम्बन्धाभावोक्तेर्न 'यत्र माये'त्यनेन 'प्रवर्तते यत्र रज' इत्यनेन च तत्र मायाभावादुभयसमाधानार्थं कृपात्वेन मायाविवक्षणात् तद्ग्रहणप्रकारमाहुः भक्तेष्विति। दयात्वेन माया भक्तेष्विति तत्र स्थापिता। अपहतपाप्मत्वाद्यतिरिक्तधर्माणां तत्र तत्र नियतत्वात्। 'प्रपन्नेर्पितया भृश'मिति तृतीयस्कन्धे स्पष्टम्। भक्तनिष्ठा माया बुभूषणा वैकुण्ठे गृहीता। 'यदा यदा हि धर्मस्ये' तिवाक्यात्। 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मे' तिवाक्याच्च। अथ 'मायाशबलितं ब्रह्मासी' दितिश्रुतेः। एवं दयापरीतो भगवान्। देहप्रहाणार्थमितिमर्यादा। शीघ्रमिति कृपाविष्टः साधनमिति तथा। षड्गुणैश्वर्येति षड्गुणदानार्थमैश्वर्यम्। तेन सम्पन्नः। किमर्थं सम्पन्न इत्यत आहुः पूर्वापराध इति। पूर्वेषां कीर्तिमदादीनां मारणे कृते प्रतीकारं तद्धन्तुः कंसस्य वधं कृत्वा 'म्ब तात' तिसम्बोधनपूर्वकवाक्यान्युक्त्वा 'मोहितावङ्कमारोप्य परिष्वज्यापतुर्मुद'मिति श्लोकोक्तपुत्रपरिष्वङ्गादिमुज्जननं कर्तुं योगमायां समादिशदित्यन्वयः। स्पष्ट इति जन्मना स्पष्टे कृते। प्रतीकारो न भविष्यतीति परमानन्दप्राकट्याभावे सर्वदुःखनिवृत्तेरभावादितिभावः। या जगत्कारणेति द्वितीयस्कन्धनवमाध्यायसबोधिन्यां स्पष्टमिदम्। दयात्वेन चिच्छक्तिः। 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति स्वरूपलक्षणे निविष्टा वनमाला। तस्य चिद्रूपस्य माया या सा व्यामोहिका भिन्ना। सदंशस्य क्रियारूपा शक्तिः। आनन्दस्य जगत्कारणभूतेति भगवत आनन्दशक्तिः जगत्कारणभूता योगमाया। तेनाजस्यानन्दस्याविर्भाव इत्युक्तम्। आनन्द उपाधिर्जननेऽजस्य योगमायेति तेन युजिर् योग इत्यस्य रूपं योग इति। दुःखपरिज्ञानार्थमिति दुःखपरिज्ञानमुद्यमान्तर्गतम्। भयं विदित्वेति भयेन कश्चिद् भगवन्मयतां गतस्तत्र कारणभयसत्तया भक्तैः सह निगूढभावकरणं कर्तुंज्ञानं विश्वभयस्य। विश्वात्मपदादक्षराभिन्नरूपेण वा विश्वभयज्ञानम्। 'अक्षराद् विविधसौम्यभावाः प्रजायन्त' इति। 'यथाग्नेः क्षुद्रा' इति मुण्डकोपनिषदश्च। सर्वं न भवतीति आनन्दलीलायां न भवतीति। क्वचित् पुस्तके केवलमिच्छयैव सर्वं भवतीति पाठः। अर्थस्तु स एव। सर्वमित्यस्येच्छारूपादृष्टकारणकमित्यर्थात्। अत्र साक्षात्सृष्टिरिति भेदः। 'निजनाथाना' मित्यत्र

निजपदादिच्छया श्रुत्युक्तेक्षया नारदपञ्चरात्रोक्तमहालक्ष्मीरूपयैव न त्वक्षरशक्त्या भगवद्रूपाधारे इत्यर्थश्च। योगमाययेति आनन्दशक्त्यादेशः ॥ ६ ॥

गच्छ देवीत्यत्र आज्ञामेवाहेति शुकनिर्देशमेवाहेत्यर्थः। 'सन्दिष्टैवं भगवते' तिवक्ष्यमाणवाक्यात्। आज्ञा तत्कार्यं सन्देशः सनिर्देश इति। 'गर्भं' इति श्लोकोक्ताक्रोशोप्य 'थाह' मित्यत्रोक्ताथशब्दविवरणमिति टिप्पण्यां विवृतत्वादाज्ञामेवेत्येवकारः। 'मध्ये अर्धं' मिति तु तत्रैव वक्ष्यते। अत्र प्रथमश्लोकः षट्पदीरूपो ज्ञेयः। तथा च शुको नवभिः श्लोकैः भगवत्कृतामाज्ञामेवाहेत्यर्थः। तत्र गतेति द्वितीयचरणस्य तात्पर्यार्थः सामान्यत उक्तः। इममर्थमग्रे विशदयिष्यन्ति तदर्थमाहेत्यादिना। दैत्यावेशादिति 'शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसं हत्वा मधुवने चक्रे मथुरा नाम वै पुरी' मिति नवमस्कन्धाल्लवणावेशात् तथा। अत एव कंसे कालनेमिः। गोकुलमेवेति गोपगोभिर्मुख्यतयालङ्कृतमितिविशेषणाद् व्रजं गोकुलमितिभावः। व्रजं गच्छ गोस्थानमिति संहितयैवकारः। सम्बोधयतीति 'देवी' तिपदेन। व्रजतीति व्रज इति व्युत्पत्त्याहुः जङ्गमत्वमिति। व्रज गतौ। गोकुलाष्टके 'श्रीमद्गोकुलजीवात्मे'त्युक्त्या देहत्वात् तेन भक्तानां वैकुण्ठेऽक्षरात्मका ब्राह्मदेहाः। आधिदैविकवैकुण्ठस्य गोपगोकुलस्य वा जातित्वेन तत्र गमनसम्भवात् जनपदस्याकृतौ शक्तेः। अत इति उक्तशक्यतावच्छेदकात्। स्थावरादिति टिप्पण्यां स्पष्टम्। स्तब्ध एवेति व्रजो भगवच्छरीरत्वात् स्तब्धः पिप्पलादिवृक्ष इव। तथेति उत्कर्षेण वर्तत इति। सुबोधिन्यां, तत्रेति गोकुले। मुग्धैरिति मायाकार्यमोहाश्रयैः। गोपा गोप्यश्च गोपा इति 'पुमान् स्त्रिये' त्यनुशासनात् स एकशेषः। चकाराद् भगवद्देहत्वेन गोकुलाष्टकात्, चकारेण गोपा वा। द्वन्द्वस्यैकत्वात् चकारेणैकेन चारिताथ्यर्यात्। गोपैर्गोपीभिः स्वदेहत्वेन गोभिश्चालङ्कृतमित्यर्थः। लौकिकी भाषा। ते उभय इति पुंस्त्वाद् गोभिरित्यत्राप्येकशेषः। गावश्च गावश्च वृषाः गावः तैर्गोभिरिति। उभये। गोगोपाः। शोभेति यथा घटो घटत्वेन शोभते। सा जातिः सा महानात्मा तामाहुस्त्वतलादय इति वाक्यपदीयात् व्रजे नान्या जातिः। वैकुण्ठो गोलोक इति पर्यायशब्दौ। जीवरहितो देहो न शोभत इति घटत्वादिभिरेव घटादीनां शोभेति तैरेवेत्यत्रैवकारः पूर्वोक्तः। तदनुगुण एवेति गोपगोपीगवानुगुणः। यमुनाजलं पानार्थं वृक्षास्छायार्थं तृणा भक्षणार्थं स्थलमुपवेशनार्थमित्येवम्। 'गोपा गोप्यश्च नः कु'र्विति कृष्णं प्रति सुरश्रुतिवाक्यादेवकारः। तेषामिति तत्रस्थानाम्। अत इति शक्यतावच्छेदकबलात् मुग्धानां तत्र स्थितत्वात् तद्दर्शनादेव सुखं स्वास्थ्यं तव भविष्यतीति निरूपितमित्यर्थः। अनेनेति नन्दस्य राजविरोधिसङ्ग्राहकत्वेनेत्यर्थः। 'उत्पथेन तु गच्छन्तं सोदरोपि विमुञ्चती'तिवाक्यात्। 'भ्रातरं नन्दमागत'मिति पञ्चमाध्यायीयवाक्यात्। वसुदेवपुत्रो नन्द इति नवमस्कन्धे। तत्त्वं न द्योतितम्। विशेषणस्य 'भ्रातर'मित्यस्य व्यावर्तकत्वात्। ननु 'नवभि'रित्यत्र सार्धनवभिरितिवक्तव्ये प्रतिज्ञाहानिरूपनिग्रहस्थानमिति चेत् तत्राहुः अत्र पादद्वयमिति। अत्रेति श्लोके, नवश्लोकीत्वात्। पादद्वयमिति नवसङ्ख्यातोधिकम्। किमितीति रोहिणी किमिति तिष्ठतीत्याकाङ्क्षानिवृत्तिर्यथा भवति तथा। निवृत्त्यर्थेयंशब्दः। अन्या वसन्तीति रोहिण्यपि तिष्ठतीति किमिति तिष्ठतीत्याकाङ्क्षानिवृत्तिः। आकाङ्क्षार्थं वा, अग्रे प्रासङ्गिकमुक्तं, तत्र आकाङ्क्षानिवृत्तिः ॥ ७ ॥

अन्याश्चेत्यत्र गुप्तस्थानेष्वित्ति गुप्तेषु स्थानेषु। 'गुप्तं रक्षितगूढयो'रिति विश्वः। स्थितिरिति वसन्ति स्थितिं कुर्वन्ति। ततः किमिति वासकथनस्याकाङ्क्षायाः किं प्रयोजनम्। अतः प्रयोजनकथनाद्धेतोः प्रयोजनमाहेत्यर्थः। इतरगर्भेति इतरेषां षड्गर्भाणां जरायौ स्थितिरस्य त्वाकाशेन्तर्वर्तिनि जठरे निर्लेपतया स्थितिरितिवैलक्षण्यबोधनार्थं विकृतजठरपदमुक्तम्। एवं विकृतत्वं, जायतेत्र जन्तुरिति जठरः। 'जने रष्ठ चे'तिसूत्रेणान्त्यस्य नकारस्या'लोन्त्यस्ये'तिसूत्रेण ठादेशः अरष्प्रत्ययश्चेति प्रकृतिविकृतिरिति। यद्वा जठर इतरगर्भवैलक्षण्यार्थं तदित्यव्ययमित्यर्थः। प्रसिद्धमिति धामत्वेन प्रसिद्धिविषयम्। धाम तेजः स्थानं वेत्याशयेनाहुः भगवत्तेज इति। स्थानभूतमिति शब्दार्थयोर्नित्यसम्बन्धान् नान्य आश्रयः ॥ ८ ॥

मातृपितृतोषिणी (सुबोधिनीजी)

कंस ने देवकी के जो छ पुत्र मारे थे, वे भगवान् के ऐश्वर्य, वीर्य, यश श्रीज्ञान और वैराग्य छ गुण रूप थे। किन्तु कंस ने उनको भगवद्रूप समझकर मारे थे। [लिकिन यह कंस की भ्रांति थी। भगवान् के छ गुण भगवद्रूप होने से भगवान के समान है उनको कोई मार सकता नहीं है। परंतु वास्तविक रहस्य यह है कि ब्रह्माजी के पुत्र प्रजापति श्री मरीचि नामक ऋषि थे उनके छ पुत्रों ने ब्रह्माजी का उपहास किया था। और ब्रह्माजी ने असुर योनि में जाने का शाप दिया था आज वे आसुर भाव लेकर देवकीजी के उदर में आये थे भगवान ने कंस के हाथ से मरवा कर आसुर भाव का नाश कराया था भगवद् धर्मों का नाश नहीं हुआ था]। देवकी के गर्भ में सातवें बालक धर्मी, अर्थात् गुणों के स्थानभूत आश्रय अक्षर स्वरूप पधारे थे। उनको भी कंस मारेगा, यह शङ्का इस लिए नहीं है कि सप्तमी 'वैष्णव' धाम यह सातवां गर्भ व्यापक विष्णु का स्वरूप है। वह सबकी रक्षा करता है, जो सबकी रक्षा कर सकता है वह अपनी रक्षा करे यह बात बताई। संशय यह है कि सप्तम गर्भ अक्षरात्मा होने से यहाँ तक ही आनन्द की गणना की सीमा हुई है। तैतिरीय उपनिषद् में 'सैषा आनन्दस्य मीमांसा' श्रुति वाक्य से आनंद की गणना की गई है, वहाँ मनुष्य के आनन्द से लेकर आखिर में प्रजापति के शत आनन्द के समान अक्षर ब्रह्म का आनन्द है। यह कह कर यहाँ तक ही आनन्द की गणना हो सकी है। यह बताया है। छ बालक गुण रूप धर्म हैं। उन छ धर्मों का आश्रय

स्थान सातवां बालक अक्षर स्वरूप होने से धर्मी हैं। पुरुषोत्तम स्वरूप तो उससे महान् है। अतः यह सातवां गर्भ पुरुषोत्तम स्वरूप नहीं है। इसका ज्ञान कराने के लिए श्लोक में सातवें गर्भ के लिए 'धाम' शब्द दिया है। इस धाम शब्द का अर्थ है पुरुषोत्तम का 'निवास स्थान' अथवा पुरुषोत्तम का वा 'चरण रूप' जिस धाम को लोक अनन्त, कालात्मा भी कहते हैं। वह अनन्त सातवें गर्भ में प्रकट हुआ। उस अनन्त स्वरूप में आनन्द को पूर्ण रूप से प्रकट न करके उसमें आधा ही आनन्द प्रकट किया है। अतः देवकी को हर्ष भी हुआ और शोक भी हुआ। हर्ष इसलिए हुआ कि वह धर्मी स्वरूप अनन्त महान् है और शोक इसलिए हुआ कि छः बालकों के समान कदाचित् कंस दुष्ट है अतः इस सप्तम को भी न मार डाले। यह भ्रम इसलिए हुआ कि देवकी ने इस स्वरूप का प्रभाव अब तक देखा नहीं था ॥ ५ ॥

एवं सति भक्तेषुदया स्थापितेति दयापरीतो भगवान् शीघ्रमुपायं कृतवानित्याह भगवानिति ।

इस प्रकार देवकीजी को हर्ष तथा शोक एवं यादवों के दुःख को देखकर, भगवान् के हृदय में भक्तों पर दया आई, और दयानिधि भगवान् ने अपने शीघ्र प्राकट्य होने के लिये उपाय किया उसका वर्णन करते हैं।

षड्गुणैश्वर्य सम्पन्न भगवान् श्रीकृष्ण जी स्वयं हि कि कंस के किये हुए पूर्व के अपराधों का प्रतीकार करना चाहते थे इसलिए अपने शीघ्र प्राकट्यार्थ, उस सप्तम गर्भ को रोहिणी जी में स्थापन करने के लिए योगमाया को आदेश दिया। भगवान् योगमाया को ऐसा आदेश देते तो सप्तम गर्भ का प्राकट्य कारागृह में देवकी के यहाँ ही होता और कंस अवश्य उनको सामान्य पुत्र मानकर मारने के लिए हाथ से अवश्य स्पर्श करता, तब तो स्पर्शमात्र से ही कंस का नाश हो जाता। भगवान ने सोचा यदि ऐसा हुआ तो मैं प्रतिकार ले न सकूँगा और शीघ्र प्रकट भो नहीं हो सकूँगा। ऐसा निर्णय कर योगमाया को आपने आदेश दिया। जो जगत् के उत्पन्न करने में कारणभूत भगवत्शक्ति है उसी का ही नाम 'योगमाया' है। यमुनाजल में स्नान करते हुवे अक्रूरजीने भगवद् दर्शन पाया और स्तुति करने लगे तब द्वादश प्रकार की भगवान की शक्तियों का वर्णन किया उसमें 'माया' नामक एक शक्ति बताई। वह शक्ति तीन प्रकार की है। उसमें जगत् कारणभूता शक्ति का नाम योगमाया है। व्यामोहिका जो शक्ति है वह चिद्रूपा है और जो वह मायापति भगवान् समग्र विश्व की आत्मा है इस लिये सकल लोकों के दुःखों को भी जानते हैं। जब सर्व के दुःखों को तथा स्वरूपों को जानते हैं तो कंस से प्राप्त यादवों के दुःखों को जाने, इसमें कोई संशय नहीं है। उनके दुःखों का प्रतीकार आप करने लगे। उसका कारण यह है कि आप यादवों के नाथ हैं। यद्यपि भगवान् सर्व समर्थ होने से केवल इच्छा से भी सभी कार्य कर सकते हैं। सप्तम गर्भ को भी इच्छा मात्र से अन्यत्र पहुँचा सकते थे किन्तु कार्य करने में प्रत्यक्ष कारण, अन्य होना चाहिए, अतः 'योगमाया' को आज्ञा देकर प्रत्यक्ष कारण दिखाया ॥६॥

आज्ञामेवाह—इस श्लोक से नव श्लोक में मथुरा में दैत्य का आवेश है। इसलिए प्रथम भगवान् योगमाया को आदेश करते हैं कि आप व्रज में जाइए। वहाँ आपको सुख होगा। दैत्यों के भगवान् माया रूप है। जो माया मथुरा में रहेगी तो दैत्यों का कार्य सिद्ध कर देगी। इसलिए माया को कहा कि आप देवाश्रित गोकुल में जाइए। कारण कि आप देवता रूप होने से दैत्यों की हितकारिणी नहीं है। इसलिए भगवान् ने श्लोक में योगमाया को हे देवि! ऐसा संबोधन दिया है। 'गोकुल' के लिये व्रज शब्द का उपयोग कहकर यह बताया है कि गोकुल जड़ नहीं है किन्तु चेतन रूप है। इसलिए स्थावर जड़रूप नगर से व्रज की चेतनता से उत्तमता दिखलाई है। यदि 'माया' व्रज में आयगी तो वहां के रहने वाले देवों को मोहित करेगी इस शङ्का की निवृत्ति के लिये श्लोक में 'माया' को 'भद्रे' विशेषण दिया है। यहाँ भद्रे संबोधन का मर्म यह है कि वह माया देवों की भी देवता होने से कल्याणमयी है। इस लोक के सुखों को देने वाली है। इस माया का सरल स्वभाव वाला जीव बहुत सन्मान करते हैं। व्रज में गोप, गोपी और गौ रहते हैं वे सरल हैं इसलिये माया का वहां सन्मान विशेष होगा। अतः भगवान् ने माया को व्रज में जाने की आज्ञा दी। ये गोपादि व्रज के अलङ्कार हैं इन्हीं से व्रज अलंकृत माना गया है। गोप आदि के विना अन्य भी जो लोग रहते हैं उन पर भी गोपादिकों का प्रभाव रहता है जिससे उन अन्यों से शोभा में किसी प्रकार की अड़चन नहीं है अतः व्रज के दर्शन मात्र से ही वहां सुखप्राप्ति होती है यह निरूपण किया है यहाँ जो गोपगोभिरलंकृतं पद है उसकी व्युत्पत्ति **गोपाश्च गोप्यश्च गावश्चेति गोपगोपीगावस्ताभिः गोपगोभिः** ऐसा एक पद समास करके बना है वहाँ मध्यम पद लोपी समास होने से मध्य का गोपी शब्द लुप्त हो गया है। वह लोप सूचन करता है कि जैसे यहाँ 'गोपी' शब्द लुप्त होकर रहा है वैसे ही व्रज में गोप गैयां व्यक्त रूप से और गोपी जन अव्यक्त रूप से व्रज के अलंकार है ॥ ६½ ॥

तत्र गतायाः मायायाः कि प्रयोजनम्–व्रज में जाने का माया का क्या प्रयोजन था? इसका समाधान इसी श्लोक में करते हैं। कि वसुदेव जी की भार्या रोहिणी नंदगांव गोकुल में रहती है कारण कि गोकुल श्री नन्द जी का गांव है इससे यह बताया कि वसुदेव और नन्द का परस्पर भ्रातृत्व सम्बन्ध है इस सम्बन्ध से ही रोहिणी वहां रहती है। श्री वसुदेव जी को जो अन्य स्त्रियां थी तथा अन्य यादवों की जो स्त्रियां थी वे कंस के भय से गुप्त स्थानों में रहती हैं। भय की दशा में गुप्त स्थानों में रहना चाहिए यह भाव 'हि' अव्यय से सूचित किया है ॥ ७ ॥

ततः किमत आह—भगवान ने आज्ञा की उसके बाद क्या हुआ उसका वर्णन करते हैं। सब गर्भ माता के गर्भाशय में स्थिति करते हैं किन्तु यह सातवां गर्भ माता के अन्दर रहे हुए जठराकाश में स्थित हुआ है कारण कि अन्य गर्भ से यह वैष्णवधाम विलक्षण स्वरूप गर्भ है। यहाँ संकेत जो श्लोक में 'तत्' शब्द है उससे सूचित किया है कि यह गर्भ मेरा धाम होने से प्रसिद्ध ही है। देवकी के जठर से इनको खींचकर रोहिणी के उदर में स्थापित करना। यहां से रोहिणी के उदर में स्थापित करने का कारण कंस से इनकी रक्षा करना है। यदि कंस इनको नाश कर दे तो भूमि किसके आधार पर ठहरेगी? इसलिये ऐसा करना आवश्यक है। हे योगमाया यह गर्भ मेरा तेजस्वरूप तथा धामरूप है अतः खींचने से इसका स्वरूप नाश न होगा। इसलिये नाश की शङ्का करना व्यर्थ है॥ ८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यमनन्तं प्रचक्षते वृद्धाः कथयन्ति स वैष्णवं विष्णोर्धाम तेजोंऽशो देवक्याः सप्तमो गर्भो बभूव। स च तस्या हर्षशोकविवर्धनः आनन्दांशस्यावतीर्णत्वाद्धर्षः पूर्वगर्भसाधारणदृष्ट्या कंसकर्तृकमारणभयाच्च शोकः॥ ५॥ भगवानपि निजः स्वयं नाथः स्वामी येषां तेषां यदूनां कंसजं भयं विदित्वा योगमायां स्वशक्तिभूतां समादिशत् आज्ञापयामास। भयज्ञाने हेतुमाह—विश्वात्मेति। सर्वसाक्षीत्यर्थः॥ ६॥ आज्ञामेव दर्शयति—गच्छेति सार्धैः सप्तभिः। देवानां भद्रं मयाऽवश्यं कर्तव्यं, तत्सम्पादयेति सूचयति—सम्बोधनद्वयेन। हे देवि! हे भद्रे! त्वं व्रजं गच्छ। गमनयोग्यत्वं सूचयन् व्रजं विशिनष्टि—गोपैर्गोभिश्चालङ्कृतमिति। तत्र नन्दस्य गोकुले व्रजे वसुदेवस्य भार्या रोहिणी आस्ते॥७॥ न केवलं सैव तत्रास्ते, किं तु अन्या अपि वसुदेवभार्या हि यस्मात् कंसात् संविग्ना भीता अतो विवरेषु देशान्तरेष्वलक्ष्यस्थानेषु प्रच्छन्ना वसन्ति। तत्र गत्वा मया किं कार्यमित्यपेक्षायामाह—देवक्याम् इति। देवक्या जठरे स्थितं शेषाख्यं गर्भं ततः सन्निकृष्य सम्यग्बहिर्निष्कास्य रोहिण्या उदरे सम्यङ्निवेशय। ननु आकृष्यमाणो गर्भः कथं जीवेत्तत्राह—मामकं धामेति। मदीयमंशभूतमित्यर्थः। अतो न मरणं शङ्कनीयमिति भावः। अनेन रोहिणीदेवक्योर्गर्भसम्बन्ध एकस्यैव रामस्य कथमित्यस्याक्षेपस्योत्तरं दत्तं ज्ञेयम्॥ ८॥

अन्वितार्थप्रकाशिका

हतेष्विति सार्द्धम्। औग्रसेनिना कंसेन देवक्याः षट्सु बालेषु हतेषु सत्सु वैष्णवं धाम विष्णोः कला एव देवक्या हर्षशोकविवर्द्धनः सप्तमो गर्भो बभूव। आनन्दरूपस्यावतीर्णत्वाद्धर्षो पूर्वगर्भसाधारणदृष्ट्या शोकः यं गर्भगतं सात्त्वताः अनन्तं प्रचक्षते॥ ५॥ भगवानिति॥ विश्वस्यात्मा भगवानपि निजा वासुदेवादयो नाथा येषां निजेषु भक्तेषु नाथानां श्रेष्ठानामिति वा। निजः भगवानेव नाथो येषामिति वा। यदूनां कंसजं भयं ज्ञात्वा योगमायां विमलादीनां नवानां चिच्छक्तीनां पञ्चमीं समादिशत्॥ ६॥ गच्छेति॥ हे देवि भद्रे मङ्गले! गोपैर्गोभिश्चालंकृतं व्रजं गच्छ। वसुदेवस्य भार्या रोहिणी नन्दगोकुले आस्ते। षड्गर्भवधानन्तरं रोहिण्या अपि जातं गर्भमालक्ष्य रहसि लोकद्वारा वसुदेवेनैव सा प्रेषिता इति सारार्थसंदर्शिनी॥ ७॥ अन्या इति सार्द्धम्॥ न केवलं रोहिण्येव गता किन्तु कंसात् संविग्ना भीताः अन्या अपि हि वसुदेवभार्याः विवरेषु अलक्ष्यस्थानेषु वसन्ति। देवक्या इति देवक्या गर्भे विद्यमानं गर्भं शेषाख्यं मामकं धाम अंशं कर्म तत् ततो देवकीजठरात् सन्निकृष्य रोहिण्या उदरे सन्निवेशय। कंसकर्तृकषड्गर्भवधादिलीला च जनेषु भक्तिपरिपाटीप्रदर्शनार्था। तथा हि! मरीचिर्मनसोऽभवदिति श्रवणान्मरीचेर्मनोऽवतारत्वम्। तत्पुत्राणां षण्णां शब्दादिषड्विषयावतारत्वं देवक्या भगवत्प्रादुर्भावकत्वाद् भक्त्यवतारत्वम्। भयात् कंस इति श्रवणात् भयमयत्वेन कंसस्य भयावतारत्वम्। अतो भक्तिगर्भगतानां षड्विषयाणां यथा संसारभयमेव निवर्त्तकं तथैव देवकीषड्गर्भाणां कंसो हन्ता विषयनिवृत्तौ सत्यां यथा भक्तिगर्भे भगवद्यशःपरिचर्यादिमयी प्रेमभक्तिरेव भवेत् तथैव देवक्यां षड्गर्भनिवृत्त्यनन्तरं सप्तमो गर्भो भगवद्यशोनिवासशय्यासनच्छत्रादिरूपोऽनन्तः ततः प्रेमभक्त्याविर्भावानन्तरं यथा भगवत्साक्षात्कारो भक्तेरष्टमो गर्भस्तथैव देवक्यास्चाष्टमो गर्भो भगवानिति तत्त्वं द्रष्टव्यम्॥ ८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवानिति। ततः विश्वात्मा सर्वान्तरात्मा भगवान् षाड्गुण्यपूर्णः स्वयं पुरुषोत्तमः अपि, निजः स्वात्मा नाथः स्वामी येषां तेषां, यदूनां, कंसजं भयं, विदित्वा ज्ञात्वा, योगमायां स्वमायाधिष्ठात्रीं देवतां, समादिशदाज्ञापयामास॥ ५॥ तदाज्ञापनमेवाह गच्छेत्यादिना संदिष्टैवमित्यतः प्राक्तनेन ग्रन्थेन। गच्छेति। हे देवि, हे भद्रे मङ्गलरूपे, गोपगोभिः गोपैर्गोभिश्चेत्यर्थः। अलंकृतं मण्डितं, व्रजं, नन्दव्रजं गच्छ। तत्र गत्वा मया किं विधेयमित्यत्राह। नन्दगोकुले नन्दव्रजे, रोहिणी रोहिण्याख्या, वसुदेवस्य भार्या पत्नी, आस्ते। ननु सैकैव तत्रास्ते तद्यन्याः क्व स्थितास्तत्राह। अन्याश्च अन्या अपि, रोहिणीवदेवेति शेषः। कंससंविग्नाः कंसाद्भीताः सत्यः, विवरेषु पर्वतबिलादिष्वलक्ष्यस्थानेषु, वसन्ति। प्रच्छन्नं यथा तथेति शेषः॥ ६॥ देवक्या इति। मामकं मदीयं, अधुनेति शेषः। शेषाख्यं शेषसंज्ञं, धामांशः, देवक्याः जठरे, गर्भं गर्भरूपेणावस्थितं भवति। तत् संनिकृष्य सम्यग्बहिर्निष्कास्य, रोहिण्याः उदरे जठरे, संनिवेशय सम्यक् निवेशय। अनेन 'रोहिण्यास्तनयः प्रोक्तः' इत्यादि प्राक्तनप्रश्नोत्तरमुक्तम्। नन्वगर्भाया

रोहिण्या नन्दगृहे गमनादकाण्डं तस्यां चातुर्मासीयगर्भेक्षयाऽन्येषां शङ्कोदयः स्यादिति चेत्तस्या नन्दव्रजयानतः प्राक् सगर्भाया अपि गर्भो गदसंचारतो हि शुष्कतां प्राप्तः स च कालेनार्द्रीभूत इति किंवदन्त्यभूत्ततोऽन्येषां शङ्कोदयो न जात इति बोध्यम् ॥७॥ किमर्थमेवं कार्यमित्यत आह । अथेति । अथ अनन्तरमेव, हे शुभे शोभने, अहम् अंशः मदंशः पुरुषस्तस्य भागोंऽशभूतः संकर्षणस्तेन सह, यद्वा अंशैः शक्तिभिः ब्रह्मादिस्तम्बपर्यन्तान् सर्वान् भजतेऽधितिष्ठति इत्यंशभागस्तेन परिपूर्णेन रूपेणेत्यर्थः । यद्वा । अंशैर्ज्ञानैश्वर्यबलादिभिर्भाजयति स्वीयान् योजयतीति तथा तेनेति । यद्वा अंशेन पुरुषरूपेण भागो मायाया ईक्षणरूपं भजनं यस्य तेन, यद्वा । अंशेन मायया भागा गुणावतारादिरूपा भेदा यस्य तेन, यद्वा । अंशा मत्स्यकूर्मादिरूपास्त एव भागा भजनीया न तु साक्षात् स्वरूपं यस्य तेन, यद्वा । अंशैर्ज्ञानबलादिभिर्भजनं भक्तेष्वनुवर्त्तनं यस्य तेन, सर्वथा परिपूर्णेन रूपेणेति विवक्षितं 'कृष्णस्तु भगवान् स्वयम्' इत्युक्तत्वात् । देवक्याः पुत्रतां सुतत्वं प्राप्स्यामि । त्वं नन्दपत्न्यां यशोदायां, भविष्यसि संभविष्यसि ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सप्तम इति : १०.२.५.

विचित्रदोहदोद्बोधि-गर्भावस्थित्यवेक्षणात् । सहर्षा देवकी युक्तं खिन्ना चारिकृतेक्षणात् ॥ ३ ॥

कृष्णप्रिया

हिन्दी अनुवाद—तब जिसको अनन्त कहते हैं वे भगवान् विष्णु के धाम शेषजी, श्री देवकी के हर्ष और शोक को बढ़ाने वाले होकर देवकी जी के गर्भ में पधारे ॥ ५ ॥ विश्वात्मा भगवान् स्वयं यादवों के नाथ हैं। भगवान् ने उन यादवों का कंसकृत भय जान कर योगमाया को आदेश दिया ॥ ६ ॥ हे भद्रे ! हे देवि ! हे योगमाया जी आप गोप, गोपीजन एवं गोधन से समलंकृत व्रज में पधारें ॥ ६½ ॥ श्री वसुदेवजी की भार्या रोहिणी जी नन्दराय जी के गोकुल में है। कंस के त्रास से पीड़ित अन्य वसुदेवजी की स्त्रियाँ एवं अन्य स्त्रियाँ भी भूगर्भ में वास करती हैं ॥ ७ ॥ और योगमाये ! श्री देवकीजी के जठर में शेष संज्ञा-नाम वाले जो मेरे धाम विराजते हैं, उनको आप देवकी जी में से अच्छी तरह निकाल कर श्रीरोहिणी जी के उदर में पधरावें ॥ ८ ॥

[1]अथाहमंशभागेन देवक्याः पुत्रतां शुभे । प्राप्स्यामि त्वं यशोदायां नन्दपत्न्यां भविष्यसि ॥ ९ ॥
अर्चिष्यन्ति मनुष्यास्त्वां [2]सर्वकामवरेश्वरीम् । [3]धूपोपहारबलिभिः सर्वकामवरप्रदाम् ॥१०॥
नामधेयानि कुर्वन्ति स्थानानि च नरा भुवि । दुर्गेति भद्रकालीति विजया वैष्णवीति च ॥११॥
कुमुदा चण्डिका कृष्णा माधवी कन्यकेति च । माया [4]नारायणीशानी शारदेत्यम्बिकेति च ॥१२॥

कर्दमक्षमा

अन्वयः—हे शुभे ! अथ अहं अंशभागेन देवक्याः पुत्रतां प्राप्स्यामि त्वं नन्दपत्न्यां यशोदायां संभविष्यसि ॥ ९ ॥ सर्वकामवरेश्वरीं सर्वकामवरप्रदाम् त्वां मनुष्याः धूप-उपहार-बलिभिः अर्चिष्यन्ति ॥ १० ॥ च भुवि नराः स्थानानि कुर्वन्ति च दुर्गा इति भद्रकाली इति विजया इति वैष्णवी इति कुमुदा इति चण्डिका इति कृष्णा इति माधवी इति कन्यका इति माया इति नारायणी इति ईशानी इति शारदा इति अम्बिका इति च नामधेयानि कुर्वन्ति ॥ ११–१२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किमर्थमेवं कार्यमित्यत आह—अथेति । अनंतरमेवेत्यर्थः । अंशभागेनेति । अंशैः शक्तिभिर्भजतेऽधितिष्ठति सर्वान्ब्रह्मादिस्तंबपर्यंतानित्यंशभागस्तेन परिपूर्णेन रूपेणेत्यर्थः । यद्वा अंशैर्ज्ञानैश्वर्यबलादिभिर्भाजयति योजयति स्वीयानिति यथा तेनेति । यद्वा अंशेन पुरुषरूपेण मायाया भागो भजनमीक्षणं यस्य तेन । यद्वा अंशेन मायया गुणावतारादिरूपा भागा भेदा यस्य तेन । यद्वा अंशा एव मत्स्यकूर्मादिरूपा भजनीया न तु साक्षात्स्वरूपं यस्य तेन । यद्वा अंशैर्ज्ञानबलादिभिर्भजनमनुवर्तनं भक्तेषु यस्य तेन सर्वथा परिपूर्णेन रूपेणेति विवक्षितम् "कृष्णस्तु भगवान्स्वयम्" इत्युक्तत्वादिति । तां प्रोत्साहयति त्वं यशोदायामिति त्र्यक्षरोनसार्धचतुष्टयेन ॥ ९ ॥ सर्वान्पुत्रादीन्कामयंते ये तेषां वरामीश्वरीं श्रेष्ठां नियंत्रीमर्चकानां सर्वान्कामवरान्प्रददाति या ताम् ॥ १०–१२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवं गर्भसंकर्षणमित्यर्थः । अथेत्यव्ययस्य मंगलादिरूपबह्वर्थकत्वादनंतरार्थमेवात्र ग्राह्यमित्याह—अनंतरमेवेति । पूर्वव्याख्याने शक्तिभिरित्युक्तेः काः शक्तय इति जिज्ञासोत्पत्तेर्ब्रह्मादिषु कथंचिच्छक्तिदर्शनेऽपि स्तंबादिषु तददर्शनाद्बास्वरसप्रतीतेः

---

१. हं स्वांश—विज. । २. कर्मवरेश्वरीम्—इति कस्यचित् कामप्रदेश्वरीं—वीर. । ३. नामोप—वीर. विज. । ४. शाना—वीर. विज. ।

पुनराह—यद्वेति । इहापि स्वीयानित्युक्तेः । पक्षपातित्वेन वैषम्यनैर्घृण्ययोः प्रतीतेररुच्या पुनराह—यद्वेति । इहापि पुरुषरूपेणेत्युक्तेर्जीवस्यापि "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च" इति श्रीमुखोक्तेः । पुरुषरूपत्वेन मायाभागित्वं स्यात् । किञ्च मायाशब्दस्येक्षणार्थे वृत्तेरदर्शनादप्यस्वरसप्रतीतेः पुनराह—यद्वेति । इहापि मायासंबंधप्रतीतेर्मायिकत्वमायाति तादृशस्य तु न सर्वथा परिपूर्णत्वं सेत्स्यतीत्यरुच्या पुनराह—यद्वेति । न तु साक्षात्स्वरूपम् । "यतो वाचो निवर्त्तंते" इत्यादिश्रुतेर्वाङ्मनसाऽगोचरत्वात् । तेन निर्गुणं स्वरूपं लभ्यते तत्र चांशादिकल्पनमप्ययुक्तमयोग्यत्वात् योग्य एव पृथिव्यादावंश्यंशादिकल्पना दृश्यते नायोग्ये वियदादाविति अतोऽयमर्थोऽपि न तोषकर इत्यरुच्या पुनराह—यद्वेति । इह भक्तेष्वित्युक्तेऽपि रागद्वेषादयस्तत्र नैवोह्याः कल्पवृक्षादिवदिति । सर्वथा सर्वप्रकारेण । तां योगमायाम् । प्रोत्साहयति सोत्साहां करोति—त्वमित्यारभ्योच्छ्रयादित्यंतेन सार्द्धचतुष्कश्लोकेन ॥ ९ ॥ नियंत्रीं प्रेरिकां स्वामिनीमिति यावत् ॥ १० ॥ नामधेयानि नामानि । दुःखेन गम्यते प्राप्यत इति दुर्गा । भद्रं कल्याणं कलयति सृजति भक्तानामिति भद्रकाली । यद्वा—भद्रा मंगलरूपा चासौ काली नीलरूपेति भद्रकाली । विजयते सर्वदुःखानि सर्वदुष्टदैत्यान्वेति विजया । विष्णोरियं शक्तिर्वैष्णवी ॥ ११ ॥ कौ भूमौ मुद्धर्षोऽनयेति कुमुदा । शत्रुषु चंडति कोपं करोतीति चंडिका । 'चंडि कोपे' । सदानंदरूपत्वात्कृष्णा कृष्णभगिनीत्वाद्वा । 'अदृश्यतानुजा विष्णोः' इति वक्ष्यमाणत्वात् । "नंदगोपगृहे जाता यशोदगर्भसंभवा" इति मार्कंडेयाच्च कृष्णवर्णत्वाद्वा कृष्णेति । मधुवंशे जातत्वान्माधवी मधोर्भगवतो भगिनीत्वेन दयितत्वाद्वा माधवी । कं सुखं नयति प्रापयति दुष्टदैत्यनाशनेन सर्वं जगदिति कन्या 'जगत्स्वास्थ्यमतीवाप' इति मार्कंडेयोक्तेः । 'णीञ्—प्रापणे' अतः कः । यद्वा—कनति तत्तद्रूपेण द्योतसे सर्वत्रेति कन्या 'कनी—दीप्तौ' कन्यैव कन्यका । स्वार्थे कप्रत्ययः । 'मायः पीतांबरेऽपि स्यात्' इति कोशान्मायस्येयं माया । मीयते कार्यान्यथानुपपत्त्या ज्ञायते इति माया । अघटनघटनापटीयसी भगवच्छक्तिः । तद्रूपा नारस्य जनसमुदायस्यायनं प्रवृत्तिर्यथा सा नारायणी "जलायना नराधारा समुद्रशयनाऽपि वा । नारायणी समाख्याता नरनारीप्रवर्त्तिका ॥" इति देवीपुराणोक्तरीत्या नारायणीपदं व्याख्येयम् । ईष्टे इतीशाना । सर्वेश्वरी सर्वदेवस्तुत्यत्वात् । तथात्वम् 'शक्रादयः सुरगणाः' इत्यादिना 'देव्या हते तत्र महासुरेन्द्रे' इत्यादिना च मार्कंडेये स्फुटतरम् । शीर्यते ज्ञानेनेति शारः संसारः । 'शॄ—हिंसायाम्' तं द्यति खंडयतीति शारदा 'सैषा प्रसन्ना वरदा नृणां भवति मुक्तये । सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥' इत्युक्तेः । "या मुक्तिहेतुरविचिन्त्यमहाव्रता च" इत्याद्युक्तेश्च । यद्वा—शरणं शारो हिंसा तं ददाति महिषादिदैत्येभ्य इति शारदा । शरदृतौ पूज्यत्वाद्वा शारदा । 'शरत्काले महापूजा क्रियते या च' इति मार्कंडेयोक्तेः । अम्ब्यते शब्द्यते दुःखे या सा अम्बा 'अबि—शब्दने' यद्वा—अम्ब्यते स्नेहेनोपगम्यते या सा 'अबि—गतौ' "अकर्त्तरि च कारके संज्ञायाम्" इत्युभयत्रापि स्त्रियां घञ् ततष्टाप् स्वार्थिके आम्बिकेति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथानन्तरमेवेति देवकी पुत्रत्वप्राप्तौ त्वरां बोधयति एवमेव श्रीबलदेवस्याल्पकालाग्रजत्वं तच्चाग्रे व्यक्तं भावि अंशेति त्रैव्याख्यातं तत्र प्रथमेऽथ कर्त्तरि घञर्थः द्वितीये च णिजन्तत्वात्तद्वत् तृतीये अंशेन पुरुषरूपेणेत्यादिकं त्वस्मन्मतसहायमिति ज्ञेयं यद्वा अंशानां भागो भजनं प्रवेशो यत्र तेन स्वरूपेण यद्वा अंशानां जीवानां भागधेयेन हेतुना ननु श्रीसङ्कर्षणाकर्षणे श्रीयशोदायां जन्मनि च मम का योग्यतेत्यपेक्षायामाह, शुभे मन्निदेशेनैव प्राप्तमङ्गले तत्र त्वं योग्याभूरित्यर्थः । एवं तां प्रति वरदानं ज्ञेयम् अत एव तया श्रीनन्दादिमोहनं वक्ष्यति यद्वा, हे भाग्यवति ! यतो यशोदायां भविष्यसि यशोदायामिति तेन तव यशः नन्दपत्न्यामित्यानन्दश्च भवितेति भावः । निगूढश्चायमर्थः अंशभागेन प्रकाशभेदेन देवक्याः पुत्रतां प्राप्स्यामीत्येवं प्रकाशान्तरेण श्रीयशोदाया अपि पुत्रतां प्राप्स्यामीति ज्ञेयं "अवतीर्णौ जगत्यर्थं स्वांशेन बलकेशवौ" इत्यत्र श्रीस्वामिचरणैरपि व्याख्यातं स्वांशेन मूर्तिभेदेनेति अत एव त्वं यशोदायां भविष्यसि विद्यमानतामेव प्राप्स्यसि न तु पुत्रीत्वमिति तथा व्यवहाराभावादिति भावः । एतद्व्यञ्जनयैव भविष्यसीति पृथगुक्तम् अन्यथा श्रीयशोदायां त्वं पुत्रतां प्राप्स्यसीति विभक्तिविपरिणामेनैवार्थसिद्धिः स्यात् पुत्रशब्दो हि कन्यामपि वदति अत एव तद्व्यवच्छेदाय "पुमांसं पुत्रमाधेहि" इति श्रुतौ पुमांसमिति पुत्रतामिति सामान्यवचनत्वेन पुंस्त्वव्यभिचारित्वं युक्तोनामिति वत् । अयं भावः "दधार सर्वात्मकमात्मभूतम्" इति वक्ष्यमाणदिशा यथा देवकी मां मनसि धारयिष्यति स्वगर्भजत्वेनाभिमंस्यते च तथा सापि । यथा च देवक्यां मम मातृत्वानुभवस्तथा तस्यामपीति नन्दस्त्वात्मज उत्पन्न इत्यादौ श्रीशुकवाक्ये विवृतीभविष्यति । अतो भवत्यास्तत्र सत्ताव्याजमात्रार्थं मया दिश्यते यतो भवती मायेति ॥ ९ ॥ तदेवाभिव्यञ्जयति—अर्चिष्यन्तीति त्रिभिः । मनुष्या इति प्रायस्तेषामेव सकामत्वात् धर्मेधिकाराच्च इत्यादिकं च तां प्रति वर एव, तथा च श्रीहरिवंशे—

"प्रसादं ते करिष्यामि मत्प्रभावसमं भुवि । येन सर्वस्य लोकस्य देवि ! देवी भविष्यसि" ॥

इति ॥ १० ॥ नामेति युग्मकं कुर्वन्ति करिष्यन्ति भुवीति भुवि वर्त्तमानाः सर्वेऽपीत्यर्थः । दुर्गादिनामानि अर्चकानां भावभेदेन तत्तत्कामापेक्षया किं वा स्थानभेदेन तत्तदाख्यया प्रसिद्धेः तत्र च क्वापि नामैकं कुत्रापि च द्वे कचिच्च बहूनीत्येतदभिप्रायेण तत्र तत्रेतिशब्दप्रयोगः चकाराच्च सर्वेषामेव प्राधान्यबोधनार्थमिति ॥ ११–१२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अथाहमंशभागेन मदशांशभूतेन सङ्कर्षणेन सह हे शुभे ! देवक्याः पुत्रत्वं प्राप्स्यामि त्वन्तु नन्दस्य पत्न्यां यशोदायां भविष्यसि सम्भव ॥ ९ ॥ सर्वेषां कामानामिष्टार्थानां वराणां च प्रदात्रीं सर्वकामप्रदानामपीश्वरीं त्वां नानाविधैरुपहारैर्नैवेद्यैरन्यैश्च बलिभिः पूजाभिर्नराः अर्चिष्यन्ति एवमनुगृह्णामीति भावः ॥ १० ॥ तथा भुवि तव स्थानानि मन्दिराणि नामधेयानि च कुर्वन्ति करिष्यन्ति, तत्र नामानि दर्शयति, दुर्गेतीति ॥ ११–१२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

स्वांशभागेन स्वांशांशेन अंशस्य भागो भजनं स्वीकारः तेनेति वा ॥ ९–१० ॥ दुरधिगमत्वाद्दुर्गा भद्रा मङ्गला नीला चेति भद्रकाली सर्वा दिशो विजयतीति विजया विष्णोरियं वैष्णवी ॥ ११ ॥ कौ भूमौ मोदतीति कुमुदा "चडि कोपे" इति धातोः शत्रवे कुपितत्वाच्चण्डिका सदानन्दत्वात्कृष्णा मधुकुलोत्पन्नत्वान्माधवी विष्णुदयितत्वाद्वा कं सुखं नयतीति कन्या नित्यकुमारी वा मीयते ज्ञायते इति माया मां यातीति वा नारस्य नरसमुदायस्य अयनत्वान्नारायणी सर्वस्येष्टा इति ईशाना शीर्यत इति शारः तं संसारं यति खंडयतीति शारदा शत्रुविषयं शारं हिंसां ददातीति वा सर्वस्य मातृत्वादम्बिका ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथाहमिति । अंशानां भागो भजनं प्रवेशो यत्र तेन पूर्णस्वरूपेणैव ॥ ९–१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अंशैर्ज्ञानबलादिभिर्भजनमनुवर्त्तनं भक्तेषु यस्य तेन सर्वथा परिपूर्णस्वरूपेणेति भावार्थदीपिकायाम् अंशानां भागो भजनं प्रवेशो यत्र तेन पूर्णेन स्वरूपेणेति अंशानां ब्रह्मादीनां भागेन भागधेयेन हेतुनेति द्वयं वैष्णवतोषिण्याम् । यद्वा, अंशभागेन अंशांशेन पुत्रतां पुत्रभावं प्राप्स्यामि न तु सर्वांशेनेत्यतः सा देवकी मयि वात्सल्यमैश्वर्यभावमयं करिष्यतीत्यर्थः । तेन भावान्तर-शून्यं सम्पूर्णमेव वात्सल्यसुखं श्रीयशोदायामेव प्राप्स्यामीति द्योतितम्, त्वन्तु यशोदायां भविष्यसि उत्पत्स्यसे मातरि यशोदायां पुत्रीत्वं समवाप्स्यसीत्यनुक्तस्त्वयि सुतायामपि सा वात्सल्यं न करिष्यते अलक्ष्यविग्रहत्वेनैव तव व्रजे वर्तिष्यमाणत्वादिति भावः ॥ ९ ॥ तवांशभूतां मायान्तु वसुदेवेनानेष्यमाणां कंसं वञ्चयित्वा विन्ध्यादिस्थानेषु प्रभविष्यन्तीति नरा आराधयिष्यन्तीत्याह–अर्चिष्यन्तीति । यतः सर्वकामानां लोकानां वरां श्रेष्ठामीश्वरीम् ॥ १० ॥ कुर्वन्ति करिष्यन्ति तदेवमिदानीं मदवतारेण त्वदवतारेण च लोकाः केचिद्वैष्णवाः केचित् शाक्ताश्च भविष्यन्तीति भावः ॥ ११–१२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथानन्तरम् अंशानां जीवानां तत्तत्पुरुषार्थाधिकारिणां धर्मार्थकाममोक्षरूपा भागा यस्मात्तेन सर्वपुरुषार्थप्रदेन रूपेण देवक्याः पुत्रतां यास्यामि ते च धर्मोदयस्तत्तदधिकारिभ्यो भगवता दत्तास्तत्तत्प्रकरणे द्रष्टव्याः ॥ ९ ॥ मनुष्याः मनुष्यत्वमन्याः न त्वात्मानात्मपरमात्मविदः सर्वान् बाह्यान् बहुरूपान् प्राकृतान् भोगान् कामयन्ते ये ते सर्वकामाः तेषां वरेश्वरीम् ॥ १० ॥ कुर्वन्तीति वर्तमानसामीप्ये प्रयोगो ज्ञेयः ॥ ११–१२ ॥

श्रीसुबोधिनी

तर्हि स्थितावेव कंसभयाभावात् को दोष इति चेत्तत्राहाथाहमिति । अयं पुरुषोत्तमो योगमायामाज्ञापयति । भक्तिमार्गे तस्यैव सेव्यत्वात् । आरम्भे 'यदूनां निजनाथाना'मिति वचनात् । स चतुर्धात्र समायास्यति । तदर्थमाहाथ शीघ्रं तदनन्तरमेव । **अहं** पुरुषोत्तमः । **अंशानां वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धानां भागेन** विभागेन चतुर्धा कार्यकरणाद् **देवक्याः पुत्रतां प्राप्स्यामि** । **भागेने**त्येकवचनं **प्रद्युम्नांशेनैव** पुत्रत्वमितिज्ञापनार्थम् । **अथाह**मितिसन्दर्भेण यथा त्वं यास्यस्यन्यत्रोत्पन्नान्यत्र तथाहमपीति ज्ञापितम् । **पुत्रता**मिति लोकप्रतीत्या तद्धर्मवत्त्वं ज्ञापितं नत्वहं पुत्रो भविष्यामि **शुभ** इति सम्बोधनेन त्वद्गमनेन मद्गमणस्थानं शोभायुक्तं भविष्यतीत्यग्रिमाज्ञापने हेतुकथनार्थं तस्या भगवदेकशरणाया वैकुण्ठे केवलं स्थातुमयुक्तमिति । तामपि जनानार्थमा-ज्ञापयति **त्वं यशोदायां नन्दपत्न्यां भविष्यसी**ति स्तन्योत्पादनार्थं मोहजननार्थं मारणार्थं च ॥ ९ ॥ स्तन्योत्पादनार्थं मोहजननार्थं मारणार्थं च यद्यप्युत्पाद्यते तथापि तस्यास्तदनिष्टमिति तदनुक्त्वा फलान्तरमाहा**र्चिष्यन्तीति** । **मनुष्या** इति । देवांशा दैत्यांशाश्च निवारिताः । देवांशास्तु भगवत्सेवका एव । दैत्यांशास्तु न भजन्त एव । अर्चनायां फलं हेतुः । **सर्वासां कामनानां वराणामीश्वरी**मिति । काम्याः सोपाया विषयाः । वरा अनुपायाः । स्त्रियाः साक्षात्सेवा तस्या अपि बाधिकेति तन्निवृत्त्यर्थं **धूपोपहारबलिने**ति । पूजायां साधनत्रयं निर्दिष्टम् । **धूपो** दूरादेव सम्भवति । **उपहारश्च** । **दीप**स्तु स्वतःप्रकाशमानाया उपयोगी न भवतीति नोक्तः ।

बलिः पशूनां दानम्। पूर्वं काम्यादीनां प्रभुत्व उक्तेप्यदातृत्वेभजनीया स्यादिति तदातृत्वमपि तस्यां भगवान् स्थापयति **सर्वकामवरान् प्रकर्षेण ददातीति सर्वकामवरप्रदा** ॥१०॥ तस्याः सान्निध्यार्थं **मन्त्ररूपाणि** नामानि स्थानान्याह **नामधेयानीति**। **कुर्वन्तीति** वर्तमानसामीप्ये। नामस्वेव **स्थानान्यपि** प्रसिद्धानि भवन्ति। चकारादधिष्ठानानि। **नरा** इति पूर्ववत्। भुवीति स्थापनार्थम्। नामान्याह दुर्गेति। सर्वत्रेतिशब्दो मन्त्रदेशभेदेन प्रसिद्धिप्रतिपादनार्थः। **दुर्गा** काश्यां प्रसिद्धा भद्रकाल्यवन्त्याम्। **विजयोत्कले**। **वैष्णवी** महालक्ष्मीः कुल्हापुरे। **चण्डिका** कामरूपदेशे। **मायाशारदे** उत्तरदेशे। अम्बिकाम्बिकावने। कन्यका कन्याकुमारी। अन्यान्यपि प्रसिद्धानि स्थानानि तथैव मन्त्रा ज्ञेयाः ॥ ११–१२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अथेत्यत्र—अथाहमित्यादिसन्दर्भस्यायमर्थः। **कंस**भयाभावमात्रं न स्वावतारप्रयोजनमपि तु तत्सेवाकरणम्। स चानेकविधेत्यंशसंबन्धिनी च न सर्वफलदेति स्वावतरणावश्यकत्वमिति। **विभागेनेति**। चतुर्विधकार्याचरणकृतो यः स्वरूपव्यूहविभागस्तेनेत्यर्थः। **एकवचन**मित्यादि। 'युवां वै ब्रह्मणादिष्टा'वित्यादिभगवद्वाक्यैः पृश्निसुतपोभ्यां प्रजासर्गसम्पादकपुत्रार्थं वरप्रार्थनावगमात् तदर्थं तत्कर्तृप्रद्युम्नस्यैवौचित्यात् तथेत्यर्थः। भूम्या देवैश्च भूभारहरणार्थमर्थितत्वात् तदर्थं 'यदा यदा हीति' गीतावाक्याद् धर्मरक्षार्थमवतार आवश्यको मोक्षार्थञ्च ज्ञानोपदेशार्थञ्चेति संकर्षणानिरुद्धवासुदेवानामप्यवतारणम्। न तु तेषां पुत्रता तथा स्वस्यापि। ऐक्यभ्रमादेव लोकानां परं तथाप्रतीतिर्भवित्रीति तथैव भगवदिच्छा। तथा च यथा परशुराम उभयोर्ब्राह्मणत्वक्षत्रियत्वयोर्निवेशेपि ब्राह्मणत्वेनैव पुत्रत्वं भार्गवत्वात् क्षत्रियत्वस्य तु युद्ध एव प्रादुर्भावः 'प्रहारः क्षात्रधर्मस्ये'त्युद्योगपर्वीयभीष्मवाक्यात्। तामुद्घाटयन्ति पुत्रतामित्यादि ॥ ९ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अर्चिष्यन्तीत्यत्र—स्त्रिया इति। स्वरूपभूताया वरदानार्थं वक्ष्यमाणमन्त्रैः प्रकटायाः **साक्षात्** स्नापनादिरूपा सेवा तस्या अपिशब्दान्मनुष्याणां च **बाधिका** वाममार्गवद्विकारसम्भवेन सेव्यसेवकभावविघातिकेतिहेतोस्तादृशबाधानिवृत्त्यर्थं दूरसेवासाधकं धूपादिसाधनत्रयं **निर्दिष्ट**मित्यर्थः। **दीपस्त्विति**। सप्रकाशत्वोक्तेरियं स्वरूपभूता। दीपापेक्षा तु प्रतिमायामिति भावः ॥ १० ॥
नामधेयानीत्यत्र—तस्या इति। स्वरूपभूताया इत्यर्थः। 'नामानीति स्थापनार्थ'मित्यग्रे कथनात् प्रतिमारूपाया इति शेषः ॥ ११ ॥

बुभुत्सुबोधिका

अथाहमित्यत्र तर्हीति यदूनां भयभञ्जनं वैकुण्ठस्थितौ सत्यामेव कंसकृतस्य भयस्य यदूनामीश्वरसम्बन्धित्वज्ञानेऽभावात् भवति न तु यदुषु मानुषीं तनुमाश्रितस्य सम्बन्धिज्ञानेतः स्थितौ को दोष इत्यर्थः। यद्वा स्थितौ रोहिण्या गोकुले स्थितौ। कंसभयेति अष्टमगर्भस्य कंसाद् भयम्। 'अन्याश्चे'त्यत्रान्येषां चेतिपक्षातो 'रोहिणीवसुदेवस्ये'ति पादद्वयमधिकम्। को दोष इति पादद्वयमधिकमित्यत्र को दोषः। 'अन्याश्चे'त्यत्र भेदप्रतियोगिनिरूपणार्थमपि न पादद्वयापेक्षेति पादद्वयमधिकं को दोष इत्यर्थः। तत्राह तादृशाविषय वागतीतपुरुषोत्तमाविर्भाव स्वसेवार्थमाह। अयमित्यादि माया योगमायानन्दशक्तिः स्वयं दयापरीत इति कृपात्वेन मायेन्द्रियाणि अतो दयापरीतो गोविन्दः। संसारदुःखं बहिरुत्क्षिपता सेवया स्थिरप्रज्ञाद्वारा भगवत्प्रेप्सूनां दैत्यस्थानापन्नः संसारस्तज्जदुःखानबर्हणभक्तियोगवितानार्थं तदाविर्भावस्यावश्यकत्वात्। पृथावाक्यात्। तदुक्तं भक्तिमार्गे इत्यादिना। एवकारेणाक्षरयोगव्यवच्छेदः। 'य एवास्मि स सन् यजे', 'मुक्तोपसृप्यव्यपदेशात्', 'मुक्तानामपि सिद्धानां नारायणपरायणः सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' इति वाक्याच्च। अक्षरात्मकं जगत् सेवकम्। यदूनां निजेति यादवत्वेन यादवोपस्थितो 'यदुषु संसारदुःख'मित्याद्युक्तानां सान्निवेशो ज्ञेयः। निजनाथत्वस्यावान्तरभेदं बहुविधत्वात्। स चेति पुरुषोत्तमस्य चतूरूपत्वात् पुरुषोत्तमश्चेत्यर्थः। समायास्यतीति सम्यक्त्वं वेदोक्तप्रकारेण दयापरीत एवायास्यति योनुभवात्मा वेदान्ते उक्तः। 'आत्ममायामृते' इति वाक्ये अनुभवात्मन इत्यस्य प्रकृतजीवपरतया तत्त्वेपि भगवतो देहपरिग्रहे आत्ममायेन्द्रियाणीति पक्षेनुभवपदस्य सत्यज्ञानानन्तानन्दपरत्वेपि बाधकाभावात्। कारणगुणाः कार्यगुणानारभन्त इति। 'भगवानपी'तिश्लोके ज्ञानशक्तिद्वारा पुरुषोत्तमाविर्भावार्थमुक्तम्। अत्र कर्मद्वारा पुरुषोत्तमाविर्भावार्थं प्रद्युम्नाविर्भावः सङ्ख्यातात्पर्यार्थमुच्यते। भक्तार्चनकर्मणा पुरुषोत्तमाविर्भावः। 'कर्मणा जायते जन्तुः कर्मणैव प्रलीयते' इति 'कर्मैव गुरुरीश्वर' इति चोक्तेः। 'ज्ञानशक्तिक्रियाशक्ती सन्दिह्यते परस्थिते' इति भाष्यात्। यद्वा। 'भगवानपी'त्यत्र कर्मद्वारा पुरुषोत्तमाविर्भावः। 'अथाह'मित्यत्र अहङ्कारेण पुरुषविधस्योपस्थितेः पुरुषविधब्राह्मणोक्तज्ञानशक्तिद्वारा पुरुषोत्तमाविर्भावार्थमुक्तम्। तदा समायातीत्यत्र सम्यक्त्वं वेदान्तोक्तप्रकारेणेत्यर्थो ज्ञेयः। तदनन्तरमिति रोहिण्युदरसन्निवेशानन्तरम्। अत्र शीघ्रमिति क्रियाविशेषणेनानन्तर्ये शीघ्रत्वबोधनेन व्यवहितानन्तर्यनिवारणा 'दाविवेशांशभागेने'ति श्लोकसुबोधिन्युक्ताथशब्दार्थसङ्ग्रहाय। तत्तत्रैव स्फुटिष्यति। तादृशानन्तरमत्राथशब्दार्थ इत्युक्तम्। विभागेनेति **चतुर्विधकार्याचरणकृतो यः स्वरूपव्यूहविभागस्तेनेत्यर्थः**। एवेति 'तस्य माता न माता पिता न पिते'तिश्रुतेरेवकारः। प्रद्युम्नस्तु

कर्मप्रधान इति मात्रादिकं सम्भवति। अत्र सङ्कर्षणाविर्भाव इति निबन्धे सङ्ख्यातात्पर्यार्थं प्रद्युम्नाविर्भाव इत्युक्तम्। 'न माते'त्यस्य मेधावीति निघण्टावर्थः। एकरसत्वाद् वैकुण्ठस्थस्य तस्यात्रागतौ ह्येकरसत्वभङ्गमाशङ्क्यानुकरणधर्मेणाभङ्गमाहुः अथाहमिति। तथाहमपीति तथा अहमेकरसोऽप्यनुकरणधर्मेण गमिष्यामीत्यर्थः। 'अनुकृतेस्तस्य चे'ति व्याससूत्रात्। न त्वहमिति प्रद्युम्नस्तु पुत्रो भविष्यति च। अग्रिमेति 'त्वं यशोदाया'मित्यग्रिमाज्ञापने। आज्ञामध्यपात्यपि सर्वमाज्ञैव। नवधाभक्तिमध्यपात्यर्चनं भक्तिरितिवत्। तस्या इत्यादि आनन्दशक्तिभूताया योगमायायाः। तेनेयं वैकुण्ठे तिष्ठति। कृपात्वेन मायेन्द्रियरूपापि। गोविन्दत्वोपयोगिनी। मोहिका तमोरूपा 'न यत्र माये'त्यनेन 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्र'मित्यनेन द्वितीयस्कन्धनवमाध्याये निषिध्यते। आज्ञापयतीति साज्ञां करोति तामाज्ञापयति। भविष्यसीत्याज्ञयेतिशेषः। स्तन्येत्यादि अष्टमे मासेऽपत्यस्नेहेन स्तन्यमिति लोकः। मोहेति मोहभिन्नमोहसदृशजननार्थम्। योगमायाया नित्यक्रीडास्थत्वेन तमोमोहाभावात्। मारणार्थमिति अवस्तुत्वेन क्लिष्टकर्मत्वाभावात्॥ ९॥

भविष्यन्तीत्यत्र उत्पाद्यत इति 'नन्दपत्न्यां भविष्यसी'त्यत्रोत्पादनार्थकभवतेः प्रयोगात्। 'परो भवती'त्यत्रेव। तस्या इति योगमायायाः। तत् उत्पादनम् अनिष्टं भगवदेकशरणत्वात्। 'सकृदेव प्रपन्नो यस्तवास्मीति च यो वदेत् अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं हरे'रिति अभयं फलम्। भगवतोऽनिष्टम्। न हि शरणागता आवर्तन्त इति भावः। 'त्रया ह प्राजापत्या' इति बृहदारण्यकादाहुः देवांशा इत्यादि। काम्या इति उक्तकामनासु पुत्र्यहं स्यामित्यादिरूपास्विच्छासु योग्या विषया इति काम्याः पुत्रादयः सोपायाः उपाया अर्चनादयस्तैः सह वर्तमानाः। विषयाः। वरा इति अनुपाया विषयाः। यथा हिरण्यकशिपोर्वरः। स्त्रिया इति स्वरूपभूतायाः वरदानार्थं वक्ष्यमाणमन्त्रैः प्रकटायाः साक्षात्स्नापनादिरूपा सेवा तस्याः। अपिशब्दात् मनुष्याणां च बाधिका वाममार्गवद् विकारसम्भवेन सेव्यसेवकभावविघातिकेति हेतोस्तादृशबाधनिवृत्त्यर्थं दूरसेवासाधकं धूपादिसाधनत्रयं निर्दिष्टमित्यर्थः। दीपस्त्विति स्वप्रकाशत्वोक्तेरियमानन्दशक्तिरूपा जगत्कारणे प्रकाशयुक्ता। दीपापेक्षा तु प्रतिमायामितिभावः। दानमिति स्वसत्त्वध्वंसपूर्वकपरस्वत्वोत्पादनं दानम्। न तु हिंसनम्। अत एव पुरुषपशुदानानन्तरं हिंसनं भद्रकाली उच्चाट। 'पशुना रुद्रं यजेत' इत्यादिस्थले पशु रुद्राय ददातीत्यन्तमेव। 'छागस्य वपां मेदो जुहुधा'त्यादिस्थले होमो दानमेव। हु दानादनयोरिति धातुपाठात्। पूर्वं काम्यादीनामिति पूर्वं 'सर्वकामवरेश्वरी'मितिपदे। आदिना वरः। तद्दीर्घत्वं च कामशब्दात् परस्य यकारस्य वर्णस्य लोपश्छान्दसः। यतः काम इच्छा न तु पुत्रादयः लक्षणाप्रसङ्गात्॥ १०॥

नामधेयानीत्यत्र मन्त्ररूपाणीति मत्रि गुप्तभाषणे। गुप्तभाषणरूपाणि। मन्त्रैः रूप्यन्ते व्यवह्रियन्ते तानि मन्त्ररूपाणि। वर्तमानसामीप्य इति भविष्यत्काले। करिष्यन्तीत्यर्थः। भविष्यत्काले वर्तमानत्वम्। अधिष्ठानानीति प्रतिमारूपाणि। पूर्ववदिति देवांशा दैत्यांशाश्च निवारिताः 'मनुष्या' इत्यत्रेव। सर्वत्रेतिशब्द इति इतिः प्रसिद्धे। 'इति प्रकरणे हेतौ प्रकाशादिसमाप्तिष्विति विश्व, आदिपदार्थः प्रसिद्धिः। तथा च दुर्गेतिनामधेयं करिष्यन्तीत्यत्र। 'दुर्गां देवीं शरणमहं प्रपद्ये' इति मन्त्रकाशीभूदेशाभ्यां इतरमन्त्रभूभेदेन दुर्गायाः प्रसिद्ध्या नामधेयम्। करिष्यन्ति। ताभ्यां दुर्गासान्निध्यमधिष्ठानेतिशब्दः प्रसिद्धिवाचकः सान्निध्यतात्पर्यकः। 'इति स्वरूपे सान्निध्ये विवक्षानियमे मते' इति विश्वात्। स्थानं देवालयं, एवमन्यत्र॥ ११॥

कुमुदेत्यत्र कन्यकेति अम्बिकायाः पूर्वं व्याख्यानं भूदेशमन्त्राधिष्ठानस्थानव्याख्यानप्रायपाठात्। प्रसिद्धानीति अयमर्थः। आनन्दशक्तियोगमायाया नामानि। कृष्णा नारायणी माधवी भद्रकाली योगमायाया एव नामानि। 'देवः सुपर्वणि राज्ञि'त्युक्त्वा 'देवी भट्टारिकायां चे'ति विश्वः। अत्र 'गच्छ देवि'त्यत्र देवीपदं राज्यां, ईश्वरस्य राजाधिराजत्वात्। साऽऽनन्दशक्तिर्जगत्कारणभूता योगमाया। कुमुदा मूलदेवीनाम सती वायुमायानाम 'अत एव प्राण' इति वैयाससूत्रात्। कन्यका मूलदेवीनाम सती नन्दगोकुलस्त्रीणां नाम। शारदा तथा सती हिरण्यगर्भमायानाम। पारिशेष्यात्। माया तथा सती (=कद्रू=शङ्कराचार्यमाया) बुद्धावतारमायानाम। दुर्गा चण्डिकाम्बिकाईशानी च तथा सत्यः रुद्रस्य मायानामानि। विजयावैष्णव्यौ तथा सत्यौ विष्णुमायानामनी। विजयार्जुनस्य नरावतारस्य वा। तथा भद्रकाली। सुभद्रा। भद्रा काली भद्रकाली। सत्यभामेत्यत्रेव अत्र कृष्णा तथा सती कृष्णतुर्यमायानाम। नारायणी नारायणमायानाम। माधवी माधवमायानाम। एतानि नामानि सान्निध्यार्थं मन्त्ररूपाणि। मत्रि गुप्तभाषणे। व्युत्पत्तिभिर्नामानि गुप्तभाषणरूपमन्त्राः। अथ मन्त्रदेशौ। सान्निध्यातिरिक्तफले यत्राभियुक्तानां मन्त्र इति समाख्या स मन्त्रः। अस्यन्तत्कान्तोत्तमपुरुषान्ता वा मन्त्राः। अत्र कृष्णायाः मन्त्रदेशौ भुवि। उदयास्ताचलौ। लोकालोकाद्रिशिखरं वा। अत्र मन्त्रलक्षणं वेदत्वम्। 'मन्त्रब्राह्मणयोर्वेदनामधेय'मिति पूर्वमीमांसायाम्। 'इतिहासपुराणं वेदानां पञ्चमो वेद' इति छान्दोग्यश्रुतेः। पुराणानामपि वेदत्वम्। तत्र मन्त्रस्तु 'ऋगावर्ता यजुर्वेदा सामस्तोमोर्मिमालिनी'त्याद्युक्त्वा 'सुपर्णपत्राशुगतिद्विजस्कन्धसमाश्रिता, साङ्गोपाङ्गद्विजा अघप्रादुष्कृतपदक्रमा। समन्त्रब्राह्मणा सूक्तकल्पकल्पितसत्क्रिये'ति। पद्मपुराणे मारीचसर्गे यमुनामाहात्म्ये स्फुटम्। नारायणी 'नारायणसमो गुणै'रितिवाक्यात् पुरुषविधब्राह्मणोक्तपुरुषविधे निविष्टा। नारायणमन्त्रदेशौ। प्रसिद्धौ। माधवीत्यत्र पुंयोगलक्षणङीष्। अवतारमन्त्रदेशौ। भद्रकालीत्यत्र मन्त्रः 'कात्यायनि महामाये महायोगिन्यधीश्वरि नन्दगोपसुतं देवि पतिं मे कुरु ते नम' इति। देशोवन्ती। कुमुदा कौ' मोदते। कर्तरि क्विप्, टाप्। वायुमाया। कौमोदकी गदा वायुतत्त्वम्। अन्तरिक्षदेशः।

'वायवः स्थोपायवः स्थे'तिमन्त्रः। उत्तमपुरुषान्तत्वात् उपायवो मनुष्याः। कन्यकेत्यत्र 'कन्यकुमारि धीमही'तिमन्त्रः। माथुरो देशः। शारदेत्यत्र शारदस्य स्त्रीत्वविवक्षायां टाप्। शरदोयं शारदः शरदृतुसम्बन्धिवर्षः प्रजापतिः। 'संवत्सरो वै प्रजापति'रितिश्रुतेः। 'शारदः पीतमुद्गे स्यात् शालीने प्रतिभे वने वर्षेथ जलपिप्पल्या'मिति विश्वः। मन्त्रः भद्रकाल्याः। भद्रा काली भद्रकालीतिप्रयोगत्रयात्। देशः उत्तरः। मायेत्यत्र मन्त्र उक्तेषु कश्चित्। देश उत्तरः। दुर्गेत्यत्र 'दुर्गां देवीं शरणमहं प्रपद्य' इति मन्त्रः उत्तमपुरुषान्तत्वात्। देशः काशी। दुःखेन गम्यते ज्ञायतेस्याम्। 'सुदुरोरधिकरणे' इति डः। दुःखेन दुष्टैर्वा गीयते, गैशब्दे। आतोनुपसर्गे कः। 'दुर्गं कोटे दुर्गमे च दुर्गा तु नीलिकोमयो'रिति हेमचन्द्रः। दुर्गा उमा सती क्रोधे तस्याः स्वरूपं ज्ञातमिति। चण्डिकेत्यत्र चडि कोपे। ण्वुल्। टाप् पचाद्यचि, बाह्वादिभ्यश्चेति ङीष्। 'चण्डी कात्यायनी देव्या'मिति कोशात्। 'कात्यायनि महामाये'ति मन्त्रः। कामरूपदेशः। अम्बिकेत्यत्र अम्बैवाम्बिकः। अवि शब्दे। भ्वा० आ० से० अम्बते इत्यम्बा। पचाद्यच्, टाप्। 'अम्बिका पार्वती मात्रोर्धृतराष्ट्रस्य मातरि'। मन्त्रः पार्वत्याः। शिवस्तुतिः पर्वतस्येयं पार्वती। तस्येदमित्यण्। 'पर्वतेराय्यास'मिति संहितायाः। देशोम्बिकावनम्। ईशानीत्यत्र ईशस्य स्त्री। इन्द्रवरुणेति ङीषानुकौ। 'जाने त्वामीश विश्वस्ये'ति परशिवस्य स्तुतिर्मन्त्रः। स्तुतौ ईशपदात्। देशो वैकुण्ठः। 'ज्ञानेन भक्ते'त्यथर्वश्रुतेः। भक्तः शिवः। विजयेत्यत्र जयतीति जयः, विशेषेण जयो विजयो विष्णुस्त्रीत्वविवक्षायां टाप्। मन्त्र उत्कलदेशे। देश उत्कलः। वैष्णवीत्यत्र विष्णोरियं वैष्णवी। तस्येदमित्यण्। कुल्लापुरे मन्त्रः। देशः कुल्लापुरम्। विजयोर्जुनः तस्य विजया। मन्त्रदेशौ द्रष्टव्यौ। सुभद्रेत्यत्र मन्त्रः 'यया सृजस्यत्सि जगन्ति नाथ वक्षःसरोजाश्रयया स्वशक्त्या तां भद्ररूपां जगदाश्रयां ते देवारणिं पादयुगं नतोस्मी'ति स्कन्दपुराणे पुरुषोत्तमक्षेत्रमाहात्म्ये। उत्कलदेशः पुरुषोत्तमक्षेत्रम्। भद्रकाल्या अप्ययं मन्त्रः। अत्रत्यकाल्या अपि ॥ १२ ॥

मातृपितृतोषिणी (सुबोधिनीजी)

तर्हि स्थितावेव—माया शायद संशय करें कि यदि यह सप्तम गर्भ आपका तेज रूप है इनको वास्तव में कंस नाश नहीं कर पायगा फिर यहाँ ही रह जाय तो क्या है ? इसके उत्तर में कहते हैं कि इस श्लोक में जो माया को आज्ञा देते हैं वे ये पुरुषोत्तम हैं, कारण की भक्तिमार्ग के वे ही सेव्य हैं। आरम्भ से भी कहा है कि **'यदूनां निजनाथानाम्'**। वे पुरुषोत्तम यहां चतुर्व्यूह प्रकार से पधारेंगे। इसलिये कहते हैं कि **'अथ'** शीघ्र वा आप इस सप्तम गर्भ को ले जाओगी इसके अनन्तर ही, मैं पुरुषोत्तम, चार प्रकार के कार्यों को पूर्ण करने के लिये, वासुदेव, सङ्कर्षण, प्रद्युम्न, अनिरुद्ध के चार व्यूहों के विभाग से, देवकी जी के पुत्रत्व को प्राप्त करूंगा यहां श्लोक में **'अंशभागेन'** एक वचन का आशय यह है कि भगवान ने देवकीजी के यहां 'प्रद्युम्न' व्यूह रूप से पुत्रत्व अङ्गीकार किया है। श्लोक में **'अथ अहम'** कहने का भावार्थ यह है कि भगवान् माया को कहते हैं कि जैसे तू एक स्थान पर, यशोदा के यहां प्रकट होकर अन्य स्थान पर देवकी के यहां जायगी। उसी प्रकार मैं भी एक स्थान पर देवकीजी के यहां प्रद्युम्नांश से प्रकट होकर अन्य स्थान पर यशोदाजी के पास जाऊँगा। श्लोक में **'पुत्रतां'** पद कहने का तात्पर्य यह है कि मैं लोकदृष्टि से अपने में पुत्रपन को दिखाता हूँ वास्तव में तो मैं किसी का पुत्र नहीं हूँ और नहीं होऊँगा। श्लोक में माया का विशेषण **'शुभे'** शब्द में दिया है उसका आशय यह है कि माया के गोकुल में जाने से श्रीकृष्णजी का रमण स्थान गोकुल रमणीय होगा। माया को गोकुल में पहले जाने का यही हेतु है कि गोकुल को रमणीय करना और यह माया वह है जिसका केवल भगवान् ही एक अवलंबन होने से माया को वैकुण्ठ में अकेली छोड़ना भी अयोग्य है। इसलिये माया को कहा आप नन्दपत्नी यशोदा में उत्पन्न होना। यशोदा के वहां क्यों उत्पन्न होने वाली माया के स्तन्य उत्पन्न करना है, (१) मोह को प्रकट करना है। (२) और मारने का कार्य करना है। (३) ये तीन कार्य हैं ॥ ९ ॥

स्तन्योत्पादनार्थं मोहजननार्थं—कदाचित् माया को **स्तन्योत्पादन**, मोहन, मारण ये तीनों कार्य अभीष्ट न हो और इससे वह उत्पन्न होना न भी चाहे तो इसलिये भगवान् माया को कहते हैं कि माया आप जाकर ये कार्य करेगी तो सर्व मनुष्य आपका अर्चन करेंगे। इस प्रसङ्ग का कथन इस श्लोक में करते हैं, जगत् में जो देवांश है वे तो भगवान् के सेवक हैं और जो दैत्यांश हैं वे तो भजन करते ही नहीं हैं, शेष जो मनुष्य हैं वे तेरी पूजा करेंगे कारण कि तू सब कामनाओं की तथा वरों की ईश्वरी है। कामनाओं की पूर्ति, उपाय करने से होती है और वरदान बिना उपाय के होते हैं। माया की पूजा का प्रकार धूप, भेंट सामग्री और बलि देना ये तीनों, कार्य दूर से ही किये जाते हैं इसलिये बताया है माया का काम स्त्री होने से उसकी भगवान् के साक्षात् श्री अङ्ग की सेवा के समान सेवा नहीं हो सकती है। यदि की जाय तब करने वाले को और माया को भी बाधक है। पूजा में दीप नहीं कहा इसका कारण यह है कि योगमाया स्वयं प्रकाशरूप है। ऊपर कहा कि सर्व कामनाओं तथा वरों की आप ईश्वरी हैं किन्तु ईश्वरी होते हुए भी यदि फलदातृत्व न हो तो वह पूजनीया नहीं हो सकती है इसलिये भगवान् ने माया में फलदातृत्व का स्थापन करने के लिये कहा है कि **'सर्वकामवरप्रदाम्'** आप सर्व प्रकार के कामनाओं तथा वरों को देने वाली है ॥ १० ॥

तस्याः सान्निध्यार्थं—योगमाया का सान्निध्य बनाने के लिये उसके मन्त्र, माया का स्वरूप और नाम तथा स्थान का वर्णन दो श्लोकों में करते हैं। श्लोक में 'कुर्वन्ति' यह क्रियापद का वर्तमान काल संस्कृत के व्याकरण के अनुसार जो कार्य जल्दी होने वाला हो उसके लिये दिया जाता है अतः यहां इस क्रिया का अर्थ किया जायगा कि करेंगे आपके नामों के साथ धाम पीठ भी प्रसिद्ध होंगे। श्लोक में दिये हुए 'च' अव्यय से अधिष्ठान प्रतिमा का भी निर्देश किया है इसके साथ भुवि पृथ्वी पर शब्द देने का भाव यह है कि मनुष्य आपकी प्रतिमाओं को पृथ्वी पर स्थापित करेंगे। नाम मन्त्र का वर्णन करते हैं— दुर्गा, (१) भद्रकाली, (२) विजया, (३) वैष्णवी, (४) कुमुदा, (५) चण्डिका, (६) कृष्णा, (७) माधवी, (८) कन्यका, (९) माया, (१०) नारायणी, (११) ईशानी, (१२) शारदा, (१३) और अम्बिका, (१४)। नामों के साथ श्लोक में इति अव्यय दिया है इसका तात्पर्य है कि वे मनुष्यों के नाम के समान संज्ञावाचक नाम नहीं है लेकिन वे सर्वत्र मन्त्र तथा देशभेद से प्रसिद्ध है। जैसे कि दुर्गा काशी में प्रसिद्ध है, भद्रकाली अवन्ती में, प्रसिद्ध है, विजया उत्कल उडीसा प्रान्त में, वैष्णवी महालक्ष्मी कोल्हापुर में प्रसिद्ध है, चण्डिका कामरूप देश में याने आसाम में, माया और शारदा उत्तर प्रदेश में प्रसिद्ध हैं, अम्बिका अम्बिका वन में, तथा कन्या का कन्याकुमारी में प्रसिद्ध हैं। इसी प्रकार जैसे अन्य स्थान प्रसिद्ध हैं वैसे ही अन्य नाम मन्त्र भी प्रसिद्ध समझने चाहिये ॥ ११–१२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

देवकीजठराद्गर्भसन्निकर्षे किं प्रयोजनमित्यपेक्षायामाह—अथेति। अथ गर्भसङ्कर्षणानन्तरं शीघ्रमेव अंशभागेन अंशानां वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धमत्स्यकूर्मादीनां भागो विभागो यस्मात् सोंऽशभागस्तेन पूर्णानन्दस्वरूपेणाहं देवक्याः पुत्रतां प्राप्स्यामि। तवावतारेणैव मम लीलासम्पच्छोभना भविष्यतीति सूचयन् सम्बोधयति—हे शुभे इति। त्वं च नन्दपत्न्यां यशोदायां भविष्यसि ॥ ९ ॥ एवं मदाज्ञापालनात् सर्वलोके वरदानसमर्था पूज्या च भविष्यसीत्याह—अर्चिष्यन्तीति। नानाविधैरुपहारैर्नैवेद्यैरन्यैश्च बलिभिः श्रीफलादिभिर्मनुष्यास्त्वामर्चिष्यन्ति। तत्र हेतुमाह—सर्वेति। सर्वेषां कामानामिष्टार्थानां वरां श्रेष्ठामीश्वरीं स्वामिनीमित्यर्थः। एवमप्यदातृत्वे अभजनीयता स्यादिति तद्दातृत्वमप्याह—सर्वान् कामवरान् प्रकर्षेण ददातीति तथा तामिति। 'धूपोपहार' इति पाठान्तरम् ॥ १० ॥ तथा भुवि तव स्थानानि नामधेयानि च नराः कुर्वन्ति करिष्यन्ति। तत्र नामानि दर्शयति—दुर्गेतीति। इति शब्दाः प्रसिद्धिबोधकाः ॥ ११–१२ ॥

अन्वितार्थप्रकाशिका

अथेति ॥ हे शुभे! अथ गर्भसंनिकर्षणानन्तरम् अहम् अंशभागेन अंशैर्ज्ञानबलादिभिर्भजनमनुवर्त्तनं भक्तेषु यस्य तेन सर्वथा परिपूर्णेन रूपेणेति विवक्षितम्। "कृष्णस्तु भगवान् स्वयम्" इत्युक्तत्वादिति। अंशानां ब्रह्मादीनां तत्समयजातानां मनुष्यादीनां वा भागेन भाग्येन हेतुना इति वा। देवक्याः पुत्रतां प्राप्स्यामि त्वं तु नन्दपत्न्यां यशोदायां भविष्यसि। गूढार्थस्तु अंशानां ज्ञानैश्वर्यादीनां भागो भेदस्तेन रूपभेदेनेत्यर्थः। तत्रैकेन रूपेण देवक्याः पुत्रतामपरेण यशोदायाः पुत्रतां प्राप्स्यामि। त्वं तु नन्दपत्न्यां भविष्यसि सत्तामात्रं प्राप्स्यसि न पुत्रीत्वम्। यशोदादेवक्योर्मम मातृत्वानुभवः तयोश्च मयि पुत्रतानुभवः अन्यथा अग्रे रूपभेदाभावेनान्यतरस्याः पुत्रत्वाभावनिश्चयेनानर्थः स्यात् इत्याहुः ॥ ९ ॥ अर्चिष्यन्तीति ॥ मनुष्याः सर्वान् पुत्रादीन् कामयन्ते ये तेषां वरामीश्वरीं श्रेष्ठां नियन्त्रीम् अर्चकानां सर्वान् कामवरान् प्रददाति या तां त्वां धूपैः उपहारैः पुष्पाद्यैः बलिभिः भोज्याद्यैः अर्चिष्यन्ति ॥ १० ॥ नामधेयानीति द्वयम् ॥ नरा भुवि दुर्गा इति भद्रकालेत्यादीनि चकारात् महिषमर्दिनी इत्यादीनि च तव नामधेयानि स्थानानि विन्ध्यादीनि च कुर्वन्ति करिष्यन्ति ॥ ११–१२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तां प्रोत्साहयति। अर्चिष्यन्तीति। सर्वेषां कामानामिष्टार्थानां वराणां चेश्वरीं प्रदात्रीं, सर्वेषामर्चकानां कामवराभिकामाभीप्सितार्थान् प्रददातीति तां, सर्वकामफलप्रदामिति पाठे प्रसिद्धोऽर्थः। त्वां, धूपश्च उपहारो नैवेद्यं च बलिः पुष्पादिपूजोपहारश्च तैः, नानोपहारबलिभिरित्यपि पाठः। मनुष्या नराः, अर्चिष्यन्ति पूजयिष्यन्ति। इत्यनुगृह्णामीति शेषः ॥ ९ ॥ नामधेयानीति। भुवि नराः तव, स्थानानि मन्दिराणि, नामधेयानि च, कुर्वन्ति करिष्यन्ति 'वर्तमानसामीप्य' इत्यादिना भविष्यदर्थे लट्। तत्र नामानि दर्शयति दुर्गेति सार्द्धेन। दुर्गा इति दूरधिगमत्वात्। भद्रा मङ्गला चासौ काली नीलेति भद्रकालीति, सर्वा दिशो विजयतीति विजया इति, विष्णोरियं वैष्णवीति च ॥ १० ॥ कुमुदेति ॥ कौ भूमौ मोदते मोदयतीति वा कुमुदा, चण्डति शत्रवे कुप्यतीति चण्डिका 'चडि कोपे' अस्मात् ण्वुल्। कृष्णा सदाऽऽनन्दमयत्वात्। मधुकुलोत्पत्तीक्षया माधवी, कनति दीप्यते इति कन्या सैव कन्यका इति च। 'कनी दीप्त्यादिषु' अघ्न्यादिः। कं सुखं नयतीति कन्येत्यन्ये। नित्यकुमारीति केचित्। विश्वं माति यस्यां मिमीते वा इति माया, 'मा माने' 'माङ् माने' वा। 'माच्छाशसिभ्यः' इति यः। मां यातीति वा। 'आतोऽनुप—इति'

कः। मीयते ज्ञायते इति मायेत्यन्ये। नारस्य नरसमुदायस्यायनत्वान्नारायणी, नारायणस्य शक्तित्वाद्वा। इष्टे इतीशाना। ईशानीत्यपि पाठः। शीर्यते इति शारः संसारः तं द्यति खण्डयतीति शारदा स्वोपासकानां मुक्तिदात्री। 'या मुक्तिहेतुरविचिन्त्य-महाव्रता त्वम्' इति मार्कण्डेयपुराणोक्तेः। अम्बैव अम्बिका, जगन्माता इति च ॥ ११ ॥ संकर्षणात्मकत्वद्विक्रमेण तस्यापि व्यपदेशा भविष्यन्तीत्याह ॥ गर्भेति ॥ गर्भसंकर्षणात्त्वत्कृतदेवकीगर्भसंकर्षणान्निमित्तादित्यर्थः। तं देवकीजठरतस्त्वदाकृष्टगर्भं, संकर्षणं संकर्षणशब्दवाच्यं, भुवि प्राहुः, पृथिव्यां वक्ष्यन्तीत्यर्थः। वै। लोकरमणाल्लोकरञ्जनान्निमित्तात्, रामेति, रामशब्दवाच्यमित्यर्थः। प्राहुः। इति नाऽभिहिते कर्मणि प्रथमा। ततः संधिरार्षः। बलवतामुदधिकः श्रय आश्रयणीयस्तस्मात्, बलं प्राहुः। 'बलभद्रं बलोच्छ्र्यात्' इति पाठे, बलोच्छ्र्याद्बलाधिक्यात्, बलं भद्रं श्रेष्ठमस्येति तं बलभद्रं, प्राहुः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अर्चिष्यन्तीति : १०.२.१०.

कार्ये सत्युदिते स्वयं नृपतिना सत्कार्य एवार्हणैः नित्यं सन्निहितः स्पशोऽपि कुरुते कार्यं स तेनोत्सवात्।
नीतिर्नीतिमता व्यबोधि हरिणा सत्कृत्य मायां तदा कार्ये योजयता प्रभोरितरथा किं सेहते वेतनम् ॥ ४ ॥
मत्पादाब्जरतीनतीवसुमतीन् कंसो नृशंसोऽनिशं वृष्णीन् क्लेशयतीति शीघ्रमयनौ गन्तव्यमद्य त्वया।
आयास्याम्यहमप्ययं त्वदनुगो देवीं त्वमेवाब्रवीर्योमालम्ब्य दयां दयाहृदय ते याता क्व सा सम्प्रति ॥ ५ ॥
देवकीजठर एव सर्वतो गर्भ एष यदि पूर्णतां व्रजेत्। शेषगर्भ इति मामकी प्रथा स्याद्वृथेति स तथाब्रवीद्धि ताम् ॥ ६ ॥

कृष्णप्रिया

हिन्दी अनुवाद— और हे कल्याणी! योगमाये। फिर मैं अंशों के भाग से पूर्णपुरुषोत्तम देवकी जी के पुत्रत्व को प्राप्त करूँगा। और आप श्रीनन्द रायजी की रानी श्रीनंदरानी जी में प्रकट होना ॥ ९ ॥ देवी योगमाये! आप सकाम उपासकों को देने में समर्थ है और सर्व प्रकारके मनोरथों की पूर्ति का वर भी देने वाली है अतः सर्व मनुष्य धूप-भेट सामग्री और बलि पूजन से आप का अर्चन करेंगे ॥ १० ॥ (भद्रे आप यह करेंगें लोक कल्याण होगा) और भूतल पर मनुष्यगण आप के मन्दिर पीठों का निर्माण करेंगे और आप के दुर्गेति, भद्रकालीति, विजयेति, वैष्णवीति, कुमुदेति, चण्डिकेति, कृष्णेति, माधवीति, कन्यकेति, मायेति, नारायणीति, ईशानीति, शारदेति, अम्बिकेति ऐसे नाम धरेंगे। और ये केवल नाम नहीं है लेकिन ये नाममंत्र भी हैं इस लिये श्लोकों में दुर्गेति इत्यन्त नामोल्लेख किया है ॥ ११–१२ ॥

गर्भसंकर्षणात् तं वै प्राहुः संकर्षणं भुवि। रामेति लोकरमणाद् [1]बलभद्रं बलोच्छ्र्यात् ॥ १३ ॥
सन्दिष्टैवं भगवता तथेत्योमिति तद्वचः। प्रतिगृह्य परिक्रम्य गां गता तत् तथाकरोत् ॥ १४ ॥
गर्भे प्रणीते देवक्या रोहिणीं योगनिद्रया। अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः ॥ १५ ॥
भगवानपि विश्वात्मा भक्तानामभयङ्करः। आविवेशांशभागेन मन आनकदुन्दुभेः ॥ १६ ॥

कर्दमक्षमा

अन्वयः— गर्भसंकर्षणात् भुवि तं वै संकर्षणं प्राहुः लोकरमणात् रामेति बलोच्छ्र्यात् बलभद्रं प्राहुः ॥ १३ ॥ भगवता एवं सन्दिष्टा तद् वचः तथा इति ओम् इति प्रतिगृह्य परिक्रम्य गां गता तत् तथा अकरोत् ॥ १४ ॥ योगनिद्रया देवक्या गर्भे रोहिणीं प्रणीते (सति) अहो (कंसेन राक्षसैः) गर्भः विश्रंसितः इति पौराः विचुक्रुशुः ॥ १५ ॥ भक्तानाम् अभयंकरः विश्वात्मा भगवान् अपि आनकदुन्दुभेः मनः अंशभागेन आविवेश ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्वद्विक्रमेण च तस्य व्यपदेशा भविष्यंतीत्याह—गर्भसंकर्षणादित्यादिना। रामेति च संबोधनं करिष्यंति। त्वया संकृष्टेन तेन लोकस्य रमणाद्रत्युत्पादनात् ॥ १३ ॥ तथेति पुनरप्योमित्यादरेण प्रतिगृह्य गां पृथ्वीम् ॥ १४ ॥ विस्रंसितो विभ्रष्टो विस्रस्त इत्यर्थः। इति विचुक्रुशुर्न तु तद्विदुरित्यर्थः ॥ १५ ॥ मन आविवेश मनस्याविर्बभूव। जीवानामिव न धातुसंबंध इत्यर्थः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्पुरुषार्थोत्कर्षमाह—त्वदिति। तस्याकृष्टगर्भस्य। व्यपदिश्यत उच्चार्यतेऽर्थादाहूयते यैस्ते व्यपदेशा नामानि। रत्युत्पादनात्प्रीत्युत्पादनात्। बलवतामुच्छ्र्यात् उन्नतत्वात्। तम् आकृष्टगर्भजं प्राहुः वदिष्यंति। "वर्तमानसामीप्ये वर्त्तमानवद्वा" इति

---

[1] बलं बलवदुच्छ्र्यात्–श्रीधरादयः बलभद्रं बलोच्छ्र्यात्–वीर. विज.।

लद् । ॥ १३ ॥ एवं पूर्वोक्तरीत्या संदिष्टाज्ञप्ता । तथेति यथोक्तं श्रीमता तथा करोमीत्यर्थः । पुनरपि ओमित्यादरेण प्रतिगृह्य 'ओमित्यंगीकारे ब्रह्मणि च' गां भूमिम् "दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु । भूमौ पशौ च गोशब्दो विद्वद्भिर्दशसु स्मृतः" ॥ इत्यनेकार्थध्वनिमंजर्याम् ॥ १४ ॥ विस्रस्त इत्यर्थः । कंसनैव केनचिन्मंत्रौषधाद्युपायेन श्रावित इत्यर्थः । विचुक्रुशुः देवक्यां स्नेहवत्तया विलेपुः । इत्यर्थ इति । योगमायाकृत्यस्य देवैरपि दुर्विज्ञेयत्वादित्यर्थः । योगमायैव योगनिद्रा निद्रावत्सकलबोधहरणात् । तया प्रकर्षेण नीते देवक्या दुःखादिकं रोहिण्याश्च विस्मयादिकं गोकुलवासिनां च तज्ज्ञानादिकं किमपि नाभूदिति द्योतितम् । किञ्च हरिवंशाद्यनुसारेणात्र ज्ञेयं प्रागेव वसुदेवाहितगर्भायाः श्रीरोहिण्याः पश्चाद्गोकुलं गतायाः सप्तमे मासि तं गर्भमपसार्य देवकीजठरात्साप्तमासिकं गर्भमलक्षितमाकृष्य रोहिण्युदरे नीत इति ॥ १५ ॥ इत्यर्थ इति । धातुसंबंधे हि जीवत्वं दुर्वारं तथाऽजत्वव्याघातश्च स्यादित्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

परमभक्तप्रेममयश्रीगोकुलसम्बन्धेन तस्याऽपि माहात्म्यमुद्देष्यतीति सङ्कर्षणप्रयोजनान्तरमाह—गर्भेति । वै एव गर्भतः सङ्कर्षणादेव न तु शेषत्वादिना प्रलयादौ जगदाकर्षणादित्यर्थः । गर्भसङ्कर्षणादेव गोकुलप्राप्त्या सर्वलोकानां रमणात् तथैव बलस्य उच्छ्रयात आधिक्यात् तदीयपरमप्रेमोर्जितमनस्तयेति भावः । बलं बलवदुच्छ्रयादिति पाठे बलवत्सु आधिक्यादित्यर्थः । रामेति "सहसुपेति" सुप्मात्रेण समासः ॥ १३ ॥ तस्य भगवतो वचस्तत् यथादिष्टं तथैव न तु किञ्चिद्व्यभिचारेणेत्यर्थः ॥ १४ ॥ योगमायैव योगनिद्रा निद्रावत् सकललोकबोधहरणात् तया प्रकर्षेण नीत इति । देवक्या दुःखादिकं गोकुलादिवासिनां च तज्ज्ञानादिकं किमपि नाभूदिति बोधितम् अत्र च श्रीहरिवंशाद्युक्तानुसारेणैव ज्ञेयं प्रागेव श्रीवसुदेवाहितगर्भायाः श्रीरोहिण्याः पश्चाद्गोकुलं गतायाः सप्तमे मासि तं गर्भमपसार्य श्रीदेवकीजठरात् सप्तमासिकं गर्भमलक्षितमाकृष्य रोहिण्युदरं नीत इति । तथा च हरिवंशे योगनिद्रां प्रति श्रीभगवदुक्तौ—

"सप्तमो देवकीगर्भो योंऽशः सौम्यो ममाग्रजः । स संक्रामयितव्यस्ते सप्तमे मासि रोहिणीम्" ॥ इति

तन्नयनप्रकारविशेषश्च तत्रैव—

"सार्द्धरात्रे स्थितं गर्भं पातयन्ती रजस्वला । निद्रया सहसाविष्टा पपात धरणीतले ।
सा स्वप्नमिव तं दृष्ट्वा स्वगर्भे गर्भमाहितम् ॥ अपश्यन्ती च तं गर्भं मुहूर्त्तं व्यथिताऽभवत् !
तामाह निद्रासम्विग्नां नैशे तमसि रोहिणीम् ॥ कर्षणेनास्य गर्भस्य स्वगर्भे चाहितस्य वै ॥
सङ्कर्षणो नाम शुभे तव पुत्रो भविष्यति" ॥ इत्यादि ॥

अहो आश्चर्ये खेदे वा देवक्या गर्भो विस्रंसितः विस्रस्तः कंसभयादिति शेषः । तथा च श्रीविष्णुपुराणे "सप्तमो भोजराजस्य भयाद्रोधोपरोधतः । देवक्याः पतितो गर्भ इति लोको वदिष्यति" इति यद्वा कंसेनैव केनचिदुपायेन पातित इत्यर्थः । व्यक्ततया तदनुक्तिस्तेषां तद्भयात् विचुक्रुशुः उच्चैरार्तस्वरेण जजल्पुः विलेपुरिति वा ॥१५॥ विश्वस्य आत्मा प्रभुरपि भक्तानामेवाभयङ्करः तदानीं तच्चित्तभावविशेषेण पर्य्यस्फुरदित्यर्थः । तत्र च सर्वैश्वर्यपरिपूर्णतयेत्यभिप्रायेण श्रीभगवानिति एतदाद्यपद्यार्द्धं सर्वसम्मतं न स्यात् अत एव श्रीचित्सुखेनैवं व्याख्यातं मन आविवेश पौरुषं धामेति सम्बन्ध इति श्रीस्वामिपादानां तु सम्मतं लक्ष्यते तथा च तद्व्याख्यानात् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तथा त्वया देवकीजठरात्सङ्कृष्टं शेषमत एव प्रवृत्तिनिमित्तात् सङ्कर्षणात् सङ्कर्षणशब्दवाच्यम्, लोकरमणात् लोकरञ्जनान्निमित्तात् रामेति रामशब्दवाच्यम्, बलाधिक्यान्निमित्ताद्बलभद्रशब्दवाच्यं भुवि प्राहुर्वक्ष्यन्ति, यद्वा, तं तेभ्यो निमित्तेभ्यस्तं तत्तच्छब्दैर्व्यवहरिष्यन्तीत्यर्थः ॥ १३ ॥ श्रीभगवदाज्ञोदयादनन्तरं सा योगमायाऽपि श्रीभगवदाज्ञां सर्वात्मनाऽत्यादरेण प्रणतिपूर्वकं शिरसि निधायाऽऽज्ञाक्रममनुलङ्घ्य भुवि समागत्य यथैवाज्ञप्ता तथैवाकरोदित्याह श्रीशुकः सन्दिष्टैवमित्यादिना । एवमित्थं श्रीभगवता सन्दिष्टा आदिष्टा योगमाया तस्य श्रीभगवतो वचः श्रीवचनं तथेति ओमित्यङ्गीकृत्य तथेत्योमिति तथैवास्त्वित्यङ्गीकारपूर्वकं प्रतिगृह्याभिनन्द्य तं प्रदक्षिणीकृत्य गां भूमिं गता प्रविष्टा सती तथैव यथोक्तमकरोत् ॥ १४ ॥ ततो योगनिद्रया श्रीभगवद्योगनिद्राधिष्ठात्र्या शक्त्या देवक्या गर्भे रोहिणीं प्रति प्रणीते प्रापिते सति तदा पौरजनाः अहो देवक्या गर्भो विस्रंसितः विस्रस्तः "स्रंसु अधः पतने" इति धातुः विचुक्रुशुः रुरुदुः ॥ १५ ॥ ततो भक्तानामभयङ्करः भक्ताभयचिकीर्षुः विश्वात्मा श्रीभगवान् अंशभागेन जातस्येति शेषः । "स आत्मा अङ्गान्यन्या देवताः" इति देवतानां श्रीभगवदंशत्वश्रवणादानकदुन्दुभेर्देवांशेन जातत्वाच्चेति भावः । मन आविवेश सङ्कल्परूपज्ञानेनाविवेशेत्यर्थः । "यो मनसि तिष्ठन्" इति पुर्वमेवाविष्टत्वावगमादंशभागेन सङ्कल्परूपज्ञानेनाविवेशेति वान्वयः ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

बलोच्छ्रयाद्बलोन्नतेः ॥ १३ ॥ तद्वचनं तथेति स्पष्टीकरणं तथेत्योमिति तथा करोमीति तद्वचः प्रतिगृह्येति वा ॥ १४ ॥ योगनिद्रया देवक्याः गर्भे रोहिण्यां प्रणीते सति विस्रंसितः स्रावितः निर्गलित इति विचुक्रुशुः ॥ १५–१६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

रामेति "सहसुपेति" सुप्मात्रेण समासः ॥ १३–१४ ॥ विस्रंसितः पातितः कंसेनेति भयात् कर्तृपदगुप्तिः ॥ १५–१६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

रामेति "सहसुपा" (२।१।४) इति समासः ॥ १३ ॥ तथेति पुनरप्योमिति अत्यादरेण तदीयं वचः प्रतिगृह्य गां पृथ्वीं तत्तदनन्तरम् ॥ १४ ॥ विस्रंसितः कंसेनैव केनचिन्मन्त्रौषधाद्युपायेनेत्यर्थः । विचुक्रुशुः देवक्यां स्नेहवत्तया विलेपुः ॥ १५ ॥ विश्वात्मा विश्वस्यैव प्रेमास्पदीभविष्यन् अंशेन पुरुषाद्यवतारवृन्देन सह भागेन भगसमूहेन षडैश्वर्येण सहित एव मन आविवेश मनस्याविर्बभूव "परावरेशो महदंशयुक्तो ह्यजोऽपि जातो भगवान्" इति तृतीयोक्तेः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गर्भभूतस्य तस्य सम्यक्कर्षणात् भुवि तं सङ्कर्षणं प्राहुः स्वतोऽपि सङ्कर्षणसंज्ञ एव इत्यर्थः । लोकस्य रमणात्तेन रत्युपपादनात् रामेति सम्बोधनं करिष्यन्ति बलवत्सु बाह्यादिपूच्छ्रयादत्यूर्जितत्वाद्बलं प्राहुः ॥ १३ ॥ भगवता सन्दिष्टा आज्ञाता तस्य भगवतः वचः तथेति परिगृह्य भगवन्तं परिक्रम्य ओमितिमङ्गलार्थं जप्त्वा गां गता भूमिं गत्वा यथा भगवतोक्तं तथैवाकरोत् ॥ १४ ॥ योगनिद्रेति तस्या एव नामान्तरम्, तया देवक्या गर्भे रोहिणीं प्रणीते प्रापिते "स्रंसु ध्वंस्वधःपतने" "आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः" इति पतनकाले पञ्चमे षष्ठे वा मासे पौराः अहो गर्भो विस्रंसितः कंसेन पातित इति विचुक्रुशुः ॥ १५ ॥ विश्वात्मा सर्वात्मा सर्वत्र स्थितः भूभारं हर्तुं शक्तोऽपि भगवान् यतो भक्तानामभयङ्करः भक्तमनोरथपूरकः अतः अंशयोः स्वांशभूतयोः श्रीदेवकीवसुदेवयोर्भागेन पुत्रतया भजनीयेन रूपेण आनकदुन्दुभेः पुत्रीभूते पुरुषोत्तमे वात्सल्यरसास्वादनाय जातोऽयं शौरिरित्येवं देवैर्जन्मसमये आनकदुन्दुभिघोषादिभिः पूजितस्य मनः आविवेश नित्यसिद्धेनाप्राकृतविग्रहेणाविर्बभूव न तु देहान्तरसिद्धये जीवानामिव धातुसंसर्गप्राप्त इत्यर्थः ॥ १६ ॥

श्रीसुबोधिनी

एवं तस्या नामान्युक्त्वा शेषस्यापि नामान्याह **गर्भसङ्कर्षणा**दिति । गर्भरूपस्य तस्य **सङ्कर्षणात् सङ्कर्षणः** सम्यक् **कर्षणं** यस्येति । **प्राहु**रितिप्रमाणम् । **भुवी**त्यवतारदशायामेव । वस्तुतस्तु **सङ्कर्षणश्चतुर्मू**र्तेर्भगवतो द्वितीयः । सोऽप्यत्राविष्टस्तथापि लोका **गर्भसङ्कर्षणादेव सङ्कर्षणं** वदन्ति । नामान्तरमाह **रामे**ति । **लोकस्य रमणं** यस्मात् । रमयतीति **रामः** । राम इति वक्तव्ये विभक्तिकनिर्देशोसम्मत्यर्थः । सम्बुद्धिरूपो वा व्यवहारार्थः । **बलभद्रमपि प्राहुर्बलेन भद्र** इति । **बलोच्छ्रयात्** । न तु बलकार्यात् ॥ १३ ॥ ईश्वरवाक्यादादेशानन्तरमेव तथा कृतवतीत्याह **सन्दिष्टैव**मिति । **भगवते**त्यनुल्लङ्घनार्थम् । तथेति करणार्थं जननार्थं च । ओमिति पूजाद्यर्थम् । तस्य भगवतो वचः **परिगृह्य परिक्रमणं** कृत्वा **गां भूमिं** गता सती **तथैवाकरोत्** ॥ १४ ॥ तत् सर्वं भगवन्निर्दिष्टं तत्कार्यं लोके प्रसिद्धं जातमित्याह **गर्भे प्रणीत** इति । **गर्भं प्रकर्षेण नीते रोहिण्युदरं** प्रापिते । **योगनिद्रये**ति कर्षणप्रापणयोः सर्वाज्ञानं निरूपितम् । **अहो** इत्याश्चर्ये । **निस्रंसित** इति 'स्रंसु ध्वंस्वधःपतने' । तेन पञ्चमो मासः षष्ठो वेति ज्ञापितम् । **पौराः** पुरवासिनः । अनेन सर्वप्रतीतिर्जातेत्युक्तम् । राक्षसैः कंसप्रेरितैः **विस्रंसित** इति **विचुक्रुशु**रित्याक्रोशं कृतवन्तः ॥ १५ ॥ **अथा**क्रोशानन्तरं विस्रंसनज्ञानानन्तरमेव भगवान् वसुदेवद्वारा देवक्यामागत इत्याह**।**विवेशेति सार्धाभ्याम् । निषेकाभावेपि पूर्वं वसुदेवे ततस्तद्द्वारा देवक्यामागमनस्यायं भावः । अत्र हि नृसिंहहंसादिवन् न प्राकट्यं किन्तु यदुवंशसम्बन्धित्वेन शूरपौत्रत्वेन वसुदेवपुत्रत्वेन । जीवे शरीरस्यैव वंशसम्बन्धित्वेन तस्य च निषेकजन्यत्वेन तथोत्पत्तिरुच्यते । ईश्वरे प्राकट्यस्यैवोत्पत्तिपदार्थत्वाद् वक्ष्यमाणप्रकारेण **वसुदेवद्वारा** देवक्यामाविर्भाव उच्यते । अन्यथा देवक्यामेव तथोच्येतेत्यानक**दुन्दुभेर्मनो भगवानाविवेशायोगोलके** वह्निरिव । **अन्यथानकदुन्दुभित्वं** व्यर्थं स्यात् । **अंशानां भागेन** विभागेन । **केचित्तु—अंशेन** नारायणरूपेण **भागेन** केशरूपेण सह स्वयं प्रद्युम्न आविवेशेत्याहुः पुरुषोत्तमस्तु नन्दगृह एव मायया सह जातः । अन्यथा 'देवकीजठरभू'रितिवत् 'तव सुत' इति कथं वदेयुः ? 'तन्मातर'विति शुकवाक्यं च विरुध्येत । माययैव रूपान्तरमिति मायानिरूपणेनैव चतुर्थाध्याये तस्योत्पत्तिर्निरूपिता । उत्पत्तेरनन्तरमेव 'नन्दस्त्वात्मज उत्पन्न' इति **सम्भ्रमः** । एवं सति सर्वेषां चरित्राणामभिनिवेशो भवति । जननं मनस इति मन उक्तम् ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

आविवेशेत्यस्याभासः—अथाक्रोशानन्तरमित्यादि। ननु मूल एतदानन्तर्यवाचकपदाभावात् स्वयं तत्कथनमनुपपन्नमिति भातीति चेन् मैवम्। भावानवबोधात्। तथाहि। इह हि शीघ्रं स्वागमनार्थमेव गर्भसङ्कर्षणज्ञापनम्। तद् 'गां गता तथाकरोदि'त्येतावतैव निरूपितमभूत्। आक्रोशस्तु प्रकृतानुपयुक्तः। एवं सत्यपि 'गर्भे प्रणीत' इति श्लोककथन यत् तद् भगवद्वाक्यस्याथशब्दतात्पर्यकथनायेति ज्ञायते। अन्यथा 'तत्सन्निकृष्य रोहिण्या उदरे सन्निवेशये'त्युक्ते प्रयोजनाकाङ्क्षायामहं देवक्याः पुत्रतां प्राप्स्यामीत्येतावतैव चारितार्थ्यादथशब्दं न वदेत्। एवं सति यस्मादानन्तर्यं प्रभुबुद्धिस्थं स पदार्थो 'गर्भे प्रणीत' इति श्लोकेन विवृतः श्रीशुकेन। आचार्यैरपि तमेवाथशब्दं प्रतीकत्वेनोक्त्वा 'गर्भ' इति श्लोकोक्ततात्पर्यमाक्रोशानन्तरमित्यादिनानूदितम्। अयमर्थो भगवतोत्यन्तं गोपनीय इति तत्सम्पत्तिर्लोकानामन्यथाज्ञानोक्त्या तत एव तदज्ञानसूचनेन च ज्ञापितेति सर्वमनवद्यम्। **आविवेशेतिश्लोकविवरणे—पुरुषोत्तमस्तु नन्दगृह एवेत्यादि भवतीत्यन्तम्**। अत्रायं भावः। उक्तवाक्यानुरोधान् नन्दगेहे पुरुषोत्तमाविर्भावोवश्यमङ्गीकार्यः। एवं सति 'सुतं यशोदा शयने निधाये'त्यग्रिमवाक्यं चानुपपन्नं भवति। तत्र स्वरूपद्वयदर्शनप्रसङ्गात्। आगतस्य तिरोधानं न वक्तुं शक्यम्। आगमनवैयर्थ्यापातात्। 'प्रागयं वसुदेवस्ये'तिवाक्यविरोधश्चेत्युभयतःपाशारज्जुरिति चेदत्र ब्रूमः। नन्दगेहे प्रादुर्भूतस्यैव पुरुषोत्तमस्य 'सर्वतःपाणिपादान्त'त्वेन तदा कार्यमस्तीति वसुदेवगृहे प्रादुर्भाव इति ज्ञायते। स एव 'बभूव प्राकृतः शिशु'रित्यनेनोक्तः। पूर्वरूपस्य तिरोधानेप्यग्रिमकार्यार्थं स्वस्मिन्नेव स्थापितवान्। यतो मुक्तिभूभारहरणवंशसम्बन्धित्वेनाविर्भावापत्रादिसुखदानवेदमार्गरक्षानारदशापविमोकद्विजसम्माननादिकार्याणि वासुदेवादिमूर्तिनियतकारणकान्युक्तकार्याण्यग्रे स्पष्टानि। एतदेवोक्तमेव **सति सर्वेषां चरित्राणामभिनिवेशो भवतीत्यनेन**। अत्र श्रुतार्थापत्तिरेव मानमिति नानुपपत्तिः काचित्। **रूपान्तरमिति**। रूपान्तरत्वेन भानमित्यर्थः। तच्च मानुषत्वम्। तथा च शुद्धे पुरुषोत्तम एव तथामानस्याग्रे वाच्यत्वान् **मायानिरूपणेन** तन्नियतकार्यविषयस्याप्युत्पत्तिर्निरूपिता भवतीत्यर्थः॥ १६॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः।

आविवेशेत्यत्र—केचित्त्वित्यादिना यन् मतान्तरमुक्तं तदेव कुतो नाद्रियत इत्याकाङ्क्षानिरासस्तु भगवद्वाक्यस्थांशभागपदस्य करणभूतस्योपादानाच्छुकेनैव भगवदावेशबोधनात् कुत इति चतुर्व्यूहरूपेणैव भूमौ पुरुषोत्तमप्राकट्यं न तु मूलरूपेणेतिशङ्का स्यात् तन्निरासायाहुः **पुरुषोत्तमस्त्वित्यादि**। **मानाकाङ्क्षायां** श्रुतार्थापत्ति प्रमाणयन्त्यन्यथेत्यादि। नन्वत्र प्रादुर्भावो नोच्यते प्रकरणाभावात् किन्तु श्रीयशोदादिप्रतीतिरेवानूद्यतेतो नेदमत्र मानमित्याकाङ्क्षायामाहु**र्माययेत्यादि**। तृतीयाध्याये रूपान्तरं यदुक्तं तन् **मायाकरणकम्**। तस्य करणभूता **माया** च चतुर्थाध्याये 'दृश्यतानुजा विष्णो'रित्यनेनानुजात्वेन निरूपिता। स च शब्दो रूढः सोदरत्वलक्षणसामानाधिकरण्यमन्तरेणानुपपद्यमानस्तत्सोदराग्रजत्वेन भगवन्तं गमयति। तदेव पूर्वोक्तवाक्यान्युपोद्बलयति। न चानुजात्वं केनाप्यवतारकालीनेनावगतं येन तत्प्रतीत्यनुवादकत्वं वक्तुं शक्येत। अतो यदिदं शुकेनोक्तं तन् नन्दगृहे भगवतो मायाशप्तुः शक्तिसाहित्येन प्रादुर्भावबोधनार्थमेवोक्तमितिनिश्चयः। एवं सति तत्रांशभागेनेत्याद्यकथनादत्र केवल एव प्रादुर्भूत इति सिद्धोर्थः। तदेतदुक्तं **माययेत्यादिना**। अयमेव शुकस्याशय इति दृढीकरणार्थमाहु**रुत्पत्तेरित्यादि**। अन्यथोत्सवस्य राज्ञादृष्टत्वाच्चतुर्थाध्यायोत्तरं 'व्रजे वसन् किमकरो'दित्यस्योत्तरभूतं पूतनामोक्षादिकमेव वदेन् न तु नन्दसम्भ्रमम्। अत एतदुपोद्घातत्वेनैव तस्योक्तिरिति शुकस्यायमेवाशय इत्यर्थः। अतः परमेका स्वरूपद्वयदर्शनापत्तिशङ्कावतिष्ठते तामपाकर्तुमनुवदन्त एवास्य भावं टिप्पण्यामाहु**रत्रायं भाव** इत्यादिना। ननु नन्दगृह आविर्भूतस्यैव तिरोधानं वाच्यमत आहुः **प्रागित्यादि**। **कार्यमिति**। अविहितभक्तिरसानुभवरूपं नान्यरूपञ्च **कार्यम्**। **स** इति। कार्यार्थः प्रादुर्भावः। एवञ्चैकदैवोभयत्र प्रादुर्भावः पञ्चाध्याय्यामिवेति ज्ञापितम्। रूपद्वयदर्शनापत्तिस्तु दर्शनस्येच्छाधीनतयैव परिच्छेदावभानवत् परिहृता ज्ञेया। नन्वस्य रूपान्तरत्वेन भासमानस्य पुरुषोत्तमत्वेन भूभारहरणादिव्यूहकार्यकरणासम्भव इत्यत आहुः **पूर्वेत्यादि**। एतेनैव मतान्तरनिराकरणे बीजमप्युक्तप्रायम्। ननु 'बभूव प्राकृतः शिशु'रित्यनेनोक्तस्य रूपस्य पुरुषोत्तमरूपत्वे किं मानं मायाकरणकं रूपान्तरमित्यत आहू **रूपान्तरेत्यादि**। तथा च मूले प्राकृतपदस्यायमेवाशयः। तदेव विवृण्वन्ति **तथा चेत्यादिना**। **तन्नियतकार्यविषयस्येति**। अन्यथाभानविषयस्य मानुषत्वस्येत्यर्थः। अत्रेदं सम्पद्यते। देवकीप्रार्थनया चतुर्व्यूहरूपं तिरोधाप्य प्रादुर्भूते पुरुषोत्तमरूपे यन् मनुष्यतया प्राकृतत्वभानं सम्पादितवांस्तेन शुक्तौ वृत्तिरूपस्य रजतस्येव स्वस्मिन् प्राकृतमनुष्यत्वस्याप्युत्पत्तिर्निरूपितेतितात्पर्यम्॥ १६॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गर्भसङ्कर्षणादित्यत्र—सोप्यत्रेति। अत्र शेषे सङ्कर्षणोपिशब्दाद् वासुदेवांशश्चाविष्ट इत्यर्थः। देवक्यां स्थितिकाले वासुदेवांशाभावेपि लोकव्यवहारकालेस्त्येव। **असम्मत्यर्थ इति**। **रामपदस्य** भगवद्रमणसाधकत्वमर्थोभिविवेच्यः सोर्थो भगवत्सम्मतो न त्वयमर्थ इत्यर्थवत्त्वाभावेन प्रातिपदिकसंज्ञाभावान्न विभक्तिः। लोकसम्मतार्थेनार्थवत्त्वेपि प्रातिपदिकसंज्ञा भवत्येवेत्यभिप्रेत्याहुः **सम्बुद्धीति**॥ १३॥ **आविवेशेत्यस्याभासे—देवक्यामागत** इति। यद्यपि मूले देवकीकर्तृकं धारणमुक्तं तथापि

तत् सर्वमल्पज्ञानां प्रतीत्यर्थमुक्तं वस्तुतस्तु भगवान् स्वयमेवागत इति **तत्रैवात्मभूतमित्यस्य** व्याख्याने वक्ष्यते। अतोत्र भगवत्कर्तृकत्वमेव मुख्यमित्याभासे तथोक्तम्। व्याख्यानेनांशानामिति। वक्ष्यमाणव्यवस्थानुरोधात् त्रयाणामंशानामित्यर्थः। **पुरुषोत्तमस्त्विति**। वासुदेवमात्रविशिष्ट इत्यर्थः। उक्तांशत्रयव्यावृत्त्यर्थं तुशब्दः। वासुदेववैशिष्ट्यस्य वसुदेवगृहे व्यावृत्त्यर्थमेवकारः। 'तव सुत' इतीति। व्रजे देवकीसुतत्वाप्रसिद्धावपि 'देवकीजठरभू'रित्वकथनादेतासां यथार्थज्ञानमस्तीति निश्चीयते। तादृशीभिरेव 'तव सुत' इत्युक्तत्वादुभयत्र प्राकट्यं मन्तव्यमितिभावः। अत्र टिप्पण्यां **प्रादुर्भूतस्यैवेति**। अस्यैव वसुदेवगृहे प्रादुर्भावो 'बभूव प्राकृतः शिशु'रितिरूपं दर्शनमित्यर्थः। **कार्यमस्तीति**। 'तमद्भुत'मित्यनेनोक्तस्वरूपस्य स्वस्मिन् स्थापनं कार्यं ज्ञेयम्। एतत्संवादानन्तरं नन्दगृहाविर्भावस्तस्यैव 'बभूव प्राकृतः शिशु'रितिदर्शनं तदैव मायाविर्भावः। एतेषामानन्तर्यं शतपत्रवेधवद्दुर्लक्ष्यमिति त्रयमप्येककालिकमेव ज्ञेयम्। सुबोधिन्यां **चतुर्थाध्याय** इति। तृतीयाध्यायपर्यन्तं न मानुषत्वस्वीकारः किन्तु व्रजगमनानन्तरं मायायां मिलितायां तत्कार्यविषयस्य मानुषत्वस्य स्वीकार इत्याशयेनाहु**रुत्पत्तेरनन्तरमेवेति**। माया स्वकार्यं सम्पाद्य मथुरामागतेति। देहेन्द्रियादिकं विहाय मनस्यावेशे हेतुमाहु**र्जननमिति**। कामस्य मनोजन्यत्वान् मन एव स्वजन्यद्वारा सर्वान् जनयतीति जननं मनसो धर्मः। अतो जननप्रकारसिद्ध्यर्थमत्रापि मनस्यावेशः। परन्त्वन्यत्र मनसा कामद्वारा परम्परया जननमत्र तु मनसा साक्षादेव स्वरूपं तत्र देवक्यां स्थापनीयमितिभेदः ॥ १६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

आविवेशांशभागेनेत्यत्र—ननु वसुदेवमनस्यावेशं निरूप्य 'ततो जगन्मङ्गल'मित्यत्र देवकीकर्तृकं धारणं निरूपितमग्रे'थ सर्वगुणोपेत' इति सन्दर्भे भगवदाविर्भावो निरूपितः। तथा च शूरपौत्रत्वेन वसुदेवपुत्रत्वेन या पुराणादौ प्रसिद्धिः सोपपन्नैव नन्दमनसि त्वेवमावेशस्यानिरूपितत्वात् तद्गृहे प्राकट्यं कथं वैष्णवैरुच्यत इत्याशङ्क्य नन्दालये स्वतन्त्रतया पुरुषोत्तमप्रादुर्भावं साधयन्ति **पुरुषोत्तमस्त्वित्यादिना**। इहायमर्थः। मथुरायां हि वंशसंबन्धिलीलाचिकीर्षया वसुदेवमनसि प्रद्युम्नरूपेणाविश्य वेधदीक्षाप्रकारेण वसुदेवमानसाद् देवक्यामागतस्ततो व्यूहविशिष्टः साक्षात्पुरुषोत्तमोकस्मादलौकिकरीत्या वसुदेवदेवक्योरग्रे प्रादुर्भूतः 'आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कल' इति वाक्यात्। नन्दगृहे तु वंशसम्बन्धिलीलाया अचिकीर्षितत्वान् न नन्दमनसि प्रद्युम्नरूपेणावेशो न वा वसुदेवाद् देवक्यामिव नन्दमनसो यशोदायामागमनमतो वसुदेवगृहे प्रद्युम्नादिव्यूहानामपि प्राकट्यं नन्दगृहे तु न प्रद्युम्नादिप्राकट्यम्। नैतावता पुरुषोत्तमाविर्भावो नन्दगृहे निवारयितुं शक्यः किन्तु पुरुषोत्तमप्राकट्यमुभयत्रापि। अतो नन्दगृहे प्रादुर्भावं साधयन्ति **पुरुषोत्तमस्त्वित्यादिना**। तु शब्देना 'विवेशांशभागेने'त्यनेनोक्तो व्यूहो व्यावर्तितः। तथा च वसुदेवमनसि प्रकटो व्यूहस्तद्रीत्या नन्दगृहे न जातः। पुरुषोत्तमस्तु नन्दगृहे मायया सह जात एवेत्यर्थः। इह फक्किकायामेवकारो ह्ययोगव्यवच्छेदको न त्वन्ययोगं व्यवच्छिनत्ति। अत एवाग्रिमफक्किकाभिरन्यथानुपपत्तिं प्रदर्श्य नन्दगृहे प्रादुर्भावः साधितोऽन्यथा 'देवकीजठरभू'रितिवत् 'तव सुतः सती'ति कथं वदेयु'रित्यादिना। न च व्रजे नन्दपुत्रत्वेन प्रसिद्धिमादाय 'तव सुत' इत्युक्तिः। व्रजे देवकीसुतत्वेन प्रसिद्ध्यभावाद् 'देवकीजठरभू'रितिकथनानुपपत्तेः। अतो व्रजसुन्दरीणामार्षज्ञानमङ्गीकार्यम्। सिद्धे ह्यार्षज्ञाने 'तव सुत' इत्युक्तिरप्यार्षज्ञानजन्येति भगवतो नन्दपुत्रत्वं निराबाधम्। इत्यन्तरमाहु**स्तन्मातरावि**ति **शुकवाक्यं च विरुध्येतेति**। ननु नन्दगृहे स्वतन्त्रतया चेत् पुरुषोत्तमप्रादुर्भावस्तदा जन्मप्रकरणे नन्दगृहाद्यस्वरूपस्योत्पत्तिः कुतो नोक्तेत्याशङ्क्य समादधते **माययैवेत्यारभ्य तस्योत्पत्तिर्निरूपितेत्यन्तेन**। **माययैव रूपान्तरमिति**। रूपान्तरत्वेन भानमित्यर्थः टिप्पण्यां व्याख्यातः। अन्यद्रूपं **रूपान्तरं** चतुर्भुजरूपादन्यद् द्विभुजम्। तयोः परस्परमभेदेपि रूपान्तरत्वेन या प्रतीतिः सा **मायया**। वस्तुतस्तु 'परिपूर्णतमः कृष्णो वैकुण्ठे गोकुले स्वयं चतुर्भुजस्तु वैकुण्ठे गोकुले द्विभुजः स्वय' मितिब्रह्मवैवर्ताद् द्विभुजश्चतुर्भुजश्च पुरुषोत्तम एक एव तत्र भिन्नत्वेन या प्रतीतिः सा माययैव। **मायानिरूपणेनेति**। मायाकर्तृकभगवन्निरूपणेनेत्यर्थः। **तस्येति**। नन्दालयाविर्भूतद्विभुजपुरुषोत्तमस्येत्यर्थः। 'जातः खलु तवान्तकृद् यत्र क्वचित् पूर्वशत्रु'रित्यनेन कंसस्याग्रे देव्या निरूपितं तत्रापि 'यत्र क्वचि'दित्यनेन प्रसिद्धप्रादुर्भावस्थलं यन् मथुरातिरिक्तं लभ्यते तद् गोकुलमेवेति सिध्यति। **जात** इत्यनेन पृथक्तया जन्मैवोक्तम्। अन्यथा 'गतः खलु तवान्तकृद्'इत्युक्तं स्यात्। अतो नन्दालये पृथगाविर्भावो मन्तव्यः। अत एव 'नन्दात्मजाय नवनीतमुषे नमस्ते' इत्यादीनि ध्यानवाक्यानि युक्तानि भवन्ति। अन्यथा नन्दात्मजत्वाभावे नन्दात्मजत्वेन चिन्तने दोषः स्यात्। 'योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं चोरेणात्मापहारिणे'ति वाक्यात्। एवं वसुदेवगृहे नन्दगृहे च पुरुषोत्तमप्रादुर्भाव इति सिद्धान्तः। अत एव 'वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः' 'या नन्दनन्दनमुपात्तविचित्रवेष'मित्याद्युक्तिश्च सङ्गच्छते। किञ्च वरुणलोकगमनप्रसङ्गे 'एवं प्रसादितः कृष्णो भगवानीश्वरेश्वरः आदायागात् स्वपितरं बन्धूनां चावहन् मुद'मित्यनेन शुकः 'स्वपितर'मित्युक्त्या नन्दालये पृथगाविर्भावः स्वीकृतः। आविर्भावस्यैव पितृत्वसाधकत्वात्। अत एव श्रीशुके 'नायं सुखापो भगवान् देहिनां गोपिकासुत' इत्याद्यनेकवाक्यैर्गोपिकासुतं 'देवक्यां विष्णुरूपिण्यां विष्णुः सर्वगुहाशय' इत्याद्यनेकवचोभिर्देवकीनन्दनत्वमप्युक्तम्। अतः पुरुषोत्तमाविर्भावो मथुरायां गोकुले च स्वीकर्तव्यः। **पुरुषोत्तमस्तु नन्दगृह एवेति**फक्किकायामन्ययोगव्यवच्छेदश्चेदेवकारार्थो व्याख्यायेत तदा वसुदेवगृहे प्रादुर्भावो बाध्येत। तथा सति भूयसां श्रुतिपुराणवाक्यानां विरोधो भवेत्।

'वसुदेवगृहे साक्षाद् भगवान् पुरुषः पर' इत्यादिवाक्यव्याख्या 'तमद्भुतं बालक'मित्यादिव्याख्या सुबोधिनी च कुप्येत् । **नन्दगृह** एवेत्यत्रैवकारस्य वासुदेवव्यूहविशिष्टपुरुषोत्तमाविर्भावीयान्ययोगव्यवच्छेदाङ्गीकारेऽग्रिमफक्किकाया 'मन्यथा देवकीजठरभूरितिवत् तव सुत' इत्यादिना प्रदर्शिता यान्यथानुपपत्तिः सा तु न सङ्गच्छत एव । अतः पूर्वोक्तोयोगव्यवच्छेदपक्ष एव साधीयानितिदिक् । किञ्च **पुरुषोत्तमस्तु नन्दगृह एव मायया सह जात** इत्यत्रावतीर्ण इत्यर्थो न तु व्यवहारविषय इति । **मायया सहोत्पन्नया** मातुरपि ज्ञानाभावात् । प्राकट्यस्यावताररूपत्वव्यवहारविषयत्वाभ्यां द्वैधाभानस्य वक्ष्यमाणतया नन्दगृहे निशीथसमयेवतरणरूपप्रादुर्भावस्यैव निजीकरिष्यमाणत्वात् । **व्यवाहारविषयतया रूपं तु नवम्या**मितिविवेकः ॥ १६ ॥

बुभुत्सुबोधिका

गर्भसङ्कर्षणादित्यत्र तस्या इति योगमायायाः । प्रमाणमिति ऐतिह्यं प्रमाणम् । यद्वा महान्तः प्राहुः महतामन्तःकरणं प्रमाणम् । जानातीच्छति यतत इति । एवेति अनवतारदशायोगव्यवच्छेदक एवकारः । सोप्यत्रेति अत्र शेषे सङ्कर्षणः । अपिशब्दाद् वासुदेवांशश्चाविष्टः । 'वासुदेवकलानन्त' इति श्लोके वासुदेवांशाविष्टत्वोक्तेः । देवक्यां स्थितिकाले वासुदेवांशाभावेपि विविक्तव्यूहप्रकरणात् । लोकव्यवहारकाले 'वासुदेवकलानन्त' इति श्लोकादस्त्येव । अत एव बलहतानां मोक्षः । मोक्षस्य वासुदेवकार्यत्वात् । वदन्तीति शास्त्राभावेन लोकदृष्टं नाम वदन्ति । लोकस्येति 'लोकरमणा' दित्यस्य विग्रहः । रामशब्दविग्रहमाहुः रमयतीति । रञ्जयतीति राजेति राजपदस्य मनुप्रसङ्गे विग्रहवत् । 'रामक्रीडा रमणात्मिके' त्युक्तम् । अत्राग्रिमनामहेतुः । प्रयोजकहेतौ णिजन्ताद् घञ् । बाहुलकात् । असम्मत्यर्थं इति रमयतीत्यलौकिकविग्रहे प्रयोजककर्तर्यसम्मत्यर्थः । प्रयोजकहेतौ तु सम्मत्यर्थः । स्वरमणस्थानत्वेनानन्तत्वेनैव प्रयोजकहेतौ घञि कृते रामः तत्र रामत्वं न तु प्रयोजककर्तरि घञा रामत्वं भगवत्सम्मतम् । न वा लोकस्य रमणात् इत्येवमसम्मत्यर्थः । रामशब्दस्य भगवद्रमणसाधकत्वमयौग्रे वाच्यः । प्रयोजकहेतोरधिकरणस्य हेतुत्वविवक्षाङ्गीकारात् । आश्चर्याभावमाशङ्क्याहुः सम्बुद्धीति । व्यवहारार्थं इति हे रामेति व्यवहारार्थः । शुकव्यवहारः । पूर्वनाम्नि हेतुभूतं नामेत्याहुः बलभद्रमिति । एवं च भद्रः, भगवद्रमणे प्रयोजकहेतुः । उच्छ्रय उद्गमः तस्मात् । भद्रः । शयनमपि बलेनैव बलेन भद्र इत्युक्तविग्रहात् ॥ १३ ॥

सन्दिष्टैवमित्यत्र पूजाद्यर्थमिति ससन्देशपूजाद्यर्थम् । सन्देशे वेदत्वज्ञापनं पूजा । आदिना सन्देशप्रवर्तनम् । 'तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिना' मिति सप्तदशाध्यायगीतायाः । तदर्थमित्यर्थः । 'त' दिति मूलस्यार्थः । तत्सर्वमित्यादि ॥ १४ ॥

गर्भे प्रणीत इत्यत्र तत्कार्यमिति योगमायाकार्यम् । 'निद्रयापगतस्मृति' रितिवाक्यात् निद्रायाः स्मृतिनाशमत्वेन सर्वे न गर्भाकर्षणं पश्यन्ति । योगनिद्रात्वेन योगमाया यदा कर्षन्ती जाता तदा तत्कार्यं सर्वस्मृतिनाशो जात इत्याहुः कर्षणेति । तेनेति अधःपतनकथनेन । पञ्चम इति अधः पतनज्ञापितः । 'चतुर्थेन तु पिण्डेन अस्थिमज्जा प्रजायते पञ्चमेन तु पिण्डेन हस्ताङ्गुल्यः शिरोमुखम् । षष्ठेन ऋतुपिण्डेन हृत् कण्ठं तालु जायत' इति पिण्डोपनिषच्छ्रुतेः । मासि मासि पिण्डाः । विशब्दार्थमाहुः अतीति । क्रुश आकाशे । हैमधातुपाठे तु क्रुश रोदनाह्वानयोः भ्वादिः परस्मैपदी अनिट् नानुध्यायान् बहून् छब्दा' नितिश्रुतेर्निषिद्धः ॥ १५ ॥

आविवेशेत्यत्र अथाक्रोशानन्तरमित्यादि अत्र टिप्पण्यां भावानवेति अत्र हि श्रीशुको 'थाहमंशभागेने' ति भगवद्वाक्यमननिष्ठः । 'ज्ञानेन भक्त्ये' तिश्रुतेः । तन्मनने सामान्यप्रकारकजिज्ञासाया विशेषप्रकारकजिज्ञासाजनकत्वं स्फुरितं सद् रसपरवशदशायां शुकमुखादमृतद्रवसंयुतं विगलितं 'मंशभागेने' तिपदं 'मथ' शब्दस्मारकम् । पदजन्यपदार्थोपस्थितेः शाब्दबोधे कारणत्वात् । तदुक्तं 'संयोगो विप्रयोगश्च साहचर्यं विरोधिते' त्युक्त्वा 'विशेषस्मृतिहेतव' इति काव्यप्रकाशे । 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारक' मिति च । तथा 'चांशभागेने' ति पदं 'मथ' पदस्मारकमि 'त्यनागतमतोतं चे' तिवाक्याद् दृष्ट्वा 'थ' पदमेव मण्डूकप्लुत्यावर्त्योपनिबबन्धुरिति भावस्तस्यानवबोधात् । तदपि दर्शयन्ति स्म तथा हीति । निदर्शनार्थं इदमव्ययम् । इह हीति ग्रन्थे हि । 'अथाहमंशभागेने' तिश्लोकैकवाक्यतायै आहुः शीघ्रं स्वागमनार्थमित्यादि । एवेति अन्यथा सङ्कर्षणाविर्भावानन्तरमाविवेशांशभागः स्यात् विलम्बेन । प्रकृत उपयोगं वक्तुमाहुः आक्रोशस्त्विति । प्रकृतेति शीघ्रागमनेनुपयुक्तः । भगवद्वाक्यस्याथशब्दार्थतात्पर्येति 'अथाहमंशभागेने' ति भगवद्वाक्यम् । आनन्तर्यमथशब्दस्य वाच्योर्थः । शीघ्रं तात्पर्यार्थः । तस्य कथनाय । तदित्थम् । आनन्तर्यं 'मथाहमंशभागेने' त्यत्राव्यवहितानन्तर्यं न विवक्षितम् । 'अथाह'मितिश्लोकसुबोधिन्याम 'थ शीघ्रं तदनन्तरमेवे' त्युक्तः । तेन शीघ्रं आक्रोशानन्तरं विस्रंसनज्ञानानन्तरमेवेति तात्पर्यार्थः । सोत्र 'गर्भं प्रणीत' इति श्लोकेस्ति । अतस्तत्कथनायेति ज्ञायत इत्यर्थः । प्रबुबुद्धेति अभिधाप्रतिपाद्यं तात्पर्यप्रतिपाद्यं च । स पदार्थ इति तात्पर्यमात्रप्रतिपाद्यः श्रीशुकेनेति रसपरवशेन जन्मोत्सवे । पौरविक्राशनतात्पर्यमाहुः अयमर्थ इति । जन्मरूपः । 'जन्म गुह्यं भगवत' इति 'गूढं ब्रह्मणि वाङ्मये' इति च । तत्सम्पत्तिरिति जन्मनो गूढत्वस्य सम्पत्तिः । तत एवेति अन्यथाज्ञानादेव । जन्माज्ञानसूचनेन । सुबोधिन्यां आक्रोशानन्तरमिति विशेष्यत्वादितिभावः । विशेष्यं विस्रंसनज्ञानं भगवन्निष्ठमपि । प्रकारान्तरेण सङ्कर्षणज्ञानात् प्रकारान्तरेण विस्रंसनज्ञानत्वेन भ्रमविषयेन । एवकारस्तु जानातीच्छति यतत इति प्रणाड्या । देवक्यामागत इति यद्यपि मूले देवकीकर्तृकं धारणमुक्तं तथापि तत्सर्वमल्पज्ञानां प्रतीत्यर्थमुक्तं,

वस्तुतस्तु भगवान् स्वयमेवागत इति तत्रैवा 'त्मभूत' मित्यस्य व्याख्याने वक्ष्यते। अतोत्र भगवत्कर्तृकत्वमेव मुख्यमिति तथोक्तम्। नृसिंहेत्यादि नृसिंहः काष्ठजः, हंस एकादशस्कन्धत्रयोदशाऽऽध्यायेऽकस्मान् आदिना नारदः 'उत्सङ्गान् नारदो जज्ञ इति। तस्येति शरीरस्य। तथोत्पत्तिरिति 'अथाहमंशभागेने' ति श्लोके प्रद्युम्नभागेनोत्पत्तिरुच्यते इत्यर्थः। तथोच्येतेति प्राकट्यत्वेन आविर्भाव उच्येत। आनकदुन्दुभेरित्यादि शब्दात्मकस्य विशुद्धसत्त्वस्य मनः आविवेश। भगवत्प्राप्तिरुक्ता साऽजुष्टग्राम्यविषयस्य वरहेतुकी वेदत्वात्। 'यत्र वेदा न वेदा' इति श्रुतेः न वेदाः मेधाविनः। अतः प्रद्युम्नांशप्राधान्येन प्राप्तिः। भूमविद्यां विनापि। भक्तित्वेन पुरुषोत्तमप्राप्तित्वेन कार्यकारणभावात्। अतो भक्तानां भूम्यादीनां दुःखनिवारणे भक्तिः कारणमिति भूम्यादिभक्त्या भूमविद्यया च भगवानाविवेश। आनन्दरूपः। 'मन आनन्द' मितिश्रुतेः। आनन्दोऽस्यास्तीत्यानन्दं अर्शआद्यच। अत एवां'शानां भागेन विभागेने' त्यर्थं 'अंशभागेने' त्यस्य वक्ष्यन्ति। मन आनन्दं आनन्दोस्यास्तीत्यानन्दमित्युक्तम्। स आनन्दो ब्रह्मेति, 'ब्रह्म तर्हि अग्नि'रितिश्रुत्यभिप्रेताग्निरित्यग्निदृष्टान्तेन स्वरूपमाहुः अयोगोलक इति। अन्यथेति उक्तव्याख्यानाभावे। 'अंशभागेने' त्यत्र षष्ठीतत्पुरुषं व्याख्याय कर्मधारयं व्याकुर्वन्ति स्म केचित् त्विति। आहुरित्यस्वरसस्तु प्रसिद्धसमासत्यागः। पुरुषोत्तमस्त्विति अकारकः भक्तैः सह निगूढभावकरणं करोति यः सोर्थः परं ब्रह्म। भूमविद्यावत्त्वान् नन्दस्येत्येवकारः। माययेति मायेन्द्रियाणि कृपा वा तद्द्वारा कारकत्वाय। 'मायया सह जात' इत्यत्रोपपत्तिः। 'योगमायाऽजनि नन्दजायये' तिवाक्ये मायाजनिरुक्ता, पुरुषोत्तमाविर्भावस्तु 'अदृश्यतानुजा विष्णो' रिति वाक्ये 'नुजा' पदेन प्रकाशे साधितः। तथाहि यद्यपि मुहूर्तानन्तरं सा जातेत्यनुजात्वमस्त्येव तथापि स शब्दः सोदरानुजायां योगरूढ इति सोदरत्वलक्षणसामानाधिकरण्यमन्तरेणानुपपद्यमानस्तत्सोदराग्रजत्वेन भगवन्तं गमयति। यतो यदिदमनुजात्वं शुकेनोक्तं तन् नन्दगृहे भगवतो मायाज्ञनः मायारूपशक्तिसाहित्येन प्रादुर्भावबोधनार्थमेवोक्तमिति निश्चय इति। अत्र तुना वेदवेदान्तसारे श्रीभागवतेयोगोलके वह्निरिवेति दृष्टान्तेन वेदे वसुदेवेग्निर्वासुदेव उक्तः। अगिर्गतावित्यस्माद्धातोर्निष्पन्नोग्निशब्दः। अतः क्रियाकत्वेन वह्निव्यवच्छेदः। यो वेदे ब्रह्मत्वेनोच्यते, व्यूहचतुष्टयश्च। पुरुषोत्तमस्तु अग्निरूपक्रियाश्रयः। आनन्दात्मा वेदान्तोक्तः। सुन्दरः पुरुषः पुरुषोत्तमः सर्वात्मभावगम्यः। पूर्वोक्तस्तु प्रतिपादकगम्यो वररूपसत्यवाग्गम्यश्च। पुरुषोत्तमस्तु ज्ञानाश्रयत्वेन। ज्ञानं सर्वात्मभावरूपं ज्ञेयम्। 'ज्ञानशक्तिक्रियाशक्ती सन्दिह्य ते परस्थिते' इतिभाष्यात्। शास्त्रद्वयार्थौ ज्ञानक्रिये। स्वरूपलक्षणे 'सत्यज्ञानपदाभ्यां तत्प्रधानाभ्यां' प्रतिपाद्ये। अत्र टिप्पण्या उक्तवाक्येति 'अथाहमंशभागेने' त्युक्तवाक्ये 'ह' मितिशब्दस्य व्यूहतद्विशिष्टपुरुषोत्तमवाचकत्वेन साधनव्यवस्थया नन्दवसुदेवगृहयोराविर्भाव उक्तः। यदि तूक्तवाक्ये देवकीजठरभू'रिति 'तव सुत' इतिवाक्ये तदा तयोरनुरोधादित्यर्थः। अनुरोधस्तु श्रुतित्वाद् वाक्यवक्त्रीणाम्। अवश्यमिति नन्दस्य सर्वात्मभाववत्त्वाच्च नैयायिकाः शङ्कामाहुः तत्र स्वरूपेति। उभयत इति नन्दगृहे पुरुषोत्तमाविर्भावे रूपद्वयापत्तिः। 'प्रागयं वसुदेवस्य कचिज्जातस्तवात्मज' इति गर्गवाक्यादुभयत्राविर्भावानङ्गीकारे वाक्यविरोधापत्तिरित्युभयतः पाशो दूषणं तत्साधनं वाक्यरूपा रज्जुः। नन्दगेह इति सर्वात्मभाववत्वेन सदाऽऽविर्भूतस्य भगवान् गृह एव तिष्ठतीति सुबोधिन्यां गृह्या देवता पुरुषोत्तम इत्यर्थः। अस्यैव वसुदेवगृहे प्रादुर्भावो 'अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समं अहं सुतो वामभवं पृश्निगर्भ इतिश्रुत' इत्यत्रारमन्तव्यार्थपुरुषस्याहङ्कारस्य वा मूलरूपे वाच्यस्य 'बभूव प्राकृतः शिशु'रितिरूपं दर्शनमित्यर्थः, गर्भबालकपदयोः सामानाधिकरण्यात् पृश्णिगर्भो जातः। वसुदेवेन भक्त्या च परिभावितोप्यजुष्टग्राम्यविषयपरिभूतभक्त्या भावित इति। पर्यनर्थकः। अतः पुरुषोत्तमस्तु नन्दगृह एव जात इत्यर्थः। कार्यमस्तीति उक्तवाक्यविरोधाभावरूपं कार्यम् अविहितं भक्तिरसानुभावनरूपं नाट्यरूपं च कार्यं 'तमद्भुत'मित्यनेनोक्तस्य रूपस्य स्वस्मिन् स्थापनं च कार्यं ज्ञेयम्। एतत्संवादानन्तरं नन्दगृहाविर्भावस्तस्यैव 'बभूव प्राकृतः शिशु'रिति दर्शनं, तदैव मायाविर्भावः, एतेषामानन्तर्यं शतपत्रवेधवत् दुर्लक्ष्यमिति त्रयमप्येककालिकमेव ज्ञेयम्। ज्ञायत इति पश्चात् पुरुषोत्तमो मायया सहितस्तु नन्दगृह एव जात इत्यर्थः। अग्रिमकार्यार्थमिति उत्तरार्धे रुक्मिण्युत्थापनादि कार्यम्। सर्वेषां चरित्राणा'मित्यस्यार्थः। यतो मुक्तीस्यादि तृतीयान्तेन व्यूहत्रयकार्यमुक्तम्। द्वन्द्वान्ते श्रूयमाण 'सम्बन्धित्वेने'तिपदं प्रत्येकं सम्बध्यते। आविर्भावकरणम्। अनिरुद्धकार्येण सह त्रयाणां कार्याण्याहुः पित्रादीति। मुक्तिसम्बन्धित्वेनेत्यत्र सम्बन्धो जन्यजनकभावः। भूभारहरणसम्बन्धित्वेनेत्यत्र वध्यघातकभावसम्बन्धः। वंशसम्बन्धित्वेनेत्यत्राधाराधेयभावः। मनस आधारत्वात्। पित्रादिसुखदानं पञ्चमाध्याये उत्तरार्धेपि। अनिरुद्धकार्यम्। षष्ठाध्याये पूतनाविद्यानाशनमुत्तरार्धे आसुरचमूसंहरणं सङ्कर्षणकार्यम्। दशमाध्याये यमलार्जुनमोक्षः उत्तरार्धे चैद्यादिमोक्षो वासुदेवकार्यं, द्विजसम्माननं गर्गसम्माननं अष्टमाध्याये, उत्तरार्धे विप्रार्चनाज्ञया। प्रद्युम्नकार्यं परिशेषात्। आदिना कृष्णकेशकार्यम्। अस्वकुलसंहरणम्। पुरुषोत्तमसहस्रनामस्तोत्रे दशमस्कन्धनामसु स्पष्टम्। एवं च सर्वेषां वासुदेवादिमूर्तिकृतानां चरित्राणामित्यर्थः। अत्र श्रुतेति 'नन्दगेह' इत्यादिनोक्तेर्थे। वाक्यश्रुतस्य अर्थस्य आपत्तिः आसमन्तात् प्राप्तिरर्थान्तरकल्पनेन। अर्थापत्तिलक्षणं तु 'प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्यार्थान्तरं विनानुपपद्यमानस्योपपत्तयेऽर्थान्तरकल्पना'। दृष्टार्थापत्तौ जीवन् देवदत्तो गृहे नास्तीत्युदाहरणम्। पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रैव। इयं मानान्तरमिति मीमांसकाः। अनुपपत्तिरिति उक्तेर्थे काल्पनिकत्वसम्भावनया मानानुपपत्तिः। तन्नियतेति मायाया नियतकार्यं रूपान्तरं तद्विषयमानुषत्वस्वीकरणस्यानिरुद्धस्याप्युत्पत्तिः। पित्रादिसुखदानरूपानिरुद्धकार्यात्। अत्र माया कृपा। 'बभूव प्राकृतः शिशु'रित्यत्र 'प्रकृतिः स्वरूप'मितिव्याख्यानात्। सुबोधिन्यां, मानाकाङ्क्षायां श्रुतार्थापत्तिं प्रमाणयन्ति स्म उभयत्र प्राकट्ये

अन्यथेत्यादि । तव सुत इतीति व्रजे देवकीसुतत्वाप्रसिद्धावपि देवकीजठरभूतस्य श्रुतित्वेन यथार्थज्ञानसत्त्वात् कथनम् । तादृशीभिरेव तव यशोदायाः सुत इत्युक्तत्वादुभयत्र प्राकट्यं मन्तव्यमितिभावः । श्रुतस्य वाक्याभ्यामुभयत्र प्राकट्यरूपार्थस्यापत्तिरासमन्तात् प्राप्तिरर्थान्तरस्य टिप्पण्युक्तस्य कल्पनेन । नन्वत्र प्रादुर्भावो नोच्यते प्रकरणाभावात् । किन्तु श्रीयशोदादिप्रतीतिरेवानूद्यतेतो नेदमत्र मानमित्याकाङ्क्षायामाहुः माययेत्यादि । तृतीयाध्याये रूपान्तरं यदुक्तं तत्कृपारूपमायाकरणकम् । तस्य करणभूता माया च चतुर्थाध्याये निरूपितेति मायानिरूपणेनैव चतुर्थाध्याये तस्य मायानियतकार्यरूपरूपान्तरविषयमानुषत्वस्वीकरणस्यानिरुद्धस्योत्पत्तिर्निरूपितेत्यर्थः । तृतीयाध्यायपर्यन्तं न मानुषत्वस्वीकारः किन्तु व्रजगमनानन्तरं मायायां मिलितायां तत्कार्यविषयस्य मानुषत्वस्य स्वीकार इत्याशयेनाहुः उत्पत्तेरित्यादि । योगमायोत्पत्तेः सम्भ्रमोजस्य मानुषत्वेन ज्ञानम् । मायायाः सङ्कर्षकत्वात् । तमोरूपायाः परस्मिन् ब्रह्मणि निषेधात् । मानुषत्वाश्रयपुरुषोत्तमोत्पत्तेर्निरोधः सफल इति ज्ञेयम् । सम्भ्रम इति उत्सवः । अनात्मजे आत्मजत्वेन ज्ञानमिति सम्यक् भ्रमः । अन्यथा उत्सवस्य राज्ञाऽपृष्टत्वाच्चतुर्थाध्यायोत्तरं 'व्रजे वसन् किमकरो'दित्यस्योत्तरभूतं पूतनामोक्षादिकमेव वदेत् न तु सम्भ्रममिति । जननं मनस इति भगवदधिष्ठानस्य । 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'ति गीतावाक्यात् । 'मनोमात्रमिदं ज्ञात्वे'ति वाक्याज् जननं मनसः । मायया सह जात इति 'माया मनः सृजती'तिचतुर्थस्कन्धः । 'तन्मनोकुरुते'ति बृहदारण्यके । 'मायाद्वारा मनःसृष्टि'रिति पुराणमतम् । अत एव माया भीष्मस्तुतौ क्षतादि दर्शयतीति ॥ १६ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

एवं तस्य नामान्युक्त्वा—इस प्रकार उपरोक्त दो श्लोकों में योगमाया के नाम कहकर इस श्लोक में शेष के नाम भी कहते हैं । शेषजी को अवतार दशा में पृथ्वी पर सङ्कर्षण कहेंगे, कारण कि इनके गर्भ काल में योगमाया ने इनको खींचकर रोहिणी के उदर में स्थापित किया था । वास्तव में तो भगवान् के चतुर्व्यूह रूप चार स्वरूपों में द्वितीय व्यूह स्वरूप सङ्कर्षण भी इनमें प्रविष्ट हैं इस लिये यह शेषजी सङ्कर्षण हैं किन्तु लोक में गर्भ खींचने के कारण इनको सङ्कर्षण कहेंगे । लोक जिनसे आनन्द पाते हैं और जो लोग को रमण कराते हैं अतः उनका दूसरा नाम राम है । श्लोक में राम शब्द विभक्ति के बिना दिया गया है इसका तात्पर्य यह है कि यह नाम भगवान् को रुचिकर नहीं है अथवा राम शब्द संबोधन रूप होने से यह नाम व्यवहारिक है । श्रीशेषजी ने बल के सर्व करने से शेषजी का बलभद्र नाम बलभद्र नहीं है किन्तु विशेष बलवान् होने के नाते ही बलभद्र कहे जाते हैं ॥ १३ ॥

ईश्वरवाक्याद्— भगवान् ने माया को आदेश दिया उसके अनन्तर माया आज्ञा अनुसार कार्य करने लगी जिसका वर्णन अब इस श्लोक में करते हैं । श्लोक में माया को आज्ञा देने वाले के लिये भगवता पद में भगवान् शब्द दिया है उसका कारण है कि भगवान् की आज्ञा का उल्लङ्घन कोई भी नहीं कर सकता है । और तथा शब्द का तात्पर्य यह है कि जैसी भगवान् की आज्ञा गर्भसङ्कर्षण तथा माया के जन्म लेने के लिये हुई वैस ही करने के लिये दिया है । एवं 'ओम्' शब्द का जो ग्रहण है वह पूजा के लिये दिया है । इसी से आज्ञा स्वीकार कर भगवान् की प्रदक्षिणा कर, योगमाया पृथ्वी पर पधारी और भगवदाज्ञा को पालने लगी ॥ १४ ॥

तत्सर्वं भगवन्निर्दिष्टं तत्कार्यं—श्रीयोगमायाजी को जिस कार्य के लिये भगवान ने आदेश दिया है वह सब कार्य लोक में प्रसिद्ध बनें जिसका वर्णन करते हैं कि भगवदादेश के अनुरूप योगनिद्राजी ने सुचारु प्रकार से गर्भ को ले जाकर श्रीरोहिणीजी के उदर में पधराया । और योगनिद्रा ने ऐसा कार्य किया जिससे सबको ऐसी नींद आ गई जो किसी को भी इस कार्य का पता भी न चला । और सबको आश्चर्य हुआ कि क्या हुआ । इस विषय को स्पष्ट करने के लिये श्लोक में 'अहो' शब्द दिया है । और श्लोक में जो 'विस्रंसितः' कृदन्त है वह संस्कृत के 'स्रंसु' अधः पतने धातु से बना है जिसका अर्थ स्राव होता है । इस कृदन्त को देने का भाव यह है कि जिस समय योगमाया गर्भ को ले गई उस समय, 'गर्भ' पाँचवे या छट्ठे मास का होना चाहिये । 'पौराः' विचुक्रुशुः पदों से यह बात बताई कि पुरवासीजन चिल्लाने लगे कि कंस ने बड़ा अनर्थ किया उस खल के भेजे हुए राक्षसों ने देवकीजी का गर्भ को गिरा दिया है ॥ १५ ॥

अथाक्रोशानन्तरं विस्रंसनज्ञानानन्तरमेव भगवान् वसुदेवद्वारा देवक्यामागत इत्याहाविवेशेति सार्धाभ्याम् ।

इधर लोगों में कोलाहल एवं गर्भ गिराने की बात सर्वत्र फैल जाने के बाद भगवान् श्रीकृष्ण श्रीवसुदेवजी के मन द्वारा श्रीदेवकीजी में पधारे यह विषय ढाई श्लोको में कहते हैं—

निषेकाभावेपि पूर्वं वसुदेवे—निषेक का अर्थ है कि लौकिक प्रकार से, गर्भ धारण की क्रिया न होते हुए भी भगवान् प्रथम श्रीवसुदेवजी के मनमें पधारे पुनः वहाँ से देवकीजी में पधारे । यदि लौकिकवत् गर्भ धारण न हुआ तो वसुदेवजी के मन से देवकीजी के जठर में आने की क्या आवश्यकता[थी]? इस शङ्का को आचार्यचरण मिटाते हैं कि यहाँ भगवान् को नृसिंह तथा हंस के समान केवल अवतारत्व प्रकट नहीं करना था किन्तु अपना यदुवंश से सम्बन्ध, शूरसेनजी का पौत्रपना

तथा वसुदेवजी का पुत्रत्व भी प्रकट करना था। इसलिये देवकीजी के जठर में प्रविष्ट होने का व्यवहार को होना आवश्यक था। जीव का तो वंशादि सम्बन्ध देह से ही होता है अतः वहाँ स्त्री पुरुष संयोग से वीर्याधान होता है और उसको उत्पत्ति कहते हैं। जब ईश्वर के मात्र प्राकट्य को ही उत्पत्ति कहते हैं। इसलिये ऊपर कहे हुए प्रकार से ही वसुदेवजी के मन से देवकीजी में भगवान् का आविर्भाव कहा गया है। यदि यह प्राकट्य भगवान् का न होता तब तो वसुदेवजी के मन में भगवान् का प्रवेश न होकर लोकसिद्ध गर्भाधान से सीधा देवकीजी में गर्भाधान होता वहाँ वसुदेवजी के मनमें भगवान् का प्रवेश है वह जैसे लोहे के गोले में अग्नि प्रवेश करती है वैसे हुआ है। जब वसुदेवजी का जन्म हुआ था तब देवों ने हर्ष में आकर दुन्दुभी बजाई थी कारण कि इनके यहाँ भगवान् प्रकट होंगे, और हमारे संकट नाश होंगे और इसी स्मृति के लिये वसुदेवजी का नाम 'आनकदुन्दुभी' रख दिया था। उस प्रसङ्ग को सार्थक करने के लिये भी भगवान् प्रथम वसुदेवजी के मनमें पधारे। 'अथांशभागेन' अंशों के विभाग से भगवान् ने वसुदेवजी में प्रवेश किया। अब ऐसा कहने का तात्पर्य यह है कि चतुर्व्यूह रूप भगवान् ने इस समय एक ही प्रद्युम्न व्यूहरूप से वंशसम्बन्ध का कार्य सिद्ध करने के लिये प्रवेश किया है। कितने तत्वज्ञों का मत है कि 'अंशेन-भागेन' यों पदच्छेद करके उनका अर्थ 'अंशेन नारायण रूप और 'भागेन' केश रूप के साथ स्वयं प्रद्युम्न ने प्रवेश किया यों कहना चाहिये।

पुरुषोत्तम तो नन्दगृह में माया के साथ ही प्रकट हुए हैं। यदि वहाँ प्रकट न हुवे होते तो, जैसे भगवान् के लिये 'देवकीजठरभूः' देवकी के जठर से प्रकट हुए हैं ऐसा श्रुतियों ने कहा है वैसे ही यशोदाजी को 'तव सुतः' सति गदाधरबिम्बे इस वाक्य में तेरा पुत्र है इस प्रकार प्रमाण मूर्धन्य श्रुति रूप गोपिकाएँ कदापि नहीं कहतीं। जो भगवान् का प्राकट्य यशोदा के घर में न हुआ होता तो शुकदेवजी का वल्लाला में 'तन्मातरौ' नंदलालजी की दो माताएँ यह कहना विरुद्ध हो जाता। चतुर्थाध्याय में माया के जन्म निरूपण से ही नन्दालय में 'भगवान्' की उत्पत्ति कही गई है। और माया के कारण ही 'मनुष्य' रूप से प्रतीति हो रही है। उत्पत्ति होने के अनन्तर ही पंचमाध्याय में 'नन्दस्त्वात्मज उत्पन्ने' श्लोक से भगवान् के प्राकट्य का महान् उत्सव मनाया गया है। इस प्रकार अर्थ करने से ही सर्व चरित्रों का समन्वय हो सकेगा। जनन भगवान् का प्राकट्य मन से हुआ है इसलिये मूल में मनस्तः पद दिया है ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गर्भसङ्कर्षणात्तं रोहिण्यास्तनयं भुवि वर्तमाना जनाः सङ्कर्षणं प्राहुः वक्ष्यन्ति। लोकरमणात्तस्य रामेति सम्बोधनं करिष्यन्ति। बलवतामुच्छ्रयात्। श्रेष्ठत्वात् बलं वक्ष्यति। 'बलभद्रं बलोच्छ्रयात्' इति पाठान्तरम् ॥ १३ ॥ एवं भगवता सन्दिष्टा आज्ञप्ता योगमाया यथा भगवतोक्तं तथेति तथास्त्विति पुनरुक्त्यादरार्थम्। ओमिति च तस्य भगवतो वचः प्रतिगृह्याङ्गीकृत्य सामर्थ्यलाभाय तं परिक्रम्य गां पृथ्वीं गता सती यथा तद्भगवद्वचनं तथाऽकरोदित्यन्वयः ॥ १४ ॥ योगनिद्रया देवक्या गर्भे रोहिणीं प्रति प्रणीते प्रापिते सति पौरा मथुरापुरवासिनो जना "अहो कंसभयात् देवक्या गर्भो विस्रंसितः पतित" इति विचुक्रुशुः। देवकीस्नेहाद्विलेपुरित्यर्थः। योगनिद्रापदेन अघटनायां सर्वविमोहे च सामर्थ्यं द्योतितम्। अहो इति तेषां खेदद्योतकम्। कंसभयादिति शेषस्तु 'सप्तमो भोजराजस्य भयाद्रोधोपरोधतः। देवक्याः पतितो गर्भ इति लोको वदिष्यति" इति विष्णुपुराणोक्त्यनुसारात्। 'स्रंसु ध्वंसु अधःपतन' इत्यनुशासनानुसारेण 'आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः। अत ऊर्ध्वं प्रसूतिः स्यात्' इति वचनाच्च पञ्चमासिकः षाण्मासिको वा गर्भः प्रणीत इति ज्ञेयम् ॥ १५ ॥ भगवान् विश्वात्मा सर्वस्वरूपोऽपि भक्तानां भूम्यादीनामभयङ्करः कंसादिभयं निवर्तयितुमंशभागेन पूर्णानन्दरूपेणानकदुन्दुभेर्मन आविवेशेत्यन्वयः। अनेन जीवानामिव न भगवतो धातुसम्बन्ध इति सूचितम्। यथा सर्वत्र व्यापकोऽपि महाभूताग्निरयःपिण्डादिष्वाविर्भूतः सन्नेव दाह्यं दहति, तथा सर्वात्माऽपि भगवान् केनचिद्रूपविशेषेणाविर्भूयैव दुष्टान् हन्तीति च सूचितम् ॥ १६ ॥

अन्वितार्थप्रकाशिका

गर्भेति ॥ वै एवार्थे। तं रोहिणीपुत्रं गर्भस्य संकर्षणादेव अत्र जन्मनि संकर्षणं प्राहुर्वक्ष्यन्ति नतु प्रलये जगदाकर्षणात्। लोकस्य रमणात् प्रीत्युत्पादनात् रामेति वक्ष्यन्ति। सुप्सुपेति समासः। रामेति संबोधयिष्यन्ति इति वा। बलवत्सु उच्छ्रयात् आधिक्यात्हेतोः बलं वक्ष्यन्ति ॥ १३ ॥ संदिष्टेति ॥ एवं भगवता संदिष्टा आज्ञप्ता देवी तस्य भगवतो वचः वचनं तथा इति पुनः ओमिति च आदरेण प्रतिगृह्य परिक्रम्य प्रदक्षिणीकृत्य गां पृथ्वीं गता सती तद् भगवद्वचनं यथा आदिष्टं तथा अकरोत् ॥ १४ ॥ गर्भे इति ॥ योगनिद्रया कर्त्र्या देवक्याः गर्भे रोहिणीं प्रति प्रणीते प्रापिते सति अहो गर्भः विस्रंसितः कंसभयाद्विस्रस्तः कंसेनैव औषधादिना पातित इति वा। लोकाः स्नेहाकुला विचुक्रुशुर्विलेपुः नतु तत्कारणं विविदुरित्यर्थः। अत्र हरिवंशे देवक्याः सप्तमगर्भसंभवोत्तरमपि किंचित्कालं रोहिणी मथुरायामवात्सीत् पश्चात् गोकुलं गतायां तस्यां साप्तमासिकं गर्भं आकृष्य प्रवेशितः तस्याः पूर्वस्थितो गर्भश्च तात्मासिक एवापसारित इत्युक्तम् ॥ १५ ॥ भगवानिति ॥ विश्वस्यात्मा भक्तानामभयंकरो भगवानपि अंशभागेन पूर्णस्वरूपेणेति

पूर्ववदर्थः । आनकदुन्दुभेर्मनः कर्म आविवेश । मन इत्यनेनान्येषामिव धातुसंबन्धनिरासः अत एव काष्ठेत्यरूपो दृष्टान्तः । भगवानपीत्यर्द्धं चित्सुखाचार्याणामसम्मतम् । पौरुषं धाम मन आविवेशेति तद्व्याख्यानात् ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

संदिष्टेति । एवमित्थं, भगवता, संदिष्टा आज्ञप्ता योगमाया, तद्वचस्तस्य भगवतो वचनं, तथेति ओमिति तथैवास्त्वेवमित्यर्थः । प्रतिगृह्य अङ्गीकारपूर्वकमभिनन्द्येत्यर्थः । परिक्रम्य प्रदक्षिणीकृत्य, गां भूमिं, गता प्राप्ता सती, तद्भगवद्वचनं, तथा यथोक्तं तथेत्यर्थः । अकरोत् ॥१३॥ गर्भ इति । ततः, योगनिद्रया भगवद्योगनिद्राधिष्ठात्र्या शक्त्या, देवक्याः गर्भे रोहिणीं प्रति, प्रणीते संप्रापिते सति, तदा पौराः पुरवासिनो जनाः, अहो देवक्याः, गर्भः, विस्रंसितः निर्गलितः । इति विचुक्रुशुः । 'आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः' इति याज्ञवल्क्यः । न तु तद्विदुरित्यर्थः ॥१४॥ भगवानपीति । ततः भक्तानां स्वाश्रितजनानां, अभयंकरः भयनिवृत्तिचिकीर्षुः, विश्वात्मा सकलजगदन्तरात्मा, भगवान् अपि, अंशभागेन देवत्वेन, जातस्येति शेषः । 'स आत्मा अङ्गान्यन्या देवताः' इति श्रुतेर्देवतानां भगवदंशत्वश्रवणात् । आनकदुन्दुभेर्देवांशत्वेन जातत्वाच्चेति भावः । आनकदुन्दुभेर्वसुदेवस्य, मनः, आविवेश । संकल्परूपज्ञानेन प्रवेशं चकारेत्यर्थः । 'यो मनसि तिष्ठन्' इति श्रुतेः पूर्वत एव तत्र तदावेशश्रवणात्पुनरावेशोक्तिः संकल्परूपज्ञानेनाविष्टत्वोक्त्यर्था बोध्या ॥ १५ ॥ स बिभ्रदिति । स वसुदेवः, पौरुषं भगवत्संबन्धि, धाम तेजः श्रीमूर्त्तिमित्यर्थः । बिभ्रत् बिभ्राणः, अत एव, रविः यथा तथा, भ्राजमानः सन्, भूतानां प्राणिनां, दुरासद इत्थंतयाऽभिसंहितुमशक्यतेजोयुक्तः, अतिदुर्द्धर्षः दुःखेनापि धर्षयितुमशक्यः, ह स्फुटं यथा तथा, संबभूव ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गर्भसङ्कर्षणादिति : १०. २. १३.

किञ्चित्कार्यवशान्मयाऽऽर्यपदवीं रामोऽयमारोपितः तेनैवाल्पदृशो भजन्तु मयि नाश्रद्धां कनीयानिति ।
इत्यात्मन्यनुपाधिकाखिलजगज्ज्येष्ठत्वमव्याहतं व्यक्तीकर्तुमसौ तदा तदभिधाधानं चकाराच्युतः ॥ ७ ॥

गर्भे प्रणीते इति : १०. २. १५

वसुदेवरोहिणीस्थितिरविकलभावा सा तु यत्रास्ते । पूर्णा योगोद्भूतिर्व्यक्ता मद्व्यक्तता च तत्र गवि ॥ ८ ॥
विवरवसतिरथाजस्रमस्त्येव जाता यदि ह पुनरसौ सत्तादृशानन्ददान ।
इति विमुरुचितज्ञो रोहिणीं गोकुलस्थां तमनघदलमन्या यद्बिलस्था विहाय ॥ ९ ॥
धराभाग्यतो गोकुलेमन्निवासो भविष्यत्यतोऽस्यापि तत्रैव वासः ।
प्रशस्तो यतः सर्वदैवैष युक्तो वियोगासहिष्णुश्च तस्यां युयोज ॥ १० ॥
अशेषज्येष्ठ एवास्मत्प्रभुरेवं वचः सताम् । कर्तुं सर्वांशतोऽन्वर्थं चक्रे शेषं निजाग्रजम् ॥ ११ ॥
अध्यास्यमानां प्रभुणा निजेन यो भूमिं विशोध्याशु तदन्यतो वसेत् ।
सत्सेवकोऽसौ भवति प्रियः प्रभोरग्रेसरश्चापि सदेति तत्स्फुटम् ॥ १२ ॥
ये सन्त्यन्येऽवतारा जगति बहुविधास्तेंऽशरूपाः परात्मा श्रीकृष्णोऽद्धेति युक्तं मुनिवरवचनं भाति मायानिदेशात् ।
स्वायत्तीकृत्य मायां विहरति किल यः सोऽयमात्मेति वेदो मानं किञ्च स्फुटं यच्चरितमपि तथैवाद्भुतानन्तकृत्यम् ॥ १३ ॥
अनेकदेहसम्बन्धो योगिनो योगतोऽवनौ । स्फुट एवेति समभूद्रामस्तत्र निदर्शनम् ॥ १४ ॥

भगवानपि : १०. २. १६.

यद्दुर्घटं चलमतीव च वस्तुजातसञ्चारि चेति बहुवारमवर्णि सद्भिः ।
कीदृग्भवेत्तदिति किं प्रभुरीक्षणाय द्रागाययौ स वसुदेवमनः परात्मा ॥ १५ ॥
यद्धामनस्थितितयाऽस्य पुराऽहमासं पुत्रोऽवनौ तदधुनापि तथैव भाव्यम् ।
प्राग्रूपसंस्तवकृते किमसौ दयालुः, यद्वा मनःस्थितिमिहाप्युररीचकार ॥ १६ ॥
अकामोऽप्यहं कामवानेव भक्तमनोजाततृप्त्यै भवामीति लोके ।
दयाम्भोधिरम्भोधिशायी परात्मा तदानीं किमासीन्मनोभूनिवासी ॥ १७ ॥
यौ वाहौ मम लोकविश्रुतगती पक्षीश्वरस्यन्दनौ सिद्धौ तौ भुवि नर्मकर्मणि तथा यात्रासु वाजौ क्वचित् ।
भक्तानां तु मनोरथो मम मतस्तत्राणवेलास्विति प्रख्यात्यै स तदारुरोह भगवांस्तच्चेत एवोदरात् ॥ १८ ॥
अणोरणीयान् महतो महीयान् श्रुत्यर्थमेनं प्रकटीचिकीर्षुः ।
विभुः स्वयं सन्नपि विश्वनाथो विवेश चित्तमणुप्रमाणम् ॥ १९ ॥

योयं विना न कुरुते गुरु वाल्पकं वा कार्यं स तस्य गदितो भृशमन्तरङ्गः ।
आलोचयन्निति विभुः पितुरन्तरङ्गं प्रागाययाऽभिलषन्नभयोर्वशित्वम् ॥ २० ॥
यो यो जनो भजति जन्मगतिं जगत्यां सर्वस्य तस्य मन एव सुखादिहेतुः ।
जानन्निदं प्रभुरसावपि तत्र वासं मैत्रीकृते किमु चकार अनुजिघृक्षुः ॥ २१ ॥
गोपालनं मम विधेयमिहाग्रतोऽस्ति तत्पालके वसतिरेव पुरोपयुक्ता ।
इत्येव गोगणनियन्तरि चेतसीशो वासं चकार किमु वाऽभ्यसनाय तस्य ॥ २२ ॥
नो मयि मनःप्रवेशो जातुचिदपि किन्तु भक्तहितकारी । अहमेव तद्धिशामीत्यबोधि बहुधा मनःप्रविष्टेन ॥ २३ ॥
इन्द्रियाणां मनश्चास्मीत्युक्तिं स्वां जगति स्फुटाम् । कर्तुं किमु हृषीकेशो मनःपदमुपाश्रितः ॥ २४ ॥
पितृतोऽपि पितामहस्य नमर्यनुरागोऽधिक इत्यशेषलोकः । वदतीत्यनुभूतयेऽस्य कामं स्वयमागात्स पितामहोपकण्ठम् ॥२५॥
यत्रामलो लसति भक्तिरसो मदङ्घ्रिपद्मं तथा मदभिधोत्तमरत्नराशिः ।
तत्रैव हंसवदहं विहरेयमित्थं तन्मानसे विहरता हरिणा न्यदर्शि ॥ २६ ॥
सङ्कल्पं निजभक्तिभृज्जनकृतं सत्यं विधातुं प्रभुर्भक्ताभीष्टफलप्रदो ध्रुवमसौ तत्रैव संतिष्ठते ।
ध्वस्ताराातिकभूमिपालनमये यद्वासुदेवे तदा सङ्कल्पेऽवसदेष एव हि मनो वासोऽस्य नत्वन्यवत् ॥ २७ ॥

कृष्णप्रिया

हिन्दी अनुवाद—गर्भ को सावधानी से खींच लेने से भूतल में उनको संकर्षण ही कहेंगे और लोकसमूह को रमण कराते हुए आनन्द प्रदान करने से 'राम इति' और अतिशय मङ्गलकर बलशाली होने से बलभद्र कहेंगे ॥ १३ ॥ जब भगवानने योगमाया को इस प्रकार आदेश दिया और योगमाया ने भगवान की आज्ञा के वचनों का स्वीकार किया पुनः प्रभु की परिक्रमा करके भूतल पर पधारी और पृथ्वी पर जाकर योगमाया ने भगवान की आज्ञा के अनुरूप कार्य का आरंभ किया ॥ १४ ॥ जब श्री योगमायाजी ने (भगवदाज्ञानुसार) देवकीजी के गर्भ को रोहिणीजी में स्थापित किया तब पौरजन चिल्लाने लगे कि अहो (कंस ने राक्षसों द्वारा) देवकीजी के गर्भ को विस्रंसित कराया ॥ १५ ॥ भक्तों को अभय करने वाले विश्वात्मा भगवान ने भी श्रीवसुदेवजी के मन में अंशों भाग से प्रवेश किया ॥ १६ ॥

[1]स बिभ्रत् पौरुषं धाम [2]भ्राजमानो यथा रविः । दुरा[3]सदोऽतिदुर्धर्षो भूतानां सम्बभूव ह ॥ १७ ॥
ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी ।
दधार सर्वात्मकमात्मभूतं काष्ठा यथाऽऽनन्दकरं मनस्तः[4] ॥ १८ ॥
सा देवकी सर्वजगन्निवासनिवासभूता नितरां न[5] रेजे ।
भोजेन्द्रगेहेऽग्निशिखेव रुद्धा सरस्वती ज्ञान[6]खले यथा सती ॥ १९ ॥
तां वीक्ष्य कंसः प्रभयाजिता[7]न्तरां विरोचयन्तीं भवनं शुचिस्मिताम् ।
[8]प्राहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी ॥ २० ॥

कर्ममक्षमा

अन्वयः—पौरुषं धाम बिभ्रत् सः रविः यथा भ्राजमानः भूतानां दुरासदः अति दुर्धर्षः ह सम्बभूव ॥ १७ ॥ ततः शूरसुतेन समाहितम् जगत् मङ्गलम् सर्वात्मकम् आत्मभूतम् (आनन्दकरम्) अच्युतांशम् देवी मनस्तः आनन्दकरं काष्ठा यथा दधार ॥ १८ ॥ सा सर्वजगन्निवासभूता सती देवकी भोजेन्द्रगृहे रुद्धा अग्निशिखा इव ज्ञानखले सरस्वती इव नितरां न रेजे ॥ १९ ॥ अजितान्तराम् प्रभया भवनं विरोचयन्तीम् शुचिस्मिताम् ताम् वीक्ष्य कंसः प्राह प्राणहरः एषः हरिः ध्रुवम् गुहाम् श्रितः यत् पुरा इयम् ईदृशी न ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

धाम श्रीमूर्तिम् ॥ १७ ॥ जगन्मंगलं जगतो मूर्तिमन्मंगलम् । अच्युतांशमच्युताश्च्युतिरहिता अंशा ऐश्वर्यादयो यस्य तम् । यद्वा अच्युतस्यांश इवांशः भक्तानामनुग्रहार्थं परिच्छिन्नवपुरित्यर्थः । सम्यग्भूतमेवाहितं वेधदीक्षयाऽर्पितं देवी द्योतमाना शुद्धसत्वेत्यर्थः । सर्वात्मकं सर्वस्यात्मानम् । अत एवात्मभूतं स्वस्मिन्नादावेव संतम् । मनस्तो मनसैव दधार धारणया धृतवती ।

---

[1] अंशेन भगवान्विष्णुर्भुवो भारापनुत्तये–इदमन्यत्राधिकं दृश्यते । २. राजमानो–विज. । ३. दुरासदः सुदु–इति कस्यचित् । ४. मनस्तं–वीर. नभस्तः–विज. । ५. विरेजे–विज. । ६. भूतखले–विज. । ७. ऽजितंभरां–विज. । ८. आहैष–श्रीधरादयः प्राहैष–वीर. ।

अत्रानुरूपं दृष्टांतमाह । यथा काष्ठा प्राची दिगानंदकरं चंद्रमिति ॥ १८ ॥ सर्वजगन्निवासस्य श्रीहरेर्निवासभूता सत्यपि नितरां सर्वजनाह्लादकतया न रेजे किं तु स्वयमेवानंदमन्वभवत् । यतः कंसस्य गृहे रुद्धाऽन्यैर्न दृश्यते । घटादिषु रुद्धाऽग्निशिखा दीपकलिकेव तथा सती शोभमाना सरस्वती ज्ञानखले ज्ञानवंचके रुद्धा यथाऽन्येषामनुपकारिणी न राजते तद्वत् ॥ १९ ॥ प्रभया भवनं विरोचयंतीम् । अजितोंतरा कुक्षिमध्ये यस्यास्ताम् । एष विरोचमानो ध्रुवं हरिरेव यद्यस्मादीदृशीयं पुरा पूर्वं नासीत् ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

श्रीमूर्ति पुरुषाकारीभूतं तेज इत्यर्थः । दुरासदः प्राणिभिरासन्नभवितुमशक्यः । दुर्द्धर्षः कंसादिभिरभिभवितुमशक्यः । पौरुषं धाम पुरुषोत्तमस्य प्रभावं दधानः । स्वस्मिन्प्रादुर्भूतं कृष्णं पश्यन्तीत्यर्थः । "धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः" इति विश्वः ॥ १७ ॥ जगतो मूर्त्तिमन्मंगलम् । जगद्विरक्षया मंगलेन मंगलानां च मंगलमित्युक्तदिशा परममंगलेन श्रीभगवता मूर्त्तिभूतेत्यर्थः । अपरिच्छिन्नैश्वर्यस्य परिच्छिन्नमनसा धारणमशक्यमित्यस्वारस्येन पुनराह–यद्वेति । इत्यर्थः इति परिच्छिन्न इह वपुर्न तु परिच्छिन्नो जीवत्वापत्तेरित्यर्थः । सत्यभूतमेव न किञ्चित्तारतम्यार्थं वेधदीक्षायार्पितं ध्यानमात्रेणैव देवकीचित्ते वसुदेवेन चेतसा प्रापितमित्यर्थः । वेधदीक्षा तु कुलार्णवतंत्रे दीक्षाकथनप्रकृते कथिता । तथा हि–"स्पर्शदीक्षा वेधदीक्षा दृग्दीक्षा चेति चेदतः । दीक्षा तु त्रिविधा प्रोक्ता पार्वत्यै शंकरेण वै ॥ यथा पक्षी स्वपक्षाभ्यां शिशून्संवर्द्धयेच्छनैः । स्पर्शदीक्षोपदेशस्तु तादृशः कथितः प्रिये ॥ यथा कूर्मः स्वतनयान् ध्यानमात्रेण पोषयेत् । वेधदीक्षोपदेशस्तु मनसः स्यात्तथाविधः ॥ स्वापत्यानि यथा मत्स्यो वीक्षणेनैव पोषयेत् । "दृग्दीक्षाया उपदेशस्तादृश कथितः शिवे" ॥ इति । शुद्धसत्त्वेत्यर्थः । देवीपदस्य क्रीडमानेत्याद्यर्थो मा भूदित्यर्थः । अत एव सर्वात्मकत्वादेव । यद्वात्मनैव भूतं स्वयमाविर्भूतं न तु योगिवद्यत्नेन मनस्यानीतं तेन जीववज्जननीजठरसंबंधो वारित इति । धारणया ध्यानेनेत्यर्थः । मनस्त इति । तृतीयार्थे तसिः । अत्र धार्योऽनुरूपं योग्यम् आनंदोऽमृतं यद्रूपाः करा रश्मयो यस्य तम् । काष्ठा प्राची यथा स्वतस्सिद्धं चंद्रमाकाशे दधाति तथा हृदयाकाशे "स्वतस्सिद्धे सर्वभूतांतरात्मा" इत्यादिश्रुतेर्दधारेत्यर्थः । चंद्रपक्षे तु अंधकारनाशकत्वेन जगन्मंगलम् । अच्युतांश पूर्णकलम् । शूरः सूर्यस्तस्य सूतः । सुषुम्नाख्यो रश्मिस्तेन समाहितं निष्पादितम् । अमायां सूर्यलीनश्चन्द्रस्तस्य सुषुम्नाख्यरश्मिनाभिव्यज्यत इति शास्त्रांतरप्रसिद्धः । सर्वासामौषधीनामंकुरजनकत्वात्सर्वात्मकम् । आत्मनो मनसोऽभिमानित्वादात्मभूतमिति योज्यम् ॥ १८ ॥ सर्वजगदाह्लादकतया निखिलविश्वानंदजनकत्वेन न रेजे न शुशुभे । स्वयमेवैकाकिन्येव । ज्ञानवंचकेऽधीत्यापि शास्त्रमनध्यापकेन्येषां तद्विज्ञानामनुपकारिणी अदत्ता सती न कस्यापि पठनपाठनजन्यपुण्योत्पत्तिं करोतीत्यर्थः । यद्वा–ज्ञानेन शास्त्रीयोपदेशेन लोकोऽधर्मे प्रवर्त्तयन्नपि स्वोपकारार्थं स्वयं स्वप्नेऽपि धर्मवार्त्तामपि यो न करोति सोऽपि ज्ञानवंचकस्तस्मिन्यथाश स्वं न शोभते तद्वदिति । यद्वा–ज्ञानवंचको दांभिकस्तत्र यथा सरस्वती न शोभते दांभिककथितं न कोपि सत्यं मनुते वंचकत्वात्तस्य । किञ्च यथाग्निशिखा प्रबला सती रोधकगृहं दहति तथा देवक्यपि कंसस्यैश्वर्यं धक्ष्यतीत्यर्थः । यथा च सती सरस्वती पापातिशयेन स्वरोधकं कालेन नाशयति तथैव देवकी कंसमिति भावः ॥ १९ ॥ प्रभया स्वदेहकांत्या । भवनं गृहम् । अजितो विष्णुरंतरा कुक्षिमध्ये कुष्यते निष्कुष्यते विचार्यते शुभाशुभमनेनेति कुक्षि मनस्तन्मध्येऽन्यथा मनस्त इत्युक्तिविरोधस्स्यादिति । कंसदृष्ट्या यथाश्रुतमेवास्तु । शुचि स्वाभाविकमानंदोत्थं न तु पूर्ववत्सकपटं स्मितं यस्यास्ताम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पौरुषं धाम श्रीभगवत्तेजः मनसि श्रीभगवदावेशेन तत्तेजोऽभिव्यक्तेः यद्वा, धामप्रादुर्भावं प्रभावं वा तथा च विश्वः "धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः" इति दुरासदः निकटे गन्तुमशक्यः चक्षुरग्राह्यो वा अत एव अतिदुर्द्धर्षः अभिभवितुमशक्यः सम्यग्बभूव ह स्फुटम् ॥ १७ ॥ सर्वात्मकमपि आत्मभूतम् आत्मनि प्रादुर्भूतं पुत्ररूपतया दधारेत्यर्थः । तेन जीववज्जन्माभावाद्व्यक्तिरेव श्रीभगवतो जन्मोच्यते । तथा च श्रीमध्वाचार्यधृतं तन्त्रभागवतवचनम् ।

"अहेयमनुपादेयं यद्रूपं नित्यमव्ययम् । स एवापेक्ष्य रूपस्य व्यक्तिमेव जनार्दनः ॥
अगृह्णाद्व्यसृजच्चेति कृष्णरामादिकां तनुम् । पठ्यते भगवानीशो मूढबुद्धिव्यपेक्षया ॥
तमसाद्युपगूढस्य यत्तमः पानमीशितुः । एतत्पुरुषरूपस्य ग्रहणं समुदीर्यते ॥
कृष्णरामादिरूपाणां लोके व्यक्तिव्यपेक्षया" । इति

महावराहवचनं च

"सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः । हेयोपादेयरहिता नैव प्रकृतिजाः क्वचित् ॥
परमानन्दसन्दोहा ज्ञानमात्राश्च सर्वतः । इति ।

भगवन्तमिति शेषः । आनन्दयन्तीत्यानन्दाः करा यस्य चन्द्रस्य तम् अमृतरश्मित्वात् अन्यत्रैः यद्वा न च्युतः एकोऽप्यंशो यस्य तं सर्वांशपरिपूर्णं भगवन्तमित्यर्थः । यत एवात्मभूतं सर्वमूलस्वरूपं समाहितं साक्षादर्पितवत्प्रकाशितं हर्षशोकविवर्द्धनं इति

पूर्वं शोकोऽप्युक्तः अधुना च परमानन्द एव जात इत्याह, सर्वेषामात्मनां जीवानां कं सुखं यस्मात्तं यद्वा न च योगिनामेव तद्धारणे यत्न इत्याह, आत्मना भूतं समाहितः सन् यः स्वयमेवाविर्भूतस्तमित्यर्थः ॥ १८ ॥ गच्छतीति जगदिति निरुक्त्या सर्वमात्र-वाचकेनापि तच्छब्देनात्रानित्य एव सर्वं उच्यते सर्वशब्दस्य पृथक्पाठात् ततः सर्वशब्देन तदतीतं सर्वमिति ततश्च नित्यस्य अनित्यस्य च सर्वस्य निवास आश्रयः, "यस्य भासा" इत्यादिश्रुतेर्यदाश्रयत्वेनैव तत्तत्सर्वं भासते स श्रीकृष्ण इत्यर्थः। तस्य च निवासभूता आश्रयत्वं प्राप्तापीत्यर्थः। इति सर्वाह्लादकशोभा योग्यतोक्ता तादृश्यपि नितरां सर्वाह्लादकतया न रेजे किन्तु स्वान्तरङ्गैः श्रीवसुदेवादिभिर्विशिष्टस्य स्वस्यैवाह्लादकतया रेज इत्यर्थः। यथा तादृष्यग्निशिखा सरस्वती च नितरां सर्वोल्लासकतया न राजते किन्तु स्वान्तरङ्गविशिष्टस्योल्लासकतयैव राजत इत्यर्थः। एते हि स्वदीप्त्या स्वयमुल्लासतः स्वानतरङ्गान् वोल्लासयत इति सरस्वतीपक्षे स्वान्तरङ्गं तन्मन आदिकं अग्निशिखेव रुद्धेत्यनेन सा प्रबला तद्गृहमपि धक्ष्यति तादृशी सरस्वती च निजाधारं पापेन नाशयिष्यत्येवेति भावः ॥ १९ ॥ वीक्ष्य साक्षात् दृष्ट्वा प्रभवेत्यत्र विशेषः श्रीविष्णुपुराणे "न शेके देवकीं द्रष्टुं कश्चिदप्यति-तेजसा। जाज्वल्यमानां तां दृष्ट्वा मनांसि क्षोभमादधुः" इति भगवदानन्दस्फूर्तिस्वाभाव्यात् शुचि शुद्धं न तु पूर्ववद्वञ्चनार्थं सकपटं स्मितं यस्यास्ताम् आह स्वचित्ते गुहां हृदयमुदरं वा श्लेषेण नागस्येव मम सिंह इव भीषणोऽयं दरीं श्रित इति ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पौरुषं धाम भगवदीयं तेजः वसुदेवाय चित्त्वसिद्धये प्रथमं वसुदेवं हृद्गतः पश्चाद्देवकीजठरं विवेशेत्यर्थः ॥ १७ ॥ काष्ठा पूर्वादिक् आनन्दकरं चन्द्रं पूर्वापरदिशोश्चन्द्रवद्देव वसुदेवदेवकीजठरयोर्भगवतः सम्बन्ध इत्यर्थः ॥ १८ ॥ परमात्मगर्भत्वा-दग्निशिखादृष्टान्तः "तस्या शिखाया मध्ये परमात्मा व्यवस्थितः" इति हि श्रुतिः ज्ञानखले ज्ञानतः खले वेदविरुद्धज्ञानवती विरुद्धा सरस्वती उपनिषदिवेत्यर्थः ॥ १९–२० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

वसुदेवः पौरुषं श्रीभगवत्सम्बन्धि तेजो बिभ्रत् बिभ्राणः यथा रविस्तथा विराजमानो दुरासदोऽपि इत्थं तयाऽभि-संहितुमशक्येन तेजसा युक्तः भूतानां कंसादीनां दुर्धर्षः दुःखेनापि सोढुमशक्यो बभूव ॥ १७ ॥ ततः शूरसुतेन वसुदेवेन निहितं जगतां मङ्गलं यस्मात्तम् अच्युतोऽप्रच्युतोऽशः सङ्कल्परूपविज्ञानं यस्य तं सर्वात्मकं सर्वशरीरकमात्मनोऽप्यात्मभूतं श्रीभगवन्तं देवकी दधार जठरे इति शेषः। हृदयाकाशे हृदयकमले वेति दिक् तथा काष्ठा पूर्वा दिक् घनस्थमभ्रपिहितमानन्दकरं चन्द्रं बिभर्ति तद्वत् वसुदेवापत्यत्वसिद्धये तावद्वसुदेवहृद्गतः पश्चाद्देवकीजठरं प्रविवेशेत्यर्थः। पूर्वदिशश्चन्द्रस्येव वसुदेवदेवकी-जठरयोर्हृदययोर्भगवतस्सम्बन्ध इति भावः ॥ १८ ॥ सा धृतपरमपुरुषा देवकी सर्वजगदाधारभूतस्य श्रीभगवतो निवासभूता सती अतितरां न रेजे न रराज यथा भोजेन्द्रस्य गृहेऽवरुद्धा उग्रसेनस्य कंसस्य वा गृहे इत्यर्थः। अग्नेः शिखा इवावरुद्धेत्य-भूतोपमेयं यथा च ज्ञानखले वेदविरुद्धेन ज्ञानेन हीने मूर्खे दुर्जने पुंसि सती निर्दुष्टा सरस्वती उपनिषन्न राजते तद्वत्परमात्म-गर्भत्वादग्निशिखादृष्टान्ताः "तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः" इति श्रुतेः। ज्ञानबल इति पाठे वेदाविरुद्धज्ञानव-तीत्यर्थः ॥ १९ ॥ तथा प्रभया जितानि अन्तराणि दिगन्तराणि यस्याः शुचि विशुद्धं स्मितं यस्यास्तां भवनं गृहं विरोचयन्तीं देवकीमालोक्य कंसः प्राह, उक्तिमेव दर्शयति—एष इत्यादिना इति घोरेत्यतः प्राक्तनेन। मे मम प्राणहरः प्राणान् जिहीर्षुरयमेव हरिः ध्रुवं गुहां देवकीजठरविवरं श्रितः पुरेयं देवकी नेदृशी एवंविधप्रभान्विता नासीदतो नूनं गुहामाश्रितः ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पौरुषं धाम पुरुषाकारीभूतं विष्णुतेजः ॥ १७ ॥ वसुदेवप्रवेशानन्तरं देवी अच्युतस्य हरेरंशं कृष्णकेशलक्षणं दधार जगन्मङ्गलयति भूभारहरणेन जगन्मङ्गलं करोतीति जगन्मङ्गलं शूरसुतेन वसुदेवेन समाहितं सर्वात्मनः सर्वव्यापिनो हरेः या सर्वव्यापित्वशक्तिः साऽस्यास्तीति सर्वात्मकस्तम्। आत्मभूतं देवक्यां प्रत्यगात्मस्वरूपम् आत्मनो मनसोभूतमभिव्यक्तं वा आत्मभुवश्चतुर्मुखस्य भूतमिष्टसाधकत्वादिष्टं देवं वा आनन्दकरमुक्तप्रपञ्चस्यापि सुखकरं कथमिव काष्ठा पूर्वदिक् आनन्दोऽमृतं करो यस्य स तमानन्दकरं चन्द्रं नभस्त आकाशे यथा दधाति तथा हृदयाकाशे दधार न तु योन्याकाशे। कीदृशी (१) काष्ठा पूर्णमनोरथा कीदृशी (२) देवी द्योतमाना कीदृशं चन्द्रं रात्र्यामन्धकारनिरासेन जगन्मङ्गलभूतं च्युतिरहिता अंशाः करा यस्य स यथा तं पूर्णकलमित्यर्थः। शूरश्चण्डकरः सूर्यस्तत्सुतः सुषुम्नाख्यो रश्मिस्तेन समाहितं निष्पादितम् अमावास्यायां सूर्ये लीनः चन्द्रः तस्य सुषुम्नाख्यरश्मिना अभिव्यज्यत इति शास्त्रप्रसिद्धिः सर्वासामोषधीनामङ्कुरजनकत्वेन प्रेष्ठत्वात्सर्वात्मकम् आत्मनो मनसोऽ-भिमानित्वादात्मभूतं लोकविडम्बनार्थं पितृमातृप्रवेशक्रमः न तु शरीरस्वीकारार्थं तदुक्तम्—

"आविश्य पितरं विष्णुस्वरूपेणैव मातरम्। विडम्बनार्थं लोकस्य निर्जनिश्चाप्यथाविशत् ॥
आनन्दमात्रदेहेन जातवत्संप्रदृश्यत" इत्यादिना ॥ १८ ॥

सा देवकी प्रथमं भोजेन्द्रगेहे रुद्धा न विरेजे इति नञमध्याहृत्य व्याख्येयं पश्चात्सर्वजगन्त्यास्मिन्निवसन्तीति सर्वजगन्निवासो विष्णुः तस्य निवासभूता हेतुगर्भं विशेषणं नितरामत्यन्तं विरेजे न रेज इति पाठे नञोऽध्याहार्यत्वम् अत्र दृष्टान्तः दाहकाग्निशिखादाह्यतृणपटलादिना रुद्धा न राजते पुनः शुष्केण तेनैव ज्वलिता यथा राजते यथा वा सती सरस्वती सत्यरूपा वाणी द्यूतखले द्यूतरङ्गस्थले अनृतेन रुद्धा न राजते सैव निर्व्याजा रोचते तथेति अन्यथा यथास्थितकथनदृष्टान्तदार्ष्टांतिकविरोधादयुक्तम् ॥ १९ ॥ अजितम्भरां विष्णुन्दधानाऽजेतुमशक्यगर्भभरा वा अन्तः स्थितविष्णुप्रभावर्धितस्वदेहप्रभया गर्भरूपेण हृदयगुहां प्रविष्टो यद्यस्मात्तं तस्माद्ध्रुवम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पौरुषं धाम भागवतं वपुः ॥ १७–१८ ॥ सेति सा शुद्धसत्त्ववृत्तिरूपत्वेन प्रसिद्धा द्योतनाद्देवकीति यथार्थनाम्नी नितरां न रेजे इति तेजसः सर्वचक्षुष्षु प्रसरणाभावादानन्दस्य च सर्वमनस्स्विति भावः। पूर्वोऽत्र दृष्टान्तोऽग्निशिखेव रुद्धेति उत्तरोऽत्र सती ज्ञानखले यथेति तत्र कंसस्य तद्गृहप्रवेशो पूर्वमनुभवविषयो भवदुत्तरं तु मनःप्रवेशाभावान्नैवेत्याह ॥ १९ ॥ तामिति एव जीवन् जीवरूपेण दृश्यमानोपि लोकबहिष्कृतत्वसाम्यात् मृत एव सन्निवृत्तौ हेतुमाह—अन्तर्यामिरूपतया स्वयं प्रभुः परमेश्वरो यत्रेति तस्य दोषमुक्त्वा श्रीहरिवंशसम्बन्धस्य स्वाभाविकं गुणमाह ॥ २०–२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततो भगवांस्तद्देहाद्देवकीदेहे प्रविष्ट इत्याह—तत इति। जगतां मूर्तिमन्मङ्गलं च्युतिरहिता अंशा नारायणनृसिंहादयो यत्र तत् सर्वेषां भक्तानां सर्वस्य शम्भोर्वा आत्मनो मनसः कं सुखं यत्र तत् आत्मभूतं आत्मनेव भूतं स्वयमाविर्भूतं न तु योगिवद्यत्नेन धारणया मनस्यानीतं मनस्तो मनसा दधार तेन जीववज्जननीजठरसम्बन्धो वारितः अत एवानुरूपं दृष्टान्तमाह, काष्ठा प्राची दिक् आनन्दकरं चन्द्रं यथेति कियद्दिनानन्तरं तं तु सा स्वकुक्षिमध्येऽपि कृष्णं पश्यन्ती बभूवेति ज्ञेयं "दिष्ट्याम्ब ते कुक्षिगतः परः पुमान्" इत्यग्रे तथोक्तेः ॥ १७–१८ ॥ प्राकृताप्राकृतसर्वजगन्निवासस्य श्रीहरेर्निवासरूपा सत्यपि नितरां सर्वजनस्याह्लादकतया न रेजे किन्तु तत्रत्यस्वान्तरङ्गद्वित्रिजनसहितस्य स्वस्यैवेत्यर्थः। यतः कंसस्य गृहे रुद्धा अग्निशिखा इवेति सा यथा गृहे रुद्धा नगरं न प्रकाशयति किन्तु गृहस्थितवस्त्वेव तथा स्वसमीपवर्तिनां द्वित्रिजनानां शीतादिनाशिका च तथैवेत्यर्थः। यथा च सा प्रबला सती रोधकस्य गृहं दहति तथैव देवक्यपि कंसस्यैश्वर्यं धक्ष्यतीत्यर्थः। ज्ञानखले ज्ञानवञ्चके रुद्धा सरस्वती सर्वलोकानुकारिणी सती यथा न राजते पापातिशयेन स्वरोधकं च कालेन यथा नाशयति तथैव स्वापराधेन कंसमपि देवकी नाशयिष्यतीत्यर्थः ॥ १९ ॥ प्रभया भवनं विरोचयन्तीम् अजितः अन्तरे कुक्षिमध्ये यस्यास्तां शुचि स्वाभाविकमानन्दोत्थं न तु पूर्ववद्वञ्चनार्थं सकपटं स्मितं यस्यास्यां वीक्ष्य स्वगतमाह मे मतङ्गजस्य हरिः सिंहः यद्यस्मात् ईदृशी पूर्वं नासीत् ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पौरुषं पुरुषस्य विष्णोर्धाम सुचिन्त्यापरिमितकल्याणविग्रहयुक्तं भगवत्स्वरूपमित्यर्थः ॥ १७ ॥ देवी श्रीदेवकी ततस्तस्मादानकदुन्दुभेर्मनसः सकाशाज्जगन्मङ्गलं भगवन्तं शूरसुतेन सम्यगाहितं ध्यानेनार्पितं मनस्तः मनसैव दधार धारणया गर्भत्वेन धृतवती आत्मभूतमात्मना धारणकाले भूतमनुभूतं द्रष्टुमित्यर्थः। मनसैव धारणे दर्शने च तस्याः सामर्थ्यं द्योतयितुं देवीत्युक्तम् मनसो निर्गत्य मनसि प्रवेशेन प्रतीतं परिच्छिन्नत्वं निराकर्तुमाह—सर्वात्मकमिति। सर्वस्यात्मभूतं सर्वोपादानरूपम् जीवः पूर्वदेहं त्यक्त्वा देहान्तरं गृह्णाति तद्वैलक्षण्यं द्योतयितुमाह—काष्ठा यथाऽऽनन्दकरमजहच्छरीरं चन्द्रमिति मात्रुदरवासादौ जीवश्च्युतैश्वर्यो भवति तद्वैपरीत्यद्योतनायाह—अच्युतांशमिति। अच्युताः च्युतिरहिताः अंशा ऐश्वर्यादयो यस्य तम् ॥ १८ ॥ सर्वाणि जगन्ति निवसन्ति यस्मिन् तस्य सर्वाधारस्य निवासभूता आधाररूपा प्राणिनो बहिराह्लादयितुमन्तश्चक्षुर्द्वारा प्रविश्याह्लादयितुं च योग्यापि नितरामुभयथाऽऽह्लादकतया न रेजे तत्र हेतुमाह भोजेन्द्रगेहे रुद्धेति बहिरनाह्लादकतायां दृष्टान्तोऽग्निशिखा दीपरूपा घटादिषु रुद्धेव अन्तराह्लादकतायां दृष्टान्तः सती भुक्तिमुक्तिप्रदातृतया शोभनापि सरस्वती ज्ञानखले ज्ञानवञ्चके रुद्धा यथा ॥ १९ ॥ अजितो भगवान् अन्तरा कुक्षिमध्ये यस्यास्तं शुचि स्मितं यस्याः ताम् अत एव भवनं प्रभया विरोचयन्ती तां देवकीम् वीक्ष्य आह एष मे प्राणहरः हरिः अस्याः क्लेशहरः गुहामुदरं ध्रुवं स्थितः यद्यतः पुरेयमीदृशी न ॥ २० ॥

श्रीसुबोधिनी

आविष्टे भगवति यादृशो जातस्तं वर्णयति **स बिभ्रदिति**। **पुरुषस्य** भगवतो **धाम** तेज आत्मनि बिभ्रदिति स्वतोपि स्वकान्तिसामर्थ्यादधिकानुभावो निरूपितस्तदा राजमानो जातः। **यथा रविरिति** सर्वेषां प्रतीत्यर्थमेवोक्तम्। अथवा द्वादशबिम्बान्येव तिष्ठन्ति येषु पुनर्यदा प्रविशति तदा स प्रकाशते तद्वत्। तदा तस्य कंसादीनां भयं निवृत्तमिति ज्ञापयितुमाह दुरासद इति। कोपि निकटे गन्तुं न शक्नोति न वाधिक्षेपं कर्तुम्। अतः क्लेशो दूरे ज्ञापितः। **भूतानां सर्वेषामेव**। दुष्टानां वा राक्षसादीनाम्।

सभ्यरा बभूवेति न कोपि परीक्षार्थमपि बलादभ्यागन्तुं शक्त इत्युक्तम् । **हेत्याश्चर्ये** । सर्वेषु भगवान् यद्यपि वर्तते तथापि **नैवं** तेजोन्यत्रेति ॥ १७ ॥

षट्पुत्रवधात् पूर्वमेव **सङ्कर्षणगर्भस्ततः** प्रभृति निगडगृहीत एव । अतः **प्रकारान्तरेण स्वस्मिन्** विद्यमानं **भगवन्तं** देवक्यामानीतवानित्याह **तत** इति । यद्यपि **स्वस्मिन्नेव** स्थापनमुचितं तथापि **सर्वलोकरक्षार्थं** देवक्यां स्थापितवानिति **ज्ञापयितुमाह** जगन्मङ्गलमिति । जगतामेव कल्याणभूतम् । नन्वेमागमनावेशप्रवेशनिर्गमनेष्वन्यथाभावो न्यूनाधिक्यं वा भविष्यतीत्याशङ्क्या- हाच्युतांशमिति । अच्युतश्चासावंशश्च । **षष्ठ्यर्थेपि** तदर्थमेव विशेषणम् । **सम्यगाहितमिति** । **वेधदीक्षाप्रकारेण** । वस्तुतस्तु **समाधौ** देवकीं भावयित्वा मनसैव तत्र साक्षात् तेजः स्थापितवान् । **शूरसुतेनेति** । विवेकार्थं पितृनाम्ना निर्देशः । **देवीति** । तस्या अन्तः- प्रवेशेन **समाधावपि** तत्तेजोग्रहणसामर्थ्यं **द्योतितम्** । इयं हि देवतारूपा । देवतायाश्च तथासामर्थ्यं **सिद्धमेव** । अत एव दधार । नन्वेवं परधृतत्वे ब्रह्मत्वं भज्येतेत्याशङ्क्याह **सर्वात्मकमिति** । स हि **सर्वेषामात्मभूतः** सर्वैरेव ध्रियत इति धारणं न दोषाय । तथापि **प्रकृते चैतन्यं** बीजं वा मानसं प्राप्य तिष्ठतीति दूषणमेवेति चेत् तत्राहात्मभूतमिति । देवक्यामात्मरूपेणैव प्रविष्टो न तु बीजे चैतन्ये वा प्रविश्य तत्र प्रविष्टः । यथा ज्ञानेन स्वात्मानं बिभर्त्ययमहमात्माधार इति तथैव भगवन्तमात्मभूतं धृतवतीत्यर्थः । अनेन **शुद्धमेव स्वरूपं वसुदेवाद्** देवक्यामागतमित्युक्तम् । **चैतन्यबीजमन्त्रपक्षा** अल्पज्ञानां प्रतीत्यर्थमुक्ताः । वृद्धिराकाशस्येव । **क्रमेण** मायोद्घाटनात् । **तदा** मायाया भगवतश्चोभयोरविकृता बुद्धिरुपपन्ना भवति । तदपि न स्वप्रयत्नाद् धारणलक्षणाद् भगवन्तमानीय धृतवती किन्तु यथा स्वत एवागतमुद्यन्तमानन्दकरं चन्द्रं **काष्ठा** पूर्वा दिग् बिभर्ति । धारणं च **मनस्त** एव । अविकृतमनसेतिज्ञाप- यितुं तसिल्प्रत्ययः । समाधाने धारणे च **मन एव** हेतुः ॥ १८ ॥

यथा **वसुदेवो** भगवदावेशे स्फुरद्रूपो जातो न तथा देवकी जातेत्याह **सा देवकीति** । पुरुषस्य हि तेजः **स्वतन्त्रमिति** विवेकादिसहभावाच्चिन्तया नाभिभूयते । स्त्रियास्तु परतन्त्रं विवेकादिरहितमिति चिन्ताभिर्भवान् न शोभते । यद्यपि **सा** देवकी देवतारूपा **सर्वजगतां निवासभूतस्य** भगवतो **निवासभूताधिकरणभूता** । न हि स्वस्मिन् विद्यमानेभ्यो लोमभ्यः स्वस्य भयं भवति । तथा भवति सर्वमस्तीति न सर्वस्माद् भगवतो भयम् । स्वस्य तु सुतरामेव जगतो भगवतश्च भगवन्निमित्तं च न भयम् । एता- दृश्यपि **सती नितरां न रेजे** । भगवच्चिन्तया स्वस्य सर्वेषां च शोकहेतुर्जातेति । बहिरन्तःकरणेपि चिन्तादिना मालिन्यात् । हेत्व- न्तरमप्याह **भोजेन्द्रगेहे** कंसगृहे **रुद्धा** निगडैर्गृहीता । बहिरागत्य सर्वसुखदायिनी न जाता । यथा **कुण्डे** ज्वलन्नप्यग्निर्भस्मना **रुद्धोन्तर्ज्वाल** एव भवत्येवमियमपि चिन्तादिना व्यापृता सम्यङ् न प्रकाशयुक्ता जाता । स्वधर्मैरेवास्फुरणे दृष्टान्तः । अन्यनिरोधेना- स्फुरणे दृष्टान्तान्तरमाह **सरस्वती ज्ञानखले यथा सतीति** । सती सन्मार्गप्रवर्तिनी **सरस्वती** भागवतादिरूपा **ज्ञानखले ज्ञानवञ्च- केस्तः** स्वस्यैव तोषं जनयति न बहिःप्रकाशेन सर्वेषां तथा **कंसेन रुद्धा** गृह एव प्रकाशमाना जाता न बहिः । **असती** तु स्वतोपि न प्रकाशते । यस्तु स्वयं जानाति सद्विद्यां परोपकारजननीमधिकारिणेपि परस्मै न प्रयच्छति स **ज्ञानखलः** । तेन स्वान्तरङ्गेष्वपि **स्वस्मिन्** भगवदाविर्भावस्य सङ्गोपनं सूच्यते ॥ १९ ॥

येन सर्वेषां सुखदा न जाता सा तस्यापि न सुखदा जातेत्याह **तां वीक्ष्येति** । **प्रभयोपलक्षितां तां वीक्ष्य कंसः प्राह** । **प्रभयैव** ज्ञापिकयाजितोन्तरा यस्याः । भगवानस्या मध्ये वर्तत इति दृष्ट्वा **प्रभयव भवनं विरोचयन्तीम्** । **अजितत्वमपि** दर्शने ज्ञातम् । अधृष्यत्वावगमात् । परमानन्दे हृदि प्रविष्टे प्राणी सर्वदुःखनिवृत्तो भवतीतिनिश्चयात् । अस्याः प्रसन्नवदनत्वमपि दृष्ट्वा भगवानस्तीति निश्चितवानित्याह **शुचिस्मितामिति** । **शुचि** विशुद्धं बाह्यविकाराजनकमन्तरानन्दोद्भूतं स्मितं यस्याः । भगवत्कान्ति- र्बहिर्निःसृता तामन्तर्बहिर्गृहं च प्रकाशितवतीत्यतो भगवानस्तीति निश्चित्य तस्य प्रयोजनान्तराभावं प्रकरणेन ज्ञात्वा वदति **मे प्राणहरो हरिरेव** एवास्या उदरे प्रकाशते । **ध्रुवं** निश्चितम् । यत इयं पुरेव न **रूपेण** सन्तोषादिना च । नन्वत्र भगवांश्चेत् सर्वैः कथं न दृश्यते तत्राह **गुहां श्रित** इति । उदरे विद्यमानत्वं तस्य न घटते । तस्याजीवत्वात् । तस्मादिदमुदरं गुहैव । 'गुहां प्रविष्टा- वात्मानाविति'न्यायात् । अतो **हरिरेव** । हरित्वादेव **मे प्राणहरः** ॥ २० ॥

(१) श्री प्रभुचरणविरचिता श्रीटिप्पणी

दधार सर्वात्मकमित्यस्य विवृतौ—**वृद्धिराकाशस्येत्यारभ्य भवतीत्यन्तम्** । यथायथा भित्त्याद्यावरणापसारणं तथा तथाकाशप्राकट्यं यथा तथा यावन्मायारूपं येन प्रकारेणापसार्यते तावत्तावत् तेन प्रकारेण भगवत्स्वरूपं **प्रकटं** भवतीतिक्रमेणैव गर्भलक्षणाविर्भावस्तेनेतरगर्भेभ्यो भगवद्गर्भसम्बन्धिन्यपि **बुद्धिर्देवक्या** अविलक्षणोपपन्ना भवति । **एवमेव** यावतांशेनेतो मायापसारणं तावतांशेन यशोदागर्भे मायाप्रादुर्भाव इति यशोदाया अप्यविकृता बुद्धिस्तथेत्यर्थः । अन्यथा त्वलौकिकत्वेन पूर्वं तल्लक्षणाभावे पश्चात्प्राकट्ये चोभयोर्यशोदादेवक्योर्बुद्धिर्विकृता भवेत् । तथा सति लीला न सम्पद्येतेति तथैव ज्ञेयमितिभावः । साकारव्यापक- लक्षणस्तोकाकारमात्रवरणापसारणेपसारितस्यापि तस्य तथाकारत्वं लोकन्यायेनापि सिद्धम् । अत्रावरणस्य व्यापकत्वेनाविशेषाद् यशोदागर्भदेशेपि तत्प्राकट्यात् नानुपपन्नं किञ्चित् ॥ १८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

स बिभ्रदिति। अत्र **पुरुषपद**तात्पर्यमाहुः **स्वकान्तीति**। स्वनिष्ठा या भगवत्कान्तिस्तत्सामर्थ्याद्धेतोर्वसुदेवस्य स्वतोपि भगवत्कान्तेरधिकानुभावो निरूपित इत्यर्थः। **प्रतीत्यर्थमेवेति**। अयं प्रातीतिको दृष्टान्तो न तु प्रियव्रतवद् रजन्या दिनत्वकरणमित्येवकारः ॥ १७ ॥ **तत** इत्यत्र—वसुदेवकर्तृकानयनं गौणवाक्यार्थस्तत्र तादृशप्रकारहेतुमाभास आहुः **षट्पुत्रेति**। तथा च हेतुबोधनार्थमेव गौणवाक्यार्थ आभास उक्त ज्ञेयम्। **नन्वेवमिति**। **आगमनं** वैकुण्ठादवतरणम्। **आवेशो** वसुदेवमनसि प्रवेशो देवक्यां स्थितिस्ततो निर्गमनं चेतेष्वित्यर्थः। **वेधदीक्षेति**। विध्युक्तमन्त्रोपदेशे गुरुः स्वस्मिन् देवतामावाह्य शिष्ये स्थापयति तेन प्रकारेणेत्यर्थः। एतेन समुपसर्गस्यार्थ उक्तः **समाहितपदस्यार्थान्तरमाहुर्वस्तुतस्त्विति**। तथा च **समाहितं** समाधिप्रकारेण समानीतमित्यर्थः। **अत एवेति**। सामर्थ्यादेव दधार न तु लौकिकसम्बन्धरीत्येत्येवकारः। वसुदेवे स प्रकारः **समाहितपदेन** निराकृतः। देवक्यां स प्रकारो **देवीपदेन** निराकृतः। पदद्वयस्यैवमर्थकथने प्रमाणमर्थापत्तिराभासे **षट्पुत्रत्वनेनोक्ता**। **चैतन्यमिति**। जीवमित्यर्थः। अत्र रेतोरूपबीजासम्भवान् **मानस**मित्युक्तं सनकादिवदित्यर्थः। **तत्र प्रविष्ट** इति। देवकीजीवे प्रविश्य तस्या उदरे प्रविष्ट इत्यर्थः। **शुद्धमेवे**त्येवकारव्यावर्त्यं विवृण्वन्ति **चैतन्येति**। देवकीकर्तृकधारणकथनेन चैतन्यपक्ष उक्तः **बीजमन्त्र**पक्षयोर्वसुदेवस्यैव प्राधान्यं न देवकीप्रयत्नापेक्षेतिभावः। **समाहितपदस्य** द्वितीयव्याख्याने **बीज**पक्षः प्रथमव्याख्याने **मन्त्र**पक्ष इति ज्ञेयम्। तथा च **सङ्क्रातस्यात्मभूतमेव** दधार न त्वात्मनि **प्रविष्टमित्यर्थः**। तादृशस्य धारणं तु **यथाज्ञानेने**त्यनेन विवृतमेव ॥ १८ ॥ **सा देवकीत्यत्र—विवेकाविरहितमिति**। तदसमानाधिकरणमित्यर्थः ॥ १९ ॥ **तां वीक्ष्ये**त्यत्राभासे—**सा तस्यापीति**। सरस्वती तु रोधकस्य तोषं जनयतीति दृष्टान्तव्याख्याने विवृतम्। सा देवकी रोधकस्य **कंसस्यापि न सुखदा जाते**त्यर्थः ॥ २० ॥

बुभुत्सुबोधिका

आत्मनीति मनसि। स्वतोपीति विशुद्धसत्त्वस्य ज्ञानत्वादितिभावः। प्रतीत्यर्थमेवेति रविदृष्टान्तः प्रातीतिको न तु प्रियव्रतवद् रजन्याः दिनत्वकरणमित्येवकारः। प्रतीत्यर्थापेक्षयोत्कृष्टार्थमाहुः अथ वेति। द्वादशेति 'द्वादशादित्या' इति श्रुतेर्द्वादशत्वम्। बिम्बान्युदयास्तमयकालिकानि। एवेति न तु प्रविष्टो ध्येयः। 'ध्येयः सदा सवितृमण्डलमध्यवर्ती'तिवाक्योक्तः। यदेति कालत्वेनोपस्थिते बिम्बे यदा यस्मिन् काले। तेन नात्र येष्वित्यत्र यस्मिन्नित्यध्याहारः। प्रकाशत इति 'यच्च् चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामक'मिति वाक्यात्। भयं निवृत्तमिति 'भीरपि यद् बिभेती'ति वाक्यात्। आश्चर्यं प्रपञ्चयन्ति स्म सर्वेष्विति ॥ १७ ॥

ततो जगन्मङ्गलमित्यत्र आर्थिकमाहुः षट्पुत्रेति। 'आर्थिकं तु प्रवक्ष्यामी'ति प्रथमस्कन्धे प्रतिज्ञायाः। निगडनिगृहीता एवेति निगडनिगृहीतौ एवेत्यत्रैव 'चोयवायाव' इति सूत्रेणानिकृते 'लोपः शाकल्यस्ये'तिसूत्रेण वकारलोपः। अत इति निगडगृहीताभ्यां गर्भासम्भवात्। प्रकारान्तरेण वेधदीक्षाप्रकारेणेत्यर्थः। अत्र धारणानुकूलव्यापारवती देवी अत्र धातूपात्तव्यापारो गौणः 'शूरसुतेने'त्यत्र व्यापारनियतं करणत्वमिति करणनिविष्टव्यापारो मुख्यः। यद्व्यापारानन्तरं फलनिष्पत्तिस्तत्त्वं करणमिति। मुख्यकरणनिष्ठो व्यापार इत्याशयेन वसुदेवकर्तृकं देवक्यामानमुक्तम्। एतादृशे मुख्ये व्यापारे करणत्वमिति 'शूरसुतेने'तिकरणे तृतीया। ननु तथाप्याहेत्यनेन तु धातुक्रियान्वयः न तु करणक्रियान्वय इति चेन्न। करणक्रियान्वयाभावस्य दुरुपपादत्वात्। अतो गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति वसुदेव 'आनीतया'नित्युक्तम्। मुख्यत्वेपि धातूपात्तव्यापारविशेष्यको बोधः। एकदेशविकृतस्यानन्यत्वादन्यथा 'जराया जरसन्यतरस्या'मितिसूत्रेण निर्जरसाविति न स्यात्। निर्जरशब्दस्य जराशब्दत्वाभावात्। यद्वा, करणव्यापारो विवक्षितः। काष्ठानि पचन्तीतिवत् सुबोधिन्याम्। न चैवमन्यदूषणार्थमाचार्यप्रवृत्तिरिति शङ्क्यम्। 'स्वादु स्वादु पदे पदे' इति प्रथमस्कन्धात्। उचितमिति 'हेयत्वावचनाच्चे'तिव्याससूत्रात्। सर्वलोकेति वेदे वसुदेवे स्थितौ वसुदेवमात्ररक्षा। नारायणकवचवत्। सर्वलोकरक्षा तु ब्रह्मविद्यायां सर्वदेवताप्रचुरायां देवक्यां स्थापने। सर्वलोकपदेन दैवीसम्पद्वतां ग्रहणम्। जगतामिति जगच्च जगच्च जगच्च जगन्ति तेषामाधिदैविकादीनाम्। नन्वेवमिति आगमनं वैकुण्ठादवतरणम्। आवेशो वसुदेवमनसि। प्रवेशो देवक्यां ततो निर्गमनं च। तेष्वित्यर्थः। अन्यथा भाव इति वैकुण्ठस्थत्वाभावः। षष्ठ्यर्थ इति षष्ठीतत्पुरुषे। अच्युतस्यांशमच्युतांशमित्येवम्। तदर्थमिति अच्युतस्वार्थमित्यर्थः। सम्यक् अच्युतं यथा भवति तथा। वेधदीक्षेति विध्युक्तमन्त्रोपदेशे गुरुः स्वस्मिन् देवतामावाह्य शिष्ये स्थापयति तेन प्रकारेणेत्यर्थः। एतेन समुपसर्गस्यार्थ उक्तः। सम्यक् वेधदीक्षाप्रकारेणाहितं स्थापितम्। 'समाहित' पदं समाधौ स्थापिते विषये यौगिकम्। तम् आहितम्। क्त कर्मणि दधातेर्हितादौ हिलीति हितमिति जातम्। तथा च समाधिविषयमिति 'समाहित'मित्यस्यार्थः तमर्थान्तरमाहुः वस्तुतस्त्विति। वेदत्वात् प्रत्याहारस्थले भावनामाहुः भावयित्वेति। ज्ञानकाण्डत्वेनानुभवस्य जातत्वात् संस्कारेण स्मरणात्मकं ज्ञानमुक्तं भावयित्वेति। मनस्त इति सार्वविभक्तिकस्तसिलिति मनसेत्युक्तम्। एवकारः 'स मानसीन आत्मा जनाना'मितिश्रुत्या 'युञ्जानः प्रथमं मनस्तत्त्वाय सविता धिय' इति चतुर्थाष्टकाद् वेदवेदान्तसारे श्रीभागवते उपायान्तरयोगव्यवच्छेदकः। तत्र देवक्यां साक्षात्तेजःस्वरूपलक्षणान्तर्गतज्ञानं स्थापितवान्। 'आत्मभूत'मि'त्यच्युतांश'विशेषणात्। स्त्रीणां चिदंशप्राधान्यात्। उपलक्षणं सदानन्दयोः। 'वसुदेवगृहे साक्षाद्भगवान् पुरुषः पर' इति। अजुष्टग्राम्यविषयत्वेन भक्तिप्रतिबन्धाद् विपश्चित्त्वविशिष्टः पुरुषोत्तमस्तु नन्दगृह एव। नन्दस्य सर्वात्मभाववत्त्वाज् जडमायांशोद्घाटनाय कृपापरीतत्वात्,

किं मया हतया मन्द जातः खलु तवान्तकृत् यत्र क्वचित् पूर्वशत्रु'रित्यत्र पुरुषोत्तमाविर्भावो 'जात' इत्यनेनोक्तः। यतो माया व्यापिका। आत्मभूतातिरिक्तं तेजस्तु कुक्षौ। 'कुक्षिगतः परः पुमा'निति वाक्यात्। भगवन्मार्गीयत्वाद् वा तेजः कुक्षिगतम्। अविषयत्वाद् वेदानां नाहं वेदै'रितिवाक्यात्, अतः कुक्षिगतः। अत एवेति सामर्थ्यादेव दधार। न तु लौकिकसम्बन्धीत्येत्येवकारः। चैतन्यमिति जीवम्। 'यस्यात्मा शरीर'मित्यन्तर्यामिब्राह्मणाच्चैतन्ये प्रवेशः सम्भवतीति बीजं वेति द्वितीया कोटिः। अत्र रेतोरूपबीजासम्भवान् 'मानस'मिति बीजविशेषणमुक्तम्। सनकादिवदित्यर्थः। तिष्ठतीति तेजः। दूषणमिति बृहत्त्वाद् बृंहणत्वाच्चेति ब्रह्मेतिलक्षणो दूषणम्। बीज इत्यादि बीजे मानसे सनकादिवत् चैतन्ये जीवे छान्दोग्योक्तवत्। तत्र प्रविष्ट इति देवकीजीवे प्रविश्य तस्या उदरे प्रविष्ट इत्यर्थः। आत्मधारणे ज्ञानी दृष्टान्तत्वेन ध्वनितः तं दृष्टान्तमाहुः यथा ज्ञानेनेति। ज्ञानमत्रा 'यमहमात्माधार' इत्याकारकम्। देहजीवविशेष्यकमात्माधारत्वप्रकारकम्। विषयाविनाभूतं ज्ञानं तेनेत्यर्थः। 'अयमहमस्मी'ति बृहदारण्यके। अनेनेति सर्वात्मकमात्मभूतमिति पदद्वयसमभिव्याहारेण। शुद्धमेवेति 'अहं सुतो वामभवम् प्रश्निगर्भ इति श्रुत' इति भगवद्वाक्योक्ताहङ्कारात्मकम्। पुरुषोत्तमरूपं वा। प्रश्निगर्भस्तु समाधाने मन एव हेतुरिति मनसः। शुद्धमेवेत्येवकारव्यावर्त्यमाहुः चैतन्यबीजेति। देवकीकर्तृकधारणकथनेन चैतन्यपक्ष उक्तः। मानसमन्त्रपक्षयोर्वसुदेवस्यैव प्राधान्यं न देवकीप्रयत्नापेक्षेति भावः। समाहितपदस्य द्वितीयव्याख्याने मानसपक्षः। प्रथमव्याख्याने मन्त्रपक्ष इति ज्ञेयम्। तथा च सञ्जातभूतस्यात्मभूतमेव दधार न त्वात्मनि प्रविष्टमित्यर्थः। तादृशस्य धारणं तु 'यथा ज्ञानेने'त्यनेन विवृतमेव। वृद्धिराकाशस्येवेति अत्र टिप्पण्याम् भित्त्यादीति भित्तिघटमृत्पिण्डनौकामहापटादिरूपाकाशावरणस्यापसारणं भित्तेरन्तर्देशस्यापसारणं घटमृत्पिण्डस्यापि तथा नौकामहापटस्यापि। अत्र यः प्रकारः खातचक्रचीवरवायुरूपाः। तैः प्रकारैरपसारणं बोध्यम्। यावदिति कार्त्स्न्यपरिमाणम्। येनेति ज्ञानभेदेन। प्रकृते प्रभुरेव ज्ञानधर्मप्रधानः षट्सु धर्मेषु। ज्ञानत्वेनावरणभङ्गत्वेन कार्यकारणभावात्। गर्भलक्षणेति गर्भः लक्षणं स्वरूपं यस्य भगवत्स्वरूपस्य मायास्वरूपस्य च तस्याविर्भावः। षड्भावविकारा न सन्तीत्याहुः तेनेतरेति। वृद्धिरूपविकारस्य निषेधेन। अविलक्षणेति न विलक्षणाऽलौकिकसामग्रीविलक्षणा अविकृतोपपन्नेत्यर्थः। यशोदेति योगमायाया यशोदोदरे उद्भूतायाः अन्यत्र यशोदोदरे स्थापनं स्वधर्म इति तथा। तथेत्यर्थ इति यथा देवक्यास्तथा यशोदाया इत्यर्थः। विकृतेति वृद्धिरूपविकारविषया। किन्त्वलौकिकसामग्री निविष्टवृद्धिविषया। लीलेति ज्ञात्वा परपुरुषे निरोधलीला। तथैवेति अविकृतबुद्धिरित्येवमेव ज्ञेयमित्यर्थः। तत्प्राकट्य इति स्थापनेन योगमायाप्राकट्ये। सुबोधिन्यां तसिलिति अव्ययम्। जननं मनस इति मन उक्तमिति सुबोधिन्यामाहुः समाधान इति। आधानं गर्भः। हेतुरिति 'मनोमात्रमिदं ज्ञात्वे'ति वाक्यात्। 'स मानसीन आत्मा जनाना'मितिश्रुतेश्च। 'मनस्त' इति कथनाच्चन्द्रोपि। 'चन्द्रमा मनसो जात' इति श्रुतेः। चन्द्रवंशीयः। 'सर्वात्मकमात्मभूत'मित्यनेना 'यमहमात्माधार' इत्यत्रा 'यमह'मित्यस्मच्छब्दार्थस्याक्षरात्मकत्वे जाते आत्मा पुरुषोत्तमो 'हं सुतो वा'मित्यत्राहङ्कारादेशेन तत्सहचरितगीतासप्तमाध्यायोक्तभूम्यादीनामाश्रयस्य पुरुषोत्तमयोगाध्याये 'यो मामेवमसम्मूढो जानाति पुरुषोत्तमं स सर्वविद् भजति मां सर्वभावेन भारते'त्यत्र सर्वभावत्वात्। गीताविस्तारे श्रीभागवते सर्वभावः सर्वात्मभावः। मध्यमपदलोपी समासः। 'सर्वात्मभावोधिकृत' इति वाक्याद् विस्तारः कृतः। पुरुषोत्तमाविर्भावे सर्वात्मभावस्य तात्पर्यविषयस्य वेदब्रह्मविद्ययोर्वसुदेवयोरावश्यकत्वात् ॥ १८ ॥

सा देवकीत्यत्र स्वतन्त्रमिति द्वादशबिम्बगतं पौरुषम्। अन्यत्रापि पौरुषम्। 'सूर्य आत्मा जगतस्तस्थुषश्चे'तिश्रुतेः। परतन्त्रमिति पुरुषतन्त्रम्। विवेकादिरहितमिति आदिना साहसः। विवेकादयो मनोधर्माः तद्राहित्यं तदभावरूपं मनसि, तेजसि तु तद्राहित्यं सहभावात्, सामानाधिकरण्यात्। तेजोत्र मनःस्थम्। ननु नितरामितिपदं निरर्थकम्। जगन्निवासो वराहो न रेजे शेषोपि परन्तु सत्तामात्रजगन्निवासनिवासभूता कुतो न रेज इत्यत्र नितरामिति 'नितरां रेजे ने'त्यत्र भगवच्चिन्ता हेतुत्वेनोक्ता वेदे वसुदेवे ब्रह्मविद्यायां देवक्यां भयाभावात्। तथापि भोजेन्द्रगेहे रुद्धेति भयं कुतो नेत्यत्र किञ्चिदाहुः न हीत्यादि मालिन्यादित्यन्तम्। लोमभ्य इति कृष्णकेशस्य भूभारहरणकर्तृत्वाद् भयहेतुत्वम्। न तु कृष्णकेशसत्तायाः न तु तत्सजातीयकेशानाम्। तदुक्तं न हीत्यादिना। स्वस्येति देवक्याः। भगवन्निमित्तमिति भगवान् निमित्तं कारणं यस्मिन् भये। ब्रह्मविद्यात्वात्। तथापि भक्तिमार्गीयसामग्र्या ज्ञानमार्गीयसामग्र्या बलीयस्त्वेन भगवन्निमित्तं भयं सम्भावितम्। भगवच्चिन्तयेति चिति स्मृत्याम्। चु० प० से० ब्रह्मविद्यात्वादेव। भगवद्धेतोः समुद्वेगाद् या चिन्ता तया। पूर्वं भगवत्कारणकं भयं नास्त्यस्या इत्युक्तं ब्रह्मविद्यात्वात्। अधुना तु समुद्वेगः समुद्भवमुक्तं तदपि ब्रह्मविद्यात्वादेव, तेन ब्रह्मविद्यायां देवक्यां ज्ञानसामग्र्याः भक्तिस्नेहसामग्र्या बलवतीत्वमुक्तम्। ज्ञानसामग्र्या भक्तिसामग्र्या बाधो ब्रह्मविद्यायामिति। चिन्तादिनेति आदिना भक्तिमार्गीयं भयम्। हेत्वन्तरमिति 'नितरां न रेज' इत्यत्रैव हेत्वन्तरम्। भागवतादीति आदिना वेदवेदान्तादिरूपा। असतीतिपदच्छेदे दोषमाहुः असतीत्विति। कुतो ज्ञानखल इति तत्पदवैयर्थ्यं दोषः। असतीतिपदच्छेदे। सूच्यत इति तेन दत्तात्रेयादिगुरुवद्गुरुत्वात् तथा ॥ १९ ॥

तां वीक्ष्येत्यत्र तस्यापीति कंसस्यापि। 'वीक्ष्ये'त्यत्र विशेषस्तं विवरितुं प्रभारूपं विशेषं द्रव्यचाक्षुषं प्रत्यालोकसंयोगस्य कारणत्वात् प्रभैव विशेषः प्रभया विरोचयन्तीत्युक्तेस्तं विशब्दार्थं विशेषमाहुः प्रभयोपलक्षितामिति। ज्ञापिकयेति हेतुभूतया। देवकी अजितान्तरा प्रभावत्त्वात् ज्ञानिवदित्यनुमानम्। दृष्ट्वेति 'ता'मित्युक्तायाश्चाक्षुषं ज्ञानम्। मध्येऽजितज्ञानमनुमितिरूपम्। भवनं वीति

अन्तर्बहिः पुरुषोत्तमो व्याप्तः प्रभयेति तथा। दर्शनेऽज्ञातमिति देवकीदर्शने मध्येऽजितत्वं ज्ञातमनुमितम्। अधृष्यत्वेति अधृष्यत्वानुगमश्चाक्षुषः। अधृष्यत्वज्ञानेऽजितत्वमनुमितं दृढं भवति। निश्चितवानिति शब्दानन्तरं प्रत्यक्षानन्तरमनुमानसत्त्वात्। यद् यज्जनक तत् तद्गुणकं यद् यद्गुणकं तत् तदात्मकमिति व्याप्तेः। आकाशवाणीशब्दश्च। बहिर्निःसृतेति। तेजःप्रधानत्वात् भगवतः। अत एव सत्त्वे प्रवृद्धे सकलदेहप्रकाशो गीतोक्तः। प्रकरणेनेति जन्मप्रकरणेन। पुरे वनेति पुरा सादृश्यं नेति प्रथमान्तसादृश्येन नञर्थो भावान्वयः। रूपेण सन्तोषादिना च पूर्वसादृश्यं नेत्यर्थः। न्यायादिति वैयाससूत्रात्॥ २०॥

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

आविष्टे भगवति यादृशो जातस्तं वर्णयति स बिभ्रदिति—

अब भगवान् के प्रवेश के बाद जैसा वसुदेवजी देखने में आये वैसा वर्णन इस श्लोक में कहते हैं—

वसुदेवजी स्वतः स्वयं अपनी कान्ति से कान्तिमान् थे पुनः भगवान् के तेज के प्रवेश से श्रीवसुदेवजी में अधिक तेज का प्रवेश हुआ तब अतिशय प्रभाव देखने में आया। मान लिजिए आकाशस्थ सूर्य के द्वादश बिम्ब हैं उन्हीं में जब भगवान् आधिदैविक रवि प्रवेश करते हैं तब सब बिम्ब अधिक प्रकाशित होते हैं, वैसे ही वसुदेवजी भी भगवान् के प्रवेश से विशेष विराजित होने लगे। प्रतीत्यर्थम् पद का तात्पर्य यह है कि श्रीवसुदेवजी का तेज प्रियव्रत राजा के समान तेज नहीं हुआ जो रात्रि को भी दिन बना दे। इसलिये ही आचार्यचरण ने 'प्रतीत्यर्थं' एव कहा है इसका आशय यह है कि यह सूर्य का दृष्टान्त प्रतीति के लिये ही दिया गया है। भगवत् प्रवेश से अब वसुदेवजी दुरासद हो गये। और कंसादि का भय भी निवृत्त हो गया। अब उनके पास जाने की कोई हिम्मत नहीं करता था फल यह हुआ कि सब भूतों की तरफ से अथवा राक्षसों से जो क्लेश भय दुःख होने थे वे सब दूर चले गये। कोई परीक्षा के लिये बल से भी आ नहीं सकता था। जैसा तेज उस समय वसुदेवजी में था वैसा किसी में भी नहीं था। **हेत्याश्चर्ये**—आचार्यचरण भागवतजी में अक्षरार्थ भी बताते हैं कि 'ह' अव्यय का यह तात्पर्य है कि सामान्यतया भगवान् का तेज सर्वत्र है क्योंकि भगवान् सर्वव्यापक है किन्तु वसुदेवजी जैसा तेज अन्यत्र नहीं हैं वैसा दिखाने के लिये मूल में 'ह' शब्द देकर आश्चर्य प्रकट किया है॥ १७॥

षद्पुत्रवधात् पूर्वमेव सङ्कर्षणगर्भस्ततः प्रभृति निगडगृहीत एव। अतः प्रकारान्तरेण स्वस्मिन् विद्यमान भगवन्तं देवक्यामानीतवानित्याह तत इति।

अब इस श्लोक में श्रीदेवकीजी के छः पुत्रों के नाश के पूर्व ही सङ्कर्षणजी गर्भ में पधारे थे। उसी समय से वसुदेवजी और देवकीजी कारागृह में ही थे। अतः वसुदेवजी ने अपने में विद्यमान भगवान् श्रीकृष्णजी को अन्य प्रकार से देवकीजी में स्थापित किया उसका वर्णन करते हैं।

यद्यपि स्वस्मिन्नेव स्थापनमुचितम्—आचार्य कहते हैं कि श्रीवसुदेवजी को अपने में आविष्ट हुआ भगवत्तेज अपने में ही स्थापित करना चाहिये था, लेकिन वसुदेवजी ने सर्वलोक की रक्षा के लिये देवकीजी में स्थापित किया। कारण कि वह भगवत्तेज लोगों का कल्याणकारी रूप है। वह तेज पहले वसुदेवजी में प्रविष्ट हुआ अनन्तर देवकी जी में आकर स्थापित हुआ। **नन्वेवमागमनावेशप्रवेशनिर्गमनेषु**—अब कहते हैं कि इस प्रकार वैकुण्ठ से यहाँ आने तथा वसुदेवजी के मन से देवकीजी में जाने आदि से भगवत् स्वरूप में अन्यथाभाव न्यूनता वा वृद्धि आदि विकार नहीं हुए इसको बताने के लिये 'अच्युतांश' विशेषण दिया है। इसका तात्पर्य यह है कि आने जाने आदि करने से भगवान् के किसी भी अंश में च्युति नहीं होती है। अर्थात् उसमें कुछ भी करने से विकृति नहीं होती है, वह सदैव अच्युत, अखण्डित, अबाधित रहते हैं।

वैधदीक्षाप्रकारेण—श्रीवसुदेव देवकीजी तो शृंखलाबद्ध थे फिर कैसे आधान हुआ इसी को कहते हैं कि वैधदीक्षा के प्रकार से देवकीजी ने सम्यक् प्रकार से उस तेज को धारण किया। यह आधान लौकिक स्त्री पुरुषों के संसार के समान न था लेकिन तात्पर्य यह है कि श्रीवसुदेवजी ने समाधि में देवकीजी की भावना कर मन से ही उन देवकीजी में साक्षात् तेज स्थापित किया। इसी बात को बताने के लिये श्लोक में वसुदेव नाम न देकर शूरसेन पुत्र कह कर विवेक दिखाया है और श्रीदेवकीजी को भी 'देवी' इसलिये कहा है कि स्वयं देवतामयी होने से अन्तः प्रवेश कर, समाधि में भी उस तेज को ग्रहण करने के लिये सामर्थ्यवती है। क्योंकि देव लोगों में इस प्रकार का सामर्थ्य सहजसिद्ध ही है। अतः समाधि के समय में तेज को धारण कर लिया।

नन्वेवं परधृतत्वे ब्रह्मत्वं भज्येत—आचार्यचरण कहते हैं कि इस प्रकार दूसरों के धारण करने से ब्रह्मपने में कमी हुई होगी? इस शङ्का को अवसर नहीं है कारण कि श्लोक में जो 'सर्वात्मक' विशेषण दिया है इसका तात्पर्य है कि वह तेज सर्व की आत्मा है अतः सब उसको धारण करते हैं इसलिये धारण करने में कोई दोष नहीं, और धारण करने से ब्रह्मत्व में

किसी प्रकार की हानि नहीं होती है। मान लीजिए कि ब्रह्मत्व में कमी नहीं हुई फिर भी प्रकृत विषय में चैतन्य, बीज वा मन में प्राप्त होकर रहना दूषण ही है, यदि इस प्रकार का दूषण कोई बतायें तब उसको मिटाने के लिए श्लोक में दूसरा विशेषण 'आत्मभूत' दिया है। जिसका भाव है कि वह तेज देवकीजी में आत्मरूप से ही सीधा प्रविष्ट हुआ है न कि बीज व चैतन्य में प्रविष्ट होकर पीछे देवकीजी में उसने प्रवेश किया है। जैसे ज्ञानी ज्ञान से अपनी आत्मा को अपने में धारण करता है वैसे ही देवकीजी ने भी आत्म-रूप भगवान् को धारण किया है। इससे शुद्ध स्वरूप ही वसुदेवजी से देवकीजी में पधारे हैं। चैतन्य, बीज वा मन्त्र द्वारा पधारना अल्पज्ञों को समझाने के लिये कहा गया है। **वृद्धिराकाशस्येव**—आचार्यचरण इस पद से स्पष्ट करते हैं कि उसकी वृद्धि आकाश की भाँति हुई है कि जैसे घटाकाश, घट टूटने से मठाकाश हो जाता है, और मठ टूटने से महाकाश हो जाता है वैसे ही जैसे गुरु प्रथम मन्त्र देवता को स्थापन कर, अनन्तर 'मन्त्रोपदेश' समयमें उस देवता को शिष्य में स्थापित करते हैं। ज्यों-ज्यों माया का अपसरण होता है वैसे ही तेज भी स्वयं बढ़ता हुआ दिखता है। वैसा ज्ञान होने से भगवान् और उसकी माया दोनों को अविकृत समझा जाता है।

तदपि स्वप्रयत्नाद् धारणलक्षणाद् भगवन्तमानीय धृतवती—अब आचार्यचरण कहते हैं कि इतना होने पर भी देवकीजी ने अपने प्रयत्न से भगवान् को धारण नहीं किया है किन्तु जैसे पूर्व दिशा में चन्द्रमा स्वतः आकार प्रकट होता है उसको वह दिशा धारण कर लेती है वैसे ही देवकीजी ने पधारे हुए अपनी आत्मारूप भगवान् को धारण किया है। लेकिन यह धारण अविकृत मन से किया है इसलिये श्लोक में 'मनसः' पञ्चमी विभक्ति के जगह 'मनस्तः' प्रत्ययान्त अव्यय पद दिया और अव्यय की तरह मन का अविकृतत्व बताया है। लाने और धारण करने में मन ही हेतु है ॥ १८ ॥

यथा वसुदेवो भगवदावेशे स्फुरद्रूपो जातो न तथा देवकी जातेत्याह सा देवकीति—

भगवान् के प्रवेश से जिस प्रकार वसुदेवजी प्रफुल्लित प्रसन्नरूप वाले देखने में आये वैसी देवकीजी नहीं हुई। अब इस श्लोक में इसका वर्णन करते हैं, पुरुष का तेज स्वतन्त्र है उसका कारण पुरुष में रूप से सहज विवेक आदि होने से चिन्ता कम होती है इसलिये पुरुष के तेज को स्वल्प चिन्ता दबा नहीं सकती है, किन्तु स्त्री का तेज परतन्त्र है कारण कि स्त्रियों में विवेकादि अपूर्ण हैं और उनमें चिन्ताएँ विशेष रहती हैं परिणाम में उनका तेज दब जाने से परतन्त्र है। इसी हेतु से देवकीजी वसुदेवजी के समान प्रमुदित चित्त वाली न हुई। यद्यपि वह देवकी देवता रूप है और सकल जगत् के निवासभूत भगवान् श्रीकृष्णजी का आधार निवासस्थान बनी है। अपने शरीर में उत्पन्न हुई रोमावली से अपने को भय नहीं होता है वैसे ही यह सर्व भगवान् में है अतः भगवान् को भी किसी से भय नहीं है।

श्रीदेवकीजी को तो भगवन्निमित्त जगत् से अथवा भगवान् से निपट भय नहीं है। वैसी देवकी होकर भी पूर्णतया शोभायमान न हुई। भगवान् की चिन्ता से अपने लिये और सबों के लिये चिन्ता का कारण बनी। देवकी में बाहर और भीतर की दोनों चिन्ताओं से मालिन्य रहा। सुशोभित अथवा अप्रसन्न होने का दूसरा कारण बताते हैं कि, देवकीजी कंस के गृह में बन्धन में होने से बाहर आकर सबको आनन्द नहीं दे सकती थी। जिस प्रकार कुण्ड के भीतर अग्नि जलती भी रहती है तो भी ऊपर राख आ जाने से प्रकाश नहीं दे सकती है। वैसे ही यह भीतर प्रकाशवती होते हुए भी चिन्ता से व्यग्र होने से सम्यक् प्रकार से बाहर प्रकाशयुक्त नहीं हुई। यह दृष्टान्त अपने धर्मों से ही प्रकाशमान न होने में दिया हुआ है। अब अन्य धर्मों के कारण अप्रकाश होने में दूसरा दृष्टान्त देते हैं। जिस प्रकार सन्मार्ग का प्रकाश करने वाली भागवतादि शास्त्र रूप सरस्वती ज्ञानखल, पुरुष के अन्तःकरण को ही आनन्द देती है बाहर प्रकाश कर दूसरों को आनन्द नहीं देती है वैसे ही देवकीजी भी कंस के गृह में बन्धन में होने से घर के भीतर ही प्रकाश करने लगी, बाहर नहीं। इससे अपने में प्रकट हुए भगवान् के आविर्भाव को अपने अन्तरङ्गों से भी छिपाने की सूचना प्राप्त होती है ॥ १९ ॥

येन सर्वेषां सुखदा न जाता सा तस्यापि न सुखदा जातेत्याह—श्रीदेवकीजी जैसे दूसरों को सुख देने वाली न हुई वैसे ही कंस को भी सुखदा न हो सकी। अब इसका वर्णन करते हैं। प्रभा से युक्त देवकीजी का दर्शन कर कंस मन में सोचने लगा कि देवकी की प्रभा से ज्ञात होता है कि इसके अन्दर अजित भगवान् विराजमान है इसीलिये अपनी कान्ति से घर को प्रकाशमान कर रही है। और भीतर विराजमान वह अजित होने से अधृष्य भी है, अपराजित है यह भी निश्चित है। और परमानन्द प्रभु के हृदय में प्रविष्ट हो जाने से प्राणी मात्र के सर्व दुःखों की निवृत्ति हो जाती है, यह भी निश्चय ही है। राजा कंस ने भी श्री देवकीजी का प्रसन्न मुख कमल देखकर निश्चय किया कि इसमें भगवान् हैं। **शुचिस्मितां** श्री देवकीजी के मुख के शुचि और स्मित दो विशेषण से यह बताया कि शुचि और स्मित श्री देवकी के भीतर आनन्द उत्पन्न हुआ है। पुनः भगवान् का प्रकाश जो बाहर निकला उसने बाहर भीतर घर को प्रकाशित कर दिया था अतः भगवान् है ऐसा निश्चय कर लिया। और भगवान् के आने का अन्य कोई कारण नहीं है ऐसा प्रकरण से जानकर कंस ने कहा कि निश्चय ही मेरे प्राणों के हरने वाले हरि इस देवकी के उदर में प्रविष्ट हैं। यदि ऐसा न होता तो यह देवकी आगे इस प्रकार रूप से अथवा सन्तोषादि से प्रकाशित नहीं

थी। गुहां श्रितो यत्र यदि यहां भगवान् है तो सबको दर्शन होना चाहिए तब इस शङ्का को मिटाने के लिये कहते हैं कि गुहां श्रितः गुफा में गोविन्द विराजमान है। और भगवान् का उदर में होना नहीं बन सकता है कारण कि वह जीव नहीं है इस कारण से यह उदर गुहा ही है। उदर को गुहा कहना इसलिये संगत है कि श्रुति में **गुहां प्रविष्टावात्मानौ** कहा है अतः मेरे प्राणों के हरण करने वाले होने से यह हरि ही है ऐसा कंस ने निश्चय किया ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स चानकदुन्दुभिः पौरुषं धाम भगवत्सम्बन्धि तेजो बिभ्रत् बिभ्राणोऽतो यथा रविस्तथा राजमानः, अतएव भूतानां कंसादीनां दुरासदः आसादयितुं समीपमपि गन्तुमशक्यः, अतएवातिदुर्धर्षः अभिभवं कर्तुमशक्यश्च सम्बभूव। हेत्याश्चर्यं सूचयति ॥१७॥ ततश्च शूरसुतेन वसुदेवेन समाहितं सम्यक् मनसैव वैधदीक्षया अर्पितं जगतां यस्मात्तं भगवन्तं देवी अदित्यवतारत्वाद्देवमाता देवकी मनस्तो मनसा धारणया दधारेति सम्बन्धः। वैधदीक्षा तु 'यथा कूर्मः स्वतनयान् ध्यानमात्रेण पोषयेत्। वैधदीक्षोपदेशस्तु तादृशः कथितः प्रियः' इति कुलार्णवोक्ता ज्ञेया। नच तया एवं धारणेऽपि तस्य तत्सम्बन्धात् स्वरूपतो गुणतो वा च्युतिरित्याह—अच्युतांशमिति। सर्वात्मकत्वेऽपि न तस्य च्युत्यादिविकारः। किं पुनस्तद्धारणे तद्विकारो नास्तीति वक्तव्यमित्याशयेनाह—सर्वात्मकमिति। अत एवात्मभूतमिति। तत्र दृष्टान्तमाह—काष्ठेति। काष्ठा प्राची दिगानन्दकरं चन्द्रं यथा धत्ते, नहि दिक्सम्बन्धेन चन्द्रस्य कश्चिद्विकारस्तथा देवकीसम्बन्धेन भगवतोऽपि न कश्चिद्विकार इत्यर्थः ॥ १८ ॥ दुष्टस्य परशोभाप्रतिबन्धकत्वमनुपकारित्वं च स्वभाव एवेति सूचयन्नाह—सेति। सर्वजगन्निवासस्य भगवतो निवासतामाप्ता सर्वजनानां परमानन्दजननयोग्याऽपि देवकी नितरां सर्वजनाह्लादकतयाऽतिशयेन न रेजे। तत्र हेतुमाह—भोजेन्द्रस्य कंसस्य गेहे रुद्धेति। अन्यैरदृश्यमाना। तत्र दृष्टान्तमाह—अग्निशिखेवेति। अग्निशिखा प्रदीपादिज्वालारूपा घटादिषु निरुद्धा यथा सर्वजनाह्लादकरी न भवति तथेत्यर्थः। दृष्टान्तान्तरमाह—सरस्वतीति। ज्ञानखले 'परस्मै तज्ज्ञानं माऽभूत्' इति ज्ञानवञ्चके पुरुषे रुद्धा सती सर्वोपकारिणी सरस्वती वेदादिविद्या यथा सर्वजनाह्लादिका न भवति तथेत्यर्थः ॥ १९ ॥ अजितो भगवान् अन्तरा कुक्षिमध्ये यस्यास्ताम्, अतएव प्रभया भवनं विरोचयन्तीम्, शुचि सुखपूर्वकं स्मितं यस्यास्ताम्, इत्यनेनानन्दमयस्य भगवतः प्रवेशादस्याः सर्वदुःखनिवृत्तिस्तदा सूचिता। तामेवंभूतां कंसो वीक्ष्य ध्रुवं निश्चितमेतत्। एष मे मम प्राणहरः शत्रुर्हरिरेवास्य गुहां कुक्षिं श्रितः प्रविष्टः, यत् यस्मात् पुरा इयमीदृशी प्रभावती नाभूदित्याह। स्वमनसि तर्कितवानित्यर्थः। अत्र उदरपदं विहाय गुहापदोपादानेन भगवति हरिपदोपादानेन च तस्मिन् सिंहत्वमारोप्य दशसहस्रगजबलवतोऽपि स्वस्य प्राणहरत्वं निश्चितम् ॥ २० ॥

अन्वितार्थप्रकाशिका

स इति। पौरुषं भगवत्संबन्धि धाम श्रीमूर्तिरूपं तेजः बिभ्रत् अत एव रविर्यथा भ्राजमानः स वसुदेवः ह स्फुटं भूतानां दुरासदः प्राणिभिरासन्नीभवितुमशक्यः अतिदुर्द्धर्षः कंसाद्यैरप्यभिभवितुमशक्यश्च बभूव ॥ १७ ॥ तत इति। ततः देवी शुद्धसत्त्वरूपतया द्योतमाना देवकी जगन्मङ्गलं जगतो मूर्तिमन्मङ्गलम् अच्युतांशम् अच्युताश्च्युतिरहिताः अंशा ऐश्वर्यादयो यस्य तम्। यद्वा। अच्युतस्यांश इवांशः भक्तानुग्रहाय परिच्छिन्नवपुः शूरसुतेन वसुदेवेन सम्यग्भूतमेवाहितम् अर्पितं सर्वात्मकं सर्वस्यात्मानम् अत एवात्मभूतं स्वस्मिन्नादावेव सन्तं भगवन्तं काष्ठा पूर्वा दिक् आनन्दकरं चन्द्रं यथा धरति तथा मनस्तो मनसैव दधार। यथा दीक्षाकाले गुरुः शिष्याय ध्यानमुपदिशति शिष्यश्च ध्यानोक्तां मूर्तिं हृदि निवेशयति तथा वसुदेवो देवकीदृष्टौ स्वदृष्टिं निदधौ। दृष्टिद्वारा च हरिः संक्रामन् देवकीगर्भे आविर्बभूव। एतेन रेतोरूपेणाधानं निरस्तम् ॥ १८ ॥ सा देवकीति। सर्वजगतां निवासस्य श्रीहरेर्निवासभूता सत्यपि भोजेन्द्रस्य कंसस्य गेहे रुद्धा सा देवकी घटादिषु रुद्धा अग्नेः दीपस्य शिखा इव नगरं न प्रकाशयति। सती शोभमाना सरस्वती ज्ञानखले ज्ञानवञ्चके रुद्धा यथाऽन्येषामनुपकारिणी न राजते तद्वत् नितरां सर्वजनाह्लादकतया न रेजे किंतु स्वयमेवानन्दमन्वभवत्। यथाऽग्निशिखा प्रबला गृहं दहति सरस्वती च परवञ्चनापापेन ज्ञानखलं च नाशयति तथेयं कंसं धक्ष्यतीति उपमाद्वयेन व्यङ्ग्यम् ॥ १९ ॥ तां वीक्ष्येति ॥ अजितो भगवान् आन्तरः कुक्षिगतो यस्यास्तां प्रभया भवनं विरोचयन्तीं शुचि स्मितं यस्यास्तां देवकीं वीक्ष्य कंस आह स्म। यत् यतः इयं पुरा ईदृशी न आसीत् अतः एष तेजोतिशयेन प्रत्यक्षायमाणा मे मम गजस्येव प्राणहरः हरिर्भगवान् सिंहश्च गुहां गर्भं दरीं च ध्रुवं निश्चितं श्रितः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः, शूरसुतेन वसुदेवेन, समाहितं निहितं, जगतां मङ्गलं यस्मात्तं, जगतां मङ्गलहेतुभूतमित्यर्थः। अच्युतः क्षरणभावमप्राप्तः अंशः संकल्परूपविज्ञानं यस्य तं, सर्वात्मकं सर्वशरीरकं, आत्मभूतमात्मनामप्यात्मभूतं, भगवन्तमिति शेषः। देवी द्योतमानशरीरा देवकी, काष्ठा पूर्वदिक्, घनस्थमभ्रपिहितं, आनन्दकरं, यथा चन्द्रमिवेत्यर्थः। दधार धृतवती। यथा पूर्वा दिगभ्रपिहितं चन्द्रं बिभर्त्ति, तथा देवकी मानुष्यनाट्यभाक्त्वसंकल्पपिहितं भगवन्तं वसुदेवतः लब्धं स्वजठरे दधारेत्यर्थः। पूर्वदिशः स्वकुक्षौ चन्द्रस्य यथाऽसंबन्धस्तथा देवकीकुक्षौ भगवतो गर्भत्वभाक्त्वेऽप्यसंबन्ध इति भावः। नभस्त इति पाठे, काष्ठा

पूर्वा दिक्, आनन्दकरं चन्द्रं, नभस्त आकाशे, यथा तथा, देवी सर्वानन्दकरं भगवन्तं, स्वहृदयाकाशे, दधारेत्यन्वयः। मनस्त इति पाठे, मनसैव दधार। धारणया धृतवतीत्यर्थः। केचित्त्वत्र शूरसुतेन समाहितं सम्यग्भूतमेवाहितं वैधदीक्षयाऽर्पितमित्याहुः। तत्र दीक्षा त्रिविधा, स्पर्शदीक्षा, दृग्दीक्षा, वैधदीक्षा चेति। तदुक्तमागमे। 'यथा पक्षी स्वपक्षाभ्यां शिशून् संवर्द्धयेच्छनैः। स्पर्शदीक्षोपदेशस्तु तादृशः परिकीर्त्तितः। स्वापत्यानि यथा मत्स्यो वीक्षणेनैव पोषयेत्। दृग्दीक्षयोपदेशस्तु तादृशः परिकीर्त्तितः। यथा कूर्मी स्वतनयान् ध्यानमात्रेण पोषयेत्। वैधदीक्षोपदेशस्तु तादृशः परिकीर्तितः' इति। तेनात्र ध्यानमात्रेण गर्भसमर्पणमिति तेषामभिप्रायः। अन्ये त्वत्र चन्द्रभगवतोरुपमानोपमेयत्वं विधाय सर्वाणि द्वितीयान्तानि योजयन्ति, तत्र क्लिष्टत्वादलं तत्पल्लवनेन ॥ १७ ॥ सेति ॥ सा गर्भधृतपरमपुरुषा, देवकी, सर्वेषां जगतां निवासः श्रीहरिस्तस्यापि निवासभूता, सर्वजगदाधारभूतस्य भगवतोऽप्याधारभूता सत्यपीत्यर्थः। यतः, भोजेन्द्रगेहे कंससंबन्धिनि कारागृहे, रुद्धा अस्ति, अतः नितरामत्यन्तं, न रेजे। सर्वजनाह्लादकतयातीव शोभमाना नाभूदित्यर्थः। कथमिव। रुद्धा कुड्यादावबरुद्धा सती, अग्निशिखा प्रदीपशिखा इव, ज्ञानखले ज्ञानमालम्ब्य जनवञ्चके, रुद्धाऽवस्थिता सती, सरस्वती उपनिषद्विद्या, यथा तथा, न रेजे ॥ १८ ॥ तां वीक्ष्येति ॥ प्रभया स्वशरीरकान्त्या, भवनं कारागृहमपि, विरोचयन्तीं विशेषेण दीपयन्तीं, अजितो भगवानन्तरा कुक्षिमध्ये यस्यास्तां, यद्वा। प्रभया जितान्यन्तराणि दिगन्तराणि यया तामित्येकं पदं, तदा प्रभयेति तृतीयाया अलुक्। शुचि शुद्धं स्मितं यस्यास्तां, तां देवकीं, वीक्ष्याऽऽलोक्य, कंसः आह। एष इत्यादिना इति घोरतमादित्यतः प्राक्तनेन। उक्तिमेव प्रदर्शयति। मे मम, प्राणहरः प्राणान् जिहीर्षुः, एषः हरिः, ध्रुवं, गुहां देवकीजठरं, श्रितः संश्रितः, यत् यतः, इयं देवकी, पुरा पूर्वगर्भधारणकाले, ईदृश्येवंविधप्रभान्विता, न नैवासीदित्यर्थः ॥ १९ ॥ किमिति ॥ तस्मिन् हरौ वा तस्मिन्नेतस्मिन् संकटे, अद्येदानीं, मे मया, आशु शीघ्रं, किं करणीयं, ननु सन्त्येव सामादय उपायाः, सत्यं सन्त्येवेति विचार्य स्वयमेवाह। यद्यतः, अर्थतन्त्रो देवकार्यप्रधानः हरिः, विक्रमं मद्वधविधानात्मकं स्वपराक्रमं, न विहन्ति। अस्याः सकाशादुत्पन्नो भूत्वा मद्वधात्मकं स्वपराक्रमं करिष्यत्येवेत्यर्थः। एवं सर्वथाऽस्माद्बिभेषि चेदद्यैतस्या वधं कुर्वित्यत्राह। स्त्रियाः अङ्गनायाः, तत्रापि स्वसुर्भगिन्याः, तत्रापि, गुरुमत्याः गर्भिण्याः, अयं मत्कृतः, वधो विघातः, यशः कीर्त्तिं, श्रियं लक्ष्मीं, अनुकूलं स्वस्यानुकूलतोपेतं, आयुर्जीवितकालं च, हन्ति विनाशयति। स्त्रीवधस्य यश आदिविनाशहेतुत्वादिति भावः। अनुकालमिति पाठान्तरे प्रतिक्षणमित्यर्थः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततो जगदिति: १०.२.१८.

सुमनोराज्यं हित्वा निविष्टधीर्यः सदा मनोराज्ये। महतोऽपि तस्य गर्भे वसतिर्नियतेति दर्शितं कृतितः ॥ २८ ॥

परोपकृतितत्परो भवति यः सदात्मस्थितिर्मनोविहृतिरप्यलं भवति तस्य बन्धाय न।
क्वचिज्जठरसंस्थितिर्विधिवशादवाप्याप्यसौ न दुःखजनिका भवेदिति विभुस्तथादर्शयत् ॥ २९ ॥

कृष्णप्रिया

भगवान् पूर्ण पुरुष के तेज स्वरूप को धारण करने वाले श्री वसुदेवजी सूर्य के समान तेजोमय शोभायमान हो गये। जिससे उनके पास दुष्ट राक्षस आदि कोई भी न आ सकता था। इसलिये श्री वसुदेव जी राक्षसादि दुष्टभूतों से अजेय हो गये ॥ १७ ॥ उसके बाद श्री शूरसेनजी तनय श्री वसुदेवजी ने मन से श्रेष्ठ प्रकार से स्थापित किये हुए जगत के मङ्गलकारी-सबके आत्मरूप और सर्व को आनन्द देने वाले अच्युतांश पूर्ण स्वरूप को जैसे पूर्णकलापूर्ण चन्द्रमा को पूर्व दिशा धारण करती है उसी प्रकार देवतामय देवी श्री देवकी जी ने मन से धारण किये ॥ १८ ॥ यद्यपि वह श्री देवकी जी सर्व जगत् के निवास रूप भगवान् का निवास रूप हुई फिर भी भोजेन्द्र कंस के घर में कैद होने से, जैसे किसी सच्छिद्र घड़े में बन्द की हुई घृत दीपक की लौ ज्योति, और विद्या को गुप्त रखने वाले ज्ञानखल में रही हुई सती सरस्वती प्रकाशित नहीं होती है वैसे सती देवकी जी भी पूर्णतया आनन्द देने वाली और प्रसन्न मनवाली नहीं हुई अथवा वहा से अधिक रूप में प्रकाशमान न हुई ॥ १९ ॥ भगवान् के अन्तःकरण में विराजमान होने से उत्पन्न हुई दिव्य कान्ति के कारण सर्व को प्रकाशित करती हुई और विशुद्ध स्मित वाली श्री देवकी जी को देखकर राजा कंस कहने लगा कि निश्चय रूप से मेरे प्राणों को हरने वाले हरि ने इसकी गुहा-कोख में आश्रय किया ही है क्योंकि यह देवकी पूर्व में ऐसी प्रकाशमय नहीं थी ॥ २० ॥

किमद्य तस्मिन् करणीयमाशु[1] मे [2]यदर्थतन्त्रो न विहन्ति विक्रमम् ।
स्त्रियाः[3] स्वसुर्गुरुमत्या वधोऽयं यशः श्रियं हन्त्यनुकालमायुः[4] ॥ २१ ॥
[5]स एष जीवन् खलु सम्परेतो वर्तेत योऽत्यन्तनृशंसितेन ।
देहे मृते तं मनुजाः[6] शपन्ति गन्ता तमोऽन्धं तनुमानिनो ध्रुवम् ॥ २२ ॥
इति घोरतमाद् भावात् संनिवृत्तः[7] स्वयं प्रभुः । आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानुबन्धकृत्[8] ॥ २३ ॥
आसीनः संविशंस्तिष्ठन् भुञ्जानः पर्यटन्[9] पिबन् । चिन्तयानो हृषीकेशमपश्यत् तन्मयं जगत् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—अद्य तस्मिन् मे आशु किम् करणीयम् यद् अर्थतंत्रः विक्रमम् न विहन्ति स्त्रियाः गुरुमत्याः स्वसुः अयम् वधः यशः श्रियम् आयुः अनुकालम् (तत् क्षणमेव) हन्ति ॥ २१ ॥ यः अत्यन्तनृशंसितेन वर्तेत स एषः जीवन् खलु सम्परेतः देहे मृते तं मनुजाः शपन्ति तनुमानिनः ध्रुवं अन्धं तमः गन्ता ॥ २२ ॥ हरेः वैरानुबन्धकृत् स्वयम् प्रभुः इति घोरतमाद् भावात् सन्निवृत्तः तज्जन्म प्रतीक्षन् आस्ते ॥ २३ ॥ आसीनः संविशन् तिष्ठन् भुंजानः पर्यटन् पिबन् हृषीकेशम् चिन्तयानः जगत् तन्मयम् अपश्यत् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु संति सामाद्य उपायाः नेति स्वयमेवाह । अयमर्थतंत्रो देवकार्यप्रधानो विक्रमं न विहंति । मद्वधे पराक्रमं करिष्यत्येवेत्यर्थः । यद्वा तर्हीदानीमेवेयं हन्यतामिति । किंचेत्याह । अर्थतंत्रोऽपि पुमान्स्वं विक्रमं न विहंति न नाशयति स्त्रीवधे तन्नाशः स्यादिति भावः । तदेवाह । स्त्रिया इति । गुरुमत्या गुर्विण्याः ॥ २१ ॥ किं च । स एव जीवन्नपि मृतः स्यात् । नृशंसितेन क्रौर्येण यो वर्तेत तं जीवंतमेव मनुजाः शपंति दुर्वाक्यैर्धिक्कुर्वंति स च देहे मृते तनुमानिनः पापिनो नरस्य नरकं गच्छति । अथवा शापप्रकारमेवाह । तनुमानिनोऽस्य देहे मृतेऽयं ध्रुवमंधं तमो गमिष्यतीति ॥ २२–२३ ॥ संविशन् शयानः ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अधुना किं कार्यमिति चेत्तत्राह–नन्विति । आदिशब्दात् दानभेददंडा ज्ञेयाः । स्वयमेव कंसः । अयं गर्भगो हरिः । अथ चोपायेषु दंडस्य कार्यसिद्धिकरत्वेऽप्यनर्थहेतुत्वमाह–यद्वेति । इयं देवकी । इदानीमेवाधुनैव । न नाशयति रक्षत्येवेत्यर्थः । तन्नाशो विक्रमनाशः । स्यादिति भाव इत्यस्य तात्पर्यमाह । स्वार्थपरोऽपि लोको विक्रमं न विहंति संप्रत्यस्या वधेन मम वीरत्वव्यंजको विक्रमो नक्ष्यत्येवास्यां जीवंत्यां ततो जातप्रवृद्धतरुणीभूतेनास्या बालेन सह युद्धे जये पराजये वा समविक्रमः स्थास्यत्येव सगर्भस्त्रीवधे तु को विक्रम इति भावः । न केवलं विक्रमहानिरेव धर्मादिहानिरपीत्याह—स्त्रिया इति । प्रथमं स्त्रीवध एव महत्पापं तत्रापि स्वसा सापि सगर्भेति सर्वथा धर्मादिहानिरेवेति । गुर्विण्याः "आपन्नसत्त्वा स्याद्गुर्विण्यंतर्वत्नी च गर्भिणी" इत्यमरः ॥ २१ ॥ अत्र लोके क्रूरकर्मणामपि श्र्यायुरादयो यद्यपि संति तथापि ते सतां न श्लाघ्या इत्याह–किञ्चेति । धिक्कुर्वंति निंदन्ति धिक्कारमाह—स चेति । स च धिक्कार ईदृश इत्याह–देह इति । शपंतीत्यस्य धिक्कुर्वंतीत्यर्थकल्पनातः प्रसिद्धार्थ एव वर इत्याह—अथवेति । तनुमानिनः प्राणिहिंसया स्वतनुं मानयतो लालयतोऽस्य जनस्य । अयं तनुमानी ध्रुवमतिशयेन यदंधं तमो नरकस्तद्गंता गमिष्यतीति मनुजाः शपंति (निन्दन्ति) इत्यन्वयः ॥२२॥ इति पूर्वोक्तविचारेण । घोरभावः सामान्यस्त्रीहिंसा घोरतरभावो भगिनीहिंसा घोरतमस्तु सगर्भायास्तस्या हिंसा इति भावात्कर्मणः "भावो लीला क्रिया चेष्टा भावः सत्ता भवोऽपि च । भावो भक्तिः समाख्याता पदार्थो भाव उच्यते" इति हलायुधः । स्वयं प्रभुः स्वयमेव स्वीकृतराज्यत्वात् । 'उग्रसेनं च पितरम्' इत्याद्युक्तेः । ज्ञानित्वाभिमानित्वाद्वा स्वयं प्रभुः । तज्जन्माष्टमगर्भजन्म । प्रतीक्षन् कदोत्पत्स्यत इति मृशन् । वैरं विरोधस्तदनुबंधस्तदाधिक्यं तं करोतीति तथा निरंतरवैरकृदित्यर्थः ॥ २३ ॥ वैरानुबंधजनितभयेन कंसस्य चित्तावेशमाह–आसीन आसने स्थितः तिष्ठन्कुत्रचित्स्थित उत्थितो वा । पर्यटन् इतस्ततो विचरन् । हृषीकेशं सर्वेन्द्रियप्रवर्त्तकं सर्वेन्द्रियग्राह्यविषये तमेव ददर्शेत्यर्थः । तन्मयत्वदर्शनं तु प्रेम्णा सदा परमानंदजनकं भयेन तत्कालं परमदुःखजनकमिति भक्तवैरिणोर्भेदः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किमद्येति अत्र टीकायां यद्वेत्यस्य पूर्वत्र किन्तु स्त्रिया इति यदि विक्रमं न विहन्ति तथापि स्त्रिया इतीति ज्ञेयम् अद्यास्मिन्नेवाऽहनि तत्राप्याशु अधुनैव एवं भयेनैव यत्स्वदौरात्म्यं स्तब्धं तत्तु विवेकेनैव स्वयं करोमीति स्वस्मिन्नभिमानसुखं कल्पयति"

---

१. घटनीय विज. । २. यथार्थतन्त्रो—वीर. विज. । ३. स्त्रियः—विज. । ४. त्यनुकूल—वीर. विज. । ५. विहन्ति कान्ति सुदुरासदां परैस्त्यजन्ति सन्तो यशसा विहीनम्—इदमन्यत्राधिकं दृश्यते । ६. तमनु ह्यर्थकामो यशोऽमलं गीरभिमानिनो—विज. । ७. स निवृत्तः—इति पाठः । ८. बन्धवित्—विज. । ९. पर्यटन् महीम्—श्रीधरादयः; पर्यटन् पिबन्—वीर. विज. ।

स्त्रिया इति सार्द्धेन । अयं स्वदेहरक्षार्थकः क्षणिकोपि वा सर्वकालं यश आदि हन्ति स्त्रिया इत्यादेर्यथोत्तरमवध्यत्वे यश आदेश्च यथोत्तरं तदपेक्ष्यत्वे श्रेष्ठ्य यदर्थं वधस्तज्जीवनमपि हन्यादिति किन्तेनेति भावः ॥ २१ ॥ ननु, दिनानि कतिचित् यज्जीव्यते तदपि शुभं तत्राह—स इति एष जीवन् जीवदवस्थत्वेन दृश्यमानोपि मृत एव लोकबहिष्कृततासाम्यादिति भावः। खलु वितर्के नृशंसितं हिंसा मनुजाः सर्व एव मनुष्याः अन्यत्तैः तत्र तनुमानिनः पापिन इति देहात्मबुद्ध्यैव पापाभिनिवेशो भवतीति भावः। यद्वा, देहे मृते जीवत्यपि सति किम्वा देहे सति मृते मरणे च सतीत्यर्थः ॥ २२ ॥ इति एवं विचारेण भावात् अभिप्रायात् चेष्टिताद्वा स्वयमेव न त्वन्येषां मन्त्रणादिना सम्यक् निवृत्तः न तु गर्भपातनादौ च यत्नं चकारेत्यर्थः। यतः प्रभुरन्यनिरपेक्षः यद्वा, स्वयमात्मनैव न त्वन्यसंमत्या प्रभुः प्रभुंमन्य इत्यर्थः। वस्तुतस्तु तत्र तत्रान्तर्यामिवश एव स्यादिति भावः। हरेः वैराद्यशेषदोषहरत्वेन किम्वा सर्वमनोहरत्वेन तन्नामतया प्रसिद्धस्यापि यद्वैरं द्वेषस्तस्यानुबन्धोऽनुवर्त्तनं तं करोतीति तथाभूतः सन् यद्यपि भयात्कंस इत्युक्तं तथापि भयस्थाने वैरमपि भवतीति तथोच्यते तेन तस्य हरेर्जन्म प्रतीक्षमाण आस्ते बभूवेत्यर्थः। तत्प्रतीक्षायां च विशेषः श्रीहरिवंशे सचिवान्प्रति कंसोक्तौ "मासान्वै पुष्पमासादीन् गणयन्तु मम स्त्रियः। परिणामे तु गर्भस्य शेषं ज्ञास्यामहे वयम्" इति अतस्तत्रैव "यदर्थं सप्त ते गर्भाः कंसेन विनिपातिताः। तं तु गर्भं प्रयत्नेन ररक्षुस्तस्य मन्त्रिणः" इति ॥ २३ ॥ वैरानुबन्धमेवाह आसीन इति। चिन्तयानः अयमधुनैवाविर्भूय मां हनिष्यतीत्येवं भावयन्नित्यर्थः। हृषीकेशमिति सर्वेन्द्रियवृत्तौ परिस्फूरणेन हृषीकेशताभिव्यक्तेः यद्यपि तन्मयत्वदर्शनं योगिनामपि सुदुर्लभं प्रेमभक्तानामेव संपद्यते तथापि तेषु परमानन्दमयत्वेन अस्मिंस्तु परमदुःखमयत्वेनेति भेदः ॥ २४ ॥

श्रीश्रील-सनातनगोस्वामि-प्रभुपाद-कृता श्रीश्री बृहद्वैष्णवतोषणी

प्रथमोऽध्यायः

श्री श्रीकृष्णचैतन्यचन्द्राय नमः

(वैष्णवतोषिण्यां मांगलिकश्लोकाः प्रदत्ता अतोऽत्र नोट्टङ्किताः, सम्पादकः)

तथा च द्वितीये (भा० २।१०।६) 'निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः' इति; अस्यार्थः — शक्तिभिश्चिच्छक्तिमाया-शक्ति-आह्लादिनी-शक्तिभिः सहितस्य; यद्वा, श्र्यादिभिः शक्तिभिः तोऽश्चोनचत्वारिंशाध्यायान्ते (भा. १०।३९।५५); अस्यात्मनो हरेरनुशयनं निरन्तरशयनमिव, वशीकरणेनान्तर्बहिश्च स्थितिर्निरोध इति, तदर्थमेव दशमेऽत्र मधुरतरलीलाकथावतारणम् ।

१–२ (१) श्रीयुक्तो राजा श्रीराजेत्यदन्ताभाव आर्षः; यद्वा, राजा कथम्भूतः ? श्रीः साक्षात् श्रीरेवेत्यर्थः। एवमग्रेऽपि। सर्व्वकथैकमूलं श्रीकृष्णचरितं विस्तरेण श्रोतुं वक्तुः श्रीवादरायणेः प्रहर्षार्थं तदुक्तमभिनन्दन् प्रार्थयते कथित इति द्वाभ्याम्; तत्तदाख्यायिकयोक्तः, न तूद्देशमात्रेणेत्यर्थः। तत्रापि वंशानां विस्तारो जन्मारभ्य समाप्तिपर्य्यन्तं प्रत्येकं पुत्रपौत्रादि–प्रपञ्चः। भवतेति परमादरात्। उभयवंश्यानां सोमसूर्य्यवंशोद्भवानां दिग्विजयादिचरित्रञ्च कथितम्। परममद्भुतं विस्मयावहम्–श्रीपुरूरवः–ककुत्स्थादीनामूर्व्वशी-परिग्रहेन्द्रारोहणादिनात्यन्तालौकिकत्वात्। सोमादि-वंशकथनादेवायातस्यापि तद्वंश्यचरित्रकथनस्य पुनः पृथगुक्तिस्तद्विशेषापेक्षया। यद्यपि श्रीस्वायम्भुवमन्वादिवंश्य-तद्वंश्यचरितान्यपि तृतीयस्कन्धादौ कथितानि सन्ति, तथापि सोमसूर्य्ययोरित्युभयवंश्यानामिति च सर्वावतार-श्रेष्ठयोः श्रीयदुनाथ-रघुनाथयोस्तत्र तत्र सम्बन्धात्; किंवा निरन्तर-नवमस्कन्धोक्तानामेवानुसरणादिति।

(२) यदोर्वंशविस्तारस्तद्वंश्यानां चरितञ्च परमाद्भुतं नितरां सम्यक्तया कथितम्। तत्र हेतुः–धर्म्मशीलस्येति। धर्मोऽत्र श्रीभगवद्भक्तिलक्षणः, (भा. ११।१९।२१) 'धर्म्मो मद्भक्तिकृत् प्रोक्त' इति श्रीभगवदुक्तेः। श्रीयदोर्भक्तिनिष्ठत्वमेकादशस्कन्धे वक्ष्यते–पृथक्त्वेन तस्योक्तिस्तद्वंशे श्रीयदुदेवावतरणेन सर्व्वतः श्रेष्ठ्यात्। एवं विस्तरेण सविशेषं तत्तत्कथनं सूचितम्। मुनिषु 'सन्' उत्तमः श्रीभगवद्भक्तः, 'सत्तरः' श्रीकृष्णे रतः, 'सत्तमः' तत्पादाब्जयोः प्रेमविशेषवानित्येवं सम्बोधनेन कथिते कथ्ये च समर्थतोक्ता। अतएव परमाद्भुतं श्रीभगवतो वंश-वंश्यचरितं विस्तार्य्य कथय इत्याशयेनाह—तत्रेति। धर्म्मशीलत्वादेव तस्मिन् यदोर्वंशेऽवतीर्णस्य श्रीवैकुण्ठलोकात् स्वयमागतस्य; अंशेन श्रीबलदेवेन सह, अन्यथा (भा. १।३।२८) 'कृष्णस्तु भगवान् स्वयम्' इत्यनेन विरोधापत्तेः। एवमन्यत्रापीति तस्यापि वीर्य्याणि शंस्यानीति भावः। यद्वा, 'मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः' इत्याद्यनुसारतो भक्तवात्सल्येन तेन सह कृतानि परमाद्भुतानि कर्म्माणि सूचितानि; तत्र हेतुः—विष्णोः सर्व्वव्यापकस्य, तथापि तत्र कृपयावतीर्णस्येति; अतएव वीर्य्याणि परमाद्भुतचरितानि नोऽस्मान् प्रति शंस स्तुतिवत् सोत्कर्षं वर्णय; 'नः' इति बहुत्वं तच्छुश्रूषयात्मनो बहुमानात्, स्वसंगिनामपेक्षया वा; सा च कृपया विनयेन वा; यद्वा, नोऽस्माकं पाण्डवानां यो विष्णुस्तस्येत्यात्मनस्तस्मिन् भक्तिस्तद्वीर्य्यश्रवणे लालसा च सूचिता। (भा० ५।२४।६६) 'जातो गतः' इत्यादिना पूर्व्वं संक्षेपतः किञ्चित् कर्म्ममात्रमुक्तम्, न तु वीर्य्याणीति भावः।

३. ननु सर्व्वाण्यपि तस्य कर्म्माणि परमाद्भुतानीति चेत्तर्हि तानि सर्व्वाण्येव कथयेत्याह—अवतीर्य्येति। अनेन साक्षात् परमेश्वरत्वमुक्तम्, यतो भगवान् सर्व्वैश्वर्यपरिपूर्णः, किञ्च, भूतभावनः स्वेच्छया सर्वजीवस्रष्टा, किञ्च, विश्वात्मा सर्वान्तर्यामीति। विशेषणानामेषां यथोत्तरं परमेश्वरत्वे श्रेष्ठ्यम्; यद्वा, अवतरणप्रयोजनमुद्दिश्य तु परमकारुण्यादिगुणप्रकटनं सूचितम्; अतो भूतानि सर्व्वाण्येव भावयति पालयतीति तथा सः, अत एव विश्वस्यात्मा परमप्रिय इत्यर्थः। एतच्चतुर्दशाध्यायान्ते व्यक्तं भावि; यद्वा, चेतयिता निजभजने प्रवर्त्तक इत्यर्थ इति तत्तदर्थं कर्म्मणामानन्त्यं तदीयत्वेन भगवत्त्वादिकञ्चाभिप्रेतम्। अतो यानि यावन्ति कर्म्माणि, तानि सर्व्वाण्येव वद संकीर्त्तय; तत्र च विस्तरात् प्रयोजनादिनिर्द्देशेन पल्लविततया, न तु पूर्व्ववत् संक्षेपेणेत्यर्थः ॥

४. न च विस्तरेण श्रुते सति मे तत्र तृप्तिराशंक्येत्याशयेनाह—निवृत्ततेति। निवृत्ततर्षैर्मुक्तैरप्युप अधिकं सर्व्वोपरितनत्वेन वा गीयमानादिति परमफलत्वेन सदोपगानात् परमानन्दमयत्वम्। भवौषधादिति सर्व्वदुःखनिवर्त्तकत्वम्। एवं साध्यत्वं साधनत्वञ्च, अतः सदा सर्वसेव्यत्वमप्युक्तम्। अत एवोत्तमः श्लोको यशो यस्य तस्य श्रीभगवतो गुणानां नित्यसत्यस्वाभाविकानामौदार्य्यवात्सल्यादीनामनुवादः कथा तस्मात् को विरज्येत तृप्तो भवेद्विरतः स्यादिति वा। त्रयाणां विशेषणानामेषां यथाक्रमं न्यूनतोह्या। तथोक्तिस्तु मुक्तत्वमुमुक्षुत्वाभावेऽपि मम विषयितया श्रोत्रमनोऽभिरामत्वेनापि तत्र विरक्तिर्न युक्तेति श्रीपरीक्षितो विनयादिना। पुमांश्चेत् स्त्रीवदस्वतन्त्रः क्लीबवदशक्तश्च कथञ्चिद्विरज्येतापीत्यर्थः। यद्वा, पुंस एव सर्वत्र प्राधान्यात् पुमानित्युक्तम्; यद्वा, पुमान् जीवस्तेन चाधिकारापेक्षापि निरस्ता। पशुघ्नात् व्याधात्, तस्य हि विषयित्वसम्भवेऽपि सततक्लेशादिना लोकद्वयसुखासिद्ध्या विषयिताया अप्यभावात्। अन्यद्-भगवद्भक्तिविलासटीकायां कथामाहात्म्ये विस्तारितमेवास्ति ॥

५. तत्रापि विशेषतोऽस्मत् कुलैकगतेः श्रीकृष्णस्य कथा अवश्यं सदा विस्तरेण मया श्रोतव्येत्याशयेनाह—पितेति। समरे धर्म्मयुद्धेऽतरन्, किंवा युद्धमध्ये। अमरञ्जयैरिति महाशौर्यमुक्तम्। देवव्रत इति इच्छामृत्युत्वादिहेतु-महानियमनिष्ठया परमदुर्ज्जयत्वम्, स आद्यः सेनापतित्वादिना श्रेष्ठो येषामतिरथानां तैरिति तत्पालयत्वेन तेषामपि सुदुर्ज्जयत्वम्, अत एव दुरत्ययं दुस्तरमपि। अतिरथलक्षणं महाभारते—'एकादशसहस्राणि योधयेद्यस्तु धन्विनाम्। अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृतः ॥ अमितान् योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः ॥' कौरवाणां दुर्योधानादीनां सैन्यमेव सागर आनन्त्यादिना तम्, स्मेति प्रसिद्धौ, इवार्थे वा; वत्सपदमिव कृत्वेत्यनायासेनेत्यर्थः। तत्र हेतुः—यत्प्लवा इति प्लवो बहित्रम्; यथा वायुवेगेन स्वयमेव गच्छन्तं प्लवमाश्रिताः सुखं शीघ्रं महार्णवं तरन्ति वणिजस्तद्वदित्यर्थः ॥

६. विशेषतश्च मम जीवनप्रदः श्रीकृष्ण एवेत्याह—द्रौणीति। विशेषेण प्लुष्टं दग्धमपि ब्रह्मास्त्रस्यानन्यनिवार्य्यत्वात् दाहकतरत्वाच्च। इदमिति जन्मान्तरीणत्वं व्यावर्त्तितम्; यद्वा, प्रत्यक्षमित्यर्थ इति तत्र संशयो निरस्तः; यद्वा, इदं सद्धर्म्मानर्हत्वेन घृणास्पदं हेयं ममांगं स्वतो नश्वरं पाञ्चभौतिकं देहमपि जुगोपेति परमवात्सल्यमुक्तम्; कुर्व्वादीनां सन्तानबीजमिति तेषां कुलक्षयदोषनिरसनेन यशो धर्म्मश्च रक्षितोऽतस्तेषां हितार्थमेव जुगोप। पाण्डवानां कुरुत्वेऽपि पृथगुक्तिस्तेषां तत्र विशेषापेक्षया, यद्वा, भारते दुर्योधनादय एव कुरुतया प्रसिद्धास्ते एवात्र ज्ञेया इति तेषां स्वसन्तानाभाव उक्तः। तेन श्रीभगवतः परमकारुण्यमेवाभिप्रेतम्, दुष्टानां समूलनाशनात्तथा तेषामपि बीजरक्षया परलोकहिताचरणञ्च। प्रायश्चक्रादानस्य सार्व्वदिकत्वादात्तचक्र इत्युक्तम्। गोपनन्तु गदयैव (भा० १।१२।१०) 'अस्त्रतेजः स्वगदया नीहारमिव गोपतिः' इति प्रथमे प्रोक्तत्वात्; यद्वा, भक्तवात्सल्येन व्यग्रतया चक्रमपि गृहीतम्; 'च' कारान्मातुरंगञ्च जुगोपेत्यर्थः, गर्भरक्षया तद्देहस्यापि रक्षणात्। शरणं गताया इति रक्ष रक्षेति वाङ्मात्रेणेत्यर्थः; अतस्तत् कथायां विरक्त्या ममाकृतज्ञतापि प्रसज्येतेति श्लोकद्वयतात्पर्य्यम् ॥

७. अतस्तद्वीर्य्याण्यवश्यं कथ्यानीति पुनरौत्सुक्येन प्रार्थयमानः श्रीभगवन्माहात्म्यमाह—वीर्य्याणीति। देहभाजां जीवानाममृतं मरणाद्यशेषदुःखरहितं परममधुरं वा श्रीवैकुण्ठलोकं श्रीकृष्णपादाब्जप्रेम वा प्रयच्छतो ददतः, 'च' कारादन्यदप्यपेक्षितम्; वदस्व गुह्यान्यपि प्रकाशयेत्यर्थः; यद्वा, स्व ! हे मदेकबन्धो, मदेकधनेति वा, अतो मद्धितार्थमवश्यं वक्तुमर्हसीति भावः। परं श्रीस्वामिपादैर्व्याख्यातमेव। भावस्त्वयम्–कथाश्रवणादिनान्तर्द्दृष्टीनां सतामन्तर्यामिरूपेणामृतं तदभावेन च बहिर्द्दृष्टीनां कालरूपेण मृत्युं ददाति यतः, अतस्तद्वीर्य्याणि ब्रूहीति; अथवा, अन्तर्बहिश्च यानि पुरुषकालयोः रूपाणि तैः, तत्र श्रवणादिनान्तःस्थितैः सद्भिः पुरुषस्य श्रीभगवतो रूपैः श्रीविष्ण्वादिमूर्त्तिभिः परमानन्दम्, तदभावेन च कालस्य रूपैर्बहिःस्थितैर्यमादिभिर्विविध-दुःखम्; किंवा बहिरन्तश्चामृतं बहिरन्तश्च मृत्युमपि प्रयच्छत इत्यन्वयः। यद्वा, पुरुषरूपेणान्तर्यामिद्रष्ट्रेत्यर्थस्तद्वताम्, 'अ'-कार-प्रश्लेषेणामृत्युं मोक्षं संसार-निवृत्तिलक्षणं कालैः प्राधान्येन सहजश्यामलवर्णै रूपैश्च श्रीरघुनाथाद्यवतारैरमृतं प्रयच्छत इति यथाक्रममेव योजना, मायया इच्छाशक्त्या; तथा च तन्त्रे—'योगमाया च माया च तथेच्छाशक्तिरेव च। कमलाभूमिशक्त्याद्यैर्विद्वद्भिः, सैव गीयते ॥' इति; स्वेच्छया मनुष्यस्येव, स्वतो मनुष्यधर्म्मातीतत्वात्; यद्वा, माययाऽप्यमनुष्यस्य मनुष्यलोकातीतस्य साक्षाच्छ्रीगरुडारोहण-रुद्रजय-ब्रह्ममोहनादिनैश्वर्य्यप्रकटनात्; यद्वा, माया विचित्रलीला विविधा विचित्र-कैतवं वा, यथा रासक्रीडोद्यमेऽपि धर्म्मोपदेशादि, तद्युक्तस्य मनुष्यस्य द्विभुजत्वादिना मनुष्याकारस्य; यद्वा, माया दया, 'माया दम्भे कृपायाञ्च' इति विश्वः,—तया मनुष्यस्य मनुष्याकारं प्रकटयतः। एवं मृत्यमृतप्रदानेनैश्वर्य्यविशेषात्तथा मायामनुष्यतया माधुर्य्यविशेषाच्चैकस्यैवावतारित्वावतारत्वाभ्यां माहात्म्यविशेष उक्त एव ॥

८—तत्र विशेषं पृच्छति—रोहिण्या इति चतुर्भिः। संकर्षण इति श्रीदेवकीपुत्रेषु (भी० ७।२४।५४) 'संकर्षणमहीश्वरम्' इति संकर्षणाख्यया यः प्रोक्तः, स एव रोहिणीपुत्रो राम इति भेदो निरस्तः ॥

९ मुकुन्दो मुक्तिं दातेति कंसस्य मुक्तिं दातुं पुर्य्यामेव स्थातुं योग्यो न च व्रजे गन्तुमिति भावः ; श्लेषेण 'मु'[1] मुक्तिसुखं 'कु' कुत्सितं यस्मात्, स मुकुस्तं प्रेमानन्दं ददातीति व्रजमेव गन्तुमर्हति; तत्र च कं हेतुं त्याजार्थमुदभावयदित्यर्थः[2]। सात्वतां भक्तानां पतिः पालक इति स्वभक्तयादव-पालनार्थम्; यद्वा, सात्वतानां यादवानां पतिः स्वामीति तैः सहावश्यं वासोऽपेक्ष्य इति भावः ॥

१०–११। (१०) ननु कञ्चित् कालं मधुपुर्य्यां ततश्च द्वारकायामिति सुप्रसिद्धमेवेति चेतर्हि तत्र तत्र कृतं सर्वं कथयेत्याह—व्रज इति द्वाभ्याम्। मधुपुर्य्यां च वसन् इति तत्र[3] वाससमये ऽन्यत्र कृतमपि तत्र तत्रैव पर्य्यवसायितम्। को ब्रह्मा, ईशो रुद्रः, तौ वयते स्वमहिम्ना व्याप्नोतीति; किंवा अस्त्यर्थे वः, तौ सेवकोत्तमतया विद्येते यस्येति परमेश्वरतोक्ता। अतस्तत्र तत्र तस्य वासेन मधुपुरादसुतकर्म्माणि सम्भवन्त्येवेति भावः। अद्धा स्वयमेवेत्यर्थः ॥

११—देहमिति। मानुषं मनुष्याकारं परमसुन्दरं देहमाश्रित्य प्रकटीकृत्य, सच्चिदानन्दघनत्वेन तस्य नित्यत्वात् यदुपुर्य्यां श्रीद्वारकायां विभोर्व्यापकस्येति पाठान्तरे च; प्रभोः समर्थस्येति पत्नीनां बाहुल्यमभिप्रेतम् ॥

१२—अहो तत्तद्विशेषा मयानभिज्ञेनान्ये कति प्रष्टव्यास्त्वया स्वयमेव सर्व्वे कथ्यन्तामित्याह—एतदिति। पृष्टमन्यच्चापृष्टमपि श्रीद्वारकावासादि सम्बन्धि श्रीकृष्णस्य नराकृतिपरमेश्वरस्यात एव विचित्रं चेष्टितं सर्वं विस्तृतं यथा स्यात्तथा, मे मह्यं वक्तुमर्हसि। कुतः ? श्रद्दधानाय; हे सर्वज्ञेति श्रद्धवतेऽवश्यं वाच्यमेवेति त्वया ज्ञायत एवेति भावः ; (धर्मज्ञेति) पाठान्तरेऽपि तथैवार्थः। ननु, तत् सर्वमहं वक्तुं न योग्योऽस्मि ? तत्राह—मुने सदा तन्मननकर्त्तरिति ॥

१३— अन्यथाधुनैव मत्प्राणा निर्यास्यन्तीत्याह—नेति। एषानशनव्रतोत्था, सर्वानर्थमूलतया प्रसिद्धा वा ; यद्वा, दुःखप्रदत्वेन सर्वैरनुभूयमाना, यया हि मया मुनिगले मृतसर्पप्रक्षेपणापराधः कृतोऽतोऽतिदुःसहात्यन्तदुःखेनैव सह्या, किंवा सोढुमत्यन्तमशक्यापि; तत्र हेतुविशेषः—त्यक्तोदमिति; यद्वा, अन्यैरतिदुःसहमपि मां सदा विविधभोगेन मृदुतरांगमपि तत्र च त्यक्तोदमपि न बाधते न व्यथयति ; किंवा कथा श्रवणादौ कञ्चिद्विघ्नमपि कर्त्तुं न शक्नोतीत्यर्थः; नञः सर्वादौ निर्देशो निषेधस्यात्यन्तापेक्षया। तत्र हेतुः—हरेः सर्वदुःखहरस्य भगवतः कथैवामृतं संसारविस्मारणादिना परम–मादकत्वान्मधुरतरत्वाच्च। तत् पिबन्तं परमभक्त्या सेवमानमित्यर्थः ; वर्तमानप्रयोगेण पानेऽविच्छेद उक्तोऽतस्तद्विच्छेदोऽनुचित इति भावः ; यद्वा, पाने प्रवर्त्तमानमात्रमित्यर्थ इति देवभोग्यादमृताद्विशेष उक्तस्तस्मिन् पीते सत्येव क्षुद्बाधाद्युपरमात्। किञ्च, तत्र मुखमेवाम्भोजं सुन्दराकारत्वादिना; तस्माच्च्युतं सारांशतया क्षरितमिति प्रसिद्धामृतस्येव शैत्य-सौरभ्यादिना सर्वतापहारित्व–मनोहरत्वादिगुणविशेषो दर्शितः, श्री भागवतोत्तममुखेन श्री भागवतकथाया माधुरीविशेषोदयात् ॥

१४—तादृशा–तदुक्त्या परमप्रीतः सन् श्रीवादरायणिः प्रयुक्तं प्रवृत्त इत्याह—एवमिति ईदृशम्। भृगुनन्दन ! हे श्रीशौनकेति प्रहर्षोदयात्, यद्वा, भागवतोत्तमानामयमेव स्वभाव इति सम्बोधयति। अथ तत्प्रश्नानन्तरमेव, स परमानिर्वचनीयमाहात्म्यः परमभागवतोत्तमतया प्रसिद्धो वा; यतो वैयासकिः—वेदव्यसनाद्व्यासस्तस्य पुत्र इति सर्ववेद–तत्त्वज्ञतोक्ता। भगवान्—तल्लक्षणं श्रीविष्णुपुराणे (६।५।७८) 'प्रवृत्तिञ्च निवृत्तिञ्च भूतानामागतिं गतिम्। वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥' इति, किंवा श्रीभगवद्भागवतयोरभेदाभिप्रायेण। अतएव विष्णुना गर्भे प्रविष्टेन भगवता रातं[4] ब्रह्मास्त्रतो रक्षित्वा श्रीयुधिष्ठिरादिभ्यो दत्तम् ; किंवा आदत्तं स्वीकृतमिति तस्यापि परमभागवतत्वमुक्तमत एव प्रत्यच्चर्यं साधु साध्वित्येवम् ; किंवा वक्ष्यमाणप्रकारेण विविधश्लाघया सम्मान्य; यद्वा, श्रीगुरुरयं यथा तेन विविधोपचारैः पूजितस्तैरेव तं प्रतिपूज्य कृष्णस्य सर्वचित्ताकर्षस्य भगवतश्चरितमतः कलौ यत् कल्मषं सुदुस्तरं पापं तदपि, यद्वा, सर्वपापहेतोः कलेरपि किं पुनस्तत्कालीनजनस्य कल्मषं दोषम् ; यद्वा, किं तत्त्वं किं फलं किं वा साधनमित्यादिविषयकः कलिः कलह एव कल्मषं श्रीभगवन्माहात्म्यानिर्द्धारात्तद्घ्नतीति तथा तत् श्रीभगवच्चरितश्रवणादिनैव तन्माहात्म्यविज्ञानादशेषकलह[5]दोषनिवृत्तेः ; यद्वा, कलिश्चात एव कल्मषञ्च सर्वदुःखमूलं पापं संसारदुःखमेव वा हन्तीति सर्वदुःखहन्तृत्वमुक्तम्; यद्वा, कथम्भूतं विष्णुरातम् ? कलिकल्मषघ्नं कलिरूपकल्मषजयिनम्। सुखप्रदत्वं सुखमयत्वञ्च कृष्णेत्यनेनैव ध्वनितम्। ननु राजसभायां विविधवासनमुनिगणाग्रे परमगोप्यं तं कुतः प्रकाशितम् ? तत्राह—भागवतेति तैर्व्याख्यातमेव; यद्वा, श्रीभागवत एव श्रीभागवत-शास्त्रमेव वा प्रधानं श्रेष्ठं परमादरणीयं यस्य सः, अनन्यापेक्षत्वादिति भावः। श्रीशुक इति प्रेमभरोदयेन शुकवन्मधुरमधुरभाषणात्। तथा च ब्रह्मवैवर्त्ते व्यासं प्रति श्रीकृष्णवाक्यम्—'व्यास ! त्वदीयतनयः शुकवन्मनोज्ञं, ब्रूते वचो भवतु तच्छुक एव नाम्ना' इति। एवमग्रेऽप्यूह्यम् ॥

१५—अतस्त्वयात्माहं मुनयोऽपि विविध–दुर्वासनामलतः शोधिता इत्याह–वासुदेवेति। पुनरुक्तिस्तस्यैवोत्कर्षख्यापनेन तन्निष्ठार्थो; कथायाः प्रश्नोऽपि त्रीन् त्रिविधान्; हि निश्चितम्; पुरुषानिति तेषामेव प्राधान्यात्; तत्र वक्तारं पुनातीति प्रश्नेनैव वक्तुः

---

१. मुं (ग, घ,); २. हेतुमुदभावयत् (ख); ३. तत्तद्—(ख)। ४. तं (ग, घ, ङ) ; ५.—कलि–(ग) ;

कथायाः सम्यक् प्रवर्त्तनात्, श्रोतॄनिति च तेनैव कथा–प्रवृत्त्या श्रवणसिद्धेः; यद्वा, प्रश्ने भगवन्नामादि–सम्बन्धेनैव तन्मात्रेणापि सर्वेषां पावनात्; तत्र वक्तुः प्रष्टुश्चैकत्वं तस्य तस्य च तद्योग्यत्वात् अधिकारानपेक्षया सर्वेषामेव श्रीभगवत्[1] 'सम्बन्धमात्रेण पावने दृष्टान्तः – तस्य पादसलिलं गंगा श्रीशालग्रामादिचरणामृतं वा ॥

१७ – दृप्तेति दैत्यत्वलक्षणम्; शतायुतैरित्यसंख्यत्वे तात्पर्य्यम् । शरणं ययौ आश्रितवती ॥

१८—कथम् ? तदाह— गौरिति । गोरूपेति कृपाविशेषजननार्थम्; तत्रापि खिन्ना दुःखिता, अतएव करुणं यथा स्यात्तथा रुदन्ती रुदन्ती,अतएवाश्रुमुखी अश्रुव्याप्तानना; यद्वा,करुणं रुदन्ती रुदन्ती करुणस्वरेण क्रोशन्ती विलपन्ती वा । तथा च श्रीविष्णुपुराण-हरिवंशयोः—'खेदात् करुणभाषिणी' इति । यद्वा, गौः पृथिवी अश्रुमुखी भूत्वा; विशेषेण योन्यादिव्यवधानराहित्येन नाभिक-मलादाविर्भवतीति विभुस्तस्येति साक्षाच्छ्रीभगवत्पुत्रतोक्ता, अतस्तस्मै तं प्रति व्यसनं निजदुःखं सम्यगुक्तवती; स्वमिति पाठे स्वकीयम् । तद्विशेषः श्रीविष्णुपुराणे (५।१।२१–२७)—

'तत् साम्प्रतमिमे दैत्याः कालनेमिपुरोगमाः । मर्त्त्यलोकं समागम्य बाधन्तेऽहर्निशं प्रजाः ॥
कालनेमिहतो योऽसौ विष्णुना प्रभविष्णुना । उग्रसेनसुतः कंसः सम्भूतः स महासुरः ॥
अरिष्टो धेनुकः केशी प्रलम्बो नरकस्तथा । सुन्दोऽसुरस्तथात्युग्रो बाणश्चापि बलेः सुतः ॥
तथान्ये च महावीर्य्या नृपाणां भवनेषु ये । समुत्पन्ना दुरात्मानस्तान्न संख्यातुमुत्सहे ॥
अक्षौहिण्यो हि बहुला दिव्यमूर्त्तिधराः सुराः । महाबलानां दृप्तानां दैत्येन्द्राणां ममोपरि ॥
तद्भूरिभारपीडार्त्ता न शक्नोमामरेश्वराः । बिभर्त्तुमात्मानमहमिति विज्ञापयामि वः ॥
क्रियतां तन्महाभागा मम भारावतारणम् । यथा रसातलं नाहं गच्छेयमतिविह्वला' ॥ इति ॥

१९ – अथेति मांगल्ये, श्रीभगवदवतारहेतूपसत्तेः,[2] यद्वा अनन्तरं सद्य एवेत्यर्थः । भूमेर्वचनं वासनं वोपधार्य्यावधानेन श्रुत्वा हृदि धृत्वा वा त्रिनयनेन सहित इति तस्य पृथगुक्तिर्भगवत्प्रियतमत्वे तस्य विशेषतः साहाय्यापेक्षया क्षीराब्धितीरे गमनं तत्र लक्ष्म्या सह सदावस्थित्या सुलभत्वात् सुप्रसन्नत्वाच्च ॥

२०—तत्र तीर एव गत्वा, न तु तत्रत्य–श्वेतद्वीपाख्यश्रीभगवत्पुर्य्यामिति तस्या अपि दौर्लभ्यमभिप्रेतम्; तच्च मोक्षधर्म्मे श्रीनारायणीये व्यक्तमेव । पुरुषमिति सदा तत्र पुरि शयनाभिप्रायेण विराडन्तर्य्यामितया वा । समाहितस्तदेकचित्तः सन्; उपतस्थे भक्त्या तुष्टाव; कुतः ? जगतां नाथं विशेषतश्च देवानां देवं पूज्यं जगत्पालनार्थं देवैः स्तुत्यत्वादिति भावः । किञ्च, वर्षति कामान् आकम्पयति क्लेशानिति वृषाकपिस्तमिति प्रयोजनं चोद्दिष्टम्, पुरुषसूक्तेनोपस्थितिस्तस्य वैदिकतया भगवन्माहात्म्यविशेषपरतया च पुरुषोत्कर्षैकोपयोगितया च तथा तदानीं गोकुलादिलीलानभिव्यक्त्या च सर्वस्तोत्रेभ्यः श्रैष्ठ्यात् ॥

२१—गगने समीरितामाकाशजामदृष्टवक्तृकामित्यर्थः; इत्यदृश्यमानेन श्रीभगवता नारायणेन तदीयेन वा केनचिदुक्तां समाधौ तत्रापि[3] गगने समीरितामिति परमादृश्यत्वमुक्तम्, अग्रे श्रीवृन्दावनादौ तस्य तादृशक्रीडया तदानीन्तनानां भाग्यविशेषबोध-नार्थम् । ह स्फुटं हर्षे वा । पौरुषीम्—पुरुषो विराडन्तर्य्यामी नारायणस्तदीयामिति तस्यां तेषां विश्वासार्थं पुनः पश्चात्तथैव तदनुरूप-मेव विधीयतां युष्माभिः सर्व्वैरेवेति वा; हे अमरा इति तदेवामरत्वं नाम सिध्येदिति भावः ॥

२२—पुरुषमुखनिःसृतां गामेवार्थतः प्रतिपादयति—पुरेति चतुर्भिः । पुंसा यस्याहमंशस्तेन पुरुषोत्तमेन पुरैवावधृत इति तद्विज्ञापनार्थं युष्मत्प्रयासेनालमिति; यद्वा, अतएव तच्छ्रवणार्थं स्वयं नाविर्भूत इति भावः । अंशैर्निजाशेषांशैः सहोपजन्यतां पुत्रपौत्रादिरूपेण जनित्वा निकटे स्थीयतामित्यर्थः । यदुष्विति प्रायिकत्वात्, किंवा तत्सम्बन्धिनामपि पाण्डवादीनां तदन्तर्भावात्; यद्वा, मुख्यत्वादीश्वराणामपीश्वर इच्छामात्रेण सद्यः सर्वं कर्त्तुं शक्तोऽपि स्वकालशक्त्या यदा यत् कर्त्तुं युज्येत, तदैव तत् करोतीति यथाकालमित्यर्थः; स्वशब्देन कालस्यापि तदधीनतोक्तैव । यावद्भुवि चरेत् प्रकटो भुवि वर्त्तेतेत्यर्थः; अन्यथा तत्तन्नित्य-प्रियजनैः सह नित्यं श्रीवृन्दावनादौ विचित्रक्रीडां कुर्व्वतोऽपि तस्यान्यैरदृश्यत्वात् ॥

२३—यदुष्वंशैरुपजनने हेतुमाह—वसुदेवेति । गृह इति जीववत् पितुः सकाशादुत्पत्तिर्निरस्ता, यतः परः पुरुषः पुरुषोत्तमोऽवतारी श्रीभगवान् प्रकटसर्व्वैश्वर्ययुक्तः सन् साक्षात् स्वयमेव जनिष्यते प्रादुर्भविष्यतीत्यंशावतारत्वमपि निरस्तम् । तथा च पाद्मे श्रीव्यासवाक्यम्,—

'ततो मामाह भगवान् वृन्दावनचरः स्मयन् । यदिदं मे त्वया दृष्टं रूपं दिव्यं सनातनम् ॥
निष्कलं निष्क्रियं शान्तं सच्चिदानन्दविग्रहम् । पूर्णं पद्मपलाशाक्षं नातः परतरं मम ॥
इदमेव वदन्त्येते वेदाः परमकारणम् । सत्यं व्यापि परानन्दं चिद्घनं शाश्वतं परम् ॥' इति ।

१· श्रीभागवत—(ग, घ) । २·—हेतुवसम्पत्तेः (घ); ३· तथापि (ख) ।

अतस्तस्य भगवतः प्रियार्थं परिचर्य्यया प्रीत्युत्पादनाय; यद्वा, तस्य प्रियाः श्रीरुक्मिण्याद्याः श्रीराधाद्याश्च तासां सख्यार्थमत एव सम्यग् भवन्तु, उक्तप्रकारेण जायन्तामित्यर्थः; यद्वा, सम्भवन्तु योग्या भवन्त्विति वरप्रदानम्; तथापि जनन एव तात्पर्य्यम् ॥

२४—अग्रतः पूर्व्वं भविता ज्येष्ठभ्राता भविष्यतीत्यर्थः; स्पष्टतानुक्तिः सम्भ्रमात्। तत्र योग्यतामाह—वसुदेवस्य चतुर्व्यूहप्रधानस्य कला अंशः, संकर्षणत्वात्, अत एवानन्तः प्रलयेऽपि नाशरहितः; यद्वा, अपरिच्छिन्नोऽत एव सहस्रवदनः श्रीवासुदेवगुणगाने सहस्रमुख इति निरन्तरानन्तभगवद्गुणगानपरता सूचिता। ननु किं तर्हि सप्तपातालतलवर्त्ती धरणीधरः ? नेत्याह—स्वयं राजत इति स्वराट्, अतस्तं विनान्यत्र स्थातुमशक्तिमिति भावः। अग्रतो भविता देवः[1] सर्व्वेषां पूजार्ह इत्यर्थः। ननु श्रीलक्ष्मणवदसौ कनिष्ठतामेवार्हति ? तत्राह—हरेः प्रियचिकीर्षयेति। पुरा श्रीरघुनाथावतारे तस्य सेवातिशयेन यन्त्रितस्य हरेर्भक्तवत्सलस्याग्रजत्वेनैव प्रीतिः स्यादिति तत्सम्पादनेच्छयेत्यर्थः। हरेरिति तादृशस्नेहेन तस्य मनोहरणात् ॥

२५—विष्णोर्विश्वव्यापकस्य भगवतो मायाख्या शक्तिः, अत एव भगवती सर्व्वशक्तियुक्ता। भगवतीत्वमेव दर्शयन् तामेव कार्य्य-द्वारा विशेषेण लक्षयति-ययेति; इति चिच्छक्तिर्व्यावर्त्तिता सम्यग्भविष्यति; अन्यथा श्रीयशोदादिमोहनाशक्तेः। कार्य्यार्थं इति श्रीयशोदा-मोहनादि-कार्यस्य सुगोप्यत्वात् संकेतेनैवोक्तम् ननु वयं देवा त्वदाज्ञाकारिण[2] एव, अनन्तश्च हरिप्रियचिकीर्षयैव भविता; सा तु परमस्वतन्त्रा, कुतस्तथा कर्त्ता ? तत्राह—प्रभुणा तदीश्वरेण विष्णुनादिष्टेति 'यया सम्मोहितं जगत्' इत्युक्तम्। ननु तर्हि तस्यास्तत्र जन्मनाऽस्मत्तदृशानामपि सम्मोहः सम्भवेदित्याशंक्याह—अंशेनेत्यंशेन भगवदंशेन सम्वलिता, अतस्तदिच्छानुसारेणैव मोहयिष्यतीति भावः ॥

२६—अमरगणान् सुरसमूहान्; यद्वा, अमरान् गणांश्च, गणाः—देवानुगा गन्धर्व्वादयः श्रीभगवज्जन्मोत्सवादौ गीतवाद्यार्थमुपयुक्ताः। आदेशे योग्यतामाह—प्रजापतीनां मरीच्यादीनामपि पतिः; यतो विभुः, उक्तार्थमेवेदम्; यद्वा अत एव जरातामरणानां वा प्रभुरिति। श्लेषेण श्रीभगवदवतारसाधनादिदानीमेव प्रजानां तत्पतीनाञ्च पालकत्वं विभुत्वमपि सिद्धमिति। गोभिः—त्वमेव धन्योस्यचिरात्तन्मधुरमधुरपदैर्भूषिता भविष्यसि' इत्यादिभिः। परमं सत्यलोकवर्त्तीतिविदूरस्य-तत्रत्यमूर्त्तिमद्वेदादि-निजपरिवाराणां साक्षाच्छ्रीभगवदवतारवार्त्तया सन्तोषणार्थम् ॥

२७—श्रीमथुरायां श्रीभगवदवतरणं वक्ष्यन्नादौ तत्कारणमाह—शूरसेन इति द्वाभ्याम्। स्वगुणैः सर्वचित्तस्य मथनाद्[3] विलोडनान्मथुरा, तां पुरीं पुरीत्वेन प्रसिद्धाम्, किंवा तत्रापि पुरीं श्रीयमुनातटे पुरा भगवता श्रीशत्रुघ्नेन वासितां नगरीम्। माथुरान् मथुरामण्डलसम्बन्धिनः; तानेव शूरसेनांश्च तद्भुक्तत्वेन तन्नाम्नैव प्रसिद्धान् देशान् बुभुजे उपबुभुजे; यद्वा, बुभुजे यतो यदुपतिर्यदुकुलश्रेष्ठो ययातिशापेन राजत्वाभावात् पतिरित्युक्तम्, न च राजेति, अत एव बुभुज इति, अग्रे च भूभुजामिति, पुरेति तस्य पूर्वपूर्वतरत्वात्, तथोक्तमेव नवमस्कन्धे ॥

२८—तत आरभ्य सा सुप्रसिद्धा अनिर्व्वचनीयमाहात्म्या वा मथुरा सर्व्वयादवभूभुजां निखिलयदुवंश्यक्षितिभृतां राजधानी कटकमभूत्। राजधानीति शूरसेनादीनां यदुपतित्वेन राजवद्व्यवहारात्। सर्वेषामेव तेषां राजधानीत्यत्र हेतुविशेषमाह—यत्र यस्यां भगवान् सर्वैश्वर्य्ययुक्तः श्रीयुक्तः[4] 'सन्निहितस्तत्रत्यानां निकटे तिष्ठतीत्यर्थः; तत्र च मथुरेत्येव हेतुर्ज्ञेयः, तया तस्यापि मनोविलोडनात्। नित्यमितिकालादि-दोषेण नान्यत्रैव वदन्तर्द्धानं[5] निरस्तम्, अस्याश्च नित्यत्वात्। तथा च पाद्मे श्रीभगवद्वाक्यम् 'अहो न जानन्ति नरा दुराशयाः, पुरीं मदीयां परमां सनातनीम्। सुरेन्द्रनागेन्द्रमुनीन्द्र-संस्तुतां, मनोरमां तां मथुरां पराकृतिम् ॥' इति। हरिः परमसमोहन-रासादिलीलया मनोहरः; एवञ्च श्रीवैकुण्ठलोकादप्युत्कर्षः सूचितः। अत एवोक्तं पाद्मे पातालखण्डे—'अहोमधुपुरी धन्या वैकुण्ठाच्च गरीयसी' इति ॥

२९—तत्रैव कंसकारागारे श्रीभगवतो जन्म वक्तुं तत्प्रसंगमारभते—तस्यां हीत्यादि; हि एव तस्यां श्रीमथुरापुर्य्यामेव कर्हिचित् चिरकाले तथैवातीते सति कदाचिदित्यर्थः। शौरिः शूरस्य पुत्र इति देवककन्या-विवाहयोग्यतोक्ता। प्रयाणे च विवाहानन्तरं निजगृहं गन्तुम् ॥

३०—उग्रसेनस्य सुत इति—स्वसृत्वसाधनार्थम्; तथा तदानीमुग्रसेनस्य तत्राधिपत्येन कंसस्यापि तादृशत्वबोधनार्थञ्च। अत एव स्वर्णमयैरसंख्यै रथैर्वृतः सन् जगद्धिंसया कंसनाम्ना प्रसिद्धोऽपि, कसि-धातोः शातनार्थत्वात्। हयानां रश्मीन् जग्राह, स्वयमेव सारथ्यमकरोदित्यर्थः। किमर्थम् ? स्वसुर्देवक्याः प्रियं कर्त्तुमिच्छया; पाठान्तरेऽपि स एवार्थः। भग्नी-शब्दस्यापि वृत्तेः; तथा च द्विरूपकोषे—'भग्नी च भगिनी चैव' इति। अत एव माघमाहात्म्ये—'विप्रं तं प्रति सर्वास्ता वयसानुपमाः पुनः। शोभन्ते स्म यथा भग्न्योर्मिथस्ताः स्वसखीवृताः ॥' इति तस्याममुष्य महास्नेहः सूचितः। एतदादिकं सर्वं कंसस्य वक्ष्यमाण-दुश्चेष्टयात्यन्तखलत्व-ज्ञापनार्थम् ॥

---

१. अग्रतो भवनादेव देवः (ख); २. वेदाज्ञाकारिण (क), त्वदाज्ञाकारिण (ख); ३. मथाद् (ग, घ, ङ); ४. श्रीकृष्णः (ख); ५ नान्यत्रैवान्तर्द्धानं (ग, ख)।

३१–३२—किञ्च, तादृश-महोत्सवे तादृशं क्रौर्य्यं न किल सम्भवेदिति विवाहोत्सवं त्रिभिर्वर्णयन् आदावुपस्कर-प्रदानमाह—चतुरिति युग्मकेन[1]। हेम्नां माला माल्यं पंक्तिर्वा, तद्वतान्। एतदग्रेऽप्यनुसर्त्तव्यम्[2]। त्रिषट्शतमष्टादश शतानि। सुकुमारीणां नवयौवनानामित्यर्थः। सम्यग्विचित्रोत्तमवस्त्रभूषणादिना यथाविध्यलंकृते। प्रकर्षेण परमश्रद्धया साधुप्रकारादिनादात्। याने प्रयाणसमये, 'यानैः' इति पाठे (शिविकादिभिः सहिते, तासां स्वयं पादव्रजनाक्षमत्वात्। तावत् प्रदाने हेतुः—दुहितृषु दुहितरि वा सर्वकनिष्ठायां तस्यां वत्सल इति॥

३३—प्रयाणस्य प्रक्रमे आरम्भे; समं युगपत्, यद्वा, अन्यूनाधिकरूपं यथा स्यात्, सुमंगलञ्च शोभन-शुभध्वनि यथा स्यात्तथा नेदुः स्वयमवाद्यन्त। एतच्च भाविशुभलक्षणम्। तातेति[3] वात्सल्येन सम्बोधनम्, श्रीभगवदवतारासन्नतादिना प्रहर्षात्; किंवा, तादृशमहोत्सवे भाव्यनर्थोपात-स्मरणेन शोकवेगात्॥

३४—प्रग्रहिणं गृहीताश्वपाशम्, गर्भोऽर्भकः; तथा च विश्वः—'गर्भो भ्रूणेऽर्भके कुक्षौ' इत्यादि। अबुध हे मूर्खेति शत्रुमातृवहनात् स्वमरणाद्यज्ञानाद्वा; कंसस्य भगिनीविषयकस्नेहेन सद्वृत्ततया तत्कारणोत्थापनार्थं व्यग्राणां देवतानामाकाश-वाणीयं [4]ज्ञेया। नयसे भर्त्तृगृहं प्रापयसि 'वहसे' इति पाठेऽपि स एवार्थः; किन्तु वाहनवद्वहसीति श्लेषः॥

३५—इत्युक्त इति तद्वाङ्मात्रेणैव, न तु तदर्थविचारणादिनेत्यर्थः; यतः खलोऽधमः, क्रूरो वा, यतः पापो दुष्टः, पाप-स्वरूपो वा, अतो भोजानां यादव-भेदानां कुलपांसनः, अतएव हन्तुमारब्धः, आदिकर्म्मणि कर्त्तरि क्तः, सद्यः प्रवृत्तः। तत्प्रकार-माह—खड्गपाणिरिति, प्रग्रहान् विहाय दक्षिणेन करेणासिमुद्यम्य वामेन केशबन्धे तामग्रहीदित्यर्थः॥

३६—जुगुप्सितं निन्दितं कर्म्म यस्य तम्, भगिनीवधे प्रवृत्तेः, नृशंसं सद्यस्तादृशस्नेहत्यागात्; निरपत्रपं तादृशोत्सवे सर्वलोकाग्रेऽत्यन्तविकर्म्मोद्यमात्। विशेषणानामेषामुत्तरोत्तरं दुष्टत्वे श्रैष्ठ्यम्; एवं तस्य महादुश्चेष्टायाः पुनः पुनर्निन्दा। महाभाग इति तैर्व्याख्यातमेव। तत्र स्वस्य श्रीवसुदेवस्य जन्मनि हर्षेण देवतैर्व आनकदुन्दुभिघोषस्तेन सूचितो यः स्वस्माद् वसुदेवाद्भावी भगवदवतारस्तेन हेतुना स्वस्माच्छक्यप्रतीकारता सम्भवतीत्यर्थः। अयमुक्तौ हेतुः। किञ्च, परिसान्त्वयन्नित्यत्र परीत्यस्य लेखकभ्रमादिति; अथवा, परमभाग्यवानिति तस्य महाधैर्य्यादिकं सूचितम्। अतएव परिसान्त्वयन्, तैर्व्याख्यातमेव; यद्वा, सान्त्वनपूर्वकं साम्नायुक्तिभेदेन (युक्तिभिर्भेदेन) स्नेहोत्पादनेन च क्रमेण प्रबोधयन्। तत्र पञ्चविधं साम, भेदश्च द्विविधः; तथा चोक्तम्—'सम्बन्ध-लाभोपकृतिरभेदो गुणकीर्त्तनम्। साम पञ्चविधं भेदो दृष्टादृष्टभयं वचः॥' इति॥

३७—तत्रादौ साम्ना प्रबोधयति[5]—श्लाघनीयेति। शूरैर्युद्धधीरैः। भवानित्यादरात्। स्त्रियं तत्रापि भगिनीं तत्रापि तद्विवाहोत्सवे कथं हन्यात्? अपि तु हन्तुं नैवार्हतीत्यर्थः; अन्यथा शौर्य्ययशसोर्हानिः। तत्र श्लाघनीयेति गुणकीर्त्तनम्, भोजेति सम्बन्धः, भगिनीमित्यभेदः, कथं हन्यादिति स्त्रीवधनिवृत्त्या यशोलाभः, उद्वाहेति सन्ततिवृद्ध्योपकारः। श्लेषेण शूरैर्मल्लादिभिरेव, न तु पण्डितैः साधुभिर्वा कैश्चित्। भोजानां कतिपयानां केषाञ्चिदेव यादवभेदानां यशस्करो न त्वन्येषाम्। यद्वा, भोजा भोगपरा भोजका वा देवान्नभोजिनो दुष्टास्त एव यशस्करा यशःख्यापका यस्येति॥

३८—युक्तिभिः षट्श्लोक्या प्रबोधयन्नादौ मृत्योरपरिहार्य्यत्वमाह—मृत्युरिति। जन्मवतामिति यथा जन्म तथा मृत्युरप्यवश्यं भवेदिति भावः। अतएव देहेन सह जायत इति तदेव निर्द्धारितम्; तथा चोक्तम् (गी० २।२७) 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च' इत्यादि। हे वीरेति सलालनसम्बोधनम्; श्लेषेण युद्धमात्रे समर्थ, न तु विचारादाविति। यद्वा, ननु मद्वीर्य्यान्मृत्युर्न प्रभविष्यति? तत्राह— वीरस्यापि देहेन सहेति; अतः प्राणिनां सर्वेषामपि ध्रुव एव मृत्युः। वा-शब्दाभ्यां पक्षयो-र्द्वयोरपि प्राधान्यं बोध्यते; वै एव, तत्प्रसिद्धमेवेत्यर्थः॥

३९—ननु, सत्यं मृत्युर्भवितैव, किन्तु देहाभावेन भोगासिद्ध्या कञ्चित् कालं भोगार्थं देहरक्षा युक्तैव? तत्राह—देह इति। पञ्चत्वमिति पञ्चभूतैरारब्धत्वेन) विकारित्वात् पञ्चभूतात्मतापत्त्या तस्य मृत्युर्घटतैवेति भावः। देहीति देहादिभिन्नत्वेन तस्य नाशो निरस्तः। देहान्तरप्राप्तौ हेतुः—कर्म्मानुग इति, कर्म्मणामवश्यभोग्यत्वात्। न च तत्र प्रयासोऽस्तीत्याह—अवशः, कर्म्मवशात् स्वत एव तत्सिद्धेरित्यर्थः। अनुत्यजत इत्यन्वयः, आत्मनेपदमार्षम्॥

४०—देहीति; अन्यथा मध्ये किञ्चिद्देहाभावेन देहित्वासिद्धेरिति भावः। सा च नैव घटेतेत्याह—कर्म्मगतिं गत इति॥

४१—एतच्च स्वानुभवसिद्धमपीत्याशयेन दृष्टान्तान्तरमाह—स्वप्न इति। हि एव तदेव। अन्यत्तैर्व्याख्यातम्। यद्वा, ननु देहादात्मनो भिन्नत्वे सतीदं घटेतापि? तच्च न सम्भवति, मरणादौ कदाचिदप्यात्मनो भिन्नत्वानुपलम्भात्? तत्राह—स्वप्न इति। अर्थः स एव; स्वप्ने मनोरथे च स्वदेहाभिमानपरित्यागेन देहान्तराभिनिवेशेनात्मनो देहात् पृथक्त्वमुपलभ्यत एव, तथा मरणेऽपि ज्ञेयमिति भावः। एवं कर्म्मवशाद्देहान्तरं प्राप्यैव प्राक्तनं देहं त्याजतीति देहप्राप्तेरावश्यकतां दृढीकृता॥

---

१. द्वाभ्यां (ख); २. अनुवर्ण्यम् (ख); ३. हे तातेति (ख, ग); ४. 'स्वमरणाद्यज्ञानाद्वा, ······ देवतानामाकाशवाणीयं' इति टीकांशः ख—करलिपेः पाठः, 'घ—ङ' ग्रन्थयोर्नास्ति। ५. बोधयति (घ, ङ)।

४२—ननु, सत्यं भविता देहामात्रम् , किन्तु पुनर्मनुष्यदेहोऽतिदुर्घटः ? तत्राह—यतो यत इति। दैवेन चोदितमिति—तदर्थं प्रयासान्तरं निरस्तम्। विकारात्मकमिति—मृत्युकालेऽप्यशान्तत्वमुक्तम्। माया भागवती, तया रचितेष्विति देहवैचित्री चोक्ता[1]। असौ अविवेकी देहादेर्भिन्नोऽपीति वा, प्रपद्यमानो मन्यमानः। मनुष्यदेहस्य प्राप्तौ तवेच्छा दृश्यते, तया च तत्प्रापकं दैवमनुमीयते; अतः सोऽप्ययत्नेन घटेतैवेति भावः।

४३—ननु भवतु साधारणनरदेहः, राजदेहः सुदुर्लभः ? तत्राह—ज्योतिरिरिति। अदो निष्कम्पत्वेन ख-स्थितमपि स्वमाया स्वाविद्या, स्वस्मिन् श्रीभगवन्माया वा, तयैव रचितेष्विति मिथ्यात्वं बोधितम्; अन्यत् सर्वं तैर्व्याख्यातमेव। यद्वा, 'यतो यतः' इत्यनेनैव राजदेहप्राप्तिः साधिता। फलोन्मुखकर्म्मप्रेरित-मनोऽभिनिवेशेन मरणसमये राज्यभोगेच्छया, 'मरणे या मतिः सा गतिः' इत्यादि-न्यायेन पुरा[2] राजत्वसम्भवात्। ननु अस्तु नाम जन्मान्तरे राजदेहलाभः, तथापि गर्भे बाल्ये च सम्यग्विषयभोगासिद्धेरेतद्धरक्षार्थं प्रयत्नो युक्त एव ? तत्राह—ज्योतिरिति। यथा जलादिषु प्रतिबिम्बं चन्द्रादिकं ज्योतिर्वायुवेगानुगतमेव सत् कम्पादियुक्तं प्रतीयते, तथा गुणेषु विषयेषु रागानुवर्ती सन्नेव जीवो विशेषेण मुह्यति—इदमुपभुक्तमिदञ्च नेत्यादिचिन्तया विकलो भवति; अतो बाल्यादौ रागविशेषाभावात्तदानीं विषयोपभोगादुःखं न स्यात् , यथारागं विषयोपभोगेन सुखञ्चास्यादेवेत्यलं मृत्युप्रतीकारेणेति भावः॥

अथवा,—(४२) ननु सत्यं देहो भावी, सदेष्टविषयभोगस्तु दुर्लभः ? तत्राह—यत इति। गुणेषु शब्दादिषु विषयेषु मध्ये यं यं प्रति मनो धावति, तं तं देही आप प्राप्तः,—निर्धार-विवक्षयातीत-निर्देशः—प्राप्नोत्येवेत्यर्थः। तत्र हेतुः—मायेति, तेषामपि मनोमयत्वादित्यर्थः अतो न तत्साधने प्रयासो ऽपीत्याह—प्रपद्यमानस्तं तं विषयमुपभुञ्जानस्तेन तेन विषयेण सहैव जायत इति बाल्यमारभ्यैव तत्तद्भोगसीद्धिरुक्ता॥

(४३) ननु, तथापि वैदग्ध्यादिगुणान् विना तत्तद् भोगसुखं सम्यक् न स्यादतः सर्व्वगुणयुक्तोऽयं देहो यत्नाद्रक्ष्य एव ? तत्राह—ज्योतिरिति। मिथ्याभूतेष्वपि विषयेषु रागमात्रेणैव विमुह्यति—'अहो रूपमहो सौरभ्यमहो स्वादुता' इत्येवमासक्तिं याति, न तु विचारेणातस्तदर्थं भगिनीवधो नोपयुक्त इति भावः। अन्यत् समानम्॥

४४—एवं श्रीकृष्ण-कथारम्भे मृत्योरावश्यकतायास्तथात्मनो विचित्रदेहप्राप्तेर्देहाद्भिन्नतायाश्च तथा विषयमायिकतादेश्च प्राक् प्रसंगः, तत्तज्ज्ञानं विना स्वहितानुसन्धानेन श्रीभगवत्कथायामपि तस्यां रुच्यनुत्पत्तेरिति दिक्। एवमग्रेऽन्यत्रापि सर्वत्र तत्रैव तात्पर्य्यंमुह्यम्। तथाविध उक्त जन्मादिप्रकारकः स पुमान्; यद्वा, द्रोहं नाचरेदित्यत्र हेतुः—यत आत्मनः क्षेमं निरन्तरमिच्छन् स द्रोग्धापि तथाविधो द्रुह्यमाणजनसदृशः, निजदुःखानुमानेनान्यस्यापि दुःखदर्शनादित्यर्थः। एवं कृपामुत्पादयति; यद्वा, सोऽपि तथाविधो द्रुग्धः स्यात्; तत्र हेतुमाह—द्रोग्धुरिति : एवं दृष्टादृष्ट-भयप्रदर्शनेन द्विविधो भेदः॥

४५—अत्युग्रे सस्तुति[3] सामैवोचितमिति पुनस्तदेवाह—एषेति नवोढा; कृपणा दीनस्वभावा भयेन रोदनादिपरेत्यर्थः। पुत्रिकोपमा तव पुत्रीतुल्या इति स्नेहं जनयति; यद्वा, पुत्तलिकासदृशी भद्राभद्रानभिज्ञेत्यर्थः; अतएव कल्याणीं निरपराधामित्यर्थः—विशेषणानामेषामुत्तरोत्तरकल्याणीत्वे श्रैष्ठ्यमुह्यम्। दीनवत्सल इति श्लेषेण दीनं मृतप्रायं वत्समेव लाति विप्रेभ्यो ददाति; किंवा, दीनादपि वत्समपि लाति गृह्णातीति निन्दैव॥

४६—भेदैरिति बहुत्वम्,—मृत्युसूचनेन भेदस्य गौरवात्; यद्वा, एवमुक्तसदृशैरन्यैश्चेति ज्ञेयम्। पुरुषमदन्तीति पुरुषादा राक्षसा अघादयस्तान्' भक्षकेषु सामादीनां वैयर्थ्यं युक्तमेवेति भावः। सामादिभिरप्यनिवृत्तेर्विस्मयेन सम्बोधयति—हे कौरवेति; यद्वा, कौरवो दुर्य्योधनस्तद्वद् स्वकुलनाशका ये पुरुषादास्तान्॥

४७—तं हननार्थं निर्बन्धमाग्रहम्, कालं समयं मृत्युं वा प्रतिवोढुं वञ्चयितुमित्यर्थः। तत्र कालवञ्चने, किंवा तदानीं सद्य एवेत्यर्थः॥

४८—अपोह्यः प्रतिकार्य्यः परिहार्य्यो वा, बुद्धिबलयोः किंवा बुद्धेर्बलं सामर्थ्यं तस्योदय उत्कर्षस्तदवधि। असौ कंसो मृत्युर्वा। अपराध उपेक्षादोषः। देहिन इति देहपरतन्त्रस्य जीवस्य ततोऽन्यत्रासक्तेः; किंवा देहाभिमानिनोऽपि देहसम्बन्धिजनरक्षया दोषो न स्यादिति भावः। तथा चोक्तम्,—'यत्ने कृते यदि न सिध्यति कोऽत्र दोष' इति॥

४९—पुत्रान् अष्टमेतरान् सर्वानपि प्रकर्षेण दत्त्वा जातमात्रेणैव[4] साक्षात् सुखमर्पयित्वा, मृत्यव इति तस्य साक्षान्मृत्युरूपत्वात्; यद्वा, तं प्रति प्रदानेन सद्यो मृत्युप्राप्तेः। कृपणामिति प्रागुदीनजनरक्षोचितेति भावः। सुता इत्यष्टमो गर्भ इत्याकाशवाण्या पुत्राष्टकत्वात्। अयञ्च गूढो भावः—यद्येको द्वौ वा जायेते, तदाष्टमपुत्रत्वाभावेन युक्त्या तस्य शंकां निरस्य रक्ष्यावपि स्याताम्; यद्वा, बाहुल्याभावेन पुत्रानिति बहुपुत्रसमर्पणप्रतिज्ञाया हानिरपि छलेन सह्या स्यादिति विपर्य्ययोऽपि सम्भवेदित्यर्थः।

---

१. प्रोक्ता (ग); २. पुनः (ग)। ३. संस्तुति—(घ, ङ); ४. ज्ञातमात्रेणैव (ख), जातमात्राणेव (ग);

यत उपस्थितोऽपि[1] मृत्युः श्रीमार्कण्डेयाजामिल-सत्यवदादीनां निवर्त्तते, निवृत्तोऽपि कुश-नमुचि-हिरण्यकशिपुप्रभृतीनां पुनरापतेत्; यतो धातुरीश्वरस्य गतिरिच्छा दुरत्ययानतिक्रम्या दुर्ज्ञेया वेत्यर्थः ॥

५० ५१—हि एवमेव जन्तोः प्राणिमात्रस्यापि हेतुरदृष्टं दुर्विभाव्यः केनादृष्टेन कस्य कदा किं स्यात्तत्तर्कयितुमशक्यमित्यर्थः। अत्र संयोगस्योक्तिर्दृष्टान्तत्वेन, किंवा सामान्यतोऽदृष्टस्य स्वभाव-बोधनार्थमिति कर्मशक्तेर्दुर्वितर्क्यतया मङ्गलकादप्यस्य मृत्युः सम्भवेदेवेति भावः। अन्यत्तैर्व्याख्यातम्; यद्वा, एवमेव जन्तोरप्यदृष्टतोऽन्यन्मरण—जीवनयोः कारणं नास्त्येवेत्यर्थः। अतः कंसस्याशुभादृष्टान्मरणम्, मत्पुत्रस्य च शुभाज्जीवनमेवेति भावः;—अन्यथा (भा० १०।१।३४) 'अस्यास्त्वामष्टमो गर्भो हन्ता' इति देववाक्यवैयर्थ्यापत्तेः[2] ॥

५२—पापमपि बहुलादरपूर्वकं पूजयामास स्तुत्यादिना सम्मानितवान् ॥

५३—ततश्च क्रूरं निर्दयमपि तं पुनरब्रवीत्। प्रत्यग्रवदनाम्भोजः सद्यो विकसितपद्मवत् प्रसन्नमुखः सन् प्रहसन्; 'प्रसार्य्य वदनाम्भोजम्' इति पाठः स्पष्टः। विश्वासाय तं प्रत्यात्मनोऽन्तःप्रसादो बोधितः, वस्तुतस्तु दूयमानेन मनसा विशिष्टः ॥

५४—सौम्य! हे शान्तप्रकृते! अन्तःप्रसादबोधनार्थमेव पूर्व्ववदत्र श्लेषार्थोऽपि न स्पष्टः। अन्यत्तैर्व्याख्यातम्। यद्वा, यतो यस्या वाचः सकाशात् सा यथाह, तथा तेन हि भयमस्ति, किन्त्वष्टमपुत्रादेव; तथापि तव हितार्थं तमेकमर्पयिष्यामीति किम्, अपि तु सर्व्वानपि सम्यक्स्नेहादि-परित्यागेन स्वयमेव सद्योऽर्पयिष्यामीति दुष्टकंस-सन्तोषार्थमुक्तम्।

५५—सुहृदो भगिन्या वधात्, सुहृदिति पितृव्य-पुत्रीत्वेन भगिनीत्वस्यातिनैकट्यबोधनार्थम्। श्लेषेण, शोभनहृदयेति, तस्या अपि निर्म्मलचित्तत्वेनाकापट्यमालक्ष्य वधान्निवृत्त इति भावः। किञ्च, तद्वधान्निवृत्त्या सुहृदामन्येषामपि वधान्निवृत्त इति सूचयति,—तस्यां सर्व्वेषामेव स्नेहभरेण तद्वधे तेषामपि वधप्रसक्तेः, किंवा देवकादिभिः सह युद्धयापत्त्या तेषां वधासम्भवात्। तद्वाक्येति तैर्व्याख्यातम्; यद्वा, तद्वाक्यस्य सार अन्तरोऽर्थभागस्तं विचारयन्, सारग्राही कृपाशीलोऽसीत्येवं स्तुत्वा, प्रकर्षेण गीत-वाद्यादिनाविशत्। इदमपि तद्विश्वासजननार्थमेव, अपिशब्दात् कंसोऽपि, पथि तस्मात् स्थानादेव निवृत्तः स्वगृहं प्रविष्ट इति।

५६—अथेति माँगल्ये; काल उपावृत्ते कतिपयकाले गते सतीत्यर्थः, (वि०पु० ५।२०।४४) 'युवेव वसुदेवोऽभूद्विहायाभ्यागतां जराम्' इत्यादि-श्रीविष्णुपुराणोक्तेः; 'वृद्धौ तवाद्य पितरौ' इत्यादि-श्रीहरिवंशोक्तेश्चानुसारेण प्रायो वार्द्धक्यान्तिके श्रीभगवदाविर्भावात्; सा सर्व्वस्य देवता पूज्येत्यर्थः। कन्यां सुभद्राम्। अनुवत्सरमेव प्रत्यब्दमेकैकश इत्यर्थः; तच्च सत्वरमेव श्रीभगवदवतारार्थम् ॥

५७—कीर्त्तिमन्तमिति पूर्व्वजन्मनि स्मरः कीर्त्तिमांश्चेति नामद्वयं तस्यासीदित्युह्यम् यद्वा, जातमात्रस्यैव देशाचारेण गणकादि-कृतं तन्नामेति। स कृत-प्रतिज्ञोऽतिविह्वलः परमभीतः ॥

५८—नु वितर्के; किं दुःसहमपि तु सर्व्वमेव सुखेन सह्यमित्यर्थः। एवमग्रेऽपि, अन्यत्तैर्व्याख्यातम्; यद्वा साधूनां सर्व्वसहत्वदार्ढ्यार्थं विदुषामित्यादिकं दृष्टान्ततया ज्ञेयम। यद्वा, कृच्छ्रेणेत्युक्तम्[3]। ननु तादृशं दुःखं कथं सोढम्? तत्राह—किं दुःसहमिति। ननु, ततो देशान्तरं किं न गतः? तत्राह—विदुषां श्रीमथुरामाहात्म्यं किंवा तस्यां भावि-भगवदवतारं जानतां ततोऽन्यत्रापेक्षा नास्तीत्यर्थः। न च मन्तव्यम्—तेन स्वगृहं त्यक्तुं न शक्यत इति; यतो धृतात्मनाम्—संयतचित्तानां गृहाद्यासक्तिरहितानामित्यर्थः—किं दुस्त्यजम्? यथा कदर्य्याणां। कुत्सिताचाराणां किमप्यकृत्यं नास्तीत्यर्थः। यद्वा, ननु श्रीदेवकीहस्तेन कुतो नार्पयत्? पुनस्तद्वधशंकयेत्याह—किमकार्य्यमिति ॥

५९—समत्वं पुत्रार्पणेन शत्रौ मित्रे च तुल्यताम्; "अममत्वम्' इति पाठे पुत्रस्नेहत्यागम्। सत्ये सत्यवाक्ये च—काराद्धैर्य्ये च। एव अपि, व्यवस्थितिं परमनिष्ठामपि तुष्टमनस्त्वादेव प्रकर्षेण हसन्; हे राजन्नित्याश्चर्य्येण सम्बोधनम्; यद्वा, राजमानः सन्, विशेषणानामेषां यथोत्तरं हेतुमत्तोह्या ॥

६०—हि ततोऽस्मादभयं मम न विद्यते; 'अस्ति मे' इति पाठः स्पष्टः। तत्र हेतुमाह—अष्टमादिति। युवयोरित्यन्यस्यां जातोऽपि व्यावर्त्तितः। विहितो विधात्रा। किलेत्याकाशवाण्याः प्रसिद्धं द्योतयति ॥

६१—यथोच्यते तथेति; किंवा एवमस्त्वित्युक्त्वेत्यर्थः। नामानन्दत न प्रतीयाय। कुतः? असतः खलस्याविश्वसनीयस्येत्यर्थः; यतोऽविजितात्मनोऽस्थिरचित्तस्येत्यर्थः ॥

६२–६४—व्रजेत्वदधिकारवर्त्तिनि श्रीमाथुरगोष्ठे अन्यत्रत्या व्यवच्छिन्ना योषितः श्रीयशोदाद्याः,—तन्नामाग्रहणं गौरवात्; द्वितीय-च-कारेण तत्पुत्र-भृत्यादयः; देवताशब्देन श्रीभगवत्पार्षदा अप्युक्ताः; प्रायशब्दस्तत्र केषाञ्चिद्दैत्यत्वात्। हे भारतेति यथा

---

१. यदुपस्थितोऽपि (घ, ङ); २. देववाक्यवैयर्थ्यापत्तिः (क, ग)। ३. कृपणेत्युक्तम् (क, ग, घ, ङ ॥

भरतवंशे भवत्पितामहादयो देवता इति भावः। भोजादयस्तदीया अपि सर्वे देवता-प्राया इत्याह—कंसं प्रति अनुव्रता भक्ताः, ज्ञातयः सपिण्डाः, बन्धवः सम्बन्धिनः, सुहृदो मित्राणि; भगवान् सर्व्वज्ञः,—कंसस्य शान्त्या शीघ्रं श्रीभगवदवतारो न स्यात्, न च तस्य पित्रोः सुखपूर्वकं गोकुले गमनम्, नापि पूतनावधादिविचित्रलीला सम्भवेदित्यादिकं चिन्तयन्नित्यर्थः; यद्वा, परम-दयालुरित्यर्थः, शीघ्रं श्रीभगवदवतारकारणोत्थापनेन जगतामेव हिताचरणात्। अतस्तं प्रत्यसूया न कार्येति भावः। संशयामास स्वार्थे इण् शशंस। तद्विशेषश्च श्रीहरिवंशे (विष्णु—पु० १।२-९,१३,१५)—

'त्रिविष्टपादापतितो मथुरोपवने स्थितः। प्रेषयामास कंसाय स दूतं मुनिपुंगवः ॥
स दूतः कथयामास नारदागमनं नृपे। स नारदस्यागमनं श्रुत्वा त्वरितविक्रमः ॥
निर्जगामासुरः कंसः स्वपुर्य्याः पद्मलोचनः। स ददर्शातिथिं श्लाघ्यं देवर्षिं वीतकल्मषम् ॥
तेजसा ज्वलनाकारं वपुषा सूर्य्यवर्च्चसम्। सोऽभिवाद्यर्षये तस्मै पूजां चक्रे यथाविधि ॥
आसनञ्चाग्निवर्णाभं विसृज्योपजहार[1] सः। निषसादासने तस्मिन् स वै शक्र-सखो मुनिः ॥
उवाच चोग्रसेनस्य सुतं परमकोपनम्। पूजितोऽहं त्वया वीर! विधिदृष्टेन कर्म्मणा ॥
गते त्वेवं मम वचः श्रूयतां गृह्यताञ्च वै। अनुसृत्य दिवो लोकानहं ब्रह्म-पुरोगमान् ॥
गतः सूर्य्यसखं तात! विपुलं मेरुपर्वतम्। सोऽहं कदाचिद्देवानां समाजे मेरुमुर्द्धनि ॥
संगृह्य वीणां संसक्तामगच्छं ब्रह्मणः सभाम्। तत्र मन्त्रयतामेवं देवतानां मया श्रुतः।
भवतः सानुगस्येह वधोपायः सुदारुणः ॥' इति ॥

६५–६६(६५)—विशेषेण पुनर्नेतिशंकापगमादिना पुरीतो निर्गमे सति। अस्य परश्लोक-पूर्वार्द्धे नान्वयः। ऋषेः साक्षान्मद्वे लज्जाद्युत्पत्तेः, किंवा तेन तन्निवारणस्य शंकया; मत्वा ज्ञात्वा; स्वस्य कंसस्य वधं प्रति तदर्थं विष्णुञ्च देवक्या गर्भे सम्यक् सर्वैश्वर्य्यपरिपूर्णतया भूतमाविर्भूतं विष्णुं प्रवेशनशीलमिति श्रीदेवकीगर्भे प्रवेशः सम्भावितः,—भविष्यत्यपि[2] भूतनिर्देशः सामीप्यात्तन्निर्द्धाराद्वा; यद्वा, गर्भे सम्भूतं सम्भूतिर्यस्य तं मत्वा सम्भूतिमिति पाठोऽपि क्वचित्। तज्ज्ञानं श्रीनारदवचनादपि, तथा च तत्रैव हरिवंशे, (विष्णु-पु० १।१६-१९)—

'तत्रैषा देवकी या ते मथुरायां पितृष्वसा। योऽस्या गर्भोऽष्टमः कंसः स ते मृत्युर्भविष्यति ॥
देवानाञ्चैव सर्वस्वं त्रिदिवस्य गतिश्च सः। परं रहस्यं देवानां स ते मृत्युर्भविष्यति ॥
परतोऽपि परस्तेषां स्वयम्भूश्च दिवौकसाम्। ततस्त्वेतन्महद्भूतं दिव्यं ते कथयाम्यहम् ॥

तत्र पितृष्वसेति पितृसम्बन्धेन स्वसेत्यर्थः। देवकजनकेनाहुकेन पौत्री देवकी स्वपुत्रीत्वेन पालितेति केचित् ॥

६६—निगृह्य बद्ध्वा निजगृहे। अजनेति जीववज्जन्मरहितस्यापि प्राकृतजन्मशंकयेति कंसस्य मौढ्यं सूचितम्। किं वा अजनाद् या शंका भयं तया ॥

६७—ननु, बालान् घ्नन् कंसः कथं न लज्जते? तत्राह मातरमिति। मात्रादीनां यथोत्तरं स्निग्धत्वे न्यूनता, मातरमपि घ्नन्ति, किमुत पितरमित्येवं कैमुतिक-न्यायमवतार्य्य व्याख्येयम्। हि निश्चये, यतोऽसून् निजप्राणानेव तर्पयन्तीत्यसुतृपो राज्यादि-लुब्धास्तदानीं भुवि वर्त्तमाना राजानो मात्रादिघातिन इत्यर्थः, तेन साधारण्यान्न लज्जते। प्रायश इति केचिद्भवादृशा एव न घ्नन्तीत्यर्थः ॥

६८—इह भूतले श्रीमधुपुर्य्यां वा; अत एव सम्यक् जातमिति पूर्वजन्मत उत्कर्षः सूचितः। विष्णुना निजशक्त्या जगद्व्यापकेनेति हनने सामर्थ्यमुक्तम्। जानन्निति श्रीनारदवचनादेव; यद्वा, 'भूतपूर्वश्च तं स्मर' इति तदाशिषा पूर्वजन्मस्मरणात् स कंसो यदुभिः सह व्यरुध्यत महावैरं चक्रे ॥

६९—न च केवलं तैः सह, स्वपित्रापीत्याह—उग्रेति। यद्वादीनामधिपमपि निगृह्य बद्ध्वातिक्रम्य वा स्वयं बुभुजे; यतो महद्बलं सामर्थ्यं दैत्यसेना वा यस्य सः। कुकुरादिबहुभेदेषु सत्स्वपि यद्वादीनामेवोक्तिः प्राधान्यापेक्षया; भोजादीनां यदुत्वेऽपि पृथगुक्तिस्तत्ताख्याया तेषां पृथक् प्रसिद्धेः, शूरसेनानिति माथुरैः सह तेषामभेदान्माथुरा न पृथगुक्ताः ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रील-सनातनगोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां प्रथमोऽध्यायः ॥ १ ॥

—:❀❀❀:—

---

[1] विभज्योपजहार (ग, घ, ङ,); [2] भविष्यतापि (घ)।

अथ द्वितीयोऽध्यायः

१–२—प्रलम्बादिभिर्वृत इति द्वितीयेनान्वयः। असुररूपैर्भूपालैः, आदिशब्दात् साल्वादयः। कदनं पीडाम्। तैर्वृतत्वे हेतुः—बलीति। किञ्च, मागधो जरासन्धस्तदानीं सम्राट्, स आश्रयः श्वशुरत्वात् सहायो यस्य सः॥

३—नितरां निभृतं वा विविशुस्तत्र तत्र गतास्तत्तद्वेशादिनैक्यं प्राप्ता इत्यर्थः॥

४–५—एके केचिद्भक्तमुख्या वा अक्रूरादयोऽनुरुन्धाना आनुकूल्यमाचरन्तश्चातुर्य्येण वशीकुर्वन्तो वा; यद्वा, श्रीमधुपुर्य्यां स्थिताः—कंसे हते सद्योऽत्र श्रीकृष्णं द्रक्ष्यामो गोकुलक्रीडाञ्च तस्य नैकट्यात् सर्वां श्रोष्याम इत्यादिस्वार्थमपेक्षमाणा इत्यर्थः—एतच्चाग्रेऽक्रूरयाने व्यक्तं भावि। पर्युपासते सर्वतोभावेन सेवन्ते, समीपे वा तिष्ठन्ति, अतीते वर्त्तमाना तदविच्छेदात्। 'पर्युपासत' इति पाठो वा। 'जातं जातमहन्' इति पूर्वमुक्तम्; ते कति हता इत्यपेक्षायामाह—हतेष्विति। ते हि पुरा मरीचेः पुत्रा देवाः श्रीब्रह्मण्यपराधेनासुरत्वप्राप्त्या हिरण्यकशिपु-पुत्रात् कालनेमेरुत्पन्नाः षड्गर्भा इति ख्याताः; पिता सर्वान् वधिष्यतीति हिरण्यकशिपु-शापतः श्रीदेवकीगर्भे योगमाया-द्वारा श्रीभगवता नियोज्य तत्पितृ-कालनेम्यवतार-कंस-हस्तेन घातिता इत्यादिकमत्र श्रीहरिवंशाद्युक्तमनुसन्धेयम्; घातनञ्च तेषां विमुक्तय एवेत्यग्रेऽत्र पञ्चाशीतितमाध्याये व्यक्तं भावि। एवं तेषां हननेन श्रीभगवत्क्रूतोपेक्षापि परिहृता स्यादिति दिक्। औग्रसेनिनेति हतानां भागिनेयत्वबोधनेन कंसस्य महाक्रूरत्वं सूचयति। अनन्तं संकर्षणं चतुर्व्यूहद्वितीयं प्रचक्षते वदन्त्यभिज्ञाः॥

६—अपि-शब्दः पूर्वोक्त-क्षीरोदशाय्यापेक्षया; विश्वस्यात्मा व्यापकोऽतो विदित्वा; यद्वा, अन्तर्यामी यदूनां भयं विदित्वा निवेदनं विनापि तद्भयनिरासार्थमित्यर्थः, सम्यक् प्रोत्साहनादिपूर्व्वकमादिशत्। कुतः? निजः स्वयमेव नाथः, किंवा निजाः श्रीवसुदेवादयो नाथा येषां तेषां भक्तवात्सल्यादिति भावः यद्वा, विश्वस्यात्मा प्रभुरिति योगमायां प्रति समादेशे हेतुः, तस्या अपि तदधीनत्वात्—योगो भगवच्छक्तिविशेषः, स एव श्रीब्रह्मादीनामपि मोहनान्माया, ताम्॥

७—देवि हे जगत्पूज्ये! भद्रे हे सर्व्वमंगले! एतत् सर्व्वं तस्याः प्रोत्साहनार्थम्; यद्वा, तत्र गमने योग्यतोक्ता; पुनर्विशेषेण प्रोत्साहयति किञ्च, नन्दयति जगदिति नन्दस्तस्य गोकुले आवासे अन्या वसुदेवभार्य्याः कंसात् सम्यक् विग्ना भीताः; हि निश्चितम्॥

८—गर्भं भ्रूणं शेषाख्यं संकर्षणाभिधं धाम रूपमेकं सम्यगलक्षितं सुखपूर्व्वकञ्च विकृष्य। अन्यत्तैर्व्याख्यातम्। यद्वा, ननु शेषाख्याश्चेत् तर्हि कंसभयाभावात् किमर्थं तथा कार्यम्? तत्राह—मामकं धाम आश्रयः; यद्वा, तद्धाम गोकुलं प्रति, तेन विना तत्र मम क्रीडासुखासम्पत्तेरिति भावः॥

९—अथानन्तरमेवेति देवकी–पुत्त्रत्वप्राप्तौ त्वरात् बोधयति। एवं श्रीबलरामस्यात्यल्पकालमेवाग्रजत्वं ज्ञेयम्; तच्चाग्रे व्यक्तं भावि। अंशेति तैर्व्याख्यातमेव। यद्वा, अंशानां श्रीब्रह्मादीनां भागधेयेन हेतुना। ननु शेषाकर्षणे यशोदायां जन्मनि च मम का योग्यतेत्यपेक्षायामाह—शुभे! हे सर्वोत्तमे। मत्प्रभावादुत्तमत्व–सिद्ध्या योग्या भूया इत्यर्थः। एवं तां प्रति वर–प्रदानं ज्ञेयम्; अतएव तया श्रीनन्दादिमोहनं वक्ष्यति; यद्वा, हे भाग्यवति! अतो यशोदायां भविष्यसि; यशोदायामिति तेन तव यशः। नन्दपत्न्यामित्यानन्दश्च भवितेति भावः॥

१०—१२—तदेवाभिव्यञ्जयति– अर्चिष्यन्तीति त्रिभिः। पूजयिष्यन्ति मनुष्या इति प्रायस्तेषामेव[1] सकामत्वात् धर्म्मेऽधिकाराच्च। सर्व्वेति तैर्व्याख्यातम्; यद्वा, सर्व्वकामान् ये वृण्वन्ति, तेषां सेव्यामित्यर्थः। तत्र हेतुः-सर्वेति। इत्यादिकञ्च तां प्रति प्रसादवर[2] एव। तथा च श्रीहरिवंशे, (विष्णु–पु० २।३० —'प्रसादं ते करिष्यामि मत्प्रभावसमं भुवि। येन सर्वस्य लोकस्य देवि! देवी भविष्यसि॥' इति कुर्व्वन्ति करिष्यन्ति भुवि वर्त्तमानाः सर्व्वेऽपीत्यर्थः। दुर्गादिनामान्यर्चकानां भावभेदेन तत्तत्कामापेक्षया; किंवा स्थानभेदेन तत्र तत्र तत्तदाख्यया प्रसिद्धेः; तत्र च क्वापि नामैकम्, कुत्रापि द्वे, क्वचिच्च बहूनीत्येतदभिप्रायेण तत्र तत्रेति शब्दप्रयोगः। चकाराश्च सर्व्वेषामेव प्राधान्यबोधनार्थमिति॥

१३—श्रीगोकुलसम्बन्धेन तस्यापि माहात्म्यमुद्देक्ष्यतीति संकर्षण–(जन्म) प्रयोजनान्तरमाह—गर्भेति। वै एव; गर्भतः संकर्षणादेव, न तु शेषत्वादिना प्रलयादौ जगदाकर्षणादित्यर्थः। गर्भसंकर्षणादेव गोकुलप्राप्त्या सर्व्वलोकानां रमणात्, तथैव बलस्योच्छ्रयाद्याधिक्यात्॥

१४—भगवता परमेश्वरेणेति तदादेशप्रतिग्रहे हेतुः। परिक्रम्य तदादिष्टसंसिद्ध्ये तं प्रदक्षिणीकृत्य तद्भगवद्वचो यथादिष्टं तथैव, न तु किञ्चित्तद्व्यभिचारेणेत्यर्थः॥

---

१. तेषामपि (ग); २. प्रसाद (ग)।

१५—योगमायैव योगनिद्रा निद्रावत् सकललोकबोधहरणात्तया प्रकर्षेण नीत इति देवक्या दुःखादिकं रोहिण्याश्च विस्मयादिकं गोकुलादिवासिनाञ्च तज्ज्ञानादिकं किमपि नाभूदिति बोधितम्। अत्र च श्रीहरिवंशाद्युक्तानुसारेणैवं ज्ञेयम्—प्रागेव श्रीवसुदेवाहित-गर्भायां श्रीरोहिण्याः पश्चाद्गोकुलं गतायाः सप्तमे मासि तं गर्भमपसार्य देवकीजठरात् सप्तमासकं गर्भमलक्षितमाकृष्य* श्रीरोहिण्युदरं नीत इति। तथा च श्रीहरिवंशे (विष्णु–पु० २।३१) योगनिद्रां प्रति श्रीभगवदुक्तौ,—'सप्तमो देवकीगर्भो योऽशः सौम्यो ममाग्रजः। स संक्रामयितव्यस्ते सप्तमे मासि रोहिणीम् ॥" इति।"

तन्नयनप्रकारविशेषश्च तत्रैव (हरिवंशे विष्णु–पु० ४।३-६)—

'सार्द्धरात्रे स्थितं गर्भं पातयन्ती'[1] रजस्वला। निद्रया सहसाविष्टा पपात धरणीतले ॥
सा स्वप्नमिव तं दृष्ट्वा स्वगर्भे गर्भमाहितम्। अपश्यन्ति च तं गर्भं मुहूर्त्तं व्यथिताभवत् ॥
तामाह निद्रासंविग्नां नैशे तमसि रोहिणीम्। कर्षणेनास्य गर्भस्य स्व-गर्भे चाहितस्य वै ॥
संकर्षणो नाम शुभे! तव पुत्रो भविष्यति ॥' इत्यादि।

अहो आश्चर्ये खेदे वा, देवक्या गर्भो विस्रंसितो विस्रस्तः कंसभयादिति शेषः, तथा च श्रीविष्णुपुराणे (५।१।७२)—'सप्तमो भोजराजस्य भयाद्रोधोपरोधतः। देवक्याः पतितो गर्भ इति लोको वदिष्यति' इति। यद्वा, कंसेनेव केनचिदुपायेन पातित इत्यर्थः। व्यक्ततया तदनुक्तिस्तेषां तद्भयात्। विचुक्रुशुरुच्चैरार्त्तस्वरेण जजल्पुर्विलेपुरिति वा ॥

१६—विश्वस्यात्मा प्रभुरपि भक्तानामेवाभयंकरः; यद्वा, विश्वान्तर्यामितया सदा तस्मिन् वर्त्तमानोऽपि तदानीं तच्चित्ते भावविशेषेण पर्यस्फूरदित्यर्थः। तत्र च सर्वैश्वर्यपरिपूर्णतयेत्यभिप्रायेणाह—भगवानिति। एतदाद्यपद्यार्थं सर्वसम्मतं न स्यात् ॥

१७—पौरुषं धाम श्रीभगवत्तेजो मनसि श्रीभगवदावेशेन तत्तेजोऽभिव्यक्तेः; यद्वा, धाम प्रादुर्भावं प्रभावं वा; तथा च विश्वः—'धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति। दुरासदो निकटे गन्तुमशक्यश्चक्षुराद्यग्राह्यो वा; अतएवातिदुर्द्धर्षोऽभिभवितुमशक्यः सम्यक् बभूव। द्व स्फुटम् ॥

१८—शूरस्य सुतेनेति श्लेषेण तत्र तस्य सामर्थ्यमुक्तम्। देवी देवकीति श्लेषेण तस्या अपि तद्धारणयोग्यतोक्ता। सर्वोत्तमकमप्यात्मभूतमात्मनि प्रादुर्भूतं पुत्ररूपतया दधारेत्यर्थः। भगवन्तमिति शेषः; अच्युतांशमित्यस्य च द्वितीयव्याख्ययेदमेव पदं विशेष्यं ज्ञेयम्। आनन्दयन्तीत्यानन्दाः करा यस्य चन्द्रस्य तममृतरश्मित्वात्। अन्यत्तैर्व्याख्यातम्। यद्वा, न च्युता अंशा यस्य तं सर्वांशपरिपूर्णं भगवन्तमित्यर्थः। समाहितं साक्षादर्पितवत् प्रकाशितम्। हर्षशोकविवर्द्ध न इति पूर्वं शोकोऽप्युक्तः। अधुना च परमानन्द एव जात इत्याह—सर्वेषामात्मनां जीवानां कं सुखं यस्मात्तम्। कुतः? आत्मभूतं परमात्मरूपं परमप्रियत्वादित्यर्थः। यद्वा, न च योगिनामिव तद्धारणे यत्न इत्याह—आत्मना भूतं समाहितं सत् स्वयमेवाविर्भूतमित्यर्थः ॥

१९—सर्वजगतो निवास आश्रयः श्रीकृष्णस्तस्य निवासभूता परमाश्रयत्वं प्राप्तेत्यर्थः। किञ्च, देवकी साक्षाद्भगवन्मात्तयावतीर्णेत्यर्थ इति भाग्यविशेषेण परमशोभायोग्यतोक्ता; तथापि न रेजे नाशोभत। अग्निशिखायाः स्वसुखाभावाद्दृष्टान्तान्तरमाह—सरस्वतीति, वेदशास्त्ररूपा। ज्ञाने खले वञ्चकः परस्मिंस्तदप्रकाशक इत्यर्थः, तस्मिन् जने तस्यात्मसुखं सतीत्वेन ज्ञानखलेऽपि स्वतो बहुधोल्लासात्। भोजेन्द्रगेहे न ज्ञानखलस्य साम्यं बोधनमात्रत्वापेक्षया। अन्यत्तैर्व्याख्यातम्। यद्वा, ज्ञानखलः परोपतापार्थं शास्त्रज्ञानपरस्तस्मिन् कथञ्चित् प्राप्तोत्तमा सरस्वती यथा न रेजे आधारदोषात्तद्वदित्यर्थः। श्लेषेण भोजयन्तीति भोजाः सूदास्तेषामिन्द्रः श्रेष्ठस्तस्य गेहे महानसे भस्मादिभी रुद्धा ज्वलदग्निशिखान्येषामुपकारमकुर्वाणा यथा न रेजे इति तस्य दुष्टत्वाभावाद्दृष्टान्तान्तरम्। अथवा भोजेन्द्रगेहे रुद्धापि नितरां न रेजे किम्?—काक्वा, अपि तु नितरां रराजैवेत्यर्थः; यतः सर्वेति साक्षाद्भगवत्समाधिष्ठितेत्यर्थः। रुद्धाप्यग्निशिखा यथा राजते, तथा तस्यां नितरां दीप्त्यभावेनान्यो दृष्टान्तः—सरस्वती पाण्डित्यरूपा सती सर्वोत्तमा ज्ञानस्य खले सूचके संकेतादिनेव प्रतिपादके यथा चातुर्यविशेषव्यञ्जनेन नितरां राजत एवेति ॥

२०—वीक्ष्य साक्षाद्दृष्ट्वा प्रभयेत्यत्र विशेषः श्रीविष्णुपुराणे (५।२।५)—'न शेके देवकीं द्रष्टुं कश्चिदप्यतितेजसा। जाज्वल्यमानां तां द्रष्टुं मनांसि क्षोभमाययुः ॥' इति। शुचि शुद्धं न तु पूर्ववत्तद्वञ्चनार्थं कपटं स्मितं यस्यास्तामाह। स्वचित्ते गुहां हृदयमुदरं वा; श्लेषेण मद्भयाद्गुप्तस्थानमाश्रितः, किं वा नागस्य मम हननार्थं हरिः सिंहो दरीं श्रित इति ॥

२१—अद्याधुना, तत्राप्याशु, अयं स्वदेहरक्षार्थकः क्षणिकोऽपि वा सर्वकालं यश आदि हन्ति। श्रिया इत्यादेर्यथोत्तरमव्ययत्वे यश आदेश्च यथोत्तरं तदपेक्ष्यत्वे श्रैष्ठ्यम्। यदर्थं वधस्तज्जीवनमपि हन्यादिति किं तेनेति भावः ॥

२२—दिनानि कतिचिद्यज्जीव्यते, तदपि शुभम्, तत्राह—स इति तत्प्रत्यक्षतां तात्कालिकतां वा बोधयति; खलु वितर्के निश्चये वा। नृशंसितं हिंसा। मनुजाः सर्व एव मनुष्याः। अन्यत्तैर्व्याख्यातम्। यद्वा, देहे अमृते जीवत्यपि सति, किं वा देहे सति मृते च सतीत्यर्थः ॥

---

*. "श्रीरोहिण्याः पश्चाद्……गर्भमलक्षितमाकृष्य' इति 'ख'— करलिप्यां प्राप्तम्, प्रकरणसंगतत्वाद्गृहीतञ्च।

[1] पालयन्ती (ख)।

२३—इत्येवं विचारेण । भावादभिप्रायाच्चेष्टिताद्वा । स्वयमेव; न त्वन्येषां मन्त्रणादिना सम्यङ्निवृत्तः, न तु गर्भपातनादौ यत्नं चकारेत्यर्थः; यतः प्रभुस्तादृशविचारे समर्थः । यद्वा, स्वयमात्मनैव, न त्वन्यसम्मत्या प्रभुः प्रभुम्मन्य इत्यर्थः । हरेर्वैराद्यशेषदोषहरस्यापि; किं वा स्वगुणैः सर्वमनोहरस्यापि यद्वैरं तस्मिन् द्वेषस्तस्यानुबन्धोऽनुवर्त्तनम् , तं करोतीति तथाभूतः सन् तस्य हरेर्जन्म प्रतीक्षमाण आस्ते बभूवेत्यर्थः । वैरानुबन्धे च विशेषः श्रीहरिवंशे (विष्णु पु० २।४) सचिवान् प्रति कंसोक्तौ,—'मासान् वै पुष्यमासादीन् गणयन्तु मम स्त्रियः । परिणामे तु गर्भस्य शेषं ज्ञास्यामहे वयम् ॥' इति; अतएव तत्रैव हरिवंशे (विष्णु-पु० ४।८)—'यदर्थं सप्त ते गर्भाः कंसेन विनिपातिताः । तं तु गर्भं प्रयत्नेन ररक्षुस्तस्य मन्त्रिणः ॥' इति ॥

२४—चिन्तयन् अयमधुनैवाविर्भूय मां हनिष्यतीत्येवं भावयन् । हृषीकेशमिति सर्वेन्द्रियवृत्तौ परिस्फुरणेन हृषीकेशताभिव्यक्तेः । यद्यपि तन्मयत्वदर्शनं योगिनामपि सुदुर्ल्लभं प्रेमभक्तानामेव सम्पद्यते, तथापि तेषु परमानन्दमयत्वेनास्मिंश्च परमदुःखमयत्वेनेति सिद्धान्तः ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अर्थतन्त्रो देवकार्यप्रधानः अधर्मे विक्रमं यथा न विहन्ति तथा किं घटनीयमित्यर्थः । गुरुमत्याः गुरुतरगर्भवत्या अनुकायं प्रतिशरीरम् ॥ २१ ॥ योऽत्यन्तेति अत्यन्तनृशंसितेन नृशंसचेष्टितेन वर्त्तते स एष जीवन् संपरेतः जीववर्जित देह इति देहात्माभिमानिनः पुरुषस्य अन्तकाले देहमात्रपर्यवसिते यशोमलं दोषप्रयुक्तम् अनुभूत्या तिष्ठतीत्यर्थः ॥ २२–२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अर्थतन्त्रो देवकार्यप्रधानोऽयं हरिः मम विक्रमं यथा न विहन्ति तथात्र हरिविषये मे मयाऽधुना आशु किं करण्यं किं घटनीयं यद्येनां हन्मि तर्ह्यस्याः स्त्रियास्तत्रापि स्वसुर्भगिन्यास्तत्रापि गुरुमत्याः गुरुतरगर्भिण्या वधोऽयं यश आदीनि हन्ति क्षपयति अनुकूलमित्यायुर्विशेषणं अनुकायमितिपाठान्तरं तदा प्रतिशरीरं यश आदीनि हन्तीत्यर्थः ॥ २१ ॥ स गुरुमतीहन्ता स्वयं जीवन्नपि संपरेतः मृतप्रायः खलु यः पुमान् अत्यन्तनृशंसितेन क्रूरचेष्टितेन जीवेत वर्त्तेत तनुमानिनः देहात्माभिमानिनो देहे मृते नष्टे सति मनुजास्तं शपन्ति स चान्धन्तमः नरकं ध्रुवं नूनं गन्ता गमिष्यति ॥ २२ ॥ इतीत्थं घोरतमाद्भावाद्गुरुमतीवधोद्योगरूपात्स्वयं प्रभुस्तां हन्तुं समर्थोपि निवृत्तः ततः हरेर्जन्म प्रतीक्षमाणस्सन् वैरानुबन्धं वैराविच्छेदं कुर्वन्नास्ते आस ॥२३॥ आसनादिक्रियास्वपि हरिमेव चिन्तयमानः जगत्तन्मयं हृषीकेशमयं तत्प्रचुरमपश्यदित्यर्थः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अस्तु तव प्राणहरो हरिस्ततः किमत्राह–किमद्येति । अद्य मे मया तस्मिन् गर्भस्थिते हरौ घटनीयम् उपद्रवत्वेन कर्तव्यं तत्केन प्रकारेणेति चिन्त्यते तदप्याशु कर्तव्यं न कालः क्षेपणीयः, कुतोऽत्राह, अर्थेति अधुना अहमर्थतन्त्रः प्रयोजनाधीन इति यत्तस्मात् कालो न क्षेपणीय इति तत्राह, यथेति । यथा अयमर्थतन्त्रः देवकार्यलक्षणप्रयोजनैकपरायणो गर्भस्थितो हरिः मम विक्रमजीवनलक्षणं न विहन्ति तथा झटिति करणीयमित्यर्थः । यथा अर्थतन्त्रः पुरुषः स्वविक्रमं न विहन्ति तथेति वा, ननु, तर्हि तद्वध एव श्रेयानिति तत्राह, स्त्रिय इति । अयं स्त्रियो वधो यशो हन्ति अस्त्वयशस्करस्ततः किं तत्राह, स्वसुरिति स्वसुर्वधः श्रियं हन्ति "जीवन्भद्राणि" इति वचनात्तदप्यस्त्विति तत्राह, गुरुमत्या इति गर्भिण्या वधोऽनुकूलं क्लृप्तमायुर्हरति अतो वधो न घटनीय इति भावः ॥२१॥ ननु लोके केषाञ्चित्क्रूरकर्मिणां दीर्घायुष्यदर्शनात्तवापि किं न स्यादित्यत आह–स एष इति । जीवन् परेतो जीवन्मृतो न केवलं क्रूरकर्मकर्तुरत्र जीवन्मृतमात्रम् अपि तु मृते पुरुषार्थसर्वस्वहानिः स्यादित्याह, देह इति । अभिमानिनो देहे मृते पञ्चत्वं प्राप्ते तं देहमन्वर्थकामौ पुरुषार्थौ नश्यतः साधकाभावात् हिशब्दोऽर्थकामावनु धर्मो नश्यतीति दर्शयति तमनुगौ स्वर्गादिशब्दवाच्यो लोको नश्यति साधकाभावात् देहमनुमानिनोऽमलं यशो नश्यति ध्रुवं तत्र न संशय इत्यर्थः । अर्थकामयश आदिनाशे गौर्दृष्टिर्ज्ञानं नश्यति तान्दृष्टिमनुमानिनः पुंसो ध्रुवं नित्यसुखानुभवलक्षणो गौर्मोक्षो नश्यतीति वा स्वतोऽनृतस्यापि कंसस्य एवम्विधं ज्ञानं सच्चेतनावेशादुपपद्यते इति क्षुद्रबाधानवकाशः "गौर्दृष्टिर्दीधितिः स्वर्गे" इति हलायुधः ॥ २२ ॥ भावात्कर्मणः "भावो लीला क्रिया चेष्टा" इति यादवः स्वयं प्रभुर्ज्ञानित्वाभिमानी स्वमनसैव समर्थम् इति वा वैरानुबन्धवित् वैरम् अनुबन्धं स्नेहं च वेत्तीति वैरमनुस्नेहं करोतीति वा "विद कृतौ" इतिधातुः अनेन निरन्तरतच्चिन्तया स्नेहस्तर्क्यते न तु तात्विकः स्वत एव प्रधानो द्वेष इति ध्वनयति निरन्तरवैरकृद्वा ॥ २३ ॥ तच्चिन्ताप्रकारं दर्शयति-आसीन इति । सम्विशन् शयानः हृषिरानन्दः स एव केशो यस्य स तथा तं यद्वा हृषीकाणामिन्द्रियाणामीश इति तत्तत्पदार्थस्य कृष्णात्मकत्वमाशङ्क्य तन्मयत्वम् ॥ २४–२५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आसीन इति येनान्ते स दोषोऽपि तद्रूपं यास्यतीति भावः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

प्रथमोऽध्यायः।

दशमक्रमसन्दर्भे सन्दर्भाणां समाहृतिः। क्रियते यन्निदेशेन स मेऽनन्यगतेर्गतिः॥
उक्त्वा सर्गविसर्गादिलक्षणानि नवैव तु। दशमे दशमः कृष्ण आश्रयत्वेन कथ्यते॥

१—अथ (भा.१।१।१२) "सूत जानासि भद्रं ते भगवान् सात्वतां पतिः। देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया॥" इति श्रीशौनकसूतसंवादे उपक्रान्तस्य श्रीकृष्णावतारप्रयोजनबीजस्य, (भा. १।८।३५) "श्रवणस्मरणार्हाणि करिष्यन्निति केचन" इति पुनः कुन्तीस्तुतौ किञ्चिदङ्कुरितस्य (भा.९।२४।६१) "कलौ जनिष्यमाणानां दुःखशोकतमोनुदम्। अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः॥" इति नवमान्ते पुनः पल्लवितस्य विस्तारं पुष्पफलावधिमवगमयितुं (भा०२।१०।२) दशमस्य विशुद्ध्यर्थं नवानामिह कीर्तनम्" इति सर्गविसर्गादिनवलक्षणकथनद्वाराश्रयस्य दशमस्य श्रीकृष्णस्य विशुद्ध्यर्थं सर्गादिप्रासङ्गिककथनम्, वस्तुतस्तु श्रीकृष्णावतारकथनमेव श्रीभागवतप्रतिपाद्यमिति पूर्वोक्तसर्वविस्मरणार्थम्॥ तत्र तत्रालंबुद्ध्या पुनः सम्यक् श्रीकृष्णचरितश्रवणादिकमेव कार्यमिति बोधयितुं च परीक्षिता यत् पृष्टं तद्दर्शयन्नाह,—श्रीराजोवाच–कथित इति। तत्र तत्रालंबुद्धिद्योतकं तावताहं कृतार्थो न स्याम्; यस्य कथनेन कृतार्थः स्याम् तत् कथयति क्त प्रत्ययध्वनिः। सूर्यसोमयोरिति वक्तव्ये सोमशब्दस्य प्रथमोपादानं यदुवंशमूलभूतत्वेन पूजार्थम्, न केवलं वंशविस्तार एव कथितः; उभयवंश्यानां राज्ञां परमाद्भुतं चरितमपि; तथा मे न तृप्तिर्जाता, श्रीकृष्णावतारं सम्यक् कथयेति वाक्यार्थः। उभयवंश्यानामित्यनेनैव रघुयदोश्चरितेऽप्यायाते॥

२—यदोश्चेति पुनरुपादानं तेषामप्यधिको यदुर्यद्वंशे वसुदेवो जात इति यदोः पूजार्थम्। तत्र (भा.९।२४।३०) "वसुदेवं हरेः स्थानम्" इत्युक्तेस्तस्मात् स्वयं हरिरवततार। अतएव (भा.९।२३।१९-२०) "यदोर्वंशं नरः श्रुत्वा सर्वपापैर्विमुच्यते। यत्रावतीर्णो भगवान् परमात्मा नराकृतिः॥" इत्याशयेनाह—तत्रांशेनेत्यादि। तत्र यदोर्वंशे आंशेन अंशानां समूहेन; तस्य समूह इत्यण्। सर्वैरंशैरिति यावत्, अंशेन बलदेवेनेति वा। अथान्यथा (भा. ९।२४।५५) "अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल" इति,—स्वयमेव किलेति शब्दैः (भा० १।३।२८) "कृष्णस्तु भगवान् स्वयम्" इति स्वयं शब्देनाप्यसङ्गतिः स्यात्॥ (३)

४— श्रीकृष्णगुणानुवादादेव विषयनिवृत्तिः स्यादित्याह,—निवृत्ततर्षैरुपगीयमानादित्यादि। आपशुघ्नात् पशुघ्नो व्याधः, तमभिव्याप्य, कः पुमान् उत्तमश्लोकगुणानुवादाद्विना विरज्येत, विरक्तो भवतीत्यर्थः। तच्छ्रवणेनैव सर्वत्रालंबुद्ध्या हेयत्वेन सर्वं जानाति। पशुघ्नोऽपि विरज्यति, किं पुनर्विद्वान्? वक्ष्यति च (भा०१०।४७।१८) "यदनुचरितलीला कर्णपीयूष विप्रुट्, सकृददनविधूतद्वन्द्वधर्मा विनष्टाः। सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना बहव इह विहङ्गा भिक्षुचर्यां चरन्ति॥" इति; यद्वा, पशुघ्नात् विना को विरज्येत? पशुघ्नः कर्मनिष्ठः, स्वर्गादिलोभेन ये पशून् घ्नन्ति, त एव न विरज्यन्ति। यद्वा, अपगता शुक् येषां ते अपशुचो वैष्णवास्तान् हन्ति द्वेष्टीति अपशुघ्नो वैष्णवनिन्दकः, तं विना। गुणानुवादं विशिनष्टि,-निवृत्ततर्षैर्निस्पृहैरात्मारामैरप्युपगीयमानात्, उपाधिकतया गीयमानात् न तु गीतात्; भवौषधात् संसारव्याधिभेषजात्; श्रोत्रमनोऽभिरामादिति मुक्तमुमुक्षुरागिणामेवानुकूलात्। रागिणस्तु श्रोत्रमनोऽभिरामत्वेनैव पूर्वं शृण्वन्ति, पश्चाद्वस्तुमर्यादया श्रवणेनैव विषयेभ्यो विरज्यन्तीति भावः॥ (५,६)

७—अतस्तमेव श्रीकृष्णगुणानुवादं कुर्वित्याह—वीर्याणि तस्येत्यादि। तस्य श्रीकृष्णस्य वीर्याणि वदस्वेति। (पा०१।३।४७) 'ज्ञानयत्नोपच्छन्देषुवदः' इत्यात्मनेपदम्। यत्नपूर्वकं वदस्वेति भावः। हे स्वेति वा छेदः, स्व सर्वभूतात्मनामात्मन्? यन्मयतया (भा०१।२।२) "तरवोऽभिनेदुः" इत्युक्तत्वात् कीदृशस्य? मायामनुष्यस्य, माया स्वाभाविकी प्रकाशिका शक्तिस्तया मनुष्यस्य मनुष्याकृतेः—(भा०७।१०।४८,७।१५।७५) "गूढं परं ब्रह्म मनुष्यलिङ्गम्" इत्युक्तेः। यद्वा, मा लक्ष्मीः शोभा तस्या या प्राप्तिस्तया मनुष्याकृतेः, शोभालम्भेनैव मनुष्यत्वम्, न तु वास्तवं तस्येत्यर्थः। माया लक्ष्म्याः शोभायाः हेतोरिति पञ्चमी वा। पुनः कीदृशस्य? अखिलदेहभाजामन्तर्बहिर्वर्त्तमानस्येति यावत्। पुरुषकालरूपैर्मृत्युम्, अमृतं मोक्षमानन्दञ्च प्रयच्छतः,— मृतञ्च अमृतञ्चेत्येकशेषः; पुनरेकवचनम्। कालशक्त्या मृत्युम्, पुरुषरूपेण श्रीनारायणेन मोक्षम्, रूपेण स्वरूपेण तमालश्यामलवंशीविलासरूपेण। आनन्दमिति एकशेषः कृत्वा यथासंख्यं योजनीयम्। अथो हे पुरुष! हे विद्वन्!-इति सम्बोधनद्वयमेव; पुरुषेति सम्बोधनेन पौरुषत्वं व्यज्यते। तत्तु उपदेशेन परनिस्तारकत्वम्, विद्वत्ता च भगवत्परायणताद्वयं त्वय्यैवास्तीति भावः। कालरूपैः कालस्य श्याममहसो रूपैर्नानाविधैस्तरङ्गैर्मृत्युममृतमानन्दञ्च प्रयच्छतः'—अदर्शनेन मृत्युम्, दर्शनेनामृतम्। अथवा अखिलदेहभाजां मध्ये अन्तः— अन्तरङ्गाणां सुहृदाममृतं प्रयच्छतः, बहिः— बहिरङ्गाणां दैत्यानां मृत्युम्। कैः? कालरूपैः, कालरूपाभ्यां कालशक्त्या मृत्युम्, रूपशक्त्या अमृतं यथायोगं योज्यम् (गी०११।३२) 'कालोऽस्मि लोकक्षयकृत्,इति स्वोक्तेः, 'कालरूपान्वमोदत' इत्युक्तेश्च। अथवा पुरुषकालरूपैरिति पूर्ववदेव पुरुषाः— स्वजना यादवादयः कालः कालशक्तिश्च, तैः; बहिरङ्गाणां मृत्युम्, रूपेणान्तरङ्गाणाममृतमिति पाण्डवानामन्तरङ्गत्वं कुरूणां बहिरङ्गत्वं मनसि कृत्वा तत्तत्परिणामस्फूर्त्या निरुक्तिः॥ (८)

९—वीर्याणि वदस्वेत्युक्त्वा किमयमामूलतः कथयति, न वेति शङ्कमानः स्वयमामूलतः पृच्छति—कस्मादित्यादि। मुकुन्दो भगवान् कस्माद्धेतोः पितुर्वसुदेवस्य गेहाद्व्रजं गतः, व्रजगतश्चेत्तदा पुनः क वा ज्ञातिभिर्यदुभिः साकं वासं कृतवानिति

व्रजमथुराद्वारकाविलासा एव कथनीयत्वेन पृष्टाः। सात्वतां पतिरिति सन् श्रीकृष्णः स उपास्यत्वेन वर्तते येषां ते सत्वन्तो वैष्णवाः, तेषां मतं सात्वतम् (पा० ४।३।१२०) 'तस्येदम्' इत्यण् तदाचष्टे इति णिजन्तात् क्विपि कृते सात्वदिति स्थितेस्तेषां सात्वताम्, सात्वतमतव्याख्यातॄणां पतिः पालकः ॥ १० ॥

११—आमूलतः पृष्ट्वा कियदवधि पृथिव्यवस्थानं च पृच्छति—देहं मानुषमास्थायेत्यादि। मानुषं देहमास्थाय स्थितैर्वृष्णिभिः सह यदुपुर्यां मथुरायां द्वारकायां वा अवात्सीत्; कति वा पत्न्यश्चाभवन्, तन्मे कथयेत्यर्थः। स्थितैरित्यध्याहार्यम्। तेन च वृष्णीनां देवत्वम् न मानुषत्वमिति व्यङ्ग्यम्, (भा १०।१।२२) "यदुषूपजन्यताम्" इति वक्ष्यमाणत्वात्। मानुषं देहं राजकन्याभावेन मानुषीं तनुमाश्रित्य पत्न्यो वा कत्यभवन्निति वान्वयः। तेन च तासां सर्वासां लक्ष्मीत्वमायातम् ॥

१२—स उपसंहरति,—एतदन्यच्चेत्यादि। एतदिति यद्यत् पृष्टम् अन्यदिति यदपृष्टं वा। ननु कथमहं सर्वमेव ज्ञास्यामि? तत्राह—सर्वज्ञः, अत एवार्हसि। श्रवणे स्वस्य योग्यतां दर्शयति,—श्रद्दधानायेति। अतएव विस्तृतं यथा स्यात् ॥ (१३)

१४—तच्छ्रुत्वा श्रीशुको यदाह, तं सूतो वदति—एतन्निशम्येति। भागवतानां वैष्णवानां प्रधानः श्रेष्ठः। प्रधानः, प्रधानशब्दो वाच्यलिङ्गेऽपि दृश्यते। प्रधाना हरितामुहुरिति दर्शनात्। यद्वा, भागवतं शास्त्रं भागवतो धर्मो वा प्रधानं यस्य; साधुवादं यथा स्यात् 'साध्विति वादम्' इति णमुलन्तं वा पदम्, एतदित्यस्य विशेषणं वा ॥ (१५-१८)

१९—अथ पृथिवीनिवेदनं श्रुत्वा ब्रह्मा देवगणैः सह क्षीरोदतीरं जगाम,—श्रीकृष्णलोकगमनं प्रत्यसामर्थ्यात्। क्षीरोदशायी अनिरुद्ध एव तस्मिन्नेवास्य निवेदनमित्याशयेनाह—ब्रह्मा तदुपधार्येत्यादि ॥

२०—तत्र गत्वा किमकरोदित्याह—तत्र गत्वेत्यादि। पुरुषमनिरुद्धं पुरुषसूक्तेन उपतस्थे। कीदृशमित्याह—जगन्नाथमित्यादिविशेषणानि। तस्मिन्निवेदित एव भगवान् श्रीकृष्णोऽपि निवेदित इति कृत्वा तमेवास्तौत्। श्रीकृष्णं साक्षाद्गमनासामर्थ्यात् तत्र न गतमिति। श्रीकृष्णलोकस्य श्रीकृष्णेच्छयैव साक्षाद्भावः, न स्वसामर्थ्यात्। उक्तञ्च—(भा. २।९।२१) मनीषितानुभावोऽयं मम लोकावलोकनम्" इति। मनीषिता ममैवेच्छा ॥

२१—उपासनानन्तरमनिरुद्धस्यैव गगने प्रादुर्भूतां वाणीं ब्रह्मा अश्रौषीदित्याह—गिरं समाधावित्यादि। गगने समीरितां तस्य वाणीं निशम्य वेधास्त्रिदशानुवाच; तामेव गिरमाहेत्यर्थः। किं तदित्याह—गामित्यादि। मे मत्तः सकाशात् पौरुषीं गां वाचम्—हे अमराः शृणुत। पौरुषीमिति आनिरुद्धीम्। श्रुत्वा च तदनुरूपमाचरत चेत्याह—विधीयतामाशिवत्यादि ॥

२२—कासौ पौरुषी वागित्याह-पुरैवेत्यादि। पुंसा श्रीकृष्णेन स्वयं भगवता धराज्वरोऽवधृतो ज्ञातः। भवादृशा यदा मह्यं निवेदितस्ततः पूर्वमपि तेन ज्ञात इत्यर्थः। पुंसो महज्जनकादीन् त्रीन् पुरुषान् स्यति काले अवसाययति इति पुंसा; विनिक्षते पागोषादिशब्दवत्, तस्य तृतीयैकवचने 'पुंसा' इत्येवरूपम्। तेन परात्परेणेति स्वतः सिद्धज्ञानत्वात् परनिवेदनापेक्षा तस्य नास्तीति भावः। तेन पुरैव धराज्वरं ज्ञात्वा किमुक्तमित्याशङ्क्याह भवद्भिरंशैरित्यादि। स पुरैव ज्ञात्वा मां प्रति इदमुक्तवान्। भवद्भिर्भवदादिभिरंशैरेव ममांशभूतैर्भवद्भिरित्यर्थः। यदुषूपजन्यतामित्यवादीदिति भावः। अथवा सर्वमेवानिरुद्धस्यैव वचः। तदा किं भविष्यतीत्याह स यावदित्यादि। यावत्तावच्च साकल्ये। स ईश्वरेश्वरः—ईश्वराणामस्माकमपीश्वरः। पुंसेति तथा व्याख्यानात्। स्वकालशक्त्या यावत् साकल्येन ऊर्व्या भवं क्षपयन् भुवि चरेत्, चरिष्यतीति भावः। इति पुरुषस्यानिरुद्धस्य वाणी या गगने प्रादुरभूत्, सा ब्रह्मणा देवेभ्यः कथिता, न त्वियं ब्रह्मणो वाणी देवान् प्रति—भवद्भिरंशैर्यदुषूपजन्यतामिति अपितु श्रीकृष्णस्यैव। तेन सर्वैरंशैरेव भगवानवतीर्ण इत्यायातम्। यदवोऽपि भगवदंशा एव न तु देवांशाः। अथवा "पुरैव पुंसावधृतो धराज्वरः" इत्यादि (भा.१०।१।२५) "कार्यार्थं संभविष्यति" इत्यन्तमेव पुरुषवाक्यं ब्रह्मा श्रुत्वा देवेभ्यः श्रावयामास ॥

२३—वसुदेवगृह इत्यादि;—(भा.५।२४।३०) "वसुदेवं हरेः स्थानम्" इत्युक्तेः। तत्रैव तस्य प्रकाश उचित इति तस्य गृहे साक्षाद् भगवान् श्रीकृष्णो जनिष्यते। साक्षादिति स्वेनैव रूपेण। गृह इति गृहिणीपरम्, वसुदेवस्य गृहे देवक्याम्; वस्तुतः कारागारमेव तत्। ततस्तस्य कृष्णस्य प्रियापि श्रीरमादेवी च पृथिव्यां प्रादुर्भविष्यति। रमा तु आनन्दरूपिणी, ऐश्वर्यानन्दरूपिणी चेति द्विधा आद्या तु व्रजेऽवतरिष्यति, द्वितीया राजकन्यात्वेनेति तयोरर्थं सुरस्त्रियोऽपि संभवन्त्वित्याह-तत् प्रियार्थमिति। तस्य श्रीकृष्णस्य प्रियाणां श्रीराधादीनां श्रीरुक्मिण्यादीनाञ्च, अर्थं निमित्तम्। सुष्ठु रातीति सुराः शोभनाः स्त्रियः श्रीरमाविभूतयः श्रीकृष्णलोकवासिन्यः प्रमदोत्तमाः; यद्वा, सुराणां स्त्रियः सुरस्त्रियश्च सुरस्त्रियश्च—पूर्वोक्तरूपे उभयोरेकशेषः। श्रीकृष्णलोकवासिन्यः श्रीराधादीनां सेवानिमित्तम्; सुरलोकस्त्रियश्च श्रीरुक्मिण्यादीनामिति तत्प्रियार्थमिति-शब्दस्यार्थः ॥

२४—वासुदेवकलेत्यादि। अग्रजो भविता अग्रजत्वेन भविष्यति; अग्रतो भवितेति पाठेऽपि स एवार्थः। कलापि भूत्वा कथमग्रजो भवितेत्याशङ्क्याह—हरेः प्रियचिकीर्षया। तथा सति तस्य प्रीतिर्भवतीत्यर्थः ॥

२५—अथ भगवदवतारे सति दुर्घटसंघटनार्थं भगवद्योगशक्तेरप्यवतारं सूचयति—विष्णोर्माया भगवतीत्यादि। माया योगमाया; सा च द्वेधा—साकारा, निराकारा चेति। साकारा तु दुर्गा; निराकारा तु केवलशक्तिरूपा दुर्घटनपटीयसी भगवती। यया

उभयविधया जगदसंमोहितं भवतीत्यर्थः। अतो ज्ञानरूपैवेयं प्रकाशिका माया। मायाशब्दोऽत्र शक्तिविशेषपरः। सा च द्विविधेत्यत्र ज्ञानरूपायाः प्रकाशिकाया एवावसरः न त्वावरिकायाः। अतोऽकारप्रश्लिष्टः। सैव प्रभुणा आदिष्टा सती साकारा नन्दगृहे भविष्यतीति; निराकारा तु कार्यार्थे। कार्यं तु अघटनसंघटनागर्भसंकर्षणादि; वृन्दावने च गोपीनां भगवत्सङ्गे विहरिष्यन्तीनाम् (भा. १०। ३३।३७) "मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः" इत्यादिना छायारूपेण प्रतिसमीपे वर्त्तमानत्वादिकृष्णलीलानुकरणे तासां प्रतिकूलतादात्म्यतया पूतनादित्वस्वीकारः; रासे च तत्तत् सामग्रीसमवधानञ्च। ननु कथं विरुद्धगोपीच्छायादि पूतनाद्यनुकरणं स्यादित्याह—अंशेनेति। विरुद्धकार्यं प्रत्यंशेन, भगवत्कार्यं प्रति तु पूर्णभावेन॥ (२६-६९)

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे प्रथमोऽध्यायः॥ १॥

**

अथ द्वितीयोऽध्यायः

(१–८) ९—(भा० १०।१।२५) "आदिष्टा प्रभुणांशेन" इति ब्रह्माणं प्रति अनिरुद्धो यदुवाच, तमेव प्रभोरादेशं प्रपञ्चयति—अथाहमंशभागेनेत्यादि। हे शुभे! अहं देवक्याः पुत्रतां प्राप्स्यामि, त्वं यशोदायां नन्दपत्न्यां भविष्यसि। अथानन्तरं त्वं देवक्यां भविष्यसि, अहं नन्दपत्न्यां पुत्रतां प्राप्स्यामीति व्यत्ययोऽप्यथशब्देन बोद्धव्यः,—अव्ययानामनेकार्थत्वात्। अंशभागेन अंशानां भागेन भागधेयेन अंशा अत्र देवा इति बोद्धव्यम्। अथवा अंश्यते विभज्यते क्रिया अनेनेति अंशः कालः 'अंशांशत्क विभाजने' इत्यतो वाभिरूपम्। तस्य भागेन भेदेन; अहमादौ देवक्याः पुत्रो भविष्यामि, पश्चान्नन्दपत्न्याः, त्वमादौ नन्दपत्न्याः पुत्री भविष्यसि, पश्चाद्द् देवक्या इति। (भा० ९।२४।३०) "वसुदेवं हरेः स्थानम्" इति लक्ष्यलक्षणभावात् हरेः स्थानत्वं हि वसुदेवत्वम् तदुभयोरानकदुन्दुभिनन्दयोरेवास्ति। नन्दादयोपि यदुवंशान्तर्गताः,—क्षत्रियवैश्ययोः सम्बन्धात्, तेन (भा० १०।१।२२) "यदुषूपजन्यताम्" इति तेषामुभयत्रैवावतारश्च। अत एवं स्वयं वक्ष्यति भगवान् (भा० १०।४५।२३) "ज्ञातीन् वो द्रष्टुमेष्यामः' इत्यादि॥ (१०—१५)

१६—अथ (भा० ।१०।१।२४) "वासुदेवकलानन्तः" इति पूर्वोक्तमुपपादयति—(भा० १०।२।५) "सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते" इत्यादि। वैष्णवं धाम श्रीकृष्णतेजः, अथवा शेषतल्परूपं स्थानं यमनन्तं प्रचक्षते, अनन्तमित्याहुः, सप्तमो देवक्या बभूव। अयमर्थः—भगवद्धामत्वेनायमपि भगवानेव, तथापि यद्देवक्याः जठरस्थतया जीववद्गर्भाकारतां प्राप, यच्च योगमाया रोहिण्यां संक्रामयामास, संक्रामिते च तस्मिन् (भा० १०।२।१५) "अहो विस्रंसितो गर्भः" इति वा यल्लोकभ्रान्तिस्तत् सर्वं विचारतो वक्ष्यमाणस्य भगवतः प्रादुर्भावस्य व्यतिरेकमुखेन गर्भाकारताद्यभावसूचनार्थम्; यतोऽनन्तस्य गर्भत्वं कथितम् न तस्येति; तदेव दर्शयति भगवानपीत्यादि। आनकदुन्दुभेर्मन आविवेश मनसि आविर्बभूव। अंशानां भागो यस्मात्तेन परिपूर्णभावेनेत्यर्थः। विग्रहेण कथं मन आविवेश? तत्राह—भगवान्-अचिंत्यपरमैश्वर्य्यः॥ उत्तरागर्भे कथं प्रविवेश? निरवकाशे स्तम्भे नृसिंहरूपेण कथमाविरासीत्? तथाविधस्य तस्य तथाविधैव शक्तिर्व्यापकतत्वात्। अत आह विश्वात्मा। विग्रहरूपेण विश्वात्मनि गर्भाकारवैलक्षण्यप्रतिपादनारम्भः।

१७—तन्मनसि तस्मिन् प्रविष्टे सति तस्य यथा रूपमासीत्तद्दर्शयति—स बिभ्रदित्यादि। वसुदेवः पौरुषं पुरुषाकारं बिभ्रत् धाम बभूव, तेजःस्वरूपोऽभवदित्यन्वयः। (भा० ९।२४।३०) "वसुदेवं हरेः स्थानम्" इति यत्तस्य सान्वयत्वं दधान इति भावः। अतएव दुरासदो दुर्विषहो भूतानां संबभूव ह, ह स्फुटम्—धामस्वरूपत्वात्। दुरासदत्वादि अत्र दृष्टान्तः—राजमानो यथा रविः स्वत एव सहजो दुर्विसहो रविः तत्र सुराजमानः अन्तर्वर्त्तिनारायणप्रभया राजमानो द्योतमानः। तथा च 'ध्येयं सदा सवितृमण्डलमध्यवर्त्ति' इत्युक्तेः। तथाविधो रविरिवेति राजमानशब्दतात्पर्यम्। अथवा, पुरुषः पुरुषोत्तमः, तस्य धाम पौरुषं धाम विग्रहम्॥

१८—अथ वसुदेवः स्वमनसि प्रादुर्भूतं भगवन्तमनुभूय कथमयं देवक्यामाविर्भवतीति समाधिना निकटस्थितायामेव तस्माद्गृहाद्गृहान्तरमिव नीयमानदशया सञ्चारयितुमुद्यतो यदासीत्, तदा स्वयमेव भगवानप्युभयोः पितृमातृभावमापादयितुं वसुदेवमनस्तो देवकीमनसि सञ्चचारेत्याह्-ततो जगन्मङ्गलमित्यादि। शूरसूतेन वसुदेवेन समाहितं समाधिना भावनया आहितमर्पितं जगन्मङ्गलं जगन्मङ्गलावतारं श्रीकृष्णं मनस्तो मनसि दधार। कीदृशम्? अच्युता अस्खलिता अंशा यत्र पूर्णत्वात्; सर्वात्मकसात्मभूतं विग्रहरूपम्। भगवद्विग्रहस्य सर्वात्मकत्वम् पूर्वं पूर्वमुक्तम्, (भा० ८।६।९) "योगेन धातः सह नस्त्रिलोकान्, पश्याम्यमुष्मिन्नु ह विश्वमूर्त्तौ" इत्यादि। तत्र दृष्टान्तः—काष्ठा यथेत्यादि। काष्ठा पूर्वा दिक् आनन्दरूपं चन्द्रं यथा दधाति, न हि चन्द्रस्तस्यां जायते, अपितु उदयत्येवेति॥

१९—तदा सा कीदृश्यभूदित्याह—सा देवकीत्यादि। सर्वजगन्निवासः श्रीकृष्णस्तस्य निवासभूता सा भोजेन्द्रगेहे रुद्धा देवकी अग्निशिखेव किं न रेजे? अपि तु रेजे एव। भोजेन्द्रगेहे रुद्धेति राजमानताऽभावस्तथापि वस्तुमहिम्ना नितरां राजमान-

त्वम् । भोजेन्द्रगेहे रुद्धेत्येकदेशे दृष्टान्तः । ज्ञानखले ज्ञानेनापि खले आत्मवञ्चके ज्ञानमनुभूय अव्यवहारिणि जने सती शोभनापि सरस्वती यथा तस्य सुखाय न भवति, तथा तथाविधराजमाना सा देवी भोजेन्द्रस्य सुखाय नाभूदिति वाक्यैकदेशे दृष्टान्तः, नत्वखण्डवाक्ये । यद्वा, ज्ञानखले रुद्धापि सती उत्कृष्टा सरस्वती विद्यात्मिका वाणी यथा शोभते, आकारेण तस्य विद्यास्यातीति लोकैर्ज्ञायमाना शोभते एव, तद्वत् यद्वा, ज्ञानमेव खलं प्रशस्तस्थलविशेषस्तस्मिन् यथा सरस्वती शोभते तथा रेज इति क्रियया सम्बन्धः, न रेजे इति च तदर्थः ।।

२०—तदा जगन्निवासनिवासभूतेति विशेषणवैयर्थ्यं (भा० १०।२।२०) तां वीक्ष्य कंसः प्रभयाजितान्तरां, विरोचयन्तीं भवनम्" इत्याद्यसङ्गतञ्चेत्यत एवाह—तां वीक्ष्येत्यादि । तां देवकीम्; अन्तर्वर्त्तिमहामणिप्रदीपवसनमञ्जूषिकावद्हृदयस्थश्रीकृष्णप्रभया बहिरपि भवनं विरोचयन्तीं वीक्ष्य आहेत्यन्वयः । अन्तःप्रमोदेन शुचिस्मिताम् । एष इति तत्प्रभाबाहुल्येन बहिर्निःसरता । साक्षाद् दृश्यमान इव निर्दिश्यमानो मे प्राणहरस्तत्क्षणमेव तथैव प्रतीतेः । तत्र हेतुञ्च वक्ति—यन्न पुरेयमीदृशाति पूर्वश्लोकव्याख्या सङ्गतिः ।। (२१-२५)

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

प्रथमोऽध्यायः

अथ (भा०१।१।१२)

सूत ! जानासि भद्रं ते भगवान् सात्वतां पतिः । देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ।।

इति सूतशौनकसंवादे उपक्रान्तस्य (भा०१।८।३५)

"श्रवणस्मरणार्हाणि करिष्यन्निति केचन" इति कुन्तीस्तुतौ अङ्कुरितम्-शुकपरीक्षित्संवादे (भा०१।२४।६१) "कलौ जनिष्यमाणानां दुःखशोकभयापहम्" इत्यादिना नवमस्कन्धोक्तेन पल्लवितं श्रीकृष्णावतारस्य चिकीर्षितं हि श्रीभागवतप्रतिपाद्यम् । अन्येषान्तु (भा०२।१०।१) "अत्र सर्गो विसर्गश्च" इति नवानां कथनम् (भा०२।१०।२) दशमस्य विशुद्ध्यर्थं इति दशमस्य श्रीकृष्णस्य विशिष्टशुद्धिः परात्परता तज्ज्ञानार्थं कीर्तितानां प्रासङ्गिकानां नवानां कथनसमाप्तौ प्रतिपाद्यभूतं श्रीकृष्णलीलावतारं कथितस्य सर्वस्य विस्मरणार्थं श्रीपरीक्षिता पृष्टं श्रीशुकः श्रावयति । राजोवाच—कथितो वंशविस्तार इत्यादि । कथित इत्यलंबुद्धिद्योतकं यद्यत् कथितम्, तावताहं कृतार्थो न भवामि, किन्तु कथित एव भवता, अपितु यदर्थं मया पृष्टः, यदर्थं वा त्वया कथितः सोमसूर्ययोर्वंशविस्तार उभयवंश्यानां राज्ञां च परमाद्भुतं चरितम्, स कृष्णावतार इदानीं कथ्यतामिति कथितशब्दस्याभिप्रायः ।

उभयवंश्यानामित्यनेनैव यदोश्चरिते प्राप्ते यदोश्चेति पुनरुपादानमत्यादरद्योतकम् । तदेव स्पष्टयति । तत्रांशेनेत्यादि । अंशानां समूह आंशम् 'समूहे अण्' तेन सह सर्वैरंशैरित्यर्थः । अन्यथा (भा०५।२४।५५) "अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल" इति स्वयमेव किलेतिशब्दैः (भा०।१।३।२८) "कृष्णस्तु भगवान् स्वयम्" इत्यस्य च स्वयमिति शब्देनासङ्गतिः स्यात् । यद्वा अंशेन बलदेवेन ।

ननु कथमत्र सङ्गतिः कार्या, यतो विष्णुपुराणादौ अन्यथैव श्रूयते । सत्यम्, यत्तु विष्णुपुराणे (५।१।२) "अंशावतारो ब्रह्मर्षे योऽयं यदुकुलोद्भवः" इति (५।१।३) "अंशांशेनावतीर्योर्व्याम्" इति (५।१।४) "विष्णोरंशांशसम्भूतिचरितम्" इत्यादि श्रूयते, तत्र तत्रायमर्थः क्रमेण दर्श्यते-अयं यदुकुलोद्भवोऽंशावतारः—अंशानां नारायणादीनामवतारो यस्मात् स तथा-इत्येकः । अंशो ब्रह्मादयस्तेषामंशेन यादवरूपेण सहावतीर्य (भा. १०।१।२२) "भवद्भिरंशैर्यदुषूपजन्यताम्" इत्यत्रैव वक्ष्यमाणत्वात्-इति द्वितीयः । विष्णोः श्रीकृष्णस्य चरितं कीदृशम् ? अंशांशसम्भूतिः—अंशानां ब्रह्मादीनामंशा यादवास्तेषां सम्यक् समीचीना भूतिः सम्पत्तिर्यस्माद् यत्र वा इति तृतीयः । यच्च तत्रैव (विष्णु पु० ५।१।५९–६०) "उज्जहारात्मनः केशौ सितकृष्णौ महामुने । उवाच च सुरानेतौ मत्केशौ वसुधातले । अवतीर्य भुवो भारं क्लेशहानिं करिष्यतः" इति (विष्णु पु. ५।१।६३) "वसुदेवस्य या पत्नी देवकी देवतोपमा । तस्यायमष्टमो गर्भो मत्केशौ भविता सुराः ।।" इति । एषां क्रमेणायमर्थः—आत्मनः सितकृष्णकेशौ उज्जहार उद्धावित्यर्थः न तूत्पाटयामास, तेषां केशानां चिद्रूपत्वात् छेदो दुर्बोधः, अमङ्गलप्रतिपादकश्च । अतस्तयोरुद्धृत्य दर्शनं सतात्पर्यं-तच्च तात्पर्यं मूर्धन्यत्व-प्रतिपादनार्थं वर्णसूचनार्थञ्च । केशद्वयसंदर्शनेनापि संदिग्धान् पुनरुवाच-एतौ मम मूर्धन्यभूतौ शुक्लकृष्णवर्णौ मत्केशौ मदीयेश्वरभूतौ 'सर्वनाम्नः कप्रत्ययः' अहमीशौ याभ्यां तौ मत्केशौ 'त्वत्कपुत्रौ मत्कपुत्रौ' इत्यादिवत् । अथवा, मम कं सुखं तत्स्वरूपौ ईश्वरौ च, यद्यपि बलदेवस्तदीयेश्वरो न भवति, तथापि सहकालवचनानन्दातिशयात् स्वांशेऽपि तथा प्रतिपादनं पश्चाच्च व्यक्तीकृतं (विष्णु पु० ५।१।७२) "शेषाख्यांशस्ततो मम अंशांशेनोदरे तस्याः सप्तमः संभविष्यति" (५।१।६३) "अष्टमो भविता गर्भो मत्केश" इति पृथगाख्यानेन मत्केशः श्रीकृष्णः इति पूर्ववद्व्याख्यानम् । यद्वा मम कं सुखं यस्मात् स चासौ ईशश्चेति । यच्च भारते "स चापि केशौ हरिरुच्चजहे शुक्लमेकमपरञ्चापि कृष्णम् । तौ चापि केशावाविशतां यदूनां, कुले स्त्रियौ रोहिणीं देवकीञ्च ।

तयोरेको बलभद्रो बभूव, योऽसौ श्वेतस्तस्य देवस्य केशः। कृष्णो द्वितीयः केशवः संबभूव, केशो योऽसौ वर्णतः कृष्ण उक्तः ॥" एषामेवमेवार्थः—यस्मै ब्रह्मादयो निवेदनमकार्षुः, स हरिः केशौ उच्चजह्रे उद्धृत्य दर्शयामास, 'हृञ् प्रापणार्थः, उद्धरणं वर्णमूर्द्धन्यत्वसूचनार्थम्। अतस्तौ चापि केशौ। अयमर्थः—यतस्तयोः प्रस्तावे केशौ उद्धृत्य दर्शितौ, ततस्तौ चापि रामकृष्णौ केशनामानौ बभूवतुः। ततस्तु यदूनां कुले स्त्रियौ अविशताम्, तयोरेकः केशः केशनामा बलदेवो बभूव। द्वितीयः केशनामा केशवो बभूव। के शिरसि शेते इति केशः। अन्यतोऽपि च, इति उभयोरपि केशत्वम् (भा०१०।२।५) सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते" इति वैष्णवधामत्वात्, षष्ठस्कन्धे उवाच च स्वयमेव सङ्कर्षणः (भा० ६।१६।५१) अहं सर्वाणि भूतानि भूतात्मा भूतभावनः। शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू॥" इति सर्वमनवद्यम्॥ (३)

४—निवृत्ततर्षैरित्यादि। आपशुघ्नात् पशुघ्नो व्याधः, व्याधमभिव्याप्य, कः पुमान् उत्तमश्लोकगुणानुवादाद् विना विरज्येत, विषयेभ्यो विरक्तो भवतीति भावः, न कोऽपि एतेन वा व्याधो भवतु यदि विरक्तो भवति, तदा परगुणानुवादादेवेति भावः। अतो विरक्तिमिच्छता भगवद्गुणा एव श्रोतव्या इत्यायाते तद्विशेषणमाह-निवृत्तेति। निवृत्तस्तर्षः कामो येषां तैरुपगीयमानाद्बीजरूपेणापि हि तस्य रागस्य पुनः प्ररोहाशङ्कया निष्कामैरप्युपगीयमानात्, न तूपगीतात्, अतो भवौषधादिति मुमुक्षुभिर्निषेव्यमानात्। श्रोत्रमनोभिरामादिति सरागाणामपि प्रीतिप्रदात्, अतस्त्रिविधानामेव प्राणिनामनुकूलात्, ये तु पूर्वं श्रोत्रमनोभिरामत्वेनैव शृण्वन्ति, तेऽपि श्रवणानन्तरं विषयेभ्यो विरज्यन्तीति भावः। वक्ष्यति च (भा०१०।४७।१८) यदनुचरित" इत्यादि। अतस्तद्गुणश्रवणेनैव क्रियमाणस्य बीजरूपेणापि यथा विषया न स्युः तथा वर्णयेति भावः। यद्वा, अपगताः शुचः संसारपीडा येषां ते अपशुचो वैष्णवाः, तान् हन्तीति अपशुघ्नो वैष्णवद्वेष्टा तं विना को विरज्येत? (५,६)।

७—यतो वैष्णवेभ्य एव गुणानुवादः, तेषां विद्वेषे अत्र विरक्तिरेव, अतस्तमेव गुणानुवादं श्रावयेदित्याह वीर्याणीत्यादि हे पुरुष हे विद्वन्-इति सम्बोधनद्वयेन तद्भिन्ना हि क्लीवा मूर्खाश्चेति तात्पर्यम्। विद्वत्वं भगवत्-परायणत्वम्—(भा०४।२९।५०) "सा विद्या तन्मतिर्यया" इति। पुरुषत्वं पुरुषाकारं सदुपदेशेन परनिस्तारकत्वम्—उभयं तवैवास्तीति स्तुतिपूर्वकमाह—तस्य वीर्याणि वदस्वेति। ज्ञानयत्नोपच्छन्दनेषु वद, इत्यात्मनेपदं यत्नपूर्वं कथयेत्यर्थः। हे स्वेति वा छेदः, सर्वभूतानामात्मन्- (भा० १।२।२) "तन्मयतया तरवोऽभिनेदुः" इत्युक्तत्वात्। कीदृशस्य? अखिलदेहभाजामन्तर्बहिश्च कालरूपैः श्यामलरूपैर्मृत्युं मरणममृतमानन्दञ्च प्रयच्छतः, अदर्शनेन मृत्युं दर्शनेनामृतम्। 'कालश्यामलमेचका' इत्यमरकोषः। रूपैरिति बहुवचनमियत्ताभारत्वसूचकम्—श्याममहसः पुनः पुनः प्ररोहात्। यद्वा, अखिलदेहभाजां मध्ये अन्तः अन्तरङ्गाणां बहिर्बहिरङ्गाणाञ्च मृत्युममृतञ्च यथायोगं प्रयच्छतः, अक्रमेण योज्यम्—प्रविश पिण्डीं गृहं भक्षय' इत्यादिनान्वयानुसारेण हि योजना क्रियते, अन्तरङ्गाणां पाण्डवानां बहिरङ्गाणां कुरूणां तथा तथा (९म-श्लो०) 'दुरत्ययं कौरवसैन्य' इत्यादिना पूर्वश्लोकार्थस्य प्रपञ्चः। पुरुषाः स्वजनाः कालः कालशक्तिश्च रूपञ्च यथायोग करणत्वमभिगन्तव्यम्। अन्तरङ्गाणां स्वजने रूपेणामृतम्, बहिरङ्गाणां कालेन च मृत्युम्,— (गी०११।३२) "कालोऽस्मि लोकक्षयकृत्' इत्युक्तेः। मायामनुष्यस्य माययाप्यमनुष्यस्यालौकिकस्येति वा यावत्। अप्रतिच्छादनीय—परमैश्वर्यस्य॥ (८)

९—सात्वतां पतिरिति—सन् श्रीकृष्ण उपास्यत्वेन वर्तते येषां ते सात्वता वैष्णवाः; तेषां मतं सात्वतं 'तदाचष्टे' इति णिजन्तात् क्विपि रूपम्—सात्वत्, सात्वतः सात्वतमतव्याख्यातारस्तेषां पतिः॥ (१०)

११—देहं मानुषमित्यादि। मानुषं देहमाश्रित्य स्थितैर्वृष्णिभिः सार्द्धं कति वर्षाण्यवात्सीदिति स्थितैरित्याध्याहारेण वृष्णीनां देवत्वं ध्वनितम्।

१२—सर्वज्ञेति योगात् सम्बोधनम्, सर्वात्मकत्वात् सर्वः श्रीकृष्णस्तं जानातीति॥ (१३)

१४—भागवतप्रधानः श्रेष्ठः, प्रधानशब्दो विशेष्यनिघ्नोऽपि वर्तते, 'प्रधानहरिता मुद्गाः इति प्रयोगात्, यद्वा भागवतं शास्त्रं भागवतो धर्मो वा प्रधानं यस्य स तथा॥ (१५-१८)

१९—तीरं क्षीरपयोनिधेरित्यादि। क्षीरोदशायी हि श्रीकृष्णस्य प्रधानांशः तस्मिन्निवेदनेनैव श्रीकृष्णस्थाने निवेदितं भवति; श्रीकृष्णसन्निधौ गन्तुमसमर्थैरस्माभिरेतदेव कार्यमिति संमन्त्र्य क्षीरपयोनिधितीरमेव जग्मुः। हरिवंशे हरिवंशपर्वणि (५४।१७) चैवम्वित्रविस्तारे विष्णुं प्रति नारदवाक्यम्—"वसुन्धरायाः साहाय्यार्थं स्वमंशं नानुयुञ्जसे इति (हरिवं प० ५४।८३) "तदा गच्छ स्वयं विष्णो गच्छावः पृथिवीतलम्" इति। अस्यार्थः—साहाय्यार्थं स्वमंशं नानुयुञ्जसे न प्रयोजय 'अनुमतौ वर्तमाना छान्दसी'। यथा देवानामंशा नियोजिताः, तदा त्वं स्वमंशं न नियोजय, स्वयमेव गच्छतीति भावः। एतत् कौतुकं द्रष्टुमहमपि गमिष्यामीति गच्छावः। तदा च नारदवाक्यानन्तरं स विष्णुर्मनसि-चकार-'कालनेमिर्व्यापादितः, तथाप्यसौ कंसरूपेणाजनिष्ट विना परात्परं श्रीकृष्णं नैषां मोक्षो भवति, तर्हि तमेवाभ्यर्थये' इति। (हरिवंश प० ५५।५०-५१) "तत्र वै पार्वती नाम गुहा मेरोः सुदुर्गमा। त्रिभिस्तस्यैव विक्रान्तैर्नित्यं पर्वसु पूजिता॥ पुराणं तत्र विन्यस्य देहं हरिरुदारधीः। आत्मानं योजयामास वसुदेवगृहं प्रति॥" विचारानन्तरं यच्चकार, तदेताभ्यां श्लोकाभ्यां प्रतिपादयति। तत्र क्षीरोदधेस्तीरे काचित् पार्वती नाम गुहा वर्तते। सा मेरोरपि सुदुर्गमा, मेरौ सर्वदेवानां प्रचारो वर्तते, न तत्र कस्यापीति पर्वसु उत्सवेषु तस्यैव विष्णोस्त्रिभिर्विक्रान्तैः प्रदक्षिणपरिक्रमैः

पूजिता स्वस्थानस्य प्रवेशे हि स्वयमपि प्रदक्षिणीकरोतीत्याचारः। अत्र गुहायां गत्वा देहं विष्णुदेहं देवदृश्यमानं विन्यस्य अन्तर्धाप्याऽदृश्यो भूत्वा गुहायामेव स्थीयत इति देवान् वञ्चयित्वा पुराणमनादिमात्मानं श्रीकृष्णं वसुदेवगुहं प्रति योजयामासेति श्लोकयोजनेति। कथं देवैरलक्षितां भूत्वा श्रीकृष्णं पार्श्वं जगाम ? इत्याह—उदारधिर्बुद्धिकौशलेनेत्यर्थः। तथात्रापि सर्वे ब्रह्मादयः क्षीराब्धौ शयानं निवेदयाञ्चक्रुः। स च श्रीकृष्णमिति रहस्यम् ॥

२०—एतदेव विवृणोति-तत्र गत्वेत्यादि। पुरुषं श्रीनारायणमुपतस्थे ॥

२१—उपासनानन्तरं गगने प्रादुर्भूतां वाणीं श्रुत्वा ब्रह्माह - गाः पौरुषीमित्यादि। पुरुषसम्बन्धिनीः गाः वाचं शृणुत पुरुषो यदुवाच, तदवधारयतेति भावः ॥

२२—तदेव किमित्याह—पुरैवेति, पुंसा श्रीकृष्णेन पुंसः पुरुषान् स्यति अवसाययति अन्तयति स्वस्मिन् विलापयति, 'षोऽन्तकर्मणि' सन्ध्यक्षराणामाकारे सति (पाणिनिः ३।२।७४) "आतो मनिन् क्वनिब्वनिपश्च" इति पुंसा इति गोषादिवत्तस्य तृतीयैकवचनेऽपि तथैव रूपम्। पुरैव भवतां निवेदनप्रागेव धराज्वरो विदितो मया, भवतां निवेदनानन्तरं यन्निवेदनं तस्य च प्रागेवेत्यर्थः सर्वज्ञत्वात्तस्य निवेदनापेक्षा नास्त्येव। विदित एवास्तु धराज्वर इति किमुक्तं तदुच्यतामित्याह भवद्भिरंशैर्यदुषूपजन्यतामिति। नेयं पुरुषस्य स्वकीया वाक्, अतएव पुंसा विदित इति न मया विदितः, श्रीकृष्णवाण्येवानेन पुरुषेणानुकृतेति यावत्। अतएव स यावदुर्व्या भरमीश्वरेश्वर इत्यत्र ईश्वरेश्वरत्वेन प्रतिपादितम्। 'कार्यार्थे सम्भविष्यति' इत्युक्तम्। पुरुषस्य वाक् ब्रह्मणा देवेभ्यः प्रतिपादिता ॥

२३—वसुदेवगृहे जनिष्यते प्रादुर्भविष्यति, 'जनी प्रादुर्भावे, साक्षात् स्वरूपेणैव, न तु प्रच्छन्नः, परः पुरुषः श्रीकृष्णः, तत्प्रियार्थं तस्य प्रियाणां गोपीनामर्थं प्रियायाः प्रियो रमाया वा अमरस्त्रियः सम्भवन्तु ॥

२४—अग्रजो भविता इत्यादि। अग्रजत्वेन भवितुमनिच्छन्नपि अग्रजो भविता। कुतः ? हरेः प्रियचिकीर्षया, तथाभूते तस्य प्रियं भवतीति भावः ॥

२५—कार्यार्थे संभविष्यतीत्यादि। कार्यमघटनसंघटना तदर्थे प्रभुणा तस्य नियन्त्रा आदिष्टा। तस्याः कुत एवं सामर्थ्यम् ? अत्राह—अंशेन भगवदंशेन विशिष्टा 'विशेषणे तृतीया', तच्छक्तेस्तदंशत्वात् विष्णुमायेति शब्दितत्वात् विष्णुशक्तिरेव सा। अतस्तेनादिष्टं करिष्यति, अस्वातन्त्र्यात्। सा च अघटन-संघटना गर्भसंकर्षणादिः, वृन्दावने च गोपीनां भगवत्सङ्गे विलसन्तीनां (भा० १०।३३।३८) "मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः" इत्यादिना छायारूपेण प्रतिनिकटे वर्तमानत्वादि कृष्णलीलानुकरणे तासां पूतनादिप्रतिकूलतादात्म्यतया विविधपूतनादिरूपस्वीकारः, रासे तत्तत्सामग्री समाधानमित्यादि ॥ (२६-६९)

इति श्री दशमे चैतन्यमतमञ्जूषायां प्रथमोऽध्यायः ॥ १ ॥

—— :०:——

द्वितीयोऽध्यायः

(१-८) ९—अथाहमंशभागेनेत्यादि। अंशानां ब्रह्मादीनां भागेन भागधेयेन, अंशानां जीवानामिति वा;–(गी० १५।७) "ममैवांशो जीवलोके" इत्यादेः ॥ (१०-१५)

१६—आविवेशांशभागेनेत्यादि। अंशभागेनेति पूर्ववत्, अंशानां भागो विभागो यस्मात्तथा तेन स्वेनैव रूपेणेत्यर्थ इति; यद्वा, अंशभागः परिपूर्णभागस्तेन। आनकदुन्दुभेर्मन आविवेश, मनसि प्रकटीबभूव। हरिः शेष इव मनोऽभिभूय तस्थौ ॥

१७—स बिभ्रदित्यादि। स वसुदेवः पौरुषं पुरुषाकारं बिभ्रत् यथा रविस्तथा राजमानः सन् धाम बभूव, धाम स्वरूपो बभूवेत्यर्थः। अतएव-च भूतानां जनानाञ्च दुरासदो दुर्धर्षः; यद्वा, पुरुषाणां नारायणादीनाञ्च धाम आश्रयभूतं श्रीकृष्णं बिभ्रत् सम्बन्धमात्रेण; यद्वा, पुरून् पाण्डवान् पुरु यथा स्याद् वा सिनोति बध्नातीति। पुरुषः श्रीकृष्ण एव तस्य धाम तत्स्वरूपं धामेति 'स्वार्थवाऽण्' धाम विग्रहं वा, 'गृहदेहत्विट्प्रभावधामानि' इत्यमरः ॥

१८—ततो जगन्मङ्गलमित्यादि। अच्युतो अस्खलिता अंशा यत्र तत्तथा जगन्मङ्गलं सर्वात्मकमात्मस्वरूपं यत् श्रीकृष्णधाम तत् मनस्तो मनसि। कीदृशम् ? शूरसूतेन समाहितं समाधिना अर्पितं तस्य हृदये प्रागाविर्भूतं श्रीकृष्णधाम, तेन समाधिना देवक्यामर्पितम्, तद्धृदयात् (भा० ९।२४।३०) "वसुदेवं हरेः स्थानम्" इति प्रादुरभूदित्यर्थः। उभयोर्हृदये उत्तरागर्भ इव प्रादुरभूत्। उभयोः पितृमातृत्वानुग्रहकारणादुभयत्रैवाभिव्यक्तिः, भगवान् तमावेश्य तामाविशदित्यर्थः। यद्वा सर्वात्मभूतं सर्वात्मपरा मा शोभा तस्या आत्मभूतं त्रिलोकीसौन्दर्यसौभाग्यात्मकं जगन्मङ्गलमच्युतांशधाम दधारेत्यन्वयः। (१७ श. श्लो०)

"स बिभ्रत् पौरुषं धाम" इति धामशब्दश्रुत्या धामशब्दानुवृत्तिः कारयितव्या। तत्र दृष्टान्तः—काष्ठेति। आनन्दकरं चन्द्रं काष्ठा पूर्वा दिक् सा यथा चन्द्रं धत्ते, तस्यां तस्याविर्भाव एव, न सा तस्योत्पत्तिस्थानम् ॥

१९—सा देवकीत्यादि। भोजेन्द्रगृहे रुद्धापि जगन्निवास-निवासभूता अग्निशिखेव नितरां न रेजे, ज्ञानखले ज्ञानेनापि खले धूर्ते आत्मवञ्चके दीनानुरूपव्यवहारिणि जने सती वर्तमाना शोभमाना वा सरस्वती यथा राजते, अस्थानस्थापि राजते, किन्तु पारलौकिकपर्याया न भवति, एवं भोजेन्द्रस्य सुखाय नाभूत्, किन्तु रेजे भोजगृहज्ञानखलयोः साधर्म्यम्। तथा च (भा० १०।२।२०) तां वीक्ष्य कंसः प्रभयाजितान्तरां विरोचयन्तीं भवनं शुचिस्मिताम्" इति वक्ष्यति ॥ (२०–२५)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्पष्टमप्याह—तस्मिन् मद्वैरिणि आशु इदानीं किङ्करणीयं गर्भस्थमेव तमिमं हन्यां चेन्न यद्यस्मादर्थतन्त्रः स्वार्थपरोपि लोकः विक्रमं न विनाशयति सम्प्रत्यस्य वधे मम वीरत्वव्यञ्जको विक्रमो नङ्क्ष्यति तस्माज्जातप्रवृद्धतरुणीभूतेनानेन सह संग्रामे जये पराजये वा मम विक्रमस्तु स्थास्यत्येव गर्भवधे तु विक्रम इति भावः। न केवलं विक्रमहानिरेव धर्मादिहानिरपीत्याह-स्त्रिया इति। गुरुमत्या गुर्विण्याः अत्र भयेनैव यत् स्वदौरात्म्यं स्तब्धं तत्तु मद्विवेकेनैवेति स्वस्मिन्नभिमानसुखं कल्पितं कंसेनेति ज्ञेयम् ॥ २१ ॥ गर्भं हतवतो मम जीवितव्यमपि धिक्कृतमेवेत्याह-स इति। नृशंसितेन क्रौर्येण देहे मृते सतीति जीवति तु यद्यपि तस्मात् बिभ्यति तदपीति भावः। शपन्ति रे पापिन् कुम्भीपाके पतेति साक्षेपमुच्चैराक्रोशन्ति ततश्च तनुमानिनः प्राण्यन्तरहिंसया स्वतनु मानयतो लालयतो जनस्य भोग्यं यदन्धन्तमस्तत् ध्रुवमेव गन्ता गच्छति ॥ २२–२३ ॥ वैरानुबन्धजनितेन भयेन कंसस्य चित्तावेशं विवृणोति–आसीन इति। सम्विशन् शयानः चिन्तयमानः चिन्तयन् हृषीकेशं सर्वेन्द्रियविषयीभूतं तन्मयत्वदर्शनं प्रेम्णा परमानन्दजनकं भयेन तु परमदुःखजनकमिति भक्तवैरिणोस्तन्मयत्वदर्शनस्य भेदो द्रष्टव्यः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्मिन् गृहाश्रिते किं करणीयं तत्रापि अद्यैव तत्रापि आशु तत्रापि मे मयैव विलम्बे पुरुषान्तरनियोजने च विपरीतशङ्कये-त्युक्तम् स्वसृवधे तु ममैव हानिरित्याह—यदर्थतन्त्र इति। यद्यदा अर्थतन्त्रः आवश्यककार्यवशोऽयं जनो भवति तदापि विक्रमं न विहन्ति न नाशयति एतदेव विशेषत आह स्त्रियास्तत्रापि स्वसुस्तत्रापि गुरुमत्याः गुर्विण्याः वधः अनुकालं वधानन्तरक्षणमेव यश आदि हन्ति ॥ २१ ॥ किञ्च, स इति योत्यन्तनृशंसितेनात्यन्तक्रूरकर्मणा वर्त्तेत जीवेत स एष जीवन् सम्परेतः सम्यक् मृतः यतस्तं जीवन्तं मनुजाः अयं दुरात्मा दुर्गतिं यात्वेवं शपन्ति स च देहे मृते तनुमानिनः देहाभिमानिनः पापकारिणोऽन्धन्तमः पुनः पुनर्नरकप्रदं ध्रुवं गन्ता गच्छति ईदृशी मतिस्तस्य भगवल्लक्षणगर्भवती देवकीदर्शनजे गण्यते ॥ २२ ॥ स्त्रीमात्रस्य वधे यो भावः स घोरस्तत्रापि स्वसुर्घोरतरः गुरुमत्या घोरतमस्तस्मान्निवृत्तः ॥ २३ ॥ सम्विशन् शयनं कुर्वन् ॥ २४ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

॥ हरिः ॐ ॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

कृत्वा तरन्वत्सपदं स्म यत्प्लव इत्यस्यायं भावः। यथा वत्सपदतरणं प्लवारोहणादि क्लेशं विनैव भवति तथा दुरत्ययकौरव-सैन्यसागरतरणं प्लवारोहणादिक्लेशं विनैव जातम्। भगवद्रूपप्लवस्य सुखमात्रसाधनत्वादिति। एतेन वत्सपदतरणे प्लवो नास्ति। कौरव-सैन्यसागरतरणे भगवद्रूपप्लवोऽभूदतो दृष्टांतदार्ष्टांतिकयोर्वैषम्यमिति दूषणस्यानवकाशः। प्लवारोहणादिक्लेशाभावेनैव साम्यमि-त्यभ्युपगमात् ॥५॥ वेधा गगने समाधौ समाधानविषये समीरितां प्रयुक्तां देवानां समाधानं कर्तव्यमिति प्रत्युक्तमिति यावत्। गिरं निशम्य त्रिदशानुवाचेत्येतद्धि प्रसिद्धम्। हे अमराः। मे मम पौरुषीमुत्तमपुरुषभगवदभिप्रेतार्थविषयिणीं गां वाचं शृणुत तथा मया यथोच्यते तथैवाशु विधीयताम्। चिरं विलंबो मा भूत्। न केवलं शृणुत किंतु विधीयतां चेति। क्रियासमुच्चये पुनः शब्द इति। एतेन पौरुषीं गां शृणुतेत्यनुपपन्नम्। पुरैव पुंसावधृतो धराज्वर इत्यादि वक्ष्यमाणवाक्यविरोधात्। तत्र हि पुरैव मया धराज्वरोऽवधृत इत्यादि नोच्यते किंतु पुरैव पुंसा धराज्वरोऽवधृत इत्याद्युच्यते। अत इदं चतुर्मुखस्यैव वाक्यं न विष्णुवाक्यमिति दूषणं परिहृतम्। पौरुषीमित्यनेन पुरैवेत्यादि वाक्यस्य भगवद्वाक्यत्वमुच्यत इत्यनंगीकृत्य पौरुषीमित्यस्य पुरुषाभिप्रेतार्थविषयिणीमित्यंगीकारेण म इत्यनेन चतुर्मुखवाक्यत्वमुच्यत इत्यूरीकरणात् ॥२१॥ प्रसक्तमरणं परिहर्तुमित्यर्थः ॥ एतेन कालस्य परिहर्तुमशक्यत्वात्। कालं परिह-र्तुमनुपपन्नमिति चोद्यं निराकृतम्। प्राप्तशब्दस्य प्रसक्त्यर्थं कल कामधेनुरिति वचनेन कामधेनुर्यथा सर्वार्थान्ददाति तथा कल धातुः सर्वार्थवाचीत्युक्तत्वात्कलधातोर्भरणार्थकत्वं चांगीकृत्य प्राप्तकालं प्रतिव्योढुमित्यस्य प्रसक्तमरणं परिहर्तुमित्यर्थ इत्युक्तत्वात् ॥ ४७ ॥ इति श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ॥ १०–१ ॥

॥ हरिः ॐ ॥ वसुदेवेन दुःसहपुत्रवियोगसहनं कथं कृतमित्यत उक्तम् ॥ किं दुःसहमिति। अनेन साधूनां सदाचाराणां दुःसहं किं न किमपि। अतोऽयमपि साधुरिति दुःसहपुत्रवियोगसहनं कृतवानित्युक्तं भवति। सर्वापेक्षितपुत्रलालनाद्यपेक्षा वसुदेवेन

कथं त्यक्तेत्याशंकापरिहारायोक्तम् ॥ विदुषामिति । अनेन विदुषां भगवज्ज्ञानिनामपेक्षितं किं न किमपि । अतोऽयमपि भगवज्ज्ञानीति पुत्रलालनादिकमपेक्षित न जातमित्युक्तं भवति । ननु वसुदेवेनाकार्यं हननार्थं पुत्रसमर्पणं कथं कृतमित्याशंकां परिहर्तुमुक्तम् ॥ किमकार्यमिति । अनेन कदर्याणां कदर्यभयविशिष्टानामकार्यं किं न किमपि । अतोऽस्यापि कदर्यं कंसभयविशिष्टत्वाद्धननार्थमकार्यपुत्रसमर्पणं कृतमित्युक्तं भवति । ननु वसुदेवेन दुस्त्यजपुत्रत्यागः स्वहस्तेन कथं कृत इत्याशंकां निराकर्तुमुक्तम् ॥ दुस्त्यजमिति । अनेन सत्यात्मनां स्ववाक्यं सत्यं कर्तव्यमित्यंतःकरणसंपन्नानां दुस्त्यजं किं न किमपि । अतो वासुदेवोऽपि प्राणभयेनोत्पन्नानां पुत्राणां समर्पणं करिष्य इत्युक्तं स्ववाक्यं सत्यं कर्तव्यमित्यंतःकरणवानिति पुत्रत्यागः स्वहस्तेन कृत इत्युक्तं भवति । एतेन वसुदेवस्य कदर्यत्वाभावात्किमकार्यं कदर्याणामित्ययुक्तमिति चोद्यं निराकृतम् । कदर्यशब्दस्य मत्वर्थीयाजंतत्वात्कदर्याणामित्यनेन भयसाधनत्वेन कदर्यविशिष्टानामित्यर्थो लभ्यत इति भावेन कदर्यभयसंपन्नानामिति तात्पर्यस्योक्तत्वात् ॥ ४ ॥ हर्षशोकविवर्धन इत्यस्य देवानां हर्षविवर्धनोऽसुराणां शोकविवर्धन इत्यर्थः । एतेन हर्षशोकविवर्धन इत्येतद्विरुद्धमिति दूषणं परास्तम् ॥५॥ इति श्रीभागवतटिप्पण्यां द्वितीयोऽध्यायः ॥ १०–२ ॥

॥ हरि ॐ ॥ स्त्रियः स्वसुर्गुरुमत्या वधोऽयं यशःश्रियं हंत्यनुकूलमायुरित्यनेनोक्तमत्र सामान्यव्याप्त्योपपाद्यते । योऽत्यंतनृशंसी । तेनात्यंतनृशंसनेन वर्तेत स एष जीवन्नपि संपरेतो मृत इत्येतत्खलु निश्चितम् । योऽत्यंतहिंसकस्तद्यशो भाग्ययोर्हानिर्भवतीति यावत् । अभिमानिनः सम्यग्देहाभिमानवतः । जीवनापेक्षावत इति यावत् । तस्य हिंसकस्य देहो मृतः प्राणवियुक्तो भवति । अनेनानुकूलमायुर्हंतीन्येतदपेक्षितमायुर्हंतीत्येवं व्याख्यातं भवति । देहे मृते तमनु देहमनु । अर्थकामौ जन्मांतरीयार्थकामसंपादकपुण्ये गच्छतोऽमलं यशो जन्मांतरीयामलं यशः संपादकपुण्यं च गच्छति । गौर्वियावगच्छतीत्येतद्ध्रुवमिति । अनेनायुर्हंतीत्यत्रायुरित्येतज्जन्यंतदीयार्थकामसंपादकपुण्यादेरुपलक्षणमित्युक्तं भवतीत्येतद्धि प्रमाणप्रसिद्धमिति । एतेन देहवियोगस्य परमात्मनिष्ठत्वाद्देहो मृतो भवतीति चोद्यस्यानवकाशः ॥ २३ ॥

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

स्वप्ने यथा पश्यतीति श्लोके मनोरथेनाभिनिविष्टचेतनः पुरुषः स्वप्ने यथा मिथ्याभूतं देहं पश्यति तथा दृष्टश्रुताभ्याम् । भावेत्कः । दृष्टेन मननाख्यदर्शनेन श्रवणेन च संस्कृतेन मनसा परं ब्रह्मानुध्यायन्पुरुष ईदृशं मिथ्याभूतमेव देहं प्रपद्यत इति देहोपलक्षितजगतः स्वप्नदृष्टांतेन मिथ्यात्वमुच्यत इति भ्रांतिः । तथाऽपस्मृतिरित्यनेन घटपटस्मरणाभाव उच्यत इति च प्रतीयतेऽतस्तत्प्रतीतिनिरासाय दृष्टश्रुताभ्यां मनसानुचिंतयन्नित्यस्यान्वयप्रदर्शनपूर्वकं तात्पर्यार्थं वदन्नपस्मृतिरित्यस्य तात्पर्यार्थमाह ॥ स्वप्ने यथेति । दृष्टश्रुतस्मृत्यनुसारिदेहं प्राप्नोति । दृष्टस्मृतकारणं संस्कारोपादानकदेहनिमित्तकसुखादिकमनुभवतीत्यर्थः । अनेन तात्पर्यवाक्येन दृष्टश्रुताभ्यां दृष्टश्रुतयोर्जाग्रद्देहयोर्मनसा जातं चिंतयंश्चिंतनमनुसृत्य स्मृत्यनुसारिदेहमिति भागवतवाक्यं व्याख्यातं भवति । तथा चिंतयन्नित्यत्र व्यत्ययो बहुलमिति सूत्राद्व्यत्ययेन कर्त्रर्थकोऽपि शतृप्रत्ययो भावार्थो ज्ञातव्य इति सूचितं भवति । मृतः पूर्वदेहनिमित्तकदुःखानुभवरहित इत्यर्थः । कुतोऽनुभवरहित इत्यतो हेतुं वक्तुमपस्मृतिपदमेव मुख्यार्थत्वेन व्याचष्टे । पूर्वदेहेति । अभिमानतो मदीयोऽयं देह इत्यभिमानेन पूर्वदेहस्मरणाभावादित्यर्थः । अभिमानत इति स्वसिद्धिपरिहारार्थम् । अनभिमानत इति क्वचित्पाठः । तत्रानभिमानत इत्येतत्पूर्वदेहस्मरणाभावस्यैव व्याख्यानमिति ज्ञेयम् ॥ ततश्चायं श्लोकार्थः ॥ स्वप्ने यथा दृष्टश्रुताभ्यां दृष्टश्रुतजाग्रद्देहयोर्मनसा जातं चिंतयंश्चिंतनं स्मृतिमनु अनुसृत्य । स्मृतिकारणसंस्कारोपादानकमिति यावत् । देहं पश्यति । दृष्ट्वा तन्निमित्तसुखादिकं प्राप्नोत्यनुभवति । अपस्मृतिर्जाग्रद्देहनिमित्तकसुखादिस्मृतिरहितश्च भवतीत्यर्थः । तथाऽयमज्ञो जीवः स्वयोग्यप्राप्यदेहविशेषे द्वारूपमनोरथयुक्तचित्तः सन् । तत्स्वयोग्यमीदृशमिष्टं किमपि शरीरं प्रपद्यते । तन्निमित्तकसुखादिकमनुभवति । अनंतरमपस्मृतिः पूर्वदेहनिमित्तकसुखदुःखादिरहितश्च भवति । कुतः । अपस्मृतिरपस्मृतेर्ममायं ब्राह्मणदेह इति विशेषतः स्वीयत्वाभिमानेन पूर्वदेहस्मरणाभावात् । अनभिमानत इति पाठे पूर्वदेहस्मरणाभावादित्यस्य विवरणमिदमिति ॥४१॥ यतो यतो धावतीति श्लोके मायारचितेष्वात्मपंचस्वात्मसंबंधिषु पंचसंख्याकेषु गुणेषु शब्दादिविषयेषु यस्य देहिनो मनो यतो यतः कर्मणो निमित्ताद्धावत्यसौ देही तेन तेन कर्मणा सहितः सन् जायत इत्यन्यथाप्रतीतेर्विवक्षितार्थाप्रतीतेश्चान्वयं दर्शयन्नपेक्षिताध्याहारेण तत्तात्पर्यार्थमाह ॥ यतो यतो यत्र यत्रेति । आत्मानश्च ते पंच चात्मपंच तेषाम् । पंचसंख्यानां देहानामित्यर्थः । अत्र पंचस्विति सप्तम्या अधिकरणत्वादिभ्रांतिनिरासाय निर्धारणार्थत्वज्ञापनाय च पंचानामिति विभक्तेर्विपरिणामं कृत्वा मध्य इत्युक्तम् । ननु पंचस्वित्यत्रैवाध्याहृतमध्यपदेनान्वये कृते सति पंचस्विति सप्तम्या एव निर्धारणत्वस्य ज्ञातुं शक्यत्वाद्व्यर्थोऽयं विभक्तिविपरिणाम इति चेत् । सत्यम् । तथाऽपि तेषां मध्य इत्युक्त्या मंदबुद्धिभिर्यथा झटिति निर्धारणार्थत्वं ज्ञायते तथा तेषु मध्य इत्युक्त्या झटिति न ज्ञायते । अतो मंदबुद्धीनामनुग्रहायाचार्यैर्विभक्तिविपरिणामः कृत इति न वैयर्थ्यमिति । दैवेन परमात्मना वायुना च गुणानुबद्धः सन्सत्त्वादिगुणानुबद्धः सन् । इदं तु गुणेष्विति भागवतपदस्य फलितार्थकथनम् । आत्मा पंचस्वित्युक्त्या पंचात्मनः क इति जिज्ञासायां प्रमाणेनैव पंचात्मनो दर्शयन्स्वोक्तार्थमपि दृढयति ॥ देवगांधर्वेति तत्र तत्रेत्यतः परं दैवेन सहेति शेषः पूरणीयः । स्वगुणस्य स्वरूपभूतसत्त्वादिगुणस्येत्यर्थः । सत्त्वादिविनिबंधनः स्वरूपातिरिक्तः

प्राकृतैः सत्त्वादिगुणैर्विशेषेण नितरां बंधनं यस्य स तथा। अनेन तात्पर्यश्लोकार्धेन गुणानुबद्धः सन्निति स्ववाक्यस्थगुणशब्दः स्वरूपभूतगुणस्य प्रकृतिकार्यभूतगुणस्य च वाचक इति सूचितम्। तेन स्वस्वयोग्यानुसारेण प्रकृतिकार्यसत्त्वादिगुणकार्यदेवादिदेहप्राप्तिर्भवतीति सूचितम्। तत्र स्वयोग्यतानुसारेण दैवादिप्राप्तिर्भवतीत्यस्मिन्नर्थे प्रमाणमाह ॥ देवादित्वं योग्यतयेत्यादि । तुः समुच्चयार्थोऽवधारणार्थश्च। तत्र समुच्चयार्थो यथास्थित एव। अवधारणार्थस्तु योग्यतयेत्यनेन संबध्यते। अनुस्मृतेर्विष्णोरनुचिंतनात्। यद्देवादित्वं यत्र तत्सकाशस्तेषां देवादीनां सकाशः सामीप्यं प्राप्यते तद्योग्यतयैव योग्यतानुसारेणैव। देवादित्वयोग्यो देवादित्वं प्राप्नोति। देवादित्वायोग्यो देवादिसामीप्यं प्राप्नोति। तदपि योग्यतानुसारेणैव ॥ यद्वा ॥ तत्सकाश इत्यस्य तेन देवादिप्रकाशेन सः समानः काशो दीप्तिरित्यर्थः। काशृ दीप्ताविति धातोर्भावे घञ्प्रत्ययः। समानस्य छंदस्यमूर्धप्रभृत्युदर्केष्विति सूत्रेण समानशब्दस्य स इत्ययमादेशो भवति। तत्रापीत्यपिशब्दोऽवधारणे। अपेक्ष्येत्यनेन संबध्यते। योग्यतामपीत्यत्रापिशब्दः संभावनायाम्। संभावितां योग्यतामित्यर्थः। विष्णोर्वायुशक्रादीनामपि यत्स्थानं श्वेतद्वीपादि तत्र तु विशेषेण। अपि संभावितां योग्यताम्। यस्य यादृशी योग्यता संभवति तादृशीं योग्यतामपेक्ष्यैव। स्थितिर्भवतीति शेषः। विष्णोर्वायुशक्रादीनां च स्थानं श्वेतद्वीपादि विनाऽन्यत्रान्येषु त्रैलोक्यदेशप्रभेदेषु त्रैलोक्ये विद्यमानेषु प्रदेशविशेषेषु स्थित्यै योग्यता नैवापेक्ष्यत इत्यर्थः ॥ ४२ ॥ ज्योतिर्यथैवोदकेति श्लोके यथोदकपार्थिवेषु प्रतिबिंबितमदः सूर्यादिकं ज्योतिः समीरवेगानुगतं वायुवेगेन चंचलत्वादिप्राप्तमुदकमनुसृत्य गतं चंचलत्वादि प्राप्तं विभाव्यते प्रतीयते। उदकगतमेव चंचलत्वछिन्नत्वादिकं जलगतसूर्यादावारोप्यते। एवं रागानुगतो बहु स्यामितीच्छामनुगतो युक्तोऽसौ पुमान्परमात्मा स्वमायया रचितेषु स्वाज्ञानकल्पितेषु गुणेष्वप्रधानेषु देहादिषु प्रतिबिंबितो मुह्यति। अहं दुःख्यहं सुखी बद्ध इत्याद्यनेकविधं दुःखादिविषयं मिथ्याज्ञानं प्राप्नोतीति परमात्मन एव देहाद्युपाधिषु जीवरूपेण विद्यमानत्वं तत्र जीवे प्रतीयमानस्य दुःखादेर्मिथ्यात्वं चोच्यत इत्यन्यथाप्रतीतिनिरासायानूद्य तत्तात्पर्यार्थमाह ॥ विभाव्यत इति। एवं स्वयं किंचिद्व्याख्यायेदानीं सर्वमपि श्लोकं प्रमाणेनैव विवृणाति ॥ यथैवोदशरावेष्वित्यादिना। उदशरावेषूदकपूर्णशरावेष्वित्यर्थः। प्रतिबिंबित इत्यनेन भगवतीति शेषः पूरितः। वायुना चलित इत्यनेन समीरवेगानुगतमित्येतद्विवृतं भवति। भाति छिन्नभिन्नादिरूपवानित्यनेन विभाव्यत इत्येतद्व्याख्यातं भवति। विष्विक्छया जातमित्यनेन स्वमायारचितेष्वित्येतद्विवृतं भवति। छिन्नो भिन्न इति तात्पर्यश्लोकार्धेन विमुह्यतीतिपदं व्याख्यातं भवति। एवमेकेन प्रकारेण श्लोकं व्याख्यायेदानीं प्रकारांतरेण तमेव श्लोकं व्याख्याति ॥ दृढीभूतोदवदित्यादिना। निःशरावके शरावान्निष्क्रांते पृथक्कृते दृढीभूते चंचलत्वादिरहिते गुणैः प्रकृतिकार्यसत्त्वादिगुणकृतदेहादिभिः ॥ विमुक्तस्त्विति। तुरवधारणार्थो नेत्यनेन संबध्यते। द्रवत्ववत् द्रवत्वयुक्तजलेन तुल्यं वर्तते। यथा शरावगतोदकसंबंधेन सूर्यादिप्रतीतिबिंबस्य चांचल्यादिकं जायते तथा देहादिगताज्ञानसंबंधेन हरिप्रतिबिंबस्य जीवस्य दुःखादिकं जायत इति भावः। तज्ज्ञानं तज्जीवस्य स्वरूपभूतं ज्ञानम्। चः समुच्चये। एवशब्दः पूर्वार्धस्थेन तज्ज्ञानमिति पदेन संबध्यते। न केवलं जीव एव दृढीभूतोदवत्किंतु तद्गतस्तस्मिन्नित्यंतःकरणगतः प्रतिभातो जीवश्चेति चशब्दद्वयान्वयः। जडांतःकरणव्यावृत्त्यर्थं नित्यांतःकरणं विशेषितम्। ननु जीवतज्ज्ञानयोर्यप्रतिबिंबत्वमुक्तं तदयुक्तम्। तथात्वे मुक्तावुपाध्यादिनाशे तयोर्नाशः स्यात्। सूर्यकादौ तथा दृष्टत्वात्। मुक्तौ तन्नाशे मुक्तेरपुरुषार्थत्वं स्यादित्यत आह ॥ द्वयमेवेति। एवशब्दोऽध्याहृतेन चिद्रूपमित्यनेन संबध्यते। अपिशब्दः किंचिदित्यनेन संबध्यते। विमुक्तस्य द्वयमुपाधिप्रतिबिंबरूपं द्वयं चिद्रूपमेवेष्यते। न तु सूर्यकांतादिवत्किंचिदपि जडमिष्यत इत्यर्थः। कुत इत्यत आह ॥ तस्येति। उत प्रश्ने विकल्पे स्यादुताप्यर्थवितर्कयोरिति विश्वकोशाख्याभिधानादत्रौतशब्दोऽप्यर्थकः। स्वरूपं च तत् द्वयं स्वरूपद्वयं। द्वयमुपाधिप्रतिबिंबरूपं द्वयं तस्य मुक्तस्य स्वरूपमेव। उत आप्यते। प्राप्त्यर्थस्य ज्ञानार्थत्वाज्ज्ञायते। प्रतिपत्तौ विमोक्षस्य नित्योपाध्या स्वरूपया। चिद्रूपया युतो जीवः केशवप्रतिबिंबक इत्यादिगीताभाष्याद्युदाहृतप्रमाणेनेति शेषः। उपसंहरति ॥ तस्मादिति। तस्मादुपाधेश्चित्स्वरूपमुक्तस्वरूपत्वेन विनाशाभावात्प्रतिबिंबस्य नाशाभावाद्बिंबस्य हरेर्व्याप्तत्वेन बिंबोपाधिसंबंधस्य च भावादीश्वरप्रतिबिंबभूतजीवस्य नित्यत्वाज्जीवस्तु केनचित्केनापि पुरुषेण हंतुं न शक्यः। यस्मात्केनापि जीवो हंतुं न शक्यस्तस्मादात्मवान्परमात्मप्रसादेन जीवनित्यत्वपरमात्मस्वातंत्र्यादिज्ञानवान्सन् परद्रोहं नाचरेत् परनाशाय यत्नं न कुर्यात्। यदि कुर्यात्तर्ह्यज्ञभावेनाज्ञस्य भावोऽज्ञत्वं तेन परेषां द्रोहमाचरन् पुरुषो हन्यते वा हन्यत एव। नरकादिकं प्राप्नोत्येवेत्यर्थः। अनेन तस्मान्नहंतुं शक्योऽसावित्यादिसार्धश्लोकेन तस्मान्न कश्चिद्द्रोहमिति भागवतश्लोको व्याख्यातः। तत्र तथाविध इत्यस्यार्थः ॥ आत्मवानिति। द्रोग्धुर्वै परतोभयमित्यस्यार्थः ॥ हन्यते चेत्यादि। स्वमायया रचितेष्वित्यत्र स्वशब्देन विष्णुर्गृहीतः। तत्कुत इति चेन्न। स्वशब्दस्य विष्णुनामत्वादित्याशयवांस्तत्र प्रमाणमाह ॥ परः स्वो हरिरिति। अस्य वाक्यस्य स्वार्थे तात्पर्यमस्तीति सूचनाय फलोक्तिः ॥ ४३–४४ ॥ नन्वग्ने यथा दार्विति श्लोके यदग्ने दारुवियोगावदृष्टस्यैव कारणत्वमुक्तं तदयुक्तम्। तत्र प्रमाणाभावात्। अग्ने दारुयोगादेः स्वतः सिद्धत्वाच्चेत्याशंकापरिहारायापेक्षिताध्याहारेण तत् श्लोकतात्पर्यार्थमाह ॥ कुंडादिस्थाग्नेरिति। आदिपदेन तृणादेर्ग्रहणम्। स्वतः स्वातंत्र्येण। अनेन जडाग्नेर्जडत्वेन स्वतः प्रवृत्तेरेवाभावाद्दारुयोगादिकारणत्वं न स्वतः सिद्धम्। तदभिमानिचेतनाग्नेः स्वातंत्र्याभावेन दारुयोगादिकारणत्वं स्वतः सिद्धमिति सूचितम्। नन्वेवं चेद्भागवतोक्तमदृष्टस्य दारुयोगादिकारणत्वमयुक्तं स्यात् अदृष्टस्यापि जडत्वादित्याशंकां प्रमाणेनैव परिहरन्नुक्तार्थं च दृढयति ॥ यथा कुंडस्थिताग्नेरिति। अत्र दैवपदग्रहणेन भागवते दृष्टशब्देनादृष्टादिनियामकपरमात्मग्रहणान्न काऽप्यनुपपत्तिरिति तथाऽन्यन्निमित्तमस्तीत्यत्र स्वातंत्र्येणेति शेषः पूरणीय इति सूचितं भवति। अग्नेरुप समीपे दारुसन्नमेत्प्रक्षीभूतं

भवेत्। णमु प्रह्वत्वे शब्दे चेति धातोः। अग्निसंयुक्तं भवेदिति भावः। उपलक्षणमेतत्। अग्निवियुक्तं च भवेदित्यपि ग्राह्यम् ॥ ५१ ॥
इति श्रीभागवततात्पर्यटिप्पण्यां प्रथमोऽध्यायः ॥ १०–१ ॥

॥ हरिः ॐ ॥ भगवानपि विश्वात्मेति श्लोके तथा ततो जगन्मंगलमिति श्लोके यथा ततो रेतः सिंचमेवानुप्रविशत्यथ
मातरमिति ब्रह्मसूत्रभाष्योदाहृतश्रुतौ जीवस्य शरीरोत्पत्त्यर्थं पित्रादिप्रवेश उच्यते। तथा विष्णोः शरीरोत्पत्त्यर्थं वसुदेवादिप्रवेश
उच्यत इति भाति। तं निवारयितुं प्रमाणेनैव तत्तात्पर्यार्थमाह ॥ आविश्य पितरं विष्णुमित्यादिना। चशब्दो मातरमित्यनेन संबध्यते।
विष्णुर्लोकस्य विडंबनार्थमनुकरणार्थं मोहनार्थमेव स्वरूपभूतेनानंदमात्रदेहेनैव पितरमाविश्याथमातरं चाविशत्। न तु जीववद्देहो-
त्पत्त्यर्थम्। निर्जनैरपि हरिर्देवक्यादिदेहात्तेनैव चिदानंदात्मकदेहेन बहिर्निर्गतः सन् जातवत्संप्रदर्शयत इत्यर्थः। जातवत्संप्रदर्शयत
इत्यनेन भागवतचतुर्थाध्यायस्थे जायमाने जने तस्मिन्निति श्लोके निशीथे तम उद्भूत इति श्लोके च विद्यमानं जायमानपद-
मुक्ततात्पर्यार्थं भवति ॥ १७–१९ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

॥ हरि ॐ ॥ श्रीमद्धनुमद्भीमध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

अत्र विरोधोद्धारे दशमस्कंधस्य क्रमप्राप्तेऽपि प्रसंगादघासुरवधाध्यायत्रयस्य प्रक्षिप्तत्वं श्रीश्रीनिवासार्यैरेव साधितमत्र लिख्यते।
अथ केचन श्रीमन्भगवन्मायामोहिता अघासुरवधप्रतिपादकाध्यायत्रयं भागवतांगं ब्रवते। तन्न। प्रक्षिप्तत्वात्। तथाहि। सर्वसंमतेन
श्रीधरेण भागवतटीकारंभसमये कल्पद्रुमसाम्येन भागवतस्तुतिः कृता। तत्रेदं पद्यम्। श्रीमद्भागवताभिधः सुरतरुस्तातारांकुरः सज्जनिः
स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः। द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः सहस्राण्यलं पर्णान्यष्टदशेष्टदोऽतिसुलभो
वर्वर्ति सर्वोपरीति। अत्र द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखा इत्यनेन भागवतस्थत्रिंशदधिकशतत्रयाः प्रोक्ताः। कृतायां तु गणनायां
पंचत्रिंशाधिकत्रिशताध्याया भवंति। तदित्थम्। प्रथमस्य (१९) ॥ द्वितीयस्य (१०) ॥ तृतीयस्य (३३) ॥ चतुर्थस्य (३१) ॥
पंचमस्य (२६) ॥ षष्ठस्य (१९) ॥ सप्तमस्य (१५) ॥ अष्टमस्य (२४) ॥ नवमस्य (२४) ॥ दशमस्य (९०) ॥ एकादशस्य
(३१) ॥ द्वादशस्य (१३) एवं मिलित्वा त्रिशतोपरिपंचत्रिंशत्संख्या भवति। (३३५) ॥ तस्मात्पूर्वप्रतिज्ञाताध्यायापेक्षयाऽध्याय-
त्रयस्याधिक्याज्ज्ञायतेऽध्यायत्रयमिदं प्रक्षिप्तमिति। न च वाच्यं चकारेणाध्यायत्रयस्यापि संग्रहः पूर्वप्रतिज्ञायामेव कृतमिति। च-
शब्दोपात्तसंग्रहस्य निरंकुशत्वेनाधिकस्य न्यूनस्य वा कर्तुं सुशकत्वात्। चशब्दस्य संग्रहार्थत्वे समुच्चयार्थकत्वाभावेन द्वात्रिंश-
तमित्यस्य द्वात्रिंशद्गुणितं त्रिशतमित्यर्थप्रसंगाच्च। दाशरथिवनवासप्रकरणे वर्षाणि नवपंच चेत्यत्रापि चकारेण चतुर्वर्षाधिक्य-
प्रसंगाच्च। अत्राध्यायत्रयोपलब्ध्याऽन्यत्र चतुर्वर्षाधिक्यानुपलब्ध्या च नैवमिति चेन्न। उपलब्धेरेव सर्वासंमतत्वेन संदिग्धत्वा-
दसिद्धेः। अन्योन्याश्रयत्वाच्च। सत्यां चाध्यायत्रयोपलब्धौ चकारस्याध्यायत्रयसंग्रहार्थकत्वनिश्चयसिद्धिः। तत्सिद्धौ चाध्यायत्रय-
निश्चयोपलब्धिसिद्धिरिति। ननु मास्तु च शब्देनाध्यायत्रयसिद्धिः। तथाऽपि द्वात्रिंशत्त्रिशतमित्यत्र त्रिशब्दस्य पुनरावृत्त्या त्र्यधिकं
त्रिशतमित्यर्थोपपत्त्या पंचत्रिंशदधिकत्रिशताध्यायसिद्धेरिति चेत्। मैवम्। कल्पनागौरवात्। पद्ये द्वितीयत्रिशब्दाभावेन त्रिशब्दस्य
कल्पनैव कार्या। ततोऽधिकशब्दस्यापि कल्पनम्। तेन पंचत्रिंशदधिकत्रिशताध्यायकल्पनमिति। न च वाक्यं गौरवं न दूषणम्।
अन्यथाऽनुपपत्तेरिति। अध्यायत्रयाभावकल्पनस्यैव लाघवादन्यथाऽप्युपपत्तेः। ननु व्यासप्रोक्तस्यैव वस्तुतत्वाद्द्वात्रिंशत्त्रिशतमित्युक्तिः
पूर्वप्रतिज्ञातायाम्। गणनायामध्यायत्रयाधिक्यं तु भागवतांते सूतप्रोक्तत्वादिति चेन्न। अंत्याध्यायद्वयस्यैव सूतप्रोक्तत्वात्। अन्यथा
महापुरुषविन्याससूर्यादिसप्तकप्रतिपादकाध्यायस्य व्यासप्रणीतत्वेनाख्यानद्वयस्यानुक्रमणिकायामभावः प्रसज्येत। न हि तथाऽत्रास्ति।
महापुरुषविन्यासः सूर्यस्य जगदात्मन इति चोक्तम्। द्विजश्रेष्ठोऽहमिहास्मि व इत्युक्तेः। अत्रेति शब्दस्य सूर्यादिसप्तकाख्यानांते भागवत-
सूचकत्वाच्च। ननु भागवतस्य द्वात्रिंशदधिकत्रिशताध्यायत्वेऽपि नाघासुरवधवत्सहरणब्रह्मस्तुतिप्रतिपादकाध्यायप्रक्षेपः सिध्यति। किंतु
त्र्यध्यायात्मकस्याजामिलोपाख्यानस्य भागवतानंतरभूतत्वाद्द्वात्रिंशत्त्रिशतमित्युक्तिः। यत इतिहासमिमं मह्यं भगवान्कुंभसंभवः।
कथयामास मलये आसीनो हरिमर्चयन्निति शुकोक्तेरिति चेत्। मैवम्। षष्ठस्कंधस्यैकोनविंशत्यध्यायप्रतिज्ञाव्याहतेः। न च वाच्यं षष्ठस्तु
षोडशोध्यायात्मकोऽध्यायत्रयं तु बाह्यमिति। तथा सूचितत्वाभावात्। अस्येतिहासस्य शुकायागस्त्योक्तत्वेऽपि व्यासग्रथितत्वसंभवाच्च।
कृष्णोक्ताया अपि व्यासग्रथितत्ववत्। किंचेतिहासारंभस्तु कान्यकुब्जो द्विजः कश्चिदित्येतस्माच्छ्लोकादेव। तत्पूर्वश्लोकानां तु
भागवतसंबंधोऽस्ति वा नास्ति। नाद्यः। अध्यायानां षोडशत्वानुपपत्तेः। न चोत्तराध्यायस्यांगम्। असंगतेः। न द्वितीयः। निवृत्ति-
मार्गः कथित इत्याद्यनुवादानुपपत्तेः। तस्मादजामिलाख्यानस्य बाह्यत्वासिध्या द्वात्रिंशत्त्रिशतमित्यध्यायसंख्यासिध्यर्थं सेत्स्यत्ये-
वाध्यायत्रयप्रक्षेपः। स्यादेवं यदि वयं श्रीधरोक्तस्य श्लोकस्यैव प्रामाण्यमंगीकुर्मः। येनाध्यायत्रयप्रक्षेपसिद्धिः। तदेव नास्तीति चेत्।
तथात्वे सर्वटीकाया एवाप्रामाण्यप्रसंगात्। यस्य हि ग्रंथस्य प्रारंभ एव ग्रथिताप्रामाण्यं तद्ग्रथितस्य सर्वस्याप्यप्रामाण्यं कथं न भवेत्।
स्यादेतत्। यदि ग्रंथारंभेऽप्रामाण्यं स्यात्। तन्नास्त्येव। यतो द्वात्रिंशच्च त्रयश्च त्रिशतानि चेति व्युत्पत्तेर्विवक्षा। अनयाऽपि कथं
संख्यासिद्धिरिति चेत्। मैवम्। शतानीति बहुवचनस्य त्रित्वे पर्यवसानात्। अपर्यवसितबहुत्वस्य त्रित्वे पर्यवसानमिति न्यायात्। इति

चेन्न। गौरवानिस्तारात्। त्रिशब्दस्य पार्थक्यकल्पनम्। शतशब्दस्य बहुवचनकल्पनम्। बहुवचनस्य त्रित्वकल्पनमिति। गौरवं न दोषाय। अन्यथाऽनुपपत्तेरिति चेन्न। द्वात्रिंशदधिकत्रिशतांगीकारेण लाघवस्याप्युपपत्तेः। किंच न्यायः सर्वत्रोपादीयते। अथवा। क्वचित्। नाद्यः। ब्राह्मणान्भोजयेत्पश्चात्सांगतार्थं हि कर्मण इत्यत्रापि ब्राह्मणत्रयस्यैव भोज्यत्वापत्तेः। द्व्यवरान्भोजयेद्विप्रानित्यत्र विप्रशब्दबहुवचनेनैव त्रित्वलाभे पुनर्द्व्यवर शब्दस्य वैयर्थ्यप्रसंगाच्च। द्वौ अवरौ अल्पौ येभ्य इति व्युत्पत्तिः। चतुर्थप्रभृतीनां तु अपर्यवसितत्वेनांगीकारायोगात् द्व्यवरशब्देन त्रित्वमेव सिध्यतीति। तस्य बहुवचनेनैव सिद्धत्वे विशेषणवैयर्थ्यं सुस्थमेव। त्रीणि त्रीणि वै देवानामृद्धानि त्रीणि छंदांꣳसि त्रीणि सवनानि त्रय इमे लोका इत्यत्र सर्वत्र त्रिशब्दानां वैयर्थ्यप्रसंगाच्च। फलानि समिधः कुशानित्यत्रापि फलादीनां त्रयस्यैव हरणापत्तेश्च। यो भूतानामधिपतयो रुद्रस्तंतिचरो वृषेत्यत्र च भूतत्रयाधिपतित्वमेव रुद्रस्य श्रुतिप्रतिपादितं स्यात्। अन्येषां भूतानां च रुद्रानधीनता स्यात्। अस्तु क्वचित्कपिंजलाहरणादौ सार्थकमुपादानम्। अत्र मास्तु। नियामकाभावात्। अत्र शतत्रयोपलब्धिरेव नियामिकेति चेत्। सा च श्रवणादिना विना न भवति! श्रवणादिप्रवृत्तिश्च सुलभेष्टसाधनताज्ञानं विना न भवति। सुलभेष्टसाधनज्ञानं तु एतस्मात्पद्यादेव। इष्टदोऽतिसुलभ इत्युक्तत्वात्। एतत्पद्यप्रामाण्यसिद्धिस्तु तदाशाध्यायोपलब्ध्या। एवं चक्रकापत्त्या तस्याप्यसिद्धेः। सुलभेष्टसाधनताज्ञानहेतुत्वं नास्त्येव पद्यस्य। अन्यस्यापि संभवान्न चक्रकापत्तिरिति चेन्न। इष्टदत्वातिसुलभत्वप्रतिपादनस्य व्यर्थत्वेनाप्रामाण्यप्रसंगात्। इष्टदत्वादिप्रतिपादनं हि श्रोतृप्रवृत्तिजननार्थमेव। तस्मादुभयथाऽपि न्यायस्योपादेयताभावाद्व्युत्पादितार्थासिध्या प्रामाण्याभावो शक्यसाधन इति। किंचाघादिविषयाध्यायत्रयांतिमश्लोकस्य तत्पूर्वाध्यायांतिमश्लोकस्य च। एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादीभिः। इत्याकारकस्यैकत्वेनापि प्रक्षेपोऽध्यायत्रयस्य सिध्यति। प्रक्षेपकेण हि संगत्यर्थं पूर्वाध्यायांतिमश्लोकस्य गृहीतत्वात्। अन्यथाऽसंगत्यैव। प्रक्षेपज्ञानस्य सुशकत्वात्। नन्वेकस्यैव श्लोकस्य पुनर्ग्रहणेन तन्मध्यवर्तिनो ग्रंथस्य प्रक्षेपाभ्युपगमे नामकरणप्रकरणे आसन्वर्णास्त्रयो ह्यस्येत्यादीनां श्लोकानां पुनर्गोवर्धनोद्धरणप्रकरणे गृहीतत्वेन तन्मध्यवर्तिग्रंथस्यापि तथात्वं स्यात्। न च तथा। तस्मादेतस्याप्यध्यायत्रयस्य तद्दृष्टांतेन प्रक्षेपासिद्धिरिति। मैवम्। दृष्टांतदार्ष्टांतिकयोर्वैधर्म्यात्। दृष्टांते हि आसन्वर्णा इत्यादीनां नामकरणप्रकरणे गर्गोक्तत्वेन गोवर्धनोद्धारणप्रकरणे च नंदानूदितत्वेन वक्तृभेदः। दार्ष्टांतिके च वक्तृभेदाभावः। उभयत्रापि शुकोक्तेरेवेति गर्गनंदवाक्ययोः शुकेनानूदितत्वात्। अपि च समाख्याभावाच्च प्रक्षेपः सिध्यति। तथाहि। द्वितीये ब्रह्मणा कृष्णकर्माणि नारदायोपदिष्टानि। तृतीये उद्धवेन विदुराय। दशमे गोवर्धनोद्धारे गोपोक्तानि। रंगसभायां च सभास्थैर्वर्णितानि। द्वादशे च सूतेन संग्रहोक्तानि। तेषां मध्ये अघाद्याख्यानस्य क्वाप्यदृष्टत्वात्। न च वाच्यं दशम एव प्रलंबबकचाणूरतृणावर्तमहाशनैरित्यत्र महाशनशब्देन शब्देनाघासुरगृहीतत्वात्समाख्याऽस्तीति। महाशन शब्दस्याघासुर शब्दवाच्यत्वे प्रमाणाभावात्। तर्हि महाशनशब्देन को गृह्यते। कुवलयापीड इति ब्रूमः। कुतः। महान्पूज्यत्वेन वा स्वजातिश्रेष्ठत्वेन पिप्पलः सोऽशनं भक्षणं यस्येति व्युत्पत्त्या युक्तत्वात्। कुंजरः पिप्पलाशन इत्युक्तेः। यद्वा। प्रलंबादीनामेव महाशनशब्दवाच्यकामक्रोधादिरूपम्। उक्तं च गीतासु। काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो महापाप्मेत्यादि। कामक्रोधादयो दैत्या देवाः शमदमादय इति च। ननु मास्तु भागवते समाख्या। तथाऽपि अन्येषां बहूनां ग्रंथानां विद्यमानत्वेन स्यात्क्वचिदिति चेन्न। भारते हरिवंशे चाघासुरवधाख्याभावेन सर्वत्राप्यभावात्। उक्तं च ब्रह्मांडे। तस्माद्धि भारते नोक्तं तद्धि नैवास्ति कुत्रचित्। अत्रोक्तं सर्वशास्त्रेषु न हि सम्यगुदाहृतमिति। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचिदिति च महाभारते। एवमेतत्प्रक्षेपसिद्धौ ग्रंथसंख्याऽपूर्तिः स्यादिति चेन्न। प्रक्षेपकेण हि पूर्वमिदं प्रक्षिप्य ग्रंथसंख्यालोचने आधिक्यभिया पारिजातहरणस्योद्घापात्। न च वाच्यं तस्यैव प्रक्षेप इति। हरिवंशादौ समाख्यासद्भावात्। तस्मादिदमेव प्रक्षिप्तमिति सिद्धम् ॥ इत्यघासुरवधाद्यध्यायत्रयप्रक्षेपसाधनं समाप्तम् ॥

॥ हरिः ॐ ॥ **कथितेति** अत्र राज्ञाश्रुतनवमस्कंधानुवादः कृतः। तत्र पूर्वं सूर्यवंशकथनेऽत्र सोमसूर्ययोरिति व्यत्यये नोक्तमतो विरोधोऽत उच्यते। अल्पाच्तरमिति सूत्रेण सोमशब्दस्य सूर्यशब्दादर्धमात्रालाघवेन सायंप्रातः शब्दयोर्मध्ये सायंशब्दस्येव पूर्वनिपातौचित्यम्। यद्वा। अभ्यर्हितं पूर्वमिति सूत्रेण सोमवंशस्य स्वसंनिहितकृष्णावतारेणाभ्यर्हितत्वात्तच्छब्दस्य पूर्वमुक्तिः। अथवा। सोमस्य स्ववंशमूलपुरुषत्वेनाभ्यर्हितत्वाभिमानात्तथोक्तिरतो न विरोधः ॥ १ ॥ यदोरिति। अत्र यदोर्नितरां धर्मशीलत्वमुक्तम्। तदयुक्तम्। जरायौवनव्यत्यासार्थं पितृकृताज्ञालंघनात्। मैवम्। स्वयौवने स्वमातृभोगापेक्षया पित्राज्ञाभंगस्यानधिकपापवहत्वात्। तर्हि पुरोरयं दोषः स्यादिति चेन्न। सापत्नमातुः पितृद्वारा संबंधसत्वेन तदाज्ञापालनस्यैवौचित्यात्। तस्माद्यदुकृतपित्राज्ञाभंगेन न धर्मशीलत्वहानिः। प्रकृतयदोरिति विचारवत्त्वादेव नितरामिति विशेषितम्। अन्यथा तद्वंशे कृष्णावतारासंभवात् ॥ २ ॥ अवतीर्येति। पूर्वश्लोके विष्णोर्वीर्याणि शंस न इत्युक्तत्वेऽपि अत्र तानि नो वदेत्युक्त्या पुनरुक्तिरित्यत उच्यते। पूर्वश्लोके कृते प्रश्ने जातो गतः पितृगृहादिनोक्तमेव पुनः किं पृच्छसीत्याशंक्य पृच्छति। यद्यपि पूर्वस्कंधाते संक्षिप्योक्तं तथापीदानीं विस्तराद्वदेति प्रश्ने न पुनरुक्तिः ॥ ३ ॥ ननु विस्तारकथने विषयतृष्णया प्रवाहितस्य वक्तुः सांसारिकतापपरिजिहीर्षोः प्रष्टुर्योग्ययोगिभेदेन द्विविधश्रोतॄणां मध्ये मनःसमाधानापेक्षकाणां योगिनामिंद्रियतृप्त्यपेक्षकाणामयोगिनां चावसराभावात्कथमिदं घटतेत्याशंक्य समाधत्ते ॥ निवृत्तेति। यद्यपि पापापरिहारकाल्पकीर्तेः पुंसो गुणानुवादे कश्चन विरज्येत। तथाप्युत्तमश्लोकगुणानुवादात्पापनाशकमहाकीर्तेर्विष्णोर्गुणानामद्भुतचरितानुवादात् पुनः पुनः कथनप्रश्नश्रवणादिरूपात्मकः पुमान्। विरज्येत अलंबुद्धिमान् भवेत्। न

कोऽपीत्यर्थः । तत्र हेतुगर्भाण्यधिकारिभेदेन त्रीणि विशेषणानि निवृत्ततर्षैर्भवद्भिः । उपगीयमानात् कथ्यमानात् । भवतां विषयतृष्णाभावेन कथने वक्तुरवसरप्राप्तिरिति भावः । भवस्य तज्जन्यतापानां च । औषधात् । उष दाह इति धातोः । दाहकत्वादित्यर्थः । अनेन पृच्छकस्य ममाप्यवसरसिद्धिश्च सूचिता । श्रोत्रमनोभिरामात् । योगिनामत्रागतानां श्रोतॄणां मुनीनां मनःसमाधानहेतोरयोगिनां केवलेंद्रियतर्पकाणां श्रोतॄणां श्रोत्रेन्द्रियरुचिकरात् । अनेन द्विविधश्रोतॄणामप्यवसरप्राप्तिः सूचिता । तस्माद्विस्तरकथनादिषु न विराम इति भावः । नन्वत्र विरक्तोऽपि कश्चिद्दृश्यत इत्यत आह ॥ विनेति । पशुघ्नात् । पशुरिति विष्णुदीक्षाराहित्येन जीवन्मृत इति ज्ञायते । सो पशुघ्नः । हन हिंसागत्योर्गत्यर्थानां च ज्ञानार्थत्वात् । उक्तं च । ते नराः पशवो लोके किं तेषां जीवने फलम् । यैर्न लब्धा हरेर्दीक्षा सर्वबंधविमोचनीति कृष्णामृतमहार्णवे । तस्माद्विना न कोऽपि विरज्येतेति । यस्तत्र विरक्तः स तु जीवन्मृत इति भावः । यद्वा । पशुघ्नः पशुहत्यादिभिः केवलयज्ञादिकर्मणि निष्ठावान्ज्ञानशून्यः । यद्वा । अपशुघ्नादिति पदम् । अपगताः शुचो जीवगतशोकोपलक्षितसर्वदोषा यस्मात्तं हरिं हंतीति । ईश्वरोऽहमहं भोगी यस्त्वया मंदभाग्योक्तो मदन्यो जगदीश्वरः कोऽसावित्यादिना चेश्वराभावकल्पनरूपां हत्यामाचरति तस्मात्पापरूपाद्विनेति । अथवा । पुमान् पुवर्ण आदौ यस्यास्तीति पुरुषोत्तम इत्यर्थः । पूर्णषड्गुणः पुंनामा भगवान्विष्णुर्यतोऽसौ पूर्णषड्गुण इत्युक्तेः । तादृशो विष्णुः । श्लोकगुणानुवादात् स्वकीर्त्यादिगुणाद्धेतोस्तमुद्दिश्येत्यर्थः । पशुघ्नात् शोकनाशकवैकुंठात् । विना गरुडेन । आप प्राप्तोऽभूत् । विनेत्यावृत्तिपक्षे गरुडेन विनेत्यर्थः । अनेन कथाश्रवणे उत्सुकता मर्यादा च सूचिता । अतस्तस्मात्क उत्तमो विरज्येत । यो विरज्येत स नोत्तमः किंतु नीच इति भावः । किंवा भवौषधात् रुद्रस्यौषधाद्विषतापहारकाद्रामायणात् । श्रोत्रमनोभिरामात् कर्णांतःकरणमनोहरात् । भारतात्सकाशादपि । पशुघ्नात् यस्य व्यासस्य शोकनाशकात् तथाऽपि नात्मा परितुष्यते इत्यादिना व्यासमनस्तोषसाधकत्वात् निवृत्ततर्षैः । न मे कर्मफले स्पृहेत्यादिभिस्तृष्णारहितैः । भगवद्ब्रह्मनारदव्यासशुकैः । उपगीयमानादुत्तमश्लोकगुणानुवादात् । अत्रानुवर्ण्यतेऽभिक्ष्णम् । इत्यादिना पुण्यश्लोकगुणानामनुवेलं वादो वर्णनं यस्मिंस्तस्मात् भागवतात् के सुखविषये । अपेक्षक इति शेषः । यः पुमान्नरः विरज्येत सः विना विरुद्धः पुरुषः पुरुषो न भवति किंतु पशुरिति भावः ॥ ४ ॥ द्रौण्यस्त्रेति । अत्र धार्तराष्ट्रस्य संतानस्यानपेक्षितत्वेऽपि कुरुशब्देन तेषां ग्रहणं कथमित्याक्षेपापाकरणार्थं उच्यते । यः श्रीकृष्णः द्रौण्यस्त्रदग्धमिदं मदंगं पांडवानाम् । संतानबीजं वंशव्यंजकम् । कुर्विति शरणं गताया मे मातुः । कुक्षिगत उदरं प्रविष्टः तत्रापि । आत्तचक्रः । चक्र दीप्ताविति धातोः । दीप्तगदाभ्रमणेनालातचक्रवदर्शनादात्तचक्र इत्युक्तिः । अन्यथा प्रथमस्कंधोक्तेन परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुरित्यनेन विरोधः स्यात् । तस्मात्तथा सन् जुगोप । तस्य वीर्याणि वदस्वेत्युत्तरेणान्वयः ॥ ६ ॥ वीर्याणीति । पूर्वत्र वीर्याणि शंस न इत्यनेन सामान्योक्तौ वद विस्तरादित्यनेन च विस्तररूपविशेषप्रश्नसिद्धौ पुनरत्र वदस्व विद्वानित्यनेन पुनरुक्तापात इति चेन्न । पूर्वत्र यद्यपि सामान्यविशेषविषयौ प्रश्नौ द्वावपि कृतौ तावत्तावतारविषयौ । तत्रांशेनावतीर्णस्येति । यदोर्वंश इति चोक्तेः । तथाप्यत्र देह्य तर्बहिःस्त्वोक्तेर्मूलरूपवीर्यविषयकप्रश्ने न विशेषसिद्धेः । न च मायामनुष्यस्येत्यनेन विरोधः । मायेतीच्छासमुद्दिष्टेति वचनान्मायया स्वेच्छया मनुष्या मनुष्यावतारा यस्मादिति व्युत्पत्त्या मूलरूपस्यैव सिद्धेः । नाप्युत्तराभावात्प्रश्नवैयर्थ्यमत्र शंक्यम् । शिवसंकटमोचकत्वभृगुवत्सलत्वश्रुतिस्तुतित्वाद्युक्तेः । ततश्चायं श्लोकार्थः ॥ अखिलदेहभाजाम् । सर्वप्राणिनाम् ॥ अंतर्बहिः । पुरुषकालरूपैः । नन्वत्रांतर्बहिरेकैकरूपसत्त्वेन द्विवचनसंभवेऽपि रूपैरिति बहुवचनमयुक्तमिति चेन्न । शरीरांतःस्थद्विसप्ततिसहस्रनाड्यादिषु प्रातिस्विकत्वेन स्थितसूक्ष्मादिद्विपरार्धपर्यंतकालावयवादिषु प्रातिस्विकत्वेन स्थितरूपाणामनेकत्वात् । तथा च शरीरांतःस्थनाडींद्रियादिगतैरत एव पुरुषशब्दवाच्ये रूपैः मृत्युम् । देहवियोगलक्षणरूपमृत्यूपलक्षितदेहसंबंधरूपजन्मादिलक्षणसंसारम् ॥ प्रयच्छतः । प्रकर्षेण यमयतः । यावद्भगवान्स्थूलनाडींद्रियांतः स्थित्वा तानि देहभाग्भिः प्रवर्तयति तावत्संसारोऽत्रापगच्छतीति भावः ।

तथैव शरीरबहिःस्थातिसूक्ष्मतमादिपरांतकालावयवस्थैरत एव । कल छेदने कल कामधेनावित्यादिधातुभ्यः । संसारच्छेदकत्वेन मोक्षकामपूरकत्वेन कालसंज्ञकै रूपैः ॥ अनामयं । आरोग्यं मोक्षं वा । नास्ति नाम मृत्युनामापि यस्मिन्सोऽनामा विष्णुर्वा । अ इति ब्रह्मेति श्रुतेः । अशब्दवाच्यत्वाद्वा । तं याति प्राप्नोत्यनेनेति अनामयं ज्ञानं प्रयच्छतः ददतः ॥ अमनुष्यस्य । मनुष्योपलक्षितसर्वजीवभिन्नस्य । तस्य वीर्याणि ॥ माया । सप्तसु प्रथमेति सूत्रात् । बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यत इत्युक्त्या बहुकालसिद्धज्ञानेन भगवत्प्राप्तिरूपमोक्षो भवतीति भावः । अथवा । अंतर्बहिः पुरुषकालरूपैः । अंतःपुरुषरूपैः अंतराकर्षणेन पुरुषसंज्ञकै रूपैरुच्छ्वसैरित्यर्थः । बहिः कालरूपैः बहिर्विसृष्टत्वेन कं कायं न लांति । ला आदान इति धातोः । नांगीकुर्वंतीति व्युत्पत्त्या कालसंज्ञकै रूपैर्निश्वासैः । आयुर्गणनायां तेषामेव निमित्तत्वात् । अखिलदेहभाजां अखिलः पूर्णो विष्णुर्देहाः संत्येषामिति देहाः । अर्श आद्यच् । जीवा इत्यर्थः । विष्णुरेव जीवा इति । भजंति । उपासंति । तेषाम् । मृत्युं संसारं तमो वा । प्रयच्छतः । मायामनुष्यस्य । महामायेत्यविद्येति नियतिर्मोहिनी चेत्यारभ्य विष्णोः प्रज्ञप्तिरेवैकशब्दैरेतैरुदीर्यत इति नारायणश्रुतेः । माया ज्ञानं तद्युक्तो मनुष्य इति मध्यमपदलोपीसमासः । तस्य । अनामयं मोक्षम् । प्रयच्छतः । ज्ञानिनां मोक्षदश्च इत्यनुव्याख्यानोक्तेः । मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धय इत्युक्तेर्देहभाग्मनुष्ययोर्बहुवचनैकवचने क्रमात्ज्ञेये । अनामयं क्षेमं प्रति । क्षेमार्थमिति यावत् । अपि वा । अखिलदेहभाजां अखिलं सर्वमिष्टं ददातीति अखिलदा तथाविधा ईहा यस्य सोऽखिलदेहो हरिः तं भजताम् । अंतर्बहिः पुरुषकालरूपैः परमाण्वंशांतःस्थब्रह्माण्डबहिःस्थपुरुषकालाख्यरूपैः । ज्ञातैरिति शेषः । पुरुषाख्यस्य भगवतो रूपैः रूप्यते

एभिरिति ज्ञानैरित्यर्थो वा तैः । अमृत्युं मोक्षम् । प्रयच्छतौ ददतः । अमनुष्यस्य मनुष्योपलक्षितसर्वविभिन्नस्य तस्य वीर्याणि । माया । सप्तसु प्रथमेति सूत्रात् । इच्छां कामितं च वदस्वेति । यद्वा । मायेति शुकं प्रति संबुद्धिः । मः शिवे मा रमायां चेति विश्वात् । मः शिवः आ आत्मत्वेन याति प्राप्नोतीति स तथा। मां ज्ञानं वा यातीति स तथेत्यर्थे विद्वन्नित्यनेन पुनरुक्तिः । अतो मातीति मः सर्वज्ञः स चासौ अश्च व्यासश्च तस्मात् यं ज्ञानं यस्य तत्संबुद्धिरित्यर्थः ॥ ७ ॥

नैषेति अत्रोत्प्रेक्षितकमलपर्यायादंभोजादमृतस्रवणमसंभावितमतो विरोधोऽतोऽर्थ उच्यते । अत्रांभोज शब्दश्चंद्रवाचकः । अब्जो जैवातृकः सोम इत्यभिधानात् । विधुः सुधांशुः शुभ्रांशुरित्यनेनामृतकराच्चंद्रादमृतस्रवणं युक्तमेवेति न विरोधः । किंच एतदन्यच्चेति पूर्वश्लोके विस्तृतं वक्तुमर्हसीत्युक्तम् । तत्र क्षुत्तृट्पीडितस्य तव कथमवसर इत्याशंक्य एषातिदुःसहा क्षुन् त्यक्तोदमपि मां न बाधते । तत्र हेतुगर्भविशेषणं त्वन्मुखांभोजसृतं हरिकथामृतं पिबंतमिति समाहितम् । अनेन ममापि क्षुत्तृट्परीतत्वात्कथमवसर इत्यपि परास्तम् । यद्यस्माद्बहिर्गच्छति तत्तस्मिन्नस्त्येवेति व्याप्त्या क्षुदुपशमस्यानुमेयत्वात् । यद्वा । अंभोजशब्दः कमलार्थक एव । द्रवद्द्रव्ये भाजनस्थे जाते तस्य तल्लेपेन न्यूनतादर्शनेऽपि पद्मपत्रमिवांभसीत्युक्त्या तत्र लेपासंभवेन कमलोत्प्रेक्षा मुखस्येति ज्ञेयं व्यासमुखाद्यावत्प्राप्तं तन्मध्ये किंचिदपि ऊनं न भूत्वैव सर्वं मत्कर्णोपरि पतिष्यतीत्यर्थः ॥ १३ ॥ वासुदेवेति । अत्र केचिदुपमायामुपकर्मासंगतिं ब्रुवते । तदर्थमयमर्थः । कीदृशः प्रश्नः ॥ तत्पादसलिलं यथा । गंगाजलतुल्य इत्यर्थः । ननु तत्कर्मक्रिययोः संबंधोऽत्रान्वेषणीयः । उपमायां सर्वसाम्याभावात् । यद्वा । तत्संबंधावश्यकत्वे तु स्नानं कुर्वाणं तत्पितृपुत्रौ चेति त्रीन्पुरुषान्यथा गंगा पुनातीति उपमायां योज्यम् । उपमेये च वक्त्रादीन्त्रीनिति केचित्स्नातुः पितृपितामहप्रपितामहानिति । अन्ये पितृमातृमातामहानिति वदंति । तदयुक्तम् । स्नातुः फलायोगप्रसंगात् । तस्याप्यंगीकारे त्रित्वसंख्योक्त्यनुपपत्तेः। अथवा । वक्त्रादीनामेवोभयत्र संबंधसत्त्वापेक्षायां तु वक्तारं शुकं पृच्छकं राजानं श्रोतॄनृषिसूतादीन् त्रयाणामपि गंगामध्यस्थत्वेन पवित्रीकर्तुं शक्यत्वात् । जटास्थगंगा रुद्रावतारत्वेन शुकं वक्तारं गंगामध्ये प्रायोपविष्टत्वेन परीक्षितं पृच्छकं सदा यात्राप्रसंगात्स्नानपानादिना ऋषीन् श्रोतॄनिति योजना । उत वा । गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छतीति वचनाद्वक्तारं कियद्दूरेऽस्ति गंगेतः किं योगात्साऽघहारिणीति पृच्छकम् । शृणुयाद्गंगामाहात्म्यं स याति परमां गतिमिति फलश्रुतेः श्रोतॄंस्तत्पादसलिलं यथा पुनातीत्यर्थः । ननु प्रश्नादिकृतिः स्वकर्तारमेव पावयेत् । अन्यथाऽतिप्रसंगात् । तस्मात्प्रश्नस्य पृच्छकपावकत्वमस्तु । वक्त्रादिपावकत्वं तु कुत इति चेत् । उच्यते । वासुदेवकथाप्रश्नः श्रूयतां देवदेवेशेति वक्तृप्रार्थनया वासुदेवस्य श्रोतृत्वे सिद्धे शक्यसंबंधेन लक्षणया वासुदेवपदेन तद्गतश्रवणरूपो धर्मो गृह्यते । कथाशब्देन वक्तृधर्मः । प्रश्नशब्देन पृच्छकधर्मः । एकत्रद्भावेन वासुदेवकथाभ्यां सहिततद्गतिः । मध्यमपदलोपीसमासेन चैकवचनोपपत्तिः । अभ्यर्हितत्वाद्वासुदेवस्यादौ ग्रहणम् । अत एवाल्पाच्तरविरोधाभावः । ननु सहपठितेष्वेकस्यैव लक्षणायां किं निमित्तमिति चेत् । इदं ज्ञेयम् । वक्तृपृच्छकयोः प्रार्थनाभावेन वासुदेवत्वासिध्या कथंचिदपावित्र्यसंभवेऽपि श्रोतृत्वाय प्रार्थितवासुदेवेऽपावित्र्यस्य सर्वथाऽसंभवात् । तत्रैव लक्षणाश्रयणं युक्तम् । तस्माच्छ्रवणादयः स्वस्वकर्तारं पुनंतीति भावः । तत्र दृष्टांतः ॥ तत्पादसलिलमिति । तनोति जगदिति तश्चतुर्मुखः । तनु विस्तारे ततःक्विप् । पातीति पो विष्णुः अत्ति जगद्भक्षयतीत्यदो रुद्रः । एते तत्पादास्तेषां सलिलं कमंडलुजं पादजं जटोद्भवं च तत्र द्वितीयं ध्रुवादीन् आद्यं शवादीन् । तृतीयं सगरादीनिति त्रीन्पथेत्यर्थः । गिरिजादिभिस्तत्त्ववक्तृत्वाद्रुद्रस्य नारदाय कृतप्रश्नत्वाद्ध्रुवादेः पितुराज्ञाश्रवणात्सगरादेः । एवं विवेकेन वक्त्रादिकमप्येतेषु युज्यत इति भावः । किंचैतद्वक्तृत्वादिकर्मत्रिके वक्तरि प्रश्नश्रवणादुत्तरदानाच्च प्रश्नं विना वक्तृत्वश्रोतृत्वधर्मद्वयसत्त्वाच्छ्रोतरि च प्रश्नोत्तराभावादेकस्य श्रवणस्यैव सत्त्वात्पृच्छके तूत्तरदानरूपवक्तृत्वाभावरूपेऽपि प्रश्नकरणरूपवक्तृत्वस्य प्रश्नस्याप्रयोजकत्वप्रसंगाच्छ्रवणस्य निजधर्मरूपस्य च सत्त्वेन धर्मत्रयस्यापि सद्भावात्पृच्छकाद्वक्तृ राधिक्येऽपि परीक्षित्संमाननार्थं शुकेन प्रश्नस्यैव प्राधान्यसमर्थनार्थं श्रोतृत्ववक्तृत्वाभ्यां सहेति विवक्षया प्रश्नैकवचनप्रयोगः । यद्वा वासुदेवकथाप्रश्नो यजुः प्रसिद्ध प्रश्न इति गुणप्रतिपादकग्रंथैकदेशः । सप्तसु प्रथमेति सूत्रात् षष्ठ्यर्थे । तस्य वक्तारं पृच्छकं श्रोतॄंश्च तत्पादसलिलं गंगा यथा यथावत्पुनाति । अतो वक्त्रादीनां गंगया कृतपावित्र्यरूपफलप्राप्तेरयं प्रश्नस्तव समीचीन इति भावः । अथवा । वासुदेवकथाप्रश्नस्तत्पादसलिलगंगा यथावत्पुनाति किं पुनर्वक्त्रादीन्त्रीनिति योजना द्रष्टव्या । हि शब्दः किंत्वर्थे यच्छब्दस्य किमर्थकाद्वा । यथा शब्दस्य किमर्थकत्वम् ॥ १६ ॥ गौर्भूत्वेति । पूर्वश्लोके ब्रह्माणं शरणं ययावित्युक्तम् । तत्र जडरूपाया भूम्या नासंभवेऽत्र गौर्भूत्वेत्याद्युक्तम् । तथाप्यवोचतेत्यनेन विरोधः । गोजातेरपि वचनासंभवात् । अत उच्यते । ससंकेतेनावोचतेत्यर्थः । स्वमिति पाठे स्वं व्यसनमवोचतेति लुप्तोत्प्रेक्षा । उः शंकरः । उकाः शंकरः प्रोक्त इत्येकाक्षरः । सः पः पालको येषां तेषां कंसबाणजरासंधादीनाम् । स्थितेन स्वतले स्थित्वा यत् अंतिकं नाशवत्सुखं तद्विषये व्यसनम् अवोचत वेत्यर्थः । अन्यथा । उपांतिकशब्दाभ्यां पुनरुक्तिप्रसंगः । ननु भूम्या रूपांतरग्रहणशक्तौ गत्युक्तिसाधनरूपमगृहीत्वा केवलगतिसाधनगोरूपधरणे किं निमित्तमिति चेत् । स्त्रीरूपापेक्षया गोरूपस्यातिदयोत्पादकत्वात् । न च वचनं विना दयाहेतुदुःखज्ञानार्थम् । दयावशेन पुंसा तल्लिंगादिनाऽनुमेयत्वात् । अत एव करुणक्रंदनादीनि लिंगान्यभिहितानि । तस्माद्गोरूपस्यैव स्वभावात्पावित्र्या दयाजनकत्वाच्चौचित्यमिति भावः ॥ १८ ॥ तत्रेति । अत्र यद्यपि न वैकेनाक्षरेण छंदांसि वियंतीति श्रुतेरक्षराधिक्यं न दोषाय तथाऽपि यत्र गत्यंतरं नास्ति तत्रैव तत् । अन्यथा सर्वछंदोच्छेदप्रसंगात् । तस्मात्पुरुषं पुरुषसूक्तेनोपतस्थे समाहित इति पाठांगीकारे गत्यंतरसत्त्वात् । नात्र यतिभंगः शंक्यः । तस्य काव्यविषयत्वोक्त्या शास्त्राविषयत्वात् । भक्त्या भागवतं शास्त्रमित्यु-

क्त्याऽस्य च शास्त्रत्वात् । तदुक्तं टीकाचार्यैश्च । न गीतार्थं वक्ष्यामि लेशत इति गीताभाष्ये मंगलव्याख्याने इति चेत् । तस्य काव्यविषयत्वात् । नाप्यत्र संधिभंगः । अजायंत एके चोभयादत इत्यादेर्बहुशो दृष्टत्वात् ॥ २० ॥ गिरमिति । अत्र समीरितामित्यस्य तृतीयासापेक्षत्वात्तदभावेन न्यूनता स्यादित्यतोऽर्थ उच्यते । अकथप्रविसंभूमसखहाविष्णुवाचका इत्यभिधानात् । संशब्दवाच्येन भगवता ईरिताम् । यद्वा । सः विष्णः मा रमा । यद्वा । मया सहितः समो भगवान् ते वासवा उत्तमत्वेन स्तोवा अस्ति यस्येति समी समीरणः तेन ॥ ईरिताम् । उदीरिताम् । गिरं हे अमराः यूयं मे मत्तः ॥ पौरुषीम् । विष्णूक्तां वायूक्तां वा ॥ वा गां । वाचं । आश्रृणुत ॥ पुनः । अनंतरम् ॥ तथैव । भगवदुक्तानुसारिणैव ॥ माचिरम् । अविलंबितम् ॥ विधीयताम् । क्रियताम् । अन्यथा पुनरुक्तापातः । न तूक्तयोजनायामुभयोराशु माचिरमित्येतयोर्मध्ये एकस्य श्रवणक्रियायामन्यस्य विधानक्रियायामिति पार्थक्येन संगतत्वात् ॥ २१ ॥ देह इति वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि । तथा शरीराणि विहायजीर्णान्यन्यानि संयाति नवानि देहीति गीतासु जीर्णशरीरत्यागांते नवग्रहणोक्तिप्रतीत्याऽत्र च भूतार्थकसत्सप्तमी क्त प्रत्ययोक्त्या देहांतरमनुप्राप्य प्राक्तनं त्यजते वपुरित्यस्य विरोधोऽत उच्यते । सप्तम्यादेरतिसामीप्यार्थकत्वात् क्तस्य च वर्तमानार्थकत्वात् ॥ देहे पंचत्वम् । पंचरूपतयाऽदर्शनम् आपद्यमाने सतीत्यर्थः । अनेनात्रत्यो विरोधः परिहृतः । जडत्वेन स्वतोऽग्रे गंतुमशक्यत्वात् । कर्माणि अनुगानि यस्य सः ॥ देही । देहाभिमानी जीवः ॥ अवसः । विष्णुवशः सन् । अनेन जीवदेहाभिमानिकर्माणि विष्ण्वधीनानीति सूचितम् ॥ देहांतरम् । अंतरे भव आंतरः देहस्य स्थूलदेहस्य आंतरः अंतःस्थो लिंगदेहः ॥ तमनुप्राप्य । धृत्वैवेति यावत् ॥ प्राक्तनं । जीर्णस्थूलशरीरं । त्यज्यते । गीतोक्तिविरोधोऽपि नास्ति । तस्याः स्थूलशरीरद्वयविषयत्वात् । अस्य च लिंगदेहाश्रयणेनैव प्राक्तनदेहविसर्जनपरत्वात् । ननु गीतायां जीर्णदेहांते एव नवदेहप्राप्तिरुक्ता । अत्र तु जीर्णदेहविसर्जनमेवोक्तम् । अतो विरोध इति चेन्न । तत्रापि हि जीर्णदेहविसर्जनकाल एव नवदेहप्राप्तिर्न विवक्षिता । मध्ये स्वर्गनरकभोगकालस्यापेक्षितत्वात् । ततः शेषेणेमं लोकं व्रजतीति श्रुतेः । कालांतरेणैव नवदेहप्राप्त्याऽत्रापि लिंगदेहस्थित्युक्तावपि तथैव स्थातुमशक्यत्वात् ।अग्रे नवदेहस्यापेक्षितत्वाच्चैकवाक्यतासंभवात् । न च व्रजंस्तिष्ठन्पदैकेन यथैवेकेन गच्छति । यथा तृणजलूकैवं देही कर्मगतिं गत इत्यग्रिमश्लोके नास्यार्थस्य विरोधः । प्रातिकूल्याभावात् । तथाहि । व्रजनांता पुमान् एकेनैकसंख्याश्रयेण पदा दक्षिणाद्यन्यतमेन पादेन तिष्ठन् भारं स्थापयन् । अंतर्णिच् । सर्वशरीरभारमेकस्मिन्नेव पादे निधायेति यावत् । एकेन अन्येन । एके मुख्यान्यकेवला इत्यभिधानात् । पदा पादेन गच्छति पूर्वस्थापितभूमिं विसृजति यथा तथा स्वदेहांतःस्थं लिंगदेहमनुप्राप्य दीपज्योतिः सदृशाणुरूपेणाश्रित्य प्राक्तनं प्रकाशसदृशव्याप्त्याऽधिष्ठितं पूर्वं जीर्णं वपुः शरीरं त्यज्यते । यद्वा । पंचत्वमनु मरणानंतरं । गोवशः इंद्रियाधीनः कर्म । सप्तसु प्रथमेति सूत्रात् । कर्मणा आपन्ने प्राप्ते । अथवा । इ कर्मा । इ विचित्रे स्मरे पुमानिति यादवकोशात् । विचित्रकर्मेत्यर्थः । नवे देहे आपन्ने प्राप्ते सति देही तद्देहाभिमानी भवतीत्यर्थः तस्मात्कदाऽपि देहेन विनाऽनवस्थानात् तद्वियोगभियाऽकीर्तिकरं स्त्रीवधं कर्तुं नार्हसीति भावः । नन्वत्रोक्तोऽयमयुक्तो दृष्टांतः । तत्र पादांतरप्राप्त्या दार्ष्टांतिके च देहांतरप्रतीत्या स्वारस्याभावादित्याशंक्य दृष्टांतांतरमाह ॥ यथेति । तृणजलूका तृणसंचारी शामनामा कीटविशेषः । देही शामकीटदेहवान्सन्नेव । भृंगाकारदेहमनुप्राप्य शामदेहाकारं त्यज्यते । एवं देही उत्तरदेहबीजभूतवृक्षांतरांकुरजनकत्वानुमेयबीजसदृशलिंगाख्यदेहावृत एव । कर्मगतिं कर्मानुरूपागतिः प्राप्तिर्यस्य तं नवदेहं गतः प्राप्तो भवतीति । तस्मात्प्राक्तनमनादिं देहांतरं स्थूलदेहांतःस्थलिंगदेहमनुप्राप्याधिष्ठायैव नवं सादिं पूर्वमुत्तरं च स्थूलदेहं त्यजते गृह्णाति चेत्यर्थः । अतः कदाऽपि देहेन विनाऽनवस्थानात्तद्वियोगभिया कीर्तिनाशकं स्त्रीवधं कर्तुं नार्हसीति भावः ॥ २९ ॥ इति श्रीभागवते प्र० ॥ १०–१ ॥

॥ हरिः ॐ ॥ कीर्तिमंतमिति । अत्र वसुदेवस्यानृतादतिविह्वलत्वमुक्तम् । तत्कृष्णसमर्पणेन विरुद्धमतोऽर्थः उच्यते । स आनकदुंदुभिः ॥ अनृतात् । नास्ति ऋतं सत्यम् । ऋगताविति धातोर्गत्यर्थानां च ज्ञानार्थत्वात् । ज्ञानं वा यस्मिंस्तस्मात्कंसात् ॥ अतिविह्वलः । बहूद्विग्नः सन् ॥ कीर्तिमंतं । तन्नामकम् । आद्यजं पुत्रम् ॥ कंसाय । कसि हिंसायामिति धातोः । हिंसनार्थं ॥ कृच्छ्रेण अतिकष्टेन । अर्पयामासेत्यन्वयः । ननु स्वभोगसाधनदारकृते हिंसाविषये पुत्रदातुर्वसुदेवस्यानृतादिदोषभीतिः कथं युज्यत इत्यतः कृच्छ्रेणेत्युक्तम् । एतदुपलक्षणम् । कृच्छ्रादिप्रायश्चित्तपूर्वकमित्यर्थः । यद्वा । अनृतं नाम भगवत्प्रीतिविरोधि । अन्यत्सर्वं तत्प्रियत्वाद्गुणो दोषो तथा प्रियम् । एवं ज्ञानवतो दृष्टिरज्ञस्तन्नावगच्छतीत्युक्तेः । भगवद्वचः सत्यत्वाद्विश्वस्तेन धर्मराजेनाश्वत्थामा हत इति भाषणे निःसंदेहानाचरणे न तस्य दोषवत्त्वदर्शनाच्च । अतः श्रीकृष्णार्पणस्य भगवद्विरोधित्वाभावेनानृतत्वाभावाद्वसुदेवस्यानृतादतिविह्वलत्वं न विरुद्धमिति भावः । अथवा पुत्रान्समर्पयिष्येऽस्या इति प्रतिज्ञातुर्वसुदेवस्य हत्यार्थं पुत्रोत्पादनमेवायुक्तमिति न शंक्यम् । सोऽनृतादित्येकं पदम् । उना उन्प्रत्ययेन सहितः ऋतुशब्दः ऋतुरिति भवति । तस्माद्तोः रजोदर्शनलक्षणात् । अतिविह्वलः दुस्त्यजं किमृतात्मानमित्युक्त्या वसुदेवस्य कामत्यागशक्तत्वेऽपि प्रदाय मृत्यवे पुत्रान्मोचये कृपणामिमामिति विचारितपुत्रदानापेक्षया देशकालाद्यनापदि भार्यर्तौवंध्यत्वकारणे भ्रूणहत्यारूपदोषस्य स्वात्मकृत्याधिक्यं ज्ञात्वाऽतिभीतः सन्नित्यर्थः । कंसाय अंतं लक्षणया बालवधदोषम् । स्वस्मै चेति शेषः धर्मज्ञत्वेन कीर्तिमाप । दयितुमित्यध्याहार्थं । प्रथमजं पूर्वगर्भं । कृच्छ्रेण धर्मसंकटेन । अर्पयामास देवक्यामधात् । तस्मात्स्वेन केवलदत्तानां परेण हिंसा कृता चेत्तत्र स्वमनीषितस्याभावात्तदपेक्षया भार्यर्तोर्वंध्यत्वकरणेन सभ्रूणहत्यायाः स्वकृतत्वसिध्या महादोषत्वमिति विचारेण पुत्रदाने केवलविह्वलत्वेऽपि भार्यर्तुवंध्यत्वकरणेऽतिविह्वलः सन्

तेन कथंचित्पुत्रसंभवेऽपि तदाचारस्य युक्तत्वमेवेति भावः । अनेन कंसायांतमित्यादिना जातमात्रसुतार्पणे नामकरणकालसंभवेन नामानुपपत्त्या कीर्तिमंतमिति नामककथनेन प्राप्तविरोधोऽपि परिहृतो भवति । ततश्च शौरिभिर्भगवत्प्रचोदित इत्युक्तेः । परप्रेरणया-ऽविहितकर्मकरणेऽपि कर्तुर्दोषाभावः । अन्यथा विश्वामित्रप्रेरिता वा वसिष्ठपुत्रहंतुः कल्माषपादस्य ब्रह्महत्याप्रसंगात् । न च तथा । किंतु प्रेरकस्य विश्वामित्रस्यैव ब्रह्महत्याप्राप्तिदर्शनात् । यद्वा अनृतत्वं नाम प्रतिज्ञाया अपारगम् । प्रतिज्ञा तु पुत्रान्समर्पयिष्येऽस्या यतस्ते भयमुत्थितमिति । सम भेदे समीचीने इति यादवकोशात् । देवकीशोणितोपादानकशरीरत्वेन सं अभिन्नानामेव पुत्राणामर्पण-प्रतिज्ञया काष्ठा यथानंदकरं नभस्त इति दृष्टालेन मद्भुतं बालकमित्यादिना च भगवतः शोणितोपादानकशरीराभावेन भिन्नत्वसिध्या तद्दानेऽपि वसुदेवस्य नानृतभाषित्वप्राप्तिः । यतस्ते भयमित्यत्र अभयमिति पदच्छेदो वा । यतः । येभ्यो पुत्रेभ्यस्ते तुभ्यम् अभयमुत्थितं तान्प्रदास्यामीति प्रतिज्ञायां सत्यां भयहेतुपुत्रानर्पणे को दोषः । उत वा । तसेः सार्वविभक्तिकत्वात् । यतो येषां पुत्राणां ते त्वत्तो भयमुत्थितं तान्पुत्रान्समर्पयिष्य इति कंसयोग्यतानुरोधेन पूर्वमेव सविप्रलंभप्रतिज्ञायां कंसजभयोत्थानरहितस्य भगवतोऽनर्पणे कथमसत्याचारित्वं । नास्त्येवेत्यर्थः ॥ ३ ॥ सर्वे इति । अत्र नारदेन कंसं प्रति भाषणाद्भारतेति संबुद्धिर्न युज्यतेत्यतोऽर्थ उच्यते । अत्र भारतेति संबुद्धिस्तु न कंसं प्रति नारदोक्ता । किंतु राजानं प्रति शुकोक्ता । तादृशसंबुद्धेरत्र बहुशो दृष्टत्वात् । यद्वा । भं ज्ञानं तत्र अरत ज्ञानशून्येत्यर्थः । इति कंसं प्रत्येव संबुद्धिः । अन्यथा कंसं प्रति भाषणे द्वितीयानुपपत्तिः । नेयं नारदोक्तिः किंतु शुकोक्ति-रेवेति चेन्न । एतत्कंसायेत्यादिनाऽग्रे उपसंहारात् । मनुव्रताः । स्वज्ञाशविषये यो मनुमंत्रस्तस्मिन्व्रतं नियमं येषां ते तस्य व्रतं कर्म वा येषां ते । अथवा । कं ब्रह्माणं सं विष्णुं अनुवृताः अनुसृतकर्माणः हिरण्यगर्भः कः प्रोक्त इति । अकथप्रविसंभूमसखहा विष्णुवाचका इति चाभिधानात् । तथा च ॥ उभयोः । गोपवृष्णिकुलयोः । नंदवसुदेवयोर्वा । अपि शब्दाद्यशोदादेवक्योरपि ॥ ज्ञातयः कुलजाः ॥ बंधवः संबंधिनः ॥ सुहृदो मित्राणि । ये च ॥ कम् । विष्णुम । कं ब्रह्म खं ब्रह्मेति श्रुतेः ॥ समनुव्रताः । अत्यनुकूलाः । सुदामादयस्ते सर्वे देवताप्रायाः प्रायो देवांशो वै । वसुदेवादीनां कश्यपस्यादित्वात् । शतधन्वादीनां देवेतरत्वात् । तद्व्यावृत्तये प्रायः शब्दः ॥१०॥ असुरा इति । अत्र पूर्वसंगतिर्न शंक्या । यतः संबंधिनां देवत्वेऽस्मदादीनामपि तत्संबंधित्वाद्देवत्वं स्यादित्याशंकानिरासार्थं तद्व्यावर्तकविशेषणेन विवेचयति ॥ असुरा इति । ये लोकोपद्रवकारिणस्त्वदादयस्ते सर्वेऽसुरा एवेति संगतिरित्यंतं नारदवाक्यम् । गत इति । अत्रापि तृतीयार्धस्य नासंगतत्वम् । तस्य क्रियाविशेषणत्वात् । यद्वा । उद्दिश्येत्यर्थकप्रतिरूपं द्वितीयाविभक्त्यर्थांगीकारात् । दैत्यवधोद्यममुद्दिश्य संशयामासेत्यर्थः ॥ ११ ॥ इति श्रीभागवते द्वि० ॥ १०–२ ॥

॥ हरिः ॐ ॥ **प्रलंबेति** । अत्र महाशब्दोऽप्रसिद्धार्थोऽत उच्यते ॥ महान् । स्वजातिश्रेष्ठोऽश्वत्थः । अश्वत्थः सर्ववृक्षाणा-मिति विभूतेः । स अशनं भक्षणं यस्य स कुवलयापीडः कुंजरः । कुंजरः पिप्पलाशन इत्युक्तेः । यद्वा । काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विध्येनमिह वैरिणमिति गीतोक्तेः । कामक्रोधाभिमानी कश्चन दैत्यः । प्रलंबादय एव कामाद्यभिमानिनो वा । अथवा । महाशनः क्रोधरूपः कालयवनः । गर्गक्रोधोत्यादित्वात् । किंवा महो मीनोत्सवाचार्योः स्युरिति कोशांतरात् । महस्य तिमिंगलस्य । अशनं भक्ष्यरूपः हंसः डिभिकाग्रजः । तस्य तिमिंगिलग्रस्तत्वस्य हरिवंशोक्तेः । केचिदघासुरं प्रवृति । तदसमंजसम् । तदाख्यनस्य सर्वशिष्टासंमतेः । संवादाभावाच्च । तदेतदग्रे प्रदर्शयिष्यते । उत वा । महस्य क्रीडोत्सवस्य आशा येषां ते महाशा गोपास्तान्नयति बिलमिति । महाशनो व्योमासुरः । मेषायितानपोवाहेत्याद्युक्तेः ॥ १ ॥ सप्तम इति । अत्र देवकीसप्तमगर्भरूपरामस्य विष्णुशेषांशत्वं दृश्यते । न ह्येकस्य भिन्नयोर्द्वयोरंशत्वं युज्यतेऽतो विरोध इत्यत उच्यते ॥ वैष्णवम् । विष्णोरिदम् ॥ धाम । शय्यासनभूतम् । शेषश्च शय्यासन इत्युक्तेः । यम् अनंतं प्रचक्षते बुधाः स शेषो देवक्याः सप्तमो गर्भो बभूवेत्यर्थः । यद्वा । विष्णोः शुक्लकेशरूपावेशस्थानं गयश्च लक्ष्मणाद्याश्च त्रयो रोहिणिनंदना नरः फल्गुन इत्याद्या विशेषा-वेशिनो हरेरिति वचनात् । असाधारण्येन व्यपदेशा भवंतीति न्यायोपेतत्वाच्च ॥ ५ ॥ अथेति । हे ॥ शुभे । योगमाये । अथवा । जगत्कल्याणविषये । अथवा । उत्तमकुले मुहूर्ते वा । स्वांशभागेन । स्वांशस्य स्वरूपांशस्य भागो भजनम् ॥ स्वीकार इति यावत् । तेन । अनेन बलरामस्य भिन्नांशत्वं सूचितम् । अत्रैव स्वशब्दप्रयोगात् । यद्वा स्वः स्वरूपभूतो योंऽशः तस्य भां द्युतिं गच्छति प्राप्नोतीति तेन रूपेण । अनेन कृष्णस्य पूर्णरूपत्वाभावशंका निरस्तेति बोध्यम् ॥ ९ ॥ नामधेयानीति । अत्र भविष्य-क्रियापेक्षितत्वे कुर्वंतीति लटा विरोधोऽत उच्यते । नामस्थानानां निश्चयेन भावित्वाद्वर्तमानव्यपदेशः । यद्वा । नराणां सप्तसु प्रथमेति सूत्रेण षष्ठ्यर्थकत्वात् ॥ भुवि आश्रयोपलक्षितोपासनाविषये ॥ नामधेयानि । दुर्गेत्यादीनि ॥ स्थानानि । विंध्यादीनि ॥ कुर्वंति । कुर्वाणे । इति योगमायासंबोधनं न तु लट् रूपक्रियाऽतो न विरोधः ॥ ११ ॥ आविवेशेति । अत्रांशभागेनेत्यनेन पूर्णत्वस्य विरोधोऽतोऽर्थांतरं ॥ अंशभागेन । अंशः किंचित्वं तस्य भां प्रकाशनं न गच्छति न प्राप्नोतीति तेन रूपेण । पूर्णरूपेणेत्यर्थः । अतो न विरोधः ॥ १७ ॥ इतीति । स्वतो दुष्टस्य प्रभुशक्तिमतश्च कंसस्य दुष्टभावनिवृत्तिकथने विरोधोऽतोऽर्थ उच्यते ॥ सन् । सचेतनः ॥ इति । विचारसमाप्तौ ॥ घोरतमात् । अतिभयंकरात् ॥ भावात् । चेतनात् कंसात् । चेतनोऽचेतनश्चेति भावश्च द्विविधः स्मृत इति तत्त्वविवेकोक्तेः ॥ निवृत्तः । कंसं विसृज्य गतः । अयं सद्विचारस्तु सचेतनावेशेनैव जात इति भावः । ततः स्वयमावे-शरहितत्वात् । आत्मैवेत्यर्थः । अकथप्रविसंभूम सखहाविष्णुवाचका इत्यभिधानात् । प्रशब्दवाच्याद्विष्णोर्भवतीति प्रभुः कामः । यद्वा । प्रकर्षेण भवते व्याप्नोतीति प्रभुः । भू व्याप्ताविति धातोः । तथा तेनेदमावृतमिति गीतोक्तेश्च काम इत्यर्थः । तदभिमानित्वा-

त्कालनेमिः। काममानी कालनेमिरित्युक्तेः। तस्य भगवतो जन्म प्रतीक्षन्सन् हरेर्वैरानुबंधवित् वैरस्यैवानुबंधनकर्ता। विद कृताविति धातोः। स्वभावतो द्वेष्टेति भावः॥ आस्ते। अस्ति। अंधेतमस्यपि भगवद्द्वेषयुक्तत्वाद्वर्तमाने लट्। स्वयं शब्देन स्वाभाविकद्वेषं द्योतयितुमात्मने पदम्। यद्वा। स्वयं प्रभुः कालनेमिरूपोपि। इति विचारेण घोरतमाद्भावाद्वधरूपकर्मणः सकाशात्। भावो लीलाक्रिया चेष्टा इति हि यादवः। सदा विद्यमानत्वान्निर्दोषत्वात्सशब्दवाच्येन भगवता निवृत्तः अत्रांतर्णिच्। निवर्तित इत्यर्थः॥२४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

दशमे दिश मेऽम्बोधौ भीतया तरितुर्गतः। पाराशर्य परं पारमसि दाशसुतासुतः॥ १ ॥

नवमान्ते कथां शुकेन सङ्कुच्य कथितां विस्तरतः श्रोतुमुत्कमनस्कः परीक्षित्किञ्चिदनूद्य श्रोतव्यं त्रयोदशश्लोकया पृच्छतीति वदति॥ **राजेति**। हे शुक भवता सोमसूर्ययोर्वंशविस्तारोऽन्ववायार्थप्रपञ्चः। विस्तारो विग्रहो व्यास इत्यमरः। उभयोः सोमसूर्ययोः। हरदत्तेनोभयशब्दस्य द्विवचनमस्तीत्युक्तं तथाऽपि शेखरे ननु काकचोः को विशेष इत्यारभ्यैतन्मूलकमेवोभयशब्दस्यासर्वविभक्तिकत्वं तद्धितश्चेति सूत्रे कैय्यटेनोक्तम्। तदाह कैय्यट इति हरदत्त इति। अत्रारुचिबीजं प्रागुक्तभाष्यविरोधः। भाष्ये तूभयशब्दपाठः प्रत्याख्यात इत्यन्तग्रन्थेन नास्तीति शंसनादस्वरसम्। अत एव सम्प्रदायविदः शय्याम्। जहत्युभयपक्षविनीतनिद्राम् इति पञ्चमसर्गरघुवंशविशदने उभाभ्यां पक्षाभ्यामिति विगृह्य कैय्यटमतमुट्टङ्कितवन्त इति दिक्। वंशे भवा वंश्यास्तेषां चरितं कथितम् इति विपरिणतं सत्कथितमित्यन्वेति। कथननिमित्तं कथयति॥ परमाद्भुतमिति। अत्याश्चर्यकरं परा मा ज्ञानं सम्पद्वा येन तच्च तदद्भुतं तयाऽद्भुतमिति वा। अद्भुतं स्कन्धान्तरे गतम्। किञ्चोभयवंश्यानां अभवतां न विद्यते भवः संसारो येषां तेषां मुक्तानां भावो मुक्तत्वं भवता साऽपि कथिता। त्वयेत्यनुक्त्वोक्त्वा चाकारप्रश्लेषभूमिकं पदं पूर्वं वदंश्चानन्तरं भवतेति भगवानमुमर्थं विवक्षितवानिति प्रेक्षणीयम्। वंशस्तथा तद्वंश्यानां च चरितं कथितः कथितमित्यन्वेति॥ १ ॥ तत्र यदुवंशेंऽशेनावतीर्णस्य यदोर्विष्णोरिति सामानाधिकरण्येनाप्यन्वयः। यथोक्तम्। अग्निना तुर्वशं यदुमित्यृग्भाष्यटीकयोर्यदस्ति तत उच्चत्वाद्यदुः। यदस्ति तत उच्चत्वाद्यदुरिति मयूरव्यंसकादित्वात्साधुरिति। विद्यमानसर्वोच्चत्वाद्विष्णुर्यदुरित्यर्थः। विष्णौ व्याख्यातोऽयं शब्दो ऋग्गतैरेयभाष्यदिशा स्कन्धान्तरे। तथा तत्त्वसङ्ख्यानटिप्पणे चास्मत्कृतेऽनुसंवेद्यः। वीर्याणि नितरां नः शंस। एतेन वक्तैकोऽनेके श्रोतार इति सूचितं भवति। तत्रेति समस्तमंसपदेन सम्बध्यते। तान् त्रायत इति तत्रः। स चासावंशश्च तेनेति। तत्र पृथक् पृथक्पदं सद्वंश इत्यर्थकं च। तकारद्वन्द्वाद्वन्द्वशङ्कापनुत्तश्चोक्षा स द्यावाक् पृथिवीत्यृग्व्याख्याभाववोधे सदिति भवत्कार्यमिति द्वेधा व्याकृतमित्यत्र दकारद्वयश्रवणं स्यादितिदूषणाभासभासकभाष्यदीपिकामनूद्य भाष्यदीपिकायुक्तिवात्यायामस्मत्कृतायां यद्वद्वैतं न पश्यति समरुद्राक्षोल्लसन्मण्डपं महत्या गदया समन्वित इत्याद्यनयतनोदाहरणपूर्वकं कृताऽनुसन्धेया। न मम समर्थता सविस्तरसङ्कीर्तन इति वद स्वामिंस्त्वमेष इत्यपि भाषते। भवता रुद्रतायत्ते ततः शंसेति॥ २ ॥ भूतभावनो जगदुत्पादको विश्वात्मा जगद्धितत्तो वा तत्स्वामी वा तदादानादिकर्ता वा यानि वीर्याणि पराक्रमान्विस्तरात्। ऋदोरप् स्तृञ् आच्छादन इति स्मरन्ति। स च शब्दस्य विस्तर इत्यमरः। कृतवांस्तानि नो वद॥ ३ ॥ मया वर्णितं त्वया चाकर्णितं किं पुनरवनीश जोषमास्वेति नो वदाहमेतादृशो न तादृश इति शंसति॥ **निवृत्ततर्षैरिति**। निवृत्तो गतस्तर्षो कामो येषां ते मुक्ता जीवन्मुक्ताश्च तैः। कामोऽभिलाषस्तर्ष इत्यमरः। तैरुपगीयमानाद्भवौषधान्मक्लेशाह्वागदादेकत्र परत्र संसाररोगवियोगौषधरूपात्। श्रोत्रमनोभिरामाच्छ्रोत्राणि च मनांसि च तान्यभिरामयति तोषयतीति स तथा श्रोत्रमनसाभिरामो येन तस्मात् श्रोत्राणि मनांसि च श्रोत्रमनः। प्राण्यङ्गत्वयैकवद्भावः। तस्याभिरामात्तस्मादुत्तमैर्ब्रह्मादिभिः श्लोक्यत इति स तथा। उद्गतं तमः संसारमूलमज्ञानं येन स श्लोकः। पद्ये यशसि च श्लोक इत्यमराद्यशो यस्य गुणानामनुवादो हि पुनः पुनर्वादस्तत्कः पुमान्विरज्येत न कोऽपि भवोद्विरक्त इत्यर्थः। पशुघ्नात्पशुघ्नानतिमुग्धानिति पाठत्रयम्। बलभद्रः प्रलम्बघ्नो वृत्रघ्न इति मूलविभुजादित्वादिसद्धमिति सिद्धान्तकौमुद्युक्तेः। केत्युपधालोपे हो हन्तेरिति कुत्वे रूपम्। पशुर्भगवांस्तं घ्नन्ति स नास्तीति मतिरेव हतिस्तस्मात्तान्वा विना मिथ्याज्ञानिनो विना भवेद्विरतिस्तादृशानामेव भवेन्नान्येषामिति भावः। यथोक्तमेकादशतात्पर्ये एतत्सजातीये। ब्राह्मणो विष्णुरुद्दिष्टः स नास्तीत्यभिचिन्तनम्। ब्रह्महत्या समुद्दिष्टा तां न कुर्यात्कथञ्चनेति। पालनात्सुखरूपत्वात्पशुनामा जनार्दन इति छान्दोग्यभाष्योक्तेर्हरिः पशुः। साधारणपशुमारकतया सम्मतानां धर्मव्याधाद्यानां तद्विरक्त्यदर्शनादेवंविधः पशुवधो ग्राह्यः। अपशुक् अपगता शुक् शोको यस्मात्तं घ्नन्ति ते तथेत्यपि व्याकुर्वते। अपशुघ्नान्हरिः सर्वेशोऽस्तीति ज्ञानिनो विना। उत्तमश्लोकगुणानुवादादुत्तमः श्लोको गुणैरनुहीन इति वादान्नितरां वृत्तस्तर्षो विषयाभिलाषो येषां तैरुपगीयमानाद्भवौषधात्तत्प्राप्तिभेषजरूपात् श्रोतॄणां सतां पाक्षिकतयाऽमनोभिरामात्को विरज्येत न कोऽप्येतादृशो विरक्तियुक्तो भूयादिति दुरात्मदौरवस्थ्यपरताऽपि गमनिकयाऽनया ज्ञेया। निवृत्ताश्च ते तर्षा अभिलाषास्तैः करणैः श्रोत्रमनोभिरामाद्भवौषधाद्भवस्य रुद्रस्य निरन्तरजपद्वारा विषभेषजरूपात् स्वेनोपगीयमानात् श्लोकगुणानुवादाद्धेतोः पुमान्पुरुषो हिरण्यगर्भ उत्तम इयदामननादित्यधिकार्यधिकः श्लोकगुणान् श्लोक्यन्त इति श्लोकास्ते च ते गुणाश्च तान् शुघ्नान् शुचं संसारक्लेशं घ्नन्तीति ते तथा तान् उवादात्। ल्यब्लोपनिमित्ता चेयं पञ्चमी। ओः रुद्रस्य वादोऽतथ्यवितथ्यवादस्तं परित्यज्य विना भगवताऽपि, तस्मात्को विरज्येतेति वा। शं लोकः सुखं ज्ञानं च।

यथोक्तम् । कीर्तिं श्लोकं च विन्दत इति बृहदारण्यकोपनिषद्भाष्येशं लोकः श्लोकः परमानन्दं परमज्ञानं चेत्यर्थः । लुक् प्रकाश इति धातोरिति । उत्तमानां यैस्ते उत्तमश्लोकास्तत्प्रापकाः प्रातिस्विकगुणास्तदनुवादादिति वा । य उवादादुक्तरूपाद्विरज्येत स कोऽपि यश्चात्यच्छ्लोकोऽपि पुमान्विना भगवता शुग्नानुत्तमश्लोकगुणानपि आपेव । अतस्तद्वीर्याणि वदेत्यन्वयो वा । यथोक्तम् । त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय । अतथ्यानि वितथ्यानि दर्शयस्व महाभुजेत्यादि वाराहे । यः पुमान्विरज्येत सः के स्वप्राप्ये सांसारिके लीने सुखे मोक्षसुखे वा विरज्येतेति वा । सुखद्वयस्य नपुंसकपुल्लिङ्गशब्दवाच्यताविशेषोऽवसेयः यथोक्तं बृहदारण्यकभाष्ये लोकशब्दव्याकृतौ । संसाराल्लुप्तानां मुक्तानां कानि सुखानि लोकाः । लीनं सुखं क इत्युक्तं कं नाम क्षीयतेऽत्र यदिति । क इत्यानन्द उद्दिष्ट इति छान्दोग्यभाष्येऽप्युक्तेः । ततश्च तत्सुखद्वयं त्यक्तवानेव स मानव इति भावः । वीति वीष्णुः समुद्दिष्टो विशिष्टत्वाच्च सर्वत इति छान्दोग्यभाष्योक्तेः । अकयप्रवीत्येकाक्षररत्नमालोक्तेश्च विर्हरिः । तेन कः पुमान्विरज्येत न कोऽपि । स विरज्यमान एव विना विशिष्टः पुरुष इत्यप्यावृत्त्योऽन्वयो ज्ञेयः ॥ ४ ॥ बहुबहुज्ञसुखतः श्रुतमनुभवसिद्धं माहात्म्यं न हातुमुत्सहेऽतो वक्तव्यमेवेति वक्तुं कांश्चित्सङ्गतिं विज्ञापयति ॥ पितामहा इति । समरे रणे मे मम पितामहाः पञ्चपाण्डवा अमरञ्जयैः । असंज्ञायामपि बाहुलकान्मानवमावर्तनावर्तन्त इतिवन्मुमागमे छान्दसेऽशनायां हि मृत्युः सर्वाशननेतेत्यर्थे विन्दुः । आधिक्येऽधिकमिति सूत्रादिति बृहद्भाष्योक्तदिशा सर्वामरेत्यर्थके विन्दौ वाऽमरञ्जयैरिति सम्भवति । अमरान्देवाञ्जयन्ति ते तथा तैः अमराणां वरादिना मरणरहितानां जयो यैरिति वा तैः । देवव्रतो भीष्मः स एवाद्यो येषां ते तथा । देवं क्रीडां स्त्रिया सह व्रतयति देवस्य व्रतं त्यागो येनेति सः । व्रताद्भोजनतन्निवृत्योरित्युक्तेः । पयो व्रतयति शूद्रान्नं व्रतयतीत्युदाहरणे । वेतूर्ध्वरेताः सततं भवानीति श्रीमदुक्तेः । ते च तेऽतिरथा देवव्रतो हरिव्रतवानादियेषां च ते रथा येषां तैरित्यर्थः । तिमिङ्गिलस्तिमिं गिरति गॄ निगरणे मूलविभुजादिः कः । अतिविभाषेति लः । गिलेऽगिलस्येति मुम् । तिमिङ्गिलादयश्चाथेत्यमरभानुदीक्षितीये मत्स्यविशेषाणां नामेत्युक्तेस्तिमिङ्गिलतुलैः । दुरत्ययं दुःसाधोऽत्ययोऽतिक्रमणं यस्य तं कौरवाणां सैन्यं सेना तदेव सागरः समुद्रस्तं वत्सपदं वत्सस्तर्णकस्तत्पदमिव । लुप्तोपमेयं । कृत्वा यः प्लवो येषां तेऽनायासतरण एव तात्पर्यम् । यत्प्लवा येनैव प्लवः प्लुतगतिर्यस्य । प्लवः शब्दः कृष्णेत्यादेर्येषां ते तथा तरन् । प्लवः कारण्डवे भके कुलके फलके कपौ । शब्दे प्लुतिगतौ प्लक्षे चण्डालजलकाकयोरिति विश्वः । यस्य स्थान्वत्सपदं सुतस्थानं कृत्वा । यत्प्लवा यः प्लवः पोतो येषां ते सन्तोऽतरन् । यं वत्सपदं वत्सापदेशं कत्वेति वा । पुत्रदूतत्वादिना कृत्वा प्रियः सुहृदः खलु मातुलेय आत्मार्हणीयो विधिकृदित्यादेः । अनेन वत्सपद कृत्वेतीरयोनेरणीयं यत्प्लवा इति वत्सपदतरणस्यानपेक्षिततरिकृत्वादतो यत्प्लवो यत्प्लव इति शङ्काकल्पितेति ज्ञेयम् । स निन्दां धिक्कारयन्ति प्राप्नुवन्तीति स्मयन्तस्ते प्लवाः पोता यैरिति स्मयत्प्लवाः सन्तः । स्मपादपूरणेऽतीतसामिनिन्दार्थयोर्मतमिति विश्वः । स्मयन्तः स्मयमाना अस्मदसाध्योऽयं व्यापार इतीव प्लवा येषा त इति वा । एवं तारणं नास्मत्साध्यमिति प्लवा विसिस्मिर इवाभवन्निति भाव इति वा । स्मयन्त इति चान्द्र्या रीत्येति ज्ञेयम् ॥ ५ ॥

साक्षादधोक्षजाध्यक्षता मत्साक्षीक्षितेति न त्यक्ष्यामि तत्कथामृतमतस्तद्वदेति वदति ॥ द्रौणीति । यः कृष्णो मे मातुरातुराया उत्तरायाः स्वं शरणं गतायाः कुक्षिमुदरं प्रविष्ट आत्तचक्र आत्तं चक्रं येन सः सन् कुरुपाण्डवानां कुरवश्च दुर्योधनाद्याश्च पाण्डवाश्च धर्माद्याश्चेति द्वये तेषां सन्तानबीजं वंशबीजायितमिदं मदङ्गं मत्कलेवरमपि जुगोपापीपलत् । किं घटितं सङ्कटं तवागतमित्यत आह । द्रौणेरश्वत्थाम्नो यदस्त्रं निर्वंशं करिष्ये पाण्डवकुलमिति कृतसङ्कल्पेन मुक्तं ब्रह्मास्त्रं तेन विप्लुष्टम् । उपप्लुषदाह इति स्मरणाद्दग्धमिति । ममैवं ज्ञानमपि तदानीं तद्दत्तमित्यप्यवयति ॥ मेय इति । कुक्षिं गतो यो मातुर्मातुर्मम सकाशान्मेयो ज्ञेयः सन् जुगोपेत्यन्वयः । अनेन मदङ्गं मातुरित्येवोक्तौ स्वमातुरित्यर्थसम्भवे भवेदतिरिक्तं म इति शङ्का दुर्मुखीकृतेति ज्ञेयम् । चात्पाण्डवव्यसनं च वीक्ष्येति ग्राह्यम् । ग्राह्यं च कुन्त्यादिप्रार्थनं च ॥ यथोक्तं प्रथमेऽश्वमेधपर्वणि च । तेषां तद्व्यसनं वीक्ष्येत्यादि । ततः कृष्णं समासाद्य कुन्तिभोजसुता तदा । प्रोवाचेत्यारभ्य प्रपन्नानामियं चेति दयां कर्तुमिहार्हसीत्यध्यायावसिति । मातुर्गर्भगतो वीरः स तदा भृगुनन्दन । ददर्श पुरुषं कञ्चिद्दह्यमानोऽस्त्रतेजसा । अङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनम् । आपीच्य दर्शनं श्यामं तडिद्वाससमच्युतम् । क्षतजाक्षं गदापाणिमात्मनः । परिभ्रमन्तमुल्काभं भ्रामयन्तं गदां मुहुः । अस्त्रतेजः स्वगदया मिषतो दशमासस्य ······ । तत्रैवान्तर्दधे हरिरिति प्रथमे प्रथमतो गर्भगो भगवानवददित्युच्यते तथागदेति । अत्र दशमे चात्तचक्र इति । तथाऽश्वमेधपर्वणि च । नान्तरनन्तनिवेशः शंसितः । किञ्च गर्भस्थस्यास्य बालस्य विना प्रयोन पातनम् । तथा मृतः शिशुरयं जीवतामभिमन्युजः । इत्युक्तेर्वासुदेवेन स बालो भरतर्षभ । शनैः शनैर्महाराज प्रास्पन्दत सचेतन इत्युक्तेर्जुगोप कुक्षिं गत आत्तचक्र इत्येवोक्तिश्चात्र कथमिति चेन्न । आचार्यैरेवाभिधानात्समाधानस्य । तथा हि । प्रविवेश पुरं कृष्णस्तदा सूतोत्तरासुतम् । द्रौण्यस्त्रसूदितं बालं दृष्ट्वा कुन्त्यादिकाः स्त्रियः । शरण्यं शरणं जग्मुर्वासुदेवं जगत्पतिम् । प्रत्यक्षमात्मनाभे रक्षितं प्रसवे हतम् । पुनरुज्जीवयामास केशवः पार्थतन्तव इति । अन्तर्यथा न मृतः स्यात्तथा ररक्ष कुक्षिस्थः । भूतलपातकाले पुनर्मृतोऽपतत् तत उज्जीवयामासेत्युभयैककण्ठ्यात् । परमवशिष्यते गदासुदर्शनगदने कथमिति शङ्कामात्रम् । चक्रं राष्ट्रास्त्रयोरपीति तथाऽस्त्रं प्रहरणेऽपि चेति विश्वाच्चक्रशब्द आयुधमात्रवचनोऽत्रेति तच्च प्रथमस्कन्धानुसन्धानेन गदेति गदनसम्भवात् । शङ्खचक्रगदापद्मधराश्चिन्त्या हरेर्भुजा इत्यादेस्तत्सहितता सहजेति द्वयोः स्थानद्वय उक्तिर्वा । याः शरणं गताः कुन्त्याद्यास्ताभ्यो मातुश्च निमित्तं जुगोपेत्याद्युर्वरितं पूर्ववत् । जु इति सौत्रो धातुर्गतिवेगवाची । ततो भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः

क्विबिति क्विप्प्रत्ययेजवतेर्दीर्घश्चेति काशिकोक्तेजू इति जाते ह्रस्वो नपुंसक इति ह्रस्वे जु इति भवन्मदङ्गविशेषणम् । जुगतं मदङ्गम् । गोपनकृदपि न गोपसुतादन्य इत्यप्याह ॥ **गोपकुक्षि गत इति** । गोपालपालितपुत्र इति द्योतयितुं कुक्षिग इत्यनुक्तिरुक्तिश्च कुक्षिं गत इति मन्तव्यम् । यः स एव जुगोपेत्यन्वयः । मनोजुवेत्यृग्भाष्यटीकायां मनोजु मनोवेगिनावित्युक्तेः । विस्तरस्तट्टिपणातोवसेयः । विप्लुष्टं भावे क्तः । विप्लोपं दाहं जु प्राप्तं मदङ्गमिति वा । पाण्डवानां सन्तानबीजं कुर्विति शरणं गताया मातुः कुक्षिं गत इदं मदङ्गं यश्च जुगोपेत्यन्वयो वा । अत एव कुरुपाण्डवेति जुगुप्सिताजुगुप्सितसन्तानबीजमित्युक्तिमस्वरसां मत्वाऽऽचार्योः केशवः पार्थतन्तव इत्येवावदन्निति मन्तव्यम् । ननु भक्तिपादीयं कुरुपाण्डववत्तेषामुपपत्तेः पृथग्वच इत्यनुव्याख्यानव्याख्यावसरे सुधायां पाण्डवानां कुरुत्वेऽपि सामान्यविशेषापेक्षया सन्तानबीजं कुरुपाण्डवानामित्यादौ कुरुभ्यः पृथग्वचनमित्युक्तिविरोधोऽत्रैव तत्र पार्थेत्येवोक्तिविरोध इति चेन्न । निर्वीर्यं सामान्यविशेषप्रयोगं प्रदर्श्य त एवोपलक्षणयैतद्ग्रहोऽस्यभिमतष्टीकाकाराणामिति सर्वैककण्ठ्यसम्भवात् । अत एव कुरुभ्यः पृथग्वचनमित्येव वचनम् । न च कुरुपाण्डवानां सन्तानबीजमित्यन्वयप्रदर्शनमिति मन्तव्यम् ॥ ६ ॥ अखिलदेहभाजां सकलदेहधारिणामन्तर्बहिश्च क्रमात्पुरुषरूपैः कालरूपैश्च मृत्युं दुःखमनन्तरं मरणं चान्धंतमः । अनामयं नीरोगतां सुखमिति यावत् । तथा मोक्षं च प्रयच्छतो ददतस्तस्य मायामनुष्यस्य स्वेच्छोपात्तमनुजतनुमतो वीर्याणि । नेतानि गोप्यानि गुरो इत्यप्याह ॥ **वीर्याणीति** । विशेषत ईर्याणि शंसनीयानि । तर्हि तर्हि व मानवतनुः कुतो भवद्भगवानित्यत आह ॥ **मायेति** । इच्छयैव मनुष्यो न तु तुच्छजनवज्जननं जनार्दनस्येति भावः । हे विद्वन्ज्ञानिन् शुक वदस्व । भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वद इत्युक्तेः । शृण्वित्युपमन्त्रणपूर्वकं वदेत्यर्थः । वद सन्देशवचन इत्यस्य वेदं रूपम् । स्वविद्वन् भगवज्ज्ञानिन्निति वा । परः स्वो हरिरुद्दाम इति वचनात् ॥ ७ ॥ ननु मुने सङ्कर्षणमहीश्वरमिति हि किल बलो देवकीसुतत्वेन कीर्तितः । स एव बलं गदं सारणं चेति रोहिणीगर्भप्ररोहिणी त्वयैव कथितः । कथमन्तरा शरीरान्तरं योनिद्वयसंसर्ग एकस्याहष्टचर इति परीक्ष्य परीक्षित्पृच्छति ॥ **रोहिण्या इति** । सङ्कर्षणो रामस्त्वया रोहिण्यास्तनयः प्रोक्तो नवमान्ते । तस्यैव देवक्या गर्भसम्बन्धो देहान्तरं विना कुतः किंकारणकः । अत एव मयाऽतिमन्दमुक्तमिति नेत्याह ॥ **प्रेति** । प्रकर्षेणोक्त इति । देवक्या गर्भसम्बन्ध इति गर्भपदसमस्तस्यैकदेशोत्कीर्तनेन सम्बन्धशब्दस्यावर्तितस्य तृतीयान्तरोहिणीपदेनान्वयः । रोहिण्या सम्बन्धः कुत इत्यर्थः । सर्वजनीने प्रमेये किं चित्रयसि चेतः पातः क्षितिमित्यत आह ॥ **अस्तनय इति** । अस्तो निरस्तो नयो नीतिर्यस्य स तथा निर्नीतिक इत्यर्थः ॥ ८ ॥ पितुर्वसुदेवस्य ज्ञातिभिः सार्धं साकं सात्वतां पतिः क्व वासं कृतवान् ॥ ९ ॥ मधुपुर्यां च वसन्किमकरोदित्यन्वयः । मातुर्भ्रातरं कंसमतदर्हणं हननार्हम् । अद्धेति स्वहस्ततः सम्यगिति मातुर्भ्रातरं कंशमित्येकसरण्यानुक्तिस्तदयोग्यतायेतेति ज्ञेयम् ॥ १० ॥ मानुषं देहमाश्रित्य स्थितैर्वृष्णिभिरित्यप्यन्वयः ॥ ११ ॥ अन्यन्मया विज्ञातं सर्वं कृष्णविचेष्टितं वक्तुमर्हसि ॥ १२ ॥ बुभुक्षितं न प्रतिभाति किञ्चनेत्युक्तेरहं बोधयामि बोधस्तव कथं भवेन्नृपोपोषितस्येत्यतो भाषते ॥ **नेति** । एषा सर्वप्रत्यक्षसिद्धाऽतिदुःसहा क्षुत्क्षुधा त्यक्तोदमपि त्यक्तमुदं सन्ध्याद्युपयुक्तोदकमन्तरेण येन तं मां न बाधते । तर्हि तदन्तरा किं भक्तं भुक्तवानसीति नेत्याह ॥ **पिबन्तमिति** । सूतं बहिरुपायातं पिबन्तं कर्णाभ्यामिति शेषः । पिबन्तं श्रुतवन्तम् ॥ १३ ॥ एवं परीक्षित्पृष्टः किं शुकोऽकरोदिति शौनकसन्देहं परिहरति सूत इत्याह ॥ **सूत उवाचेति** । हे भृगुनन्दन शौनक साधुवादं निशम्य वैय्यासकिः गतम् । व्याससूनुर्विष्णुरातं प्रत्यर्च्य वरीयानेष ते प्रश्नः कृतो लोकहितं नृपेति सत्कृत्य भागवतप्रधानस्तच्छ्रु कलिकल्मषघ्नं कृष्णचरितं व्याहर्तुमारभत ॥ १४ ॥ प्रत्यर्चनमुदञ्चयति ॥ **सम्यगिति** । हे राजर्षिसत्तम राजर्षिश्रेष्ठ ते यद्यतो वासुदेवकथायां तच्छ्रवणे नैष्ठिकी स्थिरा चरमकालिकी रतिरासक्तिर्जाता ततस्तव बुद्धिः कर्तव्याकर्तव्यनिश्चयात्मिका । यथोक्तं बुद्धिर्ज्ञानमिति गीताभाष्ये । कार्याकार्यविनिश्चयो बुद्धिः । ज्ञानं प्रतीतिर्बुद्धिस्तु कार्याकार्यविनिश्चय इत्यभिधानम् । सम्यग्व्यवसित प्रान्तगन्त्री सम्यग्विगतमवसितमलमित्युपरमणं यस्याः सेति वा नैष्ठिकी रतिर्यज्जाता यस्या बुद्धेः सा ते बुद्धिस्सम्यग्व्यवसितेत्यन्वयः वास्तवः । राजर्षय इति स्तोत्रं येषां ते च ते सन्तश्च तेषु श्रेष्ठेति वा बुद्धिरिति ज्ञानमात्रं सम्यग्व्यवसिता सर्वशास्त्रास्वपि भगवानेव एव प्रतिपाद्य इति सर्वसम्मतैक्यपरा इति वा । यथोक्तं गीताभाष्ये । बह्व्यो हि बुद्धयो मतभेदात् । तत्कथमेकत्र निष्ठां करोमीत्य आह ॥ **व्यवसायात्मिकेति** । सम्यग्युक्तिनिर्णीतानां मतानामैक्यनेवेत्यर्थ इति । सम्यक् समीचीनं ज्ञानवत्कुलं व्यव रक्ष सिता धवल प्रसस्तेति वा सिता मया ज्ञातेत्यावृत्त्याऽन्वयो वा । सितो धवले निबद्धज्ञातयोरपीति विश्वः । समञ्चतीति समःसमिरिति सम्यादेशः अबुद्धिर्बुद्ध्यभावः सिता बद्धेति वा । राज्ञामृषीणां च सन्तोऽवसादका दुरात्मानस्तांस्तमयति । तमु ग्लान इति स्मृतिः । ग्लापयति स तथा । यद्वा राजानश्च ऋषयश्च ते सन्तश्च तैस्तम्यते काङ्क्ष्यत इति स तथा सर्वथा तदपेक्षित इत्यर्थः । पुरुतमं पुरूणामित्यृग्भाष्य टीकायां पुरुभिस्तम्यते आकाङ्क्ष्यते तम् अभिकाङ्क्षायामिति व्याख्यानात् ॥ १५ ॥ श्रोतव्या वक्तव्या च हरिकथेति तत्कार निरूपणेन निरूपयति ॥ **वासुदेवकथेति** । हि यतो वक्तारं पृच्छकं श्रोतॄनिति त्रीन्पुरुषान्पुनाति पवित्रयति । निदर्शनं दर्शयति तत्पादेति । तस्य वासुदेवस्य पादसलिलं गङ्गादिजलं यथा गङ्गा गङ्गेति कीर्तयन्तं तथैव माहात्म्यपृच्छकं श्रोतॄंश्च पुनाति तथेति तव प्रश्नो यथा समीचीन इत्यर्थः । यथाशब्दस्य सम्यगर्थकत्वं षष्ठे स्पष्टमभिहितमनुसन्धेयम् एवमन्वयनेन कथं वक्त्रसम्बन्धि प्रश्नस्य तत्पावकता कथन्तरां कथाया मामित्येवातीतपद्ये कथनात्प्रश्नपर्यन्तानुधावनमिति शङ्काग्रन्थिर्मन्थरित इति ज्ञेयम् । य

पृच्छ्यत इति प्रश्नो हि कथारूपः प्रष्टव्योऽर्थ इत्यर्थः । प्रश्नमेतं वद प्रभवित्यादेः ॥ १६ ॥ अन्यच्च सर्वमिति सूचितं वक्तव्यत्वेन तदिदानीं किमर्थं भगवानवततारेत्येतद्रूपमित्यर्थात्सूचयंस्तदुत्तरं सङ्गमयन्नाह ॥ भूमिरिति । दृप्ता अहङ्कृता नृपव्याजा राजापदेशा दैत्या दैतेया एव नृपतयोऽवतार्णास्तेषामनीकशतायुतैरनीकानां सैन्यानां शतायुतैः । तात्पर्यं तु बाहुल्ये । तन्निमित्तको यो भूरिभारस्तेनाक्रान्ता व्याप्ता पीडितेति यावत् ब्रह्माणं चतुर्मुखम् ॥ १७ ॥ गौर्भूर्गोरूपिणीति केचित् । करुणयतीति करुणं स्वव्यसनमवोचदेत्यन्वयः । करुणं यथा भवति तथा रुदन्ती विभोरिति पाठे तस्य विभोर्ब्रह्मण इत्यर्थः । अन्तिके उपस्थिता भूत्वा व्यसनं तत्प्राप्ताशुभं विपत्तिं वा । व्यसनं त्वशुभेऽनिष्टफले पापे विपत्ताविति विश्वः ॥ १८ ॥ तन्मेदिनीखेदं देवैः सह तया च सह सत्रिनयनो महादेवसहितः । सह देवैरित्यनेनैव वामदेवो ग्रहीतुं शक्योऽप्राधान्यपिशाचि तु तं न मोचयति सत्रिनयन इत्युक्तावपीति किमिति पृथक्प्रथकथनमिति चेत् । शङ्का तु निश्शङ्कमङ्कुरितान्तरिति मतिमति न चित्रं त्वयि । तर्हि कर्णावभ्यर्णं आनय विनेय वक्ष्यामः । सर्जको रजसां स्थूललोचनविलोचन इत्याद्युक्तेस्तृतीयनेत्रवीतिहोत्रमारमारकस्यापीदं मथनसमर्थता नास्तीति द्योतयितुं वा । एतत्पक्षे तृतीयं नयनं यस्य तेन सहित इति विग्रहः । त्रिशब्दस्य तृतीयवाचित्वं त्रिदशशब्दान्तर्गतत्रिशब्दवत्त्रिभाग इत्यादिवद्द्रष्टव्यम् । देवाः सर्वेऽपि सर्वं सहायामवतीर्य सेवां कृत्वा कृपामृषाकपेः सम्पादयन्ति नायं तथेति तत उत्कृत्य पृथगुक्तिरिति वा । एते देवा वासुदेवसेवां विधाय व्यवधानाव्यवधानेन धाम स्वं स्वं भेजिरेऽयं तु चिरञ्जीवः सन् भूमौ जीविष्यतीति भावमाविष्कर्तुं वेति । न केवलं मेदिनीखेदत एव धातुर्विधातुं तत्समाधानं धावनं सिन्धुं प्रति किन्तु सप्ततन्तुमुखाखण्डसत्कर्मविलोपतस्तत्कर्तुकृज्जनान्निरीक्ष्येत्यप्याह ॥ सत्रिनयन इति । सत्रिषु क्रतुकारिष्वाहुत्यादिद्वारा तद्वत्सु सुरेषु वा नयनं कृपादृष्टिः उपसर्गाश्च धातुलीनार्थद्योतका इति नयसमनुनयनं वा यस्य स तथा सन्निति वा समाधिसम्भवात् । क्षीरपयोनिधेः क्षीराब्धेस्तीरं तटम् ॥१९॥ वृषाकपिं हरिं । हरिविष्णू वृषाकपीत्यमरः । वृषं धर्ममाकम्पयति । कपिकम्पिचलन इति स्मरणात् । अहिकम्प्योर्नलोपश्चेतीः । वृषाद्धर्मादाकम्पयति तदननुष्ठातृदुष्टानिति वा वर्षति कामान् । वृष सेचने इगुपधः कः । आकम्पयति पापानि । पूर्ववदिः । वृषश्चासावकपिरिति वा । वृषेण स्वानुष्ठितधर्मेणाकं दुःखं पियति गमयतीति स तथा पि मतौ अन्तर्भावितण्यर्थो वा विच् संज्ञापूर्वकत्वान्न गुणः । क्विपि तु ह्रस्वस्येति तुगागमे शासनस्यानित्यतया नेति ज्ञेयम् । वृषं धर्मं कम्पयत्यनुकम्पयतीति वा । अन्येषामपि । तुराषाट् इष्टापूर्तमितिवद्दीर्घः । इन्द्रं वा कम्पयति प्रापयतीति वा । भक्ताभिलषितसेचक इति सुखरूपत्वादासुखरूपत्वात्क आको वा स चासौ स च पालयतीति पिश्चेति वृषाकपिर्वा । पातेः किः । पुरुषसूक्तेन पुरुषं पूर्णषड्गुणं सर्वशरीरशायिनं जगन्नाथं जगदधिपं प्राणनाथं वा देवदेवं सर्वदा सर्ववेदैः स्तुत्यमुपतस्थे । उपान्मन्त्रकरण इति पुरुषसूक्तस्य करणत्वात्तिष्ठतेरात्मनेपदम् । देवपूजेत्यादिवार्तिकाद्पूजयदिति वा । पुरुषसूक्तेनेत्युक्तिस्तु वेदाः पुरुषसूक्तगा इत्युक्तेरेतन्मात्रस्तोत्रे सर्ववेदेन देवस्तुतिर्भवतीति भावेन वा । लोके लोकानामनुबन्धे बोधिते दयोदयमेतीति पद्भ्यां भूमिरजायतेति तत्रोक्तेर्गोत्रापुत्रीतत्परिदेवनमेवं न देव त्वया श्राव्यं किन्त्वान्येति विज्ञापयितुं वेति ज्ञेयम् । समाहितस्तदेकाग्रचेतस्कः ॥ २० ॥ गगने समीरिताम् । किं सम्बन्धिनी सा गीरित्यत आह ॥ पौरुषीमिति । पुरुषो भगवांस्तस्येयं पौरुषी ताम् । किमुद्दिश्य किं विषय ईरिता गीरित्यत आह ॥ गां समाधाविति । गां पृथ्वीं प्रति गौर्भूत्वेति प्राग्वादात् समाधौ समाधानार्थं समाधौ मनःपीडायां प्रसक्ते सति समा तस्येतरानिराश्यत्वं सूचयति । इतराश्रयणीयां श्रवणीयां चतुराननेनेत्यनेन द्योत्यते । स्वयं पौरुषीं समाधावागतसर्वसमाधनार्थं वा । वेधा निशम्य श्रुत्वा त्रिदशान्देवान्प्रति गतां मे गां वाणीं हे अमरा आशु शृणुत । श्रवणफलमपि लपति । यथा मयोच्यते तथा । पुनः शब्दश्चशब्दार्थः । मा चिरं च तथैव विधीयतां भवद्भिरिति शेषः । पुनः श्रवणानन्तरं मा चिरं निरालस्यं गगने समीरितामित्यन्वयो वा ॥ २१ ॥ धराज्वरो भूम्या उपतापः पुंसा परमपुरुषेणावधृतावचिकित्सनीयत्वेन ज्ञातः । यदुष्विति बहुवचनमाद्यर्थं । यद्वादिषु । एतत्पुरस्कृतिस्तु मुरहरावतारपात्रत्वादिति ज्ञेयम् । भवद्भिरंशैरुपजन्यताम् । स ईश्वरेश्वरः सर्वेशः स्वकालशक्त्या स्वरूपभूतदुर्भूतसंहारकशक्त्या क्षपयन्क्षपाचरादीन्नुविचरेद्यावत्तावत्पर्यन्तं स्थीयताम् ॥ २२ ॥ साक्षाद्भगवान्परमपुरुषो वसुदेवगृहे तद्भार्यायां जनिष्यते यस्तत्प्रियार्थं सुरप्रियोऽपि सम्भवन्तु ॥ २३ ॥ वासुदेवकला अनन्त इति छेदः । य सहस्रवदनः स्वराट् स्वेन हरिणा यानेन राजत इति स्वराट् वासुदेवस्य कला भिन्नांशरूपः । वासुवासुदेवस्य कलासहितश्चासावनन्तश्चेति पदमेकं वा । तत्रापि वासुदेवस्य कलाऽप्यनन्ताऽपरिच्छिन्ना यस्मिन्स इत्यर्थ इति वा । हरेः प्रियचिकीर्षया हरेरग्रतः प्राग्भविता सौमित्रिः सन् स्वयुक्तातिरिक्तां सेवां कृतवान् इदानीं तत्सत्कृतस्य तत्कृतनमस्कारादिना तिरस्कारे स्वयोग्यतायोग्यस्य स्थितिं सम्पादयामास शेष इति भावः । अर्थादमुमेवार्थं सेवाखिन्नो लक्ष्मणोऽग्रे हरेर्भूदिति वदन्त आचार्यवर्या अपि सूचयामासुः ॥ २४ ॥

यदा जगन्मदादिकं सम्मोहितं भवति सा भगवती पूज्या योगमाया दुर्गाऽपि प्रगुणाऽऽदिष्टाऽऽज्ञप्ताऽंशेन कार्यार्थं कर्तव्यप्रयोजनार्थं सम्भविष्यति प्रादुर्भविष्यति ॥ २५ ॥ अमरगणान्मरुदादिगणानामपि बाहुविध्याद्गणानित्युक्तिः । प्रजापतयो दक्षाद्यास्तेषां पतिर्धाता गीर्भिः । सान्त्वनप्रकारभेदाद्बहुवचनम् । परमं स्वधाम महद्रादितो महासम्पद्वा ॥ २६ ॥ अकरादर्जुनो राज्यं तस्य पश्चैवार्वरिता मृवे जयधरः ? शूरसेन इत्युक्तेः कार्तवीर्यवीर्यजो मथुरां पुरीमावसत् । उपान्वध्याङ्वस इति द्वितीया । स्वराट् स्वेन द्रव्येण राजत इति स तथा । सु अत्यन्तं न विद्यते राट् राजा यस्यासौ अखण्डभूमण्डलेश इति यावत् ॥ २७ ॥ यत्र यस्यां यतो

भगवान्हरिर्नित्यं सन्निहितस्ततः समधुरा सर्वयादवभूभुजां सर्वे च ते यादवभूभुजश्च तेषां राजधानी मुख्यराजस्थानमभूत् । हरिसन्निधिश्च कृत्रिमो ज्ञेयः यथोक्तमेकादशतात्पर्ये । आद्यन्तरः सन्निधिर्विष्णोर्बाह्या सन्निधिर्विष्णोर्बाह्यसन्निधिरेव च । द्विविधः सन्निधिः प्रोक्तः कृत्रिमो बाह्य उच्यते । स्वाभाविकस्त्वान्तरः स्यात्प्रतिमा जीवगो यथेति चेति । प्रतिमागतोऽचेतनप्रतिमादिगतः कृत्रिमः । सर्वजीवान्तर्गतः सन्निधि; स्वाभाविक इत्यर्थ इति व्यासोक्तेः ॥ २८ ॥ ततो वृत्तं वृत्तान्तं कथयति ॥ तस्यामिति । तस्यां मधुरायां कृत उद्वह उद्वाहो येन स कृतोद्वहो भार्यया देवक्या सार्धं सूर्ययेति पाठे नवोढयेत्यर्थः । प्रयाणे स्वगृहं प्रतिगन्तुं रथमारुहत् ॥ २९ ॥ स्वसुः पितृव्यसुतात्वेन स्वसुः । रौक्मैः सुवर्णमयोपस्करैः ॥ ३० ॥ पारिबर्हं प्राहुणिकैर्विवाहकाले पुंपक्षीयदेयं हेम्नां मा साऽस्त्येषां हेम्ना मालन्त इति वा तेषामयुतं दशसहस्रं त्रिषट्शतमष्टादशशतीम् ॥ ३१ ॥ यामे गमनसमये । निर्वोयामायेतृग्भाष्ये वामार्गाय । तट्टीकायां च यात्यस्मिन्निति यामे मार्गं इत्युक्तेः । तत्र वावा यामाय वो यामं प्रति दार्ढ्याय । यामं गमनं प्रतीति तदुभयोक्तेश्च । किं वक्तव्यम् । याः मे इत्यवादीद्देवकी ताः सम्पदो ददौ देवक इति वा । किं तद्दाक्षिण्यमित्यत आह ॥ दुहितृवत्सल इति ॥ ३२ ॥ वरवध्वोर्वसुदेवदेवक्योः सुमङ्गलं यथा तथा नेदुः । प्रयाणप्रक्रमे तदारम्भसमये ॥ ३३ ॥ प्रग्रहिणं हयरश्मिवन्तमशरीरवाक् । वचनादेव वाग्ब्रह्मेत्यनुव्याख्यानोक्तेर्वक्तीति वाक् अशरीरं यथा तथा वक्तीति वागशरीरदेवताकं । समाभाष्याहतो नाहेत्यनुपपन्नम् । तां वाच्यं विविच्याह ॥ अस्या इति । हे अबुधाज्ञ कंस त्वं यां नयसे नीय उभयपदित्वात् । नयसि देवक्या अष्टमो गर्भस्त्वां हन्तेति । उच्यत इति वाक् । वच परिभाषणे क्विब्वचीत्यादिना क्विप् दीर्घोऽसम्प्रसारणं च । गीर्वाग्वाणीत्यमरः । अशरीराऽतत्प्रयोज्या वाग्यस्य स वायुरिति वा । मिथ्याशब्दोऽनिर्वचनीयं वदतीतिवत्करणे कर्तृत्वोपचाराद्वागाहेति वा ॥३४ ॥ इत्युक्तोऽशरीरदेवतया पापः स्वभावतस्तद्वान् समीपेऽपि न समीचोना जना इत्याह ॥ स खल इति । सदा तत्सहवासी । स्वकुलव्याकुलतां व्यापारयति ॥ भोजानां कुलपांसन इति । नित्यसापेक्षत्वात्समासः । तत्कुलधूलीधूसरताकृत् आरब्धः संरब्धः सन् खड्गपाणिर्भगिनीं हन्तुं कचे केशपाशेऽग्रहीज्जग्राह ॥ ३५ ॥ महाभागवतो भगवदवतारहेतुर्देववान्वसुदेवः परिसान्त्वयन्नुवाच ॥ ३६ ॥ सम्बन्धलाभोपकृतिरभेदो गुणकीर्तनम् । साम सप्तविधं भेदो दृष्टादृष्टभयं वच इति स्मृतेस्तत्र प्रथमतः क्रममननुसृत्य प्राधान्याद्गुणकीर्तनं सामविशेषमाह ॥ श्लाघनीयगुण इति । श्लाघनीया गुणा यस्येत्यर्थाद्गुणकीर्तिरियम् । न गृहे गृहिण्यादिभिरित्यभिधत्ते ॥ शूरैरिति । भोजयशस्कर इति कीर्तिलाभोऽन्यथाऽकीर्तिलाभ इत्यलाभलाभः । भगिनीमिति सम्बन्धदर्शनम् । स्त्रियमित्युपकृतिः । उद्वाहपर्वणीति भोजानामस्माकं च परस्परं दृष्टादृष्टभीत्यभावात्परमसैत्र्येणाभेदः सूचितः । स्त्रियमित्यदृष्टभयं जनापवादरूपं दृष्टभयं चानेन द्योत्यत इति भेदोऽपि सूचित इति ज्ञेयम् ॥ ३७ ॥ बुद्धिमता गच्छन्मृत्युश्रवणसमनन्तरं तत्प्रयत्नमनुष्ठाय स प्रच्यावनीयस्तदुपायमेवात्मार्थे पृथिवीमिति नीतेर्भो भामेति भो भोजवरेन्द्र रेयसि चेत्किं कदाऽप्येतदुपायेनैतदपायापायेन मृत्यूपस्थितिरिति मत्वा यतसे उतैतत्समयमात्रगमनमनसेति विकल्पं मनसि कृत्वा स सर्वथैशक्यतो नान्यथयितुं शक्य इति दृष्टादृष्टोभयभयवचनरूपभेदं प्रपञ्चयन्नाह ॥ मृत्युरिति । जन्मवतां जनानां देहेन सहैव मृत्युर्जायते । एवमनेन संसर्तव्यं मर्तव्यं चैवमिति जायते रणे मारणेनारिभिर्वीराणां स च नियतः क्षणे क्षणार्धे वेति तथा सम्बोधयति ॥ वीरेति । शालत्वादबलासङ्कालनयत्नवानहहेति वीरेति वदन्नुपजहास वसुदेव इति वा । अद्य वाऽब्दशतान्ते वेति शतायुर्वै पुरुष इत्यभिप्रायेणोति ज्ञेयम् । तन्मात्रे तात्पर्यं किन्तु तदास्कन्दितत्वे ततो ध्रुवत्वान्न तत्त्यजनं सुशकमिति भावः । तर्हि सर्वेषामेवमेव किमित्युक्तौ वक्ति ॥ प्राणिनामिति । प्रकर्षेणाणनवतां तरतमभावेन चेष्टकानां ब्रह्मादीनां मध्ये ध्रुवो विष्णुर्विमृत्युर्मरणरहितस्तस्य स्थविष्ठ स्थविरो ध्रुव इति हरिनामत्वात् । न ह्यध्रुवैः प्राप्यते हि ध्रुवं तदिति काठकोपनिषद्भाष्ये ध्रुवो भगवानिति व्याख्यातत्वाच्च । एतेन ध्रुव इत्यलं पुनर्मृत्युरित्युक्तिस्तथा प्राणिनामिति च कुत इति परास्तम् । वैशब्दो जरो विमृत्युरित्यादिप्रसिद्धिं द्योतयति ॥ ३८ ॥ तत्प्रकारं प्रपञ्चयति ॥ देह इत्यादिना । पञ्चत्वं नाशं गतमापन्ने प्राप्ते सति कर्मानुगोऽवशोऽस्वाधीनप्रवृत्तिरवशो भगवदधीन इति वा देहान्तरं स्वकर्मानुगुणमनुप्राप्य प्राक्तनं वपुस्त्यजते त्यजति ॥ ३९ ॥ एकस्मिन्नेवास्मिन् शरीरे देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा । तथा देहान्तरप्राप्तिरिति विशोकदा दशा देहहानौ देहान्तरस्वीकार एवेत्यत्र निदर्शनद्वयं दर्शयति ॥ व्रजन्निति । व्रजन्पुमानेकेन पदा तिष्ठत्यथैवैकेन पदा गच्छति तथा बाल्येन तिष्ठन्कौमारं व्रजत्येवं जराम् । तृणजलूका तृणग्रहणकृत्कृमिविशेषः । पुरतस्तृणान्तरं गृहीत्वा प्राग्गृहीतं तृणं त्यजत्येवं जीवः स्वकर्मार्जितमूर्जितमनूर्जितं वा कलेवरं परं गृहीत्वैतत्त्यजति । कर्मणा गतिः प्राप्तिर्यस्य तं देहं गत इति वा । दृष्टान्तद्वयमेकत्रैवेति । पूर्वत्र । परस्तु किञ्चित्सोहितीत्यस्मद्याख्यानस्य । अत्र च स्वीकारपरित्यागौ नात्यन्तभिन्नविषयाविति स्पष्टं दृष्टान्तान्तरमाहेत्यवतारयिता चकारेत्युपर्येव ज्ञायते । जलमोको यस्याः । ओक उचः क इति निपातितोदन्त ओकशब्दः । जलोकापि जलौका स्याज्जलूका जलजन्तुकेति तारपालः ॥ ४० ॥ स्वप्ने यथा पश्यति देहमीदृशमिति श्लोके यथा मनोरथेनाभिनिविष्टचेतनः स्वप्ने देही मिथ्याभूतमेव देहं पश्यति । तथा दृष्टेन श्रुतेन दृष्टया श्रवणेनानुचिन्तनसहितेन मनसा ध्यातं देहं प्रपद्यते । तद्देहनिदर्शनेनेतरसर्वस्य मिथ्यात्वमुच्यत इति भ्रमं शमयितुं योजनाप्रदर्शनपूर्वं समग्रश्लोकतात्पर्यमाह ॥ स्वप्न इति । स्वप्ने तदवस्थायां दृष्टश्रुतस्मृत्यनुसारिदेहमनुसारी चासौ देहश्च वासनामयश्च तं । भिन्नं पदं वा । कायो देहः क्लीबपुंसोरित्यमराद्देहशब्दो नपुंसकलिङ्गोऽपीति विशेषणमनुसारीति सम्भवति । प्रेण सुखदुःखानुभवप्रकर्षसहितत्वप्राप्तेः सूचयति । अनेन चिन्तयन्निति विशेषणं चिन्तनं प्रपत्तिसम्पत्तिसाधनं हरिं पश्यन्मुच्यत इतिवदिति सूचयति । अपस्मृतिरि-

त्यनूद्य व्याचष्टे ॥ अपस्मृतिर्मृत इति । किं प्रयुक्तोक्तामृततेत्यत आह ॥ अभिमानतः पूर्वदेहस्मरणाभावादिति । ममायं कायो मम सुखादिकं जातमित्यभिमानपूर्वकपूर्वदेहादिस्मृतिरहित इति मृत इत्युच्यत इत्यर्थः । अनभिमानत इत्यचतुरपाठस्तथाऽपि अनभिमानतोऽभिमानाभावात् । तद्व्याख्याति पूर्वदेहस्मरणाभावादिति व्याख्यानव्याख्येयभाव इति व्याकुर्वते । केचिद्वैपरीत्येन व्याख्यानव्याख्येयभाव इत्याहुः । अनभिमानत इति पाठ एकादशतात्पर्योक्तार्थविशेषलाभ इति च ज्ञेयम् । तथा हि । उत्तरदेहाभिनिवेशेन पूर्वदेहस्मरणं यस्य मृत्युरिति ॥ ततश्चायं श्लोकार्थः ॥ जलूकातुलतोपपादनेन तृणतद्भेदवदत्रापि देहदेहिनोर्भेद इत्युक्तं स्यात् । तदैक्यात्तदसम्भावितमिति तत्राह ॥ स्वप्न इति । स्वप्नेऽवस्थाविशेषे तत्रापि स्वापं नयतीति स्वप्नो हरिरिति बृहद्भाष्यव्याख्यानानुसारेण च न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजत इति श्रुतेर्हरिस्तस्मिन्वासनामुपादानमुपादाय सर्जके च सतीत्यप्यर्थः । मनोरथेन जाग्रद्दृष्टश्रुतवस्तुसंस्कारसचिवेन मनोरथेनाभिनिविष्टा चेतना संविद्यस्य । चेतना संविदि प्रोक्तेति विश्वः तद्ग्रस्तधीरित्यर्थः । ईदृशं जाग्रद्देहसदृशं शरीरं यथा पश्यति स्वत्वेन जानाति परकीयत्वादिना वा । तत्रावलोक्यावलोकयितृकायभेदोऽनुभवसिद्धस्तथा दृष्टश्रुताभ्यां दर्शनश्रवणाभ्यां मनोऽपि यदनुचिन्तनसहितं तेन युक्तस्तदनुचिन्तनसाधनकमपस्मृतिरपगतस्मृतिरभिमानाभावप्रयुक्तपूर्वशरीरस्मरणरहितत्वान्मृतः किमपि स्ववासनानुसारि सुरनराद्यन्यतमं शरीरं प्रपद्यते हि यतोऽतः स्वतः सरणीयशरीरनिमित्तमुत्तम्भितासिः कथं स्वसुर्हननं तनुयास्त्यजेति भावः । निर्णयाभावात्किमपीत्युक्तिः ॥ ४१ ॥ यतो यतो धावतीति श्लोके विवक्षितार्थाप्रतीतेरात्मपञ्चसु स्वोपभोग्यशब्दादिविषयपञ्चक इत्याद्यन्यथाप्रतीतेश्च स्वयं यथावद्व्याकृत्य मानं चोदाहरति ॥ यतो यत इति । सार्वविभक्तिकस्तसिरत्र सप्तम्यर्थे इत्याह यत्र यत्रेति । वीप्सा च विषयाणां बाहुविध्याद्युक्ता । आत्मपञ्चस्विति सप्तमी निर्धारण इति निर्धारयितुं पञ्चानां मध्य इत्युक्तिः । आत्मानो वक्ष्यमाणजीवाश्च ते पञ्च च तेषु तत्र तत्र तेन देवेन क्रीडादिमता भगवता । तथा दिवु क्रीडाकान्तिगतिष्विति स्मृतेरसाधारण्येन नयेन सदागतिर्ग्राह्या । तेन वायुना च सह गुणानुबद्धः सत्त्वादिगुणवशः स्वस्वरूपगुणानुबद्ध इति वा सन् जायते शरीरसम्बन्धवान्भवति । इदं विशेषविवक्षया । सामान्यतश्चेत्पराधीनविशेषावाप्त्यादिमान्भवतीति व्याकुर्वते । दैवगान्धर्वपित्र्येषु मानुषेष्वसुरेष्विति पञ्चानां मध्ये यत्र यत्र मनो ध्यायद्याति तत्र तत्र तेन देवेनोक्तरूपेण सञ्जायते । स्वगुणस्य स्वरूपभूतगुणानामनुसारेण तथा सत्त्वादिप्राकृतगुणैश्च नितरामनुबन्धनं यस्य स इति । एतेनैव स्वपदस्यानुसारपदस्य च स्वारस्यं सूचितमिति ज्ञेयम् । स्वस्वगुणतत्त्वादिगुणैर्देवादित्वप्राप्तिर्भवन्ती सा योग्यतामनुसृत्येति मानेनाह ॥ देवादित्वमिति । दैवेत्युत्तमाधिकार्युपलक्षणम् । गन्धर्वेत्यधमाधिकार्युपलक्षणम् । उपलक्षकं च पित्र्येति मध्यमानां मानुषा मिश्रमल्पो विमिश्रगतयोऽपि च । पुनः पुनर्मानुषास्तु सृतावावर्तयत्यसौ । नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । एवमनेवं च मनुष्या इत्यादेर्नित्यसंसारिणः । एतन्मुक्तिसंसारस्तु नमकचमकविवरणेऽस्मत्कृते ललाललतायितानामिति पदव्याकृत्यवसरे विस्तृत्य कथितस्तत्स्थानादिनीरूपणतस्ततोऽनुसन्धेयः । असुरासवयोग्या इति विवेकः । स्मरणमात्रेण तत्तत्प्राप्तिरिति पातनिकार्थोऽनुपपन्नः । तत्रेतिकर्तव्यान्तरमस्तीत्याह ॥ योग्यतयेति । तुरवधारणार्थे सन्योग्यतयैवेति योग्यान्वयः । योग्यतयैव देवादित्वं प्राप्नोति । अनुस्मृतेर्भगवदनुचिन्तनाद्देवादित्वं तदयोग्यश्च तत्सकाशं सामीप्यं प्राप्नोति सकाशतत्समानदीप्तिरित्यर्थः । काशतेर्दीप्त्यर्थाद्भावे घञि समानशब्दस्य समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केष्विति सभावे सकाश इति भवतीति वा । तत्र विशेषेण योग्यतापेक्षिता किमित्यत आह ॥ श्वेतद्वीपेति । अपिर्योग्यतोत्तेजकसाधनान्तरसमुच्चायक एकः । तत्रापि वासाय योग्यतयैवापेक्षितेत्यवधारक एकः । यथोक्तम् । योग्यत्वं चात्र विवक्षितं । अत्र निवास इति शेष इति गीताभाष्यप्रमेयदीपिकयोः श्वेतद्वीपादि विष्णोः स्थानं साधनसध्रीचीनां योग्यतामपेक्ष्यैव प्राप्नोति । तथा वायुशक्रादीनां स्थानं च विना तत्रापि योग्यतापेक्षितैव । अन्यत्र त्रैलोक्यदेशभेदेष्विति सामानाधिकरण्यम् । त्रैलोक्यास्त्रिलोकीभवाश्च देशभेदास्तद्विशेषास्तेषु नैवापेक्षिता योग्यता स्थित्या इति ज्ञेयम् ॥ अथ मूलार्थः ॥ विकारात्मकं सङ्कल्पविकल्पादिस्वभावं मनो दैवचोदितमदृष्टोपोद्बलितं सत् गुणाः सन्ति येषां कारणतया ते गुणाः । कारणकार्यशब्दयोर्गीर्भिः शृणीत मत्सरं यथा वक्त्रादिकं मुखमित्यादौ साङ्कर्यं दृष्टमिति । गुणेषु तत्कार्येषु माया तु भगवदिच्छोद्बोधिता प्रकृतिस्तद्रचितेषु आत्मपञ्चसु देवादिजीवानां पञ्चानां मध्ये यतो यतो यत्र यत्र धावति तत्र तत्रासौ देही प्रपद्यमानो योग्यतानुसारेण स्मृतावद्देहवान् तेन हरिणा वायुना च स जायते । स्वरूपतदितरगुणानुबद्धः सन् जायते । देहसम्बन्धादुत्पत्तिमान्भवतीत्यर्थः ॥ ४२ ॥ ज्योतिर्यथैवोदकपार्थिवेष्वद इति श्लोके यथाऽनिलबलेन चञ्चलीभवज्जलतस्तत्प्रतिबिम्बितं ज्योतिः सूर्यादिकं चलनस्खलनभाग्भवति तथा भगवान् रागानुगतो बहु स्यामितीच्छानुगतः स्वाज्ञानरचितेषु देहादिषु प्रतिबिम्बितोऽहं सुखी दुःखी बुधोऽबुधो बद्ध इति मिथ्यामतिं प्राप्नोति । स एवात्र गात्रे जीवादिरूपी । तत्र दुःखादिकं च मायिकमेव प्रतीयत इत्यन्यथाप्रतीतिमन्यथयितुं किञ्चिदनूद्य तत्तात्पर्यार्थमाह ॥ विभाव्यत इति । विभाव्यत इति मौलं पदं तद्व्याख्यानं तु विविधं भाव्यत इति । मायारचितेषु तथैव विष्णुमायारचितेषु । इदमपि रागानुगतः स्फुटार्थम् । पुमान् जीवः स्त्र्यादिसङ्ग्रहोऽनेन कृतो ज्ञेयः । विविधं मुह्यति मोहं प्राप्नोति । श्लोकमेकमखण्डप्रमाणेन व्याख्याति ॥ यथैवेति । उदमुदकं तत्पूर्णाः शरावा वर्धमानकास्तदादिषु सूर्यादिः प्रतिबिम्बितः । उदकपार्थिवेष्वित्यतः परं प्रतिबिम्बितमिति शेषः कर्तव्य इत्यनेनासूचि । समीरवेगानुगतिमिति व्याकरोति ॥ वायुना चलितमिति । द्वैविध्यमाह ॥ छिन्नभिन्नादिरूपवानिति । अनेन विमुह्यतीति तात्पर्यमुक्तं वेदितव्यम् । एवं विष्ण्विच्छयेति मायापदार्थः कथितः । प्रतिबिम्बो जीवो बहुधा । तृतीयाविभक्तेर्लोपः । बहुप्रकारेण

प्रतिपद्यत आत्मानं जानाति । प्रकारान्तरेणेमं श्लोकं व्याकुर्वन्मानमुपन्यस्यति ॥ तदिति । निश्शरावके शरावान्निष्कासिते दृढीभूते
उदके शरावादित्वेन दृढीभूते वाऽकम्पयाणुमुखपात्रस्थिते प्रतिबिम्बितं सूर्यादिकं निश्चलं सच्छेदभेदादिकं न प्राप्नोति । एवं गुणैः
सत्त्वाद्यैर्विमुक्तस्यत्क्ताभिमतिरित्यर्थः । दुःखितं नाप्नोति बिम्बप्रतिबिम्बभावं घटयितुं दृष्टान्त इव दार्ष्टान्तिकमुपपादयन्नाह
शरावव्च्छरावेण तुल्यं वर्तन्त इति ते तथा । ब्रह्मादिगुणवैशेष्यादानन्दादिः परस्य च प्रतिबिम्बत्वमायाति मध्योद्यादिविभेदत
इत्यादेर्गुणाः । शरावव्त्प्रोक्ताः अज्ञानं जैवं द्रवत्वं तज्जलमिव । यद्वा द्रवत्ववज्जलं लुप्तोपमा । तद्वद्दृढीभूतं यदुदमुदकं तद्वज्जी-
वस्तज्ज्ञानं जीवज्ञानं स्वरूपज्ञानं प्रतिबिम्बो जीवो जडान्तःकरणकार्यं च सज्जीवस्य दुःखादिकमिति दर्शयितुं नित्येति व्यपदिशन्तः
करणमिति ज्ञेयम् । ननु मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिरिति स्थितेरुपाधिनाशेऽज्ञानान्तःकरणादिनाशस्ततः प्रतिबिम्बनाश
इति सर्वनाशे मोक्षाशा का महामुने स्यादित्यत आह ॥ द्वयमिति । तस्य द्वयं ज्ञानान्तःकरणादिकं जडमजडं चेति प्रकारद्वयोपेतम् ।
तत्र जडस्य नाशोऽनाशश्चापरस्य विमुक्तस्य किञ्चिज्जडं नेष्यते प्रामाणिकैर्नाङ्गीक्रियते । जीवोपाधिर्द्विधा प्रोक्तः स्वरूपं बाह्य एव
च । बाह्योपाधिर्लयं याति मुक्तावन्यस्य संस्थितिः। नित्योपाध्या स्वरूपया चिद्रूपया युतो जीवः केशवप्रतिबिम्बक इत्यादिचतुर्थतात्पर्यगीता-
भाष्याद्युक्तेः । किञ्चिदपि न जडमतो न सूर्यकान्तादिवन् एकाकारं येनातिप्रसक्तिः स्यादिति भावः । उत लिङ्गभङ्गानन्तरं तस्य जीवस्य
द्वयमुपाधिप्रतिबिम्बात्मकमपि स्वरूपमिष्यत इत्यन्वेति । न किञ्चिदित्येतद्विवरणमिदमिति ज्ञेयम् । देहस्य सर्वथा नाशशिरस्कत्वादा-
त्मनश्चेदनाशात्किं प्रयुक्तमेतद्धननं न युक्तमित्यतस्तस्मान्न कस्यचिदित्युत्तरश्लोकतात्पर्यं विवक्षुस्तदर्थगर्भं मानमुदाहरन्नुपसंहरति ॥
तस्मादिति । असौ जीवः केनचिदपि न हन्तुं शक्य आत्मवान्नित्यभूतस्वबिम्बपरमात्मवान् बिम्बस्यानाशाच्चेतनस्याप्यनाशादुपा-
धेश्च नित्यतयाऽऽत्मा न हन्तुं शक्य इति भावः । स्वजीवनार्थाय परद्रोहं नाचरेत् । यद्याचरेत्परेषां द्रोहमाचरन् सोऽज्ञभावेनेत-
त्प्रकाराज्ञत्वेन परैरत्रापरत्र हन्यते नरकाद्यनर्थं चाप्नोतीत्यर्थः । स्वमायेत्यत्रत्यस्वशब्दो विष्णुवाचीत्यत्र मानमाह ॥ पर इति ।
परः स्वो हरिरुद्दाम इति नामचतुष्टयं गुह्यमज्ञैरज्ञातत्वात् । यो वेद स सर्वपापैः प्रमुच्यते मुक्तो भवति । अर्थवादेन तद्वेदनस्यावश्य-
यकत्वेन विधीयमानतां द्योतयति । रूढिशब्दचतुष्टयसाधारणी प्रकाशसंहितया प्रकाश्य प्रस्तुतस्वपदं महायोगेन हरिपरमिति प्रत्याय-
यत्पाद्यं च मानमाह ॥ स्वतन्त्रत्वादिति । स्वेति नाम यस्यासौ स्वनामा ॥ ततश्चायं श्लोकार्थः ॥ आत्मन एकत्वान्नानाविधताप्रतीतिः
किंनिबन्धनेत्यतः सदृष्टान्तं तत्सम्भवमाचष्टे ॥ ज्योतिरिति । अदो ज्योतिः सूर्यादिलक्षणम् । समीरवेगानुगतं समीरो वायुस्तस्य यो
वेगस्तेनानुगतं सचलनं तच्चलनेनेत्यर्थः । उदकपार्थिवेषु पार्थिवाश्च मृद्विकृताः शरावोदञ्चनादय उदकयुताश्च ते ते च तेषु प्रतिबिम्बितं
विभाव्यते छिन्नभिन्नत्वादिना प्रतीयत एकमप्येवं तथा असौ पुमान् जीवः स्वमायारचितेषु स्वस्य हरेर्माययेच्छया रचितेषु गुणेषु
तत्कार्येषु देहेषु रागानुगतः । शोभनाध्यासो राग इति गीताभाष्योक्तेस्तदनुगतः सन्विमुह्यति छिन्नः खिन्नो भिन्नोऽहमिति विविधं
वैचित्र्यं प्राप्नोति । किञ्च यथा तदेव ज्योतिः समीरवेगोऽनुद्दीनतां गतो यस्य तद्विकलमुदकपार्थिवेषु तन्मिश्रपार्थिवादिषु विभाव्यते
वि विशिष्टमखण्डमिति यावत् भाव्यते प्रतीयते । एवं सज्जीवो गुणेषु रागान्वित इति पदमेकम् । गुणेन स्वगुणेन स्वरूपगुणेन वा
इषुरागो इषुचतन्मये भवेदिति सकलेशनिवेशवान् रागोऽनुगतोऽयं वा सोऽनुगतो येन वा । स्वमायारचितेषु देहादिषु विमुह्यति मोहं
न प्राप्नोतीति सज्जीवपरतया शरावव्द्गुणाः प्रोक्ता इत्यादिना तात्पर्यानुसारेण योजनीयोऽयं श्लोकः ॥ ४३ ॥

निगमयति ॥ तस्मादिति । यस्मात्तथाविधो नित्योपाध्यादियुतः परोऽपि स्वयं च तथाविधस्तत्प्रकार इति कस्यचित्प्राणिनो
द्रोहमात्मनः क्षेममन्विच्छन्नाचरेत् । आचरतश्चानर्थमाह । परतो भयमिति । परत उपद्रुतादत्र परत्र च नरकादिभयं च भवतीति
शेषः ॥ ४४ ॥ प्रकृतमनुसरति ॥ एषेति । बहुहेतूक्तिस्तु मुक्तिर्भवेदिति मन्तव्यम् । पुत्रिकोपमा पुत्तलिका वस्त्रमयी वा तदुपमा
निर्जीवप्रायेति वाऽर्थः । इतरस्तु स्फुटः ॥ ४५ ॥ पुरुषादानुव्रत इत्यनेन, कामिनीकारुण्यं राक्षसानामस्तीति ध्वनितम् । वधूवध-
निषेधे प्रस्तुते तदननुगुणमित्यतोऽप्याह ॥ पुरुषादाननुव्रत इति । पुरुषादा अननुव्रता येन पुरुषादैरननुव्रत इति वा । तैरपि
जुगुप्सिते कर्मण्युद्युक्त इत्यानुगुण्यं ज्ञेयम् । एतत्सर्वनिर्वाहार्थं दारुण इत्युक्तम् । स कंसः सामभिर्भेदैश्च बोध्यमानो वसुदेवेनेति
शेषः । भगिनीभङ्गभङ्ग्या न न्यवर्तत न निववृते तत्र हेतुर्दारुण इति । स्वभावतः क्रूरश्चेदपि बोधकाः साधवो वर्तेरन्नित्यत
आह ॥ पुरुषादाननुव्रत इति । पुरुषानदन्तीतिताननुव्रतो राक्षसानुसृतेर्नोपससारैवैतत्कुकर्मत इति भावः ॥ ४६ ॥ यदा दुर्वृत्तोऽ-
निवृत्तस्तदा वसुदेवः किमचरच्चरममुपसमोपायमित्यतोऽष्टभिः स्पष्टयति श्लोकैः ॥ निर्बन्धं तस्येत्यादिभिः । तस्य कंसस्य निर्बन्धं
हननदुराग्रहं प्रतिव्योढुं तदपोहितुं विचिन्त्य किञ्चिदालोच्य प्राप्तकालमनु सङ्कटकाले युक्तमिदमन्वपद्यतालब्ध ॥ ४७ ॥ यावद्-
बुद्धिबलोदयं बुद्धेर्यद्बलं तस्योदयो यावत्पर्यन्तं वर्तते तत्पर्यन्तं यथा भवति तथा । यावदवधारण इत्यव्ययीभावः । सैव नास्ति
चेन्न तद्बलं तदुदयस्तु कफोणिगुडायित इत्यत आह ॥ बुद्धिमतेति । तत्रापि मतुपा प्राशस्त्यं तस्य द्योत्यते । मृत्युरपोह्यः परिहार्योऽसौ
मृत्युर्यदि न निवर्तेत देहिनः परिहृतियत्नं कुर्वतोऽपराधो वैदिकलौकिकापवादलक्षणो नास्ति । यत्ने कृते यदि न सिध्यति कोऽत्र
दोषः । प्रयत्नमप्रतो निधायेत्यादेः । अपरहेतुभिरवान्तैरस्तन्निमित्तकमधोऽधोगतिरपि नास्तीति वर्णयन्ति ॥ ४८ ॥ पुत्रानेतद्गात्र-
जान्मृत्यवे हननाय कृपणां दयापदं प्रत्यर्प्य सङ्कल्पपूर्वमर्पणं कृत्वा मोचये । एकस्य मृतिं प्रच्यावयितुमनेकतोकसमर्पणसङ्कल्पो
नाल्पमतिमत्सम्मत इत्यत आन्तरङ्गिकीं काञ्चन कालयापनचिन्तामुचितामाह ॥ सुता इति । यदि मम सुता जायेरंस्तदा किल
समर्पणं तन्मध्ये मृत्युरयं कंसो म्रियेत न चेत्किल दानं दानवाय ॥ ४९ ॥ विपर्यय एतन्मरणं वा न स्यात्किं न चेयतिसमये कथं

कंसहिंसेत्यतः शंसति ॥ गतिरिति । विपर्ययः मम सुतादेवास्य मृत्युः किन्न स्यात् । तनुजस्य तनीयसः कथं कथयैतन्मथकतेति तत्राह ॥ गतिरिति । धातुर्विधातुर्गतिर्दु रत्ययाऽत्येतुमशक्येति वा । यद्भावि तद्भवत्येवेति भव वसुदेव तूष्णीक इत्यत आह ॥ उपस्थित इति । सद्य उपस्थितो मृत्युः सत्या निवर्तेत । इदानीं निवृत्तो मृत्युस्तद्रूपोऽयं पुनर्मत्तनुजजननानन्तरं तेनैवापतेत् । अत्र गतिर्धातुर्दु रत्ययेत्यपि योज्यम् । अस्यास्त्वामष्टमो गर्भो हन्तेत्यशरीरा गीरपि न वितथा भविष्यतीत्यन्तरङ्गबलवानेवं वसुदेवोऽवादीदिति भावसूचकं पीठिकोक्तं बुद्धिमत्त्वमिति मन्तव्यम् ॥ ५० ॥ अग्नेर्यथा दारुवियोगयोगयोरिति श्लोके काष्ठसंयोगवियोगावदृष्टघटिताविति प्रतीयते । न चैतद्युक्तम् । तयोर्यथायथं दृष्टसामग्रीसिद्धेरिति परिहर्तुमभीप्सितमध्याहृत्य तदप्रामाणिकत्वप्रच्युत्यै वामनपुराणवचनमुदाहरति ॥ कुण्डादिस्थेति । कुण्डादिस्थो योऽग्निस्तस्य दारुयोगादौ योगवियोगादौ स्वतः योजकं विना प्रवृत्तेरभावान्मूलानुकूल्येन वियोगयोगादाविति वक्तव्ये वियोगस्तु योगानन्तरकालिक इति वाऽभावज्ञानं प्रतियोगिज्ञानाधीनमित्यभावप्रतीतिर्भावप्रतीत्यधीना नियमेनेति टीकोक्तेर्युक्तं तात्पर्ये वियोगादग्रे योगाभिधानमिति ज्ञेयम् । अत एव मूलकृदपि दार्ष्टान्तिकसादृश्योक्तिसमये शरीरसंयोगवियोगेति पुरस्कुर्वन्संयोगं स्ववचनं व्याचख्याविति भावमिमं व्याख्यां त आचार्या आविर्भावयामासुरिति विभावनीयम् । पूर्वं तयोक्तिस्तु तयोरदृष्टघटितत्वाविशेषादिति मन्तव्यम् । कंसनिर्बन्धानुसारेण वियोगस्य पुरस्कृतिरिति वा । यथा कुण्डस्थितस्याग्नेस्तदादिस्थिताग्नेर्दैवाद्धरेः सकाशादेव दारुकाष्ठमुप सम्भयेत्सन्नद्धं भवेत्संयुक्तं भवेदिति यावत् । अन्यथेत्याकर्षणीयम् । अन्यथा च न सम्मेद्वियुक्तं च भवेत् । तथा देहयोगः । पुनर्देहेति योगपदेन समस्तमपि विश्लेष्य वियोगपदेनाप्यन्वेतव्यम् । देहयोगो देहवियोगश्चेति दैवाद्वासुदेवादेव । अन्यथा न च । अनेनाचेतनाग्निनिकेतनश्चेतनोऽपि प्रत्युक्तः । माने वामने दैवादित्येकवारोक्तौ चारितार्थ्ये पुनर्दैवादित्युक्तिर्दैवं दिष्टमित्युक्तदैवस्याप्यस्वातन्त्र्यं द्योतयितुमिति मन्तव्यम् ॥ ततश्चायं श्लोकार्थः ॥ यथाग्नेर्दारुवियोगयोगयोः काष्ठसंयोगवियोगयोरदृष्टतोऽदृष्टादन्यन्निमित्तं हेतुरितरो नास्ति । एवं तथा सर्वजन्तूनां शरीरसंयोगवियोगहेतुर्हरेरितरो दुर्विभाव्यो दुःसाध्यविभावः । अतो भगवानेवाङ्गसङ्गतद्भङ्गकृदिति नाभिमानाद्भामिनीहननमुत्रहननहेतुरिति निवर्तस्वेति भावः ॥ ५१ ॥ तं पापं पापपुरुषं विमृश्य निश्चित्य । आत्मनि स्वस्मिन्दर्शनं शास्त्रज्ञानं यावत्तावता शौरिर्बहुमानपुरःसरं राजेति बहुमानपूर्वकं यावदात्मनिदर्शनं, स्वानुभूतदृष्टान्तो यावान्यावदात्मनिदर्शनं यथा तथा । बहुमानपुरःसरं प्रमाणोपन्यसनपूर्वकं वा विमृश्यालोच्येति वा सान्त्वयामास ॥ ५२ ॥ प्रसन्नवदनाम्भोजः प्रत्यग्रवदनाम्भोज इति च पाठौ । प्रसन्नं वदनाम्भोजं यस्य सः । प्रत्यग्रं वदनमेवाम्भोजं यस्य सः । प्रत्यग्रमुक्तं सद्यस्कमिति हलायुधः । दूयमानेन तप्यमानेन मनसाऽन्तः प्रहसन्बहिः ॥ ५३ ॥ सौम्येति सुमुखीकर्तुमुक्तिः । अशरीरिणी वाग्वाणी यद्भयमाह तदस्याः सकाशात्तेन हि यतः पुत्रेभ्यो भयमुत्थितं तान्पुत्रांस्ते समर्पयिष्ये जातं जातं पोतं घातयितुं यातयामि । अष्टमत्वं प्रातिस्विकं सम्भवन्नैकत्र पर्याप्तमिति हन्ताऽस्या अष्टमो गर्भ इत्युक्तावपीति पुत्रानित्युक्तिः । त इत्यावर्तते । ते त्वया ते पुत्रा अस्या निरस्याः संहार्या इति यावत् । अतोऽभयं भयाभावः सिद्ध इत्यन्वयो वा । अनेनोभयस्थाने भयशब्दस्यैवास्या इति शब्दस्यापि प्रयोगेऽतिरेकयितृमूकता बोधितेति बोध्यम् ॥ ५४ ॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे प्रथमोऽध्यायः ॥ १०–१ ॥

॥ हरिः ॐ ॥ अत्र कंसकृत्यशंसनापदेशेन संसारो निस्सार इति शुकः शंसति ॥ सुहृद्वधादिति । भगिनीवधात् । सुहृदिति वदन्नदो हृदयं पश्चाधवसद्यायितमिति शोभनं तद्वती सा देवकीति ध्वनयति । कंसो हिंसात इदानीं निवृत्तः किं क्षणान्तरे ततोऽतीत्यपि न किन्तु मनःशौद्ध्याभिवृत इत्यप्याह ॥ सुहृदिति । शुद्धमनस्को वधात्प्रस्तुतादिव । तत्र निमित्तमाह ॥ तद्वाक्यसारविदिति । तस्य वसुदेवस्य वाक्यं तद्वाक्ये यः सारस्तं वेत्तीति स तथा । अशरीरवाणीसारविदिति वा । वाक्यभावविन्निवृत्ते प्रीतः प्रस्तुतभीत्यपगमात्प्रशस्य स्तुत्वा स्वगृहं प्राविशत् ॥ १ ॥ सर्वदेवताः सर्वा देवता यस्यां सन्निधानवत्य इति वा भगवदवतारभूतत्वात्सर्वस्तुत्येति वा । दशमे मासि जायत इति श्रुतिश्रावितसमये उपावृत्ते प्राप्ते सत्यष्टौ पुत्रानेकां कन्यां चानुवत्सरं संवत्सरस्यैकैकमिति प्रसुषुवे ॥ २ ॥ जन्म नाम्ना कीर्तिमंतं प्रथमं जायते स्म तथा तं कृच्छ्रेण कष्टेन कंसायार्पयामास । विना तदाज्ञां हिंसायै कंसाय दानं नोचितमित्यत आह ॥ सोऽनृतादतिविह्वल इति । अदाने प्राप्यादनृतात्तद्वादित्वप्रयुक्तपातकादतिविह्वलः सन्नार्पयत् ॥ ३ ॥ पादत्रयेण सत्वभावमेकेन दुःस्वभावं चावेदयन्कथं वसुदेवो नृपभीतः पोतमदादित्युत्तरयति ॥ किमिति । साधूनां किं दुःसहं विदुषामपेक्षितं किं न किमपीत्युपेक्षितवान्सुतमिति भावः । किञ्चेदमपि तनुजन्यजनं दुःशकमित्यत आह । ऋतात्मनां सत्यसंहितचेतसां किं दुस्त्यजं न किमपि सर्वं सुत्यजमिति भावः । वसुदेवदत्तं पुत्रं न हन्यात्कंस इत्यत आह । कदर्याणां कृपणानां कुत्सितस्वामिनां वाऽकार्यं किं सर्वं हिंसादिकार्यमेवेत्यर्थ इति कदर्ये कृपणक्षुद्रकिंपचानेत्यमरः । पर्यायेष्वेवं बहुस्थलेष्वमरो वर्तत इति नादृतमिदम् । ऋतात्मनां हरिमनसामिति वा । ऋ गताविति धातोस्तु पूर्वावगतवत्सदास्थितेर्ब्रह्मर्तामित्युक्तमित्युक्तेः । ऋतमुञ्छशिलमित्युक्तेस्तद्वृत्तिमनसां वा ॥ ४ ॥ समत्वं तोषकातोषकार्ययोः सत्ये यथार्थभाषणे व्यवस्थितिं च दृष्ट्वैव तुष्टमनाः कंसः प्रहसन्सन्निदमब्रवीत् ॥ ५ ॥ अस्मात्प्राथमिकात्कुमारान्मे भयं हि यतो नास्ति ततोऽयं कुमारः प्रतियातु । युवयोरष्टमात्पुत्रान्मे मृत्युर्विहितः । किलेत्यशरीरवाणीवार्तायाम् ॥ ६ ॥ असतस्तत्रात्यविजितात्मनोऽनिगृहीतमानसस्य तत्प्रतियातु कुमारोऽयमिति वचनं नाभ्यनन्दत न विश्वसनीयमिति न तुतोष ॥ ७ ॥ शुकः कंसघ्नकंसपक्षीयस्वरूपं निरूपयति ॥ नन्दाद्या इति । अमीषां गोपानां वसुदेवाद्या वृष्णयो देवक्याद्या यदुस्त्रियश्चेत्युभयोर्वसुदेवनन्दकुलयोः सर्वे देवताप्राया बाहुल्येन देवता एव ॥ ८ ॥ ये च

कंसमनुव्रतास्तज्ज्ञातयः सुहृदश्च लोकोपद्रवकारिण एते सर्वे एवासुरा दैत्याः ॥ ९ ॥ देवकार्यार्थमुद्यतो नारदो देवताकार्यमेवार्थः स्वप्रयोजनं तेन मुद्यस्य स यतस्तत इति वा । भगवान्नारदः कंसाय गतम् । एतन्नन्दादिदेवादित्वं शंसयामास । णिच् स्वार्थे । शशंस । शशंसाभ्येत्य नारद इति पठन्ति । तथोत्तरत्र भूमेर्भारायमाणानामिति च ॥ १० ॥ भूमेर्भारावतीर्णानां तद्रूपत्वेनावतीर्णानां दैत्यानां वधोद्यमं देवताविहितं च शशंसेत्यन्वयः ॥ ११ ॥ ऋषेर्देवर्षेर्विनिर्गमे गमने इत्येवं प्रकारेण जाते सति स्ववधं प्रति तमुद्दिश्य विष्णुं देवक्या गर्भसम्भूतं मत्वा तथा यदून्सुरांश्च मत्वा देवकीं वसुदेवं च निगडैः शृङ्खलादिभिः । अनेन पादयोरुभयोरपि पृथक् पृथक् स्थापनं द्योत्यते । तेन च किञ्चिच्चलनादिसुलभता च ध्वन्यते । गृहे कारागारे निगृह्य जातं जातं पोतमजनशङ्कयाऽजनो लोकविलक्षणो जनार्दन इति वा शङ्कयाऽवतीर्ण इति सन्देहेन । अजनं स्वक्षेपणं संहाररूपं स्वगमनं मरणरूपं तच्छङ्कयेति च ॥ १२ ॥ किमेककारणमनेकलोकहिंसा कंसस्ततानेत्यत एतादृशानां स्वभावोऽयमित्यावेदयति ॥ मातरमिति । पूर्वरूपत्वात्पूर्वं मात्रुक्तिः । अथवा कंसस्योत्तरत्र स्वेन वक्ष्यमाणस्वमातृजारजत्वेन मातृघातोऽपि घटितप्राय इति तत्पुरस्कृतिः । लुब्धा असुतृपा असून्स्वप्राणांस्तर्पयन्तीति ते तथा । इतरप्राणगार्ध्योपेता इति लुब्धास्तान्हत्वा स्वासुसंरक्षकाः प्रायो बाहुल्येन ॥ १४ ॥ प्रागमृतोऽत्यनन्तरमासुरं कालनेमिं विष्णुना हतमिदानीमिह मेदिन्यां सञ्जातमात्मानं स्वं जानन् । यदुभिर्विष्णुना च स कंसो व्यरुद्ध्यत विरोधं कृतवान् ॥ १५ ॥ शूरसेनांस्तन्नामकदेशान् । तन्निग्रहहेतुर्महाबल इति ॥ १६ ॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे द्वितीयोऽध्यायः ॥ १०-२ ॥ छ ॥ छ ॥

॥ हरिः ॐ ॥ कृष्णस्य न रेतोविकृतत्वं साक्षाद्ब्रह्मात्मकता चेति ब्रह्मादिस्तुत्या सिषाधयिषुर्विनाऽनयं न हननं युक्तमिति कंसकंसानुचरदौरात्म्यमादौ वदति ॥ प्रलम्बेति । बकोऽयं वृकोदरकवलितादन्यः । महाशनोऽपि नाम्ना दानवः । आद्यासुर इत्येके परन्तु न समाधानमुपन्यस्तम् ॥ १ ॥ बाणो बलिसुतो भौमो नरको यदूनां तैः कदनं कलहं मागधो जरासन्धः संश्रय आश्रय यस्य सः स्वयं बली च ॥ २ ॥ ते यादवा न विविशुर्न विविशिरे कुर्वादयो देशाः ॥ ३ ॥ एके केचन तं कंसमनुरुन्धानोऽनुसरन्तः षट्सु कीर्तिमदादिषु ॥ ४ ॥ शरीरान्तरं विनैकलस्य बलस्य योनिद्वयसम्बन्धः कथमिति परीक्षित्प्रश्नमुत्तरयितुं तदुपोद्घातमाह ॥ सप्तम इत्यादिना । वैष्णवं धामाविष्टभगवत्तेजस्कम् । यथोक्तं प्रथमतात्पर्ये । आवेशो बलभद्रे । शङ्खचक्रभृदीशेशः श्वेतवर्णो महाभुजः । आविष्टः श्वेतकेशात्मा शेषांशं रोहिणीसुतमिति महावाराह इति । यमनन्तं शेषं प्रचक्षते सप्तमो गर्भः । तद्गतो बभूव । हर्षशोकविवर्धनो हर्षोऽङ्कुरित इति शोकस्तु स्रुत इति तौ वर्धयतीति स तथा ॥ ५ ॥ निजः स्वयमेव नाथो येषां ते तथा तेषां निजस्य नाथो नाथनं प्रार्थना येषां तेषामिति वा योगमायां दुर्गां समादिशदाज्ञापयामास । यदूनामिति द्वितीयान्तं च सद्योगमायामित्यनेनाप्यन्वेति । येनावतारेणोना हीना तामित्यर्थः । अधुनाऽनवतारेति तां प्रत्याज्ञोचिता तदर्थमिति तात्पर्यम् ॥६॥ तदाज्ञाप्रकारं प्रज्ञापयति ॥ गच्छेति । वसुदेवस्य रोहिणी नाम्ना भार्या नन्दकुले आस्ते । साऽङ्कुरिते गर्भे बहिर्यापिता तत्रास्ते तस्याः प्राक्तनं गर्भं बहिष्कृत्यैतन्निवेशयेत्यस्य भावोऽवसेयः । सम्पूर्णलक्षणचणं नवराजमानद्वारान्तरं परमसुन्दरमन्दिरं तत् । राजेव सत्पुरवरं भुवनाधिराजो निष्कासयन्परमसौ भगवान्विवेशेतिवद्विनिश्चयार्थं देवकीगर्भजानामन्या भार्या धृतगर्भाः स कंसः स्थानान्तरे प्रसवो यावदासां संस्थापयामास सुपापबुद्धिः । हेतोस्तस्माद्रोहिणी नन्दगेहे प्रसूत्यर्थं स्थापिता तेन देवीत्याचार्योक्तेः ॥ ७ ॥ एकत्र भर्तैकत्र कलत्रं कुत इत्यत आह ॥ अन्याश्चेति । कंसविग्नाः खलः शृङ्खलाबन्धं तनुयादिति भीता विवरेष्वज्ञातप्रदेशेषु मामकं मत्सम्बन्धि तद्धाम सन्निकृष्य रोहिण्या उदरे सन्निवेशय । अथानन्तरमहं स्वांशांशभागेन साक्षात्स्वांशकृष्णकेशत्वेन विभजनेन । अने अकयेत्योदरो विष्णुस्तेनैव स्वांशं स्वरूपभूतमंशं भजतीति स तथा सन् स्वांशभागो हि स्वांशकला तेनेति वा । एते स्वांशकला इत्येतस्य किञ्चिच्छब्दतः किञ्चिदर्थतोऽनुवादोऽयमिति वा । एते प्रोक्तावतारा मूलरूपी कृष्णः स्वयमेवेति विवरणात्प्रथमे । स्वस्यांशस्य योग्यो भागो देवकीभागोऽयं तेन पुत्रतामिति वाऽन्वयः । भागो भागधेयैकदेशयोरिति विश्वः । शुभे दुर्गे ॥ ९ ॥ सर्वकामवराणामपेक्षणीयोत्तमानामीश्वरीं स्वामिनीम् ॥ १० ॥ नानोपहारबलिभिरुपग्राह्यमुपहारः करो बलिरित्युभयतश्चामरः । उपाहारः पुष्पस्तवकादिः । बलति प्राणिति भक्तेन येन स बलिरित्यर्थः । सर्वकामवरप्रदां त्वामर्चिष्यन्तीत्यन्वयः । स्थानान्यालयान् नामानि च कुर्वन्ति । तत्तत्क्रियानुगुण्येन युक्तानि जानन्त इत्यर्थः ॥ ११ ॥ दुर्गेति दुर्ज्ञेयत्वाद्दुःखदत्वाद्दुष्प्राप्यत्वाच्च दुर्जनैः । सतामभयदत्वाच्च दुर्गा त्वं हृद्गुहाश्रयादिति दुर्गा । दुःखेन गम्या गम्लृ गतौ गत्यर्थानां ज्ञानार्थत्वाद्दुर्ज्ञेयेति दुर्गा । दुर्दुःखमिति सम्प्रोक्तमित्युक्तेदुरित्यावृत्तं दुर्जनवाचि । तथा च दुर्जनान्प्रति दुःखं गमयतीति सा तथेति । दुर्गा दुर्जनैर्दुष्प्राप्यत्वादिति स्फुटम् । वैकुण्ठादिरूपतया सतामभयरूपत्वाद्दुर्गा । दुर्गमस्या अस्तीति दुर्गा । अर्शआद्यच्चि हृद्गुहामततीत्यर्थः । भद्रकाली मङ्गलरूपिणी श्यामवर्णा चेति विजयत इति विजया विशिष्टो विविधो जयो यस्याः सेति वा । विष्णोरियं वैष्णवी कौ भूमौ मुदा हलन्तत्वादाबन्तः प्राचीनरीत्या । यया सा । चण्डिका कोपना कृष्णा नाम्ना माधवी प्रस्तुतमधुकुलजेति कन्यका दीप्तिमत्त्वात् क्षिपकादित्वान्नेत्वम् । मायाः सम्पदः प्रतिपदो वा यो लाभो यस्या नारायणी मङ्गार्येति ईशाना सर्वेशनशीला शारदा शारं हिंसां ददाति लय इति शारदा । उपसर्गाणां द्योतकत्वपक्षे शारदा विशारदा कुशलेत्यर्थो वाऽम्बिका जगज्जननीति ॥१२॥ रामनामाऽप्यनन्तनामा भगवान्भगिनीं सोपपत्तिकमाह ॥ गर्भेति । गर्भात्सङ्कर्षणात्ततस्त्वत्कर्तृकं तं भविष्यन्तं सङ्कर्षणं प्राहुः । लोकरमणाद्रमयतीति राम इति । बलोच्छ्रयाद्बलेन सहित उच्छ्रय उन्नाहस्तस्माद्बलभद्रमाहुरित्यन्वयः । बलवत्वाद्बल इति श्रैष्ठ्याद्भद्र इतीति बलपदस्य पृथक् तद्वाचकत्वे विवेको ज्ञेयः । भद्रो

वाच्यवच्छ्रेष्ठसाधुनोरिति विश्वाद्भद्रतद्विवरणशब्दयोरानुरूप्यं ज्ञेयम्। अन्यथा भद्रपदमनर्थं स्यादिति। शब्दश्रेष्ठवाचे ति श्रेष्ठोच्छ्रययोरत्यन्तभिन्नार्थत्वाद्बलेन भद्रशब्देन सन्तोष्टव्यम्। बलवदुच्छ्रयादिति पाठस्तु समस्ततत्पदनिरुक्तिप्रकारज्ञानदारिद्र्यमूलकः कल्पित इति ज्ञेयम्। अनेककोशेष्वदर्शनात् ॥ १४ ॥ भगवतैवं सन्दिष्टा माया ओमिति हे ब्रह्मन्निति सम्बोध्य ओमिति ब्रह्मेति वाक्यमन्वकृत ग्रन्थकार इति मन्तव्यम्। तथैवेति वचः प्रतिगृह्य स्वीकृत्य तं भगवन्तं परिक्रम्य गां भूमिं गता सती गां गता कृतनमना च। अत एव न नमनानुक्तिः। तत्तथाऽकिञ्चिद्व्यत्यासम्। अकरोत्। व्याख्यानव्याख्येयभावस्त्वगतिका गतिरिति सुधाभिधानादगतिका गतिः ॥ १५ ॥ योगनिद्रयेत्यनेन गर्भगार्भसङ्कर्षणकाले न देवक्या अङ्गस्मरणं स्यात्तथा निद्रां दत्वा तत्कर्षणसमर्थतां दर्शयति। देवक्या गर्भं रोहिणीं प्रति प्रणीते नीते सति पौरा ग्रामीणा गर्भो विस्रंसितः स्रुतोऽहो आश्चर्यमिति विचुक्रुशुः ॥ १६ ॥ भगवानपि विश्वात्मा। स बिभ्रत्पौरुषं धाम ततो जगन्मङ्गलमच्युतांशमिति श्लोकत्रिके कर्मवशाज्जनिमतो जनस्य रेतःसिच्चमेवानु प्रविश्यत्यथ मातरम्। रेतःसिग्योगोऽथेति श्रुतिसूत्रादिभिर्यथा प्रथमतो जनकतनुप्रवेशोऽनन्तरं मातृगात्रप्रवेशः प्रमापितस्तथा वसुदेवप्रवेश ईशस्योच्यतेऽत्रेति भ्रमभ्रंशं प्रमाणेनेव कुर्वंस्तत्तात्पर्यार्थमाह ॥ आविश्येति। पितरमित्येवोक्त्वाऽनुक्त्वा च वसुदेवमिति यत्र यत्र जगत्तातोलभ्यते तत्र तत्र गतिरियमित्यवगमयामासेत्यवसेयम्। स्वरूपेणारेतोविकृतेन पितरं यं कञ्चन तातत्वेन व्यवह्रियमाणमाविश्याथानन्तरं मातरं च लोकस्य विडम्बनार्थमनुकरणार्थं निर्जनिर्लोकजनिरहितस्सन्नध्याविशत्। स्वरूपेणेत्येवोक्तम्। तत्किंरूपमित्यतो निरूपयति ॥ आनन्दमात्रदेहेनेति। जातेन तुल्यं वर्तत इति जातवत्सम्प्रदृश्यत इति च वामन इति शेषः। नन्वाविश्य मातरमाविशदित्युक्तावेव तदावेशस्य प्राक्कालिकतामात्रगात्रप्रवेशस्य तदनन्तरिकता स्वतोऽल्पबलादेव भवति विदितेत्यथेति वृथा मान इति चेन्न। तस्य कचित्कैश्चिन्मुखं व्यादाय स्वपितीत्यादावुत्तरकालप्रत्यायकताऽप्यस्तीत्यङ्गीकृते निर्णायकत्वादथेति सार्थक्योपपत्तेः। पक्षान्तरे तु निर्जनिः कुत एवं तनोतीति प्रश्नार्थं क इत्यथशब्दः सार्थकः। तत्रोत्तरमाह ॥ विडम्बनार्थमिति ॥ ततश्चायं श्लोकार्थः ॥ विश्वात्मा जगदानादिकर्ता जगद्व्यापी वा भक्तानामभयङ्करः। मेघर्तिभयेषु कृञः। भयशब्देन तदन्तविधिरित्युक्तेरभयशब्दोपपदात्कृञः खश्। आनकदुन्दुभेर्वसुदेवस्य मनोऽशांशभागेन गतम्। आविवेश ॥ १७ ॥ स वसुदेवः पौरुषं परमपुरुषसम्बन्धि धामांशं तेजो बिभ्रत् यथा दुरासदो रविस्तथा राजमानो भूतानामतिदुर्धर्षः सम्बभूव ॥ १८ ॥

ततस्तत्प्रवेशानन्तरं जगन्मङ्गलं भूर्भूभारावरोहणेन येन तमच्युतस्यांशं नीलबालात्मकं सोऽपि च्युतिरहितोऽच्युतश्चासावंशश्च तमिति वा सर्वात्मकं सर्वं च त आत्मानश्च तेषां स्वं सुखं यस्मात्तमात्मभूतमात्मना वसुदेवदेवकीकृततपनादियत्नेन देवताप्रार्थनरूपेण वा भूतमाविर्भूतमात्मना स्वेनैव स्वेच्छयेति यावत्। आत्मनैव भुवा ऊतस्सम्बद्धस्तं वा शूरसुतेन समाहितं तमिव विद्यमानं देवी द्योतमाना दधार। तत्र दृष्टान्तमाचष्टे। काष्ठा प्राची। आनन्दकरमिति चन्द्रपदं ग्राह्यं लक्षणया चन्द्रमित्यर्थः। चदि आह्लादन इति स्मरणात्। नभस्त आकाशाद्यथा धरति तथा ॥१५॥ या देवकी भोजेन्द्रगेहे कंसकल्पितकारागारेऽवरुद्धार्द्रतृणादिभिस्तिरोहितप्ररोहशक्तिरग्नेशिखा भविष्यन्ती ज्वाला यथा सत्यन्तस्सति तत्प्राया। यथा वा द्यूतखले द्यूतस्थले सरस्वती यथा सम्यगृतरूपरागमसती तस्यानृतभूयिष्ठत्वात्तत्प्राया। तथा असत्यमङ्गलाङ्कयुता। सैवेदानीं सर्वजगन्निवासनिवासभूता सर्वजगतां निवास आश्रयस्तस्य श्रीशस्य निवासभूताऽऽश्रीभूता नितरामत्यन्तं विरेजे रराजेत्यन्वयः। अवरुद्धा तत्रापि शुद्धान्ते निरुद्धाऽवरोधस्तिरोधाने शुद्धान्ते राजवेश्मनीति खलं भूस्थानकल्केष्विति शिखा शिफायां चूडायां ज्वालायामग्रमात्रक इति विश्वस्मिन्विश्वः। द्यूतं च खलश्च। सर्वो द्वन्द्वो विभाषयैकवदित्येकवद्भाव;। द्यूते खले नीचे सत्यपि रसत्वस्यसतीति वा। क्रूरे नीचेऽधमे खल इति सः। न रेजे इति पाठान्तरकल्पनं न स्वरसम्। प्रभया जितम्भरां विरोधयन्तीं न पुरेयमीदृशीत्युत्तरोक्त्यनानुगुण्यात् ॥ २० ॥ कंसोऽजितम्भरासंज्ञात्वेऽपि पूर्ववज्ज्ञेयम्। केनाप्यपराजितं हरिं बिभ्रतीति सा तथा तां भवनं स्वप्रभया विरोचयन्तीं शुचिस्मितां तां वीक्ष्यैष गुहामुदरकुहरीं श्रितो गर्भान्तर्विद्यमानोऽर्भको मे प्राणहरो हरिर्ध्रुवं निश्चयः। तत्र कारणमीरयति। यद्यतः पुरा एतदङ्कुरणात्पूर्वमियं देवकी ईदृशी नाभूत् ॥ २१ ॥ तर्हि तस्या वधोपायः कर्तव्य इत्यत आह ॥ किमिति। अद्य मया तस्मिन्घटनीयं किं न किमपि। कुत इत्यत आह ॥ यथार्थतन्त्र इति। यथार्थं तन्त्रं सिद्धान्तो यस्य सोऽनन्यथा भवत्स्वाभिप्रेतो विक्रमं स्वपराक्रमं न विहन्ति न त्यजति मां हन्यादेव। कुमाराविर्भावात्पूर्वमिमामेव मारयेत्यत आह ॥ स्त्रिया इति। आत्मनाशे समुत्पन्ने सर्वं त्यजति पण्डित इति वचनान्न गरीयसां प्राणेभ्य इत्यत आह ॥ अयमिति। स्वसुस्तत्रापि गुरुमत्या गर्भिण्या वधो यशः श्रियमनुकूलं ब्रह्मणा स्वल्पं यदायुस्तत्राशु हन्ति। एतद्धननेऽपि मद्धननं न हननेऽपि तदेवेति दुर्घटेऽस्मिन्कार्ये किं घटनीयमित्यन्वयः ॥ २२ ॥ पापी चिरायुरित्याद्युक्ते किमायुर्यातीति यासि चिन्तां शंस कंसेत्यत आह ॥ स इति। यश्चात्यन्तनृशंसितेनैवमादिहननादिना वर्तेत स एव जीवन्सम्परेतो मृतः खलु निश्चयः। देहे मृते गतप्राणे सति तं देहमनु अनुमानिनाऽभिमानवतस्तत्तज्जीवस्यामलं यश इहार्थश्च कामश्चेत्येतौ ध्रुवं निश्चयेन नश्यतो गौर्नाको नश्यति। गौर्ज्ञानं वा ध्रुवं माधवधामापि नश्यतीति वा। अतो देवकीवधः सर्वथाऽधोगतिहेतुरिति नाचरणीय इत्याशयः। गौः पशुसम इति वा। अमलं निर्दोषस्थानं मोक्ष इति वा। द्वयोस्तु रश्मिदृग्बाणस्वर्गवज्राम्बुलोमसु गौरिति नानाध्वनिपदमञ्जरी। दृक् चात्र ज्ञानम् ॥ २३ ॥ घोरतमादतिघोरान्मनसः सन्निवृत्तो न परवशोनेतीरयति ॥ स्वयमिति। दौर्बल्याद्दरिद्रमनोरथवन्नैतस्येत्याह ॥ प्रभुरिति। हरेस्तज्जन्म प्रतीक्षन्प्रतीक्षमाण आस्ते। अनुबन्धस्तु भक्तिः स्यादित्यादेः। वैरपूर्वकभक्तिप्रकारज्ञः ॥ २४ ॥

श्रीसुबोधिनी

ततः किमत आह **किमद्येति** । तस्मिन्निति । **तस्मिन्** भगवति प्राणहरणकार्ये वोपस्थिते पूर्वप्रतीकाराणां वैयर्थ्याद्य किं कर्तव्यमितिविचारः । तूष्णीं स्थितौ प्राणान् हरिष्यत्येवात **आशु मे किं कर्तव्यम्** । इयं मारणीयेति चेत् तत्राह **यदर्थतन्त्रो न विहन्ति विक्रममिति** । यद् यद्यपि मल्लक्षणो जनोर्थतन्त्रः स्वकार्यतन्त्रः कार्यवशस्तथा विक्रमं न विहन्ति । स्त्रीवधे स्वस्य पराक्रमस्य हानिरेव । अथवायमुदरस्थो भगवान् यद् यस्मादर्थतन्त्रः कार्यार्थमेव समागतोतः स्वस्य **विक्रमं न हन्ति** न नाशयति । तूष्णीं न स्थास्यतीत्यर्थः । ननु तव जीवनादृष्टे विद्यमानेयं न मारयिष्यतीति तदभावे त्वन्यतोपि त्वया मर्तव्यमित्येतद्द्रोहोनुचितो यद्यपि तथापि जीवनहेतौ सत्येवागन्तुकेन नाशहेतुना तत्सम्भवात् तत्प्रतीकारे प्रदीपस्येव जीवनसम्भवादस्या मारणमुचितमिति चेत् तत्राह **स्त्रिया** इति । विद्यमानेप्यदृष्टेत्युत्कटदुःकर्मकरणादायुः क्षीयेतैव । अतो विद्यमानेप्यायुषि मरणसम्भवान् नैतादृशं कर्म कर्तव्यम् । **स्त्रिया वधो यशो हन्ति** । स्त्रीरक्षार्थं शूराणां स्वप्राणपरित्यागो यशोहेतुः । **स्वसुर्वधः श्रियं हन्ति** । सर्वो हि पुरुषः सोमात्मकः । लक्ष्मीश्च भगिनी । अतो भगिनीवधो धनादिसर्वसम्पत्तिनाशकः । **गुरुमती** गुर्विणी । सा हि प्राणिनामायुःपोषिका । तस्या वध आयुर्नश्यति । अतः क्रमेण तस्या वधे **स्त्रियाः स्वसुर्गुरुमत्या यशः श्रियमनुकालं** तत्क्षणमेवायुश्च **हन्ति** ॥ २१ ॥

अस्तु वा प्रबलजीवनादृष्टं तथापि न हन्तव्येत्याह **स एष** इति । **स** प्रसिद्धोपि **एष** मल्लक्षणोपि जनः शौर्येण राज्यलक्ष्म्या च युक्तोपि जीवन्नेव **सम्परेतो** मृतः । यशःश्रीगमने केवलं जीवनं मरणतुल्यमेवेति जीवन्नेव **सम्परेतः** । खल्विति निश्चये । **योत्यन्तनृशंसितेन** क्रूरकर्मणा **वर्तेत** जीवेत् स जीवच्छव इति । सत्यम् । यतोमृत एव देहे **तं मनुजाः शपन्ति** ‘म्रियतामयं दुरात्मे’ति । मृते वा ‘सम्यगयं दुरात्मा मृत’ इति । एवमयं लोकधिक्कारसन्दग्धः परलोके **चान्धन्तमो गन्ता** । **तनुमानिनः** सम्बन्धिदेहाभिमानिनो ये नरका अन्धन्तमोन्तास्तानवश्यं गच्छतीत्यर्थः । भगवत्सान्निध्याद् भगवदिच्छया तस्य तथाज्ञानमुत्पन्नम् । अतो भगवदिच्छया सर्वेषां ज्ञानप्रकारविशेषश्च ज्ञाने भासते । देवक्याः पुत्रा मारणीया इति प्रथममुपदेशेन ज्ञानोदयः । वसुदेवस्यापि तथाबुद्धिः । अतः सर्वस्यापि सर्वज्ञानजनको भगवानेवेति कृष्णो भगवानेवैवंवाक्यैर्निश्चितः । तदर्थमेवैतानि वाक्यानि ॥ २२ ॥

एवं विमर्शे यज् जातं तदाह **इति घोरतमाद्** भावादिति । अयुक्तवध एव **घोरः** । तत्रापि भगिन्या **घोरतरः** । गुरुमत्या **घोरतम** इति **सम्यङ् निवृत्तः** । नन्वन्यप्रेरणया कथं न मारितवानित्याशङ्क्याह **स्वयम्प्रभुरि**ति । स्वयमेव प्रभुर्नान्योस्य प्रवर्तक इत्यर्थः । जनन्नान्तरं युद्धं कर्तव्यमिति **तज्जन्म प्रतीक्षन्नास्ते** । तर्हि भक्तो भविष्यतीत्याशङ्क्याह **हरेर्वैरानुबन्धकृ**दिति । हरेः सर्वदुःखहर्तुरपि पूर्वजन्ममारणलक्षणवैरस्यानुबन्धं निमित्तं तत्सम्बन्धिनां वधादिरूपं करोतीति तथा ॥ २३ ॥ एवं वैरानुबन्धनेनापि भगवच्चिन्तने प्रमाणबलाभावेपि प्रमेयबलेनैव तस्य ज्ञानं जातमित्याहा**सीन** इति । **आसीन** उपविष्टः **संविशन्** शयनं कुर्वंस्तिष्ठन्नुत्थित इत्यवस्था उक्ताः । क्रिया आह **भुञ्जानः पर्यटन्** पिबन्निति । एवं सर्वावस्थासु सर्वक्रियासु **हृषीकेशं चिन्तयानः** । स्वदर्शनार्थमेव सर्वेन्द्रियस्वामी तथा प्रेरितवान् । अतः **कृष्णमयमेव जगदपश्यत्** ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

किमद्येत्यत्र—जीवनहेतौ सत्येवेति । आगन्तुकेन नाशो जीवनादृष्टे सत्येव भवति तदभावे तु सहजेनैवादृष्टेन नाश इत्येवकारार्थः । तथा चागन्तुकेन नाशोपस्थितौ जीवनादृष्टं वर्तत इति निर्धारो भवतीति भावः ॥ २१ ॥ **स एष इत्यत्र—एष** इत्यस्यार्थमाहु राज्येति । ‘सर्वेषां ज्ञापनार्थाय कंसवाक्य’मितिकारिकायामुक्तमुपसंहारे विशदयन्ति **भगवत्सान्निध्यादि**त्यारभ्य **निश्चित** इत्यन्तेन ॥ २२ ॥ **इतीत्यत्र—वैरस्यानुबन्धमिति** । अनुबध्यतेनेनेति करणे घञ् । येन वैरमनुबध्यते दृढीक्रियते तादृशं निमित्तकारणमित्यर्थः । तत्सम्बन्धिवधेन वैरं दृढं भवतीतिभावः ॥ २३ ॥

बुभुत्सुबोधिका

किमद्येत्यत्र ततः किमिति निश्चयात् किं वृत्तम् अतः कारणात् विचारं वृत्तमाह । हरिष्यत्येवेति अत्यन्तायोगव्यवच्छेदकैवकारः । नीलं सरोजं भवत्येवेत्यत्रेव । तदभाव इति अदृष्टाभावे । एतद्द्रोहो देवकीद्रोहः । जीवनहेताविति आगन्तुकेन नाशहेतुना जीवनादृष्टे सत्येव नाशसम्भवो न तु जीवनादृष्टाभावे । तदभावे मृत्युरेव नागन्तुकेन नाशहेतुनापमृत्युरतः तत्प्रतीकारे नाशहेतुप्रतीकारे । प्रदीपस्येव प्रकृष्टो वर्तितैलशरावसहितो दीपः तस्य जीवनादृष्टसहितस्य आगन्तुकनाशहेतुः वायुतत्पुष्पादिः । तत्प्रतीकारे उपरोधे पातने च कृते जीवनसम्भवः न तु जीवनादृष्टरहितस्य, तस्मिन् कृतेपि जीवनसम्भवस्तस्मात् । एवकारस्तु जीवनहेत्वभावयोगव्यवच्छेदकः । अस्या इति आगन्तुकनाशहेतुगर्भायाः । मारणं नाशप्रतीकाररूपम् । तथा चागन्तुकेन नाशहेतुना नाशोपस्थितौ जीवनादृष्टं वर्तत इति निर्धारो भवतीति भावः । अन्यथाऽदृष्टाभावान् नष्टो न त्वागन्तुकेनाष्टमगर्भवायुतत्पुष्पादिरूपेण हेतुना नष्ट इति प्रतीतिः स्यात् । सोमात्मक इति प्रकृते जननं मनस इत्युक्ते तत्कारणकः पुरुषः सोमात्मकः । ‘चन्द्रमा मनसो जात’ इति श्रुतेः । भगिनीति एकसमुद्रोत्पन्नत्वात् सोमलक्ष्म्योर्भ्रातृत्वभगिनीत्वे । भगिनीवध इति लक्ष्म्यात्मकभगिनीवधः । स्त्रीणां लक्ष्म्यात्मकत्वात् ‘भूर्लक्ष्मीः भुवर्लक्ष्मीः सुवः कालकर्णी तन्ना महालक्ष्मी’रिति श्रुतेः । धनादीति पक्षपाता-

इतिभावः। नश्यतीति पोषकाभावान् नश्यति। अनुकालमित्यत्यन्तसंयोगे द्वितीया कालः क्षणः अनु हीने। हीनकालं तत्क्षणं हीनक्षणम्। हन्तीति अत्युत्कटदुःकर्मत्वादितिभावः ॥ २१ ॥

स एष इत्यत्र अदृष्टं प्राबल्याप्राबल्ययोः कार्यैकोन्नेयत्वादाहुः अस्तु वेति। तथा चागन्तुकनाशहेतुर्यद्यपि मारणीयः आगन्तुकहेतुना कंसो नष्ट इति प्रत्ययवारणाय तथापीत्यर्थः। जीवन्नेवेति खलुरवधारणे व्याख्यातः। 'खलुः स्याद् वाक्यभूषायां जिज्ञासादौ च सान्त्वने' इति विश्वकोशे आदिपदार्थः। जीवन्नेवेति मरणतुल्यजीवनकर्ता। सम्परेतः मृतक इत्यर्थः। सादृश्ये कन्। परेतः प्रेतः स सम्, वैक्लव्याश्रयः इत्यर्थात्। षम वैक्लव्ये क्विप्। सम् वैक्लव्याश्रयः परेतः मृतको भवत्येव। अतो न सम्परेतशब्दस्य मृत (सम्परेत) सदृशे लक्षणा। स 'जीवञ्छव' इति सत्यमित्यन्वयः। यदिति यस्मात्। परलोक इति असुराणां परलोके। शारीरब्राह्मणे विभूतिरत्नानामन्धन्तम उक्तम्। अवश्यमिति ध्रुवमित्यस्यार्थः। सर्वेषां ज्ञापनार्थाय कंसवाक्यमित्यध्यायारम्भे कारिकायामुक्तमुपसंहारे विशदयन्ति स्म भगवत्सान्निध्यादित्यारभ्य निश्चित इत्यन्तेन। तथा ज्ञानमिति दैवसम्पदीयत्वेन दैवसम्पदीयं ज्ञानमुत्पन्नं, देवक्यमारणविषयकम्। सर्वेषां ज्ञानमिति देवक्यमारणविषयं ज्ञानम्। प्रकारविशेषः पुत्रमारणलक्षणस्तमेवाहुः देवक्या इति। न ज्ञानोदय इति तत्रैवोक्तः। तथा बुद्धिरिति असत्त्वेनाविजितात्मत्वेन च कंससम्बन्धिनी बुद्धिः। 'नाभ्यनन्दत तद्वाक्यमसतोऽविजितात्मन' इति वाक्यात्। अत इति कालभेदेन दैवासुरज्ञानदर्शनात्। सर्वेति सदसज्ज्ञानजनकः। इति कृष्ण इति हेतोः कृष्णो भगवानेव न तु कृष्णवर्णमात्रः। 'कृषेर्वर्णे' इति पाणिनिसूत्रात्, नक्। एवं वाक्यैरिति प्रथमोपदेशरूपे'स्तां वीक्ष्य कंस' इत्यादिभिश्च। तदर्थमेवेति सर्वेषां ज्ञापनार्थमेवेत्यर्थः। न तु कालनेमिवैशिष्ट्यतदभावबोधनार्थम्। भगवदिच्छां विना कालनेम्यपसारणाभावात्। एतानीति समीपतरवर्तीनि त्रीणि ॥ २२ ॥

इति घोरतमादित्यत्र युद्धं कर्तव्यमिति घोरतमभावान् निवृत्तत्वात्। बालवधोपि घोरतम इति हेतोः युद्धं कर्तव्यम्। पूर्वजन्मेति कालनेमिजन्मनि मारणलक्षणेत्यादि। अनुबन्धं निमित्तमिति अनुबध्यतेऽनेनेति करणे घञ्। येन वैरमनुबध्यते दृढीक्रियते तादृशं निमित्तं कारणमित्यर्थः। तत्सम्बन्धिवधेन वैरं दृढं भवतीति भावः। 'अनुबन्धः प्रकृत्यादेर्दोषोत्पादे विनश्वरे मुख्यानुपायिनि शिशौ प्रवृत्तस्यानुवर्तने' इति विश्वः। आद्यन्तयोरेकतरोर्थः। प्रकृतेस्तमसस्तत्सम्बन्धिवधादिदोषोत्पादे प्रवृत्तस्य वैरस्यानुवर्तनेनुबन्धपदम्। वधादीति आदिना पीडादि। वधस्य दुःकरत्वादादिपदम्। तथेति वैरानुबन्धकृन्। करोतेः कर्तरि क्विप् ॥ २३ ॥

आसीन इत्यत्र प्रमाणबलेति 'कामाद् गोप्यो भयात् कंस' इति प्रमाणं वर्तते परन्तु बलाभावः 'यथा भक्त्येश्वरे मन' इति वाक्यात्। 'भक्त्या वयं विभो' इत्यत्रैव 'कामाद् गोप्यो भयात् कंस' इत्यस्य प्रमाणस्य बलमतः 'प्रमाणबलाभावेपी'त्युक्तम्। प्रमेयो भगवान्। तस्येति कंसस्य। ज्ञानं सर्वभूतेषु मन्मतिरूपं भक्तिकारणम्। अवस्था इति गमनं नावस्था क्रियायां पर्यटनेन्तर्भावात्। भुञ्जान इत्यादि गृहस्थस्य क्रिया, अन्येषां भोजनं गौणं, पर्यटनं यतेः क्रिया, अपां पानं ब्रह्मचारिवानप्रस्थयोः। सर्वक्रियास्विति कंसगृहस्थक्रियास्वन्तर्भूतासु। हृषीकाणामिन्द्रियाणामीशः हृषीकेशः तस्य चिन्तनस्य फलं प्रेरणाद्वारा भक्तिकारणं ज्ञानमित्याहुः स्वदर्शनेति। अत इति प्रेरणात्। अपश्यदिति भक्तिकारणां सर्वभूतेषु मन्मतिमकरोत्। एकादशेकोनविंशाध्याये वर्तते ॥ २४ ॥

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

ततः किमत आह किमद्येति—अब देवकीजी के उदर में भगवान् के पधारने पर और मेरे प्राणों के जाने का समय आने पर एवं आगे के उपाय व्यर्थ होने पर मुझको क्या करना इस प्रकार कंस सोचने लगा। यदि मैं शान्त होकर बैठ जाऊँगा तो यह मेरे प्राणों को हर ही लेगा, इसलिये मैं शीघ्र क्या उपाय करूँ। यदि देवकी को मारना चाहिये यह निश्चय कर वध करूँ तो मैं कर न सकता हूँ और मैं किन्तु स्वतन्त्र हूँ फिर भी मेरे जैसा पुरुष ऐसा कार्य तो न करे जिससे मेरी सामर्थ्य नष्ट हो जाय अथवा पराक्रम को कलङ्क लग जाय। स्त्री के मारने में अपने पराक्रम की हानि ही होती है। अथवा यह देवकीजी के गुहा रूप उदर में स्थित भगवान् स्वतन्त्र हैं व मेरे नाश के लिये आये हैं। अतः अपने पराक्रम को नष्ट नहीं होने देंगे और प्रभु यदि मैं मारने का प्रयत्न करूँगा तो निष्क्रिय नहीं बैठेंगे अवश्य मेरे प्राण ले लेंगे। पुनः कंस विचार करता है कि यदि मेरे अदृष्ट में मेरी अभी आयु होगी तो यह नहीं मार सकेंगे अन्यथा दूसरा भी मार डालेगा इसलिये यद्यपि देवकी का वधरूप द्रोह करना उचित नहीं है तो भी इसका मारना यदि मेरे जीवन का हेतु हो तो, अवश्य मारना उचित है। और यदि दूसरा कोई आगामी नाश का हेतु होगा, तो उसका भी सामना करना उचित है। जैसे वायु से बचा कर दीपक की रक्षा की जाती है वैसे जीवन की रक्षा करनी चाहिए इसलिये देवकी का वध करना उचित है यदि कोई ऐसा कहे तो उसको उत्तर कंस स्वयं देता है कि प्रारब्धानुसार आयु हो तो भी अति उत्कट पाप कर्म करने से आयु नष्ट हो जाती है अतः आयु होने पर भी मरण की संभावना से वैसा दुष्कर्म नहीं करना चाहिये। स्त्री जाति का वध यश का नाश करता है। स्त्री जाति की रक्षा करने से शूरवीरों का अपने प्राणों का त्याग यश का हेतु होता है। उसमें भी बहिन का वध, तो श्री लक्ष्मी का नाशक है। सर्वपुरुष सोम स्वरूप होने से श्री लक्ष्मी उनकी बहिन है। श्रीरूप बहिन के वध से धनादि सर्व प्रकार की श्री का नाश होता है,

फिर भी यह बहिन तो गर्भवती है। गर्भवती स्त्री प्राणियों के प्राणों की रक्षा कर रही है, उसका वध, तो वध करनेवाले की आयु को नष्ट करने वाला है अतः देवकी स्त्री है, बहिन है और गर्भवती है इसलिये मारने से यश, श्री और आयु का क्रम से नाश होता है ॥ २१ ॥

अस्तु वा प्रबलजीवनादृष्टं तथापि न हन्तव्येत्याह स एष इति।

अब इस श्लोक से भले प्रारब्ध की प्रबलता से आयु हो या न भी हो तो भी देवकी का वध करना चाहिये यदि ऐसा कोई कहे तो कंस इसका उत्तर देता है।

स प्रसिद्धोपि मल्लक्षणोपि जनः— राजा कंस ने मन से सोचा कि यदि यश और श्री को नष्ट करने वाला कर्म को करने वाला वह पुरुष प्रसिद्ध भी हो और मेरे जैसे लक्षणों वाला मनुष्य, राज्य की लक्ष्मी से युक्त होते हुए भी यदि जीवित है, तो भी मरे हुए के समान है। कारण कि यश और श्री के चले जाने पर निश्चय से वह जीवन, और मरण में कोई अन्तर नहीं है। यह कहना सर्वथा सत्य है कि जो अत्यन्त दयाहीन, दुष्कर्म करते हुए, जीवन धारण कर रहा है वह जीवित शव है। और लोग उस जीते शव को भी शाप देते हैं, कि यह पापी मर जाय तो अच्छा है। और वह जब मर जाता है तब कहते हैं कि अच्छा हुआ जो वह मर गया। इस प्रकार लोगों की इस धिक्कार से यह जीते रहने पर भी जलता रहता है और मरने के अनन्तर परलोक में घोर रौरव नरक में जायगा। देहाभिमानियों को जो अत्यन्त हलका अन्धंतम नरक प्राप्त होता है उसको भी निश्चय से वही मिलता है। कंस को इस प्रकार का ज्ञान होना भगवान् के सान्निध्य से और भगवान् की इच्छा से हुआ है। इसलिये भगवदिच्छा से सबको समय पर विशेष प्रकार की ज्ञानबुद्धि होती है। जैसे देवकी के पुत्रों को मारना ही चाहिये वैसा ज्ञान कंस को प्रथम आया और वसुदेवजी की भी बुद्धि वैसी ही हो गई। अतः सब के, सर्व प्रकार के ज्ञान के जनक भगवान् ही हैं इससे 'कृष्ण' भगवान् ही हैं, इस प्रकार के वाक्यों से ऐसा निश्चय हो जाता है। इसलिये कंस के मुख से अब इस प्रकार के वाक्य निकले हैं ॥ २२ ॥

एवं विमर्शे यज् जातं तदाह— अब इस श्लोक में कहते हैं कि कंस राजा ने इस प्रकार का विचार किया कि देवकी का वध करना सर्वथा अनुचित है क्योंकि यह घोर कर्म है, उसमें भी बहिन का वध, विशेष घोर कर्म है पुनः गर्भवती का वध तो अतिशय घोर पाप कर्म है। इस प्रकार के विचार विवेक से कंस ने यह कर्म करना त्याग दिया। अपने विचार करने से तो छोड़ दिया किन्तु अन्य दुर्मन्त्री आदि की मंत्रणा से भी क्यों न वध किया तो कहते हैं कि इस श्लोक के अन्दर कंस को 'प्रभु' अर्थात् सब करने में स्वतन्त्र कहा है जिससे कंस ने किसी भी मंत्रणा को नहीं माना। स्वयं स्वामी है इसका कोई दूसरा प्रवर्तक आज्ञा देकर काम कराने वाला नहीं होता है। वध से निवृत्त होकर भगवान् के जन्म होने की प्रतीक्षा करने लगा। तो अब क्या कंस भगवान् की भक्ति करेगा ? जो भगवान् की प्रतीक्षा करता था ? तब कहते हैं कि भक्त तो उसको नहीं होना था किन्तु कंस को हरि सर्व दुःखहर्ता से पूर्व जन्म कालनेमि के अपने वध का बदला कृष्ण से लेना था इसलिये प्रतीक्षा कर रहा था कि भगवान् पैदा हो जाय तो मैं उनका वध करूँ, तब तक उनके सम्बन्धियों का वध अपने सेवक, असुरों द्वारा कराने लगा ॥ २३ ॥

एवं वैरानुबन्धनेनापि भगवच्चिन्तने प्रमाणबलाभावेपि प्रमेयबलेनैव तस्य ज्ञानं जातमित्याहासीन इति।

अब इस श्लोक में प्रमेय बल बताते हैं कि कंस भगवान् के ध्यान में लग गया। अब कंस ने अपने असुरों द्वारा भगवान् के सम्बन्धियों का वध कराना प्रारम्भ किया, जिससे वैर दृढ़ होने लगा। जैसे वैर दृढ़ होने लगा तैसे अहर्निश कंस को सर्वत्र भगवान् का ही दर्शन होने लगा। और भगवान् का ही स्मरण होने लगा। इस प्रकार का ज्ञान जो ज्ञानियों को प्रमाण बल से साधन द्वारा होता है वह कंस को केवल प्रमेय बल भगवान् की इच्छा से हो गया।

आसीन उपविष्ट इति—अब राजा कंस को बैठते, सोते, उठते आदि अवस्थाओं में भगवान् का दर्शन और स्मरण होता था। भोजन, घूमने और पानी पीने की क्रियाओं में भी इसी प्रकार हरि का दर्शन एवं स्मरण होता था। जिससे सर्व अवस्थाओं तथा सर्व क्रियाओं में भगवच्चिन्तन ही करता था। वैसा क्यों हुआ इस पर कहते हैं कि श्री हृषीकेश याने सर्व इन्द्रियों के नाथ भगवान् श्रीकृष्ण ने अपने दर्शनार्थ इस प्रकार की अन्तःकरण में प्रेरणा की है। अतः कंस इस जगत् को कृष्णमय देखने लगा ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्मिन् मत्प्राणहरणायोपस्थिते हरौ अद्येदानीमाशु शीघ्रं मया किं करणीयम्। एवं चेदिदानीमेव तत्सहिता देवकी हन्यतामित्याशङ्क्याह—यदिति। यस्मात् अर्थतन्त्रः प्रयोजनवशोऽपि पुमान् पूर्वसिद्धं स्वविक्रमं यशो न विहन्ति न नाशयति। अस्या वधे तु अपेक्षितं यशआदि सर्वमेव विनश्येदित्याह—स्त्रिया इति। स्त्रियाः, तत्रापि स्वसुर्भगिन्या दयापात्रभूतायाः, तत्रापि

गुरुमत्या गुर्विण्या अस्या अयं वधो यशः श्रियमायुश्चानुकालं तत्क्षणमेव हन्ति ॥ २१ ॥ अनिष्टं चापद्येतेत्याह—स इति । य अत्यन्तनृशंसितेन अतिक्रौर्येण वर्त्तेत स एष अतिप्रसिद्धोऽपि मादृशो जीवन्नपि सम्परेतो मृततुल्य एव । खलुशब्दोऽवधारणे । तत्र हेतुमाह—देहे मृत इति । अस्य तनुमानिनो देहात्माध्यासवतो देहे अमृते जीवति सत्यपि तं मनुजाः शपन्ति "म्रियतामयं दुरात्मा, धिगस्य जीवितम्" इति धिक्कुर्वन्ति । मरणानन्तरं त्वमन्धं दुःसहदुखप्रदं तमो नरकं ध्रुवमवश्यं गन्ता गमिष्यतीत्यर्थः । अतोऽस्या वधस्तु नैव कर्तव्यः, पुत्र एव हन्तव्य इति भावः ॥ २२ ॥ इत्येवं विचारेण घोरतमात् "स्त्रीवधविषयको घोरः, तत्रापि भगिनीवधविषयको घोरतरः, तत्रापि गर्भिणीवधविषयको घोरतमः" तस्मात् भावात् सङ्कल्पात् सम्यक् निश्चयेन निवृत्तः । तत्र हेतुमाह—स्वयं प्रभुरिति । राजत्वेन स्वतन्त्र इत्यर्थः । तथापि हरेर्वैरमनुबध्यते दृढीक्रियतेऽनेन स हरेर्वैरानुबन्धस्तत्सम्बधिनां पीडनं तत्करोतीति तथाभूतः सन् तन्मारणार्थं तस्य जन्म प्रतीक्षमाण आस्ते स्म ॥ २३ ॥ एवं भयेन चिन्तनेऽपि तस्य योगिजनदुर्लभावस्था जातेत्याह—आसीन इति । आसीन उपविष्टः, संविशन् शयनं कुर्वन्, तिष्ठन् उत्थितः सन्, भुञ्जानः, महीं पर्यटन् । महीमित्यत्र 'पिबन्' इति पाठान्तरम् । एवं सर्वावस्थासु सर्वक्रियासु च भयाच्छत्रुभावेन हृषीकेशं सर्वेन्द्रियनियन्तारं भगवन्तं चिन्तयानः कंसः सर्वमपि जगत्तन्मयमपश्यत् ॥ २४ ॥

अन्वितार्थप्रकाशिका

किमद्येति ॥ तस्मिन्मद्वैरिणि हरौ आशु इदानीमेव मे मम । कर्त्तरि षष्ठी । किं करणीयं किं कर्त्तुं शक्यम् । गर्भस्थस्य हननं न योग्यं यद्यस्मात् अर्थतन्त्रो देवकार्यप्रधानः हरिः जातमात्रोऽपि विक्रमं न विहन्ति । मद्वधे पराक्रमं करिष्यत्येवेत्यर्थः । यद्वा । अर्थतन्त्रः स्वकार्यसाधकः अपि मादृशः विक्रमं न विहन्ति न नाशयति । स्त्रीवधे तु विक्रमनाशः स्यादेवेत्यर्थः । तदेवाह । यतः तं जीवन्तमेव मनुजा शपन्ति धिक्कुर्वन्ति स च देहे मृते तनुमानिनः पापिनो नरस्य भोग्यम् अन्धं तमो नरकं गन्ता । यद्वा । अयं स्वदेहरक्षार्थं चिन्त्यमानः स्त्रियास्तत्रापि स्वसुः तत्रापि गुरुमत्या गर्भिण्या वधः यशः श्रियं कालस्य योग्यमनुकालं यथार्थेऽव्ययीभावः । आयुश्च हन्ति योग्यकालात्पूर्वमेव शीघ्रमेव आयुर्हन्ति इत्यर्थः । यद्वा । गर्भस्थस्य वधे मम वीरत्वव्यञ्जको विक्रमो नङ्क्ष्यति । यतः जातप्रवृद्धतरुणीभूतेनानेन संग्रामे जये पराजये वा विक्रमः स्थास्यत्येव । गर्भवधे तु को विक्रमः किञ्च न विक्रममात्रहानिरपि तु धर्मादिहानिरपीत्याह । स्त्रिया इति । अत्र भयेनैव स्वदौरात्म्यं स्तब्धं तदपि मद्विवेकेनैवेति स्वस्मिन्नभिमानसुखं कंसेन कल्पितम् ॥ २१ ॥ स एष इति ॥ यः अत्यन्तं नृशंसितेन क्रौर्येण वर्त्तेत स एष खलु नूनं जीवन्नपि सम्परेतः मृत एव तनुमानिनः प्राण्यन्तरहिंसया स्वतनुं मानयतो लालयतोऽस्य देहे मृते अयं ध्रुवमन्धं तमो नरकं गन्ता गमिष्यतीति वाक्यैः तं मनुजाः शपन्ति । यद्वा । यद्यपि जीवति तस्मिन् लोका बिभ्यति तथापि देहे मृते तं क्रूरं मनुजाः शपन्ति । रे पाप ! नरके पतेति क्रोशन्ति शेषं प्रथमव्याख्यावत् ॥ २२ ॥ इतीति ॥ इत्येवं विचार्य घोरतमादत्यन्तभयंकराद् भावात् गर्भपातनाभिप्रायात् स्वयमेव निवृत्तोऽपि हरेः वैरस्यानुबन्धमनुवृत्तिं करोति तादृशः प्रभुः स्वरक्षणसमर्थः स कंसः तस्य हरेर्जन्म प्रतिक्षन् प्रतीक्षमाणः । आर्षः शता । आस्ते स्म ॥ २३ ॥ आसीन इति ॥ आसीनः संविशन् शयानः तिष्ठन् भुञ्जानः महीं पर्यटन् भ्रमंश्चापि हृषीकेशं हरिमेव चिन्तयानः । मुगभाव आर्षः । सर्वं जगत् तन्मयं हरिरूपमेव अपश्यत् ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वेतद्यशोविघातादि कालेन स्यात्तावत्तु जीवनं स्यादित्यत्राह । स एष इति । यः पुमान्, अत्यन्तनृशंसितेन उक्तविधस्त्रीहत्याविधानात्मकक्रौर्येण, वर्त्तेत स्वप्राणान् धारयेदित्यर्थः । सः एषः, जीवन्नपि, संपरेतः मृतप्रायः, खलु । तनुमानिनः देहाभिमानिनस्तस्य, देहे मृते, कालान्तरे तद्देहपतने जाते सत्यपीत्यर्थः । मनुजाः, तं नृशंसं जनं, शपन्ति दुर्वाग्भिर्धिक्कुर्वन्ति । न केवलमेतावदेव, किं तु स जनः, अन्धं तमः, निरयमपि इत्यर्थः । ध्रुवमेव, गन्ता गमिष्यति ॥ २१ ॥ इतीति । प्रभुः तां हन्तुं समर्थः, स्वयं कंसः, इत्युक्तप्रकारेण, विचारं कृत्वेति शेषः । घोरतमात् गुरुमतीवधोद्योगरूपात्, भावादभिप्रायात्, संनिवृत्तः निवृत्तिं प्राप्तः, तच्छोभनकालभवनं बोध्यम् । हरेः तत् प्रसिद्धं, जन्म जन्मकालम्, प्रतीक्षन्नालोचयन्, वैरानुबन्धकृत् उपरिष्टाददर्शयन्नपि स्वान्तस्तद्वैरमनुस्मरन् सन्नित्यर्थः । आस्ते स्मेत्यध्याहार्यम् ॥ २२ ॥ वैरानुबन्धमेवाह । आसीन इति । आसीन उपविष्टः, संविशन् शयानः, अथ वा गृहादौ प्रवेशमाचरन्, तिष्ठन्नूर्ध्वमवस्थितः, भुञ्जानोऽन्नभुक्तिमाचरन्, पर्यटन्नारामादावटनं कुर्वन्, पिबन् सशर्करदुग्धजलादिपानं कुर्वन् महीमिति पाठे स्पष्टोऽर्थः । कंसः, हृषीकेशं, चिन्तयानः उपवेशनादिक्रियासु हरिचिन्तनमेव कुर्वाणः सन्नित्यर्थः । जगत् सकलमपि विश्वं, तन्मयं हृषीकेशप्रचुरम्, अपश्यत् ॥ २३ ॥ अथ ब्रह्मादिकृतगर्भस्तुत्यवगमाय तत्प्रसङ्गमवतारयति । ब्रह्मेति । ब्रह्मा स्वयं विधिः, भवः स्वयं शिवश्च, नारदादिभिः देवर्षिप्रभृतिभिः, मुनिभिः, तथा सानुचरैः स्वपरिचारकसहितैः, देवैरिन्द्रादिभिश्च, साकं, तत्र यत्र वसुदेवदेवकीनिवासस्तस्मिन् स्थाने इत्यर्थः । एत्यागत्य, गीर्भिरौपनिषदर्थानुकारिणीभिर्वाग्भिः, धिषणं सर्वदा स्वस्वरूपज्ञानयुक्तं भगवन्तम्, ऐडयन् । स्वार्थे णिच् । ब्रह्मा भवो देवाश्च तुष्टुवुरित्यर्थः । केचित्तु वृषणमैडयन्निति पठन्ति । तत्पक्षे, वृषणं कामवर्षिणमिति तदर्थः । तथाप्यस्य शब्दस्याश्लीलप्रायत्वादुक्तपाठ एव साधुः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

किमद्येतिः १०.२.२१.

उन्मत्तवृत्तिरपि नित्यविरोधकोऽपि जन्तुर्यदि क्वचिदुदञ्चितवीक्षितेन।
दृष्टः सता सहरिवासहृदा तदैव स्यात्प्रीतिमानिह हि मानमभूत् स कंसः॥ ३०॥

प्रादुर्भावस्त्वदीयो विलसति हृदये यस्य हन्तुं तमीशो दुष्टो वा हिंस्रधीर्वा प्रभवति न परः कोऽप्यरी राज्यकृद्वा।
बीजं श्रीशैतदेव प्रकटमपरथा तस्य जाल्मस्य बुद्धिः कंसस्यैवं तदा किं मम निजभगिनी गुर्विणीत्युद्गता स्यात्॥ ३१॥

आसीन इतिः १०.२.२४.

यद्वैरचिन्तनकृदप्यनिशं स कंसोऽपश्यत्पदार्थमखिलं खलु कृष्णरूपम्।
तद्भक्ति–चारुरसरञ्जित–मानसा ये पश्येयुरत्र नहि मानमपेक्ष्यतेऽन्यत्॥ ३२॥

कृष्णप्रिया

राजा कंस ने मन में विचार किया कि अब इस परिस्थित में मैं शीघ्र इसके लिये कौन सा उपाय करूँ? यद्यपि मैं सब कुछ करने में समर्थ हूँ फिर भी मेरे जैसा मनुष्य ऐसा कार्य तो नहीं करेगा जिस कार्य से पराक्रम का नाश हो जाय। मैं यदि देवकीजी का अभी वध कर डालूँ तब प्रथम तो यह स्त्री देहवाली गर्भवती और बहिन का बध यश-सम्पत्ति और आयुष्य को तत्क्षण नाश कर देगा॥ २१॥ जो पुरुष अतिशय क्रूर कर्म से जीता है वह जीने पर भी मृतप्राय ही है। यद्यपि वह जीवित है तो भी मनुष्य मात्र उसको धिक्कारते हैं उसका तिरस्कार करते रहते हैं और देहाभिमानी जन मृत्यु के बाद निश्चित रूप से घोर नरक में जाता है॥ २२॥ भगवान् के साथ वैर भाव से सम्बन्ध रखने वाला राजा कंस यद्यपि देवकीजी का वध करने तक स्वयं समर्थ-स्वतन्त्र था फिर भी यह भगिनी वध अतिशय घोर-भयंकर है ऐसा मानकर इस घोर कर्म से निवृत्त हुआ। और भरावान् के जन्म की राह देखने लगा॥ २३॥ अब कंस बैठते, सोते, खाते पीते, और घूमते फिरते भगवान् का ही चिन्तन करता था जिससे कंस सर्व विश्व को कृष्णमय देखने लगा॥ २४॥

ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः। देवैः[1] सानुचरैः साकं गीर्भिर्वृषणमीडतुः[2]॥ २५॥

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये।
सत्यस्य [3]सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः॥ २६॥
एकायनोऽसौ द्विफलस्त्रिमूलश्चतूरसः पञ्चविधः[4] षडात्मा।
सप्तत्वगष्टविटपो नवाक्षो [5]दशच्छदी द्विखगो ह्यादिवृक्षः॥ २७॥
त्वमेक एवास्य सतः प्रसूतिस्त्वं[6] संनिधानं त्वमनुग्रहश्च।
त्वन्मायया संवृतचेतसस्त्वां पश्यन्ति नाना न विपश्चितो ये॥ २८॥

कर्दमक्षमा

अन्वयः — ब्रह्मा भवः च नारदादिभिः-सानुचरैः देवैः साकं तत्र एत्य गीर्भिः, वृषणम् ईडतुः॥ २५॥ सत्यव्रतम् सत्यपरम् त्रिसत्यम् सत्यस्य योनिम् च सत्ये निहितम् सत्यस्य सत्यम् ऋतसत्यनेत्रम् सत्यात्मकम् त्वाम् वयं शरणम् प्रपन्नाः॥२६॥ असौ आदिवृक्षः हि एकायनः द्विफलः त्रिमूलः चतूरस पञ्चविधः षडात्मा सप्तत्वग् अष्टविटपः नवाक्षः दशच्छदी द्विखगः (वर्तते)॥ २७॥ अस्य सतः प्रसूतिः त्वम् एक एव सन्निधानम् त्वम् (एक एव) च अनुग्रहः त्वम् (एक एव) त्वन्मायया संवृत चेतसः त्वाम् नाना पश्यन्ति ये विपश्चितः न॥ २८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रम्याभिर्गीर्भिर्वृषणं कामवर्षिणमैडयंस्तुष्टुवुः॥ २५॥ प्रतिश्रुतं सत्यं कृतमिति हृष्टाः संतः सत्यत्वेनैव प्रथमं स्तुवंति। सत्यव्रतमिति। सत्यं व्रतं संकल्पो यस्य तम्। सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिंस्तम्। त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्वं प्रलयानंतरं च स्थितिसमये च सत्यमव्यभिचारेण वर्तमानम्। तदेवाहुः। सत्यस्य योनिमिति सच्छब्देन पृथिव्यप्तेजांसि। त्यच्छब्देन

---

१. देवाः सानुचराः–इति कस्यचित्। २. वृषणमैडयन्–श्रीधर. वंशी. विश्व. शुक. ; विषण मैडयन्–वीर. सुदर्शन.। ३. मृत सत्य–विज.। ४. शिफः–वीर. विज.। ५. च्छदो–वीर.। ६. स्थानं निधानं–विज.।

वाय्वाकाशौ । एवं सच्च त्यच्च सत्यं भूतपंचकम् । "तत्सत्त्यमित्याचक्षते" इति श्रुतेः । तस्य योनिं कारणम् । अनेन पूर्वं वर्तमानलोका । तथा सत्ये तस्मिन्नेव निहितमंतर्यामितया स्थितम् । अनेन स्थितिसमयेऽपि सत्यत्वमुक्तम् । तथा सत्यस्य सत्यं तस्यैव सत्यस्य सत्यं पारमार्थिकं तन्नाशेऽप्यवशिष्यमाणरूपम् । अनेन प्रलयेष्ववधित्वेन सत्यत्वं दर्शितम् । एवं त्रिसत्यत्वमुपपादितम् । तथा ऋतसत्यनेत्रम् ऋतं सूनृता वाणी सत्यं समदर्शनं तथा भगवता व्याख्यास्यमानत्वात् । "सत्यं च समदर्शनम् । ऋतं च सूनृता वाणी कविभिः परिकीर्तिता ।" इति । तयोर्नेत्रं नयनसाधनं नेतारं प्रवर्तकमिति यावत् । एवं सर्वप्रकारेण सत्यात्मकं त्वां भगवन्वयं शरणं प्रपन्नाः प्राप्ता इति ॥ २६ ॥ ननु भवंतोऽपि लोकेश्वरा मत्तुल्या एव किमिति मां शरणं प्रपद्यंते नैवं वाच्यं त्वमेवैकः सर्वेश्वरः सर्वसृष्ट्यादिकारणत्वात् वयं तु त्वदेकशरणा एव लोकादिरूपं द्वैतं च सर्वं त्वद्व्यतिरेकेण नास्तीति वक्तुं द्वैतप्रपंचं वृक्षरूपकेण निरूपयंति । एकायन इति । असौ प्रपंच आदिवृक्षः । वृश्च्यत इति वृक्षः समष्टिव्यष्टिदेहरूपः । कथंभूतः एकायनः एका प्रकृतिरयनमाश्रयो यस्य सः । द्वे सुखदुःखे फले यस्य सः । त्रयो गुणा मूलानि यस्य सः । चतूरसो धर्मार्थकाममोक्षाश्चत्वारो रसा यस्य सः । पंचेंद्रियाणि विधा ज्ञानप्रकारा यस्य सः । षडूर्मयः कोशा वा आत्मानः स्वभावा यस्य सः । सप्त धातवस्त्वचो यस्य सः । पंच भूतानि मनोबुद्ध्यहंकाराश्चेत्यष्टौ विटपाः शाखाविस्तारा यस्य सः । नव द्वाराण्यक्षाशिछद्राणि यस्य सः । दश प्राणाः छदाः पत्राणि विद्यंते यस्य स दशच्छदी । द्वौ जीवेश्वरौ खगौ यस्मिन्स द्विखगः ॥ २७ ॥ एवंरूपस्य संसारवृक्षस्य सतः कार्यस्य त्वमेक एव प्रसूतिः प्रकर्षेण सूतिर्जन्म यस्मात्स प्रसूतिस्त्वं कारणमित्यर्थः । त्वं सन्निधानं त्वमेव सम्यङ्निधीयतेऽस्मिन्निति । सन्निधानं लयस्थानम् । त्वमेवानुग्रहश्चानुगृह्णासीति पालकः । ननु ब्रह्मविष्णुरुद्रा एवंभूताः प्रसिद्धाः कथमहमेवेति चेत्तत्राहुः—त्वन्माययेति । संवृतं पिहितं चेतो ज्ञानं येषां ते त्वामेव नाना पश्यंति । ये तु विपश्चितो विद्वांसस्ते तथा न पश्यंति ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र कंसकारागारे । एत्य प्राप्य । ब्रह्मा भवः सा च पृथिवी दैवैः ऐडयन् इति संबंधः । अन्यथा बहुत्वासिद्धेः । अनुचरैरित्यनुचरास्तैर्दैवविशेषणमिदम् । गीर्भिरिति पूर्वं व्याख्यातमेव । ईडेः प्रयोजकणिजंताल्लङ् स कर्मकत्वात्प्रयोज्यकर्त्तरि तृतीया दैवैरिति ॥२५॥ प्रतिश्रुतं भूभारनिवृत्तये वसुदेवगृहे भविष्यामीत्येवंरूपम् । तदेव त्रिकालावस्थायित्वमेव । "तत्' इत्यादिश्रुतेरर्थमाह—तत् भूतपञ्चकं सत्यं सत्यशब्दवाच्यमित्याचक्षते वदंतीत्यर्थः । तस्य भूतपञ्चकस्य । अनेन भूतपंचकोत्पादकत्वेन । तस्मिन्नेव भूतपंचके एव । अनेन भूतपंचकांतर्यामित्वेन । तस्यैव भूतपञ्चकस्यैव । पारमार्थिकं यथार्थम् । तन्नाशे भूतपंचकनाशे । अनेनावशिष्यमाणत्वेन । इति यावत् इति सिद्धांतः । एवं पूर्वोक्तप्रकारेण । प्राप्ता इति । सर्वथा प्राप्ता इत्यर्थः । अर्थांतरमाह—सत्यनृताप्रियहीनं यथार्थकथनं व्रतं नियमो यस्य तम् "सत्यसंहिता वै देवाः" इति श्रुतेः । 'सत्यो धर्म उदाहृतः' इति कोशात्सत्यस्य धर्मस्य परं पालकम् । यद्वा—सत्तिरवसादनं ततोऽपरमन्यं तद्रहितमित्यर्थः । "अविनाशी वा अरे अयमात्मा' इति श्रुतेः । त्रिषु लोकेषु सत्यं तेषु नष्टेष्वप्यनष्टम् । सत्यस्य मुख्यप्राणस्य योनिं कारणम् "आत्मन एष प्राणो जायते" इति श्रुतेः । सत्ये निहितं सन्निहितम् । 'सत्येन प्राप्यते हरिः' इत्याद्युक्तेः । सत्यस्य प्रपंचस्य सत्यमबाधितस्वरूपम् "अद्वैतं परमार्थतः" इति श्रुतेः । सत्या देवा नेत्रं शिष्यादिषु नेतारो यस्य तम् । "तं देवाः प्रापयंते" इति श्रुतेः । यद्वा—सत्यं नेत्रं प्रकाशकं यस्य न ह्यसत्यवादिनां तत्प्रकाशो जायत इति भावः । सत्यमबाधितमात्मनः कं स्वरूपसुखं यस्य तम् "एष ह्येव हि परमानंदः" इति श्रुतेः यद्वा—स्वभक्तपालनैकव्रतत्वान्नित्यसत्यत्वाच्च त्वमेव प्रपत्यर्ह इत्याहुः—सत्यं व्रतं यस्य तं "सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम" इति त्वदुक्तेः । न च स्वभक्तपालकदेवतांतरवत्त्वमनित्योऽनुत्कृष्टश्चेत्याहुः—सत्यः सर्वकालदेशवर्त्ती । परः श्रेष्ठश्च तम् । यद्वा—सत्यं सत्यनामानम् । "सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितम् । सत्यात्सत्यो हि गोविंदस्तस्मात्सत्यो हि नामतः" इत्युद्योगपर्वोक्तेः । परं परमेश्वरम् । त्वद्बुद्धिबलोदयोऽपि सत्य एवेत्याहुः-तिस्रः ज्ञानबलक्रियाः शक्तयस्सत्या यस्य तम् । "न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः । त्वदंशा अपि सत्या इत्याहुः । सत्यस्य मत्स्यकूर्माद्यवतारवृंदस्य योनिमुद्गमस्थानमवतारिणमित्यर्थः । त्वद्धामापि नित्यमित्याहुः—निहितं सन्निहितं स्थितमित्यर्थः । सत्ये मथुरावैकुंठादिलोके । किञ्च सारस्य सार इतिवत् समस्तचिद्वस्तुसारस्त्वमेवेत्याहुः—सत्यस्य सत्यमिति । यद्वा-सत्यस्य यत्किंचित्कालवर्त्तिनो मायिकप्रपंचस्य प्रकाशकत्वात्सत्यं त्रिकालवर्त्तिनम् "चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रम्" इति वत् "सत्यं ह्येवेदं विश्वमसृजंत" इति श्रुतेर्माध्वभाष्यप्रमाणितायाः । हे ऋत नित्य सत्यस्वरूप । सत्यं नेत्रं सर्वेन्द्रियोपलक्षकं नयनेंद्रियं यस्य तम् । सत्य आत्मा श्रीविग्रहो यस्य तम् इति विश्वनाथः ॥२६॥ "निर्बलाः शरणं यांति समर्था न कदाचन" इत्यभियुक्तोक्तिमाश्रित्य शंकते-नन्विति । किमिति कुतः । देवा ऊचुर्नैवमिति । त्वदेकशरणः त्वमेकः शरणं रक्षिता येषां ते तथा त्वद्व्यतिरेकेण स्वत्पार्थवयेन वृक्षरूपकेण रूपकालंकारेण । तल्लक्षणं च "यत्रोपमानचित्रेण । सर्वथाप्युपरज्यते । उपमेयमयीभित्तिस्तत्र रूपकमिष्यते ॥" इति । तच्चानेकधा इह च समस्तं सादृश्यरूपकमस्ति "पृथक्कथितसादृश्यं दृश्यं सादृश्यरूपकम्" इति तल्लक्षणात् । समस्तत्वं चास्य एकायनोसावित्यादीनां सर्वेषां समासवत्त्वादिति ध्येयम् । आदिः सनातनश्चासौ वृक्ष आदिवृक्षः । अनेनानादित्वं समर्थितं प्रवाहापन्नत्वात् । यद्वाऽऽदेर्हरेर्वृक्षस्तथा "आराममस्य पश्यंति" इत्यादिश्रुतेः । यद्वाऽऽदिना ज्ञानेन वृश्च्यत इति तथा

"तमेव विदित्वातिमृत्युमेति" इति श्रुतेः। ज्ञानस्यादित्वं तु परमपुरुषार्थादिकारणत्वात्। यद्वाऽऽदिरदनार्होवृक्षस्तथा भोग्यरूपत्वेन विनाशित्वादिति "तयोरन्यः पिप्पलं स्वाद्वत्ति" इति श्रुतिरपीह यथाकथंचिदुन्नेयेति। धर्मार्थकामाः प्रवृत्तानां रसास्त्रयो निवृत्तानां त्वेको मोक्ष एव रस एवं चत्वारः संतीति। पंचेंद्रियैरेव सर्वं शब्दादि ज्ञायतेऽत उक्तं पंचविधा इति। षडूर्मयः क्षुत्पिपासे शोकमोहौ जरामृत्यू इत्याख्या आत्मानः स्वभावा यस्य। अन्येप्यस्तित्वादयः स्वभावाः संत्यस्य कथमुक्तं षडूर्मय इति तत्राह–कोशा वेति। कोशशब्दोत्र षड्भावविकारपरः। तद्वितापि कोशवदात्मावरकैवातस्तेऽपिकोशा एव ते चास्ति जायते वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीत्येवंरूपा ज्ञेयाः। यद्वा–पंचकोशा अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाख्याः षष्ठश्चाहंकारस्तस्याप्यात्मावरकत्वेन कोशत्वं कैश्चित्स्वीकृतमेते वा षट्कोशाः "कोशोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके। जातिकोपेऽर्थसंघाते वेश्यां शब्दादिसंग्रहे॥" इति मेदिनी। सप्त धातवः त्वङ्मांसरुधिरस्नायुशुक्रास्थिमज्जाख्याः। नवद्वाराणि सप्त चक्षुरादीन्युपरिष्ठानि द्वे पायूपस्थरूपे अधोगे अक्षाः छिद्राणि। "अक्षो ज्ञानार्थशकटावयवेषु च पाशके। रुद्राक्षेंद्राक्षयोः सर्वे व्यवहारे विभीतके॥ चक्रे कर्षे तथा छिद्रे तुल्ये सौवर्चलेंद्रिये" इति यादवमेदिन्यौ। दशप्राणाः प्राणापानसमानव्यानोदाननागकूर्मकृकलदेवदत्तधनंजयाख्याः छदाः पत्राणि यस्य "छदः पलाशे गरुति ग्रंथिपर्णतमालयोः" इति मेदिनी॥ २७॥ कारणमित्यर्थः–इत्यस्योत्पादकमित्यर्थः। ननूत्पत्तिस्थानमिति। पुनराशंकते–एवंभूता उत्पत्तिस्थितिलयकर्त्तारः। तत्र ब्रह्मादीनामेवंभूतत्वे। आहुः देवा इति शेषः। किमाहुस्तत्राह–त्वन्माययेति। पिहितमाच्छादितम् तथा नाना॥ २८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र बन्धनागारे आदिशब्देन सनकादिभिः तेषु श्रीनारदस्यादित्वं केवलं परमभक्तत्वारामत्वेन मुख्यत्वात् श्रीहरिवंशोक्तस्य भगवदवतारार्थतदीयप्रयत्नविशेषस्य सफलतया प्रहर्षेण सर्वेषां तेषामग्रत आगमनाच्च सानुचरैः गन्धर्वादिसहितैः ऐडयन् ऐडयत द्वित्वेपि वाच्ये बहुत्वमार्षं किम्वा आगमने मुन्यादीनां पश्चाद्भावेनाप्राधान्यात् सहार्थयोगस्तृतीया च स्तुतौ तु च सर्वेषां यौगपद्येन प्राधान्यादेव कर्तृत्वमिति तौ मुन्यादिभिरनुगतौ पूर्वमागतौ च पश्चात्ते च तौ च युगपदेव तुष्टुवुरित्यर्थः! पूर्वं तेषामप्यप्रधानकर्तृत्वेनैककर्तृत्वाऽविरोधात् क्त्वायोगश्च॥ २५॥ सत्यव्रतमिति। व्रतं परिश्रुतं यः कश्चित् सङ्कल्पोपि सत्यः किं पुनर्व्रतरूप इत्यतोऽत्रावतरणमिदं युक्तमेवेति भावः। अतः सत्यपरं सत्यव्रतत्वादेव सत्यप्रियो भवान् तच्च तव प्रीतिं ज्ञात्वा विधीयमानं चेत् श्रेष्ठं भवति श्रेष्ठत्वं च तस्य तत्प्राप्तिसाधनताऽऽपन्नत्वमेवेति तथा तैर्व्याख्यातमेव अतः सत्यकोशनेन धरण्यापि त्वं प्राप्त इति भावः। स च धर्मो महासत्यस्य तव युक्त एवेत्याहुः त्रिसत्यमिति। अतः कलेः प्रथमांशमभिव्याप्य त्रियुगस्यापि तवावतारोऽयं नायुक्त इति भावः त्रिसत्यमेव सत्यस्य योनिमित्यादि विशेषणत्रयेणोपपादितं सत्यस्य सत्यमिति असंहितानिर्देशेन कालव्यवधानात् पूर्वगुरुत्वमनुभूय पादान्तवत् सकाकुगानप्लुतेन वा ततस्तथैव छन्दोनुरोधेन पठनीयं तवेदं सत्यव्रतत्वं त्रिसत्यत्वञ्च चित्रमित्याहुः ऋतेति सत्या प्रिया च या वाक् सा सूनृता सैव ऋतं समयव्यभिचारि यत् ज्ञानं तत् सत्यं तयोरपि प्रवर्त्तकं प्रकाशकं वेति तस्य तयोर्वाङ्मनसधर्मयोरव्यभिचारित्वं कैमुत्येनानीतं वैदिकरूपयोः परमयोस्तयोः परमाश्रयत्वेन त्रिसत्यत्वमपि अतो भवत्प्रसादादेव वयमपि भवन्तं जानीमश्चेत्यनुग्रहान्तरं च सूचितं अन्यत्तैः तत्र सृष्टेः पूर्वमित्यनेन भूतकालस्य वैशिष्ट्यमुक्तं प्रलयान्तरमित्यनेन भविष्यत्कालस्य स्थितिसमयमित्यनेन वर्त्तमानस्येति ज्ञेयं यद्वा व्रतं "सकृदेव प्रपन्नोऽयं तवास्मीति च याचते। अभयं सर्वदा तस्मै ददाम्येतत् व्रतं मम" इति लक्षणम् अतो यादवादिस्वभक्तानामभयार्थं त्वयाऽवतीर्णं युक्तमेवेति भावः। यतः सत्यपरं सदा सर्वथा मिथ्यारहितमित्यर्थः। अत एव त्रिसत्यं यतः सत्यस्य व्यवहारिकसत्यस्य प्रपञ्चस्य योनिमित्यादि ननु देवकीगर्भे प्रविष्टस्य कथं सत्ययोनित्वादिकं? तत्राहुः सत्यात्मकं सत्यः विकाररहित आत्मा श्रीमूर्तिर्यस्य तम् अन्यत्समानम्॥ २६॥ द्विखग इत्यधिष्ठातृत्वमात्रविवक्षया साम्येनैव निर्देशः विशेषस्तु तयोरेकः स्वाद्वत्ति पिप्पलान्नमित्यादौ ज्ञेयः एवमनयावृक्षाङ्गत्वाभावात्प्रपञ्चातीतत्वं दर्शितं प्रवाहरूपेण प्रथमत एव वर्त्तमानत्वात् आदिश्चासौ सदा कालच्छिद्यमानत्वाद्वृक्षश्च तत्र सुखदुःखरूपे फले चतूरसः त्वगष्टविटप इत्यत्र च छन्दः प्लुतस्वरेण घटनीयम् अन्यत्तैः तत्र एकायन इतीत्यन्ते द्वाभ्यामिति शेषः। पञ्चेत्यादौ ज्ञानेति करणे ल्युट् वृक्षस्यापीन्द्रियपञ्च सद्भावस्तेन पश्यन्ति पादपा इत्यादौ प्रसिद्धः कोशास्त्वङ्मांसरुधिरमेदोमज्जास्थीनि लोमरक्तमांसस्नाय्वस्थिमज्जान इत्येके धातवस्तु त्वगादयः शुक्रसंहिताः सप्तत्वगिति सप्तावरणानि त्वक् यस्येति वा॥२७॥ मुहुस्त्वं पदप्रयोगस्तत्र तत्र तदितरव्यावृत्तिदार्ढ्यार्थः अन्यत्तैः यद्वा। ननु, प्रसूतिः सन्निधानं च महापुरुषः अनुग्रहो विष्णुः कथमहमेव तत्तद्रूपः? तत्राहुः–त्वदिति अकारप्रश्लेषेण। त्वन्मायया ये तु असंवृतचेतसस्ते नाना न पश्यन्ति किन्त्वेकमेव पश्यन्तीत्यर्थः। एवं सर्वेषां भगवद्रूपाणामभिन्नत्वं चाभिप्रेतम् एकस्यैव भगवद्विग्रहस्य स्वाभाविकाचिन्त्यशक्त्या नानारूपतासमावेशात् उपासनाभेदेनैव दर्शनभेदाच्च यथोक्तं श्रीनारदपञ्चरात्रे—

"मणिर्यथा विभागेन नीलपीतादिभिर्युतः। रूपभेदमवाप्नोति ध्यानभेदात्तथाऽच्युत"॥ इति॥

मणिरत्र नानाच्छविधारी वैदूर्याख्यो ज्ञेयः। यद्वा संवृतचेतसः स्वल्पबुद्धयस्त्वदियया माययैव पूर्वोक्तं नानाविधं त्वां पश्यन्ति तयैव नानात्वमसौ प्राप्नोतीति मन्यन्त इत्यर्थः। ये विपश्चितस्ते तु तया तथा न मन्यन्ते किन्तु स्वाभाविकशक्त्यैवेत्यर्थः। अन्यत्समानम् एवं सर्वेषामेव श्रीभगवद्रूपाणाममायिकत्वं सच्चिदानन्दघनरूपत्वञ्चोक्तम्॥ २८॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

२५—तत्र बन्धनागारे। आदिशब्देन सनकादयस्तेषु श्रीनारदस्यादित्वं परमभागवतत्वेन मुख्यत्वात्, किंवा श्रीहरिवंशोक्तस्य तदवतारार्थ-तदीययत्नविशेषस्य सफलतया प्रहर्षेण सर्वेषां तेषामग्रत आगमनात्। सानुचरैर्गान्धर्वादिसहितैरैडयन् ऐडत—द्वित्वे वाच्येऽपि बहुत्वमार्षम्; किंवा मुन्यादिसाहित्येन बाहुल्यापेक्षया कंसस्य तत्तच्चेष्टानन्तरं देवानां स्तुतिस्तस्य निकटवर्त्तितयादौ श्रीभगवदवतारज्ञानां तेषाञ्च दूरवर्त्तित्वात्ततः पश्चादेव तत्सिद्धिरिति[1] ॥

२६—सत्यव्रतमिति। यः कश्चित् संकल्पोऽपि सत्यः, किं पुनः प्रतिश्रुतमतोऽत्रावतरणमिदं युक्तमेवेति भावः। किञ्च, सत्यपरमतः सत्यकोशनेन धरण्यापि त्वं प्राप्त इति भावः। न च द्वापरान्ते कलिप्रवेशेऽधुना त्वत्प्राकट्यं न घटत इत्याह—त्रिसत्यमिति। एतदेव सत्तास्य योनिमित्यादिविशेषणत्रयेणोपपादितं सत्तास्य सत्यमित्यसन्धितया च्छन्दोऽनुरोधेन पठनीयम्। अतएवास्मान् प्रति तमिमं महानुग्रहमकरोदित्याशयेनाहुः—ऋतसत्ययोर्नेत्रं प्रवर्त्तकं किंवा चक्षुः—प्रकाशकम्; तत्र सत्यं समदर्शनम्, तच्च सर्वेषां जीवानां भगवदंशत्वेन समतया दर्शनं ज्ञानम्; किंवा, अन्तर्यामितया सर्वत्र साम्येन भगवतो दर्शनम्; यद्वा, मया लक्ष्म्या सह वर्त्तत इति समो भगवान्, तस्य दर्शनमिति। अस्माकं त्वत्स्तवनमिदं त्वज्ज्ञानञ्च कृपया त्वयैव प्रवर्त्तितमित्यर्थः। एवं प्रागेव तत्तदर्पितम्। अन्यत्तैर्व्याख्यातम्। यद्वा, व्रतं 'सकृदेव प्रपन्नः सन् यस्तवास्मीति याचते। अभयं सर्वदा तस्मै ददामि' इत्यादिलक्षणम्; अतो यादवादिस्वभक्तानामभयार्थं त्वयावतीर्णमिति युक्तमेवेति भावः; यतः सत्यपरं सदा सर्वदा मिथ्यात्वरहितमित्यर्थः। अतएव त्रिसत्यम्, अतः सर्वेषां यत् सर्वसाधुत्वम्, तच्च त्वत्प्रसादादेवेत्याह—ऋतेति, ऋतेन सूनृतया वाण्या सत्यं प्रेम त्वत्स्तुतिविषयकमस्माकं प्रेमापि त्वत्त एवेत्यर्थः। ननु देवकीगर्भे प्रविष्टस्य[2] कथं सत्ययोनित्वादिकम्? तत्राहुः,—सत्यात्मकं सत्यो विकाररहित आत्मा श्रीमूर्त्तिर्यस्य तम्; यद्वा, सत्यमव्यभिचारि आत्मनां जीवानामपि कं सुखं यस्मात्तम्, अतो भक्तवात्सल्येन देवकीगर्भप्रविष्टत्वेऽपि जीवस्येव गर्भवासादिदुःखं किमपि नास्तीति भावः। अन्यत् समम्। चतूरस इत्यनेन मिथ्यात्वमिव सूचितम् (भा० १०।१४।२६) 'अज्ञानसंज्ञौ भव-बन्धमोक्षौ' इति वक्ष्यमाणात्[3] ॥

२७—द्विखग इत्यधिष्ठातृत्वमात्रापेक्षया द्वयोः साम्येन निर्देशः। आदिश्चासौ प्रवाहरूपेण प्रथमत एव वर्त्तमानत्वात् वृक्षश्चानित्यत्वात्। त्वगष्टविटप इत्यत्र छन्दोभंग आर्षत्वात् सोढव्यः ॥

२८—त्वमितिपदस्य पुनः पुनः प्रयोगस्तत्र तत्र तदितरव्यावृत्तिदार्ढ्यार्थः[4]। अनुग्रहस्य पश्चान्निर्देशस्तदानीं तस्यैव प्राधान्यात्। एवं त्रयाणां यथोत्तरं श्रैष्ठ्यम्। अन्यत्तैर्व्याख्यातम्। यद्वा, सन्निधानमाश्रयः, संहारकस्यानुक्तिः स्तुतावयोग्यत्वात्। इत्थं कारणाश्रयपालत्वलीलया महापुरुष-नारायणविष्णवाद्यवतारैरभिन्नमपि त्वां नाना न पश्यन्ति, किन्त्वनेकरूपेण वर्त्तमानमेव पश्यन्तीत्यर्थः। के? तव मायाख्यशक्त्या न संवृतं सर्वतः प्रसरच्चेतो बुद्धिर्येषां तथाभूता विपश्चितः। एवं सर्वेषां श्रीभगवद्रूपाणामभिन्नत्वञ्चाभिप्रेतम्। यद्वा, संवृतचेतसः स्वल्पबुद्धयस्त्वदीयमाययैव नानाविधं त्वां पश्यन्ति, न तु सत्यतया। ये तु विपश्चितस्ते त्वन्मायया नाना न पश्यन्ति, किन्तु मायां विनैव[5] सच्चिदानन्दघनश्रीमहापुरुषादिरूपैः सत्यतया नानाविधं पश्यन्ति। त्वदिति पृथक्पदं वा। त्वत्तः संवृतमाकृष्टं चेतो यैस्ते अभक्ता इत्यर्थः। अन्यत् समानम्। एवं सर्वेषामेव भगवद्रूपाणाममायिकत्वमुक्तम् ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

धिषणं धिषणायुक्तं सर्वज्ञं तुष्टुवुः ॥ २५ ॥ सत्यव्रतं सत्यसंकल्पं सत्यपरं सत्यभूतचिदचिदात्मकजगत्परं "यदन्यद्देवेभ्यः प्राणेभ्यश्च तत् सत् अथ यद्देवाश्च प्राणाश्च तत्सत्यं तदेकया वाचा व्यवह्रियते सत्यम्" इति श्रुतिः। ततः परं यथार्थविद्वाक्प्रतिपाद्यं वा त्रिसत्यं त्रयः प्रकृतिपुरुषकालाः सत्या यस्य तं सत्यस्य चिदचित्प्रपञ्चस्य योनिं सत्ये निर्विकारे परमे व्योम्नि निहितं जीवेभ्योऽपि सत्यं धर्मतोऽपि निर्विकारत्वात् ऋतसत्यनेत्रं सत्यमादित्यः "असावादित्यः सत्यम्" इति श्रुतिः। तत्साहचर्यादृतशब्दश्चन्द्रपरः चन्द्रसूर्यनेत्रमित्यर्थः "चक्षुषी चन्द्रसूर्यौ" इति श्रुतिः। यद्वा, एवं पुण्यकर्मणः, अपुण्यकर्मणः "एवमनृतादात्मानं जुगुप्सेत्" इति अपुण्यप्रतिसम्बन्धिन्यनृतशब्दप्रयोगात् ऋतं पुण्यमनुमोयमानो धर्मः तयोर्नेतारं सत्यात्मकं नित्यविग्रहरूपं विग्रहभूषणदेवीपरिजनादिविशिष्टं त्वां सर्वज्ञं परमकारुणिकम् अनालोचितविशेषाशेषलोकशरण्यं शरणमुपायभूतं प्रपन्नाः ॥ २६ ॥ एकायनः एकं प्रकृतितत्वम् अपरं ब्रह्मभूतत्वम् अयनमाश्रयो यस्य सः द्विफलः सुखदुःखफलः त्रिमूलः गुणत्रयमूलः चतूरसः चतुर्विधपुरुषार्थरसः पञ्चशिफः शिफा शाखान्तमूलं सूक्ष्मभूतपञ्चकजटावानित्यर्थः। षडात्मा षडूर्मिमान् मनःषष्ठेन्द्रियवान् सप्त त्वक् वसारुधिरमांसमेदोऽस्थिमज्जाशुक्ररूपाः सप्त धातवः ये च त्वग्यस्य सः अष्टविटपः हस्तौ पादौ शिरः कर्णवक्षोजठरश्च विटपस्थानीयाः नवाक्षः नवच्छिद्रकोटरः दशच्छदः शब्दादय एवानुकूला प्रतिकूलाश्च दश पत्रस्थानीया यस्य सः यद्वा, प्राणापान-

---

१. तत्सिद्धेरिति (क, ख), तत्प्रसिद्धेरिति (ग)।

'सकृदेव प्रपन्नो यस्तवास्मीति च याचते' इति (ग, घ, ङ) २. दैवकीप्रविष्टस्य (क, ग, घ, ङ); ३. वक्ष्यमाणत्वात् (ख); ४. दार्ढ्यार्थं (ख); ५. मायाधीनैव (ग, घ)

व्यानोदानसमाननागकूर्मकृकरदेवदत्तधनञ्जयरूपदशवायूपपन्नः द्विखगः जीवपरमात्मोपेतः आदिवृक्षः प्रवाहानादिः शरीराख्यः वृक्षः ॥ २७ ॥ अस्य वृक्षस्य त्वमुत्पत्तिस्थानं निधानं निधनं प्रलयस्थानं वा अनुग्रहः इष्टप्रदानादिना स्थितिकारणं त्वामिति जीवरूपेणावस्थितमित्यभिप्रायः । नानापश्यन्तीत्युक्तेः नहि जीवविलक्षणपरस्वरूपे स्वरूपतो नानादर्शनम् ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्र देवकीसन्निधौ नारदादिभिः मुनिभिः सानुचरैर्देवैश्च सह ब्रह्मा चतुर्मुखो भवो रुद्रश्च समागत्य गीर्भिरौपनिषदानुकारिणीभिर्वाग्भिर्धिषणं धिषणायुक्तं सर्वज्ञं श्रीभगवन्तमैडयन् तुष्टुवुः ण्यन्ताण्णिवृत्तप्रेरणादीडेर्लङ् नारदाद्यभिप्रायकं बहुवचनम् । वृषणमिति पाठे कामवर्षिणं श्रीभगवन्तमैडयन्निति स एवार्थः ॥२५॥ स्तुतिमेवाह—सत्यव्रतमित्यादिना यावदध्यायसमाप्ति । तावत्प्रकृतिपुरुषासम्भावितैर्धर्मैः विशिष्टं स्तुवन्ति सत्यव्रतमिति । सत्यव्रतं सत्यसङ्कल्पम् अनेन प्रतिज्ञातार्थो यथार्थीकृत इति सूचितम् । सत्यपरं चिदचिदात्मकं जगत् सत्यं "यदन्यद्देवेभ्यः प्राणेभ्यश्च तत्सत् अथ यद्देवाश्च प्राणाश्च तत्सत्यं तदेकया वाचा व्यवह्रियते सत्यम्" इति श्रुतेः । ततः परं विलक्षणमिदं साध्यम् अत्र सत्यव्रतत्वादीनि हेतवः कथं सत्यव्रतत्वम् ? तत्राह—त्रिसत्यं त्रयः प्रकृतिपुरुषकालाः सत्या यस्य तं प्रकृतिपुरुषकालशरीरकमित्यर्थः । प्रकृत्याद्यात्मकस्य कृत्स्नस्य जगतः स्वनियाम्यत्वेन स्वसङ्कल्पप्रतिभटाभावादव्याहतसंकल्प इत्यर्थः । यतः सत्यव्रतमत एव सत्यस्य योनिं सत्यस्य चिदचिदात्मकप्रपञ्चस्य योनिं कारणं सत्ये निर्विकारे परे व्योम्नि निहितं कर्त्तरि क्तः अधितिष्ठन्तमित्यर्थः । त्रिसत्यं सत्यस्य योनिमिति लीलाविभूतिमत्त्वमुक्तम् । निहितञ्च सत्य इति नित्यविभूतिमत्त्वम् एतदुभयं सत्यपरत्वहेतुः तथा सत्यस्य सत्यं जीवेभ्योपि सत्यं धर्मतोपि निर्विकारत्वात् "न ह्येतस्मादिति नेति नेत्यन्यत्परमस्त्यथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेव सत्यस्य योनिहितम्" इतिश्रुतेः । तदर्थस्तु, इति नेति यद्ब्रह्म प्रतिपादितं तस्मादेतस्माद्वस्तु परं न ह्यस्ति ब्रह्मणोऽन्यत् स्वरूपतो गुणतश्च परं नास्तीत्यर्थः । न त्वन्यमात्रनिषेधः, तथा हि सत्यन्यत्परमिति वैयर्थ्यापत्तेः, तदुपपादयति-अथेति । प्राणशब्दनिर्दिष्टेभ्यः चेतनेभ्योपि कदाचिदपि ज्ञानादिसङ्कोचाभावात् परमात्मा सत्यं निर्विकारमित्यर्थः । 'नित्यो नित्यानां चेतनश्चेतनानाम्' इति श्रुत्यन्तरसंवादात् 'अन्यत्तु प्रकृतैतावत्त्वम्' इति शारीरकसूत्रभाष्यादवगन्तव्यम् , विस्तरभयान्नात्र लिख्यते ऋतसत्यनेत्रं सत्यमादित्यः "असावादित्यस्सत्यम्" इति श्रुतेः । तत्साहचर्यात् ऋतशब्दश्चन्द्रपरः चन्द्रादित्ययोर्नेत्रं प्रशासितारमित्यर्थः । 'य आदित्ये तिष्ठन् यश्चन्द्रमसि तिष्ठन्' इत्यादिश्रुतेः । यद्वा, तौ नेत्रे यस्य ते "चक्षुषी चन्द्रसूर्यौ" इति श्रुतेः । "एवं पुण्यस्य कर्मणो दूराद्गन्धो वाति" इति पुण्यकर्मप्रतिसम्बन्धितया "एवमनृतात्मानं जुगुप्सेत्" इत्यपुण्यकर्मण्यनृतशब्दप्रयोगात् ऋतं पुण्यमनुष्ठेयं कर्म सत्यमुच्यमानधर्मः तयोर्नेतारं सत्यात्मकं स्वरूपेणापि निर्विकारम् अनेन प्रधानव्यावृत्तिः एवम्भूतं त्वां वयं शरणं प्रपन्नाः अध्यवस्यामः ॥ २६ ॥ अथ त्रिसत्यत्वमेवोपपादयितुं कृत्स्नं जगद्वृक्षत्वेन रूपयित्वा तस्य भगवदासत्वमाहुः—एकायन इति । एकं परं ब्रह्म अन्यमाश्रयो यस्य द्विफलः द्वे सुखदुःखे फले यस्य त्रयः सत्त्वादयो गुणाः मूलं यस्य चत्वारो रसाः धर्मादिपुरुषार्थः यस्य पञ्च शिफाः जटाः उत्तरमूलानि भूतसूक्ष्मात्मकानि यस्य षडात्मान ऊर्मयो मनःषष्ठानि इन्द्रियाणि वा यस्य सप्त त्वक् वसामांसरुधिरमेदोमज्जास्थिशुक्ररूपा धातव एव त्वग्यस्य अष्टौ हस्तौ पादौ शिरः कण्ठो वक्षो जठरश्चेत्येते विटपाः शाखा यस्य नवाक्षाः छिद्रकोटरा यस्य दशच्छदः दश शब्दादय एवानुकूलाः प्रतिकूलाश्च प्राणापानव्यानोदानसमाननागकूर्मकृकरदेवदत्तधनञ्जयरूपाः प्राणोपप्राणा वा छदाः पत्राणि यस्य द्वौ जीवपरमात्मरूपौ खगौ पक्षिणौ यस्मिन् स आदिवृक्षः प्रवाहानादिशरीराख्यवृक्ष एकस्त्वमेवायनमाश्रयो यस्य धारणं तथाभूत इति भावः ॥ २७ ॥ अथ सत्यस्य योनित्वमुपपादयन्ति—त्वमिति । अस्य परिदृश्यमानस्य चिदचिदात्मकस्य सतो जगतः प्रसूतिः जन्म कारणं त्वमेक एव त्वमेक एवास्य सन्निधानं संनिधीयते उपसंह्रियतेऽस्मिन्निति सन्निधानप्रलयाधिकरणमित्यर्थः । त्वमेक एवास्यानुग्रहः अनुगृह्णातोष्टप्रदानेनेत्यनुग्रहः स्थितिकारणमित्यर्थः । ननु नाहं सत् परः केचिन्मां जीवादभिन्नं पश्यन्तीत्यत्राहुः त्वन्मायया मोहितं चेतो येषामत एव न विपश्चित अज्ञाः नशब्दोयं निषेधार्थकः ततो "नलोपो नञः (६।३।७३) इति न लोपाभावः ये जनास्ते त्वां नाना पश्यन्ति जीवरूपेणावस्थितं पश्यन्तीत्यभिप्रायः । पश्यन्तीत्युक्तेर्न हि जीवविलक्षणं परस्वरूपं दृश्यते कुतो नानादर्शनं "मोहितं नाभिजानाति मामेभ्यः परमव्ययम्" इति श्रीभगवदुक्तेरिति भावः । यद्वा एवं कृत्स्नजगत्कारणत्वमुपपाद्य कार्यकारणयोरनन्यद्रव्यत्वसूचनाय तद्भेदवादं निराकुर्वन्ति, त्वन्माययेति, त्वां नाना त्वां विना इदं जगत् पश्यन्ति त्वत्तः पृथक् सिद्धं जगत्पश्यन्तीत्यर्थः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तत्र शङ्करादिभिः समेतो ब्रह्मा ज्ञानिसुगमगुणविशिष्टं विष्टरश्रवसमभिष्टौति-सत्यव्रतमिति । वयं त्वां शरणं प्रपन्ना इत्यन्वयः । कीदृशं त्वां सत्यव्रतं पूर्णानन्दज्ञानलक्षणं सत्यं तदेव व्रतं व्यावृत्तं रूपं यस्य स तथा तं सद्भ्यः पृथिव्यप्तेजोभ्यः द्वयोर्वाय्वाकाशयोः परत्वाद्विलक्षणत्वात् सत्यपरः तं त्रयाणां वेदानां सत्यत्वान्मुख्यार्थत्वात्त्रिसत्यः तं सत्यस्याबाधितप्रपञ्चस्य योनिं मूलकारणं सत्ये जगत्यन्तर्नियामकत्वेन निहितं सत्यस्य विश्वस्योत्तमानन्दज्ञानदं सत्यं सत्यस्य प्रपञ्चस्य नेत्रं नेतारं सत्यात्मकं

सत्यस्य प्रपञ्चस्य अनृत्वादादानाच्च सत्यात्मकः तं कप्रत्ययः प्रशंसायां उतशब्दः समुच्चयार्थः सच्छब्द उत्तमं प्रयादित्यादिनाऽक्षरात्मको ज्ञातव्यः प्रामाणिकत्वात् ग्राह्यमेतदिति सिद्धं यद्वा अनृताप्रियवर्जनं यथार्थकथनं सत्यं तदेव व्रतं नियमो यस्य स तथा तं "अजस्यावक्रतेजसः" इति हि श्रुतिः 'सत्यसंहिता वै देवा, इति च सत्यपरं धर्मपालकं सत्यं धर्म उदाहृतः, इत्यभिधानं 'सत्यपरं सत्तिरवसादनं तस्मादपरमन्यत्तद्रहितमित्यर्थः। "अविनाशी वा अरेऽयमात्मा" इति श्रुतेः। त्रिषु लोकेषु सत्यं तेषु नष्टेष्वप्यविनष्टमित्यर्थः। सत्यस्य मुख्यप्राणस्य योनिमुत्पादकम् "आत्मन एष प्राणो जायते" इति श्रुतिः सत्ये मुख्यप्राणो निहितं सन्निहितं "स प्राणमसृजत" इतिश्रुतिः सत्यमेव नेत्रं नयनं यस्य स तथा सत्यस्य प्रपञ्चस्य प्रकाशनात् निरुपमचरितत्वेन अबाधितम् "अद्वैतं परमार्थतः" इतिश्रुतिः सत्या देवास्ते नेत्रं शिष्यादिषु नेतारो यस्य स तथा तं देवाः प्राणयन्तेति श्रुतिः सत्यमबाधितमात्मनः कं सुखं यस्य स तथा तम् अबाधितस्वरूपसुखम् "एषह्येव परमानन्दः" इति श्रुतिरिति ॥ २६ ॥ ननु, प्रपञ्चोऽयं केचिज्जीवकर्तृकः केचित्प्रधानकर्तृक इत्यादि। सङ्गिरन्ते तत्राह—एकायन इति। अत्र यत्रशब्दमध्याहृत्यान्वेतव्यं असावादिवृक्षो यत्र स्थितस्तं त्वां शरणं प्रपन्ना इति पूर्वेणान्वयः। चेतनस्य मनुष्यस्य पुरुषार्थत्वादादिभूतमन्तरङ्गं साधनं ज्ञानं तेनादिना वृश्च्यत इत्यादिवृक्षः प्रपञ्चः आदेर्हरेरधीनो वृक्ष इति वा मुक्तामुक्तप्रपञ्चपक्षीकरणाय दूरस्थस्याप्यदस्शब्देन परामर्शः "ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः उतामृतत्वस्येशानः" इत्यादिश्रुतिः। एका चेतनाचेतनात्मकलक्षणा प्रकृतिरयनं आश्रयो यस्य स एकायनः "यत्किञ्चिज्जगत्यां जगत्" इति श्रुतिः। द्वे फले प्रवृत्तिनिवृत्तिलक्षणे यस्य स द्विफलः सत्वादिगुणा मूलानि यस्य सः त्रिमूलः चत्वारो रसा धर्मादिमोक्षान्ता यस्य स चतूरसः तत्र प्रवृत्तफलस्य धर्मादयस्त्रयो रसा निवृत्तफलस्य मोक्ष एको रस इति विभागः। पञ्च मात्राः शब्दादयः शिफा यस्य स पञ्चशिफः 'अस्ति जायते परिणमते विवर्द्धते अपक्षीयते विनश्यतीति' षड्विकारानाप्नोतीति षडात्मा त्वक्चर्म मांसरुधिरमेदोमज्जास्थीनि त्वग्रूपेण वर्त्तते यस्य स सप्तत्वक् देवगन्धर्वदानवराक्षसपिशाचतिर्यङ्मानुषस्थावरलक्षणाः अष्टविटपा यस्य सोष्टविटपः नवाक्षा इन्द्रियाधिष्ठानभूता यस्य स नवाक्षः—

"अक्षो रथाङ्ग आधारे व्यवहारे विभीतके। शकटे पाशके कर्षे द्यूतभेदेऽक्ष इन्द्रिये" ॥ इति यादवः ॥

दशच्छदाः पत्रस्थानीयानीन्द्रियाणि अस्य सन्तीति दशच्छदी प्रवृत्तिमार्गस्था निवृत्तिमार्गस्था इति द्विप्रकाराः खगाः पुण्याऽपुण्यफलभागिनो जीवा यस्य स द्विखगः तदुक्तं "जगद्वृक्षाश्रयाः" इत्यादि हिशब्देन "कारणस्य सदासत्त्वात्प्रवाहेण च सन्नसौ" इत्यादिना जगद्वृक्षस्य सनातनत्वं विष्णुकारणत्वं दर्शयति–हरिरेक एवायनं यस्याऽसौ तथा, द्वे पुण्यपापे फले यस्य स तथा तिस्रो जाग्रदाद्या अवस्था यस्य तिस्रो व्याहृतयो वेदा वा मूलं तस्य स तथा चत्वारो रसाः स्वर्गमोक्षनरकतमोलक्षणा यस्य स तथा, प्राणाऽपानव्यनोदानसमानाख्याः पञ्च शिफा अवान्तरमूलानि यस्य स तथा अशनापिपासाशोकमोहजरामृत्यवः षडात्मानः सहजा यस्य सप्त छन्दांसि त्वक्स्थानीयानि यस्य अष्ट विटपाः पञ्च महाभूतानि मनोबुद्ध्यहङ्काराः विटपा यस्य नव नवाक्षा व्यवहारा अष्टादश भाषा यस्य स तथा तन्त्रन्यायेन नवशब्दस्य एकोच्चारणं पायूपस्थयोरेकत्वेन नवेन्द्रियाणि वा यस्य दशेन्द्रियविषयाः शब्दस्पर्शादयः दशच्छदा अस्य सन्तीति द्वौ खगौ जीवपरमात्मानौ यस्य आदिरदनयोग्यः हरेरन्नभूतः प्रपञ्चः स एव वृक्षः आदिवृक्षः अनेन जगद्वृक्षस्य हरेरधीनत्ववर्णनेन हरेरत्युत्तमत्वमुक्तं भवतीति ॥ २७ ॥ ननु, "ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्त्ता भुवनस्य गोप्ता, एको रुद्रो न द्वितीयोऽवतस्थे" इत्यादिनेतरेषामपि जगदाश्रयत्वप्रतीतेर्हरेरेव तल्लक्षणं कथं स्यादिति तत्राह—त्वमेक एवेति। अस्य सतः सत्यजगतः प्रसूयत इति प्रसूतिः कारणं तिष्ठत्यस्मिन्निति स्थानं निधीयतेऽस्मिन्निति निधानम् अनुगृह्णाति रक्षतीत्यनुग्रहः संवृतचेतस आवृतज्ञानाः त्वां नाना पश्यन्ति ये विपश्चितः ते न पश्यन्तीत्यनेन हरेरेवोक्तलक्षणं नान्यस्येति निरणायि ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ब्रह्मेति अत्रागमने पश्चाद्भावि मुन्यादीनामप्राधान्यात् सहार्थयोगे तृतीया च स्तवे तु यौगपद्येन प्राधान्यात् सर्वेषां कर्त्तृत्वमेव विवक्षितमिति ऐडयन्निति बहुत्वं पूर्वं मुन्यादिमिलतौ तावागतौ पश्चात्तौ च ते च तुष्टुवुरित्यर्थः। पूर्वं तेषामपि प्रधानकर्त्तृत्वेनैककर्त्तृकत्वाविरोधात् क्त्वा योगश्च न यदित्यस्य व्याख्यायाम् ॥ २५ ॥ सत्यव्रतं विमर्शयति--सत्त्वेन सच्चिदानन्दघनत्वेन उपपन्नानि श्रौतसिद्धयुक्तिसिद्धानि ॥ २६—२८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ देवकीहृदयस्थं श्रीकृष्णं ब्रह्मादयः स्तुवन्त ऊचुः—सत्यव्रतमित्यादि। सत्यव्रतं सत्यसङ्कल्पम्,—अङ्गीकृतप्रतिपालनात्। सत्यं ब्रह्म तस्मादपि परमुत्कृष्टं परमानन्दप्रदं सविशेषम्,–तस्य निर्विशेषस्य वैभवत्वात्। उक्तञ्च—(भा०४।९।१०) "सा ब्रह्मणि स्वमहिमन्यपि" इति। त्रिसत्यं त्रिषु कालेषु सत्यम् त्रीणि श्रीविग्रहलीलास्वधिष्ण्यानि सत्यानि यस्येति वा। अतः सत्यस्य वैकुण्ठादेर्योनिमुत्पत्तिस्थानम्। निहितञ्च सत्ये सत्यस्यास्य वैकुण्ठादेः, सत्ये सति सत्यत्वे सति नितरां हितम्, सत्यशब्दो

धर्मवचनोऽप्यस्ति, (भा० ५।१६।२७) "सत्यं शौचम्" इत्याद्युक्तेः। सन् वैष्णवः, तस्मिन् सति अमृतान्मोक्षादपि सत्यं दुर्लभं यत् प्रेम, तस्य नेत्रं नेतारं प्रापकम्। सत्यात्मकं सत्यस्त्रिकालसिद्ध आत्मा विग्रहो यस्य तं त्वां श्रीकृष्णं श्रयणं प्रपन्नाः स्मः ॥२७-२८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

२६—सत्यव्रतमित्यादि। सत्यव्रतं सत्यसङ्कल्पम्, सत्यं ब्रह्म तस्मादपि परम्, त्रीणि श्रीविग्रहलीलास्वधिष्ठानानि सत्यानि, यतः सत्यस्य योनिमुत्पत्तिस्थानम्, अस्य लोकस्य सत्ये सति निहितं नितरां हितमनुकूलम्, सति भक्ते अमृतात् मोक्षादपि सत्यं दुर्लभं यत् प्रेम तस्य नेत्र नेतारं, सत्यं निरन्तरमात्मसु आत्मीयेषु परिजनेषु कं सुखं यस्य त्वां श्रीकृष्णं प्रपन्नाः ॥ २७—२८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

वृषणं लीलामृतवर्षिणं कृष्णाम्बुदं ब्रह्मा भुवनचतुर्दशकेदारमहाकृषीवल इव भवश्चोल्लासितसाधुपक्षो नृत्यविनोदीमहानीलकण्ठ इव नारदादिभिस्तदेकजीवनैर्महासोत्कण्ठचातकैरिव देवैः कंसजरासन्धादिदावानलावृतैर्महामतङ्गजैरिव सह ऐडयन् ऐडत स्तुष्टुवुरिति। यावद्बहुवचनमार्षम् ॥ २५ ॥ "त्वमेव वास्तवं वस्तु संसारेस्मिन्न वास्तवे। त्वं भक्तैर्गम्यसे नान्यैरिति स्तुत्यर्थ ईक्षितः" स्वभक्तपालनैकव्रतत्वान्नित्यसत्यत्वाच्च त्वमेव प्रपत्स्यर्ह इत्याहुः सत्यं व्रतं यस्य तं "सकृदेव प्रपन्नो यस्तवास्मीति च याचते। अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम" इति तदुक्तेः। न च स्वभक्तपालकदेवतान्तरवत्त्वमनित्योऽनुत्कृष्टश्चेत्याह, सत्वः सर्वकालदेशवर्ती परः श्रेष्ठश्च तम् यद्वा सत्यं सत्यनामानं "सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितम्। सत्यात्सत्यो हि गोविन्दस्तस्मात्सत्वो हि नामतः। इत्युद्यमपर्वोक्तः परं परमेश्वरं त्वद्बुद्धिबलादयोऽपि सत्या एवेत्याहुः तिस्रः ज्ञानबलक्रियाशक्तयः सत्या यस्य तं "न तस्य कार्यं करणं च विद्यते। न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः। त्वदंशा अपि सत्या इत्याहुः सत्यस्य मत्स्यकूर्माद्यवतारवृन्दस्य योनिमुद्गमस्थानमवतारिणमित्यर्थः। त्वद्धामापि नित्यमित्याहुः निहितं सन्निहितं स्थितमित्यर्थः। सत्ये मथुरावैकुण्ठादिलोके किञ्च सारस्य सार इतिवत् समस्तचिद्वस्तुसारस्त्वमेवेत्याहुः, सत्यस्य सत्यमिति। यद्वा सत्यस्य यत्किञ्चित् कालवर्तिनो मायिकप्रपञ्चस्य प्रकाशकत्वात् सत्त्यं सर्वकालवर्तिनं "चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" "इतिवत् सत्त्यं ह्य वेदं विश्वमसृजत" इति माध्वभाष्यप्रमाणितश्रुतेः। हे ऋत नित्यसत्यस्वरूप! सत्यं नेत्रं सर्वेन्द्रियोपलक्षकं नयनेन्द्रियं यस्य तं सत्त्य आत्मा श्रीविग्रहो यस्य तम् ॥ २६ ॥ ननु यदि देहेन्द्रियधामादिविशिष्टोऽहमेव सत्यस्तर्हि जगदिदं किमसत्यम्? तत्र जगतः सत्यत्वेपि कालच्छेद्यत्वं तव तु तदभाव इत्याहुः—एकायन इति। असौ प्रपञ्च आदिवृक्षो भवति प्रथमत एव प्रवृत्तत्वादादिः वृश्च्यते कालेन छिद्यते इति वृक्षः समष्टिव्यष्टिदेहरूपः एका प्रकृतिरयनमाश्रयो यस्य सः द्वे सुखदुःखे फले यस्य सः त्रयो गुणा मूलानि यस्य सः चत्वारो वर्णधर्मा आश्रमधर्मा वा रसा यस्य सः पञ्च इन्द्रियाणि विधा ज्ञानप्रकारा यस्य सः षडूर्मयः आत्मानः स्वभावा यस्य सः अत्र शोकमोहजरामृत्युक्षुत्पिपासाः षडूर्मयः सप्त धातवस्त्वचो यस्य सः त्वगसृङ्मांसमेदोऽस्थिवसाशुक्राणि धातवः अष्टौ पृथिव्यप्तेजोवाय्वाकाशमनोबुद्ध्यहङ्काराः विटपाः शाखाविस्तारा यस्य सः नव द्वाराणि अक्षाः छिद्राणि यस्य सः दश प्राणाः छदाः पत्राणि विद्यन्ते यस्य स दशच्छदी द्वौ जीवेश्वरौ खगौ यस्मिन् सः ॥ २७ ॥ त्वच्छक्तिकार्य्यत्वात् वृक्षोऽयं त्वदीय एवेत्याहुः—त्वमेव अस्य प्रपञ्चवृक्षस्य सतः सत्यस्य एक एव प्रसूतिरुत्पादकः सन्निधानं लयस्थानम् अनुग्रहः पालकः भावप्रधाननिर्देशेन तत्तदाधिक्यमभिप्रेतम्। ननु, भवदादयो ब्रह्मविष्णुरुद्रा एवंभूताः प्रसिद्धाः कथमहमिति चेत्तत्राहुः त्वन्मायया असंवृतचेतसः अनावृतज्ञानास्त्वां नाना न पश्यन्ति ये विपश्चितस्ते ब्रह्मादीनां त्वदवतारत्वादिति भावः ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र श्रीदेवकीसमीपे गीर्भिः भगवद्गुणस्वरूपादिविषयाभिर्वाणीभिः वृषणं पुरुषार्थवर्षिणम् ऐडयन् तुष्टुवुः बहुवचनं नारदादिसाहित्यात् गीर्भिरिति मूर्तिमद्भिर्वेदैश्च साकमिति वा ॥ २५ ॥ क्षीरनिधेस्तीरे भगवदवतारार्थं तदाराधनं कृतं तत्फलदानेन भगवता सर्वं भजनादिकं सत्यं कृतमिति मुदिताः सत्यत्वेन तावत्स्तुवन्ति, सत्यव्रतमिति, सत्यं व्रतमस्मदादिकर्तृकं भजनं यस्य तम् सत्यं परं भजनफलं यस्मात्तम् त्रिसत्यम् त्रीणि भक्तभजनतत्फलानि सत्यानि यस्मात्तम्। देवकीजठरेऽस्मद्भजनादागतेन त्वया न केवलं भजनतत्फलयोरेव सत्यत्वं दर्शितमपि त्वस्माकं सत्यभक्तत्वं दर्शितमिति फलितोर्थः "सदेव सौम्येदमग्र आसीत्" इति श्रुतेः सदुपादानकत्वात्सत्यस्य प्राकृतलोकस्य योनिमुपादानरूपं कारणम् अस्यापि सत्यता दर्शिता यत्र विहन्तुं प्रवृत्तोसीति भावः। सत्येऽप्राकृते लोके निहितं सर्वदा स्थितम् दर्शितं तस्य लोकस्य नित्यत्वं यस्मादिहागतोसीति भावः। तस्य लोकस्य प्राकृतत्वं "दर्शयामास लोकं स्वं गोपानां तमसः परम्" इत्यत्र स्फुटीभविष्यति किं बहुना सत्यस्य सर्वस्य प्रकृतिपुरुषकालादेः तव लीलौपयिकस्य सत्यं परसत्तारूपम् ऋतसत्ययोः सूनृता वाणी समदर्शनयोः भवदीयोभयलोकसुखसाधनयोर्नेत्रं नेतारम् इत्थं सर्वशः सत्यात्मकं त्वां वयं शरणं प्रपन्नाः प्राप्ताः ॥ २६ ॥ ननु सत्यस्य योनिं सत्यस्य सत्यमित्येवं कणादितत्त्वविन्मुनिमतविरुद्धं भवतां वचनमित्यत्र जगदभिन्ननिमित्तोपादानहेतुत्वं भगवतो वदन्तस्तन्मतं निराकुर्वन्ति, एकायनमिति द्वाभ्याम्। असौ आदिवृक्षः त्वं पदार्थरूपपक्षिभोग्यः

एकायनः एकत्वमेव चिदचिच्छक्तिमद्ब्रह्मायनमाश्रयो यस्य सः द्विफलः सुखदुःखफलः त्रिमूलः सत्वादिगुणमूलः चतूरसः पुरुषार्थचतुष्टयरसः पञ्च अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः कोशाः विधाः प्रकारा यस्य सः "स वा एष पुरुषः पञ्चधा पञ्च नाम" इति श्रुतेः । षट् जन्ममृत्युक्षुधापिपासाशोकमोहाख्या ऊर्मयः आत्मानः प्रकृतयो यस्य सः सप्तत्वक् मांसरुधिरमेदोमज्जास्थिशुक्राख्या धातवस्त्वचो वल्कलादीनि यस्य सः—

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा" ॥

इत्यष्टप्रकृतयो विटपा यस्य सः नव मुखादीनि द्वाराण्यक्षाः छिद्राणि यस्य सः दश प्राणापानसमानोदानव्याननागकूर्मकृकरदेवदत्तधनञ्जयाख्याः प्राणाः छदाः पत्राणि विद्यन्ते यस्य सः द्वावात्मान्तरात्मानौ खगौ यत्र सः ॥ २७ ॥ "वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्" इति श्रुतिप्रोक्तः अनादिवृक्षः बीजतुल्यैरनन्तैरंशैरनन्तब्रह्माण्डरूपवृक्षोत्पादकोऽचिंत्यानन्तस्वाभाविकगुणशक्त्याद्याश्रयः सर्वव्यापकः सर्वेश्वरो देवकीजठरगस्त्वमेकः समानाधिकशून्यः एवकारेणोपकरणनिरपेक्षः अस्य समष्टिव्यष्टिरूपस्य विश्ववृक्षस्य सतः सत्यस्य प्रसूतिः औषधादेः क्षितेः सकाशादिव प्रकर्षेण सूतिर्जन्म यस्मात्सः त्वदुपादानकमिदं जगत् न तु परमाण्वादिनानाकारणकमित्यर्थः । सम्यक् क्षितावौषध्यादिकमिव सम्यग् निधीयते यस्मिन्तत्संनिधानं त्वमेव अनुगृह्णातीत्यनुग्रहः पालनादिहेतुश्च त्वमेव "तदात्मानं स्वयमकुरुत" इत्यादिश्रुतयः जगतो निमित्तकारणमुपादानकारणं च त्वामेवाहुः ये तु त्वन्मायया यया संमोहितं जगदित्युक्तया संवृतचेतसः कुलालादिवन्निमित्तमात्रं त्वां नानापरमाण्वादिकं च कारणं पश्यन्ति न तु विपश्चितो विवेकिनः श्रुत्युक्तजगत्कारणविदो नाना पश्यन्ति ॥ २८ ॥

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

सत्यव्रतं सत्यपरमिति श्लोके विद्यमानानां सर्वेषामपि सत्यपदानामबाधितत्वरूपैकार्थत्वभ्रांतिनिरासाय प्रमाणेनैव विलक्षणार्थत्वं च दर्शयन्सत्यव्रतं सत्यपरमित्यादिवाक्यान्यपि व्याचष्टे ॥ सच्छब्द उत्तमं ब्रूयादित्यादिना ॥ तीति तकार आनंदं वदेदित्यर्थः । यतः कारणाद्धरेः रूपं नित्यं तादृक् पूर्णानंदज्ञानात्मकं ततस्तद्रूपं सत्यशब्दोदितम् । यतश्च विष्णुः सत्यशब्दोदितरूपवांस्ततः कारणात्सत्यव्रत इत्युच्यते । अनेन सत्यं व्रतं वर्तयति प्रवर्तयतीति व्रतं रूपं यस्य स तथेति सत्यव्रतशब्दस्य विग्रहः सूचितः । तथाऽवर्णी तण्यर्थाद् वृतु वर्तन इति धातोः कर्तर्यप्रत्यये धातोरमारमि च इको यणचि कृते व्रतशब्दनिष्पत्तिरिति सूचितं भवति । भूतत्रयं पृथिव्यप्तेजोरूपं सदित्युच्यते । तदन्यद्भूतत्रयादन्यमिति समुद्दिष्टम् । तुः स्वातंत्र्यरूपविशेषार्थकः । स्वातंत्र्येण तत्परत्वात्सत्यशब्दवाच्यप्रपंचात्परत्वादत्युत्तमत्वात्परः सत्यपर इत्युच्यते इत्यर्थः । वेदमुख्यार्थरूपत्वादित्यनेन त्रिभिः ऋगादिवेदैः सद्यते गम्यते ज्ञायत इति त्रिसत्य इति भागवतस्थत्रिसत्यपदस्य विग्रहः सूचितः । तथा पदलृ विशरणगत्यवसादनेष्विति धातोः कर्मणि यप्रत्यये धात्वादेः षस्य स इति सूत्रेण षस्य सत्वे सत्य इति शब्दरूपनिष्पत्तिः । गत्यर्थानां ज्ञानार्थत्वमिति सूचितं भवति । उत्तमानंदज्ञानदातृत्वत इत्यनेन भागवते सत्यस्य सत्यमित्यत्र सत्यमितिपदं मत्वर्थीयाच्प्रत्ययांतमिति सूचितम् । तथा सत्यमुत्तमानंदादिकं विद्यते यस्य सकाशात्सत्य इति सत्यशब्दव्युत्पत्तिश्च सूचिता भवति । अत्तृत्वाच्च तदादानादित्यनेन सत्यात्मकमित्यत्रात्मशब्दार्थद्वयं षष्ठीतत्पुरुषसमासश्चोक्तो भवति । आङ्पूर्वाभ्यामद भक्षणे डु दाञ् दान इति च धातुभ्यां कर्तरि डप्रत्यये टिलोपे चात्मशब्दनिष्पत्तिर्ज्ञेया ॥२७॥ नन्वेकायनोऽसौ द्विफल इति श्लोकोक्तो वृक्षः प्रसिद्धाम्रादिवृक्षश्चेत्तर्हि तस्य द्विफलत्वादिकमयुक्तम् । आम्रादिवृक्षस्य बहुफलादिमत्त्वात् । यद्यप्रसिद्धवृक्षः स्यात्तर्हि सः कः कानि च तस्यैकायनादीनीत्याशंकां प्रमाणेनैव तत्सर्वं प्रदर्शयन्परिहरति ॥ जगद्वृक्षाश्रया ह्येषेत्यादिना । अनेन जगदेवात्र वृक्षाख्यं चिदचित्प्रकृत्यादय एव तस्य वृक्षस्यायनादयो भवंतीत्युक्तं भवति । मात्राः शब्दादयः पंचशिफा अवांतरमूलानि । उत्पत्तुमिच्छतीत्युत्पित्सुस्तस्य भाव उत्पित्सुत्वम् । जननमिति यावत् । तदेवादिर्येषां त उत्पित्सुत्वादयः । आदिशब्देन सत्त्वपरिणामविवर्धनापेक्षया विनाशा गृह्यंते । प्रकारास्तन्निष्ठधर्मा इत्यर्थः । अनेन षडात्मनेत्यत्रात्मशब्दः प्रकारार्थ इत्युक्तं भवति । विटपाः शाखाः । इन्द्रियाण्यस्य पत्राणीत्यनेन भागवतस्थदशच्छदीत्येतद्व्याख्यातं भवति । दशेंद्रियाणि छदाः पत्राण्यस्य संतीति विग्रहश्च सूचितो भवति । द्वारो द्वार इत्यनेन नवाक्ष इत्येतद्व्याख्यातं भवति । नवद्वारोऽक्षिद्वयं कर्णद्वयं नासापुटद्वयं मुखं पायूपस्थे चेति नवसंख्याकानींद्रियगोलकान्येवास्य वृक्षस्य द्वारः प्रसिद्धवृक्षकोटरस्थानीयानि स्मृताः स्मृतानीत्यर्थः । प्रवृत्तं चेत्यादिना द्विफल इत्येतद्विवृतं भवति । धर्मादयस्त्वित्यादिना चतूरस इत्येतद्विवृतं भवति । तुर्विशेषार्थः । धर्मादयस्त्रयः प्रवृत्तरूपफलस्य रसा मोक्षस्तु विशिष्टो रसः । एकफलस्य निवृत्तरूपफलस्य ज्ञातव्य इत्यर्थः । प्रवृत्तास्येत्यादिना द्विखग इत्येतद्विवृतं भवति । हिः पादपूरणे हेतौ विशेषेऽप्यवधारण इति विश्वकोशाभिधानाद्भागवतस्थहिशब्दो जगद्वृक्षस्य सदासत्त्वाख्यविशेषं वक्ति । ननु घटादिरूपजगतोऽनित्यत्वस्य प्रत्यक्षादिप्रमाणसिद्धत्वात्कथं तद्विरुद्धं सदा सत्त्वं जगतो हिशब्देनांगीक्रियत इत्यतः प्रमाणेन तदुपपादयति ॥ कारणस्य सदा सत्त्वादिति । कारणस्य कारणरूपस्य प्रकृत्यादेः कस्यचिज्जगतः सदा सत्त्वात्कस्य चित्कार्यरूपस्य जगतः प्रवाहेण सदा सत्त्वादसौ कार्यकारणरूपजगत्तरुः सदा सन्विद्यमानः । ननु पूर्वमभूतस्योत्तरत्राभविष्यतो जगतः कथं सदा सत्त्वमित्यत आह । न कदाचिदिति । असौ जगत्तरुः कदाचित्स्वतो वा परतो वा न

भूतः पूर्वकाले विद्यमानो नेति न । किंतु भूत एव । तथा कदाचिन्न भविष्यतीति न । किंतु भविष्यत्येव । उपसंहरति ॥ सन्न इति । अतः कारणरूपेण प्रवाहरूपेण च पूर्वोत्तरकालयोर्विद्यमानत्वादसौ जगत्तरुः सदा सन्नित्यर्थः । अस्य सर्गादिकृद्विष्णुरित्यनेनार्धेन त्वमेक एवास्य सतः प्रसूतिरिति श्लोक उक्ततात्पर्यार्थो भवति ॥ २८–२९ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

चिंतयान इति । अत्र सत्यत्वमिथ्यात्वयोर्व्यावहारिकभेदांगीकारे तस्यानित्यत्वेनांते तयोरैक्यापत्त्या मिथ्यात्वस्यापि ब्रह्मण्यापत्तिरिति भयेनाद्वैतिभिरपि जगदीशयोरपि पारमार्थिकभेदस्य स्वीकारार्हत्वात्किं पुनर्भेदवादिभिरत उभयेषामपि तन्मयशब्दस्य स्वरूपार्थोक्तौ विरोधप्रसंगोऽतोऽर्थांतरम् ॥ तन्मयम् । मद्धंता विष्णुरत्रैव स्यात्किमिति भयेन तत्तत्पदार्थस्थतया तत्प्रतिमम् । जगदपश्यत् । यद्वा । जगत् । अहृषीकेशं विष्णुरहितम् । कर्तव्यमिति विशेषेण या चिंता तया तन्मयं तस्य विष्णोर्हिंसोपायम् । मिनु हिंसायामिति धातोः । लक्षणोपगमाच्च । नो पश्यत् न दृष्टवान् अतो नोक्तविरोधः ॥ २५ ॥ ब्रह्मेति । अनस्तोत्रक्रियाकर्तुर्मुन्यादिसाहित्योक्तौ बहुत्वापत्त्याऽस्तुवदित्येकवचनं विरुद्धमिति मंदाशंकापरिहारार्थम् उच्यते । तथात्वे पुच्छं जग्राह सामर इति प्रतिवंदी दुर्वारा स्यात् । अतः कर्तुर्वचनानुरूपेण कर्तरि क्रियावचनेन भवितव्यमिति नियमादत्र ब्रह्मणः कर्तुरेकवचनात् क्रियैकवचनं युज्यते । न च भवश्चेत्यनेन बाधः । तस्याप्येकवचनेन समुच्चये न नियमभंगः तत्रागतो नारदस्तुंबरुश्चेति भारतादिष्वेतादृशप्रयोगस्य बहुशो दृष्टत्वात् । केचिदत्र गीर्भिर्वृषणमैडयन्निति पाठं कल्पयंति । तदयुक्तम् । कर्तुर्बहुवचनांतत्वाभावेनैकवचनांतस्य तृतीयस्याप्यभावेन बहुवचनांतक्रियाऽसंगतत्वात् । न च सेति पदेन भूम्या ग्रहणं युक्तम् । तस्याः स्वरूपतो जडत्वेन स्तवनायोगात् । गोरूपिण्याश्च पशुत्वेन वचनायोगात् । नापि व्यसनं समवोचतेत्यत्र वचनलाभः । तत्रापि ससंकेतेनावोचल्लक्षणयाऽसूसुचदित्यस्यैवौचित्यात् । अत्रापि लक्षणाऽस्त्विति चेन्न । अर्धजरतीयानुपपत्तेः । ब्रह्मभवयोर्वचनवृत्त्या गोरूपिण्याः सूचनवृत्त्येत्येकक्रियाया अर्थद्वयांगीकारानर्हत्वात् । श्रीधरेणाप्यैडयदिति पाठे वल्हमेति तद्व्याख्यानुसारिणो लेखकहस्तदोषादैडयन्निति लाभेन तथैव पठंतीति । एतच्चिंत्यम् । न हि व्याख्यातैवमसंबद्धं लिखेत् ॥ २६ ॥ सत्यव्रतमिति । अन्यत्र विश्वस्य मिथ्यात्वोक्त्याऽत्र च सत्यत्वोक्तेर्विरोधः । पूर्वत्रास्तुवदित्येकवचनेनात्रोक्तस्य प्रपन्ना इत्यस्य बहुवचनस्य विरोधांतरं चातोऽर्थ उच्यते । विश्वमिथ्यात्वस्य विश्वांतर्वर्तित्वेन मिथ्यात्वासिध्या सिद्धां विश्वसत्यतां दृढीकर्तुं स्कांदोक्तविश्वसृष्टृत्वाद्यष्टलक्षणेष्वपि विश्वसत्यतां ब्रवीति ॥ सत्येति । विश्वं सत्यमिति श्रुतेरत्राष्टौ सत्यशब्दा विश्वार्थकाः । तस्य विश्वस्य व्रतम् आवरकत्वाद्व्याप्तत्वाच्च ज्ञानं यस्मात्तम् । वृञ् वरणे । अत सातत्यगमने इति च धातोः । अनेनाज्ञानदत्वं लक्षणम् ॥ सत्यपरम् । सत्यस्य परम् अज्ञानविरुद्धत्वात्संसारतः पालकत्वात्परमसाधनत्वाद्वा ज्ञानं यस्मात्तम् । अनेन ज्ञानदत्वं लक्षणम् ॥ त्रिसत्यम् । अतीतानागतवर्तमानरूपेण त्रिविधं सत्यं विश्वं यस्मिन्निति संहारकत्वं लक्षणम् ॥ सत्यस्य योनिम् । तस्य योनिं कारणमिति स्रष्टृत्वलक्षणम् ॥ सत्ये निहितम् । स्थितमित्यनेन पालकत्वलक्षणम् ॥ सत्यस्य सत्यम् । सत्यं पुनरावृत्त्यादिदोषवर्जितत्वात्सत् निर्दोषं मोक्षं यापयति प्रापयति तम् । अनेन मोक्षदत्वलक्षणम् ॥ सत्यनेत्रम् । तस्य नेत्रं मंथनरज्जुरूपं बंधनं यस्मात्तम् । इत्यनेनबंधकत्वलक्षणम् ॥ सत्यात्मकम् । तस्यात्मत्वात्स्वामित्वान्नियामकत्वं लक्षणमिति । तं त्वां शरणं प्रपन्ना इत्यन्वयः । न वचनमिव शरणागतिर्द्वयोः किंतु सर्वेषामिति भावेन बहुवचनम् । अस्तुवदिति कर्तृवचनानुरोधादेकवचनात्मकस्यापि कर्तुर्द्वित्वदर्शनाद्ब्रह्मभावावूचतुरित्युभाभ्यामपि सर्वदेवाभिप्रायं स्वमनसोरानीयोक्तत्वात्प्रपन्ना इति बहुवचनम् । अतो न विरोधः । सच्छब्द उत्तमं ब्रूयादित्यादितात्पर्यानुसारेणार्थस्य तु व्याख्यातृप्रदर्शितत्वान्नेह प्रपंचः । अग्रिमस्यापि श्लोकस्य संगतिरित्थम् । हि यस्मात् । बंधनहेतुर्देहादिरूपः प्रपंचः । आदिवृक्षः आदिना सर्वकारणरूपेण त्वया वृश्च्यते छेद्यते स तथा । अतस्त्वां शरणं प्रपन्ना इति योजना ॥ २७–२८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्प्रकारमाह ॥ आसीन इति । आसीनः संविशञ्छय्यां हृषीकेशं चिन्तयानो जगत्सर्वं तन्मयमपश्यन् भीतिशङ्कापदमभूदिति भावः ॥ २५ ॥ हिरण्यगर्भो गर्भगमर्भकमेतैः समेत आगत्य तुष्टाव विष्णुमित्याह ॥ ब्रह्मेति । यो भृगुर्मम तव च रीतिं परीक्ष्य यं पदोरसि ताडयित्वाऽपि येन बहुमतिं लेभेऽस्यासुरस्य सहवासेन कदाचित्सद्धीरभिव्यज्यत इति भवानुभवसिद्धं विशेषं द्योतयितुमेव देवेभ्यः पृथक् कृत्य भववचनमिति ज्ञेयम् । देवैरिन्द्राद्यैः सानुचरैर्गन्धर्वाद्यनुचरसहितैर्नारदादिभिः सानुचरैर्गिरिशृङ्गचरैः ऋषिभिरित्यप्यन्वयः । अनेन स्तुत्यगुणानां बाहुविध्यं गिरां भूयिष्ठत्वेन द्योत्यते । यथेतरसुरा अवतारेण हरिपरिचरणयोग्या न तथा कमलभव इत्यप्याह ॥ अभव इत्युत्पत्तिरहित इति । अतस्तत्रेत्युपपन्नम् । ब्रह्मणो नावतारोऽस्ति ब्रह्माणमप्यनवतार इत्यादेः ॥ २६ ॥ सत्यव्रतं सत्यपरमिति श्लोके सत्यपदाष्टकं तस्याबाधितत्वमात्रार्थकत्वं पुनरुक्त्यादिबाधितमतोऽर्थाप्रतीतेर्मानेन तदर्थमाह ॥ सच्छब्द इति । सदिति शब्द उत्तमं तत्त्वं ब्रूयाद्दार्ढ्यैवेति सर्वत्र ज्ञेयम् । आनन्दन्तीतीकार उच्चारणार्थः । केचिद्ध्रस्वमेव ति पठन्ति । तृप प्राणन इत्यस्मात्क्विप् ङिश्चेति वर्णयन्ति । वस्तुतस्तु तीति समञ्यन्तम् । ति तु इति हलन्तकारे आनन्दं वदेत् वाच्यं वदेदित्यर्थः । इति हेतुसमर्पकः सन्नुत्तरत्रान्वेति । तद्विवरे दर्शयिष्यामः । येति प्रातिपदिकनिर्देशः । गत्यर्थानां नयेन यो ज्ञानं समुद्दिष्टमिति यतस्ततः पूर्णानन्ददृशिरर्थः । संश्चासौ उत्तमः पूर्णः तु आनन्दं यो ज्ञानं च तत् व्रतयति प्रवर्तयतीति व्रतं सत्यं

पूर्णानन्दज्ञानं मतं यस्य स तं यतो नित्यं हरेस्ततो विष्णुः सत्यव्रतस्तच्छब्दवाच्य इत्यर्थः । ततश्चान्तर्णीतण्यर्थाद्वृतु वर्तन इत्यस्मात्कर्तर्यप्रत्यये धातोश्चागमे यणादेशे व्रतम् । वृणोतेर्वा सत्यमुक्तम् । रूपं वृणोति स तथा तं वा । सत्यपरमिति विवृणोति ॥ सद्मूर्तेति । भूतत्रयं सदित्युच्यते । सन्नामकं यदन्यद्वायोश्चान्तरिक्षाच्चैतत्सदिति श्रुतेः पृथिव्यप्तेजोरूपं त्यं तदन्यद्वाय्वन्तरिक्षाख्यमिति पञ्चभूतात्मा पदार्थः सत्यपदाभ्यां लभ्यते । यस्मात्परं विलक्षणमिति त्यं तदन्यत्समुद्दिष्टं ताभ्यां परस्तत्परः सत्यपर इत्युच्यत इत्यर्थः । त्रिसत्यशब्दार्थमाह । वेदेति । त्रिभिर्वेदैर्ऋगादिभिः सत्यते गम्यते ज्ञायत इति त्रिसत्यः । मत्वाज्जश्त्वाभावः । अथर्ववेदविभागोऽल्पीयानिति तदनुक्तिरित्येके । त्रयश्च वेदा ऋग्यजुरथर्वणास्तैः साम्नो ऋच्यध्यारूढताम्नानात्तदुक्तौ तदुक्तिरिति केचित् । त्रिभिर्ऋग्यजुरथर्वभिः सत्ता तत्त्रिकोत्तमेन साम्ना चेत्याहत्य चतुर्भिर्योच्यते ज्ञायत इति सत्य इत्यपरे । वेदानां सामवेदोऽस्मीत्यादेः । असाधारण्येन सर्वत्रापि मुख्यप्रतिपाद्यत्वं ज्ञेयमिति मुख्यार्थरूपत्वादित्युक्तिः । गुह्यदर्शनभाषे च भाषा चैव समाधिका । तिस्रस्तु मूलभाषाः स्युरित्येकादशतात्पर्योक्तेस्तिस्रो भाषा सत्यो यत्र स वेदश्चतुरात्मा तेन याप्यत इति त्रिसत्य इति वा । सत्यस्य सत्यमित्यर्थोपयति । सत्यस्य चेति । सन्तौ उत्तमौ त्यौ यस्मात्सत्य इति विग्रहे नार्शं आद्यजायास इति ज्ञेयम् । स ये निहित इति पदार्थमाह । सत्यस्य इति । सत्यं चोक्तरूपः प्रपञ्च इति प्रपञ्चयति । जगत्स्थितेरिति । सत्ये निहित इत्यभिहित इत्यर्थः । व्युत्क्रमेण व्याकरणं तद्गुणाभेदज्ञापनार्थमिति ज्ञेयम् । विष्णुः सत्यं नेतेति नेत्रः । सत्यं चोक्तं जगत् । नीञ् प्रापणे दाम्नीति ष्ट्रन् । नेत्रो नेतरि भेषवदिति विश्वः । सत्यस्यात्तृ वात्तस्यैवादानादिकर्तृ वाच्य सत्यस्यात्मैव सत्यात्मकस्तमित्याह । अत्तत्वाच्चेति । आङ्पूर्वाद्द भक्षणे तथा तत्पूर्वादेव डुदाञ् दान इत्यस्माच्च कर्तरि ण्वुल्प्रत्यये टिलोपे च वँ चात्मनि ज्ञेयम् । ततश्चायं श्लोकार्थः । धराज्वरज्वरणाय धरोपरि चरितुमवतारमनधरास्यन्दमीरितां गिरं तामृतीचकार कारुणिकशिरोमणिरिति तच्छब्दापुरस्करणेन तथा सत्यं ज्ञानमनन्तमिति श्रुतौ प्राथमिकतया तत्कीर्तनात्तामनुसंरंभ्र सरसिजः स्वस्य तत्सनामलोकप्रदत्वोपाधिनाऽपि स्तौति । सत्यव्रतमिति । पूर्णज्ञानानन्दरूपं पञ्चमहाभूतभिन्नं वेदमुख्यवेदनीयं सत्यस्य प्रपञ्चस्य सत्यं जगति स्थितं सत्यस्य योनिमबाधितप्रपञ्चस्य कारणम् । तात्पर्ये सत्यशब्दार्थो व्याख्यातो बहुत्र योनिशब्दश्च सुमिलार्थं इति मन्तव्यम् । उत्तमानन्दज्ञानप्रदमुतापि च जगन्नियामकं लवलये जगदादकं तथा तदादानादिकर्तारं यः क्रमात्सत्यत्वादिशब्दबोध्यस्तं त्वां वयं शरणं प्रपन्नाः स्म इति । इह बहुधा विवरीतुं शक्यं श्लोके विचित्यमत्येति । विस्तरादतो विरतं किञ्चाचार्यैरच्चारि नोत्कोचः ॥ २७ ॥ एकायनोऽसाविति श्लोकेऽनेकपदार्थाः सङ्केतेन कीर्तितास्ते क इत्यतस्तत्समाख्यारूपं तन्त्रभागवतवचनमुदाहृत्य तान्दर्शयति ॥ जगदिति । जगद्वृक्षेति यच्चजगाद तेनादिवृक्षपदं विवृतं ज्ञेयम् । एषा प्रकृतिश्चिदचिद्रूपिण्येकाऽऽयनमाश्रयो यस्य स तथा गुणत्रयमवान्तरमूलं यस्य सः । अनेन त्रिमूल इति विवृतम् । मात्राः शब्दादिपञ्चकं शिफा जटाः । शिफा जटायामिति विश्वः । तस्य जगन्नगस्योत्पत्तुमिच्छतीत्युत्पित्सुः सनाशंसेत्युस्तस्या भाव उत्पित्सुत्वं जननं तदेवादिर्येषां ते जन्मसत्तापरिणामवृद्ध्यपक्षयविनाशाः षट्प्रकारा विकारास्तानाप्नोतीति षडात्मा । साम्यादुभयत्र रूपकानुपन्यसनम् । अष्टौ विटपानाह । विटपा इति । देवा गन्धर्वा दानवा राक्षसाः पिशाचास्तिर्यञ्चो मानुषस्तस्थुट्शब्दोऽयं तस्थुषः स्थावराः सुपां सुपो भवतीति जसः शसा दशेन्द्रियाण्येव पत्राणि द्वाशब्दोयं नवामक्षिद्विकं कर्णद्वयं नासापुटिकाद्विकं मुखं पायूपस्थे चेति । गोलकरूपद्वार एव द्वारः कोटरादयः स्मृताः । सप्त त्वक्चर्ममांसरुधिरमेदोमज्जाऽस्थीन्येकत्रापरत्र प्रसिद्धास्त्वच इति प्रसिद्धे मतेऽनुक्तिः । द्विफल इत्यर्थोपयति । प्रवृत्तं च निवृत्तं चेति । चतू रस इत्यस्यार्थमाह । धर्मादय इति । ते त्रयो रसाः प्रवृत्तफलरूपाः । तुर्विशेषमेकस्मिन्रसे द्योतयति । तमेवाह । मोक्षेति । उर्वरितैकफलस्यैकं निवृत्तं कर्म तस्य फलं मोक्षे रस इति । द्विखग इत्यत्र द्विशब्दो द्विधार्थक इत्याह । प्रवृत्ताः प्रवृत्तकर्मिण एवं निवृत्ताश्च ते खगाः पक्षिणो मताः सम्मताः । आदिवृक्ष इत्यनेनादितो विद्यमान इत्युक्तं स्यात् । तत्र यथायथं प्रत्यक्षादिलक्षितक्षयकस्य तस्यानित्यताध्यवसायाद्बाधितमित्यतस्तदादित एवंरूपिणीति निरूपयन्मानमाह । कारणस्येति । प्रकृत्यादेः कारणस्य सदा सत्वात्तत्कार्यस्यानित्यप्रपञ्चस्य प्रवाहेण धाता यथा पूर्वमकल्पयदित्यादेः प्रवाहरूपेणासौ जगन्नगः कदाचिन्न न भूतो नावतिष्ठ न न भविष्यति चातः स्वतः स्वरूपेण प्रकृतिः सूक्ष्मादिः परतः प्रवाहतो वाऽयं जगत्तरुः सदा सन् । अस्योभयविधस्यापि प्रपञ्चस्य सर्गादिकृत् कस्यचिदुपचितिमपचितिं कस्यचिद्यथायथमुत्पत्तिनिवृत्ती च करोतीति स तथा । तस्य कर्ताऽपि वर्तेत चेद्विशेषोऽयं किमवसेय इत्यत आह ॥ सदानन्दैकरूपक इति ॥ ततश्चायं श्लोकार्थः ॥ एका प्रकृतिरयनं मुख्याश्रयो यस्य स तथा । अवान्तरमूलमालपति ॥ त्रिमूल इति । गुणत्रयरूपमूलवान् द्विफलः प्रवृत्तनिवृत्तरूपफलद्वयवान् । फलं चेद्रसेन भाव्यं स क इत्यतस्तानाह ॥ चतूरस इति । रसाः प्रवृत्तकर्मफलरसा धर्माद्यास्त्रयो निवृत्तफलरसस्तु मोक्ष एवमाहास्य रसाश्चत्वारः । चतूरस इति ढ्लोपदीर्घः । पञ्चशिफः पञ्चसङ्ख्या शब्दाद्याः शिफा जटा यस्य स षडात्मा षड्विकार आत्मा कायः संस्थानविशेषो यस्य स तानाप्नोतीत्यात्मा वा । सप्तत्वक् सप्त त्वक्चर्ममांसादयस्त्वचो यस्य सोऽष्टविटपोऽष्टौ विटपा देवगन्धर्वादिभेदाः शाखा यस्य सः । नवाक्षाणीन्द्रियगोलकानि द्वारभूतानि । इतरत्राक्षा आधारप्रदेशा यस्य अक्षो रथाङ्ग आरे व्यवहारे विभीतके शकटे पाशके कर्षे द्यूतभेदेऽक्षमिन्द्रिय इति यादवः । पुरमेकादशद्वारमिति काठकोपनिषदुक्तेः कथमत्र नवद्वारमिति कथितमिति चेन्न । नाभिशिरोरूपद्वारयोरद्रवद्वारत्वेन तद्द्वित्वाऽविवक्षणान्नवेत्युक्तिः । अत एवैकादशस्कन्धे क्षरन्नवद्वारमगारमेतदित्युक्तिरिति ज्ञेयम् । सप्त वै शीर्षण्याः प्राणा अवाग्द्वे इत्यादेर्नव द्वारे पुर इत्यादेश्च । दशेन्द्रियाण्येव छदाः पत्राण्यस्य सन्तीति दशच्छदी । द्विखगः प्रवृत्तकर्मिणो निवृत्तकर्मिणश्चेति द्विविधाः खगाः । खं सुखं सुलोपे खं दुःखमित्यर्थः । गतिस्तु पूर्व-

मुक्तेति वा। उपलक्षणया दुःखं च गच्छन्तीति ते तथेति चार्थः। आदिवृक्षः स्वतः परतो वा सदा सन् जगन्नगोऽस्य चोत्तरेणान्वयः। हीति मानसिद्धतामाह ॥ २८ ॥

श्रीसुबोधिनी

एवं पूर्वाध्याये महद्दुःखेन भगवच्चिन्तनमर्थादुक्तम्। कंसादीनामत्र। ब्रह्मादीनां वक्तुं स्तुतिलक्षणमाख्यानमाह ब्रह्मेति। अनेन सामान्यतः सर्वेषां निरोधोप्युक्तः। भगवदागमनं सर्वेषामेव ज्ञातमभूदिति वक्तुं कंसादिगणनाभावाय च देवकीगृहे समागमनमुच्यते। ब्रह्मा। भवो महादेवः। चकरादन्येपि गुणाभिमानिनो देवाः। अवताराश्च वामनादय इत्येके। मुनयः सनकादयः। नारदादयो भक्ताः। देवा इन्द्रादयः। अनुचरा गन्धर्वादयः। सर्वैः सह। गीर्भिः स्वानुकूलवाणीभिः। वृषणं कामवर्षिणं वृषं धर्मं वा नयतीति। ईडतुर्ब्रह्मभवयोरेव मुख्यत्वात्। ऐडयन्निति पाठे सहोक्तानामपि कर्तृत्वेन ग्रहणम् ॥ २५ ॥

कालात्मा भगवाञ्जात इति ज्ञापयितुं तथा। कलाभिः पञ्चदशभिः स्वपक्षख्यापकैः स्तुतिः ॥ १ ॥
पक्षपातस्तुतिर्ह्येषा देवानां हितकारिणी। ध्रुवा तु षोडशी प्रोक्ता वृद्धौ वा तादृशो भवेत् ॥ २ ॥

अत्र पञ्चदशभिर्भगवत्स्तोत्रमेकेन देवक्याः सान्त्वनम्। कालः पञ्चदशात्मा भवति। स एवावतीर्ण इति तैर्ज्ञातः। स द्विविधो भवति। दैत्यानां हितकार्यपि पञ्चदशः। देवानामपि। साधारणस्तु त्रिंशदात्मको भवतीति स्वपक्षपात्येव भगवानर्धेन निरूप्यते। स च पक्षपातः कालकृतश्चतुर्धा भवति। लोककृतः। स्मृतिकृतः। स्मृतिर्हि लोकवेदात्मिका भवति। वेदकृतस्तृतीयः। भगवन्मार्गकृतश्चतुर्थः चतुर्विधोपि प्रमाणप्रमेयसाधनफलैश्चतुर्धा। दैत्यकृतात् तस्य विशेषं वक्तुं तथोच्यते।

तत्र प्रथमं चतुर्भिः श्लोकैः प्रमाणप्रमेयसाधनफलान्युच्यन्ते। तत्र लोकसिद्धानि देवपक्षपातरूपाणि निरूप्यन्ते। लोके सत्यमेव प्रमाणम्। परिदृश्यमानं जगदेव प्रमेयम्। गुणाभिमानिनो देवा एव साधनानि। क्षेम एव फलम्। तत्रापि दैत्यपक्षव्यतिरेकश्च साधनीयः।

तत्र प्रथमं देवानां सत्यं दैत्यानामनृतं प्रमाणम्। अतः सत्यरूपो भगवानवतीर्ण इति निरूप्यते। सत्यमपि देवानां हितकार्यष्टविधं भवति। अंशतः षोडशविधम्। वेदे सत्यं पञ्चविधं निरूपितं 'सत्यं पर'मित्यत्र 'प्राजापत्यो हारुणि'रित्यत्रापि। यत् सत्यं तत् परं सर्वेभ्य उत्कृष्टम्। यद्वा सर्वोत्कृष्टं तत् सत्यम्। एवं सत्यत्वसर्वोत्कृष्टत्वयोरैक्यं प्रतिपादनीयम्। अत्र एव सत्येन स्वर्गलोकाच्च्युतिः कदापि न भवतीत्यामुष्मिकफलोत्कर्ष उक्तः। ऐहिकेपि सतां सत्यमेव मूलं फलम्। अतः सत्यं प्रमाणप्रमेयसाधनफलरूपमिति ये देवपक्षपातिनस्ते सत्य एव रमन्ते। तथा च श्रुतिः "सत्यं परं परꣳ सत्यं सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सताꣳ हि सत्यं तस्मात् सत्ये रमन्त" इति तदत्रापि निरूप्यते।

लोके हि व्रतमुत्कृष्टम्। यस्तु यत् किञ्चन व्रतमातिष्ठति स पर इत्युच्यते सत्यमपि। भगवतस्तूभयं सत्यम्। सत्यमेव व्रतं यस्य। तादृशं त्वां शरणं प्रपन्न इतिसम्बन्धः। एवं व्रतसत्ययोरैक्यमुक्तम्। उभयोः परत्वात्।

अतः परं यत् परं लोके वेदे च द्वादशविधं निरूपितं 'सत्यं तपो दमः शमो दानं धर्मः प्रजननमग्नयोग्निहोत्रं यज्ञो मौनं सन्न्यास'श्चेति तत् सर्वं भगवतः सत्यमेव। यथार्थमेव। न तु दैत्यानामिव तद् द्वादशविधमयथार्थम्। अत्र श्रुतिरनुसन्धेया पूर्वनिर्दिष्टा भगवतो व्रतानि "कौन्तेय प्रतिजानीहि" "द्विःशरं नाभिसन्धत्ते" "अनश्नन्यो अभिचाकशीति" "साधवो हृदयं मह्य" मित्यादिवाक्यैः प्रतिपादितानि। लोकानुसारेण देवहितकारिणो नियामकं सत्यमेव। अन्यथा ईश्वरः केन नियमितः स्यात्? यथा प्रकृते स्वसत्यवाक्यादेव समागतः।

लोके हि त्रयो लोकास्त्रय आत्मानो भूरादयः कायादयश्च। त उभयेपि त्रिशब्देनोच्यन्ते। त्रयोपि सत्या यस्य। अनेन साधनफले एकीकृत्य निरूपिते। एवं चतुर्धाष्टविधो निरूपित उपपत्तिरूपः।

उत्पत्तिरूपमष्टविधं निरूपयति सत्यस्य योनिमित्यादि। यत् पूर्वमष्टविधं सत्यमुक्तं तस्य सर्वस्यापि योनिः कारणं भगवानेव कालात्मा। 'श्वो दास्यामी'त्युक्ते यदि श्वो न भवेद् वागसत्यैव स्यात्। एवं सर्वत्र।

न केवलं सत्यस्योत्पादकं किन्तु सत्यस्य रक्षकमपि। तदाह निहितं च सत्य इति। सत्ये नितरां हितः रक्षकः। स्वयं तत्र स्थित एव रक्षां करोतीति निहितपदसमुदायार्थोपि। एवं सत्ये स्थित्वा सत्यं पालयतीत्यर्थः। अनेन सत्यस्योत्पत्तिविचारे प्रमेयं साधनं चोक्तम्। इतरावाद्यन्तयोः। चकार इममेवार्थमाह।

सत्यस्य प्रलयोप्यत्रैवेत्याह सत्यस्य सत्यमिति यथा 'पूर्णस्य पूर्णमादाये'ति। सत्यं सत्य एव स्वाधिदैविके लीयते। सत्य एव प्रतिष्ठितम्। सत्यं फलम्। तच्चाधिदैविकं सत्यं भगवानेव। अनेन यो भगवति प्रतिष्ठितः स सत्यः। यः सत्ये स सत्यद्वारा भगवति प्रतिष्ठितो भविष्यतीत्युक्तम्। एवमुत्पत्तिस्थितिप्रलयप्रसङ्गे पञ्चविधं सत्यमुक्तम्। एतावता त्रयोदशधा क्रियाशक्तिः सत्यत्वेन निरूपिता।

ज्ञानशक्तिं सत्यत्वेन निरूपयति ऋतसत्ये नेत्रे यस्येति। ज्ञानशक्तिर्द्विविधा प्रमाणबलेन प्रमेयबलेन च प्रमाणं वेदः। प्रमेयं भगवद्धर्माः। ऋतं सूनृता वाणी। वेदः सत्यप्रतिपादकः। अतः सत्यनिरूपणप्रस्तावेप्यृतनिरूपणम्। ऋतसत्ये नेत्रे प्रापके यस्येति भगवत्प्राप्तिर्द्विधा भवतीत्युक्तम्।

एवं शक्तिद्वयं सत्यत्वेन निरूप्य धर्मिणं सत्यत्वेन निरूपयन्ति सत्यात्मकमिति। सत्यमेवात्मा स्वरूपं यस्य। यः सर्वानेव धर्मान् व्याप्य तिष्ठति स आत्मा। स सत्यमबाधितं भगवतः सद्रूपम्। स्वार्थे कः। कं। फलं वा। सत्यमात्मा कं सुखं च यस्य। सच्चिदानन्दरूपो भगवान्। चिदानन्दयोरपि सत्यरूपतेति तथोक्तम्। तादृशे च जीवैः कर्तव्यं शरणगमनमेव। प्रपन्ना इतिबहुवचनं सर्वेषामेव देवानां सत्यतया संरक्षार्थम्॥ २६॥

एवं प्रमाणरूपतामुक्त्वा प्रमेयरूपतामाह एकायन इति। इदं जगद् ब्रह्माण्डात्मकं वृक्षत्वेन निरूप्यते "वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्व"मितिश्रुतेर्भगवान् वृक्षरूपः। तस्माज् जायमानं जगदपि वृक्षात्मकमेव भवति। अनेन भगवतो महत्त्वं निरूपितम्। यथाश्वत्थादिवृक्ष एकस्मिन् कोटिशः फलानि भवन्ति। सोपि तादृश एव। एवमनादिनिधनो वृक्षो भगवान्। अत एव कच्चिद् ब्रह्माण्डनिर्माणं भगवत एव भवति। कच्चित् तत्त्वद्वारा। अक्षरमत्र फलम्। तस्य तत्त्वान्यंशाः। बीजं ब्रह्माण्डमिति। शकुनिभक्षितमेव ततो निर्गतं फलतीति तत्त्वानां चेतनरूपता निरूपिता। तत्र दैत्यादिकल्पे बहुबीजयुक्तादपि फलादेको वृक्ष उत्पद्यते। अत एव बाह्यादिशास्त्रेषु परमाणुभ्यो बहुभ्य एककार्योत्पत्तिर्निरूपिता। पिप्पलादयोपि काकविष्ठातो जाता बहुभ्य एकं भवतीत्यध्यवसीयते तद्व्यावृत्त्यर्थमाहैकमेवायनं यस्येति। अण्डं प्रकृतिरक्षरं वा। काल इत्यन्ये। अनेनायमादिरूपः सद्वृक्ष उक्तः। अतोसाविति। परिदृश्यमानः प्रपञ्चः द्विफलः। द्वे फले यस्य। सुखदुःखेस्य फले। दैत्यानां तु दुःखमेव फलम्। ते फले नरकस्वर्गाख्ये। नराणां कं सुखं विषयात्मकम्। स्वस्वरूपं गच्छतीति स्वर्गः। सृष्ट्यन्तरे सर्वे विपर्ययेण इत्यत्र तु द्विविधा अपि। त्रयो गुणाः सत्त्वादयो मूलान्यधःप्ररोहा यस्य। अत्र त्रिविधान्यपि कर्माणि भवन्ति। अन्यत्र तामसान्येव। कच्चिद् वा राजसानि। सात्त्विकानि तु न भवन्त्येव। चत्वारो धर्मार्थकाममोक्षा रसा यस्य। अन्यत्रार्थकामावेव। पञ्च कर्माणि विधाः प्रकारा यस्य। तानि पञ्चेन्द्रियजन्यान्यप्युत्क्षेपणापक्षेपणप्रसारणाकुञ्चनगमनात्मकानि भवन्ति। अन्यत्रोत्क्षेपणाभावः। अथवान्नमयादयः पञ्च। "स वा एष पुरुषः पञ्चधा पञ्चात्मे" तिश्रुतेः। ब्रह्माण्डविग्रहोपि तथा। अन्यत्र, नानन्दः। षडात्मानो यस्य। षडिन्द्रियाण्यात्मत्वेन निरूपितानि। "अयमात्मा विज्ञानमयः"। ज्ञानं च षड्विधमुत्पत्त्या भिन्नम्। सप्त त्वगादयस्त्वचो वल्कलादीनि यस्य! अष्ट प्रकृतयो विटपाः शाखा यस्य। "भूमिरापोनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधे" ति। नव देहच्छिद्राणि नवाक्षा यस्य। दश प्राणश्छदानि यत्र। द्वौ जीवान्तर्यामिणौ खगौ यत्र। एतस्माद् वैलक्षण्यमन्यत्र ज्ञातव्यम्। हीति सर्वत्र युक्तयः सन्तीति ज्ञापितम्। आदिवृक्ष इति समष्टिरूपः। एवं प्रमेयं निरूपितं भगवदात्मकम्॥ २७॥

अत्रोपपत्तिं वदन् साधनरूपमाह त्वमेक एवास्येति। अस्य जगतः सतः सद्रूपस्य। अनेन मायावादादिपक्षा निराकृताः। ते हि वैनाशिकाः। "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वर" मितिवाक्यात् तेषामेव मतेस्य जगतोसत्यत्वम्। अन्यथासतोज्ञानकार्यस्य कर्ता भगवान् को वा स्यात् तस्य सर्वस्यापि सद्रूपस्य त्वमेव प्रसूतिरुत्पत्तिस्थानम्। प्रकर्षेण सूतिर्यस्मादिति। प्रसूतिपदेन पितराविवोत्पादकत्वं सूचितम्। त्वमेव सम्यग् निधीयतेस्मिन्निति सन्निधानं लयस्थानम्। त्वमेवानुगृह्यतेनेनेति पालकः। अत उत्पत्तिस्थितिप्रलयकर्ता त्वमेव। अन्यथाक्रमेणैवं सूचियति भगवद्रक्षितो न नश्यतीति। नन्वेते गुणाभिमानिन एव ब्रह्मादय उत्पत्त्यादावधिकारिणो नाहमित्याशङ्क्याहुस्त्वन्माययेति। ये त्वन्मायया संवृतं सङ्कुचितं चेतो मतिर्येषां ते त्वां नाना पश्यन्ति न तु विपश्चितः। त एव भगवन्तं परिच्छिन्नं जानन्ति ये तस्यैव मायासङ्कुचिता भवन्ति। अल्पेन हि ग्राहकेणाल्पमेव गृह्यते। सर्ववस्तुग्रहणार्थं चित्तं पुष्कलमेव भगवत्सृष्टम्। मायया सङ्कोचाभावे कथं परिच्छिन्नं गृह्णीयात्? अत एव त्वां नाना पश्यन्ति। परिच्छिन्नया दृष्ट्या गृहीतो देशो भिन्नतया स्वीक्रियत इति मायामोहः। अत एव ये विपश्चितस्ते ब्रह्मादीन् परस्परविलक्षणान् पश्यन्तोपि तत्तत्कार्यानुरोधेन तथाविधं त्वामेव मन्यन्ते न तु भिन्नं पश्यन्ति। य इत्यन्ते तेषां माहात्म्यनिरूपणार्थं निर्देशः। अनेन सृष्टिस्थानां गुणैर्भिन्नानां स्वकार्यसिद्ध्यर्थमेत एव यथारुचि भगवद्रूपाः सेव्या इतिसाधनमुक्तम्॥ २८॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अष्टविधं भवतीत्यादि। अष्टविधत्वमग्रे स्पष्टीभविष्यति। यत् सत्यं तत् परमित्यादि वक्ष्यमाणश्रुत्यर्थनिरूपकमिति ज्ञेयम्। यद्वा सर्वोत्कृष्टमित्यत्र वाशब्द एवकारार्थो वाक्यालङ्कारे। श्रुताविव स्तुतावप्येतयोरैक्यं प्रतिपादनीयमित्यतिविशन्त्येव सत्यस्येत्यादिना। लोके हि व्रतमुत्कृष्टमिति यदुक्तं तत्रोपपत्तिर्यस्त्वित्यादिनोच्यते। तथा च लोके व्रतं सत्यं चेति द्विविधं सत्यं निरूपितं भवति। मूले व्रतपदेनैतदुभयप्राप्तौ हेतुमाहुरुभयोः परत्वादिति। सत्यव्रतमित्यनेन 'सत्यं पर'मिति श्रुतिस्थपरस्यार्थ उक्तो भवति। तेन लोके सत्यं व्रतञ्चेतिद्वैविध्यम्। अग्रे 'परं सत्य'मितिश्रुत्यर्थनिरूपकं सत्यं परमितिपदं व्याकुर्वन्त्यतः परमिति। अत्रापि लोके लौकिकं नियामकं वैदिकं द्वादशविधञ्चेतिद्वैविध्यम्। भगवतो व्रतं लोकानुसारेण देवहितकारिणो नियामकञ्चेतिद्वैविध्यम्। त्रिसत्यमितिपदार्थे भूरादित्रयं कायादित्रयमितिद्वैविध्यम्। एवमष्टविधत्वं सत्यस्य। भगवतः कालरूपस्य

यदि सत्यरूपत्वं न स्यात् तदा लोके व्रतादिकं नियामकञ्च वैदिकञ्च द्वादशविधं भगवद्व्रतानि च लोकाश्चात्मादयश्च न स्युरित्युपपत्तिरूपत्वम् । व्रतं ह्युपोषणादिरूपमहोरात्रादिसाध्यं सत्यमपि तप्ततैलादिष्वप्यदाहोत्युत्कटपापेऽल्पेनैव कालेनानिष्टमनुत्कटे चिरेणेत्यादि । अन्यत् स्पष्टम् । लौकिकमुक्तद्वा । दशविधं वैदिकञ्चेति द्विविधम् । भगवदीयं व्रतं नियामकञ्चेतिद्विविधम् । लोका भूर्भुवःस्वर्लक्षणाः आत्मानः कायजीवपरमात्मानः । लोकाः फलरूपाः । इतरे त्वितराणि । इदञ्च द्विविधम् । एवमष्टविधत्वं सत्यस्योक्तभेदेन पदद्वये विधेयभेदेन द्वैविध्यं त्रयञ्च द्विविधमेवञ्चतुर्विधत्वम् । इतराविति । प्रमाणफललक्षणावित्यर्थः । आद्यन्तयोरिति । सत्यात्मकमित्यान्तिमेन पदेन फलमेतस्मादाद्येन 'ऋतसत्यनेत्र'मित्यनेन प्रमाणमित्यर्थः । भगवत्स्वरूपज्ञानशक्त्योः फलत्वप्रमाणत्वे प्रसिद्धे । अथवा सत्यस्य योनिमित्यनेन रमाणम् । सत्यस्य सत्यमित्यनेन फलम् । 'मानाधीना मेयसिद्धि'रिति कारणान्तःपाति मानमिति तथा । पूर्वमज्ञस्य ज्ञानेन विषयस्वरूपमपि तदैव सिद्धं भूतमिति यतो भातम् । एवं फलं विवृतावेव स्फुटं सत्य एवेत्यादिना । प्रमाणादिचतूरूपं भगवति प्रतिष्ठितं चेति पञ्चविधम् । पूर्वोक्तमष्टविधमेतत् पञ्चविधं चेति त्रयोदशधा । अग्रे ज्ञानशक्तिद्वयं धर्मी चेति षोडशधा ।। २६ ।।

इदं श्रीमत्कल्याणरायाणाम् ।

श्रीगोपीजनवल्लभाय नमः ।

टिप्पण्यां–तेन लोके सत्यं व्रतं चेत्यारभ्य धर्मी चेति षोडशधेत्यन्ते ग्रन्थे सत्यं विव्रियते । लोके सत्यं वचनम् । व्रतमेकादश्याद्युपोषणादिरूपम्, लोके लौकिकं नियामकं सत्यं तप्ततैलादौ शपथरूपम् । वैदिकं द्वादशविधम् । भगवतो व्रतानि 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति' 'द्विःशर'मित्यादिना निरूपितानि । लोकानुसारेण देवहितकारिणो नियामकं भगवतो भगवद्वचनसत्यत्वम् । भूरादित्रयम्, कायादित्रयम् । इदमष्टविधं सत्यम् । लोके व्रतं शपथरूपं च सत्यमुक्तद्वादशविधं वैदिकं चेति द्विविधम्, लोके सत्यवचनम् । व्रतमेकादश्यादि तप्ततैलादौ शपथरूपं सत्यं चेदं त्रयं लौकिकत्वेनैकविधमुक्तद्वादशविधं वैदिकत्वेनैकविधमिदं द्विविधमपि परत्वेनैकम्, शपथस्य नियामकत्वेनान्येषामुत्कृष्टत्वेन च परत्वात् । भगवतो व्रतं नियामकं भगवद्वचनं चेति द्विविधं, भगवद्धर्मत्वेनैकम् । भूरादयः फलरूपाः । कायादयः साधनानि । भूरादीनां फलत्वेन कायादीनां साधनत्वेन वैक्यम् । इदं चतुर्विधं सत्यं, प्रमाणरूपं सत्यं वेदो भगवद्धर्माः प्रमेयरूपं सत्यं सत्यस्य कारणरूपो भगवान् साधनरूपं सत्यं सत्ये स्थितः सत्यरक्षको भगवान् । फलरूपं सत्यं सत्यस्य लयस्थानमाधिदैविकसत्यरूपो भगवान् । भगवति प्रतिष्ठितं वस्तु सत्यं चैतदुभयं फलितसत्यत्वेन पञ्चमं सत्यम् । इदं पञ्चविधं सत्यम् । सत्यत्वेन परत्वेन साधनत्वेन ऐहिकफलमूलत्वात् फलत्वेन रमणादिकरणत्वेनेतिप्रकारैः पञ्चविधं सत्यं वेदे निरूपितम् । तदष्टविध एव प्रविशति । पूर्वोक्तमष्टविधप्रमाणादिरूपं पञ्चविधं चेति त्रयोदशधा । इदं त्रयोदशधा ज्ञानशक्तिद्वयं वेदो भगवद्धर्माश्च धर्मी चेति षोडशधा । वेदे भगवद्धर्माणां प्रमापकत्वात् प्रमाणत्वोपाधिना क्रियाशक्तिरूपं पञ्चविधसत्यमध्ये प्रवेशेऽपि द्रुतं भगवत्साक्षात्कारसाधकत्वेन तज्ज्ञानशक्तित्वेनापि निरूपणं न दोषाय, सर्वत्रोपाधिभेदेन भेदात् । इति सत्यविवरणम् ।।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

सत्यव्रतमित्यत्र — स्तुतिश्लोकसङ्ख्यातात्पर्यं वदन्तो निबन्धे 'सङ्कर्षणोत्पत्तिर्द्वितीयाध्यायार्थो दैत्यवधार्थत्वस्य स्फुटत्वा'दिति यदुक्तं तदत्र 'ऽहैष मे प्राणहरो हरिर्गुहा'मित्यनेन कंसस्यापि ज्ञानकथनाद् यथा सुस्फुटं तथा स्वरक्षकत्वेन देवानां ज्ञानादपीति ज्ञापयितुमाहुः कालात्मेत्यादि । भगवान् पुरुषोत्तमः प्रश्नोपनिषदि 'षोडशकल' इति श्रवणात् कलाभिः षोडशभिः कालात्मा जात इति ज्ञापयितु तथास्तुतिः । षोडशभिः स्तुतिरित्यर्थः । तत्र प्रकारमाहुः स्वपक्षव्यापकैः पञ्चदशभिर्ह्यथा देवानां हितकारिणी पक्षपातस्तुतिः षोडशी तु ध्रुवा भक्तहितकारिणी स्वाभाविकत्वान्निश्चलेति । ननु भवत्वेवं तथापि षोडशकत्वेन कथं कालावगम इत्यत आहुर्वृद्धौ वा तादृशो भवेदिति । वाशब्दोऽवधारणे । तथा च वृद्ध्या तदवगम इत्यर्थः । तदेव स्फुटीकुर्वन्त्यत्रेत्यादिना । तथा च स्तुतिसान्त्वनश्लोके 'परः पुमा'नित्यादिकथनात् षोडशानामपि भगवत्स्तुतित्वमेव । यदि च पुरुषोत्तमस्य गर्भसम्बन्धाभावान्नैतेषां साक्षात्पुरुषोत्तमस्तुतित्वं तदा तु षोडशभिः कालात्मकस्यैव स्तुतिरिति सिध्यति । तत्र पञ्चदशभिः कालात्मकस्तुतिं व्युत्पादयन्ति काल इत्याद्यर्धेन निरूप्यत इत्यन्तम् । अर्धेनेति त्रिंशदर्धेन । तर्हि षोडशभिः कथं स्तुतिरित्यतस्तामुपपादयन्ति स चेति । चोऽवधारणे । स इति । षोडशभिः श्लोकैरुक्तः । तेनेदं सिध्यति । आध्यात्मिके द्वापरादिरूपे काले विपक्षे सति तत्कार्यप्रतिबन्धार्थं कृपया भगवानाधिदैविककालरूपो भवंस्तदंशैर्लोकादिभिर्लोकादिविभाजकप्रमाणाद्युपाधिभिश्च पक्षपाती जात इति । एवं षोडशधा विभागमुपपाद्य तत्प्रयोजनमाहुर्दैत्यकृतादिति । दैत्येषु कृताद्युपकारात् स्वपक्षपातस्याधिक्यं वक्तुमत्र षोडशधोच्यत इत्यर्थः । लोककृतं चातुर्विध्यं विभजन्ते तत्रेत्यादि । एतस्यैव विवरणं लोकसिद्धानीत्यादि । सत्यमिति । सत्यभाषणं तद्विषयश्च यथार्थः । साधनानीति । जगदुत्पत्त्यादिसाधनानि । एतावदेव दैत्यपक्षेऽपि तुल्यम् । अथ देवपक्षे विशेषं वक्तुमाहुस्तत्रापीत्यादि । लोके प्रमाणादावपि दैत्यपक्षव्यतिरेकश्च दैत्यपक्षवैलक्षण्यञ्च भगवत्त्वेनैव सत्यं प्रमाणं भगवत्त्वेनैव

कात् प्रमेयमित्यादिरूपेण साधनीयमित्यर्थः। एवं प्रतिज्ञाय प्रथमतः प्रमाणमाहुस्तत्रेत्यादि। सत्यमिति। सात्त्विकज्ञानविषयं कालत्रयेप्यबाधितम्। अनृतमिति। राजसज्ञानविषयं व्यावहारिकं गुणसन्निपातकार्यम्। अत इति। देवपक्षपातात्। एतेन मायोपहितो गुणाधीनः कार्येश्वरश्चानृतरूपो निवारितः। एवं श्लोकतात्पर्यमुक्त्वा तत्र स्थितानामष्टविशेषणानां तात्पर्यमाहुः सत्यमपीति। अष्टविधत्वादिकं कथमित्याकाङ्क्षायां टिप्पण्यामाहुरष्टविधत्वमित्यादि। अग्र इति। विशेषणत्रयव्याख्यानोत्तरमष्टविधत्वं चकारात् "सत्यस्य सत्य"मित्यस्य व्याख्यानोत्तरं प्रमाणादिचतूरूपमित्यादिना त्रयोदशविध वत्रिविधत्वाभ्यां षोडशविधत्वञ्च स्फुटीभविष्यतीत्यर्थः। तेनैकस्मिन् विशेषणे प्रत्येकं विधाद्वयमित्येवं षोडशविधत्वं नोच्यते किन्तु प्रकारान्तरेणेति सूक्ष्मेक्षिकयांशतः षोडशविधमित्यनेनोपपत्त्युत्पत्तिरूपाभ्यां स्फुटीभविष्यतीति बोधितं ज्ञेयम्। न च पुरःस्फूर्तिकमष्टविधत्वं विहाय षोडशविधत्वनिरूपणे कुत आग्रह इति शङ्क्यम्। स्तुतौ सत्यविधाबोधकानां श्रौतानां पदानां प्रत्यभिज्ञानेन तत्सामानाधिकरण्यबोधनार्थत्वात्। एतद्बोधनार्थमेव सुबोधिन्यां वेदे सत्यमित्यादिना श्रुतितात्पर्यमुक्तं श्रुतिद्वयं च यदुपन्यस्तं तद् व्याख्यानग्रन्थ एवाग्रे स्फुटीभविष्यति। अतस्तत्तात्पर्यमनुक्त्वा यत् सत्यमित्यादेस्तात्पर्यमाहुर्यत् सत्यमित्यादि वाक्यालङ्कार इत्यन्तम्। एतत्कथनप्रयोजनमाहुः श्रुतावित्यादिना। तथा च यथा 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसी' तिजाबालश्रुतौ प्रत्यक्पराग्वित्तिवेद्ययोस्त्वमहम्पदार्थयोर्व्यतिहारेण भगवत्स्वाद्वैक्यं प्रतिपादितं तथास्यामपि श्रुतौ "सत्यं परं परꣳ सत्य" मितिवाक्यस्य व्यतिहारेण परसत्ययोः केनचिद्रूपेणैक्यं प्रतिपाद्यते। तथा सति येन रूपेणास्यां श्रुतावैक्यं प्रतिपादनीयमेवमनेन प्रकारेण सत्यत्वसर्वोत्कृष्टत्वयोर्भिन्नप्रतीतिविषययोरप्यैक्यं स्तुतौ प्रतिपादनीयमिति सुबोधिनीफक्किकार्थो ज्ञेयः। सुबोधिन्यामेवं विधाद्वयं व्याख्याय तृतीयां व्याकुर्वन्त्यत एवेत्यादि। यतः सत्यपरयोरैक्यमतस्तथेत्यर्थः। तुरीयां व्याकुर्वन्त्यैहिकेपीत्यादि। अत्र "सताꣳ हि सत्य" मितिश्रौतं वाक्यं साकाङ्क्षम्। तन्मूलं फलमिति फलद्वयेन पूरितम्। तथा च सतां सत्यमेव मूलं सत्ताप्रयोजकमतस्तदेवैहिकं फलमित्यर्थः। पूर्ववाक्य आमुष्मिकफलस्य कथनेनात्रैहिकफलग्रहणस्यौचित्यात् 'प्राजापत्यो हारुणि'रितिद्वितीयश्रुतौ तथैव सिद्धत्वाच्च। पञ्चमीं व्याकुर्वन्त्यत इत्यादि। अतो यथार्थत्वादबाधितत्वाच्च सतां सत्यमेव च प्रमाणादिचतुष्टयरूपमितिहेतोरुक्तविधाः सत्य एव रमन्ते क्रीडन्ति। रता भवन्तीत्यर्थः। द्वितीया श्रुतिस्तु न व्याख्याता। तदुपन्यासप्रयोजनं त्वग्रे वाच्यम्। तदत्रापि निरूप्यत इति। श्रौतं पञ्चविधत्वं स्तुतावपि निरूप्यत इत्यर्थः।

वाक्यं व्याकुर्वन्ति लोके हीत्यादि। यस्त्वित्यादिनोच्यत इति। यस्तु यत् किञ्चन व्रतमातिष्ठति स परइत्युच्यते तथा सत्यमपीत्यनेनोच्यत इत्यर्थः। अत्रातिष्ठतीत्यन्तं वाक्यं पुनरावर्तत इति बोध्यम्। तथा चैतयोः सत्यव्रतयोरास्थानाल्लोके परत्वकथनेन श्रुतौ परशब्देनोभयं सत्यं व्रतं च सङ्गृह्यत इत्यर्थः। तदेतत् प्रकृते योजयन्ति भगवतस्तूभयं सत्यमिति। यत् सत्यं यथार्थं तदुभयं सत्यं व्रतं चेतिद्वयं भगवत्स्वामिकम्। यत् पुनर्दम्भादिना कृतमयथार्थं तद् भगवत्स्वामिकं न। यथार्थत्वादेवोत्कृष्टतया परत्वमिताह्यपि सत्यमुद्दिश्यैव परत्वविधानाच्छ्रौतार्थसामानाधिकरण्यमेवेत्यर्थः। न च बहुव्रीहौ 'चित्रगुर्लम्बकर्ण' इत्यादिषु प्रथमनिर्दिष्टयोर्लम्बचित्रयोरेव विधेयत्वदर्शनात् सत्यव्रतपदेपि सत्यस्य विधेयत्वं शङ्क्यम् "कुटादिब्राह्मणादयः शूद्रदासोत्तराः प्रजा" इत्यादौ व्यभिचारदर्शनेन तथानियमाभावात्। तद् टिप्पण्यां निगमयन्ति लोके हीत्यादि। निरूपितं भवतीति। परत्वेन रूपेणोक्तं भवतीत्यर्थः। सुबोधिन्यामेवं सत्यपदार्थं व्याख्याय 'तस्मात् सत्ये रमन्त' इतिश्रुतितात्पर्यबोधनार्थं पदसम्बन्धमाहुः सत्यमित्यादि। तथा च सत्ये रताः शरणं प्रपन्ना न तु भयादिनेत्यर्थः। एतेन 'हृष्टाः स्तुवन्ती'ति श्रीधरोक्तमवतरणमादृतं ज्ञेयम्। एवं पदसम्बन्धमुक्त्वा लोके हि व्रतमित्यादिना यदुक्तं तन्निगमयन्त्येवमित्यादि। तद् विवृण्वन्ति टिप्पण्यां मूल इत्यादि। तथा च व्रतपदं स्वशक्यस्य नियमस्य परत्वेन सम्बन्धेनाजहत्स्वार्थया सत्यमपि प्रापयतीति परत्वमुभयप्राप्तौ हेतुरित्यर्थः। तेन सिद्धमाहुः सत्यव्रतमित्यादिना द्वैविध्यमित्यन्तेन। अत्र व्रतपरत्वेनोक्तायां विधेयकोटौ तयोः स्वरूपमनुपदमेव व्रतं ह्युपोषणादीत्यादिना टिप्पण्यां स्फुटिष्यति। तथा चैवंव्याख्यानेन श्रुतौ सत्योद्देश्यका परविधेयका विधा योक्ता सा बोधितेत्यर्थः। अग्रिमपदं विवृण्वन्तीत्याहुरग्र इत्यादि। अत्रापि सत्यपरपदेपि लोके लौकिकं नियामकं सुबोधिन्यां यत् परं लोक इत्यनेनोक्तं वैदिकं द्वादशविधं सुबोधिन्यां वेदे चेत्यारभ्य सन्न्यासश्चेत्यन्तेनोक्तमितिद्वैविध्यम्। एवम्प्रकारकं द्वैविध्यमित्यर्थः। तेनात्र नियामकत्वं परशब्दार्थे स्फुटमिति। तच्च यथाशास्त्रं प्रणीयमानदण्डनीत्यादिरूपम्। 'दण्डो दमयतामस्मि नीतिरस्मि जिगीषता' मिति गीतावाक्यात्। द्वादशविधस्य परत्वं तु श्रुतौ "किं भगवतः परमं वदन्ती" तिप्रश्नेन तदुत्तरेण च परमत्वेनोक्तत्वम्। तदेतत् सुबोधिन्यां स्मारयन्त्यत्र श्रुतिरित्यादि। सा तु 'सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात् सत्यं परमं वदन्ती'ति। एवं तपआदीनामपि श्रुतिर्बोध्या। अर्थस्तु सत्येन पूर्वजन्मीनसत्यभाषणेन मनुष्यत्वाद् देवतारूपं प्राप्य लोकोपकारार्थं वायुर्भूत्वा वाति। एवमादित्योपि दिवि रोचते प्रकाशं करोति। सत्यमेव वाचो वागिन्द्रियस्यापि स्थिरं स्थानम्। अनृतं तु न तथा। सत्ये यथार्थभाषणे सर्वं व्यवहारजातं प्रतिष्ठितम्। तस्माद्धेतोः सत्यं परममुत्कृष्टं साधनं वदन्तीति। अत्र प्रथमे वाक्यद्वय आमुष्मिकफलोत्कर्षः सिध्यति तदग्रे वाक्यद्वये चैहिकफलोत्कर्षः। एतदभिप्रेत्यैव प्रथमश्रुतौ सताꣳ हि सत्यमित्यत्रैहिकं फलं व्याख्यातम्। भगवद्व्रतानां परत्वं त्वसाधारणत्वादेव स्फुटम्। शेषस्य भगवन्नियामकस्य परत्वं सुबोधिन्यामेवोपपादितमित्याशयेनाहुर्भगवतो व्रतमित्यादि। तथा सति परपदेन विधाचतुष्कसङ्ग्रह इतिभावः। तथा च मूले सत्यपरपदे सत्यं परं यस्येतिबहुव्रीहौ लम्बकर्णादिवत्

पूर्वनिर्दिष्टस्य विशेषणभूतस्य सत्यस्य विधेयत्वं परपदोक्तस्य चतुर्विधस्य नियामकादेरुद्देश्यत्वं बोध्यम्। एवमत्र श्रुत्युक्तव्यतिहारबोधकं मूलस्थं पदद्वयं विवृतम्। व्यतिहारफलमैक्यं स्वग्रे विवेचनीयम्।

लोके हि त्रय इत्यादिना सुबोधिन्यां **त्रिसत्यपदं** विवृण्वन्तीत्याशयेन तत्सिद्धं विधाद्वयमष्टविधत्वपूर्णाय स्फुटीकुर्वन्ति। **त्रिसत्यमित्यादि**। स्पष्टार्थमिदम्। सुबोधिन्यां त्रिसत्यपदतात्पर्यमाहुरनेनेत्यादि। **त्रिसत्यपदेन साधनफले** 'सत्येन न सुवर्गाल्लोकाच्च्यवन्त' इतिश्रुत्युक्तं **साधनं 'सतां हि सत्य'** मितिश्रुत्युक्तं **फलं च** त्रित्वसङ्ख्यासामान्येनैकीकृत्य निरूपितम्। श्रुत्युक्तानां स्वोक्तानां च विधानां पूरकं रूपं स्फुटीकुर्वन्त्येवमित्यादि। **उपपत्तिरूप** इति उपपत्त्या रूप्यते तादृश इत्यर्थः। टिप्पण्यां कथमुपपत्तिरूपत्वमित्याकाङ्क्षायां विवृण्वन्ति **भगवत** इत्यादि **रूपत्वमित्यन्तेन** आदिकमित्यनेन। सत्यस्य सङ्ग्रहः। **व्रतानि चेति**। **चकारेण** भगवन्नियामकसत्यस्य सङ्ग्रहः। तथा चोक्तरूपयोपपत्त्या निरूप्यत्वादुपपत्तिरूपत्वमित्यर्थः। सुबोधिन्यां **सत्यव्रतपदव्याख्याने** सत्यपरव्याख्याने च व्रतसत्ययोः प्रविष्टत्वात् तयोरभेदे परपदोक्तनियामकयोश्चाभेदे विधाष्टकपूर्तिर्दुर्घटेति तदभावाय तेषां स्वरूपमाहुर्व्रतं हीत्यादि। एवं **सत्यव्रतपदं** विवृतम्। अत्र सिद्धं यद् व्रतं सत्यं च तत् प्रमाणभूतं बोध्यम्। भगवत्सम्बन्धिना तेन लौकिकादृतेन सत्येन कर्तृनिष्ठधर्मप्रमितिजननादिति। अन्यत् स्पष्टमिति। **यत परं लोक** इत्यादि सुबोधिनीस्थं **लोके लौकिकं नियामकमित्यादिना** विवृतत्वात् स्फुटमित्यर्थः। तदेतत् सङ्गृह्णन्ति **लौकिकमित्यादिना**। **लौकिकमिति**। नियामकमितिशेषः। **नियामकं चेति**। देवहितकारिणो नियामकं चेत्यर्थः। इदं चतुर्विधं सत्यं प्रमाणभूतं बोध्यम्। स्मार्तवैदिकभगवद्वाक्यैः प्रतिमातत्वादिति एवं षड्भेदैर्द्वे अपि श्रौते विधेयकोटी ज्ञापिते। त्रिसत्यपदोक्तं विधाद्वयं व्याकुर्वन्ति **लोका भूर्भुव** इत्यादि। **लोकाः फलरूपा इति**। पुरुषार्थत्वेन प्राप्यत्वात् फलरूपाः। **इतरे त्रितराणीति**। **कायादयस्त्रयस्तु** तत्साधनशेषत्वात् साधनानि। **इदञ्च द्विविधमिति**। त्रिशब्देनोक्तं द्विप्रकारकमित्यर्थः। एवं विधाष्टकं निगमयित्वा त्रिसत्यपदे सुबोधिन्यामेवं चतुर्धेति यदुक्तं तन्निगमयन्त्येवमष्टेत्यादि। एवमष्टविधत्वं सत्यस्योक्तभेदेनोक्तरीत्या सङ्गृहीतो यः षोडशभेदस्तेनेत्यर्थः। चतुर्विधत्वं निगमयन्ति **पदद्वय** इत्यादिना। **सत्यव्रत सत्यपरमितिपदद्वये यो विधेयभेदस्तेन द्वैविध्यम्**। प्रमाणप्रमेयत्वाभ्यां द्वैविध्यम्। **त्रयम्**। **त्रिसत्यपदे** त्रिशब्देनोक्तम् द्विविधम्। फलसाधनभेदेन द्विप्रकारकम्। तथा चैवं मूलस्थैस्त्रिभिः पदैः श्रौतश्चतुर्विधत्वं समर्थितं ज्ञेयमित्यर्थः। सुबोधिन्यां नन्वेवं श्रौते चातुर्विध्ये स्वोक्तेष्टविधत्वे च समर्थिते शेषाणां पञ्चानां विशेषणानां किं प्रयोजनमित्याकाङ्क्षया श्रौतव्यतिहारफलभूताभेदसाधनं स्वोक्तषोडशविधापूरणञ्च प्रयोजनमित्याशयेनाहुरुत्पत्तिरूपमित्यादि। उत्पत्त्या रूप्यते निरूप्यते तादृशं पञ्चभिर्विशेषणैर्निरूपयतीत्यर्थः। तत्र प्रथमं विशेषणं व्याकुर्वन्ति **यत् पूर्वमित्यादि**। **श्वो न भवेदिति**। द्वितीयदिनात्मा कालो यदि भगवता नोत्पादितो भवेत् तथात्राष्टविधं सत्यं भगवदुपादेयत्वात् सत्यत्वप्रयोजकमित्यर्थः। अग्रिमविशेषणेष्वप्यतिदिशन्त्येवं सर्वत्रेति। **निहितञ्च सत्य** इत्यादिविशेषणेष्वप्यष्टविधं सत्यं तत्तदुक्तेन धर्मेण तत्तत्कार्यप्रयोजकं ज्ञेयमित्यर्थः।

अग्रिमपदं व्याकुर्वन्ति न **केवलमित्यादिना**। तत्तात्पर्यमाहुरनेनेत्यादि। विशेषणचतुष्टयानन्तरवर्तिना **निहितं च सत्य** इतिविशेषणेनाष्टविधसत्यस्योत्पत्तिप्रयोजनविचारेष्टविधं सत्यं भगवद्रक्षितत्वेन प्रमेयं भगवदधिष्ठितत्वेन स्वस्वकार्यसाधनञ्चोक्तम्। न ह्यरक्षितं प्रमातुं शक्यते न वा भगवदनधिष्ठितं स्वकार्यं साधयितुं शक्नोति। "गामाविश्य च भूतानि धारयाम्यहमोजसे" त्यादिवाक्यै "स्तदभिध्यानादेव तु तल्लिङ्गात्" इतिन्यायेन च भगवदधिष्ठितस्यैव कार्यक्षमत्वेन सिद्धत्वादित्यर्थः। नन्वेवं तर्हि प्रमाणफले कुत्रोक्ते इत्यत आहुरितरावाद्यन्तयोरिति। तस्यार्थष्टिप्पण्यां वक्तव्यः। नन्वितर **वाद्यन्तयोरुच्येते** इत्यत्र किं गमकमित्यत आहुश्चकार इत्यादि। 'निहितं च सत्य' इत्यत्र चकार उक्तसमुच्चयाभावान्निरर्थकः स्यादित्यनुक्तप्रमाणफलसमुच्चयरूपमर्थमाह। तथा च चकार एव तद्गमक इत्यर्थः। **इतरावाद्यन्तयोरिति** यदुक्तं तद् टिप्पण्यां विवृण्वन्तीतरावित्यादि अत्र **प्रमाणेत्यारभ्य प्रसिद्ध** इत्यन्तमेकः प्रकारः। **अथवेत्यारभ्य** द्वितीयः। तत्र प्रथमे प्रकारे "सत्यस्य योनि" मितिविशेषणं सत्योत्पत्तिमात्रबोधकं न तु विधासङ्ग्राहकम्। द्वितीयं तु प्रमेयसाधनबोधकमिति सुबोधिन्यां स्पष्टम्। तृतीयं प्रतिष्ठितत्वबोधकम्। चतुर्थं प्रमाणस्य। पञ्चमं फलस्य बोधकम्। अस्मिन् पक्षे सुबोधिन्युक्तस्य पूर्णेत्यादिग्रन्थस्य विरोध इत्यरुच्या पक्षान्तरमाहुरथवेत्यादि। ननु योनिशब्दस्य कारणवाचकत्वादत्र प्रमानिरूपणं कथं सङ्गच्छत इत्याकाङ्क्षायां **सत्यस्य योनिमित्यनेन** प्रमाणनिरूपणे प्रकारमाहुर्मानेत्यारभ्य भातमित्यन्तम्। **विवृताविति**। सुबोधिन्याम्। नन्वेवं सुबोधिन्यविरोधेन प्रमाणफलयोः सिद्धौ पूर्वोक्तप्रकारलिखनस्य किं प्रयोजनमिति चेदुच्यते। **योनिशब्दस्य** कारणे रूढत्वादत्र सत्यकारणत्वेनैव प्रयोगात् तस्य प्रमाणकारणत्वेन सङ्कोचे मूलविरोधापत्तिः। सत्यस्य सत्यमितिविशेषणस्य फलबोधकताङ्गीकारे जहल्लक्षणापत्तिरिति जानीहि। नन्वेवं सति मूलविरुद्धः पक्षः सुबोधिन्यां कुत आदृत इतिचेदत्राप्युच्यते। **योनिशब्दस्य** प्रमाणपरत्वं "शास्त्रयोनित्वा" दित्यत्र भास्कररामानुजाचार्याभ्यामादृतम्। प्रकृते च भगवतो योनित्वकथनेन सत्यस्य तदुत्पन्नत्वं साधितमतस्तेन धर्मेण सत्यं प्रमाणमितिकथने को वा मूलविरोधः ? किञ्च सत्यस्य सत्यमितिविशेषणे भगवतः सत्याधिदैविकत्वमुक्तं तत्र प्रतिष्ठितत्वेन रूपेण सत्यस्य फलत्वकथनेपि को वा मूलविरोध इति जानीहि। एवं च पुरःस्फूर्तिकमादाय प्रथमः प्रकारः सूक्ष्मेक्षणमादाय द्वितीय इति टिप्पण्यां न कोपि विरोधः।

सुबोधिन्यां सत्यस्य सत्यमितिकथनेन कथं लयस्य बोध इत्याकाङ्क्षायामाहुर्यथा 'पूर्णमदः पूर्णमिद' मितिमन्त्रे पूर्णशब्दवाच्यस्य प्रपञ्चस्य स्थित्युत्पत्ती उक्त्वा पुनरस्य लय उच्यते तथात्रापि सत्यस्योत्पत्तिस्थिती पूर्वविशेषणाभ्यामुक्त्वात्र सत्यस्याधिदंविध सत्यमितिबोधसेनोत्पत्तिस्थितिप्रसङ्गादेव लय उच्यत इत्यर्थः। तद्यत्र कथं फलबोध इत्यत आहुः सत्य एवेत्यादि। प्रलयो हि कारणे प्रवेशरूप इति कार्यं सत्यं कारणभूते सत्ये प्रतिष्ठितं भवति। तच्च भगवानेवेति तेन रूपेण सत्यं फलमित्यर्थः। तदुपपादयन्त्यनेनेति। उक्तमिति। अनेन प्रकारेण फलमुक्तमित्यर्थः। एवं विशेषणोक्त्या विधापञ्चकसिद्धिं गमयन्त्येवमित्यादि। अष्टविधस्य सत्यस्यानेन प्रकारेणोत्पत्त्यादिप्रसङ्गे प्रतिष्ठितत्वस्यापि सिद्ध्या तदादाय पञ्चविधं सत्यमुक्तमित्यर्थः। अनेनात्र त्रयोदशत्वस्यापि सिद्धिमाहुरेतावतेत्यादि क्रियाशक्तिरिति। क्रियाजनकं क्रियात्मकं भगवत्सामर्थ्यमित्यर्थः। अत्र क्रियाशक्तेस्त्रयोदशविधत्वमेवं ज्ञेयम्। व्रतसत्ययोर्धर्मानुमापकत्वात् प्रमाणकोटिपातेपि कर्मरूपत्वात् क्रियारूपत्वम्। प्रमेयरूपाणां चतुर्विधानियामकानां तु तथात्वं यथासम्भवं क्रियारूपत्वात् तज्जनकत्वाच्च स्पष्टमेव। साधनफलयोश्च कर्मप्रधानकत्वात् तथात्वम्। अग्रे च साधनस्य प्रमेयस्य तथात्वादेव क्रियारूपत्वम्। प्रमाणस्याप्युत्पत्तिक्रियान्तःपातित्वात् तथात्वम्। उत्पत्त्यादिक्रियान्तःपातित्वादेव च प्रतिष्ठितफलरूपयोरपीति तथा। भगवच्छक्तित्वं तु भगवदाधारकत्वात् स्फुटम्।

अग्रिमविशेषणं व्याकुर्वन्ति ज्ञानशक्तिमिति। ज्ञानजनिकां भगवच्छक्तिं सत्यत्वेन निरूपयन्तीत्यर्थः। नन्वत्रर्तसत्ययोर्निरूपणस्य किं प्रयोजनमित्यतस्तदुपपादयन्ति ज्ञानशक्तिरित्यादि। प्रमाणं वेद इति। तस्यानपेक्षतया प्रामाण्यस्य तत्रैव पर्यवसानात् तथा प्रमेय भगवद्धर्मा इति। "ये वै भगवता प्रोक्ता ह्युपाया ह्यात्मलब्धय" इत्यादिवाक्यैः प्रमितत्वात्। ऋतं च सूनृता वाणी सूनृता सत्यप्रतिपादिका। ऋतं च सूनृता वाणी कविभिः परिकीर्तिते'तिभगवद्वाक्यात्। अत्र तन्निरूपणप्रयोजनमाहुर्वेद इत्यादि। उक्तमिति द्वयमुक्तम्।

सत्य एवेति सत्ये पूर्वोक्ते पञ्चदशविध एव। सत्यात्मकपदं प्रकारान्तरेण व्याकुर्वन्ति कं फलं वेत्यादि। अत्रात्मा कं वात्मकम्। सत्यमात्मकं यस्येत्येवंविग्रहो बोध्यः। एवंव्याख्यानस्य प्रयोजनमाहुः सच्चिदित्यादि। तथोक्तमित्यादि। तथा व्याख्यानमित्यर्थः। अंशतः षोडशविधत्वं यत् पूर्वं प्रतिज्ञातं तन्निगमयन्ति टिप्पण्यां प्रमाणादीत्यादि षोडशधेत्यन्तम्। अत्र च सत्यस्योपपत्त्युत्पत्तिभ्यां सर्वस्मिन् भगवदुपादेयत्वभगवत्त्वप्रमितिजनकत्वात् प्रमाणत्वं बोध्यम्।

किञ्च श्रीधरीये सत्यव्रतपदस्य 'सत्यसङ्कल्प'त्वं यद् व्याख्यातं तदत्र भगवतो व्रतानीत्यादिना सिद्धम्। सत्यपरपदे 'सत्यं परं प्रापकं यस्ये'ति व्याख्यातं तदत्र क्रियाशक्तेस्त्रयोदशविधत्वेन सिद्धम्। यच्च त्रिसत्यादिविशेषणचतुष्टये व्याख्यातं तदत्र सत्यस्य योनिमित्यादिविशेषणत्रयेणैव सिद्धम्। तेन तन्मते त्रिसत्यमित्यस्य विशेषणस्य वैयर्थ्यम्। व्याख्यानव्याख्येयभावस्यागतिकगतित्वात्। अतो दोषाणां विद्यमानत्वात् तदुपेक्ष्यमिति बोध्यम् ॥ २६ ॥

एकायन इत्यत्र—एवं प्रमाणेत्यादि। पूर्वश्लोके सत्यस्य प्रमाणत्वकथने "सत्यात्मक"मित्यनेन भगवतः प्रमाणरूपतामुक्त्वाग्रे "त्वमेक एवास्ये"त्यनेन श्लोकेन साधनरूपतां वदिष्यंस्तदुभयसन्देशेनैकायनश्लोकेन भगवतो जगद्रूपतया प्रमेयतामाहेत्यर्थः। ननु ब्रह्माण्डस्य वृक्षत्वमत्र निरूप्यतेतः कथमत्र भगवतः प्रमेयत्वप्रतिपत्तिरित्याकाङ्क्षायामाहुर्वृक्ष इवेत्यादि। भगवान् वृक्षरूप इति। तेनादिवृक्षोसावितिमूलान्वयो बोधितः। न चात्र श्रुतौ वृक्षो दृष्टान्तत्वेन प्रविष्टोतो नानया भगवतः प्रमेयत्वोपष्टम्भ इति शङ्क्यम्। 'ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद कश्चन न स जातु जनः श्रद्दध्यात् मृत्युर्मा मारयादिती'तिश्रुत्यन्तरे मृत्युमारणाभावश्रद्धारूपफलेन तस्य वृक्षस्य भगवद्रूपतावगमादिह कार्यरूपवृक्षनिरूपणेपि तेन कारणवृक्षस्यानुमानान्न प्रमेयत्वहानिरित्यर्थः। ननु तथापि सद्रूपस्य तथात्वमस्तु कालात्मकस्य कथमिति चेन्न। कालस्य जगदुपादानत्वात्। "गुणव्यतिकराकारो निर्विशेषो प्रतिष्ठितः पुरुषस्तदुपादानमात्मानं लीलयासृज"दिति तृतीयस्कन्धे तथाप्रमेयत्वस्य सिद्धत्वात्। उपादेयस्योपादानात्मकत्वेन काले तथात्वसिद्धेरप्रत्यूहत्वादिति। निरूपितेति। तृतीयस्कन्ध "एते देवाः कला विष्णो"रित्यादिनोक्तेत्यर्थः। दैत्यकल्पादत्र फलेपि विशेषमाहुर्नराणां कमित्यादिना ॥ २७ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

ब्रह्मेत्यत्र—सात्त्विककल्पे च विष्णोर्भगवत्त्वादत्रानागमनमिति ज्ञेयम्। वृषणमित्यस्य प्रथमेर्थे णकारान्तः शब्दो द्वितीयार्थेकारान्त इति ज्ञेयम् ॥ २५ ॥

कालात्मेति—भगवान् पुरुषोत्तमः कालः सङ्कर्षण आत्मनि यस्य तादृशः सञ्जातः। सङ्कर्षणं गृहीत्वा प्रकट इत्यर्थः। तथेति। एतस्यैव विवरणं कलाभिरिति। चन्द्रस्य पञ्चदश कलाः पक्षः। चान्द्रमासमभिप्रेत्येदमुक्तम्।

स एवेति। अत्र पुरुषोत्तमे सङ्कर्षण एव भूभारहरणार्थं प्रार्थितत्वादवतीर्ण इति प्रकारेण तैः सङ्कर्षणो ज्ञात इत्यर्थः। व्यूहान्तरज्ञानव्यावृत्त्यर्थमेवकारः। स्तुतेः पुरुषोत्तमत्वज्ञापकत्वं सङ्ख्यायाः सङ्कर्षणत्वज्ञापकत्वमितिविभागः। लोककृत इत्यादिषु लोकादिद्वारा कृत इत्यर्थः। दैत्यकृतादिति। दैत्येषु कृतादित्यर्थः। स त्वनृतादिरूप इतिभावः।

सत्यव्रतमित्यत्र भगवतः सत्यमेवेति । भगवतः सत्यं यथार्थं यद्रूपं तदेवैतत्सर्वरूपेण जातमित्यर्थः । न त्विति । अयथार्थं यद् रूपं तदिदं न भवतीत्यर्थः । तद् रूपं परिच्छाययन्ति दैत्यानामिवेति ।

पञ्चविधं सत्यमुक्तमिति । टिप्पण्युक्त आद्यपक्ष उत्पत्तिस्थितिप्रलयाः प्रमेयं साधनं चेति पञ्चविधत्वं ज्ञेयम् ॥ २६ ॥

एकायन इत्यत्र—चेतनरूपतेति । तृतीयस्कन्धे स्तुतिकथनेन चेतनत्वं निरूपितमित्यर्थः । इदं च तत्रैव व्युत्पादितम् । दैत्यादिकल्प इति । दैत्यानामादिकल्पे मुख्यसिद्धान्त इत्यर्थः ॥ २७ ॥

त्वमेक एवेत्यत्र—सत इतिपदकथनस्यावश्यकत्वमाहुरन्यथेति । जगतः सत्त्वाभावे जगत्कर्तृत्वेनोच्यमानो भगवान् को ब्रह्मा वासतः कर्ता स्यात् । भगवतो ब्रह्मणो वाज्ञानकार्यकर्तृत्वेऽज्ञानरूपत्वं स्यादितिभावः । दैत्यानां दुर्गाभैरवादयः सेव्या इति तत्पक्षव्यतिरेको ज्ञेयः । चित्तं पुष्कलमिति । अण्वपि सर्वग्रहणक्षममित्यर्थः ॥ २८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

सत्यव्रतमित्यस्य विवरणे—दैत्यानां हितकार्यपि पञ्चदश इति कालविशेषणम् । पञ्चदश अवयवाः कृष्णपक्षदिनरूपा विद्यन्ते यस्मिन् स पञ्चदशः कालः । अर्श आद्यच् । कालात्मा भगवाञ्जात इति । भूभारहरणार्थं तत्प्राकट्यस्यैवोचितत्वात् । 'कालोस्मि लोकक्षयकृत् प्रवृद्ध' इतिभगवद्वाक्यात् । यद्यप्यत्र पुरुषोत्तमप्रादुर्भावोपि भावी तथापि पुरुषोत्तमस्य सर्वात्मतया सर्वहितकर्तृत्वेन दैत्यनाशो न स्यादतः कालरूपः सङ्कर्षण एवास्मद्धितार्थमवतीर्णोयमिति ब्रह्मादीनां बुद्धिः । तथा च कालरूपस्य सत्त्वादिगुणानुरोधितया सात्त्विकादिजीवानां पक्षपातं क्रमेण कुर्वंस्तद्गुणप्रतिकूलगुणयुक्तानां नाशमपि करोति । अत एव 'तदा वयं विजेष्यामो यदा कालः प्रदक्षिण' इत्यादिवचांसि सङ्गच्छन्ते । कालरूपो भगवान् सात्त्विकानां हितकाङ्क्षया दैत्यनाशं करिष्यतीति तथैव ब्रह्मादिभिः स्तूयते । तत्र कालस्य भौतिकं रूपं वर्णनीयं यतो भौतिकरूपेण वर्णने कृत आधिदैविकं रूपं स्फुटीभवति । तत्र कालस्याधिभौतिकश्चन्द्रः पञ्चदशकलः । तत्स्वरूपं प्रतिपादनीयम् । तत्प्रतिपादने तदाधिदैविकं ज्ञातं भवति । अतः कालभौतिकरूपस्य चन्द्रस्य पञ्चदश कला निरूप्यन्ते । षोडशी तु ध्रुवा । सा तु वृद्धिक्षयरहिता न पक्षावयवबोधहेतुः । अतः पञ्चदशैव कला वृद्धिक्षयाभ्यां सितासितपक्षकर्त्र्यः । एकः कालः सितासितपक्षाभ्यां त्रिंशदात्मको भवति । तत्र पक्षपातसूचकस्तुतिचिकीर्षयैकपक्षत्यागे पञ्चदशात्मकत्वं कालस्येति तस्य देवपक्षपातिकालरूपस्य पञ्चदशात्मकत्वसूचनार्थं पञ्चदशभिः श्लोकैः स्तुतिरिति गर्भश्लोकसङ्ख्यातात्पर्यम् । ध्रुवायाः सूचनार्थं षोडशः श्लोकः । ध्रुवा यथा सर्वाभ्यः कलाभ्योतिरिक्ता तथात्रापि स्तुतितोतिरिक्ता प्रार्थना षोडशे श्लोक इति ज्ञेयम् । एवं षोडशश्लोकसङ्ख्यया चन्द्रमाः कालभौतिकरूपः सूचितः । तेनाधिदैविककालात्मा सङ्कर्षणो दैत्यनाशाय देवपक्षपात्यवतीर्ण इति बोध्यते स्म ॥ २६ ॥

॥ इति श्रीद्वितीयाध्याययोजना ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

सत्यव्रतमित्यस्याभासे—कालात्मेत्यादि । तथेत्यस्य विवरणं कलाभिरिति । स्वपक्षस्थापकैरिति । कालो द्विविधः शुक्लपक्षरूपो देवहितकारी कृष्णपक्षरूपो दैत्यहितकारी चेति । तत्र देवपक्षतया स्थापकैः कलारूपैः पञ्चदशभिः श्लोकैः स्तुतिरित्यर्थः ॥ १ ॥

पक्षपातेत्यादि । अत्र पञ्चदशभिर्भगवत्स्तोत्रमेकेन 'दिष्ट्याम्बे'तिश्लोकेन देवकीसान्त्वनम् । तत्र पञ्चदशभिर्देवानां हितकारिणी स्तुतिः षोडशी देवकीसान्त्वनरूपा तु कला ध्रुवा स्वाभाविकत्वादित्यर्थः । वृद्धौ वा तादृशो भवेदिति । तिथिवृद्धौ वा तादृशः षोडशदिनात्मकः कालो भवेदित्यर्थः ॥ २ ॥

अत्र सुबोधिन्यां स्वयं षोडशविधं तदन्तर्गतमष्टविधं पञ्चविधं वेदोक्तं चेति त्रिधा व्याख्यातम् । तत्र वेदोक्तं पञ्चविधं यथा । 'सत्यं परं परं सत्यं सत्येन सुवर्गाल्लोकाच्च्यवन्ते न कदाचन सतां हि सत्यं तस्मात् सत्ये रमन्त' इति श्रुतौ 'सत्यं पर'मितिपदोक्तं प्रमाणरूपं सत्यमत्र श्लोके सत्यव्रतमितिपदेनोक्तम् । 'परं सत्य'मितिपदोक्तं प्रमेयरूपं सत्यमत्र सत्यपरमितिपदेनोक्तम् । 'सत्येन सुवर्गाल्लोकाच्च्यवन्ते न कदाचने'त्यनेनोक्तं सत्यं 'सतां हि सत्य'मितिपदोक्तं सत्यं चात्र त्रिसत्यमितिपदेन भूरादित्रयकायादित्रयरूपफलसाधननिरूपकेणैकीकृत्य निरूपितम् । एतदेवोक्तं सुबोधिन्यामेवं चतुर्धा विधो निरूपित इत्यत्र चतुर्धेतिपदेन । एवं वेदोक्तपञ्चविधसत्येषु चतुर्विधं सत्यं निरूपितम् । अथावशिष्टं 'तस्मात् सत्ये रमन्त' इत्यत्रोक्तं रमणाधिकरणभूतं पञ्चमं सत्यम् । तदत्र सत्यात्मकं त्वां शरणं प्रपन्ना इत्यनेन निरूपितं ज्ञेयमिति पुरुषोत्तमा व्याख्यातवन्तः ।

अथ षोडशविधम् । तत्र सत्यव्रतमितिपदेन श्लोक उपोषणादिरूपं व्रतं तत्तैलादिष्वप्यदाहरूपं सत्यं चेति द्विविधम् । अत्र हि सत्यव्रतपदं श्रौतेन 'सत्यं पर'मितिपदेन तुल्यार्थकम् । तथा चात्र श्लोके श्रुत्युक्तोत्कृष्टार्थकपरपदतुल्यार्थकेन व्रतशब्देन व्रतसत्ययोरुभयोरप्युत्कृष्टत्वात् सङ्ग्रहः । अथ सत्यपरमितिपदेन 'दण्डो दमयतामस्मी'तवचनाल्लोके दण्डादिरूपं लौकिकनियामकं वैदिकं

द्वादशविधं भगवतो व्रतं भगवतो नियामकं चेति चतुर्विधम्। अत्र परशब्देनोत्कृष्टार्थकेन भगवदीयव्रतस्याप्युत्कृष्टत्वात् सङ्ग्रहः। त्रिसत्यमितिपदेन भूरादित्रयं कायादित्रयं च द्विविधम्। एवं त्रिभिःपदैरष्टविधं सत्यमुपपत्तिरूपं निरूपितम्। अथोत्पत्तिरूपमष्टविधं निरूप्यते। तत्र 'सत्यस्य योनिं निहितं च सत्ये सत्यस्य सत्य'मितिपदत्रयेण पञ्चविधं सत्यमुक्तम्। तदुक्तं सुबोधिन्यामेवमुत्पत्तिस्थितिप्रलयप्रसङ्गे पञ्चविधं सत्यमुक्तमिति। सुबोधिनीग्रन्थार्थष्टिप्पण्यामनुक्तोपि श्रीवल्लभगोस्वामिलेखादवगम्यते। स यथा। सत्यस्य योनिमितिपदेनोत्पत्तिरूपमेकविधं सत्यम्। निहितं च सत्य इत्यनेन स्थितिरूपं प्रमेयसाधनरूपं चेति त्रिविधम्। सत्यस्य सत्यमित्यनेन प्रलयरूपमेकविधं सत्यम्। एवं पञ्चविधम्। ऋतसत्यनेत्रमितिपदेन प्रमाणनिरूपकेण द्विविधम्। सत्यात्मकमितिपदेन फलनिरूपकेण धर्मिरूपमेकविधं सत्यमिति षोडशधा।

अथ टिप्पण्यां द्वितीयव्याख्याने सत्यस्य योनिमितिपदेन प्रमाणरूपमेकविधं सत्यम्। निहितं च सत्य इत्यनेन प्रमेयसाधनरूपं द्विविधम्। सत्यस्य सत्यमित्यनेन फलरूपं भगवति प्रतिष्ठितं चेतिद्विविधम्। एवं पञ्चविधं ज्ञेयम्। ऋतसत्यनेत्रमित्यनेन ज्ञानशक्तिद्वयम्। सत्यात्मकमितिपदेन धर्मि चेति षोडश।

तथाचायं सङ्ग्रहः। सत्यव्रतमितिपदेन द्विविधम्। सत्यपरमितिपदेन चतुर्विधम्। त्रिसत्यमिति भूरादित्रयं कायादित्रयं चेतिद्विविधम्। एवमष्टविधम्। सत्यस्य योनिमित्येकविधं प्रमाणरूपम्। निहितं च सत्य इति प्रमेयसाधनरूपमिति द्विविधम्। सत्यस्य सत्यमिति फलरूपं भगवति प्रतिष्ठितं चेति द्विविधम्। एवं पञ्चविधं तु न वेदोक्तं किन्तु श्रीभागवतोक्तमेव। वेदोक्तं तु पूर्वमेवोक्तम्। एवं त्रयोदशधा क्रियाशक्तिर्निरूपिता। अथ ज्ञानशक्तिरूपं ऋतसत्यनेत्रमिति द्विविधम्। सत्यात्मकमितिपदेन धर्मिरूपमिति षोडशविधम्। टिप्पण्युक्तप्रथमपक्षीयवैलक्षण्यं तु पूर्वमेवोक्तमितिसङ्क्षेपः॥ २६॥

बुभुत्सुबोधिका

मन्वा भवस्त्वेत्यत्र अर्थादिति 'विपदः सन्तु नः शश्व' दितिवाक्ये दुःखस्य भगवच्चिन्तनहेतुत्वमुक्तमतस्तथेत्यर्थः। कंसादीनां भगवच्चिन्तनसर्थादुक्तमित्यन्वयः। वक्तुमिति दुःखेन भगवच्चिन्तनं वक्तुम्। अनेनेति देवासुरचिन्तनकथनेन। ज्ञातमभूदिति भगवतो व्यापकत्वाद् व्यापकयोगमायया ज्ञानसङ्कर्षणात् तथा। कंसादीति देवक्याः शत्रुत्वात्। अनेन ब्रह्मविद्याऽऽसुराणां हितकारिणी न भवतीत्युक्तम्। गुणाभिमानिन इति प्रथमस्कन्धतृतीयाध्याय उक्ताः। स्वानुकूलेति स्वपक्षपातिनीभिर्वाणीभिः कामवर्षणमिति काम्यन्त इति कामाः पक्षपातादयः। वृषु सेचने, बाहुलकात् क्युः। पुल्लिङ्गशब्दः द्वितीयान्तः। वृषणोण्डकोशः। 'आण्डावानन्दा'विति श्रुतिः तयोः कोषः पात्रम्। कोषशब्दः मूर्धन्यान्तः। भगवदिच्छया तालव्यान्तः प्रयुज्यते। अलौकिकव्युत्पत्तिमाहुः वृषमिति। नीञ् प्रापणे डः। सहोक्तानामिति नारदादीनाम्। व्याख्यानद्वयेन कामस्य धर्मात्मकस्य प्रापणकर्ता वृषण इत्युक्तम्। तदुक्तं बृहद्वामनपुराणे 'यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः। भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथे'ति॥ २५॥

सत्यव्रतमित्यत्र स्तुति श्लोकसङ्ख्यातात्पर्यं जातेष्टिन्यायेन मुख्यतो वदन्तो निबन्धे सङ्कर्षणोत्पत्तिर्द्वितीयाध्यायार्थो दैत्यवधार्थत्वस्य स्फुटत्वादिति यदुक्तं तदत्र 'प्राहैष मे प्राणहरो हरिर्गुहा'मित्यनेन कंसस्यापि ज्ञानकथनाद् यथा स्फुटं तथा स्वरक्षकत्वं देवानां ज्ञानादपीति ज्ञापयितुमाहुः कालात्मेत्यादि। कालात्मा कालदेहोनन्तः कालस्यात्मा कालात्मा। सोनन्तः पुरुषोत्तमः कृष्णः प्रकाशाश्रयन्यायेन। नित्यसम्बन्धाच्च शब्दार्थयोरौत्पत्तिकसूत्रात्। ब्रह्मादिस्तुतिभिर्ज्ञायते। यद्वा काल उपदेशकशब्दो वेदात्मा सङ्कर्षण आत्मेति यस्य तादृशः सन् जातः प्रतिपादकसहितो जातः प्रतिपाद्यः। पक्षपातिनी स्तुतिरतः कालात्मत्वेन पुरुषोत्तमस्तुतिः। 'चतुर्धा स्वीकृतिश्चापि काले मूलस्वरूपत' इति निबन्धात्। तथा च प्रश्नोपनिषदि 'षोडशकल' इति श्रावणात् कलाभिः षोडशभिः कालात्मा जात इति ज्ञापयितुं तथा स्तुतिः षोडशभिः श्लोकैः स्तुतिरित्यर्थः। अत्र प्रकारमाहुः पञ्चदशभिरित्यादि। स्वपक्षव्यापकैः पञ्चदशभिर्हि एषा देवानां हितकारिणी पक्षपातस्तुतिरित्यर्थः। ध्रुवा त्विति षोडशी तु ध्रुवा मनःकलेति प्रश्नोपनिषदुक्ता। स्वाभाविकत्वान् निश्चलेति भक्तहितकारिणी। ननु भवत्वेवं तथाप्ययनादिकं विहाय षोडशकलत्वेन कथं कालात्मत्वस्य देहेवगमः आत्मनोनन्तस्य पुरुषोत्तमत्वेन षोडशकलत्वस्य पुरुषोत्तमेवगमश्च कथं इत्यत आहुः वृद्धौ वा तादृश इति। अयनादिग्रहणे कृष्णपक्षस्य सङ्ग्रहापत्तेस्तिथिवृद्धौ षोडशकलत्वेन कालत्वावगमो देहे तथात्मनि मनःकलाया अनिन्द्रियभूताया वृद्धौ तादृशः षोडशकलः पुरुषोत्तमो भवेत्। मानुषतन्त्वाश्रयणात् पुरुषपदं प्रश्नोपनिषदि। वाशब्दोऽवधारणे। तथा च वृद्ध्या तदवगम इत्यर्थः। एतदेव स्फुटीकुर्वन्ति स्म अत्रेत्यादिना। तथा च स्तुतिसान्त्वनरूपद्विधाभेदाद् द्वैविध्येपि सान्त्वनश्लोके 'परः पुमा'नित्यादिकथनात् षोडशानामपि भगवत्स्तुतित्वमेव, उत्कर्षाधायकगुणवर्णनस्य स्तुतित्वात्। यदि च पुरुषोत्तमस्य गर्भसम्बन्धाभावान् नैतेषां साक्षात्पुरुषोत्तमस्तुतित्वं तदा तु कालदेहानन्तात्मनोरेव स्तुतिरिति सिध्यति। तत्र पञ्चदशभिः कालदेहानन्तात्मनोः स्तुतिं व्युत्पादयन्ति स्म काल इत्यादि अर्धेन निरूप्यत इत्यन्तम्। काल इति देहः स एव न त्वनन्तः। तैरिति विबुधैः। ज्ञात इत्यनन्तात्मन उत्पत्त्यभावाज् ज्ञातः। काल आत्मनि यस्येति व्युत्पत्तिपक्षे कालः सङ्कर्षणः स एवेति। अत्र पुरुषोत्तमे भूभारहरणार्थं प्रार्थितत्वादवतीर्ण इति प्रकारेण तैः सङ्कर्षणो ज्ञात इत्यर्थः। अर्धेनेति त्रिंशदर्धेन। तर्हि षोडशभिः कथं स्तुतिरित्यतस्तां व्युत्पादयन्ति स्म स

चेत्यादि चतुर्धेत्यन्तम्। कालकृत इति देहकृतः न तु पुरुषोत्तमकृतः। तस्य समत्वात् भक्तैः सह निगूढभावकरणाच्च। कालोऽत्र विश्वरूपप्रदर्शनाध्यायगीतोक्तः। तृतीयस्कन्धे कालकर्मस्वभावेषु क्षोभकः कालोयमेव। चतुर्धेति 'चतुष्पाद् ब्रह्म विभाती' तिश्रुतेः चतुष्पाद् ब्रह्मणः षोडशकलानां मध्ये चतसृणां चतसृणां कलानामेकैकपादत्वम्। चतुष्कल एकपाद इति। लोककृत इति लोकादिसन्मार्गद्वारा कालात्मकृतः। स्मृतिकृत इति उक्तोर्थः। लोकवेदात्मिकेति 'ऋषीणां पूर्वचरितस्मरणात् स्मृतिरुच्यत' इति लौकिकी। ऋषीणां लोकोद्भवत्वेन तत्पूर्वचरितस्य लोकोद्भवत्वात्। उत्सन्नप्रच्छन्नशाखामूलत्वेन वेदत्वाद् वेदरूपा। अतो लोकवेदौ आत्मनि स्वरूपे यस्याः सा शब्दरूपा लोकवेदात्मिका। भगवन्मार्गकृत इति श्रीभागवतमार्गकृतः। 'कृष्णवाक्यानुसारेण शास्त्रार्थं ये वदन्ति हि ते हि भागवताः प्रोक्ताः शुद्धास्ते ब्रह्मवादिन' इति निबन्धात्। 'कृष्णवाक्यं गीता तद्विस्तारो भागवतम्'। तत्र द्वितीयस्कन्धनवमाध्यायोक्तः। पुष्टिमार्गश्च। प्रमेयबलसाध्यः स्वयं प्रमेयं निःसाधनानां ज्ञानभक्ती बलरूपे दत्वापि मोचयतीति। 'भक्त्याहमेकया ग्राह्य' इतिवाक्यात्। भगवान् ब्रह्मकार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत् कूटस्थो रतिरात्मन्यतो भवे' दितिवाक्येन ज्ञानक्रियाकाण्डयोस्तद्वाचकयो रतौ तात्पर्यमुक्तम्। रतिराध्यात्मिकी भक्तिः। 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यती'ति वाक्योक्तेषु श्रद्धायामाधिभौतिकभक्तिरूपायां आधिदैविकभक्तिमेलने आध्यात्मिकभक्तिरूपरतिपदवाच्यत्वमिति। सन्मार्गेण पक्षपात इति छान्दोग्ये देवासुरस्पर्धायामुद्गीथविद्ययाऽसुरात्यये सिद्धः। एवं च लोकादिसन्मार्गद्वारा कृतः पक्षपात इत्युक्तम्, एवमत्र भगवन्मार्गकृत इत्युपसंहारेणार्थनिर्णयात्। एवं च प्रमेयबले ज्ञानशक्तिक्रियाशक्तिभक्तिभिर्मोक्षः स न भवति भगवद्धर्मत्वेन मार्गत्वाभावात्। अतो मार्गरूपज्ञानादिभिर्मुक्तिः। अत एतेषामंशानामाकर्षः। ते च तैत्तिरीयोक्ताः षोडश। तेनेदं सिध्यति आध्यात्मिके द्वापरादिरूपे काले विपक्षे सति कलिकार्यप्रतिबन्धार्थं कृपया भगवानाधिदैविककालरूपो भवंस्तदंशैर्लोकादिभिः न्यायशास्त्रसिद्धैः लोकादिविभाजकप्रमाणाद्युपाधिभिश्च पक्षपाती जात इति। एवं षोडशधा विभागमुपपाद्य तत्कृतं प्रयोजनमाहुः दैत्यकृतादिति। दैत्येषु कृतादुपकारात् स्वपक्षपातस्याधिक्यं वक्तुमत्र षोडशधोच्यत इत्यर्थः। लोककृतं चातुर्विध्यं विभजन्ते स्म तत्रेत्यादि। तत्र षोडशेषु एतस्यैव विवरणं लोकसिद्धानीत्यादि। लोके सत्यमेव प्रमाणमिति लोके भवो भगवान् सत्यरूपः प्रमाणम्। 'अत्र प्रमाणं भगवा'निति वाक्यात्। अनेनाप्यस्माकमस्तु केवलमिति पक्षपातार्थं स्तौति स्म। बाल्ये महाजनत्वाल्लौकिकत्वम्। ततोतिशयाधाने लोकवेदात्मकस्मार्तत्वम्। ततोऽप्यतिशयाधाने वैदिकत्वम्। ततोऽप्यतिशयाधाने भगवन्मार्गीयत्वमिति। लोके सत्यभाषणमित्यादिस्थले सत्यं भाषणमिति भानात् सत्यशब्दः प्रमाणम्। प्रमाकरणं प्रमाणम्। सत्यस्यापि शाब्दप्रमाविषयत्वेन विषयविधया कारणत्वमात्रम्। एवकारस्तु लोके प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि न भवन्ति किन्तु तत्प्रेरको भगवानिति। सत्यं भाषणं वा। शब्दात्मकं प्रमाणं (तद्विषयश्च) इति प्रकाशे, प्रमाणस्य प्रवर्तकत्वेन ग्रहणे प्रमाणं भगवानिति पितृचरणाः। सत्यपदस्य यथार्थत्वं शक्यतावच्छेदकम्। लौकिकशब्दानां शक्तिरस्ति। तादृशप्रमाणेन यादृशं प्रमेयं सिध्यति तदाहुः परिदृश्यमानं जगदेवेति। दैवसृष्टौ परिदृश्यमानं जगदेव प्रमेयम्। पूर्वश्लोकोक्तषोडशविधसत्यात्मकप्रमाणज्ञानवासनासहकृतचक्षुरादिप्रमाणजन्यप्रमितिविषयत्वात् प्रमेयमित्यर्थः। 'तेनैकायनोसा'वितिश्लोकप्रतिपाद्याधिदैविकवृक्षात्मकसत्यरूपप्रमाणपादाक्षरज्ञानविषयत्वेन सद्रूपतयैवेह जगत् प्रमेयमित्युक्तं भवति। ननु वृक्षत्वेन न लोको जगत् प्रत्येतीति चेत्, ब्रह्मादिः प्रत्येतु न लोकः। जगदेवेति एवकारेण वैदिकादिप्रमेययोगव्यवच्छेदः। लोके जगदतिरिक्ताज्ञानात्। न कदाचिदनीदृशं जगदितिमीमांसकानामुत्पत्त्याद्यज्ञानवत्। प्रमेयमिति प्रमाविषयं प्रमेयम्। एवंभूते प्रमेये तत्र सुखदुःखयोरुभयोरपि श्रवणे सति दुःखनिवृत्तिपूर्वकक्षेमफलसाधनविषय उत्कटोभिलाष उदेति कथं मे क्षेमफलं स्यादिति ततस्तत्पूर्त्यै साधनं निर्दिशन्ति स्माचार्यास्तृतीयश्लोके गुणाभिमानिन इत्यादि। लोकस्य त्रिगुणप्रधानत्वात् तत्तद्गुणप्रधाना लोके तं तं ब्रह्मादिकं देवं फलार्थं सेवन्त इतिभावः। यथा नन्दस्येन्द्रयागः। साधनानीति क्षेमसाधनानि। गुणाभिमानिदेवानां प्रमेयत्वेपि। कृपाविशिष्टत्वावच्छिन्नं प्रमेयत्वं साधनत्वम्। ब्रह्मविष्णुशिवातिरिक्तवस्त्वज्ञानाल्लोके एवकारः। ननु हिरण्याक्षबाणप्रभृतयोसुरा अपि ब्रह्मविष्णुशिवोपासनया प्रभूतबलाः श्रूयन्त इति कथमेकान्ततो दैवसृष्टावेव गुणाभिमानिदेवानां साधनत्वोक्तिः सङ्गच्छतामिति चेत्, सत्यम्। श्रूयन्ते यद्यपि तथापि तदुपासनं क्षेमार्थं न भवति, किन्तु स्वपरोपद्रावणार्थमेवेति फलभेदादपि साधनभेदस्तत्रावश्यमङ्गीकार्य इत्याशयेन दैवसृष्टावभिमतं फलं निर्दिशन्ति स्म क्षेम एवेत्यादि। क्षेमः कुशलं वर्तत इत्येवागतं पृच्छन्ति। अतः क्षेम एव न तु तत्, तद्देवतासायुज्यमपि फलम्। उद्देशाभावात्। फलम् आनन्दाविष्टो भगवान् तस्य लोके क्षेमः कार्यमिति क्षेमः फलम्। आनन्दाविष्टो भगवान् फलमिति फललक्षणम्। अतो न प्रमेयसाधनयोः फललक्षणातिव्याप्तिः।

वदन्ति च। 'नमोस्तु राज्यवृक्षाय षड्गुण्यगुरुशाखिने। सामादिचारुपुष्पाय त्रिवर्गफलदायिन' इति। तथा च दैवसृष्टौ गुणाभिमानिनां देवानां यत् साधनत्वमुक्तं तच्च स्वरूपसत्तामात्रेण न निर्वहति किन्तु यागादिवद् वैदिकादिमार्गेण श्रद्धापूर्वकं उपासनादिव्यापाराविष्टा एव तथा। एवं च हिरण्याक्षबाणप्रभृतयो हि स्वेष्टदेवत्वज्ञानेन श्रद्धापूर्वकं सदुपदेशान् न भजन्ति स्म, किन्तु कौतुकार्थमेव। कथमन्यथा 'दोःसहस्रं त्वया दत्तं परं भाराय मे भव' दितिनिर्मर्यादवचनं व्याहरेयुः। न ह्युपास्यं लक्ष्मीकृत्य संयुगप्रार्थनादिरुन्मत्तव्यवहार उपासकस्य योग्यः, तस्मान्नेदमुपासनं मर्यादया प्रेम्णा वेति, किन्तु केवलदम्भ एव, कथमन्यथा तत्रेश्वरः कुप्येत, वृकादीनामुपास्ये विरुद्धाचरणं स्पष्टमेवेति। किञ्चासुरा हि मायादेवताः सर्वे, माया हि व्यामोहिका कापट्यप्रधानेति तत्सेवका अपि तथेत्यपि कापट्ययुक्ता इति। उक्तपक्षपातस्तुतित्वं सङ्गमयितुमाहुः तत्रापीत्यादि। चतुर्षु। तत्रेति चतुर्षु प्रमाणादिषु।

अनृतमिति राजसमनृतं स्थाणुर्वा पुरुषो वेत्यत्र पुरुषः तामसज्ञानविषयः। व्यावहारिकं गुणसन्निपातकार्यम्। शम्बरादिदर्शिता मायात्रानृतं प्रमाणं भगवत्स्थानापन्नत्वात् प्रवर्तकमित्यर्थः। 'ज्ञानकाशये'ति मायाविशेषणात्। 'माया च तमोरूपे'ति श्रुतेस्तमोरूपापि। सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरितिपक्षे रजसः संशयस्तमसो विपर्यासः सत्त्वान्निश्चयः। माया शब्दात्मिका प्रमाणं स्पष्टम्। अर्थात्मिकापि प्रमाणं दैत्यप्रवर्तकत्वात्। तेन द्वितीयस्कन्धनवमाध्याये 'आत्ममायामृते राज'न्नित्यत्र राजसतामसज्ञानरूपिका स्वयम्। सत्त्वं ज्ञानं व्यावहारिकम्। अत्र दैत्यपदेन लक्षणतो ये दैत्यास्त एव विवक्षिताः। अतो प्रह्लादादौ न नियमभङ्गः। तल्लक्षणं च 'भूमिर्दृप्तनृपव्याजे'त्यत्र निरूपितम्। उच्छास्त्रवर्तित्वम्। दित्युपाख्याने दयाभाव एवमन्यत्रापि हिंसाविहारभगवत्प्रत्यनीकत्वादितत्तत्प्रकरणादूह्यम्। प्रह्लादादीनां दैत्यवंशोत्पत्तिस्तु तद्वंशोद्धारार्थं, एकविंशतिपुत्रपौत्रादिरूपवंशोत्र। अत इति प्रमाणप्रकरणात् देवपक्षपातात्, यत इयं पक्षनिरूपिका स्तुतिरतो हेतोः। अत्रेदं ज्ञेयम्। पुरुषोत्तमपक्षे पक्षपातो न घटते, 'सत्यं चानृतं च सत्यमभव'दितिश्रुतेर्भगवतः सर्वरूपत्वात् तथापि ब्रह्मादिभक्तैः सर्वरूपेणैव स्तूयेत न तु सत्यरूपतामात्रेणेति स्तुतस्तद्वशः सन्नम्बरीषप्रसङ्गेम्बरीषपक्षपातो दुर्वासाः स्वशङ्करांशोऽपि न पक्षे पातितः भक्तवश्यत्वात्। एवं श्लोकतात्पर्यमुक्त्वा तत्र स्थितानामष्टविशेषणानां तात्पर्यं वदन्तः 'सत्यं पर'मिति वक्ष्यमाणश्रुतिनिरूपितपञ्चविधसत्येन सहैतच्छ्लोकोक्ताष्टपदनिरूपणीयसत्यस्यैकार्थतां दर्शयितुमाहुः सत्यमपीत्यारभ्य वेदे सत्यं पञ्चविधं निरूपितमित्यन्तेन। 'सत्यं पर'मित्यादिश्रौतवाक्यैः प्रमाणप्रमेयसाधनफलधर्मिभेदेन पञ्चविधं सत्यं वेदे यन् निरूपितं तदत्र श्लोके देवानां हितकार्यष्टविधं निरूपितं भवति। अत्र टिप्पण्याम्। अत्र इति विशेषणत्रयव्याख्यानोत्तरमष्टविधत्वं, चकारात् 'सत्यस्य सत्य'मित्यस्य व्याख्यानोत्तरं प्रमाणादिचतूरूपमित्यादिना त्रयोदशविधत्वत्रिविधत्वाभ्यां च षोडशविधत्वं च स्फुटीभविष्यतीत्यर्थः। सुबोधिन्याम्। तर्ह्येकैकेनैव विशेषणेनैकैकं सत्यं प्रतिपादनीयमित्यष्टभिर्विशेषणैरष्टविधं सत्यमत्र निरूपितं भविष्यतीत्युपस्थितामाकाङ्क्षां निरसितुमाहुः अंशतः षोडशविधमित्यादि। वेदे यत् पञ्चविधमुक्तं तदत्र सत्यमंशतः षोडशविधं निरूपितं भवतीत्यर्थः। अंशत इति उत्पत्त्याश्रितधर्मादिचतुष्टयस्य तथा धर्मिणश्च विचारेणेत्यर्थः। तथा च यद्यत्राष्टविधमेव सत्यं प्रतिपादितुमिष्टं स्यात् तदा त्वेकैकेन विशेषणेनैकैका विधाच्येत, तत् तु नास्ति किन्तु षोडशानां विधानामत्रांशतः सत्ये प्रतिपिपादयिषितत्वाद् यथासम्भवं प्रथमेन पदेन विधाद्वयं द्वितीयेन विधाचतुष्टयं तृतीयेन विधाद्वयं तुरीयेणैका विधा। ततः पञ्चमादित्रिभिः प्रत्येकं विधाद्वयमष्टमेन चैका विधेत्येवं षोडशविधानां प्रतिपादनीयत्वान्नोक्ताशङ्केति भावः। अत्र पञ्चविधं सत्यं तैत्तिरीये महानारायणे तच् छान्दोग्ये उद्गीथविद्यायामष्टविधमुक्तं तत् प्रश्नोपनिषदि षोडशविधमुक्तमिति सुबोधिन्यामपि तथा निरूपितम्, पक्षपाते स्वस्मिन्नाकर्षणार्थम्। पञ्चविधं सत्यं 'सात्मना प्रथमा लीले'ति कारिकया पञ्चाध्याय्यां प्रोक्तं तस्याष्टविधत्वं छान्दोग्ये तत्र छान्दोग्यीयषोडशविधानामवतारकाल उद्दिष्टाभिः षोडशविधाभिः प्रश्नोक्तषोडशविधानामतिदिष्टानामवतारिसम्बन्धिनीनां कासांचिद् बाधः। एवं च 'पुरुषत्वे च मां धीराः साङ्ख्ययोगविशारदाः आविस्तरां प्रपश्यन्ती'ति वाक्यमत्र। पञ्चविधसत्यनिरूपकं वेदमाहुः सत्यं परमित्यत्रेति। श्रुतिद्वयं महानारायणोपनिषदि। प्राजापत्यो गोत्रतः 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति प्रसिद्धे। प्रजापतिर्भगवान् वा, तथा च गीता 'अहं बीजप्रदः पिते'ति। अरुणस्यापत्यं आरुणिः 'अत इञ्'। श्रुत्युक्तं पञ्चविधत्वं स्फोरयन्तः श्रुतिं व्याकुर्वन्ति स्म यत् सत्यमिति। अत्र टिप्पणी वक्ष्यमाणेति वक्ष्यमाणो यः श्रुत्यर्थः 'सत्यव्रत'पदेन तन्निरूपकं श्रुतिवाक्यमित्यर्थः। 'प्राजापत्यो हारुणि'रित्यत्र 'सत्येन वायुरावाती'त्यादिपञ्चविधं सत्यं 'सत्यं पर'मितिव्याख्यानोत्तरं व्याकृतं भविष्यति 'अत्र श्रुतिरनुसन्धेये'ति सुबोधिन्या। परत्वं सर्वोत्कृष्टत्वं, 'ब्रह्मविदाप्नोति पर'मित्यादिश्रुतिदृष्टमत्रापीत्याहुः सर्वेभ्य इति। यद्वेति अत्र टिप्पणी वाशब्द एवाकारार्थो वाक्यालङ्कारे इति यद्वा सर्वोत्कृष्टमित्यत्र वाशब्द इति व्याख्येयम्। यदेव सर्वोत्कृष्टं तत् सत्यमिति व्याख्या। अत्र सर्वोत्कृष्टत्वस्य विधेयत्वयोगव्यवच्छेदकैवकारो न किन्तु वाक्यालङ्कार इत्यर्थः। एवं सत्यत्वेत्यादिनेति व्यतिहारेणैक्यं प्रतिपादनीयमित्यर्थः। यथा कृष्णोहमहं कृष्ण इति। 'परं सत्य'मितिश्रुतौ वाशब्दाभावात्, अस्य चोक्त 'परं सत्य'मितिश्रुतिव्याख्यानत्वादितिभावः। श्रुताविवेति अत्र प्रतिपादनीयमित्यस्य प्रकृतार्थत्वादाहुः स्तुतावपीति।

सुबोधिन्याम्। एवं विधाद्वयं व्याख्याय तृतीयां व्याकुर्वन्ति स्म अत एवेति। यतः सत्यपरयोरैक्यं अतः साधनफलयोरैक्यादेव न तु भिन्नत्वात्। 'सत्येन स्वर्गलोकात्' परशब्दार्थात् आत्मसुखरूपात्। कदापीति आत्मसुखैकीभावात् तथा। तुरीयां व्याकुर्वन्ति स्म एहिकेपीत्यादि। अत्र 'सतां हि सत्य'मिति श्रुतं वाक्यं साकाङ्क्षं तत् 'मूलं फल'मितिपदद्वयेन पूरितम्। मूलं प्रवृत्तिकारणम्। पञ्चमीं व्याकुर्वन्ति स्म अत इत्यादि। प्रमाणप्रमेयेति सर्वोत्कृष्टं प्रमाणं भगवान् 'सत्यं पर'मित्यनेनोक्तम्। प्रथमोपस्थितत्वाद'त्र प्रमाणं भगवा'नितिवाक्योपस्थित्या न फलं भगवान्। कार्यकारणयोरभेदाच्छब्दव्यत्ययेन प्रमेयं कार्यं 'परं सत्य'मित्यनेनोच्यते। 'सत्येने'ति तृतीयया साधनम्। 'सत्य'मिति फलम्। साधनानन्तरं तस्यौचित्यात्। सत्य एवेति स्वमूलभूते धर्मिणि। उपलक्षणं सत्यपदं ज्ञानानन्तयोरिति वक्ष्यन्ति। न त्वनृते रमन्ते। तदत्रापीति स्तुतावपि। वेदान्तसारत्वात् श्रीभागवतस्य। स्तुतिवाक्यं व्याकुर्वन्ति लोके हीत्यादि। अत्र टिप्पणी स्पष्टा। पर इत्युच्यत इति लोकोक्तिः यद्वा परमस्यास्थेयत्वेनास्तीति परः। अर्शआद्यच्। तथा सत्यमपीति अत्र आतिष्ठतीत्यन्तमावर्तते। तथा चैतयोरास्थानाल्लोके परत्वकथनेन श्रुतौ 'सत्यं पर'मित्यत्र

स्वविशेष्यव्रतबोधकसत्यव्रतमिति पुराणोपष्टब्धं सत्यपदं सत् सत्यं व्रतं च प्रतिपादयत्युपलक्षणविधया एवं प्रतिपाद्यपरमित्यनेन परैक्यं प्रतिपाद्यत इति 'सत्य'शब्देन सत्यं व्रतं चेत्युभयं सङ्गृह्यत इति भावः। तदेतत् प्रकृते योजयन्ति स्म भगवतस्त्विति। उभयं सत्यं व्रतं च अत्रोभयत्वं परत्वं वा शक्यतावच्छेदकं उद्देश्यतावच्छेदकं च न तु सत्यत्वसमानाधिकरणं व्रतत्वम्। शरीरगौरवात्। अतो नोद्देश्यतावच्छेदकविधेययोः सत्यत्वयोरैक्यं प्रयोगबाधकम्। घटो घट इति प्रयोगाभावात् उद्देश्यतावच्छेदकविधेययोरैक्यात्। घटे घटत्वमिति तु भवत्येव प्रयोगः। तुना लौकिकव्रतसत्ययोर्व्यावृत्तिः क्रियते। उभयं सत्यमित्यस्य योजना यत् सत्यं यथार्थं, तत् उभयं सत्यं व्रतं चेति द्वयमिति। यद्वा उभयं सत्यमित्यस्यैवं योजना यत् सत्यं त्रैकालिकाबाधितं न तु यथार्थम्। यथार्थमित्यस्य 'परं सत्य'मित्यत्रैवार्थत्वं अन्यत् पूर्ववत्। इदं द्वयं भगवद्देवताकं, यत् पुनर्दम्भादिना कृतमयथार्थं तद् भगवत्स्वामिकं भगवदाज्ञया प्रवृत्तं न। यदभावे तत्र भगवत्स्वामिकत्वाभावः इति व्यतिरेकः न तु यदभावे भगवदभाव इति व्यतिरेकः। ननु श्रुतौ परशब्दसत्त्वेपि 'सत्यव्रत'मित्यत्र 'पर'पदाभावात् कथमुभयोरेकवाक्यतेति चेत् सत्यं सत्यव्रत'मित्यत्र सत्यं सर्वोत्कृष्टरूपं परं व्रतं व्रतसत्योभयार्थकं उपलक्षणविधया। श्रुतौ सत्यपदं सत्यव्रतार्थकं यथा तथा स्तुतौ व्रतशब्दः व्रतसत्योभयपरं एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति। अत्र 'सत्यं पर'मित्यत्र परत्वं विधेयम्। 'सत्यव्रत'मित्यत्र सत्यत्वं परत्वं विधेयम्। 'कुटादिर्ब्राह्मणादयः शूद्रदाशोत्तराः प्रजा' इतिवदुत्तरस्य विधेयत्वम्। उत्तरस्योद्देश्यत्वं वा। एवं सत्यं व्याख्याय 'तस्मात् सत्ये रमन्त' इति श्रुतितात्पर्यबोधनाय पदसम्बन्धमाहुः सत्यमेवेति। एवकारो न विग्रहघटकः किन्तु दम्भादिकृतसत्ययोगव्यवच्छेदकः। तथा च सत्ये रताः रमणयुक्ताः शरणं प्रपन्नाः न तु भयादिनेति ब्रह्मरुद्रमात्रपरम्। सजातीयदेवानां भयादिसत्त्वात्। एतेन सत्ये प्रमाणे रता इति वाक्यार्थ उक्तः। यद्वा सत्ये फले प्रवर्तके रता इत्यर्थः। एवं पदसम्बन्धमुक्त्वा 'लोके हि व्रत'मित्यादिना यदुक्तं तन्निगमयन्ति एवमित्यादि। उभयोरिति अत्र टिप्पण्याम्। तदुभयेति व्रतसत्योभयप्राप्तौ। तथा च व्रतपदं स्वशक्यस्य नियमस्य परत्वेनैव सम्बन्धेनाजहत्स्वार्थया वृत्त्या सत्यमपि प्रापयतीत्यर्थः। सुबोधिन्याम्। एवं 'सत्यव्रत'मितिपदं व्याख्याय 'सत्यपर'मितिपदं व्याकुर्वन्ति अतः परमिति। अत्र टिप्पण्यां अत्रापीत्यादि। सत्यपरमिति पदेपि। लोके लौकिकं नियामकं तप्ततैलादौ शपथादिरूपम्। वैदिकं द्वादशविधं चेति योजनया द्वैविध्यं निरूपितमित्यर्थः। परत्वसर्वोत्कृष्टत्वयोरैक्योक्तेः। 'परं सत्य'मिति श्रुत्यनुरोधेन परपदव्याख्यानम्। परपदार्थस्तूत्कृष्टत्वं पूर्ववत्। अभेदे सति प्रमाणे निरूपणीये उत्कृष्टे सत्यत्वं विधेयम्। प्रमेये उत्कृष्टे सत्यत्वं विधेयमिति। प्रमाणे तु सत्ये उत्कृष्टत्वं विधेयं परन्तु परत्वोत्कृष्टत्वयोरैक्यमेव। प्रमाणं भगवान् प्रमेयकार्याभिन्नम्। यद्वा परपदार्थो लोके नियामकत्वं, तच्च यथाशास्त्रं तप्ततैलादौ शपथप्रणीयमानदण्डनीत्यादिरूपम्। राजादिनिष्ठम्। 'दण्डो दमयतामस्मि नीतिरस्मि जिगीषता'मिति गीतावाक्यात्। अयमुक्तार्थान्नातिरिच्यते। सुबोधिन्याम्। 'सत्यं तप' इति महानारायणस्था श्रुतिः। सत्यं प्रथमाष्टके औषधिसान्नाय्यरूपं विद्यात्वे सति वेदप्रतिपाद्यत्वात्। तपो द्वितीयाष्टके यज्ञः वायूपधावनरूपः। 'वायव्यं श्वेतमालभेते'तिश्रुतेः। दमः तृतीयाष्टके इन्द्रियदमनरूपः 'प्रजाः सृजेये'ति 'स तपोतप्यते'ति श्रुतेः। तप ऐश्वर्ये दि० आ० अनि० लङ्। शमः चतुर्थाष्टके 'युञ्जानः प्रथमं मनस्तत्त्वाय सविता धिय' इति श्रुत्यां मनोयोगोक्तेः। दानं पञ्चमाष्टके होमरूपम्। 'सावित्राणि जुहोती'तिश्रुतेः। सवितृदेवताकद्रव्याणां दानम्। हु दानादानयोः। धर्मः षष्ठाष्टके प्राचीनवंशकरणपूर्वकः 'प्राचीनवंशं करोती'तिश्रुतेः। प्रजननं सप्तमाष्टके कामरूपम्। 'प्रजननं ज्योति'रिति श्रुतेः। अग्नयो ब्रह्मचारिणः। अग्निहोत्रं गृहस्थस्य। यज्ञो वानप्रस्थस्य। 'वन्यैः चरुपुरोडाशै'रितिवाक्यात्। मनःसन्न्यासश्च यतेः। 'मनः पूतं समाचरे'दिति वाक्यात् मनः। 'आश्रमादाश्रमं गच्छेन्नान्यथा मत्परश्चरे'दितिवाक्यात्। वैदिके धर्मे 'आश्रमादाश्रमं गच्छे'दित्युक्तम्। परत्वमुत्कृष्टत्वं स्पष्टं, द्वादशविधपरस्मिन् श्रुतिरपि महानारायण एव, 'किं भगवन्तः परमं वदन्ती'तिप्रश्नेन तदुत्तरेण च परमत्वेनोक्तत्वम्। परमित्यत्र मवर्णागमः परमित्यर्थः। एवं परपदं व्याख्याय 'सत्य'पदं श्रुतिस्थं व्याकुर्वन्ति तत्सर्वमिति। आकर्षणान्तः। यथार्थमिति अर्थमनतिक्रम्येति यथार्थम्। अव्ययीभावः। यद्रूपं तदेवैतत् सर्वरूपेण जातमाकृष्टं च। अयथार्थं यद्रूपं तदिदं न भवति मायाकार्यत्वादित्यर्थः। एवं सत्यपदार्थ एक उक्तः द्वितीयः व्रतरूपोग्रे वक्तव्यः। अनेन श्रुतिस्थं 'सत्यपर'मितिपदं व्याख्यातप्रायम्। तदेतत् परत्वं स्मारयन्ति अत्र श्रुतिरिति। 'प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवन्तः परमं वदन्तीति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्यो रोचते दिवं सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं, तस्मात् सत्यं परमं वदन्ति'। एवं तपो दमः शमो दानं धर्मः प्रजनश्रुतयः अग्न्यग्निहोत्रयज्ञमनःसन्न्यासश्रुतयश्च।

अर्थस्तु 'सत्येन' पूर्वजन्मीनसत्यभाषणेन मनुष्यत्वाद् देवतारूपत्वं प्राप्य लोकोपकारार्थं 'वायु'र्भूत्वा 'आवाति' एव 'मादित्यो'पि 'दिवं' दिवि वा 'रोचते' प्रकाशं करोति। 'सत्य'मेव 'वाचः' वागिन्द्रियस्य 'प्रतिष्ठा' स्थिरं स्थानम्, अनृतं तु न स्थिरं स्थानम्। 'सत्ये' यथार्थभाषणे 'सर्वं' व्यवहारजातं 'प्रतिष्ठितम्'। 'तस्मात् सत्यं' 'परम'मुत्कृष्टं साधनं 'वदन्ति' इति। अत्र प्रथमे वाक्यद्वये आमुष्मिकफलोत्कर्षः सिध्यति। तदग्रिमवाक्यद्वये चैहिकफलोत्कर्षः सिध्यति। एतदभिप्रेत्यैव प्रथमायां 'सत्यं पर'मिति श्रुतौ 'सतां हि सत्य'मिति श्रुतावैहिकं फलं व्याख्यातम्। भगवतो व्रतानीति। अत्र टिप्पण्याम्। भगवद्व्रतानां परत्वं तु असाधारणत्वादेव स्फुटम्। शेषस्य भगवन्नियामकस्य यथार्थरूपसत्यस्य पूर्वोक्तस्य वरत्व 'अत्र श्रुतिरनुसन्धेया पूर्वनिर्दिष्टे'ति सुबोधिन्यामेवोपपादितमित्याशयेन सत्यस्यार्थद्वये शक्तस्य यथार्थरूपमर्थमुक्त्वा व्रतरूपमर्थमाहु

भगवतो व्रतमित्यादि । 'भगवतो व्रतानी'त्यारभ्य 'प्रतिपादितानी'त्यन्तसुबोधिन्योक्तम् । पूर्वोक्तं सत्यस्यार्थं स्मारयन्ति स्म लोकानुसारेणेति । देवहितकारिणो भगवतः नियामकमिति सत्यं यथार्थरूपं पूर्वोक्तम् । सत्यमेवेति 'सत्यसङ्कल्पतो विष्णुर्नान्यथा तु करिष्यती'ति । एवकारेण तस्य परयोगव्यवच्छेदः क्रियते । यद्वा 'सत्यव्रत'मित्यत्र व्रतपदं सत्यव्रतोभयवाचकमुक्तं तथाप्यत्र प्रमेयनिरूपणे यथा प्रमाणनिरूपणे सत्ये परत्वेनोपस्थिते व्रतसत्यत्वयोर्विधानं तथा प्रमेयनिरूपणे परस्मिन्नर्थचतुष्टयरूपे सत्यत्वस्य यथार्थत्वस्य विधानमत्र सुबोधिन्यां बोध्यं टिप्पण्यां तद्विवृत्तं बोध्यम् । तथा सति परपदेन विधाचतुष्कसङ्ग्रह इति भावः । एवं च स्तुतौ सत्यपरपदे सत्यं परं यस्येति बहुव्रीहौ लम्बकर्णादिवत् पूर्वनिर्दिष्टस्य विशेषणभूतस्य सत्यस्य विधेयत्वम् । परपदोक्तस्य चतुर्विधस्य नियामकादेरुद्देश्यत्वं बोध्यम् । एवमत्र श्रुत्युक्तव्यतिहारबोधकं मूलस्थं पदद्वयं विवृतम् । व्यतिहारफलमैक्यं त्वग्रे विवेचनीयम् । सुबोधिन्याम् । 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यती'ति गीतायाम् । 'द्विःशरं नाभिसन्धत्ते रामो द्विर्नैव भाषते । द्विर्ददाति न चार्थिभ्यो द्विः स्थापयन्ति नाश्रिता'निति वाल्मिकीये । अर्थस्तु । एकेनैव शरेण प्रतिपक्षो निराकरणीयः शरान्तरं च नैव योजनीयमित्यर्थे श्रीरामचन्द्रं नियमयति स्म । 'द्वासुपर्णा सयुजा सखाया समाने वृक्षे परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीती'ति श्रुतिः । द्वा इत्यादि द्विवचनान्तम् । आवोडा । 'सुपां सुलु'गिति सूत्रेण । 'वृक्षे' शरीरे । 'परि'पूर्वकः 'ष्वञ्ज' सङ्गे धातुः तु० आ० अनि० लिड्द्विवचनान्तम् । 'पिप्पलं' कर्मफलम् । 'अभिचाकशीति' पश्यति । 'साधवो हृदयं मह्यं साधूनां हृदयं त्वह'मितिवाक्यम् । हृदयत्वं चिन्तनवशात् । आदिपदेन 'मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपी'तिवाक्यम् । भक्तैः सह निगूढभावकरणात् तथा । सर्वत्र नियमो ज्ञातव्यः । सुबोधिन्याम् । लोके हि त्रय इति । अत्र टिप्पण्याम् । त्रिसत्यमिति । अष्टविधत्वं प्रथमे विधाद्वयं व्रतसत्यरूपं द्वितीये विधाचतुष्टयम् । द्वयं परशब्दार्थः लोके लौकिकं नियामकं वैदिकं द्वादशविधम् । सत्यपदार्थद्वयम् । सत्यं व्रतं च । यद्वा चतुष्कं परपदार्थः सत्यत्वं विधेयं भूरादित्रयं कायादित्रयमिति द्वयमित्यष्टविधत्वं सत्यस्येत्यर्थः । सुबोधिन्याम् । लोके हीति लोकास्त्रयो व्याहृतिरूपाः । कायादय इति आत्मोपनिषदि बाह्यात्मान्तरात्मा परमात्मेत्युक्तम् । बाह्य आत्मा कायः । अन्तरात्मालिङ्गम् । परमात्मा जीवः । सत्या यस्येति व्याहृतिलोकानां सत्यत्वम् । अनेनेति व्याहृतिरूपलोकग्रहणेन । त्रिसत्यपदेन वा ।

साधनफले 'सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचने'तिश्रुत्युक्तं साधनम्, 'सतां हि सत्य'मितिश्रुत्युक्तं फलं कार्यकारणवस्त्वैक्यमर्शनेनैकीकृत्य । कार्यकारणभावस्तु'एतन्नानावताराणां निधानं बीजमव्यय'मितिवाक्यात् । एवं चतुर्धेति अत्र टिप्पण्याम् उपपत्तिरूपपदमष्टविधपदं चतुर्धापदं प्रतिलोमक्रमेण व्याख्यातम् । तत्र प्रथमम् उपपत्तिरूप इति पदं व्याकुर्वन्ति स्म भगवतः कालरूपस्येति । कालदेहोनन्तः कृष्णः कालात्मा कालः सङ्कर्षणः स आत्मनि स्वरूपे यस्य स कालात्मेति व्याकृतं 'कालात्मा भगवाञ्जात' इति कारिकाव्याख्याने कालात्मपदम् । तथा च कालरूपस्य कालदेहस्य । कालं सङ्कर्षणं गृहीत्वावतीर्णस्य पुरुषोत्तमस्येति च । तत्र कालः प्रकृतिक्षोभकोपि देहः । अथ कालयोर्देहसङ्कर्षणयोरात्मापि काल इति पक्षो न सम्भवति । सङ्कर्षणोत्पत्तेर्द्वितीयाध्याये निरूपणादिति । तत्र सङ्कर्षणनिरूपणं जन्मप्रकरणार्थं न त्वध्यायार्थत्वार्थमतोयमपि पक्षः साधुः । छान्दोग्येऽष्टमप्रपाठके श्वेतकेतूपाख्याने प्रथमोपदेशे परदेवतात्मकोणिमोक्तः । द्वितीयोपदेशे काल उक्तः । सोत्र वक्तुं शक्य इति । तत्र कालात्मकोणिमोक्तः । यद् भवन्ति तदा भवन्ति 'स य एषोणिमे'तिश्रुतेः । तदेति काले दाप्रत्ययान्तं पदम् । तत्र नाना रसाः दृष्टान्तेत्र सर्वांशाकर्ष इति । भगवतः कालरूपस्येत्यर्थो वा । उपपत्तिरन्यथाज्ञानमित्याशयेनाहुः यदि सत्यरूपत्वमिति । सत्येनाष्टविधेन रूप्यते व्यवह्रियत इति सत्यरूपं तस्य भावः सत्यरूपत्वम् । इदं सत्त्वं विधेयम् । व्रतादिकमिति आदिना सत्यम् । सत्यव्रतमित्यत्र व्रतपदार्थौ, नियामकं लौकिकम् । वैदिकं च द्वादशविधम् । व्रतानि चेति चकारेण भगवन्नियामकसत्यम्, अन्यथाज्ञानमेतत् । सप्तमस्कन्धे 'समः सुहृत् अविकृतं ब्रह्मे'तिपक्षपाते । तथा चोपपत्त्या रूप्यते व्यवह्रियते इत्युपपत्तिरूपो भगवान् । अष्टविध इति सुबोधिनीं व्याकुर्वन्तः 'सत्यव्रत'पदव्याख्याने 'सत्यपर'पदव्याख्याने च व्रतसत्यपदव्याख्याने च व्रतसत्ययोः प्रतिष्ठत्वात् तयोरभेदे, परपदोक्तनियामकयोश्चाभेदे, विधाष्टकपूर्तिर्दुर्घटेति तदभावाय स्पष्टयन्ति स्म व्रतं हीति । इत्यादीत्यन्तं 'सत्यव्रत'पदं विवृतम् । यत्र सिद्धं यद् व्रतं सत्यं च तत्प्रमाणभूतं बोध्यम् । भगवत्सम्बन्धिना तादृशेन लौकिकव्रतेन सत्येन च कर्तृनिष्ठधर्मप्रमितिजननात् । अन्यत् स्पष्टमिति 'यत् परं लोक' इत्यादिसुबोधिनीस्थं 'लोके लौकिकं नियामक'मित्यादिना विवृतत्वात् स्फुटमित्यर्थः । तदेतत् सङ्गृह्णन्ति लौकिकमित्यादि । लौकिकमिति नियामकमितिशेषः । नियामकं चेति देवहितकारिणो भगवतो नियामकं च । इदं चतुर्विधं सत्यं प्रमेयभूतं बोध्यम् । स्मार्तवैदिकभगवद्वाक्यैः प्रमितत्वात् । एवं षड्भेदद्वे अपि परसत्यरूपे श्रौते विधेयकोटी ज्ञापिते । 'त्रिसत्य'पदोक्तं विधाद्वयं व्याकुर्वन्ति लोका भूर्भुव इत्यादि । कायजीवेति जीवो लिङ्गम् । 'जीवो जीवमजीवय'दितिवाक्यात् । लोकाः फलरूपा इति पुरुषार्थत्वेन प्राप्यत्वात् फलरूपाः । इतरे त्वितराणीति इतरे कायादय इतराणि साधनानि । इदं चेति 'त्रिसत्य'पदे त्रिसत्येनोक्तं द्विप्रकारकमित्यर्थः । चतुर्धेति सुबोधिनीं व्याकुर्वन्ति स्म पदद्वये इति ।

'सत्यव्रतं सत्यपर'मिति पदद्वये यो विधेयभेदस्तेन द्वैविध्यमित्यर्थः । प्रमाणप्रमेयत्वाभ्यां द्विविधत्वम् । त्रयमिति त्रिसत्यपदे त्रिशब्देनोक्तं द्विविधम् । फलसाधनभेदेन द्विप्रकारकम् । तथा चैवं मूलस्थैस्त्रिभिः पदैः श्रौतं प्रमाणप्रमेयसाधनफलरूपं सत्यं समर्थितं ज्ञेयमित्यर्थः । एवं चतुर्धा निरूपितो धर्मीति पञ्चविधः 'स वा एष पुरुषः पञ्चधा पञ्चात्मेति प्राजापत्यो ह्यारुणि'रित्यत्र

श्रुतेरत एवा'त्मना प्रथमा लीले'त्यत्र फलप्रकरणे पञ्चधा गणितः। सोऽष्टधा छान्दोग्यप्रथमप्रपाठके स षोडशधा प्रश्नछान्दोग्याभ्यां यद्यपि 'स वा एष पुरुषः पञ्चधा पञ्चात्मेति प्राजापत्यो हारुण'रित्यत्रत्य'संवत्सरोसावादित्यो य एष आदित्ये पुरुषः स परमेष्ठी ब्रह्मे'ति परमेष्ठिनमुक्त्वोक्ता तथाऽप्यादित्यान्तःस्थः परमेष्ठी ब्रह्मैव (परमात्मैव), 'अन्तस्तद्धर्मोपदेशा'दित्यधिकरणादिति पुरुषोत्तमपरत्वमक्षुण्णम्। सुबोधिन्याम्। नन्वेवं श्रौते चातुर्विध्ये स्वोक्तेऽष्टविधत्वे च समर्थिते शेषाणां पञ्चानां विशेषणानां किं प्रयोजनमित्याकाङ्क्षायां पक्षपातार्थं स्वोक्तषोडशविधापूरणं श्रौतव्यतिहारफलभूताभेदसाधनं च प्रयोजनमित्याशयेनाहुः उत्पत्तिरूपमित्यादि। उत्पत्त्यावतारेवतारिधर्मसत्योत्पत्तिधर्मपुरःसरधर्मप्रथमज्ञप्तिरूपया रूप्यते निरूप्यत इति तादृशं पञ्चभिर्विशेषणैर्निरूपयतीत्यर्थः। योनिः कारणमिति कालात्मनो देहरूपकालस्य समवायित्वाभावात् प्रसिद्धं निमित्तमात्रत्वमुक्तम्। तेनाभिन्ननिमित्तोपादानत्वमुक्तं भवति। ननु भगवानेवेति निरोधलक्षणग्रन्थे एवकारेण कालरूपदेहयोगव्यवच्छेदः स्यादत आहुः कालात्मेति। श्वो न भवेदिति द्वितीयदिनात्मकः कालो भगवता यदि नोत्पादितो भवेत् वागसत्यैव स्यात्, श्वो दास्यामीति प्रतिज्ञायां कालोपि विशेषणत्वेन प्रविष्ट आगामिदिनाधिकरणकभविष्यत्कालीनदानानुकूलो व्यापार इत्येवम्। एवं च द्वितीयादिनात्मकः कालो नाविर्भवेत् तदा तु विशेषणाभावप्रयुक्तस्य विशिष्टदानस्याप्यसिद्ध्या श्वो दास्यामीति प्रतिज्ञावागसत्यैव स्यादित्यर्थः। इदं सत्यं श्रुत्युक्तद्वादशविधप्रमेयेषु प्रथमोद्दिष्टसत्यमुदाहृतम्। तस्यैव प्रमाविषयत्वात्। त्रिषु सत्यज्ञानानन्तेषु स्वरूपेषु पक्षपातस्तुतौ। तेन व्रतशपथादिरूपप्रमाणे कारणत्वं प्रथममुदाहार्यमिति कुचोद्यमपास्तम्। लाघवात्। तेन कालात्मनि गर्भनिविष्टे कारणत्वं ज्ञेयम्। एवं चाष्टविधसत्यनिरूपिता कारणता काले या निरूपिता सा नान्यन्यायसाधारणत्वेन किन्तु कालोऽत्र साक्षादेव विशेषणतया प्रविष्ट इति विशिष्टैव कारणता प्रतिपाद्यत इति। एवं सर्वत्रेति तथा चाष्टविधं सत्यं भगवदुपादानकारणकत्वाद् वाक्यसत्यत्वप्रयोजकं न तु मायोपादानकं सत्यं दम्भादिरूपं वाक्सत्यत्वप्रयोजकं कारणं वेत्यर्थः। एवं सत्यं प्रति कालो निमित्तं कारणम्। अग्रिमविशेषणेष्वप्यतिदिशन्ति स्म एवं सर्वत्रेति। सत्यवागात्मकप्रमेयवदन्यत्रापि तपःप्रभृतिषु श्रुत्युक्तेषु प्रमेयेषु राजनीतिदण्डादिरूपेषु लौकिकेषु प्रमेयेष्वभगवद्व्रतरूपेषु प्रकीर्णवाक्योक्तप्रमेयेषु तथा प्रस्तुतदेवहितकारिभगवदवतारप्रयोजकस्ववाक्यादिरूपे च प्रमेये तथा 'सत्यव्रत'मिति विशेषणोक्तद्विविधे प्रमाणे तथा 'त्रिसत्य'पदोक्ते साधने फले च सर्वत्र कालस्य हेतुत्वं ज्ञेयमित्यर्थः। अन्यथा कालसत्यत्व उपपत्तिरूपत्वमेषां सत्यानां न स्यादितिभावः। प्रकाशे तु एवं सर्वत्रेत्यस्य 'निहितं च सत्य' इत्यादिविशेषणेष्वप्यष्टविधं सत्यं तत्तदुक्तेन यथा 'सत्यस्य योनि'मित्यत्र सत्यकारणत्वेन तथा सत्यपालकत्वेन सत्यप्रलायकत्वेन नेत्रत्वेन आत्मत्वेन धर्मेण वा तत्तत्कार्याणि पालनादीनि तेषां प्रयोजकं ज्ञेयमित्युक्तम्। यदि पालनकालो न भवेत् तदा स्थितौ पालयतीतिवागसत्यैव स्यादित्यादि। अग्रिममवतारयन्ति स्म न केवलमिति। सत्यस्येत्यष्टविधस्येति ज्ञेयं सर्वत्र। यथा ब्रह्मा जगदुत्पाद्य कृतार्थो रक्षणादिक्रियायामुदासीनस्तथा भगवतो रक्षणादिक्रियायामौदासीन्यं वारितम्। सर्वसामर्थ्यसहितत्वात्। तेन नित्यमेव सत्यस्यावेक्षां कृत्वा पालयतीति सत्यस्योत्कर्षो दर्शितः। 'ननु निहित'पदस्याधेयपरतया रक्षणप्राप्तिः कथमित्यत आहुर्नितरामिति। तथा च योगेन रक्षणप्राप्तिरित्यर्थः। अत्र हि केवलयोगेन रक्षणक्रियाप्रतिपादने रूढार्थस्य सर्वथात्यागादरुच्या रूढोर्थोपि यथा सङ्गृहीतो भवति तथा प्रकारान्तरेण व्याकुर्वन्ति स्म स्वयं तत्र स्थित इति। तथा च यथा पङ्कजपदं रूढ्या पङ्कजत्वेन रूपेण पद्ममुपस्थापयति, योगेन पङ्कजनिकर्तृत्वं च बोधयति तथात्र सप्तम्यन्तसत्यपदसमभिव्याहृतनिहितपदं रूढ्या सत्यानुयोगिकां स्थितिं भगवति बोधयद् योगेन सत्यप्रतियोगिकहितकर्तृत्वं च दर्शयतीतिभावः। समुदायार्थ इति अवयवशक्तिविशिष्टरूढार्थ इत्यर्थः। उपपत्तिनिरूपकाष्टविधसत्येषु यथा प्रमाणादिरूपत्वं दर्शितं तथोत्पत्तिप्रसङ्गेऽपि दर्शयन्ति स्म अनेनेत्याद्याहेत्यन्तेन। 'निहितं च सत्य' इति विशेषणेन। अष्टविधसत्यकारणत्वस्य कालात्मनि उत्पत्तिविचारे प्रथमज्ञप्तिविचारेऽष्टविधं सत्यं भगवद्रक्षितत्वेन प्रमेयं निहितपदप्रथमार्थे। न ह्यरक्षितं प्रमातुं शक्यते। द्वितीयार्थे भगवदधिष्ठितत्वेन वाय्वादिवत् स्वस्वकार्यसाधनं चोक्तम्। न हि भगवदनधिष्ठितं सत्यं स्वस्वकार्यं साधयितुं शक्नोति। 'गामाविश्य च भूतानि धारयाम्यहमोजसे'ति वाक्यात्। ननु यद्येवं तर्हि प्रमाणफले कुत्रोक्ते इति चेत् तत्राहुः इतरावाद्यन्तयोरिति। अत्र टिप्पण्याम्। 'सत्यात्मक'मित्यन्तिमेन पदेन फलम्। एतस्मादाद्येन'ऋतसत्यनेत्र'मित्यनेन प्रमाणमित्यर्थः। भगवत्स्वरूपज्ञानशक्त्योः फलत्वप्रमाणत्वे प्रसिद्धे। आद्यं फलबोधकापेक्षया न तु प्रकृत 'निहितं च सत्य इत्यस्यापेक्षयेत्यरुच्या पक्षान्तरमाहुः अथ वेति। फलमिति सत्यस्याष्टविधसत्यस्य कर्मसम्बद्धस्य लयस्थानं अतो लयः तत्स्थानं च फलम्। ननु योनिशब्दस्य कारणवाचकत्वादत्र प्रमाणनिरूपणं कथं सङ्गच्छत इत्याकाङ्क्षया 'सत्यस्य योनि'मित्यनेन प्रमाणनिरूपणे प्रकारमाहुः मानेत्यारभ्य मानमित्यन्तम्। 'योनि' शब्दस्य प्रमाणपरत्वं 'शास्त्रयोनित्वा'दिति व्याससूत्रे भास्कररामानुजाचार्याभ्यामादृतम्। इति तथेति इतरौ भगवन्तावाद्यन्तयोरित्यर्थः। क्वचिद् भगवद्धानस्यैवौचित्यादिति भावः। मेयसिद्धिरित्युक्ते मेयज्ञानसिद्धिरितिलक्षणां वारयन्ति स्म पूर्वमङ्गस्येति। लौकिकाधिभौतिकसत्यज्ञानसत्त्वेप्याधिदैविकस्याज्ञस्येत्यर्थः। ज्ञानेन आधिदैविकज्ञानेन। तदैवेति ज्ञानकाल एव सिद्धमभूत् ज्ञानस्य विषयाविनाभावात्। एवकार आधिभौतिककालयोगव्यवच्छेदकः। तच्च ज्ञानं आधिदैविकं सत्यं भगवानित्याकारकम्। भानं फलं विवृतौ सुबोधिन्यामेव स्फुटं सत्य एवेत्यादिना।

सुबोधिन्यां नन्वितरावाद्यन्तयोरित्यत्र किं गमकमित्यत आहुः चकार इत्यादि। 'निहितं च सत्य' इत्यत्र चकार उक्तं समुच्चिन्वन्नित्यर्थकः स्यादित्यनुक्तं प्रमाणफलसमुच्चयरूपमाहेत्यर्थः। तथा च चकार एतद्गमक इति भावः। अत्रैवेति स्वसमवाय्वाधि-

दैविकसत्य एव। एवकारश्चिदानन्दयोगं व्यवच्छिनत्ति। सत्यस्य सत्यमितीति। सत्यस्याष्टविधस्य सत्यं आधिदैविकमित्यर्थः। 'सत्यस्य सत्य'मित्यनेन कथं लयस्य बोध इत्याकाङ्क्षायामाहुः यथेत्यादि। बृहदारण्यके 'पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत' इत्यत्र पूर्णशब्दवाच्यस्य प्रपञ्चस्य 'पूर्णात् पूर्णमुच्यत' इति पदच्छेदे उत्पत्तिः, 'पूर्णमुत् अच्यत' इति पदच्छेदे स्थितिं चोक्त्वा 'पूर्णस्य पूर्णमादाये'त्यनेन स्वजनके आधिदैविके पूर्णे ब्रह्मणि कार्यस्य लय उच्यते। तथात्रापि सत्यस्योत्पत्तिस्थिती पूर्वविशेषणाभ्यामुक्त्वात्र सत्यस्याधिदैविकं सत्यमितिबोधनेनोत्पत्तिस्थितिप्रसङ्गादेवात्र लय उच्यत इत्यर्थः। सत्यमिति अष्टविधम्। तच्चात्र कथं 'इतरावाद्यन्तयो'रितिसुबोधिन्युक्तस्य फलस्य 'सत्यस्य सत्य'मित्यस्य टिप्पणीद्वितीयव्याख्यानोक्तस्य बोध इत्यत आहुः सत्य एवेत्यादि उक्तटिप्पणीदिशापूर्वमज्ञस्य लौकिकस्याधिभौतिके सत्येष्टविधे एव प्रतिष्ठितं सत्यं स्वाधिदैविकं फलमित्यर्थः। तस्य चाधिदैविकसत्यस्य भगवत्त्वेन ज्ञानेन विषयस्वरूपमपि तदैव सिद्धं भूतमिति भानं फलमित्याहुः तच्चाधिदैविकसत्यस्य भगवत्त्वेन ज्ञानेन विषयस्वरूपमपि तदैव सिद्धं भूतमिति भानं फलमित्याहुः तच्चाधिदैविकमिति। 'मनस उतये मनो विदु'रितिश्रुत्या तथा सिद्धत्वात्। तथा चाष्टविधे सत्ये भगवत्त्वेन भाते सत्ये भगवत्त्वेन ज्ञानेन ज्ञानस्य विषयाविनाभावात् विषयस्वरूपमपि तदैव सिद्धं भूतं फलमित्यर्थः। भगवानेवेत्येवकारस्तु 'अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशा'दिति सूत्रात्। तथा च प्रलयो हि कारणे प्रवेशरूप इति कार्यं सत्यं कारणभूते सत्ये प्रतिष्ठितं भवति तच्च भगवानेवेति तेन भगवत्त्वेन रूपेण सत्यं फलमित्युक्तम्। तदुपपादयन्ति स्म अनेनेत्यादि। भगवतीति आधिदैविकसत्यरूपे इत्यर्थः। प्रतिष्ठितः प्रतिष्ठां भक्ति इतः प्राप्तः तारकादिभ्य इतच्। स सायुज्ये फले सति सत्यः। यः सत्य इति आधिभौतिकेष्टविधे सत्ये प्रतिष्ठितपदार्थः पूर्वोक्तः। स आधिभौतिकसत्यद्वारा भगवति स्वाधिदैविकसत्यरूपे प्रतिष्ठित इति पूर्ववत्। उक्तमिति अनेन प्रकारेण फलमुक्तमित्यर्थः।

पञ्चविधमिति अत्र टिप्पण्यां प्रमाणादिचतूरूपं भगवति प्रतिष्ठितं भक्तरूपं सत्यं चेति पञ्चविधमिति। प्रतिष्ठितमित्यस्य भक्तरूपं सत्यमित्यर्थः। उक्तमितिशेषः। अष्टविधस्य सत्यस्यानेन प्रकारेणोत्पत्त्यादिप्रसङ्गे प्रतिष्ठितत्वस्यापि सिद्ध्या तदादाय पञ्चविधं सत्यमुक्तमित्यर्थः उत्पत्तिः प्रथमविशेषणेन, द्वितीयविशेषणेन प्रमेयं साधनं चोक्तम्। तृतीयविशेषणेन स्थितिः प्रलयश्चेति श्रीवल्लभजितः। इदं पूर्वान् नातिरिच्यते। प्रथमेन प्रमाणता। द्वितीयेन प्रमेयसाधनत्वे। तृतीयेन फलत्वं भगवति प्रतिष्ठितत्वं चेत्येतैः धर्मैः सत्यं पञ्चविधमिति पितृचरणाः। अनेनैव त्रयोदशत्वस्यापि सिद्धिमाहुः एतावतेत्यादि। अत्र टिप्पण्यां पूर्वोक्तमष्टविधमेतत् पञ्चविधं चेति त्रयोदशधा, तर्हि पूर्वप्रतिज्ञातषोडशविधत्वं कथमित्याकाङ्क्षायामाहुः अग्रे ज्ञानशक्तिद्वयं धर्मी चेति षोडशधेति। सुबोधिन्याम्। क्रियाशक्तिरिति क्रियाजनककृतिरूपं क्रियात्मकं च भगवत्सामर्थ्यम्। अत्र क्रियाशक्तेस्त्रयोदशविधत्वमेवं ज्ञेयम्। कर्मकाण्ड इति प्रसिद्धः क्रियाशक्तिर्वेदार्थः स च प्रमेयनिरूपणे लौकिको द्वादशधा वैदिक उक्त इति त्रयोदशधा। भगवान् वा तत्र निविष्टस्त्रयोदशः। ननु वेदार्थत्वेपि प्रकृतसत्यव्रतादिषड्विशेषणैः प्रतिपाद्या कथमिति चेच्छृणु। पक्षपातिस्तुतित्वाद् गौणक्रियात्वेन व्रतसत्ययोर्धर्मानुमापकत्वात् प्रमाणकोटिपातेपि कर्मरूपत्वात् क्रियारूपत्वम्। प्रमेयरूपाणां तप्ततैलादौ शपथरूपं सत्यादिद्वादशविधं वैदिकं भगवद्व्रतानि भगवतो नियामकं सत्यवाक्यं चेत्येषां नियामकानां यथासम्भवं क्रियारूपत्वात् क्रियाजनकत्वाच्च स्पष्टमेव। साधनफलयोश्च कर्मप्रधानकत्वात् तथात्वं तृतीयविशेषणे। चतुर्थविशेषणे प्रमाणस्यापि उत्पत्तिक्रियान्तःपातित्वात् तथात्वम्। पञ्चमे साधनस्य प्रमेयस्यापि तथात्वादेव क्रियारूपत्वम्। षष्ठे विशेषणे उत्पत्त्यादिक्रियान्तःपातित्वादेव च प्रतिष्ठितफलरूपयोरपीति तथा। गौणकर्मत्वेपि भगवच्छक्तित्वं तु भगवदाधारकत्वात् स्फुटम्। गीतायां त्रिविधं कर्मोक्तं 'करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रह' इत्यष्टादशेऽध्याये। सप्तमं विशेषणं क्रियाशक्तिनिरूपणानन्तरं ज्ञानशक्तेः स्मरणाद् व्याकुर्वन्ति स्म ज्ञानशक्तिमित्यादि। वेदवेदान्तसारत्वादितिभावः। ऋतसत्यनेत्रे यस्येति नेत्रे ऋतसत्ये इत्यर्थः। 'चित्रगुमानये' त्यत्र 'शूद्रदाशान्ताः प्रजा' इत्यत्र वा पूर्वपदार्थस्य विधेयत्वदर्शनाच्च। ज्ञानजनिकां भगवच्छक्तिं सत्यत्वेन निरूपयतीत्यर्थः। नन्वत्र ऋतसत्ययोर्द्वयोर्निरूपणस्य किं प्रयोजनमित्यतस्तदुपपादयन्ति स्म ज्ञानशक्तिरित्यादि। ज्ञानशक्तिक्रियाशक्ती ज्ञानप्रधाना शक्तिर्ज्ञानशक्तिः ज्ञानजनिका भगवच्छक्तिरिति यावत्। ज्ञानरूपा। 'ज्ञानशक्तिक्रियाशक्ती सन्दिह्येते परस्थिते' इति भाष्यात्। द्विविधेति द्विप्रकारिका। 'उद्यमश्च तथा प्रोक्तः सामग्रीबल उच्यत' इति निबन्धात्। तत्रर्तसत्यनेत्रपदे समासवर्तिपदार्थावनु समास एकार्थीभावसामर्थ्यात्। तत्र प्रथमपदार्थः प्रमाणत्वावच्छिन्नं ज्ञानम्। द्वितीयपदार्थः प्रमेयत्वावच्छिन्नं सत्यम्। बलपदार्थः। सामग्रीरूपज्ञानस्य प्रमाणस्य बलं सत्यप्रतिपादकत्वेन ज्ञानरूपवेदस्य स्फूर्तिः। वेदस्यात्मत्वात् तज्ज्ञानस्य मनोमयविषयस्य ज्ञाने भगवत्प्राप्तिः। 'ऋते ज्ञानान् न मुक्ति'रित्यत्र वेदात्मज्ञानस्यापि वक्तव्यत्वात्। शब्दार्थयोर्नित्यसम्बन्धेन ब्रह्मज्ञानकाले वेदज्ञानस्यावर्जनीयत्वात्। तदेतदुक्तं प्रमाणबलेनेति। 'प्रकृत्यादिभ्य उपसङ्ख्यान'मिति वार्तिकेन तृतीयाऽभेदे। प्रमाणबलाभिन्ना ज्ञानशक्तिरित्यर्थः। द्वितीयपदार्थः प्रमेयत्वावच्छिन्नं सत्यम्। तस्य सामग्रीरूपज्ञानस्य प्रमेयस्य बलं भक्तिर्ज्ञानं च ताभ्यां भगवत्प्राप्तिः प्रसिद्धा। वक्ष्यन्ति च 'प्रमाणानां बलं दृष्ट्वा मोहयामास गोपिका' मित्यादि। तदेतदुक्तं प्रमेयबलेनेति। प्रमेयबलाभिन्ना ज्ञानशक्तिरित्यर्थः। एवं प्रमाणप्रमेयबलपदार्थेषु निश्चितेषु तदर्थयोर्ज्ञानशक्तिपदयोः षष्ठीतत्पुरुषः। तदेतद् विशदयन्ति स्म प्रमाणं वेद इति। अनधिगतार्थगन्तृत्वलक्षणं प्रमाणम्। ऋतसत्यरूपधर्मनिरूपणे भगवतः प्रमेयत्वाभावादाहुः प्रमेयं भगवद्धर्मा इति। तदुक्तम् 'थातो धर्मजिज्ञासे'ति प्रतिज्ञाय 'चोदनालक्षणोर्थो धर्म' इति। अत्रापि चोदनालक्षणसत्त्वात्। 'ये वै भगवता प्रोक्ता' इत्यादिवाक्यैः प्रमितत्वात्। ऐश्वर्यधर्माणां चोपलक्षणमित्याशयेन प्रमेयं भगवद्धर्मा इति

सामान्यनिर्देशः । यद्वा प्रमाणस्य बलं भक्तिः प्रमेयस्यापि बलं भक्तिरुभयोः करणत्वेन व्यापारावश्यकत्वात् । तेन प्रमाणप्रमेययो ऋतसत्ययोः स्वव्यापारबलविशिष्टे शक्तिः । ऋतसत्ययोर्भगवत्प्रापकत्वरूपनेत्रत्वाभावेन समासेनान्वयापत्तेः । ननु सत्यप्रसङ्गऋतनिरूपणमप्रसक्तम् । तथा च ऋतमिति विहाय 'सत्यव्रत' मित्यादिवत् सत्यनेत्रमित्येव वक्तव्यमित्याशङ्कां वारयितुमाहुः ऋतं सूनृतेति । सूनृता सत्यप्रतिपादिका 'ऋतं च सूनृता वाणी कविभिः परिकीर्तिते' तिभगवद्वाक्यात् । वेद इति वाणीविशेष्यमिदम् । सत्यप्रतीति तेन सत्येन प्रतिपाद्यप्रतिपादकभावसम्बन्धात् सत्यप्रसङ्गऋतनिरूपणमितिभावः । अत इति सत्यप्रतिपादकत्वात् । ऋतनिरूपणमिति 'अग्निर्वाग् भूत्वा मुखं प्राविश' दितिश्रुते ऋतं अग्निरूपा सूनृता वाक् वेदः ज्ञानमिति यावत् , वेदपदेन वेदान्तस्यापि वेदने ऋते कारणदृष्टिः कर्तव्या । तस्योभयविधस्य निरूपणं कृतमित्यर्थः । ननु ज्ञानशक्तेर्द्वेधा निरूपणे किं प्रयोजनमित्यतस्तत्प्रयोजनमाहुः भगवत्प्राप्तिरिति । द्वेधापीति शब्दार्थयोर्ज्ञानेन । वेदः शब्दः सत्योर्थः ।

उक्तमिति द्वयमुक्तम् । ज्ञानक्रियारूपं प्रतिपाद्यप्रतिपादकरूपं च । शक्तिद्वयमिति अत्र न फलसाधनयोः प्राप्तिः प्रमाणप्रमेयनिरूपणप्रसङ्गे क्रियाज्ञानशक्त्योरन्तर्गडुत्वाच्च् चतुर्णाम् । 'कर्मणैव तु संसिद्धिमास्थिता जनकादयः' 'तमेव विदित्वातिमृत्युमेती'त्यादिषु कर्मज्ञानयोर्भगवत्प्राप्तिसाधनत्वमुक्तम् । तन्मात्रोपबृंहणत्वात् प्रमाणप्रमेयमात्रोक्तेः । सत्य एवेति सत्ये पञ्चदशविधे पूर्वोक्त एव । सत्यमेवात्मा स्वरूपं यस्येत्यपि पाठः । अततिं व्याप्नोतीत्यात्मेत्याहुः यः सर्वानेवेति । धर्मानिति पञ्चदशसत्यरूपानपि । 'सत्यात्मक'पदं प्रकारान्तरेण व्याकुर्वन्ति कं फलं वेति । अत्र आत्मा च कं च तयोः समाहार आत्मकम् । सत्यं आत्मकं यस्येति विग्रहः । एतदेवाहुः सत्यमात्मा कमिति । सुखं फलम् । अत्र चकार एक उक्तः तस्याभिप्रायः । कर्मधारये पूर्वपदान्ते सकारः प्रयोक्तव्यः, द्वन्द्वे तु चरमपदान्ते चकारः समासार्थस्यैकत्वात् । चकारद्वये समासार्थद्वयापत्तिः । अत्र 'सत्य'मितिविधायकं पदम् । 'आत्मक'मुद्देश्यं पदम् । एवं प्रतिपादनस्य प्रयोजनमाहुः सच्चिदिति । सत्यरूपतेति ननु सच्चिद्रूपतानन्दस्येति कुतो नोक्तमिति चेन्न । पक्षपातस्तुतित्वेन सत्य एव भरात् । अत एव छान्दोग्ये 'सदेव सोम्येदमग्र आसी'दितिश्रुतिः । 'सत्तामात्रं निर्विशेष'मिति देवक्या ब्रह्मविद्यायाः स्मृतिः । सत्यरूपता तूभयोरेवम् । आत्मा चित् कमानन्द इति । 'सत्यात्मक'मित्यत्रेति 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति स्वरूपलक्षणात् । तत्र तत्र सत्यादिरूपप्राधान्यात् सत्यादिरूपेण व्यवहारः । तादृश इति वैकुण्ठस्थे जीवैः वैकुण्ठद्वारस्थैः 'तीरं क्षीरपयोनिधे'रित्यस्य व्याख्याने वैकुण्ठस्य द्वारं क्षीरपयोनिधेस्तीरे उक्तम् । भगवद्गृहे शरणमार्गः स्वगृहे भक्तिमार्ग इति । 'मुमुक्षुर्वै शरणमनुव्रजे'दिति गोपालतापिनीयश्रुतेरेवकारः भक्तिमार्गयोगव्यवच्छेदकः । देवानामिति तेन ब्रह्मण ईश्वरत्वेपि देवानामन्येषां बहुत्वात् तदनुरोधेन पूर्वं जीवैरित्युक्तम् । सत्यतयेति 'तं यथा यथोपासते तद्वैनं भूत्वावतो'तिबृहदारण्यकोक्तेः । अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोके उच्यत इत्याकाङ्क्षायामुच्यते । तत्र तैत्तिरीये शीक्षायां पृथिवी पूर्वरूपम् , द्यौरुत्तररूपम् , आकाशः सन्धिः, वायुः सन्धानम् , इत्यधिलोकम् , अग्निः पूर्वरूपम् , आदित्य उत्तररूपम् , आपः सन्धिः; वैद्युतः सन्धानम् , इत्यधिज्यौतिषम् , आचार्यः पूर्वरूपम् , अन्तेवास्युत्तररूपम् , विद्या सन्धिः, प्रवचनꣳसन्धानम् , इत्यधिविद्यम् , माता पूर्वरूपम् , पितोत्तररूपम् , प्रजा सन्धिः, प्रजननꣳसन्धानम् , इत्यधिप्रजम् , अधरा हनुः पूर्वरूपम् , उत्तरा हनुरुत्तररूपम् , वाक् सन्धिः, जिह्वा सन्धानम् , इत्यध्यात्ममिति चतुष्कपञ्चकमुक्तम् । पूर्वद्विकं स्मार्तकृतपक्षपातस्तुतौ । तृतीयं वैदिककृतपक्षपातस्तुतौ । चतुर्थं लोककृतपक्षपातस्तुतौ । पञ्चमं भगवन्मार्गकृतपक्षपातस्तुतौ । एवं च माता पूर्वरूपमित्यंशः । सत्यस्य मातृवद्रक्षकत्वात् । सुबोधिन्यामग्रिमश्लोके 'पितराविवोत्पादकत्वं सूचित'मिति वक्ष्यते । अत्र प्रकाशे श्रीपुरुषोत्तमोपन्यस्तप्रश्ने 'इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडशकलाः प्रभवन्ती'तिश्रुतिः अवतारिपरा । 'सुकेशा च भारद्वाज' इत्यारभ्य 'ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा' इतिश्रुतेः । अभेदादत्रापि षोडशकला नोक्ताः । छान्दोग्ये मधुविद्यायां तु वक्ष्यमाणाः अवतारपराः । 'तद्धैतद् घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचे'तिश्रुतेः । अग्रे'ऽच्युतमस्यक्षितमसि प्राणसꣳशितमसीत्युक्तमुवाचे'त्यर्थः । 'अच्युतमसी'त्यत्र हे आदित्य 'अक्षितं' अक्षीणं अक्षतं वा स्वरूप'मसि,' 'अच्युतं' स्वरूपादच्युतं स्वरूपं 'असि' 'प्राण'श्चासौ 'संशितं' तनूकृतमसीति । मन्त्रत्रयार्थः । छान्दोग्यीयाः षोडशकला 'जानश्रुतिर्ह पौत्रायणः' इत्यारम्भके प्रपाठके उक्ताः 'प्राचीदिक्कला प्रतीचीदिक्कला दक्षिणादिक्कलोदीचीदिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान् नाम' । प्रमाणं चतुष्कमिदं 'अत्र प्रमाणं भगवा'नित्यत्र 'तत्सम्बन्धात् कृतिस्तस्य प्रमाण'मिति । तत्तद्दिग्देवानां भगवत्त्वात् प्रामाण्यम् । 'पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रः कलैष वै चतुष्कलः पादः ब्रह्मणोनन्तवान् नाम', कृत्या पृथिवी, पृथिवीति प्रमाविषयं प्रमेय भवति । 'अग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान् नाम', ब्रह्मत्वात् फलत्वं स्पष्टम् । 'प्राणः कला चक्षुष्कला श्रोत्रं कला मनः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवान् नाम', 'प्राण' इन्द्रियवाचकोपीति साधनत्वं स्फुटं इत्युक्तास्ता उच्यन्ते । उपक्रमस्य सञ्जातविरोधित्वादुपसंहारोक्ता मनःकला । 'स मानसीन आत्मा जनाना'मितिश्रुतेः 'ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठती'ति गीतायाः । स्वस्थित्यर्थं मनः कलां मनोरूपमंशमाचकर्ष । कला धर्मो यद्यपि तथापि व्यापकत्वमपेक्ष्य धर्मत्वमस्त्येव ॥ २६ ॥

एकायनोसावित्यत्र एवं प्रमाणेति पूर्वश्लोके सत्यस्य प्रमाणत्वकथने 'सत्यात्मक'मित्यनेन प्रमाणरूपतां भगवत उक्त्वाऽग्रे 'त्वमेक एवास्ये'त्यनेन श्लोकेन साधनरूपतां वदिष्यन् तदुभयसंदष्टेनै 'कायन' श्लोकेन भगवतो जगद्रूपतया जगत्त्वेन जगतो लोकप्रमेयतां शास्त्रपुरःसरं स्तुतिपाठार्थमाहेत्यर्थः । ननु ब्रह्माण्डस्य वृक्षत्वमत्र निरूप्यतेतः कथमत्र भगवतः प्रमेयत्वप्रपत्तिरित्याकाङ्क्षायामाहुः वृक्ष इवेत्यादि । वृक्षरूप इति न पक्षी नापि वृषभः वेदे । वेदान्ते तु 'यदेकमव्यक्तमनन्तरूप'मितिश्रुते'रेकं' मुख्यं रूपं वृक्षः । वेदवेदान्तसारत्वात् । इदं जगदित्यादि लोके घटपटकुड्यकुसूलानीत्यस्मिन् प्रमेये न सर्वं जगत् प्रमेयं भवति, अत इदं जगदित्युक्तम् । समष्टिरूपम् । एतावतापि न सर्वं जगन्निरूपितम् । गच्छतीति जगदिति व्युत्पत्तेरतो योगरूढ्या जडमपि, तेन चिज्जडात्मकं ब्रह्माण्डरूपम् , तदपि न लोके पक्षिरूपं वृषभरूपं वा । पक्षिणश्चित्त्वात् । 'ततो ह जातो भुवनस्य गोपा हिरण्मयः शकुनिर्ब्रह्म नामे' ति श्रुतेः । 'ब्रह्म' चित् । वृषभो धर्मरूपत्वात् क्रिया सद्रूपातो वृक्षत्वेन निरूप्यते लोक इत्यर्थः । ननु लोके श्रुतेः किं प्रयोजनं शक्तिग्रहे भाषाया अपि कारणत्वादिति चेन्न स्तोतुर्वेदगर्भत्वाद् वेदो वृक्ष इवेति । तेनादिवृक्षोसावित्यपि मूलान्वयो बोधितः । एवेति 'समानाः प्रजाः प्रजायन्त' इति संहिताया एवकारः । अनेनेति उभयोर्वृक्षतानिरूपणेन । महत्त्वं फलसहितत्वम् । परममहत्परिमाणवत्त्वं वा, कार्येभ्यो महत्त्वात् कारणस्य । विष्णुरूपं वृक्षं दृष्टान्तयन्ति स्म यथाश्वत्थेति । आदिना वटः । किंशुकश्च । कोटिश इति दीर्घायुष्ट्वेन वर्षावृत्त्या च कोटिसङ्ख्यां ददातीति कोटिशः । फलानीति दार्ष्टान्तिके कार्याणि । सोपीति भगवानपि । तादृश इत्यस्य तं भगवन्तमिवेमं जगद्वृक्षं पश्यन्ति जना इति दृश्यत इत्यर्थः । 'त्यदादिषु दृशेरनालोचने कञ्चे'ति सूत्रेण कञ् । एवकारस्तु 'ऊर्ध्वमूलमवाक्छाखं वृक्षं यो वेद सश्चन । न स जातु स नः श्रद्ध्यान् मृत्युर्मा मारये'दितिश्रुतेः । षश्च गतो भ्वा० प०-से० सश्चतीति 'सश्चनः' नन्द्यादित्वाल्ल्युः । हे 'सश्चन' । अस्माभिः सह वर्तमानाः सवयं तेषां स नः षष्ठ्या बहुवचनस्य नस् । 'मा' माम् । तथा च मृत्युमारणाभावश्रद्धारूपफलेन तस्य वृक्षस्य भगवद्रूपतावगमात् । ननु सत्यरूपस्य तथात्वमस्तु, कालात्मनस्तु 'कालात्मा भगवान् जात' इति कारिकोक्तस्य कथमिति चेन् न । कालात्मनः कालदेहस्य कृष्णस्य जगदभिन्ननिमित्तोपादानत्वात् । 'गुणव्यतिकराकारो निर्विशेषो प्रतिष्ठितः पुरुषस्तदुपादानमात्मानं लीलयासृज'दिति तृतीयस्कन्धे तथा सिद्धत्वात् । उपादेयस्योपादानात्मकत्वेन काले तथात्वसिद्धेरप्रत्यूहत्वात् । कचिदिति काले । ब्रह्माण्डनिर्माणमिति जगदात्मकब्रह्माण्डनिर्माणम् । 'तस्माद् विराडजायते'तिश्रुतेः । 'तस्मात्' कालात्मनः 'सहस्रशीर्षा पुरुष' इत्युपक्रमात् । भगवत एवेति कालात्मनः । एवकारस्तत्त्वयोगव्यवच्छेदकः । कचिदिति पूर्ववत् । तत्त्वद्वारेति तृतीयस्कन्धषष्ठाध्याये । 'जनयत् स्वाभिर्मात्राभिरधिपूरुष'मिति वचनात् । 'अधिपूरुषं' ब्रह्माण्डम् । अधिपुरुषपदस्य 'तस्माद् विराडजायत विराजो अधिपूरुषः स जातो अत्यरिच्यते'ति पुरुषसूक्ते तथोक्तेः स्वराजि शक्तिः । तथापि देवदत्तपदस्य जीवदेहोभयत्र शक्तेस्तथात्रापि ब्रह्माण्डपदस्योभयत्र शक्तेः । अधिपूरुषपदे पक्षान्तरमपि सुबोधिन्यां 'पुरुषादप्यधिकं वे'ति तत्त्वयोगव्यवच्छेदं कृत्वा तत्त्वद्वारा ब्रह्माण्डनिर्माणमुक्तं, तत्र तत्त्वनिवेशमाहुः अक्षरमत्रेति । अक्षरात् सृष्टावक्षरमुपादानं, अत्र कालात्मनः सृष्टौ अक्षरं फलम् । कार्यत्वेन ग्राह्यं न तु अक्षरत्वेन । वटः पृथिवीत्यत्रेव, अन्यथा तत्त्वाकारणतापत्तेरक्षरस्य । तथा चाक्षरद्वारा तत्त्वानि यानि तानि नैवकारव्यवच्छेद्यानि । अकारणत्वापत्तेः । फलतावच्छेदकमाहुः तस्य तत्त्वानीति । तत्त्वत्वं फलतायाः कार्यतया अवच्छेदकम् । तस्य कालात्मनः अपि तत्त्वानि फलानि कार्याणीत्यर्थः । बीजमिति उपादानकारणम् । 'एतन् नानावताराणां निधानं बीजमव्यय'मिति । कृष्णस्यावतारत्वात् । तद्यवतारेऽक्षरस्य कोपयोग इत्याकाङ्क्षायामाहुः शकुनीत्यादि । 'द्वा सुपर्णा सयुजा सखाया समाने वृक्षे परिषस्वजाते, तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योभिचाकशीती'तिश्रुतेः शकुनिः स्वराट् तेन भक्षितं कर्मफलं सुखदुःखसाक्षात्काररूपं विषयीकृतम् । तन्मध्ये किञ्चित् कर्म निर्गमनस्वभावकं निर्गतमवतारे गतं स्वफलं सुखदुःखसाक्षात्काररूपं करोतीति फलतीत्यस्यार्थः । कृष्णे फलत्यक्षरं कर्म । फलमक्षरमुक्तं तद्ग्रहणे मनसि सर्वतो निवृत्तव्यापारे स्वयमुपलब्धनिजसुखानुभवो भवति ब्रह्मज्ञानरूपः, तदा गर्भो मानसीनः मनोंशेऽक्षरात्मके मनसि स्थितः तदा हृदयं भवति । हृदि अयं हृदयमिति छान्दोग्यव्युत्पत्तेः, हृदो मनसोक्षरात्मकत्वे जातेऽयं पुरुषोत्तमः कालात्मेति युक्तम् । क्षेमः फलं लोके । किञ्च 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति बृहदारण्यकात् . ततः शकुनेर्निर्गतं विद्याकर्मपूर्वप्रज्ञं फलति कृष्ण इति । ततश्च 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववि'दित्युक्त्वा 'इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारय'न्निति भाष्यीयगीतायाः । अस्य विनियोग उत्तरार्धे नारदकर्तृकदर्शने 'ध्यायन्तं ब्रह्म परम'मित्यत्र । अधुनाक्षरांशानां विनियोगं वदन्ति स्म इति तत्त्वानामिति । इति हेतोस्तत्त्वानां ब्रह्माण्डनिर्मातृणां तृतीयस्कन्धे पञ्चमाध्याये 'एते देवाः कला विष्णो'रित्यादिना निरूपिता । तथा च शकुनिभक्षितमेकैकं भूतं ततः शकुनेर्निर्गतं सत् तत्त्वरूपं कृष्णे फलति देहत्वे । अस्मदादिदेहेषु पाञ्चभौतिकत्वदर्शनात् । प्रभुदेहश्च तनपाञ्चभौतिक इत्यर्थः, दैत्यपक्षव्यतिरेकं साधयन्ति स्म तत्र दैत्यादिकल्प इत्यादि । 'दैत्यानामादिकल्पे मुख्यसिद्धान्त इत्यर्थः' । एको वृक्ष इति वृक्षपदेनातादृश्यो लतौषधयो व्यावृत्ताः । 'प्रवृत्तिं च निवृत्तिं चे'तिवाक्यादेवमुक्तम् । बाह्यादीति आदिना नैयायिकाः । बहुभ्य इति अश्वत्थविष्णांशविष्टान्तर्गतबहुभ्योन्नांशेभ्यः । अण्डमिति ब्रह्मणोण्डं ब्रह्माण्डमित्यत्र ब्रह्मकर्तृकमण्डमित्यत्र ब्रह्म वृक्षः कार्यमण्डं वृक्षः । तत्र कारणवृक्षनिरूपणं वृत्तम् । कार्यवृक्षोण्डमित्यर्थः । एतन्नानावताराणां निधानं बीजमव्यय'मितिवाक्यात् कृष्णावतारे बीजमण्डमयनं बीजं यस्य जगतः । तेनारम्भे ब्रह्माण्डात्मकं जगत् वृक्षत्वेन निरूप्यत इत्यत्र ब्रह्मणोण्ड आत्मा स्वरूपं यस्य जगत इतिविग्रहः । पुराणमतेनाहुः प्रकृतिरिति । माया । 'आत्ममायामृते राजन् परस्यानुभवात्मनः । न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'तिवाक्यात् ।

श्रौतमतेनाहुः अक्षरमिति। 'अक्षरात् सौम्य विविधाः भावाः प्रजायन्त' इतिश्रुतेः। बीजमिति ज्ञेयम्। अन्य इति उपनिषच्चिन्तकाः। श्वेताश्वतरे 'कालः स्वभावो नियतिर्यदृच्छे'तिश्रुतौ 'चिन्त्य'मित्यस्वरसादन्य इति। अनेनेति दैत्यपक्षव्यावर्त्यैं एकायनत्वकथनेन। अयमिति प्रपञ्चः जगत्पदार्थो वा ब्रह्माण्डो वा। सद्वृक्ष इति औषधिविधात्वेपि बहुबीजफलवृक्षाणां मायिककामहैतुकजगदिति-सिद्धान्तपातित्वेन सुराबिन्दुस्पृष्टगङ्गाम्भोवदसद्वृक्षत्वम् एकबीजयुक्तफलवृक्षत्वात् सद्वृक्ष इत्यर्थः। आवरणभङ्गे बहुबीजत्वमेक-बीजत्वं ज्ञेयम्। 'आदिवृक्ष'स्यैकत्वलिङ्गेनाद्वितीयब्रह्मणि समावेशात्, किञ्च 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतौ 'तमसः परस्ता'-दितिकथनाच्च वैदिकवृक्षस्य धर्मत्वात् वृत्तत्वाच्चानेकरूपकार्यवदादिकार्यवृक्ष इत्याशयेनाहुः अत इति। कार्यसद्वृक्षत्वात्। 'असा'विति विप्रकृष्टे व्याख्यातमपि पदं प्रत्यक्षे छान्दसं मत्वाहुः असाविति परिदृश्यमान इति। अत एव लोको वक्ति। 'नमोस्तु राज्यवृक्षाये'ति, परं वृक्षत्वेन न प्रत्येति। न 'रूपमस्येह तथोपलभ्यत' इति गीतावाक्यात्।

विदुषां शाब्दी प्रतीतिस्तु वृक्षत्वेन वर्तत एव। फले इति श्रुतौ कर्माकर्मविकर्मणामुक्तत्वादितिभावः। कर्मणः सुखं फलम्। अकर्मविकर्मणोः दुःखम्। दुःखमेवेति विषयासक्त्या दुःखम्। 'प्रसक्ताः कामभोगे पतन्ति नरके शुचा'वितिवाक्यादेवकारः। दैत्य-फलाद् व्यतिरेकं साधयितुं दुःखफलोपादानम्। पुनर्दैत्यपक्षाद् व्यतिरेकं साधयितुमाहुः सृष्ट्यन्तर इति। अनीश्वरवादेन कामहैतुके सृष्ट्यन्तरे। अत्र त्विति दैत्यपक्षव्यतिरिक्तायां ब्राह्म्यां सृष्टौ। द्विविधाः विषयिणो विरक्ताश्च। ईश्वरप्राप्त्यर्थं विरक्ताः। 'नमाम ते देव पदारविन्दं प्रपन्नतापोपशमातपत्रम्। यन्मूलकेता यतय' इतिवाक्यात्। 'पानेन ते देव कथासुधाया' इतिवाक्याच्च। विशेषणद्वयं व्याख्याय तृतीयं व्याकुर्वन्ति स्म त्रयो गुणा इति। 'आत्ममायामृते राजन् परस्यानुभवात्मनः। न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'तिवाक्यात्। 'त्वं देवशक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेजः' इतिवाक्यात्। 'कविं' महत्तत्त्वम्। अधःप्ररोहाः अधःशिफाः। अन्यत्रेति दैत्यपक्षे। तामसान्येवेति 'प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा' इतिवाक्यात्। एवकारो गुणद्वययोगं व्यवच्छिनत्ति। क्वचिदिति वृषभासुरादौ राजसप्रकरणगतत्वात्। न भवन्तीति प्रह्लादादयस्तु नासुराः किन्तूद्धारा-र्थमासुरेषु प्रकटाः। रसा इति सुखास्वादकाः। रस आस्वादने। अन्यत्रेति दैत्यपक्षे। विषयोर्थमन्तरा न सिध्यतीति कामवादिनाम-र्थोपि पुरुषार्थः। एवकारेण धर्ममोक्षयोगव्यवच्छेदः। पञ्चेति पाणिवाङ्मेण्ढ्राङ्घ्रिपायवः इन्द्रियाणि। गमनमङ्घ्रिजन्यं कर्म। आकुञ्चनं पायुजन्यम्। प्रसारणं मेण्ढ्रजन्यम्। अपक्षेपणं परिशेषाद् वाग्जन्यम्। क्षिप प्रेरणे। वाचा प्रेर्यत इति। उत्क्षेपणं पाणि-जन्यम्। अत्र वदन्ति। पञ्चानां गमनेन्तर्भाव इति। तत्र दोर्भ्यां गच्छतीतिप्रयोगापत्तिः। अन्यत्रेति दैत्यपक्षे। उत्क्षेपणाभावः 'अधो गच्छन्ति तामसा' इतिवाक्यात्। हस्तजन्यं कर्म तु वर्तत एव। श्रौतं मतमाहुः अथ चेति। अन्नमयादय इति अन्नमयप्राणमयमनो-मयविज्ञानमयानन्दमयास्तैत्तिरीयोक्ताः। 'स वा एष' इति श्रुतिः महानारायणे। पुरुषोत्तमपरापि तदन्तःस्थजगत्सहितपुरुषोत्तमपरेति जगदात्मकवृक्षपरा। तदेतदुक्तं ब्रह्माण्डविग्रहोपि तथेति। अन्यत्रेति दैत्यपक्षे। तमोरूपमायोपासकत्वादानन्दाभावः। षडिति पञ्चज्ञाने-न्द्रियाणि मनश्च। दैत्यपक्षव्यतिरेकमाहुः अयमात्मेति। दैत्यपक्षे मायिको जीवः चतुर्थस्कन्धोक्तः। षड्विधमिति जन्यं, अत उत्पत्त्या दैत्यपक्षे भिन्नम्। षड्विधज्ञानस्याप्याविर्भावतिरोभावौ देवपक्षे। त्वगादय इति नृवर्षे त्वक् मांसं शुष्कमांसं हृदयान्तर्गत-मांसं वपा रुधिरं एकान्या। इति त्वगादयः सप्त। त्वच इति बहुवचनेनोपलक्षणसूचनाद् बोध्याः। वृक्षे वल्कलादीनि 'त्वक् स्त्री चर्मणि वल्के च मृदुत्वचि विशेषत' इति कोशः। आदिना मांसादिस्थानीयानि। रुधिरं रक्तरूपम्। सप्तब्रह्माण्डावरणानि। अष्टधेति पुरुषोत्तमयोगाध्याये गीतायामस्ति। देहच्छिद्राणीति विराजि सप्तदिवि। द्वे भुवर्लोके। 'भुवर्लोकोस्य नाभित' इतिवाक्यात्। मेण्ढ्रपायुच्छिद्रे। छदानीति 'पत्राणि छदः पुमा'नित्यमरः। नपुंसकत्वं स्मार्तम्। 'द्वा सुपर्णे'तिश्रुत्याहुः द्वौ जीवेति। जीवः स्वराट्। अन्तर्यामिणो नानावताराः। 'एतन् नानावताराणां निधानं बीजमव्यय'मितिवाक्यात्। एतस्मादित्यादि एतस्मात् ब्राह्मात् वैलक्षण्यं मायिकत्वम्। अन्यत्रेति दैत्यपक्षे। युक्तय इति 'युक्तयः सन्ति सर्वत्रे'त्येकादशस्कन्धवाक्यम्। समष्टिरूप इति असाविति विप्रकृष्टः असाविति परिदृश्यमान इतिपक्षद्वयेपि समष्टिरूपः, व्यष्टयस्त्वन्ये वृक्षाः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। विस्तरः पूर्वश्लोक उक्तः। तैत्तिरीयेत्र पितोत्तररूपम्। वृक्षस्य पालकत्वात्। सुबोधिन्यां च 'पितराविवोत्पादकत्वं सूचित'मिति प्रश्ने कला। विशेषाभावात्। छान्दोग्ये प्राची दिक् कला, प्राच्यां दिशि देवता-प्रत्यक्षाकाशशरीराकाशे च दिगन्तर्भावात् प्रत्यक्षदिग्देहका। दिव्यादिवृक्ष इति। यद्यपि प्राची दिक् आधारस्तथापि कार्यवृक्षमपेक्ष्य कलाधर्मोस्त्येव ॥ २७ ॥

त्वमेक एवास्येत्यत्र प्रमेयमिति प्रमाविषयं प्रमेयम्। प्रमात्र विद्वत्ता शाब्दी, लोकानां प्रत्यक्षम्। भगवदात्मकमिति अन्यथा 'भगवानिति शब्द्यत' इतिवाक्योक्तप्रतिज्ञासन्न्यासाख्यनिग्रहस्थानापत्तेः। अत्रेत्यादि जगतो भगवदात्मकत्वे। उपपत्तिं जगत् सन्न स्याद् भगवतः प्रसूतित्वादि न स्यादित्यन्यथाज्ञानरूपाम्। साधनरूपं देवतांत्रिकं समाप्तौ वाच्यम्। 'सामादिचारुपुष्पाये'ति श्लोकतृतीयचरणं सामादिषु दानरूपं सेवासमर्पणं साधनम्। मायावादादीति आदिना बाह्याः 'सत' इतिपदकथनस्यावश्यकत्वमाहुः अन्यथेति। जगतः सत्त्वाभावे जगत्कर्तृत्वेनोच्यमानो भगवान् को ब्रह्मा वा असतः कर्ता स्यात्। आत्मसृष्ट्यभावात् सृष्ट्यन्तरवद् ब्रह्मद्वारकः कर्त्ता स्यादित्यर्थः। ब्रह्मणो रजउपाधित्वाद् रजसश्च मायैकदेशत्वादसदुत्पादकत्वम्। अस्मिन्निति अधिकरणे ल्युडित्यु-क्तम्। अनेनेति करणे घञुक्तः। कार्यलक्षणसन्निवेशोक्तेः 'कृष्णस्तु भगवान् स्वय' मितिवाक्योक्तं स्मारितम्। वक्ष्यन्ति च

सुबोधिन्यां 'नैश्चिन्त्यं वाचि पूर्ववदि'ति। न नश्यतीति अनुग्रहशब्दात् अत्यन्तानुग्रहे यं मृत्योरपि रक्षतीति तथा। प्रह्लादमिव। चेतः प्रति मायायाः करणत्वाभावादाहुः चेतो मतिरिति चिती संज्ञाने मनु अवबोधन इत्येकार्थता। मायारूपतमसो ज्ञानावरकत्वं न चेत आवरकत्वमिति चेतोत्र मतिः। स्मार्ती योगरूढ्यादिषु काचिच्छक्तिः बाहुलकम्। सर्वे सर्वार्थवाचका इति वात इति माया च तमोरूपेति मायावृता मतिस्तामसी अखण्डे नानात्वप्रकारिका भवति। अतस्मिन् तत्त्वप्रकारिका। अखण्डे एके नानात्वप्रकारिका। 'अधर्मं धर्ममिति या मन्यते तमसा वृता। सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी'ति गीता। 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यकमप्रमेयविषयकं, न तु लौकिकप्रमेयविषयकम्। चेतसः सुषुप्तिग्राहकत्वान् नात्र मुख्यवृतत्वम्। तथा च ते मायावृतमतयस्तामसा इत्यर्थः। न तु विपश्चित इति सात्त्विकज्ञानेन विविधपश्यश्चित्त्वं तद्विशिष्टा विपश्चितः। पश्यतीति पश् क्विप् सर्वापहारिलोपः विपश् चासौ चित् चिती संज्ञाने। क्विप्। सात्त्विकज्ञानेन पश्यति ततः सम्यक् ज्ञानवन्त इत्यर्थः। लौकिकसाधने योजयन्ति स्म त एवेति। लौकिका एवेत्यर्थः। अल्पेनैवेति अणुना अल्पं परिच्छिन्नम्। यावत् तदुमाह 'यत् तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकं अतत्त्वार्थवदल्पं च तत् तामसमुदाहृत'मिति गीतायाः। अनुभवादेवकारोपरिच्छिन्नयोगव्यवच्छेदकः। चित्तं पुष्कलमिति व्यापकसृष्टं पुष्कलं भवति। 'तन्मोकुरुते'ति बृहदारण्यके 'मन' इत्येकवचनात्। सङ्कोचाभाव इति सत्त्वेन रजसा तमसा तदवान्तरभेदैश्च सङ्कोचस्याणुत्वस्याभावे। 'अणवश्चे'ति व्याससूत्रं अन्नमयमनःपरम्। अत एवेति लौकिकानां सङ्कुचितबुद्धित्वादेव। भिन्नतयेति अभिन्ने भिन्नतया तामसबुद्ध्या स्वीक्रियत इत्यर्थः। मोहस्तमःकार्यम्। विपश्चित इति व्याख्यातम्। तत्तत्कार्येति सत्त्वरजस्तमसां कार्याणि जननस्थितिसंयमाः तदनुरोधेन तथा विलक्षणान् नाना पश्यन्तीत्यर्थः। त्वामेव मन्यन्ते न तु भिन्नं पश्यन्तीति साधनभेदापगमादितिभावः। भेदः सत्त्वादिगुणकृतः। एवकारस्तु 'प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये। बन्धं मोक्षं च या वेत्ति सा बुद्धिः पार्थ सात्त्विकी'ति गीतायाः। सात्त्विक्या बुद्ध्या सत्त्वादिगुणोपमर्दात्। 'सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विक'मिति गीतावाक्यात्। न तु भिन्नमिति साधनभेदापगमात्। अन्य इति श्लोकस्य माहात्म्यबोधकस्यान्ते। माहात्म्येति त्यदादीनामुत्सर्गतः पूर्वपरामर्शित्वात् तथा। गुणैरिति लौकिकानाम्। एत इति ब्रह्मविष्णुशिवाः। एवकारेण हरियोगव्यवच्छेदः। भगवद्रूपा इति गुरुमुखाच् छ्रुत्वा सेवा लौकिकेरपि कार्येत्युक्तम्। तेन जगज्जन्मादिकर्तृत्वरूपब्रह्मलक्षणस्य नातिव्याप्तिः, त्रयाणां भगवद्रूपत्वात्। साधनमिति कृपाविशिष्टो भगवान् प्रमेयरूपः साधनमित्युच्यते। कृपावेशस्तु कृपया सत्त्वादिगुणयुक्तानां जीवानामर्थे सत्त्वादिगुणैर्ब्रह्मविष्णुशिवादिरूपाङ्गीकारात्। स्वभावस्यान्यथाभावाभावात्। कृपापात्राणि जनाः। इदं यथारुचिपदेन ज्ञाप्यते। देवसेवोक्त्या देवेषु पक्षपातो बोधितो ज्ञेयः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशात्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये विद्या सन्धिरत्र। 'ब्रह्मविद्यां प्रवक्ष्यामि सर्वज्ञानमनुत्तमां यतोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरा'दितिश्रुतेः। सुबोधिन्यामपि ब्रह्मविष्णुशिवसेवोक्तात्र, तथापि प्रजा सन्धिः एकचतुष्कगतत्वात् 'अस्य सत' इति प्रजोक्तेः। प्रश्ने कला काचित्। विशेषानुल्लेखात्। छान्दोग्ये 'कले'ति श्रुतिः। भूमौ ब्रह्मादिदेवाः पार्थिवशरीरप्रजाः शब्दप्रतिकृतिलिङ्गद्वारा प्राणप्रतिष्ठया सेव्या इत्युक्तम्। यद्यपि वायुः आधारत्रयाणां देवानां तथापि व्यापकत्वांशकला धर्मरूपा भवत्येव ॥ २८ ॥

श्रीमातृपितृतोषिणी—श्रीसुबोधिनीजी—

एवं पूर्वाध्याये महद्दुःखेन भगवच्चिन्तनम्—पूर्वाध्याय में महत् दुख के निमित्त भक्तों का भगवान् के चिन्तन का वर्णन किया है। अब इस अध्याय में कंसादिक के भगवच्चिन्तन का वर्णन, तथा ब्रह्मादिकों ने भगवान की स्तुति द्वारा जो भगवान् का चिन्तन किया उसका भी वर्णन इस अध्याय में बताया है। इस प्रकार सब भगवच्चिन्तन करने लगे इस से यह निश्चय हुआ कि भगवान् ने सर्व का सामान्यतया निरोध किया है। ब्रह्मा आदि देवगण देवकी के गृह में इसीलिये पधारे कि सब को यह ज्ञान हो जाय कि देवकी के गर्भ में भगवान् पधारे हैं। इसलिये ब्रह्मादि देवों ने कंसादिक की कोई भी परवाह नहीं की है। भगवान् गर्भ में पधारे तब जो देवगण स्तुति करने पधारे हैं उनके मुख्य नाम कहते हैं। १. ब्रह्मा २. महादेव और दूसरे भी गुणाभिमानी देव, सनकादिक मुनि, नारदादिक भक्त, इन्द्रादिक देवगण उनके अनुचर गन्धर्वादि देव ये सब मिल कर आये थे।

कई महानुभावों का अभिप्राय है कि गर्भस्तुति के अवसर पर श्री वामनादि अवतार भी पधारकर अपनी-अपनी अनुकूल वाणियों से भगवान की स्तुति करने लगे। यहाँ मूल श्लोक में 'ईडतुः' ऐसी द्विवचनक्रिया दी गई है उसका कारण यह है कि स्तुति करने वालों में ब्रह्मा और महादेव दो मुख्य है। अतः द्विवचन दिया है। और पुस्तक में 'ऐडयन्' बहुवचनान्त पाठ भी है। जहाँ बहुवचन हो वहाँ यह मानना चाहिये कि सबने मिलकर स्तुति की है भगवान् के लिये इस श्लोक में 'वृषण' शब्द दिया है इसका अर्थ दो प्रकार से होता है। एक अर्थ कामनाओं की पूर्ति करने वाले भगवान् हैं और दूसरा अर्थ, धर्म को नियम से चलाने वाले भगवान् हैं ॥ २५ ॥

कारिका—कालात्मा भगवाञ् जात इति ज्ञापयितुं तथा । कलाभिः पञ्चदशभिः स्वपक्षव्यापकैः स्तुतिः ॥ १ ॥
पक्षपातस्तुतिर्ह्येषा देवानां हितकारिणी । ध्रुवा तु षोडशी प्रोक्ता वृद्धौ वा तादृशो भवेत् ॥ २ ॥

कारिकार्थ—श्रीमदाचार्यचरण अब इन दो कारिकाओं में भगवत् प्राकट्य का स्वरूप बताते हैं । कालात्मा भगवान् प्रकट हुवें हैं । कालात्मा श्री संकर्षण जी का रूप है उस कालरूप संकर्षण जी को साथ में लेकर भगवान् देवकी जी में पधारें हैं और भगवान् कालात्मा संकर्षण जी के साथ पधारे हैं इसमें प्रमाण देते हैं पन्द्रह श्लोकों में देवों ने भगवान की स्तुति की है । शुक्लपक्ष देवों का पक्षपाती है और शुक्लपक्ष की पन्द्रह तिथियाँ होती है । इस पक्ष की प्रसिद्धि के लिये पन्द्रह श्लोकों में स्तुति है । ॥ १ ॥ यह ब्रह्मादि देवताओं ने स्तुति की है यह स्तुति देवताओं का हित करने वाली है । देवों का कहना है कि भगवान हमारे हित के लिये पधारने वाले हैं । अब सोलहवें श्लोक में भगवान की स्तुति है वह भक्तों के हित करने वाली स्तुति होने से ध्रुवा स्तुति है । ध्रुवा का अर्थ स्थिर स्तुति होता है । प्रश्नोपनिषद् में भगवान को षोडश कला पूर्ण कहें हैं । यहाँ षोडश कला परिपूर्ण भगवान पधारे हैं यह सूचित करने के लिए १६ श्लोक हैं और तिथियों की गणना की दृष्टि से कभी कभी वृद्धि तिथि होती है इसलिये १६ श्लोक हैं । यहाँ वृद्धि तिथि से भक्तों के आनन्द की वृद्धि भगवत् प्राकट्य से होगी यह भाव जानना चाहिए ।

अब श्री मदाचार्यचरण १६ श्लोकों की स्तुति का विवेक बताते हैं कि यद्यपि १६ वें श्लोक में भी परः पुमान् पद देने से भगवान् की ही स्तुति है फिर भी प्रधानता से देवकीजी को सान्त्वन ही दिया है और भगवान को परः पुमान् भी देवकीजी को पूर्ण विश्वास दिलाने के लिये दिया है अतः देवों ने पन्द्रह श्लोकों से भगवान् की स्तुति की है और एक श्लोक से देवकी को सान्त्वन दिया है । काल पञ्चदशात्मा है, वे काल ही अवतीर्ण हुए हैं ऐसी देवों की समझ है । वह काल दो प्रकार का है; दैत्यों का हितकारी भो पञ्चदशात्मा कृष्णपक्ष पन्द्रह दिनका है और देवताओं का हितकरने वाला भी पञ्चदशात्मा शुक्लपक्ष का पन्द्रह दिन का है । साधारण रीति से तो काल त्रिंशदात्मक तीस दिन का है । अतः देवों ने अपने पक्षपाती भगवान् पधारे हैं ऐसा समझ कर भगवान् की अर्धकाल रूप पन्द्रह श्लोकों से स्तुति की है ।

अब वह कालकृत पक्षपात चार प्रकार का है । १ लोककृत २–स्मृतिकृत, ३–वेदकृत और ४–भगवन्मार्ग कृत है । इस प्रकार के होते हुए भी पुनः प्रत्येक प्रमाण, प्रमेय, साधन और फल से चार प्रकार का है । इस विभाग से देवताओं का काल षोडशात्मा हो गया, दैत्यों का काल केवल पञ्चदशात्मक है । षोडशात्मा काल ने दैत्यों के काल से देवताओं के काल की विशेषता षोडशात्मकता बताई ।

अब प्रारंभ के चार श्लोकों से प्रमाण, प्रमेय, साधन और फल वर्णन करते हैं । उसमें लोकसिद्ध, जो देवों के पक्षपात वाले हैं उनका निरूपण करते हैं ।

लोक में सत्य ही प्रमाण माना है और परिदृश्यमान यह जगत् जो देखने में आ रहा है वह ही प्रमेय है । गुणों के अभिमानी देव ही साधन है । क्षेम ही फल है । इसमें और दैत्य पक्ष में भेद सिद्ध करना चाहिये ।

इसलिये बताते हैं कि देवता सत्य को प्रमाण मानते है और दैत्य असत्य को प्रमाण मानते हैं । अतः देवता यह निरूपण करते हैं कि सत्यरूप भगवान् प्रकट हुए हैं । देवताओं का सत्य भी आठ प्रकार का है । वह सत्य पुनः अंशतः षोडश प्रकार का है ।

वेद में 'सत्य' पांच प्रकार का कहा है । 'सत्यं परं' इस श्रुति में और 'प्राजापत्यो हारुणिः' इस श्रुति में भी सत्य पांच प्रकार का कहा है । जो सत्य है वह पर है, सर्वसे श्रेष्ठ है अथवा जो सर्वसे श्रेष्ठ है वह सत्य है । इस प्रकार सत्यत्व और सर्वोत्कृष्टत्व का ऐक्य प्रतिपादन करना चाहिए । जो मनुष्य इस प्रकार सत्य का स्वरूप समझकर उस पर चलता है वह स्वर्गलोक याने मुक्ति को प्राप्त कर वहाँ से पुनः कदापि नहीं लौटता है । सत्य पर चलने वाले को यह आमुष्मिक उत्कृष्ट फल मिलता है । इस आमुष्मिक फल की उत्कृष्टता यह है कि जो वहाँ जाता है वह लौटकर नहीं आता है । इस लोक में भी सत्पुरुष सत्य को ही उत्तम फल समझते हैं । अतः सत्य ही प्रमाण, प्रमेय, साधन और फल है । यों समझकर देव पक्षपाती है तात्पर्य की जो दैवी जीव हैं वे सत्य में ही रमण करते हैं सत्य पर चलने को ही आनन्द मानते हैं और सत्य से ही प्रसन्न होते हैं । भगवती श्रुति ने भी यह ही कहा है जैसे कि—'सत्यं परं परं सत्यं सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सत्तां, हि सत्यं तस्मात् सत्ये रमन्ते' यह सत्य यहाँ निरूपण किया जाता है ।

सत्यव्रतं त्वां शरणं प्रपन्नाः—लोक में व्रत को उत्कृष्ट श्रेष्ठ मानते हैं जो कोई जो कुछ व्रत करता है वह पर उत्तम कहा जाता है । सत्य को भी पर श्रेष्ठ कहते हैं । भगवान् के तो व्रत तथा सत्य दोनों सत्य हैं । अब हम जिनका सत्य ही व्रत है वैसे आपके हम शरण आये हैं । इस प्रकार दोनों 'पर' से सर्वश्रेष्ठ होने से सत्य और व्रत की एकता कही गई है ।

सत्यपरं पद में जो पर पद है उसका तात्पर्य आचार्य चरण कहते है कि जो 'पर' है वह लोक तथा वेद में बारह प्रकार का कहा है। जैसे सत्य, (१) तप, (२) दम, (३) शम, (४) दान, (५) धर्म, (६) प्रजनन करना, (७) अग्नि, (८) अग्निहोत्र, (९) यज्ञ, (१०), मौन (११) और संन्यास (१२) ये बारह सब ही भगवान् के ही सत्य हैं। न कि दैत्यों के समान असत्य है। इसकी सत्यता प्रथम कही हुई 'सत्यं परं' श्रुति को विचार में लाना। भगवान् के व्रत है याने दृढ संकल्प ये है। जैसे भगवान् आज्ञा करते हैं कि 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति' हे कौन्तेय ! मेरी तरफ से तू जाके प्रतिज्ञा कर, कि मेरे भक्त का नाश नहीं होता है। इसी प्रकार 'द्विशरं नाभिसन्धत्ते' श्री रामावतार ने भी प्रतिज्ञा की है कि किसी भी लक्ष्य वेध करने के लिए एक ही दफा शर चढाउँगा। तथा 'अनश्नन्नन्यो अभिचाकशीति' भगवान् कर्म फल को नहीं भोगते हैं एवम् सत्य से प्रकाशते हैं **'साधवो हृदय मह्यं'** साधुजन मेरे हृदय हैं। **तस्मान्मच्छरण गोप्तु मन्नाथ मन्निकेतनम्। गोपाये स्वात्मयोगेन सोयं मे व्रतआहितः** इत्यादि वचनों से भगवान् के व्रत और सत्य दोनों पर है तात्पर्य कि सर्वथा उत्कृष्ट कहे हुए हैं। लोक के अनुसार भी देवों के हितकारी भगवान् का नियामक सत्य ही है। यदि सत्य नियामक न होगा तो ईश्वर का नियामक कौन होगा ? जैसे कि इस सत्य के नियामकत्व के कारण ही भगवान् ने जो आने का सङ्कल्प किया था उसको पूर्ण करने के लिए आप पधारे हैं।

अब त्रिसत्यम् पद पर आचार्यचरण विवेचन करते हैं कि भगवान् भूः, भुवः और स्वर्लोक ये तीन लोक तथा शरीर, जीव और परमात्मा ये तीन आत्मा भी सत्य है। जिससे साधन और फल की एकता करके निरूपण किया। जिसमें यह उत्पत्ति-रूप प्रभु माने प्रमाण रूप एवं उपपत्ति रूप से युक्तियुक्त रूप सिद्ध कर दिखाये हैं।

अब सत्यस्य योनिं पद का विचार करते हैं कि अष्ट प्रकार की उत्पत्ति का निरूपण **'सत्यस्य योनिं'** पद से करते हैं। जो प्रथम अष्टविध सत्य कहे हैं। उन सब आठों प्रकारों के सत्य का कारण भी कालात्मा भगवान् ही है। **'श्वो दास्यामि'** कल दूँगा–ऐसा कहा जाता है। यदि कल ही न हो तो वाणी असत्य हो जायेगी। किन्तु कल होता है जिससे वाणी सत्य हो जाती है। इसी प्रकार सर्वत्र समझ लेना चाहिए।

अब **'निहितञ्च सत्ये'** पद का तात्पर्य बताते हुए आचार्यचरण कहते हैं कि भगवान् केवल सत्य के उत्पादक ही नहीं है किन्तु उसके रक्षक भी आप ही हैं। इस लिये कहा है कि **'निहितं च सत्ये'** आप सत्य में स्थिति कर उसकी रक्षा करते हैं। इससे सत्य की उत्पत्ति का विचार करते हुए प्रमेय और साधन दोनों कहे हैं। **'निहितं च सत्ये'** इस पंक्ति के मध्य में जो 'च' अव्यय आया है उसका यह तात्पर्य है कि शेष, प्रमाण और फल **'ऋतसत्यनेत्रे'** तथा **'सत्यात्मक त्वां'** इन दो विशेषणों से कहा है।

अब 'सत्यस्य सत्यं' इस वाक्य में सत्य का सत्य है इसका विमर्श आचार्यचरण करते है कि जैसे सत्य की उत्पत्ति और रक्षा का कारण भगवान् है, वैसे ही सत्य के लय का स्थान भी भगवान् ही है। इसको 'सत्यस्य सत्यं' पद विशेषण से कहा है। जिस प्रकार **'पूर्णस्य पूर्णमादाय'** श्रुति में सबका लय उसमें होता है वैसे ही सत्य भी आधिदैविक सत्य में लीन होता है। सत्य में ही प्रतिष्ठित है और सत्य ही फल है। यह आधिदैविक सत्य भगवान् ही है। इससे जो भगवान् में प्रतिष्ठित है वह सत्य है। जो सत्य में है वह सत्य द्वारा भगवान् में प्रतिष्ठित होगा। इस प्रकार उत्पत्ति, स्थिति और प्रलय के प्रसंग में 'पञ्चविध' सत्य कहा गया है। इससे तेरह प्रकार की क्रियाशक्ति का सत्यपने से वर्णन किया है। संक्षेप में देखें कि सत्यव्रतं श्लोक में तेरह १३ प्रकार की शक्ति कैसे बताई हैं सत्यव्रतं पद में सत्य और व्रत के भेद से २ प्रकार; सत्यपरं पद में सत्य से वायु चलन (३) सत्य से सूर्य प्रकाश (४) सत्य में वाणी का निवास (५) सत्य में सर्व निवास (६); त्रिसत्यं पद में तीन लोक (७) काया जीव परमात्मा ये तीन आत्मा (८); सत्यस्य योनिं पद में सत्य का कारण यह एक भेद (९); निहितं च सत्ये पद में सत्य में स्थित (१०) और सत्य का रक्षक (११); सत्यस्य सत्यम् पद में प्रमाण (१२) और फल (१३) ये तेरह क्रियाशक्ति के प्रकार भेद बतायें है। उसके बाद ज्ञानशक्ति के ऋतसत्यनेत्रं पद में ऋत (१४) सत्य (१५) सत्यात्मकं पद से धर्मी (१६) भेद जान लेने चाहिए।

अब आचार्यचरण **'ऋतसत्यनेत्रे'** पदों का मर्म बताते है कि जो भगवान् की शक्ति, ज्ञान उत्पन्न करती है, वह भी सत्य है। जिस परमात्मा के ऋत और सत्य रूप नेत्र ही उसकी प्राप्ति कराने वाले या दिखाने वाले हैं अतः भगवान् को **'ऋतसत्यनेत्र'** कहा गया है जिससे भगवत्प्राप्ति दो प्रकार से होती है। ज्ञान उत्पन्न कराने वाली शक्ति, प्रमाण तथा प्रमेय बल के कारण दो प्रकार की है। प्रमाण बल वेद है, जैसे कि जगत् में कोई भी कार्य किया जाय तब वह कार्य योग्य है या नहीं ? ऐसी शङ्का होने पर उसको सत्य सिद्ध करने के लिए वेद का ही प्रमाण बतलाया जाता है। तथा प्रमेय बल भगवद्धर्म है, जैसे कि जहां प्रमाण बल की गति कुंठित हो जाती है अर्थात् जो कार्य प्रमाण बल से नहीं हो सकता है वह कार्य भगवद्धर्म से होता है। अतः इस भगवद्धर्म को प्रमेय बल कहते हैं।

सूनृता वाणी को माने सत्य को प्रतिपादन करने वाली वाणी को 'ऋत' कहते हैं। वेद सत्य को प्रतिपादन करने वाला है। अतः सत्य के निरूपण करने के समय ऋत का भी निरूपण किया गया है।

सत्यात्मकं त्वां शरणं प्रपन्ना—इस पर सुबोधिनीजीकार स्पष्ट तो कहते हैं कि इस प्रकार क्रियाशक्ति और ज्ञानशक्ति दोनों सत्य रूप हैं। इनका निरूपण कर अब धर्मीस्वरूप भी सत्य रूप ही है उसको कहते हैं कि '**सत्यात्मकं**' आप भगवान् की आत्मा स्वरूप सत्य ही है। '**अत सातत्य गमने अतति सर्वत्र व्याप्नोतीत्यात्मा**' जो सब धर्मों में तात्पर्य कि पदार्थ मात्र में व्याप्त होकर रहती है उसको आत्मा कहते हैं। जो आत्मा है वह अबाधित सत्य है और वह भगवान् का सद्रूप है। '**सत्यात्मकं**' पद में जो अन्तिम अक्षर 'क' है वह प्रत्यय है। 'क' प्रत्यय स्वार्थ में होता है अथवा 'क' अक्षर का आशय 'फल' भी होता है। यहाँ 'क' फल बताने वाला है। सत्यात्मा का फल सुख आनन्द है अर्थात् जिसकी आत्मा सुखरूप है वह भगवान् सच्चिदानन्दरूप है। भगवान् का जैसे 'सद्रूप' सत्य है वैसे चिद्रूप और आनन्दरूप भी सत्य है। जीवों को वैसे सत्यात्मक सच्चिदानन्दरूप भगवान् के ही शरण जाना चाहिये।

देवों ने श्लोक में 'प्रपन्ना' बहुवचन कह कर यह बताया है कि हम सब आपके शरण इसलिये आये हैं कि आप सत्यव्रत सत्यरूप हो अतः सत्यता से ही हमारी, आप रक्षा करेंगे ॥ २६ ॥

एवं प्रमाणरूपतामुक्त्वा प्रमेयरूपतामाह एकायन इति ।

सत्यव्रतं श्लोक में सत्यात्मक परमात्मा प्रमाणरूप है यह स्पष्ट बताया अब इस '**एकायनोऽसौ**' श्लोक में भगवान की 'प्रमेय' रूपता का निरूपण करते हैं।

इदं जगद् ब्रह्माण्डात्मकं वृक्षत्वेन निरूप्यते—अब आचार्य चरण कहते हैं कि इस श्लोक में जगत का ब्रह्माण्डात्मक वृक्षरूप से वर्णन किया जाता है। परिदृश्यमान यह जगत् आदि वृक्ष रूप भगवान् से उत्पन्न हुआ है, वृक्ष से उत्पन्न हुआ पदार्थ वृक्ष ही होता है। भगवान् वृक्षरूप है इसमें श्रुति का प्रमाण देते हैं कि '**वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णपुरुषेण सर्वम्**' इस श्रुति का अर्थ है जो एक आकाश में वृक्षवत् स्थित है उस पुरुष से यह सर्व जगत् पूर्ण है, जगत् को वृक्षरूप कहने से भगवान् का महत्त्व निरूपण किया है। जैसे एक ही अश्वत्थ (वट) आदि वृक्षों में से करोड़ों फल उत्पन्न होते हैं। वैसे ही भगवद्रूप वृक्ष से असंख्य ब्रह्माण्ड उत्पन्न होते हैं अथवा प्रपंच रूप भी वैसा है जिससे अनेक उत्पन्न होते हैं। इस प्रकार भगवद्रूप वृक्ष का न आदि है और न अन्त है। वह सर्वदा ही है। अतएव इस कथन से ही इस ब्रह्माण्ड का निर्माण कभी भगवान् से होता है। **क्वचित् तत्व द्वारा अक्षरमत्र फलम्**—और कभी भगवान्, तत्त्वों द्वारा ब्रह्माण्ड का निर्माण करते है, तब इस जगत में 'अक्षर' फल है। उस फल के अंश तत्त्व है और बीज ब्रह्माण्ड हैं। उस वृक्ष से उत्पन्न फल को जब पक्षी खाता है तब वह फल फलता है इससे यह बताया कि ये तत्त्व चेतन है। उसमें दैत्यों आदिकों के कल्प में बहुत बीज वाले फल से भी एक वृक्ष उत्पन्न होता है इस कारण से ही वेद से बाह्यशास्त्रों में बहुत परमाणुओं के संयोग से एक कार्य की उत्पत्ति कही है। पीपल आदि भी कौओं की विष्टा से उत्पन्न हुए थे। बहुतों से एक होता है यां समझा जाता है। लेकिन यह परमाणुवादियों का समझना ठीक नहीं है और इस मन्तव्य के निराकरण के लिए श्लोक में कहते हैं कि '**एकायनोऽसौ**' इस प्रपञ्च का एक ही अयन ही है एक ही बीज है। 'ब्रह्माण्ड' पद में दो शब्द हैं, एक शब्द ब्रह्म और दूसरा शब्द अण्ड है अण्ड कहते हैं प्रकृति वा अक्षर को और उसका अर्थ यह है कि ब्रह्म के साथ जब अक्षर अथवा प्रकृति सम्मिलन होता है तब उसको ब्रह्माण्ड कहते हैं। कितनेक 'अण्ड' का अर्थ 'काल' भी करते हैं। इससे अब यह फलित हुआ कि यह परिदृश्यमा जगत् एकायन एक ही ब्रह्मरूप बीज वाला होने से आदि रूप सत् वृक्ष है। '**द्विफलः द्वे फले यस्य सुखदुःखेऽस्य फले**' जिसमें सुख और दुःख दो फल है। वे दो फल, 'नरक और स्वर्ग' कहे जाते हैं। दैत्यों को तो दुःख रूप फल ही प्राप्त होता है 'नरक' का अर्थ है **नराणां कं सुखं** 'विषयात्मकं' नरों का नश्वर विषयात्मक सुख है क्योंकि मनुष्य विषयों को ही सुख मानते है किन्तु वह सुख परिणाम में विषोपम होने से दुःख है अतः वह 'नरक' कहा जाता है। 'स्वर्ग' का अर्थ है **स्वः स्वरूपं गच्छतीति स्वर्गः** अपने स्वरूप की ओर जाना अतः जो अपने को अपनी आत्मा में ले जाते हैं वे सुख भोगते हैं वह स्वर्ग है। यहाँ तो ये दो प्रकार भी है, अन्य सृष्टि में सर्व विषयी होते हैं और जो विषयी होते हैं वे सर्व आसुरी होते होंगे। इस सृष्टि तो दो प्रकार के दैवी और आसुरी जीव है अतः सर्व विषयी नहीं होते हैं 'आसुरी' विषयी और दैवी निर्विषयी होते हैं, **त्रयो गुणाः सत्वादयो मूलान्यधः परो ह्यस्य** – सत्वादि तीन गुण इस जगत की जड़े हैं। अतः यहाँ तीन प्रकार के कर्म भी हो हैं। दूसरी सृष्टि में कहीं तामस कर्म ही होते हैं और कहीं राजस कर्म होते हैं लेकिन सात्विक कर्म तो वहाँ सर्वथा नहीं होते हैं, **चत्वारो धर्मार्थकाममोक्षा रसा यस्य**—धर्म, अर्थ, काम और मोक्ष ये चार प्रकार के रस भी इस सृष्टि-वृक्ष में है, अन्य अर्थ और काम दो रस है। **पञ्चकर्मा विविधाः प्रकारा यस्य**—पञ्च इन्द्रियों से जो पाँच कर्म, उत्क्षेपण, ऊपर फेकना (१ अपेक्षण नीचे फेंकना (२) प्रसारण फैलाना (३) आकुञ्चन सिकुडना (४) और गमन (५) ये पाँच कर्म के प्रकार

यहीं इस सृष्टि में है अन्यत्र 'उत्क्षेपण' कर्म नहीं होता है। अथवा अव्यय देकर—आचार्यचरण पञ्चविधः का अन्य अर्थ बताते हैं कि 'अन्नमयादि पांच कोशों को कर्म के पांच प्रकार समझने और श्रुति से स्पष्ट करते हैं कि जैसा भगवती श्रुति कहती है कि 'स वा एषः पुरुषः पञ्चधा पंचात्मा' वह यह पुरुष निश्चय पांच प्रकार के हैं और पंचात्मा है। ब्रह्माण्ड विग्रह भी उसी प्रकार का है। अन्य सृष्टियों में आनन्दमय आत्मा नहीं है। **षड् आत्मानो यस्य षड् इन्द्रियाण्यात्मत्वेन निरूपितानि**– जिस इस जगत् रूप वृक्ष की षड् इन्द्रियाँ आत्मरूप हैं। यह आत्मा 'विज्ञानमय' है। 'ज्ञान' छ प्रकार का है क्योंकि श्रोत्र चक्षु आदि छ इन्द्रियों से ज्ञान की उत्पत्ति होती है इसलिये ज्ञान उत्पत्ति से भिन्न-भिन्न प्रकार का है। **सप्त त्वगादयस्त्वचो वल्कलावीनि यस्य** इस जगत् वृक्ष के त्वक्-मांस-शोणित-मेद-अस्थि-मज्जा-वीर्य ये सात प्रकार के वल्कल-वस्त्र है। **अष्ट प्रकृतयो विटपाः शाखा यस्य**– भूमि-जल-अग्नि-वायु-आकाश-मन-बुद्धि-अहङ्कार ये आठ प्रकृति आठ शाखाएँ हैं। देह के नव छिद्र अक्ष-कोटर हैं। **दश प्राण छदानि यस्य** इस जगत् वृक्ष के—प्राण-अपान-व्यान-उदान-समान-नाग-कूर्म-कूकल-देवदत्त धनंजय ये दश प्राण हैं, ये पत्र हैं। **द्वौ जीवान्तर्यामिणौ खगौ यस्य**–जीव और अन्तर्यामी ये दो पक्षी हैं। अन्य सृष्टियों में इस सृष्टि से विलक्षणता समझनी चाहिये। श्लोक में जो 'हि' शब्द हैं उसका रहस्य यह है कि सर्वत्र युक्तियाँ हैं। 'आदि वृक्ष, शब्द समष्टि रूप से दिया है। इस प्रकार इस प्रमेयस्वरूप का निरूपण किया गया है ॥ २७ ॥

अत्रोपपत्ति वदन् साधनरूपमाह त्वमेक एवास्येति ।

अब इस श्लोक में युक्ति और हेतु को बताकर साधनरूप भी यह है इसका निरूपण करने के लिये 'त्वमेक एवास्य' श्लोक का प्रारंभ करते हैं।

"अस्य जगतः सतः सद्रूपस्य" आचार्यचरण कहते हैं कि इस श्लोक में प्रसूतिः पद देकर यह बताया है कि इस सद्रूप जगत् का उत्पत्ति स्थान, माता पिता के समान आप एक ही हो और इसका अर्थ है भली भांति जिससे उत्पत्ति हुई है। जगत् को सत्यरूप और भगवान् से उत्पन्न हुआ है यह कहकर सिद्ध किया गया है कि वैनाशिक आदि मत वाले जो जगत् को विनाशशाली मानते हैं वे अनीश्वरवादी है और उनके लिये इस भगवद्गीताजी में भगवानने अपने श्रीमुख से **"असत्यम् अप्रतिष्ठं ते जगदाहुरनीश्वरम्"** इस वचन में उनका मन्तव्य को वेद सम्मत न. होने के कारण आसुर मन्तव्य कहा है। उनके मत में ही जगत् असत्य कहा जाता है। यदि यह मन्तव्य अवैदिक का न हो, और वेद संमत हो तो ऐसा असत् और अज्ञान रूप कार्य का असद्रूप जगत् का ब्रह्म-भगवान् कर्त्ता कैसे हो ? भगवान् सद्रूप है और सद्रूप ही पदार्थ बनाते हैं। कदापि भगवान् असत् और अज्ञान रूप कार्य का कर्त्ता नहीं होते हैं और यह जगत् सद्रूप है अतः भगवान् इसका कारण उत्पत्तिस्थान कहा गया है। भगवान् केवल जगत् का उत्पत्ति स्थान ही नहीं हैं किन्तु अन्त में इस जगत् का लयस्थान अधिष्ठान भी भगवान् ही है। एवं मध्य में जगत् का पालक स्थिति कर्ता भी भगवान् ही है। इस विश्व का उत्पत्ति, लय और पालक भी आप हो ऐसा कहने का तात्पर्य यह है कि भगवान् जिस जगत् का रक्षक है उसका कदापि नाश नहीं होता है।

ये त्वन्मायया संवृतं संकुचितं चेतो पतियंषां ते—इस जगत् को उत्पत्ति, स्थिति और प्रलय करने वाले ब्रह्मा, विष्णु और महेश त्रिगुण के अधिष्ठाता आप तीन देव हैं, मैं तो नहीं हूँ यदि भगवान् ऐसा कहें तब ब्रह्मादि देव कहते हैं कि आपका माया से जिनका चित्त सङ्कुचित है, अल्प है, ज्ञानरहित है और उदारचित्त नहीं है वे आपको पृथक् पृथक् भेद युक्त अनेक प्रकार से देखते हैं लेकिन जो वेद शुद्ध बुद्धि वाले विपश्चित है वे भिन्न भिन्न न देखकर सबको आपका ही रूप समझते हैं। और अल्प मन वाले वस्तु भी अल्प ही ग्रहण करते हैं। उदार हृदय वाले पुष्कल वस्तु ग्रहण करते हैं। माया ने जिनका चित्त संकुचित नहीं किया वे कैसे भगवान् को परिच्छिन्न समझेंगे ? वे विपश्चित शास्त्रसंमत प्रज्ञावाले तो ब्रह्मादि देवों को परस्पर विलक्षण देखते हुए भी उस उस कार्य के अनुरोध से उस उस रूप से बने हुए आपको हीं देखते हैं। और वे जानते हैं कि ब्रह्मादि देव के स्वरूप में आप ही हैं आप उनसे पृथक् अन्य नहीं हैं। अतः गुणों करके भिन्न सृष्टि के मनुष्यों को अपने अपने कार्य की सिद्धि के लिये अपनी रुचि के अनुसार ये ही भगवद्रूप देव यथारुचि सेव्य है। इस प्रकार इस श्लोक में साधन कहे हैं ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नारदादिभिर्मुनिभिः सानुचरैरनुचरा गन्धर्वादयस्तत्सहितैर्देवैरिन्द्रादिभिश्च साकं ब्रह्मा भवो रुद्रश्च तत्र वसुदेवदेवकी बन्धनागारं एत्य आगत्य सर्वे रम्याभिर्गीर्भिर्वृषणं कामवर्षिणं भगवन्तमैडयन् तुष्टुवुः ॥ २५ ॥ स्तुतिमेव दर्शयति सत्यव्रतमित्यादिपञ्चदशभिः। तत्र प्रतिश्रुतमवतरणं भगवता सत्यं कृतमिति हृष्टाः सन्तः प्रथमं सत्यत्वेनैव स्तुवन्ति। सत्यं व्रतं सङ्कल्पो यस्य तम्, सत्यसङ्कल्पमित्यर्थः। तथा सत्यपरं सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिंस्तम्। त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्वं, प्रलयानन्तरं, स्थितिसमये च सत्यमव्यभिचारेण वर्तमानम्। एतदेवोपपादयन्ति–सत्यस्य योनिमिति। सच्छब्देन पृथिव्यप्तेजांसि त्यच्छब्देन वाय्वाकाशौ। एवं सच्च त्यच्च सत्यं भूतपञ्चकं 'यदिदं किञ्च तत्सत्यमितीत्याचक्षत' इति श्रुतेः। तस्य योनिं कारणम्, अनेन पूर्वं वर्तमान-

तोक्ता । तथा सत्ये तस्मिन्नेव निहितं स्थितिसमीपेऽप्यन्तर्यामितया स्थितमित्यर्थः । तथा सत्यस्य सत्यं तस्यैव सत्यस्य प्रपञ्चस्य सत्यं पारमार्थिकं तन्नाशेऽप्यवशिष्यमाणरूपम् , अनेन प्रलयानन्तरमपि वर्तमानत्वं दर्शितम् । एवं त्रिसत्यत्वमुपपादितम् । ऋतसत्यनेत्रम् । 'ऋतं च सूनृता वाणी सत्यं च समदर्शनम्' एकादशे भगवता एवं व्याख्यास्यमानत्वात् । 'सत्यं च समदर्शनम् । ऋतं च सूनृता वाणी कविभिः परिकीर्तिता' इति । तयोर्नेत्रं प्रवर्तकं यद्वा ते नेत्रे प्रापके यस्य तम् । एवं सर्वप्रकारेण सत्यात्मकं त्वां वयं शरणं प्रपन्नाः प्राप्ताः ॥ २६ ॥ ननु भवन्तोऽपि लोकेश्वराः किमिति मां शरणं प्रपद्यन्त इत्याशङ्क्य 'सृष्ट्यादिकारणत्वादस्मदादिशरणयोग्यः सर्वेश्वरस्त्वमेव' इति सूचयन् प्रपञ्चस्य वृक्षरूपत्वं भगवतस्तत्सृष्ट्यादिहेतुत्वं चाहुः—एकायन इति द्वयेन । असौ आदिवृक्षः 'वृश्च्यते कालेन च्छिद्यत इति वृक्षः' समष्टिव्यष्टिदेहरूपः सर्वोऽपि प्रपञ्चः एकायनः एका प्रकृतिरयनमाश्रयो यस्य सः । द्वे सुखदुःखे फले यस्य सः द्विफलः । त्रयः सत्त्वादयो गुणा मूलानि यस्य स त्रिमूलः । धर्मार्थकाममोक्षाश्चत्वारो रसा यस्य स चतूरसः । पञ्चेन्द्रियाणि चक्षुरादीनि विविधा ज्ञानप्रकाराः चिह्नविशेषा यस्य स पञ्चविधः । शोकमोहजरामृत्युक्षुत्पिपासारूपान् षडूर्मीन् जन्मास्तित्ववृद्धिविपरिणामापक्षयविनाशरूपान् षड्विकारान् वा प्राप्नोतीति षडात्मा । सप्त त्वङ्मांसरुधिरमेदोस्थिमज्जाशुक्ररूपा धातवस्त्वचो वल्कलानि यस्य स सप्तत्वक् । अष्टौ 'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ॥ अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा' इति भगवदुक्ता विटपाः शाखा यस्य स अष्टविटपः नव इन्द्रियगोलकानि अक्षाः कोटरा यस्य स नवाक्षः । दश प्राणापानसमानव्यानोदाननागकूर्मकृकलदेवदत्तधनञ्जयाख्याः प्राणवायवः छदाः पत्राणि पत्रवद्रक्षका विद्यन्ते यस्य स दशच्छदी । द्वौ जीवेश्वरौ खगौ यस्मिन् स द्विखगः । हिशब्दो 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्' इति श्रुत्या भगवतो वृक्षत्वेन निरूपणात् अश्वत्थजन्यस्याश्वत्थवत्तज्जन्यस्य प्रपञ्चस्यापि वृक्षत्वेन निरूपणं युक्तमेवेति सूचनार्थः ॥ २७ ॥ अस्य प्रत्यक्षसिद्धस्य सतः संसारवृक्षस्य त्वमेक एव प्रसूतिः प्रकर्षेण सूतिर्जन्म यस्मात्सः, निमित्तोपादानरूपोभयविधं कारणमित्यर्थः । एवकारेण प्रकृत्यादेः पदार्थान्तरत्वनिरासः । एकपदेन सहायान्तरनिरासः । एवं चैकस्यैवोपादानत्वं निमित्तत्वं च दर्शितम् । तथा सम्यक् निधीयतेस्मिन्निति सन्निधानं लयाधिष्ठानं त्वमेव । अनुगृह्यतेऽनेनेत्यनुग्रहः पालकश्च त्वमेव । ननु "ब्रह्मविष्णुरुद्रा एव जगज्जन्मादिष्वधिकारित्वेन प्रसिद्धा, नाहम्" इत्याशङ्क्याहुः—त्वन्माययेति । त्वन्मायया संवृतमाच्छादितं चेतो येषां ते त्वामेव ब्रह्मादिरूपैर्वर्तमानं नाना ब्रह्मादिरूपान् भिन्नान् स्वतन्त्रान् पश्यन्ति ये तु विपश्चितो मायामोहरहिता विवेकिनस्ते न तथा पश्यन्ति, किंतु त्वामेकमेव तत्तद्रूपेण स्थितं पश्यन्तीत्यर्थः ॥ २८ ॥

अन्वितार्थप्रकाशिका

ब्रह्मेति ॥ ब्रह्मा भवः शिवश्च नारदादिभिः मुनिभिः सानुचरैः गन्धर्वाद्यनुचरसहितैः देवैः साकं तत्र सूतिगृहे एत्य आगत्य तौ च देवाश्च गीर्भिः वृषणं कामवर्षणं भगवन्तम् ऐडयन् तुष्टुवुः । अत्रेड् चुरादिः । बहुत्वं सर्वदेवाभिप्रायम् । आर्षमित्येके ॥ २५ ॥ सत्यव्रतमिति ॥ सत्यं व्रतं संकल्पो यस्य तं सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्य त्रिष्वपि कालेषु सृष्टिस्थितिलयकाले तेभ्यः प्रागनन्तरं च सत्यमव्यभिचारेण वर्तमानं सत् पृथिव्यप्तेजांसि त्यत् वाय्वाकाशौ एवं सच्च त्यच्च सत्यं भूतपञ्चकम् "तत्सत्यमित्याचक्षते" इति श्रुतेः । तस्य सत्यस्य योनिं कारणम् । एतेन प्राग्विद्यमानतोक्ता । सत्ये तस्मिन्नेवान्तर्यामितया निहितं स्थितम् । एतेन स्थितिसमये सत्यत्वमुक्तम् । तथा सत्यस्य तस्यैव सत्यं पारमार्थिकं रूपं तन्नाशेऽप्यवशिष्यमाणरूपम् । एतेन प्रलयेऽप्यवधित्वेन सत्त्वं दर्शितम् ऋतं सूनृता वाक् सत्यं समदर्शनं तयोर्नेत्रं प्रवर्तकम् एवं सत्यात्मकं सत्यस्वरूपं त्वां शरणं प्रपन्नाः स्मः ॥ २६ ॥ एकायन इति ॥ एकं प्रकृतिरूपमयनमाश्रयो यस्य । द्वे सुखदुःखे फले यस्य । त्रीणि सत्त्वरजस्तमांसि मूलानि यस्य । चत्वारो धर्मार्थकाममोक्षा वर्णधर्मा वा आश्रमधर्मा वा रसा यस्य । पञ्च इन्द्रियाणि विधा ज्ञानप्रकारा यस्य । षड् जायतेऽस्ति वर्द्धते विपरिणमति अपक्षीयते नश्यति इति भावविकाराः बुभुक्षा पिपासा शोकमोहजरामृत्युरूपाः षडूर्मयः त्वङ्मांसरुधिरमेदोमज्जास्थीनि षट् कोषा वा आत्मानः स्वभावा यस्य । सप्त रसासृङ्मांसमेदोऽस्थिमज्जाशुक्ररूपा रसस्थाने त्वचमपि पठन्ति तद्रूपा वा धातवः महदादिसप्तावरणरूपा वा त्वचो यस्य । अष्ट पञ्चभूतानि मनोबुद्ध्यहंकाराश्चेति । विटपाः शाखा विस्तारा यस्य । नव शरीरच्छिद्राणि अक्षाः कोटराणि यस्य । दश प्राणापानव्यानसमानोदाननागकूर्मकृकलदेवदत्तधनञ्जयाः प्राणाश्छदाः पत्राणि विद्यन्तेऽस्य । दशभिः प्राणैश्छदी पत्रवान् इति वा । द्वौ जीवेश्वरौ खगौ यत्र ईदृशो योऽसौ समष्टिव्यष्टिदेहरूपः आदिश्चासौ वृक्ष उपलभ्यते ॥ २७ ॥ त्वमिति ॥ अस्य सतः कार्यस्य पूर्वश्लोके वृक्षत्वेन वर्णितस्य विश्वस्य त्वमेक एव प्रसूतिः कारणं त्वमेव सन्निधानं लयस्थानम् । त्वमेवानुगृह्णातीत्यनुग्रहः पालकश्चासि अतः प्रपञ्चस्त्वद्भिन्नो न । नन्वेवंविधा ब्रह्मादयः प्रसिद्धा इति चेत्तत्राहुः । ये त्वन्मायया संवृतं पिहितं चेतो ज्ञानं येषां ते त्वामेव नाना पश्यन्ति ये तु विपश्चितः ते तु तथा न पश्यन्ति । यद्वा । ये त्वन्मायया न संवृतं चेतो येषां ते विपश्चितः त्वां नाना न पश्यन्तीत्येकमेव वाक्यम् । ब्रह्मादीनामपि त्वदवतारत्वात् ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रतिश्रुतं सत्यं कृतमिति हृष्टाः सन्तस्तावत् प्रकृतिपुरुषयोरप्यसंभावितैर्धर्मैर्विशिष्टं हरिं सत्यत्वेनैव स्तुवन्ति ॥ सत्यव्रतमिति ॥ सत्यमवितथं व्रतं संकल्पो यस्य तं, अनेन प्रतिज्ञातोऽर्थो यथार्थीकृत इति सूचितम् । सत्यं धर्मः परं प्रधानीभूतो यस्य तं,

धर्मपालकमित्यर्थः। सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्येति वा। 'सत्यं धर्म उदाहृतः' इत्यभिधानात्। यद्वा। 'यदन्यद्देवेभ्यः प्राणेभ्यश्च तत् सत्यं, अथ यद्देवाश्च प्राणाश्च तत्सत्यं, तदेकया वाचा व्यवह्रियते सत्यम्' इति श्रुतेश्चिदचिदात्मकं जगत्सत्यं तस्मात्परो विलक्षणस्तं, त्रयः प्रकृतिपुरुषकालाः सत्या यस्य तम्, प्रकृतिपुरुषकालशरीरकमित्यर्थः। प्रकृत्याद्यात्मकस्य कृत्स्नस्य जगतः स्वनियाम्यत्वेन स्वसंकल्पप्रतिभटाभावादव्याहतसंकल्पमिति भावः। यद्वा। त्रिष्वपि कालेषु सृष्टेः पूर्वं प्रलयानन्तरं च स्थितिसमये च सत्यमव्यभिचारेण वर्त्तमानं, सत्यस्य चिदचित्प्रपञ्चस्य, योनिमुत्पत्तिकारणं, सत्ये निर्विकारे परे व्योम्नि, निहितं च। कर्त्तरि क्तः। अधिष्ठितमेवेत्यर्थः। यद्वा। उक्तश्रुत्या सत्ये सत्यात्मके जगति, निहितमन्तर्यामितया स्थितं, सत्यस्य सत्यं, सत्येभ्यो जीवेभ्योऽपि धर्मतो निर्विकारत्वात् सत्यरूपमित्यर्थः। प्राणा वै सत्यं तेषामेष सत्यम्' इति श्रुतेः। 'असावादित्यः सत्यम्' इति श्रुतेः सत्यशब्दाभिधेय आदित्यस्तत्साहचर्यादृतशब्दश्चन्द्रपरः, एवं सति ऋतसत्यौ चन्द्रादित्यौ तयोर्नेत्रं प्रशासितारमित्यर्थः। 'य आदित्ये तिष्ठन् यश्चन्द्रमसि तिष्ठन्' इत्यादिश्रुतौ तस्य तयोर्नियमनोक्तेः। यद्वा। तौ नेत्रे चक्षुषी यस्य तं, चक्षुषी चन्द्रसूर्यौ' इति श्रुतेः। ऋतं सूनृता वाक् सत्यं समदर्शनं तयोर्नेत्रं नेतारं प्रवर्त्तकमिति यावत्। सत्यात्मकं स्वरूपेणापि निर्विकारं, एवं सर्वप्रकारेण सत्यशब्दनिर्बोध्यं, त्वां, शरणं प्रपन्नाः। वयमिति शेषः॥ २५ ॥ अथ त्रिसत्यत्वमेवोपपादयितुं कृत्स्नं जगद्वृक्षरूपत्वेन निरूपयित्वा तस्य भगवद्धार्यत्वमाहुः॥ एकायन इति॥ एकं परं ब्रह्म अयनमाश्रयो यस्य सः, 'ऋचोऽक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः'। 'उतामृतत्वस्येशानः' इत्यादिश्रुतेः। यद्वा। एका चेतनात्मकलक्षणा प्रकृतिरयनमाश्रयो यस्य सः। 'यत्किं च जगत्यां जगत्' इति श्रुतेः। द्वे सुखदुःखे फले यस्य सः, यद्वा। द्वे प्रवृत्तिनिवृत्तिलक्षणे फले यस्य सः, त्रयः सत्त्वादयो गुणा मूलानि यस्य सः। चत्वारो धर्मार्थकाममोक्षाख्याः पुरुषार्थाः रसाः यस्य सः, पञ्च इन्द्रियाणि विधा ज्ञानप्रकारा यस्य सः, सामान्यवृक्षेष्वपि 'तस्माच्छृण्वन्ति पादपाः' इत्यादिना तदभिधानात्। पञ्चशिफ इति पाठे प्राणापानव्यानोदानसमानाख्याः पञ्चशिफा अवान्तरमूलानि यस्य सः, षट् अशनायापिपासाशोकमोहजरामरणाख्याः षडूर्मयः आत्मानः स्वभावा यस्य सः, सप्त मांसरुधिरमेदोमज्जास्थिशुक्ररूपाः धातवः त्वचो यस्य सः, हस्तौ पादौ शिरः कण्ठो वक्षो जठरश्चैतेऽष्टौ विटपाः शाखा यस्य सः, भूमिरापोऽनलो वायुः खं मनो बुद्धिरहंकारश्चेत्यष्टौ विटपा यस्येति वा। ब्रह्मरन्ध्रस्य दशमाक्षत्वात् पायूपस्थयोरेकत्वेन गणनया नवाक्षाणि छिद्राणि यस्य सः, नवद्वारैर्नवकोटर इत्यर्थः। दश शब्दादयो दशेन्द्रियविषयाः छदाः पत्राणि यस्य सः, प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधनंजयाख्या दशविधाः प्राणाः छदाः यस्य स इति वा। दशच्छदीत्यपि पाठः। द्वौ जीवपरमात्मरूपौ खगौ पक्षिणौ यस्मिन्नेवंविधः, असौ वृश्च्यते ज्ञानासिना योगिभिश्छिद्यते इति वृक्षः आदिश्चासौ वृक्षश्चादिवृक्षः संसारतरुः देहरूपो वा वृक्षः, अस्ति हि॥ २६ ॥ अथ सत्यस्य योनिमिति यदुक्तं तदुपपादयन्ति॥ त्वमिति॥ अस्य परिदृश्यमानस्य चिदचिदात्मकस्य, सतः 'धाता यथा पूर्वमकल्पयत्' इत्यादिश्रुतीक्षयाऽनादिकालतः प्रवर्त्तमानत्वेन सद्रूपस्य जगदात्मकसंसारतरोरित्यर्थः। प्रसूतिर्जन्मकारणं, त्वम् एक एव, संनिधीयते उपसंह्रियतेऽस्मिन्निति संनिधानं, प्रलयाधिकरणमित्यर्थः। त्वम् एव, अनुगृह्णातीष्टप्रदानेनेति अनुग्रहश्च स्थितिकारणं, चेत्यर्थः। त्वमेव। ननु ब्रह्मविष्णुरुद्रा एवंभूताः प्रसिद्धाः, कथमहमिति चेत्तत्राहुः। त्वन्मायया, संवृतं पिहितं चेतो ज्ञानं येषां ते, त्वन्मायामुषितज्ञाना इत्यर्थः। त्वां नाना पश्यन्ति ब्रह्मादिरूपेण समीक्षन्ते, ये विपश्चितस्त्वत्स्वरूपस्य याथार्थ्यविदः, ते तु नाना न पश्यन्ति। सृष्टिस्थितिप्रलयाख्यत्वत्कर्मणः ब्रह्मादिषु त्वया निहितत्वात्त्वं तेभ्यः पृथग्भूत एव वस्तुतोऽस्त्यतः विपश्चितो नाना त्वां न निरीक्षन्ते इति भावः। यद्वा। ननु नाहं भवद्भिः प्रोक्तो यः सत्यपरः सः, यतः केचिन्मां जीवादभिन्नं पश्यन्तीत्यत्राहुः। हे हरे, त्वन्मायया संवृतं मोहितं चेतो येषां ते, अत एव न विपश्चितः, नशब्दोऽत्र निषेधार्थकः, ततो 'नलोपो नञः' इति नलोपाभावः। ये जनाः, ते त्वां नाना पश्यन्ति, नानाजीवरूपेण स्थितं पश्यन्तीत्यर्थः॥२७–२८॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ब्रह्मेति : १०.२.२५.

मत्क्लेशापहृतावयं कृतमतिः श्रुत्वा मदभ्यर्थितं जानन्नेवमपीह यो न सदयं तं सेवते स्तौति वा।
नोन्मत्तो भुवि निस्त्रपस्तदपरो दुर्धीः कृतघ्नश्च वेत्यालोच्याच्युतमिष्टदं स्तुतिमतिः प्रागाद्विधिस्तत्क्षमम्॥ ३३ ॥
एतावत्कृतिभिस्तिरस्कृतिपदं नीतोऽस्मि वेदान्तिभिः, मन्यानैर्वयमेव सर्वविषयेष्वस्मिन् विरक्ता इति।
धन्योऽस्म्यद्य तु सर्वभूतजनकस्वीकारतः स्यामितो मूर्तः स्तोतुमगादसौ किमु महासंसार एवेश्वरम्॥ ३४ ॥
न चेद् गर्भस्तदा कुत्र जीवो ब्रह्मेति संस्थितिः। तत्प्रसादादिदं सर्वं युक्ता गर्भस्तुतिस्ततः॥ ३५ ॥

सत्यव्रतमिति : १०.२.२६.

गर्भादिवासमवलोक्य जघन्यमीशो वित्रस्य चेतसि न जातुचिदाजहातु।
सन्धां पुरा निजकृतामिति धातृमुख्याः स्तोत्रापदेशविधिनोचुरखण्डसत्यम्॥ ३६ ॥
समस्त-निगम-स्तुतोऽप्यखिलवस्तुविस्तारको वितस्तिमितकोदरो वससि देवकीये प्रभो।
अतस्तव दयालुता पतिततापनिस्तारणव्रतेत्यथ च तद्वशः प्रभुरितीह किं न स्फुटम्॥ ३७ ॥

त्वयि सति जठरस्थे देवकीनाशभीतिर्नहि खलु रिपुजाऽऽसीदत्र चित्रं न यस्मात् ।
सकलसुजनलोकानामपीहाविशङ्कं सपदि मृतिमुपेता देवकीनाशभीतिः ॥ ३८ ॥
यत्प्रत्यङ्गरुहान्तरङ्गगतया ब्रह्माण्डमुद्योतते यन्नाभ्युद्भवपद्मगर्भगतया हैरण्यगर्भस्थितिः ।
यन्नामैव जनुष्मतामलमहो स्विद्गर्भकूलङ्कषं सत्वं गर्भनिवास्यभूस्तदिह सद्वात्सल्यमाविष्कृतम् ॥ ३९ ॥

कृष्णप्रिया

ब्रह्माजी, भगवान् शंकर जी नारदादि मुनिजन और अपने सेवकों के साथ देवता लोग वहाँ आकर सुन्दर वाणी-स्तोत्रों से भगवान की स्तुति करने लगे ॥ २५ ॥ देवता लोग कहने लगे कि आप सत्यव्रत है, आप का बारह प्रकार का सत्य परश्रेष्ठ है, आप के तीन लोक और, आपकी तीन आत्मा (जीव-शरीर-परमात्मा) सत्य है, आप सत्य के कारण है, सत्य में आप की स्थिति है; आप सत्य के सत्य-आधिदैविक स्वरूप है, ऋत (सुनृत वाणी) और सत्य (समदर्शन) ये दो आप की प्राप्ति कराने वाले है , और आप सत्य स्वरूप है , ऐसे आप भगवान के हम शरणागत हैं ॥ २६ ॥ यह ब्रह्मांड रूप जो आदिवृक्ष है इसका आधार केवल भगवान् ही है । और उसके सुख और दुःख दो फल हैं, तीन गुण उसकी जडें हैं धर्म अर्थ काम मोक्ष ये चार रस हैं, पांच कर्म ही प्रकार है, छ इन्द्रियाँ ही आत्मा है, सात प्रकार की धातु सात वल्कल है, आठ प्रकार की प्रकृतियाँ आठ शाखा हैं, देह के नव छिद्र नव कोटर है । दश प्राण दश पर्ण है । जीव और अन्तर्यामी दो पक्षी है वैसा वह ब्रह्मांड नाम का वृक्ष है । इस सद्रूप जगत् के उत्पत्ति स्थान आप एकही हो, लयस्थान भी आप हो और इसकी स्थिति भी आप में ही है । आपकी माया से जिनका ज्ञान ढ़क गया है वे आपसे भिन्न, जगत् को नाना रूप में देखते हैं । और जिनकी बुद्धि माया से आच्छादित नहीं हुई है वे विद्वान् नाना रूप में अलग न देखकर सब में एक आपको ही देखते हैं ॥ २८ ॥

बिभर्षि रूपाण्यवबोध [1]आत्मन् क्षेमाय लोकस्य चराचरस्य ।
सत्त्वोपपन्नानि सुखावहानि सतामभद्राणि मुहुः खलानाम् ॥ २९ ॥
त्वय्यम्बुजाक्षाखि[2]लसत्त्वधाम्नि समाधिनाऽऽवेशितचे[3]तसैके ।
त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिम् ॥ ३० ॥
स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीममदभ्रसौहृदाः ।
भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ॥ ३१ ॥
येऽन्येऽरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—अवबोध आत्मन् चराचरस्य लोकस्य क्षेमाय सताम् सुखावहानि सत्वोपपन्नानि खलानाम् अभद्राणि रूपाणि मुहुः बिभर्षि ॥ २९ ॥ अम्बुजाक्ष अखिलसत्वधाम्नि त्वयि समाधिना आवेशितचेतसा महत्कृतेन त्वत्पादपोतेन भवाब्धिम् गोवत्सपदम् कुर्वन्ति ॥ ३० ॥ द्युमन् अदभ्रसौहृदाः सुदुस्तरम् भीमम्-भवार्णवम् भवत्पदाम्भोरुहनावम् (कृत्वा) स्वयम् समुत्तीर्य अत्र निधाय ते याताः भवान् सदनुग्रहः ॥ ३१ ॥ अरविन्दाक्ष अन्ये ये विमुक्तमानिनः त्वयि अस्तभावात् अविशुद्धबुधयः अनादृतयुष्मदङ्घ्रयः परम् पदम् कृच्छ्रेण आरुह्य ततः अधः पतन्ति ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु देवकीपुत्रं मां कथमेवं वर्णयथेति चेत्तत्राहुः । बिभर्षीति । अवबोधैकस्वरूप आत्मा त्वमेव रूपाणि मूर्तीर्बिभर्षि धत्से । न तु त्वं कस्यापि पुत्र इत्यर्थः । क्षेमाय पालनाय । सतां धर्मवर्तिनां सुखकराणि । खलानामभद्राणि नाशकानि ॥ २९ ॥ न केवलमेतावत् । भक्तानां मोक्षार्थमपीत्याहुः—त्वयीति । त्वयि समाधिना आवेशितचेतसा निमित्तेन त्वत्पादपोतेनाश्रितेन । एके मुख्या विवेकिनः । महद्भिः कृतेन सेव्यतया संपादितेन । यद्वा इदमपि मायामयमित्यनादरं परित्यज्येदमेव महत्सर्वोत्कृष्टमिति मनसि कृतेन बहुमतेनेत्यर्थः । भवाब्धिं तुच्छीकुर्वंति । अनायासेनैव भजनानुसारिणी तेषां मुक्तिरित्यर्थः ॥ ३० ॥ ननु तेन पोतेन पूर्वे चेत्पारं गतास्तर्हीदानींतनानां का गतिस्तत्राहुः-स्वयमिति । अयमर्थः । हे द्युमन्स्वप्रकाश त्वत्पादपोतसामीप्यमात्रेण भवांबुधौ वत्सपदचिह्नमात्रे जाते अतस्तन्निरपेक्षं स्वयमेवान्येषां भीमं दुस्तरमपि भवार्णवं समुत्तीर्य भवत्पदांभोरुहरूपां नावमत्रैव निधाय ।

---

१. आत्मा—श्रीधर. वंशी. शुक; आत्मन्—विज. । २. मलसत्व—वीर. । ३. चेतसो ये— विज. ।

भक्तिमार्गसंप्रदायं प्रवर्त्येत्यर्थः । पारं याताः तत्किम् । यतोऽदभ्रसौहृदाः सर्वभूतेष्वतिप्रीतियुक्ताः अतस्तेऽन्येषां तरणाय निधाय याता इति कथं मत्पादपोतश्रयणमात्रेण तीर्णा अत उक्तम् । भवान्सदनुग्रहः सतो भक्ताननुगृह्णातीति ॥ ३१ ॥ ननु विवेकिनां किं मद्भजनेन मुक्ता एव हि ते तत्राहुः—येऽन्य इति । विमुक्तमानिनो विमुक्ता वयमिति मन्यमानाः । त्वयि अस्तो निरस्तोऽत एवासन् यो भावस्तस्मात् । भक्तेरभावादित्यर्थः । न विशुद्धा बुद्धिर्येषां ते तथा । यद्वा त्वयि अस्तभाः इति च्छेदः । अस्तमतयो वादेष्वेव विशुद्धबुद्धयः । कृच्छ्रेण बहुजन्मतपसा । परं पदं मोक्षसन्निहितं सत्कुलतपःश्रुतादि । पतंति विघ्नैरभिभूयंते । न आदृतौ युष्मदंघ्री यैस्ते ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यूयं विद्वांसश्चेत्तर्हि किमर्थमेवं स्तुवंति गर्भगमिति शंकते भगवान्-नन्विति । एवं जगदुत्पत्त्यादिकर्त्तारम् । तत्र देवकीपुत्रत्वे । आहुः (कारणमिति शेषः) बिभर्षीति पद्येन । अवबोधैकस्वरूपो ज्ञानैकस्वरूपः । इत्यर्थ इति । न हि मूर्तिधारणेनान्यथात्वं जायतेऽन्यथा करकाणामपि जलत्वत्यागेन पार्थिवत्वं स्यादिति भावः । क्षेमाय तत्तत्कालप्राप्तविपत्परिहाररूपपालनाय । 'क्षेमो ना प्राप्तरक्षायाम्' इति यादवः ॥ २९ ॥ एतावत् सत्पालनं खलहननमात्रमेव । किन्तु भक्तानां मोक्षार्थमपीति त्वयीति पद्येनाहुः । पादावेव पोतो वहित्रं तेन अभेदरूपकेण पादयोर्वहित्रत्वम् । 'पोतः शिशौ वहित्रे च' इति मेदिनी । कृतेनेत्युक्तेः कृत्रिमस्य मायामयत्वं स्यादित्याह-यद्वेति । इत्यर्थ इति तात्पर्यम् । भवस्संसार एवाब्धिस्तं यथा वत्सचरणभरकृतनिम्नस्थितजलमयत्नेन तरंति तथा भवाब्धिमपीत्याह—तुच्छीकुर्वंति । भवाब्धेरस्तित्वमपि न जानंतीति भावः । "भवः क्षेमेशसंसारसत्तासु प्राप्तिजन्मनोः" इति मेदिनी । कृतिरित्यर्थ इति भावः ॥ ३० ॥ ते तु मुक्ता अन्येषां का गतिरिति शंकते-नन्विति । तेन त्वत्पादरूपेण । पारं गता मुक्ताः । इदानींतनानाम् । आधुनिकानाम् । का गतिः कथं मोक्षः । तत्र इदानींतनमोक्षे । स्वयमिति पद्येन । न केवलं स्वयं मुक्ताः किन्त्वन्यजनमोक्षार्थमुपायं कृत्वैव स्वयं मुक्तिमिता इत्याह-अयमर्थ इति । ततो वत्सपदमात्रत्वात् । तन्निरपेक्षं पोतनिरपेक्षम् । अन्येषामभक्तानाम् । निधाय इत्यस्यायमर्थ इति बोधयतीत्यर्थ इत्यंतेन न तु संस्थाप्येति 'निपूर्वः स्थापने मतः' इत्युक्तेः । तत्संप्रदायप्रवर्त्तनं किं किमर्थम् । अत्र किमव्ययं प्रश्ने "किं कुत्सायां वितर्के च निषेधप्रश्नयोरपि" इति मेदिनी । यतो हेतोः । अर्थान्तरमाह-द्युमन् हे सूर्येति । त्वं येषामन्तःकरणे नोदेषि तेषामेव तमःपुंजरूपः संसारोऽर्णवतुल्यो भीमो दुस्तरश्च भवति प्रेमभक्त्युदयपर्वते त्वय्युदिते समस्ततमसि स्वयमेव नष्टे सति स्वयमेव तरणं भवेदतो भवत्पदांबुरुहनावमत्रैव कूले निधाय याताः । यथाऽन्येप्येवं तरेयुरित्यभिप्रायेणेवोत्प्रेक्ष्यत इति भावः । अत्र संसारस्य सामस्त्येन नष्टत्वेऽपि वयं संसारिण एवेति भक्तानां मिथ्याभिमान एव गोवत्सपदाकारः । यथा च गोवत्सपदजलं पावनं श्लाघनीयं च भवेत्तथैव तेषां सोऽभिमानोऽप्यन्येषां भक्तमानिनामभिमानरोगहरोऽभिज्ञजनैः श्लाघनीयश्च भवतीति यतः सत्सु भक्तेष्वेवैतादृशोऽनुग्रहो यस्य नान्येष्विति भावः ॥ ३१ ॥ मुक्तानां भजनमकिंचित्करमिति शंकते नन्विति । विवेकिनां ज्ञानिनाम् । ते विवेकिनः । तत्र भजनाकरणे भावो भक्तिः । इत्यर्थ इति तु सत्तादिरूपो भावपदार्थोऽत्र न ग्राह्य इत्याह-किं च पदच्छेदे नार्थाधिक्यमाह-यद्वेति । छेद इति । अस्ता भा मतिर्येषां ते तथा भाति दीप्यते पुमाननयेति भा बुद्धिः । अधोऽवाक् तिर्यग्योनौ श्वशृगालादियोनौ रविंदोंधकारस्तद्भिन्नेऽरविंदः प्रकाशा ज्ञानमिति यावत् । "अंधकारो रविंदांधतिमिरं तम उच्यते" इत्युत्पलः । स एवाक्षिणी यस्य सोऽरविंदाक्षस्तत्संबुद्धौ हे ज्ञानलोचन । किञ्च हरिभक्तानामेव भवार्णवो गोष्पदी भवति ये तु तव शुद्धसत्त्वमयवपुषि मायाभानवंतो ज्ञानिनस्तेषां तु सुदुस्तरो भीमश्च 'कृच्छ्रो महानिह भवार्णवमप्लवेशाम्' इत्यादिसनत्कुमारोक्तेः 'क्लेशोऽधिकतरस्तेषाम्' इति भगवता 'नैष्कर्म्यमप्यच्युतभाववर्जितम्' इति नारदेनापि तथैव देवा अप्याहुः । अन्ये त्वदनुगृहीतसद्भक्तेभ्यो भिन्नाः अरविंदाक्षेति त्वत्कृपावलोकनमाधुर्याननुभाविन इति भावः । विमुक्तमानिनस्त्वद्भक्ता यथा संसारोत्तीर्णा अपि संसारिमानिनस्तथैवैते संसारमध्ये पतिता अपि विमुक्तमानिनस्तत्र हेतुस्त्वय्यरविंदाक्ष मधुराकारेऽस्तभावान्मायाशाबल्यमननेन प्रीत्यभावात् । 'अवजानंति मां मूढा मानुषीं तनुमाश्रितम्' इति भगवदुक्तेर्मौढ्यादविशुद्धज्ञानाः कामादिनिर्जयमूलकांतःकरणशुद्धिमत्त्वादुत्पन्नमपि ज्ञानं न विशुद्धं तदपि कृच्छ्रेण तपःशमदमादिकृच्छ्रजनितेन ज्ञानेन परं पदं जीवन्मुक्तदशायामारुह्यत्येषां गुणीभूतभक्तया युक्तत्वं ज्ञेयं तां विना परमपदारोहासंभवात् 'श्रेयः सृतिं भक्तिमुदस्य' इत्याद्युक्तेस्तां विना ज्ञानस्य मरीचिकाजलायमानत्वात्ततोऽधः पतंति । ननु भक्तिसत्त्वे कथमधः पतंति तत्राहुः नादृतौ मायिकत्वबुद्ध्या युष्मदंघ्री यैस्ते । अयमर्थः-ज्ञानिनां ज्ञानांगभूता भक्तिर्द्विधा भक्तिं विना ज्ञानं न सिध्येदिति शास्त्राज्ञयैव किञ्चिन्मात्रीक्रियमाणा भजनीयभगवद्विग्रहादिषु मायिकबुद्ध्याऽनादरवती अनादररहिता च । आद्यया तेषां तपःशमदमादिमतां बहुकालेनाविद्यानिरसनीं विद्यामुत्पाद्य ब्रह्मभूतत्वदशामुत्पाद्य च सहसैवांतर्धीयते ते विमुक्तमानिन एवोच्यन्ते न तु वस्तुतो जीवन्मुक्ताः 'भक्त्याहमेकया ग्राह्यः' इति भगवदुक्तेर्भक्तिं विना तत्पदार्थस्यापरोक्षानुभवाभावात् भगवदपराधसंभवाच्च दग्धानामपि कर्मणां पुनः प्ररोहादधः पतंति तदुक्तं रथयात्राप्रसंगे विष्णुभक्तिचंद्रोदये "नानुव्रजति ये मोहाद्व्रजंतं परमेश्वरम् । ज्ञानाग्निदग्धकर्मापि स भवेद्ब्रह्मराक्षसः ॥" इति । वासनाभाष्ये "जीवन्मुक्ता अपि पुनर्बंधनं यांति कर्मभिः । यद्यचिंत्यमहाशक्तौ भगवत्यपराधिनः ॥" इति द्वितीयया तु तेषां ब्रह्मभूतत्वदशाद्यविद्याविद्ययोरुपरामेत्यनु परमत्या तत्पदार्थसाक्षात्कारमनुभाव्यमाना जीवन्मुक्ताः सिद्धा एव स्युः । तदुक्तम् "ब्रह्मभूतः प्रसन्नात्मा न

शोचति न कांक्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ भक्तया मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥" इति विश्वनाथः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अवबोधरूप आत्मा सर्वमूलस्वरूपः श्रीदेवकीनन्दनाख्यस्त्वमेव सत्त्वेन सच्चिदानन्दघनत्वेन उपपन्नानि श्रौतपुराणादिवाक्ययुक्तिसिद्धानि रूपाणि पुरुषाख्यादीनि मुहुर्बिभर्षि जगत्सृष्टिं प्रतिधत्से प्रकटयसीत्यर्थः। अतो देवकीलक्षणनिजशक्तिद्वारा प्राकट्यात्तव तन्नन्दनत्वेपि तादृशत्वं च न व्याहन्यत एवेति भावः लोकक्षेमार्थत्वे हेतुः सुखेत्यादि सत्पालनखलदण्डाभ्यामेव तत्सिद्धेः खलानामपि दुष्टकर्मतो निवृत्तेः सन्तोऽत्र धर्ममर्यादाकारकाः खलास्तल्लोपका इति अन्यत्तैः। यद्वा त्वमेक एवास्येत्यादावेव श्रीदेवकीनन्दनरूपस्यैव तस्य तादृशत्वं निर्धार्य्येदमेवावतार्य्यं तेषां नानारूपाणां प्रयोजनमाहुः—बिभर्षीति। तदेवं सर्वेषामेव त्वद्रूपाणां तादृशत्वे सिद्धे किमुत स्वयं भगवतस्तवेति भावः ॥ २९ ॥ अस्तु तावत्त्वद्रूपाविर्भावसमयगतानां तेषां वार्त्ता अन्यदापि मनोमात्रेणापि—लब्धत्वदाश्रयाणामनायासेनाऽखिलसंसारदुःखनाशः परमसुखरूपत्वप्राप्तिश्च भवति तत्प्रसङ्गेनान्येषामपि तादृशत्वं संपद्यत इत्याहुः त्वयीति द्वाभ्यां परमसुखात्मके तत्पारतीरायमाने त्वयि हे अम्बुजाक्षेति परमसौन्दर्य्यमुद्दिष्टम् अयमावेशे हेतुः किञ्च अखिलस्याखण्डस्य सत्त्वस्य चिच्छक्तिवृत्तिविशेषाचिन्त्यापरिमितसर्वसद्गुणात्मकत्वदीयस्वरूपसुखाभिव्यञ्जकशुद्धसत्त्वस्य धाम्नि आश्रये अमलेतिपाठे तस्य मायामलराहित्येन यत् शुद्धसत्त्वसंज्ञत्वं तदेव साक्षादुक्तम् ॥ ३० ॥ सम्यक् उत्तीर्त्वेति, वत्सपदमात्रताकरणेन नावस्तितीर्षोश्च चेष्टामात्रं निरस्तं द्युमन्निति तच्च तव प्रकाशस्वभावादेवेति भावः। अत्र पूर्वत्र च पादादिशब्दस्य साधनलक्षणभक्तौ तात्पर्य्यम् अत उक्तमत्र निधायेति, अन्यत्तैः तत्र कथं मत्पादेत्यादौ ज्ञानं विनेति शेषः। यद्वा, एवं तेषामेव तत्तारणकारणत्वे हेतुः सन्त एवाऽनुग्रहरूपा यस्येति ॥ ३१ ॥ ननु, विनापि मत्पदाश्रयं ज्ञानेनैव संसारोत्तरणादिकं भवेत् किन्तेन तत्राहुः-य इति। हे अरविन्दाक्ष इति दृष्टिमात्रेण सर्वतापहारित्वमुक्तं तादृशेपि त्वयि बहुत्वपर्यवसितेन युष्मत्पदेन तदीयाश्च गृह्यन्ते अन्यत्तैः तत्र श्रुतादीत्यादिग्रहणात् मनननिदिध्यासनादि। यद्वा, प्रथमतस्तावत्त्वय्यस्तभावादविशुद्धबुद्धयः तथापि ज्ञानमार्गमाश्रित्य विमुक्तमानिनः देहद्वयातिरिक्तत्वेनात्मानं भावयन्तः ततः "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।" इत्युक्तेः कृच्छ्रेण परम्पदं जीवन्मुक्तिरूपम् आरुह्य प्राप्यापि ततोऽधः पतन्ति कदेत्यपेक्षायामाहुः—अनादृतेति। यदीतिशेषः तेषां भक्तिप्रभावस्याऽननुवृत्तेरबुद्धिपूर्वकस्य त्वदनादरस्य निवर्त्तकाभावात् तथापि दग्धानामपि पापकर्मणां महाशक्तिश्रीभगवत्पादपद्मावज्ञया पुनर्बन्धनविरोहात् तथा च वासनाभाष्यधृतं श्रीभगवत्परिशिष्टवचनम्—

"जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति कर्मभिः। यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिनः" ॥ इति।

अत एव तत्रैव—

"जीवन्मुक्ताः प्रपद्यन्ते क्वचित् संसारवासनाम्। योगिनो न विलिप्यन्ते कर्मभिर्भगवत्पराः" ॥

रथयात्राप्रसङ्गे श्रीविष्णुभक्तिचन्द्रोदयधृतं पुराणान्तरवचनं च—

"नानुव्रजति यो मोहाद्व्रजन्तं जगदीश्वरम्। ज्ञानाग्निदग्धकर्मापि स भवेद् ब्रह्मराक्षसः" ॥ इति।

तदेवं भक्तिसोपानज्ञानमार्गे "तत्रापि चित्तबडिशं शनकैर्वियुङ्क्ते" इत्यादौ "तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत्" इत्यादौ च यत्तद्ध्यानत्यागो धारणान्तरं सिद्धिश्च श्रूयते तत्रानादरो न मन्तव्यः किन्तु ब्रह्मकैवल्येच्छासंस्कारवशाच्छैथिल्यमेव यथा निद्रासंस्कारवशाद्विषयाविष्टानां विषये तद्दृश्यते तत्र श्रीभगवता वञ्चना च क्रियत इति ब्रह्मण्येव मग्नता स्यात्।

"अस्त्वेवमङ्ग भजतां भगवान् मुकुन्दो—मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम्" ॥

इत्यादेः अनादरे तु नरकोऽपि श्रूयते "नातः परमयद्भवतः स्वरूपम्" इत्यादिषु "योऽनादृतो नरकभाग्भिरसत्प्रसङ्गैः" इत्याद्युक्तेः तस्मात् सर्वं समञ्जसम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

२९— रूपाणि श्रीमत्स्यादिमूर्त्तीरबोधैकस्वरूप इति तद्रूपाणामपि तादृशत्वं सूचितम्; तदेवाभिव्यञ्जयतिसत्त्वेति, सत्त्वं सत्तामात्रं ब्रह्म तदुपपन्नानि सच्चिदानन्दघनानीत्यर्थः। यद्वा, आत्मा स्वयमेव बिभर्षि न तु माययेति सोऽर्थः समर्थित एव। क्षेमत्वे हेतुः—सत्त्वानि विविधसाधुता तद्युक्तानि, अतएव सतामविच्छेदेन सुखकराणि, सतां सुखावहत्वेन खलानाञ्च नाशनेनैव पालनसिद्धेः। यद्वा, सत्त्वानां सात्त्विकानामुपपन्नानि हितार्थं समीपं प्राप्तानि। मुहुरित्यस्य बिभर्षीत्यनेनान्वयः। ततश्च रूपाणां बाहुल्यं प्रत्येकं वैविध्यञ्च बोध्यते। यद्वा, सुखावहानीत्यनेनाभद्राणीत्यनेन चान्वयः। ततश्च तत्तदविच्छेदः, यद्वा, मुहुः खलानां पुनः पुनर्दुष्टानामिति कदाचित् साधुत्वे सति तेषामपि भद्राणि स्युरिति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, अवबोध इति यथा यस्य यदा येन

रूपेण क्षेमं स्यात्तज्ज्ञानं तदनुसारेण बिभर्षीति भावः। क्षेमाय हिताय, अभद्राणि दण्डादिना दुःखकराणि, तथापि तेषां मध्ये केषाञ्चिन्मदभञ्जनादिना केषाञ्चिन्मोक्षदानेन च हितं सिध्येदेव; पक्षान्तरे च, न केवलं तान्येव, जगद्धितार्थमन्यान्यपि विविधानि रूपाणि प्रकटयसीत्याहुः—बिभर्षीति अर्थः स एव ॥

३०—त्वद्भक्तानाञ्च मुमुक्षूणामप्यनायासेन स्वयं संसारोत्तरणार्थमन्यतारणार्थञ्च बिभर्षीत्याहुः- त्वयीति द्वाभ्याम्। हे अम्बुजाक्षेति परमसौन्दर्य्यमुद्दिष्टम् अयं समाधिना चेतस आवेशे हेतुः। किञ्च अखिलानां सत्त्वानां जीवानां धाम्नि आश्रये। यद्वा, सत्त्वानां साधुत्वानामास्पदे; किंवा सम्पूर्णब्रह्ममूर्त्तावित्यर्थः। अमलेति पाठे आद्ये पक्षे,—अमले सत्त्वधाम्नि, द्वितीये—अमलानां सत्त्वानाम्, तृतीये—विशुद्धसत्त्वं केवलसत्त्वरूपं ब्रह्मैवेति। एवं सर्वसद्गुणादिकमुक्तम् ॥

३१—सम्यगुच्चैस्तीर्त्वेति वत्सपदमात्रताकरणेन कथञ्चित्तत्सम्बन्धोऽपि निरस्तः। द्युमन्निति, तच्च तव कृपा-प्रकाशनादेवेति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, मोक्षाद्यपेक्षकानपि भक्तांस्तान्न कथञ्चित् कदाचिदपि त्वमुपेक्षस इत्याहुः—सन् सत्य उत्तमो वानुग्रहो यस्य सः ॥

३२ त्वद्भक्तिं विना ब्रह्मविदोऽपि सन्न्यासिनो विविधदुःखं प्राप्नुवन्तीत्याहुः—य इति। हे अरविन्दाक्षेति दृष्टिमात्रेण सर्व्वतापहारित्वमुक्तम्; तादृशेऽपि त्वयि; युष्मच्छब्देन त्वदीयाश्च गृह्यन्ते ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अवबोधः ज्ञानस्वरूपो रूपाणि अवताररूपाणि सत्त्वोपपन्नानि शुद्धसत्त्वमयानि ॥ २९ ॥ त्वयीति महद्भिरुपदेशकृतेन समाधिना त्वय्यावेशितेन चेतसोपलक्षिता एके अवताररूपप्रवणाः पुरुषाः त्वत्पादपोतेन भवाब्धिं गोवत्सपदं कुर्वन्ति ॥ ३० ॥ द्युमत्स्वर्गादिस्थानोपेतम् अदभ्रसौहृदाः मैत्र्यादिगुणोपेताः भवत्पदाम्भोरुहनावं निधाय भवार्णवं समुत्तीर्य स्वयं याता इत्यन्वयः। एवं भवान् सदनुग्रहः सदनुग्रहलीलः ॥ ३१ ॥ विमुक्तमानिनः विमुक्ता वयम् इति वृथाऽभिमानिनः परम्पदं वर्णाऽऽश्रमादिरूपं स्थानमारुह्य अनादृतयुष्मदङ्घ्रयः त्वच्चरण आदररहितमनसः वर्णाश्रमधर्मं क्रियमाणा अस्तभावात्त्वयि भक्तिशून्यत्वादविशुद्धबुद्धयः अधः पतन्ति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

त्वमनुग्रह इति स्थितिकारणत्वमुक्तं तच्चान्तर्यामित्वस्यावतारमन्वाद्यनुप्रवेशेनेत्यभिप्रायेणाहुः - बिभर्षीति। अवबोध आत्मा ज्ञानस्वरूपः असन्धिरार्षः यद्वा, अवबोधः ज्ञानस्वरूपः आत्मा सर्वान्तरात्मा च सन्नित्यसमस्तं पदद्वयं यद्वा अवबोध इति सप्तम्यन्तमवबोधे ज्ञानस्वरूपे जीवे आत्माऽन्तरात्मतयावस्थितस्त्वमस्य चराचरात्मकस्य लोकस्य क्षेमार्थं रूपाणि अवताररूपाणि बिभर्षि कथम्भूतानि सत्त्वोपपन्नानि शुद्धसत्त्वमयानि सतां साधूनां सुखावहानि खलानां दुष्कृतां मुहुर्मुहुरभद्राणि मुहुर्बिभर्षीति वान्वयः ॥ २९ ॥ एवं निखिलजगदुत्पादकारणत्वेन स्तुत्वाऽथ "कारणन्तु ध्येयम्" इति कारणत्वसमनियतत्वेन श्रुतमुपास्यत्वमपि त्वन्निष्ठमेवेत्यभिप्रायेण स्तुवन्ति, ब्रह्मादयो देवाः श्रीदेवकीगर्भगतं श्रीनिवासम्-त्वयीति। हे अम्बुजाक्ष! अमलसत्त्वधाम्नि शुद्धसत्त्वमयं धाम स्थानं शरीरं श्रीविग्रहो वा यस्येति यावत् तद्यस्य तस्मिन् विशुद्धसत्त्वमयदिव्यनित्यमङ्गलश्रीविग्रहविशिष्टे त्वयि एके विपश्चितः अवताररूपचरित्रगुणकथाश्रवणकीर्त्तनस्मरणादिपराः पुरुषाः समाधिना आवेशितं चेतो यैस्तथाभूताः चेतसैक इति सन्धिरार्षः समाधिना त्वय्याविशितचेतसोपलक्षिताः इति वा महत्कृतेन महता सदाचार्येण कर्णधारस्थानीयेन कृतेन सन्निधापितेन प्रदर्शितेन तव पादपोतेन श्रीपादपद्मरूपप्लवेन भवः संसारः स एवाब्धिः सागरस्तं गोवत्सपदं कुर्वन्ति तदिव सुखेनातितरन्तीत्यर्थः ॥ ३० ॥ न केवलं ते स्वयमेव गोवत्सपदं कुर्वन्ति किन्त्वन्येषामपि तथैवास्त्विति तादृशशास्त्रप्रकाशानाद्यविच्छेदसम्प्रदायपरम्परामत्रैव दृढतया विस्तार्य भवत्कृपया श्रीभवद्धाम प्राप्ता इत्यभिप्रायेण स्तुवन्ति-स्वयमित्यादिना। हे द्युमन्! नित्यविभूतिमन् विभूतिद्वयनायक! द्युमिदिति पाठे द्युमद्भवार्णवमिति समस्तं पदं स्वर्गादिस्थानोपेतं भवार्णवं भीमं दुस्तरमपि अदभ्रमनल्पं सौहृदं त्वद्भक्तिरूपं येषां तथाभूतास्ते स्वयं समुत्तीर्य त्वत्पादपोतेनेत्यनुषङ्गः श्रीभगवतः पादाम्बुजमेव नौस्तामत्र निधाय इयमेव संसारसागरोत्तारणसाधनभूतेति प्रदर्श्य यातास्त्वत्पदं प्राप्नुवन्ति बिभर्षि रूपाणीत्यादिनोपक्रान्तमनुगृहीतृत्वप्रतिपादनमुपसंहरन्ति एवं भवान् सदनुग्रहः साधूनामनुग्रहशीलः ॥ ३१ ॥ तन्निहितश्रीभवत्पदाम्बुरुहनावमननुवर्त्तमानानां समाधिनावेशितचेतसैक इत्युक्तविपरीतानां गतिं वदन्तः स्तुवन्ति-य इति। हे अरविन्दाक्ष! येऽन्ये पूर्वश्लोकद्वयप्रस्तुतेभ्योऽन्ये ये जना विमुक्ता वयमिति वृथाभिमानिनः त्वय्यस्तभावाद्भक्तिशून्यत्वाद्धेतोरविशुद्धा बुद्धिर्येषां ते तथाभूताः परं पदं वर्णाश्रमादिरूपं परं पदमुत्कृष्टं स्थानं कृच्छ्रेण प्रयासेनारुह्यापि सुकृतविशेषाद्विप्रादिरूपं श्रेष्ठं जन्म प्राप्यापीत्यर्थः। अनादृतयुष्मदङ्घ्रयः अनुपासितभगवच्चरणाः सन्तस्ततोऽधः पतन्ति पुनर्नीहीनं जन्म प्राप्नुवन्तीत्यर्थः ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तत्तत्कालप्राप्तानर्थपरिहारलक्षणपालनं चावतारलक्षणस्वरूपग्रहणेनेत्याह-बिभर्षीति। अवबोध आत्मन् ज्ञानस्वरूपे त्वय्यधिकरणे इत्यनेन शुक्रशोणितसम्बन्धं निवारयति, क्षेमाय तत्तत्कालप्राप्तविपत्परिहारलक्षणपालनाय "क्षेमो नाप्राप्तरक्षायाम्"

इति यादवः। सत्त्वोपपन्नानि बलज्ञानसमाहारयुक्तानि सतामस्माकं सुखकराणि कंसादिखलानामभद्राणि तम आद्यमङ्गलकराणि ॥ २९ ॥ सतां सुखावहानीत्येतद्विवृणोति-त्वय्येति। अखिलसत्त्वधाम्नि सदा सर्वगुणानामाधारभूते त्वयि समाधिना उपास्त्या आवेशितचेतसः तल्लिप्तचित्ताः ये पुरुषाः ते महत्कृतेन तयैवोपास्त्यायथा महद्भिस्तीर्णं भवति तथा विरचितेन प्लवेन भवाब्धिं संसारसागरं घोरं गोवत्सपदं कुर्वन्ति यथा वत्सचरणभारकृतनिम्नस्थितजलमयत्नेन तरन्ति तथेत्यन्वयः ॥ ३० ॥ नन्वस्तु गोवत्सपदोपमो भवाब्धिर्महान्त ते तमुत्तीर्य कुत्र यान्तीति तत्राह-स्वयं समुत्तीर्येति। हे द्युमन्! तेजोमूर्ते, ये अदभ्रसौहृदाः। स्वस्वयोग्यभक्तिपूर्णाः स्वयमकृत्रिमया भवत्पदाम्भोरुहनावा दुस्तरं भवार्णवं समुत्तीर्य तीर्त्वा स्थितास्तेऽत्र योग्यादिषु शिष्यादिषु उपदेशेन निधाय तां भवत्पदाम्भोरुहनावमेव याताः नान्यथाता भवन्तीति यदतो भवान् सत एवानुगृह्णातीति सदनुग्रही नामेत्यर्थः। ननु, सत्त्वोपपन्नानीत्यादौ सत्त्वगुणात्मकत्वप्रतीतेस्तीर्त्वा पुनस्तत्प्राप्तिः कथं मुक्तिः स्यात्? तस्या निर्गुणरूपत्वात्; उच्यते अत्र सत्त्वशब्देन न सत्त्वगुणविवक्षा किन्तु ज्ञानादिगुणसामग्रीप्रामाणिकत्वात् तदुक्तं "सदा सर्वगुणाढ्यत्वात्" इत्यादि त्वत्पादपोतेनेत्यनेन भगवद्भक्तस्य शिवादिपादपोतपुरुषाद्वैशिष्ट्यं ज्ञाप्यते तदुक्तम्"भगवत्पादपोतोऽसौ"इत्यादि लोके नौतार्णस्य तां विहाय देशान्तरगतिदर्शनात् कथं तामेवाश्रिता इत्युच्यत इतिचेन्न भगवत्पादनावो वैलक्षण्यादर्थवैलक्षण्यस्य सम्भवात् तदुक्तं "भगवत्पादनौका या" इत्यादि। अस्यार्थः या भगवत्पादनौका इयं अन्यनौकोपमा न भवति कुतः तया भगवत्पादनावा भवाब्धिं तीर्त्वा श्रीहरिपादनावं तां प्राप्य सुखं तिष्ठन्तीति यस्मात्तस्मादिति लोके च कर्णधारादयः तयाब्धिं तीर्त्वा तत्तीर एव तामाश्रित्य तिष्ठन्तो दृश्यन्ते इत्यतोऽविषमो दृष्टान्त इति सन्तोष्टव्यम् ॥ ३१ ॥ खलानामित्युक्तं विवृणोति-येन्ये इति। रविन्दमन्धकारः स न भवतीत्यरविन्दं प्रकाशः ज्ञानमिति यावत् "अन्धकारा रविन्दान्ध तिमिरं तम उच्यते,, इत्युत्पलमाला, ये सद्भ्योऽन्ये खलाः ते ततः परमपदात् योगारूढाः पतन्तीत्यन्वयः। पतने कारणमाह, अनादृतेति। "अत्रिरचिलधिगत्यर्थाः" इति धातोः अनुपासितभगवज्ज्ञानाः ज्ञानाभावे कारणमाह, त्वयीति। त्वय्यस्तभावात् त्वद्विषयभक्त्यभावात् अविशुद्धबुद्धयः दुष्टान्तःकरणाः दुष्टज्ञाना वा किं कृत्वा पतन्तीति तत्राह, आरुह्येति। कृच्छ्रेण महताऽऽयासेन परम्पदं भगवत्प्राप्तिनिमित्तयोगमारुह्य सन्न्यासाश्रमं प्राप्य तदनुष्ठानसामर्थ्याभावात् पतन्तीत्यर्थः। योगमवाप्य तद्भ्रंशे निमित्तमाह, विमुक्तेति। विमुक्ता वयमित्यभिमानो येषामस्तीति ताच्छीलिको णिनिः। हे विमुक्त! इति वा अभिमान एव भ्रंशे कारणमित्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

बिभर्षीति लोकदृष्टिं प्रतिधत्से प्रकटयस इत्यर्थः। अतो देवकीलक्षणनिजशक्तिद्वारा तव प्राकट्येन तत्पुत्रत्वेऽपि तादृशत्वं न व्याहतमिति भावः। न केवलं पालनार्थं किन्तु भक्तजनानां स्वानुभवानन्दावेशार्थमपि रूपं बिभर्षि येनोत्तीर्यमाणमुत्तीर्णञ्च भवाब्धिं जानन्ति तत्संसर्गेणान्येऽपि तादृशा न भवन्तीत्याहुः ॥ २९ ॥ त्वयीति। हे अम्बुजाक्ष! इति सौन्दर्यं व्यञ्जितम् अखिलसत्त्वधाम्नीति अप्राकृतसत्त्वहेतुकनिरतिशयानां न गुणा त्वं प्राकृतसत्त्वस्य खण्डत्वेन सातिशयत्वात् परिमितकार्यत्वाच्च अमलेति पाठे प्रसिद्धसत्वाख्यानेनापि तादृशत्वं व्यक्तं तादृशे त्वयि भवसमुद्रपारपरमसुखदद्वीपायमाने महत्कृतेन परमादरविषयीकृतेन त्वत्पादेनैव पोतेन आवेशितं प्रवेशितं तच्चेतः तेन भवाब्धिं गोवत्सपदं कुर्वन्ति तदानन्देन तदस्तित्वमपि न जानन्तीत्यर्थः ॥ ३० ॥ स्वमिति अत्र पूर्वत्र च पादशब्दस्य साधनलक्षणायां तद्भक्तावेव तात्पर्यं तत्र निधायेति अतः टीका च भक्तिमार्गं प्रवर्त्त्येत्यर्थः। इत्येषा भवापवर्गेत्यस्य व्याख्यायामपि स्वयम् ॥ ३१ ॥ येऽन्ये ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु प्रतिज्ञात मया सत्यं कृतमिति सत्यव्रतत्वेन यदुक्तं तदुचितमेव; किमिति मत्स्यादिसाधारण्येन कृतावतारं मां सत्यपरत्वेन ब्रह्मणोऽपि परत्वेन, सविशेषब्रह्मत्वेन, सर्वकारणकारणत्वेन च निरूपयन्तोऽतिस्तवं प्रकुरुतेत्याशङ्क्याह—बिभर्षीत्यादि। हे नाथेत्यध्याहार्यम्। हे नाथ! त्वं सत्त्वोपपन्नानि रूपाणि बिभर्षि। कीदृशानि? सतां भक्तानां सुखावहानि खलानां भद्राणीति सत्यमेव; किन्तु त्वमवबोधो ज्ञानस्वरूप आत्मा विग्रहः। तथा च वक्ष्यति—(भा॰ १०।१४।२२) "त्वय्येव नित्यसुखबोधतनावनन्ते" इत्यादि। अन्यावतारवत् सत्वमूर्त्तिरसीति न स्वयं निर्गुण एवेति सर्वकारणकारणत्वेन नायं तवातिस्तवः। यद्वा, लोकस्य मोक्षाय सत्त्वोपपन्नानि रूपाणि बिभर्षि, लोकस्यावबोधे प्रेम्णि आत्मा त्वमेवाधुनावतीर्णोऽसीति शेषः। अवबोधोऽधोज्ञानञ्च यस्मात् स तथा प्रेमरस इत्यर्थः। तदर्थमिति निमित्ते सप्तमी ॥ २९ ॥ इममर्थं प्रपञ्चयति—त्वय्यम्बुजाक्षेत्यादि बहुभिः। हे अम्बुजाक्ष! एके मुख्याः सात्वता इति यावत् त्वयि आवेशितेन तच्चेतसा भवाब्धिं गोवत्सपदं कुर्वन्ति। कीदृशे अखिलानां सत्त्वानां सत्वमूर्त्तीनामवताराणां धाम्नि आश्रये, बीजभूत इति यावत्। अतस्त्वं परात्पर एवासीति भावः ॥ ३०–३४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ननु प्रतिज्ञातं मया सत्यं कृतम्, तेन सत्यव्रतत्वादिना जात्युचितमेवास्तु तथा? अस्य विश्वस्यादिवृक्षत्वं निरूपयन्तः सर्वकारणकारणत्वेन स्तुमः। किमिति मत्स्यादिसाधारण्येन कृतावतारम्? हे नाथेत्यध्याहार्यम्। त्वं सत्वोपपन्नानि रूपाणि बिभर्षि,

तथापि लोकस्य क्षेमाय य आत्मा भवानेव, न तथा अंशभूतोऽसि न केवलं जगतः क्षेमाय, अवबोधे च, आत्मा त्वमेव अवबोधो ज्ञानं यस्मात्तस्मिन्। अवबोधे भक्तिरसे त्वमेव। अयं भावः—यथा त्वयि भक्तिरसो रस्यतामेति, यथा च लोकानां क्षेमः स्वरूपान्तरेष्वपि त्वमेव सर्वकारणकारणं सर्वेश्वरेश्वर इति ॥ २९ ॥ इममेवार्थमन्वयव्यतिरेकाभ्यां परात्परत्वेन प्रपञ्चयति-त्वयीत्यादि बहुभिः। हे अम्बुजाक्ष! अखिलसत्वधाम्नि अखिलानि सर्वे सत्वरूपावतारास्तेषां धाम्नि बीजभूते त्वयीत्यादि। यद्वा, हे अम्बुजाक्ष! अखिलानां सत्त्वानां सत्त्वावताराणां धाम्नि आश्रये ॥ ३०–३९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अन्येऽपि मत्स्यकूर्मादयो बहवस्त्वदवतारा: सन्तीत्याहुः विभर्षीति। अवबोधः चिद्घनरूपः सत्त्वोपपन्नानि शुद्धसत्त्वस्वरूपाणि खलानाम् अभद्राणि अभद्रकराणि ॥ २९ ॥ क्षेमायेत्युक्तं तदेव क्षेमं वास्तवमभिव्यञ्जयति त्वयीति। खिलं निकृष्टसत्त्वं गुणात्मकम् अखिलसत्त्वं विशुद्धसत्त्वं निर्गुणं धाम स्वरूपं यस्य तस्मिन् अमलसत्त्वेति च पाठः समाधिना पृथिव्यामवतीर्णस्य तव रूपगुणलीलादिध्यानातिशयेन त्वय्यावेशितं यच्चेतस्तेन हेतुना पाम्नेन त्वत्पादपोतेन महत्कृतेन महद्भिर्भवाब्धेः पोततुल्यीकृतेनेत्यर्थः। गोवत्सपदं कुर्वन्ति भवाब्धेरस्तित्वमपि न जानन्तीत्यर्थः ॥ ३० ॥ किञ्च त्वत्पादपाताश्रयणमात्रेणैव भवाब्धौ गोष्पदतुल्ये जाते वैष्णवा भवाब्धिमजानन्त एव पद्भ्यामेवोल्लङ्घयन्तीत्याहुः स्वयमिति। तरणसाधननिरपेक्षमेव अन्यैः सुदुस्तरमपि भीममपि समुत्तीर्य्य याताः। द्युमन्! हे सूर्य! इति त्वं येषामन्तःकरणे नोदेषि तेषामेव तमःपुञ्जरूपः संसारोऽर्णवतुल्यो भीमो दुस्तरश्च भवति प्रेमभक्त्युदयपर्वते त्वय्युदिते तु समस्ततमसि स्वयमेव नष्टे सति स्वयमेव संसारतरणं भवेदतो भवत्पदाम्भोरुहनावमत्रैव कूले निधायैव भक्तिमार्गं सम्प्रदायं प्रवर्त्त्यैव यातास्ते यथाऽन्येऽप्येवं तरेयुरित्यभिप्रायेणोत्युत्प्रेक्ष्यत इति भावः। अत्र संसारस्य सामस्त्येन नष्टत्वेपि वयं संसारिण एवेति भक्तानां मिथ्याभिमान एव गोवत्सपदाकारः संसारः यथा च गोवत्सपदमलं पावनं श्लाघनीयं च भवेत् तथैव तेषां सोभिमानोप्यन्येषां भक्तमानिनामभिमानरोगहरोऽभिज्ञजनैः श्लाघनीयश्च भवतीति भावः। यतः सत्सु वैष्णवेष्वेव अनुग्रह एतादृशो नान्येषु यस्य सः ॥ ३१ ॥ वैष्णवानामेव भवार्णवो गोष्पदीभवति ये तु तव विशुद्धसत्त्वमयवपुषि मायाभाववन्तो ज्ञानिनस्तेषां तु सुदुस्तरो भीम एव "कृच्छ्रो महानिह भवार्णवमप्लवेशः षड्वर्गनक्रमसुखेन तितीर्षयन्ति। "तत्त्वं हरेर्भगवतो भजनीयमङ्घ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम्" इति यथा सनत्कुमारेणोक्तं 'क्लेशोधिकतरस्तेषाम्" इति यथा भगवतापि "नैष्कर्म्यमप्यच्युभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्" इति यथा नारदेनापि तथैव देवा अप्याहुः ये इति। अन्ये उक्तलक्षणेभ्यस्त्वदनुगृहीतेभ्यः सद्भ्यो भिन्नाः अरविन्दाक्ष! इति त्वत्कृपावलोकमाधुर्य्याननुभविन इति भावः। विमुक्तमानिन इति त्वद्भक्ता यथा संसारोत्तीर्णा अपि संसारिमानिनस्तथैव ते संसारमध्यपतिता अपि विमुक्तमानिनस्तत्र हेतुः त्वय्यरविन्दाक्षे मधुराकारे अस्तभावात् मायाशाबल्यमननेन प्रीत्यभावात् "अवजानन्ति मां मूढा मानुषीन्तनुमाश्रितम्" इति भगवदुक्तेर्मौढ्यादविशुद्धज्ञानाः कामादिनिर्जयमूलकान्तःकरणशुद्धिमत्त्वादुत्पन्नमपि ज्ञानं न विशुद्धमित्यर्थः। तदपि कृच्छ्रेण तपःशमदमादिकृच्छ्रजनितेन विज्ञानेन परम्पदं जीवन्मुक्तत्वदशामारुह्य तेषां गुणीभूतभक्त्या युक्तत्वं ज्ञेयं तां विना परमपदारोहासम्भवात् "श्रेयःसृतिं भक्तिमुदस्य ते विभो! क्लिश्यन्ति" इत्यादेस्तां विना ज्ञानस्य मरीचिकाजलायमानत्वात् ततोऽधःपतन्ति। ननु, भक्तिसत्त्वे कथमधःपतन्ति तत्राहुः न आदृतो मायिकत्वबुद्ध्या युष्मदङ्घ्री यैस्ते अयमर्थः ज्ञानिनां ज्ञानाङ्गभूता भक्तिर्द्विविधा भक्तिं विना ज्ञानं न सिद्ध्येदिति शास्त्राज्ञयैव किञ्चिन्मात्रीक्रियमाणा भजनीयभगवद्विग्रहादिषु मायिकबुद्ध्या वा अनादरवती आदररहिता च आद्यया तेषां तपःशमदमादिमतां बहुकालेनाविद्यानिरसनीं विद्यामुत्पाद्य ब्रह्मभूतत्वदशामुत्पाद्य सहसैवान्तर्द्धीयते ते विमुक्तमानिन एवोच्यन्ते न तु वस्तुतो जीवन्मुक्ताः "भक्त्याऽहमेकया ग्राह्यः" इति भगवदुक्तेः भक्तिं विना तत्पदार्थस्यापरोक्षानुभवालाभात् भगवदपराधसम्भवाच्च दग्धानामपि कर्मणां पुनः प्ररोहादधः पतन्ति च यदुक्तं रथयात्राप्रसङ्गे श्रीविष्णुभक्तिचन्द्रोदयधृतं पुराणवचनम्—

> "नानुव्रजति यो मोहाद्व्रजन्तं जगदीश्वरम्। ज्ञानाग्निदग्धकर्माऽपि स भवेद्ब्रह्मराक्षसः" ॥ इति।

वासनाभाष्योत्थापितं परिशिष्टवचनं च "जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति कर्मभिः। यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिनः" इति द्वितीयया तु तेषां ब्रह्मभूतत्वदशामुत्पाद्य अविद्याविद्ययोरुपरामेप्यनुपरमन्त्या तत्पदार्थसाक्षात्कारमनुभाव्यमानाः जीवन्मुक्ताः सिद्धा एव स्युः यदुक्तम्—

> "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥
> भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" ॥ इति ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अत एव स्वकृतचराचरक्षेमाय साध्वसाधुजनसुखदुःखप्रदानाय च तत्रावतारा: भवन्तीत्याहुः विभर्षीति। अवबोधः ज्ञानस्वरूपः आत्मा सर्वात्मा त्वं रूपाणि पुरुषादीनि तत्तत्काले विभर्षि धत्से अत्र तु स्वयमागतोऽसीति भावः ॥ २९ ॥ त्वदवतारा: सतां

सुखावहाः यदा यदा साक्षादवतारिणस्तव पदाम्बुजं सत्तमानां सुखावहमिति किं वक्तव्यमित्याहुः त्वयीति । अखिलं देशतः कालतो वस्तुतः सम्पूर्णं यदप्राकृतं सत्त्वं तद्धाम मूर्तिर्यस्य तस्मिन् त्वयि समाधिना आवेशितचेतसोपलक्षितास्त्वत्पादपोतेनाश्रितेन एके मुख्याः सत्तमा महत् कृतेन महद्भिः गुरुभिः कृतेनोपदिष्टेन सम्प्रदायप्राप्तेनेत्यर्थः । भवाब्धिं संसारजलधिं गोवत्सपदं कुर्वन्ति अनायासेनैव संसारमवलंघ्य मोक्षसुखं प्राप्नुवन्तीत्यर्थः ।। ३० ।। तेषां कृपालुतामाहुः स्वयमिति । हे द्युमन् ! हे महाद्युतिमन् ! अदभ्रसौहृदाः अनल्पानुग्रहकर्तारस्ते भवत्पदाम्भोरुहनावम् उपासनीयं नितरां जनैः सदा ग्रहणाये ज्ञानतमोनुवृतेः सनन्दादिर्मुनिभिस्तथोक्तं "श्रीनारदायाखिलतत्त्वसाक्षिणो नान्या गतिः दारविन्दात् सन्दृश्यते ब्रह्मशिवादिवन्दिताद्रुक्केच्छयोपात्तविग्रहवन्त्यविग्रहात् ।। अचिन्त्यशक्तेरविचिन्त्यसाशयात्" इत्येवं भवत्पदाम्बुजोपासना सम्प्रदायं निधाय स्वयं भवार्णवं समुत्तीर्य याताः भवन्तं प्राप्ताः यतो भवान् सतोऽनुगृह्णातीति तथा ।।३१।। एवं भगवदनुग्रहणेन भगवदुपासकाः कृतार्था इत्युक्तम् इदानीं भगवद्बहिर्मुखास्त्वकृतार्था एवेत्याहुः—येऽन्ये इति । येऽन्योपासनेन विमुक्तमानिनः त्वदीयां दीक्षां न प्राप्नुवन्ति तेऽन्ये एवातस्त्वय्यस्तो योऽनन्यभक्तिलक्षणो भावस्तस्मात् । यद्वा कृष्णांशः कृष्णाऽन्यो न भवति कृष्णात्मकत्वात् "क्षेत्रज्ञं चापि मां विद्धि" इति श्रीमुखवचनात् ये तु जीवस्य स्वतन्त्रसत्त्वाश्रयत्वं मन्यन्ते इत्यर्थः । केनाचिदन्यशास्त्रोक्तज्ञानादिना वयं विमुक्ता इत्यभिमानवन्तोऽतस्त्वयि श्रीपुरुषोत्तमे अस्तो लुप्तो यस्तादात्म्यभावस्तस्माद्धेतोरविशुद्धबुद्धयो मलिनमतयः परं पदं मुक्तिसाधनं नृदेहं तपोऽध्ययनादिकृच्छ्रेण कष्टसाध्येन कर्मणा आरुह्य प्राप्यापि ततो परम्पदादधः पतन्ति पश्वादिषु जन्म प्राप्नुवन्ति यतो नादृतौ न सेवितौ युष्मदङ्घ्री यैस्ते ।। ३२ ।।

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

ननु त्वय्यंबुजाक्षाखिलेति श्लोके सत्त्वधाम्नीत्यनेन धाम स्वरूपमुद्दिष्टमाश्रयस्तेज एव चेत्यभिधानादीश्वरस्य प्रकृतिजसत्त्वादिगुणस्वरूपत्वमुच्यते । तदयुक्तं । हरेर्निर्गुणं निर्विकारमित्यादिप्रमाणेन प्राकृतसत्त्वादिगुणराहित्यस्योक्तत्वेन तद्विरुद्धत्वात् । तथा त्वत्पादपोतेन महत्कृतेन कुर्वंति गोवत्सपदं भवाब्धिमित्यनेन भगवत्पादस्य नौकत्वमुक्त्वा स्वयं समुत्तीर्येत्युत्तरश्लोके भगवत्पदांभोरुहनावं याता इत्यनेन हरिपादनाव एव प्राप्तिः फलत्वेनोच्यते । तदप्ययुक्तमसम्भवात् । न हि तयैव नावा नदीं तीर्त्वा नावं प्राप्नोतीति संभवतीत्याशंकापरिहाराय प्रमाणेनैव सत् श्लोकद्वयतात्पर्यार्थमाह ।। सदा सर्वगुणाढ्य वादित्यादिना । सर्वगुणाढ्यत्वादित्यनेन पूर्वश्लोकस्थसत्त्वोपपन्नानीति पदमपि व्याख्यातं । बलेत्यास्वादने । भागवतस्थात्रत्यस्य शिष्येष्वित्यर्थः । निधायेत्यस्य विवरणं संन्निधायेत्यर्थः । तदेव प्राप्नुयुर्यत इत्यनेन भगवत्पादनौकाया अन्यतो वैलक्षण्ये हेतुरुक्तः । उक्तमेवार्थं प्रमाणेन दृढयति ।। भगवत्पादनौका इति । यथा भगवत्पादनौका । इयं नौकोपमा लौकिकनौका उपमा यस्याः सा नौकोपमा तत्सदृशी नैव भवेत् । कुत इत्यतस्तत्र हेतुमाह ।। तया तीर्त्वेति । तुरवधारणे । तत्रेत्यनेन संबध्यते । फलितार्थमाह ।। अत इति । अतो लौकिकनौकायाः सकाशाद्धरिपादनौकाया अतिविलक्षणत्वादित्यर्थः । तामेव याता इत्युक्तिर्भागवते उपपद्यत इति शेषः ।। ३१ ।। ३२ ।।

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

बिभर्षीति । अत्र अव बोधेति संबोधनपक्षे संधिभंगः । प्रथमायामात्मविशेषणानुपपत्तिः । सप्तम्यमन्वयानुपपत्तिः । किंच निर्गुणस्य भगवतः सत्त्वोपपन्नत्वमपि न युज्यते । अपि च चरशब्देन सतां खलानां च ग्रहणसिद्ध्या पुनः सत्खलग्रहणात्पुनरुक्तिप्रसंगः । पूर्वं चरांतर्वर्तिखलानामपि क्षेमायेत्यनेन क्षेमकारकत्वे सिद्धे पुनरभद्राणीत्यनेनाशुभत्वकथने व्याघातश्चेति चेन्न । अभिप्रायसद्भावात् । तथाहि । रूपाणि बिभर्षीत्यनेनास्मत्सदृशजडशरीरात्मकरूपग्रहणं प्रसज्येतेत्यतोऽवबोधे ज्ञानात्मके ।। आत्मन् । आत्मनि । स्वरूपे । इयं विषयसप्तमी तृतीयार्थे । द्वितीयार्थे तृतीयार्थे पञ्चम्यर्थे च सप्तमी । चतुर्थ्यर्थे च विज्ञेया विषयेति च यां विदुरिति महाव्याकरणे । आत्मन्निति तु सप्तमी छांदसी । परमेव्योमन्नित्यादौ दृष्टत्वात् । ज्ञानात्मकस्वरूपेणेत्यर्थः ।। रूपाणि । मत्स्याद्यवतारान् ।। बिभर्षि । धत्से । यद्वा । हे आत्मन् अवबोधो ज्ञानस्वरूपस्त्वम् । अनेन कस्मिन्नप्यवतारे जडशरीरसंबंधो नास्तीति ध्वनितम् । चराचरस्य भूमिर्दमेत्यादि व्यसनं समबोचतेत्यंतेन भूलोकस्य चरत्वसिद्धेर्महाभूतात्मकत्वेनाचरत्वसिद्धेश्च । चराचरस्य लोकस्येत्यनेन भूलोको गृह्यते । तस्य मोक्षायेत्यनेनाधिकरणक्षेममेवाभ्युपेयते नाधेयक्षेमं । सत्त्वं स्वातंत्र्यमुद्दिष्टमिति भागवततात्पर्योक्तेः ।। सत्त्वोपपन्नानि । स्वातंत्र्योपेतानीत्यर्थः । इदानीमाधेयविशेषाणां क्षेमाक्षेमकरत्वमाह ।। सुखेति । सतां सुखावहानि खलानामभद्राणीति । मुहुरित्यनेन सार्वकालिकोऽयं नियमः सूच्यते इत्यतो न कश्चित्क्षुद्रशंकावकाशः ।। ३० ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्वमेक इति । अस्य प्रपञ्चस्य सतः सत्यभूतस्य स्वरूपतः प्रवाहतो वा प्रसूतिः प्रसूयत इति प्रसूतिः कारणं स्थानं स्थितिदो निधानमन्ततः प्रवेशाधिकरणं त्वमेवानुग्रहोऽनुगृह्णातीत्यनुग्रहश्च । अब्जभवभवादीनामेतत्प्रपञ्चरचनादिकर्तृतया तत्तत्सार्वोत्तम्यवादिभिर्हिरण्यगर्भः समवर्तताग्रे ब्रह्मा देवानां प्रथमः सम्बभूव । एको रुद्रो न द्वितीयाय तस्थ इत्यादिमानतोऽङ्गीकरणात्कथं माधव एवेत्यवधार्यत इदं कर्तेत्यत आह ।। य इति । ये न विपश्चितः श्रुतिपरमार्थज्ञानहीनानां । कुतस्तेषां न शेमुषीत्यत आह ।। त्वन्माययेति ।

त्वन्मायया त्वद्बन्धकशक्त्या संवृतं चेतोऽन्तःकरणं येषां ते तथा नानाविधां त्वामन्यां देवतां कर्तृत्वेनैतदादिश्रुत्यर्थतया जानते। ये च त्वन्मायया न संवृतचेतसो विपश्चितः पातनिकार्थभ्रमभ्रंशयुता नाना उत्पादत्वादिप्रकारेण त्वामेव पश्यन्त्यतस्त्वमेक एवेत्याद्युपपद्यत इति भावः। ते चास्वतन्त्रास्तच्छब्दवाच्यश्च त्वमेवेति न तदभिमतः सत्सम्मतः श्रुत्यर्थ इति भावः। अमुं श्लोकं यथावद्विवरीतुमस्य सर्गादिकृद्विष्णुः सदानन्दैकरूपक इति मानमानन्दतीर्थचरणा आदावेवोदाजह्रुरिति मन्तव्यम्। त्वन्माययाऽसंवृतचेतसो विपश्चितस्त्वामेव प्रसूतित्वादिना पश्यन्ति। नाना इतरथा न पश्यन्तीति वा ॥ २८ ॥ त्वमनुग्रह इत्युक्तानुग्रह एतद्रूप इति निरूपयति ॥ **बिभर्षीति**। हे आत्मन्स्वामिन्। त्वं चराचरस्य समस्तस्य लोकस्य क्षेमाय तदर्थमवबोधे सुखक्षेमादिसाधने ज्ञाने सति तन्निमित्तोक्त्येति यावत्। सतां सत्त्वोपपन्नानि बलज्ञानसमाहृयायुक्तानि। सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे न चापरे। अस्वातन्त्र्यात्तदन्येषां न सत्त्वमित्याद्येकादशतात्पर्योक्तेः स्वातन्त्र्योपपन्नानीति वा सुखावहानि। चराचरस्य लोकस्येत्युक्तापवादमाह। खलानां कंसादीनां मुहुरिह परत्र चेति वा पुनः पुनरुत्पत्ताविति वा। अभद्राणि दुःखतम आद्यमङ्गलदानि रूपाणि बिभर्षि तत्तदापदपनुत्यै तत्तत्समययोग्याङ्गानि धरसीति त्वमनुग्रह इत्यर्थः। यान्यभद्राणि दित्यपत्यानि तेषां खलानां मुहुः सुखम्प्रात्रहान्यप्रापकाणीति वाऽऽवृत्त्याऽन्वयः। अनेनाभद्राणि रूपाणीति शब्दतः प्राप्ताभद्रता विद्राविततेति ध्येयम् ॥ २९ ॥ त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नीति श्लोके धाम स्वरूपमुद्दिष्टमाश्रयस्तेज एव चेत्यभिधानात्सत्त्वगुणस्वरूपता विष्णोः प्रतीयते। सा च न तस्य प्राकृता मूर्तिः निर्गुणं निर्विकारमित्यादिनाऽवमानितेति नारदीयवचनेन सत्त्वशब्दार्थमाह ॥ सदेति। सर्वगुणाढ्यत्वात्तदात्मकत्वादित्यर्थः। सत्त्ववान्विशेषशक्त्या हरिरुच्यते न तु सत्त्वगुणात्मकत्वात्। तत्र तन्त्रं यतस्त्रिगुणवर्जित इति। विशेषाभावः सामान्याभावेन साध्यः। यद्वा त्रयो गुणा यस्य तदव्यक्तं प्रकृतिस्त्रिगुणपदवाच्यं तेन वर्जितः प्रकृतिसम्बन्धवैधुर्यात्प्राकृतगुणविधुर इति सत्त्ववर्जित इति वा। अनेनातीतपद्यगतं सत्त्वपदं व्याख्यातमिति वेदितव्यम् ॥ ततश्चायं श्लोकार्थः ॥ हे अम्बुजाक्षाम्बुजे कमले इवाक्षिणी यस्य तत्सम्बुद्धिः। अखिलं सत्त्वं सर्वं गुणास्त एव धाम स्वरूपं यस्य स तस्मिन्सकलगुणाढ्य इति वा समाधिनोपासनया निवेशितं चेतो येषां ते तथा ये ते भवाब्धिं संसारशरधिं त्वत्पादपोतेन त्वच्चरणतर्या महद्भिः स्वस्वापेक्षयोत्तमैस्तत्त्वेन कृतेन गोवत्सपदं कुर्वन्ति। पादपोतनिरीक्षणमात्रेण वत्सपदीभवनं भवाब्धेरिति भावः ॥ ३० ॥ पूर्वश्लोके नौकात्वं हरिचरणस्योक्तम्। न लोके नौकामधिरुह्य परम्पारमेत्य पुनर्नौकां केऽपि प्राप्नुवन्ति किञ्च तां निधाय यानं च कथमित्यतस्तत्तात्पर्यं लोकनौकावैलक्षण्यमुपपाद्याह ॥ भगवदिति। भगवत्पादपोतो भगवत्पादनौकाऽन्यपोतसमो लौकिकनौकासदृशो न बतेत्यास्वादने। शिष्येषु सन्निधायोपदेशापदेशेन निधाय तदेव तमेव पोतं यतः प्राप्नुयुस्ततो नोक्तसमः। प्रमाणान्तरमुक्तार्थ उक्त्वा तं द्रढयति ॥ भगवत्पादेति। भगवत्पादनौकाया इयं लौकिकी नौका उपमीयत इति उपमा सदृशी नैव भवेत्। येयं भगवत्पादनौका सा नौकोपमा नौकयोपमा सादृश्यं यस्याः सा तत्सदृशी नैव भवेत्। किं कृतं वैलक्षण्यमित्यत आह ॥ यद्ययतरतयेति। तुरवधारणे। तया तीर्त्वा तामेव प्राप्य तत्रैव तिष्ठन्ति ततो न सदृशीत्यर्थः। अत एतद्धेतोस्तामेव याता इति मूले उक्तिरुपपद्यत इति शेषः ॥ ततश्चायं श्लोकार्थः ॥ पूर्वमुक्तमनुग्रहमेवमित्याह ॥ स्वयमिति। हे द्युमन्ज्ञानतनो। अदभ्रसौहृदा बहुलभक्तिमन्तः सुदुस्तरमितरैर्भीमं भीष्मं भवार्णवं संसारसमुद्रमतिशोभनं त्वदैवमनुसृत्य स्वस्य स्वशब्दवाच्यस्य यद् ज्ञानं यस्मिंस्तद्यथा भवति तथेति वा। अयः शुभावहो विधिः। येति ज्ञानमित्यादेः। समुत्तीर्य। समाऽपुनरावृत्ति द्योत्यते। तीर्त्वा। अत्र शिष्यादिषु भगवत्पादाम्भोरुहनावं निधायोपदेशादिना स्थापयित्वा स्वयमपि तामेव याता अतो लौकिकनौकातोऽयं पोतो विलक्षण इति भावः। एवं भवांस्तत्तदौपसदतारकसदनुग्रहः सतोऽनुगृह्णातीति स वा सत्स्वनुग्रहो यस्येति वा सन्नुत्तमोऽनुग्रहो यस्येति वा। अत्रत इति पदमेकं वा। अतारं भगवन्तं अते गते सच्छिष्ये अत्रातो ज्ञातो येन तस्मिन्निति वा। जात्येकवचनं चेदं तदादाविति वा। तं शिष्यादिजनं। हे द्युमन्निति सम्बोध्य बोधयित्वा समयज्ञानिन् त्वमपि अभवान् भवेऽनिति चेष्टते यः स भवान् स न भवतीत्यभवान्। सदनुग्रहश्चास्मद्वद्भवेति अदभ्रसौहृदा विनेये सन्तस्तत्र विने पूर्ववदुर्वरितम्। एवमाशिषा विशेष्य शिष्यं स्वयं तामेव याता इत्यावृत्त्याऽन्वय इति वा ॥ ३१ ॥ खलानामिति प्रागभिहितं। ते च किमाकारा इत्यत ईरयति ॥ हे अरविन्दाक्ष। पद्माक्ष। अरविन्दे ज्ञानात्मके अक्षिणी यस्येति तत्सम्बुद्धिः। रविन्दोऽन्धकारः स नास्ति याभ्यां तौ रविशशिनौ अक्षिणी यस्य स तत्सम्बुद्धिरिति वा। अन्धकारो रविन्दान्धतिमिरं तम उच्यत इत्युत्पलमाला। अन्ये सत इतरे कृच्छ्रेण तपआदिश्रमेण परं पदं योगादिकमारुह्य ततः पुनरधः पतन्ति। कुत इत्यतः सपरिकरमीरयति ॥ त्वयीति। अस्तश्चासौ भावो भक्तिरनादृतयुष्मदङ्घ्रयोऽनादृतं युष्माकमङ्घ्री यैस्तैरसम्पादितयुष्मज्ज्ञाना वा। अधिप्रत्यर्थ इति ज्ञानार्थः। अस्तभावादनन्तःकरणादिति वा। आदरो भजनं भक्तिरिति गीताभाष्योक्तेरनादृतेत्यनेनैवाभक्तिपूर्वकताप्रतीतेरिति वा। अतश्चाविशुद्धबुद्धयोऽपक्वज्ञानिनः। सर्वसम्भावकमवगमयति ॥ विमुक्तमानिन इति। विमुक्तोऽत्यक्तश्चासौ मानश्चाभिमानः सोऽस्ति येषामिति ते तथा। यद्यपि बहुव्रीहिणा निर्वाहस्तथापि तेषां निन्दनीयताऽधिका वेदिता भवतीति मतुपः सार्थक्यमवधेयम्। अस्तभा अस्ता निरस्ता भा त्वद्विषयद्योतो येषां तेऽस्तभाः। तर्हि सा क्व वर्तत इत्यत आह ॥ वादविशुद्धबुद्धय इति। वेदपातनिकार्थवचने विशुद्धा बुद्धिर्येषां ते तथा। यथोक्तं गीताभाष्ये। वेदवादरता वेदैर्यन्मुखत उच्यते तत्रैव रता वादो विषयकत्वं च मुखतो वचनं स्मृतमिति वा ॥ ३२ ॥

श्रीसुबोधिनी

फलमाह **विभर्षीति**। त्वमवबोध आत्मनि रूपाणि विभर्षि। ये त्वां सेवन्ते पूर्वोक्तप्रकारेण तेषां रूपाणि ज्ञानरूप आत्मनि विभर्षि। सायुज्यं तेभ्यः प्रयच्छसि। अथवावबोध आत्मनि शुद्धात्मसिद्ध्यर्थं रूपाण्यवताररूपाणि विभर्षि येषु भक्ताश्चिद्रूपमात्मानं लभन्ते। रूपाणां ग्रहणस्यान्यदपि निमित्तमित्याह **क्षेमाय लोकस्य चराचरस्येति**। चराचरशब्देन ब्राह्मणाः क्षत्रियाश्चेति न्यायविदः। चराः प्राणिनः। अचरा भूरादयः। उभयेषामपि क्षेमाय। अनेनैहिकफलदानार्थमपि भगवदवतार इति। गुणैर्ब्रह्मादीनामपि भगवत्त्वाद् रजसा तमसाप्यवतारः सम्भवतीति तद्व्यावृत्त्यर्थमाह **सत्त्वोपपन्नानीति**। लोकानुसारीणि मत्स्यादीनि। ब्रह्ममहादेवयोरप्याधिदैविकयोरप्यवताराः सत्त्वरूपा एव। तत्र निदर्शनं **सुखावहानीति**। ये सर्वप्राणिषु सुखमावहन्ति। पक्षपातस्तोत्रत्वाद् दैत्यानामपि सुखदानि भविष्यन्तीत्याशङ्क्याह **सतामेव सुखदानि**। **खलानां त्वभद्राणि**। लक्षणपूर्वकं दैत्यानां निर्देशः **खलानामिति**। सर्वदोषनिधानं खला ये परेभ्यो दुःखदातारः। **मुहुरिति**। सर्वेषां खलानां वारंवारम्॥ २९॥

एवं लौकिकप्रकारेण चतुर्णां निरूपणमुक्त्वा स्मृतिप्रकारेण पुनश्चतुर्णां निरूपणमाह **त्वयीति** चतुर्भिः। स्मृतिषु योगो धर्मः। स च योगो बहुविध इति यो देवहितो धर्मरूपस्तं निरूपयति। हे अम्बुजाक्ष! अखिलसत्त्वधाम्नि त्वयि समाधिनावेशितचेतसः करणेन त्वत्पादपोतेन भवाब्धिं गोवत्सपदं कुर्वन्ति। योगे प्रत्यक्षो भगवान् संसारात् तारयतीति सिद्धम्। **अम्बुजाक्षेति**। दर्शनेनैव पापनाशकत्वमुक्तम्। यो योगस्तृतीयस्कन्धे निरूपितः स सर्वात्मको भगवद्विषयकः। तदाहाखिलसत्त्वधाम्नीति। अखिलानां सत्त्वानां प्राणिनां धाम स्थानम्। सर्वसत्त्वगुणनिधाने वा तादृशे भगवति। आसमन्ताद् वेशितं चित्तं यस्मिंस्तादृशेन समाधिना करणेन कृत्वा त्वत्पादः पोतो भवति। समुद्रतरणसाधनं पोतः। चरणस्य पृथ्वीरूपस्याकाशरूपस्य वाक्षररूपस्य वा पोतत्वम्। भूमिश्चेत् सर्वजनीना। आकाशं च भगवद्भावकसमाधौ भगवति विद्यमाने पादस्य पोतत्वाभावात् समाधिकल्पितस्यैव च संसारमध्यपातात् कथं पोतत्वमित्याशङ्क्याह **महत्कृतेनेति**। महद्भिः कृतेन। महान्तो हि सर्वस्यापि पदार्थस्य साध्यसाधनतामवगच्छन्ति। अतः समाधावेव भगवत्स्फूर्तौ स पादः संसारतारको भवतीत्यलौकिकसामर्थ्येन न युक्तिविरोधः शङ्कनीयः। "अयं तु परमो धर्मो यद् योगेनात्मदर्शन"मितिस्मृतेः। यथा यागादि स्वर्गसाधनं तथेदमप्यदृष्टद्वारा भविष्यतीत्याशङ्क्य तन्निराकरणार्थमपि महत्कृतेनेत्युक्तम्। पादपोतो महान् कृतः। हृदयं संसारपारं चाभिव्याप्य यथा तिष्ठति तावान् कृत इत्यर्थः। करणं समाधिरेव। **गोवत्सपदमिति**। तीर्णसंसारस्यास्थापितत्वाद् वत्सपदकरणम्। अनेन संसारे स्थिता एवं संसारं तुच्छं मन्यन्ते। अनतिगम्भीरत्वाय वत्सपदम्। समाधौ स्थितः समाधिनिर्वाहकं संसारमतितुच्छत्वेन मन्यते। सिद्धो योगः स्वयमेव सर्वमेव संसारं शोषयित्वा स्वनिर्वाहकमेव स्थापितवान्। न च ते महापुरुषा अन्येषामुद्धारमकृत्वा वत्सपदत्वमात्रे जातेपि स्वयमेव तरन्ति। अतो वत्सपदमेव कृत्वा यावदन्येषामुद्धारो भवति तावत् तूष्णीं तिष्ठन्ति। अत उक्तं वत्सपदं कुर्वन्तीति प्रमाणसमाप्तिः॥३०॥ तादृशेन प्रमाणेन यत् सिध्यति तत् प्रमेयमाह **स्वयं समुत्तीर्येति**। तीर्णस्यास्थापनेनेव वत्सपदकरणात् सम्पूर्णानुवादे सुदुस्तरं भवार्णवं भीममित्युक्तम्। मोक्षप्रतिपादकत्वात् सर्वशास्त्राणां मोक्षः सम्प्रदायश्च प्रमेयं भवति। स्वयं समुत्तीर्य भवत्पदाम्भोरुहनावमत्रैव निधाय ते याताः। सम्यगुत्तरणं दुर्घटत्वे सति वक्तव्यमिति दुर्घटत्वमाह। समुद्रो हि दुस्तरः स्वतः। तत्रापि नक्रादिभिः कृत्वा सुदुस्तरः। व्यसनमृत्युजरादिभिरलौकिककरणसामर्थ्यघातकः स्वतोपि भीमो भयानकः। द्युमन्निति सम्बोधनं चरणस्त्रिविधदोषनिवारणसमर्थ इति ज्ञापयति। यथा सूर्योन्धकारं सर्वजगत्पूर्णं जाड्यं भयं च स्वत एव निवारयति तथा त्वच्चरणप्रसादात् तेपि संसारमुत्तीर्णाः। तर्हि कथमन्येषामुद्धारः? का वान्येषामुद्धारे तेषामिति? तत्परिहारार्थमाहादभ्रसौहृदा इति। अदभ्रमच्छिद्रं सफलं सौहृदं येषामिति। अनेन पूर्वमेव कृतं सौहृदं सार्थकमेवेति तेषामवश्यमुपायकरणम्। तमुपायमाह **भवत्पदाम्भोरुहनावमिति**। तेषूत्तीर्णेषु तदनुसरणेनैव भूयान् संसारो गत इति पोतरूपोपि पादः सुखदः सर्वप्रदर्शकः। तत्कृपयानतिगम्भीरोम्भोरुहनौकारूपो जातः समुद्रश्च नदीरूपो जातस्तदाह भवत्पदाम्भोरुहनावमित्यत्रैव निधाय याताः। ननु ते महता प्रयासेन भगवन्तमाराध्य वशीकृत्य चरणमारुह्य सर्वं चरणे निवेश्य यातास्तदुपदेशिनस्तु न तद्विधा इति कथं तरणं भविष्यतीत्याशङ्क्याह **सदनुग्रहो भवानिति**। सत्स्वनुग्रहो यस्य। भवानिति। अस्मिन्नर्थे सन्मतिरुक्ता॥ ३१॥ साधनं महतामुपदेशप्रकारः। स च अर्थादुक्त इति साधननिरूपणे तदतिरिक्तसाधनान्येव निराकरोति **येन्येरविन्दाक्षेति**। अन्ये निरीश्वरसाङ्ख्यानुवर्तिनः। ते हि पूर्वज्ञानानुसारेण भगवन्तमुपासते। एवं बहुजन्मभिः प्रवृद्धं ज्ञानं विकर्मसहितं भगवदंशमात्मत्वेन स्फुरितं त्याजयित्वा निरीश्वरसाङ्ख्यं मायावादं वावलम्बन्ते। ते चेत् पूर्ववदपि तिष्ठेयुस्तथा सति कृतार्था भवेयः। तथाबुद्धिर्विकर्मफला। ते च पूर्वज्ञानेन देहेन्द्रियप्राणान्तःकरणाध्यासरहिता जाताः। महता कष्टेन सर्वस्वदक्षिणया सर्वबन्धुपरित्यागेन सर्वसुखवैमुख्येन तपसा श्रद्धया ब्रह्मात्मभावनां प्राप्तवन्तः। तदेव तेषां परं पदम्। य इति प्रसिद्धाः अन्ये भगवद्रहिता भगवद्विचारेण यान् भगवानन्यान् मन्यते न त्वात्मीयान्। अरविन्दाक्ष। कमलनयनेतिसम्बोधनेनासुरपक्षपातात् तेष्वदर्शनं सूचितम्। न हि रात्रौ कमले विकासोस्ति येन रात्रिस्थैरामोदोनुभूयेत। अतस्तेन्य एव। पूर्ववासनयात्मानं विमुक्तमेव मन्यन्त इति **विमुक्तमानिनो** न तु विमुक्ताः। ज्ञानं शास्त्रोत्थं विषयत्वेनात्मानं गृह्णाति। अतस्तस्मान्न फलम्। विषयान्तरवत् तस्याप्यभिमानजनकत्वात्। अत एव त्वयि पूर्वस्थितो भावः साधनत्वेन परिग्रहादस्तोस्तं गतो यो भावस्तस्माद्धेतोर्न विशुद्धा बुद्धिर्येषाम्। अन्यथाहङ्कारादिसर्वदोषसम्बन्धे स्वान्तःकरणे दुष्टे जाते महान्तस्ते कथं न जानीयुर्वयं दुष्टा इति। तदा तं मार्गं परित्यज्य

यत्नमपि कुर्युः । अतोविशुद्धबुद्धय एव जाताः । परमशुद्धया च स्वदोषाः स्फुरन्ति । ज्ञानस्य पूर्वावस्थैषा यत् स्वदोषस्फुरणम् । अतः कृच्छ्रेणापि परं पदं ब्रह्मभावमारुह्यानादृतयुष्मदङ्घ्रयः पतन्त्येव । जीवस्य प्रकृतेरपि परस्य प्राप्तावुद्यतौ निरालम्बने मार्गे भगवच्चरणातिरिक्तमवलम्बनं न सम्भवति । यतो वियद् विष्णुपदमेव । भगवच्चरणावलम्बनेनैव पुरुषस्योर्ध्वगमनं शृङ्खलद्वीपे सोपानारोहणे शृङ्खलापरित्यागवत् । अस्य चरणस्य ग्रहणादिक्लेशपरित्यागाभावायाहानादृतेति । आदरणमात्रेणापि न पतन्ति । आदर एव वा चरणस्थितौ हेतुः ॥ ३२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

विमर्षीत्यस्य विवृतौ–**चराचरशब्देनेत्यादि** । “यस्य ब्रह्म च क्षत्रं चोभे भवत ओदन” इतिश्रुत्यर्थनिर्णयं कुर्व“अत्ता चराचरग्रहणा” दितिसूत्रे विषयवाक्योक्त‘ब्रह्मक्षत्रे’ ‘चराचर’शब्देन व्यासोवददिति तथेति ज्ञेयम् ॥ २९ ॥ **त्वत्पादपोतेत्यत्र**—**भगवद्भावकेत्यादि** । अक्षरपक्षेनुपपत्तिरियम् । भगवतः पुरुषरूपेणाविर्भावे ह्यक्षरस्य चरणरूपत्वम् । तदा भगवतैव तरणसम्भवे तावन्मात्रस्य तथात्वमयुक्तम् । एतदेवोक्तं **भगवतीत्यादिना** । न च तेन पुरुषेणापि तत्सम्भव इत्याह **समाधिकल्पितस्य चेति** ॥ ३० ॥ **येन्येरविन्दाक्षेत्यत्र**—सम्यग्वायुसञ्चारो नाडीशुद्धौ भवतीति तदर्थमपेयपानादिकं यत् तदेव **विकर्मे**ति ज्ञेयम् । एतदुक्तं **विकर्मसहितमित्यनेन** ॥ ३२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

विमर्षीत्यत्र—अनेन क्षेमार्थावतारोक्त्या देवेषु पक्षपातो बोधितो ज्ञेयः ॥ २९ ॥ **त्वयीत्यत्र–**पृथिव्यादित्रयाणां चरणत्वेपि कथं पोतत्वमित्याकाङ्क्षायामाहुर्**भूमिश्चे**दित्यादि । भूमेर्जलोपरिष्टत्वेन पोतत्वस्य प्रसिद्धत्वात् सा पोतरूपा **सर्वजनीना** । **आकाशस्य** च विष्णुपदतायाः प्रसिद्धत्वात् ‘तत्र यदतरत् तत् तारकाणां तारकत्व’मितिश्रुत्या तत्रत्ये जल आकाशेनैव तासां तरणात् तदपि **पोतरूपं सर्वजनीनम्** । **प्रकृते च भूमौ** स्थित्वा कर्मादिसाधनकरणे “स्वर्गिणोप्येतमिच्छन्ती”तिवाक्येन **भूमेरेव** प्रयोजकत्वात् **पोतत्वम्** । आकाशस्यापि हार्दस्य ध्यानप्रयोजकत्वात् **पोतत्वं** बोध्यम् । **अक्षरपक्षेनुपपत्तिमुद्भावयन्ति भगवद्भावकेत्यादि** । तदेतट्टिप्पण्यां **विवृण्वन्त्यक्षरेत्यादि** । **तेन पुरुषरूपेणेति** । समाधिकल्पितपुरुषरूपेण । सुबोधिन्यां समाधिकल्पितस्यापि तारकत्व उपपत्तिमाहुरयं त्वित्यादि । तथा च समाधिकल्पितस्यात्मदर्शनस्य मानसधर्मत्वस्य तत्त्वमित्यर्थः । कथमदृष्टद्वारकतानिवारणमित्यत आहुः **पादेत्यादि करण समाधिरेवेति** । तथा च यस्य कस्यापि चरणस्य ध्यातस्यैव **पोतत्वमभिप्रेतम्** न तु वास्तवस्येति तस्यापि तथामाहात्म्यमित्यर्थः । **महान् कृत** इति **महत्कृतशब्दावयवस्य कृतशब्दस्य** तात्पर्यमिदम् । **इति प्रमाणसमाप्तिरिति** । भगवद्दर्शनजनकत्वेन प्रमाणपर्यवसानमित्यर्थः ॥३०॥ **स्वयमित्यत्र–सम्पूर्णानुवाद** इति अन्यं प्रति **सम्पूर्णानुवादे** । किमत्र प्रमेयं योगप्रमाणेन प्रमितं भवतीत्यत आहुर्**मोक्षेत्यादि** । **मोक्षः सम्प्रदायश्चे**ति । फलत्वेन साधनत्वेन चेतिशेषः । तथा चैतद् द्वयमिह योगजधर्मेण प्रमितं भवतीत्यतस्तथेत्यर्थः । **अलौकिककरणं च** पूर्वोक्तसमाधिरूपं बोध्यम् । ननु श्लोकद्वयेपि संसारस्य समुद्रत्वकथनात् प्रत्युतास्मिन् दुस्तरत्वाद्युक्तेरत्र चरणस्य **पोतत्वकथनमेवोचितं** तदपहाय किमिति नौत्वादिकमुच्यत इत्याकाङ्क्षायामाहुस्तेष्वित्यादि । **सर्वप्रदर्शक** इति । **कूलपरिच्छिन्नतया सर्वसंसारप्रदर्शकः** । एतस्यैव विवरणं तत्कृपयेत्यादि । एवं च **पूर्वोक्तेन स्मार्तेन** योगरूपेण **प्रमाणेन** भगवच्चरणरूपभक्तिमार्गात्मकसाधनभूतं प्रमेयं ततो भगवत्प्राप्त्यात्मकं फलरूपं च प्रमेयं प्रमितं भवतीत्यर्थः । चरणस्य **सम्प्रदायपरत्वं तु पूर्वश्लोकोक्तमहत्कृतपदादेव** सिद्धमिति न चोद्यावसरः । एतन्निदर्शनं च “भक्तियोगेन मनसि सम्यक् प्रणिहित” इति प्रथमस्कन्धोक्तव्याससमाधिसन्दर्भाज् ज्ञेयम् । **सत्स्वनुग्रहो यस्येति** । तथार्वाचीनानामतथात्वेपि तन्मूलभूतेष्वाचार्येष्वनुग्रहात् तदनुसारिणस्तारयसीत्यर्थः ॥३१॥ **येन्य इति—**नन्वस्मिञ् श्लोके बहिर्मुखनिन्दैव दृश्यते न तु किञ्चित् साधनमतः कथमस्य साधनबोधकत्वमित्याकाङ्क्षायां तद्बोधकत्वप्रकारमाहुः **साधनमित्यादि** । तथा च तदतिरिक्ते साम्प्रदायिके साधने निराकृते तत्र दृढविश्वासो भवत्यन्यथा पाक्षिकत्वं स्यादिति तदितरनिन्दाद्वारा ‘न हि निन्दा’न्यायेनात्र साधनस्यैव कथनमितिभावः । **विकर्मसहितमिति ज्ञानविशेषणम्** । तदेतट्टिप्पण्यां विवृण्वन्ति **सम्यगित्यादिना** । सुबोधिन्यां **तथाबुद्धिरिति** । निरीश्वरादिबुद्धिः । नेत्यादि । इदं **कृच्छ्रपदस्य विवरणम्** **असुरपक्षपातादिति** । अन्यपदोक्तानां तेषां तथात्वात् । **तस्मादिति** विषयत्वेनात्मज्ञानादित्यर्थः । **साधनत्वेन परिग्रहादिति** । भावनासाधनत्वेन परिग्रहात् **शृङ्खलद्वीप** इत्यादि । पुराणान्तरादौ प्रसिद्धम् । **परित्यागवदिति** । सप्तम्यर्थे वतिः ॥ ३२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

विमर्षीत्यत्र—चराचरशब्देनेति । एतदवयवभूतेनाचरशब्देनेत्यर्थः । **चरशब्देन** ‘सर्वत्र परिभ्रमन् मृत्यु’रिति तत्र व्याख्यातम् । टिप्पण्यामप्येवमेवार्थो ज्ञेयः । आधिदैविकयोरिति । चिद्धर्मो रज आनन्दधर्मस्तम एतदुभयरूपयोः । तथा च **तादृशो भगवानेवेति** भगवदवतारा एवेतिभावः । भगवदवतारेषु यत्र सत्त्वरजस्तमोभेद उच्यते तत्रैते **रजस्तमसी** ज्ञेये चन्द्रदुर्वाससं आधिभौतिकयोरवतारावित्यर्थः । दैत्यानां नैतत् फलं किन्त्वन्धन्तम इति दैत्यपक्ष**व्यतिरेको ज्ञेयः** ॥ २९ ॥ त्वयीत्यत्र—**समाधिनावेशितचेतसेति** । समाधिनेत्यस्यैव विशेषणमावेशितचेतसेति । तथा च महद्भिः पादस्य पोतत्वकरणे समावेरेव करणत्वमग्रे तथाव्युत्पाद-

नादिति ज्ञेयम् । **सर्वात्मक इति** । सर्वं आत्मा यत्र यस्मिन् योगे । सर्वोपि प्रपञ्च आत्मत्वेन भासत इत्यर्थः । **तदाहेति** । भगवतीत्यन्तस्याभासोयम् । चेतसो भगवत्यावेशकथनेन चित्तवृत्तेर्भगवति योजनमाहेत्यर्थः । **आकाशरूपस्य वेति** । वियतो विष्णुपदत्वप्रसिद्धेः । **येन्य इतिश्लोके** व्युत्पाद्यत्वादितिभावः । **सर्वजनोनेति** । सर्वानेव जनान् प्रति पोतत्वं स्यादित्यर्थः । पूर्वं भगवान् तारयतीत्युक्तं तत्र 'पादस्य पोतत्वं सम्पाद्य'तिशेषो ज्ञेयः । **इतिस्मृतेरिति** । अतो धर्मत्वाद् यागादिवददृष्टद्वारा फलसाधकत्वं भवेदित्यर्थः । **महान् कृत इति** । सदादिपदानि विहाय महत्पदकथनेन **पोतेपि महत्त्वम्** । तथा च तात्पर्यार्थोयम् । विग्रहस्य महद्भिः कृतेनेति पूर्वोक्त एव । महद्भिः कृतो महद्भिः कृतो महानेव भवतीतिभावः । आभासेष्वाहेत्याद्येकवचनं तत्र 'ब्रह्मा भवश्च'तिशेषो ज्ञेयः । **प्रमाणसमाप्तिरिति** । अत्र प्रमाणं योगो भगवत्प्रमाजनकत्वात् । तथा च वत्सपदकरण एव तत्समाप्तिः तरणं त्वनुग्रहसाध्यमत एव प्रमयेविरूपकेग्रिमश्लोके वक्ष्यत इतिभावः । दैत्यानां विमार्गपरिपोषितो निरीश्वरयोग इति तद्व्यतिरेकः ॥ ३० ॥ **स्वयमित्यत्र**—अलौकिकानां साधनानां ज्ञानादीनां करणे मोक्षादिसम्पादने यत् सामर्थ्यं चित्तमालिन्यादिसम्पादनेन तद्घातकः । संसारासक्तौ ज्ञानं कार्यक्षमं न भवत्यत एव ज्ञानिनो भीताः संसाराद् विरक्ता भवन्तीतिभावः । **तेपीति** । पूर्वश्लोकोक्तप्रकारेण कृतवत्सपदत्वा अपि सर्वांशेनोत्तीर्णाः प्रसादादेव न तु योगबलेनेत्यपिशब्दः । **अच्छिद्रं सफलमिति** । अच्छिद्रसौहृदत्वादन्येषामुद्धारः सफलसौहृदत्वादन्योद्धारापेक्षेति शङ्काद्वयपरिहारः । **द्वितीयमर्थं विवृण्वन्त्यनेनेति** । पदेनेतिशेषः । **सार्थकमिति** । सफलमित्यर्थः । **इत्यत्रैवेति** । चरणाम्भोरुहनौकारूपो जात इति हेतोरत्रैव निधायेत्यर्थः । दैत्यानां न संसारोत्तरणमिति तद्व्यतिरेकः ॥ ३१ ॥ **येन्य इत्यत्र**—भावस्यास्तत्वकथनेन पूर्वं सत्त्वमायातीत्याशयेनाहुस्ते होति । **पूर्ववदिति** । विकर्म चेन्न कुर्युरित्यर्थः । **तथाबुद्धिरिति** बहुजन्मभिः प्रवृद्धं ज्ञानमित्यर्थः । **विकर्मेति** । **महत कष्टे विकर्म फलं** यस्यास्तादृशी जातेतिशेषः । **विकर्म** सम्पादितवती तेन **विमुक्तमानिनो** जाता 'जीवा एव ब्रह्म स्वाश्रयैव मुक्ति'रितिमायावादिमतमवलम्बितवन्त इत्यर्थः । परपदारोहे **पातो**-सम्भावित इत्यत आहुस्तदेवेति । ब्रह्मत्वेनात्मभावनमेव न तु भगवदाविर्भाव **इत्येवकारः** । इदमेवाग्रे विवृण्वन्ति **ज्ञानं शास्त्रोत्थमिति** । ब्रह्मात्मभावनारूपं तत्त्वम'स्यादिवाक्योत्थमित्यर्थः । विषयविषयिभावरहितं ज्ञानं त्वात्मनि भगवदाविर्भावे भवतीतिभावः । **शृङ्खलापरित्यागवदिति** । तत्र शृङ्खलापरित्यागे सति यथा पतन्ति तथैते पतन्तीति मूलव्याख्यानान्वयः । **ग्रहणादीति** । ग्रहणादिक्लेशः शृङ्खलाया इव परित्यागश्चेद्दुभयाभावाय । अत्र क्लेशः परित्यागशङ्का च नास्तीत्यर्थः । विकर्मसहिता ज्ञानिनोस्मिन्छ्लोके उक्ता दैत्याः । स्वयं तदस्वीकारेण तत्पक्षव्यतिरेक उक्तः ॥ ३२ ॥

बुभुत्सुबोधिका

विभर्षीत्यत्र फलमाहेति लौकिकसाधनयुक्तेषु लौकिकेषु ये भक्तास्तेषां सायुज्यं फलम् । 'त्रिवर्गफलदायिन' इति बालबोधटीकायां श्रीपुरुषोत्तमैर्लिखितं वाक्यं तत्र त्रिवर्गो क्षेमः फलम्, 'क्षेमाये'ति तादर्थ्ये चतुर्थ्या क्षेमप्रयुक्तफलत्वात् त्रिवर्गस्य च । तं क्षेमफलं चाहेत्यर्थः । आनन्दाविष्टो भगवान् प्रमेयरूपः फलम् । क्षेमरूपानन्दांशः त्रिवर्गनिविष्टः फलम् । लौकिके साक्षादानन्दाभावात् । 'लौकिकं नैव मनुत' इति श्रीमदाचार्योक्तेः । अनेन क्षेमार्थमवतारोक्त्या देवेषु पक्षपातो बोधितः । न च तृतीयमार्गोक्तजन्ममरणे फले, प्रवर्तकत्वाभावात् । प्रवर्तकं फलं बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानप्रवर्तकं तस्य जन्ममरणयोरभावात् । स्वाधिकारानुसारि फलं प्रवर्तकम् । तत्र प्रथमं सायुज्यमाहुः त्वम् अवबोध इत्यादिना । 'आत्म'न्नित्यत्र ङेर्लुगित्याशयेनाहुः आत्मनीति । पूर्वोक्तेति पूर्वश्लोकोक्तप्रकारेण । तेषां सेवकानां रूपाणां ज्ञानरूपे आत्मनि भरणस्वरूपमाहुः सायुज्यमिति । तेभ्य इति ब्रह्मविष्णुशिवसेवकेभ्यो विपश्चिद्भ्यो नानात्वापश्यद्भ्यः सायुज्यं ज्ञानात्मनि भरणेन सयुजो भावं प्रयच्छतीत्यर्थः । 'सायुज्यं कृष्णदेवेन शीघ्रमेव ध्रुवं फल'मिति वाक्यात् । एवं विपश्चिद्व्यवस्थामुक्त्वा भगवन्मायासंवृतमतीनां नानात्वं पश्यतां भक्तानां व्यवस्थां वक्तुं पक्षान्तरमाहुः अथ वेति । अस्मिन पक्षे अवबोध इत्यत्र सप्तम्या अभेदसम्बन्धोर्थः । निरर्थकविशेषणविभक्त्यपेक्षया सम्बन्धार्थकत्वस्य विभक्तेर्ज्यायस्त्वात् । आत्मनीति विशेष्यविभक्तेरर्थमाहुः शुद्धात्मेति । 'निमित्तात् कर्मयोग' इति सूत्रेण सप्तमी । निमित्तमिह फलम् । कर्मणा 'योगः' संयोगसमवायान्यतरसम्बन्धः, अत्र 'आत्मनि रूपाणि विभर्षी'त्यत्र फलस्यात्मनः कर्मणा रूपैः 'योगः' संयोगः । आत्मरूपयोर्द्रव्यत्वात् । अवयवावयवित्वे समवायः । अवयवावयविनोः समवायात् । अवतारेति गुणावताररूपाण्यपि । भक्ता इति स्वस्वामिभावसम्बन्धेनावतारसेवकाः लौकिकाः । चिद्रूपमात्मानं लभन्ते, न तु सच्चिदानन्दरूपम् । लौकिकत्वात् । 'लौकिकं नैव मनुत' इतिवाक्यात् । पश्यन्ति नाना ये तेषां क्षेमफलार्थं रूपाणां भरणस्य फलान्तरमाहुरित्याहुः रूपाणां ग्रहणस्येति । अन्यदपि निमित्तमिति निमित्तान्तरं क्षेमरूपफलान्तरमिति यावत् । चराचरशब्देनेत्यादि अत्र टिप्पण्यां चराचरशब्देनेति चरान्तर्गतोचरशब्दः चराचरशब्दस्तेन । मध्यमपदलोपी समासः । द्वन्द्वगर्भितकर्मधारयस्तु न । 'चरशब्देन सर्वत्र भ्रमन् मृत्यु'रिति भाष्ये व्याख्यानात् । इति तथेति इत्येवं चराचरशब्देन ब्राह्मणाः क्षत्रियाश्चे ति न्यायविद इत्यर्थः । न्यायः सूत्रं तद्विदो व्यासादयः । सुबोधिन्यां हिरण्यगर्भाभिप्रेतचराचरशब्दार्थमाहुः चराः प्राणिन इति । इतीति पूर्वार्धार्थसमाप्तौ । इत्युक्तमिति वा । गुणैरिति भगवद्दत्तैरैश्वर्यादिभिः । सत्त्वोपपन्नानि सत्त्वेन युक्तानि न तु सात्त्विकानि सत्त्वोपाधौ 'तत्र भव' इति ठक् । लोकेति लोकस्त्रिगुणोपि श्रेयआकाङ्क्षी अतस्तदनुसारीणि । रजउपपन्नानि तमउपपन्नानि तु न भवन्ति । 'सत्त्वं रजस्तम इति प्रकृतेर्गुणा स्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ।

स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्यु'रिति प्रथमस्कन्धात्। मत्स्यादीनीति तामसपुराणोक्तान्यपि सत्त्वेनोपपन्नानि भवन्ति। वने वासात्। 'वनं तु सात्त्विको वास' इतिवाक्यात्। वनं जलमपि ब्रह्ममहेति राजसतामसयोः। आधिदैविकयोरिति चिद्धर्मो रजः, आनन्दधर्मस्तमः, एतदुभयरूपयोः। तथा च तादृशो भगवानेवेति ते नृसिंहवराहहंसा राजसाः मत्स्याश्वकच्छपास्तामसाश्च 'मत्स्याश्वकच्छपवराहे'ति श्लोके वक्ष्यमाणा भगवदवतारा एवेति भावः। भगवदवतारेषु यत्र सत्त्वरजस्तमोभेद उच्यते तत्रते रजस्तमसी ज्ञेये। चन्द्रदुर्वाससौ त्वाधिभौतिकयोरवतारावित्यर्थः। दैत्यानां नैतत् फलम्, किन्त्वन्धंतम इति दैत्यपक्षव्यतिरेको ज्ञेयः। तत्रेत्यादि सत्त्वोपपन्नत्वे निदर्शनं हेतुः। यतः सुखावहान्यतः सत्त्वोपपन्नानीत्यर्थः। पक्षपातस्तोत्रत्वादिति पक्षपातस्तोत्रत्वात् सतामेव सुखदानीत्याहेत्याहेत्यनेनान्वयः। सर्वदोषनिधानमिति सर्वदोषनिधानं वस्तु, सर्वदोषनिधानं खला इत्यादि खललक्षणप्रवेशार्थं नपुंसकनिर्देशः सामान्ये। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशात्र श्लोके उच्यत इत्याकाङ्क्षायामुच्यते, तैत्तिरीये प्रजननꣳ संधानमिति। प्रजननं कंदर्पः। 'प्रजनश्चास्मि कन्दर्प' इति गीतायाः। 'सायुज्यं तेभ्यः प्रयच्छती'ति सुबोधिन्या अक्षरात्मकजीवसायुज्ये कन्दर्पः। जीवानामक्षरात्मकत्वात् अक्षरस्य गर्भाधानयोनित्वात् कन्दर्पेण गर्भाधानमिति। माता पिता प्रजाः प्रजननमन्तरा न भवन्ति। प्रश्ने कला काचित्। छान्दोग्ये 'विद्युत् कले'ति श्रुतिः। तथा च विद्युद्रूपात्मनि बिभर्षि। 'विद्युद् ब्रह्मेत्याहु'रिति बृहदारण्यकात्। लोका अपि केचन वदन्तीति लोका 'आहु'रित्यपि श्रुतौ कर्त्राकाङ्क्षापूरणात्। ब्रह्मत्वात् फलत्वम्। अथवा लोककृतपक्षपाते चतुर्षु श्लोकेषु प्राची दिक् कला, द्यौः कला, चक्षुः कला विद्युत् कलाः निरूप्यन्ते प्रमाणादिरूपाः। तत्र 'प्राची दिक् कले'ति श्रुतिर्वा 'सत्यव्रत' श्लोके प्रमाणम्। लौकिकपक्षपाते प्रमाकरणं प्रमाणम्, न त्वनधिगतार्थगन्तृत्वम्। तस्य वेदकृतपक्षपातमात्रविषयत्वात्। तदत्र प्राची दिक् देवतेन्द्रः भगवत्कृतिरूपः, तस्य प्रमाणत्वं तृतीयस्कन्धे द्वाविंशेध्याये 'यतोभवद् विश्व'मित्यत्र 'सर्वथादरणीयो यः स प्रमाण'मित्युच्यते। 'तत्सम्बन्धात् कृतिस्तस्य प्रमाणं वाक्यमेव चे'ति कारिकायां कृतेः प्रमाणत्वोक्तेरुक्तम्। तदित्थम्। विश्वकर्तुर्भगवतः प्रमाणत्वे तत्कृतेरपि प्रमाणत्वं प्रमाणान्तःपातात्, प्रमा उत्पत्तिः प्रथमक्षणनिरूपा. तस्याः करणं कृतिर्भगवन्निष्ठेतीन्द्रः प्रमाणम्। भगवान् विश्वमुत्पादयतीत्यत्र 'यतोभवद् विश्व'मित्यत्र तु न। अधिष्ठानकारणत्वात्। 'सत्यव्रत'मित्यत्र 'सत्येन सुवर्गाल्लोकान्न च्यवन्ते कदाचने'तिश्रुतौ स्वर्गस्थेन्द्रस्य सुवर्गपदेन स्मारणात्। 'एकायनोसा'वित्यत्र 'द्यौः कले'तिश्रुतिर्वा,द्योर्विश्वान्तर्गतत्वाद् विश्वमुत्पादयतीत्यत्र प्रमाविषयत्वेन प्रमेयत्वम्। 'त्वमेक एवास्ये'त्यत्र 'चक्षुः (प्राण) कले'तिश्रुतिर्वा। 'पश्यन्ति नाने'ति मूलोक्तेः। प्राणरूपेण त्वद्दर्शनम्। कृपाविष्टो भगवान् 'पश्यन्ती'ति ज्ञानविषयत्वेनोक्तः साधनं, ज्ञानविषयस्य फलानुकूलस्य साधनत्वात्। 'बिभर्षी'त्यत्र श्रुत्यादिकं स्पष्टम्॥ २९॥

त्वय्यम्बुजाक्षेत्यत्र निरूपणमिति परपक्षनिराकरणपूर्वकस्वपक्षस्थापनं निरूपणम्, तच्चतुर्णां प्रमाणादीनां भगवत्त्वनिरूपणेस्येवाचार्याणां सर्वत्र भगवत्स्फूर्तेरावश्यकत्वात्। 'सर्वभूतेषु मन्मति'रितिवाक्यात्। विगाढभावेन सर्वत्र भगवत्स्फूर्तिः सर्वात्मभावादिति वा। निरूपणमिति पूर्ववत्। स्मृतिष्विति कपिलोक्तासु तृतीयस्कन्धे। कपिलोक्तसाङ्ख्यप्रवचनसूत्रवृत्तिरपि न, भगवन्मार्गोपयोगाभावात्। योगो धर्म इति 'अयं हि परमो धर्मो यद् योगेनात्मदर्शन'मिति स्मृतेः आत्मदर्शनं परमो धर्मः,योगो धर्म इति। 'तस्माद् योगी भवार्जुने'ति गीतायां योगस्य चोदनाविषयत्वात्। बहुविध इति 'भक्तिलक्षणो योगः। उपनिषदि षडङ्गः। योगस्मृतावष्टाङ्गः' इत्येवं बालबोधे। सुबोधिन्यां तु 'योग आध्यात्मिकः पुंसा'मित्यत्र तृतीयस्कन्धे 'योगो बहुविधः। भगवत्साक्षात्कारे य उपयुज्यते स आधिदैविकः, आत्मसाक्षात्कारे आध्यात्मिकः आधिभौतिकस्त्रिविधः। अणिमादिसाधकः शरीरसाधकः, प्राणसाधकश्च आद्यस्तु शास्त्रान्तरज्ञम्, द्वितीयोत्र मुख्य'इति कठिनत्वात् पदसम्बन्धमाहुः हे अम्बुजाक्षेति। आवेशितचेतसेति समाधिविशेषणम्। आ समन्तात् वेशितं चित्तं यस्मिन् तादृशेन समाधिनेत्येवमग्रे महद्भिः पादस्य पोतत्वकरणे समाधेरेव करणत्वस्य व्युत्पादनात्। प्रमाणत्वं चेतस एव, आवेशितचेतस्त्वेन रूपेण समाध्युपस्थितेः। घटः पृथ्वीत्यत्र पृथ्वीत्वेन घटोपस्थितिवत्। समाधेस्तु'त्वत्पादपोतेने'त्यत्र कारणत्वमित्याशयेन समाधेरधिकरणत्वमाहुः योग इति। समाधौ। प्रत्यक्ष इति चेतसेति ज्ञेयम्। 'एषोणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेशे'ति श्रुतेः। लोके योगमातिष्ठति स पर इत्युच्यत इति लोकवेदात्मिकस्मृतिकृतपक्षपात उक्तः, 'तं यथा यथोपासते तद्धैनं भूत्वावती'ति बृहदारण्यकात्। योगे समाधौ भगवत्प्रत्यक्षं प्रति चेतसः प्रमाणत्वं प्रमाकरणत्वरूपं लौकिकं, अनधिगतार्थगन्तृत्वरूपं वैदिकम्। संसारादिति अहन्ताममतात्मकात्। 'व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिः'। 'सन्निपातस्त्वहमिति ममेत्युद्धव या मति'रितिवाक्याभ्याम्। सिद्धमिति श्लोकेन सिद्धम्। पदकृत्यमाहुः अम्बुजाक्षेतीति। पापं तापकमज्ञानात्। 'एतꣳह वाव न तपती'तिश्रुतेः तादृशं पापं दर्शनेन ज्ञानेन नश्यति। अम्बुजवदिति विशेषणेन तापकाज्ञाननाशकत्वमुक्तम्। पापं लोके वेदे च नाश्यम्। लोकेऽनुत्कृष्टत्वावेदकम्। वेदे भगवत्प्रत्यक्षं प्रतिबन्धकम्। 'योगेन च दहेदंह' इतिवाक्यात्। श्रीभागवतस्य वेदवेदान्तसारत्वादन्यद् विहाय तदीययोगमाहुः यो योगस्तृतीयस्कन्ध इति। सर्वात्मक इति सर्वं आत्मा यत्र। यस्मिन् योगे सर्वः प्रपञ्च आत्मत्वेन भासत इत्यर्थः। भगवद्विषयक इति चित्तवृत्तेरन्यतो निरोधेन भगवति स्थापनरूप इत्यर्थः। तदाहेति भगवतीत्यन्तस्याभासोयम्। चेतसो भगवत्यावेशकथनेन चित्तवृत्तेर्भगवति योजनमाहेत्यर्थः। उक्तस्थानमक्षरं 'कृष्णस्तु भगवान् स्वयं'मि'त्यखिलसत्त्वधाम्नी' तिपदेन कृष्णस्तुतिर्नेत्यरुच्या पक्षान्तरमाहुः सर्वसत्त्वगुणेति। 'विशुद्धसत्त्वं वसुदेवशब्दितं' सत्त्वं विष्णूपाधिः। सत्त्वं मायिकम्। विशुद्धसत्त्वं सङ्क्रमणार्थं तस्य स्थानम्। विष्णूपाधिसत्त्वस्य स्थानं तद्गुणैर्वागगोचरस्य स्वस्य

ज्ञापनार्थम् । 'विष्णुराविरासी' दित्यत्र यथा । मायिकसत्त्वस्य स्थानं साहित्यार्थम् । 'पुरुषोत्तमस्तु नन्दगृह एव मायया सह जात' इत्यत्र यथा । करणेनेति चेतो भगवत्प्रत्यक्षे करणं समाधिस्तु त्वत्पादस्य पोतत्वे करणमिति विवेकः । यस्मिन्निति समाधौ । कृत्वेति पूर्वमीमांसकसरण्योक्तम् । उपपादयन्ति स्म समुद्रेति । संसारः समुद्रः । संसारे तत् समवायि मायिकान्तरालिकसृष्टिजलं तद्दृष्टिः कर्तव्या । तस्य तरणसाधनमित्यर्थः । पृथ्वीरूपस्येति व्याहृतित्वगुणोपसंहारे समाधौ भावितस्य पादः पृथ्व्या रूप्यते व्यवह्रियत इति पृथ्वीरूपः तस्येत्यर्थः । आकाशेति वियतो विष्णुपदत्वप्रसिद्धे'र्येन्य' इति श्लोके व्युत्पाद्यत्वादितिभावः । अक्षररूपस्येति । पुरुषाकृतित्वे पादत्वमक्षरस्य निबन्ध उक्तम् । पृथिव्यादित्रयाणां चरणत्वेपि कथं पोतत्वमित्याकाङ्क्षायामाहुः भूमिश्चे'त्यादि । सर्वजनीनेति सर्वजनेषु विदितत्वात् भूमेः सर्वान् जनान् प्रति पोतत्वं स्यान् न तु समाधिकृतः प्रत्येवेत्यर्थः । पूर्वं भगवांस्तारयतीत्युक्तम् । तत्र पादस्य पोतत्वं सम्पाद्येति शेषो ज्ञेयः । आकाशं चेति सर्वजनीनमिति सर्वान् जनान् प्रति पोतं स्यान् न तु समाधिकृतः प्रत्येवेत्यर्थः । भगवद्भावकेत्यादि अत्र टिप्पण्यां भगवतैवेति प्रमेयबलेनेति भगवतः पोतत्वं, एवकारेण चरणस्य पोतत्वयोगो व्यवच्छिद्यते । तावन्मात्रस्येति पादमात्रस्येत्यर्थः । तथात्वं पोतत्वम् । एतेन पादस्य पोतत्वाभावादिति सुबोधिनी विवृता । तेन पुरुषरूपेणेति समाधिकल्पितपुरुषरूपेणेत्यर्थः । तत्सम्भव इति पोतत्वसम्भवोऽक्षरपादस्य । सुबोधिन्याम् । संसारेति तथा च संसारवत् संसरणसाधकत्वेन तरणसाधनपोतत्वं कथमितिप्रश्नः । न युक्तीति यथा स्वाप्निकपदार्थस्य मायाकल्पितत्वेपि न भगवदाज्ञादेर्मायाकल्पितत्वं तद्वन् न युक्तिविरोध इत्यर्थः । समाधिकल्पितस्यापि तारकत्वे उपपत्तिमाहुः अयं त्वित्यादि । तथा च समाधिकल्पितस्यापि दर्शनस्य मानसधर्मत्वात् पोतत्वम् । अकल्पितेपि रूप इयं स्मृतिरत्र मुख्या । अदृष्टद्वारेति पूर्वमीमांसका वदन्ति । आशङ्क्येति पूर्वमीमांसकाशङ्कां कृत्वा । महत्कृतेनेत्युक्तमिति महान्तो हि यथा यागादीनामेव स्वर्गोत्पत्तिपर्यन्त सतां सूक्ष्मरूपेण स्वीकुर्वन्ति पूर्वमीमांसकव्यतिरिक्ताः तथा योगेनात्मदर्शनस्य त्रिक्षणावस्थायित्वमनङ्गीकृत्य संसारतरणपर्यन्तं साधनत्वमङ्गीकुर्वन्तीति महत्कृतेन त्वत्पादपोतेनेत्युक्तमित्यर्थः।महान् कृत इति 'महत्कृत'शब्दावयवस्य 'कृत'शब्दस्य तात्पर्यमिदम् ।यद्वा 'महद्' यथा भवति तथा 'कृतेने'ति 'महत्' क्रियाविशेषणम् । एतदेवाहुः हृदयमित्यादिना । संसारपारमिति सेव्यसेवकभावसंसारम् । निरीश्वरसाङ्ख्यमनीश्वरसाङ्ख्य च योगोप्येवम् । निरीश्वरयोः सांख्ययोगयोः । 'यश्चास्मिन् पुरुषे यश्चासावादित्ये स एक' इतिश्रुतेरादित्यसेव्यसेवकभावः । सेश्वरयोस्तु आत्मनः सेव्यसेवकभावः । तीर्णसंसारस्येति साङ्ख्ययोगयोरपि 'सेवातपःसमाधिप्रणिधानानि क्रियायोग' इति तत्सूत्रात् । सूत्रे 'प्रणिधानं' यत्नः । तुच्छं मन्यन्त इति एतेन गोवत्सपदं कृत्वा तरन्तीत्यर्थः । अनतीति गोपदं कुर्वन्तीति नोक्तमिति भावः । अनतिगम्भीरेर्थे तात्पर्यवृत्तिः वत्सपदस्य । शोषयित्वेति संसारस्यानुपादानकत्वान् नान्वयानुपपत्तिः । तूष्णीं तिष्ठन्तीति उत्तरश्लोके 'ऽदभ्रसौहृदा' इत्यस्य व्याख्याने स्पष्टम् । कुर्वन्तीति न तु वत्सपदं कृत्वा तरन्ति तारयन्तीति पर्यन्तं श्लोक उक्तम् । 'गोवत्सपद'मित्यस्यायमभिधेयोर्थः । गावः किरणाः तेषां मुख्यः वत्सपदेनोच्यते, चतुर्थस्कन्धे मनुप्रसङ्गे तथा दर्शनात् । सूर्य एव तस्य पदं पदनीयं तावन्मात्रं संसारं कुर्वन्तीति । अत एवाग्रे'द्युमदि'ति सम्बोधनम् । तथा चारण्यकश्रुतिः 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् । एतैः सर्वैरादित्यमण्डलमेव विधास्यत' इति । प्रमाणसमाप्तिरिति समाधिविशेषणावेशितचेतोरूपे भगवत्प्रत्यक्षजनकत्वेन प्रमाणस्य समाप्तिः पर्यवसानमित्यर्थः । त्वत्पादपोतत्वकरणे समाधिः करणमिति स प्रमाणम् । पोतत्वोत्पत्तिः प्रथमक्षणरूपा । तथा च पोतत्वकरणे एव तत्समाप्तिः । तरणं त्वनुग्रहसाध्यमत एवाग्रिमश्लोके वक्ष्यत इति भावः । दैत्यानां विमार्गपरिपोषितो निरीश्वरयोग इति तद्व्यतिरेकः पक्षपातस्तुतौ । अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु षोडशकलासु च कः कोंशात्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते । तैत्तिरीये चतुष्कद्वयं स्मार्तकृतपक्षपात उक्तम् । तत्र पृथिवी पूर्वरूपम् । आदित्य उत्तररूपं चात्र । पूर्वस्या'ध्याधिलोक'मित्युपक्रम्य पाठात् । द्वितीयस्या'ध्याधिज्यौतिष'मित्युपक्रम्य पाठाल्लोकवेदात्मकत्वं स्मृतेरिति । चरणस्य पृथ्वीरूपस्य समाधौ ध्यातरूपावयवत्वेन तत्प्रामाण्यात् प्रामाण्यम् । आदित्यस्य गोवत्सपदानभिधेयार्थ उक्तेः कालत्वेन चेष्टारूपस्य प्रामाण्यम् । 'तत्सम्बन्धात् कृतिस्तस्ये'ति कारिकायाः । प्रश्ने विशेषाभावः । छान्दोग्ये दक्षिणा दिक् कलात्र । तस्याः स्वामी यमः तस्य प्रामाण्यं 'यो यच्छ्रद्धः स एव स' इतिवाक्यान् भगवत्त्वेन प्रामाण्यम् ॥ ३० ॥

स्वयं समुत्तीर्येत्यत्र तादृशेनेति समाधिविशेषणचेतोरूपेणेत्यर्थः । प्रमेयमिति योगे प्रत्यक्षो भगवान् संसारात् तारयतीति सिद्धमिति पूर्वश्लोकसुबोधिन्यां प्रमा भगवद्विषयिणी तारकत्वप्रकारिका, संसारात् तारयतीत्यत्र योगिनः संसारात् तरन्ति तान् भगवान् संसारात् तारयतीति विग्रहात् तर्द्विषयिणी च । अतः प्रमेयं तारकत्वप्रकारको भगवान्, पादनौकारूपः प्रमेयम् । मोक्षसम्प्रदायरूपः । तत्रादभ्रसौहृदरूपं च । प्रमाविषयस्य प्रमेयत्वात् । तदत्र 'सदनुग्रहो भवा'नित्यनेन तारकत्वविशिष्टो भगवान् । अन्यग्रन्थेन तर्द् । सुदुस्तरवत्सपदकरणपदयोर्विरोधं परिहरन्ति स्म तीर्णस्येति । सम्पूर्णस्येति अन्यं प्रति सम्पूर्णस्य सुदुस्तरभवार्णवस्यानुवादे । किमत्र श्लोके प्रमेयं योगविशेषणचेतःप्रमाणेन प्रमितं भवतीत्यत आहुः मोक्षेत्यादि । मोक्षः सम्प्रदायश्चेति 'स्वयं समुत्तीर्ये'ति मोक्षः । 'भवत्पदाम्भोरुहनावमत्र ते निधाय याता' इति सम्प्रदायो भक्तिमार्गरूपः । फलत्वेन साधनत्वेन चेति शेषः । तथा चैतद् द्वयमिह योगजधर्मेण प्रमितं भवतीत्यतस्तथेत्यर्थः । सर्वशास्त्राणां शब्दरूपत्वात् मोक्षः सम्प्रदायश्च शाब्दीप्रमाविषयौ भवत इति प्रमेये । कृत्वेति प्राचां शैली । भवार्णवे नक्रादीनाहुः व्यसनेति । व्यसनं दुःखम् । अलौकिकेति समाधिकरणसामर्थ्यघातकः । द्युमन्निति द्युमत् चक्षुस्तदधिष्ठाता सूर्यो वा, तद्वान् द्युमान्, तत्सम्बोधने द्युमन् । द्युमान् सूर्यो वा । 'कृष्णद्युमणि-

निम्लोच' इतिवाक्यात्। योगरूढः शब्दः। चरणस्त्रिविधेति चरणस्त्रिषु आकाशरूपो द्युमतः पूर्वोक्तः। 'कृष्णद्युमणी'तिवाक्योक्तसूर्यरूपोपसंहारप्रयोजकमाहुः त्रिविधेति युगलगीते भक्तेष्वाविश्य भक्तान्धकारं निवारयति। उद्धवाय ज्ञानोपदेशेन जगत्पूर्णजाड्यं, भक्तानां भयं च, 'मा भैष्टेत्यभयाराव'मितिवाक्यात्। समर्थ इति 'आकाशशरीरं ब्रह्मे'तिश्रुतेराकाशस्य शरीरत्वात् सामर्थ्यम्। निवारयतीति अनुभवाज् ज्ञेयम्। तेपीति पूर्वश्लोकोक्तप्रकारेण कृतगोवत्सपदत्वा अपि सर्वांशेनोत्तीर्णाः प्रसादादेव। कपिलादिस्मृतिषु सेश्वरस्मार्तीत् तत्कृतपक्षपातात्। न तु योगबलमात्रेणैव तरन्तीत्यपिशब्दः। अन्येषामिति योगारुरुक्षूणाम्। तेषामिति आरूढयोगानाम्। अच्छिद्रं सफलमिति अच्छिद्रसौहृदत्वादन्येषामुद्धारः सुखेन, सफलसौहृदत्वादन्योद्धारापेक्षेति भावः। आभासोक्तशङ्काद्वयपरिहार इति। छिद्रं जीवप्रत्ययजनकं तद्दर्शकं सौहृदं येषां ते'ऽदभ्रसौहृदाः'। आकाशकार्यच्छिद्रे गते जीवमात्रमुद्धृतं मुक्तमित्यर्थः। 'छिद्रा व्योम्नीव चेतना' इति सिद्धान्तमुक्तावल्यामाचार्योक्तेः। यद्वा, उपाधिमात्रे गते जीवमात्रमुद्धृतमित्यर्थः। द्वितीयमर्थं विवृण्वन्ति स्म अनेनेति। 'अदभ्र'पदेन। पूर्वमेव कृतमिति 'अदभ्र'पदार्थः सफलं, तादृशं फलं द्विविधं, दुःखाभावः सुखं च, तत्र पूर्वं दुःखाभावार्थमेव कृतं सौहृदं सार्थकं सुखरूपफलेन सफलम्। जीवानन्दाविर्भावसहितमित्यर्थः। सौहृदस्यानन्दजनकत्वादेवकारः। सौहृदेन कृपालूनामन्येषामुद्धारे तेषामपेक्षेतिभावः। तथा च पूर्वं पूर्वश्लोके 'महत्कृतं' महद्भिः कृतं पादपोतत्वप्रयुक्तं सौहृदमर्थः। तेषामित्यादि आरूढयोगानां स्वार्थमन्येषामर्थे च। तमिति सौहृदरूपम्। ननु श्लोकद्वयेपि संसारस्य समुद्रत्वकथनात् प्रत्युतास्मिन् दुस्तरत्वायुक्तेत्र चरणस्य पोतत्वकथनमेव युक्तं, तदपहाय किमिति नौत्वादिकमुच्यत इत्याकाङ्क्षायामाहुः तेष्वित्यादि। तेष्विति योगारूढेषु। गत इत्यन्येषाम्। पोतरूप इति पूर्वश्लोकोक्तः पादः आकाशरूपः। सुखदो भगवदीयत्वात्। सर्वप्रदर्शक इति 'बहिरन्तश्चैव च' इतिवाक्या'दाकाशो ह वै नामरूपयोर्निर्वहिते'ति छान्दोग्याच्च कूपजलपरिच्छिन्नतया सर्वसंसारप्रदर्शकः। 'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्त' इति श्रुतेः। तत्कृपयेति अत्र लोकवेदात्मकत्वमनुसन्धेयम्। अम्भोरुहस्य पादस्य समाधिकल्पितस्य लौकिकत्वम्, वैदिकत्वं समाधिकल्पितस्यात्मनारायणस्य। वेदे त्वात्मनारायण इति। गम्भीरत्वं नारायणपादस्यारूपस्य वागगोचरत्वं जलनौकास्तम्भनसाधनलोहशृङ्खलानौकाचालनसाधनदीर्घवंशाद्यगम्यत्वं तत्तत्कृपया तद् गच्छति, न तु भक्तया, समाधौ दार्ष्टान्तिकमानसीसेवाया आभासात्। 'ता नाविदन् मय्यनुषङ्गबद्धधिय' इतिवाक्यात्। इदं महत्त्व उपयोक्ष्यते। मानस्याः सेवाया आभासेन तद्द्वारा भगवत्सम्बन्धात्। महत्त्वं भगवत्सम्बन्धात्। अतस्तत्कृपायाः करणत्वम्। महत्कृपयेत्यर्थः। अनतिगम्भीरं क्रियाविशेषणं समुद्रश्चेत्यादिनान्वेति। महत्कृपया वेदज्ञानेऽप्यात्मनारायणत्वेन सत्यज्ञानानन्तत्वेन च वेदवेदान्तसारे श्रीभागवते ज्ञानात् अनतीति। कल्पितपादस्य संसारसमुद्रस्य च मायिकत्वात्। तत्र व्यसनमृत्युजरादिसत्त्वात् गम्भीरं यथा भवति तथा इति समुद्रश्चेत्यनेनाग्रेन्वयः। अम्भोरुहनौकारूपः पादपोतो जातः। आकाशस्य वृद्धिह्रासभाक्त्व वृद्धिह्रासमूत्रे सिद्धम्। अम्भोरुहपदोक्तेनाब्धिसम्बन्धाभावादाहुः समुद्रश्चेति। 'भवः' सेवोपयोगी नदी वेदे यमुना तद्रूपो जातः यमुनायाः सेवोपयोगिनीत्वात्। लोके सिन्धुनदीरूपो जातः। संसारस्य कियतो मायायां स्वकारणे लयात् कारणमाया समुद्रः मार्कण्डेयं प्रतीवोर्वरितः। इत्यत्रैवेति चरणाम्भोरुहनौकारूपो जात इति हेतोः सर्वनिवेशरूपादत्रैव निधायेत्यर्थः। दैत्यानां न संसारोत्तरणमिति दैत्यपक्षाद् व्यतिरेकोत्र। त इति पोतारूढाः। वशीकृत्येति योगे समाधौ मानससेवाप्रवेशात् तथा। आरुह्येति मनोद्वारा स्वजीवं समाधिकल्पिते एकीकृत्य। व्यापकेऽणारारोहणम्। पोतस्य नौकारूपत्वेन महत्त्वप्रयोजनमाहुः सर्वमिति। योगसाधनमपि। सत्यव्रत इव। तदुपदेशिन इति स योगारूढकृत उपदेशो येषामस्ति ते तदुपदेशिनः योगारुरुक्षवः। तद्विधाः योगारूढविधाः। सत्सु अनुग्रहो यस्येति तथा चार्वाचीनानामतथात्वेपि तन्मूलभूताचार्येष्वनुग्रहात् तदनुसारिणस्तारयसीति भावः। 'सदनुग्रह' इत्यन्तवाक्ये विभक्त्युत्पत्तौ 'अस्ती'ति क्रियावश्यकत्वे तत्कर्ता 'भवा'नित्यनुक्तसिद्धे पुन'र्भवा' नित्युक्तेस्तात्पर्यमाहुः भवानित्यस्मिन्निति। सम्मतिरिति स्वसत्यवाक्यादेव सदनुग्रहायाजोपि जात इति सदनुग्रहपोषणम्। नलकूबरमणिग्रीवोद्धारेयं धर्मः स्फुटिष्यति। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये द्यौरुत्तररूपम्, आपः सन्धिश्चात्र। समाधेर्ब्रह्माण्डद्योरूपशिरसि जायमानत्वात्। पूर्वस्या'थाधिलोक'मित्युपक्रम्य पाठात्। द्वितीयस्या'थाधिज्यौतिष'मित्युपक्रम्य पाठाल्लोकवेदात्मकत्वं स्फुतेरिति। समाधौ ध्यातेन पृथ्वीरूपप्रमाणेन द्योरपि प्रत्यक्षविषयत्वात् प्रमेयत्वम्। पृथ्वीरूपप्रमाणाश्रयत्वाद् द्योः शिरोरूपाया योगिनाम्। आदित्यरूपकृतिः तद्रूपप्रमाणविषयत्वमपां भवाब्धिरूपाणाम्। कार्यत्वात्। अपां पुष्पस्यादित्यस्य प्रमाणत्वं तत्कार्यस्य पोतापां निर्मोकविषयाणां प्रमायाः करणत्वरूपम्। प्रश्ने न विशेषः। छान्दोग्ये समुद्रः कला। यमरूपप्रमाणेन समुद्रस्याधिष्ठानस्य प्रमायाः सत्त्वात्। प्रमाकरणस्य चक्षुरादेर्यमेन स्वस्वविषयग्रहणे प्रेरणात्। 'समुद्रं मनसा ध्याये'दितिश्रुतेः वैदिकं प्रमेयं यमुनारूपं च। लोके च सिन्धुनदीरूपम्। ॥ ३१ ॥

येन्य इत्यत्र कृपाविष्टः साधनं भगवान्, अतस्तद्व्यतिरिक्तसाधनलक्षणमाहुः साधनमिति। उपदेशक इति 'चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये मंत्रमात्रप्रकथनमुपदेशः स कथ्यत' इति रामार्चनचन्द्रिकायां रुद्रयामिलवचनमुपदेशलक्षणम्। वैदिकोपदेशे 'तत्त्वमसी'त्यादौ लौकिकनामादिप्रवेशात् अज्ञातेर्थे इवार्थे वा कप्रत्ययः। तूष्णीमुपदेशो न फलायेति प्रकारपर्यन्तानुधावनम्। प्रकारः प्रकर्षेण करणं कृतिः। उपदेशकविषयिणी कृतिः फलाय भवति। एतेन नन्वस्मिन् श्लोके बहिर्मुखनिन्दैव दृश्यते, न तु

किञ्चित् साधनम् , अतः कथं साधनबाधकत्वमिति शङ्का परास्ता । तथा च तदति रिक्तेऽसम्प्रदायिके साधने निराकृते तत्र दृढविश्वासो भवति, अन्यथा पाक्षिकत्वं स्यादिति असम्प्रदायिकसाधननिन्दाद्वारा न हि निन्दान्यायेनात्र साधनस्यैव कथनमिति भावः । स चेत्यादि न हि निन्दा निन्द्यान् निन्दितुं प्रवृत्तापि तु विधेयं स्तोतुमितिन्याये निन्द्यानि तदतिरिक्तसाधनानि । विधेयं उपदेशकस्य प्रकारः स अर्थात् आक्षेपात् अर्थापत्त्या व्यञ्जनयोक्तो'ऽनादृतयुष्मदङ्घ्रय' इति पदस्य । युष्मदङ्घ्रयो यैरादृताः पादसेवनेन ते न पतन्तीति । अर्थापत्तिस्तु प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्यार्थान्तरं विनानुपपद्यमानस्योपपत्तयेऽर्थान्तरकल्पना । अत्र शब्देन प्रमितोर्थः पतनम् । अर्थान्तरं अपतनम् । अनुपपद्यमानं अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वात् । अपतनाभावः पतनमिति प्रतियोग्यपतनम् । अर्थान्तरकल्पना अपतनकल्पनेत्यत्र ज्ञेयम् । तदतिरिक्तेति उपदेशकप्रकारातिरिक्तसाधनानि । भावस्यास्तत्वकथनेन पूर्वं भावस्य सत्त्वमायाति । 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति बृहदारण्यकादित्याशयेनाहुः ते हीति । भगवन्तमिति तथा च कापिलसाङ्ख्यप्रवचनसूत्रवृत्तिः 'क्लेशकर्मविपाकाशयैरपमृष्टः पुरुषविशेष ईश्वर' इति । एवमिति भगवदुपासनेन । ज्ञानप्रवृद्धावुपासनस्य कारणत्वं प्रसिद्धम् । विकर्मसहितमिति ज्ञानविशेषणमिदम् । अत्र टिप्पणी स्पष्टा । सुबोधिन्याम् । भगवदंशमिति भगवतोसङ्गपुरुषस्यांशं उपाधिभेदभिन्नं, 'उपाधिभेदेप्येकस्य नानायोग आकाशस्येव घटादिभि'रिति, 'उपाधिर्भिद्यते, न तद्वा'निति सूत्राभ्याम् । पूर्ववदपीति विकर्म चेन्न कुर्युः । तथाबुद्धिरिति साङ्ख्यमायावादयोरुत्कृष्टत्वेन ज्ञानकरणभूता वेदे आचार्यमतत्वात् । लोके निरीश्वरादिबुद्धिर्ज्ञानम् । बुद्धिर्ज्ञानमिति नैयायिकाः । कीदृशीत्यत आहुः विकर्मेति । विकर्मापेयपानादिसाङ्ख्यमायावादावलम्बनज्ञानं फलं यस्याः तादृशी । पूर्वज्ञानेनेति बहुजन्मभिः प्रवृद्धज्ञानेनोपासनाजन्येन । महतेति संसारावेशाः उपासकाश्चातो ज्ञानसंसाराभ्यां महत्कष्टम् । इदं कृच्छ्रपदस्य विवरणम् । सर्वस्वेति संन्यासे शाङ्करमतावलम्बे एवं भवति । ब्रह्मात्मेति 'अहं ब्रह्मास्मी' त्येवम् । निरीश्वरसाङ्ख्ये त्येवम् । 'पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्ति'रिति सूत्रात् । जीव एवात्मा ब्रह्म, स्वाश्रयैव मुक्तिरिति मायावादिमतावलम्बनेन 'विमुक्तमानिनो' जाताः । भावना स्मरणम् । शाब्दज्ञानविषयस्यात्मब्रह्मणः । परपदारोहे पातोसम्भावित इत्यत आहुः तदेवेति । ब्रह्मत्वेनात्मभावनमेव । न तु भगवदाविर्भाव इति तद्योगव्यवच्छेदक एवकारः । परं पदमिति आवरणभङ्गादिति ज्ञेयम् । 'असङ्गोयं पुरुष' इति सूत्रोक्तं साङ्ख्यानाम् । एव'मन्य'पदार्थं 'परं पद'मित्यस्यार्थमुपपाद्य पदानि व्याकुर्वन्ति स्म ये इतीत्यादि । प्रसिद्धा इति त्यदादित्रयाणां प्रसिद्धवाचकत्वम् । प्रधानरूपे जगति नित्यजगतोऽभेदं साधयन्ति स्म अन्ये भगवदिति । आन्तरालिकसृष्ट्युत्पन्नाः । प्रसिद्धा भिन्नाः पूर्वश्लोकोक्तेभ्यो भगवन्मार्गीयेभ्यो भिन्ना लौकिकाः । भगवतास्तिभातिप्रियत्वरूपेण रहिताः 'मायेत्यसुरा' इति वाक्येन प्रधानाज्जगज्जायत इति सांख्यसूत्रेण प्रधानस्य कारणत्वात् समवायित्वात् । तेन भगवद्रहिता निरीश्वरा इत्यप्यर्थः । ईश्वरान्निष्क्रान्ताः । ननु 'यतो वा इमानि भूतानि जायन्त' इतिश्रुते'रात्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसे'तिवाक्योपष्टब्धायाः कुतो भेद इत्यत आहुः भगवद्विचारेणेति । भगवद्विचारो जीवविचारश्च, तत्र जीवविचारः जीवस्य विचारः षष्ठीतत्पुरुषः जीवकर्तृकविचारः साङ्ख्ययोगसम्बन्धी । ईश्वरविचारो वेदद्वारा भगवतो विचारो भगवद्विचारः, षष्ठीतत्पुरुषः, भगवत्कर्तृको विचारस्तेनेत्यर्थः । पूर्वश्लोके भगवद्विचारः, अत्र श्लोके जीवविचारः, तेनोभाभ्यां श्लोकाभ्यां वेदलोकप्रतिपादनादपि लोकवेदात्मकस्मृतिचतुष्टयमत्र । न हि सर्वत्र भगवत्स्फूर्तौ ह्यत्र धर्मी धर्मादिषट्कं च व्यूहचतुष्टयं वा पुरुषार्थचतुष्टयं वा वक्तुं शक्यम् । व्याख्यानात् । बालबोधे 'धर्मार्थकाममोक्षाख्याश्चत्वारोर्था मनीषिणां जीवेश्वरविचारेण द्विधा ते हि विचारिताः अलौकिकास्तु वेदोक्ताः साध्यसाधनसंयुताः लौकिका ऋषिभिः प्रोक्तास्तथैवेश्वरशिक्षये'त्यनेन सन्दर्भेण साङ्ख्ययोगौ द्वौ मोक्षोपयोगिनौ जीवविचारेणातो वेदविचारेण भगवदीयेन विचारेण 'एकः सन् बहुधा विचचार' इतिश्रुतेः अन्यानिति आत्मीयेभ्योन्यान् भिन्नान् भेदेन यान् प्रसिद्धान् मन्यते जानाति । 'वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन् यदास्त' इतिश्रुतेरभिवदनरूपप्रयत्नस्येच्छाद्वारा कारणं यज् ज्ञानं तदनुकूलव्यापारवानिति 'जानाती'त्यस्यार्थः । लोके ज्ञानाश्रय इत्यर्थः । असुरेति अन्यपदोक्तानां निरीश्वराणां तथात्वात् । तेष्वित्यादि तेषु असुरपक्षपातिसाङ्ख्येषु आत्मीयत्वज्ञानाभावः । तेष्वित्यत्र विषयसप्तमी । अदर्शनं ज्ञानाभावः । रात्रिस्थैरिति रात्रिञ्चरैः । आमोद इति पक्षपातः यौगिकः शब्दः । आ समन्तात् मोदो मोदनम् । अत इति व्यतिरेकात् । पूर्वेति दृढभावनया त्यक्तपूर्वापरविचारणम् । यदादानं पदार्थस्य वासनेति प्रकीर्तिते'ति योगवाशिष्ठस्मरणात् । सञ्जात दृढस्मरणेनेत्यर्थः । पदार्थस्य विमुक्तत्वेन रूपेणात्मनः अविमुक्तत्वमाहुः ज्ञानं शास्त्रोत्थमिति । ब्रह्मात्मभावनारूपं 'तत्त्वमस्या'दिवाक्योत्थं शाब्दम् । भक्त्यर्थं तद् भवति । निबन्धे 'तत्त्वमस्यादिवाक्यस्य शोधितस्यापि युक्तितः न विद्याजनने शक्तिरन्यार्थं तच्च कीर्तितम्' । 'अन्यार्थं' भक्त्यर्थम् । तथाप्यन्ये एत आत्मीयेभ्य इति शाब्दापरोक्षमत्र । विषयत्वेनेति अभेदसम्बन्धस्तु आत्मस्वरूपसम्बन्ध इत्यात्मानतिरिक्तः । आवरणभङ्गाद्वाऽभेदसम्बन्धापेक्षाभावः । 'उपाधिर्भिद्यते न तद्वा'निति साङ्ख्यसूत्रम् । शाब्दापरोक्षे वैदिके लोकप्रवेशे विषयविषयिभावो भासत इति विषयत्वेनेत्युक्तम् । वेदे विषयविषयिभावे जडत्वापत्तिरिति । अत इति स्मृतिर्हिलोकवेदात्मिकेति वेदे लोकप्रवेशादित्यर्थः । तस्मादिति विषयत्वेनात्मज्ञानात् । विषयान्तरवत् बन्धकम् । तस्यापीति विद्यारूपस्य विषयत्वेनात्मग्रहणस्यापि । अपिशब्देन वेदान्ते विद्याभिमान उक्तः । तथा च श्रुतिः । छान्दोग्ये 'महामना अनूचानमानी स्तब्ध एयाये'ति । श्वेतकेतुः पितुराज्ञया वेदानधीत्य 'महामनाः' सर्वज्येष्ठोऽहमिति मन्यमानः । 'अनूचानम्' अनुवचनसमर्थमात्मानं

मन्यत इत्य'नूचानमानी' । 'स्तब्धः'अप्रणतस्वभावः 'एयाय' स्वगृहान् प्रत्यायात इति श्रुत्यर्थः । 'त्वय्यस्तभावा'दित्यादि व्याकुर्वन्ति स्म अत एव त्वयीत्यादिना अत एवेति जनिताभिमानादेव । पूर्वस्थित इति 'ते हि पूर्वज्ञानानुसारेणे'त्यादिग्रन्थोक्तो भगवदुपासनारूपो 'ज्ञानान् मुक्ति' रितिसाङ्ख्यसूत्राज् ज्ञानरूपो भावः । साधनत्वेनेति भावनासाधनत्वेन परिग्रहाद् । आत्मविमुक्तत्वाभिमानसाधनत्वेन परिग्रहाद् वा । अस्तः स्वरूप त् प्रच्युतः । अस्तं गत इत्यत्रास्तमिति भावे क्तः । असनं गत इति प्रत्ययार्थो विषयः कर्मप्रत्ययात् । असनाभिन्नगमनविषय इत्यर्थः । अहङ्कारादीति अविद्यासूत्रोक्ताहङ्कारादीत्यर्थः । महान्त इति अविशुद्धबुद्धिषु तत्प्रतीत्या महान्तः साधनकरणात् । 'अन्य'त्वान्न भगवत्सम्बन्धकृतं महत्त्वम् । यत्नमपीति 'तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग' इति पातञ्जलसाङ्ख्यप्रवचनसूत्रीयेश्वरप्रणिधानपदवाच्यक्रियायोगम् । अत इति यत्नाकरणात् । एव जाता इति विशुद्धबुद्धियोगव्यवच्छेदक एवकारः । ननु 'त्रय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सात्वतैरुपगीयमानमाहात्म्यं हरिं सामन्यतात्मज'मितिवाक्यात् साङ्ख्ययोगशालिनामविशुद्धबुद्धित्वं महत्त्वविरुद्धमतो विशब्दार्थमाहुः परमेति । तथा च शुद्धबुद्धित्वं महत्वाविरुद्धं वर्तत इति न महान्त इति पदविरोध इत्यर्थः । अहङ्कारादिसर्वदोषास्फुरणं च शुद्धबुद्धित्वेपि । अहङ्कारादिसर्वदोषस्फुरणे परमशुद्धेः कारणत्वात् । ज्ञानस्येति सात्विकस्य, सर्वं एको भगवानित्याकारकस्वगीतोक्तस्य । पूर्वावस्थादोषत्वप्रकारकदोषविशेष्यकज्ञानस्य सात्त्विकत्वात् । एवं च दोषविषयकराजसतामधीशून्यत्वमन्तःकरणे परमशुद्धिस्तयेत्यर्थः । अत इति संसारावेशा उपासकाश्चातो ज्ञानसंसाराभ्यां कृच्छ्रात् । आरुह्येति व्यापके औपाधिकजीवारोहणम् । अनादृतेति आरोपापवादेनाङ्घ्रीणां सगुणत्वात् आरोपविषयीकरण'मनादरणम्' । भगवच्चरणेति आकाशरूपभगवच्चरणातिरिक्तम् । श्रृङ्खलद्वीप इति तत्र श्रृङ्खलापरित्यागे सति यथा पतन्ति तथैते आत्मीयेभ्योन्ये पतन्तीति मूलसंस्कारेणान्वयः, पुराणान्तरादौ प्रसिद्धम् । आदरेति आदरः स्नेहभेदः । चरणस्थिताविति समाधावनुभूतभगवच्चरणस्थितौ मनोनिवेशद्वारा तत्र जीवस्थितौ हेतुरित्यर्थः । अत्र विकर्मसहिताः ज्ञानिनोऽस्मिन् श्लोके उक्ता दैत्याः स्वयमङ्घ्र्यादरास्वीकारेण दैत्यपक्षव्यतिरेक उक्तः अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोशोत्र श्लोक उच्यते इत्याकाङ्क्षायामुच्यते । तैत्तिरीये आकाशः सन्धिः अग्निः पूर्वरूपं चात्र अधिलोके आकाशः । वेदेऽग्निः । लोकवेदात्मकत्वं स्मृतेरिति । अत्र श्लोक आकाशस्य चरणत्वं अग्नेस्तत्प्रविष्टरूपस्यानादृतपदेन द्योतनात् प्रश्ने विशेषाभावः । छान्दोग्ये'चक्षुःकले'तिश्रुतिः । लोके चक्षुः साधनम् । सूर्यः स्मृतिपक्षपाते चक्षुराधिदैविकः । अग्निरूपः सूर्यो वेदे । इति लोकवेदात्मकत्वं स्मृतिकृतपक्षपाते ॥ ३२ ॥

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

फलमाहु बिभर्षीति ।

क्रमशः तीन श्लोकों में प्रमाण, प्रमेय और साधन कहकर अब चतुर्थ श्लोक में फल का निरूपण करते हैं ।

त्वमवबोध आत्मनि रूपाणि बिभर्षि, अब चतुर्थ श्लोक का श्रीमदाचार्यचरण विवरण करते हैं कि हे भगवन् ! आप अपनी ज्ञानस्वरूप आत्मा में रूपों को धारण करते हो । पूर्व में कहे हुए प्रकार से जो आपकी सेवा करते हैं, उन्हीं के रूपों को अपनी ज्ञान रूप आत्मा में धारण करते हो । कृपानिधि आप उनको सायुज्य मुक्ति का दान करते हो । अथवा दूसरा अर्थ बताते हैं कि ज्ञानरूप आत्मा में शुद्ध आत्मा की सिद्धि के लिये अवतारों को लेते हो । जिससे, उन अवतार स्वरूपों में भक्त जन अपनी चिद्रूप आत्मा को प्राप्त करते हैं । इसके सिवाय आपके अवतारों को धारण करने का दूसरा भी प्रयोजन बताते हैं कि चर और अचर प्राणियों के कल्याण के लिये भी आप अवतार लेते हो । चर शब्द से ब्राह्मण और अचर शब्द से क्षत्रिय, ऐसा अर्थ न्यायविद विद्वान करते हैं । चर का अर्थ है प्राण वाले प्राणीमात्र और अचर का अर्थ है स्थिर पृथ्वी आदि पदार्थ । "**अत्ता चराचरग्रहणात्**" यह जो व्यास सूत्र है उसमें ऐसा अर्थ किया है । जब "**यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदन.**" वहाँ श्रुति में चर शब्द से ब्राह्मण एवं अचर शब्द से क्षत्रिय ऐसा अर्थ मिलता है । इससे समझा जाता है कि भगवान् ऐहिकफल देने के लिये भी अवतार लेते हैं ।

ब्रह्मादि देवता भी ईश्वर कोटि में गिने जाते हैं अतः उनका भी रजोगुण वा तमोगुण से अवतार धारण करना सम्भव है । इसलिए उनके अवतारों की व्यावृत्ति के लिये ब्रह्मा भव इन्द्र आदि देववृन्द कहते हैं कि आपके अवतार सत्वगुणसम्पन्न अवतार होते हैं । जैसे लोकानुसारी मत्स्य आदि आपके अवतार भी सत्वोपपन्न हैं आधिदैविक ब्रह्मा तथा महादेव के अवतार भी सत्वोपपन्न होते हैं कारण कि ब्रह्मा और महादेव के आधिदैविक रूप आप ही हो अतः सत्वोपपन्न जो भी अवतार है वे आपके ही हैं । क्योंकि सत्व अवतार ही सुखदायी होते हैं । मूल श्लोक में सत्वोपपन्नानि 'सतां' पद देने का तात्पर्य यह है कि भगवान् के अवतार सत्पुरुषों को सुख देने के लिए हैं । कारण कि दैत्य खल है इसलिए उनके लिए तो आपके सब अवतार दुःखदायी हैं यह जताने के लिए मूल में 'अभद्राणि मुहुः खलानाम्' शब्द दिया है । अतः यह शङ्का नहीं करनी चाहिये कि भगवान् अवतार लेकर दैत्यो का भी कल्याण तो नहीं करेंगे ?

एवं लौकिकप्रकारेण चतुर्णां निरूपणमुक्त्वा स्मृतिप्रकारेण पुनश्चतुर्णां निरूपणमाह त्वयीति चतुर्भिः ।

पूर्व के चार श्लोकों में प्रारंभ में लौकिक प्रकार से प्रमाण, प्रमेय, साधन और फल इन चारों का निरूपण किया। पुनः आगे के चार श्लोकों में स्मृति प्रकार से उन चारों का निरूपण करते हैं।

"स्मृतिषु गौणो धर्मः स च योगो बहुविधः इति" अब आचार्यचरण कहते हैं कि स्मृतियों में जो योग कहा है वह अनेक प्रकार का है उनमें से जो योग देवों के लिए हितकर धर्मरूप है अब उसका निरूपण करते हैं। अम्बुजाक्ष भगवान् का यह सम्बोधन है। भगवान् के इस सम्बोधन से यह बताया है कि हे कमललोचन ! आपके दर्शन से ही पाप नष्ट हो जाते हैं। समग्र जीवों के धाम रूप आप में मनुष्य समाधि द्वारा चित्त का प्रवेश कराकर, आपके श्रीचरण रूप नौका को अवलंबन बनाकर भवसागर को, गोवत्स के खुर के जल के गड्ढे के समान बना देते हैं। भगवन्, इससे यह सिद्ध हुआ कि योग द्वारा प्रत्यक्ष भगवान् भवसागर से तारते हैं। लेकिन यह योग तृतीय स्कन्ध में वर्णन किया हुआ सर्वात्मक सबीजयोग एवं भगवत्संबन्धो योग है। **तदाहाखिलसत्वधाम्नीति** उसको स्पष्ट करते हुए कहते हैं कि आप समग्र जीवों के धाम हो और समस्त सत्वगुणों के आश्रय हो वैसे आप में, जिन्होंने समाधि द्वारा सर्वात्मक भाव से अपना चित्त लगा दिया है और आपके चरण रूप नौका को साधन बनाया है उन्होंने भवसागर को गोवत्स के खुर के जल के गड्ढे समान कर दिया है। समुद्र से पार जाने का साधन नाव है। **चरणस्य पृथ्वीरूपस्याकाशरूपस्य वा**—भगवान् के पृथ्वी, आकाश और अक्षर रूप चरण भी संसारसागर से पार जाने के लिए जहाज है। सब जानते हैं कि यह भूमि सर्व के लिए हितकारिणी है इसलिए पृथ्वी नावरूप है। कारण कि नाव का कर्तव्य है कि अपने ऊपर बिठाकर जल में डूबने न दे और नाव स्वयं जल के ऊपर तैरती रहती है इस प्रकार भूमि भी जल के ऊपर स्वयं स्थिर रहती है। पृथ्वी सर्व को जल में डूबने नहीं देती है। इस लिए पृथ्वी भगवान् का चरणरूप नौका मानी जाती है। वैसे ही आकाश भी भगवान् का चरण रूप नाव है। और तारों को जल में डूबने से बचाकर तारता है। अक्षर भी तब चरणरूप होगा कि जब भगवान् पुरुष रूप लेकर भूतल पर पधारते हैं। वैसे समाधि में भगवान् पुरुषरूप से प्रकट होकर प्रत्यक्ष होते हैं अतः उस समय भी अक्षररूप चरण पोत बनता है। इस प्रकार पृथ्वी, आकाश और अक्षर ये तीनों ही भगवच्चरण है और भक्तन को भवाम्बुधि से तारने वाले होने से तीनों नाव हैं।

'भगवद्भावकसमाधौ भगवति विद्यमाने' भगवद् भावात्मक समाधि में कल्पित पुरुष संसार के मध्यपाती होने से उसके चरण कैसे 'नाव' तारक बनेंगे ? इस शङ्का के उत्तर में कहते हैं कि **'महत्कृतेन'** भगवान् के चरण को महापुरुषों ने बनाया है। महान् पुरुष प्रत्येक पदार्थ के साध्य और साधक भाव को जानते हैं। जिसको सिद्ध करना है वह साध्य भाव है। और जो सिद्ध करनेवाला है वह साधक भाव है। समाधि में भगवत्स्फूर्ति होने से वह चरण उस समय भी तारते हैं यह भगवान् का अलौकिक सामर्थ्य है, इसलिए शंका का अवसर नहीं है। जैसे कि स्मृति में कहा है कि **"अयं तु परमो धर्मो यत् योगेन आत्मदर्शनम्"** योगद्वारा आत्मा का दर्शन ही परम धर्म है। अच्छा मान लिया तब क्या यज्ञादि अदृष्ट द्वारा स्वर्ग के साधन है वैसे यह भी भगवच्चरण होगा ? तब कहते हैं कि **'महत्कृतम्'** पद से यह बताया कि भगवान् का चरण अदृष्ट बनाकर फल नहीं देता है लेकिन स्वयं साक्षात् पार उतारता है। और यह बात महान् पुरुषों ने सिद्ध कर दिखाया है कि यह पादपोत महान् है अतः चरण हृदय तथा संसार में व्याप्त है। समाधि असाधारण साधन है। समाधि में चरण नाव का आश्रय कर भवसागर को गोवत्स पद जैसा बना देते हैं। इसका आशय यह है कि जिन्होंने भगवच्चरण का आश्रय लिया है उनके लिए यह संसार तुच्छ है वे संसार में रहते हुए भी संसार से लिप्त नहीं होते हैं क्योंकि उनकी दृष्टि में यह संसार गोवत्स खुर के समान जल का छोटा गड्ढा है। योग सिद्ध हो जाने से उनका संसार तो स्वयं सूख जाता है। किन्तु योग आदि के निर्वाह के लिए नाम मात्र संसार को रक्खा है। वे महापुरुष हैं अतः संसार को गोवत्स पद कर केवल आप ही संसार से पार होकर चले नहीं जाते हैं लेकिन अन्यों के उद्धार के लिये आप मौनो होकर बैठते हैं। इसलिए ही कहा है कि उन महापुरुषों ने संसार को 'गोवत्सपद' बना दिया है। इस श्लोक में स्मृति के प्रकार से प्रमाण का निरूपण किया ॥ ३० ॥

तादृशेन प्रमाणेन यत् सिध्यति तत् प्रमेयमाह स्वयं समुत्तीर्येति ।

आचार्य चरण बताते हैं कि ऊपर के श्लोक में निरूपित प्रमाण से जिस प्रमेय की सिद्धि होती है उस प्रमेय का निरूपण अब इस श्लोक में करते हैं।

तीर्णस्यात्रास्थापनेनैव वत्सपदकरणात्—अब श्रीमदाचार्य तीर्ण पद का अर्थ कहते हैं कि जो भक्तजन भगवत्-चरणों का आश्रय कर संसार से पार हो गये हैं उनको तीर्ण कहा गया है। वे तो भवाम्बुधि को वत्स पद कर स्वयं पार हो गये। और जिन पादों से अर्थात् पाद नौका से पार हुए उस पाद रूप नौका को यहाँ पुनः रख गये हैं। यदि भक्त जन ऐसा न करें तब इस संसार सागर का रूप तो सुदुस्तर पार करना कठिन है फिर भी उसमें रहे हुए व्यसन, मृत्यु, जरा आदि कठिन दोष अलौकिक साधन के सामर्थ्य के घातक होने से महा कठिन और भयावह है। अरे भाई, समुद्र यों ही पार करना कठिन है

यदि उसमें मगरमच्छ आदि रहे हैं तब तो महा कठिन तथा भयानक है। सर्व सच्छास्त्र मोक्ष का प्रतिपादन करते हैं अतः मोक्ष फलरूप होने से प्रमेय है। और भगवान् का चरणरूप भक्तिमार्ग भगवत्प्राप्ति का साधन होने से प्रमेय है। **द्युमन्निति सम्बोधनम्** भगवान् को 'द्युमन्' संबोधन देकर कहा कि जैसे सूर्य स्वतः अन्धकारपूर्ण जगत् के अन्धेरे और भय को मिटाता है वैसे आप स्वयं प्रकाशरूप हैं, अतः आपके चरण तीनों प्रकार के दोषों को निवारण करने में समर्थ हैं। इसलिए आपके आश्रित भी आपके चरणों के प्रसाद से भवाम्बुधि को पार कर गये हैं। **अदभ्रमच्छिद्रं सफलं सौहृदं येषामिति**— जब वे पार हो गये तो अब अन्यों का उद्धार कैसे होगा या कौन करेगा ? जो स्वयं पार पहुँच गये उनको दूसरों के उद्धार की क्या चिन्ता है ? इसके उत्तर में कहते हैं कि वे महान् पुरुष दूसरों के पार उतरने का भी विचार करते हैं कारण कि उनका हृदय सुन्दर है कोमल और कपटरहित और वे हृदय से सब से स्नेह करते हैं। अतः उनका सौहार्द सफल इस हेतु से हुआ है कि दूसरों के लिये भगवच्चरण रूप पोत, भक्तिमार्ग सम्प्रदाय रूप नौका की स्थापना कर गये हैं। जिससे निःसाधन और साधननिष्ठ सर्व के लिये, यह दुस्तर संसारसागर गोवत्स पद जैसा छोटा सा जल का गड्ढा बन गया है और समुद्र नदी रूप बन गया है।

इसका रहस्य यह है कि परम भगवदीय पुरुष स्वयं इस भक्ति मार्ग सम्प्रदाय द्वारा पार जाकर सिखा गये हैं कि आप भी भगवान् के चरण रूप, भक्ति सम्प्रदाय को नाव बनाओगे तो सहज और सरल रीति से पार हो जाओगे। इसलिये श्लोक में भगवान् के चरण को अम्भोरुह जल में रहने वाला कमल कहा है। कमल कोमल ताप निवारक और जल में रहता है वैसे ही चरण रूप भक्ति-सम्प्रदाय भी सरल सहज कोमल और ताप निवारक है। वे तो इस प्रकार का भक्ति मार्ग स्थापना कर गये, किन्तु अब उस भक्ति मार्ग का उपदेश करने वाले तो वैसे नहीं हैं तो कैसे कली काल के जीव उस भक्तिमार्ग से पार पहुंचेंगे। इसके उत्तर में कहा है कि '**सदनुग्रहो भवान्**' हे प्रभु ! आप सत्पुरुषों, जिन्होंने भक्तिमार्ग की स्थापना किया है, उन पर सदैव अनुग्रह करते हो अर्थात् उनको माध्यम बनाकर जो भक्तिमार्गानुयायी होंगे उनको अपनी कृपा बल से अवश्य पार करते हैं ॥ ३१ ॥

साधनं महतामुपदेशप्रकारः। स च अर्थादुक्त इति साधननिरूपणे तदतिरिक्तसाधनान्येव निराकरोति येऽन्येऽरविन्दाक्षेति।

अब आचार्यचरण आगे के श्लोक में कहते हैं कि महान् पुरुषों ने जिस प्रकार उपदेश किया है वह प्रकार ही साधन है। और नहीं यह बात अर्थ से आ गई इसलिये अब भक्तिमार्ग से भिन्न प्रकार के साधनों का निराकरण करते हैं।

अन्ये निरीश्वरसांख्यानुवर्तिनः ते हि पूर्वज्ञानानुसारेण—जो अन्य पुरुष निरीश्वर सांख्य तथा मायावाद के अनुयायी होते हुए भी भगवान् की उपासना करते हैं उसका कारण यह है कि उन्होंने पूर्व जन्म में जो ज्ञान प्राप्त किया था उस ज्ञान के संस्कार से अब भी उनमें सद्बुद्धि रही है। किन्तु वह ज्ञान विकर्म सहित था। विकर्म का अर्थ है वेद भगवान् ने जिन कर्मों के लिये निषेध किया है वे कर्म विकर्म है। अतः उस ज्ञान द्वारा उनको जीव, आत्मस्वरूप से जो स्फुरित होने लगा था, उस ज्ञान को वे निरीश्वर साङ्ख्य और मायावाद के संसर्ग से छोड़ देते हैं। यदि वे पूर्व की भाँति, जीव का आत्मस्वरूप से अनुसन्धान करते रहते तो भी कृतार्थ हो जाते। किन्तु इस प्रकार न रहना विकर्मों का फल है। अब आचार्यचरण 'आरुह्य कृच्छ्रेण परं पदं' का रहस्य स्पष्ट करते हैं कि पूर्व ज्ञान से उनके प्राण, देह, इन्द्रिय और अन्तःकरण के चार अध्यास नष्ट हो गये और अतिशय कष्ट से इकट्ठे किये हुए धन का सर्वस्वदक्षिणा याग से दान कर, सर्व बन्धुजन का त्यागकर, सर्व प्रपंच के सुखों से मुँह मोड़ कर, तपश्चर्या तथा श्रद्धा से ब्रह्मात्मभाव को पाया, यही उनका परम पद था। 'येऽन्येऽरविन्दाक्ष' इस श्लोक में अन्ये और 'अरविन्दाक्ष' दो पदों का आशय प्रकट करते हुए आचार्य चरण कहते हैं, कि दूसरे वे हैं जो कभी भी भगवत्सम्बन्धी विचार मात्र नहीं करते हैं ऐसे मनुष्यों को भगवान् अपना न समझ कर पराया समझते हैं। और आप अरविन्दाक्ष माने कमल नयन हैं अतः जो अन्य हैं, वे असुरों के पक्षपाती हैं, इसलिए आप उनको दर्शन नहीं देते हैं। जैसे कमल रात्रि को विकसित नहीं होता है, यदि और रात्रिस्थ कमल की गन्ध का अनुभव करते नहीं है क्योंकि वे रात्रिस्थ आमोद ग्रहण करने के योग्य नहीं है, अतः रात्रि को कमल विकसित नहीं होता है। इसी प्रकार जो असुर वा असुर पक्षपाती हैं वे दर्शन के योग्य नही है।

ते हि पूर्ववासनयाऽऽत्मानं विमुक्तमेव मन्यन्ते—

वे अन्य, पूर्व वासना के कारण अपने को विमुक्त मानते हैं किन्तु वास्तविक रूप से तो वे विमुक्त नहीं है। केवल शास्त्रीय ज्ञान से अपने को आत्मरूप मानते हैं इस प्रकार मानने से कोई आत्मानन्द अनुभव नहीं है। जैसे धनादि से धनादि का अभिमान ही होता है। इस प्रकार से अपने को विमुक्त आत्मा मान लेने से मुक्ताभिमान ही उत्पन्न होता है। फलतः केवल मुक्तत्व के अभिमान से निज में जो पहले जो भगवत् प्रेम था जो साधन रूप से किया जाता था वह भी अस्त होकर

बुद्धि मलीन हो जाती है। यदि बुद्धि मलीन न होती तब इतना विचार अवश्य होता कि अहङ्कारादि दोषों से अपना अन्तःकरण दूषित हो गया है और हम कुमार्ग पर जा रहे हैं। इसलिये इस कुमार्ग को छोड़ कर सुमार्ग पर चलने का प्रयत्न करें इतना निश्चय करते किन्तु वैसा नहीं करते हैं इससे निश्चय से जाना जाता है कि उनकी बुद्धि मलीन हो गई है। जब बुद्धि निर्मल बन जाती है तब अपने दोष स्फुरित होते हैं। ज्ञान की पूर्वावस्था तब समझनी चाहिये जब अपने दोष स्फुरायमान होने लगे। अतः परिश्रम से भी ब्रह्मभाव तक पहुंच कर आपके चरणारविन्द का अनादर करने से उस पद से अवश्य गिरते हैं। जीव को प्रकृति से पर उच्च गति की प्राप्ति के लिये बिना आश्रय वाले मार्ग में भी भगवान् के चरणों का आश्रय अनिवार्य ही है। कारण कि जो 'वियत्' है वह जो आकाश है वह सर्व का आश्रय है क्योंकि आकाश विष्णु पद का ही नाम है। और भगवान् के चरणारविन्दों के आश्रय से ही जीव का ऊर्ध्वगमन होता है।

शृङ्खल द्वीप में जो श्रीपाद शैल पर आरोहण करता है वह शृङ्खला का आश्रय लेता है यदि उसको छोड़कर अपने बल से चढ़ता है तो गिर जाता है। इसी प्रकार यहाँ भगवान् के चरणों का आश्रय आवश्यक है। यदि अधिक विशेष न कर सके, तो केवल चरणों में आदर रखे तो भी उसका अधः पतन नहीं होता है। भगवच्चरण में जीव का विश्वास तथा प्रेम आदर से ही होता है अतः चरण में स्थिति का कारण आदर ही है ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्वमनुग्रहश्चेति यत्पालकत्वमुक्तं तदेव स्पष्टयन्ति–बिभर्षीति। अवबोधः ज्ञानैकस्वरूपस्त्वं चराचरस्य स्थावरजङ्गमात्मकस्य लोकस्य प्रपञ्चस्य क्षेमाय पालनाय मुहुः पुनःपुनः सत्त्वोपपन्नानि विशुद्धसत्त्वमयानि रूपाणि मूर्तीर्बिभर्षि धत्स इत्यन्वयः। तत्र हेतुमाहुः–आत्मेति। परमात्मनः विश्वपालनस्यावश्यकत्वादित्याशयः। ननु "जगति दुष्टानामपि विद्यमानत्वात् सर्वपालने तेषामपि पालनं स्यात्तथा चानर्थ एव स्यात्, न पालनम्" इत्याशङ्क्य विभागमाहुः–सतां सदाचारनिष्ठानामेव सुखावहानि, खलानां दुष्टानां तत्प्रतिपक्षाणां त्वभद्राणि नाशकान्येवेति ॥ २९ ॥ त्वद्भक्तास्तु कृतार्था एवेत्याहुः–त्वयीति। "तव कृपादृष्ट्यैव संसारतापनिवृत्तिः, नान्यथा इति सूचयन्तः सम्बोधयन्ति–अम्बुजाक्षेति। अखिलसत्त्वधाम्नि शुद्धसत्त्वमूर्तौ त्वयि समाधिना आवेशितं स्थिरीकृतं यच्चेतस्तेनैव निमित्तेन एके मुख्या विवेकिनः महद्भिः कृतेन संसारतारकत्वेन सेव्यतया स्वीकृतेन, यद्वा इदमपि प्रपञ्चवन्मायामयमिति कुवादमनादृत्येदमेव महत्सर्वोत्कृष्टमिति संसारतारकतया स्वीकृतेन त्वत्पादरूपेण पोतेन नौकारूपेण भवाब्धिं संसारसमुद्रं गोवत्सपदं गोवत्सपदमिव तुच्छीकुर्वन्ति। दुस्तरं संसारमनायासेनैव तरन्तीत्यर्थः ॥ ३० ॥ ननु "पादपोतेन पूर्वे चेत्संसारार्णवपारंगतास्तर्हि पादपोतोऽपि तैः सहैव गतः स्यात्, लोके पोतस्यापि पारगमनदर्शनात्। तर्हीदानीन्तनाः कथं पारं गच्छेयुः" इत्याशङ्कयाहुः—स्वयमिति। यथा सूर्याश्रितानामन्धकारभयं नास्ति, तथा त्वदाश्रितानामविद्यारूपान्धकारभयं नास्तीति सूचयन् सम्बोधयति हे द्युमन्निति। भवत्पादपोतेन स्वयं सम्यक् अनायासेन पुनरावृत्तिरहितं यथा स्यात्तथा भवार्णवमुत्तीर्य भवत्पदाम्भोरुहनावमत्र संसारे विधायान्येषामुत्तरणार्थं संस्थाप्य ते महान्तो याताः पारं गताः। संसाराद्विमुक्ता इत्यर्थः। नौनिधानं नाम भक्तिमार्गप्रवर्तनम्, तेन नेदानीन्तनानां संसारतरणमशक्यमिति भावः। तत्प्रवर्तने हेतुमाहुः—अदभ्रसौहृदा इति। अदभ्रमनल्पं सौहृदं दीनेषु कृपा येषां ते तथा। अम्भोरुहेति विशेषणेन यथा कमलं सन्तापनिवर्तकं सुखजनकं च तथा पदकमलमपीत्यन्यमार्गेभ्यो भक्तिमार्गस्योत्कर्षः सूचितः। अवश्यं चैतदुत्तरणाय प्रयत्नो विधेय इत्याशयेनाहुः—भीममिति। नरकादिदुःखैर्भयङ्करमित्यर्थः। तत्र हेतुमाह—सुदुस्तरमिति। कामक्रोधादिभिस्तज्जन्यैः पापैश्च तिमिङ्गिलतुल्यैस्तद्विमुखानां दुस्तरमित्यर्थः। तत्र हेतुमाह–सदनुग्रहो भवानिति। यतो भवान् सतः शरणागतान् स्वभक्तानेवानुगृह्णाति, कामक्रोधादिभ्यो रक्षणेन संसारादुद्धरतीत्यर्थः ॥ ३१ ॥ एवं भगवद्भक्तानां कृतार्थत्वमुक्त्वा तद्विमुखानामनर्थप्राप्तिमाहुः—य इति। तद्विमुखानां तु त्वत्कृपादृष्टिविषयत्वाभावान्न कदापि संसारतापनिवृत्तिरिति सूचयन्तः सम्बोधयन्ति—हे अरविंदाक्ष इति। येऽन्ये भवद्विमुखास्ते कृच्छ्रेण विषयसुखत्यागपूर्वकतपआदिसाधनप्रयासेन परं पदमारुह्य मोक्षसन्निहितं सत्कुलजन्मादि प्राप्यापि ततोऽधः नरके पतन्तीत्यन्वयः। तानेव दर्शयन्ति—नेति। 'न आदृतौ युष्मदंघ्री येस्तेभ्यो नातो नरकभाग्भिरसत्प्रसंगैः' इति भगवदनादरेण नरकपातस्योक्तत्वात्। अनादरे हेतुमाहुः—विमुक्तमानिन इति। संसारे पतिता अपि 'विमुक्ता वयम्' इति मन्यमाना भ्रान्ता इत्यर्थः। तत्र हेतुमाहुः–अविशुद्धबुद्धय इति। तत्रापि हेतुमाहुः—त्वयीति। त्वयि अस्तो निरस्तो यो भावो भक्तिस्तस्मात्। भक्तेरभावान्न विशुद्धा बुद्धिर्येषां त इत्यर्थः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

अन्येऽपि तेऽवताराः सन्तीत्याहुः—बिभर्षीति ॥ अवबोधः ज्ञानस्वरूप आत्मा त्वमेव चराचरस्य लोकस्य क्षेमाय सत्त्वेन सच्चिदानन्दघनरूपत्वेनोपपन्नानि श्रुतियुक्तिसिद्धानि सतां सुखावहानि खलानाम् अभद्राणि नाशकानि रूपाणि मुहुर्मुहुर्बिभर्षि लोकदृष्टौ प्रकटयसि ॥ २९ ॥ त्वयीति ॥ हे अम्बुजाक्ष! एके मुख्या विवेकिनः अखिलसत्त्वधाम्नि शुद्धसत्त्वमूर्तौ त्वयि समाधिना आवेशितं स्थिरीकृतं यच्चेतस्तेनैव निमित्तेन महद्भिः कृतेन सेव्यतया संपादितेन इदमेव महदिति सादरं स्वीकृतेन वा। महद्भिः भवाब्धेः पोततुल्यीकृतेन वा त्वत्पादरूपेण पोतेन महानौकया भवाब्धिं संसारसमुद्रं गोवत्सपदमिव तुच्छं कुर्वन्ति। भवाब्धेर-

स्तित्वमपि न जानन्ति। अनायासेन तेषां मुक्तिरित्यर्थः ॥ ३० ॥ अन्येषां का गतिरिति चेत्तत्राहुः—स्वयमिति ॥ हे द्युमन्! स्वयंप्रकाश अदभ्रम् अनल्पं सौहृदं दीनेषु कृपा येषां ते पूर्वोक्ताः विवेकिनः अन्येषां सुदुस्तरं भीमं भयंकरं च भवार्णवं स्वयं समुत्तीर्य अदभ्रसौहृदत्वात् भवत्पदाम्भोरुहरूपां नावमत्रैव निधाय भक्तिमार्गसंप्रदायं प्रवर्त्यैत्यर्थः। पद्भ्यामिवानायासेन पारं याताः यत् यतः कारणात् भवान् सदनुग्रहः सतो भक्तान् अनुगृह्णाति तादृशोऽस्ति ॥ ३१ ॥ य इति ॥ हे अरविन्दाक्ष! ये केचित् विमुक्तमानिनः केवलं ज्ञानमेवाश्रित्य विमुक्ता वयमिति मन्यमानाः त्वयि अस्तो निरस्तोऽत एवासन् यो भावः तस्मात् भक्तेरभावादित्यर्थः। न विशुद्धा बुद्धिर्येषां ते तथा। यद्वा। त्वयि अस्तभाः इति च्छेदः। अस्तमतयः वादेष्वेव विशुद्धबुद्धयः अत एव न आदृतौ युष्मदङ्घ्री यैस्ते। युष्मदिति बहुत्वं भक्तसंग्रहाय। ईदृशाः सन्तः कृच्छ्रेण बहुजन्मतपसा परं पदं मोक्षसन्निहितं सत्कुलतपःश्रुतादि आरुह्य प्राप्यापि ततः अधः पतन्ति विघ्नैरभिभूयन्ते। तिर्यगादियोनिं वा प्रपद्यन्ते त्वदनादरणदोषान्नरके पतन्तीति वा। भक्तिरसिकास्तु शमदमादिकृच्छ्रजनितेन विज्ञानेन परं पदं जीवन्मुक्तदशामारुह्यापि भगवच्चरणानादरेण कर्मणां पुनः प्ररोहात्पुनः संसरन्ति जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति। कर्मभिः यद्यप्यचिन्त्यमहाशक्तौ भगवत्यपराधिन इत्युक्तेरिति यथाश्रुतार्थमेवाहुः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु देवकीपुत्रं मां कथमेवं वर्णयथ इति चेत्तत्राहुः ॥ बिभर्षीति ॥ हे हरे, अवबोधश्चासावात्मा चावबोध आत्मा ज्ञानस्वरूप इत्यर्थः। असंधिरार्षः। यद्वा अवबोधो ज्ञानस्वरूपः, आत्मा सर्वान्तरात्मा च सन्, इत्यसमस्तं पदद्वयम्। यद्वा, अवबोधे ज्ञानस्वरूपे जीवे, आत्मा आत्मस्वन्तर्यामितया स्थित इत्यर्थः। त्वं, चराचरस्य चराचरात्मकस्य लोकस्य, क्षेमाय क्षेमार्थं, सत्त्वोपपन्नानि शुद्धसत्त्वमयानि, सतां साधूनां, सुखावहानि, इदं विशेषणं भाव्यश्रीहरिकृष्णावतारं मनसि निधाय कृतमस्तीति बोध्यं 'अन्योऽपि धर्मरक्षायै' इत्यनेनाग्रे स्फुटमेवाभिधानात्। कृष्णहरिकृष्णयोरेकावतारत्वाच्च। एतन्नित्यानन्दमुनिप्रणीतश्रीहरिदिग्विजयात् स्पष्टं बोध्यम्। खलानां दुर्जनानां कंसकालीदत्तादीनां, मुहुः अभद्राणि, रूपाणि अवतारान् बिभर्षि। 'परित्राणाय साधूनां विनाशाय च दुष्कृताम्' इति त्वदुक्तेः ॥ २९ ॥ एवं निखिलजगदुत्पत्त्यादिकारणत्वेन स्तुत्वाऽथ 'कारणं तु ध्येयः' इति श्रुतेः कारणत्वस्य त्वयि नियतत्वेनोपास्यत्वमपि त्वन्निष्ठमित्यभिप्रायेण स्तुवन्ति ॥ त्वयीति ॥ हे अम्बुजाक्ष, अमलं शुद्धं सत्त्वं सत्त्वमयं धाम स्थानं विग्रह इति यावत्। यस्य तस्मिन्, शुद्धसत्त्वमयविग्रहयुक्ते इत्यर्थः। अखिलेति पाठे, अखिलं प्राकृतसत्त्वादभिरप्रतिहतं सत्त्वमित्यर्थः। त्वयि, एके विपश्चितः, समाधिना ध्यानेन, आवेशितं चेतो यैस्ते तथाभूताः सन्तः, चेतसैक इति संधिरार्षः। समाधिना, त्वयि, आवेशितचेतसा उपलक्षिताः सन्त इति वा। महता कर्णधारस्थानीयेन सदाचारेण कृतः संनिधापितः प्रदर्शित इति यावत्। तेन, त्वत्पादपोतेन तव चरणकमलोपासनाप्रधानभक्तिमार्गरूपप्लवेन, भवः संसार एवाब्धिः समुद्रस्तं, गोवत्सपदं, कुर्वन्ति। वत्सपदवदल्पं विगणय्य सुखेन भवाब्धिं तरन्तीत्यर्थः ॥ ३० ॥ न केवलं ते स्वयमेव भवाब्धिं गोवत्सपदं कृत्वाऽतरन्नपि तु अत्र तदास्थापितत्वत्पादपोतस्था अन्येऽपि तं तथैवातरन्निति प्रदर्शयन्तः स्तुवन्ति ॥ स्वयमिति ॥ हे द्युमन् हे स्वयंप्रकाश, नित्यविभूतिमन्निति वा। अदभ्रमतिशयितं सौहृदं त्वयि सुहृद्भावो येषां ते तथाभूताः, ते महत्कृतत्वत्पादपोतविहिताश्रयास्त्वदेकान्तिकोपासकजनाः, भीमं भगवज्जनेतराणां भयंकरं, सुदुस्तरं त्वदाश्रयाभावात् सुतरां तर्त्तुमशक्यमपि, भवार्णवं संसारसागरं, स्वयं समुत्तीर्य, स्वेषामुत्तरणसाधनभूतामिति शेषः। भवत्पदाम्भोरुहनावं त्वदीयचरणकमलोपासनाप्रधानभक्तिमार्गसंप्रदायरूपां नौकां, अत्र लोके, निधाय प्रवर्त्य, याताः त्वद्धाम प्राप्य तत्र त्वत्सेवाप्तिलक्षणां मुक्तिं संप्राप्ता इत्यर्थः। ननु ते किमर्थमेवं चक्रुस्तत्राह। भवान् सदनुग्रहः त्वमेवंविधेषु सत्पुरुषेष्वेवानुग्रहशीलोऽसि ततस्ते एवं चक्रुरित्यर्थः। तयाऽन्येऽप्यतरन्निति भावः ॥ ३१ ॥ समाधिनाऽऽवेशितचेतसैक इत्युक्तविपरीतानां महज्जननिहितभवत्पदाम्भोरुहनावमननुवर्त्तमानानां गतिं वदन्तः स्तुवन्ति ॥ य इति ॥ हे अरविन्दाक्ष, अन्ये पूर्ववर्त्तिश्लोकद्वयप्रस्तुतेभ्योऽपरे, ये जनाः, विमुक्तमानिनः विमुक्ता वयमिति वृथा मानिनः भवन्ति, ते जनाः, त्वयि अस्तभावात् भक्तिशून्यत्वाद्धेतोरित्यर्थः। अविशुद्धा बुद्धिर्येषां, यद्वा त्वयि, अस्तभाः अस्तमतयः, वादेष्वेव विशुद्धा बुद्धिर्येषामिति तथाभूताः सन्तः, परं पदं वर्णाश्रमादिमत्सु जन्माप्तिरूपमुत्कृष्टस्थानमित्यर्थः। कृच्छ्रेण महता प्रयासेन, आरुह्य संप्राप्यापि, सुकृतविशेषाद्विप्रादिरूपं श्रेष्ठं जन्म प्राप्यापीति भावः। अनादृतौ युष्मदङ्घ्री यैस्ते अनुपासितत्वच्चरणाः सन्तः, ततः, अधः पतन्ति। पुनर्हीनयोनिषु जन्म प्राप्नुवन्तीत्यर्थः ॥ ३२॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

त्वय्यम्बुजाक्षेति : १०.२.३०.

भवाब्धितरणे तरिर्भवति कृष्णपादाम्बुजं विभाव्य निगमागमेष्विति समुत्सुकः सज्जनः।
विचित्रमवलोकितं यदवलम्बनादप्यसौ भवाम्बुधिरगादलं सुलघु गोष्पदावस्थितिम् ॥ ४० ॥
आरूढाः पदवीं परामपि तपोयोगादियोगाद्दहो भ्रश्यन्ति प्रकृतावनादृतभवत्पादाम्बुजाता यदि।
तद्धाथ न तावकाः परिपतन्त्येतत् स्फुटं तद्बुधैरुक्तं गर्भनुतौ विलोक्य भगवञ्जातोऽस्मि ते सेवकः ॥ ४१ ॥

कृष्णप्रिया

आप चराचर लोक के कल्याण के लिये यद्यपि आप ज्ञानात्मा होने पर भी विविध प्रकार के अवतारों को धारण करते हैं और सत्वगुणसम्पन्न स्वरूप धारण करते हैं जिस से आप सत् पुरुषों का हित करते हो और खल पुरुषों का नाश करते हो ॥ २९ ॥ हे अम्बुजाक्ष ? अखिल सत्व जीवों के आधारभूत आप का कई महानुभाव समाधि से ध्यान करते हैं, चित्त को लगाते हैं वे महापुरुष किये हुए आप के चरण कमल नाव के आश्रय से भव सागर को गोवत्स बनाकर तैर जाते हैं ॥ ३० ॥ हे द्युमन् ! हे सर्वसमर्थ भगवन् ! यह भव सागर भयानक है। भक्ति सम्प्रदाय के संप्रवर्तक स्वयं पार कर जाते हैं और सम्प्रदाय-नाव को अन्य तरणार्थियों के लिये यहाँ छोड़ जाते हैं क्योंकि उन सज्जनों के हृदय सौहार्द से सभर हैं और आप सत्पुरुषों पर अनुग्रह करनेवाले हैं इससे जो लोक सत्पुरुषों के माध्यम से शरण लेते हैं एवं आप के श्रीचरणों के आश्रित बनते हैं उनको आप भव सागर से पार करते हैं ॥ ३१ ॥ हे अरविन्दनयन ? जो लोग हम मुक्त हैं ऐसा दावा करते हैं और हम मुक्त हैं ऐसा मन में अभिमान रखते हैं लेकिन आप के स्वरूप में भाव न होने से उनकी मति शुद्ध नहीं होती। संभवतः वे लोक कष्ट से मोक्ष पद को प्राप्त कर भी ले फिर भी आप के श्रीचरणों में अनुराग न होने के कारण उन्नत पद पर आरोहण कर मिटजाते हैं ॥ ३२ ॥

तथा न ते माधव तावकाः क्वचिद् भ्रश्यन्ति मार्गात्त्वयि बद्धसौहृदाः ।
त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्धसु प्रभो ॥ ३३ ॥
सत्त्वं विशुद्धं श्रयते भवान् स्थितौ शरीरिणां श्रेय उपायनं वपुः ।
वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते ॥ ३४ ॥
सत्त्वं न चेद्धातरिदं [1]निजं भवेद् विज्ञानमज्ञानभिदापमार्जनम् ।
गुणप्रकाशैरनुमीयते भवान् प्रकाशते यस्य च येन वा गुणः ॥ ३५ ॥
न नामरूपे [2]गुणकर्मजन्मभिर्निरूपितव्ये तव तस्य साक्षिणः ।
मनोवचोभ्यामनुमेयवर्त्मनो देव [3]क्रियायां प्रतियन्त्यथापि हि ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—तथा माधव त्वयि बद्धसौहृदाः तावकाः ते मार्गात् न भ्रश्यन्ति प्रभो त्वया अभिगुप्ताः निर्भयाः विनायकानीक मूर्धसु विचरन्ति ॥ ३३ ॥ भवान् स्थितौ शरीरिणां श्रेय उपायनं विशुद्धम् सत्वम् भवान् श्रयते वेद-क्रियायोगतपःसमाधिभिः येन जनः तव अर्हणम् समीहते ॥ ३४ ॥ धातः इदम् निजम् सत्वम् (वपुः) न भवेत् चेत् अज्ञानभिदा अपमार्जनम् विज्ञानं न भवेत् गुणप्रकाशैः भवान् अनुमीयते यस्य च येन वा गुणः प्रकाशते ॥ ३५ ॥ देव मनोवचोभ्याम् अनुमेयवर्त्मनः साक्षिणः तस्य तव नामरूपे गुणकर्मजन्मभिः न निरूपितव्ये अथ अपि क्रियायाम् प्रतियन्ति हि ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्वदीयास्तु न कदाचिदपि पतंतीत्याहुः। तथा नेति। विनायका विघ्नहेतवस्तेषामनीकानि स्तोमास्तानि पांति ये तेषां मूर्धसु विचरंति विघ्नाञ्जयंतीत्यर्थः ॥ ३३ ॥ सतां सुखावहानि रूपाणि धारयसीत्युक्तं बिभर्षि रूपाणीति तत्केन प्रकारेण सुखावहत्वमित्यपेक्षायामाहुः–सत्त्वं विशुद्धमिति। सत्त्वं वपुः श्रयत इत्यन्वयः। श्रेय उपायनं कर्मफलदातृ। कथम्। येन वपुषा जनस्तवार्हणं पूजामीहते करोति। कैः। वेदाश्च क्रियायोगाश्च तपश्च समाधिश्च तैश्चतुराश्रमधर्मैरित्यर्थः। वपुषोऽनाश्रयणेऽर्हणासंभवान्न कर्मफलसिद्धिः स्यादिति ॥ ३४ ॥ त्वय्यंबुजाक्षेत्यादिना श्लोकत्रयेण भगवद्भक्तानामेव मोक्षो नान्येषामित्युक्तं तत्र कर्मफलं भक्तिं विना माभून्मोक्षस्य तु ज्ञानैकसाध्यत्वात्किं भक्तयेति सानुशयान्प्रत्याहुः। सत्त्वं न चेदिति। हे धातरिदं सत्त्वं निजं तव वपुर्न भवेच्चेत्तर्हि विज्ञानं विशिष्टमपरोक्षं ज्ञानं न भवेदित्यनुषंगः। कथंभूतम् अज्ञानभिदापमार्जनमज्ञानं च तत्कृता भिदा च तयोरपमार्जनं निवर्तकम् यद्वा अज्ञानं भिनत्तीत्यज्ञानभिद्विज्ञानं मार्जनं नाशमाप प्राप्तमेवेति। ननु जडानां बुद्ध्यादीनां यतः प्रकाशस्तद्ब्रह्मेति ज्ञानं भवेदेवेति चेन्न। गुणप्रकाशैर्गुणावच्छिन्नैः प्रकाशैर्भवान्सर्वसाक्षी परिपूर्णः केवलमनुमीयते कल्प्यते न तु साक्षात्क्रियत इत्यर्थः। अनुमानप्रकारमाहुः। प्रकाशते यस्य च येन वा गुण इति। यस्य संबंधी अयम् आभ्यन्तरो बुद्ध्यादिगुणः प्रकाशते। यो गुणसाक्षीत्येवं येन वा बुद्ध्यारूढेन प्रमात्रा बुद्ध्यधिष्ठात्रा बाह्यो गुणः प्रकाशते इत्यनुमीयत इत्यर्थः। शुद्धसत्त्ववपुषि त्वयि सेव्यमाने तु तदाकारेंतःकरणे त्वत्प्रसादेन साक्षात्कारो भवेदिति भावः ॥ ३५ ॥ एवं तावद्भक्तानामभ्युदयापवर्गार्थं रूपाणि बिभर्षीत्युक्तं तान्यपि भजनीयानि केवलं न तु ज्ञातुं शक्यंते अनंतत्वादतर्क्यत्वाच्च मनोवचसोरगोचरत्वादित्याहुः। न नामरूपे इति। गुणाश्च जन्मानि

---

१. निजं वपुः इति पाठः। २. जन्मकर्मभि–श्रीधर वंशी. सुदर्शन. विज. कर्म जन्मभि–जीव.; वीर. विश्व.। ३. क्रियायाः–विज.

च कर्माणि च तैर्निरूपितव्ये निरूपणार्हे न भवतः । कुतः । अनुमेयं वर्त्म मार्गो यस्य तवेति । तत्रापि हेतुः । तस्य साक्षिण इति । न हि साक्षिणस्तत्त्वं मनोवचोगोचरमित्यर्थः । हे देव बहुधा द्योतमान । अथापि क्रियायामुपासनादिलक्षणायां त्वां प्रतियंत्युपासकाः साक्षात्पश्यंति । हि प्रसिद्धिं सूचयति ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हरिभक्तानां पतनशंकैव नेत्याहुः—त्वदीयाः इति । 'विनायकस्तु हेरंबे तार्क्ष्ये विघ्नेऽजिने गुरौ' इति हरिदीक्षित इति । विघ्नहेतव उपद्रवहेतवस्ते तु विघ्ना एवमेषां स्तोमाः समूहाः 'स्तोमः स्तोत्रेऽध्वरे वृंदे' इति रुद्रः । इत्यर्थ इत्यस्य कोर्थः । न हि विचरतेर्गत्यर्थोत्र कार्य इति । ननु ज्ञानिन एव केवलं किमित्याक्षिप्यंते भरतेंद्रद्युम्नचित्रकेत्वादिदृष्ट्या भक्ता अप्याक्षिप्यंतामित्यत आहुः—तथेति । यथा विमुक्तमानिनोऽधः पतंति तथा तावका मार्गाद्भक्तियोगान्न भ्रश्यंति किमुत मृग्यास्त्वत्त इत्यर्थः । यदि वा भ्रश्यंति तदपि त्वय्येव बद्धसौहृदा एव भवंति चित्रकेतुभरतेंद्रद्युम्नादीनां भ्रंशे सति वृत्रादित्वे प्रेम्णः शतगुणीभावदर्शनाद्भक्तानां भ्रंशोपि प्रेमाधिक्यहेतुरेव दृष्टः । यद्वा—तथा न भ्रश्यंति यतो भ्रष्टत्वेपि त्वयि बद्धसौहृदाः 'न मे भक्तः प्रणश्यति' इति प्रतिज्ञातवता समोपकरिष्यते च मत्प्रभुणा । ममायं भ्रंशः कृत इति त्वयि विश्वस्तमतयः ततश्चाभितस्त्वया रक्षिता विनायकानां विघ्नकारिणामनीकानि पांति ये तेषामपि मूर्द्धसु विचरंति तानभिभवंतीति । यद्वा- त्वच्चरणांस्तेऽपि भक्त्या मूर्द्धसु धारयंतीत्यर्थः ॥ ३३ ॥ तत्सुखावहत्वं केन प्रकारेणेति संबंधः । इत्यन्वय इति योजना वेदशब्देन तदभ्यासः चतुराश्रमधर्मैः क्रमाद्ब्रह्मचारिगृहस्थवनस्थयतिधर्मैर्वेदाभ्यासादिभिरित्यर्थ इत्याह—अर्हणासंभवात्पूजनाभावात् ॥ ३४ ॥ सानुशयान् सद्वान् "भवेदनुशयो द्वेषे पश्चात्तापानुबंधयोः" इति मेदिनी । अनुबंधो हठः । अनुषंगः पुनः सबंधः ननु किमर्थमनुषंगः कार्यः 'ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेणादर्शनायोगात्' इति न्यायमाश्रित्याह—यद्वेति । अचेतनचेतने नात्मज्ञानं स्यादेवेति शंकते—नन्वीति । अनुमानं विशदयति—अत्रेमौ प्रयोगौ बुद्ध्यादयः स्वातिरिक्तभास्याः प्रकाशरूपत्वाभावे सति प्रकाशमानत्वात् । जडत्वाद्वा घटादिवत् । बुद्धिकृतघटादिप्रकाशः तद्गतप्रकाशात्मप्रतिबिंबप्रयुक्तः स्वतोऽप्रकाशस्वच्छद्रव्यहेतुकप्रकाशत्वात् । स्वतोऽप्रकाशजलादिस्वच्छद्रव्यहेतुकमित्यादिप्रकाशस्यादित्यप्रतिबिंबयुक्तवदिति । अनुमीयत इत्यर्थ इत्यस्यायमनुमानोऽर्थ इति । न हि केवलमनुमीयतेऽपि तु प्रत्यक्षीभवतीत्याह—इति भाव इति ॥ ३५ ॥ पूर्वोक्तरीत्येत्येवं पदार्थः । अभ्युदयः संपत्संतत्यादिरूपः । अपवर्गो मोक्षः । अप्रतर्क्यत्वात्तर्काविषयत्वात् । अगोचरत्वादविषयत्वात् । अनुमेयमनुमातुं योग्यं वर्त्म मार्गो यस्य 'वर्त्म नेत्रच्छदे मार्गे' इति मेदिनी । तत्रापि अनुमेयवर्त्मत्वे । तस्य नामरूपस्य । इत्यर्थ इति भावः । यद्यपि त्वं मनोवचोगोचरोऽथापि तथापि विश्वनाथस्तु—केवलमेतद्रूपमेव ते विशुद्धसत्त्वात्मकमपि त्वेतस्य वाचकं नामापि ते च नामरूपे भक्त्यैवानुभवितुं शक्ये नान्यथेत्याहुः—नेति । गुणैः श्यामसुंदरकृपार्द्रलोचनेति । कर्मभिर्गोवर्द्धनोद्धरणत्रिभंगिललितेति । जन्मभिर्नंदनंदनवसुदेवनंदनेति । ये तव नामरूपे ते यद्यपि यथाकथंचिद्वाच्यध्येये भवतस्तदपि साक्षिणो विषयद्रष्टृजीवस्य निरूपितव्ये साक्षादनुभवनीयमाधुर्ये न भवतः तयोर्माधुर्यानुभव एव तदननुभवः यथा पित्तदूषितरसजनेन चर्वितस्यापि मत्स्यंडिकखंडस्य स्वादालाभादननुभव एव । एवं च भक्तिरहितजीवकर्तृकानुभवाशक्तेरेव हेतोर्नामरूपयोर्द्वयोरपि विशुद्धसत्त्वात्मकत्वमेव गतमिति भावः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्वद्रूपोपासकास्तु आत्मतत्त्वादिज्ञानाभावेऽपि स्वधर्मपरित्यागेपि कथञ्चित्पातकापातेपि नैव पतन्तीत्याहुः—तथेति । पूर्वार्थविरोधे यथा त्वं मूर्खस्तथाऽहं नेति वत् । यद्वा किञ्चेत्यर्थः । तावकाः कदाचित्त्वच्चरणाश्रिता ये ते तु कदाचित् कचिदपि मार्गादपि किम्पुनर्मृग्यात् न पतन्ति, प्रत्युत त्वयि बद्धसौहृदाः प्राप्तनिश्चलप्रेमाणः सन्तः अत एव त्वया अभितो गुप्तास्सन्त इत्यादि माधव ! हे लक्ष्मीकान्त ! इति तेषां स्वत एव सर्वसम्पत्सिद्धिरप्यभिप्रेता यद्वा मधुकुलावतीर्णेति परमकारुण्यं प्रभो ! हे सर्वशक्तियुक्त ! इति प्रभुप्रभावात्तेषां तद्युक्तमेवेति भावः । अन्यत्तैः यद्वा तथा तेन प्रकारेणापि प्रथमप्रवृत्तत्वात् कथञ्चिदनादृतयुष्मदङ्घ्रित्वेनापि न भ्रश्यन्ति किन्तु बद्धसौहृदाः सन्त इत्यर्थः । विनायकान कपमूर्द्धसु विशेषेण चरन्ति निर्भयत्वेन तानेव महाविघ्नवर्गेशान् विघ्नकरणार्थमागतान् सोपानानीव कृत्वा श्रीवैकुण्ठपदमारोहन्तीत्यर्थः । तेषां भक्तिविघ्ने ह्यनुतापः स्यात्तेन च श्रीभगवतो महती कृपा स्यादिति अन्यत् समानम् ॥ ३३ ॥ "नातः परं परम यद्भवतः स्वरूपम्" इति तृतीयोक्तानुसारेण परमकारणत्वद्वपुषः परमतत्त्वैकरूपत्वेऽपि विशुद्धसत्त्वस्य तत्प्रकाशशक्तिरूपत्वेन तदभेदविवक्षया विशुद्धं मायातीतं चिच्छक्तिवृत्तिविशेषसत्त्वमेव वपुरित्युक्तं स्थितौ पालनार्थं तच्छ्रयते नित्यानन्दविधवपुराकारवानेव यत्र पालने यादृशं वपुर्युक्तं तदर्थं तादृशं वपुः प्रवर्तयतीत्यर्थः । यथा नानेन्द्रियवानेव देवदत्तो दर्शनार्थं चक्षुः श्रयते श्रवणार्थं श्रोत्रमित्यादि व्यपदिश्यते तद्वदिति भावः । तदेवं स्वयं प्रकटीभूय पालनेन सुखावहत्वं दर्शितं ध्यानगतत्वेनापि दर्शयन्ति—शरीरिणामित्यादि । शरीरिणामशेषजीवानां श्रेयसः सत्कर्मफलस्य त्वत्प्रेमान्तपुरुषार्थवर्गस्य वा उपायनमुपढौकनमिव करुणया सादरदानं येन । यद्वा श्रेयसस्तस्य उपायनमाधिक्येनाश्रयरूपं परमानन्दफलस्वरूपमित्यर्थः "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः । उभयथाप्युपासकानां तत्तत्फलदातृत्वे पर्यवसानं वेदेति

त्वदर्हणप्रधानैश्चतुराश्रमधर्मैरित्यर्थः। अर्हणस्य विवक्षितत्वात् केवलवेदाद्यर्पणलक्षणार्हणस्य तु वपुर्विनाप्युपदेशेनैव सम्भवाच्च येन वपुषा हेतुना जनश्चतुराश्रमवर्त्ती सर्वोऽपि सम्यग्गीहते यदनपेक्षितवपुर्वेदाद्यर्प्पणमात्रमर्हणं तत्तु न सम्यगिति भावः। तत्र चतुराश्रमिणामर्हणसिद्धया तत्सम्बन्धेनान्येषामपि तत्सिद्धेर्युक्तमेवोक्तं शरीरिणामिति अन्यत्तैः तत्र न कर्मफलसिद्धिरिति "सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम्" इति न्यायेन ॥ ३४ ॥ धातः हे विविधमूर्त्तिधर! इदं सर्वोपकारकं सत्त्वात्मकं गुणस्य बुद्धयादेः प्रकाशैर्बहुत्वं बुद्धयादेस्तद्‌वृत्तीनां च बाहुल्यापेक्षया प्रकाशत इत्यत्र प्रयोगश्च अयं बुद्धयादिर्गुणः सम्बन्धिविशेषाश्रयः गुणत्वेन प्रकाशात् यो यो गुणत्वेन प्रकाशते स स सम्बन्धिविशेषाश्रयत्वेनैव प्रकाशते यथा गन्धादिः स चास्य सर्वस्य साक्ष्यस्य सम्बन्धिविशेषः परमसाक्षित्वेन भवानेवेति यथा अयं बुद्धयादिर्गुणः प्रमात्रधिष्ठातृकः जडत्वेऽपि प्रकाशमानत्वात् यो यो जडत्वेन प्रकाशते स स तदधिष्ठातृकत्वेनैव प्रकाशते यथा घटादिः स चास्य परमप्रमाता भवानेव यच्छक्त्या जीवस्यापि प्रमातृत्वम् इति अन्यत्तैः श्लोकत्रयेणेत्यत्र श्लोकपञ्चकेनेति वाच्यं किम्भक्त्येति गुणापोहद्वारैव ज्ञानसिद्धेरिति भावः। नेति तत्त्वज्ञानं न भवति किन्तु कल्पनामात्रमित्यपेक्षया तथा गुणसाक्षीतिपर्यन्त एकः प्रयोगः एवमित्यादिकोऽन्यः तथा शुद्धसत्त्वेत्यादौ त्वत्प्रसादेनैवेत्येव शब्दो योज्यः किं भक्त्येत्याक्षेपसमाधानार्थं तत्र प्रमाणं च "श्रेयः सृतिं भक्तिमुदस्य ते विभो!" इत्यादि बहुतरमेवास्तीति यद्वा। ननु, "सत्त्वात्सञ्जायते ज्ञानम्" इत्युक्त्या मायिकसत्त्वात्मकतयैव तत्प्रकाशतां किं विशुद्धाख्यसत्त्वान्तराङ्गीकारेण तत्राहुः हे धातः! सर्वशक्तिधारिन्! इदमस्माभिरनुभूयमानं त्वत्प्रकाशशक्तिरूपं सत्त्वं चेत् यदि निजं त्वदीयं विज्ञानं चिच्छक्तिरूपं न भवेत् किन्तु मायिकं भवेत् तदा त्वज्ज्ञानप्रकार एव मार्जनमपि निर्विकल्पतया पर्यवसितवान् यतः गुणस्य प्राकृतसत्त्वस्य प्रकाशैर्भवाननुमीयत एव न तु साक्षात् क्रियत इति यद्वा इदं त्वदीयं चिच्छक्तिरूपं सत्त्वं न भवेन्नाविर्भवेच्चेत्तदा गुणेत्यादि कथम्भूतं सत्त्वं ज्ञानेन ब्रह्मज्ञानेन कृत्वा यद्भिदापमार्जनं तन्न विद्यते यत्र यस्मिन्नुदिते तदप्यपयातीत्यर्थः "आत्मारामाश्च मुनयः" इत्यादेः अनुमानप्रकारमाहुः यस्य सम्बन्धीविश्वैकाधिष्ठितत्वेन नित्याव्यभिचारिगुणः सत्त्वाख्यः प्रकाशते सूर्योदयसान्निध्यस्यैवारुणोदय इति येन च त्वदेकप्रकाश्यः स गुणः प्रकाशते वह्निनेव धूम इति अतस्त्वद्वपुषः परमानन्दरूपत्वेन स्वप्रकाशत्वाद्येन प्रकाशो येन च ब्रह्मज्ञानस्यापि तिरोधानं सा त्वदीयस्वप्रकाशता रूपा शक्तिरेव स्यात् ततो बाह्येन जडेन सत्त्वेन न तत्प्रकाशः किन्तु कथञ्चिदनुमानमेव अरुणोदयादिना सूर्योदेरिवेति यथा "मनांस्यासन् प्रसन्नानि साधूनामसुरद्रुहाम्" इत्यादि वक्ष्यते अत एव श्रीविष्णुपुराणादौ —

"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः। स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु ॥
ह्लादिनी सन्धिनी संवित्त्वय्येका सर्वसंस्थितौ। ह्लादतापकरीमिश्रा त्वयि नो गुणवर्जिते" ॥

इत्यादिबहुतरमस्ति। यद्वा तत्राप्येतत्त्वदीयावतारप्रकाशहेतुं विशुद्धसत्त्वविशेषं विना त्वन्माहात्म्यादिज्ञानं नैव स्यादित्याहुः, सत्त्वेनेति। निजं स्वयं भगवतस्तव साक्षात् सम्बन्धित्वात् अत एव त्वन्माहात्म्यादिज्ञानलक्षणं विशिष्टं ज्ञानं मार्जनं निवृत्तिं प्राप कीदृशं तदितरज्ञानमेवाज्ञानं तद्भित्। ननु, स्वयं भगवानेवाहमवतीर्ण इति कुतो ज्ञातं तत्राहुः—गुणेति। गुणस्य श्रीदेवक्यादिप्रभादेः प्रकाशैः। ननु, ममांशत एव तस्य तादृशाः प्रकाशा भवन्तु न विलक्षणत्वादित्याहुः प्रकाशत इति श्रीसङ्कर्षणादितस्तादृशत्वाननुभवादिति भावः ॥ ३५ ॥ ननु, नामरूपे खलु मनोमये एव स्यातां कथं मद्रूपस्य तादृशत्वं वर्ण्यते तत्राहुः गुणादिभिर्ये तव नामरूपे ते निरूपणीये ज्ञेये याथार्थ्येनानुभावनीये न भवत इत्यर्थः। तत्र गुणैर्नामभक्तवत्सल इत्यादि रूपं श्यामसुन्दरादि कर्मभिर्नामश्रीगोवर्द्धनोद्धरण इत्यादि रूपं च वेणुनादनत्रिभङ्गललितेत्यादि जन्मभिर्नामश्रीदेवकीनन्दन इत्यादिरूपं च श्रीमत्स्यादि यद्वा गुणाः शास्त्राभ्यासादयः कर्माणि सदाचाराः यमनियमादीनि वा जन्मानि सद्विप्रकुलोत्पन्नत्वादीनि तैरपि न निरूपणीये यतः मनसा तर्केण वचसा आप्तवाक्येन च अनुमेयमस्तीति निश्चियमेव न त्वनुभवितुं शक्यं वर्त्म गुणकर्मादिलक्षणं प्राप्तिसाधनं यस्य तस्य तव तत्र च हेतुः तस्य पूर्वोक्तबुद्धयादिगुणस्यापि यः साक्षी साक्षाद्दर्शनशक्तिमान् अत एव तेनादृश्यस्तस्य तदगोचरविलक्षणस्वरूपमाधुर्यमयगुणादेरित्यर्थः। वैपरीत्येन वा तयोर्हेतुहेतुमद्भावः अतो गुणादीनामनिरूपणीयत्वात्ते अपि न निरूपणीये इति तथा साक्षिसंबन्धित्वेन तयोरपि तादृशत्वं यदुक्तं तच्च प्रमितमेव परमानन्दकरूपेणाव्यतिरेकेण च विद्वदनुभावात् "तदश्मसारं हृदयं बतेदम्" इत्यादौ रूपं यदेतदवबोधरसोदयेनेत्यारभ्य नातः परं परम यद्भवतः स्वरूपमित्यादौ च क्रियायां नामकीर्त्तनरूपध्यानलक्षणायां सत्यामित्यर्थः। प्रतियन्ति ते नामरूपे स्वरूपमाधुर्यादिना यथावदनुभवन्ति तदुक्तं "भक्त्याहमेकया ग्राह्यः श्रद्धयाऽऽत्मा प्रियः सताम्" इति अन्यत्तैः तत्र भजनीयानि स्मरणाभासादिना यथा कथञ्चिदनुवर्त्तनीयानि ज्ञातुम् अनुभवितुम् अतर्क्यस्वरूपादियाथार्थ्यत्वात् तत्त्वशब्देन नामरूपे अप्यन्तर्भाविते तयोस्तत्प्रकारत्वात् उपासनादीति उपासना मानसी आदिग्रहणाद्बाह्या क्रिया च गृहीतेति ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

३३—त्वदीयास्तु आत्मतत्त्वादिज्ञानाभावेऽपि स्वधर्म्मपरित्यागेऽपि कथञ्चित् पातकापातेऽपि नैव पतन्तीत्याहुः—तथेति। त्वर्थे तावकाः कथञ्चित्त्वदाश्रितास्तु ये, ते सर्व एव क्वचित् कदाचिदपि मार्गादपि किं पुनर्मृग्यात्? तत्र हेतुमाहुः—त्वयीत्यादिना।

अभितो गुप्ता अत एव विघ्नादेर्निर्भयाः सन्तः। माधव ! हे लक्ष्मीकान्तेति तेषां स्वत एव सम्पत्सिद्धिरप्यभिप्रेता; यद्वा, मधुकुलावतीर्णेति परमकारुण्यम्; प्रभो हे सर्वशक्तियुक्तेति प्रभु-प्रभावात्तेषां तद्युक्तमेवेति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, तथा तेन प्रकारेणाशुद्धबुद्धया कामादिना ये तावकास्तेऽपि न भ्रश्यन्ति, किन्तु त्वयि बद्धसौहृदाः सन्तस्त्वयाभिगुप्ता विनायकानीकपमूर्द्धसु विशेषेण चरन्ति, निर्भयत्वेन तानेव महाविघ्नवर्गेशान् विघ्नकरणार्थमागतान् सोपानानीव कृत्वा श्रीवैकुण्ठपदमारोहन्तीत्यर्थः। यद्वा, वीनां पक्षिणां नायका मुख्यास्तेषामनीकं पक्षिराजत्वात् पातीति विनायकानीकपः श्रीगरुडजातीयगरुडभेदस्तस्य मूर्द्धसु, बहुत्वं गौरवाद्विस्तीर्णत्वाद्वा, विचरन्ति श्रीवैकुण्ठलोकप्रयाणार्थमारोहन्तीत्यर्थः। अन्यत् समानम् ॥

३४—स्थितौ पालनार्थम्। तत्प्रकारमेवाहुः—शरीरिणां चराचराशेष-जीवानां श्रेय उपायनमिति वेदादिभिः कृत्वा स्वस्वधर्म्मार्पणेनेत्यर्थः। येन वपुषा हेतुना चतुराश्रमवर्त्ती सर्वोऽपि जनः सम्यगीहते स्वधर्म्मैर्मनःशुद्धेरिति तेषामर्हणसाधनतोक्ता। तत्र चतुराश्रमिणामर्हणसिद्ध्या तत्सम्बन्धिनामन्येषां सर्वेषामेव तत्सिद्धेर्युक्तमेवोक्तं शरीरिणामिति। अन्यत्तैर्व्याख्यातम्। यद्वा, श्रेयसां सर्वार्थानामुप समीप एव अयनं प्राप्तिर्यस्मात्तत्, विशेषतश्च त्वद्भक्तिविस्तारकमित्याहुः—वेदेति। अन्यथा चतुराश्रमिणां त्वद्भक्त्यसिद्धेरित्यर्थः। यद्वा, श्रेयः सर्वमेवोपायनमुपढौकनं समर्प्यं यस्मिन् तत्; कुतः ? येन वपुषा तच्छ्रीमूर्त्यादिना द्वारा वेदादिभिरर्पितैर्जनस्त्वद्भक्तः सन् सर्वोऽप्याश्रमी तवार्हणं समीहते यद्वा, श्रेयः प्रेम वैकुण्ठलोको वा, तस्योपायनं शीघ्रप्रापकम्; कथम् ? तदाहुः-वेदेति स्वधर्म्मार्पणेन श्रीमूर्त्ति–द्वारा तदर्हणसम्पत्त्या श्रेयः सिद्धेरित्यर्थः; अथवा, तावकत्वादिकन्तु सर्वं त्वया सत्त्वगुणे प्रकाशिते सत्येव सिध्येदित्याहुः—सत्त्वमिति; सत्त्वगुणं श्रयतेऽधितिष्ठति प्रकाशयतीत्यर्थः, येन सत्त्वेन शरीरिणां देहाभिमानिनामपि किंवा सर्वजीवानां वपुः श्रेय उपायनं सर्वार्थप्रापकं भवति। कथम् ? तदाहुः—वेदेति। यद्वा, येन च स्वधर्मकृत् सन् सर्वाश्रमी त्वद्भक्तः स्यादित्याहुः—वेदेति। एवं पक्षद्वयेऽपि येनेत्यस्योभयतोऽप्यन्वयः ॥

३५—धातर्हे विविधमूर्त्तिधर ! इदं सर्वोपकारकं सत्त्वात्मकं गुणस्य बुद्ध्यादेः प्रकाशैर्बहुत्वं बुद्ध्यादेस्तद्वृत्तीनां वा बाहुल्यापेक्षया; 'च' काराद्यदाश्रयः। अन्यत्तैर्व्याख्यातम्। यद्वा, त्वच्छ्रीमूर्त्तिसेवयैव साक्षात्कारानन्दः सम्पद्यते, नान्यथेत्याहुः—इदं त्वद्भुनिजमात्मीयं प्रेम्णा सेव्यम्, न चेद्भवति, तर्हि विज्ञानं साक्षात्कारो भाञ्जनं प्रापैव; अज्ञानभित् सर्वाज्ञानविदारकम्; साक्षात्कारे सति सर्वसंशयनिवृत्तेः; यद्वा, तत्राप्येतत्त्वदीयावतारं विना त्वन्माहात्म्यादि-ज्ञानं नैव स्यादित्याहुः,—सत्त्वं नेति। निजं साक्षादवतारत्वाद्विशिष्टं ज्ञानं श्रीभगवत्तद्भक्ति 'तद्भक्तमाहात्म्यादि सम्बन्धि। कथम्भूतम् ? तदितरज्ञानमेवाज्ञानम्, तद्भित् मार्जनं निवृत्ति प्राप। ननु, साक्षादहमवतीर्णोऽस्मीति कुतो ज्ञातम् ? तत्राहुः—गुणस्य श्रीदेवक्याः प्रभावादेः[2], किंवा जगतां गुणस्य तत्तत्स्वभावस्य प्रकाशनैः; तथा च श्रीविष्णुपुराणे (५।२।४)—'ततो ग्रहगणः सम्यक् प्रचचार दिवि द्विज। विष्णोरंशे भुवं याते ऋतवश्चाभवन् शुभाः ॥' इति। ननु स्वत एव तस्यास्तादृशाः प्रकाशाः सन्तु ? नेत्याहुः—प्रकाशत इति, त्वत्सम्बन्धिगुणस्य त्वयैव प्रकाशसिद्धेरित्यर्थः। सत्त्वगुणपक्षे इदं तावकत्वादिसर्व-श्रेयः सात्त्विकं सत्त्वं सत्त्वगुणः, निजं त्वदीयं त्वदधिष्ठितमित्यर्थः। विज्ञानमाञ्जनप्राप्तौ सत्यां किं स्यात् ? तदाहुः—गुणेति। अनुमीयत एव, न तु दृढं विज्ञायत इत्यर्थः। सममन्यत्, अथवा, स सर्वश्रेयः प्रापकमूर्त्तिस्त्वं यदि न भवसि नावतरसीत्यर्थः। निजमस्मदीयं किंवा कस्यचिदपि निजं स्वाधीनमिदं त्वद्भक्त्यादिमाहात्म्यविषयकं विज्ञानं भवेत् किम् ?—काका, अपि तु न भवेदेवेत्यर्थः। कथम्भूतम् ? न ज्ञानेन भिदा तत्त्वज्ञानेन यो भेदाभाव इत्यर्थः, तस्य माञ्जनम्। अन्यत् समानम् ॥

३६—गुणादिभिर्ये नामरूपे, तत्र गुणैर्नाम–भक्तवत्सल इत्यादि, रूपञ्च श्यामसुन्दरादि; कर्म्मभिर्नाम श्रीगोवर्द्धनोद्धरण इत्यादि, रूपं च वेणुवदन–त्रिभंग[3] ललितेत्यादि; जन्मभिर्नाम श्रीदेवकीनन्दन इत्यादि; रूपं श्रीमत्स्यादि। यद्वा, गुणाः शास्त्राभ्यासादयः, कर्म्माणि सदाचारा यमनियमादीनि वा, जन्मानि सद्विप्रकुलोत्पन्नत्वादीनि, तैरपि निरूपयितव्ये न स्याताम्; तयोरुपासनायां सत्यां प्रतियन्ति तयोर्माहात्म्यमनुभवन्ति तत्र विश्वसन्तीति वा, प्रतियन्ति त्वां नामरूपे वा। मनोवचोभ्यामनुमेयमेव, न तु प्राप्यं वर्त्म मार्गोऽपि यस्य, यतस्तस्य मनसो वचसश्च साक्षिणः। एवं नामरूपयोरपि तादृशत्वमभिप्रेतम्; नाम-नामिनो रूप-रूपवतोरभेदात् क्रियायामुपासनकर्म्मणि वर्त्तमानाः। अन्यस्तैर्व्याख्यातम्। यद्वा, निरूपयितुं शक्ये न भवतस्तस्य कृपया साक्षात् स्वयमवतीर्णस्यापि तव। अन्यत् समानम्। अथवा, एवं रूपमाहात्म्यमुक्त्वा प्रसंगान्नाम्नोऽपि तादृशत्वमभिप्रेत्य पूर्वोक्त-रूपतत्त्वमभि[4]-व्यञ्जयन्तो द्वयोरपि माहात्म्यमेकत्राहुः—नेति, निरूपयितव्ये न स्याताम्, प्रत्येकं निर्गुणत्वात् सगुणत्वाच्च। नन्वेकस्यैव निर्गुणत्वं सगुणत्वं च दुर्घटम् ? सत्यम्, उपासका एव तद्बोद्धुं शक्नुवन्ति नान्य इत्याहुः—देवेति, अन्यत्तथैव ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

विनायकानीकपमूर्द्धसु विघ्नसेनापतिशिरस्सु विचरन्ति ॥ ३३ ॥ विशुद्धं रजस्तमोभ्यामननुविद्धं श्रेय उपायनं श्रेयसामाश्रयं येन शुद्धसत्त्वमयं वपुः संश्रयणेन दिव्यविग्रहस्य दुरवबोधत्वमाहुः ॥ ३४ ॥ सत्त्वं न चेदिति विज्ञायतेऽनेनेति विज्ञानं

---

१. श्रीभगवद्भक्ति–(ग, घ, ङ); २. प्रसादेः–(ग, घ)। ३. त्रिभंगि–(ग, घ); ४. तत्त्वमपि (ख.)।

प्रकाशकमित्यर्थः। अनेन स्वरूपतिरोधायकत्रैगुण्यव्यावृत्तिः ध्यातृणामज्ञानकृतदेवादिभेदाभिमानापमार्जनं शुद्धसत्त्वमयं धाम तेजोरूपं ते वपुः जन्तवः एवंभूतं न वदन्ति किन्तु इतरसजातीयमेव मन्वते गुणप्रकाशैः गुणोन्मेषैः गुणकार्यैरनुमीयते कार्यस्य कारणभूत इति ज्ञायते यस्य गुणः गुणप्रपञ्चः प्रकाशते सर्वज्ञोऽसीत्यर्थः ॥ ३५ ॥ न नामरूप इति मनोवचोभ्यां वेदवाक्येन तदनुसारिमनसा अनुमेयस्वभावस्य सर्वसाक्षिणस्तव गुणजन्मकर्मभिः सह नामरूपे न निरूपितव्ये गुणजन्मकर्मसहितेतरसजातीयतया न निरूपणीयानि "जन्म कर्म च मे दिव्यम्" इति वचनात् अथापि वेदक्रियायां प्रतियन्ति अग्नीन्द्रादिनामरूपाणि त्वदीयानीति बुद्ध्या वेदक्रियायां प्रवदन्तीत्यर्थः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

आदृतयुष्मदङ्घ्रीणां तु न कर्हिचिदधःपतनमस्तीति वदन्तः सन्तः स्तुवन्ति—तथा न ते माधव तावक इत्यादिना। हे माधव! ते तावकास्त्वद्भक्तास्तु तथा त्वद्भक्तिरहितवत् क्वचित् कदाचिदपि मार्गादुत्तमजन्मनः न भ्रश्यन्ति नाधःपतन्ति तत्र हेतुं वदन्तस्तान् विशिंषन्ति त्वय्येव बद्धं सौहृदं भक्त्यात्मकं येषां ते न भ्रश्यन्ति किन्तु त्वयाऽभिगुप्ता अभितो रक्षिताः "तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्" इति तदुक्तेरिति भावः। हे प्रभो! विनायकानीकपमूर्द्धसु विघ्नसेनापतिशिरस्सु भयरहिता विचरन्ति जीवद्दशायां विघ्नानुपहतत्वद्भक्तियोगास्ततस्त्वां प्राप्नुवन्तीति भावः ॥ ३३ ॥ यद्यपि सङ्कल्पमात्रपरिकल्पितनिखिलप्रपञ्चस्त्वं संकल्पमात्रेणैव जगत्त्रातुं प्रभुर्नावतारमपेक्षसे तथाप्युपासकानाम् उपासनालम्बनार्थमवतरसीति स्तुवन्ति—सत्त्वमिति। स्थितौ स्थितिः पालनं तस्यां निमित्तभूतायां स्थित्यर्थं भवान् विशुद्धं रजस्तमोभ्यामननुविद्धं सत्त्वं सत्त्वमयं वपुः शरीरं श्रयते बिभर्ति संश्रयणे मुख्यं प्रयोजनं दर्शयंतो वपुर्विशिषन्ति शरीरिणां श्रेय उपायनं श्रेयसे उपेयते "इण् गतौ" गत्यर्था बुद्ध्यर्थाः उपास्यत इत्युपायनं येन वपुषा आलम्बनभूतेनोपलक्षितस्य तव जना वेदक्रियादिभिरर्हणमाराधनं समीहते कुरुते वेदक्रिया वेदपूर्वभागचोदिता क्रिया यज्ञादि क्रिया योगः उत्तरभागचोदितमुपासनं तपस्तदनुग्राहकमनशनादिरूपं समाधिर्वेदक्रियातपोभ्यासानुगृहीतेन योगेन निर्वृत्यं चित्तैकाग्र्यं यदि भवान् वपुर्न संश्रयते तर्ह्याराध्यरूपापरिज्ञानादाराधकास्त्वामाराधितुमप्रभवः स्युः अतो भवानाराधकानुग्रहार्थं वपुः संश्रयत इति भावः ॥ ३४ ॥ तदेव स्पष्टीकुर्वन्तः स्तुवन्ति—सत्त्वं न चेदिति। हे धातः विश्वकारणभूत! इदं विज्ञानं प्रकाशकमज्ञानभिदापमार्जनं ध्यातृणामज्ञानकृतदेवादिभेदाभिमानापमार्जनं शुद्धसत्त्वमयं धाम तेजोरूपं निजमसाधारणं वपुर्न चेत् न भवानाश्रयते चेत्तर्हि यस्य पुंसः येन कारणेन कालकर्मादिरूपेण यो गुणः सत्वाद्यन्यतमः प्रकाशते उन्मिषति तस्य तैर्गुणप्रकाशैर्गुणोन्मेषैर्भवाननुमीयते कार्यस्य कारणभूतः देवमनुष्यादिविलक्षणः न ज्ञायते किन्तु इतरसजातीयतयाऽनुमीयते यदि भवान् वपुराश्रयते तर्हि तद्वपुरसाधारणानि देवमनुष्यादिष्वसंभावितानि गुणचेष्टितानि दृष्ट्वा तैर्देवादिभिर्विजातीयं मन्यमानो ध्यातृवर्गो ध्यायतीति भावः ॥ ३५ ॥ नन्वहमपि देवादिसजातीयवपुष्मानेवेत्यत्राह—न नामरूप इति। मनोवचोभ्यां वचसा वेदवाक्येन तदनुसारेण मनसा चानुमेयस्वभावस्य सर्वसाक्षिणः तव गुणकर्मजन्मभिः सह नामरूपे न निरूपितव्ये गुणकर्मजन्मनामरूपाणि इतरसजातीयतया न निरूपणीयानि "यत्तदद्रेश्यमग्राह्यमस्थूलमनण्वह्रस्वमगोत्रमवर्णमचक्षुरश्रोत्रं, निष्क्रियं निष्कलम् अजायमानः" इत्यादिभिरितरसजातीयानि गुणादीनि प्रतिषिध्य "यः सर्वज्ञः सर्ववित्" परास्य शक्तिर्विविधैव श्रूयते" स्वाभाविकी ज्ञानबलक्रिया च "यस्य चैतत्कर्म स वै वेदितव्यः' बहुधा विजायते" इत्यादिभिर्विलक्षणानामेव गुणादीनां श्रवणात् "जन्म कर्म च मे दिव्यमिति यो वेत्ति तत्त्वतः" इति त्वदुक्तेश्चेति भावः। यद्यपि देवादिविलक्षणगुणकर्मादियुक्तस्तथापि त्वां वेदक्रियायां प्रतियन्ति अग्नीन्द्रादिनामरूपाणि तदन्तरात्मभूतस्य तवैवेति बुद्ध्या त्वद्विशिष्टमपि त्वां वेदावगतयज्ञादिक्रियायां प्रतियन्ति आराध्यं मन्यन्ते ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

समः समाधिः प्रकृत इति नेत्याह–तथा नेति। करावलम्बबाहुल्यात् उत्तमाश्रमान्न भ्रश्यन्तीत्यर्थः। विनायकाः विघ्नाः श्रेयः–प्रतिबन्धिनः तेषामनीकं सेना तत्पतयः विनायकानीकपाः तेषां मूर्द्धसु उपरितनानतिक्रम्य श्रेयस एव यतन्त इत्यर्थः ॥ ३३ ॥ अधुना कस्मिन्नधिष्ठाने स्थितो हरिः पूज्यः कैः साधनैरिति तत्स्पष्टयति–सत्त्वमिति। स्थिताविति सप्तमी चतुर्थ्यर्थे स्थितौ ज्ञानस्थिरीकरणाय भवान् विशुद्धसत्त्वं वपुः रजस्तमोभ्यामस्पृष्टं ब्रह्मादिशरीरं श्रयते विशिनष्टि–शरीरिणामिति। ज्ञानार्थिनां जीवानां श्रेय उपायनं श्रेयस्साधनं जनो येन ब्रह्मादिशरीरे स्थितेन हरिणोपदिष्टमार्गेण वेदादिभिस्त्वदर्हणं पूजां समीहिते करोति अतस्त्वत्प्रसादादवाप्तं ज्ञानमेव स्थितं भवतीत्यर्थः। "विशुद्धसत्त्वं ब्रह्मादेरिति वचनादुक्त एवार्थः ॥ ३४ ॥

ब्रह्मादि देहसन्निहितहरिप्रसादोत्पन्नज्ञानं पुरुषार्थसाधनमित्युक्तं तदनङ्गीकारे बाधकमाह—सत्त्वमिति। भो धातरिदं निजमात्मीयं विज्ञानं विशिष्टं ज्ञानं यस्मात्तथा स्वयं च ज्ञानरूपं सत्त्वं ब्रह्मादिदेहाख्यम् अज्ञानभिदापमार्जनं अज्ञानान्यथाज्ञाननिवर्तकं न भवेच्चेद्यदि तर्हि विमतं ज्ञानं केनचिज्जनितं कार्यत्वात् घटवदिति सत्त्वगुणोत्पन्नज्ञानैर्भवाननुमीयते तदनुमितो न स्यात् यदि न स्यात्तर्हि अगुणो भवान् यस्य कस्य येन केन वा साधनेन प्रकाशते ज्ञायते एतदुक्तं भवति यदि ब्रह्मादिदेह-

सन्निहितश्रीनारायणप्रसादात् यज्ज्ञानमज्ञाननिवर्त्तकत्वेन श्रेयःसाधनं न स्यात्तर्हि तज्ज्ञानाभावेन तद्विषये लिङ्गस्थानं न स्यात् यद्यदि न स्यात्तर्हि त्वज्ज्ञानाभावेन त्वत्पूजाविधानं न स्यात् तन्न स्याद्यदि जगदान्ध्यं स्यात् न चेदनुपपन्नं "कश्चिन्मां वेत्ति तत्त्वतः' प्रियो हि ज्ञानिनोऽत्यर्थम्" इत्यादि वाक्यप्रामाण्यान्यथानुपपत्त्या त्वज्ज्ञानमज्ञाननिवर्त्तकत्वेन पुरुषार्थसाधनं भवतीति सिद्धं, तदुक्तं "सत्त्वं ब्रह्मादिदेहाख्यम्" इत्यादिकमस्मिन्नर्थे मानं यद्वा धातृदेहसन्निहितत्वाद्धातरिति सम्बुद्धिः हरे ! यो भवान् गुणप्रकाशैरनुमीयते अत्र सन्निहितहरिप्रसादादिदं ज्ञानमभूत्तस्मादत्र हरिः सन्निहित इति तस्य तवेदं सत्त्वं निजं नित्यसन्निधानयोग्यं न भवेच्चेत्तर्हि तत उत्पन्नमज्ञानभिद्विज्ञानं मार्जनं स्वरूपतो नाशमाप यद्येवं तर्हि गुणो ज्ञानानन्दादिगुणपूर्णो भवान् यस्य येन वा प्रकाशते न कस्याप्याविर्भूतो न भवति । साधनसामग्र्यभावात् यद्वा, यस्य तव गुणोऽनुग्रहलक्षणः प्रकाशते येन त्वया गुणो वा प्रकाश्यते यश्च भवान् गुणप्रकाशैरनुमीयते तस्य तवेदं सत्त्वं ब्रह्माद्यन्यतमाप्रधृष्यम्वलं निजं न भवेच्चेत्तर्ह्यज्ञानभिदामापयतीत्यज्ञानभिदाप्विज्ञानमार्जनम्वरादिनाऽऽपादितम्भवति न तत्त्वौत्पत्तिकमतोऽप्रतिमन्तव सत्त्वमित्यर्थः । इति गुणप्रकाशैरिन्द्रियज्ञानैः एतदर्थद्वयं सिद्धान्ताविरुद्धत्वादाचार्यचित्ताव्याकृताकाशान्तर्गतमिति ज्ञातव्यं श्रोतुर्मतिमवेक्ष्य नोद्गलितमिदमिति ॥ ३५ ॥ गुणप्रकाशैः तव सद्भावानुमानं यथा तथा तव नामरूपानुमानेनापि त्वत्सद्भावज्ञानं किं न स्यादत्राह—न नामेति । त्वन्नामरूपाभ्यां त्वत्सद्भावज्ञानसम्भवात् किमायाससाध्येन परिशेषप्रमाणेनेत्यतो वात्राह, न नामेति । "शुक्लभास्वरं तेजः" इति गुणेन कपीटयोनिरग्निरिति जन्मना दहनोऽग्निरिति कर्मणा यथाग्निर्निरूप्यते तथा तव नामरूपे न निरूपितव्ये निरूपयितुमशक्ये लोकप्रसिद्ध्यभावात् अप्राकृतत्वासत्त्वाद्यभावात् अक्लिष्टकारित्वान्नित्यत्वात् न च नामादिकं मिथ्येत्याह, तस्येति । तस्य नामादेः साक्षिणः साक्षाद्द्रष्टुर्न हीश्वरज्ञानगोचरस्य मिथ्यात्वं वक्तुं युक्तं तथा सति सर्वत्रानाश्वासप्रसङ्गः स्यात्तस्मात् "वाचारम्भणं विकारः" इति श्रुत्यवष्टम्भेन नामरूपयोर्मिथ्यात्वेन हरेस्ते नस्त इति न वक्तव्यं किन्त्वलौकिकार्थसन्नाम्नां तद्वाच्यरूपाणां वाऽनन्तत्वादनामादिकथनमिति ज्ञानिमनसा चानुमेयानि नामरूपाणि सन्ति "सर्वनामा सर्वकर्मा रुक्मवर्णं कर्तारमीशम्" इत्यादि श्रुतेरित्याशयेनाह, मनोवचोभ्यामिति । यद्ययमनामा स्यात्तर्हि शब्दावाच्यः स्यात् न च तथा अहमेवेत्यादिश्रुतेरित्यादि ननु, ज्ञानाभावान्नास्त्येव नामादिकमिति तत्राह, प्रतियन्तीति अथापि यद्यप्यनन्तत्वाज्ज्ञातुमशक्यानि तथापि प्रतियन्ति जानन्ति ज्ञानिन इति शेषः । तज्ज्ञानं च न स्वनियतमित्याह, देवेति । देवस्य सर्वत्र द्योतमानस्य हरेः क्रियायाः प्रेरणालक्षणायाः श्रीनारायणप्रसादादित्यर्थः । लोकसिद्धार्थनाम्नः स इत्यारभ्य जानन्ति परमर्षय इत्यन्तमाचार्योक्तेरुक्तार्थसिद्धिरिति अस्तु नामरूपप्रसिद्धिः ततः किं तत्राह हीति हिशब्दो हेतौ ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तथा ॥ ३३ ॥ तस्मै इत्यादि व्याख्यायां सत्त्वमिति द्वयम् ॥ ३४ ॥ अत्र सत्त्वशब्दस्य साक्षात्तदाविर्भावे श्रीवसुदेवदेवक्यावेव तात्पर्यतोऽवगते श्रीवसुदेवाद्याख्यं सत्त्वं वपुरित्यादि योऽयं तदेव रूपप्रसङ्गेन नाम्नोऽपि स्वप्रकाशत्वमाहुः ॥ ३५ ॥ न नामेति पूर्वोक्तगुणस्य साक्षिणः तथापि क्रियायां श्रवणकीर्त्तनादिलक्षणायां भक्तौ प्रतिपत्तिभक्तौ जातायां स्वशक्त्यैव ते प्रकाशते इत्यर्थः "तदश्मसारं हृदयं बतेदम्" इत्यादेः "नाहं प्रकाशः सर्वस्य" इत्यादेश्च तस्मात्तदुपासक एव तत्र तत्राविष्टचित्तो भवति भवाय च न कल्पते नान्य इत्याहुः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

स त्वं न तदित्यादि । हे धातः ! इदं तव वपुः स त्वं स भवान् इदं वपुः । कीदृशम् ? चेत् चेतयतीति तथा चैतन्यमित्यर्थः । निजं स्वाभाविकं न ? अपि तु भवत्येव । कीदृशम् ? विज्ञानं तत्स्वरूपम् , अज्ञानभिदयोरपमार्जनम् । यद्वा, अज्ञानभित् मार्जनं शोभाया अर्जनमाप ॥ ३६–३७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

ननु, ज्ञानिन एव केवलं किमीत्याक्षिप्यन्ते भरतेन्द्रद्युम्नचित्रकेत्वादिदृष्ट्या भक्ता अप्याक्षिप्यन्तामित्यत आहुः—तथेति । यथा विमुक्तमानिनोऽधःपतन्ति तथा तावका मार्गात् भक्तियोगान्न भ्रश्यन्ति किमुत मृग्यास्त्वत्त इत्यर्थः । यदि वा भ्रश्यन्ति तदापि त्वयि बद्धसौहृदा एव भवन्ति चित्रकेतुभरतेन्द्रद्युम्नादीनां भ्रंशे सति वृत्रादित्वे प्रेम्णः शतगुणीभावदर्शनात् भक्तानां भ्रंशोऽपि प्रेमाधिक्यहेतुरेव दृष्टः । यद्वा तथा न भ्रंश्यन्ति यतो भ्रष्टत्वेपि त्वयि बद्धसौहृदाः "न मे भक्तः प्रणश्यति" इति प्रतिज्ञातवता ममोपकरिष्यतैव मत्प्रभुणा ममाऽयं भ्रंशः कृत इति त्वयि दृढविश्वस्तमतयः ततश्चाभितस्त्वया रक्षिता विनायकानां विघ्नकारिणाम् अनीकानि स्तोमाः तानि पान्ति ये तेषामपि मूर्द्धसु विचरन्ति तानभिभवन्तीत्यर्थः । यद्वा त्वच्चरणांस्तेपि भक्त्या स्वमूर्द्धसु धारयन्तीत्यर्थः ॥ ३३ ॥ तदेवं बिभर्षि रुपाणीत्यनेन शुद्धसत्त्वात्मकशरीराणां चराचरलोके प्राकट्यमुक्तं क्षेमायेति तत् प्रयोजनं क्षेमं च भक्तेः कैवल्यं त्वय्यंबुजाक्षेति चतुर्भिर्विवृतं तन्मध्य एव येन्येरविन्दाक्षेत्यनेन भक्तेर्गुणभावश्च मोक्षफलको

भगवच्चरणादरे सति ध्वनितः इदानीं भक्तेः प्राधान्यमपि प्रयोजनं शुद्धसत्त्वात्मकवपुः प्राकट्यस्येत्याहुः सत्त्वमिति विशुद्धं मायातीतं सत्त्वं चिन्मयं वपुर्भवान् श्रयते कीदृशं स्थितौ पालनसमये श्रेयसाम् उप आधिक्येन अयनं प्राप्तिर्यतस्तत् श्रेय एवाहुः वेदादिभिश्चतुर्भिश्चतुराश्रमधर्मैः सह अर्हणम् ईहते येन वपुषेति वपुषोऽनाश्रयणेऽर्हणासिद्धेः ॥ ३४ ॥ ननु, केचिद्दार्शनिका मद्वपुः प्राकृतसत्त्वमयमेव मन्यन्ते तत्राहुः—सत्त्वमिति। हे धातः! इदमिति तर्जन्या गर्भं लक्षीकुर्वन्ति तव वपुरिदं निजं सत्त्वं शुद्धं सत्त्वं न भवेच्चेत् किन्तु प्राकृतमेव सत्त्वं भवेत् तदा विज्ञानं तथाभूतत्वेन सतामनुभवः मार्जनं लोपम् आप प्राप्तं महदनुभव एवात्र प्रमाणमित्यर्थः। विज्ञानं कीदृशम् अज्ञानभित् अज्ञाननिवर्तकमिति त्वद्वपुषो विशुद्धसत्त्वत्वेन विज्ञानमात्रादेव संसारो निवर्तत इति तादृशविज्ञानस्याप्रामाण्यं नाशङ्क्यमिति भावः। न तस्य कल्पितत्वमाशङ्कनीयमिति भावः। किञ्चात्र प्रमाणान्तरमप्यस्तीत्याहुः गुणप्रकाशैर्गुणस्य अतितेजस्वित्वादस्मदादिसर्वमनःप्रसादकत्वप्रेमप्रदत्वादेः प्रकाशैरेव इदं वपुर्भवानेव न मायेत्यनुमीयते सम्प्रत्यस्माभिरपीत्यर्थः। तथाहि यस्य च यस्यैव गुणः प्रकाशते चिन्मयत्वात् न प्रकृतेर्जाड्यात् प्रकाशोऽपि प्रयोजकसापेक्षत्वाच्च येन वा शुद्धसत्त्वत्वेनैव हेतुना प्रकाशते न तु प्राकृतत्वेन अत एव वक्ष्यते "यस्यावतारा ज्ञायन्ते शरीरेष्वशरीरिणः। तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसङ्गतैः" इति यद्वा इदं निजं सत्त्वं शुद्धसत्वात्मकं तव वपुः न भवेत् नाविर्भवेच्चेत् तदा अज्ञानभित् विज्ञानमपरोक्षानुभवो मार्जनम् आप नाशमेव प्राप्नुयादित्यर्थः। किन्तु तदा गुणानां बुद्ध्यादीनां प्रकाशैर्भवान् अनुमीयते केवलमनुमीयत एव अनुमानप्रकारमाहुः यस्य गुणः प्रकाशते येन वा बुद्ध्यधिष्ठात्रा हेतुना बाह्यो गुणः प्रकाशते स ईश्वर इति ॥ ३५ ॥ न केवलमेतद्रूपमेव ते विशुद्धसत्त्वात्मकमपि तु एतस्य वाचकं नामापि ते च नामरूपे भक्त्यैवानुभवितुं शक्ये नान्यथेत्याहुः—नेति। गुणैः श्यामसुन्दरकृपार्द्रलोचनेति कर्मभिः गोवर्द्धनोद्धरणत्रिभङ्गललितेति जन्मभिर्नन्दनन्दनवसुदेवनन्दनेति ये तव नामरूपे ते यद्यपि यथा कथञ्चिद्वाच्यध्येये भवतस्तदपि साक्षिणो विषयद्रष्टुर्जीवस्य निरूपितव्ये साक्षादनुभवनीयमाधुर्ये न भवतः तयोर्माधुर्योऽननुभव एव तदननुभवः यथा पित्तदूषितरसनजनेन चर्वितस्यापि मत्स्यण्डिकाखण्डस्य स्वादालाभादननुभव एव एवं च भक्तिरहितजीवकर्तृकानुभवाशक्तेरेव हेतोर्नामरूपयोर्द्वयोरपि विशुद्धसत्त्वात्मकमवगतमिति भावः। यद्वा साक्षिण इति तवेत्यस्य विशेषणनामरूपयोः स्वरूपभूतत्वात् न हि साक्षिणः स्वरूपं साक्षात् ज्ञातुं शक्नुवन्तीति भावः। हे देव! अथापि क्रियायां त्वदीयश्रवणकीर्तनादिभक्तौ सत्यां प्रतियन्ति नामरूपे साक्षादनुभवन्ति च तेषामनुभवस्त्वन्यैरनुमानज्ञेय इत्याहुः मनसा क्षान्तिमानशून्यत्वादिलिङ्गेन वचसा "मनोऽरविन्दाक्ष! दिदृक्षते त्वाम्" इत्याद्यनुरागव्यञ्जकवाक्येन अनुमेयं वर्त्म प्रेमभक्तियोगो यस्य तस्य ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ये तथा न पूर्ववदन्ये न स्युः हे माधव! ते तावकाः सर्वस्य भवदात्मकत्वमवगम्य त्वदात्मकभावयुक्ताः अत एव त्वयि बद्धसौहृदाः अतः क्वचित्कदाचिदपि मार्गात् श्रेयःसाधनात् भ्रश्यन्ति किम्? न कदाचिदपि भ्रश्यन्तीत्यर्थः। अधःपतनस्य तु का शङ्का मार्गव्यतिचारमपि न कुर्वन्तीत्यर्थः। किञ्च अन्येषां ये विनायकाः विघ्नहेतवस्तेषामनीकानि पान्ति ये तन्मूर्द्धसु निर्भया विचरन्ति ॥ ३३ ॥ अखिलसत्त्वधाम्नीति बहुव्रीहिना अन्यत्वोक्तेः स्वरूपविलक्षणं स्वस्वरूपवन्नित्यं पूर्णञ्च आनन्दरूपममृतं यद्विभाति "आदित्यवर्णं तमसः परस्ताद्धिरण्यकेशः हिरण्यश्मश्रु आप्रणखात्सुवर्णः" यादात्मको भगवांस्तदात्मिका व्यक्तिः किमात्मको भगवान् ज्ञानात्मक ऐश्वर्यात्मकः "तमेकं गोविन्दं सच्चिदानन्दविग्रहम्" इत्यादिश्रुतिगणगीतं भगवतो वपुर्दर्शितं तदेव सर्वधर्मफलदत्वेन सर्वाश्रमपूज्यत्वेन च प्रतिपादयन्ति— सत्त्वमिति। प्रकृतिगुणेऽतिव्याप्तिवारणायाहुः— विशुद्धं कार्यकारणरूपप्रकृतिविलक्षणं वपुः भवान् श्रयते कथम्भूतं? श्रेय उपायनं सर्वपुरुषार्थदात् येन वपुषा जनः तत्तत्पुरुषार्थकामः तव परममङ्गलमूर्तेरर्हणमाराधनं सम्यगीहते करोति कैः वेदे ये क्रियायोगतपःशमादयः वेदप्रमाणकचतुराश्रमधर्मास्तैः तत्र क्रियोपनयनपूर्वकवेदवेदार्थधारणानुरूपो ब्रह्मचारिधर्मः योगः कर्मयोगो गृहीधर्मः तपोऽत्र वनिधर्मः समाधिः नैष्ठिकयतिसाधारणः आश्रमधर्मः वर्णधर्मोपलक्षकः ॥ ३४ ॥ येऽन्ये इति द्वाभ्याम्। ब्रह्मात्मकत्वाभिमानोऽभयत्वहेतुरित्युक्तं तत्र यदुपेक्षयाऽधः पातो यदाश्रयणेनाभयत्वं वा स्यात्स सर्वात्मा नास्तीति शङ्कां यच्चोक्तं वेदक्रियायोगतपःसमाधिभिरित्यत्र यदाराधनार्थानां क्रियादीनां वेदप्रमाणकत्वं स किमनुमानादिप्रमाणगम्य इति शङ्कां च निराकुर्वन्ति— सत्त्वमिति। सः उक्तप्रकारस्त्वं न भवेच्चेत्तदा इदं प्रत्यक्षप्रमाणगम्यं विचित्रं जगदपि न भवेत् कारणाभावे कार्याभावात् किञ्च विज्ञायते सर्वं सर्वैः स्वपक्षपरपक्षगैर्येन तद्विज्ञानम् अज्ञानेन भिदा नानाप्रकारो यो भेदः स्वस्य परमेश्वरात्स्वात्स्वातंत्र्येण पृथगवस्थानरूपः परमेश्वरात्पृथक्प्रधानकालकर्मादीनां जगत्कारणभेदः परमेश्वरस्य तव समत्वेन देवतान्तरभेदः इत्येवं नानाप्रकारस्तस्यापमार्जनं निवर्तकं वेद लक्षणं शास्त्रं च न स्यात् प्रवर्तकाभावे प्रवर्त्याभावात् येन शास्त्रेणैव बोधकेन गुणप्रकाशैः सर्वात्मत्वसर्वशक्तित्वसर्वकारणत्वसत्यत्वानन्दत्वसौन्दर्यमाधुर्यत्वादिभवद्गुणवर्णनैः भवान् प्रकाशते अधिकारिहृदीति शेषः "सर्वे वेदा यत्पदमामनन्ति' वेदैश्च सर्वैरहमेव वेद्यः" इति श्रुतिस्मृतिभ्यां भगवतोऽन्यप्रमाणागोचरत्वं कैमुत्तिकन्यायेन दर्शयन्ति यस्य भवत एकोपि गुणः नानुमीयते इत्यनुषङ्गः स भवान्नानुमीयते इति किं वक्तव्यम् "नेन्द्रियाणि नानुमानम्' इति श्रुतेः चकारात् यत्कृतः अनन्तकोटिब्रह्माण्डात्मकः संसारो नानुमीयते तत्कर्त्ता मानुमीयते इति

किं वक्तव्यं विस्तरस्तु वेदान्तकौस्तुभादिषु पूर्वैः कृतः ।। ३५ ।। एवं सङ्क्षेपतः स्तुत्वा साकल्येन तव नामरूपवर्णनं तु न कर्तुं शक्यमित्याहुः– नेति । श्रुतिनिर्णीतस्वरूपगुणादिविशेषशुश्रूषुणा मुमुक्षुणा “योऽयं जिघ्राणीति स आत्मा कतमः” इत्येवं गन्धग्राहकतया सामान्यतोऽनुमेयं वर्त्म यस्य जीवात्मनः स्वदृश्यस्य साक्षिणः साक्षाद्द्रष्टुस्तव नामरूपे गुणादिभिर्न निरूपितव्ये न निरूपणार्हे भगवद्दृश्यभूतो जीवः स्वगुणादिभिः स्वद्रष्टुर्नामरूपयोर्निरूपणं नैव कुर्यादित्यर्थः । अथापि देवस्य तव क्रियायामाराधने प्रतियन्ति हि हेतौ तव कृपातः साक्षात् पश्यन्ति ।। ३६ ।।

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

हे धातर्जगद्धारक विष्णो । इदं निजं स्वकीयं सत्त्वं ब्रह्मादि देहाख्यः सत्त्वगुणः । सात्त्विकब्रह्मादि शरीरमिति यावत् । यस्य चेति च शब्दो येन वेति वा शब्द इत्येतौ परस्परसमुच्चयौ । अज्ञानभिदापमार्जनमज्ञानमिथ्याज्ञाननिवर्तकं च विज्ञानं विशिष्टः सर्वोत्तम इति ज्ञानकारणं च यदि । न स्यादिति यावत् । तर्हि येन केनाधिकारिणा यस्य कस्य सधनस्य सकाशाद्भवान्सर्वोत्तम इति । प्रकाशते प्रकाशेत ज्ञायेत न केनापि न कस्य साधनस्य सकाशाज्ज्ञायेत । मत्सर्वोत्तमत्वज्ञानमनुमानेन भवतीत्याशंकापरिहारायोक्तम् ।। गुणप्रकाशैरनुमीयते भवानिति । गुणप्रकाशैः पूर्णज्ञानानंदादि गुणानां ज्ञानैर्ज्ञातैः । पूर्णज्ञानानंदादि गुणैरिति यावत् । भवान्सर्वोत्तम इत्यनुमीयते । अनेन विष्णुः पूर्णज्ञानानंदादिमानिति ज्ञानं विष्णुसर्वोत्तमत्वानुमितेरयोगात्पूर्णज्ञानानंदादि ज्ञानार्थं विष्णुरपेक्षित एवेति विष्णुरेव विष्णुसर्वोत्तमत्वज्ञानकारणत्वमित्युक्तं भवति । अन्यत्राविद्यमानं सर्वोत्तमत्वं मम कुत इत्यत उक्तम् ।। अगुण इति । यतो भगवान्नराणः सत्त्वादिगुणरहितोऽतः सर्वोत्तम इति ।। ता० अर्थः ।। ब्रह्मादिदेहाख्यं सत्त्वं सत्त्वगुणः सात्त्विको ब्रह्मादि स्थितो विष्णुरिति यावत् । तमोनुदमज्ञानमिथ्याज्ञाननिवृत्तिकारणं ज्ञानरूपं ज्ञानं विष्णुसर्वोत्तमत्वज्ञानं रूपयति निरूपयतीति ज्ञानरूपं विष्णुसर्वोत्तमत्वज्ञानकारणं यदि न स्यात् । तदा तर्हि विभुर्विष्णुः परः सर्वोत्तम इति तस्य जिज्ञासुभिः कथं ज्ञायेत न कथमपि । विष्णुसर्वोत्तमत्वज्ञानमनुमानेन भविष्यतीत्यत आह ।। सत्त्वप्रकाशानुमित इति । अधोक्षजो विष्णुः सत्त्वप्रकाशानुमितः सत्त्वस्य साधुत्वस्य । गुणपूर्णत्वस्येति यावत् । प्रकाशेन ज्ञानेनानुमितः सर्वोत्तम इत्यनुमितो भवति । अतो गुणपूर्णत्वज्ञानार्थं विष्णुरपेक्षितः । गुणपूर्णत्वज्ञानार्थं विष्णुरपेक्षित इत्यनंगीकारे बाधकमाह ।। यदीति । विष्णुः स्वगुणपूर्णत्वज्ञानकारणं यदि न स्यात्तर्हि गुणपूर्णत्वज्ञानं कस्य साधनस्य सकाशात्स्यात् । न कस्यापि साधनस्य सकाशात्स्यात् । विष्णुसर्वोत्तमत्वज्ञानाभावे बाधकमाह ।। कथमिति । यदि विष्णुः सर्वोत्तम इति ज्ञातो न स्यात्तर्हि विद्वज्जना अमुं विष्णुं कथमर्चयंत्यर्चयेयुः । विष्णुसर्वोत्तमत्वसंभावकमाह ।। निर्गुणत्वादिति । विभुर्विष्णुर्निर्गुणत्वात्सत्त्वादिगुणरहितत्वात्परः सर्वोत्तम इति ।। ३६ ।।

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

सत्त्वं विशुद्धमिति श्लोके भगवान् स्थितौ जगत्पालनाय विशुद्धं सत्त्वं केवलप्राकृतसत्त्वगुणात्मकं वपुः शरीरं श्रयते प्राप्नोति । येन केवलसत्त्वशरीरेण युक्तस्य तवार्हणं जनो वेदक्रियादिभिः समीहते करोतीति जगत्पालकविष्णुशरीरस्य प्रकृतिजसत्त्वगुणविकारात्मकत्वमुच्यत इत्यन्यथाप्रतीतिनिरासाय प्रमाणेनैव तत्तात्पर्यार्थमाह ।। विशुद्धसत्त्वमिति । सप्तसु प्रथमेति सूत्राद्विशुद्धसत्त्वमिति प्रथमा सप्तम्यर्थे । तच्छब्दो यच्छब्दमपेक्षते । यो हरिर्विशुद्धसत्त्वे विशुद्धसत्त्वाख्ये ब्रह्मादेः शरीरे संस्थितस्तं हरिं तेषामादेशमार्गेण ब्रह्मादीनां शरीरे स्थितहर्युपदिष्टमार्गेण वेदाद्यैरर्चयन्ति । विद्वज्जना इति शेषः । आद्यपदेन भागवतस्थक्रियायोगादयो ग्राह्याः । तेषामादेशमार्गेणेत्यनेन भागवतस्थयेनेतिपदं विष्णुवाचकं न तु यच्छब्दरूपम् । अकयप्रविसंभूयसखहा विष्णुवाचका इत्यभिधानादित्युक्तं भवति । अनेन भागवते वपुरित्यत्र ब्रह्मादेरिति शेषः पूरणीय इत्युक्तं भवति । भागवतस्थयेनेतिपदव्याख्यानरूपेण तेषामादेशमार्गेणेति प्रमाणवाक्येनार्थोदुपदेशेन ज्ञानं ज्ञानादज्ञाननिवृत्तिरज्ञाननिवृत्त्या विज्ञानं विज्ञानाद्भगवदर्चनसमर्पणाद्भगवत्तत्त्वज्ञानमित्युक्तं भवति । इदमेव प्रमेयं विपक्षे बाधकेन दृढीकर्तुं सत्त्वं न चेद्धातरिदं निजं भवेदिति श्लोकः प्रवृत्तः । तत्र हे धातः परमेश्वर । इदं सत्त्वं सत्त्वगुणं निजं चेतनस्वरूपं न चेद्भवेत्तर्हि विज्ञानं सत्त्वात्संजायते ज्ञानमिति गीतातात्पर्यप्रमाणात्सत्त्वकार्यविज्ञानमज्ञानभिदापमार्जनं भवेत् । भेदादिप्रपंचोपादानस्याज्ञानस्य भेदादिप्रपंचस्य चापमार्जनं निवर्तकं भवेत् । स्वरूपभूतज्ञानस्याज्ञानतदुपादानप्रपंचनिवर्तकत्वाभावाद्यदाऽज्ञानभिदापमार्जनं भवति तदा भवात्कस्य ज्ञानिनः केन हेतुना गुणप्रकाशैः प्रकाशरूपा इति प्रकाशा गुणाश्च ते प्रकाशाश्च तैरज्ञानिनां प्रतीयमानसार्वज्ञ्यादिगुणैरनुसृत्य । युक्तत्वेनेति यावत् । मीयते ज्ञायते । प्रकाशते प्रत्यक्षेण चकाश्यते ज्ञायते न कस्यापि ज्ञानिपुरुषस्य केनापि हेतुना । कुतः । यतस्त्वमगुणः पारमार्थिकसार्वज्ञ्यादिगुणरहित इति भेदादिप्रपंचस्य सार्वज्ञादिभगवद्गुणानां च ज्ञाननिवर्त्यत्वमुच्यत इत्यन्यथाप्रतीतेर्विवक्षितोऽर्थश्च न प्रतीयतेऽतः प्रमाणेनैव तत्तात्पर्यार्थमाह ।। सत्त्वं ब्रह्मादिदेहाख्यमित्यादिना । यदिशब्दस्य तदाशब्दस्य नकारस्य स्याच्छब्दस्य कथंशब्दस्य चावृत्त्या योजना कर्तव्या । सत्त्वं सत्त्वशब्दवाच्यं ब्रह्मादिदेहाख्यं वस्तु ज्ञानं रूपयति निरूपयत्युपदेशेन जनयतीति ज्ञानरूपं ज्ञानजनकं यदि न स्यात्तदा तमोनुदमज्ञाननिवर्तकं कथं स्यान्न कथमपि । यद्यज्ञाननिवर्तकं न स्यात्तदा विभुर्हरिः सत्त्वप्रकाशानुमितः सत्त्वगुणजन्यप्रकाशमनु अनुसृत्यानुमितो ज्ञातः कथं स्यान्न कथमपि । यदा हरिविषयकाज्ञाननिवृत्तिर्नास्ति तदा तत्र जीवे ज्ञानाद्याधिक्यानु-

सारेण विशेषेण संनिहितो हरिर्ज्ञातो न भवति । अज्ञानावरणस्य विद्यमानत्वात् । यदि परः सर्वोत्तमो विष्णुस्तत्र तत्र संनिहितत्वेन ज्ञातो न स्यात्तस्याविद्वज्जना अमुं सर्वोत्तमं विष्णुं तत्र तत्र कथमर्चयंति । अर्चयेयुः । न हि यस्य यज्ज्ञानमेव नास्ति तदर्चनं न संभवति । यदि हरिं नार्चयेयुस्तदा तत्वस्य स्वतंत्रतत्वस्य हरेर्जिज्ञासुभिर्ज्ञानेच्छुभिः पुरुषैर्हरिः कथं ज्ञायते । न कथमपि । नन्वर्चनाभावेऽपि तत्वजिज्ञासुभिर्हरिः कुतो न ज्ञायत इत्यत आह ।। कस्यापीति । षष्ठी तृतीयार्थे । नेत्यनुवर्तते । केनापि पुरुषेण हरिर्नज्ञायेत न ज्ञायते । यत इति शेषः । अतोनार्चनजन्यहरिप्रसादं विना हरेर्ज्ञानाभावे हरेर्नित्याव्यक्तत्वं हेतुरुक्तः । नित्याव्यक्तत्वादर्चनाभिव्यक्तप्रसादं विना हरिर्न ज्ञायत इत्यस्मिन्नर्थे तदव्यक्तमाह हीत्यारभ्यानंतेन तथा हि लिंगमित्यंत ब्रह्मसूत्रभाष्योदाहृतश्रुत्यादिकमेव प्रमाणं ज्ञातव्यम् । ननु हरेर्नित्याव्यक्तत्वमेव कुत इत्यत आह ।। निर्गुणत्वादिति । अनेन हरिर्नित्याव्यक्तो भवितुमर्हति प्राकृतसत्वादिगुणत्रयातीतत्वाद्व्यतिरेकेण जीववत् । लक्ष्म्या अपि गुणत्रयाभिमानित्वेन गुणत्रयातीतत्वाभावान्न व्यभिचारः । निर्गुणत्वेऽधोक्षजः पर इति हेतुद्वयम् । अधोक्षजशब्दोऽनुमानस्योपलक्षकः । अधःकृतोऽक्षजादिर्येन स तथा । प्रत्यक्षानुमानाविषय इत्यर्थः । अनेनेंद्रियाणि नानुमानं वेदा ह्यवैनं वेदयंतीति श्रुतिमर्थत उपादत्ते । अनेन सदागमैकविज्ञेयत्वमुक्तं भवति । परः सर्वोत्कृष्टः । सदागमैकविज्ञेयत्वात्सर्वोत्कृष्टत्वाद्धरिर्निर्गुणः । यः सगुणो जीवादिः स सदागमैकविज्ञेयो न भवति सर्वोत्कृष्टश्च न भवति । ननु विष्णोः सर्वोत्कृष्टत्वमेव कुत इत्यत उक्तम् । विभुरिति । विविधं जगद्भावयत्युत्पादयति सत्तादियुक्तं करोतीति विभुः । अनेन हरेर्जगन्नियामकत्वमुक्तम् । तेन यदि नाम परो न भवेत्स हरिः कथमस्य वशे जगदेतदभूदित्यादितर्को विपक्षे बाधकः सूचितः । अत्र तात्पर्यं यदि न स्याद्यदि न स्यादिति द्विवारोक्त्या सत्वं न चेद्धातरिदमिति श्लोके न चेद्भवेदिति पदत्रयस्यावृत्त्या योजना कर्तव्येति सूचितं भवति ।। ३५–३६ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यदन्येषां दशाऽन्यरूपस्तत्प्रतियोगिनस्त्वद्दयायोगिन एवमित्यावेदयति ।। तथेति । हे माधव प्रभो तावकाः षष्ठादौ गतम् । त्वत्सम्बन्धिन एते तथा त इव त्वयाऽभिगुप्तास्त्वयि बद्धसौहृदा मार्गात्सतः क्वचिदपि न भ्रश्यन्ति भ्रष्टा न भवन्ति । निर्भया अतीतभीतयो विनायकानीकपमूर्धसु विनायको गणेशस्तस्यानीकानि सेना विघ्नास्तानि पान्तीत्यनीकपा महाप्रत्यूहास्तेषां मूर्धानः शिरांसि तेषु विचरन्ति घनान्विघ्नानपि ते घ्नन्तीत्याशयः । आनते त्वयीत्यप्यन्वयः । सर्वजननमस्कृत इत्यर्थः ।। ३४ ।। सत्वं विशुद्धं श्रयते भवान्स्थितौ वपुरिति श्लोकेऽतीतश्लोकेऽन्यत्रापि सदा सर्वगुणाढ्यत्वादित्यादिव्याकरणप्रकारेण भगवद्वाचकत्वेऽङ्गीकृते तवार्हणं येनेति न वक्तव्यं स्यात्तथा शुद्धसत्वगुणात्मकं वपुराश्रयत इत्यपि ज्ञानानन्दतनुमत्वाद्बाधितमित्यतोऽत्र युक्तं सत्वशब्दार्थं मानेनाह ।। विशुद्धेति । सुविशुद्धसत्वे सत्वसत्वसत्वप्रचुरादित्वेन ब्रह्मादेः शरीरे यो हरिः स्थितस्तेषां ब्रह्मादीनां शरीरस्य भगवदादेशेन एष आदेश एष उपदेशस्तन्मार्गेण वेदाद्यैस्तदुपदिष्टैर्यैऽर्चयन्ति । अर्चयो ज्ञानिनो तद्वादाचरन्ति तद्बहुल्यात्सत्वेन व्यपदेशः । अग्ने भ्राजस्यर्चेय इत्यादेरर्चिन्शब्दपर्यायोऽयमर्चिशब्दः । इनिस्विदन्तोऽप्यस्तीति भानुः । ते ज्ञानिनोऽर्चयन्ति पूजयन्ति ।। अथ श्लोकार्थः ।। कुत्र तिष्ठति किं साधनेऽनुष्ठिते भगवांस्तुष्टः स्यादिति किमुपदेशेन जायमानमानवसभाजनीयो जनार्दन इत्यत आह ।। सत्वमिति । भवान्विशुद्धं सत्वं ब्रह्मादेर्वपुर्देहं शरीरिणां ज्ञानादिप्राप्तियोग्यतावत्प्रशस्तशरीरवतां श्रेय उपायनं श्रेयसामधिकाश्रयं स्थितौ । तादर्थ्ये सप्तमी । प्राप्तप्रतिपत्स्थिरतायै श्रयते जनो येन तत्कायनिकायेन हरिणा । अकायेत्यादेः । न यच्छब्दोऽयं किन्तु यशब्दः । वेदाः क्रिया ज्योतिष्टोमादयो योग इति चोपायवाचि सत्काकाक्षिन्यायेन वेदक्रियायोगौ तद्रूपापायौ पुनर्योगौ तौ च तपःसमाधी चेत्यन्वेति । ततश्च वेदः क्रिया तपः समाधियोगैरिति सिध्यति । यद्वा क्रियायोगो ज्योतिष्टोमादिरितरत्पूर्ववत् । तैः करणैस्तवार्हणमर्चनं समीहते करोति । विध्याद्यधिष्ठातृत्वदुपदेशलब्धोपलब्धिः स्थैर्यं भजते स जनस्त्वामर्चतीति साधनाधिष्ठानं चोक्तं भवति ।।३५।। एवमनर्थापने चैवमनर्थापत्तिरित्यनिष्टोपदर्शनेन पूर्वोक्तं सत्वाद्यर्थं व्यवस्थापयतः सत्वं न चेद्धातरिति पद्यस्य प्रपञ्चमिथ्यात्वं हरेर्नैर्गुण्यं चार्थ इत्यन्यथाप्रतीतिं विवक्षितार्थाप्रतीतिं च प्रच्यावयितुं मानमेवाह ।। सत्वमिति । यदि ब्रह्मादिदेह इत्याख्या यस्य तत्सत्वं ज्ञानरूपं ज्ञानं रूपयत्युपदेशाद्विना प्रतिष्ठापयतीति तत्तथा न स्यात् । तमोनुदमज्ञानापनोदकं कथं स्यात्तदुपायाभावात् । यदि न स्यादज्ञाननिवर्तकं तदा विभुर्हरिः सत्वप्रकाशानुमितो ब्रह्माद्युपदेशप्रादुर्भूतं प्रकाशमनु अनुसृत्य मितो विषयीकृतः कथं स्यान्न कथमपि । यदा न तदज्ञानहानं स्वरूपतानिमित्तकं तत्र तत्र सन्निहितो हरिरिति परः सर्वविलक्षणो विष्णुरिति ज्ञानं क्व च स्यात् । न स्यात्तर्हि विद्वज्जना अमुं माधवं कथमर्चयन्ति । नानेकेषां मनीषिणां प्रमोषो वक्तुं शक्य इति विद्वज्जना इति बहुवचनमर्चयेयुः । न हि हीनस्तज्ज्ञानेन तं सदाऽर्चयेदिति भावः । यदि ते तं नार्चयेयुस्तदा तत्वं जिज्ञासवस्तत्वजिज्ञासवस्तैः । नलोकेति षष्ठीनिषेधात् । कथं ज्ञायेत न कथमपि । नन्वर्चनमर्चनं विना न तज्ज्ञानमिति कुत इत्यत आह ।। कस्यापि केनापीति । न ज्ञायते तत्र तन्त्रं निर्गुणत्वात् । केनचिद्धर्मेण कश्चिद्धर्मी केनचिज्ज्ञेय इति लौकिकी रीतिरियम् । निर्गुण इतरज्ञानविषयताहेतुसत्वादिगुणहीन इति प्रसादसौमुख्यमनासाद्य ज्ञानविषयो न भवतीत्यव्यक्तताऽनेन सूचिता । तदधिपतिर्नान्य इति नैतदसम्भावितमित्यप्याह ।। निर्गुणत्वादप्रधानत्वादिति । अनेन हरिर्नित्यमव्यक्तः स्वातन्त्र्येण गुणत्रयातीतत्वात् । तथा हरिर्गुणत्रयातीतः सर्वप्राधान्याद्व्यतिरेकेण स्वेतरसर्ववदित्यनुमानमशुष्कं मानमुक्तं वेदितव्यम् । ननु प्रत्यक्षादिप्रमाणतोऽन्यथाऽपि ज्ञायत इति सर्वमुक्तं गजमज्जनायितमित्यतोऽधोक्षज इति । अधःकृतः

शुष्कमत्यक्षादिरिति न तद्बाधः। नेन्द्रियाणि नानुमानं वेदा ह्येवैनं वेदयन्तीत्यादेरर्थत उपादानम्। हरिः परः सर्वोत्कृष्टो विभुत्वादिति सूचयितुं विशेषणद्वयम्। वैपरीत्येन वेति ज्ञेयम्। विविधं भावयत्युत्पादयति सत्तावत्करोतीति विभुस्तदुत्पादकतया तत्सत्ताप्रापकतया तद्धरकत्वमुक्तम्। तच्च न तत्परत्वं विना सम्भवेत्तदाक्षिपति। यथोक्तमाचार्यैरन्यत्र। यदि नाम परो न भवेत्स हरिः कथमस्य वशे जगदेतदभूदिति। यदि न चेत्कथमित्यादीनां यथायथमावृत्याऽन्वयप्रदर्शनमुत्तरतात्पर्यपर्यालोचनमूलमिति मन्तव्यम्। तत्त्वं जिज्ञासुभिस्तत्त्वस्य जिज्ञासुभिरिति पाठद्वयम्। द्वितीयपाठे तत्त्वसम्बन्धिजिज्ञासावद्भिरित्यर्थः। परो विभुरिति पदमेकं वा। परस्मादुत्तमादेः परं परो श्रीतत्त्वम्। तदपेक्षया विभुर्गुणतो व्याप्त इति परो विभुः। परस्मादुत्तमं प्रोक्तं पर इति छान्दोग्यभाष्योक्ते॥ तथायं श्लोकार्थः॥ हे धातः (मां तु धातेति वदन्नरः पामरो वस्तुतस्तु सकलजगद्धारकत्वात्तच्चेन्मुख्यतो धातृत्वं तवैवेति धाता धातरिति सम्बोधयामासेति बोध्यम्) सकलजगद्धारक हरे। इदं निजं स्वकीयं विज्ञान विशिष्टज्ञानं यस्मात्तत्सत्त्वं ब्रह्मादिदेहाख्यमज्ञानभिदापमार्जनं भिदाऽन्यथाज्ञानं तयोरपमार्जनमपमार्जकं निवर्तकमिति यावत्। न भवेच्चेद्यदि न भवेत्तर्हि तद्विमतज्ञानजनकेन केनचिद्भवितव्यम्। कार्यमात्रस्य सकारणकत्वात् कार्यं चेदमिति। गुणप्रकाशैः सत्त्वाद्युत्पन्नज्ञानैर्भवाननुसृत्य मीयते ज्ञायत इति यदि न स्यात्तर्हि गुणो भवान्यस्य कस्य। यतश्चोदेति सूर्य इत्यादेः। येन साधनेन प्रकाशते ज्ञायते। अत्रेदमाकूतम्। ब्रह्मादिदेहगेहनारायणानुग्रहेण ज्ञानमज्ञानमिथ्याज्ञानहानिदत्वेन श्रेयःसाधनं न स्यात्तर्हि ज्ञानाभावेनानुमापकहेतुज्ञानं न स्यात्। तथापि न स्यात्तज्ज्ञानं दुर्मिलं यदि तत्तथा कस्य च पूजा जायेत सा च यदि नाम न स्यात्स्याज्जगदन्धं तच्चानिष्टम्। कश्चिन्मां वेत्ति तत्त्वतः। प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रिय इत्यादिमानदुराननतापत्तेरतो विज्ञानमज्ञानभिदापमार्जनं भवेत्पुरुषार्थसाधनं भवतीति सिद्धमिति॥ ३६॥

श्रीसुबोधिनी

नन्वेवं सति भक्तिमार्गानुसारेणापि भगवद्भजने विकर्मादिना कालान्तरे पुनर्बुद्धिनाशप्रसङ्गः। साधनत्वेनैव भक्तिमार्गस्यापि स्वीकारात्। अतस्तुल्यत्वात् किं मार्गान्तरदूषणेनेत्याशङ्क्य स्मार्तस्यापि भगवन्मार्गस्य फलमाह **तथेति**। हे माधव ते पूर्वं तद्वत् प्रवृत्ता अपि **तावकाः** सन्तः कचिदप्यारोहणावस्थायां **भ्रश्यन्त्यपि न**। पादोप्यधः प्रमादादपि न पतति। आरुह्यमाणमार्गात् स्वमार्गादपि न पतन्ति। मार्गस्यैव तथात्वात्। यथा वस्तुरक्षकाणां मध्ये सुगन्धरक्षकः सौरभ्यं प्राप्नोत्येव। लशुनादिरक्षकस्तद्विपरीतम्। यद्यपि स्वतन्त्रतया भगवान्न सेवितस्तथापि भगवानिति तस्य पातो न भवत्येव। **माधवेति**सम्बोधनं रात्रावपि विलासेन तत्रत्यानां दर्शनार्थम्। तेन विकर्मतुल्यत्वेपि सेवापरत्वाद् भगवद्दर्शनं नान्येषामिति निरूपितमत एव तावकाः। अभ्रंशे हेतुस्त्वयि **बद्धसौहृदा इति**। सौहृदं स्नेहो रज्जुस्थानीयः। स स्वात्मानं जीवं भगवच्चरणे बध्नाति। अतो युक्त एव तेषामभ्रंशः। नन्वन्ये कालादयः कथं तान्न भ्रंशयन्ति भक्तिं वा न नाशयन्तीत्याशङ्क्याह **त्वयाभिगुप्ता विचरन्तीति**। **त्वयाभितो** बाह्याभ्यन्तरसर्वभावेन रक्ष्यमाणाः। बुद्धयादीनामपि नाशासम्भवादन्यप्रवेशासम्भवाच्च **न भ्रश्यन्तीति** युक्तम्। अत एव **विचरन्ति**। सर्वत्र विशेषेणानिन्द्या सर्वेषु लोकेषु भ्रमन्ति। कालादिभयरहिता **निर्भयाः**। यदन्येषां त्यागस्थानं भयस्थानं वा तदेव तेषां परिभ्रमणस्थानमित्याह **विनायकानीकपमूर्धस्विति**। **विनायका** विघ्नकर्तारः। **वि**शब्देन विघ्ना उच्यन्ते। तेषां **नायका** जनका एव भवन्ति। तेषामनीकं सेना। एकस्मिन् विघ्नार्थे प्रवृत्ते तदशक्तौ तत्सहायार्थं बहवः समायान्ति। ते सर्वे स्वतन्त्रा नियामकाभावात् कार्यं न करिष्यन्तीत्याशङ्क्य तद्रक्षका अपि समायान्ति तेनीकपाः। तेपि बहवो भ्रंशयितुं समागताः। भगवदीयसुदर्शनादिभयादस्पृश्यैव निकटे तिष्ठन्ति। यथा प्रह्लादे। तेष्वेवारोहणार्थं भगवद्भक्ताः पादं प्रयच्छन्ति। तेषामधःपातनसामर्थ्याभावात् प्रतिष्ठाहेतव एव भवन्ति। यथा जडभरते मारणार्थमुद्यताः प्रतिष्ठाहेतव एव जाताः। तेषां **मूर्धानः** सर्वसामर्थ्यस्थानानि परमकाष्ठापन्नानि। एवं तेषां विचरणे हेतुः **प्रभो इति**। एतत्सामर्थ्यं त्वदीयमेव। अतस्ते समर्था अपि न द्विषन्ति। अतो भक्तिमार्गान्मार्गान्तरं साधनतः फलतश्च न समीचीनमित्युक्तम्॥ ३३॥

एवं स्तुतिमार्गेण भगवत्पक्षपातमुक्त्वा वैदिकमार्गेण पूर्ववदाह **सत्त्वमित्यादिचतुर्भिः**। वेदो हि द्विविधः प्रवृत्तिनिवृत्तिमार्गप्रतिपादकः। तादृशोपि पुनः प्रत्येकं द्वेधा भिन्नैरधिकारिभिर्द्विविधः। तत्र प्रवृत्तावर्थावबोधोध्ययनमनुष्ठानं चेति ब्रह्मचारिणो गृहस्थस्य चाधिकारेण सिद्धम्। तप आमनि च स्थितिरुत्तमाश्रमस्थयोर्निवृत्तौ क्रमेणैव सिद्धम्। एतद् वेदानुसारेणाश्रमचतुष्टये धर्मानुष्ठानं देवांशानामपि तुल्यमिति भगवान् सत्त्वमूर्तिः स्वसत्त्वं प्रकटीकृत्य सात्त्विकानेव तद्धर्मेषु प्रेरयति विपरीतांश्च निवर्तयति। अन्यथाश्रमस्थेष्वेव केचिदध्ययनादिकं यथाशास्त्रार्थं कुर्वन्ति केचिन्नेति व्यवस्था न स्यात्। वैदिकाश्च सर्वे धर्माः परिपाल्यमाना एव जगति प्रवर्तन्ते। अतः स्थितौ स्थित्यर्थं यदा भवान् **विशुद्धं सत्त्वं** सत्त्वगुणं **श्रयते** तदैव तेन सत्त्वगुणेन लोके प्रसृतेन व्याप्ता आश्रमस्थाः क्रमेण वेदाध्ययनं क्रियायोगः कर्मानुष्ठानं तपः वनवासादिः समाधिरात्मस्थितिश्चेति चतुर्विधान् धर्मान् सम्यगनुतिष्ठन्ति। ततोपि तेन धर्मेण शुद्धान्तःकरणास्तवार्हणं समीहन्ते। शुद्धैरेव हि भगवत्सेवा कर्तुं शक्यत इति। ननु वेदेनैव कार्यसिद्धौ किं सत्त्वगुणेनेत्याशङ्क्याह **शरीरिणामित्यादि**। यदि फलदाता कोपि न स्यात् प्रथमप्रवृत्तं विसंवादिनं दृष्ट्वा कोपि न प्रवर्तेत। नन्वदृष्टादिद्वारा भूतसंस्कारद्वारा वा कार्यसिद्धौ किं सत्त्वमूर्त्येत्याशङ्क्याह **शरीरिणामिति**। ते हि शरीराभिमानिनो विद्यमानशरीराश्च। यदि प्रथमं

शरीरभिन्नतयात्मानं जानीयुस्तदा कर्तृसमानाधिकरणमदृष्टमुत्पद्येत एव। देहान्तरे वा फले प्राप्ये भूतसंस्कारो भवेत्। उभयोश्चाभावात् फलदाता भगवानेवापेक्ष्यते। तदाह श्रेय उपायनम्। उप समीप आनीय समर्पणम्। यस्माद् वपुरिति। दैवगत्या फलसिद्धिज्ञानाभावाय। अस्तु वा फलसिद्धिः। तस्य धर्मस्य भगवद्भजने करणत्वं सहायत्वं वा चेन्न स्यात् तदा क्षयिष्ण्वेव फलमिति पूर्वदोषानिवृत्तिः। अतो वैदिके मार्गे सर्वधर्मप्रवर्तको भगवानिति देवानां पक्षपोषकः। जन इत्येकवचनं जात्यभिप्रायं दुर्लभत्वज्ञापनाय।३४।

ननु ब्रह्मचारिणो गृहस्थस्यापि श्रेयोदानार्थमात्मविवेकस्याजातत्वात् सत्त्वाश्रयणं भवतु नाम ज्ञानस्य तु सिद्धफलदातृत्वादसिद्धफलेपि साक्षादेव फलजननसम्भवात् तज्ज्ञाने तत्साधने तपसि वा भगवतः सत्त्ववपुर्नापेक्ष्यत इत्याशङ्क्याह सत्त्वं न चेदिति। इदं शुद्धसत्त्वं सर्वरक्षकं सर्वकर्मफलदातृ चेन्न भवेद् विज्ञानमपि न भवेत्। “सत्त्वात् सञ्जायते ज्ञान”मिति सत्त्वाभावे ज्ञानं न स्यात्। न च शास्त्रसिद्धेन सत्त्वगुणेन ज्ञानमुपस्थापयितुं शक्यते। परकीयत्वात् यस्मिन् क्षणे शास्त्रानुसन्धानं तदर्थानुष्ठानं वा तदैव तत्सत्त्वमाविर्भवति। तद्धर्मत्वात्। इदं तु निजम्। न च तैरपि स्वमूलकारणभूतं सत्त्वगुणमुत्पादयितुं शक्यते तेषां कर्तृत्वाभावादिति ज्ञापयति हे धातरिति। विज्ञानमनुभवः। स च सत्त्वैकरूपेन्तःकरणे भवति। यथा यथा च विशुध्यते तथा तथाकामहतो भवतीति शुद्धसत्त्वाविर्भाव एव विज्ञानं युक्तं यथोत्पन्ने जगत्यन्ने सत्यां क्षुध्यन्नसम्पादनं सुकरं न तु क्षुदनन्तरं तत्सम्पादनं शक्यम्। अतो भगवता सत्त्व आविर्भाविते तत्कृपया भगवता सह सत्त्वमपि हृदये समागच्छेन्नत्वन्यथा। निषिध्यमानं शास्त्रीयं भविष्यतीत्याशङ्क्य विशिनष्ट्यज्ञानभिदापमार्जनमिति। अज्ञाननाशकं विज्ञानमात्मानुभवः। भेदनाशकं तु भगवद्विज्ञानम्। उभयोः साक्षात्कारे देहाद्यध्यासनिवृत्तिः शुद्धाद्वैतं च स्फुरति। तच्च ज्ञानं न विषयविषयिभावेन। तादृशस्य पुरुषार्थासाधकत्वं पूर्वमुक्तम्। आविर्भावस्तु भगवतः स्वरूपस्य वा शुद्धसत्त्वव्यतिरेकेण न सम्भवति। यदि ज्ञाने सत्त्वापेक्षा सुतरां तपसि तदपेक्षेति न तत् पृथङ् निरूपितम्। न चेद् भवेदिति। इत्पदव्यतिरिक्तं सर्वमावर्तते। “अर्थवशात् पदानां व्यवस्था”। ‘अज्ञानभिद् विज्ञानं मार्जनमापेति’ न व्याख्यानम्। नन्वस्य सत्त्वस्य स्वतो ज्ञानरूपत्वाभावात् साधन उपयोगः। यद्यन्यथैव भगवदाविर्भावो भवेदात्मनो वा तदा किं सत्त्वेन ? तत्रेन्द्रियाणां प्रकाशो लोकदृष्टः स्वकारणप्रकाशमाक्षिपति। तत्र प्रवर्तकस्य भगवतोभिमानिनो जीवस्य च प्रकाशोवश्यम्भावी। अतस्तदनुसन्धानेनैव तद्व्यवधायकमलनिवृत्तौ तदुभयोः प्रकाशो भविष्यतीति व्यर्थं सत्त्वमिति चेत् तत्राह। गुणप्रकाशैरनुमीयते भवानिति। गुणानामिन्द्रियविषयादीनां प्रकाशैर्ज्ञानैः प्रेरकोभिमानी चानुमीयतेस्तीति। स ह्यनाविर्भूत एव तथा करोति। आविर्भावस्तु केन कर्तव्यो भवेत् ? न च स्वरूपसत्त्वं कार्यकारणं वा प्रकृते प्रयोजकम्। आविर्भावस्तु सत्त्वाधीन इति पूर्वमवोचाम। न च प्रकाशोपि कार्यव्यतिरेकेण न सम्भवति। अन्यथा गुणप्रकाशो न भवेदिति वक्तव्यम्। यस्य सम्बन्धी वा गुणः प्रकाशते येन वा गुणः प्रकाशते। न तु सम्बन्धिनः करणस्य वा प्रकाशमपेक्षते। अतः प्रकाशार्थमवश्यं सत्त्वगुणोपेक्षितः ॥ ३५ ॥

एवं प्रमाणप्रमेये वैदिकप्रकारेण भगवद्रूपेण भगवद्रूपे विचारिते। साधनं विचारयति न नामरूपे इति। वैदिकमार्गानुसारेण साधनं भगवान् सर्वपुरुषार्थेषु। स च गुणातीत एव। वेदे गुणाभावात्। फलदानार्थं परं भगवान् देवपक्षपातार्थं तथा कृतवान्। अतः सगुणः साधनमितिपक्षं निराकरोति न नामरूपे इति। ते नामरूपे गुणकर्मजन्मभिर्न निरूपितव्ये। साक्षी भगवान् सर्वकर्मफलदाता कर्माध्यक्षः। स एव साधनम्। गुणैः कृत्वा यानि कर्माणि जन्मानि च तानि तव न सन्त्येव किन्तु क्रियाशक्त्यैव सद्रूपया धर्मरूपेण प्रकटस्य तवाविर्भावः कर्माणि। आनन्दरूपेण प्रकटस्य च जन्मानि। तैरेव च नामरूपे। अन्यथा प्राकृतत्वे सति न कोपि पुरुषार्थः सिध्येत्। भवतु वा भगवतः कल्पान्तरे तथाभूते अपि न तु शास्त्रे साधनत्वेन निरूपितव्ये। तदा तस्य फलदातृत्वं न स्यात्। कर्माध्यक्षत्वाभावात्। किञ्च सगुणं चेन् मनसा वचसा च व्याप्यं भवति। ततो मानसिकं वाचनिकमेव फलं प्रयच्छेद् न त्वात्मरूपं भगवद्रूपं वा। भगवांश्च मनोवचोभ्यामनुमेयमेव तर्क्यमेव वर्त्म यस्य तादृशः। न तु प्रत्यक्षविषयः। “यतो वाचो निवर्तन्ते अप्राप्य मनसा सह” “पराञ्चि खानि व्यतृणत् स्वयम्भू”रित्यादि श्रुतिवाक्यैः। तर्हि नामरूपाण्येव न सन्तीति चेत् तत्राहुर्देव क्रियायां प्रतियन्त्यथापि हीति। हे देव सर्वपूज्य। क्रियायां श्रौत्यां तान्त्रिक्यां च नामरूपे प्रतियन्ति। “विष्णोर्नु कं” “तदस्य प्रियम्” “इदं विष्णुः” “प्र तद् विष्णुः” षडक्षरादिरामादिमन्त्राश्च। “यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद् वषट्करिष्य”न्निति श्रुतेर्ध्यानादिविधानाच्च। नामरूपाभावे ध्यानं मन्त्रश्च न भवेताम्। इमामेवोपपत्तिमाह हिशब्दः। अत एव तदन्यथानुपपत्त्या प्रतियन्ति। यतः प्रतियन्त्यतः प्राकृतत्वाभावाद् दिव्यान्येव तान्यानन्दमयानीत्यध्यवसीयन्ते। एवं सर्वाण्येव रूपाणि नामान्यानन्दमयानीति तानि सर्वपुरुषार्थसाधकानि निरूपितानि ॥ ३६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

ते हि शरीराभिमानिन इत्यादि। वैदिकं कर्म यथोक्तमेव कृतमदृष्टजनकम्। ज्ञानमपि तत्राङ्गं ‘य एवं वेदे’तिवाक्येभ्यः। तथा च तदभावात् तथेतिभावः। जडत्वादपि तथात्वं ज्ञेयम् ॥३४॥ उभयोः साक्षात्कार इत्यादि। आत्मसाक्षात्कारस्य फलमध्यासनिवृत्तिः। द्वितीयस्याद्वैतस्फूर्तिः वैदिकमार्गे हि प्रमेयं “स हैतावानास” इतिश्रुतेर्ब्रह्मात्मकम्। अतस्तत्त्वेन स्फूर्तिः फलमितिभावः। इत्पदव्यतिरिक्तमिति। न चेदित्यत्र यदित्पदं तद्व्यतिरिक्तमित्यर्थः। ‘अज्ञानभिद् विज्ञानं मार्जनमापेति न व्याख्यान’मिति। क्रियापदस्य समानलकारेणैवान्वयनियमान्मार्जनमाप्नुयादिति भवेत्। स्वोक्ताशङ्काया अनिवृत्तेश्च स्वव्याख्यातशास्त्रार्थाप्राप्तेश्चेतिभावः ॥ ३५ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः।

तथा न त इत्यत्र–**विकर्मादिनेति**। "यः कश्चिद् वैष्णवो लोके मिथ्याचारोप्यनाश्रमी" त्यादिवाक्येषु वैष्णवविशेषणतयोक्तेन विकर्मादिना। **साधनत्वेनं वेति**। त्वदीयतासाधनत्वेनैव। अतस्तुल्यत्वादिति। भगवद्भावे साधनत्वेन परिग्रहस्य तुल्यत्वात्। **स्मार्तस्येति**। मोक्षशेषभूतस्य। **पूर्वं तद्वत् प्रवृत्ता इति**। इदं मूलस्थतथापदस्य विवरणम्। तथाचैवमन्वयः। ये तथा पूर्वं तद्वत्प्रवृत्तास्तेपि तावकाः सन्तो न भ्रश्यन्तीति। **पाद इत्यादि**। इदं भ्रश्यन्त्यपि नेत्यस्य विवरणम्। एतस्यैव निष्कर्षमाहुरासह्येत्यादि। यत् तु 'यथा पूर्वश्लोकोक्ताः पतन्ति तथा ते तावका न भ्रश्यन्ती'त्यन्वयं कश्चिदाशशङ्के तथा च "पातो भवति परं तथा न भवती" त्यर्थं चाह तन्मन्दम्। त इतिपदस्य वैयर्थ्यापत्तेः। यदि हि तच्छब्दस्येदं बहुवचनं तदा तेन पूर्वश्लोकोक्ता एव परामर्षणीयाः। तेषां तु पात उक्त इति न भ्रश्यन्तीतिवाक्यस्यैव विरोधः। यदि च युष्मच्छब्दस्य षष्ठ्येकवचनं तदा तेनैव भगवदीयतायाः प्राप्तत्वात् तावकपदस्य वैयर्थ्यम्। एवमन्यदपि तर्कितं दूषणीयमितिदिक्। **तत्रत्यानामिति**। रात्रौ भवानां भगवति विलासचिह्नानाम्। स्मार्तभक्तिमार्गे विद्यमानानां जीवानां वा दर्शनार्थमित्यर्थः। **विकर्मतुल्यत्व इति**। विषयासक्तिसद्भावेनेतरमार्गतौल्ये "श्यपि चेत् सुदुराचार" इतिवाक्यात् तथेत्यर्थः। अत्रायमाशयः। ये भक्ताः सेवां कुर्वन्तोपि न विषयासक्तिरहितास्तेषां विषयासक्तिनिवृत्त्यर्थं भगवान् स्वस्वरूपस्थितानि विलासचिह्नानि प्रदर्शयति। तदा चिह्नानामतिरमणीयत्वाद् भगवद्विलासे सर्वोत्कृष्टत्वज्ञानेन विषयेष्वतिहीनत्वबुद्धिरुत्पद्यते तदा विषयं त्यक्त्वा भगवत्येवासक्ता भवन्तीत्यर्थः। नन्वेवङ्करणे भगवतः किं प्रयोजनमत आहुरत एवेति। यतस्तावकाः। पूर्वमेव भगवदनुगृहीताः। तावकत्वाभावे त्वयैवं किमिति क्रियेतेतिभावः। एवं च साधने दृढविश्वासे पूर्वोक्तं फलं भवतीत्यत्र निदर्शनमनेनोक्तं ज्ञेयम्। **अतो भक्तिमार्गादित्यादि**। तथा चात्र स्तुत्या फलनिरूपकत्वं बोध्यम्। लौकिके प्रकारे प्रमाणादीनि चत्वार्यपि भिन्नानि। स्मार्ते तु निरूपणप्रकारे प्रमेयकोटावेव साधनफलयोरन्तर्भाव इतिविशेषः। एतेषु चतुर्षु भगवत्स्तुतिस्तु स्फुटैव। कालस्तुतिस्त्ववतारस्तुतित्वाद् बोध्या॥ ३३॥ **सत्त्वं विशुद्धमित्यत्र पूर्ववदाहेति**। प्रमाणप्रमेयसाधनफलभेदेन भगवत्पक्षपातमाहेत्यर्थः। प्रमाणेन पक्षपातमुपपादयन्ति **वेदो हीत्यादि न स्यादित्यन्तम्**। **द्वेधा भिन्नै रिति**। पूर्वाश्रमद्वयमेकस्यां कोटावुत्तराश्रमद्वयं चेतरस्यामित्येवं द्वेधाभिन्नैः। एतदेव विवृण्वन्ति तत्रेत्यादि। तथा च सत्त्वमूर्तेः स्वसत्त्वप्रकटनमेव प्रमाणमतः पक्षपात इत्यर्थः। श्लोकं व्याकुर्वन्ति **वैदिका इत्यादि**। **स्थित्यर्थमिति**। वैदिकधर्मस्थित्यर्थम्। सिद्धमाहुः **शुद्धैरित्यादि**। तथा च भगवत्सत्त्वेन चतुर्विधधर्मप्रमित्या भगवत्सेवाप्रमित्या च शुद्धैस्तथेत्यर्थः। **कार्यसिद्धाविति**। धर्मप्रमित्यादिसिद्धौ। **कोपीति**। वेदातिरिक्तश्चेतनो नियामकः। तथा च दृष्टविसंवादेपि केचिद् वेदमार्गे प्रवर्तन्तेऽन्ये च न प्रवर्तन्त इतिदर्शनान्न वेदेन कार्यसिद्धिः किन्तु प्रयोजकः सत्त्वोपाधिर्वैदिकपदार्थक्रियाप्रमितिजननायावश्यक इत्यर्थः। एतदाक्षिपन्ति नन्वित्यादि। समादधते **ते हीत्यादि**। अत्र समाधिष्टिप्पण्यां वैदिकं कर्मेत्यादिना निष्कृष्टो बोध्यः। **तदभावात् तथेति**। वेदान्तोक्तकर्तृस्वरूपज्ञानाभावने यथोक्तत्वाभावान्नादृष्टजननं कर्मप्रकारज्ञानाभावाच्च न भूतसंस्कार इत्यर्थः। **जडत्वादिति**। शरीराभिमानेन जडत्वाच्चेतनधर्मस्यादृष्टस्य तत्र नोत्पत्तिरित्यर्थः। सुबोधिन्यामपेक्ष्यत इति। तादृशां फलदानार्थमपेक्ष्यते। **अस्तु वेति**। यथाकथञ्चित् कर्तृस्वरूपज्ञानात् कर्मप्रकारज्ञानाच्चास्तु वा अस्मिन् पक्षे मैत्रायणीयोपनिषदुक्तो गुणान्तरसारभूतः सत्त्वगुणो वेदे प्रमाणमिति तदेतद्देवानां सात्त्विकत्वात् तत्पक्षपातार्थं भगवता धियते तदा देवानां वैदिकधर्मेषु भगवत्सेवाकरणतायास्तत्सहायतायाश्च प्रमितिर्भवतीत्युक्तम्॥ ३४॥ **सत्त्वं न चेदित्यत्र**—पूर्वोक्तं पक्षपातमेकदेशेनाक्षिपन्ति नन्वित्यादि। **भवतु नामेति**। तदुभयोपकारकं भवतु नाम। **सिद्धफलदातृत्वादिति**। सिद्धस्य परमानन्दरूपस्य मोक्षाख्यफलस्य दातृत्वात्। **असिद्धफलेपीति**। सिद्धं वृत्तिविचारगम्यरूपं फलं यस्य तादृशे तपस्यपि साक्षादेव द्वारान्तरमन्तरेणैव ज्ञानाख्यफलजननसम्भवात् तथा। **तज्ज्ञान इति**। वेदोक्ते ज्ञाने। अत्र मूलश्लोके चेदिति नैकं पदं किन्तु चोप्यर्थे। इदवधारणे। तथा चैवं योजना। इदित्यवधारणे। हे धातरिदं निजं सत्त्वं यदि न भवेदज्ञानभिदापमार्जनं विज्ञानं च न भवेदिति बोध्या। तदेतद् व्याकुर्वन्तीदमित्यादिना। चेदितिपदं तु तर्कत्वादर्थादध्याहृतं बोध्यम्। ननु सत्त्वमात्रस्यैवापेक्षा चेच्छास्त्रीयत्वेन निर्वाहान्न समाधिष्ठानापेक्षेत्यत आहुर्न **च शास्त्रेत्यादि**। **ज्ञानमिति**। साक्षात्काररूपं ज्ञानम्। **तद्धर्मत्वादिति**। शास्त्रधर्मत्वात् शास्त्रेयत्वात्। **तैरिति**। शास्त्रैः। विज्ञानशब्द उपासने प्रसिद्ध इति तद् व्यावर्तयितुं **विज्ञानमनुभव इति**। अयमहमित्यभेदेनानुभवः। **यथा यथेत्यादि**। आनन्दमीमांसायां प्रत्यानन्दं "श्रोत्रियस्य चाकामहतस्ये"तिविशेषणादितिभावः। **निषिध्यमानमिति**। न भवेदित्यनेन निषिध्यमानम्। उभयोरिति। आत्मनो भगवतश्चेत्यर्थः। तदेतट् टिप्पण्यां व्याकुर्वन्त्यात्मेत्यादि। सुबोधिन्यां पूर्वमिति। "येन्येरविन्दाक्षे" त्यस्य व्याख्याने। श्लोकयोजनां स्फुटीकुर्वन्ति न चेत्यादि। तदेतट् टिप्पण्यां व्याकुर्वन्तीयदेत्यादि। सुबोधिन्यां ननु पदावर्तनापेक्षया व्याख्यानान्तरस्य व्यायस्त्वाच्छ्रीधरोक्तमादरणीयमित्यत आहुरन्नेत्यादि। तद्व्याख्यानानादरे टिप्पण्यां हेतुमाहुः क्रियापदस्येत्यादि। **स्वोक्ताशङ्केत्यादि**। श्रीधरेण हि 'मोक्षस्य तु ज्ञानैकसाध्यत्वात् किं भक्त्ये'त्याशङ्कावतारिकायामुपक्षिप्ता। सा तदा निवर्तते यदा मोक्षस्य ज्ञानस्य वा भक्त्येकसाध्यता व्याख्यायते। तत् तु न व्याख्यातमिति तदनिवृत्तिः। स्वव्याख्यातशास्त्रार्थो भक्तानां मोक्षप्राप्तिरूपस्तस्याप्यनेनाप्राप्तिरित्यतः श्रीधरीयं द्वितीयव्याख्यानमयुक्तमित्यर्थः। सुबोधिन्यामुत्तरार्धमवतारयन्ति नन्वित्यादि। **स्वल इति**। प्राकृतगुणतया। **साधन इति**। आविर्भावसाधने। **केन प्रकारान्तरेणा-**

विर्भाव इत्यपेक्षायां तं प्रकारमाहुस्तत्रेत्यादि । कारणप्रकाशमाक्षिपतीति कारणं प्रवर्तकः स चेदर्थः । प्रकाशयुक्तो न स्यात् तस्मिन्नर्थं इन्द्रियं न प्रेरयेदतः प्रेरणाबाक्षिपति । तत्र आक्षेपे । एवमाविर्भावोपपादनेन स्वरूपसत्त्ववैयर्थ्ये शङ्किते तत्पार्थक्यमुपपादयितुं मूलं व्याकुर्वन्ति गुणानामित्यादि । तथा 'चेन्द्रियप्रेरकाभिमानी च तत्तदर्थप्रकाशवान् तत्रतत्रेन्द्रियप्रेरकत्वात् यन्नैवं तन्नैव' मित्यनुमानेनेन्द्रियप्रवर्तकस्य प्रकाशेनुमितेपि तेन तत्सत्तामात्रं सिध्यति न तु तत्स्वरूपं प्रकाशते । यदि तत् प्रकाशेत तदायं भगवानयमहमित्येवं ज्ञानं स्यात् तत् तु न जायते । तत्र हेतुः स हीत्यादि । ननु स्वरूपसत्तादिनैव स्वत एवाविर्भावोस्त्विति चेत् तत्राहुर्न चेत्यादि । स्वरूपसत्त्वमिति । स्वरूपसत्ता । प्रकृत इति । पूर्वोक्तप्रकारकपरोक्षानुभवे । पूर्वमिति । पूर्वार्धव्याख्याने । इदमाक्षिपन्ति न च प्रकाशोपीत्यादि प्रकाशो भगवत्प्रकाशः । कार्यस्य गुणप्रकाशस्य व्यतिरेकेण गुणप्रकाशमपहायेतियावत् । तथा न सम्भवति न वक्तुं शक्यते । तत्र युक्तिरन्यथेत्यादि । तथा च यथा प्रकाशविशिष्ट एव सूर्यो वस्तुप्रकाशरूपं कार्यं करोति न सूर्यसत्तामात्रं सर्वप्रासादौ कार्यादर्शनादेवमत्र गुणप्रकाशैरपि प्रेरकाभिमानिनोः प्रकाशविशिष्टसत्तैवानुमेया न तु सत्तामात्रम् । 'जीवात्मनो भगवतश्च प्रकाशः कार्यकालेप्यस्ति प्रकाशत्वात् सूर्यादिप्रकाश' वदितिप्रयोगात् तथा च भगवत आत्मनो वा प्रकाशार्थं न सत्त्ववपुषोपेक्षेतिपूर्वपक्षहृदयम् । समादधते यस्येत्यादि । तथा चैवमनुमानेपि गुणात्मकप्रकाशस्यैवानुमितिर्न तु स्वरूपस्य तत्प्रकाशकस्य चाप्रकाश इतिभावः । सिद्धसिद्धमाहुरत इत्यादि । यतो गुणप्रकाशरूपेण कार्येण प्रकाशविशिष्टस्य सत्तैवानुमिता भवति न तु स्वरूपस्य प्रकाशोनुभवात्मकोतो भगवतो जीवस्य च स्वरूपप्रकाशार्थमवश्यं भगवद्वपूरूपः सत्त्वगुणोपेक्षितः । तेन विना उत्तमाश्रमिणोरपि हृदि स्वरूपप्रकाशो न स्यात् । तस्मादाश्रमचतुष्टयेपि भगवत्स्वरूपात्मकस्य सत्त्वगुणस्यापेक्षेत्यर्थः । एवं चात्र जीवस्वरूपप्रकाशः शुद्धाद्वैतप्रकाशस्य वैदिके वर्त्मनि प्रमेयमित्युक्तम् ॥ ३५ ॥ न नामरूपे इत्यत्र—वेदे गुणाभावादिति । तत्र सृष्ट्यादिनिरूपणस्थलेनादित्वेन गुणानामनुक्तत्वेन तथात्वात् कचिज्जन्येत्वेनोक्तत्वेपि भगवतः पूर्वं निर्गुणत्वादिति । तथा कृतवानिति । सत्त्वगुणाश्रयं कृतवान् । इदमेव द्वितीयस्कन्धे "स वाच्यवाचकतये" तिश्लोके 'यतो वस्तुतोकर्मकः सर्वकर्मरहितः सर्वेषां नियामकश्च तादृशोपि सर्वानुत्पादयितुं त्रिगुणात्मकमव्यक्तं च रूपं करोती'ति विवृतम् । अनिरूपणे हेतुः साक्षीत्यादि । कर्माध्यक्ष इति । "कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुण"श्चेतिश्रुतेः । आनन्दरूपेण प्रकटस्य च जन्मानीति । एतदेव ब्रह्माण्डपुराणेप्युक्तं "स्त्रीपुंमलानुषङ्गात्मा देहो नास्य विजायते किन्तु निर्दोषचैतन्यसुखनित्यां स्वकां तनुं प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरे"ति । एवमेव "यज्ञो वै विष्णु"रितिश्रुतेः कर्माण्यपि ज्ञातव्यानि । ब्रह्मसूत्रभाष्येपि "ज्ञापनार्थं प्रमाणानि सन्निकर्षादिमार्गतः सर्वथाविषयेवाच्येव्यवहार्ये कुतः प्रमे"त्याशङ्क्य प्रकृत्यधिकरणे चतुःसूत्रम् इदमेव प्रतिपादितं "स आत्मानं स्वयमकुरुते" त्यादिश्रुत्या चेति बोध्यम् । शास्त्रयोनित्वव्याख्यानेपि "मतान्तरवज्जन्मादीनां न विकारत्वं किन्त्वाविर्भावतिरोभावावेव तथोत्तरत्र वक्ष्यते तदनन्यत्वाधिकरण"इत्युक्तम् । तस्मिन्नधिकरणे च "सत्त्वाच्चावरस्ये" तिसूत्रे 'प्रपञ्चस्य सत्त्वात् त्रैकालिकत्वाद् ब्रह्मत्वं "सदेव सौम्येदमग्र आसीद्" "यदिदं किञ्च तत् सत्यमित्याचक्षत" इतिश्रुते'रित्युक्तमत्र प्रपञ्चस्यापि यत्राविर्भावतिरोभावौ तत्र पुरुषोत्तमनामरूपयोस्तथात्वे किं वक्तव्यमिति सिध्यति । इमामिति । श्रुतार्थापत्तिरूपाम् ॥ ३६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तथेत्यस्याभासे—भक्तास्तु तादृशा अपि न पतन्तीत्यग्रिमश्लोके निरूप्यत इत्याशयेन तदाभासमाहुर्नत्वेवमिति । तत्र प्रह्लादभरतौ दृष्टान्तत्वेन वक्ष्येते । पूर्वं सनकादिरूपस्य प्रह्लादस्य भगवद्द्वारि क्रोधेन विकर्मणा दैत्येषु जन्म जातं परं तत्रापि भजनमेव न त्वधःपातः । भरतस्यापि मृगसङ्गेन विकर्मणा जन्मान्तरं जातं परं ततो द्विजत्वप्राप्त्या मुक्तिरेव न त्वधःपातः । एतेना"त्रापि वेदनिन्दायामधर्मकरणात् तथा नरके न भवेत् पातः किन्तु हीनेषु जायते पूर्वसंस्कारतस्तत्र भजन् मुच्येत जन्मभि"रिति सिद्धान्तः समर्थितः । अन्ते सर्वसामर्थ्ये ति । यत्र तेषां विघ्नानां परमं सामर्थ्यं प्रभवति तादृशानि निषिद्धदेशरूपाणीत्यर्थः । भक्तास्तादृशस्थानेपि गतास्तत्कृतभयरहिताः । दैत्यानामभगवदीयत्वाद् भ्रंश एवेति तद्व्यतिरेकः । एवमग्रेपि सर्वत्र ज्ञेयम् । अत इति । सामर्थ्यस्य त्वदीयत्वादेतानपि त्वत्सृष्टान् ज्ञात्वा न द्विषन्तीत्यर्थः । सामर्थ्यस्य स्वकीयत्वे स्वातन्त्र्याद् द्वेषं न कुर्युरितिभावः ॥ ३३ ॥

सत्त्वं विशुद्धमित्यत्र—सम्यगनुतिष्ठन्तीति । येन सत्त्वाश्रयणे हेतुना वेदादिभिः करणैस्तवार्हणं समीहत इत्युक्ते वेदादीनां दृष्टद्वारक भजनकरणत्वं न सम्भवतीति पूर्वं तदनुष्ठानं ततश्चित्तशुद्ध्या भजनमित्यदृष्टद्वारा करणत्वम् । तथा चैतावदर्थापत्त्या लब्धमिति ज्ञेयम् । यदीति । नियामकाभावे कचिद् विसंवादोपि भवेदितिभावः । नन्वदृष्टं भूतसंस्कारो वा नियामकोस्त्वित्याहुर्नत्वदृष्टादीति धूमादिमार्गेदृष्टद्वारा फलसिद्धिरर्चिरादिमार्गे भूतसंस्कारद्वारेतिविभागः । कर्त्रिति । फलदाने कर्तृभूतमदृष्टं समानाधिकरणम् । कर्म इतिशेषः । कर्मानुरूपमदृष्टं कर्तरि फलदायकमुत्पद्यतेत्यर्थः । तथा च ज्ञानाभावेन कर्मणो निरङ्गत्वान्नादृष्टोत्पत्तिर्न वा भूतसंस्का इतिसमाधानम् ॥ ३४ ॥ सत्त्वं न चेदित्यत्र-आत्मविवेकस्येति । अनयोर्द्वयोरेतदभावादसिद्धं स्वर्गादिरूपमेव फलं भविष्यती भावः । असिद्धेति । पराश्रयमुक्तिपक्षेपीत्यर्थः । तपसि वेति । ज्ञाने तपसि वा सति । फलदानार्थं सत्त्वापेक्षा नास्तीत्यर्थः । तथा ज्ञानार्थमेव सत्त्वापेक्षेतिसमाधानं भविष्यति । व्याख्याने निजपदव्यावर्त्यमाहुर्न च शास्त्रेति । धातरित्यस्याभासमाहुर्न च तं रपीति शास्त्रैरपि । स्वस्य मूलकारणभूतं शास्त्रोत्थानि सत्त्वानि गुणा अंशा यस्यैतादृशं निजं वपुः सत्त्वमुपासकहृदय उत्पादयितुं शक्य

इत्यर्थः। शुद्धसत्त्वोद्रेक ऋषिभिः शास्त्रप्रकटनात् सत्त्वस्य शास्त्रमूलत्वम्। तेषामिति। शास्त्राणां भगवदीयसत्त्वोत्पादकत्वाभावाद् यतो धाता निजसत्त्वोत्पादकस्त्ववत्येर्थः सत्त्वस्य विज्ञानहेतुत्वं विज्ञानमिति। प्रकारान्तरेणाप्याहुर्यथा यथेति। इति शुद्धसत्त्वेति। इति हेतुद्वयादित्यर्थः। निषिध्यमानमिति। 'न भवेदि'ति निषेधविषयीभूतं विज्ञानमित्यर्थः। उत्तरार्धं व्याचिख्यासवो विज्ञानस्वरूपं विविच्य सत्त्वस्य तद्धेतुत्वं साधयन्ति तच्चेति। आविर्भूतस्य भगवतो जीवस्य चात्मत्वेनानुभवो विज्ञानमितिभावः। स्वरूपस्य वेति। जीवतात्त्विकरूपस्येत्यर्थः। उत्तरार्धस्याभासमाहुर्नन्वस्येति। साधन इति। विज्ञानहेतुभूताविर्भावसाधनार्थमित्यर्थः। यद्यप्ययेवेति। अन्यथा। सत्वं विनापीत्यर्थः। अर्थापत्त्याविर्भावः सिद्ध एव चेद् भवेत् तदा तत्साधनार्थं का सत्वापेक्षेत्यर्थः। भवेत् सिद्ध इतिशेषः। तत्रेति। आविर्भावहेतुगवेषणायामित्यर्थ इन्द्रियाणामिति। लोकेदृष्टोनुभूयमान इन्द्रियाणां प्रकाशो रूपादिग्रहणं स्वस्मिन् प्रवर्तकत्वाभिमानित्वाभ्यां हेतुभूतयोरन्तर्यामिजीवयोः प्रकाशमाविर्भावमाक्षिपत्यर्थापत्त्या बोधयतीत्यर्थः। तत्र हेतुमाहुस्तत्रेति। इन्द्रियाणां रूपादिग्रहणे प्रवर्तको भगवानभिमानी च जीवोत उभयोः प्रकाश आविर्भाव आवश्यकः। भावः सत्ता। तद्वान् भावी। भवतीत्यर्थः। अत इति। उभयोर्निर्धारादित्यर्थः। तदनुसन्धानेनेति। उभयोरनुचिन्तनेन तदुभयोरात्मत्वेन ज्ञाने व्यवधायकस्य प्रतिबन्धस्य मलस्य देहात्मज्ञानस्य निवृत्तौ सत्यामुभयोः प्रकाश आत्मत्वेनानुभवो भविष्यतीत्यर्थः। मूले गुणपदेनेन्द्रियाणि विषयाश्चे ति व्याख्यातम्। तत्रेन्द्रियाणि रूपादिज्ञानजनकानि तादृशज्ञानस्य रूपादिकं तु विषय इत्यर्थः। इन्द्रियाणां जनकतासम्बन्धो विषयाणां तु विषयतासम्बन्ध इतिविभागः। इन्द्रियजन्यं विषयविषयकं ज्ञानमिति। अत्र तदंशत्वाज्जीवोपि भगवत्पदेनोच्यत इत्याशयेनाहुः प्रेरकोभिमानी चेति तथा करोतीति इन्द्रियाणां विषयग्रहणं सम्पादयतीत्यर्थः। केन कर्तव्य इति ? न केनापि कर्तुं शक्यो भवेदित्यर्थः। प्रकृत इति। विज्ञानसम्पादन इत्यर्थः। प्रयोजकमिति। हेतुरित्यर्थः। कैमुत्येन भगवदाविर्भावकथनार्थं चतुर्थश्चरण इत्याशयेन तस्यार्थमाहुर्न चेति कारणं गन्धादयः। कार्यं पृथिव्यादयः। तथा च पृथिव्यादि व्यतिरेकेण केवलगन्धादीनां प्रकाशा ज्ञानमपिशब्दात् स्थितिश्च न सम्भव यतः पृथिव्यादिप्रकाशो मन्तव्य इतिभावः। अन्यदित्याहुरन्यथेति। करणाभावे गुणप्रकाशो न भवेत्। सम्भावनायां लिङ्। न सम्भवतीत्यर्थः। अतः करणप्रकाशोपि मन्तव्यः। तथा च प्रकाशहेतूनां प्रकाशस्यावश्यकत्वात् प्रेरकाभिमानिनोरपि प्रकाशो मन्तव्य इतिभावः। इदं द्वयमपि न च वक्तव्यमित्यर्थः। गुणो रूपादिर्यस्य पृथिव्यादेः सम्बन्धी प्रकाशते तस्य सम्बन्धिनः पृथिव्यादेः प्रकाशं येन च करणेन चक्षुरादिना प्रकाशते तस्य चक्षुरादेः प्रकाशं न स्वप्रकाशो न त्वपेक्षते। तथा च संलग्नयोः सम्बन्धिकरणयोरेव चेत् प्रकाशनापेक्षते तर्हि गुणप्रकाशो भगवत्प्रकाशं कथं साधयेदितिभावः। ग्रहणं रूपादीनामेव। इन्द्रियाणां विषयग्राहकत्वात्। आश्रयस्तु रूपादिग्रहणे गृहीत एव भवति न तु तस्य भिन्नतया ग्रहणम्। अतो न कार्यकारणभाव इत्याशयः। भवानस्तीति भवतः सत्तामात्रं गुणप्रकाशैरनुमीयते न तु तैर्भवतः प्रकाशोनुमीयते। किं बहुना ? यत्प्रकाशैर्भवाननुमीयते स गुणो यत्सम्बन्धी यत्करणकप्रकाशश्च स सम्बन्धी तत्करणं चाप्यस्तीति तत्सत्तामात्रमनुमीयते न तु तत्प्रकाशोनुमीयत इति मूलेन्वयः। प्रमाणप्रमेये इति। स्मृतिषु योग इव वेदे प्रमाजनकत्वात् सत्त्वं प्रमाणम्। "इन्द्रियाणां प्रमाणत्वं सत्त्वयोगाच्च चान्यथे"त्यत्र तथाव्यवस्थापनात्। तत् सत्त्वं पूर्वश्लोके निरूपितं तेन साध्यः प्रमाविषयीभूत आविर्भावोत्र श्लोके निरूपित इत्यर्थः॥ ३५॥

बुभुत्सुबोधिका

तथा न त इत्यत्र। भक्तास्तु तादृशा अपि न पतन्तीत्याशयेनाभासमाहुः नन्वित्यादि। 'एकं साङ्ख्यं च योगं च वेदारण्यकमेव च परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यत' इतिवाक्यात् साङ्ख्ये पि पञ्चरात्रोक्तां स्वतो जातां वा आदरे जाते नादृतशब्दप्रयोगात् भक्तिं निवेश्य साङ्ख्ये पि भक्तिमार्गमाहुः भक्तिमार्गेति। विकर्मेति 'यः कश्चित् वैष्णवो लोके मिथ्याचारोप्यनाश्रयी' त्यादिवाक्येषु वैष्णवविशेषणतयोक्तेन विकर्मादिना। साधनत्वेनेति निरीश्वरसाङ्ख्यमायावादावलम्बनसाधनत्वेन। यद्वा। त्वदीयतासाधनत्वेन। आशङ्काग्रन्थत्वादेवकारस्त्वदीयत्वासाधनत्वयोगव्यवच्छेदकः। तुल्यत्वादिति बुद्धिनाशप्रसञ्जकत्वेन तुल्यत्वं आत्मीयान्ययोर्मार्गयोः, भगवद्भावे साधनत्वेन परिग्रहस्य तुल्यत्वादित्यर्थो वा। मार्गान्तरं अन्यमार्गम्। स्मार्तस्येति आत्मीयेभ्यो येन्ये तेषां मार्गो गतः। तथा च मोक्षशेषभूतस्य। त इति स्मार्तभगवन्मार्गीयाः। पूर्वमिति बुद्धिनाशात् पूर्वम्। तद्वत् निरीश्वरसाङ्ख्यवत्। इदं मूलस्थ'तथा'पदस्य विवरणं, तथा चैवमन्वयः। ये तथा पूर्वं तद्वत् प्रवृत्तास्तेपि तावकाः सन्तः न नश्यन्तीति। पाद इति इदं भ्रश्यन्त्यपि नेत्यस्य विवरणम्। एतस्यैव निष्कर्षमाहुः आरुह्यमाणेति। साङ्ख्यमार्गात्। स्वमार्गादिति भगवन्मार्गात्। स्मृतिकृतपक्षपाते लोकवेदात्मकस्मृतिसङ्ग्रहोद्येति। विशेष्यविशेषणभावो वा। मार्गस्येवेति 'यानास्थाय नरो राजन् न प्रमाद्येत कर्हिचित् धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिहे'तिवाक्यात्। प्राप्नोत्येवेति अत्यन्तायोगव्यवच्छेकैवकारः। भगवानितीति ऐश्वर्यप्रधानः। कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वमैश्वर्यम्। न भवत्येवेति अत्यन्तायोगव्यवच्छेदक एवकारः। तत्रत्यानामिति तावकानाम्। विलासचिह्नानां भगवति रात्रौ भवानां वा दर्शनार्थम्। विकर्मेति 'अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृत'मितिवाक्यात् तथा। द्वितीयपक्षे विषयासक्तिसद्भावेन विकर्मतुल्यत्वं दर्शनस्य। 'अपि चेत् सुदुराचार' इति वाक्यादाहुः सेवापरत्वादित्यादि। अनेन सेवाया विकर्मबाधकत्वमुक्तम्। तदित्थम्। ये भक्ताः सेवां कुर्वाणा अपि न विषयासक्तिरहितास्तेषां विषयासक्तिनिवृत्त्यर्थं भगवान् स्वस्वरूप-

स्थितानि विलासचिह्नानि प्रदर्शयति, तदा चिह्नानामतिरमणीयत्वेन भगवद्विलासे सर्वोत्कृष्टत्वज्ञानाद् विषयेष्वतिहीनत्वबुद्धिरुत्पद्यते, तदा विषयं त्यक्त्वा भगवत्येवासक्ता भवन्तीति । नान्येषामिति 'येन्य' इतिपदोक्तानां प्रसिद्धान्येषां नेत्यर्थः । अत एवेति दर्शनवत्त्वादेव । रज्ज्विति स्नेहानुबन्धो बन्धूनां मुनेरपि सुदुस्त्यज' इतिवाक्यात् । स इति स्नेहः, सः स्वं स्नेहः आत्मनि यस्यैतादृशं जीवम् । तेषामिति स्मार्तभगवन्मार्गीयाणाम् । कालादय इति आदिना दुःसङ्गादयः । 'सर्वत' इत्यर्थक'मभित'इत्यव्ययमित्याहुः बाह्याभ्यन्तरेति । बाह्यं देहं कालादिभ्यः आभ्यन्तरं भक्तिं दुःसङ्गादिभ्यः । कालादिभ्यः एव वा बाह्यमाभ्यन्तरं च । तदपि सर्वं यतः सर्वभावेन सर्वत्वेन । रक्ष्यमाणाः रक्षिताः । यथाश्रुतं वार्थः । बाह्यमाभ्यन्तरं च सर्वमाहुः बुद्ध्यादीनामित्यादि । आदिना मनश्चित्ताहङ्काराः मनोवृत्तयश्च दशाभ्यन्तरं सर्वम । अन्यप्रवेशो भूतादिप्रवेशो बाह्यं सर्वम् । सर्वेष्विति 'तस्य सर्वेषु लोकेषु कामचारो भवती'ति छान्दोग्यश्रुतेः । 'तस्य' सर्वात्मभाववतो भक्तस्य । सर्वात्मभावदानेनापि रक्षिता रक्ष्यमाणा वा भ्रमन्तीत्यत्र कर्तारः । तदाहुः कालादिभयरहिताः निर्भया इति दुःसङ्गेपि निर्भयाः । यदिति सर्वलोकेषु विनायकानीकपमूर्धरूपम् । एतेषामिति आत्मीयानां तावकानाम् । नायका दुष्टानामित्याशयेनाहुः विघ्नकर्तार इति । स्वयमपि दुष्टाः । घ्नवर्णलोप इत्याशयेनाहुः विशब्देनेति । 'विघ्नराज' इति शब्दसमानाधिकरणत्वाद् विघ्ना उच्यन्ते । जनका एवेति विघ्नजनका एव । अन्ययोगव्यवच्छेदक एवकारः । अनधिकारात् । बहव इति बहुवचनार्थः । भगवदीयेति आदिशब्देन बलभद्रसुदर्शनभयमम्बरीषप्रसङ्गे नवमस्कन्धे दुर्वाससः । बलभद्रभयं फलप्रकरणे भक्तनयने शङ्खचूडस्य । शंखचूडस्पर्शेप्यत्रत्यस्पर्शात् पश्चादस्पृश्यैवेति ज्ञेयम् । उक्तदार्ष्टान्तिके दृष्टान्तमाहुः यथा प्रह्लाद इति । सामीप्ये सप्तमी । यथा प्रह्लादसमीपे अस्पृश्यैव तिष्ठन्तीत्यन्वयः । तेष्विति उक्तानां मूर्धसु सर्वसामर्थ्यस्थानेषु परमकाष्ठापन्नेषु आरोहणं मर्यादार्थं जन्म तदर्थं भगवद्भक्ताः प्रह्लादादयः । सेश्वरसाङ्ख्याः पादं चरन्तीत्यस्य गतिकर्मणः गत्याश्रयं, पादं पदनं गमनं स्वीयं कुर्वन्ति, प्रयच्छन्ति ददति । दैत्येभ्यः । अयमर्थः । पूर्वं सनकादिरूपस्य प्रह्लादस्य भगवद्द्वारि क्रोधेन विकर्मणा दैत्येष्वनुपदोक्तरीत्या जन्म जातम् । तथा च निबन्धे 'अत्रापि वेदनिन्दायामधर्मकरणात् तथा नरके न भवेत् पातः किन्तु हीनेषु जायत' इति सम्प्रदायः । इदं अशक्यत्वेन भातं परिभ्रमणस्थानं जीवानामित्याभासोक्तं युक्तम् । किंच तदनु सर्वेषु लोकेषु परिभ्रमन्ति । यत्र तेषां विघ्नानां परमं सामर्थ्यं प्रभवति तादृशेषु निषिद्धदेशेष्वपि भ्रमन्तीति तेषामध इति । विघ्नतत्कर्तॄणां भगवद्भक्तानां तत्कृतभयाभावाद् भगवद्बद्धसौहृदत्वेनाधःपातनसामर्थ्याभावात् । अत्राधःपातनं पादसेवनानादरः । पाद आकाशः । प्रतिष्ठाहेतवः भक्तिहेतवः एव भवन्ति । माहात्म्यस्मारकत्वात् । अत्र निबन्धः 'किन्तु हीनेषु जायत' इत्यस्याग्रे पूर्वसंस्कारतस्तत्र 'भजन् मुच्येत जन्मभि'रिति । अयं सिद्धान्तः समर्थितः । दृष्टान्तमाहुः यथा जडेति । तेषामिति त एते निरीश्वरसाङ्ख्याद्यभिनिवेशिनोपि । अहं ब्रह्मास्मीति भावनावन्तः । तेषां मूर्धानः मुख्याः । सर्वेति यत्र तेषां विघ्नानां परमं सामर्थ्यं प्रभवति तादृशानि निषिद्धदेशरूपाणि । गौणनिषिद्धदेशव्यावृत्त्यर्थं विशेषणं परमेति । परमकाष्ठा पश्चिमदेशकाष्ठा । अतस्त इति तावकाः । न द्विषन्तीति । अधःपतनसाधनं क्रोधं न कुर्वन्तीत्यर्थः । अधोगमनत्वेन तमस्त्वेन कार्यकारणभावात् । 'अधो गच्छन्ति तामसा' इतिवाक्यात् । यत्तु यथा पूर्वश्लोकोक्ताः पतन्ति तथा ते तावकाः न भ्रश्यन्तीत्यन्वयं कश्चिदाशशङ्के । तथा च पातो भवति परं तथा न भवतीत्यर्थं चाह । तन् मन्दम् । 'त' इति पदस्य वैयर्थ्यापत्तेः । यदि हि तच्छब्दस्येदं बहुवचनान्तपदं तदा तेन पूर्वश्लोकोक्ता एव परामर्षणीयाः । तेषां तु पात उक्त इति न भ्रश्यन्तीति वाक्यस्यैव विरोधः । यदि च युष्मच्छब्दस्य षष्ठ्येकवचनान्तं तदा तेनैव भगवदीयतायाः प्राप्तत्वात्, 'तावक'पदस्य वैयर्थ्यमिति दिक् । सिद्धमाहुः अतो भक्तीति । तथा चात्र स्तुत्या भगवदंह्य्यादरस्य साधनस्य फलनिरूपकत्वं बोध्यम् । फलमभयम् । 'अभयं ह वै जनक प्राप्तोसी'तिबृहदारण्यकाद् वेदः, एकविंशतिदुःखध्वंसो मोक्षः इति लोकः । दुःखं भयात् । 'मुक्तिरन्तरायध्वस्तेर्न पर इति साङ्ख्यसूत्रम् । भाष्येप्येकैका भक्तिर्मुक्तिसाधनमित्युक्तम् । भक्तास्तादृशस्थानेपि गतास्तत्कृतभयरहिताः, दैत्यानामभगवदीयत्वाद् भ्रंश एवेति दैत्यपक्षव्यतिरेकः । अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते । तैत्तिरीये 'वायुः सन्धानं' 'वैद्युतः सन्धान'मिति च श्रुतिः । वेदे वायुः अधिलोके वैद्युतः । लोकवेदात्मकत्वं स्मृतेरिति । परिशेषादत्र श्लोके । 'माधव'पदेना'स्मा वै पुत्र नामासी'तिश्रुतेर्वायुः वैद्युतश्च । विद्युता लिङ्ग्यत इति वैद्युतः, शैषिकोऽण्, माधवः । सूर्यो विद्युत्स्थः, माशब्दस्य विष्णुपत्न्यां लक्षणा, एकभर्तृत्वसम्बन्धः । फलत्वसाम्यात् । जन्मप्रकरणत्वेन सङ्ख्यातात्पर्यस्य मुख्यत्वात् । प्रश्ने विशेषाभावः । छान्दोग्ये 'सूर्यः कले'तिश्रुतिः । स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् एतैः सर्वैरादित्यमण्डलमेव विधास्यत' इत्यारण्यकात् ॥ ३३ ॥

सत्त्वं विशुद्धमित्यत्र पूर्ववदिति प्रमाणादि किं भगवत्पक्षपाते आह । सप्तम्यन्ताद् वतिः । प्रमाणेन पक्षपातमुपपादयति स्म वेदो हीत्यादि न स्यादित्यन्तम् । वैदिके मार्गे सर्वधर्मप्रवर्तको भगवान् प्रमाणं, तच्चानधिगतार्थगन्तृत्वं, तत् सर्वमुच्यते । प्रवृत्तीति 'निवृत्तं कर्म सेवेत प्रवृत्तं दूरतस्त्यजे'दित्युक्तेः । प्रतिपादक इत्यभिधया । तात्पर्यवृत्त्या तु 'तवार्हणमर्थ' इत्यग्रे वक्ष्यन्ति 'ततोपी'ति ग्रन्थेन । 'आश्रमादाश्रमं गच्छेन् नान्यथा मत्परश्चरे'दितिवाक्यात् सर्वोत्तममार्गमेकादशस्कन्धे 'यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवे'दित्याद्यध्यायद्वयेनोक्तं व्याख्यायामाहुः तादृशोपीत्यादि । प्रवृत्तिनिवृत्तिप्रतिपादकोपि, प्रत्येकं एकं प्रवृत्तं निवृत्तं वा कर्म लक्ष्मीकृत्य, द्विधा भिन्नैः ब्रह्मचारिगृहस्थावित्येको भेदः वानप्रस्थयती इत्येको भेदः । द्विधा भिन्नैश्चतुर्भिराश्रमैः । द्विविध इति ब्रह्मचारिगृहस्थाधिकारकः वानप्रस्थयत्यधिकारकश्चेति । सप्तदशाध्यायार्थैकवाक्यतयाहुः तत्र प्रवृत्ताविति । सिद्धमिति ब्रह्मचारिणोरध्ययनं

अर्थो वेदार्थः गृहस्थस्यानुष्ठानं तेनाध्यात्मिकचित्तशुद्धौ अवबोधो ज्ञानमिति सिद्धम्। अष्टादशाध्यायार्थैकवाक्यतयाहुः तप इत्यादि। एतेन वेदः प्रमाणं भगवत्कृतिश्चाश्रमचतुष्टयधर्मरूपा प्रमाणमुक्तम्। कृतिसम्बन्धिनं प्रवर्तक भगवन्तं प्रमाणमाहुः एतदित्यादि। धर्मानुष्ठानमित्यस्य विशेषणं वेदानुसारेणेति। क्रियाकाण्ड इतिनामानुसरणेन। दैत्यांशानामिति आश्रमचतुष्टयाधिकारिष्वेवासुरसम्पत्तिमताम्। सत्त्वमूर्तिरिति द्वितीयस्कन्धनवमाध्याये'प्रवर्तते यत्रे'तिवाक्ये शुद्धसत्त्वस्य वैकुण्ठ उक्तेः'सत्त्वं यस्य प्रिया मूर्ति'रित्युक्तम्। द्वितीयनवमाध्यायोक्ता। मिश्रसत्त्वप्रयोजनमाहुः स्वसत्त्वं प्रकटीकृत्येति। स्वं स्वीयम्। सात्त्विकानेवेति एवकारस्तामसदैत्यांशयोगव्यवच्छेदकः। प्रेरयतीति बुद्धिद्वारा। विपरीतानिति तामसान्। श्लोकं व्याकुर्वन्ति स्म वैदिकाश्चे ति। जगति प्रवर्तन्ते इति 'यद्यदाचरति श्रेष्ठस्तत्तथेवेतरो जनः। स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते' इति गीतायाः। स्थितिपदार्थं विशदयन्ति स्म तदेव तेनेत्यादि। 'स्थितिर्वैकुण्ठविजय' इतिवाक्याद् वैकुण्ठरूपेणैक्येपि विजये न कर्तृकर्मभाव इति। श्रयते सेवते। क्रीडार्थं आत्मनेपदात्। द्वितीयस्कन्धनवम एव 'ददर्श तत्रे'त्यत्रेत्यादिवाक्योक्तः सात्वतां पतिर्वाक्ये भगवान्। भक्तवश्यत्वेपि क्रीडापि निमित्तम्। प्रसृतेनेति व्यापकधर्मस्य व्यापकत्वनियमात् व्याप्तेनेत्यर्थः। क्रमेणेति आश्रमक्रमेण। सम्यगनुतिष्ठन्तीति येन व्याप्तस्य सत्त्वस्याश्रयणेन हेतुना वेदादिभिः करणे'स्तवार्हणं समीहित' इत्युक्ते वेदादीनां दृष्टद्वारकं भजनकरणत्वं न सम्भवतीति पूर्वं वेदाद्यनुष्ठानं ततश्चित्तशुद्ध्या भजनमित्यदृष्टद्वारा करणत्वम्। तथा चैतावदर्थात् अर्थापत्तिरूपाल् लब्धम्, 'आर्थिकं तु प्रवक्ष्यामी'ति कारिकाया इति ज्ञेयम्। वेदरूपप्रमाणस्याभिधया भगवान् तत्कृतिश्च प्रमाणं निरूप्य तात्पर्यवृत्त्या वेदप्रमाणसिद्धार्हणकृतिरूपप्रमाणमाहुः ततोपीत्यादि। शुद्धान्तरिति आधिदैविकी शुद्धिरत्र। तवार्हणमिति तदुक्तं, 'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया। तदध्यवस्यत् कूटस्थो रतिरात्मन्यतो भवे'दिति। भगवत्सेवेति सेवा रतिः। श्रद्धायां भक्तौ व्यसनरूपप्रेममिलनात्। रतिरेवासक्तिः। अत्र 'श्रद्धारतिर्भक्तिरनुक्रमिष्यती'ति वाक्यम्। 'ततः प्रेम तथा सक्तिर्व्यसनं च यदा भवे'दित्याचार्योक्तिश्चानुसन्धेया। स्फुटिर्यथाऽनन्तपारस्य वेदस्यातिविस्तृतभगवत्सेवानिरूपकत्वेन विस्तारस्य स्कन्दपुराणचातुर्मास्यमाहात्म्यनिरूप्यत्वात् प्रवृत्त्यर्थं संक्षिप्तपूजनमेकादशेकोनविंशाध्यायोक्तम्। एकोनविंशाध्यायोक्तश्रवणादिकं च भगवत्सेवापदेन गृह्यते। भक्तिवर्धिन्यां 'पूजया श्रवणादिभि'रित्याचार्यवचनात्। अष्टाक्षरमन्त्रः श्रीभागवतमाहात्म्योक्तः साधनचतुष्टये मुमुक्षुकार्यम्। "मुमुक्षुर्वै शरणमनुव्रजेदितिश्रुतेः। आत्मनिवेदनं श्रद्धा, श्रवणादिसरणिः प्रेमान्ता, एकोनविंशाध्याय एकादशीये इयं मर्यादा भक्तिः। पुष्टिभक्तिस्तु सन्ध्यामन्त्रे। 'तत्वायामि ब्रह्मणा वन्दमान' इत्यादौ। 'तदाशास्ते' इत्यनेन तच्छब्दार्थाशाया यजमानो हविर्भिरिति मूर्तौ मर्यादामार्गकरणात्। सर्वात्मभावस्तु प्रदानसाध्य इत्यन्यदेतत् भावनादिकं ग्रन्थान्तरादूह्यम्। फलाध्यायरश्मेश्च सत्कृतात् अप्रतीकालम्बनसूत्रीयात्। विस्तरभिया न लिख्यते। ननु वेदेनेति विधिनिरूपकेणैव। एवकारः सत्त्वश्रयणयोगव्यवच्छेदकः। कार्यसिद्धाविति धर्मप्रमित्यादिसिद्धौ। मूले श्रेयः फलमित्याशयेनाहुः यदि फलेति। कोपीति वेदातिरिक्तश्चेतनो नियामकः। न च वपुर्विना वेदादपि न फलसिद्धिरिति वाच्यम्। तैत्तिरीये 'तस्य यजुरेव शिरः ऋग् दक्षिणः पक्ष' इत्यादिपक्षिवपुस्सत्त्वाद् वेदस्य। एवं वेदातिरिक्तापेक्षाभाव इति वाच्यम्। 'तासां न पौरुषी प्रिये'तिवाक्यात् पुरुषविधब्राह्मणोक्तवपुषो मुख्यत्वात्। वेदातिरिक्तचेतनापेक्षासत्त्वात्। विसंवादिनमिति फलेन विगतसंवादोस्यास्तीति विसंवादी तं विसंवादिनम्। फलरहितम्। न प्रवर्ततेति'सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन' इतिवाक्यात्। तथा च दृष्टविसंवादेपि केचिद् वेदमार्गेण प्रवर्तन्तेन्ये च न प्रवर्तन्ते इतिदर्शनात्, न वेदेन धर्मप्रमित्यादिसिद्धिः किन्तु श्रेयोजनकः सत्त्वोपाधिर्वैदिकपदार्थयथार्थज्ञानजननायावश्यकः, 'सत्त्वात् सञ्जायते ज्ञान'मितिवाक्यात्, प्रमेयबलं चैतत्, वेदशब्दस्तु स्वज्ञानजनने भगवत्प्रसादसापेक्ष इति वेदातिरिक्तश्चेतनः फलदानायापेक्षितः। 'अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते। तपसा वेदयुक्त्या तु प्रसादात् परमात्मन' इतिश्रुतेः। एतदाक्षिपन्ति स्म नन्विति। शुद्धसत्त्वस्य प्रमेयबलतुल्यत्वेनादृष्टभूतसंस्कारद्वारा प्रमेयबलेन ज्ञानभक्तिभ्यां वैदिकपदपदार्थयथार्थज्ञानजननरूपकार्यसिद्धावित्यर्थः। समादधते स्म ते हीत्यादि। अत्र टिप्पणी। अदृष्टजनकमिति प्रमेयबलजन्यज्ञानभक्तिव्यापारभूतं यददृष्टं तस्य जनकमित्यर्थः। ज्ञानमिति माहात्म्यज्ञानम्। 'य एवं वेदे'त्यन्तिमवाक्यं बहुषु स्थलेष्विति बहुवचनम्। तदभावादिति वेदान्तोक्तकर्तृस्वरूपस्य मुक्तस्य माहात्म्यज्ञानस्य चाभावेन यथोक्तत्वाभावात् न तादृशादृष्टजननं, षडङ्गाशुद्ध्या कर्मप्रकारज्ञानाभावाच्च न भूतसंस्कारः शरीरोत्पादनलक्षण इत्यर्थः। जडत्वादिति शरीराभिमानेन जडत्वाच्चेतनधर्मस्यादृष्टस्य तत्र नोत्पत्तिरित्यर्थः। सुबोधिन्याम्। जानीयुरिति ते चतुराश्रमस्थाः शरीराभिमानिनः शरीरमात्मेत्यन्यथाज्ञानवन्तः। शरीरमात्मत्वेन जानन्त्यतो यदि प्रथमं शरीरभिन्नतयात्मानं जानीयुः विद्वन्मण्डनोक्तरीत्या शरीरं नात्माऽनित्यत्वादित्येवमात्मविषयकानुमितिरूपज्ञानानुकूलव्यापारवद् व्यापारवन्तो विधिरस्मान् प्रेरयतीत्येवं विधिविषयतयात्मज्ञानं कुर्युरित्यर्थः। तदा कर्त्रिति भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थप्रतिपादकत्वं सामानाधिकरण्यम्। कर्तृपदप्रतिपाद्यार्थैक्येनार्थप्रतिपादकत्वमदृष्टपदे तत्प्रतिपाद्यमदृष्टमुत्पद्येतेत्यर्थः। 'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्। तत्रैवं सति कर्तारमात्मानं केवलं तु यः। पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मति'रितिगीतायाः। दैवमदृष्टम्। तथा च कर्तृपदप्रतिपाद्यमदृष्टमुत्पद्येतेत्यर्थः। एवकारोत्यन्तायोगव्यवच्छेदकः। देहान्तर इति तेषां विद्यमानशरीराणा देहान्तरे वा फले प्राप्ये भूतसंस्कारो देहान्तरोत्पादको भवेदित्यर्थः। अभावादिति ज्ञानाभावेन कर्मणो निरङ्गत्वान् नादृष्टोत्पत्तिः न वा भूतसंस्कार इति समाधानम्। भगवानेवेति कर्तृपदवाच्यो भगवान्। एवकारोऽधिष्ठानादिकर्तृचतुष्टययोगं व्यवच्छिनत्ति। वेदकृतपक्षपातत्वाद् भगवान्

वासुदेवः, 'वासुदेवश्छन्दसि पठ्यत' इति ज्योतिषे। तेन 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्य' इतिसूत्राद् भगवान् कर्मापेक्षः फलदातेत्यपि प्रत्युक्तम्। वेदान्तमतत्वेन भगवन्मार्गाकृतपक्षपातविषयत्वात्। 'तं त्वौपनिषदं पुरुषं पृच्छामी'तिश्रुतेः, 'नाहं वेदे'रिति स्मृतेश्च। तथा च वासुदेवपदप्रवृत्तिनिमित्तत्वेन वासुदेवत्वरूपविशुद्धसत्त्वस्य वसुदेवशब्दितस्यापेक्षेति भावः। 'विशुद्धसत्त्वं वसुदेवशब्दित'मितिवाक्यात्। अपेक्ष्यत इति फलदानार्थमपेक्ष्यत इत्यर्थः। श्रेय इति श्रेयांसि सुदामसमृद्धिः नन्दभक्तिः परीक्षिद्ब्रह्मास्त्रनिवारणं 'तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यह'मिति योगक्षेमप्रापणम्। उक्तफलानि च। उप समीप इति अलौकिकी व्युत्पत्तिः उप समीपेऽयतेनेनेति लौकिकी। 'करणाधिकरणयोश्चेति ल्युट्'। यस्मादिति वपुषः। वं सुखं पुष्णातीति वपुरिति व्युत्पत्त्याहुः। दैवगत्येति। पुष्ट्या अधीतिनामिति बोध्यम्। किन्तु वपुषो व्यापकत्वादित्यपि बोध्यम्। अस्तु वेति यथाकथंचिच्छाब्दादिज्ञानरूपात् कर्तृस्वरूपज्ञानात् कर्मप्रकारज्ञानाद्वास्तु वा। तस्येति चतुराश्रमीणस्येत्यर्थः। भगवद्भजन इति भक्त्यात्मके करणत्वं, प्रसृतसत्त्वाज् ज्ञानं, ज्ञानादिच्छया यत्न इति। अन्यथासिद्धत्वे तु कारणत्वमपि न सत्त्वस्य, कुतः करणत्वमित्यरुच्याहुः सहायत्वमिति। अन्यथासिद्धं यत् प्रतीयते कारणत्वं तदेव सहायत्वम्। यद्वा सहायत्वमाधिदैविकत्वं सत्त्वस्य भगवदीयत्वात्। भगवतश्चाधिदैविकत्वात्। क्षयिष्णवेवेति 'जायस्व म्रियस्वे'ति छान्दोग्योक्ततृतीयमार्गोक्तं क्षयिष्ण्वेव फलम्। एवकार अक्षय्यफलयोरन्यवच्छेदः। 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवती'ति श्रुत्युक्तं अक्षय्यं वैश्वदेवपर्वणि। तत् पूर्वमीमांसाभाष्ये वृत्तौ वा मत्कृतायां स्पष्टमिति ततोवसेयम्। पूर्वदोषेति कस्याप्यप्रवृत्तिलक्षणदोषस्यानिवृत्तिः। देवानां पद्येति अस्मिन् पद्ये पूर्वार्धेन सत्त्वस्य फलसिद्धौ धर्मज्ञानद्वारा करणत्वमुक्तं, तत्र सत्त्वं पूर्वोक्तं मैत्रायणीयोपनिषदुक्तो गुणान्तरसारभूतः कारणं सत्त्वगुणः कारणनिष्ठो वेदे ब्राह्मणरूपे प्रमाणं, मन्त्ररूपे वेदेनुष्ठीयमानवैदिकधर्मेषु भगवत्सेवाकरणतायाः तत्सहायतायाश्च प्रमितिर्भवति। ननु मन्त्रोक्तानुष्ठानेन फलं न ब्राह्मणप्रमितधर्मेणेति चेन्न। श्रेयस्त्वेन फलस्योपादानात्। तद् देवानां सात्त्विकत्वात् तत्पक्षपातार्थं भगवताधिष्ठीयते। सत्त्वेन धर्मप्रवृत्तिर्देवानां तमसा दैत्यानामिति। न च भगवत्सेवाकरणतातत्सहायताविशिष्टधर्मप्रमितौ सत्त्वस्यान्यथासिद्धत्वेन कारणत्वं कुतः करणत्वमिति शङ्क्यम्। सत्त्वाज् ज्ञानं ज्ञानादिच्छेच्छाया यत्न इति क्रमस्यात्राभावात्। सत्त्वे ज्ञानपदप्रयोगात्। यत्नेपि ज्ञानपदप्रयोगः पञ्चरात्रशास्त्रे। अतः सत्त्वस्येच्छाव्यापारकत्वं वा। अत्र मन्त्रब्राह्मणयोर्वेदनामधेयमिति वेदकृतपक्षपाते उत्तरार्धेन वेदक्रियायोगतदर्हणानां फलसिद्धौ करणत्वमुक्तं, तानि च शब्दभगवत्कृतिजीवकृतिरूपत्वेन मन्त्ररूपे वेदे प्रमाणं अनधिगतार्थगन्तृत्वरूपम्। वेदादिभिः तदर्हणादिरूपधर्मानुष्ठानादि प्रमा भवतीति। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्रश्लोक उच्यत इत्याकाङ्क्षायामुच्यते तैत्तिरीये 'अधरा हनुः पूर्वरूपम्। उत्तरा हनुरुत्तररूपम्। वाक् सन्धिः जिह्वा सन्धान'मिति चतुष्के वाक् सन्धिरत्र। 'वाचा विरूपनित्यये'ति श्रुतेः। वाक् प्रमाण, शब्दरूपत्वात्। प्रश्ने विशेषाभावः। छान्दोग्ये 'प्रतीचीदिक्कले'ति श्रुतिः। वरुणेन दिक्पतिना नारायणप्रमाणम्। व्रियते वृणोति वा वृणुते वा वरुणः। वृञ् वरणे। 'कृवृदादिभ्य उनन्'। नारा आप इति प्रोक्ताः ता अयनं यस्येति नारायणः। ॥ ३४ ॥

सत्त्वं न चेदित्यत्र पूर्वश्लोके पूर्वाधनोक्तं पक्षपातमेकदेशेनाश्रमचतुष्टये आश्रमद्वयेनाक्षिपन्ति स्म नन्वित्यादि। भवतु नामेति भक्तिमार्गे पुष्टेः सत्त्वेन तदुभयोपकारकं भवतु नाम श्रेयोदानार्थम्। गृहस्थमुक्तेश्च छान्दोग्योक्तात्। इत्याश्रमद्वयव्यवस्था। आश्रमचतुष्टये द्वितीयैकदेशेनाहुः ज्ञानस्येत्यादि। आत्मसाक्षात्कारस्य भगवद्विज्ञानस्य च। विज्ञानं ज्ञानमेकमेव मन्यन्ते। सिद्धफलेति देहाध्यासनिवृत्तिद्वारा सिद्धस्य परमानन्दरूपस्य मोक्षाख्यफलस्य ब्रह्मज्ञानस्य दातृत्वात्, भगवद्विज्ञानस्य भेदनाशद्वारा सिद्धस्य परमानन्दरूपस्य मोक्षाख्यस्य फलस्य दातृत्वात्। असिद्धेति साध्यस्वर्गादिफले द्रव्यादियागेपि ज्ञानस्य साक्षादेव कर्मभिरेव 'य एवास्मि स सन् यज' इतिश्रुतेः फलजननसम्भवात्। तद्ज्ञान इति संन्यासाश्रमीणज्ञान आत्मसाक्षात्काररूपे। तत्साधन इति यतिज्ञानसाधने वानप्रस्थतपसि वन्यफलयागरूपे। नापेक्ष्यत इति विवेकस्य जातत्वादितिभावः। आत्मानात्मविवेकमन्तराश्रमद्वयेऽप्रवृत्तेः आहेति विशुद्धानुवादकनिजपदाभिप्रायपूर्वकं विज्ञानप्रमेयमाह। 'निजं सत्त्व'मिति योजनयाहुः शुद्धसत्त्वमिति। सत्त्वप्रयोत्यार्थमाहुः सर्वरक्षकमिति। सर्वकर्मेति मोचककर्मसङ्ग्रहाय सर्वपदम्। 'शरीरिणां श्रेयउपायनं वपु'रित्यस्य तात्पर्यार्थः चेदिति। च इदिति पदच्छेदः। चोप्यर्थे इदवधारणे। विज्ञानमिति भगवद्विज्ञानं न भवेदिति पूर्वेणान्वयः। कारणाभावादिति हेतुः। अपिना श्रेयः। पदार्थसम्भावनायामपिः। सत्त्वस्य श्रेयोदानार्थत्वमुक्तं, पूर्वश्लोके विज्ञानार्थत्वे हेतुमाहुः सत्त्वात् सञ्जायत इति। शास्त्रसिद्धेनेति शास्त्रीयवाग्विषयेण। उपेति उप समीपे नियन्तुः। परकीयत्वात् शास्त्रीयत्वात्। तदैवेति तत्काले। अभ्यासेपि पदजन्यपदार्थोपस्थितेः कारणत्वात् शास्त्रानुसन्धाने शास्त्रार्थयागाद्यनुष्ठाने वा शास्त्ररूपपदजन्यत्वेन अनुष्ठाने मन्त्ररूपपदजन्यत्वेनैवकारोयधारणार्थकः। आविरिति अन्यथाऽन्यदापि सत्त्वाज् ज्ञानं भवेदिति। तद्धर्मेति पदसमानाधिकरणः शास्त्रानुसन्धातुः तदर्थानुष्ठातुर्वा धर्मः तत्त्वात्। यद्वा सत्यादिधर्मत्वात्। सत्याद् रजः ज्ञानात् सत्त्वं आनन्दाच्च तम इति। स्वरूपलक्षणेऽनन्त आनन्द इति। इदमिति पार्थिवमिव प्रतीयमानमाकाशम्। निजं वागगोचरमध्यपातिवागगोचरम्। 'धात'रित्यस्याभासमाहुः न च तैरपीति। शास्त्रैरपि सात्त्विकराजसतामसैः। स्वमूलेति स्वीयसत्त्वादिगुणमूलं च तत्कारणभूतः सत्त्वगुणस्तम्। यद्वा तैरित्यस्य निजैरित्यर्थः। सत्यज्ञानानन्तधर्मैः सत्त्वरजस्तमोभिः उत्पादयितुमिति उपासकहृदये उत्पादयितुम्। तेषामिति प्रकृतिसाम्यावस्थारूपस्य गुणत्रयस्य

स्थित्यादिकालक्षुब्धानां विष्ण्वादिशक्तिभूतानां सत्त्वादिगुणानाम्। विशुद्धसत्त्वकारणत्वाभावात्। तस्य नित्यस्य कारणायोगात्। यतो धाता निजसत्त्वोत्पादकस्त्वमेवेत्यर्थः। सत्त्वस्य विज्ञानहेतुत्वं व्युत्पादयन्ति स्म विज्ञानमिति अनुभवस्तु आत्मभगवद्विषयकः। आत्मविषयकं भगवद्विषयकं चानुभवं व्युत्पादयन्ति स्म स च सत्त्वेनेति। सत्त्वं एकं रूपे यस्यान्तःकरणस्य तत् तथोक्तं तस्मिन्। 'माया मनःसृजती'ति चतुर्थस्कन्धात्। कारणस्य रजस्तमसो अन्तःकरणे तिरोहिते। साधनात्। भवतीति 'कामः सङ्कल्पः' इतिश्रुतौ मनोवृत्तिषु धीगणनात्। यथा यथेत्यादि ब्रह्मवित्प्रपाठके आनन्दमीमांसायां प्रत्यानन्दं 'श्रोत्रियस्य चा कामहतस्ये'ति विशेषणे छन्दोऽप्येतुः 'अकामहतत्व'मिच्छाऽपराभूतत्वं इच्छयाननुकूलेपि प्रवृत्तत्वमितियावत्। 'यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानैः। तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्त'मितिवाक्यमप्यनुसन्धेयम्। शुद्धसत्त्वेति आन्तं विशुद्धान्तःकरणे मायिकसत्त्वाद्युपमर्देन शुद्धसत्त्वाविर्भावे भगवदधिष्ठानं तस्मिन् सत्येव समानाधिकरणं मनस्यात्मविज्ञानम्। जगत्यन्न इति जगद्रूपेऽन्नेऽभेदान्वयः क्षुधीति दार्ष्टान्तिके आत्मविज्ञानाकाङ्क्षा क्षुत्स्थाने। शक्यमिति 'वासुदेवं परित्यज्य योन्यं देवमुपासते। तृषितो जाह्नवीतीरे कूपं खनति दुर्मति'रिति पाण्डवगीताया न शक्यम्। अयमर्थः। जगतोन्नत्वं ईषावास्योपनिषदि 'ईषा वास्यमिदं सर्वं यत् किञ्चिज् जगत्यां जग'दिति जगदुक्तम्। तस्यान्नत्वं तैत्तिरीये 'अन्नं बहु कुर्वीत, तद्व्रतम्, पृथिवी वा अन्न'मिति।

'अन्नं'पृथिवी 'बहु कुर्वीत' 'पृथिव्या ओषधयः ओषधीभ्योऽन्नं'मितिश्रुतेरन्नौषधिरूपेण बहु कुर्वीतेत्यर्थात्। अन्नसम्पादनमिति दार्ष्टान्तिके विज्ञानसम्पादनम्। न तु क्षुदनन्तरमिति दुःसहक्षुदनन्तरमित्यर्थः। दार्ष्टान्तिके दुःसहात्मविज्ञानाकाङ्क्षानन्तरम्। तत्सम्पादनं अन्नसम्पादनम्। दार्ष्टान्तिके आत्मविज्ञानसम्पादनं शक्यम्। ननु जानातीच्छति यतत इति आकाङ्क्षानन्तरं यत्न उचित इति चेन्न। ननु क्षुदनन्तरं तत्सम्पादनं शक्यमिति पाठान्तरसत्त्वात्। क्षुदनन्तरं क्षुज्ज्ञानं तदनन्तरं तन्निवर्तकान्नाकाङ्क्षा तदनन्तरं तत्सम्पादनमन्नसम्पादनं यत्नाख्यं शक्यम्। ननु प्रश्ने अयं प्रश्नः। यद्वा ननु निश्चयेऽयं निश्चय इत्यर्थः। दार्ष्टान्तिकमाहुः अतो भगवतेति। आविर्भावित इति अन्नदृष्टान्तेन दृष्टान्तिते। तत्कृपयेति विज्ञानकारणभूतकृपया। विज्ञानत्वेन तत्कृपात्वेन कार्यकारणभावात्। आत्मविज्ञानाकाङ्क्षायां सत्यामिति बोध्यम्। सङ्कर्षणप्राकट्यस्याध्यायार्थत्वात् तत्प्रतिपाद्यपूर्वाध्यायार्थोपि भगवता सह सत्त्वं वासुदेवाख्यमित्यर्थः। तदायमहमित्यभेदेनानुभवः। इदं सत्त्वं आविर्भावितसत्त्वं प्रसूतं बोध्यम्। न त्वन्यथेति भगवता सत्त्वे अनाविर्भाविते। निषिध्यमानमिति न भवेदिति निषेधविषयीभूतं विज्ञानमित्यर्थः। शास्त्रीयमिति शाब्दं यस्मिन् क्षणे शास्त्रानुसन्धानमित्यादिना पूर्वमुक्तम्। तथा च सात्त्विकं ज्ञानं न भवेत् चेत् नावश्यकं अदृष्टादिनापि तदितिभावः। आवश्यकं तु ज्ञानभिद्योरपमार्जनं विज्ञानमित्यपि भावः। विज्ञानं विशिष्टं ज्ञानं, तच्च विषयविशिष्टमित्याशयेनाहुः आत्मानुभव इति। आत्मनोनुभवः आत्मानुभवः अयमहमित्याकारकः। प्रतियोगिनः स्वाभावनाशकत्वं दृष्टम्। 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त' इति वाक्यादाहुः भेदनाशकमिति। भिदा माया तन्नाशकं भगवद्विज्ञानं श्रीकृष्णः शरणं ममे'ति विज्ञानम्। स्वसमीपे स्वाशयप्रकाशनात् 'प्रपत्तिमार्गः' शरणमार्गः। यद्वा आत्मा सविकल्पकं ज्ञानम्। भगवान् ब्रह्म निर्विकल्पकज्ञानम्। 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यत' इति वाक्याच्छ्रुत्यादौ शब्दत्रयात्। उभयोरिति आत्मभगवतोरित्यर्थः। अत्र टिप्पण्याम् अध्यासनिवृत्तिरिति आत्मानुभवेऽहं स्थूलोहं पश्यामीत्यादिदेहाध्यासः तस्य निवृत्तिः। आत्मा स्थूलत्वादिरहितः शुद्धः बुद्धः मुक्तस्वभावः। द्वितीयस्येति भगवद्विज्ञानस्येत्यर्थः। अत्र 'सत्त्व न चे' दित्युक्तं सत्त्वं भगवता सह सत्त्वरूपं हृदये समागतं वासुदेवरूपं विज्ञानविषय इति विषयरूपेण कारणम्। अद्वैतस्फूर्तिः न सात्त्विकी गीताष्टादशाध्यायोक्ता किन्तु आत्मसृष्टिविषया। निजसत्त्वस्य वासुदेवात्मकत्वेनाभिन्ननिमित्तोपादानत्वात् विज्ञानात्मसृष्टौ ह्यद्वैतस्फूर्तिर्या तामाहुः स वैदिकेति। सः अद्वैतविशिष्टत्वेन स्फूर्तिविषय आत्मा। प्रमेयमिति वैदिके मार्गे प्रमाणं वासुदेवः। 'विशुद्धसत्त्वं श्रयत' इतिवचनात् पूर्वार्धे उत्तरार्धे वेदः भगवत्क्रिया कृतिरूपा च प्रमाणमुक्तम्। सर्वथापि वैदिके मार्गे सर्वधर्मप्रवर्तको भगवानिति सुबोधिन्या भगवान् प्रमाणमित्युक्तम्। तादृशभगवज्जन्यकृतिजन्या या आत्मसृष्टिः तद्विषयिणी प्रमा च तद्विषयत्वं आत्मसृष्टावित्यात्मसृष्टिः प्रमेयं प्रमाविषयं प्रमेयमितिलक्षणात्। तत्त्वेनेति अद्वैतविशिष्टत्वेन। आत्मनः सृष्टिरूपस्य स्फुर्तिरित्यर्थः। सुबोधिन्याम्। उत्तरार्धं व्याचिख्यासवो विज्ञानस्वरूपं विविच्य सत्त्वस्य विज्ञानहेतुत्वं साधयन्ति स्म तच्चेति। शुद्धाद्वैतस्फूरणम्। न विषयेति किन्त्वावरणभङ्गमात्रेण। तथा चात्मानुभव इत्यत्र भगवद्विज्ञानमित्यत्र च न षष्ठीतत्पुरुषः किन्तु कर्मधारय इति भावः। पूर्वमिति 'येन्येरविन्दाक्ष' स्यस्य व्याख्याने। किन्तु शुद्धाद्वैतं परिणामवादेन, 'आत्मकृतेः परिणामात्' इति व्याससूत्रात्। तच्च टिप्पण्युक्तत्वादात्मसृष्टौ भवति। तत्र स्वगतद्वैतस्य दुष्परिहरत्वाच्च् शुद्धत्वं स्वगतद्वैतशून्यत्वं त्रिविधद्वैतशून्यत्वम्। आत्मसृष्टावपि भेदस्य प्रत्यक्षसिद्धस्य द्वित्वसङ्ख्यारूपद्वैतसापेक्षत्वं संशयज्ञानरूपद्वैतसापेक्षत्वं वेति न द्वैतहानिस्ततो न शुद्धाद्वैतत्वमिति चेन्न। सात्त्विकज्ञानेन गीतोक्तेन भेदनिवृत्त्या तन्निबन्धनसङ्ख्यारूपसंशयज्ञानरूपद्वैतयोर्निवृत्तेरज्ञानमूलकमेव भेदस्फूर्तिः। कार्यकारणवस्त्वैक्यमर्षणं पटतन्तुव'दितिवाक्यात्। एवं शुद्धाद्वैतं पुरुषार्थसाधकमिति विवेकः। एवं विज्ञानस्वरूपं विविच्य सत्त्वस्य विज्ञानहेतुत्वं साधयन्ति स्म आविर्भावस्त्विति। स्वरूपस्येति जीवतात्त्विकरूपस्य। शुद्धसत्त्वेति वासुदेवत्वादितिभावः। आत्मानुभवाधिकारिणावत्राश्रमद्वयस्थौ। आत्मविवेकस्य जातत्वात्। अत आश्रमस्थयोर्ज्ञानतपसी सत्त्वापेक्षे। आश्रमधर्मज्ञाने सत्त्वं हेतुतया तपसि तु ज्ञात्वा तपःस्वरूपं तपः कर्तव्यमिति। तपःस्वरूपं तु द्वितीयनवमाध्याये 'तपो मे हृदय'मिति वाक्योक्तम्। भगवतो हार्दकरणार्थं सन्तापः। तदपेक्षेति सत्त्वापेक्षा। न तदिति वानप्रस्थाश्रमधर्मस्तपः पृथक्त्वन् निरूपितम्। ज्ञानादिति बोध्यम्। श्लोकयोजनां स्फुटीकुर्वन्ति स्म

न चेत्यादि । अत्र टिप्पण्याम् । यदितिपदमिति 'य इत् तद्विदुस्त इमे समासत' इति श्रुतौ ये इत् तद्विदुः समासते इति पदच्छेदः । तद्वत् यत् इतपदमित्यर्थः ।

योजना तु विज्ञानं सत्त्वं स्वकारणस्वत्वयुक्तं हे 'धातः' 'इदं' आत्मानुभवरूपं आत्मानुभवस्य मानसप्रत्यक्षविषयत्वात् । 'निजं' च भगवद्विषयकं 'च न भवे'दिति । सुबोधिन्याम् । ननु चेदित्येकं पदं यदि तदा लाघवमिति चेत् तत्राहुः अर्थवशादिति । तथा चार्थेन लाघवं बाधकं, अन्यथा कलशपदार्थे कर्तव्ये लाघवात् कुम्भार्थापत्तेः । अज्ञानभिदिति अत्र टिप्पण्यां इति भवेदिति 'हेतुहेतुमद्भावे लिङानुशासनात्' । कृष्णं नमेच्चेत् सुखं यायादित्यत्रेव । श्रीधरव्याख्यानं प्रत्युक्तम् । स्वोक्ताशङ्काया इति श्रीधरेण हि मोक्षस्य तु ज्ञानैकसाध्यत्वात् किं भक्त्येत्याशङ्कावतारिकायामुपक्षिप्ता । सा तदा निवर्तते यदा मोक्षस्य ज्ञानस्य वा भक्त्येकसाध्यता व्याख्यायते, तत् तु न व्याख्यातमिति स्वोक्ताशङ्काऽनिवृत्तिः । स्वव्याख्यातेति स्वव्याख्यातशास्त्रार्थो भक्तानां मोक्षप्राप्तिरूपः तस्याप्यनेनाप्राप्तिरित्यतः श्रीधरोक्तं द्वितीयव्याख्यानमयुक्तमित्यर्थः । सुबोधिन्याम् । उत्तरार्धस्याभासमाहुः नन्विति । अस्येति भगवदीयस्य । स्वत इति कार्यकारणभावसम्बन्धरूपलक्षणं विनाभिधयेत्यर्थः । साधन इति 'सत्त्वात् सञ्जायते ज्ञान'मिति वाक्याज् ज्ञानसाधने । ज्ञानमत्र प्रथमज्ञप्तिरूपोत्पत्तिरूपम् । आविर्भावः । तथा च आविर्भावसाधन इत्यर्थः । यद्यन्यथैवेति अन्यथा सत्त्वं विनापीत्यर्थः । अर्थापत्त्याविर्भावः सिद्ध एव चेद् भवेत् तदा आविर्भावसाधनार्थं का सत्त्वापेक्षेत्यर्थः । भगवदाविर्भावो भगवद्विज्ञानम् । भेदनाशकमित्येव । आत्मन इति जीवस्य सविकल्पज्ञानस्य वा आविर्भावः प्रथमज्ञप्तिरूपः सिद्धो भवेत् । आत्मानुभवः सिद्धो भवेत् । अज्ञाननाशक इत्येव । केन प्रकारान्तरेणाविर्भाव इत्यपेक्षायां तं प्रकारमाहुः तत्रेन्द्रियाणामिति । तत्रेति आविर्भावप्रकारे वाच्य इत्यर्थः । प्रकाश इति विषयग्रहणं, इन्द्रियकर्तृकं ज्ञानं वा । स्वकारणेति स्वमिन्द्रियाणि तस्य कारणं प्रवर्तकं केनोपनिषदुक्तं ब्रह्म तस्य प्रकाशो ज्ञानं इन्द्रियविषयकं गृह्यते इन्द्रियप्रवर्तनेनेन्द्रियविषयकयत्नात् । आक्षिपतीत्याक्षेपं करोति । आक्षेपोऽर्थापत्तिः । तत्रेत्यादि तत्रेति स्वकारणप्रकाश आक्षिप्ते प्रवर्तकस्येति केनोपनिषदुक्तस्येन्द्रियप्रवर्तकस्य । अभिमानिन इति स्थूलत्वद्रष्टृत्वाद्यभिमानवतः । भगवत अभिमानिन इति स्मार्तप्रयोगः । भावी भावः सत्ता तद्वान् भावी, षड्भावविकारेषु द्वितीयो भावः सत्ता । भवतीति शेषः । अत इति उभयोर्निर्धारात् । तदनुसन्धानेनेति उभयोरनुचिन्तनेन तदुभयोरात्मत्वेन ज्ञाने व्यवधायकस्य प्रतिबन्धकस्य मलस्य देहात्मज्ञानस्य निवृत्तौ सत्यामुभयोः प्रकाश आत्मत्वेनानुभवो भविष्यति वेदादिप्रमाणाभ्यां शाब्द इत्यर्थः । एवकारेण सत्त्वयोगव्यवच्छेदः क्रियते । इति प्रकाशेति इति हेतोः प्रकाशार्थं व्यर्थं सत्त्वमित्यर्थः । इन्द्रियेति इन्द्रियविषयाणां रूपादीनां आदिना सत्त्वादीनां गुणानाम् । ज्ञानैरिति तेनेन्द्रियाणां प्रकाशो विषयग्रहणं व्यावर्तितः । प्रेरक इति प्रेरक इन्द्रियाणां अभिमानीन्द्रियप्रेरकत्वद्रष्टृत्वादीनाम् । अनुमीयत इति इन्द्रियप्रेरकोभिमानी च तत्तदर्थप्रकाशवान्, तत्र तत्रेन्द्रियप्रेरकत्वात्, यन्नैवं तन्नैवमित्यनुमानेनेन्द्रियप्रवर्तकस्य प्रकाशेनुमितेपि तेन तत्सत्तामात्रं सिध्यति । न तु तत्स्वरूपं प्रकाशते । यदि तत् प्रकाशेत तदाऽयं भगवानयमहमित्येवं ज्ञानं स्यात् । तत् तु न जायते, तत्र हेतुः स हीत्यादि । तथा करोति प्रेरणं करोति । अग्राह्यत्वात् । ननु स्वरूपसत्तादिनैव स्वत एवाविर्भावो भवतु 'यदा यदा'हीतिवाक्यादिति चेत् तत्राहुः न चेत्यादि । स्वरूपसत्त्वमिति स्वरूपसत्ता । कार्यकरणमिति कार्यं धर्मः 'यद्धिया त ऊरुगाय विभावयन्ति तत् तद् वपुः प्रणयसे सदनुग्रहाये'ति वाक्योक्तवपुरूपः तस्य करणम् । प्रकृत इति पूर्वोक्तप्रकारकापरोक्षानुभवे । पूर्वमिति पूर्वार्धव्याख्याने । इदमाक्षिपन्तः तुरीयचरणं व्याकुर्वन्ति स्म न च प्रकाशोपीति । कार्यमुक्तमेवात्र । न सम्भवतीति अग्राह्यत्वात् । गुणप्रकाश इति सत्यादिगुणानां सत्त्वादीनां प्रकाशो ज्ञानम् । सम्बन्धिन इति भगवतः । केनोपनिषदः प्रेरक उक्तः । येनेतिपदोक्तस्य करणस्य । अत इति गुणेन कार्यरूपेण सम्बन्धिनः प्रकाशाभावात् । अपेक्षित इति तेन प्रकटस्य प्रमाणत्वे सत्त्वं पूर्वश्लोकोक्तं ग्राह्यं प्रमाणकमुक्तम् । अथ तैत्तिरीयप्रश्नच्छान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते । तैत्तिरीये उत्तराहनुरुत्तररूपमत्र । परिशेषात् । अधराहनौ उपयोगाल्लोभोपयोगात् । 'लोभोधरोष्ठ' इति वाक्यात् । उत्तरश्लोकयोः स्फुटिष्यति । प्रश्ने विशेषाभावः । छान्दोग्ये 'पृथिवी कले'ति समर्थितम् । 'इद'मिति । त्यक्षगे पृथिवीरूपे प्रयोगात् । पार्थिवं शरीरं ब्रह्मेति पृथिव्याकाशस्थानीयेति । 'यस्य पृथिवी शरीर'मित्यन्तर्यामिब्राह्मणे । 'आकाशशरीरं ब्रह्मे'ति तैत्तिरीये । विशुद्धसत्त्वस्य मायाभावेन तत्र तत्सत्त्वाभावात् पृथिवीरूपत्वं वसुदेवे दृष्टम् ॥ ३५ ॥

न नामरूपे इत्यत्र प्रमाणप्रमेये इति स्मृतिषु योग इव, वेदे प्रमाजनकत्वात् सत्त्वं प्रमाणं भगवद्रूपं, अनधिगतार्थगन्तृत्वम् । प्रमाणम् । ज्ञानं भगवद्रूपम् । 'ज्ञानमात्रं परब्रह्मे'तिवाक्यात् । 'इन्द्रियाणां प्रमाणत्वं सत्त्वयोगान्न चान्यथे'त्यत्र तथा निरूपणात् । तत् सत्त्वं पूर्वश्लोके निरूपितम् । तेन साध्यः प्रमाविषयीभूत आविर्भावोऽत्र श्लोके विचारित इत्यर्थः इति श्रीवल्लभानां लेखे उक्तम् । 'स वैदिकमार्गे हि प्रमेय'मित्युक्तटिप्पण्यां 'स' अद्वैतविशिष्टत्वेन स्फूर्तिविषय आत्मा 'प्रमेय'मित्युक्तम् । श्रीपुरुषोत्तमैस्तु अत्र जीवस्वरूपप्रकाशः शुद्धाद्वैतप्रकाशस्य वैदिके वर्त्मनि प्रमेयमित्युक्त मत्युक्तम् । प्रमाविषयीभूत आविर्भावः श्रीवल्लभोक्तः, टिप्पण्युक्तोऽद्वैतविशिष्टत्वेन स्फूर्तिविषय आत्मा तन्निष्ठः । श्रीपुरुषोत्तमलेखे जीवस्वरूपश्च प्रकाशोन्य आत्मा ज्ञानरूपश्च जडो यस्मिन् प्रपञ्चे स तथोक्तः । स शुद्धाद्वैतस्य यः प्रकाशो ज्ञानं तस्य प्रमाया विषयमित्येवं प्रमेयमित्यनेनान्वयः । क्वेति चेन्न । वैदिके वर्त्मनी-

न्वयः। इति परस्परं न विरोधभानम्। वैदिकेति 'वेदक्रियायोगे' तिवाक्ये शब्दार्थयोरुक्तेश्चतुर्षु वाक्येषु वैदिकमार्ग इति भवत्यवधृतिः। भगवानिति 'फलमत उपपत्ते'रिति व्याससूत्रात्। भगवान् कृपाविशिष्टो बोध्यः। ननु भगवत्त्वेन भगवतः कृपया धर्मेण साधनत्वं कुतः धर्मार्थकामरूपसाधनस्य सत्त्वादिति चेन्न। 'वेदे रामायणे चैव पुराणे भारते तथा। आदावन्ते च मध्ये च हरिः सर्वत्र गीयते' इति वाक्यात् भगवतः कृपारूपेण साधनत्वात्। सर्वपुरुषार्थेष्विति तेषु मोक्षरूपः। स च गुणातीत एवेति 'गुणेभ्यश्च परं वेत्ती'ति गीतायां आम्नायार्थदर्शिकायां 'गौणश्चेन्नात्मशब्दा'दिति व्याससूत्रादेवकारः। वेदे गुणाभावादिति 'वेदो नारायणः साक्षा'दितिवाक्येनात्मत्वादात्मनि च गुणाभावात्। उक्तसूत्रात् 'न यत्र माये'तिवाक्याच्च। तथा कृतवानिति मायिकसत्त्वभिन्नविशुद्धसत्त्वगुणाश्रयं कृतवान्। अत इति सत्त्वगुणसादृश्यात्। निराकरोतीति साक्षिण इति मूले, 'साक्षी चेता केवलो निर्गुणश्चे'तिश्रुतौ साक्षित्वस्य निर्गुणत्वसमानाधिकरणत्वान् निराकरोति। गुणकर्मेति गुणाश्च कर्माणि च जन्मानि च गुणकर्मजन्मानि तैरिति श्रीधरीयम्। तत्र गुणाः करणानि जन्मकर्मणोः। सात्त्विकजन्म सात्त्विकं कर्मेति प्रत्ययात्। न तु निरूपितव्ये करणानि आत्मनि गुणाभावादित्युक्तत्वात्। एवं च गुणैः कृत्वा यानि कर्माणि जन्मानि चेति द्वन्द्वः। कर्माधीनत्वाज् जन्मनः। तत्र मूले जन्मनोऽभ्यर्हितत्वा'दभ्यर्हितं चे'ति सूत्रात् पूर्वनिपातः। अतः गुणकर्मजन्मभिरिति सुबोधिन्यां पाठः। अनिरूपणे हेतुमाहुः साक्षीति। सुषुप्तिसाक्षी। श्रुतौ चेतःपदसमभिव्याहारात् सर्वभूताधिवासपदाच्च। तथा च श्रुतिः 'कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चे'ति। सर्वोपनिषदि ज्ञानज्ञेयानामाविर्भावतिरोभावज्ञानात् स्वयमेवमाविर्भावतिरोभावहीनः स्वयंज्योतिः स साक्षीत्युच्यते इति साक्षिलक्षणम्। अत उक्तं भगवानिति। सर्वकर्मफलदाता स्वयमेवमाविर्भावतिरोभावहीनो भवति। आविर्भावतिरोभावकाले कर्मफलदातृत्वाभावात्। कर्माध्यक्षः कर्माधिकृतः स स्वयंज्योतिर्भवति। साधनमिति भगवान् कृपाविष्टः साधनमिति बोध्यं, ग्रन्थान्तरात्। यद्वा 'द्रक्ष्याम गां गां च तवानुकम्पिता'मिति भगवदनुकम्पाया वक्ष्यमाणत्वात् कृपाविशिष्टः। सगुणसाधनपक्षनिराकरणं स्पष्टयन्ति स्म गुणैः कृत्वेति। प्राकृतैर्गुणैः। सात्त्विकादिकर्माणि सात्त्विकादिजन्मानि। एवेति 'गौणश्चेन्नात्मशब्दा'दिति व्याससूत्रात्। 'कृष्णो ब्रह्मैव शाश्वत'मितिश्रुतेः। स्वरूपलक्षणधर्मैर्जन्मकर्माण्याहुः किन्तु क्रियेति। सद्रूपयेति 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति स्वरूपलक्षणे सत्यत्वरूपया। धर्मरूपेणेत्यस्य वेदार्थधर्मरूपेण जैमिनिविचारितेन। आविर्भावः धर्मविशेषकर्मरूपेणाविर्भावः, जनी प्रादुर्भाव इति धात्वर्थः कर्म, प्राकट्यापरनाम। जात्यपेक्षयैकवचनमित्याशयेनाहुः कर्माणीति। विशेष्यम्। 'कर्मैके तत्र दर्शना'दिति जैमिनिसूत्रम्। एवं जन्मप्रकरणे सत्यत्वेन धर्ममुक्त्वा शरीरस्वीकृतिज्ञानस्य 'आत्ममायामृते राज'न्निति द्वितीयस्कन्धादतो ज्ञानमुक्तप्रायमिति ज्ञानं विहायानन्तानन्दमाहुः आनन्दरूपेणेति। 'अनन्त'मित्यानन्दविशेषणं स्वरूपलक्षणं इति भाष्ये। 'यदेकमव्यक्तमनन्तरूप'मिति महानारायणे। एवमुभयोरेकवाक्यतया रूपानन्दयोरेकरूपत्वे 'आनन्दरूपममृतं यो विभाती'ति श्रुत्युक्तेनानन्दरूपेणेत्यर्थः। 'अनन्तमानन्द'मित्यत्र श्रुतावानन्दमर्शआद्यजन्तम्। तेन नानन्दत्वेन रूपेणेत्युक्तम्। जन्मात्र चतुर्व्यूहसमुदायः। एतदेव ब्रह्माण्डपुराणेऽप्युक्तम्। 'स्त्रीपुंमलानुषङ्गात्मा देहो नास्य विजायते किन्तु निर्दोषचैतन्यसुखनित्यां स्वकां तनुं प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरे'ति। ज्ञानानन्दसत्यरूपामिति 'चैतन्यसुखनित्या'मित्यस्यार्थः। निर्दोषां च चैतन्यसुखनित्यामिति निर्दोषचैतन्यसुखनित्याम्। तथा च 'प्रकटस्य तवे'ति सुबोधिन्यां 'धर्मरूपेणे'त्यत्र 'प्रकृत्यादिभिरुपसङ्ख्यानमिति वार्तिकेनाभेदे तृतीया, धर्मरूपाभिन्नाविर्भावविशिष्टमित्यर्थः। एकत्वावच्छिन्नाविर्भावाभिन्नानि बहुत्वविशिष्टानि कर्माणीत्यर्थः। आविर्भावो वर्तमानस्य वस्तुनो दर्शनविषयत्वयोग्यता विद्वन्मण्डनोक्तः। दर्शनविषयत्वयोग्यतास्वरूपसम्बन्धविशेषः। तैरेवेति जन्मकर्मभिरेव न तु गुणैः। जन्मना नन्दनन्दनः यशोदोत्सङ्गलालितः इत्यादीनि। कर्मणा गोवर्धनोद्धरणधीरः कालीयफणमाणिक्यरञ्जित श्रीपदाम्बुज इत्यादीनि नामानि। रूपाण्युद्बाहूत्थितरिङ्गणकर्त्रित्यादीनि। नामरूपे इति उदाहरणार्थमेकवचनं प्रत्येकम्। सिध्येदिति न हि मरुमरीचिकायां स्नानं सिध्यति। 'न निरूपितव्ये' इत्यस्यार्थमाहुः भवत्विति। कल्पान्तर इति लक्ष्मीकल्पे सरस्वतीकल्पे गौरीकल्पे वा। मात्स्ये कल्पानुकीर्तने उपान्त्याध्याये। तथाभूते इति प्राकृते। तदा तस्येति तस्य भगवतः। अत्र हेतुः कर्माध्यक्षत्वेति। अलीककर्माधिकाराभावात्। आत्मरूपमिति जीवात्मरूपम्। 'अयमात्मा ब्रह्मे'तिश्रुतेः। अनुमेयमेवेति यथाहुः कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्यय' इत्युदयनाचार्याः कुसुमाञ्जलौ ग्रन्थे। मनः कर्तृपूर्वकं कार्यात् घटवत्। वेदः पौरुषेयः वाक्यत्वात् अस्मदादिवाक्यवत्। तथा च मनोवचोभ्यां पक्षाभ्यामित्यर्थः। त्वं असि मनसः देवदत्तवत्। त्वं असि वचसः देवदत्तवत्। इति वानुमेयम्। एवकारव्यावर्त्यमाहुः न तु प्रत्यक्षेति। पराञ्चि खानीति खानीन्द्रियाणि पराञ्चि बहिष्ठग्राहकाणि। न सन्तीति स्वरूपव्यतिरिक्तानि न सन्ति। आत्मसृष्टिवत्। श्रौत्यामिति वैधसेवारूपायामपि। 'तं भजेत् तं रसे'दिति गोपालतापिन्याम्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति मैत्रेयीब्राह्मणे। तान्त्रिक्यामिति नारदपञ्चरात्रोक्तायां पञ्चरात्रोक्तायाम्। प्रतियन्तीति भगवदिच्छयावगच्छन्ति। जगज्जन्मादिद्वारा व्यवहार्यो भविष्यामीतीच्छया। 'अथापी'त्यस्य नामरूपाभावभिन्नप्रक्रमेण नामरूपे उपपत्त्यापीत्यर्थमाहुः विष्णोरित्यादि। विष्णुर्नाम 'इदं विष्णुर्विचक्रम' इति त्रिविक्रमरूपम्। षडक्षरादिमन्त्राः। वषट् स्वधा। वह प्रापणे। बाहुलकाड्डषट् वा। ध्यानादीति आदिना गुप्तभाषणम्। मन्त्रा इत्यत्र मत्रि गुप्तभाषणे इति। इमामेवेति श्रुतार्थापत्तिरूपाम्। अत एवेति नामरूपकल्पनरूपार्थापत्तेरेव, तस्याः कारणीभूतान्यथानुपपत्त्या सह। दिव्यान्येवेति एवकारो विवर्तनामरूपयोगव्यच्छेदकः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोशोऽत्र

श्लोक उच्यत इत्याकाङ्क्षायामुच्यते । तैत्तिरीये जिह्वा सन्धानमत्र । 'तव तस्ये'ति मूले तच्छब्दार्थस्य फलस्याऽस्वाद्यत्वात् । यद्वाऽधरा हनुः पूर्वरूपमत्र । अधरो लोभः । 'लोभोऽधरोष्ठ' इति वाक्यात् । तस्मिन् सति वेदेपि स्मरणेन क्रियायां पूर्णायामविभक्त्या नामरूपे प्रतियन्तीति । मूले 'प्रतियन्त्यथापो'ति वाक्यात् । प्रश्ने विशेषाश्रवणम् । छान्दोग्ये 'श्रोत्रं कले'ति । वचोनुषङ्गेन श्रोत्रस्यानुमेयत्वात् ॥ ३६ ॥

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

नन्वेवं सति भक्तिमार्गानुसारेणापि भगवद्भजने विकर्मविना कालान्तरे पुनर्बुद्धिनाशप्रसङ्गः । साधनत्वेनैव भक्तिमार्गस्यापि स्वीकारात् । अतस्तुल्यत्वात् किं मार्गान्तरदूषणेनेत्याशङ्क्य स्मार्तस्यापि भगवन्मार्गस्य फलमाह तथेति ।

यदि भक्ति मार्ग के अनुसार भगवद् भजन करने में भी विकर्म करने से जब कालान्तर में बुद्धि का नाश हो सकता है यह स्थिति भक्ति मार्ग की है तो फिर अन्य मार्गों को दूषित करने से क्या ? इस शङ्का के समाधान के लिये कहते हैं कि स्मृतिप्रतिपादित भक्ति मार्ग में स्थित मनुष्यों को मिलने वाला फल इस श्लोक में बताते हैं ।

हे माधव ते पूर्वं तद्वत् प्रवृत्ता अपि तावकाः सन्तः—हे माधव ! वे आपके भक्त जिन्होंने पूर्वकाल में ज्ञानियों की भाँति किये हुए पुण्य कर्मों से आपने उनको अपना बना लिया हैं अतः वे भक्त साधनावस्था में कदापि गिरते नहीं है । कचित् प्रमाद होने पर भी एक भी कदम नीचे नहीं गिरते हैं परंतु अपने ही मार्ग पर स्थिर रहते हैं कारण कि भक्तिमार्ग ही केवल विशेषता पूर्ण एक मार्ग वाला है । जो मनुष्य जैसी वस्तु अपने पास रखता है उसको वैसा ही फल मिलता है । जैसे इत्र फुलेल बेचने वाले को सहज सुगन्धि मिल ही जाती है । और जो लहसुन बेचने वाला है उसको निरुपाय दुर्गन्धि लेनी ही पड़ती है । उससे वह अपने को बचा नहीं सकता है । यद्यपि जिसको भगवान ने निजजन बना लिया है उसने स्वतन्त्र आपकी सेवा नहीं की है तो भी उसका अधःपतन नहीं होता है । इसका कारण यह है कि उसको अपनाने वाला ऐश्वर्यादि षड्गुणसम्पन्न स्वयं भगवान् हैं । अब आचार्य चरण श्लोक में भगवान् का माधव नाम को संबोधन देने का रहस्य बताते हैं कि भगवान् रात्रि में व्रजस्थ भक्तों को विलासपूर्वक दर्शन देते हैं । इससे यह दिखाया कि दोनों विकर्म की तुल्यता होने पर भी इन भक्तों को कृष्ण का, माधव का दर्शन होता है अन्यों को नहीं । जो भगवान् की सेवा करने वाले सेवक होते हैं वे भगवान् के हैं और वे कभी भ्रष्ट नहीं होते हैं । कारण कि इन भक्तों का भगवान् में अनन्य सौहार्द है । स्नेह का स्वभाव रज्जू के समान होता है यद्यपि रज्जू दूसरे को बान्धते हुए स्वयं भी बद्ध हो जाती है वैसे ही भगवान में स्नेह भी जीव को तथा अपने को भगवान् के चरणों में बद्ध कर देता है । इसलिये भगवच्चरणानुरागी सेवकों का पतन न होना समुचित है । **ननु अन्ये कालादयः कथं तान्न भ्रंशयन्ति**–शङ्का करते हैं कि कालादिक उनको भ्रष्ट क्यों नहीं करते अथवा उनकी भक्ति का क्यों नहीं नाश कर देते हैं ? तब कहते हैं कि उनकी रक्षा स्वयं भगवान् कर रहे हैं इसलिये भक्तजन निर्भय होकर घूमते हैं । भगवान निजजनों की साधारण प्रकार से रक्षा नहीं करते हैं किन्तु पूर्णतया करते हैं जिससे बाहर भीतर सर्वत्र रक्षा होने से उनकी बुद्धि का नाश नहीं होता है और न उनमें कोई दोष का भीतर प्रवेश होता है जिससे वे भ्रष्ट हो सकें । भक्तजनों को कालादिकों का भय न होने से तथा कहीं भी निन्दा न होने से वे सर्वत्र निर्भय होकर विचरते हैं । इतना ही नहीं, लेकिन कृष्ण प्रभु से रक्षित होने के कारण, जहाँ दूसरों को विघ्नों के कारण भय होता है और दूसरे विघ्नों के भय से, जिस स्थान को छोड़ देना चाहते हैं वहाँ पर ये भक्तजन उन विघ्न करने वाले सेनानायकों के शिर पर पैर धर कर निर्भय बनकर घूमते हैं शायद वहाँ विघ्नकर्ताओं की समग्र सेना विघ्न करने के लिये आक्रमण करे फिर भी कुछ कर नहीं सकती है । कारण कि आपके सुदर्शनचक्र आदि के भय से उनका स्पर्श तक न करके दूर ही खड़ी रहती है । प्रह्लाद के चरित्र से इसका प्रमाण मिलता है । भगवद्भक्त ऊपर चढ़ने के लिये विघ्नों के शिर पर सोपान बनाते हैं । और विघ्नकर्ताओं की शक्ति तो इन भक्तों को नीचे गिराने की नहीं होती है अतः ये विघ्नकर्ता, भक्तों की प्रतिष्ठा के लिये कारण बन जाते हैं । जैसे जड़भरत को मारने के लिये प्रयोग किये गये, वे उनको मार न सके किन्तु जड़भरत की प्रतिष्ठा के कारण बन गये ।

विघ्नकर्ताओं के मस्तक सर्व सामर्थ्य वाले और परम श्रेष्ठ स्थिति को प्राप्त हुवे होने से वे आप के बल पर ही सबके पास जा सकते हैं किन्तु समर्थ होते हुए भी भक्तों से द्वेष नहीं करते हैं क्योंकि वहाँ उनकी शक्ति कुंठित हो जाती है, इससे सिद्ध होता है कि भक्ति मार्ग के साधन और फल से कोई भी अन्य मार्ग का फल और साधन उत्तम नहीं है ॥ ३३ ॥

एवं स्मृतिमार्गेण भगवत्पक्षपातमुक्त्वा वैदिकमार्गेण पूर्ववदाह सत्त्वमित्यादिचतुर्भिः ।

अब तक चार श्लोकों से स्मृति मार्ग से भगवत्पक्षपात कह कर अब वैदिक मार्ग से भगवत्पक्षपात का पूर्व की तरह ४ श्लोकों में प्रमाण, प्रमेय, साधन और फल के भेद से निरूपण करते हैं ।

वेदो हि द्विविध प्रवृत्ति निवृत्तिमार्गप्रतिपादकः—प्रवृत्ति तथा निवृत्ति मार्ग के प्रतिपादन के कारण वेद दो प्रकार का कहा गया है । पुनः प्रवृत्ति और निवृत्ति मार्ग के भिन्न-भिन्न अधिकारी के कारण दो-दो भेद हैं । और वे वैदिक दो भी

पुनः दो-दो प्रकार के हो जाते हैं। उन दोनों में से प्रथम प्रवृत्ति मार्ग में "**अर्थावबोध**" वेदशास्त्र के वचनों के अर्थ का ज्ञान (१) "**अध्ययन**" वेदशास्त्र स्मृति आदि का अभ्यास (२) और "अनुष्ठान" शास्त्रोक्त धर्मों का परिपालन जो ब्रह्मचर्याश्रम के धर्म और गृहस्थाश्रम के धर्मों का अधिकार के अनुसार धर्म जिनके सिद्ध है वे प्रवृत्तिमार्ग के हैं। द्वितीय, निवृत्तिमार्ग के धर्म, वानप्रस्थाश्रम तथा चतुर्थ संन्यासाश्रम के अधिकारानुसार तपश्चर्या और आत्मा का अनुसन्धान निवृत्ति के समय क्रम से करने के लिये कहे गये हैं।

इस प्रकार वेदानुसार सर्व जीवों के लिये चारों आश्रमों के धर्मों का आचरण करने के लिये कहा है अतः जो दैत्यांश है वे भी इन धर्मों का अनुष्ठान करने लगेंगे। इसलिए सत्वमूर्ति भगवान् अपना सत्व प्रकट कर सात्विक जीवों को ही वैदिक धर्मों के करने के लिए प्रेरणा करते हैं और अन्य दैत्यांश वाले आसुरी जीवों को वहाँ से हटा देते हैं। जो इस प्रकार भगवान् की प्रेरणा कारण नहीं होती तो आश्रम स्थितों में भी, कोई शास्त्रार्थानुसार वेदाध्ययन करते हैं, तथा कोई नहीं करते हैं इस भाँति की व्यवस्था नहीं होती। वैदिक धर्मों का प्रचार उनके पालन करने से ही जगत् में होता है। अतः जगत् की स्थिति समय में जगत् की स्थिति के लिए जब भगवान् सर्वथा शुद्ध सत्व रूप धारण करते हैं तब लोक में प्रतिष्ठित हुए आश्रम धर्म, क्रमपूर्वक ब्रह्मचारी में वेदाध्ययन, गृहस्थों में क्रिया योग कर्मानुष्ठान, वानप्रस्थों में तपश्चर्या वनवास और विरक्तों में समाधि आत्मानुसंधान इन चार प्रकार के धर्मों का जीव यथोचित प्रकार से सेवन करते हैं। अनन्तर इन धर्मों के पालन से शुद्ध अन्तःकरण होने पर आपकी सेवा कर सकते हैं। शुद्ध जीव ही भगवत्सेवा करने के योग्य हैं।

ननु वेदेनैव कार्यसिद्धौ किं सत्वगुणेनेत्याशंक्याह शरीरिणामिति वेद से ही जब कार्य की सिद्धि हो सकती है तब सत्वगुण की क्या आवश्यकता है? इस शङ्का के निराकरण के लिए श्लोक में 'जीवा' न कहकर "**शरीरिणः**" ऐसा कहा है। जीव को शरीरी कहने का कारण यह है कि जीव जब तक "**शरीराभिमानी**" है तब तक वेदाज्ञा का पालन कर धर्म नहीं कर सकता है। जीव अभिमान रजो एवं तमो गुण से होता है और अभिमान से बुद्धि भी अन्यथा होती है। अतः उन शरीराभिमानी जीवों के रजो गुण और तमो गुण को पराजित कर सत्वगुण का आविर्भाव भगवान् स्वयं अवतार द्वारा नहीं करेंगे, तब तक आश्रम धर्मों का पालन नहीं हो सकता है, फलतः जगत् की स्थिति भी, डावाँडोल बन जाती है, इसलिए वेदों के रहने पर भी, सत्वगुण की आवश्यकता है। अथवा यदि कोई वेद से अतिरिक्त कोई चेतन फलदाता न होवे, तो प्रथम प्रवृत विसंवादी संदेह को पैदा करने वाले को देखकर, प्रायः जनसमूह वैदिक कर्मों में प्रवृत नहीं होगा। अतः वेद से कार्य की सिद्धि नहीं होने से, श्रेय करने वाले सत्वगुणावतार को वैदिक पदार्थ तथा क्रिया का ज्ञान उत्पन्न करने के लिए आवश्यकता है।

यदि ऐसा संदेह हो कि वेद से सिद्धि न हो तो भी अदृष्ट द्वारा या भूतसंस्कार द्वारा कार्य की सिद्धि हो जायगी फिर भी सत्वमूर्ति भगवदवतरण की आवश्यकता नहीं है। ऐसे संशय का इस भाँति समाधान करते हैं कि अदृष्ट और भूतसंस्कार तब बनते हैं जब जीव को देह से भिन्न समझा जाय वे तो शरीर को ही अपना रूप समझते हैं इसलिये उनका प्रारब्ध नहीं बनता है। और प्रारब्ध के न होने से भूतसंस्कार भी नहीं बनते हैं। और इन दोनों के अभाव में फलदाता भगवान् की अपेक्षा रहती ही है। भगवान् ही फलदाता है इसको सिद्ध करने के लिए श्लोक में 'श्रेयः उपायनं और वपुः' शब्द दिये हैं। उसमें श्रेयः उपायनं का अर्थ है कि भगवान् स्वयं सत्वमूर्ति धारण कर स्वयं पधारकर अमृतमय श्रीविग्रह को कल्याणकारी उपहार भेंट करते हैं। दैवगति से फल की सिद्धि होती है इस प्रकार के ज्ञान की निवृत्ति के लिए और भगवान् की कृपा से फल की प्राप्ति होती है यह सिद्धान्त जताया है।

क्षणभर यह सिद्धान्त मान लिया जाय कि, दैवगति से फल की सिद्धि होती है फिर भी वह सिद्धि भगवद्भजन में साधनभूत सहायक न हुई तो उस सिद्धि का फल नश्वर होगा और पूर्व दोषों की निवृत्ति भी नहीं होगी। अतः वैदिक मार्ग में सर्वधर्म प्रवर्त्तक भगवान् ही है और देवों के पक्ष का पोषक है। श्लोक में येन जनः समीहते पद में जो 'जनः' शब्द एक वचन में दिया वहाँ एकवचन का प्रयोग जातिवाचक समूह वाचक के अर्थ में है और वह सेवोपयोगी देह दुर्लभ है यह बताने के लिये है ॥ ३४ ॥

ननु ब्रह्मचारिणो गृहस्थस्यापि श्रेयोदानार्थमात्मविवेकस्याजातत्वात् सत्वाश्रयणं भवतु नाम ज्ञानस्य तु सिद्धफलदातृत्वादसिद्धफलेऽपि साक्षादेव फलजनसम्भवात् तज्ज्ञाने तत्साधने तपसि वा भगवतः सत्ववपुर्नापेक्ष्यत इत्याशङ्क्याह सत्वं न चेदिति।

यदि कोई भी ज्ञान सिद्धान्तवादी कहे कि ब्रह्मचारियों और गृहस्थियों को आत्मविवेक का उदय नहीं हुआ है इसलिए उनको आत्मज्ञान नहीं है श्रेयस् प्रदान के लिये उनमें सत्व प्रकट कर आत्म स्वरूप का ज्ञान देने के लिये अथवा मोक्ष देने के लिये सत्वगुण रूप अवतार लेने की भगवान् को चाहे आवश्यकता हो तब ठीक है और मान भी ले। लेकिन ज्ञान तो सिद्ध फल का दाता है, यदि फल की सिद्धि न भी हुई हो तो भी ज्ञान साक्षात् फलजनक होने से उस ज्ञान के वा उसके साधन

अथवा तपश्चर्या के लिए भगवान् के सत्वशरीर धारण करने की आवश्यकता नहीं है। तब इन मतवादियों के लिए इस श्लोक का आरंभ करते हैं—

इदं शुद्धसत्वं सर्वरक्षकं सर्वकर्मफलदातृ चेन्नभवेद विज्ञानमपि न भवेत्—यदि सर्व रक्षक और सर्व फल देनेवाला आपका यह शुद्ध स्वरूप न हो तो विज्ञान भी संभवतः नहीं होवे। कारण कि गीता और शास्त्र कहते हैं कि **'सत्वात् संजायते ज्ञान'** सत्वगुण से ज्ञान उत्पन्न होता है अब सत्वगुण ही नहीं है तब ज्ञान की उत्पत्ति भी कैसे होगी। यदि कहो कि शास्त्राध्ययन से ज्ञान प्राप्त होगा तो वह भी शक्य नहीं है। कारण कि शास्त्राध्ययन से अथवा शास्त्र के अर्थ के मनन से जो ज्ञान उत्पन्न होता है वह शास्त्र का धर्मरूप होने से अध्ययन काल पर्यन्त ही रहता है। और वह ज्ञान परकीय होने से स्थिर नहीं है। यह ज्ञान जो सत्वगुण वपुधारी-विग्रह से दान रूप में मिलता है इसलिए वह अपना होने से स्थिर रहता है इसलिये इस ज्ञान से सिद्धि होती है। शास्त्र, मूलभूत सत्वगुण को प्रकट नहीं कर सकते हैं। कारण कि शास्त्र, कर्ता नहीं है इसको सिद्ध करने के लिये भगवान् की अपेक्षा रहतो है इसलिए भगवान् को **'हे धात'** नाम से संबोधन किया है आप रक्षक हो जिससे आपका स्थापित किया हुआ सत्वगुण सदैव रहकार ज्ञान को प्रकट करता है जिससे क्रमशः विज्ञान भी होता है। 'विज्ञान' का अर्थ है अनुभव, वह अनुभव सत्वगुणयुक्त अन्तःकरण में होता है। जैसे-जैसे ज्ञान द्वारा जीव का अन्तःकरण शुद्ध होता है वैसे वैसे निष्काम बनता जाता है और उसको विज्ञान की प्राप्ति होती है। जैसे जगत् में अन्न उत्पन्न हो गया हो तो क्षुधा होते ही अन्न लाना सरल होता है। लेकिन क्षुधा के होने के बाद अन्न उत्पन्न करने का प्रयत्न नहीं किया जाता है और प्रयत्न करे तो वह यत्न व्यर्थ है। अतः भगवान् द्वारा सत्व का आविर्भाव होने से उनकी कृपा से उनके साथ सत्व भी हृदय में प्रवेश करता है, अन्य प्रकार से सत्व, हृदय में सदैव के लिए नहीं आता है ज्ञान से अथवा अन्य साधन से यदि आयेगा तब वह सत्व स्थिर नहीं होगा।

यदि इस प्रकार सत्व प्राप्त न हो तो शास्त्र से प्राप्त करेंगे। इस शङ्का को **'अज्ञानभिदापमार्जन'** विशेषण देकर निवारण करते हैं। विज्ञान के दो प्रकार हैं—एक प्रकार जो अज्ञान का नाश कर आत्मा का अनुभव कराता है वह आत्म-विज्ञान है। दूसरा प्रकार जो जीवात्मा और परमात्मा के भेद को मिटाता है उसको भगवद्विज्ञान कहते हैं। जब इस प्रकार जीव और परमात्मा के स्वरूप का साक्षात्कार होता है तब देह इन्द्रिय आदि में जो अभ्यास है वह नष्ट हो जाता है और सर्वत्र शुद्ध अद्वैत स्फुरित होता है। वह ज्ञान, विषय तथा विषयीभाव से नहीं होता है कारण कि विषय और विषयीभाव द्वैत तक रहता है, अद्वैत में वह भाव नहीं होता है। विषय विषयी भाव पुरुषार्थ को सिद्ध नहीं करता है यह पूर्व में कह दिया है। भगवान् आविर्भाव अथवा आत्मस्वरूप का आविर्भाव शुद्ध सत्वगुण के सिवाय नहीं होता है। यदि ज्ञान में सत्वगुण की अपेक्षा है तो तपश्चरण में भी सत्वगुण की अपेक्षा रहनी चाहिए। इसलिए उसका पृथक् निरूपण नही किया गया है।

अब आचार्यचरण कहते हैं यदि आप श्लोकों का अर्थ करना चाहें तब पदों का अन्वय अर्थ के अनुकूल किया जाय वह योग्य होगा। इसलिए इस श्लोक में यहाँ अर्थानुकूल अन्वय इस प्रकार करना चाहिए। अन्यों ने जिस प्रकार अन्वय किया है, वह प्रसङ्गानुकूल युक्त नहीं है।

अब श्लोक के पूर्वार्ध का अन्वय इस प्रकार करें—

हे धातः, इदं निजं सत्वं यदि न भवेत्, (तदा) अज्ञानभिदापमार्जनं विज्ञानं (अपि) न भवेत्।

अर्थ—हे धातः! यह अपना सत्व न हो तो अज्ञान के भेद को नष्ट करनेवाला विज्ञान भी उत्पन्न न होवे। इस प्रकार अन्वय करने पर कार्यकारण हो जाने से अर्थ भी स्पष्ट हो जाता है।

यदि इस प्रकार की शंका भी की जाय कि सत्व की क्या आवश्यकता है क्योंकि यह सत्वगुण स्वयं तो ज्ञानरूप नहीं है। इसलिए इस सत्वगुण का उपयोग ज्ञान के साधन के रूप में किया जाता है। तब अन्य प्रकार से ही भगवान् का और आत्मा का आविर्भाव हो जाय तो सत्व की क्या आवश्यकता है? इन्द्रियों का प्रकाश लोकदृष्टि से भी देखा जाय तो अपने कारण रूप भगवान् के प्रकाश का ही अनुगमन करता है। वहाँ ज्ञान मार्ग में प्रवृत्ति कराने वाले भगवान् और भगवद् रूप होने का अभिमान करने वाले जीव दोनों का प्रकाश अवश्यम्भावी है। अतः अपने कारणरूप, भगवान् का अनुसन्धान करने से विक्षेप करने वाले मल की निवृत्ति हो जायगी, जिससे जीवात्मा और परमात्मा दोनों का प्रकाश हो जायगा। अतः सत्व की कोई आवश्यकता नहीं है। तब आचार्यचरण कहते हैं कि यह तर्क ठीक नहीं है सत्व की आवश्यकता है क्योंकि **'गुणप्रकाशैः अनुमीयते भवान्'** गुण के प्रकाश से अर्थात् इन्द्रियों के विषय ज्ञान से केवल अनुमान किया जाता है कि आप प्रेरक और जीव गुणाभिमानी हैं। इस प्रकार के अनुमान से उन दोनों की सत्ता का ज्ञान होता है, लेकिन उनके स्वरूपों का प्रकाश नहीं होता है। यदि स्वरूप का प्रकाश होता तब तो उस समय यह ज्ञान हो जाता कि यह तो भगवान् हैं और यह मैं हूँ परंतु वैसा

तो होता नहीं है। इसका कारण यह है कि यहाँ भगवान् आविर्भूत न होकर ही कार्य करते हैं। आविर्भाव तो कौन कर सकता है? यदि कहा जाय कि स्वरूप, सत्ता से ही भगवान् का आविर्भाव हो जायगा तब कहते हैं कि प्रकृत में स्वरूप की सत्ता अथवा कार्यकारण भाव प्रयोजक नहीं है। आविर्भाव तो सत्व गुण पर अवलंबन रखता है। भगवान् का प्रकाश तो गुणों के प्रकाश के सिवाय भी होता है। यदि इस प्रकार न हो तो यों कहो कि गुणों का प्रकाश भी नहीं होगा। कारण कि जिसके सम्बन्ध वाला गुण, प्रकाश में आता है और जिससे गुण का प्रकाश होता है। इस प्रकार अर्थ करने से सर्व स्पष्ट हो जायगा। यहाँ सम्बन्धी वा करण के प्रकाश की अपेक्षा नहीं है। अतः प्रकाश के लिये सत्त्वगुण की आवश्यकता है ही। जैसे सूर्य की सत्ता हो तो भी, वह सत्ता वाला सूर्य, वस्तु का प्रकाश नहीं कर सकता है। इसका प्रत्यक्ष ज्ञान, ग्रहण के समय में होता है, उस समय सूर्य की सत्ता है किन्तु वह, केवल सत्ता वस्तु को दिखा नहीं सकती है, ग्रहण के अभाव में जब प्रकाश युक्त सूर्य होता है तब वह वस्तु को दिखा सकता है। इसी भाँति यहाँ भी प्रकाशविशिष्ट सत्ता से ही कार्यसिद्धि होता है, अतः प्रकाशार्थ भगवान् के "वपु" विग्रहस्वरूप सत्त्व गुण की आवश्यकता है क्योंकि उसके बिना उत्तमाश्रमी के हृदय में भी स्वरूप का प्रकाश नहीं होता है। इस प्रकार इस वैदिक मार्ग में, जीवस्वरूप, प्रकाश तथा शुद्धाद्वैत प्रकाश प्रमेय कहा गया है ॥ ३५ ॥

एवं प्रमाणप्रमेये वैदिकप्रकारेण भगवद्रूपेण भगवद्रूपे विचारिते। साधनं विचारयति न नामरूपे इति।

उपरोक्त श्लोक में वैदिक प्रमाण तथा प्रमेय का भगवद्रूप से विचार किया अब इस श्लोक में साधन का विचार करते हैं—

वैदिकमार्गानुसारेण साधनं भगवान् सर्वपुरुषार्थेषु – वैदिक मार्ग के अनुसार समस्त पुरुषार्थों में भगवान् ही साधन है। और वह साधनरूप भगवान् गुणातीत है कारण कि वेद में गुणातीत भगवान् का वर्णन है। किन्तु उस निर्गुण भगवान् ने देव पक्षपात के लिये तथा फलदान करने के लिये गुणविशिष्ट स्वरूप धारण किया है जिससे वह सगुण भगवान् यहाँ साधन रूप है। इस प्रकार यदि कहा जाय कि सगुण भगवान् साधनरूप है तो उस मन्तव्य का खण्डन करते हुए कहते हैं कि आपके नाम तथा रूप लोक की समान गुण कर्म और जन्म के कारण नहीं बनते हैं। कारण कि आप भगवान् तो साक्षी है सर्व कर्मों के फलदाता है एवं कर्मों के अध्यक्ष हैं वह ही साधनरूप है। गुणों से जो कर्म या जन्म होते हैं वे आप के नहीं होते हैं किन्तु सद्रूप क्रिया शक्ति द्वारा धर्मरूप से जो आपका प्राकट्य होता है वे ही आपके नाम हैं। तथा आनन्द रूप से जो आपका प्राकट्य है वे ही आप के जन्म हैं। इसलिए सद्रूप धर्म और आनन्द रूप से प्रकट गुण कर्मों से ही आपके नाम तथा जन्म है। यदि वैसे आपके अलौकिक-अप्राकृत नाम तथा जन्म न होवे तब प्राकृत होने पर कोई भी पुरुषार्थ उन प्राकृत नाम रूपों से सिद्ध न होंगे।

इस प्रकार भगवान् के नाम और रूप इस कल्प से दूसरे कल्पों में भले माने जाँय, किन्तु शास्त्र में साधन रूप से, निरूपण नहीं करना चाहिए। जो इसी तरह मान लिया जाय, तो भगवान् में जो फलदातृत्व है वह भी रहेगा नहीं। कारण कि प्राकृत नाम रूप वाले, फलदाता नहीं हो सकते हैं। पुनः जो सगुण माना जाय, तो वह मन एवं वाणी के विषय होने से, मानसिक और वाचनिक फल ही दे सकेंगे। भगवान् तो मन और वाणी से पर है और भगवान् के मार्ग का केवल अनुमान ही कर सकते हैं वैसे मन अगोचर और वागगोचर है। नकि प्रत्यक्षविषय है भगवती श्रुति '**यतो वाचो निवर्तन्ते अप्राप्य मनसा सह एवं पराञ्चि खानि व्यतृणत् स्वयम्भूः तस्मात् पराङ्पश्यति नान्तरात्मन्**' इत्यादि श्रुतियों में कहा है कि मन सहित इन्द्रियाँ वहाँ न पहुँचकर, लौट आती हैं, उस स्वयम्भू को इन्द्रियाँ प्राप्त नहीं कर सकती हैं। तो उसके नामरूप नहीं है यदि यों कहो तो उसके उत्तर में श्लोक में कहा है कि (**देव क्रियायां प्रतियन्त्यथापि हीति**) हे देव! यद्यपि आपके नामरूप इन्द्रियों से नहीं जाने जाते हैं तो भी क्रिया से इनकी प्रतीति होती है जिसका प्रमाण भी शास्त्र ही है। जैसे कि कहा है—'**विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह**' विष्णु के वीर्य को कहते हैं। '**तदस्य प्रियं**' वह इसका प्रिय है। '**इदं विष्णुर्विचक्रमे त्रेधा पदम्**' विष्णु ने इस विश्व को तीन पादों में नाप लिया इत्यादि श्रुति विद्यमान है और षडक्षरादि राम आदि मंत्र तथा **यस्यै देवतायै हविर्गृहीतं तां मनसा ध्यायेद् वषट् करिष्यन्**' जिस देवता के लिए हवि अर्पण करने के लिए ग्रहण की है उस देवता का मन से ध्यान करो। इत्यादि क्रियाएँ तब ही सकती हैं जब भगवान् के नाम और रूप हो यदि नाम व रूप न हो तो ध्यान तथा मंत्र भी न होना चाहिए। (हि) शब्द से निश्चय पूर्वक यह उपपत्ति होती है कि, ये आपके नाम और रूप प्राकृत नहीं है किन्तु आनन्दमय अप्राकृत हैं। अतः वे आनन्दमय नाम तथा रूप सर्व पुरुषार्थों के साधक हैं। ऐसा निरूपण किया गया है ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्वद्भक्तास्तु कदाचिदपि न पतन्तीत्याहुः—तथेति। यथा त्वद्विमुखाः स्वाधिकाराद्भ्रश्यंति, तथा हे प्रभो! हे माधव! तावकास्त्वद्भक्ताः क्वचित्कदाचिदपि मार्गात् भजनाधिकारात् न भ्रश्यन्ति; भरतचित्रकेतुगजेन्द्रप्रह्लादादीनां जन्मान्तरेऽपि

भक्तिसद्भावदर्शनात्। किन्तु निर्भयाः कालकर्मादिभयरहिताः सन्तः विनायकाः। विघ्नकर्तारस्तेषामनीकिनी सेनास्तासां पालकानां मूर्द्धसु विचरन्ति विघ्नान् जयन्ति। तेषां भगवद्भजने विघ्नं कर्तुं विघ्नकर्तारो न शक्नुवन्तीत्यर्थः। तत्र हेतुमाहुः— त्वयाभिगुप्ता इति। तत्र हेतुं वदन्तो भक्तान् विशिंषन्ति—त्वयि बद्धं सौहृदं प्रेमातिशयो यैस्त इति। प्रभो इति सम्बोधनं रक्षायां सामर्थ्यसूचकम्। माधवेति सम्बोधनेन। तत्र हेतुः सूचितः—"मा च ब्रह्मस्वरूपा या मूलप्रकृतिरीश्वरी। नारायणीति विख्याता विष्णुमाया सनातनी॥ महालक्ष्मीस्वरूपा च वेदमाता सरस्वती॥ राधा वसुन्धरा गङ्गा तासां स्वामी च माधवः" इति ब्रह्मवैवर्तोक्तेर्मायादिस्वामित्वात् तद्रक्षितानां कथं पतनमिति भावः॥ ३३॥ सतां सुखावहानि रूपाणि बिभर्षीत्युक्तम्, तत् केन प्रकारेण सुखावहत्वमित्यपेक्षायामाहुः— सत्त्वमिति। स्थितौ निमित्तभूतायां स्थितिः पालनम्, जगत्पालनार्थं भवान् विशुद्धं रजस्तमोभ्यामननुविद्धं सत्त्वं सत्त्वमयं वपुश्च अमृतं पुष्णातीति वपुः उपासकानामानन्दपोषकं शरीरं श्रयते बिभर्ति। येन वपुषा युक्तस्य तव वेदादिभिः स्वधर्मैस्सहार्हणं पूजनं जनः आश्रमचतुष्टये स्थितः प्राणी समीहते करोति। तत्र वेदो वेदाध्ययनं ब्रह्मचारिधर्मः। क्रियायोगः कर्मानुष्ठानं गृहस्थधर्मः। तपो वनवासादि वानप्रस्थधर्मः। समाधिर्यतिधर्मः। ननु "सत्यसङ्कल्पस्य सङ्कल्पमात्रेणैव जगत्स्थितिः सम्भवति, आराधनं तु शास्त्रतः प्राप्तमेव। किं वपुर्धारणेन?" इत्याशङ्क्याहुः—शरीरिणामिति। शरीरिणां श्रेयसामुपायनं उप समीपे आधिक्येन वा अयनं प्राप्तिर्यस्मात्तत्। यद्यपि सर्वं सङ्कल्पमात्रेणैव सिद्ध्यति, तत्र च शास्त्रं प्रमाणमस्ति, तथापि तत्सामान्यस्य विवादग्रस्तत्वात्तत्र विश्वासाभावेन तदुक्तमार्गे कस्यापि प्रवृत्तिर्न स्यात्, फलं तु दूरतः अवतारग्रहणेन। साक्षात्फलप्रदाने तु शास्त्रप्रामाण्यस्यापि निश्चयात्तदुक्तमार्गे सुतरां प्रवृत्तिरित्याशयः। जन इत्येकवचनं दुर्लभत्वसूचनाय॥ ३४॥ एवं त्वय्यम्बुजाक्षेत्यादिश्लोकपञ्चकेन भगवद्भक्तानामेव मोक्षो, नान्येषामित्युक्तम्। तत्र 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इत्यादिश्रुतिभ्यो मोक्षस्य ज्ञानैकलभ्यत्वनिश्चयात् किं भक्त्या किं वा भगवदवतारेणेत्याशंक्याहुः—सत्त्वमिति। "भवदग्रेऽस्माभिरतितुच्छैः किं बहु वक्तव्यम्? सर्वजनकत्वेन सर्वज्ञत्वात्" इत्याशयेन सम्बोधयन्ति—हे धातरिति। निजं भवदीयसत्त्वं विशुद्धसत्त्वमयमिदं वपुश्चेत् यदि प्रकटितं न भवेत् तदा तद्भजनाभावे अज्ञानं च तत्कृताभिधा देवमनुष्यतिर्यगादिभेदबुद्धिश्च तयोरपमार्जनं निवर्तकं विज्ञानं तव तत्त्वसाक्षात्कारात्मकमपि न भवेदित्यनुषङ्गः। 'वासुदेवे भगवति भक्तियोगः प्रयोजितः। जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम्' इत्यादिवाक्यैर्ज्ञानस्य भक्तिजन्यत्वनिश्चयादित्याशयः। ननु "सत्यसङ्कल्पादिगुणको भगवानेवाहं जात इति कथं ज्ञायते? तत्राहुः—गुणेति। येनैव हेतुना यस्य च भवतः सम्बन्धी गुणः प्रकाशबाहुल्यदुर्धर्षत्वादिरूपः देवकीवसुदेवयोः प्रकाशते अतस्तैर्गुणप्रकाशैर्भवान् सत्यसंकल्पादिपूर्णगुणकोऽनुमीयत इत्यन्वयः॥ ३५॥ पुनश्च भक्ताभक्तयोरुत्कर्षापकर्षावाहुः—नेति। यद्यपि गुणजन्मकर्मभिः स्वीकृते तव नामरूपे त्वद्विमुखानां मनोवचोभ्यां न निरूपितव्ये मनसा चिन्तनार्हे वचसा कीर्तनार्हे च न भवतः अथापि तथापि हे देव! बहुधा चोलमानक्रियायां भवदुपासनायां वर्तमाना भक्ताः प्रतियन्ति नामानि कीर्तयन्ति रूपाणि च पश्यन्तीत्यन्वयः। हीति प्रसिद्धिं सूचयति, 'यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय' इति तृतीयोक्तेः। अनिरूपितव्यत्वे हेतुं वदन्तो भगवन्तं विशिंषन्ति—अनुमेयवर्त्मन इति। अनुमेयं महता प्रयत्नेन सूक्ष्मया बुद्ध्या विज्ञेयं वर्त्म प्राप्तिसाधनं यस्य तस्येत्यर्थः। तत्कथं तत्प्राप्तिसाधनस्य नामसङ्कीर्तनादेर्भगवद्विमुखानां विषयाविष्टानां मनोवचसोर्विषयत्वं स्यादित्याशयः। अनुमेयवर्त्मत्वे हेतुमाहुः—तस्येति। मनइंद्रियादिसङ्घातस्य साक्षिण इत्यर्थः। तत्र गुणैर्दीनवत्सल इत्यादि, जन्मभिः रामः कृष्णः नन्दनन्दन इत्यादि, कर्मभिः गोवर्धनोद्धरण इत्यादि॥ ३६॥

अन्वितार्थप्रकाशिका

तथेति॥ हे माधव! हे प्रभो! यथा त्वद्विमुखाः स्वाधिकाराद् भ्रश्यन्ति तथा त्वयि बद्धं सौहृदं प्रेमातिशयो यैस्ते तावकास्त्वद्भक्ताः कचित्कदाचिदपि तत्त्वज्ञानाभावेऽपि स्वधर्मत्यागेऽपि च मार्गात् मार्गणीयात् भजनाधिकारान्न भ्रश्यन्ति। भरतचित्रकेतुगजेन्द्रप्रह्लादादीनां जन्मान्तरेऽपि भक्तिसद्भावदर्शनात्। किन्तु त्वया अभि सर्वतः गुप्ताः रक्षिता अत एव निर्भयाः कालकर्मादिभयरहिताः सन्तः विनायका विघ्नकर्तारस्तेषामनीकानि सेनास्तासां पालकानां मूर्द्धसु विचरन्ति। विघ्नकरणार्थमागतानां देवादीनां मूर्द्धपरम्परां सोपानीकृत्य त्वत्पदमारोहन्तीत्यर्थः॥ ३३॥ बिभर्षि रूपाणीत्युक्तानां रूपाणां केन प्रकारेण सुखावहत्वमित्याशङ्क्याह–सत्त्वमिति॥ भवान् स्थितिः पालनं तस्यां निमित्तभूतायां जगत्पालनार्थमिति यावत्। विशुद्धं रजस्तमोभ्यामननुविद्धं सत्त्वं सत्त्वमयं शरीरिणां श्रेयसः कर्मफलस्य उपायनं प्रापकं वपुः श्रयते बिभर्त्ति। येन वपुषा हेतुना जनः ब्रह्मचार्यादिः वेदाश्च क्रियायोगाश्च तपश्च समाधिश्च तैः क्रमेण चतुराश्रमधर्मैरित्यर्थः। तव अर्हणं पूजनं सम्यक् ईहते करोति। वपुषोऽनाश्रयणेऽर्हणासम्भवान्न कर्मफलसिद्धिः स्यादिति॥ ३४॥ सत्त्वं न चेदिति॥ हे धातः! निजं भवदीयं सत्त्वं विशुद्धसत्त्वमयमिदं वपुश्चेत् यदि प्रकटितं न भवेत्। तदा तद्भजनाभावेन अज्ञानं च तत्कृता भिदा भेदबुद्धिश्च तयोरपमार्जनं निवर्त्तकं विज्ञानं तव तत्त्वसाक्षात्कारात्मकमपि न भवेदित्यनुषङ्गः। यद्वा। चेद्यदि सत्त्वमयमिदं तव निजं वपुर्न भवेत् तर्हि अज्ञानभित् अज्ञाननिवर्त्तकं विज्ञानमपरोक्षज्ञानं मार्जनं नाशम् आप प्राप्तमेव तदा अपरोक्षज्ञानस्य नाश एव भवेदित्यर्थः। ननु जडानां बुद्ध्यादीनां यतः प्रकाशस्तद्ब्रह्मेति ज्ञानं स्यादेवेति चेत्तत्राहुः। गुणेति॥ तदा हि यस्य संबन्धी अयं बुद्ध्यादिगुणः प्रकाशते यो गुणसाक्षीत्येवं येन वा

बुद्ध्यारूढेन प्रमात्रा बुद्ध्याद्यधिष्ठात्रा बाह्यो गुणः प्रकाशते इत्येवं गुणप्रकाशैः गुणावच्छिन्नैः प्रकाशैर्भवान् सर्वसाक्षी परिपूर्णः केवलमनुमीयते कल्प्यते नतु साक्षात्क्रियत इत्यर्थः। अनुमानप्रयोगश्च बुद्ध्यादयः प्रकाशकसापेक्षाः जडत्वात् घटादिवत् इति। अतः भवता शुद्धसत्त्वमूर्त्तिः धार्या एवेत्यर्थः। ततः शुद्धसत्त्ववपुषि त्वयि सेव्यमाने तु तदाकारेऽन्तःकरणे त्वत्प्रसादेन साक्षात्कारो भवेदिति भावः॥ ३५॥ यानि रूपाणि त्वं बिभर्षि तान्यपि भजनीयान्येव नतु ज्ञातुं शक्यानि अनन्तत्वादिहेतोरित्याहुः–न नामरूपे इति॥ अनुमेयं महता प्रयत्नेन सूक्ष्मया बुद्ध्या विज्ञेयं वर्त्म प्राप्तिसाधनं यस्य तस्येत्यर्थः। तस्य मनइन्द्रियादिसंघातस्य साक्षिणः तव गुणजन्मकर्मभिः स्वीकृते नामरूपे मनोवचोभ्यां न निरूपितव्ये मनसा चिन्तनार्हे वचसा कीर्त्तनार्हे च न भवतः। तत्र गुणैर्नामरूपे दीनवत्सलादि श्यामसुन्दरादि। कर्मभिर्गोवर्द्धनधरादि त्रिभङ्गाकृत्यादि। जन्मभिर्देवकीनन्दनादि मत्स्यादि। यद्वा। मनः मननं युक्तिः वचः आप्तवाक्यं ताभ्यामप्यनुमेयं न त्वनुभाव्यं वर्त्म गुणादिरूपं यस्य तस्य। तव नामरूपे गुणैः शास्त्राभ्यासाद्यैः कर्मभिः नियमादिभिः जन्मभिः सत्कुलादिभिर्हेतुभिरपि न निरूपितव्ये निरूपणार्हे न भवतः। अनित्यण्यन्ताश्चुरादयः। हे देव ? अथापि तथापि क्रियायां भवदुपासनायां वर्त्तमाना भक्ताः प्रतियन्ति नामानि कीर्त्तयन्ति रूपाणि च पश्यन्तीत्यन्वयः। "यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय।" इति तृतीयोक्तेः॥ ३६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आदृतयुष्मदङ्घ्रीणां न कर्हिचिदधः पतनमस्तीति वदन्तः स्तुवन्ति॥ तथेति॥ हे माधव, तावकास्त्वद्भक्त्याचरणेन त्वदीयतां प्राप्ताः, ते आदृतयुष्मदङ्घ्रयः जनाः तु यत त्वयि बद्धसौहृदाः, त्वयि नित्यं निबद्धसुहृद्भावाः सन्ति, अतः तथा त्वद्भक्तिरहितवत्, क्वचित् कदाचिदपि, मार्गात् ब्राह्मणाद्युत्तमकुलजन्माप्त्यादेरध्वनः सकाशात्, न भ्रश्यन्ति नाधः पतन्तीत्यर्थः। प्रत्युत, त्वया, अभिगुप्ताः अभितो रक्षिताः, अत एव, निर्भयाः दुर्गतिप्राप्तिभयवर्जिताः सन्तः, हे प्रभो, विनायकाः श्रेयःप्रतिबन्धिनो विघ्नास्तेषामनीकं सेना तत् पान्तीति विनायकानीकपास्तेषां मुर्द्धानस्तेषु विघ्नसेनापतिशिरःस्वित्यर्थः। विचरन्ति विघ्नान् जयन्तीत्यर्थः॥ ३३॥ संकल्पमात्रपरिकल्पितनिखिलप्रपञ्चस्त्वमस्यतः संकल्पमात्रेणैव जगत्त्रातुं प्रभुर्नावतारमपेक्षसे, तथाप्युपासकानामुपासनालम्बनार्थमवतरसीति स्तुवन्ति॥ सत्त्वमिति॥ स्थितौ स्थितिः पालनं तस्यां निमित्तभूतायां स्थित्यर्थमित्यर्थः। भवान्, शरीरिणां देहिनां, श्रेयसे उपेयते प्राप्यते इति श्रेयउपायनं, शरीरिभिः श्रेयःप्राप्त्यै श्रयणीयमित्यर्थः। 'इण् गतौ' विशुद्धं रजःसत्त्वतमोभिरनुविद्धं, सत्त्वमप्राकृतसत्त्वमयं, वपुः शरीरं, श्रयते बिभर्त्ति प्रकटयतीत्यर्थः। अनेन भगवद्वपुः श्रयणमेव शरीरिणां मुख्यं श्रेयःसाधनमिति प्रदर्शितम्। येन वपुषा, आलम्बनभूतेन येन वपुषेत्यर्थः उपलक्षितस्येति शेषः। तव. अर्हणमाराधनं, जनः, वेदक्रिया वेदपूर्वभागोदिता यज्ञादिक्रिया च योगः वेदोत्तरभागोदितमुपासनं च तपस्तदनुग्राहकमनशनादिरूपं च समाधिस्तन्निर्वृत्यं चित्तैकाग्र्यं च तैः, समीहते करोति। यदि भवान् वपुर्न संश्रयते तर्ह्याराध्यरूपापरिज्ञानात् आराधकास्त्वामाराधयितुमप्रभवः स्युरतो भवानाराधकानुग्रहार्थं वपुः संश्रयते इति भावः॥ ३४॥ एतदेव स्पष्टीकुर्वन्तः स्तुवन्ति॥ सत्त्वं न चेदिति॥ हे धातः विश्वकारणभूत, विज्ञानं विशिष्टज्ञानप्रकाशकं, अज्ञानभिदापमार्जनं ध्यातॄणामज्ञानकृतदेवादिभेदाभिमाननिवर्त्तकं, सत्त्वं शुद्धसत्त्वमयं, निजमसाधारणं, इदं वपुः, न भवेत् चेत्, भवान्नाश्रयते चेत्तर्हीत्यर्थः। यस्य पुंसः, येन कालकर्मादिरूपेण कारणेन, यः च गुणः सत्त्वाद्यन्यतमो गुणः, प्रकाशते उन्मिषते, तस्य पुंसः, तैरिति च शेषः। गुणप्रकाशैर्गुणोन्मेषैः, युक्तः भवान्, अनुमीयते सकलकार्यकारणभूतो देवमनुष्यादिविलक्षणश्चेति त्वं न ज्ञायसे, किं तु इतरसजातीयतयाऽनुमितिविषयः जायसे इत्यर्थः। वाशब्दोऽवधारणे। यदि भवान्वपुराश्रयते तर्हि तवासाधारणानि देवमनुष्यादिष्वसंभावितानि गुणचेष्टितानि दृष्ट्वा तैः त्वद्वपुः देवादिविजातीयं मत्वेदमेव भगवद्वपुरिति मन्यमानो ध्यातृवर्गोऽत्र तदेव ध्यायतीति भावः॥ ३५॥ नन्वहमपि देवादिसजातीयवपुष्मानेवेत्यत्राहुः॥ न नामरूप इति॥ मनोवचोभ्यां, अनुमेयवर्त्मनः वचसा वेदवाक्येन तदनुसारेण मनसा चानुमेयस्वभावस्येत्यर्थः। साक्षिणः सर्वसाक्षिणः, तस्य तव, गुणजन्मकर्मभिः सह, नामरूपे न निरूपितव्ये। गुणकर्मजन्मनामरूपाणीतरसजातीयतया न निरूपणीयानि, 'यत्तदद्रेश्यमग्राह्यमस्थूलमनण्वह्रस्वमगोत्रमवर्णमचक्षुरश्रोत्रं' 'निष्क्रियं निष्कलं' 'अजायमान' इत्यादिश्रुतिभिरितरसजातीयानि गुणादीनि प्रतिषिध्य, 'यः सर्वज्ञः सर्ववित्' 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' 'यस्य चैतत् कर्म स वै वेदितव्यः' 'बहुधा विजायते' इत्यादिश्रुतिवृन्दैर्विलक्षणानामेव त्वद्गुणादीनामुक्तत्वादिति भावः। ननु, यद्यहमेवं देवादिविलक्षणगुणकर्मादियुक्तोऽस्मि, तर्हि नाहं वेदोक्तक्रियाराध्यः, कुतस्तत्रेन्द्राद्याराध्यत्वादिति चेन्न, वेदा इन्द्रादिनामभिस्तत्र त्वामेव वदन्ति तव तदन्तरात्मत्वादित्याहुः। अथापि तवोक्तविधत्वेऽपि, त्वदुपासकाः, वेदक्रियायां यज्ञादिक्रियायां, त्वां एव, प्रतियन्ति आराध्यं मन्यन्ते। अग्नीन्द्रादिनामरूपाणि तदन्तरात्मभूतत्वात्त्वदीयानीति बुद्ध्या तद्विशिष्टमपि त्वां वेदावगतयज्ञादिक्रियायां सर्वत्रैवाराध्यं मन्यन्ते इत्यर्थः॥ ३६॥

कृष्णप्रिया

हे माधव ! जो लोग आप के हैं और आप ही में अनुराग वाले होने के कारण आप के ही बन गये हैं वे तो, जो लोग स्वयं अपने को ब्रह्म मान बैठे हैं एवं मुक्त भी समझ रहे हैं वे भी भगवन् मार्ग से कभी भ्रष्ट नहीं होते किन्तु आप से सुरक्षित

होने से निर्भय बन कर बड़े बड़े विघ्नों के सिर पैर रखकर सर्वत्र विचरते हैं ॥ ३३ ॥ आप विश्वके पालन के प्रसङ्ग में जीवों को सत् कर्मों का फलस्वरूप भेट देने के लिये सत्व गुण मय श्रीविग्रह को धारण करते हो। जिस से–जिस श्री विग्रह के आधार पर जन समुदाय वेद में बताई हुई वैदिक क्रिया–योग-तपः समाधि से आप की सेवा कर सकते हैं ॥ ३४ ॥ हे धातः हे भगवन् यदि आप इस सत्वगुणमय वपु को धारण नहीं करो तो अज्ञान को नाश करने वाले विज्ञान की भी स्थिति न हो। गुणों के प्रकाश से ही हम आपका अनुमान कर सकते हैं कि जिसका और जिससे गुणों का प्रकाश होता है ॥ ३५ ॥ भगवन् ! आपके नाम और रूप, मन तथा वचन के अगोचर है इसलिये साक्षी स्वरूप आपके मार्ग का मात्र अनुमान होता है अतः गुण, कर्म और जन्म से निरूपण नहीं किये जा सकते हैं तो भी क्रिया में आपकी प्रतीति उपासकों को होती है ॥ ३६ ॥

शृण्वन् गृणन् संस्मरयंश्च चिन्तयन् नामानि रूपाणि च मङ्गलानि ते[1] ।
क्रियासु [2]युष्मच्चरणारविन्दयोराविष्टचित्तो[3] न भवाय कल्पते ॥ ३७ ॥
[4]दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोऽपनीतस्तव जन्मनेशितुः ।
दिष्टयाङ्कितैः[5] त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां च तवानुकम्पिताम् ॥ ३८ ॥
न तेऽभवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे ।
भवो निरोधः स्थितिर[6] विद्यया कृता [6]यतस्त्वय्यभयाश्रयात्मनि ॥ ३९ ॥
मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः ।
त्वं पासि नस्त्रिभुवनं च तथा[7]धुनेश भारं भुवो हर यदूत्तम वन्दनं ते ॥ ४० ॥

कर्दमक्षमा

अन्वयः– ते मङ्गलानि नामानि च रूपाणि शृण्वन् गृणन् च संस्मरयन् क्रियासु युष्मच्चरणारविन्दयोः आविष्टचित्तः भवाय न कल्पते ॥ ३७ ॥ हरे दिष्टया भवतः पदः अस्या भूमेः ईशितुः तव जन्मना भारः अपनीतः दिष्टया सुशोभनैः अङ्कितैः त्वत्पदकैः तवानुकम्पिताम् गां च द्याम् द्रक्ष्यामः ॥ ३८ ॥ ईश बत अभवस्य ते भवस्य कारणं विनोदं विना न तर्कयामहे यतः अभव आश्रय आत्मनि त्वयि भवः निरोधः अपि स्थितिः अविधया कृताः ॥ ३९ ॥ यदूत्तम मत्स्य-अश्व-कच्छप-नृसिंह-वराह-हंस–राजन्य-विप्र-विबुधेषु कृतावतारः त्वम् नः त्रिभुवनम् च (यथा) पासि तथा अधुना हे ईश भुवः भारम् हर (हरे) ते वन्दनम् ॥४०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्माद्भक्तयैव मोक्ष इत्युपसंहरति। शृण्वन्निति। अन्यानपि संस्मारयन्। क्रियासु देवार्चनादिकर्मसु ॥ ३७ ॥ विशेषतः श्रीकृष्णावतारमभिनंदंति। दिष्टयेति। दिष्टया भद्रम् तव पदः पादभूतायाः। ईश्वरस्य तव जन्ममात्रेणापनीत एव। किं च। त्वत्पदकैः कोमलैः पदैः सुशोभनैर्वज्रांकुशादिशुभलक्षणैः। गां पृथ्वीं द्यां स्वर्गं च तव त्वयाऽनुकंपिताम् ॥ ३८ ॥ तव जन्मना भारोऽपनीत इत्युक्त्या ममापि किं जीववत्संसार उक्तो नहि नहीत्याहुः। नेति। बत हे ईश ! संसारिणस्ते जन्मनः कारणं क्रीडां विना न तर्कयामः। किं च। हे अभयाश्रय न भयमाश्रयत इति तथा तत्संबोधनम्। हे नित्यमुक्त इत्यर्थः। तव जन्मकारणं नास्तीति किं वक्तव्यं यतो जीवात्मन्यपि भवादयस्त्वयि विषये या अविद्या तया कृता न परमार्थतः संतीति ॥ ३९ ॥ प्रस्तुतं प्रार्थयंते। मत्स्याश्वेति। नोऽस्मांस्त्रिभुवनं चान्यदा यथा पासि तथाऽधुनाऽपि पाहीति वंदनं ते इति च वदंतः सर्वे शिरोभिः प्रणमंति ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यस्मादुपासकास्त्वां साक्षात्पश्यंति तस्माद्धेतोरित्यर्थः। भक्त्यैव भक्तिद्वारेणैव। एवशब्दो भक्तिं विना मोक्षहेतुज्ञानासिद्धिमाह। तद्वक्ष्यति–"श्रेयः श्रुतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये। तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥" इति ॥ ३७ ॥ विशेषतः तृतीयार्थे तसिः। अभिनंदंति श्लाघंते दिष्टयेत्यव्ययं भद्रे। पदः पादभूतायाः कार्यकारणाभेदाभिप्रायेण वा "पद्भ्यां भूमिः" इति श्रुतेः पद इत्युक्तम्। "भूः पादौ द्यौ शिरः" इत्युक्तेः। अपनीतोऽपास्त एव अधुनैव कंसादीन्हतान् जानीम इत्याह–भारः कंसादिहेतुकस्तवावतारमात्रेणैवाद्य नीत इदं विज्ञापनचातुर्यं देवानां ज्ञेयम् अन्यदपि सुखमनुभविष्याम इत्याह–किञ्चेति। त्वत्पदकैः तव कोमलैः पादैरिह पदशब्दात्कोमलेर्थे बाहुलकात्कः।

---

१ वः–इति कस्यचित्। २. यस्त्व–श्रीधर. वंशी. वीर. विज. जीव. शुक.। ३. चेता–श्रीधर. वंशी. ; चित्तो–वीर. विज. जीव. शुक.। ४. दिष्टया हरे नो भवतः इति पाठः। ५. अङ्कितां–वीर. विज जीव. शुक. ; अङ्कितां–श्रीधर. वंशी.। ६. ह्यभवा–विज.। ७. यथा–श्रीधर. वंशी. वीर. जीव. ; तथा–विज. विश्व. शुक.।

सुष्ठु शोभनानि शोभाकराणि वक्त्रादीन्येषु तैः। यद्यपि 'मया हतांस्त्वं जहि मा व्यथिष्ठाः' इति रीत्या तव जन्मनैव भारोपनीतस्तथापि बहिस्तल्लीलादर्शनार्थमस्माकमियं प्रार्थनानि। द्यां स्वर्गम् 'सुरलोको द्योदिवौ' इत्यमरः। कदाचित्पारिजातहरणाद्यर्थं तत्र गतस्य पारिजातपरागादिषु पदानामुदयात्स्वर्गमपि पदांकितं द्रक्ष्याम इत्यर्थः। अनुकंपा जाता यस्येति ताम्। जातार्थे इतच् ॥ ३८ ॥ जीववज्जन्मायुक्तैः कुपितमिव प्रसादयतां संभ्रमान्नहिनहीति द्विरुक्तिः। नेति। बत हे ईश "बतामंत्रणसंतोषखेदानुक्रोशविस्मये" इति मेदिनी। बत संबुद्धौ ज्ञेयोत्र त्वयि विषये याऽविद्या तया कृताः जीवस्यापि वस्तुतस्त्वद्रूपत्वात्त्वदज्ञानकल्पिता इत्याह-न परमार्थत इति ॥ ३९ ॥ प्रस्तुतं भूभारनिराकरणम्। अन्यदा इदानींतनकालादन्यस्मिन्काले। अश्वो हयग्रीवः। विप्रो जामदग्न्यः। विबुधो यज्ञः। कृतोऽवतारो येन स तथा। वयं तु तव नतिं विना किञ्चिदपि प्रतिकर्त्तुं न क्षमाः इत्याहुः-वंदनमिति। यदव उत्तमा उद्गतक्लेशा येन स तथा तत्संबुद्धौ तवाविर्भावेण यदूनां क्लेशो नंक्ष्यत्यतः झटित्याविर्भवेति संबुद्ध्यभिप्रायः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नतु, तत् क्रियाचेत्तदनुभवस्य हेतुस्तर्हि कथं प्रथमत एव स न स्यात्? उच्यते अस्त्यत्र नानापराधमयी संसारवासना प्रतिबन्धिनी सा च तदा वृत्त्यैवापगच्छतीत्याहुः—शृण्वन्निति। श्रवणादीनां विकल्पो ज्ञेयः मङ्गलानि सर्वदुःखनिवर्त्तकत्वात् परमसुखात्मकत्वाच्चेति भावः। अतः स्वतः पुरुषार्थतोक्ता अत एव क्रियासु निजाशेषकर्म्मसु वर्त्तमानो यः सोपि त्वच्चरणारविन्दयोराविष्टचित्तो भूत्वा। यद्वा य इत्यस्य पूर्वेणान्वयः। यः शृण्वन् भवतीत्यर्थः। तच्चरणारविन्दयोः क्रियासु श्रवणादिकर्म्मसु आविष्टचित्तः यद्वा क्रियासु तत्तल्लीलासु युष्मदिति पाठश्च क्वचित् ततश्च समञ्जसमेव अतो भवाय संसाराय न कल्पते तत्कारणे विद्यमानेऽपि तद्योग्यो न स्यात्तद्वासनारहितो भवतीत्यर्थः ॥ ३७ ॥ दिष्ट्या एतद्भद्रं जातम् अस्मादृशानां भाग्येनेत्यर्थः। अस्याः भारार्त्तायाः त्वदवतारेण परमधन्यत्वं प्राप्तायाः वा पद इति पद्भ्यां भूमेरुत्पत्त्या कार्यकारणयोरभेदाभिप्रायेण "पद्भ्यां भूमिः" इति श्रुतेः अत एवाग्रेऽक्रूरस्तुतौ "अग्निर्मुखं तेऽवनिरङ्घ्रिः" इति जन्मना श्रीदेवक्यामवतारमात्रेण भारः कंसादिहेतुकः अपनीतः दूरीकृतः इदं तद्विज्ञापनचातुर्यम् एवं भारहरणाद्धरे इति सम्बोधनं निजपदाब्जव्यपदेशसौभाग्यभाजनपृथिवीभारापनयनेन भक्तानामस्मादृशां भुवोऽपि हितं कृतमेवेति प्रयोजनमेकं सिद्धम्। किन्तु अस्माकं तस्याश्च परमहितकारिविचित्रक्रीडया सर्वलोककृतार्थीकरणमेव मुख्यप्रयोजनं कार्यमित्याशयेनाहुः-दिष्ट्याङ्किन्तामिति। अल्पार्थे कप्रत्ययः द्वापरान्तोचितनराकृतित्वेन महाशरीरिणां तेषां देवानां तादृशदृष्ट्या किं वा दयार्थे सुकोमलत्वस्फुरणात् अङ्किताम् अलङ्कृतामित्यर्थः। द्यामनुकम्पितामिति दैत्यवधादिना तत्रत्यानां हिताचरणात्। यद्वा विशेषणाद्वयमिदं द्वयोरेव ज्ञेयम्। ततश्च अङ्कितत्वेनैव भक्तिविस्तारणादिना वाऽनुकम्पितां गां द्यामङ्कितामिति कदाचित् पारिजातहरणार्थं तत्र गतस्य पारिजातपरागादिषु पदानामुदयात् ॥ ३८ ॥ न भवः संसारो भक्तानां जगतामपि वा यस्मात्तस्य बत हर्षे अन्यत्तैः। यद्वा विनोदमात्रार्थत्वे हेतुः हे अभय! यतः सर्वाश्रयात्मनि त्वय्याश्रित्य वर्त्तमाना या अविद्याविद्याख्यायाश्चिच्छक्तेरितरा माया तयैव नित्यं भवादयः कृता वर्त्तन्ते ततस्तदन्तःपातिपालनमात्रार्थं नायं स्वस्वरूपेण प्रयत्नविशेषो युक्त इति विनोदं विना कारणान्तरं न तर्कयामह इत्यर्थः। दुष्टवधार्थप्रयत्नश्च सभयस्यैव सम्भवतीति तदेवं विनोदस्य स्वरूपाऽनुबद्धत्वेन सृष्ट्यादिलीलाभ्यो महान् विशेषो दर्शितः। अत एव नागपत्नीभिरुक्तम्। अव्याकृतविहारायेति, अत एव "अजितरुचिरलीलाकृष्टसारम्" इत्यादिकानि श्रीशुकादीनामपि विशेषणानीति ॥ ३९ ॥ हे ईश! इति तत्र सामर्थ्यं दर्शयन्ति हे यदूत्तम! इति अधुना श्रीकृष्णरूपत्वेन साक्षाद्भगवत्त्वात् पूर्वतोपि विशेषेण पालनं कर्त्तव्यमिति भावः। अत एव भारं हरेति यद्यपि "मया हतांस्त्वं जहि मा व्यथिष्ठाः" इति रीत्या तव जन्मना भारोऽपनीत इत्युक्त्यैव तत्प्रार्थना विशेषतो लब्धा तथापि पुनर्बहिस्तल्लीलादर्शनार्थमत्युत्कण्ठयेवेदमुक्तमिति ज्ञेयम्। अन्यत्तैः यद्वा यथा पासि तथाऽधुनापि पासि पास्यसि काक्वा ततो अधिकमेव पास्यसीत्यर्थः। तदेवाभिव्यञ्जयन्ति भुवो भारं हरेति श्रीनृसिंहाद्यवतारे त्वया हतानामपि हिरण्यकशिपुकालनेमिप्रभृतीनां पुनरत्र जन्मना भुवो भारो भवत्येव अधुना तथा विधेहि यथा तेषां पुरावृत्तिर्न स्यात् येन भक्तानामस्माकं तादृशदुष्टादर्शनेन च परमहितं स्यादिति भावः। नन्वेवं दुष्टानां मुक्तिदानमयोग्यमित्याशङ्क्य तदर्थं सकाकु प्रणमन्ति यदूत्तमेति अन्यत्समानम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

३७—तत्तदुपासक एव परमकृतार्थो भवतीत्याहुः—शृण्वन्निति। श्रवणादीनां विकल्पो ज्ञेयः, मंगलानि परमसुखात्मकानीति स्वतः पुरुषार्थतोक्ता। अतएव क्रियासु निजाशेषकर्मसु वर्त्तमानो यः, सोऽपि त्वच्चरणारविन्दयोराविष्टचित्तः परमासक्तो भवति; यद्वा, य इत्यस्य पूर्वेणान्वयः, यः शृण्वन् भवतीत्यर्थः। त्वच्चरणारविन्दयोः क्रियासु श्रवणादिकर्मस्वाविष्टचित्तो भवति। युष्मदिति ततश्च समञ्जसमेव; अतो भवाय संसाराय न कल्पते— तत्कारणे विद्यमानेऽपि तद्योग्यो न स्यादित्यर्थः। एवमानुषंगिकन्यायेन स्वत एव संसारनिवृत्तिरुक्ता ॥

३८—दिष्ट्या—एतद्भद्रं जातम्, किंवा अस्मादृशानां भाग्येनेत्यर्थः। अस्या भारार्त्तायास्त्वदवतारेण परमधन्यत्वं प्राप्ताया वा, पद इति पद्भ्यां भूमेरुत्पत्त्या; तत्र च कार्य्यकारणयोरभेदाभिप्रायेण। अतएवाग्रेऽक्रूरस्तुतौ (भा० १०।४०।१३)—

'अग्निर्मुखं तेऽवनिरङ्घ्रिः' इति। जन्मना श्रीदेवक्यामवतारमात्रेण भारः कंसादिहेतुकोऽपनीतो दूरीकृतः। इदं तद्विज्ञापनचातुर्यम्। यद्वा, भारः पापलक्षणोऽपनीत एव,—दुष्टानामपि तत्तत्सद्बुद्ध्याद्युत्पत्तेः। एवं भारहरणाद्धरे इति सम्बोधनं निजपदाब्जभारापनयनेन भक्तानामस्मादृशां हितं कृतमेवेति प्रयोजनमेकं सिद्धम्, किन्त्वस्माकं परमहितकारि विचित्रक्रीडया सर्वलोककृतार्थीकरणमेव मुख्यप्रयोजनं कार्यमित्याशयेनाहुः—दिष्ट्यांकितामिति। अल्पार्थे कप्रत्ययः पदानां सुकोमलत्वं बोधयति। अंकितामलंकृतामित्यर्थः। द्यामनुकम्पितामिति दैत्यवधादिना, तत्रत्यानां हिताचरणात्। यद्वा, विशेषणद्वयमिदं द्वयोरेव ज्ञेयम्। ततश्चांकितत्वेनैव भक्तिविस्तारणादिना वानुकम्पितां गां द्यामंकितामिति कदाचित् पारिजातपरागादिषु पदानामुदयात्॥ ३८॥

३९—न भवः संसारो भक्तानामपि जगतामपि वा यस्मात्तस्य, बत हर्षे। अन्यत्तैर्व्याख्यातम्। यद्वा, दुष्टवधादिना भारहरणमपि त्वत्क्रीडैवेति। अथवा ननु, भूभारहरणार्थमवतीर्णस्य दुष्टवधादिप्रयासेन सा विचित्रक्रीडा कथं सिध्येदित्यत्राहुः—नेति। यत आत्मनि साक्षाद्भूते, न तु किञ्चिद्व्यवहिते त्वयि वर्त्तमानयाविद्यया माययैव सृष्ट्यादयः कृता भवन्ति; आत्मनीत्यविद्यायास्तत्र शक्तिः सम्भाविता, अतो दुष्टवधादिकं तव कियदेतत् प्रयोजनमिति भावः। यद्वा, युष्मत्प्रार्थनया भूभारहरणायावतीर्णोऽस्मीति तदेव कार्यम्, किमन्यक्रीडयेत्यत्राहुः—नेति। गोकुलादिक्रीडार्थमवतीर्णत्वात्तत्क्रीडावश्यं कार्येति भावः। अन्यत् समानम्' यद्वा, ननु सृष्ट्याद्या महालीला वर्त्तन्ते, तदपेक्षया कोऽयं विनोदो नाम? तत्राहुः—भव इति। आत्मनि जीवे विषये निमित्ते वा—जातावेकत्वम्। भवादयोऽविद्ययैव, ते मायिकाः। अयञ्च सत्य एवेत्यर्थः। एवं रूपलीलानां सच्चिदानन्दरूपताभिप्रेता॥

४०—हे ईशेति तत्र सामर्थ्यं दर्शयन्ति। हे यदुत्तमेति अधुना श्रीकृष्णरूपत्वेन साक्षाद्भगवत्त्वात् पूर्वतो विशेषेण पालनं कर्त्तव्यमिति भावः; अतएव भावं हरेति। अन्यत्तैर्व्याख्यातम्। यद्वा, यथा पासि, तथाधुनापि पास्यसि किम्?—काक्वा, ततोऽधिकं पाहीत्यर्थः। तदेवाभिव्यञ्जयन्ति—भुवो भारं हरेति, श्रीनृसिंहाद्यवतारे त्वया हतानामपि हिरण्यकशिपुकालनेमिप्रभृतीनां पुनरत्र जन्मना भुवो भारो भवेत्येव; अधुना तथा विधेहि, यथा तेषां पुनरावृत्तिर्न स्यादिति भावः। नन्वेवं दुष्टानां मुक्तिदानमयोग्यमित्याशंक्य तदर्थं सकाकु प्रणमन्ति—यदुत्तमेति। अन्यत् समानम्। गूढोऽयमभिप्रायः—अपुनरावृत्तिमोक्षाप्त्या तेषां दुष्टानां कदाचिदपि दर्शनादिकं न भावीति भक्तानामस्मादृशां परमहितमेव सिद्धमिति। यद्वा, ते तव बन्धनं जगत्कर्तृकभजनं यथा स्यात्तथा दुष्टवधादिना भुवो भारं हर; किंवा ते त्वदीयानां यदूनां यदुप्रधानभक्तानामुत्तमबन्धनं यथा स्यात्, दुष्टानामत्यन्ताभावेनैव प्रेमभक्तिसिद्ध्यात्यन्ताभावलक्षणो मोक्षस्तान् प्रति दातुं योग्य एवेति भावः॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

इन्द्रादिनामरूपेभ्यः स्वाऽसाधारणनामरूपाणां ध्येयत्वादिकमाहुः—शृण्वन्निति॥ ३७॥ अपनीतः अपनीतप्रायः गां भूमिम्॥ ३८॥ अभवस्य ते भवस्य जन्म न कारणमित्यन्वयः। अविद्यया संसारिणां ज्ञानाविरोधिन्या प्रकृत्या उत्पत्त्यादयो विकाराः प्रकृतिगता न स्वरूपगता इत्यर्थः॥ ३९॥ ४०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इन्द्रादिनामरूपेभ्यः स्वासाधारणनामरूपाणां ध्येयत्वादिकं वदन्तः स्तुवन्ति शृण्वन्निति। यः पुमांस्ते तव मङ्गलावहानि नामानि रूपाणि च शृण्वन् वक्तृसन्निधौ सति गृणन् श्रोतृसन्निधौ तदुभयासन्निधौ नामानि स्मरन् रूपाणि चिन्तयंश्च संस्मरयन्निति णिजर्थस्त्वविवक्षितः क्रियासु वैदिकक्रियासु आसनाटनभोजनादिक्रियास्वपि त्वच्चरणारविन्दयोरासक्तं चित्तं मतिर्यस्य तथाभूतः स पुमान् भवाय श्रेयःसमृध्द्यै कल्पते नेति पाठे भवाय संसृतये न कल्पते किन्तु मुक्तय इत्यर्थः॥ ३७॥ आत्मनां प्रकृतावतारप्रयुक्तमानन्दमाविष्कुर्वन्तः स्तुवन्ति—दिष्ट्येति। दिष्ट्येत्यानन्दद्योतकमव्ययं हे हरे आश्रितार्तिहारिन्! तव ईश्वरस्य जन्मना भवतस्तव पदा पादविन्यासेन च पद इति पाठे पदरूपाया अस्या भुवोभारोऽपनीतोऽपनीतप्रायः। इदं दिष्ट्या अस्माकमानन्द इत्यर्थः। एवमुत्तरत्रापि सुशोभनैर्ध्वजवज्राङ्कुशादिचिह्नैश्चारुभिः पदकैः पादविन्यासैरलङ्कृतां तव त्वया अनुकम्पिताञ्च गां भूमिं द्याञ्च स्वर्गं द्रक्ष्यामः नित्यविभूतिमिव द्रक्ष्याम इत्यर्थः। एतद्दिष्ट्या सङ्कल्पमात्रनिर्वर्त्यजगद्रक्षणक्षमस्य तवावतारप्रयोजनं भक्तजनानुग्रह एवेत्युक्तम्॥ २८॥ अथावतारनिमित्तमाविष्कुर्वन्तः स्तुवन्ति—नेति। हे ईश! अभवस्य कर्माधीनोत्पत्तिरहितस्य तव भवस्य जन्मनः कारणं निमित्तं विना विनोदं लीलार्थं सङ्कल्पं विना अन्यन्न तर्कयामहे। बतेत्याश्चर्ये अनितरसाधारणत्वाद्विस्मयः यथा सृष्ट्यादि जगद्व्यापारो विनोदमात्रानुकूलसङ्कल्पमूलकस्तद्वज्जन्मादीत्यभिप्रायेणाऽऽहुः—भव इति। हे अभय! यतो विनोदादेव निमित्तादविद्यया संसारिणां ज्ञानविरोधिन्या प्रकृत्या जगत उत्पत्त्यादयो विकारास्तस्याश्रये आधारभूतेऽन्तरात्मनि च त्वयि कृताः तमेव विनोदमभवस्य तव भवकारणं मन्यामह इत्यर्थः। आश्रयात्मनि कृता इत्यनेन उत्पत्त्यादयो विकाराः प्रकृतिगताः न स्वरूपगता इति सूचितम्॥ ३९॥ यथा मत्स्याद्यवतारपरिग्रहेणास्मान् रक्षितवानेवमधुना भूभारापहारद्वाराऽस्मान् पाहीत्याहुः—मत्स्येति। मत्स्यादिषु कृतः परिगृहीतोऽवतारो येन तथाभूतस्त्वमस्मान् त्रिलोकीञ्च यथा पासि रक्षितवांस्तथाऽधुनाऽपि भुवो भारं हराऽपनय हे यदूत्तम! ते तुभ्यं वन्दनं नम इत्यर्थः॥ ४०॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यस्मान्नामादयः सन्ति तस्मात्क्रियमाणासु क्रियासु प्रेरकत्वेन नामानि शृण्वन् गृणन् रूपाणि चिन्तयन्नास्ते स त्वच्चरणारविन्दयोः आविष्टचित्तः पुरुषः भवाय संसाराय न कल्पत इत्यन्वयः । चशब्देन "सर्वक्रियासु कर्तृत्वपूज्यत्वेन जनार्दनम् । यो वेत्ति नेति संसारं तत्प्रसादान्न संशयः" इति स्मृतेर्न श्रवणादिना पूर्यते किं तु तज्ज्ञानं चावश्यमपेक्षितं भवति ॥ ३७ ॥ इदानीमवतारप्रयोजनं विज्ञापयति —दिष्ट्येति । तव जन्मना भवतः पदः भवच्चरणस्थानीयायाः भुवः असुरकृतभारोपनीत इति यत्तद्दिष्ट्या सर्वस्य सुखमभूत् सुष्ठु वा "सुष्ठु दिष्ट्योपजोषम्" इति यादवः तवानुकम्पिताम् अनुकम्पाविषयां द्यां च द्रक्ष्यामः दिष्ट्येत्यभ्यास आदरार्थः "पदाद्याश्रयणाद्विष्णोः पृथिव्याद्विपदादिकम्" इत्यादिस्मृतिसिद्धं भूमेर्विष्णुपदत्वम् ॥ ३८ ॥ लोकानुग्रहमन्तरेणान्यदवतारप्रयोजनं नास्तीति विज्ञापयतीत्याह नेति । न विद्यते भवः शुक्रशोणितसम्पर्कलक्षणं जन्म यस्य तथा तस्य भवस्य भद्रस्य जन्मादिदोषरहितस्येत्यर्थः "भवो भद्रे हरे प्राप्तौ सत्तासंसारजन्मसु" इति यादवः । ननु कर्दमे लीयत इव हरेर्जन्मादिमत्त्वं सत्यमित्यायातं तथा च तस्य कर्माधीनप्रवृत्तत्वेनेश्वरत्वहानेर्न मोक्षार्थं तदुपासनं विधेयमिति तत्राह—भव इति । त्वयीति षष्ठ्यर्थे सप्तमी अभवाश्रयश्चायमात्मा चेत्यभावाश्रयात्मा मोक्षाश्रयः स्वामी तस्य मुक्ताश्रयस्य स्वरूपस्य वा तव कृता अङ्गीकृताः भवादयो ऽविद्यया त्वत्स्वरूपाज्ञानेन सत्या इति नरा मन्यन्ते इति यत इति शेषः । अस्य स्वस्य विद्यया इच्छया कृताः सत्या मन्यन्ते इति यतस्तस्मात्स्वरूपानादित्वेन ईश्वरत्वहान्यभावेन त्वदुपासनमेव विधेयमिति भावः—

"अज्ञानादेव मन्यन्ते विष्णोर्जन्ममृती नराः । स्थितिरूपस्य चान्यस्मात् स्थितिं मोक्षाश्रयस्य हि" इति ॥

वचनान्नेन्द्रजालमिति मन्तव्यमिति ॥ ३९ ॥ भक्तसङ्कटपरिहारमन्तरेणान्यदवतारप्रयोजनं न तवास्तीति यत इतो निकृष्टोत्कृष्टजातिग्रहणेन त्रिभुवनमपादित्युपसंहरतीत्याह—मत्स्येति । अश्वो हयग्रीवः कच्छपः कूर्म्मः विप्रो जामदग्न्यः त्रिभुवनं पास्यथा इति लकारव्यत्ययः तथा सति कार्ये कृतेऽप्यस्माभिरेतावदेवाऽनुष्ठीयते कृतप्रतिनिध्यभावादित्याह—यदूत्तम इति । अस्त्विति शेषः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

शृण्वन्निति । क्रियासु व्यवहारिकीष्वपि वर्त्तमानः योंऽशेन मत्स्यादिनाऽस्माकं भवाय स साक्षात् स्वयमेवेति कुक्षिं गत इति पूर्वं मनसो दधारेत्यप्युक्तं तत एकवाक्यतानुरोधेनायमर्थः यद्यपि तदीयप्राचीनतादृशप्रेमयाञ्चावशतया कुक्षिं प्रविष्ट एव तथापि कुक्ष्यादिद्रव्यं भगवतोऽवरोधकं न स्यात् किन्तु प्रेमैवेति तस्य च प्रेम्ण आश्रयः कुक्षिर्न भवति किन्तु मन एवेति तदात्मतया मन एव तद्धारणे साधनं ततः कुक्षिङ्गतः मनसैव दधारेति ॥ ३७—४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

३८—दिष्ट्याङ्कितामिति । त्वत्पदकैः कोमलपदैः पदचिह्नैर्वा अङ्कितां गां पृथिवीं द्यां वैकुण्ठम्, द्योतते इति द्यौः, स्वप्रकाशत्वाद् द्योशब्दोऽत्र वैकुण्ठवचनः पृथिवीमधिष्ठितस्य तव पदकैः पृथिवीमङ्किताम्, तदनु तिरोभावलीलायां तथाङ्कितं वैकुण्ठञ्च द्रक्ष्यामः,—अस्यैव स्वरूपस्य नित्यत्वात् । आविर्भाव-तिरोभावावेवेति द्योशब्द-तात्पर्यम् ॥ ३९ ॥

४०— मत्स्यादयस्तु तवैवावताराः, त्वं तु त्वमेवेत्याह—मत्स्यान्-श्वकच्छपेत्यादि । राजन्यो दशरथादिः, विप्रः कश्यपादिः विबुधो धर्मादिः एषु कृतोऽवतारो येन स त्वं सर्वावतारबीजम् । अधुना भुवो भारं हर, तदा रूपान्तरं गृहीत्वैव नः त्रिभुवनञ्च पासि; अधुना तु स्वरूपेणैवावतीर्णो भूत्वा भारं हरेति वाक्यार्थः । कृतावतार इति गुणभावात् त्वमित्यस्य प्रधानत्वाच्च ते तुभ्यं वन्दनमस्त्वित्युपसंहारः ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मत्स्याश्वेत्यादि । मत्स्यादिषु कृतावतारः सन् त्रिभुवनं नोऽस्मानपि पासि, हे ईश ! अधुना त्वं साक्षात् स्वयमवतीर्णः सन् भुवो भारं हरेत्यस्य सर्वेश्वरेश्वरत्वं प्रतिपादितम् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

किञ्च नामरूपयोः श्रवणादिभिरभ्यास एवानुभवे कारणमित्याहुः-शृण्वन्निति । क्रियासु स्वदैहिकव्यापारेषु वर्त्तमानोऽपि न भवाय कल्पते किन्तु भगवदनुभवाय कल्पते ॥ ३७ ॥ भारावतरणमवश्यकर्तव्यमिति भङ्ग्या विज्ञापयन्ति, दिष्ट्येति । पदः पदजन्यायाः "पद्भ्यां भुमिः" इति श्रुतेः । भारोऽपनीतः अधुनैव कंसजरासन्धादीन् हतान् जानीम इति भावः । पदकैः सुकुमारैः पदैः सुशोभनैर्ध्वजवज्रादिमङ्गलचिह्नवद्भिः गां पृथ्वीं द्यां स्वर्गं च ॥ ३८ ॥ अस्मद्विज्ञापितोऽस्मदादिपालनार्थमवतीर्णोऽसीत्यस्मा-

कमभिमान एव केवलं वस्तुतस्त्वं स्वैरजन्मकर्मलीलोऽसीत्याहुः-नेति। अभवस्य अजन्मनः भवस्य प्रादुर्भावस्य यत आश्रयात्मनि त्वयि त्वामाश्रित्य वर्तमाना या अविद्या माया तयैव भवादयो जगत्सृष्ट्यादयः कृता इत्यर्थः। हे अभय! नास्ति भयं यत इति त्वत्स्मरणादेव कंसाद्यसुरभयं निवर्तते तद्वधार्थं तव स्वयमेवाविर्भूयोद्यमो न घटत इति भावः॥ ३९॥ तदप्यस्माकमधीराणां बहुधैवावगतचरं वैकल्यमवगम्यतां चेत्याहुः-मत्स्याश्वेति। तथैव भुवो भारं हरेति भूभारहरणमेव सम्प्रत्यस्माक्तं पालनमिति भावः। वन्दनं ते इति वदन्तः सर्वे शिरोभिः प्रणमन्ति॥ ४०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्माद्भवदाराधनं मुक्तिसाधनमित्याहुः-शृण्वन्निति "यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्" इति स्मृत्या क्रियान्यूनतापूर्त्यर्थकानि—

"यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम्। लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः"॥

इतिपूर्वोक्त्या सद्यः कल्मषहराणि—

"अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यम्। तेपुस्तपस्ते जुहुवुस्सस्नुरार्या ब्रह्मानूचुर्नाम गृह्णन्ति ये ते"॥

इति पूर्वत्रोक्त्या सर्वशोधकानि सर्वसाधनफलप्रदानि—

"स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः। स्त्रीराजमित्रगोहन्ता ये च पातकिनोऽपरे॥
सर्वेषामप्यघवतामिदमेव सुनिष्कृतम्। नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः"॥

इतिमहापातकप्रायश्चित्ततयोक्तानि—

"सकृदुच्चरितं येन हरिरित्यक्षरद्वयम्। बद्धः परिकरस्तेन मोक्षाय गमनं प्रति"। इति।

स्मृत्या मोक्षप्रदानि नामानि प्रतिदिनं क्रियासु त्वद्भक्तैरुच्चारितानि रूपाणि च निरूपितानि शृण्वन् श्रोतरि सति गृणन् अन्यदा संस्मरयन् चकाराद्भक्तान् संस्मारयन् चिन्तयन् मननं कुर्वन् त्वच्चरणारविन्दयोः आविष्टचित्तः भवाय संसाराय न कल्पते॥ ३७॥ भूभारहरणप्रसङ्गेन सलोकाः वयं तीर्थीकृता इत्याहुः-दिष्ट्येति। दिष्ट्येत्यव्ययं मङ्गल हे हरे! स्वभक्तक्लेशहारिन्! दिष्ट्या भद्रं भवतः पदो भुवः पादरूपायाः क्षितेः तव जन्मनैव भार एको भारः अनाथतया सात्मप्रजाधारणरूपोऽपनीतः यथा काचित्पतिवियुक्ता सात्मप्रजाभारेण सीदमाना क्षुद्रैः क्लिश्यमाना च प्रत्यागमनमात्रेण गतैकभारा भवति। तथेयमित्यर्थः। किञ्च त्वत्पदकैः अतिमृदुपदकमलैः सुशोभनैः स्वासाधारणलक्षणसंपन्नैः तवानुकंपितां गां भूमिं द्यां देवलोकं च अङ्कितां ध्वजवज्रादिचरणचिह्नैः चिह्नितां दिष्ट्या द्रक्ष्यामः सलोकाः वयं कृतार्था इति भावः॥ ३८॥ किञ्च सर्वात्मनः सर्वगतस्य सर्वदा सर्वं कर्तुं समर्थस्यार्यावतारणं स्वेच्छया लीलार्थमित्याहुः- नेति। यतो यत्र त्वयि अभयानां "सदा पश्यन्ति सूरयः" इत्यादिश्रुतिप्रसिद्धानामाश्रयश्चासावात्मा च तस्मिन् भवादयः अनन्तकोटिब्रह्माण्डात्मकविश्वजन्मादयः अविद्यया विद्यावर्जितया मायया त्वत्कृताः भवन्ति एवंभूतस्याभवस्य "अजायमानो बहुधा विजायते" इत्यादिश्रुत्युक्तप्रभावस्य ते जन्मनः कारणं विनोदं विना न तर्कयामहे इत्यन्वयः। किं यदिदं भूभारहरणादिकमिति भावः॥ ३९॥ तथापि विनोदायावतीर्णः असुरकृतं भूमेर्भारं हर नः पाहीति प्रार्थयन्ते-मत्स्येति। मत्स्यादिरूपभृत् नोऽस्मान् त्रिभुवनं चकाराद्धर्मादिकमन्यदा यथा त्वं पासि तथा अधुनापि पाहि भुवो भारं च हर हे यदूत्तम! ते वन्दनमिति किरीटकोटिभिः भूसंस्पर्शपूर्वकमभिवन्दनमस्तु॥ ४०॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

अस्याः भवतः पदो भुवः। इत्यस्य भवतः पदश्चरणभूताया अस्या भुवो भूम्या इत्यर्थः। एतेन भगवतः पृथिव्याश्रयणाभावाद्भवतः पदाश्रयभूताया अस्या भुव इत्यनुपपन्नमिति दूषणं निरस्तम्। यच्छब्दस्याश्रयत्वमनंगीकृत्य पदार्थस्योक्तत्वात्॥ ता० अर्थः॥ खन्नाभिश्चरणौ क्षितिरित्यनेन पृथिव्या भगवच्चरणत्वस्योक्तत्वाद्भगवतः पदो भुव इत्यनेन पृथिव्या भगवच्चरणत्वमेवोच्यते न तु भगवदाश्रयत्वम्। खन्नाभिश्चरणौ क्षितिरित्यनेन भवतः पदोभुव इत्यनेन च पृथिव्या यद्भगवच्चरणैक्यमुक्तं तन्मुख्यं न भवति किंतु तदाश्रितत्वतज्जन्यत्वतत्सादृश्यत्वरूपं गौणमित्यस्मिन्नर्थे प्रमाणमाह॥ पदाद्याश्रयणादिति। विष्णोः पदाद्याश्रयणात्तज्जन्यत्वात्पादादिजन्यत्वाद्वा। अथवा। सादृश्यात्पदादि सादृश्यात्पृथिव्यादि विष्णोः पदादिकं पादादिकमिति खन्नाभिश्चरणौ क्षितिरित्यादावुच्यते। अत्र दृष्टांतमाह॥ यथेति। यथा नु पुरुषस्य भूमिगं भूमौ विद्यमानं पदं प्रतिपदं पुरुषपादजन्यत्वात्पुरुषपादसदृशत्वाद्वा पुरुषस्य पदमित्युच्यत इति। एतेन भगवतः पदो भुव इति सामानाधिकरण्येनैव पृथिव्या भगवत्पादत्वस्य प्रतीयमानत्वात्। खन्नाभिश्चरणौ क्षितिरिति भवतः पदो भुव इति तात्पर्यं व्यर्थमिति दूषणस्यानवकाशः। भवतः पदो भुव इत्यनेन पृथिव्या भगवत्पादत्वस्य बाधितत्वाद्भगवदाश्रयत्वमुच्यत इति भ्रमं परिहर्तुं खन्नाभिश्चरणौ क्षितिरिति भवतः पदो भुव इति तात्पर्यं प्रत्यक्ष-

मित्यभ्युपगमात् ॥ ३९ ॥ मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रबुधत्वैर्युक्तः सन् कृतोऽवतारो येन स तथेति । एतेन मत्स्यवाक्यस्य मत्स्येषु कृतावतारोऽश्वेषु कृतावतार इत्याद्यर्थो वक्तव्यः । तत्र भगवद्व्यतिरिक्तानां मत्स्यादीनां विद्यमानत्वात् । मत्स्येषु कृतावतार इत्याद्युपपद्यते भगवद्व्यतिरिक्तनृसिंहहंसस्याभावान्नृसिंहेषु कृतावतार इत्यनुपपन्नमिति शंका परिहृता । मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेष्विति सप्तमी बहुवचनं तृतीया बहुवचनोद्देशः । भावप्रधानोऽयं निर्देश इति चांगीकृत्य मत्स्यत्वेन युक्तः सन् कृतावतार इत्याद्यर्थ उच्यत इत्यभ्युपगम्य मत्स्यत्वादि योगवन्नृसिंहत्वयोगः संभवतीत्यूरीकरणात् ॥ ४१ ॥

इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ १०—३ ॥ (अस्मत्क्रमेण द्वितीयोऽध्यायः)

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

न नामरूपे इति । ननु न नामरूपे इति श्लोके गुणकर्मभिः सहिते तव नामरूपे न निरूपितव्ये निरूपयितुं शक्ये न भवत इति हरेर्नामरूपादिराहित्यमुच्यते । तदयुक्तम् । सर्वनामा सर्वरूपः सर्वगुण इत्यादिप्रमाणेन विरुद्धत्वादित्यतः प्रमाणेनैव तत्तात्पर्यार्थमाह ॥ लोकसिद्धार्थनाम्न इत्यादिना । नाम्न इति षष्ठी तृतीयार्थे । लोकसिद्धः प्रसिद्धोऽर्थो यस्य तत्तथा । तच्च तन्नाम च तस्येति विग्रहः । लोकसाधारणार्थवन्नामराहित्यादित्यर्थः । सत्त्वाभावात्प्राकृतसत्त्वादिगुणत्रयातीतत्वात् । अक्लिष्टकारित्वादकमत्यन्वयः । सुसुखज्ञानान्येव रूपाणि यस्य संति स सुखज्ञानरूपवानित्यर्थः । यद्यस्मादस्य हरेस्तानि रूपाणि शुभलक्षणपूर्णानि शुभानि लक्षणानि येषु तानि तथा पूर्णानि संख्यया पूर्णानि । असंख्यातानीति यावत् । संत्यतोऽसौ हरिरनंतरूप इत्यन्वयः । असौ हरिर्बलैश्वर्यसुवीर्याद्य एव पूर्णा असंख्यगुणा यस्मिन्स तथा तस्य भावस्तत्त्वं तस्मादित्यर्थः । ननु हरिगुणानां पूर्णत्वे किं मानमित्यत आह ॥ पूर्णानंदादिभोजनादिति । पूर्णत्वेनानंदादीनां भोजनादनुभवात् । हरेरिति शेषः । अनेन पूर्वगुणोऽहमिति विष्णोः प्रत्यक्षानुभव एवानंदादीनां पूर्णत्वे मानमित्युक्तं । हरेरिति पदं गुणा इत्यनेनाभिन्ना इत्यनेन संबध्यते । तद्गता भगवद्गुणगताः सर्वे धर्मा गुणाः सत्त्वादयश्चेत्यर्थः । प्राकृतस्य तु नामादेरित्यनेन तस्येति भागवतपदं व्याख्यातं भवति । ईक्षिता पुरुषोत्तम इत्यनेन साक्षिण इति भागवतपदं व्याख्यातं भवति । अनामादिवचोभिर्हरेर्नामरूपराहित्यादिप्रतिपादकवचोभिः । तुरवधारणे । एष इत्यनेन संबध्यते । स एष एवार्थोऽलौकिकार्थः सन्नाम्नामित्यारभ्य सर्वाणि जगदीशतुरित्यंतब्रह्मतर्कोक्त एवार्थः । अनु उपक्रमादिलिंगानुसारेण मीयते ज्ञायते प्रतिपाद्यत इत्यर्थः । अनामत्वादि चान्यश्च लोकप्रसिद्धार्थवन्नामरूपराहित्यादिरूपोऽन्योऽर्थोऽनामादिवचोभिः प्रतिपाद्यत इत्यर्थः । नन्वनामादिवचसामलौकिकार्थनामादियुक्तत्वमर्थः कुतः । सर्वथा नामादिराहित्यमेवार्थः किं न स्यादिति चेन्न । अलौकिकार्थनामादियुक्तत्वरूपार्थस्य प्रामाणिकत्वात्सर्वथा नामादिराहित्यरूपार्थस्याप्रामाणिकत्वादित्याशयवानाह ॥ ज्ञानिनामिति । स एषोऽर्थ इति वाक्यमनुवर्तते । अन्यश्चेति चशब्दोऽवधारणार्थः । एष इत्यनेन संबध्यते । तेन परोक्तसर्वथानामादिराहित्यरूपोऽर्थो व्यावर्त्यते । इंग्यते ज्ञायत इत्यर्थः । अनेन ज्ञानिनामनुभव एवास्मिन्नर्थे प्रमाणमुक्तं भवति । न चायमनुभवो ज्ञानिनां स्वातंत्र्येणेति मंतव्यमित्यभिप्रायेणैवाह ॥ तेनैव चोह्य इति । चशब्दो ज्ञानिनामित्यनुकर्षणार्थः । षष्ठी तृतीयार्थे । ज्ञानिभिरेषोऽर्थस्तेनैव प्रसन्नपरमात्मनां तत्प्रेरणयैवोह्य ऊहितुं ज्ञातुं शक्यो नान्यथा । उपसंहरति ॥ तस्मादिति । तस्मात्सर्वथा नामादिराहित्यस्याप्रामाणिकत्वादलौकिकार्थनामादिराहित्यस्य ज्ञानिप्रत्यक्षादिप्रमाणसिद्धत्वात्प्रभुः परमसमर्थो हरिरिति पूर्वोक्तालौकिकार्थनामादिवत्त्वेव ज्ञेय इत्यर्थः । अत्रानामादिवचोभिरित्यारभ्य मनसेंग्यत इत्यंतेन तात्पर्यप्रमाणेन मनोवचोभ्यामनुमेयवर्त्मन इति भागवतवाक्यं व्याख्यातं भवति । तेनैव चोह्य एषोऽर्थ इति तात्पर्यश्लोकपादेन देवक्रियायाः प्रतियंत्यथाऽपीते भागवतवाक्यं व्याख्यातं भवति । देवक्रियायाः प्रतियंतीति भागवतश्लोकांत्यपादं देवक्रियाया इंद्रादिदेवानुद्दिश्य कृतयज्ञादिक्रियायाः प्रतियंति स्वर्गादिकं प्राप्नुवंतीत्यन्यथाप्रतीतिनिरासाय प्रमाणेन व्याख्यातमपि स्पष्टमव्याख्यातत्वादनूद्य स्पष्टं स्वयं व्याचष्टे ॥ देवक्रियायाः प्रतियंतीति । स्वोक्तार्थे प्रमाणमाह ॥ नामरूपादि विष्णोरिति ॥ ३७ ॥ शृण्वन् गृणन्निति श्लोके क्रियासु तदित्यत्र तच्छब्दस्य विवक्षितार्थान्वयाप्रतीतेरर्थान्वयौ दर्शयन् क्रियास्वित्यस्य चान्वयाप्रतीतेरपेक्षिताध्याहारेणान्वयं दर्शयति ॥ यस्मादिति । क्रियमाणासु क्रियासु प्रेरकत्वेन पूज्यत्वेन च । हरिं वेत्तीति शेषः शृण्वन् गृणन् । नामादीनिति शेषः । स्वोक्तार्थे प्रमाणमाह ॥ सर्वक्रियास्विति ॥ ३८ ॥ दिष्ट्या हरे इति श्लोके भवतः पद इत्यनेन पृथिव्या विष्णोः पादाख्यावयवत्वमुच्यते । तदयुक्तं । पृथिव्या विष्णुपादत्वे प्रमाणाभावादित्यतः प्रमाणमुदाहृत्य तेन प्रमाणेनास्य भागवतवाक्यस्यान्वयं दर्शयति ॥ खं नाभिरिति । खमाकाशो नाभिः । क्षितिः पृथिवी चरणाविति प्रमाणस्य विद्यमानत्वाद्भगवतः पदो भुव इति पृथिव्या यद्विष्णुपदत्वमुक्तम् । तद्युक्तमिति शेषः । नन्वेवं चेद्विष्णुपादस्य जडत्वं स्यात्तदंगीकारे चेतोमुखः सुखगंधश्च ज्ञानभाः सत्पराक्रम इत्यादिश्रुत्यादिविरोधः स्यादित्यतः प्रमाणेनैव पृथिव्या विष्णुपादत्वमुपपादयंस्तत्प्रसंगादाकाशादीनां विष्णुनाभित्वादिकमुपपादयति ॥ पदाद्याश्रयणाद्विष्णोरिति । पदादीति पदद्वये । आदिपदेन नाभ्यादिकं ग्राह्यम् । विष्णोरिति पूर्वोत्तरत्र च संबध्यते । पदादिकमुच्यत इति शेषः । सादृश्यमेव स्पष्टयति ॥ यथा नुरिति । यथा नुः परमपुरुषस्य पदं भूमिगं भूमिगतं यस्मिंस्तद्भूमिगं भूमेराधारभूतं तथा नुः परमपुरुषरूपस्य कृष्णरामादेः पदं भूमिगं भूमौ गतम् । अनेन भूमेर्विष्णुपदस्य च सामान्यत आधारत्वादिमात्रं सादृश्यमुक्तं भवति ॥ ३९ ॥ न ते भवस्येशेति श्लोके अभवाश्रयात्मन्यभवः पारमार्थिकसंसाराभावस्तस्याश्रयो जीवः स एवात्मा स्वरूपं यस्य स तथा तस्मिन्

जीवस्वरूपे त्वयि भव उत्पत्तिर्निरोधः संहारः स्थितिश्चाविद्यया कृताः कल्पिता इति कृष्णस्य जीवत्वं तथा जीवस्योत्पत्त्यादिस्थितीनां मिथ्यात्वं चोच्यत इत्यन्यथाप्रतीतिनिरासाय प्रमाणेन तत्तात्पर्यार्थमाह ॥ अज्ञानादेव मन्यंत इति। स्थितिं रूपयति निरूपयति करोतीति स्थितिरूपस्तस्य। अन्यस्मादित्यस्य स्थितिमित्यनेनान्वयः। न तु जनिमृती इत्यनेनापि। तथात्वेऽन्यस्माज्जनिमृत्यभावेऽपि। स्थितिवत्स्वभावत एव जनिमृती स्याताम्। तदंगीकारे नित्यो नित्यानाम्। अविनाशि तु तद्विद्धि। न जायते म्रियते वा कदाचिदित्यादिश्रुतिस्मृत्यादिविरोधः स्यादित्यतः स्थितिपदेनैवान्वयो ज्ञातव्यः। अनेन विष्णोर्ये तथाऽन्यस्मात्स्थितिं मन्यंते तेऽपि ज्ञानिनस्तथा ये जन्मादिकं मन्यंते तेऽज्ञानिन इति सामान्यत इत्युक्तं भवति। ननु तेऽज्ञानिनः कुतो ज्ञानिन एव किं न स्युरित्यत आह ॥ मोक्षाश्रयस्य हीति। हेतुगर्भविशेषणम्। मोक्षाश्रयत्वान्मोक्षप्रदत्वादित्यर्थः। न हि स्वयं जन्मादिमान् सन्परं जन्मादिभ्यो मोचयतीति संभवति। अतिप्रसंगात्। अनेनाभावाश्रयात्मनीति भागवतवाक्यं व्याख्यातं भवति। एवं मोक्षप्रदत्वेन हेतुना विष्णोर्जन्माद्यंगीकुर्वतां मिथ्याज्ञानित्वमुपपाद्य हेत्वंतरेणाप्युपपादयति ॥ स्वेच्छया हीति। चोऽवधारणे। स्वेच्छयेत्यनेन संबध्यते। हिशब्दोऽस्यार्थस्य प्रामाणिकत्वं द्योतयति। तज्जन्यादिर्जनिरादिर्यस्यासौ जन्यादिस्तस्य विष्णोर्जन्मादिस्तज्जन्मादिरिति विग्रहः। तदिति भिन्नं पदं कृत्वा तस्य तस्मादित्यन्वयोऽपि कर्तव्यः। अनेन स्वातंत्र्येण सर्वस्य जगतो जन्मादिकर्तृत्वान्न विष्णोर्जन्मादित्वं संभवति। न हि जन्मादिमतः स्वातंत्र्यं स्वातंत्र्येण सर्वजन्मादिकर्तृत्वं च संभवति। अतो विष्णोर्जन्मादिमत्त्वज्ञानिनो मिथ्याज्ञानिन एवेत्युक्तं भवति। अत्राज्ञानादेव मन्यंत इति तात्पर्यश्लोकेन भागवतस्थमविद्यापदमज्ञानार्थत्वेन व्याख्याय भागवतश्लोको विष्णोर्जन्मादिमत्त्वज्ञानिनो मिथ्याज्ञानित्वपरत्वेन व्याख्यातः। स्वेच्छया हीति द्वितीयतात्पर्यश्लोकेन भागवतस्य तदेवाविद्यापदं भगवदिच्छार्थत्वेन व्याख्याय विष्णोः स्वातंत्र्येण जगज्जन्मादिकर्तृत्वपरत्वेन व्याख्यातः ॥ ४० ॥

इति श्रीभागवततात्पर्यटिप्पण्यां तृतीयोऽध्यायः ॥ १०–३ ॥ (अस्मत्क्रमेण द्वितीयोऽध्यायः)

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

न नामरूपे इति। न नामरूपे गुणकर्मभिर्जन्मभिर्निरूपितव्य इति श्लोके नामरूपानिरूपणीयत्वेन तद्राहित्यं तत्साहित्येन गुणकर्मादिराहित्यं च भगवत उच्यत इति प्रतीयते। तच्च सर्वनामा सर्वकर्मा सर्वगुणः सर्वरूपः। नामानि सर्वाणि यमाविशन्ति। यो देवानां नामधा। ईक्षतेर्नाशब्दमित्यादिबाधितमित्यतोऽभिप्रायं प्रायो मतिर्मानेनैवाह ॥ **लोकेति।** स हरिर्नामवर्जित इत्युच्यते कुत इत्यत आह ॥ **लोकप्रसिद्धार्थनाम्नो रहित इति।** लोकप्रसिद्धोऽर्थो यस्य तच्च तन्नाम च तस्य राहित्यादभावात्। आनन्दो नेदृश आनन्द इत्यादेः साधारणाभिधेयहीननामवानित्यर्थः। अन्यत्राप्यनामाऽसौ प्रसिद्धत्वादिति। अप्राकृतत्वादप्राकृतरूपवत्त्वादरूपो भूतवर्जनादित्युक्तेः। पूर्वपद्ये गदितमगुणपदमनुवर्ण्य तदर्थं वर्णयति। तथाशब्दः समुच्चायकः। सत्त्वाभावान्मुख्यस्यैव सत्त्वस्यासत्त्वस्यासत्त्वे द्वयोरमुख्ययोः प्रत्याख्यानं कैमुत्येन प्रत्येतुं शक्यमिति तन्मात्रग्रहणमिति ज्ञेयम्। तथा च गुणत्रयातीतयाऽगुण इत्युच्यत इति भावः। अक्लिष्टकारित्वादकष्टोऽकार्यकर्तृत्वादकर्मा। एतद्व्याजेनातीतैरपदैस्तत्सजातीयशब्दार्थमप्याह ॥ **निस्यत्वावज इति।** अलौकिकार्थानि यानि सन्ति नामानि तेषामनन्तत्वाज्जनार्दनो गतम्। अनन्तनामोच्यते। प्रकृतप्राकृतरूपराहित्ये किं नीरूप उत सरूपः। अनन्तरूपोऽनन्तश्च इत्यादिविरोधापत्तेः। द्वितीये तन्निरूपणीयमित्यत आह ॥ **सुसुखेति।** सुनामसुखज्ञानसाधारण्यं वारयति तान्येव रूपाणि सन्त्यस्येति सः। तानीत्यनेन रूपवानिति विशेषणरूपपरामर्शः। यत्तानि रूपाण्यस्य हरेः सुदिव्यानि सु शोभनश्चासौ गन्धश्च आ सम्यक् नि नितरां शुभं च मङ्गलं च येषु तानि। एतेन गन्धस्येदुत्पूतिसुसुरभिभ्य इतीत्वं न कुत इति शङ्काऽऽतङ्कितेति ज्ञेयम्। आपञ्चभ्यः प्रयोक्तव्या उपसर्गा इत्याद्युभाष्याद्युक्तेरानीत्युपपन्नम्। तात्पर्यं तु समानस्येत्यादिवदाधिक्य इति ज्ञेयम्। यद्वा गन्धो येषामस्तीति गन्धीनि सु शोभनानि गन्धीनि च स्वार्थशोभनताया विशेषणे गन्धे योग्यतयाऽन्वयः। प्रपञ्चः स्कन्धान्तरविवृतौ कृतोऽत्रानुसन्धेयः। सु शोभनश्चासौ गन्धश्च नितरां शुभान्यशुभमिश्राणि च शुभानि चेत्येवमेव विग्रहः। गन्धपदोत्तरं दीर्घश्च सांहितिकः। न चेदृशायासं विज्ञानं क्वेति वाच्यम्। ईदृशायासविज्ञ इत्येकादशमूलतात्पर्ये ईदृशं वर्तमानमाय एष्यन्सोऽतीत इति त्रैविध्यं भाति। विज्ञाय वस्तुनि विज्ञाते सति दीर्घलोपोऽत्रात इतिवत्। क्षेप्रेदीर्घलोप इति सूत्रादित्युक्तेर्विग्रहदशीयपदकाले ह्रस्व इति ज्ञेयम्। शुभानि लक्षणानीतरविलक्षणानि तैः पूर्णानि सुवर्णानि रुक्मवर्णमित्यादेर्महान्ति च। अतोऽसौ हरिरनन्तरूपः पूर्णानन्दादिभोजनाद्बलैश्वर्यसुवीर्यादयः पूर्णाः प्रत्येकमसङ्ख्याश्च गुणा यस्य स तस्य भावस्तत्त्वं तस्मादसावनन्तगुण एव। तर्हि तत्तेषां भेदः किमित्यत आह ॥ **ते चेति।** तत्तेषां परस्परमप्यनन्तरमितीरयति। तद्गताः सर्वे धर्माश्च परस्परं चाभिन्ना भेदरहिता इति। रूपाण्यपि मत्स्यादीन्यप्यभिन्ना इत्याह। **अभिन्नानीति।** प्राकृतस्य। अत्र द्वे दर्शने। भागवतानां नाम्नां प्राकृतत्वमेवेत्येकम्। द्वयेषां च। अलौकिकास्तस्य शब्दास्तथार्था अलौकिको ह्येष विष्णुरिति न्यायविवरणं मूलम्। तस्य प्रथमेऽर्थोऽलौकिकत्वं वैदिकत्वमर्थानामप्राकृतत्वमिति श्रीभावबोधीये। द्वितीये सम्यक् तद्वाचकाः शब्दास्तत्स्वरूपा अलौकिका अप्युक्ता लौकिकैः शब्दैरचिन्त्यैश्वर्ययोगतः। वस्तुतः सम्यक् तत्प्रतिपादने ब्रह्मस्वरूपभूता एव शब्दा नान्य इत्याह ॥ **सम्यगिति।** तथाऽपि प्रसिद्धानन्दसुखादिपदवाच्यताऽप्यस्ति। तादृशैश्वर्यादित्याह ॥ **अपीति।** इति सटीकसत्तत्त्वरत्नमालोक्तोऽर्थः। तथा चायरीत्या प्राकृतस्य स्वनामेतरनामादेः। तु शब्दो रूपादीनां तत्त्वाभावं तत्त्वं नाम्न

इति विशेषसूचकः। द्वितीयस्याप्राकृतस्य च नामादेः स्वकीयस्येतिविवेकः। पुरुषोत्तमः क्षराक्षरपुरुषश्रेष्ठो नामादेरीक्षिता साक्षात्कर्ताऽनामादिवचोभिर्हरेर्नामरूपादिरहितताप्रतिपादकवचोभिरनु उपक्रमाद्यनुसृत्यैष एवार्थो मीयते ज्ञायते। अनामत्वादिकमन्यनामादिविलक्षणार्थकमित्यन्यत्। ज्ञानिनां बहूनां बहुज्ञानं मनसेऽङ्ग्यते ज्ञायते। अनेन बहुप्रेक्षावदनुभवो मानमस्मिन्नर्थ इति ज्ञापितमिति ज्ञेयम्। एषोऽर्थोऽनामेत्यादेस्तेनैव ज्ञानिज्ञानसिद्धत्वादितरैरूह्यः सम्भावितत्वयोहनीयः। तस्मान्मानिकवादित्युक्तप्रकारेण। प्रभुर्हरिर्ज्ञेयस्तत्रैव देवक्रियायाः प्रतियन्तीत्यनूद्य व्याख्याति॥ भगवत्प्रेरणादेव जानन्तीति। स्वोक्तार्थस्येतिमानमाह॥ नामरूपादीति। विष्णोर्नामरूपादिकमञ्जसा स्वसामर्थ्येन ज्ञातुं न शक्यम्। तर्हि सर्वथाऽज्ञेयं चेच्छून्यमिति स्यादित्यत आह॥ तथाऽपीति। तस्य विष्णोः प्रसादो ज्ञानी भव त्वमितीच्छाविशेषस्तेन परमर्षयस्तज्ज्ञानयोग्या जानन्ति। प्रसादो नामेच्छाविशेषो गुणान्तरं वा न नः काचित्क्षतिरिति सुधाभिधानात्॥ ततश्चायं श्लोकार्थः॥ तस्य प्राकृतनामादेः साक्षिणः साक्षाद्द्रष्टुर्मनोवचोभ्यां मनश्च मनस्विनां वचश्च सर्वनामा। यो देवानां नामधा। नामानि सर्वाणि। अलौकिकार्थसन्नाम्नामित्यादि च वचश्च। ताभ्यामनु उपक्रमादितात्पर्यलिङ्गमनुसृत्य मेयं ज्ञेयं मानोक्तप्रकारेणानुमेयं च वर्त्म यस्य स तस्य। नामरूपे गुणकर्मजन्मभिर्निरूपितव्ये ज्ञातृस्वातन्त्र्येण न निरूपयितुं शक्ये। तर्हि केचन जना जानत इति कथमित्यतः कथयति॥ देवेति। अथाऽपि स्वयं ज्ञातुं शक्तिविफलत्वेऽपि हे देवैसद्रूपक्रीडाशालिन् तव क्रियायाः प्रेरणारूपिण्याः सकाशात्प्रतियन्ति जानते परमर्षय इति मानिकस्यात्र शेषः। देवक्रियाया इत्येकपद्ये देवस्य क्रियाया इति व्याख्याने तवेत्यस्य प्रागेवान्वयः। हीति मानसिद्धं नामादिकमित्यसूचि॥ ३६॥ शृण्वन्गृणन्निति श्लोके क्रियासु तदिति तच्छब्दः किमन्वयः किमर्थं इति न ज्ञायत इत्यतस्तौ प्रदर्शयन्क्रियास्वित्यत्रापेक्षितं पूरयित्वाऽन्वयं च दर्शयति॥ यस्मादिति। नामरूपादयः सन्ति तस्मात् क्रियासु क्रियमाणासु तत्प्रेरकत्वेन पूज्यत्वेन च गृणन्स्तुवन् शृण्वंस्तच्चरितं। मूलस्थेन न भवाय कल्प्यत इत्यनेनान्वयः। तत्र मानमाह॥ सर्वक्रियास्विति। कर्तृत्वेन सहितं च तत्पूज्यत्वं च तेन यो वेत्ति स संसारं तत्प्रसादतो नेति॥ ततश्चायं श्लोकार्थः॥ यस्माद्धरेर्नामरूपाण्युक्तरूपाणि सन्ति ततः क्रियमाणक्रियासु प्रेरकत्वेन पूज्यत्वेन त्वच्चरणारविन्दयोरेव समावेशितचित्तो नामानि गृणन् शृण्वन्रूपाणि संस्मरयन्नन्यान्संस्मारयन्स्वयं च चिन्तयन्मङ्गलानि तत्प्रदानि तद्रूपाणि वा जनार्दनं त्वां वेत्ति स भवाय संसृत्यै न कल्प्यते॥ ३७॥

दिष्ट्या हरेऽस्या भवतः पदो भुव इति धारिण्या हरिचरणतोक्ता। सा च जडपृथिव्या इव तदभिमानिन्या अपि। सदेहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः। ज्ञानज्ञानः सुखसुखः स विष्णुः परम.इति प्रमुखमानबाधितेत्यतो मेदिन्याः पदतां प्रतिपिपादयिषुः प्रसङ्गाद्गगनस्याप्यवयवविशेषतां प्रतिपादयन्मानमुदाहृत्य किञ्चिन्मध्ये सङ्गमनप्रकारं प्रदर्श्य विशिष्टेऽर्थे मानमुदाहरति॥ खमिति। खं गगनं नाभिः क्षितिश्चरणौ। इति मानस्य सत्त्वाद्भक्तः पदो भुव इति युक्तमिति शेषः। सामानाधिकरण्यघटना त्वेवं पदाश्रयणात्पद्नाभ्याद्याश्रयणात्पृथिव्यादि खाब्धिमेखलादि पदादिकं पद्नाभ्यादिकं तज्जत्वाद्वा। पद्नाभ्यादेरुत्पन्नत्वात्। तत्त्वेनोच्यत इति शेषः। विष्णोरिति योग्यान्वयि। सादृश्याद्भूमिरप्युपरिगकतिपयपदार्थाधारभूता तथा भगवत्पदमपि सर्वाधारमिति वा भुवः पद इति सम्भवति। तन्निदर्शनेन दर्शयति॥ यथेति। नुर्गच्छतः पुंसः। उपलक्षणमेतत्। गच्छतः सर्वस्य जनस्य भूमिरां चैसमुद्रितां दृष्ट्वेदं तत्पदमित्याश्रयसादृश्यादेरिदमिति व्यवहारस्तयोक्तस्थलेऽपीति॥ ततश्चायं पद्यार्थः॥ स्वार्थितमर्थितदाता कृतवानित्याह॥ दिष्ट्येति। हे हरे भवतः पदो भुव आश्रितत्वतज्जत्वसादृश्यैस्तथा भूताया भुव ईशितुस्तव जन्मनाऽवतारेण भारोऽपनीतः। स्वस्वाम्याज्ञा नास्ति सा चेद्भारावतारः स्यादिति न च वद देव स नास्तीत्यप्याह॥ अपेति। पालकविकलेरर्थः। न्यायदीपिकायामाषो ना इदमग्र इति व्याकृतावपः पालकरहित इत्युक्तेस्तत्सम्बुद्धिः। नीतोऽवितथसङ्कल्प इति सिद्धवदुक्तिः। अपनीत इत्यखण्डपक्ष ईशितुरित्यनेन कृतशङ्कापराकृतिर्ज्ञेया। इति यत्तद्दिष्ट्या सुखमभूत्। भूमेः सुशोभनैस्त्वत्पदकैः प्रतिबिम्बितपदैर्वा भूमिमङ्कितां चिह्नितां द्रक्ष्यामः। तवानुकम्पितामनुकम्पा सञ्जाताऽस्या इति तारकादितच्। द्यां च द्रक्ष्याम इति। दिष्ट्याऽस्माकं सुखमिति द्विष्ठस्य दिष्ट्येत्यस्यान्वयः। तावत्पर्यन्तमर्थपसदेरुपसर्गः कृत इति तदपनयनेन दिवोऽनुकम्पास्पदतेति ज्ञेयम्। भवतः पदं पश्यन्तं भुवस्तवेशितुर्जन्मना त्वत्पदकैरङ्कितां द्यां च तवानुकम्पितामिति पृथक् पृथगन्वयनान्नातिरेकः शङ्क्यः॥ ३८॥ न ते भवस्येति श्लोके वास्तविकसंसाररहितजीवात्मके भवादयोऽविद्याकल्पिताऽतोऽयं प्रपञ्चो मिथ्येति प्रतीयते। तां मानेन निराकरोति॥ अज्ञानादिति। केचिन्नरा अन्यस्मात्कर्तुरिव कर्मादेश्च विष्णोरज्ञानादेव जनिमृती मन्वते। स्थितिरूपस्य स्थितिप्रतिष्ठापकस्य स्थितिं च मन्यन्त इत्यन्वयः। कुतस्तेऽज्ञा इत्यतस्तद्दौर्घट्यं हेतुमाह। हि यतो मोक्षाश्रयस्येतरासुसाधनतद्दाननिदानत्वेन तदाश्रयस्येति। न हि भवपरिभावकः स्वयं तद्वान्भवेत्। तद्वदितारोऽतोऽज्ञा इति भावः। नैतदन्यथाऽनुपपत्तिमात्रत एवं जनिमृतिदूरता हरेः स एवेतरजन्मादि तन्वान इत्यपि न जनिमृती तस्येत्याह॥ स्वेच्छयेति। स्वस्येच्छा स्वरूपभूतेच्छा तया यस्मादसावजः स्वयं सर्वस्य जगतो जनिं करोति तस्मादिति स्वेतरसत्ता लभ्यते यस्मादित्युक्तेः। तज्जन्मादिस्तस्य विष्णोर्जन्मादिर्यस्य सः। कुतः कस्माद्भवेत्। सर्वकर्तुः कर्ताऽन्यः कः स्यादिति भावः। समस्तस्य प्रपञ्चस्येत्यवचनेन सर्वस्य जगतः इति वचनेन सर्वस्य अर्व पर्व हिंसायामिति स्मृतेः सर्वति हिनस्तीति सर्वो रुद्रस्तस्य च सर्वोऽस्त्वेष रुद्रः सर्वः कालञ्जर शिव इति नामनिधानम्। जगतः प्राणात्मकस्य सर्गकस्य ब्रह्मणश्च यस्मात्तज्जन्मादिरित्यान्तरङ्गिको भावः सूचित इति ज्ञेयम्। जगत्प्राणसमीरणा इत्यत्र जगदिति भिन्नं पदं प्राणवाचीत्यपि भानुव्याख्यानात्। अनेन भगवान्नान्यतो जन्मादिमान्स्वातन्त्र्येण तत्कर्तृत्वाद्व्यतिरेकेणान्यवत्। सोऽप्ययमेवमवसेयः। ब्रह्मादिर्न

स्वातन्त्र्येण जननादिकर्ताऽन्यतो जन्मादिमत्त्वाद्यन्नैवं तन्नैवमिति सत्येवं हरेरितरतो जन्मादिकमिति ये मन्वते तान्मिथ्याज्ञानिन इति मन्तव्यम् ॥ अथ मूलार्थः ॥ अस्मदादिनाथनात एव नाथ तवावतारो नान्यत्तत्र निमित्तमित्याह ॥ नेति । हे ईश अभवस्यान्यकर्तृकोत्पत्तिर्भवः स न विद्यते यस्य तस्याभवस्यैतस्य विनोदं विविधो नोदोऽस्मत्प्रेरणा याञ्चेति यावत् । तं विना कारणमितरत्र नास्ति । अभवाश्रयात्मनि मुक्तस्वामिति त्वयि सति जगतो भवो निरोधः स्थितिश्च भवन्ति । ते च तेऽसन्त इति ये मन्वते तेऽविद्यया मिथ्याज्ञानेनाकृता आकृष्टा इति तर्कयामाहे । त्वय्यभवात्मनि भवादयोऽविद्यया कृता अङ्गीकृता बत खेद इति वा । अविद्ययाऽविद्ययेति पदद्वयं वा । हे अ ईश विद्यया तवेच्छयैव कृता इति तेने न सन्तीति वा । अदोषत्वाद्गुणोद्रेकाद् इत्युक्ते हरिः स्वयमगम्यत्वाच्च बुद्ध्यादेरिति बृहदारण्यकभाष्योक्तेः । ते सकाशाद्भवतीति भवस्तस्य भवस्य मम तथा भवस्य शिवस्यापि भवो निरोधः स्थितिर्यतः कृता अतस्तवादयोऽविद्ययाऽङ्गीकृता इति वा । विना भगवता त्वया विनेत्यावृत्तमन्वेतव्यम् । विना क देवताऽरणं न काऽपि रक्षयित्रीति योजयन्ति । नते सर्वनमस्कृते त्वयीत्यपि योजयन्ति । भवो निरोधः संहारोऽनिरोधः पाल स्थितिरूर्ध्वगतिः साऽव्यक्तवाच्या यया सा च साऽविद्या तया स्थितिरुर्ध्वगतौ भाव इति विश्वात्स भावाख्यो ययेति सा तयेति वा । ये भवादयस्त्वय्यकृता नाङ्गीकृता ये ते चाविद्यया शिष्टं प्राग्वत् । अविस्त्वयि कृता इति जानातीति शेषः । यया ते शरीर्यस्य शरीरवानित्यभवस्य मम भवस्य शिवस्य च भवादयः कृतास्तस्य या रमाया शं यस्मात्तस्य ईशेति वा तत्सम्बुद्धिः । यं कामयते तमुग्रं कृणोमि तमृषिं तं सुमेधामित्यादेरित्यपि वर्णयन्ति ॥ ३९ ॥ सदा देवैवमवतारान्कुर्वंस्तस्तव न किमपि प्रयोजनं किन्त्वस्म दादिसङ्कटविघटनमेव नैतन्मात्रं विना किञ्चित्प्रतिकर्तुं न समे वयं समर्था इति वदन्नुपसंहरति ॥ मत्स्येति । अ अश्व ईषदश्व हयग्रीवश्च कच्छपः कूर्मादयश्च हंसश्च राजन्यो राज्ञ्यां राज्ञा जाता राजा रामादिश्च विप्रः परशुरामादिश्च विबुध उपेन्द्रो येषु तत्त्वे कृतावतार इत्यर्थः । एतेन मत्स्यादीनामन्येषां सत्त्ववन्नृसिंहानामन्येषामभावात्कथमन्वय इति निरस्तम् । यद्वा मत्स्येत्योरभ्याव तारान्तमेकं पदम् । मत्स्य इति विबुध इतीषुरिति कृता अवतारा ये स तथा । यथोक्तं कर्णपर्वणि । विष्णुमिषुं समकल्पयन् इषुश्चात्यभवद्विष्णुरिति । इषु इच्छायामिति स्मरणादिषेरौणादिके कुप्रत्यये इषु इच्छा तेन मत्स्येत्येवं सर्वत्रेषुणा कृतावता इति वा । नृसिंह इव मत्स्याश्वकच्छपाश्च वराहहंसराजन्यविप्रविबुधाश्च तेषु कृतावतार इति वा । न च द्वन्द्वनिर्दिष्टेषु कथमेकस् दृष्टान्तत्वमदृष्टं क्वापि कल्प्यत इति वाच्यम् । दोषारच्छिद्रशब्दानां पर्यायत्वमिति व्याकृतिलवेऽत्र छिद्रशब्दोपादानं दृष्टान्तत्वेनो सुधाभिधानात् । अनेन रेतआद्यविकृततारूपार्थविशेषोऽपि लभ्यत इति ज्ञेयम् । यथा नृसिंहाकृतिराविरासीदित्यादेः । त्वं नस्त्रिभुव च पासि । अपा इति वक्तव्ये यदूत्तमाभेदं बोधयितुं पासीत्युक्तिरिति ज्ञेयम् । व्यत्ययो वा । धातुसम्बन्धे प्रत्यया इति वा । य यथा तथाऽधुनाऽपीश यदूत्तम भुवो भारं हर ते वन्दनमस्तु कुर्म इति वा शेषः ॥ ४० ॥

श्रीसुबोधिनी

तैः फलमाह शृण्वन् गृणन्निति । साङ्गानि कर्माणि वैदिकान्यवश्यं फलदातॄणि । "यस्य स्मृत्या च नामोक्त्या तपोय क्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युत"मितिस्मृतेः । सम्पूर्णं चेज्जातं फलं जनयेदेव । तच्च फलं मोक्ष एवेति स्वर्ग विचारे निबन्धे निरूपितम् । तदेवात्राप्याह । ते नामानि शृण्वन् । परैरुच्चारितानि रूपाणि च कीर्त्यमानानि ये शृण्वन्ति तद गृणन्ति । उभयविधान्यपि श्रोतरि सति । अन्यदा स्मरन्ति । तदपि स्मरणं ध्यानरूपमिति संस्मरणमुक्तम् । चकारात् स्मारय पदेशादिदानेन श्रावयन् वादयन्नपि । चिन्तयन् योगाङ्गध्यानत्वेन । तथैव चित्तनिरोधेन नामावृत्तिर्नाम ध्यानम् । अप्रयत्नश्चि व्यापारः स्मरणं सप्रयत्नश्चित्तव्यापारश्चिन्तनमितिविशेषः । तदेव रूपपरिकल्पने ध्यानमित्युच्यते । चकाराद् भगवत्सम्बन्धिना प्यन्येषां श्रवणादिकं फलसाधकमित्युक्तम् । मङ्गलानीति तत्र प्रतिबन्धाभावो निरूपितः । अन्यथा तस्याप्यसिद्धाविच्छायाम सत्यां कार्यं न स्यात् तदर्थमन्यच्च कर्तव्यमापद्येत । त इति मङ्गलरूपस्य तव । उत्तरत्र वा सम्बन्धः । क्रियासु यज्ञादिषु भगवत्सेव रूपासु वा लौकिकक्रियासु यस्त्वच्चरणारविन्दयोराविष्टचित्तः स सर्वथा भवाय संसाराय न कल्पते न समर्थो भवति ।

स्मरणेन क्रियाः पूर्णाश्चित्तावेशश्च तत्र हि । ज्ञानक्रिये यदा विष्णुस्तदा मोक्षो न संशयः ॥ १ ॥

सदोष एव हि संसारे कल्पते । एवं कृते सर्वदोषनिवृत्तौ संसारासामर्थ्यं युक्तमेव ॥ ३७ ॥

एवं वैदकप्रकारेण चतुष्टयमुक्त्वा स्वसिद्धान्तानुसारेण चतुष्टयमाह दिष्ट्येतिचतुर्भिः । भगवच्छास्त्रे भगवा प्रमाणादिचतुष्टयम् । भगवत्साक्षात्कारः साक्षात्कृतो वा भगवान् प्रमाणम् । भूमिप्रसङ्गाद् वयं कृतार्था जाता इति वदन्तः सर्व जगद् भगवता कृतार्थमासीदित्याहुः । हरे ते पदो भुवः पादरूपाया भूमेस्ते जन्मना भारोपनीतः । मर्दनकेलशस्तु परमान प्राकट्येनैव गच्छतीति । भारहानौ जन्मन एव करणत्वं न तु किञ्चित् तत्र कर्तव्यमस्ति । तत्र हेतुरीशितुरिति । ईशप्राकट्य सर्वानर्थनिवर्तकम् । भूमिभारनिराकरणं च तवावश्यकम् । अस्माकं च हितकारि । यतस्तव चरणरूपा भूः । सर्वोपि स्वचरण दूरीकरोति । उपास्ये च दोषाभावः सर्वेषां हितकारी । एतत्करणं चावश्यकं यतो हरिस्त्वम् । भगवज्जन्मनोलौकिकत्वात् कल साधनाभावात् सर्वात्मकत्वाच्च भगवतोसम्भावितमिति विष्टच्येत्युक्तम् । केचित् 'त्विदमुदरे समागमनं भूमेर्भारहरणमेव न तु

जन्मेत्याहुः। अतो भूमावानन्द एव केवलं प्रकट इति। अन्यदपि जातमित्याह **दिष्ट्याङ्कितैरिति**। देवा अपि भुवं न स्पृशन्ति किं पुनर्भगवान् स्प्रक्ष्यति? अतोसम्भावितमपि यद् भविष्यति तद् दिष्ट्येति। सर्वरूपत्वाद् भगवतो मनुष्यादिरूपेण भुवं स्पृशत्येव किमाश्चर्यमित्याशङ्क्याहाङ्कितैरिति। ध्वजवज्राङ्कुशादिचिह्नैरङ्कितैः। अङ्कितामितिपाठे शङ्कापरिहारार्थम्। **सुशोभनैः** सर्वलक्षणसम्पन्नैः **पादैरङ्कितां** चिह्नितां **गां द्रक्ष्याम** इति महद्भाग्यमस्माकम्। भूमिः पदं गृह्णातीत्यपि भाग्यम्। पदं छायामपि जनयतीत्यपि। पुरुषपदमुद्धृता च भूर्ब्रह्मणो दुहितेति सानुरागाया भगवति दर्शनं दिष्ट्या। अत्र तामित्यनुक्त्वा गामिति यदुक्तं तेन पदाङ्किता सती सर्वेषां सकलकामदोग्ध्री भविष्यतीति सूच्यते। अपरं च पूर्वमियमेव या गोरूपाश्रुमुखीत्वादियुक्ता दृष्टा सा परमानन्दरूपपदाङ्किता द्रक्ष्यत इत्यपि महद् भाग्यं न इत्यपि गोपदेन ज्ञाप्यते। किञ्च पादैरेवानुकम्पितां त्वया वा **द्यां च द्रक्ष्यामः** देवानां सर्वोपकारकरणाददित्याः कुण्डलदानादिना च द्यौरनुकम्पिता। अतोस्माकमेव भाग्यं यदुभयं द्रक्ष्यामः। दर्शनं प्रमाणमाविर्भावः प्रमेयमिति ॥ ३८ ॥

आविर्भावं समर्थयति **न ते भवस्येति**। ते भवस्य जन्मरहितस्य भवस्य जन्मनः **कारणं विनोदं विना न तर्कयामहे**। विनोदो लीला। वेः कालस्य वा नोदः प्रेरणम्। कालो हि स्थिरः सर्वानेव मर्यादया यथासुखं करोति। स जन्मना नोद्यते। अन्यथा क्रियते। विनावि संसारनौकायां वा। अन्यथा संसारनौः पारं न गच्छेत्। अस्मिन्नर्थे नते नम्रे शरणागते पुरुषे भवनिवारकस्य यो **भवो जन्म तस्य कारणं विनाविनोदं तर्कयामह** इतिसम्बन्धो ज्ञेयः। यद्वा नतो य इभो गजेन्द्रस्तस्य वमभूतं मोक्षो यस्मात् तादृशस्येत्यग्रे पूर्ववत्। तथा च पशुजातीयस्यापि नतिमात्रेण भवनिवारकस्य भवोसम्भावित इति तस्य हेतुं तं **तर्कयामह** इतिभावः। नौकारहिता वा संसृतिस्तस्यां सत्यां सर्वप्रेरणं **तव भवस्य कारणम्**। यद्यप्यत्र प्रमाणं नास्ति यथार्थद्रष्टराप्तस्याभावाद्यापि त्वयाप्यनुक्तत्वादतः स्वयमेव **तर्कयामहे**। वस्तुतस्तु लीलापि भवति न वेतिसन्देह एव। ननु सर्वस्यापि जीवस्य मदंशस्य यथा **भवस्तथा** ममापीति कथमभवस्येत्युच्यते? तत्राह **भवो निरोध** इति। सर्वस्यापि प्राणिन उत्पत्तिस्थितिप्रलया अविद्यया देहाद्यध्यासेन भवन्ति। स्वतो जीवानां जन्माभावात्। तदपि त्वयि सति भवति। अन्यथा निराधारे जगत्युत्पत्तिर्न स्यात्। तत्रापि त्वय्युदासीने न भवति। अनित्ये न भवति। असमवायित्वे न भवति। आधारसमवाययोरवश्यापेक्षणात्। तव चोत्पत्तौ जगतोनादित्वं भज्येत। अलौकत्वं च स्यात्। यथा तव भव आकस्मिक एवमेव जगतोपि भवेत् अतोभव आश्रयरूपे आत्मरूपे सत्येव जीवानामुत्पत्त्यादि भवेत्। एवं भगवतो लीलया प्रादुर्भावः। स्वरूपनिमित्ताज्ञानं वा। अन्यथा सर्वमेव जगन्न स्यादित्यानन्दाविर्भावो भगवान् निरूपितः ॥ ३९ ॥ स एव साधनमित्याह **मत्स्याश्वे**ति। यथा पूर्वं नवावतारा जाता एवमयमपि दशमः। त्रयो जलजाः। त्रयो वनजाः। त्रयो लोकजाः। **मत्स्याश्वकच्छपा-नृसिंहवराहहंसा राजन्यविप्रविबुधाश्च तमोरजःसत्त्वसमानाकृतयः**। **अश्वो** हयग्रीवः। अश्वोपि जलजो हयग्रीवोपि जलजः। **नृसिंहः** काष्ठजत्वाद् वनजः। **वराह** आरण्यप्रकृतिक इति अक्षजोपि बहिर्वायुस्थानत्वादारण्यः। **राजन्यो** रघुनाथः। **विप्रः** परशुरामः। **विबुधो** वामनः। तरतमभावात् त्रित्वम्। **मत्स्यादश्व** उत्तमः। **अश्वादपि कूर्मः**। वात्सल्यत्वात्। **नृसिंहाद्** वराहः। भूम्युद्धारकहिरण्याक्षमारकत्वात्। ततोपि ज्ञानप्रदो **हंसो** महान्। क्षत्रियब्राह्मणदेवेषु तरतमभावः स्पष्टः। एभिर्नवविधैर्नवविधा अपि रक्षिताः। इदानीमेकेनैव नवविधा रक्षणीयाः। अयमेव भगवान् तत्तज्जात्यनुकूलाकाररूपेष्ववतारं कृत्वा पाति। अधुना ततोप्यधिकं विज्ञापयन्ति। त्वमेतेषु पूर्वं कृतावतारो नोस्मान् **त्रिभुवनं** चकाराद् धर्मादिकमपि **पासि**। तथाधुना हे ईश। सर्वसामर्थ्यरूपेणावतीर्णस्तथा। पूर्वोक्तं त्रयं देवत्रैलोक्यधर्मरक्षा भूमेर्भारनिराकरणं चाधिकम्। अस्यापि लोके व्यवहारो यदूसमेति। प्रत्युपकारस्ते वन्दनम्। नमस्कार एव प्रत्युपकार इत्यर्थः ॥ एतान्येव भगवतो दश रूपाणि सर्वपुरुषार्थसाधकानि। अत्र दृष्टान्तत्वेन मत्स्याद्युक्तेरयं भावः। भूभारभूतासुरराजन्यहननार्थं ह्यवतारः। एवं सति तैः सह युद्धं सम्भाव्यते। तच्च स्नेहातिशयेन भक्तैः सोढुमशक्यम्। अतो "रूपं चेदं पौरुषं जन्म ते मय्यसा"वित्यादिना देवकीवद् ब्रह्मादयो माहात्म्यज्ञानवन्तोपि भक्तत्वेन भूभारहरणे प्रकारविशेषं प्रार्थयन्ति यावत् स्वस्यैश्वर्याद्यप्राकट्येन निगूढत्वेनान्यतो वा शत्रुहननं भवति तावन् न स्वयं युद्धं कार्यमिति। तत्र प्रलयाब्धौ सत्यव्रतादिभक्ता रक्षणीयाः। एवं सति पुरुषादिरूपेण रक्षणे क्रियमाणे लोकरीत्या मकरादिभयसम्भावनया स्नेहेन भक्तानां क्लेशः स्यादिति तदभावाय येन रूपेण जलसञ्चारः सुखावहस्तद्रूपं जगति हीनजातीयमपि मात्स्यमङ्गीकृत्य रक्षितवांस्तथाधुनोक्तरीत्येतिप्रार्थना। अत एव स्वैश्वर्यादिविरुद्धमपि याचकत्वमङ्गीकृत्य भीमेन जरासन्धं मारितवान् न तु स्वयम्। हयग्रीवो ब्रह्मणः सत्रे प्रादुर्भूतः सन्नसुरहननवेदरक्षादिकं कृतवान्। इहापि राजसूये प्रकटो ब्राह्मणसम्माननेन मर्यादां स्थापयित्वा वेदविरुद्धवादिनं चैद्यमनायासेन मारितवान्। कच्छपस्तु "मेनेङ्गकण्डूयन"मित्यादिवाक्यैः सुखसाधनत्वेनैव मन्दरं दधार। तद्वदिहापि वीर्यबलाधिक्यजबाहुकण्डूशान्त्यर्थमेव युद्धं कार्यं न तु प्रतिभटोपस्थितिमात्रतः। तदा त्वन्य एव प्रेरणीय इतिप्रार्थना। अत एव यत्र युद्धं कृतं तत्र तथैव कृतमिति ज्ञेयम्। क्रीडार्थं मृगयावत्। अत एव "विक्रीडितं तज्जगदीशयोः पर"मितिवचनम्। यथामृतदानार्थमेव मन्दरधारणं तथेहापि स्वस्वरूपामृतदानार्थमेव गोवर्धनोद्धरणं तेन रक्षां च कृतवान्। नृसिंहस्तु भक्तपितरमपि पूर्वभक्तमपि भक्तरक्षार्थमकस्मात् प्रादुर्भूय मारितवान्। लक्ष्म्यादीनामप्यगम्यो दैत्यत्वेपि भक्तमात्रगम्य इत्यपि ज्ञापितवान्। इहापि पाण्डवरक्षार्थं तत्पितामहादीन् भक्तानप्यासुरावेशिनो मारितवान्। तथैव कंसादीनपि वनवासे पार्थरक्षार्थमकस्मादाविर्भूय

शिष्टशाकान्नं भक्षयित्वा सर्वं समाहितवान्। वराहस्तु यदुद्धारार्थं प्रवृत्तस्तत्रैतादृक्पक्षपातवान् येन तन्मात्रविशेषगुणग्राहकेन्द्रियस्यैवाधिष्ठाने प्रकटोभवन्न तु नृसिंहादिवत्। इहापि पाण्डवरक्षार्थमागच्छंस्तन्मात्रगुणग्राहिविदुरगेह एव स्थितोभवन्न त्वन्यत्र। तथा व्रजस्थानुद्धर्तुं तन्मात्रसम्बन्धिनि स्थले स्वयमाविर्भूय तथा कृतवान् न त्वन्यत्र स्थितः। एवमेव वेदभ्युद्धारं कुर्वन् हिरण्याक्षवन्मध्येमार्गं प्रतिबन्धकर्तारं रुक्मिणमुपेत्यैव स्वकार्यं कृतवान् न तु तदेव हतवान्। अग्रे च तथा कृतवान्। हंसस्तु तत्त्वमुपदिश्य ब्रह्मादिविषादहन्ता। इहापि वेदमर्यादाविरोधिगुरुवधादेर्विमुखस्य तच्चिन्ताविषादं तत्त्वोपदेशेन हतवान्। अन्यथा भूभारहरणं न स्यात्। राजन्यस्तु भजनसाधनं तारकं कृत्वैकभक्तार्थमनेकान् दैत्यानवधीत्। तथेहापि भूनिमित्तमनके मारणीयाः। एतेनैकस्या भुवो निमित्तमनेकान् कथं वधिष्य इतिशङ्कापास्ता। द्वेषादिभावस्यापि तारकत्वं स्पष्टम्। विप्रस्तु ब्रह्मवृत्तिरपि घोरं क्षात्रमूरीकृत्यासुरराजन्यानवधीत्। इहापि ब्रह्मत्वेन समत्वेपि दैत्यवधः कार्य एव। विबुधस्तु मातृप्रार्थनयाविर्भूय ब्रह्माद्यशक्यं त्रिभुवनहरणं वाङ्मात्रेण कृतवान्। एवमत्र वृकासुरवधे स्पष्टम्। देवकीप्रार्थनयाविर्भूय ब्रह्मादिदुरापं स्वानन्दं यदुभ्यो दत्तवान् राज्यलिप्सुं कंसं मारयित्वोग्रसेनाय राज्यं दत्तवान् न तु स्वयं गृहीतवानिति एवं नमस्कारान्तं भगवान् स्तुतः। कंसादिवधस्त्वप्रयोजकः। तस्मान्न विशेषेण गणितः॥ ४० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः।

दिष्ट्या हरेस्य इत्यत्र—भगवतः प्रमाणत्वं कथमित्याकाङ्क्षायामाहुर्भगवदित्यादि। "भिद्यते हृदयग्रन्थि"रितिश्रुतौ भगवद्दर्शने सर्वसंशयनिवृत्तेरपि फलत्वेनोक्तत्वाद् भगवत्साक्षात्कारः प्रमाणं श्रुतौ "तस्मिन् दृष्ट" इत्युक्तत्वेन साक्षात्कृते भगवत्येवोक्तफलस्य पर्यवसानात्। "प्राणन्नेव प्राणो भवती"तिवदावरणभञ्जनेन प्रमाणकार्यं कुर्वन् साक्षात्कृतो भगवानेव वा प्रमाणमित्यर्थः। अत्र द्वितीपक्षस्य मुख्यत्वेपि द्रक्ष्याम इति कथनेन भगवत इदानीमगोचरत्वाद् द्वितीयपक्षेनादरः सूच्यते। शङ्कापरिहारार्थमिति। पदान्तरशङ्कापरिहारार्थम्। ननु विस्मयजनक उत्तमेर्थे दृष्टे स्वभाग्यमभिनन्दनीयं पदाङ्कदर्शने किमाश्चर्यमित्याकाङ्क्षायामसम्भावितमिति। जन्मासम्भावितम्। पूर्वं मूलेन पदकशब्द "इवे प्रतिकृता"वित्यनेनकप्रत्ययसिद्धमन्यमर्थं बोधयन्ति। द्विधा पूर्वमाहुर्भूमिः पदमित्यादि पदं छायामित्यादि च। देवपादा भूमिं न स्पृशन्ति छायां च न जनयन्ति तदत्र देवदेवपदे जातमिति विस्मयादभिनन्दनम्। तृतीयमाहुः पुरुषपदमित्यादि। त्रिलोकीकल्पनायां भूः पुरुषस्य पदम्। अवान्तरकल्पेषु ब्रह्मणा त्रिलोकी निर्मीयत इति ब्रह्मजन्या भूः। किञ्च "आपो वा इदमग्रे सलिलमासीत् तस्मिन् प्रजापतिर्वायुर्भूत्वाचरत् तां वराहो भूत्वाहरत् तां विश्वकर्मा भूत्वा व्यमार्ट् साप्रथत तत् पृथिव्याः पृथिवीत्व"मितिश्रुत्युक्ते पक्षेप्युद्धृता। उभयथापि ब्रह्मणो दुहितातस्तथेत्यतो भाग्याभिनन्दनमित्यर्थः॥ ३८ ॥

न ते भवस्येत्यत्र—आविर्भावं समर्थयतीति दर्शनप्रामाण्यार्थं समर्थयति। मूले बतशब्दो हर्षवाचकः। कारणमिति। प्रयोजकम्। न तर्कयामह इति। अन्यन्न तर्कयामहे। तथा च लीलैवाविर्भावप्रयोजिकेत्यर्थः। विनोदशब्दस्यार्थान्तरमाहुर्वैरित्यादि। तथा च कालस्यान्यथा करणमाविर्भावप्रयोजकमित्यर्थः। योगान्तरमाहुर्विनावीत्यादि। विशब्दो विशेषशब्दस्यैकदेशः सत्यासत्यभामेतिवद् विशेषं बोधयति। विशेषश्च देहः। पञ्चमस्कन्धे "येषां समूहेन कृतो विशेष" इति जडवाक्यात्। स च भावविकारविचारे संसारत्वेन पर्यवस्यति। भावविकारशून्यस्य प्रपञ्चस्य ब्रह्मात्मकत्वात्। संसारस्य नौत्वं च "नृदेहमाद्यं सुलभं सुदुर्लभ"मित्येकादशस्कन्धीयभगवद्वाक्योक्तन्यायाद् बोध्यम्। एतेनैव तन्नोदनस्याविर्भावप्रयोजकता व्याख्याता। तदेतदाहुरन्यथेत्यादि। तदा च यदि भगवान् भक्तानां पतिपुत्राद्याभिमानिकसम्बन्धिरूपेण नाविर्भवेत् तदा संसारनौः पारं न प्राप्नुयादित्यर्थः। अस्मिन् पक्ष आरम्भगतस्य नशब्दस्यान्वयो न भवतीति तदर्थं योजनान्तरमाहुरस्मिन्नर्थ इत्यादि। अस्मिन्नेवार्थे पक्षान्तरमाहुर्यद्वेत्यादि। विशब्दस्य वियोगरूपमर्थान्तरमभिप्रेत्यार्थान्तरमाहुर्नौकेत्यादि। सर्वप्रेरणमिति। सर्वेषामवतारकालीनानां कामभयादिभिः, स्वसम्बन्धकरणम्। नन्वेतेषु पक्षेषु कश्चिदेको निष्कृष्य वक्तव्यः किं बहुभिरित्याकाङ्क्षायामाहुर्यद्यपीत्यादि। तथा चाप्ताभावात् कल्पनया बहवस्तर्क्यन्त इत्यर्थः। ननु तर्हि लीलापक्ष एवाद्रियतां किमन्यैरित्यत आहुर्वस्तुत इत्यादि। "स वै नैव रेम" इति श्रुतौ लीलायाः स्वबहुभवन एव कारणताया उक्तत्वेन मूलरूपजन्मकारणताया अनुक्तत्वेन च तत्रेदमपि गोचरीभवतीत्यस्य निर्णेतुमशक्यत्वात् सन्देह एवेत्यर्थः। उत्तरार्धव्याख्याने जगतीति। विषये सप्तमी। अनादित्वमिति। "न कदाचिदनीदृशं जगदि"ति"श्रुत्या "यथेदानीं तथा चाग्रे पश्चादप्येतदीदृश"मितिस्मृत्या च बोधितमनादित्वम्। अलीकत्वमिति। नित्यस्य मूलकारणस्याभावादलीकत्वम्। आकस्मिक इति। अहेतुजन्यः। तथा च यदृच्छापक्षापत्त्या श्रुतिविरोधः। अत इति। उत्तरदूषणनिरासार्थत्वात्। "जीवतदुत्पत्त्यादिर्मूलकारणाधारा साधिष्ठाना स्वरूपवती। उत्पत्त्यादिहेतुत्वात्। स्वस्वमतप्रतिपन्नप्रथमकार्यव"दित्यनुमानेन सिद्धे सत्ये तादृशे कारणे जीवाद्युत्पत्तिर्भवेत्। एवं युक्त्या भगवतोभवत्वं व्युत्पाद्य पद्ये फलितमाहुरेवमित्यादि। पूर्वोक्तरीत्या भगवत्सत्तायाः साधनेन "स वै नैव रेम" इति श्रुत्यनुसृतो लीलया प्रादुर्भावः समर्थितः पूर्वार्धोक्तरीत्या प्रादुर्भावप्रयोजकाज्ञानं वा समर्थितम्। तत्र युक्तिमाहुरन्यथेत्यादि। भगवतः सादित्वेनाश्रयत्वेनात्मरूपत्वे च सर्वमेव जगन्न स्यात्। नित्यस्य कारणस्य वक्तुमशक्यत्वादित्यर्थः॥ ३९ ॥

मत्स्याश्वेत्यत्र—अश्वोपि जडज इति। "अप्सु योनिर्वा अश्व" इति श्रुतेर्**हयग्रीवोपि जलज** इति। इदं कल्पान्तराभिप्रायम्। द्वितीयस्कन्धे ब्रह्मसत्रे हयग्रीवप्रादुर्भावस्योक्तत्वात्। अथवा पञ्चमस्कन्धे "वेदान् युगान्ते तपसा तिरस्कृतान् रसातलाद् यो नृतुरङ्गविग्रहः प्रत्याददे वै कवयेभि याचत" इत्यत्र युगान्तरे रसातलाद् वेदानयने जल एवाविर्भूय स्थिते तथेत्यर्थः। **अक्षजोपीत्यादि।** अक्षं मनोरूपमिन्द्रियं तस्मात् प्रकटो हंसः। स ब्रह्मणा ध्याने क्रियमाणे प्रकटः। ध्यानं च मानसम्। तथा च 'तदुदित' इति न्यायेन तस्याक्षजत्वमुच्यते। "स मानसीन आत्मा जनाना"मितिश्रुतेश्च। **बहिर्वायुर्यत्रासौ बहिर्वायुराकाशस्तदेव स्थान**मुद्गमे यस्य स तथा च योवतीर्यान्यान् वने प्रवेशयति तस्मादारण्यत्वमुचितमितिभावः। एवं व्याख्यानं जलवासित्वेन जलप्रकृतित्ववारणायेति बोध्यम्। **तरतमभावादिति।** मत्स्यादिषूत्तरोत्तरं तथात्वात्। **वास्तव्यत्वादिति।** सर्वदा जलवासित्वात्। इदं च तैत्तिरीयब्राह्मणे प्रजापतिकूर्मयोः संवादे "ममैव त्वं पूर्वः समभू"रिति प्रजापतिना प्रोक्तः कूर्मः "पूर्वमेवाहमिहास्मी"त्युक्त्वा "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादि"तिश्रावणात् स्फुटम्॥ ४०॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

शृण्वन्नित्यत्र—तथैवेति। रूपध्यानप्रकारेणैवेत्यर्थः। **मङ्गलरूपस्य तवेतिसमभिव्याहारेण प्राप्तमिदम्।** अत्रोक्तं मोक्षं व्युत्पादयन्ति **स्मरणेनेति।** इदमुपलक्षणम्। श्रवणादिचतुर्भिरपि क्रियाः पूर्णाः साङ्गा भवन्ति। "यस्य स्मृत्ये"तिवाक्यात्। **क्रिया**रूपो भगवानाविर्भवतीत्यर्थः। तेनैव तत्र **चित्तावेशश्च भवति।** क्रियया चित्तशुद्धौ भगवदावेशो युक्त इति हि शब्दः। चरणाविष्टचेतस्त्वे **ज्ञानशक्तिरूपो** भगवानाविर्भवतीत्यर्थः। एवं **ज्ञानक्रिये यदा विष्णुरूपे** जाते **तदा मोक्षो** युक्त एवेत्यर्थः। भगवद्रूपकर्मणो मोक्षसाधकत्वं निबन्धे **स्वर्गपदविचारे** विवृतम्॥ ३७॥

दिष्ट्या हरे इत्यत्र—भगवत्साक्षात्कार इति। प्रमाणस्वरूपनिष्ठरसानुभावक इत्यर्थः। **मूले गां द्यां च द्रक्ष्याम** इत्युक्तं भगवत्साक्षात्कारः स्पष्टतया नोक्त इत्यरुच्या पक्षान्तरमाहुः **साक्षात्कृतो** वेति। भगवान् स्वयमेव स्वरूपानन्दमनुभावयति न तु साधनसाध्यं तदितिभावः। जन्मनो भारापनेतृत्वं व्युत्पादयति **मर्दनेति।** तथा च **मूले भारपदेन मर्दनक्लेशो** ज्ञेयः। **केचित्त्विति।** अस्मिन् पक्षे जन्मनेति न तृतीयान्तं किन्तु न जन्मेतिपदच्छेदः। समागमनस्य भारहरणहेतुत्वं न तु तद्रूपत्वमेवेत्यस्वरस उक्तः। **अत इति।** जन्मनोभावेनाप्राकृतत्वसूचनादित्यर्थः। **शङ्कापरिहारार्थमिति अङ्कितैरितिपाठे** भूस्पर्शानाश्चर्यशङ्का तेन पदेन निरस्ता। **अङ्कितामितिपाठे** तु सा शङ्का **सुशोभनैरितिपदेन** निरस्तेत्यर्थः। **अङ्कितत्वकथनेन** भूमेर्भगवतश्चानुरागः सूचितस्तत्र भूम्यनुरागं विशदयन्ति **भूमिरिति।** अत्यनुरागेण सात्त्विकभावस्वेदोद्गमे पदं प्रतिफलति। अतः पदग्रहणेन **भूमेरनुरागः** सूचितः। भगवदनुरागमाहुः **पदमिति।** अनुरागेण गाढधारणे **पदं छायामङ्कं** जनयति। अतोङ्ककथनाद् गाढधारणसूचनेन भगवदनुग्रहः सूचित इत्यर्थः। **भूमेर्ब्रह्मदुहितृत्वं** सम्पादयति **पुरुषपदमिति।** **पदं** जघनमारभ्य तलपर्यन्तम्। "भूर्लोकः कल्पितः पद्भ्या"मित्यत्र तथाविवरणात्। एतत्पक्षे ब्रह्मणा ध्यानेन तथा निर्मितत्वाद् दुहितृत्वम्। **पृथग्भूतैव** भूमिर्ब्रह्मणा वराहमाविर्भाव्योद्धृतेतिपक्षे उपकरणाद् दुहितृत्वम्। तथा च भूमिः पुरुषपद्रूपोद्धृता चेतिपक्षद्वयेपि **ब्रह्मणो दुहितेत्यर्थः।** "जघनाब्जपृथग्रूपैस्त्रिधा भूमेर्निरूपणं" ब्राह्मे पाद्मे च वाराह इति सिद्धान्तः। तत्र **जघनपक्षे पृथक्पक्षे** च सन्दिग्धत्वाद् दुहितृत्वं व्युत्पादितम्। **अब्जपक्षे** "त्वनेन लोकान् प्राग् लीनान् कल्पितास्मीत्यचिन्तय"दिति वाक्यात् स्वयमेव कल्पितेति दुहितृत्वं स्पष्टमेवेतिभावः। स्वदुहितुर्भगवदन्योन्यानुरागसहिताया दर्शनं दिष्ट्येत्यर्थः। **पादैरेवेति।** न तु सामान्यतो देवादिरूपेणेत्येवकारः॥३८॥

न ते भवस्येत्यत्र—अन्यथाक्रियत इति। प्राकट्यानन्तरं कालस्य साधकत्वं बाधकत्वं वा नास्तीतिभावः। **संसारनौरिति।** संसारस्थितेन्द्रियरूपा **नौः** कामोदधितारिका **पार** कामस्य पर्यवसानं न प्राप्नुयादित्यर्थः। इन्द्रियनौकायां सत्यां तस्या नोदं स्वस्मिन् प्रेरणं प्राकट्ये कारणं **तर्कयामह** इत्यर्थः। स्वस्य कामान्तरूपत्वात् स्वस्मिन् प्रेरणे पारं गच्छेदितिभावः। **तत्रापीति।** उदासीने सति भवो न भवेत्। अनित्ये सति स्वस्यैव नाशप्रतियोगित्वात् तत्कृतोन्यस्य निरोधो न भवेत्। असमवायित्वे स्थितिर्न भवेत्। तत्र हेतुमाहुराधारेति। **असमवायीत्यनेनाधारः समवायश्चोक्त** इति भावः। **अभवाश्रयात्मनीतिपदत्रयस्यार्थमाहुस्तवेति।** भवदुत्पत्तेः पूर्वं जगतः कर्ता को वा स्यात्? आश्रयाभावे शशविषाणवदलीकं जगत् स्यात्। आत्माभावे यथा त्वय्यात्मान्तराभावात् स्वतन्त्रत्वेनानियतस्तव भवस्तथा जगतोपि स्यादित्यर्थः। **स्वरूपेति।** स्वरूपप्राकट्यनिमित्तं लीला वा प्रेरणं वान्यद्वेत्यज्ञानं तर्ककथनादितिभावः लीलैव चेद्धेतुस्तदा ज्ञानं सम्पन्नमन्यश्चेद्धेतुस्तदाज्ञानमिति **तर्कस्वरूपं** विवृतम्। उत्तरार्धार्थमाहुरन्यथेति। भगवतो भवे सत्युक्तप्रकारेण **सर्वमेवानादिभूतं जगन्न** स्यादितिहेतोरानन्दरूप एव न तु भवरूप आविर्भावो यस्य तादृशो **भगवान् निरूपित** इत्यर्थः॥ ३९॥

मत्स्याश्वेत्यत्र—हयग्रीवोपीति। हयग्रीवासुरोपीत्यर्थः। अतोश्वस्य जलजत्वं सम्भवतीतिभावः। **बहिर्वायुस्थानत्वादिति।** प्राणं बहिर्वायुस्थानमरण्यमपि ग्रामाद् बहिर्भूतवायोः स्थानमितिभावः। **तरतमभावं** विवृण्वन्ति **मत्स्यादिति।** इदमुत्तमत्वं कार्यवशात् प्रातीतिकम्। **वास्तव्यत्वादिति।** वास्तवरूपमर्हतीति वास्तव्यः। **कूर्मः** पृथिवीं सदा बिभर्ति। अन्ये स्वावतारदशायामेव कार्यं कुर्वन्तीत्यर्थः। **भूम्युद्धारेति।** नृसिंहेन प्रह्लादस्य यथास्थितस्य रक्षणं न तु नष्टाया भूमेरिवोद्धरणमितिभावः। **भारनिरा-**

करणमिति । रामावतारे रावणवधार्थं प्रार्थितत्वात् तावन्मात्रकरणं धर्मरक्षाप्रसङ्गेनान्यदपि न तु मुख्यतया यावद्भारनिराकरणमिति भावः । ननु नवावतारकार्यमधिकं दशमावतारकार्यं भूभारहरणं च प्रार्थितमवतारान्तरकार्यं कुतो न प्रार्थितमित्याशङ्क्याहुरेताग्वेवेति । एतैरेव सर्वकार्यसिद्धिरित्यर्थः ॥ ४० ॥

(५) भगवदीयनिर्भयराममनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

शृण्वन् गृणन्नित्यत्र—स्मरणेनेति ।

स्मरणेन क्रियाः पूर्णाश्चित्तावेशश्च तत्र हि । ज्ञानक्रिये यदा विष्णुस्तदा मोक्षो न संशयः ॥ १ ॥

अत्र श्लोके हि वैदिकप्रकारेण मोक्षो निरूपितः । स्मरणेनेत्युपलक्षणम् । श्रवणादिभिश्चतुर्भिरपि क्रियाः पूर्णा भवन्ति । 'यस्य स्मृत्या च नामोक्त्ये'ति वाक्यात् । क्रियारूपो भगवानाविर्भवतीत्यर्थः । तेनैव तत्र चित्तावेशश्च भवति । चरणाविष्टचेतस्त्वे ज्ञानशक्तिरूपो भगवानाविर्भवतीत्यर्थः । एवं ज्ञानक्रिये यदा विष्णुरूपे जाते तदा मोक्षो युक्त एवेत्यर्थः । मूले स्मरन् गृणन्नित्यादिना स्मरणाद्युक्तिराविष्टचेता इत्यनेन चित्तावेशश्च स्पष्ट एव ॥ ३७ ॥

इति द्वितीयाध्यायकारिकार्थः ॥ २ ॥

बुभुत्सुबोधिका

शृण्वन्नित्यत्र पुरुषार्थेति स्वज्ञानद्वारेति बोध्यम् । तैरिति नामरूपैः । फलमिति अभयम् । साङ्गानीति ससाधनानि । साधनानामसिद्धवदावृत्तिः कर्तव्येति सुबोधिन्यामतः फलसाधने एकीकृत्य निरूपिते । जनयेदेवेति अत्यन्तायोगव्यवच्छेदकैवकारः । नीलं सरोजं भवत्येवेत्यत्रेव । मोक्ष एवेति एवकारेण 'जायस्व म्रियस्वे'ति तृतीयमार्गीयस्वर्गलोकयागयोगव्यवच्छेदः क्रियते । उभयविधानीति श्रवणगृणनविषयाणि नामानि रूपाणि च । अन्यदेति श्रोतृरहितकाले । ध्यानरूपमित्यग्रे विवेच्यम् । योगीश्वरप्रबुद्धवाक्यं 'स्मरन्तः स्मारयन्तश्च मिथोघौघहरं हरि'मितिवाक्यं तदनुसारेण चकारार्थमाहुः चकारादिति । वैदिकमार्गे गोपालतापिनीये 'मुमुक्षुर्वै शरणमनुव्रजे'दिति श्रुतिरुपदेशादि दानमाक्षिपति । अष्टाक्षरशरणमन्त्रः । आदिनाऽऽत्मनिवेदनम् । 'इमे विदेहा अयमहमस्मी'ति याज्ञवल्क्यं प्रति जनकवाक्यात् । योगाङ्गत्यादि एवं त्रिभिः श्रवणादिभिः ध्यानेन प्रेम्णि जातेऽथवे 'भक्त्या प्रसन्ने तु हरौ तं योगेनैव योजये'दिति तृतीयस्कन्धनिबन्धाद् योगाङ्गध्यानत्वेन । इदं चिन्तननिष्ठम् । ध्यानं रूपस्येति नाम्नो ध्यानस्वरूपमाहुः तथैव चित्तेति । योगाङ्गत्वेनैवेत्यर्थः । रूपध्यानप्रकारेणैवेति श्रीवल्लभाः । इदं योगाङ्गत्वं आवृत्तिनिष्ठम् । नामावृत्तिरिति नाम्नामावृत्तिः नाम्नां ध्यानमित्यर्थः । अप्रयत्न इति स्मरणविषये रूपादौ चित्तस्य व्यापारमात्रं न तु प्रत्यङ्गे रूपपरिकल्पने प्रयत्नवानित्यर्थः । रूपत्वप्रकारकं रूपविशेष्यकं स्मरणम् । सप्रयत्न इति रूपकल्पने नः प्रयत्नस्तेन सह वर्तमानो व्यापारो न तु प्रकटरूपकल्पनसमर्थः । 'संस्मरय'न्नित्यत्र 'स'मुपसर्गार्थमाहुः तदेवेति । चिन्तनमेव । एवकारः स्मरणयोगं व्यवच्छिनत्ति । रूपस्य प्रत्यङ्गे परितः कल्पनं समर्थनं येन प्रयत्नेन तादृशप्रयत्नवच्चित्तव्यापारो ध्यानम् । अत्रा'प्रयत्नश्चित्तव्यापारः स्मरण'मित्यादावभेदान्वयः । चित्तव्यापारः स्मरणानुकूलो व्यापारः, उपासनान्यमते । स्मरणं भावप्रत्ययान्तम् । भावो धात्वर्थः, तत्र स्मरणो स्मरतेः प्रकृत्यर्थः । फलं धात्वर्थो व्यापारः । फलव्यापारयोर्धातुराश्रये तु तिङः स्मृता इति भावप्रत्ययान्तस्मरणस्य स्मरणानुकूलो व्यापारोऽर्थः । स्मर्तेत्यत्र स्मरणानुकूलव्यापाराश्रय इति बोधः । नैयायिकमतेप्येवम् । स्मरणमात्रं भाव इति मण्डनमिश्राः, तन्मते स्मरणमित्यत्र भावप्रत्ययार्थे पुनरुक्तिरतः स्मरणद्वयं प्रकृष्टं स्मरणं ज्ञापयति । प्रकर्षश्चोक्तव्यापारवैशिष्ट्यम् । स चाप्रयत्नः प्रयत्नभेदवान् । चित्तस्य ज्ञानत्वेन प्रयत्नसम्भवात् । समानाधिकरणसम्बन्धेन । उदाहरणं 'सर्वं खल्विदं ब्रह्मे'ति स्मरणं अप्रयत्नश्चित्तव्यापारः । 'तज्जलानिति शान्त उपासीते'ति चिन्तनं सप्रयत्नश्चित्तव्यापारः, स्मरणोऽप्रयत्नचित्तव्यापारे तज्जलान्त्वोपासनाज्ञाविषयत्वेन पदजन्यचिन्तनविषयपदार्थोपस्थितौ लक्षणाभिधातात्पर्यप्रयत्नसाहित्यात् सप्रयत्नत्वम् । प्रयत्नेनाप्रयत्नप्रतिबन्धो भवति । अभेदसम्बन्धः पूर्ववत् । यदा तु भक्त्या सप्रयत्नचित्तव्यापारे प्रयत्ने आधिदैविकरूपस्य विश्वरूपदर्शने गीतोक्तस्य परितः एकैकाङ्गे मनः कल्पनं प्रणयनं येन तादृशे जाते ध्यानमित्युच्यते, 'एकैकाङ्गे मनःप्रणयनं ध्यान'मिति ध्यानलक्षणादिति प्रपञ्चः । चकारादिति द्वितीयचकारात् । भगवत्सम्बन्धिनामिति समुद्रशेषचक्रव्यूहनृसिंहभगवद्भक्तानाम् । अन्येषामिति नामरूपाणामित्यर्थः । 'समुद्रं मनसा ध्याये'दित्यादिश्रुतेः । शेषोपासना पञ्चमस्कन्धे । चक्रोपासना नृसिंहतापिन्यां, नृसिंहोपासना च । व्यूहोपासना गोपालतापिन्यां भगवद्भक्तोपासना, 'तस्मादात्मज्ञं ह्यर्चयेद् भूतिकाम' इत्युपनिषदि । निरूपित इति तेन 'कथितो वंशविस्तार' इत्यारम्भे मङ्गलाभावेपि प्रतिबन्धाभाव इति ज्ञापितम् । मङ्गलत्वे युक्तिमाहुः अन्यथेति । प्रतिबन्धे तस्य श्रवणादेरसिद्धौ कार्यं फलं निरोधश्च न स्यात् । ननु भगवदिच्छया श्रवणाद्यभावेपि फलं भविष्यति गोपीनामिवेत्याशङ्क्याहुरिच्छायामिति । पुष्टेरनुग्रहसाध्यत्वेनानुग्रहस्य ज्ञातुमशक्यततया कार्यं न स्यादित्यर्थः । तदर्थमित्यादि प्रतिबन्धाभावार्थं नामरूपश्रवणाद्यादन्यत् । भजनानन्यत्वभञ्जकम् । मङ्गलरूपस्येति 'मङ्गलानी'त्यस्य समभिव्याहारात् प्राप्तमिदम् । उत्तरत्रेति उत्तरार्धे ।

उत्तरार्धं व्याकुर्वन्ति स्म । वेदतात्पर्यार्थमाहुः भगवत्सेवेति । 'अग्नये जुष्टं निर्वपामी'ति संहिता । जुष प्रीतिसेवनयोरिति धातुः तु० आ० से०, जुष परितर्पणे इत्यपि धातुः चु० प० से० । 'लोकवत्तु लीलाकैवल्य'मिति सूत्रादाहुः लौकिकक्रियास्विति । 'कायेन वाचा मनसेन्द्रियैर्वे'ति वाक्योक्तास्विति वा । यस्त्वदित्यादि आचार्योपायेन यः कोपि । त्वच्चरणारविन्दयोरिति पादकृतोपकारस्मरणात् पादसेवनमुक्तम् । 'चरणं पवित्रं विततं पुराणमितिवेदः । वैधावैधसेवोपलक्षणम् । आविष्टचित्त इति मानसी सेवा तनुवित्तजसेवाफलम् । सर्वथेति लौकिकक्रियाप्रकारेण लोकवेदक्रियाप्रकारेण वैदिकप्रकारेण च । 'जायस्व म्रियस्वे'ति तृतीयमार्गेपि सेवयाहन्ताममतात्मकसंसारनिवृत्तिमाहेत्याशयेनाहुः भवायेति । अत्रोक्तं मोक्षं व्युत्पादयन्ति स्म स्मरणेनेति । इदमुपलक्षणम् । श्रवणादिचतुर्भिरपि । यद्वा उपलक्षणं विनाप्यर्थः । 'यस्य स्मृत्ये'तिवाक्यात् । क्रियाः पूर्णाः साङ्गा भवन्ति 'आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तये'दिति सिद्धान्तमुक्तावलीवाक्याच्च । क्रिया इति वेदेनाभिहिताः तात्पर्यवृत्त्योक्ताश्च तनुजवित्तजरूपाः लौकिक्यश्च । पूर्णाः क्रियाः त्रयोदशगुणाः सत्य आनन्दरूपाः यास्ता गृह्यन्ते । फलनिरूपणात् । क्रियारूपो भगवानाविर्भवतीत्यर्थः । चित्तावेशो मानसी सेवा । तत्र भगवति चित्तावेशः । क्रियया चित्तशुद्धौ भगवदावेशो युक्त इति हिशब्दः । उपकारस्मरणेन पादसेवने चरणाविष्टचित्तत्वे ज्ञानशक्तिरूपो भगवानाविर्भवतीत्यर्थः । क्रियाशक्तिर्यथा सदंशप्रकटा चिदानन्दतिरोहिता सा यदा प्रकटानन्दांशा तिरोहितसच्चिदंशाऽऽनन्दरूपा, तथा ज्ञानशक्तिः चिदंशप्रकटा सदानन्दांशतिरोहिता, सा यदा प्रकटानन्दांशा तिरोहितचित्सदंशाऽऽनन्दरूपा । ज्ञानक्रियेति ज्ञानक्रिये जीवनिष्ठे जीवोऽणुर्भगवदंशः । एवं ज्ञानक्रिये भगवदीयज्ञानक्रियांशौ । एवं च 'ज्ञानशक्तिक्रियाशक्ती सन्दिह्य ते परस्थिते' इति भाष्ये ज्ञानशक्तिक्रियाशक्ती विष्णू । आनन्दत्वेन ज्ञानक्रियाशक्त्योर्ग्रहणात् । वाच्यत्वार्थं विष्णुः । ज्ञानक्रिये जीवात्मके इति वाक्यवृत्तिः । शक्तिमतो 'यतो वाचो निवर्तन्त' इति श्रुतेर्वागविषयत्वात् । तद्वज् जीवीये ज्ञानक्रिये यदा विष्णुः तदा जीवस्य मोक्षः, ज्ञानक्रियाशक्त्योर्वैलक्षण्यात् । जीवे व्यापकत्वोद्गमाच्च मोक्षश्च 'परं ब्रह्माधिगच्छती'तिवाक्यात् संसारदुःखनिवृत्तिर्ब्रह्मबोधनं च । तदुक्तं सिद्धान्तमुक्तावल्यां 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधन'मितिवाक्यात् । अन्यथा ज्ञानमार्गीयो मोक्षः । भगवद्रूपकर्मणो मोक्षसाधकत्वं निबन्धे स्वर्गपदविचारे विवृतम् । सदोष इति 'दोषा हरौ न सन्त्येव तथा भक्ताहिताः क्रियाः स्फुरन्ति बुद्धिदोषेण मूलं तस्य बहिर्दृशि'रितिवाक्यात् । निर्दोषयोगव्यवच्छेदक एवकारः । 'निर्दोष एव रमत' इतिवाक्यात् । हि युक्तश्चायमर्थः । अपहतपाप्मत्वात् भगवतः । सर्वदोषेति 'जीवाः स्वभावतो दुष्टाः दोषाभावाय सर्वथा श्रवणादि तथा प्रेम्णा सर्वं कार्यं हि सिध्यती'तिवाक्यात् । संसारेति संसारायासामर्थ्यं संसारासामर्थ्यम् । 'सह सुपे'ति सूत्रेण समासः । अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते । तैत्तिरीयेऽधराहनुः पूर्वरूपमत्र 'गृण'न्नित्युक्तेः । जिह्वा सन्धानं वात्र । अभयरस आस्वाद्यत इति । लिह आस्वादने इत्यस्य जिह्वेति जायते । प्रश्ने विशेषाभावः । छान्दोग्ये 'अग्निः कले'ति । 'अग्निमीळे पुरोहित'मिति ऋग्वेदारम्भात्, 'ब्रह्म तर्हि अग्नि'रित्युत्तरार्धं, अथवा वेदकृतपक्षपाते चतुर्षु श्लोकेषु आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् । विद्या सन्धिः प्रवचनं सन्धानमिति चतुष्कं निरूप्यते । 'विशुद्धसत्त्वं वपुराचार्यस्य । 'आचार्यं मां विजानीया'दित्यभेदः । 'आचार्यचैत्यवपुषा स्वगतिं व्यनक्ती'त्यत्र वपुः पदम् । अतः आचार्यः पूर्वरूपमत्र । 'सत्त्वं न चे'दित्यत्र 'विज्ञानमज्ञानभिदापमार्जन'मन्तेवासिनीत्यन्तेवास्युत्तररूपमत्र । 'न नामरूपे' इत्यत्र वेदादिविद्या, अतः विद्या सन्धानमत्र । 'शृण्वन् गृण'न्नित्यत्र श्रवणाद्यर्थप्रतिपादको वेद इति प्रवचनं सन्धानमत्र 'प्रवचनं' वेदः । पदजन्यपदार्थोपस्थितिरत्र । 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध' इति जैमिनिसूत्रे शब्दार्थयोर्नित्यसम्बन्धोक्तेः 'औत्पत्तिकमिति नित्यं ब्रूम' इति शाबरभाष्यात् ॥ ३७ ॥

दिष्ट्येत्यत्र स्वसिद्धान्तेति वेदकृतपक्षपातस्य मार्यादिकस्योक्तत्वात् तत्प्रसङ्गेन पौष्टिकपक्षपातं वक्तुं स्वस्य श्रीभागवतस्य सिद्धान्तः । 'नायमात्मा प्रवचनेन लभ्य' इति श्रुत्युक्तः श्लोके 'दिष्ट्ये'तिपदेन साधनाभावोक्तेस्तदनुसारेणाहेत्यर्थः । भगवच्छास्त्र इति श्रीभागवते द्वितीयनवमेध्याये । भगवानेवेति 'हर' इति पदात् शास्त्रार्थत्वेन व्याप्त्या भगवानेवेत्येवकारः । सर्वात्मभावाद् भगवानिति । 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमे'ति सर्वात्मभावलक्षणं लिङ्गभूयस्त्वाधिकरणभाष्ये । भगवतो'न्यत्' 'यत्र' भावे सुखत्वेन सुखसाधनत्वेन 'पश्यती'त्यादि । 'भूमा' सर्वात्मभावो भगवांश्च भूमाधिकरणे । 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'तिवाक्यात् । उभयोर्भूमत्वम् । प्रमाणादीति प्रमाणं ज्ञानरूपो भगवान् । 'दर्शनं प्रमाण'मिति वक्ष्यमाणत्वात् । 'अत्र प्रमाणं भगवा'निति वाक्यमनुसन्धेयम् । आनन्दाविर्भावो भगवान् प्रमेयं, वक्ष्यमाणश्लोके प्रमाविषयत्वात् । स एव कृपाविष्टः साधनम् । लीलायुक्तः फलं लीला वा आनंदयुक्तस्य लीलात्वात् । अग्रे स्पष्टीभविष्यति । तत्र प्रमाणं स्पष्टयन्ति स्म भगवत्साक्षात्कार इति । 'ज्ञानमात्रं परं ब्रह्मे'ति श्रुतेः । 'अत्र प्रमाणं भगवा'नित्युपष्टम्भानुरोधादाहुः साक्षात्कृत इति भगवच्छास्त्रं पञ्चरात्रमपीति । द्वितीयस्कन्धानुसारेण विराड्ध्याने पृथिवी पादरूपा सोपकारस्मरणात्, द्वितीयनवमाध्याये'ऽहमेवासमेवाग्रे' इति वाक्ये भगवानग्र आस कारणात्मा, पृथ्वी कार्यरूपा पूर्वमासीदिति । पञ्चरात्रेण भगवद्भार्या भक्तेति च । भगवच्छास्त्रे पूर्वं निरूपयन्ति स्म भूमीत्यादिना । 'यमेवे'ति श्रुतौ भार्यात्वेन भक्तात्वेन च वृता । तस्याः प्रसङ्गादित्यर्थः । वयमिति ब्रह्माद्याः । कृतार्थः भगवन्मार्गीयमोक्षः तदीयत्वलक्षणो यैस्तादृशा जाताः । 'भगवानेव हि फल'मिति निरोधलक्षणग्रन्थे भगवानानन्दाविष्टो लीलायुक्तः । लीलारूपो वा । द्वितीयस्कन्धनवमाध्याये 'इदं मतं ममातिष्ठ परमेण समाधिना भवान् कल्पविकल्पेषु न विमुह्यति

कर्हिचि'दिति मोहाभावश्च मोक्षः, उक्तः स तदीयत्वे निविशते। भगवन्मार्गे तदीयत्वं भर्तृसूक्तप्रकारेण भूमेर्गृहीतम्। दत्तात्रेयवत्। तदुक्तं टिप्पण्याम्, 'स्त्रियो वा पुरुषा वापि भर्तृभावेन केशवं हृदि कृत्वा गतिं यान्ति श्रुतीनां नात्र संशय' इति। कृतार्थमासीदिति स्वस्वमार्गीयं फलं प्राप्तवत्। त इति 'भवत' इत्यस्यार्थः। जन्मनेति चतुर्व्यूहैः। 'समुदायो जन्यवाची'ति निबन्धात्। वासुदेवेनासुरमोक्षदानाद् भारोपनीतः। सङ्कर्षणेन भूभारहरणेन। प्रद्युम्नेन गर्भसम्बन्धेन। अनिरुद्धेन धर्मरक्षणेन। अध्यायार्थसङ्कर्षणजन्मना वा। प्राकट्यरूपेण। अत्राश्चर्यरसोनुसन्धेयः। 'आश्चर्यवत् पश्यति कश्चिदेनमाश्चर्यवद् वदति तथैव चान्य' इति गीतायाः। 'आश्चर्यो वक्ता कुशलोस्य लब्धे'ति काठकोपनिषच्च। एवं दुःखाभावरूपं फलमुक्त्वा सुखरूपं फलं भगवन्मार्गप्रवर्तकमाहुः मर्दनेति। तथा च मूले भारपदेन मर्दनक्लेशो ज्ञेयः। भर्तृगर्भसम्बन्धे आनन्दो भवति परन्तु मर्दनक्लेशस्तु परमानन्दप्राकट्येन न तु आनन्दप्राकट्येनेति परमपदम्। सर्वानर्थेति 'जगन्मङ्गल'मितिवाक्यात्। उपास्ये चेति विराजि। स्वराजि। 'कृष्णद्युमणिनिम्लोचे' इति वाक्यात्। सूर्यदेहे चन्द्रस्य वंशीयस्य। 'मूर्तित्वे परिकल्पितः शशभृतो वर्त्मा पुनर्जन्मनामात्मेत्यात्मविदां क्रतुश्च यजतां भर्ताऽमरज्योतिषां लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ वाणीं नः स ददात्वनेककिरणस्त्रैलोक्यदीपो रवि'रिति बृहज्जातके। 'शशभृत'श्चन्द्रस्य 'मूर्तित्वे' परिच्छिन्नपरिमाणत्वार्थं 'परितः कल्पितः' समर्थितः। यतो जलमयश्चन्द्रः प्रकाशहीनः तत्र रविकलाः प्रतिफलिताः ज्योत्स्ना भवन्ति। तदुक्तं 'सलिलमये शशिनि दीधितयो मूर्च्छितास्तमो नैशं क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्त' इति। 'यः पुनर्जन्मनां' मोक्षमार्गिणां 'वर्त्मा' मार्गभूतः। मोक्षभाजो रविं भित्त्वा गच्छन्ति। एतत्करणमिति भारापनयनकरणम्। हरिरिति हरति दुःखमिति हरिः। अलौकिकत्वादिति तावतीं मायां दूरीकृत्य प्रकटत्वं चतुर्व्यूहसमुदायः तद्रूपभगवज्जन्मनः अलौकिकत्वात्। क्लृप्तेति मनस्तोपि धारणे तथा। सर्वात्मकत्वादिति भगवतः भिन्नं जन्मासम्भावितं भेदाभावादित्यर्थः। दिष्ट्या महता भाग्येन। तेन साधनाभावद्योतनाद् द्वितीयस्कन्धनवमाध्याये पुष्टिसिद्धान्तोत्रेति सूचितम्। केचित् त्विति अस्मिन् पक्षे जन्मनेति न तृतीयान्तं किन्तु जन्मेति पदच्छेदः। भारोपनीतस्तव जन्म, ईशितुस्तव जन्म, नेत्यर्थः। समागमनस्य भारहरणहेतुत्वं, तत् तु न तु भारहरणहेतुत्वमेवेत्यस्वरस उक्तः॥

अत इति जन्माभावेनाप्राकृतत्वसूचनात्। यद्वा आभ्यां दिष्ट्येत्युक्तेः। आकारसमर्पकत्वाच्च। जातमिति भविष्यतीति क्रियापदम्। शङ्कापरिहारार्थमिति भगवति आभासोक्तशङ्कापरिहारार्थं पद्मपुराणे चरणचिह्नाध्याये 'केनैव ज्ञायते देवो भगवान् भक्तवत्सलः तान्यहं वेद नान्योस्ति सत्यमेतन् मयोदितम् षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे दक्षिणे नव चिह्नानि इतरे सप्त एव चे'त्युक्त्वाग्रे चिह्नलक्षणान्युक्त्वा 'अङ्कान्येतानि भो विद्वन् दृश्यन्ते तु यदा कदा कृष्णाख्यं तु परं ब्रह्म भुवि जातं न संशय' इति वामचरणचिह्ननिरूपणानन्तरं वाक्यं, दक्षिणचिह्ननिरूपणानन्तरं 'चिह्नान्येतानि भो वत्स दक्षिणे चरणे सदा स वै कृष्ण इति ज्ञेयो बुद्धिमद्भिर्नरोत्तमै'रिति वाक्यम्। ताभ्याम्। देवपादाः भूमिं न स्पृशन्ति छायां च न जनयन्ति तदत्र देवदेवपदे जातमिति पुरुषोत्तमकृतपक्षपातो जात इति भाग्याभिनन्दनमित्याशयेन पुरुषोत्तमकृत इति हर्षात् प्राप्तं 'दिष्ट्ये'त्यस्यार्थमाहुः महदिति। महतां भूनारदवसुदेवनन्दानां भाग्यं अस्माकम्। असमस्तं वा पदद्वयम्। मूले पदकशब्दः सर्वलक्षणसम्पन्नैः पदैरितिस्वार्थकप्रत्ययान्तो व्याख्यातोधुना 'इवे प्रतिकृता'विति सूत्रेण कप्रत्ययेप्यज्ञातार्थेपि सिध्यन् यावर्थौ बोधयति तौ द्विधा पूर्वमाहुः भूमिः पदमित्यादि पदं छायामित्यादि च। पूर्वं पदं प्रतिकृतिरूपं द्वितीयं च। छायाम्। अज्ञातं पदमित्यर्थः। तृतीयं कप्रत्ययार्थमनुवदन्ति स्म पुरुषपदमिति। स्वार्थे कप्रत्ययान्ते पदकपदे कृते पुरुषस्य भगवतः पदकमित्यर्थः। उद्धृता चेत्याधिभौतिकी भूः। अग्रे चाधिदैविकी भूः, पक्षपातो जात इति पक्षपातज्ञानार्थं दुहितेति। त्रिलोकीकल्पनायां भूः पुरुषस्य पदम्। अवान्तरकल्पेषु ब्रह्मणा त्रिलोकी निर्मीयत इति ब्रह्मजन्या भूरतो दुहिता। सानुरागाया इति भूमिः पदं गृह्णातीत्यत्रात्यनुरागेण सात्त्विकभावस्वेदोद्गमे पदं प्रतिफलतीति पदग्रहणे भूमेरनुरागः सूचित इति सानुरागायाः। भगवति अनुरागेण सह वर्तमानायाः। दिष्ट्येति देवा अपि भुवं न स्पृशन्ति तत्र देवदेवस्य भूस्पर्शे सानुरागत्वदर्शनं विस्मयाविष्टमिति भाग्येन। पदाङ्किता सतीति भगवदर्थे मनुप्रसङ्गे चतुर्थस्कन्धे'सर्वपा'मित्यादिः। पूर्वमिति प्रथमाध्याये, 'गौर्भूत्वाश्रुमुखी'त्यत्र। परमानन्देति मर्दनक्लेशहान्यन्तरमिति बोध्यम्। महदिति तेन भाग्यमित्यत्रैकदेशग्रहणं ज्ञेयम्। अपिशब्दात्। न इत्यपीति नो देवानां सकलदेवानामपि पक्षपातदोग्ध्री। 'तवानुकम्पिता'मिति व्याकुर्वन्ति स्म किञ्चेति। तव पादैरेव न तु देवान्तरपादैः। 'तवे'त्यत्र करणत्वसम्बन्धाविवक्षायां सम्बन्धसामान्ये षष्ठीत्याशयेनाहुः त्वया चेति। दिव्यवतारपादसत्तामाहुः देवानां सर्वेति। तथा च दिव्यपि देवोपकारकरणात् 'तवानुकम्पितां द्याम्'। कुण्डलेति आदिना कुण्डलयोः स्वसत्त्वध्वंसाभावः। आदित्या इति षष्ठी, सामर्थ्यात्। रजकस्य वस्त्रं ददातीति वत्। अत्र स्वसत्त्वध्वंसपूर्वकपरस्वत्वोत्पादनाभावेन दानत्वाभावान् न चतुर्थी। अस्माकमिति देवानां एवकारेणासुरपक्षपातव्यतिरेकात् असुरयोगव्यवच्छेदकः। उभयमिति अनुकम्पितां गां द्यां चेत्युभयम्। दर्शनं प्रमाणमिति व्याप्तिज्ञानवत् प्रमाणम्। दर्शनं भावल्युडन्तप्रतिपाद्यं धात्वर्थरूपं भगवदनुकम्पितगोद्योसाक्षात्काररूपं, तेन देवैर्निरोधक्रीडाः कर्मरूपाः कर्मणां प्ररोहैकस्वभावत्वादाविर्भावजनकत्वम्। आविर्भावो वर्तमानस्य वस्तुनो दर्शनविषयत्वयोग्यता, सा च प्रथमज्ञप्तिरपि। विषयस्य ज्ञानत्वाद् विषयत्वयोग्यतापि स्वरूपसम्बन्धविशेषाज्ञानरूपैवेति तादृशप्रमाकरणत्वं धात्वर्थज्ञान इति करणल्युडन्तप्रतिपाद्यप्रमाणं दर्शनमित्यर्थः। अभेदान्वयो भवत्येव। ते आविर्भाव इति प्रमाविषयत्वं प्रमेयत्वमनुकम्पितत्वाविर्भाव-

स्येत्याविर्भावः प्रमेयम्। दिष्ट्येत्युपक्रमोपसंहाराभ्यां चतुष्कं भिन्नम् अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये अधरा हनुः पूर्वरूपमत्र। अधरोष्ठो लोभः। तस्य फलं 'वाक् सन्धि'रित्युक्ता वाक्। विद्याप्रवचनयोः पूर्वश्लोकचतुष्के गतत्वात् काण्डद्वयार्थानन्तरं कांडद्वयतात्पर्यार्थभक्तिमार्गीया 'मत्स्याश्वे'ति श्लोकोक्ता वागत्र गृह्यते। तत्र वाचि प्रवचनपदोक्तयावत्पुराणवेदस्मृतीतिहासातिरिक्तायां वरणमात्रैकलभ्यायां 'उपध्मानीयामोष्ठौ जिह्वामूलीयस्य जिह्वामूल'मितिवचनोक्तपुरुषोत्तमोङ्कारजिह्वास्वादनस्य पारोक्ष्येण तात्पर्यवृत्त्या प्रतिपादिकायां ओष्ठद्वयं जिह्वा चोपयुक्तेतिक्रमेण चतुष्कोपयोगः। अतोधरा हनुः पूर्वरूपमत्र उक्तवाक्कारणत्वात्। उकारशब्देनोङ्कारः परोक्षवादात्। बाहुलकाच्च। पुः पुरुषोत्तमः। उकाभ्यामेव हेतुभ्याम्। तेन पुष्टिमार्गीयं भक्तसंवलितं पुरुषोत्तमरूपम्। उपध्मानीयः पकारात् पूर्वं अर्धविसर्गसदृशः उपध्मानीयः पुरुषोत्तमपकारात् पूर्वं अर्धचन्द्रसदृशः उपध्मानीयः तुरीयतत्त्वं चन्द्रः तद्रूपपुरुषोत्तमः। जिह्वामूलीयस्येत्यत्र ककारात् आत्मसुखात् पूर्वं अर्धविसर्गसदृशः जिह्वामूलीयः पुरुषोत्तमो मनसा चन्द्ररूपेणात्मसुखम्। खकारादाकाशरूपशरीरात् पूर्वं अर्धविसर्गसदृशोपि जिह्वामूलीयः तेनाधरौष्ठलोभकार्यपुरुषोत्तमप्रतिपादनात् उत्तरत्र उत्तरा हनुरुत्तररूपम्। वाक् मत्स्याश्वादिषु कृतावतार यदूत्तम वन्दनं त इति सेवापूर्णताद्योतकवन्दनभक्त्यन्तप्रतिपादिका सन्धिः जिह्वा रसास्वादकर्त्री पुरुषोत्तमरूपा 'परः पुमा'निति चतुर्थश्लोके उक्ता। अतो वाचः सेवापूर्णताद्योतकवन्दनभक्त्यन्तप्रतिपादिकायाः प्रपञ्चः पूर्वश्लोकयोः चतुर्थे चेति, तेनार्थापत्त्या प्रमाणेन तत्प्रतिपादकाधरहन्वादेरुपस्थितिकल्पनं तत्प्रतिपादकपदाभावेऽपि श्लोके। पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रिभोजनकल्पनवत् इति शुभम्। प्रश्ने विशेषाभावः। छान्दोग्ये 'उदीची दिक् कले'ति। तस्याः स्वामी कुबेरः। धनाधिपः लक्ष्मीपतौ मुख्यः शब्दः कुंबति, कुबि छादने, कुबेर्नलोपश्च त्येरक्। तदुक्तं वायुपुराणे। 'कुत्सायां क्वितिशब्दोयं शरीरं वेरमुच्यते कुवेरः कुशरीरत्वान् नाम्ना तेनैव सोङ्कित' इति। तत्रापि कौ वर्तमाने वातगणे। विराट्प्राणरूपे। 'वेरं वातगणेपि चे'ति विश्वात्। तथा च कौ पृथिव्यां वेरं वातगणः कुवेरः। वेरशब्दस्य पुंस्त्वम्। 'प्राणस्तथानुगमा'दिति व्याससूत्रात्। अतो भगवत्त्वात् कुबेरः प्रमाणम् ॥ ३८ ॥

न तेऽभवस्येत्यत्र आविर्भावमिति पूर्वश्लोके'द्रक्ष्याम' इतिपदोक्तदर्शनस्य प्रामाण्यार्थं ब्रह्मा समर्थयति स्म ते अभवस्येति। जन्मनः कारणमिति भक्तमनोरथविषयविनोदस्य जन्मकारणत्वं वक्तुं शक्यं, भक्तवश्यत्वाद् भगवत इति। तर्कयाम इति तर्कः व्याप्तिशोधकः। निर्भवः स्यान्निर्विनोदः स्यादिति। तथा च त्वं जन्मवान् लीलावत्त्वात्। विषयिवदित्यनुमानम्। बन्ध्यावलो वक्ष्यमाण्यत्र। इच्छावादेनाहुः वेः कालस्येति। कालो हि स्थिर इति अनन्तदेहत्वात् स्थिरः सन्। व्यापकश्च। अत एव प्रस्थानरत्नाकरे स्वरूपेन्तर्भावः कालस्योक्तः। बुभूषुः प्रभुर्यदा भवति तदा कालकर्मस्वभावान् गृह्णातीति श्रीभागवते। यथासुखमिति काल उपदेश इति धातुपाठात्, उपदेशेन सुखं प्रसिद्धः अधिकारिणि काले वेति वक्ष्यन्ति। अन्यथेति स इच्छया पुष्टिमार्गोपयोगी क्रियते। प्राकट्यानन्तरं कालस्य मर्यादायाः साधकत्वं बाधकत्वं वा नास्तीति भावः। 'यदा यदा हि धर्मस्ये'ति गीतामूलादाहुः विनाबीति। मोक्षविरुद्धायामिन्द्रियरूपायां नावि। संसारनौरिति संसारस्थिता नौरिन्द्रियरूपा कामोदधितारिका पारं कामस्य पर्यवसानं न प्राप्नुयादित्यर्थः। 'कामस्यान्तं हि क्षुत्तृड्भ्या'मिति सप्तमस्कन्धात् क्षुत्तृड् न भवेदित्यर्थः। इन्द्रियनौकायां सत्यां तस्या नोदं स्वस्मिन् प्रेरणं प्राकट्यकारणं तर्कयामह इत्यर्थः। स्वस्य कामान्तरूपत्वान् प्राकट्येनेन्द्रियरूपाया नौकायाः स्वस्मिन् प्रेरणे निरोधलक्षणग्रन्थोक्तरीत्या पारं कृष्णं गच्छेत् प्राप्नुयादिति श्रीवल्लभजिल्लेखे। पारावारः कृष्णः तस्यैकदेशः पारः। सत्या भामेतिवत्। अस्मिन् पक्षे मूले नशब्दान्वयो न भवतीति तदर्थं अस्मिन्नर्थे इत्यादिना योजनान्तरमुक्तम्। अस्मिन्नर्थे भक्तो नागतः शरणागत इत्यर्थाच्च् छरणमार्गं आगत इति। किञ्च पशुजातीयनागत इति शरणभक्तिमार्गार्थं पक्षान्तरमाहुः यद्वेति।

यमिति नोदम्। विशब्दस्य वियोगरूपमर्थान्तरमभिप्रेत्य पक्षान्तरमाहुः नौकारहितेति। तस्यामिति वियुक्ता नौः श्रेयःसाधनरूपा यस्यां संसृतौ तस्याम्। सत्याम्। सर्वप्रेरणमिति सर्वेषामवतारकालीनानां 'कामाद् गोप्यो भयात् कंस' इतिवाक्यविषयाणां कामादिभिः स्वस्मिन् इन्द्रियाणां प्रेरणं स्वसम्बन्धकरणं निरोध इति यावत्। अनवतारकालीनानामपि शब्दरूपश्रीभागवते स्वस्वरूपे अधिकारिणां श्रवणादिभिरिन्द्रियाणां प्रेरणं स्वसम्बन्धकरणं निरोध इति यावत्। अत्रेति कारणे। प्रमाणं ऐतिह्यरूपम्। शब्दरूपमपि प्रमाणं नास्तीत्याहुः अद्यापीति। तेन भगवन्मार्गकृतपक्षपाते भक्तकृततर्कशोधितव्याप्तिज्ञानातिरिक्तप्रमाणाभाव उक्तः। 'यमेवैष वृणुते तेन लभ्य' इतिश्रुतेः। 'नाहं वेदैर्न तपसे'ति स्मृतेश्च, 'भक्त्याहमेकया ग्राह्य' इति स्मृतेश्च। भगवन्मार्गकृतपक्षपातस्तु विश्वरूपदर्शनाध्यायोक्तधर्माणामुपसंहारात्। तत्र दैत्यानां क्षयः सुराणां जयः। कृष्णेपि जृम्भालीलायां सुरपक्षपातः। तर्कयामह इति तर्क उक्तः वेदयुक्तिरूपः। अतः सत्यसंकल्पात् 'वशीकुर्वन्ति भक्त्ये'त्येवंरूपात्। 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यह'मितिवाक्यरूपादुक्तरूपाद् वा। तर्के शोधके व्याप्तौ हेतोर्विरुद्धत्वमाहुः वस्तुतस्त्विति। रजोभाजो ब्रह्मणस्तर्को व्याप्तिशोधकः संशयविषय इति तथा। एवं च लीलावत्त्वादिति हेतोः सन्दिग्धविरुद्धत्वमिति भावः। सकलशास्त्राग्राह्यत्वे सति चरणग्राह्ये तर्कोपि सन्दिग्ध उक्तः। 'प्रवर्तते यत्र रज' इति द्वितीयस्कन्धनवमाध्यायवाक्यात्। अधिकारिभक्तिः सर्वथाऽप्रयोजिका, केनचित् प्रकारेणैव प्रयोजिका। यथा मानसी सेवा ब्रह्मणः मानसीसेवात्वेन प्रयोजिका। अत एवकारः। ममापीति कारणगुणाः कार्ये समायान्तीत्यदोषात्। अविद्ययेत्यस्य विवरणं देहाद्यध्यासेनेति। देहस्तु तं विद्याकर्मणी

समन्वारभेते पूर्वप्रज्ञा चे'ति श्रुत्युक्तविद्यादिभिः तस्याध्यासो देहे गृहीते स्थूलोऽहमिति देहधर्मस्थौल्याध्यासः । स्थितिः स्पष्टा । प्रलयः देहान्तरे व्यापकत्वे च मुक्तामुक्तयोः मुक्तस्य च । मुक्तस्यापि स्वोपास्याध्यासाङ्गीकारात् । एवमन्तःकरणाध्यास इन्द्रियाध्यासः प्राणाध्यासः स्वरूपविस्मरणं च उत्पत्तिरुक्ता तां व्याकुर्वन्ति भाष्यत्वाय । जगति इति जगति ब्रह्माभिन्न आधारे, उत्पत्तिरुत्पत्त्यादीति । गीताविस्तारो भागवतमतः सुबोधिन्या भाष्यत्वमविरुद्धम् । त्वयीत्यधिष्ठानकारणम् । उदासीने न भवतीति किन्तु सिसृक्षाद्याविष्टेऽभवे भवति । अनित्ये नेति किन्तु नित्ये आश्रयरूपे भवति । असमवायीति किन्तु समवायिन्यात्मरूपे सत्येव जीवानामुत्पत्त्यादिर्भवेदित्यन्वयः । आधारेति आश्रयेत्यर्थः । अवश्येति उदासीनेऽक्षरे जीवानामुत्पत्त्यादिर्भवतीति नावश्यकतानुदासीनत्वस्य । 'अभयाश्रयात्मनी'त्यत्र 'भवाश्रयात्मनी'तिपाठमङ्गीकृत्याहुः अत अभव इति । स्मार्तः प्रयोगः । अथ तैत्तिरीयप्रश्नच्छान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते । तैत्तिरीये उत्तराहनुरुत्तररूपमत्र । तद्वाचकपदाभावेऽप्यर्थापत्तिः प्रमाणपूर्वश्लोकव्याख्याने उपपादितम् । प्रश्ने विशेषाभावः । छान्दोग्ये अन्तरिक्षं कलात्र । 'अन्तरिक्षदेवा वै पशव' इतिश्रुतेः । 'आदित्यः पशुरासीत् तेनायजन्ते'तिपञ्चमाष्टकसंहिता । यद्वा 'ऽग्निः पशुरासीत् तेनायजन्ते'तिश्रुतिः । गतवैदिकपदे 'वायुः पशुरासीत् तेनायजन्ते'तिश्रुतिप्रसरः । ब्राह्मणे वराहोक्तेः । 'वराहो वायु'रिति । ब्रह्मणस्तो निर्गमात् । पश्यतीति 'पशु'पदनिरुक्तिः । अन्तरिक्षमाकाशः, तेना'काशशरीरं ब्रह्मे'तिश्रुतेर्जरायुर्निरूपितम् ॥ ३९ ॥

मत्स्याश्वेत्यत्र प्रथमपर्यायमनूद्य द्वितीयपर्यायमनुवदन्ति स्म स्वरूपेति । स्वरूपं चतुर्व्यूहरूपं जन्मवागगोचरस्य तस्य निमित्तं कारणमिच्छारूपं तस्या ज्ञानम् । अन्यथेति लीलया प्रादुर्भावे स्वरूपनिमित्तेच्छाज्ञानाभावे वा । न स्यादिति कारणगुणाः कार्यगुणानारभन्त इति हेतोर्न स्यात् । आनन्दाविर्भाव इति आनन्देन विनोदेन लीलयाविर्भावो यस्य तादृशः भगवानिति ज्ञानं तद्विषयः प्रमेयं निरूपितः । स एवेति ज्ञान मुपासनं तेनाविर्भूत एव मत्स्यादिः साधनम् । उपास्यातिरिक्तस्य साधनत्वायोगात् । एवकारस्तु 'यत्किञ्च विज्ञातं वाचस्तद्रूपं वाग्धि विज्ञाता वागेनं तद् भूत्वावती'ति बृहदारण्यकात् । 'एनं' 'वाग्विदं तद् भूत्वा' विज्ञातस्वरूपं भूत्वा । कृपाविष्टो बोध्यः कृपाविष्टं साधनमिति । एवं च 'तत्रानुकम्पिता'मिति श्लोकादनुकम्पितपदमनुवर्त्यानुकम्पाविशिष्टो मत्स्यादिरिति बोध्यम् । एवमन्यत्र । नत्वाहुरित्याशयेन व्याकुर्वन्ति स्म त्रयो जलजा इति । 'अप्सुयोनिर्वाऽश्व' इतिश्रुतेरश्वोपि जलजः । आपःसु योनयो यस्य सोऽप्सुयोनिः । अग्रे स्पष्टम् । तमो रज इति 'बहुष्वनियम' इति सूत्रात् सत्त्वस्थाने रजः । तथा च तमःसत्त्वरजःसमानाकृतयः त्रयस्त्रयो बोध्याः क्रमात् । तमःसमाना निन्दिताकृतिः, सत्त्वसमाना आपाततः पूर्वं निन्दिताकृतिः, विचारे तु न निन्दिताकृतिः । रजःसमानाकृतिः आपाततः पूर्वमनिन्दिताकृतिः, विचारे तु निन्दितिकाकृति । अश्वो हयेति हयः ग्रीवः हयग्रीव इति नामत्रयमतस्तथा । जलज इति उक्तश्रुतेः । अतो हयग्रीवोपि जलजः । त्रयस्तामसाः । वनवासगृहवासातिरिक्तवासात् । 'तामसं द्यूतसदन'मितिवाक्यात् । उपलक्षणविधयेदमपि । जगति हीनजातीयं मात्स्यमिति तामसं निन्दितत्वात् । निन्दन्ति तामस'मिति वाक्यात् । तमःसमानाकृतिः लोकनिन्दितमत्स्यसमानाकृतिः । न तु मत्स्यः । 'मायामत्स्यविडम्बन'मितिवाक्यात् । 'यदग्रे चानुबन्धे च सुखं मोहनमात्मनः निद्रालस्यप्रमादोत्थं तत् तामसमुदाहृत'मितिगीतायाः । कच्छपः तामसः । 'मेनेङ्ग कण्डूयन'मित्यादिवाक्यैर्दुःखसाधनं मन्दरं सुखसाधनत्वेन दधारेति दुःखसाधने सुखसाधनत्वज्ञानं तामसं, तादृशज्ञानवान् तामसः । तामसकच्छपपुराणप्रतिपाद्यत्वाच्च । आरण्येति आरण्यपशुस्वभावकः । अक्षोपीति अक्षः अक्षजः हंस इति पाठत्रयं पुस्तकभेदेन । अक्षः हंसः । हन्तीति हंसः वृत्रवदिह नीति सः । यद्वा पचाद्यचि कृते भवेद् वर्णागमाद्धंस इति सक् । तदर्थोक्षोपि व्यवहारः यौगिक आत्मजो वा एकादशस्कन्धात् 'अक्षः कर्षे तुषे चक्रे शकटव्यवहारयोः आत्मजे पाशके चाक्ष'मिति विश्वः । व्यवहारस्तु 'व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभि'रित्येकादशस्कन्धादसुकार्यं अहं ममेति धीः । 'सन्निपातस्त्वहमिति ममेत्युद्धव या मति'रितिवाक्यात् । शरीरे बहिर्वायुस्थानत्वादारण्यः । अक्षजो हंसः । अक्षं मनोरूपमिन्द्रियम् । 'अधोक्षज' इत्यत्र तथा व्याख्यानात् । तस्मात् प्रकटः अक्षजः हंसः, स ब्रह्मणा ध्याने क्रियमाणे प्रकटः, ध्यानं च मानसम् । तथा च 'तदुदित' इतिन्यायेन तस्याक्षजत्वमुच्यते । तदुदितः तस्मादुदितो जातः । 'स मानसीन आत्मा जनाना'मितिश्रुतेश्च । बहिर्वायुर्यत्रासौ बहिर्वायुराकाशः । तदेव स्थानमुड्डयने यस्य स तथा । तथा च योवतीर्यान्यान् वने प्रवेशयति तस्यारण्यत्वमुचितमिति भावः । एवं व्याख्यानं मानसौकस्यजलवासित्वेन जलप्रकृतिकत्ववारणायेति बोध्यम् । हंस इति पाठे स्पष्टम् । 'हंसः स्यात् मानसौकसि निर्लोभनृपविष्णवर्कपरमात्मन्यमत्सरे योगभेदे मन्त्रभेदे शारीरमरुदन्तरे तुरङ्गमप्रभेदे चे'तिकोशः । एते त्रयः सात्त्विकाः । वनवासात् । 'वने तु सात्त्विको वास' इतिवाक्यात् । 'यत् तदग्रे विषमिव परिणामेऽमृतोपमम् तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादज'मिति गीतायाः । सत्त्वसमानाकृतयश्च । नृसिंहः पशुत्वांशे निन्दितत्वस्य पूर्वं भानेपि छान्दोग्य उपदेशे 'सिंहो वा व्याघ्रो वे'ति कालोपाधिकपरदेवतारूपमिति ज्ञाने परमोत्कृष्टत्वज्ञानात्, एवं वराहेपि । 'त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वे'तिश्रुतेः । 'ते' जीवाः । हंसः सत्त्वाकृतिः प्रसिद्धः परमात्माऽपरपर्यायः । 'परमात्मनी'त्युक्तकोशात् । 'ततो ह जातो भुवनस्य गोपा हिरण्मयः शकुनिर्ब्रह्म नामे'ति श्रुतेः । 'यद्वद् वृद्धाः प्रचक्षत' इति वाक्यात् सुष्ठ्वाकृतयः । राजन्य इत्यादि एते त्रयः राजसाः गृहे वासात् । 'गृहे राजस उच्यत' इत्येकादशस्कन्धात् । 'रघुनाथस्तु सीताभक्तार्थेनेकदैत्यानवधी'दिति पूर्वं एकभक्तार्थेनेकहननं माहात्म्यद्योतकमपि समत्वहानेः पश्चात् 'विषमिवे'ति राजसः । 'विषयेन्द्रियसंयोगाद् यत्

तदग्रेऽमृतोपमं परिणामे विषमिव तत्सुखं राजस'मिति गीतायाः। क्षात्रधर्मो न समत्वबाधक इति चेद् रजः कर्मबहुलमिति। यागादिकर्मबहुलं यत्रेति राजसः। परशुरामो राजसः प्रसिद्धः। सहस्रार्जुनवधेन माहात्म्येपि पश्चात्तापात् यागादिबहुलकर्मकरणाच्च राजसः। वामनस्तु राजसवामनपुराणप्रतिपाद्यत्वाद् राजसः। रजःसमानाकृतयश्च। राजत्वात् राजकत्वाभ्यां च 'राजसं तदुपेक्षित'मितिवाक्यात्। तरतमेति मायाविडम्बनमत्स्यात् तामसतामसाद्धयग्रीवो राजसतामसः उत्तमः। द्वितीयस्कन्धे ब्रह्मसत्रे हयग्रीवप्रादुर्भावस्योक्तत्वात् कर्मणां राजसत्वेन कर्मान्तपाती हयग्रीवोपि राजसः। तामसस्तु द्विरूपत्वेनासुरसादृश्याङ्गीकारात्। कूर्म इति सात्त्विकतामसः, उत्तम इत्यर्थः। वास्तव्यत्वादिति सर्वदा जलवासित्वात्। तामसकूर्मपुराणप्रतिपाद्यत्वात् तामसः। जनवास्तव्यत्वात् सात्त्विकः। आश्रयः। इदं च तैत्तिरीयब्राह्मणे कूर्मप्रजापतिसंवादे प्रजापतिना 'ममैव त्वं पूर्वः समभूरिति प्रोक्तः कूर्मः पूर्वमेवाह हासीत्युक्त्वा सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् भूत्वोदतिष्ठ'दिति श्रावणात् स्फुटम्।

ज्ञानांशः सात्त्विकः कूर्मस्तामस इति। एवं तामसे तरतमभावं प्रोच्य सात्त्विकत्रिक आहुः नृसिंहादिति। हिरण्यकशिपुमारकात्। नृसिंहः सात्त्विकः मारकस्तामसः। वराह इति भूम्युद्धारे सात्त्विकः, सात्त्विकवराहपुराणप्रतिपाद्यत्वात्। हिरण्याक्षवधे राजसः। हिरण्यकशिपुवत् अत्यन्तापराधाभावेनान्ते विषमिव तत्सुखमिति नृसिंहेन प्रह्लादस्य यथास्थितस्य रक्षणं कृतं न तु नष्टाया भूमेरिवोद्धरणमिति भावः। महानिति सात्त्विकसात्त्विकः स्वयं सात्त्विकः ज्ञानप्रदः सात्त्विकः। 'सत्त्वात् सञ्जायते ज्ञान'मितिवाक्यात्। स्पष्ट इति राजन्यो राजसतामसः। विप्रो राजसराजसः। 'रजो रागात्मकं विद्धी'ति कर्मणि रागाद् राजसः। पितृमारकसहस्रार्जुनमारकत्वात् राजसः। विबुधो राजससात्त्विकः। देवाः सात्त्विकाः, वामनो राजसः राजकार्यकर्तृत्वात्। एभिरित्यवतारैः। नवविधाः सगुणाः। एकेनेति कृष्णेन। निर्गुणेन। स्वगुणान् सङ्गृह्य। अयमेवेति अवतारी अवताररूपेण प्रत्यक्षः। एवकारस्तु 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतावनेकरूपस्य 'तमसः परस्ता'दिति कथनेन तमःपरत्वमवतारिलिङ्गमिति। 'अनुकृतेस्तस्य चे'ति सूत्रादाहुः तत्तज्जातीति। मत्स्यादिजात्यनुकरणरूपेषु मायाविडम्बनमत्स्यादिरूपेषु अवतारं वैकुण्ठादागमनं कृत्वा स्वायम्भूमन्वादीन् पाति। त्वमेतेष्विति त्वमवतारी साधनत्वात् कृपाविष्टः। ननु कृपाबोधकपदाभावात् कुतः कृपा यद्विशिष्टत्वमुच्यते इति चेच्छृणु। कृपात्वेन मोक्षसाधनोपदेशत्वेन कार्यकारणभावस्य 'इति भारतमाख्यानं कृपया मुनिना कृत'मितिवाक्ये सिद्धत्वात्। पूर्वमिति अवतारिदशायां अवतार्यवतारयोरभेदः 'समान एवं चाभेदा'दिति व्याससूत्रात्। हे ईशेति अवतारिन् आकृष्टसर्वांशेनावतीर्णः वैकुण्ठात् कृष्णत्वेनागतः। पूर्वोक्तत्रयं त्रिभुवनं करोषि। अदित्याः कुण्डलदानेन द्यां पासि। अन्तरिक्षशरीरग्रहणेनान्तरिक्षम्। द्वयोः पालनेन भूः पालितैव, देवाः भूमिं न स्पृशन्तीति। देव त्रैलोक्येति हे देव क्रीडितः त्रैलोक्यधर्मरक्षाः 'उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्। संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजा' इतिवाक्यात्। भारनिराकरणमिति अवतारिणा रघुनाथावतारे रावणवधार्थं प्रार्थितत्वात् तावन्मात्रकरणम्। धर्मरक्षाप्रसङ्गेनान्यदपि शूर्पणखाविरूपादिकरणं न तु मुख्यतया यावद्भारनिराकरणमिति भावः। यदूत्तमेति मत्स्यादिवद् यदूत्तमेति। 'यदूत्तमे'तिव्यवहारः कश्चिद् द्रष्टव्यः। प्रत्युपकार इति त्रिभुवनकरणादेः प्रत्युपकारः। एवेति 'नमो नम इत्येव सदुपशिक्षित'मिति पञ्चमस्कन्धात्। ननु नवावतारकार्यं दशमावतारकार्यं भूभारहरणं चाधिकं प्रार्थितमवतारान्तरकार्यं कुतो न प्रार्थितमित्याशङ्क्याहुः एतान्येवेति। एतैरेव सर्वकार्यसिद्धिरित्यर्थः। सर्वपुरुषेति दशरसत्वाज् जगतः। अत्रेति कृष्णावतारे। प्रार्थयन्तीति 'हरे'ति प्रार्थनार्थकलोडन्तप्रयोगात् तथा। निगूढत्वेनेति अरूपवत्सदृशेन। 'अरूपवदेव हि तत्प्रधानत्वा'दिति सूत्रात्। अन्यत इति बलपार्थभीमाद्द्यतः। तेन (येन) रूपेणेति मत्स्यरूपेण। उक्तरीत्येति 'तथाधुने'तिमूलार्थः, 'तथा पूर्वोक्तत्रय'मित्यादिनोक्तरीत्या। प्रार्थना 'हरे'तिलोटा। राजसूय इति युधिष्ठिरराजसूये। यत्रेति रङ्गभूमौ। अमृतेति 'पयोनिधिं येन निर्मथ्य सुराणां राधिता सुधे'तिवाक्यादेवकारः। 'मेनेङ्ग कण्डूयन'मित्यादिवाक्योक्तं तु ग्रामं गच्छन् तृणं स्पृशतीतिवत्। स्वस्वरूपेति 'क्षुत्तृड्व्यथा'मित्यस्य सुबोधिन्यां स्पष्टम्। अत एवैवकारः। तेनेति गोवर्धनोद्धरणेनासार पीडातो रक्षाम्। पूर्वभक्तमिति पूर्वस्मिन् जयद्वारपालकाले भक्तम्। पाण्डवेति 'पितामहा मे' इतिश्लोके 'व्यवहितपृतनामुखं निरीक्ष्ये'तिश्लोके च प्रथमस्कन्धे स्पष्टम्। श्रीभागवतमूले, गीतायां तु स्पष्टम्। मारितवानिति ते मृतवन्तस्ताम् मारितवान्, कंसादयो मृताः क्रूरकर्मणा तान् मारितवान्। पार्थरक्षार्थमिति भोजनानन्तरमागताद् बहुशिष्याद् दुर्वाससः भक्षयित्वेति स्वार्थेणिच्। सर्वमिति पार्थरक्षाप्रतिकूलम्। यदुद्धारार्थमिति पृथिव्युद्धारार्थम्। पक्षपातेति पक्षपातः सर्वत्र ज्ञेयः। पक्षपातस्तुतित्वात्। तन्मात्रेति पृथिवीमात्रविशेषगुणो गन्धः न्यायप्रसिद्धः तद्ग्राहकेन्द्रियं घ्राणं तस्याधिष्ठाने नसि। प्रकटो भवन्नित्यत्राभवन्निति लिङन्तं पदम्। आगच्छन्निति। तन्मात्रेति पाण्डवमात्रेत्यर्थः। 'अजातशत्रोः प्रतियच्छ दाय'मित्यादिवाक्येभ्यः। 'यद्वा अयं मन्त्रकृद् वो भगवानखिलेश्वरः पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृत'मितिवाक्याच्च। अभवदिति लिङन्तम्। स्थल इति मथुरायाम्। तथाकृतवानिति व्रजस्थानुद्धृतवान्। 'लोके विकुण्ठ उपनेष्यति गोकुलं स्व'मितिवाक्यात्। अन्यत्रेति व्रजादन्यत्र। अग्रे चेति उत्तरार्धे। तथेति हननम्। ब्रह्मादिविषादेति एकादशे त्रयोदशे स्फुटम्। इहापीति अपिना गीता। ननु मर्यादाविरोधितत्त्वोपदेशः शास्त्राणां विषयः कथमिति चेत् तत्राहुरन्यथेति। भूभारहरणमिति अयमर्थः मर्यादाविरोधितत्त्वोपदेशोयं मार्यादिकानामेव न तु पुष्टिमर्यादास्थानां पाण्डवानां यतो गुरुवधादिः पुष्टिमार्गे न दोषः, 'ज्ञानी चेद्

भजते कृष्ण'मिति निबन्धात्, ज्ञानिनस्तु तत्त्वोपदेशवन्तः 'नासाधुना कर्मणा कनीयांस' इति बृहदारण्यक उक्तम्। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुने'ति भगवताप्युक्तम्। अतो ज्ञानिनः पुष्टिमर्यादास्थाः पाण्डवाः। अत उक्तं भीष्मेण सर्वधर्मभृतां वरेण 'व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद् विमुखस्य दोषबुद्ध्या कुमतिमहरदात्मविद्यया य' इति। भगवदीयस्य तु भगवच्चिकीर्षितकार्योन्मुख्येव मतिरुचिता, तद्विरुद्धा कुमतिरेव। अन्यथा धर्मशास्त्रादिषु गुर्वादिहननस्य निषिद्धत्वात् ततो निवर्तिका मतिः कुमतित्वेन नोच्येत सर्वधर्मभृतां वरेण। तथा च मर्यादाविरोधितत्त्वोपदेशः पुष्ट्यंशे ज्ञानिनं विशेषणीकृत्य, ज्ञानिपुष्टिमर्यादास्थाः पाण्डवा इति तथेति ज्ञेयम्। गीतातात्पर्यनाम्नि ग्रन्थे स्फुटम्। मज्जनेति अश्मानम्। अयोध्यास्थानां द्वेषादिकं च। रामोयोध्यास्थान् वैकुण्ठं निनाय। द्वेषादिभाववतां तथा कृतवानित्युक्तोद्धाराविषयत्वमाशङ्क्याहुः द्वेषादीति। 'कामाद् गोप्यो भयात् कंस'इति सप्तमस्कन्धे स्पष्टम्। मात्रिति 'अदितेरास कश्यपा'दितिवाक्याददितिप्रार्थनया। वृकासुरेति अत्र मातृस्थानीयः शिवः। साक्षान्मातृप्रार्थनया प्राकट्यमाहुः देवकीप्रार्थनयेति। आविर्भूयेति द्विभुजत्वेनाविर्भूयेत्यर्थः। स्वानन्दमिति स्वार्थरूपं स्वस्य ब्रह्मण आनन्दम्। एकादशे चतुर्दशाध्याये 'धर्ममेके यशश्चान्य' इतिवाक्यात्। न तु स्वयमिति दृष्टान्ते इन्द्राय दत्तवान् न तु स्वयं विबुधो गृहीतवानिति बोध्यम्। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कोंशोत्र श्लोक उच्यत इत्याकाङ्क्षायामुच्यते। तैत्तिरीये वाक् सन्धिरत्र 'मत्स्याश्वे'त्यादिवाक्। इत्युपपादितं 'दिष्ट्या हरे' इत्यस्य व्याख्यानान्ते। प्रश्ने विशेषाभावः। छान्दोग्ये 'मनः कले'ति 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुव'मिति बृहदारण्यकात्। मनोत्र भक्तिरूपं 'भक्तिरहस्यभजनं, तदिहामुत्र फलभोगनैराश्येनामुष्मिन् मनःकल्पन'मेतदेव च 'नैष्कर्म्य'मिति गोपालतापिनीये। 'मानसी सा परा मते'ति सिद्धान्तमुक्तावल्याम्। 'भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले अपश्यत् पुरुषं पूर्णं मायां च तदपाश्रयाम् यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम् परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो व्यासः चक्रे सात्वतसंहिता'मिति समाधिभाषायां मनसः करणत्वमाभास उक्तमतो मनसः आश्रयत्वं करणत्वं चोक्तम् ॥ ४० ॥

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

तैः फलमाह शृण्वन् गृणन्निति। साङ्गानि कर्माणि वैदिकान्यवश्यं फलदातॄणि —

उपरोक्त श्लोक में भगवान् के नामो व रूपों के अलौकिक व अप्राकृत स्वरूप का वर्णन किया गया कि भगवान् के वे नाम और रूप नित्य तथा आनन्दमय हैं, अब इस श्लोक में उनके लेने और ध्यान करने से जो फल मिलता है उसका वर्णन करते हैं। जो कर्म सांग किये जाते हैं और वैदिक जो कर्म है वे अवश्यफल देने वाले होते हैं यह बात शृण्वन् श्लोक से कहते हैं—

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्' ॥ इस श्लोक द्वारा स्मृति शास्त्र कहता है कि वैदिक कर्म जब अङ्गों सहित पूर्ण किये जाते हैं, तब वे फल देते हैं। यदि उनमें कुछ त्रुटि रह जाय तो फल नहीं देते हैं। अतः उस त्रुटि की उसी क्षण में ही पूर्ति करने के लिए स्मृतिकार ने कहा है कि तपश्चर्या में यज्ञादि क्रियाओं में रही हुई कर्मक्षति की पूर्ति, अच्युत भगवान् की स्मृति से और नाम लेने से हो जाती है। मैं उस अच्युत भगवान् को वन्दन करता हूँ। इस स्मृति वाक्य का पालन वैदिक कर्मों के अन्त में किया जाता है और वहाँ जो फल बताया है वह मोक्ष है। आचार्य चरण कहते हैं कि हमने निबन्ध में स्वर्गपद का विश्लेषण करते हुए यह समझाया है कि 'स्वर्ग' शब्द का तात्पर्यार्थ मोक्ष है। उसे ही यहाँ भी कहा है।

यदि और भक्तजन भगवान् के नामों का उच्चारण करते हैं तथा उनके गुण व रूपों का कीर्तन करते हैं तो उनको सुनकर जो श्रवण करने वाले स्वयं भी उसी भाँति बोलते हैं और स्मरण करते हैं तो वह स्मरण भी अतिशय एकाग्रता से करना चाहिए। श्लोक में संस्मरयन् कहा है। उसका ख्याल रखना चाहिए। और श्लोक में कहे हुए 'च' का तात्पर्य है कि केवल स्वयं भगवन्नाम न लेकर अन्यों को भी भगवन्नाम स्मरण करावे तथा उपदेशादि दान से भगवन्नामों का भाव बताते हुए दूसरों को श्रवण करावे और हो सके तो उन्हींसे नामसंकीर्तन करावे।

चिन्तयन् योगाङ्गध्यातृत्वेन—अब श्री आचार्यचरण 'स्मरण' तथा 'चिन्तन' में रहे हुए भेद को समझाते हैं कि प्रापंचिक पदार्थों के स्मरण से चित्त को रोक कर बार-बार नाम लेना नाम का जप करना ध्यान है, और जिस ढंग से चित्त को किसी प्रकार का प्रयत्न न करना पड़े उस प्रकार अनायास नाम लेने को 'स्मरण' कहते हैं। प्रयत्न से नाम स्मरण में चित्त लगाने को चिन्तन कहते हैं। **तदेव रूपपरिकल्पने ध्यानम्**—उसी चिन्तन के समय में स्मरण करते हुए यदि भगवद्रूप की भी कल्पना की जावे तो वह 'ध्यान' है। इस श्लोक में दूसरे 'च' का यह तात्पर्य है कि यदि भगवान् से सम्बन्ध रखने वाले अन्य विषयों का श्रवण किया जाय तो उनसे भी फलसिद्धि होती है। **मंगलानीति:**—यदि फल प्राप्ति की भावना रही और फलसिद्धि न हुई तो क्या फल प्राप्ति के लिए कोई दूसरा उपाय करना चाहिये ? ऐसी शंका का अवसर ही नहीं है क्योंकि भगवान् के नाम, रूप और गुण तथा भगवत् सम्बन्ध वाले भगवान् के सब पदार्थ मंगलरूप हैं। अतः वे सब मङ्गलरूप है तो सिद्धि की

प्राप्ति में प्रतिबन्ध हो ही नहीं सकता है। क्योंकि आपकी यज्ञादि, भगवत्सेवादि अथवा लौकिक जैसी क्रियाएँ सब मंगलरूप होने से बिना प्रतिबन्ध के सिद्धि देने वाली है।

जिसका चित्त आपके श्रीचरणारविन्दो में संपूर्ण प्रविष्ट हो चुका है वह कदापि संसार में नहीं आता है क्योंकि वह भक्त मुक्त हो जाता है। और संसार में वही आयगा कि जिसमें दोष रहे हों। लेकिन श्रवण स्मरणादि क्रिया करने से सर्व प्रकार के दोषों की जब निवृत्ति हो जाती है, तब अहंताममतारूप संसार का निर्बल बन जाना सहज है। जिससे निर्दोष की मुक्ति हो जाती है ॥ ३७ ॥

कारिका—स्मरणेन क्रियाः पूर्णाश्चित्तावेशश्च तत्र हि। ज्ञानक्रिये यदा विष्णुस्तदा मोक्षो न संशयः ॥ १ ॥

कारिकार्थ—भगवान् के स्मरण से सर्व क्रियाओं में पूर्णता आती है और भगवान में चित्त का प्रवेश हो जाता है। ज्ञान और क्रिया दोनों जब विष्णु रूप हो जाय तब मोक्ष होता है इसमें किसी प्रकार का संशय नहीं है ॥ १ ॥

यद्यपि कारिका में केवल स्मरण का उल्लेख है किन्तु इस स्मरण शब्द से 'श्रवण, स्मरण, चिन्तन और कीर्तन' इन चारों समझने चाहिए क्योंकि इन चारों प्रकार से भगवच्चिन्तनादि करने से भक्त के हृदय में क्रियात्मक भगवान् का आविर्भाव होता है। हृदय में क्रियारूप भगवान् का आविर्भाव होने के फलरूप उस भक्त का चित्त भगवान् के चरणारविन्द में प्रविष्ट होता है। भगवच्चरण में चित्त प्रविष्ट होने से ज्ञान शक्तिरूप भगवान् का भी हृदय में आविर्भाव होगा। इस रीति से जब भक्त की क्रिया तथा ज्ञान शक्ति विष्णुमय बन जाएगी तब मोक्ष होता है। इसमें संशय का अवसर नहीं है ॥ १ ॥

एवं वैदिकप्रकारेण चतुष्टयमुक्त्वा स्वसिद्धान्तानुसारेण चतुष्टयमाह दिष्ट्येति चतुर्भिः।

उपरोक्त चार श्लोकों में वैदिक प्रकार से प्रमाण, प्रमेय, साधन और फल इन चारों का निरूपण किया। अब देवताओं के सिद्धान्तानुसार प्रमाणादि चारों का चार श्लोकों में वर्णन करते हैं।

भगवच्छास्त्रे—भगवत् शास्त्र में भगवान् ही प्रमाण, प्रमेय, साधन और फल हैं। भगवान् का साक्षात्कार अथवा साक्षात्कारकृत भगवान् ही प्रमाण है। भूमि के प्रसङ्ग के कारण हम सब देवता लोग तो कृतार्थ हो गये हैं किन्तु भगवन् केवल, हम ही नहीं किन्तु समग्र जगत् भी भगवान् के प्राकट्य से कृतार्थ हुआ है। हे हरे! आपको पाद रूप भूमि का भार आपके चरण स्पर्श से उतर गया है। पृथ्वी की प्रजा का मर्दन क्लेश तो केवल परमानन्द के प्राकट्य मात्र से दूर हो गया है। पृथ्वी भार नाश का साधन आपका जन्म ही है जिसके लिये अन्य प्रयत्न करने की कोई आवश्यकता नहीं है। क्योंकि जिसका जन्म हुआ है वह भगवान् सर्वथा समर्थ है और सर्व अनर्थों को स्वयं निवृत्त करने वाले हैं। हे हरे! भूमि के भार का निराकरण करना आपके लिये आवश्यक है। और वह हमारे लिये हितकर है। कारण कि पृथ्वी आपकी चरणरूपा है। प्रत्येक व्यक्ति अपने चरणों का भार दूर करता है। अपने उपास्यदेव में दोष न रहे वह समस्तों के लिये हितकर है। इस प्रकार कर्त्तव्य करना आपके लिये आवश्यक है क्योंकि आप स्वयं सर्वदुःखनिवारक हरि हो।

भगवन्, आपका आविर्भाव अलौकिक है। आपके आविर्भाव के लिये संपूर्ण साधन भी नहीं है और आप सर्वात्मक है, ऐसे होते हुए भी जो आप पृथ्वी का भार उतारने के लिये और दैत्यों के विनाश के किये कृपाकर प्रकटे हो, यह हर्ष है। कई लोगों का कहना है कि देवकी के उदर में आना यह पृथ्वी के भार का हरण करना ही है, नहीं कि आपका जन्म है। इसलिये तो पृथ्वी पर केवल आनन्द ही प्रकटे हैं। आपके समागमन से और भी जो कुछ हुआ है उसका वर्णन करते हुए कहते हैं कि देव भी पृथ्वी का स्पर्श नहीं करते हैं तो क्या भगवान् उसका स्पर्श करेंगे? इस शङ्का के उत्तर में कहते हैं कि जो न होने वाला है वह भी यदि आपके जन्म से होगा वह भी प्रसन्नता का चिन्ह है।

सर्वरूपत्वाद्भगवतो मनुष्यरूपेण भुवं स्पृशत्येव:— भगवान् सर्वरूप है अतः मनुष्य रूप से पृथ्वी को स्पर्श करते ही हैं, इसमें क्या आश्चर्य है? ऐसी शङ्का का उत्थान कर देवता उसके समाधान में कहते हैं कि ध्वज, वज्र और अंकुशादि सर्व चिह्नों वाले आपके सुन्दर चरण चिह्नित भूमि का हम दर्शन करेंगे। यह हम लोगों का परम सौभाग्य है। पृथ्वी पद को, ग्रहण करती है यह इस भूमिका भी भाग्य है। खास बात तो यह कि भगवच्च् चरणों की छाया भी पृथ्वी पर पड़ती है। धरा, भगवान् का पद है, भगवान् ने उसका उद्धार भी किया है तथा वह ब्रह्मा की पुत्री है जिससे उसका भगवान् में प्रेम है, प्रेम के कारण भगवान् ने इस प्रकार दर्शन दिये हैं। यह भी प्रसन्नता है। इस श्लोक में व्याकरणानुसार **'गां द्यां च तवानुकम्पिताम्'** इस पद में भूमि के लिए 'तां' पद न देकर गाँ शब्द दिया है उसका भाव आचार्य श्री बताते हैं कि भगवान् के पदों से चिह्नित होने से यह भूमि सकल कामनाओं को कामधेनु के समान पूर्ण करने वाली होगी, एवं पहले यह भूमि ही आंखों से आंसू बहाती हुई, जो रूप धारण करती हुई, हमने देखी थी अब वह ही परमानन्द स्वरूप चरणों से अङ्कित होने के कारण आनन्द में प्रफुल्लित हुई हम देखेंगे, यह भी हमारा महद्भाग्य है यहाँ श्लोक में गो पद देने से ये दो भाव बताये गये हैं। नाथ

पृथ्वी के साथ चरणों द्वारा आपसे अनुकम्पित स्वर्ग को भी देखेंगे। देवों के ऊपर सर्व प्रकार के आपने उपकार किये और अदिति के कुण्डल का दान किया उससे स्वर्ग भी अनुगृहीत है। अतः हमारे देवों का परम भाग्य हैं जो (इन दोनों भूमि तथा स्वर्ग को) इस प्रकार के अनुगृहीत देखेंगे। दर्शन प्रमाण रूप हैं और आविर्भाव प्रमेय रूप है ॥ ३८ ॥

आविर्भावं समर्थयति नतेभवस्येति:—ते, भवस्य जन्म—जन्मरहित आपके जन्म का कारण केवल लीला के बिना अन्य प्रकार का तर्क हम नहीं कर सकते हैं। अथवा विनोद पद में दो शब्द हैं एक 'वि' शब्द है जिसका अर्थ है काल, दूसरा 'नोद' है जिसका अर्थ है प्रेरणा करना। अब विनोद का अर्थ हुआ कि काल स्वयं स्थिर है। सकलों को ही मर्यादानुसार सुखी करता है उस काल को आप जन्म से प्रेरणा करते हो अर्थात् अन्यथा करते हो। अब आचार्यचरण विनोद शब्द का दूसरा अर्थ बताते हैं कि बिना विनोद इन दो पदों को मिलाकार 'विनाविनोद' ऐसा एक पद बनाकर फिर 'विनावि' और 'नोद' ऐसा पदच्छेद करना और 'विनावि' इस संसार नौका में 'नोद' प्रेरणा करना अर्थात् यदि आप संसार नौका को प्रेरणा न करें तो यह संसार रूप नौका कभी भी पार न जा सके। ऐसा कहने का रहस्य यह है कि भाव विकारों से रहित यह संसार ब्रह्मात्मक है और संसार एक प्रकार की नौका है। जैसा कि एकादश स्कन्ध के '**नृदेहमाद्यं सुलभ सुदुर्लभं प्लवं सुकल्प**' इस श्लोक में मनुष्य देह को नौका बताया गया है इसीसे उस नौका को संसार से पार जाने के लिए प्रेरणा की आवश्यकता देखकर आप प्रेरणा देने के लिए ही अपना आविर्भाव करते हो। यदि नाथ, आप कृपा करके भक्तों के यहाँ पति पुत्रादि के आभिमानिक सम्बन्ध रूप से प्रकट न होते तो संसार नाव पार न पहुंचती। आचार्य श्री अब नतेऽभवस्य पदों का अन्य प्रकार से अन्वय करते हैं कि 'न' और 'ते' ये पद भिन्न हैं उनको मिलाकर एक पद 'नते' सप्तमी विभक्ति कर उसका अर्थ करते हैं नते–शरणागते शरणागत पुरुष पर कृपाकर अजन्मा आप जो प्रकट होते हो वह भी संसार नौका को पार करने की प्रेरणा के लिये ही है यों हम तर्क करते हैं। पुनः आचार्य श्री अन्य प्रकार बताते हैं न ते भवस्य इस पद का विच्छेद नतेभ-वस्य नत+इभ और 'वस्य' कर के अर्थ करते हैं कि 'नतेभ' पद में 'नत' और 'इभ' ऐसे दो पद है और 'नत' का अर्थ शरणागत और "इभ" का अर्थ गजेन्द्र अर्थात् जो गजेन्द्र शरण आया है उसको 'व' अमृत अथवा मोक्ष जिससे प्राप्त हुआ उसका जन्म विनाविनोद केवल लीला का है अन्य कुछ नहीं है ऐसा हम अनुमान करते हैं। यद्यपि वैसे पशु जाति के केवल शरण आने से संसार निवर्त्तक 'अभव' का जन्म रहित का जन्म असंम्भावित है तो भी इस प्रकार भी आविर्भाव होने का आशय भी लीला ही है यों हम अनुमान करते हैं। यह संसारसागर नौका रहित है उसको पार पहुंचने की प्रेरणा करने के लिए ही आपका आविर्भाव है। यद्यपि हमारे इस कथन की पुष्टि के लिए न तो कोई प्रमाण है, न तो कोई यथार्थ द्रष्टा प्राप्त पुरुष भी है जो इसका प्रत्यक्ष सबूत दे और न कि आपने भी आज तक इस विषय में कुछ कहा है, इसलिए हम स्वयं वैसा अनुमान लगाते हैं। वस्तुतः यह लीला भी है, या नहीं, इसमें भी सन्देह है, तात्पर्य यह है कि आपके प्राकट्य का कारण आप ही जानते हो अन्य सब अनुमान ही है। न ते भवस्य पद में जो शब्द की षष्ठी विभक्ति का एकवचन है। संपूर्ण पद समासान्त है। वह समास इस प्रकार बहुव्रीहि किया गया है '**न ते भवस्य व यस्मात्**' सः नतेभवः तस्य नतेभवस्य। जिसका अर्थ होता है शरणागत गज को एवं। मोक्ष जिससे प्राप्त हुआ उस भगवान् का जन्म बिना विनोद अन्य कोई कारण है, ऐसा तर्क नहीं कर सकते हैं।

ननु सर्वस्यापि मदंशस्य :—हे देवो! आप मुझे अभव क्यों कह रहे हो, जैसे मेरे अंश रूप जीव का जन्म होता है वैसे मेरा भी जन्म मान लो। तब देवता कहते हैं कि यदि भगवान् ऐसा कहे तो उत्तर यह हैं कि प्राणी मात्र की उत्पत्ति, स्थिति और प्रलय देहगेहद्वारा द्रव्य आदि के अभ्यास के कारण होते हैं। स्वतः तो जीवों का भी जन्म नहीं होता है। वह भी तब होता है जब आप हो। यदि आप नहीं हो तो निराधार जगत् में उत्पत्ति का संभव ही नहीं हो सकता है। यदि आप उदासीन रहे तो भी उत्पत्ति न होगा। अनित्य में भी उत्पत्ति नहीं होती है। कोई समवायी-कारण न हो तो भी उत्पत्ति नहीं होती है। 'समवायीकारण' उसको कहा जाता है जिससे वस्तु बने जैसे कि तंतुओं से पट बनता है तो तन्तु पट का समवायीकारण है वैसे भगवान् से जगत् बना है तो भगवान् जगत् का समवायी कारण है। उत्पत्ति के लिए आधार और समवायी कारण की आवश्यकता रहती है। यदि नाथ! आपको भी उत्पत्ति मानी जाय तो जगत् का अनादिपन न रहेगा तथा जगत् अलीक—असत्य हो जायगा—जैसे आप का प्राकट्य एकाएक होता है वैसे जगत् का भी होगा।

अतो भव आश्रयरूपे आत्मरूपे :—अतः आत्मा के आश्रयरूप होने से ही जीवों की उत्पत्ति आदि होते हैं और आपका तो लीला से ही प्राकट्य होता है। भगवान् जीवों की तरह जन्म लेते हैं यह कहना भगवान् के स्वरूप का एवम् उनके कारण का अज्ञान ही है। भगवान् का जन्म नहीं है किन्तु आनन्दरूप का प्राकट्य है यह निरूपण किया गया है। भगवान् का जन्म मानने से समस्त जगत् अनादि न रहेगा ॥ ३९ ॥

स एव साधनमित्याह—मत्स्याश्वेति।

वही आनन्दरूप भगवान् साधन है। इसका वर्णन करते हैं।

स एव साधनमित्याह मत्स्याश्वेति वही भगवान् साधन है इसका मत्स्याश्व श्लोक से वर्णन करते है—कि प्रथम जैसे आपके नव अवतार हुए वैसे ही यह आपका दशवां अवतार है। इन नव अवतारों में तीन अवतार जल से हुए, तीन बन से हुए और तीन लोक में हुए। मत्स्य, हयग्रीव तथा कच्छप तमोगुण जैसी आकृति वाले हैं। नृसिंह, वराह और हंस राजस गुण समान आकार वाले हैं। रामचन्द्रजी, परशुराम और वामन ये सत्वगुण सहज रूप वाले हैं। मूल में अश्वपद हयग्रीव का वाचक है। अश्व भी जलज जल से उत्पन्न होता है और हयग्रीव भी जलज है। नृसिंह स्तम्भ से प्रकट होने के कारण वनज कहे जाते हैं। वराह की आरण्यक प्रकृति है अतः वनज है। हंस बाहिर वायु वाले खुले आकाश स्थान में रहने की प्रकृति वाला होने के कारण वनज है। जो हंसावतार से प्रकट होकर भगवान् उपदेश द्वारा अन्यों को वनवासी बनाते है अतः हंस जी को वनज कहना यह योग्य ही है। रघुनाथ जी क्षत्रिय है परशुराम जी विप्र है और वामनजी देव है इन तीनों का तरतम भेद बताने के लिए पृथक वर्णन किया है। मत्स्य से अश्व उत्तम है। अश्व से कूर्म उत्तम है। यह उत्तमता कार्य करने से सिद्ध होती है अतः यह उत्तमता देखने में आती है अर्थात् अन्य अवतारों में उत्तमता कार्य समय में देखने में आती है। कूर्म की उत्तमता वास्तविकी है कारण कि कूर्म सदैव जल में रहकर पृथ्वी की रक्षा करते हैं। नृसिंह से वराह इसलिए उत्तम है कि नृसिंहजी ने यथास्थित प्रह्लाद की रक्षा की थी किन्तु वराह ने जल में डूबी हुई पृथ्वी को जल से उपर लाकर उद्धार किया तथा हिरण्याक्ष का वध किया था। वराह से हंस ज्ञानप्रद होने के कारण उत्तम है। क्षत्रिय, ब्राह्मण और देव अवतारों में तरतम भाव एक से एक श्रेष्ठ भाव स्पष्ट ही है। इन नवविध अवतारों ने नवविधों की रक्षा की है। इस समय आपको एक ही अवतार से नवविधों की रक्षा करनी है। ये ही भगवान् जिस जाति की रक्षा करनी होती है उस जाति में अवतार लेकर उस जाति की रक्षा करते हैं। अब देवता उससे भी विशेष प्रार्थना करते हैं कि आपने प्रथम उन में अवतार धारण करके हम लोगों की, तीनों भुवनों की और धर्मादिक की भी रक्षा की है। वैसे ही इस समय भी हे ईश! सर्व प्रकार से सामर्थ्य से अवतीर्ण हुए हो अतः उसी प्रकार देवता, तीन लोक और धर्म की रक्षा करने के साथ विशेष में भूमि का भार उतारने की कृपा करो। आप ईश होते हुए भी लोक में आपका 'यदूत्तम' नाम से व्यवहार होता है। आपके इन उपकारों का बदला केवल वन्दन ही हो सकता है।

श्रीकृष्णावतार के समय देवों ने नव अवतारों के कार्य से अधिक, भूभारहरण कार्य की प्रार्थना की, लेकिन अवतारों के कार्यों से विशेष अन्य कार्यों की प्रार्थना क्यों नहीं की ? इस शङ्का के उत्तर में श्री मदाचार्य चरण आज्ञा करते हैं कि भगवान् के ये मत्स्यादि अवतार ही सर्व कार्य साधक हैं। इस प्रसङ्ग में जो मत्स्यादि अवतारों का वर्णन दृष्टान्त रूप से किया गया है उसका यह भाव है कि पृथ्वी पर जो भार रूप असुर नृपति हुए थे उनके नाश के लिए ही भगवान् अवतार लेते हैं। इसलिए जो अवतार लिये जाते हैं तो उन असुर राजाओं से युद्ध होने की सम्भावना होती है। लेकिन भगवान् में अतिशय अनुराग के कारण अनन्य भक्तजन वह युद्ध नहीं चाहते हैं कारण कि युद्ध में भगवान् को अतिशय कष्ट उठाना पड़ेगा। और भक्तों से वह सहन नहीं किया जा सकता है। 'रूपंचेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मां सदृशां कृषीष्ठाः और जन्मते मय्यसौ' इन दो श्लोकों में देवता कहते हैं कि यह आपका पौरुष जन्म हमारे लिये है। अतः देवकीजी के समान भगवान् का माहात्म्य जानते हुए भी भक्त होने के कारण भूभार का हरण युद्ध बिना अन्य प्रकार से करने की प्रार्थना करते हैं।

यावत्स्वस्यैश्वर्याद्यप्रकटनेन निगूढत्वेनान्यतो वा :—जब तक आपने अपने ऐश्वर्य आदि को प्रकट नहीं किया है तब तक गुप्त रीति से अन्य द्वारा शत्रुओं का नाश हो सके तब तक युद्ध नहीं करना। वहाँ पर प्रलयाब्धि के समय में सत्यव्रत आदि का भक्तजन रक्षणीय है।

(१) भगवन् आपने पुरुष रूप धारण किया है, इसलिये आप युद्ध द्वारा रक्षा करना चाहोगे तो युद्ध रूप महासागर में युद्ध क्लेशादि रूप मकरों से भय की सम्भावना है ऐसे विचार से स्नेह भाव वश भक्तों को दुःख होगा। वह दुःख भक्तों को अभीष्ट नहीं है अतः जैसे हीन जाति वाले मत्स्य का रूप धारण कर सुख पूर्वक विनाश्रम जल संचार करते हुए रक्षण किया था वैसे अब भी करो यह प्रार्थना है। इसी कारण से अपने ऐश्वर्य के विरुद्ध होते हुए भी भीमसेन ने याचक बनकर जरासन्ध को मारा न कि भीम ने क्षात्र रूप से मारा।

(२) भगवन् आपने हयग्रीव रूप से ब्रह्मा के सत्र में प्रकट होकर असुर बध तथा वेद की रक्षा की। यहाँ भी राजसूय यज्ञ के समय प्रकट होकर ब्रह्माजी के स्वरूप ब्राह्मणों का सम्मान कर धर्म मर्यादा की स्थापना की और वेदविरुद्ध बकवास करने वाले शिशुपाल का बिना श्रम विनाश किया। (३) कच्छपावतार में 'मेनेऽङ्गकण्डूयनं ८.७-१० इस वाक्यानुसार खुजली मानकर आपने सुखपूर्वक 'मन्दराचल' को धारण किया। वैसे ही यहाँ भी विशेष वीर्य शक्ति के कारण भुजाओं में उत्पन्न हुई खुजली की शान्ति करने के लिये लीलामय युद्ध करना, न कि सामने आये हुए प्रतिपक्षी योद्धाओं को मारने के लिए। जब ऐसा अवसर हो तो, उनको मारने के लिए दूसरों को प्रेरणा कर दें। यही हमारी प्रार्थना है लेकिन आप कृपया विशेष श्रम न करें। अतः भगवान् का जहाँ जहाँ युद्ध हुआ है वहाँ वहाँ ऐसा ही किया है, तात्पर्य यह है कि भगवान् ने

अपने अन्य व्यूहों को प्रेरणा की है। जैसे राजा लोग क्रीड़ा के हेतु शिकार खेलते हैं वैसे ही भगवान् युद्ध करते हैं। इसलिए कहा गया है। विक्रीडितं तव्जगदीशयोः परम् यह जगत् के दोनों ईशों की क्रीडा है। जिस प्रकार अमृतदानार्थ कच्छपजीने मन्दराचल को धारण किया वैसे ही यहाँ पर अपने आनन्दमय निज स्वरूप रूप अमृत के दान के लिए ही गोवर्धन को धारण किया है और उससे व्रजमण्डल की रक्षा भी की है। (४) नृसिंह अवतार में पूर्व जन्म के भक्त जय विजय और इस जन्म में भक्त के पिता हिरण्यकशिपु का भक्त प्रह्लाद की रक्षा के लिये यकायक प्रकट होकर नाश किया। यह भी जताया कि नृसिंहावतार के समय दैत्यत्व के तथा क्रूर होने के कारण लक्ष्मीजी भी स्वयं समीप नहीं जा सकती थी तो भी आपके पास भक्त जा सकते थे कारण कि भक्तों को आनन्द रूप से ही दर्शन देते थे। यहाँ भी पाण्डवों की रक्षा के लिए आसुरावेशी उनके भीष्म आदि पितामहादि का विनाश किया। वैसे ही कंसादिकों का भी बध किया। वनवास में पार्थ रक्षार्थ अचानक आविर्भूत होकर शेष बचे हुए शाकान्न का उपभोग कर सबका समाधान किया। (५) श्री वराहजी श्री नृसिंहजी के समान प्रकट न होकर जिस पृथ्वी के उद्धार के लिए स्वयं प्रकट हुए थे उस पृथ्वी के गन्ध गुण को ग्रहण करने वाली नासिका इन्द्रिय को अधिष्ठान बनाकर उससे प्रकट होकर आपने पृथ्वी से अपना स्पष्ट पक्षपात दिखा दिया। इस कृष्णावतार में भी पाण्डवों के रक्षणार्थ विदुरजी के घर में बिराजे परंतु अन्यत्र दुर्योधनादि के राजभवन में नहीं बिराजे। कारण कि विदुरजी पाण्डवों के गुणों के ग्राहक थे। इसी प्रकार व्रज भक्तों के उद्धारार्थ व्रज जनों से सम्बन्धित श्री गोकुल में स्वयं प्रकट होकर व्रज भक्तन की रक्षा की लेकिन अन्यत्र स्थिति नही की। इसी भाँति विदर्भराजतनया रुक्मिणीजी का शिशुपाल से उद्धार करते हुए, हिरण्याक्ष की तरह मार्ग के मध्य में अन्तराय करनेवाले रुक्मी को बाँधकर ही स्वकार्य सिद्ध किया, लेकिन मङ्गल प्रस्थान के अवसर रुक्मी को मारा नहीं। आगे चलकर समय आने पर श्रीबलभद्र द्वारा रुक्मि का बध किया। (६) जैसे हंसावतार में तत्त्वज्ञान का उपदेश देकर सनत्कुमारोने ब्रह्मादिकों का विषाद नष्ट किया वैसे यहाँ भी यदि वैदिक मर्यादा के विरुद्ध गुरुवध करना पाप समझ कर स्वधर्म युद्ध से विमुख, भक्तवर अर्जुन की चिन्ता और विषाद को मिटाने के लिए श्रीमद्भगवद्गीता द्वारा तत्त्व ज्ञान का उपदेश दिया और पृथ्वी पर बढ़ा हुआ असुर राजाओं का भार उतारा।

(७) रामावतार में डूबने के साधन पत्थरों को तारने का साधन बनाकर एकभक्ता श्रीजानकी जी और एक भक्त विभीषण के लिए अनेक दैत्यों का नाश किया वैसे ही यहाँ इस कृष्णावतार में एक पृथ्वी के लिए और अनेक व्रजभक्त गोपीजनों के लिए अनेकों का मारे। एक पृथ्वी के लिये अनेकों को कैसे मारा? इस शङ्का के निवारण के लिए कहते हैं कि असुरावेशी राजाओं में जिनको मारा था उनमें द्वेषादिभाव था। जिनको इन्होंने मारा वे नाम मात्र के लिये ही गये थे किन्तु उनका उद्धार हो गया। (८) परशुरामावतार ब्राह्मण वृत्ति होते हुए भी उसमें घोर क्षात्र धर्म स्वीकार कर असुर क्षत्रियों का बध किया है। इस अवतार में ब्रह्मत्व समान होते हुए भी दैत्य बध करना ही है। (९) देवावतार में श्रीवामनजीने तो माता की प्रार्थना से प्रकट होकर जिस त्रैलोक्य का लेने के कार्य को ब्रह्मादिक भी नहीं कर सके, उस कार्य को केवल अनायास वाणीमात्र व्यवहार से कर दिखाया। इस प्रकार यहाँ वृत्रासुर बध में यह स्पष्ट है। माता श्रीदेवकीजी की प्रार्थना से प्रकट होकर ब्रह्मादिकों को कठिनाई से मिलने वाला अपना आनन्द यादवों को दान दिया। राज्य के लोभी कंस को मारकर राज्य उग्रसेन को दिया आपने नहीं लिया था। इस प्रकार नमस्कार पर्यन्त भगवान् की स्तुति की गई है। कंसादिवध तो भूतल पर अवतारी स्वरूप से पधारने में अप्रयोजक है इसलिए इसकी पृथक् विशेष रूप से गणना नहीं की है॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्रवणादिभक्त्या भक्तानामेव मोक्ष इत्युपसंहरति–शृण्वन्निति। मङ्गलानि श्रवणादिपरस्य मोक्षप्रतिबन्धकदुरितनिरासपूर्वकं पुण्यावहानि ते तव नामानि रूपाणि चकारात् कर्माणि च वक्तरि सति शृण्वन्, श्रोतरि सति गृणन् कीर्तयन्, श्रोतृवक्त्रोराभावे स्वयमेव संस्मरयन्, चिन्तयन्, चकारादन्यानपि स्मारयन् क्रियासु लौकिकालौकिकव्यापारेषु वर्तमानोऽपि युष्मच्चरणारविन्दयोराविष्टमासक्तं चित्तं यस्य सः। पुनर्भवाय संसारप्राप्तये न कल्पते न योग्यो भवतीत्यर्थः। प्रयत्नं विना मानसिकव्यापारः स्मरणम् सप्रत्नश्च सञ्चिन्तनमिति भेदः॥ ३७ ॥ भवदवतारेणास्मद्वाञ्छितं सर्वमेव जातप्रायमित्याहुः— दिष्ट्येति। आश्रितार्तिहरणशीलस्य तव तदर्थमवतारो युक्त एवेत्याशयेन सम्बोधयन्ति हे हरे इति। तव जन्ममात्रेण भवतः पदः पादभूताया अस्या भारार्ताया भुवो दैत्यादिजनितो भारोपनीतो दूरीकृत एवेति दिष्ट्या भद्रं जातम्। किञ्च सुशोभनैर्वज्राङ्कुशादिभिः शुभलक्षणैस्त्वत्पदकैस्तव कोमलैश्चरणैरङ्कितां तव त्वयानुकम्पितां कृपादृष्ट्यावलोकितां गां पृथ्वीं द्यां स्वर्गं च वयं द्रक्ष्यामेत्यपि दिष्ट्या भद्रमेव। जन्ममात्रेण चरणस्पर्शेन वा कथं भारापगमादि तत्राहुः– ईशितुरिति। देवानां पादस्पर्शोऽपि भुवो दुर्लभः, किं पुनर्देवदेवस्य भगवतः पादस्पर्श इत्याश्चर्यम्? भगवत्कृपायाः कृत्यमित्याशयः। अदित्याः कुण्डलदानार्थं स्वर्गे गमनात्तत्रापि पादाङ्कितत्वं बोध्यम्॥ ३८ ॥ भारोऽपनीतस्तव जन्मनेति जीववज्जन्मोक्त्यापराधमाशङ्क्य तन्निरासाय संकल्पमात्रे भूभारहरणादि कर्तुं समर्थस्यापि तवावतारे स्वजनानां श्रवणादिसुखपूर्वकोद्धारार्थलीलासङ्कल्प एव कारणमित्याहुः—न तेऽभवस्येति हे ईश?

ते तव भवस्य जन्मनः कारणं विनोदं क्रीडासङ्कल्पं विनान्यन्न तर्कयामः। ननु जीववन्ममापि जन्म कुतो नेत्याशङ्क्याहुः-भव इति। आत्मनि जीवात्मन्यपि भवो जन्मनिरोधः मरणं स्थितिश्चेत्येते त्रयो यतस्त्वयि निमित्ते सति अविद्यया देहेन्द्रियान्तःकरणादावात्माध्यासेनैव कृता भवन्ति, अविद्यानिवृत्तौ तु तस्यापि जन्मादयो न भवन्ति। तव तु जन्मादि तद्वत्कथं स्यात्। तत्र हेतुमाहुः-अभवस्येति। अविद्यारहित-येनासंसारिण इत्यर्थः। तत्र हेतुं सूचयन्तः सम्बोधयन्ति-हे अभयेति। स्वयं भयरहितोऽन्यभयनिवर्तकश्चोभयथाप्यभयस्तत्सम्बोधनम्। अविद्यानिवारणेन जीवाभयप्रदस्य कथमविद्याधीनत्वं स्यादित्याशयः। तत्र हेतुं सूचयन्तः पुनः सम्बोधयन्ति—हे आश्रयेति। अविद्यादिसकलाधारभूते-यर्थः। तत्रापि हेतुः-ईशेति। सम्बोधनेन सूचितलोकवज्जन्मप्रतीतेराश्चर्यं तव लीलाया इति सूचयन्ति— बतेति॥ ३९॥ प्रस्तुतं प्रार्थयन्ते –मत्स्येति। हे ईश कर्तुमकर्तुमन्यथा कर्तुं समर्थ ? अन्यदा यथा मत्स्यादिषु कृतावतारः संस्त्वं नः अस्मान् देवान् त्रिभुवनं त्रिभुवनस्थान् साधुजनांश्च पासि तथाऽधुनापि भुवो भारं हरेत्यन्वयः। एवं परमोपकारिणः परिपूर्णस्य तव नमनव्यतिरेकेण प्रत्युपकारे वयमसमर्था इति सूचयन्तो हे यदूत्तम ? ते वन्दनमिति वदन्तः सर्वे प्रणमन्ति। अश्वो हयग्रीवः। राजन्यः श्रीरामः। विप्रः परशुरामः। विबुधो वामनः॥ ४०॥

अन्वितार्थप्रकाशिका

तस्माद् भक्त्यैव मोक्ष इत्युपसंहरन्ति शृण्वन्निति॥ मङ्गलानि पुण्यावहानि ते तव नामानि रूपाणि चकारात्कर्माणि शृण्वन् स्वयं स्मरन् अन्यांश्च सोत्कण्ठं संस्मारयन् चिन्तयंश्च श्रवणादीनां विकल्पो ज्ञेयो नतु समुच्चयः। क्रियासु लौकिकालौकिकव्यापारेषु वर्त्तमानोऽपि क्रियासु देवार्चनादिष्विति स्वामिपादाः। युष्मच्चरणारविन्दयोराविष्टमासक्तं चित्तं यस्य। यद्वा। क्रियासु त्वल्लीलासु त्वच्चरणारविन्दयोश्चाविष्टचित्तः स पुनर्भवाय संसारप्राप्तये न कल्पते न योग्यो भवतीत्यर्थः। प्रयत्नं विना मानसिकव्यापारः स्मरणं स प्रयत्नश्च सचिन्तनमिति भेदः॥ ३७॥ दिष्ट्येति॥ हे हरे ! ईशितुः ईश्वरस्य तव जन्ममात्रेण भवतः पदः पदजातत्वेन त्वभेदात् पादभूताया अस्या भारार्त्ताया भुवो दैत्यादिजनितो भारोऽपनीतो दूरीकृत एवेति दिष्ट्या भद्रं जातम्। किंच सुशोभनैर्वज्राङ्कुशादिभिः शुभलक्षणैः त्वत्पदकैः। अल्पार्थे अनुकम्पायां वा कन्। कोमलैः पदैरित्यर्थः। अङ्कितां तव त्वयाऽनुकम्पितां कृपादृष्ट्याऽवलोकितां गां पृथ्वीं द्यां स्वर्गं च वयं द्रक्ष्यामेत्यपि दिष्ट्या भद्रमेव। सलोप आर्षः। अदित्याः कुण्डलदानाद्यर्थं स्वर्गे गमनात्तत्रापि पादाङ्कितत्वं बोध्यम्॥ ३८॥ जन्मनेत्युक्त्या प्रसक्तं संसारित्वकथनापराधं मार्जन्ति –न ते इति॥ हे ईश ! हे अभय भयरहित ! हे आश्रय यद्वा। अभवाश्रय अभवस्य असंसारिणः तव भवस्य जन्मनः कारणं विनोदं क्रीडासंकल्पं विनान्यन्न तर्कयामहे। लीलार्थमेव जन्म कंसवधादि त्वत्तितुच्छम्। यतः आत्मनि जीवात्मन्यपि भवो जन्म निरोधः मरणं स्थितिश्चेत्येते त्रयो यतस्त्वयि विषये अविद्याकृता न परमार्थतः सन्तीति। तव तु जन्मादि तद्वत्कथं स्यात्। यद्वा। प्रपञ्चस्य सृष्ट्यादिका अपि त्वदाश्रितया अविद्ययैव कृताः। तत्र कंसवधादेः का वार्त्ता॥ ३९॥ मत्स्याश्वेति॥ हे ईश ! अन्यसमये यथा मत्स्यादिषु कृतावतारः सन् त्वं नः अस्मान् देवान् त्रिभुवनस्थान्साधुजनांश्च पासि तथाऽधुना भुवो भारं हरेत्यन्वयः। अधुना भूभारहरणमेवास्माकं पालनम् इत्याशयः। तत्र अश्वो हयग्रीवः राजन्यः श्रीरामः विप्रः परशुरामः विबुधो वामनः। हे यदूत्तम ! ते वन्दनमिति वन्दतः सर्वे प्रणमन्ति। तवोपकारस्य प्रणमन्ति। तवोपकारस्य प्रणाम एव प्रत्युपकार इत्याशयः॥ ४०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इन्द्रादिनामरूपेभ्यो हरेरसाधारणनामरूपाणां हि ध्येयत्वादिकं वदन्तः स्तुवन्ति॥ शृण्वन्निति॥ यः पुमान्, ते तव, मङ्गलानि मङ्गलावहानि, नामानि कृष्णहरिकृष्णादीन्यभिधानानि, रूपाणि कृष्णशुक्लवर्णादीनाकारांश्च, शृण्वन् वक्तृसंनिधाने सत्याकर्णयन् गृणन् श्रोतृसंनिधाने सति तान् प्रति कथयन्, तदुभयासंनिधौ संस्मरयन् णिजर्थस्त्वविवक्षितः चिन्तयंश्च सन्, क्रियासु वैदिकासु आसनाटनभोजनादिलौकिकक्रियासु चापि, त्वच्चरणारविन्दयोः, आविष्टचित्तः आसक्तमतिः भवेत्, सः पुमान्, भवाय श्रेयसः समृद्ध्यर्थं, कल्पते योग्यो भवति। स इत्यत्र नेति पाठे, भवाय संसृतये, न कल्पते। किं तु मुक्तये कल्पते इत्यर्थः॥३७॥ आत्मनां प्रकृतावतारप्रयुक्तमानन्दमाविष्कुर्वन्तः स्तुवन्ति॥ दिष्ट्येति॥ दिष्ट्येत्यानन्दद्योतकमव्ययम्। हे हरे आश्रितार्त्तिहारिन्, ईशितुरीश्वरस्य, तव जन्मना, भवतः पदा पादविन्यासेन च, पद इति पाठे, भवतः पदः, तव पदरूपाया इत्यर्थः। अस्याः भुवः, भारः अपनीतः अपहृतप्रायो जात इत्यर्थः। इदं, दिष्ट्या अस्माकमानन्दकृदित्यर्थः। सुशोभनैः ध्वजवज्राङ्कुशयवोर्ध्वरेखात्मकचिह्नैश्चारुभिरित्यर्थः। त्वत्पदकैः तव पादविन्यासैः, अङ्किताम् अलंकृतां, तव त्वया, अनुकम्पितामनुकम्पाविषयतामुपनीतां, गां भूमिं, द्यां स्वर्गं च, द्रक्ष्याम द्रक्ष्यामः। एतदपि दिष्ट्या दिष्ट्येत्यस्य पूर्ववदर्थः॥ ३८॥ अथावतारनिमित्तमाविष्कुर्वन्तः स्तुवन्ति। नेति। हे ईश, अभवस्य कर्माधीनोत्पत्तिरहितस्य, ते तव, भवस्य जन्मनः, कारणं निमित्तं, विनोदं विना, लीलार्थकसंकल्पमृते इत्यर्थः। न तर्कयामहे। तदर्थमेवेति जानीम इत्यर्थः। बतेत्याश्चर्ये अनितरसाधारणत्वाद्विस्मयः। यथा सृष्ट्यादिजगद्व्यापारो विनोदमात्रानुकूलसंकल्पपूर्वकस्तद्वत्त्वज्जन्माऽपीत्यभिप्रायेणाहुर्भव इति। यतो भवद्विनोदादेव निमित्तात्, हे अभय, पाठान्तरे हे अभव, अविद्यया संसारिणा ज्ञानविरोधिन्या प्रकृत्या, जगत इति शेषः। भवः प्रादुर्भावः, स्थितिः पालनं, निरोधो लयश्चापि, इत्येते

त्रयोऽपि विकाराः, आश्रयात्मनि आश्रये तस्याधारभूते, आत्मनि अन्तरात्मनि, आश्रयेऽऽत्मनि इति पाठे, 'गूढोऽऽत्मा न प्रक शते' इतिवद्वर्णविकारः। त्वयि, कृताः तमेव विनोदमभवस्य तव भवकारणं मन्यामहे इत्यर्थः। आश्रयात्मनीति संधिरार्षः। अनेन जगत उत्पत्त्यादयो विकाराः प्रकृतिगता न स्वरूपगता इति सूचितम्। अस्माभिर्जगदुत्पत्त्यादिकं यद्विधीयते तत्त्वन्निदेशागतैश्वर्येण, त्वयि तु साहजिकं, तदपि विनोदानुकूलसंकल्पमात्रतस्तदपि अविद्याद्वारजमेवेति त्वमपारैश्वर्य इति भावः ॥ ३९ ॥ यथा मत्स्याद्यवतारपरिग्रहेणास्मान् रक्षितवानेवमधुना भूभारापहारद्वाराऽस्मान् पाहीत्याहुः । मत्स्येति। मत्स्यश्च अश्वश्च कच्छपश्च नृसिंहश्च वराहश्च हंसश्च राजन्यः क्षत्त्रियश्च विप्रश्च विबुधा देवाश्च तेषु, कृतः परिगृहीतोऽवतारो येन स तथाभूतः, त्वं नोऽस्मान्, त्रिभुवनं त्रिलोकीं च, यथा पासि रक्षितवान्, तथा अधुनाऽपि, हे ईश, भुवः भारं हर अपनय। हे यदूत्तम, ते तुभ्यं, वन्दनं, नमस्कुर्म इत्यर्थः ॥४०॥

कृष्णप्रिया

हे भगवन्! आपके मङ्गलमय नाम और मङ्गलमय रूपों को स्मरण करते हुए, सुनते हुए, कहते हुए और चिन्तन करते हुए जो पुरुष देवार्चनादि क्रियाओं के करने के समय आपके चरणारविन्द में ही चित्त स्थिर रखते हैं। उनका कभी भी पुनर्जन्म नहीं होता है ॥ ३७ ॥ हे हरे। प्रसन्नता का विषय है कि आपके श्रीचरण स्वरूप इस भूमि का भार, आप प्रभु के जन्म प्रादुर्भाव से दूर हो गया। आपके सुन्दर चरणारविन्दों से चिह्नित तथा कृपावाली पृथ्वी और स्वर्ग को हम देखेंगे यह भी हर्ष का विषय है ॥ ३८ ॥ हे ईश! हे श्रीकृष्ण! आप यद्यपि अजन्मा हो, फिर भी जन्म लेने का कारण केवल क्रीड़ा बिना दूसरा कोई हेतु हमारे विचार में नहीं आता है। जन्मरहित, आपके विषय में जन्म, निरोध तथा स्थिति, अज्ञान के कारण, हम देखते हैं ॥ ३९ ॥ हे यदूत्तम! मत्स्य, कच्छप, नृसिंह, वराह, हंस, क्षत्रिय, विप्र और देवों में अवतार धारण करके आपने दूसरे समय में जैसे हमारी तथा त्रिलोकी की रक्षा की है वैसे अब भी करो और पृथ्वी का भार उतारो। हे ईश! हम आपको प्रणाम करते हैं ॥ ४० ॥

दिष्ट्याम्ब[1] ते कुक्षिगतः परः पुमानंशेन साक्षाद् भगवान् भवाय नः।
मा भूद् भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः ॥ ४१ ॥

श्रीशुक उवाच

इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा। ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवम्॥४२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे [2]जन्मप्रकरणे
समुद्यमो नाम द्वितीयोऽध्यायः [3]॥ २ ॥

कर्दमक्षमा

अन्वयः— हे अम्ब दिष्ट्या ते कुक्षिगतः अंशेन परः पुमान् साक्षात् भगवान् नः भवाय (समागतः) मुमूर्षोः भोजपतेः भयम् मा भूत् तव आत्मजः यदूनाम् गोप्ता भविता ॥ ४१ ॥ श्रीशुक उवाच—इति पुरुषम् यद्रूपम् अनिदम् यथा तथा अभिष्टूय ब्रह्मेशानौ पुरोधाय देवाः दिवम् प्रतिययुः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

देवकीं प्रत्याहुः। दिष्ट्येति। नोऽस्माकं भवायोद्भवाय साक्षात्परः पुमांस्ते कुक्षिं गतोऽतो भयं माभूदिति ॥ ४१ ॥ यस्य रूपमनिदं सर्वप्रत्यग्भूतम्। यथा यथावत्। अस्मान्वंचयित्वा एताविह स्थास्येते इति मन्यमाना ब्रह्मेशानौ पुरोधाय पुरतः कृत्वा ययुरिति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे टीकायां द्वितीयोऽध्यायः ॥ २ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रत्याहुः सांत्वयामासुः। यदूनाम् अंशेनापि भोजपतेः कंसस्य सकाशाद्भयं मा भूत् किं तु हर्यवतारेण सर्वं तेषां भयं नष्टं भविष्यतीति। यद्वा—योंशेनः परः पुमान्प्रकृतीक्षणकर्त्ता पुरुषः स साक्षादिति संबंधः। अन्यथा 'कृष्णस्तु भगवान्स्वयम्' इत्युक्तिरसमंजसा स्यादिति भावः। हे अम्बेति। भगवन्मातृत्वेन परमवंद्यत्वात्। यद्यपि मनस्तो दधारेत्युक्तं तथापि मातरि कुक्षिगत

---

[1] दिष्ट्या च ते इति कस्यचित्। [2] गर्भगत विष्णोर्ब्रह्मादिकृतस्तुतिर्नाम—इति कस्यचित्। [3] तृतीयोऽध्यायः—विज.।

इति तथैव वक्तुं योग्यत्वादुक्तम्। अंशेन श्रीबलदेवेन तस्यापि तस्यां जन्म प्रकाशितमिति यद्वांशेन मत्स्यादिना योऽस्माकं भवाय भवेत्स एव साक्षात्ते कुक्षिगत इति दिष्ट्या। ननु कंसस्य दुश्चेष्टाभरेण बिभेमि तत्राहुः—मुमूर्षोरिति। निकटापातमृत्युत्वादेवं चेष्टत इति भावः। ते भयं मा भूत्त्वं भयं मा कुर्वित्यर्थः। ननु जाने तावदेव किमनिष्टं स्यात्तत्राहुः—यदूनां सर्वेषामपि किं पुनस्तव श्रीवसुदेवादीनां तस्य स्वस्य चेत्यर्थः। एवं नित्यमेव देवास्तां स्तुवंतीति ज्ञेयं तदुक्तं वैष्णवे "अदृष्टाः पुरुषस्त्रीभिर्देवकी देवता गणाः। बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम्॥" इति विश्वनाथः॥ ४१॥ सर्वप्रत्यग्भूतं सर्वांतरम्। यद्वानिदम्। इदंतया वक्तुमशक्यं प्रत्यक्षजगद्विलक्षणम्। 'एताविह स्थितौ किञ्चिद्रहस्यं मा द्रक्ष्यत' इति मन्यमाना देवा ब्रह्मेशानौ पुरोधायैव ययुरिति भावः॥ ४२॥ गर्भस्य देवक्यष्टमगर्भस्य स्तुतिर्यस्मिन् स गर्भस्तुतिः अस्य द्वितीयाध्यायस्य नामेत्यर्थः॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे द्वितीयोऽध्यायः॥ २॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमन्यैरलक्ष्यमाणा देवाः श्रीभगवन्तं स्तुत्वा तेनैवातिविस्मितां श्रीदेवकीमाश्वासयन्ति—दिष्ट्याम्ब! इति हे मातरिति भगवन्मातृत्वेन परमवन्द्यत्वात् यद्यपि मनस्तो दधारेत्युक्तं तथापि कुक्षिङ्गत इति मातरि तस्यां तथैव वक्तुं योग्यत्वादुक्तं परः पुमान् परमपुरुषोत्तम इत्यर्थः। तत्र साक्षात् स्वयमेव न त्वंशादिना अत एव भगवान् सर्वैश्वर्ययुक्तः अंशेन श्रीबलदेवेनेति तस्यापि तस्यां जन्म प्रकाशितमिति ज्ञेयं न इति साक्षात्तदङ्गविशेषयोर्युवयोर्भवायेति किम्वक्तव्यमपि तु तत्प्रजानामस्माकमेवेत्यर्थः। यद्वा, अंशेन मत्स्याश्वादिना योऽस्माकं भवाय भवेत् स एव साक्षात्ते कुक्षिं गत इति यत् एतद्दिष्ट्या। ननु, कंसस्य दुश्चेष्टाभरेण बिभेमि तत्राहुः—मुमूर्षोरिति। निकटायातमृत्युत्वादेवं चेष्टत इति भावः। ते भयम्माभूत्त्वं भयमाकुर्वित्यर्थः। ननु, न जाने तावदेव किमनिष्टं स्यादिति तत्राहुः—यदूनां सर्वेषामपि किम्पुनस्तव श्रीवसुदेवादीनां वा तस्य स्वस्य वेत्यर्थः। एवं नित्यमेव देवास्तां स्तुवन्तीति ज्ञेयं तथा च विष्णुपुराणे—

"अदृष्टाः पुरुषैः स्त्रीभिर्देवकीं देवतागणाः। बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम्"॥ ४१॥

पुरुषमिति श्रीदेवकीहृदयपुरे स्थित्यभिप्रायेण। यद्वा परमपुरुषोत्तमं यस्य रूपमनिदं प्रपञ्चातीतं परब्रह्मात्मकं तथा तथाभूतत्वेन स्तुतेरविषयमपीत्यर्थः। इत्यनेन देवकीजन्ममात्रेणैव भूभारोऽपनीत इत्यादिगर्भितेन प्रकारेणाभितः स्तुत्वेति परमात्मतादिवर्णनेन स्तवनादपि श्रीदेवकीगर्भजातत्वादिवर्णनस्तुतेरुत्कर्षोऽभिप्रेतः॥ ४२॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां द्वितीयोऽध्यायः॥ २॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

४१—एवमन्यैरलक्ष्यमाणा देवाः श्रीभगवन्तं स्तुत्वा तेनैवातिविस्मितां श्रीदेवकीमाश्वासयन्ति—दिष्ट्याम्बेति, हे मातरिति भगवन्मातृत्वेन परमवन्द्यत्वात् यद्यपि मनस्तो दधारेत्युक्तम्, तथापि कुक्षिंगत इति स्नेहविशेष-जननार्थं तव पुत्र इत्यर्थः। भक्तवात्सल्येन स्नेहभर-जननार्थं कुक्षिप्रवेशोऽपि भगवत्तया विकारादिदोषाभाव एवेति सिद्धान्तेऽपि विरोधो न स्यादेव। परः पुमान् पुरुषोत्तमः परमेश्वर इत्यर्थः। तत्र च साक्षात् स्वयमेव, न त्वंशादिना, अतएव भगवान् सर्वैश्वर्ययुक्तोंऽशेन श्रीबलदेवेनेति तस्यापि तस्यां जन्म प्रकाशितमिति ज्ञेयम्। यद्वा, योंऽशेन मत्स्याश्व-कच्छपादिना नोऽस्माकं भवाय भवेत्, स एव साक्षात् ते कुक्षिं गत इति यदेतद्दिष्ट्या। 'नः' इति श्रीदेवकी-वसुदेवादीनप्यात्मीयत्वेन गृह्णन्ति। ननु कंसस्य दुश्चेष्टाभरेण बिभेमि? तत्राहुः—मुमुर्षोरिति निकटायातमृत्युत्वादेवं चेष्टत इति भावः। ननु न जाने तावदेव किमनिष्टं स्यादिति? तत्राहुः—गोप्तेति, यदुनां सर्वेषामपि, किं पुनस्तव वसुदेवादीनामेवेत्यर्थः। एवं नित्यमेव देवास्तां स्तुवन्तीति ज्ञेयम्। तथा च श्रीविष्णुपुराणे (५।२।६) 'अदृष्टाः पुरुषैः स्त्रीभिर्देवकीं देवतागणाः। बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम्॥' इति॥

४२—पुरुषमिति श्रीदेवकीहृदयपुरे स्थित्यभिप्रायेण; यद्वा, पुरुषोत्तममपि यस्य रूपमनिदं प्रपञ्चातीत परब्रह्मात्मकमित्यर्थः। तथाभूतमपीत्यनेन देवक्यां जन्ममात्रेणैव भूभारोऽपनीत इत्यादिप्रकारेणाभितः स्तुत्वेति परमात्मतादिवर्णनेन स्तवनादपि देवकीगर्भजातत्वादि-वर्णनस्तुतेरुत्कर्षोऽभिप्रेतः॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामि-पाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां द्वितीयोऽध्यायः॥ २॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

देवकीं प्रत्याहुः—दिष्ट्याम्बेति भवाय समृद्ध्यै॥ ४१–४२॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृते शुकपक्षीये द्वितीयोऽध्यायः॥ २॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

देवकीं प्रत्याहुः - दिष्ट्येति। हे अम्ब ! नोऽस्माकं भवाय समृद्ध्यै अंशेन स्वसङ्कल्पेन हेतुना परमपुरुषो भगवान् साक्षात् तव कुक्षिं प्रविष्टः मुमूर्षोर्भोजपतेः कंसाद्भयं तव माभूत् तव आत्मजो यदूनां गोप्ता भविता भविष्यति ॥ ४१ ॥ इतीत्थं यथा यस्य भगवतो रूपम् अविदंस्तथा स्वमत्यनुसारेण तं परमपुरुषमभिष्टूय ब्रह्मरुद्रौ पुरस्कृत्य देवाः स्वर्गं ययुः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां द्वितीयोऽध्यायः ॥ २ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भगवद्भक्तबहुमानातिशयेनापि भागवतो धर्म इति प्रदर्शनाय देवकीमाह–दिष्ट्येति। दिष्ट्या मङ्गलं "दिष्ट्या स्यान्मङ्गलादिषु" इति यादवः साक्षात्तुर्यः जाग्रदाद्यवस्थातिक्रान्तः भविता भविष्यति ॥ ४१ ॥ यद्रूपमनिदं प्रत्यक्षसिद्धं जगद्विलक्षणं तं पुरुषं पूर्णं यथा यथावदाभिष्टूय यद्वा यद्रूपं यथाऽनिदं प्रतीयते तादृशैर्विशेषणैरभिष्टूय ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

दिष्ट्याम्ब ते इति। साक्षात् परः पुमान् ते कुक्षिं गतः। अंशेन बलदेवेन। अंशे किं न इति वा। अंश्यते विभज्यते अस्मादित्यंशः पूर्णभावः, तेनेति वा; अन्यथा साक्षादित्यसङ्गतेः ॥ ४२ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे द्वितीयोऽध्यायः ॥ २ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

दिष्ट्येत्यादि। हे अम्ब मातः ! देवः परो भगवान् साक्षात् स्वयमेव ते तव कुक्षिं गतः कुक्षिप्रविष्टः, यः खल्वंशेन भवायनो भवो विश्वमयनं यस्यांशेन पुमान् पुरुषावतारः अतो भोजपते, सकाशाद्भयं मा भूत्। यद्वा, नोऽस्माकं भवाय वृद्धये साक्षाद् भगवान् ते तव कुक्षिं गतः, अंशेन पुरुषः पुरुषावतारो यस्यांशे इत्यर्थः। अतः परः परात्परः ॥ ४१-४२ ॥

इति द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देवकीं स्तुवन्तं आश्वासयन्ति–दिष्ट्येति। अंशेन बलदेवेन सह कुक्षिङ्गत इति यद्वा योंऽशेन परः पुमान् प्रकृतीक्षणकर्ता भवेत् साक्षाद्भगवानित्यर्थः। भवाय भूत्यै ॥ ४१ ॥ यस्य रूपम् अनिदं प्रपञ्चातीतं चिन्मयमित्यर्थः। अस्मान् वञ्चयित्वा एताविह किमपि रहस्यमद्भुतं द्रक्ष्यत इति मन्यमाना ब्रह्मेशानौ पुरतः कृत्वा ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। द्वितीयो दशमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ २ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीदेवकीं प्रत्याहुः—दिष्ट्येति ! हे अम्ब मातः ! योंऽशेन नो भवायोद्भवाय भवति स साक्षात्परः पुमान् ते कुक्षिङ्गतः अत्याश्चर्यरूपं तव भाग्यम् ॥ ४१ ॥ इदं प्राकृतमनिदमप्राकृतम् अप्राकृतविग्रहं परं पुरुषम् इति पूर्वोक्तरीत्या यथाशक्त्याभिष्टूय ब्रह्मेशानौ पूज्यतया पुरोधाय पुरस्कृत्य दिवं प्रति ययुः यद्वा, वयमंशेनात्रावतीर्णा भगवदाज्ञया तथैव निवसामः एतौ तु कदाचिदत्र भगवल्लीलादर्शनार्थं साक्षान्निवसिष्यतः अतः पुरोधायेत्युक्तम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्वितीयाऽध्यायार्थप्रकाशः ॥ २ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

इतीति। अत्रादौ ब्रह्माभवश्चास्तुवत्। मध्ये ब्रह्मभवावूचतुः। अंते इत्यभिष्टूय देवताः प्रतिययुरिति। अतो विरोधः तस्मादर्थांतरं। पुरुषं गर्भस्थं। यदित्यव्ययं। यस्यां देवक्यामित्यर्थः ॥ अनिदं। इदं शब्दवाच्यजगद्विलक्षणं ॥ रूपं। भगवद्रूपं स्थितं तं च ॥ यथा। योग्यतामनतिक्रम्य ॥ इति। उक्तप्रकारेण ॥ अभिष्टूय। स्तुत्वा। यद्वा। यस्य भगवतः। रूपं। अनिदं अन प्राणो गुरुत्वेनास्त्येषामिति अनिनो वैष्णवाः। तान् दयति पालयति। तत् अनिदं। देङ् पालन इति धातोः। तं पुरुषमभिष्टू स्थिताविति ब्रह्मेशानविशेषणत्वेन शेषं कल्पयेत्। अन्यथा ल्यबंतक्रिययोरेककर्तृकत्वनियमात्स्तवनरूपक्रियायाः सर्वदेवकर्तृकत्वे ब्रह्मभवावूचतुरिति पूर्ववाक्यस्य विरोधापत्तिस्तस्मात्स्थितशब्दस्य स्थानरूपक्रियायामेव ब्रह्मेशानकर्तृकल्यबंतान्वयं कृत्वा तत्पुरोधा नार्थकेन पुरोधायेति ल्यबंतेन सहयानरूपक्रियाया देवमात्रकर्तृकत्वं ज्ञेयं। तस्मान्न कोऽपि विरोधः ॥ ४३ ॥

इति श्रीभागवते तृतीयोऽध्यायः ॥ ३ ॥ (अस्मत्क्रमेण द्वितीयोऽध्यायः)

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

देवकीर्तनवद्देवकीगुणकीर्तनमपि भगवत्तोषदमिति तामुद्दिश्य भाषते ॥ दिष्ट्याऽम्बेति । अम्बार्थनद्योरिति ह्रस्वः । हे अम्ब दिष्ट्या मङ्गलम् । दिष्ट्या स्यान्मङ्गलादिष्विति यादवः । परः पुमान्परमपुरुषो भगवानंशेनावेशावतार इति पराकरोति ॥ साक्षादिति । मुख्यांशेन नो भवाय मङ्गलाय भवाय नो मङ्गलाश्रय इति वा । ते कुक्षिं गत इति स तथा । भोजपतेः कंसात् । मा भूत्स कीदृश इत्यत आह ॥ मुमूर्षोरिति । तथा जनाशङ्कितात् श्वा मुमूर्षति । कूलं पिपतिषतीत्यादिवदाशङ्कायां सन् तवात्मजो यदूनां गोप्ता रक्षिता भविता भविष्यति ॥ ४२ ॥ यद्रूपमनिदं नेदमनिदं जगद्विलक्षणं तं पुरुषं पूर्णषड्गुणं यथा सम्यगिति पूर्वोक्तप्रकारेणाभिष्टूय स्तुत्वा ब्रह्मेशानौ ब्रह्मा चेशानश्च तौ ब्रह्मा चेशश्च तौ । अनित इत्यनौ च । चेष्टावन्तौ गन्तुमुद्यताविति यावदिति वा । तौ पुरोधाय पदमेकं देवा दिवं प्रति ययुः ॥ ४३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे तृतीयोऽध्याय ॥ १०३ ॥ छ ॥

अस्मत्क्रमेण द्वितीयोऽध्यायः ॥

श्रीसुबोधिनी

प्रसङ्गात् तच्चरित्रं फलरूपं निरूपयन् देवकीसान्त्वनमप्याह **दिष्टयाम्बेति** । **हे अम्ब** मातः । सर्वात्मकस्य भगवतो माता मातैव । नृसिंहादिवदकस्मादेवाविर्भावो युक्तः । यत् **ते कुक्षिं गत** एतद् **दिष्टया** । उक्तमर्थमुपपादयितुमाह **परः पुमा**निति । पुरुषोत्तम इत्यर्थः । अंशेन तव कुक्ष्येकदेशेन प्रद्युम्नांशेन पुत्रो वा । **साक्षाद् भगवा**निति ज्ञानक्रियांशव्यावृत्त्यर्थम् । तवोदरे त्वदर्थं नागतः किन्तु **भवाय नो**ऽस्माकमेवोद्भवाय तव **कुक्षिं गतः** । तर्हि मम का गतिरितिचेत् तत्राह **तव भयं मा भून्न** भविष्यति । आशंसायां प्रथमार्थं "छन्दसि लुङ्लङ्लिट" इति लडर्थे लुङ् । "माङि लुङ"तिसूत्रादपि तथा । **भोजपतेः** कंसात् । स हि वचनेनैव भीषयति । न तु क्रियां कर्तुं शक्तः । वचनं च तस्योपेक्ष्यम् । यतोयं **मुमूर्षुः** । मुमूर्षूणां विक्लवा गिरो भवन्ति । ननु वचनमात्रेणैव कथं भयनिवृत्तिस्तत्राह **गोप्ता यदूनां भविता तवात्मज** इति । तव रक्षायां कः सन्देहः ? **यदूनां** सर्वेषामेव **तवात्मजो गोप्ता** भविष्यति । अनेन स्वरूपकार्यमानुषङ्गिकं च कार्यमुक्तम् ॥ ४१ ॥

उपसंहरतीति । **पुरुष**मिति । स्वतन्त्रतया सर्वकार्यकर्तृत्वमुक्तम् । यद् रूपं पूर्वं स्तोत्रे यादृशं रूपं निरूपितम् । **अनिदं यथै**तदुक्तं तथा च न भवति । दैत्यानामपि मुक्तिदानेन हितकर्तृत्वात् । इदमेवं भवदपि तथा न भवति । प्रकारभेदेन सर्वमेव सत्यं सर्वमसत्यमित्यर्थः । **ब्रह्मेशानौ** कथञ्चिदत्रैव स्थास्यत इति शङ्कया तौ **पुरोधा**याग्रे कृत्वा **देवा दिव प्रति ययुः** । प्रतिदिवमिति । एकविंशतिः स्वर्गाः शतं स्वर्गाश्चेतिमतभेदेन स्वस्वस्वर्गे स स देवो गत इत्यर्थः । ययुरिति । मध्ये दैत्यकृतो विघ्नः क्वापि न जात इति "या प्रापण" इतिधातुना सूचितम् ॥ ४२ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीवल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीयोध्यायः ॥ २ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

दिष्टयेत्यत्र–**तच्चरित्रं फलरूप**मिति । "दिष्ट्या हरेस्या"इत्यत्र भगवच्छास्त्रे भगवानेन प्रमाणादिचतुष्टयमिति प्रतिज्ञाय यदत्र चरित्रस्य फलत्वमुक्तं तद् धर्मरूपेण प्रकटस्याविर्भावः कर्माण्यानन्दरूपेण प्रकटस्याविर्भावो जन्मानीति वैदिकसिद्धान्तस्य भगवच्छास्त्रसिद्धान्तस्य च सामानाधिकरण्यादिति बोध्यम् ॥ ४१ ॥

इतीत्यत्र–मूलेनिदंयथेत्येकं पदम् । समासस्तु इदं च तद् यथा च इदंयथा न इदंयथा अनिदंयथेत्येवं तत्र बोध्यः । एकविंशति स्वर्गा इति । ते च नृसिंहपुराणे सिद्धाः । एवं शतस्वर्गपक्षोपि पुराणान्तरादवगन्तव्यः ॥ ४२ ॥

इतिश्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाशे द्वितीयाध्यायविवरणम् ॥ २ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

दिष्टयाम्बेत्यस्याभासे–प्रसङ्गादित्यस्य **देवकीसान्त्वनमि**त्यनेनान्वयः । फलरूपत्वस्यावान्तरप्रकरणार्थसङ्गतत्वात् सान्त्वनस्य च कथासङ्गतत्वात् परपुरुषत्वकथनात् तच्चरित्रस्य फलरूपत्वमुक्तम् । व्याख्याने **प्रथमार्थ** इति । अष्टाध्यायोक्रमेणा "शंसावचन लिङो" तिसूत्रात् प्रथमस्य"लृट् शेषे चे"ति सूत्रस्याथ लृडर्थे भविष्यत्याशंसायां वाच्यायां"छन्दसी"ति सूत्रेण लुङित्यर्थः । अनेनेति । "परः पुरुष" इतिस्वरूपं "नो भवाये"ति कार्यं "तव भयं मा भू"दित्यानुषङ्गिकं कार्यमिति विभागः ॥४१॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे प्रथमे जन्मप्रकरणे समुद्यमो नाम द्वितीयोध्यायः ॥ १० ॥ २ ॥

बुभुत्सुबोधिका

दिष्ट्याम्बेत्यत्र नमस्कारान्तमिति वन्दनभक्तिः दास्यसेवापूर्त्यर्थं तद्वत् स्तवनरूपकीर्तनभक्तिपूर्त्यर्थं नमस्कारान्तं भगवान् स्तुत इत्यर्थः। विशेषेणेति 'भारं भुवो हरस्यदूत्तम वन्दनं त' इत्यत्र तथा। प्रसङ्गादिति देवकीसान्त्वनमित्यनेनान्वेति। प्रसङ्गाद् देवकीसान्त्वनमप्याहेत्यर्थः। चरित्रं फलरूपमिति 'कुक्षिं गत' इति पदाभ्यां देवानन्दजनकं पक्षपातस्तुतित्वेनानन्दफलरूपचरित्रमित्यर्थः। निरूपयन्निति भूमौ निरूपयन्। लोके 'विकुण्ठमुपनेष्यति गोकुलं स्व'मिति परलोकेपि फलरूपं चरित्रं कुक्षौ तु स्वल्पकालं फलमिति निरूपयन्। नन्वानन्दरूपं चरित्रं भूमावस्तु, वैकुण्ठे तु सगुणः, निर्गुणफलरूपं चरित्रं कथमिति चेन्न, विद्वन्मण्डने नित्यलीलावादान्ते निपुणतरमुक्तस्य प्रत्युक्तत्वात्, 'परः पुमा'निति परपुरुषत्वकथनात् तच्चरित्रस्य फलत्वं वोक्तम्। नृसिंहादीति आदिना हंसवराहौ। कुक्षिगत इति लोकरीत्या फलरूपानन्दज्ञापितेयं कुक्षिगमनक्रिया तद्रूपं चरित्रम्। छान्दोग्यीयाष्टमोपदेशोक्त 'अथ न जानाति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेत'विति कुक्षौ भवतीत्युपसंहारे सान्त्वनम्। एकादशस्य दशमेऽध्याये 'बन्ध इन्द्रियविक्षेपो मोक्ष एषां च संयम' इति वाक्यादिन्द्रियसंयमो मोक्षः कुक्षिंगतः। 'इन्द्रियाणि समस्तानां मृत्यव' इति बृहदारण्यके 'समुदाहृताः'। अतोयमग्रे गोविन्दो भविष्यति गवामिन्द्रियाणां इन्द्रः। 'पश्यन् चक्षुर्भवती'त्यादि बृहदारण्यकात्। उक्तमिति 'सर्वात्मकस्ये'त्यादिनोक्तमर्थम्। पुरुषोत्तम इति तत्र सर्वं सम्भवतीति भावः। ज्ञानक्रियेति काण्डद्वयार्थौ, भगवद्धर्मभूते ज्ञानक्रिये। ममेति देवक्याः। सान्त्वनपक्षे का गतिः किं फलम्। 'अन्ते या मतिः सा गति'रित्यत्र गतिपदस्य फलवाचकत्वं दृष्टम्। आशंसार्थद्योतनाय विशेषसूत्रमाहुः आशंसायामिति। प्रथमार्थे इति अष्टाध्यायीक्रमेणा'शंसावचने लि'ङिति सूत्रात् प्रथमस्य 'लृट् शेषे चे'तिसूत्रस्यार्थे लृडर्थे भविष्यति। आशंसायां वाच्यायां 'छन्दसी'तिसूत्रेण लिङिति श्रीवल्लभानां लेखः पुस्तकान्तरसूत्रानुसारी। कंसादिति कसि गतिशासनयोः अदा० आ० से० पचाद्यच्, कंसः तस्मात्। क्रियां कर्तुमिति 'भयात् कंस' इति वाक्याद् भयभीतस्तथा। वचनेनेति उपेक्षितवचनमात्रेणेत्यर्थः। 'भविते'ति लुडन्तं न तु तृन् तृजन्तमित्याशयेनाहुः भविष्यतीति। अद्यतनकालाभावादिति भावः। अनेनेति परः पुरुष इति स्वरूपम्। 'नो भवाये'ति कार्यम्। 'तव भयं माभू'दित्यानुषङ्गिकं च कार्यमुक्तमित्यर्थः। अथ तैत्तिरीयप्रश्नछान्दोग्योक्तेषु चतुष्केषु षोडशकलासु च कः कांशोत्र श्लोक उच्यते इत्याकाङ्क्षायामुच्यते। तैत्तिराये जिह्वा सन्धानमत्र, परः पुमा'निति वाक्यात्। पुरुषोत्तम आस्वादनीयः शृङ्गाररसो भक्तिरसश्च, चतुर्यूथैः। लिह् आस्वादने अदा० उभ० अनिट्। लेढि लिहन्त्यनया वा, जिह्वा। शेवयह्व जिह्वेति साधुः। हस्य जः वप्रत्यय इति। प्रश्नेऽविशेषः। छान्दोग्ये 'चन्द्रः कले'ति, 'परः पुमा'निति वाक्यात्। शिक्षायां 'भूर्भुवः सुव'रिति वा एतास्तिस्रो व्याहृतयः। तासामु ह स्मैतां चतुर्थम्। महाचमस्यः प्रवेदयते। भूरिति वा अग्निः, भुव इति वायुः, सुवरित्यादित्यः, मह इति चन्द्रमाः चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्त' इति। न च भक्त्यकवेद्यत्वहानिरिति वाच्यम्। 'नमामि हृदये शेषे लीलाक्षाराब्धिशायिनं लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधि'मिति मङ्गलाचरणकारिकायां 'कलानिधि'पदादिति शुभम्। अस्यार्थो वृत्रोदरे। तदुक्तं षष्ठस्कन्धे द्वादशेऽध्याये 'कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुम् नभो गम्भीरवक्त्रेण लेलिहोल्बणजिह्वये'ति। वाक् वृत्रासुरचतुःश्लोकीति सर्वं सुस्थम्। सङ्ख्यातात्पर्यफलं चतुष्पाद्ब्रह्मणैवेत सम्भरति। षोडशविकारभिन्नषोडशविकारसहशसूक्ष्मदेहेन सम्भरतीति च प्रश्नेऽविशेषः, य एवं चतुष्पादं षोडशकलं च भावयति सः ॥ ४१ ॥

इत्यभीत्यत्र उपसंहरतीति पक्षपातस्तुतिं ससान्त्वनां उपसंहरति, उपसंहारः समाप्तिः। चरमवर्णध्वंसस्तं करोति। इति शब्देन। स्वतन्त्रतयेति 'स्वतन्त्रः कर्ते'ति पाणिनिसूत्रात्। अनिदंयथेति मूले 'अनिदंयथे'त्येकं पदमत्रापि। समासस्तु इदं च तद् यथा इदं यथा न इदंयथा अनिदंयथेत्येवं बोध्यः। तथा न भवतीति 'सर्वं सर्वमय'मिति श्रुतेः। ऋषिः सिंहोपि भवति। श्रीगोवर्धनः पर्वतः सर्वोपि भवति। 'एषोधमानितो मर्त्यान् कामरूपो वनौकसः हन्ति ह्यस्मै नमस्यामः शर्मणे ह्यात्मनो गवा'मितिवाक्यात्। प्रकारेति प्रकारो ब्राह्मत्वं मायिकत्वं च। यद्वा इदं घटाद्येवं ब्राह्मत्वेन प्रकारेण भवेदपि देवमुक्तिदानार्थमित्यर्थः। तथा न भवतीति ब्राह्मत्वेन प्रकारेण न भवति किन्तु मायिकत्वेन प्रकारेण भवति दैत्यहितार्थमित्यर्थः। प्रकारेति प्रकारयोः ब्राह्मत्वमायिकत्वयोर्भेदेन। इत्यर्थ इति 'अनृतेन प्रत्यूढ'मितिश्रुतेरित्यर्थः। स्थापयत इति ननु तिष्ठतां नाम का चिन्तेति चेन्न। ब्रह्मापत्यान्तरा सुरपक्षपातं ईशानस्तु समत्वाद् दैत्यपक्षपातं कुर्यादिति तयोः पुरोधानस्यावश्यकत्वात्। एवं 'प्रतेर्लक्षणार्थ उक्तः। वीप्सार्थमाहुः एकविंशतीति। नृसिंहपुराणे प्रसिद्धाः। एवं 'शत स्वर्गा' इति पक्षापि पुराणान्तरादवगन्तव्यः ॥ ४२ ॥

इति श्रीमद्वल्लभचरणैकतानश्रीगोपेश्वरविरचितायां शास्त्ररीत्या बुभुत्सुबोधिकायां द्वितीयाध्यायव्याख्यानम् ॥ २ ॥

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

प्रसङ्गात् तच्चरित्रं फलरूपं निरूपयन् देवकीसान्त्वनमप्याह दिष्ट्याम्बेतिः—

प्रसङ्ग से श्रीकृष्ण का चरित्र फलरूप है उसका और देवकी के सान्त्वना का भी वर्णन इस श्लोक में करते हैं—

प्रसङ्गात् तच्चरित्रं फलं— अब इस श्लोक में प्रसङ्ग से श्रीकृष्ण का चरित्र फलरूप है उसका एवं माता देवकीजी के आश्वासन का भी वर्णन इस श्लोक में करते हैं। सबों की आत्मा भगवान् हैं। अतः उनकी माता सबकी माता है। इसलिए देवों

ने देवकीजी को कहा है कि हे अम्ब ! हे माँ ! आपके यहाँ श्रीनृसिंहादि अवतारों की भांति अकस्मात् प्राकट्य होना भगवान केलिये योग्य नहीं होने से ही आपकी कूँख में बिराजे हैं यह आनन्द बधाई है। उनकी कूँख में विराजने की योग्यता का समर्थन करते हैं कि वे पूर्ण पुरुषोत्तम हैं। 'अंशेन' शब्द का भाव यह है कि कूँख के एक देश से अथवा प्रद्युम्नांश से पुत्र रूप होकर विराजते हैं। "साक्षात् भगवान्" कहने का आशय यह है कि केवल क्रियाशक्ति से ! आकर नहीं बिराजे हैं किन्तु साक्षात् ज्ञान क्रिया विशिष्ट आप भगवान् पधारे हैं। आपके उदर में केवल आपके लिए नहीं पधारे हैं लेकिन हमारे हित के लिए हमारे उद्भव के हेतु पधारे हैं। आगे बढ़कर देव कहते हैं कि माताजो आप अब किसी प्रकार का डर मत करो। क्योंकि कंस तो केवल आकाश वचन से डरा रहा है वह कुछ नहीं कर सकता है। उसके वचनों पर ध्यान नहीं देना चाहिये, कारण कि वह मरने वाला है। जिनकी मृत्यु समीप होती है उनके वचन घबराहट वाले और असम्बद्ध होते हैं। यदि देवकीजी कहे कि आपके कहने से मैं निडर कैसे बनूँगी ? तो इसके उत्तर में कहते हैं कि हम केवल आपको वचनों से नहीं कहते हैं किन्तु हम देव हैं। इसलिए हम जानते हैं कि यह आपके पुत्र कंस को मारकर यादवों के रक्षक होंगे। अतः आप निर्भय रहो। क्योंकि जब सब यादवों की रक्षा करेंगे तो आपकी रक्षा में कौनसा संशय है ? कोई नहीं हो यह आपके पुत्र की ही स्वल्प यादवों की रक्षा करेंगे यों न समझना किन्तु समस्त यादव मात्र की रक्षा करेंगे। इस प्रकार कहने से स्वरूप कार्य और आनुषंगिक दोनों कार्य कहे ॥ ४१ ॥

उपसंहरतीति—

उपसंहार करते हैं—

अब इस श्लोक में जो "पुरुष" पद है उसका तात्पर्य बताते हैं कि पुरुष शब्द से यह बताया कि परमात्मा सर्व-कर्ता है। जिस स्वरूप का वर्णन प्रथम स्तुति में जैसा किया है वैसे ही हैं और उतने ही वे हैं यों नहीं है। इसका रहस्य यह है कि भगवान् केवल देवताओं के ही पक्षपाती हैं सो नहीं है किन्तु दैत्यों के भी हितकारी हैं कारण कि उनको भी मुक्तिदान दिया है। यह इस प्रकार का होता भी है, नहीं भी होता है, तात्पर्य यह है कि प्रकार भेद से प्रभु आप सर्व रूप होने से सत्य भी हैं। और असत्य भी है। देवताओं को यह शङ्का हुई कि हम तो जारहे हैं कदाचित् ब्रह्मा तथा शिवजी यहाँ ही रुक न जायँ, इसलिये इनको आगे करके उनके पीछे सब अपने अपने स्वर्ग में गये। देव अपने अपने स्वर्ग में गये इससे समझा जाता है स्वर्ग एक नहीं है किन्तु बहुत हैं। नृसिंह पुराण में इक्कीस स्वर्ग कहे हैं। अन्य पुराणों में शत स्वर्ग भी कहे हैं। यहां क्रियापद में "या" प्रापणे अर्थ में 'या' धातु देने का आशय यह है कि देवताओं को मार्ग में किसी प्रकार का विघ्न नहीं आया और सब सुख पूर्वक पहुंच गये यह तात्पर्य है क्योंकि "या" धातु का अर्थ है पहुंचना ॥ ४२ ॥

दशम स्कन्ध के द्वितीय अध्याय की श्रीमद्वल्लभाचार्य कृत श्री सुबोधिनीजी का मातृपितृतोषिणी हिन्दी अनुवाद समाप्त ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं भगवन्तं स्तुत्वा देवकीमाश्वासयन्ति—दिष्ट्येति। भगवान्मातृत्वेन पूज्यत्वं मत्वा स्वयमपि मातृत्वेन सम्बोधयन्ति—हे अम्बेति। यः परः पुमान् पुरुषोत्तमः अंशेन वा राघवावतारेण नोऽस्माकं भवायोद्भवायासीत् स इदानीं साक्षात् पूर्णेनैव रूपेण ते तव कुक्षिं गत इति दिष्ट्या भद्रमेव जातमित्यन्वयः। कंसाद्बिभेमीति चेत्तत्राहुः—मेति। भोजपतेः कंसाद्भयं माभूत् न कुरु। तत्र हेतुमाहुः—मुमूर्षोरिति। आसन्नमृत्योरित्यर्थः। तथापि यावज्जीवमस्मदपेक्षया स प्रबल एवेत्याशङ्क्याहुः—सर्वेषां यदूनामयं तवात्मजो गोप्ता रक्षको भविता। किं पुनर्युवयोः स्वस्य वा रक्षणे सन्देहः ? ॥ ४१ ॥ यस्य रूपं यथा यथावत् अनिदमिदं दृश्यं विश्वं तस्माद्विलक्षणं भवति तं पुरुषं सर्वान्तर्यामिणं भगवन्तमित्येवमुक्तप्रकारेणाभिष्टूय स्तुत्वा ब्रह्मेशानौ पुरोधाय अग्रतः कृत्वा देवा दिवं स्वर्गं प्रति ययुः ॥ ४२ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र हरेर्जन्मनिरूपणे। द्वितीयो विवृतोऽध्यायो गर्भवासनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

देवकीं प्रत्याहुः—दिष्ट्येति। अम्ब हे मातः ! नः अस्माकं भवाय परः पुमान् भगवान् एव अंशेन बलदेवेन सह साक्षात्पूर्णरूपेणैव ते तव कुक्षिं गतः इति दिष्ट्या भद्रमेव जातम्। मुमूर्षोः आसन्नमृत्योः भोजपतेः कंसात् भयं मा भूत्। अन्येषामपि कुक्षिं हृदयं गतो हरिर्भवति तेषां भयं न भवतीति कुतस्तव भयं तव आत्मजः सर्वेषां यदूनां गोप्ता रक्षको भविता किं पुनर्युवयोः स्वस्य वा रक्षणे संदेहः ॥ ४१ ॥ इत्यभिष्टूयेति। यस्य रूपं यथा यथावत् अनिदमिदं विश्वं तस्माद्विलक्षणं सर्वप्रत्यग्भूतं भवति

तं पुरुषं सर्वान्तर्यामिणं भवन्तमित्येवमुक्तप्रकारेणाभिष्टूय स्तुत्वा । दैर्घ्यमार्षं तत्स्तुवभावः । ब्रह्मेशानौ देवश्रेष्ठत्वात् पुरोधाय अग्रतः कृत्वा देवाः दिवं प्रति ययुः । यद्वा । अस्मान् वञ्चयित्वा एताविह किमपि रहस्यमद्भुतं मा द्राक्षामिति ब्रह्मेशानौ पुरोधाय अग्रे कृत्वा । पुरोऽव्ययमिति गतित्वात्समासे क्त्वो ल्यप् ।। ४२ ।।

इति श्रीभागवते महापुराणे दशस्कन्धेऽन्वितार्थप्रकाशिकायां द्वितीयोऽध्यायः ।। २ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सांप्रतं देवकीं प्रत्याहुः ।। दिष्ट्येति ।। हे अम्ब, नोऽस्माकं, भवाय समृद्ध्यै, अंशेन स्वसंकल्पेन हेतुना, परः पुमान्, भगवान् षाड्गुण्यपूर्णः, सर्वपरः स्वयं पुरुषोत्तम इत्यर्थः । साक्षात्, ते तव, कुक्षिंगतः कुक्षिं सम्यक् प्रविष्टः, दिष्ट्या । मुमूर्षोर्मत्तु मिच्छोः, भोजपतेः कंसात् सकाशात्, तव भयं मा भूत् । तव आत्मजः पुत्रः, यदूनां गोप्ता रक्षकः, भविता भविष्यति ।।४१।। इतीति ।। इतीत्थं, यथा यद्रूपं यस्य भगवतो रूपं, अविदन्, तथा स्वमत्यनुसारेणेत्यर्थः । अनिदं यथेति पाठे, यद्रूपं यथाऽनिदं प्रतीयते, तथा तादृशैर्विशेषणैरित्यर्थः । पुरुषं तं परमपुरुषमित्यर्थः । अभिष्टूय स्तुत्वा, अस्मान्वञ्चयित्वा एताविह स्थास्यत इति मन्यमानाः सन्त इति शेषः । ब्रह्मेशानौ विधिरुद्रौ, पुरोधाय पुरस्कृत्य, देवाः दिवं स्वर्गं, प्रति ययुः ।। ४२ ।।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे द्वितीयोऽध्यायः ।। २ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दिष्ट्येति : १० २.४१.

धन्यमद्य भुवि भाग्यमम्ब ते यन्न केनचिदवाप्तमंशतः । दुर्लभा अपि विधीन्द्रशङ्कराः किङ्करा इव पदान्तिके यतः ।। ४२ ।।
संध्यातोऽपि चिरादचिन्त्यचरितश्चित्तेऽपि यो योगिनां नैवायाति विकासमञ्चति न वा स्फूर्तिं किलार्धक्षणम् ।
सोऽयं पूर्णसुखः सुखान्निवसति त्वज्जाठरे कोटरे मातस्तत्तव पुण्यवर्णनविधौ के नाम कीटा वयम् ।। ४३ ।।
मातर्विश्वविधातृधात्रि निखिला देवेन्द्रमुख्या अपि नम्रारो यदमी वयं तव पुनर्जाताः स्म तत्पाहि नः ।
सन्तीमे शिशवस्ततो न गणयैतेषां त्वमागांस्यमून् प्रीत्या पालय देहि चेप्सितमिति प्रोच्य स्वपुत्रं मुहुः ।। ४४ ।।
यन्नाकानकदुन्दुभि-ध्वनिरभूद्यज्जन्मनि श्रीमती पत्नी यस्य च मूर्तमेव सुकृतं वृत्तिश्च तत्त्वार्थवित् ।
पुत्रोऽपि प्रभुरिन्दिरापतिरयं सर्वेश्वराधीश्वरस्तत्किं वा वसुदेव नास्ति भवतस्त्रैलोक्यलोकोत्तरम् ।। ४५ ।।
सुत्रामा-ऽनल-धर्मराज-निकषोद्भूता-ऽप्पति-स्पर्शनत्र्यक्षस्नेहिमहेश्वरान् वसुदिशामीशांस्त्वदङ्घ्रिस्पृशः ।
कृत्वा यद्वसुदेव येन विहितं नामापि तेऽन्वर्थकं तद्भाग्यं तव किं स्तुतं कथय तं नित्यात्मदीयावनम् ।। ४६ ।।
गर्ह्योऽप्यर्हतमेन चेन्निजपदं नीतस्तदानीं जगद्वन्द्यानामपि वन्द्यतापदमसौ सञ्जायते यत्स्फुटम् ।
गर्ह्यं गर्भनिवासमप्यजमुखा देवाः समग्रा अपि दृष्ट्वा श्रीशपदश्रियं सुनतयः सन्तो मुहुः प्रास्तुवन् ।। ४७ ।।

श्रीशकल्पतरुक्रीडा. ।।

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने द्वितीयोऽध्यायः ।। २ ।।

कृष्णप्रिया

हे अम्ब ! हे माँ ! आपकी कूख में प्रद्युम्नांश व्यूहरूप से पूर्ण पुरुषोत्तम पधार गये हैं, वे साक्षात् भगवान् हैं। वे हमारा कल्याण करने के लिए आये हैं। अब आप समीप में ही मरने वाले कंस से मत डरो। ये आपके आत्मज पुत्र यादवों का रक्षण करेंगे। यह मंगल बधाई है ।। ४१ ।। श्री शुकाचार्य जी कहते हैं कि राजन् देवताओं ने इस प्रकार पूर्ण पुरुषोत्तम की स्तुति की कि वह भगवान् का स्वरूप इस भांति हैं भी और नहीं भी है। किन्तु भगवान् सर्व रूप हैं। तदनन्तर ब्रह्माजी तथा महादेवजी को आगे कर सब देव स्वर्ग को गये ।। ४२ ।।

दूसरा अध्याय समाप्त ।

* * *

अथ तृतीयोऽध्यायः

स॰ श्लोका॰	अनु.	वं.	मालिनी	उ. प.	उवाच	श्लो. अ.	उ. अ.	अ. अ.	स. श्लो. अ.	सं श्लोका	अ.
५३	३२	१	५	१५	७	२०१०	४५	४६	२१०१	६५।।	५

श्रीशुक उवाच

अथ सर्वगुणोपेतः कालः परमशोभनः । यर्ह्येवाजनजन्मर्क्षं शान्तर्क्षग्रहतारकम् ॥ १ ॥
दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयम् । मही मङ्गलभूयिष्ठपुरग्रामव्रजाकरा ॥ २ ॥
नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रियः । द्विजालिकुलसंनादस्तबका वनराजयः ॥ ३ ॥
ववौ वायुः सुखस्पर्शः पुण्यगन्धवहः शुचिः । अग्नयश्च द्विजातीनां शान्तास्तत्र समिन्धत[1] ॥ ४ ॥

कर्दमक्षमा

अन्वयः—अथ कालः परमशोभनः सर्वगुणोपेतः (संजातः) यर्हि एव अजनजन्मर्क्षम् (तर्हि) शान्तर्क्षग्रहतारकम् (अभवत्) ॥१॥ दिशः प्रसेदुः गगनं निर्मलोडुगणोदयम् (संजातम्) मही मङ्गल-भूयिष्ठ-पुर-ग्राम-व्रज-आकरा (संजाता) ॥२॥ नद्यः प्रसन्नसलिलाः ह्रदाः जलरुहश्रियः वन-राजयः द्विज-अलि-कुल-सन्नाद-स्तबकाः, (समभवन्) ॥ ३ ॥ पुण्य-गन्ध-वहः शुचिः सुखस्पर्शः वायुः ववौ च, द्विजातीनाम् शान्ताः अग्नयः तत्र समिन्धत ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तृतीये निजरूपेण संभूतस्तु हरिः स्वयम् ॥ पितृभ्यां संस्तुतो नीतः पित्रा भीतेन गोकुलम् ॥ १ ॥

अथेति मंगलार्थम् । यर्हि सर्वगुणोपेतः कालो बभूव तदा देवक्यां विष्णुराविरासीदित्यष्टमश्लोकगतेनान्वयः । परमशोभनत्वमेवाह यर्हीत्यादिना । अजनान्नारायणाज्जन्म यस्य प्रजापतेस्तस्य ऋक्षं रोहिणीनक्षत्रम् । कथंभूतम् । शांतानि ऋक्षाण्यश्विन्यादीनि ग्रहाश्च तारकाश्च यस्मिंस्तत् । यर्हीति सर्वत्रानुषज्जते ॥ १ ॥ निर्मलानामुडुगणानामुदयो यस्मिंस्तत्तथा । मंगलभूयिष्ठाः पुरादयो यस्यां सा ॥ २ ॥ जलरुहैः श्रीः शोभा येषां ते । द्विजालिकुलानां पक्षिभृंगसमूहानां सन्नादो येषु ते स्तबका यासु ताः ॥ ३ ॥ समिंधत । आडागमोऽत्र द्रष्टव्यः समैंधतेति । सम्यग्दीप्ता बभूवुरित्यर्थः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

निजरूपेण स्वाभाविकेन रूपेण । स्वयं हरिः । परिपूर्णतमः । पितृभ्यां मातापितृभ्यां देवकीवसुदेवाभ्याम् । पित्रा वसुदेवेन (१) । शोभनकालस्तु हरिभक्ताविर्भावयुतः परमशोभनत्वं कालस्य हर्याविर्भावत एवेति ज्ञेयम् । ग्रहाः सूर्यादयः । तारकाः सप्तर्षिमंडलादिरूपाः । सर्वत्र दिशः प्रसेदुरित्यादिषु सर्वेषु वाक्येष्वनुषज्यते संबध्यते । यद्वा—यर्ह्येवाजनस्य प्राक्तनजन्मरहितस्य भगवतो जन्मनक्षत्रमभूत्तदैव सर्वगुणोपेतकालोऽभूदिति योज्यम् । श्लिष्टत्वेनोक्तिः । 'जन्मर्क्षं न प्रकाशयेत्' इति नीतिशास्त्रोक्तेर्गोपनार्थेति ज्ञेयम् ॥ १ ॥ 'दिशः प्रसेदुः' इत्यादिना वर्षास्वपि शरद्गुण उक्तः । 'निर्मलोडुगणोदयम्' इत्यनेनोदूर्ध्वस्थप्रसाद उक्तः । 'मही मंगल'—इत्यादिनाधस्थप्रसाद उक्तः ॥ २ ॥ 'ह्रदा जलरुह'—इत्यादिना रात्रावपि दिनगुणयुक्तः । 'द्विजालिकुल' इत्यादिना वर्षास्वपि वसंतगुण उक्तः ॥ ३ ॥ 'सुखस्पर्शः' इत्यनेन शैत्यम् । 'पुण्यगंधवहः' इति सौरभ्यम् । शुचिरिति मांद्यं धूल्याद्यसंपर्केण निर्मलत्वं चोक्तम् । इत्यर्थ इति । सम्यग्दक्षिणावर्त्तत्वेन दीप्ता बभूवुरिति भावः । द्वापरेपि त्रेतागुण उक्तः 'त्रेतायां यजतो मखैः'—इत्याद्युक्तेः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सर्वगुणोपेतत्वादेव परमशोभनः यर्हीत्यादिकं तैर्योजितं तत्र यह्यजने जायमाने तत्संनिहितसमये तादृगजनजन्मर्क्षादिकमासीत् यर्हि च जनार्दने जायमाने तज्जन्मसमय एव च तादृग्दुन्दुभिनादादिकमासीत् तदा देवक्यामाविरासीदिति विशेषो द्रष्टव्यः यद्यप्येवं सार्द्धैरष्टभिरेकमेव वाक्यं स्यात्तथापि सुबोधत्वाय तदन्तर्वाक्यानि पृथक् प्रथगङ्कयित्वैव व्याख्येयानि सार्द्धाष्टत्वेऽप्यष्टमश्लोकगतेनेति तद्व्याख्यापरार्द्धस्य तदन्तर्भावविवक्षया शान्तर्क्षादिकत्वं तस्मिंस्तु रोहिणीदिने सर्वेषामृक्षादीनामुग्रदोष्टत्वराहित्या-

---

१. समैधिताः—इति कस्यचित् ।

दिना तच्चोग्रादीनामुग्रत्वादिपरिहारादेः अत्र विशेषश्चोक्तः खमाणिक्यनाम्नि ज्योतिर्ग्रन्थे "उच्चस्थाः शशिभौमचांद्रिशनयो लग्नं वृषो लाभगो जीवः सिंहतुलादिषु क्रमवशात् पूषोशनोराहवः। नैशीथः समयोऽष्टमीबुधदिनं ब्रह्मर्क्षमत्र क्षणे श्रीकृष्णाभिधमम्बुजेक्षणमभूदाविः परमब्रह्म तत् ॥" इति किञ्चान्यत्र "वृषकन्यातुलामीनराजेषु स्फुटमुच्चगाः। सोमसौम्यशनिक्षोणीसुतास्तज्जन्मनि स्थिताः। यस्माद्विश्वावसौ वर्षे जन्म श्रीनन्दजन्मनः विश्वमेव वसुश्रीमद्वाभूवामुष्य तुष्यतः" ॥१॥ उदयः प्रकाशः ॥ २ ॥ प्रसन्नसलिलत्वजलरुहश्रीत्वयोस्तत्र तत्र पृथक् निर्देशः प्राधान्यमात्रेण अत उभयेषामप्युभयं ज्ञेयम् ॥३॥ सुखस्पर्श इति शैत्यं पुण्येति सौरभ्यं "पुण्यं तु चार्वपि" इत्यमरः शुचिर्निर्मल इति धूल्याद्यसम्बन्धेन मान्द्यमुक्तं च शब्दोऽत्र वाय्वग्न्योर्युग्मतापेक्षया पूर्वोक्तसमुच्चये अत एव तत्र वायौ सतीत्यर्थः। शान्ता निर्वाणप्राया अपि यद्वा प्रदक्षिणावर्त्ताः सन्त इत्यर्थः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

सर्वगुणोपेतत्वादेव परमशोभनः शान्तर्क्षादिकत्वं तदानीं रोहिण्यां सर्वेषामृक्षादीनां दृष्टिराहित्यादिना। अन्यत्तैर्व्याख्यातम्। यद्वा, प्रत्यासन्ने भगवज्जन्मनि सर्वगुणोपेतः परमशोभनश्च कालो बभूव; गुणाः स्वतः सम्भविनः, शोभनता च कृत्रिमैर्वाद्यत्सवैस्तत्र च दिक्प्रसादादयश्चिरप्रवृत्ता दुन्दुभिनादादयश्च तत्कालीना इति यथायथं विवेचनीयम्। सर्वगुणोपेतत्वं दर्शयति—यर्हीत्यादिना; यस्मिन् काले प्रथमं ऋक्षादीनां शान्त्वमुक्तम् ॥ १ ॥ अधुना तेषां नैर्मल्येनोदय उच्यते, प्रावृषि तदभावसम्भवात् ॥२॥ नद्यादीनां वृष्टिकालादिना सलिलप्रसादाद्यभावेऽपि तत्तदुदयस्य; किंवा, तदानीं तत्तद्विशेषस्यापेक्षया तत्तदुक्तिः ॥३॥ सुखस्पर्श इति सुशैत्यम्, पुण्येति सौरभ्यम्, शुचिर्निर्मल इति धूल्याद्यसम्बन्धेन मान्द्यमुक्तम्। शान्ता निर्वाणप्राया अपि; यद्वा, प्रदक्षिणावर्त्ताः सन्त इत्यर्थः; तत्र तदानीम् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अथ सर्वेति अभूदिति शेषः ॥ १–३ ॥ पश्य तस्मिन् पूर्वं शान्ताः अग्नयः तदा समेधिता जज्वलुरित्यर्थः यद्वा शान्ताः अकलुषाः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ भगवदवतारं प्रस्तौति अथेति। यर्ह्येव अजनजन्म अजनस्य कर्मायत्तोत्पत्तिरहितस्य भगवतो जन्म अथ तदा कालः सर्वैर्गुणैरुपेत अत एव परमशोभनोऽभूदिति शेषः। तदेव प्रपञ्चयति शान्तर्क्षग्रहतारकम् ऋक्षं भगवज्जन्मनक्षत्रं रोहिण्याख्यं तस्मिन् शान्ता अनुकूलाः अन्येषु च नक्षत्रेषु ग्रहाः सूर्यादयः तारकाः अश्विन्यादिव्यतिरिक्तनक्षत्राणि च यस्मिन् यथा भवति तथा अभूदिति क्रियाविशेषणम्, यद्वा, अजनाद्भगवतो जन्म यस्य तस्य प्रजापतेः यदृक्षं रोहिण्याख्यं तस्मिन् इत्यादि पूर्ववत् ॥ १ ॥ तदा दिशः प्रसेदुः प्रसन्ना बभूवुः गगनं निर्मलानाम् उडूनां नक्षत्राणां गणो यस्मिन् तथाभूतं पुराणां प्राकारोपेतानां ग्रामाणां तद्रहितानां व्रजानां गोष्ठानाञ्चाकराश्रयभूता मही मङ्गलभूयिष्ठा बभूव ॥ २ ॥ नद्यस्तु प्रसन्नानि सलिलानि यासु तथाभूताः ह्रदास्तु जलरुहाणां श्रीर्येषु तथाभूताः वनानां राजयः पङ्क्तयस्तु द्विजानां पक्षिणामलीनां भृङ्गाणाञ्च कुलानां सङ्घानां सन्नादो येषु तानि स्तवकानि यासु तथाभूताः ॥ ३ ॥ वायुस्तु शुचिर्धूलिरहितः पुण्यगन्धवहः सुगन्धिस्सुखस्पर्शश्च ववौ प्रससार द्विजातीनां त्रैवर्णिकानामग्नयः पूर्वं शान्तास्तदा समेधत "इन्ध दीप्तौ" जज्वलुः समेधिताः इति पाठेऽपि स एवार्थः यद्वा शान्ताः अकलुषाः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भगवद्भक्त्यर्थं तदवतारप्रयोजनं समयेनाविर्भूतपूर्वकालादिगुणविलासमाह—श्रीशुक इति। सर्वेषां ग्रहाणामुच्चस्थानगतत्वादिगुणविशिष्टः सर्वगुणोपेतः परमं शोभनं यस्मात्स तथा अजनजन्मर्क्षं रोहिणी यत्र स तथा शान्तानि प्रसन्नानि ऋक्षाणि ग्रहाश्च तारका यस्मिन् स तथा यर्हि यदैवंविधः कालः ॥ १ ॥ तदा दिशः प्रसेदुरित्यादिकमभूत् निर्मलोडुगणस्य उदयो यस्मिन् स तथा मङ्गलपूर्णाः पुराणि ग्रामा व्रजाकराश्च यस्यां सा तथा ॥ २ ॥ जलरुहाणां पद्मानां श्रियो येषु तथा वनराजयः वनपङ्क्तयः ॥ ३ ॥ समिन्धत ज्वलिताः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथेति। यर्हि यदा अजनस्य कदाप्यन्यदा ज्ञातत्वेनाश्रुतस्य श्रीकृष्णस्य निजजन्मना स्वीक्रियमाणम् ऋक्षं तद्द्वापरान्तकालविशेषगतरोहिण्याख्यम् अभूत्तदेव सर्वकालगुणोपेतः सर्वशुभसमेतश्च कालोऽभूत्तदिच्छायां जातायां दुर्घटघटनीभिः तच्छक्तिरेव वा स्वभावेनैव वा स तथा सम्पन्न इत्यर्थः। सर्वगुणत्वादिकमाह-शान्तेत्यादिना। यथा यथञ्च तत् ज्ञेयं तेषां भीषणस्वभावत्वेन सर्व एव तेभ्यो द्रुह्यन्तीति असुरद्रुहां सर्वप्राणिनाञ्च एव तेभ्यो द्रुह्यन्तीति ॥ १–४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ भगवदाविर्भावकालस्य सौभाग्यमाह—अथ सर्वगुणोपेत इत्यादि । भगवदवतारस्य निकटे वर्षाकालस्य ये ये दोषास्ते गताः, सर्वे गुणा एव समासन्ना इति तात्पर्येण सर्वगुणोपेतत्वम् अथवा कालो वर्षाकालः, सर्वेषामृतूनां गुणैरुपेत आसीदित्यर्थः । अतएव परमशोभनः । उक्तञ्च श्रीविष्णु पुराणे–(५।२।४) 'विष्णोरंशे भुवं याते ऋतवश्चाभवन् शुभाः' अंश्यन्ते विभज्यन्ते कला अस्मादिति अंशः परिपूर्णभागः । भवन्त्यस्यामिति भूर्देवकी तां याते प्राप्ते सति, ऋतवः षडेव, शुभा निर्दोषा अभवन् । अथवा अंशे अनन्ते भुवं पृथिवीं याते सति, अतः परं श्रीकृष्णोऽवतरिष्यतीति कृत्वा षडेव ऋतवः शुभा आसन् । अंश इति यथाश्रुतव्याख्याने – (वि० पु० ५।२।६) 'बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम' इति तत्रैवोक्तत्वादसङ्गतेस्तत्रापि वपुषेति वपुर्विशिष्टम् ॥ १ ॥ (२ ७)

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अथ सर्वगुणोपेत इत्यादि । भगवदवतारनिकटे कालस्य ये ये दोषास्ते गताः, सव गुणा एव प्रत्यासन्ना इत्यर्थः । कालो वर्षाकालः सर्वेषां ऋतूनां गुणोपेत आसीत्, अतएव परमशोभनः । उक्तञ्च (वि० पु० ५।२।४) "विष्णोरंशे पुरं याते ऋतवश्चाभवञ्छुभाः" इति । अस्यार्थः अंश्यन्ते विभज्यन्ते कला इति अंशः परिपूर्णभागो भुवं याते भूमिष्ठे सति ऋतवः शुभा आसन्; अतः परं श्रीकृष्णोऽवतरिष्यतीति कृत्वा (विष्णु पु० ५।२।६) "बिभ्राणा वपुषो विष्णुं तुष्टुवुस्तमहर्निशम्" इति तत्रैव विष्णुत्वेनोक्तत्वादंश इति न सङ्गच्छते "विष्णुर्नारायणः कृष्णः" इति विष्णुशब्दो हि कृष्णपरः ॥ १—७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

"तृतीये देशकालादौ प्रसन्ने श्रीहरेर्जनिः । पितृभ्यां संस्तुतिः प्राप्तिर्यशोदासूतिकागृहे" ॥

यर्ह्याजनस्य प्राकृतजन्मरहितस्य भगवतो जन्म नक्षत्रमभूत् अथ तदैव सर्वगुणोपेतः कालोऽभूदित्यन्वयः । श्लेषेण जन्मर्क्षनामाप्याह–अजनान्नारायणाऽजन्म यस्य सोऽजनजन्मा प्रजापतिस्तस्य ऋक्षं रोहिणीनक्षत्रमित्यर्थः । श्लिष्टत्वेनोक्ति "जन्मर्क्षं न प्रकाशयेत्" इति नीतिशास्त्ररीत्या गोपनार्था कीदृशं शान्तानि ऋक्षाण्यश्विन्यादीनि ग्रहाश्च तारकाश्च यस्मिंस्तत् ॥ १ ॥ सर्वगुणोपेतत्वमाह—दिश इति । वर्षास्वपि शरदो गुण उक्तः तदानीं सर्वाणि तत्त्वानि प्रसन्नानि तत्र महाभूतस्योदूर्ध्वस्थस्य प्रसादमाह, गगनमिति । अधःस्थस्य प्रसादमाह महीति ॥ २ ॥ मध्यस्थानां त्रयाणां प्रसादमाह—द्वाभ्यां नद्य इति । जलरुहश्रिय इति रात्रावपि दिवसस्य गुणः द्विजालिकुलानां सन्नादः स्तवकाश्च यासु ता इति वर्षास्वपि वसन्तस्य गुण उक्तः ॥ ३ ॥ सुखस्पर्श इति शैत्यं पुण्येति सौरभ्यं "पुण्यं तु चार्वपि" इत्यमरः शुचिर्निर्मल इति धूल्याद्यसम्बन्धेन मान्द्यमुक्तं शान्ता निर्वाणप्राया अपि समिन्धत अडागमाभाव आर्षः सम्यग्दक्षिणावर्त्तत्वेन उद्दीप्ता बभूवुरिति द्वापरयुगेपि त्रेतायाः गुण उक्तः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ तृतीयाऽध्याये स्वयं विष्णोरनावृतस्य सर्वज्ञस्य सर्वशक्तेः सर्वात्मनः सर्वभिन्नाभिन्नस्य सर्वेश्वरस्याचिन्त्याद्भुताप्राकृतमूर्तेः प्रादुर्भावं सर्वज्ञाभ्यां भगवद्गुणस्वरूपशक्त्याद्यभिज्ञाभ्यां श्रीदेवकीवसुदेवाभ्यां कृतं भगवद्गुणस्वरूपादिप्रकाशकं स्तोत्रं पितृद्वारा भगवतः श्रीनन्दगृहे गमनं च वर्णयति– अथेति । मङ्गले –

"ओंकारो वाऽथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्जातौ तस्मान्माङ्गलिकावुभौ"

इति स्मृतेः यर्हि सर्वगुणोपेतः कालो जातस्तदा देवक्यां विष्णुराविरासीदित्यष्टमेनान्वयः सर्वैर्नानाऋतुगतैर्गुणोपेतः अनेन कालगुणसकलीकरणेनाऽघटनघटनापटीयसी शक्तिर्भगवतो द्योतिता अयमर्थः यदिच्छयैव प्रावृषि वसन्तग्रीष्मशरदादिगुणाः आगताः न च तत्तदृतुषु गुणा लुप्ताः स सर्वत्र स्वव्याप्तिमलोपयित्वैव व्यापक एव आविरासीदिति वक्ष्यते च अनावृतस्य बहिरन्तरं न ते इत्यादिना—

"क्वाहं तमोमहदहं खचराग्निवार्भू-–सम्वेष्टिताण्डघटसप्तवितस्तिकायः ।
क्वेदृग्विधाविगणिताण्डपराणुचर्या- वाताध्वरोमविवरस्य च ते महित्वम्" ॥

इत्यादिना च साक्षात्स्वरूपस्यैकत्वेपि अधिकारीतारतम्यादर्शनेपि तारतम्य वक्ष्यति भगवान् शुकः –

"इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन । मायाश्रितानां नरदारकेण साकं विजह्रुः कृतपुण्यपुञ्जाः" ॥ इति

"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां वृष्णीनां परदैवतेति विदितो रङ्गं गतः साग्रजः" ॥

इति च अजनो विष्णुस्तस्माज्जन्म यस्य ब्रह्मणस्तस्य ऋक्षं रोहिण्याख्यं नक्षत्रम् अश्विन्यादीनि ऋक्षाणि च सूर्यादयो ग्रहाश्च तारकाश्च ते तथा शान्ताः ऋक्षादयो यस्मिन् तत् यर्हीत्यस्याग्रेपि योगो ज्ञेयः ॥ २ ॥ सर्वा दिशो यर्हि स्वरूपतः सुमङ्गला जाताः सर्वासु दिक्षु भगवत्पार्षदैर्देवैश्च गीतनृत्यशङ्खघोषादिनोत्सवः कृतोऽतो दिशः प्रसेदुरिति गगनं च निर्मलानामुज्ज्वलानामुडुगणानामुदयो यत्र तत्तथेत्येवंभूतं जातम् मङ्गलभूयिष्ठाः पुरग्रामादयो यस्यां सा ॥ २ ॥ प्रसन्नानि सलिलानि यासां ताः जलह्रदैः पद्मादिभिः श्रीः शोभा येषां ते द्विजाः अण्डजाः अलयो भ्रमरास्तेषां कुलानि जातिभेदास्तेषां हृष्टानां संनादो येषु ते स्तबका यासां ताः वनराजयोऽरण्यपङ्क्तयो यर्हि जाताः ॥ ३ ॥ शान्ताः पिहिता अपि समिन्धतः अडागमोऽत्र द्रष्टव्यः समैधत सम्यग्दीप्ता जाताः "इन्धि दीप्तौ ॥ ४ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

॥ हरिः ॥ ॐ ॥ अथेति । अत्र कालस्य सामान्येन परमशोभनत्वमुक्तम् । तदयुक्तम् । कंसादिभ्योऽशोभनत्वात् । अतो विरोधः । तस्मादर्थांतरम् । अथसर्वगुणोपेत इत्येकं पदम् । नास्ति थम् अन्नं यस्य सोऽथः । यस्मादन्नं थमुच्यते इति कौर्म्ये । निरशनो भगवानित्यर्थः । अनश्नन्नन्योऽभिचाकशीतीति श्रुतेः । अन्यो निरन्नोऽपि बलेन भूयानिति स्मृतेश्च । तं सरंति जानंति ते सर्वाः । सृगतौ ततो वः । गत्यर्थानां च ज्ञानार्थत्वात् । अनुसरंतो वा । तेषां गुणोपेतः सुखकारक इत्यर्थः । यद्वा । अथ भगवदवतारारंभ एव । सर्वान्प्रति गुणोपेतोऽपि कालः ॥ परम् । शत्रुं प्रति । अशोभनः । आसीदिति शेषः । परम् अत्यर्थम् । अशोभनः कालः । अपेतः परावृत्तः । किंतु । सर्वगुणः सर्वगुणा एव यस्मिन्स तथा । अभूदिति शेष इति वा ॥ अजानत् । विष्णोः । जन्म यस्य तस्य ब्रह्मणः ॥ ऋक्षः । रोहिणीनक्षत्रम् । यर्हि । यस्मिन्समये । स कालः सर्वगुणोपेत इति योजना । यद्वा । अजनजन्म जनविलक्षणस्य जन्मरहितस्य वा भगवतो जन्मऋक्षम् । ऋकारो देवमाता स्यादित्येकाक्षरात् । ऋशब्दवाच्या दितिरूपदेवकी क्षं क्षेत्रं यस्य तत् । क्षःक्षेत्रे राक्षसे क्षये इति वररुचिकोशात् । क्षा भूमिर्यस्य वा । क्षा शब्दस्य पृथिवीनामसु पाठात् । देवक्यां भगवज्जन्म यदासीदित्यर्थः । यर्ह्येव । यदैव । आसीत्तदा कालः ॥ शांतर्क्षग्रहतारकोऽभूत् । शांताः प्रसन्नाः । ऋक्षाणि अश्विन्यादीनि । ग्रहाः सोमादयः । तारका अन्य भानि । यस्मिन्काले सः । यर्हि यदा । एवं कालः । तदा दिशः प्रसेदुरित्यादिरन्वयः । यद्वा । अथ शब्दावृत्तिः कार्या । तथा च । यर्हि यदा । अथ सर्वम् । अथ मंगलम् । मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथोऽथेत्यमरः । तदा कालः सर्वगुण इति योजना । केचित् । शांतर्क्षग्रहतारकमिति पाठं कल्पयित्वा ऋक्षविशेषणत्वेनोत्तरचरणं च शांता ऋक्षादयो यस्मिंस्तदिति बहुव्रीहिणा योजयंति । तच्चिंत्यम् । ऋक्षादेस्तच्छांतत्वस्य वा रोहिण्याश्रयत्वानुपपत्तेः ॥ १ ॥ दिश इति । अग्रे मंदमंदं जलधरा जगर्जुरिति मद्भावात् । अत्र निर्मलोडुगणोदयमिति विरुद्धम् । अतोऽर्थांतरम् ॥ निर्मलः । निर्दोषः ॥ उडुगणोदयम् । लग्नम् । यस्मिन्गगने तत् । उडूनां गणः अनेकत्वं यस्मिंस्तद्राशेः उदयो लग्नमिति विग्रहः । राशीनामुदयो लग्नमित्यमरः । यद्वा । निर्मलः तिमिररहितः । उडुगणोदयः रोहिण्यादिनक्षत्रोदयः । यस्मिन्निति । चंद्रोदयाभावेन तत्तिथौ कृत्तिकांतानामुडूनां तमस्युदयेऽपि रोहिण्यादीनां चंद्रोदयसद्भावान्न तमस्युदय इति भावः । अथवा । निर्मलः पुण्यरूपः । यः । उडुगणः कृत्तिकादिविशाखांताश्चतुर्दशनक्षत्रगणः । तन्मध्येऽग्निदैवतत्वेनाद्यांत्ययोर्यज्ञाद्युपयोगित्वाभावस्य क्वचिदुक्तत्वेन रोहिण्यादेरेव प्राशस्त्यात् । यत्पुण्यं नक्षत्रमित्यादिश्रुत्या तदादेर्देवनक्षत्रोक्तेः । तस्योदयो यस्मिंस्तत् । अभ्रपिधानेऽप्युदयाचलोर्ध्वागमनरूपोदयस्याप्रतिबद्धत्वान्न विरोधापत्तिरिति भावः । किंवा । निर्मलोडुमलैः पापग्रहैः सहितान्युडूनि मलोडूनि निर्गतानि मलोडूनि यस्मात्तत् । तत्काले रोहिण्युदयात्तत्पूर्वाणि दृश्यमानानि चतुर्दशनक्षत्राणि पापग्रहानधिष्ठितान्याकाशेऽभवन्नित्यर्थः । गणोदयम् । नामैकदेशग्रहणेन नामग्रहणमिति न्यायात् । गणो गणेशः । तस्याकाशाभिमान्युदय आविर्भावो यस्मिंस्तद्गगनमासीत् । इदमप्युपलक्षणम् । कालादीनां सर्वेषामप्यभिमानिदेवताव्यक्तिः स्वस्वाभिमन्यमानस्थानेऽभूदिति ग्राह्यम् ॥ २ ॥ द्विजावलीति । अत्र रात्रौ पक्षिशब्दासंभवाद्विरोधोऽतोऽर्थांतरम् । द्विजानां ब्राह्मणानाम् । आलिः पंक्तिः । तस्याः । कुः आश्रयभूमिः । तत्र यः । लसन् शोभमानः । नादः शब्दः । यस्य सः । स्तवः स्तुतिः । यासु तादृश्यो वनराजयस्तदा आसन् । स्वार्थे कः । बवयोरभेदश्च ॥ ३ ॥ अग्नय इति । अत्र निशीथे ब्राह्मणाग्नीनां प्रदीपनासंभवाद्विरोधोऽत उच्यते । कंसादिभयाद्ये पूर्वम् ॥ शांताः । विनष्टाः । ते ॥ तत्र । भगवज्जननकाले ॥ सं । स्वत एव ॥ इंधत । प्रदीप्ताः । इति वैलक्षण्यज्ञापनायैव अडागमस्यापेक्षितत्वेऽपि समिंधतेति विलक्षणः प्रयोगः । अन्यथा समैंधतेति स्यात् । अथवा । ये च पूर्वं द्वीजातीनामग्नयः कोपाग्नयः संतापाग्नयो वा । समिंधत प्रदीप्ता आसन् । ते । तत्र जन्मकाले । शांताः शमं प्राप्ताः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ अथेति । ब्रह्मादिगमनानन्तरमित्यानन्तयार्थकं सच्छ्रुत्या मङ्गलप्रयोजनकम् । सर्वगुणैरुच्चस्थानस्थत्वादिसर्वग्रहगुणैरुपेतः । जनानां विद्यते थमन्नं यस्मिन्सः । अथः स चासौ सर्वगुणोपेतश्चेति वा । यो भुङ्क्ते तद्दिने मोहात्पूयशोणितमत्ति स इत्यादेः । परमं शोभनं यस्मात्स तथा । परमरिजनं प्रत्यशोभनः । एकस्यैव कालस्य सदसद्विवक्षया शोभनत्वाशोभनत्वे वियुक्तनारी परितापकरी किमिन्दुरानन्दकरो लोक इत्यादिवज्ज्ञेये । अजनस्य प्राकृतकायसंसर्गरूपजननहीनस्य जन्मनटनस्य ऋक्षं

नक्षत्रं रोहिणीनामकं यस्मिन्सः। अजनेति वदन् जन्मेति जल्पन्प्रसिद्धजन्मोपजहास शुक इति ज्ञेयम्। शान्तिप्रदानि ऋक्षाण्यस्थूलनक्षत्राणि ग्रहा राह्वादयो ये ऋक्षाः कृतनिवेशना हि ते विहितस्थाननिवेशाश्च ते ग्रहाश्चेति वा। ऋक्षः कृतनिवेशने ऋक्षमुक्तं च नक्षत्र इति विश्वः। तारकाः स्थूलानि नक्षत्राणि नक्षत्राणि वा यस्मिन्सः। तारका ज्योतिषीति निपातनान्नेत्वम्। तारकाणि यस्मिन्स इति वा। नक्षत्रे तारकं तारकाऽपि चेति विश्वः। यद्वा खण्डे खण्डःकाल इति यदेत्युक्तिः। अजनान्नारायणाज्जन्म यस्य स ब्रह्मा देवता यस्य तदृक्षं रोहिणीनक्षत्रं यस्मिन्स इति केचित्। प्रजापतिदेवतेति। तथा चोक्तं। दुवदे चतुर्ब्रह्मः कं देवताप्रस्तावे। रोहिणीनक्षत्रं तथा च कालामृते। ऋक्षेशा अथ दस्रकालहुतभुग्ब्रह्मेन्द्विति ॥ १ ॥ तदा दिशः प्रसेदुः प्रसन्ना अभूवन् गगनं भागभेदत इयमुक्तिः। निर्मलानामुडूनां गणस्योदयो यत्रेति तन्मही मङ्गलभूयिष्ठा पुराणि ग्रामा बहुजनाकीर्णा व्रजनिकराश्च यस्यां सा ॥ २ ॥ जलरुहाणां कमलानां श्रियः शोभा येषां ते वनराजयो वनपङ्क्तयो द्विजानां पक्षिणामलीनां भ्रमराणां च कुलं तस्य सन्नादो येषु ते च स्तबका गुच्छा यासां ताः ॥ ३ ॥ सुखं तत्साधनं स्पर्शो यस्य सः। सुखमासनमिति यथा। वहतीति वहः पुण्यगन्धस्य शुचिः शुद्धो वायुः शान्ताः प्राक्। तत्र तत्समये समिन्धत दीप्ता बभूवुः ॥ ४ ॥

श्रीसुबोधिनी

जननं वर्णनं स्तोत्र सान्त्वनं गमनं तथा। षड्विधो भगवानत्र तृतीये विनिरूप्यते ॥ १ ॥
रूपान्तरस्वीकरणमध्यायार्थं इहोदितः। प्रतीयमानो भगवानिति षड्विध उच्यते ॥ २ ॥
अष्टभिश्च चतुर्भिर्वै दशभिश्चाष्टभिस्तथा। चतुर्दशभिरष्टाभि षडर्थाः क्रमतोऽत्र हि ॥ ३ ॥
ऐश्वर्यमष्टधा यस्मादर्धमात्रा हरौ परा। सार्धाष्टभिरतः प्रोक्तमैश्वर्यं सर्वमङ्गलम् ॥ ४ ॥
अधिकारिणि काले वै अनन्ता भगवद्गुणाः। खण्डशस्तेवयवशः सर्वेषां फलबोधकाः ॥ ५ ॥
मूले समागते कालः स्वकीयान् सकलान् गुणान्। हरौ प्रदर्शनार्थाय प्रकटीकृतवान् यथा ॥ ६ ॥
देशोपि त्रिविधश्चैव भूतान्यपि तथैव च। तत्रत्या ये विदुस्तेपि ज्ञापनार्थं गुणान् स्वकान ॥ ७ ॥
प्रकटीकृतवन्तो वै दोषनाशपुरःसरम् ॥ ७½ ॥

एवं पूर्वाध्याये भगवत उद्यममुक्त्वा सर्वेषां त्रिविधदुःखदूरीकरणाय रूपान्तरस्वीकरणमुच्यते, अत आदौ रूपं वक्तव्यं, अन्यथा रूपान्तरत्वं न स्यात्, तस्य च प्राकट्ये यद्यधिकारिणां नैमित्तिकगुणप्राकट्यं सर्वं नोच्येत तदा प्राकट्यमपि जननापरपर्यायं स्यात्, न ह्येकस्य जनने सर्वं गुणा प्रकटीभवन्ति महतामन्येषां च, जनकयोर्वा यदि स्तोत्रं नोच्येत तादृशमेव जनितमिति तयोर्बुद्धिः स्यात्, रूपस्य प्रदर्शनमात्रप्रयोजनव्यावृत्त्यर्थं स्वरूपकथनमपि वक्तव्यं, अन्यथाश्चर्यमात्रत्वेन निदानाज्ञानात् सन्देह एव तिष्ठेत्, रूपान्तरेण कार्यं न भवतीति गमनमावश्यकं, रूपान्तराभावे सर्वमुक्तिरेव स्यात्, लीलाया रसालता च न स्यात्, अलौकिकं लोकाद् दुर्लभमिति ज्ञापयितुं दृष्टेप्यलौकिके जनकयोर्भयवर्णनम्।

प्रथममष्टैश्वर्ययुक्तमाविर्भावमाह, यदैव ते स्तुत्वा गता अथ तदनन्तरमेव भगवानाविर्भूत इति सम्बन्धः, तदैव सर्वगुणोपेतः कालो जातः, यावन्तो गुणाः काले स्थापितास्ते सर्वे प्रकटीभूता भगवज्ज्ञापनार्थमित्यर्थः, अत एव परमशोभनो जातः, परमस्यापि भगवतः पूर्णगुणस्य शोभाजनकः, कालावयवरूपाणि यानि नक्षत्राणि तेष्वपि केवलगुणाधारभूता रोहिण्येव, भगवता हि स्वगुणप्राकट्यार्थमेव ब्रह्मोत्पादितः, स तु विकारान् दूरीकृत्य गुणानेव प्रकटयितुं तन्नक्षत्रं गृहीतवान्, अत एवाजनस्य जन्मरहितस्य पुत्रोपि जन्मरहित एवेति ज्ञापयितुमजनाज् जन्म यस्य तस्य नक्षत्रमित्युक्तं "ततो वै ते सर्वान् रोहानरोहंस्तद्रोहिण्यै रोहिणीत्व"मितिश्रुतेः, यद्वाजनजन्मर्क्षं जातं, तदैव सर्वगुणोपेतः कालो जात इतिसम्बन्धः, अनेन नक्षत्रारम्भे जन्मेति सूचितं, तस्य नक्षत्रस्य सर्वेषां सहायवर्तिनामानुगुण्यमाह शान्तर्क्षग्रहतारकमिति, शान्तान्यन्यान्यृक्षाणि ग्रहास्ताराश्च यस्य, अश्विन्यादीनि नक्षत्राणि, आदित्यादयो ग्रहाः, अन्यानि च नक्षत्राणि ताराः, यद्यपि तेषां ज्योतिःशास्त्रे फलं नोक्तं तथाप्यस्तीति शान्तत्वमुक्तं, अनेन स्वाभाविका आनुषङ्गिकाश्च गुणा निर्दोषाः कालगता निरूपिताः ॥ १ ॥

देशस्त्रिविधः, अध उपरि परितश्चेति, तत्र परितो दिश उपरि द्यौरधो भूमिः, त्रयाणां दोषाभावपूर्वकं गुणा उच्यन्ते, तत्र दिशो देवतात्मिका भूतात्मिकाश्च भवन्ति, तत्र मेघादिना दूरदर्शनलक्षणप्रसादो दिशां भवति, देवताप्रसादस्तु सर्वसाधकः, अतो ज्ञानं सर्वमेव च फलं सिध्यतीत्युभयविधदिशां प्रसाद उच्यते।

दिशः प्रसेदुरिति, निर्मला उडुगणा यत्र वर्षाकाले मेघाः सहजास्तैः कृत्वोडुगणानां प्रकाशो न दृश्यत इति नैर्मल्यमुच्यते, उदयेति, उदयकालेपि मेघानामभावः, उदयो दर्शनमेव वा, मही भूमिर्मङ्गलभूयिष्ठा, सर्वत्रैव विवाहपुत्रजन्माद्युत्सवास्तस्मिन् समये जायन्त इति, पुरं नगरं, ग्रामाः साधारणाः, व्रजो गवां स्थानं, आकरा रत्नाद्युत्पत्तिस्थानि, सर्वाण्येव मङ्गलभूयिष्ठानि यस्याम् ॥ २ ॥

एवं देशकालयोर्गुणानुक्त्वा भौतिकानां तत्तद्भूतप्रधानानां गुणानाह, तत्र प्रथममपामाह। नद्यः प्रसन्नसलिला इति, यद्यप्यापो बहुविधा एकोनविंशतिभेदास्तथाप्युभयविधा एव, स्थावरा वहन्त्यो वा, अत उभयानां गुणा उच्यन्ते नदीषु कालवशात्

पङ्किलं जलं भवति, आधिदैविककालवशात् कालनियन्तृभगवद्वशाद् वा स निवर्तते, अतः कालनियन्तरि भगवति समागते **नद्यः प्रसन्न सलिलं** यासां तादृश्यो जाताः, दोषनिवृत्तिपूर्वकः स्वाभाविक गुण उक्तः, **ह्रदाः** स्थावराः, **जलरुहाणां** कमलानां **श्रीर्येषु** जलस्य योयं सारांशः स कमलादिः, अतो साधारणा गुणा अनेनोक्ताः, भूमेर्गुणान् वक्तुं गन्धस्तस्या मुख्यो गुण इति स च पुष्पादिषु प्रसिद्ध इति गन्धरसकार्यकथनपूर्वकं पुष्पादिसम्पत्तियुक्तां वनरूपां भूमिमाह **द्विजालीति द्विजाः** पक्षिणः, अलयो भ्रमराः, उभयेषां **कुलानि**, तेषां सन्नादयुक्ताः **स्तबका** पुष्पगुच्छा यासां तादृश्यो **वनराजयो** वनपङ्क्तयो जाताः ॥ ३ ॥

ववौ वायुरिति सुखस्पर्शो वायोर्गुणः, गन्धं च भूमेर्वहतीति शुभकार्यं, पुण्यं गन्धं वहतीति पुण्यगन्धवहः, **शुचिर्गङ्गादि**जलसम्बन्धी दोषरहितो वा, यो वा वायुः शुभसूचकः स शुचिः, **अग्नयो** लौकिका वैदिकाश्च **द्विजातीनामिति** निषिद्धेतराः, तत्राप्यशुभकार्यस्थव्यावृत्त्यर्थं **शान्तास्तस्मिन् समये समिन्धत** सम्यग् दीप्ता जाताः, तस्मिन् समये शुभा अग्नयः पिहिता अपि प्रज्वलिता जाता इत्यर्थः ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अधिकारिणि काल इति, दक्षिणायनकृष्णपक्षनिशीथादिदोषेषु सर्वकर्मणि निन्दितेषु सत्सु **सर्वगुणोपेत**त्वोक्तिर्मूलेनुपपन्नेत्याशङ्क्य तत्तात्पर्यमाहुरधिकारिणीत्यादिना, तथा'प्यधिकं तत्रानुप्रविष्टं न तु तद्धानि'रितिन्यायेनोक्तदोषानिवृत्तिस्तदवस्थैवेति चेत्, अत्र वदामः, नात्र पूर्वोक्ताधिभौतिककाले प्रादुर्भाव उच्यते किन्त्वधुनैव लीलाविर्भावारम्भ इति लीलाकालो योग्र भगवदात्मकत्वेन वाच्यः स प्रादुर्भूत इति, एवमेव देशादिरपि, अत एवाथशब्दो भिन्नप्रक्रमार्थक उक्तः, आधिभौतिकस्य तस्य जन्मनिमित्तत्वाभावाद्, भौतिकस्याधिष्ठानत्वेपि यथा वरदेयरात्रीणां तदा दिवापि प्रकटनं कृतमिति तद्रात्रीणां दिवारूपत्वमपीति न वक्तुं शक्यं तथास्याधिभौतिकतद्रूपत्वं न वक्तुं शक्यं, एतज्ज्ञापनायैव शुकैस्तथोक्तं, अन्यथा प्रकटे त्वदुक्तदूषणे सत्येवं न वदेत्, यद्यप्याधिभौतिक उत्तरायणत्वादिविशिष्टेप्येतत्प्रकटनं सम्भवति तथापि यदेतादृशे तस्मिंस्तथाकरणं तन् **मर्यादामार्गात् पुष्टिमार्गोतिविलक्षणो बालष्ठश्चे**तिज्ञापनायेति जानीमः, अत एव सर्वदेवतासान्निध्यप्रयुक्तसर्वगुणोपेतत्वव्यावृत्त्यर्थं तद्गमनानन्तरं भिन्नप्रक्रमेणेदमुक्तं, असङ्कोचात् **सर्वशब्देनै**श्वर्यादय उच्यन्ते, तेन भगवदात्मकत्वमुक्तं भवति, तेन लीलाकालत्वमायाति ॥ १ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

तृतीयाध्यायं व्याख्यातुं **सङ्गतिमवसररूपां** सूचयन्तोर्थविशेषमाहु**र्जननमि**त्यादि, अत्र **षड्विधो भगवा**नित्युक्तया "दिष्ट्या हरेस्या" इत्यत्र 'धर्मरूपेणाविर्भावः कर्माण्यानन्दरूपेणाविर्भावो जन्मानी'ति यः श्रौतसिद्धान्त उक्तः स स्मारितो ज्ञेयः ॥ १ ॥ अत्र षडर्थानां निरूप्यत्वेध्यायार्थाननुगम इत्यत आहू **रूपान्तरे**त्यादि, तर्हि षण्निरूपणस्य किं प्रयोजनमत आहुः **प्रतीयमान** इत्यादि, रूपान्तरस्वीकारात् पूर्वं यः **प्रतीयमानः स भगवान्** षड्गुणैश्वर्यसम्पन्न इति ज्ञापयितुं **रूपान्तरस्वीकारो**पयोगित्वेन तथोच्यते, तेन **रूपान्तरस्वीकरणमे**वाध्यायार्थ इत्यर्थः ॥ २ ॥ जननस्य **सार्धाष्टभिर्निरूपणे** हेतुमाहु**रैश्वर्य**मित्यादि, **अर्धमात्रा हरौ परे**ति, "अर्धमात्रात्मकः कृष्ण" इति तापनीयश्रुते"रर्धचतुर्थमात्रेणोमित्येकेनैवाक्षरेण परं पुरुषमभिध्यायीते"तिप्रश्नश्रुतेश्च प्रणवस्य या चतुर्थ्यर्धमात्रा **सा हरौ** प्रकटे **परा** परत्वबोधिका, **अर्धमात्रा** चात्र गर्भवृद्ध्यादेस्तुल्यत्वेपि प्रादुर्भावप्रकारेण लोकविलक्षणेन स्वरूपेण च प्रकटीकृतेतिज्ञापनाय तथेत्यर्थः ॥३-४॥ टिप्पण्यां ननु जनने वर्णनीये कालगुणवर्णनस्य किं प्रयोजनमित्याकाङ्क्षायाम् अधिकारिणीत्यर्धं विवृण्वन्ति दक्षिणेत्यादि, नन्वाधिदैविककालप्रादुर्भावे किं मानमित्यत आहुरत **एवे**त्यादि **तथोक्तमिति सर्वगुणोपेतत्व**मुक्तं, ननु प्रक्षालनपङ्कन्यायेन दक्षिणायनं विहायोत्तरायण एव तद् भगवता कुतो न कृतमित्यत आहुर्यद्यपीत्यादि, अत्रापि गमकमाहुरत एवेत्यादि, ननु भवत्वेवं तथापि भगवदात्मत्वे किं गमकमत आहुरसङ्कोचेत्यादि, **सर्वशब्देनेति**, **सर्वगुणोपेत**शब्दैकदेशेन, तेन सुबोधिन्यां मूले कालस्य **सर्वगुणोपेत**त्वादिकथनेन सर्वथा भगवत्तुल्यत्वमायातीति तद्वारणायाहुः **खण्डश** इत्यादि, भगवद्गुणैकदेशास्ते गुणा **अवयवशः** कालावयवैः कृत्वा **सर्वेषां** ग्रहर्क्षतारादीनां यत् फलं तस्य **बोधका** उद्बोधकाः, तथा च तावन्मात्रकार्यकर्तृत्वात् कालस्य न सर्वथा भगवत्तुल्यत्वमित्यर्थः ॥ ५ ॥ गुणप्राकट्यं देशादिष्वप्यतिदिशन्ति **मूल** इत्यादिसार्धद्वयेन, **देशोपि त्रिविध** इति, उपर्यधःपरित इति, भूर्भुवस्वरिति वा, चैवेति, चकारः सर्गगुणप्राकट्यबोधकः, एवकारस्तस्याप्याधिदैविकत्वज्ञापकः, एवंभूतान्यपि ज्ञेयानि, **तत्रत्या ये विदुरिति**, त्रिविधदेशोद्भवेषु ये भगवत्प्राकट्यं **विदुरि**त्यर्थः, ज्ञापनार्थमिति, अवतरतो मूलरूपत्वज्ञापनार्थमित्यर्थः ॥ ६—७½ ॥

कारिकोक्तमर्थं विशदीकर्तुमाहुरेवमित्यादि **भयवर्णनमित्यन्तं**, तत्र **स्वीकरणमुच्यत** इत्यन्तेन सङ्गतिबोधनायाध्यायार्थ उक्तः, अतो वर्णनतात्पर्यमाहुरत इत्यादि, ततो जननस्वरूपबाधनार्थं सर्वगुणप्राकट्यतात्पर्यमाहुस्तस्येत्यादि, ततः स्तोत्रयोस्तात्पर्यमाहु**र्जनकयो**रित्यादि, तादृशमेव जनितमिति तयोर्बुद्धिः स्यादिति, पूर्वोक्तरूपमेव तयोरुत्पन्नमिति सर्वेषां बुद्धिः स्यात्, ततः सान्त्वनगतस्वरूपकथनस्य तदाहू **रूपस्ये**त्यादि, गमनस्य च स्फुटं, ननु रूपेणैव सकलकार्यसिद्धेः किं रूपान्तरग्रहणेनेत्यत आहू **रूपान्तरे**त्यादि, नन्वात्मत्वेन ज्ञानाभावादपि सर्वमुक्त्यभावसिद्धिरिति नेदं रूपान्तरग्रहणप्रयोजनमित्यतो हेत्वन्तरमाहुर्लीलाया इत्यादि, तर्हि

भयवर्णनं कुत्रोपयुज्यत इत्यत आहुर**अलौकिक**मित्यादि, **अलौकिक** माहात्म्यज्ञानं **लोकात्** स्नेहाद् बालरूपात् कंसादेरित्यर्थः, तद्बुद्ध्य-नुवादोयं, अथ मूलं व्याकुर्वन्ति **प्रथम**मित्यादि, **प्रादुर्भूत** इति 'प्रादुरासीदि' त्यस्यार्थोयं एवमेव जातपदमपि बोध्यं, यद्यपि दूरान्वय एवं भवति तथाप्यध्याहारापेक्षया लघीयस्त्वादेवमुच्यते ॥ १ ॥

दिशः प्रसेदुरित्यत्र **देवताप्रसाद** इति, 'कर्णौ दिश' इत्यादिवाक्याद् दिशः श्रोत्रेन्द्रियदेवतास्ताः प्रसन्नाः, सर्वमेव भगवत्स-म्बन्धि श्रोष्यन्तीति तत्प्रसादः **सर्वसाधक** इत्यर्थः, तद् विवृण्वन्त्यत इत्यादि, **निर्मले**त्यत्र निर्मला उडुगणा उदये यत्रेति गड्वादि-समासोत्र बोध्यः, समासान्तरमपि बोधयन्त्यु**दयो दर्शन**मिति, अस्मिन् पक्षे निर्मलानामुडुगणानामुदयो यत्रेतिसमासः, **मही**त्यत्र विवाहेति, 'सर्वर्तवो विवाहस्ये' त्यापस्तम्बस्मृतेस्तथेत्यर्थः ॥ २ ॥

नद्य इत्यत्रै**कोनविंशतिभेदा** इति, यद्यपि तैत्तिरीयसंहितायां "कूप्याभ्यः स्वाहे"त्यादिना "सर्वाभ्यः स्वाहे"त्यन्तेन विंशतिभेदा अपामुक्तास्तथापि "सर्वाभ्य" इत्यन्तिमस्य पूर्वोक्तसर्वग्राहकत्वेनातिरिक्तत्वाभावमभिप्रेत्यै**कोनविंशतिभेदा** इति बोध्यं, **कालनियन्तु**रिति सङ्कर्षणस्य, तथा च भगवद्वशो यः कालनियंता तस्मादित्यर्थः ॥ ३-४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तृतीयाध्याये प्रथमकारिकायां स्तोत्रे इतिद्विवचनान्तं, वसुदेवदेवकीकृतं स्तोत्रद्वयमित्यर्थः ॥ १ ॥ अनन्तेषु **गुणेषु** सत्सु श्रोतव्यविषयतावच्छेदकत्वेन षडेव गुणा"स्तस्माद् भारते"तिश्लोक उक्ताः, तथा च भागवते **प्रतीयमानो भगवानेवे**तिहेतोः **षड्विध** उच्यत इत्यर्थः ॥२॥ **हरौ परे**ति परमेश्वरत्वबोधिकेत्यर्थः ॥३-४॥ **सर्वगुणोपेत**त्वे शङ्काव्यावृत्त्यर्थम**धिकारिणी**तिकारिकाद्वयमुक्तमिति टिप्पण्यामुक्तं, **भगवतोधिकारिणि काले** शुभफलसूचका उत्तरायणाद्यो **भगवद्गुणा** अनन्ताः सन्ति परन्तु भगवदतिरिक्तानां सर्वेषां ते केनचिदंशेनोत्तरायणत्वाद्यन्यतमावच्छेदेन तत्रापि **खण्डशः फलबोधकाः**, अतः कालः कश्चिद् गुणं प्रकटयतीतिशेषः, फलदातृत्वं भगवत एव न तु कालस्थितानां गुणानां, काले तु स्वधर्मानावेश्योत्तरायणत्वादिव्यपदेशं सम्पाद्य फलं बोधयतीति **बोधका** इत्युक्तं न तु दायका इत्यर्थः ॥ ५ ॥ **मूले भगवति समागते तु कालः** स्वनिष्ठान् भगवद्गुणान् **शुभफलसूचकान् सकलान् प्रकटीकृतवान्**, तथा च प्रतीत्या दक्षिणायनत्वादिरूपत्वेपि शुभफलसूचकत्वादुत्तरायणनिष्ठो धर्मः शुभफलसूचनं तद्वत्त्वादुत्तरायणादिरूपत्वमितिभावः, यद्यपि कालगुणप्राकट्येपि भगवतो न कोपि विशेषस्तथापि यथा राज्ञा सेवकगृहे स्थापितमाभरणादिकं राज्ञि समागते तत्प्रदर्शनार्थं पुरतः स्थाप्यते तथेति सूचयितुं **प्रदर्शनार्थापे**त्युक्तं, **यथा** यथावदित्यर्थः, तादृशे काले प्राकट्यं तु भगवतः कालानपेक्षासूचनाय, काल एव भगवत्प्राकट्यं ज्ञात्वा भगवते प्रदर्शयितुं **स्वनिष्ठान् गुणान् प्रकटीकृतवा**निति भावः, ननु **सर्वगुणोपेत**त्वमधिकं जातं न तु तावता पूर्वोक्तदोषहानिरतो दोषसहिता एव गुणाः स्युरित्यरुचिमुद्भाव्य स्वतन्त्रलेखनं टिप्पण्यां कृतमिति **चेदत्र वदाम** इति, इतिशङ्का चेद् भवेत् तदात्रार्थं आचार्यैर्गोपनार्थमनुक्तमपि वयं **वदाम** इत्यर्थः ॥ ६ ॥ **सुबोधिन्यां देशोपी**ति **गुणान्** 'प्रकटीकृतवानि'तिपूर्वेणान्वयः, **त्रिविधः** परित उपर्यधोभेदेन, **तथैव चे**ति **गुणान् प्रकटीकृत**वन्तीत्यर्थः, **तत्रत्या** इति, देवा मुनयश्चेत्यर्थः, किन्नरास्त्वाकाशगुण-त्वेनोक्ता इति तत्र व्याख्यास्यते, **ये विदु**रिति, भगवत्प्राकट्यमितिशेषः ॥ ७½ ॥

त्रिविधेति, 'कंसादेः कालतोज्ञानादि'त्यर्थः, **महता**मिति, अन्येषामपि महतां पृथ्व्यादीनां मध्य **एकस्य जनन** इति पूर्वेणान्वयः, **तयोर्बुद्धि**रिति, एतादृशी तयोर्बुद्धिरितिज्ञानमस्मदादीनां **स्या**दित्यर्थः, **स्वरूपकथन**मिति, 'त्वमेव पूर्वसर्गेभू'रित्या-दिना भगवत्कृतं स्वरूपकथनं **शुकेन** वक्तव्यमित्यर्थः, **रूपान्तरेणे**ति, गमनं विना रूपान्तरस्वीकारमात्रेण पूर्वोक्तं कार्यं त्रिविध-दुःखदूरीकरणं न भवतीत्यर्थः, तर्हि तदेव रूपं स्थापनीयमित्यत आहू **रूपान्तराभाव** इति **अथे**त्यत्र **भगवा**निति, अत्र **भगवाना-विर्भूतो जात** इतिहेतोरिति, **फलार्थं** राजनिर्गमफलार्थं **पूर्वमेव** यथामार्गसंस्कारस्तथा तेषां गमनानन्तरमेवाजनजन्मर्क्षादीनां गुणानां काले सम्बन्धो जातोथतस्त**दैव सर्वगुणोपेतः कालो जात** इत्यर्थः, भगवत्प्राकट्यज्ञानं कालस्य गुणप्राकट्ये हेतुः, पूर्वस्थितानामपि रोहिण्यादीनां कालावयवरूपैश्चन्द्रादिभिर्न सम्बन्ध इति भावः, अत्रानन्तर्यार्थोथशब्द उक्तः, टिप्पण्यां **भिन्नप्रक्रमार्थ** उक्तस्तत् स्वतन्त्रलिखनत्वात् पक्षान्तरमिति ज्ञेयं, **भगवज्ज्ञापनार्थ**मिति भगवते स्वस्वरूपज्ञापनार्थमित्यर्थः, **अजस्ये**ति, कारणसदृशं हि कार्यं, तथा च भगवतो यथाजननप्रकारेणाविर्भावस्तथा **ब्रह्मणोपी**त्यर्थः, **ब्रह्मणो** भगवानेव कारणं, ततो जातास्तु कालादिसहकारिवशाद् विकारयुक्ता जाता इति भावः ॥ १ ॥

दिश इत्यत्र **देवतात्मिका** इति, श्रोत्रेन्द्रियदेवतारूपा इत्यर्थः, **भूतात्मिका** इति, प्राच्यादिरूपा इत्यर्थः, **भूतात्मिकानां प्रसाद**माहुस्तत्रेति, **दिशां** भूतात्मिकानामितिशेषः, देवतारूपाणामाहु**र्देवते**ति, सर्वेन्द्रियदेवतोपलक्षकमिदमिति ज्ञापयितुं **देवते**ति-सामान्यत उक्तं, भूतरूपाणां **प्रसादो दूरदर्शन**मात्रं भवति न तु तेन सर्वफलसिद्धिस्तद्व्यावृत्त्यर्थं **तु** शब्दः, **सर्वसाधक** इति, इन्द्रियजन्यज्ञानक्रियासाधक इत्यर्थः, भूतरूपाणां दूरदर्शनं प्रसाद इति स्वरूपतः प्रसाद उक्तो देवताप्रसादः फलत उक्त इतिविभेदः, **ज्ञान**मिति, दूरदर्शनमित्यर्थः, **निर्मला उडुगणा यत्रे**त्यर्थकथनं, विग्रहस्तु निर्मलानामुडुगणानामु**दयो** यत्रेति, **तस्मिन् समय** इति, उत्तरायणादिरूपे काले, **जायन्त** इतिहेतोः काले तादृशत्वस्य जातत्वान् **मही मङ्गलभूयिष्ठपुरग्रामव्रजाकरा** जातेत्यर्थः, अत्रापि सर्वगुणप्राकट्यादुत्तरायणत्वादिप्राकट्यात् तदाधेयानां मङ्गलानामपि प्राकट्यमितिभावः ॥ २ ॥

नद्य इत्यस्याभासे **भौतिकानामिति**, नदीजलादीनि पञ्चीकृतत्वाद् भौतिकान्येव न तु भूतरूपाणि किन्तु तत्तद्भूतप्रधानानीत्यर्थः, व्याख्याने **कमलादिरिति**, सहस्रपत्रं कमलं तदादिः सर्वोपि जलरुह इत्यर्थः, **गन्धरसेति**, स्तबकेषु द्विजानामपि सम्राडकथनान् मालत्यादिषु च रसमात्राभिलाषिणां मोदासम्भवात् स्तबकपदेन मालत्यादिपुष्पाणामाम्रादिपुष्पाणां च गन्धा उच्यन्ते, तथा च गन्धरूपं यत् कार्यं रसरूपं च यत् कार्यं तत्कथनपूर्वकमित्यर्थः, **पुष्पगुच्छा इति**, आम्रादिपुष्पाणां मालत्यादिपुष्पाणां च गुच्छा इत्यर्थः ॥ ३-४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तृतीयाध्यायोक्तौ प्रतीयमानः भगवानिति, जीवो हि देहं गृह्णन् न प्रतीयते, देह एव प्रतीयते, एवमत्रापि देह एव प्रतीतोस्ति तदन्तर्गतो भगवानन्य एव भविष्यतीति कस्यचिच्छङ्का स्यात् तन्निवृत्त्यर्थं भगवतो देहदेहिभावाभावात् प्रतीयमानस्यैव भगवत्त्वमिति सूचयितुं षड्भिः प्रकारैरत्राध्याये निरूपणमित्यर्थः ॥ १-२ ॥ तान् षट्प्रकारानाहुरष्टभिरित्यादिना ॥ ३ ॥ तत्र प्रथममैश्वर्यं निरूपणीयं, तदथ **सर्वगुणोपेत** इत्यादिना निरूप्यते तत्राथ **सर्वगुणोपेत** इत्यादिसार्धाष्टश्लोकसङ्ख्यातात्पर्यमाहुरैश्वर्यमष्टधा **यस्मादर्धमात्रा हरौ परेति**, तत्राष्टविधमैश्वर्यं श्लोकानामष्टत्वसङ्ख्यया सूच्यते, अर्धश्लोकेन तु प्रणवार्धगता मात्रा सूच्यते, तथा च योष्टविधैश्वर्यवान् यश्च प्रणवगतार्धमात्रावाच्यः सोवतीर्ण इति सार्धाष्टश्लोकसङ्ख्यातात्पर्यं, अर्धमात्रायाः प्रणवगतायाः परब्रह्मवाचकत्वस्य गोपालतापिन्यादिषूक्तत्वात् परब्रह्मत्वमेव सूचितं ज्ञेयम् ॥४॥ **खण्डशस्तेवयवश इति**, कालो हि खण्डशो व्यक्तिभेदेनोत्तमं फलं ददाति तदवयवशोवयवरूपैः सूर्यादिभिर्ददाति लोके, यथा नवमस्थानगुरुणेष्टं करोति, न हि सर्वेषां नवमो गुरुर्भवति अतो देवदत्तयज्ञदत्तादिव्यक्तिभेदेन फलदानं **खण्डशो** दानं सूर्यचन्द्रयोरन्यतरद्वारा शुभफलदानम**वयवशो** दानमिति लोके व्यवस्था, अतो जीवजन्मनि कश्चनैको द्वौ वा त्रयो वा गुणा भगवज्जन्मनि तु सर्वे शुभगुणा आधिदैविककालेन प्रकटीकृताः, अतः **सर्वगुणोपेतः कालः** शुकैरुक्तः ॥ ५-७१ ॥

अजनजन्मर्क्ष इत्यस्य व्याख्याने**जनस्य जन्मरहितस्येति**, इह कालस्याधिदैविकस्य प्रतिष्ठायां निरूप्यमाणायामजनजन्मर्क्षपदेनापि महिमैव वक्तुमुचित इति तमाहुर**जनस्य जन्मरहितस्ये**त्यादिना, भगवतो नित्यत्वाज् जन्मराहित्यमतः प्रादुर्भाव एव भगवतो वाच्यः, एवमेवाजनाद् भगवतो जातस्य भगवत्पुत्रस्य विधेरपि न प्राकृतरीत्या जन्म किन्तु तस्यापि गुणावतारत्वेन प्राकट्यं, एतदेवोक्तं **पुत्रोपि जन्मरहित इति**, प्रादुर्भावशालीत्यर्थः, अत एव 'गतव्यलीकैरजशङ्करादिभि' रित्यादिषु ब्रह्मणो ह्यज इति नाम दृश्यते, अनेन तस्य गुणावतारत्व न जीवत्वमित्युक्तं, तथा चैतादृशस्य विधेर्नक्षत्रं रोहिणी, सा सर्वनक्षत्रोत्तमेति तस्यां भगवदाविर्भावो युक्त एव, अत एव 'ततो वै ते सर्वान् रोहानरोह'न्निति तैत्तिरीयाणां ब्राह्मणे रोहिण्याः स्तुतिः प्रदर्शिता ॥ १ ॥

दिशः प्रसेदुरित्यत्र मेघादिना दिशां दूरदर्शनलक्षणः प्रसाद इति, ननु दिशां निराकारत्वात् कथं प्रसादो ज्ञेयः को वा प्रसाद इत्याकाङ्क्षायामाहुर्दिशामित्यादि, निशीथसमये मेघबाहुल्ये निकटस्थमपि वस्तु न दृश्यते किमुत दूरस्थम् ? प्रकृते तु भगवदाविर्भावमहिम्नाधिदैविकदिशामानन्दाधिक्यजप्रकाशवशाद् दूरदिक्स्थवस्तूनां सर्वेषामेव साक्षात्कारो भवति, अयमेव भौतिकदिशां प्रसादपदार्थो नाम, **सर्वत्रैव विवाहपुत्रजन्मादिभ्यो** जन्या य उत्सवा आनन्दास्ते **जायन्ते** विवाहपुत्रोत्पत्त्यादिभिर्यादृशा आनन्दास्तादृशास्तदा जायन्त इति तात्पर्यम् ॥ २ ३ ॥

अग्नयश्चेत्यत्र लौकिका वैदिकाश्चेति, लौकिकाः स्मार्ता वैदिका अग्निहोत्रादिसम्बन्धिनः, **निषिद्धेतरा इति**, निषिद्धा असुरादिशास्त्रसिद्धदुष्कर्मसम्बन्धिनः, तेषां तु तत्समये न समिन्धनमिति तदग्निव्यावृत्तये द्विजातिपदमितिभावः ॥ ४ ॥

(५) भगवदीयनिर्भयरामभट्टनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

'**स्तोत्रे** इति द्विवचनान्तं, वसुदेवदेवकीकृतं स्तोत्रद्वयमित्यर्थः', अत्र तृतीयाध्याये, **षड्विधो** जननादिषट्प्रकरणार्थरूपो भगवान् विनिरूप्यत इत्यर्थः ॥ १ ॥ अत्र तृतीयाध्याये 'बभूव प्राकृतः शिशु'रित्यत्रोक्तं रूपान्तरस्वीकरणमध्यायार्थः, अत्र **प्रतीयमानो** भगवानेवेतिहेतोः पूर्वोक्तजननवर्णनादिप्रकारेण **षड्विध** उच्यत इत्यर्थः ॥ २ ॥ **अष्टभिर्जननं** चतुर्भिर्वर्णनं दशभिर्वसुदेवस्तुतिरष्टभिर्देवकीस्तुति 'त्वमेव पूर्वसर्गेभू'रित्यादिचतुर्दशभिः सान्त्वनमष्टाभिः श्लोकैर्भगवतो गोकुले गमनमित्यर्थः ॥ ३ ॥ **ऐश्वर्यमिति**, अनेन सार्धाष्टभिः श्लोकैर्जननिरूपणे हेतुरुक्तः, तत्राष्टौ श्लोका अष्टविधैश्वर्यबोधकाः 'प्रादुरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कल' इति, **अर्धमात्रा** प्रादुर्भूतहरौ परा परैश्वर्यबोधिकेत्यर्थः, यथा प्रश्नोपनिष'द्यर्धचतुर्थमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीते'त्यत्र प्रणवस्यार्धचतुर्थमात्रा परत्वबोधिका तथात्रेतिभावः ॥४॥ **अधिकारिणीति**, दक्षिणायनकृष्णपक्षनिशीथरूपे सर्वत्र निन्दितत्वेन प्रसिद्धे काले **सर्वगुणोपेतत्वे** शङ्काव्यावृत्त्यर्थं कारिकाद्वयमित्युक्तं टिप्पण्यां, भगवतोधिकारिणि **काले** शुभफलसूचका उत्तरायणत्वादयो भगवद्गुणा अनन्ताः सन्ति परन्तु भगवदतिरिक्तानां सर्वेषां ते गणाः केनचिदवयवेन तत्रापि **खण्डशः फलबोधका न तु पूर्णफलदायकाः, मूलरूपे हरौ तु समागते कालः स्वनिष्ठान् सकलान् गुणान् प्रदर्शनार्थाय प्रकटीकृतवान्**

यथेति, यथावदित्यर्थः, अथवा यथा कालस्तथा देशादिरपीत्युत्तरेणान्वयः ॥ ५–६ ॥ देशोपीत्यादि, 'दिशः प्रसेदुरि'तिश्लोकोक्तः परित उपर्यधोभेदेन त्रिविधो देशोपि गुणान् प्रकटीकृतवानित्यर्थः, तत्रत्या इति, 'मुमुचुर्मुनयो देवा' इत्यत्रोक्ताः पूर्वोक्तत्रिविधदेशाद्भवा मुनिदेवादयोपि ये भगवत्प्राकट्यं विदुस्तेपि स्वसेवाज्ञापनार्थं गुणान् प्रकटीकृतवन्त इत्यर्थः ॥ ७½ ॥

बुभुत्सुबोधिका

जननमित्यादि सङ्गतिरवसररूपा सूचिता । प्रथमाध्याये हेतुमुक्त्वा सद्व्यापारो हेतुरिति कोस्य व्यापार इति प्रतिबन्धकीभूतजिज्ञासानिवृत्त्यर्थं कृष्णोद्यमं द्वितीयाध्याये निरूप्यावश्यवक्तव्यस्य रूपस्य रूपान्तरस्य चावश्यवक्तव्यत्वमवसरसङ्गतिलक्षणसमन्वयः । प्रतिबन्धकीभूतजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्यत्वमवसर इत्यवसरसङ्गतिलक्षणम् । कारिकार्थोग्रे वक्तव्यः स्वयमेव । स्तोत्रे इति द्विवचनान्तम् । वसुदेवदेवकीकृतं स्तोत्रद्वयम् । का० १ । अत्र षडर्थानां निरूप्यत्वेऽध्यायार्थाननुगम इत्यत आहुः रूपान्तरेत्यादि । तथा च 'कर्मैवाद्वितीयं ब्रह्मेति' श्रुतेर्नाननुगम इति भावः । अनन्तेषु गुणेषु सत्सु षण्णामेव निरूपणे हेतुमाहुः प्रतीयमान इति । अनन्तेष्वपि गुणेषु सत्सु भगवत्त्वेन श्रोतव्यविषयतावच्छेदकाः षडेव धर्मा गुणाः 'तस्माद् भारत सर्वात्मे'त्यत्र द्वितीयस्कन्धे उक्ताः । तथा च भागवते प्रतीयमानो भगवानेवेति हेतोः षड्विध उच्यत इत्यर्थः । का० २ । ब्रह्म वेदेत्र भगवानिति अष्टभिरित्यादि श्लोकैरेवमग्रेपि । अत्रेति अध्याये । का० ३ । ऐश्वर्यमिति । एकादशेऽणिमाद्यैश्वर्यम् । ननु कर्तुमकर्तुमन्यथाकर्तुं समर्थ ईश्वर इति वेणुगीतोक्तं त्रिधैश्वर्यं कुतोऽष्टधेति चेन्न । गताध्याये 'सर्वात्मकं दधारे'त्युक्तेष्टविधे प्राकाश्ये त्रिधैश्वर्यान्तर्भावात् । अत एव वक्ष्यन्ति 'ऐश्वर्यं सर्वमङ्गल'मिति । अष्टधैश्वर्यमोंकारनिष्ठं सङ्ख्यातात्पर्यस्य जन्मप्रकरणे मुख्यत्वात् । अत आहुः अर्धमात्रेति । हरावति वेदवाच्यत्वाय तात्पर्यार्थे कृष्णे पुष्टिमार्गीयफलरूपे ॐकारभक्तविशिष्टेऽर्धमात्रा परा 'अर्धमात्रात्मकः कृष्ण इति तापिनीयश्रुतेः कृष्णः । तेन कृष्णो वाच्यवाचकरूप उक्तः । 'अर्धचतुर्थमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीते'ति प्रश्नश्रुतेः ऊँमिति प्रणवः । तदर्थः श्रीगोस्वामिभिर्गायत्र्यर्थकारिकासु कृतः । विविधहरिभावास्तत्रापि । सर्वमङ्गलमिति सर्वात्मकत्वाद् भगवतः सर्वमङ्गलम्, न तु वेणुगीतलक्षणकमात्रमैश्वर्यम् । का० ४ । अधिकारिणीति अत्र टिप्पण्याम् सत्स्विवति तेन ननु जनने वर्णनीये कालगुणवर्णनस्य किं प्रयोजनमित्याकाङ्क्षायां सर्वगुणोपेतत्वोक्तिर्मूलेनुपपन्नेत्याशङ्काप्रयोजनमित्युक्तम् । अधिकारिणीति अनन्तदेहः कालः चेष्टारूपः सकलकार्याधिकारी । अधिष्ठानं चाविर्भावे । अधिकं तत्रेति तत्र सर्वगुणोपेतत्वोक्तिर्मूलेनुपपन्नेति दोषेऽधिकं आधिभौतिककाले प्रादुर्भावः । तद्धानिः उक्तदोषहानिः । अग्र इति अत्रैव 'तमद्भुत'मितिश्लोकीयकारिकाव्याख्याने च । प्रादुर्भूत इति कालस्यानन्तदेहत्वाद् देहस्य प्रादुर्भावात् । किञ्च त्रिविधसुधाविर्भावोपि । अन्यथा 'न तदश्नोति कश्चन न तदश्नोति कश्चने'तिश्रुतिविरोधः स्यात् । देशादीति आदिना तत्रत्याः । नन्वाधिदैविककालप्रादुर्भावे किं मानमित्यत आहुः अत एवेति । आनन्तर्यार्थशब्दः सुबोधिन्यामभिधया व्याख्यातः, तात्पर्यवृत्त्या तु टिप्पण्यां भिन्नप्रक्रमार्थक उक्तः । विविधहरिभावार्थम् । तथा च पूर्वार्धसमाप्तौ मङ्गलाचरणश्लोकः 'सर्वेषु पुष्टहृदयेषु निवेदयामि मार्गो यदा भगवतो भवतामभीष्टः भक्तिप्रकारसहितो हरिभावयुक्तो ज्ञेयस्तदा विवृतिरेव सदा विचिन्त्ये'ति । वरदेयेति वरे देयानां रात्रीणाम् । तदा दिवापीति वरदानकाले दिवेत्यव्ययं प्रातःकालेपि । दिवारूपत्व'मिति स्वाधिष्ठानदिवारूपत्वम् । अस्येति आधिदैविककालस्य आधिभौतिकस्वाधिष्ठानरूपत्वम् । तथोक्तमिति सर्वगुणोपेतत्वमुक्तम् । अन्यथेति एतज्ज्ञापनाभावे । एवमिति पूर्वोक्तप्रकारेण सर्वगुणोपेतत्वम् । ननु प्रक्षालनपङ्कन्यायेन दक्षिणायनं विहाय उत्तरायण एव सर्वगुणोपेतत्वप्रकटनं भगवता कुतो न कृतमित्यत आहुः यद्यपीत्यादि । एतदिति सर्वगुणोपेतत्वप्रकटनम् । एतादृश इति दक्षिणायने काले । तथाकरणम् सर्वगुणोपेतत्वकरणम् । जानीम इति भगवत्कृतपक्षपातस्य साधनापेक्षया पुष्टिफलदातृत्वानुभवाज् जानीम इत्यर्थः । मयि दृष्टे साधनादिक्लेशनिवर्तनं भवतीत्यर्थबोधकवाक्याच्च । अत्रापि गमकमाहुः अत एवेत्यादि । भिन्नप्रक्रमेणेत्य'थ' शब्दार्थः । इदमिति । सर्वगुणोपेतत्वमुक्तम् । ननु भवत्वेवम्, तथापि भगवदात्मकत्वे कालस्य किं मानमतः सर्वशब्दार्थापत्तिं मानमाहुः असङ्कोचेत्यादि । सर्वशब्देनेति सर्वगुणोपेतशब्दैकदेशेन सर्वशब्देन । ऐश्वर्यादयः काले देहे सामानाधिकरण्यसम्बन्धेन । एकं रूपं रसात् पृथगित्यत्रेव । तेनेति ऐश्वर्यादिमत्त्वेन । तेनेति जगद्वत् कारणात्मनाऽभेदानुक्त्यैश्वर्यादिनाऽभेदेनेत्यर्थः । सुबोधिन्याम् । मूले कालस्य सर्वगुणोपेतत्वादिकथनेन सर्वथा भगवत्तुल्यत्वमायातीति तद्वारणायाहुः खण्डश इति । भगवद्गुणैकदेशास्ते गुणाः अवयवशः कालावयवदानेन कृत्वा सर्वेषां ग्रहर्क्षतारादीनां यत् फलं तस्य बोधका उद्बोधकाः । 'कालावयवाः' उत्तरायणदक्षिणायनादयः । तथा च तावन्मात्रकार्यकरणान्न सर्वथा भगवत्तुल्यत्वमिति भावः । का० ५ । गुणप्राकट्यं देशादिष्वतिदिशन्ति स्म मूल इत्यादि सार्धद्वयेन । मूले कारणे । हरावित्याश्रयबोधार्थमधिकरणसप्तमीविवक्षा । विवक्षातः कारकाणि भवन्तीति । प्रदर्शनार्थायेति राज्ञः प्रदर्शनार्थायाभरणादिकं पुरतः स्थाप्यते तथा प्रदर्शनार्थाय । यथेति यथावत । का० ६ । देशोपीति उपर्यधः परितश्च । आधिभौतिकादिभेदाद्वा । चैवेति चकारो मूलकारिकोक्तं कालव्यतिरिक्तस्य सर्वस्यानुक्तस्य समुच्चायकः, एवकारः आधिभौतिकत्वयोगव्यवच्छेदकः । भूतानीति 'मही मङ्गलभूयिष्ठे'त्यादिपद्योक्तानि भूतान्यपि । तथैव च उक्तप्रकारेणैव न पुनः । किन्नरास्त्वाकाशगुणत्वेनोक्ता इति तत्र व्याख्यास्यते । तत्रत्या ये विदुरिति तत्रत्या देशोद्भवा ये भगवत्प्राकट्यं विदुरित्यर्थः । ज्ञापनार्थमिति अवतरतो मूलरूपत्वज्ञापनार्थमित्यर्थः । दोषनाशेति 'निर्मलोडुगणोदय'मिति गगनदोषनाशः तत्पुरःसरम् । स्वामिन्यागते उडुगोपनं दोषो वा । तस्य नाशः प्राकट्यम् । एवं सर्वत्र । का० ७½ ।

कारिकोक्तमर्थं विशदीकर्तुमाहुः एवमित्यादि भयवर्णनमित्यन्तम्। तत्र स्वीकरणमुच्यत इत्यन्तेन सङ्गतिबोधनायाध्यायार्थ
उक्तः। तत्र त्रिविधेति आधिभौतिकादिदुःखदूरीकरणाय, कंसादेः कालतोऽज्ञानादित्यर्थः। अतो रूपवर्णनतात्पर्यमाहुः अत इति।
रूपमिति भेदप्रतियोगि। रूपान्तरत्वमिति वर्णितरूपात् चतुर्भुजात् अन्यत् रूपं रूपान्तरं द्विभुजम्। तस्याध्यायार्थत्वं सार्वदिकत्वाभि-
प्रायेण। गोपालतापिनीये। 'कदाचिच्च चतुर्भुज' इति श्रुतेरुपक्रमगतत्वेपि नाध्यायार्थत्वम्। कादाचित्करूपप्रतिपादकत्वेन सन्दिग्ध-
त्वात् उपक्रमस्य। ततो जननस्वरूपबोधार्थसर्वगुणप्राकट्यतात्पर्यमाहुः तस्येत्यादि। जननेति 'अनित्ये जननं नित्ये परिछिन्ने
समागमः नित्यापरिछिन्नतनौ प्राकट्यं चेति सा त्रिधे'ति कारिकोक्तजननापरपर्यायम्। न ह्येकस्येति कालस्य देहस्य। महतामित्यादि
पृथ्व्यादीनां अन्येषां गन्धर्वादीनाम्। 'जगुः किन्नरगन्धर्वा' इति वाक्यात्। ततो वसुदेवस्तोत्रयोस्तात्पर्यमाहुः जनकयोरिति।
एकशेषः। स्तोत्रमिति जात्यपेक्षयैकवचनम्। स्तोत्रे इति पाठो वा। तादृशमिति धर्मरूपम्। तयोर्बुद्धिरिति तादृशी तयोर्बुद्धिरिति
ज्ञानमस्मदादीनां स्यादित्यर्थः। यथास्थित एवार्थः स्यात्। तत 'त्वमेव पूर्वसर्गे भू'रित्यादिगतस्वरूपकथनस्य तात्पर्यमाहुः
रूपस्येति। चतुर्भुजरूपस्य। स्वरूपकथनमिति 'त्वमेव पूर्वसर्गे भूः' इत्यादिभिः स्वरूपत्रयकथनं शुकेन वक्तव्यमित्यर्थः।
आश्चर्येति अकस्मादग्रे प्रकटे चतुर्भुजरूपे। आश्चर्यमात्रत्वेन निदानस्य कारणस्य वरस्याज्ञानात्। सन्देहः भगवान् वा अन्यो
(अक्षरो) वेति। एवकारो निश्चययोगव्यवच्छेदकः। तथा च 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि
तस्मिन् दृष्टे परावरे' इति श्रुतिविरोधः। परावरः कृष्णः। 'ततश्च शौरिर्भगवत्प्रणोदित' इत्यस्य तात्पर्यमाहुः रूपान्तरेणेति। कार्यं
भक्तत्रिविधदुःखदूरीकरणं न भवतीति बृहद्वने गमनमावश्यकम्। कार्यप्रयोजकरूपान्तरग्रहणप्रयोजनमाहुः सर्वमुक्त्यभावरूपं
रूपान्तराभाव इति। 'तमेव विदित्वा अतिमृत्युमेती'तिश्रुतेरेवकारः सर्वमुक्त्यभावयोगव्यवच्छेदकः। ज्ञाताज्ञातौषधपानेन
तद्गुणवत्। तर्हि भयवर्णनं कुत्रोपयुज्यत इत्यत आहुः अलौकिकमित्यादि। अलौकिकं माहात्म्यज्ञानम्। लोकात् स्नेहात्। इदं च
टिप्पण्यां स्फुटं षष्ठेध्याये। भयवर्णनमिति 'अयं त्वसभ्य' इत्यनेन 'समुद्विजे भवद्धेतो'रिति वाक्याभ्यां तथा।

अथ मूलं व्याकुर्वन्ति स्म प्रथममित्यादि। अष्टैश्वर्येति अष्टैश्वर्ययुक्तं दर्शनविषयत्वयोग्यत्वमाहेत्यर्थः। युक्तत्वं सामानधि-
करण्यसम्बन्धेन। वस्तुतो दर्शनविषयत्वयोग्यताविर्भावः। ते इति पूर्वाध्याये ब्रह्मादयः। आधिभौतिककालस्याधारतानिवृत्त्यर्थं
वाक्यभेदेन व्याकुर्वन्ति स्म अथ तदनन्तरमिति। 'द्रव्यसंस्कारयोर्मध्ये द्रव्यं बलीय' इति न्यायेन 'स आत्मा स्वाश्रयाश्रय' इति
द्रव्यं स्वाश्रयश्चासावाश्रयस्तत्त्वभङ्गो यदा तदा वाक्यभेदेन व्याख्यानं न दोषाय। संस्कारो यर्हि पूर्वोक्तं सर्वं जातं तदा विष्णुरा-
विरासीदिति वाक्यभेदविरहेण व्याख्यानम्। एवं व्याख्याने कालस्याश्रयत्वापत्त्याधेयत्वेनाश्रयत्वभङ्गः। आविर्भूत इति 'प्रादुरासी'
दित्यस्यार्थोयम्। एवमेव जातपदमपि बोध्यम्। यद्यप्येवं दूरान्वयदोषो भवति तथाप्यध्याहारापेक्षया लघीयस्त्वादेवमुच्यते। अत
एवेति भगवत्सेवापरत्वादेव। 'परमशोभन' पदार्थमाहुः परोऽवतारी मीयते ज्ञायतेनेति परमः तस्य। पूर्णा गुणा यस्य। पूर्णगुणरूपस्य
वा। शोभाजनक इति तेन शोभन इत्यत्र नन्द्यादित्वाल्ल्युः। शोभते शोभां कुरुते जनयतीति शोभाजनकः। ण्वुल्। पञ्चाङ्गे
नक्षत्रप्राधान्यमित्याशयेनोत्तरार्धं विवृण्वन्ति स्म कालावयवेति। कालः शरीरम् सावयवं भवत्येव। अवयवा अस्थीनि। 'नक्षत्रा-
ण्यस्थीनी'ति बृहदारण्यकात्। भगवदृश्यत्वादाहुः केवलेति। वक्ष्यमाणश्रुतेरेवकारः। भगवत्सृष्टस्रष्टृत्वादाहुः स्वगुणप्राकट्येति।
'दोषा हरौ न सन्त्येव तथा भक्ताहिताः क्रियाः। स्फुरन्ति बुद्धिदोषेण मूलं तस्य बहिर्दृशि'रिति वाक्यादेवकार उक्तः। उत्पादित
इति 'नारायणाद् ब्रह्मा जायत' इति नारायणोपनिषदः। रजो गृहीतवानित्यर्थः। 'सत्त्वं रजस्तम' इति प्रथमस्कन्धात्। सत्त्वरज-
स्तमोगुणान् भगवत्सृष्टान् सृजति ब्रह्मा। माया रजोदेहरूपा विकारान् षड्भावविकारान्। गुणानेवेति एवकारो मायिकगुणयोग
व्यवच्छेदकः। तन्नक्षत्रमिति स्वदेवताकं रोहिणीनक्षत्रं गृहीतवान् स्वीकृतवान्। नक्षत्रस्य सर्वरोहरोहकर्तृत्वेन गुणप्राकट्यहेतुत्वात्
तस्येति ब्रह्मणः। 'ततो वै ते' इति श्रुतिस्तु यजुर्ब्राह्मणे प्रथमप्रपाठके द्वितीयानुवाकेस्ति। 'प्रजापती रोहिण्यामग्निमसृजताम्, त
देवा रोहिण्यामादधत, ततो वै ते सर्वान् रोहानरोहन्, तद् रोहिण्यं रोहिणीत्वम्, रोहिण्यामग्निमाधत्ते ऋध्नोत्येव सर्वान् रोहान्
रोहती'ति। श्रुत्यर्थस्तु सायणाचार्यैर्माधवीये वेदार्थप्रकाश एवं कृतः। अथ निर्दोषनक्षत्रं विधत्ते। 'ततः प्रजापति'रित्यादिश्रुति
मुपन्यस्य। रुह्यन्ते प्राप्यन्त इति रोहाः कामाः। ते च यस्यां रुह्यन्ते सा रोहिणी। रोहिण्यै इति षष्ठीस्थले चतुर्थी। ऋध्नोत्येव
समृद्धो भवति। समृद्धिरेव सर्वानित्यन्तेन विशदीकृतेति तत्र असृजत अमिति पदच्छेदः। अम् प्रसिद्धार्थकमव्ययम्। रुह जन्मनि
भ्वा० प० अ० ऋध वृद्धौ। भ्वा० प० भ्वादेराकृतिगणत्वात्। विकरणव्यत्ययः। सर्वगुणोपेत इति काले सर्वगुणोपेतत्वं जातम्
कालस्य नित्यत्वात्। रोहिण्या रोहिणी वात् सर्वगुणोपेतत्वस्य। आनुगुण्यमिति निर्दोषनक्षत्रत्वादिति भावः। तेषामिति तारा
नक्षत्राणाम्। शान्तत्वमिति अशान्तत्वप्रतियोगिकं यत् शान्तत्वाभावाभावरूपं शान्तत्वमुक्तम्। अनेनेति सम्बन्धकथने रोहिण्या
कारणत्वेन। आनुषङ्गिका इति रोहिण्यनुषङ्गजाः सर्वगुणोपेतत्वादयः। एवं पञ्चाङ्गे नक्षत्रमुक्तम्। प्रत्यक्षत्वात्। 'यत् पुण्यं नक्ष
तद्वट् कुर्वीतोपव्युष'मिति श्रुतिः। अर्थस्तु 'तत्' नक्षत्रं 'वट्' प्रत्यक्षं 'कुर्वीत'। वष वधे इत्यस्मात् क्विपि अव्ययम्। प्रत्यक्षकरणो
पायमाह उपेति। उषः कालोऽष्टपञ्चाशदिति विध विचारे लिखितवाक्यादुषसीति व्युषमिति विभक्त्यर्थेऽव्ययीभावः। व्युषं समीप
व्युषम्। पारिभाषिकसूर्योदयकाल इत्यर्थः। पञ्चाङ्ग इतराणि तिथिवारयोगकरणानि नारदीये ब्रह्माणं प्रति भगवद्वाक्येषु 'सिंह
राशिगते सूर्ये गगने जलदाकुले मासि प्रोष्ठपदेऽष्टम्यामर्धरात्रे विधूदये बुधवारे वृषे लग्ने रोहिण्याश्चरमांशके शुभे हर्षणयोगे

कोलवेन युते तथा वसुदेवेन देवक्यामहं जातोस्मि पद्मज इहातः शिश्नहास्यैव कृष्णजन्माष्टमीत्वत' इति। शिश्नहा नपुंसकत्वात्। एवं पञ्चाङ्गं निष्पन्नम्। अत्रा 'थ सर्वे'त्युपक्रमः 'देवक्यां विष्णु'रिति पदद्वये विष्णुः प्रद्युम्नप्राकट्यार्थम्। अध्यायार्थः स्पष्टः ॥१॥

दिश इत्यत्र त्रयाणामिति देश आधिदैविकत्वाभावादाधिभौतिकत्रिकाभावात् तथा। वैकुण्ठे दिशोयं देश इति चातुरर्थिकप्रत्ययान्तदेशपदप्रयोगाप्रवृत्तेः। तत्रेति उक्तासु तिसृषु। देवतात्मिका इति श्रोत्रेन्द्रियदेवतारूपाः। भूतात्मिका इति प्राच्यादिरूपाः। आध्यात्मिका देवतारूपा एव। 'यस्तु आध्यात्मिकः प्रोक्तः सोसावेवाधिदैविक' इति वाक्यात्। चकारेणाध्यात्मिकाः। भूतात्मिकानां दिशां प्रसादमाहुः तत्रेति। मेघादिनेति चातुर्मास्य आविर्भावादिति भावः। मेषादिनेति द्वितीयः पाठः। आदिना दिशां व्यापकत्वं क्रियाव्यापकत्वम्। 'मेघास्तस्यात्ममूर्तय' इति वाक्यादिन्द्रक्रियारूपात्ममूर्तित्वात् क्रियारूपाः। क्रियाणां करणत्वमिन्द्रियव्यापाररूपाणाम्। मेषादिना लग्नादिरूपेण तेषां फलानि। 'चण्डोभिमानी गुणवान् सकोपः सुहृद्विरोधी च सखा परेषाम्। पराक्रमप्रामयशोविशेषो मेषादयो यः पुरुषोधिरोप' इति मेषलग्नफलम्। 'भवति साहसकर्मकरो नरो रुधिरपित्तविकारकलेवरः। क्षितिपतिर्मतिमान् सहितश्च क्रिये रवि'रिति राशिफलम्। क्रिये मेषे। कालस्य करणत्वं प्रसिद्धम्। दूरदर्शनेति दूरे श्रावणप्रत्यक्षलक्षणः प्रसादः। दिशामिति भूतात्मिकानाम्। 'दिशः श्रोत्रा'दितिश्रुतेर्मेघादिना स्वव्यापारेण मेषादिना कालेन स्वगुणैश्चण्डत्वादिभिः लुब्धगुणो दूरे शृणोतीत्यर्थः। प्रसादस्तु प्रसन्नतेति करणे मनसि आनन्दः। 'मन आनन्द'मिति तैत्तिरीयश्रुतेः। भगवदाविर्भावे दिगादीनां साधारणासाधारणधर्मा उच्यन्ते। देवताप्रसाद इति 'कर्णौ दिश' इति वाक्याद् दिशः श्रोत्रेन्द्रियदेवताः तासामाकाशेन्तर्भावात् तत्प्रसादः सर्वसाधकः। 'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ती'ति श्रुतेः सर्वकारणत्वात्। तद् विवृण्वन्ति स्म अत इति। ज्ञानमिति दूरदर्शनम्। निर्मलोडुगणं च तदुदयमिति बहुव्रीहिगर्भितकर्मधारयमाहुः निर्मला इति। बहुव्रीहौ यत्रेति गगने दर्शने वा। वर्षाकाले भाद्रपदे। उदयेतीति उदया सोरममो डा मूले। गगनं उदयरूपं भगवद्देहत्वात्। प्रसिद्धिस्तैत्तिरीये। उदयोपि मलाभावरूपः साम्निध्यादित्याहुः उदयेति। गगने उदयकाले इत्यर्थः। अपिशब्दात्। उदयस्य मलरहितस्य गगनस्य कालेपि मलाभावः, नीलिमा काले नास्तीत्यर्थः। 'कृषेर्वर्णे' इति पाणिनिसूत्रात् कृष्णस्वाभाविकनीलिमा गगने काले चेति भावः। यत्तु निर्मला उडुगणा उदये यत्रेति समासो गड्वादिः स प्रयोजनशून्यः, अवतारकालेपि साधारणगगनोक्तेः प्रयोजनाभावात्। उदयो दर्शनमिति आकाशरूपदेहस्य ज्ञानं तदानीं जातम्। उदयोस्यास्तीति उदयम्। अर्श आद्यच्। एवकारो ज्ञानरहितस्य गगनदेहत्वयोगव्यवच्छेदकः। विवाहेति षोडशसंस्कारादित्वात् पूर्वं ग्रहणं विवाहस्य। सर्वर्तवो विवाहस्येति वर्षाकालेपि विवाह उक्तः। अजायन्तेति निशीथकालेपि रोहिणीसत्त्वाद् भगवत एव वा सत्वात्। 'मही मङ्गलभूयिष्ठा' इति पाठेऽर्थमुक्त्वा 'मङ्गलभूयिष्ठपुरग्रामे'त्यादिपाठेऽर्थमाहुः पुरं नगरमिति। सर्वाण्येवेति रोहिणीभगवतोः सत्त्वादेवकारः ॥ २ ॥

नद्य इत्यत्र भौतिकानामिति नद्यादीनाम्। तत्तद्भूतेति सलिलजलरुहादिप्रधानानाम्। गुणान् श्रीप्रसन्नतादीन्। तत्रेति 'बहुष्वनियम' इति सूत्रेणानियमे। एकोनेति यद्यपि तैत्तिरीयसंहितायां 'कूपाभ्यः स्वाहे'त्यादिना 'सर्वेभ्यः स्वाहे'त्यन्तेन विंशतिभेदा अपामुक्तास्तथापि 'सर्वेभ्य' इत्यन्तिमस्य समष्टित्वेन पूर्वोक्तसर्वसङ्ग्राहकत्वेन सर्वातिरिक्तत्वाभावात्। उभयविधा एवेति स्थावरजङ्गमजगद्वत्। एतदेवाहुः स्थावरा इति। उभयेषामिति 'उभय'शब्दस्य द्विवचनं नास्तीति कैयटः। कालेति वर्षाकालवशात्। कालनियन्तुरिति सङ्कर्षणात्। कालनियन्तृभगवद्वशादिति पाठान्तरम्। कालनियन्तुर्भगवतो वशादित्येकदेशान्वयः। स इति दोषः। कालनियन्तरीति कालनियन्तरि ई इति छेदः। इ आश्चर्ये। स्वाभाविक इति गुणः प्रसन्नता। कमलादिरिति पार्थिवांशप्रतीतिभ्रमात्। मत्स्यादिष्विव। वायूपनीतपार्थिवांशप्रतीतिर्वात एव गन्धो रसयुक्तः। अनेनेति विशेषणेन। भूमेर्गुणानिति पूर्वं भूमेर्मङ्गलान्युक्तानि। मुख्य इति पृथ्वीतन्मात्रत्वे सति गुणत्वं मुख्यत्वम्। गन्धरसेति भगवत्प्राकट्याद् रोहिणीनक्षत्राच्च, गन्धास्वादः गन्धाघ्राणाच्छब्दः, रस आस्वादने रस शब्दे इति धातुपाठे, 'सन्नादे'तिशब्दोक्तं शब्दः कार्यं, तत्कथनपूर्वकम्। भूमेरैश्वर्यख्यापकाः। मूढैरलिभ्रमरैस्तदाघ्राणादिकरणरूपपूजनात्। 'ईश्वरः पूज्यते लोके मूढैरपि यदा तदा निरुपाधिकमैश्वर्यं वर्णयन्ति मनीषिण' इति वेणुगीतसुबोधिनीकारिकायाः। कुलानीति समूहाः। पुष्पगुच्छा इति मालत्यादिपुष्पाणामाम्रादिपुष्पाणां च गुच्छाः। जाता इति आधिदैविककालेनाधिदैविका जाताः ॥ ३ ॥

ववौ वायुरित्यत्र सुखस्पर्श इति त्रिगणस्पर्शः रोहिणीनक्षत्रे गुणः भगवत्प्राकट्यात्। अन्यदा तु स्पर्शमात्रम्। सामानाधिकरण्यसम्बन्धेन स्पर्शं त्रिगुणान् शीतमन्दसुगन्धानाहुः गन्धं चेति। भूमेरिति मालत्यादिपुष्पाणामाम्रादिपुष्पाणां च। तेन मन्दत्वगुणोप्युक्तः। पुण शुभे पुणमर्हति पुण्यमित्याशयेन पुण्यशब्दार्थमाहुः शुभकार्यमिति। कर्मणि घञ् न कृतः। वेदवेदान्तसारत्वात् पचाद्यच् कृतः। वाह इत्यत्र अञ्विकारो वा, वहतीति वहः पुण्यगन्धस्य वहः पुण्यगन्धवह इति षष्ठीतत्पुरुषो न कृतः। कर्मणि घञ्पस्थितेः। गन्धादिजलेति वर्षाकालत्वात् तथा। दोषेति जीवसाम्यदोषः प्राणत्वाद् भवति। 'अथातो ब्रह्मजिज्ञासे'त्युपक्रम्य 'प्राणस्तथानुगमा'दित्युपसंहारो भाष्ये प्रथमचरणस्य यतः। शुभसूचक इति हिरण्याक्षहिरण्यकशिपूत्पत्तौ कठोरवायुरशुभसूचकोयं तद्विपरीतः शुभसूचकः। लौकिका इति स्मार्ताः। निषिद्धेति चिताग्न्यसंस्कृताग्नय इतरे येभ्यः ते निषिद्धतराः। शान्ता

इति अशुभकार्यस्थास्तु क्रूरा अशुभभयात् । जाता इति रोहिण्याः स्वभावात् शुभसूचका जाताः । कालोपि प्रतिबन्धपिहितत्वनिवारक इति तत्पुरःसरं विवृण्वन्ति स्म तस्मिन् समय इति । जाता इति पूर्ववत् ॥ ४ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

कारिका **जननं-वर्णनं-स्तोत्रे-सान्त्वनं-गमनं तथा । "षड्विधो भगवानत्र" तृतीये विनिरूप्यते ॥ १ ॥**
रूपान्तरस्वीकरणमध्यायार्थं इहोदितः । प्रतीयमानो भगवानिति षड्विध उच्यते ॥ २ ॥

कारिकार्थ—अब श्रीमदाचार्यचरण कहते हैं कि इस तृतीय अध्याय में १. जनन भगवान् का प्राकट्य, २ वर्णन स्वरूपवर्णन, ३. स्तोत्रे श्रीवसुदेवजीकृत स्तुति एवं ४. श्रीदेवकीकृत स्तुति, ५ सान्त्वन श्रीदेवकी वसुदेवजी के प्रति आश्वासन और पूर्व जन्मकथा तथा ६. 'गमन'—गोकुल को पधारना भगवान के इन छह, (६) भगवच्चरित्रों का स्पष्टरूप से निरूपण किया है । भगवच्चरित्र भगवत्स्वरूपात्मक होते हैं इसलिए कारिका में अत्र भगवान् यहाँ भगवान् निरूपित किये गए हैं ऐसा कहा है । इस श्रुतिप्रसिद्ध सिद्धान्त के अनुसार यहाँ पर ६ प्रकार से भगवान् का निरूपण हुआ है । ऐसा कहा गया है । ऐश्वर्य, वीर्य, यश, श्री, ज्ञान और वैराग्य ये भगवान् के षड् गुण हैं जिनकी सूचना इधर वर्णित हुए छह चरित्रों की संख्या से हो रही है ॥ १ ॥

अब आचार्यचरण द्वितीय कारिका में बतलाते हैं कि इस अध्याय का मुख्य प्रतिपाद्य विषय रूपान्तर स्वीकार कहा है । कारागृह में माता पिता के देखते ही भगवान् का द्विभुज प्राकृत शिशु रूप ग्रहण करना ही रूपान्तर का स्वीकार करना है । इस रूपान्तर के स्वीकार करने वाले षडैश्वर्यसम्पन्न भगवान् ही है जिस रूप में उसकी प्रतीति हो रही है वह रूप देह देही के भेद से रहित है । ऐसी सूचना देने को जननादि षट्चरित्रों से अध्यायार्थ को समन्वित कर उसकी भगवद्रूपता बतलाई गई है । परम दयाला श्रीविट्ठलनाथजी श्रीटिप्पणीजी में कहते हैं कि श्रीनन्दालय में भगवत्प्राकट्य के समय ही श्रीमथुराजी में उसी द्विभुज नन्दनन्दन का दर्शन देवकी वसुदेव को हुआ है जिसे प्राकृत शिशु रूप में कहा गया है । इस मर्म की सूचना करने के लिए भी रूपान्तर स्वीकार को ही मुख्य रूप से अध्यायार्थ माना है ॥ २ ॥

कारिका—अष्टभिश्च चतुर्भिर्वै दशभिश्चाष्टभिस्तथा । चतुर्दशभिरष्टाभिः षडर्थाः क्रमतोत्र हि ॥ ३ ॥
ऐश्वर्यमष्टधा यस्मादर्धमात्रा हरौ परा । सार्धाष्टभिरतः प्रोक्तमैश्वर्यं सर्वमङ्गलम् ॥ ४ ॥
अधिकारिणि काले वै अनन्ता भगवद्गुणाः । खण्डशस्तेवयवशः सर्वेषां फलबोधकाः ॥ ५ ॥

कारिकार्थ—यहाँ प्रथम कारिका में क्रम से ही 'जनन आदि' ६ अर्थों का निर्देश किया है । प्रथम आठ श्लोकों से भगवान् का जनन चरित्र कहा है, चार श्लोकों से भगवत्स्वरूप वर्णन चरित्र कहा है, पुनः दश श्लोकों से श्रीवसुदेवजीकृत स्तोत्र एवम् आठ श्लोकों से श्रीदेवकीकृत स्तुति कही गई है । चौदह श्लोकों से मातापिता का आश्वासन चरित्र और आठ श्लोकों से गमन चरित्र कहा है ॥ ३ ॥

अब श्रीआचार्यचरण तृतीय अध्याय के प्रथम प्रकरण के ८॥ श्लोकों के उपलक्ष्य में कहते हैं कि प्रथम जनन चरित्र में भगवान् के प्रथम गुण अष्टविध ऐश्वर्य की सूचना जिन आठ श्लोकों से की है उनका अष्टम श्लोक 'सार्ध' १॥ है । तात्पर्य कि उसमें आधा श्लोक अधिक होने से साढ़े आठ श्लोक हैं । जिससे यह फलित हुआ कि अष्टविध ऐश्वर्य की सूचना के साथ-साथ ही भगवान् की परमतत्त्वरूपता भी सूचित हो रही है, क्योंकि ओङ्कार की अन्तिम अर्धमात्रा परमतत्त्व की प्रतिपादिका है । तापनीय उपनिषद् में 'अर्धमात्रात्मकः कृष्णः' ऐसा स्पष्ट उल्लेख है । "अर्धचतुर्थ मात्रेण 'ओं'-इत्येके नैवाक्षरेण परं पुरुषमभिध्यायीत", इस प्रश्न श्रुति के अनुसार परम पुरुष के ध्यान में भी ओंकार की आधी चतुर्थमात्रा को ही मुख्य रूप से बताई है । अतः साढ़े आठ श्लोकों से यह निर्देश होता है कि जो सर्व मङ्गल निधान व अष्ट ऐश्वर्यपूर्ण एवं ओंकार गत अर्धमात्रा प्रतिपाद्य परमतत्त्व है उसी के प्रादुर्भाव का यहाँ पर वर्णन हो रहा है । तभी तो श्री देवकीजी के गर्भ का बढ़ना आदि सर्व धर्म सर्व स्त्री साधारण थे तो भी भगवान् के प्रकट होने का प्रकार 'प्रादुरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कलः' लोकविलक्षण था एवम् **'यमद्भुतं बालकमम्बुजेक्षणम्'** स्वरूप भी लोकोत्तर था ॥ ४ ॥

अब पांचवी कारिका द्वारा आचार्यचरण यह बतलाना चाहते हैं कि पूर्ण पुरुषोत्तम का प्राकट्य जिस समय में हुआ है वह समय यद्यपि माङ्गलिक कार्यों में प्रशस्त नहीं माना गया किन्तु निंदित कहा गया है क्योंकि उत्तरायण न होकर दक्षिणायन का काल था, शुक्ल पक्ष न होकर कृष्ण पक्ष था दिन न होकर रात्रि का भी निशीथ समय था ऐसे दोषों के रहते हुए भी उस समय को सर्वगुणोपेत सर्वगुणपूर्ण बतलाकर महर्षि व्यासजी ने यह सूचित कर दिया है कि काल भगवान् का एक अधिकारप्राप्त सेवक है । भगवान् का कार्य मंत्री है, उसमें उत्तरायण आदि अनन्त शुभ फल सूचक गुण भगवान् के ही हैं उनकी कृपा से ही उसे प्राप्त हुए हैं । वह उत्तरायणादि काल गुण भी किसी अंश से सब लोगों को प्राप्त होने वाले अपूर्ण फल का

बोध मात्र कराते हैं। फल का दान तो भगवान् के ही हाथ है। अधिकारिणे = भगवान् से अधिकार प्राप्त भगवत्सेवक, काले वे = काल में, अनन्ताः भगवद्गुणाः = भगवान् के अनन्त गुण जो है वे 'खण्डशः-अवयवशः' ॥ ५ ॥

कारिका—मूले समागते कालः स्वकीयान् सकलान् गुणान्। हरौ प्रदर्शनार्थाय प्रकटीकृतवान् यथा ॥ ६ ॥
देशोऽपि त्रिविधश्चैव भूतान्यपि तथैव च। तत्रत्या ये विदुस्तेऽपि ज्ञापनार्थं गुणान् स्वकान् ॥ ७ ॥
प्रकटीकृतवन्तो वै दोषनाशपुरस्सरम् ॥ ७½ ॥

अब आचार्यश्री षष्ठी कारिका में कहते हैं कि जब काल के स्वामी मूलतत्त्व भगवान् स्वयं पधारते हैं तब तो वह काल अपने आराध्य प्रभु श्रीकृष्णचन्द्रजी की सेवा में अपने समस्त उत्तरायणादि सद्गुणों को उनके दृष्टिगोचर कराकर निवेदन करता है—भगवान् आपकी वस्तु इस प्रकार सुरक्षित रखी है। अब इन वस्तुओं को कृतार्थ करें इस आशय से प्रकट करता है ॥ ६ ॥ +

उच्च देश आकाश, मध्य देश दिशा और अधोदेश भूमि ने तथा इन देशों में रहने वाले देव, मुनि, सिद्ध; गन्धर्व, किन्नर, चारण आदि ने भी एवम् जल, अग्नि, वायु आदि भूतों ने भी अपने अपने गुणों को प्रकट किया, इन सबके दोषों का नाश तो पूर्व में ही हो चुका था।

आभास व्याख्यान—इस प्रकार अगले दूसरे अध्याय में भगवान् के भूतल पर पधारने के उद्यम का वर्णन किया। अब तृतीयाध्याय में (१) भूमि, (२) माता-पिता, एवं (३) अन्यान्य भक्त इन सबके सात्विकादि, तीन प्रकार के दुःख दूर करने के लिए अथवा (१) कंसकृत, (२) कालकृत, (३) अज्ञानकृत इन तीनों प्रकार के दुःख दूर करने के लिए भगवान् का रूपान्तर स्वीकार कहा जाता है। इसलिए प्रथम रूप का वर्णन आवश्यक है क्योंकि किसी एक रूप का अन्य रूप में परिवर्तन करना ही तो रूपान्तर है। यदि भगवान् के रूप का वर्णन न किया जाय तो भगवान् के रूपान्तर का स्वीकार करना जो कि अध्याय का विषय-अर्थ है वह सङ्गत न हो सकेगा और यदि भगवत्प्राकट्य में काल आदि अधिकारियों के प्रभु प्राकट्य निमित्त से शुभसूचक गुणों के प्रकट होने का सर्वांश में वर्णन न किया जाय तब तो भगवत्प्राकट्य को प्राकट्य शब्द से नहीं कहा जा सकेगा। तब तो उस प्राकट्य का जन्म अर्थात् "जनन" शब्द से ही व्यवहार होगा क्योंकि सर्व गुणों का सर्वांश में प्रादुर्भाव किसी एक देव के भी जन्म काल में नहीं होता। समर्थ से समर्थ महानुभाव 'पृथु' महाराज जैसों के भी प्राकट्य काल में सर्वगुणों का प्राकट्य नहीं हुआ। यदि वसुदेव एवम् देवकीकृत स्तुति का वर्णन न किया जाय तब तो उनके विषय में सर्व साधारण की यही बुद्धि हो सकती है कि इन माता-पिताओं को इतना ह: ज्ञान होगा कि हमारे चतुर्भुज पुत्र उत्पन्न हुआ है यह साक्षात् भगवान् है। इस प्रकार का ज्ञान तो उनकी की हुई स्तुति से ही स्पष्ट होता है। उक्त चतुर्भुज रूप केवल माता-पिता को दिखाने को ही प्रकट किया हो, ऐसी बात नहीं किन्तु श्रीवसुदेव देवकीजी के पूर्व जन्मों के प्रसङ्गों का स्मरण कराने के लिए है। अतः शुकदेवजी ने पाँचवें सान्त्वन प्रकरण में भगवत्कृत स्वरूप वर्णन को आवश्यक मानकर ही उल्लेख किया है। यदि ऐसा नहीं किया जाता तो वह अद्भुत स्वरूप दर्शन आश्चर्य ही बना रहता और उसके कारण का ज्ञान न होने से सन्देह ही रह जाता कि यह हमारे पुत्र कैसे हो सकते हैं। रूपान्तर के स्वीकार मात्र से भक्त दुःख निवृत्ति का कार्य बिना गोकुल पधारे नहीं हो पाता, अतः मथुराजी से प्रस्थान भी अध्याय के अन्तर्गत आवश्यक है ॥ ७½ ॥

अब आचार्यचरण रूपान्तर स्वीकार के तीन हेतु बताते हैं कि, यदि प्राकृत शिशु रूप ग्रहण न किया जाता तो चतुर्भुज स्वरूप दर्शन से सर्व साधारण की मुक्ति हो जाने की सम्भावना थी (१) तथा लीला की वह वात्सल्य माधुर्य आदि रसमयता भी सम्पन्न न हो पाती। (२) माता पिता श्री वसुदेव एवं देवकी जी के भय का वर्णन उनकी ही स्तुति में आता है,

---

+ परम दयालु श्री विट्ठलेश प्रभु अतिशय मननीय समाधान करते हैं कि 'अधिकं तत्र.नु प्रविष्टं न तु तद् हानिः' इस न्यायसे यदि कोई कहे कि भगवान् के प्राकट्य का काल यदि उत्तरायण शुक्ल पक्ष दिन आदि होता तब तो और भी अच्छा ही था। भगवत्सेवक काल उन गुणों को अवश्य प्रकट करता ही उसमें क्या संदेह लेकिन उत्तरायण आदि और अधिक रूप से गुणों की वृद्धि में उपयुक्त हो जाते, और कोई हानि तो थी नहीं। उक्त शंका का समाधान करते हुए आप आज्ञा करते हैं कि भगवत्प्राकट्य की देश कालादि सर्व सामग्री आधिदैविक होती है, आधिभौतिक देश कालादि में भगवत्प्राकट्य का सम्भव ही नहीं। यदि उत्तरायणादि काल रहता तब भी आधिभौतिक ही रहता और भगवान् प्राकट्य के लिये वह पर्याप्त न था। यह लीलाकाल भगवत्स्वरूप है। भगवल्लीला का प्रारम्भ होने वाला है। अतः यह स्वरूपात्मक लीलाकाल प्रकट हुआ है। इसकी सूचना मूल में **'अथ सर्वगुणोपेतः'** वाक्य में अथ शब्द से की है कि अब सब ही प्रकार भिन्न है। जिस प्रकार रास लीला की षड् मास की रात्रियों में दिन का प्रवेश नहीं हुआ, यह उन रात्रियों की विलक्षणता थी, और आधिदैविकता थी उसी प्रकार इस प्राकट्य काल में भी आधिभौतिक दक्षिणायनादि का प्रवेश नहीं। यह पुष्टिमार्ग की मर्यादा मार्ग से विलक्षणता अलौकिकता और महत्ता है। **'सर्वगुणोपेतः'** इस विशेषण से इस प्राकट्य काल की ऐश्वर्यादि गुणपूर्ण भगवद्रूपता स्पष्ट होती है।"

जब कि चतुर्भुज अलौकिक स्वरूप का दर्शन कर रहे हैं। चतुर्भुज भगवद्दर्शन दशा में भी भय का होना स्पष्ट सूचित करता है कि लौकिक स्नेह की अपेक्षा अलौकिक कुछ दुर्बल होता है। भगवान् की महिमा का ज्ञान अलौकिक है। उस अलौकिक ज्ञान के होते हुए भी इस बालक का क्रूर कंस से कोई अनिष्ट न हो जावे, इस प्रकार की स्नेहमय लौकिकबुद्धि का बना रहना स्पष्ट कर देता है कि लोक की प्रबलता है, अलौकिक की नहीं।

प्रथममष्टैश्वर्ययुक्तमाविर्भावमाह—भगवान् श्रीशुकाचार्यजी सर्व प्रथम भगवान् के अष्टैश्वर्य सहित प्रादुर्भाव का वर्णन करते हैं कि जब देवगण स्तुति करके चले गये, उसके पश्चात् ही भगवान् प्रकट हुए, उसी समय काल सर्वगुण सम्पन्न हो गया, जितने गुण काल में स्थापित किये थे वे सब प्रकट हो गये, भगवान् को अपनी सेवा बतलाने के लिये काल ने गुण प्रकट किये। इसी हेतु से काल परम शोभापूर्ण हो गया अब तो परम तत्त्व एवं सर्व गुणपूर्ण भगवान् की भी शोभा का हेतु बन गया। काल के अवयव जो नक्षत्र हैं उनमें भी केवल गुणों का आश्रय 'रोहिणी' नक्षत्र ही है, भगवान् ने अपने गुणों को प्रकट करने के लिए ही ब्रह्मा को उत्पन्न किया।

स तु विकारान् दूरीकृत्येति—श्री ब्रह्माजी ने तो काल के दोषों को दूरकर गुणों को ही प्रकट करने के लिए उस रोहिणी नक्षत्र का अङ्गीकार किया। तात्पर्य यह था कि निर्दोष ऐसे सर्व गुणों के प्राकट्य द्वारा भगवत्प्राकट्य काल की आधिदैविकता सिद्ध करना ब्रह्माजी को अभीष्ट है। इसलिए रोहिणी नक्षत्र को "अजनजन्म जन्मरहित भगवान् श्रीकृष्ण से, जिसका आविर्भाव है वैसे ब्रह्माजी भी अजन्मा है रोहिणी को उस ब्रह्माजी का नक्षत्र कहा है, जिससे उक्त नक्षत्र के देवता ब्रह्मा की निर्विकारता सिद्ध होती है। रहस्य यह है कि भगवान् तो जन्मादि विकारों से रहित होने के कारण 'अजन' है और ब्रह्मा उन्हीं भगवान् के पुत्र के नाते स्वयं भी जन्मरहित ही है। इसी से ब्रह्मा को भी "अज" कहते है। अतः अजन्मा भगवान् से जन्म लेने के कारण **"स्वयंभूः"** "अज." आदि शब्दों से व्यवहृत ब्रह्मा के नक्षत्र का निर्दोष गुणपूर्ण होना सर्वथा समुचित ही है। श्रुति में 'रोहिणी' शब्द का जो निरूपण मिलता है वही इस नक्षत्र की महिमा का काफी प्रमाण है। भगवती श्रुति ने कहा है कि **"ततो वै सर्वान् रोहानरोहंस्तद्रोहिण्यै रोहिणीत्वमिति"** "उस नक्षत्र से ही वे लोग सर्व उच्च स्थानों को चढ़ गये" वे अपने संबंध वालों को उच्च स्थान पर चढ़ा देना रोहिणी का रोहिणी नाम से कहलाने का कारण है। जब रोहिणी नक्षत्र का आरंभ हुआ तब ही सर्वगुणपूर्ण काल हुआ, इस प्रकार की योजना से सूचित होता है कि भगवान् का जन्म रोहिणी नक्षत्र के प्रारम्भ में ही हुआ। उस समय रोहिणी नक्षत्र के सब ही सहायवर्ती दूसरे भी नक्षत्र ग्रहादि भी सानुकूल थे। ऐसा निर्देश करने के लिए 'शान्तर्क्ष' इत्यादि विशेषण का प्रयोग किया है। इस समय रोहिणी नक्षत्र के सहचारी अन्य नक्षत्र, ग्रह और तारा भी शान्त थे, इस अवसर पर अश्विनी आदि नक्षत्र, सूर्य आदि अन्य ग्रह एवं उपनक्षत्र तारा सब ही सब शान्त उच्चस्थान के शुभ थे। यद्यपि ज्योतिष शास्त्र में इन का फल नहीं कहा तो भी उनका भी फल होता है। इसीलिए उनकी शान्त अवस्था का उल्लेख किया है। इस श्लोक से काल के सब ही स्वाभाविक एवम् सहयोग से प्राप्त होने वाले संयोग प्राप्त गुणों का निरूपण किया है ॥ १ ॥

देशः त्रिविध इति—नीचे का, उपर का और सब ओर चारों बगल का, वैसे देश तीन प्रकार का है। उसमें चारों ओर दिशा, ऊपर आकाश और नीचे भूमि इन तीनों की निर्दोषता के साथ गुणों का वर्णन किया जा रहा है उन देशों में दिशा देवता रूप भी होती है और भूतात्मक भी होती है। उनमें भूतात्मक पूर्व-पश्चिम आदि दिशाओं की प्रसन्नता उज्ज्वलता वह है, जिससे दूरदेशस्थ वस्तु का भी दर्शन हो सके। आकाश में मेघ आदि के न रहने पर वैसी निर्मलता होती है और श्रवण इन्द्रिय की अधिष्ठात्री दिग्देवता की प्रसन्नता तो सर्व सिद्धि का कारण है। इसलिए ज्ञान भी सिद्ध हो और सर्व फल भी सिद्ध हो, इसलिए भूतात्मक और देवात्मक दोनों प्रकार की दिशाओं की प्रसन्नता **"दिशः प्रसेदुः"** इन शब्दों से कही है—

निर्मल तारागणों से उनके उदयकाल में भी आकाश शोभित था। वर्षाकाल में मेघों का होना स्वाभाविक है और उन मेघों के निमित्त ताराओं का प्रकाश नहीं दीख पाता। इस हेतु से ताराओं की निर्मलता बतलाई गई कि उदयकाल में भी मेघादिकों का अभाव था। अथवा यहां उदय शब्द का "दर्शन" अर्थ पर अधिक उपयुक्त है। आकाश में निर्मल तारागणों का दर्शन हो रहा था। सर्वत्र पृथ्वी में पुत्र-जन्म आदि माङ्गलिक उत्सव होने लगे। बड़े से बड़े नगर में और छोटे से छोटे ग्रामों में, गोशालाओं में एवं रत्न आदि की खानों में सब प्रकार बहुविध और अधिकतर मङ्गलमय दृश्य पृथ्वी में सज उठा ॥ २ ॥

एवं देशकालयोर्गुणानुक्त्वा उपर के श्लोकों से देश और काल के गुणों का वर्णन कर उन-उन भूतों में प्रधानभूत भौतिक पदार्थों के गुणों को अब इस श्लोक से कहते हैं। **'नद्यः प्रसन्नसलिला इति'** उनमें प्रथम जलों के गुणों को कहते हैं कि नदी प्रसन्नसलिला हो गई। उनका जल प्रशान्त और स्वच्छ हो गया। यद्यपि जल अनेक प्रकार के रहते हुए भी मुख्य दो ही प्रकार हैं। एक तो स्थिर रहने वाले बद्धघाट सरोवर और दूसरे बहने वाले सरिता आदि। इसलिए इन दोनों के गुण कहे जाते हैं। नदियों में कालवश जल मलिन हो जाता है। आधिदैविक काल के प्रकट होने से या काल के नियामक भगवान् के

सामर्थ्य से उस मलिनता का दोष दूर होता है। इसलिये यहाँ काल के नियामक भगवान् के पधारने के समय नदियों का नीर निर्मल बन गया और प्रसाद गुण पूर्ण हो गया। '**नद्यः प्रसन्नसलिला**' इस पद के द्वारा मलांश दोष की निवृत्ति और स्वाभाविक नयनानन्दकारी सौन्दर्य गुण का निर्देश किया गया है। सरोवर स्थिर जलाशय होते हैं। जल में प्रकट होने वाले कमलों की शोभा उन जलाशयों में व्याप्त हो रही थी। जल का जो यह सार भाग है वह कमलादि ही है। अतः जल के असाधारण गुणों का वर्णन इस विशेषण से हुआ है। पृथ्वी के गुणों का वर्णन करना है, और गन्ध ही पृथ्वी का प्रधान गुण है, इस दृष्टि से एवं उस गन्ध की प्रसिद्धि पुष्पादिकों में है इस दृष्टि से गन्ध और रस के कार्यों का कथन करते हुए पुष्पादि सम्पत्ति वाली वनरूपिणी पृथ्वी का वर्णन करते हैं कि पक्षियों और भ्रमरों के समूहों की मधुर ध्वनि से शब्दायमान पुष्प गुच्छों द्वारा वनराजियाँ भी आनन्दोल्लास से परिपूर्ण हो गईं ॥ ३ ॥

ववौ वायुरिति—सुखमय स्पर्श वायु का गुण है और वह वायु पृथ्वी के प्रधान गुण गन्ध का वहन करता ही है परन्तु भगवत्प्राकट्य के सुअवसर पर तो उस वायु ने मांगल्यसूचक पवित्र सुगन्ध को बहा दिया। उस पवित्र पवन ने दिशा और अवान्तर दिशाओं को सुगन्ध से सुवासित कर दिया। इस पावन पवन में गंगादि पवित्र तीर्थों के जल कण व्याप्त थे इसलिये पवन को 'शुचि' कहा है अथवा दोष रहित होने के कारण पवन 'शुचि' है अथवा मंगलसूचक होने के कारण वायु 'शुचि' है, तात्पर्य कि सब ही अभिप्रायों को लेकर शुचि पद का प्रयोग हुआ है। वायु के गुणों में उसके तीनों विशेषणों का उपयोग है, और स्मृति प्रतिपादित धर्म कर्मों के उपयोगी लौकिकाग्नि तथा श्रुतिप्रतिपादित अग्निहोत्रादि वैदिक कर्मों के उपयोगी वैदिकाग्नि दोनों प्रकार के मङ्गल अग्नि प्रज्वलित हो उठे। '**द्विजातीनामिति**'—द्विजाति पद से अग्नि के ब्राह्मण क्षत्रिय आदि उच्च श्रेणी के सत्कर्माधिकारियों के सम्बन्धी होने का निर्देश किया है द्विजाति पद से म्लेच्छ आदि से सम्बन्धित निषिद्ध कर्मगत अग्नि का अग्रहण भी सूचित किया गया है। तात्पर्य तो यह था कि म्लेच्छों की अग्नि बुझ गई, यह सूचित किया है। 'शान्ता' स्तस्मिन्—शांत विशेषण से अशुभ कार्यगत अग्नि का व्यावर्तन किया है, आशय यह है कि भगवत्प्राकट्य के मङ्गल अवसर पर मंगल अग्नि भस्म में दबी हुई भी जाग उठीं और अशुभ क्रियागत अग्नि जगाने पर भी नहीं जगी ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तृतीये श्रीहरेर्जन्म पितृभ्यां संस्तुतिस्तथा । गोकुले नयनं तस्य वसुदेवेन वर्ण्यते ॥ १ ॥

एवं देवानां गमनानन्तरं भगवतः प्रादुर्भावं निरूपयति—अथेति। अथ ब्रह्मादिगमनानन्तरमित्यर्थः। तेन ब्रह्मादिदेवसान्निध्यात् कालादेर्गुणवत्त्वं जातमितिशङ्का निराकृता भवति। तस्मिन् अजने जनार्दने जायमाने सति यर्हि परमशोभनः कालादिर्बभूव तदा देवक्यां विष्णुराविरासीदिति सार्द्धाष्टमश्लोकगतेनान्वयः। "भगवत्प्रादुर्भावे न कालादिशोभनत्वं हेतुः, तस्य स्वातन्त्र्येण कालादिपारतन्त्र्याभावात्। किन्तु तत्प्रादुर्भावसान्निध्यमेव कालादिशोभनत्वे हेतुः" इति सूचयितुं जायमानेऽजने तस्मिन्नित्याद्युक्तम्। तस्मिन् स्वतन्त्रत्वेन प्रसिद्धे कालकर्मादिवशवर्तिजन्मरहिते भगवति। तत्र हेतुमाह - जनार्दने इति। जनानामविद्यामर्दयतीति तथा तस्मिन् यो हि स्वाश्रितजनानां जन्मादिहेतूनविद्याकालकर्मादीन् निवर्तयति स स्वयं कथमविद्यादिवशवर्तिजन्मवान् स्यादिति भावः। कालस्य शोभनत्वे हेतुमाह—सर्वगुणोपेत इति। तानेव गुणानाह यर्ह्येवेति। अजनो भगवांस्तस्माज्जन्म यस्य, तस्य ब्रह्मणः ऋक्षं रोहिणी नक्षत्रं यर्ह्येव बभूव तदा देवक्यां विष्णुराविरासीत्। एवमग्रेऽपि सर्वत्र यर्ह्येवेत्यनुषङ्गेणान्वयो बोध्यः। तस्य नक्षत्रस्य सहायकानामानुगुण्यमाह—शान्तेति। शान्तानि ऋक्षाणि अश्विन्यादीनि, ग्रहा आदित्यादयः, तारकाः अन्यानि नक्षत्राणि यस्मिंस्तत्। तत्रर्क्षग्रहाणां शान्तत्वं दुष्टस्थानस्थितिराहित्यम्, तारकाणां तूत्पातसूचनराहित्यम् ॥ १ ॥ एवं कालगुणानुक्त्वा देशगुणानाह—दिश इति। देशस्त्रिविधः। तत्राधोदेशो भूमिः, उपरि गगनम्, परितो दिश इति। तत्र दिशः प्रसेदुः निर्मला जाताः। निर्मलानामुडुगणानां नक्षत्रादीनामुदयो यस्मिंस्तथाभूतं यर्हि गगनं बभूव। मङ्गलानि पुत्रजन्मादीनि भूयिष्ठानि येषु तथाभूताः। पुरादयो यस्यां तथाभूता यर्हि मही बभूव। तत्र पुराणि हट्टादिमन्ति, तद्रहिता ग्रामाः गोगोपनिवासस्थानं व्रजः, आकरः सुवर्णमण्याद्युत्पत्तिस्थानम् ॥ २ ॥ अथ जलगुणानाह—नद्य इति। प्रसन्नानि पङ्करहितानि सलिलानि यासां तथाभूता यर्हि नद्यो जाताः एवं जङ्गमजलगुणमुक्त्वा स्थावरजलगुणमाह—ह्रदा इति। जलरुहाणां कमलादीनां श्रीः शोभा येषु तथाभूता ह्रदा जाताः। भूमेर्गुणं गन्धातिशयं द्योतयन्नाह - द्विजेति। द्विजानां पक्षिणामलीनां भ्रमराणां च कुलानां सङ्घानां गन्धमत्तानां सन्नादो मनोहरशब्दो येषु ते स्तवका पुष्पगुच्छाः यासां तास्तथाभूता वनराजयः वृक्षपङ्क्तयो यर्हि बभूवुः। यद्यपि वर्षाकाले जलानां स्वच्छता रात्रौ कमलशोभा पक्ष्यादिशब्दश्च न सम्भवति, तथापि भगवत्प्रादुर्भावमहिम्ना जातमिति बोध्यम् ॥ ३ ॥ वायुगुणानाह—ववाविति। सुखस्पर्श इति शीतत्वं मन्दत्वं चोक्तम्। पुण्यगन्धवह इति सुगन्धित्वम्। शुचिः यमुनाजलसम्बन्धी। तेजसो गुणमाह—अग्नय इति। द्विजातीनां ब्राह्मणादीनां श्रौतस्मार्तकर्माङ्गभूताः अग्नयश्च पूर्वं शान्तास्तत्र तस्मिन् समये समिन्धत। अडागमाभाव आर्षः। सम्यक् होमा बभूवुरित्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

तृतीये स्वयमुद्भूतः पितृभ्यां च स्तुतो हरिः । गोकुलं प्रापितः पित्रा श्लोकाः सार्द्धास्त्रिमार्गणाः (५३ ॥) ॥
षड्वाचेति (६) पादाद्यास्त्रयः षष्टिरनुष्टुभः (६३ ।) ॥ ३ ॥

अथेति ॥ अथेति मंगलार्थम् । यर्हि सर्वगुणोपेतः कालो बभूव तदा देवक्यां विष्णुराविरासीदित्यष्टमश्लोकगतेनान्वयः । अन्येऽप्यन्वयप्रकाराष्टीकान्तरेषु ज्ञेयाः । यद्वा । यर्ह्येव शान्तानि ऋक्षाण्यश्विन्यादीनि ग्रहाश्च तारकाश्च यस्मिंस्तत् अजनस्य जन्मरहितस्य भगवतो जन्मनक्षत्रं रोहिणी अभूत् । यद्वा । अजनान्नारायणाज्जन्म यस्य तस्य प्रजापतेर्ऋक्षं रोहिण्यभूत् । अथ तदैव सर्वगुणोपेतः परमशोभनः कालोऽभूदिति सारार्थसंदर्शिन्यां सर्वेभ्यो लघुः प्रकारो भाति ॥ १ ॥ सर्वगुणोपेतत्वं सर्वतत्त्वानां प्रसादादिनाह –दिश इति ॥ तत्र दिशः प्रसेदुः निर्मला जाताः इति वर्षासु शरद्गुणः गगनं च निर्मलानामुडुगणानां नक्षत्रादीनामुदयो यस्मिंस्तथाभूतं बभूव । मही च मङ्गलानि पुत्रजन्मादीनि भूयिष्ठानि येषु तथाभूताः पुरादयो यत्र तादृशी बभूव । तत्र पुराणि हट्टादिमन्ति तद्रहिता ग्रामाः गोगोपनिवासस्थानं व्रजः आकरः सुवर्णमण्याद्युत्पत्तिस्थानम् ॥ २ ॥ नद्य इति ॥ नद्यः प्रसन्नानि पङ्करहितानि सलिलानि यासां तथाभूता बभूवुः । ह्रदाश्च जलरुहैः विकसितकमलैः श्रीर्येषां तथाभूता बभूवुः । इति रात्रावपि दिवसगुणः । वनानां राजयः द्विजानां पक्षिणामलीनां भ्रमराणां च कुलानां सङ्घानां गन्धमत्तानां सन्नादो मनोहरशब्दो येषु ते स्तबकाः पुष्पगुच्छाः यासां तास्तथाभूता बभूवुः । इति वर्षासु वसन्तगुणः । सर्वमेतत् भगवत्प्रादुर्भावमहिम्नैवेति बोध्यम् ॥ ३ ॥ ववाविति ॥ तत्र काले सुखः शीतः स्पर्शो यस्य सः पुण्यः सुरभिर्यो गन्धस्तस्य वहः प्रापकः शुचिर्यमुनासङ्गी वायुर्ववौ । द्विजातीनां ब्राह्मणादीनामग्नयः शान्ताः कंसपापप्राबल्येन निर्वाणप्राया अपि समिन्धत । सम्यग् दक्षिणावर्तत्वेन उद्दीप्ता बभूवुः । यद्वा । शान्ताः धूमादिरहिताः सन्तः समिन्धत । आडागमाभाव आर्षः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वस्वरूपेण संभूतस्तृतीये संस्तुतो हरिः । पितृभ्यां बिभ्यता नीतो गोकुलं जनकेन सः ॥ १ ॥

अथ भगवदवतारं प्रस्तौति ॥ अथेति ॥ यर्हि यदा, अजनजन्म कर्माद्यत्तोत्पत्तिरहितस्य भगवतो जन्म, अभूत् , अथ तदा, कालः, सर्वेषां ग्रहाणां गुणा उच्चस्थानगतत्वादयो गुणास्तैरुपेतो विशिष्टः, परमं शोभनं यस्मात् सः, एवंभूतः अभूत् । शान्तानि ऋक्षाण्यश्विन्यादीनि भानि ग्रहाः सूर्यादयः तारका अन्ये ताराराणा यस्मिंस्तत् , ऋक्षं भगवज्जन्मकालीनं रोहिणीनक्षत्रं, अभूत् । यद्वा, अजनान्नारायणाज्जन्म यस्य ब्रह्मणः ऋक्षं रोहिण्याख्यं, शान्तर्क्षग्रहतारकं, यर्हि अभूत्, तदैव भगवानन्नाविरासीदित्यष्टमश्लोकस्थेनान्वयः । अत्र ऋक्षस्योपलक्षणत्वाद्बुधवाराष्टम्यौ ग्राह्ये । अत्र निशीथे बुधाष्टमीरोहिणीनां मुख्यता, प्रपञ्चस्तु गौरवभयान्न कृतोऽस्ति यर्हीति सर्वत्रानुषञ्जनीयम् ॥ १ ॥ दिश इति ॥ यर्हि दिशः प्रसेदुः प्रसन्ना बभूवुः, निर्मलानामुडुगणानां नक्षत्रगणानामुदयो यस्मिंस्तथाभूतम् , गगनं नभः, अभूत् । पुराणि प्राकारोपेतानि च ग्रामास्तद्रहिताश्च तेषां व्रजानां समूहानामाकरा आश्रयभूता, मही भूः, मङ्गलानि भूयिष्ठानि बहूनि यस्यां तथाभूता, बभूव । पाठान्तरे मङ्गलानि भूयिष्ठानि येषु तथाविधाः पुरग्रामव्रजाकरा यस्यां तथाविधा, महीति ॥ २ ॥ नद्य इति । यर्हि नद्यः, प्रसन्नानि सलिलानि यासु तास्तथाभूताः, ह्रदा अगाधजला जलाशयाः, जलरुहाणां जलरुहैर्वा श्रीर्येषु तथाभूताः, अत्र ह्रदानां भगवज्जन्मकाले जलरुहश्रीयुक्तत्ववर्णनात् जलरुहाणां च सूर्यसंबन्धेन श्रीयुक्तत्वदर्शनात् , अर्द्धरात्रे सूर्यस्यासंबन्धात् श्रीयुक्तत्वहानेर्न सूर्यविकाशिपद्मरूपोऽर्थः, किं तु जलरुहशब्देनात्र रक्तादिवर्णवन्ति चन्द्रविकाशिकुमुदानि बुद्ध्यन्ते, तैरपि तेषां श्रीमत्त्वस्य युक्तत्वात् । भगवत्प्रतापदृष्ट्या प्रफुल्लपद्मश्रीमत्त्वेऽपि तेषां न बाधः । वनराजयो वनपङ्क्तयश्च, द्विजानां पक्षिणामलीनां भ्रमराणां च यानि कुलानि संघास्तेषां सन्ना निवृत्ता आदा अदनानि येषु तानि स्तबकानि यासु ताः, अदनम् आदः कणचयनं, भगवत्प्रतापेक्षया तु द्विजालिकुलानां सन्तः शोभना नादा येषु ते स्तबका यासु ताः, इति वा । अभवन् ॥ ३ ॥ ववाविति । यर्हि वायुरपि, शुचिर्धूलिरहितः, पुण्यगन्धवहः पवित्रगन्धवाहकः, सुखस्पर्शः सुखकारकस्पर्शश्च, ववौ । द्विजातीनां त्रैवर्णिकानाम् , अग्नयः, तत्र स्वस्थानभूतेषु कुण्डेषु, शान्ताः करीषादिसंबन्धजधूमादिकालुष्यरहिताः सन्तः, समिन्धत समैन्धत प्रज्वलिता आसन् । अडागमाभाव आर्षः । अत्रैषामित्थंभावोऽपि भगवत्प्रादुर्भावावसरत एव ॥४॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अथ सर्वगुणेति : १०.३.१.

यः सर्वैकगुणाश्रितो निगदितः कालो जनानिष्टकृत् सोऽपि श्रीमदधोक्षजोदयतयाऽजन्युत्तमः शोभनः ।
किं वाच्यं स्थितिसर्गजृम्भणगुणाक्रान्तस्य दिष्टस्य वा भ्वादीनां स्थितिरित्यभूत्स्फुटमिह प्राग्दिष्टसद्वर्णनात् ॥ १ ॥
प्रजारूपेणाहं बहु भवितुमिच्छामि च यदा ततः पूर्वं सर्वं निरवधितमस्तोमकलितम् ।
इतीव श्रुत्यर्थद्वयमिदमबोधि स्फुटमिह तथादिष्टोल्लेखाद् ध्रुवमजनजन्मेति पदतः ॥ २ ॥

सन्मार्गमेव स्वच्छाशं कर्तुमभ्युद्यते विधौ। युक्तैव कान्तिः शान्तिश्च सदा सत्पथवर्तिनः ॥ ३ ॥
सकलगुणान्वयशोभिनि सर्वज्ञे श्रीपतौ समवतीर्णे। भूमिजबुधगुरुकवयः सुखोदयं प्रापुरेतदिति युक्तम् ॥ ४ ॥
वाच्ये सति प्रसिद्धे सिद्धस्तद्वाचकोच्छ्रयो लोके। प्रणवोल्लासिनि भगवति युक्तोऽसावमलतारकोल्लासः ॥ ५ ॥

दिशः प्रसेदुरिति : १०.३ २.

रिपुजातभयोज्झिताधिकारैः पतिभिः साकमितोऽचिरेण योगः।
प्रभवेदिति ता दिशः प्रसेदुर्भुवि जन्मैशमवेक्ष्य कंसहन्तृ ॥ ६ ॥
हरित्वं हरावेवमेवासु सिद्धं निराबाधमस्तीति युक्तं दिशस्ताः।
सुभव्येऽच्युतात्मप्रसन्नोदये सत्यलं प्रापुरच्छाच्युतात्मप्रसादम् ॥ ७ ॥

आशाः प्रसादफलकाः सकला अपीह भूमौ भवेयुरचिरादमलस्थितीनाम्।
अर्थोऽस्त्वयं सुविशदोऽर्थत इत्यबोधि प्रायः प्रसेदुरनिशं दिश एवमुक्त्या ॥ ८ ॥

दुर्दान्तोद्धतदैत्यदत्तविपदां तत्क्लेशनाशार्थिकां श्रोतुं वाचमदुर्हृदां सदयधीर्दत्तावधानः सदा।
अस्त्येव प्रभुरित्यशङ्कमखिलस्पष्टावगत्यै तदा युक्तं ता निखिलाः प्रसेदुरमलास्तच्छ्रोत्ररूपा दिशः ॥ ९ ॥
साधारणोऽपि सुकृती यदि यत्कुले स्यात् तत्पूर्वजो भवति तेन हि निर्मलात्मा।
युक्तं तदेशजनुषोडुगणोच्छकान्तिरासीदसौ यदिह पूर्वजपुंप्रियात्मा ॥ १० ॥
हरावुदयमासन्ने सहस्रगुणशोभिनि। भुवने पुष्करोल्लासो युक्त एवेति विद्महे ॥ ११ ॥
यस्माद्रसः स्रवति सर्वमलापहारी यद्राजहंसपदमाश्रयद द्विजानाम्।
यद्भाते मानसमिवाच्छसमप्रतारं युक्तं वियत्तदमलं च सुशोभमासीत् ॥ १२ ॥

मही मङ्गलेति :

ध्येयं योगिभिरर्च्यमाश्रितजनैर्गेयं हि देवर्षिभिः सेव्यं भव्यदया च यत्सदयया सर्वाढ्ययापि श्रिया।
तच्छ्रीमत्पदमद्य मय्यविरतं सञ्चारशीलं भवेदित्यानन्दयुता तदाऽवनिरभून्माङ्गल्यतोऽलङ्कृता ॥ १३ ॥
त्वदीय-परिधान-सद्वसनवास्यसौ मत्पतिस्ततो भृशमदुर्लभो भवति भोगयोगोऽस्य ते।
इति प्रियसखीकृतं समुपहासमन्वर्थतोऽचिरादनु भवेयमित्यवनिराप्तभव्याऽभवत् ॥ १४ ॥
आयाते क्वचिदेव सद्मनि निजे जामातरि प्रेमतः कन्यामातुरतीव चेतसि भवत्यानन्द एतत्स्फुटम्।
सर्वत्रेति न चित्रमत्र यदभूत्सा भूमिरानन्दभाक् सीताभर्तुरनामयाऽऽगमनमालक्ष्याऽखिलाधीशितुः ॥ १५ ॥
पुरा वराहवर्ष्मणोद्धृता द्विजाग्रतोऽप्यहं न तद्विहारसौख्यभागभूवमेवमंशतः।
पदे पदे पदाम्बुज-प्रचारसार-सौख्यभागितो भवेयमित्यभूदिला समुत्सुमङ्गला ॥ १६ ॥
देवर्षि-द्विज-वह्निसाक्षिकमहं पाणिग्रहेणादृताप्यात्मीयव्रतरक्षिणा न हरिणा संभोगपात्रीकृता।
संचिन्त्यैशमिहावतारमतुल-क्रीडा-प्रधानोज्ज्वलं साऽथाभ्यन्तरमोदमानहृदया साऽभूरभूद्भव्यभूः ॥ १७ ॥
वर्णित्वाद्यदुपेन्द्रतोऽनुविहित ब्रह्मार्पणाद्रामतोयत्सीतापतितोऽप्यभून्न च सुखं श्वश्रूत्वतस्तादृशम्।
तत्सौभाग्यसुखं किलाद्य फलितं तद्भोगतोऽस्मिन् भवेदस्माद्धासकसज्जिकेव समभूद्भूमिस्तदाऽत्युज्ज्वला॥१८॥
यस्यां ग्रामपुरव्रजादिरचना विद्योतते सूत्रवत् कामं तत्र सुमङ्गलत्वमृषिणा वक्त्रेदमत्राध्वनि।
आलक्ष्येशमहोदयं बहुदयं सौभाग्यसन्धायकं श्रीमन्मङ्गलसूत्रसूत्रितगला सेलोज्ज्वलश्रीरिति ॥ १९ ॥
प्राप्तं कार्यमनर्हमर्हमपि वा यस्तुल्यभावं क्षमाशीलः संसहते लषन्निजपति-प्रेमर्द्धिमन्तश्चिरम्।
नीतश्चेत्प्रभुणा स सत्कृतिपदं कार्तार्थ्यमस्यार्थतस्तद्व्यक्तं भवतीति युक्तमतिभा सर्वंसहाऽऽसीत्तदा ॥ २० ॥
पुत्रेणाखिललोकपालनकला संदर्शनीयाऽनिशं स्वीया सर्वसदिष्टशर्मरुचये ताताय निस्तन्द्रितम्।
युक्तं तत्किल मङ्गलोऽप्यविकलं संलक्ष्य तातागतिं यद्ग्रामव्रजपूर्वनान्यवनिजः स्वार्थान्वितान्यादधे ॥ २१ ॥
यः सतामच्युतोऽजस्रमचलानन्दकारकः। युक्तस्तदुदयोऽप्यस्मिन्नचलानन्दकारकः ॥ २२ ॥
त्यक्त्वाऽन्यामखिलामपि व्यवहृतिं स्वस्थाचलानन्ददां यत्ताद्रूप्यममानसोक्तिविषयं प्राप्तुं यतन्ते बुधाः।
स्वात्माकारतयाऽद्य तु स्वयमहो सोऽयं स्थितः श्रीपतिः शंसन्ती निजदिष्टमिष्टमिति सा पृथ्वी तथाऽऽसीत्तदा ॥ २३ ॥

नद्यः प्रसन्नसलिला इति : १०. ३. ३.

प्रक्षिप्तानेकभूभृन्निचय-परिचलद्-व्यस्तनीरधिवार्द्धौ सेतूद्योगेन भव्यं जनकगृहसुखं येन दत्तं पुरा नः।
सोऽयं भूयोऽभ्युपेतस्तदनुपमसुखं लभ्यमस्मभ्यमस्मात् भूयो भूयोऽभयरत्नादिति ननु सरितः सुप्रसन्नास्तदासन्॥२४॥

दृष्टास्मज्जनकावनिप्रपदया संदर्शनीयं त्वया हे मन्दाकिनि नः शुभं निजसमद्भूतेर्निदानं पदम् ।
एवं भूरितरार्थिनाऽपि नहि सा प्रादर्शयद् द्वेषतः स्पष्टं दृष्टमितोऽचिरेण भवितेत्यासन् प्रसन्नास्तु ताः ॥ २५ ॥
नित्यं सन्निहितोऽपि भर्तृसदने नास्माभिरालोकितो जामाताऽस्ति स कीदृशः स्वमहो यः संवृतः पद्मया ।
इत्यभ्यन्तरवासनामसुलभां निर्यत्नलभ्यामितो निश्चित्य स्फुटनामरूपविभवास्ताः किं तथाऽऽसंस्तदा ॥ २६ ॥

एता नदी नेष्टकदन्तरा इति मत्वा रमानायक न त्यजाद्य नः ।
इत्यर्थनासन्धिमवेक्ष्य तास्तदा नद्यो मुदा निर्मलवृत्तयः स्थिताः ॥ २७ ॥
यत्कान्तः शरणमिहास्ति यस्य तस्मिन् तत्स्त्रीणां निरुपधिवृत्तिरेव युक्ता ।
जानन्त्यो नयमिममार्यजुष्टमिष्टं सन्नद्योऽकलुषित-जीवनास्तदाऽऽसन् ॥ २८ ॥
भुवनाधिपतौ हि शूरजाते भुवनत्राणकृतौ कृतप्रतिज्ञे ।
भविता न कथं प्रसादशालि भुवनं भूरितरास्तदाश्रिता वा ॥ २९ ॥

ह्रदा इति :

कश्चित्सम्पदमुत्तमामधिगतश्चेत्तर्हि तेनापरे कार्तार्थ्यं बहुमानयन्त्यतिजडास्तज्जातिमत्त्वाश्रिताः ।
एतद् व्यक्तमभूत्तदा यदखिला फुल्लाम्बुजातश्रियः संचिन्त्य स्वकमत्र भावि भगवत्क्रीडं तमेकं ह्रदम् ॥ ३० ॥
जडाशया इमे इति प्रकाममुग्धबुद्धयो वदन्तु किन्तु तत्त्वतः परेशवृत्तयो वयम् ।
यतः श्वफल्कजं पुरो विधाय माधवोऽत्र नः करिष्यति प्रतिष्ठितानिति ह्रदास्तथाऽभवन् ॥ ३१ ॥
सकलमपि भुवनजातं जडजातं मोदयेदयं सदयः । इति सत्प्रत्ययहेतुकमभूत्प्रसन्नं ह्रदोत्थजलजातम् ॥ ३२ ॥

द्विजालीति :

व्यरचि भूर्यवतारभृता वने स्वतनुकेलिरनेन महात्मना ।
तदधिकामधुना तु करिष्यतीत्युदितहर्षरवा वनराजयः ॥ ३३ ॥
जपो वा तपो वा महोपासना वा निदिध्यासनं साधनौघः परो वा ।
कुतो जातु नेतो भवो दुस्तरो नः प्रभौ पातरीहेत्युवाच द्विजालिः ॥ ३४ ॥

तिर्यञ्चोऽपि भवेमेश सदयेक्षणलक्षिताः । वयं धन्याः सदा वन्यामिति वोचुर्द्विजालयः ॥ ३५ ॥
लसन्ति येऽस्मिन् सुमनःसुवृत्तयः सदैव वा ये वनजातशोभिनः ।
द्विजादयस्तेऽभ्युदिते हरौ लसद् गिरस्तदाऽऽसन्निति युक्तमेव तत् ॥ ३६ ॥
अवनविहृतिदीक्षां स्वाममुञ्चन् मुरारिर्वनविहृतिममीषां प्राग्वदत्रापि कुर्यात् ।
इति किमु किमु वाच्यं साधुवात्सल्यमस्य प्रतिवनमिति सर्वेऽप्यूचिरे ते द्विजाद्याः ॥ ३७ ॥

वृन्दावनं स्वपदकेलिपदं करिष्यत्यस्मिन् दयोदधिरसौ बहुधावतारे ।
श्रुत्वा द्विजालिगिरमेवमुदारवल्ली वृन्दावनालिरभवत् स्तबकामितश्रीः ॥ ३८ ॥

ववौ वायुरिति : १०. ३. ४

दातृप्रीत्यूद्धिरास्तां मयि सततमिति स्पृह्यते येन तेन स्वीकार्यं भव्यकृत्तद्व्यसनमिह यतस्तुल्ययोः प्रीतिरुक्ता ।
जानन्नित्थं वदान्योत्तरवरदपदे श्रीपदावभ्युदीतेतत्प्रीतिप्राप्तिकामोऽप्यवनि स पवनः सत्सुखस्पर्श आसीत् ॥ ३९ ॥
गुणी बहुगुणान्वयोच्छ्रितपदं परं प्रेक्ष्य यत् प्रकाशयति सद्गुणं निजबहुप्रशंसाऽऽशया ।
विलोक्य जगतीपतेस्तदतिशायिनोऽस्योदयं सदागतिरसावपि स्वगुणदर्श्यभूत्तत्क्षमम् ॥ ४० ॥

नित्योल्लसत्पदमुकुन्दमुखारविन्दघर्मोदबिन्दु-मकरन्द-रसैकपाने ।
उत्तुङ्गभृङ्गतिरस्तु मानवधेत्यभ्यासधीः परिववौ स तदा नभस्वान् ॥ ४१ ॥
प्रभुपदेक्षणलालसता यदि सुकृतमेव हि तर्हि नरार्जय ।
उपदिशन्निति सर्वजनान्निजं सुकृतगन्धमसावकरोत् स्फुटम् ॥ ४२ ॥
पुत्रेण प्राग्धनुमता कृतयाऽस्य भूयः शुश्रूषयाऽत्र भृशमस्मि कृतार्थ एव ।
साक्षात्तथाप्यहमिहापि समाचरेयं सेवामतः परिचचार तदा सदा सः ॥ ४३ ॥
युक्त एव सतां त्रातर्यवतीर्णे जगत्प्रभौ । वन्द्यान्यपूत-पुण्यात्म-जगत्प्राणसुखोदयः ॥ ४४ ॥
तथा मरुत्सौख्यमहं दिशाम्यलं सुखप्रचारो भविता यथा सदा ।
इति प्रतिज्ञो यदुपागतः प्रभुस्तत्साधुसामोदमरुद्गतिः सुखे ॥ ४५ ॥

अग्नय इति ।

निस्तन्द्रं सुजनावनोत्सुकमना नारायणः सम्प्रति प्रादुर्भूय धनञ्जयर्द्धिमतुलां लोके करिष्यत्यसौ ।
अर्थः पार्थपरोऽस्तु तस्य वचसो नाम्नास्तु कीर्तिर्ममेत्यानन्दादनलस्तदा किल लसत्कीलाकलापो बभौ ॥ ४६ ॥
पातिव्रत्यभयाद्विदेहदुहितुस्त्वत्क्रोधभीत्याऽथवा शान्तोऽसावनलः कृपापदमभूत्तेनैव ते श्रीपते ।
शान्ता एव निसर्गतो वयममी स्मः सम्प्रतीति प्रभुख्यात्यै शान्ततरार्चिषः समभवन् सर्वे द्विजात्यग्नयः ॥ ४७ ॥
यः कश्चिदस्मज्जातीयः स्यान्मुख्यः श्रीपतेरपि । अचिरादित इत्यासन् सुप्रभाः प्रेमतोऽग्नयः ॥ ४८ ॥

वर्णाश्रमाद्यखिलसत्स्थितिक-श्रुतीड्ये प्राप्तेऽवनौ श्रुतिमुखे भगवत्यनन्ते ।
विश्वेनराः सुरसभाः किल यत्तदासन् स्वस्वैकधर्मकलिता इति युक्तमेव ॥ ४९ ॥
अभ्यागते स्वामिनि शान्तवृत्तिस्तदाश्रयाशस्य हि मुख्यधर्मः ।
तद्युक्तमाप्तेऽखिललोकनाथे तदाऽऽश्रयाशः स यदास तादृक् ॥ ५० ॥
नारायणे समुदिते वेदावनपरायणे । युक्ता द्विजश्रेष्ठ जातवेदस्थितिरनामया ॥ ५१ ॥
अस्मत्परित्राणकृते कृपालुः कृतप्रतिज्ञः सुकृतात्मरूपः ।
धृतावतारो ह्यधुनेति देवा आसन् सदास्या बहुधाग्निवक्त्रा ॥ ५२ ॥

कंसाद्यैरसुरैर्बलादपहृतं स्वीयं हविर्वैभवं लब्धं तत्पुनरच्युते समुदिते मत्त्वेत्यभूत् कान्तिमान् ।
सम्प्राप्तेऽमितवैभवेऽपि सबले प्राबल्यतो धीमता सन्त्याज्यो विनयो न जातुचिदपीत्यासीच्च शान्तोऽनलः ॥५३॥

कृष्णप्रिया

भगवान् की स्तुति कर देवताओं के प्रस्थान के अनन्तर परम सुन्दर एवं सर्व गुणसम्पन्न काल प्रकट हुआ जब ही रोहिणी नक्षत्र आया और उसके सहवर्ती अन्य नक्षत्र ग्रहतारा भी शान्त रूप से शुभ फल की सूचना देने के लिये उपस्थित हुए ॥ १ ॥ भगवत्प्राकट्य कालका निरूपण करते कह रहे हैं कि सर्व दिशाएँ प्रसन्न हो गई थीं आकाश भी निर्मल तारागणों के उदय से प्रसन्न-निर्मल था। पृथ्वी में भी प्रत्येक नगर और ग्रामों में. एवम् गौओं के व्रज स्थान तथा रत्नादिकों के भी उत्पत्ति स्थानों में सर्वत्र ही उत्कट प्रमाणमें मङ्गल कार्य हो रहे थे ॥ २ ॥ अब जल तत्व की प्रसन्नता बताते हैं कि नदियों का जल प्रसन्न था, सरोवर भी खिले हुए कमलों से शोभा प्रदान कर रहे थे। वनराजियाँ भी पक्षीवृन्द एवम् भ्रमरपुञ्ज की गुंजन से पुष्प गुच्छों को गुंजित कर रही थी ॥ ३ ॥ श्रीकृष्णचन्द्रजी के प्राकट्य अवसर पर जगपावन एवं माङ्गल्य सूचक सुगन्धपूर्ण तथा स्पर्श से सुख देनेवाला वायु बह रहा था और द्विजातियों के शांति पुष्टिकर अग्नि देव भी प्रदीप्त हो उठे थे ॥ ४ ॥

मनांस्यासन् प्रसन्नानि साधूनामसुरद्रुहाम् । जायमानेऽजने तस्मिन् नेदुर्दुन्दुभयो दिवि ॥ ५ ॥
जगुः किन्नरगन्धर्वास्तुष्टुवुः सिद्धचारणाः । विद्याधराश्च[1] ननृतुरप्सरोभिः समं मुदा ॥ ६ ॥
मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः । मन्दं मन्दं जलधरा जगर्जुरनुसागरम् ॥ ७ ॥
निशीथे तमउद्भूते जायमाने जनार्दने । देवक्यां [3]देवरूपिण्यां विष्णुः सर्वगुहाशयः[4] ॥ ८ ॥
आविरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥ ८½ ॥

कर्दमक्षमा

अन्वयः—तस्मिन् अजने जायमाने असुरद्रुहाम् साधूनाम् मनांसि प्रसन्नानि आसन्, दिवि दुन्दुभयः नेदुः ॥ ५ ॥ किन्नर-गन्धर्वाः जगुः, सिद्धचारणाः तुष्टुवुः च विद्याधराः अप्सरोभिः समं मुदा ननृतुः ॥ ६ ॥ मुदान्विताः मुनयः देवाः सुमनांसि मुमुचुः जलधराः मन्दम्-मन्दम् अनुसागरम् जगर्जुः ॥ ७ ॥ जायमाने जनार्दने निशीथे तम उद्भूते प्राच्यां दिशि यथा पुष्कलः इन्दुः इव देवक्यां देवरूपिण्यां सर्वगुहाशयः विष्णुः आविरासीत् ॥ ८½ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

असुरद्रुहां देवानां कंसादिव्यतिरिक्तानां सर्वप्राणिनां चेति । स्वर्गे तु विशेषमाह । जायमान इति । अजने जायमाने ॥५॥ तदा आसन्नः प्रसवो यस्मिंस्तस्मिन्समये ॥ ६ ॥ अनुसागरं सागरनादमनुलक्ष्य मन्दं जगर्जेति ॥ ७ ॥ तमसोद्भूते घनतमसि निशीथे । यथा यथावदैश्वरेणैव रूपेण ॥ ८ ॥

---

१. धर्मश्च–श्रीधर. वंशी जीव. गिरि. भक्त. । २. तदा–श्रीधर. वंशी. जीव. गिरि. भक्त. । ३. देव–श्रीधर. वंशी. जीव. विजय. विश्व. गिरि. भक्त. । ४. गुणाश्रयः—वीर. भक्त. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

क्लिष्टकल्पनां परित्यज्याह—देवानां वेति। अजने वस्तुतो जनिरहिते तस्मिन्भगवति जायमाने आसन्नप्रसवे आसन्नोऽतिनिकटः प्रसव आविर्भावो यस्मिन्समय इत्यर्थ इत्युक्तेर्जाते सतीत्यर्थो न विधेयः॥ ५॥ समं सार्द्धम्। तदा भगवदाविर्भाववेलायाम्॥ ६॥ सुमनांसि पुष्पाणि अनुसागरम्। अनुकृतं सदृशीकृतं सागरः तद्गर्जनं यत्र तद्यथा स्यात्तथेति॥ ७॥ निशीथेऽर्द्धरात्रे। जनार्दने जनभयंकरे। जायमाने सति तत्र हेतुः—तम इत्यादिः। यद्वा—जनैरर्द्यते प्रार्थ्यते उदयो यस्येति जनार्दनश्चन्द्रः। यद्वा—जनानां सर्वज्ञभक्तमुनिदेवादीनामर्दने भगवन्नाविर्भवाविर्भवसमयोऽयमिति याचने जायमाने सति। वस्तुतस्तु—जनान्दुष्टजनानर्दयति नाशयति स्वांशैरिति जनार्दनः स्वयं भगवति नंदनंदने श्रीगोलोकस्वामिनि जायमाने तत्कालमेवाविर्भूते सति। स्फुटमेवात्रावतारद्वयं भगवत उक्तमिति एवं जायमानेऽजने तस्मिन्नित्यत्रापि ज्ञेयम्। देवस्य विष्णोरिव रूपं सच्चिदानंदघनं वर्तते यस्यास्तस्यामाविरासीत्। सर्वासु गुहासु गुहावदसदगम्यस्थलेषु मथुरावैकुंठादिषु जीवांतःकरणेषु वा सर्वजनापरोक्षत्वाच्छेत इति तथा सः। अन्यो बालो यथा गर्भादायंत्रितः सन्निस्सरति तथा नेत्यत्र दृष्टांतः। किञ्च—दृष्टांतदार्ष्टांतिकयोर्युगपदाविर्भावमाह—तद्दिने (अष्टमीतिथौ) निशीथे प्राच्यां दिशि इंदुरपूर्णोपि मद्वंशं मत्प्रभुर्जन्मनालंचकारेतीत्यानंदोद्रेकेण पुष्कलः। पूर्णिमेंदुरिव सन्यथाविरासीत्तथैव देवक्यां विष्णुरपि सर्वांशकलापरिपूर्ण आविरासीदित्यर्थः। आविर्भावश्च कंसवंचनार्थमष्टमे मासि। तदुक्तं हरिवंशे "गर्भकाले त्वसंपूर्णे ह्यष्टमे मासि ते स्त्रियौ। देवकी च यशोदा च सुषुवाते समं तदा॥" इति खमानिक्यग्रंथे श्रीकृष्णजन्मपत्री चोक्ता - "उच्चस्थाः शशिभौमचांद्रिशनयो लग्नं वृषो लाभगो जीवः सिंहतुलावृषक्रमवशात्पूषोशनोराहवः। नैशीथः समयोऽष्टमी बुधदिनं ब्रह्मर्क्षमत्र क्षणे श्रीकृष्णाभिधमंबुजेक्षणमभूदाविः परं ब्रह्म तत्॥" इति॥ ८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भीषणाकारादित्वेन सर्वेष्वपि उद्वेगहेतुतया तेभ्यो द्रुह्यन्त्येव सर्वे इति असुरद्रुहां सर्वप्राणिनां च ततः कंसादीनां तु चित्तोद्वेगोऽधिकमजनीति भावः। ननु, सर्वगुणोपेतत्वादिकमजनजन्मर्क्षस्य कियन्तं कालमारभ्येत्यपेक्षायामाह अजने भगवति जायमाने इति। "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" (३।३।१३१) तदादिभागमारभ्यैव तत्तत्प्रवृत्तं किन्तु निकटं त्वधिकमित्यर्थः। अजनपदं तस्यापि यदा जन्म तदा वा किं किमाश्चर्यमिति भावः अजने भगवति जायमान इति यर्हिपदेन सहेदमपि सर्वत्र योज्यं नेदुः स्वयमेव शुभविशेषोदयात् तथा च श्रीहरिवंशे "अनाहता दुन्दुभयो देवानां प्राणदंस्तदा" इति अत्र दिक् प्रसादादयश्चिरप्रवृत्ताः दुन्दुभिनादादयस्तु तत्कालीना इति ज्ञेयम्॥ ५॥ विद्याधर्यश्चेति चशब्दः पूर्ववत्समानगुणत्वापेक्षया मुदेति निभृतं श्रीभगवत्प्रादुर्भावे सत्यपि तत्तदाचरणे हेतुः तदनुसन्धानाभावेप्याकस्मिकहर्षस्वाभाव्येनैव तदाचरणात् तदेति पाठस्तु सर्वदेश्यः किन्तु स्वाम्यसम्मत इव यर्हीत्यादिनाऽष्टमश्लोके तस्याध्याहृत्य व्याख्यानात् यद्वा तेनैव सम्बन्ध उद्दिष्टः॥ ६॥ अत्रापि पूर्ववद्विवक्षया मुदेति अन्विताः अन्योन्यं मिलिताः सन्तः अनुसागरं सागरं गर्जन्तमनु तथा च श्रीविष्णुपुराणे "सिन्धवो निजशब्देन वाद्यं चक्रुर्मनोहरम्" इति॥ ७॥ नेदुर्दुन्दुभय इत्यादिकं कदेत्यपेक्षायामर्द्धेनाह—निशीथेऽर्द्धरात्रे कीदृशे तम उद्भूते तमसा उद्भवत्यपि ते भूप्राप्तौ भाद्रकृष्णाष्टमीत्वात् विशेषणं चेदं तत्कान्तिद्वारा तमोनाशनेनापीन्दूपमायोजनाय तथाप्यभूतोपमेयं निशीथे पूर्णचन्द्रोदयादर्शनात् तेनोपमा चेयं यथा कथञ्चिदेव न त्वतियोग्येति ज्ञाप्यते दुन्दुभिनादादौ हेतुः जायेति श्रीब्रह्मादिभक्तजनप्रार्थ्यमानप्राकट्ये तस्मिन् प्रकटीभवति प्राकट्यक्षण इत्यर्थः। कंसादीनां तत्तदज्ञानं गोकुले जायमानाया मायायाः प्रभावेणैवेति ज्ञेयम् अथवा अथेति यर्हि यदा अजनस्य कदाप्यन्यदा जातत्वेनाश्रुतस्य श्रीकृष्णस्य जन्मर्क्षं निजजन्मना स्वीक्रियमाणं तद्द्वापरान्तसमयविशेषगतरोहिण्याख्यमभूत् तच्च तदारम्भ एव सर्वस्य ऋत्वादेः कालस्य स्वस्य च ये गुणाः सुखदा धर्मास्तैरुपेतः सर्वशुभसमेतश्च कालोऽभूत् तदिच्छायां जातायां दुर्घटघटनीभिस्तच्छक्तिभिरेव वा स्वस्वभावेनैव वा तथा सम्पन्न इत्यर्थः। अजनजन्मर्क्षमिति शब्दश्लेषमयसंकेतनिर्देशो रहस्यत्वं सूचयति—तच्च तद्व्रतोत्सवमहिमार्थमिति ज्ञेयम्। सर्वगुणोपेतत्वं दर्शयति शान्तर्क्षेत्यादिना महीत्यर्द्धवर्जितेन मनांसीत्यर्द्धान्तेन तत्र सर्वगुणोपेतत्वं शान्तेति परमशोभनत्वं जायमान इत्यादिना मुमुचुरित्यर्द्धान्तेन महीत्यर्द्धेन च अत्र दिक्प्रसादादिवायुपर्यन्तवर्णनं शरद्वसन्तादिसम्बन्धिनां गुणानां दर्शकं जलरुहश्रिय इति रात्रौ च दिवससम्बन्धिना अम्बर इत्यादिपद्यं तेषां सत्यादिसम्बन्धिनाम् उपलक्षणं चैतदन्यदीयानां मन्दमन्दमित्यर्द्धं दिगन्ते वर्षागुणानां च दर्शकं दिश इत्याद्युक्तत्वात् मध्ये हि ते न संभवन्ति अतो "मन्द जगर्जुर्जलदाः पुष्पवृष्टिमुचो द्विजाः" इति वैष्णववाक्यं जन्मर्क्षारंभसम्बन्ध्येव ज्ञेयमिति अन्यत् समानम्। देवस्य भगवतो रूपमिव रूपं सच्चिदानन्दविग्रहः तद्वत्यामिति तदुदराविर्भावेपि न कश्चिद्दोष इति भावः। विष्णुरूपिण्यामिति पाठोपि क्वचित् सर्वगुहाशयः दुर्गमत्वात् दुर्वितर्क्यत्वाच्च गुहेव गुहा श्रीभगवत्स्थानं सर्वासु सर्वजीवाद्यन्तरलक्षणासु श्रीवैकुण्ठादिलक्षणासु च गुहासु शेते अक्षुभिततया विहरतीति पुष्कलः सर्वांशपूर्ण इति अन्तर्यामित्वादिना हृदयादिषु वर्तमानैरंशैः सर्वैरेव सम्भूयावतीर्णः अन्तर्यामिणामपि तदानीं श्रीदेवकीनन्दनत्वेनैव महत्सु स्फूर्तेः तथा च श्रीभीष्मवाक्यम्—

"तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम्।
प्रतिदृशमिव नैकधाऽर्कमेकं समधिगतोस्मि विधूतभेदमोहः"॥

इति तथा च श्रीवैकुण्ठलोकाद्यधिष्ठातारोपि ततस्ततः सम्भूयावतीर्णा इति श्रीहरिवंशाद्युक्तेन मुकुटमाहृत्य गोमन्थे श्रीगरुडागमनादिना स्पष्टत्वात् इति एतच्च श्रीभागवतामृते विवृतमस्ति न चात्र दोषः स्वस्वरूपेणैव परमविभौ तत्रैव निजसर्ववृत्ति प्रकाश्य तत्तेजोनिगूढतया तेषां स्थितत्वात् तथा च श्रीमध्वाचार्यधृतं पाद्मवचनं "स देवो बहुधा भूत्वा निर्गुणः पुरुषोत्तमः एकीभूय पुनः शेते निर्दोषो हरिरादिकृत्" इति। प्राच्यामितिदृष्टांतेन सर्वत्र प्रकाशमानस्यापि श्रीदेवक्यामाविर्भावयोग्यतोक्ता अत एव श्रीविष्णुपुराणेपि "ततोखिलजगत्पद्मबोधायाच्युतभानुना। देवकीपूर्वसन्ध्यायामाविर्भूतं महात्मना" इति आविर्भावश्च कंसवञ्चनार्थमष्टमे मासीति श्रीहरिवंशे "गर्भकाले त्वसम्पूर्णे अष्टमे मासि ते स्त्रियौ। देवकी च यशोदा च सुषुवाते समन्तदा" इति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

असुरद्रुहामिति कंसादीनां चित्तोद्वेगोऽधिकमजनीत्यर्थः। सर्वगुणोपेतत्वे हेतुमाह—अजनेऽपि भगवति जायमान इति। परमशोभनत्वं दर्शयति—नेदुरित्यादिना, नेदुः स्वयमेव शुभविशेषोदयात्। तथा च श्रीहरिवंशे (विष्णु-प० ४।१८) ॥ ५ ॥

'अनाहता दुन्दुभयो देवानां प्राणदंस्तदा'[1] इति॥ मुदेति निभृत श्रीभगवत्प्रादुर्भावेऽपि तत्तदाचरणे हेतुहर्षेण तदनुसन्धानादित्यर्थः। अतएवाग्रेऽपि तत्पुनरुक्तिः; अन्विता अन्योऽन्यं मिलिताः सन्तः। अनुसागरं समुद्रे, यद्वा, सागरं गर्ज्जन्तमनु; तथा च श्रीविष्णुपुराणे (५। ३। ५)—'सिन्धवो निजशब्देन वाद्यं चक्रुर्मनोहरम्' इति। निशीथे जगर्ज्जुरेव केवलम्, न तु व्योमाच्छाद्य ववृषुरित्यर्थः, तथा सति निर्मलोडुगणोदयत्वाद्यसम्भवात्। अतएव तत्रैव (वि० पु० ५।३।६)—'मन्दं जगर्ज्जुर्जलदाः पुष्पवृष्टिमुचो द्विज' इति। परमशोभनत्वेऽपि तदेकहेतुता—विवक्षया पूर्वोक्तमेव हेतुमाह—जनार्दने दुष्टजननाशके भक्तानां जन्मलक्षणसंसार[2] ध्वंसके वा श्रीब्रह्मादिभक्तजनप्रार्थ्ये वा भगवति जायमाने इति। तमसोद्भूते व्याप्त इति कृष्णाष्टमीत्वादिना कंसादीनां तत्तदज्ञानं गोकुले जायमानमायाप्रभावादिनेति ज्ञेयम्। देवस्य भगवतो रूपमिव रूपं सच्चिदानन्द-विग्रहस्तद्वत्यामिति तदुदरादाविर्भावेऽपि न कचिद्दोष[3] इति भावः। 'विष्णुरूपिण्याम्' इति पाठोऽपि कचित्। सर्वगुहाशयोऽन्तर्यामित्वेन जगच्चित्तान्तर्वर्त्त्यपि पुष्कलः सकल इत्यन्तर्यामित्वादिना हृदयादिषु वर्त्तमानैरंशैः सर्वैरपि सम्भूयावतीर्ण इत्यर्थः। तत्र वैकुण्ठलोकाद्यधिष्ठातारः श्रीनारायणादयस्ततस्ततोऽवतीर्ण एवेति श्रीवाराहाद्युक्तेन श्रीगरुड़-मथुरागमनादिना स्पष्टमेव। तथा च पाद्मे—'स देवो बहुधा भूत्वा निर्गुणः पुरुषोत्तमः। एकीभूय पुनः शेते निर्दोषो हरिरादिकृत्॥' इति। तच्च श्रीभागवतामृते विवृतमस्ति। अन्तर्यामिणाञ्च सर्वेषु तदानीं श्रीदेवकीनन्दनत्वेनैव स्फुर्त्तेस्तैरपि सम्भूयेति ज्ञेयम्। तथा च प्रथमस्कन्धे श्रीभीष्मवाक्यम् (भा० १।९।४२)—'तमिममहमजं शरीरभाजां, हृदि हृदि धिष्ठितमात्मकल्पितानाम्। प्रतिदृशमिवनैकधार्कमेकं, समधिगतोऽस्मि विधूतभेदमोहः॥' इति प्राच्यामिति दृष्टान्तेन सम्बन्धासम्भवेऽपि सम्बन्धसत्ता, तथा सर्वत्र प्रकाशमानस्यापि श्रीदेवक्यामेवाविर्भावे योग्यता चोक्ता। सर्वत्र योग्यसत्ताकस्यापि पूर्णेन्दोः प्राच्यामेवोदयादिति दिक्। अतएव श्रीविष्णुपुराणेऽपि (५।३।२)—'ततोऽखिलजगत्पद्मबोधायाच्युतभानुना। देवकीपूर्वसन्ध्यायामाविर्भूतं महात्मना[4]॥' इति। आविर्भावश्च कंसवञ्चनाद्यर्थमष्टमे मासीति श्रीवैशम्पायनमतम्। तथा च श्रीहरिवंशे (विष्णु-प० ४।११)—'गर्भकाले त्वसम्पूर्णे अष्टमे मासि ते स्त्रियौ। देवकी च यशोदा च सुषुवाते समं तदा॥' इति॥ ७-८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अमरद्रुहामपीत्यर्थः॥ ५-१०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

असुरद्रुहां देवानां साधूनाञ्च मनांसि प्रसन्नान्यासन् तस्मिन् भगवति जायमाने सति दिवि दुन्दुभयो नेदुः दध्वनुः॥५-६॥ कुसुमानि समन्ततः मुमुचुरित्यन्वयः॥ ७॥ जनार्दने जायमाने निशीथे अर्द्धरात्रे तमसाऽन्धकारेण उद्भूते व्याप्ते सति मेघा मन्दं मन्दमनुसागरं सागरमनुसृत्य जगर्जुर्यथा सागरो ध्वनति तद्वत् सादरमिति पाठे आदरयुक्तं यथा तथा अनुजगर्जुरित्यर्थः। तथा देवभूतायां देवतांशत्वात्तत्तुल्यायां देवक्यां सर्वेषां गुणानां ज्ञानशक्तिबलैश्वर्यवीर्यतेजःप्रभृतीनां गुणानामाश्रयो विष्णुराविरासीदा-विर्बभूव यथा प्राच्यां दिशि पुष्कलष्षोडशकलापरिपूर्णश्चन्द्रस्तद्वत् इवशब्दो वाक्यालङ्कारे॥ ८॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सुमनांसि पुष्पाणि अनुसागरं समुद्रस्योपान्ते॥ ५-७॥ जायमान इति द्विर्वचनं जन्मवैलक्षण्यप्रदर्शनपरं देवस्य हरेरूपं अस्यामस्तीति देवरूपिणी तस्याम्॥ ८॥

---

१. 'प्राणदन् दिवि' इति पाठान्तरम्;

२. जन्ममरणसंसार-(ग); ३. कश्चिद्दोष (ग); ४. महात्मना (घ, ङ)।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

असुरद्रुहां सर्वप्राणिनाञ्च ॥ ५–६ ॥ अनुसागरं सागरेण सह ॥ ७ ॥ जायमाने जनार्दन इति तज्जन्मार्थं जनानां याचने सतीत्यर्थः। देवो वसुदेवस्तद्रूपिण्यां शुद्धसत्त्ववृत्तिरूपायामित्यर्थः। पाठान्तरे विष्णुरूपिण्यां तद्वद्व्यापकाप्राकृतविग्रहामिति च धारणायोग्यतोक्ता सर्वासु गुहासु तद्वत् दुर्ज्ञेयस्थलेषु वकुण्ठादिषु शेते निगूढं क्रीडति यः स सर्वांशः परिपूर्ण इत्यर्थः। दृष्टान्ते च तथाह पुष्कल इति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

अथ (भा० १०।२।१८) "काष्ठा यथानन्दकरं मनस्तः" इति पूर्वोक्तेर्न देवकी चिरं मनस्येव दधार, अवतारसमयमासाद्य भगवान् तन्मनसो बहिर्बुभूषुरतिशयं भवितुमिच्छुः प्राकट्यमासेदिवानित्याह—देवक्यामित्यादि। देवरूपिण्यामिति देवी भक्तिर्भगवती तद्रूपिणीति पुंवद्भावः,—भक्तावेव भगवत्प्रकाशनियमात्। विष्णुर्व्यापकोऽपि सर्वेषु गुहाशयत्वेन वर्त्तमानोऽपि तस्यां यथा यथावत् याथार्थ्येन श्रीकृष्णाख्यस्वरूपेणाविरासीत्। क इव कस्याम् ? इन्दुः प्राच्यां दिशीव, पूर्णत्वेनान्यत्र स्थितोऽपि चन्द्रः प्राच्यां दिश्येवोदयति नान्यस्यामित्येव याथार्थ्यम् ॥ ८)

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

देवक्यामित्यादि। प्राच्यां दिशि इन्दुरिव यथा यथावत् स्वभावसिद्धत्वेनाविरासीत्; यथा अन्तःस्थितस्तथैव बहिः प्रादुरासीत, अन्तः प्रादुर्भावानन्तरं बहिः प्रादुरभूदित्यर्थः। न हि प्रवेशनिर्गमाभ्यां तथात्वं व्यापकत्वात्; न हि नृसिंहो निराकाशे स्तम्भे प्रविश्य पुनर्बहिर्भूतः। एतेन न लौकिकगर्भरूपत्वम्, दृष्टान्तेऽपि पुष्कलशब्दोपादानात्, पुष्कलः सम्पूर्णः। न हि प्राच्यामिन्दुः क्रमशो वर्द्धित्वा उदेति, प्रागेव सम्पूर्ण एवोदेति, पुष्यन्तीति पुषः कला यस्य नित्यसम्पूर्ण इव चन्द्रो यथा प्राच्यां दिशि—इति वान्वयः। नित्यसम्पूर्णस्यासम्भावनायामिवशब्दः, उपमायां यथाशब्दः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

मनांसि मनोबुद्धीन्द्रियादीन्यपि तत्त्वानीत्यर्थः। असुरद्रुहामित्यसुरकर्तृकद्रोहवत्त्वेन साधूनामपि मनांसि पूर्वमप्रसन्नान्येवासन्निति भावः। जायमाने आसन्ने प्रादुर्भावे अजने श्रीकृष्णे ॥ ५–६ ॥ अनुकृतः सदृशीकृतः सागरः सागरगर्जनं तद्यथा स्यात्तथा ॥ ७ ॥ ननु, दिशः प्रसेदुरिति गगनं निर्मलोडुगणोदयमिति पूर्वोक्तेर्जलधराः खलु कदा जगर्जुरित्यपेक्षायामाह—निशीथ इति। तमसा उत्कर्षेण भूते व्याप्ते इति निशीथ एव मध्येगगनं मेघखण्डोद्गमात् भूप्राप्ताविल्यस्य रूपं जनानां सर्वज्ञभक्तमुनिदेवादीनाम् अर्दने भगवानाविर्भावाविर्भावसमयोऽयमिति याचने जायमाने सति देवरूपिण्यां विष्णुरूपिण्यामिति च पाठः। देवस्य विष्णोरिव रूपं सच्चिदानन्दघनं वर्तते यस्यास्तस्याम् आविरासीत् प्रकटीबभूव सर्वासु गुहासु गुहावदगम्यस्थलेषु मथुरावैकुण्ठादिषु जीवान्तःकरणेषु च सर्वजनपरोक्षत्वाच्छेते इति सः अन्यो बालको यथा गर्भाद्यन्त्रितः सन्निस्सरति तथा नेत्यत्र दृष्टान्तः यथेति किञ्च दृष्टान्तदार्ष्टान्तिकयोर्युगपदेव आविर्भावमाह—तद्दिने निशीथे प्राच्यां दिशि अष्टम्याम् इन्दुरपुष्टोऽपि मद्वंशं मत्प्रभुर्जन्मनाऽलङ्करोत्वित्यानन्दोद्रेकेण पुष्कलः पूर्णिमाया इन्दुरिव पुष्टकलः सन् यथा आविरासीत्तथैव देवक्यां विष्णुरपि सर्वांशकलापरिपूर्ण आविरासीदित्यन्वयः आविर्भावश्च कंसवञ्चनाद्यर्थमष्टमे मासि यदुक्तं हरिवंशे—

> "गर्भकाले त्वसम्पूर्णे अष्टमे मासि ते स्त्रियौ। देवकी च यशोदा च सुषुवाते समं तदा" ॥ इति

खमाणिक्यनाम्नि ज्योतिर्ग्रन्थे जन्मपत्रीचोक्ता "उच्चस्थाः शशिभौमचान्द्रिशनयो लग्नं वृषो लाभगो जीवः सिंहतुलालिषुक्रमवशात् पूषोशनो राहवः। नैशीथस्समयोऽष्टमीबुधदिनं ब्रह्मर्क्षमत्र क्षणे श्रीकृष्णाभिधमम्बुजेक्षणमभूदाविः परम्ब्रह्म तत्" इति ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अजने "अजायमानो बहुधा विजायते" इतिश्रुतिप्रोक्ते कर्मनिबन्धनजन्मरहिते जायमाने दुन्दुभयः स्वतो नेदुः अयमर्थः चेतनाचेतनेषु प्रहर्षः सर्वगतेन हरिणोत्पद्यमानेन कृत इति ॥ ५ ॥ तुष्टुवुः स्तुतिं कृतवन्तः ॥ ६ ॥ तमसा उद्भूते व्याप्ते निशीथे जनार्दने जायमाने पूर्वमेव सुमनांसि मुमुचुरित्यन्वयः। विष्णुराविरासीदित्यनेनैव व्यापकस्यावतारो दर्शितः हैतुकानामंशेनैव विष्णोरवतारः व्यापकस्य चैकत्र प्राकट्यासम्भवादिति तर्कतिरस्कारार्थं पुनराह—सर्वगुहाशय इति। हेतुवादो नोऽस्माकं सच्छास्त्रानुवर्तिनाभिष्टः तथाह भगवती श्रुतिः "नैषा मतिस्तर्केणापनेया" इत्यादि श्रीपुरुषोत्तमविग्रहोऽपि नित्यसिद्ध एवेति दृष्टान्तमुखेन दर्शयति। दिशि पूर्वायां पुष्कलः पूर्णः इन्दुश्चन्द्रः पूर्वसिद्ध एव न तु दिक्सम्बन्धिद्रव्योपचितो जायते तद्वद्देवक्यां यथास्ति तथैवाविरासीत् ॥ ७-८ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

मनांसीति। अत्र द्रोग्धुर्वै परतो भयमित्युक्त्या परद्रोहिणां भयसद्भावेन मनःप्रसादः साधुत्वं च कथम्। जडस्य स्वतः प्रवृत्तिः कथम्। अतो विरोधोऽत्र उच्यते ॥ असुरद्रुहां सुरद्रोहा न भवंतीति तेऽसुरद्रुहस्तेषामिति विग्रहेण द्रोहाभावे तात्पर्यसिद्धेर्न विरोधद्वयमपि। यद्वा। आसन्नित्यत्र अ आसन्निति पृथक् पदद्वयम्। नेषा तर्केण मतिरापनेयेत्यत्रत्यापेतिवत्। तथा च साधूनां मनांसि प्रसन्नानि नावसन्नानि आसन्। असुरद्रुहां अः विष्णुः सुरा देवास्तान् द्रुह्यंति ये तेषां तु। प्रसन्नानि प्रकर्षेण खिन्नानि आसन् ॥ अजने। जन्मरहिते जनविलक्षणे वा। भगवति जायमाने सति ॥ तस्मिन्निति। विषयसप्तम्यास्तृतीयार्थत्वात्। भगवज्जन्मनिमित्तेनेत्यर्थः। दिवि दुंदुभयो नेदुः स्वयमेव शब्दमकुर्वन्। यद्वा। देववादिता इति विशेषेणान्वयः। अतो न विरोधोऽपि तृतीयः ॥ ५ ॥ निशीथ इति। पूर्वं जायमाने जने तस्मिन्निति वाक्यसद्भावादत्र जायमाने जनार्दने इति पुनरुक्तिः। अतोऽर्थांतरम्। द्विर्वचनस्य जन्मवैलक्षण्यप्रदर्शनार्थत्वात्। सत्प्रयोजनत्वेन सत्यामपि पुनरुक्तावदोषः। वैलक्षण्यं हि प्राकृतदेहविधुरत्वाच्चतुर्भुजादियुक्तत्वाच्च। जन्मनो लोकातिशयितत्वाद्वा। व्यत्ययोऽतिशयकुत्सनाभेदेष्विति हि सूत्रम्। यद्वा ॥ जनार्दने। अर्द गतौ याचने चेति धातोः। जनैरर्यते प्रार्थ्यते यस्तस्मिन्। तथा ॥ अतमसः। तमोविरोधिनः। प्रकाशस्य ॥ उद्भूतं। उद्भवं। यस्मात्तथाविधे ॥ निशीथे। नितरां शीते चंद्रे इत्यर्थः। उद्गीथवत्तस्य स्थाः ॥ जायमाने। उदयं प्राप्नवति सति। विष्णुर्देवक्यां प्रादुरासीदिति संबंधः। अथवा। इथे विचित्रभयलक्षणे। निशि रात्र्यां। उद्भूते सति। जनार्दने विष्णौ। च जायमाने सति। तमोऽधकारः। यदा बभूवेति शेषः। तदा प्रादुरासीदिति संबंधः। इ विचित्रे स्मरे पुमानिति हि यादवः। थकारो भयलच्चे इत्येकाक्षरे। षट् पादत्वात्सार्धोऽयं श्लोकः। तम उद्भूते तमसा उद्भूते उत्कृष्टे। निशीथे मध्यरात्रे। अधिकरणे सप्तमी वा। जनार्दने जनान् असत्प्राणिनः। अर्दयति। पीडयतीति स तथा। अनेकार्था हि धातव इत्युक्तेः। धातूनामनेकार्थत्वात् रूढत्वाच्च। अर्द हिंसायामिति धातोः। असत्प्राणिहिंसको वा। शृण्वे वीर उग्रमुग्रं दमायन्निति श्रुतेः। जनेषु जन्मवत्सु। अर्दनं गमनं। यस्येति तथा। प्रवेश इति यावत्। जनैरर्यते प्रार्थ्यतेऽसौ तथा वा। अर्द गतौ याचने चेति धातुः। अथवा। न जायते अर्दयति च संसारमिति जनार्दनः। संभूतः स जनार्दन इति सच्चासीत्सनासीत्सोर्दयदिति श्रुतेः। उत वा। अजनार्दन इति विच्छिद्य जन्मरहिते संसारनाशके चेत्यर्थः। अपि वा। अजनैर्मुमुक्षुभिरर्यते गम्यते प्रार्थ्यत इति वा। किंवा। न जायतेऽनेनेति अजनं। अर्दनं गतिः ज्ञानं वा यस्येति। गत्यर्थानां ज्ञानार्थत्वात्। उत्कृष्टगुणविशिष्टविष्णौ। जायमाने आविर्भवति सति। जलधरा मंदं मंदं जगर्जुरिति पूर्वेण संबंधः। ननु जायमाने जने तस्मिन्निति वाक्यस्य पूर्वं विद्यमानत्वेनेयं पुनरुक्तिः प्रसज्येत चेति चेन्न। अस्य श्लोकांतरस्थत्वेनादोषात्। अथवा। अजाय ब्रह्मणे। जनार्दने विष्णुविषये। माने ज्ञाने। अतमः मोहरहितं। यथा भवति तथा। उद्भूते उत्पन्ने सति। निशीथे मध्यरात्रे। प्रादुरासीदिति वा। उत वा जनार्दनविषये। तमसः अज्ञानस्य। उद्भूते उद्भवे। जायमाने जने सति। निशीथे प्रादुरासीदिति। किंवा। उद्भूतानि भूतानि यस्मात्तादृशे जनार्दने जायमाने सति। निशीथेऽपि अतमः प्रकाशो बभूवेति। स्वरोचिषा भारत सूतिकागृहं विरोचयंतमिति वक्ष्यमाणत्वात्। अथवा। जनार्दने। जन हिंसायां। जायमाने जायमानायां सत्यां तमसोत्कृष्टे निशीथे आविरासीदिति। यद्वा। अजा कालशक्तिः। यमः अंतकः। ताभ्यां सकाशात्। एजनं कंपः। एज् कंपने। भयमिति यावत्। येषां तेभ्यो असुरेभ्यः सकाशात्। अर्दने पीडने। भूते जाते सति। यदा तु सता। उत् उत्कृष्टं। तमः ग्लानिः। बभूव। तमु ग्लानौ। तदा निशीथे आविरासीदिति। अपि वा। अजायमाने जनानामसुराणामर्दने हिंसाविषये तम उद्भूते निशीथे आविरासीदिति। जनार्दने जनपीडके तमसोत्कृष्टे निशीथे जायमाने सतीति वा। उत वा। उद्भूते उत्कृष्टभूते जीवजात इत्यर्थः। जडस्यापि भूतशब्दवाच्यत्वात्तद्व्यावृत्तये विशेषणं। जडस्य जीवापकृतत्वात्। स्वापायोगाच्च। निशीथेन निमित्तेन इता गता। इण् गताविति धातोः। मा ज्ञानं यस्य तादृशे सति निशीथे। सर्वजीवेषु सुप्तेष्वित्यर्थः। आत् वासुदेवाज्जन्यत इति अजनो ब्रह्मा। अकारो वासुदेवः स्यादित्येकाक्षरः। यो ब्रह्माणं विदधाति पूर्वमिति श्रुतेश्च। तस्य। अर्दने याचने जायमाने सति च। आविरासीदित्यन्वयः। अहो स्वित्। जन्यंते ते जनाः। प्रकरणाद्देवकीपुत्राः। तेषां। अर्दने हिंसने। भूते जाते सति। निशि प्रलये। इ विचित्रं विश्वं थं अन्नं यस्य तादृशे भगवति। प्रलये विश्वोपसंहारक इत्यर्थः। यस्मादन्नं थमुच्यत इति कौर्म्ये। उत् ऊर्ध्वं। षड्गर्भहिंसानंतरमित्यर्थः। जायमाने सति दुर्गादेवी यदा बभूव तदा आविरासीदिति। सर्वाधिकत्वेन तमो हि दुर्गा इत्यौद्दालिकायनश्रुतिः। दुर्गेति भद्रकालीतीति च। या योगमायाऽजनि नंदजाययेति वक्ष्यमाणत्वात्। ग्रंथबाहुल्यभिया विस्तरेणालमिति सद्भिः संतोष्टव्यम् ॥७॥ अथोत्तरत्र पादचतुष्टयार्थोऽपि लिख्यते। यथेवेत्युपमाद्वयवैयर्थ्यनिरासार्थम्। यथा प्राच्यां दिशि पुष्कल इंदुः प्रादुरासीत्तथा देवक्यां विष्णुः प्रादुरासीत्तथा प्राच्यामिंदुः प्रादुरासीदिति परस्परप्रमेयत्वप्रदर्शनार्थमुपमाद्वयं। यद्वायथा शब्द उपमार्थः। इवशब्द उत्प्रेक्षार्थः। तथाहि। इंदोः कृष्णाष्टम्यामुदितत्वेन पूर्णकलात्वाभावात्पुष्कल इत्युत्प्रेक्षितेंदुर्यथा प्राच्यां तथा देवक्यां विष्णुरित्यनेनोत्प्रेक्षणेन तद्दिने चंद्रस्यापूर्णकलात्वेन पूर्णावतारत्वेन च भगवतश्चंद्रोपमानयोग्यत्वं नास्तीति ध्वनितम्। अथवा। यथा विष्णुश्चतुर्भुजत्वादिगुणोपेतस्तथैव सन् प्राच्यामिंदुरिव देवक्यां प्रादुरासीत्। चतुर्भुजं शंखगदाद्युदायुधमिति वक्ष्यमाणत्वात्। न प्राकृतशिशुवदिति भावः। उत वा। स्ववंशे भगवदवतारेण तद्दिनेऽपूर्णकलोऽपि चंद्रो यथा यथावत्पुष्कलः पूर्णकल इंदुरिव विष्णुर्देवक्यां प्रादुरासीदिति। किंवा। यथा सर्वगुहाशयस्तथैव

भूर्ल्येंदुरिव देवक्यां प्रादुरासीत्। हरेर्देवक्युदराद्बहिः प्रादुर्भावेऽपि तदुदरं विष्णुव्याप्तिहीनं नासीदिति भावः। अहो स्वित्। इव पुष्कल इत्येकं पदम्। इ विचित्रे स्मरे पुमानिति यादवकोशात्। इ शब्दवाच्यो मदनस्तत्सदृशं वपुः शरीरं कलयतीति स तथा। दग्धशरीरमदनं वपुषा कलयति बंधयतीति स तथेति वा। कल बंधन इति धातुः। अपि वा। इंदुरिव किंचित् चंद्रोऽल्पकलावानित्यर्थः। प्रादुर्बभूव। विष्णुस्तु यथावत्पुष्कलः प्रादुरासीत्। एककाले उभयोः सत्यपि जन्मनि न साम्यमिति भावः। किंचित्त्वे चोभयत्वे च संशये सदृशे तथा। इव शब्दः प्रयुज्येत न्यक्कारेऽपि च पंडितैरिति शब्दनिर्णये। यद्वा। यदा विष्णुर्देवक्यां प्रादुरासीत्तदा पुष्कलोऽपि चंद्र इव न्यक्कृतस्तिरस्कृत इति यावत्। अथवा। इ वपुः कलः इति पदद्वयं भगवद्विशेषणं। इ वपुः विचित्रशरीरः। शुक्रशोणितसंबंधविधुरशरीर इत्यर्थः। तमद्भुतमिति वक्ष्यमाणत्वात्। अत एव प्रागुदितचंद्रदृष्टांतः। चंद्रस्य प्रागुदयेऽपि शुक्रशोणितादिराहित्यम्। एवं देवक्यामुत्पन्नत्वेऽपि शुक्रशोणितादिराहित्यं भगवत इति भावः। कलः कं सुखमेव लाति आदत्ते स तथा। ला आदान इति धातुः आनंदस्वरूप इत्यर्थः। इदमेवालौकिकशरीरत्वे हेतुरपीति। तस्मान्नात्र पुनरुक्तादिदोषगंधोऽपीति भावः॥ ८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

असुरेभ्यो द्रुह्यन्तीत्यसुरद्रुहस्तेषां साधूनां मनांसि प्रसन्नान्यासन्। तस्मिन् अजने हरौ जायमाने समीपभविष्यज्जनने सति दिवि दुन्दुभयो नेदुः स्वयम्॥ ५॥ अप्सरोभिः समं साकम्॥ ६॥ सुमनांसि सुमनसः स्त्रियः सुमनसः पुष्पमित्यर्थः। भूम्नि स्त्रियां सुमनस इति रत्नकोशः। सुमनाः पुष्पमालयोः स्त्रियां ना धीरदेवयोरिति मेदिनी। तम्। यद्वा सुमनसश्च सुमनांसि च सुमनांसि। द्वन्द्वे नपुंसकं भविष्यति। एकवचनं चेति प्रासङ्गिकयुक्तिः। कृष्ण एव मनांसि स्थापितवन्त इति द्योतनार्थं सुमनांसीत्युक्तिः। अनुसागरं समुद्रसमीपे मन्दं जलधरा जगर्जुः॥ ७॥ तम उद्भूते प्रचुरतमस्के तमो दुर्गोद्भूतं यस्मिंस्तस्मिन्यशोदायां दुर्गोत्पत्तौ तदानीं भाव्यायामिति यावदिति वा। तमो हि दुर्गेत्यादेः। आहिताग्न्यादिः। निशीथे निशीथः स्यादर्धरात्रे निशीथो रात्रिमात्रक इति विश्वः। गोपीथेत्यादिनिपातितः शब्दः। अजनार्दने जनो लोके महर्लोकात्परलोके च पामर इति विश्वादजना अपामरास्सज्जनास्तेषामर्दने कंसादिभिर्जायमाने सति जनार्दने जनानां मुख्यादीनामर्दन आगमे जायमाने सतीति वा। जनार्दने जायमाने वर्तमानसामीप्ये वर्तमानव्यपदेश इति भविष्यति वा। अजायमाने जनार्दन इति पदमेकं वा। अजश्चासावुत्पत्तिरहितश्चासावयमोऽसदृशश्चासावनेजनो न विद्यते एजनं भयं यस्य सोऽजनश्चासावदनो याचितश्च तस्मिन् जायमान इति पूर्वेण नेदुर्दुन्दुभय इत्यनेनान्वयो वा अनेज्ज्वलपातेनास्माकं नैल्यवर्णः कश्चन समुद्रशाय्युत्पत्स्यत इति स्वामिनोऽभिमतभङ्गभियेति ध्वन्यते। सजलजलदनीलमित्यादेः। अनेजन्निर्भयत्वादीशावास्योपनिषद्भाष्योक्तेः। अन्यत्राजनो लोकविलक्षण इत्यर्थः। जायमाने जने तस्मिन्नेदुरिति श्लोके जायमाने जनेऽतस्मिन्निति छेदः। अतस्मिन्न सः तस्मिन्नतस्मिन् श्रीहरिभिन्ने कीर्तिमदादिपूर्वजे जायमाने यानि मनांसि प्रसन्नानि शीर्णान्यधुना मधुनाथोऽत्र प्रादुर्भूत इति जनार्दने जायमाने प्रसन्नान्यासन्नित्येकान्वयो वा। देवरूपिण्यां देवस्य रूपं तदसत्यस्यामिति देवरूपिणी तस्यां सर्वगुहाशयः सर्वेषां गुहा हृदयगुहास्तासु शेत इति स तथा। अधिकरणे शेतेरित्यच्। एवमेव देवो देवक्यां वर्तत इति दर्शयितुमदो विशेषणम्॥ यथा यथावत्पूर्ण एव प्राच्यां। यथाप्राच्यामित्येकं पदं वा। योग्या या प्राची तस्यां तत्तद्देशवासिविवक्षया प्राचीत्वादेरव्यवस्थितत्वादिति केचित्। दिशि पुष्कला पूर्णकल इन्दुश्चन्द्रमा इव। यथा प्रादुरासीत्तथा सम्यग्देवरूपिण्यां देवक्यामिति योजना वा। इन्दुः इव पुष्कल इति वा छेदः। अस्यापत्यं इर्मन्मथस्तस्य यद्वपुस्तद्यस्य कलांशस्तस्मिन्कला यस्य सः। साक्षान्मन्मथमन्मथ इत्यादेस्ततोऽपि सुन्दर इति भावः॥ ८॥

श्रीसुबोधिनी

सात्त्विकाहङ्कारकार्यं मन इति भौतिकगुणसमये मनसो गुणा उच्यन्ते।

यदा सत्त्वमारूढं भवति तदा मनांसि प्रसन्नानि भवन्ति, मनसो दैत्यसम्बन्धित्वमपि वर्तत इति तन्निवृत्त्यर्थं **साधूनामित्युक्तं**, इदं साधुपदं दैत्यव्यतिरिक्तमात्रपरमिति ज्ञापयितुमसुरद्रुहामित्युक्तं, साधुपदं च व्यवहारे सन्मार्गवर्तित्वाय, इयमवस्था स्थूलकालेपीति निकटकाले विशेषमाह **जायमाने जन** इति, **अजने जायमाने दिवि दुन्दुभयो नेदुः**, तस्मिन्निति तन्निकटे, यथा वसुदेवादयः शृण्वन्ति, आकाशस्य गुणा नृत्यवादित्राणि, दुन्दुभिर्मङ्गलवाद्यं, **स्वयमेव** नेदुर्न तु कैश्चिद् वादिताः॥ ५॥

किन्नरगन्धर्वा अपि स्वत एवोल्लसितहृदयाः **जगुः**, अज्ञात्वैवेति ज्ञातव्यं, अन्यथा माहात्म्यप्रतिपादकं न स्यात्, **सिद्धाश्चारणाश्च तुष्टुवुः**, अकस्मादेव स्तोत्रं तत्काले कृतवन्तः, ते हि वैतालिकप्रायाः, विद्याधरा नर्तकाः, चकाराद् **विद्याधर्यश्च ननृतुः**, **अप्सरोभिः सम**मित्यानन्दावेशेनैव नृत्यं, न तु शास्त्रीयं, **मुदा**नन्देन, न केनचित् प्रेरिताः, स्वत एवानन्दाविर्भूता अकस्मात् तस्मिन् समये स्त्रियः पुरुषाश्च ननृतुः, अनेन ये केचन यस्यां विद्यायां रतास्ते कस्मात् मुदा तत्तत् कार्यं कृतवन्त इत्यर्थः॥ ६॥

(**अथ च मुनयः सुष्ठु निर्दुष्टानि मनांसि** पुरुषोत्तमसम्बन्धाभावात् समाधितो निष्कास्य तदाविर्भावस्थले **मुमुचुर्ववृषु**रित्यर्थः, देवास्तु पुष्पाणीत्यर्थः, अत एव पुष्पादिपदानि विहायोभयार्थकत्वात् **सुमनः**पदमुक्तं, सुमनस इति स्त्रीलिङ्गप्रयोगाभावश्च, पुष्पवाचकस्यैव स्त्रीलिङ्गनिर्देशात्, अन्यथा भुवि स्थितानां मुनीनां नभसि स्थितैर्देवैः सह वृष्टिकर्तृत्वं कथमुपपद्येत ? मनसः पुष्पतया कथनमुज्ज्वलत्वसङ्कोचविकासादिधर्मवत्त्वादविरुद्धं, **मुदान्विता** इति, तत्रानन्दावेशलक्षणमकरन्दसम्पत्तिः सूचिता, तदा सुमनोवृष्ट्यपेक्षया जलवृष्टिरल्पा नाद्भुता चेति मत्वा मेघा न ववृषुः किन्तु तत्र गर्जितं नास्तीति तावत् कार्यं कृतवन्त इत्याह **मन्द मन्दं जलधरा जगर्जु**रिति, मेघानामुच्चैर्गर्जनं पूर्वोक्तवाद्यगीतादिश्रवणप्रतिबन्धकता भवतीति तदभावाय **मन्दं मन्द**मित्युक्तं, अन्यथा तद्वैयर्थ्यापत्तेः, तथा च युगपज्जायमानान्यपि वाद्यगीतगर्जितान्यन्योन्यमिश्रितानि सर्वैरश्रूयन्तेतिभावः किञ्च **जगर्जुरेव** न तु ववृषुः, यतो **जलधरा** न तु जलमुचः, अत्रायमाशयः, मेघास्तु भगवत्प्राकट्यात् पूर्वं लोके नीलरूपमश्लाघ्यं मत्वा स्वस्य तादृशत्वेन तदभावाय जलमुचो जाताः, इदानीं स्वसारूप्यमङ्गीकृत्य भगवान् प्रकट इति कवयोग्रे स्वस्योपमां दास्यन्ति तेन स्वजन्मसाफल्यं भविष्यतीति हर्षवशादात्मनो नीलरूपस्यैवाभीष्टत्वेन तद्धेतुभूतं च जलधारणं, अन्यथा शुभ्रता स्यात्, अतो **जलधरा** जाताः, यद्यपि मरकतेन्दीवरादीनामपि सारूप्यमस्ति तथापि स्वस्य विद्युत्सहभावात् कामिनीतनुकनकलतालङ्करणदशायां द्वैरूप्येपि सादृश्यमधिकमिति च जलधरपदेन सूचितं, सजलमेघानामेव तडित्सहभावदर्शनात्, अपि च समुद्रः स्वगाम्भीर्यगुणं प्रभुरङ्गीकृतवानितिगर्वेण गर्जति तस्य तं गर्वमपहन्तुं धर्मापेक्षया स्वरूपसादृश्यं स्वस्याधिकमिति ज्ञापयितुमनुसागरमित्युक्तं,) **देवा** ज्ञात्वैव पुष्पवृष्टिं **मुमुचुर्मुनय**श्च, शब्दबला मुनयः, अर्थबला देवाः, उभये प्रामाणिकाः, स्वसेवामभिज्ञतां च ज्ञापयितुं शुभसूचनार्थं **सुमनांसि** पुष्पाणि **हर्षेणान्विता मुमुचुः**, सर्वथा मेघानामभावे विपरीतः कालधर्मो शुभकर इति तेषामपि कार्यमाह **जलधरा मन्दं मन्दं सागरनिकटे जगर्जुः** ॥ ७ ॥

एवं देशकालयोस्तत्रत्यानामृतोश्च गुणानुक्त्वा रात्र्यास्तन्मुहूर्तस्य च गुणानाह **निशीथ** इति ।

अर्धरात्रं निशीथं पञ्चचत्वारिंशत्षट्चत्वारिंशद्घटिकाद्वयं, तस्य दोषाभावः, **तमउद्भूत** इति, तम उद्भूतं, ऊर्ध्वभूतं निवृत्तं यस्मिन्, यो हि निर्गच्छति स ऊर्ध्वो भवति **जायमाने जनार्दने** सतीति गुणा उक्ताः, यावता गुणेन जनानामविद्यामर्दयतीति सर्वाविद्यानाशकः प्रादुर्भवति तादृशगुणवान् **निशीथ** इत्यर्थः, भगवज्जननस्य मूलभूतगुणानां प्राकट्ये भौतिकानां च प्राकट्ये निमित्तत्वं वक्तुं 'जायमानेजन' इति मध्ये निरूपितं, अजनत्वान्न कालनिमित्तत्वं किन्तु कालस्य तादृशगुणवत्त्वेजन एव मध्ये निमित्तं, अन्ते च पुनर्जायमाने जनार्दन इति सर्वाविद्यानाशनार्थं प्रादुर्भावे सर्वगता गुणाः प्रकटीभवन्तीति प्रकटीभावे हेतुरुक्तः, एवं सन्दर्भे भगवतोवतारत्रयमप्युक्तं, सर्वधर्मसंरक्षकोनिरुद्धः सर्वमुक्तिदाताज्ञाननिवृत्तिद्वारा सङ्कर्षणो देवक्यां प्रद्युम्नो नन्दगृहे वासुदेव इति सर्वरूपेणाप्याविर्भूतो भगवानित्युक्तं, निमित्तत्वं च भगवत एव दोषाभावे गुणप्राकट्ये च, ननु तादृशोपि कालः सहजः कश्चिदस्तीत्येकमेव चेन् निमित्तमुच्येत तस्मिन् समयेन्योप्युत्पन्नो भगवत्सदृशः स्यात्, अतो भगवत्प्रादुर्भाव एव गुणप्राकट्ये निमित्तं भगवत्प्रादुर्भावार्थमेव गुणप्राकट्यं चेति निरूपितं, एवं सर्वांशो भगवान् प्रादुर्भूत इत्याह **देवक्या**मिति, **देवक्यां विष्णुः** प्रादुरासीत्, देवानां समूहो देवकी, सम्पूर्णे देवसमूहे पूर्णसत्त्वं भवति, तच्च सत्त्वं भगवदाविर्भाव आधारत्वेन निमित्तं भवति यथाग्नावरणिः, न केवलमव्यापाराविष्टा निमित्तमरणिरपि भवतीति मथनस्थानीयं किञ्चिन्न निरूपणीयं, तदाह **विष्णुरूपिण्या**मिति, विष्णो रूपमस्यामस्तीति **विष्णुरूपिणी**, भगवद्रूपमेव तत्र विद्यमानं भगवन्तं प्रकटीकृतवन् न तु प्रयत्नः प्रसूतिवातादिर्वा तत्र निमित्तमिति तन्निराकरणार्थमुक्तमिदमेव रूपमिति सिद्धान्तः, देवक्यां विद्यमान आधिदैविक इति केचित्, तदा विष्णुरूपायामित्यर्थो भवति, पाठान्तरेऽपि देवो विष्णुरेव, विष्णुर्व्यापकः पुरुषोत्तमो यो वेदान्ते 'ब्रह्म' शब्देनोच्यते, तस्य सर्वत्रैव विद्यमानत्वात् प्रादुर्भावो भाक्त इत्याशङ्क्य सर्वव्यापकत्वेपि यः सर्वान्तरः सर्वान्तर्यामी सोन्तःस्थितो बहिरागत इति वक्तुं सर्वेषां गुहा हृदयाकाशं तस्मिन्नासमन्ताच्छेतेधितिष्ठतीति **गुहाशय** इत्युक्तं, अनेन सर्वेषां भजनार्थं स्वयं हृदि स्थित्वा तत्पराः कृतार्था भविष्यन्तीति ज्ञापयितुं वेदांश्चकार स इदानीमत्रैव प्रकटीभूत इति न पूर्वप्रक्रियातःपरमुपयुज्यते किन्त्वयमेव बहिः सेव्य इति निरूपितं, **प्रादुरासीत्** प्रादुर्भूतो जातः, अकस्मात् प्रकटः, अन्तरनुभूयमानो बहिर्दृष्टः, न तु कश्चन व्यापारो देवक्यास्तत्र जातो निमित्तभूतोपि ज्ञानं सावधानता वा, स सम्पूर्ण एवानन्दमय इति निरूपयितुमाधारप्रकटीभूतयोर्दृष्टान्तमाह **यथा प्राच्यां दिशीन्दुरिवे**ति, सर्वोपास्या प्राची दिक् सर्वदेवतामयी, साप्यागमने मार्गमात्रं न तु जनने, इन्दुरमृतमयः, 'इदि परमैश्वर्ये' इति परमैश्वर्ययुक्त आनन्दमयः, स प्राच्यां दिशि प्रथमं पूर्ण एव दृश्यते खण्डास्तु मध्ये प्रान्ते उच्चैश्च खण्डोपि **प्राच्यां** दृश्यत इति तद्व्यावृत्त्यर्थमाह **पुष्कल** इति पूर्णः, पुष्कलशब्देन पुष्टोप्युक्तः, तेन निष्कलङ्को निरूपितः, कलङ्कस्यैव क्षयहेतुत्वात्, तथोक्तरीत्या प्राच्यां दिशि पुष्कल इन्दुरित्येको दृष्टान्तः, नन्वानकदुन्दुभेः पत्नीषु बह्वीषु सतीषु देवक्यामेवाविर्भावे को हेतुरितिशङ्कानिरासाय **यथा प्राच्यां दिशि पुष्कल** इन्दुरिति द्वितीयो दृष्टान्तः, अत्र प्राच्यादिपदानाम वृत्तिर्ज्ञेया, एवं सति पूर्णेन्दुप्राकट्यस्थानं प्राच्येव तथा पूर्णशक्तेः पुरुषोत्तमस्य प्राकट्यस्थानं देवक्येवेति तथेत्यर्थः, अतः सर्वकलापूर्णो भगवान् सच्चिदानन्दविग्रहोऽकस्मादग्रे प्रादुर्भूत उपविष्टयोस्तयोर्देवकीवसुदेवयोः सतोः, अत एव तयोराश्चर्यं वर्णनं च सङ्गच्छते ।

दासीनां सर्वरक्षार्थं निमित्तीकृत्य तादृशम् । प्रादुर्भूतो मम स्वामी नैश्चिन्त्यं वाञ्चि पूर्ववत् ॥ १-८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

नैश्चिन्त्यं वाचि पूर्ववदिति, वाच्युपनिषद्रूपायामित्यर्थः, 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह,' 'अदृश्यमग्राह्य',' 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः,' 'न चक्षुषा दृश्यते नोत वाचे'त्यादिविरोधः प्राकट्यकथन आपतति, स च 'कश्चिद् धीरः प्रत्यगात्मानमैक्षत्,' 'ततस्तु तं पश्यते निष्कलं ध्यायमान'' इत्यादिश्रुतिभिर्भगवदिच्छया भगवान् दृश्य इन्द्रियसामर्थ्येनादृश्य इति श्रुत्यास्तात्पर्यनिरूपणेन निरस्यत इति प्राकट्यात् पूर्वमविरोधो यथा तथा प्राकट्यानन्तरमपीति न काचिच् चिन्तेत्यर्थः ॥ ८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

मनांसीत्यत्र भौतिकगुणसमय इति, तामसाहङ्कारकार्यगुणसमये, मनःपदमिन्द्रियाणामप्युपलक्षणम् ॥ ५–६ ॥

मुमुचुरित्यत्र मुनीनां देवानां भगवत्प्राकट्यज्ञाने हेतुमाहुः **शब्दबला** इत्यादि, **शब्दस्य** श्रुतेरर्थस्य भगवतश्च **बलं** येषां तेन तथा, अतो ज्ञानात् तथा कृतवन्त इत्यर्थः ॥ ७ ॥

निशीथ इत्यत्र **रात्रेस्तन्मुहूर्तस्य चे**ति, **निशीथ**शब्दस्यार्धरात्रवाचकत्वात् तेनैवार्थबलाद् रात्रेपि प्राप्तेस्तथेत्यर्थः, सिंहार्के निशीथ इदानीं षट्चत्वारिंशत्सप्तचत्वारिंशद्घटिकाद्वयात्मको भवतीति तद्व्यावृत्त्यर्थं विवक्षितं प्रादुर्भावसमयं निश्चेतुमाहुः **पञ्चचत्वारिंशत्षट्चत्वारिंशद्घटिकाद्वयमि**ति, ईदृशस्तु निशीथो विषुवद्दिन एकस्मिन् भवति पञ्चमस्कन्धीयाद् 'यदा मेषतुलयोर्वर्तते तदाहोरात्राणि समानानि भवन्ती'तिवाक्याज् ज्योतिः शास्त्राच्च निश्चीयते, तदग्रे तु प्रत्यहं पलद्वयं रात्रेर्दिनस्य च वृद्धिह्रासौ, एवं सति यदत्रैवमुक्तं तत्रायमर्थः, द्वापरस्य 'पञ्चविंशाधिक'शरच्छतावशेषे भगवत्प्रादुर्भाव इत्येकादशस्कन्धीयाच् 'छरच्छतं व्यतीयाय पञ्चविंशाधिकं विभो' इति ब्रह्मवाक्यान् निश्चीयते, तत्र च गणितविचारे स्फुटोर्कः ४।१९।०।१, गतिः ५८।८, अयनांशाः २४।३२।२०, मधुपुर्यां पलप्रभा, ८।५, चरखण्डानि ६०।४८।२०, चरपलानि ३२, दिनमानं ३१।४, रात्रिमानं २८।५६, रात्र्या अर्धं १४।२८, निशीथः ४५।३२, एवं सति तत्राबाढोधिकोभ्युपेयः, उक्तरीत्या स्पष्टेर्केपि सति ४।१९।०।१, एतादृशस्य सूर्यस्य तदैव सिद्धेरिति, एतावान् भवति तत्राष्टम्याः प्रान्तभाग इति तत्र चन्द्रप्रकाशस्तेभ्यो द्वात्रिंशत्पलेभ्यः पूर्वं भवति, चन्द्रप्रकाशस्य क्षितिजसंयोगे तमसो निवृत्तेः, तदेवाभिप्रेत्य मूले **तमउद्भूत** इत्युक्तं, भगवत्प्राकट्यं तु तावत्पलोत्तरं निशीथारम्भसमये चन्द्रोदयसमकाले तदेवाग्रिमश्लोके **प्राच्यां दिशीन्दुरिवे**तिदृष्टान्तेन सूचयिष्यते, अतो द्वात्रिंशत्पलान्यनादृत्य यत् **पञ्चचत्वारिंशे**त्यादिकथनं तत् प्रकाशन्यायेन दोषनिवृत्तिबोधनार्थमिति न कोपि विरोधः, ननु 'जायमानेजन' इत्यनेनैव गुणनिरूपणसिद्धिरिति **जायमाने जनार्दन** इत्यस्य किं प्रयोजनमित्याकाङ्क्षायामाहुर्**भगवज्जननस्येत्यारभ्य हेतुरुक्त** इत्यन्तं, तथा च कालः पूर्वमुपक्रान्तः सर्वत्र च हेतुत्वेन प्रसिद्ध इति प्रकृतेपि स एव निमित्तत्वेन सम्भाव्यत इति तद्व्युदासाय 'जायमानेजन' इत्युक्तं प्रादुर्भावस्य निमित्तत्वाय च **जायमाने जनार्दन** इत्युक्तमिति भावः, ननु नेदं युक्तं **देवक्यामिति**पदेनैव चारिताथ्यादित्याशङ्कायामस्याप्याशयं सूक्ष्मेक्षिकयाहुर्**एवं सन्दर्भ** इत्यादि, **प्रथमपी**ति, अपिशब्दः प्रासङ्गिकत्वं सूचयति, पुरुषोत्तमस्यैव प्रकरणित्वात्, **तत् स्पष्टीकुर्वन्ति सर्वे**त्यादि, तत्र 'जायमानेजन' इत्यस्य गुणाविर्भावोक्तिमध्ये निरूपणाद् धर्मरक्षकता स्पष्टेति तेनानिरुद्धावतारो **जायमाने जनार्दन** इत्याद्यैश्वरूपाज्ञाननिवर्तकत्वेन सङ्कर्षणावतारो **देवक्यामि**त्यनेन च प्रद्युम्नः पित्रोः सुखदानाद् **विष्णुरूपिण्यामि**ति वक्ष्यमाणाच्च, यः पुन'र्बभूव प्राकृतः शिशु'रित्यनेनोक्तः स तु वासुदेवो नन्दगृहे प्रादुर्भावात् पूर्वमत्र जात इति ''प्रागयं वसुदेवस्य क्वचिज जातस्तवात्मज'' इति गर्गवाक्यादवसीयते, अतो हेतोः **सर्वरूपेणाप्याविर्भूतो भगवानि**ति, एतत् तृतीयाध्यायरूपे **सन्दर्भ उक्त**मित्यर्थः, ननु तादृशगुणाधारादौ कालस्य निमित्तत्वेङ्गीकृते को वा दोष इत्यपेक्षायामाहुर्**निमित्तत्वमि**त्यादि, **एकमि**ति, कालात्मकं, **निरूपितमि**ति, वारद्वयं 'जायमान' इत्यादिकथनेन **निरूपित**मित्यर्थः, न चास्त्वेवं तथापि **सकृदुच्चारितैर'जना'दिपदैः** कथमर्थद्वयबोध इति शङ्क्यं, **सकृदुच्चारितादप्य'जना'**दिशब्दादर्थमर्यादया छिद्रेतरत्ववदवतारत्रयबोधस्यापि सुखेन सम्भवात्, ननु पूर्वाध्याये पुरुषोत्तमप्रादुर्भावस्य नन्दगृहे समर्थितत्वादत्र नन्दगृहे वासुदेवपदस्य व्यूहसाधारणस्य कथने किं प्रयोजनमिति चेदुच्यते, वासुदेवव्यूहस्य नान्तरीयकत्वज्ञापनायेति जानीहि, वक्ष्यन्ति च **पञ्चमाध्याये** 'वासुदेवोत्रैवाविर्भूत इति सिद्धान्त' इति, द्वितीयस्कन्धे विमर्शाध्याये 'भूमेः सुरेतरे'त्यस्य व्याख्याने चोक्त'मेकमेव चरित्रं मोक्षभक्ती निरूपयती'ति, तेन पुरुषोत्तमवासुदेवयोराधिदैविकाध्यात्मिकवत् तत्तत्कार्यकरणादेव व्यपदेशभेद इत्यभिप्रेत्यैव **'शुद्धसत्त्व आविर्भूतः पुरुषोत्तम एव वासुदेव'** इति 'वसति जगदस्मिन्निति वासुदेवः क्रीडावान् स चासौ देवश्च 'सर्वतःपाणिपादान्त'मितिवाक्योक्तधर्मवा'निति च द्वेधापि साम्प्रदायिकानां व्याख्यानं सङ्गच्छते, **देवक्या**मित्यत्र ननु नन्दगृहे वासुदेवश्चेत् तर्ह्यत्र नेति वक्तव्यं तथा सति कथं सर्वांशेन प्रादुर्भाव इत्याकाङ्क्षायामाहुः **सम्पूर्ण** इत्यादि, तथा च निबन्धे 'प्रथमे वासुदेवोभू'दिति कथनात् तद्द्वारात्रापि तदागमनेन वासुदेवाविर्भावादस्ति सर्वांशेनाविर्भाव इत्यर्थः, ननूभयत्र वासुदेवाविर्भावस्य किं प्रयोजनमत आहुर्न **केवलमि**त्यादि, **इदमि**ति, वासुदेवाख्यं, तथा च पुरुषोत्तमस्याक्षर एवाविर्भावो न तु गुणसंसर्ग इति तदभावार्थमत्रापि वासुदेवाविर्भावाङ्गीकरणमित्यर्थः, सत्त्वगुणाभिमानिव्युदासायाहुर्**विष्णुर्व्यापक** इत्यादि, **सर्वान्तर** इति, अनेन स्वतोनाविर्भाव उपपत्तिरुक्तान्तर्यामिव्युदासश्च **कृतः**, स्वत आविर्भावे स्वभावहानिप्रसङ्गादन्तर्यामिणः प्रतिशरीरं

भिन्नत्वाचेति, दृष्टान्तसिद्धमर्थं व्याकुर्वन्ति सर्वेत्यादि, तथा च प्राचीदृष्टान्तेन श्रीदेवक्या आविर्भावप्रयोजकत्वमात्रं न तु मातृवत्
जननीत्वं द्योतितं, इन्दुपदेन च परमैश्वर्ययोगात् पूर्णत्वं द्योतितं, तर्हि दृष्टान्तेन कथं तत्सिद्धिरित्यत आहुः स इत्यादि, स इन्दुः
प्राच्यां दिशि प्रथमं पौर्णमास्यां षोडशकलत्वदशायां पूर्वं पूर्ण एव दृश्यते, तथा च प्राचीपदेन्दुपदयोः समभिव्याहाराद् दृष्टान्तेपि
तत्सिद्धिरित्यर्थः, नन्वेवं दृष्टान्तेनैव पूर्णत्वसिद्धौ पुष्कलपदस्य किं प्रयोजनमित्याकाङ्क्षायामाहुरुचैरित्यादि, तथा च कृष्णद्वितीया-
दावुचैःखण्डस्यापि प्राच्यां दर्शनात् तद्व्यावृत्त्यर्थं पुष्कलपदमिति तत्समभिव्याहृतदृष्टान्तादेव पूर्णत्वसिद्धिरित्यर्थः, अत्र दृष्टान्त-
बोधकयोर्यथेवपदयोः सत्वात् पुष्कलपदस्यार्थान्तरमभिप्रेत्यैतद् द्विधा व्याकुर्वन्ति पुष्कलशब्देनेत्यादि नन्वित्यादि च, अत्रेति,
एवं व्याख्याने, एवं सतीति, दृष्टान्तद्वयेऽङ्गीकृते सति, इति तथेत्यर्थ इति, एवंबोधनार्थं दृष्टान्तद्वयमुक्तमित्यर्थः, सिद्धमाहुरत
इत्यादि, एतमर्थमुपपत्त्या दृढीकुर्वन्त्यत एवेत्यादि, प्रादुर्भाव आपतितं श्रुतिविरोधं कारिकया परिहरन्ति दासीनामित्यादि अर्थस्तु,
दास्यो वक्ष्यमाणा अङ्गीकार्याः, तासां सर्वपुरुषार्थरक्षानिमित्तं तादृश स्वसमानाकारं वासुदेवमत्युत्कटं भक्तदुःखं वा, निमित्तीकृत्य
स्वाविर्भावे प्रयोजकं कृत्वा, मम स्वामी पुरुषोत्तमः प्रादुर्भूत इति, शेषं तु टिप्पण्यां व्याख्यातं वाचीत्यादिना, 'अयं टिप्पण्यो-
क्तोर्थः साधनाध्यायद्वितीयपादेरूपवदधिकरणस्य द्वितीये "प्रकाशवच्चावैयर्थ्या'दितिसूत्रे स्फुटः, तत्र हि "यथा सौरः प्रकाशो
व्यवहार्योऽव्यवहार्यश्च न हि स्वतः सम्पादयितुं शक्यते स्थापयितुं वा, आगते तु सूर्ये मेघाद्यभावे च सान्निध्यमात्रेण व्यवहारः
कर्तुं शक्यते तथा लौकिकवाङ्मनोभिर्न शक्यते व्यवहर्तुमीश्वरसन्निधाने तु शक्यत इति द्वयमाह श्रुतिः, कुत एतदवगम्यते ?
तत्राह 'अवैयर्थ्यात्', अन्यथा शास्त्रं व्यर्थं स्या'दित्येवं प्रतिपादनात् ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

मनांसीत्यत्र सात्त्विकाहङ्कारेति, तामसाहङ्कारकार्याणि भूतानि निरूपितानि, सात्विकाहङ्कारकार्यं मनोत्र निरूप्यते,
राजसाहङ्कारकार्याणीन्द्रियाणि मनोनिरूपणेन निरूपितानि, एतद्देवतास्तु 'दिशः प्रसेदु'रित्यत्रोपलक्षणविधया निरूपिताः, तथा
चाहङ्कारत्रयकार्यमपि निरूपितं जातमित्यर्थः, सत्त्वमारूढमिति, भगवतेतिशेषः, देवक्यां देवरूपिण्यामित्यत्र देवक्याः सत्त्वरूपत्वं
व्याख्यास्यते, तथा च सत्त्वं यदा भगवतारूढं भवति तदा स्वकारणे भगवदारोहान् मनसां प्रसादो भवत्येवेत्यर्थः, दैत्यसम्बन्धित्व-
मिति "द्वयाह प्राजापत्या" इतिसन्दर्भे सत्त्वरूपेषु शमादिष्वसुराणामरुचेर्व्युत्पादितत्वात् सत्त्वेन तेषां प्रसादो नेतिभावः, स्थूलकाल
इति, जननात् किञ्चिदर्वाक् पश्चाच्च मायाजननावधीत्यर्थः, निकटकाल इति, जननसमय इत्यर्थः, जायमान इतिवर्तमानप्रत्ययोक्त्ये-
तिभावः, 'यर्ह्येवाजनजन्मर्क्ष' जातं तदैव 'सर्वगुणोपेतः कालो' जातस्तदैव च 'दिशः प्रसेदुर्गगनं' तथा जातमेवं मनांस्यासन्
प्रसन्नानीत्यत्र 'यर्ह्येवे'त्यस्यान्वयः' आकाशस्येति, आकाशप्रधानस्यान्तरिक्षलोकस्येत्यर्थः, न तु कैश्चिद् बाधिता इति किन्नरादयः
केनचित् प्रेरिता न ॥ ५ ॥ अतो मुदेत्युक्तत्वात् स्वत एव जातो य आनन्दस्तेनाविर्भूतास्तेषां गानादिक्रिया इतिशेषः, अत्र श्लोके
मुदा जगुस्तुष्टुवुर्ननृतुरित्युक्त्यानन्दोद्रेकादेव गानादिकं न तु हेतुज्ञानेनेति सूचितमित्याशयेनाज्ञात्वैवेत्युक्तम् ॥ ६ ॥ अग्रिमश्लोके
तु मुदान्विता इत्युक्तं न तु क्रियायां मुदः करणत्वमतो हेतुज्ञानं सूचितमित्याशयेनाहुर्देवा ज्ञात्वैवेति, गानादिकं रसोद्रेकात् स्वतोपि
जायते पुष्पवृष्टिस्तु हेतुज्ञानं विना न जायत इतिभावः, पुष्पवृष्टिमिति, वृष्टिर्धारा, पञ्चविंशेऽध्याये "तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणि
पार्थिवे" तिवाक्यात्, तथा च पुष्पधारा मुमुचुरित्यर्थः, देवानामूर्ध्वस्थितानां सुमनोविमोको वृष्टिप्रकारेणैव सम्भवतीत्यर्थापत्तिलभ्यं
वृष्टिरूपं प्रकारं बोधयितुमेवमुक्तं, शब्दबला इति, शब्देन बलं येषां, स्वाध्यायबला इत्यर्थः, अर्थबला इति, मन्त्रार्थरूपान् देवान्
ज्ञात्वा तैर्मन्त्रैर्हविर्दाने तादृशहविर्भोगेन देवाः पुष्टा भवन्तीत्यर्थेन प्रतिपाद्ययोगेन बलं येषां तादृशा इत्यर्थः, अत उभयेपि
प्रामाणिकाः, प्रमाणं वेदस्तत्सम्बन्धिनः, तदुपजीवका इत्यर्थः, तथा च पूर्वश्लोकेषु रूपलीलासम्बन्धिनां गुणा उक्ता अत्र नाम-
लीलासम्बन्धिनां गुणा उक्ता उत्तरार्धे दोषाभाव उक्त इति सप्तभिः श्लोकै रूपनामव्यवस्थोक्तेति सूचितं, स्वसेवामित्युभयमुभयो-
रन्वेति ॥ ७ ॥ तत्रत्यानामिति, भूतानां देवादीनां चेत्यर्थः, मन्दं मन्दमित्यर्धेनर्तोर्गुण उक्तः, राज्या इति, तादृङ्निशीथवत्त्वंराज्या
गुणः, गुणा उक्ता इति, जनार्दने जायमाने सति तमउद्भूते निशीथे सति देवक्यां विष्णुः प्रादुरासीदित्यन्वयः, तथा च सङ्कर्षण
प्राकट्यस्य तमोनिवृत्तौ हेतुत्वोक्त्या तत्प्राकट्ययोग्या गुणा निशीथ उक्ता इत्यर्थः, मूल इतेति, काले स्थितानां मूलभूतस्य भगवतो
गुणानामित्यर्थः, भौतिकानामिति, नद्यादिगुणानामित्यर्थः, कालनिमित्तत्वमिति, कालो निमित्तं यस्य तादृशत्वमित्यर्थः, 'जायमा-
नेजन' इत्यत्रानिरुद्धप्राकट्यं, तद् व्युत्पादयन्ति सर्वधर्मेति, 'अनुसागर'मित्यन्तैः सप्तभिः श्लोकैर्धर्मरक्षोक्तेति तन्मध्ये कथनमनिरुद्ध-
स्यैवोचितमितिभावः, जायमाने जनार्दन इत्यत्र सङ्कर्षण उक्तस्तद् व्युत्पादयन्ति सर्वमुक्तीति इदं वासुदेवकार्यमित्याशङ्क्याहुरज्ञानेति,
तस्य साक्षान्मोक्षदातृत्वमस्य परम्परयेतिविभेदः, तथा च जनार्दनपदादयं सङ्कर्षण इतिभावः, देवक्यामिति, देवक्यां विष्णुरूपिण्या-
मितिश्लोक इत्यर्थः, पुरुषोत्तमस्तूक्त एव, परं व्यूहत्रयमध्ये द्वयं पूर्वमुक्तं देवक्यामितिश्लोके तृतीयोप्युक्तो न तु वासुदेव एव, तदाभासे
तथा वक्ष्यमाणत्वात्, पुरुषोत्तमप्राकट्यमपि कारिकयोपसंहारे वदिष्यन्ति, तथा च व्यूहत्रयविशिष्टपुरुषोत्तमप्राकट्यं देवक्या-
मितिश्लोके निरूपितमित्यर्थः, सर्वरूपेणेति, चतुर्व्यूहरूपेण सह भगवान् पुरुषोत्तम आविर्भूतोत्रावतार इतिशेषः, न त्वधुनैव,
वासुदेवाविर्भावस्य नवम्यां निर्धारितत्वात्, अत एव "तमद्भुत" मित्यत्र "मधुसूदनो माधवश्च"तिकारिकाव्याख्याने 'सङ्कर्षणा-

निरुद्धप्रद्युम्नरूपताप्युक्ते'ति व्यूहत्रयमेव निरूपितं टिप्पण्यां 'चतुर्भुज'पदव्याख्याने कार्यचतुष्टयमुक्तं, कार्यं तु चतुर्णामपि मथुरायामेवादौ प्रकटमिति प्रागुक्तमेव, यद्यप्यत्रावतारे नारायणः कृष्णकेशश्चास्ति तथापि नारायणोनिरुद्धांशः कृष्णकेश सङ्कर्षणांश इति व्यूहनिरूपणेनैव तौ निरूपितौ जाताविति भावः, देवक्यामित्यस्याभासे सर्वांशो भगवानिति, सर्वे त्रयोपि व्यूहा अंशा यस्मिंस्तादृशो व्यूहत्रयविशिष्टो भगवान् पुरुषोत्तम इत्यर्थः, व्याख्याने देवानां समूह इति, 'देवकी सर्वदेवते'तिव्याख्यानात् सर्वदेवसान्निध्याद् देवसमूहरूपमेव सम्पन्नमित्यर्थः, न त्वयं विग्रहः, सत्वे भगवत्स्थितावंशावतारत्वं स्यादित्याशङ्क्याहुराधारत्वेनेति, अयं भावः, अंशावतारे विग्रहः सत्त्वं तत्र भगवदाविर्भावोऽयोगोलके वह्निरिवेति साधनाध्याये गुणोपसंहारचरणे निरूपितं अत्र तु प्राकट्यार्थमाधारत्वेन तदपेक्षा न तु प्राकट्यानन्तरमपि सत्त्वं व्यवधानेन स्थितिरिति, अत एवारणिदृष्टान्तमाहुर्यथेति, यथाग्निप्राकट्ये रणिर्निमित्तमाधारत्वेन तथेत्यर्थः, मथनस्थानीयमिति,व्यापारसम्पादकमथनदण्डस्थानीयमित्यर्थः, विष्णुरूपिण्यामित्यत्रोक्त रूपं विचारयन्तादमेवेति, प्रादुर्बुभूषु रूपमेव तदिति मुख्यः पक्षः, गौणं पक्षमाहुर्देवक्यामिति, अस्य गौणत्वे हेतुमाहुस्तदेति, आधिदैविकदेवक्यां सत्त्वरूपायां हि प्रादुर्भावः, तथा च देवक्याधिदैविकरूपस्य विष्णोस्तु सा स्वरूपभूतैव न त्वधिकरणमतो विष्णुरूपिण्यामित्यत्र मत्वर्थीयेनिप्रत्ययस्यार्थोसङ्गतो भवेदितिभावः, भाक्त इति भक्तिर्भागोंश इतियावत्, तथा चांशतः सिद्धो भवेदित्यर्थः, सर्वान्तर इति, 'अन्नमया'दीनां चतुर्णामन्तरस्तेषामन्तर्यामी च 'पुरुषविध'त्वसम्पादक 'आनन्दमय'इत्यर्थः, हृदयाकाशमिति, 'गुहायां परमे व्योमन्नि'त्यत्रोक्ता गुहेत्यर्थः, तत्र 'निहितो' व्यापिवैकुण्ठस्थित एव समागत इतिभावः, अनेनेति, सर्वेषां भजनसिद्ध्यर्थं स्वयं हृदि स्थित्वा तदाऽ वेदपराः कृतार्था भविष्यन्तीति ज्ञापयितुं वेदांश्चकार, इयं सर्वदा व्यवस्थितिः, इदानीं सोत्रैव प्रकट इति हेतोः पूर्वं क्रिया नोपयुज्यते किन्त्वयमेव बहिः सेव्य इत्यनेन गुहाशयस्य प्राकट्यकथनेन निरूपितमित्यन्वयः, अन्तरनुभूयमान इति भजनार्थं स्वयं हृदि स्थित्वेत्यनेन भक्तहृदयस्थितेरुक्तत्वाद् भक्तया देवक्या अन्तरनुभूयमान इत्यर्थः, न त्विति, जननिमित्तभूतस्तु जननाभावादेव न जातः, अनिमित्तभूतोपि ज्ञानरूपो व्यापारोवधारणार्थं मनसस्तदेकपरता सावधानता विनयेन स्थितिस्तादृशोपि व्यापारो न जात इत्यर्थः, सम्पूर्ण एवेति प्रियमोदप्रमोदानन्दयुक्तो न तु कञ्चिदप्यंशं विहायानन्दमयः प्रकट इतिशेषः, यथा प्राच्यां दिशीत्येतावत्प्रतीकेनाधारदृष्टान्तः, इन्दुरिवेतिप्रतीकेन प्रकटीभूतदृष्टान्तः, प्रथम दृश्यत इति, प्राच्या दिशः प्रथमभाग इत्यर्थः, प्रान्त इति, पश्चिमदिशीत्यर्थः, उच्चैश्चेति, कृष्णपक्षद्वितीयादिष्वपि प्राच्यां दिशि दृश्यते परन्तु तस्योच्चैः खण्डोपि दृश्यतेतः प्राच्यां दिशि दर्शनमात्रेण पूर्णत्वं नायातीतिभावः, प्राच्यादिपदानामिति, यथेवेतिपदद्वयस्य विद्यमानत्वादेवं व्याख्यायते, प्राच्यां दिशि पुष्कल इन्दुरितिचतुर्णां पदानामावृत्तिः, यथा प्राच्यां दिशि पुष्कल इन्दुस्तथा देवक्यामित्याधारे दृष्टान्तः, प्राच्यां दिशि पुष्कल इन्दुरिव विष्णुः प्रादुरासीदिति प्रकटीभूते दृष्टान्तः, अत इति, पुष्कलेन्दुदृष्टान्तकथनादित्यर्थः, श्लोकार्थं कारिकायां विशदयन्ति दासीनामिति भक्तानां, सर्वस्य सङ्घातस्य रक्षणार्थं, तादृशं देवकीनिष्ठं सत्त्वं, निमित्तीकृत्य स्वरूपतोनिमित्तमपि मथनस्थानीयेन रूपेण व्यापाराविष्टत्वसम्पादनादाधारत्वेन निमित्तं कृत्वा, मम स्वामी पुरुषोत्तमः प्रादुर्भूतः, पूर्वं व्यूहत्रयप्राकट्यं देवक्यां विवृतमिति तावदेव भविष्यतीतिशङ्का स्यादत उपसंहारे पुरुषोत्तमप्राकट्यमुक्तमिति ज्ञेयं, गुहाशयपदस्य तात्पर्यमाद्यचरणेनोक्तं, पूर्वं भक्तानां देहेन्द्रियादिरक्षामन्नमयादिरूपैरकरोत्, तद् विवृतमानन्दमयाधिकरणे, अधुना तु स्वयमानन्दमयरूपेणैव तथा रक्षां कर्तुमित्यर्थः ॥ ८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एवं सन्दर्भ इति, मूले 'जायमाने जने तस्मि'न्नित्यनेनानिरुद्ध उक्तः, "मनांस्यासन् प्रसन्नानि साधूनामसुरद्रुहा"मित्यनेन रक्षाकार्यस्योक्तत्वात्, जायमाने जनार्दन इत्यनेन जनामविद्यामर्दयतीतिव्युत्पत्त्याज्ञानप्रलयकर्ता सङ्कर्षणो निरूपितः, प्रलयस्य सङ्कर्षणकार्यत्वात्, तत इहाविद्याकार्यरूपाज्ञानप्रलयः सङ्कर्षणकार्यम्, 'य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रन्थि सत्त्वरजस्तमोमयमन्तर्हृदयं गत आशु निर्भिनत्ती'तिपञ्चमस्कन्धवाक्यात्, देवक्यां विष्णुरूपिण्यामित्यनेन विष्णो रूपं विद्यते यस्यामितिव्युत्पत्त्या प्रद्युम्न उक्तः, प्रद्युम्नस्य वसुदेवमनस्याविष्टस्य पूर्वोक्तेनालौकिकप्रकारेण देवक्यां समागमनात्, "दधार सर्वात्मकमात्मभूतं काष्ठा यथानन्दकरं मनस्त" इति वाक्यात्, विष्णुः सर्वगुहाशय आविरासीदित्यनेन साक्षाद् भगवान् पुरुषोत्तम उक्तः, एवं व्यूहसहितपुरुषोत्तमाविर्भावो मथुरायां बोध्यः, अत एव दिशीन्दुरिव पुष्कल इति पूर्णचन्द्रो दृष्टान्तीकृतः, न "न्वथ सर्वगुणोपेतः काल" इत्युपक्रम्य "निशीथे तमउद्भूते जायमान" इत्युक्त्वा "विरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कल" इत्यनेन निशीथकालाधिकरणकं भगवज्जन्मेति शुकेनोक्तं, एवं सति कालाधीनत्वप्रतीतेर्भगवति कथं तदतीतत्वं ? किञ्च "मनांस्यासन् प्रसन्नानि साधूना" मित्यनेनासुरद्विण्मनःप्रसाद उक्तस्तस्य चासुरनाशजन्यत्वात् तदर्थं कृष्णाविर्भाव इति प्रतीयते, तच्च विरुद्धं, भूभारनाशस्य व्यूहकार्यत्वेन मूलरूपाविर्भावे प्रयोजनान्तरस्यैव वक्तुमुचितत्वाज् जन्मप्रकरणारम्भे तथाव्यवस्थापनाच्च, अन्यच्च "विरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कल" इत्यत्र पुष्कलपदेन पूर्णत्वोक्त्या पूर्णस्य परब्रह्मणः सर्वव्यवहारविषयत्वरूपः प्रादुर्भावो दुरुपपादः, "अदृश्यमग्राह्य" "न चक्षुषा गृह्यते", "पराञ्चि खानी"त्यादिश्रुतिव्याकोपात्, एवमाशङ्कात्रयं परिहर्तुं श्रीमदाचार्यवर्याः कारिकां पठन्ति दासीनां सर्वरक्षार्थमित्यादिना, अयमर्थः, मथुरायां

व्यूहसाहित्येन पुरुषोत्तममाविर्भावादसुरद्विष्मनःप्रसादो व्यूहाविर्भावनिबन्धनः, अत एव श्रीमदाचार्यैरुक्तमस्मिन् सन्दर्भे भगवतोऽवतारत्रयमप्युक्तमिति, न ह्येतावता पुरुषोत्तमो भूभारहरणायावततारेति वक्तुं शक्यं, "तथा परमहंसानां मुनीनाममलात्मनां भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः" "यद्यद् धिया त उरुगाय विभावयन्ति तत्तद् वपुः प्रणयसे सदनुग्रहाये"ति वाक्यात्, किन्तु दासीनामग्निकुमारश्रुतिगोपिकादीनां सर्वस्माद् भगवद्भिन्नाद् या रक्षान्यविनियोगराहित्यसम्पादको निरोधस्तदर्थं कृष्णावतार इत्यर्थः, भगवान् विविधलीलाभिः प्रापञ्चिकविलक्षणं नित्यं निरवधिकं परमानन्दं प्रयच्छन् भक्तान् विस्मृतप्रपञ्चान् करोति, युक्तं चैतत्, परमानन्दप्राप्तौ प्रापञ्चिकतुच्छसुखहेतुभ्यो विषयेभ्यो विरागः, इदमेव हि प्रभुकर्तृकं सर्वतो रक्षणं नाम, तदर्थमेव मूलरूपप्राकट्यं, "कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ पृथिव्यां भारते क्षेत्रे माथुरे मम मण्डले वृन्दावने भविष्यामि प्रेयान् वो रासमण्डल" इति बृहद्वामनीभगवद्दत्तवरवाक्यात्, एवं सति भगवज्जन्मनो दशमस्कन्धार्थप्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपनिरोधाङ्गभूतत्वाज् जन्मप्रकरणस्य स्कन्धार्थसङ्गतिर्निष्प्रत्यूहेति ध्येयं, एवं प्राकट्यस्य प्रयोजनं निश्चित्य कालातीतत्वं साधयितुं भगवज्जन्मनः कालाधिकरणत्वं न कालकृतं किन्तु भगवत्कृतमित्याहुर्निमित्तीकृत्येत्यादिना, तादृश "सर्वगुणोपेत"माधिदैविकं कालं निमित्तीकृत्येत्यर्थः, तादृशमितिपदे "नाथ सर्वगुणोपेत" इत्यत्रोक्त आधिदैविकः काल उच्यते, तच्छब्दस्य पूर्वपरामर्शित्वात्, यद्यपि भगवज्जन्मनि तादृशकालो न निमित्तं स्वेच्छयैवाविर्भावात्, "नैवेशितुं प्रभुर्भूम्न ईश्वरो धाम मानिना"मिति कालस्वरूपनिरूपकतृतीयस्कन्धवाक्यात्, अक्षरस्य कालनियम्यत्वाभावादक्षरातीते श्रीकृष्णे कालाधीनत्वसम्भावनस्यापि वक्तुमशक्यत्वात्, तथापि तस्य लीलया निमित्तीकरणं ज्ञेयं, अयमर्थश्च्विप्रत्ययेन बोधितः तादृशेऽर्थे तस्य स्मरणात्, अतः परदृश्यत्वादिनिरूपकश्रुतिविरोधं परिहरन्ति नैश्चिन्त्यं वाचीत्यादिना, वाच्युपनिषद्रूपायां, नैश्चिन्त्यं समाधानं, पूर्ववदनवतारदशावत्, अयमाशयः, वैकुण्ठादौ यथा भगवत्कृपया दर्शनं तथेहापि चक्षुर्न स्वसामर्थ्येन भगवन्तं विषयीकरोति किन्तु भगवदिच्छाविशेषेण, तथा चादृश्यत्वादिश्रुतिस्तादृगिच्छाविषयभिन्नचक्षुरदृश्यत्वपरेतिव्यवस्थायां न कोपि दोषः, एवं सति "ततस्तु तं पश्यते निष्कलं ध्यायमान" इत्यादिश्रुतयोपि सविषया भवन्ति, विस्तरस्तु भाष्यविद्वन्मण्डनादौ द्रष्टव्यः, तथा सति प्रादुर्भूतः सर्वव्यवहारयोग्योपि कृष्णः परं ब्रह्मवेति ज्ञेयं, अत एव "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकस्तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत" इति श्रुत्युक्तं, अतो नात्र भगवज्जन्म किन्तु स्वेच्छया देवक्यामभिव्यक्तिमात्रं वक्तुं "प्राच्यां दिशीन्दु"वेतिदृष्टान्तो मूले पठितः, परमकाष्ठापन्नत्वेनास्मिन्नेव श्रीकृष्णे भजनीयत्वपर्यवसानमिति बोधयितुं मम स्वामीत्यनेन स्वस्वामित्वाभिमानः श्रीमदाचार्यैरुक्त इति दिक् ॥ ८ ॥

(५) भगवदीयनिर्भयरामभट्टनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

देवक्यामित्यत्र दासीनामिति, भक्तानां सर्वरक्षार्थं तादृशं देवकीनिष्ठं निमित्तीकृत्य मम स्वामी पुरुषोत्तमः प्रादुर्भूतः, नैश्चिन्त्य वाचि पूर्ववदिति, वाच्युपनिषद्रूपायामित्यर्थः, 'अदृश्यमग्राह्य'मित्यादिश्रुतिविरोधः प्राकट्यकथन आपतति स च विरोधः 'कश्चिद् धीरः प्रत्यगात्मानमैक्षत'इत्यादिश्रुतिभिर्भगवदिच्छया भगवान् दृश्य इन्द्रियसामर्थ्येनादृश्य इति द्विविधश्रुतितात्पर्यनिरूपणेन निरस्यत इति प्राकट्यात् पूर्वमविरोधो यथा तथा प्राकट्यानन्तरमपीति न काचिच्चिन्तेत्यर्थ इति व्याख्यातं जनकापरमूर्तिभिः श्रीमत्प्रभुभिष्टिप्पण्याम् ॥ ८ ॥

बुभुत्सुबोधिका

मनांसीत्यत्र भौतिकगुणसमय इति तामसाहङ्कारकार्याणि भूतानि निरूपितानि । स्मरणात् सात्त्विकाहङ्कारकार्यं मन इति तद्गुणा उच्यन्ते । राजसाहङ्कारकार्याणीन्द्रियाणि मनोनिरूपणेन निरूपितानि । स्वस्वगुणप्रकटकानि । तद्देवतास्तु 'दिशः प्रसेदु'-रित्यत्रोपलक्षणविधया निरूपिताः । तथा चाहङ्कारत्रयकार्यमपि निरूपितं जातमित्यर्थः । सत्त्वमारूढमिति । भगवदिच्छया स्वकार्ये मनसि आरूढं जातं प्रतीतिविषयं भवतीत्यर्थः । 'माया मनः सृजतो'ति चतुर्थस्कन्धात् । श्रीवल्लभानां लेखे तु भगवतेति शेषः । 'देवक्यां देवरूपिण्या'मित्यत्र देवक्याः सत्त्वरूपत्वं व्याख्यास्यते । तथा च सत्त्वं यदारूढं भवति तदा स्वकारणे भगवदारोहात् मनसां प्रसादो भवत्येवेत्यर्थ उक्तः । प्रसन्नानीति 'सत्त्वात् सञ्जायते ज्ञान'मिति वाक्यात् । स्थूलेति भौतिककाले । निकटेति भगवद्रूपे रोहिणीरूपे जायमान इति जायमानेऽजने प्रद्युम्ने । 'निशीथ' इतिश्लोकसुबोधिन्यां 'देवक्यां प्रद्युम्न' इत्युक्तेः । 'अजन' इति मूले पदच्छेदः । 'दिवि दुन्दुभय' इति पदसमभिव्याहारात् । तस्मिन्निति सामीप्ये सप्तमीं व्याकुर्वन्ति स्म तन्निकट इति । वटे गावः सुशेरत इत्यत्र वटनिकटे गावः सुशेरत इत्यर्थात् । नित्यवादित्राणीति नित्यशब्दा आकाशगुणाः वादित्ररूपाः । दुन्दुभिरिति तेषु दुन्दुभिरित्यर्थः । कैश्चिदिति मयापि (गोपेश्वरेण) दुन्दुभिरेतादृशी श्रुता आकृतिस्त्वाकाशत्वात् । 'आकाशो ह वै नामरूपयोर्निर्वहिते'ति छान्दोग्यात् । विरुद्धधर्माश्रयत्वं सर्वत्र । तेन कदाचित् कैश्चिद् वादिता अपि ॥ ५ ॥

जगुरित्यत्र स्वत इति आनन्दस्य व्यापकत्वात्, मायाज्ञापनाच्च, 'मुदे'ति श्लोके पदात् । अज्ञात्वेवेति व्यापकानन्दज्ञानं न जातम् । मायाज्ञापनात् तत्कार्यमुल्लसितहृदयत्वम् । अन्यथेति स्वत एवोल्लसितहृदया इति, आर्थिकोर्थोत्र न प्राप्नोतीति

न्यूनपूरणं कृत्वा। किन्नरगन्धर्वविशेषणाभावे। लेखे तु मुदेति दूरान्वयं कृत्वा मुदेत्यस्यार्थमाहुः। तदान्यथेत्यस्य मुदेत्यस्यात्रान्वयाभाव इत्यर्थः। माहात्म्येति देवत्वस्य प्रतिपादकं 'जगुः किन्नरगन्धर्वा' इति वाक्यं न स्यात्। अकस्मादित्यव्ययम्। कारणशून्ये। कृतवन्त इति ननु रोहिण्या अपि कारणत्वं भज्येतेति चेन्न। वाचनिकत्वात्। वैतालिकेति वैताला वंशशंसकाः। विद्याधर्य इति तेन वाचकं विना विद्याधरा इत्यत्र नैकशेषः कर्तव्यः। पाठभेदेनोभयप्राप्तेः। विद्याधरा इति पाठे एकशेषे कृते तु चकारस्तात्पर्यग्राहक इति भावः। आनन्दावेशेनेति अद्यापि जन्माष्टम्यादौ विवशदशायामेवं नृत्यं कुर्वन्ति। शास्त्रीयं संगीतं नृत्यम्। केनचिदिति मुदा तु स्वकीयानन्दरूपेति न कारणत्वसमर्पिका। 'आपं चैव हलन्तानां यथा वाचा निशा दिशे'ति भागुरिर्वष्टि। मुदारूपा इत्यर्थः। मुदेति करणत्वपक्षमग्रे वक्ष्यन्ति। अत्र पक्षे मुदा आनन्दरूपाः। मुदा इत्यत्र विसर्गलोपश्छान्दसो वा। स्वत इति आनन्द आविर्भूतो येषु। कपो वैकल्पिकत्वम्। अस्मिन् पक्षे मुदा आनन्दे केनचित् प्रेरिता इति पाठः। मुदा आनन्देन न केनचित् प्रेरिता इति पाठान्तरम्। अकस्मात् इत्यस्य कारणशून्ये। तस्मिन् समये कार्ये। मुदेति टाबन्तं पदं लुप्तविसर्गकं पदं तृतीयान्तं च पदम् ॥ ६ ॥

मुमुचुरित्यत्र देवा ज्ञात्वैवेत्यारभ्य पुस्तकेषु ग्रन्थः। कस्मिंश्चित् पुस्तके तु विविधभावार्थं अथवेत्यारभ्येत्युक्तमित्यन्तो ग्रन्थोधिकः। सोप्याख्यायते। अथवेति तेनाथवेत्यस्य पूर्वं स्पष्टमिति ग्रन्थोऽसूचि। श्लोकव्याख्यानं स्पष्टमित्यर्थः। तथापि भावविवशा आहुः अथवेति। स्पष्टव्याख्यानापेक्षया विविधभावव्याख्यानं श्रेष्ठमिति। 'भक्त्या भागवतं शास्त्रं न बुद्ध्या न च टीकये'ति श्रीव्यासं प्रति नारदवाक्यम्। 'न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्। तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युसिक्क्षया' इति वाक्याच्च। मानसाः सत्त्वप्रधाने मनसि वर्तमानाः। मनस इमे मानसाः। चातुरर्थिकः प्रत्ययः। 'उसिक्' कमनीयं ब्रह्म, 'क्षयो' निवासो येषां ते उसिक्क्षयाः। सुमनांसि यद्यपि पुष्पाणि तथा चित्रपदत्वाच्छोभनानि मनांस्यप्यर्थः। यथा गतश्लोके मुदाशब्दः। अत आहु; सुष्ठु निर्दुष्टानि मनांसीति। 'सुमनः' पदमहिम्नाहुः ववृषुरिति। सुमनोभिरिव पूजायै ववृषुरित्यर्थः। गर्भे ऐक्यस्यायुक्तत्वात्। देवक्यां ववृषुः। 'तस्यारविन्दनयनस्य पदारविन्दकिञ्जल्के'ति-श्लोकोनुसन्धेयः। उभयेति कर्तृसम्बन्धात् तथा। उपपद्यत इति मुख्यमुपपद्यते कादाचित्कत्वात्। आनन्दावेशेति शब्दबलत्वेन शब्दार्थानन्देन व्याप्ताः, भगवत्प्राकट्यानुभावात्। 'मन आनन्द'मिति श्रुतेः। तच्च गर्जितमिति तत् प्रसिद्धम्। बृहदारण्यके। भाण्रूपं वेदारण्यके। विद्युद्ब्रह्म वाल्पशब्दरूपं गर्जितं गगने नास्तीत्यर्थः। प्रतिबन्धकतामिति प्रतिबन्धकता अम् इति छेदः। अत्रायमाशय इति अत्र जलधरपदे। तादृशत्वेनेति नीलत्वेन। कवय इति 'तदेव ब्रह्म परमं कवीना'मिति महानारायणात् कवीनामधिकारः। जलधरा इति जलस्य धरा इति पुण्यगन्धवह इतिवत्। जाता इति रोहिण्याः। स्वस्य विद्यदिति स्वस्य जलधरस्य विद्युत्सहभावोन्यकालेपि दृष्ट इति तस्मात्। गर्जतीति जलधराशयः। धर्मापेक्षयेति गर्जितशब्दापेक्षया। स्वस्येति समुद्रापेक्षया जलधरस्याधिकम्। अनुसागरमिति सागरं लक्षीकृत्य। लक्षणेत्थम्भूताख्यानेति कर्मप्रवचनीयसंज्ञायां द्वितीया। इति 'अथवे'-त्यारभ्य 'इत्युक्त'मित्यन्तग्रन्थाख्यानम्। सङ्क्षेपेण सम्बन्धमाहुः देवा ज्ञात्वैवेति। अत्र मुदान्विता इत्युक्तम्, न तु मोचनक्रियायां मुदः करणत्वमतो भगवज्जन्मरूपहेतुज्ञानं सूचितमित्याशयेनाहुः देवा ज्ञात्वैवेति। गानादिकं रसोद्रेकात् स्वतोपि भवति। पुष्पवृष्टिस्तु हेतुज्ञानं विना न जायत इति भावः। हेतुज्ञानं योगजप्रत्यासत्त्येत्याहुः शब्दबला इत्यादि। मुनीनां व्यासमुख्यानां व्यासस्य शब्दबलं भाष्ये उक्तमित्यन्येषामपि मुनीनाम्। अतो योगजधर्मेण भगवदनुभावरूपमानन्दं कृष्णजन्मीनं ज्ञात्वेत्यर्थः। अर्थबला इति बादरिरर्थबलविचारक इत्येवं भाष्ये उक्तस्तदनुसारिदेवाः अर्थेनानुभावसहितेन विचारविषयेणाज्ञप्रयोगमायाकार्येण तद्विषयज्ञापनेन कृष्णजन्म ज्ञात्वेत्यर्थः। प्रामाणिका इति दैवी सम्पत् तेषु वर्तत इति। स्वसेवां सुमनोवृष्टिरूपाम्। अभिज्ञताम् कृष्णविषयिणीम्। शुभेति सर्वोत्कृष्टस्वरूपशुभसूचनार्थम्। संहितायां पुष्पाणि ऊर्ध्वमेव गृह्णन्तीति। हर्षेणेति 'मुदे'ति तृतीयान्तम्, न टाबन्तम्, नापि लुप्तविभक्तिकं मुद्पदम्। विपरीतः कालधर्म इति वर्षायां सर्वथा मेघानामभावः, शरदि सर्वथा मेघाः, इति विपरीतः कालस्य शरदो धर्म इत्यर्थः। अशुभेति उत्पातेन्तर्भावात्। कार्यमिति अविपरीतं कालधर्मं जलधरगर्जनमाहेत्यर्थः। सागरनिकट इति 'अनुसागर' मित्यत्र सागरं लक्षीकृत्येत्यर्थात् तथा ॥ ७ ॥

निशीथ इत्यत्र भगवत्प्राकट्ये पूर्वश्लोकैः सह सप्तार्थी वक्तुमाहुः एवं देशकालयोरित्यादि। देशकालौ प्रकरणमिति निबन्धात् चतुर्व्यूहसमुदायो जन्म तस्य देशकालाविति। यद्यप्यनिरुद्धजन्म चतुर्थाध्याये तथापि शुकहृदयेस्त्येवेत्यदोषः। तत्रत्यानामिति भूतानां देवादीनां च। अनेन आनन्दत्वेन लीला शास्त्रार्थ उक्तः। 'जगुः किन्नरगन्धर्वा' इत्यत्र स्वत एवोल्लसितहृदया इति न्यूनपूरणाय तस्य विशेषणमुक्तम्। सा लीलानन्दत्वेनात्र। ऋतोश्चेति 'मन्दं मन्दं जलधरा' इत्यनेन वर्षर्तोर्गुण उक्तः। तेनोत्सवाविष्टचित्तानां निरोधात् स्कन्धार्थ उक्तः। रात्र्या इति 'निशीथ' शब्दस्यार्धरात्रवाचकत्वात् तेनैवार्थबलात् रात्रेरपि प्राप्तेस्तथेत्यर्थः। एतादृशनिशीथवत्त्वं रात्र्या गुणः। मुहूर्तस्य घटिकाद्वयात्मकस्य। निशीथस्य गुणस्तमउद्भूतत्वादिः। अध्या ार्थः—रूपान्तरस्वीकरणम्। 'विष्णुराविरासी'दिति रूपं रूपान्तरप्रयोजकम्। अथ वाक्ये सप्तार्थाव्याप्तिपरिहारोपि व्याख्यास्यते। सिंहार्के निशीथविचारस्तु श्रीपुरुषोत्तमानां लेखेस्ति। तथाहि। सिंहार्के निशीथे इदानीं षट्चत्वारिंशत्सप्तचत्वारिंशद्घटिकाद्वयात्मको भवति तद्व्यावृत्त्यर्थं सौरमानब्राह्ममानाभ्यां घटीद्वयविषमभावात् विवक्षितं प्रादुर्भावसमयं निश्चेतुमाहुः पञ्चचत्वारिंशदिति। तत्रायमर्थः। द्वापरस्य पञ्चविंशाधिकशरच्छतावशेषे भगवः (भगवतः ?)। 'शरच्छतं व्यतीयाय पञ्चविंशाधिकं विभो' इति ब्रह्मवाक्यान् निश्चीयते।

तत्र गणितविचारे स्फुटोर्कः ४-१९-०-१ चतुरङ्केन गतकर्कराशिः। सिंहेर्क इत्युच्यते। एकोनविंशाङ्केन सिंहराश्येकोनविंशांशाः अंशादिना विकलाः पूर्णाः। एकाङ्केन विकला एका। गतिः ५९ ९ सूर्यगतिः एकोनषष्टिः कलाः, नव विकलाः। अयनांशाः २४-३२-२०। मथुरायां पलप्रभा ६-५। चरखण्डानि ६०-४८-२०। चरपलानि ३२। दिनमानं ३१-४। रात्रिमानं २९-५६। रात्र्यर्धम् १४-२८। निषीथः ४५-३२। एवं सति तत्राषाढोधिकोभ्युपेयः। उक्तरीत्या स्पष्टेर्के सति ४-१९ ० १। पूर्ववत् राश्यंशकलाविकलाश्चतस्रः। एतादृशस्य सूर्यस्य तदैव सिद्धेः। षट्चत्वारिंशद् घटिका द्वात्रिंशत्पलात्मिका भवति। इति षट्चत्वारिंशद्घटिकाद्वयमिति। ईदृशस्तु निशीथो विषुवदिने एकस्मिन् भवति। पञ्चमस्कन्धीयात्। 'यदा मेषतुलयोर्वर्तते तदाऽहोरात्राणि समानि भवन्ती'ति वाक्यात्। ज्योतिःशास्त्राच्च निश्चीयते दिनमानं ३०-०। रात्रिमानं ३०-०। रात्र्यर्ध १५ ०। निषीथः ४५-४६-०। तदग्रे तु पलद्वयं प्रत्यहं रात्रेर्दिनस्य च वृद्धिह्रासौ। एवं सति यदत्राष्टम्याः प्रान्तभाग इति। तत्र चन्द्रप्रकाशस्तेभ्यो द्वात्रिंशत्पलेभ्यः पूर्वं भवति। चन्द्रप्रकाशक्षितिज (पृथ्वीछाया) संयोगे तमसो निवृत्तः। तदेवाभिप्रेत्य मूले 'तम उद्भूत' इत्युक्तम्। भगवत्प्राकट्यं तु द्वात्रिंशत्पलोत्तरं निशीथारम्भसमये चन्द्रोदयसमकाले। एतदेवाग्रिमश्लोके 'प्राच्यां दिशीन्दुरिवे'ति दृष्टान्तेन सूचयिष्यते। अतो द्वात्रिंशत्पलान्यनादृत्य यत् पञ्चचत्वारिंशत् षट्चत्वारिंशद्घटिकाद्वयमितिकथनं तत् प्रकाशन्यायेन लक्षणादोषनिवृत्त्यर्थं भगवत्प्रभावादिति न कोपि विरोधः। ऊर्ध्वो भवतीति उत्क्षेपणकर्मोक्तं तमसः। गुणा उक्ताः। नन्वनन्तस्य कालात्मनोनन्तमाहात्म्ये कृष्णलोकेजनार्दनाविर्भावे निशीथे गुणाः क इत्याकाङ्क्षायां गुणा उक्ताः। निशीथे तमउद्भूते सत्युत्क्षेपणकर्मणा रोहिण्या च जनार्दने सङ्कर्षणे सितकेशे जायमाने। इत्यन्वयोत्र। सर्वाविद्येति सर्वेषां निरोधाधिकारिणां पूतनाचैद्यप्रलम्बादिरूपाविद्यानाशकः। तादृशगुणवानिति तमउद्भूतत्वगुणवान्। तमोऽविद्या विद्यया नश्यतीति वेदविद्यारूपः सङ्कर्षण उक्तः। ननु 'जायमानेऽजने' इत्यनेनैव चारितार्थ्यं, विद्यागुणनिरूपणसिद्धेः, अतो जायमाने जनार्दन इत्यस्य किं प्रयोजनमित्याकाङ्क्षामाहुः भगवज्जननस्येत्यारभ्य हेतुरुक्त इत्यन्तम्। भगवज्जननस्येत्यस्य निमित्तत्वमित्यनेनान्वयः। मूलभूतेत्यादि काले स्थिताना'मथ सर्वगुणोपेतः काल' इत्यारम्भश्लोकोक्तानां मूलभूतस्य भगवतो गुणानाम्। भौतिकानां नद्यादिगुणानाम्। 'दिशः प्रसेदु'रित्यादिभिः पञ्चमहाभूतानां दिश आकाशेन्तर्भाव्य प्राकट्ये इत्यर्थः। मध्य इति कालगुणभौतिकगुण 'नेदुर्दुन्दुभयो दिवी'त्याद्युक्तदेवगुणास्तेषां मध्ये। देहलीप्रदीपन्यायेन निमित्तत्वं वक्तुम्। कालनिमित्तत्वमिति कालो निमित्तं यस्य तादृशत्वमित्यर्थः। अन्ते चेति अष्टधार्धमात्रानिरूपणान्ते च। प्रकटीति अविद्यानाशादिति भावः। ननु नेदं युक्तम्, देवक्यामितिपद्येन 'देवकी सर्वदेवते'ति सर्वदेवतावाचकपदघटितेनैव चारितार्थ्यादित्याशङ्कायामस्याप्याशयं सूक्ष्मेक्षिकयाहुः एवं सन्दर्भ इत्यादि। त्रयमपीत्यपिशब्दः प्रासङ्गिकत्वं सूचयति स्म। पुरुषोत्तमस्यैव प्रकरणित्वात्। सर्वधर्मेति 'अनुसागर'मित्यन्तैः सप्तभिः श्लोकैर्धर्मरक्षोक्तेरैश्वर्योधर्ममात्रामध्ये कथनमनिरुद्धस्येवोचितमिति भावः। सर्वमुक्तीति सर्वेषां चैद्यप्रलम्बादीनामासुरसम्पत्तियुक्तानां मुक्तिदाता तथेत्यर्थः। अज्ञाननिवृत्तिरज्ञानसंहारः। विद्ययाऽज्ञाननाशे मोक्षो वासुदेवकार्यमिति विवेकः। तथा च जनार्दनपदादयं सङ्कर्षण इति भावः। तथा चार्द हिंसायां चु० आत्म० से० तस्य रूपं न तु अर्द गतियाचनयोरित्यस्य भ्वादेः परस्मैपदिनः सेटः। देवक्यामिति 'देवक्यां देवरूपिण्या'मिति श्लोके देवरूपाधिकरणत्वकथनात्। वासुदेव इति 'प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज' इतिवाक्याद् वसुदेवगृहेपि व्यूहचतुष्टयप्राकट्यम्। पुरुषोत्तमो नन्दगृहे पूर्वमुक्तो वासुदेवोत्रोक्तो वेदसारः तेन वेदवेदान्तसारत्वात् पदभेदः। सर्वरूपेणापीति विश्वप्रदर्शनं मुखे करिष्यमाणमिति सर्वरूपेणेत्यस्य नार्थः, किन्तु चतुर्व्यूहरूपेण सह भगवान् पुरुषोत्तम आविर्भूत इत्यर्थः। पूर्वपक्षस्या'थोष्ण्येव समार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग' इतिवाक्योक्तौत्पत्तिकात्मयोगत्वात्। द्वितीयाध्याये 'कालात्मा भगवान् जात' इति काल देहात्मा भगवानुक्तः, तत्रापि न कालस्य निमित्तत्वं किन्तु देहिनो भगवत एव। न तु देहस्य कालस्य तमोरूपदोषाभावे 'सर्वगुणोपेत' इतिपदोक्ते गुणप्राकट्ये चेत्यर्थः। तादृश इति देहरूपः। सहज इति बलभद्रे तु सहजः, अत्र तु चतुर्व्यूहरूपेण सह पुरुषोत्तमो जात इति सङ्कर्षणाप्राधान्यात् न सहज इत्यर्थः। कश्चिदिति द्वितीयस्कन्धनवमाध्यायेपि विशुद्धसत्त्वस्य तत्रोक्तेः तस्यैव देहत्वं, न तु कालस्येति भावः। एकमिति कालरूपम्। 'निर्दोष एव रमत' इतिवाक्यादाहुः भगवत्प्रादुरिति। गुणप्राकट्यमिति पूर्वोक्ताज्ञाननिवृत्तिद्वारा। तेन नान्योन्याश्रयः। निरूपितमिति वारद्वयं 'जायमाने' इत्यादि कथनान्निरूपितम्। सर्वांश इति कृष्णकेशनारायणांशावपि। तत्र कृष्णकेशः सङ्कर्षणो शब्दे कृष्णशब्दात्मके नारायणांशोनिरुद्ध इति विवेकः। तेन सर्वशब्देनेन्द्रियदेवता अपि। देवक्यां विष्णुरिति प्रद्युम्नः। विष्णुपदप्रयोगतात्पर्यमग्रे स्वयमेव वाच्यम्। देवानां समूह इति "गोत्रोक्षोष्ट्रोरभ्रराजन्यराजपुत्रवत् समनुष्याद्वुञ्" इति सूत्रेण समूहार्थकप्रत्यये विष्ण्वाविर्भावः कारणम्। अन्यथाविर्भावो न स्यादधिष्ठानान्तरे। वृद्ध्यभावश्छान्दसः। तदुपपादयन्ति स्म सम्पूर्ण इत्यादि। तथा च 'देवक्यां देवरूपिण्या'मिति पाठान्तरम्। पूर्णमिति भगवता पूर्णम्। मूषानिषिक्तन्यायेन। देवकी ब्रह्मविद्या, भगवानपि सत्यज्ञानानन्तानन्दरूपविद्यारूपोसङ्गत्वात्। आधारत्वेनेति अवतारे आधारनिमित्तं न दोषाय। भक्त्यन्तःपातित्वाद्वा। सत्त्वं ज्ञानं वा। तेन स्वाश्रयः। अनवतारदशायां त्वक्षरात्मकत्वे हृदयस्य जाते तत्राविर्भूत 'परमं व्योमे'त्याद्युक्तमेवाधारत्वेन निमित्तम्। 'ब्रह्म तर्हि अग्नि'रित्युत्तरार्धे वक्ष्यमाणत्वादाधानोक्तः साधिष्ठानोग्निर्दृष्टान्तीक्रियते यथेति। भवतीति इतिशब्द उत्तरत्र हेतुवाची। मथनेति मथनदण्डस्थानीयम्। ज्ञानस्य प्रयत्नासाध्यत्वादाहुः भगवद्रूपमिति। देवकीस्वरूपम्। तत्रेति देवक्याम्। इदमेवेति सर्वभूतस्थं जातिरूपं प्रादुर्बुभूषुरूपमेव वा। आधिदैविक

इति ब्रह्मविद्यारूपः। यद्वा देवक्यां विद्यमानः सर्वव्यापकत्वेन यः स विष्णुपदेनोच्यते। पाठान्तरे। गुहा हृदय आकाशमिति हृदयाकाशमिति समस्तोपि पाठः। तस्मिन्निति 'गुहायां परमे व्योम'न्नित्यत्रोक्तायामित्यर्थः। पाठान्तर इति देवक्यां 'देवरूपिण्या'मिति व्योमन्नित्यत्र ङलुक्। आ समन्तादिति अन्तर्याम्यपि स्वांशजीवरूपेणापीत्यर्थः। इत्यादि। पुरुषोत्तम इति विष्णुसमानयोगक्षेमत्वेनाकारकत्वेन च पुरुषोत्तमे विष्णुपदमुक्तमिति भावः। सत्त्वगुणाभिमानित्वव्यावृत्त्यर्थमाहुः विष्णुर्व्यापक ब्रह्मत्वेन। अत्र चत्वारः पादाः व्यूहाः तात्पर्यवृत्त्या। सर्वान्तर इति सर्वेषामन्नमयादीनामन्तर आनन्दमय इत्यर्थः। ब्रह्मशब्देनेति चतुष्पाद्-अन्तर्यामिसमष्टिः, अन्तर्यामिब्राह्मणोक्तानां सर्वेषां पृथ्व्यादीनामन्तर्यामी वा। सर्वान्तर्यामी गुहाशयपदेनेत्यर्थः। सर्वेषामिति ब्रह्मप्रभृतीनाम्। अनेनेति अध्यायार्थप्रद्युम्नस्य राजसत्वेन तत्प्रकरणीय-एक्यं चेत्युभयं भजनाङ्गं भजनार्थमुच्यते। भजनार्थमिति 'भगवान् ब्रह्मकात्स्न्र्येने'ति वाक्यात्। तेन वेदे माहात्म्यज्ञानं हृद्देशेऽर्जुन तिष्ठती'ति। स्वयं हृदि स्थित्वेति 'तेने ब्रह्म हृदे'त्यत्रेति बोध्यम्। तदुक्तं गीतायाम् 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'ति। वेदांश्चकारेत्यन्वयः। 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा' इति श्रुतेः। किं प्रयोजनमित्याकाङ्क्षायामाहुः तत्परा इति। वेदपराः, भजनद्वारा कृतार्था इत्यादि। तदुक्तं सुबोधिन्यां ब्रह्मा मानसीं सेवां प्रत्यहं करोतीति। इयं सर्वदा व्यवस्थितिः। सोत्रैवेदानीं प्रकट इति हेतोरवतारपूर्वप्रक्रिया नोपयुज्यते। अतः परं अवतारदशायाम्। अयमेवेति गुहाशय एव। गुहाशयप्राकट्यकथनेन निरूपितमिति अन्वयः। अन्तरन्वित विद्यारूपज्ञानस्य निर्विषयत्वाभावात् तथा। पूर्वोक्तप्रणाड्या वा। न त्विति जननिमित्तभूतस्तु जननाभावादेव न जातः। अनिमित्तभूतोपि ज्ञानरूपो व्यापारोवधारणार्थं मनसस्तदेकपरता। सावधानता विनयेन स्थितिः, तादृशोपि व्यापारो न जात इत्यर्थः। सम्पूर्ण एवेति गतिप्रतिबन्धकमुल्लङ्घ्य प्रियमोदप्रमोदादियुक्तः पक्षी न तु कञ्चिदंशं विहायानन्दमयः प्रकट इत्यर्थः। चतुर्भुजत्वेप्रे 'बभूव प्राकृतः शिशु'रिति न्यायो बोध्यः। आधारेति विशुद्धसत्त्वमाधारः। यथा प्राच्यां दिशीन्दुरिवेति 'यथा प्राच्यां दिशी'त्येतावत्प्रतीकेनाधारदृष्टान्तः, इन्दुरिवे'ति प्रतीकेन प्रकटीभूतदृष्टान्तः। सर्वोदस्येति 'तस्यै दिशे नमस्कृत्ये'तिवाक्यात्। हेतुगर्भं विशेषणमाहुः सर्वदेवतेति। श्रीभागवते तत्र देवताप्राकट्यकथनाज् ज्ञायते सर्वदेवतामयीति। तस्या आकाशेन्तर्भावा'दाकाशशरीरं ब्रह्मे'ति श्रुतेः सर्वदेवमयब्रह्मशरीरत्वात् तथा। आगमन इति चन्द्रागतौ। अमृतमय इति जलमयः। 'अपां पुष्पं यो वेदे'ति श्रुतेः। आनन्दरूपामृतमयो वा। 'आनन्दरूपममृतं यद्विभाती'तिश्रुतेः। इदीति औणादिक उः। आनन्दमय इति नन्वानन्दमयाधिकरणे आनन्दमयः परमात्मोक्तः कुतश्चन्द्र इति चेन्न। तैत्तिरीये देवतात्रयपक्षे चतुर्थ्याकाङ्क्षायामस्योपादानात्। अत एव जन्माष्टम्यामर्धरात्रे चन्द्रार्घ्यदानं स्मृतम्। तथा च प्राचीदृष्टान्तेन श्रीदेवक्या आविर्भावप्रयोजकत्वमात्रम्। न तु मातृवज् जननीत्वं द्योतितम्। इन्दुपदेन च परमैश्वर्ययोगात् पूर्णत्वं द्योतितम्। तर्हि दृष्टान्तेन कथं पूर्णत्वसिद्धिरित्यत आहुः स इन्दुः प्रथमं पूर्णमास्यां षोडशकलत्वदशायां प्रथमं पूर्वं पूर्ण एव दृश्यते। खण्डास्त्विति चन्द्रमसः खण्डास्तु तिथ्यन्तरे आकाशमध्ये तत्प्रान्ते पश्चिमदिशि च दृश्यन्ते। तथा च प्राचीपदेन्दुपदयोः समभिव्याहारात् दृष्टान्तेनापि तत्सिद्धिरित्यर्थः। नन्वेवं दृष्टान्तेनैव पूर्णत्वसिद्धौ पुष्कलपदस्य विष्णुविशेषणप्रतिपादकस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः उच्चैरित्यादि। तथा च कृष्णद्वितीयादौ उच्चैः खण्डस्यापि प्राच्यां दर्शनात् तद्व्यावृत्त्यर्थं पुष्कलपदमिति तत्समभिव्याहृतदृष्टान्तादेव पूर्णत्वसिद्धिरित्यर्थः। समाप्तपुनरात्तत्वदोषहान्यैतद्गतभूयोधर्माणां दार्ष्टान्तिके निरूपयितुं पूर्णत्वातिरिक्तधर्मनिरूपणार्थं पुष्कलपदस्यार्थान्तरमभिप्रेत्यैतद् द्विधा व्याकुर्वन्ति स्म पुष्कलशब्देनेत्यादि, नन्वित्यादि च। क्षयेति लोके प्रसिद्धम्। अत्रेति एवं व्याख्याने। प्राच्यादीति 'यथेवे'तिपदद्वयस्य विद्यमानत्वात् प्राच्यां दिशि पुष्कल इन्दुरिति चतुर्णां पदानामावृत्तिः। यथा प्राच्यां दिशि पुष्कल इन्दुस्तथा देवक्यामित्याधारदृष्टान्तः। प्राच्यां दिशीन्दुरिव विष्णुः प्रादुरासीदिति प्रकटीभूते दृष्टान्तः। तथेत्यर्थ इति पत्नीषु बह्वीषु सतीषु देवक्यामेवाविर्भावः। अत इति समाप्तपुनरात्तत्वदोषानवृत्त्यर्थं दृष्टान्ते निवेश्य पुष्कलेन्दुदृष्टान्तकथनादित्यर्थः। आश्चर्येति 'सविस्मयोत्फुल्लविलोचन' इति पदेन। आविर्भावे प्राप्त सदेकरसत्वश्रुतिविरोध कारिकया परिहरन्ति स्म दासीनामिति। भक्तानाम्। स्त्रीप्रत्ययस्तु प्रसादरूपशक्तिरूपस्त्रीत्वविवक्षायां भवति। 'स्त्रीद्वारा पुरुषे भवेत्' इति च। 'दास्यो वक्ष्यमाणा अङ्गीकार्या' इति लेखे (प्रकाशे)। सर्वरक्षार्थं सर्वपुरुषार्थरक्षानिमित्तम्। स्वसमानाकारं वासुदेवं अत्युत्कटं भक्तदुःखं वा। निमित्तीकृत्य स्वाविर्भावे प्रयोजकं कृत्वा। मम स्वामी पुरुषोत्तमः प्रादुर्भूतः। अत्र 'मायया सह जात' इति सुबोधिन्या मायिकी विषयता जाता, तया 'न तदश्नोति कश्चन, न तदश्नोति कश्चने'तिश्रुतिविरोधो न। कृपारूपमाया त्रिविधा सुधा तस्याः अप्याविर्भावो बोध्यः। नैश्चिन्त्यमिति, अत्र टिप्पणी, स्पष्टार्था, पूर्ववदित्यस्य व्याख्या प्राकट्यात् पूर्वमित्यादिना। अयमर्थः साधनाध्यायद्वितीयपादे। 'अरूपवदेवे'त्यधिकरणस्य द्वितीयसूत्रे 'प्रकाशवच्चावैयर्थ्या'दित्यत्रोक्तः (३-२-१५) ॥ ८ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

सात्त्विकाहंकारकार्यं मन इति—सात्विक अहंकार का कार्य मन है इस हेतु से तामस अहङ्कार के कार्य पृथिवी जल तेज आदि भौतिक पदार्थों के गुण वर्णन के अवसर पर मन के भी गुणों को कहा जाता है। यह सहज नियम है कि मन सत्व गुण पर स्थित होता है, तब मन प्रसन्न होते हैं। दैत्यसम्बन्धी भी मन होता है, उस मन को प्रसन्नता प्राप्त नहीं हुई ऐसा 'साधूनाम्' से सूचित किया गया है, यह 'साधू' पद दैत्यों के अतिरिक्त सब ही का बोधक है ऐसा सूचित करने के लिये

'असुरद्रुहाम्' पद का विशेषण दिया है, व्यवहार में सन्मार्ग पर रहने वाले सदाचारी ही साधु जन है ऐसा 'साधु' पद से सूचित होता है। यह अवस्था स्थूल काल में भगवान् के जन्म काल से कुछ पूर्व में प्रारम्भ हुई और माया के जन्म पर्य्यन्त यह देश काल आदि की प्रसन्नता वाली अवस्था वर्तमान रही परन्तु जन्म के निकट समय में तो यह विशेषता हुई कि आकाश में दुन्दुभि स्वयं बज उठीं, और अजन्मा भगवान् के प्राकट्यकाल के निकट आते ही आकाश में नगाड़े खड़कने लगे, यह मंगल ध्वनि इतना समीप थी जिससे श्री वसुदेवजी आदि सर्व सुन सकें। आकाश के गुण नृत्य और वाद्य हैं, दुन्दुभि मंगलवाद्य है, भगवत्प्राकट्य की महिमा यह थी कि बिना बजाये स्वयं ही दुन्दुभि बजी थीं ॥ ५ ॥

किन्नरगन्धर्वा अपि किन्नर और गन्धर्व भी स्वतः ही उल्लासपूर्ण हृदय होकर गान करने लगे। पुरुषोत्तम प्रकट हो रहे हैं, इस ज्ञातव्य विषय के ज्ञान के बिना ही उनकी यह रसमत्त अवस्था बन गई थी। यदि भगवत्प्राकट्य को जानकर उन्होंने गान किया ऐसा समझा जाय तब तो भगवत्प्राकट्य की महिमा का प्रतिपादन न हो सकेगा। प्राकट्य की स्वाभाविक चमत्कृति का दिग्दर्शन न हो सकेगा। जब सिद्ध और चारण स्तुति करने लगे, तब अकस्मात् ही किन्नर और गन्धर्व गण माङ्गलिक स्तुति पाठ में प्रवृत्त हो गये। कारण यह था कि वह लोग इस माङ्गलिक समय के राय भाट जैसे थे, और विद्याधर लोग नाचने वाले नर्तक थे। विद्याधराश्च इस पद में जो च अव्यय है उससे यह भी सूचित होता है कि विद्याधरों का गृहिणीयाँ भी नाचने लगीं। अप्सराओं के साथ हो रहा यह नृत्य आनन्द के आवेश से ही है लेकिन नाट्यशास्त्र की अवाप्तता से गान तान की पद्धति से नहीं है इस बात को 'मुदा' पद से निर्देश किया है। मुदा पद द्वारा आनन्द की सूचना की है, किन्नर आदि गायक किसी के प्रेरणा से गानादि में प्रवृत्त नहीं हुए किन्तु स्वतः ही आनन्द में डुब कर अकस्मात् स्त्री और पुरुष उस समय साथ साथ नाचने लगे, इससे यह अर्थ निकलता है कि जो भी कोई जिस विद्या में तल्लीन थे वह सहसा हर्ष के साथ उस उस कार्य को करने लगे ॥ ६ ॥

देवा ज्ञात्वैव – देवगण और मुनिगणों ने भगवत्प्राकट्य को जान कर ही सतत सुमनों की वृष्टि की थी, मुनियों को शब्द रूप श्रुति का बल है और देवताओं को अर्थ रूप भगवान् का ही बल है, यह दोनों प्रामाणिक है, इन्होंने अपनी सेवा और भगवान् पधारते हैं, इस विषय में अपनी जानकारी प्रकट करने को मङ्गल की सूचना के लिए हर्षपूर्वक सुमनस वृष्टि की, भगवत्प्राकट्य काल में यदि सर्वथा ही मेघ न रहे तब तो वर्षा-ऋतु में मेघों के न होने के कारण काल-धर्म विपरीत होने से अशुभकारी समझा जावे, अतः मेघों का भी कार्य वर्णन किया है कि समुद्र के तट पर मेघों ने गर्जना की ॥

मुनियों ने अपने निर्मल मानसों को पुरुषोत्तम से सम्बन्ध के न होने के कारण समाधि से निकालकर भगवान् के प्राकट्य स्थल पर छोड़ दिये व रख दिये। मुनिजनों की मनोवृत्ति तन्मय बन कर वहीं पर लग गई। देवताओं ने तो वहाँ पर पुष्पों की वृष्टि की। व्यासजी ने पुष्प आदि पद को छोड़ कर यहाँ पर "सुमनस्" पद का प्रयोग किया है, क्योंकि सुमनस पद सुन्दर मन और पुष्प दोनों अर्थों का वाचक है, पुष्पवाचक "सुमनस्" शब्द यद्यपि स्त्रीलिङ्ग है, फिर भी स्त्रीलिङ्ग की द्वितीया विभक्ति बहुवचन का "सुमनसः" पद का प्रयोग न करना और सुमनांसि ऐसा पद लेने का तात्पर्य है कि सुमनस् शब्द का द्वितीय अर्थ 'सुन्दर मन' भी यहाँ अभीष्ट है, अन्यथा भूमि में निवासी मुनिजनों का आकाश निवासी देवताओं के साथ पुष्प-वृष्टि करना कैसे सिद्ध हो सकेगा। और एक और भी समाधान है कि मन का पुष्प रूप से कथन पुष्पों के "उज्ज्वल एवं सङ्कोचविकास आदि धर्मों से युक्त होने के कारण सुसंगत है मुनि और देवों को 'मुदान्विताः' इस विशेषण से मुनि और देवताओं में आनन्दावेश की सूचना है जिससे पुष्प रूप मुनि मानसों की मकरन्दभरपूर्णता व्यञ्जित होती है। उस समय मेघों ने विचार किया कि इस सुमन वृष्टि की अपेक्षा हमारी की हुई जल-वृष्टि न्यून रहेगी और ऐसी अद्भुत न होगी इसलिये मेघोंने जल-वृष्टि नहीं की लेकिन पुष्पवृष्टि में गर्जना नहीं है अतः गर्जना मात्र ही मेघों ने आवश्यक कर्त्तव्य समझकर की। गर्जना भी मन्द मन्द सुहावने नाद से की जिससे वह किन्नर गन्धर्वों के गान तान सुनने में आ सके। उच्चस्वर गम्भीर मेघ-गर्जना पूर्वोक्त की वाद्य गीत आदि के श्रवण में प्रतिबन्ध करने वाली होती है अतः उसमें प्रतिबन्ध न होने पावे इसलिए मन्द गर्जना की ऐसा कहा है। यदि तार नाद से मेघ गर्जना होती तब वाद्य गीतों की व्यर्थता हो जाने की आपत्ति थी। आचार्यचरण कहते हैं कि इससे यह अभिप्राय सिद्ध होता है कि एक ही साथ वाद्य, गीत, और गर्जना हो रहे थे और उनका आपस में मेल मिल रहा था एक दूसरे के उतार चढ़ाव में सहायक हो रहे थे ऐसी सुव्यवस्था के साथ सब लोगों के सुनने में आ रहे थे।

किञ्च जगर्जुरेव न तु ववृषुः—वह मेघ जल को धारण करने वाले ही थे वर्षा करने वाले नहीं थे, इसलिये गर्जना ही की, वृष्टि नहीं की यह बताने के लिये शुकाचार्यजी ने मेघों का 'जलधर' शब्द से व्यवहार किया है। भगवत्प्राकट्य से पूर्व में नील वर्ण की प्रशंसा लोक में नहीं थी इस कारण वह अपने नीलरूप को अप्रशस्त समझ कर उसके दूर करने के लिए जल का त्याग करते रहते थे, और शुभ्र हो जाते थे, परन्तु अब तो परम मनोहर श्याम स्वरूप प्रभु प्रकट हो रहे हैं अतः कविगण आगे हमारी उपमा उन्हें देंगे, उससे हमारा जन्म सफल होगा इस हर्ष के कारण अपने नील रूप को अभीष्ट होने से उसे बचाये

रखने को उस नीलरूपता का कारण जल धारण है, इस विचार से जलधर ही रहे आये, 'जलद' या 'जलमुक्' नहीं हुए, यदि जल धारण नहीं करते उसकी वृष्टि कर देते तो शुभ्रता हो जाती नीलिमा न रह पाती, यद्यपि मरकत मणि, नील कमल आदि की भी समानरूपता है तथापि मेघ का सहयोग विद्युत से होता है मरकतादि का विद्युत संयोग नहीं, अतः स्वामीनियों की सुनहरी तनुलता से जब श्याम तमाल प्रभु वेष्टित होंगे तब उस दशा में युगलच्छवि के दोनों रूपों में अधिक साम्य अपना ही ठहरेगा, इत्यादि 'जलधर' पद का स्वारस्य है, क्योंकि जल वाले मेघों में ही विद्युत् का साथ देखने में आता है, और भी बात यह है कि समुद्र इस गर्व से गर्जना करता है कि मेरे गाम्भीर्य गण को प्रभु ने अङ्गीकार किया है, उसके उस गर्व को दूर करने के लिए मेघ गर्जता है कि तेरा तो केवल गाम्भीर्य मात्र धर्म से ही साम्य है और मेरा साम्य तो स्वरूप से है अतः मेरा साम्य अधिक है तू क्या गर्व करता है ऐसा सूचित करने के लिए 'अनुसागरम्' यह पद कहा है ॥ ७ ॥

एवं देशकालयोस्तत्रत्यानामृतोश्च गुणानुक्त्वा राञ्येस्तन्मुहूर्तस्य च गुणानाह निशीथ इति।

एवं देशकालयोः—इस प्रकार देश कालों के तथा देश कालस्थ जलवायु आदि तत्वों के और वर्षा ऋतु के गुणों का निरूपण करने के बाद निशीथे' तम इस श्लोकार्ध से रात्री के और उनके मुहूर्त के गुणों का वर्णन करते हैं। निशीथ का अर्थ है रात्री का मध्यभाग उस मध्य भाग में जहाँ रात्री के पूर्वार्ध और उत्तरार्ध मिलते हैं उसको अर्धरात्र या निशीथ कहते है। वह निशीथ जो कि ४५ पैंतालीस और ४६ छयालसवीं घड़ियों का जोड़ा है, यद्यपि मेष या तुला राशि पर सूर्य के संक्रमण काल में ही दिन मान और रात्रि मान ३० तीस तीस घड़ियों का समान होता है और उसी दिन अर्ध रात्र ४५ और ४६ घड़ियों का होता है श्रीकृष्ण प्रादुर्भाव के समय श्रावण (भादों) मास में सिंह राशिस्थ सूर्य के काल में ४६–४७ घड़ियों का अर्ध रात्र होता है तो भी आचार्य चरणों ने ४५–४६ घड़ियों का निर्देश किस प्रकार किया ? इस विषय पर प्रकाश डालते हुए श्री प्रकाशकार ने भगवान् के जन्मकाल का गणित कर इस प्रकार निर्णय दिया है कि कलियुग के आने से १२५ वर्ष पूर्व भगवान् का जन्म हुआ था, तथा उस वर्ष में 'आषाढ़' मास अधिक था उस दिन का मान ३१ घड़ी ४ पल था एवं रात्रि का मान २८ घड़ी ५६ पल था रात्रि का पूर्वार्ध १४ घड़ी २८ पल का था तथा रात्रि का उत्तरार्ध भी १४ घड़ी २८ पल का ही था तदनुसार अर्धरात्र का काल ४५ घड़ी के अनन्तर ३२ पल व्यतीत होने पर आता है भगवान् का जन्म उसी समय हुआ था उसी समय चन्द्रमा का भी उदय हुआ था परन्तु अन्धकार की निवृत्ति ४५ वीं घड़ी के आरम्भ होते ही हो गई थी ३२ पलों से पूर्व ही चन्द्र प्रकाश का क्षितिज से संयोग होने पर अन्धकार हट गया था इस अन्धकार के हटने के काल का उल्लेख ४५ वीं घड़ी पर किया है जिससे अन्धकार की निवृत्ति के द्वारा सर्व दोषों की निवृत्ति का बोध कराना अभीष्ट है कि उस समय किसी प्रकार का कोई दोष अवशिष्ट नहीं रहा था सर्व दोषों की निवृत्ति होने पर ही 'प्रादुरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कलः' पूर्ण चन्द्र कृष्ण चन्द्र का प्राकट्य हुआ। उसका निशीथ काल की निर्दोषता का सूचक 'तम उद्भूते' यह विशेषण है क्योंकि उस निशीथ में तम अन्धकार उद्भूत हो चुका था ऊंचा हो चुका था अर्थात् निवृत्त हो गया था; रात्री का दोष अन्धकार है उसकी निवृत्ति से निर्दोषता सिद्ध होती है, ऊँचा होने का तात्पर्य ही निवृत्त होना है क्योंकि देखा जाता है कि जो निकल जाता है वह ऊँचा होता है और जो फंस जाता है वह नीचा पड़ा रहता है। जायमाने जनार्दने जनार्दन के जन्म का वर्तमान काल होने से जायमाने जनार्दने पद द्वारा उस काल के गुणों का निर्देश किया है कि जितने गुणों से सर्व प्राणियों के अविद्या नाशक जनार्दन प्रभु प्रकट होते हैं वैसे गुणों का आधार वह निशीथ काल था, ऐसा अर्थ है। कालगत मूल रूप भगवद्गुणों के और भौतिक नदी आदि के गुणों के प्रकट होने में भगवान् का प्राकट्य ही निमित्त है कालनिमित्त नहीं है, इस तत्व को लक्षित कराने के लिए आगे पंचम श्लोक में जायमाने अजने ऐसा कहा जा चुका है, ऐसा 'अजन' शब्द से भगवान् का जन्मादि विकारों से रहित होना सूचित कर और भगवान् का स्वेच्छा से प्राकट्य होने में विकार हेतु काल निमित्त नहीं हो सकता किन्तु प्राकट्यकाल के सर्व गुण युक्त होने में स्वयं प्रकट होने वाले 'अजन' भगवान् ही निमित्त हैं। **अन्ते च पुनर्जायमाने जनार्दन इति सर्वाविद्याविनाशनार्थं** अन्त में आगे चलकर 'जायमाने जनार्दने' पद द्वारा यह सूचित करना अभीष्ट है कि सर्व तत्वों के गुणों का प्रकट होना इसलिए अनिवार्य है कि भगवान् सबकी अविद्या का नाश करने को प्रकट हो रहे हैं इसलिये भगवत्प्राकट्य ही भूमि जल आकाश आदि सबके गुणों के प्रकट होने में हेतु है। इस प्रकार इस सन्दर्भ में गूढार्थ प्रकाशक पद्धति से विचारित तृतीयाध्याय ग्रन्थ में भगवान् के अवतारत्रय भी कहे हैं सर्व धर्म के संरक्षक श्री 'अनिरुद्धजी', एवं अज्ञान निवृत्ति के द्वारा मोक्षदाता 'सङ्कर्षण' जी और देवकी जी में जो विष्णु रूप है वह 'प्रद्युम्न जी' तथा नन्दालय में 'वासुदेव' जिन भगवान् का दर्शन चतुर्भुज से द्विजभुज स्वरूपके स्वीकार स्थल' पर श्री देवकी वसुदेवजी माता-पिता को हुआ है इस प्रकार सर्वरूप से प्रकट हुए यही भगवान् हैं, ऐसा कहा गया है। इसका तात्पर्य यह है कि अनिरुद्धव्यूह के प्राकट्य की सूचना 'जायमानेऽजने' इस स्थल पर मिलती है क्योंकि 'अथसर्वगुणोपेतः' वर्णन से लेकर 'जगर्जुरनुसागरम्' वर्णन पर्यन्त कालादि गुणरूप धर्मों का निरूपण है उसी के मध्य में अजन के जन्म का जो उल्लेख है धर्म वह संरक्षक अनिरुद्ध व्यूह स्वरूप का ही परामर्श करता है। सङ्कर्षण व्यूह की सूचना भी 'जायमाने जनार्दने' इस स्थल पर हुई है। क्योंकि जो जनार्दन

का प्राकट्य है वह उस संकर्षण स्वरूप का प्राकट्य है जो जना नामक अविद्या का 'अर्दन' विनाश करता है, विनाश अथवा तो प्रलय करना सङ्कर्षण का कार्य है, अविद्या का विनाश करने पर मोक्षदान भी करते हैं। देवकी में प्रकट होकर वंशवृद्धि करने वाला स्वरूप प्रद्युम्न व्यूह है। और श्रीनन्दालय में तो द्विभुज धर्मी श्रीपुरुषोत्तमजी का प्रादुर्भाव है।

निमित्तत्वं च भगवत एव दोषाभावे गुणप्राकट्ये च दोषों के सम्पादन में एवं गुणों के प्रकट होने में भगवान् ही कारण हैं, काल कारण नहीं है यदि दोषाभाव का सम्पादक एवं गुणों को प्रकट करने वाला कोई स्वाभाविक काल ही है ऐसा मान लिया जाय तब तो उस समय में उत्पन्न होने वाला और कोई पुरुष भी भगवान् के समान ही होना चाहिये था क्योंकि उस पुरुष की उत्पत्ति का काल एवं भगवत्प्राकट्य का काल एक ही है जो कि दोनों स्थलों पर निमित्त रूप से उपस्थित है, इसलिये यह ही मानना उचित है और अनिवार्य है कि भगवान् का प्राकट्य ही सर्व गुणों के प्राकट्य में निमित्त है और उन गुणों का प्राकट्य भी भगवान् के प्रकट होने के लिए ही हुआ है, ऐसा निरूपण दो बार 'जायमाने' बात के कथन से अभीष्ट है। एवं **'सर्वांशो भगवान् प्रादुर्भूतः'** इस प्रकार सर्वांश पूर्ण भगवान् प्रकट हुए ऐसा कहते हैं कि देवकी में विष्णु प्रकट हुए, देवकी सर्व देवता है सर्व देवताओं की समूहात्मक मूर्ति है, सम्पूर्ण देव समूह में पूर्ण सत्व होता है और वह पूर्ण सत्व भगवान् के आविर्भाव में आधार रूप से निमित्त होता है, जैसे अग्नि के विषय में अरणि काष्ठ को आधार रूप से निमित्त देखा गया है यहाँ पर अरणि काष्ठ के दृष्टान्त को लेकर यह विचार प्रस्तुत होता है कि अरणि (काष्ठ) भी किसी मथन व्यापार के आवेश को पाकर ही अग्नि के प्रकट होने में निमित्त होती है वैसे देवकी में भी मथन के स्थान पर किसी व्यापार का निरूपण करना आवश्यक है, उक्त विचार को लक्ष्य में रखकर 'विष्णुरूपिण्याम्' यह देवकी के लिये विशेषण प्रयुक्त हुआ है। श्री देवकी में विष्णु का रूप विद्यमान है अतः देवकी को विष्णुरूपिणी कहा गया है। यहाँ रहस्य यह है कि देवकी के अन्तःस्थित भगवत्स्वरूप ने ही बाहर भगवान् को प्रकट कर दिया है, देवकी का कोई प्रयत्न अथवा प्रसव का वायु आदि कुछ भी भगवत्प्राकट्य में निमित्त नहीं उन प्रयत्न आदि अन्य निमित्तों के निवारण करने के लिए बतलाया गया यह देवकी हृदयगत रूप ही स्वयमेव मथन स्थानीय होकर अपने आविर्भाव में कारण है, ऐसा सिद्धान्त है।

देवक्यां विद्यमान आधिदैविक इति केचित्—कुछ विद्वानों का कहना है कि देवकी में जो आधिदैविक स्वरूप विद्यमान है उसका विष्णु शब्द से निर्देश है, परन्तु उस दशा में 'विष्णुरूपायां' विष्णुरूपा देवकी ऐसा अर्थ होता है। विष्णुरूप को धारण करने वाली विष्णु रूपवती देवकी इस प्रकार विष्णु रूप से अतिरिक्त उसकी आधार रूप देवकी ऐसा अर्थ यहाँ पर अभीष्ट है। मूल भागवत पाठ में कहीं 'देवरूपिण्याम्' ऐसा भी पाठ मिलता है वहां भी देव शब्द से विष्णु का ही ग्रहण अभीष्ट है। विष्णु का अर्थ व्यापक पुरुषोत्तम है वेदान्त में जिसको ब्रह्म कहा जाता है। जब उस व्यापक की सर्वत्र ही सत्ता है तो उसका प्रादुर्भाव वास्तविक नहीं औपचारिक किसी धर्म को लेकर कथन मात्र ही है ऐसी शङ्का के निवारण के लिए **'सर्वगुहाशयः'** इस पद का प्रयोग किया है। भगवान् प्राणीमात्र की हृदयरूप गुहा में विराजते हैं वह सर्व व्यापक होते हुए भी सर्वान्तर हैं, सबके अन्तर्यामी हैं, अन्तर्देश में स्थित हैं वह आज स्वेच्छा से बाहर पधारे हैं बाहर पधारना ही उनका प्रादुर्भाव है, अतः व्यापक का प्राकट्य कैसे ? ऐसी शङ्का को स्थान नहीं होता है। भगवान् की व्यापकता और सर्वान्तरता श्रुतिसिद्ध हैं अतः उनका अविरोध है, उक्त गुहाशय स्वरूप के प्राकट्य प्रतिपादन से यह निरूपण किया है कि भगवान् ने अपने भजन के लिए सर्व साधारण लोगों के हृदय में विराजमान होकर इस तत्व को समझाने के लिए वेदों की रचना की कि वेदोक्त कर्तव्यपरायण लोग कृतार्थ हो जाय। आज इस समय वह अन्तरस्वरूप बाहर प्रकट हुआ है इसलिए अब इससे आगे भविष्य में वेदोक्त अन्तःस्वरूप चिन्तन आदि की प्रक्रिया का उपयोग आवश्यक नहीं किन्तु इस बाहर प्रकट हुए भगवत् स्वरूप की ही सेवा करनी चाहिए।

आविर्भावे को हेतुः—आचार्यचरण कहते हैं कि श्री देवकी जी जिस आनन्दमय भगवत् स्वरूप का हृदय में अनुभव कर रही थी वह स्वरूप यकायक बाहर दृष्टिगोचर हो गया; श्री देवकी जी का कोई भी व्यापार प्रभु को प्रकट करने में निमित्त नहीं हुआ, और देवकीजी को न कुछ ज्ञान ही हुआ कि प्रसव होने वाला है और न उसके लिए सावधानता रखनी पड़ी, लेकिन जो स्वरूप प्रकट हुआ वह स्वरूप सम्पूर्ण ही आनन्दमय है ऐसा निरूपण करने की आश्रयभूता श्री देवकी का प्राची दिशा और प्रकट हुए भगवान् का पूर्ण चन्द्र दृष्टान्त कहा है **'आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः'** प्राची पूर्व दिशा सबकी उपासना करने योग्य है और सर्व देवतामयी है। वह प्राची भी चन्द्रमा के आगमन में मार्ग मात्र है, चन्द्रमा को उत्पन्न करने में कारण रूप नहीं क्योंकि चन्द्रमा अमृतमय है और परम ऐश्वर्यशाली है इसलिए चन्द्र को भी कहते हैं, यह आनन्दमय है; पूर्व दिशा में प्रथम इसका पूर्ण रूप से ही दर्शन होता है, इसके खण्ड तो मध्य आकाश में और प्रान्त भाग पश्चिम दिशा में दीखते हैं, और इसका ऊँचा विशाल खण्ड भी पूर्व दिशा में दीखता है। कृष्ण पक्ष की प्रतिपदा द्वितीया तिथियों के काल में पूर्व दिशा में दीखने वाले रेखा मात्र चन्द्र के निवारण करने के लिए 'पुष्कल' शब्द का प्रयोग किया है। इस पूर्ण चन्द्र के दृष्टान्त से भगवान् की पूर्णता सिद्ध की है, पुष्कल शब्द से परिपुष्टता भी सूचित होती है, जिसके द्वारा निष्कलङ्कता का बोध होता है क्योंकि कलङ्क ही

तो क्षय का कारण है, तथा उक्त रीति से पूर्व दिशा में पूर्ण चन्द्र की भांति देवकी में विष्णु का प्राकट्य हुआ, यह एक दृष्टान्त निकलता है, और इस शङ्का के निवारण करने के लिए कि वसुदेवजी की अनेक पत्नियों के होते हुवे देवकी में ही भगवान् का प्राकट्य क्यों हुआ ? दूसरा दृष्टान्त है कि, जैसे अनेक दिशाओं के होते हुए भी पूर्ण चन्द्र प्राची दिशा में ही उदित होता है उसी प्रकार देवकी में ही भगवान् प्रकट हुए, 'इव' और 'यथा' इन दो दृष्टान्तवाचक शब्दों की आकांक्षा शान्त करने को 'प्राची-दिशा' और 'पुष्कल-चन्द्र' इन शब्दों का दो बार उच्चारण जानना आवश्यक है, इस प्रकार व्याख्या करने पर यह अर्थ सिद्ध होता है कि जैसे पूर्ण चन्द्र का प्राकट्य स्थान पूर्व दिशा ही है, उसी भांति सर्व शक्ति परिपूर्ण पुरुषोत्तम का प्राकट्य स्थान देवकी ही है, अतः सच्चिदानन्दस्वरूप, एवं सकलकला परिपूर्ण भगवान् अकस्माद् ही देवकी वसुदेव के सम्मुख प्रकट हो गये वह दोनों तो बैठे थे उनके बैठे-बैठे ही आकस्मिक प्रादुर्भाव हुआ तभी आश्चर्य भी उन दोनों को हुआ और उन्होंने वर्णन भी किया।

कारिका—दासीनां सर्वरक्षार्थं निमित्तीकृत्य तादृशम्। प्रादुर्भूतो मम स्वामी नैश्चिन्त्यं वाचि पूर्ववत् ॥ १ ॥ ८½ ॥

यह भी सङ्गत होता है, भगवान् के प्रकट होने में कुछ श्रुति वाक्यों का विरोध प्रतीत होता है उसके निवारणार्थ आचार्यचरण उपर निर्दिष्ट कारिका में समाधान करते हैं कि मेरे स्वामी दासीजनों की सर्व प्रकार से रक्षा करने के हेतु वैसा निमित्त बना कर प्रकट हुए हैं, 'अदृश्यम् अग्राह्यम्' भगवान् याने ब्रह्म तो दृष्टिविषय नहीं कर।दादि से स्पर्श के विषय नहीं है ऐसी उपनिषद् वाणी में किसी प्रकार की '**नैश्चिन्त्यं वाचि पूर्ववत्**' चिन्ता की आवश्यकता नहीं क्योंकि इन्द्रियसामर्थ्य से उनकी अग्राह्यता एवं अदृश्यता में उसका तात्पर्य है, स्वेच्छा से तो वह दृश्य एवं ग्राह्य होते ही हैं लेकिन जीवों के किसी भी प्रकार के योगादि सामर्थ्य से ग्राह्य और दृश्य नहीं होते हैं। अतः प्राकट्य से पूर्व जैसे कोई विरोध नहीं था प्रकट होने पर भी कोई विरोध नहीं है। इस कारिका के शब्दों से निश्चय होता है कि श्री वल्लभाचार्य ने अपने सर्वस्व प्रभु का जिन्हें गोपीजन वल्लभ कहते हैं यहां प्राकट्य माना है '**मम स्वामी**' और '**दासीनाम्**' इन शब्दों का स्वारस्य इस ओर आकृष्ट करता है, मथुरा में व्यूह सहित पुरुषोत्तम का प्राकट्य है, यह तो सर्वसम्मत है ही, **अनिरुद्ध**, संकर्षण, और प्रद्युम्न इन तीनों व्यूहों का तो श्री सुबोधिनी में स्पष्ट उल्लेख हुआ ही है, प्रकाशकार पुरुषोत्तमजी महाराज ने श्री सुबोधिनी के ही अक्षरों के आधार पर वासुदेव व्यूह का प्राकट्य भी मथुरा में हुआ है, ऐसा सिद्ध कर दिया है, लेखकार वासुदेव के प्राकट्य को यहाँ नहीं मानते हैं उनका मत है कि वासुदेव व्यूह के अतिरिक्त तीनों व्यूहों के साथ पुरुषोत्तम का प्राकट्य मथुरा में हुआ है, वासुदेव का प्राकट्य तो नन्दालय में नवमी के दिन हुआ है, पुरुषोत्तम प्राकट्य में तो कोई मतभेद नहीं है, पुरुषोत्तम प्राकट्य व्यूहों के सहित मथुरा में हुआ और व्यूहरहित द्विभुज पुरुषोत्तम प्राकट्य गोकुल में हुआ ॥ ८½ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

साधूनां मनांसि प्रसन्नान्यासन् के ते साधव इत्यपेक्षायामाह—असुरद्रुहामिति। असुरकर्तृकद्रोहवतामित्यर्थः। तेन भगवद्भक्तानां प्रह्लादादीनामपि सङ्ग्रहः। असुराणां मनःप्रसादाभावः सूचितः। दिवि स्वर्गे दुन्दुभयः स्वयमवादिता अपि नेदुर्दध्वनुः। तेन भगवन्माहात्म्याज्जडानामपि चैतन्यसादृश्यं सूचितम्। तथोक्तं हरिवंशे—'अनाहता दुन्दुभयो देवानां प्राणदंस्तदा' इति ॥ ५ ॥ तदा तस्मिन् समये किन्नरा गन्धर्वाश्च भगवद्गुणाञ्जगुः। सिद्धाश्चारणाश्च भगवन्तं तुष्टुवुः अप्सरोभिः समं सह विद्याधर्यश्च ननृतुः ॥ ६ ॥ मुनयः सुष्ठु निर्मलानि मनांसि मुमुचुः, भगवद्ध्यानपराणि कृतवन्तः। देवास्तु सुमनांसि पुष्पाणि मुमुचुः ववृषुः। अतएवमन्वयमभिप्रेत्यैव पुष्पादिपदं विहायोभयार्थकसुमनःपदप्रयोगः। यद्वा मुनयस्तुष्टुवुरित्यनुषङ्गः। मुदा हर्षेणान्विताः पूर्णा इति मुनीनां देवानां च विशेषणम्। अनुसागरं सागरगर्जनसहितं यथा भवति तथा जलधरा मेघा मन्दं मन्दं जगर्जुः गम्भीरशब्दं कृतवन्तः। तथोक्तं विष्णुपुराणे—'सिन्धवो निजशब्देन वाद्यं चक्रुर्मनोहरम्' इति। तम उद्भूते तमसा व्याप्ते निशीथे अर्धरात्रे। न च "गगनं निर्मलोडुगणोदयम्, दिशः प्रसेदुः" इत्युक्तिविरोधः शङ्कनीयः। सर्वथा मेघाद्यभावे कालगुणवैपरीत्येन भयसूचकत्वं सर्वगुणोपेत इत्युक्तिविरोधश्च स्यादतस्तदनुकूला मेघादयः सन्तीति ज्ञेयम् ॥ ७ ॥ देवरूपिण्यामिति। देवमात्रदित्यवतारभूतायामित्यनेन वसुदेवभार्यासु बहुषु सतीषु देवक्यामेव किमिति प्रादुरभूदित्याशङ्का निरस्ता, तस्या एव तदवतारयोग्यत्वात्। एतदेव दृष्टान्तेन स्पष्टयति—यथेति। यथाऽन्यासु दिक्षु सतीष्वपि प्राच्यां दिश्येवेन्दुः प्रादुर्भवति योग्यत्वात्, तथाऽन्यासु सतीष्वपि देवक्यामेव भगवानाविरासीदित्यर्थः। इव शब्दस्तथार्थः। न्यूनकलोऽपि चन्द्रः प्रादुर्भवतीति दृष्टान्तेन भगवतोऽप्यंशावतारशङ्का स्यात्तन्निवृत्त्या भगवतः पूर्णत्वज्ञापनार्थमाह—पुष्कल इति। पूर्ण इत्यर्थः। विष्णुशब्दस्य व्यापकवस्तुवाचकत्वात्तद्वाच्यस्य भगवतो व्यापकत्वमाह—सर्वगुहाशय इति। सर्वेषां प्राणिनां गुहास्वन्तःकरणेषु शेते नियामकतया तिष्ठतीति तथेत्यर्थः ॥ ८ ॥

अन्वितार्थप्रकाशिका

मनांसीति ॥ असुरद्रुहां सुरद्रुहः कंसाद्यास्तद्भिन्ना असुरद्रुहस्तेषां सर्वप्राणिनां देवानां च। यद्वा। असुरा द्रुहो द्रोहकर्तारो येषां तेषामसुरकर्तृकद्रोहाक्रान्तानां साधूनां मनांसि पूर्वमप्रसन्नानि तदा तु प्रसन्नानि आसन्। एतत्पर्यन्तमष्टम्यां सूर्योदयादे-

बभूव। अथ तस्मिन् अजने श्रीकृष्णे जायमाने आसन्नप्रादुर्भावे सति दिवि दुन्दुभयः स्वयमेव नेदुः। "अनाहता दुन्दुभयो देवानां प्राणुदंस्तदा।" इति हरिवंशे ॥ ५ ॥ जगुरिति ॥ तदा किन्नराः गन्धर्वाश्च भगवद्गुणान् जगुः। सिद्धाश्चारणाश्च भगवन्तं तुष्टुवुः अप्सरोभिः समं सह विद्याधर्यश्च ननृतुः ॥ ६ ॥ मुमुचुरिति ॥ मुदा हर्षेणान्विताः एकत्र मिलिता इति तोषिणी। मुनयो देवाश्च सुमनांसि पुष्पाणि मुमुचुः। क्लैब्यमार्षम्। जलधरा मेघाः अनुसागरम् अनुकृतः सागरो यत्र तत्र कर्मणि तथा समुद्रवदित्यर्थः। यद्वा। सागरगर्जनसहितं यथा भवति तथा मन्दं मन्दं जगर्जुः गम्भीरशब्दं कृतवन्तः। तथोक्तं विष्णुपुराणे। "सिन्धवो निजशब्देन वाद्यं चक्रुर्मनोहरम्।" इति। न च दिशः प्रसेदुरित्यस्य जलधरा जगर्जुरित्यनेन विरोधः शङ्क्यः प्रावृट्कालानुगुण्येन मेघगर्जनस्यापि गगनदेशकालभेदेनोचितत्वात् ॥ ७ ॥ निशीथ इति सार्द्धम् ॥ तमसा उत् उत्कर्षेण भूते व्याप्ते निशीथे यद्वा अतिशयिनि निशीथे निशीथे तमे उद्भूते जाते सति "घकालतनेषु" इति सप्तम्या अलुक्। जनानां भक्तादीनाम् अर्दने भगवन्नाविर्भव इति याचने जायमाने सति जनानां पीडाकरे निशीथे जायमाने इति केचित्। सर्वेषां गुहास्वन्तःकरणेषु शेते सः विष्णुः देवस्येव रूपं विद्यतेऽस्याः तस्यां देवमात्रदित्यवतारभूतायां देवक्यां विष्णुरूपिण्यामित्यपि पाठः। प्राच्यां दिशि पुष्कलः पूर्ण इन्दुरिव यथा यथावत्पूर्णरूपेण आविरासीत्। यद्वा तद्दिने निशीथे प्राच्यां दिशि अष्टम्या इन्दुरपुष्टोऽपि मद्वंशं मत्प्रभुर्जन्मनाऽलंचकारेत्यानन्दोद्रेकेण पुष्कलः पूर्णिमाया इन्दुरिव पूर्णकलः सन् यथा आविरासीत्तथैव देवक्यां विष्णुरपि सर्वांशकलापरिपूर्णं आविरासीदिति दृष्टान्तदार्ष्टान्तिकयोर्यौगपद्यम्। आविर्भावश्च कंसवचनार्थमष्टमे मासि यदुक्तं हरिवंशे। "गर्भकाले त्वसंपूर्णे अष्टमे मासि ते स्त्रियौ ॥ देवकी च यशोदा च सुषुवाते समं तदा ॥" इति। खमाणिक्यनाम्नि ज्योतिर्ग्रन्थे जन्मपत्री प्रोक्ता ॥ "उच्चस्थाः शशिभौमचान्द्रिशनयो लग्नं वृषो लाभगो जीवसिंहतुलादिषु क्रमवशात् पूषोशनोराहवः ॥ नैशीथः समयोऽष्टमी बुधदिनं ब्रह्मर्क्षमत्र क्षणे श्रीकृष्णाभिधमम्बुजेक्षणमभूदाविः परं ब्रह्म तत् ॥" इति। तथा च जन्मकुंडली ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मनांसीति ॥ तदा इत्युत्तरश्लोकादाहार्यम्। असुरद्रुहां देवानां, साधूनां भागवतानां च, मनांसि प्रसन्नानि, आसन्। तस्मिन्नुक्तविधमहामहिमप्रसिद्धे, अजने भगवति, जायमाने आसन्नप्रादुर्भावसमये सति, दिवि स्वर्गे, दुन्दुभयः देवानामानकाः, नेदुर्दध्वनुः ॥ ५ ॥ जगुरिति ॥ तदा किंनराः किंपुरुषाश्च गन्धर्वा देवगायकाश्च ते, जगुः। सिद्धाः सिद्धजनाश्च चारणाश्चारणजनाश्च ते, तुष्टुवुः। तदा, विद्याधर्यश्च, अप्सरोभिः समं ननृतुः ॥ ६ ॥ मुमुचुरिति ॥ तदा, इदं पूर्वश्लोकादाहार्यम्। मुनयः, देवाश्च, मुदाऽत्यानन्देन, अन्विताः, सन्तः, सुमनांसि कुसुमानि, मुमुचुः पुष्पवृष्टिं चक्रुः। जलधरा मेघाः, अनुसागरं गर्जन्तं सागरं लक्षीकृत्य, समुद्रस्योपान्ते वा, मन्दं मन्दं, जगर्जुः ॥ ७ ॥ निशीथे इति ॥ निशीथेऽर्द्धरात्रे, तमसा अन्धकारेणोद्भूते व्याप्ते सति, घनतमसि सतीति यावत्। जनार्द्दने विरहिजनपीडाकरे चन्द्रे, जायमाने उदीयमाने सति, अर्द्धरात्रे चन्द्रोदयसत्त्वमष्टम्यामेव, तेन तत्काले तिथिरप्यष्टम्येवाभूदित्यपि ज्ञापितम्। देवस्य हरे रूपमस्यामस्तीति देवरूपिणी तस्यां, देवतुल्यायामिति पाठे, देवतांशत्वात्तत्तुल्यायां देवभूतायामित्यर्थः। द्योतमानरूपवत्यामित्येके। देवक्यां, सर्वे ये गुणा ज्ञानशक्तिबलैश्वर्यतेजःप्रभृतयस्तेषामाश्रयः, सर्वगुहाशय इति पाठे, सर्वान्तर्यामिरूपः, अत एव विष्णुः व्यापको भगवान्, प्राच्यां दिशि पूर्वदिशायां, पुष्कलः षोडशकलायुक्तः, इन्दुश्चन्द्र इव, यथा यथावदेव, षाड्गुण्यपरिपूर्णेश्वररूपेणेत्यर्थः। आविरासीदाविर्बभूव ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मनांसीति : १०.३.५.

एतावदस्माकमसीम आसीद्यत्नः स्वरूपाकलनेऽच्युतस्य।
इतःसहाक्षैरपि तद्व्रजामः प्रसन्नताऽऽसीदिति सन्मनस्सु ॥ ५४ ॥
यद्यद्रूपमहं दधामि बहुधा तत्तात्त्विकाज्ञानतः श्रान्तान्येव भवन्ति साधुहृदयान्येवं विभाव्याच्युतः।
अस्मास्वन्यतमे स्ववासममले कृत्वैव सम्प्रत्यभूद् व्यक्तोऽसाविति तानि तत्सुखवशादासन् प्रसन्नानि वा॥ ५५ ॥
सुमनःसुखैकवितरणमवतरणं जगति भगवतो ज्ञात्वा।
क्षममेव तत्सुमनसांप्रसन्नताऽऽसीत्तदा सतामिति यत् ॥ ५६ ॥
उपवनभुवि दिवि सत्स्वपि सुमनःश्रेणी बभूव सामोदा।
तद्युक्तमेव सकलानन्दकरे माधवोदये सदये ॥ ५७ ॥
अनामयानन्दविधेर्विधायकः समग्रभूतश्रुतिसौख्यदायकः।
प्रभौ जनानां द्विविधक्षमाश्रिते स्फुटं तदासीत् स्वरवस्थितो रवः ॥ ५८ ॥
स्वयं सुखी यः सुखिनः परानपि करोति लोकेष्विति युक्तमेव तत्।
स दुन्दुभिः स्वस्थ इहाखिलेष्वपि निजोक्तितः स्वास्थ्यमलञ्चकार यत्॥ ५९ ॥

जगुरिति : १०.३.६.

सन्नरावनकरोऽस्मि सदैव किन्नरावनमितोऽपि करिष्ये ।
श्रीशमेवमनुसन्धमुदीक्ष्य किन्नरा जगुरिति क्षममेव ॥ ६० ॥
यत्सौख्याप्तिसमीहयाऽनवरतं पूर्णाप्तकामोऽप्यसौ श्रीशोऽङ्गीकुरुते जनुः कुतुकतस्तं भूरिभव्यं भवम् ।
सन्तोऽस्मन्नगरेण तुल्यमिति यत्प्राहुस्तदस्मत्पुरं सर्वोत्कृष्टमिति प्रहृष्टमनसो गन्धर्वसङ्घा जगुः ॥ ६१ ॥
स्वस्थान्तःकरणैरलक्षि किल यैः सच्चित्सुखात्मा विभुस्तेषां तद्गुणगान-वर्णन-सुखास्वादस्य दुर्भिक्षता ।
सिद्धैवेति तदा विभाव्य तमजं षाड्गुण्यभाजं मुहुः तत्स्तोत्रोत्सुकतान्विताः समभवन् सिद्धास्तदेतत्क्षमम्॥ ६२ ॥

सद्वृत्तयो ये तदनुप्रचारणाः सिद्धैकसङ्गाहृतचेतसः सदा ।
तेषां हि तादृग्व्रतरक्षकं तदा दृष्ट्वेशमासीत् स्तुतिबुद्धिरित्यलम् ॥ ६३ ॥
विद्याप्रधानव्रत-शालिनीशे विद्याप्रदानाय धृतावतारे ।
स्वस्थैकसौख्यागमसस्पृहाणां विद्याधरीणामुचितं सुनृत्तम् ॥ ६४ ॥
अनङ्गदोऽयं शत्रूणामपि श्रीशो भवेदितः । किं पुनर्नः स्वराढ्यानामिति ता ननृतुर्मुदा ॥ ६५ ॥

मुमुचुरिति : १०.३.७.

ये वा सदा विहितसन्मननाः पुमांसो ये सत्प्रभा दिविषदो विलसद्विमानाः ।
तेषामयत्नसुलभे भगवत्स्वरूपे त्यक्त्वाऽन्यकर्म सुमनोर्पणमेव युक्तम् ॥ ६६ ॥

मन्दं मन्दमिति :

सागर त्वदुपदेशफलं तदद्वयं बहुजडस्थितपः स्मः । तत्तथा वद यथात्वमिवास्मिंस्तत्प्रिया वयमपि प्रभवामः ॥ ६७ ॥
भक्तत्राणविधावजस्र-मनुदासीनोऽहमद्याऽभवमेवं त्वां त्यजताऽच्युतेन जलधे व्यक्तीकृतः स्वाशयः ।
अब्दत्वं तदितः स्वनाम्नि सफलं कुर्वन्नहं चापि तत्सेवायां नितरां भवेयमनुदासीनश्च विष्णोः पदे ॥ ६८ ॥
जडजोद्धरणे प्रशस्तहस्तः सदयोऽसौ जडजातवृत्तयो हि ।
वयमस्य कृपापदं भवामो नियमेनेति जगुस्तदा मुदाऽब्दाः ॥ ६९ ॥
मद्वस्वायत्तवृत्तिर्यदसि घन ततो मद्वदत्यक्तवेलो वर्तस्वेत्युक्तिमब्धेस्तदुदितरवतस्तर्कयन्नम्बुवाहः ।
सन्मार्गस्थः सवियुद्वसुद इह मरुद्योगतः सञ्चरामि सूर्याद्युत्कृष्टतेजा इति स किमवदन्मन्दमन्दस्वरेण ॥ ७० ॥
भूयिष्ठप्रसरे भूमावधर्मे धर्मरक्षकः । प्रादुर्भवति लीलात्ततनुरीश इति स्फुटम् ॥ ७१ ॥
सोमसूर्यद्दशोरेका पुरा तेजस्विनी कृता । चक्रेऽन्यामुज्ज्वलीकर्तुमीशस्तद्वंश-संश्रयम् ॥ ७२ ॥
एकः सौरोऽपरश्चान्द्रो मार्गौ द्वावेव सम्मतौ । द्वयोर्वंशावलम्बेन प्रायः श्रीशेन बोधितम् ॥ ७३ ॥
क्रूराः क्रोड-नृसिंह-वामनमुखा लेखैककार्योन्मुखाः तत्तत्कार्यवशान्मया मलमुषो नैकेऽवतारा धृताः ।
सौम्यस्तेष्वयमेव मे वर इति श्रीशेन मन्ये तदा विश्रम्भाय सतां श्रितो ह्यविकलो लोकेषु सोमान्वयः ॥ ७४ ॥
अतिक्रूराः केचिन्नरहरिमुखाः केऽप्यतितरां प्रशान्ता हंसाद्या मम सदवताराः शतविधाः ।
अयं शत्रौ क्रूरो भवति सुजने सौम्यपदभागितीव त्वं शौरिः प्रकटमभवः सौम्य इति च ॥ ७५ ॥
मदीयावस्थानं प्रणव इति सद्वेदगदितं यदो रूपं चापि प्रणवमयमेवास्ति जगति ।
अतः स्थानभ्रंशो नहि तदवतारे प्रभवितेत्यदो ज्ञात्वा मन्ये प्रभुरजनि वंशे भुवि यदोः ॥ ७६ ॥
वसुदेव-सुखद-गोत्रोद्धरणं कार्यं मयेति चिन्तयता । यत्कं सुजन्मना तद्गोत्रोद्धारः कृतोऽत्र यदुपतिना ॥ ७७ ॥
मदर्थं यः क्लिष्टो भवति सततं प्रेष्ठमदनुग्रहस्याराद्पात्रं स भुवि भवितेति स्वनियमम् ।
स्फुटीकर्तुं लोके स्वजनमपि पातुं च कृपया कृपाब्धिर्देवक्यां प्रकटमभवत् क्लिष्टवपुषि ॥ ७८ ॥
वंशाद्यशीतकर - जन्मभुवीन्दिरेशो देशे स यामुनपदे विदधेऽवतारम् ।
यत्तस्य बीजमिदमेव विभाति तस्मिन् देशे स्वमूलपुरुषाऽऽगतवृत्तिमत्वम् ॥ ७९ ॥
मन्नामश्रावणासक्तेर्मद्दर्शनमदुर्लभम् । प्राबोधि बहुधा कृष्णः श्रावणस्योदयादिह ॥ ८० ॥
भोगतो जनवज्जन्म न मेऽनन्तपदस्थितेः । लीलया किमिति ज्ञप्त्यै प्रादुरासीन्नभोगतः ॥ ८१ ॥
अष्टम्यामुदितेनास्मिन्श्रीशेनेदमबोधि यत् । अष्टमीभूमिकैवेका नित्यानन्देष्टकारिणी ॥ ८२ ॥
कुलेन्द्रचन्द्रमङ्गलाग्रतः प्रचारणाग्रणीः सुरासुरैकपूज्यपादशोभिताग्रभागभूः ।
मदीयवंशविस्तृतिप्रधानहेतुरित्यसावजो बुधं निजोदयादलञ्चकार साधु तत् ॥ ८३ ॥

अनुद्दङ्कितमप्येतन्मूलेऽथापि प्रसङ्गतः । श्रीश-चित्र-चरित्रैक-प्रस्तावाद्विशदीकृतम् ॥ ८४ ॥ (कुलकम्)

निशीथ इति १०.३.८.

यो जागर्ति निशायां स पश्यतीशमिति श्रुतिम् । व्याख्यातुमखिलाधीशो निशायामुदितः किमु ॥ ८५ ॥

ये ये निशानाथकुलेऽवतीर्णाः सर्वेऽपि सौम्याः परिभाषया ते ।
नाहं तथेति प्रतिबोधनाय साक्षान्निशायामुदितः किमीशः ॥ ८६ ॥
वसत्येव गर्भक्रिया मध्यभागे प्रसूतिस्ततश्चेति वृत्तं विदन्तः ।
निशानाथवंशे निशामध्यतोऽभूदितीशोऽत्र युक्तं न के वा वदेयुः ॥ ८७ ॥
कृष्णाष्टमीनिशायां निशीथ एवोदयेन भवितव्यम् ।
जगति विधोरिति शास्त्रं रक्षन् प्रभुरपि तदैव स समुदिता ॥ ८८ ॥

निशीथादर्वाक् चेन्मदवतरणं तत्र भविता सुखोल्लासो राजद्-द्विजवरमुखो वेति विफलम् ।
तदूर्ध्वं चेत्सिद्धो भुवि मदवतारेण हि वनेत्यलं मन्वानस्तन्मति-रभवदीशोऽर्धगनिशि ॥ ८९ ॥
नास्माद्वृद्धाधिकारात्कथमपि जनकाज्जातकं स्यान्मदीयं तस्मात्संपाद्यमाद्यान्वयपुरुषकरस्पर्शतः सम्प्रतीति ।
आलोच्यैवाच्युतोऽसौ समजनि समये तादृशे एव यस्मिन्नागन्ताऽसौ लसद्गुरुर्भुवमिह सकलात्माब्धिवाराप्लुतश्च॥ ९० ॥

पुत्रजन्मर्क्षे एवात्मजन्मभाजेश्वरेण हि । आत्मा वै पुत्रनामासि श्रुत्यर्थोऽयं प्रकाशितः ॥ ९१ ॥
प्रजापतौ सृष्टिविधानचातुरी विभाति या सा ननु रोहिणीफलम् ।
भवेदितीशो यदुवंशविस्तृति विधित्सुरासीदुदयेन तत्स्थितः ॥ ९२ ॥

ज्येष्ठत्वेऽपि विभिन्नमातृकतया खेदोऽवशिष्टः पुरैवं स्वाग्रज-रामचेतसि कदाप्यायातु नेत्याशयात् ।
मन्येऽन्यासु षडक्षिसम्मित-महातारासु कारागृहे रोहिण्यामुदयं दयानिधिरयं स्वस्यापि चक्रेऽञ्जसा ॥ ९३ ॥
याः स्युः पूर्वजवल्लभाः सुमहिलास्ताश्चात्र सर्वा अपि सत्पुत्रा मम जन्मना भुवि यथा स्याद्वा न सापत्न्यकम् ।
रामे ज्येष्ठजनौ च तादृगधुना सत्कार्यमित्यच्युतो रोहिण्यां निशि चाविरास युगपत् सद्देवकीयोदरे ॥ ९४ ॥
यो मध्यमो बहुतमस्थितिरप्यजस्रं मद्रूपदर्शनसमुल्लसदुत्सवश्चेत् ।
प्राप्तोत्तमस्थितिमहं द्विजराजपूज्यं कर्ता तमित्यलमदर्शि निशार्धभागे ॥ ९५ ॥

आविरासीदिति :

अगर्भसम्बन्धकमेव जन्म व्यक्तीचकारेह निजं रमेशः ।
तद्बीजमात्मान्वयमुख्यधर्मस्वीकार इत्यध्वनि तादृगुक्त्या ॥ ९६ ॥
सस्याढ्या वसुधा जलं सुविमलं शान्ताार्चिषश्चाग्नयः पूतो वायुरनन्तकान्तिविलसत्तारं नभोमण्डलम् ।
इत्थं कृत्स्नसुभूत-शुद्धिरभवद् भावत्कलीलोद्भवप्राग्भूतक्षण एव तेन भगवन् जाताङ्गशुद्धिर्न किम् ॥ ९७ ॥

कृष्णप्रिया

भगवत्प्राकट्य के अवसर पर असुरों के द्रोह करनेवाले सब ही सत्पथवर्ती सज्जनों के मन उल्लासपूर्ण होकर खिल उठे थे, अजन्मा के जन्म काल के अधिक निकट आने पर आकाश में नगाड़े बजने लग गये ॥ ५ ॥ भगवान के प्राकट्य अवसर पर किन्नर और गन्धर्व गान करने लगे, सिद्ध और चारणगण स्तोत्रपाठ करने लगे और विद्याधर गण अप्सराओं के साथ हर्ष से नाच रहे थे ॥ ६ ॥ राजन् ! श्रीकृष्ण चन्द्रजी के प्राकट्य कालः—मुनि एवम् देवताओं ने प्रसन्नता के साथ सुमन पुष्पवृष्टि की एवं मेघों ने सागर के निकट मन्द मन्द गर्जना की ॥ ७ ॥ जब, जना—अविद्या को दूर करनेवाले भगवान् जनार्दन प्रकट हो रहे थे तब तमः अंधकार नष्ट हो चुका था उस अर्धरात्र के समय विष्णु स्वरूप धारण करने वाली श्रीदेवकी में सर्वान्तर्यामी पुरुषोत्तम भगवान् विष्णु का पूर्व दिशा में पूर्ण चन्द्र की भाँति प्रादुर्भाव हुआ ॥ ८½ ॥

श्रीशुक उवाच

तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं [1]शङ्खगदाद्युदायुधम् ।
श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीताम्बरं सान्द्रपयोदसौभगम् ॥ ९ ॥
[2]महार्हवैडूर्यकिरीटकुण्डलत्विषा परिष्वक्तसहस्रकुन्तलम् ।
उद्दामकाञ्च्यङ्गदकङ्कणादिभिर्विरोचमानं वसुदेव ऐक्षत ॥१०॥
स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुन्दुभिस्तदा ।
कृष्णावतारोत्सवसम्भ्रमोऽस्पृशन् मुदा द्विजेभ्योऽयुतमाप्लुतो गवाम् ॥११॥
अथैनमस्तौदवधार्य पूरुषं परं नताङ्गः कृतधीः कृताञ्जलिः ।
स्वरोचिषा भारत सूतिकागृहं विरोचयन्तं गतभीः प्रभाववित् ॥१२॥

कर्दमक्षमा

अन्वयः—अद्भुतम् बालकम् अम्बुजेक्षणम् चतुर्भुजम् शंखगदाद्युदायुधम् श्रीवत्सलक्ष्मम् गलशोभिकौस्तुभम् पीताम्बरं सान्द्रपयोदसौभगम् ॥९॥ महार्हवैडूर्यकिरीटकुण्डलत्विषा परिष्वक्तसहस्रकुन्तलम् उद्दामकाञ्च्यङ्गदकंकणादिभिः विरोचमानम् (तम् बालकम्) वसुदेवः ऐक्षत ॥ १० ॥ तदा विस्मयोत्फुल्लविलोचनः सः आनकदुन्दुभिः हरिम् सुतम् विलोक्य कृष्णावतारोत्सवसम्भ्रमः मुदा आप्लुतः द्विजेभ्यः गवाम् अयुतम् अस्पृशत् ॥ ११ ॥ अथ भारत स्वरोचिषा सूतिकागृहं विरोचयन्तम् एनं परं पुरुषम् अवधार्य प्रभाववित् गतभीः कृतधीः नताङ्गः कृताञ्जलिः (सन्) अस्तौत् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तमद्भूतं बालकं वसुदेव ऐक्षतेति द्वितीयश्लोकेनान्वयः। अद्भूतत्वे हेतुगर्भाणि विशेषणान्यंबुजेक्षणमित्यादीनि। श्रीवत्सलक्ष्मं श्रीवत्सलक्ष्माणम्। गलेन शोभत इति गलशोभी स कौस्तुभो यस्मिन् ॥ ९ ॥ परिष्वक्तसहस्रकुंतलं किरीटकुंडलादीना त्विषा स्फुरदपरिमितकेशमित्यर्थः ॥ १० ॥ विस्मयेनोत्फुल्ले विकसिते लोचने यस्य सः गवामयुतमस्पृशन् मनसा दत्तवान् कंसनिगृहीतस्य दानासंभवात्। स्पृष्टौ हेतुः कृष्णावतारेति। मुदा आप्लुतो व्याप्तः स्नात इति वा ॥११॥ कृतधीः शुद्धबुद्धिः ॥१२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उदिति झटिति कंसादिहिंसनक्षपणाय। उद्यतान्यायुधानि यस्य तं तथा। आयुधक्रमश्च गौतमीये "दक्षस्योदूर्ध्वे स्मरेच्चक्रं गदां च तदधः करे। वामस्योदूर्ध्वे शार्ङ्गधनुः शंखं च तदधः स्मरेत्" ॥ इति "शंखचक्रगदापद्मश्रिया जुष्टम्" इति वक्ष्यमाणानुसारेण शार्ङ्गस्थाने पद्मं ज्ञेयं तत्र शार्ङ्गपदोपादानमुपासनाविशेषार्थमेवेति ध्येयम्। श्रीवत्सं लक्ष्म चिह्नं यस्य स तथा तम्। अत्र समासांतो डः। 'चिह्नं लक्ष्मं च लक्षणम्' इत्यमरः। "दक्षिणावर्त्तरोमालिः श्रीवत्सं दक्षभागगम्। वक्षसि भृगुपादांकं कैश्चिच्छ्रीवत्समुच्यते ॥ वत्सं नाम उरः प्रोक्तं श्री रमा प्रोच्यते मुने। श्रिया युक्तं तु यदुरस्तच्छ्रीवत्समुदाहृतम्" इत्यादिपुराणीयवृंदावनमाहात्म्ये। ननु सर्वादिकारणहिरण्यगर्भस्य जनके श्रीभगवति कथं बालक इति प्रयुक्तमिति चेन्नहि स्तनंधयवाच्ययं प्रयुक्तोऽपि तु स्वयं भगवदर्थक एव तथा हि—बालः को ब्रह्मास्येति बालकः। "यो ब्रह्माणं विदधाति पूर्वम्" इति श्रुतेः। बालानां गोपानां कं सुखं येनेति वा। बालानामज्ञानामपि कं सुखं यन्नामोच्चारणादिनेति "अज्ञानादपि यन्नाम स्मृतं सर्वार्थसाधकम्" इति स्मृतेः। बालेषु रोमसु कानि ब्रह्मांडानि यस्येति वा। "ईदृग्विधाविगणितांडपराण्डचर्यावाताध्वरोमविवरस्य च ते महित्वम्" इति वक्ष्यति ब्रह्मा। बालयति चालयति वातादीनिति वा। "यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात्" इति। "भीषास्माद्वातः पवते" इत्यादिश्रुतेश्च। यद्वा—बलानां सेनानां समूहो बालं रावणादिसैन्यं तदालयति वारयति नाशयतीति यावत् बालो लक्ष्मणस्तेन कं सुखं रामावतारे यस्येति वा "बालोऽज्ञे लक्ष्मणे शिशौ" इति धरणिः। स एव बालकः। बालान् कृन्तति छिनत्ति रुक्मिण इति वा "चैलेन बद्ध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन् विरूपयन्" इत्युक्तेः। के प्रलयजले बालो वटपत्रपुटशायीति वा। राजदंतादित्वात्परनिपातः। बालानां

श्रीकृष्णजन्माङ्गम् ।



---

[1] गदायुदा-श्रीधर. वंशी. मक्त. ; धृदायुधम्-गिरि. । [2] वैडूर्य-श्रीधर. वंशी. विज. जीव. गिरि मक्त. ।

मेध्यानां कं शिरो मुख्यमिति यावत्। 'पवित्राणां पवित्रं यः' इति स्मृतेः। 'अलंकारांतरे मेध्ये बालो रोमणि' इति विश्वः। वा वक्रा अलका केशा यस्येति वा 'वो वक्रे हिंसके वरे' इति धरणिः। बायां नर्मदायां लिनाति श्लिष्यतीति बालः शिवः 'नर्मदायां सदाशिवः' इति पुराणात्। 'वा स्यान्नर्मदा नदी' इति सौभरिः। तेन कायते स्तूयते इति बालकः। सर्वत्र डप्रत्ययः। बालान् कारयति स्वभक्तविरोधिस्त्रीणां केशान् विक्षेपयतीति वा "केशान्विकीर्य पदयोः पतिताश्रुमुख्यः" इत्युक्तेः। बान् बालान् लाकयत्यास्वादयति स्वभोजनमिति वा बालकः। 'लक—आस्वादनोपार्जनयोः'। किमनंतमहिम्नोऽल्पार्थैरित्यलम्। सांद्रपयोदः अंदति प्लुतधृतं बध्नातीत्यंद्रं जलं तेन सह वर्त्तत इति सांद्रः स चासौ पयोदश्चेति तथा। सजलमेघस्तद्वत्सौभगं सुंदरम् 'सांद्रं वने घने मृदौ' इति मेदिनी। काठिन्ये संहतौ च घनः॥ ९॥ महार्हमनर्घं यद्वैदूर्यं नीलपीतरक्तच्छविरत्नं तद्युते किरीटकुंडले तत्त्विषा तद्भास्वत एवोद्भूतानि सा। इत्यर्थ इति तात्पर्यम्। "कुंतलश्चषके बाले जवे पुंभूम्नि नीवृति" इति मेदिनी। उद्दामानि स्वतंत्राणि यानि कांच्यंगदकंकणादीनि तैः। "उद्दामो बंधरहिते स्वतंत्रे च प्रचेतसि" इति मेदिनी। कांची मेखला "कांची स्यान्मेखलादाम्नि प्रभेदे नगरस्य च" इति मेदिनी। अंगदं केयूरम् "अंगदः कपिभेदे ना केयूरे तु नपुंसकम्" इति च। "कंकणं करभूषणम्, कंकणं करभूषायां सूत्रमंडनयोरपि" इति च। आदिनांगुलीयकादयो ज्ञेयाः॥ १०॥ स्पृष्टौ दाने 'विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्" इत्यमरात्स्पृशिर्दानेपि। सामान्यबालस्यापि जन्मनि पिता दानाद्युत्सवं करोति मम तु श्रीकृष्णः साक्षात्परब्रह्मैव पुत्रो जातः संप्रत्यहं कमुत्सवं करोमीति प्राप्तसंभ्रमः प्रसिद्धार्थमाह—स्नात इति। 'आप्लुतः स्नातके स्नातः' इति मेदिनी। विस्मयैरुत्फुल्ले सुप्रकाशे विलोचने यस्य स तथा विस्मयानाह—अहो मुनींद्राणामपि दुर्लभदर्शनो मम पुत्रत्वेन दृश्यो बभूवेति हेतोर्विस्मयः प्रथमः। सर्वव्यापकं परं ब्रह्मापि मानुषगर्भादजनिष्टेति द्वितीयः। विविधाम्बरभूषणविशिष्ट एवं गर्भान्निष्क्रांत इति तृतीयः। साक्षान्महाभयस्यापि भीषण आदिपुरुषो भगवानपि मां कंसभीतं पितृत्वेनांगीचक्र इति चतुर्थ इत्येवमनंता एव विस्मयास्तस्यासन्निति। 'विस्मयोद्भुतमाश्चर्यम्' इत्यमरः॥ ११॥ गतभीर्निर्भयः। तत्र हेतुः—प्रभावविदिति। ईशोयमनंतोऽयं सर्वान्तकर इत्याद्यैश्वर्यज्ञानवान्॥ १२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तमिति युग्मकम् बालकं मृदुस्वल्पाकारतया बालकत्वेनैव प्रतीयमानं शङ्खादीनि उदिति झटिति कंसादिहिंसनज्ञापनाय उद्यतानि उत्कृष्टानि वा आयुधानि यस्य तम् आयुधक्रमश्चोक्तो गौतमीये बृहद्गौतमीये चैतद्ध्यानकमन्त्रविशेषप्रसङ्गे 'दक्षस्योर्ध्वे स्मरेच्चक्रं गदां च तदधः करे। वामस्योद्र्ध्वे शार्ङ्गधनुः शङ्खं च तदधः स्मरेत्" इति किन्तु शङ्खचक्रगदापद्मश्रिया जुष्टं चतुर्भुजमिति वक्ष्यमाणानुसारेणात्र शार्ङ्गस्थाने पद्मं ज्ञेयं तत्र तु शार्ङ्गोपदेश उपासनाविशेषार्थमेव भगवति तु सर्वदा सर्वसमावेशान्नासम्भावितमिति सान्द्रपयोदादपि सौभगं वर्णसौन्दर्यं यस्य तं महार्हं तत्रत्यरत्नेष्वपि परमोत्कृष्टं यद्वैदूर्यं बालवायजाख्यं नीलपीतरक्तच्छविरत्नं तद्विद्यते मध्ये महिष्ठतया यस्मिन् तादृशस्य किरीटस्य त्विषोर्द्ध्वं कुण्डलयोस्त्विषात्वधः किर्मीरितबहुलकुन्तलमित्यर्थः। यद्वा त्विषेति टाबन्तं हलन्ताद्वेति विधानात् दिशादिवत् ततश्च महावैदूर्यमिव किरीटकुण्डलत्विषा परिष्वक्तं सहस्रकुन्तलं यस्य तं तद्भानाच्छादितया शोभमानकुन्तलवृन्दमित्यर्थः। किरीटं त्रिकोणं पत्रावलिरूपं मुकुटं तु समस्तकचावरकमिति भेदः। उद्दामभिः तेजसात्युद्भटैः काञ्च्यादिभिः कृत्वा विशेषतो रोचमानम् यद्वा तैरुपलक्षितं स्वयमेव विरोचमानं किन्तु स्वरूपलावण्यादिलब्धधामभिरेव तैः स्वयमसौ प्रतिभूषितो भवतीति भावः। अत एव घनतमस्यपि तादृशमैक्षत वक्ष्यते च स्वरोचिषेति अत्र गौतमीये यद्गरुडोपरि निविष्टत्वमष्टमहिषीसमावृतत्वं ब्रह्मशिवादिभिः स्तूयमानत्वं चोक्तं तन्नोक्तं पितृभ्यामदृष्टत्वादिति ज्ञेयम्॥ ९-१०॥ सः परमभाग्यवान् हरिं कंसादीनां सर्वज्ञानहरं भगवन्तं सुतं पुत्रतां प्राप्तं विलोक्य साक्षाद्दृष्ट्वा विस्मयेन विकसितलोचनः सन् तदा तत्क्षणमेव अस्पृशत् अस्पर्शयत् दानाय सङ्कल्पमकरोत्। ननु, कंसेन पीडितस्य हृतसर्वस्वस्य बद्धस्य सङ्कल्पोऽपि कथं घटेत? कथं वा स्नानं विनैव दानं? तत्राह—कृष्णेति, कृष्णप्रादुर्भावस्वभावेन य उत्सव उल्लासस्तेन सम्भ्रमो मनस्त्वरा यस्य सः ततो विचारमपि न कृतवानिति भावः। ततश्च मुदा व्याप्तो बभूव क्षणं मुग्ध इवासीदित्यर्थः। यद्वा मुदा हर्षपूर्वकं स्नातः सन् कृष्णेत्यादिलक्षणो भूत्वाऽस्पृशदिति॥ ११॥ अथानन्तरं सद्य एवेत्यर्थः। पुरुषं परमेश्वरं तत्रापि परं परिपूर्णतयाऽवतीर्णम् अवधार्य निश्चयेन ज्ञात्वा अत्र हेतुः कृतधीः तत्र न्यस्तचित्त इति ततश्च नतानि कृतप्रणामानि अङ्गानि भुजादीनि यस्य सः साष्टाङ्गं प्रणम्येत्यर्थः। यद्वा अवनतशिराः सन् अवधारणे हेत्वन्तरमप्याह-स्वीयेन असाधारणेन मनोनयनाह्लादकेन मिलितार्केन्दुकोटितुल्येनापि रोचिषा तमोव्याप्तं सूतिकागृहमेव न तु तद्बाह्यं विशेषेण रोचयन्तं प्रकाशयन्तम् एवमेकस्यैव युगपन्निजतेजसः कश्चिद्विस्तारणेन कश्चिच्च संवरणेन पारमैश्वर्यशक्तिर्द्योतिता कीदृशः समस्तौत्, तत्राह गतभीः अपगतकंसभयः सन्। ननु, स्तवशब्दं कंसप्राहरिकाः श्रोष्यन्तीति भयहेतुस्तवस्त्येति तत्राह, प्रभावं तदैश्वर्यं वेत्तीति तथा सः किं करिष्यन्त्येते वराकाः सोऽपि वेति भावयित्वेति भावः। भारत! हे भरतवंश्येति श्रीवसुदेवभाग्यतरेण प्रीत्या सम्बोधयति श्लेषेण भाः श्रीकृष्णस्य तादृशी कान्तिः हेतुगर्भत एव तस्यां रतेति॥ १२॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

बालकं मृदु-स्वल्पाकारतया बालकत्वेनैव प्रतीयमानम्। शङ्खादीनि 'उत्' उद्यतान्युत्कृष्टानि वायुधानि यस्य तम्, सान्द्रपयोदादपि सौभगं वर्णसौन्दर्य्यं यस्य तम्। महार्हं बहुमूल्यं यद्वैदूर्य्यं बाल-वायजात्थ्यं रत्नं तस्य किरीटं कुण्डले च तेषाम्। यद्वा, महार्हं वैदूर्य्यं येषु तेषां किरीटादीनामुपरि किरीटस्याधश्च कुण्डलयोस्त्वियोद्दामभिस्तेजसात्युद्भटैः काञ्च्यादिभिः कृत्वा विशेषतो रोचमानम्। यद्वा, तैर्विशिष्टं स्वत एव विरोचमान[1] मत एव घनतमस्यपि तादृशमैक्षत ॥ ९-१० ॥

स च परमभाग्यवान्। हरिं कंसादीनां सर्व्वज्ञानहरं रूपादिना मनोहरं वा भगवन्तं सुतं पुत्रतां प्राप्तं विलोक्य साक्षाद्दृष्ट्वा विस्मयेनाश्चर्य्येण विकसितविलोचनः सन् तदा तत्क्षण एवास्पृशदस्पर्शयद् दानसंकल्पमकरोत्। ननु कंसेन पीडितस्य हृतसर्व्वस्वस्य बद्धस्य संकल्पोऽपि कथं घटेत ? तत्राह—कृष्णेति। ननु तथापि कतिचिदेवाल्पतराः संकल्पन्ताम् ? यद्वा, ननु स्नानानन्तरमेव संकल्पो युज्यते ? तत्राह—मुदाप्लुतो व्याप्त इति। यद्वा, आप्लुतः स्नातस्ततो मुदेति गोस्पर्शने कृष्णेति च विस्मये हेतुः ॥ ११ ॥

अथानन्तरं सद्य एवेत्यर्थः। परं पुरुषं परमेश्वरम्, किंवा परं परिपूर्णतयावतीर्णं पुरुषं श्रीभगवन्तमवधार्य्य निश्चयेन ज्ञात्वा। नतानि कृतप्रणामान्यंगानि भुजादीनि यस्य सः, साष्टागं प्रणम्येत्यर्थः। यद्वा, अवनतशिराः सन् कृतधीः श्रीभगवति न्यस्तचित्तो विनीतो वा। अवधार्य्येत्यत्र हेतुः—स्वकीयेनासाधारणेन मनोनयनाह्लादकेन मिलितार्केन्दुकोटितुल्येनापि रोचिषा तमोव्याप्तं सूतिकागृहमेव, न तु तद्वाह्यं विशेषेण रोचयन्तं प्रकाशयन्तम्,—एकस्यैव युगपन्निजतेजसः क्वचिद्विस्तारणे क्वचिच्च सम्वरणे परमेश्वरशक्तिं विनान्यथानुपपत्तेः। अतो गतभीरपगत-कंसभयः; यतः प्रभावं तदैश्वर्य्यं वेत्तीति तथा सः, यद्वा, तादृशैश्वर्य्यदर्शनेनापि गतभीः साध्वसाकुण्ठितचित्तः, यतो भक्तवात्सल्यादि तन्माहात्म्यवित्। भारत ! हे भरतवंश्येति श्रीवसुदेव-भाग्यभरेण प्रीत्या सम्बोधयति, श्लेषेण भाः श्रीकृष्णभक्त्या कान्तिः[2] रताः यस्मिन्निति ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आप्लुतः स्नातः स्पृशतः अदात् दत्तवान् ॥ ११ ॥ अस्तौत् स्तुतवान् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तमवतीर्णं भगवन्तं वसुदेव ऐक्षत अपश्यदित्यन्वयः। कथंभूतम् ? अद्भुतमदृष्टरूपत्वादाश्चर्यविषयम् अम्बुजे इवेक्षणे नेत्रे यस्य चत्वारो भुजा यस्य शङ्खादीन्युद्धृतान्यायुधानि यस्य आदिशब्देन चक्रपद्मसंग्रहः श्रीवत्सं लक्ष्म चिह्नं यस्य आर्षत्वाट्टिलोपः यद्वा श्रीवत्समेव लक्ष्म तदस्याऽस्तीति श्रीवत्सलक्ष्मः अर्शं आदित्वान्मत्वर्थीयेऽचि 'नस्तद्धिते" (६।४।१४४) इति टिलोपः श्रियां लक्ष्म्यां वत्सला सापत्न्यदोषनिवृत्त्याऽनुकूला क्ष्मा भूमिर्यस्येति व्याख्यानान्तरं गले कण्ठे शोभि शोभावान् कौस्तुभो यस्य पीतमम्बरं यस्य सान्द्रनीलाम्बुदस्येव सौभगं सौन्दर्यं वर्णं इति यावत् यस्य तथाभूतं यस्य महार्हाण्यनर्घाणि वैडूर्यादिरत्नानि यस्मिंस्तस्य किरीटस्य कुण्डलयोश्च त्विषा कान्त्या परिष्वक्ताः अनुविद्धाः सहस्रकुन्तलाः यस्य उद्दामैः श्लाघ्यैः काञ्च्यादिभिर्विरोचमानम् ॥ ९-१० ॥ स वसुदेवस्तं हरिं सुतं पुत्रभूतं विलोक्य विस्मयेनोत्फुल्ले विकसिते लोचने यस्य कृष्णावताररूपादुत्सवात् संभ्रमो यस्य तथाभूतः तथैवाप्लुतः स्नातः द्विजेभ्यो गवामयुतमस्पृशत् दातुं सङ्कल्पितवान् इत्यर्थः। तदा कंसनिगृहीतस्य दानासम्भवात् ॥ ११ ॥ अथ हे भारत ! स्वरोचिषा सूतिकागृहं विरोचयन्तम् एवं कुमारं परमपुरुषम् अवधार्य निश्चित्य नतं प्रणतमङ्गं यस्य कृतो बद्धोऽञ्जलिर्येन कृता समाहिता धीर्येन गता भीः कंसजा यस्य तथाभूतो वसुदेवः तस्य भगवतः प्रभावं जनान् अस्तौत् तुष्टाव ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

शङ्खगदे आदी येषां तानि शङ्खगदादीनि तानि चोत्कृष्टानि चायुधानि यस्य स तथा तं श्रीवत्सलक्ष्मं श्रीवत्सलाञ्छनं सान्द्रपयोदसौभगं सान्द्रपयोदस्य जलपूर्णमेघस्येव सौभगं कान्तिविशेषो यस्य स तथा तम् ॥ ९ ॥ महार्हाणि अनर्घाणि वैदूर्यमयकिरीटकुण्डलानि महार्हवैदूर्यकिरीटकुण्डलानि तेषां त्विषा शोभया किरीटं च कुण्डले च किरीटकुण्डलानि परिष्वक्ता आलीढाः सहस्रकुन्तला यस्य स तथा ॥ १० ॥ अस्पृशत् दास्यामीति मनसा संक्लिप्तवान् मुदा आप्लुतः ॥ ११ ॥ कृतधीः शिक्षितबुद्धिः पण्डित इत्यर्थः गतभीत्वे निमित्तं प्रभावविदिति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तमद्भुतमिति परिच्छेदानामपि तत्स्वरूपभूतत्वे लिङ्गमिदं तत्सहितानामेवाविर्भावात् परिष्वक्तेति किर्मीरितानेककेशमित्यर्थः ॥ ९-१० ॥ सुतं हरिं विलोक्येति अवतारसामान्यज्ञानं तत्र कृष्णेति मुनीन्द्रवाक्यं तत्स्वभावं बत एवात्यन्तोल्लासज-

---

[1] रोचमान-(ग, घ)। [2] श्रीकृष्णकान्तिः (ग, घ, ङ);।

चेतस्त्वराबोधनाय ततो विशेषज्ञानाय ततो विशेषज्ञानमाह ॥ ११ ॥ परं पुरुषं श्रीकृष्णाख्यं स्वयं भगवन्तमेव निश्चित्य तत्र हेतुः कृतधीर्न्यस्तचित्तः तथैवाह ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

आविर्भावमाह—तमद्भुतमित्यादि द्वाभ्याम्। प्रमाणगतस्थूलत्वेन बालवत् प्रतीयमानम्, न तु वास्तवं बालकम्, अतएवाद्भुतम्। अथवा बलत इति बालः, बालं निविडं कं सुखमानन्दं सान्द्रानन्दमिति यावत्। पयोदस्यापि सौभगं यस्मात्—तद्वर्णोपमानभाग्यात्, न तु पयोदस्येव वर्णो यस्य, सौभगशब्दोपानाद्वर्णस्यालौकिकत्वम्। अथवा, वसुदेवस्तं बालकं श्रीकृष्णं शङ्खगदायुदायुधं चतुर्भुजं ददर्श इत्यद्भुतम्। अथवा बालकञ्च चतुर्भुजञ्च ददर्शेत्यर्थः। श्रीकृष्णस्वरूपं नित्यकैशोरमेव, द्विभुजमेव तथाप्यसौ पूर्वपूर्वाराधनसंस्काराच्च चतुर्भुजं पुत्रो मेऽधुना बभूवायमिति बालकमेव ददर्शेत्यद्भुतत्वं वसुदेव एवादौ ददर्श। देवकी तु तत्तेजसा धर्षितनेत्रा हर्षेण विवशा च 'किमयं द्विभुजश्चतुर्भुजो वा' इति न ज्ञातवतीत्यायातम् ॥ ९–१२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तमद्भुतमित्यादि। प्रमाणगतस्तोकत्वेन बालकवत् प्रतीयमानम्, न तु बालकमित्यद्भुतशब्दार्थः। यद्वा, बलते इति बालः, बालं बलमानं कं सुखं यस्य सान्द्रानन्दम्। पयोदस्य सौभगं यस्मात्तदुपमायोग्यत्वात्, न तु पयोदवर्णम्, वर्णस्तु प्राकृतः, तस्य तु सच्चिदानन्दरूपं पयोदसौभगं धाम ॥ ९-१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तमद्भुतं बालकं वसुदेव ऐक्षतेति द्वितीयेनान्वयः। अद्भुतत्वहेतुगर्भाणि विशेषणानि अम्बुजेक्षणमित्यादीनि वैडूर्य्यं नीलपीतरक्तच्छविरत्नं तद्युक्तं किरीटं त्रिकोणपत्रावलिरूपम् ॥ ९–१० ॥ स विस्मयेत्यहो महामुक्तमुनीन्द्राणामपि दुर्लभदर्शनः परमेश्वरो मम पुनरविद्या बद्धजीवस्याविद्याबद्धजीवेन कंसेनापि बहिरपि बद्धस्य गृहेऽवतीर्य दृश्यो बभूवेत्येको विस्मयः सर्वव्यापकं परं ब्रह्मापि मानुषगर्भादजनिष्टेति द्वितीयः विविधाङ्गकटककुण्डलकिरीटाद्यलङ्कारविशिष्ट एव बालको गर्भान्निष्क्रान्त इति तृतीयः साक्षान्महाभयस्यापि भीषण आदिपुरुषो भगवानपि कंसभयभीतं मां स्वपितृत्वेनाङ्गीचक्रे इति चतुर्थः इत्येवमनन्ता एव विस्मयास्तस्याभूवन्निति भावः। हरिं सुतं विलोक्येति तस्मिन् स्वेष्टदेवत्वपुत्रत्वयोर्भावना यौगपद्येनैव तस्याभूदिति भावः। कृष्णावतारेत्यहो सामान्यबालकस्यापि जन्मनि पिता दानध्यानाद्युत्सवं करोति एव पुत्रत्वेनावतीर्णः सम्प्रत्यहं कमुत्सवं करोमीति प्राप्तसम्भ्रमः मुदा आप्लुतः आनन्दसमुद्रेण निमज्जितः सन्नस्पृशत् मनसा ददौ "विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्" इत्यभिधानात् स्पृशि दानार्थकोऽपि ज्ञेयः ॥ ११ ॥ कृतधीस्तस्मिन्नेव यौगपद्येन कृतैश्वर्यवात्सल्यबुद्धिः गतभीः प्रभावविदिति हन्तहन्तास्मिन्नप्यङ्गे कंसः सहसाऽऽगत्यास्त्रं प्रयोक्ष्यते इति पुत्रबुद्ध्या यद्भयमुद्बभूव तदैश्वर्य्यबुद्ध्या प्रभावज्ञानेन गतमित्यर्थः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ तं परममङ्गलं स्वासाधारणाभरणवस्त्रायुधयुतमद्भुतं सर्वाश्चर्यमयं वसुदेव ऐक्षतेति द्वयोरन्वयः। गलेन शोभते गलशोभि कौस्तुभो यस्मिन् ॥ ९ ॥ महानपरिमितः अर्हो मूल्यं येषान्तेषाम्महार्हाणां किरीटादीनां त्विषा कान्त्या परिष्वक्ता आलिङ्गिताः सहस्रपरिमिताः कुन्तलाः "हिरण्यकेशः" इति भगवत्या श्रुत्या प्रदर्शिताः केशाः यस्य तम् ॥ १० ॥ स श्रीवसुदेवः हरिं सुतं विलोक्य मुदाऽऽप्लुतः गोदानं कर्तुं स्नातः यद्वा मुदा आप्लुतः हर्षजलेनैव स्नातवान् कृष्णावतारे य उत्सवः कुतूहलस्तेन सम्भ्रमः किं मया पुण्यं कृतं कोऽस्मि यः सर्वेश्वरेणैवमादृत इत्येवं रूपो यस्य गवामयुतं द्विजेभ्य अस्पृशत् मनसा द्विजानुद्दिश्य दत्तवानित्यर्थः ॥ ११ ॥ अथानन्तरमेनं शास्त्रार्थभूतं भगवन्तम् आनकदुन्दुभिः आस्तौत्—

"योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चोरेणात्मापहारिणा" ॥

इत्यन्यथा स्तुतौ दोषपरिहाराय कृतधीः कृता भगवत्स्वरूपगुणादियाथात्म्योऽर्पिता धीर्येन सः परं पुरुषमवधार्य अत एव नताङ्गः कृतप्रणामः ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

बालकं तद्विद्यमानं बालः को ब्रह्मा यस्य तमित्यान्तरङ्गिको भावः। बाल एव कृष्णकेश एव बालक इति भावोऽपि विभावनीयः। चिकुरः कुन्तलो बालः। बालः कचे शिशौ। कचः केशः शिरोरुह इति सोपयुक्तयुक्तामरविश्वामराः। अम्बुजेक्षणं कमललोचनं रमासमायुक्तनेत्रं वा। अम्बुजे चन्द्रमसीक्षणं। अम्बुजश्चन्द्रमा ईक्षणो यस्येति वा। शिशिरत्वकुलगुरुत्वाभ्यां सति शीतांशुमहः। चत्वारो भुजास्तत्काले प्रदर्शिता येन स तं। अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधमित्यादेश्चतुर्भिः प्रकारैर्भुङ्क्ते भक्तमित्यप्यर्थः। शङ्खगदायुधं शङ्खश्च गदा च शङ्खगदे ते उद्धृते आयुधे

नन्दकचक्रके यस्य स तं । श्रीवत्सलक्ष्मगलशोभिकौस्तुभमिति पदमेकम् । श्रीवत्सो लक्ष्म चिह्नं यस्य तदसाधारण्यद्योतको बिन्दुः शोभाऽस्यास्तीति शोभि शिखादिः शोभत इति शोभी वा गलेन शोभी कौस्तुभो मणिर्यस्य तं । चिह्नं लक्ष्म च लक्षणमित्यमरः । पीतमम्बरं वस्त्रं यस्य तं । सान्द्रशब्देन जलपूर्णता द्योत्यते । सान्द्रा जलपूर्णाः पयोदा मेघास्तेषां सौभगं कान्तिविशेषो यस्य तम् ॥ ९ ॥ महानर्हो मूल्यं येषां तानि वैदूर्याणि गतं । तेषां किरीटः कुण्डले च कर्णवेष्टने च तेषां त्विट् कान्तिस्तस्या परिष्वक्ताः परितः सम्बद्धाः सहस्रं कुन्तला यस्य तं । त्विषेति टाबन्ततापक्षे पदमेकम् । त्विषाभिरिति विग्रहभूमिकं च भवतीति कश्चन लाभस्तत्रेति ज्ञेयम् । उद्दामानि काञ्च्यङ्गदकङ्कणान्यादयो येषां तैराभरणैर्विरोचमानं तं वसुदेव ऐक्षतेति श्लोकद्विकान्वयः । पुंस्यादिः पूर्वपौरस्त्येत्यमरः ॥ १० ॥ विस्मयोत्फुल्ललोचने यस्य स हरिं सुतं विलोक्य कृष्णावतारोत्सवसम्भ्रमः कृष्णस्यावतारजनितो योऽयमुत्सवस्तत्र सम्भ्रम आदरो यस्य सः । स आनकदुन्दुभिस्तदा आप्लुतः । स्नात इत्यनुक्त्वोक्त्वाऽऽप्लुत इति जलोत्प्लवनं सम्प्रदायायातमिति ध्वनयति । मुदा गवामयुतं । द्विजेभ्योऽस्पृशन्मनसा ददौ । स्पर्शनोतेनामते ? स्पर्शदानयोः स्पर्शनं मतमिति विश्वः । मुदा आप्लुत इति वा । कृष्णायां भूमौ योऽवतारस्तन्निमित्तो य उत्सवस्तत्र सम्भ्रमो यस्य स इत्यत्र दृश्यते । एतेनाधुनाऽजातकर्माऽपि न जातं कथं जातस्य कृष्णेति नामेति पराकृतेति वदन्तो यत्कृष्णं तदन्नस्य रक्तोऽग्निरुदकं शुक्लं कृष्णैव पृथिवी स्वत इत्यादेर्हरिमितीरणतदवतारेत्येतावता पूर्तेः कृष्णेत्यवक्तव्यमिति युक्तिमुपन्यस्यातुतुषन्निति ज्ञेयम् । सुरभीणासुरभीतितस्तदानीं दानासम्भवाद्गवामयुतमुद्दिश्य गवां सङ्कल्पवचसां प्रातिस्विकेनायुतमस्पृशद्दावित्यन्वयेन मनसेत्यध्याहार इति वदन्ति ॥ ११ ॥ अथ पूः दानवभाररूपं पूरणं पुरारुड्वा यस्य तं । पूः पूजने समाख्याता पूरण इति विश्वः । तदवताराय कृतावतार इति भूभारभूतभूपकोपो विहित इति भावः । नताङ्गो नतान्यङ्गान्यष्टौ येन यस्य स वा नताङ्गः कृतधीः शिक्षितप्रेक्षः कृताञ्जलिः स्वरोचिषा सूतिकागृहं विरोचयन्तं परं श्रीहरिमवधार्य परं पुरुषं परमपुरुषमवधार्य वा निश्चित्यैनं भगवन्तमवधारणकर्मीभूततयोपात्तं पुनः स्तुतिकर्मत्वेनाप्युपादानात् । इदमोन्वादेशे द्वितीया टौस्त्वेन इति एनादेशः । गता भीर्भीतिर्यस्य स सन्नस्तौत्तुष्टाव । ननु हिंसककंसकंसकिङ्कराणामसतां सतां कथं स्तवनावसरो गतभीतिश्चायमित्यत आह ॥ प्रभावविदिति । आगताश्चेदवगत्य हन्यादेव देवो न समयोऽयं चेत्तान्मोहयेदिति तत्सामर्थ्यं वेत्तीति स तथा । तर्हि साकल्येनास्तौत्किमित्यतोऽप्याह ॥ प्रभाविति । प्रभौ भगवद्विषयेऽविदज्ञ एव । अथाथाप्यस्तौदिति व्याचक्षते । गतभीःप्रभावविदिति पदमेकं वा । गता प्राप्ता वातादीन् भीर्यस्मात्स गतभीः । भीषाऽस्मास्माद्वात इत्यादेः । गतभीरिति प्रभावो माहात्म्यं तं वेत्तीति स तथेति च विवृण्वन्ति । तन्निकाशे का शङ्केति भावः ॥ १२ ॥

श्रीसुबोधिनी

एवं भगवतः प्रादुर्भावमैश्वर्येण निरूप्य वीर्यनिरूपणार्थं भगवन्तमनुवर्णयति तमद्भुतमिति द्वाभ्याम् ।

अत्र निर्वृताः सर्वे श्रोतारो बहिःसंवेदनरहिता जाता इति ज्ञापयितुं पुनः शुकोक्तिकथनम् ।

दशलीलानिरूप्योयं पुरुषो द्वादशात्मकः । द्विगुणो भगवानत्र प्रादुर्भूत इतीर्यते ॥ १ ॥
सर्वेषां प्राणरूपश्च ऐहिकः पारलौकिकः । ज्ञानक्रियोभययुतो दशलीलाप्रवर्तकः ॥ २ ॥
सगुणां नवधाभक्तिं निर्गुणां च प्रवर्तयन् । काण्डद्वयार्थं तनुते सोत्र द्वादशधा मतः ॥ ३ ॥
सर्वप्रकाशकश्चैव कालात्मेन्द्रियनायकः । आत्मा कार्यं च भूतानि अहन्तत्त्वमुभौ त्रयः ॥ ४ ॥
अक्षरं भगवांश्चेति द्वादशात्मा हरिः स्वयम् ॥ ४½ ॥

तत्र प्रथमं दशधा स्वरूपलक्षणानि वर्णयति तमिति, तं प्रसिद्धं लोकवेदयोः, "अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम" इति आश्रयभूतः सर्वमूलभूतत्वात्, सृष्टिरूप इति केचित्, अद्भुतमिति, अलौकिकमेव ह्यद्भुतं न तु लोकवेदसिद्धं, इदं हि प्रमेयबलं प्रमाणादतिरिक्तं, तदेव हि वीर्यं भवति यत्र लौकिकवैदिकैश्चानुल्लङ्घ्यं, आश्चर्यं तदेव भवति, अनेन तद् रूपं दृष्टमेवोपपद्यते न तु स्मतुं वर्णयितुं वा शक्यत इत्युक्तं, एवं सर्वैर्वर्णयितुं शक्यमशक्यं चोक्तं पदद्वयेन, बालकमिति, बाले बाले को ब्रह्मा ब्रह्माण्डविग्रहो यस्य, अद्भुतश्च बालको न स्वरूपतो वक्तुं शक्यः, बालानामपि कं सुखं यस्मादिति, बालः को ब्रह्मा यस्य, बलसम्बन्धिनो ये बालास्तेषां कं शिरोभूतं, एवमद्भुतपराक्रमत्वेन यशो निरूपितं, अलौकिकशोभां निरूपयत्यम्बुजेक्षणमिति, अम्बुजतुल्ये कमलतुल्ये ईक्षणे यस्य, अम्बुजा वा लक्ष्मीरीक्षणे यस्य, अम्बुजौ वा सूर्याचन्द्रमसावीक्षणे यस्य, अम्बुजे वा पञ्चाग्निविद्यया साधितरूपवती क्षणं ज्ञानं यस्य, अम्बुजाया इः कामस्तदेव क्षणं सुखं यस्य, अम्बुजे ब्रह्माण्डे वा पालनार्थमीक्षणं यस्य, अम्बुजायां लक्ष्म्यामीक्षणं सुखं यस्य वा भोगायतनत्वात्, अम्बुजायां पृथिव्यामेवेक्षणं यस्य नान्यत्र, एवमनेकधा भगवतः श्रीनिरूपयितव्या ज्ञानात्मिका, मध्येनिविष्टभ्रमरमेवाम्बुजं नेत्रतुल्यं भवति, निश्चलश्च भ्रमरः, तेन मकरन्दपूरस्तत्र निरूपितः, दयामृतादयोत्र मकरन्दाः, तत्सम्बन्धे सर्वोपि मधुपो भवतीति निरूपयितुं प्राकृतैरप्युपमीयते, यथा वा जलेद्भुतरूपं भवति कमलमेव सम्पूर्णेपि रूपेद्भुतरूपे नेत्रे भवतः, अनेनाद्भुता ज्ञानशक्तिर्निरूपिता, क्रियाशक्तिं निरूपयंश्चतुर्विधमपि ज्ञानमाह चतुर्भुजमिति,

चत्वारो भुजाः क्रियाशक्तयो यस्य, चतुर्विधकार्यार्थं हि भगवदवतारः, तान्येव कार्याणि चतुर्भुजरूपेणोच्यन्ते, चत्वारो वा पुरुषार्था भूतानि वा धर्मादयो दिक्पाला वा भुजा भुजेषु वा यस्य, अनेन द्विगुणः पुरुष उक्तः, लौकिकोलौकिकश्च ।

घातकौ रक्षकौ चोक्तौ विरोधेप्यतिसङ्कटे । वेदोक्तं द्विविधं ज्ञान भक्तिर्भगवतस्तथा ॥ १ ॥
मधुसूदनो माधवश्च त्रिवृन्नारायणस्तथा ॥ १½ ॥

शङ्खगदाद्युदायुधमिति वैराग्यं, शङ्खस्तदादिश्च गदा तदादिश्च, "अपां तत्त्वं दरवरं," भुवनात्मकं कमलं प्राणात्मको वायुर्गदा, "तेजस्तत्त्वं सुदर्शनं एवं शङ्खपद्मगदाचक्राणि क्रमेण निरूपितानि, शङ्खगदादीन्येवोद्यतान्यायुधानि यस्य, इन्द्रियदेहप्राणान्तःकरणैरेव सर्वमारणमित्याकाशलक्षणं शरीरं, अन्यानि महाभूतान्यायुधानि, उदायुधानि वा, तत्रैव सर्वान् मज्जयन्ति न तु छित्त्वापि त्यजन्ति, एवं षड्गुणो भगवान् निरूपितः, पुनरैश्वर्यादयो वैदिका उच्यन्ते **श्रीवत्सलक्ष्ममित्यादि, श्रीवत्सो लक्ष्म यस्य,** श्रीर्वत्सा यस्य, यल् लक्ष्म्या जनकं तद् भगवतश्चिह्नं व्यावर्तकं, सा हि ब्रह्मानन्दो भवति, तस्या मूलं ब्रह्मैव, यत् सर्ववेदप्रतिपाद्यं स भगवतोसाधारणो धर्मः, सर्वात्मकस्य भगवतो जगद्ब्रह्मकालादिलक्षणधर्मवतो ब्रह्म हि मुख्यं लक्षणं भवति, अत एव हि सर्वब्रह्माधारवतो भृगोः पदं तत्र प्रतिष्ठितं भवति स्वाश्रयत्वाल्लक्ष्म्याश्च स जनको भवति, "भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्व"मितिवाक्याद्, ब्रह्मलक्षणत्वेनैश्वर्यं निरूपितं, वीर्यं निरूपयन् कयाचिदवस्थयावस्थितं ब्रह्म जीवाख्यं लक्षणान्तरत्वेनाह **गलशोभिकौस्तुभमिति,** गले शोभायुक्तः कौस्तुभो यस्य, स हि सर्वजीवानां स्वरूपभूतः, "चैत्यस्य तत्त्व"मितिवाक्यात्, क्रियाशक्तेर्ज्ञानशक्तिरुत्तमेति मुक्तजीवानां सरस्वतीस्थानप्रापणार्थं कण्ठे कौस्तुभस्थापनं, जीवानामुभयविधत्वज्ञापनाय मध्ये स्थापनं, केचन क्रियानिष्ठाः केचन ज्ञाननिष्ठा इति, अत एव सर्वाङ्गवर्णनायां कौस्तुभो मणिरुभयत्र निरूपितः, "कण्ठं च कौस्तुभमणेरधिभूषणार्थ" "चैत्यस्य तत्त्वममलं मणिमस्य कण्ठ" इति च, अत एव शोभा द्विविधा, क्रियाकृता ज्ञानकृता च, जीवस्तूभयधर्मयुत इति शोभायुक्त उक्तः, एवं ब्रह्मद्वयसम्बन्धं भगवति निरूप्य जीवानां तथात्वहेतुभूतां मायां भगवतः प्रदेशविशेषावरिकां **पीताम्बरं** निरूपयति, पीतमम्बरं यस्येति, आकाशतनोरविकारसम्बन्ध एव शोभाहेतुर्भवति, पीतत्वं तामसराजससम्बन्धात्, अन्यथा त्रिविधमेव रूपमिति पीतत्वं नोपपद्येत, "यदग्ने रोहितं रूपं तेजसस्तद् रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्ये"तिश्रुतेः, व्यामोहिका तु माया तथैव भवति लयविक्षेपात्मिका, प्रभां वर्णयति **सान्द्रपयोदसौभगमिति,** सान्द्रो हि स्निग्धो नीलः, पयोदो मेघः, परमानन्दस्य नीलरूपत्वे प्रकारचतुष्टयं पूर्वं निरूपितं, आकाशकालभूमिवैकुण्ठैस्तस्य धर्मा इदानीं निरूप्यन्ते, यस्तु स्वकाले सर्वानन्ददाय्यन्नोत्पादकस्तापनाशकश्च स सान्द्रः पयोदः, एवमेव भगवानपि पृथिव्याः स्वर्गस्य धर्मस्य भक्तानां च सर्वानिष्टनिवृत्तिपूर्वकसर्वेष्टकर्ता, "सर्वत्र पूर्णगुणकोपि बहूपमोभू"दिति प्राकृतोपमा न दोषः, अन्यथा न सङ्गच्छेत, 'स्निग्धप्रावृड्घनश्याम' इत्यर्थः, अनेन कान्तिलक्षणा श्रीर्निरूपिता ॥ ९ ॥

एवं मूलभूते ब्रह्मणि स्वयं स्थित्वा स्वांशान् जीवान् कृतार्थान् कृत्वा भूमिष्ठान् जीवान् व्यामोहेन स्वरूपज्ञानरहितान् विधाय तेभ्यश्चतुर्विधपुरुषार्थान् प्रयच्छतीत्युक्तं, तत्र ज्ञानक्रिययोः प्रकारभेदाः सन्तीति ज्ञापयितुं सर्वशास्त्ररूपाणि भगवदाभरणान्यनुवर्ण्यन्ते ज्ञानवैराग्यरूपेण महार्हेति ।

महानर्हो मूल्यं यस्य तादृशवैडूर्ययुक्तं **किरीटं कुण्डले** च तेषां त्विषा कान्त्या **परिष्वक्तान्यालिङ्गितानि सहस्रं कुन्तलानि** यस्य, भगवन्मुखनिरीक्षकाः शास्त्राभिज्ञा जीवा भगवन्मुखामोदपानरताः षट्पदा इव भक्तौ परितश्चकासते, तेषां वेदः सांख्ययोगौ च शोभाजनका भवन्ति, वेदसांख्ययोगानां प्राप्तिश्च सर्वलोकप्रसिद्धाद् गुरोरेव भवतीति **महार्हवैडूर्यरूपेण** निरूपिताः, वेदे काण्डद्वितयं, योगोपि साधनफलरूपो द्विविधः, सांख्यमपि न्यासज्ञानभेदेन द्विविधं, एवं षट् शास्त्राणि निरूपितानि भवन्ति, तान्येव पदानि, त्रयाणामपि भेदाः सहस्रं सन्तीति ज्ञापयितुं कुन्तलानां संख्या निरूपिता, लौकिकज्ञानविस्मरणार्थं **परिष्वङ्गो** निरूपितः, एवं लोके ज्ञानं निरूप्य क्रियां निरूपयत्युद्दामेति, कर्माण्यनन्तान्येव तथापि त्रिविधानि निरूप्यन्ते काञ्च्यङ्गदकङ्कणरूपाणि तमःसत्त्वरजोरूपाणि, एतानि त्रीणि वेदादिभूतानि स्वसजातीयानि बहून्येव जनयिष्यन्ति, लोके **काञ्ची** सदामा भवति, इयंतूद्दामा दामरहिता, हिंसाप्रचुरापि वैदिकी कृतिर्न लोकानुसारिणी, भूमौ मायाव्याप्तानामेव तत्राधिकार इति पीताम्बरोपरि **काञ्ची** तिष्ठति, लौकिकानि तानि व्यावर्तयितुं लौकिकसूत्राभाव उक्तः, उत्कृष्टानि वा लौकिकानि तत्र साधनानि निरूपितानि, अङ्गदानि बाहुमध्ये तिष्ठन्ति, अङ्गं द्यति खण्डयतीति राजसं तद् भवति, सात्त्विकराजसयोर्विभागहेतुत्वात्, आदिशब्देन मुद्रिका अङ्गदस्थानीयान्यन्याभरणानि क्षुद्रघण्टिकानूपुरादीन च निरूप्यन्ते तैः सर्वैरेव धर्ममार्गवर्तिभिर्भगवत्सम्बन्धिभिर्विरोचमाना भगवान् भवति, "वेदे रामायणे चैव पुराणे भारते तथा । आदावन्ते तथा मध्ये हरिः सर्वत्र गीयत" इति, नन्वेतादृशो भगवानिति किमर्थमुच्यते ? तत्राह **वसुदेव ऐक्षतेति,** तत्पूर्वोक्तानां धर्माणां लौकिकत्वमलौकिकत्वं च सम्भवति, यदि वसुदेवो न ज्ञास्यति तदा लौकिकान्येवैतानीति मंस्यते, अथ ज्ञास्यति तदोक्तं व्याख्यानमुभयार्थं तादृशधर्मयुक्तं दृष्टवानिति शुक आह, एतज् ज्ञानं स्तोत्रे स्पष्टं भविष्यति ॥ १० ॥

एवं भगवन्तं दृष्ट्वा शुद्धसत्त्वात्मको वसुदेवः क्रियां ज्ञानं च प्रकटीकृतवानित्याह द्वाभ्यां, दानं क्रिया, स्वरूपज्ञानबोधकं स्तोत्रं, कर्मण्यधिकारचतुष्टयं, श्रद्धा चाङ्गं; 'अर्थी विद्वान् समर्थः शास्त्रेणापर्युदस्त'श्च, इदं च कर्म नैमित्तिकं, तस्यापेक्षाज्ञापको हर्षः, स चासाधारण एव भगवन्निष्ठो भवति, तदाह **स विस्मयोत्फुल्लविलोचन** इति ।

एतत्सर्वपरिज्ञाने स इति पूर्वोक्तो वसुदेवो हेतुः, अलभ्यलाभाद् **विस्मयः**, स विस्मयोन्तःप्रविष्ट **उत्फुल्ले विलोचने** करोति, पूर्वं हरिः सुतो भविष्यतीति श्रुतं, इदानीं **हरिं सुतं विलोक्य**, अनेन विद्वत्तोक्ता, निमित्तज्ञानेनैव नैमित्तिकमपि ज्ञातमपि ज्ञानं करणात् भविष्यति, **आनकदुन्दुभिरिति**, असामर्थ्ये आनका दुन्दुभयश्च कथं नेदुः ? कृष्णस्यावतारे य **उत्सवो** मनसो विलासस्तस्मिन् जाते **सम्यग् भ्रमो** यस्य तादृशश्च भगवच्छास्त्रे स्मृतिशास्त्रे चोत्सवाविष्टः, तादृशे कर्मणि शास्त्रेणापर्युदस्तः, पुत्रस्य सर्वलक्षणसम्पत्तावेव तथाधिकार इति कृष्णपदं, मुदेति, हर्षः स्नेहात्मक इति भक्तिसूचकः, **गवामयुतं द्विजेभ्योस्पृशद्** ब्राह्मणानुद्दिश्य दशसहस्रं गावो दत्ताः, ननु स्नात्वा गावो देयाः कथमेवमेव सङ्कल्पं कृतवानित्याशङ्क्याह **मुदाप्लुत** इति, हर्षजलेनैव स्नातवानित्यर्थः ॥ ११ ॥

ननु पुत्रः संस्कर्तव्यो जातकाख्येन कर्मणा तत् कथं न कृतवानित्याशंक्य प्राकृत एव तस्य संस्कार इति नास्मिंस्तदपेक्षेति तज् ज्ञानं स्वस्य वर्तत इति ज्ञापयन् भगवन्तं स्तौतीत्याहाथैनमिति ।

अथ कर्मसमाप्तिं विधाय तदनन्तरमेनं पुत्रत्वेनाविर्भूतं भगवन्तमस्तौत्, स्तोत्रमुत्कृष्टे कर्तव्यमिति कथं पुत्रे स्तोत्रमित्याशंक्याहावधार्य पूरुषमिति, पूर्वोक्तवर्णनप्रकारेण परः पुरुषः पुरुषोत्तम एवायमित्यवधार्य, अभिनन्दनात्मकमपि स्तोत्रं भवतीति तद्व्युदासार्थं नताङ्ग, नतमङ्गं यस्य, नमस्कारं कृत्वेत्यर्थः, यो भगवान् जातो यादृशस्तं तथैव ज्ञात्वा स्तोत्रमुचितं, 'अन्यथा सन्तमन्यथा' चेत् "प्रतिपद्यते" तदायुक्तमिति तद्व्युदासार्थमाह कृतधीरिति, यद्यपि पूर्वं पुरुषोत्तम आविर्भविष्यतीतिज्ञानं न स्थितं तथापि प्रदर्शितैर्भगवतावयवादिभिः कृता धीर्यस्य, समानयोरपि तथात्वं सम्भवतीति तद्व्युदासार्थं **कृताञ्जलिरिति**, अञ्जलिर्महत एव क्रियते, स्तोत्रं कायवाङ्मनोभिः कर्तव्यं, तत्र कृताञ्जलिरिति स्तोत्रे कायस्थितिः, कृतधीरिति मनसः, स्तोत्रं वाचनिकं, ननु स्तोत्रमुच्चैः कर्तव्यं तथा सति प्राहरिकाणां जागरणं भवेदित्याशंक्य कंसभयं तस्य नास्तीत्याह गतभीरिति, तत्र हेतुः **प्रभावविदिति**, भगवतः कालादिनियमनं जानातीति **प्रभाववित्**, ननु विद्यमानमपि सामर्थ्यं न प्रकटयेच् चेत् प्रमाणसिद्धं वा शालग्रामादिवत् सामर्थ्यं स्यात् तदा विपरीतं भवेदित्याशंक्य प्रकटतेजःपुञ्जेन प्रकटमेव सामर्थ्यं तस्येत्याह **स्वरोचिषा** स्वरूपकान्त्या कोटिमणितेजसा यथा गृहं प्रकाशितं भवति तथा प्रकाशयन्तं, भारतेतिसम्बोधनं विश्वासार्थम् ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

विशेषणसंख्यातात्पर्यं वदन्त आद्यश्लोकस्थविशेषणसंख्ययोः प्रत्येकसमुदायाभ्यां तात्पर्यमाहुर्दशलीलेत्यादिना, आद्यस्थतत्संख्याभिप्रायोयं, द्वितीयेन पदेन समुदिततत्तात्पर्यमुक्तं, **द्विगुण** इति मर्यादामार्गीयमैश्वर्यादिकं भूभारहरणवेदधर्मविहितभक्तिज्ञानादिप्रवर्तकमेकं, **ब्रह्ममर्यादाया अप्युल्लंघनं दैत्यानामपि मुक्तिदानमदेयस्वरूपामृतदानादौ** पुष्टिमार्गीयैश्वर्यादिकं हेतुः, एवं सत्युभयविधं प्रकटीकृत्य प्रकट इति समुदितस्तत्तात्पर्यं, एवमग्रेपि ज्ञेयं, भक्तानां दशप्राणाविरूपः, **सर्वप्रकाशकः सूर्यो द्वादशात्मेति** तथा, लीलासम्बन्धिपदार्थानामनन्यप्रकाश्यत्वात्, लीलायाः कालातीतत्वेन तदवच्छेदो न सम्भवतीति द्वादशमासात्मको लीलाधारभूतो यः संवत्सरात्मकः **कालस्तद्रूपोपि**, तेनै 'कहायन' 'त्रैमासिकः कुमार'इत्याद्युक्तिर्न विरुध्यते, लौकिकेन्द्रियविषयत्वाल् लीलायास्तन्मध्यपातिभक्तानामेकादशेन्द्रियरूपस्तन्नियामकश्चेति **द्वादशात्मा**, आत्मपदेन जीवपरमात्मानावुच्येते, **कार्यं महत्तत्त्वं भूतान्येकविधानि**, **उभौ प्रकृतिपुरुषौ**, **त्रयो गुणाः**, अन्यत् स्पष्टम्, एतेन लीलासम्बन्धिपदार्थसृष्टिरेतत्स्वरूपात्मिकैवेति फलितं, एवंतात्पर्यनिरूपणोपीदमेव मूलम्, अन्यथा प्राकृतसम्बन्धे ब्रह्मत्वानुपपत्तिरिति, **न तु लोकवेदसिद्धमिति**, यद्यपि साकारत्वेन वेदे सिद्धं तथापि यादृश् रूपं प्रकटमधुना तत् तथैवेति तदभिप्रायेणेदमुक्तं, तेन पूर्वेण न विरोधः, **चतुर्विधमपीति**, प्रमाणप्रमेयसाधनफलरूपमपीत्यर्थः, अत्रायं भावः, सम्पूर्णस्वरूपवर्णने ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च वाच्यानि, तत्र ज्ञानेन्द्रियेष्वीक्षणमेवोक्तं, कर्मेन्द्रियेषु **भुजा** एवोक्ताः, तेनैकेनैव पूर्णा ज्ञानशक्तिः क्रियाशक्तिश्च निरूपितेति ज्ञायते, एवं सति कर्मेन्द्रियं निरूपयन् यद् भगशब्दार्थरूप ज्ञानं निरूपयति तेन जीवानामिव भगवतः कर्मेन्द्रियाणि न ज्ञानजनकानीति न किन्तु स्वयं चिद्रूपाणि पूर्णज्ञानजनकानीति ज्ञापयति, **चतुर्विधकार्यार्थमित्यादिना** चतुर्विधक्रियाशक्तिविवरणं, व्यूहकार्याण्येव **चतुर्विधानि** तानि, तेषां नियतकार्यत्वात्, भगवद्भुजानां क्रियाशक्तिरूपत्वेन सर्वेषां क्रियावतां मूलत्वात् पृथिव्यादिचतुर्णामेव भूतेषु क्रियावत्त्वात् तदाधिदैविकरूपत्वमपीत्याशयेन भूतत्वमुक्तं, तेन लीलामध्यपातिनां तेषां प्रभुभुजरूपत्वमेव न प्राकृतत्वमितिभावः, जरायुजस्वेदजाण्डजोद्भिज्जानि वा, तान्यप्युक्तरूपाणीति ज्ञेयं, **पुरुषस्य द्विभुजत्वमौत्सर्गिकमित्यत्र** द्विगुणपुरुषत्वं, एतस्यैव विवरणं **लौकिक** इत्यादि, युद्धादिना जरासन्धादिमारणं लौकिकसदृशं, अन्यथेश्वरस्यैतत्वमूमारणे का युद्धापेक्षा स्यात् ? अवस्थासाधनविरुद्धकार्यकरणं पूतनाशकटादिमारणमलौकिकं, **घातकाविति**, हननरक्षणयोरेकत्रैकदाकरणं विरुद्धं, तथापि तत् कृतवान्, परीक्षितो लौकिकबीजांशस्य दाहनं

वैष्णवांशस्य गर्भस्य रक्षणं तन्मातुश्च, तत्राप्यनिवर्त्यंब्रह्मास्त्रात्, एतदेव संकटरूपमपि, तथैवेन्द्रवृष्ट्यादिकमपि ज्ञेयं, वेदोक्तमिति, कर्मब्रह्मविषयकमात्मपरमात्मविषयकं, वा ज्ञानमित्यर्थः, भक्तिरपि सगुणा निर्गुणा च साधनफलरूपा वा, वैराग्यं हि सर्वदुःखनिवर्तकं, भक्तदुःखनिवर्तनं ह्यायुधैः, तेन तेषां वैराग्यरूपता, तेन भक्तेष्वेव रागस्तद्द्वेषिषु तदभाव इति ज्ञाप्यते, अत एव मातुलादयोपि हताः, **मधुसूदन** इत्यादि, उक्तरीत्या मधुसुदनः, गदाचक्रे दक्षिणयोरब्जशङ्खौ वामयोर्धारयन् **माधवो** भवति, एवं सति गदाचक्रयोरेकत्राब्जशङ्खयोश्चैकत्रस्थितिमात्रसाधर्म्येणात्र माधवत्वमपि, शङ्खाब्जे दक्षिणयोश्चक्रगदे वामयोर्धारयन् **नारायणो** भवति, तेन शङ्खाब्जयोश्चक्रगदयोश्चैकत्रस्थितिमात्रसाधर्म्येण नारायणत्वं, एवं त्रिवृद्रूपत्वं सङ्कर्षणप्रद्युम्नानिरुद्धरूपतापि, **शङ्खे**त्यादिविग्रहवाक्ये शङ्खगदे आदी ययोस्ते शङ्खगदादिनी पद्मचक्रे **उदायुधे** यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः, शङ्खाब्जाभ्यां मारणासम्भवादायुधत्वं कथमितिशङ्काभावाय तत्तात्पर्यमाहुरिन्द्रियेत्यादि, प्राणपोषितानीन्द्रियाणि हि कार्यसाधकानि, "विष्णोर्मुखोत्थानिलपूरितस्य यस्य ध्वनिर्दानवदर्पहन्ते"तिवाक्याच् छङ्खस्य तादृशत्वादिन्द्रियरूपता, तेनान्तरो मारकः, दर्पाभावे मृतप्रायो यतः, गतदर्पस्य बाह्योपमर्देनाशु नाशो भवति, प्रकृते च ब्रह्माण्डविग्रहो नारायण इति तदात्मकाब्जधारणेनैव यथोपरि पतित्वोपमर्दनं तथा भवतीति तथा, गदाया आधिदैविकप्राणात्मकत्वादधिभूतासुरप्राणान् निहन्ति, तेजोरूपमन्तःकरणं, चक्रं च तथा, मुक्तिदित्सायां चक्रेण मारयतीति तद्धतास्तथैव भवन्ति "ये ये हताश्चक्रधरेणे"तिवाक्यात्, स्वयं निर्लेप एव महाभूतैरेव मारयतीतितात्पर्येण पक्षान्तरमाहुराकाशेत्यादि, शङ्खगदाद्यायुधमेतावतैव चारितार्थ्येप्युदायुधमितिकथनेनान्योपि भावः सूच्यत इति तमाहुरुदायुधानीति वेति, उदमुदकं तद्रूपाणीत्यर्थः, उदकत्वोक्तितात्पर्यमाहुस्तत्रैवेति, गुरुपदार्थं हि तत् स्वस्मिन् पतितं मज्जयति तद्वदहङ्कारेणानम्रानासुरान् प्रावप्रायान् महाभूतान्येव पुनः प्रापयन्ति न तु मुक्तिमित्यर्थः, **श्रीवत्स** इत्यादि, अत्रैतावद् वाच्यं, पुरुषोत्तमैकनिष्ठत्वेन तदसाधारणं लक्षणं श्रीर्भवति, तस्याश्चेतरागोचरत्वेन लक्ष्यज्ञानं कस्यापि न भविष्यतीति तत्प्रादुर्भावस्थानासाधारणधर्मं सर्वगोचरं कृत्वा स्वस्मिन् धारयति, तद्दर्शनेन तत्र श्रीस्थितिज्ञानेन पुरुषोत्तमत्वज्ञानं भवति, अस्य मुख्यत्वमुपपादयन्ति सर्वात्मकस्येति, "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यान्तःस्थानि भूतानी"तिभगवद्वाक्याद् "यः पृथिव्यां तिष्ठ"न्नित्यादिश्रुतिभ्यश्च जगत् तथा, "परस्तस्मात् तु भावोन्योव्यक्तो व्यक्तः सनातन" इत्युपक्रम्या "व्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिं यं प्राप्य न निवर्तन्ते तद् धाम परमं ममे"तिप्रभुवाक्याच् छ्रीव्रजजनमनोरथपूर्तये "दर्शयामास लोकं स्वं गोपानां तमसः परं । सत्यं ज्ञानमनन्तं यद् ब्रह्म ज्योतिः सनातनं यद्धि पश्यन्ति मुनयो गुणापाये समाहिता" इत्यादिवाक्यैः सर्ववेदप्रतिपाद्यत्वेनाप्यक्षरं ब्रह्म पुरुषोत्तमस्य लक्षणं, चेष्टारूपत्वेना "थ सर्वगुणोपेतः काल" इत्यादिना निरूपितो य आनन्दमयो लीलाकाल सोपि तथा, आदिपदाल् लीलाविशेषाश्च, तथा च सर्वात्मकत्वभगवत्त्वजगदादिलक्षणेषु ब्रह्म मुख्यं लक्षणं, सर्ववेदप्रतिपाद्यत्वादाविर्भूतसच्चिदानन्दरूपत्वाज् ज्ञानिमुक्तिस्थानत्वात् पुरुषोत्तमगृहचरणात्मकत्वात्, अतः श्रीवत्सस्य लक्षमत्वमुक्तं, अन्यथेतरविशेषणवदिदमप्युक्तं स्यादिति भावः, अत्रोपपत्त्यन्तरमाहुरत एवेति, जातिवेदाक्षरब्रह्माणि तदानन्दश्च सर्वशब्देनोच्यते, तदाधारभूतो भृगोर्देहः, तद्धतस्तस्य गतिर्भगवत्पर्यवसायिन्येवेति तथेत्यर्थः, किञ्च भगवत्त्वगिन्द्रियाद् भृगोरुत्पत्तिः, तच्चेतरेन्द्रियेभ्यो विशिष्टमन्तर्बहिर्व्यापित्वात् तथा ज्ञानजनकत्वाच्च स्पर्शसुखाभिव्यक्तिहेतुत्वाद् भगवतः स्पर्शसुखाभिव्यक्तिहेतुः, श्रीस्तत आविर्भूतेत्याशयेनाहुर्लक्ष्म्याश्चेत्यादि, **गलशोभे**त्यत्र सरस्वत्या ज्ञानशक्तिरूपत्वात् तथाकृतिः, अत्र विद्यादिपदानि त्यक्त्वा सरस्वतीपददानस्यायं भावः, सा हि वीणागानपरा प्रभुश्च 'मुक्तोपसृप्य' इति मुक्ताः सर्वे संगीतविद्यया यथा प्रभुं सन्तोषयन्ति तदर्थमेवंकरणं, एतेनैवंविधानां लीलास्थभक्तानां न प्राकृतत्वं किन्तु कण्ठभूषणरूपत्वमेवेति ज्ञाप्यते, **स्थानं** प्रभुगुणज्ञानं, मुक्तानामेव शुकादीनां तत्राधिकारादितिभावः, **पूर्व**मिति, निबन्धे निरूपितमित्यर्थः, तत् स्मारयन्त्याकाशेत्यादि, चक्षू रूपवद् द्रव्यं गृह्णत् तदभावे निर्मेघ आकाशे दूरं गतं सन् नीलमिव पश्यति तथा ब्रह्माप्यतिगाढं गम्भीरतया नीलमिव पश्यतीत्येकः प्रकारः, तत्तद्गुणाधिष्ठातृदेवतानां तादृक्तादृग्रूपत्वात् तत्प्रतिबिम्बानां नियतानेकरूपत्वमिति द्वितीयः, भूमेर्नीलरूपत्वेन तत्राविर्भावे तत्प्रतिफलनेन तथा भातीति तृतीयः, शुद्धस्य सत्त्वस्य नीलरूपत्वेन तत्प्रतिफलनेन वैकुण्ठाविर्भूतं ब्रह्म तथा भातीति तुरीयः, अथवा भूमिवैकुण्ठं श्वेतद्वीपं, हन्तेदं ब्रह्मो नीरूपत्वपर्यवसायित्वेन न विद्वज्जनमनोरमं भवतीति चेन्, मैवं, अंशावतारविभूतिरूपावतारविषयत्वादस्य, श्रीपुरुषोत्तमाख्यं तु वस्त्वेव तादृशं न त्वौपाधिकं तत्राण्वप्यस्ति शुद्धब्रह्मरूपत्वादित्यनुपदमेव प्रमाणप्रकरणे निरूपयिष्यत इति विद्वद्भक्तमनोरममेतदिति जानीहि, यत्तु **स्वकाल** इत्यादि तु परोक्षवादत्वेनापि ज्ञेयं, स्वकाले लीलाकाले, अत एव स्वपदं, नूतनरसोत्पादको दिनान्तादिष्वभिमश्च, एवमित्यादिना श्रीवत्सेत्यादिविशेषणोक्तितात्पर्यमुक्तक्रमेण पुरुषोत्तमासाधारणचिह्नत्वात् तत्त्वेन ज्ञाने मूलकारणभूतः श्रीवत्सस्तस्य ब्रह्मत्वं निरूपितं, वस्तुतस्तु श्रीरूप एव सः, ब्रह्मानन्दरूपत्वात् तस्याः तत्र स्थितो लीलां करोतीति लीलामूलभूतमपि तद्रूपं ब्रह्म, "कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यज" इति वाक्यात् स्वीयत्वेनाङ्गीकृतानामात्मनामाधिदैविकं रूपं स्वकण्ठे स्थापयन् न जातु त्यजति स्वरूपानन्दं च ताननुभावयतीति तथा, भूरूपकट्या आवरणोक्त्या तथात्वं, प्रावृड्घनश्यामत्वोक्त्या सर्वानिष्टनिवृत्तिपूर्वकं सर्वार्थदानम् ॥ ९ ॥

भगवन्मुखनिरीक्षका इत्यादि, अत्रायं भावः, "बिभर्ति सांख्यं योगं च देवो मकरकुण्डले" इति वाक्यात् तद्रूपयोस्तयोः सहभावेन किरीटस्योक्ते "मौलिपदं पारमेष्ठ्य"मित्यत्रापि तद्रूपो वेद एवोच्यत इत्यवगम्यते, सर्वप्रमाणानामुपरिस्थितिस्तस्यैवोचिता यतः, एवं सति तज्जनितज्ञानमेव तडिद्रूपमिति तत्परिष्वङ्गोक्त्या तेषां तथात्वमेव सम्पद्यत इति जीवानां तत्र स्थितिरयुक्तेतिशङ्का-

निवारणाय **भगवन्मुखेत्याद्युक्तं**, अपरं च तेषां बहुत्वेपि **तद्विदित्येकत्वोक्त्या** तज्जनितस्य भक्तिभावस्यैकरूपत्वं मूले ज्ञाप्यते, तेन वेदादीनां भक्तिरेव फलमिति ज्ञापितं भवति, अर्हस्य प्रापकद्रव्यरूपत्वेन तादृशोत्र गुरुरेवेति तथोक्तं, अन्यथा त्वमूल्यपदमेव वदेदितिभावः, इदं च भक्तिमन्महापुरुषानुग्रहादेवेतिज्ञापनायार्हे महत्त्वमुक्तं, अत एव "वेदवादरताः पार्थे"त्यादिनोक्तशीलानां न भक्तिलाभः, एतदेवाभिसन्धाय सर्वलोकप्रसिद्धादितिविशेषणं दत्तं, अर्हस्य लोकसिद्धत्वेनापि तथाविशेषणमिति ज्ञेयं, **कुन्तलानां** रसोद्दीपकत्वेन तेषु भक्तिप्रवर्तकत्वमपि सूच्यते, **तान्येव पदानीति**, कुन्तलानां भ्रमरतुल्यत्वेन तेषां षट्पदत्वेनैतेष्वेतान्येव तानीत्यर्थः, **त्रयाणामपीति**, वेदसांख्ययोगानामित्यर्थः, कुन्तलानां शाखाभिज्ञजीवत्वेन पूर्वमुक्तत्वात् तेषामनेकविधत्वे तज्ज्ञानप्रकारानेकविधत्वमेव प्रयोजकमिति कुन्तलानेकत्वोक्त्या तत्प्रयोजकमप्याक्षिप्तं भवतीत्यर्थः, **उद्दामेत्यत्र** त्रयाणां कर्मत्वोक्तेरयं भावः, भूमावेव कर्ममार्गा इति तद्रूपकट्यां भूषणत्वेन स्थितस्य कर्मत्वं युक्तमितरयोः क्रियाशक्तिप्रतिष्ठितत्वेनेति ॥ १० ॥

सम्यग् भ्रमो यस्येति, विविधपदार्थैर्महानुत्सवः कार्य इति बुद्ध्या तत्र तत्र मनोधावनं भ्रमः, पुरःप्रकटे भगवत्यत्रापि मनोधावनस्यानुचितत्वात् परं तूत्सवरसस्तादृश एवेति भक्तिमार्गे स गुण एवेति भगवच्छास्त्रेणापर्युदस्तः ॥ ११ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तमद्भुतमित्यत्र वीर्यनिरूपणार्थमिति, सामर्थ्यनिरूपणार्थं, ऐश्वर्यस्याष्टविधत्वात् तत्राष्टौ श्लोका युक्ताः, निरूपणीये वीर्ये कुतो द्वौ श्लोकौ कुतश्च प्रथमे श्लोके दश पदानि द्वितीयश्लोके च द्वे इत्याकांक्षया सार्धचतुष्टयकारिकाभिस्तत्तात्पर्यं वदन्तीत्याशयेन टिप्पण्यां तद् व्याकुर्वन्ति **विशेषणेत्यादि**, **अयमिति**, प्रथमचरणोक्तः, **हेतुरिति**, उक्तदानादौ हेतुभूतं, **द्वितीयमितिशेषः**, **समुदिततत्तात्पर्यमिति**, समुदितं यच्छ्लोकद्वयं तत्तात्पर्यमित्यर्थः, **अग्र इति**, अग्रिमकारिकासु, **सर्वेषामितिपदं** संकुचितवृत्तिकमित्याशयेनाहुर्**भक्तानामित्यादि**, अग्रे तु स्फुटत्वान्न व्याख्यातं, परं तत्रार्धाभ्यां द्विधा द्वादशविधत्वमुच्यत इति बोध्यं, **सर्वप्रकाशकश्च** वेत्यनेन पुनरन्या विधोच्यत इत्याशयेनाहुः **सर्वेत्यादि**, **कालात्मे**त्यनेन ततोऽप्यन्योच्यत इत्याशयेनाहुर्**लीलाया** इत्यादि, **इन्द्रियनायक** इत्यनेन ततोऽप्यन्योच्यत इत्याहुर्**लौकिकेत्यादि**, **आत्मेति**कारिकां व्याकुर्वन्त्य**आत्मपदेनेत्यादि**, नन्वत्र श्लोकद्वये तमित्यस्येक्षतिक्रियाकर्मत्वेन मुख्यतयान्वयदर्शनाद् द्वादशानामपि विशेषणत्वाङ्गीकारो न युक्त इतिचेन्न, तमित्यस्यात्रैवं विशेष्यत्वेपि पूर्वश्लोके यः 'प्रादुरासीदि'त्यादिनोक्तस्तत्परामर्शितयेतरव्यावर्तकत्वेन विशेषणत्वानपायात्, एवं चापेक्षाभेदेन तमित्यस्योभयरूपत्वाद् विशेषणानां द्वादशत्वं युक्तमेवेति जानीहि, एवं कारिकाणां तात्पर्यमुक्त्वा एवंविधाकथनस्य प्रयोजनं बीजं चाहुर्**एतेनेति**, अष्टधा द्वादशविधत्वनिरूपणेन, **इति फलितमिति**, **इति** हेतोः सर्वरूपतयात्यलौकिकभगवत्सामर्थ्यरूपं वीर्यमेव फलितं, सुबोधिन्यां **तमित्यस्याभासे तत्रेति**, द्वादशसु विशेषणेषु, **विवृत** "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर" इति गीतायां श्लोकद्वये सर्वान्तरविश्वसर्वधारकत्वेन क्षराक्षरातीतत्वेन च य उच्यते सोत्र तच्छब्देन परामृष्ट इत्याशयेनाहुस्**तमित्यादि**, यादृशस्तच्छब्देन परामृष्टस्तस्य सामान्यतः स्वरूपमेतेनोक्तं, "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यान्तःस्थानि भूतानि येन सर्वमिदं तत"मितिलक्षणान्तरसंग्रहायाहुर्**आश्रयेत्यादि**, तथा च गीतोक्तलक्षणत्रयवानत्र परामृश्यत इति बोधितं, एतेन सर्वनियामकत्वादिरूपमैश्वर्यं चोक्तं, मतान्तरमाहुः **सृष्टिरूप इति केचिदिति**, अत्र युक्त्यलिखनादुक्तवाक्यविरोधाच्च तदसङ्गतमिति बोधितं, टिप्पण्यां **तमद्भुतमितिपदद्वयव्याख्यानयोः** परस्परं विरोधं परिहरन्ति **यद्यपीत्यादि**, तथा "चान्यदेव तद् विदितादथोविदितादधी"तिश्रुत्या विदिताविदितपरत्वस्यापि श्रावणादस्यैवार्थस्य सिद्धेर्न विरोध इत्यर्थः, **सुबोधिन्यामिदमिति**, लोकवेदप्रसिद्धत्वे सत्यप्यद्भुतत्वं, एवमत्र तात्पर्यवृत्त्या पदद्वयं व्याख्यातं, अतः परं योगेनाग्रिमपदं व्याकुर्वन्ति **बाल इत्यादि**, 'अद्भुतं' 'बालकं' पदयोः समभिव्याहारेण सूचितमर्थमाहुर्**अद्भुतश्चेत्यादि**, **पद्मारनेत्यादि**, "अत्र ह्यापः पुरुषवचसो भवन्ती"तिश्रुतेस्तद्विद्यासाधितरूपस्याम्बुजत्वं बोध्यं, **प्राकृतैरिति** अम्बुजैरित्यर्थः, **चतुर्भुजमित्यस्याभासे क्रियाशक्तिमित्यादि**, ज्ञानशक्तिवदद्भुतां क्रियाजनिकां **शक्तिं निरूपयंश्चतुर्विधमपि ज्ञानमाह**, क्रियाया ज्ञानमूलकत्वात् तच्छक्तिनिरूपणे छिद्रेतरत्ववत् तन्मूलभूतं ज्ञानमर्थबलादाहेत्यर्थः, किं तच्चतुर्विधमित्याकाङ्क्षायां टिप्पण्यां तद् विवृण्वन्ति **प्रमाणेत्यादि**, **निरूपयतीति**, अर्थबलान्निरूपयति, ज्ञाननिरूपणप्रयोजनमाहुस्**तेनेत्यादि**, **चतुर्विधेत्यादे**स्तात्पर्यमाहुश्**चतुर्विधेत्यादि**, **तेषामिति**, व्यूहानां, **भूतानि वे**त्यस्य तात्पर्यमाहुर्**भगवद्भुजेत्यादि**, तस्यैवार्थान्तरमाहुर्**जरेत्यादि**, **उक्तरूपाणीति**, आधिदैविकरूपाणि, अत्र **चतुःशब्देन** नानाविधानां चतुःसंख्याकानां यः सुबोधिन्यां संग्रहस्तत्र बीजं तु जातेष्ट्यधिकरणे सिद्धं संख्यायाः प्रयोजनवत्त्वमेव ज्ञेयं, तत्र हि वैश्वानरद्वादशकपालेष्ट्यादिसंख्यानां विद्यमानत्वात् ताभिस्तत्समानाक्षरच्छन्दःप्रभृतीनां तत्कार्याणां चावरोधदर्शनादेवमत्रापि चतुर्णां भुजानां दर्शनेनेदं सर्वं सूच्यते, अन्यथा गोपालतापनीये 'द्विभुज'मितिश्रावणादत्रापि तथैव दर्शयेदिति, **दिक्पाला वेति** तु "इन्द्रादयो बाहव आहुरुस्रा" इति द्वितीयस्कन्धवाक्यात् स्फुटतो न व्याख्यातं, **द्विगुणपुरुषत्वं** विवृण्वन्ति **पुरुषस्येत्यारभ्यालौकिकमित्यन्तं**, **घातकाविति**, कारिकयोजना तु चतुर्षु भुजेषु द्वौ भुजौ घातकौ रक्षकौ विरोधेप्युक्तौ, च पुनरतिसङ्कटेपि तथोक्तौ, किञ्च चतुर्भुजपदेन भुजतया वेदोक्तं द्विविधं ज्ञानमुक्तं तथा भगवतो भक्तिरुक्तेतिरूपामङ्गीकृत्य तां विवृण्वन्ति **घातकावित्यारभ्य रूपा वेत्यन्तं**, अत्रैतद् बोध्यं, मूले सकृदुच्चारितेष्वेतेषु

पदेषूक्ता अनेकेर्थाः खलेकपोतिकान्यायेनापतन्तो 'गलोस्तमर्क' इतिवद् बोद्धव्यवैशिष्ट्येन तं तं प्रत्येकैकशः स्फुरन्तोपि भगवत्कृपावलोकितं सर्वज्ञं प्रति युगपत् क्रमेण वा यथाधिकारं विषयीभवन्तीति न कोपि शङ्कालेशः, एवमग्रेपि बोध्यं, अग्रिमपदे वैराग्यं कथमुच्यत इत्याकाङ्क्षायां तद् विवृण्वन्ति वैराग्यमित्यादि, अर्थस्तु स्पष्टः, उक्तरीत्येति, दक्षिणहस्तयोरुपरि शङ्खो नीचैः पद्म वामयोरुपरि गदानीचैश्चक्रमनया रीत्या धारयन् मधुसूदनः, पुराणान्तरे तथा प्रसिद्धत्वात् मन्दारमधुसूदनादौ तथा दर्शनाच्चेति भाति, एवं माधवरूपेपि बिन्दुमाधवादौ तथादर्शनात् नारायणस्वरूपेपि व्यङ्कटेशे तथा दर्शनाद् भाति, अत्र पूर्वं चतुर्भुजपदविवरणे चतुर्विधकार्यकारणार्थमवतारकथनेन चतुर्व्यूहत्वसिद्धावपि यदत्र त्रिरूपत्वेन विवरणं तच् छङ्खगदाद्युदायुधमित्यत्र क्रमेण शङ्खस्य गदाया आदिपदोक्तस्य चोत्पदेनोच्चैः स्थापनबोधनादङ्गीकृतमिति प्रतिभाति, त्रिव्यूहत्वं च त्रिव्यूहकार्यस्यैव बहुशः कारणादुक्तं ज्ञेयं, वासुदेवकार्यस्य गीतोपदेशभीष्ममुक्त्यादौ क्वचिदेव करणादिति भाति, इन्द्रियेत्यादिपक्षं व्युत्पादयितुमवतारयन्ति शङ्खेत्यादि, पद्मस्य देहरूपतामायुधरूपतां चोपपादयन्ति प्रकृत इत्यादि, तथेति, पद्मस्य देहरूपत्वमायुधरूपत्वं चेत्यर्थः, तेजोरूपमिति, अन्तःकरणस्य सात्त्विकाहङ्कारकार्यत्वात् प्रकाशकत्वेन तेजोरूपं, पक्षान्तरमवतारयन्ति स्वयमित्यादि, इदं ''चापां तत्त्वं दरवर''मित्यादेरेव प्रपञ्चरूपं ज्ञेयं, शेषं स्फुटं, श्रीवत्सलक्ष्ममित्यत्रा''च् प्रत्यन्ववपूर्वात् सामलोम्न'' इत्य'त्राजि'तियोगविभागादच् पद्मनाभ इतिवत्, विशेषणान्तरेष्वपि व्यावर्तकस्य सत्त्वादत्रैव यत् लक्ष्मत्वमुक्तं तत्तात्पर्यं श्रीवत्सेत्यादिना वदन्तीत्याशयेन टिप्पण्यां तद् विवृण्वन्ति श्रीवत्स इत्यादिना, अत्रेति, अस्मिन् विशेषणे, स्थानासाधारणधर्ममिति, स्थानरूपमसाधारणधर्मं, तथा चास्य मुख्यत्वादत्र लक्ष्मपदप्रयोग इत्यर्थः, कथं मुख्यत्वमित्याकाङ्क्षायामाहुरस्येत्यादि भाव इत्यन्तं, अत्रेति, मुख्यत्वे, अत एवेति, मुख्यलक्षणत्वादेव, तद्वत इति, त्रिब्रह्मवतः, गतिरिति, महत्त्वपरीक्षार्थं गमनं, तथेति मुख्यत्वं, तथा च यदि तत्र भगवति पुरुषोत्तमत्त्वं न स्यात् तदा महत्त्वपरीक्षार्था भृगोर्गतिस्तत्र न पर्यवस्येत, यत एवमतः श्रीवत्सस्य ब्रह्मत्वात् मुख्यत्वमित्यर्थः, इदं प्रकारान्तरेणापि भृगुपदस्य नानुचितत्वमित्याहुः किञ्चेत्यादिना, तथा च तज्जातो भृगुरपि विशिष्ट इति नानुचितत्वमित्यर्थः, इदं प्रकारान्तरेणाहुः स्पर्शेत्यादि, अनुचितत्वपरिहारायैवमुपपत्तित्रयेण भृगोरक्षरात्मकत्वं तेन श्रीवत्सस्याक्षरात्मकत्वं च समर्थितं, सुबोधिन्यामस्मिन् विशेषणे पूर्वोक्तमैश्वर्यनिरूपणं निगमयन्ति ब्रह्मेत्यादि, ब्रह्मणोक्षरस्योक्तरीत्या निरूपितेन लक्षणत्वेनैव भगवतोक्षरप्रयोजकत्वरूपमैश्वर्यं निरूपितमित्यर्थः, अग्रिमविशेषणमवतारयन्ति वीर्यमित्यादि, स्वरूपसामर्थ्यं हि वीर्यं, तदत्र मुक्तजीवस्वाधीनकरणलक्षणं, तन् निरूपयन् कण्ठाभरणतयावस्थितं जीवस्वरूपं लक्षणान्तरत्वेनाहेत्यर्थः, अङ्गान्तरेस्थापयित्वा यत् कौस्तुभस्य कण्ठे स्थापनं तत्तात्पर्यमाहुः क्रियाशक्तेरित्यादि, क्रियाशक्तिर्हस्तादिः, ज्ञानशक्तिः कण्ठदेशः, पश्यन्त्यनन्तरमध्यमास्थानत्वेन ज्ञानप्रत्यासन्नत्वात्, अतः सोत्तमेति तथेत्यर्थः, तदेव टिप्पण्यामाहुः सरस्वत्या इत्यादि, पीताम्बरमित्यत्र तथात्वहेतुभूतामिति, जीवत्वप्रयोजकभूतां, नन्वम्बरस्य मायात्वे पीतत्वं नोपपद्यते तस्या लोहितशुक्लकृष्णवर्णत्वेन पीतत्वस्य तत्रानुक्तत्वादित्यत आहुः पीतत्वमित्यादि, रजस्तमोगुणजन्यं यत् सुवर्णं तत्सम्बन्धादित्यर्थः, तदुपपादयन्त्यन्यथेत्यादि, तथा चेदमागन्तुकं रूपमित्यर्थः, तत्रास्पष्टं लिङ्गं मानत्वेनाहुर्व्यामोहिकेत्यादि, तथा च ''वैरं च पञ्चम''मितिप्रथमस्कन्धवाक्याद् वैरजनकस्य सुवर्णस्य तथात्वेन तन्मूलभूता सा लयविक्षेपात्मिकेत्यर्थः, पीताम्बरमित्यनेन यशो निरूपितं ज्ञेयं, प्रथमस्कन्धे 'सम्यक्त्वेन रूपेण वर्णनयोग्यं गुणक्रियादिपौष्कल्यं यश' 'आधारोत्कर्षाधायकः सर्वजनाह्लादको विसर्पिगुणोपि यश' इति च पृथ्वीवाक्यव्याख्याने तत्स्वरूपस्योक्तत्वात्, तच्च गुणपौष्कल्यमत्राभासे जीवानामित्यादिनोक्तं, येदृशो सा नाभिप्रदेशविशेषापरिकैव न तु तं वशयितुं समर्थेति, सान्द्रेत्यत्र टिप्पण्यां भूमेरित्यादि, अयं च प्रकारो निबन्धे त्रुटित उपलक्षणविधया व्याख्यातो ज्ञेयः, तदेव स्फुटीकुर्वन्त्यथ वेत्यादिना, अत्र रूपविषये किञ्चिदाशंक्य परिहरन्ति हन्तेत्यादि जानीहीत्यन्तं, तथा च निबन्ध आकाशपक्षस्य यद् व्याख्यानान्तरं प्रभुभिः कृतं तत्र प्रमाणप्रकरणोक्तमेव बीजमिति न तस्याचार्योक्तिविरुद्धत्वं बोधितं, न चैवं सत्येते पक्षा अत्राचार्यैः किमित्युक्ता इति वाच्यं, वासुदेवादिव्यूहसाहित्यस्यात्र सत्त्वेन तद्रूपबोधनार्थत्वात्, नन्वनौपाधिकं चेद् रूपं मूलाभिप्रेतं स्यात् तदा पयोददृष्टान्तो नोक्तः स्यात् पयोदे नीलत्वस्य प्रावृट्कालोपाधिकत्वादित्याशङ्कायां तत्तात्पर्यमाचार्यैस्तस्य धर्मा इत्यारभ्य स्निग्धप्रावृड्घनश्याम इत्यर्थं इत्यन्तेन निरूपितं, तथा चैतद्बोधनार्थं प्राकृतोपमा न त्वौपाधिकरूपबोधनार्थं, अतस्तद्वस्तुनस्तादृशत्वमभिप्रेत्यवोक्तमित्याशयेनाहुर्यस्त्वित्यादि, तथा च तस्य परोक्षत्वात् परोक्षवादत्वेनाप्युपपन्नत्वं ज्ञेयं, अतो निबन्धे यत् प्रकारचतुष्टयमुक्तं तन् नीलरूपत्वसाधनार्थं तत्र तथैव प्रतीतेः, न तु वस्तुस्वभावेन तादृशत्वार्थत्वमत्रैव तत्र कार्यानुल्लेखादित्यर्थः, अत्र स्वकालः को वा विवक्षित इत्याकाङ्क्षायां तद् विवृण्वन्ति स्वकाल इत्यादि, अग्रिम इति, तापनाशकः, एवं मूल इत्यादेस्तात्पर्यमाहुरेवमित्यारभ्य दानमित्यन्तं, तत्त्वेनेति, पुरुषोत्तमत्वेन, श्रीवत्स इतिशेषः, निरूपितमिति, श्रीर्वत्सायस्येति विगृह्य तद्व्याख्यानेनोक्तं, वस्तुत इत्यादि, ''उरो वत्सं च वक्ष''श्चेतिकोशाद् वत्सशब्दस्य वक्षोवाचकत्वे वत्सस्य लक्ष्म वत्सलक्ष्म श्रीवत्सं लक्ष्म यस्येतिविग्रहे ''वक्षस्यधिश्रितवधू''रित्यादिवाक्याद् वस्तुस्वरूपविचाराद् लक्ष्म्याश्च स्वार्थं चिद्रूपत्वेपि भगवद्धर्मानन्दरूपत्वात् तथेत्यर्थः, तर्हि श्रीवत्सस्यात्र मूलभूतब्रह्मत्वं कुत उक्तमित्यत आहुस्तत्रेत्यादि, तथा च प्रतिश्रुत्या लीलास्थानत्वमभिप्रेत्योक्तमिति श्रीरूपत्वं ब्रह्मरूपत्वं च न विरुद्धमित्यर्थः, शेषं स्फुटम् ॥ ५ ॥

महार्हेत्यत्र सुबोधिन्यां **भक्ता**विति, भक्तौ सत्यामित्यर्थः, टिप्पण्यामत्रापि **तद्रूप** इति, **मौलौ** किरीटरूपः, **अवगम्यते** शास्त्रप्रायपाठादवगम्यते, **तथात्व**मिति, शास्त्राभिज्ञत्वं, **तादृश** इति, शिष्यनिष्ठभगवद्भक्त्या प्रसन्नः शास्त्रत्रयाभिज्ञो यथा महापौरुषिकत्वेन प्रसीदन् छुकस्तथा, **उद्दामे**त्यत्र, सुबोधिन्या**मेवं लोके ज्ञान**मिति, शास्त्रीयत्वेन रूपेण **लोके**नेकविधतां प्राप्तं भगवद्विषयकं ज्ञानमित्यर्थः, **चतुर्भुज**मित्यत्र यज् ज्ञानं निरूपितं तदलौकिकमिति ततो भेदज्ञापनायात्र **लोकपदं**, **जनयिष्यन्ती**ति, कर्मणां सजातीयोत्पादनस्वभावत्वाज् जनयिष्यन्ति, **हिंसाप्रचुरापी**ति, अनेन वैराग्यरूपता स्फुटीकृता बोध्या, **शंखगदादी**त्यत्रेवात्र वैदिककृतेलौकिकदुःखनिवर्तकत्वात् , तत्र **साधनानी**ति, काञ्चीरूपे वैदिककर्मण्युपकरणानि, अङ्गदानीत्यादि, अत्र बहुवचनं चतुष्टयत्वस्मारणाय, **बाहुमध्ये तिष्ठन्ती**ति, कर्मत्वोपपादनाय, इदमेव टिप्पण्यामितरयोरित्यादिना विवृतं, समानयोगक्षेमत्वं **कङ्कणाना**मपीति न पृथक् तदुक्तिः, अङ्गदानां सात्त्विकत्वे हेतुमाहुरङ्ग दतीत्यादि, "कर्मणः सुकृतस्याहु"रितिवाक्याद् विदेहकैवल्यसम्पादकत्वेन **सात्त्विकं** तदित्यर्थः, तदिति, कङ्कणमित्यर्थः, राजसत्वं च तस्य चलत्वाद् भाति, नन्वेकस्यामेव क्रियाशक्तौ प्रतिष्ठितयोः शास्त्रबोधितकर्मरूपयोस्तयोर्द्वैविध्यं कथं सङ्गच्छत इत्यत आह **सात्त्विके**त्यादि, कर्त्रोरितिशेषः, विलक्षणाधिकारिकर्तृत्वेनैकस्य कर्मणो विलक्षणत्वं गीतायां "नियतं सङ्गरहित"मित्यादिना स्फुटमिति न शङ्कालेशः, **तैरि**ति, शास्त्रोक्तकर्मरूपाभरणैः, **तैर्विरोचमानत्वे** गमकमाहु**र्वद** इत्यादि, हरिवंशे पुष्करप्रादुर्भावसमाप्ताविदं पद्यं, शुक आहेति, दर्शनाङ्कनार्थक**मैक्षते**तिपदमाहेत्यर्थः ॥ १० ॥ **सविस्मय** इत्यत्रैतत्सर्वपरिज्ञान इति, दानस्तोत्रस्वाधिकाराणां परिज्ञाने, **पूर्वोक्त** इति, **ईक्षण**कर्तृत्वेनोक्तः शुद्धसत्त्वात्मकः, **अलभ्यलाभा**दित्यादि, एतेनार्थितोक्ता, **नैमित्तिकम**पीति, नैमित्तिकविषयकमित्यर्थः, **तादृश** इति, समीचीनभ्रमयुक्त इत्यर्थः ॥ ११ ॥ **अथैन**मित्यस्याभासे प्राकृत एव तस्य संस्कार इति, प्राकृते पुत्रे जाते तस्य पुत्रस्य संस्कारः ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तमद्भुतमित्यत्र पुनः **शुकोक्ती**ति, मूलेस्मिन् छ्लोके **श्रीशुक उवाचे**तिपाठो वर्तत इति ज्ञेयं, **दशलीले**त्यस्य टिप्पण्या**माद्यश्लोकस्थविशेषणसंख्ययो**रिति, द्वादशसंख्याद्यस्थविशेषणान्यादायैवोक्तेति, तेषु द्वादशसंख्यापि वर्तते परमपर्याप्ता दशसंख्या तु पर्याप्तेतिविभेदः, यथा नवसु पुरुषेषु मध्य एकस्मिन् पुरुष एकसंख्या वर्तते नवसंख्यापि पर्याप्तत्वापर्याप्तत्वाभ्यां परं विभेदस्तथात्रापि, तथा चैतद्विभेदाविवक्षया संख्याद्वयमध्याद्यश्लोकस्थविशेषणेष्वस्तीति **संख्ययो**रित्युक्तं, सुबोधिन्यां तमित्यस्य विशेष्यत्वात् तमादाय विशेषणेषु दशसंख्या न भवतीत्याशङ्क्याहुस्त प्रसिद्धमिति, तच्छब्दस्य पूर्वपरामर्शित्वे स्वरूपमात्रबोधकत्वाद् विशेष्यत्वमेव भवेत् प्रसिद्ध्यर्थकत्वे तु प्रसिद्धिरूपधर्मपुरःसरं बोधकत्वाद् विशेषणत्वमपि, **सृष्टिरूप** इति, सृष्टिं निरूपयतीति, सर्गलीलाप्रवर्तक इत्यर्थः, अत्र लीलाप्रवर्तकत्वं संख्यातात्पर्येणोच्यते न तु प्रत्येकं विशेषणेषु ता लीला व्याख्यातुं शक्यन्तेतोत्रापि न व्याख्येयमित्याशयेन **केचि**दित्युक्तं, ननु प्रमाणे'यतो वाच' इत्यादिभिर्विशेषज्ञानस्य निषेधादद्भुतत्वज्ञानं कथं भवतीत्याशङ्क्य व्युत्पादयन्तीदं **ही**ति, हि यत इदमद्भुतत्वज्ञानजनकं **प्रमेयस्वरूपस्य बलमतः प्रमाणात्** प्रमाणबलादतिरिक्तमधिकमित्यर्थः, तथा च पूर्वविशेषणोक्तं सामान्यतो ज्ञानं वेदेनापि भवति तद्विशेषाणामद्भुतत्वादीनां ज्ञानं तु तदधिकेन प्रमेयबलेनैव भवतीतिभावः, प्रमाणतोधिकबलत्वादेवास्य वीर्यरूपत्वमित्याहुस्तदेव **ही**ति, तदंबेति, लौकिकवैदिकानुल्लंघ्यवीर्यप्राकट्ये सत्येवेत्यर्थः, **अनेने**ति, लोकवेदाप्रसिद्धाश्चर्यरूपत्वकथनेन, तद् रूपमनुग्रहवशात् स्वत एव दृष्टं सदुपपद्यते याथातथ्येन विषयीभवतीत्यर्थः, **ब्रह्माण्डे**ति, **ब्रह्माण्डं** चतुर्दशलोकात्मकं पादमूलाद्यवयवभेदेन **विग्रहो** यस्य तादृशो विराड्रूप आध्यात्मिको ब्रह्मेत्यर्थः, **बलसम्बन्धिन** इति, "रामाद्या गोपबालका" इत्यत्रोक्ता बालाः क्रीडायां तेषु मुख्यो भगवानिति, **अलौकिके**ति, श्रीपदस्य शोभार्थकत्वमभिप्रेत्य चतुर्थो गुणोनेनोक्तः, **अम्बुजपदस्य** बह्वर्थकत्वेन व्याचिख्यासितत्वात् तत्सादृश्यकथनेनालौकिकत्वं शोभाया उक्तं, **अम्बुजौ वा सूर्याचन्द्रमसा**विति, "अद्भ्यः प्रातरुदेत्यपः सायं प्रविशती"तिश्रुतेरम्बुजत्वं सूर्यस्यातस्तन्न्यायेन चन्द्रोपि तथा, **ईक्षणे** इति द्विवचनान्तः, एतावीक्षणरूपौ यस्येत्यर्थः, चन्द्रस्य वामनेत्ररूपत्वमित्यपि पक्षः, अत एव गीतायां स्वरूपदर्शने 'शशिसूर्यनेत्र'मित्युक्तं, तमादायैव नाटकादिषु 'कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने'इत्यादिप्रयोगः, **ज्ञानं यस्ये**ति विषयता षष्ठ्यर्थः, यद्विषयकं ज्ञानमित्यर्थः, **ब्रह्माण्डे ईक्षण**मिति, तदन्तर्वर्तिनी पृथिव्यप्युक्तैव, अतः प्रथमपक्षाद् भेदं सूचयितुमाहुर्नान्यत्रेति, लोकान्तरचिन्तां विहाय पृथिवीमात्रोद्धारार्थं प्रवृत्त इत्यर्थः, एवमन्येप्यर्था ऊह्या इत्याशयेनोक्तं निरूपयितव्येति, कमलनेत्रयोः साधारणधर्मं विशदयितुमाहु**र्मध्य** इति, **दयामृताढ्य** इति, दयया प्रकटं यदमृतं नेत्रनिष्ठो रसस्तदाढ्यो **मरकन्दा अत्र स्वरूपे**, भवन्तीतिशेषः, **तत्सम्बन्ध** इति, कमलसम्बन्धे **भ्रमरो मधुपो** भवति तन्निष्ठमकरन्दपानकर्ता भवति तथा भगवन्नेत्रसम्बन्धे **सर्वोपि** तद्रसपानकर्ता भवति, भगवान् यं दयया पश्यति तस्य तद्रसास्वादो भवतीतिभावः, एतावदर्थबोधनार्थं **प्राकृतैरुपमीयते**, तथा च स्वसम्बन्धेन मधुपत्वकरणं साधारणधर्म इत्युक्तं, पक्षान्तरमाहु**र्यद्वा चे**ति, तदा स्वाधारापेक्षयाद्भुतत्वं **साधारणधर्मः**, शङ्खादित्वं पद्मस्य गदादित्वं चक्रस्य व्युत्पादयन्त्ययं **तत्व**मिति, **शङ्ख आदि**र्यस्येत्यर्थः, उत्पत्तिक्रमे जलं पृथिव्या आदिरितिभावः, एवं **गदादि**र्यस्य, वायुस्तेजस आदिरितिभावः, **शङ्खगदादीन्येवे**ति, शङ्खगदे आद्यावयवभूते येषां शङ्खगदापद्मचक्राणां मध्य इतिसमासः, **येषा**मिति, निर्धारणे षष्ठी,

तत्पुरुषाभावान्न समासनिषेधः, क्रमोत्र न विवक्षितः, मूले तु क्रमस्य वक्तव्यात् तत्र ययोरितिद्विवचनान्तेन विग्रहष्टिप्पण्यां व्याख्यातः, तदा ययोरित्यस्य सम्बन्धमात्रे षष्ठ्यर्थः, श्रीवत्सलक्ष्ममित्यत्र व्यावर्तकमिति, क्षरादक्षराच्च व्यावर्तकमित्यर्थः, अत्र टिप्पण्यामेतावद वाच्यमिति, मूले लक्ष्मत्वकथनादेव किञ्चिदाधिक्यं वाच्यमित्यर्थः, पुरुषोत्तमैकनिष्ठत्वेनेति, क्षराक्षरयोरपि लक्ष्मीस्तिष्ठति परं तत्र तस्याश्चलत्वमतस्तस्या निष्ठा नियता स्थितिः पुरुषोत्तम एवेत्यर्थः, तत्प्रादुर्भावेति, तस्या लक्ष्म्याः प्रादुर्भावस्थानं श्रीवत्सस्तद्रूपमसाधारणधर्ममित्यर्थः, सुबोधिन्यां ब्रह्मानन्द इति, ब्रह्मणोक्षरस्यानन्दः, सच्चिदानन्दात्मकमक्षरं ब्रह्म तन्मध्य आनन्दो लक्ष्मीरित्यर्थः, इदं द्वितीयस्कन्धनवमाध्यायसुबोधिन्यां स्फुटं, सर्ववेदेति, सर्वे वेदास्तल्लक्षणमक्षरं ब्रह्म प्रतिपादयन्ति, स्वरूपं त्ववाङ्मनोगोचरमितिभावः, नन्वक्षरस्य पुरुषोत्तमाधारत्वकथनात् पुरुषोत्तमोक्षरे भासते न तु पुरुषोत्तमेक्षररूपः श्रीवत्स इति चेदत्रैवं ज्ञेयं, इदमाधारत्वं न लौकिकगृहादिवत्, तथा सति पुरुषोत्तमस्य तद्व्याप्यत्वं स्यात्, किन्तु मण्डले सूर्यस्येव, यथा सूर्यो मण्डलं प्रतपन् बहिरपि किरणैः प्रतपति, तदुक्तं "स्वधिष्ण्यः प्रतप"न्निति "गोभिः सूर्य इवातप"न्निति च द्वितीयस्कन्धसुबोधिन्यां च विवृतं, यथा वायोगोलके वह्निः, यथा वह्निरयोगोलकमन्तर्बहिर्व्याप्य तिष्ठति बहिरपि दाहादिसम्पादकत्वात् तदधिकदेशवर्ती वा तथा भगवान्, तथा च भगवति बहिःप्रकटे लक्ष्यज्ञापनार्थं केनचिदंशेनाक्षरमपि भासते प्रबलेग्नावयोगोलकश्यामतेवेति, अत एवेति, श्रीवत्सस्याक्षरत्वादेवेत्यर्थः, एतस्य स्वाश्रयत्वादित्यनेनान्वयः, स्वपदेन भृगुस्तदाश्रयोक्षरं ब्रह्मेत्यर्थः, सर्वब्रह्माधारवत इति हेतुगर्भविशेषणं, तादृशदेहवान् ज्ञान्यक्षरमाश्रित्यैव तिष्ठतीतिभावः, लक्ष्म्याश्चेति, भृगोः सर्वब्रह्माधारदेहवत्त्वेन ज्ञानित्वादृष्यन्तरेभ्यो विशिष्टत्वाच् छ्रीवत्सस्य तदाश्रयत्वमिति चकारष्टिप्पण्यां च किञ्चेत्युक्तं, स्पर्शसुखाभिव्यक्तिहेतुत्वेन तत्पदस्पर्शे सुखमेव जातमितिभावः, इदं हेतुद्वयं भृगुनिष्ठं स्वाश्रयत्वेक्षरत्वं श्रीवत्सनिष्ठो हेतुरितिविभागः, कयाचिदवस्थयेति, अक्षरब्रह्मण एवावस्थाविशेषो जीव इति काशकृत्स्नमतमनुसृत्येदमुक्तं, स्वरूपभूत इति, अनारोपितमविद्यारहितं रूपमित्यर्थः, देहादिस्त्वविद्यारोपितं रूपमितिभावः, बाह्वादिकं विहाय कण्ठेस्थापनस्य तात्पर्यमाहुः क्रियाशक्तेरिति, मुक्तजीवानामिति, अविद्यारहितत्वादितिभावः, अत एव सर्वाकृति, स्थलद्वये निरूपणादुभयविधत्वमिति संख्यातात्पर्यमात्रं, तथात्वहेतुभूतामिति, तादृगवस्थोत्पादनेन जीवत्वहेतुभूतामित्यर्थः, वर्णान्तरं विहाय पीतस्यैवाम्बरस्य धारणे हेतुमाहुराकाशतनोरिति, पीतत्वं व्युत्पादयन्ति पीतत्वमिति, अन्यथेति, सम्बन्धकृतत्वाभाव इत्यर्थः, रूपस्य त्रैविध्यनियमे श्रुतिं प्रमाणयन्ति यदग्नेरिति, सत्त्वसम्बन्धाभावे हेतुमाहुर्व्यामोहिका त्विति, सत्त्वरजस्तमसां नीलरक्तश्वेतरूपता, तथा च सत्त्वसम्बन्धि नीलमपि रूपं प्रतीयेतेतिभावः, पीताम्बरस्य मायात्वं भगवदावरकत्वादिति ज्ञेयं, तस्य धर्मा इति, नीलवर्णस्य धर्मास्त्रयो निरूप्यन्ते सान्द्रदृष्टान्तेन ज्ञाप्यन्त इत्यर्थः, तान् धर्मानाह सर्वानन्देति, नीलवर्ण एव मेघ एते भवन्त्यतो नीलमेघधर्मा न वर्णान्तरमेघस्य, भगवति जीवनदातृत्वादिना मेघदृष्टान्तः सिद्धस्तस्य सान्द्रत्वकथनेनैते धर्माः सूचिता इति भावः, भगवानपीत्यन्तेन मेघसाधर्म्यं विवृतं, विशेषमप्याहुः पृथिव्या इति ॥ ९ ॥

महार्हेत्यस्याभासे तत्रेति, भगवत्स्वरूप इत्यर्थः, वेदसांख्ययोगानामिति, तथा च मूले महानर्होनुग्रहो यस्येत्यर्हपदेनानुग्रहः, वेदसांख्ययोगप्रापक इत्यर्थः, स यस्येति, सम्बन्धमात्रे षष्ठ्यर्थः, उद्दामेत्यस्याभास एवं लोक इति, लोके शास्त्राभिज्ञजीवेष्वेवं किरीटकुण्डलत्विट्परिष्वंगप्रकारेण वेदसांख्ययोगसम्बन्धिज्ञानं निरूप्येत्यर्थः, लौकिकानीति, भगवति लौकिकानि कर्माणि न सन्ति किन्त्वलौकिकानि, तानि तु नित्यत्वात् साधनानपेक्षाणीत्यर्थः, साधनानामपि भगवद्रूपत्वसिद्धान्तमभिप्रेत्याहुरुत्कृष्टानि वेति, अलौकिकानि भगवद्रूपाणीत्यर्थः, "तत् साधनं च स हरिः प्रयाजादिस्रुगादि य"दितिसिद्धान्तात्, अङ्गदानीति, चतुर्भुजत्वमभिप्रेत्य बहुवचनं, तद् भवतीति, तमःसत्त्वरजोरूपाणीति पूर्वमुक्तत्वात् तत् कङ्कणं राजसं भवतीत्यर्थः, विक्षेपकत्वादितिभावः, अङ्गदकङ्कणयोर्हस्तस्थितितात्पर्यमाहुः सात्त्विकेति, रज उत्पादकत्वाद् भगवतः सकाशाद् विभागहेतुः सत्त्वमपि विभक्ततया स्थापयतीति तद्धेतुरेव तमस्तु भगवति लयसम्पादकत्वात् विभागनिवर्तकमतोङ्गुल्यादिभावेन विभक्तयोः सखण्डयोर्हस्तयोरङ्गदकङ्कणस्थितिरविभक्तायामखण्डायां कट्यां काञ्चीस्थितिरित्यर्थः, धर्ममार्गवर्तिभिरिति, 'चोदनालक्षणोर्थो धर्म'स्तन्मार्गवर्तिभिः, तथा च वेदविहितैर्न त्वविहितैरित्यर्थः, भगवत्सम्बन्धिभिर्भगवत्याभरणत्वेन प्रतीतैरित्यर्थः, भगवान् पूर्वकाण्डे प्रतिपाद्य इत्यर्थः, विशेषणसंख्यायास्तात्पर्यान्तरमप्याहुर्वेद इति, चतुर्ष्वादावन्ते मध्ये चेति स्थानत्रये गीयते, एवं द्वादशविधत्वमित्यर्थः, नन्विति, 'देवक्यां प्रादुरासी'दित्यस्यानन्तरं 'सविस्मयोत्फुल्ल'तिश्लोको वक्तव्यस्तत्र विलोक्येतिपदाद् दर्शनमात्रेपलभ्यं भविष्यत्येवेति मध्ये श्लोकद्वयेन लौकिकवैदिकैश्वर्यादियुक्तो भगवानिति किमर्थमुच्यते तत्राशङ्कायां सत्यां शुको वसुदेव ऐक्षतेत्याहेत्यर्थः, तथा च वसुदेवस्य तावद्धर्मविशिष्टज्ञानं जातमितिबोधनार्थं श्लोकद्वयमुक्तमितिभावः, ज्ञानसम्पादनप्रयोजनं विवृण्वन्ति पूर्वोक्तानामिति, लोकेपि प्रियव्रतादिष्विव कार्यार्थं प्रकटयितुं योग्या ऐश्वर्यादयो लौकिका इत्युच्यन्ते, लोकप्रसिद्धत्वाल् लोके प्रकटयितुमयोग्या निरतिशया वैदिका भगवत्स्वरूपमिव वेदैकसमधिगम्या तेत्रालौकिका इत्युच्यन्ते, तथा च पूर्वोक्तानामैश्वर्यादिधर्माणामुभयविधत्वं सम्भवत्यतो वसुदेवश्चेदुभयविधत्वं न ज्ञास्यति तदाग्रे लीलास्वचिन्त्यैश्वर्यादिकं दृष्ट्वापि प्रियव्रतादिष्विव लौकिकान्येवैश्वर्यादीनि मंस्यते, अतः पूर्वमेव वसुदेवस्य तावद्धर्मज्ञानं सम्पादनीयमित्याहुरथेति, अधुनैव चेत् तावद्धर्मान् ज्ञास्यति तदास्माभिरुक्तमुभयविधैश्वर्यादिप्रतिपादकं स्वरूपस्य यद् व्याख्यानं विवरणं तदग्रेपि लीलासु ज्ञास्यतीत्यन्वयः, अस्मदुक्तव्याख्यानप्रकारेण लीलास्वैश्वर्यादिकं ज्ञास्यतीत्यर्थः, अतस्तादृशधर्मयुक्तं दृष्टवानिति शुक आह, श्लोकद्वयेनेतिशेषः, वसुदेवस्य तथाज्ञाने प्रमाण-

माहुरेतज् ज्ञानमिति, अर्थीति, निमित्तार्थीत्यर्थः, तस्येति निमित्तस्येत्यर्थः, वसुदेवस्य भगवत्प्रादुर्भावोपेक्षित इत्यर्थः, नन्वधिकारिविशेषणं तु फलकामना न तु निमित्तकामनेत्याशंक्येदं चेति पूर्वमुक्तं, नैमित्तिकं जन्मरूपं निमित्तं प्राप्य प्रवृत्तमित्यर्थः, काम्ये कर्मणि तथैव नैमित्तिके तु जन्मादिरूपनिमित्तकामनैव, यस्य पुत्रजन्माभिलषितं भवति स एव विशेषणदानादिकं करोतीति भावः भगवन्निष्ठ इति, भगवति निष्ठा स्थितिर्येन भगवन्निष्ठतासम्पादकस्तादृशो हर्ष इत्यर्थः। भगवन्निष्ठतां 'युवां मा'मितिश्लोके कारिकाभिर्व्याख्यास्यन्ति, भगवति विषयतासम्बन्धेन निष्ठा स्थितिर्यस्य, भगवद्विषयको हर्ष इत्यर्थः, अत्र 'हर्षः स्नेहात्मक' इति व्याख्यास्यन्ति, तदाहेति, हर्षस्यासाधारण्यं गवामयुतदानेनाहेत्यर्थः ॥ १० ॥

स विस्मयोत्फुल्लेत्यत्र ननु कर्मविद्वत्ताधिकारिविशेषणं न तु निमित्तविद्वत्तेत्यत आहुर्निमित्तज्ञानेनैवेति, एतेनैव कर्मज्ञानमप्युक्तमित्यर्थः, स्नेहात्म इति, स्नेह आत्मनि स्वरूपे यस्य, स्नेहविशिष्ट इत्यर्थः, मुदेत्यस्यावृत्त्योभयत्राप्यन्वयोऽस्पृशादित्यनेनाप्लुत इत्यनेन चेतिज्ञेयम् ॥ ११ ॥

अथैनमस्तौदित्यत्र पुत्रत्वेनाविर्भूतमिति, 'देवक्या'मितिश्लोके प्रद्युम्नप्राकट्यस्योक्तत्वादित्यर्थः, प्रमाणासिद्धमिति, शास्त्रसिद्धं, द्वेष्टुरामुष्मिकानिष्टजननमित्यर्थः ॥ १२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तमद्भुतमित्यत्र पुनः शुकोक्तिकथनमिति, श्रीशुक उवाचेत्यनेन कथनमिति साम्प्रदायिकाः, तमद्भुतमित्यस्य विवृतावम्बुजौ वा सूर्यचन्द्रमसावीक्षणे यस्येति, मुण्डकोपनिषत्स्व'ग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ'वित्यनेन सूर्यचन्द्रमसोर्नेत्रत्वकथनात्। 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ'वित्यनेन सूर्यचन्द्रमसोर्नेत्रत्वकथनात्, पीताम्बरमित्यस्य विवृतौ पीतत्वं राजसतामससम्बन्धादिति, ननु "यदग्ने रोहितं रूपं तेजसस्तद्रूप" मितिश्रुतौ रूपत्रयमेवास्तीत्युक्तमतः कथं प्रभोरम्बरस्य पीतरूपमित्याकाङ्क्षायामाहुः पीतत्वं राजसतामससम्बन्धादिति, सत्त्वरजस्तमसां नीलरक्तश्वेतरूपतेति गुणावतारवाक्यैर्निर्णीयत इति तत्त्वदीपप्रकाश उक्तत्वात् रजोगुणस्य रक्तत्वं तमसः श्वेतत्वमुभयोर्मिश्रणे पीतत्वं भगवदम्बरस्येत्यर्थः, पीताम्बरस्य मायारूपत्वं तन्त्र उक्तं, तत्र मायया गुणत्रयात्मकत्वेन सत्त्वगुणस्याप्यपेक्षितत्वेपि व्यामोहकमायारूपत्वान्न सत्त्वगुण इतिगुणद्वयमेवात्रेति ज्ञेयं, तत्र भगवत्सम्बन्ध्यनेकभावोत्पादनाय पीताम्बरे विक्षेपकरजोगुणोस्तीति भक्तानां रजस उपयोगः, भजनानधिकारिणां तु भगवत्स्वरूपाद् विक्षेपोत्पत्तौ रजोगुणकार्यं, स्वरूपसौन्दर्ये भक्तानां मनसो लयार्थं तमोगुणः पीतांबरे बहिर्मुखानां तु भगवत्स्वरूपाच्छादनं तमोगुणकार्यमितिविवेकः, अत एवाग्रे वक्ष्यते "व्यामोहिका माया तथैव भवति लयविक्षेपात्मिके"ति, तथा च सर्वभगवत्सामर्थ्यरूपायां तु सत्त्वगुणोपीतिभावः ॥ ९ ॥

(५) भगवदीयनिर्भयरामभट्टनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

तमद्भुतमित्यत्र दशलीलेत्यादि, दशलीलानिरूप्योयं पुरुषो द्वादशात्मकः द्विगुणो भगवानत्र प्रादुर्भूत इतीर्यते, अत्राद्यश्लोके दश विशेषणानि सन्ति द्वितीयश्लोके च द्वे विशेषणे, तेन तात्पर्यं प्रत्येकसमुदायाभ्यामुच्यते, सर्गविसर्गादिदशलीलानिरूप्य इत्याद्यश्लोकस्थसंख्याभिप्रायः, द्वादशात्मक इति समुदितविशेषणतात्पर्यं, द्वादशात्मकमुपपादयन्ति द्विगुण इति, मर्यादामार्गीयमैश्वर्यादिकमेकं द्वितीयं पुष्टिमार्गीयमैश्वर्यादिकं, एवं सत्युभयविधं प्रकटीकृत्य प्रकट इति द्विगुणपुरुषत्वं, प्रकारान्तरमाहुः सर्वषामिति, सर्वषां प्राणरूपश्च ऐहिकः पारलौकिकः, भक्तानां दशप्राणरूप ऐहिकः पारलौकिकश्चेति द्वादशाचेतितात्पर्यम्, तामाहुर्ज्ञानक्रियोभययुतो दशलीलाप्रवर्तक इति, प्रकारान्तरमाहुः सगुणामिति, सगुणां नवधाभक्ति निर्गुणां च प्रवर्तयन् काण्डद्वयार्थं तनुते सोत्र द्वादशधा मतः, स्फुटं, पुनः प्रकारान्तरमाहुरर्धेन सर्वप्रकाशकश्चैव कालात्मेन्द्रियनायक इति, सर्वप्रकाशकः सूर्यो द्वादशात्मेति, कालात्मा द्वादशमासात्मकः, इन्द्रियनायक इति, भक्तानामेकादशेन्द्रियरूपस्तदिन्द्रियनियामकश्चेति द्वादशात्मा, तात्पर्यान्तरमाहुरात्मेति, आत्मा कार्यं च भूतानि अहंतत्वमुभौ त्रयः अक्षरं भगवांश्चेति द्वादशात्मा हरिः स्वयं, आत्मेतिपदेन जीवपरमात्मानावुच्येते, कार्यं महत्तत्त्वं, भूतान्येकविधानि, अहंतत्त्वमहंकारः, उभौ प्रकृतिपुरुषौ, त्रयो गुणाः, अक्षरं भगवांश्चेति द्वादशात्मा, एतेन लीलासम्बन्धिपदार्थसृष्टिरेतत्स्वरूपात्मिकैवेति फलितम्।

अत्रैव श्लोके चतुर्भुजमित्यस्याभासे घातकाविति, घातकौ रक्षकौ चोक्तौ विरोधेप्यतिसंकटे वेदोक्तं द्विविधं ज्ञानं भक्तिर्भगवतस्तथा, विरोधेप्यतिसंकटेपि द्वौ भुजौ घातकौ द्वौ च रक्षकौ, हननरक्षणयोरेकत्रैकदाकरणं विरुद्धं तथापि तत् कृतवान्, परीक्षितो लौकिकबीजांशस्य दाहनं वैष्णवांशस्य गर्भस्य रक्षणं तन्मातुश्च, एतदेव सङ्कटरूपमपि, वेदोक्तमिति, कर्मब्रह्मविषयमात्मपरमात्मविषयकं ज्ञानमित्यर्थः, भक्तिरपि सगुणा निर्गुणा च साधनफलरूपा वा, एतेनापि चतुर्भुजकार्याण्युक्तानि। अत्रैव श्लोके मधुसूदन इत्यादि, मधुसूदनो माधवश्च त्रिवृन्नारायणस्तथा, चतुर्भुजरूपस्यायुधधारणक्रमभेदेन मधुसूदनमाधवनारायणाद्यश्चतुर्विंशतिभेदा वैष्णवशास्त्र उक्ताः, प्रकृते क्रमेण शंखपद्मगदाचक्राणि धारयन् मधुसूदनो भवति, किंचित् साम्यमादाय माधवत्वं नारायणत्वं चेति त्रिरूपत्वं, एवं संकर्षणप्रद्युम्नानिरुद्धरूपतापि ॥ ९ ॥

महार्हवैडूर्यं 'वेदे रामायणे चैव पुराणे भारते तथा आदावन्ते यथा मध्ये हरिः सर्वत्र गीयत इति, अत्र श्रीपुरुषोत्तमा 'हरिवंशे पुष्करप्रादुर्भावसमाप्तावदं पद्यमनेन शास्त्रोक्तकर्मरूपाभरणविरोचमानत्वे गमकमुक्त'मित्याहुः, श्रीवल्लभगोस्वामिनस्तु 'वेद इति वेदादिषु चतुर्ष्वादावन्ते मध्ये चेतिस्थानत्रये गीयत एवं द्वादशविधत्वमित्यर्थः, एतेन द्वादशविशेषणानां तात्पर्यान्तरमप्युक्त'मित्याहुः ॥ १० ॥

बुभुत्सुबोधिका

तमद्भूतमित्यत्र ऐश्वर्येणेति 'ईश्वरः पूज्यते लोके मूढैरपि यदा तदा निरुपाधिकमैश्वर्यं वर्णयन्ति मनीषिण' इत्यैश्वर्यलक्षणम्। अत्रान्यथाकर्तुं समर्थ ईश्वरः। अजनः प्रादुर्भून इति। वीर्येति 'वीर्यं देवेषु तत्रापि स्त्रीषु तत्रापि कामतः सान्निध्ये पुरुषाणां च मूर्छा तेन ततो मह'दिति लक्षणकवीर्यनिरूपणार्थम्। देवे वसुदेवे वीर्यमत्र। अग्रे देवेषु वीर्यं अपि न, किन्तु दैत्येष्विति विपरीतलक्षणयार्थः। पुनः शुकोक्तीति मूलेऽस्मिन् श्लोके 'श्री शुक उवाचे'ति पाठो वर्तत इति ज्ञेयम्। 'अद्भुत'पदस्मारित 'नेश्चिन्त्यं वाचि पूर्वव'दिति तत् प्रपञ्चयन्ति स्म दश लीलेति। अत्र टिप्पणी, ऐश्वर्यस्याष्टविधत्वात् तत्राष्टौ श्लोका उक्ताः। निरूपणीयस्य वीर्यस्य कुतो द्वौ श्लोकौ कुतश्च प्रथमे श्लोके दश पदानि द्वितीयश्लोके च द्वे इत्याकाङ्क्षायां सार्धचतुष्टयकारिकाभिस्तत्तात्पर्यं वदन्तीत्याशयेन व्याकुर्वन्ति स्म विशेषणेत्यादि। अयमिति प्रथमचरणोक्तः। पदेनेति विशेष्येण 'पुरुष'पदेन। अत्र व्युत्पत्तित्रयम्। द्वादशात्मकः उभयश्लोकावशेषणसङ्ख्यातात्पर्यम्। समुदायसङ्ख्यातात्पर्यम्। द्विगुण इति 'द्वादशाङ्गायं पुरुष' इति श्रुतेर्द्वादशाङ्गानां वक्तव्यत्वेऽसानन्दमात्रकरपादमुखादरादिरूपेपेक्षाबुद्धिजन्यद्वादशत्वाभावाज् जन्यत्वादाहुः मर्यादामार्गीयमित्यादि। पूर्वं पक्षपातादधमाङ्गे ऐश्वर्यादिकं पुरुषोत्तमस्या (= वासुदेवस्यो) च्यते। षट्कभागे भूभारहरणप्रवर्तकं सङ्कर्षणव्यूहरूपम्। वेदधर्मप्रवर्तकमनिरुद्धव्यूहरूपम्। विहितभक्तिः उद्धवद्वारैकादशस्कन्धोक्ता, तत्प्रवर्तकं गर्भसम्बद्धप्रद्युम्नव्यूहरूपम्। ज्ञानवैराग्ययोः प्रवर्तकं वासुदेवव्यूहरूपम्। यशः समुदायेन। 'तस्य नाम महद्यश' इति महानारायणात्। चतुर्व्यूहैः षड्गुणा उक्ताः। इदं रूपं वेदे देवासुरमर्यादया एकम्। वेदान्ते पुष्टिरूपं उत्तमाङ्गे पक्षपाताभावादैश्वर्यादिकं वासुदेवस्य (पुरुषोत्तमस्य) उच्यते। मर्यादाया अपीति पूर्वमैश्वर्यादिकं वासुदेवस्य पुरुषोत्तमस्य वा कारणरूपस्य व्यापारभूतमुक्तम्। अधुना कार्यरूपमैश्वर्यादिकमुच्यते। तथा च पुरुषोत्तमः स्वव्यापारेण वेदधर्मप्रवर्तकानिरुद्धेन पुष्टिधर्मं मर्यादाया अप्युल्लङ्घनं कार्यं ऐश्वर्यरूपम्। तथा स एव स्वव्यापारेण भूभारहरणप्रवर्तकसङ्कर्षणेन पुष्टिधर्मं दैत्यानामपि मुक्तिदानं कार्यं वीर्यरूपं करोति। उभयं ऐश्वर्यादिकं अदेयस्वरूपामृतदानादौ हेतुः। नपुंसकत्वविशिष्टैश्वर्यादिकाभिन्नपुंस्त्वविशिष्टो हेतुरित्यर्थः। अत्रेदं बोध्यम्। अदेयस्वरूपामृतदानं ऐश्वर्यकार्यकार्यम्। स एव स्वव्यापारेण विहितभक्तिप्रवर्तकप्रद्युम्नेन पुष्टिधर्मं यशःश्रीरूपं करोति। आदिशब्देन देयस्वरूपदानं वीर्यकार्यकार्यम्। स एव स्वव्यापारेण ज्ञानवैराग्यप्रवर्तकवासुदेवेन पुष्टिधर्मं ज्ञानवैराग्यरूपं करोतीति। समुदितेति समुदितं यच् छ्लोकद्वयं तत्तात्पर्यमित्यर्थः। तेन पुरुषपदे पुरा आसेति पुरमुषतीति व्युत्पत्तिद्वयम्। पुरि शेत इति तृतीया व्युत्पत्तिर्नास्ति व्यापकत्वादिति बोधितम्। अग्र इति अग्रिमकारिकासु। सर्वेषामितिकारिकायां सर्वेषामितिपदं सङ्कुचितवृत्तिकमित्याशयेनाहुः भक्तानामित्यादि। ऐहिकः पुरुषार्थरूपः पारलौकिकश्चेति द्वादशात्मक इत्यर्थः। तेन 'प्राणस्तथानुगमा'दितिसूत्रोक्तप्राणरूपता। वेदसारत्वात्। 'वायुर्वै क्षेपिष्ठा देवते'ति वेदः। तथा ज्ञानक्रियोभययुत इत्यज्ञात्वा लीलाः प्रवर्तयति करोतीति द्वादशधा मत इति ज्ञेयम्। तथा सगुणां नवधाभक्तिं इत्यत्र तात्पर्यार्थं भक्तिं प्रवर्तयन् काण्डद्वयस्यार्थं अभिधेयरूपं ज्ञानक्रियारूपं तनुत इति द्वादशधा मत इति ज्ञेयम्। अत्र कारिकासार्धेनाद्भुतं कर्म 'कर्मैव गुरुरीश्वर' इति सिद्धान्तोक्तम्। बलं चोक्तम्। 'बलं भक्तिरिति सिद्धान्त' इति भाष्यात्। जन्मप्रकरणे द्विधा द्वादशधा सूक्ष्मरूपेण विद्यमानापीदानीं सङ्ख्यातात्पर्यरूपापि। सर्वप्रकाशक इतिकारिकां सार्धां विवृण्वन्ति स्म सर्वप्रकाशक इत्यादिना। तथेति 'कृष्णद्युमणिनिम्लोच' इतिवाक्यात् सूर्यात्मकः। द्वादशस्कन्धे द्वादश सूर्या इत्याश्रयस्कन्धप्रतिपाद्यत्वादाश्रयरूपा द्वादश। स्मार्तसिद्धान्तात्यत्र। 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् एतैः सर्वैरादित्यमण्डलमेव विधास्यत' इत्यारण्यकात्। कालात्मेत्यादि कारिकांशं विवृण्वन्ति स्म लीलाया इत्यादि। तदवच्छेद इति कालावच्छेदः। एकहायन इत्यादि नात्र कालावच्छेदः स्वरूपातिरिक्तः। इन्द्रियनायक इत्यनेनान्या विधोच्यते सूक्ष्मदेहरूपेत्याशयेनाहुः लौकिकेति। आत्मेतिकारिकां विवृण्वन्ति स्म आत्मपदेनेत्यादि। अन्यदिति आनन्दमात्र इत्यन्यत्। अक्षरं भगवांश्चेति पदद्वयं स्पष्टम्। कारिकांशरूपं च। एतत्स्वरूपात्मिकैवेति भाष्ये फलाध्याये स्पष्टम्। छान्दोग्यीयश्रुतेरेवकारः। 'आत्मतः सर्व'मिति श्रुतिः। एवमैश्वर्यं निरूप्य वीर्यं निरूपयन्ति स्म एवं तात्पर्येति। पूर्वोक्तप्रकारेण। इदमेवेति वीर्यमेव, ऐश्वर्यमेव वा। एवकारस्तु 'वीर्यं मे दुश्चरं तप' इति वाक्यात्। फलितमित्यन्वयः। हरिरिति सुबोधिन्यां प्रतिपाद्यत्वाय कृष्णस्याकारकत्वाय। सुबोधिन्याम्। तत्र प्रथमं दशवेति द्वादशसु विशेषणेषु, दशवेति विशेषणेषु, तमित्यस्य प्रसिद्धार्थकत्वे विशेषणत्वात्। आश्रयार्थकत्वे तु तमिति विशेष्यम्। यादृशस्तच्छब्देन परामृष्टः तस्य सामान्यतः स्वरूपमेतेनोक्तम्। 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यये'ति वाक्यात्। स्वरूपलक्षणानीति। 'दिष्ट्याम्ब ते कुक्षिगतः परः पुमान्' इति पूर्वाध्यायान्त उक्तत्वात्। तथा 'परः पुमान्' भगवानिति वक्तुं युक्तम्। यथा घट इत्युक्ते कम्बुग्रीवादिमानिति लक्षणविद् वक्ति, न त्वातानवितानवानिति पटलक्षणम्, अनाप्तत्वापत्तेः। एवं वाङ्मनातीते परपुरुषे तत्त्वाद्भुतत्वादिलक्षणानि न। तमिति 'यस्मात् क्षरमतीतोऽहमक्षरादपि

चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति वाक्याद् वा । एकं स्वरूपलक्षणं लोकवेदप्रसिद्धत्वम् । 'यस्यान्तःस्थानि भूतानि येन सर्वमिदं तत'मिति लक्षणान्तरसङ्ग्रहायाहुः आश्रयेति । कृष्णाश्रयभूतः । सृष्टिरूप इति 'तदात्मानं स्वयमकुरुते'ति श्रुतावप्यकर्मत्वोक्तेः । केचिदिति विरलाः । मायापसारणादिकमत्रापि ज्ञेयम् । लेखे (प्रकाशे) मतान्तरमाहुः 'सृष्टिरूप इति केचिदिति अत्र युक्त्यलिखनादुक्तवाक्यविरोधाच्च तदसङ्गतमिति बोधित'मिति । श्रीवल्लभास्तु 'सृष्टिरूप इति सृष्टिं निरूपयतीति सर्गलीलाप्रवर्तक इत्यर्थः, अत्र लीलाप्रवर्तकत्वं सङ्ख्यातात्पर्यत्वेनोच्यते, न तु प्रत्येकं विशेषणेषु ता लीला व्याख्यातुं शक्यन्ते, अतोत्रापि न व्याख्येयमित्याशयेन केचिदित्युक्त'मित्याहुः । आश्रयत्वं द्वितीयं स्वरूपलक्षणम् । अलौकिकमेवेति लोके भवं लौकिकं, अद्भुतं भवति, 'आश्चर्यवत् पश्यति कश्चिदेन'मितिवाक्यात्, परं परिचयात् प्रतीतिविषयं न भवतीत्यलौकिकमेवेत्येवकारः । अलौकिकत्वं तृतीयं स्वरूपलक्षणम् । न तु लोकवेदसिद्धमिति अत्र टिप्पणी 'तमद्भुत'पदयोर्विरोधपरिहर्त्री यद्यपीत्यादि । सिद्धमिति तृतीयाष्टके सिद्धम् । 'प्रजापतिरकामयते'ति प्रजापतिपदेन । 'ब्रह्मन् पुंसि चे'ति लिङ्गानुशासनसूत्रम् । अत एव संवत्सरोत्सवः सवत्सरादिः । 'संवत्सरो वै प्रजापति'रिति संहिता । तत्तथैवेति तत् रूपं तथा विरुद्धधर्माधारत्वेन एव । 'उभयव्यपदेशात् त्वहिकुण्डलव'दिति सूत्रभाष्यादेवकारः । इदमिति लोकवेदप्रसिद्धत्वे सति अद्भुतत्वम् । 'अदि भुवो डुतच्' इति पाणिनीयसूत्रम् । पूर्वेणेति 'त'मिति विशेषणार्थेनेत्यर्थः । सुबोधिन्याम् । ननु प्रमाणे'र्यतोवाच' इत्यादिभिर्विशेषज्ञानस्य निषेधादद्भुतत्वं ज्ञानं कथं भवतीत्याशङ्क्य व्युत्पादयन्ति स्म इदं हीत्यादि । हि यत इदम् लोकवेदप्रसिद्धत्वे सत्यद्भुतत्वं स्वेच्छया यदा प्रमाविषयं भवति तदा तस्य बलं भक्तिः स्नेहः प्रमाणाद् 'यतो वाचो निवर्तन्त' इत्यस्मात् अतिरिक्तं स्निग्धभगवद्विषयकम् । तथा च पूर्वविशेषणोक्तं सामान्यतो ज्ञानं वेदेनापि भवति, तद्विशेषाणामद्भुतत्वादीनां ज्ञानं तु तदधिकेन प्रमेयबलेनैव भवतीति भावः ।

प्रमाणतोधिकबलत्वादेवास्य वीर्यरूपत्वमित्याहुः तदेव हीति । अनुल्लङ्घ्यमिति उल्लङ्घनं लौकिकैः दूषणं वैदिकैरप्रमाणीकरणं तद्योग्यं न भवतीत्यर्थः । तदैवेति लौकिकवैदिकानुल्लङ्घ्यवीर्यप्राकट्यकाल एवेत्यर्थः । अनेनेति लोकवेदाप्रसिद्धाश्चर्यरूपत्वकथनेनेत्यर्थः । दृष्टमित्यनुग्रहवशाद् दृष्टम् । उपपद्यत इति प्रत्यक्षप्रमाणादुपपन्नं भवति, युक्तियुक्तं कुरुतेऽन्योपि । इत्युक्तमिति तथा च श्रुतिः "अन्यदेव तद् विदितादथोऽविदितादधी"ति उक्तमिति तात्पर्यवृत्त्योक्तम् । वाच्योर्थस्तु त्यदादीनां पूर्वोर्थः प्रधानोर्थो वा । त्यदादीनां पूर्वपरामर्शित्वं प्रधानपरामर्शित्वं वा । अद्भुतपदस्याश्चर्यं वाच्योर्थः । बाले बाले क इति 'नैश्चिन्त्यं वाचि पूर्वव'दिति निशीथसूत्र उक्तत्वाद् रोमे 'ऊर्ध्वमूलमधःशाख'वृक्षे समवायसम्बन्धेन ब्रह्माण्डविग्रहो यस्य, तथा बाले पुरो दृश्यमाने को ब्रह्माण्डविग्रहो यस्य जृम्भिष्यतः । यद्वा । 'सर्वं सर्वमय'मिति श्रुतेः तथा । यद्वा । बालब्रह्माण्डयोराधाराधेयभावसम्बन्धमात्रम् । अस्मदादिरोमशरीरयोः सम्बन्धस्तथा । श्रीभागवते वाक्यमपि । अद्भुतबालकपदयोः सामानाधिकरण्यस्वभावात् सूचितमर्थमाहुः अद्भुतश्चेत्यादि । बलसम्बन्धिन इति 'रामाद्या गोपबालका' इत्यत्रोक्ता बालाः क्रीडायां तेषु मुख्यो भगवानिति । अद्भुतपराक्रमत्वेनेत्यादि अद्भुतः पराक्रमो वीर्यं तदभेदाद् बालके तत्त्वेन बालकपदेन यशो निरूपितमित्यर्थः । 'यशो यदि विमूढानां प्रत्यक्षासक्तिवारणात् स्वधर्मं योजयेत् तेषु तदा भवति नान्यथे'ति लक्षणकम् । 'विमूढा' लौकिकाः अद्भुतबालके बालकधर्मासक्तियुक्ता भवन्त्येव । 'स्वधर्मं' पीयूषरूपम् । चतुर्थं स्वरूपलक्षणमद्भुतबालकत्वम् । लक्ष्मीरीक्षण इति कामपुरुषार्थत्वात् तदीक्षणे लक्ष्मीः, प्रतिबिम्बद्वारा ईक्षणे भवति । सर्वतोक्षित्वाद्वा । अम्बुजौ सूर्याचन्द्रमसौ अपां पुष्पत्वात्, आरण्यके प्रसिद्धम् । ईक्षणे इति द्विवचनान्तं पदम् । पञ्चाग्नीति अत्र 'ह्यापः पुरुषवचसो भूत्वा वदन्ती'ति श्रुतेस्तद्विद्यासाधितरूपस्याम्बुजत्वं बोध्यम् । ज्ञानं यस्येति विषयता षष्ठ्यर्थः । यद्विषयकं ज्ञानमित्यर्थः । सप्तमी तु न भवति । तात्पर्यार्थत्वात् । भोगायतनेति भोगायतनं शरीरम् । कादाचित्की क्रीडा । "प्राप्तं तन्निजरूपाय गोविन्दाय नमो नम" इति श्रीगोस्वामिविज्ञप्तेः । पृथिव्यामेवेति पृथिवी पत्नी पञ्चरात्रशास्त्रे भगवतः । अन्यत्रेत्यन्तरिक्षे दिवि च । पृथिव्याः प्रकृतत्वात् । पादयोर्दृष्टिरुक्ता न शिरसि न मध्येन्तरिक्षे । अनेकधेति पूर्वोक्तप्रकारेणैवेति बोध्यमदृष्टोत्पादकत्वात् । 'श्रियो हि परमा काष्ठा सेवकास्तादृशा यदी'ति श्रीलक्षणम् । 'सेवका' ईक्षणं इन्द्रियाणि च । अत्रैव ज्ञानं निरूपयन्ति स्म ज्ञानात्मिकेति । तत्रेत्यम्बुजे । दयामृतादय इति अमृतं जलम् । आदिना लक्ष्मीः । तत्सम्बन्ध इति भक्त्या बोध्यम् । प्राकृतैरिति 'लौकिकं नैव मनुत' इतिवाक्यात् पक्षान्तरमाहुः यथा वेति । कमलमेवेति हंसशैवालादयोऽद्भुता भवन्ति तद्योगव्यवच्छेदायैवकारः । दार्ष्टान्तोपयोगिनो न भवन्तीति । ज्ञानलक्षणं तु, 'ज्ञानोत्कर्षस्तदेव स्यात् स्वभावविजयो यदी'ति । सर्वो हि भगवद्व्यतिरिक्ते आसक्तः स्वभावात्, स्वभावविजये भगवद्दयामृतादिमकरन्दमधुपो भवति । तथाऽद्भुतरूपत्वेन नेत्रज्ञानं तद्वान् भवति । इदं गीतोक्तज्ञानपक्षे । स्वयं प्रकाशत्वं ज्ञानत्वमितिपक्षे तु न । अम्बुजेक्षणत्वं पञ्चमं स्वरूपलक्षणम् । चतुर्विधमिति 'क्रिया ज्ञान'मिति पञ्चरात्रमित्याशयेनात्र टिप्पणी प्रमाणेत्यादि । सङ्ख्यातात्पर्यम् । यद्वा । कामः प्रमाणं शृङ्गाररसत्वात् । 'अत्र प्रमाणं भगवा'निति वाक्यात् । अर्थः प्रमेयम् । धर्मः साधनम् । मोक्षः फलम् । चतुर्व्यूहकार्यम् । निरूपितेति उभयकाण्डार्थौ । ज्ञानं निरूपयतीति पञ्चरात्रात् कर्म ज्ञानत्वेन निरूपयति । इति नेति जानातीच्छति यतते इति नैयायिकप्रवादात् । स्वयमिति कर्मेन्द्रियाणि । चिद्रूपाणि ज्ञानरूपत्वात् । पूर्णज्ञानजनकानि अद्भुतत्वात् । तेषामिति धर्मार्थकाममोक्षाणाम् । अत्र सुबोधिनी तान्येवेति "चतुर्णां पुरुषार्थानां दानाद् देवश्चतुर्भुज" इति प्रसिद्धेरेवकारः । यद्यत्र तिष्ठति तदन्यस्मै ददातीति तथा । चतुर्भुजरूपेणोच्यन्त इति

चतुर्भुजरूपेण चतुर्भुजाभिरुच्यन्त इत्यर्थः। पुरुषार्था इति सङ्ख्यातात्पर्यं जन्मप्रकरणत्वात्। एवं स्पष्टेति न व्याख्याता। भूतानि चेत्यस्य तात्पर्यमाहुः भगवद्भुजानामित्यादि। तदाधीति क्रियाधिदैविकरूपत्वमपि। तन्मात्राणि गन्धादीनि तद्रूपत्वम्।

अपिना तन्मात्राकार्यरूपपृथिव्यादिचतुष्टयरूपत्वं, 'आकाशशरीरं ब्रह्मे'ति भुजानामाकाशरूपत्वम्। ज्ञाननिरूपणप्रयोजनमाहुः तेनेत्यादि। तेषामिति ज्ञानरूपकर्मेन्द्रियाणामित्यर्थः। भूतपदस्यार्थान्तरमाहुः जरेति। सङ्ख्यातात्पर्यं प्रकरणात्। उपकरूपाणीति जरायुजादीनामाधिदैविकरूपाणि। तेन जरायुजादीनां कर्मसिद्धान्ते क्रियारूपभुजामूलम्। अत्र वाक्यम्। 'कर्मणा जायते जन्तुः कर्मणैव प्रलीयत' इत्यादि। भगवान् पुरुषद्वारा स्रष्टा। पुरुषान्तःस्था जरायुजादयः। धर्मादयो दिक्पाला वेति तु 'इन्द्रादयो बाहव आहुरुस्रा' इति द्वितीयस्कन्धवाक्यात् स्फुटमतो न व्याख्यातम्। द्विगुणपुरुषत्वं विवृण्वन्ति स्म पुरुषस्येत्यारभ्यालौकिकमित्यन्तम्। युद्धापेक्षेति 'कालः कलयतामह'मिति वाक्यात्। अवस्थेति बाल्यावस्था। साधनं स्तनपीडनचरणोत्क्षेपणम्। घातकावितिकारिकायोजना तु चतुर्षु भुजेषु द्वौ द्वौ भुजौ घातकौ रक्षकौ विरोधेप्युक्तौ। च पुनः अतिसङ्कटेपि तथोक्तौ। किञ्च चतुर्भुजपदेन भुजतया वेदोक्तं द्विविधं ज्ञानमुक्तम्। तथा भगवतो भक्तिरुक्तेति रूपामङ्गीकृत्य तां विवृण्वन्ति स्म घातकावित्यारभ्य रूपा चेत्यन्तम्। विरुद्धमिति सहानवस्थानलक्षणो विरोधः। तथापि विरुद्धधर्माश्रयत्वात् तद् विरुद्धं कृतवान्। कर्म ब्रह्मेति वेदशब्देन वेदान्तस्यापि सङ्ग्रहे बोध्यम्। वेदान्तासङ्ग्रहे त्वाहुः आत्मपरमात्मेति। आत्मा वेदे। 'कृष्णाजिनं ब्रह्मे'ति श्रुतौ। परमात्मा स्मृतौ। तेनोत्सन्नप्रच्छन्नशाखामूलत्वम्। स्मृतीनामुत्सन्नप्रच्छन्नशाखामूलत्वात्। अत्र द्वयं द्वयं घातकं रक्षकं च। भक्तिरपीत्यत्र सगुणा साधनरूपा च घातिका। निर्गुणा फलरूपा च रक्षिका। मूलेन सकृदुच्चरितेषु पदेषु अद्भुतत्वादनेकेर्थाः 'सर्वं सर्वमय'मितिश्रुतेर्ब्रह्मविषयिण्या उक्तास्ते खले कपोतन्यायेनात्र बोध्याः। वैशिष्ट्येन तं प्रत्येकैकशः स्फुरन्तोपि भगवत्कृपावलोकितं सर्वज्ञं प्रति युगपत् क्रमेण वा यथाधिकारं विषयीभवन्तीति न कोपि शङ्कालेशः। चतुर्भुजत्वं न लक्षणं, अम्बुजेक्षणरूपस्वरूपलक्षणेन्तर्भावात्। 'ज्ञानं क्रिये'ति पञ्चरात्रात्। अग्रिमपदेन वैराग्यं कथमुच्यत इत्याकाङ्क्षायां तद् विवृण्वन्ति स्म वैराग्यं हीत्यादि। सर्वदुःखेति भगवद्रूपत्वात् तथा। तेनेति यद् यज्जनकं तत् तद्गुणकं यद् यद्गुणकं तत् तदात्मकमितिव्याप्तेस्तन्न्यायेनेत्यर्थः। अत्र विरुद्धधर्मौ व्यवस्थयेत्याहुः तेन भक्तेष्विति। वैराग्यलक्षणं तु, 'हरेश्चरणयोः प्रीतिः स्वसर्वस्वनिवेदनात् उत्कर्षश्चापि वैराग्ये हरेरपि हरिर्यदि भक्त्या च तादृशत्वं च सा सेवा सेवकोचिते'ति 'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्य'मिति साङ्ख्यसूत्रोक्तनिर्व्यापारं भक्तिमार्गेनुपपन्नम्। मिथ्याचारत्वस्य गीतोक्तस्यापत्तेः। सुबोधिन्यां शङ्ख तदादिश्चेत्यादि शङ्खादिः पद्मम् 'तदादि'शब्दार्थः। शङ्खं आदिर्यस्येति। आदिशब्दोऽनपुंसकः। शङ्खं च गदा च शङ्खगदे। द्वन्द्वान्ते श्रूयमाणः आदिः प्रत्येकमभिसम्बध्यते। तेन शङ्खगदे आदि श्रुतौ ययोः पृथिवीतेजसोः ते शङ्खगदादिनी। तद्गुणसंविज्ञानो बहुव्रीहिः। तदनन्तरं शङ्खगदादीनि आयुधे यस्येति बहुव्रीहिः। गदादिश्चेति गदा आदिर्यस्याग्नेः स गदादिः। शङ्खादित्वं पद्मस्य, गदादित्वं चक्रस्य व्युत्पादयन्ति स्म अपां तत्त्वमिति। श्रुतिस्तु 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद् वायु'रित्यादिस्तैत्तिरीये। इत्येवं स्फुटत्वान्न व्याख्यातम्।

टिप्पण्याम् उक्तरीत्येति लेखे (प्रकाशे) 'दक्षिणहस्तयोरुपरि शङ्खो नीचैः पद्मम्, वामयोरुपरि गदा नीचैश्चक्रम्। अनया रीत्या धारयन् मधुसूदनः, पुराणान्तरे तथाप्रसिद्धत्वात्। मन्दारमधुसूदनादौ $\begin{smallmatrix}\text{१ म. ३}\\ \text{४ द. २}\end{smallmatrix}$। तथा दर्शनाच्चेति भाति। एवं माधवरूपेपि, बिन्दुमाधवादौ $\begin{smallmatrix}\text{३ मा. १}\\ \text{२ द. ४}\end{smallmatrix}$। तथा दर्शनात्। नारायणस्वरूपेपि वेङ्कटादौ $\begin{smallmatrix}\text{४ ना.}\\ \text{१ द.}\end{smallmatrix}$। तथा दर्शनाद् भातीति। तथा एवं त्रिवृद्रूपत्वमित्यादिटिप्पणीलेखे (प्रकाशे) "अत्र पूर्वं चतुर्भुजपदविवरणे चतुर्विधकार्यकरणार्थमवतारचतुष्टयकथनेन चतुर्व्यूहत्वसिद्धावपि यदत्र त्रिरूपत्वेन विवरणं तत् 'शङ्खगदाद्युदायुध'मित्यत्र क्रमेण शङ्खस्य गदायाः 'आदि' पदोक्तस्य चक्रस्य च उत्पदेनोक्तः स्थापनबोधनादङ्गीकृतमिति प्रतिभाति। त्रिव्यूहकार्यस्यैव बहुशः करणादुक्तं ज्ञेयम्। वासुदेवकार्यस्य गीतोपदेशभीष्ममुक्त्यादौ क्वचिदेव करणादिति भाती"ति। अत्र प्रथमभातीतिपदं एवं शङ्खपद्मेति सुबोधिन्या दक्षिणावर्तनेपि क्रमो नायातीति क्रमेणेति सुबोधिन्या विरोधः, अतोयं क्रमो वासुदेवव्यूहे दक्षिणावर्तने नास्ति। वासुदेवो वेदे पठ्यत इति वेदत्रयीपक्षवत्। व्यूहत्रयपक्षे वासुदेवव्यूहः पुरुषोत्तमः इति हेतोः क्रम उक्तः सुबोधिन्याम्, लेखे (प्रकाशे) तु प्रतिकृतिकानुरोधेनोक्तम्। तद्यथा $\begin{smallmatrix}\text{१ म. ३}\\ \text{४ द. २}\end{smallmatrix}$। द्वितीयभातीति तत्र माधवनिरूपणे तथेति गदाचक्रे दक्षिणयोरब्जशङ्खौ वामयोर्धारकत्वप्रकारेण। तद्यथा $\begin{smallmatrix}\text{३ मा. १}\\ \text{२ द. ४}\end{smallmatrix}$। नारायणनिरूपणे तथेति शङ्खाब्जे दक्षिणयोः चक्रगदे वामयोर्धारकत्वेन प्रकारेण। तद्यथा। $\begin{smallmatrix}\text{शं. ना. च.}\\ \text{प. द. ग.}\end{smallmatrix}$। त्रिरूपत्वेनेति त्रिवृन्नारायण इति नैकं पदं नारायणे त्रिवृत्करणस्य वेदादिबाधितत्वात्। प्रतिभातीति, समासस्य सुबोधिन्यामुक्तत्वात् प्रकारान्तरस्य व्यूहेषु युक्तत्वात् प्रतिभाति। $\begin{smallmatrix}\text{३ अ. २}\\ \text{१ द. ४}\end{smallmatrix}$। लेखोक्तप्रकारात्। $\begin{smallmatrix}\text{३ सं. २}\\ \text{१ द. ४}\end{smallmatrix}$। व्यूहप्रतिपादकत्वेन तद्विरुद्धक्रमाप्राप्तेः। सङ्कर्षणो वेदात्मेति। $\begin{smallmatrix}\text{३ प्र. ४}\\ \text{१ द. २}\end{smallmatrix}$।

शङ्खगदादिनी पद्मचक्रे उदायुधे यस्येति टिप्पण्याः। अस्याः शङ्खगदे आदी ययोस्ते शङ्खगदादिनी पद्मचक्रे उदायुधे यस्येति तद्गुणसंविज्ञानो बहुव्रीहिरिति टिप्पणीफक्किकाया आधुनिकत्वे तु शङ्खगदादय एव उद्यतान्यायुधानि यस्येति सुबोधिन्युक्तविग्रहो द्रष्टव्यः। अग्रे स्पष्टम्। उक्तमिति उपलक्षणविधया व्यूहत्रयपक्षादुक्तमित्यपि। भातीति ४ वा. २ १ द. ३। पञ्चमस्कन्धे 'श्रीवत्सलतामन्दरवरवनरुहवनमालाच्छूर्यमृतमणिरादादिभिरुपलक्षित' मिति वाक्यात्। 'अङ्घ्रि' चक्रम्। त्रिधाति व्यूहाश्चतुर्धापि। वासुदेवो धर्मी वेदे। २ वा. ३ १ द. ४। वेदेऽस्पष्टत्वात् पञ्चरात्रं 'इत्युक्तो ब्रह्मणा देवः शङ्खचक्रगदाधर' इति। पुष्टौ तु विपरीतः क्रमः। ३ वा. २ ४ वा. १ ।

अत्र वासुदेवः पुरुषोत्तमो। न व्यूहः। २ पु. १ ३ द. ४। 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः, आकाशाद् वायुः, वायोरग्निरग्नेरापः, अद्भ्यः पृथिवी'ति श्रुतेः। अत उक्तं भातीति। तदग्रे शङ्खेत्यादिविग्रहेति टिप्पणी। विग्रहवाक्ये शङ्खगदादय इत्यत्र शङ्खः गदा च शङ्खगदे आदिः आदिश्चेति आदी सरूपैकशेषः। शङ्खगदे आदी च शङ्खगदादयः। परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्यजहल्लिङ्गविषयत्वात्। 'आदि'शब्दो नियतपुल्लिङ्गः। क्वचित् स्त्रियामपि। आदिशब्दे न्यूनपूरणम्, आदिः तदादिः शङ्ख आदिर्यस्य। आदिः गदादिः गदा आदिर्यस्य। न स्वार्थिकमिदम्। अर्थस्यार्थान्तरं विनानुपपत्त्यभावात्। यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रिभोजनकल्पनमन्तरा पीनत्वानुपपत्तिस्तथात्र नेति। न च वसुदेवदर्शनादार्थिकं तत्र तु न्यूनपूरणमिति वाच्यम्। दर्शनस्य भविष्यत्वात्। एवकारो स्यादिचतुष्टययोगव्यवच्छेदकः। 'पुरुषोत्तमस्तु नन्दगृह एव मायया सह जात' इति मायाशबलितस्य नन्दगृह एव सत्त्वात्। अष्टभुजामायासहितस्य उद्यतानीति उत् प्रधानानि तत्त्वरूपाणि यतानि। उत् प्राधान्ये। इन्द्रियेत्यादिसुबोधिन्युक्तं पक्षं व्युत्पादयितुमवतारयन्ति स्म शङ्खाब्जाभ्यामित्यादि। 'अपां तत्त्वं दरवर'मित्यादौ अपां तत्त्वे कारणताशक्तौ भगवन्निष्ठायां दरवरत्वं न तु दरत्वं तच्चेन्द्रियम्। दरवरस्यान्यविधस्यास्याविसर्जनाया ज्ञानाविषयत्वं इन्द्रत्वादिन्द्रसम्बन्धि किञ्चित् तत्त्वमिन्द्रियम्। योगमात्रात् 'सर्वं सर्वमय'मिति 'सर्वे सर्वार्थवाचका' इति च वाक्याभ्याम्। यद्वा, प्राणपदस्येन्द्रियवाचकत्वमपोति प्राणपोषितमपीन्द्रियम्। तदाहुः प्राणपोषितानीति। कार्येति गतप्राणेन्द्रियाणां कार्यासाधकत्वात्। तादृशत्वादिति प्राणपोषितत्वात्। प्राणेन्द्रसम्बन्धेनेन्द्रियत्वात्। द्वे आयुधे आन्तरमारकौ इत्याहुः तेनान्तर इति। 'दर्पोऽहङ्कारकः सूर्य' इति विश्वः। 'सूर्य आत्मा जगतस्तस्थुषश्चे'ति श्रुतेः सूर्य आत्मा। प्रकृते चेति अवतारे च। पद्मस्य देहरूपता, तां चोपपादयन्ति स्म ब्रह्माण्डेति। उपरीति कंसस्योपरि। तथा भवतीति दर्पहन्तृ भवतीत्यर्थः। तथेति देहरूपत्वमायुधरूपत्वं च पद्मस्येत्यर्थः। एवं दर्पोपमर्दके द्वे उक्त्वा प्राणघातके द्वे आयुधे आहुः गदाया इति। निहन्तीति तम उपाधिमैच्छिकं स्वीकृत्येति बोध्यम्। अतिदेशाधिकरणे प्राणपदवाच्यत्वोक्तेर्ब्रह्मणः। तेजोरूपमिति मन ज्ञाने मनोन्तःकरणमतस्तेजोरूपम्। सात्त्विकाहङ्कारकार्यत्वाच्च। पक्षान्तरमिति पद्मदेहात् पक्षान्तरमाहुः। इति हेतो 'राकाशशरीरं ब्रह्म'। अन्योपीति वेदान्तादन्यो वैदिकः भावः, 'आप मायामपः सर्वा' इत्यारण्यकोक्तो वात्मभावः। मज्जयतीति जलं कर्तृ। प्रापयन्तीति इच्छाविद्याकर्मपूर्वप्रज्ञाः कर्त्र्यः। तेन न तु छित्त्वेत्यस्याः सुबोधिन्या अयमर्थः। देवासुरान् द्वैधीकृत्वाप्यासुराणां महाभूतपातनं न त्यजन्तीच्छाविद्यादयः। तदुक्तं दशमे नलकूबरमणिग्रीवस्तुतौ 'त्वमेकः सर्वभूतानां देहास्वात्मेन्द्रियेश्वर' इति चतुर्व्यूहेष्वेकत्वसामानाधिकरण्येपि शब्दप्रवृत्तिनिमित्ताभावादायुधेष्वेव देहास्वादीनां कारणेषु देहास्वादिरूपेष्वलौकिकेषु प्रवृत्तिः, देहः असुः आत्मा इन्द्रियाणि च तेषामीश्वरः। आभिरीशिनीभिरीशते इतीश्वरः। यद्यपि सर्वभूतानां देहास्वादीश्वरः तथापि तैस्तैरूपैरीश्वरो बोध्यः। अलौकिकत्वाच्चतुर्णाम्। शङ्खगदाद्युदायुधत्वं षष्ठं स्वरूपलक्षणम्। एवं षड्गुण इति ऐश्वर्यादिगुण एवं 'तमद्भुत'मित्याद्युक्तप्रकारेण भगवान् निरूपितः, न तु तत्त्वाद्भुतत्वादिप्रकारेण। परपुरुषस्य स्वरूपलक्षणलक्षितस्य वक्तुं युक्तत्वात्। वेदे स्मृतौ पुराणे च 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यत' इति वाक्यात्। पुनरिति 'हरिः सर्वत्र गीयत' इति वाक्यात् पुरुषस्य द्विगुणत्वात् शङ्ख्यातात्पर्यात् वेदान्तोक्तरूपानन्तरं वैदिकैश्वर्यादेः प्राप्तत्वाच्च पुनरित्यर्थः। श्रीवत्स इत्यादि, अत्र टिप्पणी, अत्रैतावदिति मूले लक्ष्मत्वकथनादत्र विशेषणे ज्ञानक्रियाशक्तिरूपमधिकं किञ्चिद् व्याख्यानं वाच्यमित्यर्थः। लक्ष्म लक्षणं, तज्ज्ञानवत्त्वं लक्षणम्। 'यः सर्वज्ञ' इति श्रुतेः सर्वज्ञानमक्षरम्। अनन्तत्वात्। क्रियावत्त्वं च। जगज्जन्मादिकर्तृत्वं कृतिः। तत्र श्रीः कृतिः। कार्यलक्षणरूपा परम्परया स्वजनकाक्षरद्वारा। 'अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तम'मिति वाक्यात्। अक्षरं 'सत्यं ज्ञानमनन्तम्'। इदं स्वरूपलक्षणम्। तत्र श्रियः परम्परालक्षणभूतायाः 'जन्मा'दिसूत्रे साक्षाल्लक्षणत्वेन प्रतीतेराहुः पुरुषोत्तमेति। अनेन भाष्ये 'ब्रह्मलक्षणं पुरुषोत्तमे तु कृतिः श्रीरूपा परिचायिता अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तम'मिति वाक्यादक्षरसमावेशमाहुः तस्याश्चेतरेति। लक्ष्मीत्वेनागोचरत्वं भक्तिजज्ञानविषयत्वात्। ब्रह्मानन्दत्वेन तु प्रत्यक्षत्वम्। तत्प्रादुर्भावेति लक्ष्म्याः प्रादुर्भावस्थानं च तत्, असाधारणधर्मः, अक्षरः तम्। धारयतीति तद्द्वारपरम्परया श्रियं च धारयतीत्यर्थः। तद्दर्शनेनेत्यक्षरदर्शनेन। अत्र सुबोधिनी जनकमिति अक्षरमित्यर्थः। व्यावर्तकमिति क्षराक्षराभ्यां व्यावर्तकम्।

ब्रह्मानन्द इति ब्रह्मणोऽक्षरस्यानन्दः। इदं द्वितीयस्कन्धनवमाध्याये सुबोधिन्यां स्फुटम्। सर्ववेदेति सर्वे वेदास्तल्लक्षणमक्षरं ब्रह्म प्रतिपादयन्ति। स्वरूपं त्ववाङ्मनोगोचरमिति भावः। धर्माधारत्वं तु अयोगोलके वह्नेरिव। तथा च बहिःप्रकटे

भगवति लक्ष्मज्ञापनार्थं केनचिदंशेनाक्षरमपि स्वानन्दधर्मेण भासते। प्रबलेग्नायोगोलकश्यामतेवेत्येवं स्फुटेति न व्याख्याता। सर्वात्मकस्येत्यादिसुबोधिनीं विवरीतुमाहुः अस्य मुख्यत्वमित्यादि। साक्षात् सृष्टावुक्त्वा परम्परासृष्टौ पृथिवीस्थं जगत् लक्षणमाहुः यः पृथिव्यामित्यादि। अन्तर्यामिब्राह्मणेस्ति। जगत् तथेति कृष्णाश्रयस्यादिपदार्थत्वेन वक्तव्यत्वाज् जगदाश्रयलक्षणमुक्तम्, तथा लक्षणम्। अक्षरमिति सत्यं ज्ञानमनन्तानन्दम्। जन्यमात्रं कालोपाधिः 'जन्यानां जनकः काल' इति अलौकिकसृष्टौ कालापेक्षायामाहुः चेष्टेति। तथेति लक्षणम्। अक्षरलक्षणेऽनन्तानन्दस्य कालस्यापि निवेशात्। कृष्णाश्रयलक्षणमाहुः आदिपदादिति। लीलाविशेषा दशमस्य विशुद्ध्यर्थं नवविधलीलाः, देहिष्वसङ्गता लीला वा। अत्रेति मुख्यत्वे। अत एवेतीति मुख्यलक्षणत्वादेव, श्रीवत्सस्याक्षरत्वादेवेति वा। जातीति ब्राह्मणत्वजातिः, भृगुत्वं वा। तदानन्द इति अक्षरानन्दः। चकारात् सर्वर्षिदत्तविद्याः भार्गवी विद्या च। तद्वतस्तस्येति देहवतो भृगोः। रातिरिति महत्त्वपरीक्षार्थम्। तथेति मुख्यत्वम्। स्वाश्रयत्वादितिसुबाधिनी स्वमक्षररूपभृगुस्तदाश्रयोक्षरः तत्त्वादित्येव स्पष्टेति न व्याख्याता। प्रकारान्तरेणापि भृगुपदस्य नानुचितत्वमित्याहुः किञ्चेत्यादि। अन्तर्बहिरिति ब्रह्म (प्राण) धर्मवत्त्वात्। तथा ज्ञानेति स्पार्शनप्रत्यक्षस्य ब्रह्मधर्मस्य जनकत्वात्। 'आत्तगजेन्द्रलीला' इति वाक्यात्। स्पर्शसुखं गजेन्द्रस्य प्रसिद्धम्। तथा च स्पर्शजातो भृगुरपि विशिष्ट इति नानुचितत्वमित्यर्थः। इदं प्रकारान्तरेणाप्याहुः स्पर्शत्यादि। अनुचितत्वपरिहारायैवमुपपत्तित्रयेण भृगोरक्षरात्मकत्वं तेन श्रीवत्सस्याक्षरात्मकत्वं समर्थितम्। अत्र "अच् प्रत्यन्ववपूर्वात् सामलोम्न" इति सूत्रेऽजितियोगविभागादच्। सुबोधिन्याम्। अस्मिन् विशेषणे आभासोक्तमैश्वर्यनिरूपणं निगमयन्ति स्म ब्रह्मेत्यादि। ब्रह्मणोक्षरस्योक्तरीत्या निरूपितेन लक्षणत्वेनैव भगवतोक्षरप्रयोजकत्वरूपं कर्तुं समर्थरूपमैश्वर्यं निरूपितम्। अयमर्थः। 'ईश्वरः पूज्यते लोके' इत्युक्तैश्वर्यलक्षणात् अकारके मूलरूपे 'मूढा' वैचित्यं प्राप्तास्तैरक्षरं पुच्छं चरणं वैकुण्ठरूपं वा भगवत्कृतं 'पूज्यते' प्रतिपादनसौकर्यार्थं अर्हं क्रियते इति। कयाचिदिति अक्षरब्रह्मण एवावस्थाविशेषा जाव इति काशकृत्स्नमतमनुसृत्येदमुक्तम्। वैदिकत्वेन धर्मरूपैकदेशत्वात्। क्रियाशक्तेरित्यादि, अत्र टिप्पणी ज्ञानशक्तीति क्रियाशक्तिर्भुजा, तद्व्यतिरिक्तत्वं ज्ञानशक्तित्वम्। सरस्वती कीर्तनभक्तिरूपा ज्ञानशक्तिः। 'एतद् ज्ञान'मिति गीतायाः। स्थानमित्यस्य विशेषणं प्रभुगुणगानमिति। प्रभुगुणा गायन्तेस्मिन् कण्ठ इत्यधिकरणे ल्युट्। तेन सुबोधिन्यां ज्ञानशक्तिरुत्तमेत्यत्रोत्तमा देहासमारम्भिका। क्रियाशक्तिस्तु देहारम्भिका। 'तं विद्याकर्मणी समारभेते पूर्वप्रज्ञा चे'ति शारीरब्राह्मणात्। न च पूर्वप्रज्ञाभावः। विद्यात्वेन सत्त्वात्। सुबोधिन्याम्, 'शोभी'ति विशेषणादाहुर्मध्य इति। ज्ञानक्रियाशक्त्योर्मध्ये। अत एव सर्वाङ्गेति जीवानां द्विविधत्वादेव। उभयत्रेति कण्ठे भुजायां च। कण्ठं चेति चकाराद् भुजा। कण्ठ इति अन्यविधं भुजायामिति ज्ञेयम्। 'चेत्यस्य तत्त्व'मितिविशेषणे 'तत्त्व' पदात्। तत्त्वं कारणताशक्तिः। चैत्यमात्रमन्यत्र। अन्यथा जीवा नोत्पद्येरन्। कर्माभावात्। अत्रार्थे प्रत्यक्षं प्रमाणमाहुः अत एवेति। उक्तचकारार्थात् 'तत्त्व'पददानाच्च च। उभयेति भगवदंशत्वादितिभावः। जीवा अक्षरांशा इति स्त्रीप्रायत्वात् वीर्यलक्षणं सङ्गतम्। ब्रह्मद्वयेति अक्षरं कयाचिदवस्थयावस्थितं ब्रह्म जीवाख्यं चेति ब्रह्मद्वयम्। तथात्वेति तादृगवस्थोत्पादनेन जीवत्वप्रयोजकभूतामित्यर्थः। प्रदेशविशेषेति यदवच्छेदेन मायासम्बन्धः स प्रदेश अक्षरात्मकचरणः पुच्छं वा तत्र मायासम्बन्धः मायास्मृतेः। सृष्टीच्छा मायाया ज्ञाननाश्यत्वप्रतिबन्धिका। आकाशशरीरे वा मायासम्बन्धः। पीताम्बररूपत्वं गोपालतापिनीये। निरूपयतीति देहसम्बन्धमर्यादार्थं कारणे निरूपयति। वर्णान्तरं विहाय पीतस्यैवाम्बरस्य धारणे हेतुमाहुः आकाशतनोरिति। एवेति सायं प्रातराकाशे सिन्दूरादिवर्णसम्भवेपि न तादृशी शोभेति भावः। पीतत्वमित्यादि तामसमाकाशीयकृष्णं रूपं सजलवालुकासु राजसं सूर्यातपरूपं रोहितं तयोः सम्बन्धात् संयोगरूपात् पीतं रूपं प्रसिद्धं लोके। इदं भास्वरशुक्लकं रूपम्। रूपाणां त्रैविध्यात्। यद्वा, पीतमम्बरं यस्येति विग्रहे पीताम्बररूपा माया सा तु ज्ञानकाशेति ज्ञानं विषयाविनाभूतं पीतं चाम्बरं वेति संशयात्मकं राजसं ज्ञानं तमोरूपमायायाः पीतत्वांशे सत्त्वात्। तथा पीतमम्बरमिति भ्रमात्मकं तामसं ज्ञानं शुक्ताविदं रजतमिति ज्ञानवत्। ननु रविकरा एकादशाङ्गुलसूर्यबिम्बस्योदयास्तं गच्छतस्तन्निष्ठनारायणस्य भवन्तीति राजसतामसत्वं कथं नारायणस्य सात्त्विकत्वादिति चेन्न। तमसः पारे विराजमानस्य द्वितीयस्कन्धोक्तसत्त्वादिषु मायारूपपीताम्बरे सत्त्वस्यानुपयोगाद् द्वितीयतामसराजससम्बन्धग्रहणात्। अन्नस्येति पृथिव्याः। 'पृथिवी वा अन्न'मितिश्रुतेः। सत्त्वसम्बन्धाभावे हेतुमाहुः व्यामोहिकेति। तथा च सत्त्वसम्बन्धे नीलमपि रूपं प्रतीयेतेति भावः। लयेति भगवति दृष्टेपि विषयेषु मनोलयः विषयत्वेन भगवद्ग्रहणात्। चित्तविक्षेपोपि भवति। सुवर्णग्रहणे। आकाशे तथा दर्शनात्। तेन मायाप्राबल्यम्। चिक्रीडिषया। पीताम्बरमित्यनेन यशो निरूपितम्। 'यशो यदि विमूढानां प्रत्यक्षासक्तिवारणा'दित्युक्तलक्षणकम्। कारागृहे श्रीवसुदेवस्य वैचित्यसम्भवात् मूढानां प्रत्यक्षे स्वमोचनादिविषयकज्ञाने आसक्तिवारणात् 'स्वधर्मं' दिव्यचक्षुरादियोजनाल्लक्षणसङ्गतिः। सान्द्रो हीत्यादि 'सान्द्रं घनकाननयोर्मृदा'विति विश्वः। घनकाननमृदावर्थे। सान्द्रपयोदस्येव सौभगं कान्तिर्यस्य स तथोक्तः, तमित्यत्र सौभगपदार्थमाहुः परमानन्दस्येति। ननु परमानन्दः कालः प्रद्युम्नो वात्रेति चेन्न। 'कालदेहः प्रद्युम्नः' इत्युक्तम्। काल आनन्दमय इति कालविशेषणं परमानन्दस्येति। पूर्वमिति अत्र टिप्पणी पूर्वमिति निबन्ध इति शास्त्रार्थनिबन्धे। रूपवद् द्रव्यमिति रूपविशिष्टं द्रव्यम्। रूपद्रव्यमाकाशम्। नीरूपो नील आकाश इति रूपं द्रव्यमिति कर्मधारयः। तथेति चक्षुः कर्तृ। अतिगाढमिति दृढम्। यथा गाढं जलं नीलं वियति विक्षेपे शुक्लम्। अतिगाढमप्यगम्भीरं छिल्लरं जलं शुक्लं भवतीति गम्भीरतयाऽगाधतयेत्युक्तम्। आकाशेन नीलरूपत्वमुक्तम्। कालेन नीलरूपत्वमाहुः तत्तद्युगेति। तादृक्तादृगिति 'कृते

शुक्लश्चतुर्बाहु'रिति 'आसन् वर्णास्त्रयो ह्यस्य गृह्णतोनुयुगं तनू'रिति च तादृक्त्वाद्रूपत्वात्। तत्तदिति स्फटिके जपाकुसुमारुणिमेव। भूम्या नीलरूपत्वमाहुः भूमेर्नीलेति। 'यत् कृष्णं तदन्नस्ये'तिश्रुतेः। वैकुण्ठेन नीलरूपत्वमाहुः शुद्धस्येत्यादि। अयं च प्रकारो निबन्धे त्रुटितः। उपलक्षणविधया व्याख्यातो ज्ञेयः। तदेव स्फुटीकुर्वन्ति अथवेत्यादिना। अंशावतारेत्यादि आकाशनीलः अंशस्य जीवस्याक्षरस्य, कालनीलः अवतारस्य अध्यायार्थस्य, 'कालोस्मि लोकक्षयकृत् प्रवृद्ध' इति देहविषयश्च भूमिनीलः विभूतिरूपव्याहृतेः, वैकुण्ठनीलः अवतारस्य लोकरूपस्याक्षरस्य, तथा च अंशः अवतारः विभूतिरूपं अवतारश्चेति द्वन्द्वः, एते विषया यस्य तस्मात् अस्य प्रकारचतुष्टयस्य। निरूपयिष्यत इति यथा 'इदानीं कृष्णतां गत' इति, कृष्णता स्वाभाविकी, अन्यतिरोभावेन यथा जीवे चिदंशः प्रधान इतरयोस्तिरोभावः, तथा च 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इति सिद्धान्तोक्तशुद्धसत्त्वनीलो वास्तविक इत्युक्तम्। तस्य धर्मो इति सुबोधिनी 'नीलवर्णस्य धर्मो' इत्येवं स्पष्टार्थेति न व्याख्याता। यस्तु स्वकाल इत्यादि सुबोधिनीं व्याख्यातुमाहुः यस्तु स्वकाल इत्यादीनि। जन्मप्रकरणे भगवतः फलत्वात् फलांशे परोक्षवाद इति फलांशे परोक्षवादमाहुः परोक्षवादत्वेनापीति। अत एवेति लीलाकालस्य पारोक्ष्येण विवक्षितत्वादेव। अन्यथा प्रावृट्काल इति वदेयुरिति भावः। अन्नोत्पादक इत्यस्य परोक्षवादः। नूतनरसोत्पादक इति 'दिनान्त' इति पदात् तथा। आदिनान्यदपि। अग्रिम इति तापनाशक इत्यस्य परोक्षवादः स्पष्टः। सान्द्रः पयोद इति तस्येव सौभगं यस्येति ज्ञेयम्। एवमेवेत्यादिसुबोधिनीतात्पर्यमाहुः एवमित्यादिनेत्यादिना। अनेन प्राकट्यनिमित्तभक्तदुःखनिवारकधर्मस्य सर्वानिष्टेत्याद्युक्तस्य वसुदेवकर्तृकदर्शनविषयत्वमुच्यते। स्वतोऽविषयत्वात्। विशुद्धसत्त्वात्मकत्वेपि वसुदेवस्य 'न वव्राथेपवर्गं मे मोहितौ मम मायया' इति वाक्ये मोहकथनात्। अतो 'दृवभोग्या सुधे'यम्। द्वितीयस्कन्धनवमाध्याये 'विषयते'त्युच्यते। 'ब्रह्म पुच्छं प्रतिष्ठे'ति ब्रह्मणः पादत्वमुक्तम्। भृगोर्ब्रह्माधारवतोत्र पादः प्रतिष्ठित इत्युक्तम्। पादः पृथिवी। भुवनत्रयपक्षे। एवं च श्रीवत्सो ब्रह्म, पाद इति यावत्। उपपादयन्ति स्म पुरुषोत्तमेति। तत्त्वेनेति अक्षरवत्त्वेन। मूलकारणेति 'अक्षरात् सौम्य विविधाः भावाः प्रजायन्त' इति श्रुतेरक्षरः श्रीवत्सः। अत इति शेषः। तस्येति श्रीवत्सस्य। नैतावता 'श्रीवत्सलक्ष्म'मित्यत्र साक्षाच्छ्रियाः लक्ष्मत्वं येन पृथिवीविषयि ज्ञानं तद्विषयणीच्छा तदनु पृथिवीप्रतीतीच्छयोश्चरितत्वम्। वक्तुः शुकस्येच्छा वा पृथिवीप्रतीतिविषयिणी न स्यात् तात्पर्यरूपा। तत्प्रतीतीच्छयोश्चरितत्वं तात्पर्यम्। वक्तुरिच्छा वा तात्पर्यम्। अत आहुः वस्तुतस्त्विति। स इति श्रीवत्सः। अन्यथा श्रीर्यथा तपः कृत्वा वक्षःस्थानं प्राप्ता तथा भूमिः हिरण्यगर्भद्वारा सर्वानिष्टनिवृत्तिपूर्वकसर्वेष्टकर्तारं प्राप्तेति प्रतीतीच्छया वक्तुरिच्छया वा 'श्रीवत्सलक्ष्म'मिति विशेषणं नोक्तं स्यात् श्रीशुकेनोक्त 'भूमिर्दृप्तनृपव्याजे'तिप्रसङ्गेन। जानातीच्छति यतते इति नैयायिकोद्घोषात्। 'यन् मनसा ध्यायति तद् वाचा वदती'तिश्रुतेः। किञ्च, स्वरूपलक्षणबाधितं श्रीघटितं लक्षणं न ब्रूयाच्छुकः। गौणमुख्यन्यायेनाप्याहुः ब्रह्मानन्दरूपत्वादित्यादि। तद्रूपमिति ब्रह्मानन्दरूपम्। 'उरो वत्सं च वक्षश्चे'ति कोशाद् 'वत्स'पदं वक्षो वाचकं तत्पक्षे लक्ष्मपदासङ्गतिः। श्रौतेन स्वरूपलक्षणेन विग्रहप्राप्तेनास्य विग्रहस्य बाधात्। एवं 'श्रीवत्स'पदे व्याख्यातब्रह्मरूपायाः भृगोः पादरूपायाः पृथिव्याः सर्वानिष्टनिवृत्तिपूर्वकसर्वेष्टकर्तृत्वमुक्तम्। 'गलशोभिकौस्तुभ'मित्यस्य विशेषणस्य तात्पर्यं स्वर्गस्य सर्वानिष्टेत्यादावाहुः कौस्तुभव्यपेति। तथेति व्याहृतिरूपभगवतो द्यौः शिरः अतः स्वर्गस्य सर्वानिवृत्तीत्यादौ तात्पर्यमित्यर्थः। तेन कौस्तुभव्यपदेशेनेत्यादिवाक्यज्ञानवतः शुकस्येच्छातात्पर्यलक्षणघटिका बोध्यात्र। 'पीताम्बर'मितिविशेषणस्य तात्पर्यं धर्मस्य सर्वानिष्टेत्यादावाहुः भूरूपेति। नरको हि धर्मग्लानिजकः भूस्थः तस्यावरणे ग्लानिनिवृत्त्या तथात्वं धर्मस्य सर्वानिष्टेत्यादौ तात्पर्यमित्यर्थः। अत्र 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यह'मितिगीताज्ञानवतः शुकस्येच्छातात्पर्यलक्षणघटिका बोध्या। 'सान्द्रपयोदसौभग'मिति विशेषणस्य तात्पर्यं भक्तानां सर्वानिष्टेत्यादावाहुः प्रावृड्घनेति। सुबोधिन्याम् ,सर्वत्रेत्यादि, अग्रे हेतुः प्राकृतेति। सान्द्रपयोदोपमा ॥९॥

महार्हेत्यत्र वीर्यक्रीडां धारयितुं श्लोकार्थं स्मारयन्ति स्म एवं मूलभूत इति। एवं श्रीवत्सलक्ष्मलक्षणे 'तमद्भुत'मित्याद्युक्तमूलभूते ब्रह्मणि 'वस्तुतस्त्वि'त्यादिटिप्पण्युक्तदिशा ब्रह्मानन्दे स्थिरत्वेत्यर्थः। 'गलशोभिकौस्तुभ'मित्यस्यार्थमाहुः स्वांशानिति। पीताम्बर'मित्यस्यार्थमाहुः भूमिष्ठानिति। व्यामोहः पीताम्बररूपमायाधर्मः। 'सान्द्रपयोदसौभग'मित्यस्यार्थमाहुः तेभ्य इति। अनुगृहीतेभ्यः प्रमेयबलेन। चतुर्विधेति भुजाभिप्रायेण। तत्रायुधेषु पृथिव्याः स्वभार्यायाः भारदूरीकरणेन कामः धर्मो वा गदया स्थापितः, अस्त्रतेजः स्वगदये'ति वाक्यात्। 'गदा सा कालिका साक्षात सर्वशत्रुनिबर्हणी'ति उपनिषदि। पद्मेन स्वदेहरूपेण तु कंसतृणावर्तादौ भुवनभारदानात् अर्थः। शङ्खेनापां सत्त्वेन सर्वशुद्धया कामः। अद्भिः शुद्धिः प्रसिद्धा। चक्रेण मोक्षः। 'ये ये हताश्चक्रधरेण राज'न्निति वाक्यात्। तत्रेति भगवत्स्वरूपे। सर्वशास्त्रेति वेदवेदान्तयोः। ज्ञानक्रिये। साङ्ख्यादिषु प्रकारभेदः। सांख्ययोगयोः असङ्गत्वम्। पञ्चरात्रे चतुर्भुजत्वम्। पाशुपतशास्त्रे पशुपतित्वमिति सर्वशास्त्रे रूप्यन्तेऽभेदेन व्यवह्रियन्त इति सर्वशास्त्ररूपाणि शब्दार्थरूपाणि। ज्ञानवैराग्येति ज्ञानत्वं स्वरूपात्मकत्वात्, किरीटादीनाम्। भक्तैः सह निगूढभावकरणे उपयोगात् वैराग्यं तदितरेषु। यशःश्रीवाचकपदाभावात् तन्नोक्तम्। तादृशवैडूर्येति राहुरूपम्। सप्तग्रहाङ्गीकारपक्षे द्वयाभावमाशङ्क्योक्तं उपलक्षणविधया केतुरपि। रत्नं पद्मरागः। त्विषेति राहुकेतुत्विट्स्वरूपोपाधिकी। 'स्वरोचिषा भारत सूतिकागृहं विरोचयन्त'मिति वाक्यात्। अत्र द्वितीयनवमाध्याये तत्र तमोनिषेधात् समाकर्षाधिकरणोक्ताकृष्टार्थस्तमःपदस्य विवक्षितः। वसुदेवस्तत्र स्थित ऐक्षत एव पुनस्तत्कथनेन योर्थोद्भुतरूपस्तमाहुः परिष्वक्तानीत्यादि। किमेतावता तत्राहुः भगवन्मुखनिरीक्षका इति अत्र टिप्पणी अत्रापि

तद्रूप इति मौली किरीटरूपः । अवगम्यत इति शाखाप्रायपाठादवगम्यते । तथात्वमिति शाखाभिज्ञत्वम् । यद्वा, तेषां कुन्तलानां तथात्वं भगवन्मुखनिरीक्षकशाखाभिज्ञजीवत्वम् । वृत्तिस्तु तात्पर्यरूपा । अयुक्तेति भक्त्यभावादयुक्ता भगवन्मुखेति भक्तिरूपभगवन्मुखेत्यादिः । भक्तिज्ञानमात्रं भक्त्योक्तम् । सुबोधिन्याम् भगवन्मुखामोदेति भक्त्यामोदतज्जनकसाधनशाखाणि तेषां पानं समवधारणं पानम् अनुभवार्थमन्तःप्रवेशनं तत्र रता इत्यर्थः । 'पुण्यस्य कर्मणो दूराद् गन्धो वाती'तिश्रुतेर्भक्त्यामोदः । भक्ताविति मुखारविन्दरूपभक्तौ सत्याम् । अन्यदा तु अपरितः । चकास्त् दीप्तौ । अथ वैराग्यसाङ्ख्ययोगे तु ज्ञानं फलं निबन्ध उक्तम् । दैवगत्यानुग्रहेण भक्तौ तु फलभक्तिरूपभगवन्मुखामोदपानरताः तद्गताः सारूप्यमुक्तिं प्राप्ताः कमलगताः षट्पदा इव भवन्ति । टिप्पण्यां फलमिति मुखारविन्दसायुज्यं सारूप्यमुक्तिंगतानाम् । वेदसाङ्ख्ययोगानामितिसुबोधिनीं विवृण्वन्ति स्म अर्हस्येत्यादिना । शिष्यनिष्ठभगवद्भक्त्या प्रसन्नः शास्त्रत्रयाभिज्ञः । तादृश इति यथा महापौरुषिकत्वेन प्रसीदन् शुकस्तथा । तथोक्तमिति वैडूर्यरूपेणोक्तम् । महार्हत्वेन वैडूर्यं निरूपितं वा । इदं चेति भगवन्मुखामोदपानम् । तथा विशेषणमिति 'महे'तिविशेषणम् । उक्तसायुज्ये काममार्गीयकामप्राप्तेस्तत्र स्थितिरयुक्तेति भक्तिशाबल्यमाहुः कुन्तलानामिति । भक्तिप्रेति 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यत' इतिवाक्यात् । सुबोधिन्याम् शास्त्राणां मुक्त्यनन्तरं षट् शास्त्राण्याहुः वेदे काण्डद्वितयमिति । षट्पदत्वार्थमुक्तम् । 'त्रय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सात्वतैरुपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मज'मित्यत्र द्वे शास्त्रे, अन्यत्र वेदान्ते भेदाभावरूपमद्वैतमिति साधनेन मुक्त्यनन्तरम् । सात्वते मुख्यतया विष्णुशिवपरत्वमिति साधनेन मुक्त्यनन्तरम् । टिप्पण्याम् एतेष्वेतानीति । मुक्तजीवेषु एतानि त्रीण्येव तानि षट्पदानि । तत्प्रयोजकमित्यादि कुन्तलानेकत्वप्रयोजकम् । आक्षेपोर्थापत्तिः । लौकिकज्ञानेत्यादिसुबोधिनी तु स्कन्धार्थानुस्यूततया लौकिकज्ञानं शास्त्रत्रयोत्थं प्रपञ्चसम्बन्धि शास्त्रीयत्वेन रूपेण लोकेऽनेकविधतां प्राप्तं भगवद्विषयकं ज्ञानम्, तद्विस्मरणे प्रपञ्चविस्मृतिर्जाता, तत्पूर्वकभगवदासक्तिः परिपूर्वकष्वञ्जधातोरर्थः । तु० आ० अनि० ष्वञ्जिः । भगवतो निरोधस्तु वर्तते एव । लोके ज्ञानमिति शास्त्रत्रयोत्थं लोके ज्ञान 'महार्हवैडूर्यकिरीटकुण्डलत्विषे'त्यनेन निरूप्य ज्ञानक्रिययोः काण्डार्थयोः द्वितीयं निरूपयतीति स्पष्टार्थेति तां विहाय कर्माण्यनन्तानीत्यादिसुबोधिनीं विवृण्वन्ति स्म त्रयाणामित्यादि । दशगण्युक्तकर्मणां भ्वादेराकृतिगणत्वेन बहुविधत्वेपि पुराणे मायायाः व्यापारत्वेन तस्या गुणत्रयसाम्यावस्थारूपत्वेन गुणत्रयकार्येषु गुणत्रयरूपकर्ममुख्यत्वं, तत्र द्रव्येषु कर्मत्वं कथमित्यत आहुः भूमावेवेति । तद्रूपकत्व्यमिति 'कर्ता कर्म च करणं च त्रिविधः कर्मसङ्ग्रह' इत्यत्र कर्तरि पञ्चविधे'धिष्ठानं तथा कर्ता करणं च पृथग्विधम्, विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्, तत्रैवं सति कर्तारं आत्मानं केवलं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मति'रित्यधिष्ठाननिवेशात् कर्मरूपकत्व्यमित्यर्थः । एकरसत्वाद् युक्तम् । द्रव्यत्वेपि वेदान्ते । प्रतिष्ठितत्वेनेति पूर्ववद् द्रव्यत्वेपि कर्मत्वं वेदान्ते । सुबोधिन्याम् । जनयिष्यन्तीति कर्मणः सजातीयोत्पादनस्वभावत्वाज्जनयिष्यन्ति । काञ्च्यां अद्भुतत्वं तमोरूपत्वं चाहुः लोके काञ्चीति । उद्दामेति 'अच्प्रत्यन्ववपूर्वात् सामलोम्न' इत्यत्राजिति योगविभागादच् । प्रतिसाममित्यादिवत् । टापि उद्दामा । हिंसेति हिंसाप्रचुरं कर्म तामसम् । तामस वं द्वितीयनवमाध्यायसिद्धान्तविरुद्धं मत्वाहुः न लोकेति । लौकिकदुःखनिवर्तकत्वात् । अनेनाभासोक्ता वैराग्यरूपता स्फुटीकृता । लोकदुःखनिवर्तकत्वं वैराग्यम् । हरेरपि हरित्वे वैराग्य उत्कर्षः । दृष्टानुश्रविकविषयवितृष्णसंज्ञं वैराग्यमर्थात् सिद्धम् । तत्रेति काम्यकर्मसु । तानीति कर्माणि । नित्यकर्मसङ्ग्रहायाहुः उत्कृष्टानि वेति । अलौकिकानि नित्यानि भगवद्रूपाणि । तत्र निरूपितानीति काञ्च्यां वैदिककर्मणि उपकरणानि । 'तत्साधनानि स हरिः प्रयाजादिस्रुगादि य'दितिसिद्धान्तात् । अङ्गदानां सात्त्विकत्वे हेतुमाहुः अङ्गं द्यतीत्यादि । न च तामसत्वम् । दो अवखण्डने इति धातुपाठेऽवखण्डने शक्तेः । सात्त्विकबाह्वंशेवस्थानात् । भगवतः फलत्वेनाद्यमनोरथस्य सिद्धत्वात् साध्ये आद्यमनोरथे पूर्वदेहावखण्डनेऽङ्गदं सात्त्विकं फलम् । 'यत् तदग्रे विषमिव परिणामेमृतोपमम् । तत् सुखं सात्त्विकं विद्यादात्मबुद्धिप्रसादज'मिति गीतायाः । इति हेतोः सात्त्विकं भवतीति शेषः । 'अलौकिकस्य दाने हि चाद्यः सिध्येन् मनोरथ' इति सेवाफलग्रन्थे । कङ्कणं निरूपयन्ति स्म राजसं तदिति । कङ्कणम् । राजसं कर्मबहुलं कङ्कणम् । सात्त्विकराजसयोरिति यावत्पर्यन्तं कङ्कणचलनं बाहौ तावद् राजसं कङ्कणं बाहुश्च । अङ्गदस्थानापेक्षया कङ्कणस्थाने कर्मबाहुल्यात् तद्भिन्नं सात्त्विकं स्थानमङ्गदस्थानम् । एवं च सात्त्विकराजसयोरेकबाह्वोरंशद्वयोरित्यर्थः । भेदरूपा मायात्र कृपा । अन्यस्या निषेधात् । कृपायां गुणत्रयं द्वितीयस्कन्धोक्तम् । द्वन्द्वान्ते श्रूयमाणं प्रत्येकमभिसम्बध्यते तदादायाहुः अङ्गदस्थानीयानीति अन्यानीति अङ्गदोत्तरं सम्बद्धादिशब्दार्थः । काञ्चीसम्बद्धादिशब्दार्थमाहुः क्षुद्रघण्टिकेति । 'आदि'शब्देन चरणभूषणानि । धर्ममार्गेति प्रभुबाह्वो धर्मरूपाः क्रियारूपत्वात् । वसुदेवज्ञानमिश्रीभावे मार्गत्वम् । भगवद्धर्माणां क्रियारूपाणाम् । अन्यथा भगवद्धर्मत्वमेव । एकादशसुबोधिन्यां तथोक्तेः । तद्वृत्तिभिः । तेन क्रमेण वसुदेवदर्शनविषयत्वं 'तमद्भु त'मित्यादिविशेषणोक्तानामर्थानाम् । भगवद्रूपाणां जन्मनि सङ्ख्यातात्पर्यमावश्यकमिति तद् वदन्त एव जन्मप्रकरणव्यतिरिक्तस्थले 'यतो वाच' इति श्रुते 'स्तमद्भु त'मित्यादिकथनं युक्तमित्याशङ्क्य तत्र गमकमाहुः वेद इत्यादि । तथा च जन्मप्रकरणेपि हरिरेव नारायणस्तत्समानयोगक्षेमत्वात् कृष्णोपि । हरिवंशे पुष्करप्रादुर्भावसमाप्ताविदं पद्यम् । तथापि नारायणपरमिति वेदपुराणसम्मतम् । किमर्थमिति श्रीभागवतत्वेपि शब्दत्वात् प्रत्यक्षामूलत्वे किमर्थमित्यर्थः । यतो वेदेपि ब्रह्मण आर्षं वर्तत इति किमर्थमुच्यत इत्यर्थः । तत्पूर्वोक्तानामिति ते पूर्वोक्ताधर्माश्चे ति द्वन्द्वः । अलौकिकत्वमिति अद्भुतत्वसमानाधिकरणम् । वसुदेव

इति भगवदधिष्ठानं ज्ञानरूपः । मंस्यत इति लोकः । उभयार्थमिति लौकिकालौकिकत्वार्थम् । शुक आहेति दर्शनाङ्गनार्थकमैक्षतेतिपदमाहेत्यर्थः । वसुदेवस्य तत्समये तथाज्ञाने प्रमाणमाहुः एतद् ज्ञानमिति । तथा च प्रमेयबलमिदमिति भावः ॥ १० ॥

स विस्मयेत्यत्र भगवन्तमिति अङ्गदप्रधानमिति बोध्यम् । शुद्धसत्त्वात्मक इति विशेषणं कर्मानर्हदेहव्यावर्तकम् । साङ्गदभगवदनुभावेन कर्मार्हदेहोत्पादनम् । तेन शुद्धसत्त्वात्मको जातः । तत्कार्ये इच्छाद्वारा क्रिया । यदा तु शुद्धं सत्त्वं न ज्ञानं तदा साक्षाज्ज्ञानं च । कारागृहे क्रियाज्ञानप्राकट्ये हर्षो हेतुः । हर्षे पुत्रजन्म हेतुः । कर्मणीति जातकर्मणि । एतस्यैव विवरणं आसमाप्ति । इदं कर्म यथाकालम् । न मुख्यं हर्षहेतुकम् । अर्थीति भगवत्प्रादुर्भावार्थी । गीतायामर्थार्थी । विद्वदादयोग्रे स्पष्टाः । नैमित्तिकमिति नित्यकाम्यनैमित्तिकेषु कर्मसु । कारागृहे कर्मबाधादाहुः तस्येति । जातकर्मणः । भगवन्निष्ठ इति भगवति निष्ठा स्थितिर्भक्तिर्वा येन स तथोक्तः । 'स विस्मये'त्यत्रोत्फुल्ल विस्मयो हेतुस्तल्लाभाय स इति भिन्नं पदम् । एतत् सर्वेति दानस्तोत्रस्वाधिकाराणां परिज्ञाने । पूर्वोक्त इति ईक्षणकर्तृत्वेनोक्तः शुद्धसत्त्वात्मकः । अलभ्यलाभादित्यादि एतेनार्थितोक्ता । विस्मय आश्चर्यम् । पूर्वमिति 'वसुदेवगृहे साक्षाद् भगवान् प्रकृतेः परः जनिष्यत' इति वाक्ये श्रुतम् । विद्वत्ता सुतविषयकज्ञानवत्ता । गीतायां ज्ञानी । ननु कर्मविद्वानधिकारी, न तु हर्षद्वारा निमित्तसुतं विद्वानित्यत आहुः निमित्तज्ञानेनैवेति । निमित्तं सुतं तज्ज्ञानेनैव, न तु पृथक्तया । नैमित्तिकं सवनकर्म ज्ञातम् । करणात् ज्ञानेन स्पष्टं भविष्यति । ततो निमित्तसुतविद्वान् कर्मविद्वानधिकारी । नेदुरिति तेन गीतायामार्तोधिकारी । 'अतप्ततनुर्न तदामोऽश्नुत' इतिश्रुतेः । सम्यक् श्रमो यस्येति अत्र टिप्पण्याम् भगवच्छास्त्रेणापर्युदस्त इति श्रीभागवतेन अपर्युदस्तः, अतोधिकमतः । कारागृहेपि । स्मृतिशास्त्रे न त्वधिकाराभावादधिकमतः । पर्यनर्थकः 'अपपर्यनर्थका'-विति सूत्रात् । सुबोधिन्याम् । तथाधिकार इति कारागृहे स्मृतिशास्त्रेणाधिकाराभावेपि हर्षकृतोऽधिकारः । एवमङ्गचतुष्टयं विवृत्योक्तश्रद्धाङ्गं विवृण्वन्ति स्म मुदेतीति । सूचितार्थो मुदेत्यस्य भक्तिस्तयेत्यर्थः । 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यती'ति वाक्याच्छ्रद्धा भक्तेः पूर्वरूपम् । 'अयुत'मित्यस्यार्थः दशसहस्रमिति । एवमेवेति स्नानं विनैव । हर्षजलेनैवेति न तु नेत्रजलमात्रेण ॥ ११ ॥

अथैनमित्यत्र इत्याशङ्क्येति तेनाशङ्काग्रन्थे कारागृहेऽप्राप्तापि जातसंस्कारोक्तिर्न विरुद्धा । प्राकृत इति प्राकृत एव पुत्रे जाते तस्य पुत्रस्य संस्कारः । कृतधीत्वात् । कर्मसमाप्तिमिति हर्षजलाप्लवनान्तं कर्म मानसम् । अवभृथान्तकर्मवत् । तदनन्तरमित्यथशब्दार्थः । पुत्रत्वेनेति 'देवक्या'मितिश्लोके प्रद्युम्नाविर्भावस्योक्तत्वादित्यर्थः । पूर्वोक्तेति 'त'मित्यादिपूर्वश्लोकद्वयोक्तवर्णनप्रकारेण । तथात्वमिति अभिनन्दननताङ्गो कृतधीत्वम् । प्रमाणसिद्धमिति शास्त्रसिद्धम् । द्वेष्टुरामुष्मिकानिष्टजननम् । अग्निं प्रत्युक्तिर्या घोरा तनुः तया तान् प्रति गच्छ योस्मान् द्वेष्टि यं च वयं द्विष्म इति शास्त्रं वेदः । भारतेति भरताऽत्यगान् मायामिति । कापट्याभावाद् विश्वासः, तदर्थम् ॥ १२ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

एवं भगवतः प्रादुर्भावमैश्वर्येण निरूप्य वीर्यनिरूपणार्थं भगवन्तमनुवर्णयति तमद्भुतमिति द्वाभ्याम् । अत्र निवृताः सर्वे श्रोतारो बहिःसंवेदनरहिता जाता इति ज्ञापयितुं पुनः शुकोक्तिकथनम् । इस प्रकार भगवान् के प्रादुर्भाव का निरूपण उनके ऐश्वर्य के साथ साथ साढ़े आठ श्लोकों से करने के बाद उनके वीर्य का निरूपण करने के लिये '**तमद्भुतम्**' आदि दो श्लोकों से भगवान् का अनुरूप वर्णन करते हैं, इस वर्णन के पूर्व में 'श्रीशुक उवाच' ऐसा कहा गया है, जब कि अध्याय के आरम्भ में ही 'श्री शुक उवाच' ऐसा कहा जा चुका है, साढ़े आठ श्लोकों में प्रादुर्भाव का वर्णन शुकदेवजी ने ही किया है बीच में कोई अन्य संवाद आया नहीं अब वर्णन भी शुकदेव ही कर रहे हैं ऐसी स्थिति में पुनः 'श्रीशुक उवाच' इस प्रकार का उल्लेख आवश्यक नहीं लगता है, उल्लेख करते है इससे यह मालुम होता है कि श्रोतृगण की कोई विशेष दशा की दिशा को दिखला रहा है कि इस भगवत्प्राकट्य प्रसङ्ग में आनन्दमग्न हुए श्रोतृगण बाह्यानुसन्धान रहित हो गये और परीक्षित आदि सबकी लीला में तन्मयता हो गई उन्हें पुनः सावधान करते हुए शुकदेवजी वर्णन करने लगे इस अभिप्रायसे यहाँ पुनः 'शुक उवाच' कहा गया है ।

कारिका—**दशलीलानिरूप्योऽयं पुरुषो द्वादशात्मकः । द्विगुणो भगवानत्र प्रादुर्भूत इतीर्यते ॥ १ ॥**
सर्वेषां प्राणरूपश्च ऐहिकः पारलौकिकः । ज्ञानक्रियोभययुतो दशलीलाप्रवर्तकः ॥ २ ॥
सगुणां नवधाभक्तिं निर्गुणां च प्रवर्तयन् । काण्डद्वयार्थं तनुते सोत्र द्वादशधामतः ॥ ३ ॥
सर्वप्रकाशकश्चैव कालात्मेन्द्रियनायकः । आत्मा कार्यं च भूतानि अहन्तत्वमुभौ त्रयः॥४॥
अक्षरं भगवांश्चेति द्वादशात्मा हरिः स्वयम् ॥ ४½ ॥

कारिकार्थ—जिसका सर्ग, विसर्ग, आदि दश विध लीलाओं से स्वरूप निरूपण किया गया है वह ही द्वादशात्मक पूर्ण पुरुषोत्तम आज अद्भुत बालक स्वरूप से प्रकट भये हैं यहां पर प्रकट हुए भगवान् मर्यादा पुष्टि के ऐश्वर्य से द्विगुण हैं। षड् ऐश्वर्यादि गुणयुक्त जो भगवान् कहलाते हैं उसकी अपेक्षा यहाँ द्विगुण है, इसलिए तात्पर्य यह है कि प्रकट हुए स्वरूप में

मर्यादा मार्गीय षड् ऐश्वर्यादि और पुष्टिमार्गीय षड् ऐश्वर्यादि दोनों प्रकार के गुण मिलकर एक काल में एक साथ विराजमान हैं अतः इस स्वरूप को द्विगुण भगवान् जानना ऐसा द्विगुण पद से कहा गया है ॥ १ ॥

यह प्रकट हुआ स्वरूप सब का दशविध प्राण है और इस लोक एवं परलोक दोनों लोक का परम फल है, एवं ज्ञानशक्ति तथा क्रियाशक्ति दोनों शक्तियों से परिपूर्ण है और सर्ग आदि दशलीलाओं को प्रवृत्त करने वाले हैं ॥ २ ॥

श्रवण, कीर्तन, आदि नवधा सगुण भक्ति और निर्गुण प्रेम लक्षणा, भक्ति को प्रवृत्त करते हुए वेद के पूर्व और उत्तर दोनों काण्डों के प्रतिपाद्य कर्म, और ज्ञान का विस्तार करते हैं वही भगवान् यहाँ पर द्वादश प्रकार से मान गये हैं ॥ ३ ॥

यह स्वयं श्री हरि द्वादशात्मा पुरुषोत्तम द्वादश राशियों के द्वादश सूर्यों की भांति सर्व प्रकाशक हैं, (१) एवं द्वादश मासात्मक काल रूप हैं, (२) तथा एकादश इन्द्रिय और उनका नायक मन यह सब मिलकर द्वादश रूप है यह ही है, (३) आत्मा आत्मा–जीवात्मा[१] एवं परमात्मा[२] कार्य–महत्तत्व[३] भूतानि–पृथ्वी आदि पञ्च महाभूत[४] अहन्तत्वं (अहङ्कार[५]) उभौ दोनों प्रकृति[६] और पुरुष[७] त्रयः–तीनों गुण सत्त्व[८], रज[९], तम[१०], अक्षरं[११] अक्षरब्रह्म च भगवान्' परब्रह्म[१२] इस प्रकार द्वादशात्मा स्वयं हरि ही सब कुछ है ॥ ४ ॥

उपरोक्त कारिकाओं में 'तमद्भुतम्' और महार्ह वैडूर्य इन दो श्लोकों में प्रयुक्त हुए भगवत्–स्वरूप के परिचायक १२ विशेषणों की संख्या का प्रयोजन ८ आठ प्रकार से सूचित किया है। (१) प्रथम श्लोक में १० और द्वितीय श्लोक में दो विशेषण हैं, उनका पृथक् और मिलाकर दोनों प्रकार से तात्पर्य वर्णन किया है, एवं उसके द्वारा यह प्रतिपादन किया है कि भगवल्लीलास्थ सर्व सामग्री भगवद्रूप ही है।

(२) दो श्लोकों से वीर्यगुण का निरूपण भी भगवान् की द्विगुणता का सूचक है।

(३) जो लोकवेदप्रसिद्ध है वह ही अद्भुत भी है अर्थात् लोकवेदप्रसिद्ध नहीं भी है, यह तत्त्व प्रमाणयुक्ति द्वारा बुद्धिगम्य नहीं हो पाता क्योंकि उस अद्भुत तत्त्व की अद्भुतता तो यह ही है कि सब प्रमाण उसका अनुसरण करते हैं परन्तु **'इदमित्थं'** यह इस प्रकार का है इस रूप से नहीं बतला पाते उस प्रमेय स्वरूप परम तत्व का यह बल है यह ही उसका वीर्य है कि लोक और वेद दोनों मिलकर या पृथक् २ भी उसका पार नहीं पा सकते है, वह अपार है दो श्लोकों द्वारा लोक और वेद दोनों से भगवत्स्वरूप का वर्णन उनके वीर्य की, प्रमेय बल की अगम्यता सूचक है ॥ ४½ ॥

तत्र प्रथमं दशधा स्वरूपलक्षणानि वर्णयति—आचार्यचरण कहते हैं कि उन द्वादश विशेषणों में प्रथम दश प्रकार के स्वरूप लक्षण विशेषणों का वर्णन करते हैं, 'तम्' इस विशेषण से भगवद्गीता के १५ वें अध्याय के १८ वें श्लोक में **'अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः'** पुरुषोत्तम का निर्देश किया है जो मूलरूप होने के कारण आश्रयभूत सर्वाधार है उसी का निरूपण हुआ है। कितने विवेचकों ने 'तम्' इस प्रथम विशेषण से, 'सृष्टि' सर्ग नामक लीला का ग्रहण कर भगवान् की सृष्टिरूपता स्वीकार की है। अद्भुत शब्द भगवान् की अलौकिकता का सूचक है क्योंकि जो पदार्थ लोक अथवा वेद में प्रसिद्ध होता है वह तो नेत्रगोचर अथवा श्रवण गोचर होकर सर्वसाधारण को आश्चर्यजनक नहीं हो सकता है लेकिन अलौकिक पदार्थ ही आश्चर्यजनक होता है, यही प्रमेय बल कहलाता है। यह प्रमाण से सर्वथा भिन्न है, वीर्य वह ही होता है जिसका उल्लङ्घन लौकिक और वैदिकों से न हो सके, तब ही आश्चर्य होता है 'अद्भुत' विशेषण से सूचित होता है कि भगवत्स्वरूप ऐसा है कि जिसके देखते ही बनता है उसका स्मरण या वर्णन नहीं हो सकता, इस प्रकार 'तम्' और **'अद्भुतम्'** इन दो पदों से भगवत्स्वरूप के सर्व साधारण लोगों से वर्णित हो सकने की और न हो सकने की सूचना की है। उपरोक्त तम् और अद्भुत पदों से ऐश्वर्य और वीर्य का वर्णन किया।

बालकमिति बाले बाले को ब्रह्मा—अब तृतीय पद से बालक का तात्पर्य बतलाते हैं कि बालकम्, इस विशेषण के द्वारा भगवान् के यश का निरूपण अभीष्ट है, जिसके बाल बाल में प्रत्येक रोम के छिद्र में ब्रह्माण्ड शरीरधारी ब्रह्मा है, ऐसे अद्भुत बालक का यथावत् वर्णन शक्य नहीं। अब बालक शब्द का दूसरा अर्थ कहते हैं, **बालेभ्यः कं यस्मात्सः** जिससे अत्यन्त मुग्ध गोपबालकों को 'क' सुख ब्रह्मानन्द से भी अधिक आनन्द प्राप्त होता है या होने वाला है ऐसा यह अद्भुत बालक है, अब तीसरा अर्थ कहते है कि 'क' ब्रह्मा भी जिसका बाल पुत्र है। एवं बलभद्रेण साकं खेलतां बालानां (बलदेव जी के साथ क्रीड़ा करने वाले) बाल सखाओं के 'क' शिर रूप उनमें सर्वश्रेष्ठ सबके शिरोमणि यह बालक है, इत्यादि निर्वचन से आपके पराक्रम की अद्भुतता के द्वारा **'यश'** का निरूपण हुआ है। 'अम्बुजेक्षणम्' इस विशेषण से चतुर्थ वीर्य अलौकिक श्री शोभा का निरूपण करते हैं, कि कमलजैसे आपके नयन हैं, एवं अम्बुजा समुद्र से उत्पन्न हुई लक्ष्मी आपके ईक्षण दर्शन में है जो आपको देख पाता है अथवा जिस पर आपका दृष्टिपात हो जाता है वह सर्व समृद्धिसम्पन्न बन जाता है। अब दूसरा अर्थ बताते है कि सूर्य चन्द्र को उपनिषद् में जिसका नेत्र बतलाया है। अब अम्बुजेक्षण का विशेष अर्थ कहते हैं कि श्रुतिसिद्ध

पञ्चाग्नि विद्या के द्वारा जिस रूप की साधना उच्च कोटि के साधक करते हैं उस रूप वाले पुरुष को अम्बुज' शब्द से कहा है क्योंकि "**पञ्चम्यामा हुता वापः पुरुष वचसो भवन्ति**" इस श्रुति में पञ्चम आहुति के होने पर जलों की पुरुषसंज्ञा का उल्लेख मिलता है, उस अम्बुज नामक पुरुष में जिसका ईक्षण है जिसका ज्ञान उस पुरुष में प्रकट होता है, ऐसा वह अद्भुत बालक है। एवं लक्ष्मी का काम जिसका सुख है, तथा ब्रह्माण्ड में उसकी रक्षा के निमित्त जिनका दृष्टिपात होता है, और लक्ष्मी में जिसका दृग्विलास या सुख है क्योंकि लक्ष्मी आपका भोगमन्दिर है। **अम्बुजायाः श्री लक्ष्मी जी का इः कामः** कामपूर्ति वही क्षणं सुखं यस्य जिसका सुख है वैर वही अम्बुजेक्षण है। इस विषय को आचार्यचरण व्युत्पत्ति करते हैं कि '**अम्बुजायां रक्षणं यस्य तमम्बुजेक्षणम्** जल से जिसकी उत्पत्ति है वैसी लक्ष्मी और पृथ्वी इन दोनों में जिसका ईक्षण अनुग्रह बना रहा है वह भगवान् अम्बुजेक्षण है।

और आगे बढ़कर आचार्यचरण कहते हैं कि जल से प्रकट हुई पृथिवी में जिसका दर्शन है अन्यत्र नहीं मिलता, अब तो ऐसा सुभग सुयोग बना कि जिस कृष्ण के दर्शन को अलभ्य या दुर्लभ कहते हैं वह पुरुषोत्तम अब यहाँ पृथिवी पर ही दर्शन दे रहे हैं अब कहीं अन्यत्र खोजने की आवश्यकता नहीं, ऐसे अनेक प्रकार से भगवान् की ज्ञानात्मक श्री का निरूपण किया है। नेत्र ज्ञानशक्ति प्रधान है और कमलश्री सौन्दर्य प्रधान है इन दोनों का साम्य भी अभेद पर्यवसायी ही है अतः ज्ञानमयी श्री का निरूपण होता है षड् ऐश्वर्यादि गुणों की भी पारस्परिक विभिन्नता ही हो, ऐसा नियम नहीं है, ज्ञानगुण, श्रीगुण का एवं श्रीगुण, ज्ञानगुण का कार्य कर सकते हैं अप्राकृत गुणों में ऐसा ही सहज चमत्कार है। भ्रमरयुक्त कमल को ही नेत्र की उपमा प्राप्त होती है और वह भ्रमर भी जब निश्चल ही हो जाता हो, तब ही नेत्र तारा की सदृशता को प्राप्त कर सकता है, कमल में भ्रमर मकरन्द रस पान मग्न होकर ही निश्चल बन जाता है अतः कमल की समानता नेत्रों में किसी विलक्षण मकरन्द रसपूर को बतलाती है, भगवान् के नेत्रों में दया, अमृत आदि ही मकरन्द स्थानीय हैं, उन दयामृतादि रूप भगवत्कृपाकटाक्ष के सम्बन्ध होने पर ही सब को भगवद्रस के आस्वाद की योग्यता एवं अधिकार प्राप्त होते हैं। मकरन्द रस सम्बन्ध से रहित भ्रमर को मधुप नहीं कह सकते वह मकरन्द (रस) पान से ही मधुप कहलाता है इस रहस्य का निरूपण करने के लिये प्राकृत कमलों से भी नेत्रों को समानता दी है, अथवा जल में कमल एक अद्भुत सौन्दर्यशाली पदार्थ होता है, इसी प्रकार सम्पूर्ण रूप में नेत्रों की प्रधानता होती है वह अद्भुत शोभा सम्पन्न होते हैं, इस विशेषण से अद्भुत ज्ञानशक्ति का निरूपण किया है।

चतुर्भुजमिति चत्वारो भुजाः क्रियाशक्तयो यस्य–अब चतुर्भुजपद का अर्थ कहते हैं कि इस विशेषण से भगवान् की क्रियाशक्ति का निरूपण करते हुए उसके चतुर्भुज पद के मूलभूत ज्ञान की चतुर्विधता का भी निरूपण करते हैं। भगवान् की भुजा चार है, इन भुजाओं से आदान प्रदान आदि क्रिया होती है अतः भुजा क्रियाशक्तिस्वरूप है, भगवान् की भुजा आदि कर्मेन्द्रिय जीवों की भुजा आदि कर्मेन्द्रियों की तरह ज्ञानशून्य नहीं है किन्तु ज्ञानपूर्ण है। और ज्ञान में किसी भी पदार्थ के प्रत्यक्ष ज्ञान के लिए ज्ञान के चार अङ्ग अथवा तो चार प्रकार अपेक्षित है। उस ज्ञान की प्रमाण-प्रमेय-साधन और फल ये चार अङ्गों की संज्ञा है। दृष्टान्त रूप से देखे जैसे श्रीनाथजी के मन्दिर का कोई दर्शन करना चाहता है तो सबसे पहले चक्षु इन्द्रिय प्रमाण बनेगी मन्दिर को देख कर जैसा वर्णन किया था वैसा स्वरूप मिला तब चक्षुरिन्द्रिय प्रमाण बनी।

फिर जानने की जो वस्तु थी मन्दिर वह तो प्रमेय बना, इसलिए ज्ञान को ज्ञातव्य जानने योग्य प्रमेय की भी अपेक्षा रही। अब ज्ञान को साधन की भी अपेक्षा रहेगी जैसे श्रीनाथ द्वार के स्टेशन पर आये वहाँ संकेत फलक नहीं दीख पड़ा तब संदेह हुआ कि यह कौन गाँव होगा ? इतने में किसी ने समीप में रहे फलक-पटिया को बताया तब साधन ज्ञान हो गया। साधन ज्ञान होने के बाद नाथ द्वार में श्रीनाथजी के मन्दिर आ पहुँचे यह ज्ञान का फल मिला। वैसे भगवान् के ज्ञान के लिये भी प्रमाण-प्रमेय-साधन और फल ये चार अङ्गों की अपेक्षा रहेगी। भगवान् का अवतार चार प्रकार के कार्य करने को हुआ है, उन्हीं कार्यों को चतुर्भुज रूप से कहा है, अथवा धर्म, अर्थ, काम, मोक्ष, यह चारों पुरुषार्थ अथवा पृथ्वी, जल, तेज, वायु यह चारों भूत अथवा धर्म, वरुण, इन्द्र, कुबेर, यह चार दिक्पाल भगवान् की भुजा हैं या भुजाओं में यह सब हैं, इस विशेषण से भगवान् की पुरुषरूपता को द्विगुण रूप से कहा है वह लौकिक भी है और अलौकिक भी हैं। वासुदेव, सङ्कर्षण, प्रद्युम्न, अनिरुद्ध, इन व्यूहों के क्रमशः मुक्तिदान, असुरवध, वंशवृद्धि, धर्मरक्षा कार्य हैं, उन्ही का भुजाओं से संकेत है। युद्ध आदि के द्वारा शत्रुवध लौकिक चरित्र है, और शकटभङ्ग आदि अलौकिक चरित्र हैं।

कारिकार्थ—घातकौ रक्षकौ चोक्तौ विरोधेप्यतिसंकटे। वेदोक्तं द्विविधं ज्ञानं भक्तिर्भगवतस्तथा—भगवान् की चार भुजाओं में दो भुजा घातक है और दो भुजा रक्षक हैं, एक समय में एक ही स्थान पर घात भी करना और रक्षा भी करना यद्यपि अत्यन्त विरुद्ध है, फिर भी विरुद्धधर्मसमाश्रयी श्रीकृष्ण के लिए तो अलङ्कार है। जैसे महाराज परीक्षित को उत्तरा माता के उदर में अश्वत्थामा के अमोघ ब्रह्मास्त्र से प्रहार कराकर राजा के लौकिक बीजांश का घात भी

किया और वैष्णवांश गर्भ की रक्षा भी किया और उसकी माता उत्तरा की रक्षा की, महान् सङ्कट की अवस्था में भी इस प्रकार भक्तों के दोष विनाशपूर्वक रक्षा करने की सूचना चतुर्भुज शब्द से की गई है। अथवा वेदोक्त ज्ञान दो प्रकार का होता है एक कर्मज्ञान, और दूसरा ब्रह्मज्ञान, अथवा तो आत्मज्ञान और भगवत्स्वरूपज्ञान, उसी प्रकार से भगवद्भक्ति भी दो प्रकार की होती है, एक साधनभक्ति, और दूसरी फलभक्ति, अथवा तो सगुणभक्ति और निर्गुणभक्ति इत्यादि सर्व फलों का दान भगवान् के ही हाथ है ऐसी सूचना चतुर्भुज शब्द से होती है।

शङ्खगदाद्युदायुधम्—इस पद से चारों आयुधों के संकेत को आचार्यचरण बताते हैं और यह छट्ठा विशेषण है इस विशेषण से भगवान् के छट्ठे वैराग्य ऐश्वर्य की सूचना है। कारण यह है कि वैराग्य होने पर ही सर्व दुःखों की निवृत्ति होती है। उद् आयुधम् इस प्रकार का पदच्छेद होता है इसमें उद् का अर्थ होता है कि आयुधों को ऊँचे उठाना इससे देवकीजी को और भक्तों को भगवान् निर्भयता की सूचना करते हैं और दुःखों की निवृत्ति बताते हैं।

अब **"शङ्खगदाद्युदायुधम्"** पद से चारों आयुधों का संकेत समझाते हैं कि शंखस्तदादि शंख और तदादि पद से कमल का ग्रहण करना चाहिए क्योंकि **"अपां तत्त्वं दरवरं"** शंख जल तत्त्व है जल से पृथिवी उत्पन्न हुई अतः पृथिवी तत्त्व का जल आदि कारण है इसलिये जो "भुवनात्मक कमलरूप पृथिवी तत्त्व का आदि पद से ग्रहण किया जायगा। अब गदा तदादिश्च ऐसी व्युत्पत्ति से गदा और चक्र का ग्रहण हो जायेगा क्योंकि गदा प्राणात्मक वायुतत्त्व है और 'वायोरग्निः' इस श्रुति वाक्य से निश्चय होता है कि अग्नि का आदि कारण वायु है अतः आदि पद से अग्नि तत्त्व सुदर्शन चक्र का ग्रहण हो जायगा वैसे—**शंखः तदादि** इस दो पदों से शंख और कमल, एवं गदा तदादि दो पदों से गदा और चक्र का ग्रहण होता है। इस प्रकार क्रम से शंख-पद्म-गदा-चक्र इन चारों आयुधों का संकेत शुकाचार्यजी ने सूचित किया है। भक्तों के दुःखों की निवृत्ति के लिये भगवान् ने चारों आयुधों को ऊँचा उठाये हुए रखे हैं।

कारिकार्थ—मधुसूदनो माधवश्च त्रिवृन्नारायणस्तथा १½ वैष्णवशास्त्र में चतुर्भुज स्वरूप के आयुधों के धारण क्रम में भेद होने से 'मधुसूदन' माधव, नारायण, इत्यादि भेद बतलाये हैं, यहाँ पर प्रकटहुए स्वरूप को दक्षिण हस्तों में ऊपर शङ्ख, और नीचे पद्म, तथा वामहस्तों में ऊपर गदा और नीचे चक्र इस प्रकार से मधुसूदन माना है, साथ साथ कुछ समानता के कारण माधव और नारायण रूप भी कहा है, तथा संकर्षण, प्रद्युम्न, अनिरुद्ध, रूपता भी है।

इसी कारिका का तात्पय श्रीपुरुषोत्तमजी एवं विट्ठलनाथजी आदि बतलाते हैं। उक्त आयुधों के विषय में यह शंका हो सकती है कि शङ्ख, और कमल को किस प्रकार शस्त्ररूप माना जाय क्योंकि शंख कमल से तो शत्रुवध नहीं होता, उक्त शंका के निवारणार्थ आयुध शब्द के प्रयोग का तात्पर्य समझाते हैं कि यह शंख, पद्म, गदा, चक्र भगवान् के क्रमशः इन्द्रिय, देह, प्राण, अन्तःकरण हैं, इनसे ही भगवान् दैत्य वध करते रहते हैं। शङ्ख प्राणात्मक वायु से भरा जाता है उसकी ध्वनि से दैत्यों का दर्प नष्ट होता है अतः शीघ्र ही वे मारे जाते हैं, इन्द्रियों का भी पोषण शङ्ख की भाँति प्राण से ही होता है अतः शङ्ख इन्द्रिय रूप है। अब कमल का समन्वय बताते हैं कि कमल ब्रह्माण्डरूप होने से भगवान् का स्थूल शरीर ही है, उसको धारण कर सूचित करते हैं कि जैसे अधिक भार युक्त पदार्थ ऊपर गिर पड़ने से साधारण जन्तुओं को कुचल कर मार देता है उसी प्रकार ब्रह्माण्डात्मक कमल के घूमाने से इन साधारण कीट पतंग जैसे दैत्यों को भगवान् जब चाहें तब जहां चाहें वहीं पीस देता है। इस प्रकार शंख कमल की आयुध संज्ञा सर्वथा युक्त है, अब आचार्यचरण गदा और सुदर्शन तत्त्व का समन्वय दर्शाते हैं कि गदा वायु तत्त्व होने से आधिदैविक प्राण रूप है ही, और सुदर्शन चक्र तो तेज स्वरूप होने के कारण आपका अन्तःकरण है। भगवान् मोक्ष देने की इच्छा से जिसका वध करते हैं तेजःस्वरूप चक्र के द्वारा उसे तेज में ही लय प्राप्त करा देते हैं, अब प्रकारान्तर से आचार्यचरण चारों तत्त्वों का आयुध रूप से समन्वय करते हैं अथवा पञ्च महाभूतों में आकाश को छोड़कर अन्य पृथिवी आदि भूतचतुष्टय ही आपके आयुध हैं, आकाश तो निर्लेप होने के कारण आपके श्रीविग्रह के रूप में उपयोग पाता है, पृथिवी कमल है, जल शङ्ख है, तेज सुदर्शन चक्र है और वायु गदा है, आप तो आकाश की भांति निर्लेप रहते हैं भूतों से भूतों का वध होता रहता है यह अभिप्राय है। उक्त विशेषण में 'उदायुध' पद का 'उद् + आयुध' इस प्रकार पदच्छेद करने से उद् पद का 'उदक याने जल' इस अर्थ की भी प्रतीति होती है उस अर्थ के अनुसार भी व्याख्या करते हैं कि जिस प्रकार जल अपने में गिरे हुए भारी पदार्थ को अपने में ही डुबा लेता है उसी प्रकार अभिमान के भार से लदे हुए उद्दण्ड पाषण जैसे दैत्यों को भगवान् के आयुध अपने में ही मिला लेते हैं लेकिन निकाल कर अलग नहीं फेंकते अतः असुर लोग भूतों में ही लीन होते हैं भगवान् में मिलते नहीं हैं इससे मुक्ति को प्राप्त नहीं कर पाते हैं।

इस प्रकार तमद्भुतं बालकं श्लोक के पूर्वार्ध में षड् गुण सहित भगवान् का निरूपण किया है, अब फिर श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं उत्तरार्ध में वैदिक ऐश्वर्य आदि कहे जाते हैं, अब प्रथम विशेषण श्रीवत्सलक्ष्मम् है इस विशेषण से श्रीवत्स को भगवान् का चिह्न बतला कर उनकी अक्षर ब्रह्म से प्रधानता सूचित की गई है, जिससे उनके वैदिक ऐश्वर्य का बोध होता है,

किस प्रकार से यह समन्वय होगा, इसको कहते हैं कि उक्त विशेषण में श्री, वत्स और लक्ष्म ये तीन शब्द हैं, इनमें श्री शब्द का अर्थ 'लक्ष्मी' है वह ही ब्रह्मानन्द कहलाती है, वह ब्रह्मानन्दस्वरूपा श्री 'लक्ष्मी' जिसकी 'वत्सा' 'पुत्री' है वह श्री वत्स सर्व वेद प्रतिपाद्य अक्षर ब्रह्म ही है वह ब्रह्म स्वरूप श्रीवत्स जिसका लक्ष्म 'चिह्न' है परिचय कराने वाला असाधारण धर्म है, वह परब्रह्म स्वरूप यह अद्भुत बालक है। सर्वात्मा भगवान के 'जगत्' अक्षर ब्रह्म-काल-आदि अनेक लक्षणरूप धर्मों में 'अक्षर ब्रह्म की मुख्यता है, अतएव आपके वक्षःस्थल में 'भृगुपद' का चिह्न है। भृगु ऋषि सर्व प्रकार से ब्रह्म को धारण करने वाले थे, वे जाति से भी ब्राह्मण थे, और वेदाध्ययनपरायण थे, और अक्षर ब्रह्म के तादात्म्य का अनुभव करने वाले थे, उन्होंने जाति रूप से भी ब्रह्म का धारण किया था, वेद रूप से भी ब्रह्म का धारण किया था, और अभेद चिन्तन की प्रक्रिया से भी ब्रह्म का धारण किया था, महाराज भृगु सर्व प्रकार से ब्रह्म के धारण करने वाले महात्माजी का पद जहाँ अंकित है वह सर्वथा ही ब्रह्म का आश्रय है क्योंकि आश्रय में ही पद स्थिर होकर ठहरता है अन्यत्र मार्गादि में तो वह पद गतिशील ही बना रहता है, जब कोई किसी गन्तव्य देश को लक्ष्य कर चलता है वह जब तक वहाँ पहुँच नहीं पाता तब तक उसके पद गमनशील होते हैं ठहरते नहीं, पद तो ठहरते वहीं पर जहां उसे पहुँचना है जो उसका आश्रय है, सर्वथा ब्रह्ममय भृगु ऋषि के भगवान् ही आश्रय हैं अतः उनकी गति का पर्यवसान भगवान् में ही है वहीं पर उनका पद आश्रय प्रतिष्ठित हुआ है, आचार्यचरण का यह विश्लेषण अतिशय गहरा है पुनः पुनः चिंतन करने पर कुछ समझ में आयेगा। अब आगे आचार्यचरण की बात समझाते हैं कि इन भृगु ऋषि को ख्याति नामकी पत्नी से "श्री" नामकी कन्या उत्पन्न हुई थी अतः इन भृगु मुनि को "श्रीवत्स" कहते हैं क्योंकि श्री जिसकी वत्सा हो उसे श्रीवत्स कहा जाता है, अब इस पद में वैदिक मार्गीय ऐश्वर्य कैसे समन्वित होता है इस को बताते हैं कि ब्रह्म का लक्षण रूप से अपने परिचायक धर्म रूप से ग्रहण करना भगवान् के ऐश्वर्य का कार्य है और वह ऐश्वर्य वेदसिद्ध होने से यह वैदिक ऐश्वर्य का निरूपण हुआ है। **वीर्यं निरूपयन् कयाचिदवस्थयाऽवस्थिते ब्रह्म जीवाख्यं लक्षणान्तरेणाह गलशोभिकौस्तुभमिति** अब "गलशोभिकौस्तुभम्" इस विशेषण से भगवान् के वैदिक "वीर्य" गुण का निरूपण करते हुए बतलाते हैं कि ब्रह्म ही किसी अवस्था से सम्पर्क प्राप्त कर जीवपदवी को धारण करता है वह भी भगवान् का एक प्रकार का लक्षणविशेष है—

भगवान् के कण्ठ में विराजमान जो है वह सर्व जीवों का स्वरूप भूत प्रतीक है, "**चैत्यस्य तत्त्वममलमणिमस्य कण्ठे**" ऐसा उल्लेख भा० स्कं० ३ अ० २८ श्लोक २८ में कौस्तुभमणि के वर्णन में बतलाया है, भगवान् ने कौस्तुभमणि को श्रीहस्तादि में स्थान न देकर गले के श्रृङ्गार विभूषण में स्थान देने का अभिप्राय यह है कि क्रियाशक्ति की अपेक्षा ज्ञानशक्ति उत्तम होती है, इसलिए मुक्त जीवों को सरस्वती का स्थान ही उपयुक्त है। भगवान् का कण्ठप्रदेशज्ञान शक्ति स्वरूपा सरस्वती जी का आश्रय है अतः वहां मुक्तात्माओं का स्थान है। "**मुक्तोपसृप्यो भगवान्**" मुक्तजनों से प्राप्य भगवान् मुक्त जीवों को कण्ठाभरण रूप से धारण करते हैं। कौस्तुभमणि का मुख और कबन्ध के बीच में धारण करना यह सूचित करता है कि जीव दोनों प्रकार के होते हैं। कोई क्रियानिष्ठ होते हैं जिनका कर्मकाण्ड की पद्धति से ब्रह्मप्राप्ति के लिये उद्यम होता है और कुछ ज्ञाननिष्ठ होते हैं जिनका ज्ञानकाण्ड की पद्धति से ब्रह्मप्राप्ति के लिए उद्यम होता है। भगवान् की सर्वाङ्ग वर्णना श्री भा० स्कं० ३ अ० २८ में हुई है वहां कौस्तुभ का वर्णन दो बार किया है इससे भी द्विविधता स्पष्ट होती है, श्लोः सं० २६ **कण्ठश्च कौस्तुभमणेरधिभूषणार्थम्** श्लोः सं २८ **चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे**, यह दोनों श्लोकों के अंश हैं, शोभा दो प्रकार की होती है ज्ञानकृत शोभा और कर्मकृत शोभा सत्कर्माचरण से हुई शोभा कर्मकृत शोभा है, और तत्त्वचिन्तनादि से सम्पन्न हुई शोभा ज्ञानकृत शोभा है। जीव के ये दोनों ही, क्रिया और ज्ञान, धर्म हैं अतः जीवतत्वात्मक कौस्तुभमणि को "शोभि" शोभा सम्पन्न बतलाया है, उक्त प्रकार से भगवान् में अक्षर ब्रह्म एवं जीव ब्रह्म इन दोनों के सम्बन्ध का श्रीवत्स और कौस्तुभ रूप से निरूपण किया गया है।

जीवस्य तथात्वहेतुभूतां भगवतः प्रदेशविशेषावरिकां पीताम्बररूपां निरूपयति—जीवों के जीव भाव में करणीभूत माया का भगवान् के अमुक अंश को आच्छन्न करने वाली होने के कारण पीताम्बर रूप से निरूपण करते हैं, 'पीताम्बरम्' भगवान् का वस्त्र पीतवर्ण है, अतः शोभा का हेतु है क्योंकि नीलवर्ण तो आपका श्रीविग्रह है, और आकाश का वर्ण भी नील है इसलिये आपको आकाशतनु कहा है कि भगवान् का शरीर आकाश है, नील वर्ण पर पीतवर्ण अधिक शोभादायक होता ही है साथ ही में एक धर्म और भी शोभा में उपयोगी है कि भगवान् का शरीर आकाश है ऐसा "**आकाशः शरीरं ब्रह्म**" आदि श्रुतियों से सिद्ध होता है।

आकाश निर्विकार है तब उसकी शोभा भी निर्विकार पदार्थ होने पर ही रह पावेगी लेकिन विकारिवस्तु के सम्बन्ध होने पर निर्विकार की भी शोभा नहीं रह पाती। भगवान् का पीताम्बर सर्वांश में निर्विकार है इस पीताम्बर में पीत और अम्बर दो अंश हैं, अम्बर शब्द आकाश वाचक होने के कारण निर्विकारिता का सूचक है। अब बात रही पीतवर्ण के विषय में

निर्विकारिता के विचार में, कि पीतवर्ण निर्विकारिता का द्योतक कैसे है तब पीतवर्ण के विषय में इस प्रकार से विचार करने पर निर्विकारिता प्रतिपादित होगी कि तामस और राजस के सम्बन्ध से पीतवर्ण सम्पन्न होता है, इसमें सात्त्विक का सम्बन्ध नहीं है। सात्त्विक अहंकार को "**वैकारिको राजसश्च तामसश्चेत्यहं त्रिधा**" आदि स्थल पर वैकारिक कहा है एवं रोमांच आदि सात्त्विक भावों को भी विकार माना है अतः पीतवर्ण में सात्त्विक का सम्बन्ध न होने से निर्विकारता है। यदि कहें कि पीतवर्ण स्वतन्त्र है राजस तामस के सम्बन्ध से क्यों माना जाय तो इस विषय में तो श्रुति ही प्रमाण है कि रूप तो तीन ही प्रकार का होता है लाल, शुक्ल और कृष्ण, पीतवर्ण आया कहाँ से। श्रुति में स्पष्ट उल्लेख है कि "**यदग्ने रोहितं रूपं तेजसस्तद् रूपं यच्छुक्लंतदपांयत्कृष्णं तदन्नस्य**" लालवर्ण तेज का है, शुक्ल वर्ण जलों का है, कृष्ण वर्ण अन्न पृथ्वी का है। अतः पीत वर्ण तामस राजस के संयोग से बनेगा और 'सात्त्विक सम्बन्धरहित' होने से निर्विकार है तो पीताम्बर से नीलवपु की निर्विकार से निर्विकार की शोभा होना सर्वथा सुसंगत है।

"**प्रभां वर्णयति–सान्द्रपयोदसौभगमिति**" अब **सान्द्रपयोदसौभगम्** विशेषण से भगवान् की 'श्री' प्रभा का वर्णन करते हैं, सान्द्र अत्यंत गाढ नील वर्ण वाले मेघ के समान आपकी सुन्दरता है, परमानन्दस्वरूप भगवान् की नीलवर्णता का निरूपण चार प्रकार से पूर्व के "निबन्ध" में किया जा चुका है, प्रथम प्रकार यह है कि जैसे नेत्र रूप वाले पदार्थ को देखते देखते आकाश में किसी वस्तु के न होने पर मेघ शून्य प्रदेश में दूर जाकर कुछ नीलासा दिखता है, उसी प्रकार ब्रह्म भी अत्यन्त गम्भीर होने के कारण नीला जैसा ही दीखता है। द्वितीय प्रकार यह है कि सत्ययुग आदि युग के अधिष्ठाता देवताओं के शुक्ल, रक्त, पीत, नील, वर्ण हैं उनके प्रतिबिम्बों की प्रतीति ब्रह्म में होती है। तृतीय प्रकार यह है कि भगवान् भूमि में प्रकट हुए हैं अतः भूमि का नीला वर्ण उनमें प्रतिफलित होता है। चतुर्थ प्रकार यह है कि शुद्ध सत्त्व का वर्ण नील है शुद्ध सत्त्वात्मक वैकुण्ठ में प्रकट हुए ब्रह्म में उस शुद्ध सत्त्व की नीलता झलकती है।

तस्य धर्मा इदानीं निरूप्यन्ते यस्तु स्वकाले सर्वानन्ददायी—इस प्रकार आकाश, काल, भूमि, और वैकुण्ठ इनके द्वारा चार प्रकार से नीलरूपता का प्रतिपादन किया है। इस समय तो नील मेघ की उपमा के द्वारा उसके धर्मों का निरूपण करना अभीष्ट है, जो मेघ अपने समय पर सर्व साधारण को आनन्द देता है, एवं अन्न पैदा करता है, और ताप निवारण करता है वह मेघ सान्द्र और नीलवर्ण होता है, इसी प्रकार भगवान भी पृथिवी, एवं स्वर्गलोक, धर्म, तथा भक्तों के सर्व अनिष्टों का निवारण कर सर्व अभीष्टों को सिद्ध करते हैं। भगवान् के विषय में कहा है कि "**सर्वत्र पूर्णगुणकोऽपि बहूपमोऽभूत्**" वह भगवान् सर्वत्र पूर्ण गुणों से सम्पन्न होते हुए भी बहुत उपमाओं को अंगीकार करते हैं। अतः प्राकृतमेघों की उपमा कोई अनुचित नहीं, अन्यथा सर्वथा अप्राकृत ब्रह्म को प्राकृत मेघों की उपमा कैसे संगत हो सकेगी, इस विशेषण से मनोहर वर्षाकालीन मेघ के समान श्याम सुन्दर स्वरूप का वर्णन कर भगवान् की कान्तिस्वरूप श्री का निरूपण किया है ॥ ९ ॥

एवं मूलभूते ब्रह्मणि स्वयं स्थित्वा—इस प्रकार पूर्वोक्त श्लोक में "**श्री वत्सलक्ष्मम्**" आदि चार विशेषणों से यह बतलाया कि भगवान् मूलभूत अक्षर ब्रह्म में विराजमान होकर, अपने अंश रूप जीवों को कृतार्थ करके, भूमिस्थित जीवों को महामोह से स्वरूप ज्ञान रहित बनाकर उनको चतुर्विध पुरुषार्थ का दान करते हैं। अब इस श्लोक में ज्ञान और वैराग्य के रूप से भगवान् के सर्व शास्त्र मय अलंकारों के अनुरूप वर्णन किया जाता है। इस वर्णन द्वारा यह सूचित करना अभीष्ट है कि भगवत्स्वरूपगत ज्ञान, एवं क्रिया यह दोनों शक्ति, विविध भांति की हैं, और ज्ञान क्रिया शक्ति के अनेक प्रकार हैं।

महानर्हो मूल्यं यस्य तादृशवैदूर्ययुक्तं किरीट—बहुमूल्य वैदूर्यमणि से जटित किरीट एवं कुण्डलों की कान्ति से मिश्रित हिरण्यकेश भगवान् के सहस्रशः केश आलिङ्गित हो रहे हैं, अब इस विशेषण से यह सूचित होता है कि भगवान् के श्री मुख के दर्शन करने वाले शास्त्र तत्त्व के मर्मज्ञ जीववृन्द भगवान् के श्री मुख कमल के मकरन्द रस पान में डूबे हुए भ्रमरों की भांति भक्ति के हो जाने पर सब ओर से सुशोभित हो रहे हैं। आचार्यचरणों का यहाँ यह कहना है कि केवल पद पदार्थों के ज्ञानमात्र से शास्त्र श्रम सफल नहीं होता लेकिन श्रीकृष्ण के श्रीमुख दर्शन से भक्ति प्राप्त होने के बाद ही शास्त्रतत्त्व का मर्मज्ञान होगा इसी विषय में सुभाषित है कि "**यथा खरश्चन्दनभारवाही भारस्य वेत्ता न तु चन्दनस्य ।। तथैव विप्राः षट्शास्त्रयुक्ताः मद्भक्तिहीनाः खरवद् वहन्ति ।। १ ।।**"

तेषां वेदः सांख्ययोगौ च शोभाजनका भवन्ति—उन जीवों की शोभा के सम्पादन में वेद, और सांख्य योगों का उपयोग है तथा वेद सांख्य योगों की प्राप्ति सर्व लोकप्रसिद्ध गुरु से ही होती है। भगवान् ने इसलिये वैदूर्यमणि को बहुमूल्य कहा है, लेकिन अमूल्य नहीं कहा। बहुमूल्य कहना वस्तु की प्राप्ति के साधन की सूचना करता है और उसके महत्व का भी सूचक है। इसका मर्म यह है कि किरीट आदि आभूषणों से सूचित वेद उपनिषद आदि शास्त्र भी, बहुमूल्यवती हरिभक्ति से या तो सद्गुरु कृपा से प्राप्त होते हैं। वेद में कर्म और ज्ञान, के प्रतिपादक दो काण्ड हैं, योग में भी साधन, और फल, भेद से दो प्रकार है, और सांख्य में भी न्यास तथा ज्ञान के भेद से दो प्रकार है, इस प्रकार षट् शास्त्रों का निरूपण होता है। यह षट् शास्त्र ही षट्

पद भ्रमर रूप जीवों के पद हैं। **परिषक्तसहस्रकुन्तलम्**—स्वरूप वर्णन में कुन्तलों की संख्या सहस्र शब्द से इसलिये प्रकट की है कि वेद, सांख्य, योग, इन तीनों के भी हजारों भेद हैं शास्त्रज्ञ भक्तों का लौकिक ज्ञान विस्मृत हो जाता है इस आशय को व्यक्त करने के लिए कुन्तलों का किरीट और कुण्डलों की कान्ति से परिषाङ्ग माने समालिंगन बतलाया है, इसका तात्पर्य यह है कि कुन्तल रूप जीव षट् शास्त्र ज्ञान जनित भक्ति भाव से सर्वाङ्ग परिपूर्ण हो जाते हैं अतः उन्हें लौकिक का अनुसन्धान नहीं रहता है। अब उद्दाम काञ्च्यंगद पद का रहस्य कहते हैं कि—इस प्रकार लोक में नाना प्रकारों को प्राप्त हुए ज्ञान के निरूपण करने के अनन्तर 'उद्दाम', इत्यादि विशेषण के द्वारा क्रिया का निरूपण करते हैं। यद्यपि कर्म अनन्त प्रकार के ही हैं फिर भी तीन प्रकार के ही बतलाये गये हैं। इसका हेतु यह है कि सर्व कर्मों का सात्त्विक, राजस, तामस, तीन रूप से ही विभाग होता है, अतः यहां पर उन कर्मों का काञ्ची–अङ्गद–कङ्कण, के रूप में निरूपण किया है, इन तीनों में करधनी काञ्ची तमोमय कर्मरूप है, अङ्गद बाजूबन्ध सत्त्वमय कर्म रूप है और कङ्कण रजोमय कर्म स्थानीय है।

कांची-अंगद-कंकण ये भगवान् के आभरण रूप त्रिविध कर्म वेदादि शास्त्रों से प्रतिपाद्य हैं, और जितने कर्म करेंगे उन कर्म मात्र के मूलभूत पूर्ववर्ती कारण हैं। वे कर्म अपने समान जातीय अनन्त सात्त्विक आदि कर्मों को भविष्य में प्रकट करते रहते हैं, इसका कारण यह है कि कर्मों का स्वभाव है कि उत्तरोत्तर अपने जैसे कर्मों को उत्पन्न करते रहना, काञ्च्यंगदकङ्कणादिभिः पद में जो आदि शब्द है वह काञ्ची, अङ्गद, और कङ्कण तीनों से सम्बन्धित है अतः तामस कर्म तामस कर्मों को, सात्त्विक कर्म सात्त्विक कर्मों को और राजस कर्म राजस कर्मों को, जन्म देते हैं यह सूचना अभीष्ट है।

लोके काञ्ची सदामा भवति इयं तूद्दामा दामरहिता—लोक में काञ्ची दाम रेशम के सूत्र सहित होती है परन्तु यहाँ बालमुकुन्द जी की करधनी तो उद्दाम बन्धन रहित है। वैदिक क्रिया यद्यपि स्वल्प हिंसात्मक होती है फिर भी वह भयंकर लौकिक हिंसा की तरह निन्द्य या पाप जनक नहीं और बन्धन हेतु नहीं इस अभिप्राय को 'उद्दाम' विशेषण से व्यक्त किया है। साथ ही वैदिक कृति के हिंसात्मक होने की सूचना से काञ्ची की वैराग्यरूपता भी स्पष्ट हो जाती है क्योंकि राग प्रयुक्त हिंसा ही पाप है एवं बन्धन का कारण है वैदिक हिंसा पाप नहीं क्योंकि वह शुद्ध विधि प्रयुक्त ही है अतः राग के अभाव की या वैराग्य की स्पष्टता हो ही जाती है। पीताम्बर के ऊपर काञ्ची स्थित है, वह यह सूचित कर रही है कि जो लोग भूमि में माया से व्याप्त हैं उनका ही वैसे हिंसात्मक कर्मों में अनुराग है क्योंकि भगवान् के चरण स्थानीय भूलोक पर पीताम्बर-रूपिणी माया है और उसका काञ्ची रूप वैसे कर्मों से निकट सम्बन्ध है। भगवान् में लौकिक कर्मों का सर्वथा अभाव है अतः उन लौकिक कर्मों की व्यावृत्ति करने के लिये, उनके अभाव बतलाने के लिये लौकिक सूत्र का अभाव 'उद्दाम' शब्द से सूचित किया गया है। उद्-और दाम इन दोनों शब्दों का अर्थ यह है कि जिसमें से दाम सूत्र उद् माने निकल गया है ऐसी करधनी को उद्दाम कांची कही गई है। अथवा 'उद्दाम' शब्द के अन्तर्गत 'उद्' शब्द का उत्कृष्ट अर्थ होने के कारण उस काञ्ची रूप वैदिक कर्म में अलौकिक साधनों का निरूपण 'उद्दाम' शब्द से किया है। यज्ञ में जो स्रुग् स्रुव् चमस आदि यज्ञोपयोगी साधन होते हैं वे काष्ठादि के स्वरूप में नहीं होते लेकिन निबन्ध में बताये हुए सिद्धान्त के अनुसार **'तत् साधनञ्च स हरिः प्रयाजादि-स्रुगादिवत्'** वे साधन भगवद्रूप है। अङ्गद बाहुओं के मध्य में रहते हैं, यह सात्त्विक कर्मों के मूलभूत है क्योंकि **'अङ्गयति खण्डति'** इस व्युत्पत्ति के अनुसार अङ्ग का देहाध्यास का खण्डन करने वाला ही अङ्गद शब्द का वाक्यार्थ है। देहाध्यास की निवृत्ति या विदेह कैवल्य की प्राप्ति में अङ्ग का, देह का अनुसन्धान न रहना स्वाभाविक है। यह देहविस्मृति की अवस्था सात्त्विक है अतः इस अवस्था का प्रयोजक कर्म भी सात्त्विक ही है। कङ्कण चंचल होने से राजस कर्म स्थानीय है, यद्यपि शास्त्रविहित कर्म रूप अङ्गद और कङ्कणों की क्रियाशक्ति रूप भगवान् की भुजाओं में स्थिति होने से उनके सात्त्विक या राजस होने में कोई स्थूल कारण नहीं दीखता परन्तु एक ही कर्म की सकाम निष्काम कर्त्ताओं के आधार पर सात्त्विकता और राजसत्ता गीता १८ श्लोक २३-२४ में कही है उस दिशा से सात्त्विक और राजस कर्ता ही कर्म के सात्त्विक और राजस इस विभाग के कारण है अतः उक्त विषय में कोइ शङ्का नहीं।

कांच्यंगदकंकणादिभि—पद में जो आदि शब्द है उस आदि शब्द से अंगूठी एवं बाजूबन्द के स्थान पर धारण करने योग्य अन्य आभरण तथा क्षुद्र घण्टिका नूपुर आदि का निरूपण किया है। उन सब ही धर्म मार्गीय भगवत्सम्बन्धी कर्म-रूप आभूषणों से भगवान् शोभा सम्पन्न होते हैं।

'वेदे रामायणे चैव' पुराणे भारते तथा। **आदावन्ते तथा मध्ये हरिः सर्वत्र गीयते'** इस हरिवंश के पद्य का उद्धरण इस दृष्टि से किया गया है कि सर्व सच्छास्त्रों में भगवान् की सम्पूर्ण महिमा का ही गान किया गया है। अतः शास्त्रोक्त कर्म रूप आभरणों से भगवान् का विराजमान होना सर्वथा सङ्गत ही है। श्री लेखकार जी का हरिवंश के इस पद्य का भाव यह बतलाते है कि तमद्भुतम् और महार्ह वैडूर्य इन दो श्लोकों में जो द्वादश विशेषण दिये गये हैं उनका तात्पर्य यह है कि वेद में आदि (१) मध्य (२) अन्त में (३) रामायण में आदि (१) मध्य (२) अन्त में (३) पुराणों में आदि (१) मध्य (२)

अन्त (३) में और श्री महाभारत में आदि (१) मध्य (२) अन्त में (३) बारह प्रकार से यहाँ श्री वसुदेव जी के कारागृह में प्रकटे हुए भगवान् का ही निरूपण है। उक्त श्लोक में 'वसुदेव ऐक्षत' वसुदेवजी ने उक्तस्वरूप भगवान् को देखा, ऐसा कहा गया है, शुकमुनि का ऐसा कथन एक शङ्का के निवारणार्थ हुआ है, कि प्रकट हुए भगवान् का दर्शन तो स्वतःसिद्ध है उसके कथन की फिर क्या आवश्यकता ! जो स्वरूप प्रकट हुआ है उसका दर्शन होना तो सहजसिद्ध ही है। फिर आगे बैठकर 'स विस्मयोत्फुल्ल' श्लोक में 'विलोक्य' पद से दर्शन का अनुवाद आगे किया ही है ऐसी स्थिति में भगवत्स्वरूप वर्णन की क्या आवश्यकता थी कि ऐसे रूप को वसुदेवजी ने देखा। भगवान् प्रकट हुए उनको देखकर वसुदेव जी ने दान, गुणगान आदि किये इतना कथन ही काफी था, लेकिन बात यह है कि वसुदेवजी को भगत्स्वरूप का सर्वांश में यथार्थ ज्ञान हो गया है, इस रहस्य की सूचना के लिये वह कथन किया है, बात ऐसी है कि पूर्वोक्त ऐश्वर्यादि भगवद्धर्मों की लौकिकता का भी सम्भव है और अलौकिकता का भी सम्भव है, इस समय वसुदेवजी को यदि यथार्थ ज्ञान न होगा तो वह उन ऐश्वर्यादिकों को लौकिक ही मानेंगे, और यदि यथार्थ ज्ञान होगा तो हमने लौकिक वैदिक दोनों प्रकार के ऐश्वर्यादिकों का प्रतिपादक जो व्याख्यान पूर्व में कहा है उसी प्रकार का आगे भी उनको भगवल्लीलाओं में अनुभव होता रहेगा, अतः शुकदेवजी कहते हैं कि वसुदेवजी ने वैसे धर्मों के सहित भगवान् को देखा उनका लौकिक वैदिक उभयविध ऐश्वर्यादि परिपूर्ण स्वरूप उसी समय पहिचाना, वसुदेवजी का वह ज्ञान उनके किये हुए स्तोत्र में स्पष्ट हो जावेगा ॥ १० ॥

एवं भगवन्तं दृष्ट्वा शुद्धसत्त्वात्मकः वसुदेवः—इस प्रकार भगवान् का दर्शन कर शुद्ध सत्व गुणमय श्री वसुदेवजी ने किया और ज्ञान को प्रकट किया, यह दो श्लोकों से कहते हैं, गोदान रूप क्रिया है, और गुणगान भगवत् स्वरूप के ज्ञान का बोधक है, कर्म में चार प्रकार का अधिकार और श्रद्धा अंग है।

अब आचार्यचरण कर्ता अर्थी-विद्वान्-समर्थः-शास्त्रेणापर्युदस्तः'' अभिलाषायुक्त-ज्ञानी-समर्थ और शास्त्रसंमत होना चाहिए ऐसी वेदाज्ञा का तात्पर्य कहते हैं कि कर्ता अर्थी होना चाहिये जिस निमित्त से वह कर्म करता है उस निमित्त की उसे अभिलाषा होनी चाहिये। एवं वह कर्ता विद्वान भी हो उसे निमित्त का और नैमित्तिक कर्म का ज्ञान भी हो, अन्यथा कर्म नहीं कर सकेगा। इसी तरह उसे सामर्थ्यशाली भी होना आवश्यक है, क्योंकि सामर्थ्य के बिना कुछ भी नहीं किया जा सकता है। फिर उस कर्ता को शास्त्र से कर्म करने में निषेध प्राप्त न होना चाहिये इस प्रकार कर्ता के यह चार विशेषण कर्म में अधिकार रूप हैं, और यह दान रूप कर्म नैमित्तिक है। और पुत्रजन्म आदि के निमित्त से किया जाने वाला है। वसुदेवजी अर्थी है, विद्वान् है, समर्थ है, और शास्त्र से निषेध नहीं है और वसुदेवजी को भगवान् के जन्म की अपेक्षा है, इसकी सूचना उनका हर्ष ही कर रहा है, वह हर्ष भगवद् प्राकट्य के कारण के होने से असाधारण ही होता है, उस असाधारण हर्ष का अब **सविस्मयोत्फुल्ल** और **अथैनमस्तौद्** इन दो श्लोकों से कहते हैं।

एतत्सर्वपरिज्ञाने स इति पूर्वोक्तो वसुदेवो हेतुः—उक्त श्लोक में 'स' शब्द से पूर्वोक्त वसुदेवजी का परामर्श कर उनके दान, भगवद् गुण गान और स्वाधिकार सम्बन्धी परिज्ञान में हेतु का निर्देश किया है कि श्री वसुदेवजी ने भगवत्साक्षात्कार किया है एवं स्वयं विशुद्ध सत्त्वात्मक है, इसलिए इनके सर्वविध ज्ञान सम्पन्न होने में किसी भी प्रकार के संदेह का अवसर नहीं। इनको अलभ्य लाभ होने के कारण विस्मय हुआ, अलभ्य वस्तु का लाभ विस्मयजनक तो होता ही है साथ ही उस वस्तु की उत्कट प्राप्ति की इच्छा का भी द्योतक है जिसको प्राप्त करने की पूर्ण लालसा होने पर अपने साधन बल से प्राप्त होने की संभावना न हो, ऐसी वस्तु का लाभ होने पर वह अलभ्य लाभ कहा जाता है। अलभ्य लाभ का वह विस्मय अन्तःस्तल हृदय में प्रविष्ट होकर नयनों को विकसित प्रफुल्लित कर देता है यह विस्मय का स्वभाव है। वसुदेवजी के नेत्र विस्मय से खिल उठे, उन्होंने पूर्व में यह सुना था कि भगवान् हरि पुत्र रूप से प्रकट होंगे, इस समय तो पुत्र रूप से प्रकट हुए हरि को देख रहे हैं, इस प्रकार के दर्शन से उनका ज्ञान स्पष्ट होता है जो ज्ञान कर्माचरण के अधिकारों में एक अंग है। प्रस्तुत गोदान कर्म में भगवत्प्रादुर्भाव निमित्त है, वही अर्थ है जो अर्थ भी एक अंग है इस निमित्त के ज्ञान से वसुदेवजी का नैमित्तिक गोदान कर्मविषयक ज्ञान भी सिद्ध होता है। उनका वह ज्ञान आगे कंसवध के अनन्तर गोदान करने से स्पष्ट होगा। श्री वसुदेवजी को इसलिये तो आनकदुन्दुभि कहते हैं कि इनके जन्म समय में आनक और दुन्दुभि दो वाजित्र बजे थे, इस कारण इनका गोदानादि सत्कर्माचरण में सामर्थ्य व्यक्त होता है जो अधिकारिता में एक अंग है यदि दश सहस्र गोदान का सामर्थ्य नहीं होता तो जन्म काल में आनक दुन्दुभियों का नाद भी कैसे सम्भव था।

अब श्रीमदाचार्यचरण "कृष्ण" शब्द का महत्त्व और रहस्य खोलते हैं कि भगवान् कृष्ण के प्राकट्य होने पर श्रीवसुदेवजी के मनो विलास रूप जो उत्सव प्रकट हुआ उस आनंदोत्सव से सुन्दर संभ्रम और अतिशय व्यग्रता हुई कि इस मंगल उत्सव पर क्या क्या न्यौछावर न किया जाय। भगवच्छास्त्रों में एवं स्मृतिशास्त्रों में वैसे पुरुष का ही गोसहस्र दानादिकर्म में अधिकार बताया कि जिसका मन उल्लासपूर्ण हो और सम्भ्रान्त हो। वैसा उल्लासपूर्ण मन और सम्भ्रान्त मन तब ही होगा जब पुत्र

यदि सर्व शुभ लक्षणों से सम्पन्न होगा। और वैसे पुत्र के पिता को शुभ कर्म का अधिकार प्राप्त हो सकता है। अतः यहाँ कृष्ण पद का प्रयोग कर पुत्र की सर्व लक्षण सम्पत्ति सूचित की गई है। दशसहस्र गोप्रदान तो कोई बड़ी चीज नहीं है। करोड़ों गोप्रदान किया जाय तब भी कुछ नहीं दान किया। 'मुदा' हर्ष के साथ श्री वसुदेवजी ने गोदान किया, हर्ष स्नेहस्वरूप है, उसके स्वरूप में स्नेह अन्तः प्रविष्ट है, अतः भक्ति की सूचना करता है, कि भक्तिमान् वसुदेवजी ने भक्ति पूर्वक गोदान का मानस संकल्प किया। दश सहस्र गौओं का दान ब्राह्मणों को उद्देश्य कर वसुदेवजी ने किया, यद्यपि जातकर्म गोदानादि पुण्यकर्म में नैमित्तिक स्नान, करने के अनन्तर ही होता है क्योंकि वैसे सत्कर्मों का विधान है, फिर श्री वसुदेवजी ने बिना स्नान संकल्प कैसे किया इस संदेह का यह समाधान है कि 'मुदाऽऽप्लुतः' श्रीवसुदेवजी ने हर्ष नामक जल से स्नान किया है और ऐसे अर्थ को लाने के लिये **मुदा द्विजेभ्यो गवामयुतमस्पृशत्** और मुदा आप्लुतः दोनों पदों में "मुदा" अव्यय का आवर्तन करना और हर्ष से दान किया और हर्षजल से स्नान किया ऐसा अर्थ करना ॥ ११ ॥

ननु पुत्रः संस्कर्तव्यो जातकाख्येन कर्मणा तत् कथं न कृतवान्—ऐसी शङ्का हो सकती है कि पुत्र का संस्कार 'जातक' नामक कर्म से करना चाहिये, तब वसुदेवजी ने वैसा क्यों नहीं किया, ऐसी शङ्का को यहां अवसर नहीं, क्योंकि प्राकृत पुत्र के जन्म होने पर गर्भशुद्धि के लिए संस्कार का विधान है इस अप्राकृत बालक में संस्कार की आवश्यकता नहीं, श्रीवसुदेवजी को इस बालक की दिव्यता का ज्ञान हो चुका है, इसलिए तो स्तुति करते हैं। मानसिक गोदान रूप कर्म की समाप्ति के अनन्तर श्रीवसुदेवजी ने पुत्र रूप से प्रकट हुए पूर्ण पुरुषोत्तम की स्तुति की है। स्तुति अपनी अपेक्षा से उच्च कक्षा वाले पुरुष की की जाती है, पुत्र की स्तुति कैसे की गई, इस संशय के समाधान के लिए शुकदेवजी कहते हैं कि वसुदेवजी ने पूर्वोक्त प्रकार से इस बालक को परतत्त्व रूप पूर्ण पुरुष जानकर स्तुति की है, कभी कभी स्तुति केवल प्रशंसा करने मात्र से भी हो सकती है परन्तु यह स्तुति वैसी नहीं है, यह तो शतशः नम्रतापूर्ण स्तुति है वसुदेवजी 'नताङ्ग' होकर स्तुति करते हैं, भगवान् को नमस्कार करके स्तुति कर रहे हैं उनका अङ्ग झुक गया है।

कृतधीः—अब कृतधी पद का स्वारस्य बतलाते है कि जो भगवान् जैसे प्रकट हुए हैं उनको वैसा ही जानकर स्तुति करना उचित है, अन्यथा उचित नहीं। शास्त्र में कहा है कि 'अन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते' आत्मा का स्वरूप हो कुछ अन्य प्रकार से, और यदि कोई अबुध अथवा अव्यवस्थितमति व्यक्ति उसे अतिरिक्त प्रकार से समझने लग जाते तो आत्मा के स्वरूप को अन्यथा स्वरूप समझाने वाले उस आत्मापहारीने कौन सा पाप नहीं किया!' इसलिये आत्मा का यथार्थ ज्ञान समझना चाहिए। श्रीवसुदेवजी ने तो कृतधीः स्थितप्रज्ञ होने के कारण भगवत्स्वरूप को यथार्थ जाना है यह ज्ञान यद्यपि पूर्व में वसुदेवजी को नहीं था कि पुरुषोत्तम का प्राकट्य होगा परन्तु भगवान् ने अपने श्री हस्तादि अवयवों का दर्शन कराकर उनकी उस प्रकार की बुद्धि बनादी जिससे वह समझ गये कि यह पूर्ण पुरुषोत्तम हैं। कभी कभी नम्रता पूर्वक स्तुति भी समान स्तर के लोग परस्पर किया करते हैं परन्तु यहाँ वैसी बात नहीं है इसलिए, वसुदेवजी को कृताञ्जलिः कहा है कि वह अंजलिबद्ध बनकर स्तुति करते हैं क्योंकि महान् पुरुष की ही हाथ जोड़ कर स्तुति की जाती है, समान कक्षा वाले की नहीं की जाती। स्तुति मन वाणी और काया से होनी चाहिये, हाथों का जोड़ना काया की स्थिति का सूचक है कि स्तुति करने में काया का विनियोग हुआ, और 'कृतधी' शब्द से मन का विनियोग हुआ है, और वाणी का विनियोग तो स्तुति में स्पष्ट ही है क्योंकि स्तवन-कथन वचन द्वारा ही हो पाता है।

गतभीः प्रभाववित्—भगवद्गुणानुवाद उच्च स्वर से किया जाता है ऐसा करने पर जागरूक जग जायेंगे ऐसी शङ्का के निवारणार्थ 'गतभीः' विशेषण का प्रयोग किया है कि वसुदेवजी को कंस का भय नहीं था, क्योंकि वह 'प्रभावविद्' थे, भगवत्प्रभाव को उन्होंने जान लिया था कि यह काल आदि के भी नियामक हैं। यदि कोई कहे कि भगवान् का सामर्थ्य होते हुए भी उसे प्रकट न करें अथवा शालग्राम शिला आदि की भाँति सामर्थ्य के रहते हुए भी अतिक्रम करने वाले को परोक्ष रूप से ही दण्ड देते हैं। प्रत्यक्ष रूप से कोई दण्ड नहीं देते केवल शिलावत् मूक ही रहे तब तो विपरीत हो जाने का सम्भव है, इस शङ्का को निवृत्त करते हैं कि **स्वरोचिषा विरोचयन्तम्** भगवान् का सामर्थ्य तो प्रकट तेजःपुञ्ज से प्रत्यक्ष ही प्रतीत हो रहा है अपनी दिव्य कान्ति से जन्म स्थान को इस प्रकार प्रकाशित कर रहे हैं जैसे करोड़ों मणियों से गृह प्रकाशित होता है। भारत! यह सम्बोधन परीक्षित के विश्वास के लिये प्रयुक्त हुआ है कि हे राजन् तुम भगवद्भक्त राजर्षि भरत के वंश में प्रकट हुए हो अतः तुम्हारा इस प्रकार के भगवत्प्रभाव पर पूर्ण विश्वास होना तो अनिवार्य है ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं भगवतः प्रादुर्भावं निरूप्य प्रादुर्भूतं तं वर्णयति—तमिति द्वाभ्याम्। तं पुरुषोत्तमत्वेन शास्त्रे प्रसिद्धं, अद्भुतं सर्वाश्चर्यरूपं, बालकं वसुदेव ऐक्षत अपश्यदित्यन्वयः। अम्बुजे इव ईक्षणे नेत्रे यस्य तम्। चत्वारो भुजा यस्य तम्। शङ्खगदादीन्युद्यतानि उद्धृतानि येन तम्। आदिशब्देन चक्रपद्मयोः सङ्ग्रहः। 'विष्णोर्मुखोत्थानिलपूरितस्य यस्य ध्वनिर्दानवदर्पहन्ता'

इति वाक्यात् शङ्खस्याप्यायुधत्वम् । कमलं तु क्रीडनकम् । श्रीवत्सं लक्ष्म चिह्नं वक्षसि रोमावर्तविशेषो यस्य तम् । गलेन शोभतेऽसौ गलशोभी स कौस्तुभो यस्य तम् । पीते अम्बरे यस्य तम् । सान्द्रो हि स्निग्धो यो नीलपयोदो मेघस्तद्वत् सौभगं सौन्दर्यं वर्णो यस्य ॥ ९ ॥ महार्हममूल्यं यद्वैदूर्यम्, तन्मयानि यानि किरीटकुण्डलानि, तेषां त्विषा प्रभया परिष्वक्तानि अनुविद्धानि सहस्रमपरिमितानि कुन्तलानि केशा यस्य तम् । उद्दामैरत्युत्कृष्टैः काञ्च्यादिभिर्विरोचमानमतिशयेन शोभमानम् । तत्र काञ्ची कटिसूत्रम्, अङ्गदानि बाहुभूषणानि, कङ्कणानि करभूषणानि, आदिपदेन भूषणान्तराणि सर्वाणि सङ्गृहीतानि ॥ १० ॥ स आनकदुन्दुभिर्वसुदेवस्तदा हरिं सुतं विलोक्य विस्मयेनाश्चर्येण उत्फुल्ले विकसिते विलोचने यस्य सः । कृष्णावतारनिमित्तः कर्तव्यो य उत्सवस्तत्र सम्भ्रमस्त्वरा यस्य सः । मुदा हर्षेण आप्लुतः व्याप्तः सन् द्विजेभ्यो ब्राह्मणेभ्यो गवामयुतं दशसहस्रमस्पृशत्, कंसनिगृहीतत्वेन तदा दानस्याशक्यत्वात् मनसा दानं सङ्कल्पितवानित्यर्थः ॥ ११ ॥ अथ गोदानसङ्कल्पानन्तरं नताङ्गः कृतदण्डवत्प्रणामः ततश्चोत्थाय कृताञ्जलिः सन्नेनमस्तौदित्यन्वयः । ननु पुत्रे जाते जातकर्मादिसंस्कारः कर्तव्यो, न तु तत्स्तुतिरित्याशङ्क्याह—परं पुरुषमवधार्य निश्चित्येति । नहि तत्र परमेश्वरत्वनिश्चये प्राकृतवत् संस्कार उचित इत्याशयः । तथाऽवधारणे हेतुमाह—स्वप्रकाशेन सूतिकागृहं विरोचयन्तमिति । एवं प्रकाशकत्वेऽपि कलुषितान्तःकरणस्यैव निश्चयो न सम्भवतीत्याशङ्क्याह कृतधीरिति । भगवद्भक्त्या निर्मलीकृतबुद्धिरित्यर्थः । ननु कंसभयव्याकुलस्य कथं स्तुतिकरणं सम्भवतीत्याशङ्क्याह—गतभीरिति । गता निवृत्ता भीर्भयं यस्य सः । तत्र हेतुमाह—प्रभावविदिति । स्वभक्तप्रतिपक्षिदुष्टविनाशकरूपभगवत्प्रभावं वेत्तीति तथा ॥ १२ ॥

अन्वितार्थप्रकाशिका

तमद्भुतमिति द्वयम् ॥ अम्बुजेक्षणं चतुर्भुजं शङ्खो गदा अरि चक्रम् एतदादीन्युद्यतानि उत्कृष्टानि वा आयुधान्यस्य श्रीवत्सं वक्षसि रोमावर्त्तरूपं लक्ष्म चिह्नं यस्य । अदन्तमार्षम् । गले गलेन वा शोभते तादृक् कौस्तुभो यस्य पीताम्बरं सान्द्रो य पयोदो मेघस्तस्येव सौन्दर्यं यस्य महार्हाण्युत्कृष्टानि वैदूर्याणि नीलपीतरक्तकृष्णरत्नविशेषा यत्र तादृक् यत्किरीटं मुकुटं त्रिकोणपत्रावलिरूपमिति च चक्रवर्ती । तच्च कुण्डले च तेषां त्विषा प्रभया परिष्वक्तानि अनुविद्धानि सहस्रमपरिमितानि कुन्तलानि केशा यस्य तम् । त्विषेत्याबन्तं वा । उपरि किरीटत्विषा परिष्वक्तः उद्दामैरत्युत्कृष्टैः कांच्यादिभिर्विरोचमानमतिशयेन शोभमानम् तत्र काञ्ची कटिसूत्रम् अङ्गदानि बाहुभूषणानि कङ्कणानि करभूषणानि आदिपदेन भूषणान्तराणि सर्वाणि संगृहीतानि तम् अद्भुतं बालकं वसुदेव ऐक्षत ॥ ९–१० ॥ स इति ॥ आनकदुन्दुभिर्वसुदेवस्तदा हरिं सुतं विलोक्य विस्मयेनाश्चर्येण अहो अविद्यया बद्धस्य बहिः कंसेन च बद्धस्य च गृहे सर्वबन्धनमोचको विष्णुरवतीर्णः । सर्वव्यापकोऽपि गर्भादजनिष्टेत्यादिरूपेण उत्फुल्ले विकसिते विलोचने यस्य सः कृष्णावतारनिमित्तः कर्त्तव्यो य उत्सवस्तत्र संभ्रमस्त्वरा यस्य सः मुदा हर्षेण आप्लुतः व्याप्तः सन् हर्षजलेनेव स्नात इति वा द्विजेभ्यो ब्राह्मणेभ्यो गवामयुतं दशसहस्रमस्पृशत् । कंसनिगृहीतत्वेन तदा दानस्याशक्यत्वात् मनसा दानं संकल्पितवानित्यर्थः ॥ ११ ॥ अथेति ॥ हे भारत स्वस्य रोचिषा प्रकाशेन सूतिकागृहं विरोचयन्तम् एनं बालं परं पुरुषं भगवन्तम् अवधार्य निश्चित्य प्रभावचित् भगवत्प्रभाववेदी अत एव गता कंसजा भीर्भयं यस्य सः कृतधीः शुद्धबुद्धिः वसुदेवः नताङ्गः कृतदण्डवत्प्रणामः ततश्चोत्थाय कृताञ्जलिः सन् अस्तौत् ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति । महार्हेति च । वसुदेवः, तमवतीर्णं भगवन्तं, ऐक्षतापश्यदिति द्वयोरेकसंबन्धः । तं कथंभूतं, अद्भुतमदृष्टपूर्वत्वादाश्चर्यविषयं, बालकं बालमूर्त्तिं, अम्बुजे कमले इव ईक्षणे नेत्रे यस्य तं, चत्वारो भुजा यस्य तं, शङ्खः पाञ्चजन्यश्च गदा कौमोदकी च अराणि सन्त्यस्येत्यरि चक्रं च उदमुदकमायुर्जीवनमस्येत्युदायुः पद्मं च तानि धत्तेऽसौ शङ्खगदार्युदायुधस्तम् 'अरं शीघ्रे च चक्राङ्गे' इति मेदिनी । बाष्पोदबिन्दूनिति रसमञ्जर्याम् । 'विभ्व्यस्तवामृतकथोदवहा' इत्येकादशस्य षष्ठेऽध्याये एकोनविंशश्लोकटीकायामुदमुदकं वहन्तीति श्रीधरस्वामिनः 'को नाम तत् प्रतिकरोति विनोदपात्रम्' इत्यादावुदशब्द उदकार्थः । 'विद्यादायुं तथाऽऽयुषा । आयुरप्यायुषा सह' इति च द्विरूपकोषः । केचित्तु शङ्खगदाद्युदायुधमिति पठन्ति । पठन्ति । तत्वे शङ्खगदे आदी येषां तानि शङ्खगदादीनि उदुद्यतानि आयुधानि यस्य तं, श्रीवत्सो लक्ष्म चिह्नं यस्य तं, आर्षत्वाट्टिलोपः । यद्वा । श्रीवत्स एव लक्ष्म तदस्यास्तीति तं, आर्षत्वान्मत्वर्थीयेऽचि 'नस्तद्धिते' इति टिलोपः । श्रीवत्सलाञ्छनमित्यर्थः । श्रियां लक्ष्म्यां वत्सला सापत्न्यदोषनिवृत्त्या अनुकूला क्ष्मा मूर्त्तिर्यस्येत्यन्ये । गले कण्ठे शोभी शोभावान् कौस्तुभो यस्य तं, पीतं पीतवर्णमम्बरमधोंऽशुकं यस्य तं, सान्द्रपयोदस्य जलपूर्णमेघस्येव सौभगं कान्तिविशेषो यस्य तम् ॥ ९ ॥ महार्हाण्यनर्घ्याणि वैदूर्यादीनि रत्नानि यस्मिंस्तस्य किरीटस्य कुण्डलयोश्च समाहारस्य या त्विट् कान्तिस्तया आ समन्तात् परिष्वक्ता अनुविद्धा सहस्रं कुन्तला यस्य तं, उद्दामा श्लाघ्यतमा ये काञ्च्यङ्गदकङ्कणादयस्तैः, विरोचमानो विशेषेण शोभमानस्तं, तत्र काञ्ची कटिमेखला, अङ्गदे केयूरे, कङ्कणानि हस्तकटकानि, आदिशब्देन हंसकशृङ्खलकादेर्ग्रहणम् ॥१०॥ स विस्मय इति । सः आनकदुन्दुभिः वसुदेवः, हरिं स्वशरणगतार्त्यादिहरं श्रीपुरुषोत्तमं, सुतं पुत्रभावं प्राप्तं, विलोक्य, तदा, विस्मयेनाश्चर्येण उत्फुल्ले विकसिते विलोचने यस्य सः, कृष्णावतारः साक्षाच्छ्रीपुरुषोत्तमप्रादुर्भावस्तस्माद्य उत्सवस्तस्मात् संभ्रमश्चित्तसंवेगो यस्य तथाभूतः, तथा आप्लुतः स्नातः

संश्च, मुदाऽत्यानन्देन, द्विजेभ्यो ब्राह्मणेभ्यः, गवां धेनूनां, अयुतम् अस्पृशत् । दशसहस्रगोदानसंकल्पं मनसा कृतवानित्यर्थः ॥११॥ अथेति । अथानन्तरम् , हे भारत, वसुदेवः, स्वरोचिषा स्वकान्त्या, सूतिकागृहं विरोचयन्तम् एनं प्रादुर्भावं प्राप्तं, पुरुषं, परं परमपूरुषम्, अवधार्य निश्चित्य, नताङ्गः विनयेनावनताङ्गः, कृतधीः शुद्धबुद्धिः, कृताञ्जलिः विहितकरसंपुटः, गता भीः कंसाद्भयं यस्य सः, प्रभावविद् भगवन्महिमाभिज्ञः, एवंभूतः सन् , अस्तौत् तुष्टाव ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

भगवति विधियोगादागतेऽध्यक्षभावं हितमति रतितोषादक्षजातं तदैव ।
विगतविविधभावो योजयेद् ब्रह्मभूते किमिति स वसुदेवोऽबोधयद्गोप्रदानात् ॥ ९८ ॥
सितोल्लसितसद्गुणं दरगदारि-पद्मोल्लसत्करं स्वपदसेवकावन-समुल्लसन्मानसम् ।
पयोमुगसितप्रभं कनकवर्ण-चीनाम्बरं वराभयदयाकरं वरमिदं प्रपद्ये महः ॥ ९९ ॥
किं वर्णयामि भगवंस्तव रूपमेतद् भक्तैकहेतुकमनन्तसुख-प्रबोधम् ।
तत्सर्वभावविहिता प्रणतिर्ममेयं त्वद्ध्यान-पूजन-नुतिप्रसृतार्थदाऽस्तु ॥ १०० ॥
किं ते वदामि भगवन् वरदानजातिमद्यापि नापि किल यद्धितमिन्द्रमुख्यैः ।
त्वज्जन्मना व्यरचि तद्धितदानमद्य नाम्नेऽपि मे किमुत मे परमेशवाच्यम् ॥ १०१ ॥
निराकाराऽपि साकारा मूर्तिस्तव मयेक्षिता । प्रभो किं चित्रमत्रैषा कारा राकात्वमागता ॥ १०२ ॥
मोदं दत्स्व विभो यदत्र सततं कौमोदकीमत्करो भूषे देहि सुसम्पदं च यदयं पद्माश्रितस्ते करः ।
शत्रून् भञ्जय भञ्जयाऽश्वरिदरप्रोद्यत्करः सेवकांस्त्वं नः पालय विश्वतात सदयेत्याम्नातनामासि यत् ॥१०३॥

कृष्णप्रिया

वह प्रकट पुरुषोत्तम अद्भुत है; बालक है; कमल तुल्य नेत्र है चार भुजाओं से युक्त है; उन भुजाओं में शङ्ख कमल गदा चक्र चार आयुध उठे हुवे हैं वक्षःस्थल में श्रीवत्स का चिह्न है; कण्ठ में कौस्तुभ मणि विराजमान है, पीताम्बर धारण किये हैं; नील गाढ़ स्निग्ध मेघ के समान अत्यन्त सुन्दर है ॥ ९ ॥ उत्तममूल्य वाले नीलपीतरक्त कान्तिवाले वैदूर्य मणि से जटित किरीट और कुण्डलों की कान्ति से चारों ओर स्फुरायमान हिरण्यकेश केश वृन्दवाला, कटिप्रदेश पर सूत्र के बन्धन से रहित करधनी-बाजूबन्द-कंकण आदि आभूषणों को छवि को अधिक ठहराने वाला दिव्य स्वरूप वेदप्रसिद्ध वह बालक का श्री वसुदेवजी ने दर्शन किया ॥ १० ॥ जब प्रभु का प्राकट्य हुआ तब श्रीहरि भगवान को पुत्र रूप में हरि को देखकर वसुदेवजी के नयन विस्मय से विकसित हो गये, और श्रीकृष्ण का अवतार होने के कारण उल्लास और आनन्द के अतिरेक से संभ्रान्त होकर प्रसन्नता जल से स्नान कर ब्राह्मणों को दश सहस्र गोप्रदान का मानस संकल्प किया ॥ ११ ॥ भारत ! राजन् परीक्षित् ! श्री वसुदेवजी ने मानस संकल्प से गोप्रदान किया, फिर अपनी दिव्य कान्ति से प्रसूति गृह को विशेष प्रमाण में प्रकाशित करने वाले चतुर्भुज इस अद्भुत बालक को यह ही पूर्णपुरुषोत्तम है ऐसा निश्चय कर, प्रभु के सामर्थ्य को जानने वाले श्री वसुदेवजी निर्भय होकर साष्टाङ्ग दण्डवत् करते हुए अञ्जलि जोड़कर स्तुति करने लगे ॥ १२ ॥

श्री [१]वसुदेव उवाच

विदितोऽसि भवान् साक्षात् पुरुषः प्रकृतेः परः । केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् ॥ १३ ॥
स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम् । तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे ॥ १४ ॥
यथेमेऽविकृता भावास्तथा ते विकृतैः सह । नानावीर्याः पृथग्भूता विराजं जनयन्ति हि[२] ॥ १५ ॥
सन्निपत्य समुत्पाद्य दृश्यन्तेऽनुगता इव । प्रागेव विद्यमानत्वान्न तेषामिह सम्भवः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—भवान् प्रकृतेः परः पुरुषः केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् साक्षात् विदितः असि ॥ १३ ॥ सः एव त्वम् अग्रे स्वप्रकृत्या त्रिगुणात्मकम् इदं सृष्ट्वा तदनु अप्रविष्टः अपि प्रविष्टः इव भाव्यसे ॥ १४ ॥ यथा इमे अविकृताः भावाः तथा ते पृथग्भूताः नानावीर्याः विकृतैः सह सन्निपत्य विराजं जनयन्ति (एवं) समुत्पाद्य अनुगताः इव दृश्यन्ते प्राग् एव विद्यमानत्वात् तेषाम् इह सम्भवः न ॥ १५–१६ ॥

---

१. वसुदेव उवाच–श्रीधर. वंशी. गिरि. भक्त. ; प्राचीनप्रत्यां वसुदेव उवाच पाठो न दृश्यते । २. जनयन्ति च–इति कस्यचिद् शयनं तव–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

वसुदेवः प्रथमं पुत्रबुद्ध्या पश्यंस्तां परित्यज्याऽऽह । विदितोऽसीति । कथं विदितोऽस्मि । भवान्प्रकृतेः परः पुरुष इति । ननु किमाश्चर्यं पुरुषस्य प्रकृतेरन्यत्वादेवेत्यत आह । साक्षादिति । प्रत्यक्षत इत्यर्थः । नन्वक्षिसन्निकृष्ट प्रत्यक्षतः उपलभ्यते किं चित्रमित्यत आह । केवलेति । केवलश्चासावनुभवश्च स चासावानंदश्च तदेव स्वरूपं यस्य सः । किं च सर्वबुद्धिदृक् न ह्येवंभूता दृश्यो भवतीत्यर्थः ॥ १३ ॥ ननु देवकीजठरे प्रविष्टस्य किमियमतिस्तुतिः क्रियतेऽत आह । स एवेति । स एव उक्तस्वरूप एव त्वमसि न देवकीजठरे प्रविष्ट इत्यर्थः । ननु विश्वं सृष्ट्वा तदनु प्रविष्टस्य किमेतद्बह्वत आह । स्वप्रकृत्येति । स्वमायया सृष्ट्वा तदनु त्वमप्रविष्ट एवेति । ननु तर्हि कथं श्रुत्याच्यते "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यत आह । प्रविष्ट इवेति । भाव्यसे निरूप्यसे प्रत्यक्षतो वा सद्रूपेण वा प्रविष्ट इव लक्ष्यसे ॥ १४ ॥ अत्र दृष्टांतः । यथेति । इमेऽविकृता भावा महादादयो यथा तथेति । दृष्टांतं विवृणोति । ते विकृतैरिति । ते महदादयः विकृतैः षोडशविकारैः सह संनिपत्य विराजं ब्रह्मांडं जनयंति । संनिपतने हेतुः । यतः पृथग्भूताः संतो नानावीर्या विशिष्टकार्यसमर्था भवन्तीत्यर्थः ॥ १५ ॥ अतः संनिपत्येति । एवं समुत्पाद्यानुगताः प्रविष्टा इव दृश्यंते न पुनः प्रविष्टाः । कुतः । उत्पत्तेः प्रागेव कारणतया विद्यमानत्वान्न तेषामिह सृष्टे कार्ये पश्चात्संभवः प्रवेश इति ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तां पुत्रबुद्धिम् अक्षिसन्निकृष्टं नेत्रगोचरम् । यद्वा—विदितोस्यथ मयोपलब्धोसीत्याह—यः प्रकृते परस्तद्द्रष्टा पुरुषः स भवान् यथा यः केवलानुभवानंदस्वरूपः परब्रह्माख्यो निर्विशेष आत्मा सोऽपि भवान्यश्च सर्वबुद्धिदृक् सर्वांतर्यामी परमात्मा सोऽपि भवानिति तत्तद्रूपकत्वात्स्वयं भगवत्त्वेन ज्ञातोऽसि तत्रापि साक्षाद्विदितोऽसि चक्षुषा दृष्टासीत्यहो मे भाग्यमहिमेति भाव इति तोषिण्याम् । इत्यर्थ इति । नहि द्रष्टा दृश्यतां यातीति भावः । केवलो द्वितीयोऽनुभवो ज्ञानं आनन्दसुखं कथमेतादृशस्तत्राह—किंचेति ॥ १३ ॥ केवलद्रष्टृरूपस्य कथं जन्मादीति शंकते—नन्विति । जठरम् उदरम् । उक्तस्वरूपः केवलानुभवानंदस्वरूपः । इत्यर्थ इति । न ह्येतादृशस्य जठरे प्रवेशः संभवतीति भावः । पुनराशंकते नन्विति । तदनु सृष्टिमनु । किमेतद्बहु किमधिकं कथ्यते प्रविष्ट इति । अतो हेतोः । पुनराह—स्वप्रकृत्या स्वमाययाऽघटनघटनापटीयस्या स्वशक्त्या । पुनराशंकते नन्विति । श्रुत्या वक्ष्यमाणया प्रत्यक्षतो योगिभिरेवान्यैः कथं लक्ष्य इत्याशंकानिवृत्तये सद्रूपेण आकाशः सन्वायुः सन्नित्यादिरूपेण सर्वैर्लक्ष्यते इति भावः । अत्र विश्वनाथः—ननु भो तात त्वद्गृहे प्रविष्टं परिच्छिन्नमेव जातमेव जानास्यतः किमपि मे तत्त्वं न जानासीत्याशंक्य स्वज्ञानमाविष्कुर्वन्नाह—स एवोक्तस्वरूप एव स्वप्रधानशक्त्येदं विश्वं सृष्ट्वा तदनु प्रविष्ट इवाप्रविष्ट इव च निरूप्यसे जगतोंतरुपलभ्यमानत्वादप्रविष्ट इव न त्वप्रविष्टः बहिश्चोपलभ्यमानत्वात्प्रविष्ट इव न तु प्रविष्ट इत्यर्थः । एवमेव वर्त्तमानस्त्वं मद्गृहे प्रविष्ट इव न तु प्रविष्टः सर्वदैव वर्त्तमानस्त्वं जात इव न तु जातस्तेन च सर्वव्यापकमूर्त्तेस्तव कंसः किमपि कर्त्तुं न शक्नुयादितिजातान्येवेति ॥ १४ अत्राप्रविष्टस्यापि प्रवेशे महदादयः सप्त महदहंकारपंचतन्मात्रारूपाः । विवृणोति स्फुटयति । सन्निपत्य मिलित्वा । विशिष्टकार्यसमर्था ब्रह्मांडोत्पादनसमर्थाः ॥ १५ ॥ अतो हेतोः । एवं समुत्पाद्य मिलित्वोत्पाद्य ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विदित इति तैर्व्याख्यात तत्र कथमिति किं प्रकारक इत्यर्थः । भवानित्यादौ हेतुरूपे वाक्यान्तरे तत्तल्लक्षणदृष्ट्या परमपुरुषत्वेन सिद्धो भवान् प्रकृतेः परः इति व्याख्येयं नन्वित्यादौ ननु तर्हि आश्चर्यवत्कथं विदितोसीति वदसि ? पुरुषस्य प्रकृतेरन्यत्वं प्रसिद्धमेवेत्यत आह—साक्षादिति । यद्वा परमदुर्लभस्यापि साक्षात् प्राप्त्याऽतिप्रहृष्यन्नाह-विदितोसीति । मयाऽद्यत्वमुपलब्धोऽसीत्यर्थः । वेदनप्रकारमेवाह—यः प्रकृतेः परः प्रकृतिद्रष्टा पुरुषः स भवान् यथा यः केवलानुभवानन्दस्वरूपः परब्रह्माख्यो निर्विशेष आत्मा सोऽपि भवान् यश्च सर्वबुद्धिदृक् सर्वान्तर्यामी परमात्मा सोपि भवानिति तत्तद्रूपकत्वात् स्वयं भगवत्वेन विदितोसीत्यर्थः । तत्रापि साक्षाद्विदितोसि चक्षुषा दृष्टोऽसीत्यहो मम भाग्यमहिमेति भावः ॥ १३ ॥ तत्र दैन्येन तस्मिन्निजपुत्रत्वापलपनाय "सा देवकी सर्वजगन्निवासनिवासभूता" इति दिष्ट्याम्ब ते कुक्षिगतः परः पुमानित्यादि लब्धमपि तत्प्रवेशं वारयति—स एवेति चतुर्भिः तस्मात् सर्वव्यापकस्य तवात्र सम्प्रति प्रकाश एव न तु प्रवेश इति तात्पर्यम् । वास्तवार्थस्त्वेवं न केवलं साक्षात्प्राप्तोसि अपितु पुत्रतयाऽपीत्याशयेनाह—स इति । स एव पूर्वोक्तमदनुभवरीत्या अनेनैव रूपेण स्वयं भगवद्रूप एव त्वं ततो हेतोरप्रविष्टः असम्भावितप्रवेश इत्यर्थः । "पराजेरसोढः" (१।४।२६) इति वन्निष्ठार्थवैशिष्ट्यं तथाभूतोपि स्वप्रकृत्या प्रेमवशत्वेन परमाचिन्त्यशक्तित्वेन च निजस्वभावेन इदं देवक्युदरं हि निश्चितं प्रविष्टो भाव्यसे क्रियसे तत्र दृष्टान्तः अग्रे सृष्ट्यादौ कारणार्णवशायिरूपेण त्रिगुणात्मकं ब्रह्माण्डं सृष्ट्वा गर्भोदकशायिरूपेणानु पश्चात्तदिवेति अत्र सामान्यतोऽयं भावः वक्ष्यमाणानुसारेणायोग्येपि तत्र यदि प्रविष्टस्तदात्र योग्ये किमुतेति विशेषतः स्वयं ब्रह्मादिभक्त्या तत् प्रवेशे सत्यपि ब्रह्माण्डस्य जडत्वेन त्वत्प्रेमाभावात् प्राकृतगुणमयत्वेन त्वत्स्पर्शित्वाभावाच्च तत्रोदासीन एवासि अतः प्रविष्टोप्यप्रविष्ट एव अस्यास्तु तद्वैपरीत्यादस्त्येव तत्तद्योग्यतेति तद्वदेव च ममेति स्वविग्रहप्रविष्टत्वेन पुत्रतयापि त्वं प्राप्तोसीति अत एव । यद्वा तदनु हि निश्चितमप्रविष्टस्त्वम् इदं तु प्रविष्ट इव भाव्यसे यथा अन्यत्रान्यः

प्रविष्टो भवति तथैव क्रियस इति। एतदुक्तं भवति "न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम्" इत्यादिरीत्या परमकारणतत्त्वैकरूपमपि विभुमपि निजविग्रहं निजजनप्रेम्णा स्वल्पदेशमध्यस्थितमेव सन्दर्शयसि तेन चानन्दयसि ब्रह्मानुभविनोपीऽत्यन्यथानुपपत्त्या मणिमन्त्रमहौषधादिवत् काप्यचिन्त्या शक्तिरेव निमित्तमुपपद्यते तथैव निजजनप्रेमप्रवर्तितया लोकवल्लीलाकैवल्यविनोदशीलशालिनस्तव प्रवेशोपि सम्पादितः तथा पुत्रभावोपीति तत एव भगवतो वरादिकं च निव्यूँढमिति ज्ञेयम् अत्र श्रीदेवक्या तदर्थमस्मिन्नेव जन्मनि व्रतं विधाय तस्मात्तद्वरो लब्ध इति श्रीविष्णुधर्मप्रसिद्धिश्चानुस्मर्त्तव्या ॥ १४ ॥ अन्यत्र महदादीनामिव भवतः सुतरां प्रवेशोपि न सम्भवेदित्याह—यथेति युग्मकेन। बहिर्गतस्यान्तर्गमनमेव प्रवेशोपि न सम्भवेदित्याह—यथेति युग्मकेन। बहिर्गतस्यान्तर्गम मेव प्रवेशः पूर्वं विद्यमान एव हि कारणे कार्यांशाभिव्यक्तिश्चेति न तेषां प्रवेश इत्यर्थः ॥ १५–१६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

परमदुर्लभस्यापि साक्षात् प्राप्त्यातिप्रहृष्यन्नाह—विदितोऽसीति, मयाद्य त्वं साक्षादुपलब्धोऽसीत्यर्थः। यद्यपि भवान् प्रकृतेः परः पुरुषः परमेश्वरः केवलानुभवानन्दस्वरूपः परब्रह्म सर्वबुद्धिदृक् च परमात्मेत्यर्थः। अहो मम भाग्यमहिमेति भावः ॥ १३ ॥ तत्रापि पुत्रतया प्राप्तोऽसीत्याशयेनाह—स इति। 'एव' अपि, स उक्तस्वरूपोऽपि त्वं स्वस्य तव प्रकृत्या भक्तवात्सल्यादिस्वभावेनेदं मद्गृहं श्रीदेवक्युदरं वा प्रविष्ट इव भाव्यसे क्रियस इवेति तत्त्वतो मनोधारणेनोदरप्रवेशाभावात्, किंवा लोकाकिरीत्यानधिकार्थम्; 'हि' अपि, पूर्वं त्रिगुणात्मकं जगत् सृष्ट्वा तदन्वप्रविष्टोऽपि ॥ १४ ॥ अप्रविष्टत्वमेव, किंवा, अप्रविष्टस्यापि प्रविष्टत्वं दृष्टान्तेन साधयति—यथेति द्वाभ्याम्। यद्यपि तेषां महदादीनां प्रथमत एव कारणत्वेनावरणतया बहिर्विद्यमानत्वादिह विराजि प्रवेशो नास्ति, तथापि प्रविष्टा इव दृश्यन्त एवेत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, तथा तेन तन्मायाशक्त्युद्भवत्वादिप्रकारेण ते त्वदीया इत्यर्थ इति तेषां शक्तिः सम्भाविता; यद्वा, तथेत्यस्य परेणान्वयः; तेनानिर्वचनीयेन प्रकारेणेत्यर्थः। अथवा, बहुजन्मसु त्वन्माहात्म्यं जानतोऽपि ममाधुनैव कृतार्थताभूदिति वक्तुमादौ तज्ज्ञानप्रकारमेवाह—विदित इति। भवान् पूज्यस्त्वं जन्मानि बहूनि व्याप्य साक्षात् स्वयमेव मया ज्ञातोऽसि। कथम्? तदाह—पुरुष इत्यादि पादोनद्वयेन। प्रकृतिपरत्वादिरूपेण श्रीदेवक्युदरप्रविष्टत्वेन चेत्यर्थः। अन्यत् समानम् ॥ १५–१६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सर्वबुद्धिदृक् सर्वज्ञानधरः ॥ १३–१४ ॥ सप्तमहदहङ्कारतन्मात्राः विकृतैः स्थूलभूतैः सन्निपत्येति पञ्चीकरणमुक्तं विराजं ब्रह्माण्डं शयनस्थानभूतम् अनुगताः अंडान्तर्गताः इवशब्दोऽनतिरिक्तार्थः क इवेति बत तत्प्रागेव अण्डोत्पत्तेः प्रागेव विद्यमानत्वात् पृथिव्यादीनामण्डान्तरं नोत्पत्तिरित्यर्थः ॥ १५–१६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स्तुतिमेव दर्शयति–विदितोऽसीत्यादिभिर्दशभिः। तावत् "सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दम्, 'यतो वा इमानि भूतानि" इत्यादिभिर्वेदान्तवाक्यैरवगतं स्वरूपतः स्वभावतश्च प्रकृतिपुरुषविलक्षणं ब्रह्म तदेव त्वमिति स्तौति–विदीतोसीति द्वाभ्याम्। प्रकृतिशब्देनात्र "भूमिरापोऽनलो वायुः, अपरेयमितस्त्वन्याम्" इति श्लोकद्वयप्रतिपादितं चिदचिदात्मकप्रकृतिद्वयं तन्त्रेण विवक्षितं न त्वचेतनप्रकृतिरेव सर्वबुद्धिदृगिति सर्वसाक्षित्वोक्तेः जीवाद्व्यावृत्तेरप्यवगमान्मुक्तजीवस्वरूपस्य तत्संभवेऽपि स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकमित्यवगतजगद्व्यापारासंभवात्तदसंभवस्य जगद्व्यापारवर्जं "जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च" (४।४।१७) इति सूत्रितत्वात् यद्वा प्रकृतेः पर इत्यनेनाचेतनप्रकृतेः परत्वमुच्यते सर्वबुद्धिदृक् स एवेत्यादिना बद्धमुक्तजीवाभ्यां परत्वमुच्यते यः प्रकृतेः परो विलक्षणोऽसौ केवलमनुभवः ज्ञानमानन्दश्च स्वरूपं यस्य सः अनुभवस्वरूप इत्येतावदुक्तेः दुःखस्यापि ज्ञानात्मकत्वेन तत्स्वरूपत्वं प्रतीयेत अतस्तद्व्यावृत्तये आनन्द इत्युक्तम् आनन्दोऽनुकूलं ज्ञानं स्वरूपं यस्येत्यर्थः। केवलशब्देन दुःखसंभिन्नानुभव व्यावृत्तिः सर्वा बुद्धीः तद्वृत्तीः युगपत् पश्यतीति तथा एवमनेन बद्धजीवाद्व्यावृत्तिरुक्ता ॥ १३ ॥ अथ मुक्तजीवाद्व्यावर्त्तयितुमाह—स एवेति। यः प्रकृतेः परः सर्वबुद्धिदृक्स एव त्वमग्रे सृष्टेः प्राक्कारणत्वेनावस्थित इति शेषः। स्वप्रकृत्या स्वशरीरभूतया महदादिपृथिव्यन्तरूपेण परिणतया त्रिगुणात्मिकया इदं परिदृश्यमानं स्थूलचिदचिदात्मकं सत्त्वादिगुणत्रयपरिणामरूपत्वेन तद्वश्यजीवप्रचुरत्वेन च तदात्मकं जगत् सृष्ट्वा अनु पश्चात्तज्जगत्प्रविष्टः स्थित्यर्थं सङ्कल्परूपज्ञाने प्रविष्टः सृष्टिदशायामपि प्रविष्टत्वात्तथाप्यप्रविष्ट इव भाव्यसे प्रविष्टजगद्गतविकारैरस्पृष्ट इव भाव्यसे विभाव्यसे विज्ञायस इत्यर्थः। तथा च श्रूयते "तत्सृष्ट्वा तदेवानुप्राविशत् सत्यञ्चानृतं च सत्यमभवत्" इति विचित्रचिदचिद्रूपेण विक्रियमाणमपि ब्रह्म सत्यमेव भवेत् निरस्तनिखिलदोषमपरिच्छिन्नज्ञानानन्दमेकस्वरूपमेवाभवदित्यर्थः। इवशब्दोऽनतिरिक्तार्थः। अप्रविष्ट इव तद्गतदोषास्पृष्ट एव विभाव्यस इत्यर्थः ॥ १४ ॥ ननु कार्यानुप्रविष्टस्य मम कार्यात्प्रागेव तत्कारणतयाऽवस्थानं कथम्? कथन्तरां कार्यगतविकारास्पृष्टत्वम्? चेत्याशंक्य तदुभयं महदादिपृथिव्यन्ताचेतनदृष्टान्तमुखेनोपपादयति—यथेति चतुर्भिः। तावद्दृष्टान्तं शिक्षयति–यदेति

द्वाभ्याम् । सप्तमहदहङ्कारतन्मात्रारूपाः विकृताः प्रकृतिविकारात्मकाः भावाः पदार्थाः ये त इमे तैः विकृतैस्तद्विकाररूपैराकाशादिस्थूलभूतैरिन्द्रियैः साधिदैवतैश्च सह तथा तैरिति पाठे ये च विकृता महदादयो भावास्तथा ये च तद्विकाराः स्थूलभूतरूपास्तैस्तैस्सहेत्यन्वयः । तावन्नानावीर्याः विभिन्नशक्तयः ब्रह्माण्डरूपैककार्योत्पादनोपयुक्तैकरूपसामर्थ्यरहिता इत्यर्थः । अत्र हेतुः पृथग्भूताः परस्परसंमेलनरहिताः तावदेवं भूतास्सन्तः "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणि नामरूपे व्याकरोत्त्रिवृतं त्रिवृतमेकैकामकरोत्" इति श्रुत्युक्तरीत्या तदनुप्रवेशपूर्वकत्वत्कर्तृकत्रिवृत्करणद्वारा त्रिवृत्करणं पञ्चीकरणस्याप्युपलक्षणम् ॥ १५ ॥ किञ्च संनिपत्य समुत्पात्य संहतत्वं समागतत्वञ्चेत्यवस्थाद्वयं प्राप्य "समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः" इति वैष्णववचनात्तत्र संहतत्वं नाम पृथक्स्थित्यनर्हसंयोगमात्रं समागतत्वं पृथक्स्थित्यनर्हसंश्लेषविशेषः विराजं ब्रह्माण्डं त्वच्छयनस्थानं जनयन्ति हि हिशब्देन "महदादिविशेषान्ता ह्यण्डमुत्पादयन्ति ते" इति वैष्णवादिपुराणान्तरप्रसिद्धिर्द्योत्यते एवं सम्यग्विराजम् उत्पाद्यानुगता इव दृश्यन्तेऽण्डान्तर्गता इव दृश्यन्ते इवशब्दोऽनतिरिक्तार्थः अण्डान्तर्गता इव तत्रैव उत्पन्ना इव दृश्यन्ते न त्वण्डोत्पत्तेः प्रागेव विद्यमाना इवेत्यर्थः । न चैतावता तेषां तत्रोत्पत्तिरिति शक्यं वक्तुमित्यभिप्रायेणाह प्रागेवेति अण्डोत्पत्तेः प्रागेव विद्यमानत्वात्पृथिव्यादीनामण्डान्तर्नोत्पत्तिरित्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रकृतेः परत्वेन केवलाऽनुभवानन्दस्वरूपत्वेन सर्वबुद्धिसाक्षित्वेन च पुरुषः षड्गुण इति भवान् पूज्यस्त्वं विदितोऽसि साक्षान्नोपचारमात्रम् ॥ १३ ॥ ननु, साक्षित्वेनोदासीनश्चेत् जगत्स्रष्टा क इति तत्राह—स एवेति । तदनुसृष्टेरनन्तरं बहिरपि विद्यमानत्वात् अप्रविष्टः पूर्णस्वरूपात्प्रविष्टः सर्वगतस्य प्रवेशाप्रवेशौ उपचारतो न तु देवदत्तवन्मुख्यावित्यत इव शब्दः "बहिश्च विद्यमानत्वादप्रविष्टो जगत्पतिः । प्रविष्टवच्च तत्रैव पूर्णरूपत्वतो विभुः" इत्यादेः सर्वगतरूपेणाप्रवेशः पुरुषरूपेण प्रवेशः जले प्रतीयमानाकाशादिवदिति वा हि शब्दोऽसक्तत्वमाह ॥ १४ ॥ सृष्टिप्रकारं दर्शयति—य इति । य एते सप्त विकृताः महदहङ्कारपञ्चतन्मात्राणि भावाः पदार्थास्ते विकृतैः स्थूलीभूतैः पृथिव्यादिभिर्जन्यप्राणिकामकर्मादिभिर्वा सह सन्निपत्यान्योन्यं मिलित्वा विराजं ब्रह्माण्डं समुत्पाद्य अनुगताः प्रविष्टा इव दृश्यन्ते बहिरपि विद्यमानत्वात् कथम्भूता भावाः पृथग्भूता विश्लिष्टाः नानावीर्याः अवकाशदानादिशक्तीनां नानाविधित्वाद्विभक्तशक्तित्वात्तदभिमानिदेवानामिति शेषः । ननु, तर्हि मेलनकर्ता क इति तत्राह—शयनमिति । तव शयनस्थानीयत्वात्त्वमेव मेलनकर्त्ता इत्यर्थः ॥ १५ ॥ व्यक्तिविशेषादण्डे प्रवेशमात्रमेवोत्पत्तिर्न तु साक्षादित्याह, प्रागेवेति । इह ब्रह्माण्डे सम्भवः साक्षादुत्पत्तिर्नास्ति किं तु व्यक्तिविशेषेण प्रवेशमात्रमेव कुतः प्रागेव विद्यमानत्वात् लब्धसत्तात्वात्पूर्वमेवोत्पन्नत्वादित्यर्थः । प्रकृतिविकृतत्वमन्तरेणावान्तरविकृतत्वाभावात् महदादयोऽविकृता इत्युच्यन्ते, "महदादिस्त्वविकृतः" इत्यारभ्य "अण्डेत्वेषामभिव्यक्तिर्जनिरित्यभिधीयते" इत्यन्तेन सम्यग्व्याख्यातमाचार्यैरिति भाष्यम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विदितोऽसि भवान् विज्ञातोऽसि कथं यः प्रकृतेः परः पुरुषस्तद्द्रष्टा स भवान् यः केवलानुभवानन्दः परब्रह्माख्य आत्मा स भवान् सर्वबुद्धिदृक् सर्वान्तर्यामी सोऽपि भवानिति स्वयं भगवत्त्वेनेत्यर्थः । तत्रापि साक्षादेव विदितो दृष्टोऽसीत्यहो मम भाग्यमिति भावः । कियत् एतद्वा यतः पुत्रतयापि प्राप्ताऽसीति तमवतारकारणेन सह वक्तुं तादृशप्राप्तिदुर्लभताख्यापनाय प्रकृतिपरादित्वं योजयन् तस्य घटनाय सर्गादिपरिपाटिञ्चानुवदन् सर्गप्रवेशौ तावदाह ॥ १३ ॥ स एवाह—तत्र प्रवेशोऽपि ततः परत्वमाह—एवं भवानित्यन्त्याभ्यां यथेति द्वाभ्याम् ॥ १४ ॥ यथेमे पृथिव्यादयस्तथा ते महदादयोऽपि कथं हि यस्मात् कृतैरिति पूर्वत्र तु सजकादिभिः परत्र षोडशविकारैः पूर्वत्र विराजं तत्प्रायं घटं परत्र ब्रह्माण्डम् ॥ १५–१६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

ईक्षित्वा यदुवाच, तदाह—विदितोऽसीत्यादि । त्वं विदितोऽसीति किं प्रकारेणेत्याकाङ्क्षायामाह— प्रकृतेः परः पुरुषः । तत् किमहं पञ्चविंशः ? नेत्याह,—केवलानुभवानन्दस्वरूपः । तर्हि किमहं नीरूपः ? नेत्याह—साक्षान्मूर्त्तम् , आनन्दज्ञानघन इति यावत् ; अथवा केवलेनानुभवेन आनन्दो येषां तेषु भक्तेषु स्वरूपं श्रीकृष्णाख्यं रूपं यस्य ॥ १४–१८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

विदितोऽसीत्यादि । केवलानुभवानन्द इव त्वमात्मा यस्य तत् केवलानुभवानन्दत्वं ब्रह्म तदेव रूपं रूपविशेषो यस्य । यद्वा, केवलेनानुभवेन स्फूर्त्या तर्काद्यगोचरतया आनन्दो येषां तेषु भक्तेषु स्वं रूपं प्राकट्यं यस्य, साक्षादपरोक्षः ॥ १४-१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हे भगवंस्त्वं मामेवं निजस्वरूपं यद्दर्शयसि तस्यायमभिप्रायः मत्पिता मदर्थं कंसाद्बिभेति तन्मामीश्वरं प्रतीत्य निर्भयो भवत्विति तत्सत्यं त्वयीश्वरत्वेन मम प्रतीतिः जातैवेत्याह —विदितोऽसि, कीदृशत्वेनेति चेदत आह —यः प्रकृतेः परः पुरुषस्तदीक्षणकर्ता स भवानेव यः केवलानुभवानन्दस्वरूपः परब्रह्माख्य आत्मा स भवान् यः सर्वबुद्धिदृक् सर्वान्तर्यामी सोपि भवान्

साक्षादेव स्वयं भगवत्त्वेनैवेति सर्वमहं जानाम्येवेत्यर्थः ॥ १३ ॥ ननु, भोः तात! त्वद्गृहे प्रविष्टं मां परिच्छिन्नमेव जातमेव जानासि अतः किमपि मे तत्त्वं न जानासीत्याशङ्क्य स्वज्ञानमाविष्कुर्वन्नाह स एव उक्तस्वरूप एव त्वं स्वप्रकृत्या स्वीयप्रधानशक्त्या इदं जगत् सृष्ट्वा तदनु अप्रविष्ट इव प्रविष्ट इव च भाव्यसे निरूप्यसे जगतोऽन्तरुपलभ्यमानत्वात् अप्रविष्ट इव नत्वप्रविष्टः बहिश्चोपलभ्यमानत्वात् प्रविष्ट इव न तु प्रविष्ट इत्यर्थः। एवमेव सर्वत्र वर्तमानस्त्वं मद्गृहे प्रविष्ट इव न तु प्रविष्टः सर्वदैव वर्तमानस्त्वं जात इव न तु जातस्तेन च सर्वव्यापकमूर्तस्तव कंसः किमपि कर्त्तुं न शक्नुयादिति जानाम्येवेति भावः ॥ १४ ॥ अत्र दृष्टान्तः यथा इमे अविकृता भावा महदादयो ब्रह्माण्डे प्रविष्टा अपि न प्रविष्टाः तत्र पुनर्जातवत् प्रतीता अपि न जातास्तथैव त्वमित्यर्थः। दृष्टान्तं विवृणोति ते अविकृताः विकृतैः षोडशविकारैः सह नानावीर्य्याः परस्परविसदृशस्वरूपा अपि पृथग्भूताः परस्परममिलिता अपि सन्निपत्य चैतन्यप्रेरणवशात् मिलितीभूय विराजं जनयन्ति ततश्च विराजं समुत्पाद्य अनुगता इव तत्र प्रविष्टा इव दृश्यन्ते न तु प्रविष्टास्तद्बहिरपि तेषां वर्त्तमानत्वादित्यर्थः। तथा तत्र विराजि समुद्भूतास्तत्र हेतुमाह प्रागेवेति इह विराजि सम्भव उत्पत्तिः समुद्भूता इव दृश्यन्ते न तु ॥ १५–१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ज्ञानी भक्तो भगवतोऽतिप्रिय इत्यत आत्मनो भगवत्स्वरूपादिवर्णनेऽधिकारं निवेदयति–विदितोऽसि मया ज्ञातोऽसि कोऽस्मि ? भवान् प्रकृतेः कार्यंकारणरूपायाः मायायाः परः पुरुषः अप्राकृतलोकस्थः पुरुषोत्तमोऽस्ति किंलक्षणः ? इत्यत्र सत्वत्वादिमत्त्वे सति जगज्जन्मादिहेतुत्वं ब्रह्मत्वमिति पुरुषोत्तमलक्षणमाह—सार्द्धेन केवलेति। केवलश्चासावनुभवश्चानन्दश्च स एव स्वरूपं यस्य सः केवलशब्दोऽत्र सत् शब्दार्थबोधकः तथा च "सत्यं ज्ञानमनन्तं ब्रह्म, प्रज्ञानमानन्दम्ब्रह्म" इत्यादि श्रुतिप्रोक्तसत्यत्वादिगुणयुक्तस्वरूपः सर्वबुद्धिदृक् सर्वज्ञः ॥ १३ ॥ स एव सत्यत्वादिगुणयुक्तस्त्वं स्वप्रकृत्या त्रिगुणमय्या शक्त्या इदं विश्वं सृष्ट्वा तदनु "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः विश्वनियमनाय प्रविष्ट एव तथापि प्रवेशात्पूर्वं सर्वकारणस्य सर्वशक्तेः सर्वात्मनस्तव विद्यमानत्वादेवाप्रविष्ट इव भाव्यसे लक्षणं तु सत्यत्वादिमत्त्वे सति जगज्जन्मादिहेतुत्वं ब्रह्मत्वमिति विस्तरस्तु वेदान्तकौस्तुभे द्रष्टव्यः ॥ १४ ॥ भगवतः प्राग्विद्यमानत्वमात्रे दृष्टान्तमाह—यथेति, द्वाभ्याम्। इमे स्वकार्यापेक्षया अविकृताः महदादयो यथा तथेति एतत् प्रपञ्चयति—ते इति। ते महदादयः विकृतैः स्वकार्यैः सह विराजं सावर्णं समष्टिशरीरं जनयन्ति ॥१५॥ ननु, पृथग्भूतानां तेषां विराड्जनने का शक्तिरित्यत्राह—सन्निपत्य सम्यगेकीभूय जनयन्तीति सम्बन्ध एवं समुत्पाद्य विराजं सम्यगुत्पाद्य अनुगता इव प्रविष्टा इव दृश्यन्ते न तु प्रविष्टाः यतो हि कारणरूपेण तेषां प्रागेव विद्यमानत्वात् न सम्भवः न प्रवेशसम्भवः ॥ १६ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

॥ हरिः ॐ ॥ स भगवान् त्वमेव प्रकृत्या स्वाधीनया प्रकृत्या अग्रे त्रिगुणात्मकमिदं जगत्सृष्ट्वा जगदनु जगत्सर्जनानंतरमेवाप्रविष्टो बहिर्विद्यमानत्वात्। प्रविष्टोऽतर्विद्यमानत्वात्प्रविष्ट इव जगत्समपरिमाणतया जगति विद्यमानत्वाद्भाव्यसे ज्ञायस इत्येतद्धि बहिश्च विद्यमानत्वादिति प्रमाणप्रसिद्धमिति। अयं भावः। गृहे प्रविष्टं घटादिकं गृहाद्बहिस्तिष्ठति गृहेऽपि गृहान्यूनपरिमाणतया तिष्ठति। भगवांस्तु जगतो बहिस्तिष्ठतीति कारणादप्रविष्ट इत्युच्यते। जगतोऽतस्तिष्ठतीति कारणात्प्रविष्ट इत्युच्यते। जगत्यपि जगत्समपरिमाणतया तिष्ठतीति कारणादप्रविष्ट इत्युच्यते इति। एतेन सृष्ट्वेत्यनेनैव जगत्सर्जनानंतरमित्यर्थ इत्यस्य प्राप्तत्वात्। तदन्वित्येतत्पुनरुक्तमिति चोद्यस्यानवकाशः। सृष्ट्वेत्यनेन जगत्सर्जनानंतर्यमुच्यते। तदन्वित्यनेन जगत्सर्जनानंतरमेव न तु कालाव्यवधानेनेत्युच्यत इत्यभ्युपगमात्। एतेनैव प्रविष्ट इवेति प्रविष्टसादृश्योक्त्या बहिर्विद्यमानस्य प्राप्तत्वाद्बहिर्विद्यमानत्वादप्रविष्ट इत्युच्यमाने पुनरुक्तिः स्यादिति दूषणमपास्तम्। प्रविष्ट इवेत्यनेन बहिर्विद्यमानत्वं नोच्यते किंतु समपरिमाणत्वमुच्यत इत्यभ्युपगमात् ॥ ता० अर्थः ॥ विभुर्हरिर्जगतो बहिश्च बहिरंतश्च विद्यमानत्वाज्जगदप्रविष्टो जगत्प्रविष्ट इति चोच्यते। जगत्येव पूर्णरूपत्वतो जगत्पूर्णरूपत्वात्। जगत्समपरिमाणरूपत्वादिति यावत्। प्रविष्ट इव प्रविष्टसदृश इत्युच्यते। उक्तार्थे शब्दवेदिनां संमतिमाह ॥ अप्रवेश इति। बहिरंतर्गतस्येति हेतुगर्भविशेषणं। बहिरंतर्गतस्येति जगत्समपरिमाणस्याप्युपलक्षणं। भगवतो बहिर्गतत्वादप्रवेशोऽप्रवेशोक्तिर्युक्ता स्यात्। जगदंतर्गतत्वात्प्रवेशः प्रवेशोक्तिर्युक्ता स्यात्। जगत्समपरिमाणत्वात्तथा प्रविष्टोपमता प्रविष्टोपमतोक्तिर्युक्ता स्यादिति शब्दवेदिनः शब्दार्थवेदिन आहुरिति। एतेन बहिश्च विद्यमानत्वादिति श्लोकेनैवाप्रविष्टत्वस्य प्रविष्टोपमत्वस्य चोपपादित्वादप्रवेश इति श्लोकः पुनरुक्त इति चोद्यं परिहृतं। प्रमाणकारेणाप्रवेश इत्यनेन स्वोक्तार्थे शब्दवेदिनां संमतिरुच्यत इत्यंगीकारात् ॥ १५ ॥

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

॥ हरिः ॐ ॥ स एव स्वप्रकृत्येति श्लोके स एव त्वं प्रकृत्या स्वेच्छयेदं जगत्सृष्ट्वाऽन्वनंतरमेव जगत्प्रविष्ट इव भाव्यसे ज्ञायसे न वस्तुतः प्रविष्टोऽसीति हरेर्जगति प्रवेशाभाव उच्यते। सोऽनुपपन्नः। तथात्वे तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुतिविरोधः स्यादित्यतः प्रमाणेन तत्तात्पर्यार्थमाह ॥ ॥ बहिश्चेति। चशब्दोऽनुक्तस्यांतरित्यस्य समुच्चयार्थः। तदंतरितिपदं तत्रैवेत्यनेन

संबध्यते । जगतो बहिर्विद्यमानत्वाद्धरिर्जगदप्रविष्टो भवति । तत्र जगत्यंतः पूर्णत्वत एव प्रविष्टवत्प्रविष्टसदृशश्च भवति । यथाऽऽकाशो घटेऽतःपूर्णरूपं भवतीति कृत्वा प्रविष्टमित्युच्यते । तद्धरिरपि जगदंतः पूर्णरूपत्वात्प्रविष्ट इवेत्युच्यत इत्यर्थः । ननु बहिरेव प्रवेशः प्रविष्टसादृश्यं चेति द्वयमेवागतं न तु वस्तुतः प्रवेशः । तथा च पूर्वोक्तश्रुतिविरोधस्तदवस्थ एवेत्यत आह ॥ अप्रवेशः प्रवेशश्चेति । जगतो बहिरंतर्गतस्याप्रवेशः प्रवेशस्तथा प्रविष्टोपमता च स्यादित्यन्वयः । नन्वंतर्गतस्य हरिरूपस्य प्रविष्टत्वमेवास्तु बहिष्ठत्वमपि कुतोऽङ्गीक्रियत इति चेत् । उच्यते । यदि जगदंतर्गतस्य हरिरूपस्य प्रविष्टत्वमेव स्यात्तर्हि घटांतर्गतस्य जलस्य यथा घटबहिष्ठत्वं नास्ति तथाऽस्यापि जगद्बहिष्ठत्वं न स्यात् । न चेष्टापत्तिः । तथात्वे एष म आत्मांतर्हृदयेऽणीयान् व्रीहेर्वेत्यादिना हृदयांतर्गतहरिरूपस्य हृदयपूर्णरूपत्वमुक्त्वा तस्यैवांतर्गतरूपस्य एष म आत्मांतर्हृदये ज्यायान्पृथिव्या ज्यायानंतरिक्षादीति बहिष्ठत्वप्रतिपादकछांदोग्योपनिषदादिश्रुतिविरोधः स्यात् । अत्र हृदयांतर्गतहरिरूपस्य हृदयापेक्षयाऽधिकपरिमाणोक्त्या हृदयाद्बहिष्ठत्वं प्रतीयते । हृदयादधिकपरिमाणं तु सर्वलोकात्मकब्रह्मांडादधिकपरिमाणोक्त्या ज्ञायते । अतो यस्यैकस्य वस्तुनोऽतर्बहिष्ठत्वं प्रमाणसिद्धमस्ति तस्यैकस्यैव प्रवेशादित्रयं संभवति । यस्यैकस्यैव घटांतर्गतस्य घटबहिर्गतस्य वा जलादिवस्तुनोऽतर्बहिष्ठत्वं नास्ति तस्यैकस्य वस्तुनो प्रवेशादित्रयं न संभवति । हरिरूपस्य त्वंतर्बहिष्ठत्वस्योक्तप्रमाणसिद्धत्वादप्रवेशः प्रवेशस्य प्रविष्टवदिव प्रविष्टोपमत्वं चावश्यमंगीकार्यमिति ॥ १५ ॥ य एतेऽविकृताभाव इति श्लोके य एतेऽविकृता अपरिणामरूपाः सप्तभावा द्रव्याद्यभावांतसप्तपदार्था विकृतैः स्वस्वकार्यैः सह । विराजं ब्रह्मांडमनुगता इव प्रविष्टा दृश्यंत इति वैशेषिककल्पितसप्तपदार्थानां ब्रह्मांडप्रविष्टोपमत्वमुच्यत इत्यन्यथाप्रतीतिनिरासाय प्रमाणेनैव सप्तभावा इत्यस्यार्थं दर्शयंस्तेनैव तेषामविकृतत्वं च घटयति ॥ महदादिस्त्विति । आदिपदेनाहंकारतत्वं पंच शब्दादयो मात्रा गृह्यंते । तुर्महदादीनां विशेषार्थकः । सन्निपत्य समुत्पाद्येति श्लोकेऽनुगता इवेति वाक्यं विराजं ब्रह्मांडमनुसृत्य गच्छंति इत्यन्यथाप्रतीतिनिरासायानूद्य व्याचष्टे ॥ अनुगता इवेति । महदादेरपि प्रविष्टोपमत्वादित्रयं पूर्वोक्तयुक्त्यैवोपपादनीयमित्याशयवान्पूर्वोक्तातिदेशेन तामेव युक्तिमाह ॥ पूर्वोक्तवदिति । बहिरप्यंतश्च । ब्रह्मांडस्येति शेषः । ननु प्रागेव विद्यमानत्वादित्यादिना भागवतवाक्येन यो महदादीनां ब्रह्मांडे उत्पत्त्यभाव उच्यते स न युज्यते । महदादीनामंडादुत्पत्तिप्रतिपादकेनांडजो ब्रह्मेत्यादिप्रमाणेन विरुद्धत्वादित्यतः प्रमाणमन्यथा व्याचष्टे ॥ देवतानामिति । इत्यादि इत्यादावित्यर्थः । प्रवेशमात्रं तत्वानां महदादितत्त्वानां तदभिमानिदेवतानां चांडजो ब्रह्मेत्यादावुत्पत्तिरित्युपचर्यते । उपचारेणांडज इत्युत्पत्तिशब्दार्थो भवति । नन्वंडज इत्युत्पत्तिशब्दस्य प्रवेशरूपगौणार्थः कुतोऽङ्गीक्रियते । मुख्योत्पत्तिरेव किं न स्यादित्यत आह ॥ पूर्वोत्पन्नत्वादिति । ब्रह्मांडादिति शेषः । पूर्वोत्पन्नत्वे हेतुः ॥ विभक्तशक्तित्वादिति । तारतम्येन शक्तिमत्त्वादित्यर्थः । ननु ब्रह्मादीनां तारतम्येन शक्तिमत्त्वं केन प्रमाणेन सिद्धमिति चेन्न । विष्णुवायुगिरीशेंद्रा देवा विप्राः क्रमात्सदा । सामर्थ्यतो विहीनास्तु गुणैः सर्वैस्तथैव च । हीनो विष्णुर्न कस्यापि सर्वतश्चोत्तमोत्तम इति याज्ञवल्क्योपनिषद्भाष्योदाहृतहरिवंशप्रमाणसिद्धत्वात् । ननु तर्हि तारतम्येन शक्तिमत्त्वमस्तु । तथाऽप्यंडात्पूर्वोत्पन्नत्वं कुतः । अंडे उत्पन्नानामेव तारतम्येन शक्तिमत्त्वं किं न स्यादिति चेन्न । विपर्ययेण तु क्रमोऽत उपपद्यते चेति ब्रह्मसूत्रभाष्योदाहृतेन पूर्वे पूर्वे यतो विष्णोः सन्निधानं क्रमादिकम् । सामर्थ्याधिक्यमेतेषां पश्चादेव लयस्तथेत्यादिवामनपुराणेन विरोधः स्यात् । तत्र प्रमाणवाक्ये क्रमान्मुख्योत्पत्तिमतामेव तारतम्येन शक्तिमत्त्वस्योक्तत्वात् । ननु तत्र प्रमाणवाक्ये पूर्वपूर्व इत्युत्पत्तिमात्रमुच्यते । न तु मुख्योत्पत्तिस्तज्ज्ञापकाभावादिति चेन्न । बाधकाभावे सति मुख्यामुख्योर्मुख्ये संप्रत्यय इति न्यायेन मुख्योत्पत्तेरेव ग्राह्यत्वात् । मुख्योत्पत्तिस्त्वंडात्पूर्वोत्पत्तिरेव भवति न त्वंडांत उत्पत्तिः । नन्वंडात्पूर्वोत्पत्तिरेव मुख्योत्पत्तिर्न त्वंडांतरुत्पत्तिर्मुख्येत्येतत्कुतः सिद्धमिति चेन्न । चराचरव्यपाश्रयस्तु स्यादिति ब्रह्मसूत्रभाष्योदाहृते परादव्यक्तमुत्पन्नमव्यक्तात्तु महांस्तथेत्यादिस्कांदपुराणवाक्ये एवं बाह्या परा सृष्टिरित्यनेन बाह्यसृष्टेरेव परत्वं मुख्यत्वमुक्त्वांऽतःसृष्टेस्तद्व्यक्त्यपेक्षयेत्यनेनामुख्यत्वस्योक्तत्वात् । तत्र बाह्यांतःशब्दयोरंडादित्यध्याहृतांडशब्देनान्वयस्य टीकाकारैरुक्तत्वादंडाद्बाह्यांतःसृष्टिरिति ज्ञायते । नन्वेतावता प्रबंधेनांडज इत्यत्रोत्पत्तिवाचकशब्दप्रवेशे गौणीवृत्तिरङ्गीकृता । गौण्या वृत्तेस्तु मुख्यार्थनिष्ठासाधारणगुणसदृशगुणयोगो निमित्तम् । अत्र तादृशः को गुणोऽस्तीत्यत आह ॥ व्यक्तिविशेषादिति । यथा घटादीनामुत्पत्त्यनंतरमभिव्यक्तिर्भवति तथा ब्रह्मादीनामंडे प्रवेशानन्तरमभिव्यक्तिर्भवतीत्यभिव्यक्तिकारणत्वरूपमुख्यार्थनिष्ठगुणसदृशगुणयोगोंऽडे प्रवेशेऽप्यस्तीति न काऽप्यनुपपत्तिः । अत्र विभक्तशक्तित्वादित्यनेन तात्पर्यवाक्येन नानावीर्या इति भागवतवाक्यं हेतुगर्भविशेषणपरत्वेन व्याख्याय तस्य प्रागेव विद्यमानत्वादित्यत्र हेतुत्वेनान्वयः सूचितो भवति । स्वोक्तार्थे प्रमाणमाह ॥ महद्रूपादिनेति । आदिपदेनाहंकारादिरूपं ग्राह्यम् । अभिधीयते प्रतिपाद्यते । लक्षणयेति शेषः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रभावविदित्युक्तज्ञत्वं सर्वज्ञं प्रति सम्बोध्य किञ्चिद्दर्शयति । विदित इति । प्रकृतेः परो विलक्षणः पुरुषः । नाविष्टरूपादिरित्याह साक्षादिति । मुख्यतया केवलो जडामिश्रो अनुभवो ज्ञानं चानन्दस्तावेव स्वरूपं यस्य स बुद्ध्यत इति बुद्धिः सर्वा चासौ बुद्धिः पदार्थस्तं पश्यतीति स तथा । यद्वा बुद्धं बुद्धिर्भावेक्तस्तदस्ति यस्य तत् सर्वं च तद्बुद्धि च ज्ञानविषयो जगत्पश्यतीति सर्वबुद्धिदृगिति सर्वजीवद्रष्टा । बुद्धिर्जायत इति प्रोक्त इति तात्पर्यान्तरादिति वा । भवान्विदितोऽसि । त्वमग्ने प्रथमो मातरिश्वन इति

ऋग्भाष्ये त्वं विष्णो प्रथमो मातरिश्वन आविर्बभूयास्य सुबोधवत्त्वादिति कथमुक्तमित्यर्थादाशङ्क्य टीकायां युष्मद्युपपदेऽपि त्वं देवशक्त्यामित्यादौ प्रथमपुरुषो दृष्ट इत्युक्तेरत्र भवच्छब्दयोगेऽत्यत एव भागवतान्मध्यमपुरुषो ज्ञेयः। व्यत्ययस्तद्विवरणकृद्भिः स्वातन्त्र्यार्थ इत्युक्तोऽत्रापि मद्वेदनदानत्वमेव स्वतन्त्र इति स्वातन्त्र्यद्योतक इति भवान्विदितोऽसीत्युपपद्यते। तन्नियमप्रच्यावनं न कार्यं चेत्। (१) भा दीप्तौ (२) भा ज्ञाने (३) भा आधारभावे (४) भा औदार्ये (५) भा सन्धाने (६) भा उपादाने (७) भा निकटभावे (८) भा सेव्यत्वे (९) भा ऊरीकरणे (१०) भा सन्ततभावे (११) भा नानाभावे (१२) भा वैलक्षण्ये (१३) भा आधिक्ये (१४) भा स्वातन्त्र्ये (१५) भा आनन्दे (१६) भा सन्ततवचने (१७) भा पूज्यभावे (१८) भा विस्तारे (१९) भा विनाशने (२०) भा स्वामिभावे (२१) भा विनिश्चललाभे भावे (२२) भा उग्रभावे (२३) भा उद्गाने (२४) भा सम्मोहने (२५) भा सञ्चारे (२६) भा विदारणे (२७) भा आलोचने (२८) भा सुन्दरभावे श्रीमदुडुपी श्रीकृष्णपादपङ्कराधकहृषीकेशश्रीमच्चरणैः श्रीमध्वराजमुखकमलाच्छ्रुत्वा लिखितमेतद्धातुव्याख्यानमिति तत्सम्प्रदायाभिज्ञोक्तमुखाच्छ्रुत्वा कृतेयं लेखेति एतदन्यतमो योग्यो भोऽस्यास्तीति भवानिति वा त्वं विदितोऽसीत्यन्वयः ॥ १४ ॥ स एव प्रकृत्येदमिति श्लोके प्रविष्ट इवेत्यनेन प्रवेशोऽवास्तविक इति प्रतीयते। सा च तत्सृष्ट्वा तदेवानुप्राविशत्। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इत्यादिमानावमानितेत्यनेन प्रमाणेनेव तत्तात्पर्यमाह। बहिरिति हरिर्बहिश्च बहिरपि विद्यमानत्वाज्जगज्जगतोऽप्रविष्ट इत्युच्यते। विभुः पूर्णरूपत्वतस्तत्र जगति प्रविष्टवत्प्रविष्ट इव तत्कृतलेपाभावादिवेत्युक्तिः। अणुत्वस्यैव घनत्वस्यैवासत्त्वरं वाऽणोरणीयान्महतो महीयानित्यादेः। इदमेव विशदयति। अप्रवेश इति। अप्रवेशः प्रवेशश्च प्रविष्टोपमता तथा। बहिरन्तर्गतस्यास्य हरेः स्यादिति शब्दवेदिन आहुरिति च ब्रह्मतर्क इति शेषः। एष म आत्मान्तर्हृदये ज्यायान्व्रीहेर्वेत्यादिना हृदयान्तर्गतस्य रूपस्य पूर्णत्वमुक्त्वा तस्यैवैष म आत्मान्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायानिति छान्दोग्योपनिषदाद्युक्तेः। ततश्चायं श्लोकार्थः। यो मया विदितः स एव सः सारत्वात्स इति प्रोक्त इत्यादेः साररूप इति वा सः साधकतापन्न इति वा। स कोपे वारणे सत्ये तथा शूलिनि साधक इति विश्वः। स्वप्रकृत्या स्वाधीनप्रकृतिमुपादानीकृत्याग्रे जगत्सृष्ट्वा। अवान्तरकारणमाह। त्रिगुणात्मकमिति। अनु सर्जनमनुसृत्य तज्जगदेवाप्रविष्टो बहिष्ठरूपेणाप्रविष्टोऽन्तर्गतरूपेण प्रविष्टः। इवेन तत्कृतदुर्दशाशून्यतामाह। भाव्यसे विभाव्यसे हीति ब्रह्मतर्कप्रसिद्धिद्योतिका ॥१५॥ य एते विकृताभावा इति श्लोकेऽविकृता अपरिणताः सप्तभावा द्रव्याद्यभावावसानाः पदार्था विकृतैः स्वस्वकार्यैः समेता ब्रह्माण्डं विराजमनुगता इव दृश्यन्त इति वैशेषिककल्पनास्पदसप्तपदार्थानां ब्रह्माण्डप्रविष्टोपमताऽत्रोच्यत इत्यपरथाप्रतिपत्त्यापत्त्यै भावाः सप्तेत्यस्य यथावदर्थं प्रदर्शयन्मानमुपन्यस्य तेनैव तेषामविकृतत्वं चैवमित्यावेदयति। महदादिरिति। अहङ्कारतत्त्वं शब्दादयः पञ्चतन्मात्राश्चादिपदार्थः। अविकृतो महदादीनां साक्षादुपादानस्य प्रकृतेर्नित्यत्वादेषां सूक्ष्मरूपं च नित्यकमित्यादेरीषद्विकृतरूपतोऽसंसृष्टत्वाद्रूपभेदेनाविकृतत्वमप्रविष्टत्वतदुपादानत्वादीनि ज्ञेयानि। सन्निपत्य समुपद्येत्युत्तरश्लोकेऽनुगता इवेति विराजं ब्रह्माण्डमनुसृत्य गच्छन्तीति भाति। तन्निरासाय तदनूद्य व्याचष्टे। अनुगता इवेति। तस्यार्थः प्रविष्टा इवेति। महदादिष्वपि प्रविष्टत्वाप्रविष्टत्वं भागवते पक्ष इवोपपादनीयमित्याशयवान्सङ्कुच्योक्तां स्मारयति। पूर्वोक्तवदिति। ब्रह्माण्डान्तस्तद्बहिश्च विद्यमानत्वात्त्रिकं ज्ञेयम्। प्रागेव विद्यमानत्वादित्यादिनाऽत्रत्येन वाक्येन महदादीनामुत्पत्तिराहित्यमुच्यते। तथानित्यं द्विविधं मतम्। असंसृष्टं च संसृष्टमसंसृष्टं महानहम्। बुद्धिर्मनः खानि दश मात्रा भूतानि पञ्च च। संसृष्टमण्डं तद्गं च समस्तं सम्प्रकीर्तितम्। पूर्वं पूर्वं कारणं स्यात्प्रकृत्यंशैश्च संयुतम्। महदादिषु तत्त्वेषु त्वण्डाद्यं तात्त्विकं स्मृतम्। सूक्ष्माणि महदादीनि स्थूलान्यण्डादिकानि च। स इदं सर्वमसृजत ॥ ॐ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः। ॐ यावद्विकारं तु विभागो लोकवत्। इत्यादि वियदधिकरणसुधा। ससर्ज भगवानादौ त्रीन्गुणान्प्रकृतेः परः। महत्तत्त्वं ततो विष्णुः सृष्टवान्ब्रह्मणस्तनुम्। महत्तत्त्वादहङ्कारं ससर्ज शिवविग्रहम्। देवान्देहात्मनः स्वानि खं च सत्त्रिविधात्तत इत्यादिविरुद्धत्वान्नोपपद्यत इत्यतो मानमनुमतार्थतया समीकरोति। देवतानामिति। इत्यादीत्यस्येत्यादिरित्यर्थः। महदादीनां तत्त्वानां प्रवेशमात्रं देवतानामभिमानः। अण्डजो ब्रह्मेत्यादौ जनिधात्वर्थीभूतोत्पत्तिरुपचर्यते। प्रवेशादिरूपगौणार्थपरेत्यर्थः। कुतो न सा मुख्योत्पत्तिरिति तिरस्करोति। पूर्वोत्पन्नत्वादिति। अण्डात्पूर्वमुत्पन्नत्वात्। तदसिद्धिं परिहरति। विभक्तशक्तित्वादिति। तारतम्येन विभागो ह्यल्पशक्तिः स्यादित्यादेः शक्तिमत्त्वादित्यर्थः। तथा हि बृहदारण्यकभाष्योदाहृतहरिवंशे। विष्णुवायुगिरीशेन्द्रदेवविप्राः क्रमात्सदा। सामर्थ्यतो विहीनास्तु गुणैः सर्वैस्तथैव च। हीनो विष्णुर्न कस्यापि सर्वतश्चोत्तमोत्तम इति। नन्वस्तु वरो विभक्तिशक्तित्वे पूर्वमुत्पन्नत्वं तु कुत इति चेन्न। ॐ विपर्ययेण तु क्रमोऽत उपपद्यत इति सूत्रभाष्ये पूर्वे पूर्वे यतो विष्णोः सन्निधानं क्रमाधिकम्। सामर्थ्याधिक्यमेतेषां पश्चादेव लयस्तथेत्यादेः। बाह्यसृष्टिर्मुख्या त्वमुख्याऽण्डान्तःसृष्टिः। यथोक्तम्। चराचरव्यपाश्रयस्तु स्यादिति सूत्रभाष्ये परादव्यक्तमुत्पन्नमव्यक्तात्तु महांस्तथा। एवं बाह्या परा सृष्टिरन्तस्तव्यक्त्यपेक्षयेति। को वा गुणः सम औपराक्यां वृतावित्यत आह। व्यक्तिविशेषादिति। घटादीनामिवोत्पत्त्यनन्तरं व्यक्तिविशेषस्तथा तद्गुणव्यक्तिकृत्सदृशव्यक्तिकृयुक्तत्वाद्गौणी ज्ञेया मानमप्युक्तार्थं आह। महद्रूपेति। महद्रूपं महत्तत्त्वरूपं तदेवादिर्यस्याहंरूपादेस्तन्महद्रूपादि तेन ब्रह्मदेवा ब्रह्मादयो देवाः। अण्डे त्वित्युक्त्येयं जनिस्तद्बहिरिति द्योत्यते। तथा च तस्यामुख्यत्वमपि ज्ञापितं ज्ञेयम्। अण्डे तदन्तर्जनिर्या श्रुता साऽभिव्यक्तिरभिधीयते गौणीवृत्त्या। ततश्चायं श्लोकद्विकार्थः। सृष्ट्वाऽग्र

इत्यग्रे कथितसृष्टिप्रकारमीरयति । य इति । ये एते सप्त अविकृता भावा महदहङ्कार पञ्च तन्मात्राः पदार्थास्ते विकृतैर्विकारमात्रैः पृथिव्यादिभिः सन्निपत्यान्योन्यं मिलित्वा विराजं ब्रह्माण्डं समुत्पाद्यानुगताः प्रविष्टा इव दृश्यन्ते बहिरपि सत्त्वात् । तद्भावस्वरूपं निरूपयति । पृथग्भूता इति । विश्लिष्टा नानावीर्यास्तत्तत्पदार्थशक्तीनां बाहुविध्यान्नानावीर्या इत्युक्तिः । तत्तदन्तर्गतानां विभक्तशक्तित्वादिति शेषः । तव शयनीयस्थानं तस्मात्त्वमेव मेलक इति भावः । उत्पत्तिस्तूपचारत इत्याह । इह ब्रह्माण्डान्तः प्रागण्डसृष्टेः पूर्वं विद्यमानत्वात्तेषां सम्भव उत्पत्तिर्मुख्या न हि । किन्तु व्यक्तिविशेषेण प्रवेशमात्रम् । प्रकृतिविकृतत्वातिरिक्तविकृतत्वाभावादविकृततेषां ज्ञेयेत ।। १६ ।।

श्रीसुबोधिनी

द्वादशात्मा हरिर्ज्ञेयस्त्रिधा च नवधा तथा । नवधा वैदिकः प्रोक्तस्त्रिधा लौकिक उच्यते ।। १ ।।
यज्ञस्तु पञ्चधा प्रोक्तश्चतुर्धा भगवानिति । पञ्चात्मकश्चतुर्मूर्तिस्तन्त्र वेदेन सम्मितम् ।। २ ।।
लौकिकस्त्रिगुणः प्रोक्तः स्मृतिश्चैव हि लौकिकी । नवधा वसुदेवोस्तौत् त्रिधा चैव हि देवकी ।। ३ ।।
एकेन प्रार्थनं पूर्वं द्वाभ्यां चैव तथापरम् । दशभिः पञ्चभिश्चैव निरूप्येते स्तुती उभे ।। ४ ।।
शास्त्रतो भगवानेव प्रतीत्यापि दृढीकृतः । बाधकं त्वन्यथाज्ञानमज्ञानं चापि हेतुतः ।। ५ ।।

तत्र प्रथमं बाधकधर्मैश्चाक्षुषत्वादिभिर्ब्रह्मत्वं नोपपद्यत इति चाक्षुषत्वे निमित्ताज्ञानाद् भगवद्विषयकमज्ञानं सम्भवति तदादौ निराकरोति विदितोसीति ।

विदितोसीति ज्ञातस्वरूपस्तोत्रे एते, भवान् विदितो मया सम्यग् ज्ञात आर्षेण ज्ञानेन "तत्त्वमस्या" दिवाक्योत्थेन बहव एव जीवमपि भगवत्त्वेन जानन्तीति चेत् तत्राहासीति, यस्तु युष्मच्छब्देनापि व्यवह्रियते चतुर्भुजः सोपि त्वं विदितोसीत्यर्थः, अप्रयुज्यमानेपि युष्मच्छब्दे मध्यमपुरुषप्रयोगः, अतः शास्त्रतो लोकतश्च यः प्रतीयसे स मया विदित इत्यर्थः, अनेन परम्परया यः प्रतीयते चेतनश्च यो वा साक्षात् प्रतीयते तदुभयरूपो भवानित्युक्तम् ।

अथवा, "विदितोसी"ति प्रतिज्ञाय भगवतो ब्रह्मत्वमुपसंहरिष्यन् सर्वत्वं प्राप्तस्य ब्रह्मत्वं भवतीति "भवान् "पुरुष" इतिपदद्वयेन बाह्याभ्यन्तररूपस्त्वमेवेत्याह, प्रत्यक्षोप्यप्रत्यक्ष इति ज्ञापयितुं वा सम्मुखोप्यसम्मुख इति वा पुरुषत्रयरूपो भगवानिति वा वस्तु 'असि' "भवान्" "साक्षात्पुरुष" इतिपदत्रयं, अन्नमयादेरपि पुरुषविधत्वात् पुरुषो भवतीति तद्व्युदासार्थं साक्षादित्युक्तं, पुरुषप्रवेशात् परम्परया ते पुरुषाः, नन्वात्मस्फुर्तौ ब्रह्मविदामपि साक्षात्पुरुषत्वं भवतीति ततोप्याधिक्यमाह प्रकृतेः पर इति, न हि ते जीवाः प्रकृतिनियन्तारः, प्रकृतिनियमनं च गुप्तानामर्थानां मायाजीवादीनां प्राकट्यकरणात् प्रत्यक्षदोष'स्त्वसि' 'भवा'नितिपदाभ्यां परिहृतः, ज्ञानत्वदोषश्च सर्वभावेन प्राकट्यात् , विरुद्धा धर्मा एकैकांशेन चरितार्था भवन्ति, तद्ध्यहमात्मा चतुर्भुजदेहे विद्यमानस्तथा भविष्यामीतिचेत् तत्राह केवलानुभवानन्दस्वरूप इति, केवलो देहेन्द्रियप्राणान्तःकरणरहितः, नापि जीववत् केवलं चिद्रूपः किन्त्वनुभवानन्दः, अयोगोलके वह्निरिव भगवानस्मिन् देहे चिदानन्दः संक्रान्तो भविष्यतीत्याह स्वरूप इति, यत् स्वरूपं दृश्यते तदेव चिदानन्दरूपं, न तु चिदानन्दो स्वरूपे यस्मिन्, अतश्चिदानन्दस्वरूपः सच्चिदानन्दविग्रह इत्यर्थः, एवं परोक्षापरोक्षान्तर्यामिरूपः परिदृश्यमानो भवानित्युक्त, आत्मा नोक्त इत्यात्मत्वेनापि भगवन्तं निरूपयति सर्वबुद्धिदृगिति, सर्वेषां बुद्धीः, पश्यतीति सर्वेषां बुद्धिषु दृग् ज्ञानं यस्येति वा एव षड्विधोपि भगवानयमेवेत्युक्तं प्रत्यक्षव्यवहारादयश्च धर्मा अंशेन समर्थिताः ।। १३ ।।

दूषणान्तरमाशङ्क्य परिहरति स एवेति,

यद्यहं सर्वरूपो भगवानेव कथं देवक्या उदरे प्रविष्ट इति चेत् तत्राहाप्रविष्ट एव तत्र विद्यमान एव प्रविष्ट इव भाव्यसे, न हि दर्शनमात्रेण प्रविष्टत्वनिर्धारः कर्तुं शक्यो यावच्छास्त्रेण दर्शनं संवादि न भवति, "स एष इह प्रविष्ट आनखाग्रेभ्यो यथा क्षुरः क्षुरधाने विश्वम्भरो वा विश्वम्भरकुलाये" "तत् सृष्ट्वा तदेवानुप्राविशद्", "गुहां प्रविष्टौ परमे परार्धे" एवं वेदे स्थित्यर्थं कार्यार्थमनेकरूपभवनार्थमन्यप्रवेशनार्थं च प्रवेशः श्रूयते, तथा देवक्यामपि कश्चन प्रवेशनप्रकारो भविष्यति, ननु तथापि सोपाधिक एव कार्याभिनिविष्ट एव प्रविशतीति मुख्यः कृष्णः कथं स्यात् तत्राह—प्रविष्ट एव प्रविष्ट इवेति, योगबलादपीन्द्र इव प्रवेशः सम्भवति दक्षिणायां वा जननार्थं प्रवेशः सम्भवति, "यो वा इतो जनिष्यते स इन्द्रो भविष्यतीति तां प्राविशत् तस्या इन्द्र एवाजायते"तिश्रुते।दितेर्जठरे च मरुतां छेदनार्थमिन्द्रः प्रविष्टस्तथा भगवानत्र न प्रविष्ट इति वक्तुमप्रविष्ट इत्युक्तं, प्रवेशधर्मो भगवति वर्तत इति तज्ज्ञापनार्थं प्रविष्ट इवेति विभाव्यते, तर्हि कः प्रकारः प्रवेश इत्याकाङ्क्षायामाह यः पूर्वं सच्चिदानन्दरूप उक्तः स एवाग्रे पूर्वमेव स्वप्रकृत्याधिदैविकस्वभावेनेदं भगवदर्थमेव जगत् त्रिगुणात्मक सृष्ट्वा, अन्यार्थं जगत्सृष्टौ प्रवेशोपेक्ष्यते न स्वार्थसृष्टावित्यप्रविष्ट एव भोगार्थं कारणत्वेनैवाविर्भूतः सृष्ट्यन्तरन्यायेन प्रविष्ट इव विभाव्यसे, अयमत्र प्रवेशदर्शने प्रकार उक्तः, भगवान् स्वार्थं सृष्टानस्मानुपभोक्तुमस्मासु स्थित एवाविर्भूत इत्यप्रविष्ट एव प्रविष्टो विभाव्यस इत्यर्थः यथा सृष्ट्यन्तरन्यायेन प्रवेशभावना तथा स्नेहद्वेषसाधारणभावानामपि प्रभुविषयकाणां लीलास्थजनेषु दर्शनात् सृष्ट्यन्तरन्यायेन तेषामेवात्र

सत्वादिरूपत्वमित्याशयेन त्रिगुणात्मकत्वोक्तिर्ज्ञेया, अत्रिगुणात्मकमिति वा, यद्वाग्रे पूर्वं त्रिगुणात्मकं जगत् सृष्ट्वा तदनु तदनन्तरमुक्तरूपया स्वप्रकृत्येदं लीलात्मकं जगत् सृष्ट्वेत्यग्रे पूर्ववत्, अन्यथाक्त्वाप्रत्ययेनैव पूर्वभावित्वप्राप्त्यार्थादेवाप्रवेशानन्तर्यमपि लभ्यत एवेति तदन्वितिपदं व्यर्थं स्यात्, यद्वा सृष्ट्यनन्तरं यस्तत्र प्रवेशस्तस्यानुप्रवेश इति रूढनाम ज्ञेयं, तथा सति नोक्तदोषः, अत एव श्रुतिरपि "तत् सृष्ट्वा तदेवानुप्राविश"दित्युक्तवती, अन्यथान्वित्युपसर्गवैयर्थ्यं स्यात् ॥ १४ ॥

उक्तरीत्या दूषणान्तरमप्याशङ्क्य पुनः परिहरति द्वाभ्यां **यथेमे विकृता भावा** इति ।

नन्वस्मिन् रूपे प्राकृतेष्विव पृथिव्यादीनि भूतानि प्रतीयन्ते, ततः कथमानन्दमय इति चेत् तत्राह यथेमेस्मिन् रूपे विद्यमाना **अविकृता भावा** आधिदैविकानि चतुर्विंशतितत्त्वानि "चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं मनसो मन" इत्यादिश्रुतिप्रतिपादितानि तत्तत्कार्यार्थं तत्र तत्र स्थितानि, **विकृतैस्तथैव** चतुर्विंशतितत्त्वैः प्राकृतैः **सह नानावीर्या** रूपरसादिज्ञापनादिसमर्था अन्योन्यममिलिता भिन्नान्येव कार्याणि कर्तुमेकस्मिन्नेव कार्ये सर्वे संहत्य **विराजं** ब्रह्माण्डविग्रहं स्वराड्देहं **जनयन्ति**, युक्तश्चायमर्थ आधिदैविकव्यतिरेकेणाधिभौतिकात् केवलात् कार्यं न सम्भवतीति, तथा प्रकृतेपि सर्वांशो भगवानिति तान्याधिदैविकानीह प्रतीयन्त इति न कोपि दोषः ॥ १५ ॥

ननु त्वक्चर्मादयोपि प्रतीयन्ते लोमदन्तनखानि च ततः कथमानन्दमय इति चेत् तत्राह सन्निपत्येति ।

सन्निपत्य मिलित्वा **समुत्पाद्येतिपूर्वानुवादः** कार्येपि कारणेष्विवाधिदैविकं रूपं वर्तत इति ज्ञापनार्थः, **अनुगता इव** दृश्यन्ते पुनः कार्ये त्वक्चर्मादिरूपेण पृथिवीसमष्टौ तत्तद्रूपा वा, सर्वत्र रुधिरादिरूपं जलमेवमन्यदपि, तर्हि दर्शनप्रामाण्यादनुगता इव भवन्त्विति चेत् तत्राह **प्रागेव** कारणत्वेनेह **विद्यमानत्वात्** पुनस्तेषामिहोत्पत्तिर्न सम्भवति, कारणानां विलक्षणत्वात् साक्षात् प्रवेशस्तु प्रतीत्यैव बाधितः, यथाधिदैविकानि कारणरूपाण्येवं दन्तादीन्यप्याधिदैविकानीति पूर्ववत् तेषामप्यत्र प्रतीतौ न कोपि विरोधः ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

यस्त्विवत्यारभ्य प्रयोग इत्यन्तं, अत्रैवं ज्ञेयं, 'असी'तिव्यवहारो युष्मच्छब्देनोपस्थित एव भवतीतिस्थितावपि व्यवहारमात्रोक्तिर्या सा स तेन विनानुपपन्नस्तमाक्षिपतीत्यन्यलभ्यत्वाभिप्रायेणेति, अत एव 'पिधेही'त्यादौ 'द्वारा'दिपदार्थस्यैवाध्याहारो न तु पदस्यापि लाघवादिति भाट्टा मन्यन्ते, प्रकृते त्वर्थस्य पुरःस्थत्वेन नाध्याहारापेक्षापि, वस्तुत'स्त्वसिभवा'निति समस्तं पदं, तथा चासिशब्दयुक्तो भवानित्यर्थः, तद्युक्तत्वं तेन व्यवहार्यमाणत्वं, पूर्वोक्तपक्षे भवच्छब्दसंगत्यभावारुच्या पक्षान्तरमाहुरथवेत्यादि, क्षराक्षरपुरुषोत्तमा आधिभौतिकादयो वा त्रयः पुरुषाः, असीति देहरूपेण सत्त्वेन प्रतीयमान उक्तो भवानिति तदभिमानित्वेनाग्रिमेण परमात्वेन प्रतीतिविषय उक्तस्तेन श्रुत्युक्त'सैन्धवघन'दृष्टान्तन्यायोत्राभिप्रेत इति ज्ञायते, प्रत्यक्षदोषस्त्वित्यादि, शुद्धब्रह्मत्वेन पुरुषोत्तमत्वेन च वेदनं हि **विदितोसी**त्यनेन प्रतिज्ञात'मसि भवानि'तिव्यवहारश्च प्रत्यक्षविषय एव भवति, एवं सत्युक्तव्यवहारविषयस्यैव प्रभोरुक्तरूपत्वं सिध्यतीति तत्परिहार इत्यर्थः, ननु ज्ञातत्वे प्रामाणिके सत्युक्तदोषपरिहारस्तश्च न वक्तु शक्य दोषत्वादित्यत आहुर्ज्ञातत्वेति, 'भवत्' 'पुरुष'पदाभ्यां पूर्वं तथोक्तत्वादलौकिकचक्षुस्तत्सामर्थ्यरूपेणापि स्वयमेव हरिः प्रकटो जात इति स्वस्य स्वज्ञानं यथा न विरोधि तथा वसुदेवज्ञानमपीत्यर्थः, "अन्यदेव तद् विदितादथोविदिता"दित्यादिश्रुतिरपि लौकिकयोस्तयोः सकाशादेव भेदमाह, अन्यथा वदद्व्याघात इति भावः, नन्वदृश्यत्वादिप्रतिपादकवेदाप्रतिपाद्यत्वाद् ब्रह्मत्वमपि न वक्तुं शक्यमित्यत आहुर्विरुद्धा इति, यद् रूपं यदा दृश्यं तदेव तदैवादृश्यमपीतीन्द्रियसामर्थ्यलक्षणेनांशेन प्रभ्विच्छालक्षणेन तेन चोभयधर्मसिद्ध्या ब्रह्मत्वं न क्षतं भवतीत्यर्थः ॥ १३ ॥ **स एव स्वप्रकृत्ये**त्यत्राधिदैविकस्वभावेनेति, आधिदैविकस्वभावेनेत्यादि, लीलौपयिकपदार्थानामलौकिकत्वेन लौकिक्या प्रकृत्या न तत्सृष्टिः सम्भवतीति तथोक्तं, अन्यथा स्वपदानर्थक्यमितिभावः ॥ १४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

विदितोसीत्यत्र ज्ञातस्वरूपस्तोत्रे इति, ज्ञातस्वरूपाभ्यां कृते स्तोत्रे इत्यर्थः, ज्ञातस्वरूपत्वं व्युत्पादयन्ति **यस्त्वित्यादि**, तथा च यश्चाक्षुषत्वेन प्रतीयसे सोपि त्वं पुरुषोत्तमत्वेन विदित इत्यर्थः, नन्वत्र मूले युष्मच्छब्दाभावात् कथमेव व्यवहारोक्तिरित्यतस्तदाशयं टिप्पण्यामाहुर्यत्रैवमित्यादि, **व्यवहारमात्रोक्तिरिति**, तदभावेपि व्यवहारमात्रोक्तिः, **अन्यलभ्यत्वाभिप्रायेणेति**, शब्दार्थस्याक्षेपलभ्यत्वाभिप्रायेणेत्येतदर्थं, व्यवहारोपपादनायाक्षेपलभ्यस्यापि ग्रहणे विद्वत्सम्मतिमाहुरत एवेत्यादि, अत एवेति व्यवहारस्योपपाद्यत्वादेव, तथा चा"सी"तिप्रयोगेण शब्द एवाक्षिप्यत इति भवत्पदेन वेदनकर्माकाङ्क्षापूर्तावपि यदेवंप्रयोगस्तच्चाक्षुषत्वेन ज्ञायमानस्यैव विदितत्वज्ञापनार्थं इति सुबोधिन्याशय इतिभावः, कल्पनाक्लेशपरिहाराय पक्षान्तरमाहुर्वस्तुत इत्यादि **समस्तं पदमिति**, असीतिविभक्तिप्रतिरूपकमव्ययं तेन सह समासं प्राप्तमेकं पदं, तथा च यथा'स्ति क्षीरा गौ'रित्यादा"वस्तीत्य" व्ययं

प्रथमपुरुषार्थे तथा "सी"त्यव्ययमपि मध्यमपुरुषार्थे, तस्य च भवच्छब्देन समासे पूर्वोक्तोर्थोसीतिकल्पनाक्लेशश्च न भवतीत्यतस्तथेत्यर्थः, **भवच्छब्दसङ्गत्यभावारुच्येति**, अध्याहृतेन त्वंपदेन भवत्पदकार्यसिद्धेस्तदसङ्गत्यरुच्या, **तदभिमानित्वेनेति**, भातीति **भवान्** प्रकाशमान इत्यतोभिमानित्वेन, **सुबोधिन्यां प्राकट्यकरणादिति**, कौस्तुभपीताम्बराभ्यां प्राकट्यकरणात्, टिप्पण्यां **तत्परिहार** इत्यर्थः, इदं चाग्र "एतद् वां दर्शितं रूपमि"तिभगवद्वाक्याच्च स्फुटीभविष्यति, **तथोक्तत्वादिति**, ज्ञातत्वस्योक्तत्वात्, ननु ज्ञातत्वस्य प्रामाणिकत्वे "प्राप्य मनसा सहे"तिश्रुतिविरोधस्तु दुष्परिहर इत्यत आहु'रन्यदेवे'त्यादि, अपिशब्दा 'दानन्दं ब्रह्मणो विद्वानि'तिश्रुतिः सङ्गृह्यते, **अन्यथेति**, समानकारणयोरेकविषये विदितत्वाविदितत्वयोः प्रामाणिकत्वे, तथा च वदतोव्याघातपरिहाराय विदितत्वाविदितत्वयोः स्वरूपभेदे सिद्धे लौकिकविदितत्वाद् भिन्नत्वस्य सिद्धत्वे सुखेन तस्यापि परिहार इत्यर्थः, **सुबोधिन्यामत इति**, अनुभवानन्दावेव स्वरूपं यस्येत्युद्देश्यविधेयभावादित्यर्थः, **परोक्षापरोक्षान्तर्यामिरूप इति**, अदृश्यरूपो दृश्यरूपोन्तर्यामिरूपश्चे त्यर्थः, **आत्मेति**, सर्वात्मा **षड्विध इति**, क्षराक्षरपुरुषोत्तमान्तर्यामिदेहजीवभेदेन षड्विधः, यद्वा **सैन्धवघनदृष्टान्तात्** पूर्वमाधिभौतिकादित्रयरूपेणात्र सर्वान्तर्यामिदेहजीवरूपेणेत्यर्थः ॥ १३ ॥

स एवेत्यत्र कश्चन प्रकार इति, तथा च तैः प्रकारैर्यथा न सर्वरूपत्वव्यापकत्वादिहानिस्तथानेनापीत्यर्थः, **तथापीति**, वैदिकप्रकारेपीत्यर्थः, **आहेति**, प्रवेशस्य भावनामात्रत्वादप्रविष्टत्वमाहेत्यर्थः, तदुपपादयन्ति **योगे**त्यादि, यथानुगमाधिकरणविषयवाक्ये योगबलादिन्द्रः परमात्मनि प्रविष्टस्तथेत्यर्थः, **दक्षिणायां वेति** वाशब्द इवार्थे ज्ञेयः, प्रकारान्तरेणापीन्द्रप्रवेशमाहुर्बलेरित्यादि, **तथेति**, सोपाधिकः कार्याभिनिविष्टश्च वा, तथा चानुपाधिकत्वं कार्यार्थतया प्रवेशभावना चोपपद्यत इत्यर्थः, प्रकारसंदेहं परिहर्तुं व्युत्पादयन्ति **तर्ही**त्यादीत्यर्थ इत्यन्तं, **आधिदैविकस्वभावेने**त्यस्य तात्पर्यं तत्र प्रमाणं च टिप्पण्यामाहुराधिदैविकेत्यादि, **सुबोधिन्यामपेक्ष्यत इति**, साक्षित्वप्रकाशननियमनाद्यर्थमपेक्ष्यते, न तु **स्वार्थसृष्टाविति**, स्वार्थसृष्टौ कारणतया विद्यमानेनैव रूपेणान्तर्यामिकार्यस्य जीवकार्यस्य च करणान्नापेक्ष्यते, ननु "तमद्भुत"मित्यत्र लीलोपयोगिप्रपञ्चस्य ब्रह्मात्मकत्वमभिप्रेतमित्युक्तमिह तु त्रिगुणात्मकत्वमुच्यत इति कथमविरोध इत्यत आहुर्यथेत्यादि ज्ञ येत्यन्तं, मायासाम्यस्य दौर्बल्यमभिप्रेत्य पक्षान्तरमाहुरत्रिगुणात्मकमिति वेति, **अकारप्रश्लेषमनङ्गीकृत्य पक्षान्तरद्वयमाहुर्यद्वे**त्यारभ्योक्तरीत्यन्तम् ॥ १४ ॥

यथेमे इत्यत्र **सुबोधिन्यां प्रतीयन्त इति**, शरीररूपेण पृथ्वी मुखे मुख्या आपः कान्तिरूपं तेजः सर्वत्र प्राणरूपो वायुर्नासिकायां छिद्रेष्ववकाशरूपेणाकाश इत्येवं प्रतीयन्ते, **तत्राहेति**, तादृश्यामाशङ्कायां स्वरूपे प्रतीयमानानां तेषां दृष्टान्तमुखेन नित्यत्वं चाविकृतत्वं चाहेत्यर्थः, दृष्टान्तं व्युत्पादयन्तो मूले **यथे**त्यस्य **विराज जनयन्ति** हीतिचतुर्थपादेनान्वय इत्यभिप्रेत्य व्याकुर्वन्ति **यथे**त्यादि **प्रतिपादितानीति**, उपलक्षणविधया प्रतिपादितानि, **तत्रतत्रेति**, तेषुतेष्विन्द्रियेष्विव तेषु **तथैवेति**, तादृशैरविकृतसदृशैः, अयं मूलस्थस्य **तथा त** इत्यस्य विवरणं, **त इति**, वक्ष्यमाणा ये विकृताः, वस्तुतस्तु **तथैव विकृतैः सहे**तिपाठो भाति, '**सहेत्यन्तस्यैकस्मि**'न्नित्यग्रिमग्रन्थेनान्वयः, **नानावीर्या** इत्यादिकं तु विकृताविकृतयोः साधर्म्यबोधनार्थं, शेषं स्फुटं, तथा सत्येवं योजना, **इमे अविकृता भावा नानावीर्याः पृथग्भूतास्तथा** तादृशास्ते वक्ष्यमाणाविकृता भावाः, **तथैवेति** वा पाठः, '**विकृतैः सह यथा विराजं जनयन्ति ही**'ति बोध्यं, एवं दृष्टान्तं व्याख्याय दार्ष्टान्तिके योजयन्ति **तथा प्रकृतेपी**त्यादि, **तानीति**, विराड्जनकान्यविकृतानि तत्त्वानि, **न कोपि दोष इति**, पृथिव्यादिभूतदर्शनकृतो यः स्वरूपेनित्यत्वविकृतत्वादिप्रतीतिरूपो दोषः सोपि नेत्यर्थः, न च **विकृतैस्तथैवे**त्यादिना चतुर्विंशतितत्त्वानां विकृतत्वप्राकृतत्वकथनं कथं सङ्गच्छते प्रकृतितत्त्वे विकृतत्वप्राकृतत्वयोः सांख्यैः पौराणिकैश्चानङ्गीकारादिति वाच्यं, एकादशस्कन्धे द्वाविंशाध्याये 'प्रकृतिः पुरुषश्चे'तिविकल्पः पुरुषर्षभ एष वैकारिकः सर्गो गुणव्यतिकरात्मक' इत्यादिना प्रकृतिपुरुषयोरपि विकल्पत्ववैकारिकत्वगुणव्यतिकरात्मकत्वानां भगवतैवाङ्गीकारात्, सिद्धान्तस्य च भगवन्मतीयत्वाद् ब्रह्मवादे ब्रह्मातिरिक्तस्य सर्वस्यापि विकारत्वाद् 'यावद्विकारं तु विभागो लोकव'दिति सूत्रोक्तन्यायस्य प्रकृततत्त्वेप्यङ्गीकारे बाधकाभावाच्चेति ॥ १५ ॥

अग्रिमे ततः कथमिति, कारणरूपेण पृथिव्यादिप्रतीतौ भवतु समाधानं न तु कार्यरूपेणापि प्रतीतौ कार्यस्य जन्यत्वादतः कथम्? **तत्राहेति**, तादृश्यामाशङ्कायां त्वगाद्यात्मककार्यरूपेणापि प्रतीयमानस्य दृष्टान्तमुखेन नित्यत्वमविकृतत्वं चाहेत्यर्थः, **मिलित्वेति**, पूर्वं 'विकृतैः सहे'त्युक्तं स सहभावो निमित्तभूतानामिवापि सम्भवतीति तद्व्युदासार्थं दुग्धजलादिवदुपादानत्वेन मिश्रीभूय, **पूर्वानुवाद इति** जनयन्तीत्यस्यानुवादः, **वर्तत इति**, 'तदभिध्यानादेव तु तल्लिङ्गात् स' इतिन्यायेन वर्ततेन्यथा कार्यजन्यं कार्यान्तरं न स्यात्, **अनुगता इवेति**, पटे तन्तव इव, **समष्टाविति**, ब्रह्माण्डे, **अन्यदपीति**, तेजोवायुव्योमापि, तथा चानुगतत्वात् कार्ये कारणभूतानां तत्त्वानां सत्ता दृष्टान्तेनोपपादिता, अतः परं तेषां तत्त्वानां बीजाङ्कुरवत् कृत्स्नप्रसक्तिवारणायावतारयन्ति **तर्ही**त्यादि, **भवन्त्विति**, कार्यमात्ररूपा भवन्तु, समाधि व्याकुर्वन्ति **प्रागि**त्यादि, **इहेति**, स्वरूपे ब्रह्माण्डोपरि च, **इहोत्पत्तिरिति**, कार्ये पुनरुत्पत्तिः, **विलक्षणत्वादिति**, कृत्स्नप्रसक्तिवारणार्थं कार्यानवयवतयातिरिक्तत्वेन विद्यमानत्वात्, ननु तत्रानुगमो बीजाङ्कुरन्यायेनास्तु 'जातेङ्कुरे कथमिहोपलभेत बीज'मिति सप्तमस्कन्धे प्रह्लादवाक्याच्चेति चेत् तत्राहुः **साक्षादि**त्यादि, तथा च त्वगादीनां बीजाङ्कुरन्यायकप्रवेशस्तु मातापित्रोः शरीरे तेषां विद्यमानत्वप्रतीत्यैव बाधित इत्यर्थः, एवमाधिदैविकानां कारणभूतानां तत्त्वानां व्यतिरेकं

दृष्टान्तेन साधयित्वा फलितमाहुर्यथेत्यादि, न कोपि विरोध इति, शास्त्रसिद्धत्वात् तद्विसंवादिप्रतीतकृतो विरोधोऽकिञ्चित्करत्वान्नेत्यर्थः ॥ १६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

विदितोसीत्यस्याभासे कारिकासु स्मृतिश्चैव हि लौकिकीति, लोकैर्भगवद्व्यतिरिक्तैरृषिभिः प्रणीतेत्यर्थः, **अन्यथाज्ञान**मिति, प्राकृतत्वज्ञानं ब्रह्मत्वेनाज्ञानं च ब्रह्मत्वे बाधकं ब्रह्मसाक्षात्कारे ह्यज्ञानमन्यथा ज्ञानं च न तिष्ठतीतिभावः, एताभ्यां तन्निरूपणाभाव एतयोरन्यथाज्ञानमज्ञानं वा शंक्येत तथा च दृश्यमानस्य ब्रह्मत्वं न सिध्येदित्यर्थः, **तत्रे**ति, ब्रह्मत्वे साधनीय इत्यर्थः, **प्रथम**मिति, वक्ष्यमाणाशङ्काभ्यः प्रथममित्यर्थः, **बाधकधर्मै**रिति, ब्रह्मत्वे बाधकमज्ञानमन्यथाज्ञानं च तद्धेतुभूतैर्धर्मैरित्यर्थः, **चाक्षुषत्वे**ति, चाक्षुषत्वे निमित्तं 'सर्वे मां पश्य'न्त्वित्याकारिका भगवदिच्छा तस्या अज्ञानादित्यर्थः, व्याख्याने **चतुर्भुज** इति, देहेन्द्रियादिरूपो न तु जीवस्थानीयमात्ररूप इत्यर्थः, अस्मिन् पक्षे विदितोसीति भिन्नं वाक्यं, वक्ष्यमाणपक्ष एतस्यैव प्रकारकथनमग्रिमेणेतिविभेदो ज्ञेयः, **अत** इति, विदित इत्यनेन शास्त्रतः प्रतीतिरुक्ता तत्र व्यवहारकथनेनासीत्यनेन लोकतोपि प्रतीतिरुक्तात एव व्याख्याने सोपि त्वं विदित इत्यपिशब्द उक्तः, **अनेने**ति, 'विदितोसी'तिपदद्वयेनेत्यर्थः, **शास्त्रप्रतीतिः** परंपराप्रतीतिः, 'असी'त्यनेन व्यवहारकथनादचेतनदेहेन्द्रियादिरूपोप्युक्त इत्याशयेनाहु**रचेतनश्चे**ति, **तदुभये**ति, परम्पराप्रतीतिसाक्षात्प्रतीतिरूप इत्यर्थः, **आद्यपक्षे**सीति न क्रियापदं किन्त्व'सि'ना व्यवह्रियमाण इत्यर्थबाधकं, अस्मिन् पक्षे त्वंपदमिव'भव'त्पदमपि न वक्तव्यमिति टिप्पण्युक्तारुच्या पक्षान्तरमुक्त**मथवे**ति, अस्मिन् पक्षे भवत्पदस्य तेन व्यवह्रियमाणत्वमर्थः, तत्रासिपदं व्यर्थं क्रियायास्तु विदितपदेनैव चारितार्थ्यादित्यरुच्या तृतीयः पक्षः उक्तः, **पुरुषत्रये**ति, भवत्पदेन भातीतिव्युत्पत्त्या भानकथनात् प्रत्यक्षत्वं, एतादृशोपि सन् पुरि शेत इति पुरुषोऽप्रत्यक्षः, तथा च मूले भवान् सन् पुरुष इत्यन्वयः, **सम्मुख** इति, भगवत्पदेन दृश्यमानत्वसूचनादितिभावः, **पुरुषे**ति पदत्रयेण पुरुषत्रयरूपत्वमुक्तं, अर्थान्तरमाहु**र्भगवानिति वे**ति, पदत्रयमिदमग्रिमं च पदत्रयमेवं षड्भिः पदैः सङ्ख्यातात्पर्यत्वेन भगवत्त्वं वा वक्तुमिदं पदत्रयं पूर्वमुक्तमित्यर्थः, इममेवार्थमभिप्रेत्य वाक्यार्थोपसंहार **'एवं षड्विधोपि भगवानि'**ति वदिष्यन्ति, **सच्चिदानन्दविग्रह** इति, अनुभवानन्दौ स्वरूपं यस्येत्युक्त्या सत्त्वेन प्रतीयमानस्य विग्रहस्य चिदानन्दात्मकत्वमुक्तं, तथा च सच्चिदानन्दात्मको विग्रहो न तु केवलं सदात्मक इत्युक्तं जातमितिभावः, **परोक्षे**ति, दृश्यमानो विग्रह एव चित्सदानन्दरूप इत्यर्थः, **आत्मे**ति, अत्र विग्रह आत्मत्वेन प्रतीयमानस्य स्वरूपं नोक्तमित्यर्थः, **सर्वे**ति, सर्वबुद्धिद्रष्टुः स्वबुद्धिद्रष्टृत्वं सिद्धमेवेतिभावः बुद्धिशब्देन पञ्चेन्द्रियजन्यानि ज्ञानानि ॥ १३ ॥

स एवेत्यत्र **दर्शनमात्रेणे**ति, 'जगन्मङ्गल'मितिश्लोके समाधौ देवकीं भावयित्वा तत्र भगवन्तं स्थापितवानित्युक्तं तथा च दर्शनमात्रेणेत्यस्य मानसप्रत्यक्षमात्रेणेत्यर्थः, **स्थित्यर्थ**मिति, इदं चतुष्टयमुक्तेषु चतुर्षु वाक्येषु क्रमाज् ज्ञेयं, **अन्येति**, जीवप्रवेशनार्थमित्यर्थः, **सोपाधिक एवे**ति, 'सोकामयते'त्यत्रोक्तकामसहित एवेत्यर्थः, **कार्याभिनिविष्ट** इति, जगज्जननार्थं तत्प्रकाराभिनिविष्टचेता इत्यर्थः, **मुख्यः कृष्ण** इति, 'अद्भुत'पदोक्त लोकवेदाप्रसिद्ध इत्यर्थः, **इन्द्र एवे**ति, आधिभौतिक इन्द्रे भगवद्बाहुरूपस्याधिदैविकस्य प्रवेश इत्यर्थः, अत्र प्रवेशमात्रं साधारणधर्मं न तु योगबलादित्यस्येन्द्रेप्यन्वयः, यथा तत्र प्रवेशस्तथात्र योगबलादपि सम्भवतीत्यर्थः, **प्रवेशधर्म** इति, प्रवेशकृतो धर्मो बहिर्निर्गमनं जननमित्यर्थः, यद्वा **सृष्ट्यनन्तर**मिति, एतद्दूषणसमाधानमेवं वा कर्तव्यमित्यर्थः, तथा च पूर्वोक्तैकसृष्टिपक्ष एव दूषणसमाधानपूर्वकमनेन स्थापित इति ज्ञेयम् ॥ १४ ॥

यथेमे इत्यत्राविकृता एव भावा भावत्वेन सदृशैर्विकृतैः भावैः सहभूता विराजं जनयन्तीत्यन्वयः, **रूपरसादी**ति, पूर्वमादिपदेन गन्धादयः, अग्र आदिपदेन क्रियादयः, 'विनापि सहपदं सहार्थे तृतीये'तिव्यवस्थापितत्वादत्र सहपदप्रयोगं विनापि विकृतैरितितृतीयया सहार्थलाभेपि सहपदप्रयोगादन्योन्यमपि सहभावो विवक्षित इत्याशयेनाहुः **सर्वं संहत्ये**ति, तथा च मूलस्थसहपदस्यार्थोयं, प्राकृतैःसहेतिसहपदेन तु तृतीयाया अर्थ उक्त इति ज्ञेयं, **ब्रह्माण्डविग्रह**मिति, ब्रह्माण्डरूपो यो विग्रहस्तद्रूपमित्यर्थः, **स्वराड्देह**मिति, विराडन्तर्गतस्य स्वराजो देहमित्यर्थः, **सर्वांश** इति, अत्र सर्वांशयुक्तो भगवानित्यंशसम्बन्धिन एते भावाः प्रतीयन्त इत्यर्थः, अंशानां सत्त्वव्यवहितत्वात्, सत्त्वनिष्ठा विराड्देहजनकाः कारणभूता भावास्तत्र प्रतीयन्ते, पुरुषोत्तमस्य त्वानन्दमयत्वात् तत्र शिर आदयः प्रियादिरूपा एव न हि ते कारणभूताः, 'कारणत्वं न चैवास्ति चिदानन्दांशयोः स्वत' इति सिद्धान्तात्, अतः सुष्ठूक्तं सर्वांशयुक्तत्वादेतत्प्रतीतिरिति, तथा चेदं समाधानमंशसद्भावमभिप्रेत्य केवलपुरुषोत्तमाख्यं तु वस्त्वेव तादृशमिति तत्र न शङ्का काचिदितिभावः ॥ १५ ॥

सन्निपत्येत्यत्र **पूर्वानुवाद** इति, संहननस्य विराजुत्पादनस्य च पूर्वश्लोकोक्तस्यानुवाद इत्यर्थः, **कारणेष्विवे**ति, अंशावतारेष्विवेत्यर्थः, परमत्राधिदैविकमेव रूपं न त्वाधिभौतिकं कार्ये तूभयविधमपीतिविशेषः, **अनुगता इवे**ति, अग्रिमव्याख्यानानुरोधाद् यतो दृश्यन्तेतोनुगता इव सन्तीत्यन्वयः, पूर्वोक्ता अविकृता भावाः पूर्वं विराजितत्वरूपेण दृष्टाः पुनः कार्ये व्यष्टौ तत्वकार्यत्वधर्मादिरूपेण दृश्यन्तेतः कार्येनुगता इव सन्तीत्यर्थः, अनुगतत्वं विशदयन्ति **पृथिवी**ति, **समष्टौ** सङ्घातरूपेस्मदादिदेहे कारणभूताधिदैविकी पृथिव्यनुगतेव, **सर्वसङ्ग्रहार्थ**माहु**स्तत्तद्रूपा वे**ति, घटादौ सर्वत्र तत्कारणरूपाधिदैविकी पृथिव्यनुगतेव

समष्टौ जलं रुधिरस्वेदादिरूपं हिमकरकादौ च तत्कारणरूपमनुगतमिवेत्यर्थः, अन्यदपीति, तत्त्वान्तरमपीत्यर्थः, तर्हीति, एतस्यैव विवरणं दर्शनेति, अत्रापीतिशेषः, कार्ये कारणगुणानां दर्शनप्रामाण्यात् कारणगता गुणाः कार्येनुगता इव सन्तीति चेदुच्यते तत्र स्वरूपेपि कार्यधर्माणां दर्शनादत्रापि कार्यधर्मा अनुगता इव भवन्त्वित्यर्थः, पुनस्तेषामिति,एकवारं कार्येषूत्पन्नानां पुनः कारण उत्पत्तिर्नेत्यर्थः, विलक्षणत्वादिति, कार्यविलक्षणत्वादित्यर्थः, कारणधर्माः कार्येषु गता इव भवन्ति ततः कार्यसम्बन्धिनो भूत्वा पुनः कारणेनुगता इव न भवन्तीदमेव कार्यकारणयोर्वैलक्षण्यमितिभावः, कार्येपि कारणासाधारणधर्मा नानुगच्छन्ति किन्तु केवल साधारणधर्मा अनुगता भवन्तीतीवपदप्रयोगः, कार्येषु धर्मा अपि साधारणाः कार्यरूपेणोत्पद्यन्तेतस्तत्रानुगताः कारणे तूत्पत्तिर्न सम्भवत्यतोदर्शनेपि कार्यधर्मा अनुगता इव न सन्तीत्यर्थः, तथा च 'तत् सृष्ट्वे'तिप्रकारेण यथा कारणधर्मा कार्येनुगतास्तथा कार्यधर्माः कारणेनुगता नेत्युक्तं, तर्हि 'तदेवानु प्राविश'दितिप्रकारेण कार्यधर्माः कारणे प्रविशन्तामित्यत आहुः साक्षात्प्रवेशस्त्विति, धर्माः कार्ये कार्यं स्वसमष्टौ विराजि स च स्वकारणभूततत्त्वेषु तानि भगवतीत्येवम्परम्परया प्रवेशः सम्भवति साक्षादेवानुप्रवेशलक्षणः प्रवेशस्तु कार्यधर्माणां तावत्सामर्थ्याभावात् प्रत्येतुमेव न शक्यतेतो बाधित इत्यर्थः, श्लोकद्वयार्थमुपसंहरन्ति यथेति, अत्र तत्त्वरूपाश्चक्षुरादयः प्रतीयन्ते त आधिदैविका एवेति पूर्वश्लोकार्थः, तत्त्वकार्यरूपास्त्वगादयः प्रतीयन्त त आधिदैविका एवेति द्वितीयश्लोकार्थः, विराजुत्पत्तेः पूर्वावस्था द्वितीयश्लोक उक्तातत्र कार्यभूता उक्ता इति भावः ॥ १६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

विवितोसीत्यत्र परम्परयेत्यादि, दृश्यमाने चतुर्भुजदेह आत्मत्वेन यः प्रतीयत इत्यर्थः, आत्मा हीन्द्रियप्रेरकतया परम्परयैव प्रतीयते लोके न तु साक्षात्, तस्येन्द्रियातीतत्वात्, एवमत्रापि चतुर्भुजदेहे कश्चिदात्मा भविष्यतीतिप्रतीतिरतो यः परम्परयात्मा प्रतीयते चतुर्भुजरूप इत्यर्थः, अचेतनश्चेति, लोके ह्यचेतनो देहः साक्षात् प्रतीयत आत्मभिन्नत्वेनाचेतनतया चक्षुरादिविषयत्वात्, तथेहापि चतुर्भुजो देह आत्मभिन्न इत्यज्ञानकृतः प्रत्ययः, एव प्रतीतिद्वयमुपपाद्य तयोः परम्परासाक्षात्प्रतीतयोः स्वरूपं मयावगतमिति वक्तुं भवान् साक्षात्पुरुष इति वसुदेवेनोक्तं, तदाशयं स्फुटीकुर्वन्ति तदुभयरूपो भवानित्युक्तमित्यनेन, अयमर्थः, लोके देहदेहिनोर्भेदोस्ति तद्वदिहाप्यज्ञानां तथैव प्रतीतिर्भवेन् मया तु चतुर्भुजस्वरूपमेव देहत्वेन देहित्वेन ज्ञातं, युक्तं चैतत्, "एकमेवाद्वितीयं ब्रह्म" "नेह नानास्ति किञ्चने"तिश्रुतेः सजातीयादिद्वैतत्रयाभावात्, अतो देहदेहिरूप एक एव त्वमित्यर्थः, अत एव "सच्चिदानन्दविग्रह"मिति श्रुतौ पठितं, अतो न त्वयि देहात्मपार्थक्यमितिभावः, इह "भवानि"तिपदेनात्र प्रत्यक्षरूप आत्मा "सी"तिपदेन युष्मच्छब्दवाच्यः प्रत्यक्षो देहो गृहीतः, एवमात्मदेहौ पृथगुद्दिश्य तत्र "साक्षात्पुरुष" इत्यनेनाभेदं प्रतिपाद्य ब्रह्मत्वं साधितमिति ज्ञेयं, अथवेति, सर्वत्वं प्राप्तस्येति, "स सर्वं भवति" "इदं सर्वं यदयमात्मा" "पुरुष एवेदं सर्वमित्यादिश्रुतिभिर्यः सर्वरूपः स एव परमात्मातोस्मिंश्चतुर्भुजरूपे ब्रह्मत्वबोधनार्थं सर्वरूपता वाच्येति "भवत्पुरुष"पदाभ्यां क्रमेण बाह्याभ्यन्तररूपता प्रदर्शिता, अतो बाह्यरूप आन्तररूपस्त्वमेवेति सर्वरूपो विदित इत्यर्थः, प्रत्यक्षोप्यप्रत्यक्ष इति, चतुर्भुजरूपेण प्रत्यक्षत्वमिदमित्थतया ज्ञानाभावादप्रत्यक्षत्वमतो विरुद्धधर्माश्रयत्वमितितात्पर्यं सम्मुखोप्यसम्मुख इति, भवत्पदेन भातीतिव्युत्पत्त्या पूज्यत्वसूचनेन कृपया सम्मुखत्वं सूचितं, पुरुषपदेनान्तरत्वाद् बहिःप्राकट्याभावेन चक्षुराद्यगोचरतयासम्मुखत्वं, भक्तानां तु कृपया सम्मुखो बहिः प्रकटीभूय व्यवहारविषयो भवति, अन्येषां तु बहिःप्राकट्याभावेन केवलमन्तर्यामितया स्थितो भगवानसम्मुख एव ॥ १३ ॥

यथेमे विकृता भावा इत्यस्य विवृतावाधिदैविकचतुर्विंशतितत्त्वानीत्यादि, अयमर्थः, अस्मिंश्चतुर्भुजदेहे पृथिव्यादीनि यानि प्रतीयन्ते तान्याधिदैविकान्याधिदैविकानामतिरोहितानन्दांशत्वेनाविकृतत्वमतो नास्मिन् रूपे कोपि प्राकृतांश इति भावः, ननु चतुर्भुजस्यास्य साक्षात्पुरुषोत्तमत्वे नात्राधिदैविकतत्त्वानामपि विग्रहपातित्वं न वक्तुमुचितं केवलानन्दमयत्वादाधिदैविकतत्त्वानां तु भगवद्धर्मात्मकविशुद्धसत्त्वरूपत्वेन पूर्णरूपेनंगीकारादित्याशंक्य समाधिमाहुः प्रकृते सर्वांशो भगवानित्यनेन, अयमर्थः 'कृष्णस्तु भगवान् स्वय'मितिवाक्यादस्यावतारित्वेन सर्वेषामंशानामत्र विद्यमानत्वं, अंशानां तु भगवद्धर्मात्मकविशुद्धसत्त्वरूपविग्रहत्वेन तत्राधिदैविकतत्त्वानां सत्त्वं प्रमाणसिद्धमित्यंशिनि कृष्णे तादृक्तत्त्वानां प्रतीतौ न कोपि दोषः, नैतावता चतुर्भुजरूपस्यानन्दमयत्वं हीयत इति भावः ॥ १५ ॥

सन्निपत्येत्यस्य विवृतौ कार्येपि कारणेष्विवेति, यथा कारणान्याधिदैविकचतुर्विंशतितत्त्वानि 'यथेमेविकृता भावा' इत्यत्र विकाराराहित्येनोक्तानि तथैव कार्येष्वपि त्वक्चर्मादिष्वाधिदैविकत्वमत आधिदैविकानि कार्याणि त्वक्चर्मादीनि चतुर्भुजरूपे प्रतीयन्ते, आधिदैविकानामतिरोहितचिदानन्दत्वात् तेषां सत्तया न कोपि दोषः, अंशिनि कृष्णेंशानां सत्तयांशगतान्याधिदैविककार्यरूपत्वगादीनि प्रतीयन्तेंशी चतुर्भुजरूपस्तु केवलमानन्दमय एव, तत्र नाधिदैविकतत्त्वानामाधिदैविकत्वगादीनां वा विग्रहघटकत्वमिति बोध्यं, अत एव 'इयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया त' इत्यस्य विवृता 'वसौ प्राक्तनरूपो विन्यास इयानेतावानन्दमयस्य त्वन्य'इत्युक्तं, अतश्चतुर्भुजरूपं तु केवलमानन्दमयमेव, ज्ञापनार्थं इति, सन्निपत्येत्यादिना पूर्वश्लोकोक्तप्रकारानुवादे कृते तान्येवाधिदैविकानि चतुर्विंशतितत्त्वानि भौतिकैर्विकृतैश्चतुर्विंशतितत्त्वैर्विराजमुत्पाद्याधिदैविककार्येनुगतान्यत

आधिदैविकतत्त्वानुगतानि कार्याण्यप्याधिदैविकान्यनुवादं विना पूर्वोक्तस्मारणाभावे न दृश्यन्तेनुगता इवेत्येतावन्मात्रकथने भौतिकानामनुगतत्वं सम्भाव्येतात आधिदैविकप्रसक्त्यर्थमनुवाद इत्यर्थः, त्वक्चर्मादिरूपेण पृथिवीति, आधिदैविकत्वक्चर्मादिरूपेणाधिदैविकपृथिव्यनुगतात आधिदैविकास्त्वगादयोत्र प्रतीयन्त इत्यर्थः, एवं भगवत्स्वरूपविमर्शरीत्या आधिदैविककारणकार्ये निरूप्य लोकप्रसिद्धव्याख्यारीत्या लापयन्ति समष्टावित्यारभ्यान्यदपीत्यन्तेन, अस्मिन् पक्षे भौतिका भावा भौतिकतत्त्वानि विराजमुत्पाद्य समष्टौ तत्तद्रूपाः कार्यरूपा अनुगता इति श्लोकद्वयार्थो बोद्धव्यः, तत्र दृष्टान्तो रुधिरादिरूपं जलमिति, अतिदिशन्त्येवमिति, अनुगता इवेति, कार्यरूपेण अनुगता उत्पन्ना भवेयुरितिपूर्वपक्षाशयः, तत्र समादधते प्रागेवेत्यारभ्य न सम्भवतीत्यन्तेन, तथा च कारणत्वेन प्रकटसच्चिदानन्दरूपेणालौकिकभावेनाधिदैविकतत्त्वानामिह रूपे विद्यमानत्वात् पुनस्तेषां त्वगादिरूपेणोत्पत्तिर्नास्त्यपि त्वाधिदैविकतत्त्वान्येवावतारवत् त्वगादिशब्दवाच्यं रूपान्तरं गृहीत्वा तिष्ठन्तीति न तत्कार्यत्वमाधिदैविकत्वगादीनामपि तु रूपान्तरत्वमतो नित्यान्येव त्वगादीनीति कार्यत्वं तत्र भाक्तमिति भावः, अत एव अनुगता इवेतीवपदं, अत एव न तेषामिह सम्भव इत्यनेनाधिदैविककारणानां त्वगादिरूपेणोत्पत्तिर्निराकृता, तत्र हेतुमाहुः कारणानां विलक्षणत्वादिति, आधिदैविककार्यत्वगादिनिरूपितकारणत्वानामाधिदैविकतत्त्वानामित्यर्थः, विलक्षणत्वादिति, भौतिकतत्त्वेभ्यो विलक्षणत्वादित्यर्थः, अयं भावः, भौतिकानां तत्त्वानां लौकिककार्येष्वनुगतत्वं तत्तद्रूपेणोत्पत्तिराधिदैविकतत्त्वानां त्वाधिदैविककार्यरूपेण नोत्पत्तिराधिदैविककार्याण्याधिदैविककारणानामवतारवदंशरूपाणीति ज्ञेयम् ॥ १६ ॥

(५) भगवदीयनिर्भयरामभट्टनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

विदितोसीत्यत्र द्वादशात्मा हरिर्ज्ञेयस्त्रिधा च नवधा तथा वैदिकः प्रोक्तस्त्रिधा लौकिक उच्यते, वसुदेवेन नवभिः श्लोकैः स्तूयमानो नवधेति, देवक्या त्रिभिः श्लोकैः स्तूयमानो हरिस्त्रिधा, तत्र नवधा वैदिकस्त्रिधा स्मृत्युक्तप्रकारेण स्तूयमानो लौकिक उच्यते, तत्रोपपत्तिमाहुर्यज्ञस्त्विति, यज्ञस्तु पञ्चधा प्रोक्तश्चतुर्धा भगवानिति पञ्चात्मकश्चतुर्मूर्तिस्तन्त्रं वेदेन सम्मितं, अग्निहोत्रादिपंचात्मको यज्ञः प्रोक्तश्चतुर्धा वासुदेवादिव्यूहात्मकः, एवं पञ्चात्मकश्चतुर्मूर्तिश्चेति नवधा वैदिकः प्रोक्त इत्यर्थः, ननु चतुर्मूर्तिर्न वेदोक्तः किन्तु तन्त्रोक्त एवेति कथं नवधा वैदिक इत्याशंक्याहुस्तन्त्रं वेदेन सम्मितमिति, लौकिक इति, लौकिकस्त्रिगुणः प्रोक्तः स्मृतिश्चैव हि लौकिकी नवधा वसुदेवोस्तौत् त्रिधा चैव हि देवकी, लोकैर्भगवद्व्यतिरिक्तैर्ऋषिभिः प्रणीतत्वात् स्मृतेर्लौकिकत्वमुच्यते, एकेन प्रार्थनं पूर्वं द्वाभ्यां चैव तथापरं दशभिः पंचभिश्चैव निरूप्येते स्तुती उभे, ‘अयं त्वसभ्य’ इत्येकेन पूर्वं वसुदेवकृतं प्रार्थनं तथापरं देवकीकृतं प्रार्थनं द्वाभ्यां ‘स त्वं घोरा’दिति ‘जन्म ते मय्यसौ पाप’ इति श्लोकाभ्यामित्यर्थः, एवं प्रार्थनया सह दशभिर्वसुदेवकृता स्तुतिस्तथा प्रार्थनाद्वयेन सपञ्चभिर्देवकीकृता स्तुतिरित्युभेपि स्तुती निरूप्येते, यद्य‘प्युपसंहर विश्वात्म’न्नित्यनेन सह त्रिभिरेव ‘प्रार्थनात्रितयं तथे’ति तथापि केवलस्वार्थमुपसंहारप्रार्थनं द्वयं तु प्रकृतोपयोगि, तथा च रक्षाप्रार्थना जन्माज्ञानप्रार्थना चेति प्रार्थनाद्वयं मुख्यत्वविवक्षया पृथगुक्तं, चकारेण तृतीयापि संगृहीता, तथा ‘चोपसंहर विश्वात्म’न्नितिश्लोकेन सह त्रिभिः श्लोकैः प्रार्थनात्रयं मध्ये ‘मर्त्यो मृत्युव्याले’तिश्लोकेन ‘शरणाग’मने ‘हेतु’रुक्तः, अन्ते ‘विश्वं यदेत’दित्यनेन ‘विरोधपरिहार’ इति, एवं सति मुख्यतया त्रिभिरेव स्तुतिः, प्रार्थनाद्वयेन सह पञ्चमी रूपोपसंहारप्रार्थनाशरणागमनेहेतुविरोधपरिहारैः सहाष्टभिरितिविवक्षाभेदेन देवकीस्तुतौ त्रिभिः पञ्चभिरष्टभिश्चेतिप्रकारत्रयमुक्तं, शास्त्रत इति, शास्त्रतो भगवानेव प्रतीत्यापि दृढीकृतः बाधकं त्वन्यथाज्ञानमज्ञानं चापि हेतुतः, ‘विदितोसी’त्यत्र ‘विदित’ इत्यनेन शास्त्रतो भगवानेवेत्युक्तं, तत्र ‘व्यवहार’कथनेना‘सी’त्यनेन प्रतीत्यापि दृढीकृत इत्यर्थः, ब्रह्मत्वबाधकमज्ञानमन्यथाज्ञानं च चाक्षुषत्वादिहेतुभ्यः सम्भवति तद् ‘विदितोसी’त्यादिना निवार्यत इत्यर्थः, ‘सर्वं मां पश्य’न्त्विवतीच्छयैव चाक्षुषत्वं न त्विन्द्रियसामर्थ्येनेति न चाक्षुषत्वादिकं ब्रह्मत्वबाधकमित्यर्थः ॥ १३ ॥

बुभुत्सुबोधिका

विदितोसीत्यत्र द्वादशात्मेत्यादि, अत्र टिप्पणी, द्वादशधा प्रादुर्भाव इति क्रमेणोत्युक्तम् । तद्रूपेति भगवद्रूपे दशौ ययोस्ताभ्याम् । पूर्ववदिति ‘त’मित्यादिश्लोकद्वयवत् । त्रिधेति दशश्लोकैर्वसुदेवः अष्टभिर्देवकीत्यष्टादश श्लोकाः स्तुतौ, तदग्रे स्पष्टम् । स्तुत्योरिति दशभिरष्टभिश्च कृतयोरित्यर्थः । वैदिको लौकिक इत्यत्रावृत्त्या विशेषणं स्मृतेर्लोकवेदात्मकत्वादित्याहुः वैदिको लौकिक उच्यत इत्यनेनेति । आहुरिति कारिकाद्वयेनाहुः । ‘भगवा’नित्यस्यार्थमाहुः षड्गुणैश्वर्यवानिति । षड्गुणाः तद्दाता धर्मोप्युक्तः ऐश्वर्यरूपः । शेषं पूरयति स्म साकारेति । ऐश्वर्यकृतः । तन्त्रे पञ्चरात्रे । फलितमित्यादि अवान्तराभासः । इदमेवेति न नवविधोपदेशोक्तं, वेदमार्गत्वेन तन्त्रत्यागापत्तेः । नन्विति अवान्तराभासः । तत्रेति वेदे । अत्र त्विति तन्त्रे त्वित्यर्थः । तथेति भाव इति तन्त्रं वेदेन सम्मितमित्यर्थः । त्रिधात्व इति अष्टश्लोकैः कृतायास्त्रिधात्वे । लौकिको हरिर्यस्त्रिगुण इत्यत्र गुणपदार्थमाहुः अत्र गुणेति । प्राकृतेति प्राकृतगुणवाची । सा तथेति तन्त्ररूपा स्मृतिर्लौकिकी लोकैर्भगवद्व्यतिरिक्तैः ऋषिभिः प्रणीतेत्यर्थः । अत आधिदैविकादिरूपपरो गुणशब्दोष्टश्लोकेषु । त्रिधेति मुख्यव्यवहार इति भावः । लौकिकस्यैवेति शास्त्रदृष्ट्या दर्शनाविषयस्येति ज्ञेयम् । अत एवेति

त्रित्वादेव। अनुवदन्तीति भक्त्यानुवदन्ति। मुख्येति त्रिधाऽष्टधयोर्मुख्या। एकेन प्रार्थनमिति कारिकायां एकेनेत्यादेरर्थ उक्तः। त्रिधेत्यत्र पञ्चत्वाय देवकीस्तुतौ द्वयमाहुः द्वाभ्यां चेति। तदर्थमाहुः मर्त्यो मृत्य्वित्यादि। पर्यवसानत इति प्रपत्तिः विरोधपरिहारश्च तत्र प्रतीयेते पर्यवसानतः स्तुतिरूपं अपरमित्यर्थः। पर्यवसानतः स्तुतिप्रतिपादकाभ्यामिति चकारार्थः। एवं च एकेन वसुदेवस्तुतौ प्रार्थनं, पूर्वं नवभिः श्लोकैः पूर्वम्। तेन वसुदेवस्तुतौ दश श्लोकाः इत्यर्थः। त्रिधा देवकीस्तुतौ त्रिभिराधिदैविकादिभिः द्वाभ्यां श्लोकाभ्यां च पर्यवसानतः स्तावकाभ्यां अपरं प्रार्थनात् तथा अपरं स्तुतिरूपमेव न तु प्रपत्तिविरोधपरिहाराभ्यां परिसमाप्तार्थौ श्लोकौ। सिद्धमाहुः दशभिरित्यादि। पञ्चभिरिति द्वौ श्लोकौ आधिदैविकादित्रयं चेति पञ्च तैरिति कारिकार्थः। फलितमिति 'अपि संराधने प्रत्यक्षानुमानाभ्या'मिति व्याससूत्रम्। उभाभ्यामिति शास्त्रप्रत्यक्षाभ्याम्। तथेति दृढीकृतः। आवश्यकत्वमिति दृश्यमानस्य ब्रह्मत्वार्थम्। बाधकमितीति अन्यथाज्ञानं प्राकृतत्वेन ज्ञानम्, अज्ञानं ब्रह्मत्वेन, एतदुभयं ब्रह्मत्वे बाधकम्। ब्रह्मसाक्षात्कारे ह्यज्ञानमन्यथाज्ञानं च न तिष्ठतीति भावः। शास्त्रप्रत्यक्षाभ्यां तन्निरूपणाभावे एतयोरन्यथाज्ञानमज्ञानं वा शङ्क्येत, तथा च दृश्यमानस्य ब्रह्मत्वं न सिध्येदित्यर्थः। हेतुत इत्यस्यार्थमाहुः उभयोर्हेतुरिति। अज्ञानान्यथाभावयोर्हेतुः। आदिना प्राकृतत्वज्ञानम्। तस्मादिति हेतुतः। सुबोधिन्याम्। तत्रेति ब्रह्मत्वे साधनीये। प्रथममिति बाधकशङ्काभ्यः प्रथमम्। बाधकधर्मैरिति ब्रह्मत्वे बाधकमज्ञानमन्यथाज्ञानं च तद्धेतुभूतैर्धर्मैरित्यर्थः। चाक्षुषत्वनिमित्तेति चाक्षुषत्वस्य निमित्तं लोकद्वारा व्यवहार्यो भविष्यामीतीच्छा तदन्तर्गता ज्ञातस्वरूपो भविष्यामीतीच्छा तस्या अज्ञानात्। ज्ञातस्वरूपेति ज्ञातस्वरूपो भविष्यामीतीच्छयेह ज्ञातस्वरूपाभ्यां कृते स्तोत्रे इत्यर्थः। जानातीच्छति यतत इत्यनुक्रमात्। ताभ्यां ज्ञातस्वरूपस्य स्तोत्रे इति वा। विदित इति पुरुषोत्तमत्वेन स्मृतः। सम्यगिति ज्ञाने सम्यग् यथा भवति तथा। अयं परः पुमान् कुक्षिगतो यश्छान्दोग्याष्टमोपदेशोक्तोतो भक्तानुग्रहाय चतुर्भुजः। धर्मग्लानिभक्तदुःखादिजन्या कारणम्। भक्तमनोरथपूरकत्वात्। बहव इति शङ्कराचार्यप्रभृतयः। ज्ञातस्वरूपत्वं व्युत्पादयन्ति स्म यस्त्वित्यादि। अत्र टिप्पणी। सुबोधिनी। चतुर्भुज इति तेनात्रावतारविषये माध्वमतेन भागत्यागलक्षणेति भावः। सिद्धान्ते विरुद्धधर्माश्रयः। अद्भुतः। इत्यर्था स्फुटेति न ख्याता, यस्त्वित्यारभ्य प्रयोगान्तं व्याख्यायते अत्रैवं ज्ञेयमिति। छान्दसः प्रथमपुरुषस्थाने मध्यमपुरुषप्रयोग इत्यनुक्त्वा व्याकरणोक्तरीत्या वाक्यभेददोषेण यत् सुबोधिन्यां व्याख्यातं तस्मिन् प्रत्यक्षव्याख्याने एवं वक्ष्यमाणप्रकारेण ज्ञेयमित्यर्थः। छान्दसत्वकल्पनापेक्षया शब्दबलविचारकाणां 'भवान् असी'तिपदाभ्यां वाक्यभेदपक्षो ज्यायान् बाह्याभ्यन्तररूपनिरूपक इति व्याकरणस्मृतिः प्रबलेति हेतोः। किञ्च भवान् उत्पत्तिसामयिको विदितः। भवतेरुत्पत्त्यर्थकस्य षड्भावविकारेषु प्रथमस्य वाक्यभेदेनोक्तिः। असिपदेन द्वितीयभावविकारः। स स्थितौ अस्तिपदवाच्यायामिति न वाक्यभेदो दोष इत्याशयेनाहुः असीति व्यवहार इति। 'व्यवहारस्त्वहमिति ममेत्युद्धव या मतिः'। स्थितावपीति द्वितीयभावविकारेपि। व्यवहारमात्रोक्तिरिति न तु युष्मच्छब्देनोपस्थितोक्तिः। स युष्मच्छब्देनोपस्थितः। तेन विना असीतिव्यवहारेण विना। तमिति युष्मच्छब्देनोपस्थितम्। अत एवेति स्थितौ अर्थाक्षेपादेव। सुबोधिनी। य इति चेतनस्थानीय इत्येवं स्फुटेति तां विहाय अध्याहारापेक्षाभावात् तदपेक्षाकथनारुच्या पक्षान्तरमाहुः वस्तुतस्त्विति। पुरुषत्रयरूपो वेत्यारभ्य पदत्रयमित्यन्ता सुबोधिन्यत्र व्याख्याता। सुबोधिन्याम्। अतः शास्त्रत इत्यादि बाह्याभ्यन्तरभेदेन वेदनापेक्षणाच्छान्दसत्वस्यानावश्यकत्वात्। शास्त्रतः आभ्यन्तररूपः लोकतः लोकदर्शने प्रत्यक्षतो बाह्यरूपः यः। अधुना भवान् विदितोसीति छान्दसप्रयोगेपि बाह्याभ्यन्तरभेदोपपत्तिरन्यथा पूर्वेण चारितार्थ्यमित्याशयेनाहुः अनेनेत्यादि। अङ्गग्रन्थेन। भवत्पदस्य द्वेधा व्युत्पादनेनेत्यर्थः। य इति भातीति भवानिति व्युत्पत्त्या यो भवानित्यर्थः। 'चतुर्भुज' इत्यत्र भवत्युत्पद्यत इति भवान्। ज्ञाता लोकतो चेतनः। इत्युक्तमिति वेदोवयवीतिपक्षेप्युक्तम्। अथ वेति, अत्र टिप्पणी, भवच्छब्दसङ्गतीति आवृत्तिं विना तथा। देहरूपेणेति 'यथा दशमस्त्वमसी'त्यत्र। तदभीति भातेर्डवतौ तथा। अग्रिमेणेति पुरुषपदेन। भवानिति वेदाङ्गनिष्पन्नात् पश्चात् पुरि शेत इति पुरुष इति तथा। तेनेति भवत्पुरुषपदाभ्यामेकरूपत्वेनोभयोक्तिस्मारितकृत्स्नत्वेन। प्रतिज्ञायेति प्रतिज्ञाहेतूदाहरणोपनयनानि गमनानि पञ्चावयवा इतिवत्। सुबोधिन्याम्। सैन्धवदृष्टान्तन्यायश्छान्दोग्ये। उपसंहरिष्यन्निति वसुदेवः विशुद्धसत्त्वेऽवतारकारणे स्वस्मिन्नुपसंहरिष्यन्। 'एवं भवान् बुद्ध्यनुमेयलक्षणै'रिति श्लोकेनोपसंहरिष्यन्। तत्र स्वरूपमात्रमुक्तम्, बहिरन्तररूपोपसंहार उक्तः। अस्मिन् पक्षे एकेन प्रार्थनं पूर्वं बोध्यम्। असीतिक्रियायाः प्रतिज्ञायां निवेशात् सर्वदृगस्त्विति प्रार्थने लोडन्तक्रियाध्याहारात्। यद्वा। विदिते प्रतिज्ञाते ब्रह्मत्वं विराट्त्वाद्युपसंहरिष्यन् प्रापयन्। 'उपसंहारोर्थाभेदा'दित्यादिव्याससूत्रात्। भवान् पुरुष इति भवान् विराट् पुरुषस्त्वण्डसंस्थितः अतः सर्वत्वं प्राप्तः। 'तृतीयं सर्वभूतस्थ'मितिवाक्यात्। तेन पूर्वोक्तः भवान् चतुर्भुजः महतः स्रष्टा बोध्यः। भारते सारं गीता। गीतायामपि विश्वरूपदर्शनाध्यायः सारमिति। उपसंहार्याधिभौतिकरूपमुक्त्वाध्यात्मिकं रूपमाहुः प्रत्यक्ष इति। स्वेच्छया प्रत्यक्षः आध्यात्मिकरूपो भवान् अप्रत्यक्षः पुरुष इति। आधिदैविकं रूपमाहुः सम्मुख इति। भक्तसम्मुखः भक्त्या प्रकटः भवान्। असम्मुखः पुरुषः व्यापकः। वेदान्तसारभागवतपक्षमुक्त्वा वेदसारभागवतपक्षमाहुः पुरुषत्रयेति। टिप्पण्यां व्याख्यातम्। असि भवानिति अत्रापि टिप्पणी समस्तं पदमिति असीति विभक्तिप्रतिरूपकमव्ययम्। तेन सह समासं प्राप्तमेकं पदम्। यथास्ति क्षीरा गौरित्यादावस्तीत्यव्ययं प्रथमपुरुषार्थे। तथासीत्यव्ययमपि मध्यमपुरुषार्थे। संहितायामापस्तम्बादि'रसि विष्णव' इत्याह, 'अधस्तमसि विष्णवे त्वे'त्याह, 'यज्ञो वै विष्णुः यज्ञायैवैनदद्रस्तं करोती'त्यनेन। तेन सुबोधिन्यामसि भवान् साक्षात्पुरुष इति पदत्रयं न व्याख्येय-

विरोधापादकम्। 'यस्यामतं तस्य मत'मितिश्रुतेरिति द्योतितम्। सुबोधिन्याम्। पुरुषपदकृत्यमाहुः पुरुषप्रवेशादिति। पुरुष आनन्दमयः पुरा आसेति पुरुषपदव्युत्पत्तेः। तस्य प्रवेशादित्यर्थः। त इति अन्नमयादयः। न त्वात्मस्फूर्ताविव्यादिः 'प्रकृतेः पर' इत्यस्याभासः। प्रकृतीति तेन परत्वं नियन्तृत्वं इत्युक्तम्। गुणानामिति त्र्यंशेष्वेकप्राधान्यं द्वयोस्तिरोभावः प्राकृतसत्त्वादिश्च तैगुणानाम्। मायाजीवेति 'आत्मानं त्रिगुणात्मकं परोपि मनुत' इति समाधिभाषायां मायाजीवाः, तेषाम्, आदिना जडानाम्। प्राकट्यकरणादिति कौस्तुभपीताम्बराभ्यां प्राकट्यकरणात्। प्रत्यक्षदोषस्त्वित्यादि अत्र टिप्पणी प्रत्यक्षविषय इति 'भवा'नित्यत्र भवतेरुत्पत्त्यर्थकस्य शतृप्रत्ययान्तस्य ग्रहणात् तथा। 'असी'ति षड्भावविकारेषु द्वितीय इत्येवकारः। उक्तव्यवहारेति प्रत्यक्षव्यवहारविषयस्य। उक्तरूपत्वमिति असि भवानित्युक्तरूपत्वम। तत्परिहार इति इच्छया प्रत्यक्षदोषपरिहारः। शरीरप्रत्यक्षात् 'लोकद्वारा व्यवहार्यो भविष्यामी'ति भाष्ये सत्त्वात्। तयोरिति विदिताविदितयोः। अन्यदितिपदेन भेदमाह। वदद्व्याघात इति शब्देन विदिते भगवति विदितभेदे वदद्व्याघातः। यदादृश्यमिति अदृश्यमिति पदच्छेदः। उभयेति इन्द्रियसामर्थ्येनादृश्यत्वसिद्ध्या प्रभिच्छालक्षयोन दृश्यत्वधर्मसिद्ध्या। भाष्येनैकदेशिमतम। सुबोधिन्याम्, तथा भविष्यामीति। प्रकृतेः परो भविष्यामीत्यर्थः। अनुभवानन्द इति ज्ञानानन्तानन्दः। अयोगोलके वह्निरिवेति पूर्वं उत्तरं चान्वेति चिदित्यनुभवविवरणम्। नन्वपरोक्ष उक्तदेह इति षड्विधत्वभङ्गमाशङ्क्याहुः आत्मा नोक्त इति बुद्धीः पञ्च ज्ञानेन्द्रियाणि, ज्ञानकारणानि वा। षड्विध इति द्विगुणसच्चिदानन्दः। अयमिति वसुदेवज्ञानविषयः। प्रत्यन्तेति आदिशब्देनाप्रत्यक्षव्यवहारः ॥ १३ ॥

स एवेत्यत्र तत्रेति उदरे। दर्शनमात्रेणेति 'ततो जगन्मङ्गल'मितिश्लोके समाधौ देवकीं भावयित्वा 'देवक्यां' भगवन्तं 'स्थापितवा'नित्युक्तम्। तथा च दर्शनमात्रेणेत्यस्य मानसप्रत्यक्षमात्रेणेत्यर्थः। स्थित्यर्थमिति यावज्जीवं स्थित्यर्थमिति प्रथमश्रुतौ। कार्यार्थं भूभारहरणादिकार्यार्थमिति द्वितीयश्रुतौ। क्षुरोसिः। विश्वम्भरो भगवान्। दृष्टान्तयोः कार्ये ऊह्ये, विश्वम्भरः कीटविशेषः। अनेकरूपभवनार्थमिति सृष्टानामनेकरूपत्वात्। अन्यप्रवेशनार्थम् आतपादन्या छाया तस्याः प्रवेशनार्थम्। त्रिभ्योऽन्यद्वा प्रवेशनं तदर्थं वा। छायाप्रवेशनार्थमित्यर्थः। कश्चनेति द्वितीयः। दक्षिणायां वेति इवार्थे वाशब्दः। "जातो रुचेरजनयत् सुयमान् सुयज्ञ आकूतिसूनुरमरानथ दक्षिणाया"मित्यत्र द्वितीयस्कन्धे सिद्धः। चतुर्थस्कन्धारम्भेपि वर्तते। 'यस्तयोः पुरुषः साक्षात् विष्णुर्यज्ञस्वरूपधृक्, या स्त्री सा दक्षिणाभूतेरंशभूतानपायिनी'त्यादिना दक्षिणाप्रसङ्गः। तथेति सोपाधिकः कार्याभिनिविष्टश्च वा। तथा चानुपाधिकत्वं कार्यार्थतया प्रवेशभावना चोपपद्यत इत्यर्थः। इत इति दक्षिणायाः। इदं शुक्रं कर्तृ। तामिति दक्षिणाम्। अवतारप्रवेश उक्तः। सामान्यप्रवेशप्रकारप्रश्नमवतारिविषयकमाहुः तर्हीत्यादि इत्यर्थ इत्यन्तम्। प्रकार इति सामान्यप्रकारः। पूर्वमिति सृष्टेः पूर्वम्। स्वप्रकृत्येत्यादि स्वस्य भगवतः प्रकृतिः स्वभावः। आधिदैविकेति अत्र टिप्पणी तथोक्तमिति आधिदैविकस्वभावेनेति व्याख्यातम्। सुबोधिन्याम् अपेक्ष्यत इति स्वभोगार्थम्। अन्यार्थसृष्टावन्येषां मायाजीवानां भोगात्। यद्वा। साक्षित्वप्रकाशननियमनाद्यर्थमपेक्षते। न तु स्वार्थेति स्वार्थसृष्टौ कारणतया विद्यमानेनैव रूपेणान्तर्यामिकार्यस्य च कारणात् नापेक्षते। कारणत्वेनैवेति आधिदैविकरूपेणैव। आधिदैविकादिभेदस्य सर्वत्र सत्त्वादेवकारः। सृष्ट्यन्तरमिति पुरुषद्वारा सृष्टिः। सृष्ट्यन्तरन्यायेनेति वा पाठः। अग्रे तथोक्तेः। प्रकार इति उक्तसामान्यप्रकारः। ननु 'तमद्भुत'मित्यत्र लीलोपयोगिप्रपञ्चस्य ब्रह्मात्मकत्वमभिप्रेतमित्युक्तम्, इह तु त्रिगुणात्मकत्वमुच्यत इत्यत आहुः यथेत्यादि ज्ञेयेत्यन्तम्। प्रवेशभावनेति प्रवेशस्मरणम्। तेषामेवेति सात्त्विकादीनामेव। एवकारोन्ययोगव्यवच्छेदकः। मायासाम्यस्य दौर्बल्यमभिप्रेत्य पक्षान्तरमाहुः अत्रिगुणात्मकमिति। अकारप्रश्लेषमप्रतीतमनङ्गीकृत्य पक्षान्तरद्वयमाहुः यद्वेत्यारभ्य उक्तरीत्येत्यन्तम्। अत्रैव 'स्व'पदानर्थक्यपरिहारः। 'तद'न्वितिपदव्यर्थत्वपरिहारश्च। योग्र इदं प्रकृत्याऽक्षरद्वारा त्रिगुणात्मकं सृष्ट्वा तदनु स एव स्वप्रकृत्याऽत्रिगुणात्मकं सृष्ट्वा अग्रे पूर्ववत्। तदन्विति 'अनुकृतेस्तस्य चे'तिसूत्रादिदमुक्तम्। अत्र युक्तिमाहुः अन्यथेति। 'अनाविष्कुर्वन्नन्वया'दितिसूत्रादाहुः। यद्वानन्तरमिति रूढमिति यौगिकशक्तिसङ्कोचात्मकरूढिस्तद्युक्तम्। वेदे योगरूढिः वेदान्ते ईदृशी रूढिः प्रस्थानरत्नाकरे ग्रन्थे उक्ता। उक्तदोषः इति आनन्तर्यस्य शाब्दत्वदोषः। त्रिगुणात्मकत्वदोषो वा प्रपञ्चस्य। अनन्यलभ्यस्य शब्दार्थत्वात्। अत एवेति अनुप्रवेशस्य रूढत्वादेव। अन्विति यथा भुक्त्वा व्रजतीत्यत्रानूपसर्गाभावेप्यानन्तर्यस्य क्त्वाप्रत्ययेनैव सिद्धेर्नानूपसर्गः। उक्तरीत्या इति अतः पूर्वव्याख्यानोक्तरीत्या ॥१४॥

यथेमे इत्यत्र दूषणान्तरमिति प्राकृततुल्यत्वम्। तथैवेति तादृशैरविकृतसदृशैः। मूलस्थ'तथा तै'रित्यस्य विवरणम्। 'तैः' इति वक्ष्यमाणा ये विकृतास्तैः। तेन विराजि आध्यात्मिकानि चतुर्विंशतितत्त्वानि। रूपरसादीति पूर्वमादिपदेन गन्धादयः। अग्रे आदिपदेन क्रियादयः। अमिलिता इति चिक्रीडिषया विशेषपदार्थैर्नामिलिताः। विनापि 'सह'पदप्रयोगं सहार्थे तृतीयेति व्यवस्थापितत्वात्, अत्र सहपदप्रयोगं विनापि 'विकृतै'रिति तृतीयया सहार्थलाभेति 'सह'पदप्रयोगादन्योन्यमपि सहभावो विवक्षित इत्याशयेनाहुः सर्वे संहत्येति। तेनाधिकान्यपूरणयोरङ्गमन्थाप्राप्तौ प्रसङ्गो बोध्यः। हिशब्दार्थमाहुः युक्तश्चेति। कार्ये इति देहे। सर्वांश इति अत्र सर्वांशो भगवानित्यंशसम्बन्धिन एते भावाः। प्राकृताः प्रतीयन्त इत्यर्थः। अंशानां चतुर्विंशतितत्त्वानां सत्त्वव्यवहितत्वात् सत्त्वनिष्ठा विराड्देहजनकाः कारणभूता भावास्तत्र प्रतीयन्ते। पुरुषोत्तमस्य त्वानन्दमयत्वात् तत्र शिरआदयः प्रियादिरूपा एव, न हि ते कारणभूताः। 'कारणत्वं न चैवास्ति चिदानन्दांशयोः स्वत' इति सिद्धान्तात्। न कोपाति पृथिव्यादिभूतदर्शनकृतो यः

स्वरूपेऽनित्यत्वविकृतत्वादिप्रतीतिरूपो दोषः सोपि नेत्यर्थः। किञ्चानन्दमयः लीलास्थकालः। तथा दुःखादिलीला अप्यानन्दमय्यः। यतः सुखात्मके जगति ईर्ष्यादिमिश्रणे सुखं दुःखायते। भगवदिच्छाननुकूलत्वे च दुःखम्, न तु स्वत इति न कोपीत्युक्तम् ॥१५॥

सन्निपत्येत्यत्र 'नैश्चिन्त्यं चाचि पूर्ववदि'ति पूर्वश्लोकेवतारिविषयोऽवतारेप्युक्तप्रायः। अवतारेप्यन्यदप्युच्यते सन्निपत्येति। सन्निपातोवतारिणि सिद्धः। अवतारे त्वाहुः मिलित्वेति। मायाजवनिकां दूरीकृत्योद्घाटितांशे मिलित्वा। 'यदेकमव्यक्तमनन्तरूप'मितिश्रुतेः। दर्शनाच्च। यद्वा, विराजि त्वाहुः मिलित्वेति। दार्ष्टान्तिकस्याग्रे कथनात्। विराजि मिलित्वा। पूर्वेति विराजमिव सम्यक्। 'सौन्दर्यं प्रकटीकरिष्यामी'तीच्छानुकूलम्। प्रद्युम्नव्यूहमुत्पाद्येति पूर्वस्य वैराजस्यानुवादः। सिद्धस्य कथनमनुवादः। कारणेष्विवेति विराडादिषु। एतन्नानावताराणां निधानं बीजमव्यय' मितिवाक्यात्। आधिदैविकमिति यद्यपि विराड्याध्यात्मिकं रूपं तथाप्यवतार्यभेदादाधिदैविकमित्युक्तम्। विराड्यपि युक्तम्। 'यस्तु आध्यात्मिकः प्रोक्तः सोसावेवाधिदैविक' इतिवाक्ये आधिदैविकाध्यात्मिकयोरभेदोक्तेः। अनुगता इति अग्रिमव्याख्यानुरोधात् यतो दृश्यन्तेऽतोनुगता इव सन्तीत्यन्वयः। पटे तन्तव इव। पूर्वोक्ता अविकृता भावाः पूर्वं विराजि तत्त्वरूपेण दृष्टाः पुनः कार्यरूपव्यष्टौ तत्त्वकार्यत्वक्चर्मादिरूपेण दृश्यन्तेऽतः कार्येनुगता इव सन्तीत्यर्थः। अनुगतत्वं विशदयन्ति स्म पृथिवीति सङ्घातरूपस्मदादिदेहे। कारणभूता आधिदैविकी पृथिव्यनुगतेव। विराड्यावरणरूपादौ रूपे आनन्दः पृथिवीरूपेण प्रतीयते। वायवीयदेहे वायुः पृथ्वीव प्रतीयते यथा। सर्वसङ्ग्रहार्थमाहुः तत्तद्रूपा चेति। घटादौ सर्वत्र तत्तत्कारणरूपा घटत्वादिरूपाधिदैविकी पृथिव्यनुगतेव। रुधिरादीति अस्मदादिसमष्टौ देहरूपायां जलं रुधिरस्वेदादिरूपम्। विराजि जलमावरणरूपम्। हिमकरकादौ च तत्तत्कारणरूपमनुगतमिव। अदोरूपे तु वायुर्जलमिव वायवीयदेहे तद्वदानन्दरूपं जलम्। अवतारे तु वैराजं जलम्। अन्यदपीति तेज आदि सत्त्वान्तरम्। अतः परं तत्त्वानां कृत्स्नप्रसक्तिवारणाय बीजाङ्कुरन्यायमवतारयन्ति स्म तर्हीत्यादि। अत्रापीति शेषः। भवन्त्विति उत्पद्यन्ताम्। प्रागेवेति अवतारिदशायाम्। कारणत्वेनेति न तु कार्यत्वेन। 'एतन्नानावताराणां निधानं बीजमव्यय'मितिवाक्यात्। इहेति स्वरूपे, ब्रह्माण्डोपरि च। इहोत्पत्तिरिति कार्ये पुनरुत्पत्तिः। विलक्षणत्वादिति आधिदैविकत्वादिना। 'तत् सृष्ट्वा तदेवानु प्राविश'दिति श्रुतिविरोधं वारयन्ति स्म साक्षादिति। एवकारेण न तु श्रुत्या। श्रुतिबोधितः कृष्णत्वप्रवेशस्तु वर्तते श्रुतिप्रामाण्यात्। पूर्ववत् तेषामपीति अवतारिदशावत् तेषां त्वक्चर्मादीनाम्। अत्रेत्यवतारे। न कोपीति शास्त्रसिद्धत्वात् तद्विसंवादिप्रतीतिकृतो विरोधोऽकिञ्चित्करत्वान्नेत्यर्थः ॥ १६ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

कारिका—द्वादशात्मा हरिर्ज्ञेयस्त्रिधा च नवधा तथा। नवधा वैदिकः प्रोक्तस्त्रिधा लौकिक उच्यते ॥ १ ॥
यज्ञस्तु पञ्चधा प्रोक्तश्चतुर्धा भगवानिति। पञ्चात्मकश्चतुर्मूर्तिस्तन्त्रं वेदेन सम्मितम् ॥ २ ॥
लौकिकस्त्रिगुणः प्रोक्तः स्मृतिश्चैव हि लौकिकी। नवधा वसुदेवोऽस्तौत् त्रिधा चैव हि देवकी ॥ ३ ॥
एकेन प्रार्थनं पूर्वं द्वाभ्यां चैव तथापरम्। दशभिः पञ्चभिश्चैव निरूप्येते स्तुती उभे ॥ ४ ॥
शास्त्रतो भगवानेव प्रतीत्यापि दृढीकृतः। बाधकं त्वन्यथाज्ञानमज्ञानं चापि हेतुतः ॥ ५ ॥

कारिकार्थ - भगवान् श्री हरि द्वादशात्मा है, ऐसा प्रतिपादन नव और दश इन दो श्लोक के ऊपर की कारिकाओं से अनेकधा किया जा चुका है, विशेष श्री वसुदेव जी श्री देवकी जी के द्वारा की हुई स्तुतियों के श्लोकों की संख्या भी उसी तत्त्व की परिचायक है इस आशय को आचार्यचरण अब आगे की कारिकाओं में निरूपण करते हैं। श्री हरि को द्वादशात्मा जानना चाहिये, क्योंकि श्री वसुदेवजी ने नव श्लोकों द्वारा स्तुति कर उनकी नवविधता बतलाई है और श्री देवकी जी ने ३ (तीन) श्लोकों द्वारा स्तुति कर उनकी त्रिविधता बतलाई है। दोनों स्तुतियों की संख्या को मिलाने से द्वादशविधता स्पष्ट हो जाती है। वैदिक प्रकारसे नव श्लोकों से गाये हुए भगवान् नवधा वैदिक रूप से बतलाये गए हैं, और स्मृति निर्दिष्ट प्रकार से तीन श्लोकों से स्तुति किये हुए भगवान् त्रिधा स्मार्त या लौकिक रूप से कहे जाते हैं। इस प्रथम कारिका में आचार्यचरण श्री वसुदेवजी की स्तुति में दश श्लोक के रहते हुए नवश्लोक कहते है और श्री देवजी की स्तुति में आठ श्लोकों के रहते हुए भी तीन श्लोक कहते है इसका तात्पर्य यह है कि जो वसुदेव जी का अन्तिम दशवाँ श्लोक है उसमें स्तुति नहीं है लेकिन हमारे घर आप का पधारना योग्य नहीं और आपके पधारने के समाचार जानकर अभी कंस आ जायगा ऐसी वस्तुस्थिति का कथन मात्र है। श्री देवकीजी के आठ श्लोकों में से तीन ही श्लोकों में भगवत्स्वरूप का और भगवदैश्वर्य का स्तवन है और पिछले पांच श्लोकों में दैन्य अभ्यर्थना कुछ निवेदन आदि बातें आती है। अग्निहोत्र १ दर्शपूर्णमास २ पशु ३ चातुर्मास्य ४ सोम ५ इन भेदों से यज्ञात्मा भगवान् पांच प्रकार के हैं, एवं वासुदेव १ सङ्कर्षण २ प्रद्युम्न ३ अनिरुद्ध ४ इन व्यूहों के भेद से भगवान् चार प्रकार के हैं, फलतः भगवान् पञ्चयज्ञात्मक है और चतुर्व्यूहात्मक भी हैं, यद्यपि वेद भगवान् ने व्यूह मूर्ति का निरूपण नहीं किया है किन्तु तन्त्र ने किया है तथापि तन्त्र भी वेद तुल्य है इसलिये वैदिक पञ्चयज्ञात्मक और तांत्रिक व्यूह चतुष्टयात्मक मिलकर नवधा स्वरूप को यहाँ वैदिक पद से लिया गया है ॥ २ ॥ सत्त्व, रज, तम इन गुणों के भेद से लौकिक, स्वरूप त्रिविध

कहा है, और श्री देवकीजी ने स्मृति की प्रक्रिया से स्तुति की है स्मृतिकार ऋषियों ने लोकरीति से वर्णन किया है अतः स्मृति लौकिक ही कही गई है। वसुदेवजी ने नवधा स्तुति की है, और देवकी ने त्रिधा स्तुति की है। दोनों मिलकर द्वादशधा बनेगी ॥३॥ यद्यपि श्री देवकी जी एवं श्री वसुदेव जी दोनों की स्तुति के संकलित १८ श्लोक है परन्तु प्रथम कारिका में श्री वसुदेव जी के नव और देवकी जी के तीन श्लोक को जोड़ कर बारह प्रकार कहे गये हैं। अब दोनों स्तुतियों में पन्द्रह एवं अठारह प्रकार का समन्वय बताते हैं। प्रथम जो वसुदेवजीकृत स्तुति है उसमें नब श्लोक स्तुति के और एक श्लोक प्रार्थना का ऐसे दश श्लोक होंगे इसलिये इस चतुर्थ कारिका में "दशभिः" पद से एक वसुदेव जी के दश श्लोक कहें। देवकीजीकृत स्तुति के लिये "पञ्चभिः" पद कहा उसमें तीन श्लोक स्तुति के और दो श्लोक प्रार्थना के ऐसे पांच प्रकार की स्तुति कही। इसी विषय का विशद विवरण यह है कि—आचार्यचरणों ने प्रथम कारिका में श्रीवसुदेवकृत स्तुति "नवधा" और श्री देवकी जी कृत स्तुति को त्रिधा ऐसा कहा। अब आचार्यचरण चतुर्थ कारिका में पुनः **दशभिः पञ्चभिश्चैव निरूप्येते स्तुती उभे** दश श्लोकों से और पञ्च श्लोकों से दोनों स्तुतियों का निरूपण किया जाता है ऐसी आज्ञा करते हैं तो इसका रहस्य यह है कि पूर्व में श्री वसुदेव जी कृत स्तुति में प्रार्थना के श्लोक को न लेकर स्तुति के नव श्लोक कहे। अब प्रार्थना के श्लोक को लेकर "दशभिः" दश श्लोकों से स्तुति है ऐसा कहते हैं। अब श्री देवकी जी कृत स्तुति में आठ श्लोक है फिर "पञ्चभिः" कहते है तो इसका तात्पर्य यह है कि प्रारंभ के तीन श्लोकों में ही मुख्यतया स्तुति है। जो चतुर्थ श्लोक है उसमें तो मात्र तृतीय श्लोक में "**क्षेमधाम प्रपद्ये**" कहकर देवकीजी ने प्रपत्ति का जो निर्देश किया उस प्रपत्ति का कारण बताया गया है इसलिये चतुर्थ श्लोक का तृतीय श्लोक में अन्तर्भाव हो जायगा। फिर पञ्चम श्लोक में रक्षण की प्रार्थना है और षष्ठ श्लोक में कंस को भगवत्प्रादुर्भाव का ज्ञान न हो यह प्रार्थना है अतः प्रार्थना दो प्रकार की और तीन प्रकार की स्तुति उन दोनों का जोड़ कर इस कारिका में पञ्चभिः पाँच श्लोकों से स्तुति की है ऐसी आचार्यचरणों ने आज्ञा की है। अब फलित यह हुआ कि चतुर्थ श्लोक का तृतीय में अन्तर्भाव करने से तीन श्लोक पञ्चम और षष्ठ दो श्लोकों में प्रार्थना इस तरह तीन और दो मिलकर पांच श्लोक स्तुति के बने। अब रहे सप्तम और अष्टम दो श्लोक तब इन दोनों में से सप्तम श्लोक में भगवान् के रूप के उपसंहार की प्रार्थना है लेकिन उस प्रार्थना का पूर्व प्रार्थनाओं के समान स्तुति में उपयोग नहीं अतः दो ही प्रार्थना बनी तीन नहीं। अष्टम श्लोक में तो प्रार्थना नहीं है और स्तुति भी नहीं है लेकिन विश्व को धारण करने वाले भगवान् के गर्भगत होने में विरोध का केवल परिहार ही है, अतः इस श्लोक का स्तुति में सन्निवेश उपयुक्त नहीं इस दृष्टि से अवलोकन करने पर विदित होता है कि देवकीकृत स्तुति प्रधान रूप से तीन प्रकार की है उनमें प्रार्थना के दो श्लोको का सन्निवेश करने से स्तुति पाँच प्रकार की होती है यह बात "**दशभिः पञ्चभिः**" कारिका में कही गई है। और देवकी जी के आठ श्लोक तो है ही तब संख्या की दृष्टि से स्तुति आठ प्रकार की भी है ॥ ४ ॥

'विदितोऽसि' इस वाक्य में वसुदेवजी ने भगवत्स्वरूप को शास्त्रसिद्ध कहा है और प्रतीति के द्वारा भी उस शास्त्रैक-समधिगम्य स्वरूप की दृढता की है। भगवत्स्वरूप के चक्षु आदि इन्द्रियों के विषय हो जाने के कारण लोगों को भगवत्स्वरूप के ब्रह्म रूप होने में बाधा डालने वाला अन्यथा ज्ञान एवं अज्ञान हो सकता था परन्तु वसुदेवजी स्तुति के द्वारा **'विदितोऽसि'** वाक्य में उस अदृश्य और इन्द्रियादि से अग्राह्य ब्रह्म की स्वेच्छा से दृश्य ग्राह्य होने की सूचना देकर उस अज्ञान एवं अन्यथा ज्ञान का निवारण करते हैं ॥ ५ ॥

तत्र प्रथमं बाधकधर्मैश्चाक्षुषत्वादिभिः—उक्त स्तुति में सर्व प्रथम वसुदेवजी ने **'विदितोऽसि'** इस वाक्य से मुझको आप का यथार्थ ज्ञान आप के दर्शन से हो चुका है ऐसा कह कर भगवान् के विषय में अपने अज्ञान का निराकरण किया है। अज्ञान की सम्भावना इस प्रकार हो सकती है कि ज्ञानियों का यह मन्तव्य है कि ब्रह्म तो अतीन्द्रिय है, उसका चक्षु आदि इन्द्रिय से ग्रहण नहीं हो सकता, इसलिये जो स्वरूप नेत्र के सम्मुख प्रत्यक्ष दीख रहा है वह ब्रह्म नहीं हो सकता। ब्रह्म का नेत्रों आदि के विषय उस स्वरूप को ब्रह्मता के बाधक धर्म हैं, इस प्रकार का ज्ञान अज्ञान है। हाँ जीव यदि अपने सामर्थ्य से भगवान को इन्द्रियों का विषय बनाता है तब तो उसका अज्ञान है परन्तु ब्रह्म के चाक्षुष प्रत्यक्ष होने में कारण उस ब्रह्म की एकमात्र इच्छा ही है ऐसा ज्ञान न हो पावे तो उक्त प्रकार से अज्ञान का सम्भव है, अतः आरम्भ में ही वसुदेवजी ने वैसे अज्ञान का अपने में अभाव बतलाया है कि **'विदितोऽसि'** आप ही भगवान् हो ऐसा जाना है। वसुदेव और देवकी इन दोनों की की हुई स्तुति उनके भगवद्विषयक ज्ञान की सूचक हैं कि पिता और माता दोनों को भगवत्स्वरूप का ज्ञान हो चुका है।

वसुदेवजी का कहना है कि मैंने आपको अच्छी तरह जान लिया है, आर्ष ज्ञान से आपको मैंने भली भाँति पहिचान लिया है। कदाचित् भगवान् ऐसा प्रश्न कर बैठें कि 'तत्त्वमसि' इत्यादि वैदिक वाक्यजन्य ज्ञान से तो बहुत लोग जीव को भी भगवद्रूप से जान लेते हैं क्या उसी तरह आपका भी ज्ञान है? इसके समाधान में वसुदेवजी ने 'असि' इस मध्यम पुरुष का प्रयोग किया है, उक्त श्लोक में 'त्वम्' इस प्रकार युष्मद् शब्द का प्रयोग नहीं भी हुआ है तो भी 'असि' यह मध्यम

पुरुष का प्रयोग सम्मुखस्थ चतुर्भुज स्वरूप के प्रति किया गया है कि 'युष्मद्' शब्द से जो सम्मुखस्थ चतुर्भुज रूप व्यवहृत होता है वह भी तुम जान लिये गये हो, अतः शास्त्र से और लोक से जो तुम ज्ञात होते हो वह मैंने जान लिया है, इस व्याख्यान से यह निरूपण किया है कि जिस अन्तर्गत स्वरूप की परम्परा से प्रतीति होती है जिसके लिये 'भवान्' शब्द का प्रयोग अपेक्षित है एवं जिस देह इन्द्रियादि रूप जड वर्ग की बाह्य प्रतीति होतो है जिसके लिये 'त्वम्' शब्द का प्रयोग अपेक्षित है वह दोनों रूप आप एक ही है, आप के स्वरूप में देह देही का विभाग नहीं, आप सर्वांश में आनन्दमय हैं 'आनन्द मात्र करपाद मुखोदरादि, श्रुति सिद्ध आपके स्वरूप का ज्ञान मुझे हुआ है। और एक बात यह भी है कि 'विदितोऽस्ति भवान्' ऐसा पाठ न होकर उक्त असि पाठ का होना और वह भी भगवान् के जन्मप्रसङ्ग में उनके पिता श्री वसुदेवजी के शब्दों में वैयाकरणों को जो कि अर्धमात्रा के लाघव से पुत्रोत्सव मानते हैं अपनी आर आकृष्ट करता है क्योंकि 'अस्ति' पद की अपेक्षा 'असि' पद में अर्धमात्रा का लाघव है वसुदेवजी का पुत्रोत्सव ही स्तुति रूप में व्यक्त हो रहा है।

अथवा **विदितोसोति प्रतिज्ञाय**—पूर्व व्याख्यान में 'भवान्' शब्द की आवश्यकता सिद्ध नहीं हो पाती है क्योंकि 'असि' इस मध्यम पुरुष के प्रयोग से 'त्वम्' शब्द का या उसके अर्थ का लाभ होना अनिवार्य है ऐसी दशा में 'भवान्' शब्द से जो कार्य सिद्ध करना है वह 'त्वम्' शब्द से ही सिद्ध हो जाता है, अतः दूसरे प्रकार से व्याख्यान करते हैं कि—अथवा **'विदितोऽसि'** तुमको मैंने जान लिया ऐसी प्रतिज्ञा करके भगवान् की ब्रह्मरूपता का ही आगे उपसंहार में निरूपण करना है इस दृष्टि से 'भवान्' और पुरुष, इन दो पदों के द्वारा बाह्य, एवं आभ्यन्तर दोनों रूपों में एक रूप तुम ही हो क्योंकि सर्वभाव को प्राप्त होने वाला ही तो ब्रह्म है—

पुरुषस्वरूपो भगवानिति वा अस्तु—अथवा 'भवान् पुरुषः' इन पदों से ब्रह्म की विरुद्ध धर्माश्रयता का ज्ञान दिखलाना अभीष्ट है कि वह प्रत्यक्ष होते हुए भी अप्रत्यक्ष है सम्मुख होते हुए भी असम्मुख है, इस व्याख्यान में भी यह अरुचि रह जाती है कि 'असि' इस मध्यम पुरुष के प्रयोग के बिना भी 'विदितो भवान्' इत्यादि प्रकार से भी प्रत्यक्ष अप्रत्यक्ष आदि अभीष्ट अर्थ सिद्ध हो सकता था 'भवान्' शब्द ही 'त्वम्' के अर्थ को बोधित कर सकता था 'असि' पद की सार्थकता प्रतीत नहीं होती अतः प्रकारान्तर से व्याख्यान करते हैं कि—अथवा भगवान् पुरुषत्रय रूप है—क्षर, अक्षर, पुरुषोत्तम, अथवा आधिभौतिक, आध्यात्मिक, आधिदैविक रूप से त्रिविध रूप आप ही हैं ऐसा प्रतिपादन करने के लिये 'असि' 'भवान्' और साक्षात्पुरुष' इन तीन पदों का संयोग किया है, और एक बात है कि 'असि' पद से देह रूप, 'भवान्' पद से देहाभिमानी, 'साक्षात्पुरुष', पद से परमात्मा इन तीनों का बोध होता है, भगवत्स्वरूप में जो देह है वही देही आत्मा है और वही परमात्मा भी है, भगवत्स्वरूप को सक्कर के आकार की भाँति एक रस सर्वांश में आनन्दमय वसुदेवजी ने जाना है, व्याकरण में प्रथम, मध्यम, उत्तम, इस प्रकार पदों में व्यवहार किया गया है वहाँ भी उन्हें 'पुरुष' पदवी मिली है जो कि भगवान् की त्रिविधता की सूचक है 'साक्षात्पुरुषः' पद के अन्तर्गत 'साक्षात्' पद का प्रयोग इसलिये है कि आनन्दमय पुरुष का ही बोध हो अन्नमयादि पुरुषों का नहीं, क्योंकि वह आनन्दमय पुरुष के प्रवेश से पुरुषरूप होते हैं अतः साक्षात् पुरुष नहीं हो सकते वह तो परम्परा से पुरुष हैं, आत्मस्वरूप की स्फूर्ति होने पर ब्रह्मवेत्ताओं को भी साक्षात्पुरुषरूपता हो जाती है अतः उनसे भी अधिकता बतलाते हैं कि आप तो प्रकृति से पर हैं उसके नियन्त्रण करने वाले हैं। वह ब्रह्मवेत्ता लोग तो जीव हैं इसलिये प्रकृति के नियामक नहीं, भगवान् ने कौस्तुभमणि और पीताम्बर के द्वारा गुप्त जीव, माया, आदि तत्त्वों को प्रकट कर अपनी प्रकृति नियामकता स्पष्ट की है।

प्रत्यक्षदोषस्तु 'असि' भवन्तीति पदाभ्यां परिहृतः—प्रत्यक्ष दोष का परिहार तो 'असि' 'भवान्' इन पदों द्वारा कर ही दिया है कि भगवती श्रुति ने जिस तत्त्व को अतीन्द्रिय कहा है वही तत्त्व स्वेच्छा से साकार आनन्द रूप में श्रीवसुदेवजी के सम्मुख समुपस्थित होता है और श्रीवसुदेवजी उनकी इच्छा से उन्हें जानकर कहते हैं कि आपको मैंने शुद्ध ब्रह्म पुरुषोत्तम रूप से जान लिया है, ऐसी अवस्था में यह मानना ही पड़ेगा कि अतीन्द्रिय होने के कारण ब्रह्म की प्रत्यक्षता जो दोष रूप मानी जाती थी वही उनकी निजेच्छा से गुण रूप हो जाती है, यद्यपि ब्रह्म को जान लेना प्रमाणसिद्ध नहीं क्योंकि उस अनन्त, एवं अग्राह्य तत्त्व का ज्ञान सम्भव नहीं अतः उसके विषय में 'ज्ञातत्त्व' भी एक दोष ही है परन्तु उस दोष का भी परिहार भगवान् के सर्वभाव से प्रकट होने के कारण हो जाता है, बात ऐसी है कि 'स सर्वं भवति' भगवान् सब कुछ हो जाते हैं, **'इदं सर्वं यदयमात्मा'** यह सब कुछ जो है यह आत्मा ही है, इत्यादि श्रुति भगवान् की सर्वरूपता का प्रतिपादन करती हैं; वसुदेवजी भी 'भवान् पुरुष, पदों से उनकी बाह्य एवं आभ्यन्तर रूपता का वर्णन कर सर्वरूपता ही सूचित करते हैं, ऐसी स्थिति में यह मानना अनिवार्य है कि भगवान् को देखने वाले नेत्र या नेत्रों का सामर्थ्य भी भगवान् ही है, तब स्वयं भगवान् का अपने आपको जान लेना जिस प्रकार दोषावह नहीं उसी प्रकार वसुदेवजी का भी उन्हें जान लेना अविरुद्ध ही है वसुदेवजी या उनकी शक्ति आदि सर्वरूप भगवान् ही तो हुए हैं अतः सर्व भाव से प्रकट होने के कारण ज्ञातव्य दोष को

अवकाश नहीं, प्रत्यक्षत्व, अप्रत्यक्षत्व, आदि विरुद्ध धर्म एक एक अंश से चरितार्थ हो जाते हैं, प्राकृत इन्द्रियों से तो ब्रह्म सर्वथा अग्राह्य ही है परन्तु अप्राकृत इन्द्रिय भगवद्रूप ही है अतः अप्राकृत इन्द्रिय से ग्राह्य होने पर भी भगवान् की अधोक्षजता निर्विरोध सिद्ध है। तात्पर्य यह है कि उनका विरोध नहीं रहता। अपनी इच्छा से भगवान् जिस समय दर्शन देते हैं उसी समय दर्शन करने वाले की इन्द्रिय के सामर्थ्य से अदृश्य भी बने रहते हैं।

अयोगोलके वह्निरिव भगवान् देहे चिदानन्दः संक्रान्तोभविष्यतीत्याह स्वरूपः इति केवलानुभवानन्दस्वरूपः—इस विशेषण से वसुदेवजी ने भगवान् के एक प्रश्न का उत्तर देकर उनके स्वरूप के विषय में अपनी अभिज्ञता प्रकट की है भगवान् ने प्रश्न किया कि तो क्या इस चतुर्भुज देह के अन्तर्गत जो आत्मा है वही मैं उस प्रकार का पुरुषोत्तम आदि रूप होऊँगा। वसुदेवजी उत्तर में कहते हैं कि आप तो केवल हैं, देह, इन्द्रिय, अन्तःकरण रहित हैं, आपके स्वरूप में जड़ देह एवं इन्द्रियादि का सम्भव ही नहीं, और न आप जीव की भाँति केवल ज्ञानरूप ही हैं, आप तो अनुभवानन्द रूप हैं, चिन्मय एवं आनन्दमय हैं, लोहे के गोले में जिस प्रकार अग्नि का संक्रमण होता है कि प्रथम तो लोहा अग्नि से भिन्न ही प्रतीत होता है पश्चात् मुद्गर प्रहार आदि की प्रक्रिया से धीरे धीरे अग्नि उस लोहा में प्रकट होकर सर्वांश में उसे अपने रूप में मिला लेता है। क्या उसी प्रकार चिदानन्द का सङ्क्रमण इस चतुर्भुज देह में है? नहीं ऐसा नहीं है जो स्वरूप दृष्टिगत हो रहा है यह ही चिदानन्द रूप है, इस में चिद् और आनन्द हों और यह उनसे पृथक् हों ऐसी बात नहीं, आप चिदानन्द स्वरूप है, सच्चिदानन्द ही आपका विग्रह है। मूर्तिमान् सच्चिदानन्द आप हैं, इस प्रकार परोक्ष, अपरोक्ष, और अन्तर्यामी इन तीनों रूपोंवाला जो स्वरूप सामने दीख रहा है वह आप हैं यह निरूपण किया है, आप ही सर्वात्मा है ऐसा कहना अवशिष्ट रह गया, अतः सर्व बुद्धि दृग् इस विशेषण से सबकी आत्मा हैं इस प्रकार निरूपण करते हैं कि आप सब की बुद्धियों को देखते हैं, अथवा सबकी बुद्धियों में जिनका दर्शन है, ज्ञान है, प्रकाश है, जिनके प्रकाश से सब की बुद्धि प्रकाशित होती है इस प्रकार क्षर, अक्षर, पुरुषोत्तम, अन्तर्यामी, देह, जीव, अथवा आधिभौतिक, आध्यात्मिक, आधिदैविक, अन्तर्यामी, देह, जीव इन रूपों से छहों प्रकार का भी भगवान् यह ही है ऐसा कहा है, और प्रत्यक्ष व्यवहार आदि धर्मों का अंशतः समर्थन किया है ॥ १३ ॥

दूषणान्तरमाशंक्य परिहरति स एवेति यद्यहं सर्वरूपो भगवानेव कथमिति—अग्रीम श्लोक में अन्य दोष की आशङ्का कर समाधान करते हैं, भगवान् ऐसा प्रश्न कर सकते हैं कि यदि मैं सर्वरूप भगवान् ही हूँ तो देवकी के उदर में मेरा किस प्रकार से प्रवेश हुआ, तब उक्त प्रश्न पर वसुदेवजी कहते हैं कि आप तो अप्रविष्ट ही हैं कहीं अन्य स्थान से आकर आपने देवकी के उदर में प्रवेश किया नहीं है आप तो वहाँ प्रथम से वर्तमान ही है प्रवेश तो उसका होता है जो वहाँ पर न हो, फिर भी आप प्रविष्ट की भाँति प्रतीत होते हो। केवल दर्शन या मनुष्य की अपनी प्रतीति से प्रवेश का निर्णय नहीं किया जाता है जब तक कि वह दर्शन या प्रतीति शास्त्र से अनुमोदन प्राप्त न करें। भक्त को या जीव को जो दीखता है वह तब ही प्रमाणित माना जाता है जब शास्त्र भी वैसा ही प्रतिपादन करता हो। प्रवेश के विषय में कतिपय श्रुति उपलब्ध होती हैं, उनके अनुसार स्थिति के अर्थ तथा कार्यार्थ, एवं अनेक रूप होने के लिये, और अन्य के प्रवेश के लिये अर्थात् जीवात्मा के प्रवेश के लिये ब्रह्म का प्रवेश होता है, ऐसा सुना जाता है। जैसे **बृहदारण्यक उपनिषत्** प्रथमाध्याय चतुर्थ ब्राह्मण में सप्तम मन्त्र है। **'स एष इह प्रविष्ट आनखाग्रेभ्यो यथा क्षुरः क्षुरधानेवहितः स्याद् विश्वम्भरो वा विश्वम्भर कुलाये'** इस मंत्र में स्थिति के निमित्त आत्मा का प्रवेश इस शरीर में होता है यह निरूपण किया है छुरे का उसके कोष में प्रवेश स्थिति के निमित्त से ही होता है अतः छुरे के दृष्टान्त से यहां स्थित्यर्थ प्रवेश ही अभिमत है जैसा कि **'अवहितः स्यात्'** इस वाक्य शेष से स्पष्ट होता है। दूसरा दृष्टान्त विश्वम्भर के कुलाय प्रवेश का है, इसके द्वारा कार्यार्थ प्रवेश सिद्ध होता है, यदि विश्वम्भर शब्द से भगवान् विष्णु का ग्रहण किया जावे तब तो भूभारहरणादि कार्य के लिये भगवान् का प्रवेश जिस प्रकार देव मनुष्य पशु पक्षि आदि शरीरों में होता है उस प्रकार आत्मा का प्रवेश भी कार्यार्थ ही है, विश्वम्भर शब्द 'अग्नि' के अर्थ में यदि प्रयुक्त हुआ है तो भी **'अह वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः प्राणापानसमायुक्तः पचाम्यन्न चतुर्विधम्'** के अनुसार अन्न परिपाक कार्य के लिये प्राणियों के देह में अग्नि रूप से भगवत्प्रवेश की भांति आत्मा का प्रवेश कार्यार्थ सिद्ध होता है।

तत् सृष्ट्वा तदेवानु प्राविशत् यह श्रुति तैत्तरीय उपनिषत् ब्रह्मानन्दवल्ली षष्ठ अनुवाक के अन्तर्गत है। उसका निर्माण कर उसमें प्रवेश किया इस प्रवेश को अनेक रूप भवनार्थ मानना आवश्यक है।

गुहां प्रविष्टौ परमे परार्धे यह श्रुति कठोपनिषत् प्र० अध्याय तृतीय वल्ली के प्रथम मन्त्रगत है यहाँ पर और जीवात्मा परमात्मा दोनों का हृदय में प्रवेश कहा गया है।

तथा देवक्यामपि कश्चन प्रवेशप्रकारो भविष्यति—उस प्रकार देवकी में भी प्रवेश का कोई प्रकार होगा, ऐसा मानना या कहना पूर्ण पुरुषोत्तम भगवान् श्रीकृष्ण के लिये सुसंगत नहीं है क्योंकि श्री देवकी के उदर में प्रकार विशेष से श्रीकृष्ण का प्रवेश मानने में भगवान् की मुख्य कृष्णरूपता में एवं उनकी प्रधानपरमतत्त्वरूपता में विसंवादिता उत्पन्न हो सकती है।

कि प्रवेश करने वाला तो सोपाधिक भी कामना की उपाधि युक्त होकर ही प्रवेश करता है और उसका किसी कार्य में अभिनिवेश भी होता है। जो कामनायुक्त एवं अभिनिवेशयुक्त है वह किसी कार्य के सम्पादन के लिये उपायों का आग्रहपूर्वक संग्रह भी करता है जैसा कि जगत् के निर्माण आदि कार्य के लिये कार्यानुकूल **'सोऽकामयत बहु स्यां प्रजायेय'** **रूपं रूपं प्रतिरूपो बभूव** आदि श्रुतियों से सिद्ध है, किसी भी कामना की उपाधि वाला और कार्यार्थी स्वरूप, मुख्य तत्त्व सदानन्द कृष्ण नहीं हो सकता वह तो सर्वोपाधि रहित लोक और वेद में अप्रसिद्ध पूर्णानन्द है। उसका प्रवेश सम्भव नहीं, इस संदेह की निवृत्ति के लिये कहते हैं कि 'अप्रविष्ट एव प्रविष्ट इव' आपतो अप्रविष्ट ही हैं प्रविष्ट जैसे प्रतीत हो रहे हैं।

अब दूसरे विकल्प का खंडन करते हैं कि **योगबलादपीन्द्र इव प्रवेशः**—योग बल से भी प्रवेश हो सकता है (इन्द्र योगबल से परमात्मा में प्रविष्ट हुआ था) एव दक्षिणा नामक स्त्री में जन्म ग्रहण करने के निमित्त प्रवेश हो सकता है जैसा कि **'यो वा'** इत्यादि श्रुति से सिद्ध है कि जो दक्षिणा से जन्म ग्रहण करेगा वह इन्द्र होगा इस कारण से इन्द्र ने दक्षिणा में प्रवेश किया और दक्षिणा से इन्द्र ही उत्पन्न हुआ, एवं दिति के उदर में स्थित मरुत नाम वाले गर्भस्थ बालकों के नाश के लिये भी इन्द्र ने प्रवेश किया था, परन्तु भगवान् का प्रवेश उस प्रकार का नहीं है, इसे स्पष्ट करने के लिये **"अप्रविष्टः"** इस शब्द से भगवान् को अप्रविष्ट कहा है, परन्तु प्रवेश धर्म तो भगवान् में है ऐसा बतलाने को **"प्रविष्ट इव"** प्रविष्ट जसे प्रतीत हो रहे हो ऐसा कहा गया है।

प्रकृत्याऽऽधिदैविकस्वभावेनेदं भगवदर्थमेव जगत् त्रिगुणात्मकं सृष्ट्वा—यदि प्रविष्ट नहीं है परंतु प्रविष्ट जैसे प्रतीत हो रहा है तब प्रवेश किस प्रकार का होगा—ऐसी आशङ्का होने पर कहते हैं कि जो पूर्व में सच्चिदानन्दरूप कहा गया है वह ही आप अपनी निज प्रकृति या आधिदैविक स्वभाव से इस भगवल्लीलोपयोगी त्रिगुणात्मक जगत् की रचना करने के अनन्तर यद्यपि आप उसमें प्रविष्ट नहीं हुए हो प्रवेश की केवल प्रतीति है, क्योंकि अन्य के लिये की जाने वाली जगत् की सृष्टि में साक्षी होने के लिये अथवा तो प्रकाश एवं नियन्त्रण आदि करने के लिये प्रवेश अपेक्षित है अपने लिये की गई लीला सृष्टि में तो कारण रूप से विद्यमान स्वरूप के द्वारा ही अन्तर्यामी का एवं जीव का भी कार्य हो जाता है अतः वहाँ प्रवेश की अपेक्षा नहीं। लीलासृष्टि में तो भोग्य पदार्थों का भोग करने को कारण रूप से जो आप प्रकट होते हैं उन्हें ही जीवार्थ सृष्टि की भाँति प्रविष्ट जैसा मान लिया गया है। यहाँ पर प्रवेश के दर्शन में यह प्रकार बतलाया है कि वास्तव में परमतत्त्व कृष्ण का प्रवेश सम्भव नहीं प्रवेश की प्रतीति मात्र है। वसुदेवजी कहते हैं कि आप भगवान् हैं आपने अपने लीला विलास के लिये हम लोगों को बनाया है हमारा उपभोग करने के लिये हमारे भीतर विराजमान ही आप बाहर प्रकट हुए हो अतः अप्रविष्ट ही हो तो भी प्रविष्ट जैसे प्रतीत होते हो यह अर्थ होता है। वसुदेवजी ने इस लीलासृष्टि को त्रिगुणात्मक इस दृष्टि से कहा है कि जिस प्रकार जीवार्थ सृष्टि में होने वाले आपके प्रवेश की भावना इस निज सृष्टि में भी होती है मुख्यतया प्रवेश तो अन्यार्थ सृष्टि में ही है यहाँ तो केवल उसको भावनामात्र है, उसी प्रकार त्रिगुणात्मक भी साधारण जगत् ही है यह असाधारण लीलात्मक जगत् त्रिगुणात्मक नहीं फिर भी लीलास्थजनों में भगवद्विषयक स्नेह, द्वेष एवं औदासीन्य आदि भावों की प्रतीति होती है उन्हीं भावों को परार्थ सृष्टि की प्रक्रिया से यहां सत्त्व आदि गुण रूप मान लिया गया है और लीलासृष्टि को त्रिगुणात्मक कह दिया है।

अत्रिगुणात्मकमिति वा भगवन् वास्तव में तो यह सृष्टि गुणातीत ही है, **अत्रिगुणात्मकम्** ऐसा पदच्छेद यहाँ पर अभीष्ट है, तब तो लीलासृष्टि की गुणातीतता स्पष्ट ही है, अथवा **'अग्रे त्रिगुणात्मकं सृष्ट्वा तदनु स्वप्रकृत्या-इदं सृष्ट्वा'** इस प्रकार पदयोजना अभीष्ट है, 'तदनु' पद का योग 'प्रविष्ट' पद से नहीं क्योंकि 'तदनु' का अर्थ 'तदनन्तर' होता है और उस अनन्तर अर्थ की प्रतीति 'सृष्ट्वा' पद के अन्तर्गत 'क्त्वा' प्रत्यय से ही हो जाती है, क्योंकि वह 'क्त्वा' प्रत्यय पूर्व काल की क्रिया का बोधक है, तब अनन्तर या उत्तर काल की प्रतीति स्वभावतः हो जाती है। अतः प्रवेश की उत्तरकालिकता 'तदनु' पद के बिना ही सिद्ध है तदर्थ उसकी आवश्यकता नहीं, अतः उक्त योजना के अनुसार इस प्रकार अर्थ समझना चाहिये कि पूर्व में त्रिगुणात्मक जगत् को रचकर तदनन्तर आधिदैविक प्रकृति से इस लीलात्मक जगत् को रचकर आप अप्रविष्ट ही प्रविष्ट जैसे होते हैं, अथवा **तत्सृष्ट्वा तदेवानुप्राविशत'** इस श्रुति में 'अनु' इस उपसर्ग का प्रयोग हुआ है इससे यह स्वीकार करना आवश्यक है कि सृष्टि के अनन्तर जो प्रवेश होता है उसका 'अनुप्रवेश' यह रूढ नाम है, उसके अन्तर्गत 'अनु' पद का 'अनन्तर' अर्थ नहीं है, ऐसा मान लेने से पूर्वोक्त रीति से जो 'अनु' पद की व्यर्थता का दोष सम्भावित था वह नहीं रहता है।

उक्तरीत्या दूषणान्तरमप्याशङ्क्य पुनः परिहरति द्वाभ्याम्—अन्य दोष की आशङ्का कर पुनः उसका परिहार **'यथेमे'** आदि दो श्लोकों से करते हैं, यह शङ्का हो सकती है कि इस भगवत्स्वरूप में उसी प्रकार पृथिवी आदि भूतों की प्रतीति होती है जिस प्रकार प्राकृत पदार्थों में उनकी प्रतीति होती रहती है, तो इस भगवत्स्वरूप को आनन्दमय कैसे माना जाय, शरीररूप से पृथिवी की, मुखारविन्द में प्रधानतया जल की, सर्वाङ्ग में कान्तिरूप से तेज की, नासिका में प्राण रूप वायु की, एवं अन्यान्य छिद्रों में अवकाश रूप से आकाश की प्रतीति होती है, उक्त आशङ्का का समाधान करने के लिये दृष्टान्त के द्वारा

भगवत्स्वरूप में प्रतीत होने वाले पृथिवी आदि तत्त्वों की नित्यता एवं अविकारिता सूचित करते हैं कि इस भगवत्स्वरूप में विद्यमान देह इन्द्रियादि सब अविकारी भाव हैं चौबीसों तत्त्व आधिदैविक ही हैं, आधिभौतिक नहीं, इनकी आधिदैविकता का प्रतिपादन केनोपनिषत् की **'श्रोत्रस्य श्रोत्रम्'** आदि श्रुति ने उपलक्षणरूप से किया है, कि वह श्रवण आदि ज्ञानेन्द्रियों का श्रवण आदि रूप हैं, मनः प्रभृति अन्तःकरणों का मन आदि रूप है, वागादि कर्मेन्द्रियों का वाक्–आदि रूप है एवं पृथिवी का पृथिवी, जल का जल आदि भी है, यह ही आधिदैविक तत्त्व है, आधिभौतिक पृथिवी आदि में यह आधिदैविक तत्त्व उन उन कार्यों के लिये स्थित रहते हैं, इनके बिना केवल आधिभौतिक चक्षु आदि से रूपादि ग्रहण का कार्य नहीं हो सकता।

अन्योन्यमिलितेति—जिस प्रकार आधिदैविक २४ प्रकृति आदि तत्त्व (नाना वीर्य) है जैसे आधिदैविक चक्षु रूप का ज्ञान करा देने की सामर्थ्य रखती है, रसना रस के ज्ञान करा देने की सामर्थ्य रखती है एवं आधिदैविक हस्तपादादि भी आदान प्रदान, गमन आगमन आदि की सामर्थ्य रखते हैं तथा पृथक् पृथक् अवस्थित है परस्पर में मिलित नहीं है, भिन्न भिन्न कार्यों को करने के लिए पृथक् ही रहते हैं, उसी प्रकार आधिभौतिक प्रकृति आदि तत्त्व भी (नाना वीर्य) है और पृथग्भूत भी है, परन्तु ब्रह्माण्ड रचना के एक ही कार्य में यह सब आधिदैविक तत्त्व आधिभौतिकों से मिलकर ब्रह्माण्ड शरीर विराट् को जन्म देते हैं जो कि स्वराट् पुरुष का देह कहलाता है, ऐसा होना ठीक भी है क्योंकि आधिदैविक मूल या प्राणप्रद तत्त्व के बिना केवल आधिभौतिक से कार्य नहीं हो सकता है, जब ऐसी बात है कि प्राकृत स्थल में भी अप्राकृत तत्त्वों का रहना शास्त्रसम्मत है तब अप्राकृत भगवत्स्वरूप में जो तत्त्व दृष्टिगत हो रहे हैं वह अप्राकृत ही हैं आधिदैविक ही है अतः उनको लेकर भगवत्स्वरूप की विकारिता या अनित्यता का सन्देह नहीं रह पाता, किसी दोष का अवकाश नहीं रह जाता क्योंकि जो स्वरूप प्रकट दर्शन दे रहा है वह सर्वांशयुक्त भगवान् है किसी भी अंश में प्राकृतता का स्पर्श नहीं ॥ १५ ॥

ननु त्वक् चर्मादयोऽपीति—पूर्व श्लोक में यह निरूपण किया गया है कि भगवत्स्वरूप में जो कारण रूप से पृथिवी आदि तत्त्व प्रतीत होते है वह आधिदैविक तत्त्व हैं प्राकृत नहीं, अतः सर्वांशपूर्ण भगवान् श्रीकृष्ण में उनके अंशगत आधिदैविक तत्त्वों की प्रतीति होने पर भी उनकी आनन्दमयता अक्षुण्ण बनी रहती है, परन्तु यहाँ एक सन्देह उपस्थित हो सकता है कि भगवत्स्वरूप में जो त्वचा, चर्म, रोम, दन्त, नख आदि प्रतीत होते हैं वह तो कार्यरूप हैं पृथिवी आदि तत्त्वों के विकार हैं, इनको आधिदैविक कैसे माना जा सकता है अतः भगवान् की आनन्दमयता विचारणीय ही है, उक्त सन्देह के निवारणार्थ इस श्लोक से दृष्टान्त के द्वारा त्वचा, चर्म आदि की भी आधिदैविक होने से नित्यता एवं अविकारिता बतलाते हैं, इस श्लोक में आधिदैविकतत्त्व आधिभौतिकतत्त्वों से जल से दुग्ध की तरह मिलकर विराट् जगत् को भलीभाँति उत्पन्न करके उसमें, पट में तन्तुओं की भाँति, अनुगत जैसे प्रतीत होते हैं, परन्तु पूर्व से ही विद्यमान होने के कारण उनकी यहाँ उत्पत्ति का सम्भव नहीं ऐसा कहा है, ध्यान देने की बात है कि जब पूर्वश्लोक में **'विराजं जनयन्ति हि'** ब्रह्माण्ड के निर्माण की चर्चा हो चुकी है तो प्रकृत श्लोक में **'समुत्पाद्य'** पद के द्वारा उस चर्चा को फिर दुहराना इसी मर्म को रखता है कि आधिदैविक तत्त्वों की सत्ता कारणों तक ही सीमित नहीं है अपितु उनके साथ साथ कार्य में भी व्याप्त है, इस मर्म की सूचना 'सन्निपत्य' 'समुत्पाद्य' इन पदों द्वारा हुए अनुवाद से ही होती है अन्यथा पूर्व श्लोक में 'सह' 'जनयन्ति' इन पदों से मिलकर उत्पन्न करने का प्रसंग कथित ही है प्रकृत श्लोक में उसका अनुवाद करना निष्प्रयोजन सिद्ध होगा, आशय यह है कि अनुवाद के द्वारा आधिदैविक तत्त्वों का स्मरण कराना अभीष्ट है अन्यथा **'दृश्यन्तेऽनुगता इव'**

एवं दृष्टान्तद्वयमुपपाद्येति—इतने कथन मात्र से आधिभौतिकों के ही अनुगत होने की प्रतीति की सम्भावना थी, वह ही आधिदैविक तत्त्व कार्य में अनुगत जैसे प्रतीत हो रहे हैं, आधिदैविक त्वचा चर्म, आदि रूप से आधिदैविक पृथिवी तत्त्व, अनुगत है अतः भगवत्स्वरूप में जो त्वचा आदि प्रतीत होते हैं वह आधिदैविक ही हैं एवं समष्टिरूप भौतिक देह में या ब्रह्माण्ड में पृथिवी, जल, तेज आदि कारण तत्त्व उन रूपों में प्रतीत होते हैं, देह में कारण रूप जल तत्त्व ही रुधिरादि रूप से प्रतीत होता है, इसी प्रकार अन्य आकाश आदि तत्त्व भी छिद्र के अवकाश आदि रूप से प्रतीत होते हैं, जबकि कारण तत्त्व कार्य में दृष्टिगत होते हैं तो उसी आधार पर उस दर्शन (प्रतीति) के प्रमाण बल से यह क्यों न मान लिया जाय कि कारण तत्त्व अनुगत ही हैं, अर्थात् वह कारण ही कार्यरूप से उत्पन्न हुए हैं, ऐसी शङ्का कर उत्तर देते हैं कि पहले से ही कारण रूप से इस विराट् रूप में और ब्रह्माण्ड के ऊपर भी विद्यमान रहने के कारण फिर उन कारण तत्त्वों की यहाँ कार्य में उत्पत्ति सम्भावित नहीं, प्रकृत के उपयोगी आशय को इस प्रकार जानना आवश्यक है कि भगवत्स्वरूप में आधिदैविक तत्त्वों की प्रकट सच्चिदानन्दरूप अलौकिक भावात्मक कारण रूप से सत्ता है अतः उनकी त्वचा चर्म; आदि रूप से उत्पत्ति नहीं है किंतु वह आधिदैविक तत्त्व ही त्वचा चर्म आदि के रूप को अवतार की तरह ग्रहण करके वहाँ पर उपस्थित हैं, अतः भगवत्स्वरूपगत त्वक् चर्मादि आधिदैविक तत्त्वों के कार्य नहीं किंतु रूपांतर ही है, उनकी उत्पत्ति सम्भव नहीं क्योंकि आधिदैविक तत्त्वरूप कारणों की

आधिभौतिकों से विलक्षणता होती है, भौतिक तत्त्व लौकिक कार्यों में उस रूप से उत्पन्न होते हैं आधिदैविक तत्त्व तो आधिदैविक कार्यों का अवतार की भांति रूपान्तर ग्रहण करते हैं।

चेत् तत्राह—जिस प्रकार बीज अङ्कुर रूप में प्रकट होता है तब बीज की पृथक् सत्ता प्रतीत नहीं होती क्योंकि वहाँ बीज का साक्षात् प्रवेश है उसी प्रकार कारण तत्त्व कार्य रूप में प्रकट हो जाता है ऐसा भी स्वीकार नहीं कर सकते, क्योंकि माता पिताओं के शरीरों में त्वचा आदि की सत्ता पृथक् ही प्रतीत होती है अतः पुत्र के शरीर में उन त्वचा आदि का साक्षात् प्रवेश सिद्ध नहीं हो सकता बीज का अंकुर में जैसे साक्षात् प्रवेश है वैसा प्रवेश तो उक्त प्रतीति से बाधित होने के कारण नहीं माना जा सकता। उक्त प्रक्रिया से यह सिद्ध होता है कि जैसे आधिदैविक कारणरूप पृथिवी आदि तत्त्व भगवत्स्वरूप में प्रतीत होते हैं इसी प्रकार दन्त आदि भी आधिदैविक ही हैं अतः पृथिवी रूप शरीर आदि की भांति दन्त आदि की प्रतीति में कोई विरोध नहीं ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्कृतां भगवत्स्तुतिमेव दर्शयति—विदितोऽसीत्यादिना। भवान् त्वं मया विदितोऽसि। कथंभूतो विदितोऽस्मीत्यत आह—प्रकृतेः परः। केवलश्चासावनुभवश्चानन्दश्च तावेवं स्वरूपं यस्य सः ज्ञानानन्दैकस्वरूपः, अतएव पुरुषः पुरुषोत्तम इति। एवंभूतस्य तव शाब्दमपि ज्ञानं दुर्लभम्, मम तु त्वत्कृपया साक्षात्कारोऽपि जात इत्याशयेनाह—साक्षादिति। तस्य दुर्लभत्वे हेतुमाह—सर्वेति। सर्वेषां प्राणिनां बुद्धीः पश्यतीति सर्वबुद्धिदृक्। नहि सर्वसाक्षिणः साक्षात्कारस्तत्कृपां विना सम्भवतीति भावः ॥ १३ ॥ ननु देवकीजठरप्रविष्टस्य मम कथं पुरुषोत्तमत्वमित्याशङ्क्य सर्वोपादानत्वेन सर्वस्मिन् जगति प्रविष्टस्यापि तव क्षतिर्नास्ति, किं पुनर्वक्तव्यं देवकीगर्भप्रवेशे क्षतिर्नास्तीति इत्याशयेनाह स इति। स सच्चिदानन्दस्वरूप एव त्वमग्रे सृष्ट्यादौ स्वशक्तिरूपया प्रकृत्या त्रिगुणात्मकमिदं विश्वं सृष्ट्वा तदनु ततः पश्चात् अप्रविष्टोऽपि प्रविष्ट इव भाव्यसे 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति श्रुत्या निरूप्यसे इत्यर्थः। हीत्यप्यर्थे ॥ १४ ॥ अत्र दृष्टान्तमाह—यथेति। यथेमेऽविकृता भावा महदादयस्तथेत्यर्थः। एतदेव विवृणोति—ते इति। ते महदहङ्कारशब्दादिपञ्च, तन्मात्राः सप्त, विकृतैः पृथिव्यादिपञ्चमहाभूतानि एकादशेन्द्रियाणि चेत्येवं षोडशभिः सह सन्निपत्य मिलित्वा विराजं ब्रह्माण्डं जनयन्ति। सन्निपतने हेतुमाह—नानेति। यतः पृथग्भूताः सन्तो नानावीर्याः विरुद्धनानास्वभावा विशिष्टकार्यजनने समर्थाः न भवन्तीत्यर्थः। हिशब्दोऽस्यार्थस्य शास्त्रप्रसिद्धिं सूचयति, तृतीयस्कन्धे तथोक्तत्वात् ॥ १५ ॥ एवं विराजं समुत्पाद्य तत्रानुगता इव प्रविष्टा इव दृश्यन्ते, परन्तु तेषां महदादीनामिह सृष्टे कार्ये सम्भवः पश्चात्प्रवेशो नास्ति। तत्र हेतुमाह—प्रागेव विद्यमानत्वादिति। नहि कार्योत्पत्त्यनन्तरमुपादानं तत्र प्रविशति, तत्समवेतत्वेनैव कार्यस्योत्पन्नत्वादित्यर्थः ॥ १६ ॥

अन्वितार्थप्रकाशिका

विदित इति ॥ भवान् प्रकृतेः परः पुरुषः केवलो निरुपाधिकश्चासावनुभवः चिद्रूपश्चासावानन्दश्च तदेव स्वरूपं यस्य सः सर्वेषां बुद्धीः पश्यतीति सर्वबुद्धिसाक्षी इत्येवंरूपतया साक्षात् प्रत्यक्षतः विदितोऽसि। न ह्येवंभूतो दृश्यो भवति चक्षुषा साक्षात्कारस्तु महावाक्येनैव वृत्तिव्याप्तत्वमात्रेण फलव्याप्तत्वं तु अत्रापि नास्ति स्वयंप्रकाशत्वसाम्यात्। सच्चिदानन्दरूपे स्वप्रकाशो भवति न विवदितव्यम्। बहुवाक्यप्रामाण्यात् इति तोषिणी ॥ १३ ॥ ननु देवकीजठरे प्रविष्टस्य किमियमतिस्तुतिः क्रियत इत्याशङ्क्य अनावृतस्याप्रच्युतस्य तव मुख्यप्रवेशः क्वापि नास्ति सर्वकारणतया वर्त्तनरूपो गौण एव प्रवेशस्तथैव देवकीजठरे प्रवेश इति प्रतिपादयति स एवेति ॥ सः सच्चिदानन्दस्वरूप एव त्वमग्रे सृष्ट्यादौ स्वशक्तिरूपया प्रकृत्या त्रिगुणात्मकमिदं विश्वं सृष्ट्वा तदनु ततः पश्चात् अप्रविष्टोऽपि प्रविष्ट इव भाव्यसे। प्रत्यक्षतो वा सद्रूपेण वा प्रविष्ट इव लक्ष्यसे। "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुत्या निरूप्यसे इत्यर्थः। हि इत्यप्यर्थे। एवमेव देवकीजठरे प्रविष्ट इव भाव्यसे ॥ १४ ॥ अत्र दृष्टान्तः—यथेति युग्मकेन ॥ अत्र तथा इत्यन्तं दशाक्षरं भिन्नं वाक्यम्। अग्रे च तद्विवरणं यथा इमे अविकृता भावाः महदादयः विराडादिषु कार्येषु अप्रविष्टा अपि प्रविष्टा इव दृश्यन्ते तथा त्वम् अप्रविष्टोऽपि प्रविष्ट इव भाव्यसे। एतदेव विवृणोति ते इति। ते महदादयः महदहङ्कारशब्दादि पञ्च तन्मात्राः सप्त हि यतः पृथग्भूताः सन्तो नानावीर्याः विशिष्टकार्यजनने असमर्था भवन्ति। अतो विकृतैः पृथिव्यादिपञ्चमहाभूतानि एकादशेन्द्रियाणि चेत्येवं षोडशभिः विकारैः सह सन्निपत्य संभूय विराजं ब्रह्माण्डं जनयन्ति। यद्वा। नानावीर्याः परस्परविसदृशा अपि पृथग्भूता अपि च चैतन्यप्रेरणया सन्निपत्य विराजं जनयन्तीति एवं विराजं समुत्पाद्यानुगताः प्रविष्टा इव दृश्यन्ते न पुनः प्रविष्टाः। उत्पत्तेः प्रागेव कारणतया विद्यमानत्वात् तेषामिह सृष्टे कार्ये पश्चात् संभवः प्रवेशो न इत्यर्थः ॥ १५–१६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्तुतिमेव दर्शयति दशभिः ॥ विदित इति ॥ प्रकृतेः 'भूमिरापोऽनलो वायुः' इत्यादिनोक्तद्विविधप्रकृतेः परः, अनेन चिदचिदात्मकप्रकृतेः परत्वमुक्तम्। केवलमनुभवो ज्ञानमानन्दश्च स्वरूपे यस्य सः, सर्वेषां जीवानां बुद्धीः बुद्धिवृत्तीः पश्यतीति

सर्वबुद्धिदृक्, पुरुषः पुरुषाकृतिः, यः भवान्, स एव त्वं इति साक्षात्, विदितः असि । यः प्रकृतेः परत्वेन केवलानुभवानन्दस्वरूपत्वेन सर्वबुद्धिसाक्षित्वेन च वर्त्तमानः पुरुषाकृतिः षाड्गुण्यपूर्णो भगवान्वेदैरुक्तः, स त्वमेवेति साक्षात् विदितोऽसि । नात्रोपचारमात्रमिति भावः ॥ १३ ॥ चित्प्रकृतिगतजीवानां बद्धमुक्तभेदेन द्वैविध्यात् पूर्वश्लोके चित्प्रकृतिगतबद्धजीवेभ्यो व्यावृत्तिरुक्ताऽथ मुक्तजीवेभ्यो व्यावर्त्तयितुमाह ॥ स एवेति ॥ यः प्रकृतेः परः, सर्वबुद्धिदृक् स एव त्वं, अग्रे सृष्टेः प्राक्, कारणत्वेनावस्थितः सन्निति शेषः । स्वप्रकृत्या महदादिपृथिव्यन्तरूपेण परिणतया त्रिगुणात्मिकया स्वशरीरभूतया प्रकृत्येत्यर्थः । इदं परिदृश्यमानं, त्रिगुणात्मकं स्थूलभावापन्नगुणत्रयपरिणामरूपत्वेन तद्वश्यजीवप्रचुरत्वेन च तदात्मकं जगत्, सृष्ट्वा, अनु पश्चात्, तज्जगत्, प्रविष्टः स्थित्यर्थं संकल्परूपज्ञानेन प्रविष्टः, असि हि । अथापि, अप्रविष्टः इव, भाव्यसे । इवशब्दोऽत्रावधारणार्थः । जगद्गतविकारैरस्पृष्ट एव ज्ञायसे इत्यर्थः । तथा च श्रूयते । 'तत् सृष्ट्वा तदेवानुप्राविशत् सत्यमभवत्' इति । स्थूलभावे विचित्रचिदचिद्रूपेण विक्रियमाणवत् प्रतीयमानमपि ब्रह्म सत्यमेवाभवत् । निरस्तनिखिलदोषमपरिच्छिन्नज्ञानानन्दं सदेकस्वरूपमेवाभवदिति श्रुत्यर्थः ॥ १४ ॥ ननु कार्यमनुप्रविष्टस्य मम कार्यप्रवेशात् प्रागिव तत्कारणतयाऽवस्थानं कार्ये प्रवेशे कृते सत्यपि कार्यगतविकारास्पृष्टत्वं च कथंतरामित्याशङ्क्य तदुभयं महदादिपृथिव्यन्ताचेतनदृष्टान्तमुखेनोपपादयति चतुर्भिः, तत्र तावत् दृष्टान्तं दर्शयति द्वाभ्याम् । यथेति ॥ संनिपत्येति च ॥ नानावीर्याः विभिन्नशक्तयः, ब्रह्माण्डोत्पादनरूपैककार्योत्पादनोपयुक्तैकरूपसामर्थ्यरहिता इत्यर्थः । पृथग्भूताः, परस्परसंमेलनरहिताः, ये विकृताः भावाः, महदहंकारतन्मात्ररूपाः प्रकृतिविकृत्यात्मकास्तत्त्वात्मका ये सप्त पदार्था इत्यर्थः । ते इमे विकृतैराकाशादिपञ्चस्थूलभूतैकादशेन्द्रियरूपषोडशभिर्विकारैः सह, इन्द्रियदेवानामिन्द्रियेभ्यः पृथग्भावेन तत्त्वेष्वगणनाद्विकाराणां षोडशत्वम् । संनिपत्य अन्योन्यसंयोगं प्राप्य, विराजं ब्रह्माण्डाख्यं वैराजपुरुषशरीरं, जनयन्ति हि । अनेन 'समेत्याऽन्योन्यसंयोगं परस्परसमाश्रयाः । महदादिविशेषान्ता ह्यण्डमुत्पादयन्ति ते' इति वैष्णवादिपुराणान्तरप्रसिद्धिर्द्योत्यते । एवं, समुत्पाद्य विराजं सम्यक् सृष्ट्वा, यथा अनुगताः अण्डान्तरं गताः इव, दृश्यन्ते, अण्डे एव उत्पन्ना इव दृश्यन्ते । तथापि, तेषां प्रागेव अण्डोत्पत्तेः प्रथमत एव, विद्यमानत्वात्, इव ब्रह्माण्डे, संभवः न । तथा, अस्यायं भावः । यथा महदादिविशेषान्तानां भावानां ब्रह्माण्डोत्पत्तेः प्रागेव तत्कारणतयाऽवस्थानं ब्रह्माण्डान्तर्गतदेवमनुष्यादिभावेष्वनुवृत्तिरनुवृत्तत्वेऽप्यननुवृत्तवदवस्थानमस्ति, तथा कृत्स्नजगदुत्पत्तेः प्रागेव तत्कारणतयावस्थितिस्ततस्तदनुप्रविष्टोऽपि अप्रविष्ट इव भाव्यसे इत्र द्वयोरेकान्वयः ॥ १५-१६ ॥

कृष्णप्रिया

श्री वसुदेवजी ने कहा है कि भगवन् ! मैंने आपको जान लिया है आप साक्षात् प्रकृति से पर और प्रकृति के नियामक पुरुषोत्तम हो, आपका स्वरूप केवल अनुभव एवं आनन्द रूप है, आप सर्व चेतनों की बुद्धि के द्रष्टा हैं ॥ १३ ॥ वह ही आप अपनी प्रकृति से इस गुणत्रयात्मक जगत् को बनाकर उस जगत् के भीतर प्रविष्ट न होते हुए भी प्रविष्ट जैसे प्रतीत होते हो ।१४। जिस प्रकार यह अविकृत (आधिदैविक भाव) है उसी प्रकार वह प्राकृत भाव भी हैं, इन दोनों का सादृश्य नाना प्रकार के सामर्थ्य और पृथक् होने से है यह अविकृत भाव विकृत भावों से मिलकर ब्रह्माण्ड को उत्पन्न करते हैं यह ठीक ही है ॥ १५ ॥ (वह प्राकृत और अप्राकृत भाव) मिलकर भले प्रकार (भौतिक जगत्) को उत्पन्न कर उसमें अनुगत जैसे पीछे से प्रविष्ट हुए से दीखते हैं, परन्तु पहले से ही विद्यमान होने के कारण यहाँ उनका प्रवेश सम्भव नहीं है ॥ १६ ॥

एवं भवान् बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः ।
अनावृतत्वाद् बहिरन्तरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः ॥ १७ ॥
य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः ।
विनानुवादं न च तन्मनीषितं सम्यग् यतस्त्यक्तमुपाददत् पुमान् ॥ १८ ॥
त्वत्तोऽस्य जन्मस्थितिसंयमान् विभो वदन्त्यनीहादगुणादविक्रियात् ।
त्वयीश्वरे ब्रह्मणि नो विरुध्यते त्वदाश्रयत्वादुपचर्यते गुणैः ॥ १९ ॥
स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः ।
सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तपसा जनात्यये ॥ २० ॥

कर्दमक्षमा

अन्वयः—एवं भवान् अपि बुद्ध्यनुमेयलक्षणैः ग्राह्यैः गुणैः सन् अपि तद्गुणाग्रहः सर्वस्य सर्वात्मनः आत्मवस्तुनः ते अनावृतत्वात् बहिः अन्तरं न ॥ १७ ॥ यः आत्मनः दृश्यगुणेषु स्वव्यतिरेकतः सन् इति व्यवस्यते (सः) अबुधः अनुवादं

विना तन्मनीषितं सम्यक् न यतः पुमान् त्यक्तम् उपाददत् ॥ १८ ॥ विभो अनीहात् अगुणात् अविक्रियात् त्वत्तः अस्य जन्मस्थितिसंयमान् वदन्ति ब्रह्मणि त्वयि नो विरुध्यते तदाश्रयत्वात् गुणः उपचर्यते ॥ १९ ॥ सः त्वं स्वमायया त्रिलोकस्थितये आत्मनः शुक्लं वर्णं बिभर्षि खलु सर्गाय रजसा उपबृंहितं रक्तं जनात्यये तमसा कृष्णं वर्णं च (बिभर्षि) ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दार्ष्टांतिकेऽतिदिशति । एवं भवानिति । ननु यद्यहमप्रच्युतस्वरूप एव कारणतया कार्येषु वर्ते तर्हि तैरिंद्रियैर्गृह्यमाणेषु मम ग्रहणं किं नास्ति तत्राह । बुद्ध्यनुमेयलक्षणैरिति । बुद्ध्या रूपादिज्ञानेनानुमेयं लक्षणं स्वरूपं येषां तैर्गुणैरिंद्रियैर्ग्राह्यैर्गुणैर्विषयैः सह सन्नपि वर्तमानोऽपि तद्गुणाग्रहस्तैर्गुणैः सह न गृह्यते भवान् । अयं भावः । नहि ग्राह्यैः सहभावमात्रं ग्रहणे कारणं किं त्विंद्रियाणां शक्तिः सा च कार्यैकसमधिगम्या यथा कार्यमेव कल्प्यते अतो यथा चक्षुषा रूपग्रहणेऽपि रसादिग्रहणं नास्ति एवं सहभावेऽपि जिह्वया रस एव गृह्यते न तु रूपं तथैव विषयग्रहणे त्वद्ग्रहणमपीति । अविषयत्वेन च ग्रहणानर्हत्वमुक्तमेव सर्वबुद्धिदृगित्यत्र एवं तावत्प्रागेव विद्यमानत्वात्प्रवेशो नास्तीत्युक्तम् । किं च परिच्छिन्नस्य नीडे पक्ष्यादेरिव प्रवेशो भवेत्तव त्वनावृतत्वादपरिच्छिन्नत्वेन बहिरंतर्भेदो नास्ति । कुतः प्रवेशः इत्याह । अनावृतत्वादिति । अनावृतत्वे हेतूनाह । सर्वस्येति नहि सर्वस्वरूपस्यान्यदावरकमस्ति सर्वात्मनः । न ह्येकेनावृतोऽन्यस्यात्मा भवेत् । आत्मवस्तुन इति आत्मनो वस्तुनश्चेति हेतुद्वयम् ॥ अत सातत्यगमन इत्यस्मादतति व्याप्नोतीत्यात्मा नहि व्यापकस्यावरणं घटते । तथा वस्तुनः परमार्थवस्तुन आवरणं न घटत इत्यर्थः । आवृतं हि न प्रकाशेत । तस्मात्तवांतर्यामितया प्रवेशो न मुख्योऽस्ति कुतस्तरां गर्भे प्रवेशः अतः केवलानुभवानंदस्वरूप एव त्वं विदितोऽसीत्याश्चर्यं मम भाग्यमित्यर्थः ॥ १७ ॥ नन्वेतद्धेतुचतुष्टयं प्रपंचस्यावस्तुत्वे घटेत तत्तु न संभवति सत्यत्वेन प्रतीतेरित्याशंक्याह । य इति । आत्मनो दृश्येषु गुणेषु देहादिषु स्वव्यतिरेकत आत्मव्यतिरेकेण पृथक्सत्त्वं देहादिरिति व्यवस्यते निश्चिनोति यः पुमान्सोऽबुधोऽविद्वान् व्यतिरेकदर्शनात् । किं च मनीषितं विचारितं तद्देहादि सर्वं यतो विनानुवादं वाचारंभणमात्रं विना सम्यक् न भवति । अतोऽवस्तुत्वेन त्यक्तं बाधितमेव वस्तुबुद्ध्या उपाददत्स्वीकुर्वन्नबुध इत्यर्थः ॥ १८ ॥ एवं परमेश्वरदृश्यस्य तद्व्यतिरेकेणासत्त्वमुक्तं परमेश्वरोपादानत्वादपि तद्व्यतिरेकेणासत्त्वमित्याह । त्वत्तोऽस्येति । न चैवं सत्यपि विकारित्वमित्याह । अनीहादिति । अगुणत्वादनीहत्वं ततो विकारित्वमित्यर्थः । नन्वनीहत्वे कथं कर्तृत्वं कर्तृत्वे वा कुतोऽविकारित्वं तत्राह । त्वयीश्वर इति ब्रह्मत्वादविकारित्वमीश्वरत्वात्कर्तृत्वमिति । नन्वेतदपि विरुद्धमेव नेत्याह । त्वदाश्रयत्वादिति । गुणैः कुर्वद्भिस्त्वयि सृष्ट्यादिकर्तृत्वमुपचर्यते गुणाश्रयत्वात् । यथा भृत्यकृत्यं राजनीति ॥ १९ ॥ एवंभूतस्यैव तव यथा विश्वस्थितिसर्गप्रलयार्थं त्रिवर्णा गुणावतारा एवमयं भूभारापनयनार्थमिति ज्ञातमित्याह स त्वमिति श्लोकद्वयेन ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यमुद्दिश्य दृष्टांतः प्रदीयते स दार्ष्टांतिकः । अतिदिशति साम्येन कथयति । एवमनेन प्रकारेण भवानपि । यथा ते महदादयो ब्रह्मांडप्रविष्टा अपि न प्रविष्टास्त पुनर्जातवत्प्रतीता अपि न जातास्तथैव त्वमपीत्यर्थः । पुनराशंकते नन्विति । तेषु कार्येषु मम कारणस्य किं नास्ति कुतो नेत्यर्थः । तत्र कार्यग्रहणेऽपि कारणाग्रहणे गुणैरिति पदमावृत्त्या योज्यं गुणैर्विषयैः अनुमेयमनुमातुं योग्यम् अनुमानं तु रूपाद्युपलंभः करणसाध्यः क्रियात्वात् छिदिक्रियावदिति । किं–च या या क्रिया सा सा करणसाध्येति व्याप्तेर्वा स्यादिरूपकरणसाध्यच्छिदिक्रियायां दृष्टत्वादिंद्रियसिद्धावित्थं बोध्यम् । अयं भावः इदमत्र तात्पर्यम् । तदाह–नहीति । कार्यैकसमधिगम्या कार्यद्वारेणैव केवलं ज्ञेया । यथा कार्यं कार्यानुसारेण । यतः कार्यानुसारेण कल्प्यतेऽतः कारणात् । यथाम्रफले दृष्टे तद्गतनीलपीतादिवर्णविशिष्टाकारमात्रं चक्षुषा गृह्यते न तदंतर्वर्तिरसोऽपि तद्वदित्यर्थः । अविषयत्वेन द्रष्टृरूपत्वादगोचरत्वेन । ग्रहणानर्हत्वं ज्ञानाविषयत्वम् । एवमनया रीत्या तावत् निश्चयेन साकल्येन वा । अन्यदप्याह किं चेति । परिच्छिन्नस्य परिमितस्य नीडे तृणादिरचितपक्ष्यावासे । पक्ष्यादेरित्यादिना सर्पादिग्रहः । अनावृतत्वादावरणहीनत्वात् । अपरिच्छिन्नत्वेनापरिमितत्वेन । बहिरंतर्भेदो बाह्याभ्यंतरभेदः । कुतः प्रवेशः कथं प्रवेशः संगच्छेदित्यर्थः । इत्यर्थ इति । अवस्तुनो जगतः परिच्छिन्नत्वेनावरणं संजाघट्यादेवेति न हि परमार्थरूपत्वात्सर्वव्यापकस्येति तात्पर्यम् । यस्मात्तवांतर्यामितया मुख्यः प्रवेशो नास्ति तस्मात्कुतस्तरां गर्भे प्रवेश इति संबंधः । यतो गर्भे न प्रवेशोऽतो हेतोः । इत्यर्थ इति । न हि परपुण्योत्कर्षं विनैतद्रूपस्य दर्शनादि भवतीति भावः ॥ १७ ॥ मीमांसकमतेन प्रपंचसत्यत्वमंगीकृत्य पुनराशंकते नन्विति । एतत्पूर्वोक्तं हेतुचतुष्टयं सर्वस्वरूपत्वात्सर्वात्मत्वादात्मत्वाद्वस्तुत्वादित्येवं रूपाणां हेतूनां चतुष्कम् । अवस्तुत्वेऽपरमार्थत्वे घटेत संगच्छेत । तत्तु अवस्तुत्वं तु । व्यतिरेकदर्शनात् भेददर्शनात् । भेददर्शनं त्वविचारचार्वित्याह–किञ्चेति । सर्वं जगत् । इत्यर्थ इति । असति सद्बुद्धिकर्त्ता मूर्ख इति भावः ॥ १८ ॥ दृश्यस्य द्रष्टारं विहाय निष्पत्तेरनुपलंभादुपादेयस्योपादानाव्यतिरिक्तत्वाच्चासत्त्वमस्तीत्याह—एवमित्यादिना । एवं सत्यपि जन्माद्युपादानत्वे सत्यपि । विकारित्वं सविकारत्वम् । तत्र हेतुः–अनीहत्वादिति । अचेष्टत्वादित्यर्थः । ततोऽनीहत्वात् । इत्यर्थ इत्थं हेतुहेतुमद्भाव इति भावः । पुनस्तत्रैवाशंकते—नन्विति । संभवमाह–त्वयीति । निरुपाधित्वादकर्तृत्वेपि नियंतृत्वेन कर्तृत्वं तवास्त्येव तर्हि ईश्वरत्वेपि एतत्कर्तृत्वं विरुद्धमेव लोके ईशो राजादिर्न हि कार्यकर्त्ता

दृश्यते किं–तु भृत्यादिरेवात ईशः कर्त्तेति विरुद्धं तत्राह नेति। त्वयि त्वद्विषये। उपचर्य्यते आरोप्यते। तदाश्रयत्वाद्गुणाश्रयत्वात्। यद्यपि गुणाश्रयत्वं प्रकृतेरेव तथापि तस्या अपि त्वच्छक्तिरूपत्वेन त्वदाश्रयत्वात्तदाधारा अपि पारंपर्य्येण त्वदाश्रया एव त इत्यर्थः। भृत्यकृतं योद्धृकृतं जयपराजयादिकर्म ॥ १९ ॥ एवंभूतस्यैव निर्विकारस्यैव त्रयः शुक्लरक्तकृष्णा वर्णा येषां ते त्रिवर्णाः गुणैरवतीर्यंत इति गुणावतारा ब्रह्मविष्णुरुद्राख्याः। एवमयं तथैवाधुना मद्दृग्गोचरो यस्तेऽवतारः। अपनयनमपाकरणम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भवतस्तु परमकारणत्वेन न सुतरां प्रवेशो न च स्पर्श इत्याह—एवमिति। तस्मादेवम्भूतस्य तव साक्षाद्योऽयं प्रकाशः सोपि तव परमप्रसादमय इति भावः। अन्यस्तैः तत्र गुणैरिति विशेषेण भेदेनार्थभेदाद्द्विधा व्याख्यातं यद्वा, अत्रैवार्थविशेषेण प्रेमवश्यत्वादिगुणशीलत्वं योजयति एवमुक्तप्रकारेण प्रेमवश्यत्वादिभिर्गुणैः सह नित्यं वर्त्तमानोपि तेषु गुणेषु आग्रहः पुनः पुनरासक्तिर्यस्य तथाभूतो भवान् भवति, कथंभूतः? बुद्ध्यनुमेयमेव न तु प्राप्यं लक्षणं स्वरूपं येषां तैः "न तत्समश्चाभ्यधिकश्च दृश्यते" इति श्रुतेः। तत्र हेतवः सर्वस्यैश्वर्यादयः सर्वमयस्य सर्वात्मनः सर्वचेतयितुः सर्वव्यापकस्य वा आत्मना स्वयमेव वस्तु यस्तस्य स्वतः परमपुरुषार्थस्वरूपस्येत्यर्थः। तथापि तद्गुणाग्रह इति सततभक्तप्रेमवशत्वेन सतताशेषसद्गुणाभिव्यञ्जकत्वं दर्शितं तत आवयोर्यत्पुत्रतया प्रविष्टः प्राप्तोऽसि च तद्भवतो युक्तमेव तदेव चावयोरपि परमफलमिति भावः ॥ १७ ॥ नन्वन्येषामन्येऽपि देवाः पुत्रादिरूपाः प्रकाशन्ते कथं मय्येवाग्रह इत्यत्राह—य इति द्वयेन। परमस्रष्टारं परमकारणञ्च त्वां विनाऽन्येषां स्वातन्त्र्येण सत्त्वाभावान्न तेषु पुरुषार्थत्वमिति भावः। यद्वा आत्मनः स्वरूपदृश्याः साक्षादनुभवनीया मनोहरा वा गुणा येषां तेष्वपि मध्ये स्वव्यतिरेकतः तेषामपि मूलस्वरूपं त्वां विना अयं देवस्सन् उत्तम इति यो निश्चिनोति स मूर्खः, यतः तन्मनीषितं दृश्यगुणोऽयं सन्निति विचारितं सम्यक् उत्तमं न भवति, कुतः? अनुवादं तत्त्वनिर्द्धारणार्थमन्योन्यवादं विना तत् सत्सङ्गाभावेन तत्त्वानिश्चयादेवेत्यर्थः। यतः स पुमान् सूरिभिस्त्यक्तं पुरुषार्थान्तरमेवोपाददत् स्वीकृतवान् ददेः परस्मैपदमार्षम् ॥ १८ ॥ त्वत्त इति तैर्व्याख्यातं तत्रोपादानत्वनिर्वाहायैवं व्याख्येयम् अनीहत्वमक्षोभितत्वमित्यर्थः। अविकारित्वं स्वरूपान्यथाभावरहितत्वमित्यर्थः। गुणमय्याविद्यया विवर्त्तत एवेति नोपादानत्वेपि दोष इति भावः। अथ निमित्तत्वे दोषमाशङ्कते नन्विति। ब्रह्मत्वादित्यादौ वस्तुतो ब्रह्मस्वरूप एव तस्मिन् गुणाध्यारोपादेव विकारित्वादिप्रतीतेरिति भावः। यद्वा निर्दोषेण सर्वकारणत्वेन सर्वोत्कृष्टानन्तगुणत्वं स्थापयति त्वत्तः प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधेनेति न्यायेनोपादानान्निमित्ताच्च अत्र विरोधमाशङ्क्य परिहरति विभो इत्यादिना तत्रागुणादविक्रियादनीहादिति पदत्रयस्य क्रमेणायमर्थः, यद्यपि तव रज आदित्रैगुण्यसम्बन्धो नास्ति तत उपादानता हेतुः स्वरूपान्यथाभावसम्भवोऽपि नास्ति निमित्तताहेतुर्बहिरन्तश्चेष्टापि नास्तीति तथापि विभो इत्यस्यायमर्थः, यद्यपि च कृत्स्नप्रसक्तिर्निरवयवशब्दव्यापको वेत्युक्तरीत्या विभोरेकदेशाभावेन सर्वपरिणतावुपास्यांशानवस्थानादिदोषः स्यात् निमित्तत्वाङ्गीकारे चेष्टापि न सम्भवेदिति तथापि "श्रुतेस्तु शब्दमूलत्वात्" (२।१।२७) इति न्यायेन श्रुत्यैकप्रमाणास्त्वत्त एव वदन्ति निर्गुणत्वादित्वे जगदुद्भवादिहेतुत्वे च भ्रमादिदोषचतुष्टयराहित्येन स्वत एव प्रमाणभूताभिः श्रुतिभिरेव सिद्धे क इव सन्देह इत्यभिप्रायादित्यर्थः। न चायं विरोध इत्याह—त्वयीति। ब्रह्मणि निर्विकारपरमानन्दैकरूपेपि ईश्वरत्वे सर्वाचिन्त्यशक्ताविति चिन्तामण्ययस्कान्तादीनामपि नानापदार्थप्रसरलोहचालनादावविकारत्वादौ च दृष्टे "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्। प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम्" इति पुराणानां निर्णये च सति सर्वाचिन्त्यशक्तिगणपूर्वकपरस्परापरमकारणभूते त्वयि को वा विरोधः स्यात् अन्यथाऽनुपपत्तिर्हि सर्वोपमर्दिनी ये यमुभयत्राप्यचिन्त्यामेव शक्तिं बलादुपस्थाप्य विरोधमपि निरुन्धे ततः सर्वपरमत्वेन तादृशशक्तेः परमयोग्यत्वात् वाङ्मनसातीतपरमानन्दैकरूपत्वेनाविद्याविषयाश्रयतारहितत्वाच्च न विवर्त्तकल्पनं युक्तमित्यर्थः। ननु, भवतु वैकुण्ठैश्वर्यादिहेतुनिर्दोषषाड्गुण्यशक्तिता जगज्जन्मादिहेतुसदोषत्रैगुण्यशक्तिता तु दोषायैवेत्याशङ्क्याह—तदाश्रयत्वादिति। तस्याः शक्तिच्छायारूपत्वान्न तद्दोषेण लिप्यसे तथापि त्वामाश्रयमन्तरेण तद्गुणा न सिद्ध्यन्तीति तैर्गुणैस्तत्कर्तृत्वादिकमुपचर्य्यते एवेत्येतदप्यचिन्त्यता वैभवमेवेत्यर्थः ॥१९॥ ननु, कथं मत्तोस्य सर्वं सृष्ट्यादिकं ब्रह्मादीनामपि सर्गादिकर्तृत्वादित्यत आह —सत्त्वमिति। स उक्ताविरोधप्रकारेण सृष्ट्यादिकारकस्त्वं शुक्लं स्वतो मायागुणराहित्यात् सांनिध्येनापि सत्त्वमात्रोपकारकत्वाच्च शुद्धमित्यर्थः। तादृशमात्मनः स्वस्यैव वर्णं रूपं श्रीविष्णुः सन् बिभर्षि जगति धारयसि प्रकटयसीत्यर्थः। तत्र हेतुः स्वमायया निजकृपया तथा रक्तं रजोमयत्वेन सिसृक्षादिरागबहुलं ब्रह्मात्मा सन् बिभर्षि पुष्णासि तथा तमोमयत्वेन कृष्णं क्रोधादिप्रायतया नाभिव्यञ्जितस्वरूपप्रकाशमित्यर्थः। तत्तु रुद्रात्मा सन् बिभर्षीति अत्र चाक्षुषे गुणे न तात्पर्यं परमतामसानां बकादीनामपि शुक्लवर्णत्वात् परमसात्त्विकानां श्रीव्यासशुकादीनामपि श्यामवर्णत्वात् शुक्लादिशब्दास्तु ब्राह्मणादिजातिष्वपि प्रयुज्यन्ते किञ्च क्षीरोदशाय्येव गुणावतारो विष्णुरिति पूर्वं प्रतिपादितं स च तत्र तत्र श्यामवर्णत्वेनैव प्रसिद्धः रुद्रश्च शुक्लः तथा तयोर्नानावतारा नानावर्णा अपि यथा त्वं पालनसंहारपरा एव अतो ब्रह्मणो रक्तवर्णत्वेपि न तत्र तात्पर्यं श्रीविष्णोस्तु निर्गुणरूपत्वमेव नान्यवत् सगुणत्वं वक्ष्यते च त्रिदेवीपरीक्षायाम्—

हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः। शिवः शक्तियुतः शश्वत्त्रिलिङ्गो गुणसम्वृतः ॥ इति।

अत एवात्रापि रजसेत्यादिवत् सत्त्वेनेति नोक्तं तैरपि तत्तद्गुणक्रियाव्यत्ययेन व्याख्यास्यते रक्षितुमिच्छुरवतीर्णोसि कृष्णेन वर्णेनेति अत इत्यादौ च प्रत्युत तामसानां हननमेव वक्ष्यते अन्यथा तदीयस्वव्याख्यासहस्रेणापि विरोधः स्यादिति सर्वदा सच्चिदानन्दघनस्वरूपमेव तद्रूपमिति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमुक्तप्रकारैर्योदृशैर्वा स्वाभाविकैर्भक्तवात्सल्यादिगुणैः सह नित्यं वर्त्तमानोऽपि तेषु गुणेष्वाग्रहः पुनः पुनरासक्तिर्यस्य तथाभूतो भवान् भवति । कथम्भूतैः ? बुद्ध्यानुमेयमेव, न तु ग्राह्यं स्वरूपं येषां तैरपरिच्छिन्नत्वादिना परमदुर्वितर्कैरित्यर्थः । अतो ग्राह्यैः सर्वोपादेयैः परमसेव्यैरित्यर्थः; यद्यपि ते तव बहिरुपेक्ष्यमन्तरञ्चापेक्ष्यं नास्ति । कुतः ? अनावृतत्वात् परमस्वतंत्रत्वादित्यर्थः । तत्र हेतवः सर्वस्येत्यादयः सर्वमयस्य सर्वात्मनः सर्वचेतयितुः सर्वव्यापकस्य वात्मा स्वयमेव वस्तु यस्तस्य स्वतः परमपुरुषार्थस्वरूपस्येत्यर्थ; तथापि तद्गुणाग्रह इति सततभक्तवात्सल्याद्यशेषगुणनिधित्वमुक्तम् ॥ १७ ॥ अत एव त्वमेव भजनीयो न त्वन्य इत्याह—य इति । आत्मनः स्वस्य दृश्याः साक्षाद् भवनीया मनोहरा वा गुणा येषां तेष्वपि मध्ये स्वव्यतिरेकतस्त्वां विनायं देवः सन् उत्तम इति यो निश्चिनोति, सोऽबुधः, यतस्तन्मनीषितं सम्यगुत्तमं न स्यात् । कुतः ? अनुवादमन्योन्यसम्वदि विना; यद्वा, नु अहो ! तत्त्वनिर्द्धारार्थमन्योऽन्यं वादं विना तत्सत्संगाभावेन तत्त्वानिश्चयादेवेत्यर्थः । अतः पूर्वैस्त्यक्तं भजनीयान्तरमुपाददं स्वीकुर्वन् पुमान् बुध एव; किंवा, तन्मनीषितमनुवादं विनैवेतित्यक्तमुपेक्षितमुपादद पुमान् सम्यक् समीचीनो न भवति ॥ १८ ॥ ननु, कथमहमेव भजनीयः ? तत्राह—त्वत्त इति । अनीहान्निष्कामादनन्यापेक्षादपीत्यर्थः; अगुणान्मायागुणसम्बन्धरहितादपि; अविक्रियात् क्रोधादि-विकार-रहितादपि, वदन्ति वेदास्तद्विदो वा । विभो हे प्रभो ! सर्वशक्तियुक्तेत्यर्थः । एवं पूर्वोक्तप्रकृतिपरत्वादिकस्यापि तस्य (परमेश्वरस्य) मायिकसृष्ट्यादि-(आदि-शब्दात् स्थितिसंयमौ) कर्त्तृत्वं समर्थितम् । तत्रानीहत्वादित्रयं यथाक्रमं यथासम्भवं वा प्रकृतिपरत्वादित्रयादुह्यम्; तथानीहत्वादावपि सति स्रष्टृत्वादित्रयञ्च । नन्वेवं विरुद्धं स्यात्तत्राह—त्वयीति । यथैकस्यैवेश्वरत्वं ब्रह्मत्वञ्च न विरुध्यते—ऐश्वर्य्यस्यापि समग्रस्यामायिकत्वेन ब्रह्मात्मकत्वात्, तथेदमपीत्यर्थः । ननु सत्यं वस्त्वविरुद्धमास्ताम्, सृष्ट्यादिकन्तु मायिकत्वाद्विरुद्धं स्यादेव ? तत्राह—त्वदिति । मायागुणैः क्रियमाणं सृष्ट्यादिकं त्वय्युपचर्य्यते, मायागुणाश्रयत्वात्, तत्त्वतः सम्बन्धाभावेन त्वत्सम्बन्धसत्तया वा, न विरुध्यत इत्यर्थः । यद्वा, एवमविरोधादेव गुणैर्भगवत्तावाच्यैरुपचर्य्यते परिचर्य्यते नित्यं सेव्यते भवान् तदाश्रयत्वात्, तादृशगुणानां भवानेवैक आश्रयः, नान्यः कोऽपीत्यतो हेतोरित्यर्थः । एवमाश्चर्य्यस्वरूपत्वाद्भवानेव भजनीय इत्यर्थः ॥ १९ ॥ ननु, कथं मत्तोऽस्य सृष्ट्यादिकं ब्रह्मादीनामेव तत् कर्त्तृत्वादत आहुः—सत्त्वमिति । सत्त्वगुणाधिष्ठातृत्वेनाभेदादुक्तम्; यद्वा, स उक्ताविरोधप्रकारकः सृष्ट्यादिकारको वा त्वं प्रायः शुक्लं शुक्लवर्णं रूपं श्रीयज्ञादि-मन्वन्तरावतारैः स्वमायया निजकृपया यद्यपि भवानेव स्वयं पालकः, अत एवात्र प्रथमं स्थितय इत्युक्तम् । तथाप्यवतारावतारित्व-भेदापेक्षया स ततो भिन्नतयोक्तः । कृष्णं नीललोहितं जनात्यये जगत्संहारे निमित्ते । एवं ब्रह्मादयोऽपि तवैव गुणावतारा इति त्वत्त एव सृष्ट्यादिकमित्यर्थः ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

बुध्यनुमेयलक्षणैः बुद्धिनिरूप्यस्वभावैः गुणैः गुणमयकामैः सन्निति एककारणतया अस्तीति न ग्राह्यत्वं तद्गुणग्राहं तत्तद्गुणमयं कार्यं साक्षात्कर्तुं तत्र हेतुरनावृतत्वम् असङ्कुचितज्ञानत्वं बहिरन्तरं न ते बहिर्भागस्तत्प्रतिसम्बध्यन्तर्भागश्च नास्ति व्यापित्वात्, तदेवाह; सर्वस्य सर्वशब्दवाच्यस्य सर्वात्मनः सर्वशरीरकस्य आत्मवस्तुनः सर्वेषामात्मवस्तुनः सर्वेषामात्मभूतस्य बहिरन्तरं नेत्यन्वयः ॥ १७ ॥ अदात्मनः इति आत्मैव नित्यस्तथापि स्वव्यतिरिक्तेषु भोग्यपदार्थेषु सन्निति नित्य इति अबुधो व्यवस्यते अबुध्वा व्यवस्यति तन्मनीषितं न सम्यक् विनानुवादं अनित्यत्वनिषेधार्थमनन्यत्वमनुवादेनोक्तं चेन् तत्सम्यङ्नित्यत्वप्रतिपादनं तत्तु न सत्यमित्यर्थः । यतस्त्यक्तमुपाददत्पुमानिति विवेकिभिरितरानित्यतया त्यक्तं हि तद्बुद्ध्या पुमानुपादत्ते अतो न सत्यमित्यर्थः ॥ १८ ॥ अनीहात् संकल्पेतरव्यापाररहितात् अगुणात् गुणत्रयरहितात् अविक्रियात् अविक्रियस्वरूपात् त्वयि न विरुध्यते सर्वशक्तित्वादित्यर्थं तस्मिन् कथं सृज्यत्वादिव्यपदेशः ? इत्यत्राह—त्वदाश्रयत्वादिति । स्वशरीरभूतस्य कार्यवर्गस्यान्तरात्मतया धारकत्वात्तत्तच्छरीरगतैरुत्पत्यादिभिर्विशिष्टे त्वयि न तु साक्षादुच्यत उपचर्यते इत्यर्थः ॥ १९ ॥ स्वमायया स्वसङ्कल्पेन शुक्लादिशब्दैः सत्त्वादिगुणा लक्ष्यन्ते ॥ २०–२१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दृष्टान्ताभिप्रेतमर्थं दार्ष्टान्तिके निगमयति—एवमिति । यथा महदादिविशेषान्तानां भावानामण्डोत्पत्तेः प्रागेव तत्कारणतया अवस्थानमण्डान्तर्गतदेवमनुष्यादिभावेष्वनुवृत्तिश्च तथा भवानपि कृत्स्नजगदुत्पत्तेः प्रागेव तत्कारणतयाऽवस्थितस्तदनुप्रविष्टः अथानुप्रविष्टोऽप्यप्रविष्ट इव भाव्यस इत्येतदुपपादयति—बुद्धीतिसन्नपि देवमनुष्यादिपदार्थेष्वनुप्रविश्य विद्यमानोऽपि बुद्ध्यनुमेयलक्षणैर्ज्ञाननिरूप्यस्वभावैर्ग्राह्यै रैन्द्रियकैर्गुणैर्गुणमयैर्देवादिपदार्थैर्गुणकार्यैर्विशिष्टोपीति शेषः । तद्गुणाग्रहः तद्गुणैर्देवादि-

भावगतविकारैर्न गृह्यते नोपादीयते न स्पृश्यते इति यावत् तथा तद्गुणग्रह इति पाठे तद्गुणमयकार्ये साक्षात्कर्ता भवान् बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैर्विशिष्टोपि सन्नेकरूपो निर्विकारः निरस्तनिखिलदोषोऽपरिच्छिन्नज्ञानानन्दस्वरूपः एकरूपत्वेनावतिष्ठत इत्यर्थः। यद्वा, बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपि तैः सह वर्त्तमानोऽपि तद्गुणाग्रहः तद्गतविकारास्पृष्टः पाठान्तरे तत्साक्षात्कर्ता न तु तद्गतविकारस्पृष्टः इत्यन्वयः। कथं तद्विशिष्टस्यापि तद्गतविकारास्पर्शः? इत्यत्राह—अनावृतत्वादिति। अनावृतत्वादसङ्कुचितज्ञानत्वान्नित्यासङ्कुचितापरिच्छिन्नज्ञानत्वेन जीवस्येव कर्मायत्तज्ञानसङ्कोचविकासादिविकाराभावादनेन जीवगतविकारास्पर्श उक्तः अनावृतत्वे हेतुमाह; बहिरन्तरं न ते इति। बहिर्भागस्तत्प्रतिसम्बध्यन्तर्भागश्च ते तव नास्ति व्यापित्वादपरिच्छिन्नस्यावरणासंभवादिति भावः। व्यापित्वमचेतनगतदोषास्पर्शश्चाह; सर्वस्य कृत्स्नजगत्कारणतया तदनन्यत्वेनावस्थितस्य किं सर्वत्वं स्वरूपेण? नेत्याह; सर्वात्मनः सर्वशरीरकस्य शरीरात्मभावनिबन्धनमेवानन्यत्वं न तु स्वरूपाभेदनिबन्धनमिति भावः। शरीरगोचरबुद्धिशब्दानां शरीरपर्यन्तत्वात् सर्वशरीरकत्वेपि सर्वानन्यत्वमविहतमेवेति भावः। यतः सर्वात्मा अत एव न सर्वगतदोषसंस्पर्शप्रसङ्गः न हि देहगता बाल्यादयो धर्मास्तदात्मनि प्रसजन्तीत्यभिप्रायेण विशिनष्टि; आत्मवस्तुन इति, सर्वेषामात्मभूतस्य तव बहिरन्तरं नेत्यन्वयः। सर्वत्र सर्वथा सर्वतः परिपूर्णत्वादिति दिक्। यद्यपि बालोऽहं युवाऽहम् इति देहधर्मास्तदात्मनि प्रतीयन्ते तथापि सा प्रतीतिर्जीवानां देहात्मभ्रान्तिमूला परमपुरुषस्य त्वनावृतत्वादावरणमूलकदेहात्मभ्रान्त्यादेरभावादात्मनि न शरीरगतदोषसंस्पर्शस्तत्प्रतीतिश्चास्तीति भावः॥ १७॥ एतदेव विशदयितुं परमपुरुषस्य प्रत्यक्षतः स्वयाथात्म्यत्वेन देहात्मभ्रान्त्यभावं जीवस्य तद्वैपरीत्यञ्चाह—य इति। यो भवान् बुधः सर्वज्ञः शश्वत्स्वयाथात्म्यज्ञः आत्मनः स्वस्माद्व्यतिरेकतः भेदाध्यवसायाद् दृश्यगुणेषु दृश्येष्वैन्द्रियकेषु गुणेषु गुणकार्येषु देवादिभावेषु सन्निति व्यवस्यते देवादिपदार्थेष्वन्तरात्मतया अवस्थितमप्यात्मानं सन्नित्येव निरस्तनिखिलदोषत्वेनापरिच्छिन्नज्ञानानन्दस्वरूपत्वेन चैकरूपतया निर्विकारत्वेनैव व्यवस्यति विविनक्ति आत्मनेपदन्त्वार्षं चस्त्वर्थः तन्मनीषितन्तु तस्य जीवस्य मनीषितमध्यवसायः बालोऽहं युवाऽहं देवोऽहं मनुष्योऽहम् इत्यध्यवसायस्त्वनुवादं विना न सम्यग्विवेकिभिः तत्त्वत्रययाथात्म्यविद्भिर्निषेधार्थमनुवादं विना न सम्यक् नाबाधितः तन्मनीषितं केवलं निषेधार्थमनुवादरूपतयोपयुज्यते नत्वबाधितमित्यर्थः। कुतः? यतः विवेकिभिस्तत्त्वत्रययाथात्म्यविद्भिस्त्यक्तं परिहृतं बाधितं मनीषितं पुमान् देहात्मभ्रान्तिमानुपाददद्धितबुद्ध्योपादत्ते तदेवं शश्वत् प्रत्यक्षितस्वयाथात्म्यत्वाद्देहात्मभ्रान्त्यभावाच्च शरीरभूतचिदचिद्गतविकाराभावात्प्रविष्टस्याप्यप्रविष्टप्रायत्वात्कृत्स्नजगदुत्पत्तेः प्राक् तत्कारणतया निर्विकारत्वेनावस्थितो भगवानिदं जगत्ससर्जेति समुदायार्थः॥ १८॥ ननु, निर्विकारस्य मम कथं विकाराश्रयत्वरूपं जगत्कारणत्वम्? इत्यत्राह—त्वत्त इति। हे विभो! अनीहात्सङ्कल्पेतरव्यापाररहितादगुणात्सत्त्वादिगुणत्रयरहितादविक्रियस्वरूपादपि त्वत्त एव कारणादस्य जगतो जन्मादीन् वदन्ति संयमो लयः "निष्क्रियं निष्कलं शान्तं निरवद्यं निरञ्जनम्" सत्यं ज्ञानमनन्तं" सदेव सौम्येदमग्र आसीत् "एकमेवाद्वितीयं' तदैक्षत बहु स्याम्" इत्यादयो वेदान्ताः प्रतिपादयन्तीत्यर्थः। कथमग्निना सिञ्चेदितिवदसङ्गतमर्थं वेदान्ता अपि प्रतिपादयेयुरित्यत्राह—त्वयीति। तज्जगत्कारणत्वमीश्वरं प्रकृतिपुरुषनियन्तरि तच्छरीरके ब्रह्मणि निमित्तत्वोपादानत्वोपयुक्तसार्वज्ञसर्वशक्तित्वाद्यनन्तकल्याणगुणैः स्वरूपेण च बृहत्त्ववति सर्वशक्तौ त्वयि न विरुध्यते सूक्ष्मचिदचिद्विशिष्टे सर्वशक्तौ त्वयि कारणत्वविरुद्धमेव स्वरूपस्य निर्विकारत्वेऽपि स्वशरीरभूतचिदचिद्द्वारा विकाराश्रयत्वात्तदाश्रयत्वरूपं कारणत्वमविरुद्धमेवेत्यर्थः। ननु, सृज्यत्वादेः शरीरभूतचिदचिद्गतत्वात्कथं मम साक्षात्सृज्यत्वादिव्यपदेश इत्यत्राह—आश्रयत्वादिति। स्वशरीरभूतकार्यवर्गस्याश्रयत्वादन्तरात्मतया धारकत्वाच्छरीरगतैरुत्पत्त्यादिभिर्विशिष्टे त्वयि तदुपचर्यते शरीरद्वारकमुच्यते न तु साक्षादुच्यत इत्यर्थः॥ १९॥ ननु, नाहं जगज्जन्मसंयमकारणम् अपि तु ब्रह्मरुद्रादीत्यत्राह—सत्त्वमिति। स उक्तविधस्त्वं त्रिलोकस्य स्थितये पालनायात्मनः स्वस्य मायया सङ्कल्पेन शुक्लं विशुद्धं वर्णमाकारं रजतस्तमोभ्यामननुविद्धमप्राकृतं शुद्धसत्त्वमयं विग्रहं बिभर्षि साक्षादुपादत्से सर्गाय त्रिलोकसृष्टये तु रजसा रजोगुणोपलक्षितेन चतुर्मुखाख्यजीवेन उपबृंहितमधिष्ठितं रक्तं वर्णं रजोगुणमयं वर्णं शरीरं बिभर्षि चतुर्मुखाख्यजीवद्वारा बिभर्षीत्यर्थः। तथा जनस्योत्पत्तिमतः त्रिलोकस्यात्यये प्रलये निमित्ते तमसा गुणेनोपलक्षितेन रुद्राख्यजीवेनोपबृंहितः कृष्णः तमोगुणमयं वर्णं शरीरं बिभर्षि ब्रह्मरुद्राख्यजीवानुप्रवेशेन जन्मसंयमौ करोषि स्थितिं तु साक्षात्त्वमेव करोषीत्यर्थः। अत्र शुक्लरक्तकृष्णशब्दैः सत्त्वरजस्तमोगुणा लक्ष्यन्ते यथा "अजामेकां लोहितशुक्लकृष्णाम्" इत्यत्र तद्वद्रजस्तमःशब्दाभ्यां तद्गुणप्रचुरौ ब्रह्मरुद्राख्यौ जीवौ वर्णशब्देन शरीरं सत्त्वमित्येकं पदं वा शुक्लं रजस्तमोभ्यामननुविद्धं सत्त्वं शुद्धसत्त्वमयं वर्णं शरीरं बिभर्षीत्यन्वयः॥ २०॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स इत्यनुवर्तते यथा तत्त्वानामचेतनत्वेन तदभिमानिनां विभक्तशक्तित्वेन च तेषामन्यत्वं मेलयितृत्वेन भाव्यः स एवं शरीरमुत्पाद्य समुत्पत्तेः प्राक् पश्चादपि निर्दोषत्वेन वर्तमानो भवान् ग्राह्यैरनुमेयैर्गुणैरिन्द्रियविषयैः उत्पन्नया बुद्ध्या ज्ञानाख्यलिङ्गेनानुमेयानि लक्षणानि स्वातन्त्र्यादीनि यस्य स तथा तेषामिन्द्रियाणां गुणाग्रहः विषयज्ञापकोऽस्तीति ज्ञायते "क्षेत्रज्ञः पुरुषो ह्यात्मा" इत्यत्र क्षेत्रज्ञानस्य जीवनिष्ठत्वेन दर्शनान्नारायणनिष्ठत्वेनोच्यत इति कथम्? तत्राह—अपीति। ग्राह्यगुणेष्वस्वातन्त्र्यप्रतीतेरिदं

जानामीति। जीवसमवेतग्रहणशक्तिरपि तन्नियतेति तदुक्तमाचार्यैः भाव्यगुणेत्यादि सत् सर्वस्य ज्ञातृत्वेन वर्त्तमान इति वा तदुक्तम् ज्ञातापि सर्वभावानामिति उपहितस्यैव बहिरन्तर्विभागः, न सर्वज्ञस्य भवेदित्याह—अनावृतत्वादिति अव्यवधानेन द्रष्टृत्वात् तदुक्तम् "सर्वत्राव्यवधानेन द्रष्टृत्वात्सर्ववस्तुनः" इति कुतो नास्तीति तत्राह—सर्वस्येति। सर्वस्य पूर्णस्य, हेतोरनुग्राहकमाह—सर्वात्मन इति। न ह्यव्याप्तस्य सर्वस्यात्तृत्वं देवदत्तस्येव युज्यते तस्मात्सर्वभक्षकत्वान्यथानुपपत्याऽपरिच्छिन्नत्वमेष्टव्यं नन्वपरिच्छिन्नस्य "एको देवः सर्वभूतेषु गूढः" इत्यन्याश्रयत्वेन अवस्थानं कथमिति, तत्राह—आत्मवस्तुन इति आत्मन्येव वसति न परस्मिन्नशक्तित्वेनेत्यात्मवस्तु तस्य पूर्णसामर्थ्यात् सर्वात्मा सर्वभक्षणादिति च ॥ १७ ॥ ज्ञानलिङ्गेन शरीरेन्द्रियादिभ्यो भेदेन ज्ञायसे इत्युक्तं तत्राज्ञानिन एवं मन्यन्त इत्याह—यदात्मन इति। यदात्मनः परमात्मनः प्रत्यगात्मनः दृश्यगुणेषु शरीरेन्द्रियादिषु सन्निधेः प्रवेशलक्षणसन्निधानादबुधैरस्वव्यतिरेकतः स्वाभेदेन व्यवस्यसे निश्चित्य ज्ञायसे इति यत्तदनुवादमनुकूलं वेदवचनं विना न मनीषितम् नैवाङ्गीकारयोग्यं कुत इति तत्राह—सम्यगिति। पुमान् पुरुषः पर्यङ्कशयनो विष्णुः व्यक्तं संशयनिरासकरणं सम्यग्वचः अपौरुषेयत्वेन निर्दोषवेदवाक्यं उपाददत्स्वीकृतवानाहेत्यन्वयः। परमात्मनोऽपि शरीरे सन्निधानादबुधैरस्वव्यतिरेकतो ज्ञायस इत्यादेरयमर्थः सिद्धः (१) यदिदं जगदेकम् एकीभूतं मामभियाति तद्यहमेक एव निःपट नितरां सहमानोभियोद्धास्मि अथवा द्वावभियातस्तावप्येवमेव अथवा त्रय एतादृशा मामभ्येत्य किमु करन्ति किं कुर्वन्ति त्वां घ्नन्तीति वार्ता माभूत् अहमेव हन्मीत्याह—खलेनेति पर्षान् धान्यानि कुलित्थादीनि खलेन खेले इव भूरीणि शत्रुभूतानि जगन्ति प्रति हन्मि हनिष्यामि त्वद्धननशक्त्यभावेपि तव दुर्भगजीवाभेदवचनेन त्वां निन्दतीति तत्राह—किमिति। शत्रवो मा मां किं निन्दन्ति सर्वगुणाकरत्वेन दोषलेशस्पर्शाभावात् स्वतो दोषाभावेपि बलादापादयन्ति हीति तत्राह—अनिन्द्रा इति। असमर्था इत्यर्थः—

प्रविष्टत्वाच्छरीरेषु जीव एवेति दुर्धियः। मन्यन्ते परमात्मानं न तन्मतमनुव्रजेत् ॥ इत्यादेः—

तर्हि निन्दाफलं किमिति अस्याप्येतदेवोत्तरमाह—अव्यक्तमिति। अव्यक्तम् अप्रकाशलक्षणं व्यक्तिशून्यमन्धन्तमः यान्तीति च देववचनमुपादत्ते ऐकात्म्यज्ञानतो यान्ति तम इति तर्हि भेदज्ञानस्य किं फलमित्यस्यापीदमेवोत्तरमित्याह—व्यक्तमिति। विगताञ्जनं निर्दोषभेदज्ञानं मुक्तिसाधनमुपाददत् भेदात्परं पदं स्वातन्त्र्यपारतन्त्र्यादिज्ञानं भेददर्शिभिर्वेदिति वचनम् ॥ १८ ॥ कुलालघटयोरिव कार्यकारणयोर्जगद्ब्रह्मणोर्भेदः पारमार्थिक इति ज्ञापनाय सृष्टिप्रकारं स्पष्टयति–त्वत्त इति। अस्य प्रपञ्चस्य कुलालवदायासप्रस्ततया कर्त्ता नायं किं तु पूर्णानन्दत्वेनेत्याशयेनाह–अनीहादिति। अनीहादक्लिष्टकारित्वादिति अनीहत्वेन कर्तृत्वेन्स्यद्विकारित्वं हरेरिति तत्राह–अविक्रियादिति। तथाऽविकृत एव सन् सर्वं करोतीति। नन्वियं सृष्टिः गुणपूर्विका सृष्टित्वात् पटसृष्टिवदिति तत्राह–अगुणादिति। नन्वियं प्रतीतिविरूद्धा सृष्टिर्निष्क्रियस्य क्रियावत्त्वम् अगुणस्य गुणवत्त्वमविकारिणा विकारित्वमिति तत्राह–त्वयीति। ईश्वरे ब्रह्मणीति पदद्वयं हेतुगर्भम् "ऐश्वर्यात्पूर्णशक्तितः" इति वचनात्। नन्वयमीश्वरः सृष्ट्यादौ प्रवर्तमानो गुणमपेक्षते न वा प्रथमे गुणित्वम् सृष्ट्याद्यनुपपत्तिरिति तत्राह–तदाश्रयत्वादिति। गुणैः सत्त्वादिभिः सृजसि न तत्र सन्देहः तर्हि निर्गुणस्य गुणित्वापातः इति शङ्का माभूदिति तदाश्रयत्वाद्गुणानां जडत्वेन स्वतः प्रवृत्त्यनुपपत्तेस्तत्प्रवृत्त्यर्थं तत्प्रेरणाद्गुणीत्युपचर्यसे न तु मुख्यतो गुणी 'केवलो निर्गुणश्च' इति श्रुतेः। ननु, सगुणागुणवचनस्य का फलमिस्तर्हीत्यस्यापीदमुत्तरं तदाश्रयत्वादिति ज्ञानादिगुणैः कृतदेहत्वात्सत्त्वादिगुणविधुर इत्युपचर्यते उपसङ्क्रम्यसे ज्ञायसे इत्यर्थः। तेषां सत्त्वादिगुणानामाश्रयत्वादैश्वर्यादिगुणपूर्णत्वाद्वा सगुण इत्युपचर्यसे सम्भाव्यस इत्यर्थः—

"अगुणो गुणदेहत्वात्सगुणो गुणधारणात्। ऐश्वर्यादिगुणित्वाद्वा वासुदेव इतीर्यते" ॥

इति वचनात् अर्थविशेषो ज्ञायत इति ॥ १९ ॥ तदाश्रयत्वं प्रपञ्चयति–सत्त्वमिति। अयमर्थः यदा त्रिलोकस्थितये त्रैलोक्यरक्षणाय सत्त्वगुणं (१) वर्धयन्नास्ते तदा हयग्रीवादिरूपं शुक्लवर्णं निर्मुक्तकलङ्कानूनबिम्बचन्द्रवद्धवलवर्णं बिभर्षि "जगतां वर्धयन् सत्त्वं यदा रक्षति केशवः" इत्यादेः खल्वलङ्कृतोऽयमर्थः यदा सर्गाय तत्तत्स्वभावाभिव्यक्तये रजोवर्धयंस्तदा रजसोपबृंहितं रजोगुणशक्तिव्यञ्जकं रक्तं जामदग्न्यादिरूपं बिभर्षि खलु "वर्द्धयंस्तु रजो येन जगदुत्पादयेद्धरिः" इत्यादेः जनस्यात्यये प्रलये। अत्तय इति पाठे अत्तिः संहृतिः तस्यै यदा लोके तमो वर्द्धयन् तदा तमसोपबृंहितं तमोगुणप्रवर्तकं कृष्णं यादवादिरूपं बिभर्षि खलु "येन विनाशयेत्। वर्धयंस्तु तमो लोके तत्कृष्णं यादवादिकम्" इति वचनात् ननु, सर्वत्र सर्वशक्त्यभावादपूर्णता हरेरित्यस्यापि इदमुत्तरं खल्विति जिज्ञासा लक्षणा वाप्सा कर्तव्या तथा हि यच्छुक्लं रूपं सत्त्वं वर्द्धयन् बिभर्षि तद्रूपं त्रिलोकस्थितये खलु न भवति किन्तु सर्गसंहाराभ्यां बिभर्षि रजो वर्द्धयन् रक्तरूपं बिभर्षि तत् सर्गाय खलु न भवति किन्तु तत् स्थितिसंहाराभ्यां च बिभर्षि यत्तमो वर्द्धयन् कृष्णं रूपं बिभर्षि तज्जनात्यय एव खलु न भवति किन्तु तत् त्रिलोकस्थितिसर्गाभ्यां च बिभर्षि इति मन्दमतीनां विस्पष्टतयाभ्यासोक्तं "सर्वत्र सर्वं कुरुते विशेषस्तत्र कीर्तितः" इत्यादेः तत्तात्पर्यार्थपरतया श्लोकार्थो ज्ञातव्यः। "षद्लृ विशरणगत्यवसादनेषु" इत्यादेर्धातोः सृष्टिसंहाराविति सत्त्वशब्देन ज्ञातव्यौ "रञ्जो रागे" इति धातोः रागशब्दस्यानेकार्थत्वेन स्थितिसंहारार्थोऽपि ज्ञातव्यः। "तमु ग्लाने" इति धातोः ग्लानशब्दस्य सृष्टिस्थितिविरोधिज्ञापकत्वेन तत्परत्वेनार्थो बोद्धव्यः

निर्गुणस्य गुणोपरक्तत्वं कथमित्यत उक्तं स्वमाययेति "स्वेच्छयानुगुणाद्विष्णुर्नानारूपान् करोत्यजः" इत्यादि च "निषेधे वागलङ्कारे जिज्ञासानुनये खलु" इत्यमरः "निषेधे वागलङ्कारे वीप्सनेऽनुनये खलु इति" यादवः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवं भवान् तथा तद्गुणेषु गृह्यमाणेषु अग्रहो ग्रहणाभावो यस्य तादृशश्च भवानिति तु स्थितौ ततः परत्वमुक्तं प्रवेशमेव निराकुर्वन् प्रपञ्चस्य स्वतः सत्तां परिहरति ॥ १७ ॥ य इति । यदि स्वस्य जीवात्मनो द्रष्टुर्व्यतिरेकेणापि न जगदुपलभ्यते तदा किं पुनः सर्वप्रकाशकस्य परमात्मन इत्यर्थः । अनुवादं वेदानुमतिं विनेति तत्र सापि नास्तीत्यर्थः । "यस्य भासा सर्वमिदं विभाति" इत्यादि श्रुतेः । यतः स पुमान् वेदैस्त्यक्तमुपाददत् उपादेयत्वेन स्वीकृतवानित्यर्थः । दद धातौ तिङ्गातिङ्गौ भवन्तीतिच्छान्दसं परस्मैपदं सृष्ट्यादिकर्तृत्वेऽपि ततः परत्वम् आह ॥ १८ ॥ त्वत्त इति "श्रुतेस्तु शब्दमूलत्वात्" इति न्यायेन सिद्धान्तमाह–वदन्तीति । विरोधं परिहरति ईश्वरे ब्रह्मणीति चिन्तामण्यादिवदचिन्त्यशक्तित्वेनेति भावः । तत एव त्रैगुण्यं शक्तित्वेऽपि तदस्पर्शमाह—तदाश्रयत्वादिति । तथैव पालनलक्षणान्तरस्थितिविसर्गलक्षणावान्तरं जन्म दैनन्दिनादि लक्षणावान्तरसंयमा अपीत्याह ॥ १९ ॥ स त्वं स तथाभूत एव त्वम् अत्र लोकेषु त्वद्भक्ता एव मुख्या इति मुख्यं तत् पालनमेव प्रयोजनमिति भावः । तदेवाह–स्वमायया स्वेषु भक्तेषु कृपया भक्तकृपाऽत्र प्रवर्त्तिका पूर्ववदचिन्त्यशक्तिस्तु दुर्घटघटनीति ज्ञेयं शुद्धत्वेन श्यामोऽपि शुक्लत्वेनोक्तम् उत्तरत्र रजसेत्यादिवत् सत्त्वेन त्यक्तत्वात् न ततस्तद्वर्णः किन्तु तदधिष्ठानक एवेत्यर्थः । आत्मनः श्रीविष्णुरूपस्य तथैवाधुनापि इत्युपसंहरति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

प्रकृतिपुरुषावेव यद्यपि जगत्कारणम्, तथापि सर्वकारणकारणत्वात्त्वमेव जगत्कर्त्तेति ये केचिद्वदन्ति, तदपि न विरुद्धमित्याह त्वत्तोऽस्येत्यादि । निरीहात् अन्तरङ्गलीलेहां विना बहिरङ्गरूपा जगत्कर्तृत्वादिलीला तव नास्तीति निरीहस्तस्मात्; अतएवागुणात् सत्त्वादिगुणरहितात्, अविक्रियात् विक्रिया विकारः परिणामस्तद्रहितान्नित्यकैशोरादित्यर्थः । तथापि त्वत्त एवास्य जगतः स्थित्यादय इति यद्वदन्ति, तत्त्वयि ईश्वरे ब्रह्मणि श्रीकृष्णे न विरुध्यते । कुतः ? तदाश्रयत्वात् । तेषां स्थितिजन्मादिकर्तृणां विष्णुब्रह्मरुद्राणामाश्रयत्वमेव । अतो हेतोस्तेषां गुणैरुपचर्यते, वस्तुतस्तु त्वं निर्गुण एवासि ॥ १९ ॥ उपचर्यते इति यदुक्तम्, तदेव प्रपञ्चयति—सत्त्वमित्यादि । स त्वं निरीहत्वादिपूर्वोक्तविशेषस्त्वं त्रिलोकस्थितये शुक्लं वर्णं विष्णुरूपं बिभर्षि । अथवा, सत्त्वं सत्त्वगुणमयशुक्लरूपं बिभर्षि । एवं रजसा रक्तवर्णं ब्रह्मरूपेण, तमसा कृष्णपिङ्गलं वर्णं रुद्ररूपेण, (नृ० पु० १।६) ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्' इति रुद्रोपस्थाने तद्रूपोक्तेः । उक्तञ्च—'ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः । संनियच्छति तत् कालः' इत्यादि । बिभर्षीत्यविकारः, त्वं भवसीत्यनुक्तेः, बिभर्त्तेर्धारणार्थत्वाद्विकारस्य वेशान्तरधारणवत् । अथवा, खलुशब्दः प्रतिषेधार्थः, त्वं खलु बिभर्षि ? मा बिभर्षीत्यर्थः—'निषेधवाक्यालङ्कारे जिज्ञासानुनये खलु' इत्यमरः । तं तं वर्णं त्वदंशा एव बिभ्रति, त्वं तु अविकृत एव ॥ २० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

त्वत्तोऽस्येति । केचिद् वदन्ति त्वत्त एवास्य जगतो जन्मस्थितिसंयमाः, वस्तुतस्तु त्वदंशभूतेभ्य एव ब्रह्मादिभ्यः, अतस्ते वदन्त्येव, न तु तत्त्वतो जानन्ति । तथापि तेषां त्वदंशत्वात् त्वय्युपचारः, अतस्त्वयीश्वरे ब्रह्मणि नो विरुध्यते, ईश्वरो ब्रह्मपरं ब्रह्मेति त्वयि ईश्वरे ब्रह्मणि श्रीकृष्णे विरोधाभावस्य हेतुमाह—त्वदाश्रयत्वात्तेषां ब्रह्मादीनामाश्रयस्त्वमेवेति । अतस्त्वत्तो निरीहादपि जगतोऽस्य सृष्ट्यादय इति न विरोधः । गुणैः सत्त्वादिभिः सृष्ट्यादिहेतुभिः ॥ १९ ॥ उपचर्यत इति यदुक्तं तदेव प्रपञ्चयति—स त्वमित्यादि । स त्वमनीहत्वादिविशिष्टः, अथवा, सत्त्वं सत्त्वगुणमयं शुक्लवर्णम् रजोमयं रक्तञ्च वर्णम्, एवं तमोमयं कृष्णवर्णं खलु बिभर्षि न बिभर्षि, खलु शब्दोऽयमव्ययो निषेधार्थः, अलंखल्वोरिति अलंकृत्वा, खलु कृत्वा, अमरश्च—'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' इति । तं तं वर्णं त्वदंशो एव बिभ्रति, त्वं त्वविकृत एव । मद्गृहे यत्त्वमवतीर्णोऽसि, स तु त्वमेव स्वस्वरूपः, न तु जनास्ययाधिकरणककृष्णवर्णधारी 'अतएव प्रथमत एव (९ म श्लो०) 'पयोदसौभगम्' इत्येव उक्तम्, न तु कृष्णवर्णम्, स तु कालाग्निरुद्रः, (महानारायणोप १०।१०) ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्'' इति; उक्तञ्चात्रैव (भा० २।१०।४३) ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः । सन्नियच्छति तत्काले'' इत्यादि ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

किञ्चेमे तत्तद्गुणैर्लिप्ता इव भवांस्तु कारणत्वेन प्रविष्टोऽप्यलिप्त एवेत्याह—एवं भवान् स्वप्रकृत्या सृष्टे जगति प्रविष्टोपि बुद्ध्या अनुमेयमेव लक्षणं येषां तैः स्वप्रकाशत्वाखण्डज्ञानानन्दादिभिर्ग्राह्यैः स्वोपादेयैर्गुणैः सह सन्नपि सदा विराजमानोपि तद्गुणाग्रहः तस्याः प्रकृतेर्गुणान् लेपकान् दुःखात्मकान् आनन्दैकमयस्त्वं न गृह्णासि कुतः अनावृतत्वात् योहि प्रकृतिगुणैरावृतो

भवति स एव तान् गृह्णाति लिप्तश्च भवति यथा जीव इति भावः। अतस्तव बहिरन्तरं व्याप्यते प्रकृतेर्गुणा न सन्ति यथा जीवस्य बहिः शब्दस्पर्शादयः अन्तश्च शोकमोहादय इति भावः। सर्वात्मतः सर्वत्रान्तर्यामितया प्रविष्टस्यापि किञ्च केवलं न तवैव अपि तु आत्मवस्तुनः तव स्वीयपदार्थस्य सर्वस्य कृत्स्नस्यापि लीलाविलासधाम भक्तादेर्बहिरन्तरं च व्याप्यते लेपकाः प्रकृतिगुणा न सन्तीत्यर्थः॥ १७॥ ननु, लेपका अपि प्रकृतिगुणाः केचित्सुखदा भद्रा एवेत्यत आह—य आत्मनः स्वस्य दृश्यगुणेषु भोग्यस्रक्चन्दनवनितादिषु सन्निति उत्तमोयं पदार्थ इति व्यवस्यते निश्चिनोति स अबुधः कुतः स्वव्यतिरेकतः स्वस्मिंस्तेषां सदा संयोगाभावात् ततश्च शोकमोहादिदुःखप्रदत्वात् संसारप्रवाहप्रापकत्वाच्चेति भावः। नन्वसौ मीमांसको भोग्यस्रगादिः सन्निति वदन् मनीषिणमेवात्मानं मन्यते तत्राह—विनेति। नु निश्चितमेव वादं विना तन्मनीषितं न सम्यक् मनीषित्वं तत्र प्रवाद एव न तु स मनीषीत्यर्थः। यतस्त्यक्तमेव त्वदीयजनैर्घृणास्पदत्वेन यत् तदेव उप आधिक्येनाददत्स्वीकृतवान् ह्रस्वत्वमार्षम्॥ १८॥ ननु, स एव स्वप्रकृत्येदं सृष्ट्वेत्यादि त्वदुक्तेर्गुणमयप्रकृतेश्च मच्छक्तित्वेनाभेदात् गुणमयजगदुपादानस्य मम कथमन्तर्बहिर्गुणयोगाभावस्तत्राह—त्वत्त इति। ननु, जगत्सृष्ट्यादिकर्तुः कुतोऽनीहत्वादि सम्भवेत्? तत्राह—त्वयि ईश्वरे ब्रह्मणि न विरुध्यते त्वयि ब्रह्मत्वान्यथानुपपत्त्यैवेश्वरत्वेप्यनीहत्वादिकमभ्युपगम्यमेव स्वरूपद्वयाभावादिति षष्ठोक्तेरित्यर्थः। नन्वेतेन विरोधो नापयातीत्यत आह तदाश्रयत्वादिति। गुणैः कुर्वद्भिस्त्वयि सृष्ट्यादिकर्तृत्वमुपचर्य्यते गुणाश्रयत्वात् यथा भृत्यकृतं राजनीत्यतः प्रकृतेस्त्वच्छक्तित्वेऽपि बहिरङ्गत्वेन त्वत्स्वरूपत्वाभावादन्तर्बहिस्तव तद्गुणयोगाभाव उपपादितः। यद्वा ननु, त्वत्पुत्रस्य चतुर्भुजस्य मम कथं ब्रह्मत्वं कथं वेश्वरत्वं सम्भवेदिति चेत्सत्यं त्वं न ब्रह्म नापीश्वरः किन्तु "ब्रह्मणो हि प्रतिष्ठाऽहम्" इति त्वदुक्तेराद्योऽवतारः पुरुषः परस्येति ब्रह्मोक्तेश्च तयोराश्रयस्त्वं भवसीत्याह—तदाश्रत्वात् तयोर्ब्रह्मेश्वरयोरप्याश्रयत्वाद्गुणैरुपचर्य्यते इति स्रष्टृत्वादिगुणनिबन्धनोपचारादाश्रितधर्ममाश्रयोऽपि धत्त इति पुण्यतमोऽयं देश इतिवत्त्वमपि ब्रह्म ईश्वरश्च भवसीत्यर्थः। उक्तिरियं रसरीत्यैव यदुक्तं 'रसेनोत्कृष्यते कृष्णरूपमेषा रसस्थितिः" इति वस्तुतस्तु ब्रह्म ईश्वरः कृष्ण एक एव स्वरूपद्वयाभावादिति षष्ठोक्तेः॥ १९॥ ननु, ब्रह्मादिभ्योऽस्य सृष्ट्यादिप्रसिद्धं कथं त्वत्त इति ब्रूषे? सत्यं ब्रह्मादयोऽपि तवैव रूपाणीत्याहुः, स प्रसिद्धस्त्वमेव स्वमायया स्वरूपेणैव शुक्लमित्यर्थः। जगत्पालकस्य विष्णोः श्यामवर्णत्वात् जनात्यये जनसंहारायेत्यर्थः। अत्र रजसोपबृंहितं रक्तमितिवत् तमसोपबृंहितं कृष्णमितिवत्सत्त्वेनोपबृंहितं शुक्लमित्यनुक्तेर्ब्रह्मरुद्रयोरजस्तमोभ्यां योग इव विष्णोर्न सत्त्वेन योगः सत्त्वस्यावरणविक्षेपाभावादौदासीन्यरूपत्वेन शुद्धसत्त्वे परमेश्वरे सान्निध्यमात्रं न तु स्पर्शः अत एवोक्तं त्रिदेवीपरीक्षायां "हरिर्हि निर्गुणः साक्षात्" इति "सत्त्वादयो न सन्तीशे" इति "साक्षी चेताः केवलो निर्गुणश्च" इति श्रुतिश्च॥ २०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु, परिच्छिन्नतया स्थितं मां कथं सर्वत्र विद्यमानत्वेन वदसीत्यत आह- एवमिति एवमुक्तप्रकारः ग्राह्यैर्गुणैः प्राकृतरूपादिभिः सह सन्नपि विद्यमानोपि भवान् बुद्ध्यनुमेयलक्षणैरिन्द्रियैस्तद्गुणग्रहैः तैर्गुणैः सह न गृह्यसे इत्यर्थः। अयमर्थः चक्षुषा पुष्पगते रूपे गृह्यमाणे तद्गतः सुगन्धः प्राकृतो यदि न गृह्यते चक्षुषस्तद्ग्रहणे शक्त्यभावात्तदभावान्न गृह्यते इति किमु वक्तव्यम् यदीन्द्रियाणां तव ग्रहणे एव शक्तिर्नास्ति तदा परिच्छिन्नं त्वां केनेन्द्रियेण को वक्तुं शक्नोति अतो व्यापक एवाप्राकृतरूपः स्वेच्छया प्रत्यक्षोसीति भावः घटादिकं त्विन्द्रियाणि यथेष्टं गृह्णन्ति भगवद्रूपं तु तदिच्छानुसारेणेति विवेकः एवं बालत्वतरुणत्वादिकं प्रत्यक्षत्वमप्रत्यक्षत्वमनेकविग्रहत्वं द्विभुजत्वचतुर्भुजत्वसहस्रपादोरुभुजाननत्वादिकं च न प्रकृतिकालक्षेत्रज्ञतत्करणनिबन्धनं किन्तु स्वाभाविकानन्तगुणशक्तिसिन्धौ सर्वज्ञे सर्वव्यापके सर्वेश्वरे भगवति सर्वं यथा प्रयोजनं स्वभावत एव सूपपन्नमिति राद्धान्तः कृपां विना करणाग्राह्यत्वे हेतुं सूचयन् व्यापकत्वं दर्शयति—अनावृतत्वादिति। ते अनावृतत्वात् अनवधिकनिरावृतस्वरूपत्वात् हेतोः तद्गुणाग्रह इति निरन्तरेण पूर्वपदेन सम्बन्धः पूर्वत्र स्वातन्त्र्येण करणानामेव तद्ग्राहकशक्त्यभावः कथितः। अत्र स्वरूपस्यैवानन्त्याद्यथावद्गृह्यत्वाभाव उक्तः आनन्त्यमेवाह बहिरन्तरं न ते इति परितो निस्सीमत्वाद्बहिर्नास्ति मध्ये सर्वत्राकाशवत्पूर्णत्वादन्तरं च ते नास्ति कथम्भूतस्य कल्पद्रुमवत्सर्वस्य मुख्यतत्त्वस्य पुनः कथम्भूतस्य सर्वात्मनः सर्वेषां चिदचित्तत्त्वद्वयभेदानां शक्तिभूतानां पत्रादिस्थानीयानां मुक्तनित्यमुक्तादीनां प्राकृताप्राकृतकालाख्यानां पदार्थानामात्मा कल्पद्रुमस्थानीयस्तस्य ननु समाप्याश्रयं किञ्चिद्वस्त्वन्तरं किमस्ति नेत्याह आत्मवस्तुनः स्वाश्रयस्येत्यर्थः। अत्र "एकमेवाद्वितीयं ब्रह्म, सर्वं खल्विदं ब्रह्म, प्रधानक्षेत्रज्ञपतिर्गुणेशः" अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः, सदा पश्यन्ति सूरयः, योस्याध्यक्षः स परमे व्योमन् तिष्ठति 'ज्ञः कालकालः "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते। मत्तः परतरं नान्यत्। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इत्याद्याः श्रुतिस्मृतयोऽनुसन्धेयाः॥ १७॥ नश्वरः सर्वः सर्वात्मा च सर्वेश्वरतोऽत्यन्तभिन्नत्वादिति सेश्वरं साङ्ख्यायादीनां पक्षं निराकरोति—य इति। यः "आत्मा वा अरे द्रष्टव्यः, आत्मैवेदं सर्वम्" इत्यादिश्रुतिप्रोक्तस्य परमेश्वरस्य प्रधानक्षेत्रज्ञपतेर्भगवतो दृश्येषु गुणेषु शक्तिगुणपरिणामेषु जङ्गमाजङ्गमेषु पदार्थेषु स्वव्यतिरेकतः परमेश्वरव्यतिरेकतः अतदात्मकतया कमपि पदार्थं सदिति व्यवस्यते निश्चिनोति स अबुधः बालः "एतदात्म्यमिदं सर्वम्" इत्युपदेशं न गृह्णातीत्यर्थः। तन्मनीषितं तस्य मतं विनानुवादं न भवति वचनमात्रमस्ति न त्वर्थत इत्यर्थः। अतोऽबुध एव यतः स पुमान् सन्

"स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुत्याज्ञापालनयोग्यः सन् "सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेद" इत्यादि श्रुतिभिः सम्यक् त्यक्तं मतमुपाददत् स्वीकुर्वन् ॥ १८ ॥ विश्वस्य चिदचिच्छक्तिमयस्य शक्तिमति स्वाभाविको भेदाऽभेदसम्बन्धो केवलभेददर्शिनोऽबुधत्वमुक्तमथ कार्यकारणयोः स्वाभाविकभेदाभेद एव सम्बन्ध इति दर्शयितुं विश्वस्य भगवदुपादानकत्वमाह—त्वत्त इति। "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसम्विशन्ति" इत्याद्याः श्रुतयः त्वत्त एवास्य विश्वस्य जन्मादीन्वदन्ति कथंभूतादनीहान्निर्व्यापारात् अगुणात्त्रिगुणास्पृष्टस्वरूपात् अविक्रियादविकृतस्वरूपात् ननु निर्व्यापारस्य कथं जगत्कर्तृत्वं निस्त्रिगुणस्य रजोगुणं विना स्रष्टृत्वं सत्त्वगुणं विना स्थितिकर्तृत्वं तमोगुणं विना संहर्तृत्वं च कथं घटेत ? अतः सर्वमिदं विरुद्धमेवेत्यत आह त्वयीश्वरे ब्रह्मणि नो विरुद्धयते इति। बृहीबृंहीवृद्धौ बृहद्गुणशक्तिमति शक्तिपरिणामाङ्गीकारात् सर्वज्ञत्वं सर्वाधारत्वं सत्यसङ्कल्पत्वादिकल्याणगुणयोगात् सङ्कल्पमात्रेणैव विश्वोत्पत्तिसम्भवान्न किञ्चिदीश्वरे सर्वेश्वरे ब्रह्मणि त्वयि विरुध्यते इत्यर्थः। ननु ब्रह्मविष्णुशिवाः सृष्टिस्थितिसंहारकर्त्तार इति प्रसिद्धिरत्राह त्वदाश्रयत्वादुपचर्यते गुणैरिति विष्णुः सत्त्वगुणनियन्ता स्वावतारः "जगृहे पौरुषं रूपं भगवान्" इति "कृष्णस्तु भगवान्स्वयम्" इति च प्रागुक्तेः ब्रह्मशिवौ त्वदंशविशेषौ गुणावतारौ रजस्तमःप्रकृती "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः" इति पूर्वोक्तेस्त्वदाज्ञानुकारिणौ एवं त्वदाश्रयत्वात्तेषामपि तत्कर्तृत्वं गुणैः सत्त्वादिभिरुपचर्यते यत्तु गुणैः कुर्वद्भिस्त्वयि सृष्ट्यादिकर्तृत्वमुपचर्यते इति तदयुक्तमेव "यतो वा इमानि भूतानि जायन्ते, इति "जन्माद्यस्य यतः" (१।१।२) इति श्रुतिसूत्रयोर्ब्रह्मलक्षणप्रतिपादकयोर्निर्विषयत्वप्रसङ्गात् साङ्ख्यपक्षप्रवेशाच्च ॥ १९ ॥ "त्वदाश्रयत्वादुपचर्यते गुणैः" इत्येतद्विवृणोति—स इति। सः निखिलविश्वजन्मादिकर्ता त्वमवान्तरलोकस्थित्याद्यर्थं शुक्लादिवर्णान् गुणावतारद्वारा बिभर्षीत्यर्थः ॥ २० ॥

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

एवं भवान् बुद्धीति श्लोके भवान् बुद्ध्यनुमेयलक्षणो बुद्ध्याऽनुमेयं लक्षणं स्वलक्षणं शुद्धस्वरूपं यस्य स तथा। तव स्वरूपं प्रत्यक्षगम्यं न। कुतः। ग्राह्यैर्गुणैरनावृतत्वाद्युक्तत्वाभावान्निर्गुणत्वात्। सगुणं हि प्रत्यक्षगम्यं न तु निर्गुणं। तथाऽऽत्मा वस्तुन आत्मस्वरूपं वस्तु पारमार्थिकसत्यं यस्य स तथा तस्य तव स्वरूपस्य पारमार्थिकसत्यत्वादन्यस्य तदभावादित्यन्यथाप्रतीतेर्विवक्षितार्थाप्रतीतेश्च ग्राह्यैर्गुणैरित्यस्यान्वयं दर्शयन् बुद्ध्यनुमेयलक्षण इत्यस्य तात्पर्यमाह ॥ ग्राह्यगुणविषयेति। अनेन गुणैरिति तृतीया विषयसप्तम्यर्थेत्युक्तं भवति। ग्राह्यगुणेषु तद्विषये ज्ञानेऽस्वातंत्र्यात्। जीवस्येति शेषः। अन्यः। स्वतंत्र इति शेषः। स्वोक्तार्थे प्रमाणं दर्शयंस्तेनैव प्रमाणेन व्याख्यातभागवतपदानि व्याचष्टे ॥ ज्ञाताऽपीति। जिघृक्षोर्गृहीतुमिच्छावतः। अनेन तद्ग्रहणाग्रह इति भागवतपदं व्याख्यातं भवति। सर्वत्राव्यवधानेन द्रष्टृत्वात्सर्ववस्तुन इत्यनेनानावृतत्वादिति पदं व्याख्यातं भवति। आंतरं बाह्यमित्युर्वरितार्थे बहिरंतरं न त इति वाक्यं व्याख्यातं भवति। सन्नपीत्यपिशब्दस्यासन्नपीत्यसत्त्वसमुच्चयार्थत्वभ्रांतिनिरासायार्थमाह ॥ जीवस्य ग्रहणेति। ननु पूर्वं दृष्टांतस्यानुक्तत्वादेवं भवानिति दार्ष्टांतिकार्थकैवंशब्दः कथमुक्त इत्यत आह। एवं शरीरमिति। अनेन भागवते बुद्ध्यनुमेयलक्षण इत्यतः पूर्वं यथेति पदमध्याहार्यम्। एवमित्यतः परं शरीरमुत्पाद्य ज्ञायत इति चाध्याहार्यमित्युक्तं भवति। सर्वस्येत्यस्य जगद्विशेषणत्वभ्रांतिनिरासायार्थमाह। सर्वस्येति। स्वोक्तार्थे प्रमाणं वदंस्तेनैव प्रमाणेन सर्वात्मन आत्मवस्तुन इति पदद्वयं व्याचष्टे। सर्वः संपूर्णस्तमभ्योदिति। सर्वभक्षणादित्यनेन सर्वमत्तीति सर्वात्मेति विग्रहः। तथा आङ् पूर्वादद भक्षण इति धातोः कर्तरि मन्प्रत्यये दकारस्य तत्व आत्मेति शब्दरूपसिद्धिरिति च सूचितं भवति। अनन्याश्रयतश्चेति प्रमाणेनात्मवस्तुन इत्यस्यानन्याश्रयत्व उक्तः। स कथं पदलब्ध इत्यतः स्वयं तद्विग्रहं दर्शयति। आत्मन्येवेति। अनेन सप्तम्यंतात्मपदोपपदाद्वस निवास इति धातोः कर्तर्यौणादिके तुन्प्रत्यये आत्मवस्त्विति शब्दरूपसिद्धिरित्युक्तं भवति ॥ १७ ॥ यदात्मनो दृश्येति श्लोके यद्यस्मात्कारणाद्दृश्यगुणेषु दृश्येष्वप्रधानेषु देहेन्द्रियादिपदार्थेष्वात्मनो मनसः सन्निवेः संनिहितत्वादासक्तत्वादबुधैर्मिथ्याज्ञानिभिस्त्वं स्वव्यतिरेकतः स्वस्माद्भिन्नत्वेन व्यवस्यसे ज्ञायसे। तत्तस्मात्तव जीवभिन्नत्वं न मनीषितं यथार्थज्ञानविषयो न। ननु द्वासुपर्णेत्यादिवेदेन प्रतिपादितस्य भेदस्य कथं मनीषितत्वाभाव इत्यत उक्तम्। विनाऽनुवादमित्यादि। पुमान् ज्ञानिपुरुषो व्यक्तं यथा भवति तथा सम्यग्वचः समीचीनं वेदरूपं वाक्यमनुवादं विना नोपाददत्। द्वासुपर्णेत्यादिवेदवाक्यमनुवादकमात्रं न तु विधायकमतो भेदस्य मनीषितत्वाभावो युक्त इति जीवेश्वरादिभेदस्य भ्रांतिविषयत्वमुच्यत इत्यन्यथाप्रतीतिनिरासाय तत्तात्पर्यार्थमाह। परमात्मनोऽपीति। यथाऽनुकूलवादमित्यनेन भागवतस्थानुवादपदस्य यथावस्थितमनुकूलमर्थं वदतीत्यनुवाद इति विग्रहं प्रदर्श्य तस्य पदस्य वेद एवार्थो न तु लोकप्रसिद्धानुवादरूपोऽर्थ इति सूचितं भवति। सम्यगित्यनेन भागवते सम्यग्वच इत्यतः सम्यगितिपदं पृथक् कृत्य मनीषितमित्यनेन संबंधनीयमित्युक्तं भवति। प्रवर्तनादिति भागवतेऽध्याहारो ज्ञातव्यः। भागवते विनाऽनुवादमित्यनेन जीवेश्वराभेदस्याप्रामाणिकत्वमुक्त्वा प्रमाणविरुद्धत्वं वक्तुं वचो व्यक्तमुपाददत्पुमानित्युक्तम्। तत्र वचःशब्दोक्तवेदवाक्यमुदाहृत्य तद्भागवतवाक्यं व्याचष्टे। अभी इदमेकमिति। स्वोक्तार्थं प्रमाणेन द्रढयति। प्रविष्टत्वाच्छरीरेष्वित्यादिना। विष्णुः किमाहेत्यतो अभी इदमेक इत्यादिश्रुतिव्याख्यानरूपं विष्णुवाक्यं दर्शयति। इदं जगत्सर्वमिति। ब्रह्मांडपुराणस्थभूरीणि वेति वाक्ये वाशब्दमनुक्तसमुच्चयार्थत्वेन व्याचष्टे। वेत्तीति। तसेः सार्वविभक्तिकत्वात्फलत इति तसिर्द्वितीयार्थो न केवलं देहनाशाख्यमेव फलं यांति किंतु तमःप्राप्तिरूपमपि फलं

यांतीति चेति। शब्देनोच्यत इति शेषः। अनेन श्रुतौ प्रतिहन्मीतिपदस्य तमसि पातनरूपं हननं करोमीत्यर्थांतरमुक्तं भवति। ततश्चैवं मत्यर्थः। यदीदं जगदेकमेकीभूतं सत् मा मां संख्ये युद्धे युद्धार्थमभि अभियाति तर्हि अहमेक एव निष्षाळ् नितरां सहमानः सन् अभियोद्धाऽस्मि। अथ द्वावभियातश्चेत्तर्हि तावप्येवमेव। अथ त्रय एतादृशाः मामभ्येत्य किमु कुर्वंति न किमपि मम कुर्वंति। प्रत्युताहमेव पर्षान् धान्यानि खलेन खले इव भूरि भूरीणि शत्रुभूतानि जगंति प्रतिहन्मि। यथा कश्चिद्धान्यान्युलूखलादौ प्रक्षिप्य चूर्णयति तथाऽहमेक एवापरिमितानि शत्रुभूतजगंति प्रतिहन्मि नाशयामि तमसि पातयामि चेत्यर्थः। ननु तर्हि ते शत्रवोऽयं दुष्ट इति तव निंदां करिष्यंतीत्यत आह। किमिति। शत्रवो मां किं निंदति। निंदा नाम विद्यमानदोषोत्कीर्तनम्। अहं तु कल्याणगुणत्वेन सर्वदोषरहितो मां किमपि न निंदंति। किंच मन्निंदनेऽसमर्थाश्चेत्याह। अनिंद्रा इति। असमर्थाः। मम निंदन इति शेषः। सुखमिच्छता पुरुषेण सर्वथा जीवेश्वरभेदज्ञानमेव संपादनीयं न तु जीवेश्वरैक्यज्ञानमिति सूचनाय जीवेश्वरैक्यज्ञानस्य तमःफलकत्वे जीवेश्वरभेदज्ञानस्य मोक्षफलकत्वे प्रमाणांतरं वदंस्तेनैव प्रमाणेन जीवेश्वरभेदज्ञानस्वरूपं च दर्शयति। ऐकात्म्यज्ञानत इति। भेदादृढज्ञानात् ॥ १८ ॥ त्वत्तोऽस्य जन्मेति श्लोकेऽनीहादित्यनेन हरेः पाषाणवत्सर्वथा चेष्टाराहित्यमुच्यत इत्यन्यथाप्रतीतेर्विवक्षितार्थप्रतीतेश्च प्रमाणेनैव तत्तात्पर्यार्थमाह। अनीहोऽक्लिष्टकारित्वादिति। तदविकारेणैव सर्वकरणं युक्तमित्यर्थः। अत्र हेतुद्वयमैश्वर्यमित्यादि। अनेन न विद्यते ईहा क्लेशहेतुचेष्टा यस्य स तथा तस्मादित्यनीहपदस्य विग्रहः सूचितो भवति। ननु तत् श्लोकांत एव तदाश्रयत्वादुपचर्यसे गुणैरित्युपचारेण गुणवत्त्वे गुणाश्रयत्वं हेतुरुच्यते। तदसंगतम्। न हि यो यस्याश्रयः स उपचारेण तद्वानिति संभवति। तथात्वे जलपूर्णो घट उपचारेण जलवान्स्यादतोऽसंगतमिदं भागवतवाक्यमिति चेन्न। अस्य वाक्यस्य शंकापरिहारकत्वेन संगतत्वादित्याशयवांस्तन्निवर्त्याशंका प्रदर्श्य तद्वाक्यमवतारयति। अगुणश्चेत्कथमिति। सृष्ट्यादिकृदितीति शब्दात् परमत आहेति शेषः पूरणीयः। अनेन सत्त्वादिगुणकार्यदेहादिरहितत्वेनागुणोऽपि विष्णुः सत्वादिगुणाधारत्वाद्गुणैः सत्त्वादिगुणैरुपचर्यते। सत्त्वादिगुणवानित्युपचारेणोच्यते न तु जीववत्सत्त्वादिगुणकार्यबद्धत्वेन मुख्यतः। अतो हरेर्गुणैः सृष्ट्यादिकर्तृत्वं युक्तमिति शंकापरिहारः सूचितो भवति। स्वोक्तार्थे प्रमाणमाह। अगुणो गुणदेहत्वादिति। गुणधारणादैश्वर्यादिगुणत्वाद्धेत्यनेन तदाश्रयत्वादिति भागवतवाक्यं व्याख्यातं भवति। तत्रैश्वर्यादिगुणाश्रयत्वादिति व्याख्यानपक्षे गुणैरैश्वर्यादिगुणैरुपचर्यसे उप समीपे चर्यसे गम्यसे प्राप्यसे। ऐश्वर्यादिगुणैर्युक्तोऽसीति भागवतवाक्यं प्रकारांतरेण व्याख्येयम् ॥ १९ ॥ सत्त्वं त्रिलोकस्थितय इति श्लोके स्वमायया स्वाश्रितमायया लोकस्थितये सत्त्वं प्राकृतसत्त्वगुणमाश्रित्यात्मनः स्वस्य तत्कार्यं शुक्लवर्णं रूपं बिभर्षि। तथा सर्गाय रजसा प्राकृतरजोगुणेनोपबृंहितमभिवृद्धं रक्तवर्णं बिभर्षि। जनात्यये तमसा जातं कृष्णवर्णं बिभर्षीति हरेः प्राकृतसत्त्वादिगुणजन्यशुक्लादिरूपत्वमुच्यत इत्यन्यथाप्रतीतिनिरासाय प्रमाणेन तत्तात्पर्यार्थमाह। जगतां वर्धयन्सत्त्वमित्यादिना। जगतामिति षष्ठी द्वितीयार्थे। अस्य पदस्य रक्षतीत्यनेनान्वयः। येन जामदग्न्यादिरूपेण हयग्रीवादीत्यादिपदेन विष्ण्वादिरूपं गृह्यते। जामदग्न्यादीत्यादिपदेन चतुर्मुखस्थब्रह्मादिरूपं गृह्यते। यादवादीत्यादिपदेन रुद्रस्थरुद्रादिरूपं गृह्यते। लोके लोकमित्यर्थः। नन्वनेन हयग्रीवादीनां रक्षकत्वमेव नोत्पादकत्वमिति प्राप्तं। तथात्वे परस्परविरुद्धधर्माधिकरणत्वेनात्यंतभेदः स्यादित्यत आह। सर्वत्रेति। यतः सर्वत्र सर्वस्मिन्देशे काले च सर्वरक्षणोत्पत्त्यादिकं च कुरुते। हयग्रीवादिजामदग्न्यादिसर्वरूपो हरिरिति शेषः। अतः सर्वत्र सर्वेषु हयग्रीवादिजामदग्न्यादिरूपेषु सर्वं शुक्लरक्तादिकं रूपमस्ति। तथाऽपि तत्र हयग्रीवादिरूपेषु विशेषो लोकदृष्ट्याऽभिव्यक्तौ रक्षणादिरूपौ विशेषः प्रकीर्तितः। ननु विष्ण्वादिरूपाणां जगत्पालकत्वादिना जगद्रक्षकत्वादिकं संभवति। हयग्रीवादिजामदग्न्यादीनां जगत्पालकत्वाद्यभावात्कथं रक्षकत्वादिकमित्यत आह ॥ ज्ञानदानादिनेति। रागदानेन सृष्टिस्तद्रागयुक्तत्वेन करणं। कृष्णरूपी हरिर्यदा सतां विवर्धनायासतां तमोवृद्धिं कुर्वन् पातयेदंधं तमः प्रापयति तदा। विनाशक इत्युच्यत इति शेषः। सर्वत्र सर्वं कुरुत इत्युक्तं विवृणोति। ज्ञानाद्युत्पत्तिकृच्चेति। विभोर्विष्णोर्यच्छुक्लं हयग्रीवादिरूपं तद्रक्तमपि भवतीति स्मृतं। तथा कृष्णवर्णमप्युदाहृतं। कुतः। यतो ज्ञानाद्युत्पत्तिकृद्यतश्च तमो विनाशकमज्ञानाख्यतमोनाशकं। न केवलं ज्ञानदानादिना रक्षकं। किंतु ज्ञानाद्युत्पत्तिकृच्च तमोविनाशकमपीति चापिशब्दयोरर्थः। विष्णोर्यद्रक्तं जामदग्न्यादिरूपं तच्छुक्लमपि स्मृतं। कृष्णमप्युदाहृतं। कुतः। यतो ज्ञानाद्युत्पत्तिकृत्। ज्ञानादिनोत्कृष्टां पत्तिं संपत्तिं रक्षारूपां करोति यतश्च शत्रुरूपतमोविनाशकं। विभोर्विष्णोर्यत्कृष्णं रूपं तद्रक्तमपि स्मृतं शुक्लमप्युदाहृतं। कुतः। यतो ज्ञानाद्युत्पत्तिकृत्। अस्य पदस्य पूर्वोक्तार्थद्वयमेवात्र वर्णद्वये हेतुत्वेन ज्ञातव्यं। रागदानेन महतामिति प्रमाणवाक्ये रागशब्दस्य प्रकृतिजरजोगुणकार्यं रागोऽर्थ इति भ्रांतिर्भवति। तमोविनाशकमिति प्रमाणवाक्येन तमःशब्दस्य प्रकृतिगुणकार्यतमोगुण एवार्थ इति भ्रांतिर्भवति। अतस्तन्निरासाय रजस्तमःशब्दार्थमाह ॥ आचार्यादिष्विति। तमसोऽपीत्यपिशब्दः सृतिगतानामित्यनेन संबध्यते। तेन कैमुत्यं द्योत्यते। आदिपदेन सच्छिष्यो ग्राह्यः। आचार्यादिषु रागः सच्छास्त्रं व्याख्यास्यामीत्यादिरूपेच्छा सच्छिष्येषु रागः सच्छास्त्रश्रवणं करिष्यामीत्यादिरूपेच्छा स एवार्थस्तस्मिन् निमित्तसप्तमीयं। तन्निमित्तं रजो यतः शुद्धसत्त्वात्मकं व्यपेक्षितं विशेषेणापेक्षितं एवं यतस्तमसोः विष्णुद्वेषाज्ञानादिरूपतमसो नाशे नाशनिमित्तं परं तमः शुद्धसत्त्वात्मकमुदीर्यते। अतः सृतिगतानामपि तु विशिष्टा उत्करागाद्या न गुणोद्भवाः प्रकृतिजरजस्तमोगुणोद्भवा यदा न भवंति तदा मुक्तानां रागाद्याः प्रकृतिजगुणोद्भवा न भवंतीति किमु वक्तव्यं। तर्हि मुक्तानां रागाद्याः किमात्मका इत्यत आह शुद्धज्ञानेति। सर्वे रागाद्याः। अत्र रागादीनां शुद्धज्ञानात्मकत्वे शुद्धसत्त्वात्मकत्वं चेत्यर्थः। ननु तमोनाशे तमःकारणं कथं भवति।

न ह्यंधकारस्य नाशोऽधकारेण भवत्यतस्तमःपरमिति कथमुक्तमित्यतोऽत्र तमःशब्दार्थमाह। तमो द्वेषात्मकमिति। लोके यस्य यत्र प्रद्वेषः स तस्य नाशं करोति। नान्यथा। अतो विष्णुद्वेषाज्ञानादौ द्वेषादेव तन्नाशो भवतीति द्वेषाख्यतमसः विष्णुद्वेषाज्ञानादितमोनाशं प्रति कारणत्वं यदुक्तं तद्युक्तमेव। न च तर्हि प्रद्वेष इति वक्तव्यं तद्विहाय तम इति कथमुक्तमिति वाच्यं। एवं वचनेन विष्णुद्वेषाज्ञानादिव्यतिरिक्तेषु विष्णुभक्त्यादिसप्तपदार्थेषु प्रद्वेषस्य प्रकृतिजतमोगुणकार्यत्वमंधंतमःसाधनत्वं च सूचितं भवति। अत एवात्र विष्णुद्वेषाज्ञानादिविषयद्वेषस्य विष्णुभक्त्यादिद्वेषान्महावैलक्षण्यद्योतनार्थं परमिति विशेषणमुक्तं। अत्र सूतिगानां महतां यः सच्छास्त्रव्याख्यानादिविषयो रागोऽवैष्णवादिविषयद्वेषश्च शुद्धसत्त्वगुणात्मकः। मुक्तानां तु सच्छास्त्रव्याख्यानादिविषयपरागादयः शुद्धज्ञानात्मका इति विवेको ज्ञातव्यः। एवं सर्वत्र सर्वं कुरुत इत्यत्रोक्तं सर्वरूपाणां कर्तृत्वादिकं सप्रपंचमुपपाद्येदानीमेकस्मिन्विरुद्धानेकवर्णादिकं कथं घटत इत्याशंकां घटकोक्त्या परिहरति ब्रह्मतर्ककारः। सर्वत्र सर्वकृच्चापीति। अत्रापि बहुरूप इवेयत इत्यत्र बहुरूपोऽयमत्यंतभिन्नाभिन्नरूपाभावादिति प्रविष्टवत्त्वेत्यादाविवोपपादनीया। अचिंत्यैश्वर्यरूपत्वादित्यनेन घटकमुक्तं। अत्रैव श्लोके स्वमाययेति माया शब्दस्याज्ञानार्थत्वभ्रांतिर्भवति। तथा रजसा तमसोपबृंहितमित्यनेन रजस्तमोगुणाभ्यामभिवृद्धत्वभ्रांतिश्च भवति। तन्निरासाय प्रमाणेन तदर्थमाह। स्वेच्छयात्विति। तुरवधारणे। तेन परांगीकृतामज्ञानप्रभेदमायां व्यावर्तयति। नानारूपवान् नाना भिन्नं विलक्षणं रूपं स्वरूपं येषां तथा तान् गुणान्सत्वादीनित्यर्थः। द्वितीयस्तुरवधारणे। तेन बृंहितशब्दस्याभिवृद्ध्यर्थत्वं व्यावर्तयति॥ २०॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं भवान्बुद्ध्यनुमेयलक्षण इति श्लोके गुणराहित्यं तथाऽनुमानमात्रमानकलक्षणकत्वमेकस्य पारमार्थिकताऽपारमार्थिकता चेतरस्येत्यसदर्थप्रतीतेश्च सतोऽर्थस्य ग्राह्यैर्गुणैरित्यस्यान्वयनप्रकारं प्रदर्श्य बुद्ध्यनुमेयेत्यादेस्तात्पर्यमाह। ग्राह्यगुणैरिति। सुपां सुपो भवन्तीति सप्तम्या भिसादेशः। ग्राह्यगुणेष्विति तृतीया सप्तम्यर्थ इति प्रदर्शयोर्थापयति। बुद्ध्यनुमेयलक्षणग्राह्यगुणेष्विति। तद्गुणज्ञान इति यावत्। बुद्ध्यनुमेयं लक्षणं स्वातन्त्र्यरूपं यस्य स तथाऽस्वातन्त्र्याज्जीवस्येति शेषः। तज्ज्ञापको गुणज्ञानजनकोऽन्यो जीवविलक्षणोऽस्तीति ज्ञायते। बुद्ध्यनुमेयलक्षणग्राह्यगुणेष्विति ज्ञापनमात्रेण नार्थ उक्तप्राय इति तदभिप्रायकं प्रमाणमुपन्यस्य भागवतमध्यवगतां नयति। ज्ञातेति। सर्वस्य स्वेतरस्य ज्ञाताऽपि भगवान्ज्ञानलिङ्गतो जीवजालजातज्ञानलिङ्गेन ज्ञायते तज्ज्ञानप्रेरकतया ज्ञायत इत्युच्यते। चेतनमात्रस्य सम्भवति ज्ञानं तत्रास्वातन्त्र्यं कुतो जीवस्येत्यत आह। जिघृक्षोरिति। ग्रहीतुमिच्छावतः स्वभावजिज्ञासोरिति यावत्। स्वत एव ज्ञानाभावादन्योऽभ्युपेयः। कुतस्तन्नेत्यत आह। अस्वातन्त्र्यप्रतीतित इति। अस्वातन्त्र्येणैव प्रतीतिमत्त्वाज्ज्ञास्यामीतीच्छति न जायते तदित्यस्वातन्त्र्यप्रतीतेरित्यपि योजयन्ति। अनेन सन्नपि तद्गुणाग्रह इति विवृतम्। अनावृतत्वादिति विवृणोति। सर्वत्रेति। सर्वत्राव्यवधानेन लिङ्गाद्यनपेक्षतया द्रष्टृत्वात्सर्ववस्तु भगवांस्तस्य सर्वस्मिन् वसतीति वसतेस्तुन्प्रत्ययः। सर्वाच्छादकत्वात्सर्वशक्तत्वाद्वा सर्ववस्तु शक्तं वस्त्विति तात्पर्यान्तरात्। सर्ववस्तुनः सर्वपदार्थस्येति वा। तस्याव्यवधानद्रष्टृताहेतुमाह। आन्तरमिति। यद्विशेषकृतं व्यवधानं स नास्तीत्यर्थः। अपेरर्थमाह। जीवस्येति। इत्यपिशब्द इत्यर्थद्योतकोऽपिशब्द इत्यर्थः। प्राक् कस्याप्यर्थस्यानुक्तत्वादेवमित्यतिदेशः कथमिति तत्राह। एवमिति। ब्रह्माण्डोत्पत्तिप्रकारस्योक्तत्वादेवं शरीरमुत्पाद्य ज्ञायत इत्यध्याहार्यं मूल इति सूचितम्। सर्वस्य सर्वात्मन इत्यनयोरर्थविशेषं स्वयमेकं व्याख्यायोभयार्थसङ्ग्राहकं मानमाह। सर्वस्य पूर्णस्य सर्वात्मा सर्वभक्षणात्। आङ्पूर्वाददेः कर्तरि मन्प्रत्यये दस्य चर्त्वे आत्मेति ज्ञेयम्। आत्मवस्तुन इत्यस्यार्थमाह। अनन्याश्रयतश्चेति। कथमिदमात्मवस्तुपदाल्लब्धमित्यतः स्वयमाह। आत्मन्येवेति। ततश्चायं श्लोकार्थः। यथा तत्त्वानां तदभिमतानां चाचेतनत्वेन विभक्तशक्तित्वेन च तदन्यो मेलयितृत्वेन सम्प्रतिपन्नस्तथा भवाञ्छरीरमुत्पाद्य सन्सर्वदा ग्राह्यैर्गुणैस्तेषु विषयेषु बुद्ध्यनुमेयं लक्षणं स्वातन्त्र्यादिकं यस्य स तच्छरीरादिभेदेन ज्ञायते। तद्गुणानामग्रहो ज्ञानाभावो जीवस्येति शेषः। अस्वातन्त्र्यात्तद्गुणानामग्रहः सम्यग्ग्रहणं ते सकाशादेव। ममापि कुत इदमित्यत इत इत्याह। अनावृतत्वाद्प्रकृत्यावृतत्वादिति। अबहिरन्तरमिति नास्ति। सर्वस्य सम्पूर्णसामर्थ्यात्पूर्णस्य व्याप्ततया पूर्णस्येति वा। सर्वं समाप्नोषि ततोऽसि सर्व इत्यादेः सर्वात्मनः सर्वभक्षकात्सर्वस्वामिनो वा। आत्मवस्तुन आत्मन्येव वसतीति स तथा। स्वे महिम्नीत्यादेः॥ १७॥ यदात्मनो दृश्यगुणेष्विति श्लोके स्वव्यतिरेकतो बुधैर्व्यवस्यसे। द्वासुपर्णेत्यादिकमनुवादमात्रं न भेदविधायकमतो भेदमतं मनीषिमनीषित नेत्यन्यथापस्तिमन्यथयति। परमात्मनोऽपीति। परमात्मन इति व्यस्तं समस्तं च। आत्मनो जीवस्य परमात्मनो हरेरपि। आत्मनः सर्वस्वामिनः शरीरे सन्निधानात्। जीवपक्षे कर्मणेतरत्रेच्छयाऽबुधैरन्यथाज्ञानिभिरव्यतिरेकतोऽभेदेन ज्ञायते। ज्ञायत इति स्वारस्यादात्मनोऽपि स्वस्यापि सन्निधानात्। त्वमव्यतिरेकतोऽबुधैः परं यथा स्यात्तथा ज्ञायस इत्यन्वयो वा। अव्यतिरेकतो मननमेतद्रूपमिति निरूपयति। यथेति। यथानुकूलमनुकूलार्थमुपक्रमाद्यानुकूल्येनार्थं व्यवस्थापयद्वेदवचनं तद्विना प्रवर्तनात्तदभेदमतं न सम्यङ्मनीषितम्। वैपरीत्यशङ्कामपाकुर्वन्मूले सम्यग्वचःशब्दसङ्ग्राह्यं वाक्यमुदाहृत्य भागवतं समीकरोति। अभी इदमिति। इति जीवभेदे व्यक्तं स्पष्टार्थं परः पुमान्पर्यङ्कशायी विष्णुर्वच उपाददे भेदसाधकतयोपाददे। प्रमाणं स्वोक्तार्थदार्ढ्यायाह। प्रविष्टत्वादिति। मननहेतुः प्रविष्टत्वं तन्मतं नानुव्रजेच्छुभेच्छुः। तत्कुत इत्यत आह। दुर्धिय इति। बहुवचनेन च तथाकथका

एवासुरा बहुला यस्मादित्यादेर्बह्व इति सूचयति । अत्र वेदवादः परमार्थवादो धर्तव्यस्तद्विरुद्धत्वात् । यद्वा वेदवाद इति तत्पातनिकार्यवान्वेद इति विरुद्धस्तत्त्वात् । तामेवं मन्त्रूननुयातानुगच्छन्यः स तमो विशेत् । अत एतद्धेतोः पर्यङ्कशयनो सनातनो विष्णुराह । किमित्यत आह । इदं जगदिति । इदं सर्वं जगत्सङ्ख्ये युद्धार्थमेकमायाति चेत् । मा मां प्रति भूरीणि द्वे त्रीणि वाऽथेदशानि वाऽभियान्ति तानि मर्त्यः खलगानि धान्यानि यद्वत्सञ्चूर्णयत्यहमेक एव चूर्णयिष्यामि । वाशब्दस्तमो विशेदित्युक्ततमोरूपफलाप्तिसमुच्चायक इति व्याचष्टे । वेतीति । फलतः फलं तमो यान्तीति । एतदर्थकमित्यर्थः । ततश्चायमभी इदमित्यृगर्थः । यदीदं जगदेकं मा मां प्रति सङ्ख्ये युद्धार्थमायाति तर्ह्यहमेक एव निःषाट् नितरां सहमानः सन्नभियोद्धाऽस्मि द्वां द्वे जगती अभ्यायातश्चेदपि प्रतियोद्धाऽस्मि । त्रयः पञ्च किं करन्ति किं कुर्वन्ति प्रत्युताहमेव मर्त्यः खले न इव धान्यानि प्रतिहन्ति तथा पुरुषाञ्जिष्णुरान्प्रतिहन्मि भूरीणि जगन्ति प्रतिहन्मि संहरामि तमसि पातयामि चेत्यर्थः । अथ च दैत्यहतिस्तमसि चिरेत्यादेः । ते तर्हि त्वद्भुतावसिद्ध्यै निन्दयेयुरित्यत आह । किमिति । मा किं निन्दन्ति शत्रवो निन्दनं च विद्यमानदोषाविष्कारस्त एव न सन्ति मयाति किं निन्दन्तीत्युक्तिः । मन्निन्दने न समर्थास्त इत्याह । शत्रवोऽनिन्द्रा इति । अनिन्द्रा दरिद्रा इत्यप्यर्थः । करन्तीति व्यत्ययेन करबद्धस्ववदाचरन्ति हस्तौ यथा स्वाधीनौ तद्वद्वर्तन्त इत्यर्थविशेषद्योतनिको भवतीति भावमाविष्कुर्वन्ति । बुभूषुणा जीवेशभेदबोध एव सम्पाद्यो नाभेदबोध इति तत्कल्पनानि दर्शयन्मानमुदाहरति । ऐकात्म्यज्ञानत इति । ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः । याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यव इत्यादेः । भेदात्तज्ज्ञानतः परं पदम् । नान्यः पन्था अयनाय विद्यत इत्यादेः । किमाकारं भेदज्ञानमित्यत आह । स्वातन्त्र्यमिति । स्वतन्त्रो हरिरितरदस्वतन्त्रमित्यादिज्ञानं भेददर्शिभिर्भवेत् । ततश्चायं श्लोकार्थः । ज्ञानलिङ्गतः स्वतन्त्रो ज्ञायस इत्युक्तम् । तत्राज्ञानिज्ञानिनां मननमेवंरूपमित्याह । यदात्मन इति । आत्मनो जीवस्यात्मनस्तव च दृश्या गुणा विषया यैस्तेषु देहेन्द्रियादिषु सन्निवेः प्रवेशादविबुधैरन्यथामतिभिरस्वव्यतिरेकतः स्वेभ्यो व्यतिरेकः स्वभेदः स नेत्यस्वव्यतिरेकोऽभेदस्तेन व्यवस्यसे तथा ज्ञायस इति तत्तस्य व्यवसायस्यानुवादं वेदवचनं यथानुकूलं विनाऽतिहाय प्रवर्तनात्तन्मनीषितम् । सम्यगित्युभयान्वये । सम्यक् न । न च तत्त्वमसीत्यादेर्वेदस्य सत्त्वात्कथमिदं न सम्यङ्मनीषितमित्यत आह । सम्यग्वच इति । पुमान्पुरुषः पर्यङ्कशयनो व्यक्तं स्पष्टार्थं सम्यग्वचः स आत्मा तत्त्वमसीत्याद्यर्थकतां घटयन्निरवकाशमिति यावत् । तादृग्वाक्यमभीदमित्यादिकमुपाददुपादत्ताहेति यावत् । न च द्वासुपर्णा सयुजेत्यजजीवभेदसाधके सति माने ते कथमतथा कथयन्तीत्यतो वाऽऽह । विनानुवादमिति । अनुवादं पातनिकार्थं वेदसुखवादं विना तत्र मनीषितं समवन्न भवतीत्यव्यतिरेकतो व्यवस्यसे । अतः सम्यग्वचः पुमान्व्यक्तमुपाददत्स्वीकृतवानित्यन्वयः । बुधैर्दृश्यगुणेषु सन्निवेर्जडाजडेषु कृत्रिमाकृत्रिमसन्निधानाद्धेतोः स्वव्यतिरेकतः स्वभेदेन व्यवस्यसे । तद्भेदनिश्चयनमनुवादमुक्तरूपं विना मनीषितं न च । तर्हि किंरूपं तन्मनीषितं वच इत्यत आह । पुमान्व्यक्तं सम्यग्वच उपाददत्यपि भेदात्परं पदमिति तात्पर्यानुयाय्यन्वयो ज्ञेयः । अन्यथामतियथावन्मतीनां फलमप्याह । अबुधैरव्यक्तं सप्रकाशं नेत्यव्यक्तं यो मनीषितमुपाददद्यद्वच ऐकात्म्यज्ञानतो यान्ति तम इत्यादिकं पुमानुपाददत्प्राप्यं तदित्यर्थः । व्यक्तं पक्ष्युपलक्षितदुर्जनं तु स ददुमिति विभरक्तं तम इति । पक्षिभिर्विक्षिताङ्गानित्यादेरिति वा । स्वव्यतिरेकतः स्वश्च हरिश्च स्वश्चाहं च स्वौ व्यतिरत्यधिकश्च करोपमश्च तौ च तौ च स्वव्यतिरेकौ । व्यतीकूरवीविपदिति विवृतौ विशेषत्वात्तदेव ताः स्मृता इत्युक्तेर्व्यतिर्विशेषतोऽधिकः । रेको विवेके शङ्कायां रेकः स्यादधमेऽपि च । रेको नीचे चेति विश्वः । भावप्रधानं चेदम् । स्वव्यतित्वं स्वरेकत्वं बुधैर्जानद्भिर्व्यक्तम् । निरञ्जनः परमं साम्यमुपैतीत्यादेरुक्तम् । भावे क्तः । विगतमक्तमञ्जनं यत्र तन्मोक्षस्थानं भेदज्ञानफलत्वेन वदद्वेदवचनं पुमानुपाददिति । स्वातन्त्र्यपारतन्त्र्यादिज्ञानं भेददर्शिभिर्भवेदिति तात्पर्यमक्षरानुगुणं विवृतं ज्ञेयम् । पर्यङ्कशयन इत्युक्त्या रमया सह शयनसमये तां प्रति भगवतेदमीरितमिति न सा प्रातार्यासमयैश्चैकान्तिक इति विश्वसनीयतां ध्वनयति । तथा चोक्तं पर्यङ्कोपासनायाम् । पर्यङ्कफलपुष्पादिविविधानन्तरूपकैः । पूजयन्ती जगन्नाथमित्यादि । आह देवो रमोत्सङ्गविलसत्पादपल्लव इति विवरणे प्रसन्नता द्योत्यत इत्युक्तेरत्रापि सा ज्ञेया । श्रीर्यत्र रूपिण्युरुगाय पादयोः करोति मानं बहुधा विभूतिभिरित्यादेः पर्यङ्कपदेन रमाग्रहणं युक्तमिति ज्ञेयम् । पर्यङ्कः पल्यङ्कः शेषस्तत्र शयनं यस्य स तस्य च विकर्णत्वादाकर्णयितुरितरस्य प्रतार्यस्याभावात्स्वयमेव मनस्कृदिति तदानीन्तनं वचनं नाविश्वसनीयमिति ध्वनिमुत्प्रेक्षयन्ति ॥ १८ ॥ त्वत्तोऽस्येति श्लोकेऽनीहादचेष्टादिति शिलातुल्यता प्रतीयते विवक्षितोऽर्थो न च प्रतीयते इत्यतः प्रमाणेनैव तत्तात्पर्यार्थमाह । अनीह इति । अक्लिष्टमक्लेशकारित्वात्तथाऽविकृत एव सम्भवं करोषि । तदक्लेशेन करणमविकृततया करणं चेत्येतद्युक्तम् । लोके केनापि नालोकीत्यसम्भावितमिदमिति तत्राह । ऐश्वर्यात्पूर्णशक्ति इति । वैभवादगुणात् । गुणैरुपचर्यस इति प्रतीयते तदाह अगुणश्चेत्कथं गुणैः सृष्ट्यादिक्रियादतीति । तदनन्तरमत आहेति शेषः । तदाश्रयत्वादिति । सत्त्वादिविकृतताशून्यस्तदाधारत्वात्सत्त्वादिगुणवानित्युपचारेणोच्यते । स्वोक्तार्थे मानमाह । अगुणादेहत्वादिति । अगुणा गुणा देहहीनत्वादिहोपचर्यन्त इति स्मरणादतदुचितत्वाद्वाऽगुणा इत्युच्यते । गुणधारणात्सगुणाश्चर्यते ऐश्वर्यादिगुणत्वाद्वा वासुदेवः सगुण इतीर्यते । आग्नेये अग्निकलिभ्यां ठग्वक्तव्ये ठकि ईयन्नादेशः । ततश्चायं श्लोकार्थः । अगुणात्सत्त्वादिगुणरहितात्तथाऽविक्रियान्न विद्यते विक्रिया यस्मिन्स तस्मादनीहादीहा क्लेशपूर्विका चेष्टा सा न यस्मिंस्तस्मात्त्वत्तोऽस्य प्रपञ्चस्य जन्मस्थितिसंयमान्वदन्ति । कर्ता त्रिगुण इति विप्रतिषिद्धमित्यत आह । विभविति । त्वयीश्वरे ईश्वरत्वाद्ब्रह्मणि पूर्णत्वादिति हेतू । ऐश्वर्यात्पूर्णशक्ति इति मानानुयानात्ततो नो विरुध्यते । गुणाधारत्वात्सृष्टिरुपपन्नेत्याह । तदाश्रयत्वाद्गुणाधारत्वादिति । तैर्गुणैर्नि-

मिस्तैरुपचर्यसे गुणीति गीयसे। केवलो निर्गुणश्चेति श्रुतेः। मुख्यं सागुण्यं नास्ति किमीश्वर इत्यप्युत्तरयति। तदाश्रयत्वादिति। विशेषमहिम्ना तदाश्रयत्वम्। हे उप शर्वप वा ज्ञायसे गुणात्पूर्णत्वेन वा। अभेदे तृतीया। गुणैस्तदभेदेन च चर्यस इति वा ॥१५॥ सत्त्वं त्रिलोकेति श्लोके स्वमायया लोकस्थितये सत्त्वं प्राकृतगुणमाश्रित्यात्मनस्तत्कार्यं शुक्लवर्णं बिभर्षीत्येवमुत्तरत्रापि प्राकृतगुणजन्यं रक्तिमानं कृष्णं च बिभर्षीति प्रतीयते। तच्च पूर्वपक्षोक्तागुणाविक्रियत्वादिबाधितमित्यतः प्रमाणेन तदर्थमाह। जगतामिति। विभुः सत्त्वं विवर्धयन् जगतां जगन्ति रक्षति यदा हयग्रीवादिरूपेण साक्षाद्धयग्रीवविष्ण्वादिरूपेण। विष्णुं शशिवर्णं चतुर्भुजं प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तय इत्यादेः। शुक्लवर्णो भवति। तथा येन रूपेण रजो वर्धयन् हरिर्जगदुत्पादयेत्तज्जामदग्न्यादि रक्तम्। आदिपदेन सर्जकचतुर्मुखान्तर्गतं च ग्राह्यम्। एवं यादवादिकमित्यत्रादिपदेन रुद्रान्तर्गतं च रूपं ग्राह्यम्। येन रूपेण तमो वर्धयन् जगद्विनाशयेत्तद्यादवादिकं प्रस्तुतं कृष्णं तद्वर्णम्। तर्हि भगवद्रूपेषु निरूपितो विशेष इति भेद आपन्न इत्यत आह। सर्वत्रेति। सर्वत्र देशे काले। तथा सर्वरूपेषु सर्वं कार्यं रक्षणक्षपणसर्जनादिकं कुरुते। तथाऽपि विशेषस्तत्र कीर्तितो लोकमवलोक्य। ननु विष्ण्वादिः पालकतया सम्प्रतिपन्नो न सम्प्रति सम्प्रतिपन्न उक्तहयग्रीवादिरित्यत एवंरूपं पालकत्वादिकं तत्रास्तीत्याह। ज्ञानदानादिनेति। महतामधिकारिणां ज्ञानदानादिना रक्षा तद्रूपिणी रक्षेत्यर्थः। रागदानेन सृष्टिर्या सा सृष्टिरित्युदीर्यते। कृष्णादिरूपी सद्विवर्धनायासतां तमोवृद्धिं कुर्वन् असतां तान्यदा पातयेदन्धंतमः प्रापयेत्तदाऽवृद्धिं नाशं कुर्वन् वृद्धिं छेदनं कुर्वन्नाशक उच्यते। सर्वत्र सर्वमित्युक्तं तत्सङ्क्रामणप्रकारं निरूपयति। ज्ञानाद्युत्पत्तिकृदिति। ज्ञानाद्युत्पत्तिकृद्धयग्रीवादिरूपं यच्छुक्लं तद्रक्तमपि स्मृतम्। तथा कृष्णं कृष्णादिकं शुक्लं रक्तं चोदाहृतम्। हयग्रीवादिकं ग्लानिदं विनाशकं चोदाहृतम्। रज आदिशब्दानां प्रसिद्धरजआद्यर्थकत्वभ्रमं वारयंति। आचार्यादिष्विति। तमसोऽपीत्यत्रत्योऽपिः सुतिगानामपीत्यप्यन्वेति तेन कैमुत्यं द्योत्यते। आदिपदेन सच्छिष्यो ग्राह्यः। आचार्यो रागो व्याख्यास्यामीत्यादिः शास्त्रश्रवणं करिष्यामीति शिष्ये राग इच्छा स एवार्थस्तन्निमित्तं यद्रजः शुद्धसत्त्वात्मकमेव व्यपेक्षितम्। एवं यतस्तमसो विष्णुद्वेषादितमसो नाशे तन्निमित्तं तमसो नाशे परमन्यत्तमो व्यपेक्षितं तद्द्वेषात्मकं तच्छुद्धसत्त्वात्मकमुदीर्यते। प्रतिद्वेषादिकं विना द्वेषादिनाशासम्भवात्तमोनाशे परं तमोऽपेक्षितं तच्च शुद्धसत्त्वात्मकमिति भावः। तमआदिशब्दप्रयोगेण तदुक्तादिद्वेषस्य तमोगुणकार्यत्वेन तमःसाधनत्वमपि स्फोरयतीति ज्ञेयम्। यः सुतिगतानां महतामाचार्यादीनां सच्छास्त्रविषये रागो वैष्णवद्वेषश्च शुद्धसत्त्वात्मक इत्येते रागाद्या गुणोद्भवा नो मुक्तानां किन्तु ज्ञानानन्दात्मका अत्र संशयो नास्ति। तुरिति किं वक्तव्यमिति विशेषार्थः। सर्वत्र सर्वकरणमुपपाद्यैकस्मिन्ननेकवर्णादिघटकं वर्णयित्वा तद्दौर्घट्यं पराकरोति ग्रन्थकारः। सर्वत्रेति। जामदग्न्यादिरूपवांश्च ज्ञानादिरक्षको हयग्रीवादिकार्यकारि। एवं सोऽपि दोषनाशककृष्णादिर्ज्ञानाद्युत्पादकः स दोषनाशकश्चैकरूपोऽप्येव बहुरूप ईयते। अचिन्त्यैश्वर्यपूर्णत्वात्पूर्णानन्दैकरूपक इति। अचिन्त्यैश्वर्येणैकरूप्यं बाहुरूप्यं च घटत इति भावः। मायारजआदिपदार्थान्मानेनाह। स्वेच्छयेति। अजो विष्णुः स्वेच्छया गुणान्नानारूपान्नाना विलक्षणानि रूपाणि येषां ते तान्गुणान्करोति गुणानां सत्त्वादीनामाश्रयत्वादाधारत्वादेवागुणबृंहित आनन्दादिगुणपूर्णस्तच्छुक्लादिकमप्राकृतमिति गुणबृंहित इत्यनेनाहेति व्याकुर्वते। भक्तैर्भगवदभक्तेषु क्रियमाणः कोपादिः शुद्धसत्त्वाद्यात्मा भगवतस्तु तदादिशुद्धज्ञानाद्यात्मा तथा च मुक्तानां च कोपोऽपि देवस्य वरेण तुल्यो न साधुवादो मुनिकोपभर्जिता नृपेन्द्रपुत्रा इति सत्त्वधामनि कथं तमो रोषमयं विभाव्यत इत्यादेर्विवेको ज्ञेयः। ततश्चायं श्लोकार्थः। स त्वं यदा मायया स्वेच्छया त्रिलोकस्थितये तद्रक्षायै सत्त्वं वर्धयन् शुक्लवर्णं तद्वृद्धये हयग्रीवादिरूपं चात्मनो बिभर्षि। एवं सर्गाय सृष्टये रजसोपबृंहितं रक्तं जामदग्न्यब्रह्मान्तर्गतं च रक्तवर्णं बिभर्षि। जनात्यये तन्नाश आसन्ने कृष्णं वर्णं कृष्णं रुद्रान्तर्गतं च रूपं बिभर्षि खलु सर्वमलङ्कारभूतं न तु दोषात्मकमित्यर्थः। त्रिलोकस्थितये सत्त्वं बिभर्षि तथा शुक्लमित्येव खलु नापि तु रक्तं सर्गाय रक्तमेव खलु न किन्तु सत्त्वं तदेव खलु न किन्तु कृष्णं तमश्चेति सर्वत्र शक्तिसर्वस्वं ज्ञेयम्। भक्तैरभक्तेषु यत्तमः कोपादिकं तत्सत्त्वं शुद्धसत्त्वात्मकं भगवति तु व्युत्पादितप्रकारेण ज्ञानानन्दाद्यात्मकं मुक्तेष्वपि तथेति यथामानं ज्ञेयम् ॥ २० ॥

श्रीसुबोधिनी

एवं दृष्टान्तद्वयमुपपाद्य तेषामाधिदैविकानां भगवतो भेदो भविष्यतीति तन्निराकरणार्थं दार्ष्टान्तिकेतिदिशत्येवं भवानिति।

एवंरूपो भवानेवेत्यर्थः, अन्यथा मूलस्याताद‍ृशत्वे कार्यं ताद‍ृशं न कदापि भवेदिति पुनर्दूषणान्तरमाशङ्क्य परिहरति बुद्ध्यनुमेयेति, ननु भगवान् द‍ृश्यः कथमन्यथा सर्वमुक्तिश्च स्यात्? बाह्यत्वेन भिन्नत्वेन च कथं प्रतीयते? न हि भगवान् बाह्य एव भिन्न एव, तस्माद् भिन्नत्वेन बाह्यत्वेन द‍ृश्यत्वेन च प्रतीयमानत्वाद् दोषत्रयसद्भावान्नानन्दमयो भगवानिति चेत् तत्राह बुद्ध्यनुमेयं लक्षणं येषां ताद‍ृशैरिन्द्रियैर्ग्राह्यैर्गुणै रूपादिभिः सह तत्र विद्यमानो भवान् गृह्यमाणोपीन्द्रियसम्बन्धयुक्तोपि सन्नपि तद्गुणैरिन्द्रियसामर्थ्येन ग्राह्यो यस्य, यद्यपि भगवानिन्द्रियेषु विषयेष्वपि वर्तते तथापि तेषामिन्द्रियाणां न भगवद्ग्रहणसामर्थ्यं, न वाधिदैविकानामन्यार्थं निविष्टानां, ग्राह्यस्वरूपत्वाच्च न ग्राहकत्वं, न वा विषयाणां स्वाधिदैविकैः सह ग्राहकसम्बन्धः, अतः सर्वत्र विद्यमानोपि रूपभूतोपि रूपे गृह्यमाणो न गृह्यसे, इन्द्रियाणां प्रत्यक्षता तु नास्ति, आत्माग्राहकत्वात्, अतो 'रूपोपलब्धिः करणसाध्या क्रियात्वाच्छिदिक्रियाव'दित्यनुमानेन सामान्यतः करणे सिद्धे नेत्रगोलकान्वयव्यति-

रैकानुविधानाच्च चक्षुरेव करणमित्यध्यवसीयते, एवं रसोपलब्धिर्गन्धोपलब्धिरित्यादि, अनेन 'प्रत्यक्षत्व एव प्राकृतत्वमप्रत्यक्षत्वेप्राकृतत्व'मिति निरस्तं, न ह्यप्रत्यक्षाणीन्द्रियाण्यप्राकृतानि भवन्ति, अतो भगवतः प्रत्यक्षत्वेपि प्राकृतत्वमप्राकृतत्वं वा न सेत्स्यतीति युक्तिरप्रयोजिका, ननु व्यापकव्यभिचारो न दोषायेति चेद् यत् प्रत्यक्षं तत् प्राकृतमेवेति भगवतः प्रत्यक्षत्वात् प्राकृतत्वमेवेति चेत् तत्राह **ग्राह्यं गुणैरिति**, सर्वत्रैव भगवान् वर्तते न सर्वत्रैव प्रत्यक्षः, रूपादिषु विद्यमानस्यास्यैव चक्षुषाऽग्रहणात्, क्वचिदपि प्रत्यक्षत्वमपि बाधकमिति चेत् तत्राह **तद्गुणाग्रह** इति, न हि चक्षुषः सामर्थ्येनेदानीमत्रापि भगवान् दृश्यते, किन्तु स्वेच्छयैव, अतः स्वेच्छया प्रतीतमिन्द्रियग्रहणदोषेण न दुष्टं भवति, 'पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन् कश्चिद् धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छ'न्निति श्रुतेः परावृत्तचक्षुषो ग्राहकत्वं श्रूयते स्वभावतश्च निषेधः, न ह्युभयं विरुद्धं, तथा प्रकृतेपीन्द्रियसामर्थ्यादद‍ृश्यः स्वेच्छया तु दृश्य इत्यविरुद्धं, तस्माद् दृश्यत्वेनाब्रह्मत्वशङ्का परिहृता, भिन्नत्वेन बाह्यत्वेन प्रतीतौ समाधानमाहानावृतत्वाद् **बहिरन्तरं न त** इति बाह्याभ्यन्तरव्यवस्थाकाशकृतेति पूर्वमेवावोचाम, तदपि भूतादीनामेव, भगवतो व्यवधायकं न किञ्चित्, न हि गृहमध्यस्थितैर्गृहमन्यस्माद् व्यवहितं भवति, न वा स्वस्य स्वयं व्यवधायकं, व्यापको भगवानिति, ततः स्थूलकार्यस्यास्थूलकार्यस्याभावाद् भगवतोनावृतत्वं, एतदग्रे स्पष्टीभविष्यत्युलूखलबन्धने, अनावृतत्वादेव तव बाह्याभ्यन्तरव्यवहारो नास्ति, सम्पूर्णे तडागे तदुद्भवैश्छन्ने क्वचित् प्राकट्ये तावन्मात्रत्वं तदुद्भवानां वावच्छेदकत्वं न सम्भवति तथा प्रकृतेपि व्यापकस्यैव तवैकदेशे प्रकटस्य न बाह्यान्तरभेदः सम्भवति, प्रतीतिस्तूपपादितैव, परिच्छिन्नत्वमप्यनेनैव परिहृतं, अस्मिन्नर्थे शास्त्रीयं हेतुत्रयमाह **सर्वस्य सर्वात्मन आत्मवस्तुन** इति, सच्चिदानन्दरूपो भगवान्, जगद्रूपो भगवान् सद्रूपः, चिद्रूपा जीवात्मानः, आनन्दरूपः स्वयं तेषां फलरूपः, अत्र व्यावर्तकत्वं जगतो जीवानां फलस्य च न सम्भवति, त्रयाणामपि स्वरूपं भगवानेव, तदाह **सर्वस्य** सर्वरूपस्य **सर्वेषामात्म**रूपस्य सर्वात्मनां च वस्तुरूपस्य फलरूपस्य चात्मना न परिच्छेदः, नाप्यात्मनो महतः, अतो भगवदंशानामंशान्तरैर्भगवता वा परिच्छेदः सम्भवति न तु भगवतः केनापि प्रकारेण, तद्व्यतिरिक्तस्यान्यस्याभावात् आत्मनैवात्मपरिच्छेदपक्षोऽग्रे विवेचनीयः ।

एवं वैदिकप्रकारेण पञ्चात्मको भगवान् निर्दोषपूर्णगुणविग्रह एवायमिति निरूपितः ॥ १७ ॥

तन्त्रप्रकारेण चतूरूपो निरूप्यते य आत्मन इत्यादिचतुर्भिः ।

तत्र तन्त्रे प्रथमो वासुदेवस्तत्र श्रीर्माया "यत् प्रवदन्ति माया"मितिवाक्यात्, मोक्षप्रतिबन्धनार्थं तया केवलया जगत् मुच्यते, तत्र चेत् सद्बुद्धिस्तदा प्राणी न मुच्यत इति तन्मतं वदन्नेव चतुर्मूर्तिर्भगवानवतीर्ण इति वासुदेवोयमन्तरेव बहिर्वा द्रष्टव्यः, उभयथापि न तत्त्वसहितो द्रष्टव्यः केवलचिदानन्दरूपो द्रष्टव्य इति प्रथममाह, **य आत्मन** आत्मभूतस्य भगवतो **दृश्येषु** सङ्घातरूपेष्वात्मनैवानुभूयमानेष्वनुभवातिरेकेण तेषां सत्त्वाभावाच्च चतुर्विंशतितत्त्वेष्वप्यात्मनो बन्धकेषु **गुणेषु यः सन्निति** कमपि पदार्थं **व्यवस्यति**, अस्ति च तत्र सर्वत्रैव तद्रूपेण निविष्टः स सन्नेव भवति तत्सत्तयैव च तत्त्वान्यपि सत्त्वेन प्रतीयन्त इति परमार्थः, यदि **स्वव्यतिरेके**णात्मव्यतिरेकेणात्मसम्बन्धाभाव आत्मव्यतिरिक्तस्य वा सत्त्वं यद्यङ्गीक्रियेत तदाबुधः, न तस्य ज्ञानमस्ति, मायामोहित एव स इत्यर्थः, नन्वात्मसम्बन्धात् तस्य सत्त्वमुत्पद्यतामतः सत्प्रतीतौ न दोष इति चेत् तत्राह **विनानुवादं न च तन्मनीषित**मिति, वैराग्यार्थमिदं मतं, त्यागार्थमेवास्यानुवादः, सत्त्वसिद्धिव्यतिरेकेण त्यागो नोपपद्येतेति तदर्थमात्मसम्बन्धात् सत्त्वमित्यनुवादेनोक्तं, न त्वात्मना सह सम्बन्धोप्यस्ति प्रतीत्यतिरिक्तस्तदाहानुवादं विना तज्जगन् मनीषितं मनसा सत्त्वेनाकलितं न भवति, नन्वेवमप्यबुधत्वं कथमारोपार्थमपि तथाज्ञानं युक्तमेवेति चेत् तत्राह **सम्यग् यतस्त्यक्तमुपाददत् पुमा**निति, सम्यगात्मान्वेषणदशायामात्मव्यतिरिक्तं सर्वमेव त्यक्तं तच्च चेत् पुनर्गृह्णाति तदाबुध एव, तदाह पुमान् स्वयं पुरुषोपि भूत्वा सम्यक् त्यक्तमुपाददबुध एवेति पूर्वेणैव सम्बन्धः, त्यक्तमपि दूराद् दृश्यते न तूप समीपे, अन्योपदेशार्थमनुवादेनापि ग्रहण सम्भवति तद्व्यतिरेकार्थमाह **सम्यक् त्यक्तमाददिति**, येनैव प्रकारेण सम्यक् त्यक्तं तेनैव तद् गृह्णातीति ।

अथवात्मनो भगवतो दृश्येषु गुणेषु केशलोमनखरूपस्पर्शादिष्वेकोपि गुणः स्वस्मात् सच्चिदानन्दात्मकभगवत्स्वरूपाद् व्यतिरेकतः, ल्यब्लोपे पञ्चमी, तथा च व्यतिरेकं प्राप्यैव सन्, अन्यथैकरसे ब्रह्मणि विविधरूपत्वभानं न स्यात्, इति यो व्यवस्यते सोबुधः, धर्मिग्राहकमानेन शुद्धस्यैव ब्रह्मणस्तथैव सिद्धेः, एतदेवाह विनेति, वस्तुन एव तथात्वादाकारदर्शनान्तरं यो भक्तकृतः कराम्बुजं पदाम्बुजं नयनाम्बुजमित्यादिरूपो वादः सोनुवादस्तं विना तत् कराम्बुजादिकं स्वरूपव्यतिरिक्तत्वेन मनीषित मनसा सत्त्वेनाकलितं न हि भवति, ननु प्राकृतेष्वपि भगवत्सम्बन्धात् सत्त्वोत्पत्त्या तथाप्रतीतौ न दोष इत्यत आह सम्यगिति, "स यथा सैन्धवघनोनन्तरोबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्मानन्तरोबाह्यः कृत्स्नः प्रज्ञानघनः" "असङ्गो ह्ययं पुरुषः" "अथात आदेशो नेति नेती"त्यादिश्रुतिविचारदशायां त्यक्तं प्राकृतधर्ममुपाददद् भवतीत्यर्थः, तैः सह सम्बन्धे सति हि तेषु सत्त्वोत्पत्तिसम्भावना तस्यैवाभावात् तदसम्भव इति भावः, अथवा यः पुमानात्मनो द्रष्टुः स्वस्य दृश्येषु गुणेषु करपादादिषु भगवान् सन् वर्तमान इति व्यवस्यते सोबुधः, तत्र हेतुरस्वव्यतिरेकत इति, तेष्वात्मत्वेनाभिमतादभिन्नत्वादित्यर्थः, अव्ययान्तप्रयोगेणाविकृतत्वं सूच्यते करादिषु, शेषं पूर्ववत्, अतोस्मिन्नपि पक्षे कोपि त्वयि प्राकृतो धर्मो नास्तीति वासुदेवो भवान् ॥ १८ ॥

प्रद्युम्नरूपं भगवन्तं निरूपयति त्वत्तोस्येति, स हि जगत्कर्ता निरूपितः, स्मृतिर्हि तस्य श्रीः, स तस्यां प्रकृतिमुत्पादितवान्, न ततः काचित् पुरुषोत्पत्तिः, प्रकृतौ स्त्र्येव प्रधानभूता, पुरुषस्तु गुणभूतः, तया प्रकृत्या सृष्टिस्थितिप्रलया भवन्ति, सङ्कर्षणादुत्पन्नेनैव "सूत्र"नाम्ना तस्यामुत्पाद्यत इति जगदुत्पत्तिस्थितिप्रलये परम्परया सन्निधिमात्रेण प्रद्युम्नस्योपयोगः, तन्मात्रेणैव लोकः प्रद्युम्नात् सृष्टिमाह न तु वासुदेववदपि ततः सृष्टिरस्ति, तदत्रानूद्यते, त्वत्तः प्रद्युम्नरूपाद् भगवतोस्य जगतो जन्मस्थितिसंयमानुत्पत्तिस्थितिप्रलयाँल्लोका वदन्ति, तथा कथने हेतुर्विभो इति, समर्थत्वाद् वदन्तीत्यर्थः, नन्वस्तु तथैव को दोष इति चेत् तत्राहानीहादगुणादविक्रियादिति, यो हि चेष्टां करोति स एवोत्पादयति, यस्तु महदैश्वर्यादिगुणानवलम्बते स पालयति, पालनं ह्याज्ञयैवाविकृतादपि सम्भवति, यस्तु क्रोधादिविक्रियां प्राप्नोति स संहारको भवति, अयं च सत्त्वरजस्तमोगुणातीतः, अत एव नास्य कापि विक्रिया, अतः कूटस्थोयं निरीहः, तस्मादघटमानमेवालौकिकसामर्थ्यस्य विद्यमानत्वाल्लोको वदति, यद्ययं कर्तुमिच्छेत् तदा गुणानप्युत्पादयेदविकृतश्च भवेदुत्पत्त्यादिकमपि कुर्यात्, चिन्तामणिरिव वा स्वत एव कुर्यात्, तर्हि विरोधेन्यतरपरित्यागस्योचितत्वा'दन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीय' इति न्यायेनान्तरङ्गा एव स्वरूपधर्मा बलिष्ठा न तु लोकप्रतीतिर्बहिरङ्गेति भगवतो जगत्कर्तृत्वाभाव एवास्मिन् पक्षे मुख्यः सिद्धान्त इति युक्तमतो वासुदेवान्न कोपि विशेष इति चेत् तत्राह त्वयीश्वरे ब्रह्मणि नो विरुध्यत इति, विरोधे ह्येकतरपरित्याग उचितः सर्वभवनसमर्थे ब्रह्मणि विरोधाभावान्नैवङ्कल्पनोचिता, किञ्च न केवलं भगवान् ब्रह्मरूप एव किन्त्वीश्वरोपि, ईश्वरत्वेन जगत्कर्तृत्वं ब्रह्मत्वेनाविकृतत्वं च द्वयमुपपद्यते, देशकालस्वरूपावस्थाभेदा अपि नापेक्ष्यन्ते, ईश्वरत्वाद् ब्रह्मत्वाच्च, आज्ञाशक्तिरीश्वरेप्रतिहता सर्वभवनसामर्थ्यं च ब्रह्मणि, तस्माद् विरोधाभावान्नैकतरपरित्याग उचितः, किञ्च प्रतीत्यनुरोधेन हि विरोधः प्रतीतिस्त्वन्यथापि व्याख्यातुं शक्या, न हीयं प्रतीतिः प्रत्यक्षा किन्तु शास्त्रीया, शब्दप्रयोगस्तु गौण्यापि सम्भवति यथा 'सिंहो माणवक' इति, तथाधारभूतो भगवानेवेति निराश्रयस्य जगतोऽसम्भवादाधारत्वे सिद्धे तद्द्वारा कर्तृत्वमप्युपचर्यते, वस्तुतस्तु गुणा एव कर्तारोत एव साङ्ख्यादयः प्रकृतेरेव कर्तृत्वं वदन्ति, गुणानामप्ययमाश्रय इति कार्यकारणाधारभूतत्वादभिमानाभावेपि लोकदृष्ट्या कर्तृत्वकथनमुपपद्यते, एवं जगतोमायिकत्वं भगवतोकर्तृत्वं कर्तृत्वमुभयं चेति वासुदेवाद् वैलक्षण्येन प्रद्युम्नो निरूपितः, इदमाध्यात्मिकत्वेनोत्पत्तिस्थितिप्रलयात्मकत्वमुक्तम् ॥ १९ ॥

आधिदैविकत्वेनानिरुद्धं तथाभूतमुपपादयति स त्वमिति, यथा पिता कृषीवलादिर्वा पुत्रान्नादेरुत्पादको यथा वा ब्रह्मादयो वृष्टिद्वारेन्द्रादेस्ते गुणावतारा उच्यन्ते, तादृशस्त्वनिरुद्धः, तत्र ब्रह्मविष्णुशिवानामेव प्रत्येकगुणैरुत्पत्त्यादिनियामकत्वं न त्वनिरुद्धस्येत्याशङ्क्य तस्यैव त्रितयमाह, त्रिलोकस्थितये स्वमायया शान्त्या सत्त्वं बिभर्षि, तस्य सत्त्वस्य स्वरूपमाहात्मनः शुक्लं वर्णमिति, खल्विति, प्रसिद्धिः "कृते शुक्लश्चतुर्बाहु"रित्यादिवाक्यादुपाधिकालरूपाण्येवास्मिन् पक्षे भगवद्रूपाणि, तदर्थं गुणान् वदन् रूपाणि वदति, सर्गाय रक्तरूपं बिभर्षीतिसम्बन्धः, तस्य रूपस्य सहजत्वाभावायाह रजसोपबृंहितमिति, तथैव कृष्णं वर्णं जनानामत्यये नाशार्थं बिभर्षीति सम्बन्धः ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

त्वयीश्वर इत्यत्राविरोध ईश्वरत्वब्रह्मत्वलक्षणं हेतुद्वयमुक्तं तृतीये पादे, चतुर्थेपि द्वितीयकोट्युपस्थितिर्न प्रामाणिक्यतोपि न विरोध इति हेत्वन्तरमुक्तमिति किञ्चेत्यादिना व्याख्यातं, अन्यथा त्वविरोधः पूर्वेणोक्त एवेत्यग्रे तच्छङ्कयोपचारोक्तिः शशशृङ्गभिया पलायनमनुहरेत्, वस्तुतस्तु 'ननु साङ्ख्यादिषु गुणानामेव कर्तृत्वमुच्यत' इत्यत आह त्वदाश्रयत्वादिति, त्वमेवाश्रयो येषां तादृशत्वाद् गुणानां त्वन्निष्ठं कर्तृत्वं तेषूपचर्यत इत्यर्थोभिप्रेत इति ज्ञेयम् ॥ १९ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अग्रिममवतारयन्त्येवमित्यादि, अतिदेशे युक्तिमाहुरन्यथेत्यादि, तथा च 'व्यावहारिकः प्रपञ्चः स्वसत्तोत्कृष्टसत्ताकप्रपञ्चपूर्वको मायिकप्रपञ्चत्वादैन्द्रजालिकप्रपञ्चव'दितिन्यायेन पारमार्थिकप्रपञ्चसिद्धौ पश्चात् तत्स्वरूपे विचार्यमाणे 'यदेकमव्यक्तमनन्तरूप'मिति 'यदक्षरे परमे प्रजा' इत्यादिजातीयकश्रुतिभिर्द्वितीयस्कन्धीयचतुःश्लोक्युक्तप्रकारेण च ब्रह्मरूपत्वं पर्यवस्यति, एवं ब्रह्मणः सर्वाकारत्वे सर्वात्मकत्वे च सिद्धे नाद्वैतश्रुतिविरोधः, अविद्यादिवदभेदस्यापि भेदविरुद्धसम्पद्रूपत्वादिति, इदं चादृश्यत्वादिगुणकाधिकरणादवगन्तव्यं, बुद्ध्यनुमेयेत्यत्र दूषणान्तरं व्युत्पादयन्ति नन्वित्यादि, अन्यथेति, साधनं विनैव दृश्यत्वे, सर्वमुक्तिश्चेति, चकारेण सर्वाभावकृतो लीलाया अभावः समुच्चीयते, हीति, श्रुतिविरोधरूपाद्धेतोः, तत्राहेति, तादृश्यामाशङ्कायामिन्द्रियसामर्थ्येनाग्राह्यत्वादिकमाहेत्यर्थः, तदुपपादयितुं व्याकुर्वन्ति बुद्ध्येत्यादि, बुद्ध्येति, उपलब्ध्या, लक्षणमिति, ज्ञानकरणत्वं, सामर्थ्यमिति दर्शनाभावेनैव तथानिश्चयादित्यर्थः, ननु मास्तु लौकिकेन्द्रियग्राह्यत्वं तथाप्याधिदैविकेन्द्रियाणां भगवद्विभूतिरूपत्वाद् भगवतस्तद्ग्राह्यत्वं त्वदण्डवारितमित्यत आहुर्न वेत्यादि, अन्यार्थमिति, लौकिकेन्द्रियेषु सामर्थ्याधानार्थं, तथा च यथा दहरविद्यायां नाडीरूपक्रम्या "मुष्मादादित्यात् प्रतायन्त" इत्यादिनोक्तो नाडीसूर्यरश्मिसम्बन्धो देहान्निष्क्रमणसमये जीवस्य मार्गप्रकाशनमात्रं करोति न तु कार्यान्तरं तद्वदित्यर्थः, ननु सामर्थ्याधानवद् ग्राहकत्वमप्यङ्गीकार्यमिति चेत् तत्राहुर्ग्राह्येत्यादि,

इन्द्रियैर्यद् ग्राह्यं रूपादि तत्स्वरूपत्वादित्यर्थः, इदं च द्वितीयस्कन्धे प्रथमाध्याये "घ्राणं च गन्ध" इत्यादौ स्पष्टं, ननु तथापि तेषां देवरूपत्वेन सत्त्वप्रधानत्वाद् भगवद्ग्रहणसामर्थ्यं कल्प्यमिति चेत् तत्राहुर्न वेत्यादि, विषयाणां सम्बन्धी यः सन्निकर्षः संयोगरूपः स स्वाधिदैविकैः सह न किन्त्वाधाराधेयभावरूपः स्वरूपसम्बन्धः, तस्मिंश्च ग्राहकसम्बन्धत्वं न क्वचित् सिद्धमतो न कल्पयितुं शक्य इत्यर्थः, सिद्धमाहुरत इत्यादि, यत आधिदैविकानामन्यार्थत्वग्राह्यस्वरूपत्वाभ्यां न ग्राहकत्वमाध्यात्मिकानां तु सन्निकर्षराहित्यान्न तथात्वमतो न ग्राह्यस इत्यर्थः, ननु मास्तु विषयप्रत्यक्षे भगवद्ग्रहः सन्निकर्षाद्यभावादिन्द्रियाधिदैविकरूपाणि त्विन्द्रियमध्यवर्तीन्येव तथा चेन्द्रियं स्वस्वरूपं गृह्णत् तत्स्वरूपमपि गृह्णात्विति चेत् तत्राहुरिन्द्रियाणामित्यादि, आत्माग्राहकत्वादिति, स्वस्वरूपाग्राहकत्वात् , तथा च तत्र स्वयं स्वग्राहकमतस्तत्सहभूतस्य भगवतोपि न ग्राहकमित्यर्थः, नन्विन्द्रियाणामप्रत्यक्षत्वं चेत् तर्हीन्द्रियसद्भावे किं मानमित्याकाङ्क्षायां नैयायिकादिप्रसिद्धमनुमानमेव मानत्वेनाहुरत इत्यादि, तथा चानुमानमेव तत्सद्भावे प्रमाणमित्यर्थः, एतेन मूलस्थं बुद्ध्यनुमेयलक्षणैरितिपदं व्याख्यातं ज्ञेयं, तेन सिद्धमाहुरनेनेत्यादि, युक्तिरप्रयोजिकेति, दृश्यस्य प्राकृतत्वकथनेदृश्यस्याप्राकृतत्वं यदङ्गीकृतं सा युक्तिरनुकूलतर्कशून्येत्यर्थः, एवमप्रत्यक्षत्वेनाप्राकृतत्वेन व्याप्तौ दूषितायां पुनराशङ्कान्तरमवतारयन्ति नन्वित्यादि, प्रसिद्धानुमाने यथा व्यापकस्य वह्नेर्व्यभिचारो न दोषाय तद्वदत्रा 'प्राकृतोप्रत्यक्षत्वा'दित्यनुमानेप्यप्रत्यक्षत्वस्य व्यभिचारो न दोषाय, मया 'प्राकृतः प्रत्यक्षत्वा'दित्यनुमानाङ्गीकारात् , तथा सति 'यत् प्रत्यक्षं तत् प्राकृतमेवे'तिव्याप्तौ तु न दोषोतस्तथेत्यर्थः, समाधिं व्याकुर्वन्ति सर्वत्रेत्यादि, तथा च व्यतिरेकव्याप्त्याप्रत्यक्षत्वस्यापि सिद्धेर्लौकिकरूपादिसहभूतस्याप्यप्रत्यक्षत्वान्नानन्दमयत्वबाध इत्यर्थः, पुनराशङ्कन्ते क्वचिदित्यादि, तत्राहेति, बाधकयुक्तेरप्रयोजकत्वमाहेत्यर्थः, तद् व्युत्पादयन्ति न हीत्यादि, न दुष्टं भवतीति, 'प्राकृतः क्वचित्प्रत्यक्षत्वा'दित्यनुमानेपि हेतोरिन्द्रियसामर्थ्येनोपहितत्वं व्यभिचारित्वमप्रयोजकत्वं चेत्यतो नानेन हेतुना दर्शनं दुष्टं भवतीत्यर्थः, दोषं व्युत्पादयितुं प्रमाणमाहुः पराञ्चीत्यादि, तथा च 'पराक्' पदादिन्द्रियसामर्थ्येनोपहितत्व"मैक्षदि"त्यनेन व्यभिचारः श्रुत्या प्रदर्श्यते तत एवाप्रयोजकत्वमपि सिध्यतीति श्रुतिरेवात्र मानमित्यर्थः, सिद्धमाहुस्तस्मादित्यादि, तस्मादिति, श्रुत्या प्रतिपक्षहेतौ दोषप्रदर्शनात् , उत्तरार्धमवतारयन्ति भिन्नत्वेनेत्यादि, बाह्यत्वपरिहारं व्याकुर्वन्ति बाह्येत्यादि, पूर्वमवोचामेति, तृतीयस्कन्धे कापिलेय आकाशलक्षणे 'बहिरन्तरमेव चे'त्यत्र, तदपीति, आकाशकृतं बाह्याभ्यन्तरत्वमपि, अन्यस्मादिति, द्रष्टुः, उपपादितैवेति भगवदिच्छयैवोपपादिता, तथा च न बाह्यत्वप्रतीतकृत आनन्दमयत्वबाध इत्यर्थः, एतेनैव भिन्नत्वकृतस्यापि परिहारमाहुः परीत्यादि, परिच्छिन्नत्वे हि भिन्नत्वं, व्यापकत्वेन तस्मिन् परिहृते भिन्नत्वमपि परिहृतप्रायमेवेत्यर्थः, कथमित्याकाङ्क्षायां तत्र हेतुत्रयमवतार्य व्याकुर्वन्त्यस्मिन्नित्यादि विवेचनीय इत्यन्तं, व्यावर्तकत्वमिति, भेदकत्वं, अग्र इति, उलूखलबन्धस्थले, तथा च परिच्छिन्नतया भिन्नत्वस्यापि स्वेच्छया कृतत्वान्न तत्प्रतीत्याप्यानन्दमयत्वबाध इत्यर्थः, एवमेतैः श्लोकैर्दोषपरिहारेण "विदितोसी"तिप्रतिज्ञा समर्थिता, उपसंहरन्त्येवमित्यादि, वैदिकप्रकारे यज्ञोग्निहोत्रादिपञ्चात्मकः, अत्र च भिन्नत्वनिराकरणे "सर्वस्य सर्वात्मन" इति विशेषणद्वयेन सर्वरूपत्वसर्वात्मकत्वप्रतिपादनात् "पञ्चात्मकः स भगवानि"तिपञ्चरात्रस्मृत्युक्तपञ्चात्मकत्वस्याप्यर्थादेव सिद्धेः श्लोकसङ्ख्या सूचिता, यज्ञात्मकताप्यर्थादेव सिद्धा, उत्तरकाण्डोक्तं सकारब्रह्मत्वं तु व्याख्यानेन समर्थितमतो वैदिकप्रकारेण तथा निरूपित इत्यर्थः ॥ १७ ॥

अग्रिम एवं वैदिके प्रकारे निरूपिते सति "य आत्मन" इति वक्ष्यमाणश्लोकस्थं प्रमेयं भगवत्पक्षे पुनरुक्तं भवति प्रपञ्चपक्षे च सर्वात्मकत्वं विरुद्धं भवतीति कथमविरोध इत्याकाङ्क्षायां मतान्तरमिदमित्याशयेनाहुस्तन्त्रेत्यादि, प्रथम इति, परब्रह्मरूपः, यत् प्रवदन्तीति, 'इत्थं विचिन्त्य परमः स तु वासुदेवनामा बभूव निजकारणमुक्तिदाता तस्याज्ञयैव नियता परमापि रूपं यत्र द्वितीयमिव यत् प्रवदन्ति माया'मितिपञ्चरात्रवाक्यात् , सृज्यत इति, नृसिंहोत्तरतापिनीयोक्तप्रकारकं व्यावहारिकमसत् सृज्यते, तन्मतमिति, तादृशं पञ्चरात्रमतं, अन्तरेव बहिर्वेति, स्वान्तरेव स्वस्माद् बहिः पराग् देशे वा, आत्मभूतस्येति, केवलचिदानन्दरूपस्य, दृश्येष्विति, लौकिकेन्द्रियसामर्थ्येन दृश्येषु, आत्मनेति, अन्तर्वर्तिना भगवता, अनुभवातिरेकेणेति, प्रतिभासातिरेकेण, आत्मनो बन्धकेष्विति गुणशब्दस्यार्थः, गुणानाम्रज्जुरूपत्वेन द्रष्टृबन्धकत्वादिति, व्यवस्यतीति, निश्चिनोति, तादृशस्यासुधत्वं व्युत्पादयन्त्यस्तीत्यादि, आत्मव्यतिरेकेणेत्यस्यैव व्याख्यानमात्मसम्बन्धेत्यादि, तत्राहेति, सत्त्वोत्पत्तिप्रतीतौ दोषमाह, सत्त्वसिद्धीत्यत्र सत्त्वशब्देन सत्ता ज्ञेया, न भवतीति, तथा चानुवादस्य प्रतीतिमात्रसापेक्षत्वात् प्रतीतेश्चाभास्यसत्तामात्राद् दोषवशेन द्विचन्द्रप्रतीतिवत् सिद्धेरनुवादेनैव तदाकलितं भवतीति न तेन सज्ञातसत्तासिद्धिरित्यर्थः, गृह्णातीति, सत्त्वेन गृह्णाति, पुरुषोपि भूत्वेति, पुरमुषति दहतीति पुरुषस्तादृशोपि भूत्वा, समीप इति, गृह्यत इति शेषः, तथा चादरेण ग्रहणादबुध एव सः, अविचारेण ग्रहणात् , ग्रहणमिति, आदरेण ग्रहणं, येनैव प्रकारेणेति, आत्मव्यतिरिक्तत्वेन प्रकारेण, तथा च व्याख्यानारम्भे 'अन्तरेवे'त्यारभ्य 'चिदानन्दरूपो द्रष्टव्य'इत्यन्तेन यदुक्तं तदेव सिध्यतीति लौकिकेन्द्रियसामर्थ्येन दृश्येषु व्यावहारिकेषु सज्ञातरूपेष्वर्थेषु वैराग्यार्थमसद्बुद्धिरेव कार्या तदेव तथा दर्शनसिद्धिरितिव्याख्यानसन्दर्भार्थः, न चात्र मायावादसिद्ध्या वैदिकसिद्धान्तविरोधः शङ्कनीयः, आभासाभासयोर्बिम्बप्रतिबिम्बयोश्च समानाकारत्वनियमेन तस्यैतत्प्रयोजकतया विरोधाभावात् , तन्मया पूर्वमनुमानेनैव साधितं, उत्तरतापनीयटीकायां भाष्यप्रकाशे च व्युत्पादितमिति ततोवधेयं, एवमेव श्लोकं प्रभुचरणाः

पूर्वोक्तब्रह्मवादरीत्या व्याकुर्वन्त्यथ **वे**त्यादि, **दृश्येष्वि**वेति, भगवदिच्छया भक्त्या दृश्येषु, **धर्मिग्राहकमानेनेति**, 'उभयव्यपदेश' सूत्रबोधितेनेतिभावः, **इतिहेतोस्ता**दृश्यमुपाददबुध एवेतिभाव इत्यर्थः, तथा च **तन्त्रेपि** भिन्नस्य जगत एव वैराग्यार्थमसत्त्वमुच्यते न तु स्वरूपात्मकस्येति तन्त्रमपि वेदेन **समानं मोक्षधर्मे पञ्चरात्रस्य** तथात्वनिश्चायनादितिबोधनार्थमेवं व्याख्यातमतो न कोपि दोष इत्यर्थः, श्रीधरीये 'व्यवस्यत' इत्यात्मनेपदपाठदर्शनात् तस्मिन् पाठे पूर्वोक्तोर्थो न सङ्गच्छत इति तेन पाठेन व्याख्यानान्तरमाहुर**थ वे**त्यादि, **स्वस्य दृश्येष्वि**वेति, **स्वेन्द्रियसामर्थ्येन दृश्येषु**, **करपादादिष्वि**वेति, भगवत्करपादादिषु, **वर्तमान** इति, व्याप्य स्थितः, **तेष्वात्मत्वेनेति**, **इदमस्वव्यतिरेकपदस्य** व्याख्यानं, तथा च तेषु करपादादिषु भगवदभिन्नत्वेन जीववदभिमतादभिन्नत्वाज्जीववदभिमानेन भगवान् वर्तमान इति यो **व्यवस्यते सोबुध** इत्यर्थः ॥ १८ ॥

त्वत्तोस्येत्यत्र प्रद्युम्नरूपमिति, यो भवान् प्रत्यक्षगोचरः परब्रह्मतया वासुदेवत्वेन निरूपितस्तमेवेश्वरत्वब्रह्मत्वाभ्यां **प्रद्युम्न**रूपत्वेन निरूपयतीत्यर्थः, **निरूपित** इति, पञ्चरात्रे निरूपितः, तत्प्रकारमाहुः **स्मृति**रित्यादि, **प्रकृति**मिति, रजःसत्त्वतमोमयीं **भूतप्रकृतिं**, **प्रकृतौ स्त्री एव प्रधानभूतेति**, प्रकृतिसमीपे शाक्तमते स्त्री एव मुख्या; **उत्पाद्यत** इति, **पुरुष** उत्पाद्यते, **वासुदेवा**दिति, **बिम्बप्रतिबिम्बन्यायेन**, **अस्तु तथैवेति**, सामर्थ्यात् साक्षात्कर्तृत्वमस्तु, **अघटमानमेवेति**, कर्तृत्वमघटमानमेव, **तर्हि विरोध** इति, **सामर्थ्यसत्तायां** विद्यमानायामप्यकर्तृत्वे सति कर्तृत्वाकर्तृत्वयोर्विरोधे, **तत्राहेति**; **वासुदेवाद्** भेदं वक्तुं कर्तृत्वाकर्तृत्वयोर्विरोधाभावे हेतुमाह, **नैवङ्कल्पनेति**, नैकतरपरित्यागकल्पना, ननु ब्रह्मत्वेन सर्वभवनसामर्थ्येप्यविकृतस्य विद्यमानत्वाज्जगदकरणेस्त्येव विरोध इत्यत आहुः **किञ्च** नेत्यादि, **नापेक्ष्यन्त** इति, कर्तृत्वार्थं नापेक्ष्यन्ते, विरोधभावमुपपादयन्त्याज्ञेत्यादि, प्रकारान्तरेणाप्युपपादयन्ति **किञ्चे**त्यादि, तथा चानीहत्वादिकं गौण्यात्रोच्यतेतो न विरोध इत्यर्थः, तुरीयपादं व्याकुर्वन्ति **तथे**त्यादि, **तद्द्वारेति**, आधारत्वद्वारा, ननु पूर्वोक्तहेतुद्वयेन कर्तृत्वाकर्तृत्वयोरविरोधे सिद्धे पुनरुपचारेणाविरोधसाधनस्य किं प्रयोजनमित्याकाङ्क्षायां तत्प्रयोजनं टिप्पण्यामाहुर**विरोध** इत्यादि, **द्वितीयकोटयुपस्थितिरिति**, कर्तृत्वकोट्युपस्थितिः, **हेत्वन्तरमिति**, **त्वदाश्रयत्वादिति** हेत्वन्तरं, **तच्छङ्कयेति**, विरोधशङ्कया, तथा च **मूलानुसरणं** प्रयोजनमित्यर्थः, ननु मूल उपचारपक्षः किमित्युक्त इत्याकाङ्क्षायां यत् सुबोधिन्यां **वस्तुतस्त्वि**त्यादिनो**पपद्यत** इत्यन्तेनोक्तं तद् विवृण्वन्ति **वस्तुतस्त्वि**त्यादि **ज्ञेय**मित्यन्तं, तथा च मूले गुणेषु कर्तृत्वोपचार इत्याशयो न तु भगवति तदुपचारः, एवं च सुबोधिन्यां **गुणा एव कर्तार** इत्यस्यात **एवे**त्यस्याभिमानादेवेत्यर्थो ज्ञेयोतो न विरोध इत्यर्थः, सुबोधिन्यां श्लोकार्थं निगमयन्त्ये**वं जगत** इत्यादि, अग्रिमे **वासुदेवात् प्रद्युम्नतश्च** वैलक्षण्येनानिरुद्धं निरूपयितुं **पूर्वोक्त**मनुवदन्तः प्रस्तुतमवतारयन्तीदमित्यादि, **प्रद्युम्ने** प्रकृतिजननद्वारेदमुत्पत्तिस्थितिप्रलयात्मकत्वमा**ध्यात्मिकत्वे**नाध्यात्मं भवत्वेनोपादानतया निरूपितम् ॥ १९ ॥

अतः परमधिदैवं भगवत्त्वेन प्रयोजकतयांशत उपादानतया चानिरुद्धं जगत्कर्तारमुपपादयन्ति, तथा च **वासुदेव**स्तटस्थत्वेन **प्रद्युम्न** उपादानत्वेनानिरुद्धः प्रयोजकत्वादिना कारणमित्येवम्भेदमुपपादयन्तीत्यर्थः, तद् व्युत्पादयन्ति **यथापिते**त्यादि, **उत्पादक** इति, एतदग्रे '**वृष्टिद्वारेन्द्रादि**'स्तदग्रे '**यथा वा ब्रह्मादय**' इत्येवम्पाठः प्रतिभाति, तथा च पितृवदंशविशेषेणोपादानभूतः **कृषीवलेन्द्रब्रह्मादिव**दनेकधा स्वक्रियारूपव्यापारेण प्रयोजकश्चानिरुद्ध इति वासुदेवादिभ्यो विलक्षण इत्यर्थः, व्याकर्तुमवतारयन्ति **तत्रे**त्यादि, **शान्त्येति**, स्वश्रिया शान्त्या, ननु गुणावताररूपेषु सत्त्वस्य श्यामस्तमसश्च शुक्लो वर्णो निरूपितः प्रकृते च विपरीत इति कथं प्रसिद्धिभेदसमाधिरित्यत आहुः **प्रसिद्धिः कृते शुक्ल** इत्यादि, **उपाधिकालरूपाणीति**, सत्त्वरजस्तमसामुपाधिभूतकालरूपाणि, **तदर्थ**मिति, रूपनिरूपणार्थं, तथा चात्र 'स्थितये सर्गाय जनात्यय' इतिकार्यनिर्देशात् सत्त्वतमसी क्रियाव्याप्ते सती विपरीतरूपे भवत इति न गुणावतारवर्णवाक्यविरोधः, यथा गन्धकधूमेन जपाकुसुमादेः श्वैत्यं धूमान्तरेण शुक्लपटादेः श्यामत्वं तद्वद् **वस्तुविशेषजन्यक्रियाविशेषजसंयोगस्यैव** तत्र कारणत्वादिति न चात्र प्रद्युम्नानिरुद्धयोः क्रमेण निरूपणे किं मानमिति वाच्यं, श्लोकारम्भे तत्तत्कार्यबोधक'जन्म'पद'त्रिलोकस्थिति'पदयोरेव मानत्वात् , तन्त्रे प्रद्युम्नस्य सृष्टिकृत्त्वेनानिरुद्धस्य पालकत्वेनैव प्रसिद्धत्वात् , उभयत्र कार्यान्तरानिर्देशस्तु योग्यतामादाय वासुदेवार्थत्वाय वेति न कोपि दोष इति दिक् , **अग्रिमे सङ्कर्षणात्मक**माहेति, कार्यनिरूपणमुखेन तथाहेत्यर्थः, शेषं स्फुटम् ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एव भवानित्यस्याभास **एवमि**ति, एत एव विराजं जनयन्तीतिकथनेन विराजीवात्रापि तत्त्वानि प्रतीयन्ते परं त्वाधिदैविकानीति पूर्वश्लोक उपपादितं कार्येनुगता इव, अत्र तु दृश्यमानत्वेपि कार्यगतानां सम्भवो नेतिकथनेन तत्त्वकार्याणि त्वगादीनि कार्यं इवात्रापि प्रतीयन्ते परं त्वाधिदैविकानीति द्वितीयश्लोक उपपादितं, तथा **चोपपाद्याधि**दैविकत्वबोधनार्थमितिशेषः, तात्पर्यवशादयमर्थो लब्ध **इत्युपपाद्येत्युक्तं**, अत्र ते सन्तीत्याधाराधेयभावत्वे भेद आयाति **तन्निराकरणार्थम**तिदिशति यथा दृष्टान्ते प्रतीयन्ते तथात्रापि प्रतीयन्ते परमत्र स्वरूपमेव तत्तद्रूपेण जातमितिविशेषोस्तीति वदतीत्यर्थः, अयं पदस्याभास उक्तो वाक्यस्याभासस्तु **पुनर्दूषणा**न्तरमित्यनेन वक्ष्यत इति ज्ञेयं, स्वरूपस्य तावद्रूपभवने प्रयोजनमाहुर**न्यथेति**, एतस्यैव विवरणं **मूलस्येति**, **नन्विति**, **भगवांश्चेद् दृश्यः** कथम् ? **कथ**मित्यस्याग्रेप्यन्वयः, **अन्यथेति**, दृश्यत्वाभावे **सर्वमुक्तिश्च कथं स्यादि**त्यर्थः, तथा च भगवत्त्वे

दृश्यत्वं बाधकमितितात्पर्यं, बाधकद्वयमन्यदप्याहुर्बाह्यत्वेनेति, भगवत्त्व इतिशेषः, **बुद्ध्यानुमेयमिति**, 'रूपग्राहकमिन्द्रियं चक्षु'रित्यादीनि लक्षणानि बुद्ध्या विचारेणानुमेयानि न तु घटस्य जलग्राहकत्वमिव प्रत्यक्षत उपलभ्यन्त इत्यर्थः, इन्द्रियैरग्रहणेऽप्याधिदैविकैः सूर्यादिभिरेव ग्रहणं भवत्वित्याशङ्क्याहुर्न वाधिदैविकानामिति, आधिदैविका अन्यार्थं विषयग्रहणार्थं निविष्टा अतो 'न सामर्थ्य'मिति पूर्वेणान्वयः, तथा चासामर्थ्यान् न ग्राहकत्वमितिभावः, हेत्वन्तरमाहुर्ग्राह्येति, ग्राह्यत्वेन सम्भाव्यो भगवांस्तत्स्वरूपा आधिदैविका भवन्ति, अतो भगवद्ग्राहकत्वमाधिदैविकानां न, न हि स्वयं स्वेन गृह्यत इति भावः, तथा चेन्द्रियेषु स्थितोऽप्याधिदैविकैर्न गृह्यत इत्यत्रेन्द्रियनिष्ठग्राह्यस्वरूपत्वं हेतुरुक्तः, न वा विषयाणामिति, स्वपदेनेन्द्रियाणि, तदाधिदैविकैः सह विषयाणां साक्षाद्ग्राहकत्वसम्बन्धो नास्ति किन्तु विषयाणामिन्द्रियैरिन्द्रियाणां च स्वाधिदैविकैः साक्षात्सम्बन्धाभावादाधिदैविकैर्विषयस्थितस्याप्यग्रहणं, तथा चान्यार्थं निविष्टत्वेन सामर्थ्याभावाद् ग्राह्यस्वरूपत्वात् साक्षात्सम्बन्धाभावाच्चाधिदैविकानां न ग्राहकत्वमित्यर्थः, आध्यात्मिकेन्द्रियाणां त्वसामर्थ्यमित्युक्तमेवेतिभावः, ननु सार्वदिकीयं व्यवस्थाधुना तु स्वरूपं दृश्यत एव तथा च दृश्यत्वात् प्राकृतत्वं सिध्येदेवेत्याशङ्क्य प्रत्यक्षत्वप्राकृतत्वयोर्व्यभिचारं साधयितुं मूले बुद्ध्यनुमेयलक्षणैरितिपदोक्तमिन्द्रियाणामप्रत्यक्षत्वं साधयन्तीन्द्रियाणामिति, निश्चयार्थं तु शब्दः, तत्र हेतुरात्माग्राहकत्वादिति, न हि स्वं स्वेन गृह्यत इति भावः, अत इति, अप्रत्यक्षत्वादेवम्प्रकारकानुमानेनैव साधनीयमित्यर्थः ॥ १७ ॥

य आत्मन इत्यत्र, **केवलयेति**, प्रेरकत्वमात्रं न तु स्वयं व्यापाराविष्ट इत्यर्थः, **तन्मतं वदन्नेवेति**, **वदन्नेव प्रथममाहे**त्यग्रिमेणान्वयः, आद्यपक्षे दृश्यगुणानामसत्त्वकथनेन तत्र सद्बुद्धौ प्राणी न मुच्यत इति मतमुक्तं जातं, द्वितीयपक्षेपि भगवतः केशादीनां भिन्नसत्ताकत्वे जगद्रूपत्वमेव सम्पन्नमितीदमेव मतमुक्तं जातमितिभावः, ननु वासुदेवस्तु नन्दगृह आविर्भविष्यतीत्यधुनात्र कथं तत्कथनमित्याशङ्क्याहुरन्तरिति, 'प्रथमे वासुदेवोभू'दित्यनेन निबन्धेन्तःप्राकट्यं निरूपितं तदवधि वसुदेवहृदि प्रकट एवास्ति, अत एव वसुदेव आविर्भवतीति वासुदेवपदनिरुक्ति 'वसुदेवं हरेः स्थान'मित्यादिवाक्यानि च, बहिःप्राकट्यं नन्दगृहे भविष्यति, इममन्तर्बहिर्भेदमविवक्षन्नन्तः प्रकटं पश्यन् तत्स्वरूपं निरूपयतीत्यर्थः, **आत्मभूतस्य भगवत** इति, जीवानामात्मभूतस्यान्तःप्रकटस्य वासुदेवस्येत्यर्थः, **बहिर्वा दृष्टव्य** इति पक्षोथवेत्यनेनाग्रे वाच्यः, **सञ्जातरूपेष्विति**, दृश्योस्मदादीनां सञ्जातोपि वासुदेवस्यैव गुणतच्छक्तिश्रीकृतत्वादितिभावः, **दृश्यपदस्यार्थमाहुरात्मनैवानुभूयमानेष्विति**, **गुणपदतात्पर्यमाहुरात्मनो बन्धकेष्विति**, जीवात्मन इत्यर्थः ।

द्वितीयपक्षे भगवतः केशादीनां भिन्नसत्ताशङ्काया प्राकृतत्वमेव शङ्कितं जातमित्याशयेनाहुर्ननु **प्राकृतेष्वपीति**, तृतीयपक्ष **आत्मनो द्रष्टुरिति**, स्वस्य जीवस्य दृश्येषु भगवदीयकरपादादिष्वित्यर्थः, **आत्मत्वेनाभिमतादिति**, एतादृशात् स्वरूपात् करपादादीनामभिन्नत्वमित्यर्थः, आत्मानात्मविभागाभावादात्मत्वमपि न वक्तुं शक्यत इत्यभिमतादित्युक्तं, अस्मिञ्छ्लोके वासुदेवव्याख्यान उपपत्तिमाहुः **कोपि स्वयोति**, व्यूहत्रयं गुणत्रययुक्तं वासुदेवो गुणातीत इति तन्त्रसिद्धान्तादितिभावः ॥ १८ ॥

त्वत्तोस्येत्यत्र **तस्यामुत्पाद्यत** इति, जगदितिशेषः **वासुदेववदपीति**, प्रेरकत्वेनापीत्यर्थः, तदज्ञेति, तन्मतमित्यर्थः, **महदैश्वर्येति**, तथा चागुणपदस्यैश्वर्यादिगुणानामाश्रय इत्यर्थः, एतेषां गुणानां पालनकरणत्वं व्युत्पादयन्त्याज्ञयैवेति, विकारनियमाभावेप्याज्ञानियमस्तु वर्तत एवेत्यर्थः, **अयं चेति**, अविक्रियपदव्याख्यानमिदं न त्वगुणपदस्य, अतो गुणानतीतस्तैर्विक्रियां न प्राप्नोति, तदनधीन इत्यर्थः, न तु गुणरहितः, तादृशस्तु वासुदेव एवेति पूर्वमुक्तं, **स्वत एवेति**, चेष्टां विनैवेत्यर्थः, **चिन्तामणेरपि** चेष्टा नास्तीति तद्दृष्टान्तः, वासुदेवादिति, वासुदेवः स्वश्रिया मायया केवलया जगत् करोत्यतः **स्वयमकर्तैवेतिभावः**, **भगवानेवेतीति**, इति हेतोराधारत्वे सिद्ध इत्यन्वयः, भगवत आधारत्वं साधयन्ति निराश्रयस्य जगतोसम्भवादिति, उपसंहारे **कर्तृत्वमुभयत्रेति**, पूर्वार्धे 'लोका वदन्ती'तिकथनादकर्तृत्वं तृतीयचरणेनोभयं चतुर्थचरणेन कर्तृत्वमितिविभागः ॥ १९ ॥

स त्वमित्यत्र विष्णोः श्यामत्वादत्र शुक्लत्वं कथमुक्तमित्यत आहुरुपाधिभूतो यः कालस्तत्कृतानि त्रीण्यपि रूपाणीत्यर्थः, तथा च सत्त्वतमसोः कालवशाद् वर्णव्यत्ययः, अत्र विष्णुब्रह्मशिवा नोच्यन्ते किन्तु युगाभिमानिनोवतारा उच्यन्त इति भावः, कृतयुगे त्रिलोक्या रक्षार्थं शुक्लं चतुर्बाहुरूपं धृतवांस्त्रेतायां रक्तवर्णं तत्र यज्ञैर्भगवद्भजनस्योक्तत्वात् तेषां च प्रवृत्तिस्वभावत्वात् सर्गायेत्युक्तं, 'कलौ कृष्णवर्णः' स एव कल्किर्भूत्वाधर्मिष्ठान् मारयतीति जनात्यय इत्यर्थः, रक्षोत्पत्तिप्रलयानामेव वक्तव्यत्वात् त्रयमेवोक्तं, द्वापरावतारेपि प्रवृत्तिस्वभावतान्त्रिकपूजाया उक्तत्वात् तस्यापि सर्गोपयोगित्वमेव ज्ञेयं, पीतवर्णोपि रक्तसजातीय एव ॥ २० ॥

बुभुत्सुबोधिका

एवमित्यत्र दृष्टान्तद्वयमिति अवतारि विराड्रूपं द्वयम् । दार्ष्टान्तिकोक्तिस्तु प्रासङ्गिकी सुखबोधायेति ज्ञेयम् । भेद इति आधाराधेयसम्बन्धे भेद आयातीति तन्निराकरणार्थमतिदिशति, अन्यत्रैव प्रतीतायाः कृत्स्नाया धर्मसन्ततेः अन्यत्र कार्यतः प्राप्तावतिदेशः, स कथ्यत इति । अत्रान्यत्र दृष्टान्तद्वये । अन्यत्रावतारे । अतिदेशयुक्तिमाहुः अन्यथेति । एतस्य विवरणं मूलस्येत्यादि ।

विराजो मूलस्येत्यर्थः । कार्यं कृष्णावताररूपमत्र । तथा च व्यावहारिकः प्रपञ्चः स्वसत्तोत्कृष्टसत्ताकप्रपञ्चपूर्वकः मायिकप्रपञ्चत्वात्, ऐन्द्रजालिकप्रपञ्चवदितिन्यायेन पारमार्थिकप्रपञ्चसिद्धौ पश्चात् तत्त्वरूपे विचार्यमाणे 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता' दिति 'यदक्षरे परमे प्रजा' इत्यादिजातीयकश्रुतिभिः द्वितीयस्कन्धचतुः श्लोक्युक्तप्रकारेण च ब्रह्मरूपत्वं पर्यवस्यति । एवं तमः परत्वलिङ्गेनाक्षरप्रतिष्ठत्वलिङ्गेन च ब्रह्मणः सर्वाकारत्वे सर्वात्मकत्वे च सिद्धे नाद्वैतश्रुतिविरोधः । अविद्यादिवदभेदस्यापि भेदविरुद्धसम्पद्रूपत्वात् । इदं चा 'दृश्यत्वादिगुणको धर्मोक्ते' रित्यधिकरणे स्पष्टम् । अन्यथेति दृश्यत्वे । 'तमेव विदित्वा अतिमृत्युमेती' तिश्रुतेः । बाधकद्वयमन्यदाहुः बाह्यत्वेन भिन्नत्वेन चेति । आनन्दमयस्य सर्वान्तरत्वात् । व्यापकाद् भिन्नत्वेन । दोषत्रयेति प्रतीतित्रयविषयत्वानि दोषाः तेषां त्रयम् । तत्राहेति तादृश्यामाशङ्कायामिन्द्रियसामर्थ्येनाग्राह्यादिकमाहेत्यर्थः । बुद्ध्येत्यादि तत्र तैजसाहङ्कारोपादेयत्वे सति ज्ञानक्रियान्यतरकारणत्वमिन्द्रियत्वम् । इदं साक्षात्सृष्टावव्याप्तमिति देहसंयुक्तत्वे सति स्वफलेनात्मज्ञापकत्वं लक्षणम् । इदं क्रमसृष्टौ नाव्याप्तम् । 'सर्वं खल्विदं ब्रह्मे'ति श्रुतेर्ब्रह्मज्ञानिनं प्रति लक्षणस्य मुख्यत्वात् । कालिकसम्बन्धेनाव्याप्तेरदुष्टत्वात् । परं त्विहांशभेदेन विरुद्धधर्मसमाधानात् सैद्धान्तिकमतमिति यत् सम्प्रयुक्तेर्थे विशदावभासं ज्ञानं जनयति तदिन्द्रियमिति मीमांसकलक्षणम् । अथवा शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिति नैयायिकलक्षणमादर्तव्यम् । उद्भूतविषयगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं श्रोत्रेन्द्रिये व्याप्तमिति शब्देतरेति । विशेषणदलं घटादावतिव्याप्तमिति विशेष्यदलम् । तदपि व्यापकात्मकालादावतिव्याप्तमिति विशेषणदलम् । सूर्यग्राहकमिन्द्रियं चक्षुरित्यादिलक्षणानि च बुद्ध्या विचारणानुमेयानि न तु कम्बुग्रीवादिमत्त्ववत् प्रत्यक्षत उपलभ्यन्त इत्यर्थः । तत्रेति आनन्दमये गह्वरे । अत्रोक्तं दृष्टान्तद्वयमनुसन्धेयम् । तेन विराड्यपि विद्यमानो गृह्यते, तेन तत्रेत्यस्य तयोरित्यर्थः । अपीन्द्रियसंयुक्तोपि इति सर्वे मां पश्यन्त्वितीच्छयेन्द्रियसंयुक्तः । दृष्टान्तीयविराट् तु साधारणेच्छयेन्द्रियसंयुक्तः । ननु विषयता काचिदस्ति तयेन्द्रियसंयुक्तोस्त्विति चेत् तत्राहुः सन्नपीति । विषयता मायिक्ययं तु सन्नित्यर्थः । सर्वे मां पश्यन्त्वितीच्छया विषयतास्त्वयं तु विषयतानिष्ठः सन्नित्यर्थः । व्यावहारिकी सत्तेत्युच्यते । तद्गुणेति तद्गुणैरिन्द्रियसामर्थ्यैः । वर्तत इति व्यावहारिकी सत्तारूपेण वर्तते । न भगवदिति दिव्यचक्षुराद्यभावादवतारिवन्नेत्यादिः । इन्द्रियैरग्रहणेत्याधिदैविकैः सूर्यादिभिरेवावतारिवद् ग्रहणं भवत्वित्याशङ्क्याहुः न वाधिदैविकानामिति । अन्यार्थमिति विषयग्रहणार्थम् । निविष्टानां न भवद्ग्राहकत्वमित्यन्वयः । ग्राह्येति इन्द्रियैर्यद् ग्राह्यरूपादि तत्स्वरूपत्वादित्यर्थः । न वा इति ग्राहकेति स्वनिष्ठग्राह्यत्वनिरूपितग्राहकत्वसम्बन्धः । ग्राहकेति भावप्रधानम् । इन्द्रियैस्तु वर्तते इति भावः । अत इति यत आधिदैविकानामन्यार्थत्वग्राह्यत्वाभ्यां न ग्राहकत्वं मायात्मिकानां तु सन्निकर्षराहित्यान्न तथात्वमतोवतारिवत् त्वं न गृह्यस इत्यर्थः । विद्यमानोवतारिवत् रूपभूतो विराड्वत् । 'एवं भवा' नित्युपपाद्य दोषत्रये दृश्यत्वेनाब्रह्मत्वं निराकरोतीत्याशयेन पूर्वार्धं व्याकुर्वन्ति स्म इन्द्रियाणामित्यादि । बुद्ध्यनुमेयत्वं साधयितुं प्रथमतः प्रत्यक्षतामुपस्थितां वारयन्ति स्म प्रत्यक्षतेति । अर्षआद्यच् । प्रत्यक्षविषयता । प्रत्यक्षं चक्षुस्तत्त्वं न निषेधार्हमिन्द्रियेषु । प्रत्यक्षं ज्ञानं तत्ता ज्ञानेन्द्रियेषु नास्ति । तत्तद्द्रव्यरूपत्वात्, आत्माग्राहकत्वात् । ज्ञानरूपाणीन्द्रियाणि ज्ञानेन्द्रियाणीति न समासः आत्मग्राहकत्वापत्तेः । 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इतिवाक्यात् । अतः स्वविषयरूपादिग्राहकाणीन्द्रियाणि ज्ञानेन्द्रियाणि । अत इति 'अणवश्चे'ति सूत्रेणेन्द्रियाणां प्रत्यक्षविषयत्वाभावात् । बुद्धिरनुमानज्ञानजनिका । बुद्धिमानयं पदार्थान् जानातीति प्रत्ययात् । बुद्धिस्तत्त्वान्तरम् । क्रियात्वादिति साध्यतावच्छेदकसम्बन्धो ग्राहकता । हेतुतावच्छेदकसम्बन्धः समवायः ।

ननु स्वरूपसिद्धो हेतुरिति चेन्न, वेदवेदान्तसारत्वेनोपलब्धेः क्रियात्वेन विवक्षितत्वात् । तथा च पञ्चरात्रशास्त्रं ज्ञानं क्रियेति । छिदि क्रियायां दात्रं करणम् । नेत्रेत्यादि यत्र यत्र क्रियात्वं तत्र तत्र नेत्रगोलके इत्यन्वयव्याप्तिः । यत्र यत्र नेत्रगोलकाभावस्तत्र तत्र क्रियात्वाभावः । 'यस्तु ह्याध्यात्मिकः प्रोक्तः सोसावेवाधिदैविक' इति द्वयमुपात्तम् । आधिदैविकस्याध्यात्मिकाभेदात् । इत्यादीति शब्दोपलब्धिः स्पर्शोपलब्धिः । एतेन मूलस्थं 'बुद्ध्यनुमेयलक्षणैरिन्द्रियै'रितिपदं न्यूनपूरणेन व्याख्यातं ज्ञेयम् । न यथामूलं व्याख्यानमस्त्विति शङ्क्यम् । दृष्टान्तोपात्तेन्द्रियवदत्रापि न्यूनपूरणे कर्त्रभिप्रायात् । तेन सिद्धमाहुः अनेनेत्यादि । निरस्तमिति तेन विदितेप्यप्राकृतत्वमिति भावः । युक्तिरिति दृश्यस्य प्राकृतत्वकथनेऽदृश्यस्याप्राकृतत्वं यदङ्गीकृतं सा युक्तिरनुकूलतर्कशून्येत्यर्थः । एवमप्रत्यक्षत्वेनाप्राकृतत्वेन व्याप्तौ दूषितायां पुनराशङ्कान्तरमवतारयन्ति स्म नन्वित्यादि । प्रसिद्धानुमाने यथा व्यापकस्य वह्नेरयोगोलकादौ हेतुव्यभिचारः हेत्वभाववद् वृत्तित्वं न दोषाय, तद्वदत्र अप्राकृतोऽप्रत्यक्षत्वादित्यनुमानेप्यप्रत्यक्षत्वस्य व्यभिचारो न दोषाय । मया प्राकृतः प्रत्यक्षत्वादित्यनुमानाङ्गीकारात् । तथा सति यत् प्रत्यक्षं तत् प्राकृतमेवेति व्याप्तौ न दोष इत्याशङ्का चेत् यदीत्यर्थः । सर्वत्रेति तेन ग्राह्यैर्गुणैः सह सन्नपि प्राकृतं विदितत्वात् प्रत्यक्षत्वात् घटवदित्यत्र विदितत्वहेतुः सत्प्रतिपक्ष इति भावः । अनुमानं तु रूपादिषु भगवानप्राकृतः अप्रत्यक्षत्वात् भक्तनिष्ठभगवद्वत् । साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः । चक्षुषाऽग्रहणादिति अग्रहणादिति छेदः । पुनराशङ्कते कश्चिदपीति । प्राकृतः कश्चित्प्रत्यक्षत्वादित्यनुमानं बाधकं प्रत्यनुमानसत्प्रतिपक्षत्वेन मूलानुमानसत्प्रतिपक्षत्वविघटकमित्यर्थः । तत्राहेति आशङ्कायां बाधकानुमानस्याप्रयोजकत्वमाहेत्यर्थः । चक्षुषः सामर्थ्येनेति तद्गुणैर्ग्रहो यस्येत्यत्र तद्गुणान्तर्गतेनानेन । इदानीमित्यादि न हि ग्रहो यस्येत्यस्यार्थः । अत्रापीति जन्मस्थानेपि । न दुष्टं भवतीति उक्तकश्चित्प्रत्यक्षत्वहेतोः सोपाधिकत्वात् दुष्टम् । इन्द्रियसामर्थ्यमुपाधिः । यत्र यत्र प्राकृतत्वं तत्र तत्र

इन्द्रियसामर्थ्यम्। यत्र यत्र कचित्प्रत्यक्षत्वं तत्र तत्र इन्द्रियसामर्थ्यमिति नास्ति, किन्तु स्वेच्छयैव कचित्प्रत्यक्षम्। तथा कचित्प्रत्यक्षत्वहेतोर्व्यभिचारित्वं साध्याभाववद्वृत्तित्वम्। धीरप्रत्यक्कृते दर्शने विषये प्राकृतत्वाभाववति कचित्प्रत्यक्षत्वहेतोः सत्त्वात्। अत एवाप्रयोजकत्वं च हेतोः। इन्द्रियग्रहणदोषेण न दृष्टं भवतीति पाठः। अत्रेन्द्रियग्रहणेन दोषः प्राकृतत्वं तेन सह न धीरदृष्टं भवतीत्यर्थः। यद्वा। इन्द्रियैर्भगवद्ग्रहणे इन्द्रियाणां दोषः पराग्द्रष्टृत्वं विषयदोषस्त्वपराक्त्वम, तेन पूर्वोक्तस्तु करणदोषः। दोषं व्युत्पादयितुं प्रमाणमाहुः पराञ्चीति। खानीन्द्रियाणि। अन्तरात्मन्नित्यत्रामोलुक्। प्रत्यक्जीवः। तथा च पराक्पदादिन्द्रियसामर्थ्येन सोपाधिकत्वम्। ऐक्षदित्यनेन व्यभिचारः श्रुत्या प्रदर्श्यते। तत एवाप्रयोजकत्वमपि सिध्यतीति श्रुतिरेवात्र मानमित्यर्थः। सिद्धमाहुः तस्मादित्यादि। तस्मादिति श्रुत्या प्रतिपक्षहेतौ दोषप्रदर्शनात्। उत्तरार्धमवतारयन्ति स्म भिन्नत्वेनेत्यादि। पूर्वमिति तृतीयस्कन्धे कापिलेये आकाशलक्षणे बहिरन्तरमेव चेत्यत्र। तदपीति आकाशकृतं बाह्याभ्यन्तरत्वम्। अन्यस्मात् द्रष्टुः गृहमध्यस्थितान्तर्गतात्। स्वस्य गृहस्य। स्वयं गृहम्। दार्ष्टान्तिके योजयन्ति स्म व्यापको भवानिति। उपपादयन्ति स्म तत इति। व्यापकाद् भगवतः। अग्र इति उलूखलबन्धन इत्यनेनान्वेति। तदुद्भवैरिति तृणशैवालादिभिरित्यर्थः। तावदिति अनाच्छन्नप्रकटतडागमात्रत्वम्। जगदुद्भवानामिति तदुद्भवव्यतिरिक्तानां पुरुषद्वारोद्भवानामिति बोध्यम्। अवच्छेदकत्वम्। अन्यूनवृत्तित्वं अनतिरिक्तवृत्तित्वम्। न संभवतीति तादृशव्यापकत्वात्। एकदेशे इति कारागृहे भक्तहृदये च तावन्मायादूरीकरणेन प्रकटस्येत्यर्थः। उक्तदृष्टान्तेन प्राकृतेन प्रतीतत्वं न सेत्स्यतीत्यत आहुः प्रतीतिस्त्विति। दृष्टान्तीयाशेषधर्मापत्त्या माभूत् प्रतीतिः। उपपादिताऽलौकिकी प्रतीतिस्तु स्यादेवेत्यर्थः। पराञ्चि खानि इत्युक्तश्रुतेरेवकारः। तथा च न बाह्यत्वप्रतीतिकृत आनन्दमयत्वबाध इति भावः। एतेनैवभिन्नत्वकृतस्यापि परिहारमाहुः परीत्यादि। अनेनैवेति 'अनावृतत्वाद् बहिरन्तरं न त' इति विशेषणेनैव। परिच्छिन्नत्वे हि भिन्नत्वं व्यापकत्वेन तस्मिन् परिहृते भिन्नत्वमपि परिहृतप्रायमेवेत्यर्थः। कथमित्याकाङ्क्षायां तत्र हेतुत्रयमवतार्य व्याकुर्वन्ति स्म अस्मिन्नित्यादि विवेचनीय इत्यन्तम्। अस्मिन्निति तृतीयपादोक्तेर्थे। प्रथमतो वेदान्तशास्त्रीयं हेतुमाहुः सच्चिदिति। सच्चिदानन्दरूपो भवान् सर्वः अंशत्रययुक्तः। गवर्णलोपः 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतेः। भगवानित्युत्तरत्राप्यन्वेति। 'सदेव सोम्येदमग्र आसी'दितिश्रुतेः। जीवात्मेति द्वितीयनवमाध्याये स्पष्टम्। 'यतो वाचो निवर्तन्त' इत्युपक्रम्या 'नन्दमेतज्जीवस्ये'तिश्रुत्युक्तमानन्दं व्यावर्तयन्ति स्म न आनन्दरूप इति। किन्तु 'यतो वाचो निवर्तन्त' इत्युपक्रम्या 'नन्दं ब्रह्मणो विद्वा' नित्युक्त आनन्दमयः। काल आनन्दमयचेष्टाप्रवर्तक आनन्दमय इति, 'आनन्दरूपममृतं यद् विभाती'तिश्रुतेः। अत्रेति एकस्मिन् सर्वरूपे। व्यावर्तकत्वं भेदकत्वम्। जगत इत्यादि जगतो जडस्य कर्ममयस्य, जीवानां ज्ञानानां, फलस्य कर्मद्वारा जीवफलस्य। यथा जगदाश्रये सति जगद् भेदकम्। आश्रयो भिद्यते जगद्वत्त्ववात्। घटत्वान् घट इत्यत्र घटत्वजगद्वति घटे पट भेदवत्। पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यत्र गन्धजगद्वत्यां पृथिव्यामबादिभेदवत्। जगदाश्रयो भिद्यते जीवेभ्यः, कौस्तुभवत्। जडाश्रयाद् भिद्यते। एवं फलस्य भेदकत्वं, कृष्णाश्रयः भिद्यते आनन्दमयत्वात्। आनन्दमयजीववत्। एवं न सम्भवति भेदकत्वम्। त्रयाणामितीति 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति ज्ञानस्वरूपम्। ज्ञानमात्रं परं ब्रह्मेतिवाक्यात्। अपि स्वरूपमिति पाठे स्वरूपं समष्टिः। एवकारस्तु व्यावर्तकाभावे समष्टित्वेन सति ज्ञानरूपत्वात्। सर्वरूपस्येति सर्वं त्रयं तद्रूपस्येत्यर्थः। 'सर्वात्मन' इत्यस्यार्थमाहुः सर्वेषामिति। तेन षष्ठीतत्पुरुषः। 'आत्मवस्तुन' इत्यस्यार्थमाहुः सर्वात्मनामिति। आत्मनेति स्वस्वरूपेण। महत इति अवतारस्य। अंशान्तरैरिति सदानन्दरूपैः। भगवता आकाशशरीरेण व्युच्चरणे सति 'छिद्रा व्योम्नीव चेतना' जीवा भवन्तीति। आत्मनैवेति स्वस्वरूपेणैव। इतरव्यावर्तक एवकारः। अग्र इति उलूखलबन्धनस्थले। तथा च परिच्छिन्नतया भिन्नत्वस्यापि स्वीयेच्छया स्वेच्छाकृतत्वान्न तत्प्रतीत्याप्यानन्दमयत्वबाध इत्यर्थः। एवमेतैः श्लोकैर्विदितत्वे ब्रह्मत्वबाधकदोषपरिहारेण विदितोसीति प्रतिज्ञा समर्थिता। उपसंहरन्ति स्म एवमित्यादि पञ्चात्मक इति पृथिव्याद्यात्मकः। कालात्मकः पञ्चनित्ययागात्मकः इति शास्त्रद्वयम्। वेदवेदान्तरूपम्। पञ्चरात्रशास्त्रीयम्। 'पञ्चात्मकः स भगवा'निति पञ्चरात्रात्। तीति इत्येवं निरूपितोवतारः ॥ १७ ॥

य आत्मन इत्यत्र पञ्चात्मक इति पृथिव्याद्यात्मकः। तस्माद्वा एतस्मादात्मन आकाशः संभूत' इत्यादिश्रुतेश्चतुर्भुजः। व्यक्तरूपश्च। तन्त्रेत्यादि 'गहना कर्मणो गति'रिति बोधयन् अनुकल्पं वैदिकप्रकारानन्तरं 'पञ्चात्मकः स भगवा'निति पञ्चरात्रं तद्रूपेण वेदभेदेन तत्रस्योक्तत्वात् तत्रत्यचतूरूपो निरूप्यते भयाभावाय। 'सोबिभे'दिति बृहदारण्योक्तं भयमेकस्येति। प्रथम इति परब्रह्मरूपः। यत् प्रवदन्तीति 'इत्थं विचिन्त्य परमः स तु वासुदेवनामा बभूव निजकारणमुक्तिदाता, तस्याज्ञयैव नियता परमापि रूपं यत्र द्वितीयमिव यत् प्रवदन्ति माया'मितिपञ्चरात्रवाक्यात्। केवलयेति सदस्पृष्टया। न मुच्यत इति 'योन्यथासन्त' मितिश्रुत्युक्तपापापत्त्या मर्यादाभक्तिप्रतिबन्धान् न मुच्यते। सद्बुद्धिरसज्जन्ये जगति या बुद्धिः सा तामसी। तमोऽज्ञानजमित्यज्ञानाच्च न मुच्यते। वदन्नेवेत्यस्य प्रथममाहेत्यनेनान्वयः। अन्तरेवेत्यादि स्वान्तरेव स्वस्माद् बहिः पराक्देशे। वासुदेवपदात् स्वस्य वसुदेवस्यान्तरे स्वस्माद् वसुदेवाद् बहिः केवलचिदानन्देति चित् श्रीरानन्दो ब्रह्मानन्दः तद्रूपः। श्रीकार्यं उत्पन्नत्वात्। आत्मभूतस्येति केवलचिदानन्दरूपस्य। दृश्येष्विति लौकिकेन्द्रियसामर्थ्येन दृश्येषु। आत्मनैवेति अन्तर्वर्तिनानुभवरूपभगवता। तेषामित्यादि प्राकृतरूपाणाम्। सत्त्वाभावात् व्यावहारिकसत्त्वस्याप्यभावः कारणे सत्त्वाभावात्। बन्धकेष्विति सर्जकत्वेनेच्छाविषयत्वात्।

व्यवस्यति निश्चिनोति। तादृशस्य अबुधत्वं व्युत्पादयन्ति अस्तीति। परमार्थोस्तीत्यन्वयः। तेन तान्त्रिकोवस्यति। तन्त्रं वेदविरुद्धांश इति परमार्थः। आत्मव्यतिरेकेणेति तसिल् तृतीयार्थे व्याख्याय षष्ठ्यर्थे तस्यैव व्याख्यानं आत्मसम्बन्धेत्यादि। मोहित इति मुह वैचित्ये, मायाधर्मो मोहः। आत्मसम्बन्धादिति अनुभवसम्बन्धात्। 'आत्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्ध' इतिवाक्यात्। तस्येति श्रीकार्यस्य। वैराग्यार्थमिति अस्ति सत्त्वं तथापि प्रपञ्चे वैराग्यार्थं केवलया जगत् सृज्यत इति मतम्, अनुवादात्। अस्येति मतस्यानुवादः। तन्त्रोक्तत्वादिति भावः। नोपपद्यतेति खपुष्पस्यागायोगात्। अनुवादेनेति सिद्धस्य कथनमनुवादस्तेन। सिद्धं वैदिकमतम्, तस्यानुवादस्तन्त्रे पुनरुक्तिदोषरहितः। सम्बन्ध इति अज्ञातः। प्रतीत्यतीति अनुभवातिरिक्तः। सञ्जात इति 'अत्र मां मार्गयन्त्यद्धे'तिवाक्यात्। ज्ञानमार्गीयज्ञानानन्तरम्। आत्मव्यतिरिक्तमिति 'कामं कामं पुरुषो निर्मिमाण' इतिश्रुत्युक्तात्मव्यतिरिक्तम्। गृह्णातीति सत्त्वेन गृह्णाति। सत्त्वसिद्धिव्यतिरेकेणेति पाठे। स्वत्वसिद्धिव्यतिरेकेणेति पाठे स्वत्वेन गृह्णाति। पुरुषोपि भूत्वेति पुरमुपति दहतीति पुरुषः। 'सूर्य आत्मा जगतस्तस्थुषश्चे'ति श्रुतेः। पुरा आसेति ब्रह्मणि पुरुषपदव्युत्पत्तिः। पुरि शेत इति स्वोपशुसाधारणो व्युत्पत्तिः। 'निवृत्ततर्षै'रित्यत्र स्पष्टः। पूर्वेणैवेति भवतीत्यादि क्रियापदम्। एवकार इतरयोगव्यवच्छेदकः। समीप इति गृह्यत इति शेषः। न्यूनपूरणं स्पष्टम्। तथा चादरेण ग्रहणादबुध एव स इति भावः। अन्योपेति दत्तात्रेयगुरुवत्। आत्मसम्बन्धात् सत्त्वानुवादेन। ग्रहणमिति आदरेण ग्रहणम्। येनैव प्रकारेणेति आत्मव्यतिरिक्तत्वेन प्रकारेण। गृह्णातीतोति इति हेतोरन्योपदेशार्थमनुवादेनापि ग्रहणसम्भवव्यतिरेक इत्यर्थः। एवं 'निगमो वसुदेवोभू'दितिश्रुत्यावसुदेवनिगमस्य वैदिकप्रकारेणोक्त्वा स्तुतिं तद्गौणतन्त्रप्रकारेणोक्तौ 'वेदान्तरूपवेदेन स्तुतिं प्रभुचरणा आहुः अथवेत्यादि। व्यतिरेकमिति व्यतिरिक्तत्वं प्राप्य सन् व्यावहारिकः सन्। धर्मिग्राहकेति उभयव्यपदेशसूत्रोक्तेन। न हीति हि युक्तश्चायमर्थः। भक्तिमन्तरा स्वरूपाज्ञानात्। तस्यैवेति तैः सह सम्बन्धस्यैव। तदसम्भव इति व्यावहारिकसत्त्वोत्पत्त्यसम्भवः। इति भाव इति इति हेतोस्तादृशमुपाददबुध एवेति भाव इत्यर्थः। तथा च तन्त्रेपि भिन्नस्य जगत एव वैराग्यार्थमसत्त्वं स्मार्यते न तु स्वरूपात्मकस्येति तन्त्रमपि वेदेन समानम्। मोक्षधर्मे पञ्चरात्रस्य तथात्वनिश्चायनादिति बोधनार्थमेवं व्याख्यातमतो न कोपि दोष इत्यर्थः। श्रीधरीये व्यवस्यत इत्यात्मनेपदपाठदर्शनात् तस्मिन् पाठे जीवब्रह्मवादानुक्तः। किञ्च। 'स्वव्यतिरेकत' इत्यस्य स्वपदघटितस्य स्वस्मिन् यदभावे यदभावो व्यतिरेक इति व्यतिरेकलक्षणासम्भवात् इत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि। आत्मनो द्रष्टुरिति आत्मपदार्थः द्रष्टुरिति। अनुभवेन सत्वकर्तुः स्वस्यात्मीयस्य जीवस्य दृश्येषु स्वेन्द्रियसामर्थ्येन दृश्येषु भगवदीयकरपादादिषु। वर्तमानः व्याप्य स्थितः। व्यवस्यत इति जीवब्रह्मवादेन जनविमुखकरणनिश्चयं कुरुते इत्यर्थः। अत्र फलमात्मने भवतीत्यात्मनेपदम्। स्वात्मत्वेनेति अस्वव्यतिरेकपदविवरणम्। विवर्तवादे आत्मानात्मविभागाभावादात्मत्वमपि न वक्तुं शक्यते इत्यभिमतादित्युक्तम्। सिद्धान्ते कराम्बुजं पदाम्बुजमित्यत्र विशेषमाहुः अव्ययान्तेति। तसिलन्तमव्ययम्। कोपि त्वयीति व्यूहत्रयं गुणत्रययुक्तं वासुदेवो गुणातीत इति तन्त्रे सिद्धान्तादिति भावः। एवमनुवादपदस्वारस्येन तन्त्रमतमुक्तम् ॥ १८ ॥

त्वत्तोस्येत्यत्र प्रद्युम्नरूपमिति यो भवान् प्रत्यक्षगोचरः परब्रह्मतया वासुदेवत्वेन निरूपितः गुणातीतस्तमेवेश्वरत्वहिरण्यगर्भत्वाभ्यां प्रद्युम्नरूपत्वेन निरूपयतीत्यर्थः। स हीति प्रद्युम्नः, हिर्हेतौ, राजसत्त्वात्। निरूपित इति पञ्चरात्रे निरूपितः। प्रकृतिमिति रजःसत्त्वतमोमयीं भूतप्रकृतिम्। प्रकृतौ रूच्येवेत्यादि। सामीप्ये सप्तमी। प्रकृतिसमीपे शाक्तमते रूच्येव मुख्या। ननु राजसाज्जन्म भवतु स्थितिप्रलयौ कुत इत्यत आहुः सङ्कर्षणादीति। न प्रद्युम्नमात्रात् सृष्टिः, किन्तु ब्रह्मोपाधिरजोरूपात् प्रद्युम्नात्। एवं चेश्वरवत् प्रद्युम्नोप्यनुस्यूतः। एवं च वासुदेवात् सङ्कर्षणः, सङ्कर्षणात् प्रद्युम्नः, प्रद्युम्नादनिरुद्ध इति। सङ्कर्षणादुत्पन्नेनेव सूत्रनाम्ना तस्यां जगत् पुरुषो वोत्पाद्यत इत्यर्थः। जगदुत्पत्तीत्यादि प्रद्युम्नादुत्पत्तिः, प्रद्युम्नानुस्यूतवासुदेवात् स्थितिः। प्रद्युम्नसङ्कर्षणात् प्रलय इति। तन्मात्रेणैवेति सन्निधिमात्रेणैव। एवकारव्यावर्त्यमाहुः न त्वित्यादि। वासुदेववदिति बिम्बप्रतिबिम्बन्यायेन, प्रेरकत्वेनापीत्यर्थो वा। तदत्रेति तन् मतम् अत्र स्तुतौ। त्वत्तः प्रद्युम्नरूपादिति ननु वासुदेवादिति कुतो नोक्तं तन्त्रत्वादिति चेन्न। गौणमुख्यन्यायात् 'वदन्ती'ति वचनेन तन्त्रे लोकमतस्य प्रबलत्वात्। शब्दबलविचारकत्वादाचार्याणाम्। किञ्च, युष्मच्छब्दस्य गर्भसम्बद्धे प्रद्युम्ने प्रयोगः दशमस्त्वमसीत्यत्र तथा दर्शनात्। लोका वदन्तीति तन्त्रेपि लोकमतत्वादस्वरसः। अतो 'वदन्ती'तिपदेनास्वरसार्थं प्रद्युम्नरूपादिति व्याख्यातम्। प्रद्युम्नेन रूपं यस्य, प्रद्युम्ने रूपं यस्येति वा, प्रद्युम्नो रूपं व्यवहार्यं यस्येति वा, प्रद्युम्नेन रूप्यते व्यवह्रियत इति वा। ननु सङ्कर्षणत्यागे किं मानमिति चेन्न। शब्दबलविचारकत्वादाचार्याणाम्। तन्त्रे तथाशब्दः। अस्तु तथैवेति सामर्थ्यात् साक्षात्कर्तृत्वमस्तु। महदैश्वर्यादीति महताम् ऐश्वर्यं मूढपूजनाश्रयत्वं तदादि समत्वं सत्त्वं सत्यवत्त्वं च। एतेषां गुणानां पालनकर्तृत्वं व्युत्पादयन्ति स्म आज्ञयैवेति। विकारनियमाभावेप्याज्ञानियमस्तु वर्तत एवेति भावः। आज्ञायैवेति पाठोपि। तथा चागुणपदस्यैश्वर्यादिगुणानाश्रय इत्यर्थः। अयं चेति वासुदेवः च पुनरयं प्रद्युम्नः। मायागुणानां ज्ञानिनां प्रत्युदस्तानामभावाद् गुणातीतः। अस्येति प्रद्युम्नस्य। विक्रिया गुणानामिति भावः। अत इति गुणादर्शनात्। अघटमानमिति कर्तृत्वमघटमानमेव। तर्हि विरोध इति सामर्थ्यसत्तायां विद्यमानायामप्यकर्तृत्वे कर्तृत्वकाले, कर्तृत्वाकर्तृत्वयोर्विरोधः। अन्तरङ्गेति स्वल्पापेक्षमन्तरङ्गं बह्वपेक्षं बहिरङ्गम्। बलिष्ठा इति तेन त्वत्तः अनीहात् अगुणात् अविक्रियादेषां सामानाधिकरण्यमिति भावः। पक्ष इति प्रद्युम्नपक्षे। वासुदेवादिति गुणातीतात्। तत्राहेति वासुदेवाद् भेदं वक्तुं कर्तृत्वाकर्तृत्वयोर्विरोधाभावे हेतुमाहेत्यर्थः। एवमारोपवादसङ्गत्या

कर्तृत्वाकर्तृत्वविरोधः परिहृतः। सिद्धान्ते तु निर्वाहकसङ्गत्याऽविरोधमाहुः विरोधे ह्येकतरेति। नैवंकल्पनेति नैकतरपरित्यागकल्पना। देशभेदेनेति ज्ञेयम्। ननु ब्रह्मत्वेन सर्वभवनसामर्थ्येपि विकृतत्वस्य विद्यमानत्वाज् जगदकरणेस्त्येवोभयोर्विरोध इत्यत आहुः किञ्च नेति। ब्रह्मरूप एवेति विशेष्यत्वात् पूर्वमुपादानम्। 'त्वयी'ति युष्मच्छब्दार्थः, प्रद्युम्नो वा विशेष्यम्। जगत्कर्तृत्वमिति अन्यथाकर्तृत्वसामर्थ्येन, रजो विनापि कर्तृत्वम्, जगत इति बोध्यम्। नापेक्ष्यन्त इति कर्तृत्वार्थं नापेक्ष्यन्ते। ईश्वरत्वादिति कर्तुम कर्तुमन्यथाकर्तुं समर्थो यः स पूज्यते मूढैरितीश्वरः। विरोधाभावमुपपादयन्ति स्म आज्ञाशक्तिरिति। एकतरेति कर्तृत्वाकर्तृत्वयोरेकतरपरित्यागः। प्रकारान्तरेणाप्युपपादयन्ति स्म किञ्चेत्यादि। इयमिति कर्तृत्वाकर्तृत्वविषयिणी। शास्त्रीयेति शास्त्रं वेदान्तरूपम्, 'यतो वा इमानि भूतानि जायन्त' इति 'निष्कलं निष्क्रियं शान्त'मित्यादि च। शास्त्रशब्दाद् 'वृद्धाच्छः'। सम्भवतीति विरोधाभावाय सम्भवति। यथेति सिंहत्वमाणवकत्वे विरुद्धे, सिंहपदस्य गौण्या वृत्त्या क्रौर्यादिगुणवाचकत्वम्, "लक्ष्यमाणगुणैर्योगात् वृत्तेरुक्ता तु गौणते"ति, सिंहपदेन क्रौर्यादिगुणाः लक्ष्यन्ते, आधेयतासम्बन्धो लक्षणा, तथा च सिंहनिष्ठक्रौर्यादिगुणविशिष्टो माणवक इत्यर्थः, तथा जगत्कर्ताऽविकृत इत्यत्र, वक्ष्यमाणरीत्या च, तथा च निर्वाहकसङ्गतिप्रकारादन्यः प्रकारः प्रकारान्तरम्। चतुर्थपादं व्याकुर्वन्ति स्म तथेत्यादि। यथा दृष्टान्ते सिंहस्तथा। कर्तृत्वाधारभूतो भगवानेव। 'परात् तु तच्छ्रुते'रिति सूत्रादेवकारः। आधारत्वे सिद्ध इत्यन्वयः। तत्र हेतुः निराश्रयस्येति। त्रिगुणात्मकं जगत् कचिदाश्रितं गुणत्वात् रूपवत्। तद्द्वारेति आधारत्वद्वारेत्यर्थः। कर्तृत्वमाधारत्वसमानाधिकरणं गुणेषूपचर्यते। 'गुणै'रिति सप्तम्यर्थे तृतीया। भगवान् सगुणः कर्तेत्यत्र भगवन्निष्ठगुणेषु भगवच्छब्दं कर्तृत्वलक्षकं कृत्वा तद्वान् (तद्विशिष्टः) सगुणः, अर्थात् गुणाः कर्तृत्ववन्त इति गुणेषूपचर्यते। यद्वा। गुणैः सह वर्तमाने त्वय्युपचर्यते, सहार्थे तृतीयान्तस्य क्रियायामन्वयो दृष्टः, पुत्रेण सहागतः पितेत्यत्रेतोहापि तथा। तेन वेदान्तगुणेषूपचार इति लभ्यते, न तु 'गुणै'रिति सप्तम्यर्थे तृतीया। ननु पूर्वोक्तहेतुद्वयेन कर्तृत्वाकर्तृत्वयोरविरोधे सिद्धे पुनरुपचारेणाविरोधसाधनस्य किं प्रयोजनमित्याकाङ्क्षायां तत्प्रयोजनं टिप्पण्यामाहुः अविरोध इत्यादि। द्वितीयकोटीति कर्तृत्वकोट्युपस्थितिः। न प्रामाणिकीति शुक्तौ रजतोपस्थितिवत्। हेत्वन्तरमिति 'त्वदाश्रयत्वा'दिति हेत्वन्तरम्। पूर्वेणेति पक्षेण। तच्छङ्कयेति विरोधशङ्कया। तथा च मूलानुसरणं प्रयोजनमिति भावः। ननु मूले उपचारपक्षः किमित्युक्तः सहार्थतृतीयान्तपदेन इत्याकाङ्क्षायां यत् सुबोधिन्यां वस्तुतस्त्वित्यादिनोपपद्यत इत्यन्तेनोक्तं तदुक्तवेदान्तपक्षेपीत्याशयेन तद् विवृण्वन्ति स्म वस्तुतस्त्वित्यादि ज्ञेयमित्यन्तम्। तथा च मूले गुणेषु कर्तृत्वोपचार इत्याशयो न तु भगवति तदुपचारो वेदान्तपक्षे, एवं च सुबोधिन्यां गुणा एव कर्तार इत्यस्य अभिमानेन कर्तारः। अत एवेत्यस्याभिमानादेवेत्यर्थो ज्ञेयः। अतो न वेदान्तपक्षे विरोधः। सुबोधिन्याम्, प्रद्युम्नस्य स्मृतिरूपश्रीद्वारा सृष्टौ मायिकत्वात् साङ्ख्यावलम्बनं स्पष्टमेव। अत एव साङ्ख्यादय इत्यादिशब्दः। सुबोधिन्याम्। अव्ययमाश्रय इति अचिन्त्योक्तवेदान्तमतीयकर्तृत्वस्य। अयमिति भगवान्। कार्यकारणेति कार्यकर्तृत्वं कारणानि गुणाः तेषामभिमानाभावेप्याधारत्वात्। तथा चोपचारो लक्षणापि। आधाराधेयभावलक्षणा। कर्तृत्वेति भगवति कर्तृत्वकथनं मायिकसृष्टावपि तन्त्रमतत्वादुपपद्यते इत्यर्थः। श्लोकार्थं निगमयन्ति एवं जगत इत्यादि। अमायिकत्वमिति स्मृत्यां प्रकृत्युत्पादकथनात् स्मार्ती सृष्टिरमायिकीति। अकर्तृत्वमित्यादि तृतीयचरणेनोभयम्। चकारेण पूर्वार्धे लोका वदन्तीति कथनादकर्तृत्वम्, चतुर्थचरणेन कर्तृत्वमिति विभागः ॥१९॥

सत्त्वमित्यत्र वासुदेवात् प्रद्युम्नतश्च वैलक्षण्येनानिरुद्धं निरूपयितुं पूर्वोक्तमनुवदन्तोनिरुद्धमवतारयन्ति स्म इदमित्यादिना। प्रद्युम्ने प्रकृतिजननद्वारा इदमुत्पत्तिस्थितिप्रलयात्मकत्वम् आध्यात्मिकत्वेन 'अनीहा'दित्यादिवाक्यादध्यात्मसंभवत्वेनोपादानतया निरूपितम्। उत्पत्तिस्थितीति उत्पत्तिस्थितिप्रलया आत्मनि यस्येति तथोक्तम्। 'अधिष्ठानं तथा कर्ते'ति वाक्यमनुसन्धेयम्। अतः परमधिदैवंभवत्वेन प्रयोजकतयांशत उपादानतयात्रानिरुद्धं जगत्कर्तारमुपपादयति। तथा च वासुदेवः तटस्थत्वेन, प्रद्युम्न उपादानत्वेन, अनिरुद्धः प्रयोजकत्वादिना कारणमित्येवं भेदमुपपादयतीत्यर्थः। तद् व्युत्पादयन्ति स्म यथा वेत्यादि। उत्पादक इति बीजद्वाराप्रयोजकः। वृष्टिद्वारा इन्द्रादिः। आदिना मेघाः। यथा वा ब्रह्मादयः। गुणावतारा उच्यन्त इत्यन्वयः। त्रितयमिति त्रयोवयवा यस्य तादृशरूपम्। विष्णोः श्यामत्वादत्र शुक्लत्वं कथमुक्तमित्यत आहुः उपाधीति। उपाधिरूपो यः कालः कृतादिः तत्कृतानि त्रीण्यपि रूपाणीत्यर्थः। कालात्मत्वाद् भगवतः। अस्मिन् पक्ष इति गुणावताररूपेषु सत्त्वस्य श्यामः तमसश्च शुक्लो वर्णो निरूपितः ततो विपरीतपक्षे। तदर्थमिति रूपनिरूपणार्थम्। गुणानिति स्थित्यादिगुणान्। रूपाणीति वर्णान्। त्रिलोकस्थितिपदेन पालकोनिरुद्धः उक्तः। तन्त्रे प्रद्युम्नस्य सृष्टिकर्तृत्वेनानिरुद्धस्य पालकत्वेन प्रसिद्धेः ॥ २० ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

यद्यपीति—इस प्रकार दो श्लोकों से दो दृष्टान्तों का विचार करने के अनन्तर उन दृष्टान्तोक्त आधिदैविक भावों का भगवान् से भेद होगा ऐसी शङ्का के निवारण के लिये दृष्टान्तों द्वारा जिसे लक्षित करना है उस दार्ष्टान्तिक भगवत्स्वरूप में आदेश करते हैं कि 'एवं भवान्' ऐसे स्वरूप वाले आप ही हैं, अर्थात् पूर्व दो श्लोकों में आधिदैविक तत्त्वों के विषय में जो चर्चा की है वह आपकी ही है, क्योंकि सब के मूल रूप तो आप ही हैं, यदि मूल तत्त्व नित्य, अविकृत नहीं हो तो उसका कार्य

कदापि नित्य, अविकृत नहीं हो सकता, आधिदैविक तत्त्वों की नित्यता और अविकारिता के प्रयोजक उनके मूल रूप होने के कारण आप ही हैं, पुनः अन्य दोष की आशङ्का कर (बुद्ध्यनुमेय) इत्यादि के द्वारा उस आशङ्का का निवारण करते हैं, आशङ्का यह है कि भगवान् तो द्रष्टा है वह दृश्य कैसे हो सकता है और यदि वह दृश्य है तो सर्व मुक्ति की सम्भावना है क्योंकि विना ही साधन के जब भगवत्स्वरूप दृष्टिगत हो सकता है तो मुक्ति होने में क्या साधन अवशेष रह जाते हैं जो वह नहीं हो तो, अतः उक्त स्वरूप का दृष्टिगत होना उनके भगवद्रूप होने में बाधक है, ब्रह्म को तो 'अदृश्यमग्राह्यम्' आदि कहा है, एवं जो 'अनन्तरमबाह्यम्' बाह्य आभ्यन्तर आदि भेदों से रहित है वह बाह्य रूप से तथा भिन्न रूप से कैसे प्रतीत होता है, न तो भगवान् बाह्य ही हैं न वह भिन्न ही हैं, अतः भिन्न, तथा बाह्य, और दृश्य रूप से प्रतीत होने के कारण त्रिदोष के उपस्थित होने से प्रस्तुत स्वरूप को आनंदमय भगवान् नहीं माना जा सकता, ऐसी आशङ्का कर कहते हैं कि जब इन्द्रियों के सामर्थ्य से आपका ग्रहण नहीं होता तो श्रुतिसिद्ध आपकी अदृश्यता व अग्राह्यता से तो कोई विरोध ही नहीं है, बुद्धि से जिनके लक्षण या स्वरूप को अनुमानतः जाना जाता है उन इन्द्रियों से ग्रहीत होने वाले रूप आहि गुणों के साथ वहां आप विद्यमान हैं, अतः इन्द्रियों से आपका ग्रहण होता भी है, रूपादि की भांति इन्द्रियों से आपका संयुक्त समवाय आदि सम्बन्ध भी होते हुए भी आप उन इन्द्रियां के गुणों से उनके सामर्थ्यों से गृहीत नहीं होते। बात ऐसी है कि भगवान् इन्द्रियों में भी विराजते हैं और उनसे गृहीत होने वाले घट पटादि वस्तु में तथा रूप, रसादि गुणों में भी विराजमान हैं, तो भी उन इन्द्रियों की सामर्थ्य नहीं जो भगवान् को ग्रहण कर सके, तथा आधिदैविक इन्द्रिय तो सामान्य इन्द्रियों में लौकिक विषय के ग्रहण करने के सामर्थ्य सम्पादन के लिये उन भौतिक इन्द्रियों में प्रविष्ट होते हैं अतः उनका भी सामर्थ्य नहीं, तथा (श्रोत्रममुष्य शब्दः) (घ्राणोऽस्य गन्धः) भा० द्वि० प्र० अध्याय के अनुसार आधिदैविक इन्द्रिय तो स्वयं ग्राह्य विषय स्वरूप है वह विषय के ग्राहक नहीं हो सकते, एवं अपने आधिदैविक इन्द्रियों के साथ विषयों का वह सम्बन्ध भी नहीं जो विषय ग्राहक इन्द्रियों से विषयों का होता है, अतः आप सर्वत्र विद्यमान भी हैं सबके स्वरूप हैं, रूप, रस आदि भी आप है तो भी रूपादि के ग्रहीत होते हुए भी आप ग्रहीत नहीं होते। यदि इन्द्रियों की प्रत्यक्षता का संभव हो तब तो इन्द्रियों के सहवर्ती आपका उनके आधिदैविक रूप में प्रत्यक्ष सम्भावित है परन्तु इन्द्रिय तो अपने स्वरूप का ग्रहण नहीं कर सकती अतः वह स्वयं ही अप्रत्यक्ष है, उनकी सत्ता में अनुमान ही प्रमाण है, प्रत्यक्ष नहीं, अनुमान का आकार इसप्रकार है कि (पक्ष) रूप, रस, गन्ध आदि विषयों की उपलब्धि (ज्ञान), (साध्य) किसी करण (व्यापार वाले असाधारण कारण से साध्य हैं, (हेतु) क्रिया रूप होने से, (दृष्टांत) छेदन (विदारण) क्रिया की भांति, सारांश यह है कि जैसे काटना फाड़ना आदि क्रिया किसी खड्ग कुठार आदि साधन से ही साध्य होती है उसी प्रकार रूप आदि का जान लेना भी एक क्रिया है वह भी किसी साधन से ही साध्य हो सकती है अतः सामान्यतया करण की सिद्धि होने पर नेत्र गोलक के साथ रूप ग्रहण का अन्वय और व्यतिरेक देखा जाता है कि नेत्र गोलकों के सद्भाव में रूप ग्रहण हुआ है, एवं उनके अभाव में नहीं इस प्रकार अनुसंधान से नेत्र गोलकवर्त्तीचक्षु इन्द्रिय ही रूप ग्रहण का कारण है ऐसे ही रसना इन्द्रिय रस ग्रहण का व घ्राण इन्द्रिय गन्ध ग्रहण का कारण है यह सिद्ध होता है, इस प्रकार इन्द्रियों की अप्रत्यक्षता के प्रतिपादन से यह मान्यता खण्डित हो जाती है कि जो प्रत्यक्ष होगा वह ही प्राकृत होगा, और जो अप्रत्यक्ष होगा वह ही अप्राकृत होगा, क्योंकि इन्द्रिय अप्रत्यक्ष होते हुए भी अप्राकृत नहीं प्राकृत ही हैं, अतः भगवान् का प्रत्यक्ष हो रहा है तो भी इतने मात्र से उनकी प्राकृतता या अप्राकृतता सिद्ध न हो पावेगी, क्योंकि दृश्य वस्तु को प्राकृत ठहराने में अदृश्य वस्तु का अप्राकृत स्वीकार करना तर्क की कसोटी पर साफ नहीं उतरता, वादी की युक्ति को सहायता देने वाला उसे सफल या सप्रयोजन सिद्ध करने वाला कोई विचार उपस्थित नहीं होता वह युक्ति अप्रयोजक ही रह जाती है निर्बल पड़ जाती है, यदि ऐसा कहा जाय कि जो प्रत्यक्ष होता है वह प्राकृत ही होता है वह अप्राकृत नहीं होता, और जो प्राकृत होता है वह प्रत्यक्ष हो होता है, वह अप्रत्यक्ष नहीं होता ऐसा नियम नहीं, वह अप्रत्यक्ष भी देखा जाता है जैसे इन्द्रिय अप्रत्यक्ष होते भी प्राकृत ही हैं, अतः प्राकृतत्व, और प्रत्यक्षत्व समव्याप्त नहीं प्राकृतत्व व्यापक है प्रत्यक्षत्व की अपेक्षा अधिक देशवृत्ति है और प्रत्यक्षत्व व्याप्य है प्राकृतत्व की अपेक्षा अल्प देशवृत्ति है, सारांश यह है कि जहां भी प्रत्यक्षत्व होगा वहां प्राकृतत्व अवश्य होगा, परन्तु जहां प्राकृतत्व होगा वहाँ प्रत्यक्षत्व होगा ही ऐसा नियम नहीं है वहां अप्रत्यक्षत्व भी हो सकता है, ऐसी स्थिति में इन्द्रियों की प्राकृतता होते हुए अप्रत्यक्षता अनुचित नहीं परन्तु प्रत्यक्षता होने पर भगत्स्वरूप की अप्राकृतता तो कैसे स्वीकृत की जाय, व्यापक का व्यभिचार (अधिक देश में रहना) तो दोषजनक नहीं वह तो उचित है परन्तु व्याप्य का व्यभिचार दोषजनक है, व्याप्य कदापि व्यापक के अभावाधिकरण में नहीं मिलता उनका व्यापक भाव ही नष्ट हो जाता है अतः प्राकृतत्वाभाव स्थल स्थल में प्रत्यक्षत्व नहीं रह सकता अतः प्रत्यक्ष हुए भगवत्स्वरूप को अप्राकृत स्वीकार करना कहाँ तक सम्भव है उसका प्राकृत होना ही सम्भावित है ऐसी आशङ्का के निवारण करने के लिए उस विषय में कहते हैं कि इन्द्रियग्राह्य गुणों के साथ भगवान् सर्वत्र ही विद्यमान है तो भी सर्वत्र उनका प्रत्यक्ष तो नहीं होता। रूप, रस आदि में रहने वाले भगवत्तत्व का

चक्षु रसना आदि इन्द्रिय से ग्रहण नहीं होता। रूप, रस, आदि मात्र का ही ग्रहण होता है, अतः भगवान् में प्रत्यक्षता नहीं है तो प्राकृतता भी नहीं है, अप्राकृतता ही है, यदि कहें कि कहीं भी प्रत्यक्षता होना अप्राकृतता का बाधक है तो भी इन्द्रियों के सामर्थ्य से होने वाले प्रत्यक्ष को ही अप्राकृतता का बाधक कह सकते हैं, भगवान् तो 'तद्गुणग्रह' हैं, इन्द्रियों के गुणों (सामर्थ्यों) से ग्रहीत नहीं होते, इस समय भी जो भगवान् का दर्शन हो रहा है, वह नेत्र के सामर्थ्य से नहीं किन्तु उनकी निजेच्छा से ही हो रहा है, अतः स्वेच्छा से प्रतीत होने वाला स्वरूप इन्द्रिय द्वारा गृहोत होने के दोष से दूषित नहीं हो सकता, श्रुति में कहा है कि स्वयम्भू ने इन्द्रियों को पराङ्मुख बनाकर उनकी हिंसा की है अतः बाहर दीखता है अन्तरात्मा में नहीं, कोई धीर पुरुष अमृतत्वरूप परमानन्द की इच्छा करने वाला अपने चक्षु को अन्तर्मुख कर लेता है और अन्तरात्मा का दर्शन करता है, इस प्रकार श्रुति में परावृत्त हुए चक्षु की ग्राहकता भी बतलाई है और स्वभावतः ग्राहकता का निषेध भी किया है, इन दोनों श्रौत सिद्धान्तों का विरोध नहीं है, उसी प्रकार प्रकृत से भी इन्द्रिय सामर्थ्य से आप अदृश्य ही हैं, और निजेच्छा से दृश्य हैं इस रीति से कोई विरोध नहीं रह जाता है, उक्त कारण से भगवान् के दृश्य होने से उनकी अब्रह्मता या प्राकृतता की शङ्का नहीं रह जाती, अब भिन्नता एवं बाह्यता से जो प्रतीति हो रही है उस विषय में समाधान करते हैं कि अनावृत होने के कारण आपका बाहर एवं भीतर कुछ भी नहीं है, आपको न बाहर कहा जा सकता है न भीतर ही कहा जा सकता है, अमुक वस्तु बाह्य है या आभ्यन्तर है, इस प्रकार व्यवहार व्यवस्था आकाशकृत है यह बात हम पूर्व में तृतीय स्कन्ध २६ अध्याय श्लोक ३४ के 'बहिरन्तरमेव' की व्याख्या में कह चुके हैं, वह भी पृथ्वी आदि भूतों का ही बाह्य अथवा आभ्यन्तर व्यवहार होता है, भगवान् का तो व्यवधायक कोई वस्तु मात्र नहीं उन्हें अपनी आड़ से रोक दे या सीमित कर दे ऐसा कोई भी पदार्थ नहीं जिस प्रकार घर के भीतर रहने वाले पदार्थों से घर दूसरे किसी देखने वाले से व्यवहित नहीं होता आड़ में नहीं आ सकता एवं स्वयं भी वह घर अपना ही आप व्यवधान नहीं करता। अपनी आड़ आप ही कर लेता हो यह बात भी नहीं है, उसी प्रकार भगवान् भी सर्वव्यापक है सर्वत्र विद्यमान है उनसे स्थूल या महान् कोई भी कार्य नहीं जो उनका व्यवधान या आवरण कर सके अतः भगवान् अनावृत्त है किसी आवरण या व्यवधान से सीमित नहीं है इसका स्पष्टीकरण आगे उलूखल बन्धन प्रसङ्ग में होगा, आवरण रहित होने के कारण आपके सम्बन्ध में बाह्य, या आभ्यन्तर व्यवहार नहीं होता, यदि सम्पूर्ण तालाब उसी में उत्पन्न हुए कमल शैवाल आदि से ढका हुआ हो या किसी अमुक भाग में खुला भी हो तो वह जितने भाग में खुला है उतना ही तालाब है ऐसा नहीं माना जाता और न उन कमल शैवाल आदि को तालाब का अवच्छेदक ही माना जाता है कि यह तालाब इतना ही है इस तालाब की इयत्ता या सीमा कमल शैवाल आदि के आधीन हो ऐसी भी बात नहीं है, तालाब से प्रकट हुए पदार्थ तालाब को सीमित नहीं कर सकते, उसी प्रकार प्रकृत विषय में आप व्यापक हैं एक देश में प्रकट हुए हैं, अतः आपका बाहर भीतर वाला भेद नहीं हो सकता है, प्रतीति जो हो रही है वह तो आपकी इच्छा से उत्पन्न ही है, आप अपनी इच्छा से बाह्य आदि रूप से प्रतीत होते हैं, जैसे इन्द्रिय सामर्थ्य से अदृश्य होते हुए भी स्वेच्छा से दृश्य होते हैं उसी प्रकार सर्व व्यापक होते हुए भी स्वेच्छा से एकदेशस्थ, बाह्य, भिन्न आदि प्रतीति के विषय होते हैं, परिच्छिन्नता (एकदेशीयता) या भिन्नता का परिहार भी आपके अनावृत्त या व्यापक होने के कारण हो ही जाता है, इस विषय में शास्त्रोक्त तीन हेतुओं का निर्देश करते हैं कि आप सब कुछ हैं, और सब के आत्मा हैं, एवं सब आत्माओं के वस्तुस्वरूप भी हैं, भगवान् सच्चिदानन्दरूप हैं। उस सच्चिदानन्द का 'सद्' रूप तो जगत् रूपी भगवान् है, और 'चिद्' रूप तो जीवात्मा हैं ही और उन जीवात्माओं का फल रूप स्वयं आप आनन्दरूप हैं, इसमें जगत् या जीव, या फलरूप आनन्द एक दूसरे से अपनी व्यावृत्ति (भेद) नहीं कर सकते हैं क्योंकि तीनों का स्वरूप भगवान् ही है, तब कौन किसका व्यावर्तक (भेदक) होगा, उक्त तथ्य को 'सर्वस्य सर्वात्मन आत्मवस्तुनः' इन शब्दों में कहते हैं, कि भगवान् सर्वरूप हैं (जगद् रूप हैं) सबके आत्मस्वरूप हैं (जीवात्मा) हैं, एवं सर्व जीवात्माओं के भी वस्तुस्वरूप फलात्मक आनन्दरूप हैं, उनका अपने आप से परिच्छेद (व्यावृत्ति या भेद) नहीं हो सकता है, 'अतति व्याप्नोति' इस व्युत्पत्ति से आत्मा पदार्थ सर्वव्यापक महान् सिद्ध होता है उस महान् का परिच्छेद कहाँ सम्भावित है, अतः भगवान् के अंशों का उनके अन्य अंशों से या भगवान् से परिच्छेद हो सकता है परन्तु भगवान् का किसी भी प्रकार परिच्छेद नहीं हो सकता क्योंकि उनसे अन्य कोई दूसरा तत्त्व ही नहीं तो परिच्छेद किससे होगा, स्वयमेव आप ही अपना परिच्छेद करते हैं इस पक्ष का विवेचन आगे उलूखल बन्धन प्रसङ्ग में करना आवश्यक है, इस प्रकार पाँच श्लोकों द्वारा निर्दोषपूर्ण गुणसम्पन्न शरीरधारी साकार यह अद्भुत बालक ही (१) अग्निहोत्र, (२) दर्शपूर्णमास, (३) पशु, (४) चातुर्मास्य, (५) सोम नामक पञ्च यज्ञात्मक है ऐसा वैदिक प्रकार से निरूपण किया है ॥ १७ ॥

'य आत्मन' आदि चार श्लोकों से तन्त्र में कही हुई प्रक्रिया के अनुसार वासुदेव आदि चतुर्मूर्ति भगवान् का निरूपण किया जाता है, वहाँ तन्त्र शास्त्र में प्रथम परब्रह्मरूप वसुदेव हैं ऐसा माना है, वहाँ पर 'श्री' नामक भगवच्छक्ति या श्रीश्च ते लक्ष्मीश्च पत्न्यौ' के अनुसार भगवत्पत्नी को माया कहा है क्योंकि पञ्चरात्र में ऐसा वाक्य है 'इत्थं विचिन्त्य परमः स तु

वासुदेवो नामा बभूव निजकारणमुक्तिदाता, तस्याज्ञयैव नियता परमाऽपि रूपं भवेद्द्वितीयमिव यत्प्रवदन्ति मायाम्' प्राणियों के मोक्ष में प्रतिबन्ध करने को वह केवल माया ही जगत् को रचती है, वासुदेव तो प्रेरणामात्र करते हैं उस जगत् में यदि प्राणी सत्यबुद्धि करता है उसे सत्य समझता है तो वह मुक्त नहीं होता है, इस प्रकार तान्त्रिक मत कहते हुए ही श्रीवसुदेवजी पूर्व में यह कहते हैं कि यह चतुर्मूर्ति भगवान् अवतीर्ण हुए हैं, अतः इस वासुदेव का दर्शन अन्तर्देश हृदय में अथवा बहिर्देश में जहाँ कहीं भी करना चाहिए परन्तु दोनों प्रकारों में केवल चिदानन्द का ही दर्शन अभीष्ट है। पृथ्वी आदि तत्त्वों के सहित उनका दर्शन अपेक्षित नहीं, वसुदेवजी का कहना है कि जो प्राणी आत्मस्वरूप भगवान् के दृश्य गुणों में देह, इन्द्रिय आदि समुदायों में किसी भी पदार्थ को 'सत्' यह सत्य है ऐसा निश्चित कर लेता है वह मूर्ख है, क्योंकि यह देह, इन्द्रिय आदि समुदाय आत्मा के द्वारा ही अनुभव के विषय होते हैं अनुभव के अतिरिक्त उनकी कोई सत्ता नहीं प्रतीतिमात्र ही है, प्रकृति आदि चौबीस तत्त्व गुण हैं। रस्सी की भाँति बन्धन करने वाले हैं जीवात्मा को प्रपञ्च में फसा देने वाले हैं, इनमें से किसी एक को भी जो कोई सत्य मानता है वह मूर्ख है, क्योंकि असली बात तो यह है कि वहाँ सर्व वर्गों में उन उन रूपों से भगवान् ने ही प्रवेश किया है, भगवान् सत्य ही है, उनकी सत्ता से ही तत्त्व भी सत्य रूप से प्रतीत होते हैं, यदि आत्मा के सम्बन्ध के बिना ही किसी पदार्थ को सत्य मानता है अथवा आत्मा से अतिरिक्त किसी पदार्थ को सत्य रूप से स्वीकार करता है तो वह मूर्ख ही है, उसकी बुद्धि कार्य नहीं करती वह माया से मोहित हो चुका है, यहाँ पर यह पक्ष उठाया जा सकता है कि आत्मा के सम्बन्ध से अनात्म पदार्थ देहादि में भी सत्यता उत्पन्न हो जाती है ऐसा मान लिया जाय तो उसकी प्रतीति में तो कोई आपत्ति या दोष नहीं इसका खण्डन कर वे उक्त विषय पर कहते हैं कि विचारशील मनीषियों के मन ने जगत् को सत्य रूप से नहीं विचारा है, केवल उसका अनुवाद ही किया है, अनुवाद के बिना उसकी अन्य कोई सत्ता नहीं, जगत् की असत्यता के प्रतिपादन किये बिना विषयासक्ति की निवृत्ति नहीं हो सकती, इस दृष्टि से विषयों से वैराग्य कराने के लिये यह मत उपयुक्त है, आत्मा से अतिरिक्त वस्तु मात्र का त्याग अपेक्षित है अतः इसका अनुवाद आवश्यक है, त्याग उसी वस्तु का हो सकेगा जिसकी सत्ता सिद्ध होगी, जिसकी सत्ता ही नहीं, जो कुछ है ही नहीं उसका त्याग कैसा, अतः आत्मा के सम्बन्ध से देह इन्द्रिय आदि जगत की सत्ता है ऐसा अनुवाद रूप से कहा गया है। परन्तु आत्मा के साथ जगत् का कोई सम्बन्ध नहीं केवल प्रतीतिमात्र ही है, अतः कहते हैं कि अनुवाद के बिना वह जगत् मनीषित नहीं, मन के द्वारा सत्य रूप से विचारित नहीं, आशय यह है कि अनुवाद किसी वस्तु के यथार्थ या अयथार्थ होने की अपेक्षा नहीं रखता वह तो केवल प्रतीतिमात्र की अपेक्षा रखता है, चाहे वह प्रतीति ठीक हो या न हो जिसे आँख के दोष से आकाश में दो चन्द्रों की प्रतीति होती है वह कहता है कि दो चन्द्र हैं, उसकी उक्ति का अनुवाद तटस्थ व्यक्ति करता है कि (दो चन्द्र हैं) ऐसा यह भ्रमवश कह रहा है वास्तव में दो चन्द्र नहीं हैं, जिस प्रकार ऐसे अनुवाद से दो चन्द्रों की सत्ता सिद्ध नहीं होती, उसी प्रकार त्यागार्थ अनुवाद मात्र से जगत् की सत्ता सिद्ध नहीं होती, आत्मा के अतिरिक्त देह इन्द्रिय आदि दृश्यवर्ग की वास्तविकता नहीं, यद्यपि किसी वस्तु का निषेध करने के लिये भी उसका स्वरूपतः उल्लेख आवश्यक होता है, वस्तु के उल्लेख किये बिना उसका निषेध सम्भव नहीं। रस्सी का यथार्थ ज्ञान होने पर यह सर्प नहीं ऐसा कथन भी सर्प का उल्लेख चाहता है जिसे कभी सर्प मान लिया था वह सर्प नहीं रस्सी है, इसी प्रकार जगत् को असत्य ठहराने में उसके पूर्व जो जगत् में सत्यता का आरोप आवश्यक है उसके लिये जगत् को सत्यरूप से जानने में कोई बुराई नहीं वह तो ठीक ही है तो वैसे जानने वालों को (अबुध) क्यों कहा जाय ऐसी आशङ्का में कहते हैं। कि जब विचारपूर्वक अग्राह्य समझकर जिस वस्तु का त्याग कर दिया है उस वस्तु का ग्रहण करने वाला पुरुष मूर्ख ही है, आत्मा और देह इन्द्रियादि के समुदायात्मक इस सङ्घात में आत्मा के अन्वेषण की दशा में आत्मा से अतिरिक्त देह इन्द्रिय आदि सबको अग्राह्य समझा था उनका त्याग किया था उन त्यागे हुए देहादिकों को पुनः ग्राह्य रूप से स्वीकार करना मूर्खता ही है, (पुमान्) शब्द से ऐसे व्यक्ति का उपहास व्यङ्ग्य है कि स्वयं पुरुष होकर भली भांति विचार कर त्याग कर चुका है उसी का पुनः ग्रहण करना क्या पुरुषार्थ सिद्धि के अनुकूल है! नहीं नहीं अत्यन्त मूर्खता ही है, छोड़ी हुई वस्तु दूर से देखी जा सकती है, समीप में उसका ग्रहण नहीं किया जाता, पास में वह वस्तु नहीं रखी जाती, किसी अन्य व्यक्ति को तत्त्व का उपदेश करने के लिये यद्यपि अनुवाद रूप से उस दृश्य वर्ग का ग्रहण सम्भावित है परन्तु जहाँ पर उपदेशादि की सम्भावना के बिना ही दृश्य वर्ग में सद्बुद्धि होती है वहाँ तो वह मूर्खता ही है क्योंकि जिस प्रकार से त्याग किया है, अनित्य समझकर अग्राह्य कक्षा में समझा है, उसी प्रकार से नित्य समझकर ग्राह्य कक्षा में रखता है अतः मूर्ख ही है क्योंकि उसका विचार यथार्थ नहीं पूर्व में भली भांति त्याग किया अब भली भांति ही ग्रहण करता है ॥ १८ ॥

प्रकृत श्लोक का ब्रह्मवाद की रीति से यह व्याख्यान गो० श्री विट्ठलनाथ प्रभु चरणों ने किया है, (आपने स्वव्यतिरेकतः) इस पद का (**स्वव्यतिरेकं प्राप्य**) ऐसा विवरण किया है (**तथा सर्वं वाक्यं सावधारणं भवति**) (प्रत्येक वाक्य निश्चय के साथ होता है) इस मीमांसकसंमत विचारशैली के अनुसार (एव) पद का (प्राप्य) पद के साथ प्रयोग किया है,

एवं (प्राप्य) इस पूर्वकालिक क्रिया का (सन्) पदार्थैक देश सत्ता क्रिया से अन्वय किया है, (**स्वव्यतिरेकतः**) यह पद पञ्चमी विभक्ति के अर्थ का प्रतिपादन करने वाले (त) (तसिल्) प्रत्यय के योग से सिद्ध हुआ है (**ल्यब्लोपे कर्म्मण्यधिकरणे च**) इस व्याकरण के नियमानुसार (**प्रासादमारुह्य प्रेक्षते**) के स्थान पर (**प्रासादात्प्रेक्षते**) इस वाक्य की भांति (**स्वव्यतिरेकं प्राप्यैव सन्**) के स्थान पर (**स्वव्यतिरेकतः सन्**) यह वाक्य प्रयुक्त हुआ है, इस प्रक्रिया से यह वाक्यार्थ सिद्ध होता है कि आत्मस्वरूप भगवान् के दृश्य गुणों में (भगवदिच्छा से दृष्टिगत होने वाले) केश रोम नख एवं रूप रस स्पर्श आदिकों में किसी एक भी गुण को जो ऐसा मानता है कि सच्चिदानन्द स्वरूप स्वयं भगवान् से व्यतिरेक (भेद) को प्राप्त करके ही यह सत्तावान् है, भगवान् से भिन्न होकर ही इसकी सत्ता है, उस प्रकार का निश्चय करने वाला मूर्ख है, आशय यह है कि भगवान् के गुण धर्म आदि सब कुछ भगवत्स्वरूप ही है, भिन्न नहीं, भिन्न मानने वाला मूढ़ सोचता है कि ब्रह्म तो एकरस है यदि उसके रूप आदिकों को सत्य माने तो किसी एक रूप के सत्य मानने पर विविधरूपता सिद्ध नहीं होगी, (**समो नागेन समो मशकेन**) यह श्रुति हाथी और मच्छर के समान आकार वाला ब्रह्म है ऐसा प्रतिपादन करती है, यदि हाथी के समान है तो मच्छर के समान नहीं हो सकता है, और यदि मच्छर के समान है तो हाथी के समान नहीं हो सकता है, अतः रूपादि की प्रतीति यथार्थ नहीं, रूपादि गुण को ब्रह्म से भिन्न ही स्वीकार करना उचित है ऐसा जो निश्चय कर बैठता है वह मूर्ख है, वह यह नहीं समझ पाता कि धर्मी ब्रह्म ही यथाऽवसर उन उन धर्मों को प्रकट करता रहता है, उसके स्वरूपात्मक सब धर्म नित्य सिद्ध हैं, सर्प कुण्डलाकार भी हो जाता है और सरलाकार भी हो जाता है उसके वह आकार न तो उससे भिन्न है और न मिथ्या ही हैं, यथावसर उन आकारों को प्रकट करता है उसी प्रकार ब्रह्म भी धर्मिग्राहक मान से उसके स्वरूप का ज्ञान कराने वाले (**उभय व्यपदेशात्त्वहिकुण्डलवत्**) ब्रह्म सूत्र तृ० अ० द्वि० पा० २७ सूत्र, इस न्याय से विविध रूपों को प्रकट करता रहता है, यह सिद्ध हो जाता है, शुद्ध ब्रह्म। उन उन रूपों को अभिव्यक्त करता है, इसी बात को कहते हैं कि '**विनानुवादम्**' भगवत्स्वरूप वस्तु ही वैसा है, उसके आकार विशेष के दर्शन करने के अनन्तर भक्तों के द्वारा किया गया यह कथन ही अनुवाद है कि यह श्रीहस्तकमल है और यह श्रीचरण कमल है एवं यह श्रीनयन कमल है, इस अनुवाद के बिना वह श्रीहस्तकमलादि भगवत्स्वरूप से पृथक् सत्तात्मक रूप में मन के द्वारा भी विचारित नहीं होते, यहाँ पर यह शङ्का हो सकती है कि भगवत्सम्बन्धी पदार्थों को भी प्राकृत ही मान लिया जावे, केवल भगवत्सम्बन्ध होने के कारण उनको 'सत्' कहा जाता है क्योंकि उनमें सत्त्व की उत्पत्ति भगवत्सम्बन्ध से हुई है अतः प्राकृत पदार्थ ही सद् रूप से प्रतीत होने लगते हैं ऐसा स्वीकार करने में कोई दोष नहीं होता उक्त शङ्का के निवारणार्थ कहते हैं कि भगवत्तत्व श्रुतिपाद्य है श्रुतिविरुद्ध तर्क से उसके विषय में विचार करना मूर्खता है, भगवती श्रुति आज्ञा करती है कि—जैसे सैन्धवघन (जमा हुआ लवण) भीतर बाहर के भेद से रहित सर्वांश में लवण रस का एक पिण्ड है उसी प्रकार अरे जिज्ञासुगण ! यह आत्म स्वरूप भगवान् भीतर बाहर के भेद से रहित प्रज्ञान का सर्वांश में प्रकृष्ट ज्ञान का मूर्तिमान् स्वरूप है, तथा 'यह पुरुष असङ्ग ही है' इसका किसी प्राकृत वस्तु से स्पर्श या सम्बन्ध नहीं, पुष्कर पलाश की भांति निर्लेप है, एवं ब्रह्मतत्त्व के विषय में 'अब इस कारण यह आदेश है कि इसको निषेध मुख से समझो कि वह तत्त्व प्रकृति के साम्राज्य में जो पदार्थ है उन सब से भिन्न है, इस प्रकार प्रतिपादन करने वाली श्रुतियों के विचारकाल में प्राकृत धर्मों का सर्वथा त्याग किया गया है कि ब्रह्म में प्राकृत पदार्थ का गन्ध भी नहीं है उसी त्यागे हुए प्राकृत धर्म का स्वीकार करना कि ब्रह्म के सम्बन्ध से उनके प्राकृत गुणों में सद्रूपता आ जाती है सर्वथा अनुचित है, क्योंकि प्राकृत पदार्थों से सम्बन्ध होने पर ही उनमें सत्ता की उत्पत्ति ही की संभावना है जब सम्बन्ध नहीं तब कैसे सत्ता प्रकट हो सकेगी, उक्त श्लोक में 'व्यवस्यति' के स्थान पर 'व्यवस्यते' ऐसा पाठ भी सम्भव है, तदनुसार 'अस्वव्यतिरेकतः' ऐसा पदच्छेद भी अभीष्ट है, तब अथवा इस प्रकार भी व्याख्या हो सकती है कि जो पुरुष आत्मा देखने वाले स्वयं अपने इन्द्रिय सामर्थ्य से दृष्टिगत होने वाले भगवान् के कर चरणादि अंगों में भगवान् विद्यमान् हैं उन अंगों को व्याप्त कर अभिमानी जीव की तरह स्थित हैं ऐसा निश्चय करता है वह मूर्ख है, क्योंकि 'अस्वव्यतिरेकतः' उन कर चरणादिकों में उसका व्यतिरेक (भेद) नहीं है जिसे आत्मा रूप से मान रखा है, जीव की भाँति वहां देह देही का भेद ही नहीं तो आभिमानिक सम्बन्ध भी असम्भावित है, वहां तो कर चरणादि उनके आत्मरूप ही हैं, जैसे आत्मा शुद्ध निर्विकार है उसी प्रकार आत्मा के (भगवान् के) कर चरणादि भी निर्विकार शुद्ध चिन्मय आनन्दघन हैं इस प्रकार की सूचना हमको अव्ययान्त प्रयोग से मिल रही है, (व्याकरण में तसिल् प्रत्यय की 'तद्धितश्चासर्वविभक्तिः' सूत्र से अव्यय संज्ञा हुई है, अव्यय में कोई भी परिवर्तन या विकार नहीं होता उसके प्रयोग से प्रकृत में भगवत्स्वरूप की शुद्ध एकरसता का बोध कराना अभीष्ट है, इस व्याख्यान में अन्य विवरण पूर्व व्याख्यान की भाँति ही जान लेना इसके लिए विशेष मात्र का निर्देश किया है अतः इस पक्ष में भी आप में (भगवान् में) कोई प्राकृत धर्म नहीं है इस कारण आप वासुदेव हैं ॥ १८ ॥

प्रत्यक्ष हुए जिस अद्भुत बालक का तांत्रिक प्रक्रिया से परब्रह्म होने के कारण वासुदेव रूप से निरूपण किया उसका इस श्लोक से ईश्वर और ब्रह्म होने के कारण प्रद्युम्न रूप से निरूपण करते हैं कि आप ही भगवान् प्रद्युम्न रूप भी हैं, पञ्चरात्र में

प्रद्युम्न को जगत् का कर्त्ता बतलाया है और उसी की शक्ति या पत्नी को 'स्मृति' कहा है, प्रद्युम्न ने स्मृति को पैदा किया है, जो कि रजःसत्त्वतमोमयी है, उससे कोई पुरुष की उत्पत्ति नहीं होती प्रकृति में स्त्री की ही प्रधानता है पुरुष ता अप्रधान ही है, उस प्रकृति से सृष्टि, स्थिति और प्रलय होते हैं, सङ्कर्षण से उत्पन्न हुए 'सूत्र' नामक तत्त्व से उस प्रकृति में जगत् उत्पन्न किया जाता है, इस प्रकार जगत् की उत्पत्ति, स्थिति और प्रलय में प्रद्युम्न का उपयोग परम्परा से समीप होने मात्र से ही है, इतने मात्र से ही लोग प्रद्युम्न से सृष्टि बतलाते हैं, किन्तु वासुदेव की भाँति प्रद्युम्न से सृष्टि नहीं उस मत का यहाँ अनुवाद किया जाता है कि हे विभो ! उनके इस प्रकार कहने का कारण आपकी विभुता है, सर्वसमर्थता है, हे विभो ! यह सम्बोधन पूर्वोक्त लोकोक्ति के कारण की सूचना करता है कि आप समर्थ है लोग आपसे जगत् की उत्पत्ति आदि बतलाते हैं, शङ्का हो सकती है कि सामर्थ्य है तो प्रद्युम्न से उत्पत्ति आदि क्यों न मानली जावें, उक्त विषय में उत्तर रूप में कहते हैं कि 'आपतो अनीह (चेष्टारहित) गुणरहित एवं विकाररहित हैं' अतः जो ही चेष्टा करता है वही उत्पादन करता है, जो महान् ऐश्वर्य आदि गुणों का अवलम्ब करता है वह पालन करता है, पालन तो आज्ञा मात्र से भी सम्पन्न हो सकता है उसके लिये विकार की आवश्यकता नहीं, देखा जाता है कि राजवर्ग आज्ञा मात्र से सर्व पालन सम्बन्धी शासन व्यवस्था करता रहता है परन्तु संहार तो क्रोध आदि विकार के बिना नहीं होता जो क्रोध आदि विकार को प्राप्त करता है वही संहार करता है, यह भगवान् प्रद्युम्न तो सत्त्व, रजः, तमः, इन तीनों गुणों का अतिक्रमण कर गए हैं, इन गुणों से परवर्ती हैं इनके सर्वथा आधीन नहीं है, अतः इनमें किसी भी विकार का सम्भव नहीं यह कूटस्थ हैं सर्वथा निष्क्रिय एवं अविचल स्थिर हैं, उक्त कारण से इनका जगत्कर्ता आदि होना सर्वथा नहीं घटता, परन्तु अलौकिक सामर्थ्य के होने से लोग कहते हैं, यदि यह जगत् की उत्पत्ति आदि करना चाहें तो गुणों को भी उत्पन्न कर दें और स्वयं विकारों से रहित भी रह जावे और उत्पत्ति आदि भी कर देवे, अथवा जिस प्रकार चिन्तामणि किसी अन्य साधन के सहयोग के बिना ही अनेक पदार्थों की सृष्टि कर देता है उसी प्रकार यह प्रद्युम्न भगवान् भी गुणादिकों की अपेक्षा न कर स्वतः सब कुछ कर सकते हैं, जब सामर्थ्य होते हुए भी जगत् का निर्माण नहीं करते तो इनको अकर्ता ही क्यों न मान लिया जावे, कर्त्ता मानने की क्या आवश्यकता है, विराध होने पर किसी एक धर्म का परित्याग करना उचित ही है, यदि कर्त्ता मानना हो तो अकर्तृत्व का त्याग करना आवश्यक है, अकर्त्ता मानना हो तो कर्तृत्व का त्याग अपेक्षित है, क्योंकि विरोध होने पर किसी एक धर्म का त्याग करना ही पड़ता है।

धर्मा बलिष्ठा इति—यदि लोकप्रतीति से कर्ता मानते हो और स्वरूपतः अकर्ता स्वीकार करते हो तो ऐसी दशा में स्वरूपगत अकर्तृत्व धर्म को ही बलिष्ठ मानना होगा क्योंकि यह अन्तरङ्ग है भगवत्स्वरूप के अन्तर्गत है और कर्तृत्व तो लोकप्रतीति के आधार पर माना गया है अतः दुर्बल है क्योंकि लोकप्रतीति बहिरङ्ग है अन्तरङ्ग और बहिरङ्गों में अन्तरङ्ग अधिक बलवान होता है इस लोकसिद्ध न्याय से अन्तरङ्ग स्वरूप धर्मों की ही बलिष्ठता सिद्ध होती है बहिरङ्ग लोकप्रतीति दुर्बल पड़ जाती हैं, अतः इस पक्ष में यह ही सिद्धान्त होना उचित है कि भगवान् कर्ता नहीं है, अतः वासुदेव की अपेक्षा प्रद्युम्न की कोई विलक्षणता सिद्ध नहीं होता एसी शङ्का में वासुदेव से प्रद्युम्न की विलक्षणता बतलाने को उक्त विषय में कर्तृत्व और अकर्तृत्व इन दोनों धर्मों के परस्पर अविरोध होने के कारण कहते हैं कि (त्वयीश्वरे) इत्यादि, यदि विरोध हो तब तो दोनों में से किसी एक का परित्याग उचित है परन्तु जब ब्रह्म की यह स्वाभाविकता है कि वह सब कुछ हो सकता है उसमें किसी भी विरोध को अवकाश ही नहीं तो किसी एक धर्म के परित्याग करने की कल्पना उचित नहीं, अकर्तृत्व और कर्तृत्व यह दोनों धर्म ब्रह्म के स्वरूप में अविरुद्ध है, अन्य कारण यह भी है कि भगवान् ब्रह्म ही नहीं ईश्वर भी है, ईश्वर होने के कारण जगत्कर्ता है ब्रह्म होने से सर्व विकार रहित है, अतः जगत्कर्तृता और निर्विकारता दोनों ही युक्त हैं, भगवान् को लौकिक कर्ता की भाँति किसी देश या काल की अपेक्षा नहीं, और न उन्हें स्वरूप की अवस्थाओं का भेद ही अपेक्षित है, अतः सर्वथा निर्विकार ही रहते हैं, और जगत् का सर्जन भी करते हैं, जगद्रूप भी होते हैं, क्योंकि वह ईश्वर हैं, और ब्रह्म हैं, ईश्वर में आज्ञाशक्ति अकुण्ठित रहती है, उनको स्वयं कोई चेष्टा नहीं करनी पड़ती उनके आदेशमात्र से सर्व व्यवस्था सम्पन्न होती रहती है, तथा ब्रह्म में सब कुछ हो जाने की शक्ति है, अतः किसी प्रकार के विरोध की सम्भावना ही नहीं है तब कर्तृत्व और अकर्तृत्व धर्मों में किसी एक के त्याग की चर्चा अनुचित है, ब्रह्म के विषय में अविरोध प्रतिपादन करने की एक प्रक्रिया यह भी है कि विरोध तो प्रतीति के अनुरोध से होता है, कि प्रतीति की व्याख्या अन्य प्रकार से हो सके तो विरोध नहीं रहपाता, ब्रह्म कर्ता है या अकर्ता है वह अनीह, अगुण, अविकार है या नहीं इत्यादि प्रतीति प्रत्यक्षप्रमाणजन्य तो है नहीं, किन्तु शास्त्रगम्य हैं, शास्त्रों में ब्रह्म को कर्ता भी कहा है और अकर्ता भी कहा है, अनीह आदि भी कहा है, शास्त्र शब्दात्मक है और शब्द का प्रयोग मुख्य अर्थ को लेकर ही होता हो ऐसी बात नहीं है वह किसी गुणकृत साम्य से भी होता है, जैसे (सिंहो माणवकः) इस वाक्य में बालक को सिंह कहा है परन्तु सिंह शब्द के मुख्य अर्थ पशु विशेष को लेकर नहीं, उसके पराक्रम आदि गुणकृत

साम्य को लेकर उस बालक को सिंह कह दिया है उसी प्रकार ब्रह्म की कर्तृता भी औपचारिक है मुख्य नहीं मुख्य तो अकर्तृता ही है अतः विरोध नहीं, यदि कर्तृत्व, और अकर्तृत्व दोनों वास्तविक हो तब तो विरोध की आशङ्का हो सकती है किसी एक को अवास्तविक मानने पर विरोध नहीं रह पाता, भगवान् सर्वाधार हैं बिना आधार के जगत् सम्भव नहीं, अतः भगवान् की जगदाधारता सिद्ध हो जाती है, उसी आधारता को लेकर उन्हें कर्ता कह दिया है वास्तव में तो गुण ही कर्ता है अतएव सांख्य वालों ने प्रकृति का ही कर्तृत्व स्वीकार किया है, गुणों के भी भगवान् ही आश्रय हैं, जगत् रूपी कार्य और उसके कारण रूप गुणों के भी आश्रय होने से ब्रह्म को जगत् का कर्ता कह देना सङ्गत हैं, यद्यपि कर्तापने का अभिमान ब्रह्म में सम्भव नहीं तो भी लोकदृष्टि से उसकी कर्तृता युक्त ही है, इस श्लोक में जगत् की अमायिकता है तथा भगवान् की अकर्तृता और कर्तृता दोनों ही हैं ऐसा निर्देश कर वासुदेव की अपेक्षा विलक्षणता से प्रद्युम्न का निरूपण किया है क्योंकि वासुदेव के निरूपण में जगत् की मायिकता और भगवान् की सर्वथा साक्षिरूपता या केवल प्रेरकता का ही निरूपण किया है, प्रद्युम्न में जो प्रकृति के उत्पादन द्वारा उत्पत्ति स्थिति प्रलय रूपता का जो निरूपण किया है वह आध्यात्मिक (उपादान) रूप से किया गया है ॥ १९ ॥

आधिदैविकत्वेनानिरुद्धं तथेति—उक्त श्लोक में आधीदैविक रूप से भगवान् अनिरुद्ध का जगत्कर्त्ता होना सिद्ध किया है, जिस प्रकार पिता पुत्रादि का उत्पादक होता है या कृषीवल खेती करने वाला किसान अन्न आदि का उत्पादक होता है, एवं वर्षा के द्वारा इन्द्र आदि देवता सस्यादि सृष्टि के प्रयोजक होते हैं, अथवा गुणावतार रूप ब्रह्मा, विष्णु, रुद्र, जगत् के उत्पत्ति, स्थिति, संहार के प्रयोजक होते हैं, उस प्रकार का स्वरूप भगवान् अनिरुद्ध का है, उक्त विषय में आशङ्का हो सकती है कि ब्रह्मा, विष्णु और शिव को ही रज आदि एक एक गुण के द्वारा उत्पत्ति आदि का नियामक माना गया है अनिरुद्ध को तो उस प्रकार नहीं कहा गया है ऐसी आशङ्का कर समाधान करते हैं कि अनिरुद्ध की ही उत्पत्ति, स्थिति, संहार इन तीनों में नियामकता है अर्थात् ब्रह्मा विष्णु शिव यह तीनों प्रकारान्तर से अनिरुद्ध के ही रूपान्तर हैं, ऐसा कहते हैं, त्रिलोकी की रक्षा के लिये आप अपनी शान्ति नामक माया से सत्त्वगुण को धारण करते हो उसे पोषण देते हो उस सत्त्वगुण का स्वरूप आपका अपना शुक्ल वर्ण है, ऐसी प्रसिद्धि है, सत्य युग में शुक्लवर्ण एवं चतुर्भुज रूप कहा है, तदनुसार सत्त्व आदि गुणों को लेकर जो भगवान् के शुक्ल आदि वर्ण बतलाये है वह उन गुणों के उपाधिभूत काल के रूप हैं, उन्हें ही इस पक्ष में भगवद्रूप कहा है, उसी के लिये गुणों को कहते हुए रूपों का निरूपण करते हैं, कि सृष्टि के लिये रक्त वर्ण को धारण करते हैं, वह रूप आपका स्वाभाविक नहीं है किन्तु रजोगुण से अभिवृद्ध हुआ आगन्तुक है, उसी प्रकार कृष्ण वर्ण को लोकों के नाश के निमित्त धारण करते हो, इस प्रकार पूर्वार्ध के (बिभर्षि) इस क्रियापद से सम्बन्ध वाक्यार्थ सिद्ध होता है ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं दृष्टान्ते उपपादितमर्थं दार्ष्टान्तिके अतिदिशति—एवमिति। एवं महदादिवत् भवानपि कार्योत्पत्त्यनन्तरं तत्राप्रविष्टोऽपि, तदुपादानत्वेन प्रागेव विद्यमानत्वात् प्रविष्ट इव भाव्यस इत्यर्थः। ननु यद्यहमप्रच्युतस्वरूप एव कारणतया कार्येषु वर्ते, तर्हि तेष्विन्द्रियैर्गृह्यमाणेषु सत्सु मम ग्रहणं कुतो न भवतीत्यपेक्षायामाह—बुद्ध्यनुमेयलक्षणैरिति। बुद्ध्या रूपादिज्ञानेनानुमेयं लक्षणं स्वरूपं येषां तैर्गुणैः कार्यैरिन्द्रियैर्ग्राह्यैर्गुणैर्घटादिविषयैः सह सन् वर्तमानोऽपि भवान् तद्गुणाग्रहः तैर्गुणैः सह न ग्रहो ग्रहणं यस्य तथाभूतः। अनुमानप्रयोगस्तु—'रूपाद्युपलब्धिकरणजन्यक्रियात्वात् या या क्रिया सा सा करणजन्या, यथा छिदिक्रिया। तथा चेयं तस्मात्तथा' इत्यनुमानेन सामान्यतः करणे सिद्धे नेत्रगोलकाद्यन्वयव्यतिरेकाभ्यां चक्षुरादिविशेषसिद्धिः। अयं भावः—नहि ग्राह्यैः सह भावमात्रं ग्रहणे कारणम्, किन्तु इन्द्रियाणां शक्तिः। सा च कार्यैकसमधिगम्या, यथा कार्यमेव कल्प्यते। तथा च यथा चक्षुषा रूपग्रहणे सत्यपि सामर्थ्याभावाद्रसग्रहणं न भवति, तथैवेन्द्रियैर्विषयग्रहणेऽपि सामर्थ्याभावादेव भगवद्ग्रहणं न भवति। एवम-विषयत्वं च 'पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात् पराङ् पश्यति नान्तरात्मन्' इति श्रुत्या सर्वबुद्धिदृगित्यत्र चोक्तम्। तत्कृपया तु इन्द्रियविषयत्वमपि भवति, 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' 'दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्' 'दर्शयामास लोकं स्वम्' इत्यादिवाक्येभ्यस्तथैव निश्चयात्। एवं तावदुपादानतया प्रागेव विद्यमानत्वात् पश्चात् प्रवेशो नास्तीत्युक्तम्। इदानीं तु "परिच्छिन्नस्यैव नीडे पक्ष्यादिवत् प्रवेशः सम्भवति, तव त्वनावृतत्वादपरिच्छिन्नत्वेन बहिरन्तर्भेदाभावात् कुतः प्रवेश" इत्याह—अनावृतत्वादिति। अनावृतत्वे हेतूनाह—सर्वस्येति। नहि सर्वस्वरूपस्यावरणं सम्भवति, तद्भिन्नस्यावरकस्याभावादित्यर्थः। सर्वात्मन इति। सर्वस्यात्मनोऽन्तर्यामिण इत्यर्थः। नह्यावृतः परवशो नियामको भवितुमर्हतीत्याशयः। आत्मवस्तुन इति। 'अत सातत्यगमने' इति धातोः अतति व्याप्नोतीत्यात्मा, स चासौ वस्तु च परमार्थभूतस्तस्यैवंभूतस्याप्यावरणं न घटत इत्यर्थः। अतो न तव स्वरूपतो गुणतो वा क्षतिरिति सिद्धम् ॥ १७ ॥ ननु "यर्हि सर्वोपादानतया सर्वस्वरूपोऽहमेव, तर्हि कथं नैयायिकमीमांसकादिजन आत्मव्यतिरिक्तमपि पदार्थं सत्त्वेनाङ्गीकरोति" इत्याशङ्क्याह—य इति। यः पुमानात्मनो दृश्येषु प्रकारेषु गुणेषु गुणकार्येष्वाकाशादिषु स्वव्यतिरेकतः आत्मभिन्नतया सन्निति व्यवस्यते सत्त्वं निश्चिनोति स अबुधः। अत एव

तत्र हेतुमाह—यत इति। यता विवेकिभिस्त्यक्तमस्वीकृतमप्यात्मव्यतिरिक्तमपि वस्तु स उपाददत् स्वीकुर्वन्भवतीत्यर्थः। ननु 'तर्हि कथं तथा स्वीकारेण सर्वोऽपि व्यवहार' इत्याशङ्क्याह—विनेति। अनुवादं वाग्व्यवहारं विना वाग्व्यवहारमात्रं भवतु, तथापि मनीषितं विचारितं सत्तु तत् आत्मव्यतिरिक्तस्य सत्तया स्वीकरणं सम्यक् न भवतीत्यर्थः ॥ १८ ॥ किं तत्र प्रमाणमित्यपेक्षायामाह–त्वत्त इति। त्वत्त एवास्य विश्वस्य जन्मादीन् वदन्ति 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशंति, सर्वं खल्विदं ब्रह्म' इत्यादयः श्रुतयो वर्णयन्तीत्यर्थः। तर्हि विकारित्वं स्यादित्याशङ्क्याह—अविक्रियादिति। तत्र हेतुमाह–अनीहादिति। ईहा चेष्टा, कामना वा तद्रहितात्। तत्रापि हेतुमाह—अगुणादिति। गुणाधीनत्वाभावादित्यर्थः। ननु एकस्यैवानीहत्वं जगज्जन्मादिकर्तृत्वं च विरुद्धमेवेत्याशङ्क्याह—त्वयीति। हे विभो! सर्वदा सर्वथा सर्वत्र समर्थः, त्वय्येतन्नो विरुध्यते। तत्र हेतुमाह—ईश्वरे ब्रह्मणीति। अचिन्त्यानन्तशक्तित्वात्। तथापि कथं न विरोध इत्यपेक्षायामाह—गुणैरिति। रजआदिगुणैः कुर्वद्भिर्जगज्जन्मादिकर्तृत्वं त्वय्युपचर्यते। यथा भृत्यकर्तृत्वं तत्स्वामिनीत्यर्थः। उपचारे हेतुमाह—त्वदाश्रयत्वादिति। तेषां गुणानामाश्रयत्वादित्यर्थः। तथाच गुणद्वारा कर्तृत्वम्, स्वतस्त्वनीहत्वादिति न विरोध इति भावः ॥ १५ ॥ नन्वेवं चेद् ब्रह्मविष्णुरुद्रेभ्यः सृष्ट्यादिप्रतिपादकशास्त्रविरोधः स्यादित्याशङ्क्य ब्रह्मादिस्वरूपमपि त्वमेव बिभर्षि इत्याह स त्वमिति। खल्वित्यवधारणार्थः। सच्चिदानन्दात्मकः परमेश्वरस्त्वमेव त्रिलोकस्य स्थितये पालनाय स्वमायया स्वेच्छयैव सत्त्वेन गुणेनात्मनः स्वस्य शुक्लं स्वच्छं शान्तवर्णं विष्णुरूपं बिभर्षि धारयसि। तथा त्रिलोकस्य सर्गाय रजसा उपबृंहितं प्रकटितं रक्तं रागयुक्तं ब्रह्मस्वरूपं बिभर्षि। तथा जनानामत्यये संहाराय तमसा गुणेन कृष्णं क्रोधादितमःकार्ययुक्तं रुद्ररूपं बिभर्षि। अत्र शुक्लादिशब्दाः 'अजामेकां लोहितशुक्लकृष्णाम्' इति श्रुत्युक्तसत्त्वादिवर्णपराः सत्त्वादिगुणकार्यशान्तिरागक्रोधादिपराश्च, न स्वीकृतमूर्तिवर्णपराः। सत्त्वमूर्तेर्विष्णोस्तमोमूर्तेः रुद्रस्य च मूलोक्तवर्णवैपरीत्यनिश्चितत्वात् ॥ २० ॥

अन्वितार्थप्रकाशिका

दार्ष्टान्तिकेऽतिदिशति—एवं भवानिति। एवं भवानपि अप्रविष्टोऽपि प्रविष्ट इव भाव्यसे। ननु यद्यहमप्रच्युतस्वरूप एव कारणतया कार्येषु वर्ते तर्हि तैरिन्द्रियैः गृह्यमाणेषु मम ग्रहणं किं नास्ति तत्राह बुद्ध्यनुमेयलक्षणैरिति। बुद्ध्या रूपादिज्ञानेनानुमेयं लक्षणं स्वरूपं येषां तैर्गुणैः इन्द्रियैः ग्राह्यगुणैः सह सन्नपि वर्त्तमानोऽपि तद्गुणाग्रहः तैर्गुणैः सह न गृह्यसे। अयं भावः। न हि ग्राह्यैः सह भावमात्रं ग्रहणे कारणं किन्तु इन्द्रियाणां शक्तिः सा च कार्यैकसमधिगम्या। यथा कार्यमेव कल्प्यते अतो यथा चक्षुषा रूपग्रहणेऽपि रसादिग्रहणं नास्ति एवं सहभावेऽपि जिह्वया रस एव गृह्यते नतु रूपं तथैव विषयग्रहणे त्वद्ग्रहणमपीति अविषयत्वेन च ग्रहणानर्हत्वम्। यद्वा। एवं भवान् स्वप्रकृत्या सृष्टे जगति प्रविष्टोऽपि बुद्ध्याऽनुमेयमेव लक्षणं येषां तैः स्वप्रकाशत्वानन्दादिभिर्ग्राह्यैः सह सन्नपि तस्याः प्रकृतेर्गुणान् दुःखात्मकान्न गृह्णातीति तद्गुणाग्रहोऽस्ति। यद्वा ग्राह्यैः प्राप्यैः उपादेयैः गुणैः प्रेमवश्यत्वादिभिः सह सन्नपि नित्यं वर्तमानोऽपि तेषु गुणेषु आग्रहः पुनः पुनरासक्तिर्यस्य तथाभूतो भवान् भवति तानेव गुणान् गर्भप्रवेशादिभिर्व्यञ्जयसीत्यर्थः। किञ्च अपरिच्छिन्नत्वात् नीडे पक्षिण इव तव प्रवेशोऽपि न संभवति इत्याह। सर्वस्य सर्वरूपस्य सर्वेषामात्मनोऽन्तर्यामिणः आत्मा चासौ वस्तु च तस्य व्यापकस्य परमार्थवस्तुनश्च ते तव अनावृतत्वात् परिच्छेदरहितत्वात् बहिरन्तरं बहिरन्तर्भेदो नास्ति। न हि सर्वस्वरूपस्य सर्वात्मनो व्यापकस्य चावरणं घटते नापि भेदः कुतः प्रवेश इत्यर्थः. तस्मात्तवान्तर्यामितयापि प्रवेशो न मुख्योऽस्ति कुतस्तरां गर्भे प्रवेशः। अतः केवलानुभवानन्दरूप एव त्वं विदितोऽसीत्याश्चर्यं मम भाग्यमित्यर्थः ॥ १७ ॥ य इति। यः पुमान् आत्मनो दृश्येषु गुणेषु देहादिषु स्वव्यतिरेकतः आत्मव्यतिरेकेण पृथक् सन्नयं देहादिरिति व्यवस्यते निश्चिनोति। तत्रार्थः। सः अबुधः अविद्वान् यतः मनीषितं विचारितं सत् देहादि सर्वम् अनुवादं वाचारम्भणं विना न सम्यग्भवति अतोऽवस्तुत्वेन त्यक्तं बाधितमेव वस्तु बुद्ध्या उपाददत् स्वीकृतवान्। अतः स अबुध एव "दद दाने" लङ् परस्मैपदमार्षम् डुदाञो रूपं चेत् ह्रस्वत्वमप्यार्षम्। यद्वा। यः आत्मनः स्वस्य गुणेषु भोगेषु स्रक्चन्दनादिषु सन्निति व्यवस्यते सः स्वस्मिन् तेषां व्यतिरेकतः सदा संयोगाभावाद्धेतोः शोकादिप्रदत्वात् अबुधः नु निश्चितं वादं विना तस्य मनीषितं सम्यक् नास्ति वाद एव तत्रास्ति न तु विचार इति भावः। यतः स पुमान् त्वद्भक्तैः त्यक्तं घृणयोत्सृष्टमेव भोग्यं वस्तु उपाददत्। यद्वा। यः आत्मनो दृश्याः गुणाः सौन्दर्यप्रभावादयो येषु तेषु देवादिषु मध्ये स्वव्यतिरेकतस्तद्व्यतिरेकेण अयं देवः सन्निति यो व्यवस्यते सः अबुधः। यतस्तस्य जनस्य मनीषितं ह्यसिद्धार्थानुवादं विना नास्ति। अन्धपरम्परोपदेशेन प्रमाणत्वाभावात्। अतः सम्यङ् न भवति। यतः स पुमान् सूरिभिः अपुरुषार्थतया त्यक्तमेवोपाददत्। यद्वा। दृश्या रम्या ये गुणास्तेषु मध्ये स्वव्यतिरेकतः स्वरूपभूताधिष्ठानं त्वां विनाऽन्यत्र देवादिषु अयं गुणः सन्निति यो निश्चिनोति सः अबुधः समानमन्यत् ॥१८॥ त्वत्त इति॥ हे विभो! अनीहात् ईहा चेष्टा कामना वा तद्रहितात् अगुणात् निर्गुणात् अविक्रियात् निर्विकाराच्चापि त्वत्तः अस्य जगतः जन्मस्थितिसंयमान् वदन्ति। ब्रह्मणि निर्विकारादिरूपेऽपि ईश्वरे ईशनाद्यचिन्त्यशक्तिमति त्वयि एतन्न विरुध्यते ब्रह्मत्वादविकारित्वमीश्वरत्वात् कर्तृत्वमिति न विरोधः। चिन्तामण्ययस्कान्तादीनामविकारिकार्यकारित्वयोर्दर्शनात् उभयविधश्रुतिसद्भावात् उपपत्त्यन्तरमाह—तदाश्रयत्वात् जगदाकारपरिणतानां तेषां गुणानामाश्रयत्वात् गुणैः कुर्वद्भिर्जगज्जन्मादि कर्तृत्वं त्वय्युपचर्यते।

यथा भृत्यकर्तृत्वं तत्स्वामिनीत्यर्थः । आध्यासिकसंबन्धेन परिणममानगुणाधिष्ठानत्वात् ॥ १९ ॥ स त्वमिति । स खलु स एव सच्चिदानन्दात्मकः परमेश्वरः त्वमेव त्रिलोकस्थितये त्रयाणां लोकानां पालनाय स्वमायया स्वच्छयैव सत्त्वेन गुणेनात्मनः स्वस्य शुक्लं स्वच्छं शान्तवर्णं विष्णुरूपं बिभर्षि धारयसि तथा त्रयाणां लोकानां सर्गाय रजसा उपबृंहितं प्रकटितं रक्तं रागयुक्तं ब्रह्मस्वरूपं बिभर्षि तथा जनानामत्यये च संहाराय तमसा तमःकार्ययुक्तं कृष्णं वर्णं रुद्ररूपं बिभर्षि ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ एवं पूर्वोक्तप्रकारेण, भवान् त्वं बुद्ध्यनुमेयलक्षणैः ज्ञाननिरूपणीयस्वभावैः, ग्राह्यैः इन्द्रियैर्ग्रहीतुं योग्यैरित्यर्थः । गुणैर्गुणमयैर्देवादिपदार्थैः, सन्नपि देवमनुष्यादिपदार्थेष्वनुप्रविश्य विद्यमानः अपि, तद्गुणैर्देवादिभावगतविकारैर्न गृह्यते नोपादीयते न स्पृश्यते इति यावत् । इति तद्गुणाग्रहः, भवति । ननु कथं तद्विशिष्टस्यापि मम तद्विकारास्पर्श इत्यत्राह । सर्वस्य कृत्स्नजगत्कारणतया तदनन्यत्वेनावस्थितस्य, सर्वात्मनः सर्वशरीरकस्य, शरीरात्मभावनिबन्धनमेवानन्यत्वं, न तु स्वरूपाभेदनिबन्धनमित्यर्थः । यतः त्वं सर्वात्माऽत एव न तव सर्वगतदोषप्रसङ्ग इति भावः । न हि देहगता बाल्यादयो धर्मास्तदात्मनि प्रसज्जन्तीत्यभिप्रायेण विशिनष्टि । आत्मवस्तुनः सर्वेषामात्मनामप्यात्मभूतस्येत्यर्थः । ते तव, बहिः, अन्तरं, न । कुतः अनावृतत्वात् असंकुचितज्ञानत्वात् । यद्वा । अनावृतत्वात् ते, बहिः, अन्तरं न । यद्यपि बालोऽहं युवाहमिति देहधर्मास्तदात्मनि प्रतीयन्ते, तथापि जीवानां सा प्रतीतिः देहात्मभ्रान्तिमूला, आत्मात्मनः परमपुरुषस्य तव त्वनावृतत्वादावरणमूलकदेहात्मभ्रान्त्यादेरभावादात्मात्मनि त्वयि न शरीरगतदोषसंस्पर्शः तत्प्रतीतिश्चेति भावः ॥ १७ ॥ एतदेव विशदयितुं परमपुरुषस्य प्रत्यक्षतः स्वयाथात्म्यवेदनत्वेन देहात्मभ्रान्त्यभावं जीवस्य तद्वैपरीत्यं चाह ॥ य इति ॥ बुधः सर्वज्ञः, शश्वत् स्वयाथात्म्यज्ञ इत्यर्थः । यः भवान्, स तु, आत्मनश्च स्वस्य तु व्यतिरेकतः सर्वस्मात् भेदाध्यवसायात्, दृश्यगुणेषु दृश्येष्वैन्द्रियकेषु गुणेषु गुणकार्येषु देवादिभावेषु इत्यर्थः । सन्निति सत्यमिति व्यवस्यते च । विविनक्त्येव । अयं भावः । देवादिपदार्थेष्वन्तरात्मतयावस्थितमप्यात्मानं निरस्तनिखिलदोषत्वेनापरिच्छिन्नज्ञानानन्दस्वरूपत्वेनैकरूपतया निर्विकारत्वेन च सद्रूपमिति विविनक्ति इति । आत्मनेपदमार्षम् । ननु जीवोऽपि स्वस्वरूपं मद्वद्विविनक्तु किमिति देवोऽहं मनुष्योऽहं बालोऽहं युवाऽहमित्यात्मन्यध्यवस्यतीति चेत्, स देहात्मभ्रान्त्याऽऽत्मनि देहादिमध्यवस्य तथाऽनुवदति, तच्च विवेकिभिरात्मनः सकाशाद्दूरे समुत्सारितं तस्योपादानमात्मनि कुर्वतोऽस्य मनीषितं न सम्यगित्याह । विनेति । तन्मनीषितं तस्य जीवस्य देवोऽहं बालोऽहमित्याद्यध्यवसायः, अनुवादं बिना, भवति । स्वात्मानुभवं विनैव वर्त्तते इत्यर्थः । अतः न सम्यक्, च अविचारसुन्दरमेवास्तीत्यर्थः । ननु लोके पण्डिततया विचक्षणतया ज्ञानितया च विख्यातोऽयं कथमित्थंभूतमनीषित उच्यते तत्राह । यतः स पुमान्, त्यक्तं उपाददत्, तत्त्वत्रययाथात्म्यविद्भिस्त्वं देवो न, बालो नेत्येवं तत्र तन्निषेधार्थमुपयोगीकृतं यत्तदेव देहात्मभ्रान्त्या स्वीकरोति, तेन स्वीकृतमपि तद्बाधितमेव, न त्वबाधितमिति भावः ॥ १८ ॥ ननु निर्विकारस्य मम विकाराश्रयत्वरूपं जगत्कारणत्वं कथमित्यत्राह ॥ त्वत्त इति ॥ हे विभो, अनीहात् संकल्पेतरव्यापाररहितात्, अगुणात् सत्त्वादिगुणत्रयरहितात्, अविक्रियादविक्रियस्वरूपादपि, त्वत्तः कारणरूपाद्भवतः सकाशादेव, अस्य जगतः, जन्मोत्पत्तिश्च स्थितिः पालनं च संयमो लयश्च तान्, वदन्ति । 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' 'सत्यं ज्ञानमनन्तं' 'सदेव सोम्येदमग्र आसीत्' 'एकमेवाद्वितीयम्' 'तदैक्षत बहु स्याम्' इत्यादयो वेदान्ताः, प्रतिपादयन्तीत्यर्थः । ननु कथमग्निना सिञ्चेदितिवदसंगतमर्थं वेदान्ता अपि प्रतिपादयेयुरित्यत्राह । त्वयीति । ईश्वरे जगत्कारणे प्रकृतिपुरुषशरीरके, तयोर्नियन्तरीत्यर्थः । ब्रह्मणि निमित्तत्वोपादानत्वोपयुक्तसार्वज्ञसर्वशक्तित्वाद्यनन्तकल्याणगुणैः स्वरूपेण च बृहति, त्वयि नो विरुद्ध्यते । जगत्कारणत्वमिति मेषः । प्रलयकालेऽपि सूक्ष्मचिदचिद्विशिष्टे सर्वशक्तौ त्वयि सर्वकारणत्वमविरुद्धमेवेत्यर्थः । अयं भावः । त्वत्स्वरूपस्य निर्विकारत्वेऽपि त्वच्छरीरभूतचिदचिद्द्वारा तव विकाराश्रयत्वात् तदाश्रयत्वरूपं कारणत्वं न विरुद्धताभागिति । ननु त्वमेव सृज्यं स्रष्टा चेत्यादिवाक्यैर्मामेव सृज्यं स्रष्टा चापि वदन्ति । तत्र सृज्यत्वादेः शरीरभूतचिदचिद्गतत्वात् कथं मयि साक्षात् सृज्यत्वादिव्यपदेश इत्यत्राह । आश्रयत्वात्, गुणैरुत्पत्त्यादिगुणैः युक्ते त्वयि, तत् सृज्यत्वादिकं, उपचर्यते । स्वशरीरभूतकार्यवर्गस्याश्रयत्वादन्तरात्मतया तद्धारकत्वाच्च शरीरगतैरुत्पत्त्यादिभिर्गुणैर्विशिष्टे त्वयि, शरीरद्वारा तदुपचर्यते न तु साक्षादित्यर्थः ॥ १९ ॥ ननु नाहं जगज्जन्मस्थितिसंयमकारणमपि तु ब्रह्मविष्णुरुद्रा एवेत्यत्राह ॥ स त्वमिति ॥ स उक्तविधः त्वं, त्रिलोकस्थितये त्रिलोकपालनाय, स्वमायया स्वस्य संकल्पेन, आत्मनः शुक्लं विशुद्धं, वर्णमाकारं, रजस्तमोभ्यामननुविद्धमप्राकृतं शुद्धसत्त्वमयं विग्रहं बिभर्षि उपादत्से खलु । सर्गाय त्रिलोक्याः सृष्टिविधानार्थं तु, रजसा रजोगुणोपलक्षितेन ब्रह्मणा, उपबृंहितमधिष्ठितं, रक्तं वर्णं रजोगुणप्रधानं शरीरमित्यर्थः । बिभर्षि । तथा जनस्य उत्पत्तिमतस्त्रैलोक्यस्य अत्ययः प्रलयस्तस्मिन्, त्रिलोकोलयविधाननिमित्तमित्यर्थः । तमसा तमोगुणोपलक्षितरुद्रेणेत्यर्थः । उपबृंहितमधिष्ठितं, कृष्णं वर्णं च, तमोगुणमयं शरीरमपि, बिभर्षि ॥ २० ॥

कृष्णप्रिया

इसी प्रकार आप बुद्धि के द्वारा ही जिनका स्वरूप अनुमानतः सिद्ध होता है उन इन्द्रियों से गृहीत होने वाले गुणों के साथ रहते हुए भी उन इन्द्रियों के सामर्थ्य से गृहीत नहीं हो पाते, आपके आवरण होने के कारण बाहर भीतर का भेद नहीं क्योंकि आप सर्वरूप हैं सबके आत्मा हैं और आत्मामात्र के वस्तु रूप (फलरूप) हैं ॥ १७ ॥ जो पुरुष आत्मा के दृश्य देह इन्द्रियादि गुणों में किसी पदार्थ को आत्मा से भिन्न है इस प्रकार समझता है वह मूर्ख है, क्योंकि विचार करने पर वह देह इन्द्रियादि केवल अनुवाद मात्र ही हैं; विचार दशा में जिस पक्ष का अच्छी तरह से त्याग किया जा चुका है उसी पक्ष का स्वीकार करना मूर्खता नहीं तो क्या है ॥ १८ ॥ हे विभो ! आप से इस जगत् के उत्पत्ति, पालन एवं प्रलय होते हैं ऐसा प्रामाणिक लोग कहते हैं, आप तो कोई चेष्टा नहीं करते एवं गुण और विकारों से रहित हैं परन्तु समर्थ ब्रह्म में यह कुछ विरोध नहीं आता, गुण भी तो आपके ही आश्रित है, रज आदि गुण से उत्पत्ति आदि का होना उपचार मात्र है ॥ १९ ॥ त्रिलोकी की स्थिति के लिये आप अपनी माया से अपने शुक्ल वर्ण रूप सत्त्वगुण को धारण करते हैं, सृष्टि के लिये रजोगुण से पुष्ट हुए रक्त वर्ण को धारण करते हैं एवं तमोगुण से पुष्ट हुए कृष्ण वर्ण को लोक प्रलय के निमित्त धारण करते हैं ॥ २० ॥

त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवतीर्णोऽसि ममाखिलेश्वर ।
राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना निहनिष्यसे चमूः ॥ २१ ॥
अयं त्वसभ्यस्तव जन्म [1]नो गृहे श्रुत्वाग्रजांस्ते [2]न्यवधीत् सुरेश्वर ।
स तेऽवतारं पुरुषः समर्पितं श्रुत्वाधुनैवाभिसरत्युदायुधः ॥ २२ ॥

श्रीशुक उवाच

अथैनमात्मजं वीक्ष्य महापुरुषलक्षणम् । देवकी तमुपाधावत् कंसाद् भीता [3]सुविस्मिता ॥ २३ ॥

[4]श्रीदेवक्युवाच

रूपं यत् तत् प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम् ।
सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद् विष्णुरध्यात्मदीपः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—विभो अखिलेश्वर त्वम् अस्य लोकस्य रिरक्षिषुः मम गृहे अवतीर्णः असि राजन्यसंज्ञासुरकोटियूथपैः निर्व्यूह्यमानाः चमूः निहनिष्यसे ॥ २१ ॥ सुरेश्वर असभ्यः अयं तु नः गृहे तव जन्म श्रुत्वा ते अग्रजान् न्यवधीत् सः पुरुषः समर्पितं ते अवतारं श्रुत्वा उदायुधः अधुना एव अभिसरति ॥ २२ ॥ अथ कंसात् भीता देवकी एनम् आत्मजं महापुरुषलक्षणं वीक्ष्य सुविस्मिता तम् उपाधावत् ॥ २३ ॥ अव्यक्तम् आद्यं ब्रह्म ज्योतिः निर्गुणं निर्विकारं सत्तामात्रं निर्विशेषं निरीहं सः साक्षात् अध्यात्मदीपः विष्णुः त्वम् (असि) ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रिरक्षिषुः रक्षितुमिच्छुरवतीर्णोऽसि । कृष्णेन वर्णेन अतः साधूनां रक्षणार्थं राजन्यसंज्ञा येऽसुरकोटियूथपास्तैर्निर्व्यूह्यमाना इतस्ततश्चाल्यमानाश्चमूः सेना निहनिष्यसे संहरिष्यसि ॥ २१ ॥ किं तु तथाप्यप्रमत्तेन त्वया भाव्यमित्याह । अयं त्विति । असभ्यः खलः । समर्पितं कथितम् । अभिसरत्यागमिष्यति ॥ २२ ॥ उपाधावदस्तौत् ॥ २३ ॥ त्वयि भयशंकैव तावन्नास्तीति श्लोकचतुष्टयेनाह देवकी किंचिद्विज्ञापयितुम् । रूपमिति । यत्तत्किमपि रूपं वस्तु प्राहुर्वेदाः । किं तद्वस्तु तदाह । अव्यक्तम् । अत्र हेतुः । आद्यं कारणम् । किं परमाणवः न ब्रह्म बृहत् । किं प्रधानं न ज्योतिश्चेतनम् । किं वैशेषिकाणामिव ज्ञानगुणं न निर्गुणम् । किं मीमांसकानामिव ज्ञानपरिणामि न निर्विकारम् । किं पुष्कराक्षादीनामिव शक्तिविक्षेपपरिणामि न सत्तामात्रम् । तर्हि किं सामान्यं न निर्विशेषम् । तर्हि किं कारणत्वात्सक्रियं न निरीहम् । सन्निधिमात्रेण कारणं एवंभूतं किमपि कार्यकल्प्यं यद्वस्तु स एव साक्षात्त्वं विष्णुरिति । न केवलं कार्यकल्प्यत्वम् अपरोक्षश्चेत्याह । अध्यात्मदीप इति । बुद्ध्यादिकरणसंघातप्रकाशक इत्यर्थः । अथवा अव्यक्तं न केनापि प्रकारेण व्यज्यत इत्यव्यक्तम् । कथं उत्पत्त्या तावन्न व्यज्यत इत्याह । आद्यं सर्वस्य कार्यस्याद्यं कारणम् ।

---

[1] नो–श्रीधर. गिरि. ; जन्मगृहे नो–वंशी. ; जन्म मे गृहे–भक्त । [2] हतवान्–इति कस्यचित् । [3] शुचि–श्रीधर. वंशी. वीर. गिरि. भक्त. । [4] देवक्युवाच–श्रीधर. ।

अनादीत्यर्थः । तथा ब्रह्म ज्योति निर्गुणं निर्विकारमिति चतुर्भिः पदैर्देशेन प्रकाशेन च गुणेन च विकारेण च व्यक्तिं निराकरोति । तथा सत्तामात्रमिति विशेषेण निर्विशेषमिति सामान्येन निरीहमिति क्रियया च व्यक्तिं निराकरोति । अन्यत्समानम् । एवंभूतस्य तव न भयशंकेति भावः ।। २४ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतोऽवतीर्णोऽसि अतो हेतोः ।। २१ ।। यद्यपि खलप्रहाणयेऽवतीर्णोऽसि तथाप्यन्यच्छृण्वित्याह—किं त्विति । अप्रमत्तेन सावधानेन भाव्यं भवितव्यम् । अयं कंसः । कंसस्य बालहननादि दुश्चरितं पश्यद्भिरपि सुरैर्न किञ्चित्तद्दमनं कृतमतस्त्वां प्रार्थयामीति सुरेश्वरसंबुद्ध्यभिप्रायः । अभिसरति अभिमुखमेवागतप्रायं तं पश्यामीत्यतोऽधुनैवेदं रूपमुपसंहर समागते तु तस्मिन्नुपसंजिहीर्षतः पूर्वं किं भविष्यतीति । उदायुध उद्धृतायुध इति । मे महान्कंप इति भावः ।। २२ ।। अथ वसुदेवस्तुत्यनंतरम् । एनमित्यन्वादेश एतद् एनदादेशः । यो वसुदेवेन स्तुत एनं महापुरुषो विष्णुस्तस्य लक्षणानि शंखचक्रादीनि यस्य तम् । यद्वा—अथ पत्युर्भयं दृष्ट्वा समीपं भीतेति । स्वरूपमुपसंहरंतं स्मयमानं तमालक्ष्य परमेश्वरत्वाहंकारेण कंसभयं न गणयति तदहं किं करोमीति विह्वलेत्यर्थः । सुविस्मितेत्यस्य परमेश्वराग्रे कोयं खलु वराकः कंसस्तदप्यावयोर्भयं वर्द्धत एवेति कोयमविवेको दुस्तर इति भावः । शुचिस्मितेति पाठे । अहो मे भाग्यं साक्षात्परब्रह्मैव पुत्रतामाप इत्याह्लादेन शोभनेषद्धासमुखीत्यर्थः ।। २३ ।। अथ देवकी परमात्मनि निर्भयतां निवेदयंती स्तौतीत्याह—त्वयीति । तावत्सर्वथा । विज्ञापयितुं बोधयितुम् । रूप्यते निरूप्यत इति रूपम् । तदाह—वस्तु वक्ति न व्यज्यते वेदातिरिक्तमानेन प्रकाश्यत इत्यव्यक्तम् । अत्राव्यक्तत्वे । "आद्यं कारणं कोऽद्धा वेदकः प्रावोचत्" इत्यादिश्रुतेः । तार्किकैः परमाणव एव जगत्कारणत्वेन स्वीक्रियंते तन्निरस्यंत्याह—न ब्रह्मेति । ननु तर्हि "अजामेकां लोहितकृष्णशुक्लां बह्वीः प्रजाः सृजमानाम्" इत्यादिश्रुतेः "मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् । संभवः सर्वभूतानां ततो भवति भारत ।।" इति श्रीमुखोक्तेश्च । किं प्रधानं सांख्यैरपि तदेव जगत्कारणत्वेनांगीक्रियते तन्निरस्यंत्याह न ज्योतिरिति । चेतनं प्रधानं त्वचेतनत्वान्न कारणमिति निरूपितमाद्यश्लोकव्याख्याने "ईक्षतेर्नाशब्दम्" इति परमर्षिसूत्रेण वैशेषिका अपि तार्किका एव ते ईश्वरं ज्ञानगुणकं मन्यंते तदाक्षिपंत्याह—न निर्गुणमिति । मीमांसकास्तु "धिक्रिया ज्ञानरूपास्य नित्यत्वेन विरोत्स्यते" इत्यादिवाक्यैर्ज्ञानपरिणामिनमात्मानमभ्युपगच्छंति तन्मतं घ्नंत्याह—न निर्विकारमिति । पुष्कराक्षा उत्तरमीमांसकैकदेशिनस्तु शक्तिविक्षेपेण मायानिष्ठविक्षेपशक्त्या परिणामिनमात्मानमभ्यर्हंति तन्मतमनंगीकुर्वंत्याह—स सत्तामात्रमिति । सत्स्वरूपं सर्वदैकरसमिति यावत् । तर्हि किं सामान्यं तन्निरस्यंत्याह—न निर्विशेषमिति सामान्यस्य परापररूपविशेषवत्त्वात् । तार्किकैः परापरभेदेन सामान्यद्वयमूरीक्रियते परं सत्ताऽपरं द्रव्यत्वादीति । कारणत्वं समर्थ्यं पुनराशंकते—तत्र तर्हीति । तर्हीह वाक्यालंकारेऽव्ययमिति ध्येयम् अव्ययानामनेकार्थत्वात् । निरीहं निष्क्रियं सन्निधिमात्रेण चुंबकाश्मवदिति । एवंभूतं सन्निधिमात्रेणैव कारणतावत् । किमपि अनिर्वाच्यम् । कार्येण जगदुत्पादनादिरूपेण कल्प्यत इति कार्यकल्पम् "यतो वा इमानि भूतानि जायंते" इत्यादिश्रुतेः । साक्षात् अपरोक्षः प्रत्यक्षः । इत्यर्थ इति । जडानां चेतनमंतरा प्रकाशासंभवादिति भावः । पूर्वव्याख्याने नानामतनिरासप्रयासात्तद्विहाय शुद्धवेदांतमतमेव श्रेयोऽतस्तत्पक्षमाह—अथ वेति । केनापि प्रकारेण प्रत्यक्षानुमानादिरूपेणेत्यर्थः । तावत्प्रथमम् । इत्यर्थ इति । आदिमत इव व्यक्तिर्भवति न त्वनादेरिति तात्पर्यम् । तथा दर्शयति चतुर्भिर्विशेषणैः । ब्रह्म व्यापकं नहि व्यापकस्य कस्मिंश्चिद्देशे एव व्यक्तिरस्ति व्यापकत्वव्याघातादिति भावः । ज्योतिः सर्वप्रकाशकम् "येनेद्धः सूर्यस्तपति" इत्यादिश्रुतेः । सर्वप्रकाशकस्य कश्चित्परिच्छिन्नप्रकाशो व्यक्तिं कर्तुं न शक्नोतीत्यर्थः । निर्गुणं निर्गुणस्य न केनापि गुणेन व्यक्तिः संभवतीति निर्गुणत्वहानेः निर्विकारम् । सविकारस्य प्रकृत्यादेर्महदादिद्वारेणाभिव्यक्तिर्भवति निर्विकारस्य तु सा कथमपि न संभवतीत्यर्थः । तथैव सत्तामात्रम् । सत्तास्वरूपस्य व्यक्तिकारको न कश्चिद्विशेषोऽस्ति तस्यैव सर्वव्यंजकत्वात् । तथा घटः सन् पटः सन्निति सत्तयैव घटादयो व्यज्यंते न तु घटादिभिः सत्तापीति तेषामसत्वात् । असतोऽपि व्यंजकत्वे वंध्यात्मजोऽपि स्वरूपादि व्यंजयेदिति भावः । निर्विशेषं सविशेषस्यैव सामान्येन घटत्वादिना घटादेर्व्यक्तिर्दृश्यते न तु निर्विशेषस्य ब्रह्मणोपीति विशेषोऽत्रावयवादिर्ज्ञेयो न तु तार्किकाभिमतपंचमपदार्थ इति । निरीहम् । सचेष्टस्यैव क्रियया कर्मणा व्यक्तिर्दृश्यतेऽपिहितकपाटकोष्ठान्तर्गतस्य यथा कपाटोद्घाटनकर्मणा न तु निश्चेष्टस्याकाशादेरपीति । अन्यद्विवृतावशिष्टं रूपं यत्तदित्यादि । एवंभूतस्य सर्वथा परब्रह्मरूपस्य । इति भाव इति । न हि 'यद्बिभेति स्वयं भयम्' इत्युक्तेः 'भीरपि यद्बिभेति' इत्युक्तेश्च "मृत्युश्चरति यद्भयात्" इति श्रुतेः "यस्य मृत्युरुपसेचनम्" इति श्रुतेश्च कालस्यापि त्वत्तो भीतत्वात्कथमपि तव भयशंकैव नोदेति भयं तु कथं स्यादिति तात्पर्यम् ।। २४ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अधुना तु लोकहितार्थं स्वयमेव मत्पुत्रतां प्राप्तोसि अहो लोकभाग्यं किमुत मद्भाग्यमित्याह—त्वमिति । अस्य विविधदुःखसागरनिमग्नस्य यादवादिभक्तजनप्रधानस्य सर्वलोकस्य रिरक्षिषुः सुपांसुपो भवन्तीति द्वितीयायाः षष्ठी तं रक्षितुमित्यर्थः । हे विभो अखिलेश्वरेति अवतारासम्भवं द्योतयति तथाप्यवतीर्णोऽसि तत्रापि मम गृहे मत्सम्बन्धमात्रयुक्ते कारागृहेऽपि अहो परम-

कारुण्यमहिमेति भावः। तस्मात् क्षत्रियच्छद्मासुरचक्र वर्त्तिवृन्दैर्निःशेषेण विशेषेण च उह्यमानाश्चाल्यमानायाश्चम्वस्ताः पुनरावृत्यभावेन नितरां हनिष्यस एव तदग्रतस्तासां हननेन तेषां हननस्यापि सुष्ठुप्राप्तेस्तत्सहितहननमेव विवक्षितं यद्वा निर्व्यूह्यमाणा निर्व्यूढाः सिद्धा इत्यर्थः। दीर्घपाठस्तु तेषामसम्मतः निःशेषेण व्यूहं कार्यमाणव्यूहत्वेन रच्यमाना इत्यर्थः ॥ २१ ॥ अयमिति। अत्र तेषामाभासे किन्त्विति पितृस्नेहमूढतया त्विदं निवेदयामीत्यर्थः। तदेवाह तथापीति यद्वा तेषां मध्ये महादुष्टत्वात्तदीयानां नः परमदुःखदत्वात् अद्यापि धृष्टचेष्टतयैव भावित्वाच्चायमेव प्रथमं प्रतिकार्य इत्याह अभ्यहनत् अभ्यहन् शिलायां पेषयामास न्यवधीदिति पाठस्तु सार्वत्रिकः तैः सम्मतश्च सिद्धत्वेनासमाहितत्वात् अभिसरति आगच्छन्नेव वर्त्तते हे सुरेश्वरेति तच्च त्वदुक्तदेववैरिणामसुराणां युक्तमेवेति भावः ॥ २२ ॥ अथ श्रीवसुदेवस्तवानन्तरं तमेनमित्यन्वयः। तं चिरमपेक्षितम् एवं दिव्यरूपेणाविर्भूतमित्यर्थः। आत्मजं निजोदरादेव जातत्वेन भातं तादृशभानोत्पादनं च ममता विशेषजननार्थम् अत एव मम गर्भजोऽभूदित्याद्युक्तिः किन्तु प्रसूतिरीत्यनुकरणात्तद्गोपनाय पूर्वं योगनिद्रया वा भगवत्तेजसा वा बाह्येन्द्रियावरणमपि कृतम् अत एवात्मेत्युक्तं महापुरुषः स्वयम् भगवान् तत्रात्मजत्वदर्शनं भये हेतुः महापुरुषत्वदर्शनं विस्मये हेतुः स्तोत्रे चेति ज्ञेयं तथापि भयस्थितिरात्मजत्वदर्शनमयस्य स्नेहस्य प्राबल्यं दर्शयति ॥ २३ ॥ रूपमिति। तैर्व्याख्यातं तत्राव्यक्तं सर्वागोचरं ननु, वस्तु च सर्वागोचरं चेति न सम्भवति तत्राह—कारणं सर्वकारणं कार्यान्यथानुपपत्त्यैव गम्यमित्यर्थः। न ह्यग्नेरर्चिषोऽग्निः प्रकाश्यते दह्यते वा स इति भावः। ननु, परमाणुसमुदाये खल्वव्यक्तत्वं कारणत्वं च विद्यत इति तत्रातिव्याप्तिः स्यादित्याशङ्कते किं परमाणव इति परिहरति नेति। तेषां वाय्वादिपरमाणूनां परस्परव्यावृत्तेर्न बृहत्तमत्वमित्यर्थः। तर्हि तत्तद्धर्ममये प्रधानेऽतिव्याप्तिरित्याह, किमिति परिहारे तु स्वतः प्रकाशमानत्वाज्ज्योतिः शब्देन चेतनमुच्यते प्रधानस्य जडत्वात् तत्प्रकाश्यत्वमिति भावः "ज्योतिश्चरणाभिधानात्" (१।१।२५) इति न्यायात् ननु, चितो ज्ञानस्य योगाच्चेतनमुच्यते तर्हि यथा वैशेषिकाणामात्मानः स्वतो जडाः किन्तु ज्ञानगुणयोगादेव चेतना इति मतं तथा किन्तरापि तद्वस्त्वित्याशङ्कते किं वैशेषीति तथैव तत्राशङ्कान्तरं किं मीमांसकानामिव इति अथ भास्करीया यद्ब्रह्मण एव शक्तिकृतविक्षेपेण ज्ञानक्रियादिरूपतया परिणामं मन्यन्ते तदप्याशङ्कन्ते किं भास्करीत्यादिना तत्परिहरति न सत्तामात्रमिति। सच्छब्देनात्र वस्त्वेवोच्यते तस्य तु प्रवृत्तिनिमित्तं सत्तातन्मात्रमित्यविकृतमेव तदित्यर्थः। तत्तु सोत्प्रासमाक्षिपति। तर्हीति सा खलु सामान्यं तच्च पराजातिरेवोच्यते सा च पूर्वोक्ता व्यक्तादिरूपा न भवतीति हस्तिस्नानमिव सर्वं जातमिति भावः। तत्र सिद्धान्तयति न निर्विशेषमिति सामान्यं खलु विशेषेष्वनुगतमेव स्यात् तत्तु विशेषात् पूर्वमुत्तरमपि वर्त्तमानं न सामान्याकारमित्यर्थः। ततस्तत्प्रकाशकत्वात्तद्वाचकशब्दस्यापि प्रवृत्तिनिमित्तं या चित् सैव सत्तोच्यत इत्यर्थः, चेतनत्वं च स्वयं प्रकाशत्वादेवोक्तमिति भावः। तदेवं सामञ्जस्ये पुनराशङ्कते तर्हीति सक्रियं सक्षोभमित्यर्थः। एवं निरीहमित्याद्यपि सन्निधिमात्रेणेति स्वरूपभूताचिन्त्यशक्त्यैवेत्यर्थः। विशेषतश्चायमर्थः ननु, सारांशविवेके सति जगदपि ब्रह्मत्वेनोपलभ्येत तर्हि केन विशेषस्तत्राह, साक्षादिति मायानावृतत्वेनेत्यर्थः। तस्मादिदं व्यक्तत्वं षाड्गुण्यं कृपादिविकारित्वम् अङ्गप्रत्यङ्गविशेषवत्वं करचरणादिचेष्टासौष्ठवमपि स्वरूपं धर्मवैभवमेव श्रीरामानुजादिमतानुसारेण तत्स्वरूपस्य सधर्मत्वस्थापना तु श्रीभागवतसन्दर्भतट्टीकादौ द्रष्टव्या अतः सत्तामात्रं केवलधर्मरूपं ज्योतिः स्वप्रकाशचैतन्यं ब्रह्म सर्वता बृहत् आद्यं जन्मरहितं दृष्टदोषप्राकृततत्तद्धर्मनिरासेन ज्ञानिनः प्रतिप्रकाशमानं तद्वस्तु यत् रूपं श्रीविग्रहं प्राहुः स तद्रूप एव भवान् न चैतदपि तत्तद्दोषार्हं भवेत् अदृष्टदोषत्वात् विद्वदनुभवसिद्धार्थैः शास्त्रैर्निराकृतत्वाच्चेत्यभिप्रेत्य स्वयमेव निराकरोति तत्र जन्मराहित्यं साक्षादित्यनेनैव निराकरोति तत्तन्निजपरिच्छदवता स्वस्वरूपेणैव प्राकट्यात् परिच्छिन्नत्वं निराकरोति विष्णुरिति सर्वव्यापक इत्यर्थः। "न चान्तर्न बहिर्यस्य" इत्यादिवचनवृन्दात् श्रीयशोदादिभिः सर्वाधारादित्वेनानुभवनीयत्वाच्च व्यक्तत्वं निराकरोति अध्यात्मदीप इति प्रत्युतास्माकं च बुद्ध्यादिकमेवेदं प्रकाशयसि ततो ब्रह्मवत्स्वयमेव प्रकाशसे ततश्च न केनापि व्यङ्ग्यस इति शब्दश्लेषेण च आत्मानमधिकृत्य वर्त्तमाना अध्यात्मान आत्मारामाः तानपि दीपयसि परमानन्देनोल्लासयसीति ब्रह्मतोपि परमाविर्भावत्वं दर्शितं साक्षादित्यनेन च तथैव व्यञ्जितम् अस्फुटस्फुटत्वेन तारतम्यादिति दिक्। यद्वा, यदिति यस्य रूपं श्रीविग्रहं तत् अनिर्वचनीयं वस्तु प्राहुः तदेवाह—अव्यक्तमित्यादिना निर्गुणादित्वं प्राकृतगुणादिरहितत्वम् एवं परब्रह्मत्वमुक्तं स एव त्वं विष्णुः निजैश्वर्येण सर्वव्यापक इति परमेश्वरत्वम् अध्यात्मदीप इति परमात्मत्वम् अन्यत्समानम्॥२४॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना च लोकहितार्थं स्वयमेव त्वं मत्पुत्रतां प्राप्तोऽसीत्यहो! मद्भाग्यमित्याह—त्वमिति। अस्य विविधदुःखसागर निमग्नस्य सर्वलोकस्य ततो रक्षितुमिच्छुः; किंवा अस्य यादवादि-निजभक्तलोकस्य भक्तिविघ्नतो रक्षार्थं मम गृहे मत्सम्बन्धमात्रयुक्ते कारागारेऽप्यवतीर्णोऽसि। विभो! हे अपरिच्छिन्नेति अखिलेश्वर! हे जगदीशेति चावतारणासम्भवं बोधयति, तथाप्यवतीर्ण इत्यहो परमकारुण्यादिमहिमेति भावः। निःशेषेण विशेषेण चोह्यमानाः; दीर्घपाठे निःशेषेण व्यूहं कार्यमाणा इत्यर्थः, अत्रार्षो दीर्घः; नितरां हनिष्यसे भूभारहरणार्थमपुनरावृत्तिमोक्षदाने संहरिष्यसीति प्रार्थनापाटवम् ॥ २१ ॥ एवमखिललोकहितार्थमत्रैवान्तिके साक्षादवतीर्णस्यापि तव माहात्म्यमभक्तः कदाचिदपि बोद्धुं न प्रभवेदित्याह—अयमिति। पूर्वमभ्यहनत् शिलायां मुहुः प्रक्षिप्य पिष्ट्वा मारयामास; अधुनाप्युद्यतायुध एव सन्नभिसरिष्यति, वेगेन धावन्नभिमुखमेष्यतीत्यर्थः। हे सुरेश्वरेति—

तव त्वद्भक्तदेववैरिणामसुराणां युक्तमेव, अन्यथावधानापत्तेरिति भावः ॥ २२ ॥ अथ श्रीवसुदेवस्तवानन्तरमेनमीदृशमष्टमं वात्मजं निजोदरात् प्रसूतिरीत्या जातं यद्यपि जीववद्गर्भे प्रवेशो जन्मनैव घटते, तथापि स्नेहविशेषार्थं श्रीभगवतैव तादृशत्वं-प्रदर्शनात्तस्यास्तादृगभिमानः सम्भवत्येव । अतएव मम गर्भजोऽभूदित्याद्युक्तिः । एकमेव लौकिकवत् प्रसवानुकरणात् प्रसूतिसमये प्रसुप्ताया मातुः प्रागात्मजदर्शनासम्भवादथेत्युक्तम् । यद्वा, श्रीभगवत्तेजसोत्पन्नसाध्वसात् प्राग्द्रष्टुमक्षमायाः पश्चात् प्रतिस्तुत्यनन्तरमाश्वस्तायास्तद्दर्शनमिति महापुरुषः श्रीनारायणस्तस्यैव चतुर्भुजत्वादिना लक्षणं यस्य तं वीक्ष्य साक्षाद्दृष्ट्वा सुविस्मिता सती कंसाद्भीतापि तमात्मजमेव हर्षणास्तौत् । यद्वा, तादृशं वीक्ष्यापि स्नेहोद्रेकेण कंसाद्भीता । श्रीभगवज्जन्मना च सुविस्मिता । तमेनमिति वान्वयः । चिरमपेक्षितं दिव्यरूपेणाविर्भूतमित्यर्थः ॥ २३ ॥ रूपमिति तैर्व्याख्यातमेव । यद्वा, यदिति यस्य रूपं श्रीमूर्त्तिस्तदनिर्वचनीयं वस्तु प्राहुः । तदेवाह—अव्यक्तमित्यादिना । एवं परब्रह्मत्वमुक्तम् ; स एव त्वं विष्णुर्निजैश्वर्येण सर्वव्यापक इति परमेश्वरत्वम् ; अध्यात्मदीप इति परमात्मत्वम् । अन्यत् समानम् ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तमस्यः तमोगुणाभिभूतः ॥ २२. २३ ॥ रूप्यत इति रूपं स्वरूपम् अव्यक्तमिन्द्रियाग्राह्यं निर्गुणं सत्त्वादिगुणरहितं निर्विकारं शोकमोहादिविक्रियारहितं सत्तामात्रं वृद्धिक्षयादिरहितं निर्विशेषं शब्दादिरहितं निरीहं पुण्यपापरूपव्यापाररहितम् आत्मज्ञानं दीपो यस्य सः अध्यात्मदीपः आत्मविषयज्ञानप्रदो वा ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यद्यपि भवान् दुष्कृद्विनाशपूर्वकं त्रिलोकपालनाधिकृतत्वात्तदुपयुक्तया स्वासाधारण्या तन्वा अवातरत् तथाप्येनां तिरोधाप्य मनुष्यसजातीयां तनुमाश्रयान्यथाऽधुनवाऽयं कंसोऽभिद्रवतीत्यत्राह-त्वमिति द्वाभ्याम् । हे विभोऽखिलेश्वर ! अस्य लोकस्य रिरक्षिषुः पालयितुमिच्छुः मम गृहे कलत्रेऽवतीर्णोऽसि अस्येति कर्मणि षष्ठी राजन्यसंज्ञा येऽसुरसङ्घास्तेषां कोटिभिर्निर्व्यूह्यमानाः प्रचोद्यमानाः चमूः सेनाः निहनिष्यसि ॥ २१ ॥ तथा हे सुरेश्वर ! असभ्यः असत्सभाप्रवेशानर्हः खलेश्वर इति पाठे दुष्टाग्रगण्यः अयं कंसो मम गृहे तव जन्म श्रुत्वा भविष्यतीति श्रुत्वा तन्मात्सर्यादेव हेतोस्तवाग्रजान्न्यहनद्धतवान् कंसोऽधुना पुरुषैः स्वभटैः समर्पितं निवेदितं श्रावितमिति यावत्तवावतारं श्रुत्वाऽधुनैवोद्धृतमायुधं खड्गं येन तथाभूतोऽभिसरत्यभ्येति अत एव तनूं तिरोधापयेति भावः । अधुना अभिसरन्तमपि हन्तुं प्रभुरेव त्वं तथाप्यहं ततो बिभेमीति च भावः ॥ २२ ॥ अथैनं देवक्यपि स्तुत्वा प्रार्थयामासेत्याह मुनिः—अथेति । महापुरुषस्य भगवतोऽसाधारणविलक्षणानि चतुर्भुजत्वादीनि यस्य तमेनमात्मजं वीक्ष्य परमपुरुषं ज्ञात्वा पूर्वं कंसाद्भीताऽपि शुचिस्मितं यस्यास्तथाभूता स्वपुत्ररूपभगवद्दर्शनेन निवृत्तभीतित्वाच्छुचिस्मिता सती देवकी तमुपाधावत् तुष्टाव ॥ २३ ॥ उपाधावनमेवाह–रूपमित्यादिभिः चतुर्भिः । तत् प्रसिद्धं यद्वेदान्तैकसमधिगम्यं परमात्मस्वरूपं स एव त्वमिति स्तौति—रूपमिति । यत्तद्रूपं वेदान्ताः प्राहुः स साक्षाद्विष्णुस्त्वमित्यन्वयः । रूप्यते प्रकृतिपुरुषविलक्षणत्वेन निरूप्यत इति रूपं परमात्मस्वरूपं वैलक्षण्यमेव दर्शयितुं विशिनष्टि अव्यक्तमित्यादिना, तत्राव्यक्तं निर्गुणं सत्तामात्रं निर्विशेषम् इत्येतानि प्रकृतिव्यावर्त्तकानि विशेषणानि अन्यानि तु पुरुषव्यवच्छेदकानीति विवेकः । अव्यक्तं व्यक्तैरिन्द्रियैर्न व्यज्यते न विषयीक्रियते इत्यव्यक्तमदृश्यमतीन्द्रियमित्यर्थः । प्रधानन्तु पृथिव्यादिरूपेण व्यक्तमिति भावः । अत्र "यत्तदद्रश्यमग्राह्यम्" इत्यादि श्रुतिरनुसन्धेया यद्वा, तदन्यार्थको नञ् पृथिव्यादिरूपेण व्यक्तादचिद्द्रव्यादन्यदव्यक्तमिति साध्यधर्मोक्तिः तत्र हेतुः आद्यमादौ भवमाद्यं व्यक्तादचिद्द्रव्यादौ कारणत्वेनावस्थितं, किं तर्हि तत् सूक्ष्मावस्तमचिद्द्रव्यम् ? नेत्याह, निर्गुणं सत्त्वादिगुणरहितमनेन सूक्ष्मावस्थाचिद्व्यावृत्तिः सत्तामात्रं सतो भावः सत्ता सैव सत्तामात्रं सच्छब्दः सततैकरूपवस्तुवाची वृद्धिक्षयादिरहितमित्यर्थः । निर्विशेषं विशेषाः शब्दस्पर्शादयः आकाशादिभूतपञ्चकगुणास्तेभ्यो निर्गतं तद्रहितमित्यर्थः । एवं कार्यकारणोभयावस्था चिद्द्रव्यावृत्तिः अथ चिद्द्रव्यव्यावृत्तये विशिनष्टि, ज्योतिः स्वयं प्रकाशं, किं तर्हि तद्बद्धजीवः ? नेत्याह; निर्विकारं शोकमोहादिविकाररहितं निरीहं पुण्यपापरूपव्यापाररहितं, तर्हि तत्किं मुक्तजीवः ? नेत्याह; अध्यात्मदीपः आत्मन्यध्यात्ममिति विभक्त्यर्थेऽव्ययीभावः आत्मनि दीपः दीपवत्स्वप्रकाशं नियमसङ्कुचितं धर्मभूतं ज्ञानं च यस्य सः अनेन मुक्तजीवव्यावृत्तिः तेषां संसारदशायां सङ्कुचितज्ञानत्वात् , तर्हि किं नित्यसिद्धजीवः ? नेत्याह; ब्रह्मस्वरूपेण गुणैश्च निरतिशयबृहत् अनेन नित्यसिद्धव्यावृत्तिः तत्स्वरूपस्याप्यणुत्वात्सत्त्वं विष्णुरध्यात्मदीप इति पुंस्त्वनिर्देशो विधेयप्राधान्याभिप्रायकः । तत्त्वमिति पाठे तस्य भावस्तत्त्वमबाधितमित्यर्थः । एवं प्रकृत्यादिविलक्षणमबाधितं यद्रूपं तत्त्वम् इत्यध्याहारः । यद्वा तत्त्वमिति पदद्वयं यत्तदित्यत्र तच्छब्दः प्रसिद्धिद्योतकः यत्प्रसिद्धं प्रकृत्यादिविलक्षणं रूपं तत्त्वमित्यन्वयः । प्रकृत्यादिनामपि तच्छरीरकत्वेन तदात्मकत्वात्तदन्यदेवेति तद्व्यावृत्तये साक्षात्त्वमित्युक्तं प्रकृत्यादीनां तदनन्यत्वं शरीरात्मभावकार्यकारणभावनिबन्धनं तव तु तद्रूपानन्यत्वं मृदात्मको घट इति यत्स्वरूपाभेदरूपमिति साक्षाच्छब्दाभिप्रेतोर्थः चतुर्मुखादि देवान्तरव्युदासाय विष्णुरित्युक्तम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सर्वरूपेषु सर्वशक्तिरस्तीत्याशयेन स्तौति-त्वमस्येति। त्वदवतारेण संहारकारणेन रक्षा कथंकारा स्यादित्याशङ्क्यासतां हनने सतां तारतम्येन सुखसमृद्धिः स्यादित्याशयेनाह-राजन्येति। निव्यूह्यमानां निहनिष्यसे निहनिष्यसि गमयिष्यसि सतां सुखानुभवमितीतिशेषः। "चरभक्षणे" इति धातोः "सतां सुखविवृद्ध्यर्थमसतां पीडनं हरेः" इत्यादेश्च ॥ २१ ॥ स्वात्मनि स्वभक्तेषु द्वेषवृद्धिकरत्वेन द्वेषात्मकं तमो भवतीत्यतस्तदुपादाय त्वत्प्रवर्तनमित्याशयेनाह—अयं तमस्य इति। तमस्यः स्वभक्तद्वेषमूर्तिः तदुक्तं "तमो द्वेषात्मकं शुद्धं सत्त्वात्मानमुदीर्यते इति वा जन्म भविष्यतीति स्वपुरुषैः समर्पितम् अभिसरत्यभ्यागच्छति उदायुधः धृतायुधः ॥ २२ ॥ उपाधावत् गुणस्मरणपूर्वकं तुष्टाव ॥ २३ ॥ भगवदनुग्रहपात्रत्वाद्वेदान्तनिर्णीतगुणविशिष्टं स्तौति—रूपमिति। यद्यस्य तद्रूपम् एवंविधं प्राहुः वेदान्ता इति शेषः। परोक्षत्वात्तदित्युच्यते, कथंभूतम् ? अव्यक्तम् आराधनेऽपि स्वप्रसादमन्तरेणाप्रत्यक्षं "तदव्यक्तमाह हि" (३।२।२२) "अव्यक्तमचलन्ध्रुवं तर्हि शून्यं नेत्याह" आद्यम् आदौ विद्यमानं "आत्मा वा इदमेक एवाग्र आसीत्" किमस्य संज्ञेत्यत्राह-ब्रह्मेति "ब्रह्मविदाप्नोति परम्" अथ कस्मादुच्यते ब्रह्मेति ? "बृहन्तोऽस्मिन्गुणाः" संज्ञान्तरमाह-ज्योतिरिति। "परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" यद्वा गुणित्वेपि चेतनत्वं माभूद्घटवदित्यत्राह—ज्योतिर्ज्ञानलक्षणप्रकाशरूपं सुवर्णज्योतीः साक्षी चेता च गुणाः सत्त्वादयः किं नेत्याह—निर्गुणं केवलो निर्गुणश्च उत्पन्नक्षणे सर्वकार्याणां निर्गुणत्वम् उत्तरक्षणे नास्तीत्यादिविकारः किं न स्यादित्यत्राह—निर्विकारं निर्विकारोऽक्षरः शुद्धः अज्ञानादिमिश्रज्ञानगुणः किं न स्याज्जीवगुणवदिति तत्राह-सत्तामात्रं सर्वाशुभनिर्मुक्तगुणैकरूपं "सर्वाशुभविनिर्मुक्तगुणमात्रो यतो हरिः। सत्तामात्रमतः प्राहुः" एवंविधमन्यन्नास्तीत्याह—निर्विशेषं निर्गतो विशेषो द्वितीयोयस्मात्तन्निर्विशेषं "निर्विशेषोऽखिलोत्तमः" "एकमेवाद्वितीयम्" निराहमात्मकर्तृत्वाभिमानादिरहितं न तु क्रियाशून्यं "स इमाल्लोकानसृजत" इति श्रुतेः "अनादराग्निरीहश्च सेहः सर्वकृती यतः" स साक्षात्त्वम् अन्यो न विद्वज्जनोक्तलक्षसंज्ञाभ्यामयं नारायण इति प्रत्येत्यतः प्राकृतजनप्रत्ययोत्पत्तये तत्सिद्धसंज्ञामाह—विष्णुः। णकारो बलं षकारः प्राण आत्मा "स यो हेतौ णकारषकारावनुसंहितमृचो वेद" योगिभिर्ध्येयं वस्त्विदमेव नान्यदित्याशयेनाह—अध्यात्मदीपम् आत्मानमधिकृत्य वर्तमानदेहेन्द्रियादिप्रकाशकं "अध्यात्मयोगाधिगमनेन देवं मत्वा धीरो हर्षशोकौ जहाति" यत्तदिति सामानाधिकरण्येन प्रकृते यदित्यस्य षष्ठीत्यङ्गीकारे किं नियामकम् ? उच्यते स इति पुल्लिङ्गेन परामर्शात् तद्रूपमित्यभ्युपेयते स इति पुनरुक्ते प्रथमायाः षष्ठ्यर्थत्वं न दृष्टमिति चेन्न "सप्तसु प्रथमा" इति सूत्रात् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

त्वमस्येति मम त्वदेककामत्वात् कारागृहरूपेऽपि गृहे दारेषु वा विभो सर्वत्र सर्वांशेन स्थितः हे अखिलेश्वर ! सर्वेषां कायमनोवागतीताचिन्त्यानन्तशक्ते ! ततो भक्तकृपाप्रवर्त्तितया अचिन्त्यशक्त्या तवावयोः प्रवेशोऽपि घटते भवदङ्गीकृतः पुत्रभावोऽपीति भावः। न विद्यते इत्यस्य रूपव्याख्यायामपि सत्त्वमित्यादि द्वयम् ॥ २१ ॥ अथ वृत्तमपि निवेदयन् तथाप्ययन्तु शीघ्रमेव प्रतिकार्य इत्यभिप्रैति अयन्त्विति अथेति आनन्तर्ये योगनिद्रया तावद्बाह्येन्द्रियावरणात् अन्तरेवमन्तः किञ्चिज्जातमिति भानात् ॥ २२ ॥ अथेत्युक्तमात्मजमिति च तद्भावनञ्च ममताविशेषजननाय जीवद्गर्भनिष्क्रमणस्य सर्वांशानङ्गीकारात् तत्सङ्गोपनाय ज्ञेयम् ॥ २३ ॥ रूपं विशेषतश्चायमर्थः। ननु, सारांशविवेके सति जगदपि ब्रह्मत्वेनोपलभ्येत तर्हि केन विशेषस्तत्राह—साक्षादिति। माया नावृतत्वेनेत्यर्थः। तस्मादिदं व्यक्तत्वं षाड्गुण्यं कृपाविकारित्वम् अङ्गप्रत्यङ्गविशेषत्वं करचरणादिचेष्टा सौष्ठवमपि स्वरूपधर्मवैभवमेव अतः सत्तामात्रं केवलधर्मरूपं ज्योतिः स्वप्रकाशचैतन्यं ब्रह्म सर्वतोऽपि बृहत् आद्यं जन्मरहितं दृष्टदोषप्राकृततत्तद्धर्मनिरासेन ज्ञानिनः प्रतिप्रकाशमानं तद्वस्तु यद्रूपं श्रीविग्रहं प्राहुः स तद्रूप एव भवान् न चेतदपि तद्दोषार्हं भवेत् अदृष्टदोषत्वात् विद्वदनुभवार्थः शास्त्रे निराकृतत्वाच्चेत्यभिप्रेत्य स्वयमपि निराकरोति जन्मराहित्यं साक्षादित्यनेनैव निराकरोत् तत्तन्निजपरिच्छदवता स्वस्वरूपेणैव प्राकट्यात् परिच्छिन्नत्वं निराकरोति—विष्णुरिति। व्यापकमूर्त्तिरित्यर्थः। व्यक्तत्वम् अध्यात्मदीप इति प्रत्युतास्माकं बुद्ध्यादिकमेवेदं प्रकाशयते ततो ब्रह्मवत् स्वयमेव प्रकाशते ततश्च केनापि व्यञ्जित इति शब्दश्लेषेण च आत्मानमधिकृत्य वर्त्तमाना अध्यात्मान आत्मारामाः तानपि दीपयसि परमानन्देनोल्लासयसीति ब्रह्मतोऽपि परमाविर्भावत्वं दर्शितं साक्षादित्यनेन च तथैव व्यञ्जितं स्फुटास्फुटत्वेन तारतम्यादिति दिक् ॥ २४–२७ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

एवंविधः सर्वकारणकारणमनीहोऽविकृतस्त्वं मम गृहेऽवतीर्णोऽसीत्यहो मे सौभाग्यमित्याह—त्वमस्य लोकस्येत्यादि। हे विभो ! त्वं मम गृहेऽवतीर्णोऽसि, किं चिकीर्षुः ? अस्य लोकस्य रिरक्षिषुरिति। (भा० १०।३।२०) "कृष्णञ्च वर्णं तमसा जनात्यये" इति यदुक्तम्, तस्यान्यथाप्रतीतौ विरुद्धमतिकृद्दोषनिवासः। रिरक्षिषुत्वं प्रकटयति—हे अखिलेश्वर ! राजन्यसंज्ञासुरकोटियूथपैर्निव्यूह्यमानाश्चमूर्निहनिष्यसे, निःशेषेण हनिष्यसि, हननद्वारा अपुनर्भवं तेभ्यो दास्यसि, यथा पुनरुत्पद्य लोकपीडां न कुर्वन्ति। तत्तु त्वत्त एव भवति, नांशद्वारा, यतस्त्वमखिलेश्वरः। विष्णुना हतस्यापि कालनेमेः पुनः कंसत्वेनोत्पत्तेः इति नेरुपसर्गस्य ध्वनिः ॥ (२२–२३) अथ देवकी स्तौति—यत्तदित्यादि। स त्वं साक्षात् प्रकटीभूतोऽसि। अहो मे भागधेयमिति शेषः। स

त्वमिति कोऽहमित्याशङ्क्याह—तद्रूपं सविग्रह इत्यर्थः। कीदृशम् ? आद्यम्। तदिति कम् ? तत्राह–यद्यस्य ज्योतिर्ब्रह्म प्राहुः, अर्थात् सात्वताः। ब्रह्म कीदृशम् ? अव्यक्तम्, निर्गुणम् निर्विकारम्, सत्तामात्रम्, निर्विशेषम्, निरीहम्। रूपत्वेन किमहं परिच्छिन्नः ? नेत्याह—विष्णुर्व्यापकः वियत् व्याप्तौ। तर्हि दृश्योऽस्मि किम् ? नेत्याह—अध्यात्मदीपः, आत्मानमधि आध्यात्मम्, दीप आत्मप्रकाशने आत्मैव प्रकाशक इत्यर्थः ॥ २४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

त्वमस्येति। प्रत्युत त्वमस्य जगतः रिरक्षिषुः, अतोऽखिलेश्वरेति सम्यक् सम्बोधनम्। अतएव (१३ श-श्लो,) "विदितोऽसि भवान् साक्षात् पुरुषः प्रकृतेः परः" इति पूर्ववत् व्याख्या ॥ २२-२३ ॥ रूपं यत्तदिति। स त्वं साक्षात् प्रकटीकृतोऽपि अहो मे भागधेयम् ? तर्हि कोऽहमित्यपेक्षायामाह–रूपं श्रीविग्रहः; तत् किं लौकिकम् ? नेत्याह–यदिति। यत् अव्ययम्, यत् यस्य रूपस्य ब्रह्म ज्योतिः। ब्रह्म तु कीदृशम् ? तत् प्रसिद्धमव्यक्तं निर्गुणं निर्विकारम् सत्तामात्रमित्यादि। रूपत्वेन किं परिच्छिन्नम् ? नेत्याह—विष्णुर्व्यापको विग्रहोऽपि व्यापी। ननु व्यापी तावद् भवानिति, किन्तु दृश्योऽस्ति किम् ? नेवमित्याह—अध्यात्मदीपः— आत्मानमधि अध्यात्ममात्मनः प्राकट्यं तस्य दीपः प्रकाशकः। दीपभूतेन त्वया दत्तस्वप्रादुर्भावकशक्तिविशेषैरेव भक्तानामिन्द्रियैरनुभूयसे इति दृश्यत्वं तेनायातीति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भोस्तात ! सत्यं त्वयाऽहं विदिततत्त्व एवास्मि त्वद्गृहे किमर्थमवातरमित्यपि जानासि चेद्ब्रूहीत्यत आह–त्वमिति। अस्य लोकस्य इमं लोकम् अतः साधूनां रक्षणार्थं राजन्यसंज्ञा येऽसुरकोटियूथपास्तैः निव्यूह्यमानाः इतस्ततश्चाल्यमानाश्चमूः सेनाः॥२१॥ अतस्त्वत्कृपया तव सर्वमैश्वर्य्यमहं जानाम्येव तदप्यविवेकसमुद्रो मया दुस्तर एव यतः साम्प्रतिकस्य महादुष्टकंसस्य दौरात्म्यं त्वां ज्ञापयामीत्याह–अयन्त्विति। ननु ममैतत् अलौकिकरूपमाधुर्य्यास्वादनिमग्नो मां न प्रहरिष्यति प्रत्युत प्रीणयिष्यतीति तत्राह–असभ्यः रसास्वादहेतुर्हि सभ्यत्वमेवेति भावः। हिंसायां कैमुत्यमाह–तवेत्यादि। समर्पितं कथितम् अभिमुखमेव सरतीति तमागतप्रायमहं पश्यामीत्यतोऽधुनैव रूपमिदमुपसंहर तस्मिन्नागते तूपसञ्जिहीर्षोतः पूर्वं किं भविष्यतीति मे महाकम्प इति भावः ॥ २२ ॥ अथ पत्युर्भयं दृष्ट्वा उप समीपं भीतेति स्वरूपमनुपसंहरन्तं स्मयमानं तमालक्ष्य परमेश्वरत्वाहङ्कारेण कंसभयं न गणयति, तदहं हन्त किङ्करोमीत्यतिविह्वलेत्यर्थः। सुविस्मितेत्यस्य परमेश्वरस्याग्रे कंसः खलु को वराकस्तदप्यावयोर्भयं वर्द्धत एवेति कोऽयमविवेको दुस्तर इति भावः ॥ २३ ॥ किञ्च भक्ताः खलु स्तुत्या भगवन्तमपि वशीकुर्वन्तीति प्रसिद्धेरेनं महाहठिनं स्तुत्यैव वशीकृत्य स्ववचने स्थापयामीति मनसि विमृश्य भो परमेश्वर ! आवयोः प्रतिक्षणमेवातिभये वर्द्धमानेऽपि तव भयशङ्कैव नास्तीत्याह–चतुर्भिः, रूपमिति। यद्यस्य तव तत् प्रसिद्धं रूपमाकारं नारायणराघवहयशीर्षादिकम् अव्यक्तं सर्वेन्द्रियागोचरम् आद्यम् अजन्यं प्राहुर्वेदाः तथा निर्गुणं निर्विकारं ब्रह्म यस्य तव ज्योतिः प्राहुः "यस्य भासा सर्वमिदं विभाति" इति श्रुतेः "सत्यं ज्ञानमनन्तम्" यद्ब्रह्मज्योतिः सनातनमित्यग्निमोक्तेः—

तत्परं परमं ब्रह्म सर्वं विभजते जगत्। ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत ॥

इत्यर्जुनं प्रति हरिवंशे भगवदुक्तेः—

यस्य प्रभा प्रभवतो जगदण्डकोटिकोटिष्वशेषवसुधादिविभूतिभिन्नम्।
तद्ब्रह्म निष्कलमनन्तमशेषभूतं गोविन्दमादिपुरुषं तमहम्भजामि ॥

इति ब्रह्मसंहितोक्तेः "ब्रह्मणो हि प्रतिष्ठाऽहम्" इत्यत्र स्वामिचरणैस्तथा व्याख्यानाच्च विभूतिप्रसङ्गे विकारः पुरुषोऽव्यक्तं रजःसत्त्वन्तमःपरमित्यत्र परमितिशब्दस्य ब्रह्मेति तैर्व्याख्यानाच्च "मदीयं महीमानं च परम्ब्रह्मेति शब्दितम्" इति मत्स्यदेवोक्तेश्च "परात्परं ब्रह्म च ते विभूतयः" इति श्रीयामुनाचार्यस्तोत्राच्च तद्ब्रह्मकृष्णयोरैक्यात् किरणार्कोपमायुजोः इति भक्तिरसामृताच्च तथा यस्य तव सत्तामात्रं शुद्धसत्त्वसामान्यं शुद्धसत्त्वविलासभूतमिति यावत् स्वविग्रहधामभक्तपरिकरादिकं निर्विशेषं विशेषात् प्रपञ्चान्निर्गतं प्राहुः अत एव निरीहं स्वतः परिपूर्णत्वेन वितृष्णं यद्वा सकामभक्तानपि निरीहयतीति निरीहं किम्वा निश्शेषेण ईहयतीति त्वमभिलाषयतीति निरीहं स्पृहेहातृड्वांछेत्यमरः सत्वं विष्णुरध्यात्मदीपः सर्वतत्त्वप्रकाशक इत्यविज्ञाया अपि मम मनसि यथा स्फोरयसि तथाऽहं वच्मीति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भविष्यं कृत्यं विज्ञापयति, त्वमिति ॥ २१ ॥ कंसविचेष्टितं विज्ञापयति—अयमिति ॥ २२ ॥ श्रीवसुदेवे तूष्णीं स्थिते अथानन्तरं देवकी एनं प्रस्तुतं महापुरुषलक्षणं स्वासाधारणलक्षणमात्मजं वीक्ष्य कंसाद्भीता तमुपाधावत् अस्तौत् पुत्रीभूते भगवति विद्यमानेपि कंसाद्भीतेत्यस्य यदि दैवादल्पतरं ममायुर्भवेत् क्रूरतरः कंसः कृतवैरः सन्निहित एव मृत्युहेतुः तर्हि हरिलीलारसलाभो न

भविष्यतीत्याशयः ॥ २३ ॥ किञ्चिद्विज्ञापयितुं भगवद्गुणस्वरूपनिरूपणेन स्तौति—रूपमिति । "तन्त्वौपनिषदं पुरुषं प्रच्छामि, "सर्वे वेदा यत्पदमामनन्ति" इत्याद्याः श्रुतयो तद्रूपं सर्ववेदवेद्यतया प्राहुस्तत्त्वमित्यन्वयः । अत एवोक्तं श्रीमुखेन "वेदैश्च सर्वैरहमेव वेद्यः" इति, हे मातः ! मयि पुत्रदृष्टिं कुरु किं बहुभाषणेनेत्यतो रूपं विशिनष्टि हे भगवन् ! आद्यं सर्वकारणं श्रुतयः प्राहुः "यतो वा इमानि भूतानि जायन्ते" इत्याद्याः तस्मिन् सर्वजनके जन्यभावनाऽन्याय्या अत एवाव्यक्तं व्यक्तं पाञ्चभौतिकं रूपं तद्विलक्षणम् अत एव निर्विशेषं निर्गताः स्वभावतः सर्वे विशेषाः स्थूलत्व-अणुत्व-जन्ममरणक्षुत्-तृट्शोकमोहादयः सर्वे दोषा यतस्तत् तत्र हेतुगर्भविशेषणम् । निर्गुणं सत्त्वरज आदिगुणरहितम् अत एव निरीहं गुणनिबन्धनेहारहितम् अत एव निर्विकारम् अत एव सत्तामात्रम् । नन्वेवंभूतं सर्वकारणं कथं भवेदित्यत्राह—ब्रह्मेति । बृहत्वाद्बृंहणत्वाच्च तस्मादुच्यते परं ब्रह्म स्वरूपतो निर्विकारम् अनन्तचेतनाचेतनशक्तिभिः बृंहयति विश्वमिति ब्रह्म । ननु, स्वशक्तिविकारेण कदाचित्तदावृतं न कुतो भवेदित्यत आह—ज्योतिरिति । ननु, मातः ! एवंभूतरूपो विष्णुर्भवतु अहन्तु भवत्याः पुत्र एव त्वद्गर्भादित्यल्पदेशादल्परूपो जातोस्मीत्यत आह—स विष्णुः त्वमेव साक्षादित्यर्थः ॥ २४ ॥

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

त्वमस्य लोकस्येति श्लोकेऽस्य लोकस्य सकाशाद्विशिष्टत्वेन भवतीति विभुस्तस्य संबोधनं विभो सर्वोत्तमत्वं रिरक्षिषुर्मम गृहेऽवतीर्णोऽसि । अत एव मम रक्षणार्थं राजन्यसंज्ञासुरकोटियूथपैर्निव्यूंह्यमानां नितरां विशेषेणोह्यमानां चमूं निहनिष्यस इत्यन्यथाऽन्वयार्थप्रतीतिनिरासाय प्रमाणेनैव तं श्लोकं व्याचष्टे ॥ सतां सुखविवृद्ध्यर्थमिति । हरेः सकाशादिति शेषः । पीडनमित्यन्वयः । च शब्दोऽभ्यधिकमिति वक्ष्यमाणस्यानुकर्षणार्थः । तत्तु दुःखसुखमित्युभयत्र संबध्यते । यत्र यावत्तमः क्षीणं भवति तत्र तावत्प्रकाशस्य तु विशेषेण वर्धनं भवतीत्यन्वयः । चोऽवधारणे । कलेरित्यनेन संबध्यते । सर्वस्मादभ्यधिकेति शेषः । अनेनास्य लोकस्य रिरक्षिषुस्त्वं मम गृहेऽवतीर्णोऽसि लोकरक्षणार्थमेव राजन्यसंज्ञासुरकोटियूथपैर्निव्यूंह्यमानां चमूं निहनिष्यस इति भागवतपदान्वयस्तथा लोकपदस्य सज्जनार्थत्वं सूचितं भवति । उपसंहरति ॥ तस्मादिति । सर्वकर्म असतां नाशनादि कर्म ॥ २१ ॥ रूपं यत्तत्प्राहुरिति श्लोके ब्रह्म निर्गुणमित्यस्य सत्त्वादिगुणत्रयराहित्यार्थत्वभ्रमनिरासाय स्वयमेवार्थमाह ॥ निर्विशेषमिति । सर्वधर्मरहितम् । सत्तामात्रं केवलं सत्त्वं । ब्रह्म निरीहं सर्वथा चेष्टारहितमिति परब्रह्मणः सर्वगुणक्रियाराहित्यं सत्ताजात्यैक्यं चोच्यत इत्यन्यथाप्रतीतिनिरासाय प्रमाणेनैव तेषां पदानामर्थमाह ॥ सर्वाशुभविनिर्मुक्तेत्यादिना । अनेनात्र सत्तेत्यत्र सच्छब्दः सद्भावे साधुभावे च सदित्येतत्प्रयुज्यत इति गीताप्रमाणात्साधुभावार्थकः । साधुभावशब्दस्य तु साधुश्चासौ भावश्च साधवो भावा धर्मा यस्मिन्स साधुगुण एव । ततश्च सत्तामात्रं साधुगुणस्वरूप एवेति सत्तामात्रशब्दस्याक्षरार्थः सूचितो भवति । तथाऽखिलोत्तम इत्यनेन विशिष्यत इति विशेष उत्तमः । निर्गतो विशेषो यस्मात्स निर्विशेष इति निर्विशेषपदस्य व्युत्पत्तिः प्रदर्शिता । चोऽप्यर्थे । यतः सर्वकृती सर्वं प्रति कृतं कर्तृत्वम् । तदस्त्यस्मिन्निति सर्वकृती । अतः सेहोऽपि सचेष्टोऽप्यनादरात्तज्जन्यफले आदराभावात् फलोद्देशेन चेष्टान्निरीह इत्युक्त इत्यन्वयः । ननु यदव्यक्तं ज्योतिर्ब्रह्म सत्त्वमिति यच्छब्दस्य तच्छब्देनान्वये पूर्तस्तदिति तच्छब्दो व्यर्थः । रूपशब्दस्यान्वयाभावात्सोऽपि व्यर्थ इत्यतस्तयोः शब्दयोरन्वयं दर्शयति ॥ यस्य तद्रूपं सत्त्वमिति । ननु यदिति प्रथमांतपदस्य यस्येति षष्ठ्यंतत्वेन यद्व्याख्यानं तत्कुत इत्यत आह ॥ सप्तस्विति । इति सूत्रात्प्रमाणात् षष्ठ्यंतत्वेन व्याख्यानं युक्तमिति शेषः ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्वमस्य लोकस्येति श्लोके लोकस्य रिरक्षिषुस्त्वं राजन्यसंज्ञासुरकोटियूथपैर्निव्यूंह्यमानां चमूं हनिष्यत इति परस्परमसङ्गतमवनहननयोर्वैयधिकरण्यादित्यवतारयन्ति । अस्य लोकस्य सकाशाद्विभुर्विविधभवनवानिति विभो मम मन्मात्ररक्षणार्थं चमूं हनिष्यस इत्यन्यथाप्रतीतिं वारयितुं प्रमाणेन तं श्लोकं व्याकरोति ॥ सत्तामात्रमिति । केचिल्लोकस्य सदसत्सङ्घस्य रिरक्षिषुरित्युक्त्वा पुना राजन्यसंज्ञेत्यादिवचनं च व्याहतमित्यतः प्रमाणेन तद्विवेकं लोकपदार्थसङ्कोचनमुखेन दर्शयति ॥ सतामिति । असतां हरेर्यत्पीडनं तत्सतां सुखविवृद्ध्यर्थं तत्सम्बन्धि यत्पीडनमिति हरेः सकाशात्पीडनमिति वाऽन्वयः । यावदसुरदुःखं च स्यात्तावदेव सुखं ज्ञानिनां भवेत् । तत्रापि सत्समुदायेऽपि तावदेव सुखमिति पाठोऽसुरप्रतियोगिसमर्पक इति सुललितः । तारतम्येन ब्रह्मणः सुखमधिकं भवेत् । असदवधिकलिपीडामभिधाय सदवधिकार्यविधिसुखमभिधत्ते । सर्वस्मात्पीडायोग्यात्कलेः पीडाऽभ्यधिकमिति विपरिणतमन्वेति । अभ्यधिकेति ब्रह्मणः सुखयोग्यात्सर्वस्मात्सुखमधिकम् । उपसंहरति ॥ तस्मादिति । लोकस्य सतां रक्षणाय सर्वं हरेः कर्म स्मृतम् ॥ ततश्चायं श्लोकार्थः ॥ हे विभो अखिलेश्वर । अस्य लोकस्य सज्जनस्य तं लुक् प्रकाशन इति धातोर्ज्ञानवतामिति वा । रिरक्षयिषुः रक्षितुमिच्छुर्मम गृहे भार्यायामवतीर्णोऽसि । किञ्च तरतमभावेन सदसत्सुखाप्त्यै राजन्येति संज्ञा येषां ते च तेऽसुरकोटियूथपाः सेनानायकास्तैर्निव्यूंह्यमानां समूहीकृत्यानीतां चमूं सेनां हनिष्यसे संहरिष्यसि । निव्यूंह्य ऊह्योऽगोचरो मानोऽहङ्कारो यस्याः सा तां वा । चमू भक्षणे चम्यत्यरिनिकरमिति चमूस्ताम् ॥ २१ ॥ यः प्राक् मम गृहे भार्यायां तेषां जन्मोत्पत्तिं श्रुत्वा तेऽग्रजान्कीर्तिमदादीन्न्यहनअहन्स तमस्यस्तमोगुणकार्यत्वद्भक्तद्वेषवान् । तेऽवतारं पुरुषैस्तद्भटैः समर्पितं

निवेदितं श्रुत्वा । उदायुध उद्धृतायुधवानधुनैव रात्रावेवाभिसरत्यभि भयरहितं यथा भवति तथा सरतीति वा । अयं त्वसभ्य इति पाठे खल इत्यर्थः । नावित्यपि पठन्ति । आवयोर्गृहे गेह इत्यर्थः । महापुरुषस्य भगवतो लक्षणानि यस्य तं देवकी मातैनमात्मजं वीक्ष्य कंसाद्भीता शुचिस्मिता प्राक् शुचि अन्तः सत्यामपि बहिः स्मिता स्मयमाना तमुपधावदस्तौत् ॥ २२ ॥ रूपं यत्तत्प्राहुरव्यक्तमाद्यमिति श्लोकेऽखण्डब्रह्मस्वरूपपरं सत्तामात्रमित्यादीनीति प्रतीतिनिरासाय निरीहादिशब्दार्थोन्मानेनाह ॥ सर्वशुभेति । यतो हरिः सर्वाणि च तान्यशुभानि च तेभ्यो विनिर्मुक्तश्चासौ गुणनामात्रं कार्त्स्न्यं यत्र स तथा मात्रक वा तदात्मकमिति यावत् । अतः सत्तामात्रं ज्ञानिनः प्राहुः । सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यत इत्यादेस्तस्य तद्गुणानां च साधुत्वात्सच्छब्दवाच्यतेति ज्ञेयं । अखिलोत्तमत्वान्निर्विशेष इत्युच्यते । विशिष्यत इति विशेषोऽतिशायी स नास्ति यस्मात्स इति व्युत्पत्तिः सूचिताऽनेनेति ज्ञेयं । न नादरात्फलस्नेहराहित्यान्निरीह इति निरुक्त्यन्तरमिदमिति मन्तव्यं । सर्वं कृतं कर्म चेष्टा सृष्ट्यादावस्तीति स इति सेहा चेष्टावान् । ननु यदव्यक्तं ज्योतिर्ब्रह्म स त्वमिति यच्छब्दस्य तच्छब्देनान्वयनेन न तच्छब्दो व्यर्थः । व्यर्थश्चान्वयाभावाद्रूपशब्दश्चेति द्वयोरन्वयपरमाह ॥ यस्य तद्रूपं सत्त्वमिति । यद्यस्येति व्याख्याने बीजमानमाह सप्तसु विभक्त्यर्थेषु ततश्चात्र यदिति षष्ठ्यर्थ इ युक्तं भवति ॥ अथ श्लोकार्थः ॥ साक्षाददितिरित्युत्तमत्वादुपनिषदुक्तगुणत्वेन देवं देवकी स्तौति ॥ रूपमिति । यद्यस्य तद्रूपमव्यक्तमित्यादिप्रकारेण प्राहुर्वेदान्ताः । प्रेण च न च पातनिकोऽर्थ एतदुक्त इति द्योतयति । बहुवचनेन च बहुसम्मतिरिति नाविश्वसनीयमिदमिति ध्वनयति । भव्यक्तं प्रसादमन्तरा । अव्यक्तमचलं । तदव्यक्तमाहेत्यादेः । आद्यमादौ भवं । अनेनेदानीं दानवहान्यै मय्ययमवतार इति ध्वनयति । ब्रह्म बृहन्तोऽस्मिन्गुणा इत्यादेर्गुणपूर्णं ज्योतिः परं ज्योतिः । वीदं ज्योतिर्हृदय, आहितं यत् । ज्योतिश्चरणाभिधानादित्यादेः । जातमोतमित्याद्यपि ज्ञेयं । ज्योतिर्ज्ञानस्वरूपं । गुणाः किं ब्रह्मपदोक्ताः सत्त्वादय इति नेत्याह ॥ निर्गुणमिति । केवलो निर्गुणश्चेत्यादेः सत्त्वाद्यैर्वा स्वाभिन्नैर्वा रहितं निर्विकारं निर्विकारोऽक्षरः शुद्ध इत्यादेः । सत्तामात्रं सत्ता सद्भावः । ग्रामजनेति योगविभागात्समूहार्थे तल् । मात्रं च सर्वाशुभव्युदासकः । ततश्च सर्वाशुभविनिर्मुक्तगुणगणात्मकं गुणात्मकमिति वा सत्तामात्रं निर्विशेषं निर्गतो विशेषो विशिष्यतेऽतिशायी यस्मात्तदखिलोत्तमं न त्वत्समश्चाभ्यधिकः । एकमेवाद्वितीयमित्यादेः । निरीहमफलादरान्निरीहं नितरामीहा चेष्टा यस्य तदिति वृत्त्यन्तरं च सेहेः सर्वकृती यत इत्यादेरनुसन्धेयम् । स इमांल्लोकानसृजत इत्यादेः । स्वयमेव ज्योतिरूपमिति नेत्याह ॥ अध्यात्मदीपमिति । आत्मानमधिकृत्य विद्यमानस्वस्वेन्द्रियादिकं दीपयति प्रकाशयतीति तत्तथा । सत्त्वं विष्णुर्णकारो बलं षकारः प्राण आत्मा स यो हेतौ णकारषकारावनुसंहितमृचो वेदेत्याध्यायावसित्यैतरेयगीताभाष्याद्युक्तप्रकारेणार्थोऽवसेयः । साक्षादित्याविष्टत्वादिव्युदासः । अत्र नानाश्रुत्यादिवाक्यसङ्ग्राहकाणि विशेषणान्यव्यक्तमित्यादीनि निमित्तीकृत्य वितत्य विचरो व्योमरोमन्थायित इति बहुविस्तारहेतुरिति वा तत्र न मनः श्रमणीयमित्युपरतमिति मन्तव्यं । न च बृहदारण्यकभाष्य इदमिति द्वितीया षष्ठ्यर्थ इति प्रतिपत्तिलघुतामादाय दृष्टिं व्याकरणान्महाव्याकरणसूत्रं चेदं षट्सु द्वितीयेति चेति किं न च तथोचुरिति वाच्यं । तत्रेदमग्र इत्येव श्रुतेर्द्वितीयाकर्तुं रूपाव्यक्तादिपदानां सामानाधिकरण्य आवश्यके किल पुनः स इति तच्छब्दनैरर्थ्यप्रतीतिस्तस्यां च षष्ठ्यन्ततया विवरणं तत्र सूत्रमानीकरणं चेतीदमर्थविशेषेणैवमेव वक्तव्यत्वादिति दिक् ॥ २४ ॥

श्रीसुबोधिनी

सङ्कर्षणात्मकमाह त्वमस्येति, अस्य लोकस्य रिरक्षिष् रक्षितुमिच्छुः सन् मे गृहेऽवतीर्णोसि, अवश्यरक्षायां हेतुरखिलेश्वरेति, विभुरिति, सामर्थ्यं, इदं सङ्कर्षणकार्यं देवान् प्रति तद्द्वेषिदैत्यवधादेव न तु सर्वनाशकत्वेन, अतो देवांशो जगतां रक्षक एव दैत्यानामेव निवारकः तदाह राजन्यसंज्ञेति, राजन्या राजान इति संज्ञामात्रं वस्तुतस्त्वसुरा एव, तेषां कोटयः सेनारूपास्तासां यूथपा महान्तः कंसादयस्तैर्नितरां व्यूह्यमानाः परिपाल्यमानाः प्रेर्यमाणा वा चमूर्निहनिष्यसे नितरां मारयिष्यसे, अतो रक्षार्थमेव दैत्यवधः, भगवत्सान्निध्यात् सर्वज्ञता तस्य, "यस्मिन् विदिते सर्वमिदं विदितं भवती"त्यार्षज्ञानं वा ॥ २१ ॥

एवमपि ज्ञाते भयं न निवृत्तमिति लौकिकस्य बलिष्ठत्वज्ञापनाय भयाद् भगवन्तं विज्ञापयत्ययं त्वसभ्य इति, तुशब्दः पूर्वार्थं स्तुतिलक्षणं व्यावर्तयति, भगवानवतीर्ण इति सतामेव सुखं भवति न त्वमतां, अयं त्वसभ्य इममर्थमज्ञाप्यः, अत एव तव जन्म नो गृहे श्रुत्वा तेऽग्रजान् मम षट् पुत्रान् न्यवधीत्, सुराणामीश्वरेतिसम्बोधनं पक्षपातार्थं, तर्हि किमधुना कर्तव्यमिति चेत् तत्रा स एव क्रूरात्मा कंसो रक्षकैः पुरुषैस्तेऽवतारं निवेदितं श्रुत्वोदायुधः सन्नधुनैव निकट एवाभिसरत्यागच्छति, 'वर्तमानसामीप्ये वर्तमानवद् वे'ति वर्तमानप्रयोगः, ईश्वरे निवेदनमात्रं सेवककार्यं कर्तव्यं तु प्रभुरेव जानातीत्यस्य तूष्णीम्भावः, अभिप्रायस्तु यदीदानीं मारणीयस्तदा स्थातव्यं नो चेदन्यत्र गन्तव्यमिति, इदानीं मारणे गुप्ततया गोकुलवासिभिः सह क्रीडोद्धारादिकं न भविष्यतीति तत् कृत्वा पश्चान्मारणं, अतः पितुरभिप्रायादन्यत्र गतवानिति लक्ष्यते ॥ २२ ॥

तूष्णीं स्थिते वसुदेवे देवकी रूपोपसंहारं कंसस्य भगवज्जन्माज्ञानं च प्रार्थयितुं प्रथमतः स्तौतीत्याहाथैनमिति, स्वस्यैवायं पुत्र इति ज्ञातवती, तथा बुद्धेरुत्पादितत्वात्, परं स पुत्रश्चतुर्भुजादिलक्षणैर्लोकप्रसिद्धैर्भगवत्तुल्योयमिति ज्ञात्वा स्वबुद्ध्या स्मृतिपुराणेषु प्रसिद्धं भगवत्स्वरूपं प्रकृतेनुवर्णनीयमिति तदर्थमाह, महापुरुषस्य पुरुषोत्तमस्य लक्षणानि यत्र तं भगवन्तमुपाध वच्

छरणं गता, स्तुत्यैव शरणं गमिष्यति, भगवन्निमित्तमेव कंसाद् भीता, तर्हि भगवत्स्वरूपज्ञानाद् भयमेव कथं न निवर्तयतीत्या-
शङ्क्याह **सुविस्मितेति**, आश्चर्यरस एव तस्या उत्पन्नो न तु निर्धारितं ज्ञानं जातं येन भयं निवर्तेतेत्यर्थः, **शुचिस्मितेतिपाठे**
भगवत्स्तोत्रज्ञानार्थं तस्याः पातिव्रत्यादिधर्मो निरूपितः, अथेति भिन्नप्रक्रमे न तु वेदादिप्रकारेण, अन्यथा पौनरुक्त्यं स्यात् ॥२३॥

शरणं गता देवक्यष्टभिः स्तोत्रमाह, आधिदैविकमाध्यात्मिकमाधिभौतिकमिति भगवतो रूपत्रयमादौ निरूप्य शरणागमने
हेतुं चोक्त्वा प्रकृते रक्षां भगवत्स्वरूपाज्ञानं द्वयं प्रार्थयते, इदानीं मारणे युद्धार्थं प्रवृत्तावेव पूर्वज्ञानसदृशत्वात् प्राणा न स्थास्यन्ति,
अतस्तेन प्रकारेण रक्षा न कर्तव्या, प्रकारान्तरेण रक्षां प्रार्थयन्त्यज्ञानमपि प्रार्थयते, अन्यथा प्रथमपक्ष एव न स्यात्, रूपोपसंहारं
च प्रार्थयते, सर्वाधिक्ये सर्वद्वेषसम्भवात्, सर्वमारणं चाशक्यं, अलौकिके च शीघ्रमुपसंहारश्च स्यात्, अतः केवलं स्वार्थमुप-
संहारः, प्रार्थनाद्वयं तु प्रकृतोपयोगि, एवं प्रार्थनात्रयं स्वस्य गर्वाभावार्थं, इदं न जननरूपं किन्तु नटवदनुकरणरूपमिति भगवद-
वतारं निरूपयति ।

रूपत्रयं तथा हेतुः प्रार्थनात्रितयं तथा । नटत्वमितिविज्ञानं स्वस्य यादृक् तथोदितम् ॥ १ ॥

आदौ भगवानाधिदैविक इति वदन्ती स्वाभिज्ञानप्रमाणे प्रसिद्ध्या निरूपयति, इदं रूपं तदेव यत् सर्वैराधिदैविकत्वे-
नोच्यते, द्वयन्मल्लोकसिद्धं, अलौकिकं स्वाधिदैविकमेव, अन्यथा प्रमाणानामनुवादकत्वं स्यात्, अत इदं रूपं तदेव, किं तदित्या-
काङ्क्षायामाह **तत् यत्** प्राहुरिति, यत्तदोरानुपूर्व्येण निरूपणमाकाङ्क्षावैपरीत्येपि स्वानुभववदार्ढ्यार्थं, नन्वाधिदैविकमेतद्
भवितुं नार्हति वैलक्षण्यादित्याशङ्क्य वैलक्षण्यहेतुभूतान् धर्मानत्रैव साधयत्यव्यक्तमित्यादिनवभिः पदैः, नवधा हि जगत्, तद्वि-
लक्षणं ब्रह्म नवधा निरूप्यते, जगद्धर्माश्च तस्मिन् रूपे प्रतीयन्ते, तत्र“व्यक्तादीनि भूतानी”तिवाक्यादव्यक्तं मूलरूपं, व्यक्तं तु
जगत्, इदं तु व्यक्तमितिलोकप्रतीतिः, मूलभूतं त्वाद्यं भवति, इदं त्वाधुनिकं, जगच्च स्वरूपकृतं कालकृतं च वैलक्षण्यमुक्तं पदद्वयेन,
देशकृतं वैलक्षण्यं वदन्ती परिमाणेन तदाह ब्रह्मेति, “बृहत्त्वाद् बृंहणत्वाच्च ब्रह्म” मूलभूतं, जगत्तु परिच्छिन्नमबृंहितं च तथैवरूपं,
एवं सदंशेन वैलक्षण्यत्रयं निरूपितं, चिदंशेनापि त्रयमाह **ज्योतिर्निर्गुणं निर्विकारमिति**, “प्रकाशकं तच्चैतन्यं” जगत् प्रकाशयति,
अन्यथा जगदभिव्यक्तिर्न स्यात्, त्रिगुणात्मकं च जगत्, त्रिगुणातीतमेव हि कारणं भवति, गुणानामपि कारणत्वे भगवत्कारणता
न स्यात् स्वातन्त्र्याभावात्, सदंशा एव गुणा न चिति सम्भवन्ति, यत्रैव भूतेन्द्रियान्तःकरणानि तदेव सगुणं, तदेव कारणं भवति
यत् प्रपञ्चविलक्षणं, प्रपञ्चस्तूत्पत्त्यादिभावविकारयुक्तः, अतो निर्विकारमङ्गीकर्तव्यं, लौकिकानि च ज्ञानानि विकारयुक्तानि रूपादि-
गुणयुक्तानि चेन्द्रियादिभिश्च प्रकाश्यन्ते, विषयकृतं वैलक्षण्यमानन्दांशे निराकरणीयमित्येतदर्थमाह **सत्तामात्रमिति**, सत्ता विद्यमानता
कालत्रयाबाधितसत्ता वा, सर्वमेव हि जगत् सद्रूपमपि विशेषनामरूपधर्मवद् भवति, यावद्विशेषनिर्मुक्तं सामान्यं न भविष्यतीत्या-
शङ्क्य लौकिक एव विषय इयं व्याप्तिर्न त्वलौकिक इति सत्तमात्रमपि **निर्विशेषमित्याह**, अन्यथा पौनरुक्त्यं स्यात्, विशेषा हि
व्यावर्तकाः, मूलसत्तायां व्यावर्त्याभावात् किं विशेषेण ? कार्ये तु सा सर्वत्रानुस्यूतेति कार्यं न व्यावर्तनीयं, अन्यथा तस्य कारणतैव
न स्याद् घटपटयोरिव, “पूर्णमदः पूर्णमिद”मित्यादिश्रुतौ सर्वचेष्टारहितमेव कारणं भवति, कार्यं सर्वमेव चेष्टमानं, आकाशादेरपि
शब्दजननलक्षणा चेष्टा वर्तत एव, आवरणापगमे कार्यापगमवदाकाशापगमस्यापि दृष्टत्वादन्धकारवदीहा तत्रापि, ब्रह्मणि त्वावरका-
सम्भवादव्यवहार्यत्वाच्च निरीहत्वं सिद्धमेव, यद्यप्येकस्मिन्नपि विशेषणे सर्वे धर्माः क्रोडीकर्तुं शक्यन्ते तथापि नवधा वैलक्षण्यस्य
वक्तव्यत्वान्नव विशेषणान्युक्तानि, तादृशमिदमेव रूपं, नवविधानां प्राणिनां स्वदोषेणैव नवविधत्वप्रतीतिः, यथा भ्रमरिकादृष्ट्या
गृहीता भूमिरपि भ्रान्तेव दृश्यते तदपि तस्यैव दृष्ट्यैवमत्रापि ब्रह्मविदां दृष्ट्या भगवान् वर्णितगुण एव, अन्यथा तदभिव्यक्त्यर्थं
प्रयत्नं न कुर्युर्ब्रह्मादयोपि पश्चादुत्पन्नं न नमस्कुर्युः सायुज्यं चात्र न प्राप्नुयुरेतज्ज्ञानेन च सर्वज्ञा न भवेयुरेतन्निष्ठाश्च निर्गुणा न
भवेयुरेतद्भजनेन च सर्वविकाररहिता न भवेयुः सर्वेषु पदार्थेष्वेतं च न पश्येयुरेतज्ज्ञानेन च प्रपञ्चो न निवर्तेतैतत्कृपया च ब्रह्म-
निष्ठा न भवेयुः, अतोयमेतादृश एव, नन्वेतत् सर्वं सर्वज्ञान्युपास्यत्वे भगवतः सम्भवति न त्विदानीमेवाविर्भूतस्य तथात्वं वक्तुं
शक्यत इत्याशङ्क्याह **स त्वमिति**, यदेतादृशं तत् त्वमेव, तत्र हेतुर्**विष्णुरिति**, विष्णुर्हि पूर्वोक्तप्रकारेण सर्वोपास्यः, स एव
सर्वेषामधिदेवः, स एवाविर्भूत इति ब्रह्मवाक्यादवसीयते, नन्वेवमप्यंशावतारः स्यात् ततश्च मूलत्वाभावादुक्तं सर्वं बाधितमित्यत
आह साक्षादिति, ननु वाक्यं गौणमपि भवति स्तुतिपरमपि भवति तस्मात् कथं निर्णय इति चेत् तत्राहाध्यात्मदीप इति, अध्यात्मं
मदन्तःकरणं वस्तुतो जडं मुग्धं सर्वशास्त्रविहीनं तच्चेदेवम्प्रकाशयुक्तं त्वत्सान्निध्यात् तदेवास्य कारणमित्यवसीयते, आधिदैवि-
कस्यैवाध्यात्मप्रकाशजनकत्वात्, अतो मदनुभवेनापि भवानुक्तरूप एव, कार्यं चाव्यभिचारि लिङ्गम् ॥ २४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

इदानीं मारण इत्यादि, युद्धे भगवतैव तन्मारणसम्भवेपि पूर्वमुद्यतायुधेन बाला मारिता इत्यधुनापि तादृशतद्दर्शनं
पूर्वज्ञानसदृशं, तथा च तन्मात्रेणैव तथेत्यर्थः, **अन्यथेति**, जन्माज्ञानाभावे प्राणास्थितिरेव स्यादित्यर्थः, **न सिध्येदितिपाठे प्रथमः
पक्षो रक्षा** ॥ २४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अयं त्वित्यत्र पूर्वार्थमिति, लक्ष्यत इति, वैयाकरणमतेन वाक्ये शक्तिमङ्गीकृत्य पूर्वोक्तरीत्या कंसकर्तृकोदायुधाभिसरणसंसर्गरूपस्य शक्यार्थस्य सम्बन्धो गमनादाविति तादृशोभिप्रायोस्याजहत्स्वार्थया लक्ष्यते, 'तदवाचकत्वेपि तत्प्रतीतिजनकत्व'मितितात्पर्यलक्षणाङ्गीकारे तु तात्पर्यगोचरीक्रियत इति वार्थो बोध्यः ॥ २२ ॥

अथैनमित्यत्रेति तदर्थमिति, एवम्प्रकारकश्रीदेवक्याशयज्ञापनार्थं, तर्हीति, भगवन्निमित्तमेव ॥ २३ ॥

रूपं यत् तदित्यत्राष्टभिरिति, नन्वष्टभिः स्तोत्रोक्तौ पूर्वोक्तकारिकासु पञ्चभिरितिसङ्ख्योक्तिविरोध इति चेत्, अत्रेदं प्रतिभाति, पूर्वं 'द्वाभ्यां चैव तथा पर'मितिचकारसूचितेन तृतीयेनापि प्रार्थनं लभ्यते, पञ्चभिः स्तुतिस्तु टिप्पण्यामुपपादितैव, एवं सति त्रयमिदमपि तत्र सङ्गृहीतमिति न विरोध इति, अष्टानामर्थमाहुराधिदैविकमित्यादि, रूपत्रयं क्रमतस्त्रयाणां हेतुस्तुरीयस्य प्रकृत इत्यारभ्य पञ्चमस्येदानीमित्यारभ्य सिध्येदित्यन्तं षष्ठस्य, तत्तात्पर्यं टिप्पण्यामाहुर्युद्ध इत्यादि, रूपेत्यादि सप्तमस्य स्वस्येत्यादिकमष्टमस्य, तदेतत् कारिकायां सङ्गृह्णन्ति रूपेत्यादि, प्रार्थनात्रितयमिति, तच्चतुष्टयघटितं श्लोकत्रयं रूपादर्शनप्रार्थनस्य रूपोपसंहारप्रार्थनायामेव प्रवेशात् प्रार्थनात्रयं वा, विज्ञानमित्यादिकं त्वर्थचतुष्टये प्रत्येकमन्वेतीति बोध्यं, रूपं यत् तदित्यत्र स्वाभिज्ञानमिति, स्वस्य भगवत्प्रत्यभिज्ञानं, अन्यथेति, अस्यापि लोकसिद्धत्वे, आकाङ्क्षावैपरीत्येपीति, यत् प्राहुस्तद्रूपमित्याकाङ्क्षायामपि, वैलक्षण्यादिति, आधिदैविकादस्य वैलक्षण्यादित्यर्थः, अत्र वेति, जगत्सलक्षणत्वेन प्रतीयमान एवास्मिन् रूपे, कारणस्य गुणातीतत्वे युक्तिमाहुर्गुणानामित्यादि, कारणतेति, कर्तृता, तत्र हेतुः स्वालम्बाभावादिति, तथा च गुणानां कारणत्वे श्रुतिविरोध इति गुणातीतमेव कारणमित्यर्थः, न चितीति, ज्योतिरित्यनेन चिद्रूपत्वमुक्तं तद्विरुद्धाश्च गुणा न तत्र सम्भवन्तीत्यतोपि गुणातीतमेव कारणमित्यर्थः, प्रकृते सगुणत्वानुमापकमाहुर्यत्र वेत्यादि, तथा चानया व्याप्त्या 'इदं सगुणं भूतादिमत्त्वाज्जगद्वत् यन्नैवं तन्नैवं पुरुष'वदिति चिद्विरुद्धसाधकमनुमानं प्रदर्शितं, तेन सिद्धमाहुस्तदेवेत्यादि, उत्पत्त्यादीति, उत्पत्तिस्थितिप्रलयवृद्धिविपरिणामापक्षयाख्यषड्भावविकारयुक्त इत्यर्थः, प्रकृते सविकारत्वाद्यनुमापकमाहुर्लौकिकानीत्यादि, ज्ञानानीति, ज्ञानविषयाणि, इन्द्रियादिभिरिति, आदिपदेन सूर्यादिसङ्ग्रहः, परप्रकाश्यत्वानुमापकमेतत्, तथा च 'प्राकृतं ज्योतिरादिविरुद्धं विकारयुक्तत्वाद् रूपादिगुणयुक्तत्वादिन्द्रियादिप्रकाश्यत्वाच्च घटादिव'दितिप्रयोगो बोध्यः, नन्वानन्दांशे वक्तव्ये सत्तामात्रमिति किमित्युक्तमित्याकाङ्क्षायामाहुर्विषयेत्यादि, अत्र च सत्तापदेनोक्तरूपतया सन्नात्मैव सर्वशब्दवाच्य उच्यते, तथा च त्रैकालिकाबाधितसत्तामात्रत्वेन भूमरूपता बोधिता तेनानन्दांशेपि न विषयकृतं वैलक्षण्यमित्यर्थः, तर्हि निर्विशेषपदस्य किं प्रयोजनमित्यतस्तदवतारयन्ति सर्वमित्यादि, विशेषनामरूपधर्मवदिति, विशेषभूता ये नामादयस्तद्युक्तं, इयं व्याप्तिरिति, सामान्यत्वेन विशेषत्वेन व्याप्तिः, इतीति, एतज्ज्ञापनार्थं, अन्यथेत्यादि, तद्भिन्नभिन्नत्वे सति तदभिन्नत्वस्य मात्रपदार्थत्वात् सत्तामात्रपदेनैवाशेषराहित्यप्राप्ताविय व्याप्तिरलौकिके कुतो नेत्याकाङ्क्षायां, तत्र तदभावं व्युत्पादयन्ति विशेषा हीत्यादि, मूलसत्तायामिति, आत्मरूपायां सत्तायां, तस्य कारणतेति, मूलसतः समवायिता, निरीहपदं व्याकुर्वन्ति पूर्णमित्यादि, ननु कार्येपि न चेष्टा नियता आकाशादौ व्यभिचारादित्यत आहुराकाशेत्यादि, चेष्टा हि व्यापारः, ननु महाभाष्यकृता व्यापारश्चेष्टात्वेनाङ्गीकृतो न त्वन्यैरत आकाशे चेष्टाराहित्यं न कारणासाधारणलक्षणमित्यत आहुरावरणेत्यादि, आकाशापगमस्यापीति, आवरणकृतावितिशेषः, तथा च दीपचलनेन्धकारचलनवदाकाशेपि दृष्टानुरोधान्नैमित्तिकी चेष्टाङ्गीकार्या, अन्यथा तादृशप्रतीतेर्निर्विशेषत्वापत्तेः, न च सा भ्रम इति वाच्यं, किं तावता ? भ्रमत्वेपि सविषयत्वस्यावश्यकत्वात्, न च विषयोसन्नेव प्रतीयत इति वाच्यं, श्रौते मत आकाशस्य कार्यत्ववदव्यापकत्वस्यापि सत्त्वात्, अन्यथा 'ज्यायानाकाशा'दितिश्रुतिविरोधापत्तेः, एवं सिद्धेव्यापकत्वे तत्र क्रियाङ्गीकारोपि युक्त एवेति पूर्वोक्तप्रतीतेरभ्रान्तत्वमेव युक्तं, धियां बाधकं विना प्रमात्वस्यौत्सर्गिकत्वादिति, नन्वेवं सति ब्रह्मण्यपि चेष्टास्तु मिषत्त्वस्य तत्रापि श्रौतत्वादित्यत आहुर्ब्रह्मणीत्यादि, तथा च विरुद्धधर्माश्रयत्वादव्यवहार्यस्य तस्य सत्त्वेपि व्यवहार्यस्य तस्यासत्त्वान्निरीहत्वं सिद्धमेवेत्यर्थः, वैलक्षण्यस्येति, जगद्वैलक्षण्यस्य, तादृशमिति, नवविशेषणविशिष्टं, नन्वेकस्मिन्नपि विशेषणे सर्वधर्मसङ्ग्रहसिद्धौ किमिति नवानामुक्तिरित्यत आहुर्नानाविधेत्यादि, तस्यैवेति, भ्रमदोषदुष्टस्य, ननु भवत्वेवं तथाप्यत्रोक्तानां नवानां स्वरूपे प्रतीत्यभावात् कथं सिद्धिरित्याकाङ्क्षायां व्याप्तिमूलभूततर्कानुगृहीतानुमानेन सिद्धिरित्याशयेनाहुरेवमित्यादि, अन्यथेतिपदमग्रिमेषु वाक्येषु सम्बध्यते, तथा च भगवानव्यक्तो ब्रह्मादिभिस्तदभिव्यक्त्यर्थं प्रयत्नकरणाद् यन्नैवं तन्नैवं, आद्यः पश्चादुत्पन्नत्वेपि ब्रह्मादिभिस्तन्नमस्करणात्, ब्रह्म तस्य तत्र सायुज्यप्राप्तेर्यन्नैवं तन्नैवं, ज्योतिस्तज्ज्ञानेन तेषां सार्वज्ञ्यभवनाद् यदेवं तदेवं यन्नैवं तन्नैवं, गुणातीतस्तन्निष्ठानां निर्गुणभवनात्, निर्विकारस्तद्भजनेन सर्वविकारराहित्यात्, सत्तामात्रः सर्वेषु पदार्थेषु तेषां तद्दर्शनात्, निर्विशेषस्तज्ज्ञानेन प्रपञ्चनिवृत्तेर्यन्नैवं तन्नैवं, आनन्दमात्रो निरीह एतत्कृपया तेषां ब्रह्मनिष्ठत्वभवनाद् यन्नैवं तन्नैवम्, अत इति, उक्तविधानुमानेभ्यः, कालिकव्यभिचारमाशङ्क्य परिहरतीत्याशयेनाहुर्नन्वित्यादि, ब्रह्मवाक्यादिति, 'दिष्ट्याम्ब ते कुक्षिगतः परः पुमा'निति वाक्यात् ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

त्वमस्येत्यत्र ननु रक्षायाः कथं सङ्कर्षणकार्यत्वमित्यत आहुरिदमिति, देवान् लक्ष्यीकृत्येदं लोकरक्षणं तद्द्वेषिदैत्यवधादेव हेतोः सङ्कर्षणकार्यं, वधजन्यत्वादेतस्य सङ्कर्षणकार्यत्वमित्यर्थः, इदं व्युत्पादयन्ति नन्वित्यारभ्य वध इत्यन्तेन, सङ्कर्षणोधुना सर्वनाशकत्वेन तु न तिष्ठत्यतो देवानां रक्षको दैत्यानां निवारक इतिविभाग इत्यर्थः, तदाहेति, रक्षार्थं दैत्यनिवारणमाहेत्यर्थः, अत इति, चमूमारणादित्यर्थः, दैत्यवधो लोकरक्षार्थमेवातोधुना देवांशरक्षा सङ्कर्षणकार्यमित्यर्थः ॥ २१ ॥ अयं त्वसभ्य इत्यस्याभासे लौकिकस्येति, लौकिकः कंसकृतोपद्रवो बलिष्ठ इति भगवते ज्ञापनायेत्यर्थः ॥ २२ ॥ अथैनमित्यत्र देवक्याः स्मृतिप्रकारेण स्तुतौ हेतुमाहुः स्वबुद्ध्यति, स्त्रियाः श्रौतज्ञानेनाधिकारादितिभावः, आभासोक्तवाक्यार्थमुपपादयितुमाहुःस्तुत्वैवेति, कथं न निवर्तयतीति, भगवानितिशेषः ॥ २३ ॥ रूपं यत् तदित्यस्याभासे प्रसिद्ध्येति, प्रसिद्ध्या सहेत्यर्थः, यत् तत् प्राहुरित्यनेन प्रसिद्धिरुक्ता, स त्वं साक्षाद् विष्णुरित्यनेनाभिज्ञानमुक्तम्, अध्यात्मदीप इत्यनेन प्रमाणमुक्तमितिविभागः, व्याख्यान आवरणापगम इति, यथावरणस्य घटादेरपगमे चलने कार्यं तदन्तर्वर्ति जलादिकमपि चलति तथा जलाद्यभावे तदन्तर्वर्त्याकाशोपि चलत्यतोन्धकारवदाकाशेपीहास्तीत्यर्थः ॥ २४ ॥

(५) भगवदीयनिर्भयरामभट्टनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

देवकीस्तुतौ 'रूपं यत् तदि'त्यस्याभासे—

रूपत्रयं तथा हेतुः प्रार्थनात्रितयं तथा । नटत्वमितिविज्ञानं स्वस्य यादृक् तथोदितम् ॥ १ ॥

आधिदैविकादि रूपत्रयं तथा 'मर्त्यो मृत्युव्याले'त्यनेन शरणागमने हेतुः प्रार्थनात्रितयं 'स त्वं घोरा'दित्यादिभिस्त्रिभिः, नटत्वमितिविज्ञानं 'विश्वं यदेव तदि'त्यनेन भगवज्जन्मनो नटवदनुकरणत्वज्ञानमित्यष्टभिर्देवकीस्तुतिः ॥ २४ ॥

बुभुत्सुबोधिका

त्वमस्येत्यत्र सङ्कर्षणात्मकमिति वासुदेवकार्यम् । सङ्कर्षणकार्यमिति रक्षणस्य तद्द्वेषिदैत्यहननजन्यत्वेन कार्यकारणयोरैक्यात् । सर्वज्ञतेति अनागतज्ञानं सर्वज्ञतान्तर्गतम् । तस्य वसुदेवस्य । आर्षज्ञानमिति ऋषेर्मन्त्रद्रष्टुरिदमार्षम् । मन्त्राः लीलाप्रतिपादका अपि ॥ २१ ॥

अयं त्वित्यत्र लौकिकस्येति लौकिकः कंसकृतोपद्रवो बलिष्ठः विशुद्धसत्त्वत्वे शूरत्वेपि विद्योपमर्दोऽविद्ययेति भगवते ज्ञापनायेत्यर्थः । भयमविद्याकार्यं, तस्मात् । 'तु'शब्द इति पूर्वार्धव्यावर्तने शक्तः । अज्ञाप्य इति ज्ञापयितुमयोग्यः कंसोसभ्यत्वात् । न इति बहुवचनं सर्वाभिप्रायेण । वर्तमानेतिफक्किका नातिप्रयोजना । पूर्वश्लोके आर्षज्ञानस्योक्तत्वाद् वसुदेवस्य । अस्येति वसुदेवस्य । मारणीय इति शङ्कायायुधधारित्वात् । गन्तव्यमिति शिशुर्भूत्वा मां प्रेरयित्वा गन्तव्यम् । लक्ष्यत इति अर्थाज् ज्ञायते । ग्रन्थाच्च न्यूनपूरणाद् वा ज्ञायते ॥ २२ ॥

अथैनमित्यत्र प्रार्थयितुमिति 'प्रार्थिते वा ततः किं स्यात् स्वाम्यभिप्रायसंशया'दिति योगविषयं भक्त्याविर्भूतपुरुषोत्तमस्य न तु ब्रह्मविद्याविषयमिति ज्ञापितम्, देवक्या ब्रह्मविद्यात्वात् । प्रथमत इति शरणगमनात् प्रथमतः । पदचतुष्टयार्थमाहुः स्वस्यैवेत्यादि । षड्भिः श्लोकैः विदितस्य ब्रह्मत्व उपपादिते आत्मजादिपदासङ्गतिर्ब्रह्मविद्यादेवकीं प्रति तद्वारणाय भिन्नप्रक्रमार्थकाथशब्दाभिप्रायेण पदचतुष्टयं सहेतुकं विवृतम् । स्वस्यैवेत्येवकारो'थ'शब्दस्य भिन्नप्रक्रमार्थत्वात् वेदादिरूपवसुदेवव्यावृत्त्यर्थः । 'वीक्ष्ये'त्यस्यार्थः ज्ञातवतीति । तथा बुद्धेरिति 'वैष्णवीं व्यातनोन् मायां पुत्रस्नेहमयी'मिति वाक्यात् । तया तामस्याऽपुत्रेपि पुत्रत्वज्ञानात् । न तु 'स्त्रीशूद्रद्विजजातीनां त्रयी न श्रुतिगोचरे'ति ज्ञानाभावात् । 'महापुरुषे'त्यस्याभासमाहुः परमित्यादि । चतुर्भुजादीति आदिना श्रीवत्सलक्ष्मादि । इति तदर्थमिति इत्येवं श्रीदेवक्याशयज्ञापनाय । देवक्याः स्मृतिप्रकारेण स्तुतौ हेतुमाहुः स्वबुद्ध्येति । स्त्रियाः श्रौतज्ञाने नाधिकार इति भावः । 'उपाधाव'दित्यस्य 'प्रपद्य' इति वक्ष्यमाणैकवाक्यतयार्थमाहुः शरणं गतेति । यथा प्रथमस्कन्धे पृथा उपधावनानन्तरं शरणं गता । तत्र शरणं कार्पण्यरूपम् । अत्रापि तदेव । शरणमुपोपसर्गार्थः । उप दाक्षिण्ये पूजायां वा विश्वकोशात् । दाक्षिण्यं पूजा वा शरणम् । धाव् गतिशुद्ध्योः । भ्वा० उ० से० । आभासोक्तवाक्यार्थमुपपादयितुं स्तुतिमाहुः स्तुत्वैवेति । ब्रह्मविद्यात्वादेवकारः । गमिष्यतीति चतुर्थश्लोके । भीतेति ब्रह्मविद्यात्वादिति भावः । निवर्तयतीति भगवान् अभयं मोक्षं कथं न ददातीत्यर्थः । येनेति साधनेन । विस्मय आश्चर्यरसः । 'तमद्भुत'मित्यत्रोक्तोद्भुतरसोत्र स्मारितः । विस्मयः स्थायिभावः । चमत्कारदर्शनस्पर्शनस्मरणजनितोऽपरिपूर्णो मनोविकारो विस्मयः । 'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्सा विस्मयश्चे'ति स्थायिभावाः प्रकीर्तिताः' । 'स्थायिभावो रसः स्मृतः' परं तु परिपूर्णः । 'चित्रं महानेष बतावतारः क्व कान्तिरेषाभिनवैव भङ्गिः, लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः' इत्यत्र विभावादयः । नायकवचनम् । एष पुरुषः महान् विकाररहितः चित्रम् । बत हर्षे । एषा कान्तिः क्व ? न कुत्रापि । प्रकारोभिनव एव । धैर्यं लोकोत्कृष्टम् । अहो प्रभावः । आकृतिरपि का ? अपूर्वैव । ब्रह्मण एष विषयसर्गः

विषयसृष्टिर्नूतनः । अत्र लोकोत्तरवस्तुदर्शनादिर्विभावः । नेत्रविकासाद्यनुभावः । हर्षादि व्यभिचारी । विस्मयस्थायिभावोद्भुतरसः । इतिसरस्वतीतीर्थः । एवं प्रकृतेपि । भङ्गिः, तत्र गमनोपवेशनदर्शनादिगतसौन्दर्यातिशयस्येति विस्तारिकाकृत् । तस्याश्रया । 'स्थायिभावो रसः स्मृतः' इति रसशास्त्रे । 'अभिसरत्युदायुध' इत्युक्तं ततश्चो 'पाधावत्कंसा' दित्येकं पदमतः क्रियापदाकाङ्क्षाया 'मथ'शब्दमन्ते भूत्वा भिन्नप्रक्रमस्तवनभिन्नप्रक्रमस्तस्मिन् सत्य 'स्तौ' दितिक्रियापदमर्थाल्लब्धमिति तेनान्वयो न तु भिन्नप्रक्रमे वेदादिप्रकारेण तत्र क्रिया नाधिकार इति । अन्यथेति 'उपाधावत्कंसा' दित्येकपदाभावे 'उपाधाव' दित्यस्या 'थैनमस्तौदवधार्य पूरुष' मित्यत्रोक्तेना 'स्तौ'दित्यनेन पौनरुक्त्यं स्यात् ॥ २३ ॥

रूपं यत् तदित्यत्र अष्टभिरिति श्लोकैः । 'पञ्चभि'रर्थैः । अर्थानां संनिवेशादन्यत्र । अष्टानां स्वरूपमाहुः आधिदैविकमित्यादिना । रूपत्रयं क्रमतस्त्रयाणां श्लोकानाम् । तुरीयस्यार्थमाहुः शरणागमने हेतुमिति । हेतुस्तुरीयस्य । 'मर्त्यो 'मृत्युव्यालभीत' इत्यस्य 'पञ्चभि' रित्यत्रापि तुरीयस्यार्थस्य । प्रकृत इत्यारभ्य पञ्चमस्य । 'पञ्चभि'रित्यत्राधिदैविकार्थस्य । इदानीमित्यारभ्य सिध्येदित्यन्तं षष्ठस्य । 'पञ्चभि'रित्यत्राध्यात्मिकस्यार्थस्य । 'मधुसूदने'तिपदात् । 'कृष्णस्तु भगवान् स्वय'मित्युक्तस्याधिदैविकस्याधिभौतिकवसुदेवमनःसम्बन्धात् आध्यात्मिकत्वम् । अत्र टिप्पण्याम्, तन्मारणेति आकाशवाणीप्रामाण्यात् कंसमारणसंभवे । पूर्वज्ञानेति सुबोधिनीं विवृण्वन्ति स्म पूर्वमुद्यतेति । तादृशतद्दर्शनमिति उद्यतायुधकंसदर्शनम् । आकाशादिकृतं मायिकं वा । तथेत्यर्थ इति प्राणा न स्थास्यन्तीत्यर्थ इत्यर्थः । सुबोधिनी, प्रकारान्तरेणेत्यादिः प्रकारान्तरं जन्माज्ञानरूपं, तेन । प्रार्थयन्ती देवकी । अज्ञानं 'मा विद्या'दित्यनेन षष्ठ श्लोके प्रार्थयत इत्येवं स्पष्टार्थेत्यन्यथेतिसुबोधिनीं विवृण्वन्ति स्म अन्यथेतीति । जन्माज्ञानेति'मा विद्यादित्यनेन जन्माज्ञानोपस्थित्या तदभाव उक्तः, न तु जन्मज्ञान इत्युक्त शक्यतावच्छेदकलाघवेपि । प्राणास्थितिरिति भगवतो युद्धार्थं प्रवृत्तावित्येव । अयमेव प्रथमपक्षः । रक्षेति इदानीमुभयोरेकतरस्य कंसस्य । सुबोधिन्याम्, रूपेत्यादि सप्तमस्य श्लोकस्य । 'पञ्चभि'रित्यत्राधिभौतिकस्यार्थस्य । तत्रैव सुबोधिन्यां स्पष्टम् । अत्राप्याधिभौतिकत्वं स्पष्टयन्ति स्म सर्वाधिक्य इत्यादिना । अलौकिक इति प्रार्थनाविषयेऽलौकिकत्व उपसंहृते लौकिकसमानेऽलौकिक इत्यर्थः । शीघ्रमिति संस्काराभावेपि । चे इत्यत्र इ इत्यस्याश्चर्यार्थकस्य छेदः । स्वार्थमिति स्वस्याः ब्रह्मविद्याया विषयत्वार्थम् । आधिभौतिकम् । वसुदेवमनोपि ब्रह्मविद्या । मन ज्ञान इति धातुपाठात् । 'यतो वाचो निवर्तन्त' इतिश्रुतेः । द्वयमिति 'स त्वं घोरा'दिति 'जन्मत' इति श्लोकद्वयोक्तं द्वयम् । प्रकृतेति प्रकृतायां भयकृतस्तुतौ । स्वस्येत्यादिकोष्टमस्य श्लोकस्य । 'पञ्चभि'रित्यत्र पञ्चमस्यार्थस्य । स्वस्येति देवक्याः । भगवत्सेवानुकूलत्वलक्षणं पुंस्त्वं विवक्षितम् । तदेतत् कारिकायां सङ्गृह्णन्ति स्म रूपत्रयमित्यादि । रूपत्रयमाधिदैविकादि । प्रार्थनात्रितयं श्लोकत्रयात्मकम् । विज्ञानमित्यादिकं चतुष्टये प्रत्येकमन्वेति । स्वस्येति देवक्याः, पुंस्त्वं भगवत्सेवानुकूलत्वलक्षणम् । यादृगिति ब्रह्मविद्यासामग्रीं न्यूनां कृत्वा भक्तिमार्गीयसामग्रीप्रबलविषयकम् । तेन चतुर्भुजादिरूपोपसंहारप्रार्थनेपि न चतुर्भुजादिरूपे गोपालतापिनीयादिब्रह्मविद्यानिरूपिते काचित् क्षतिः । स्वामीति 'स त्वं साक्षाद्विष्णु'रित्यभिज्ञानम् । 'अध्यात्मदीप' इत्यनेन प्रमाणम् । आधिदैविक इत्यर्थात् । आधिदैविको भगवान् प्रमाण, 'अत्र प्रमाणं भगवा'निति वाक्यात् । अन्यत्र ज्ञानमात्रं शाब्दं वा भवतु, न त्वभिज्ञानं, उक्तश्रुतेः । प्रसिद्ध्येति प्रसिद्ध्या सह इत्यर्थः । 'यत् तत् प्राहु'रित्यनेन प्रसिद्धिरुक्ता । द्वयमिति आध्यात्मिकमाधिभौतिकं च । आध्यात्मिकस्याधिदैविकाधिभौतिकसम्बन्धजन्यत्वात् । अन्यथेति अस्यापि लोकसिद्धत्वे, 'योध्यात्मिकोयं पुरुष' इतिवाक्यात् । प्रमाणानामिति आधिदैविकादिशब्दानाम् । अनुवादकत्वमिति सिद्धस्य कथकत्वम् । तदेवेति प्रत्यभिज्ञा । आनुपूर्व्येणेत्यादि यत्तदोर्नित्यसम्बन्ध इत्यानुपूर्व्येण । आकाङ्क्षावैपरीत्यं 'रूपं तत् यत् प्राहु'स्तद्रूपमित्येवम् । स्वस्य देवक्या अनुभवः स्वबुद्ध्या स्मृतिजनकः तस्य दार्ढ्यार्थम् । अनुभवदार्ढ्ये स्मृतिर्दृढा भवति भगवद्विषयिणी । वैलक्षण्यादिति आधिदैविकादस्य वैलक्षण्यात् । अत्रैवेति जगत्सलक्षणत्वेन प्रतीयमान एवास्मिन् रूपे । नवधा हि जगदिति पृथिव्यप्तेजोवाय्वाकाशमनोबुद्ध्यहंकारजीवा इति नवधा, 'भूमिरापोनलो वायु'रित्यादिवाक्यात् । 'तत्त्वान्युक्तानि मे नवे'ति श्रीभागवते । आत्ममायागुणास्त्रयः, विस्तारे नव, एकैकस्य त्रैविध्यात् इति वा । यद्वा । सच्चिदानन्दानां त्रयाणां विस्तारो नव । मूलरूपमिति 'अक्षरात् सौम्य विविधा भावाः प्रजायन्त' इति श्रुतेः । 'पुरुषोत्तमेऽव्यक्तत्वं समाकर्षा'दित्यधिकरणोक्तम् । आद्यमिति सत्यज्ञानानन्तानन्दम् । जगच्चेति इदं त्वाधुनिकमिति लोकप्रतीतिरित्यनेनान्वयः । उक्तमिति अव्यक्तं स्वरूपलक्षणकं द्वेधापि आद्यं कालकृतं परमित्येवमुक्तं 'अदृश्यत्वादिगुणको धर्मोक्ते'रित्यधिकरणे च । वदन् परिमाणेनेति शब्दो वदन् परममहत्परिमाणेन । तथैव रूपमिति इति लोकप्रतीतिरित्यन्वयः । तदिति प्रसिद्धं सूर्यादिनिष्ठम् । सूर्यादिनिष्ठतेजसो भगवदीयत्वे युक्तिमाहुः अन्यथेति । तेजसो भगवदीयत्वाभावे जगत्त्वावच्छेदेन जगदभिव्यक्तिर्न स्यात् । दशाङ्गुलं बिम्बमिति । तथा च तेजो भगवदीयं न स्यात् जगदभिव्यक्तिर्न स्यादित्यन्यथाज्ञानरूपा युक्तिः । ननु कारणवैजात्ये कार्यं कथं त्रिगुणमित्याकाङ्क्षायां समवायिकारणवैजात्ये तथा न तु कर्तृत्वे इत्याहुः गुणानामित्यादि । गुणानां कारणत्वं साङ्ख्यमते । सिद्धान्तेपि 'आत्ममायामृते' इति वाक्यात् । भगवत्कारणतेति भगवतः कर्तृता । तत्र हेतुः स्वातन्त्र्येति । गुणाधीनत्वेन तथा । 'स्वतन्त्रः कर्ते'ति पाणिनिसूत्रात् । ब्रह्मविद्यारूपदेवक्याः स्तुतिर्वेदान्तरूपापि । तथा च गुणानां कारणत्वे वेदान्तश्रुतिविरोध इति गुणातीतमेव कारणमित्यर्थः । निर्गुणं विवृण्वन्ति स्म सदंशा इति । न चितीति ज्योतिरित्यनेन चिद्रूपत्वमुक्तम् तद्विरुद्धा गुणा नात्र तत्र सम्भवन्तीति गुणातीतमेव कारणमित्यर्थः । कारणस्य स्वमतेन निर्गुणत्वमाहुः तदेवेति । प्रपञ्चविलक्षणमिति निर्गुणमित्यर्थः ।

रूपं त्वाधिदैविकभूतेन्द्रियादिरूपम्। निर्विकारं विवृण्वन्ति स्म प्रपञ्चस्त्वित्ति। भावविकाराः षट्, जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते नश्यतीति। अत इति प्रपञ्चविलक्षणत्वात्। तदेवाहुः लौकिकानीति। इदं तु प्रपञ्चविलक्षणम्। इन्द्रियादिभिरिति। आदिपदेन सूर्यादिचक्षुराद्याधिदैविकसङ्ग्रहः। नन्वानन्दमात्रे वक्तव्ये 'सत्तामात्र'मिति किमित्युक्तमित्याकाङ्क्षायामाहुः विषयकृतमित्यादि। यद्वा। प्रपञ्चवैलक्षण्येऽङ्गीकृते आनन्दवैलक्षण्यं प्राप्तं वारयन्ति स्मेत्याहेत्याहुः विषयकृतमिति। निराकरणीयमिति 'आनन्दं ब्रह्मणो विद्वान्' इति 'आनन्दमेतज् जीवस्ये'ति श्रुतिद्वयदर्शनादिति भावः। मात्रच्प्रत्ययः कार्त्स्न्ये इत्याहुः सर्वमेवेति। कृत्स्नमेव। अपीति अपिना चिद्रूपं आनन्दरूपं च। तेनानन्देपि न विषयकृतं वैलक्षण्यमिति भावः। आद्यपदेनानन्दमयस्य मूलभूतत्वात्। 'सत्तामात्र'मित्युपलक्षणम्। 'सत्यात्मकं त्वां शरणं प्रपन्ना' इत्यत्र सत्यपदवत्। तेन व्यष्टिसत्तायां कारणत्वभरः। 'सदेव सोम्येदमग्र आसी'दिति छान्दोग्यात्। तेन स्त्रीत्वेन स्मृत्या स्तुतिः, विद्यात्वेनोपनिषदनुसारिणी स्तुतिः। आनन्दांशे जगद्वैलक्षण्यं निराकृतं, अधुना जगद्वैलक्षण्यार्थं जगति वैलक्षण्यं विशेषरूपमग्रिमविशेषणप्रतियोगिरूपमाहुः विशेषनामेति। व्यावर्तकविशेषपदार्थनामरूपधर्मवद् भवति परमाण्वंशे। बृहदारण्यकात् षष्ठस्कन्धार्थेन विशेषदर्शनं भगवति षष्ठस्कन्धार्थवैलक्षण्यार्थम्। षष्ठस्कन्धे प्रकरणत्रयम्, नामप्रकरणं रूपप्रकरणं क्रियाप्रकरणं च, षष्ठस्कन्धार्थः पोषणम्, 'पोषणं तदनुग्रह' इतिवाक्याद् विषयतासम्बन्धेन जगद्वृत्त्यनुग्रहात् आश्रयतासम्बन्धेन नामरूपकर्मवान् भगवान् विलक्षणः। जीवे विशेषकर्म भगवति सामान्यं कर्मेति बोध्यम्। एवं सर्वमित्यादिफक्किकाभासे तात्पर्यार्थाभावदर्शनाद् व्याख्याता जगदानन्दस्यावैलक्षण्यार्थम्। आवृत्त्या व्याख्यायते। तर्हि मात्रचोवधारणार्थत्वमपीति तस्याङ्गीकारे निर्विशेषपदस्य किं प्रयोजनमित्यतो 'निर्विशेष' पदमवतारयन्ति स्म सर्वमित्यादि। सामान्यमिति सत्तारूपं नित्यमेकमनेकानुगतं सामान्यं न भवति किन्तु ब्रह्म। इयं व्याप्तिरिति सामान्यत्वेन विशेषवत्त्वेन व्याप्तिः। सत्ता विशेषवती, सामान्यत्वात्, घटसत्तावदित्यनुमानम्। इतीति एतज्ज्ञापनार्थम्। साध्यतावच्छेदकसम्बन्धभेदात्। सत्तामात्रं सामान्यत्वहेतुमदपि साध्याभाववदित्याहेत्यर्थः। अन्यथेत्यादि अन्यथा उक्तव्याख्यानाभावे। सत्तामात्रनिर्विशेषयोः पौनरुक्त्यं स्यात्। साध्याभावोपि सत्तामात्र एवेत्याहुः विशेषा हीति। नामरूपधर्मरूपाः। हीति 'चरमः सद्विशेषाणां' इत्यत्रापि विशेषा व्यावर्तकाः। मूलसत्तायामिति आत्मरूपायां सत्तायाम्। तथा च विशेषवत्त्वं चित्यानन्दे चेति भावः। व्यावर्त्यसत्त्वात्। सत्तावन्तस्त्रयस्त्वाद्या इति सामान्ये सत्ताभावाद् धर्माभावप्रयुक्तो नामरूपाभावः। वाङ्निवृत्तिश्रुतेः। आद्याः द्रव्यगुणकर्मपदार्थाः सामान्यसमवायविशेषाभावेषु। विशेषेणेति व्यावर्तकेन। कार्यं न व्यावर्तनीयमिति सत्तया कार्यं न व्यावर्तनीयम्। घटत्वद्रव्यत्वादिना तु व्यावर्तनीयम्। क्वचित् कार्यं न कर्तव्यवर्तयमिति पङ्क्तिः। सा यथा लिखितपाठकस्य भाष्ये पाठकाधमेषु पाठात् बाहुलकाद् व्याकृता। अधुना जन्मप्रकरणे फले परोक्षातिपरोक्षवादानुक्तेः परोक्षवादमाहुः कर्तव्यवर्तयमिति। अतिपरोक्षवादः। कर्तं छिन्नं तस्मान् न व्यावर्तनीयमित्यर्थः। काना—न्यक्षरयोरलुखरति (?) परोक्षवादार्थम्। कर्तव्यवर्तवृतु वर्तने क्विप्। इ अम् अव्ययद्वयम् आश्चर्ये प्रसिद्धौ चेति परोक्षवादः। कर्तव्ये वर्तनीयमित्यस्य। अन्यथेति सत्तायाः कार्यवैलक्षण्ये। तस्य कारणेति मूलसत्त्वसमवायिता। 'निरीह'पदं व्याकुर्वन्ति स्म पूर्णमित्यादि। चेष्टमानमिति 'अचेतनत्वेपि क्षीरवच्चेष्टितं प्रधानस्ये'ति साङ्ख्यसूत्रात् प्रधानचेष्टा। ननु कार्येपि न चेष्टा नियता, आकाशादौ व्यभिचारादित्यत आहुः आकाशेत्यादि। आदिना जडलोहादिकमभिमन्त्रितम्। चेष्टा व्यापारः। महाभाष्येपि। ननु नैयायिकैश्चेष्टात्मधर्मो व्यापारो जडधर्म इत्युच्यत इत्याकाशे चेष्टाराहित्यं न कारणासाधारणलक्षणमित्यत आहुः आवरणेति। घटाद्याकाशावरणस्य घटादेर्गमने सर्वक्रियारूपे गमने कार्यापगमे घटादिनाशे तन्निष्ठाकाशे साकारे साकारत्वापगमवत्। तथा च चेष्टात्वव्यापारत्वजातिद्वयकल्पने गौरवमिति भावः।

अयं दृष्टान्त उत्तरत्र। आकाशापगमस्यापीति आवरणनिवृत्ताविति द्रष्टव्यम्। अन्धकारवदिति सप्तम्यन्ताद् वतिः। दीपचलनेन्धकारवत्। तथा च दीपचलनेन्धकारचलनवदाकाशेपि घटाकारे दृष्टानुरोधान् नैमित्तिकी चेष्टाङ्गीकार्या। अन्यथा घटाद्याकाराकाशप्रतीतेर्निर्विषयत्वापत्तेः। न च सा भ्रम इति वाच्यम्। भ्रमत्वेपि सविषयत्वस्यावश्यकत्वात्। आकाशस्य सर्वगतत्वात्। न च विषयोऽसन्नेव प्रतीयत इति वाच्यम्। श्रौते मते आकाशस्य कार्यत्ववदव्यापकत्वस्यापि सत्त्वात्। अन्यथा 'ज्यायानाकाशा'दितिश्रुतिविरोधापत्तेः। एवं सिद्धेऽव्यापकत्वे तत्र क्रियाङ्गीकारोपि युक्त एवेति पूर्वोक्तप्रतीतेरभ्रान्तत्वमेव युक्तम्। धियां बाधकं विनौत्सर्गिकत्वादिति। नन्वेवं सति ब्रह्मण्यप्याकाशशरीरे चेष्टास्तु, मिषत्वस्य तत्रापि श्रौतत्वादित्यत आहुः ब्रह्मणीत्यादि। आवरकेति आकाशवद् घटाद्यावरकासम्भवात्। 'आकाशवत् सर्वगत' इत्याकाशदृष्टान्तादावरणसम्भवादाहुः अव्यवेति। जगज्जन्मादिकर्तृत्वेन वेदान्ते व्यवहार्यत्वं, साङ्ख्ये तु 'असङ्गोयं पुरुष इती'ति सूत्रादव्यवहार्यत्वात्। 'प्रधानाज्जगज्जायत इती'ति साङ्ख्यसूत्रात्। प्रधानस्य व्यवहार्यत्वात्। एकस्मिन्निति यथाऽव्यक्ते नवधर्माणां क्रोडीकरणं पातङ्गिकरणम्। 'क्रोडः शूकरपातङ्ग्यो'रिति विश्वः। पतदङ्गः पतङ्गः शकन्ध्वादिः। तस्यापत्यं पातङ्गिः अत इञ्। पतङ्गार्भककरणम्। पृथिव्यामिदं सर्वमिति। अव्यक्तं प्रकृतिः पृथ्वीः। ॐ। एवमाद्ये नवधर्माणां क्रोडीकरणं मूलकारणत्वात् सत्तारूपाणाम्। आद्यः बुद्धिः। आत्मत्वात् ॥ १ ॥ एवं ब्रह्मणि नवधर्माणां क्रोडीकरणम्। 'मनोमात्रमिदं ज्ञात्वे'ति वाक्यात्। ब्रह्म मनः। 'आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धि'ष्विति विश्वात् ॥ २ ॥ एवं ज्योतिषि नवधर्माणां क्रोडीकरणम्। 'ब्रह्म तर्हि अग्निः' इति सुबोधिन्याम् ॥ ४ ॥ एवं निर्गुणे, नवधर्माणां क्रोडीकरणम्। 'सर्वाणि इमानि भूतानि आकाशात् समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशः परायण'मिति छान्दोग्यात्। निर्गुणम् आकाशः। 'आकाश-

शरीरं ब्रह्मेति श्रुतेः। 'नीरूपो नील आकाश' इति प्रस्थानरत्नाकरग्रन्थे। ५। तृतीयपञ्चमाङ्कव्यत्यययो वा। एवं निर्विकारे नवधर्माणां क्रोडीकरणम्। 'आपमापामपः सर्वा' इति श्रुतेः। आपः विकारो शुद्धिः तद्रहिताः ॥ ६ ॥ एवं सत्तामात्रे नवधर्मक्रोडीकरणम्। अतिदेशाधिकरणे प्राणश्रुतेः प्राणैर्भूयत इति भावप्रत्ययात् ॥ ७ ॥ एवं निर्विशेषे नवधर्मक्रोडीकरणम्। निर्विशेषा निराकारा जीवाः। नामरूपधर्मरहिता वा। तत्र नवधर्माः शरीरद्वारा प्रसिद्धाः। 'नैव किञ्चित् करोमी'ति वाक्यात् ॥ ९ ॥ एवं निरीहे नवधर्मक्रोडीकरणम्। निरीहोऽहंकारः। अहंकारी सर्वत्र न गच्छतीति। 'ततोहं नामाभव'दिति पुरुषविधब्राह्मणश्रुतेः प्रथमकार्ये नवधर्मक्रोडीकरणं युक्तम् ॥ ८ ॥ अत्र 'भूमिरापो नलो वायुः खं मनोबुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा, अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्, जीवभूतां महाबाहो ययेदं धार्यते जग'दिति सप्तमे ज्ञानविज्ञानयोगाध्याये। वाक्ये अनुसन्धेये। इमे पुरुषोत्तमयोगाध्याये योक्तव्ये। पुरुषोत्तमजन्मप्रकरणात्। तथाहि। 'यो मामेवमसंमूढो जानाति पुरुषोत्तमम्; स सर्वविद् भजति मां सर्वभावेन भारते'त्यत्र। 'एवं' नाम क्षराक्षरोत्तमत्वेन। तत्र क्षराक्षरयोर्नवधात्वम्, इति पुरुषोत्तमसम्बन्धस्तयोः। प्रकृतिर्यदि स्वरूपम्, तदात्मसृष्टिः। यदा तु माया तदा पौराणी क्रमसृष्टिरिति ज्ञेयम्। वैलक्षण्यस्येति जगद्वैलक्षण्यस्य। वक्तव्यत्वादिति अत्रैवाग्रे वक्तव्यत्वात्। तादृशमिति नवविशेषणविशिष्टम्, स्वदोषेणैवेति इच्छाभावात् दिव्यचक्षुराद्यदानाच्च करणदोषेण। सर्वभोग्यसुधाया अपि तादृशविषयत्वेनाभावादेवकारः। नन्वेकस्मिन्नपि विशेषणे सर्वधर्मसङ्ग्रहसिद्धौ किमिति नवानामुक्तिरित्यत आहुः नवविधत्वेति। इयं भ्रमरूपा। आनन्दमात्रे गीतोक्तभूमित्वादिप्रकारेण ज्ञानात्। भ्रमरिकेति दृष्टिरूपकरणदोषः। तस्यैवेति करणविषयान्यतरदोषदुष्टस्यैव। इतरयोगव्यवच्छेदकैवकारः। एवेति न तु नवधात्वविशिष्टः। ननु भवत्वेवम्, तथाप्यत्रोक्तानां स्वरूपे प्रतीत्यभावात् कथं सिद्धिरित्याकाङ्क्षायां वक्ष्यमाणव्याप्तिमूलभूततर्कानुगृहीतानुमानात् सिद्धिरित्याशयेनाहुः एवमत्रापीत्यादि। अन्यथेतिपदमग्रेपि सम्बध्यते।

तथा च भगवान् अव्यक्तः ब्रह्मादिभिस्तदभिव्यक्त्यर्थं प्रयत्नकरणात्, यन्नैवम् तन्नैवम्, घटादिवत्। भगवान् आद्यः पश्चादुत्पन्नत्वेपि ब्रह्मादिभिस्तन्नमस्करणात्। यन्नैवं तन्नैवम्, घटादिवत्। भगवान् ब्रह्म, ब्रह्मादीनां तत्र सायुज्यप्राप्तेः। यन्नैवं तन्नैवं, मायिकघटादिवत्। भगवान् ज्योतिः तज्ज्ञानेन ब्रह्मादीनां सार्वज्ञ्यभवनात्। यदेवं तदेवं धूर्जटिवत्। यन्नैवं तन्नैवं, विष्णुमित्रवत्। भगवान् गुणातीतः तन्निष्ठानां निर्गुणभवनात्, यदेवं तदेवं व्रजभक्तवत्, यन्नैवं तन्नैवं घटादिवत्, भगवान् निर्विकारः तद्भजने सर्वविकारराहित्यात्। यदेवम् इत्यादि पूर्ववत्। भगवान् सत्तामात्रः सर्वेषु पदार्थेषु तेषां तद्दर्शनात्। यन्नैवं तन्नैवं घटसामान्यवत्। भगवान् निर्विशेषः, तज्ज्ञानेन प्रपञ्चनिवृत्तेः। यन्नैवं तन्नैवं घटादिवत्। आनन्दमात्रो निरीहः एतत्कृपया तेषां ब्रह्मनिष्ठत्वभवनात्। यन्नैवं तन्नैवं प्रेरितघटादिवत्। अत इति उक्तविधानुमानेभ्यः। सम्भवतीति किन्तु भक्तभजनीयत्व एव सम्भवति। 'यो मामेवमसंमूढो जानाति पुरुषोत्तमं स सर्वविद् भजति मां सर्वभावेन भारत, इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारते'ति पुरुषोत्तमयोगाध्यायवाक्याभ्याम्। 'सर्वभावेने'त्यस्य सर्वात्मभावेनेत्यप्यर्थः। कालिकव्यभिचारमाशङ्क्य परिहरतीत्याशयेनाहुः नन्विदानीमित्यादि। न त्वनवतारकालिकस्वरूपस्येति तद्योगव्यवच्छेदक एवकारः। आविर्भूतस्येति कालात्मनः। शक्यत इति तथा च कालिकात्मनि सङ्कर्षणव्यूहेषु नैतादृशत्वस्य व्यभिचारः। विशेषेणाभितश्चरणम्। कालिकानवतारूपे ज्योतिराद्यधिकरणोक्ते कस्मिंश्चित् प्रसिद्धव्यभिचारः साध्याभाववद्वृत्तित्वरूपः। तत्त्वमेवेति प्रत्यभिज्ञा। सेयं दीपमालिकेतिवत्। तत्ताइदंताप्रकारकं ज्ञानं प्रत्यभिज्ञा। अयमर्थः। शब्दार्थयोर्द्वितीयाध्यायोक्तयोः कालात्मनोरैक्यं औत्पत्तिकसम्बन्धात्। युष्मच्छब्दार्थः प्रद्युम्नः व्यूहत्रयेयं प्रत्यक्षः। सः तत् इति पूर्वोक्तेति विष्णुः पुरुषोत्तमसमानधर्मत्वेन पुराणे प्रसिद्धः। अत उक्तं पूर्वोक्तप्रकारेणेति। ब्रह्मवाक्यादिति 'दिष्ट्याम्ब ते कुक्षिगतः परः पुमान्' इति 'विष्णुः सर्वगुहाशय आविरासी'दिति वाक्यैकवाक्यतया 'स त्वं विष्णु'रिति ब्रह्मविद्यात्वाद् देवक्या ज्ञानम्। तथा च ब्रह्मवाक्यादित्यस्य शुकवाक्ये 'विष्णुः सर्वगुहाशय' इत्यस्मिन् ग्राह्ये भगवद्वाक्यादित्यर्थः। 'वैयासकिः सभगवान्' इत्यत्र शुकवाक्ये भगवद्वाक्यत्वोक्तेः। अंशावतार इति सत्त्वावतारः। साम्यमिति 'स त्वं विष्णुः साक्षा'दितिवाक्यम्। अध्याहृतक्रियया 'एकतिङ् वाक्यम्'। अध्यात्ममिति पूर्वमाधिदैविकभगवन्मनःसम्बन्धाद् वसुदेवमनसः। वस्तुत इति स्वरूपतः। तदेवास्येति त्वत्सान्निध्यमेवास्य प्रकाशस्य कारणम्। मदनुभावेनेति ममानुभावः त्वत्कृतः तेन। अनुभावो वस्तुत इत्यारभ्य प्रकाशयुक्त इत्यन्तेनोक्तः। कार्यमिति एवं प्रकाशरूपम्। लिङ्गमिति आधिदैविकत्वे ॥२४॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

तस्य रूपस्य सहजत्वाभावायाह रजसोपबृंहितमिति—इस श्लोक में भगवान् का सङ्कर्षण रूप कहा है, कि हे विभो! आप इस लोक की रक्षा की इच्छा रखते हुए मेरे गृह में प्रकट हुए हो, रक्षा करना आपका आवश्यक कर्तव्य है क्योंकि आप अखिलेश्वर हैं, समस्त जगत् के स्वामी हैं, एवं विभु सर्वथा समर्थ भी हैं, यह लोक रक्षात्मक सङ्कर्षण कार्य देवताओं के प्रति उनके द्वेषि दैत्यों के नाश करने से ही सिद्ध होता है, सर्व नाश करने से नहीं, अतः देवांशी सङ्कर्षण सर्वथा संहारक ही हो यह बात नहीं वह तो जगत् के रक्षक ही हैं केवल दैत्यों का निवारण करते रहते हैं, उक्त तथ्य को कहते हैं कि आप राजा कहलाने वाले असुरों की सेनाओं के यूथपति कंस आदिकों से अत्यन्त सुरक्षित एवं उत्तेजित सेनाओं का निःशेष रूप से वध करेंगे, अतः

आपके द्वारा सम्पन्न हुआ दैत्य वध लोक रक्षा के लिये ही सिद्ध होता है, इस प्रकार भविष्य का निर्देश वसुदेवजी की सर्वज्ञता का सूचक है जो कि उन्हें भगवान् के सन्निधान से प्राप्त हुई है, अथवा श्रुति कहती है कि ब्रह्म के विदित हो जाने पर सब कुछ विदित हो जाता है, इस कारण इनका यह ज्ञान ऋषियों की भांति भगवत्तत्त्व के ज्ञान से भी हो सकता है ॥ २१ ॥

एवमपि ज्ञाते भयं न निवृत्तमिति—ऐसा ज्ञान होने पर भी वसुदेवजी का भय निवृत्त नहीं हुआ इसलिये लौकिक की प्रबलता के सूचनार्थ 'अयन्तु आदि श्लोक द्वारा भय से भगवान् के प्रति विज्ञापना करते हैं, उक्त श्लोक में (तु) शब्द स्तुति की व्यावृत्ति का द्योतक है कि अब स्तुति समाप्त हुई पूर्व में जो कहा गया है वह स्तुति पदार्थ है उसकी समाप्ति कर अब एक श्लोक से प्रार्थना करते हैं, वसुदेवजी कहते हैं कि यह कंस तो असभ्य है, भगवान् प्रकट हुए हैं ऐसा जानकर साधु पुरुषों को ही सुख होता है दुष्टों को नहीं, अतः इसले इस प्रसङ्ग को कहना सर्वथा अयोग्य है, असभ्य होने के कारण ही इसने आपके जन्म को हमारे गृह में सुनकर आपके ज्येष्ठ भ्राता मेरे षट् (६) पुत्रों को मारा है, उक्त श्लोक में (सुरेश्वर) यह सम्बोधन अमृत मन्थन आदि प्रसङ्ग पर देवताओं के पक्षपात की स्मृति दिलाता हुआ भक्त पक्षपात का सङ्केत करता है, इस समय क्या करना चाहिये इस प्रश्न के विषय में वसुदेव जो कहते हैं कि वह हत्या प्रिय कंस प्रहरी लोगों से सूचित हुए आपके अवतार को सुनकर शस्त्रों को उठाये हुए अब ही निकट भविष्य में आ ही रहा है, वर्तमान के समीप होने पर भी वर्तमान जैसा व्यवहार होता है अतः अभिसरति यह वर्तमान का प्रयोग सङ्गत है, ईश्वर के प्रति प्रार्थना मात्र ही सेवक का कार्य है, कर्त्तव्य विषय का ज्ञान तो प्रभु को ही है, अतः वसुदेवजी मौन हो गये, वसुदेवजी का अभिप्राय तो यह है कि यदि इसी समय मारना हो तो यहां विराजें अन्यथा अन्यत्र पधारें, भगवान् ने विचार किया कि अभी मारने में तो गुप्त रूप से जो व्रजवासियों के साथ लीला अपेक्षित है वह नहीं होगी एवं और भी लोगों का उद्धार आदि न हो पावेगा अतः उस कार्य को करने के अनन्तर ही कंस का वध उचित है अतः पिता श्री वसुदेवजी के अभिप्राय से अन्यत्र पधारे ऐसा तात्पर्यतः विदित होता है ॥ २२ ॥

तूष्णीं स्थिते वसुदेवे देवकी रूपोपसंहारं कंसस्य—वसुदेवजी के मौन हो जाने पर श्री देवकी भगवान् से उनके रूप के छुपा लेने की एवं कंस को उनके जन्म के ज्ञान न होने की प्रार्थना करने के लिये प्रथम स्तुति करती है, ऐसा (अथैनम्) इस श्लोक द्वारा शुकदेवजी कहते हैं, श्री देवकी ने उस अद्भुत बालक को 'यह मेरा अपना ही पुत्र है, ऐसा समझा क्योंकि भगवान् ने उस प्रकार ही उनकी बुद्धि उत्पन्न कर दी थी, परन्तु वह पुत्र लोकप्रसिद्ध चतुर्भुज आदि लक्षणों से भगवान् के समान है ऐसा जानकर अपनी बुद्धि से स्मृति और पुराणों में भगवान् का स्वरूप जैसा प्रसिद्ध है वैसा इस अवसर पर वर्णन करना आवश्यक है अतः देवकी द्वारा वैसे वर्णन करने के लिए महापुरुषलक्षणम्' इस विशेषण का प्रयोग शुकदेवजी ने किया है, महापुरुष श्री पुरुषोत्तम के लक्षण जिस बालक में हैं, उस अद्भुत बालक भगवान् की शरणागति देवकी ने प्राप्त की, स्तुति करने के अनन्तर ही इन्हें शरणागति सिद्ध होगी, यह भगवान् के निमित्त से ही कंस से भीत (डरी हुई) हैं, शङ्का हो सकती है कि तब महापुरुष लक्षणों से भगवत्स्वरूप के ज्ञान द्वारा देवकी ने भय को क्यों नहीं निकाल दिया उसके विषय में कहते हैं कि देवकी 'शुचिस्मिता' थी उनको आश्चर्य रस ही उत्पन्न हुआ, निश्चयात्मक ज्ञान नहीं हुआ, जिससे भय निवृत्त होता 'शुचिस्मिता' ऐसा पाठ भी सम्मत है, तदनुसार भगवान् की स्तुति के उपयोगी ज्ञान प्राप्त करने की योग्यता के प्रयोजक देवकी के पातिव्रत्य आदि धर्म का निरूपण हुआ है 'ऐसा जानना', उक्त श्लोक के प्रारम्भ में ही 'अथ' शब्द इस प्रसङ्ग की पूर्व प्रसङ्ग से विभिन्न शैली का सूचना देता है कि वसुदेवजी ने वेद और तन्त्र के प्रकार से स्तुति की थी, और देवकीजी उनसे भिन्न स्मृति पुराणोक्त दिशा से स्तुति करेंगी, अन्यथा वसुदेवजी के प्रकार से स्तुति करने में तो पुनरुक्ति दोष का संभव है ॥२३॥

शरणं गता देवक्यष्टभिः स्तोत्रमाह—शरणागत देवकी आठ श्लोकों से स्तुति कह रही हैं, प्रारम्भ में भगवान् के आधिदैविक, आध्यात्मिक, आधिभौतिक, इन तीनों रूपों का तीन श्लोकों द्वारा निरूपण कर चतुर्थ श्लोक से शरणागति में कारण का उल्लेख कर पञ्चम श्लोक से उपस्थित परिस्थिति में रक्षा, एवं सर्व साधारण को भगवत्स्वरूप का ज्ञान न हो, यह दो प्रार्थना करती है, षष्ठ श्लोक में इस अभिप्राय से कि अभी कंस के मारने में तो उसके साथ आपके युद्ध के लिये प्रवृत्त होते ही मेरे प्राण नहीं रहेंगे क्योंकि पूर्व में मैं जिस भयङ्कर दृश्य को देख चुकी हूँ वैसा ही दृश्य (शस्त्रों को उठाये कंस का आना) देखने में आयेगा, यद्यपि युद्ध में आप ही उसे मारेंगे फिर भी मेरे षट् (६) पुत्रों का हत्यारा शस्त्रधारी क्रूर कंस मेरे सम्मुख उपस्थित होगा इतने मात्र से ही मेरे प्राण नहीं ठहर सकते हृदय इतना दुर्बल पड़ गया है, अतः उस प्रकार से रक्षा न कीजिये, आपका अभी युद्ध में उसे मारकर हम लोगों की रक्षा करना मुझे अभीष्ट नहीं, किसी अन्य प्रकार से रक्षा अभीष्ट है, अभी तो आपके जन्म का ज्ञान भी उसे नहीं होना चाहिये, ऐसी प्रार्थना करती है, क्योंकि यदि आपके जन्म का ज्ञान उसे हो जावेगा तो भी हम लोगों के प्रथम पक्ष की ही संभावना हैं अर्थात् प्राणों की स्थिति नहीं रहेगी, (रक्षा सिद्ध नहीं होगी) सप्तम श्लोक से चतुर्भुज रूप के छुपा लेने की प्रार्थना करती हैं, सम्भव है सर्व साधारण लोग आपसे द्वेष करने लगें क्योंकि ऐसा अद्भुत रूप किसी का भी नहीं है अतः सब से अधिकता होने पर द्वेष ईर्ष्या आदि का सर्व साधारण में उद्गम होना संभावित है, और

सब का ही संहार कर देना भी अशक्य है क्योंकि तब तो कोई भी न रहेगा तो आदान भी व्यर्थ ही सिद्ध होगा, अतः सब को मार देना भी नहीं बनेगा, अतः इस रूप को ही तिरोहित कर लेना उचित है, दूसरी बात यह भी है कि इस अलौकिक रूप में शीघ्र ही उपसंहार की संभावना है।

कारिका—रूपत्रयं तथा हेतुः प्रार्थनात्रितयं तथा। नटत्वमिति विज्ञानं स्वस्य यावक् तथोदितम् ॥ १ ॥

कारिकार्थ – आधिदैविक आदि तीन रूप और शरणागति का कारण, तथा रक्षा, भगवत्स्वरूप का तथा उनके जन्म का ज्ञान न होना, और रूप का उपसंहार (तिरोभाव) करना, यह तीन प्रार्थना एवं नट की भाँति भगवान् का जन्म अनुकरण मात्र है, ऐसा श्री देवकी ने अपने अनुभव के अनुसार कहा है।

आदौ भगवानाधिदैविक इति वदन्ती—अधिक समय तक इस अद्भुत रूप से सर्व साधारण जनता में विराजना सम्भावित नहीं, अतः चिरकाल तक आपके विराजमान रहने के केवल अपने स्वार्थ को लेकर रूप के उपसंहार की प्रार्थना है, अवशिष्ट दो प्रार्थनायें तो प्रस्तुत में उपयोगी है हीं, इस प्रकार तीन प्रार्थना की है, अष्टम श्लोक से श्री देवकी अपने गर्व के न होने की सूचना करती हुई यह निरूपण करती है कि आपका अवतार तो नट की भाँति अनुकरण मात्र ही है, माता के आधीन होकर गर्भ में रहना और सर्व साधारण की भाँति जन्म ग्रहण करना नहीं है।

श्री देवकी स्तुति के आरम्भ में भगवान् की आधिदैवक बतलाती हुई अपने भगवद्विषयक ज्ञान और उसमें प्रमाण इन दोनों का प्रसिद्धि के साथ निरूपण करती है कि यह प्रत्यक्ष सम्मुख दृष्टिगत होने वाला रूप वह ही है जिसे सब लोग आधिदैविक कहते हैं, आधिभौतिक व आध्यात्मिक यह अन्य दो रूप तो लोकसिद्ध हैं, अलौकिक रूप तो आधिदैविक ही हैं, यदि आधिदैविक रूप भी लोकसिद्ध हो तब तो उसका ज्ञान लोकतः प्राप्त है अतः उसके ज्ञापक वचनों को अनुवाद ही मानना होगा, प्रमाण नहीं, अतः श्री देवकी का कहना है यह रूप वह ही है, वह क्या है ऐसी आकाङ्क्षा (जिज्ञासा) होने पर कहती है कि यह वह है जिसे कहते हैं, अर्थात् सर्व शास्त्रों में जिसे परम तत्त्व मूलरूप कहा है वह ही यह साकार आधिदैविक तत्त्व है, श्री देवकी ने अपनी इस उक्ति में अपने अनुभव की दृढ़ता बतलाने के लिये (यत्) शब्द के अनन्तर ही (तद्) शब्द का प्रयोग कर दिया है यद्यपि (यत् प्राहुस्तद् रूपम्) इस प्रकार का शब्दविन्यास अपेक्षित था, अपने ज्ञान की प्रामाणिकता के निरूपण करने के लिये (यत्) और (तद्) इन दोनों शब्दों के मध्य में (प्राहुः) शब्द का प्रयोग करना आवश्यक था और (तद्) शब्द के साथ ही 'रूप' शब्द का प्रयोग भी उचित था, परन्तु देवकीजी ने वैसा प्रयोग नहीं किया।

जगद्धर्माश्च तस्मिन् रूपे प्रतीयन्ते, तत्राह– क्योंकि उनके अनुभव में अंशतः भी शिथिलता नहीं थी सर्वांश में दृढ़ था अतः उनको उस प्रकार के शब्दविन्यास की आवश्यकता नहीं, उनको अपने अनुभव पर विश्वास था अतः उनकी प्रामाणिकता के विषय में प्रयास करना अनावश्यक समझकर (यत् प्राहुस्तद्रूपम्) इस प्रकार आकाङ्क्षा के विपरीत होने पर भी (रूपं यत् तत् प्राहुः) ऐसा ही प्रयोग किया, यह स्वरूप आधिदैविक नहीं होना चाहिये क्योंकि आधिदैविक स्वरूप तो विलक्षण होता है ऐसी शङ्का के समाधान करने के लिये विलक्षणता के कारण रूप धर्मों को (अव्यक्त) आदि नव (९) पदों के द्वारा इसी स्वरूप में सिद्ध करती है, जगत् नव (९) प्रकार का ही है, उससे विलक्षण ब्रह्म नव (९) प्रकार से ही निरूपित होता है, जगत् के धर्म उक्त प्रकट हुए भगवत्स्वरूप में प्रतीत होते हैं, वहाँ (अव्यक्तादीनि भूतानि) भगवद्गीता द्वि० अ० श्लो० २८ में सर्व जगत् का मूल रूप अव्यक्त है ऐसा कहा है, जगत् तो व्यक्त है ही, परन्तु यह भगवत्स्वरूप व्यक्त है इस प्रकार की लोकों को प्रतीति होती है (वास्तव में तो यह अव्यक्त ही है) एवं मूल तत्त्व तो आद्य सब से पूर्ववर्ती है, और यह स्वरूप अभी देखने में आया है अतः आधुनिक है (ऐसी लोकप्रतीति है) जगत् भी आधुनिक है, (अव्यक्त) (आद्यम् ,) इन दो पदों से स्वरूपकृत और कालकृत विलक्षणता उक्त भगवत्स्वरूप की बतलाई गई है, श्री देवकी उक्त स्वरूप की विलक्षणता को देशकृत भी बतलाती हुई परिमाण के द्वारा (ब्रह्म) शब्द से उसे सूचित करती हैं कि यह स्वरूप वह है जिसे (ब्रह्म) कहा है, मूलभूत पर तत्त्व बृहत् (व्यापक) होने से एवं बृंहण (वर्धनशील, बढ़ता ही रहे) होने से (ब्रह्म) कहलाता है, जगत् तो व्यापक नहीं परिच्छिन्न (सीमित) है एवं वर्धनशील भी नहीं ह्रासशील है, उसी प्रकार से लोगों को प्रकट हुआ यह रूप भी प्रतीत होता है, (परन्तु वास्तव में तो यह रूप (ब्रह्म) ही है, इस प्रकार सच्चिदानन्दगत सदंश से तीन विलक्षणताओं का निरूपण किया, चिदंश के द्वारा भी तीन विलक्षणताओं को बतलाती हैं कि यह स्वरूप (ज्योति) (निर्गुण,) एवं निर्विकार है।

लौकिकानि च ज्ञानानीति—(प्रकाशकं तच्चैतन्यम्) आदि वचनों से चैतन्य (चित्) को प्रकाशक कहा है, वह जगत् को प्रकाशित करता है अन्यथा उसके प्रकाश के बिना जगत् की प्रतीति ही न हो पावेगी, एवं जगत् त्रिगुणात्मक है, सत्त्व आदि गुणत्रयों का रूपान्तर है, कारणभूत मूल तत्त्व तो गुणत्रय से अतीत है निर्गुण है, यदि जगत् के प्रति गुणों को भी कारण मानलिया जावे तो भगवान् की जगत्कर्तृता सिद्ध न हो सकेगी क्योंकि कर्ता स्वतन्त्र होना चाहिये गुणों के कारण उसकी स्वतन्त्रता नहीं रह पाती, गुण सदंश है अतः उनका (चित्) में सम्भव नहीं, पृथिवी आदि भूत एवं इन्द्रिय अन्तःकरण जहां

भी होते हैं वह सगुण होता है, कारण वह ही होता है जो प्रपञ्च (कार्य) से विलक्षण हो, प्रपञ्च तो उत्पत्ति आदि षट् ६ भावविकारों से युक्त है अतः कारण तत्त्व को निर्विकार मानना आवश्यक है, लौकिक वस्तु मात्र जो ज्ञान के विषय हैं वह सब सविकार हैं और रूपादि गुणों से समन्वित हैं, तथा चक्षु आदि इन्द्रिय एवं उनके सूर्य आदि देवताओं से प्रकाशित होते हैं, अतः चिदंश से उक्त विलक्षणता भगवान् की सिद्ध होती है, क्योंकि लौकिक चित् की भांति आपका प्रकाश इन्द्रियादि के आधीन नहीं आप तो स्वयं प्रकाश ज्योती रूप है, और न आप लौकिक गुण एवं विकारों से ही युक्त हैं आप तो निर्गुण एवं निर्विकार हैं, सत्तामात्र निर्विशेष, निरीह, इन पदों द्वारा आनन्दांश से विलक्षणता बतलाती हैं, आनन्दांश में विषय के द्वारा कोई विलक्षणता नहीं आती यह बतलाना आवश्यक है अतः भगवान् को सत्तामात्र कहा है, आपका स्वरूप सर्वत्र विद्यमान है किसी भी काल में आपकी सत्ता बाधित नहीं होती, भूत, भविष्य, वर्तमान तीनों कालों में वह अक्षुण्ण बनी रहती है, सत्ता शब्द किसी 'सद्' वस्तु के भाव को ही कहता है, **सतो भावः सत्ता सदैव सत्तामात्रम्** , बात ऐसी है कि लौकिक आनंद में भी लौकिक ज्ञान की भाँति विषयकृत विलक्षणता देखी जाती है; जिस प्रकार घट, एवं पट, की विलक्षणता से घटज्ञान एवं पटज्ञान विलक्षण प्रतीत होते हैं, उसी प्रकार कामिनी स्पर्शज सुख एवं पुत्र स्पर्शज सुख भी कामिनी 'एवं पुत्र' की विलक्षणता से विलक्षण ही प्रतीत होते हैं ।

दृष्टत्वादन्धकारवदीहा तत्रापि— अलौकिक सुख में वैसी विलक्षणताओं का सम्भव नहीं क्योंकि वह सुख स्वरूपतः सुख है, कामिनी, एवं पुत्र आदि के स्पर्श के विषय को लेकर नहीं, वह तो सत्ता मात्र है किसी देश या काल में उसके अभाव का सम्भव नहीं वह व्यापक है अतः वह ही यथार्थ सुख है **'यो वै भूमा तत्सुखम्-नाल्पे सुखमस्ति'** आदि श्रुति भी इसी तत्त्व का प्रतिपादन करती हैं, अस्तु । जब 'सत्तामात्र' शब्द से व्यापक आनन्द का प्रतिपादन हो जाता है तब 'निर्विशेष' शब्दके प्रयोग की क्या आवश्यकता रह जाती है क्योंकि जो पदार्थ सविशेष होता है वह उस विशेष को लेकर अन्य पदार्थ के भिन्न सिद्ध होता है; वैशेषिकां ने परमाणुओं के पारस्परिक विभेद का कारण विशेष पदार्थ माना है, सर्वव्यापक सत्तामात्र आनन्दमय ब्रह्म का भेद सम्भव ही नहीं उसकी निर्विशेषता तो अनुक्त सिद्ध है । ऐसी अवस्था में 'निर्विशेष' शब्द का प्रयोग एक लौकिक नियम का अलौकिक विषय में अनादर बतलाने को उसकी अमान्यता सूचित करने को किया है, कि यद्यपि सम्पूर्ण जगत् ही सद् रूप है, 'घटः सन् पटः सन्' घट है, पट है, इत्यादि प्रतीति ते आधार पर सत्ता सर्वत्र व्याप्त है एवं सर्वत्र ही नाम 'रूप' विशेष भी धर्म रूप से उपलब्ध होते हैं, जो है उसका कोई नाम विशेष 'घट' आदि भी है एवं उसका रूप विशेष भी रक्त कृष्ण, गोलाकार, लम्बाकार आदि भी है ऐसा कोई भी सामान्य पदार्थ नहीं जो नाम रूप विशेष से सर्वथा रहित हो तथापि जगत् के पदार्थों की भाँति ब्रह्म के भी सविशेष होने की शङ्का के निवारणार्थ 'निर्विशेष' शब्द का प्रयोग किया है कि लौकिक विषय में ही यह व्याप्ति या नियम है कि सामान्य पदार्थ सविशेष ही होता है निर्विशेष नहीं, अलौकिक ब्रह्म के विषय में यह नियम नहीं वह तो सर्व विशेष, विनिर्मुक्त, निर्विशेष ही है, आशय यह है कि केवल उक्त नियम का ब्रह्म के विषय में अपवाद बतलाने को 'निर्विशेष' शब्द प्रयुक्त हुआ है अन्यथा उसकी आवश्यकता नहीं किन्तु पुनरुक्ति दोष का ही सम्भव था, उक्त नियम को अलौकिक विषय में इसलिये नहीं माना जाता कि विशेष पदार्थ भेद करने वाले होते हैं, मूल सत्ता स्वरूप ब्रह्म में किसी से भेद अभीष्ट ही नहीं, उससे किसी को व्यावृत्त या पृथक् सिद्ध करना अपेक्षित ही नहीं एवं सम्भावित भी नहीं तो वहाँ विशेष से क्या प्रयोजन है, कार्य में तो सत्ता सर्वत्र ही व्याप्त है । अतः सत्तात्मक कारण रूप ब्रह्म से कार्य की तो व्यावृत्ति या भेद का सम्भव नहीं, यदि कार्य से उसका उपादान भिन्न हो तब तो उसमें उपादान कारणता ही नहीं मानी जा सकेगी— उपादान कारण तो पट है ।

नन्वेतत् सर्वं सर्वज्ञान्युपास्यत्वे भगवतः सम्भवतीति—तन्तुओं की भांति कार्य में अनुस्यूत ही रहते हैं, 'घट' एवं 'पट' यह दोनों एक दूसरे से व्यावृत हैं तो एक दूसरे के कारण भी नहीं हैं, ब्रह्म सब का कारण है सद्रूप से सर्वानुगत है उसकी व्यावृत्ति नहीं अतः वह निर्विशेष ही है, 'निरीहम्' पद से ब्रह्म की चेष्टा का अभाव प्रतिपादन अभीष्ट है ब्रह्म सर्व चेष्टाओं से रहित है, क्योंकि चेष्टा करने वाला अपनी किसी अपूर्णता को पूर्ण करने के लिये चेष्टा करता है, ब्रह्म में अपूर्णता का संभव नहीं, भगवती श्रुति उसके विषय में प्रतिपादन करती है कि 'पूर्णमदः पूर्णमिदम्' परोक्ष और प्रत्यक्ष दोनों अवस्थाओं में ब्रह्म पूर्ण ही है, उक्त श्रुति में कारण सर्व चेष्टाओं से रहित है ऐसा सूचित किया है, सर्व जगत् का कारण ब्रह्म किसी भी प्रकार की चेष्टा नहीं करता उस कारण का लक्षण ही चेष्टारहित होना है, और कार्य मात्र चेष्टाशील है, किसी भी प्रकार की चेष्टा होना कार्य में अनिवार्य है, आकाश आदि भी चेष्टा रहित नहीं शब्द को जन्म देने की चेष्टा आकाश आदि की भी प्रसिद्ध ही है, इतना ही नहीं किन्तु जिस प्रकार आवरण के हट जाने पर कार्य की स्थिति नहीं रहती वह भी हट जाता है, जिन कपाल आदिकों ने जितने अंश में आकाश को आवृत करके घट रूपी कार्य को उपस्थित किया था उन आवरण रूप कपाल आदि के हट जाने पर घट आदि कार्य भी हट जाता है उस घट आदि कार्य की नष्ट या चलित हो जाने की चेष्टा प्रतीत होती है उसी

प्रकार वह आकाश भी जिसके आवृत होने से घट आदि कार्य दृष्टिगत हुए थे नष्ट या चलित प्रतीत होता है, एवं दीपक के चलने पर अंधकार का चलना प्रतीत होता है उसी प्रकार आकाश भी आवरण के हटने पर हटता हुआ प्रतीत होता है अतः आकाश में चेष्टा है ही, ब्रह्म में तो किसी प्रकार चेष्टा का सम्भव नहीं क्योंकि न तो उसका कोई आवरण करने वाला है और न वह किसी प्रकार के व्यवहार का विषय ही है, अतः उसकी निरीहता सिद्ध ही है, यद्यपि किसी एक ही विशेषण से सर्व धर्मों का संग्रह संभावित है तो भी नव (९) प्रकार से विलक्षणता का बतलाना आवश्यक है अतः नव (९) विशेषण कहे हैं, पूर्वोक्त नव (९) विशेषणों के द्वारा जैसा मूल कारण ब्रह्म का स्वरूप कहा है वैसा ही प्रत्यक्ष दृष्टिगत यह स्वरूप है, व्यक्त आदि (९) नव प्रकार के लोगों को अपने दोष से ही उनमें व्यक्तत्व आदि नव (९) दोषों की प्रतीति होती है, प्राणी स्वयं व्यक्त, आधुनिक, परिच्छिन्न पर प्रकाश्य, सगुण, सविकार, त्रैकालिक, सत्ताहीन, सविशेष, सचेष्ट होते हैं उनको भगवत्स्वरूप में भी व्यक्तत्व आदि नव धर्मों की प्रतीति होती है, जैसे घूमती हुई दृष्टि से देखी गई पृथ्वी घूमती सी प्रतीत होती है उसी प्रकार भगवत्स्वरूप भी-व्यक्त आदि रूप में प्रतीत होता है, भ्रान्त दृष्टि वाले की दृष्टि से ही पृथ्वी भ्रमित प्रतीत होती है।

एवमाधिदैविकरूपं निरूप्याध्यात्मिकं रूपं निरूपयति –स्थिरदृष्टि वाले की दृष्टि से नहीं, भगवत्स्वरूप भी संसारी लोगों की दृष्टि से ही व्यक्त आदि रूप से प्रतीत होता है ब्रह्मवेत्ताओं की दृष्टि से तो अव्यक्त, आद्य आदि वर्णन किये गये गुणों से परिपूर्ण ही दिखता है, यदि भगवान् अव्यक्त नहीं होते व्यक्त हो होते तो उनकी अभिव्यक्ति (प्राकट्य) के लिए भक्त जन प्रयत्न नहीं करते क्योंकि व्यक्त तो प्रकट ही है उसकी अभिव्यक्ति तो स्वतःसिद्ध है, उसके अर्थ प्रयत्न प्रकाश में दीपक जलाने की भाँति व्यर्थ ही है अतः अभिव्यक्ति के प्रयत्न से सिद्ध होता है कि आप अव्यक्त हैं, एवं यदि आप आद्य नहीं आधुनिक होते तो इस अर्वाचीन स्वरूप को ब्रह्मादिक सर्व प्राचीन देवता नमस्कार नहीं करते, यदि आप ब्रह्म नहीं होते तो मुक्तात्मा इस स्वरूप में सायुज्य को प्राप्त नहीं कर पाते, यदि स्वयं प्रकाश ज्योति रूप नहीं होते तो इनके ज्ञान से साधक गण सर्वज्ञ नहीं हो पाते, यदि निर्गुण नहीं होते तो इसमें निष्ठा रखने वाले लोग निर्गुण नहीं हो पाते, यदि निर्विकार नहीं होते तो इनके भजन से भक्तजन सर्व विकार रहित नहीं हो पाते, यदि सर्व देश-काल में सत्तात्मक रूप से नहीं विराजते तो सर्व पदार्थों में इनका दर्शन न हो पाता, यदि नाम रूप आदि विशेषों से विरहित न होते तो इनके ज्ञान से नाम रूपात्मक प्रपञ्च की निवृत्ति नहीं हो पाती, यदि स्वयं पूर्ण होने के कारण चेष्टा रहित न होते तो इनकी कृपा से लोग ब्रह्मनिष्ठ परम शान्त भी नहीं हो पाते, अतः यह प्रत्यक्ष दृश्यमान स्वरूप ऐसा ही है, एक शङ्का हो सकती है कि यह सब कुछ उस दशा में सम्भावित है जब भगवान् सर्व ज्ञानी जनों के उपास्य रूप में माने गये हों, इस समय प्रकट हुए स्वरूप को 'अव्यक्त' आदि कहना शक्य नहीं, सामर्थ्य से साध्य नहीं, उक्त आशङ्का के निवारणार्थ कहती है कि 'सत्त्वम्' वह आप ही हैं, जो ऐसा अव्यक्त आदि स्वरूप है वह आप ही हैं, उसमें कारण आपका विष्णु रूप होना है, क्योंकि कि विष्णु ही अव्यक्त आदि पूर्व-वर्णित प्रकार से सर्व साधारण के उपास्य हैं, वह ही सबके अधिदेव हैं, वह ही आप प्रकट हुए हैं, ऐसा ब्रह्माजी के वचन से निश्चित होता है, **'दिष्ट्याम्ब ! ते कुक्षिगतः परः पुमान्'** ऐसा ब्रह्मा का स्पष्ट वचन है, यद्यपि ब्रह्मा के उक्त वचन में 'अंशेन जातः' अंश शब्द का प्रयोग किया है अतः अंशावतार की सम्भावना हो सकती है, तब मूल रूप होने के कारण पूर्व में कहा हुआ सब ही बाधाग्रस्त है, युक्तिसङ्गत नहीं, ऐसी शङ्का के निवारणार्थ 'साक्षात्' पद का प्रयोग कर श्री देवकी ब्रह्माजी के पूर्वोक्त वचन गत 'अंशेन' के साथ प्रयुक्त हुए **'साक्षात् भगवान् भवाय नः'** साक्षात् पद का स्मरण दिलाती है कि आप साक्षात् मूल रूप ही हैं। **तस्मादयं भगवानात्मा, अन्यस्य लयावधित्वं नास्तीति**—किसी ज्ञान या क्रिया के अंश से प्रकट हुए हों ऐसी बात नहीं है, श्री देवकी ने ब्रह्मा के कथन से ही भगवान् की परमतत्त्वरूपता समझी हो ऐसी बात नहीं है, क्योंकि ब्रह्मा का उक्त वाक्य **'सिंहो माणवकः'** की भाँति गौण भी हो सकता है, जिस प्रकार बालक में शूरता आदि गुणों को देखकर उसे सिंह कह देते हैं उसी प्रकार मूल तत्त्व के किसी अंश को लेकर भी अंशावतार को साक्षात् भगवान् कहा जा सकता है, तथा प्रशंसात्मक स्तुति में भी ब्रह्मा का तात्पर्य हो सकता है प्रशंसा सर्वांश में यथार्थ ही हो ऐसा नियम नहीं है, श्री देवकी ने अपने अन्तःकरण के संवाद से निर्णय किया है आप कहती है **'अध्यात्मदीपः'** मेरा अध्यात्म यह अन्तःकरण जो कि जडता एव मोह से व्याप्त है सर्व शास्त्र विहीन है जिसे किसी प्रकार से प्रकाश प्राप्त नहीं हुआ, उस अन्तःकरण का आपके सन्निधान से इस प्रकार प्रकाशपूर्ण हो उठना ही सूचित करता है कि आप परम तत्त्व हैं, इस जड मुग्ध अन्तःकरण की प्रकाशपूर्णता का कारण आपका मूल रूपत्व ही है ऐसा निश्चय होता है, क्योंकि अध्यात्म को प्रकाशित करने वाला आधिदैविक ही होता है, अतः मेरे अनुभव से भी आप उक्त रूप ही हैं, अव्यक्तादि विशेषण विशिष्ट परम कारण मूल तत्त्व आधिदैविक स्वरूप ही हैं, क्योंकि कार्य तो बिना कारण के होता नहीं धूम अग्नि के बिना नहीं हो सकता वह अग्नि का कार्य है, अग्नि से प्रकट होता है, उसे देखकर अग्नि नहीं भी दीखता तो भी निर्णय कर लिया जाता है कि अग्नि है, क्योंकि धूम अग्नि से व्यभिचरित नहीं होता वह उसका अव्यभिचारी लिङ्ग है (चिह्न है) उसको छोड़कर अन्यत्र कहीं नहीं रहता

अतः धूम अग्नि का अनुभाषक या निश्चायक है उसी भांति अध्यात्म (अन्तःकरण का प्रकाश भी) भगवान् के आधिदैविक होने का निश्चायक है ।। २४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं भगवत्सान्निध्याद्वसुदेवस्य सर्वज्ञता जातेति भूतं कार्यं निरूप्य भाव्यपि अवतारप्रयोजनमाह—त्वमिति । अस्य लोकस्य साधुजनस्य रिरक्षिषू रक्षितुमिच्छुः सन् मम गृहे त्वमवतीर्णोऽसि, युक्तं चैतत्तवेत्याशयेन सम्बोधयति—अखिलेश्वरेति । रक्षायां सामर्थ्यं सूचयन् पुनः सम्बोधयति—विभो इति । अतः साधुरक्षार्थं राजन्या इति संज्ञामात्रं येषां, वस्तुतस्त्वसुरा एव । तेषां कोटिशो यूथानि तानि ये पान्ति तैर्निव्यूह्यमाना इतस्ततश्चाल्यमानाश्चमूः सेना निहनिष्यसे संहरिष्यसि ।। २१ ।। एवं भगवन्माहात्म्यं कार्यं च ज्ञात्वापि लौकिकस्यालौकिकात् प्रबलत्वात् कंसाद्भीतः संस्तत्प्रतीकारस्यावश्यकर्तव्यत्वं सूचयंस्तद्दुश्चेष्टितं विज्ञापयति—अयं त्विति । 'तवावतारः सतामेव सुखावहो, न खलानाम्' इति सूचयितुं तुशब्दः । अयं कंसः असभ्यः सभानर्हः खल एव । अतो नौ आवयोर्देवकीवसुदेवयोर्गृहे तव जन्म भविष्यतीति श्रुत्वा त्वयि शत्रुत्वारोपात्त्वच्छङ्कया ते तवाग्रजान् मम षट्पुत्रानवधीत् हतवान् । 'त्वयि तु तद्भयशङ्का नास्त्येव, देवपक्षपातश्च त्वयाऽवश्यं कार्यं' इति सूचयन् सम्बोधयति—सुरेश्वरेति । सोऽतिक्रूरस्वभावः पुरुषैर्द्वारे स्थापितैः स्वपुरुषैः समर्पितं श्रावितं ते तवावतारं श्रुत्वा उदायुधः गृहीतखड्गः सन्नधुनैवाभिसरति आगमिष्यतीत्यर्थः । सेवकेन स्वाम्यग्रे वृत्तनिवेदनमात्रमेव कर्तव्यम् , कर्तव्यं तु स्वयमेव स करिष्यति । इति वृत्तनिवेदनं कृत्वा वसुदेवस्तूष्णीं बभूव ।। २२ ।। अथ तत्स्तुत्यनन्तरं कंसाद्भीता देवकी एनमात्मजं स्वसकाशात् प्रादुर्भूतं महापुरुषस्य भगवतो विष्णोर्लक्षणानि चतुर्भुजत्वादीन्यसाधारणचिह्नानि यस्य, तथाभूतं वीक्ष्य महापुरुषं ज्ञात्वा भयनिवृत्तेः प्रहसितमुखी सती तमुपाधावत् अस्तौत् ।। २३ ।। तत्कृतां स्तुतिमाह - रूपमिति । यत्तद्रूपं परमार्थं वस्तु वेदाः प्राहुः प्रतिपादयन्ति स साक्षादध्यात्मदीपः देहेन्द्रियान्तःकरणादिसङ्घातप्रकाशको विष्णुस्त्वमेवेत्यन्वयः । परमार्थत्वे हेतुमाह—आद्यमिति । सर्वकारणभूतमित्यर्थः । तत्र ज्ञापकमाह—सत्तामात्रमिति यस्य कारणतया कार्येष्वन्वितस्य स्वरूपसत्तया सर्वमपि विश्वं सदिति प्रतीयत इति भावः । तर्हि सर्वकारणत्वात् परिणामादिविकारः स्यादित्याशङ्क्याह—निर्विकारमिति । तत्र हेतुमाह—निर्गुणमिति । लोके गुणकार्यस्यैव विकारो दृष्टः, तत्तु ततो भिन्नमित्यर्थः । तर्हि जडकारणत्वेन तस्यापि जडत्वापत्तिरित्याशङ्क्याह—ज्योतिरिति । चिद्रूपमित्यर्थः । कारणत्वात् सक्रियत्वं स्यादित्याशङ्क्याह—निरीहमिति । तत्र हेतुमाह—ब्रह्मेति । व्यापकत्वेन तस्य क्रिया न संभवतीत्यर्थः तस्य तर्हि कुतो न प्रतीतिरित्यत आह—अव्यक्तमिति । अतीन्द्रियमित्यर्थः ।। तत्रापि हेतुमाह—निर्विशेषमिति । जातिगुणक्रियावयवादिविशेषरहितमित्यर्थः ।। २४ ।।

अन्वितार्थप्रकाशिका

त्वमिति । हे विभो अखिलेश्वर ! त्वम् अस्य लोकस्य साधुजनस्य शेषे षष्ठी । रिरक्षिषू रक्षितुमिच्छुः सन् मम गृहेऽवतीर्णोऽसि अतः राजन्या इति संज्ञामात्रं येषां वस्तुतस्त्वसुरा एव तेषां कोटिशो यूथानि तानि ये पान्ति तैर्निव्यूह्यमाना इतस्ततश्चाल्यमानाश्चमूः सेनाः साधुरक्षार्थं निहनिष्यसे संहरिष्यसि । तत्कार्षः ।। २१ ।। एवं ज्ञाततत्त्वोऽपि भगवता प्रेममोहित आह—अयमिति ।। हे सुरेश्वर ! असभ्यः खलः अयं कंसस्तु नौ आवयोर्देवकीवसुदेवयोर्गृहे तव जन्म भविष्यतीति श्रुत्वा त्वच्छङ्कया ते तवाग्रजान्मम षट्पुत्रानवधीत् हतवान् । सोऽतिक्रूरः कंसः पुरुषैः समर्पितं श्रावितं ते तवावतारं श्रुत्वा उदायुधः गृहीतखड्गः सन्नधुनैवाभिसरति आगच्छन्नेव वर्तते । अतः शीघ्रमेतत् रूपमुपसंहरेति ।। २२ ।। अथेति ।। अथ कंसाद् भीता देवकी एनमात्मजं स्वसकाशात्प्रादुर्भूतं महापुरुषस्य भगवतो विष्णोर्लक्षणानि चतुर्भुजत्वादीन्यसाधारणचिह्नानि यस्य तथाभूतं वीक्ष्य महापुरुषं ज्ञात्वा भयनिवृत्त्या शुचिस्मिता सती उपाधावत् अस्तौत् । अत्रात्मजत्वदर्शनं भयहेतुः महापुरुषत्वदर्शनं स्मिते स्तुतौ च तत्रापि भयस्थितिः पुत्रस्नेहप्राबल्यं व्यनक्ति ।। २३ ।। रूपमिति ।। अव्यक्तमतीन्द्रियम् आद्यं कारणं ब्रह्म व्यापकं नतु परमाणवस्तार्किकाणामिव तथा ज्योतिश्चिद्रूपं नतु प्रधानं सांख्यानामिव निर्गुणं नतु तार्किकाणामिव ज्ञानगुणं निर्विकारं नतु मीमांसकानामिव ज्ञानपरिणामि सत्तामात्रं नतु पुष्कराक्षादीनामिव शक्तिविक्षेपपरिणामि निर्विशेषं जातिगुणादिविशेषरहितं निरीहं सन्निधिमात्रेण कारणं नतु सक्रियं यत्तत् किमपि कार्यकल्प्यस्वरूपं परमार्थवस्तु वेदाः प्राहुः प्रतिपादयन्ति सः साक्षादध्यात्मदीपः देहेन्द्रियान्तःकरणादिसङ्घातप्रकाशको विष्णुः त्वमेव ।। २४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यद्यपि भवान् दुष्कृतविनाशपूर्वकं त्रिलोकीपालनोपयुक्तया स्वासाधारणया तन्वा विधृतावतारोऽसि, तथाप्येनां तिरोधाप्य मनुष्यसजातीयां तनुमाश्रयान्यथाऽधुनैवायं कंसोऽभिद्रवतीत्याह त्वमिति द्वाभ्याम् ।। त्वमिति ।। हे विभो, हे अखिलेश्वर, अस्य लोकस्य, कर्मणि षष्ठी । रिरक्षिषुः लोकं पालयितुमिच्छुः, त्वं, मम गृहे कलत्रे, अवतीर्णः, असि । राजन्यसंज्ञाः क्षत्रियसंज्ञा येऽसुरास्तेषां यूथानि संघास्तेषां कोटयस्ताभिः, असुरकोटियूथपैरिति पाठे राजन्यसंज्ञा येऽसुरकोटियूथपास्तैः, निव्यूह्यमानाः

प्रचोद्यमाना इतस्ततश्चाल्यमाना इति यावत् । चमूः सेनाः, निहनिष्यसे संहरिष्यसि ।।२१।। तथाप्यप्रमत्तत्वेन त्वया भाव्यमित्याह ।। अयमिति ।। हे सुरेश्वर, खलेश्वर इति पाठे, दुष्टाग्रगण्यः, असभ्यः सत्सभाप्रवेशानर्हः, अयं कंसस्तु, मे मम, गृहे मत्पत्न्यामस्यां देवक्यामित्यर्थः । तव जन्म श्रुत्वा अस्यां त्वद्रिपोर्जन्म भविष्यतीत्याकाशगिरोक्तमाकर्ण्य, त्वन्मात्सर्याद्धेतोरेवेत्यर्थः । ते तव, अग्रजान् न्यवधीत् हतवान् । केचिन्नो गृहे इति पठन्ति, तन्मते नोऽस्माकं गृहे इत्यर्थः । नाविति पाठे, नावयोः गृहे, एवमुभयथा पाठे गृह इत्यस्य भवने इत्यर्थः । सः कंसः, पुरुषैः स्वभटैः, समर्पितं निवेदितं, ते तव, अवतारं श्रुत्वा, अधुना एव, उदायुधः उद्धृतखड्गः तथाभूतः सन् , अभिसरति अभ्येति । 'वर्त्तमानसामीप्ये भूते भविष्यति च' इति वर्त्तमानता । अभिसरन्तमपि तं हन्तुं त्वं प्रभुरस्येव, तथापि त्वत् स्वरूपायथार्थविदहं बिभेमि, अत एनां तनुं तिरोधापयेति भावः ।। २२ ।। अथैवं देवक्यपि श्रुत्वा प्रार्थयामासेत्याह मुनिः ।। अथेति ।। अथानन्तरं, देवकी, कंसात् , भीता पूर्वमिति शेषः । ततः शुचि स्मितं यस्याः सा, पुत्रभूतभगवद्दर्शनेन निवृत्तभीतित्वात् शुद्धस्मिता सती, एनं आत्मजं, महापुरुषस्य परमेश्वरस्य लक्षणानि पादगतषोडशलक्ष्मचतुर्भुजादीनि यस्य तथाभूतं, वीक्ष्य, तं, उपाधावत् तुष्टाव ।। २३ ।। प्रसिद्धं वेदान्तैकसमधिगम्यं यत् परमात्मस्वरूपं तत्त्वमेवेति ब्रुवाणा तदुपधावनं चतुर्भिराह ।। रूपमिति ।। हे प्रभो, यत् रूप्यते प्रकृतिपुरुषविलक्षणत्वेन निरूप्यते इति रूपं, परमात्मनस्तव स्वरूपमित्यर्थः । तत् , वेदान्ताः अव्यक्तादिविशेषणविशिष्टत्वेनेति शेषः । प्राहुः कथयन्ति । तद्यथा । व्यक्तैरिन्द्रियैर्न व्यज्यते न विषयीक्रियते इत्यव्यक्तमदृश्यमतीन्द्रियमित्यर्थः । यद्युच्यते प्रधानमप्यस्ति तथाविधमिति चेन्न, प्रधानं तु पृथिव्यादिरूपेण व्यक्तमस्तीति भावः । 'यत्तददृश्यमग्राह्यम्' इति श्रुतेः । आदौ भवमाद्यं, व्यक्तादचिद्द्रव्यादपि प्रथमतः कारणत्वेनावस्थितमित्यर्थः । एवं चेत् सूक्ष्मावस्थमचिद्द्रव्यमपि तथाभूतमस्त्येव तत्राह । निर्गुणं सत्त्वादिगुणरहितं, अनेन सूक्ष्मावस्थाचिद्व्यावृत्तिः कृता । सतो भावः सत्ता सैव सत्तामात्रं, सच्छब्दः सततैकरूपवस्तुवाची । वृद्धिक्षयादिरहितमित्यर्थः । विशेषाः शब्दस्पर्शादय आकाशादिगुणास्तेभ्यो निर्गतं तद्रहितमित्यर्थः । अनेन कार्यावस्थाचिद्द्रव्यव्यावृत्तिरुक्ता । एवं कार्यकारणोभयावस्थाचिद्द्रव्यतो व्यावृत्तिमभिधायाथ चिद्द्रव्यतो व्यावृत्तये विशिनष्टि । ज्योतिः स्वयंप्रकाशं, किं तर्हि तद्बद्धजीवरूपं नेत्याह । निर्विकारं शोकमोहादिविकाररहितं निरीहं पुण्यपापाचरणव्यापाररहितं, ज्योतिःस्वरूपत्वेऽपि बद्धजीवे शोकमोहपुण्यपापादिमत्त्वान्निर्विकारतया निरीहतया च ततो विलक्षणमिति भावः । तर्हि किं तन्मुक्तजीवरूपं नेत्याह । आत्मनीत्यध्यात्मं, विभक्त्यर्थेऽव्ययीभावः । अध्यात्ममात्मनि दीपो दीपवत् स्वप्रकाशं, लिङ्गसंख्याविभेदेऽपि विशेषणविशेष्यतायां तयोर्न बाधः । नित्यासंकुचितस्वरूपभूतधर्मभूतज्ञानमित्यर्थः । अनेन मुक्तजीवतो व्यावृत्तिरुक्ता । तेषां संसारदशायां संकुचितधर्मभूतज्ञानवत्त्वात् । तर्हि किं नित्यसिद्धजीवरूप नेत्याह । ब्रह्म स्वरूपेण गुणैश्च निरतिशयं बृहत् । अनेन नित्यसिद्धजीवव्यावृत्तिरुक्ता । एवं रूपशब्दं विशेषीकृत्य उक्तः यः विष्णुः, सः साक्षात् प्रत्यक्षः, त्वमेव ।। २४ ।।

कृष्णप्रिया

हे विभो ! आप इस लोक की रक्षा करने के इच्छुक हैं, हे अखिलेश्वर मेरे गृह में प्रकट हुए हो, राजनामधारी असुरों की कोटियों के यूथपतिओं द्वारा प्रेरित हुई सेनाओं का आप वध करेंगे ।। २१ ।। हे सुरेश्वर ! इस असभ्य कंस ने तो हमारे गृह में आपका जन्म होगा ऐसा सुनकर आपके ज्येष्ठ भ्राताओं का वध किया है, वह दुष्ट अपने प्रहरी पुरुषों द्वारा विदित किये गये आपके अवतार को सुनकर शस्त्रों को उठाये हुए अभी आता ही है ।। २२ ।। श्री शुकदेवजी ने कहा इसके अनन्तर इस पुत्र को महापुरुष के लक्षणों से सम्पन्न देखकर कंस से डरी हुई देवकी उस पुत्र रूप भगवान् की शरणागत हो गई, उस दशा में वह आश्चर्य रसान्वित थी अथवा पवित्र मृदुहास से सुशोभित थी ।। २३ ।। श्री देवकी ने कहा कि जिसे अव्यक्त, आद्य, ब्रह्म, ज्योति, निर्गुण, निर्विकार एवं सत्तामात्र, निर्विशेष निरीह कहा है (वह आधिदैविक रूप से यह ही है जिसे मैं देख रही हूँ) जो अन्तःकरण को प्रकाशित करने वाला है वह सर्वोपास्य विष्णु आप ही हैं ।। २४ ।।

नष्टे लोके द्विपरार्धवसाने महाभूतेष्वादिभूतं गतेषु ।
व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः ।। २५ ।।
योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम् ।
निमेषादिर्वत्सरान्तो [1]महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ।। २६ ।।
मर्त्यो मृत्युव्यालभीतः पलायन् [2]सर्वाँल्लोकान्निर्भयं नाध्यगच्छत् ।
त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति ।। २७ ।।
स त्वं घोरादुग्रसेनात्मजान्नस्त्राहि त्रस्तान् भृत्यवित्रासहासि ।
रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां कृषीष्ठाः ।। २८ ।।

---

१. गरी–इति कस्यचित् । २. लोकान् सर्वा–श्री. वंशी. गिरि. मक्त ।

कर्दमक्षमा

अन्वयः—कालवेगेन द्विपरार्धावसाने लोके नष्टे महाभूतेषु आदिभूतं गतेषु व्यक्ते अव्यक्तं याते अशेषसंज्ञः भवान् एकः शिष्यते ॥ २५ ॥ अव्यक्तबन्धो यः अयं निमेषादिः वत्सरान्तः महीयान् कालः येन विश्वं चेष्टते तस्य ते चेष्टां आहुः तं तु ईशानं क्षेमधाम प्रपद्ये ॥ २६ ॥ मर्त्यः मृत्युव्यालभीतः सर्वान् लोकान् पलायन् निर्भयं न अध्यगच्छत् आद्य यदृच्छया त्वत्पादाब्जं प्राप्य स्वस्थः शेते अस्मात् मृत्युः अपैति ॥ २७ ॥ सः त्वं घोरात् उग्रसेनात्मजात् त्रस्तान् नः पाहि भृत्यवित्रासहा असि पौरुषं ध्यानधिष्ण्यं इदं रूपं मांसदृशां मा कृषीष्ठाः ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च महाप्रलयेऽप्यवशिष्यमाणस्य कुतो भयमित्याह । नष्टे लोक इति । चराचरे लोके महाभूतेषु लीने तेष्वप्यादिभूतं भूतसूक्ष्मं प्रविष्टेषु तस्मिन्नपि व्यक्तेऽव्यक्तं प्रधानं प्राप्ते । अशेषसंज्ञः अशेषात्मके प्रधाने संज्ञा प्रज्ञा यस्य । एवं मयि लीनमिदमस्ति पश्चादेवमुद्बोधनीयमिति प्रज्ञा यस्येत्यर्थः । सोऽशेषसंज्ञ इति वा ॥ २५ ॥ किं च एवं प्रलयहेतुर्योयं काल एनम् । हे अव्यक्तबंधो प्रकृतिप्रवर्तक । तस्य प्रलयावधिभूतस्य ते तव चेष्टां लीलाम् आहुः । चेष्टते विपरिवर्तते पुनः पुनर्वत्सरावृत्त्या । महीयान् द्विपरार्धरूपः । यस्य चेष्टामाहुस्तं त्वा त्वां क्षेमधामाभयस्थानं प्रपद्ये शरणं व्रजामि ॥ २६ ॥ क्षेमधामत्वमेवाह । मर्त्य इति । मृत्युः संसारः स एव व्यालः तस्माद्भीतः लोकान्प्रति यदृच्छया केनापि भाग्योदयेन । हे आद्य अस्मात्त्वत्पदाब्जादपैति पलायते । "मृत्युर्धावति पंचमः" इति श्रुतेः ॥ २७ ॥ प्रस्तुतं विज्ञापयति । स त्वमिति । भृत्यानां वित्रासं हंतीति भृत्यवित्रासहा भृत्यविदिति वा छेदः । पौरुषमैश्वरं ध्यानधिष्ण्यं ध्यानास्पदम् । मांसदृशां मांसचक्षुषां प्रत्यक्षं मा कृथाः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

महाभयस्थलेऽपि तव निर्भयत्वादन्यत्र कथं तत्स्यादित्याह—किञ्चेति । तेषु महाभूतेषु । तस्मिन्नपि भूतसूक्ष्मेपि । व्यक्तेव्यक्तसंज्ञके भूतसूक्ष्माहंकारमहत्तत्त्वानां प्रकृतेर्व्यज्यमानत्वाद्व्यक्तत्वं तथा चादिभूतपदं चात्रोपलक्षकं महदहंकारयोरपि अशेषात्मके सर्वकारणे प्रधाने प्रकृताविति । यद्वाऽशेषाः संज्ञा यस्य सः "नामानि सर्वाणि यमाविशंति" इति श्रुतेः । न शेषो यस्मात्सोऽशेषः सर्वात्मा स एव संज्ञा यस्येति वा न शेषोऽर्थात्प्रपंचस्य यत्र सोऽशेषः प्रलयस्तस्मिन्संज्ञा ज्ञानं यस्येति वा । प्रलयेऽपि यज्ज्ञानं न नश्यतीत्यर्थः । प्रधानेऽशेषात्मकत्वासंभवं पर्यालोच्याह—शेषसंज्ञ इति । शिष्यतेऽस्थूलमनण्वित्यादिना सर्वनिषेधेऽवधित्वेनेति शेषः परमात्मा स एव संज्ञा यस्येति । अनंतस्यापि प्रलये श्रूयमाणत्वात्तत्संज्ञो वेत्यर्थः ॥ २५ ॥ कालस्यैव 'यतो भिन्नदृशां भयम्' इत्यादिना सर्वभयहेतुत्वं श्रूयते स तु तव चेष्टैवातस्तव कथं भयं न हि स्वकरादिचालनं स्वस्य भयकरमित्याह—किञ्चेति । एवं महाभूतादिलयप्रकारेण । ईशानं कालस्यापि नियंतारम् ॥ २६ ॥ यद्वा—त्वत्पाद एवाब्जो धन्वंतरिस्तं प्राप्य व्यालदष्टं यथा धन्वंतरिः पाति तथा मृत्युग्रस्तं त्वत्पादाब्जं रक्षकमिति भावः । "अब्जोऽस्त्री शंखे ना निचुले धन्वंतरौ हिमकरे च पद्मे क्लीबम्" इति मेदिनी ॥ २७ ॥ प्रस्तुतं प्रकृतम् । विज्ञापयति बोधयति । भृत्यवित्रासहंतृत्वेन भगवति वैषम्यमाशंक्याह—भृत्यवित् त्रासहेति छेदम् । भक्तवत्सलः सामान्यतस्सर्वत्रासहर इति । यद्वा—भृत्यानामपि त्वं विविधत्रासं भयं हंसि आवयोः पित्रारंतर्भयं कुतो न हंसीति भावः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कालवेगेनेति सर्वत्रैव हेतुः एक इति । वैकुण्ठादीनामपि तदभेदाभिप्रायेण यद्वा अशेषा ये तदानीं वैकुण्ठादयस्तत्तत्पदार्थाभिधास्तेऽपि संज्ञा यस्य तत्तद्रूपेणापि यः स्वयमेवेत्यर्थः । यद्वा, शिष्यन्ते महाप्रलयेऽपि तिष्ठन्तीति श्रीवैष्णवमते यथेष्टविनियोगार्हं शेषशब्देन कथ्यन्त इति वा शेषाः श्रीवैकुण्ठलोकपरिच्छदपरिवारादयः तेऽपि संज्ञायन्ते येन यद्ग्रहणेनैव ते गृहीता भवन्तीत्यर्थः । एवम्भूतो भवानेकः शिष्यते नत्वन्तर्गतेतरजीववृन्दप्रपञ्चेत्यर्थः । तथैव तृतीये श्रीविदुरप्रश्नः—

"तत्त्वानां भगवंस्तेषां कतिधा प्रतिसङ्क्रमः । तत्रेमं क उपासीरन् क उ स्विदनुशेरते" ॥ इति ।

एवमेव कैमुत्येन वक्ष्यते मर्त्यो मृत्युरित्यादि ॥ २५ ॥ कालवेगेनेत्युक्त्वा प्राप्तं कालस्य स्वातन्त्र्यं निरस्यन्ती ततः सुतरां तस्य भयमात्रं निराकुर्वती स्वयमपि कंसादिभयाच्छरणं याति य इति योऽयं निमेषादिर्वत्सरान्तः कालः वत्सरावृत्त्या च महीयान् द्विपरार्द्धरूपः येन च कालेन हेतुना विश्वं चेष्टते तं कालं तस्य तादृशस्य ते तव चेष्टामाहुरित्यन्वयः । अत एवेशानं सर्वेश्वरं ततः प्रपन्नभयहरणमात्र कियद्वेति भावः । अत एव क्षेमस्याभयस्य सुखप्राप्तेश्च स्थानं यद्वा सर्वमङ्गलद्रव्यादीनामप्याश्रयम् ॥ २६ ॥ यतस्त्वत्पादाश्रितोऽपि निर्भयः सन् सुखी स्यादित्याह—मर्त्य इति । मरणधर्मा यः कश्चित् मृत्युस्तत्परम्परानिर्भयं भयाभावं न प्राप आद्य हे सर्वश्रेष्ठ ! मृत्य्वादिनियन्तरित्यर्थः । स्वस्थः भयरहितः सन् शेते निर्वृतो भवतीत्यर्थः । यतः अस्मात् त्वत्पदाब्जाद्धेतोर्मर्त्याद्वा

तस्मात् सकाशात् मृत्युः पलायते अब्जत्वरूपकेन स्वतः पुरुषार्थत्वमपि तस्य ध्वनितं तत्प्रभावमात्रजातत्वं तु भयाभावस्य यद्वा मृत्युरिति अद्य अधुना त्वयि साक्षात्प्रादुर्भूते सर्वो लोकः स्वस्थः सन् शेते वर्त्तमानसामीप्ये वर्त्तमानवत्वं तत्र हेतुः मृत्युरिति अन्यत्समानम् एवं परब्रह्मत्वेन सूचितं निर्भयत्वं प्रलयेप्यवशिष्यमाणत्वेन सर्वोपसंहारादिहेतुकाललीनत्वेन शरणापन्नमृत्युनिवारणतत्तत्कैमुत्येनैव दृढीकृतम् अतः प्रकरणैकवाक्यतानुरोधेन रूपं यत्तदित्युक्तक्रमवाक्यं न ब्रह्मपरत्वेन व्याख्यातम् ॥ २७ ॥ स तादृशत्वेन निर्भयः मद्भाग्येन च मत्पुत्रतामाप्तस्त्वम् त्राहि द्विष्टत्वेनारोचकत्वात् साक्षात् कंसनामाग्रहणम् एवं पूर्वमपि अयं त्वसभ्य इत्येवोक्तं शब्दश्लेषेण परमोग्रत्वं सूचितम् अर्थश्लेषेण च पितृव्यजत्वव्यक्त्या भयाधिक्यं निकृन्तति समूलं हि “बन्धुभ्यो भयमुत्थितम्” इति न्यायात् नस्त्राहीति अस्मद्रक्षामेव कुरु न तु तं घातयितुं प्रार्थये इति कृपाविशेषाय दैन्योक्तिः । भो इति परमार्त्या सम्बोधनं तथापि मातृभावस्वभावतो भयविषयं तमेवान्तर्द्धापयितुं छलेनाह, रूपं चेति । पुरुषस्य व्यष्ट्यन्तर्यामिणो रूपमाकारं चतुर्भुजत्वात् तत एव विराडन्तर्वर्तिषु ध्यानधिष्ण्यत्वेन प्रसिद्धमित्येवार्थः । द्विभुजत्वेऽपि गूढत्वं ध्यानधिष्ण्यत्वं च श्रूयते “गूढं परं ब्रह्म मनुष्यलिङ्गम्” इत्यादि सप्तमादौ “शृङ्गवेणुधरं तु वा” इत्यादि श्रीगोपालतापनीध्यानादौ मांसदृशामज्ञानाम् अयोग्यत्वादिति भावः । तत्र हेतुस्तु वक्ष्यते विश्वमित्यादिना ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतएव महाप्रलयेऽपि निजलोके पार्षदादिभिः सह विहरसीत्याह—नष्ट इति । कालवेगेनेति सर्वत्रैव हेतुः । शेषसंज्ञश्च पार्षदः शिष्यते; उपलक्षणमेतत्—श्रीगरुडादयोऽप्यवशिष्यन्ते । यद्वा, शिष्यन्ति महाप्रलयेऽपि तिष्ठन्तीति; किंवा, साक्षाच्छेषतामिव प्राप्ताः शेषाः श्रीवैकुण्ठलोकपरिच्छदपरिवारास्तेषां संज्ञा ख्यातिर्यस्मात् सः । तथा च श्रीवैष्णवाः पठन्ति—‘यथेष्टविनियोगार्हं शेष-शब्देन कथ्यते’ इति; श्रीभगवतो यथार्हविनियोगार्हमित्यस्यार्थ इति नित्यं तत्साहित्यमभिप्रेतम् ॥ २५ ॥ कालवेगेनेत्युक्त्या प्राप्तं कालस्य स्वातंत्र्यं निरस्यन्ती (सा) कंसादिभयाच्छरणं याति—य इति । अतएव ईशानं सर्वेश्वरं प्रपन्नजनाशेषभयहरणसमर्थं वा; अतएव क्षेमस्याभयस्य मंगलस्य वा स्थानम् ॥ २६ ॥ अतस्त्वदाश्रितो निर्भयः सन् सुखी स्यादित्याह—मर्त्य इति । मरणधर्मशीलो मनुष्यो निर्भयं मृत्युभयाभावं भयरहितं वा कश्चिदपि नाध्यगच्छत्, न प्राप । आद्य ! हे सर्वश्रेष्ठ ! मृत्यादि-नियन्तरित्यर्थः । स्वस्थो मृत्युभयरहितः सन् शेते निश्चिन्तस्तिष्ठेत् सुखी स्यादित्यर्थः; यतोऽस्मात्वत्पादाब्जाद्धेतोर्मर्त्याद्वा, तस्मात् सकाशान्मृत्युः पलायते । यद्वा, अद्य अधुना त्वयि साक्षात् प्रादुर्भूते सति सर्वलोकः स्वस्थः सन् शेते, सामीप्ये वर्त्तमाना, शयिष्यत इत्यर्थः । एवमपैतीत्यपि । अन्यत् समम् । एवं परब्रह्मत्वादिना सूचितं निर्भयत्वं प्रलयेऽप्यवशिष्यमाणत्वेन तथा सर्वसंहारक-काल-लीलत्वेनाश्रितस्यापि भयहरणेन च दृढीकृतम्; स सर्वथा स्वयं निर्भय एव त्वम्; यद्वा, परब्रह्मत्वादिनोक्तं माहात्म्यं तेन दृढीकृतम्; ततश्च स तादृशस्त्वं मत्सुतोऽसीत्यहो ! मद्भाग्यमहिमेति भावः ॥ २७ ॥ अतः कंसात् त्रस्तान् दीनानस्मानस्मद्विधजनान् पाहि । उग्रा घोरा सेना परिजनलक्षणा यस्य तस्यात्मजादिति श्लेषेण परमोग्रत्वं सूचितम् । यद्वा, उग्रसेनस्य पितृव्यस्यात्मजादिति भयाधिक्यम्,—‘निकृन्तति समूलं हि बन्धुभ्यो भयमागतम्’ इति न्यायात् । यद्वा, त्राहीत्यस्मद्रक्षामेव कुरु, न तु कंसं घातयेत्यर्थः । कुतः ? उग्रसेनात्मजान्मातुलत्वादित्यर्थः । ननु कथं तर्हि त्रस्ताः स्थ ? तत्राह - घोरादिति । भो इति परमार्त्त्या सम्बोधनम् । अन्यत्तैर्व्याख्यातम् । यद्वा, त्राणप्रकारमेव निवेदयति—भृत्यानां विगतत्रासो यस्मात्तथाभूतहासयुक्तमपीदं रूपं मांसदृशामज्ञानम्, किंवा मांसे दृक् भक्षणार्थं दृष्टिर्येषां तेषां कंसादीनां प्रत्यक्षं दृश्यं मा कृथाः । कुतः ? ध्यानधिष्ण्यं मुनीनामपि ध्येयमेवेत्यर्थः । दिव्यैतद्रूपादृष्ट्या तज्जन्माज्ञानेनास्माकं भयं नोत्पादयिष्यति । यद्वा, रूपरूपवतोरभेदेन त्वमन्तर्हितो भवेति स्नेहभरेण प्रार्थितमिति भावः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आदिभूतं भूतादिं महदहङ्कारं व्यक्ते महति ॥ २५ ॥ चेष्टामाहुः—स्वसङ्कल्पाधीनकालेनेत्यर्थः क्षेमधाम क्षेमस्याश्रयं “क्षेमं वहामि” इत्युक्तम् ॥ २६ ॥ ध्यानधिष्ण्यं योगिध्येयं पौरुषं परमपुरुषत्वसूचकम् ॥ २७–३० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

आद्यत्वमेव दर्शयितुं प्राकृतप्रलयावशिष्टं वस्तु त्वमेवेत्याह नष्ट इति । चतुर्मुखस्य तन्मानेन वर्षशतात्मकमायुस्तस्य पञ्चाशद्वर्षात्मकं पूर्वार्द्धमुत्तरार्द्धञ्च परार्द्धमुच्यते तदुक्तम्—

“ब्रह्मणः स्वस्य मानेन ह्यायुर्वर्षशतं स्मृतम् । तत्परं वै तदर्द्धं तु परार्द्धमभिधीयते” ॥ इति—

द्विपरार्द्धावसाने द्वयोः परार्द्धयोरवसाने चतुर्मुखलय इत्यर्थः । कालस्य वेगेन हेतुना महाभूतेषु पृथिव्यादिषु स्वकारणपरंपरया आदिभूतं भूतादिमहङ्कारं गतेषु तस्मिन् लीनेषु सत्सु तथाऽव्यक्तेऽहङ्कारप्रकृतिभूते महत्तत्वेऽव्यक्तं सूक्ष्मावस्थमचिद्द्रव्यं याते गते सति इदम् ‘अव्यक्तमक्षरे लीयते अक्षरन्तमसि लीयते तमः परे देव एकीभवति’ इति श्रुत्यर्थस्याप्युपलक्षणम् एवं सति यः

शिष्यते पदार्थः स एको भवानेव यतो भवान् अवशिष्यतेऽत एव निमित्ताच्छेषसंज्ञः शेषशब्दाभिधेयश्च नामरूपविभागानर्हसूक्ष्मचिदचिद्विशिष्टतया अवशिष्ट एकस्त्वमेवेत्येकशब्दाभिप्रायः अनेन “तमः परे देव एकीभवति” इति श्रुत्युक्तैकीभावश्चाभिप्रेतः नामरूपाभ्यामविभाज्यतया स्वाश्रयवस्तुसंश्लेषो ह्येकीभावः अनेन प्रकृतिपुरुषयोर्नित्यत्त्वं फलितम् एतदभिप्रायेणैव हि श्रुतौ “अक्षरं तमसि लीयते” इत्येतत्पर्यन्तं सर्वत्र लय उक्तः “तमः परे देव एकीभवति” इत्यत्रत्वेकीभावः अयमर्थः, अत्र द्विविधा हि लयो विवक्षितः एकस्तावत्स्वावस्थाप्रहाणेन पूर्वावस्थाप्राप्तिरूपः यथा पृथिवीत्वावस्थायाः प्रहाणेन स्वावस्थाप्राप्तिः इतरस्तु स्वावस्थाप्रहाणमन्तरेण वस्त्वन्तरविभागानर्हसंसर्गविशेषप्राप्तिः यथा प्रकृतिपुरुषयोः पुरुषरूपं प्रकृतिरूपं च परित्यज्य नित्यसिद्धमबाधित्वा विशेष्यभूतेन भगवता विभागानर्हसंसर्गविशेषप्राप्तिः तदेव तम एकीभवतीति विशिष्टैक्यरूपतया अभिधीयते तदेव चात्रैकशब्देनाभिप्रेतं पूर्वं तु “पृथिव्यप्सु प्रलीयते “इत्यादिना साक्षाल्लयशब्द एव प्रयुज्यते “उभावेतौ लीयते परमात्मनि” इति वैष्णववचनमपि प्रकृतिपुरुषयोर्भगवता सह संश्लेषमात्रमेव कथयतीति न विरोधः। संसर्गविशेषेऽपि लयशब्दः प्रयुज्यते यथा “वृक्षेषु पक्षिणो लीयन्ते” इति साक्षात् लयशब्द एव प्रयुज्यते अत एव—

“प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि। अचेतना परार्था च नित्या सततविक्रिया” ॥

इत्यादिषु “तदेतदक्षयं नित्यं जगत्स्थावरजङ्गमम्” इत्यादि वेदपारवेदिनां पराशरादीनां वाक्येषु च प्रकृतिपुरुषयोरनादित्वं प्रोक्तम् तस्मादपि तयोर्न साक्षाद्विलयः यथायुधरूपेण परिणते अयसि परिगृहीतं तोयं तोयरूपेणैव तिष्ठति अन्यथा स्नेहानुवृत्त्याद्ययोगात्तद्वत्प्रकृतिपुरुषावपि भगवत्यविभागार्हसंसर्गविशेषमात्रेणैकीभावव्यवहारविषयमात्रभूतौ विशेषणजगत्सृष्ट्यादावुपकुरुत इति “महानव्यक्ते लीयते” इत्यादि श्रुतावव्यक्तशब्दश्चित् समष्टिसंसृष्टा चित्समष्ट्यवस्थाविशेषपरः अक्षरशब्दस्तु अचित्समष्टिपरः तमःशब्दस्तु सर्वाचित्प्रपञ्चकारणभूताजहत् स्वावस्थसूक्ष्मचित्परः ॥ २५ ॥ ननु, कालवेगेनेति कालावशेषस्यापि सूचितत्वेन कथमेकस्य ममैवावशेष इत्यत्राह—य इति। हे अव्यक्तबन्धो अव्यक्तस्य निरतिशयसूक्ष्मदशामापन्नस्य प्रधानस्य बन्धो! तदाश्रयत्वरूपं तद्बन्धुत्वमिह विवक्षितम् इदं दृष्टान्तार्थमुक्तं यथा सूक्ष्मचिदद्रव्यं त्वयि संश्लेषविशेषमापन्नं त्वदपृथक्सिद्धविशेषणं सत् त्वदेकत्वाविरोधि तद्वदयम् कालोऽप्यपृथक्सिद्धविशेषणभूतस्सन्नेकत्वाविरोधीति योऽयं निमेषादिर्वत्सरान्तः कालस्य सूक्ष्मावस्था निमेषः स्थूलावस्था तु वत्सरः महीयान् महीयस्त्वमात्र ब्रह्मादीनामपि प्रभुत्वरूपं विवक्षितं येन कालेन निमित्तेन भवान् विश्वं चेष्टते करोति सृजत्यवत्यत्ति च यद्वा विश्वं कर्तुं चेष्टते प्रवर्तते तं च कालं तस्योक्तविधस्य ते तव चेष्टामाहुः चेष्टातुल्यमपृथक्सिद्धविशेषणमाहुरतो नायं त्वदेकत्वविरोधीति भावः। यं कालं यस्य तव चेष्टामाहुस्तमीशानं कालस्यापि नियन्तारं क्षेमधाम क्षेमस्य आश्रयं क्षेमङ्करं त्वां प्रपद्ये शरणं व्रजामि हेतुगर्भमिदं क्षेमधामत्वात्प्रपद्य इत्यर्थः ॥२६॥ कीदृशं तत्क्षेमधामत्वम्? यतो मां प्रपद्यसे इत्यत्राह—मर्त्य इति। मर्त्यः मरणशीलः जन्मनोऽप्युपलक्षणमिदम्। जन्ममरणादिरूपसंसृतिभाक् पुमान् मृत्युव्यालभीतः मृत्युर्जन्ममरणादिरूपः संसारः स एव व्यालः दुष्टसत्त्वस्तस्माद्भीतः मुमुक्षुः सन् इत्यर्थः। सर्वान् लोकान् प्रति पलायन् पलायमानः परस्मैपदमार्षम् लोक्यन्ते उपायत्वेनाध्यवस्यन्ते इति लोकाः उपायाः सर्वानुपायाननुतिष्ठन्नित्यर्थः। निर्भयम् भयस्याभावो निर्भयम् अर्थाभावेऽव्ययीभावः मृत्युव्यालभयाभावं नाध्यगच्छन्न प्राप न मुक्तो बभूवेति भावः। यदृच्छया यादृच्छिकसुकृतविशेषपरिपाकेन त्वत्पादाम्बुजं प्राप्य उपायत्वेन प्राप्य शरणं प्रपद्यति भावः। स्वस्थः मृत्युव्यालभयनिवृत्तये कर्त्तव्योपायान्तररहितः शेते यावज्जीवं सुखं वर्त्तते ततोऽस्मान्मृत्युरपैति अपगच्छति संसारान्मुक्तो भवतीत्यर्थः। त्वत्पदाब्जशरणवरणमात्रेणैव निश्श्रेयसप्रदस्य तव कियदेतल्लौकिकश्रेयःप्रदत्वमिति भावः ॥ २७ ॥ इत्थमभिष्टूयाथ हृद्गतं विज्ञापयति स त्वमिति। स क्षेमङ्करस्त्वं घोराद्द्रष्टुमप्यशक्यादुग्रसेनस्यात्मजात् कंसात् त्रस्तान् भीतान् नोऽस्मांस्त्राहि पाहि यतस्त्वं भृत्यानां वित्रासहा भयापहर्ता भवसि पौरुषं परमपुरुषासाधारणं परमपुरुषत्वसूचकं चेदं रूपं ध्यानधिष्ण्यं योगिनां ध्यानैकशुभाश्रयभूतम् अतस्त्वं मादृशां मांसचक्षुषां प्रत्यक्षं मा कृषीष्ठाः माकार्षः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

निर्गुणत्वादिकं तल्लक्षणमेवेत्याह—नष्ट इति। द्विपरार्द्धावसाने ब्रह्मणः शतायुर्लक्षणः कालः द्विपरार्द्धस्तस्याऽवसाने लोके नष्ट इति सामान्येनोक्तं विशिनष्टि-पञ्चमहाभूतेषु पृथिव्यादिषु अहङ्कारद्वारा आदिभूतं महत्तत्त्वं गतेषु व्यक्ते महत्तत्त्वे अव्यक्तं प्रधानं गते सति अशेषसंज्ञः अशेषाः संज्ञाः यस्य स तथा “नामानि सर्वाणि च यं विशन्ति” इति श्रुतेः ॥ २५ ॥ कालवेगेन यात इत्यत्र प्रतीतं कालस्वातन्त्र्यं निवारयति, योऽयमिति। निमेषादिर्वत्सरान्तो योऽयं कालः तं कालं यश्चाशेषसंज्ञस्तस्य ते तत्र चेष्टामाहुरित्यन्वयः। अव्यक्तबन्धो! मुख्यबन्धो! प्रारब्धः येन त्वया येन कालेन वा क्षेमधाम निर्भयस्थानम् “अभयम् प्रतिष्ठां विन्दते” इति श्रुतिः ॥ २६ ॥ क्षेमधामत्वं दर्शयति—मर्त्य इति। मृत्युरेव व्यालः तस्माद्भीतः पलायन् पलायमानः अस्मान्मर्त्यात् ॥ २७ ॥ भृत्यवित्रासहा भृत्यानां विविधभयनाशकोऽसि मादृशामप्रत्यक्षं कृषीष्ठाः प्रत्यक्षं न कुरु ध्यानधिष्ण्यं ध्यानविषयम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एक इति वैकुण्ठानामपि स्वरूपं चेति पुरुषविराडन्तर्यामिणो रूपम् आकारं चतुर्भुजत्वात् अत एव विराडन्तर्वर्ति ध्यानधिष्ण्यत्वेन प्रसिद्धं मांसदृशाम् अज्ञानाम् अयोग्यत्वादित्यर्थः। रूपं चेदमित्यादि प्रकरणव्याख्याविशेषं चतुर्थसन्दर्भस्य सप्तनवति-

तमपथानन्तरप्रघट्टके दृश्यः ननु मातस्तव किमर्थं भयं तमहं मारयाम्येव तथा ममाप्रत्यक्षतायां गर्भचौर्येण तस्माद्भयमेव स्यात् इत्याशङ्क्य यथार्थमेव निवेदयति ॥ २८-२९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

आद्यमिति यदुक्तम् तद् विवृण्वन्नाह—नष्टे लोक इत्यादि । एकः सजातीयद्वैतशून्यः । अत आह—अशेषसंज्ञ इति । ज्ञानं ज्ञा, सम्यग्ज्ञानं भगवत्तत्त्वज्ञानं येषां ते संज्ञाः पार्षदाः । अशेषा अविनाशिनः संज्ञा यस्य स तथाभूतः सन् शिष्यते पार्षदैः सह शिष्यत इत्यर्थः । पार्षदस्थिरया तल्लोकस्यापि स्थितिरिति (भा० २।९।३२) "अहमेवासमेवाग्रे" इत्यत्र योऽर्थः स एवात्रापि ॥ २५–२७ ॥ अथ स्त्रीत्वस्वभावात् कंसतो भीता स्वल्पतरमपि वरं प्रार्थयमानाह—स त्वं घोरादित्यादि । भिया नामापि न गृहीतम् , उग्रसेनात्मजादित्येवोक्तम् । यतस्त्वं भृत्यवित्रासहोऽसि; अन्यच्च, इदं पौरुषं नारायणीयं रूपं चतुर्भुजाकारं मांसदृशां चर्मचक्षुषात् प्रत्यक्ष मा कृषीष्ठाः । अथवा इदं पौरुषं, इदमुक्तप्रकारं ब्रह्मज्योतिर्यस्येत्यादि निरुपमं पौरुषं पुरुषाकारो यस्य तथाविधम् , इदं पौरुषमित्येकमेव पदम् । ध्यानधिष्ण्यं परमप्रेमानन्दसमाधिस्थानं द्विभुजं श्रीकृष्णरूपं मांसदृशां बहिर्मुखानां मा प्रत्यक्षं कृषीष्ठाः । अतो मातृवचनप्रतिपालनात् अन्तरङ्गेभ्य एव द्विभुजं रूपं प्रकाशयति, बहिरङ्गेभ्यस्तु चतुर्भुजरूपमिति पौण्ड्रादयस्तं तथैव ददृशुः । अथवा, सदृशां सचक्षुषां मध्ये मां प्रति इदं पौरुषं चतुर्भुजरूपं मा प्रत्यक्षं कृषीष्ठाः, मां प्रति द्विभुजमेव स्वरूपं दर्शनीयमित्यर्थः; यत्र पुत्रबुद्ध्या वात्सल्यं जनिष्यते ॥ २५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नष्टे लोके इत्यादौ नातिविप्रतिपत्तिः । एकोऽपि अशेषस्वजने सम्यग्ज्ञानं यस्य, स्वजना अपि ते नित्या इत्याह शेष इति सात्वतग्रन्थे पार्षदसंज्ञा, तेन संज्ञपनं मारण संज्ञपनं संज्ञा मरणम् , न विद्यतेऽशेषाणां पार्षदानां मरणं नाशो यस्मात् सोऽशेषसंज्ञः ॥ २५–२७ ॥ रूपञ्चेत्यादि । रूपं कीदृशम् ? इदं पौरुषम् , इदं पूर्वोक्तप्रकारं यस्य ब्रह्मज्योतिरित्यादिकं पौरुषं सामर्थ्यं यस्य, इदं-पौरुषमित्येकमेवपदम् , एवं प्रकारकपुरुषाकारमित्यर्थः । मांसदृशां प्रत्यक्षं मा कृषीष्ठाः, परमानन्दचक्षुषामेव प्रत्यक्षमिदम् , अतएव गुरुवचनप्रतिपालनकारणेन प्रेमभक्तजनान् विना सामान्येभ्यः शत्रुभ्यश्च तथारूपं न दर्शयेति मन्तव्यम् ॥ २८–२९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

किञ्च महाप्रलयेऽप्यवशिष्यमाणस्य तव कुतो भयमित्याह, नष्टे चराचरे लोके महाभूतेषु लीने सति तेष्वप्यादिभूतमहंकारं गतेषु सत्सु तस्मिन्नप्यहङ्कारे व्यक्ते व्यक्त प्रविष्टे सति तस्मिन्नपि व्यक्ते महत्तत्त्वे अव्यक्तं प्रधानं प्राप्ते सति एको भवानेव शिष्यतेऽवशिष्टो भवतीति पूर्वश्लोकोक्तलक्षणं भवत एकस्यैव रूपं ज्योतिः सत्तामात्रं च शिष्यत इति सपरिवारस्थानपरिच्छदस्यैव तस्य नित्यत्वमभिप्रेतम् अतः शेषसंज्ञः शेषनाम्ना शिष्यत इति व्युत्पत्त्या भवान् शेष उच्यत इत्यर्थः ॥ २५ ॥ कालवेगेनेत्युक्त्या प्राप्तं कालस्यापि स्वातन्त्र्यं वारयन्ती सर्वभीषणात्कालादपि यद्भयं नास्ति तत्र हेतुमाह—योऽयं सर्वसंहारकः कालस्तमपि तस्य तव चेष्टामाहुः हे अव्यक्तबन्धो ! प्रकृतिप्रवर्त्तक ! येन त्वच्चेष्टारूपेण कालेनैव विश्वं चेष्टते स एव कालः कस्तत्राह—निमेषेति । महीयान् पुनः पुनर्वत्सरावृत्त्या द्विपरार्द्धरूपः त्वा त्वां प्रपद्ये यथा त्वं निर्भयस्तथैव स्वमातरं मामपि निर्भयां कुर्विति भावः ॥ २६ ॥ त्वच्चरणाश्रितोऽपि निर्भयः किमुत त्वमित्याह—मर्त्य इति । सर्वान् लोकान् प्रति पालयन् निर्भयं भयाभावं न प्राप यदृच्छया यादृच्छिकमहत्कृपालब्धभक्त्यैवेत्यर्थः । त्वत्पादमेवाब्जं धन्वन्तरिं प्राप्य "अब्जोऽस्त्रीशङ्खे ना निचुले धन्वन्तरौ च हिमकिरणे" इति मेदिनी । हे आद्य ! तेन त्वद्भक्तापि त्वया मातृत्वेन स्वीकृतापि कंसादपि केवलमहमेव महाभयविह्वलेति भावः ॥ २७ ॥ त्वं त्वदीयश्च निर्भयः कथमावामेव महाभयग्रस्तौ करोषि इत्याह—स त्वमिति । घोरादिति महाभीषणत्वम् उग्रेति पिता नोग्रः सेना च नोग्रा किन्त्वात्मज एवोग्र इति भयेनेव साक्षात्तन्नामाग्रहणम् किञ्च भृत्यानां विविधं त्रासं हंसि पित्रोरावयोः किमन्तर्भयं न हरसीति भावः । भो मातः ! कंसवधार्थमेवावतीर्णोऽस्म्यायातु कंसस्तमधुनैव वधिष्यामि चक्षुर्भ्यां पश्येति तदुक्तिमाशङ्क्य वर्द्धिष्णुना पुत्रभावेन तस्मात् कंसवधमसम्भावयन्ती प्रत्युत कंसादेव तदनिष्टमाशङ्कमाना महाभयकम्पितसर्वाङ्गी हन्त हन्त परमेश्वरत्वाहङ्कारवति पुत्रेऽस्मिन् भेदादय उपाया न घटन्त इत्यतः साम्नैव स्वकृत्यं साधयामीति मनसि विमृश्य तद्रूपमुपसंहारयितुं युक्त्यन्तरमुत्थापयति—रूपमिति । पौरुषमैश्वरं ध्यानधिष्ण्यं ध्यानास्पदं मांसदृशां मांसचक्षुषां प्रत्यक्षं मा कृथाः ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं भगवतः सर्वकारणत्वेन सर्वतः आद्यत्वं कारणत्वेऽपि निर्विकारत्वादिमत्वं चोक्तमथ सर्वनिधित्वमाह—नष्टे इति । आदिभूतं तन्मात्रसंज्ञम् एवं व्यक्ते कार्ये स्वस्व कारणद्वारा अव्यक्तं प्रधानं त्वच्छक्तिभूतां प्रकृतिं सा च त्वच्छक्तित्वात्सदैव प्राप्ता परमकारणम् भवन्तम् अशेषेषु स्वस्मिन् लीनेषु चेतनाचेतनेषु तत्प्रलयोत्पत्तिस्थितिनिमित्तकालकर्मादिषु च प्रज्ञा यस्य सः सर्वज्ञः

भवानेव शिष्यते ॥ २५ ॥ ननु, कालवेगेनेत्यनेन कालस्य पृथगवस्थानं प्रतीयते इत्यत आह–योऽयमिति । हे अव्यक्तबन्धो ! प्रकृतिस्वामिन् ! योऽयं कालः एनं तस्याऽशेषसंज्ञस्य ते चेष्टां शक्तिमाहुः तं सर्वकारणकारणं सर्वज्ञं सर्वशक्तिं त्वां प्रपद्ये शरणं व्रजे ॥ २६ ॥ हे आद्य ! सर्वजनक ! ॥ २७ ॥ पौरुषं चतुर्भुजम् ध्यानधिष्ण्यम् अयमर्थः परमविष्णोः परमपुरुषस्य तवावतारभूतश्चतुर्भुजः पुरुषो ध्येयत्वेन प्रसिद्धोऽतस्तद्रूपेण स्थितं त्वां लाका वेत्स्यन्ति अत इदं रूपं मांसचक्षुषां प्रत्यक्षं मा कृषीष्ठाः मा कृथाः "एवं भवान् बुद्ध्यनुमेयलक्षणैः" इत्यत्र करणानां भगवद्रूपग्रहणशक्त्यभावो दर्शितः भगवति तु व्यापकत्वादिना च चतुर्भुजत्वेन द्विभुजत्वादिना च स्वरूपप्रकाशनशक्तिरस्येव अतः प्रत्यक्षं मा कृथाः अयमाशयः मुक्तिस्तु येषामिच्छसि तेषां द्विभुजरूपदर्शनाद्भविष्यत्येव पुत्रबुद्धिस्तु नरलोके चतुर्भुजेऽप्रशस्ताऽतो द्विभुजो बालो भवेति प्रार्थनेति द्विभुजरूपदर्शनान्मुक्तौ को विवादः तत्स्मरणमात्रेणापि मुक्तिर्वक्ष्यते "सकृद्यदङ्गप्रतिमान्तराहितामनोमयीं भागवतीं ददौ गतिम्" इति श्रुतिश्च "द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् । चिन्तयेच्चेतसा कृष्णं मुक्तो भवति संसृतेः" इति ॥ २८ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

हेऽव्यक्तबंधो लक्ष्मीपते । येन कालेन विश्वं चेष्टतेऽयं निमेषादिर्वत्सरांतो महीयान्कालस्य ते त्वां चेष्टां । चेष्टतेऽनेनेति चेष्टां । आहुः । तं कालचेष्टकमीशं ब्रह्मादीनां स्वामिनं क्षेमधाम आत्यंतिकक्षेमप्रदवैकुंठादिस्थानस्वामिनं त्वां प्रपद्य इति । एतेन कालस्य भगवच्चेष्टैक्याभावात् । तं कालं चेष्टामाहुरित्यनुपपन्नमिति दूषणस्यानवकाशः । चेष्टाहुरित्यनेन कालस्य भगवच्चेष्टैक्यं नोच्यते किंतु चेष्टाशब्दस्य चेष्टतेऽनेनेति व्युत्पत्तिमंगीकृत्य ते इति षष्ठ्यास्त्वामिति द्वितीयादेशत्वं च स्वीकृत्य तस्य कालस्य त्वां चेष्टकमाहुरित्यर्थ उच्यत इत्यभ्युपगमात् ॥ ता० ॥ कालश्चेष्टतेऽनेन भगवतेति हेतोर्भगवांश्चेष्टेत्युच्यत इति ॥ २६–२८ ॥

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

नष्टे लोके इति श्लोके शिष्यतेऽशेषसंज्ञ इत्यनेन हरेःशेषैक्यप्रतीतिर्भवति । अतस्तन्निरासाय तदनूद्य तस्यार्थमाह ॥ अशेषसंज्ञ इति । अनेनाशेषाः सर्वाः संज्ञा नामानि यस्येति विग्रह उक्तो भवति ॥ २६ ॥ योऽयं कालस्तस्येति श्लोके योऽयं कालस्तं कालं तस्य पूर्वोक्तस्य तव चेष्टा पदस्य प्रसिद्धक्रियारूपचेष्टार्थत्वभ्रांतिनिरासाय तस्मिन्नेव भागवतश्लोके चेष्टते येन विश्वमित्यनेन व्युत्पत्तिरुक्ता । तत्रान्वयपूर्तेर्विभक्तिविपरिणामेनावृत्तपूर्वपदेनान्वयं दर्शयति ॥ चेष्टत इति । येनेत्यस्यार्थः ॥ अनेनेति । चेष्टतो विश्वमिति शेषः । इति व्युत्पत्त्या कालश्चेष्टेत्युच्यत इत्यर्थः । न चेदं तात्पर्यवाक्यं चेष्टापदस्यैव व्युत्पत्तिप्रदर्शकं न तु चेष्टाव्युत्पत्तिप्रदर्शकस्य चेष्टते येन विश्वमिति भागवतवाक्यस्यान्वयप्रदर्शकमिति वाच्यम् । तथात्वे चेष्टतेऽनयेति तात्पर्यवाक्यप्रयोगः स्यान्न त्वनेनेति । चेष्टायाः स्त्रीलिंगत्वात् । अत उक्तं युक्तमिति ॥ २७–२८ ॥

इति श्रीभागवततात्पर्यटिप्पण्यां चतुर्थोऽध्यायः ॥ १०–४ ॥ छ ॥ (अस्मत्क्रमेण तृतीयोऽध्यायः)

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नष्टे लोके इति श्लोके शेषसंज्ञ इति शेषतादात्म्यमुच्यत इति प्रतीयत इति स्वयमकारप्रश्लेषं कृत्वा विवृणोति ॥ अशेषसंज्ञः सर्वनामेति । केचिदेवमपि प्रदर्शितान्यथाप्रतीतेर्विना विवरणमनिवारणात् । वस्तुतस्तु शिष्यत इति शेषपदनिर्वचननैर्भर्यभ्रमेण शेषनामैकत्वमेव भगवत इति प्रतीयते । सा च न माहात्म्यापादिकेत्यत अकारप्रश्लेषेण व्याख्याति ॥ अशेषेति । अशेषाः संज्ञा नामानि । नामानि सर्वाणि यमाविशन्तीत्यादेर्यस्य सः ॥ ततश्चायं श्लोकार्थः ॥ द्विपरार्धावसाने शतानन्दशतायुर्लक्षणो द्विपरार्धः कालस्तस्यावसाने लोके नष्टे । प्रतिज्ञातां नष्टिमेव विशिनष्टि ॥ भूतेष्विति । कालवेगेन कालजवेन महाभूतेषु पृथिव्यादिष्वादिभूतं महत्तत्त्वं गतेषु व्यक्ते प्रकृतितो व्यक्ते महत्तत्त्वेऽव्यक्तं प्रकृतिं याते सति सर्वेषां नाशेन वाच्यार्थहीनता वेदादेरित्यत आह ॥ अशेषसंज्ञः शेषनामा सन् भवान् शिष्यत इति । अत्यन्तसमीपवर्तिनीरमेये क इति वेशकोटिनिवेशाद्वोक्तिरिति व्याकुर्वते ॥ २५ ॥ योऽयं काल इति श्लोके कालस्य भगवच्चेष्टारूपत्वमद्रव्यत्वात्कालस्य कथं चेष्टारूपत्वमित्यत आह ॥ चेष्टत इति । एतच्चार्थकथनपरमिति नानेन लिङ्गविपर्यासदोषः ॥ ततश्चायं श्लोकार्थः ॥ तर्हि कालस्य सकलकलनसमर्थता किमित्यत उक्तापवादमाह ॥ योयऽमिति । येन त्वया विश्वं चेष्टते तस्य ते सम्बन्धी कालो योऽयं निमेषादिर्वत्सरान्तो महीयानुक्तद्विपरार्धरूपस्तं कालं चेष्टामाहुः । हे अव्यक्तबन्धो रमापते । अव्यक्तं श्रीरुदाहृता । अव्यक्तात्पुरुषः पर इत्यादेः । तं क्षेमधाम क्षेमस्थानं नित्यक्षेममोक्षाश्रयं वा ईशानमीशनादेव चेशान इति स्मृतेः सर्वप्रेरकं प्रपद्ये ॥ २६ ॥ तं क्षेमधामत्वं दर्शयति ॥ मर्त्य इति । हे आद्य यो मर्त्यो मृत्युरेव व्यालः सर्पो वा दुर्दन्ती वा तस्माद्भीतः । व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनीति विश्वः । सर्वान् लोकान्पलायन्निर्भयस्थानं नाध्यगच्छन्नालब्धः सो यदृच्छया यदृच्छा तु तदिच्छा स्यादिति त्वदिच्छया त्वत्पादाब्जं प्राप्य शेते । सति मृत्यौ कथं स्वास्थ्येनावस्थानमित्यत आह ॥ मृत्युरिति । अस्मात्त्वत्प्राप्तिमतो मृत्युरपैति । स्वस्मिन् अस्मज्जातिनाथे तिष्ठतीति स्वस्थः स सन् शेते । य इति मृत्युसर्पोपासर्पदहं पद्मोऽस्मीदं च पादाब्जमिति मृत्युं दुर्दन्त्यपागादस्मादिति प्रेक्षावन्त उत्प्रेक्षयन्ति । एकनाम्नोः

सदा प्रीतिरित्याम्नानात् ॥ २७ ॥ यस्त्वमुक्तरीत्या भृत्यवित्रासहा भृत्यानां वित्रासं हन्तीति स तथाऽसि अतो घोरादुग्रसेनात्मजात्त्रस्तान्नः पाहि । अणुभाष्याद्युदाहरणपूर्वकं प्रकृत्यन्तररूपत्वेनातीतस्कन्धोक्तः समाधिरवधेयः । त्रायस्व भृत्यानां वित्रासं यथा भवति तथा हासयति सन्तोषातिशयेन तद्वित्रासह यद्रूपमित्यप्यन्वयो ज्ञेयः । ध्यानधिष्ण्यं ध्यानस्थानं तद्विषयमिति यावत् पौरुषं रूपं चतुर्भुजत्वादिमन्मादृशां जनानामप्रत्यक्षं कृषीष्ठाः कुरु त्वमन्यद्रूपं लोकपालवद्दृशां पिशितलोचनानामप्रत्यक्षं मा कृषीष्ठाः साधारणाकारधारणेनास्माकं दृग्विषयो भव भगवन्नित्यावृत्याऽन्वयो वा । स्वत्वावन्यपर्यायावित्युक्तः ॥ २८ ॥

श्रीसुबोधिनी

एवमाधिदैविकरूपं निरूप्याध्यात्मिकं रूपं निरूपयति नष्टे लोक इति, आधिभौतिकस्य सर्वस्याध्यात्मन्येव लयः, तस्यैवात्मत्वप्रतिपादनात्, दृश्यते च स्वप्नादौ बाह्यप्रकाशेऽप्यान्तरः प्रकाशः, तस्मादयं भगवानात्मा, अन्यस्य लयावधित्वं नास्तीति तस्य लयावधित्वमाह लोके प्रकाशे चतुर्दशलोकेषु च नष्टेषु सर्वनाशो नियतकाल इति ज्ञापयितुमाह द्विपरार्धावसान इति, ब्रह्मण आयुः परशब्देनोच्यते, तस्यार्धं परार्धं, परार्धद्वये ब्रह्मसमाप्तिः, बन्धमोक्षव्यवस्थां लोके वक्तुं ब्रह्मण आयुषोर्धव्यवहारो ब्रह्मण उत्तरायुष्येव ब्रह्माण्डस्थानां मुक्तिरितिज्ञापनार्थः, द्विपरार्धस्याप्यवसाने समाप्तौ, ब्रह्माण्डस्य तु प्रलयस्तदैव भवति, तदा तत्त्वानि तिष्ठन्ति, तेषामपि प्रलयमाह महाभूतेष्वादिभूतं गतेष्विति, आदिभूतशब्देनाहङ्कार उच्यते, अग्रे महत्तत्त्वस्यापि प्रकृतौ लयस्य वक्ष्यमाणत्वात्, अहङ्कारोपि महति लीयत इति ज्ञापितं, भूतानामादिभूत इतिव्युत्पत्त्यादिभूतशब्दवाच्योहङ्कारो भवति, आदौ भूतो जातश्चेन् महत्तत्त्वमेव, व्यक्ते महत्तत्त्वेऽव्यक्तं प्रकृतिं गते सति, व्यक्ताव्यक्तपदाभ्यामेतत् सूचयति, अक्षरात् प्रकृतिपुरुषविभागपक्षे प्रकृतिपुरुषयोरप्यक्षरे लयः, कालादीनामव्यक्ततैव, किं बहुना ? सर्वमेव व्यक्तमव्यक्ते प्रविष्टं, तत्र प्रवेशे कालवेग एव हेतुः, भगवतः सर्वोपसंहारेच्छायां सर्वोपसहारार्थमधिकारी कालो वेगवत्तरो भवति, एवं स्वयमप्यक्षरे, अक्षरं पुरुषोत्तमे, पुरुषोत्तमाभिन्ने वाक्षरे, तदा भवानेवैकः शिष्यते, तस्य भगवतः स्वरूपाणि यानि स्थितान्याधिदैविकानि तेषामपि लयमाशङ्क्य तन्निवृत्त्यर्थमाहाशेषसंज्ञ इति, अशेषाः सर्वाः संज्ञा यस्य, सर्वशब्दवाच्यो भगवानेक एवेति, एक एव शिष्यत इत्यर्थः, एवमाधिभौतिकानां सर्वेषां लयस्थानभूतोध्यात्मा उक्तः ॥ २५ ॥

आधिभौतिकं रूपमाह योयं काल इति, आधिभौतिकानामाधिभौतिकभूतो भगवान् न त्वाधिभौतिक एव, तथात्वज्ञापकमाह कालो यस्य चेष्टेति, कालप्रेरितानि सर्वाण्येवाधिभौतिकानि, योयं कालः सर्वेषां मूलभूतस्य, स एव भवानिति ते तव चेष्टामाहुः, ननु भगवतश्चेष्टासत्त्वे किं प्रमाणं चेष्टाया वा कालत्वे ? तत्राहुरिति चेष्टायाः कालत्वे मानमुक्तं, चेष्टासत्त्वे मानमाह चेष्टते येन विश्वमिति, येन कालेन विश्वमेव चेष्टते, न हि कारणस्य चेष्टाभावे कार्ये चेष्टा भवति, कालवशाच्च चेष्टा, चेष्टायाः कर्मरूपत्वात्, कर्म च कालजनितं, काले कर्मविधानात्, अतो भगवच्चेष्टारूपः कालः, ननु प्रकृतिकारणपक्षे तद्द्वारा कार्यपक्षे वा न चेष्टारूपः कालः सिध्येदित्याशङ्क्याहाव्यक्तबन्धो इति, अव्यक्तस्य प्रकृतेर्बन्धुः सर्वकार्यकर्ता, अतः प्राकृतकार्यपक्षेपि चेष्टारूपः कालः, आधिदैविककालस्य भगवद्रूपत्वात् तद्व्यावृत्त्यर्थमाह निमेषादिर्वत्सरान्त इति, यद्यपि परमाणुकाल आदिभूतस्तथापि परमाण्वादिलवान्तानामतिसूक्ष्मत्वाद् व्यवहारानौपयिकत्वमाशङ्क्य निमेषादिरेव गृहीतः, 'द्विपरार्धावसान'त्वाच्चेष्टारूपकालस्य संवत्सरो मध्यम इति ततोप्याह महीयानिति, एवं यस्य चेष्टा कालो य"श्चावशिष्यते" यश्चाधिदैविकः सर्वकारणकारणभूतस्तं त्वां प्रपद्ये शरणं गच्छामि, अनेन 'बालकः पुत्रः कथं शरणार्ह' इति निरस्तं, तं त्वामित्यत्र प्रमाणं पूर्वमुक्तमे'वाहु'रित्य'ध्यात्मदीप' इति च 'विष्णु'रिति च, एवं सर्वरूपोपि यदि रक्षादिकं नाविष्कुर्यात् तदा शरणगतिरप्रयोजिकेति तद्व्यावृत्त्यर्थमाहेशानमिति, यत्र भगवत एतावन्तो धर्माः स ईश एव भवति, ऐश्वर्यं विलम्बं न सहते न चोपेक्षते, नन्वीश्वरो दैत्यपक्षपाती चेत् तदापि कार्यं न सिध्यतीति तदर्थमाह क्षेमधामेति, क्षेमाख्यं शुद्धसत्त्वं धाम यस्य, अतः शिष्टानामेव पक्षपातं करिष्यतीति न काचिच्चिन्ता, आधाररूपधर्मस्यैव प्राधान्यख्यापनार्थं लिङ्गव्यत्ययः ॥ २६ ॥

एवं भगवतो रूपत्रयं प्रपत्तिं च निरूप्य तस्याः प्रपत्तेः प्रकृतोपयोगित्वाय हेतुं निरूपयति मर्त्य इति, अतीन्द्रियः कालो लोके स्वज्ञापनार्थं स्वप्रतिकृतिं सर्पमुत्पादितवान्, लौकिकास्त्वलौकिकं तद्द्वारैव प्रतिपद्यन्ते, यथा सिंहप्रतिकृतिर्ग्रामसिंहः, एवं बिडालगवादयश्च व्याघ्रगवयादीनां प्रतिकृतिरूपाः, कालः स्वभक्ष्यमेव सृजति, अतः कालसृष्टा मर्त्या इत्युच्यन्ते, तस्य च भार्या कुण्डलिनी शक्तिः स्वभर्तृज्ञापिका सर्वेषु पुरुषदेहेषु तिष्ठति, योगो हि तदुद्बोधकः, तच्छरणं गत एव योगी, तदा तया प्रार्थितः कालः शीघ्रं न भक्षयति, तस्य चाध्यात्मा वेदः, तदुक्तकर्मणापि विलम्बो भवति, अन्ये च सर्वे देवाः पुराणोक्तास्तस्याधिभौतिकरूपाणि, तेपि विलम्बहेतवो भवन्ति, इमे त्रिविधा अपि धर्ममार्गवर्तिनो निरन्तरमेकनिष्ठास्तत्प्रवणाः, ये पुनर्लौकिकाः साधारणाः शीघ्रं भक्षणार्थमेव स्थापिता ओदनभूतास्ते चेत् कालातिक्रमार्थं यतन्ते तदा कालकार्यं स्वस्मिन् रोगादिकमनुभूय कालनिवर्तकत्वेन श्रुतान् बहूनेव धर्मान् कर्तुं यतन्ते तद् व्यालभीतस्य पलायनं मूषकस्येवाग्रे पतितस्य, मृत्युः कालस्य मुखं, सोपि व्यालः, भयहेतुवाचको व्यालशब्दो मुखहेतुक एव, यत्र क्वापि गच्छन् क्षुत्पिपासे जरावलीपलिताद्युच्चनीचधर्माननुभवति, अतः कालकार्यदर्शनाद् भयं न निवर्तते, देवत्वे मानुषत्वे वृक्षत्वे वा बहुकालस्थितधर्मेषु भयं निवर्तत इत्याशङ्क्य लोकान् सर्वानित्युक्तं, निर्भयं भयाभावं,

अतः केनाप्युपायेन मृत्युर्न निवर्तत इति **निर्भयं नाध्यगच्छन्** भयनिवर्तकस्थानं वा, शास्त्रानुभवयोः संवादे हि तन् निवर्तते, येपि पूर्वमुक्तास्त्रिविधास्ते कालाधीना इत्यवश्यभक्ष्यत्वे न समर्था भवन्ति, प्रार्थना हि दुर्बला, एवं शरणान्वेषणार्थं परिभ्रमणे क्रियमाणे सर्वत्र प्रवर्तको भगवान् कदाचित् परितुष्यति तदा भगवच्चरणप्राप्तिः, सत्सङ्गो भागवतं चेति भगवच्चरणद्वयमाधिभौतिकं, ज्ञानं भक्तिश्चाध्यात्मिकं, चरणावेव प्रसन्नस्याधिदैविकौ, तन्मध्ये अन्यतरप्राप्तावपि कृतार्थतेति ज्ञापयितुं **त्वत्पादाब्जमित्युक्तं**, भगवत्सहितं भगवच्चरणारविन्दं **प्राप्य, यदृच्छया** भगवदिच्छया, कालसम्बन्धाभावाय **यदृच्छयेत्युक्तं**, नियतकालस्य यदृच्छात्वाभावात्, अब्जपदेन चालौकिको लोक एव ज्ञापकः शोभातिशयो निरूपितः, त्रितयापेक्षयाप्यतिशयः, अनेनैव विश्वासेन, अद्यैव यदैव चरणप्राप्तिस्तदैव, **स्वस्थः** शेते, मृत्युनिवारणार्थं यत्नं च न करोति, मृत्युः पुनः स्वत एव निवर्तते, भगवच्चरणारविन्दमत्र वर्तत इत्यस्मादसाध्यादपगमनं युक्तमेव, शास्त्रं तु प्रमाणं, संवादस्त्वलौकिकभावसिद्धिः, कालनियन्ता च भगवान्, अतोनुभवप्रमाणयुक्तयोत्रैव सन्तीति न पूर्ववदस्मिन् मार्गे शङ्का, **निःकपटतया प्रवृत्तौ तु नात्र व्यभिचारः** ॥ २७ ॥

एवं शरणागतौ हेतुमुपपाद्य त्रयं प्रार्थयति **स त्वमित्यादि**त्रिभिः, अत्रावसरे त्रयं सम्भवति, भगवानिदानीमेवान्तर्हितो भवेत् पश्चात् स्वेच्छयान्यत्र स्थितः कंसं मारयेत्, तदिमां कथां कंसः श्रुत्वा मारयेदस्मान् ज्ञानदापनयोर्नियोगात्, अतो रक्षा प्रार्थनीया, इदानीं वा कंसं मारयेत् ततो गच्छेत् ततः कंसपक्षपातिनः पश्चादस्मान् मारयेयुः, तदर्थमिदं रूपं लौकिके न व्यापनीयमिति प्रार्थनीयं, एवंरूपेणात्रैव च स्थितिरपि सम्भवति तदालौकिकं दृष्ट्वा प्राकृतो लोको द्वेषं कुर्यादस्मदादयश्च शीघ्रं मुच्येरन् भक्तिरसानुभवश्च न स्यान् मर्यादा च भज्येतेत्यतो रूपाप्रदर्शनप्रार्थना युक्तैव, एतत्सर्वदोषपरिहारार्थं साम्प्रतं कंसस्याज्ञानं भवत्विति प्रार्थना, इदानीं मारणे वा युद्धसमये स्वजीवनार्थमनुपसंहारे पूर्वोक्तपक्षसम्भवादुपसंहारोपि प्रार्थ्यः, भगिनीपतिश्चेति कदाचिन्न मारयेदित्याशङ्काव्युदासार्थमाह **घोरादिति**, प्रार्थनीयसर्वदानसामर्थ्यार्थं **स त्वमिति**, स पूर्वोक्तधर्म एव त्वं, **घोरो** निर्दयो भयानकः, क्रूर इतियावत्, उपायेन विषादिनाऽमारणार्थ**मुग्रसेनात्मजादित्युक्तं, उग्रसेनस्य** शरीरजः कथं वध्यो भवेत् ? घोरत्वात् स मारयेदेव, **त्रस्तानिति**, पूर्वपुत्रमारणेन **त्राहि** पालय, उभयपदी धातुरयं प्रचुरप्रयोगान्निश्चीयते, ननु पर्यवसाने बाधाभावादिदानीं मारणपक्षे किमिति रक्षा प्रार्थ्यत इति चेत् तत्राह **भृत्यवित्रासहासीति**, **भृत्यानामस्मदादीनां वित्रासं** भयं हन्तीति तथा, असीति तव सङ्कल्पः, यथा गन्धः पृथिव्या एवैवं भगवतो भक्तदुःखनिवर्तकत्वमेव, यथास्मद्रक्षेदानीममारणेनान्यत्र गमनेन च कर्तव्या तथा स्थितौ रूपोपसंहारश्च कर्तव्य इत्याह रूपं चेदमिति, सर्वदानेन रूपेण स्थातुमयुक्तमिति, **इदं रूपं मांसदृशां चर्मचक्षुषां प्रत्यक्षं मा कृषीष्ठाः**, तर्हि कस्यापि मुक्तिर्न स्यादित्याशङ्क्याह **ध्यानधिष्ण्यमिति**, ध्यानमेव **धिष्ण्यं** स्थानं यस्य, ध्यान एव प्रकाशो भवतु न बहिः, अतः सर्वं सुस्थं भविष्यतीतिभावः, **मा कृषीष्ठा** इत्यनेन चेतज् ज्ञापितं, अयं स्वेच्छयैव प्रकटीकरोति, वस्तुतस्त्विन्द्रियावेद्यमेव, **मांसदृशामित्यनेन** दैत्या एते मांसभक्षका मांसमेव पश्यन्ति सर्वत्र न तु विहितं निषिद्धं वा विचारयन्तीत्युक्तं, चकारस्तूक्तसमुच्चयार्थः ॥ २८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

व्यक्तेव्यक्तमित्यत्र पुरुषोत्तमाभिन्न इति, पुरुषोत्तमचरणात्मक इत्यर्थः ॥ २५ ॥ **त्वत्पादाब्जं प्राप्येत्यत्र** ननूक्तपलायनविशिष्टस्य साक्षाद्भगवच्चरणप्राप्तिर्न सम्भवत्यतोनुपपन्नमिदमित्याशङ्क्य तत्तात्पर्यमाहुः **सत्सङ्गो भागवतं** चेत्यादिना ॥ २७ ॥ **स त्वं घोरादित्यत्रेदानीं मारणे** वेत्यादि, रक्षाप्रार्थनेतिशेषः, अस्मिन् पक्षे रूपानुपसंहारातिरिक्तस्य बाधकाभावात् तत् कृत्वान्यत्र स्थेयमितिभावः, एतदेवोक्तमनुपसंहार इत्यादिना, **अन्यतरेति**, इदानीमेव मारणं लोके चैतद्रूपदर्शनमित्येतयोरन्यतरस्य तथात्वायेत्यर्थः, इदानीं मारणमन्यत्र गमनं च मध्यमः पक्षः, एवं सत्यपि यदि तममारयित्वैवान्यत्र गतिर्भवति तदा स्वतस्तन्मारणान्निवृत्तिर्भवतीति, तथापि दोषानिवृत्तिरित्याहुर्मध्यमपक्षे स्वत इत्यादिना, तेन जन्माज्ञानस्यावश्यकत्वमुक्तं भवति ॥ २८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

नष्टे लोक इत्यत्र **तस्यैवेति**, अभिमन्तुः, लोकशब्दस्यार्थद्वयमभिप्रेतमित्याशयेनाहुर्लोक इत्यादि, लोक्यतेनेनेतिकरणव्युत्पत्तौ **लोको** बाह्यप्रकाशः, लोक्यन्त इति लोकाः कर्मव्युत्पत्तौ, ते चतुर्दश, यद्यपि ब्रह्मणः 'सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेती'तिश्रुत्याध्यात्मिकस्यापि लय उच्यते परं सोत्र नाभिप्रेत इतिज्ञापनाय विवृण्वन्ति **स** चेत्यादि, **स कालो ब्रह्मण** इत्यादिना विवृतः, तथा च निद्रापूर्वभाग इत्यर्थः, **तदैवेति**, एतेनावान्तरकल्पेषु त्रिलोक्या इव महाकल्पेषु सप्तलोक्याः प्रलयः शेषाद् ब्रह्माण्डरूपा भूस्तिष्ठतीत्यनुसन्धेयमिति ज्ञापितम्, **आदौ** भूत इतिपक्षेहङ्कारो नायातीतिमूलस्थे **गतेष्वितिपदेहङ्कारद्वारा गतेष्विति** व्याख्यानं ज्ञेयम्, **एतत् सूचयतीति**, एकस्यैव भगवतः स्थितिं सर्वसंहारकाले वदन्ती व्याख्यायमानप्रक्रियां सूचयति, **पुरुषोत्तमाभिन्न** इतिपक्षस्यार्थष्टिप्पणीतो ज्ञेयः, **सर्वशब्दवाच्य** इति, सर्वैः शब्दैर्वाच्य इत्यर्थः ॥ २५ ॥ **यो यं काल इत्यत्राधिभौतिकानामाधिभौतिकमूल** इति, 'तदभिध्यानादेव त्वि'तिन्यायेन तत्र प्रविष्टस्तल्लिङ्गः, **स एवेति**, 'प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानविचेष्टा यतः स भगवान् काल इत्युपलक्षित' इति तृतीयस्कन्धे कपिलवाक्यात् काले निविष्टः काललिङ्गः, **चेष्टामाहुरितिमूलवाक्यं**

तमित्यध्याहारेण पूरणीयं, योयमिति, यच्छब्दस्य तच्छब्दसापेक्षत्वादिति, चेष्टासत्त्वमुपपादयन्ति न हीत्यादि, चेष्टायाः कालत्वे प्राहुरिति यन्मानमुक्तं तदुपपादयन्ति कालेत्यादि, अत इति, यो यज्जनकः स तदात्मक इतिव्याप्तेः, प्राकृतकार्यपक्षेपीत्यादि, 'प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः सतोभिव्यञ्जकः कालो ब्रह्म तत् त्रितयं त्वह'मित्येकादशस्कन्धवाक्यादित्यर्थः, ततोप्याहेति, ततोप्यधिकमाह, आधाररूपधर्मस्येति, आधारभूतस्य धर्मरूपस्य सत्त्वस्य ॥ २६ ॥ मर्त्य इत्यत्र रूपत्रयमिति, कालरूपमीश्वररूपं विष्णुरूपं च, हेतुमिति, प्रपत्तिहेतुभूतं भयम्, अलौकिकमिति, अतीन्द्रियं भयजनकं कालं, प्रतिकूल्या तादृशपदार्थान्तरप्रतिपत्तौ दृष्टान्तमाहुर्यथेत्यादि, ननु भवत्वेवं तथापि भयं कुत इत्यत आह कालः स्वभक्ष्यमेव सृजतीति, कालस्य सृष्टिकर्तृत्वं तृतीयस्कन्धे 'सोनन्तोन्तकरःकालोनादिरादिकृदव्ययः जनं जनेन जनयन् मारयन् मृत्युनान्तक' इत्यत्र भारते राजधर्मेपि स्पष्टं, तत्र गमकमाहुरत इत्यादि, तदुपपादयन्ति तस्येत्यादि, तस्येति, कालात्मकस्य सर्पस्य, तस्य चेति, अतीन्द्रियस्य, त्रिविधा इति, योगिनः कर्मठा देवोपासकाश्च, तत्प्रवणा इति, कालाधीनाः, ओदनभूता इति, 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदन' इतिश्रुत्युक्ताः, मुखमिति, भक्षणे द्वारमुक्ततृतीयस्कन्धवाक्यात्, सोपीति, मृत्युरपि, व्यालत्वमुपपादयन्ति भयेत्यादि, विविधमालभनमर्थोस्मादिति क्षीरस्वामिभिर्निरुक्तत्वाद् योगेन भयहेतुवाचको व्यालशब्दः, तथापि मुखहेतुक एव 'व्यालो दुष्टगजे सर्पे शठे श्वापदसिंहयो'रिति कोशे मुखवतामेवोक्तत्वात् तेषु योगरूढः, अन्यथा 'नदीप्रवाहपतद्भित्तिनिस्त्रिंशा'दावपि योगस्य तुल्यत्वात् तत्रापि प्रयोगः स्यात्, अतस्तस्मात् पलायनं मूषकस्येवेत्यर्थः, तदाहुर्यत्रेत्यादि, इत्युक्तमिति, तथा च देवत्वादावपि न निवर्तत एवेत्यर्थः, कुतो नाध्यगच्छदित्यत आहुः शास्त्रेत्यादि, तथा च संवादाभावान्नाध्यगच्छदित्यर्थः, त्रिविधा इति, योगवेदोपासनाः, अवश्यभक्षकत्वे नेत्यत्र सप्तम्यनन्तरं नेति भिन्नं पदं, हिर्हेतौ, 'योसौ तपन्नुदेती'तिश्रुतिविचारे तथानिर्णयात्, तर्हि कथं भयनिवृत्तिरित्याकाङ्क्षायामुत्तरार्धं व्याकुर्वन्त्येवमित्यादि, तन्मध्य इति, त्रिविधयोर्द्वयोर्मध्ये, त्वत्पादाब्जमित्यत्र समासस्यार्थमाहुर्भगवत्सहितमिति, त्वया सहितमितिव्युत्पत्त्या तथार्थः स्फुरति, लोक एवेति, सप्तमी त्रितयापेक्षयेति, कुण्डलिनी वेददेवापेक्षया ते कालाधीना, इदं च तदतीतमिति, ततोतिशयः, स्वपदार्थमाहुर्मृत्स्विवत्यादि, तर्हि मृत्युः स्वतः कुतो न प्रवर्तत इत्यत आहुर्मृत्युरित्यादि, एवं सर्वं व्याख्याय सिद्धमर्थं निगमयन्ति शास्त्रं त्वित्यादि, 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मे'तिश्रुतौ 'नास्य जरयैतज् जीर्यति न वधेनास्य हन्यत' इति तैत्तिरीये च 'यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेभयं प्रतिष्ठां विन्दतेथ सोभयं गत' इतिशास्त्रं प्रमाणं, संवादस्तु स्वस्यालौकिकभावसिद्धिः, युक्तिस्तु सर्वस्य वशी सर्वस्येशानो' 'भीषास्मा'दित्युपक्रम्य 'मृत्युर्धावति पञ्चम' इत्यादिश्रुत्युक्ता, कालनियन्ता च भगवानत एभ्यो हेतुभ्यस्तथेत्यर्थः, ननु लोके व्यभिचारो दृश्यत इत्यत आहुर्निःकपटतयेत्यादि, तथा च यथा प्रह्लादस्य तथास्यापि प्रवृत्तिश्चेत् स्यात् तदा न व्यभिचार इत्यर्थः ॥२७॥ स त्वं घोरादित्यत्र श्लोकत्रयोक्तानां चतसृणां प्रार्थनानां तात्पर्यं वदन्त्यत्रेत्यादि, एतेषु श्लोकेषु प्रथमे प्रार्थनाद्वयं तत्र प्रार्थनीयेत्यन्तेन प्रथमायास्तात्पर्यमुक्तम्, इदानीमित्यारभ्य प्रार्थनीयमित्यन्तेन द्वितीयस्याः, एवमित्यारभ्य युक्तं वेत्यन्तेन तत्रैव पक्षान्तरोपपादनेन युक्तत्वसमर्थनं, न स्यादिति, अस्माकमितिशेषः, मयदिति, पुत्रभावमर्यादा, एवं युक्तं वेत्यन्तेन प्रथमश्लोकतात्पर्यमुक्तं, एतदित्यादिना द्वितीयस्य, इदानीं मारणेत्यादिना तृतीयस्य ॥ २८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नष्टे लोक इति, अध्यात्मन्येवेति, अधिक आत्माध्यात्मा तस्मिन्नित्यर्थः, तत्र लयेनुभवं प्रमाणयन्ति दृश्यते चेति, अन्यस्येति, स्वप्नद्रष्टुर्जीवस्येत्यर्थः, अत्र प्रलयेवधिर्न भवति किन्तु स्वप्नमात्र इत्यर्थः, ब्रह्माण्डस्थानां मुक्तिरिति, अधिकारिणां क्रममुक्तिं प्राप्तानां परान्तकालप्रारब्धानां चेतिशेषः, पूर्वपरार्धे सृष्टेरुत्तरोत्तरमभिवृद्धिरतोधिकारिणां बन्ध एवोत्तरायुषि सृष्टेरुत्तरोत्तरं ह्रासोतोधिकारिणामपि क्रमेण बन्धनिवृत्त्यन्ते मोक्षो 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पद'मितिवाक्यादितिभावः, ब्रह्माण्डस्थानामित्युक्तेरधिकारिन्यायेन येषां येषां च क्रममुक्तौ ब्रह्मणः परान्तकाले प्रारब्धसमाप्त्या मोक्षः प्राप्तस्तत्रोन्तेन्येषां तु ज्ञानिनां भक्तानां च 'निशि नेति चेन् ने'तिसूत्रत्रयेण कालनियमाभावः प्रतिपादित एव ॥ २५ ॥ स त्वमित्यत्र रक्षाप्रार्थनायां हेतुः प्रथममुक्तः, रूपाप्रदर्शने हेतुमाहुरिदानीं वेति, पक्षान्तरेणेदं रूपमिति, कंसमारकं रूपमित्यर्थः, यद्यपि सर्वदैवंस्थितावेतद्दोषनिवृत्तिस्तथापि दोषान्तरं भवतीत्याहुस्तदेति, पूर्वोक्तपक्षेति, मारयित्वा गमने कंसपक्षपातिनोस्मान् मारयेयुरेवंरूपेण स्थितौ च द्वेषं कुर्यादित्युक्तानि दूषणानि भवेयुरित्यर्थः, तथा चेदानीं मारणे चेत्यनेन रक्षाप्रार्थनायामेव रक्षान्तरमुक्तमुपसंहारप्रार्थनायां तु पूर्वोक्तपक्ष एवानूदित इति ज्ञेयं, रूपं चेदमित्यस्याभासे स्थिताविति, अन्यत्रापि स्थितावित्यर्थः ॥ २८ ॥

बुभुत्सुबोधिका

नष्टे लोके इत्यत्र आध्यात्मिकं रूपमिति अध्यात्मनि भवमाध्यात्मिकम्। तत्र भव इति ढक्। लयम्। 'अशेषसंज्ञः' च। उपपादयन्ति आधिभौतिकस्येत्यादि। 'अत्रात्मा स्वयंज्योतिर्भवती'ति श्रुत्युक्तस्यैव। 'अत्रे'ति स्वप्ने। तथा सुषुप्तिसाक्षिप्राज्ञस्यैव। मुक्तावध्यात्मा तस्यैव। तत्र लयेऽनुभवं प्रमाणयन्ति स्म दृश्यते चेत्यादि। अध्यात्मनीति अव्ययीभावभ्रमो न कर्तव्यः। सर्वस्य

लोकस्यात्मनि लयाभावात्। अतोधिक आत्माध्यात्मा तस्मिन्नित्यर्थः। स्वकारणे इत्यर्थः। एवकार आत्मसृष्टावप्येवमिति प्रकारान्तरयोगव्यवच्छेदकः। तस्यैवेति अभिमन्तुः। एवकार इन्द्रियादियोगं व्यवच्छिनत्ति। स्वप्नादाविति आदिना सुषुप्तिः। 'सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेती'ति श्रुत्याध्यात्मिकस्याभिमन्तुर्ज्ञानस्य तमोरूपाज्ञानाभिभवेन लय उच्यते। सोप्यध्यात्मके। सुखमाधिदैविकमन्तर्यामिसुखे आधिभौतिके मिलितं सुखरूपमाध्यात्मिकमित्यर्थः। अयमिति 'अत्रात्मा स्वयंज्योतिर्भवती'ति श्रुत्युक्त आध्यात्मिकः अयं प्रत्यक्षः। श्रुता'वत्रे'ति स्वप्ने। अयमात्माधिक इत्यर्थः। अन्यस्येति स्वप्नद्रष्टुर्जीवस्य। स लयेवधिर्न भवति किन्तु स्वप्नमात्र इत्यर्थः। लयावधित्वमिति लयाधिकरणत्वेपि 'जन्माद्यस्य यत' इत्यारभ्मे व्याससूत्रे चेति लयावधित्वम्। पञ्चमीश्रवणात्। आहेति 'नष्टे लोक' इत्यनेनाहेत्यन्वयः। लोकस्य सविषयत्वाल्लोकशब्दस्यार्थद्वयमभिप्रेतमित्याहुः लोक इत्यादि। लोक्यतेनेनेति लोकः बाह्यप्रकाशः। लोक्यन्त इति लोका इति कर्मव्युत्पत्तौ ते चतुर्दश। सर्वनाश इति न तु यस्य कस्यचित् स्वाप्निकः। परार्धद्वय इति द्वे परार्धे द्विपरार्धं द्विगुः। लोक इति ब्रह्मकार्ये। ब्रह्मण उत्तरेति एवकार इवार्थे। ब्रह्माण्डस्थानामिति पूर्वायुष्ये विषयासक्त्या बन्धः। पञ्चाशद्वर्षपर्यन्तम्। उत्तरोत्तरमभिवृद्धितः। उत्तरायुषि सृष्टेरुत्तरोत्तरं ह्रासोतोधिकारिणामपि क्रमेण बन्धनिवृत्त्या मोक्ष इति ज्ञापनार्थम्। प्रलय इति प्राकृतिकप्रलयः 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे, परस्यान्ते कृतात्मानः प्रविशन्ति परं पद'मिति विशिष्टजीवानाम्। प्रलय इति प्राकृतिकः। तत्त्वानीति ब्रह्माण्डकारणानि। तदेवेति एतेनावान्तरकल्पेषु त्रिलोक्या इव शतमहाकल्पेषु सप्तलोक्याः प्रलयः। चतुर्दश लोकाः सात्त्विकपक्षे। त्रिलोकीपक्षस्तामसः। सप्तलोकीपक्षो राजसः। शेषा तु ब्रह्माण्डरूपा भूस्तिष्ठतीत्यनुसन्धेयमिति ज्ञापितम्। तत्त्वानीति ब्रह्माण्डकारणानि। अग्र इति अत्रैवाग्रे। आदौ भूत इति अस्मिन् पक्षेऽहङ्कारो नायातीति मूलस्थे'गते'ष्विति पदेऽहङ्कारद्वारा गतेष्विति व्याख्यानं बोध्यम्। प्रकृतिमिति अव्यक्तम्। व्यक्ताव्यक्तेति महत्तत्त्वे प्रकृतिमित्यस्य स्थले व्यक्ताव्यक्तपदाभ्याम्। एतदिति एकस्यैव भगवतः स्थितिसंहारकाले वदन्ती देवकी व्याख्यायमानां प्रवेशक्रियां सूचयति। अक्षरादिति साक्षात्सृष्टिः क्रमसृष्टिः मुण्डकेऽक्षरात् सृष्टिः। 'आसीज् ज्ञानमथो ह्यर्थः केवलं निर्विकल्पितं वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत्' इत्यादि श्रीभागवते। पुरुषोत्तमाभिन्न इति अत्र टिप्पणी। अक्षरस्य रूपद्वयं वस्तुन एव तथात्वात् जातिव्यक्तिभेदेन। जातिश्चरणौ वाक्यपदीये जातेरात्मत्वोक्तेः। जातिगुणयोरक्षराक्षरत्वयोर्भेदः स्पष्ट एवं स्पष्टार्थो। इदं द्वयम् आभासोक्तमध्यात्मरूपद्वयम्। तेना'दृश्यत्वादिगुणको धर्मोक्ते'रित्यधिकरणेऽक्षराभिन्नपुरुषोत्तम उक्तः, स चरणरूपाक्षराभिन्न इति ज्ञेयम्। स्वरूपाणीति 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दिति महानारायणोक्तानि। आधीति तमः परत्वलिङ्गात्। तन्निवृत्त्यर्थं लयनिवृत्त्यर्थम्। संज्ञा इति 'श्रीकृष्णः सच्चिदानन्दो नित्यलीलाविनोदकृत् सर्वागमविनोदी च लक्ष्मीशः पुरुषोत्तम' इत्यादिपुरुषोत्तमसहस्रनामस्तोत्रोक्ताः। ब्रह्मविद्यात्वात् देवक्या अशेषपदे तात्पर्यमुक्तम्। तत्प्रसङ्गेन शेषपदच्छेदे त्वाहुः सर्वशब्देति। शेषाशेषादिशब्दवाच्यः। शेषः शब्दः वेदेऽशेषोर्थो वेदान्ते ब्रह्मविद्यायाम्। वेदे। श्रुतिस्तु 'स शयानमसृजते'ति तृतीयाष्टके 'तस्मात् समानाः प्रजाः प्रजायन्त' इति श्रुतिश्च ॥ २५ ॥

योयं काल इत्यत्र अध्यात्मेति अधिक आत्मा। आधिभौतिकं रूपमिति रूप्यते व्यवह्रियते येनाधिभौतिकत्वेन तदाधिभौतिकत्व रूपम्। आधिभौतिकभूत इति आधिभौतिकत्वजातिरूपात्मा। अयमिति प्रत्यक्षः आधिभौतिकानामाधिभौतिकः काल आधिभौतिको भगवान् जातिरूपः। तथात्वेत्यादि आधिभौतिकानामाधिभौतिकत्वज्ञापकम्। इदं पदोक्तप्रत्यक्षसमानाधिकरणः कालः आधिभौतिकः चेष्टा यस्य तत्सम्बन्धिनस्ते तव चेष्टामाहुरिति सम्बन्धः। कालरूप इत्यस्य चेष्टात्मकर्मपदार्थस्याभेदो यथा तथात्रैवाग्रे वाच्यः। कालेति आधिभौतिकवच्च चेष्टारूपो भगवानितो 'निमेषादिर्वत्सरान्त'स्तत्प्रेरितानि। चेष्टारूपकर्मपदार्थरूपत्वं प्रकाशाश्रयन्यायेन। सामान्यत्वतलादिप्रतिपाद्यजातिरूपत्वं 'तत् सृष्ट्वा तदेवानुप्राविश'दिति छान्दोग्येन। 'योय'मित्याधिभौतिकः 'निमेषादिर्वत्सरान्तः'। तस्येति व्याख्येयम्। सर्वेषामित्याधिभौतिकानामित्यर्थः। मूलभूतस्येति आधिभौतिकस्य जातिरूपस्य तव 'चेष्टामाहु'रित्यन्वयः। तत्र हेतुः स एवेति। 'प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि चेष्टा यतः स भगवान् काल इत्युपलक्षित' इति तृतीयस्कन्धे कपिलवाक्यात्। स एव भवानिति हेतोः। तत्रेति तादृशे विचारे मानमिति शब्दरूपं मानम्। 'तं चेष्टामाहु'रिति मूले योजना। यत्तदोर्नित्यसम्बन्धात्। चेष्टासत्त्वमुपपादयन्ति स्म न हीत्यादि। अस्तिभातिप्रियत्ववत्। समन्वयाधिकरणे स्पष्टम्। 'आहु'रित्यन्यमुखेनास्वरसेन चेष्टायाः कालत्वमुक्तम्। 'चेष्टते येन विश्व'मित्यनेन स्वमतमित्याशयेनाहुः कालवशाच्चेति। चकारः 'आहु'रित्युक्तमभेदपक्षमाह। चेष्टायाः कालत्वे 'आहु'रिति यन् मानमुक्तम्, तदस्वरसग्रस्तमिति द्वितीयं यत् तदुपपादयन्ति स्म काले कर्मेति। 'दर्शपूर्णमासाभ्यां यजेते'त्यत्र। अत इति यो यज्जनकः स तदात्मक इति व्याप्तेः। प्रकृतीति वक्ष्यमाणैकादशवाक्योक्तपक्षे। द्वितीयस्कन्धे तु 'ह्यात्ममायामृत' इत्यत्र मायाद्वारा कार्यपक्षस्तस्मिन्। सर्वकार्यकर्तेति तस्य सम्बोधनं 'अव्यक्तबन्धा'विति। प्राकृतेति 'प्रकृतिर्यस्योपादानमाधारः पुरुषः परः सतोभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वह'मित्येकादशस्कन्धवाक्यादित्यर्थः। अत्र कालः सतोभिव्यञ्जकः। द्वितीयपक्षे चेष्टा कालस्तज्जनको वा। देहरूपस्य कालस्य चेष्टात्मकस्वरूपभूतकर्मरूपस्य च व्यवस्थामाहुः आधिदैविककालस्येति। भगवद्रूपत्वं शब्दार्थयोरभेदात् साधनप्रकरणे कर्मेश्वरवादाच्च। तद्व्यावृत्त्यर्थमिति 'अय'मिति मूलपदविरोधात् तद्व्यावृत्त्यर्थम्। ततोप्याहेति ततोप्यधिकमाह। एवमिति संवत्सरतो महीयान्। अवशिष्यत इति काल इत्यन्वयः। आधिदैविकः कालः। प्रपद्य इति प्रपत्तिः शरणमार्गः। अनेनेति चेष्टाकालरूपत्वादिना। प्रमाणमिति 'आहु'रित्यादिशब्दात्मकम्। स

ईदृश एवेति शरणागतेरप्रयोजकत्वनिवर्तकः परिदृश्यमान एव। देवक्युदाहरणमत्रेत्याहुः ऐश्वर्यमित्यादि। आधाररूपधर्मस्येति आधारभूतस्य धर्मरूपस्य सत्त्वस्य। क्षेमधामेति लिङ्गव्यत्ययः। सत्त्वस्य नपुंसकत्वादिति भावः॥ २६॥

मर्त्यं इत्यत्र रूपत्रयं प्रपत्तिं चेति उक्तश्लोकचतुष्टयार्थाः। प्रकृतेति स्तुत्युपयोगित्वाय। हेतुमिति प्रपत्तिहेतुभूतं भयम्। अतीन्द्रिय इति 'कालोस्मि लोकक्षयकृत् प्रवृत्त' इत्युक्तः। प्रत्यक्षस्तु दत्तदिव्यचक्षुषा। प्रकृतिं समुत्पादितवान् 'सोनन्तोन्तकरः कालोनादिरादिकृ'दिति वाक्यात्। 'आदिः' प्रकृतिस्तस्याः कृत्। अयं कालो मृत्युभ्रातृरूपभयजनकत्वात् मृत्युप्रसङ्ग उक्तः। कालोयं मृत्युबालजनकत्वात् कुण्डलिनीरूपप्रकृतिसमुत्पादकत्वाच्च सङ्कर्षणः शेषः शब्दात्मा। अतोर्थाभेदात् सृष्टिरस्मान् न विरुद्धा। कालश्चेष्टा इतिपक्षे निर्धर्मकत्ववारकः वेदार्थ इति वेदार्थेनाभेदः। ननु न सङ्कर्षणस्य शेषत्वेन प्रतीतिः, किन्तु 'देवप्रवर'त्वेनेति चेत् तत्राहुः लौकिकास्त्विति। दत्तदिव्यदृष्टिरहिताः। अलौकिकमिति अतीन्द्रियं भयजनकं कालम्। तद्द्वारा प्रकृतिरूपकुण्डलिनीद्वारा। लौकिकद्वारा वा। प्रतिपद्यन्ते जानन्ति। प्रतिकृत्या तादृशपदार्थान्तरप्रतिपत्तौ दृष्टान्तानाहुः यथा सिंहेत्यादिना। सिंहो हिंसकः। व्याघ्रो द्वीपीति भेदः। कालः स्वभक्ष्यमिति कालस्य सृष्टिकर्तृत्वं तृतीयस्कन्धे 'सोनन्तोन्तकरः कालोनादिरादिकृदव्ययः, जनं जनेन जनयन् मारयन् मृत्युनान्तक' इत्यत्र। अयमर्थः। मर्त्यास्त्रिविधाः। असन्मृत्युर्बृहदारण्यकोक्ताधिदैविकः कामरूपत्वात्। असन् कामी। सदासक्त्यभावात् ते मर्त्याः। ज्ञानिनो ज्ञानिभक्ताश्च, तेत्र श्लोके। अत्यन्तविस्मृतिर्मृत्युराधिभौतिकः। अत्रानुभूयमानत्वात्, पाप्मा मृत्युराध्यात्मिकः। असदत्यन्तविस्मृतिरूपमृत्युभ्यां मिश्रः। स बृहदारण्यकोक्तोऽग्न्यादिचन्द्रान्तानाम्। द्वितीयस्त्वत्रत्यमर्त्यानाम्। लौकिकभाषोक्तत्वादत्र। एतेन पूर्वश्लोकसङ्गतिरप्युक्ता। तत्र गमकमाहुः अत इत्यादि। मर्त्या इति मृत्यूपसेचनयुक्ता ब्रह्मक्षत्राः ते शीघ्रं भक्षणार्थं स्थापिताः उपसेचनयुक्तत्वाच्छीघ्रम्। शब्दसृष्टौ तदुपपादयन्ति स्म तस्येत्यादि। तस्येति कालात्मकस्य सर्पस्य। तदुद्बोधक इति कुण्डलिन्युद्बोधकः। तच्छरणमिति कुण्डलिनीशरणगतः यदा भवति तदा तया कुण्डलिन्या प्रार्थितोतीन्द्रियः कालः शीघ्रं न भक्षयति। मृत्युभ्रातृभयप्रेषणेन मृत्युजनकं भक्षणं न करोति। स्वजन्यमृत्युरनुकूलो यतः अर्थसृष्टिः वैश्यशूद्रौ सेवकावतः शीघ्रं नेत्युक्तम्। 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनं मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स' इति श्रुतेः। तस्य चेति अतीन्द्रियस्य कालस्याधिक आत्मा वेदः। 'स एष जीवो विवरप्रसूति'रित्यत्र 'मनोमयो' वेदः। अन्तीन्द्रियः कालः। 'छिद्रा व्योम्नीव चेतना' इत्यत्रोक्तार्थसंवलितः शब्दः। छिद्रवदाकाशधर्मः। तदुक्तेति 'अनभ्यासाच्च वेदानामाचारस्य च लङ्घनादालस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसती'ति निबन्धात्। अपिना कुण्डलिनीप्रार्थनया। यादृशमध्यात्मत्वं तदुक्त्वाधिभौतिकानाहुः अन्ये चेत्यादि। वेदोक्ता नित्यानित्यभिया नाधिभौतिकाः पुराणोक्तास्तु तथा। तस्याधिभौतिकरूपाणीति अतीन्द्रियकालस्य। जन्यमात्रस्य कालरूपशब्दोपाधित्वात्। विलम्बहेतव इति मन्त्रौषध्यादिभिः। त्रिविधा इति योगिनः कर्मठाः देवोपासकाश्च। धर्ममार्गेत्यादि यथासङ्ख्यम्। त्रितयमेकत्र वा। तत्प्रवणाः कालाधीनाः अपि सेवकाः 'चेतस्तत्प्रवणं सेवे'ति सिद्धान्तमुक्तावल्याः। द्वितीयान् मर्त्यानाहुः ये पुनरिति। लौकिका इति उक्तत्रितयभिन्नाः। शीघ्रमिति अमार्गवर्तिनां रक्षकाभावाच्छीघ्रम्। अमुमुक्षुत्वादेवकारः। ओदनभूता इति उक्तश्रुतेः। धर्मानिति काम्यान् उपवेदोक्तौषधिरूपानपीत्यर्थः। पलायनमिति काम्यधर्माचरणमन्याश्रयरूपम्। मुख्यार्थेन दृष्टान्तः। मूषकस्येवेति व्यालभीतस्य। पतितस्येति पलायनशून्यस्य। मृत्युः। मृत्युः कालस्य मुखम्। भक्षणे उपायः उपसेचनरूपः। सोपीति मृत्युरपि। व्यालत्वमुपपादयन्ति स्म भयेत्यादि। विविधमालमनर्थोऽस्मादिति क्षीरस्वामिना निरुक्तत्वाद् योगेन भयवाचको व्यालशब्दः। तथापि तात्पर्यवृत्त्या मुखं वक्त्रं तद्धेतुक एव। 'व्यालो दुष्टगजे सर्पे शठे श्वापदसिंहयो'रिति विश्वे मुखवतामेवोक्तेः। तेषु योगरूढः। अन्यथा नदीप्रवाहपतद्भित्तिनिस्त्रिंशादावपि योगस्य तुल्यत्वात् तत्रापि प्रयोगः स्यात्। गच्छन्निति काम्यकर्माणि कुर्वन्। क्षुत्पिपासे असन्मृत्योर्घोरे तनू। जरावलीपलितादि, आदिना अपस्मृतिः। भयेन मृतस्य देवादिदेहप्राप्तौ भयं निवर्तत इत्याशङ्क्याहुः देवत्वेत्यादि। बहुकालः स्थितो धर्मो येषु तेषु। अभ्यासाद् भयं निवर्तते। लोकान् देहानपि। निर्भयमिति निर् इत्यस्याभावोर्थः। वेदेङ्गविकल्पात्। अत इति कार्यकारणमृत्यून् प्राप्य। 'निरादयः क्रान्ताद्यर्थे द्वितीयये'ति प्रसिद्धेराहुः भयनिवर्तकेति। अभ्यासेन कुतो नाध्यगच्छदित्यत आहुः शास्त्रेत्यादि। शास्त्रं प्रश्नघटकेच्छाविषयोनुभवश्च जनकस्य। 'अभयं ह वै जनक प्राप्तोसी'ति श्रुतेः काम्यकर्मभिर्नानुभवः, किन्तु तत् तत् फलम्। नित्यकर्मभिस्तु चित्तशुद्धिद्वारा ज्ञानेऽभयं भवति। एवं लौकिकसाधारणविषये उक्त्वा उक्तत्रिविधविषय आहुः येपीति। पूर्वमिति अत्रैव पूर्वमुक्ताः। कालाधीना इति योगिनः समाधिकालाधीनाः। कर्मठा दर्शपूर्णमासादिकालाधीनाः। देवोपासकाः प्रातरादिकालाधीनाः। अवश्यभक्षकत्व इति सप्तम्यन्तम्। भगवतोवश्यभक्षकत्वनिमित्तं सामर्थ्ययुक्ता न भवन्तीत्यर्थः। काले प्राप्ते तु भवन्ति। तत्र हेतुः प्रार्थनेति। कुण्डलिनीकृता। दुर्बला ईश्वरस्य स्वातन्त्र्यात्। तर्हि कथं भयनिवृत्तिरित्याकाङ्क्षायामयमर्थ इत्याद्युक्तप्रथमपक्षेणोत्तरार्धं व्याकुर्वन्ति स्म एवमित्यादि। भगवच्चरणप्राप्तिरिति छान्दोग्ये 'उपरि उपरि सञ्चरन्तो न विन्दन्ति ब्रह्मे'त्युक्तं परितुष्टस्तु प्रतिबन्धनिवारणे प्रेरकः स्वचरणप्राप्तिकरो भवतीत्युक्तं सुबोधिन्याम्। अक्षरस्य चरणत्वे एकत्वं व्यापकत्वं च स्यात्, तद्वारणायाहुः सत्सङ्ग इत्यादि। शब्दार्थौ। पुष्टिमार्गस्य मुख्यत्वात् सत्सङ्गरूपोर्थ उक्तः अर्थविशिष्टः शब्द एको व्यापकश्च। सत्सङ्गो भगवत्प्रापकश्चरणश्चेति सत्सङ्गस्य। सत्सङ्गत्वेन रूपेणाक्षरप्राप्तौ भगवत्प्राप्तिः अक्षरत्वेनाक्षरप्राप्तिरक्षरैक्यम्। भागवतं भगवत्प्रापकं प्रसिद्धम्। सत्सङ्गवाचकमपि। अक्षरं सर्वं यद्यपि तथापि प्रकृतोपयोगि चरणरूपं यत् तद् गृहीतम्। आध्यात्मिकमिति ज्ञानभक्ती भगवद्धर्मौ सत्सङ्गे भागवते च

मिलितौ आध्यात्मिकम्। चरणावेवेति ज्ञानभक्त्योराध्यात्मिकत्वोक्त्या ज्ञानभक्तिरूपौ धर्मौ चरणौ, चरणयोरिव भगवत्प्रापकत्वात्। प्रसन्नस्येति चरणविषयत्वार्थम्। तन्मध्य इति त्रिविधयोर्द्वयोः। षण्णां मध्ये द्वयोरन्यतरस्य प्राप्ताविति वा। पूर्वोक्तं स्फुटीकर्तुं 'त्वत्पादाब्ज'मित्यत्र समासार्थमाहुः भगवत्सहितमिति। समासे न समासघटकानां शब्दानां पृथक्शक्तिः। समसनं समासस्तद्वैयर्थ्यापत्तेः। अतस्त्वया (भगवता) सहितमिति व्युत्पत्त्या विशेषणस्याक्षरव्यावर्तकत्वात् तथार्थः स्फुरति। भगवच्चरणारविन्दमिति 'त्वत्पादाब्ज'मित्यस्यार्थः। लोक एवेति सप्तम्यन्तं लोकपदम्। ज्ञापको भगवज्ज्ञापकः। शोभातिशयः चरणयोः। त्रितयेति कुण्डलिनीवेददेवापेक्षया। ते च कालाधीनाः अक्षरात्मानः, इदं च तदतीतमिति ततोतिशयः। स्वस्थपदार्थमाहुः मृत्वित्यादि। तर्हि मृत्युः स्वतः कुतो न प्रवर्तत इत्यत आहुः मृत्युरित्यादि। निवर्तत इति प्राप्तचरणान् मर्त्यात्। भगवच्चरणारविन्दमिति मृत्युत्रयप्रतियोगि। चिद्रूपत्वात्। निवर्तत इत्यनुक्त्वा'पैती'त्युक्तं तत्स्वरूपमाहुः अस्मादित्यादि। असाध्यत्वं त्वक्षरब्रह्मत्वात्। अप आ एतीति छेदः। अन्यथा त्वपेतीति। युक्तमेवेति मृत्योरुपसेचनत्वाद् युक्तियुक्तम्। एवं सर्वं व्याख्याय सिद्धमर्थं निगमयन्ति स्म शास्त्रं त्वित्यादि। 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मे'ति श्रुतौ 'नास्य जरयैतज् जीर्यति न वधेनास्य हन्यत' इति। तैत्तिरीये च 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो' इति शास्त्रं प्रमाणम्। संवादस्तु स्वस्यालौकिकभावसिद्धिः। युक्तिस्तु 'सर्वस्य वशी सर्वस्येशान' इति। 'भीषास्माद् वातः पवत' इत्युपक्रम्य'मृत्युर्धावति पञ्चम' इतिश्रुत्युक्ता। कालनियन्ता च भगवान्। अत एभ्यः हेतुभ्यः अनुभवादिः। अत्रेवेति साङ्ख्यवेदान्ते। पूर्ववदिति वसुदेवोक्तवैदिकमार्गवत्। शङ्केति विदितत्वादिनाऽब्रह्मत्वशङ्कावन्न शङ्केत्यर्थः। ननु लोके व्यभिचारो दृश्यत इत्यत आहुः निःकपटेत्यादि। 'दासवद् यदमायये'त्येकादशस्कन्धात्। 'माया' कापट्यम्। तथा च यथा प्रह्लादस्य तथान्यस्यापि प्रवृत्तिश्चेत् तदा न व्यभिचार इत्यर्थः। अब्रह्मविदितत्वाद् घटवदित्र शङ्का वसुदेवस्य ब्रह्मत्वे भवेत्। अत्र तु 'रूपं यत् तत् प्राहुरव्यक्तमाद्य'मित्यत्र श्लोकेन्यमुखेन सर्वैर्विदितेपि साक्षादविदितत्वात्। 'यतो वाचो निवर्तन्त' इति श्रुतेः। तथा च ब्रह्मविदितत्वेपि साक्षादविदितत्वादक्षरवदित्यत्र न व्यभिचारः साध्याभाववद्वृत्तित्वरूपः। अब्रह्मविदितत्वादित्यत्र घटे व्यभिचाराभावेपि नृसिंहादौ व्यभिचारात्॥ २७॥

स त्वं घोरादित्यत्र हेतुमिति भयम्। त्रयमिति उग्रसेनात्मजात् पालनं, जन्माज्ञानं, रूपोपसंहारं च। वसुदेववेदस्य गतभीत्वाद् देवक्या ब्रह्मविद्यात्वात् कंसस्य कनिष्ठत्वाद् भयाभावेऽविद्यया विद्यानाशे भयसम्भावनयाहुः अत्रेति। अत्र श्लोके। भयावसरे। तत्र प्रथमे 'प्रार्थनीये'त्यन्तेन रक्षाप्रार्थनतात्पर्यमुक्तम्। तत्र ज्ञानदापनयोरिति आकाशवाणीवाक्यान् मारकत्वेनाष्टमगर्भज्ञानम्। 'तथेति सुतमादाये'ति दापनं तयोर्नियोगादवधारणात्। एतत् कंसस्य। श्लोकोत्तरार्धीयप्रार्थनातात्पर्यमाहुः इदानीं वेति। इदं रूपमिति कंसमारकं रूपम्। प्रार्थनीयमिति 'कृषीष्ठा' इति लिङन्तमिति तथा माङ्योगे छान्दसम्। एवमित्यारभ्य युक्तेवेत्यन्तेन तत्रैव पक्षान्तरोपपादनेन युक्तत्वसमर्थनम्। एवं रूपेणेति दृश्यादृश्यरूपेण। अत्रैव कारागृह एव। यद्यपि सर्वदैवममारयित्वा स्थितौ कंसकंसपक्षपातिकृतमारणदोषनिवृत्तिस्तथापि दोषान्तरं भवतीत्याहुस्तदेति। भक्तिरसेति 'पुत्रभावेन' भक्तिरसानुभवः। मर्यादेति अलौकिकत्वेपि द्विभुजत्वमर्यादा कपिलदेवादौ दृष्टेति तथा। द्वितीयश्लोकीयप्रार्थनातात्पर्यमाहुः एतदित्यादि। एतेषां पूर्वोक्तानां सर्वेषां दोषाणां इदानीमेवान्त इत्याद्युक्तानां कंसकंसपक्षपातिप्राकृतलोकास्मदादिनिष्ठानां मारणद्वेषशीघ्रमुक्तिभक्तिरसाननुभवानाम्। प्रार्थनेति 'मा विद्या'दिति प्रार्थना। 'ननु 'त्रयं प्रार्थयती'त्युक्तम्। चतुर्थीप्रार्थनोपसंहारविषयिणी कुत इत्यतः 'शङ्खचक्रे'त्यादिविशेषणात् इदानीं मारयो वेति पक्षान्तरे प्रार्थनानुवाद इत्येवमुप संहारस्य प्रार्थ्यत्वं समर्थयन्ति स्म इदानीमित्यादि। स्वजीवनार्थमिति कंसपक्षपातिभ्यः। अत्र टिप्पणी। अस्मिन्निति अनुवादपक्षे। तत्कृत्वेति 'उपसंहरे'तिश्लोकोक्तं रूपोपसंहरणं द्वेषाभावादिभिः कृत्वेत्यर्थः। सुबोधिन्याम्। पूर्वोक्तपक्षेति अलौकिकं दृष्ट्वेत्याद्युक्तपक्षसम्भवात्। प्रार्थ्य इति अनुवादत्वेपि प्रार्थ्यः। प्रसङ्गादाहुः भगिनीपतिरिति। पक्षपातिभिर्न मारयेत। प्रार्थनीयेति अग्रेतनग्रन्थाभासः। पूर्वोक्तेति विरुद्धधर्माश्रयत्वादिति भावः। त्रैङ् पालने। भ्वादिः आ अनिट्। त्रायस्वेति प्राप्त आहुः उभयपदीति। प्रचुरेति उत्तरार्ध इदं द्रष्टव्यम्। इयं फक्किकाऽनिविष्टापि। नन्वित्यादि भगवदधिष्ठानत्वेन 'न मे भक्तः प्रणश्यति' इति वाक्यार्थज्ञानेन पर्यवसाने बाधस्य मारणस्याभावात्। प्रार्थ्यत इति ज्ञानदापनयोर्नियोगे आकाशवाणीप्रामाण्याद् दापननियोगाभावात्। सङ्कल्प इति 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यती'ति वाक्यात्। स्थिताविति अन्यत्रापि कंसममारयित्वा स्थितौ। अयुक्तमिति'कदाचिन्न चतुर्भुज' इति श्रुतिविरोधादयुक्तम्। सर्वमिति श्रुतिविरोधाभावः मुक्तिश्च अन्यदपि। इत्यनेनेति छान्दसप्रयोगेण। चकारात् स्वरेण। 'मांसदृशा'मित्यस्य विग्रहमाहुः मांसमेव पश्यन्तीति। पश्यन्तीति दृशः मांसस्य दृशः मांसदृशः। विहितमित्यादि 'कृष्णो ब्रह्मैव शाश्वतमिति विहितम्। 'योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यत' इति मांसदर्शनं निषिद्धम्। उक्तसमुच्चयेति उक्ततात्पर्यसमुच्चयार्थः। आद्य उक्तान्तेर्थी चकारः सर्वतात्पर्यसङ्ग्रहार्थम्॥२८॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

एवमाधिदैविकरूपं निरूप्याध्यात्मिकं रूपं निरूपयति 'नष्टे लोक इति'—इस प्रकार आधिदैविक स्वरूप का निरूपण कर 'नष्टे लोके' आदि श्लोक से आध्यात्मिक स्वरूप का निरूपण करती हैं, समस्त आधिभौतिक पदार्थ का लय अध्यात्म में ही है क्योंकि 'अधिक आत्मा' 'अध्यात्मा', इस व्युत्पत्ति से सर्वाधिक आत्मा ही सर्व तत्वों का लयस्थान

होने से आत्मारूप से प्रतिपादित हुआ है, स्वप्न आदि में देखा जाता है कि बाह्य वस्तु के सर्वथा प्रकाश न रहने पर भी आन्तरिक प्रकाश होता है, उक्त कारण से यह स्वीकार करना पड़ता है कि यह भगवान् आत्मा है, प्रलय काल में अन्य कोई स्वप्न का द्रष्टा जीव लय का अवधि नहीं होता, वह तो स्वप्नावस्था में ही उस प्रकार का हो सकता है इस कारण भगवान् को ही लय का अवधि बतलाया है कि लोक के नष्ट हो जाने पर आप ही शेष रहते हैं 'लोक' शब्द से 'प्रकाश' तथा चतुर्दशभुवन' दोनों ही का ग्रहण अभीष्ट है, सर्व नाश एक किसी निश्चित काल में होता है ऐसा बतलाने को **'द्विपरार्धावसाने'** कहा है, ब्रह्मा के आयु को 'पर' शब्द से कहते हैं, उस आयु के अर्ध भाग को परार्ध कहते हैं, दो परार्धों के समाप्त होने पर ब्रह्मा की समाप्ति हो जाती है, ब्रह्मा के आयु का अर्ध व्यवहार अर्थात् पूर्वार्ध और परार्ध इस प्रकार का विभाग लोक में बन्ध और मोक्ष की व्यवस्था के सूचनार्थ ही प्रचलित हुआ है, कि जिससे लोगों को ज्ञात हो जावे कि ब्रह्मा के आयु के उत्तरार्ध में ही ब्रह्माण्डवर्ती जीवों की मुक्ति होती है, द्विपरार्ध के भी अवसान अर्थात् समाप्ति होने पर ही ब्रह्माण्ड का प्रलय होता है, ब्रह्माण्ड का प्रलय तो तब ही होता है परन्तु उस समय तत्त्व रह जाते हैं, उनके प्रलय को भी कहती है कि पृथ्वी आदि महाभूत अहङ्कार को जो कि सर्व भूतों का आदि भूत है उसे प्राप्त कर लेते हैं अर्थात् उसमें लीन हो जाते हैं, आदि भूत शब्द से अहङ्कार कहा जाता है, आगे महत्तत्व का लय प्रकृति में होता है ऐसा कहेंगे अतः अहङ्कार भी महत्तत्व में लीन हो जाता है यह सूचना मिलती है, आदि भूत शब्द से अहङ्कार का ग्रहण **'भूतानामादिभूतः'** इस व्युत्पत्ति के अनुसार पृथ्वी आदि भूतों के प्रथमवर्ती होकर उनको उत्पन्न करने से उचित ही है, **'यदि आदौ भूतो जातः'** इस प्रकार व्युत्पत्ति अभीष्ट है तो **'महत्तत्व'** का ग्रहण 'आदिभूत' शब्द से सम्भावित है, **'व्यक्त'** महत्तत्व के **'अव्यक्त'** प्रकृति को प्राप्त कर लेने पर भगवान ही शेष रहते हैं, यहाँ 'व्यक्त' 'अव्यक्त इन पदों द्वारा श्री देवकी यह सूचना देती हैं कि जब यह मान्यता है कि अक्षर ब्रह्म से प्रकृति और पुरुष का विभाग हुआ है तो उस पक्ष में प्रकृति और पुरुष का भी अक्षर ब्रह्म में लय होता है, 'व्यक्त' शब्द से प्रकृति और पुरुष भी संगृहीत होते हैं, और 'अव्यक्त' शब्द से अक्षर ब्रह्म का संग्रह अभीष्ट है, काल आदि तो अव्यक्त ही हैं, अधिक कहने से क्या प्रयोजन है सब ही 'व्यक्त' प्रकट हुए पदार्थ 'अव्यक्त' अक्षर ब्रह्म में लीन हो जाते हैं, प्रवेश कर जाते हैं, उस प्रवेश में कारण काल का वेग ही है, जब भगवान् सर्व जगत् को समाप्त करना चाहते हैं तो उस कार्य के लिये उनका अधिकारी काल तीव्र वेग धारण करता है, और वह स्वयं काल भी अक्षर ब्रह्म में ही लीन हो जाता है, अक्षर ब्रह्म का लय परब्रह्मपुरुषोत्तम में होता है अथवा उनके चरण रूप होने से उनके स्वरूप से पृथक् न रहकर उनके चरण में ही प्रवेश कर जाता है, उस समय केवल भगवान् ही आप शेष रहते हैं, उक्त अवस्था में भगवान् जो आधिदैविक स्वरूप हैं उनका लय भी हो जाता होगा इस आशङ्का के निवारणार्थ **'अशेषसंज्ञः'** पद का प्रयोग किया है कि आपकी तो सब ही संज्ञा यथावत् रहती हैं, आप तो अपने वाचक अशेष शब्दों से वाच्य बने रहते हैं, अनन्त शब्दों के द्वारा जिन जिन अनन्त रूपों का बोध होता है उन सर्व रूपों को लेकर आप एक मात्र अवशिष्ट रहते हैं, इस प्रकार सब ही आधिभौतिकों के लय स्थान आध्यात्मा का प्रतिपादन किया है ॥ २५ ॥

आधिभौतिकं रूपमाह योऽयं काल इति । श्री देवकी उक्त श्लोक में भगवान् के आधिभौतिक रूप को कहती हैं, उनके आधिभौतिक होने का प्रकार यह है कि वह आधिभौतिक वर्ग में प्रवेश कर आधिभौतिक कहलाते हैं, जैसे वह चक्षु के चक्षु हैं, श्रोत्र के श्रोत्र हैं, वैसे ही आधिभौतिकों के आधिभौतिक हैं, न कि आधिभौतिक ही हैं, उक्त प्रकार से उनके आधिभौतिक हो जाने का ज्ञान कराने के लिये काल को उनकी चेष्टा बतलाया है कि यह जो काल है जिसके द्वारा सब ही आधिभौतिक वर्ग प्रेरणा प्राप्त करते हैं वह आपकी चेष्टा है, श्री देवकी का कहना है कि सब का निमित्त कारण जो यह काल है वह आप ही हैं क्योंकि सबके मूल कारण तो आप ही ठहरे अतः काल में प्रवेश कर उसे प्रेरणा शक्ति का लाभ कराने से काल भी आपका अन्यतम रूप है जैसा कि श्री कपिल देवजी ने देवहूति के प्रति कहा है कि **'प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि ! चेष्टा यतः स भगवान् काल इत्युपलक्षितः'** भा. तृ. स्कं. २६ अध्याय श्लो० १० हे मनुपुत्रि ! आप महात्मा मनु की पुत्री होने के कारण अलौकिक प्रकार को समझती हैं जब तक काल के द्वारा प्रकृति के गुणों में क्षोभ का उदय नहीं होता तब तक किसी भी प्रकार का विशेष (भेद) न होने से उन गुणों की साम्यावस्था निर्विशेष कहलाती है काल के द्वारा चेष्टा प्राप्त होने पर ही उन गुणों में क्षोभ होता है उनकी निष्क्रियता दूर होती है वह सक्रिय होकर परस्पर में एक दूसरे का अभिभव करते हैं एवं उत्तरोत्तर प्राकृत तत्त्वों का सर्जन करते हैं वह चेष्टा का हेतुकाल उपलक्षण रूप से भगवान् ही समझा जाता है वास्तव में तो वह काल आपकी चेष्टा ही है उक्त श्लोक में 'आहुः' इस क्रियापद से भगवान् की चेष्टा के काल रूप होने में प्रमाण की आकाङ्क्षा को शान्त करती हैं कि अलौकिक तत्त्व के यथार्थदर्शी महानुभावों ने भगवान् की चेष्टा को काल कहा है, भगवान् की चेष्टा के अस्तित्व में प्रमाण की आकाङ्क्षा को शान्त करने के लिये अनुमान प्रमाण का उपन्यास करती कहती हैं कि **'चेष्टते येन विश्वम्'** जिस काल से समस्त विश्व चेष्टा युक्त हुआ हैं, विश्व का सचेष्ट होना ही भगवान् की सचेष्टता का साधक है क्योंकि

विश्व कार्य है भगवान् कारण है, कारण के धर्म ही कार्य में उपस्थित होते हैं, विश्व में चेष्टा प्रत्यक्ष उपलब्ध होती है तो उसके कारण भगवान् में भी चेष्टा की सत्ता है भगवान् भी चेष्टावान है, यह सिद्ध हो जाता है, अनुभवियों ने चेष्टा को काल इसलिये कहा है कि समस्त चेष्टा काल ही के आधीन है और कालवश से ही चेष्टा होती है, चेष्टा का स्वरूप कर्म ही है, कर्म की उत्पत्ति काल से है क्योंकि उन उन कर्मों के लिये शास्त्र ने नियत काल का निर्देश किया, कि अमुक काल में अमुक कर्म कर्त्तव्य है अतः काल को कर्मों का कारण मानना आवश्यक है, जो जिसका कारण होता है वह उसका प्रकारान्तर से एक रूपान्तर है अतः कर्म या चेष्टा को काल बतलाना युक्तियुक्त ही है, काल भगवान् की चेष्टा का ही स्वरूप है, जिस पक्ष में प्रकृति को विश्व का कारण माना है अथवा प्रकृति के द्वारा विश्व की कार्य रचना होती है ऐसा स्वीकार किया है, उस पक्ष में काल की चेष्टा रूपता सिद्ध न हो पावेगी ऐसी आशङ्का कर 'अव्यक्तबन्धो ! इस सम्बोधन से समाधान करती हैं कि हे अव्यक्तबन्धो ! आप तो अव्यक्त (प्रकृति) के बन्धु (सहायक) है, बन्धु बन्धु की सहायता करता है आप प्रकृति के सर्व कार्यों को सिद्ध करते हैं, अतः प्रकृति सम्बन्ध से प्राकृत कार्य जगत् होता है इस पक्ष में भी प्रकृति के बन्धु भगवान् चेष्टा करते ही हैं, तो उस पक्ष में भी भगवान् का चेष्टा रूप काल सिद्ध होता है, आधिदैविक काल तो भगवद्रूप होता है अतः उसे चेष्टात्मक न समझ लिया जावे इसलिये आधिभौतिक काल के आकार को भी बतला देती हैं कि निमेष से लेकर वर्ष पर्यन्त का जिसका विभाग है वह काल आपकी चेष्टा है, यद्यपि काल के अवयवों में सर्व प्रथम आदि अवयव परमाणु काल माना है परन्तु परमाणुकाल से लेकर लव पर्यन्त का काल अत्यन्त सूक्ष्म होने से व्यवहार में उपयुक्त नहीं अतः निमेष से ही प्रारम्भ मान कर उसका ही आदि रूप से ग्रहण किया है, वर्ष पर्यन्त का काल भी पूर्ण तो नहीं है चेष्टात्मक काल की समाप्ति तो वहाँ पर नहीं होती उसके एक अंश की समाप्ति ही वहाँ पर होती है, चेष्टात्मक काल तो उससे कहीं अधिक विशाल है, ब्रह्मा की आयु का अन्तिम भाग द्वितीय परार्ध जब समाप्त होता है तब उस काल का अन्त कहा जाता है, संवत्सर तो उसके मध्य में होता रहता है अतः वह तो मध्यम काल ही है इस मध्यम काल से उसकी महत्ता का बोध कराने को (महीयान्) शब्द प्रयुक्त किया है कि आपका चेष्टा रूप काल तो अत्यन्त महान है वत्सर पर्यन्त का कथन तो उसके अवान्तर भेद को लक्ष्य में रखकर कर दिया है, क्योंकि वत्सरों के द्वारा ही तो उसका परिणाम होता है, इस प्रकार काल जिसकी चेष्टा है, एवं सबके लय हो जाने पर जो अवशिष्ट रहता है, तथा जो आधिदैविक परतत्त्व है सर्व कारणों का कारण है वह आप ही है, मैं उन्हीं आपकी शरणागत हूँ, इस प्रकार आधिदैविक आदि रूप त्रय का प्रतिपादन करने से एक आक्षेप का समाधान किया है कि, जो बालक एवं पुत्र है उसे शरण कैसे किया जावे, इस आक्षेप को अवकाश नहीं क्योंकि आप तो वह ही है जो पूर्व में बतलाये गये हैं, इस विषय में प्रमाण तो 'आहुः' 'अध्यात्मदीपः' विष्णु इन पदों द्वारा सूचित हो ही चुका है, इस प्रकार सर्व रूप होते हुए भी यदि रक्षा आदि धर्म को प्रकट नहीं करें तो शरणागति निष्प्रयोजन ही ठहरेगी अतः उसके निवारणार्थ कहती हैं कि ऐसा नहीं हो सकता आप 'ईशान' हैं, समर्थ हैं जिसमें भगवान् के इतने धर्म प्रकट हैं वह ईश ही होता है, ऐश्वर्य विलम्ब का सहन नहीं करता शीघ्र ही शरणागत का त्राण करता है और उपेक्षा भी नहीं करता शरणागत की रक्षा ही करता है, ईश्वर यदि दैत्यों का पक्षपाती होवे तो भी कार्य सिद्ध नहीं हो सकता इस शङ्का के निवारणार्थ 'क्षेमधाम' पद का प्रयोग है, क्षेम नामक विशुद्ध सत्त्व ही आपका धाम है अतः विशुद्ध सत्त्व में विराजने वाले आप भद्र पुरुषों का ही पक्षपात करेंगे दैत्यों का नहीं अतः कोई चिन्ता नहीं है, 'क्षेमधाम की उक्त व्याख्या के अनुसार 'क्षेमधामानम्' ऐसा पुलिङ्ग का निर्देश उचित था परन्तु आधारभूत विशुद्ध सत्त्व रूप धर्म की प्रधानता को बतलाने के लिये यह लिङ्ग व्यत्यय हुआ है अर्थात् इस लिङ्ग परिवर्तन से विशुद्ध सत्त्व की प्रधानता के साथ सत्पुरुषों की रक्षा सूचित होती है ॥ २६ ॥

एवं भगवतो रूपत्रयं प्रपत्तिं च निरूप्येति—इस प्रकार भगवान् के आधिदैविक आदि तीनों रूपों का तीन श्लोकों से निरूपण किया है और तृतीय श्लोक में शरणागति का भी निरूपण किया है, तदनन्तर उस शरणागति के प्रकृत में उपयोगी होने की सिद्धि करने के लिये श्री देवकी मर्त्य आदि श्लोक से शरणागति के हेतु भय का निरूपण करती है, काल अतीन्द्रिय है इन्द्रियों द्वारा वह नहीं जाना जाता अतः उसने अपने स्वरूप को लोगों के बुद्धिगम्य बनाने को सर्प प्रकट किया सर्प काल की प्रतिकृति है उसके समान आकार प्रकार वाला है, लौकिक प्राणी उस अलौकिक या अतीन्द्रिय काल को सर्प के द्वारा ही समझ पाते हैं, जैसे सिंह जैसे आकार का श्वान होता है, व्याघ्र एवं गवय जैसे आकार के बिडाल एवं गौ होते हैं, वह काल जिसे प्रकट करता है वह उसका भक्ष्य ही होता है अतः काल से रचे गये प्राणी 'मृत्यु' कहलाते हैं, उस काल की भार्या कुण्डलिनी शक्ति है वह अपने भर्त्ता काल से परिचय करा देती है सब पुरुषों के देहों में उसका निवास है उस कुण्डलिनी शक्ति को प्रबोधित करने वाला योग ही है, योगी उस कुण्डलिनी के ही शरणागत होता है, तब उस काल भार्या कुण्डलिनी की प्रार्थना के कारण योगी को काल शीघ्र भक्षण नहीं करता, और उस काल का आध्यात्मिक रूप वेद है अतः वेदोक्त कर्म से भी विलम्ब होता है, जो कर्म मार्गी वैदिक कर्म का विधिपूर्वक अनुष्ठान करते हैं, उपासकों का भी भक्षण करने में काल विलम्ब करता है।

फिर जो सर्व पूराणोक्त देवता है वे काल के आधिभौतिक रूप हैं वह भी विलम्ब के कारण हो जाते हैं, पुराणोक्त देवताओं के उपासक भी काल के शीघ्र भक्ष्य नहीं होते। यह योगी, कर्मी, और उपासक ये तीनों निरन्तर एक ही साधन में निष्ठापूर्वक तत्परता से लगे रहते हैं अतः इनके भक्षण में विलम्ब होता है।

ये पुनर्लौकिकाः साधारणाः शीघ्रं भक्षणार्थं—फिर जो साधारण प्राणी हैं जिनको काल ने अपने भक्षण के लिये ही रखा है जो पकाये हुए ओदन की भाँति सरलता से उसके गले में उतर जाने वाले हैं वह लोग यदि काल के उल्लङ्घन के लिये प्रयत्न करें तब काल के कार्य रोग आदि का अनुभव कर उस काल के निवारक रूप से सुने गये बहुत से धर्मों का आचरण करने का प्रयास करते हैं, वह उनका काल से बचने का प्रयत्न सर्प से डरे हुए एवं उसके आगे पड़े हुए मूषक के भागने के समान व्यर्थ है। मृत्यु काल का मुख है वह भी व्याल है यद्यपि कोष में सर्प, दुष्ट, हस्ती, शठपुरुष, एवं व्याघ्र सिंह आदि हिंसक पशुओं को ही व्याल शब्द से बोधित होने वाले कहा है फिर भी वह सब मुख के द्वारा ही भय के कारण हैं अतः काल के मुखरूप मृत्यु को मुख्य व्याल कह देना समुचित ही है, उस मृत्यु से डर कर भागना मूषक की भाँति ही सिद्ध होता है, जहाँ कहीं भी जाता है वहाँ भूख, प्यास, वृद्धता, शरीर की त्वचा का सिकुड़ना, बालों का श्वेत हो जाना आदि ऊँचे नीचे विविध प्रकार के काल धर्मों का अनुभव करता है, काल के कार्यों के देखने से भय बना ही रहता है उसकी निवृत्ति नहीं होती, बहुत काल तक स्थित रहने वाले देवत्व, मनुष्यत्व, वृक्षत्व, आदि धर्मों के प्राप्त होने पर भय की निवृत्ति होती होगी इस आशंका के निवारणार्थ कहा है कि '**सर्वाँल्लोकान्**' सब लोकों को दौड़ता हुआ भी निर्भयता को प्राप्त नहीं करता '**निर्भयम्**' पद से भय का अभाव बोधित होता है अतः किसी भी उपाय से मृत्यु की निवृत्ति नहीं होती यह अर्थ सिद्ध हुआ, अथवा '**निर्भयम्**' पद का अर्थ है 'भय का निवर्तक स्थान' ऐसा कोई स्थान विशेष नहीं मिल पाता जहाँ मृत्यु का भय न हो, सब लोग दौड़ते रहने पर भी भय के निवारण करने वाले स्थान को नहीं पहुंच पाता।

शास्त्रानुभवयोः संवादे हि तत् निवर्तते—क्योंकि भयनिवारण तो शास्त्र और अपने अनुभव इन दोनों के परस्पर मिलन से ही हो सकता है, शास्त्र में जिसे निर्भय बतलाया हो और अपने अनुभव से भी वह निर्भय ही सिद्ध होता हो, जहाँ पहुंचकर किसी प्रकार के भय के उदय की हृदय में सम्भावना भी न हो, ऐसा स्थान शास्त्र एवं अनुभव के द्वारा अवगत नहीं होता, पूर्व में जिनकी चर्चा कर चुके हैं वह तीनों योग, कर्म और उपासना तो काल के आधीन ही हैं, अतः योगादि के साधन करने वालों को भी काल अवश्य भक्षण करता है, कुछ विलम्ब से भक्षण करे यह बात दूसरी है, परन्तु सर्वथा उनको छोड़ नहीं देता, अतः वह भय निवारण में समर्थ नहीं है।

प्रार्थना हि दुर्बला एवं शरणान्वेषणार्थं परिभ्रमणे क्रियमाणे—पूर्वोक्त कुण्डलिनी की प्रार्थना दुर्बल है वह भी काल से सर्वथा निवृत्ति नहीं करा सकती, इसलिये अपने रक्षक को ढूँढने को परिभ्रमण कर रहा है ऐसी स्थिति में सर्वत्र प्रवृत्ति कराने वाले कृपानिधि कृष्ण कदाचित् प्रसन्न हो जावें तब प्रभु श्रीचरणों की प्राप्ति होती है। 'सत्सङ्ग' और 'श्रीमद्भागवत'जी यह दोनों भगवान् के आधिभौतिक चरण युगल हैं। ज्ञान और भक्ति, यह दोनों श्रीकृष्णजी के आध्यात्मिक चरण युगल हैं और स्वयं प्रसन्न हुए भगवान् श्रीकृष्ण के साक्षात् चरण युगल आधिदैविक तो है हीं, उनमें से किसी एक की भी प्राप्ति हो जाने पर परम पुरुषार्थ सिद्ध हो जाता है ऐसा सूचित करने को '**त्वत्पादाब्जम्**' यह एक वचन प्रयुक्त किया है। उक्त पद में भगवान् के साथ उनके चरण कमल की प्राप्ति की सूचना है क्योंकि समास के द्वारा उनकी मिलित रूप से उपस्थिति होती है, '**ते पादाब्जम्**' इस प्रकार पृथक् पदों का उपन्यास न कर समास युक्त पद का प्रयोग भगवान् को लक्षित कर सत्संग, भागवतादि का सेवन कर्तव्य है, ऐसा सूचित करता है, भगवान् के साथ उनके किसी भी अन्यतम चरण कमल का लाभ होने से कृतार्थता हो जाती है, यह चरण कमल का लाभ किसी काल से सम्बन्धित नहीं है कि अमुक समय उसकी प्राप्ति के लिए नियत हो वह सर्वथा काल के आधीन नहीं वह तो भगवदिच्छा पर ही निर्भर है अतः भगवदिच्छा के बोधक '**यदृच्छया**' पद का प्रयोग किया है, नियत हुए काल को यदृच्छा नहीं कह सकते आकस्मिक स्थल में ही यदृच्छा शब्द का प्रयोग होता है, अतः भगवच्चरणारविन्द की प्राप्ति भगवदाधीन ही है कालाधीन नहीं यह सिद्ध होता है, '**पादाब्जम्**' शब्द से चरण को कमल बतलाया है, कमल जल में होता हुआ भी उससे अस्पृष्ट एवं अन्यान्य पुष्पों से अधिक शोभाशाली होता है प्रभु का चरण भी लोक में होते हुए अलौकिक तथा अपने स्वरूप का चमत्कार बतलाने वाला अतिशय शोभाशाली है ऐसा प्रतिपादन यहाँ अभीष्ट है, भगवच्चरण की शोभा कुण्डलिनी, वेद, देव इन तीनों से कहीं अधिक यह तीनों काल के आधीन हैं—

भगवच्चरणकमल कालाधीन नहीं है परंतु कालातीत है, अधिक क्या कहा जाय काल भी भगवच्चरणाधीन है जो भक्तजन भगवच्चरण का आश्रय करता है उसको काल कवलित नहीं करता है ऐसा विश्वास अपेक्षित है। इस विश्वास के बल पर जब ही जीव प्रभु चरणों का आश्रय लेता है तब ही निश्चिंत बन जाता है इस अभिप्राय से श्लोक में '**अद्य**' पद का प्रयोग किया है। यदि आज अभी चरण कमल की आकस्मिक प्राप्ति हो गई तब तत्काल ही वह जीव स्वस्थ होकर प्रभु के चरणों में

शयन करता है, और मृत्यु की निवृत्ति के निमित्त प्रयत्न नहीं करता। मृत्यु तो फिर अपने आप ही निवृत्त हो जाता है, क्योंकि वह मृत्यु सोचता है कि इसके हृदय में भगवच्चरणारविन्द विराजमान हैं और भगवच्चरणों का आश्रय है अतः मेरा प्रभाव यहां न चलेगा, अतः इससे हट जाना ही उचित है ऐसा जानकर हट जाता है। उक्त विषय में यद्यपि शास्त्र प्रमाण हैं ही, परन्तु अलौकिक भाव की सिद्धि ही अपने अनुभव के साथ उन शास्त्रों का संवाद होना है, तात्पर्य यह है कि स्वानुभवैकवेद्य अलौकिक भाव के उदय होने पर ही शास्त्रप्रतिपादित भगवच्चरण की काल भय निवारकता प्रत्यक्ष हो जाती है। जब भक्त के हृदय में भगवान् के चरणों के प्रति अलौकिक भाव सिद्ध होता है तब स्वयं ही भक्तहृदय निर्भयता का अनुभव करता है। भगवान् काल के नियामक हैं उसे अपनी इच्छानुसार प्रेरणा देते हैं, उसका नियन्त्रण करते हैं अतः अनुभव, प्रमाण एवं युक्ति इसी पक्ष में हैं कि भगवच्चरण शरणागत जीव ही निर्भय होता है अतः योगादि मार्गों की भांति शरण मार्ग में कोई भी शङ्का का अवसर नहीं उसके लेश का भी अवकाश नहीं, निष्कपट भाव से शरण मार्ग में प्रवृत्ति हो जाने पर सर्वथा निर्भयता हो जाती है ऐसा सुदृढ सिद्धान्त है और अकाट्य नियम है। यह नियम कभी भी व्यभिचरित नहीं होता या भंग नहीं हो सकता ध्रुव, अम्बरीश, प्रह्लाद आदि भक्त उक्त सैद्धान्तिक नियम के उज्ज्वल उदाहरण उपस्थित हैं ॥ २७ ॥

एवं शरणागतौ हेतुनुपपाद्य त्रयं प्रार्थयति स त्वम् इत्यादिभिः त्रिभिः—श्रीदेवकी जी इस प्रकार शरणागति में कारण का उपपादन करके **स त्वं घोरात्** इत्यादि तीन श्लोकों से भगवान् के श्री चरणों में तीन प्रार्थनायें कर रही है कि भगवन् इस प्राकट्य प्रसङ्ग पर तीन संभावनायें घटित हैं।

(१) **प्रथम सम्भावनाः—"भगवान् इदानीमेवान्तर्हितो भवेत्"** "प्रथम पक्ष तो यह है भगवान् तो अभी तो अन्तर्हित-गुप्त हो जाय और बाद में अपनी इच्छानुसार अन्यत्र विराजमान होकर कंस का नाश करे" तब तो कंस आपके प्राकट्य की वार्ता सुनकर हम सबको मार सकता है कारण कि कंस जानता है कि इन वसुदेव देवकी को हमें मारने वाला अष्टम गर्भ है इस विषय का ज्ञान था और यही अष्टम गर्भ आया है इसलिये इन्होंने ही उसको अन्यत्र भेज दिया है इस प्रकार आपके विषय में हमारे "ज्ञान" और दापन-अन्यत्र प्रेषण के अपराध का वह कंस निर्णय करेगा और हमें मारे विना नहीं रहेगा ऐसी सम्भावना को लेकर अपनी रक्षा की आप को प्रार्थना करना उचित एवं आवश्यक है।

(२) **द्वितीय सम्भावनाः—"इदानीं वा कंस मारयेत् ततो गच्छेत्"** अब दूसरी यह है कि यदि भगवान् इसी समय भगवान् कंस का वध कर देवें पुनः अन्यत्र विदाय हो जाय तब कंस का भय न रहेगा लेकिन कंस के पक्षपाती श्वशुर जरासंधादि वैरवृत्ति से हम सबको मार सकते हैं इसलिए इस चतुर्भुज स्वरूप को लोक में प्रख्यात न करें ऐसी भी अभ्यर्थना करना उचित है।

(३) **तृतीय सम्भावनाः—"एतद्रूपेणात्रैव च स्थितिरपि संभवति"** भगवान् क्या करेंगे वह तो कौन जाने लेकिन यह तीसरी भी सम्भावना है कि भगवान् कंस का अभी वधकर दें और यहाँ पर इस अलौकिक चतुर्भुज स्वरूप से विराजमान रहें तब भी इस दिव्यस्वरूप को देखकर हमारे असूयान्वित ज्ञातिजन सामान्यजन आसूयक स्वभाववाले दुष्टजन जिसका स्वभाव अपने पड़ोसी के और कुटुम्बी की समृद्धि को देखकर जलने का है वे लोग द्वेष भी कर सकते हैं। फिर दूसरी यह भी चिन्ता है कि आपके इस दिव्य स्वरूप के दर्शन से बिना विलम्ब हमारी मुक्ति हो जाने की भी सम्भावना है तब तो महती हानि होगी क्योंकि हमें भक्ति रसानुभूति नहीं होगी साथ साथ पुत्रभाव का आस्वाद पुत्रभाव की मर्यादा भी नहीं रह पावेगी तब क्या लाभ ? इससे आपके इस दिव्य स्वरूप के अदर्शन की प्रार्थना उचित है।

भगवन् इन तीनों प्रकार की सम्भावना में आपका क्या आशय है यह कहना सुलभ नहीं लेकिन इन सब दोषों के निवारण के निमित्त इस अवसर कंस को आपके जन्म का ज्ञान न हो यह अभ्यर्थना श्रीचरणों में है। अथवा श्रीदेवकी माता इस आशय से रक्षा का भगवान् को निवेदन कर रही है कि भगवन् यदि आप अभी कंस को मारे तब उस कंस को मारने के कारण उसके साथ आप के युद्ध होने के समय में मेरा जीवन नहीं रहेगा क्योंकि आप के अग्रज भाइयों के हत्यारे क्रूर कंस का भयानक दृश्य-स्वरूप को देखते ही मेरे प्राण निकल जायँगे अतः रक्षा की प्रार्थना आवश्यक है। एवं रूप के उपसंहार या परिवर्तन की प्रार्थना इस दृष्टि से आवश्यक है कि यदि इस अद्भुत रूप को ही धारण किये रहेंगे तो पूर्वोक्त पक्षों का संभव है कंस को मारकर अन्यत्र पधारने में उसके पक्षपातियों से हमको आशङ्का रहेगी और यहाँ विराजने पर लोक प्रद्वेष की आपत्ति बनी रहेगी, अतः इस अलौकिक स्वरूप का उपसंहार भी प्रार्थनीय ही हैं। **कदाचित् भगिनीपतिश्चेति न मारयेत्**–बहन बहनोई का सम्बन्ध विचार कर कदाचित् कंस नहीं मारे ऐसी सम्भावना नहीं की जा सकती है, क्योंकि **घोरात्** विशेषण से कंस की क्रूरता निश्चित की गई है। **"स त्वम्"** इन पदों द्वारा भगवान् के उस सामर्थ्य की सूचना है जिस सामर्थ्य से आप अपने भक्तों के सर्वविध प्रार्थनीय अभीष्ट पदार्थों को देते रहते हैं, पूर्व में जिन शरणागत वत्सलता आदि गुणों को कहा है आप उन समस्त गुण या धर्मों के आश्रय हैं। 'घोर' शब्द से कंस को निर्दय एवं भयानक हत्यारा कहा है, एवं उग्रसेन का आत्मज

शरीर से उत्पन्न हुआ सन्तान बतलाकर उसको अन्य उपायों से अवध्य सूचित किया है। वह विष आदि उपायों के द्वारा नहीं मारा जा सकेगा क्योंकि वह जिस उग्रसेन के शरीर से उत्पन्न हुआ है उसकी तो सेना ही 'उग्र' विष रूप है अतः विष का प्रभाव उस पर नहीं पड़ सकता। कंस तो स्वयं ही घोर हालाहल विष है। श्रीदेवकी माता 'त्रस्तान्' पद के द्वारा अपनी भयभीत परिस्थिति का निदर्शन करती हैं कि हम लोग अत्यन्त उद्विग्न हैं हमारे पूर्व पुत्रों को मार कर कंस ने हमको अत्यन्त व्यथित कर दिया है उस कंस से हमारी रक्षा करो, 'त्राहि' यह पालनार्थक 'त्रैङ्' धातु का परस्मैपद प्रयोग पाणिनीय व्याकरण की रीति से यद्यपि सङ्गत नहीं, क्योंकि धातु पाठ में इसे आत्मनेपदी ही माना है, परन्तु स्तोत्रों में इसका परस्मैपद में प्रयोग अधिक प्रमाण में मिलता है अतः त्रैङ् धातु को उभयपदी मानना आवश्यक है, ऐसा निश्चय किया जाता है। **ननु पर्यवसाने बाधाभावादिदानीं मारणपक्षे किमिति**—यह शङ्का की जा सकती है कि कंस का अभी वध करने में परिणाम तो बाधा रहित ही रहेगा उसमें तो कोई आपत्ति आने की नहीं तो रक्षा की प्रार्थना की क्या आवश्यकता इसके समाधान के विषय में श्रीदेवकी कहती हैं कि आप तो अपने भृत्यगण हम सेवक लोगों के विविध प्रकार के त्रासों का विनाश करने वाले हैं। अतः परिणाम में बाधा न होने पर भी आरम्भ की पूर्वोक्त बाधा निवृत्ति के लिए रक्षा प्रार्थनीय है। 'असि' पद के द्वारा भगवान् की प्रतिज्ञा की सूचना है कि आपका तो यह प्रण है 'परित्राणाय साधूनां विनाशाय च दुष्कृताम्' भक्तों का दुःख निवारण करना आपका स्वभाव है जिस प्रकार 'गन्ध' पृथिवी का सहज गुण है उसी प्रकार भक्तों के दुःखों की निवृत्ति करना आपका सहज स्वभाव है। जिस प्रकार हम लोगों का रक्षण वर्तमान में कंस के न मारने से एवं अन्यत्र पधारने से करना आवश्यक है, उसी प्रकार यही स्थिति रखने में इस रूप का उपसंहार करना भी आवश्यक है, इस बात को माता देवकीजी 'रूपञ्चेदम्' इस उत्तरार्ध से कहती हैं कि सर्वदा इस अलौकिक रूप से विराजना उचित नहीं इस रूप को लौकिक बाह्यदर्शी चर्मचक्षु लोगों के प्रत्यक्ष न कीजिये। इस स्वरूप के दर्शन के बिना किसी की मुक्ति न हो सकेगी इस आशङ्का के समाधान में कहती हैं कि यह रूप तो 'ध्यानधिष्ण्यं' है ध्यान ही इसका स्थान है अतः ध्यान में ही इसका प्रकाश होना चाहिए बाहर नहीं, इससे सर्व व्यवस्था सुन्दर रहेगी, ध्यान से मुक्ति हो सकेगी। 'मा कृषीष्ठाः' साधारण लोगों के प्रत्यक्ष न करिये ऐसा कहने से सूचित होता है कि यह स्वरूप स्वभावतः तो इन्द्रियगम्य नहीं अप्रत्यक्ष ही है परन्तु भगवदिच्छा से ही प्रत्यक्ष होता है, 'मांसदृशाम्' पद से सूचित किया है कि यह मांसाहारी दैत्य सर्वत्र मांस को ही देखते हैं कर्त्तव्य, अकर्त्तव्य का विचार नहीं करते, 'रूपञ्च' यहाँ पर 'च' शब्द पूर्वोक्त रक्षा का समुच्चायक है अर्थात् देवकी को 'रक्षा' और रूप का 'अदर्शन' दोनों ही अपेक्षित है ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सर्वकारणत्वमुक्त्वा प्रलयावशिष्टत्वमाह—नष्ट इति। चतुर्मुखतन्मानेन वर्षशतात्मकमायुः परशब्दवाच्यार्थः, तस्यार्धं परार्धम्। कालवेगेन हेतुना द्विपरार्धस्य ब्रह्मायुषोऽवसाने समाप्तौ सत्यां लोके चतुर्दशभुवनात्मके नष्टे सति महाभूतेषु पृथिव्यादिपञ्चमहाभूतेषु एतदिन्द्रियाणां देवतानां चोपलक्षणम्। आदिभूतं भूतानामादिमहङ्कारं गतेषु स्वस्वकारणपरम्परयाऽहङ्कारे लीनेषु सत्सु तस्मिन्नप्यहङ्कारे व्यक्तं महत्तत्त्वं याते इति शेषः। तस्मिन् व्यक्ते महत्तत्त्वेऽप्यव्यक्तं प्रधानं याते प्राप्ते तस्मिन्नपि प्रधाने त्वयि लीने सतीति शेषः। भवानेक एव शिष्यते। अतः शेषादेव शेषसंज्ञः शेषशब्दाभिधेयः॥ यद्वा अशेषसंज्ञः इति पदच्छेदः। अशेषात्मके प्रधाने प्रज्ञा 'एवं मयीदं सर्वं लीनमस्ति, पश्चादेवमुद्बोधनीयम्' इति प्रज्ञा यस्य सः॥ २५॥ कालवेगेन यातेत्युक्त्या कालस्यापि स्वातन्त्र्यप्रतीतेस्तस्यापि भगवत्पारतन्त्र्यं वदन्ती तं शरणं व्रजति—य इति। हे अव्यक्तबन्धो! अव्यक्तं प्रधानं तत्प्रवर्तकः योऽयमुत्पत्तिप्रलयादिहेतुः निमेषः आदिः सूक्ष्मावस्था यस्य सः वत्सरान्तः संवत्सरपर्यन्तस्थूलस्तदावृत्त्या च द्विपरार्धलक्षणो महीयान् कालः, येन कालेन सर्वमपि विश्वं चेष्टते विपरिवर्तते तं तस्योक्तस्य ते तव चेष्टां शक्तिविशेषमाहुः महान्तो वर्णयन्ति। यस्य चेष्टामाहुस्तमीशानं प्रकृतिकालादिनियन्तारमत एव क्षेमधाम अभयं स्थानं त्वा त्वां प्रपद्ये शरणं व्रजे॥ २६॥ क्षेमधाम त्वमेवेति स्पष्टयन्ती शरणागतेः फलमाह—मर्त्य इति। मर्त्यः मरणशीलः, इदं जन्मादीनामप्युपलक्षणम्। जन्ममरणादिसंसारी जनः मृत्युरेव व्यालः महासर्पः तस्माद्भीतः सर्वाँल्लोकान् पलायन् पलायमानः तत्तल्लोकं मृत्युभयरहितं श्रुत्वा तत्र लोकप्राप्तिसाधनान्यनुष्ठाय तं तं लोकं गच्छन्नपि निर्भयं स्थानं नाध्यगच्छत् न प्राप। हे आद्य! यदृच्छया केनापि सुकृतविशेषपरिपाकेन त्वत्कृपया त्वत्पादाब्जं सेव्यतया प्राप्य स्वस्थः निर्भय एव शेते तिष्ठति। तत्र हेतुमाह—अस्मात् प्राप्तत्वच्चरणकमलात् पुरुषात् मृत्युरपैति। निवर्तत इत्यर्थः। आद्येति सम्बोधनेन सर्वकारणत्वादिति हेतुः सूचितः। अब्जपदेनानन्दजनकत्वं च सूचितम्॥ २७॥ एवं मृत्युनिवारकत्वेन स्तुत्वा प्रस्तुतकार्यं विज्ञापयति—स इति। स उक्तविधः परमेश्वरस्त्वं घोरात् क्रूरस्वभावेन भयङ्करात् उग्रसेनात्मजात् कंसात् त्रस्तान् भीतान् नोऽस्मान् त्वत्सेवकान् त्राहि पाहि। ङित्त्वेऽप्ययं धातुरुभयपदी, बहुशः परस्मैपदप्रयोगदर्शनात्। पालने हेतुमाह—भृत्येति। यतो भृत्यानां विशिष्टं महान्तं त्रासं हन्तीति तथाभूतोऽसीत्यर्थः। किञ्चेदं रूपं मांसदृशां मांसचक्षुषां प्रत्यक्षं त्वं मा कृषीष्ठाः मा कृथाः। तत्र हेतुमाह—ध्यानधिष्ण्यं मुमुक्षूणां ध्यानयोग्यमिति। तत्र हेतुमाह—पौरुषमिति। ऐश्वर्यमित्यर्थः॥ २८॥

अन्वितार्थप्रकाशिका

महाप्रलयेऽपि शिष्यमाणस्य तव कुतो भयमित्याह—नष्टे इति ॥ कालवेगेन हेतुना द्विपरार्धस्य ब्रह्मायुषोऽवसाने समाप्तौ सत्यां लोके चतुर्दशभुवनात्मके नष्टे महाभूतेषु लीने सति तथा महाभूतेषु इन्द्रियदेवतासहितेषु आदिभूतं भूतसूक्ष्मं भूतानामादिमहङ्कारं वा गतेषु कारणपरम्परया लीनेषु तस्मिन्नपि व्यक्ते महत्तत्वे लीने महत्तत्वेऽपि अव्यक्तं प्रधानं याते प्रधाने लीने सति प्रधानेऽपि त्वयि लीने सतीति शेषः । अशेषे अशोषात्मके प्रधाने संज्ञा प्रज्ञा यस्य एवं मयि लीनमिदमस्ति । पश्चादेवमुद्बोधनीयमिति सोऽशेषसंज्ञ इति । यद्वा । शिष्यते इति शेषः अतः शेषसंज्ञः शेषशब्दाभिधेयः भवानेक एव शिष्यते ॥ २५ ॥ कालवेगेनेत्युक्त्या प्राप्तं कालस्वातन्त्र्यं वारयति । योऽयमिति ॥ हे अव्यक्तस्य प्रधानस्य बन्धो प्रवर्त्तक ! योऽयमुत्पत्तिप्रलयादिहेतुः निमेषः आदिः सूक्ष्मावस्था यस्य सः वत्सरान्तः संवत्सरपर्यन्तस्थूलस्तदावृत्त्या च द्विपरार्धलक्षणो महीयान् कालः येन कालेन सर्वमपि विश्वं चेष्टते विपरिवर्त्तते तस्य प्रलयावधिभूतस्य ते तव चेष्टां शक्तिविशेषमाहुः महान्तो वर्णयन्ति । तमीशानं प्रकृतिकालादिनियन्तारमत एव क्षेमधाम अभयस्थानं त्वा त्वां प्रपद्ये शरणं व्रजामि ॥२६॥ मर्त्य इति ॥ मर्त्यः मरणशीलः इदं जन्मादीनामप्युपलक्षणं जन्ममरणादिमान् संसारी जनः मृत्युरेव व्यालः महासर्पः तस्माद् भीतः सर्वान् लोकान् पलायन् पलायमानः । आर्षः शता । तत्तल्लोकं मृत्युभयरहितं श्रुत्वा तत्र लोकप्राप्तिसाधनान्यनुष्ठाय तं तं लोक गच्छन्नपि निर्भयं स्थानं नाध्यगच्छत् न प्राप । हे आद्य ! यदृच्छया केनापि सुकृतविशेषपरिपाकेन त्वत्कृपया त्वत्पादाब्जं सेव्यतया प्राप्य स्वस्थः निर्भय एव शेते तिष्ठति । तत्र हेतुमाह । अस्मात्प्राप्तत्वच्चरणकमलात् पुरुषात् मृत्युरपैति निवर्त्तत इति । यद्वा अद्याधुना त्वयि प्रादुर्भूते सति सर्वोऽपि स्वस्थः शेते शयिष्यते ॥ २७ ॥ स त्वमिति ॥ स उक्तविधः परमेश्वरस्त्वं घोरात् क्रूरस्वभावत्वेन भयंकरात् उग्रसेनात्मजात् त्रस्तान्भीतान्नोऽस्मान् त्वत्सेवकान् त्राहि पाहि । परस्मैपदमार्षम् । "बहुलं छन्दसि" इति शब्लुक् आत्वम् । यतो भृत्यानां विशिष्टं महान्तं त्रासं हन्तीति तथाभूतोऽसीत्यर्थः । किंच पौरुषम् ऐश्वर ध्यानधिष्ण्यं मुमुक्षूणां ध्यानयोग्यमिदं रूपं मांसदृशां मांसचक्षुषामज्ञानां प्रत्यक्षं मा कृषीष्ठाः । आशीर्लिङार्षः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पूर्वश्लोकोक्तमाद्यत्वं दर्शयितुमेव प्राकृतप्रलयावशिष्टं यद्वस्तु तत्त्वमेवेत्याह । नष्ट इति । वैराजब्रह्मणस्तन्मानेन वर्षशतात्मकमायुस्तस्य पूर्वपञ्चाशद्वर्षात्मकं पूर्वार्द्धमुच्यते, उत्तरपञ्चाशद्वर्षात्मकमुत्तरार्द्धमुच्यते, तत् द्वयं परार्द्धसंज्ञमप्युच्यते । द्विपरार्द्धावसाने द्वयोः परार्द्धयोरवसाने, लोके नष्टे, सर्वलोकाधारभूते वैराजब्रह्मणि लय प्राप्ते सतीत्यर्थः । कालवेगेन हेतुना, महाभूतेषु, स्वस्वकारणपरंपरयेति शेषः । आदिभूतमहंकारं गतेषु, त्रिविधाहंकारकार्यभूतस्तत्त्वगणः स्वकारणभूताहंकारे लीने सतीत्यर्थः । तस्मिन्नहंकारे इति शेषः । व्यक्ते स्वप्रकृतिभूते महत्तत्वे, लीने सतीति शेषः । तस्मिन्महत्तत्वात्मके व्यक्ते इति शेषः । अव्यक्तं याते, अव्यक्तशब्दाभिहितप्रधानपुरुषे लीने सतीत्यर्थः । अत्रानुक्तेऽपि प्रधानपुरुषवर्गे मूलप्रकृतिपुरुषयोर्लीने सति मूलप्रकृतिपुरुषाक्षरे लयं प्राप्ते सतीति बोध्यं, स्कान्दादौ तथाभिधानात् । अयमनयोर्लयः जललीनमत्स्यवद्वृक्षलीनपक्षिगणवद्दिवसलीननक्षत्रगणवद्बोध्यः । न तु जललीनलवणवत्, 'प्रकृति पुरुषं चैव विद्ध्यनादी उभावपि' इति भगवद्वचने बाधापातात् । एवं सति, यः शिष्यते, सः एकः भवानेव, अतः शेषसंज्ञः शेषशब्दाभिधेयः, त्वं वर्त्तसे इति शेषः अत्र केचित्तु एकः मुक्तभावं प्राप्तेष्वनादिमुक्तेषु च मध्ये प्रधानः, 'एकोऽन्यार्थे प्रधाने च' इति 'एके मुख्यान्यकेवलाः' 'एकं संख्यान्तरे श्रेष्ठे' इत्यादिकोशेषु एकशब्दस्य श्रेष्ठत्वेनाभिधानात्, शेषः प्रलयकालत्वात् सर्गकर्मोपयुक्तेतरः, 'शेषोऽनन्ते वधे सीरिण्युपयुक्तेतरेऽपि च' इत्यनेकार्थसंग्रहहैमे उपयुक्तेतरत्वेन शेषशब्दार्थाभिधानात् सृष्टिकर्मोपयुक्तत्वतः पृथग्भावेन स्थित इत्यर्थः । इत्युक्त्वा 'यः स्वभक्तेभ्यो रमते स मे सर्वस्वम्' 'स्वधामनि ब्रह्मणि रंस्यते नम' इत्यादिश्रुतिस्मृतीक्षया स न तदानीमेकलः, किं तु स्वभक्तैः सर्वदा क्रीडामाचरतीति वदन्ति ॥ २५ ॥ 'कालवेगेन याते' इत्यनेन प्रतीतं कालस्वातन्त्र्यमपि निवारयति । योऽयमिति । हे अव्यक्तबन्धो निरतिशयसूक्ष्मदशापन्नप्रधानबन्धो, निमेषादिः, वत्सरान्तः, महीयानतिमहान्, यः अयं कालः भवति, येन कालेन निमित्तेन भवान् विश्वं चेष्टते चेष्टयते, करोति सृजति अत्ति चेत्यर्थः । यद्वा, येन विश्वं चेष्टते, तं कालं, तस्योक्तविधस्य, ते तव चेष्टां, आहुः । ईशानं तस्य कालस्यापि नियन्तारं, क्षेमधाम क्षेमस्याप्याश्रयं, क्षेमंकरमित्यर्थः । त्वा त्वां, प्रपद्ये शरणं व्रजामि । हेतुगर्भमिदम् । क्षेमधामत्वात् प्रपद्ये इत्यर्थः ॥ २६ ॥ कीदृश तत् क्षेमधाम त्वं यतो मां प्रपद्यसे इत्यत्राह । मर्त्य इति । मर्त्यः मरणशीलः, इदं जन्मनोऽप्युपलक्षणम् । एवं सति जन्ममरणादिरूपसंसृतिभाक् पुमान्, मृत्युव्यालभीतः जन्ममरणाद्यात्मकसंसाररूपाजगरग्रसनभययुक्त इत्यर्थः । मुमुक्षुः सन्निति भावः । सर्वान् लोकान् प्रति, पलायन् परस्मैपदमार्षम् । पलायमान इत्यर्थः । यद्वा सर्वान् लोक्यन्ते उपायत्वेनाध्यवस्यन्ते इति लोका उपायास्तान् अनुतिष्ठन्निति शेषः । अस्मिन् पक्षे सर्वान् लोकानिति शेषत्वेनोपादाय तदग्रे पलायन्निति योज्यम् । एवंभूतः सन्नपि, भयस्याभावो निर्भयं, अर्थाभावेऽव्ययीभावः । मृत्युव्यालजभयाभावमित्यर्थः । न अध्यगच्छत् न प्राप । मुक्तो न बभूवेत्यर्थः । हे आद्य सर्वकारणभूत, यदृच्छया यादृच्छिकसुकृतविशेषपरिपाकेनेत्यर्थः । त्वत्पादाब्जं त्वयीयाङ्घ्रिकमलं, प्राप्य उपायत्वेनोपलभ्य, शरणं प्रपद्येति भावः । स्वस्थः मृत्युव्यालजभयनिवृत्त्यर्थकर्त्तव्योपायान्तररहितः सन्नित्यर्थः । शेते । यावज्जीवं तु सुखं यथा तथा वर्त्तते,

ततः अस्मात् मृत्युः, अपैति अपगच्छति। संसारात् मुक्तो भवतीत्यर्थः। त्वत्पादाब्जशरणवरणमात्रेणैव निःश्रेयसप्रदस्य तव कियदेतल्लौकिकश्रेयःप्रदत्वमिति भावः ॥ २७ ॥ एवं स्तुतिं कृत्वा सांप्रतं स्वहृद्गतं विज्ञापयति। स त्वमिति। सः उक्तरीत्या सर्वथा क्षेमंकरः, त्वं, घोरात् द्रष्टुमप्यशक्यात्, उग्रसेनस्यात्मजः कंसस्तस्मात्, त्रस्तान् भीतान्, नोऽस्मान्, त्राहि त्रायस्व पाहीति यावत्। यतः त्वं भृत्यवित्रासहा स्वभृत्यभयापहर्त्ता, असि। पाठान्तरे यथार्थस्वभृत्यस्वरूपाभिज्ञः, त्रासहा यथार्थभृत्यानामेव त्रासनाशकश्चेत्यर्थः। पौरुषं पुरुषाकृतिपरमपुरुषासाधारणं परमपुरुषत्वसूचकं चेत्यर्थः। ध्यानधिष्ण्यं योगिनां ध्यानैकशुभाश्रयभूतं, इदं रूपं, त्वं, मांसदृशां चर्मचक्षुषां, प्रत्यक्षं, मा कृषीष्ठाः मा कार्षीः मा कृथा इति यावत् ॥ २८ ॥

कृष्णप्रिया

द्विपरार्ध (ब्रह्मा की पूर्ण आयु) के समाप्ति काल में भुवनों के नाश हो जाने पर एवं प्रकाश के विलीन हो जाने पर पृथ्वी आदि महाभूतों के आदिभूत अहंकार में लीन हो जाने पर काल वेग से सब ही व्यक्त हुए महतत्त्व आदि पदार्थों के अव्यक्त (प्रकृति अथवा अक्षर ब्रह्म) में प्राप्त हो जाने पर अपनी अशेष संज्ञाओं को धारण किये हुए सर्व शब्दों के वाच्यार्थ आपही एक अवशिष्ट रहते हैं ॥ २५ ॥ हे अव्यक्तबन्धो ! प्रकृति के सहायक ! यह सम्पूर्ण विश्व जिससे चेष्टा प्राप्त कर रहा है वह जो यह काल है उसे आपकी चेष्टा बतलाते हैं, वह निमेष से लेकर वर्ष पर्यन्त का है वर्षों से भी उसका अन्त नहीं वह अत्यन्त महान् है उस काल के स्वामी मङ्गलमय धाम विशुद्ध सत्त्व में विराजनेवाले सर्व समर्थ आपकी मैं शरणागत हूँ ॥ २६ ॥ मरणधर्मा मनुष्य मृत्युरूपी सर्प से डर रहा है, डर से भाग रहा है, ऊँचे नीचे लोकों में भटक रहा है कहीं भी निर्भयता या शान्ति इसे नहीं मिल पाती। अकस्मात् आज आपके चरणारविन्द को प्राप्त कर स्वस्थ होकर शान्ति से सोता है, और इससे मृत्यु भाग जाता है ॥२७॥ कृपानाथ वह आप हमारी उस भयानक उग्रसेन के आत्मज कंस से रक्षा करें हम उससे भयभीत हो रहे हैं, और आप भृत्यजन के भय का निवारण करने वाले हैं कृपया आप इस पुरुषोत्तम सम्बन्धी चतुर्भुज रूप को चर्म चक्षुओं के प्रत्यक्ष न करें आप का यह स्वरूप तो ध्यान का ही विषय है ॥ २८ ॥

जन्म [1]ते मय्यसौ पापो मा विद्यान्मधुसूदन। समुद्विजे भवद्धेतोः कंसादहमधीरधीः ॥ २९ ॥
उपसंहर विश्वात्मन्नदो रूपमलौकिकम्। शङ्खचक्रगदापद्मश्रिया जुष्टं चतुर्भुजम् ॥ ३० ॥

श्रीभगवानुवाच[2]

विश्वं यदेतत् स्वतनौ निशान्ते यथावकाशं पुरुषः परो भवान्।
[3]बिभर्षि सोऽयं मम गर्भगोऽभूदहो नृलोकस्य विडम्बनं [4]महत् ॥ ३१ ॥[5]
त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायम्भुवे सति। तदायं सुतपा नाम प्रजापतिरकल्मषः ॥ ३२ ॥

कर्दमक्षमा

अन्वयः— मधुसूदन असौः पापः मयि ते जन्म मा विद्यात्, अधीरधीः अहम् भवद्धेतोः कंसात् समुद्विजे ॥ २९ ॥ विश्वात्मन् अदः शंखचक्रगदापद्मश्रिया जुष्टम् चतुर्भुजम् अलौकिकम् रूपम् उपसंहर ॥ ३० ॥ निशान्ते यत् एतत् विश्वम् स्वतनौ यथा अवकाशं बिभर्षि सः अयम् भवान् परः पुरुषः मम गर्भगः अभूत् अहो नृलोकस्य महद्विडम्बनम् ॥ ३१ ॥ हे सति पूर्वसर्गे स्वायंभुवे त्वम् एव पृश्निः अभूः अयं (वसुदेवः) तदा सुतपाः नाम अकल्मषः प्रजापतिः (आसीत्) ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मा विद्यात् न जानातु। भवत एव हेतोर्निमित्तादहं कंसात्समुद्विजे बिभेमि यतोऽधीरचित्ता ॥ २९–३० ॥ किमित्युपसंहर्तव्यमेवंभूतेन मया पुत्रेण तव महती श्लाघा स्यादिति तत्राह। विश्वमिति। निशांते प्रलयावसाने। यथावकाशमसंकोचतः असंभावितत्वादुपहास्यतैव स्यादित्यर्थः ॥ ३१ ॥ चतुर्भुजेन रूपेणाविर्भावे कारणं तावदाह त्वमेवेत्यादिचतुर्दशभिः। पूर्वसर्गे प्रथमजन्मनि। अभूः आसीः। पृश्निर्नाम। स्वायंभुवे मन्वंतरे। तदा अयं वसुदेवः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भवत एवेति। यदीश्वरं मां जानासि तर्हि किमर्थमुद्विजसे तत्राह—यतोऽधीरधीश्चलबुद्धिः अलौकिकं लोकेष्वविद्यमानं शंखादीनां श्रिया कांत्या जुष्टं सेवितं यतः। यद्वा—शंखादिभिः सहिता श्रीश्चिह्नरूपा रमा तया उपसंहर अंतर्द्धेहि। अत्र

---

१. जन्म मे—च. पु.। २. अन्यत्र श्रीभगवानुवाच पाठो न दृश्यते। ३. बिभर्ति—श्रीधर. वंशी. वीर. शुक. गिरि. भक्त.। ४. हि तद्—श्रीधर. वंशी. गिरि. ; महद्—वीर. भक्त. ; यदेतद्—इति कस्यचित्। ५. 'श्रीभगवानुवाच' पाठः श्रीधर.–वंशीधर.–भक्त.–पाठेषु दृश्यते।

विश्वनाथः—भो मातर्यदीदं रूपमंतर्धापयामि तदा कंस आगत्य गर्भस्ते क्व गत इति गर्भचौर्यापराधेन त्वामधिकं ताडयिष्यतीति चेत्तत्र मम का शंकेत्यत आह—ते जन्म मा जानातु। हे मधुसूदनेति। मधुं हतवतो मम कंसवधे कः प्रयास इति मामंस्थाः। तदानींतनान्मधोरप्ययमिदानींतनः कंसः कोटिगुणबलाधिक इति भावः। भवद्धेतोरिति मदपराधं प्रकल्प्य मत्ताडनादिकं कुर्याच्चेत्करोतु केवलं भवतः कल्याणमाशास इति भावः तर्हि 'रूपं यत्तत्' इत्यादिना मदैश्वर्यं वृथा—किमवादीः सत्यं पुत्र भवन्माताहमधीरधीरिति मातृवात्सल्येनैवेदं रूपमुपसंहरेति भावः ॥ २९-३० ॥ एतादृशं पुत्रं सर्वे वांछंति त्वं किमेवं वदसीत्याह—किमिति। एवंभूतेन शंखादिशोभितेन नृलोकस्य मनुष्यलोकस्य विडंबनमुपहास एवेत्यर्थः। इत्यर्थ इति। उचितेनैव श्लाघा न त्वसंभविनेति भावः ॥ ३१ ॥ तावदादौ चतुर्दशभिः 'त्वमेव—इत्यारभ्य 'मद्गतिं पराम्' इत्यंतैः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, मातस्तव किमर्थं भयं तथा ममाप्रत्यक्षतायां गर्भचौर्यापराधेन तस्मात् भयमेव स्यात् इत्याशङ्क्य यथार्थमेव निवेदयति—जन्मत इति। भवदर्थमेव बिभेमि नात्मार्थमिति यद्यपि मधुसूदनत्वेन त्वयि क्षुद्रादस्माद्भयं न सम्भवति तथाऽपि तत्र कारणमिदमेवेत्याह- अधीरधीरिति हठाद्धैर्यविलोपकेनानुकम्पोदयेनेत्यर्थः। अत्र कंसानामग्रहणमत्युत्कण्ठया ॥ २९ ॥ तत्रानुमतिमाशंक्य पुनस्तदप्यसहमानाऽऽह-उपेति। शङ्खादिश्रिया सेवितं चत्वारो भुजा यत्र तादृशं यत् रूपम् आकरविशेषः तदेवोपसंहर गोपय रूपान्तरन्तु प्रकटयेत्यर्थः। तथा सति लोके कुत्रापि गोपयितुमशक्यस इति भावः। हे विश्वात्मन्निति युगपदनन्तरूपावकाशत्वान्नात्र तवाशक्तिरिति भावः अतोऽधिकभुजद्वयं कौस्तुभादिकं च गोपयन् निगूढं लोकानुरूपमेव रूपं प्रकाशयेत्यर्थः। तथा सति लोके कुत्रापि गोपयितुं शक्यस इति भावः ॥ ३० ॥ नन्वधुना बन्धनात्तारयाम्येव त्वां मारयाम्येव तं तथेदृशेन मया पुत्रेण कीर्तिरेव भविष्यति मांसचक्षुषोऽपि च मत्कृतिमाप्स्यन्तीत्याशङ्क्य पुनर्बलाद्वर्द्धिष्णुना मातृभावेन तस्य तादृशशक्तेरप्रतीत्या व्याजान्तरेणापि तत्प्रार्थयते विश्वमिति। अत्र तेषामाभासेपि किमिति साटोपमेव वाक्यं ततश्च अधुना मारयाम्येवेत्येवौद्धत्येन ध्वनितं स्यात् एवमित्यर्थान्तरं विश्वम् अनन्तकोटिब्रह्माण्डात्मकं निशा प्राकृतप्रलयरात्रिः तदन्ते तस्या नाशे सृष्टिस्थितिसमये परः पुरुषो महत्स्रष्टृरूपः सन् बिभर्षीति सोयमेव हि विश्वमन्तर्भावयन् स्वांशिनं तं प्रविश्याविर्भवतीत्यभिप्रायात् गर्भजो गर्भगश्चेति पाठद्वयम् ॥ ३१ ॥ एवं तयोरुक्तिभिरानन्दितो निजप्रसिद्धरूपाविर्भावकारणकथनादिना तौ प्रतिष्टुवन्निव परिसान्त्वयन् मातरि स्नेहविशेषेण तां संबोध्याह—त्वमेवेत्यादिना। स्वायम्भुवे मन्वन्तरे सति वर्त्तमाने, यद्वा, हे सतीति पुनःपुनस्तस्यैव पत्नीतया पातिव्रत्यनिष्ठाभिप्रायेण अकल्मषः रागद्वेषादिरहितः एवमन्योन्यं दाम्पत्ययोग्यतोक्ता ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु, मातस्ते गर्भो व्यक्त एवासीदतो जातः सन् पित्रा कुत्रापि नीत इति वितर्क्य कंसः प्रतिज्ञातपुत्रार्पणं तं किल पीडयेदित्याशंक्य प्रार्थयते—जन्मेति। कंसो मयि तव जन्म न जानातु। हे मधुनाम-महादैत्य-हन्तः! इत्थं यद्यपि त्वयि त्वदीयेष्वपि भयशंका नास्त्येव, तथाप्यहं भवदर्थं कंसान्महादुष्टात् सम्यगुच्चैर्विजे बिभेमि। कुतः? अधीरधीः स्नेहोद्रेकेण धैर्याभावादित्यर्थः ॥ २९ ॥ अतोऽद इदं रूपमाकारमुपसंहर संवृणु; यतोऽलौकिकं दिव्यम्। हे विश्वात्मन्निति रूपोपसंहारे सामर्थ्यं द्योतितम्। अलौकिकत्वमेव दर्शयति—शङ्खेति, शङ्खादीनां श्रिया शोभया, किंवा, शङ्खादिभिः श्रिया च वस्त्राभरणादिसम्पत्त्या जुष्टमलौकिकत्वमेवोपसंहर्त्तव्यमित्यर्थः। गूढोऽयं भावः—तथासति लोके कुत्रापि निह्नुत्य रक्षितुमपि शक्य इति। यद्वा, रूपाप्रत्यक्षीकरणे हेतुमाह—जन्मेति। ततो मा विद्यादिति सम्भावनायां सप्तमी। तत् किमित्यत्राह—यतो भवतो भवज्जन्मन एव हेतोरहं समुद्विजे त्वज्जन्माज्ञानेन कंसोऽस्मान्न खलु पीडयिष्यतीति भावः। ननु, तर्ह्यन्तर्दधानि? नेत्याह—उपेति। अर्थः स एव ॥ ३० ॥ किञ्चास्मिन्नैश्वरे रूपे वृत्ते सति मनुष्याणां मादृशां त्वयि स्नेहोऽपि न सम्भवतीत्याह—विश्वमिति। तत् मद्गर्भजत्वमनुकरणमात्रम्, न तु तात्त्विकमिति ज्ञानादित्यर्थः ॥ ३१ ॥ एवं तयोरुक्तिभिरानन्दितो निजदिव्यरूपाविर्भावकारणकथनादिना तौ प्रतिष्टुवन्निव परिसान्त्वयन् मातरि स्नेहविशेषेण तां सम्बोध्याह—त्वमेवेत्यादिना। स्वायम्भुवे मन्वन्तरे सति वर्त्तमाने; यद्वा, हे सतीति पुनः पुनस्तस्यैव पत्नीतया पातिव्रत्यनिष्ठाभिप्रायेणाकल्मषो रागद्वेषादि-रहिते दुर्व्वासनाहीनो वा। एवमन्योऽन्यं दाम्पत्ययोग्यतोक्ता ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

विडम्बनम् उपहासास्पदम् ॥ ३१ ॥ स्वायम्भुवो स्वायम्भूवमन्वन्तरे अभवः ॥ ३२-३८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे मधुसूदन! अयं पापः कंसः मयि तव जन्म मा विद्यान्न जानातु तत्र हेतुमाह; भवद्धेतोः त्वद्रूपात्कारणात् भवदवताररूपात् निमित्तादिति यावत् कंसादहमधीरधीर्हेतुगर्भमिदं धैर्यरहितबुद्धित्वात्समुद्विजे बिभेमि ॥ २९ ॥ हे विश्वात्मन्! अथो

अतः अद इति पाठे अदः एतच्छंखचक्रादिभिर्जुष्टं श्रीर्लक्ष्मीः शङ्खादीनां श्रिया शोभया जुष्टं वा चत्वारो भुजा यस्मिन् अत एवालौकिकं प्राकृतजनेष्वसंभावितं रूपमुपसंहर तिरोधापय ॥ ३० ॥ स्वनाभीकमलस्थाखिललोकमपरिच्छिन्नवैभवं श्रीभगवन्तं स्वगर्भे धृतवत्यस्मीति विस्मयते—विश्वमिति। निशा प्रलयः तस्या अन्तःसृष्टिदशा तदा स्वतनौ स्वतन्वेकदेशभूते नाभीकमले यः परमपुरुषो भवानिदं कृत्स्नं चिदचिदात्मकं विश्वं बिभर्ति सोऽयं भवान् मम गर्भगोऽभूदिति यत्तन्नृलोकस्य विडम्बनं तद्वदनुकरणमात्रः अहो अत्याश्चर्यमेतस्य भगवतो माहात्म्यमिति विस्मयः ॥ ३१ ॥ तदेवं पितृभ्यां संस्तुतः प्रार्थितश्च स्वासाधारणदिव्यमङ्गलविग्रहप्रदर्शननिमित्तं विवक्षुस्तदुपोद्घातरूपमितिहासमाह भगवान् त्वमित्यादिना एतद्वामित्यतः प्राक्तनेन ग्रन्थेन। पूर्वसर्गे इतस्तृतीये जन्मनि स्वायम्भुवे मन्वन्तरे सति त्वमेव पृश्निर्नामयोषिदभूः तदा अयं तव भर्ता वसुदेवस्तु सुतपा नाम प्रजापतिरभूत् कथम्भूतः अकल्मषः विशुद्धः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अप्रत्यक्षकरणे कारणमाह—जन्मेति। मा विद्यान्न जानातु समुद्विजे बिभेमि अधीरधीः चञ्चलबुद्धिः ॥ २९-३० ॥ इतरगर्भवदिदुःखाऽनुभवो नास्तीत्याशयेनाह—विश्वमिति। निशान्ते रात्रिमध्ये यथावकाशम् अवकाशमनतिक्रम्य यथा सादृश्य इति समासः ॥३१॥ अहं युवयोस्तपःप्रभावादाविर्भावमकरवं न तु कर्माधीनत्वेनेति पूर्वजन्मसञ्चीर्णतपोमाहात्म्यं कथयति त्वमेवेति, अयं वसुदेवः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

जन्मत इति। भवदर्थमेव बिभेमि नात्मार्थमिति यद्यपि मधुसूदनत्वेन क्षुद्रात्तस्मात्तव न भयं सम्भवेत् तथाप्यधीरधीत्वेनैव बिभेमीत्यर्थः। अतोऽधिकं भुजाद्वयं कौस्तुभादिकञ्च गोपयन् निगूढं लोकानुरूपमेवाकारं प्रकाशयेत्यर्थः। तथा सति लोके कुत्रापि गोपयितुमपि शक्येथामिति भावः। नन्वधुना मारयाम्येव तं तथेदृशेन मया पुत्रेण तव कीर्त्तिरेव भवेत् मांसदृशोऽपि च मत्कृतिसुखमाप्स्यन्तीत्याशङ्क्य तादृशस्नेहेनैव तस्य तादृशशक्तिमप्रतीयती व्याजान्तरेणापि तदेव प्रार्थयते ॥ ३० ॥ विश्वमिति। विश्वम् अनन्तकोटिब्रह्माण्डात्मकं निशा प्रलयरात्रिः तदन्ते तदानीमेव तेषामभिव्यक्तेः परः पुरुषो महत्स्रष्टृरूपः सन् ॥ ३१-३३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

अत्र भक्तिगौरव एव इममर्थं पुनर्द्योतयति—उपसंहरेत्यादि। हे विश्वात्मन्! अहो रूपमुपसंहर। कीदृशम्? अलौकिकं चतुर्भुजम्। लौकिकद्विभुजमेव तव श्रीकृष्णस्य स्वरूपम्—'नराकृति परं ब्रह्म' (भा० ७।१०।४८,७।१५।७५) “गूढं परं ब्रह्म मनुष्यलिङ्गम्”, “परमात्मा नराकृतिः” इत्याद्युक्तेः, तदेव प्रकाशयेत्यर्थः। इदं तु पौरुषं रूपम्, तद्विशिनष्टि—शङ्खचक्रेत्यादि ॥ ३०-३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

उपसंहरेत्यादि। उपसंहर तिरोभावय, अद इत्यस्यायं भावः—तथाविधेन तेजसा निमीलिताक्षी सर्वमिदमुक्तवती, अतो विप्रकृष्टमिव तद्रूपं तस्यासीत्, तेजसा मुषितचक्षुषा अद इति गदितम्, अदसो विप्रकृष्टवाचित्वात् अलौकिकं यथा स्यात्तथोपसंहर अन्यथोपहरिष्यमाणरूपस्य लौकिकत्वमायाति ॥ ३० ॥ मम गर्भगोऽभूदिति। गर्भजमात्रत्वेन तस्याः प्रतीतिमात्रम्, न तु वास्तवमिदं रूपं तिरोभावनीयमेव, तत्र सन्देहो नास्ति ॥ ३१-३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

भो मातः यदीदं रूपमन्तर्द्धापयामि तदा कंस आगत्य गर्भस्ते क गत इति गर्भचौर्य्यापराधेन त्वामधिकं ताडयिष्यतीति चेदत्र मम का शङ्केत्याह जन्मेति। मा विद्यात् मा जानातु मधुसूदनेति मधुदैत्यं हतवतो मम कंसवधे कः प्रयास इति मामंस्थास्तदानीन्तनात् मधोरप्ययमिदानीन्तनः कंसः कोटिगुणितबलाधिक इति भावः। भवद्धेतोरिति मदपराधं प्रकल्प्य मत्ताडनं वधादिकं कुर्य्यात् चेत्करोतु केवलं भवतः कल्याणमाशासे इति भावः। ननु, तर्हि रूपं यत्तदित्यनेन नष्टे लोक इत्यनेन योऽयमित्यनेन मर्त्योमृत्युव्यालेत्यनेन मदैश्वर्यं वृथैव किमवादीः सत्यं पुत्र! भवन्माताऽहमेवमधीरबुद्धिरेव मा खिद्यस्व ममैव दोषोऽयं निर्मञ्छनं ते यामि मातृवात्सल्येनापि रूपमिदमुपसंहरेति भावः ॥ २९ ॥ विश्वात्मन्निति विश्वस्य मध्ये अमहत्यस्मि तन्ममान्तर्मध्ये स्थित्वा कथमेवमधीरां धियं प्रवर्त्तयसीति तवैवायं दोष इति भावः। अलौकिकमिति लौकिकनरबालकाकारो भव यथा झटिति त्वामहं क्वापि गोपयामीति भावः ॥ ३० ॥ ननु, किमित्युपसंहर्तव्यम् मया परमेश्वरेण पुत्रेण तव महती प्रतिष्ठैवास्त्विति चेन्नाहं प्रतिष्ठामाशासे इत्याह—विश्वमिति। निशान्ते मन्दिरे “निशान्तवस्त्यसदनभवनागारमन्दिरम्” इत्यमरः। स्वतनुमन्दिरे यथावकाशमसङ्कोचतः नृलोकस्य मानुष्या मम विडम्बनमेव तदिदम् अयि मूढे कोटिब्रह्माण्डविग्रहो भगवांस्तव मानुषपुत्र्या गर्भे स्थितोऽभूदिति वक्तुमभिमन्तुमपि किं न लज्जसे? इति प्रतिवेशिन्यो मामुपहसिष्यन्तीति प्रत्युताप्रतिष्ठैव मे स्यादिति भावः। ननु,

परब्रह्ममूर्तेर्भगवतः साक्षादपरोक्षानुभविनोर्देवकीवसुदेवयोरपि किमिदमघटमानमाविद्यकं भयशोकादिकं मैवं विद्याविद्याभ्यां बहिरङ्गाभ्यां परभूता खलु यान्तरङ्गा स्वरूपभूता चिच्छक्तिस्तस्या अपि सारवृत्तिरूपो यः प्रेमा तद्विलासभूतमेवेदं भयशोकादिकमाविद्यकत्वप्रवादपात्रीभवितुं नैवार्हति प्रेम्णोमायातीतत्वे किं प्रमाणमिति चेत् भगवतः प्रेमवश्यत्वान्यथानुपपत्तिरेव मायामयत्वे तस्य मायावश्यत्वमापद्येतेति किञ्चात्र चान्यत्र च व्युत्पत्त्यर्थमिदमभ्यस्यते "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। भक्त्याहमेकया ग्राह्यः" इति भगवदुक्तेस्तस्य स्वरूपं भक्त्यैव गम्यमित्यवसीयते सा च भक्तिस्त्रिविधा गुणीभूता प्रधानीभूता केवला च तासां च क्रमेण ज्ञानं ज्ञानमयीरतिः प्रेमा चेति फलानि तत्र ज्ञानेन केवलं चित्सुखैकमयं ब्रह्मस्वरूपमेव ज्ञानमयरत्या चिदैश्वर्यसुखमयं भगवत्स्वरूपमेव प्रेम्णा तु माधुर्य्यमयं कृष्णरामादिस्वरूपमेवास्वाद्यते कस्यचित्प्रेमवत्साधुसङ्गमहिम्ना प्रधानीभूतापि भक्तिः प्रेमफला स्यात् किन्तु तत्प्रेमैश्वर्यमेवेत्याहुः, स्वरूपस्य वस्तुत ऐक्येप्यास्वादनभेदाद्भेदातिदेशः तत्र माधुर्य्यं श्रीविग्रहनिग्रहरूपादिपञ्चकस्य भक्तवात्सल्यस्य लीलायाश्चेति सप्तविधं रजस्थस्य तस्य तु वेण्ववैश्वर्ययोराधिक्यानवविधं यदुक्तम् -

"चतुर्धा माधुरी तस्य व्रज एव विराजते ऐश्वर्यक्रीडयोर्वेणोस्तथा श्रीविग्रहस्य च" ।। इति ।

प्रेमा च दास्यसख्यवात्सल्योज्ज्वलभेदाच्चतुर्विधः तेष्वपि मध्ये वात्सल्यप्रेमा स्वस्वभावमहिम्नैव कृष्णमनुकम्प्यत्वेन ममत्वातिशयविषयीकृत्य स्पष्टमप्यैश्वर्यं स्वयमनुभूयमानत्वं प्राप्तमपि तथाऽऽच्छादयति, यथा तन्ममतारसनया निबद्धो वशीभूय स कृष्णः स्वमाधुर्य्यमपारमन्यानास्वाद्यं वात्सल्यप्रेमवज्जनमास्वादयति। ज्ञानेन वा ज्ञानमयरत्या वा सच्चिदानन्दात्मकवस्तूनां य आस्वादस्तस्मात् कोटिकोटिगुणितं ममता हेतुकमास्वादं प्रेमा प्रवर्त्तयति तथा हि सर्वसन्तापनिवर्त्तकात् परमाह्लादकात् दृश्यमानात् चन्द्रादपि सकाशात्सर्वगुणहीनोऽपि कालत्वादिदोषयुक्तोपि दृश्यमानः स्वपुत्रो यत्सुखमधिकं दत्ते तत्र ममतैव यदि कारणं तदा सर्वगुणमण्डिते स्वभावादेव निरवधिकसुखप्रदे श्रीकृष्णे पुत्रीभूते निरवधिकैव सा ममता प्रेमनिष्ठा किमुतेति ज्ञानप्रेम्णोर्भेदो विवृतः यथाह्यविद्यास्ववृत्त्या ममतया जीवं दुःखयितुमेव बध्नाति तथैव प्रेमा स्ववृत्त्या ममतयेश्वरं सुखरूपमप्यतिसुखयितुं बध्नाति यथा दण्डनीयजनस्य गात्रबन्धनं रज्जूनिगडादिना माननीयजनस्यापि गात्रबन्धनमनर्घसुगन्धसूक्ष्मश्लक्ष्णकञ्चुकोष्णीषादिनेत्यविद्याधीनो जीवो दुःखी प्रेमाधीनः कृष्णोऽतिसुखीति किञ्च यथैवाविद्यया स्वतारतम्येन ज्ञानावरणतारतम्याज्जीवस्य पञ्चविधक्लेशतारतम्यं विधीयते तथैव प्रेम्णापि स्वतारतम्येन ज्ञानैश्वर्याद्यावरणतारतम्यात् स्वविषयाश्रययोः अनन्तप्रकारं सुखतारतम्यं विधीयते इति तत्र केवलः प्रेमा श्रीयशोदादिनिष्ठः स्वविषयाश्रयौ ममतारशनया निबद्ध्य परस्परवशीभूतौ विधाय ज्ञानैश्वर्य्यादिकमावृत्य यथादिकं सुखयति न तथा देवक्यादिनिष्ठः ऐश्वर्य्यज्ञानमिलितत्वेन प्राबल्याभावात् तत्तत्प्रेम्णस्तथा तथा भूतत्वे कारणं तु नान्वेष्टव्यं तासां यशोदादिदेवक्यादीनां नित्यसिद्धत्वादेव तत्तत्सादृशप्रेमविशेषाणामपि नित्यसिद्धत्वादिति सर्वं निरवद्यम् ।।३१।। भो मातर्न केवलमस्मिन्नेव जन्मनि त्वद्गर्भगतोऽहमपितु जन्मान्तरेष्वप्यतस्त्वं किमिति स्वदैन्यं मन्यसे न त्वं प्राकृत्येव मानुषीत्याह— त्वमेवेत्यादिचतुर्दशभिः। अभूः आसीः स्वायम्भुवे मन्वन्तरे सति वर्तमाने अयं वसुदेवः ।। ३२- ३३ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भवतः एव हेतोः कंसात्समुद्विजे मयि सति क उद्वेगः अत्राह—अधीरधीरिति ।। २९ ।। पौरुषं रूपं प्रत्यक्षं मा कृषीष्ठा इति यदुक्तं तद्विवृणोति, उपसंहर इति ।। ३० ।। निशान्ते प्रलयान्ते विश्वं यथावकाशमसङ्कोचतः स्वतनौ भवान् बिभर्ति स भवान् मम गर्भगोऽभूदिति मम भाग्यं परन्तु असम्भावनया नृलोकस्य विडम्बनमुपहासास्पदं भवेदत उपसंहरेति पूर्वेणान्वयः ।। ३१ ।। प्रार्थितं स्वीकृत्य आवयोः प्रार्थनयेव जन्मान्तरे कृतयेवं जातोऽस्मीति विज्ञापयति भगवान्-त्वमिति चतुर्दशभिः। हे सति! मातः! स्वायम्भुवे मन्वन्तरे अभूः आसीः ।। ३२ ।।

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

निशांत इत्येतन्निशायां दिवसस्यांते निशाया आदिभाग इति व्याख्येयम्। एतेन निशाया आदाविति वक्तव्यम्। निशाया अंत इति कथनमनुपपन्नम् इति दूषणं निरस्तम् ।। ३२ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तदेव देवकी देवं प्रति विविच्य वक्ति। जन्मेति। हे मधुसूदन मयि ते जन्मासौ पापो मा विद्यान्न जानातु। अधीरंधीरहं भवद्धेतोस्त्वत्कारणं कंसात्समुद्विजे बिभेमि। अहं रोहिणी चेति द्वाभ्यां जायत इति द्विजो बलस्तद्विषये समुद्वर्तते स्थानान्तरमिति ससन्तोषेत्यावृत्त्याऽर्थः ।। २९ ।। अनेन स्थानान्तरगमनागमनौ भवत इति ध्वन्यते। मां प्रति किं वदसि मातरितः परमित्यत ईरयति। उपसंहरेति। हे विश्वात्मन् विश्वे नानाप्रकारा आत्मानो देहा यस्य स तथेति। अनेनानेनैव रूपेण यथा मनीषितं तथा भवनसामर्थ्यं द्योत्यते। अलौकिकं तदलौकिकत्वमुपपादयति। शङ्खचक्रैः गदापद्मैः सहिता या श्रीस्तया वा तेषां श्रिया शोभया वा जुष्टं चतुर्भुजं भुजचतुष्टयसहितमिति। हे रूपम रूपाणां मा सम्पश्यस्येदानीं प्राकृरूपज्ञानं रूपेषु प्रतिरूपं मा रमाऽस्येति तत्सम्बुद्धिः। लौकिकमदः

कुर्वीथाः कुर्विति ॥ ३० ॥ एतादृशोऽपि त्वमीश मे गर्भकोशजात इति जातमद्भुतमिदमित्याह । विश्वमिति । यदेतद्विश्वं जगत्परः पुरुषो भवान्यथावकाशं पदमेकम् । अवकाशमनतिक्रम्य यथा सादृश्य इति समासः । निशान्ते प्रलयावसाने स्वतनौ बिभर्ति सोऽयं मम गर्भगोऽभूदिति यन्नृलोकस्य महद्विडम्बनमाश्चर्यम् ॥ ३१ ॥ न मम कर्मनिर्मितमेतद्वर्ष्म किन्तु भवत्प्रार्थनयेति तौ स्मारयंस्तत्पूर्वरङ्गमाह । त्वमेवेति । पूर्वसर्गेऽतीतजन्मनि हे सति स्वायम्भुवमन्वन्तरे सतीति वा त्वं पृश्निस्तन्नाम्न्यभूरयं वसुदेवस्तदाऽकल्मषा सुतपा नाम प्रजापतिरभूत् ॥ ३२ ॥

श्रीसुबोधिनी

अन्यतरकरणाभावाय मध्यमपक्षे स्वतो निवृत्तावपि कंसश्चेज् जानीयात् स्वयमागत्य युद्धं कुर्यात्, अत एव स दोषस्तदवस्थ इति तस्य जन्माज्ञानं प्रार्थयति **जन्मत इति, असौ कंसस्ते जन्म मा विद्यात्**, यतोयं पापः, तर्हि मत्स्वरूपं न जानासीतिचेत् तत्राह **मधुसूदन** इति, यद्यप्येतज् जानीमस्तथापि मध्यमपक्षशङ्कया प्रार्थ्यते, ननु मध्यमपक्षे को दोषोविश्वासस्तु न कर्तव्य इति चेत् तत्राह **भवद्धेतोः कंसादहं सम्युद्विजे**, विश्वासः कर्तव्य इति चेत् तत्राहाधीरधीरिति, न हि भगवत्युत्पन्ने परमानन्दे कोपि क्लेशहेतुर्भवितुमुचितः, भवद्धेतोरित्यनेनैतज् ज्ञापयति यद्ययं जानीयादस्मादुत्पन्नो भगवानन्यत्र तिष्ठतीति तदा निर्बन्धेन समानयनं वा प्रार्थयेत् पूर्वं प्रतिज्ञातत्वात्, अतोस्य ज्ञानाभाव एवोचितः ॥ २९ ॥

रूपान्तरस्वीकारे त्वन्यत्रापि स्थापयितुं शक्यते न त्वनेन रूपेणेत्युपसंहारं प्रार्थयत्युपसंहरेति, अदो वेदवेद्यमलौकिकं रूपं लोक उचितं न भवतीत्युपसंहर, विश्वात्मन्निति रूपग्रहण उपसंहारे च सामर्थ्यं द्योतितं, स हि विश्वस्मिन् सर्वाण्येव रूपाणि गृह्णात्युपसंहरति च, अद इति पदेन चैतज् ज्ञापयति, अवतारो नोपसंहर्तव्योलौकिकत्वमात्रमुपसंहर्तव्यमिति, सर्वमेवालौकिकमिति सर्वस्यैवोपसंहारे प्राप्ते यल् लौकिकसमानं तत् स्थापनीयमन्यदुपसंहर्तव्यमिति वदन्त्यलौकिकमंशमाह **शङ्खचक्रे**ति, शङ्खचक्रगदापद्मान्यायुधान्युपसंहर्तव्यानि, अलौकिकी श्रीश्चोपसंहर्तव्या भुजानां चतुष्टयं चोपसंहर्तव्यं द्वयं स्थापनीयं, उपलक्षणमेतत्, प्राकृतभावाद्यदतिरिक्तं तदुपसंहर्तव्यं, अविद्यमानोपि प्राकृतो भावः स्थापनीयः, यद्यपि चतुर्भुजं रूपं देवादीन् प्रति प्राकृतमेव तथापि साधारणान् प्रति तादृशमपि न प्रकटनीयमिति प्रार्थना ॥ ३० ॥

एवं स्तुत्वा प्रार्थयित्वा च विरोधं परिहरति विश्वमिति, अथवार्धोपसंहारेणार्धस्थापने सामर्थ्यार्थं विरोधिगुणमनूद्यान्यतरस्य प्रदर्शनपरत्वेनोपपादयन्ती समर्थयते विश्वमिति, **स्वतनौ** स्वशरीरे विराजि ब्रह्माण्डाख्ये **निशान्ते** सृष्टिसमये यथावकाशं चतुर्दशलोकात्मकं भुवनं **बिभर्षि**, प्रलये सूक्ष्मतया निवेशनं भवतीति निशान्त इत्युक्तं, किर्मीरतया स्थितिर्निषिद्धा, नन्वत्र किं प्रमाणमित्याशङ्क्याह **पुरुषः पर इति पुरुषो** व्यष्टिः **परः** समष्टिः, भवानिति सम्मत्यर्थं, तेन स्वस्य एतादृङ्माहात्म्यज्ञानवत्त्वसम्बोधनं, एवं विश्वाधारभूतोपि **भवान् मम गर्भगोभूत्**, यद्यपि विरुद्धसर्वधर्माश्रयस्य भगवतो नेदमाश्चर्यं तथापि स्वप्रतीत्याश्चर्यं मत्वा परिहरत्यहो **नृलोकस्य विडम्बनं महदिति**, अहो इत्याश्चर्ये, **नृलोकस्य** मनुष्यमात्रस्य महदेतदनुकरणमितिसमाधानं महानप्यल्पमनुकरोति यथा पुरुषो बिडालं तथापि ब्रह्माण्डविग्रहस्य परमसूक्ष्मताश्चर्यरूपेत्याशङ्क्याह **महदिति, अनुकरणं महदिति अनुकरणं**, सत्यमेव, परमलौकिकमनुकरणं, अनेन गर्वाभावोप्युक्तः ॥ ३१ ॥

एवमुभयोः स्तोत्रे सम्प्रार्थने कृते भगवान् स्वस्य पुत्रत्वे तादृशरूपेण प्राकट्ये च हेतुं वदंस्तयोः पूर्ववृत्तान्तमाह परिज्ञानार्थं, **त्वमेवेति** चतुर्दशभिश्चतुर्दशविद्यानां प्रामाण्यार्थम् ।

पूर्वस्थितिस्तथा कार्यं प्रकारो भजनं हरेः । कालस्तोषश्च प्राकट्यं वरप्रार्थनया सह ॥ १ ॥
अल्पबुद्धित्वभोगौ च जन्मत्रितयमेव च । त्रिगुणं भगवत्सत्यं लौकिकाद् वैदिकान् महत् ॥ २ ॥
रूपदर्शनकार्यं च साधनं प्रोच्यते महत् ॥ २½ ॥

प्रथमं स्थितिमाह, **पूर्वसर्गे** प्रथमब्रह्माण्डे प्रथमकल्प इतः पूर्वकल्पे वा, साक्षाद् देवकीं प्रत्येवाह भगवान्, तस्या दीनत्वेन स्नेहातिशयात्, पृश्निरितिनाम, **त्वमेव पृश्निरभूः स्वायंभुवे मन्वन्तरे, सतीति**सम्बोधनं, अनेनास्या अधिककृपायां धर्मातिशयो हेतुरुक्तः, तदा तस्मिन्नेव समये, अयमपि सुतपा इति नाम प्रसिद्धः, अयं च **प्रजापतिर्ब्रह्मणः** सुतो मरीच्यादिवत् कर्दमवत् स्वभाववत् एवायम**कल्मषः** कामक्रोधलोभादिरहितः ॥ ३२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

शङ्खचक्रेत्यत्र **यद्यपीति**, केचिद् देवा अपि चतुर्भुजा भवन्तीति तादृशे रूपे देवानां नालौकिकत्वेन भानं, इतरेषां तु भवतीति तथा तादृशमपीति, उपसंहृतालौकिकप्रभं चतुर्भुजाकारमात्रमपीत्यर्थः, **रूपं चेदमित्यनेन** कंसादीनामदर्शनं प्रार्थितमत एव "मांसदृशा"मित्युक्तं, अनेन तु तददर्शनेपि मनुष्यमात्रस्य तथा दर्शनं नास्मद्धितमिति तदभावः प्रार्थितोतो नान्यतरवैयर्थ्यं शङ्कनीयं, किञ्च यद्यप्याद्येनैव द्वितीयचारितार्थ्यं भवति तथापि "रूप"पदमात्रं "ध्यानधिष्ण्य"पदं च श्रुत्वा सर्वांशेन तिरोधानं हरिर्मा करोत्विति विशेषप्रार्थनं द्वितीयं कृतमिति ज्ञेयम् ॥ ३० ॥

भगवदुक्तवाक्यसङ्ख्यातात्पर्यमाहुश्चतुर्दशेति, पूर्णब्रह्मणो देवकीपुत्रत्वं न प्रमाणसिद्धमिति भ्रमाभावाय सर्वा अपि विद्या अत्र प्रमाणानीतिज्ञापनाय तत्समानसङ्ख्यैर्वाक्यैर्भगवतोक्तमित्यर्थः, प्रमाणस्य भावः प्रामाण्यं, प्रमाणत्वमिति यावत्, तदर्थमित्यर्थः, न च सङ्ख्यायामपि तात्पर्यवत्त्वे प्रमाणाभाव इति वाच्यं श्रुतिसिद्धत्वात्, तथा हि 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति यद् दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद् द्वादशकपालो जगत्यैवास्मिन् पशून् दधाती'तिश्रुतौ कपालेषु द्वादशसङ्ख्याविधानतात्पर्यं तदवयवभूतसङ्ख्याफलोक्त्या निरूपितम्, तत्तत्सङ्ख्यायास्तत्तत्फलसाधकत्वोक्तेरपि तत्तत्फलसङ्ख्यासजातीयत्वमेव प्रयोजकमिति ज्ञेय "मष्टाक्षरा गायत्री तेजस्त्रिवृद् दशाक्षरा विराडन्नं विराडेकादशाक्षरा त्रिष्टुब् द्वादशाक्षरा जगती जागताः पशव" इतिश्रुतिभ्यः, ननु सकृत्पुत्रत्वेपि वरवाक्यसत्यत्वे वारत्रयं तथात्वं कुत इत्यत आहुस्त्रिगुणमित्यादि, लौकिकमेकगुणं द्विगुणं वैदिकं भगवदीयं त्रिगुणमतः सर्वाधिकमिहोक्तमिहैव फलति चेत् तदा सत्यं भवति, वैदिकं तु जन्मान्तरेपि फलतीति तथा, भगवदुक्तं त्वामोक्षं यावन्ति जन्मानि तेषु सर्वेष्वेव फलतीत्येतदेवैकगुणत्वादिकं तेषु ॥ ३२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

जन्मत इत्यग्रिमश्लोकस्याभासं टिप्पण्यां विवृण्वन्तीदानीं मारणेत्यादि, इदानीममारयित्वान्यत्र गमनं प्रथमः पक्षः, इदानीं मारयित्वान्यत्र गमनं मध्यमः पक्षः, इदानीममारयित्वानेन रूपेणात्र स्थितिस्तृतीयः, मध्यमपक्षे पक्षद्वयं, स्वत उपेत्य युद्धेन कंसस्य मारणमित्येकः, स्वतो निवृत्तावपि कंसो युद्धार्थमायाति चेत् तदा मारणमिति द्वितीयः, एवं पक्षद्वये सत्यपि स स्वतो नायाति तदा तममारयित्वैवान्यत्र गतिर्भवति तदा तथेत्यर्थः, सुबोधिन्यां क्लेशहेतुरिति, अधीरत्वरूपक्लेशहेतुः, तथा च विश्वासेप्यधीरत्वाज्जन्माज्ञानं प्रार्थयत इत्यर्थः, ननु यद्येवं तर्हि भवद्धेतोः समुद्विज इति कुत उच्यत इत्यत आहुर्भवदित्यादि ॥ २९ ॥

विश्वं यदेतदित्यत्रोपपादयन्ती समर्थयत इति, विरोधाभावमुपपादयन्ती विरोधं समर्थयते, ज्ञानवत्त्वसम्बोधनमिति, ज्ञानवत्त्वस्य भगवते सम्यग्बोधनम् ॥ ३० ॥

भगवद्वाक्यतात्पर्योक्तिटिप्पण्यां ननु च 'सङ्ख्याया' इत्यारभ्य 'श्रुतिभ्य' इत्यन्तेन यत् सङ्ख्यायास्तात्पर्यमुक्तं तन् न सङ्गच्छते, सङ्ख्यायाः पुरोडाशविशेषणतया तत्र श्रावणेन पुरोडाशेष्टाकपालत्वादिरूपधर्मे वा पर्यवसानादिति चेन्न, उदवसानीयविधायकश्रुतौ तथा निर्णयात्, तत्र हि 'अप वै सोमेनेजानाद् देवताश्च यज्ञश्च क्रामन्त्याग्नेयं पञ्चकपालमुदवसानीयं निर्वपेदग्निः सर्वा देवताः पाङ्क्तो यज्ञो देवताश्चैव यज्ञं चावरुन्धे गायत्रो वा अग्निर्गायत्रच्छन्दास्तं छन्दसा व्यर्धयति यत् पञ्चकपालं करोत्यष्टाकपालः कार्योष्टाक्षरा गायत्री गायत्रो वा अग्निर्गायत्रच्छन्दाः स्वेनैवैनं छन्दसा समर्धयति पाङ्क्त्यौ याज्यानुवाक्ये भवतः पाङ्क्तो यज्ञस्तेनैव यज्ञान्नैती'ति श्रावितं, तथा च तत्राष्टाकपालपुरोडाशविधाने तस्मिन् पञ्चकपालस्य सत्त्वेपि तदनादृत्य याज्यानुवाक्ययोः पञ्चसङ्ख्याकत्वविधानेन पञ्चसङ्ख्याकयज्ञादनपगमविधानतस्तथा निश्चयात्, अतः सत्ताया एव सतात्पर्यकत्वमपेक्षितस्थले निश्चयमनपेक्षितानां निस्तात्पर्यकत्वं चेति दिक् सुबोधिन्यां पूर्वस्थितिरित्यादिकारिकाभिर्भगवद्वाक्यार्थ उच्यते, तत्र जन्मत्रित इत्यारभ्य श्लोकत्रयस्य तात्पर्यं, तत्र त्रिगुणमित्यादिकथनस्य किं प्रयोजनमित्याकाङ्क्षायां टिप्पण्यां तदाहुर्नन्वित्यादि ष्वित्यन्तम् ॥ ३२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

जन्मत इत्यत्र मध्यमेति मध्य इदानीं मारणपक्षे शङ्कया विपरीतं कदाचित् भवेदितिसन्देहेनेत्यर्थः ॥ २९ ॥ उपसंहृ त्यत्रादरशब्दस्यार्थमाहुर्वेदवेद्यमिति श्रीश्चेति, तथा च पद्यान्तैः श्रिया च जुष्टमितिमूले समासः ॥ ३० ॥ विश्वमित्यस्य द्वितीयाभा विरोधीति, एतमनूद्य समर्थयत इत्यन्वयः, अन्यतरस्येति, स्वगर्भगतत्वस्येत्यर्थः, अत्र कर्मणि सम्बन्धमात्रविवक्षया षष्ठी, गर्भगतत प्रदर्शनार्थत्वेनोपपादयन्तीत्यर्थः, विश्वं भगवत्तनौ नित्यत्वात् सर्वदा तिष्ठतीति निशान्तपदवैयर्थ्यमाशङ्क्य तदानीन्तनं विशे वक्तुमाहुः प्रलय इति, तदा सूक्ष्मरूपेण स्थितिर्निशाया अन्ते जाते तु स्थूलरूपेण यथावकाशं स्थितिरित्यर्थः निषिद्धा इ यथावकाशपदेनेतिशेषः ॥ ३१ ॥

बुभुत्सुबोधिका

जन्मत इत्यत्र अन्यतरेति अत्र टिप्पणी । तथात्वायेति करणाभावाय । इदानीमेव मारणं अन्यत्र गमनेनैतद्रूपादर्शनं तस्मै । इदानीमेवामारणं लोके चैतद्रूपदर्शनं तस्मै च । इदानीं मारणमिति 'रूपं चेद'मित्यस्य व्याख्यानम् । द्वितीयः पक्षः मध्यमप स्तस्मिन् । एवं सत्यपीत्यादि अयं प्रथमपक्षः । स्वत इति स्वस्माद् भगवत इत्यर्थः । स्वस्य भगवत इति वार्थः । दोषानिवृत्तिरि मारणदोषानिवृत्तिः । स दोष इत्यस्याः सुबोधिन्या अर्थः मध्यमपक्षे स्वत इत्यादिनेति । मध्यमपक्षे पक्षद्वयम् । स्वत उपेत्य यु कंसस्य मारणमित्येकः पक्षः । स्वतो निवृत्तावपि कंसो युद्धार्थमायाति चेत् तदा मारणमिति द्वितीयः । एवं पक्षद्वये सत्यपि स

नायाति तदा तममारयित्वैवान्यत्र गतिर्भवति । इत्युक्तम् । जन्माज्ञानस्येति मूलश्लोकोक्तस्य । सुबोधिन्याम् । स चेदित्यत्र सश्चे दिति पाठे सश्च गतौ । श्वा० प० से० । अत इति ब्रह्मविद्याकृतनिषेधात् । पापः जन्मज्ञानकारणमर्यादाभक्तिप्रतिबन्धकपापात्मा । मत्स्वरूपमिति सर्वसामर्थ्यसहितम् । अविद्ययोपमर्दो विद्याया ज्ञेयः । ममाकारकत्वाद्वा । मधुसूदन इतीति अकारकस्य दूतात् सम्बोधनं सम्भवति । अतः प्लुत्वम् । मधुसूदनायुधक्रमः 'शङ्खगदाद्युदायुध'मित्यस्य व्याख्यान उक्तः । अविश्वास इति सर्वसामर्थ्ये विश्वासत्वे । विश्वास इति विश्वात्मत्वेनैकतमरक्षणाभावे । तथा । उचित इति एतादृशज्ञानवत्यहमधीरधीः । भवद्धेतोरिति भवान् हेतुस्तस्मात् सकाशात् । अतो 'जन्म ते मय्यसौ पापो मा विद्या'दिति जन्माज्ञानं प्रार्थ्यत इति भावः ।। २९ ।।

उपसंहरेत्यत्र पूर्वमिति 'तथेति सुतमादाये'ति वाक्ये । 'अदसस्तु विप्रकृष्टे' इति कोशात् अदस्शब्दस्यार्थमाहुः अलौकिकरूपमिति । अलौकिकप्रकारकम् । श्रीश्चे ति तथा च पद्मान्तैः श्रिया च जुष्टमिति मूले समासः । यद्यपीति अत्र टिप्पण्यां तद्भाव इति अलौकिकांशदर्शनाभावः । नान्यतरेति उक्तादर्शनयोरन्यतरस्य वैयर्थ्यं न शङ्कनीयमित्यर्थः ।। ३० ।।

विश्वं यदेतदित्यत्र विरोधं परिहरतीति फले समवायिरूपत्वरूपविरोधं नृलोकस्य विडम्बनकथनेन परिहरतीत्यर्थः । विरोधीति विराड्रूपत्वम् । विरोधीति दीर्घान्तपाठे ई आश्चर्ये । अन्यतरस्येति विराड्रूपत्वनृलोकविडम्बनयोरन्यतरस्य कर्मादीनामपि सम्बन्धसामान्यविवक्षया षष्ठीप्रदर्शनपरत्वं तेनेत्यर्थः । उपपादयन्निति देवकीपदार्थः । देवकी भगवत्सेवानुकूलत्वलक्षणपुंस्त्ववतीत्यतः देवकी उपपादयन्नित्यत्र पुंस्त्वविशिष्टोपपादनकर्त्रभिन्ना स्त्रीत्वविशिष्टा एका देवकीति बोधः । विराजीति 'यथावकाश'मितिपदात् । 'यदेकमव्यक्तमनन्तरूपं तत्रे'ति नोक्तम् । 'रूपं चेद'मितीदमः प्रयोगात् पुनश्चा'दो रूप'मित्युक्तम् । तदकारकम् । स्तुत्यविषयम् । अत आहुः ब्रह्माण्डाख्य इति । 'कालात्मा भगवाञ् जात' इत्युक्तकारिकायामपि कालः समवायी विराट् आत्मा स्वरूपं यस्येत्यपि ज्ञेयम् । गीताप्रसिद्धः चतुर्दशेति सात्त्विकपक्ष उक्तः । किर्मीरिततयेति सङ्कुचिततया । पुरुष इति विराट् । विराट्त्वेनोपासनार्थमुक्तम् । तदत्र मृत्स्नाभक्षणविश्वदर्शने जातम् । 'सर्वत्र प्रसिद्धोपदेशा'दिति सूत्रभाष्य उक्तम् । सङ्गत्यर्थमिति समष्टिसङ्गत्यर्थम् । 'कृष्णस्तु भगवान् स्वय'मिति वाक्यात् । समाधानमिति प्रथमाभासोक्तविरोधस्य द्वितीयाभासे विरोधिगुणस्य च परिहार इत्यर्थः । बिडालमिति बिडालोनिच्छतीमपि मार्जारीं भुनक्तीति दृष्टान्तः । उपकारं कृत्वा भुनक्तीति वा । गृहीव तिष्ठतीति वा । अनेनेति महत्पदेन । गवाभाव इति भगवता बोध्यः ।। ३१ ।।

त्वमेवेत्यत्र स्तोत्रे इति कीर्तनभक्तिरूपे, भगवान् वदन्नित्यत्र हेतुः । जन्मप्रकरणत्वात् सङ्ख्यातात्पर्यमाहुः चतुर्दशेति । प्रामाण्यार्थमिति भगवद्वाक्यत्वाद् वेदत्वेन प्रामाण्यार्थम् । अत्र टिप्पण्याम् । चतुर्दशविद्यासम्बन्धिप्रमाणार्थमिति स्वार्थे ष्यञ् भवति तद्व्यावृत्त्यर्थमाहुः प्रमाणस्येति । व्याख्यानात् । सङ्ख्याया इति तत्प्रतीतीच्छयोच्चरितत्ववत्त्वरूपे तात्पर्यवत्त्वे । अतः षष्ठी । वक्तुरिच्छारूपतात्पर्यविषयत्वे सप्तमीप्रसङ्गः । मोक्षे इच्छास्तीतिवत् । वैश्वानरमिति वैश्वानरो देवतास्य पुरोडाशस्य, 'सास्य देवते' त्यण् । तदवयवेति पुरोडाशविशेषणभूतद्वादशकपालस्य सङ्ख्यायाः फलोक्त्या । तत्तत्फलेति सजातीयत्वं अष्टत्वादिना । त्रिवृदिति अस्थिमज्जावाग्रूपम् । नवकपाल इत्युक्तत्वात् तेजस्त्रिवृद्वदन्नं त्रिवृत् । पुरीषमांसमनोरूपम् । एवमापः त्रिवृत् । मूत्ररुधिरप्राणरूपाः यद्वा । 'तजस्त्रि'वृदित्युक्तेराधिदैविकादिभेदान्नव । विराडिति छन्दः । फलसङ्ख्यासजातीयत्वायाहुः अत्र विराडिति । 'पृथिवी वा अन्नमिति' श्रुतेः दशधा पृथिवी सात्त्विक्यादिभेदात् । श्रुतिभ्य इति न च वाच्यमिति पूर्वेणान्वयः । सुबोधिन्याम् । भगवद्वाक्यार्थानाहुः पूर्वस्थितिरित्यादिकारिकाभिः । त्रिगुणमित्यादि अत्र टिप्पण्याम्, सर्वाधिकमिति लौकिकाद् वैदिकान् महदित्यत्र महदित्यस्यार्थः । तथेति त्रिगुणं सत्यम् । तेष्विति आधिदैविकादिसत्येषु । 'बहुषुबहुवचन'मिति सूत्रात् । सुबोधिन्याम् । इत इति सारस्वतकल्पात् । प्रत्येवेति 'धृतिर्वाक् श्रीश्च नारीणा'मितिवाक्याद् धृतेरेवकारः । 'कश्चिद्धीर आत्मानमैक्ष'दितिश्रुतेः । पृश्निरवं सतीत्वं वा न भगवज्ज्ञाने जानातीच्छति यतत इति प्रक्रियोक्ते प्रयोजकमिति हेत्वन्तरमाहुः तस्या दीनत्वेनेति । 'भक्तानां दैन्यमेकं हि हरितोषणसाधन'मिति वाक्यात् । अयमपीति वसुदेवोपीत्यर्थः ।। ३२ ।।

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

अन्यतरकरणाभावाय मध्यमपक्षे स्वतो निवृत्तावपि—कंस को वर्त्तमान में मार दिया जावै और अलौकिक रूप को सर्व साधारण देखे इन दोनों घटनाओं में से एक भी घटना उपस्थित न हो न तो कंस अभी मारा जाय और न सर्वसाधारण को भगवत्स्वरूप का दर्शन ही हो इसलिये श्रीदेवकी माता कंस को भगवान् के जन्म का अज्ञान चाहती है कि कंस को आपके जन्म का ज्ञान न हो, अभी कंस को न मारकर अन्यत्र पधारें यह प्रथम पक्ष है, उसके विषय में अपने प्राणों की आशंका थी देवकी ने पूर्व में प्रस्तुत की है, एवं कंस को अभी मारकर यहाँ पर ही विराजमान रहें यह तृतीय पक्ष है उसके विषय में भी ज्ञातिजन सामान्य जन द्वेषी जन की असूया और द्वेष एवं हम लोगोंकी विनाविलंब मुक्ति का प्रसङ्ग महती हानि के रूप से निर्दिष्ट किया गया है। कंस को अभी मारकर भगवान् यदि अन्यत्र पधार जावें यह मध्यम पक्ष है, इस मध्यम पक्ष में भी स्वयं कंस के पास जाकर उसे मारें तो आपके अन्यत्र पधारने पर उसके पक्षपातियों का भय हम पर

बना रहेगा अतः आप स्वतः अपनी ओर से कंस के मारने से निवृत्त भी हो जावें स्वयं उसे मारने को नहीं भी पधारें तो भी यदि कंस को आपके जन्म का ज्ञान हो जायगा तो स्वयं आकर युद्ध करेगा, तब उस घोरस्वरूप कंस के दृश्य से हमारे प्राणों की स्थिति न रहने की संभावना का दोष तो इस मध्यम पक्ष में भी बना ही रहेगा अतः आपके जन्म का ज्ञान कंस को नहीं होना चाहिये ऐसी प्रार्थना करती हूँ कि यह कंस आपके जन्म को नहीं जाने, क्यों कि यह पापात्मा है, अत्यन्त भयङ्कर हत्यारा है, आप ऐसा न कहें कि तू मेरे स्वरूप को नहीं जानती, मैं जानती हूँ आप मधु दैत्य के विनाशक हैं, यद्यपि हम लोग जानते हैं कि आप ही उसे मारेंगे तो भी मध्यम पक्ष की सम्भावना से प्रार्थना की जाती है। आप कह सकते हैं कि मध्यम पक्ष में क्या दोष है अविश्वास करना तो उचित नहीं, मैं इस विषय में कहती हूँ सूनिये भगवन् आपके कारण से मैं क्रूर कंस से अत्यन्त उद्विग्न हूँ भय से कांप रही हूँ, आप के सामर्थ्य में विश्वास करना आवश्यक है पर विश्वास धीरता की अपेक्षा रखता है मैं तो '**अधीरधीः**' हूँ मेरी बुद्धि तो धैर्य को खो बैठी है। परमानन्दमय भगवान् के प्रकट हो जाने पर किसी भी प्रकार के क्लेश का कारण उपस्थित होना उचित नहीं फिरभी यह उद्वेग या क्लेश आप के निमित्त है इसी बात को कहती है कि '**भवद्धेतोः**' यदि कंस को विदित हो जावे कि हम लोगों से उत्पन्न हुए भगवान् कहीं अन्यत्र बिराजते हैं तो हठपूर्वक आपको मंगालेने के लिये हमें बाध्य करेगा क्योंकि पूर्व में वैसी प्रतिज्ञा उससे की गई है कि अपने पुत्रों को तुम्हें देंगे, अतः कंस को आपके जन्म का ज्ञान ही न होना चाहिये ॥ २९ ॥

रूपान्तरस्वीकारे इति—भगवान् यदि रूपान्तर करे तब तो आपको कहीं अन्यत्र भी पधराया जा सकता है, परंतु इस अद्भुत चतुर्भुज रूप से तो नहीं पधराया जा सकता। नाथ इसलिये तो मैं इस रूप के उपसंहार की प्रार्थना करती हूँ, कि वह वेद के वेद्य अलौकिक रूप लोक में दिखाना उचित नहीं अतः इस स्वरूप का उपसंहार कर लीजिये। '**विश्वात्मन्**' इस सम्बोधन से यह सूचित किया गया कि आप रूप के ग्रहण एवं उपसंहार के विषय में समर्थ है। विश्वात्मा भगवान् विश्व में सब ही रूपों का ग्रहण और त्याग भी करने में समर्थ रहते हैं। अतः पद से भगवत्स्वरूप की अलौकिकता व्यक्त की है जिसके द्वारा यह सूचित किया है कि अवतार का तिरोधान न करे केवल अलौकिकता का ही तिरोभाव करने की कृपा करें। भगवत्स्वरूप में सब ही अलौकिक सामग्री है तो सब का ही उपसंहार करना होगा ऐसी दशा में जो लोक के समान है उसको रखना चाहिये अन्य जो लोकवत् नहीं है उसका उपसंहार करना चाहिये ऐसा बतलाती हुई श्री देवकी अलौकिक अंश को कहती हैं, कि शंख चक्र, गदा, पद्म—इन आयुधों को तिरोधान कर दीजिये और अलौकिक श्री 'शोभा' का भी तिरोधान कीजिये एवं चार भुजाओं को छुपा लीजिये, और दो ही भुजा रखिये यह कथन मात्र एक उपलक्षण है तात्पर्य तो यह है कि लौकिकता से जो भिन्न प्रतीत होता है वह सब छुपा लीजिये, अलौकिक स्वरूप में यद्यपि लौकिकता की सत्ता अंशतः भी नहीं है तो भी लोगों के दिखाने भर के लिये उसको रखना आवश्यक है। यद्यपि चतुर्भुज रूप देवताओं के लिये साधारण जैसी बात है क्योंकि ब्रह्मा शिव इन्दु आदि देवताओं के तो चार मुख, तीन नयन एवं विभिन्न संख्या वाले बाहु आदि प्रसिद्ध है परन्तु सर्व साधारणों के प्रति वैसा चतुर्भुज रूप भी प्रकट करने योग्य नहीं यह प्रार्थना है ॥ ३० ॥

एवं स्तुत्वा प्रार्थयित्वा च विरोधं परिहरति—भगवती श्रीदेवकीजी माता तीन श्लोकों से इस प्रकार स्तुति एवं प्रार्थना करने के अनन्तर '**विश्वम्**' इस चतुर्थ श्लोक में विरोध का परिहार करती हैं, अथवा अलौकिक अर्ध अंश का उपसंहार करके लौकिक समान अर्ध अंश के रखने में भगवान् के सामर्थ्य के प्रतिपादन करने के लिये 'विश्व को स्वकुक्षि में रखना और स्वयं मेरी कुक्षि में रहना इस विरोधी गुण का अनुवाद कर उन दोनों में से एक गुण मेरे कुक्षिस्थ होना तो दिखाने मात्र है इस प्रकार विरोध के अभाव का प्रतिपादन करती हुई माता देवकी अविरोध का समर्थन करती हैं कि ब्रह्माण्ड नाम वाले अपने विराट् शरीर में सृष्टि के समय आप यथावकाश उसे सङ्कुचित किये बिना ही चतुर्दश लोकात्मक विश्व को धारण करते हैं। **प्रलये सूक्ष्मतया निवेशनं भवतीति निशान्त इत्युक्तम्**—"निशान्ते" पद से प्रलय रूप निशा की समाप्ति हो जाने पर आने वाला सृष्टि का काल सूचित होता है, प्रलय काल में तो सूक्ष्म रूप से विश्व की ब्रह्म में स्थिति होती है, स्थूल रूप से नहीं अतः प्रलय की समाप्ति होने पर उपस्थित होने वाले सृष्टि काल का निर्देश 'निशान्त' शब्द से किया गया है। '**यथाऽवकाश**' शब्द के द्वारा '**किर्मीरतया**' सङ्कुचित रूप से स्थिति का निषेध किया है, कि अवकाश बना रहे अपेक्षित विकास में कोई बाधा न आवे उस प्रकार विश्व का धारण आप सृष्टि काल में करते हैं। यदि पूछा जाय कि इसमें प्रमाण क्या है तब इस आशङ्का का समाधान करने के लिये '**पुरुषः**' और '**परः**' इन दो पदों का प्रयोग हुआ है, श्री देवकी कहती हैं कि आप ही पुरुष हैं और आप ही पर हैं, वृक्ष आदि के समान व्यष्टिरूप एकदेशी भी आप हैं और वन आदि के समान समूहात्मक समष्टिरूप सर्वदेशी भी आप हैं। अतः आप से विश्व का विकास के साथ धारण करना वन और वृक्ष के दृष्टान्त से सर्वथा सुसंगत है। इस विषय के प्रतिपादन में किसी भी प्रमाणान्तर की अपेक्षा नहीं रह जाती, इस विषय में भगवान् की सम्मति के सूचनार्थ '**भवान्**' पद का उपयोग हुआ है, कि आप से आप का स्वरूप तो अज्ञात नहीं आप तो विदित ही हैं कि आप ऐसे ही हैं। उक्त सम्मति के

प्रदर्शन से श्रीदेवकी को अपना भगवद्विषयक माहात्म्यज्ञान हो जाने का भगवान् को अच्छी तरह से जनाना अभीष्ट है, इस प्रकार विश्व के आधारभूत होकर भी आप मेरे गर्भस्थ हुए यह महान् आश्चर्य है। यद्यपि परस्पर सर्व विरुद्ध धर्मों के आश्रयरूप भगवान् के विषय में यह आश्चर्य की बात नहीं फिर भी श्रीदेवकी अपनी प्रतीति से आश्चर्य मान कर विरोध का परिहार करती हैं कि यह तो मनुष्यमात्र का महान् अनुकरण है। श्लोक में अहो अव्यय का उल्लेख आश्चर्यसूचक है, मनुष्यमात्र का अनुकरण ही उक्त शंका का समाधान है। बड़े लोग भी छोटों का अनुकरण करते हैं जैसे मनुष्य बच्चों को खुश करने के लिये बिडाल का अनुकरण करता है। अब श्लोक में 'महत्' पद आया उसका आशय बताते हैं फिर भी ब्रह्माण्ड शरीर धारी पुरुषोत्तम की परम सूक्ष्मता आश्चर्यरूप है इस शङ्का को हटाने के लिये मूल में 'महत्' पद का प्रयोग किया है कि आप का यह अनुकरण भी महान् है, भगवन् आप का यह अनुकरण है यह तो सत्य है लेकिन ऐसा अलौकिक अनुकरण लोकसाधारण अनुकरण नहीं, इस कथन से श्रीदेवकी ने अपने गर्व का अभाव सूचित किया है कि मेरा क्या सामर्थ्य है जो आपको धारण कर सकूँ यह तो सब आप की अनुकंपा है और आप ही का खेल है ॥ ३१ ॥

एवमुभयोः स्तोत्रे सम्प्रार्थने कृते भगवान् स्वस्य पुत्रत्वे तादृशरूपेण प्राकट्ये हेतु वदन्—इस प्रकार वसुदेवजी और देवकी दोनों की की हुई प्रार्थना के सहित स्तुतियों के वर्णन करने पर भगवान् अपने पुत्र होने में एवं उस प्रकार से अलौकिक रूप से प्रकट होने में कारण को बतलाते हुए उन दोनों माता-पिता के पूर्व जन्म के वृत्तान्त को सर्वथा ज्ञात कराने के लिये **त्वमेव पूर्वसर्गे भूः पृश्नि स्वायंभुवे**—इत्यादि चौदह श्लोकों द्वारा सूचित करते हैं। इन श्लोकों की १४ चतुर्दश-संख्या इस मर्म से रखी गई कि चतुर्दश विद्यावेद्य पूर्ण ब्रह्म पर तत्त्व ही श्रीदेवकी नन्दन रूप में प्रकट होते हैं इसमें कोई सन्देह या असम्भावना आदि करने का अवकाश नहीं है। इसकी प्रमाणिकता में चतुर्दश विद्यायें अपने समसंख्याक श्लोकों के मिष से उपस्थित है। ऋग्-यजुः-साम-अथर्व चार वेद, शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिष यह षड् वेदाङ्ग और स्मृति-पुराण-मीमांसा-तर्क यह चार शास्त्र सब मिलकर चौदह विद्या है।

कारिका—पूर्वस्थितिस्तथा कार्यं प्रकारो भजनं हरेः। कालस्तोषश्च प्राकट्यं वरप्रार्थनया सह ॥ १ ॥
अल्पबुद्धिस्वभोगौ च जन्मत्रितयमेव च। त्रिगुणं भगवत्सत्यं लौकिकाद् वैदिकान् महत् ॥ २ ॥
रूपदर्शनकार्यं च साधनं प्रोच्यते महत् ॥ २½ ॥

पूर्वस्थितिस्तथा कार्यं प्रकारो भजनं हरेः इत्यादि कारिका का विवेचनः—श्रीदेवकी वसुदेवों की पूर्व जन्म की स्थिति प्रथम श्लोक में कही है। द्वितीय श्लोक में उनका कार्य तप कहा है। तृतीय श्लोक में तपश्चर्या का प्रकार कहा है। चतुर्थ श्लोक में उनका भगवदाराधन हरिभजन कहा है। पञ्चम श्लोक में तपश्चर्या का काल बताया है। षष्ठ श्लोक में भगवान् की प्रसन्नता का कथन है। सप्तम श्लोक में वरदानार्थ भगवान् का प्रकट होना कहा है साथ में वर के लिये प्रार्थना भी कही है। ॥ १ ॥ अष्टम श्लोक में उनकी बुद्धि की अल्पता बतलाई है कि मोक्ष नहीं माँग सके इसका उल्लेख है। नवम श्लोक में उनका ग्राम्य सुख भोग का उल्लेख है। दशम, एकादश, द्वादश, इन तीन श्लोकों में भगवान् के तीन बार भूतल पर अवतार ग्रहण करने का निर्देश किया गया है। भगवान् का कहा हुआ सत्य वचन लौकिक सत्य और वैदिक सत्य इन दोनों से अधिक महत्त्व रखता है, इस मर्म की सूचना तीन बार अवतार ग्रहण से होती है। लौकिक सत्य एक गुण है वैदिक सत्य द्विगुण है लौकिक वैदिक दोनों से अधिक बलवत्तर भगवत्सत्य त्रिगुण है। इसलिये लौकिक वैदिक दोनों सत्य से अधिक बलवत्तर भगत्सत्य है लौकिक सत्य वह है कि इस जन्म में कहा हुआ इसी जन्म में फलित हो। वैदिक सत्य जन्मान्तर में भी फलित होता है। भगवत्सत्य तो मोक्ष पर्यन्त जितने भी जन्म हों सर्वत्र फलित होता है ॥ २ ॥ त्रयोदश श्लोक में भगवत्स्वरूप के दर्शन का कार्य पूर्व जन्मों का स्मरण कहा है। चतुर्दश श्लोक में स्नेह रूप महान् साधन का निर्देश किया है ॥ २½ ॥

प्रथमं स्थितिमाह—अब भगवान् श्रीकृष्णजी माता-पिताजी के पूर्व जन्म की स्थिति को कहते हैं कि पूर्व सृष्टि काल में जब सर्व प्रथम ब्रह्माण्ड की रचना हुई तब प्रथम कल्प में अथवा इस वर्तमान कल्प से पूर्व कल्प में हे सति! आप प्रश्नि के रूप में थी। श्री भगवान् माता देवकीजी को और भक्ति को देख कर आर्द्र हो गये और स्नेहातिशय के कारण माता श्री देवकी को ही सती पद से सम्बोधित कर साक्षात् माता के प्रति ही वचन कहते हैं कि माताजी, उस समय आप का प्रश्नि नाम था, आप ही प्रश्नि हुई थी, उस समय स्वायम्भुव मन्वन्तर था। भगवान् ने यहाँ पर सती पद से सम्बोधित कर श्री देवकी माताजी के प्रति अधिक कृपा होने का कारण निर्दिष्ट किया है कि पातिव्रत्य धर्म की महत्ता ही वैसी कृपा का कारण है। उस समय यह श्री वसुदेवजी भी सुतपा इस नाम से प्रसिद्ध प्रजापति हुए थे। यह सुतपा प्रजापति मरीचि आदि की भाँति ब्रह्मा के पुत्र होने से प्रजापति कहे गये, और महर्षि कर्दम प्रजापति की भाँति स्वभाव से ही यह थे काम, क्रोध और लोभ आदि दोषों से रहित अकल्मष मुनि ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतद्रूपप्रदर्शने को दोष इत्याशङ्क्य रूपान्तरं कथंचिद्गोपयितुमपि शक्यम्, इदं तु न तथा । तथा चास्यां विष्णुः प्रादुर्भविष्यतीति श्रुतवतः कंसान्महद्भयं स्यादित्याशयेनाह–जन्मेति । असौ पापाचारः कंसो मयि ते तव जन्म मा विद्यात् न जानातु । यतः पूर्वं बहवः पुत्राः कंसेन विहिंसिता अत इदानीं भवत एव हेतोः निमित्तात् कंसादहं समुद्विजे बिभेमि तर्हि पूर्वोक्ते मत्प्रभावे तव किंनिश्चयो नास्तीत्याशङ्कानिरासाय सम्बोधयति–मधुसूदनेति । महाबलपराक्रमं मधुदैत्यं हतवतस्तव कंसहनने कः सन्देह इत्याशयः । तर्हि कथं बिभेषीत्याशङ्क्याह–अधीरधीरिति ॥ २९ ॥ 'प्रत्यक्षं मा कृथा' इत्युक्तमेव स्पष्टयति–उपसंहरेति । अदो रूपमुपसंहर । रूपोपसंहारो नाम स्वरूपान्तर्भावः; तस्मिन् सति अवतार एव निष्फलः स्यादित्याशङ्क्याह–अलौकिकमिति । तदेव दर्शयति—शङ्खेत्यादि । तथा चालौकिकमुपसंहृत्य लौकिकसदृशेन रूपेणैव स्थेयमित्यर्थः । सङ्कल्पमात्रेण विश्वरूपेणैव स्थेयमित्यर्थः । सङ्कल्पमात्रेण विश्वरूपेण स्थितस्यैवंकरणायासस्तु तव नास्त्येवेत्याशयेन सम्बोधयति–विश्वात्मन्निति ॥ ३० ॥ ननु "किमिति रूपमिदमुपसंहर्तव्यमेव । एवंभूतेन मया पुत्रेण महती श्लाघा स्यात् । कंसहनने त्वहं समर्थ एवेति तद्भयं तु त्वया नैव कर्तव्यम्" इत्याशङ्क्याह–विश्वमिति । यत् यतः परः पुरुषो भवान् निशान्ते प्रलयावसाने सृष्टिस्थितिसमये एतदसङ्ख्यातब्रह्माण्डात्मकं विश्वं स्वतनौ स्वशरीरे यथावकाशमसङ्कीर्णं यथा भवति तथा बिभर्ति धारयति सोऽयं मम गर्भगोऽभूदिति यत्तत् हि यस्मात् नृलोकस्याहो विडम्बनमतिशयेनापहासास्पदम्, असम्भावितत्वात् । तस्माददो रूपमुपसंहरेति शेषः ॥ ३१ ॥ एवं पितृभ्यां संस्तुतः सम्प्रार्थितश्च भगवांश्चतुर्भुजादिरूपेणाविर्भावे कारणमाह—त्वमिति चतुर्दशभिः । पूर्वे सर्गे इतस्तृतीये पूर्वजन्मनि स्वायम्भुवे मन्वन्तरे हे सति मातः ! त्वमेव पृश्निर्नाम अभूः । तदाऽयं वसुदेवः अकल्मषः सर्वदोषरहितः सुतपानाम प्रजापतिरभूत् ॥ ३२ ॥

अन्वितार्थप्रकाशिका

जन्मेति ॥ हे मधुसूदन ! असौ पापः कंसो मयि ते तव जन्म मा विद्यात् न जानातु । यतः अधीरा धैर्यरहिता धीर्यस्याः सा अहं भवत एव हेतोः निमित्तात् कंसात् समुद्विजे बिभेमि ॥ २९ ॥ उपसंहरेति ॥ हे विश्वस्यात्मन् ! अलौकिकं दिव्यं शङ्खचक्रगदापद्मानां श्रिया जुष्टं चतुर्भुजम् अदः इदं रूपम् उपसंहर गोपाय उपसंहृत्य च बालकाकारो भवेत्यर्थः ॥ ३० ॥ विश्वमिति ॥ यत् यतः परः पुरुषो भवान् निशान्ते प्रलयावसाने सृष्टिस्थितिसमये एतदसंख्यातब्रह्माण्डात्मकं विश्वं स्वतनौ स्वशरीरे यद्वा स्वतनुरूपे निशान्ते गृहे "निशान्तपस्त्यसदनभवनागारमन्दिरम्" इत्यमरः । यथावकाशमसंकीर्णं यथा भवति तथा बिभर्ति धारयति । सोऽयं मम गर्भगोऽभूदिति यत्तत् हि यस्मात् नृलोकस्याहो विडम्बनमनुकरणमुपहासास्पदम् ॥ ३१ ॥ त्वमेवेति ॥ पूर्वसर्गे इतस्तृतीये पूर्वजन्मनि स्वायंभुवे मन्वन्तरे सति विद्यमाने त्वमेव पृश्निर्नाम अभूः तदाऽयं वसुदेवः अकल्मषः सर्वदोषरहितः सुतपा नाम प्रजापतिरभूत् ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

जन्मेति ॥ किं च हे मधुसूदन, पापः पापरूपः, असौ कंसः, मयि, ते तव, जन्म मा विद्यात् न जानात्वित्यर्थः । तत्र हेतुमाह । भवद्धेतोः त्वन्निमित्तं, अहं कंसात्, समुद्विजे बिभेमि । यतोऽहं, अधीरधीः धैर्यरहितबुद्धित्वाद्बिभेमीत्यर्थः ॥ २९ ॥ ॥ उपेति ॥ हे विश्वात्मन्, शङ्खचक्रगदापद्मानां या श्रीस्तया, जुष्टं, चत्वारो भुजा यस्मिंस्तत्, अतः अलौकिकं प्राकृतजनेष्वसंभावितमित्यर्थः । अदः एतत्, रूपं उपसंहर तिरोधत्स्व ॥ ३० ॥ स्वनाभिकमलस्थाखिललोकापरिच्छिन्नवैभवं भगवन्तं स्वगर्भेण धृतवत्यस्मीति विस्मयमानाऽऽह ॥ विश्वमिति ॥ निशान्तः प्रलयस्यान्तः सृष्टिदशेति यावत् । तस्मिन्, स्वतनौ स्वतन्वेकदेशभूते नाभिकमले इत्यर्थः । परः पुरुषः परमपुरुष इत्यर्थः । भवान्, यत् एतत् विश्वं चिदचिदात्मकं कृत्स्नं जगदित्यर्थः । यथावकाशं, बिभर्त्ति, सः अयं परमपुरुषः त्वमेव, मम गर्भगः अभूत् । एतत् महत्, नृलोकस्य, विडम्बनं, अहो आश्चर्यरूपम् । विडम्बनं हि तदिति पाठे, अहो चित्रकृत् तत् तव नृलोकस्य विडम्बनम् ॥ ३१ ॥ तदेवं पितृभ्यां संस्तुतः प्रार्थितश्च भगवान् स्वासाधारणदिव्यविग्रहप्रदर्शननिमित्तं विवक्षुस्तदुपोद्घातरूपमितिहासमाह त्वमित्यादिना एतद्धामिस्यतः प्राक्तनेन ग्रन्थेन ॥ त्वमेवेति ॥ हे सति, पूर्वसर्गे इतस्तृतीये पूर्वजन्मनि, स्वायंभुवे स्वायंभुवमन्वन्तरे सति, त्वं एव, पृश्निः पृश्निनाम्ना प्रसिद्धा योषित्, अभूः । तदा, अयं तव भर्त्ता वसुदेवः, सुतपा नाम सुतपा इति नाम्ना प्रसिद्धः, अकल्मषो विशुद्धः, प्रजापतिः, अभूत् ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

उपसंहरेति : १०.३.३०.

सत्पुत्रसौख्यमनिशं यदि मे ददासि त्वं कौतुकेन यदि वेच्छसि मातृसौख्यम् ।
तद्ध्यानधिष्ण्यमधिमानसमस्तरूपं साधारणं च बहिरस्त्वखिलान्यबालैः ॥ १०४ ॥
रूपेण चेद्विहरसे त्वमनेन भूयादुच्छिन्नमेव जपयोगतपोविधानम् ।
स्यात्तारतम्यमसतामपि वा न भक्तिभाजामतो भव विभो भुवि भावदृश्यः ॥ १०५ ॥

न दारिद्र्यं लक्ष्मीः कृतविविधयत्नापि तिमिरं न चार्कः संपश्यत्यपि सुरनदीपापनिचयम् ।
तथेशैतद्रूपस्त्वमपि न च पश्यस्यरिगणानतो धृत्वा रूपं लघु जहि खलान् कंससहितान् ॥ १०६ ॥

विश्वं यदेतदिति : १०.३.३१.

तातोऽपि सर्वजगतां जनपालकोऽपि नित्योऽप्यनन्तशयनोऽपि च चित्सुखोऽपि ।
जातो मयीति भुवनेषु विडम्बनाऽपि सौख्यं हरे दिशति खल्वितरैर्दुरापम् ॥ १०७ ॥

कृष्णप्रिया

हे मधुसूदन ! यह पापात्मा कंस मुझ में आप के जन्म को न जान पावे, मैं आपके कारण कंस से डरती हूँ, मेरी बुद्धि अधीर हो रही है धैर्य धारण नहीं कर पाती ॥ २९ ॥ हे विश्वात्मन् ! शङ्ख चक्र गदा पद्म और अलौकिक शोभा से सम्पन्न इस अलौकिक रूप का उपसंहार संगोपन कर लीजिये ॥ ३० ॥ श्री ब्रह्माजी की रात्री के अन्त में सृष्टि काल में इस समग्र विश्व को विश्व का किसी भी अंग का संकोच किये बिना आप अपने ब्रह्माण्ड शरीर में धारण करते हैं, आप ही परम पुरुष पुरुषोत्तम हैं। आज वह पूर्णपुरुष ब्रह्माण्डविग्रह मेरे गर्भगत हुआ यह परम आश्चर्य है, मैं मानती हूँ कि मनुष्य लोक का महान् अनुकरण है ॥ ३१ ॥ भगवान् श्रीकृष्णजी ने कहा कि हे सति ! पूर्व सृष्टिगत स्वायम्भुव मन्वन्तर में आप ही प्रश्नि नाम वाली हुई थी, और उस समय यह श्रीवसुदेवजी सुतपा नाम के कामादि दोषों से रहित प्रजापति हुए थे ॥ ३२ ॥

युवां वै ब्रह्मणाऽऽदिष्टौ प्रजासर्गे यदा ततः । [1]संन्नियम्येन्द्रियग्रामं तेपाथे परमं तपः ॥ ३३ ॥
वर्षवातातपहिमघर्मकालगुणाननु । सहमानौ श्वासरोधविनिर्धूतमनोमलौ ॥ ३४ ॥
शीर्णपर्णानिलाहारावुपशान्तेन चेतसा । मत्तः कामानभीप्सन्तौ मदाराधनमीहतुः ॥ ३५ ॥
एवं वां तप्यतोर्भद्रे[2] तपः परमदुष्करम् । दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः— यदा ब्रह्मणा प्रजासर्गे युवां आदिष्टौ (तदा) इन्द्रियग्रामं सन्नियम्य परमं तपः तेपाथे ॥ ३३ ॥ वर्षवातातपहिमघर्मकालगुणान् अनु सहमानौ श्वासरोधविनिर्धूतमनोमलौ मत्तः कामान् अभीप्सन्तौ शीर्णपर्णानिलाहारौ उपशान्तेन चेतसा मदाराधनम् ईहतुः ॥ ३४ ३५ ॥ हे भद्रे ! परमदुष्करम् तपः तप्यतोः मद् आत्मनोः द्वादश दिव्यवर्षसहस्राणि ईयुः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तेपाथे तपः कृतवंतौ ॥३३-३४॥ ईहतुः कृतवंतावित्यर्थः ॥३५॥ तप्यतोराचरतोः । ईयुर्गतानि । मदात्मनोर्मच्चित्तयोः ॥३६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रजासर्ग तादर्थ्ये सप्तमी तेपाथे आत्मनेपदमार्षम् ॥ ३३ ॥ तपसः परमत्वमाह—आतपः सौरतापः घर्मो निदाघोत्थतापः । वर्षाद्या घर्मान्ताश्च ते कालगुणास्तान् । श्वासरोधेन प्राणायामेन विनिर्धूतं निरस्तं मनोमलं चांचल्यं याभ्यां तौ तथा ॥ ३४ ॥ शीर्णपर्णानि वायुपातितपत्राणि । ईहतुश्चक्रतुः 'ईह–चेष्टायाम्' परस्मैपदमार्षं तत्वादेवामभावश्च ॥३५॥ एवं वर्षादिसहनादिप्रकारेण । वां युवयोः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वै प्रसिद्धौ स्मरणे वा ततस्तदानीमेवेति ब्रह्मादेशपालनपरतोक्ता सन्नियम्येति च शान्तिनिष्ठा अत एव परमम् अनेकार्थस्य तपेः तपः कृत्यर्थव्यक्त्य एव तपःशब्दो ऽनूद्यते इत्यभिप्रेत्य तैर्व्याख्यातं तेपाथे तपः कृतवन्ताविति किन्तु उक्तार्थानामप्रयोग इति तत्र कृतवन्तावित्येवार्थः । पर्यवस्यति तत एव चान्वितं स्यादिति ॥ ३३ ॥ तप एव दर्शयति—वर्षेति युग्मकेन । वर्षादीन् कालस्य गुणान् अनु निरन्तरं सहमानौ आतपः साक्षात् रविरश्मितापः घर्म औष्ण्यम् यद्वा आतपः शारदस्य रवेः घर्मो नैदाघस्य किञ्च श्वासरोधः प्राणायामस्तेन प्रथमं सामान्यतो धूता नाशितास्ततो यावदुपलभ्यन्ते तावन्निःशेषेण धूतास्ततः स्वयमनुपलभ्यमानाया अपि सुक्ष्मतमवासनाया उच्छेदनेन विशेषेण निर्धूता मनसो मलाः कामादयो याभ्यां तौ एतेन यत्किञ्चित्त्वमध्यमत्वयावत्वक्रमेण तयोराग्रहाधिक्यं बोधितम् अत एव उपशान्तेन सुस्थिरेण किंवा मन्निष्ठेन शमो मन्निष्ठता बुद्धिरित्युक्ते इति शान्तिनिष्ठा मत्तः पुत्रभूतात् कामान् जनकभावोचितसुखानि प्रजासर्गं इत्युक्तत्वात् मादृशो वां वृतः सुत इति वक्ष्यमाणत्वाच्च ॥ ३ -३५ ॥ भद्रे ! हे परमभाग्यवतीति तत्र योग्यतोक्ता यद्वा भद्रवने माथुरक्षेत्र एवात्र मय्येव आत्मा चित्तं ययोरिति कामान्तरं निरस्तम् इत्युपरतिनिष्ठा ॥३६॥

---

१. रुद्ध्ये—इति कस्यचित् । २. तोस्तीव्रं—श्रीधर. वंशी. भक्त. ; तोर्भद्रे—गिरि. ।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

वै प्रसिद्धौ स्मरणे वा। ततस्तदानीमेवेति ब्रह्मादेशपालनपरतोक्ता। इन्द्रियग्रामं सर्व्वाण्येवेन्द्रियाणि सम्यक् नियम्येति च दान्ति निष्ठा; अतएव परमम् ॥ ३३ ॥ तदेव दर्शयति—वर्षेति द्वाभ्याम्। वर्षादीन् कालस्य गुणान् स्वभावाननु निरन्तरं सहमानावतपः साक्षाद्रविरश्मितापो घर्म औष्ण्यम्। किञ्च, श्वासरोधः प्राणायामस्तेन विशेषेण सम्यक्तया निःशेषेण च समूलतया धूता नाशिता मनसो मलाः कामादयो याभ्यां तौ। अतएवोपशान्तेन सुस्थिरेण; किंवा, मन्निष्ठेन (भा० ११।१९।३६) 'शमो मन्निष्ठता बुद्धेः' इति श्रीभगवदुक्तेरिति शान्तिनिष्ठाकामान् मत्पुत्रतावरान्—गौरवेण बहुत्वम् ॥ ३४-३५ ॥ भद्रे ! हे परमभाग्यवतीति तत्र योग्यतोक्ता; यद्वा, भद्रवने माथुरक्षेत्र एवात्र मय्येवात्मा चित्तं ययोरिति कामान्तरं निरस्तमित्युपरति-निष्ठा ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं सति यदा युवां ब्रह्मणा चतुर्मुखेन प्रजासर्गे निमित्ते चेत् आदिष्टावाज्ञप्तौ तत इन्द्रियग्राममन्तर्बाह्येन्द्रियगणं सम्यक् नियम्य निगृह्य परममुत्कृष्टं तपः तेपाथे चक्राथे पाकं पचतीतिवन्निर्देशः ॥ ३३ ॥ तपसः परत्वमेव दर्शयितुं तौ विशिनष्टि—वर्षवातातपेत्यादि। वर्षादीन् कालगुणाय ऋतुधर्मान् क्रमेण प्राप्तान् सहमानौ घर्मातपजं स्वेदोदकं "घृ क्षरणे" इति धातुः श्वासनिरोधेन प्राणवायुनिरोधेन निर्धूतं मनसो मलं रजस्तमोभ्यामभिभवरूपं ययोर्जीर्णानि वृक्षेभ्यो गलितानि पर्णान्यनिलश्च आहारो ययोस्तथाभूतौ मत्सकाशात्कामानभीष्टार्थानभीप्सन्तौ उपशान्तेन रागादिभिरकलुषितेन चेतसा मदाराधनमीहतुः ईहाञ्चक्रान्ते कृतवन्तौ इत्यर्थः। आर्षत्वादिजादेरित्यामभावस्तङ्भावश्च अनुदात्तेत्वलक्षणात्मनेपदस्य चक्षिङ्ङित्करणादनित्यत्वाद्वाऽधिजिहीर्षिभवच्छब्दसामानाधिकरण्याभिप्रायकः प्रथमपुरुषप्रयोगः ॥ ३४-३५ ॥ हे भद्रे! एवमित्थं परमदुष्करं च तपश्चरतोर्मय्येवात्मा मनो ययोस्तयोर्युवयोर्दिव्यादि न देवमानपरिमितानि वर्षाणि वर्षाणां वत्सराणां सहस्राणि द्वादश ईयुर्व्यतिक्रान्तानि बभूवुः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रजासर्गे तादर्थ्ये सप्तमी ततस्तदा ॥ ३३ ॥ अनुक्रमेण वर्षादिगुणान् सहमानौ श्वासरोधः प्राणायामस्तेन ॥ ३४ ॥ शीर्णपर्णं वायुना पतितपत्रं कामान् पुत्रादिलक्षणान् ॥ ३५ ॥ वां युवयोः ॥ ३६-३७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अनेकार्थस्य तपेः तपःकर्मककृत्यर्थव्यक्तय एव तपःशब्दोऽनूद्यते आतपः शारदस्य रवेः घर्मो नैदाघस्य मत्तः पुत्रभूतात् कामान् जनकभावोचितसुखानि प्रजासर्गं इत्युक्तं मादृशो वां वृतस्सुत इत्यग्रतश्च वक्ष्यते ॥ ३४-३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आतपः सौरकिरणोत्थस्तापः घर्मो निदाघोत्थः ॥ ३४-३५ ॥ मदात्मनोर्मच्चित्तयोः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

परमं ममाराधनात्मकं तपः तेपाथे कृतवन्तौ ॥ ३३ ॥ वर्षादीन् कालगुणान् सहमानौ तत्र घर्मशब्दः प्रस्वेदवाचकः "घृ क्षरणे" "स्वेदे घर्म्मः स्वेदने च" इति हैमः ॥ ३४-३५ ॥ तपस्तप्यतोः आचरतोः ईयुर्गतानि ॥ ३६ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

एवमिति। अत्र भद्रे इत्येकवचनं संबुद्धौ सत्यां वां तप्यतोरिति द्विवचनेन विरोधोऽत उच्यते मातापित्रोर्मध्ये मातुरपत्यकृते परमश्रमप्राप्त्या मातृदेवो भवेति श्रुतावपि मातुरेव पूर्वग्रहणाच्चात्रापि देवक्या एवाव्यवहितस्तुत्या वसुदेवस्य निव्यूहमानां निहनिष्यसे चमूमित्युक्त्या भावाभावेन स्वयमेव सन्मुखत्वाद्देवक्यास्तु समुद्विजे भवेद्धेतोः कंसादहमधीरधीरित्युक्त्या स्त्रीजात्या च सभयत्वदर्शनात्। अतिकृपया देवक्या एव संबुध्या तामेव संमुखीकृत्योभौ प्रति भाषणं। अतो न विरोधः। यद्वा। भद्रे स्वकल्याणविषये परमं दुष्करं तपस्तप्यतोर्वां युवयोरिति योजना। अग्रेऽनघे इत्यत्रापि पापाभावे इत्यर्थो ज्ञेयः। अथवा। मातापित्रापरपर्यायतीर्थे शब्दविवक्षया भद्रे अनघे इति नपुंसकसंबुद्धिद्विवचनप्रयोगः। अतो न विरोधः ॥ ३६-३७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ब्रह्मणा विधिना प्रजासर्गे तदर्थमिन्द्रियग्राममिन्द्रिसमूहं सन्नियम्य परममुत्कटं तपस्तेपाते। ते पाथे इति पाक्षिकः पाठः। प्राथमिके पाठे गतिर्वक्तव्या ॥ ३३ ॥ वर्षवातातपहिमघर्मादयः कालगुणास्ताननुक्रमतः सहमानौ श्वासस्य निरोधेन विनिर्धूतं मनोमलं याभ्यां तौ ॥ ३४ ॥ शीर्णपर्णानि चानिलो वायुश्चाहारो ययोस्तौ उपशान्तेनैव समाहितेन चेतसा मत्तः कामान्वि-

षयानभीप्सन्तौ मदाराधनकृतवन्तौ गतम् ॥ ३५ ॥ तप्यतोस्तपः कुर्वतोर्मदात्मनोर्मय्यात्मा मनो ययोरहमात्मा स्वामी ययोरिति वा दिव्यानि देहसम्बन्धीनि द्वादशवर्षसहस्राणीयुर्गतानि ॥ ३६ ॥

श्रीसुबोधिनी

एतादृशौ पूर्वं स्थितौ तादृशौ प्रति ब्रह्मण आज्ञामाह **युवामिति**, प्रजासर्गे **ब्रह्मणादिष्टौ तदा** ततस्तदनन्तरमेव **क्वचिद्** देशविशेषे **सन्नियम्येन्द्रियग्रामं** ततः प्रभृति सम्बन्धमकृत्वा **परमं** तपस्तेपाथे, सर्वेन्द्रियनिरोधेन सर्वाहारपरिवर्जनेन वाय्वादिनिरोधे विहिते शरीरे सन्तापजननात् **तपो** भवति, **परमम्**उत्कृष्टं भगवद्विषयकत्वात्, एवं तस्मिन् जन्मनि कार्यमुक्तम् ॥ ३३ ॥

तस्य तपसः प्रकारमाह **वर्षवातेति**-वर्षवातयोः सहनं प्रावृट्कालेनावृतदेशेन्तरिक्षे स्थित्वा, **आतप**सहनं पञ्चाग्निप्रकारेण, **हिम**सहनं जलवासादिना, **घर्मः** कालान्तरीयोपि, **कालगुणा** अन्येपि शीतादयः साधारणाः, तेषामप्रतीकारेण स्थितिरेव **सहनं**, उभावपि **सहमानौ** न त्वेकस्तपः करोत्यपरस्तत्सेवामिति ॥ ३४ ॥

तादृशयोर्भगवत्सेवामाह **शीर्णेति**, कियत्कालतपसा चित्ते शुद्धे भगवत्सेवैव कार्या नान्यथेति ज्ञात्वा तपः कुर्वाणावेव परिचर्यां कृतवन्तौ सर्वथाहाराभावे बहिस्संवेदनाभावे चोभयोः परिचर्या न भवतीति यादृशेन तपसा परिचर्यां कृतवन्तौ स विशेष उच्यते, **शीर्णानि पर्णान्यनिलो** वायुश्चाहारो ययोः, परमोपशान्तिः शुद्धसात्त्विकगुणाविर्भावः, स एवोपशमः, सोपि चित्तस्य स्वभावत एव चेज्जातस्तदोपशान्तं चित्तं भवति, एवं यमा नियमाश्चोक्ताः, **मत्तो** हरेरेव, **कामान्** पुत्रादीनभीप्सन्तौ सकामो मदाराधनं मत्परिचर्यामीहतुः कृतवन्तौ ॥ ३५ ॥

एवं तिष्ठतोर्यावान् कालो जातस्तमाहैवमिति, भद्रे इतिसम्बोधनं स्त्रीपुम्भावेन स्थितयोः सौभाग्यबोधनार्थं, उत्तरोत्तरतपोवृद्धौ परमदुष्करता, द्वादश दिव्यवर्षसहस्राणि चतुर्युगं, युगधर्मा अपि तयोर्बाधका न जाता इतिज्ञापनार्थं, तावत्कालं देहस्थितौ हेतुर्मदात्मनोरिति, अहमेवात्मनि ययोः ॥ ३६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

सुबोधिन्यामेवं वामित्यत्राहमेवात्मनि ययोरित्यत्र सप्तमीविशेषणे बहुव्रीहावितिज्ञापकाद् व्यधिकरणपदे बहुव्रीहौ गडवादेः परा सप्तमीति परनिपातः 'पद्मनाभ' इतिवत् ॥ ३६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

युवां वै ब्रह्मणेत्यत्र **भगवद्विषयकत्वादिति**, भगवन्तमुद्दिश्य कृतत्वादित्यर्थः ॥ ३३ ॥ **वर्षवाते**त्यत्र**अन्तरिक्षे स्थित्वेति**, वृक्षाद्युपरि स्थित्वा वातसहनमित्यर्थः ॥ ३४ ॥

(५) भगवदीयनिर्भयरामभट्टनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

त्वमेव पूर्वसर्गेभूरित्यत्र पूर्वस्थितिरित्यादि,

पूर्वस्थितिस्तथाकार्यं प्रकारो भजनं हरेः । कालस्तोषश्च प्राकट्यं वरप्रार्थनया सह ॥ १ ॥
अल्पबुद्धित्वभोगौ च जन्मत्रितयमेव च । त्रिगुणं भगवत्सत्यं लौकिकाद् वैदिकान् महत् ॥ २ ॥
रूपदर्शनकार्यं च साधनं प्रोच्यते महत् ॥ २$\frac{1}{2}$ ॥

अत्र भगवदुक्तानां चतुर्दशश्लोकानां वाक्यार्थ उक्तस्तत्र 'त्वमेव पूर्वसर्गेभू'रितिप्रथमश्लोके नन्दयशोदयोः पूर्वजन्मस्थितिरुक्ता, 'युवां वै ब्रह्मणादिष्टा' वित्यत्र तपोरूपं कार्य, 'वर्षवाते'त्यत्र तस्य तपसः प्रकारः, 'शीर्णपर्णे' त्यत्र हरेर्भजनं, 'एवं वां तप्यतोर्भद्रे, इत्यत्र दिव्यद्वादशसहस्रवर्षात्मकस्तपसः काल 'स्तदा वां परितुष्टोह'मितिभगवत्तोषः, 'प्रादुरासं वरदराडि'तिश्लोके भगवदाविर्भावो वरप्रार्थनया सहितः, 'अजुष्टग्राम्यविषया'वित्यत्र तयोरसद्बुद्धित्वमुक्तं मोक्षयाचनाभावात्, 'ग्राम्यान् भोगा'नित्यत्र भोगः, 'अदृष्ट्वे' त्यादित्रिभिर्भगवतो जन्मत्रितयं वारत्रयं, पुत्रत्वे हेतुं त्रिगुणमित्यादि, लौकिकमेकगुणं वैदिकं द्विगुणं भगवदीयं सत्यं त्रिगुणमिति, 'एतद् वां दर्शितं रूप'मितिश्लोके पूर्वजन्मस्मरणात्मकं रूपदर्शनकार्यं, चतुर्दशे 'युवां मां पुत्रभावे'नेत्यत्र स्नेहात्मकं महत् साधनमिति ॥ ३३ ॥

बुभुत्सुबोधिका

युवां वा इत्यत्र एतादृशावित्यादौ 'पुमान् स्त्रिये'त्यनेनैकशेषः । क्वचिदित्यादि न्यूनपूरणम् । सन्तापेति द्वितीयस्कन्धनवमाध्यायोक्तराद्धान्तीयसन्तापस्य वक्ष्यमाणकामस्फूर्त्यर्थं जननादित्यर्थः । भगवद्विषयकत्वादिति भगवन्तमुद्दिश्य कृतत्वात् ॥ ३३ ॥ वर्षवातेत्यत्र अन्तरिक्ष इति वृक्षाद्युपरि । पञ्चाग्नीति चत्वारः सर्वतः उपरि सूर्य इति पञ्चाप्यग्नयः । उभावपीति दम्पती ॥ ३४ ॥

शीर्णपर्णेत्यत्र 'सती' त्युक्तत्वाद् धर्मातिशयात् सेवा। द्वितीयत्वमात्रविवक्षयाऽपर इति पुंस्त्वम्। पूर्ववद्वा। भगवत्सेवामाहेति अखण्डब्रह्मज्ञानस्य वसुदेवं प्रत्युत्तरार्धे वक्तव्यत्वाज् ज्ञानाङ्गभगवत्सेवां 'भक्त्याग्राह्य' भक्त्या जानाति चाव्यय'मिति वेदाद् वेदरूपवसुदेवस्याहेत्यर्थः। कियत्कालतपसेति कर्मविशेषेण। यथाग्निना हेम्ना मले त्यक्ते ध्माते हेम्नि पुनः स्वं रूपं भजते तद्वत् शुद्धसात्त्विकगुणाविर्भावके चित्त इत्यर्थः। कार्यमिति भगवतः पुत्रत्वम्। सेवयैवेत्यत्रैवकारार्थमाहुः नान्यथेति। सेवां विना केवलतपस्त्वेन प्रकारेण। बहिःसंवेदनेति बहिर्ज्ञानाभावे। परिचर्येति तपसा भवति। स विशेष इति स तपोविशेषः। वसुदेवस्य स्वरूपलाभो जात इत्याहुः शुद्धसात्त्विकेति। यथा बुद्धिः सात्त्विकी गीतोक्ता तथा। स्वभावत इति अधिष्ठानकृतो विशेषः। अन्येषां साधनकृत उपशमः। 'शीर्णपर्णे'त्यनेन स्नानादयो यमा आराधनशब्देनाराधनादयो नियमा इत्याशयेनाहुः एवमिति। सकामाविति अनेन ज्ञानाङ्गभक्तिः सकामा 'अकामः सर्वकामो वे'ति वाक्यात्। न सगुणा भगवदधिष्ठानत्वात्। भगवदाविर्भावाच्च। सगुणत्वे भस्महोमप्रसङ्गः॥ ३५॥

एवं वामित्यत्र दिव्यवर्षेति दिव्यं वर्षमस्मदादिषष्ठिवर्षाधिकत्रिशतं वर्षाणि, एतादृशां सहस्रसङ्ख्याकानि। चतुर्युगमिति कृतयुगप्रमाणं १७२८०००,त्रेतायुगप्रमाणं १२९६०००, द्वापरयुगप्रमाणं ८६४०००, कलियुगप्रमाणं ४३२०००, गतकलिप्रमाणं ४९४२ भोग्यकलिप्रमाणं ४२७८। अहमेवात्मनीति अत्र सप्तमी विशेषणे बहुव्रीहाविति ज्ञापकाद् व्यधिकरणपदे बहुव्रीहौ गड्वादेः परा सप्तमीति परनिपातः पद्मनाभ इतिवत्। आत्मपदं देहवाचकम्। आत्मोपपदा। तथा च परिच्छिन्नदेहस्य व्यापकात्मत्वेन नित्यकस्य स्थितिस्तावत्कालमित्याश्चर्यम्। द्रष्टव्यम्॥ २६॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

पूर्व सर्ग में इसी प्रकार परम पतिव्रता श्री देवकीजी और काम क्रोध आदि कल्मषों से मुक्त ऐसे श्री वसुदेवजी थे दोनों पूर्व में दर्शित प्रकार की योग्यता से पूर्ण थे, उन दोनों की योग्यता देख कर उन दोनों के प्रति ब्रह्माजी की आज्ञा हुई, **"युवाम्"** आप दोनों प्रजा की सृष्टि के लिये सप्रयत्न बनें, तब ब्रह्माजी के आदेश पाते ही आप दोनों किसी विशेष स्थान पर रहकर इन्द्रियसमूह को वश में कर उस समय से लौकिक दाम्पत्य भोग सुख का त्याग कर परम तप करने लगे। आप दोनों ने सर्व इन्द्रियों के नियन्त्रण के साथ सर्व प्रकार के आहार का त्याग किया। आहार का त्याग कर देने के कारण वायु आदि के निरोध होने पर शरीर में सन्ताप के जन्म होने से तप स्वयं हो जाता है। श्री वसुदेव-देवकीजी ने यह तप भगवान् का उद्देश्य रूप में रखकर किया था अतः भगवद्विषयक होने से इस तप को **"तेपाथे परमं तपः"** अत्यन्त श्रेष्ठ या उत्कृष्ट कहा है। भगवान् ने बत्तीसवें श्लोक में श्री वसुदेव-देवकीजी के पूर्व जन्म की स्थिति दिखाई और इस श्लोक में इस प्रकार उस जन्म में जो दोनों ने तपश्चरण कार्य किया था उस कार्य का संकेत किया है॥ ३३॥

तस्य तपसः प्रकारमाह—आचार्य चरण अब तपश्चर्या के प्रकार को **'वर्षवात'** इत्यादि श्लोक से कहते हैं। वर्षा ऋतु के समय पर अनाव्रत स्थान पर किसी वृक्ष आदि के ऊपर अन्तरिक्ष में बैठकर वर्षा और पवन का सहन करना यह वर्षा का तप है एवं पञ्चाग्नि प्रकार से चारों दिशाओं में अग्नि की धूनी धरवाकर स्थापित कर ऊपर से सूर्य के ताप को सहन करना ग्रीष्म का तप है। शीत काल में आकंठ शीत जल में निवास आदि के द्वारा हिमशीत का सहन करना शीत काल का तप है। पञ्चाग्नि ताप के काल से अतिरिक्त काल वाले घाम का भी सहन करना, एवं अन्यान्य तत्तत्समय के शीत आदि काल गुणों का सहन करना उन शीत आदि से बचने का उपाय न भी करना और उनमें ठहरे रहना ही उनका सहन है, इस प्रकार दोनों ही सहन करते रहते थे। यह बात नहीं थी कि एक तप करता हो और दूसरा उसकी सेवा करता हो॥ ३४॥

तादृशयोर्भगवत्सेवामाह शीर्णेति—आचार्यचरण कहते हैं कि अब इस **"शीर्णपर्णानिराहारो"** श्लोक से तपस्या में निरत हुए उन दोनों के द्वारा सम्पन्न हुई भगवत्सेवा का निरूपण करते हैं। कुछ समय तपश्चर्या से चित्त की शुद्धि हो जाने पर भगवत्सेवा करनी चाहिये लेकिन बिना चित्त शुद्धि के सेवा करना उचित नहीं, ऐसा जानकर आप दोनों तपश्चर्या करते करते सेवा करने लगे। सर्वथा आहार न करने पर और बाह्य अनुसन्धान के न रहने पर भगवान् की सेवा नहीं हो पाती, इसलिये जिस प्रकार के तप के साथ सेवा की जाय उस प्रकार के विशेष को भगवान् कहते हैं कि माताजी ? झरे हुए पत्ते और पवन यह तो आप दोनों का आहार था, और आप का चित्त उपशान्त था। राजस, तामस, भावों से मुक्त शुद्ध सात्त्विक गुण भाव का चित्त में उदय होना ही परम उपशान्ति है, इसे ही उपशम कहते हैं। वह उपशम भी यदि चित्त का स्वतः सिद्ध स्वभाव हो जावें तब चित्त उपशान्त होता है। इस प्रकार भगवान् ने इन दोनों के यम नियमों का निरूपण किया। अब आगे भगवान् कहते हैं कि भक्त दुःख हारी मुझ हरि से ही पुत्र आदि अभीष्ट पदार्थों की कामना करते हुए सकाम भाव से आप ने मेरी आराधना और परिचर्या की॥ ३५॥

एवं तिष्ठतोर्यावान् कालो जातस्तमाहैवमिति—अत्र आचार्यचरण इस श्लोक में दोनों का कितना काल बिता उस बात को कहते हैं, भद्रे यह सम्बोधन स्त्री पुरुष भाव से रहते हुए दोनों के सौभाग्य की सूचना देता है। उत्तरोत्तर क्रम से तप की वृद्धि होने पर तप की परम दुष्करता अधिक कठिनता बन जाती थी। ऐसे तप करते हुए बारह हजार दिव्य वर्ष बीत गये। देवताओं के १२००० वर्ष ही सत्य युग, त्रेता युग, द्वापर युग, कलियुग, इन चारों युगों का कालमान है। भगवत् कृपा से तपश्चर्या में कलिकाल आदि के युगधर्मों ने भी बाधा नहीं पहुंचाई ऐसा बतलाने के लिये वैसा काल का निर्देश है। मदात्मनोः पद से—उतने समय तक देह की स्थिति रहने में कारण का निर्देश किया है कि मैं ही तुम दोनों की आत्मा या शरीर में उपस्थित था। आप दोनों ने मुझे ही हृदय में रखा था। इस श्लोक की व्याख्या में **'असकृत्'** और **'चिन्तयन्तौ'** इन दोनों पदों का उल्लेख नहीं मिलता है। उसका कारण चिन्त्य है, संभवतः श्री सुबोधिनी के प्रामाणिक आदर्श पुस्तक की अप्राप्ति और आगे कारिकाओं में चिन्तन का आकार एवं प्रकार को कहना है। इसलिए यहाँ पर उन पदों के व्याख्यान को अनावश्यक समझा हो।

इस श्लोक में भद्रे! यह सम्बोधन श्री देवकी के प्रति ही प्रयुक्त हुआ है, अतः **"देवक्या सौभाग्यबोधनार्थम्"** इतना कहना ही पर्याप्त था फिर भी श्रीमदाचार्यचरणों की **"भद्रे इति संबोधनं स्त्रीपुंभावेन स्थितयोः सौभाग्यबोधनार्थं"** ऐसी पंक्ति इस आशय को व्यक्त कर रही हैं कि स्त्री पुरुष दोनों ही यदि स्वकर्तव्य परायण हो तब ही प्रत्येक का सौभाग्य सम्पन्न होता है अन्यथा उस सौभाग्य में अपूर्णता रहती है। पूर्ण सौभाग्यसूचक भद्रे यह सम्बोधन देवकी के सौभाग्य को बोध कराता हुआ दम्पती के सौभाग्य का बोधक है ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वै इति। अत्र सन्देहो न कार्यः। युवां यदा ब्रह्मणा प्रजासर्गे निमित्ते आदिष्टौ ततः तदा इन्द्रियग्रामं सम्यक् नियम्य वशीकृत्य परममुग्रं तपस्तेपाथे कृतवन्तावित्यर्थः ॥ ३३ ॥ तपसः परमत्वं दर्शयंस्तत्प्रकारमाह—वर्षेति। वर्षादीन् कालगुणान् ऋतुधर्माननुक्रमेण प्राप्तान् सहमानौ। घर्मः सूर्यकिरणसम्बन्धकृतस्तापः। आतपस्तु तत्सम्बन्धाभावेऽपि साधारणो ग्रीष्मऋतुनिमित्तोष्णतापश्चाग्निविधिनाग्निसम्बन्धकृतो वा। सहनं नाम तत्प्रतीकारोपायमुपेक्ष्य स्थितिः। श्वासः प्राणवायुस्तन्निरोधेन प्राणायामेन विनिर्धूता निवृत्ता मनोमलाः कामक्रोधादयो ययोस्तौ ॥ ३४ ॥ शीर्णानि वृक्षेभ्यः स्वयं पतितानि शुष्काणि पर्णानि अनिलश्चाहारो ययोस्तौ, मत्तः सकाशात् कामानभीष्टानर्थानभीप्सन्तौ उपशान्तेन रागादिभिरकलुषितेन चेतसा मदाराधनमीहतुः। मम परिचर्यापूर्वकं ध्यानं कृतवन्तावित्यर्थः ॥ ३५ ॥ हे भद्रे! मय्येवात्मा मनो ययोस्तयोर्वां युवयोरेवमुक्तप्रकारेण परमदुष्करमतितीव्रं तपस्तप्यतोः कुर्वतोः सतोर्दिव्यानां देवमानपरिमितानां वर्षाणां सहस्राणि द्वादशेयुरतिक्रान्तानि बभूवुः। एवं चतुर्युगव्यतीतेऽपि कलिकालादिधर्मास्तयोर्बाधका न जाता इति सूचितम् ॥ ३६ ॥

अन्वितार्थप्रकाशिका

युवामिति ॥ वै निश्चितम्। युवां यदा ब्रह्मणा प्रजासर्गे निमित्ते आदिष्टौ ततः तदा इन्द्रियग्रामं सम्यक् नियम्य वशीकृत्य परमं तपस्तेपाथे कृतवन्तावित्यर्थः। तपस्तपःकर्मकस्यैवेति कर्मकर्त्तरि लिट् ॥ ३३ ॥ वर्षेति द्वयम् ॥ वर्षं वृष्टिः वातः आतपः सूर्यकिरणतापः हिमं शैत्यं घर्मः ग्रीष्मज ऊष्मा एतान् कालगुणान् अनुक्रमेण निरन्तरं वा सहमानौ श्वासरोधेन प्राणायामेन विनिर्धूता मनोमलाः कामक्रोधादयो ययोस्तौ ॥ ३४ ॥ शीर्णेति ॥ शीर्णानि वृक्षेभ्यः स्वयं पतितानि शुष्काणि पर्णानि अनिलश्चाहारो ययोस्तौ मत्तः सकाशात्कामान् पितृभावोचितसुखानि अभीप्सन्तौ सन्तौ उपशांतेन रागादिभिरकलुषितेन चेतसा मदाराधनमीहतुः। आमृत्कोरभाव आर्षः ॥ ३५ ॥ एवमिति ॥ हे भद्रे! मय्येवात्मा मनो ययोस्तयोर्वां युवयोरेवमुक्तप्रकारेण परमदुष्करमतितीव्रं तपस्तप्यतोः कुर्वतोः सतोः। कर्मकर्त्तरि लट् परस्मैपदमार्षम्। दिव्यानां देवमानपरिमितानां वर्षाणां द्वादशसहस्राणि ईयुर्गतानि ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

युवामिति ॥ युवां, ब्रह्मणा, प्रजासर्गे निमित्ते, यदा आदिष्टौ आज्ञप्तौ, ततः, इन्द्रियग्राममन्तर्बाह्येन्द्रियगणं, संनियम्य सम्यक् निगृह्य, परममुत्कृष्टं, तपः तेपाथे चक्राथे वै। पाकं पचतीतिवन्निर्देशः ॥ ३३ ॥ तपसः परमत्वमेव दर्शयितुं तौ विशिनष्टि ॥ वर्षेति ॥ अन्वनुक्रमेण प्राप्तान्, वर्षश्च वातश्च आतपश्च हिमं च घर्मश्च ते ये कालगुणा ऋतुधर्मास्तान्, सहमानौ, तत्र घर्मः आतपजं स्वेदोदकं, 'घृ क्षरणे' इति धातोर्घर्म इति। श्वासनिरोधेन प्राणवायुनिरोधेन विनिर्धूतं मनसः मलं रजस्तमोभ्यामभिभवरूपं मानसं पापं ययोस्तौ, 'मलोऽस्त्री' इति मेदिनी ॥ ३४ ॥ शीर्णेति ॥ शीर्णानि वृक्षेभ्यो गलितानि पर्णानि पक्वपत्राणि अनिलो वातश्चाहारो भक्ष्यपदार्थो ययोस्तौ, मत्तः मत्सकाशात्, कामानभीष्टार्थान्, अभीप्सन्तौ प्राप्तुं वाञ्छन्तौ, भवन्तौ, उपशान्तेन रागादिभिरकलुषितेन, चेतसा चित्तेन, मदाराधनं मत्संतोषणं, ईहतुरीहांचक्राते कृतवन्तावित्यर्थः। आर्षत्वात् 'इजादेः'—इत्यामभावस्तकभावश्च। अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्य चक्षिङो ङित्करणादनित्यत्वाद्वा अभिजिहीर्षितभवच्छन्दसामानाधि-

करण्याभिप्रायकः प्रथमपुरुषप्रयोगः । इति द्वयोरेकसंबन्धः ॥ ३५ ॥ एवमिति ॥ एवमित्थं, परममत्युत्तमं च तत् दुष्करमितरासाध्यं च तत्, अत एव, तीव्रमतितीक्ष्णं तपः, तप्यतोः चरतोः मय्येवात्मा मनो ययास्तयोः, वां युवयोः, द्वादश द्वादशसंख्याकानि, दिव्यानि देवमानपरिमितानि च तानि वर्षसहस्राणि च, यदा ईयुः, देवानां मानेन द्वादशवर्षसहस्राणि मानुषाणां मानेन विंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षपरिमितानि वर्षाणि व्यतिक्रान्तानि बभूवुरित्यर्थः ॥ ३६ ॥

कृष्णप्रिया

हे माता ! ब्रह्माजी ने जब आप दोनों को प्रजा सृष्टि के निमित्त आदेश दिया, तब उस आदेश को प्राप्त करते ही आप दोनों ने इन्द्रिय वर्गों को वश कर परम तपश्चरण का आरम्भ कर दिया ॥ ३३ ॥ हे माताजी, आप दोनों वर्षा वायु, पञ्चाग्नि का ताप, शीत, एवं गर्मी आदि काल के गुणों को सहते रहते थे तथा प्राणायाम के द्वारा मन के मलों को संपूर्ण प्रकार से प्रक्षालित कर चुके थे ॥३४॥ वृक्षों के झरे हुए पत्तों का और कभी वायु का ही आहार कर लेते थे, और मुझ से पुत्र आदि कामनाओं की सिद्धि प्राप्त करने की चाहना रखते हुये शान्तचित्त से मेरे आराधन को करते थे, आप की आराधना पुत्रकाम की सकाम आराधना थी ॥ ३५ ॥ हे भद्रे ! इस प्रकार परम कठिन तप को करते हुए आप दोनों का देवताओं के बारह हजार वर्ष का दीर्घ काल व्यतीत हो गया क्योंकि मैं तुम दोनों की आत्मा में स्थित था ॥ ३६ ॥

तदा वां परितुष्टोऽहममुना वपुषानघे । तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ॥ ३७ ॥
प्रादुरासं वरदराड् युवयोः कामदित्सया । व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ॥ ३८ ॥
अजुष्टग्राम्यविषयावनपत्यौ च दम्पती । न वव्राथेऽपवर्गं मे मोहितौ मम मायया ॥ ३९ ॥
गते मयि युवां लब्ध्वा वरं मत्सदृशं सुतम् । ग्राम्यान् भोगानभुञ्जाथां युवां प्राप्तमनोरथौ ॥ ४० ॥

कर्दमक्षमा

अन्वयः हे अनघे तदा वां तपसा च नित्यं श्रद्धया भक्त्या हृदि भावितः अहम् अमुना वपुषा परितुष्टः ॥ ३७ ॥ युवयोः कामदित्सया वरदराड् प्रादुरासम् व्रियतां वरः इति वाम् उक्ते मादृशः सुतः वृतः ॥ ३८ ॥ अजुष्टग्राम्यविषयौ अनपत्यौ च मम मायया मोहितौ दम्पती अपवर्गं वै न वव्राथे ॥ ३९ ॥ मयि गते युवाम् मत्सदृशं सुतम् वरम् लब्ध्वा प्राप्तमनोरथौ युवाम् ग्राम्यान् भोगान् अभुञ्जाथाम् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अमुना वपुषा प्रादुर्भूतोऽस्मि ॥ ३७ ॥ वरदराट् वरदेषु श्रेष्ठ इत्यर्थः । तेन सकृद्वरेण च वारंवारमाविर्भावे कारणमुक्तम् । कामस्य दित्सया दातुमिच्छया । मादृशो मया सदृशः ॥ ३८ ॥ मे मत्तोऽपि युवामपवर्गं न वव्राथे न वृतवंतौ ॥ ३९ ॥ वरं दत्त्वा मयि गते ॥ ४०-४१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अमुना इदानीं दर्शितेन । वपुषा शरीरेण ॥ ३७ ॥ वरदेषु ब्रह्मादिषु राजत इति वरदराट् विष्णुरहम् । इत्यर्थ इति । आत्मप्रदत्वात्सर्ववरदोत्तम इति तात्पर्यम् । "सर्वान्ददाति सुहृदो भजतोऽभिकामानात्मानमप्युपचयापचयौ न यस्य" इत्युक्तेः । तेन वरदश्रेष्ठत्वेन हेतुना । सकृद्वरेण च चोप्यर्थः । एकवारवरेणाऽपि यतोऽहं वरदश्रेष्ठस्तत एवैकवारवरेण वारंवारं प्रादुर्भूत इति । वां युवाभ्याम ॥ ३८ ॥ अजुष्टग्राम्यविषयौ अननुभूतमैथुनादिसुखौ । देवस्य मम मायया पुत्रस्नेहमय्या । "वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः" इत्युक्तेः । पुत्रस्नेहोपि मयाशब्देनोच्यते । मोहितौ तदास्वादानंदेन विचित्तीकृतौ । अत्रोत्तरश्लोकगतयुवामिति पदमन्वेत्यन्यथा तत्र पुनरुक्तिदोषा भविष्यतीति ॥ ३९-४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेति सार्द्धकम् । अनघे ! हे सर्वापराधरहिते ! इति तपोनिश्छिद्रता सूचिता अत एव वां युवयोः सम्बन्धेन युवां प्रतीत्यर्थः । परितः तुष्टः सन् परीतिकर्मप्रवचनीयं वा तच्च वीप्सायां वीप्सा च जन्मभेदेनेति तथैवार्थः । ननु, भक्त्यैव परितोष्यस्त्वं न तु तपसा सत्यं पारम्परिकमेव कारणं तदित्याह, तपसा मत्सन्तोषार्थं प्रयुक्तेन जातायां नवधा साधनभक्तौ श्रद्धा तया जाता या तल्लक्षणा भक्तिस्तया नित्यं हृदि भावितः यत्नेन पापितः चकाराद्विनैव यत्नं च प्रेमलक्षणया प्रापितः पुत्रत्वभावनामय्येवेति ज्ञेयम् । अमुना एतेन श्रीकृष्णाख्येन वपुषेति परितोषादौ सर्वत्र योज्यम् अमुना वपुषा हृदि भावितः अत एव परि सर्वतो भावेन तुष्टोऽहम् अत एवामुनैव वपुषा प्रादुरासमिति वरदराडिति तैर्व्याख्यातम् । किञ्च तपसोऽधिकफलदाने तत्र चोत्तरोत्तराधिक्ये च कारणं ज्ञेयम् ॥ ३७ ॥

प्रियतामित्यर्द्धकम् वां युवाभ्यामित्यर्थः। तृतीयायाः षष्ठी मादृशः मत्सदृश एव वृतः न तु साक्षादहं लज्जादिना तथा वरणाशक्तेरिति भावः ॥ ३७ ॥ तादृशेन च मद्भावेन युवां केवलं विषयान्तरोत्पादनं नादृतवन्तौ अपि तु तदनादरेण मोक्षाय योग्यावपि मत्प्रसादेन तं हस्तप्राप्तमपि नादृतवन्तावित्याह—अजुष्टेति। तत्राजुष्टग्राम्या विषयावित्यनेनाहङ्कारास्पददेहावेशो निरस्तः अनपत्यावित्यनेनापत्योपलक्षितममतास्पदाभाव उक्तः ततश्चापवर्गाचरणयोग्यता दर्शिता तदुक्तं "विनिर्द्धूतमनोमलौ" इति तत्रापि मे मत्त इति प्राप्तिभावना दृढीकृता तदुक्तं वरदराडिति तादृशावपि युवां तादृशादपि मत्तो न वव्राथ तत्र क्रमप्राप्तं हेतु निर्दिशति मोहितौ मम माययेति मम मदीयया मायया झटिति स्वविषयकपुत्रस्नेहसम्पादिकया मायया कृपया यद्वा, मद्विषयपुत्रोचितलालनेच्छामय्या कृपया तिरस्कृतान्यभावत्वादित्यर्थः। दृष्टान्तस्तु सालोक्यसार्ष्टीत्यादिषु प्रसिद्ध एवेति नोक्तः ॥ ३९ ॥ अतः साधिते मयि मदेकार्थोद्वैराग्यादपि शिथिलौ जातौ उत्फुल्लमनस्त्वेन स्वस्य मल्लक्षणपुत्रसंपत्तियोग्यतेच्छया च विषयमप्यर्जितवन्तावित्याह, गते मयीति। पश्चात् ग्राम्यान् भोगानपि युवां भुक्तवन्तौ यतो युवां प्राप्तमनोरथौ भूतौ युवां प्रतिगते इति वा अत्र टीकायां वरं दत्त्वेत्यध्याहृत्यैव व्याख्यातं दत्त्वेति पाठस्य कुत्राप्यदर्शनात् वरं मत्सदृशमित्यत्र च वरशब्दः कर्मसाधनः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अनघे! हे सर्वापराधरहित इति तपोनिश्छद्रता सूचिता। अतएव वां युवां प्रति परितस्तुष्टः सन्, अमुनैतेन दिव्येन। ननु भक्त्यैव परितोष्यस्त्वम्, न तु तपोमात्रेण? सत्यम्, तेनैव तदुत्पत्तेरित्याह—तपसा, श्रद्धा विश्वासस्तया, भक्तिः प्रेमलक्षणा, तया नित्यं हृदि भावितः प्रापितो ध्यातो वा सन्नमुना वपुषेत्यस्याप्यनुषंगः। विशेषणे तृतीया। अयं तेन रूपेण प्रादुर्भावे हेतुर्ज्ञेयः ॥ ३७ ॥ वरदराडिति तैर्व्याख्यातमेव। किञ्च, तपसोऽधिकफलदाने तत्र चोत्तरोत्तराधिक्ये च कारणं ज्ञेयम्। वां युवाभ्यां मादृशो मत्सदृश एव वृतः, न तु साक्षादहं लज्जादिना साक्षात्तथा वरणेऽशक्तेरिति भावः ॥ ३८ ॥ अपवर्गावरणे हेतुः—अजुष्टेत्यादि, विषयभोगाद्यभावेन वैराग्यानुत्पत्त्या मोक्षारुचेरित्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, च अपि, असेवितलौकिकविषयावपि, पुत्रकन्यादिरहितावपि युवाम्, तथापि मादृशः सुत एवैको युवाभ्यां वृतः, न तु विषयभोगो बहुलपुत्रकन्यापत्यानि वेत्यर्थः। अहो! मोक्षोऽपि न वृत इत्याह—अपवर्गमिति। तत्र सर्वत्र हेतुः—अमोहितावित्यनेन मोक्षस्यापि मायामोहितग्राह्यत्वमुक्तम् ॥ ३९ ॥ वरमेव विवृणोति—मत्सदृशं सुतमिति। पश्चाद्ग्राम्यान् भोगानपि युवां भुक्तवन्तौ, यतो युवां प्राप्तमनोरथौ भूतौ पुत्रत्वेन मत्प्राप्त्या कुतश्चिदपि भयाभावात्; यद्वा, पुत्रोत्पत्त्युपकरणत्वेन तैल-ताम्बुल-शय्या-वस्त्राद्युपभोगस्यापेक्ष्यत्वात्॥४०॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आत्ममायया स्वस्याश्चर्यशक्त्या सङ्कल्परूपज्ञानाद्वा ॥ ३९–४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो हे अनघे! नित्यं भक्त्या हृदि भावितोऽनुध्यातः वां युवयोस्तपसाऽनशनादिरूपेण श्रद्धया च परितुष्टस्सन् वरदराडहं युवयोः कामदित्सया वरान् दातुमिच्छया अमुना चतुर्भुजादिमता वपुषा प्रादुरासं प्रादुर्भूतोऽस्मि प्रादुर्भूतोऽभवमित्यर्थः। ततः प्रादुर्भूतेन मया वरोऽभिमतोऽर्थः प्रीयतामित्युक्ते सति वां युवाभ्यां शेषषष्ठीयं मादृशः सुतः पुत्रो वृतः याचितः ॥ ३७–३८ ॥ ननु, मुक्तिदं श्रीभगवन्तं भवन्तं साक्षात्कृत्य मुक्तिरेवाभ्यां किं न वृता? इत्यत्राह—अजुष्टेत्यादिना। अजुष्टाः असेविताः ग्राम्यविषयाः शब्दादयो याभ्यां न विद्यते अपत्यं ययोस्तौ दम्पती जायापती युवां मम मायया विमोहितावत एव मे मत्तः अपवर्गं मुक्तिं न वव्राथे अननुभूतविषयत्वादनपत्यत्वान्मन्मायामोहितत्वाच्च नापवर्गं वव्राथ इत्यर्थः ॥ ३९ ॥ मत्सदृशं सुतमेव वरं लब्ध्वा युवां मयि गते सति प्राप्तो मनोरथो याभ्यां तौ तथाभूतौ युवां ग्राम्यान् भोगान् विषयान् अभुञ्जाथामन्वभूतम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

वरदराट् वरदराजः कामदित्सया अभीष्टदानेच्छया ॥ ३८ ॥ अजुष्टग्राम्यविषयौ अननुभूतमैथुनादिविषयौ ॥ ३९–४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वा युवां परि प्रति तपसा मत्सन्तोषार्थं प्रयुक्तेन जाता साधनभक्तौ या श्रद्धा तया जाता तल्लक्षणा या भक्तिस्तया नित्यं हृदि भावितः प्रेमलक्षणया प्रापितः पुत्रभावना मय्येति ज्ञेयं वां हृदि युवाभ्यामित्यर्थः। चतुर्थ्यां षष्ठी तदा वामित्यादि ॥ ३७–३८ ॥ अजुष्टेति मम मायया मद्गतपुत्रस्नेहमय्या कृपयेत्यर्थः। मद्विषयस्नेहस्यापवर्गसुखातिक्रमित्वादिति भावः ॥ ३९ ॥ युवां गते प्राप्तवति मयि वरं लब्ध्वा अत उत्फुल्लमनस्त्वेन तादृशपुत्रार्हसम्पत्तियोग्यतेच्छया च विषयोपार्ज्जनं ज्ञेयम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

अथ भगवत्प्रत्युक्तिः। एतद्रूपं संहर्त्तव्यमेव, किन्तु पुरैतद्रूपेण भवतोरहं साक्षाद्भूतः, तदर्थमिदानीमपि तेनैव रूपेण भवतोः प्रत्ययार्थं प्रादुर्भूतः, वस्तुतस्तु द्विभुज एवास्मीत्याह— तदा वां परितुष्टोऽहमित्यादि बहुभिः। यदा पूर्वं भवद्भ्यां मत्सदृशपुत्रकाम्यया दुश्चरं तपस्तप्तम्, तदेत्यर्थः। परितुष्टः सन्नमुना चतुर्भुजेन, न तु स्वरूपेण द्विभुजेन वपुषा, प्रादुरासम्। कीदृशोऽहम्? तपसा श्रद्धया नित्यं हृदि भावितः। पुनः कीदृक्? वरदराट्। किमर्थम्? युवयोः कामदित्सया। काममाह—व्रियतामित्यादि। मादृशो मत्सदृशोऽहम् ॥ ३७-३८ ॥ तस्य कामस्य प्रशंसा व्यतिरेकेण दर्शयन्नाह—अजुष्टग्राम्यविषयावित्यादि। स्वभावत एव विरक्तौ भवन्तौ अजुष्टोऽसेवितो ग्राम्यविषयो ग्राम्यधर्मो याभ्याम्, अतएवानपत्यौ, तथापि मे मत्तः सकाशादपवर्गं न वव्राते मद्विषयकवात्सल्यरसात्तत्रारुच्या। कुतः? मम माययाऽमोहितौ। मम मायामोहिता हि अपवर्गं वाञ्छन्ति, मायातरणार्थम्। ये तु मायया मोहिता न भवन्ति, तेषां किं तेनेति। ते तु मयि रतिमेव कुर्वन्तीति भावः ॥ ३९ ॥ मादृश एव सुतो भवद्भ्यां वृतः, न त्वहमिति कृत्वा पूर्वमंशेन वां सुतपःपृश्निभ्यां 'पृश्निगर्भः' इति पुत्रोऽभवम्। तदनु उपेन्द्र इति च कश्यपादितिभ्यां तथैवांशरूपेण उपेन्द्रोऽप्यभवम्; मत्सदृशस्याभावादंशेनैवाभवमिति भावः ॥ ४०–४२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

इदं रूपम् मे ईश्वरमैश्वर्यव्यापकम् द्विभुजन्तु सहजम्, संप्रति तदेवाविष्करिष्ये, किन्तु युवयोः प्रत्ययार्थमेवैतद्रूपमाविष्कृतमिति भगवान् वदति—तदा वां परितुष्टोऽहमित्यादि। अमुना वपुषा चतुर्भुजेन विग्रहेण पुरं प्रादुरासम्, तत्स्मरणार्थमिदं प्रकटीकृतमित्यर्थः। युवाभ्यान्तु मादृशो मत्सदृशः पुत्रो वृतः, न त्वहं वृतः ॥ ३७ ३८ ॥ न वव्राथ इति। अपवर्गं न वव्राथे, मत्सदृशमेव पुत्रं वव्राथे। कुतः? मम मायया अमोहितौ, मायामोहिता एवापवर्गं वृणुते ॥ ३९–४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

मदीयव्रतरूपतपःश्रद्धाभक्तिपूर्वकं निरन्तरं मद्ध्यानमेव मत्परितोषे कारणमित्याह—तदेति। अमुना अनेन चतुर्भुजेन अत्र भक्त्येति श्रद्धयेति नित्यमिति भावित इति पदत्रयाधिक्येन नेयं तपोयोगाङ्गभूता भक्तिर्व्याख्येया सा तु मदात्मनोरित्येतावन्मात्रेणैव सिद्ध्येदतस्तत्पृथग्भूता प्रेमहेतुभूतैव ततश्च तपोयोगावेवाधिकावनयोरैश्वर्यज्ञानहेतुर्ज्ञेयाविति केचिदाहुरन्ये तु नित्यसिद्धयोर्देवकीवसुदेवयोः प्रेमान्धैश्वर्यज्ञानमिश्रो नित्य एव तदंशयोः पृश्निसुतपसोर्ज्ञानयोगौ त्वंशिनोस्तयोरकिञ्चित्करावित्याहुः, अत्र चिन्तित इत्यनुक्त्वा भावितौ भावविषयीकृत इत्यनेन रागभक्तिरवगम्यते ॥ ३७ ३८ ॥ मायया पुत्रस्नेहमय्या "वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः" इत्युपरिष्टादुक्तेः पुत्रस्नेहोऽपि मायाशब्देनोच्यते मोहितौ तदास्वादानन्देन विचित्रीकृतौ ॥ ३९ ॥ ग्राम्यान् भोगानिति तादृशपुत्रोत्पत्तीच्छयेति भावः। "व्यवायो ग्राम्यधर्मश्च" इत्यमरः। पृश्निगर्भ इति सोऽयं त्रेतायुगावतारो लक्ष्यते "विष्णुर्यज्ञः पृश्निगर्भः" इत्येकादशे तत्प्रासङ्गिकोक्तेः ॥ ४०-४१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वां युवयोः अमुना वपुषा प्रादुरासमित्यग्रिमेणान्वयः ॥ ३७ ॥ वरदराट् आत्मपर्यन्तदातृत्वेन वरदेषूत्तमः वां युवाभ्याम् मादृशः अर्थात्पुत्रो भवेति साक्षाद्वक्तुमशक्यत्वात् अहमेव सुततया वृत इत्यर्थः ॥३८॥ नन्वावयोस्त्वां पुत्रत्वेन वरणे कोऽधिकारः? इत्यत आह —अजुष्टग्राम्यविषयाविति। दम्पती सहचरावपि अजुष्टग्राम्यविषयौ असेवितलौकिकसुखौ ऐहिकसुखत्यागिनावित्यर्थः। अनपत्यौ अनुत्पादितपुत्रौ आमुष्मिकसुखसाधनपुत्रानुत्पादनेन आमुष्मिकसुखत्यागिनावित्यर्थः। एवंभूता अपि मुक्तिमिच्छन्ति तेभ्योपि श्रैष्ठ्यमाह— अपवर्गं मोक्षमपि न व्रतवन्तौ एवंभूतौ युवां परमोत्तमाधिकारिणौ मम विषयिकया मायया वयुनापरपर्यायया हरिरावयोः सुतो भवत्विति वासनया मोहितौ सर्वपितरं पुत्रं कर्तुं प्रवृत्तावित्यर्थः। अहो युवयोर्मयि स्नेहातिशयः एतदेव वारंवारं सुतभावे हेतुः ॥ ३९ ॥ युवयोर्वाञ्छितं स्वीकृत्य मयि गते ॥ ४०-४१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तदा वां परिश्रद्धया तपसा तत्पूर्वकतपसा भक्त्याऽमुना वपुषा हृदि भावितोऽनघे। सम्बुद्ध्यन्तं चेन्द्रवती च भवांश्चेति विग्रहदशापन्नैकदेशोत्कीर्तनेनान्वयो ज्ञेयः। वरदरोऽट्यतेनेनेति वा दरेण स अटतीति वा। उपलक्षणया चक्रादिग्रहः। शङ्खचक्रगदापद्मश्रिया जुष्टमित्युक्तेः। अनेन भद्र इत्यपि व्याख्यातम्। अनघे हृदीति तु द्वयोऽन्वयः। वरदराट् वरदश्रेष्ठः। युवयोरिति पाठेऽप्येवमेवान्वयो ज्ञेयः। कामदित्सयाऽमुना वपुषेत्यत्राप्यन्वेति। प्रादुरासं प्रादुर्भूतेन मया वरं व्रियतामित्युक्ते मादृशः सुतो वां युवाभ्यां वृतः ॥ ३८–३९ ॥ अजुष्टग्राम्यविषयौ असेवितव्यवायादिविषयौ मम मायया मोहिताविति मे मत्तोऽपवर्गं मोक्षं न वव्राथे मत्सदृशं मामेव प्राप्तमनोरथाविति ग्राम्यान्भोगानभुञ्जाथां। युवां युवामिति पृथक् पृथगन्वयाज्ञातिरेकः। स्मरणार्थं भवान्भवान्गच्छतु अहमहमायात इतिवदुक्तिर्वा ॥ ४० ॥

श्रीसुबोधिनी

एवं कृतेहं प्रसन्नो जात इत्याह **तदेति**, **वां** युवयोः **परितस्तुष्टः** सर्वभावेन, **अहमिति**, न मदंशो नाप्यहं तस्यांशः, परं **वपुरिदं** प्रदर्शितं, आकारोयं, वपुःपदेन पुत्रत्वं स्थापयति, अन्यथा तयोः परमस्नेहो न स्यात् **अनघे** इतिसम्बोधनं तादृशेपि रूप इच्छाभावार्थं, तदपि च बालरूपं, रूपस्य बलिष्ठत्वात् स्थानात् प्रच्युतिर्भवेदिति, तोषे त्रयं हेतुस्तपः **श्रद्धा** नित्यं परिचर्या च, एवमपि बहिर्मुखानां न परितुष्यतीति **हृदि भावित** इत्युक्तं, **हृदये** सर्वदा मानसपूजादिना **भावितश्चिन्तितः** ॥ ३७ ॥

तदाहमाविर्भूतो जात इति वदन्नाविर्भावस्य फलनैकट्यनियमार्थं वरप्रार्थनामप्याह **प्रादुरासमिति**, वरान् ददत इति **वरदा** अन्ये ब्रह्मादयः, यावत्प्रार्थितमेव हि ते प्रयच्छन्ति, तेषां **राजा वरदराट्**, स तु ततो बहुगुणमलौकिकं च प्रयच्छति, अत एव मादृशसुतवरणेहमेव वारत्रयं सुतो जात इति **वरदराजः**, आविर्भावे हेतुमाह **युवयोः कामदित्सयेति**, **युवयोरिति** बहुकालतपस्तप्तौ निरूपितौ, ताभ्यां चाल्पमेव प्रार्थनीयं तपश्च बहु, यतो मन्निष्ठयोस्तपः स्वाभाविकादपि तपसोधिकफलमिति तद्दानार्थं **वरदराडुक्तः**, साधारण्येनैव **व्रियतां वर इत्युक्तं**, तावपि मां साधारणं ज्ञात्वा **बालकसौन्दर्येण** च **सम्मुग्धौ** त्वादृशः पुत्रो भूयादिति वृतवन्तावित्याह **मादृश इति**, **वां युवाभ्यां**, **सुतः**, भूयादित्यर्थात् ॥ ३८ ॥

मोक्षावरणे हेतुमाहाजुष्टेति, ग्राम्यविषयः स्त्रीसम्भोगो लौकिकः, प्रीतिः स्थितैव सेवा न वृत्तेति, न **जुष्टो ग्राम्यविषयो** याभ्यां, वैदिकेनापि लौकिकफलसिद्धिर्भवतीति तत्सम्भवेपि लौकिकसिद्धिरिति तन्निषेधार्थमाहा**नपत्याविति**, न विद्यतेपत्यं ययोः, चकारादन्येपि स्वर्गादयो नानुभूता इति सूचितं, **दम्पतीपदेनो**भयोः सहभावो नियत उक्तः, अतोपि मोक्षस्यावरणं, रागस्यानिवृत्तत्वादृणानामनिवर्तितत्वाद् विरुद्धाश्रमनिष्ठत्वाच्च मोक्षस्यावरण, सर्वतः शास्त्रार्थपरिज्ञानेपि यदेतत् त्रितयं तत्र **हेतुर्मोहितौ मम मायये**ति, **इयं विशेषमाया भगवल्लीलासाधिका साधारणी तु शास्त्रान् निवर्तत एव**, **अपवर्गं न च वव्राथे**, जन्ममरणानां समाप्तिरपवर्गः यदि साक्षादपवर्गमप्यप्रार्थयित्वा भक्तिं प्रार्थयेतं तथाप्यपवर्गो भवेत् सापि न प्रार्थितेति वै निश्चयेनापवर्गो न प्रार्थितः, **म** इतिपाठे मत्तो मत्सम्बन्धि वा, प्रमेयबलेनापवर्गं न प्रार्थितवन्तावित्यर्थः ॥ ३९ ॥

वरदानमर्थसिद्धमिति तदनुक्त्वा भगवन्निर्गमे जाते प्रथमतो रागनिवृत्त्यर्थं ग्राम्यभोगा भुक्ता इत्याह **गते मयीति**, मत्सदृशं सुतं वरत्वेन प्राप्य तन्निर्धारं कृत्वा ग्राम्यभोगेन च तत्र विघ्नो भविष्यतीतिशङ्कामकृत्वा **ग्राम्यान् भोगानभुञ्जाथां**, यतो **युवां प्राप्तमनोरथाविति** भिन्नं वाक्यं नैश्चिन्त्ये हेतुत्वार्थमुक्तं, पुनर्युवामितिग्रहणं संस्कारोद्बोधे सम्मत्यर्थम् ॥ ४० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अजुष्टग्राम्येत्यत्र ननु प्रीतिसेवनार्थत्वाज्जुषेरनयोः प्रीतिसत्त्वादजुष्टत्वं कथमिति चेत्, सत्यं, तथापि द्वितीयमर्थमादाय तथोक्तमित्याहुः **सेवा न वृत्तेतीति**, नन्वजुष्टत्वेन पत्यत्वं प्राप्तमेवेति कथनं तस्य किम्प्रयोजनकमित्याशङ्क्य तत्तात्पर्यमाहु**र्वैदिकेनापीति**, अलौकिकप्रकारकतन्निषेधार्थकं तदित्यर्थः, **अजुष्टेत्यादि**विशेषणतात्पर्याणि **रागस्येत्यादिना** क्रमेणोक्तानि, ननु मोक्षाधिकविवक्षितलीलामृताब्धिफलके मोक्षवरणपूर्वकहरिसदृशपुत्रवरणे मायामोहस्य हेतुत्वोक्तिर्भक्तिमार्गविरुद्धा मोक्षस्य चैवमाधिक्यं भवेदित्यत आहुरियं **विशेषमायेत्यादि**, तर्हि मदनुग्रहात् तन्न वव्राथ इति वक्तुं युक्तं न त्वेवमिति चेद्, नानवबोधात्, प्रकटे भगवति ज्ञानशक्तेरपि प्रकटत्वेपि ब्रह्मत्वेन भगवत्त्वादिना च ज्ञानाभावो य स न मोहमृते, तथा ज्ञानं च लीलारसविरोधीति न तथा ज्ञापनं नन्वयमप्यनुग्रहादेवेतिचेन् ननु मोहोप्यनुग्रहादेवेति बुध्यस्व, तथाप्येवंविधेर्थे मोहोक्तिः कथं भक्तमनोरमा भवेत् ? इत्थं, अचिन्त्यानन्तशक्तेर्भगवतो नियतकार्या हि ताः सर्वा लीला अप्यनेकविधाः, एवं सति यान्तरङ्गलीलायामेवाधिकृता सा तल्लीलास्थभक्तानां मध्ये यस्मिन् यादृशी लीला प्रभोश्चिकीर्षिता तस्मिँस्तदुपयोगिपदार्थेष्वासक्तिं तदतिरिक्तविस्मृतिं च करोतीत्येतन्मात्रसाधर्म्येणैतच्छक्तिकार्येपि मोहत्वोक्तिः, प्रकटे प्रभौ सर्वशक्तिप्राकट्येपि स्वानुरूपातिरिक्तज्ञानाद्यभावात् **प्रमाणमार्गात् प्रमेयमार्गोति**विलक्षणो बलिष्ठश्चेतिज्ञापनाय च, अत एव "न न्यवर्तन्त मोहिता" इति वक्ष्यते, न हि तत्रामोह उत्तम इति वक्तुं शक्यं निवृत्तिहेतुत्वात्, यथा यथैतन्मोहाधिक्यं तथा तथा पुष्टिमार्गे भावप्राचुर्यमिति ज्ञेयं, अत एव 'गोविन्दापहृतात्म' त्वेनैवानिवृत्तिसम्भवेपि मोहिता इत्युक्तं, अत एव भगवन्मायावाचकपदयोरसमासः, दास्यभावात् पितृत्वादिभावस्य न्यूनत्वात्, यद्वा "समो मशकेने" तिश्रुतेः भगवतः सर्वसमत्वेपि भगवत्समत्वं नान्यस्यास्तीति तादृक्पुत्रवरणं मोहकार्यमिति तथोक्तिः, वस्तुत 'स्त्वपवर्गं न वव्राथे' इत्येतावतैव चारितार्थ्येपि म इति यदुक्तं तेन **पुरुषोत्तमसम्बन्धी** भक्तिमार्गीयो दास्यरूपो योपवर्गः स उच्यते तस्य सर्वाधिकत्वात्, तदवरणं मोहादेवेति तथा, ननु तदवरणोक्तिप्रयोजनं न पश्यामस्तया विनापि प्रकृतार्थोपपत्तेः, उच्यते, भगवद्वचनैरुक्तप्रकारकस्वरूपदर्शनेन च सर्वार्थतत्त्वज्ञानमभूदित्येवम्भूतास्मत्क्लेशेनाविर्भूतो भगवान् दास्यमेव कुतो न दत्तवानित्याशङ्काभावायैतदुक्तं, अत्रायं भावः, **कामदित्सयेति**वचनान्नियतेच्छयैवाविर्भाव इति भवदकामितं स्वतो न देयं, अपवर्गे च भवतोः कामो नाभूदिति तथेति ज्ञापयितुं तदुक्तिः, तथापि परमकृपालुरेवं कुतः कृतवानितिशङ्का 'त्वेवं सति यान्तरङ्गे' त्यादिना प्रागेव निरस्ता, एतेनैव **कामदित्सयेति**वाक्या-

देवाकामितादानस्य प्राप्तेः कामाभावस्य च स्वतःसिद्धत्वात्तदनुवादः किमर्थं इत्याशङ्कापि निरस्ता ज्ञेया, कामाभावहेतोर्मोहस्यापि निरूपणात्, अन्यथा मोहनमेव कुतः कृतवानितिशङ्का तिष्ठेदेवेति ॥ ३९ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तदा वामित्यत्र स्थापयतीति, वं सुखं पुष्णातीतिव्युत्पत्त्या स्थापयति, तदपि च बालरूपमिति, अमुनेत्यस्य पदस्य तात्पर्यमिदं, ईक्षणस्थले बालकमितिविशेषणस्य पूर्वमुक्तत्वात् ॥ ३७ ॥

अजुष्टेत्यत्र टिप्पण्यां जुषधात्वर्थे किञ्चिदाशङ्क्य परिहरन्तीत्याशयेनाहुर्ननु प्रीतीत्यादि, पुनः किञ्चिदाशङ्क्य परिहरन्ति नन्वजुष्टेत्यादि, पुनः किञ्चिदुद्ग्रन्थमाशङ्क्य परिहरन्ति ननु मोक्षेत्यादि, सर्वां इति, शक्तयः, अत एवेति, लीलार्थं मोहस्यावश्यकत्वादेव, अत एव भगवन्मायापदयोरिति, उक्तमोहादस्य मोहस्य न्यूनत्वादेव ममभायेतिपदयोः, अत्र प्रासङ्गिकानुप्रासङ्गिककथनं न प्रकृतोपयोगीत्यरुच्या पक्षान्तरमाहुर्वस्तुत इत्यादि, पुनः किञ्चिदाशङ्क्य परिहरन्ति ननु तदित्यादि तिष्ठेदेवेत्यन्तं, तथा चाप्रतिहतेच्छत्वात् सत्यसङ्कल्पत्वाच्च तथेति न कोपि शङ्कालेशः ॥ ३९ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गते मयीत्यस्याभासे भोगा इति, 'अकर्तरि च कारके संज्ञाया' मित्यत्र प्रायिकत्वसिद्धान्तादत्रापि कर्मणि घञ्, व्याख्याने लाभस्य भावित्वाल् लब्ध्वेतिक्त्वाप्रत्ययासम्भवमाशङ्क्याहुस्तन्निर्धारं कृत्वेति ॥ ४० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तदा वां परितुष्टोहमित्यस्य विवरणेनघेइतिपदविवरणं तादृशेपि इच्छाभावार्थमिति, रूपस्य कोटिकन्दर्पाधिकलावण्यवत्त्वेन तादृग्दर्शने कामभावानुदयो भवत्या महापतिव्रताया एव भवेदतोनघा निष्पापा भवसीत्यर्थः, तदपि च बालरूपमिति, अमुना वपुषानघेइतिवाक्यात् साम्प्रतमनुभूयमानरूपमेव देवकीवसुदेवयोः प्रदर्शितमिति ज्ञायते, साम्प्रतमनुभूयमानं तु बालरूपं 'तमद्भुतं बालक' मितिवाक्यात्, अतः पूर्वप्रदर्शितमपि बालकरूपमित्यर्थः, ननु बालरूपे कामभावोदयस्यासम्भावितत्वात् कथं तदभावेन देवकी स्तूयत इत्याशङ्क्याहू रूपस्य बलिष्ठत्वात स्थानात् प्रच्युतिर्भवेदिति, रूपस्य कोटिकन्दर्पाधिकसुन्दरत्वाद् स्वङ्गिनस्त्रीणां तु स्थानात् मर्यादातश्च्युतिर्भवेत् तव तु न च्युतिरिति पातिव्रत्यधर्मो भगवतानघापदेन श्लाघितः ॥ ३७ ॥

बुभुत्सुबोधिका

तदा वामित्यत्र स्थापयतीति वं सुखं पुष्णातीति वपुरिति व्युत्पत्त्या स्थापयति। अन्यथेति सुखपोषाभावे। पुत्रत्वस्थापनाभावे वा। परमेति स्नेहस्तु स्यादेवेत्यर्थः। इच्छेति काम इच्छा। तदपि च बालेति अमुनेत्यस्य पदस्य तात्पर्यमिदम्। 'तमद्भुतं बालकमित्यत्र 'बालक' मिति विशेषणस्य पूर्वमुक्तत्वात्। रूपस्येति उक्तेच्छापेक्षयेति बोध्यम्। तेन वात्सल्यरस उत्पन्नः। स्थानादिति करणल्युडन्तम्। पातिव्रत्यादित्यर्थः। चेति आधिदैविकाध्यात्मयोरैक्याच् छ्रद्धापरिचर्ये उक्ते, 'श्रद्धारतिर्भक्तिरनुक्रमिष्यती'ति वाक्यात्। बहिर्मुखानामिति बहिर्मुखास्तोषहेतुत्रयसहिताः तत्सम्बन्धी न परितुष्यति यथा मानसपूजादिना इति हेतोः। भावितः स्मृतः। अन्तर्मुखानामपि परितुष्यतीत्यर्थः ॥ ३७ ॥

प्रादुरासमित्यत्र पूर्वश्लोकोक्तभवसाधने तु हेतुत्रयमित्याशयेनाहुः चिन्तित इति। भावित इत्यस्यार्थो वा भावत्वेनाविर्भावत्वेन कार्यकारणभावः। फलनैकट्येति फलस्य नैकट्यनियमार्थम्। आविर्भावस्य फलस्येत्यन्वयः। चैत्रस्य गुरुकुलमित्यत्रेव। यावदिति तादृश्याः क्रीडेच्छाया नियामकत्वात्। वरदराज इति वरदराट् वरदराज इति प्रयोगद्वयं छन्दसि समासान्तविकल्पात्। ताभ्यामिति अजुष्टग्राम्यविषयाभ्याम्। बालकेति 'सोबिभेत् तस्मादेकाकी बिभेती'ति पुरुषविधब्राह्मणश्रुतेः। भयं बालकलिङ्गमिति भाष्यप्रकाशे। प्रथमज्ञप्तिरुत्पत्तिरिति वोत्पत्तिमत्त्वं बालकत्वम्। 'जन्म त्वात्मतया पुंसः शरीरस्वीकृतिं प्राहु'रिति शरीरस्वीकृतिमत्त्वं बालकत्वम्। त्वादृश इति चरणस्वरूपम्। तत्रापि सङ्क्षेप इत्याशयेन विवृण्वन्ति वां युवाभ्यामित्यादि। पदद्वयं विवृत्य वृतपदं विवृण्वन्ति भूयादिति। आशीरुक्ताहिताशंसा। ३८ ॥

अजुष्टग्राम्येत्यत्र प्रीतीति प्रतिनिधिः। भगवदधिष्ठानत्वब्रह्मविद्यात्वाभ्याम्। स्थितैवेति 'मदाराधनमीहतु' रिति वाक्यात्। सेवा न वा वृत्तेति जुष प्रीतिसेवनयोरित्यत्रार्थयोर्विकल्पेन सेवा न वृत्ता। प्रीत्या सेवायां 'प्रतिमुखस्य यथा मुख श्री' रिति सप्तमस्कन्धवाक्यान् न जुष्टा ग्राम्यविषयो याभ्यामिति अत्र टिप्पण्याम्। पाठान्तरं लौकिकप्रीतिः स्थितैव, सेवा न वृत्तेति। अजुष्टग्राम्यविषयो याभ्यामिति। द्वितीयमिति सेवनरूपम्। सुबोधिनी। तत्सम्भवेपि काम्यकर्मणां वैदिकेन ग्राम्यविषयजोषसम्भवेपि। तन्निषेधेति लौकिकसिद्धापत्यनिषेधार्थम्। अलौकिकप्रकारकापत्यनिषेधार्थकं वा अतोपीति विशेषणत्रयात्। अपिना चिक्रीडिषा। मोक्षस्यावरणं 'मोहिता' वित्यनेन मोह उक्तः। एवं स्पष्टेति न विवृता। तदिति अनपत्याविति विशेषणम्। रागस्येत्यादिसुबोधिनीं विवृण्वन्ति अजुष्टेत्यादीति। सु. ऋणादीति देवर्णपितृणमनुष्यर्णेत्यृणत्रयम्। आदिना पूर्णता पुत्रकृता। अनपत्यौ द्वौ मदाराधनमिति पञ्चसु त्रयं

पुत्रधनेन स्त इति। विरुद्धेति मोक्षविरुद्धगृहस्थाश्रमनिष्ठत्वात्। मोक्षस्येति 'मोहिता' वित्युक्तमोहस्तस्य तमोधर्मत्वादवरणम्। सर्वत इति चतुर्भिः। शास्त्रार्थेति विशुद्धसत्त्वत्त्वाद् वेदत्वाच्च। शास्त्रं गीता 'सर्वेन्द्रियाणि संयम्ये'त्युपक्रम्य मिथ्याचारः स उच्यत' इति। शास्त्रं'ऋणानि त्रीण्यपाकृत्ये'ति। शास्त्रं 'मनो मोक्षे निवेशये'दिति। त्रितयमिति विशेषणत्रयोक्तम्। इयं विशेषेति अत्र टिप्पणी आभासे मोक्षावरणेति मोहेन मोक्षावरणम्। एवमाधिक्यमिति भक्तिमार्गे मोहे मोक्षे मोहाभावादाधिक्यम्। तर्हीति मोक्षस्य लीलामृताब्धिफलकवरणानाधिक्यकाले। मदनुग्रहादिति अनुग्रहस्य दास्यरूपापवर्गे कारणत्वं, न तु साधारणापवर्गं इति। कारणमात्रोक्तिर्न तु साधारणापवर्गकारणोक्तिः। न त्वेवमिति मोक्षप्रतिबन्धकमायामोहितत्वेन 'न वव्राथे' इति। ज्ञानशक्तेरिति भगवत्साम्निध्याद् वसुदेवज्ञानशक्तेः। मोहमृते इति तथा च वसुदेवमोहोनूद्यते भगवता 'मोहिता' वित्यनेनेति भावः। तथेति ब्रह्मत्वेन भगवत्त्वफलत्वविराट्त्वैः। अयमिति ब्रह्मत्वादिना ज्ञानाभावः। अनुग्रहादिति भक्तिमार्गीयत्वादिति भावः। (द्वितीयं) एवेति 'वैष्णवीं व्यतनोन् मायां पुत्रस्नेहमयीं'मिति वाक्यात्। एवंविध इति मोक्षरूपेर्थे। भक्तेति शास्त्रीयभक्त्येत्यादिः। सर्वा इति शक्तयः। एतच्छक्तीति विशेषमायाशक्तिकार्येर्थे मोहे मोहत्वोक्तिरित्यर्थः। सर्वशक्तीति सर्वाः शक्तयः। प्रमाणेति शास्त्रीयज्ञानमार्गात्। प्रमेयेति लीलारसाब्धिफलकवरणे विशेषमायामोहमार्गः। 'नैषा तर्केण मतिरापनेये'ति काठकात्। 'आश्चर्यो वक्ते'तिकाठकः। बलिष्ठः स्वकार्यकरणात्। अत एवेति लीलार्थं मोहस्यावश्यकत्वादेव। अत एवेति विशुद्धज्ञानत्वादेव। अत एवेति अनिवृत्तौ कारणद्वयादेव। असमास इति समासशक्त्या निवृत्तावेककारणबोधकसमसनाभाव इत्यर्थः। दास्यभावादिति ज्ञानकृतात्। पितृत्वादिभावो विशेषमायाकृतः तस्य। न्यूनत्वं भक्तिवात्सल्यरसकृतमपि बोध्यम्। एवं मोक्षस्य लीलारसाब्ध्यपेक्षया मुख्यत्वमागतम्, मोहाभावादित्यरुच्या पक्षान्तरमाहुः यद्वेति। तथोक्तिरिति 'मोहितौ मम मायये' त्युक्तिः। तथा च परम्परया ज्ञानकार्यत्वाच्च साक्षाज्ज्ञानकार्यमोक्षस्याधिक्यमिति भावः। अधुना तु रूढ्यापवर्गपदार्थ उक्तः, अङ्गेन व्याकरणेन योगोपस्थित्यार्थमाहुर्योगरूढ्या वस्तुत इति। म इतीति 'अदृश्यत्वादिगुणको धर्मोक्ते' रित्यधिकरणोक्तः पुरुषोत्तमः। तत्र निःसम्बोधोपवर्गो व्याख्यातः प्रसिद्धया ससम्बोधोपवर्ग उच्यते तत्राक्षराधिकरणकाधेयतासम्बन्धेन तत्र स्थितः पुरुषोत्तमोऽत्र गृह्यते, न त्वक्षराभिन्नः पुरुषोत्तमः। दास्यरूप इति 'स्वरूपलाभान्न परं विद्यत' इति श्रुतेः। 'य एवास्मि सन् यज' इति 'ब्रह्मदासा' इति श्रुतिभ्याम्। उच्यत इति योगरूढ्योच्यते। अप वर्जने। वृजू वर्जने उभाभ्यां वर्जनाभ्यां उत्कृष्टापवर्गो मायावर्जनरूपो यौगिकार्थः, स च दास्यरूपः। तथेति यथाश्रुतं मूलं तु 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय' इतिन्यायविरोधि मूलमित्यर्थः। श्लोकासङ्गतिं शङ्कते ननु तदेवेति। तदवरणेति दास्यावरणोक्तिप्रयोजनम्। उपपत्तेरिति अर्थादुपपत्तेः। एतदुक्तिरिति तद्दास्यवरणाभावोक्तिः। कुत इत्यत आहुः तया विनेति। दास्यावरणोक्त्या विना। दास्यरूपावर्गार्थेन विनापि प्रकृतो यः एतच्छ्लोकार्थस्तस्योपपत्तेर्भगवद्वचनैः। यथा 'तेपाथे परमं तप' इति वचनेना 'जुष्टग्राम्यविषया' वित्यस्यार्थस्योपपत्तिः। नियतेच्छयैवेति आविर्भावे कारणत्वेन नियतेच्छया न तु ब्रह्मणादिष्टप्रजासर्गेच्छया। न देयमिति अतो दास्यं परमं मोक्षरूपं न देयम्। काम्यत्वाभावादिति भावः। तथेति दास्यं न दत्तवानिति ज्ञापयितुं तदुक्तिः श्लोकोक्तिः। एवं कुत इति दास्यान्यलीलायामङ्गीकारम्। प्रागेवेति अत्रैव प्राक्। कामाभावस्येति दास्यकामाभावस्य। तदनुवाद इति 'न वव्राथेपवर्गं मे' इति कामाभावस्यानुवादः। न तु श्लोकोनुवादक इति चेच्छृणु। अनुवादस्योत्कृष्टार्थत्वबोधकत्वादस्यार्थस्य। अन्यथेति दास्यकामाभावहेतुत्वाभावे। कृतवानिति स्वाधिष्ठाने विशुद्धसत्त्वे। सुबोधिन्याम्। समाप्तिरिति चरमावयवकध्वंसः। स च दास्येपि। यद्वा समाप्तिरभावमात्रं प्रतियोगिनोरुक्तत्वात्। जन्ममरणप्रतियोगिकाभावः। अपवर्गस्य मायानाशरूपत्वेनाभेदसम्बन्धः। भक्तिमिति ज्ञानाङ्गम्। प्रमेयेति प्रमेयस्य भगवतो बलं साधनसत्त्वे तद्कार्यं बलकृतम्। एवं 'वै' इत्यस्यापवर्गेणान्वयमुक्त्वा मुख्यापवर्गार्थे त्वाहुः म इति पाठ इति ॥ ३९ ॥

गते मयीत्यत्र भोगा इति 'अकर्तरि च 'कारके संज्ञाया'मित्यत्र 'संज्ञाया'मित्यस्य प्रायिकत्वसिद्धान्तादत्रापि कर्मणि घञ्। लाभस्य भावित्वाल्लब्ध्वेति क्त्वाप्रत्ययासम्भवमाशङ्क्याहुः वरत्वेनेति। निर्धारं कृत्वेति सादृश्यनिर्धारं कृत्वा। तत्रेति सदृशप्राप्तौ। अकृत्वेति किन्तु साक्षात्प्राप्तौ विघ्नशङ्केति भावः। 'युवा'मिति पुनरुक्तसार्थक्यायाहुः यत इत्यादि। एकतिङ्वाक्यम्। तथापि 'युवा'मित्यधिकं मत्वाहुः पुनरिति। अयमर्थः। 'वरं लब्ध्वे'त्यनेनैव प्राप्तमनोरथत्वं जातम्, पुनः स्मरणजनकसंस्कारस्योद्बोधे 'युवा' मुद्बुद्धसंस्कारौ इति। पूर्वं'युवा'मित्यस्य कृतनिर्धारावित्यर्थः। सम्मत्यर्थः इति। यथा युवामुद्बुद्धसंस्कारौ तथाहमिति वसुदेवसम्मत्यर्थः। अन्यथा'ऽपरं भवतो जन्म परं जन्म विवस्वत' इति न्यायेनात्रापि वसुदेवप्रश्नः स्यादिति ॥ ४० ॥

श्रीमातृपितृतोषिणी—श्रीसुबोधिनीजी—

एवं कृतेऽहं प्रसन्नो जात इत्याह "तदा वां परितुष्टोहम्" अब आचार्यचरण इस श्लोक से भगवान् के प्रसन्नता का निरूपण करते हैं कि भगवान् ने कहा कि आप दोनों के कठिन तप से आप दोनों पर मैं सर्वथा सन्तुष्ट हो गया। यहाँ पर अहं पद से यह कहा कि जो मैं हूँ वही मैं तब भी था वह मेरा कोई अंश हो या मैं उसका अंश होऊँ ऐसी बात नहीं है। अधिक तो क्या शरीर भी यह ही था जो आप को दिखाया है, यही आकार था। वपुः पद के द्वारा भगवान् **वं अमृतं पुष्णाति** इस व्युत्पत्ति के आधार पर पुत्रभाव की स्थापना करते हैं; क्योंकि पुत्रभाव आनन्द का पोषक है। यदि पुत्रभाव की

स्थापना न की जावै तो उन दोनों का भगवान् में परम स्नेह होना सम्भावित नहीं। श्रीदेवकीजी को अनघे यह सम्बोधन कन्दर्प कोटि लावण्य पूर्ण उस प्रकार के सुन्दर स्वरूप में कामभाव के उदय न होने का सूचक है और अनघ पद परम पतिव्रता होने से उनके सर्वथा किसी भी प्रकार के पाप का अभाव का बोधन करता है। इस समय जैसा बालरूप है उस समय भी जो रूप था वह भी बालरूप था, यद्यपि बालरूप से कामोदय भी सम्भावना नहीं तो भी परम सुन्दर स्वरूप को देखकर अन्य स्त्रियों का अपने धैर्य आदि स्थान से च्युत हो जाना स्वाभाविक है, क्योंकि रूप मोहित करने में अतिशय बलवान है। श्रीदेवकी वसुदेवजी के तप, श्रद्धा और नित्य सेवा, यह तीन भगवान् श्रीकृष्ण को प्रसन्नता और सन्तोष के कारण बन गये। तप-भक्ति आदि के रहने पर भी भगवान् बहिर्मुखों के ऊपर प्रसन्न नहीं होते इसलिये श्रीदेवकी वसुदेवजी की अन्तर्मुखता का निरूपण करने के लिये श्लोक में **हृदि भावितः** इस विशेषण का उल्लेख किया गया है। भगवान् कहते हैं कि मानस पूजा आदि के द्वारा हृदय में मेरी भावना की गई, अन्तर्देश में मेरे स्वरूप का चिन्तन सदैव चलता रहा, इसलिये मुझको सन्तुष्ट होना आवश्यक था ॥ ३७ ॥

''तदाहमाविर्भूतो जात:'' आचार्यचरण कहते हैं कि अब क्रमशः सप्तम श्लोक में **''प्रादुरासंवरदराट्''** इन पदों से भगवान् अपने प्रकट होने का फल निकट ही रहना है, और शीघ्र ही मिलता है। ऐसा बतलाने को **प्रादुरासम्** क्रियापद का प्रयोग करते हैं और इस श्लोक से वरदान की याचना भी करते हैं। वरदराट् पद का तात्पर्य बतलाते हैं कि अन्य ब्रह्मा आदि देवता वर देते हैं अतः वरद कहलाते हैं; वह देवतागण उपासना साधना करने वाले की प्रार्थना के परिमाण से ही वर प्रदान करते हैं। उन वरदायक ब्रह्मादिकों का मैं सम्राट् हूँ इसलिये प्रार्थना से कहीं अधिक बहुत कुछ देता हूँ और अलौकिक लोकोत्तर वस्तु को देता हूँ, इसी कारण मुझ जैसे पुत्र का वर माँगने पर स्वयं मैं ही तीन वार पुत्र हुआ, इस कारण मैं वरदराज हूँ। अब भगवान् प्रकट होने में कारण का निर्देश करते हैं कि **युवयोरिति बहुकालतस्तपस्तप्तौ** आप दोनों के अभीष्ट प्रदान करने की इच्छा से मैं प्रकट हुआ। चार युगों के सुदीर्घ काल पर्यन्त तपश्चर्या से तप्त हुए तापसों का **युवयो:** पद से उल्लेख किया है। उन तपोनिष्ठ व्यक्तियों के द्वारा जो भी मांगा गया अल्प ही था, और उनका तप अधिक था। मेरे स्वरूप में पूर्ण निष्ठा वाले उन दोनों का तप स्वाभाविक तप से कहीं अधिक फल सम्पन्न होने के योग्य है इसलिये उसके फल देने की योग्यता के सूचनार्थ वरदराट् पद का प्रयोग किया है। जब मैंने **व्रियतां वर इति** वर माँगिये ऐसा साधारणतया ही कहा था, उन दोनों ने भी मुझे साधारण समझकर बाल सौन्दर्य से सम्मुग्ध होने के कारण **''त्वादृशः''** आप समान पुत्र हो, ऐसा वर माँगा, इस बात का ,**'मादृशः इति वां युवाभ्यां सुतः भूयादिति** पदों से कहते हैं। यहाँ **युवाम् वां** पद के अर्थ में प्रयुक्त हुआ है। **वृतःसुतः** इन दो शब्दों के अर्थ से **''भूयात्''** इस क्रियापद के इस प्रार्थनाबोधक क्रियापद का अर्थ स्वतः प्राप्त है। सुत वरण किया अर्थात् सुत होवे ऐसा वर माँगा ॥ ३८ ॥

''अजुष्टग्राम्यविषयौ'' यह भगवान का आठवाँ श्लोक है इस श्लोक के रहस्य को आचार्यचरण **''मोक्षावरणे हेतुमाह''** इन सुबोधिनी जी के वाक्यों से कहते हैं, मोक्ष के वर न मांगने में हेतु का वर्णन करते हैं कि पृश्नि और सुतपाओं ने ग्राम्यविषय का सेवन नहीं किया था, ग्राम्यविषय स्त्री सम्भोग को कहते हैं, यह लौकिक सुख है, उस सुख में उन दोनों की प्रीति तो थी ही सेवन नहीं किया था, इस कारण मोक्ष नहीं मांगा। कोई सन्तान भी नहीं थी, यद्यपि स्त्रीसम्भोग के सेवन न करने से सन्तान का न होना अनुक्त सिद्ध है परन्तु **''वैदिकेनापि लौकिकसिद्धिः''** वैदिक यज्ञादि अनुष्ठान के द्वारा भी लौकिक पुत्रादि फल की सिद्धी होती है अतः वैदिक कर्म के सम्भव होने पर भी लौकिक सन्तान रूप फल की सिद्धी हो सकती थी उसके निषेध करने को **'अनपत्यौ'** विशेषण कहा है, उन दोनों के किसी प्रकार कोई सन्तान नहीं हुई थी, **'च'** अव्यय अन्य लौकिक सुख सेवन के भी अभाव का सूचक है, उन्होंने अन्य लौकिक स्रक् चन्दन आदि सुखों का भी अनुभव नहीं किया था। 'दम्पती' पद से दोनों स्त्री पुरुषों का नियमतः साथ रहना कहा है, इस कारण से भी मोक्ष को नहीं मांग सके। **''रागस्यानिवृत्तत्वादृणानामतिवर्त्तत्वाद्''** लौकिक सुख भोग में राग की निवृत्ति न होने से, पुत्र के उत्पन्न होने के कारण पितृ आदि के ऋणों के भी निवृत्त न होने से एवं मोक्ष के विरुद्ध ग्रहस्थ आश्रम में निष्ठा होने से मोक्ष नहीं मांग सके, **''सर्वतः शास्त्रार्थपरिज्ञानेपि''** सर्व प्रकार से शास्त्र के अर्थ का परिमार्जित ज्ञान होते हुए भी पूर्वोक्त लौकिक सुख रागादि तीन कारण मोक्ष के वर रूप से स्वीकार करने में कैसे सफल हो सके, शास्त्रार्थ ज्ञान ने उन लौकिक रागादि को निवृत्त क्यों नहीं कर दिया, उसमें कारण बतलाते हैं कि **'मोहितौ मम मायया'** मेरी माया से वह दोनों मोहित थे, यह विशेषण माया भगवान् की लीला के साधने में अनुकूल है, साधारण माया तो शास्त्र से निवृत्त हो जाती है, अपवर्ग को उन्होंने नहीं मांगा, जन्म और मरण की समाप्ति को अपवर्ग कहते हैं, यदि साक्षात् मोक्ष को न मांग कर भक्ति को ही मांग लेते तो भी मोक्ष हो जाता, उन्होंने भक्ति भी नहीं मांगी अतः निश्चयार्थक 'वै' शब्द का प्रयोग उपयुक्त है कि उन्होंने किसी भी प्रकार मोक्ष माँगा ही नहीं, न तो सीधा मोक्ष ही मांगा और न भक्ति के द्वारा ही उसकी इच्छा की। मूल श्लोक में जो **''वै मोहितौ''** इस स्थान में जो ''वै'' अव्यय का पाठ है उसके स्थान पर 'मे' ऐसा पाठ माने तब मुझसे मोक्ष नहीं मांगा अथवा मेरे सम्बन्ध का अवगाहन करने वाला मोक्ष सुख नहीं मांगा यह अर्थ

निकलता है। 'प्रमेय बल से भगवदिच्छा से मोक्ष नहीं माँगा यह अर्थ सिद्ध हुआ। यदि यहाँ पर ऐसी कोई शंका करे कि श्री सुतपा और पृश्नि के मोक्ष के स्वीकार न करने में माया मोह को निमित्त कहना भक्तिमार्ग सिद्धान्त के अनुकूल नहीं क्योंकि "दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" के अनुसार भक्ति मार्ग में तो भगवत्सेवा ही परम पुरुषार्थ है मोक्ष का अधिक महत्त्व नहीं इस प्रकार की शङ्का का समाधान "मे अपवर्गं न वव्राथे" इस योजना से होता है कि भगवत्सम्बन्धि भक्तिमार्गीय मोक्ष का तो स्वीकार करना उचित था उसको स्वीकार नहीं किया इसमें चिकीर्षित लीला के रसानुभव कराने के लिये भगवदिच्छा ही कारण है, उसी को मम मायया इन शब्दों से कहा है ॥ ३९ ॥

भगवान् का यह नवम श्लोक है। आचार्यचरण कहते हैं कि भगवान् ने उन दम्पती को वर देने के लिये "तथास्तु" क्यों नहीं कहा। ऐसी शंका को अवसर नहीं, वर का दान तो अर्थसिद्ध है, बिना ही कथन किये आगे पीछे के वचनों से बुद्धिगम्य हो जाता है, इस कारण वरदान के प्रसङ्ग को शब्दों से न कहा पुनः भगवान् के पधारने पर उन दोनों ने प्रथम तो लौकिक विषयों से राग की निवृत्ति करने के लिये वैषयिक सुख भोगों को भोगा, इस बात को इस श्लोक से कहते हैं, कि **मयि गते युवां** मेरे चले जाने पर आप दोनों मेरे समान पुत्र को वर ग्रहण रूप से प्राप्त कर अवश्य ही ऐसा पुत्र होगा ऐसा निश्चय कर ग्राम्य सुख के भोग करने से उस वर प्राप्ति में विघ्न हो सकता है ऐसी शङ्का न कर ग्राम्य भोगों को भोगने लगे। क्योंकि आप दोनों अपने मनोरथ को तो प्राप्त कर ही चुके थे। **युवां प्राप्तमनोरथौ** यह वाक्य पृथक् है जो कि दोनों स्त्री पुरुषों की निश्चिन्तता प्रतिपादन करने को उसमें कारणता के उल्लेख के लिये कह दिया है। **युवाम्** पद की पुनरुक्ति दिख पड़ती है वह देवकी वसुदेव के जन्मान्तरीय संस्कारों के जागरित हो जाने में उनकी सम्मति की सूचना के लिये आवश्यक है अतः दोषावह नहीं ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे अनघे सकलदोषरहिते! तदा युवयोः कामदित्सया वरदानेच्छया वरदराट् वरप्रदेषु श्रेष्ठोऽहममुना चतुर्भुजादिमता वपुषा प्रादुरासमिति द्वयोरन्वयः। प्रादुर्भावे हेतुमाह-वां युवयोः परितुष्ट इति। परितोषेऽपि हेतूनाह-तपसा शीर्णपर्णाहारादिना, श्रद्धया मद्विषयकविश्वासेन, नित्यं निरन्तरं भक्त्या प्रेम्णा स्वहृदि भावितः चिन्तितश्चेति ॥ ३७ ॥ तदा 'वरो व्रियताम्' इति मयोक्ते सति वां युवाभ्यां कर्तरि षष्ठी। मादृशः मत्सदृशः सुतो वृतः याचितः। वरदराडित्यनेन सकृदङ्गीकारेऽपि वारंवारमाविर्भावे कारणमुक्तम् ॥ ३८ ॥ यद्यपि मे मत्तो मोक्षदातुः सकाशात् संसारापवर्गो मोक्ष एव वरणयोग्यस्तथापि दम्पती युवामपवर्गं न वव्राथे। तत्र हेतुद्वयमाह—अजुष्टेति। न जुष्टाः न सेविताः ग्राम्यविषयाः गृहसम्बन्धिनः शब्दादयो याभ्यां तौ। तथा न विद्यते अपत्यं ययोस्तौ। तथा चाननुभूतगृहस्थदुःखत्वेन वैराग्याभावाद्विषयासक्तिसत्त्वाच्च पुत्रमेव वव्राथे, नापवर्गमिति भावः। ननु पूर्वं तु 'विनिर्धूतमनोमलौ' इत्युक्त्या विषयासक्त्यभाव एवोक्तः, इदानीं कथं पुनस्तदासक्तिर्जातेत्यत आह-मोहितौ मम माययेति। यद्यपि भगवत्प्रसादे संसारे हेतुभूताया मायाया निवृत्तिरेवोचिता, तथापि तयोस्तपआदिभिर्विशुद्धतया भगवदवतारयोग्यत्वात्तयोर्विमुक्तावतारादिलीलेव न सिद्ध्येदतस्तत्सिद्ध्ये भगवदिच्छारूपया मायया तयोर्मोहः स्थित इति ज्ञेयः ॥ ३९ ॥ तथास्त्विति वरं दत्त्वा मयि गते सति युवां मत्सदृशं सुतं वरं लब्ध्वा तत्प्राप्तिनिश्चयं कृत्वा ग्राम्यान् भोगान् शब्दादिविषयान् अभुञ्जाथाम्। एवं च युवां प्राप्तमनोरथौ जाताविति वाक्यान्तरम्। शीलं चित्तकोमलता, औदार्यं दातृत्वम्, गुणाः करुणादयस्तैः समं स्वसदृशं लोकेऽन्यतममदृष्ट्वा अहमेव वां युवयोः सुतोऽभवम्। पृश्निसंज्ञायास्तव गर्भे भूतत्वात् 'पृश्निगर्भ' इति श्रुतः प्रसिद्धः। अस्य रूपस्योपासनं द्वापरे ज्ञेयम्, 'विष्णुर्यज्ञः पृश्निगर्भः' इति एकादशे तथैव वक्ष्यमाणत्वात् ॥ ४० ॥

अन्वितार्थप्रकाशिका

तदेति सार्द्धम् ॥ हे अनघे! तदा तपसा श्रद्धया भक्त्या च हृदि भावितश्चिन्तितः अतः वाम् युवयोः परितुष्टः वरदराट् वरप्रदेषु श्रेष्ठोऽहमपि एतच्च सकृद्वरेऽपि वारंवारं प्रादुर्भावे कारणं युवयोः कामस्य दित्सया दातुमिच्छया अमुना चतुर्भुजादिमता वपुषा प्रादुरासं प्रकटोऽभवम् ॥ ३७ ॥ व्रियतामित्यर्द्धम् ॥ तदा वरो व्रियतामिति मयोक्ते सति वां युवाभ्याम्। युवाभ्यामित्यर्थेऽव्ययं कर्तरि शेषे षष्ठी वा। मादृशः मत्सदृशः सुतो वृतः याचितः ॥ ३८ ॥ अजुष्टेति ॥ न जुष्टाः न सेविताः ग्राम्याः गृहसंबन्धिनः विषयाः याभ्यां तौ तथा न विद्यते अपत्यं ययोस्तौ दम्पती युवाम् अजुष्टेत्यादिविशेषणात् मोक्षयोग्यावपीत्याशयः। मम मायया लीलासम्पादिकया मदिच्छया देवमाययेत्यपि पाठः। मोहितौ सन्तौ मे मत्तः अपवर्गं मोक्षं न वव्राथे न वृतवन्तौ। संधिरार्षः ॥ ३९ ॥ गते इति ॥ तथाऽस्तु इति वरं दत्त्वा मयि गते सति युवां मत्सदृशं सुतं वरं लब्ध्वा तत्प्राप्तिनिश्चयं कृत्वा आप्तप्रायमनोरथौ सन्तौ मादृशपुत्रोत्पत्तीच्छया ग्राम्यान् भोगान् अभुञ्जाथाम् ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेति ॥ प्रादुरासमिति च ॥ तदा, हे अनघे, नित्यं भक्त्याऽनुरागविशेषेण, हृदि स्वान्ते, भावितोऽनुध्यातः, वां युवयोः, तपसाऽनशनादिरूपेण, श्रद्धयाऽऽदरातिशयेन च, परितुष्टः वरदराट् अहं, युवयोः कामदित्सया वरान् दातुमिच्छया, अमुना चतुर्भुजादिमता, वपुषा प्रादुरासं प्रादुर्भूतोऽस्मि । ततः प्रादुर्भूतेन मयेति शेषः । वरः अभिमतोऽर्थः, व्रियतां, इत्येवं, उक्ते सति, वां युवाभ्यां, कर्त्तरि षष्ठीयम् । मादृशः । सुतः, पुत्रः, वृतो याचितः । इति द्वयोरेकान्वयः ॥ ३७–३८ ॥ ननु मुक्तिदं भगवन्तं साक्षात्कृत्य मुक्तिरेवावाभ्यां किं न वृतेत्यत्राह ॥ अजुष्टेति ॥ अजुष्टा असेविताः ग्राम्यविषयाः शब्दादयो याभ्यां तौ, न विद्यतेऽपत्यं प्रजा ययोस्तौ च, दंपती जायापती युवां, मम मायया मोहितौ, अत एव, मे मत्तः, अपवर्गं मुक्तिं, न वव्राथे । अननुभूतविषयत्वादनपत्यत्वान्मन्मायामोहितत्वाच्च नापवर्गं वव्राथ इत्यर्थः ॥ ३९ ॥ गत इति ॥ वरं दत्त्वेति शेषः । मयि गते सति, युवां मत्सदृशं सुतं, सुतोत्पादकमित्यर्थः । वरं लब्ध्वा, प्राप्तो मनोरथो याभ्यां तौ तथाभूतौ, युवां ग्राम्यान् भोगान् विषयान्, अभुञ्जाथामन्वभूतम् ॥ ४० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तदा वामिति : १०.३.३७.

यथा त्वरा मद्धृदये मदीयजनाखिलक्लेशविमोचनेषु । तदन्यकृत्ये न तथेत्यजेन वक्त्रा पितृभ्यां सह लब्धबोधि ॥ १०८ ॥

अदृष्ट्वेति : १०.३.३९.

त्वयि प्रसन्ने किमुतार्थनीयं संसारसौख्यं तु तथापि ताभ्याम् । तदार्थितं तत्र न किं त्वयोक्तं मायाबलं मे न च वोऽपराधः ॥ १०९ ॥

कृष्णप्रिया

हे निर्दोष जननि ! उस समय तुम दोनों के ऊपर मैं इसी अलौकिक शरीर से प्रसन्न हुआ था आप दोनों ने तपश्चर्या, श्रद्धा एवं नित्य भक्तिपूर्ण परिचर्या सेवा के द्वारा मानसी भावना से हृदय में मेरा चिन्तन किया था—तब आप दोनों के ऊपर मैं इसी अलौकिक विग्रह से प्रसन्न हो गया ॥ ३७ ॥ तुम दोनों को अभीष्ट वर देने की इच्छा से वरदायकों को राजा स्वयं मैं प्रकट हुआ और मैंने कहा 'वर माँगो' ऐसा कहने पर आप दोनों ने मुझ जैसा पुत्र माँग लिया ॥ ३८ ॥ हे माताजी, आप दोनों लौकिक विषय सुख का सेवन नहीं कर पाये थे आप के घर अपत्य सन्तान भी नहीं हुई थी और मेरी माया से मोहित आप दोनों स्त्री-पुरुष मुझ से मोक्ष नहीं माँग सके ॥ ३९ ॥ भगवान् ने कहा अम्मा मेरे चले जाने पर आप दोनों मेरे समान पुत्र वरदान रूप में प्राप्त कर विषयभोग में रत हो गये क्योंकि आप दोनों को मनोरथ तो प्राप्त हो ही चुका था आप तो निश्चिन्त थे ॥ ४० ॥

अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समम् । अहं सुतो वामभवं पृश्निगर्भ इति [1]स्मृतः ॥ ४१ ॥
तयोर्वां पुनरेवाहमदित्यामास कश्यपात् । उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः ॥ ४२ ॥
तृतीयेऽस्मिन् भवेऽहं वै तेनैव वपुषा [2]युवाम् । जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ॥ ४३ ॥
एतद् वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे । [3]नान्यथा [4]मद्भवं ज्ञानं मर्त्यलिङ्गेन [5]जन्यते ॥ ४४ ॥

कर्दमक्षमा

अन्वयः – शीलौदार्यगुणैः समम् अन्यतमम् अदृष्ट्वा पृश्निगर्भः इति स्मृतः अहं वां सुतः अभवम् ॥ ४१ ॥ पुनः तयोः एव अहम् कश्यपात् अदित्याम् आस (तदा) उपेन्द्रः इति विख्यातः च वामनत्वात् वामनः इति विख्यातः ॥ ४२ ॥ हे सति भूयः तृतीये अस्मिन् भवे तयोः एव युवाम् तेन एव वपुषा अहं वै जातः मे व्याहृतम् सत्यम् ॥ ४३ ॥ प्राग्जन्मस्मरणाय मे एतद् रूपं वां दर्शितं अन्यथा मर्त्यलिङ्गेन मद्भवं ज्ञानं न जन्यते ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अदित्यां कश्यपाद्वामन आसेति यत्तदपि तद्रूपयोर्युवयोरहमेव पुनरासमित्यर्थः ॥ ४२–४३ ॥ प्राक्प्रथमं तावदेतद्रूपं मे जन्मेति स्मरणाय ज्ञानाय दर्शितम् । मद्भवं मद्विषयम् । अनंतरं त्वदिच्छया बालोऽपि भविष्यामीति भावः ॥ ४४ ॥

---

१. श्रुतः-श्रीधर. वंशी. गिरि. ; स्मृतः—भक्त. । २. वपुषाथ वाम्—श्रीधर. वंशी. भक्त. ; वपुषा युवाम्—गिरि. । ३. अन्यथा—भक्त. । ४. मद्भवज्ञानं—वीर. । ५. जायते—श्रीधर. वंशी. जीव. वीर. शुक. ; जन्यते—गिरि. मर्त्यानां वो न जायते—भक्त. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यतमं कमपि शीलं वृत्तम् । औदार्यं माहात्म्यम् । गुणा वात्सल्यादयः । वां युवयोः ॥ ४१ ॥ तद्रूपयोः पृश्निसुतपोरूपयोरेवादितिकश्यपयोः । अहमेव यः पृश्निगर्भः स एवाहमित्यर्थः इति । यः पूर्वमवतीर्णः स एव पुनरप्यवतीर्णोऽस्मीतिभावः । वामनत्वाद्ध्रस्वत्वात्सुंदरत्वाद्वा "वामनः सुंदरे खर्वे ह्रस्वांकोटपादपे" इति धरणिः ॥४२॥ अस्मिन्वर्तमानकालीने भवे जन्मनि । तेनैव शंखाब्जादियुतेन भूयः पुनस्तयोरेव पृश्निसुतपसोरेव नामांतरेण देवकीवसुदेवयोर्वा युवयोः । हे सति । व्याहृतं कथितम् ॥४३॥ अन्यथा मदिच्छां विना । मर्त्यलिंगेन मनुष्यदेहेन । इति भाव इति । मदिच्छया भवद्भ्यां मद्दर्शनं जातं भक्तवत्सलत्वान्मम त्वदिच्छापि कार्यैवेति तात्पर्यम् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहं तु भवद्भ्यां तदुक्तिचातुर्योच्छलित इव पश्चाद्विचार्यं भवन्-मनोगतमेव कृतवानित्याह—अदृष्ट्वेति । शीलं सच्चरित्रम् औदार्यं महत्त्वं गुणस्तयोः कारणं कारुण्यादिः तैरात्मनैव समं तुल्यं स्मृतः ख्यातः श्रुत इति पाठः क्वचित् सोऽयमेव त्रेतायुगाधिष्ठाता बभूवेति लक्ष्यते "विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः" इत्यादिकं ह्येकादशे तत्प्रसङ्गतः श्रूयते ॥ ४१ ॥ तयोरिति तैर्व्याख्यातं तत्र तदपीत्यादौ तदपि ममैव पुनरस्तित्वमित्यर्थः । वामन आसेति यदिति उपेन्द्र इति विख्यातो "वामनत्वाच्च वामनः" इति विख्यातो यः स आसेति यदित्यर्थः अस्तेर्लिटि रूपं भ्वादेशाभाव आर्षः । यद्वा, तथा तथा विख्यातः सन् यः कश्यपाददित्यामास बभूव सोऽहमेव तद्रूपयोर्युवयोरास बभूवेति ॥ ४२ ॥ येन पुरा वराय प्रादुरासं तेनैवेति अत एव पृश्निगर्भादित्वे तेनैव वपुषेत्यनुक्तत्वात् न तु तदानीमधुनेव स्वयमेव किन्त्वंशेनैवेति "एते चांशकलाः पुंसः" इत्याद्युक्तेः "पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान् परः" इत्यत्राप्येतदेव गीर्देव्या सूचितमस्ति अत एव वै निश्चये अथ कार्त्स्न्ये तृतीय एव भवे तत्सदृशसुतप्राप्तिलक्षणवरस्य परमपूर्णत्वापेक्षया च सत्यं मे व्याहृतमित्युक्तम् ॥ ४३ ॥ भवत्यस्मिन्निति भवो विषयः अहं विषयो यस्य तज्ज्ञानं निर्णयो मनुष्यरूपेण न स्यात् जन्यत इति चित्सुखपाठः यद्वा यथोक्तं रूपं चेदमित्यादि तत्राह एतच्चतुर्भुजाकारं यद्रूपं दर्शितं तत्तु वरदानमारभ्य प्राचीनतदाकारप्रादुर्भावत्रयस्मरणायैव न तु प्राधान्यापेक्षया नराकृतिपरब्रह्मत्वेनैव स्वयं भगवतो मम तत्र तत्र प्रतिपादनादित्यर्थः । किञ्च अन्यथा प्रकारान्तरेण मम भवो जन्म तत्प्रतीतिर्यत्र तज्ज्ञानं न जायते केनात्र प्रकारान्तरं तदेवाह—मर्त्यस्य द्विभुजत्वादिना प्राकृतमनुष्यस्येव लिङ्गं चिह्नं यत्र तेन गूढेन नराकृतिपरब्रह्मरूपेणेत्यर्थः । तस्माच्चतुर्भुजद्विभुजतया क्रीडतो मम मुख्योपि तदाकारः प्रथमं न दर्शित इति भावः । मुख्यत्वञ्चास्य दर्शितम् "एकोसि प्रथमम्" इत्यादि "तदमितं ब्रह्माद्वयं शिष्यते" इत्यन्तब्रह्मवाक्ये न चान्तर्न बहिर्यस्येत्यादि श्रीशुकवाक्ये "गोप्यस्तपः किमचरन्" इत्यादि श्रीशुकदेवेनापि स्वयमनुमोदमानेनानूदिते मथुरापुरस्त्रीवाक्ये "यन्मर्त्यलीलौपयिकम्" इत्यादिश्रीमदुद्धववाक्ये च ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

शीलं स्वभावः शान्तत्वादि, औदार्य्यं महत्त्वम्, जगदीशत्वादिगुणः कारुण्यादिस्तैरात्मना समं तुल्यं स्मृत इति तस्य तत्रान्यैव व्याख्यातत्वात् ॥४१॥ तयोरिति तैर्व्याख्यातम् । आसमिति वक्तव्ये आसेत्यार्षम्; किंवा, अहमासेति परोक्षप्रयोग आर्षः । वामनश्चेति विख्यातः ॥ ४२ ॥ येन पुरा प्रादुरासम्, तेनैवेत्यधुना परिपूर्णतया पूर्वजन्मद्वये चांशतयेति बोधयति आत्मनोऽवतारित्वात्तयोश्चावतारत्वात्, (भा० १।३।२८) 'एते चांशकलाः पुंसः' इत्याद्युक्तेः । वै स्मरणे । अथानन्तर्यं मांगल्ये वा । वां युवयोस्तयोरेवेति जन्मभेदेऽप्यभेदं बोधयति । हे सतीत्येवं पातिव्रत्यादिधर्म्मतया मदुक्तेरपि सत्यतापेक्षत एवेति भावः ॥ ४३ ॥ मम भवो जन्म यस्मिन् तत् । "अहं जातोऽस्मीति ज्ञानं मनुष्यरूपेण न स्याज्जन्मतः" इति चित्सुखः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदाऽहं रूपादिभिर्गुणैः समं मत्सदृशमन्यतममदृष्ट्वा "न तत्समश्चाभ्यधिकश्च दृश्यते', "न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः" इत्युक्तरीत्या मत्सदृशपुरुषान्तराभावं दृष्ट्वाऽहमेव वां युवयोः सतोऽभवं तदाऽहं पृश्निगर्भ इति स्मृतः पृश्नेस्तव गर्भभूतत्वात्तथा प्रसिद्धः ॥ ४१ ॥ तयोः पृश्निसुतपसोरेवानन्तरजन्मनि कश्यपाऽदितिरूपेण जातयोर्वां युवयोरथ कश्यपादित्यामहमासं पुत्रोऽभवम् उपेन्द्र इति विख्यातः प्रसिद्धः इन्द्रानुजत्वादिति भावः । तथा वामनत्वाद्ध्रस्वमूर्तित्वाद्वामनश्चेति विख्यातोऽभवम् ॥ ४२ ॥ एवं जन्मद्वयमुक्तमथ तृतीयं जन्मेदमेवेत्याह—अस्मिन् तृतीये भवे जन्मनि तयोरेवादितिकश्यपयोरेवैतद्रूपेण जातयोर्युवयोः तेनैव चतुर्भुजादिमता वपुषा भूयोऽहं जातः हे सति मे मम व्याहृतं भाषितं सत्यमेव हि ॥ ४३ ॥ वां युवाभ्यामेतच्चतुर्भुजादिमद्रूपं दर्शितं किमर्थं ते तव प्राग्जन्मस्मरणाय पूर्वमप्यावयोरेष एवोत्पन्न इति ज्ञापनार्थमन्यथा प्रदर्शितरूपदर्शनाभावे च मद्भवज्ञानं मदवतारज्ञानं मर्त्यानां युष्माकं न जायते मद्भवमिति पाठे मद्विषयकं मदवतारः विषयकमिति यावत् ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

शीलं वृत्तम् औदार्यं माहात्म्यम् ॥ ४१ ॥ वामनत्वात् सुन्दरत्वात् ह्रस्वत्वाद्वा ॥ ४२ ॥ तृतीये भवे जन्मनि ॥ ४३ ॥ मद्भवज्ञानं मज्जन्मविषयज्ञानं मर्त्यलिङ्गेन मनुष्यशरीरेण ॥ ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अदृष्ट्वेति शीलं सच्चरित्रम् औदार्यं महत्त्वं गुणाः कारुण्यादयः तयोः कारणानि ॥ ४१ ॥ या तयाऽतिदुरत्यया अभवन् ता द्वारोऽपि श्रीवसुदेव आगते सति विवृता इति द्वयोरन्वयः तदंशस्येव तत् साम्यात् पृश्निगर्भादिरूपद्वयेन पूर्वमाविर्भावः तथाप्यपरितोषात् तृतीये स्वयमेव स्वयं तावदत्रैव तेनैव वपुषेत्युक्त्या गम्यते ॥ ४२-४४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

तथापि भवतोस्तपसा ऋणीव पुनस्तृतीयेऽस्मिन् भवेऽहं परिपूर्ण एव प्रादुरासम्। तत्स्मरणार्थं तेनैव वपुषा चतुर्भुजेनेत्याह—तृतीयेऽस्मिन् भवेऽहं वै इत्यादि। वै इति प्रसिद्धौ। प्रसिद्धः परिपूर्णः सर्वेश्वरेश्वरः परात्परः, तेनैव वपुषा अहमित्यस्य समुचितेन वपुषा परिपूर्णसच्चिदानन्दरूपेण श्रीविग्रहेण न तु पृश्निगर्भादिवदंशकलया। भुजाधिक्यं तु यदिदम्, तत् प्राक्स्मृतय एव। यद्यपि मनुष्यलिङ्ग एवाहम्, तथापि चतुर्भुजाकारेणैव मामीश्वरमिति लोका जानन्ति, न तु मनुष्यलिङ्गेनेत्याह—नान्यथा मद्भवमित्यादि। मयि भवतीति मद्भवं ज्ञानं मर्त्यलिङ्गेनान्यथा न जायते, चतुर्भुजाकारेण विना न जायते। अथवा, मद्भवं ज्ञानं यद्यपि मर्त्यलिङ्गेनापि अन्यथा न जायते, अन्यथा न भवति, तथापि एतच्चतुर्भुजं रूपं प्राग्जन्मस्मरणाय वां दर्शितमिति पूर्वोक्ते एव भावः ॥ ४३–४४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मादृशत्वं लोके नास्त्येव युवाभ्यां तु स हि वृतः, अतो मया अंशेन पृश्निगर्भोपेन्द्ररूपाभ्यां द्वयोरेव भवयोरभवम्, तथापि युवयोस्तपसा नाहमनृणी तेन युवाभ्यामहमवृतोऽपि स्वयमेवास्मिन् भवे पुत्रोऽभवमित्याह—तृतीयेऽस्मिन् भवेऽहं वै इत्यादि। वै प्रसिद्धे प्रसिद्धः परिपूर्णः सर्वेश्वरेश्वरः परात्पर इति वै शब्दस्यार्थः। तेनैव वपुषा अहमित्यस्य समुचितेन परिपूर्णसच्चिदानन्दस्वरूपेण श्रीविग्रहेण सर्वनाम्नो बुद्धिस्थत्वादेवमधिगन्तव्यम्। न तु पृष्णिगर्भादिवदंशरूपेण प्रादुरासम्। अत एतदेव तदर्थितं यत्त्वया (२८ श० श्लो०) "मा प्रत्यक्षम्" इत्यादिना प्रत्यषेधि। भुजाधिक्यन्तु प्राक्स्मृतये, अन्यथा यद्यपि मर्त्यलिङ्ग एवाहं (भा० १।१०।४८) "गूढं परं ब्रह्म मनुष्यलिङ्गम्" इत्यादिना तत्स्वरूपत्वेऽपि ऐश्वर्यप्रकाशकं चतुर्भुजरूपं झटिति मत्स्वरूपाज्ञानान्न द्विभुजत्वेन प्रादुरासमित्याह— नान्यथेत्यादि। इति वाक्यार्थः, इति सत्यमेव मे मया व्याहृतम् ॥ ४३–४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अदित्यां कश्यपाद्वामन आसेति यत्तदपि तद्रूपयोर्युवयोरहमेव पुनरासमित्यर्थः ॥ ४२ ॥ भवे जन्मनि तेनैव चतुर्भुजेन अहं जात इति प्रथमे जन्मन्यहं पृश्निगर्भः द्वितीयेऽहं वामनः तृतीयेऽस्मिन्नहमेवेत्यस्मच्छब्दमात्रवाच्यत्वेन ममैव पूर्णत्वं तयोः मदंशत्वमिति बोधितम् एवं त्वमेव पूर्वसर्गेऽभूः पृश्निरिति न तु पृश्निरेव त्वमित्युक्त्या युवामिति पुत्रभावेन नराकृति परब्रह्म भावेन वा कृतस्नेहौ सकृदेव वा चिन्तयन्तौ परां प्रकटलीलाम् उत्तरामप्रकटलीलां पृश्न्यादीनामंशत्वं देवकीवसुदेवयोरंशित्वं च सति हे कोविदे "सन् सुधीः कोविदो बुधः" इत्यमरः ॥ ४३ ॥ मयि भवतीति मद्भवं मद्विषयं मर्त्यलिङ्गेन मयेत्यहं तु स्वयं परिपूर्णस्वरूपो मर्त्यलिङ्गो द्विभुज एव नराकृतिपरब्रह्मत्वादिति भावः ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तयोः पृश्निसुतपसोः अदितिकश्यपरूपयोः युवयोः अदित्यां कश्यपात्पुनरहमासमिति शेषः। स च ममावतारः उपेन्द्र इति विख्यातः वामनत्वाद्ध्रस्वत्वाच्च वामनः आसेति योजना ॥ ४२ ॥ तयोः पृश्निसुतपसोः वां देवकीवसुदेवरूपयोः युवयोः ॥ ४३ ॥ एतद्रूपं वां युवयोरर्थे प्राग्जन्मस्मरणाय मे मया दर्शितम् प्रथमजन्मनि अयमेवापत्यतया वृतस्तथा प्राप्तश्च स एवाधुना प्राप्तः इति युवयोः स्मृत्युद्बोधनाय दर्शितमित्यर्थः। अन्यथा प्रभुत्वख्यापनाय न दर्शितम् येषां पुत्रतया भक्तिरसास्वादनाय प्रवृत्तोऽस्मि तेषु किं प्रभुत्वख्यापनेनेति भावः। नन्वयमावयोः पूर्वजन्मनि पुत्रोऽभूदिति प्राग्जन्मस्मृतिरपि भवद्दर्शने जातेपि न जाता किन्तु "त्वमेव पूर्वसर्गे भूः" इत्याद्युपदेशेनोत्पादितात्राह, मर्त्यलिङ्गे मनुष्यदेहे उपलक्षणमेतद्देवादीनां मनुष्यादिदेहेषु मद्भवं मद्विषयकं ज्ञानं न जायते उपदेशं विनेति शेषः ॥ ४४ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

तयोरिति। अत्र तयोर्वामित्यनयोरन्वयानुपपत्तिः। न चादितिकश्यपयोर्विशेषणत्वेन योजना। सप्तमीपंचमीभ्यां सामानाधिकरण्यानुपपत्तेः। नापि वां सकाशात् अहं पुनरेवासमिति योजना। अदितिकश्यपपदयोरसंगतत्वप्रसंगात्। तयोरेवैताभ्यां विवरणमिति चेन्न। तच्छब्देन पृश्निसुतपसोर्ग्रहणेनादित्यादेर्ग्रहणायोगात्। तयोरेव तद्रूपतांगीकारेऽहं कश्यपाददित्यामास युवामेवादितिकश्यपौ जाताविति भावः। सत्तार्थकास धातोः कर्तरि लिडुत्तमपुरुषैकवचनरूपं। ननु ब्रह्ममानसपुत्रमरीचिपुत्रत्वात्कश्यपस्य सृष्ट्याद्यभाग एव जन्मनः श्रुतत्वात्तत्काले सुतपसोः श्रुतत्वात्कथं सुतपसः कश्यपजन्म युज्यते इति चेन्न। पूर्वकल्पे यः सुतपा नामप्रजापतिः स एवास्मिन्कल्पे कश्यपो जात इत्यंगीकारात्। न च पूर्वकल्पेऽपि एवंविधः कश्यप आसीदेवेति वाच्यं। तत्पूर्वकल्पीयसुतपसोऽभ्युपगमात्। सृष्टेर्यथा पूर्वस्य श्रुतिसिद्धत्वात्। तस्मान्न क्षुद्रशंकावकाशः॥ ४२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सदृशशब्दार्थं स्वयमेवाह। अदृष्ट्वेति। शीलं सौन्दर्यमौदार्यं च गुणा इतर आनन्दादयस्तैः सममन्यतमं स्वार्थेयं तमप्। अन्यं। यथोक्तं पुरुतमं पुरूणां छान्दसस्तमप्स्वार्थ इति ऋग्भाष्यटीकाटिप्पणेषु। तथा श्रेष्ठतमाय कर्मणे। अन्यतमो मुकुन्दादित्यत्र टीकायां तम् अभिकाङ्क्षायामित्यस्य कर्मणि रूपम्। पुरुभिस्तम्यत इत्युक्तेः। अन्यस्तमोभिकाङ्क्ष्यश्च तमिति वा। अदृष्ट्वा पृश्निगर्भ इति स्मृतोऽहं पृश्निसुतपसोः सुतोऽभवम्॥ ४१॥ तयोरेव वां युवयोरुपेन्द्र इति विख्यातो वामनत्वात्सुन्दरत्वाद्ध्रस्वत्वाद्वा। स वामनः स भामनः शब्दादेव प्रमित इत्यादेः आस आसम्। तौ कौ तदानीमित्यत आह। अदित्यां कश्यपादिति। पृश्निरेवादितिः सुतपाश्च कश्यप इति तयोरासमित्यन्वयः॥ ४२॥ अस्मिंस्तृतीये भवे जन्मनि तेनैव तदा प्रसन्नेन वपुषा तयोः पृश्नितपसोरदितिकयोर्देवकीवसुदेवयोर्भूयः पुनर्जातः। एतेन त्रिवारं जन्मार्थनमित्यर्थाद्ध्वनितमिति वदन्ति। मे व्याहृतं भाषणं सत्यम्॥ ४३॥ एतच्चतुर्भुजत्वादियुतं रूपं वां युवयोः स्मरणाय अस्मद्रूपान्तरे दृष्टरूपाद्रूपान्तरे तादृशमिति स्मरणार्थं मे मया दर्शितं मर्त्यलिङ्गेन भुजद्वयादिचिह्नेन। अन्यथामद्भवज्ञानमिति पदमेकम्। मद्भवो मदुत्पत्तिः स चान्यथा लोकभवविलक्षण इत्यन्यथामद्भवस्तस्य ज्ञानं वाम इत्यस्माकं भवस्तस्मादन्यथेत्यन्यथामद्भवः स इति ज्ञानं वा। अन्यथा एवमप्रदर्शने मर्त्यलिङ्गेन मद्भवज्ञानं न जन्यत इति वां सन्दर्शित इति योज्यम्॥ ४४॥

श्रीसुबोधिनी

यद्यपि युवाभ्यां भ्रमादेव याचितो वरस्तथाप्यविद्यमानं न देयं कृत्रिमं तु न सम्भवति सर्वभावेन स्वस्य द्वैरूप्ये श्रुतिविरोधो मर्यादाभङ्गश्च स्यात्, अदानेपि तथा, सादृश्यभेदसहिष्णुत्वेपि तयोराकार एव तात्पर्यमिति तात्पर्यविरोधाभावात् तात्पर्यज्ञापकं वचनमिति जीववाक्यत्वात् यथाश्रुतं वचनं बाधित्वाहमेव पुत्रो जात इत्याहादृष्ट्वेति।

यद्यपि मत्तोन्ये केचन सम्भवन्ति मायया सृष्टाः, तेषामपि मत्सत्तयैव सत्तेति सर्वात्मनान्यतमत्वं नास्ति, असतः सत्ता नाङ्गीक्रियत इति लोकेदृष्ट्वेत्युक्तं, यद्यपि कृत्रिमेपि रूपसाम्यं शक्यते कर्तुं तथापि शीलौदार्यगुणा आत्मान्तःकरणनिष्ठा अलौकिका नोत्पादनीया इति विशिष्टस्य मिलितस्य वा दर्शनमेव, अतोहं सुतो वामभवं, उभयोरपि क्रमेण प्रादुर्भूत इत्यर्थः, "स एकधा भवति दशधा भवती"त्यादिश्रुत्या तथा तस्य भवने न कोपि विरोधः, जन्मैव मुख्यमिति पृश्निगर्भ इतिनाम्नैव लोकप्रसिद्धिरुक्ता, स्मृत इति प्रमाणम्॥ ४१॥

अपवर्गस्याप्रार्थितत्वात् पुनर्जन्मान्तरं जातं तस्मिन्नपि जन्मनि तयोस्तुल्यत्वात् पुनरहं पुत्रो जात इत्याह तयोर्वामिति, तयोरेव युवयोः पुनरेवाहं स्वसदृशमदृष्ट्वा पुनरेवाहं जातः, तयोर्जन्मान्तरेदितिकश्यपत्वं, तदाहादित्यामास कश्यपादिति, यद्यप्यत्रादितिगर्भ इति वक्तव्यं तथाप्युपेन्द्र इत्येव लोके विख्यातः, नामान्तरप्रसिद्धौ हेतुमाह वामनत्वादिति, द्वितीये जन्मनि नामद्वयमुपेन्द्रो वामन इति॥ ४२॥

पुनस्तृतीयं जन्म तयोर्जातं, तत्राप्यहमेव पुत्रो जात इत्याह तृतीयेस्मिन्निति, अयं परिदृश्यमानो भवस्तृतीयो भवति, अत्रापि नामद्वयं मुख्यं, तृतीयस्थाने बहूनि, देवकीनन्दन इति च मुख्यं, तदग्रे वक्ष्यामः, पूर्वयोर्भवयो रूपभेदोस्ति तृतीये तु जन्मनि तेनैव प्रसन्नेनैव वपुषा तयोरेव भूयो जातः, एवं वारत्रयभवने हेतुमाह सत्यं मे व्याहृतमिति, यदि कस्मिन्नपि जन्मनि वरानन्तरभाव्ये भगवान् पुत्रो न भवेत् तदा वाक्यमसत्यं स्यात्, पूर्वदेहस्य त्यक्तत्वात् तत्पुत्रो न पुत्रो भवति, व्यवहाराभावात् प्रमाणाभावाच्च, अतः पुनर्जन्मान्तरे पुत्रत्वेन भाव्यं, अग्रे तु जन्माभावात् पुत्रत्वाभावः, सतीतिसम्बोधनं सम्माननार्थं, सैव पतिव्रता भवति या कल्पादौ यं पतिं प्राप्नोति कल्पान्तपर्यन्तं सर्वजन्मसु तमेव चेत् प्राप्नोति, तस्याश्च पुनर्धर्मो अभिज्ञानं च शास्त्रे निरूपितं, "य प्रथमं न म्रियते मृते म्रियेत तादृशी। त्वमिति ज्ञापयति मोक्षार्थं, व्यभिचारिण्याः स्त्रियास्तु न मुक्तिः, अतः सर्वदोषपरिहारार्थं सतीतिसम्बोधनमन्ते निरूपितम्॥ ४३॥

एवं पुत्रत्वे हेतुमुक्त्वा तादृग्रूपेणाविर्भावे हेतुमाहैतद्विति, वां युवयोरर्थं एतत् पूर्वानुभूतं रूपं दर्शितं, सम्बन्धिदर्शने सम्बन्धिनः संस्कार उद्बुद्धो भवति, एतद्विषयको लुप्तोपि संस्कारश्चोद्बुद्धो भवति, सान्निध्यात् सर्वज्ञतायां तु वैराग्यं स्यात्, तदाश्रितभक्तिरसो नानुभूयेत, रूपेण तदुद्बोधने तु तत्कालमात्रस्यैव स्मरणं वाक्याज् ज्ञानं तु प्रत्यक्षाद् दुर्बलमिति न काप्यनुपपत्तिः, प्राग् जन्मनोः प्रथमजन्मन एव वा स्मरणाय, एतावता क्लेशेनायं भगवान् पुत्रो जात इति, केवलवाक्ये तु भगवतो माहात्म्यमुच्यमानं शास्त्रार्थपरं स्यात्, तदाह, अन्यथा रूपप्रदर्शनव्यतिरेके केवलमुच्यमाने मर्त्यलिङ्गे रूपे मानुषशरीरे मद्भवं ज्ञानं न जायते साक्षाद्भगवानयमिति, प्रदर्शिते तु रूप उच्यमानं ज्ञानमनुभवारूढं भवति ॥ ४४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

अदृष्ट्वेत्यत्र भ्रमादिति, भगवत्समोपि कश्चिदस्तीतिसम्भावनरूपादज्ञानात्, मर्यादाभङ्ग इति एक एवेश्वर इति मर्यादाया भङ्गः, तथेति 'मां प्रपन्नो जनः कश्चिन् भूयो नार्हति शोचितु'मित्युक्तमर्यादाभङ्गः, ननु स्वसदृशयाञ्चायां स्वदानेपि मर्यादाया भङ्गः स्यादेवेत्यत आहुः सादृश्येत्यादि, वचनं बाधित्वेति, अनेना 'जुष्टेत्येतट्टिप्पणीस्थ 'मत्रायम्भाव' इत्यादिनोक्तं दृढीकृतं ज्ञेयं, अन्यथा यथाश्रुताबाधेनापि तदाकारकदाने वरसिद्धेर्बाधनं वृथा स्यादिति, नोत्पादनीया इति, कृत्रिमस्यासत्त्वात् तत्र त उत्पादयितुं न शक्या इत्यर्थः, क्रमेणेति, 'आविवेशे'त्यत्रोक्तप्रकारकक्रमेणेत्यर्थः, ननु तथापि जन्म तादृशस्य न सङ्गच्छत एवेत्याशङ्कायामभवमितिपदतात्पर्यमाहुः स एकधेत्यादि, तथा तस्य भवन इति, सुतत्वेन भवने, अनेकप्रकारमध्ये तस्यापि सङ्ग्रहादिति ॥

तृतीयेस्मिन्नित्यत्र भव इति, वसुदेवदेवकीत्वेन भवः, अत्रापि नामद्वयं मुख्यमिति, अत्रापि प्रकटस्य कृष्णो वासुदेव इति नामद्वयं गर्गेण नामकरणान् मुख्यत्वेन विवक्षितमित्यर्थः, ननु प्रथम एकं द्वितीये द्वयमिति तृतीये त्रयमपेक्षितमित्यत आहुस्तृतीयस्थाने बहूनीति, लोकवद् बहुत्वस्य त्रित्वे पर्यवसानाभावाद् बहूनीत्यर्थः, पक्षान्तरमाहुर्देवकीत्यादि, यद्यपि कृष्ण इत्येव नाम मुख्यं 'कृषिर्भूवाचक' इति श्रुत्या ब्रह्मनामत्वबोधनाद् ब्रह्मवैवर्तोक्तनिरुक्तिभिश्च "नाम्नां मुख्यतरं नाम कृष्णाख्यं यत् परन्तपे"ति पुराणान्तराच्च तथाप्यवतारानन्तारानन्तर्यमपेक्ष्यैतदुक्तं ज्ञेयम् ॥ ४३ ॥

एतद् वां दर्शितमित्यत्र ननु भगवत्सान्निध्यजनितसर्वज्ञतया लौकिकप्रत्यक्षसिद्धेः प्राग्जन्मादिविषयकमलौकिकं प्रत्यक्षमेव सेत्स्यतीत्येवं तत्स्मारणस्य किं प्रयोजनमत आहुः सान्निध्यादित्यादि, तथा च तस्य तत् फलं तथा वैराग्यमपीति नायं दोषः स्यादिति सर्वज्ञतां प्रतिबद्ध्यैतेन बालकरूपेण तत्स्मारणमित्यर्थः, तत्कालमात्रस्यैवेति, स कालो यस्य तत् तत्कालं तन्मात्रस्य तत्सामयिकमात्रस्यैवेति यावत्, अत एव स्तुतिः प्रार्थनाबीजभूतं भयं चेतिद्वयं सान्निध्यरूपप्रदर्शनस्य च क्रमिकं कार्यमत्र सङ्गच्छते, अन्यथा तु प्रार्थनाबीजस्य भयस्याघटमानतैव स्यात्, ननु वाक्येन भगवत्त्वज्ञाने पुनस्तद्दोषतादवस्थ्यमित्यत आहुर्वाक्यादित्यादि, न काप्यनुपपत्तिरिति, सान्निध्यस्य प्राधान्ये मोहकाभावात् तथा स्यात् भगवांस्तु यावत् स्वेच्छं च मोहं ज्ञानं च सम्पादयतीति न दोष इत्यर्थः, स्मारणफलमाहुरेतावतेत्यादि, ननु रूपमदर्शयित्वा केवलवाक्यमेव कुतो नोक्तवानित्यत आहुः केवलवाक्ये त्वित्यादि, केवलवाक्य इति, लौकिकरीतिकबालरूपेणोक्ते वाक्ये, तथा च शास्त्रानुभवयोः संवादार्थं प्रदर्शितवानित्यर्थः, उत्तरार्धस्याभासोयं उत्तरार्धं व्याकुर्वन्यथेत्यादि, उच्यमान इति, वाक्ये उच्यमाने ॥ ४४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अदृष्ट्वान्यतममित्यत्र कृत्रिमेपीति, अंशेष्वपीत्यर्थः, रूपसाम्यमिति, चतुर्भुजाद्याकारश्यामरूपेण साम्यमित्यर्थः, आत्मान्तःकरणनिष्ठा इति, आत्मनः स्वस्य भगवतो यदन्तःकरणं तन्निष्ठा इत्यर्थः, अनुत्पादने हेतुरलौकिका इति, भगवदतिरिक्तेषु भवितुमयोग्या इत्यर्थः, त्रिशिस्येति, यावन्तः शीलौदार्यगुणा भगवति सन्ति लौकिकैरपि तावद्भिर्विशिष्टस्येत्यर्थः, मिलितस्य चेति, अलौकिकैरपि मिलितस्येत्यर्थः, तथा च मूले साम्यस्य भेदसहिष्णुत्वाद् भिन्नगवेषणायामन्यतममदृष्ट्वांशेषु च शीलौदार्यगुणैः सममदृष्ट्वेत्यन्वयः, अन्यतमस्य स्वरूपत एवासत्त्वात् तत्र शीलादय आपादयितुमेव न शक्यन्त इत्येवंव्याख्यानम् ॥ ४१ ॥

तयोर्वामित्यत्र पुनरेवाहमितिमूलस्थप्रतीकं स्वेत्यादिना तद्व्याख्यानमतो न पुनरुक्तिः ॥ ४२ ॥

तृतीयेस्मिन्नित्यत्र नामद्वयमिति, रामःकृष्णश्चेत्यवतारद्वयस्य नामद्वयमित्यर्थः, तृतीयस्थान इति, कृष्ण इत्यर्थः, कृष्ण एव मूलरूपत्वात् तृतीयस्थानत्वं, तस्यैव रूपान्तरं राम इति भावः, देवकीनन्दन इति च मुख्यमिति, अन्यानि नामान्यवतारान्तरेपि वक्तुं शक्यानि न तु देवकीनन्दनेति, अतो मुख्यमंशेभ्योपि व्यावर्तकमित्यर्थः, इदं गुणोपसंहारचरणे स्फुटं, कृष्णेत्यस्यापि मुख्यत्वमुक्तमिति चकारः तदग्र इति, देवक्यां पूर्णाविर्भावोतो न केनाप्यंशेन प्राकृतत्वमतो न देवकेय इति भवतीत्यष्टमाध्याये वक्ष्याम इत्यर्थः, रूपमेव इति 'तमद्भुतमित्युक्तं रूपं पूर्वभवयोर्न प्रदर्शितमित्यर्थः ॥ ४३ ॥

बुभुत्सुबोधिका

अदृष्ट्वान्यतममित्यत्र भ्रमादिति 'न तत्सम' इति श्रुत्या सदृशसुतवरयो भ्रमः असदृशे ससदृशत्वज्ञानात्। मर्यादेति 'एक एवेश्वर' इति मर्यादाभङ्गः। अदानेपीति वरादाने सत्यसङ्कल्पत्वमर्यादाभङ्गः। ननु स्वसदृशयाञ्चायां योगिवत् स्वदानेपि

मर्यादाया भङ्गः स्यादेव वक्ष्यमाणज्ञानाङ्गभक्तिमत्त्वात् वसुदेवस्येत्यत आहुः सादृश्येत्यादि । भगवतः सर्वभावेन सर्वैरंशैः सादृश्यं साम्यं तस्य भेदः तत्सहिष्णुत्वं योगिवत् स्वदाने स्वरूपं योगिवद् गृहीतं रूपं नेत्येवं छान्दोग्यीयरूपेषु फलप्रकरणोक्तेषु सप्तसु वर्तत इति । सप्तसु साम्यं नेति भेदसहिष्णुत्वं, तत्त्वेपि, धर्मधर्मिभावात् । आकार एवेति एकरस आकार एव विशुद्धसत्त्वत्वादेवकारः । अभिधा तु वेदस्य विद्यायाम् । आकारे तात्पर्यस्य तत्प्रतीतीच्छयोच्चरितत्वरूपस्य ज्ञापकम् । वचनं त्वादृशः पुत्रो भूयादिति वचनम् । त्वमाकारः दृश्यते यत्र त्वादृशः योगरूढः शब्दः । जीवेति भ्रान्तजीववसुदेववाक्यत्वात् । बाधित्वेति पूर्वतन्त्रे श्रुत्या स्मृतिबाधोक्तेः । अन्यतमं विशिंषन्ति यद्यपीति । नास्तीति शास्त्र इति ज्ञेयम् । तथापि लोकेऽसतो मरुमरीचिकादेर्दर्शनादाहुः असत इति । खपुष्पादिवदाकारस्य । कृत्रिम इति मिथ्यावासुदेवे । नोत्पादनीया इति कृत्रिमस्यासत्त्वात् तत्र ते उत्पादयितुमशक्या इत्यर्थः । विशिष्टस्येत्यादि व्यावहारिकसत्ताविशिष्टस्य, उत्कृष्टस्य वा । आन्तरालिकसदृशो मूलसदृशमिलितस्तस्य दर्शनं ज्ञानवतोपि प्राप्तं तस्याभावोऽदर्शनमेव । अत्यन्तायोगव्यवच्छेदक एवकारः । मानव इति प्रद्युम्नगर्भशब्दतात्पर्यार्थः । मनुरलौकिकः पुरुषविधब्राह्मणात् । क्रमेणेति जन्मत्रयक्रमेण । 'आविवेशे'त्यत्रोक्तक्रमेणेति वार्थः । ननु तथापि जन्म तादृशस्य न सङ्गच्छत एवेत्याशङ्कायामभव'मितिपदतात्पर्यमाहुः स एकवेति । तथा तस्य भवन इति सुतत्वेन भगवत्त्वेन भगवतो भवने । अनेकप्रकारे मध्ये तस्यापि सङ्ग्रहात् । जन्मैव मुख्यमिति उपक्रमोपसंहारयोः सञ्जातविरोधित्वेन प्रकरणार्थ एव मुख्य इत्यर्थः । अध्यायार्थत्वात् । उभयोरव्याप्तिर्वारिता । तन्नाम्ना पृश्निनाम्ना । स्मृत इति 'पृश्निगर्भस्तु ते बुद्धि'मिति षष्ठे स्मृतः । शब्दरूपं प्रमाणम् ॥ ४१ ॥

तयोर्वामित्यत्र तुल्यत्वादिति पुत्रत्वकामेन तौल्यम्, जन्मना तौल्यं वा । पुनरेवाहमिति मूलस्थपदानि व्याख्येयानि ॥ ४२ ॥

तृतीयेस्मिन्नित्यत्र जात इति अहं जातः, अमःसुर्वां । भव इति वसुदेवदेवकीत्वेन भवः अहन्ताममता । अत्रेति तृतीये जन्मन्यपि । नामद्वयमिति रामकृष्णश्चेत्यवतारद्वयस्य पृश्निगर्भवामनरूपस्य नामद्वयम् । बहूनीति नामानि । चकाराद् रामः कृष्ण इति । शब्दार्थयोरैक्यात् । देवकीनन्दन इति अवतारान्तरे वक्तुमशक्यमिति मुख्यम् । तदग्र इति देवक्यां पूर्णाविर्भावोतो न केनाप्यंशेन प्राकृतत्वमतो न दैवकेय इति भवतीत्यष्टमाध्याये वक्ष्यामः । रूपभेद इति 'तमद्भुत'मित्युक्तं रूपं पूर्वभवयोर्नेति भेदः । प्रसन्नेनैवेति वृतेनैव एवकारः 'तदा वां परितुष्टोहममुना वपुषानघे'ति वाक्यात् । 'मया प्रसन्नेने'ति गीतैकवाक्यतया प्रसन्नपदम् । वाक्यमिति 'अहं सुतो वामभव'मिति वाक्यम् । अहं जात इत्यत्रास्मच्छब्दप्रयोगतात्पर्यार्थमाहुः पूर्वदेहस्येति 'आत्ममायामृत' इति वाक्यान् मायिकदेहत्यागः । तत्पुत्र इति पूर्वदेहपुत्रः । कल्पादाविति कल्पो ब्रह्मणो दिनम् । शास्त्र इति स्त्रीशास्त्रे वात्स्यायनसूत्रे तत्र स्त्रीशास्त्रपदप्रयोगात् ॥ ४३ ॥

एतद् वां दर्शितमित्यत्र हेतुमिति 'सत्यं मे व्याहृत'मित्यनेन वाक्यं हेतुः । आविर्भावे हेतुमिति प्रथमजन्मनि हेतुं विषयं रूपम् । आविर्भावो विद्वन्मण्डनोक्तो वा । तत्र हेतुं रूपमेव । अत्र प्रथमान्तविशेष्यको बोध इति सूच्यते । युवयोरर्थे इति अर्थे प्रयोजने मद्भवज्ञाने वैषयिकाधारे सप्तमी । मद्भवज्ञानविषयम् । भवतीति यथा हस्तिदर्शने हस्तिपकस्य संबंधिनः स्मरणजनकः संस्कार उद्बुद्धो भवति तथा । एतदिति समीपतरवर्तिरूपविषयकः । ननु भगवत्सान्निध्यजनितसर्वज्ञतयाऽलौकिकप्रत्यक्षसिद्धेः प्राग्जन्मादिविषयकमलौकिकमेव प्रत्यक्षं सेत्स्यतीत्येवं तत्स्मरणस्य किं प्रयोजनमत आहुः सान्निध्यादित्यादि । तथा च यथा सान्निध्यस्य सर्वज्ञताद्वारा प्राग्जन्मस्मरणं फलं तथा वैराग्यमपीति वैराग्येणायमविहितभक्तिरसलीलानुभवप्रतिबन्धो दोषः स्यादिति सर्वज्ञतां प्रतिबद्ध्य तद्बालकरूपेणालौकिकप्रत्यक्षस्मरणमिति भावः । तदुद्बोधन इति 'सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधका' इत्युक्तसंस्कारोद्बोधे रूपं सदृशत्वेनोद्बोधकम् । तत् प्राक्कालजन्मनोः स्मरणजनकसंस्कारोद्बोधकम् । तथा च रूपप्रदर्शने । अदृष्टचिन्ताद्यैः संस्कारोद्बोधने तु, तुः सदृशस्य रूपस्योद्बोधनसाधनत्वं व्यावर्तयति । एवकारो रूपयोगव्यवच्छेदको मात्रचोवधारणार्थकत्वं कार्त्स्न्यार्थव्यावर्तनेन निश्चिनोति । कालमात्रं स्मरणं यथा तदिदं जलं सेयं दीपमालिका सायंकाले दीपः इत्यादौ जलाद्यभावे कालमात्रस्मरणम् । जलादिसत्त्वे तूभयस्मरणम् । तद्वत् । ननु रूपप्रदर्शनाभावेपि 'एतद् वां' पूर्वं वरदानकाले'रूपं दर्शित'मिति वाक्याज् ज्ञानं शाब्दं रूपज्ञानम् । दुर्बलमित्युद्बोधकम् । न कापीति सान्निध्यस्य प्राधान्ये मोहकाभावाद् वाक्याज् ज्ञानं तथा भगवद्वाक्यत्वाद् वैदिकं प्रत्यक्षात् प्रबलं स्यात् । भगवांस्तु यावत् स्वेच्छया मोहं ज्ञानं च सम्पादयतीति न वैदिकज्ञानेपि प्रत्यक्षस्य दुर्बलत्वमिति वैदिकीया शाब्दात् प्रत्यक्षं दुर्बलमित्यनुपपत्तिर्नेत्यर्थः । कापीति शब्दाभ्यां 'अथवा शून्यवद् गाढं व्योमेव ब्रह्म तादृशं प्रकाशते लोकदृष्ट्या नान्यथा दृक् स्पृशेत् पर'मिति शास्त्रार्थनिबन्धोक्तापि शङ्का नेत्यर्थः । रूपं दृष्टं वसुदेवेन मायिकं भगवता स्वेच्छया रूपमाकाशशरीरं दर्शितमिति । स्मारणफलमाहुः एतावतेति । क्लेशेनेत्युक्तिस्तु द्वितीयस्कन्धनवमाध्यायोक्ततपोद्योतनार्थम् । ननु रूपमदर्शयित्वा केवलवाक्यमेव कुतो नोक्तवानित्यत आहुः केवलवाक्ये त्वित्यादि । लौकिकरीतिकबालकरूपेणोक्ते वाक्ये । उत्तरार्धस्याभासोयम् । शास्त्रेति शास्त्रं वेदः । तदर्थपरं स्यात् । उत्तरार्धं व्याकुर्वन्ति अन्यथेत्यादिना । अनुभवेति सदृशेन स्मरणं यतः ॥ ४४ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

"अदृष्ट्वान्यतमं" यह भगवान् का दशम श्लोक है, आचार्यचरण आज्ञा करते हैं कि यहाँ से तीन श्लोकों में भगवान् तीन बार अवतार लेने की कथा माता को और पिताजी को कह रहे हैं **"यद्यपि मत्तोन्ये केचन सम्भवंति मायया सृष्टाः"** यद्यपि तुम दोनों ने मेरे समान कोई अन्य होगा इस प्रकार के भ्रम से मेरे सदृश पुत्र होने का वर मांगा था लेकिन जो वस्तु उपस्थित ही नहीं उसका दान तो सर्वथा संभावित नहीं है और मुझ सदृश किसी रूप को बनाया नहीं, जा सकता श्रुति भगवती ने सर्वथा भगवान के दो स्वरूपों के होने पर विरोध और मर्यादा का भङ्ग संभावित किया है। **एकमेवाद्वितीयम्** दो स्वरूप स्वीकारने से यह श्रौत सिद्धान्त एवं ईश्वर के एक होने की मर्यादा इन दोनों पर आपत्ति थी। वरके नहीं देने में भी मर्यादा नष्ट हो जाती, क्योंकि मेरे शरणागत जन को किसी प्रकार की चिन्ता करना योग्य नहीं इस मर्यादा की रक्षा न हो पाती। दूसरी बात यह है कि सादृश्य भेद की अपेक्षा करता है तो भी पृश्नि सुतपाओं का मेरे इस परम मनोहर आकार में ही तात्पर्य है कि ऐसे सुन्दर आकार वाला मनोहर पुत्र हो उनका तात्पर्य यह नहीं है कि वह पुत्र स्वयं यह न होकर इससे कोई अन्य हो, ऐसे विचार से मेरे स्वयं पुत्र होने में उनके तात्पर्य का कोई विरोध न होने से मैं ही पुत्र हुआ। पृश्नि सुतपा जी का मुझ जैसे पुत्र की प्रार्थना का वचन जीव की उक्ति है। केवल अपने तात्पर्य बतलाने को शब्दों का प्रयोग मात्र है, इस दृष्टि से यथा श्रुत वचन का बाधकर अक्षरशः उस वचन के पालन की आवश्यकता न समझकर स्वयं मैं ही उनका पुत्र हुआ। इस विषय को अदृष्ट्वान्यत्तमं लोके इस श्लोक से कहते हैं कि लोक में स्व सदृश किसी अन्य को नहीं देख मैं ही तुम्हारा पुत्र हुआ। यद्यपि मुझसे भिन्न कोई हो भी सकते हैं माया से जिनको उत्पन्न किया जावे तो भी उनकी सत्ता तो मेरी सत्ता से ही है मेरी सत्ता के आधान होने से उनकी स्वतन्त्र सत्ता नहीं अतः सर्वथा सर्वांश में भिन्न नहीं, असत् की सत्ता मानी नहीं जाती, इस कारण लोक में अपने समान अन्य को न देखकर मैं ही स्वयं तुम्हारा सुत हुआ। यद्यपि रूप की समानता कृत्रिम वस्तु में की जा सकती है परन्तु शील, उदारता, आदि गुण तो उसमें उत्पन्न नहीं किये जा सकते, वह तो आत्मा भगवान के अन्तःकरण में रहने वाले हैं, उन अलौकिक उदारतादि गुणों का उत्पादन नहीं हो सकता। इस लिये निज गुणों से सर्वथा विशिष्ट अथवा अंशतः समान किसी अन्य का दर्शन ही नहीं हुआ, तब मैं ही आप दोनों का पुत्र हुआ। दोनों में क्रम से प्रकट हुआ, प्रथम सुतपा के मन में तत्पश्चात् पृश्नि के हृदय में उदित हुआ। श्रुति ने स एकधा भवति स दशधा भवति इस वाक्य से परमात्मा के पुत्रादि भाव से प्रकट होने का प्रतिपादन किया है कि वह एक प्रकार से होता है, दश प्रकार से होता है, इन प्रकारों में पुत्र रूप से होना भी एक प्रकार है, अतः भगवान् के पुत्र रूप से प्रकट होने में कोई विरोध नहीं। जन्म की मुख्यता को लेकर ही पृश्नि गर्भ इस जन्म सूचक नाम से ही लोक में प्रसिद्धि बतलाई है। स्मृतः इस पद से इस प्रसङ्ग की प्रामाणिकता सूचित की है। लेखकार ने सुबोधिनीजी में जो कृत्रिम शब्द है उस कृत्रिम शब्द का अंश अर्थ माना है। अर्थात् भगवान् के अंशावतारों में चतुर्भुज आदि आकार एवं श्यामलत्वादि रूप का साम्य सम्भावित है।

श्री लेखकारजी ने श्रीसुबोधिनीजी के **"विशिष्टस्य मिलितस्य वाऽदर्शनमेव"** इस वाक्य में आये हुए विशिष्ट एवं मिलित इन दो पदों का विवेचन इस प्रकार किया है कि भगवान् के अलौकिक शील उदारतादि गुणों के समान लौकिक शील उदारता आदि गुणों से युक्त होना 'विशिष्ट' होना है, एवं भगवन्निष्ठ अलौकिक गुणों से भी युक्त होना 'मिलित होना' है।

इनके व्याख्यान का आशय यह है कि इस श्लोक में **'अन्यतमम्' 'अदृष्ट्वा'** यह पृथक् वाक्य है, और **'शीलौदार्यगुणैः समम्'** अदृष्ट्वा, यह भिन्न वाक्य है क्योंकि जब अन्यतम 'भिन्न' कोई है ही नहीं तो उसमें शील उदारतादि से समानता का आपादान करना अशक्य है ॥ ४१ ॥

"तयोर्वां पुनरेवाहम्" यह भगवान् का एकादश श्लोक है। आचार्यचरण कहते हैं कि भगवान इस श्लोक में मातापिता के द्वितीय जन्म और अपने द्वितीय अवतार की कथा कहते हैं कि **"अपवर्गस्याप्रार्थितत्वात् पुनर्जन्मान्तरं जातं"** मोक्ष के न माँगने के कारण उनका पुनः जन्मान्तर हुआ, उस जन्म में भी वह दोनों पूर्व समान ही थे इसलिये मैं ही उनका पुत्र हुआ इस बात को इस श्लोक से कहते हैं, उन्हीं तुम दोनों के फिर भी मैं ही हुआ, अपने सदृश को न देखकर फिर भी मैं ही हुआ। उन पृश्नि, सुतपा, ओं को जन्मान्तर में अदिति कश्यप इस नाम से कहा गया इस बात को कहते हैं कि अदिति में कश्यप से मैं उत्पन्न हुआ,, यद्यपि इस जन्म में पृश्निगर्भ की तरह अदिति गर्भ ऐसा नाम आवश्यक है तो भी लोक में उपेन्द्र नाम से विख्यात हुआ, मेरा वामन बौने आकार के कारण मैं वामन नाम से विख्यात हुआ इस हेतु मेरे दूसरे जन्म में मेरे उपेन्द्र और वामन ये दो ही नाम थे ॥ ४२ ॥

"तृतीयेऽस्मिन् भवेऽहं वै" यह भगवान का द्वादश श्लोक है। आचार्यचरण आज्ञा करते हैं कि इस श्लोक में भगवान् अपने वर्तमान प्राकट्य की कथा कहते हैं कि **पुनस्तृतीयं जन्म तयोर्जातं** फिर आप का तृतीय जन्म हुआ, उस जन्म में भी मैं ही पुत्र हुआ यह दीखने वाला जन्म तृतीय जन्म है। इसमें कृष्ण और वासुदेव यह दोनों मुख्य है। यदि कहो कि तृतीय

जन्म में तीन नाम तो होने ही चाहिये अतः तृतीय नाम के स्थान पर मुख्य देवकीनन्दन यह नाम है उसे आगे बतलायेंगे, और भी बहुतेरे नाम तृतीय नाम के स्थान पर हैं। प्रथम दो जन्मों में रूप का भेद था इस तृतीय जन्म में तो उसी प्रसन्न श्रीविग्रह से उन्हीं माता पिताओं के पुनः प्रकट हुए। इस प्रकार तीन बार जन्म ग्रहण करने का कारण बतलाते हैं कि मेरा कथन सत्य है यदि वरदान के अनन्तर होने वाले किसी भी जन्म में भगवान् पुत्र नहीं होते तो उनका कथन मिथ्या हो जाता। कारण यह है कि पूर्व जन्म का शरीर तो छोड़ दिया था अतः पूर्व जन्म का पुत्र पुत्र नहीं कहा जा सकता क्योंकि उस प्रकार का व्यवहार भी नहीं है और उसमें प्रमाण भी नहीं है। पूर्व जन्म के पुत्र से पुत्रवान् कोई नहीं होता, अतः जन्मान्तर होने पर पुत्र रूप से प्रकट होना आवश्यक है। माताजी, अब इस जन्म के पश्चात् तो आप लोगों का जन्म नहीं होगा तो मेरा पुत्र रूप से प्राकट्य भी नहीं होगा। भगवान का माताजी का सति! सम्बोधन सम्मान का सूचक है। पतिव्रता वह ही होती है जो कल्प के प्रारम्भ में जिस पति को प्राप्त करे कल्पान्त तक यदि प्रत्येक जन्म में उसी पति को पति रूप से प्राप्त करती रहे। उक्त प्रकार की पतिव्रता के धर्मों को शास्त्र में इस प्रकार से बतलाया है, और उसकी पहचान भी कही है, कि जो पति से पूर्व मृत्यु को प्राप्त न करे उसके मरण होने पर ही मृत्यु को प्राप्त हो, वैसी पतिव्रता तुम हो ऐसा श्री देवकी को बतलाते हैं जिससे उनके मोक्ष की सूचना देते हैं। व्यभिचारिणी स्त्री की मुक्ति नहीं होती, अतः सर्व दोषों के परिहार करने को माताजी को सति! यह सम्बोधन अन्त में कहा ॥ ४३ ॥

"एतद् वां दर्शितं रूपम्" यह भगवान का अम्मा के प्रति त्रयोदश श्लोक है। आचार्यचरणों का कथन है कि इस श्लोक में इस प्रकार पुत्र होने में कारण का निर्देश कर चतुर्भुज आदि रूप से प्रकट होने में कारण को बतलाते हैं, कि यह पूर्व में जिसका अनुभव आप लोगों को हो चुका है वह चतुर्भुज स्वरूप आप दोनों के लिये दिखलाया है। अम्मा, ऐसा स्वाभाविक नियम है कि किसी एक सम्बन्धी पदार्थ के देखने से उसके सम्बन्धी अन्य पदार्थ के विषय में संस्कार जाग उठता है, और इस दिखने वाले पदार्थ के विषय में लुप्त हुआ भी संस्कार पुनः जागरित हो जाता है। यद्यपि मेरे समीप होने मात्र से सर्वज्ञता होने पर भी पूर्व जन्म का प्रत्यक्ष होना सम्भव था फिर भी उस सर्वज्ञता में तो सिर्फ वैराग्य की सम्भावना थी लेकिन वैराग्य होने पर भी अविहित पुष्टि भक्ति रस का अनुभव तो नहीं होता, और इस रूप के दर्शन से पूर्व जन्म के संस्कार को जागरित करने पर तो पूर्व काल में जैसा अनुभव हुआ है वैसा स्मरण आप लोगों को हो गया, इसमें भक्तिरस प्रतिबन्धक वैराग्य की कोई सम्भावना ही नहीं। वाक्य से माने शब्दों से यह भगवान् है ऐसा ज्ञान तो प्रत्यक्ष की अपेक्षा दुर्बल है अतः कोई भी किसी प्रकार की आशङ्का नहीं रह जाती। उपरोक्त कथन का तात्पर्य यह है कि भगवान् की दृष्टि से अपने इस स्वरूप के दर्शन से श्री देवकी वसुदेव को मोहित करना भी अभीष्ट है जिससे मातापिता को लालारस का अनुभव होता रहे। भगवान् के सान्निध्य से मातापिता का सर्वज्ञता होन के कारण भगवत्स्वरूप के मार्मिक परिचय पूर्ण स्तोत्र माता पिता ने किये फिर भी इन लोगों का भय निवृत्त नहीं हुआ पुनः भय की निवृत्ति के लिये मातापिता ने अन्त में प्रार्थना की ऐसी परिस्थिति में स्वीकार करना पड़ेगा कि भगवान् अपनी इच्छानुसार कभी मोह भी उत्पन्न करते हैं और कभी ज्ञान को भी प्रकाशित करते हैं, जिससे भगवान् विचारित लीला यथोचित रूप से सम्पन्न होती रहती है। भगवान् ने वर्तमान चतुर्भुज रूप का दर्शन प्रथम के दोनों जन्मों के अथवा प्रथम के एक ही जन्म के स्मरण दिलाने का भगवान् ने इन्हें कराया है। जिससे मातापिता का यह ज्ञात हो जावे कि इतने कड़े तप और परिश्रम से यह भगवान् मेरे घर पुत्र रूप से प्रकट हुए है। यदि केवल भगवान् वाक्य मात्र कहते तब तो भगवान् का माहात्म्य कहा हुआ भी अनुभव बिना शास्त्रवेद्य ही रहता। भगवान् कृपालु है वह शास्त्र और अनुभव दोनों के परस्पर में संवाद कराने का और उनका मेल मिलाने को चाहते हैं अतः स्वरूप दर्शन कराया है। इसी बात को अन्यथा **"रूपदर्शनव्यतिरेक"** इत्यादि उत्तरार्ध से कहते हैं कि यदि रूपदर्शन न कराते और केवल मैं भगवान् हूँ इतना कहने पर मर्त्यलिङ्ग रूप में सर्व साधारण मनुष्य शरीर में यह साक्षात् भगवान् है। ऐसा करा देने पर तो कहा हुआ ज्ञान अनुभवारूढ हो जाता है हृदय से मिलान मिल जाती है ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तयोरेव वां युवयोः कश्यपादितिरूपाभ्यां स्थितयोर्यः कश्यपाददित्यामास जातः इन्द्रानुजत्वादुपेन्द्र इति, वामनत्वात् ह्रस्वाङ्गत्वाच्च वामन इति च विख्यातः प्रसिद्धः सोऽपि पुनरहमेवासमित्यन्वयः ॥ ४१–४२ ॥ तयोः कश्यपादित्योरेव युवां युवयोरस्मिंस्तृतीये भवे जन्मनि तेन प्राक् प्रदर्शितेनैव चतुर्भुजादिविशिष्टेन वपुषाऽहं भूयो जातः पुनः प्रादुर्भूतः। तस्यां स्वप्रादुर्भावयोग्यतां सूचयन् सम्बोधयति–हे सतीति। मे मम व्याहृतं 'युवयोर्मत्सदृशः पुत्रो भविष्यति' इति भाषितमेवं हे सति! सत्यमेव जातम् ॥ ४३ ॥ चतुर्भुजस्वरूपेण प्रादुर्भावे हेतुमाह–एतदिति। प्राक् प्रथमं मे मम भगवतो जन्मनः स्मरणाय ज्ञानाय एतच्चतुर्भुजादिविशिष्टं रूपं वां युवयोर्दर्शितम्। अन्यथा मर्त्यस्य लिङ्गेन शरीरेण मद्भवं मद्विषयकं ज्ञानं न जन्यते। अनन्तरं स्वेच्छया बालरूपमपि गृहीष्यामीति भावः ॥ ४४ ॥

अन्वितार्थप्रकाशिका

अदृष्ट्वेति ॥ शीलं सच्चरित्रम् औदार्यं महत्त्वं गुणाः करुणादयः तैः समं स्वसदृशं लोकेऽन्यतममदृष्ट्वा अहमेव पृश्निगर्भ इति श्रुतः प्रसिद्धः वां युवयोः सुतः अभवम्। अयमवतारस्त्रेतायां "विष्णुर्यज्ञः पृश्निगर्भ" इति एकादशे त्रेताप्रसङ्गोक्तेः ॥ ४१ ॥ तयोरिति ॥ तयोरेव वां युवयोः कश्यपादितिरूपाभ्यां स्थितयोर्यः कश्यपाददित्यामास जातः इन्द्रानुजत्वादुपेन्द्र इति वामनत्वात् ह्रस्वाङ्गत्वाच्च वामन इति च विख्यातः प्रसिद्धः सोऽपि पुनरहमेवासम्। यद्वा। तयोरेव युवयोः पुनरहमेव सुतपोऽवतारात्कश्यपात् पृश्न्यवतारभूतायामदित्यामास जातः। स च उपेन्द्र इति वामनत्वाच्च वामन इति विख्यातः ॥ ४२ ॥ तृतीये इति ॥ हे सति कोविदे! तयोः कश्यपादित्योरेव युवां युवयोरस्मिंस्तृतीये भवे जन्मनि तेन प्राक्प्रदर्शितेनैव चतुर्भुजादिविशिष्टेन वपुषाऽहं भूयो जातः पुनः प्रादुर्भूतः। तेन मे व्याहृत सत्यमेव जातम् ॥ ४३ ॥ एतदिति ॥ प्राक् प्रथमं मे मम भगवतो जन्मनः स्मरणाय ज्ञानाय एतच्चतुर्भुजादिविशिष्टं रूपं वां युवयोर्दर्शितम्। अन्यथा मर्त्यस्य लिङ्गेन शरीरेण मयि भवतीति मद्भवं मद्विषयकं ज्ञानं न जायते अनन्तरं त्वदिच्छया बालरूपमपि ग्रहीष्यामीति भावः ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अदृष्ट्वेति। तदा अहं लोके, शीलं सद्वृत्तं च औदार्यं दातृत्वं महत्त्वं दाक्षिण्यं च गुणाः सत्यशौचादयश्च तैः समं मत्सदृशं, अन्यतममितरमित्यर्थः। अदृष्ट्वा, अहं एव, वां युवयोः, सुतः अभवम्। तदा, अहं पृश्निगर्भः इति, स्मृतः पृश्नेस्तव गर्भभूतत्वात्तथा प्रसिद्धः। ध्रुववरदरूपमेतच्चरित्रं लघुभागवतामृतादवगन्तव्यम् ॥ ४१ ॥ तयोरिति। तयोः पृश्निसुतपसोरेव, वां युवयोः अनन्तरजन्मनीति शेषः। पुनः, कश्यपात् अदित्यां कश्यपादितिरूपाभ्यां भवद्भ्यां सकाशादित्यर्थः। अहं एव, आस आसम्। तदा, उपेन्द्रः इति, वामनत्वाच्च वामनः इति, विख्यातः। अभवमिति शेषः ॥ ४२ ॥ एवं द्वयोर्जन्मोक्तिपूर्वं तयोः स्वजन्मनामनी उक्त्वाऽथ वां मम च तृतीयं जन्मेदमेवेत्याह। तृतीय इति। अथ, अस्मिन् तृतीये भवे जन्मनि, तयोः वां युवयोः, कश्यपादिती एव वां वसुदेवदेवकीरूपेण जातौ, तयोरेव युवयोरित्यर्थः। तेनैव चतुर्भुजादिमतैव, वपुषा भूयः अहं एव, जातः वै। हे सति, मे मम व्याहृतं सत्यं मया यदेतदुक्तं तत् सत्यमेवास्तीत्यर्थः ॥ ४३ ॥ एतदिति। किं च वां युवाभ्यां एतच्चतुर्भुजादिमत्, रूपं यत् दर्शितं, तत्तु, मे मम, प्राग्जन्मस्मरणाय, पूर्वमप्यावयोरेष एवोत्पन्न इति ज्ञापनार्थमित्यर्थः। अन्यथा प्रदर्शितरूपदर्शनाभावे, मद्भवं मज्जन्मसंबन्धि ज्ञानं, मर्त्यानां मनुष्यधर्मभाजां, वो युष्माकं, न जायते 'नान्यथा मर्त्यलिङ्गेन' इति पाठे, मर्त्यलिङ्गेन मनुष्यदेहेन, मद्भवं ज्ञानं न जायते। अत इदं रूपं दर्शितमनन्तरं त्वदिच्छया बालोऽपि भविष्यामीति भावः। केचित्तु मद्भवज्ञानमिति पठन्ति, तदपि चार्वेव।४४।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अदृष्ट्वेति : १०.३.४१.

पुत्रो मत्सदृशो वृतो वरगिरा दत्तस्तदा तत्तपः-सन्तुष्टेन मया परन्तु न तथाभूतोऽस्ति लोकत्रये।
ज्ञात्वेवं ह्यवतारभाक् किमभवत् कर्तुं वचोऽन्वर्थकं सादृश्यार्थकमन्यथाऽवतरणे त्रित्वं कुतोऽप्रार्थितम् ॥ ११० ॥
देयं यत्परिकल्पितं यदि च तद्दौर्लभ्यतो नार्पितं कल्प्यो देयतया तदा प्रतिनिधिस्तत्तुल्यवस्तुत्रयम्।
इत्थं शास्त्रमनुस्मरन् प्रभुरपि प्रायः स्वतुल्यं सुतं मत्वा दुर्लभमेव तत्त्रिगुणितं तत्तुल्यमादान्निजम् ॥ १११ ॥

कृष्णप्रिया

शील उदारता आदि सद्गुणों से सम्पन्न अपने समान किसी अन्य को लोक में न देखकर मैं ही जो "पृश्निगर्भ" नाम से प्रसिद्ध था वह आप दोनों का पुत्र हुआ था ॥ ४१ ॥ फिर भी उनही आप दोनों कश्यप और अदिति के रूप में आये तब मैं कश्यप से अदिति में उपेन्द्र नाम से विख्यात हुआ और शरीर ठिगना होने के कारण वामन नाम से ख्यात हुआ ॥ ४२ ॥ हे सति, उसके अनन्तर तुम्हारे इस तीसरे जन्म में उस पूर्वदर्शित शरीर से ही मैं तुम दोनों में प्रकट हुआ हूँ, मेरा कहा हुआ वचन सत्य ही होता है ॥ ४३ ॥ भगवान कहते हैं अम्मा ! पूर्व जन्मों का स्मरण कराने के लिये मैंने यह रूप आप दोनों को दिखाया है, यदि ऐसा नहीं करता तो मनुष्य शरीर में मेरा ज्ञान न हो पाता ॥ ४४ ॥

युवां मां पुत्रभावेन ब्रह्मभावेन [1]चासकृत् । चिन्तयन्तौ कृतस्नेहौ यास्येथे मद्गतिं पराम् ॥ ४५ ॥

श्रीशुक उवाच

इत्युक्त्वाऽऽसीद्धरिस्तूष्णीं भगवानात्ममायया । पित्रोः सम्पश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥ ४६ ॥

ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् ।
यदा बहिर्गन्तुमियेष तर्ह्यजा या योगमायाजनि नन्दजायया ॥ ४७ ॥
तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वनु[2] शायितेष्वथ ।
द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृङ्खलैः[3] ॥ ४८ ॥
ताः कृष्णवाहे वसुदेव आगते स्वयं [4]व्यवर्यन्त यथा तमो रवेः[5] ।
ववर्ष पर्जन्य उपांशुगर्जितः शेषोऽन्वगाद् वारि निवारयन् फणैः ॥ ४९ ॥

कर्दमक्षमा

अन्वयः—युवां मां पुत्रभावेन च ब्रह्मभावेन असकृत् चिन्तयन्तौ कृतस्नेहौ परां मद्गतिं यास्येथे ॥ ४५ ॥ भगवान् हरिः इति उक्त्वा तूष्णीम् आसीत् आत्ममायया पित्रोः सम्पश्यतोः सद्यः प्राकृतः शिशुः बभूव ॥ ४६ ॥ च ततः पश्चात् भगवत्प्रचोदितः सः शौरिः सूतिकागृहात् सुतं समादाय यदा बहिः गन्तुम् इयेष तर्हि नन्दजायया या अजा अजनि ॥ ४७ ॥ तया द्वाःस्थेषु अथ पौरेषु हृतप्रत्ययसर्ववृत्तिषु शायितेषु बृहत्कपाटआयसकीलशृङ्खलैः पिहिताः दुरत्ययाः सर्वाः ताः द्वारः तु कृष्णवाहे वसुदेवे आगते रवेः आगते यथा तमः स्वयं व्यवर्यन्त उपांशुगर्जितः पर्जन्यः ववर्ष फणैः वारि निवारयन् शेषः अन्वगात् ॥ ४८–४९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु त्वयि प्रसन्नेऽपि कथमावयोः पुनः पुनर्जन्मेत्यतः परं न भविष्यतीत्याह । युवामिति ॥ ४५-४६ ॥ यदि कंसाद्बिभेषि तर्हि मां गोकुलं नय यशोदायाश्च तां कन्यां मन्मायामानयेति प्रथममेव भगवता प्रचोदितो वसुदेवो यदा गंतुमैच्छत्तदैवाजाऽपि या योगमाया सा नंदजायया निमित्तमात्रभूतया अजनि जाता ॥ ४७ ॥ हृताः प्रत्ययार्थाः सर्वा वृत्तयो येषाम् अथवा हृताः प्रत्यया अन्याश्च सर्वा वृत्तयो येषां जाग्रतामपि । तथाभूतेषु द्वारपालेषु सत्सु बृहत्सु कपाटेषु लोहकीलकयुक्तशृंखलैर्युक्ताः द्वारः कपाटादिभिर्दुरत्यया इति वा ॥ ४८ ॥ स्वयमेव व्यवर्यंत विवृता इत्यर्थः । व्यध्रियंतेति वक्तव्ये गुणश्छांदसः । रवेर्निमित्तात् ॥ ४९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"तस्मिन्प्रसन्ने सकलाशिषां पतौ किं दुर्लभं ताभिरलं लवात्मभिः" इत्याद्युक्तेरावयोर्जन्मावृत्तिः कथं जातेत्याशंकते—नन्विति । 'नहि वस्तुशक्तिर्बुद्धिमपेक्षते' इति न्यायेन पुत्रभावेनापि परां पुनरावृत्तिरहिताम् । यास्येथे आत्मने पदमार्षं यास्यथ इत्यर्थः । एवं स्वपितृत्वात्स्वमंत्रोपासनापटलोक्तवसुदेवादिध्यानपूजादीनां सार्वकालिकत्वप्रदर्शनमप्यन्यथानुपपत्तिसिद्धं तयोर्नित्यसिद्धत्वं संगोप्य प्रेमवर्द्धनार्थं साधकत्वं ख्यापयन् सिद्धिं प्रतिश्रुत्यानंदयति युवामिति । वस्तुतस्त्वयमर्थः–मम प्रथमा गतिरद्यतनी गोकुलं प्रति यात्वेकादशे वर्षे मथुरां प्रति तां परां मद्गतिं युवां यास्येथे । सांप्रतं तु मया सह युवयोर्विच्छेद एव भवतीति भावः ॥४५॥ यद्वा प्रलयेति कृतः प्राकृतः इह पृषोदरादित्वात्प्रलयस्य प्रा इत्यादेशः 'वटपत्रपुटे तोकं शयानम्' इत्युक्तेः । प्रकर्षेणाकृतः स्वतस्सिद्धः प्राकृतः । यद्वा–प्रकृतेः प्रवर्तकः प्राकृतिकोपि शिशुः शिशुवद्बभूवेति । यद्वा–प्राकृतः प्रकृतिश्च स्वरूपं च स्वभावश्चेति पर्यायात् "प्रकृतिसिद्धमिदं हि महात्मनाम्" इति शिष्टप्रयोगाच्च । स्वभावसिद्ध इत्येवार्थः । अर्थांतरं तु 'न चांतर्न बहिर्यस्य' इत्यारभ्य 'बबंध प्राकृतं यथा' इत्यग्रिमवाक्ये दृष्टांतदार्ष्टांतिकाभ्यां निरसिष्यतीति ॥ ४६ ॥ अजनि प्रादुर्भूता किं च "गर्भकाले त्वसंपूर्णे ह्यष्टमे मासि ते स्त्रियौ । देवकी च यशोदा च सुषुवाते समं तदा" इति हरिवंशवाक्ये समं समकालं सुषुवाते इत्यर्थावगमात् । अत्र तु देवकीप्रसवोत्तरकाले एव यशोदाप्रसवदर्शनादुभयोरेव शास्त्रवाक्ययोः । प्रामाण्यादेवमवसीयते यदैव देवकी विष्णुं सुषुवे तदैव यशोदापि कृष्णं तदनंतरं योगमायां च सुषुव इति कालभेदेन तस्या द्विः प्रसव एवेत्यत एव 'अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा' इति वक्ष्यते किं तु यशोदाप्रसवस्य चतुर्भुजत्वाद्यनुक्तेर्नराकृतिपरब्रह्मत्वाच्च द्विभुजत्वमेव बुध्येत वक्ष्यति च "तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनंतमगाधबोधम्" इति ब्रह्मा "गूढं परं ब्रह्म मनुष्यलिंगम्" इति च ॥४७॥ प्रत्ययार्थाः पदार्थप्रत्यायकाः बुद्ध्यादिवृत्तयः ।

---

[1] वा पुनः–इति कस्यचित् ; वाऽसकृद्–मत्त. । [2] पौरेष्वपि–श्रीधर. वंशी. गिरि. मत्त. ; पौरेषु च–वीर. विज. । [3] शृङ्खलाः–वीर. मत्त. । [4] व्यशीर्यन्त–वीर. विज. ; विशीर्यन्त–इति कस्यचित् । [5] रवौ–इति कस्यचित् ।

क्लिष्टकल्पनयाऽरुचेरर्थांतरमाह अथवेति । प्रत्ययाः प्रतीतयो ज्ञानानीति यावत् । अन्याः सर्वा वृत्तयोऽध्यवसायाद्याः । यद्वा–प्रतीयंते पदार्थां यैस्ते प्रत्ययाः चक्षुरादींद्रियाणि तेषां वृत्तयो रूपादिज्ञानहेतुका इति । तथाभूतेषु निर्वृत्तिकेषु सत्सु पूर्वसमासे कार्कश्यं दृष्ट्वा समासांतरमाह बृहद्भिरित्यादि ॥ ४८ ॥ कृष्णवाहे उत्संगीकृतकृष्णे । व्यवर्यंत व्यत्रियंतेति वक्तव्ये गुणः छांदसः । इत्यर्थ इति । न तु त्रुटिता इति भावः । उपांशुगर्जितोल्पगर्जितः । यद्वोपांशुरहसि शेषोन्वगादिति संबंधः ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

युवामिति । वाशब्द उपमार्थे विकल्पे वा स्वरूपेण गुणेन च बृहत्तमत्वान्मुख्यत्वेन भगवानेवात्र ब्रह्म तादृशभावेन कृतस्नेहौ सन्तौ मुहुश्चिन्तयन्तौ भावद्वयस्य तुल्यत्वं च विषयमाहात्म्यात् परां मद्गतिं परमवैकुण्ठं तद्गमनं च कश्यपादितिभ्यामेकीभूयाधिकारान्ते ज्ञयम् अन्यत्तैः तत्रावतारिकायाम् इति कथमित्यन्वयः अत इत्यादिस्तु सिद्धान्तः अथवा तदेवमपि युवां साधकाविति न मन्तव्यं न च पुनर्मत्प्राप्तौ शङ्का कार्या यतः "एते हि यादवाः सर्वे मद्गणा एव भाविनि" इत्यादि पाद्मकार्त्तिकमाहात्म्यवचनात् यथा "सौमित्रिभरतौ यथासङ्कर्षणादयः । तथा तेनैव जायन्ते निजलोकाद्यदृच्छया । पुनस्तेनैव गच्छन्ति तत्पदं शाश्वतं परं । न कर्मबन्धनं जन्म वैष्णवानां च विद्यते" इति पाद्मोत्तरखण्डवचनात् मदीयतन्महामन्त्रमज्जन्माष्टमीपूजादिपटलानुसाराच्च युवां नित्यमेवैतादृशौ तथाऽपि ममेव युवयोरपि मत् प्रेम्णैव मत्प्रेमविशेषममाराधनप्रचारार्थं तत्र तत्र स्वांशेन सम्प्रति स्वयमेव चावतरणं लीलामात्रम् एतदेवोक्तं "त्वमेव पूर्वसर्गेऽभूः पृश्निः" इत्यादि तत एवानन्तरमपि मत्प्राप्तौ न साधनवैशिष्ट्यसापेक्षत्वं किन्तु तदपि पूर्ववदेव मत्प्राप्तिस्तु स्वत एवेत्याह, युवामिति । पुत्रभावेनेति, भाववैशिष्ट्येन तथा मदाविर्भाववैशिष्ट्येन चेत्यर्थः । ब्रह्मभावेनेति भावसामान्येन भगवन्मन्त्रतयाविर्भावसामान्येन चेत्यर्थः । वेत्यनुकल्पे "पितरौ नान्वविन्देताम्" इत्यादिना "पितरावुपलब्धार्थौ" इत्यादिना "अहो भाग्यमहोभाग्यम्" इत्यादिरीत्या "इत्थं सतां ब्रह्मसुखानुभूत्या इत्यादिरीत्या च तारतम्यात् पूर्वेण मुख्येनेतरेण गौणेन वा चिन्तयन्तौ तत्रापि सकृदपि चिन्तयन्तौ वा यद्यवमपि सम्भवति तदापीत्यर्थः । पराम् अस्याः प्रपञ्चप्रकटलीलात उत्तरां तदप्रकटलीला रूपां मद्गतिं यास्येथ एव नाधुनिकसाधनयोग्यतायोग्यताभ्यां तत्रोपकार्यतापकार्यते इति भावः । तत्र हेतुः, कृतस्नेहौ कृतः स्वभावत एव सिद्धः स्नेहः पुत्रभावमयः प्रेमा ययोस्तौ स्वभावसिद्धत्वमत्र "अयमात्माऽपहतपाप्मा" इति वत् यद्वा कृतस्नेहौ चिन्तयन्तौ सकृदेव वा चिन्तयन्तौ अन्यत् समानम् ॥४५॥ ततः किं जातमित्यपेक्षायामाह–इतीति इत्युक्त्वा हरिस्तच्चतुर्भुजं रूपमपहर्त्तुं प्रवृत्तत्वेन च विख्यापिततन्नामाऽसौ तूष्णीमासीत् ततश्च पित्रोः सम्पश्यतोरेव नत्वन्यत्र दत्तदृष्ट्योः सतोर्भगवान् स्वस्वरूपभूतषाड्गुण्यवानसावात्ममायया "मायास्याच्छाम्बरीबुद्ध्योः" इति त्रिकाण्डशेषात् "माया तु वयुनं ज्ञानम्" इति निघण्टोश्च स्वरूपभूतज्ञानशक्त्या बुद्धिसौष्ठवविशेषमयशक्त्येति यावत् यद्वा "आत्ममाया तदिच्छा स्यात् गुणमाया जडात्मिका" इति महासंहिता वचनादात्मेच्छया यद्वा "माया दम्भे कृपायां च" इति विश्वकोशादात्मकृपया शिशुराविष्कृतशैशवो बभूव तत्र विशेषज्ञानार्थमाह, प्राकृत इति । गौण्या वृत्त्या प्राकृत इवेत्यर्थः । यद्वा न चागन्तुकाकारेण तादृग्बभूवेत्याह–प्राकृत इति "प्रकृतिश्च स्वरूपं च स्वभावश्च" इति पर्य्यायात् "प्रकृतिसिद्धमिदं हि महात्मनाम्" इति प्रयोगाच्च स्वभावसिद्ध एवेत्यर्थः । अर्थान्तरं हि "न चान्तर्न बहिर्यस्य" इत्यारभ्य "बबन्ध प्राकृतं यथा" इति पूरिते वाक्ये दार्ष्टान्तिकदृष्टान्ताभ्यां निरसनीयं स्वाभीष्टलीलाक्रममेव प्रकटयतस्तस्य सर्वदा सर्वशक्तिनिधानत्वेन तत्तदुपासकाभीष्टलीलादर्शनाय युगपद्योग्यत्वात् सर्वमेव तत्र स्वभावसिद्धमिति भावः । वक्ष्यते च गर्गेण "बहूनि सन्ति रूपाणि नामानि च सुतस्य ते" इति ॥ ४६ ॥ भगवता प्रचोदित इत्यत्र व्यक्तोक्तिरेव तस्य श्रीहरिवंशे "वसुदेववचः श्रुत्वा रूपं संहरदच्युतः अनुज्ञाप्य पितृत्वेन नन्दगोपगृहं नय" इति अस्यार्थः संहरत् समहरत् किं कृत्वा ? नन्दगोपगृहं नयेति पितृत्वेन पितृस्नेहेनानुज्ञायेत्यर्थः । सम्यगादाय कोमलवस्त्रास्तृतपेटिकायां सुखं निधाय तां शिरस्याधाय किंवा सावधानं शनैः शनैः कराभ्याम् उत्थाप्य निजाङ्के निधाय बाहुभ्यामाश्लिष्यन्निव गृहीत्वा सः अनिर्वचनीयभाग्यवान् ततश्च पादनिगडः स्वयमेव भ्रष्ट इति ज्ञेयं तर्हीत्यत्र विशेषः श्रीहरिवंशे "नवम्यामेव सञ्जाता कृष्णपक्षस्य वै तिथौ" इति ॥ ४७ ॥ तयेति युग्मकं प्रत्ययः ज्ञानं द्वास्थाः द्वारस्थिता रक्षिणो द्वारपालाश्च तेषु तथा च श्रीविष्णुपुराणे "मोहिताश्चाभवं तत्र रक्षिणो योगनिद्रया । मथुराद्वारपालाश्च व्रजत्यानकदुन्दुभौ" इति मोहनादिकं च मायया एव योग्यमिति तथा । तदुक्तं प्रकाशनं तु श्रीभगवत एवेति तथैव तदाह द्वारश्चेति । अथानन्तरं सद्य एवेत्यर्थः । याः पिहिता मुद्रितास्ता द्वारोऽपि द्वास्थादीनां हृतप्रत्ययादित्वं लक्षणीकृत्य श्रीवसुदेव आगते सति स्वयमेव विवृता इत्यर्थः । ताश्च कथमप्युद्घाटयितुं न शक्यन्त इत्याह–बृहत् कपाटादिभिर्दुरत्ययाः ॥ ४८ ॥

कृष्णः "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' ॥

इत्यनुसारेण सर्वाकर्षकपरमानन्दघनमूर्त्तिस्तस्य वाहे वाहक इति वहनादिश्रमो निरस्तः प्रत्युत परमानन्द एव व्यञ्जितः तथा संसारबन्धमपि कर्षति हरतीति कृष्णस्तद्वाह इति स्वयं द्वारविवृतौ च हेतुः व्यवर्यंतेति कर्मकर्त्तरि प्रयोगः कर्त्ता चार्थात् श्रीवासुदेव एव तमो यथोद्घटितं स्यादिति दृष्टान्तेन तदागमनात्पूर्वमेव क्रमेण सम्यग्विवृतिर्ध्वनिता पर्जन्यो गर्जन्मेघः उपांशु मन्दं मन्दं गर्जितं यस्य सः शेष इति समये निजसेवासिद्धये पार्षदप्रवरः श्रीमाननन्त एव शय्यासनपरीधानपादुकाच्छत्रचामरैः "किं नाभूस्तस्य कृष्णस्य मूर्त्तिभेदैश्च मूर्त्तिषु" इति ब्रह्माण्डवचनात् अन्वगात् श्रीवसुदेवस्य पश्चादगच्छत् तथा च श्रीविष्णुपुराणे "वर्षतां जलदानां च

तोयमत्युल्वणं निशि । सञ्छाद्यानुययौ शेषः फणैरानकदुन्दुभिम्" इति तत्र तेन स्वशिरसि महावृष्टिनिवारणं यत्किञ्चित् लक्षितमेव ज्ञेयं चिन्तया वर्द्धमाने वैयग्र्ये सद्यः सुखदचमत्कारहेतुत्वेन योग्यत्वात् ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ब्रह्मभावेनेति स्वस्मिन् पुत्रभाव-ब्रह्मभावयोस्तुल्यता बाधिता, विषयस्य माहात्म्यविशेषात्; अतएवासकृच्चिन्तयन्ताविति तत्तद्भाव उक्तः। यद्वा, वा-शब्द उपमार्थे,—ब्रह्मभावेनेव पुत्रभावेनासकृच्चिन्तयन्तौ। ब्रह्मभावेन वेति वा-शब्देन ब्रह्मभावस्य तुच्छत्वमभिप्रेतम्। परां सर्वोत्कृष्टां मम गतिं गम्य स्थान—प्रपञ्चात तश्रावैकुण्ठलोकमित्यर्थः कृतस्नेहौ सन्तौ यास्यथः। यद्वा, मत् मत्तः सकाशादिति तत्प्राप्तावनायासः स्वकारुण्यविशेषश्चोक्तः। यद्वा, अप्यर्थे वा-शब्दः। किं वक्तव्यं, परमस्नेहरसमय-पुत्रभावेनेति नीरसब्रह्मभावेनापि सकृदपि चिन्तयन्तौ; कुतः? कृतस्नेहौ मद्विषयकस्नेहेन युवयोः कथमपि मत्पदप्राप्तिविघातासम्भवात्। एवं युवामिति पूर्व्व-पूर्व्वजन्मतस्तयार्माहात्म्यञ्च दुःखितयोस्तयोः सान्त्वनार्थं प्रतिस्तुत्यैव सूचितम्। यद्यप्यधिकारान्तेऽदिति-कश्यपयोः परमपदप्राप्त्यैव तदंशयोरनयोस्तत्प्राप्तिस्तथापि युवां यास्येथ इति जन्मान्तराभावमात्रे तात्पर्य्यम्। यद्वा, श्रीदेवकी-वसुदेवाविमावेव नित्यवैकुण्ठमुख्यपार्षदावेतयोरेवांशौ तौ; अतएवोक्तम् (भा० १०।३।३२) 'त्वमेव पूर्व्वसर्गेऽभूः पृश्निः' इत्यादि, अतोऽनयोरधुनैव निजपदप्राप्तिस्तयोश्चाधिकारान्ते तत्प्राप्तिरिति श्रीभागवतामृतोत्तरखण्डोक्तानुसारेण ज्ञेयम्। यद्वा, मद्गतिं पुत्रभावदार्ढ्यं न मामेव गतिम् ॥ ४५ ॥ आत्मतुल्यया मायया सच्चिदानन्दशक्तिविशेषेणेत्यर्थः; यद्वा, निजसहजकृपया। प्रकृतिः स्वभावः, प्राकृतो लोकस्वाभाविकः, किंवा प्रकृष्टमाकृतमाकृतिराकारो द्विभुजत्वलक्षणं यस्य तथाभूतः शिशुर्लौकिकाभिनवजातबालकोऽतो मनोहरणाद्धरिर्भगवानिति च परमसौन्दर्याद्यभिप्रायेण। एवं दिव्यायुधाद्यन्तर्धापनं नाभिनालसाहित्यादिकञ्च द्रष्टव्यम्; अन्यथा गोकुलवासिषु महाविस्मयाद्युत्पत्तिस्तथा नाडी साहित्येनैवाशौचानापत्त्या श्रीनन्दस्य वक्ष्यमाणदानाद्युपपत्तेश्च पित्रोः संपश्यतोः सतोरित्यविलम्बतोक्ता; यद्वा, तन्मायायाः परमाद्भुता शक्तिर्दर्शिता। यद्वा, तयोर्दृष्ट्या तादृशो वृत्तस्ताभ्यां तादृशाः सर्व्वेऽस्निग्धतरा उपलक्ष्यन्ते; अन्यदृष्ट्या च दिव्यरूप एवेत्यर्थः। अतएवार्ज्जुननारदादयस्तं चतुर्भुजमेव पश्यन्ति; तच्च श्रीगीता-विश्वरूपाध्यायादौ व्यक्तमेव। यद्वा, संपश्यतोः प्राकृतशिशुत्वमेवापेक्षमाणयोः। केचिच्चैवं व्यचक्षते—पूर्व्वं द्विभुजमनुष्यबालकरूपेणैव जातस्ततः पित्रोः स्वजन्मबोधनाय दिव्यरूपोऽभूदत एवोक्तम्—अद्भुतमिति; पश्चाच्च प्राकृतः स्वाभाविको यथा प्राग्जातस्तथैवाभूदिति ॥४६॥

भगवता प्रचोदित इत्यत्र व्यक्तोक्तिरेव तस्य; यथा श्रीहरिवंशे (विष्णु पु० ४।२४) 'अनुज्ञाप्य पितृत्वेन नन्दगोपगृहं नय। वसुदेववचः श्रुत्वा रूपं संहरदच्युतः ॥' इत्यस्यार्थः, संहरत् समहरत; किं कृत्वा? नन्दगोपगृहं नयेति पितृत्वेन पितृस्नेहेनानुज्ञाप्येत्यर्थः। सम्यगादाय कोमलवस्त्रास्तृतपेटिकायां सुखं निधाय ताञ्च शिरस्याधाय किंवा सावधानं शनैः शनैः कराभ्यामुत्थाप्य निजांके निधाय बाहुभ्यामाश्लिष्यन्निव गृहीत्वा सोऽनिर्वचनीयभाग्यवान्। ततश्च पादनिगडः स्वयमेव भ्रष्ट इति ज्ञेयम्। तर्हीत्यत्र विशेषः श्रीहरिवंशे (विष्णु-पु० २।३५)—'नवम्यामेव संजाता कृष्णपक्षस्य वै तिथौ' इति नन्दस्य जाययेति श्रीनन्दादीनां तया मोहनं सूचितम् ॥ ४७ ॥

प्रत्ययो ज्ञानम्, द्वाःस्था द्वारस्थिता रक्षिणो द्वारपालाश्च, तेषु; तथा च श्रीविष्णुपुराणे (५।३।१६)—'मोहिताश्चाभवंस्तत्र रक्षिणो योगनिद्रया। मथुराद्वारपालाश्च व्रजत्यानकदुन्दुभौ ॥' इति मोहनादिकं मायया एव योग्यमिति तथा तदुक्तम्; प्रकाशनन्तु श्रीभगवत एवेति तथैव तदाह—द्वारश्चेति। अथानन्तरं सद्य एवेत्यर्थः; एवमस्य पूर्व्वेणान्वयः। 'च' अपि, पिहिता मुद्रिता अपि; ताश्च कथमप्युद्घाटयितुं न शक्यन्त इत्याह बृहत्कपाटादिभिर्दुरत्ययाः; यद्वा, स्वभावत एव दुरत्यया अपि रक्षार्थस्थापितसिंहव्याघ्रादिव्याप्तत्वात्; किञ्च, बृहत्कपाटादिभिः पिहिता। कृष्णः परमानन्दघनमूर्त्तिस्तस्य वाहे वाहक इति वहनादिश्रमो निरस्तः। यद्वा, संसारबन्धमपि कर्षति हरतीति कृष्णस्तद्वाह इति। स्वयं द्वार्विकृतौ हेतुः। तमो यथोद्घाटितं स्यादिति दृष्टान्तेन तदागमनात् पूर्व्वमेव क्रमेण सम्यग्विवृतिर्ध्वनिता। पर्ज्जन्यो गर्ज्जन्मेघोऽतएवोपांशु मन्दं मन्दं गर्जितं यस्य सः। शेष इति समये निजसेवासिद्धये पार्षदप्रवरः श्रीमाननन्त एव—'शय्यासनपरिधानपादुकाच्छत्रचामरैः। किं नाभूत्तस्य देवस्य मूर्तिभेदैश्च मूर्तिषु ॥' इति ब्रह्माण्डवचनात्। अन्वगात् श्रीवसुदेवस्य पश्चादलक्षितं प्रत्यक्षं वागच्छत्; तथा च श्रीविष्णुपुराणे (५।३।१७)—'वर्षतां जलदानाञ्च तोयमत्युल्वणं निशि। संछाद्यानुययौ शेषः फणैरानकदुन्दुभिम् ॥' इति ॥ ४८-४९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

उपांशुगर्जितम् उपांशुत्वं पौराणामप्रबोधाय वारि वर्षजलम् ॥ ४९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, एवमपि कथमावयोर्मुक्तिः स्यादित्यत्राह—युवामिति। असकृत्पुत्रभावेनापि सकृदपि वा ब्रह्मभावेन परब्रह्मत्वेन मां स्मरन्तौ युवां कृता मयि निबद्धः स्नेहो ययोस्तौ परामुत्कृष्टां मद्गतिं यास्याथे ॥ ४५ ॥ इतीत्थमुक्त्वा हरिस्तूष्णीं बभूव ततः

पित्रोर्देवकीवसुदेवयोः संपश्यतोः सतोरेव सद्यः तदैव स्वाधीनमायया भगवान् षाड्गुण्यपूर्णः प्राकृतः मानुषशिशुः बभूव बालरूपो बभूवेत्यर्थः ॥ ४६ ॥ ततः शिशुभावनानन्तरं भगवता शिशुरूपेण प्रचोदित आदिष्टः स शौरिर्वसुदेवः तं सुतमादाय सूतिकागृहाद् बहिर्यदा गन्तुमियेष ऐच्छत् तदा तर्हि व्रजे नन्दस्य जायया यशोदया अजा प्रकृत्यभिमानिनी योगमाया शक्तिरजनि जनिता जनेः कर्मणि चिणः परस्य तच्छब्दस्य लुक् ॥ ४७ ॥ तदा तया योगमायया हृताः प्रत्ययाः बुद्धयः सर्ववृत्तयः तत् पूर्वकसर्वेन्द्रियव्यापाराश्च येषां तेषु अत एव सर्वेषु द्वास्थेषु द्वारपालेषु पौरेषु जनेषु च शायितेषु निद्रितेषु सत्सु अथ बृहन्ति कपाटेषु आयसानि अयोमयानि कीलानि परस्परबन्धकशङ्कुविशेषात्मकानि शृङ्खलाश्च च यासु ताः तृतीयान्तपाठे बृहद्भिः कपाटैरायसकीलैः शृङ्खलैश्च पिहिताश्छादिताः बृहत्कपाटेषु आयसकीलशृङ्खलैः पिहिता इति वा अत एव दुरत्यया दुरतिक्रमाः या द्वारः द्वाराणि ॥४८॥ ताः सर्वाः कृष्णवाहे कृष्णं वहतीति तथा अस्मिन् वसुदेवे आगते सति स्वयमेव व्यशीर्यन्त विवृता बभूवुः यथा रवौ सूर्ये उदिते सति तमोऽन्धकारो विशीर्यते तद्वत् रवेरिति पाठे रवेः सकाशात् तदा पर्जन्य उपांशुगर्जितः मन्दगर्जितः ववर्ष पौराणामप्रबोधार्थमिति भावः । शेषोऽनन्तः फणैर्वारि वर्षजलं निवारयन्नन्वगादनुययौ ॥ ४९ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यास्येथे गमिष्यथः ॥ ४५ ॥ प्राकृतवत् न तु प्राकृतः ॥ ४६ ॥ इयेष गन्तुमैच्छत् नन्दजायया नन्दजायायां तर्हि तदा ॥ ४७ ॥ योगमायया हृताः प्रत्ययानां ज्ञानहेतूनां इन्द्रियाणाम् सर्वा वृत्तयो येषु ते तथा तेषु निद्रया मुग्धेष्वित्यर्थः । चशब्दात्पौरेषु निद्रां यापितेषु प्रापितेषु सत्सु मन्त्रौषधादिभिर्दुरत्ययाः सर्वा द्वारश्च बृहत्कपाटायसकीलशृङ्खलैः पिहिताः बृहद्भिः कपाटैः अयोमयैः अर्गलैः शृङ्खलैश्च ॥ ४८ ॥ कृष्णवाहे कृष्णं बिभ्राणे ताः कपाटद्वारः व्यशीर्यन्त विवृताः यथा तमः रवेरुदये उपांशु रहसि अन्वगात् पृष्ठत अयासीत् फणाशब्दः उभयलिङ्गः "फणाद्वयोः" इत्यमरः ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यास्यथः ॥ ४५-५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

किन्तु नारायणरूपं दर्शितमिति भवद्भ्यां मयि ब्रह्मभावो न कार्य्यः, पुत्रभाव एव कार्य इत्याह युवां मामित्यादि । असकृत् सकृद् वा, 'च'कारो वार्थः । पुत्रभावेन कृतस्नेहौ सन्तौ मां चिन्तयन्तौ । ब्रह्मभावे सति परां परात्परां मद्गतिं मल्लोकाख्यां न यास्येथे । ब्रह्मभावे कैवल्यमेव भवति, न तु मल्लोकप्राप्तिः । येन पूर्वमपवर्गं न वव्राथे, तेनैवाधुनापि पुत्रभावमेव कुरुतम् । अथो नित्यतयैव मयि वात्सल्यवन्तौ भविष्यथ इति भावः ॥ ४५ ॥

अथ कथं सुतपःपृश्न्योः कश्यपादित्योर्वा परिपूर्णभावेन भगवान् पुत्रो नाभूत् ? सत्यम् , भगवदवतारसम्बन्धादेव जन्मद्वयेन पूर्णावतारावस्थानयोग्यतामापन्नौ तौ । यतः (भा० ९।२४।३०) वसुदेवं हरेः स्थानं वदन्ति" इत्युक्तिः, (भा० ४।३।२३) "सत्त्वं विशुद्धं वसुदेवसंज्ञितम्" इति शुद्धसत्त्वता च, इति स्वयमेव तद्रूपमुपसंजिहीर्षुर्मात्रापि तथैवोक्तश्च प्रकृतं स्वकीयरूपं प्रादुर्भावयामासेत्याह इत्युक्तासीदित्यादि । भगवान् श्रीकृष्ण आत्ममायया आत्मन ऐच्छिकया प्रकाशिकया मायया संपश्यतोरेव पित्रोः प्राकृतो बभूव । प्रकृत एव प्राकृतः बान्धवादित्वादण् । कीदृशः शिशुः ? शिशुरिति प्रतीतिकृतत्वात् शिशुरित्युपचारः । अविकारित्वाद्भक्तवासनानुरूपं प्रकाश एवासौ, न तु विकृतिः । तथाविध शक्तिमत्त्वं हि ऐश्वर्यम् ; उक्तं हि - 'जुष्टं भगैः स्वैरितरत्र चाध्रुवैः' इत्यादौ भगैरणिमादिभिः । तत्तज्जुष्टता च न विकृतिरपि त्वैश्वर्यविशेष एव ॥ ४६ ॥

अथ (भा० १०।२।९) "अथाहमंशभागेन देवक्याः पुत्रतां शुभे" इत्यादौ व्याख्यातं व्यत्ययार्थः सत्यीकर्तुं नन्दपुत्रतां प्रेप्सुस्तद्भगवान् प्रापणार्थमादिष्टेन पित्रा तत्रैव नीत इति प्रस्तवन्नाह—ततश्च शौरिरित्यादि । भगवत्प्रचोदितो भगवता चतुर्भुजाकारेण पूर्वं प्रेरितः, पश्चात् शिशुर्यदाभूत् , तदा जननीस्तनपानानन्तरं नन्दभवनं प्रापयितुं समादाय बहिर्गन्तुमियेषेति । भगवत्प्रचोदित इति भगवच्छब्दस्य सुतं समादायेति 'सुत' शब्दस्य च वैयधिकरण्येन निर्देशः । यदा बहिर्गन्तुमियेष तदैव लौहनिगडकपाटकूटोद्घाटनादिकार्याय (भा० १०।१।२५) "कार्य्यार्थे संभविष्यति" इत्युपक्रान्तावतारहेतुर्योगमाया नन्दजायायामजनिष्ट, तदैवतत्प्रादुर्भावसमये लौहनिगडादिभङ्गस्तत्प्रभावेणैवाभूत् । भगवत इच्छाशक्तिः सैवेति तस्या एव तत्तत्कार्य्यहेतुत्वाद्भगवानपि तामपेक्ष्य पृथगिच्छाविलासं प्रकटितवानिति यदातदाशब्दयोरर्थः ॥ ४७-४८ ॥

अथ भगवद्विजयसमये मेघा 'जय' शब्दं चक्रुरित्याह—ववर्ष पर्जन्य इत्यादि । उपांशुगर्जितत्वं कंसभयेनैव, 'जय कृष्ण, जय कृष्ण', इति गर्जनं बोद्धव्यम् । ववर्षेति आनन्दाश्रुक्षरणं शेषसौभाग्यप्रकटनार्थम् । अन्यथा शेषस्य छत्रता न स्यात् । यद्यपि वर्षातपवारणादिसेवागरुडस्यैव, तथापि शेषेनाग्रजत्वापराधक्षमापनार्थं हठात् परसेवा गृहीता । अन्वगादिति पश्चाद्गमनं छत्रधारिणः पार्श्वस्थत्वसम्भवेऽपि वसुदेवसङ्कोचव्यापनार्थम् ॥ ४९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

युवामित्यादि । पुत्रभावेन कृतस्नेहौ असकृद्वा सकृद्वा इति वा शब्दस्यार्थः । ब्रह्मभावे सति न परां गतिं मल्लोकं श्रीवृन्दावनम् , ब्रह्मभावे सति मोक्षमेव ॥ ४५ ॥

सुतस्नेहस्वभावाद्बभूव प्राकृतः शिशुरिति—प्रकृत एव प्राकृतः 'बान्धवादित्वात् स्वार्थेऽण्', प्राकृतत्वं तु द्विभुजत्वम् , तथा च (भा० ६।८।२०) "गोविन्द आसङ्गव आत्तवेणुः" इति वेणुपाणित्वाद् द्विभुजत्वमेव प्राक्सिद्धम् , प्रागेव तथा व्याख्यातम् । किञ्च (भा० ३।१५।४०) वल्गु प्रकोष्ठवलयं विनतासुतांसे, विन्यस्तहस्तमितरेण धुनानमब्जम्" इति तृतीयोक्तेस्तथैव व्याख्यानात् । प्रकृतः सन् शिशुर्बभूव शिशुरिति प्रतीतिकृत् , नत्वविकृतस्याखण्डकिशोरस्य शिशुत्वादि विकृतिः । ननु तर्हि किमेतत् , यतः स्तनन्धयाकारत्वेन प्राकट्यम् ? सत्यम् , आत्ममायया आत्मसु भक्तेषु या मा शोभा तस्याः या प्राप्तिः, 'या प्रापणे क्विप्' तया येषु येषु भक्तेषु यथा शोभते तत्तदिच्छानुरूपत्वात् मातृरूपस्य भक्तस्य तथाविधेच्छया तथाविधं प्राकट्यं यथा चक्षुषोर्विप्रकृष्टत्वोपाधिकं ध्रुवादेर्ज्योतिषस्तथाविधसूक्ष्मत्वम् , न हि वस्तुतस्तत् सूक्ष्ममेव निकटवर्तिनां तु प्रकृतमेव तत् तथा भक्तेच्छोपाधिकमेव प्रकृतस्य किशोरस्य स्तोकाकारत्वम् , न तु विकृतिस्तस्यापीतिस्तोकाकारत्वमेव शिशुत्वम् , न तु ज्ञानादिसङ्कोचवत् चेत्तर्हि तस्यैव भक्तस्य समयान्तरे कथं किशोरत्वादि स्फूर्तिरिति को विशेषः । अत एव भक्तेच्छोपात्तविग्रह इति भक्तेच्छायामुपात्तो विविधो ग्रहो येनेति तत्र तत्र व्याख्या । वस्तुतस्तु नित्यकैशोर एवायम् , तथा च (भा० ३।२८।१७) "सन्तं वयसि कैशोरे" इति नित्यप्रवृत्ते वर्तमाने शतृङ् वस्तुतस्त्विदमत्र रहस्यम् —श्रीकृष्णविग्रहो हि ज्ञानमयः भक्तेच्छानाञ्च ज्ञानान्तर्भावात् ते यदा यद् यद् ज्ञानं कुर्वन्ति तत्तदेव तत्र तत्र प्रतिफलतीति, सर्वस्यैव ज्ञानस्य तत्र तत्र विद्यमानत्वान्न विकृतिः । ननु तर्हि नित्यलीलत्वं कथमास्ताम् ? सत्यमेतत् नित्यलीलत्वं नाम किं तदेव विचार्यताम्—नित्या लीला नाम शक्तिर्यस्य स तथा, लीला तस्य श्रीरिव काचिन्मूर्तिमती शक्तिः (सीतोप० ८) श्रीभूर्लीला इत्यन्यत्र लिखितत्वात् , सा तु श्रीरिव नित्या, तस्यास्तु नानाविधा एव प्रपञ्चाः, पुरुमहिमत्वात् । तस्या नित्यत्वे तत्प्रपञ्चानामपि नित्यत्वेऽपि सर्वा एव लीला नित्यसिद्धा एव, किन्तु भक्तेच्छया कालवशादाविर्भावतिरोभावौ तासामिति रहस्यम् । अथ (४२ श-श्लो०) "तयोर्वां पुनरेवाहमदित्यामास कश्यपात्" इति यदुक्तम् , तत्र द्वितीये भवे सुतपःपृश्न्योरेव कश्यपादितित्वमासीत् । "तृतीयेऽस्मिन्' इति तयोस्तत्तद्रूपेण वर्त्तमानयोः कथं वसुदेव-देवकीरूपेण पुनराविर्भावः सङ्गच्छताम् ? सत्यम् , तयोः शुद्धसत्वांशावेव पृथग्भूय वसुदेव-देवकीरूपेणावतीर्णाविति मन्तव्यम् । अतः उक्तम् (भा० ४-३-२३) "सत्त्वं विशुद्धं वसुदेवशब्दितम्" इति वसुदेव-शब्द उपलक्षणः, देवकी चेति बोद्धव्यम् , सत्त्वं विशुद्धमिति कश्यपादित्योरिति तात्पर्यंलभ्यम् ॥ ४६ ॥

ततश्चेत्यादि । भगवता तेनैव 'मां नन्दगृहं प्रापय, मच्छक्तिर्योगमायाऽवतीर्णा, सा तेऽपत्यं भविष्यति, अहं यशोदाया अपत्यं भविष्यामि, अतो मां यशोदायां न्यस्य तामानय' इति प्रकारेण प्रचोदितः प्रेरितः । सुतं भगवन्तमादाय शौरिर्यदा बहिर्गन्तुमियेष, तदैव योगमाया नन्दजायया अजनि, यतः (भा० १०।१।२५) "कार्यार्थे संभविष्यति इति तत्क्षण एव सर्वेषामिन्द्रियवृत्तिलोप-कपाटकुटोद्घाटनादि कार्यमापत्तितम् । अतो मध्यरात्रे अष्टम्यां भगवदाविर्भावः तदनन्तरमविलम्बत एव नवम्यां योगमायाविर्भावः, एवम्विध एव योगो हि दुर्लभः प्रियभक्तानाम् ॥ ४७–४८ ॥

ववर्ष पर्जन्य इत्यादि । उपांशुत्वं कंसभिया, कुतो मेघानां गर्जितैः कंसभयमित्याशङ्कायां गर्जितान्यत्र जय कृष्ण जय कृष्णेति स्तवनपराणीति ज्ञेयम् । वर्षणन्तु तेषामेवानन्दाश्रूणामिति शेषसौभाग्यार्थं च तथा सति तस्य छत्रसौभाग्यं भवति, लोकप्रचाराभावार्थञ्च । शेषोऽन्वगादित्यादि । यद्यपि वर्षातपवारणत्वेन गरुडस्यैवेयं सेवा तथापि शेषस्याग्रजत्वापराधसङ्कोचेन तदपजिहीर्षया हठेन परसेवाग्रहणम् ॥ ४९–५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीनाथचक्रवर्तिपादविरचितायां मञ्जूषाटीकायां
तृतीयोऽध्यायः समाप्तः एवं चतुर्थोऽपि समाप्तः ॥ ३–४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवं स्वपितृत्वात् स्वमन्त्रोपासनापटलोक्तवसुदेवादिध्यानपूजादीनां सार्वकालिकत्वप्रदर्शनादप्यन्यथानुपपत्तिसिद्धं तयोर्नित्यसिद्धत्वं सङ्गोप्य प्रेमवर्द्धनार्थं साधकत्वमेव ख्यापयन् सिद्धिं प्रतिश्रुत्य तावानन्दयति–युवामिति । वस्तुतश्चायमर्थः मम प्रथमा गतिरद्यतनी गोकुलं प्रतियास्वेकादशे वर्षे मथुरां प्रति पुनर्भाविनी तां परां मद्गतिं युवां यास्येथे यास्यथः प्राप्स्यथ इत्यर्थः साम्प्रतं तु मया सह युवयोर्विच्छेद एव भवतीत्यर्थः ॥ ४५ ॥ आत्ममायया "आत्ममायातदिच्छास्याद्गुणमायाजडात्मिका" इति महासंहितावचनादात्मेच्छया प्राकृतः प्रकृतिश्च स्वरूपं च स्वभावश्चेति पर्यायात् प्रकृतिसिद्धमिदं हि महात्मनामिति शिष्टप्रयोगाच्च स्वभावसिद्धः इत्येवार्थः । अर्थान्तरस्य "न चान्तर्नबहिर्यस्य" इत्यारभ्य "बबन्ध प्राकृतं यथा" इति अग्रिमवाक्ये दार्ष्टांतिकदृष्टान्ताभ्यां निरसनीयत्वात् ॥ ४६ ॥ भगवता प्रचोदितः यदि बिभेषि तर्हि मां गोकुलं नय यशोदायाश्च तां कन्यां मन्मायामान-

चेत्यादिष्टः स वसुदेवः स्वपादनिगडं स्वयमेव स्रस्तं वीक्ष्य यदा गन्तुमैच्छेत् तदा सा नन्दजायया निमित्तभूतया अजनि जाता किञ्च—

"गर्भकाले त्वसम्पूर्णे अष्टमे मासि ते स्त्रियौ । देवकी च यशोदा च सुषुवाते समं तदा ॥

इति हरिवंशवाक्ये समं सह समकालमेव सुषुवात इति तत्रार्थावगमादत्र तु देवकीप्रसवोत्तरकाल एव यशोदाप्रसवदर्शनादुभयोरेव शास्त्रवाक्ययोरतिप्रामाण्यादेवमवसीयते यदैव देवकी कृष्णं सुषुवे तदैव यशोदाऽपि कृष्णं सुषेवे तदनन्तरसमये योगमायां च सुषुवे इति कालभेदेन तस्याद्विः प्रसव एवेत्यत एव "अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा" इति वक्ष्यते किञ्च यशोदाप्रसूतस्य कृष्णस्य चतुर्भुजत्वाद्यनुक्तेर्नराकृतिपरब्रह्मत्वाच्च द्विभुजत्वमेव बुद्ध्यत इति ॥ ४७ ॥ तया योगमायया हृताः प्रत्ययस्य ज्ञानस्य सर्ववृत्तयो येषां तेषु द्वास्थेषु द्वारपालेषु शायितेषु सत्स्विति ज्ञानहरणं योगमायांशभूतायाः मायायाः कार्य्यं याः द्वारः पिहिताः ताः व्यवर्य्यन्त विवृता इत्यर्थः । बृहत्कवाटगतैरायसकीलश्रृङ्खलैर्दुरत्ययाः दुरतिक्रमाः रवेर्निमित्तात् उपांशु मन्दमन्दङ्गर्जितं यस्य सः फणैश्छत्रीकृतैरित्यर्थः । शय्यासनपरीधानपादुकाच्छत्रचामरैः "किन्नाभूस्तस्य कृष्णस्य मूर्त्तिभेदैश्च मूर्तिषु" इति ब्रह्माण्डपुराणात् ॥ ४८–४९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

परां मद्गतिं तमसः परां मद्विभूतिं यास्येथे ॥ ४५ ॥ आत्ममायया स्वेच्छया शिशुः द्विभुजो बाल बभूव कथंभूतः प्राकृतः स्वाभाविकः ॥ ४६ ॥ भगवत्प्रचोदित इत्यनेन मां यशोदासमीपे स्थापय तत्कन्यामिहानयेति पूर्वमेव भगवता ऽऽज्ञप्त इति गम्यते या योगमायाऽऽख्या अजा भगवच्छक्तिर्नन्दजायया निमित्तभूतया अजनि जाता ४७ ॥ हृताः प्रत्ययाः येषां सर्वे वासुदेवे अन्तर्यामिणि वृत्तयो येषां ते च ते च ते तेषु ॥ ४८ ॥ व्यवर्य्यन्त गुणाश्छान्दसः व्यवृयन्त ॥ ४९ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

युवामिति । अत्र पुत्रभावेन चिंतयतो भगवद्गतिप्राप्तिरुक्ता । तन्न युज्यते । ममताज्ञानयोः सद्भावेन विरुद्धत्वादर्थांतरं । उपमायां विकल्पे वेत्यमरोक्त्या वा शब्दस्योपमार्थकत्वात् । सर्वथस्तुतः पुत्रस्याधिकप्रेमास्पदत्वात्पुत्रभावेनेव ब्रह्मभावेनासकृन्मां चिंतयंतौ युवां परां मद्गतिं यास्येथे गमिष्यतः । चिंतनमपि द्वेषभक्तिभ्यामसकृद्भवति । तत्र द्वेषाद्दैत्यानामिव मद्गतिप्राप्तिरिति सूचयितुं कृतस्नेहावित्युक्तं । अतो न कश्चिद्विरोधः ॥ ४६ ॥ पित्रोरिति । अत्र प्राकृत इत्युक्तस्य पुरुषः प्रकृतेः पर इत्यनेन विरोधोऽतोऽर्थांतरं । प्राच इव पूर्वबालमुकुंदवत् कृतं शयनकर्म यस्य तादृशः शिशुर्बालो बभूवेत्यर्थः । अथवा । अत्रोपमालोपेन प्राकृतवदित्यर्थः । अतो न विरोधः ॥ ४७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पुत्रभावेन पुत्रत्वेन ब्रह्मभावेन नारायणत्वेन च । असकृच्चिन्तयन्तौ कृतस्नेहौ कृतभक्ती परां मद्भक्तिं यास्येथे ॥ ४५ ॥ हरिरित्युक्त्वा देवकीवसुदेवौ प्रति तूष्णीमासीद्भगवान् तथाऽऽसीनश्चात्ममायया स्वेच्छया पित्रोः । पिता मात्रेत्येकशेषः । मातापित्रोः सम्पश्यतोः सम्पश्यतीः च सम्पश्यंश्च । पुमांस्त्रियेत्येकशेषः । सद्यः प्राकृतः शिशुस्तद्वद्बभूव ॥ ४६ ॥ ततः सुतशिशुभवनानन्तरं भगवत्प्रचोदितो यदि कंसाद्बिभेषि त्वं तर्हि मां गोकुलं नय । मन्मायामानयाशु त्वं यशोदागर्भसम्भवामिति क्वचित् श्लोको दृश्यते तथाऽपि न सार्वत्रिकः । अन्तः प्रेरितः स शौरिः सूतिकागृहात्प्रसवनिवासात्सुतं समादाय यदा बहिर्गन्तुमियेषैच्छत्तर्हि तदा नन्दजायया निमित्तभूतयेति वा । तृतीया सप्तम्यर्थे । नन्दजायायां या योगमायाऽजा चित्प्रकृती रमाऽजनि जाता । ननु स्वस्य खलश्रृङ्खलाबन्धोऽन्धकारश्च बहिर्न हि न तद्धटकूटघटिततेति न हि । न च कीलाः किलद्वारः किं द्वारा सत्येवं वसुदेवो देवमन्यत्र नेतुमैच्छदित्यतः सर्वानुपपत्तिविच्छित्तकं हेतुमाह ॥ तयेत्यादिना । तयाऽपहृताः प्रत्ययो ज्ञानं च सर्वा वृत्तयश्चेष्टा येषां ते सर्वेन्द्रियवृत्तयो वा येषां तयाऽऽहृतः प्रापितः प्रत्ययो विश्वासो येषु सर्वेन्द्रियेषु तेषां वृत्तिर्व्यापारो येषु तेष्विति वा पश्यत्स्वप्यनिवारयत्स्विति तात्पर्यम् । द्वाःस्थेषु द्वारपालेषु पौरेषु च यापितेषु । एतद्वृत्तिमिति वा निद्रामिति वा शेषः । पौरयापनसुपनयनसमयप्रश्नार्थम् । सर्वद्वारः पिहिता बृहत्त्वं कपाटादित्रिके ज्ञेयम् । बृहन्ति च तानि कपाटाभ्यतराणि बृहन्त्यायसान्ययोविकृतानि कीलानि । शङ्कौ ज्वाले तु कीलवदिति विश्वः । शङ्कुविशेषा बृहन्ति श्रृङ्खलान्यन्दुकानि च तैर्दुरत्यया अत्येतुमशक्याः । तुस्तु मन्त्रौषधादिभिरत्येतुमशक्यत्वविशेषसूचकाः ॥ ४७—४८ ॥ कृष्णं वहन्तीति कृष्णं बिभ्राणे वसुदेवे आगते स्वाः पतिताः कपाटघटिताः स्वयं व्यशीर्यन्त शीर्णा विवृता इति यावत् । रवेः सकाशाद्रवेरुदये वा यथा तमस्तथा उपांशु मन्दं यथा गर्जितं भावे क्तः । गर्जनं यस्य स पर्जन्यो मेघो ववर्ष मन्दगर्जनान्मन्दं ववर्षेति ध्वन्यते । अन्यथा रसाभासेन देवकोपास्पदता स्यादिति ज्ञेयम् । इदमपि तस्य तदङ्गुच्छविसदृशतायातसन्तोषेणेत ज्ञेयम् । शेषः फणैः फणा द्वयोरित्यमरात्स्वशिरोभिर्वारि मन्दं पतदुदकं निवारयन्भूस्पर्शतः प्रागस्पृश्यत्वात् । मदनन्तरमयमनन्तो जातो न सेवा ममैतर्हीदमपदेशेनेयते सा घटतामित्येवमाटीकत शेष इति ध्वनिः । अन्वगाद्वसुदेवमनुसस्यागात् ॥ ४९ ॥

श्रीसुबोधिनी

अधुना तु अप्रार्थितेऽप्यपवर्गं मुक्तिर्भविष्यतीत्याह युवामिति, प्रमेयबलस्य प्रकटीकृतत्वाच्छास्त्रस्य गौणत्वादविहितस्नेहेन पुत्रभावेन विहितस्नेहेन ब्रह्मभावेन वा विषयस्य तुल्यत्वात् प्रकारस्याप्रयोजकत्वाद् यथाकथञ्चिन्मयि कृतस्नेहौ परां मद्गतिमपि वैकुण्ठाख्यां यास्यथे 'माहात्म्यज्ञानपूर्वकसुदृढसर्वतोधिकस्नेह'स्य तुल्यत्वात्, अत एव भगवान् गोपिकादीनामपि माहात्म्यज्ञानमुत्पादयिष्यति, अन्यथा बोधांशोधिकः स्यात्, भक्तानां प्रपञ्चाभावस्य निरोधत्वात्, अत एव पूर्वस्कन्धे उत्पत्तिनिरूपणेन स्वरूपत एव भक्ता निरूपिताः, प्रेमज्ञानं निरोधश्च यथैव भवति तदत्रैव वक्ष्यते, आर्थिकमत्र नोच्यत इति 'मां गोकुले नय तत्र स्थापयित्वा तत्रत्यां कन्यामत्रानये'ति मुखतो नोक्तं, एतदुक्त्वैव पश्चात् तूष्णीं जात इति ज्ञातव्यं, एभिर्वचनैर्भगवता वसुदेवदेवक्योः स्वावतारात् पूर्वं तदनन्तरं च दुःखप्राप्तौ हेतुरपि निरूपित इतिज्ञेयं, तथा हि 'भक्तः कामानभीप्सन्ता' वितिवाक्यात् तदर्थमेव भगवदाराधनं पूर्वं कृतं न तु भगवदर्थं, तस्य चानिष्फलत्वाद्धर्याविर्भावे सौन्दर्यं दृष्ट्वा तादृशः सुतो वृतो न तु स्नेहेनार्थो प्रभुप्राकट्यं वृतं, अत एव 'वरं मत्सदृश मित्यादिना स्वप्राप्त्यनन्तरमपि 'ग्राम्यभोग'भोजनमेवोक्तं, एवं सति स्वसाम्यमन्यत्रादृष्ट्वा स्वस्यैव तथाविर्भावने प्रभोर्निर्बन्धोभूत्, मुक्तानामपि दुरापस्य स्वरूपस्याल्पार्थे प्रकटीकरणमापतितं यतः, 'अदृष्ट्वान्यतम'मितिवाक्येनायमेर्थो ज्ञापितः प्रभुणा, अतोधुना प्रभुप्राकट्यनिमित्तकः कंसकृतो निर्बन्धोभूत्, पुत्रत्वे निर्बन्धात् कीर्तिमदादिपुत्रनाशोपि, साम्ये निर्बन्धाद् गुणस्तत्सम्भवाद् गुणसमसङ्ख्यानां तेषां तथा, मर्यादारक्षायै तद्दण्ड इवायं प्रभुणा सम्पादितः, अद्भुतकर्मत्वाद् भगवत एतयोः स क्लेशः स्नेहातिशयहेतुरभूत्, क्लेशेन प्राप्तेर्थे तस्यावश्यकत्वात्,

आविर्भावे पुत्रतया साधनं तु तपोभवत् । अग्रे लीलारसप्राप्तौ साधनं मृग्यमेव हि ॥ १ ॥
भक्तिमार्गीयमित्यात्मवियोगमकरोद्धरिः । तदा तु स्वत एवासीद् भगवद्भावसन्ततिः ॥ २ ॥
एतावन्ति दिनान्यासन्नेवं कुर्वन् भविष्यति । एतावन्मासिकश्चासीदेवमेवं करिष्यति ॥ ३ ॥
एतावद्वार्षिकश्चासीत् तेन चैवंविधाः शुभाः । लीलाः कुर्वन् साग्रजः श्रीप्रभुस्तत्र भविष्यति ॥ ४ ॥
कुशल्यास्ते साग्रजो नु कदा द्रक्ष्यामि तादृशम् । एवंविधानन्तभावैरत्यार्त्यौ दर्शने तयोः ॥ ५ ॥
मिथस्तथालापतश्च सर्वथेन्द्रियवृत्तयः । सर्वा हरिपरा आसन् स एव सततं हृदि ॥ ६ ॥
वियोगतापतोभूत् तेनासां जीवनं तयोः । तेनैकादश वर्षाणि तथा कुर्वन् हरिर्बभौ ॥ ७ ॥
'युवां मा'मितिवाक्येन चेममेव वरं ददौ । अन्यथैतादृशो भावो न भवत्येव कुत्रचित् ॥ ८ ॥
अतो माहात्म्यधीयुक्तस्नेहोभवदिति प्रभुम् । चिरात् प्राप्यापि पितरौ सस्वजाते न शङ्कितौ ॥ ९ ॥

एवमुक्त्वा रूपान्तरस्वीकरणं कृतवानित्याहेत्युक्त्वासीदिति, तूष्णींभावोनुक्तसिद्धोपि रूपवज् ज्ञानस्यापि तिरोभावप्रतिपादनार्थः, यथा रूपं प्राकृतं स्वीकृतवानेवं प्राकृतमेव ज्ञानं स्वीकृतवानिति, तथा सति रूपान्तरस्वीकरणं सम्यगुपपद्येत, नन्वेवं स्वविरुद्धधर्मं कथं स्वीकृतवानित्याह हरिरिति, यतः स सर्वदुःखहर्ता, स्वरूपमप्यन्यथा करिष्यतीत्याशङ्क्याह भगवानिति, रूपज्ञानकार्ययोरपि तदा प्राकट्यं न स्यादित्याशङ्क्याहात्ममाययेति, स्वस्यैव सर्वभवनसामर्थ्येन तथा कृतवान्, ततः स्वेच्छया यदा तत्कार्यमायास्यतीति गीतोपदेशने भीष्ममुक्तौ च तथैव तदा प्रकटीभविष्यति, अन्यदा तु मातृप्रार्थनया रूपान्तरमेव प्रदर्शयिष्यतीतिभावः, यदैव तूष्णीं स्थितस्तदैव सद्यस्तत्क्षणमेव प्राकृतः शिशुर्बभूवाच्छिन्ननालोवस्थितः, नटानां रूपान्तरस्वीकारे दिदृक्षूणां परोक्षतापेक्ष्यतेत्र तु तन्नापेक्ष्यत इत्याह पित्रोः सम्पश्यतोरिति, लौकिकज्ञाननैपुण्यं मातुः परमार्थज्ञाननैपुण्यं पितुः, उभयमपि विद्यमानमेव न भगवत्सामर्थ्यस्य प्रतिबन्धकम् ॥ ४६ ॥

एवं स्वीकृत्य रूपान्तरं तत्र स्थितौ प्रयोजनाभावात् स्वयं गमने रूपान्तरस्वीकारवैयर्थ्यात् तस्य चाज्ञानात् सर्वसमाधानार्थं ते बोधयित्वा तद्द्वारा स्वयं गोकुले गतवानित्याह ततश्चेति, प्राकृतभावानन्तरं शौरिश्चकारादाज्ञापनानन्तरं च सुतं भगवन्तं समादाय सम्यग् गृहीत्वोत्तमपात्रे वस्त्रं च प्रसार्य तदुपरि स्थापयित्वा स सूतिकागृहाद् यदा बहिर्गन्तुमियेष तर्हि तस्मिन् समये नन्दजायया योगमायाजनि जनिता, शौरिरिति गमने भयाभावः, स इति भगवद्वाक्ये विश्वासः, सुतमिति, तस्यापि पुत्रत्वबुद्धिः प्राकृतेव जातेति ज्ञापितं, सूतिकागृहादिति, प्रसवधर्मास्तत्रापि गृहे आविर्भूताः, देवक्या अपि सूतिकात्वं जातं, साधारणमोहस्य निवर्तकं साधारणं ज्ञानमिति गमनस्वाच्छन्द्यं कपाटोद्घाटनं च, आत्मन इव देहस्यापि विस्मरणं यथा भवति तदर्थं तस्मिन्नेव समये योगमाया जाता, भगवत्समानकाले चेज् जाता भवेत् तदा देवकीवसुदेवयोरपि प्रस्वापः स्यात्, अनेन मुहूर्तानन्तरं सा जातेति ज्ञायते, नवम्यां च सा जाता, रोहिणी तु तुल्या, अतो रोहिण्याः कृत्तिकावेधो न दोषाय, सप्तमीवेधस्तु दोषायैव, पुत्रोत्सवादिकं शुद्धनवम्यामेव जातमिति शुद्धाष्टनवम्यप्युपोष्या, अन्तःस्थिते भगवति मायोद्गमो न भवतीति यदैव बहिर्गन्तुमियेष तर्ह्येव जातेत्युक्तं, सा हि योगार्थमेव माया, भगवतः कार्योपायार्थमेव लोकान् व्यामोहयतीति, मायायाः स्वतन्त्रज्ञानपक्षं व्यावर्तयितुं नन्दजायया जनितेत्युक्तं, न तु भगवानिव सा स्वत आविर्भूतेति ॥ ४७ ॥

तस्याः कार्यमाह तयेति, तया मायया **हृताः प्रत्ययानां सर्ववृत्तयो** येषु जाग्रत्स्वापयोः प्रत्ययानां ज्ञानानां वृत्तयः संशयादय उत्पद्यन्ते; मायामोहितास्तु **मूर्च्छिता** एव जाताः, जगति तस्यामुत्पन्नायां तत्प्रभावः, यशोदादयस्तु मुग्धा एव गोकुलवासिनश्च, ततः क्रमेण मथुरायां **द्वास्थास्ततः पौराः**, न केवलं पूर्ववद् बुद्धिरेव गृहीता किन्तु निद्रयातिरिक्तबुद्धिरपि सम्पादिता, यथा भूयान् कालो लोकान्तरं गतानामिव मुग्धतया गच्छति तथानुशायितेषु सुषुप्तिं प्रापितेषु सत्सु, इयं हि मायैतावत्कार्यमेव कृतवती, अन्यत् त्वन्यथा जातमिति वदन् प्रक्रमान्तरमाहाथेति, पूर्वं तैरेव द्वारपालकैः **सर्वा एव द्वारो बृहत्कपाटायसकीलशृङ्खलैः पिहिताः** स्वभावतोपि **दुरत्यया**—

गजा व्याघ्राः क्वचित् सिंहा विषमाश्चैव भूमयः । दिवसेपि गतौ नित्यं सर्वथा भयहेतवः ॥ १ ॥

येषु द्वारेषु, गमनमात्रेपि साधारणानां बन्धो भवति, तत्रापि पिहिताः, **बृहन्ति कपाटानि** यत्र, **आयसाः कीलाः शृङ्खलाश्च** यासु, **कीलसहिता वा शृङ्खला** यासु, कुञ्चिकयैवोद्घाटयितुं शक्याः, कुञ्चिकापि विषमा, एतादृशा अपि **कृष्णवाहे वसुदेवे समागते स्वयमेव व्यवर्यन्त** विशीर्णा जाताः, स्वयमेवोद्घाटितकपाटा जाताः, भगवतः सर्वमोक्षदातृत्वात् कपाटानामप्यचेतनानामतितामसैर्बद्धानां मुक्तिः प्रदर्शिता, अनेनान्येषां मुक्तिर्व्याख्याता, यदि शुद्धसत्त्वं भगवद्वाहकं चेद् भवति, एतत्प्रदर्शनार्थमेव **कृष्णवाहे वसुदेव** इत्युक्तं, अयमेवोपाय इति ज्ञापयितुं दृष्टान्तमाह **यथा तमो रवे**रिति, उपायसहस्रेणापि सर्वं तमो न गच्छति, उदिते तु सूर्ये स्वत एव गच्छति, तथा शुद्धसत्त्वे भगवत्सहिते सत्येव सर्वाविद्यानाशः, सर्वासाध्यानां स्वत एव सिद्धिर्नान्यथेति निरूपितं, अन्तर्द्वारेषु निर्गतेषु मायायाः प्रवेश उभयोः साम्मुख्ये यदासीत् तदाह **ववर्ष**ेति, वृष्टिरपि सर्वेषामनुत्थाने हेतुः, उपांशुर्गर्जितं चानुत्थाने शब्दान्तरप्रतिबन्धे च, अधिकगर्जने तेनैव प्रबोधः, एतावन्मायाकार्यं साधारण्येन प्रवृत्तं वसुदेवस्यापि खेदहेतुर्भवति, अतस्तन्निवारणार्थं **शेषोन्वगात्**, पातालात् समागत्य **फणैः** पर्जन्यवारि **निवारयन्नन्वगात्**, पश्चाद्भागेन गतवान्, भगवत्सम्बन्धात् तत्कृतं तु भयं न भवति, अन्तरिक्षे निवारयन् गच्छतीत्येके, **फणै**रितिपदादन्वगादिति च पश्चादेव छत्रधारीव गच्छतीति ज्ञायते ॥ ४८–४९ ॥

इदं श्रीमत्कल्याणरायाणाम्

टिप्पण्याम् अचेतनकपाटादिबन्धनिवृत्तौ च वसुदेवागमनस्यैव हेतुत्वम्, न तु साक्षाद्भगवतः, वृष्टिभयाद् वस्त्रपिहितत्वात् परं वसुदेवस्य तथा सामर्थ्ये कृष्णवाहत्वं हेतुरिति ज्ञापयितुं तथा विशेषणम् । अत एव भगवद्रहितस्य तस्यागमने पुनर्मुक्तानां बन्धो भविष्यति । न हि साक्षाद्भगवद्विमुक्तानां पुनर्बन्धो भवितुमर्हति । एवं सति रवेर्दृष्टान्तत्वमुपपद्यते, यतो रवावपि भगवद्रूपमदृश्यमस्तीति ततस्तमोनिवृत्तिः, पुनरागतिश्च दृश्यते । तथा च कौमुतिकन्यायेन उभयत्र भगवन्माहात्म्यमेवेति भावः । निरूपितमित्यनन्तरं **प्रभूणां स्वतन्त्रः** ॥ ४९ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

युवां मामित्यत्र यदि भक्त्यङ्गत्वेन ज्ञानं नोच्येत किन्तु स्वातन्त्र्येण तदा यथाकथञ्चित् स्नेहमात्रेण निरोधपदार्थसिद्धेरस्मिन् स्कन्धे ज्ञानमुच्यमानमेतदर्थासङ्गत्यात्र प्रवेशमलभमानं वाक्यभेदापादकं भवेदित्याहुरन्यथा **बोधांश** इत्यादि ॥ ४५ ॥

इत्युक्त्वासीद्धरिस्तूष्णीमित्यत्रात्मपदेनेदमाकूतं, यथात्माविकृतो नित्यः शुद्धः सद्रूपस्तथेयं **माया**प्युक्तगुणविशिष्टा, अत एव तादृशगुणविशिष्टलीलायाः प्रत्यायिका नासत्पदार्थस्य, संसारहेतुभूता माया यथा जीवस्य स्वरूपं विस्मारयित्वा प्रापञ्चिकविषयासक्तिं जनयत्येवमियमपि भक्तानां स्वस्वरूपविस्मृतिं भगवदासक्तिं च जनयतीत्येतावद्धर्मसाम्येनास्यामपि **माया**शब्दप्रयोगः, वस्तुतस्तु यथान्ये लीलोपयोगिनो गोपीगोपादय आनन्दरूपा एवमियमपीति ज्ञापनायात्मपदं, अन्यथा पुरुषोत्तमवाचिभगवत्पदाव्यवहितोक्त्यैव मायाया भगवदीयत्वप्राप्तेरात्मपदं व्यर्थं स्यात् एवं सति "प्रकाशाश्रयवद् वा तेजस्त्वा" दितिन्यायेन भगवद्रूपत्वादत्र कर्मधारयोप्यभिप्रेत इति ज्ञेयं, तथा चेदम्पदं सर्वत्रानुषज्यते, तथा हि, अत्र लीलार्थं भगवता तौ पितृत्वेनाङ्गीकृताविति भगवदिच्छयैव तयोस्तथाविर्भावः, अन्यथा निषेकजननाद्यभावेन तयोस्तथात्वमुच्यमानं बाधितं स्यात्, एतदेवाहात्ममायया पित्रोरिति, न "न्वेतद् वां दर्शितं रूप"मितिवाक्यात् पूर्वरूपदर्शन एव भगवदिच्छाया उक्तत्वाद् 'नान्यथा मद्भवं ज्ञान'मितिवाक्याद् दर्शनस्यानन्यलभ्यत्वाच्चैतद्रूपदर्शनं कथमेतयोरत आहात्ममायया सम्पश्यतोरिति एतेन चक्षुस्सामर्थ्येनादृश्यत्वं सूचितं, अतिशयेनोपक्रान्तकार्योपयोगित्वं हि सम्यक्त्वं, तेन पूर्वमीश्वरत्वेन जानतोर्लीलोपयोगिमायाकरणकदर्शने सम्यक्त्वं स्वपुत्रत्वेनापि दर्शनं ज्ञेयं, तथैव लीलायाः करिष्यमाणत्वात् 'पित्रो'रितिवचनाच्च, यद्वा लौकिकभावे सत्येव लीलोपपत्तिरिति दर्शने लीलोपयोगिमायाकरणकत्वनिरूपणेन पितृत्वोक्त्या च पुत्रत्वज्ञानं प्राप्तमेव, तच्च न केवलं किन्त्वीश्वरत्वानुसन्धानसहितमिति तदेव सम्यक्त्वं, "युवां मां पुत्रभावेन ब्रह्मभावेन चे"तिभगवद्वचनात्, अथवोक्तरूपमायाकरणकदर्शने तद्विरुद्धाविषयकत्वमेव सम्यक्त्वं, तथा च ब्रह्मभावस्य लीलाविरोधित्वेन तद्रहितं स्वस्मादुत्पन्न इत्येव ज्ञानं सम्यग्दर्शनं, एवं सति तया'पश्यतोस्तयोः' परं 'प्राकृतः शिशुर्बभूवे'ति

तद्दर्शनप्रकारकथनं, वस्तुतस्तु भगवान् सद्गुणसम्पन्नः परमकाष्ठापन्नः शुद्धब्रह्मरूप एव यः शिशुः शिशुरूपः स सद्यस्तस्मिन्नेव क्षण आसीत्तद्दृष्टःप्रकटो वा जात इतियोजना, 'तत्राभवद् भगवान् व्यासपुत्र' इत्यत्रेवात्राप्यासीदितिपदस्य नोत्पत्तिरर्थः, जातो हि बालो रोदिति, तच्च द्वाःस्थजागरणहेतुरिति तूष्णीं तथासीत्, अपरोक्षत्वेप्यलौकिकत्वेन ज्ञानाभावात् सोंशः परोक्ष एवेति लिट्प्रयोगः, अपरं च, इह हि तत्तत्क्षणसम्बन्धित्वेनोच्यमानापि सर्वा लीला तथाभूतैव शुद्धब्रह्मधर्मरूपा नित्यैवेति 'कृतागसं त'मितिश्लोकोक्तरूपवत् नालादिसहितशिशुरूपस्यापि शुद्धब्रह्मत्वाद् यथाश्रुतेपि न काप्यनुपपत्तिः, तच्छ्लोकोक्तरूपस्यैव 'न चान्त'रित्यादिना शुद्धब्रह्मत्वमग्रे शुकेनोक्तमिति न काचिच्छङ्कात्र, लीलाया निरोधार्थत्वाद् यथैव सम्भवति तथैव करोतीति न प्राकृतानुकरणलीलायां काचिन्न्यूनता प्रत्युत भक्तार्थं एवमपि करोतीत्यद्भुतमाहात्म्यख्यापकमित्येतत्सर्वं हृदि कृत्वा 'स्वस्यैव सर्वभवनसामर्थ्येन तथा कृतवा'नित्याद्युक्तमिति ज्ञेयं, अत एव 'बबन्ध प्राकृतं यथे'तिप्राकृतदृष्टान्त उक्तोग्रे, अथवा शेष इदं सूत्रं, शेषाधिकारकाण्प्रत्ययान्तोत्र प्रकृतिशब्दः, तेन यथा 'चक्षुषा ग्राह्यं रूपं चाक्षुष'मित्यादिशब्दास्तथायमपीति 'प्रकृत्या ग्राह्यः प्राकृत' इत्यर्थः सम्पद्यते, लौकिकालौकिकभेदेन हि द्विविधा जीवाः, तेषां प्रकृतिरपि तथा' तथा च 'मल्लानामशनि'रितिश्लोकोक्तरीतिवदलौकिकप्रकृतिभिरलौकिकत्वेन ग्राह्यो लौकिकप्रकृतिभिर्लौकिकत्वेनेत्येतादृशो वस्तुतस्त्वलौकिक एव शिशुर्बभूवेत्यर्थः सम्पद्यते, अत्र लौकिकव्यवहारोपयोगि ज्ञानं लौकिकं, तद्वन्तस्तथा, शास्त्रीयं ज्ञानमलौकिकं तद्वन्तस्तथेत्युच्यन्ते तेन नन्दादीनां लौकिकत्वेन भानेपि लीलाया अलौकिकत्वात्तन्मध्यपातित्वेन तज्ज्ञानादीनां न लौकिकत्वं, तेषां पुत्रत्वादित्वेन ज्ञानं शास्त्रेणानूद्यते परं न तु विधीयत इति शास्त्ररीतिमपेक्ष्य लौकिकत्वमुच्यते, नैतावता काचिन्न्यूनतात्र, लीलात्वेनालौकिकत्वमुक्तमेव, यद्वा प्रथमस्कन्धे भीष्मोक्तौ "प्रकृतिमगमन् किल यस्य गोपवध्व" इत्यत्रेवात्रापि प्रकृतिशब्दो भगवत्स्वरूपवाची, तथा च पूर्ववत् प्रकृत्या स्वरूपेणैव ग्राह्यस्तथा, 'न तत्र सूर्यो भाती' त्यादिश्रुतिभि'र्नाहं वेदै'रित्यादिस्मृतिभिश्चेतरसाधननिषेधाच्छ्रुत्यन्तरे च "नायमात्मा प्रवचनेन लभ्य" इत्यादिनेतरसाधननिषेधपूर्वकं "यमेवैष वृणुते तेन लभ्य" इत्यादिना भगवतैव भगवाँल्लभ्य इति निरूप्यते, तथा चैतादृशशुद्धब्रह्मरूपो लोकवेदप्रसिद्धः पुरुषोत्तमः शिशुर्बभूवेत्यर्थः, पित्रोः सम्पश्यतोरित्यत्र तयोः सम्पश्यतोरेव तथाकरण उपपत्तिमाहुर्लौकिकज्ञानेत्यादिना, सामर्थ्यस्य सामर्थ्यप्रकटनस्येत्यर्थः, इदमत्राकूतं, अनेनैव रूपेणाधुनैव कंसं मारयित्वा सर्वसमाधानं कर्तुं सामर्थ्ये सत्यपि यद् रूपान्तरप्रकटनं तत् 'समुद्विजे भवद्धेतोरधीरधी'रित्यादिवाक्यैर्लौकिकरीत्यैव स्नेहातिशयो ज्ञायते येन भगवतः कंसाभिमुखत्वमात्रेपि प्राणापगमो भवेत्, लोकविद्वेषभिया रूपोपसंहारप्रार्थनेनापि लौकिकरीत्यैव स ज्ञाप्यते मातुः, पितुस्तु पूर्णमाहात्म्यज्ञानवत्त्वेनोक्तशङ्काभावेप्यनेनैव रूपेणाधुनैव कंसमारणे भक्तदुःखनिवृत्तौ सत्यां स्थितौ प्रयोजनाभावादस्माकं पुनर्दर्शनं न भविष्यति चेन्न प्राणस्थितिर्भविष्यतीत्यभिप्रायेण तद्वृत्तान्तकथनादेतद्रूपोपसंहारोन्यत्राधुना गमनमभिप्रेतमिति ज्ञायते, अन्यथा माहात्म्यज्ञानवत्त्वेन सर्वज्ञतामपि प्रभोर्जानातीति न तत् निवेदयेत्, तथा च तदा तद्दर्शनसत्त्वोक्त्या तज्ज्ञानस्योक्तरूपस्य हेतुत्वं सूच्यत इति युक्तं तथात्वमिति ॥ ४६ ॥

ततश्च शौरिरित्यत्र सर्वमोहनस्वभावायास्तस्या आविर्भावे वसुदेवे तथात्वं कुतो नेत्याशङ्क्य तन्निवारणाय भगवत्प्रचोदित इति पदतात्पर्यमाहुः साधारणमोहस्येति, भगवता गोकुले स्वनयनार्थं ततः कन्यायाश्चानयनार्थं स प्रेरित इत्येतावति कार्ये भगवज्ज्ञानशक्त्यैव व्याप्त इति योगमायाजनितसर्वसाधारणमोहस्य निवर्तकमुक्तरूपं ज्ञानमिति तथेत्यर्थः, यथान्यः कश्चिच्चौर्येण गच्छन् पद्भ्यां शनैश्च गच्छति स्वचातुर्येण तथैव वसुदेवोपीति ज्ञाने साधारणत्वं, अन्यथा गोपाला भाण्डीरमिवायमपि गोकुलं प्रापितः स्यात्, यद्वा भगवद्विषयकज्ञानतारतम्येन मोहापगमतारतम्यमिति भगवति लोकसाधारणं ज्ञानमधुनास्यास्तीति तादृङ् मोहोप्यपगत इति तथेत्यर्थः, तावान् बाह्योपि बन्धो निवर्तत इत्याहुः कपाटोद्घाटनं चेति, तदा देवकीत्यादि, दर्शनेन हि मोहाभावः, समानकालत्वे जन्मनो दर्शनलक्षणो मोह एव भवेदित्यर्थः ॥ ४७ ॥

॥ टिप्पण्यां समाप्तस्तृतीयोध्यायः ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

युवां मामित्यत्र ननु विषयैक्येपि विहितभक्त्योः प्रकारभेदस्य सत्त्वात् फले कथमैक्यमित्यत आहुर्माहात्म्येत्यादि, तथा च विशेष्यांशस्यैक्यात् फलैक्यमित्यर्थः, उक्तयुक्तेरप्रयोजकत्वपरिहारायाग्रिमग्रन्थसम्मतिमाहुरत एवेत्यादि, अत एवेति, गोपिकादिस्नेहस्य भक्तित्वादेव, नन्वत्र माहात्म्यज्ञानस्य स्नेहाङ्गत्वेन प्रतिपादने कावश्यकतेत्याकाङ्क्षायां तदावश्यकत्वे युक्तिं वदन्तीत्याशयेन टिप्पण्यामाहुर्यदीत्यादि, कथमधिकः स्यादित्याकाङ्क्षायां सुबोधिन्यामाहुर्भक्तानामित्यादि, व्यापाररूपस्य निरोधस्य प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपत्वात् करणरूपया लीलया तावन्मात्रसिद्धावपि भक्तानां प्रपञ्चाभावरूपस्य निरोधस्य तावतैव सिद्धेर्बोधांशप्रयोजनाभावेन सोंशो वाक्यभेदमापादयन्नधिकः स्यादित्यर्थः, अत्रैव युक्त्यन्तरमाहुरत एवेत्यादि, यस्माद् भक्तौ बोधांशस्यावश्यकतात एव हेतोः पूर्वस्कन्धे उत्पत्तीत्यादिप्रकारेण स्वरूपतो भक्ता भाववन्तो निरूपिताः, प्रेमाद्युत्पत्तिप्रकारस्त्वत्रैव वक्ष्यते, अन्यथा पूर्वस्कन्धस्यास्य चैकवाक्यता न स्यादतोपि सोंशो नाधिक इत्यर्थः, ननु मातृप्रार्थनयान्यत्र गमनस्यावश्यकत्वेपि

तत्स्थलादिकमनुक्त्वा कथमत्र वाक्यं समापितमित्याकाङ्क्षायां समापनतात्पर्यमाहुरार्थिकमित्यादि, यदर्थात् छिद्रेतरत्वादिवत् सिध्यति तदत्र कण्ठतो नोच्यत इति हेतोर्वाक्यपरिसमाप्तिरित्यर्थः ॥ ४५ ॥

इत्युक्त्वासीदित्यत्र रूपज्ञानेत्यादि, भगवत्त्वे तिरोधापिते प्राकृतरूपज्ञानयोर्ये कार्ये अविहितभक्तिरसानुभावादिरसुरव्यामोहादिश्च तयोरपि प्राकट्यं न स्यात् तद्बाधकस्य भगवत्त्वस्योद्भूतत्वादित्याशङ्क्य तत्र समाधिमाहेत्यर्थः, तथा कृतवानिति, एतट्टिप्पण्यां बहुधा स्फुटिष्यति, तत्कार्यमिति, स्वरूपकार्यं, ज्ञानप्राकट्येप्येवमेव ज्ञेयं, आत्ममायापदे स्वस्य सर्वभवनसामर्थ्यं यदाचार्यैर्व्याख्यातं तत्तात्पर्यं टिप्पण्यां व्युत्पादयन्त्यत्रात्मपदेनेत्यादि, यद्यात्मतुल्या तदास्या मायात्वं कुत उक्तमित्यत आहुः संसारेत्यादि, तथा चैतत्कार्ये किञ्चित्तद्धर्मसाम्येन तथोक्तं 'कौण्डपायिनामयनेऽग्निहोत्रशब्द'वदित्यर्थः, तर्ह्यात्मपदस्य किं प्रयोजनमित्यतस्तदाहुर्वस्तुत इत्यादि, एतमर्थं न्यायेनोपोद्बलयन्ति सतीत्यादि, एवं सतीत्यादि, एवं तस्यां भगवत्तादात्म्यसाधनस्य प्रयोजनमाहुस्तथा चेत्यादि, अनुषज्यत इति, संयोगपृथक्त्वेनानुषज्यते, तद् व्युत्पादयन्ति तथा हीत्यादि, अनुषङ्गान्तरं व्युत्पादयन्ति नन्वेतावदित्यादि, सूचितमिति, रूपान्तरस्य सूचितं, दर्शनेन्यप्रकारतः सम्यक्त्वं व्युत्पादयन्त एव समर्थयन्त्यतिशयेनेत्यादि, एतेषां त्रयाणामपि सम्यक्त्वपक्षाणां समुच्चय एव न तु विकल्पः श्रुतार्थापत्तिसिद्धत्वात्, व्याख्याने वाशब्दस्तु वाक्यालङ्कारे, तेन सिद्धमाहुरेवमित्यारभ्य तथासीदित्यन्तं, नन्वेवं सर्वेषु पदेष्वासीदितिक्रियायां सम्बद्धेषु सत्सु बभूवेतिक्रियान्तरं व्यर्थमसङ्गतं वा स्यादित्याकाङ्क्षायां तदवैयर्थ्यप्रकारमाहुरपरोक्षेत्यादि, सोंश इति, अप्राकृतत्वांशः, तथा च प्राकृतो बभूवेति भिन्नं वाक्यमतो न वैयर्थ्यादिदोष इत्यर्थः, यद्यप्यत्र पूर्वसमुच्चायकश्चकारोपेक्ष्यते तथापि परोक्षत्वायैव तदनुक्तिरित्यपि ज्ञेयं, प्राकृतो बभूवेत्यस्य तद्दर्शनप्रकारकथनत्वमभिप्रेत्य पक्षान्तरमाहुरपरश्चेत्यादि, तथाभूतैवेति, अप्राकृतैव, ननु तर्हि नालच्छेदादेः कथमुत्पत्तिरित्यत आहुस्तच्छ्लोकेत्यादि, नन्वनुक्तमिदं कथमङ्गीकर्तुं शक्यमित्यत आहुर्लीलाया इत्यादि, प्राकृतत्वप्रतीतेरौचित्ये युक्त्यन्तरमाहुरेत एवेत्यादि, ननु प्राकृतो बभूवेत्यस्य दर्शनप्रकारकथनत्वाङ्गीकारे भवनक्रियां प्रति प्राकृत इत्यस्य कर्तृत्वमसङ्गतं स्यादित्यतः पक्षान्तरमाहुरथ वेत्यादि मुक्तमेवेत्यन्तं, अस्मिन् पक्षे कल्पनाक्लेशादरुच्या पक्षान्तरमाहुर्यद्वेत्यादि, अस्मिन् पक्षे तथाश्रुतमेव श्लोके वाक्यं ज्ञेयं, शेषं विवृण्वन्ति पित्रोरित्यादि, स्नेहातिशयो ज्ञायत इति, स्नेहातिशयरूपं ज्ञायत इत्यर्थः, मम तु 'स्नेहातिशयाज् ज्ञायत' इति पञ्चमीघटितः पाठः प्रतिभाति, स ज्ञाप्यत इति, स्नेहातिशयो ज्ञाप्यते ॥ ४६ ॥

ततश्चेत्यत्र तस्य चेति, वसुदेवस्य च, भगवत्प्रचोदित इत्यादेस्तात्पर्यं तु टिप्पण्यामेव प्रकाशितमिति ततोवधेयं, तर्ह्येवेत्यादिशब्दसूचितमर्थं सुबोधिन्यामाहुरनेनेत्यादि, यदा बहिर्गन्तुमियेष तर्ह्यजा या योगमायाजनीत्यादिकथनेन भगवत्प्राकट्यान्मुहूर्तानन्तर्यं लभ्यते, 'नवम्यां योगनिद्राया जन्माष्टम्यां हरेरतः नवमीसहितोपोष्या रोहिणी बुधसंयुते'ति भविष्योत्तरवाक्यान्नवम्यां सा जातेति ज्ञायते'थ सर्वगुणोपेत' इत्यत्र 'यर्ह्येवाजनजन्मर्क्ष'मिति निशीथारम्भे रोहिण्यारम्भकथनाद्, रोहिणी तु भगवन्मायाजन्मनोस्तुल्या, अतो निशाथे रोहिण्यारम्भकथनात् रोहिण्याः कृत्तिकावेधो न दोषाय, तेन रामानुजमतीयैर्यत् कृत्तिकाविद्धा रोहिणी नाद्रियते तदसङ्गतमुक्तवाक्यविरुद्धत्वात्, सप्तमीवेधस्तु दोषायैवोक्तभविष्योत्तरवाक्यविरुद्धत्वात् 'सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी अविद्धायां सऋक्षायां जातो देवकिनन्दन' इति ब्रह्मवैवर्तवाक्यविरुद्धत्वाच्च, 'अष्टमी सप्तमीविद्धा हन्ति पुण्यं पुराकृतं ब्रह्महत्याफलं दद्याद्धरिर्वैमुख्यकारणा'दिति गौतमीयतन्त्रवाक्ये दोषोक्तेश्च, पुत्रोत्सवादिकं च शुद्धनवम्यामेव जातमिति शुद्धाष्टम्यभाव उत्सवाधिकरणकालत्वमादाय 'स्वकालादुत्तरः कालो गौणः सर्वस्य कर्मण' इति गौणकालत्वं चादाय नवम्युपोष्या न तु तादृशस्थलेऽर्धरात्रवेधादिकमादरणीयमित्यर्थः, इदं यथा तथोत्सवनिर्णयान्तर्गतजन्माष्टमीनिर्णयविवरणे सम्यक् प्रपञ्चितमिति ततोवधेयं, ननु गृहाद् बहिर्गमनावसरे मायाजन्म कुत उक्तमित्याकाङ्क्षायामाहुरन्तरित्यादि, तत्र हेतुमाहुः सा हीत्यादि, कार्योपायार्थमिति, कार्यसाधनार्थम् ॥४७॥ ववर्षेत्यस्याभास उभयोः साम्मुख्येति, मायाभगवतोः साम्मुख्ये ॥ ४९ ॥

(२) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

युवां मामित्यत्र व्यापीति, व्यापिवैकुण्ठेनाख्या प्रसिद्धिर्यस्यास्तादृशीं गतिं नित्यलीलाप्रवेशो भविष्यतीत्यर्थः। अत एवेति, ज्ञानस्य भक्त्यङ्गत्वादेवेत्यर्थः, पुत्रभावेपि माहात्म्यज्ञानं श्लोकव्याख्यानान्ते व्युत्पादयिष्यन्ति, व्याख्यानानन्तरमार्थिकमिति, गोकुलगमनाभावे 'रूपं यत् त'दितिश्लोकारम्भे सुबोधिन्यां विवृतं देवकीप्रार्थितं रक्षादित्रयं च न सिध्येदतोऽर्थापत्तिलभ्यं तदित्यर्थः, मुखतो नोक्तमिति, भगवत्प्रचोदित इत्युक्तत्वात् प्राकृतत्वानन्तरं मनस्येव प्रेरितमित्यर्थः, कारिकास्वेवंविधानन्तभावैरिति, एभिर्भावैरत्यार्तयोर्वसुदेवदेवक्योर्वियोगदशायामपि भगवद्दर्शने जाते सति तयोरेवं मिथस्तथाभावपूर्वकमालापतश्चकारादन्तःस्थितभगवत्प्रभावत इन्द्रियाणामेकादशानां वृत्तयो हरिपरा आसन्नित्यर्थः, अत्यार्तौ भगवद्दर्शनं गुणप्रकरण ऐश्वर्याध्याये निबन्धे विवृतं, तादृशार्तावपि जीवन उपपत्तिमाहुः स एवेति, दर्शनं कदाचिद् हृदये स्थितिस्तु सततमित्यर्थः, तेनेति, इन्द्रियाणामेकादशत्वेन हेतुना, एकादशवर्षपर्यन्तं तथेन्द्रियाणां स्वपरत्वं कुर्वन्निति सङ्ख्यातात्पर्यं, वर्षाणीति, अत्यन्तसंयोगे द्वितीया, इममेवेति, व्यापिवैकुण्ठाख्यगतेः स्नेहं विनासम्भवेन स्नेहे च सति नियतत्वेन स्नेहदानमेव वाक्यार्थ इत्यवकारः, तथा चाभासे मुक्तिर्भविष्यति

स्नेहदानादितिशेषः, अन्यथेति, दानाभाव इत्यर्थः, स्वविरुद्धं धर्ममिति, प्राकृतत्वेन ज्ञानविषय त्वं स्वस्मात् स्वरूपाद् विरुद्धो धर्मस्तमित्यर्थः, सर्वदुःखेति, 'उपसंहर विश्वात्म'न्नितिदेवकीप्रार्थनया तथा कृतवानितिभावः, रूपस्य कार्यं भीष्मस्य प्रपत्तिर्ज्ञानस्य विश्वरूपदर्शनसम्पादितालौकिकत्वज्ञानविषयत्वस्य कार्यमर्जुनस्य प्रपत्तिः, टिप्पण्यां प्रथमं स्वतन्त्रव्याख्यानं तत्र 'मूल' 'इत्युक्त्वा हरिर्भगवान् तूष्णीं शिशुरासीत् प्रकट आत्ममायया पश्यतोः पित्रोः परं प्राकृतः प्राकृतत्वप्रकाशकः शिशुर्बभूवे'त्यन्वयः, 'अपरश्चे'त्यारभ्य सुबोधिनीव्याख्यानं, तत्र यथाश्रुतमेवान्वयः, चतुर्थाध्याये तस्योत्पत्तिर्निरूपितेत्युक्तत्वादधुना न तत्स्वीकार इत्याशयेन एतद्व्याख्याने प्राकृतपदस्यार्थान्तराण्युक्तानि, भगवत्सामर्थ्यंस्यति, अत्र सामर्थ्यपदेन कंसमारणसामर्थ्यं ज्ञेयं, तत्प्रकटनस्येदं ज्ञानद्वयं प्रतिबन्धकमतस्तदप्रकटयित्वा प्राकृतभावमेव स्वीकृतवानित्यर्थः ।। ४५ ।।

ततश्चेत्यस्याभासे भगवत्प्रचोदितपदस्यार्थमाहुर्बोधयित्वेति, 'मां नय कन्यामानये'त्यादिप्रकारं, मनसेतिशेषः, गतवानित्याहेति; भगवत्प्रचोदितत्वकथनाद् भगवत एव मुख्यत्वात् स्वातन्त्र्यमितिभावः, तथा च भगवान् स्वयं गोकुले गतवानित्यनेन 'नन्दव्रजं शौरिरुपेत्ये'त्यन्तस्यार्थ उक्त इति हेतोः शुक आह, वसुदेवस्य बहिर्गमनं मायाजननं चेतिशेषः, अनेनैतद्वाक्यार्थ उक्तः, व्याख्याने नन्दगृहीयप्रादुर्भावोत्तरक्षण एव मायाजननमन्यथा नन्दगृहेपि भगवद्दर्शनं स्यादतस्तत इति पदस्य व्यवधानतात्पर्यकत्वशङ्कां व्यावर्तयितुमाहुः प्राकृतभावानन्तरमिति, तत्सामयिकप्रादुर्भावे गमकं 'जातं परमबुध्यते'ति सामान्यतो ज्ञानं भगवत्प्रादुर्भावाद् द्वितीये मायाजननक्षणे जातमेव विशेषतस्तु भगवत्प्रादुर्भावात् तृतीये मायाजननोत्तरक्षणे दर्शनं भवेत् तदैव मायाकार्यं जातमतो व्रजे न दर्शनं मथुरायां तु मुहूर्तपर्यन्तं दर्शनस्य जातत्वात् तत्प्रभावेणैव मायाकार्याभाव इति भावः, आज्ञापनानन्तरं चेति, 'युवां वा'मिति श्लोके पुत्रत्वेन ब्रह्मत्वेन चिन्तनं कर्तव्यं तेनाग्रिमलीलारसानुभव इति कथनानन्तरमित्यर्थः, तथा च प्राकृतभावैतदाज्ञापनयोर्भगवदुद्ग्रहणे हेतुत्वसूचनाय तत इत्यनेन तदानन्तर्यमुक्तं न तु किञ्चिद् व्यवधानं सूचयितुमितिभावः, भगवत्प्रचोदितस्यार्थस्त्वाभास उक्त एव, समुपसर्गस्यार्थमाहुरुत्तममिति, भगद्वाक्य इति, एवं चिन्तनेनैव लीलारसप्राप्तिर्भविष्यतीतिवाक्य इत्यर्थः, प्राकृतेवेति अत्रैवार्थे च शब्दः, आत्मन एवेति, गोकुलस्थानां यथा स्वात्मनो विस्मरणं तथा पुत्रदेहस्यापि विस्मरणं पुत्रः पुत्री वेति संस्कारोद्बोधो न भवेदित्यर्थः, अनेनेति, पित्रोः प्रस्वापाभावकथनेनेत्यर्थः, तथापि मुहूर्तनियम उपपत्त्यन्तरमाहुर्नवम्यां चेति, पुराणान्तरसम्मत्येदमुक्तं, पित्रोः प्रस्वापाभावेन भगवद्दर्शने मायाजननाभावस्य हेतुत्वोक्त्या गोकुले भगवद्दर्शने तत्समकालमायाजननं हेतुरिति सूच्यतेतो व्रजे नवम्यां प्रादुर्भावो भगवत्प्रादुर्भावानन्तरं मायाजनने तु प्राथमिकभगवद्दर्शनप्रभावेणैवाग्रेपि दर्शनं भवेन् मथुरायामिव, समकालं जनने भगवद्दर्शनमेव न सम्पद्येतातो न भगवद्दर्शनप्रभाव इति टिप्पण्यां स्फुटं, ननु यथा नन्दगृहीयप्रादुर्भावक्षण एव मथुरायां तद्दर्शनं तथा तस्मिन्नेव क्षणे व्रजेपि दर्शनं भवेन्मायायास्तूत्तरक्षणे जातत्वादिति चेत् , अत्रैवं ज्ञेयं, दर्शने हि प्रादुर्भावो हेतुः, तथा च प्रादुर्भावस्य हेतुत्वार्थं दर्शनात् पूर्ववर्तित्वं वाच्यमतः प्रादुर्भावोत्तरक्षणे 'जातं परमबुध्यते'ति सामान्यज्ञाने जाते तदुत्तरक्षणे भगवत्प्रादुर्भावात् तृतीये मायाजननाद् द्वितीये विशेषदर्शनं व्रजे भवेत् तावता स्तोत्रक्षणे मायाकार्यं जातमिति न दर्शनं, सामान्यतस्तु 'जातं परमबुध्यते'तिज्ञानं प्रादुर्भावाद् द्वितीये मायाजननक्षणे जातमेव, मथुरायां दर्शने पूर्वप्रादुर्भाव एव हेतुः, तस्यैव रूपस्यैतदन्तर्भूतत्वेनाधुनापि दर्शनात् , अतो मथुरायां नन्दगृहीयप्रादुर्भावक्षण एव दर्शनमिति, सप्तमीवेधस्त्विति, नवमीसाहित्ये सप्तमीवेधस्यासम्भावितत्वेन, सप्तमीविद्धायां जन्मतिथित्वाभावादितिभावः, दोषायेति, विद्धोपवासे जन्मतिथौ पारणप्राप्तेर्दोषः स्यादित्यर्थः, तिथिक्षये निर्णयमाहुः पुत्रोत्सवादिकमिति, नवमीसहिताष्टमी जन्मतिथिः, तथा चाष्टमी मुख्या नवमी तदङ्गं, एवं सति मुख्यालाभे तदङ्गे व्रतं कर्तव्यं न त्वजन्मतिथौ सप्तमीविद्धायामितिभावः, उक्तरीत्या नन्दगृहे प्रादुर्भावस्य नवम्यां निर्धारितत्वात् , पुत्रोत्सवावादिभूतौ यस्य, सर्वसम्पत्समृद्धिपूर्वकरमाक्रीडत्वस्येति तद्गुणसंविज्ञानो बहुव्रीहिः, जातं प्रादुर्भूतमित्यर्थः, स्वरूपवल्लीलाया अपि नित्यसिद्धाया एवाविर्भाव इति पुत्रोत्सवयोः समत्वं सूचयितुं द्वन्द्वः, आन्तःस्थित इति, यावद् भगवानन्तस्तिष्ठति न तावन्मायाया उद्गमः, कार्यं पौरानुशायनादिकं न भवति प्रयोजनाभावादित्यर्थः, इदं विवृण्वन्ति सा होति, कार्योपायार्थमिति, कार्ये गमन उपायः प्रतिबन्ध-भावस्तदर्थे लोकान् पौरादीन् व्यामोहयति शाययतीत्यर्थः ।। ४७ ।।

तया हृतेत्यत्रैतावत्कार्यमेवेति, प्रत्ययवृत्तिहरणमनुशायनं च कृतवतीत्यर्थः, तयेत्यस्यानुशायितेष्वित्यनेनाप्यन्वयः, बन्धास्त्विति, द्वारपिधानादिकं कंसाज्ञया पूर्वमेव जातं स्थितं तदुद्घाटनं तु भगवत्प्रभावादेव जातमित्यर्थः, शृङ्खलाश्च यास्विति पिहिता इत्यस्यार्थकथनं न तु बहुव्रीहिः ।। ४८ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

ततश्च शौरिर्भगवत्प्रचोदित इत्यस्य विवरणे मुहूर्तानन्तरं च सा जातेत्यादि, अनेन, वसुदेवबहिर्गमनेच्छासमानकालिकयोगमायाजन्मकथनेन, मुहूर्तानन्तरमिति वसुदेवगृहीयप्रादुर्भावकालान् मुहूर्तानन्तरमित्यर्थः, अत्रेदं तत्त्वं, 'अथ सर्वगुणोपेत' इति सन्दर्भे निरूपितस्याधिदैविककालात्मकपञ्चचत्वारिंशत्षट्चत्वारिंशद्घटिकाद्वयरूपनिशीथस्यारम्भे मथुरायां पुरुषोत्तमजन्माभूत् , निशीथावसानसमये नन्दगृहे पुरुषोत्तमजन्म, एवं मथुरायां श्रीगोकुलेपि पुरुषोत्तमजन्मन एक एव निशीथकालोधिकरणं, तावत्येवाष्टमी तिथिः, तदनन्तरं नवमी प्रवृत्ता, तस्यां गोकुले मायाया जन्म भविष्ये 'नवम्यां योगनिद्राया जन्माष्टम्यां हरेस्ततः

नवमीसहितोपोष्या रोहिणी बुधसंयुते'त्यनेन विष्णुपुराणे पञ्चमेंशे प्रथमाध्याये 'प्रावृट्काले च नभसि कृष्णाष्टम्यां महानिशि उत्पत्स्यामि नवम्यां च प्रसूतिं त्वमवाप्स्यसी'त्यनेनैव नवम्यां मायाजन्मकथनात्, अत एव 'नवम्यां सा जाते'ति सुबोधिन्यामुक्तं, तथा सति वसुदेवगृहीयप्रादुर्भावकालान्मायाजन्मनो मुहूर्तानन्तरत्वमुपपन्नं, वसुदेवगृहे प्रादुर्भावानन्तरं पित्रोः स्तुतिर्भगवद्वाक्यानि प्राकृतानुकरणे स्वीकृतिर्वसुदेवकर्तृकमुत्तमपात्र उत्तमवस्त्रास्तरणयुक्ते भगवत्स्थापनं चेत्येतावत्कृतौ तावान् कालो व्यतीयायेति युक्तं मथुराप्राकट्यकालान् मायाजन्मनो मुहूर्तानन्तरत्वं पुरुषोत्तमप्राकट्यं वसुदेवगृहे नन्दगृहेष्टम्यां निशीथकाल एवेति न तिथिमुर्तभेदः किन्तु क्षणभेदमात्रं, अत एव जन्माष्टमीनिर्णयग्रन्थसमाप्ता'विति श्रीगोकुलाधीशप्रादुर्भावदिनव्रतमस्माभिर्निरणाय्येत'दिति निरूपितं, अन्यथा नन्दगृहीयप्रादुर्भावस्य नवम्यधिकरणत्वे जन्माष्टम्यां 'गोकुलाधीशप्रादुर्भावदिन'त्वमेव न स्यात्, तथा सति 'श्रीगोकुलाधीशप्रादुर्भावदिन'त्वं न वदेयुः, किञ्च प्रादुर्भावसमये'थ सर्वगुणोपेत' इत्यादिकथिता गुणा अपेक्षितास्ते तु तस्मिन्नेव निशीथे वाच्यास्तत्रैवोक्तत्वात्, नवम्यां तु नोक्ता इति गोकुलीयप्राकट्यसमये तद्गुणानामप्रसक्तिः स्यादत उभयत्राप्यष्टम्यां निशीथ आविर्भाव इति सिद्धान्तः, नन्वेवं 'पुरुषोत्तमस्तु नन्दगृह एव मायया सह जात' इति सहोक्तिर्विरुध्यत इति चेन्न, स्वल्पव्यवधाने 'सहोक्ते'रविरुद्धत्वात्, युग्मप्रसवे हि सर्वत्रस्वल्पकालभेदेनोत्पत्तौ 'सहैवोत्पन्नावेता'विति प्रयुञ्जते विद्वांसः, एवमिहापीति नास्वारस्यं किमपि, 'नन्दगृहीयपुरुषोत्तमप्राकट्यकालमायाजन्मकालयोः स्वल्पमेव व्यवधान'मित्युक्तं प्राक्, रोहिणी तु तुल्येति, वसुदेवगृहे नन्दगृहे भगवत्प्राकट्यं तत्प्रयुक्तो नन्दगृह उत्सवश्च रोहिण्यामेवेति प्राकट्योत्सवयोरुभयोरप्येकनक्षत्राधिकरणत्वमिति जन्मनस्तत्प्रयुक्तस्योत्सवस्य च रोहिणी तुल्येत्यर्थः, नैवमष्टमीतिथिः, किन्तु जन्ममात्रस्याधिकरणमिति तु शब्देनाष्टमी व्यावर्त्यते, अतो रोहिण्याः कृत्तिकावेधो न दोषायेति, रोहिण्यारम्भे भगवज्जन्मनो जातत्वेन तत्प्रयुक्तोत्सवयोर्विद्यमाना रोहिण्युभयोस्तुल्येति कृत्तिकया विद्धैव जन्मनक्षत्रमतः कृत्तिकाविद्धरोहिण्यां व्रतादिकृतिर्न दोषायेत्यर्थः, कृत्तिकाविद्धरोहिणीनक्षत्रस्य जन्माधिकरणत्वादुत्सवाधिकरणत्वाच्च, इदमत्र तत्त्वं, निशीथकाले रोहिणीनक्षत्रारम्भे भगवज्जन्म 'यर्क्षे वाजनजन्मर्क्ष'मिति वाक्यात्, 'नक्षत्रारम्भे जन्मे'ति विवृतत्वाच्च, अतो रोहिणी नवम्यां सर्वस्मिन्नहनीति जन्मोत्सवौ तदधिकरणावेव, सप्तमीवेधस्त्विति, व्रतकरणे दोषावह इत्यर्थः, नवमीयुताष्टम्यां कृष्णाविर्भावस्तत्र सप्तमीवेधोसम्भवपराहतः, अत एवोक्त'मविद्धायां सऋक्षायां जातो देवकिनन्दन' इति, अतः सप्तमीवेधो व्रतादौ त्याज्य एव, ननु नवमीसहिताष्टम्याः प्राकट्यकालत्वेन सप्तमीविद्धां पूर्वाष्टमीं त्यक्त्वा नवमीयुताष्टम्यां व्रतादि कार्यमिति तु युक्तं विद्धाक्षये तु विद्धैव ग्राह्या न तु केवला नवमी जन्मतिथित्वाभावादित्याशङ्क्याहुः पुत्रोत्सवादिकं शुद्धनवम्यामेव जातमिति शुद्धाष्टम्यभावे केवला नवम्युपोष्येति, व्रतकरणे हि भगवदाविर्भावस्तत्प्रयुक्त उत्सवश्च निमित्तमिति भक्तिमार्गमर्यादा प्रमाणसिद्धा, अत एवोक्तं निबन्धे 'भुक्त्वा चोत्सवो निषिद्धो भगवदावेशाभावा'दिति, तत्रोत्सवस्य प्राकट्यप्रयुक्तत्वेन प्राकट्यापेक्षया न्यूनबलतया प्राकट्यकाललाभे तत्रैव व्रताद्यनुष्ठेयं, तदलाभे तूत्सवकाले व्रतादि कार्यमितिनिष्कर्षः, अन्यत्रावतारे प्राकट्यकाल उत्सवकालश्चैक एव श्रीकृष्णावतारे त्वष्टमी जन्मकालो नवम्युत्सवकाल इति कालभेदः, वसुदेवकर्तृकमायानयनानन्तरं नन्दालये पुत्रज्ञाने नवम्युत्सवकरणात्, उत्सवस्य जन्मप्रयुक्तत्वेन जन्मापेक्षया गौणतया जन्मनो मुख्यतया जन्मकाललाभे तत्रैव व्रतं, तदलाभ उत्सवकालरूपकेवलनवम्यामुपोषणं युक्तमिति तात्पर्यं, विद्धाक्षयेपि विद्धोपवासो न कार्यो वेधस्य सर्वथा निषिद्धत्वात्, उक्तप्रकारेण केवलनवम्यामप्युपवासादेर्युक्तत्वाच्च, अत एव 'जन्माष्टमीं पूर्वविद्धां सऋक्षां सकलामपि विहाय नवमीं शुद्धामुपोष्य व्रतमाचरेदि'त्यार्षवाक्यं वैष्णवग्रन्थेषूपलभ्यते, ननु पूर्वविद्धाष्टमीक्षये केवला नवम्युपोष्येत्युक्तं, तज् जन्माष्टमीनिर्णयग्रन्थेन विरुध्यते, तथा हि ''केचित् तु 'जन्माष्टमीपूर्वविद्धां सऋक्षां सकलामपि विहाय नवमीं शुद्धामुपोष्य व्रतमाचरे'दिति व्यासवचनात् पूर्वविद्धायाः क्षये शुद्धैव नवम्युपोष्या वचनबलादेकादश्यां दशमीवेधे शुद्धद्वादशीवदिति वदन्ती''ति मतान्तरमुपन्यस्य 'तत्र यद्येतद् वचनं समूलकं तदा तथैव नो चेत् पूर्वोक्तरीतिरेवानुसर्तव्ये'ति प्रभुचरणैर्जन्माष्टमीनिर्णयग्रन्थे निरूपितं, एवं सति वचनस्य समूलत्वे सन्देहप्रदर्शनेन तत्प्रयुक्तव्रतेपि सन्देह एव प्रतिपादितो न तु निर्णय इति चेन्न, अनवबोधात्, तथा हि प्रभुचरणैर्हि तत्र 'यद्येतद् वचनं समूलकं तदा तथैव नो चेत् पूर्वोक्तरीतिरेवानुसर्तव्ये'तिनिर्णायकफक्किकोक्ता, तस्या अयमर्थः, यदि 'जन्माष्टमीं पूर्वविद्धा'मिति वचनं समूलकं तदा तथैव तद्वचनबलादेव केवला नवम्युपोष्या नो चेद् वचनस्य समूलत्वाभावे पूर्वोक्तरीतिरेकादश्यां दशमीवेधे शुद्धद्वादशीव'दितिरीतिरेवानुसर्तव्या, केवला नवम्युपोष्येत्यर्थः, तर्हि वचनमुपन्यस्तं 'शुद्धद्वादशीव'दितिरप्युक्ता, तत्र वचनस्य सन्दिग्धत्वेपि रीतेरसन्दिग्धत्वात् तद्रीत्या विद्धाक्षये शुद्धा नवम्येवोपोष्या, 'साधूनां समयश्चापि प्रमाणं वेदवद् भवेदि'ति स्कान्दात्, अतो वचनस्य मूललाभे वचनं रीतिं चाश्रित्य केवला नवम्युपोष्या, वचनस्य मूलालाभे तु रीतिमेवाश्रित्य केवला नवम्युपोष्येतिफक्किकार्थः सिद्धः, एवं सति पूर्वविद्धाक्षये केवला नवम्येवोपोष्या न तु पूर्वविद्धेतिनिर्णयः सम्पन्नो न तु संशयो न वा विरुद्धनिर्णय इति निरवद्यः पन्था आर्याणां, ननु सिद्धान्ते जन्माष्टम्यां नन्दालये प्राकट्यं स्वीकृतं तत्र युक्तं 'व्यवहारविषयत्वं प्राकट्य'मिति लक्षणाप्रसङ्गात्, अष्टम्यां निशीथसमये गोकुले सर्वेषामेव भगवज्ज्ञानाभावात्, किञ्च 'जातं परमबुध्यत न तल्लिङ्गं परिश्रान्ते'ति वाक्यान् मायाया अपि सामान्यज्ञानं मातुरभून् न तु विशिष्टं, तत्र पुरुषोत्तमज्ञानस्य क्वावकाशः ? अतो व्यवहारविषयत्वरूपः प्रादुर्भावो दुरुपपाद इति चेत्, सत्यं भगवत्प्रादुर्भावस्यावताररूपत्वव्यवहारविषयतारूपत्वाभ्यां द्वेधाङ्गीकारान्निशीथसमय आविर्भावस्त्ववताररूपो ज्ञेयः, 'अवतारो नाम व्यापिवैकुण्ठाद् भगवतः

प्रपञ्चे समागमन'मिति सुबोधिनीसिद्धलक्षणेन प्रपञ्चे समागमनमवतारः, स द्विभुजस्य पुरुषोत्तमस्याष्टम्यां निशीथसमये श्रीगोकुले जातः, द्वितीयो व्यवहारविषयस्वरूपः प्रादुर्भावस्तु नवम्यां नन्दगृहे जातः, देवकीवसुदेवकृतप्राकृतभावाङ्गीकारप्रार्थनानन्तरं नन्दालयेवतीर्णस्य द्विभुजस्य देवकीवसुदेवाभ्यां मथुरायां दर्शनं लेभे, तदुक्त टिप्पण्यां 'नन्दगृहे प्रादुर्भूतस्यैव सर्वतःपाणिपादान्तत्वेन तदा कार्यमस्तीति वसुदेवगृहे प्रादुर्भाव इति ज्ञायते स एव 'बभूव प्राकृतः शिशु'रित्यनेनोक्त' इति, तथा च सिद्धमेतत्, अवताररूपं व्यवहारविषयस्वरूपं चेति प्राकट्यं द्वेधा, तत्र द्विभुजपुरुषोत्तमस्यावताररूपं प्राकट्यमष्टम्यां निशीथसमये श्रीगोकुले, व्यवहारविषयस्वरूपं प्राकट्यं तु प्राकृतभावाङ्गीकारप्रार्थनानन्तरं देवकीवसुदेवयोरग्रे समभूत्, श्रीगोकुले व्यवहारविषयस्वरूपं द्विभुजस्य प्राकट्यं नवम्यामासीत् तत्प्रयुक्त उत्सवश्चेति न क्वापि दोषलेशः, इदमत्र तत्त्वं, अवताररूपं प्राकट्यं तु नियतदेशकालसङ्ख्यं व्यवहारविषयस्वरूपं तु यत्रैव भक्तेरुद्रेकस्तद्भक्तार्थं तत्रैव मायाजवनिकादूरीकरणेन भवतीत्यनियतदेशकालसङ्ख्यं, यथा रासे बह्वीनामर्थे बहुधा, अस्मिन् प्राकट्ये नोत्पत्तिभ्रमः, अवताररूपे प्राकट्ये तु माययोत्पत्तिभ्रमः कार्यतेज्ञानामितिविशेषो ज्ञेयः, ननु पुरुषोत्तमाविर्भावो मथुरायां श्रीगोकुले च स्वीकृतस्तत्र नन्दालये पुरुषोत्तमप्राकट्यं न सम्भवति मानाभावान्मथुराधिकरणाविर्भावेन चरितार्थत्वाच्चेति चेन्न, 'नायं सुखापो भगवान् देहिनां गोपिकासुत' इत्यादिश्रीशुकोक्तीनां मानत्वात्, गौतमीयतन्त्रादिषु 'बल्लवीनन्दनं वन्द' इत्यादिवाक्यैर्मन्त्रेष्वपि यशोदानन्दनत्वव्यवहाराच्च, न चेदं लोकप्रसिद्धिमात्रमूलकं भ्रान्तिप्रतिपन्नमनूदितमिति वक्तव्यं, भ्रान्तिप्रतिपन्नस्यासतो मन्त्रादौ व्यवहारे दोषाधिक्यस्मरणात्, 'योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं चौरेणात्मापहारिणे'तिवाक्यात्, अन्यथा भ्रान्तिप्रतिपन्नं मनुष्यत्वादिकमपि कुत्रचिदनूदितं स्यात्, प्रत्युत 'मायामनुष्यस्य वदस्व विद्व'न्नित्यादिवाक्यैर्मनुष्यत्वादि भ्रान्तिप्रतिपन्नमपोह्यतेतो 'नन्दस्त्वात्मज उत्पन्न'इत्यादिवाक्यबलान्नन्दालये पृथक् प्राकट्यमङ्गीकार्यं, न च 'न खलु गोपिकानन्दनो भवानि'त्यादिभिर्यशोदानन्दनत्वं निषिद्धमिति वाच्यं, प्राकृतरीत्या प्राप्तस्यैव 'गोपिकानन्दनो भवानि'त्यादिभिर्यशोदानन्दनत्वं निषिद्धमिति वाच्यं, प्राकृतरीत्या प्राप्तस्यैव 'गोपिकानन्दन'त्वस्य निषेधात्, देवकीजन्मवाद' इत्यादिवाक्यैर्देवकीनन्दनत्वनिषेधवदत्रापि स्वीकारात्, अन्यथोक्तवाक्येन देवकीनन्दनत्वमपि बाध्येत, अपि च ब्रह्मादिप्रार्थनया भूम्युद्धारार्थं वसुदेवगृहे चतुर्भुजरूपेण पुरुषोत्तमोवतीर्णः, एवमक्षरात्मकव्यापिवैकुण्ठस्थाभिः श्रुतिभिश्चिरं स्तुत्या प्रसाद्य प्रार्थितो नित्यलीलास्थभक्तवृन्दविरचितरासमण्डलमण्डनो भवान् पुरुषोत्तमो द्विभुजरूपेण नन्दालयेवततार, अतो यादृश द्विभुजं नित्यलीलामध्यपाति गोपनितम्बिनीवृन्दवेष्टितं रासस्थं दृष्ट्वा समुत्पन्नरिरंसाभिः श्रुतिभिः प्रार्थनायां क्रियमाणायां 'पृथिव्यां भारते क्षेत्रे माथुरे मम मण्डले। वृन्दावने भविष्यामि प्रेयान् वो रासमण्डल' इति वरं दत्तवान्, तादृश 'द्विभुजरूपेणावतरणमपेक्षितमिति नन्दालये पृथगेव द्विभुजावतारः, पुरुषोत्तमस्य चतुर्भुजत्वद्विभुजत्वयोः, प्रमाणसिद्धत्वात्, परिपूर्णतमः कृष्णो वैकुण्ठे गोकुले स्वयं चतुर्भुजश्च वैकुण्ठे गोकुले द्विभुजः स्वय'मिति ब्रह्मवैवर्तात्, न चोपसंहर विश्वात्म'न्निति देवकीप्रार्थनानन्तरं चतुर्भुजस्वरूपमेव भुजद्वयोपसंहारेण तथा प्रदर्शितवानिति वाच्यं, नन्दगृहे प्रादुर्भूतस्य द्विभुजस्यैव मथुरायां प्राकृतभावाङ्गीकारात् प्रार्थनानन्तरं दर्शनमितिसिद्धान्तात्, अन्यथा चतुर्भुजस्य द्विभुजप्रदर्शनं मायिकं स्यात्, तथा सति तादृशद्विभुजरूपेण कृता लीला मायिकरूपपर्यवसिताः स्युः, तत् तु न सम्भवति, अनेकप्रमाणविरुद्धत्वात्, अतो 'गोकुले द्विभुजः स्वय'मित्यादिप्रमाणसिद्धं मायासम्बन्धरहितं द्विभुजं परमकाष्ठापन्नं पुरुषोत्तमस्वरूपं नन्दगृहाविर्भूतमेव प्राकृतभावस्वीकारप्रार्थनानन्तरं मथुरायां देवकीवसुदेवयोः प्रकटीकृतमित्यङ्गीकर्तव्यं, साहजिकद्विभुजस्वरूपस्य सिद्धत्वात्, प्रदर्शनार्थं चतुर्भुजस्यैव द्विभुजत्वकरणे तु द्विभुजत्वं कल्पनीयं स्यात्, तादृशकल्पिततद्द्विभुजरूपेणान्यासां लीलानामसम्भवात्, न हि श्रुतिभ्यो वरदानं कल्पितद्विभुजरूपेण कृतं किन्तु साहजिकद्विभुजरूपेण, अतः फलदानमपि साहजिकद्विभुजरूपेणैव भवितुमर्हति, तदर्थं द्विभुजस्य नन्दालयेवतारः पृथगेव स्वीकार्यः, 'नन्दस्त्वात्मज उत्पन्न' 'तन्मातरौ निजसुतौ घृणया स्तुवन्त्या'वित्यादिबहुवाक्यस्वारस्याच्च तस्यैव मथुरायां प्राकृतभावप्रार्थनानन्तरं पित्रोर्दर्शनमिति निर्दुष्टमखिलं 'बभूव प्राकृतः शिशु'रित्यत्र प्राकृतपदार्थस्तु प्रभुचरणैष्टिप्पण्यामुपपादितः, स ततोवधेयः, 'प्राकृतत्वं द्विभुजत्व'मिति केचिदाहुस्तत्तु पूर्वोक्तरीत्या ब्रह्मवैवर्तादिविरुद्धं बृहद्वामनीयसन्दर्भविरुद्धं युक्तिविरुद्धं भक्तिमार्गविरुद्धं चेति नादर्तव्यं सुधीभिः ॥ ४७ ॥

॥ योजनायां तृतीयाध्यायः समाप्तः ॥

(५) भगवदीयनिर्भयरामभट्टनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

'युवां मां पुत्रभावेने'त्यत्र भगवतः श्रीगोकुल एकादशवर्षस्थितिप्रयोजनमाहुराविर्भाव इत्यादिना, "आविर्भावे इत्यारभ्य सततं हृदि" कारिकाणां व्याख्या—एवं विधानन्तभावैरिति, एवं भावैरत्याख्यां तयोर्वसुदेवदेवक्योर्दर्शने जाते सति तयोरेव मिथस्तथा भावपूर्वकमालापत इन्द्रियाणामेकादशानां वृत्तयो हरिपरा आसन्नित्यर्थः ॥ १-६ ॥ वियोगतापेति कारिकाया व्याख्या—पूर्वकारिकान्त उत्तरस्य 'स एव सततं हृदी'त्यस्योत्तरेणान्वयः, वियोगतापतप्ते हृदि स एव हरिः स्थितोभूत् तेनैव तयोर्जीवनमासीदित्यर्थः, तेनेति, इन्द्रियाणामेकादशत्वेनैकादशवर्षपर्यन्तं तथा कुर्वन्निन्द्रियाणां स्वपरत्वं कुर्वन् हरिर्बभौ ॥ ७ ॥ युवामिति कारिकायां—अत इति अतो वरदानादेव माहात्म्यज्ञानयुतः स्नेहोभवदितिहेतोः कंसं मारयित्वा बन्धनान्मोचयित्वो-

पस्थितं प्रभुं चिरादेकादशवर्षोत्तरं प्राप्यापि माहात्म्यज्ञानेन शङ्कितौ पितरौ न सस्वजाते नालिङ्गितवन्तौ, तदुक्तमेकचत्वारिंशाध्याये 'देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ कृतसंवेदनौ पुत्रौ सस्वजाते न शङ्किता'विति ॥ ८ ॥ ४५ ॥ तथा हृतप्रत्ययेत्यत्र गजा इति कारिकाया व्याख्या द्वारस्तु सर्वाः पिहिता दुरत्यया इत्यत्र दुरत्यया इतिपदव्याख्यानमिदं स्पष्टमेव ॥ ४८ ॥

॥ इति श्री तृतीयाध्यायकारिकार्थः समाप्तः ॥

बुभुत्सुबोधिका

युवामित्यत्र अधुनेति वाक्यार्थानुसन्धाने । मुक्तिर्भवतीति 'दशपूर्वान् दशापरा'निति वाक्यात् । 'अनिच्छतोपि गतिमण्वीं प्रयुङ्क्त' इति वाक्याच्च । ननु 'न वव्राथेपवर्गं म' इति वाक्यादपवर्गे अप्रार्थितेप्येतच्छास्त्रस्य वेदरूपस्य मुख्यत्वात् कुतो मुक्तिरित्याशङ्क्याहुः प्रमेयेति । अप्रत्यक्षोपि प्रत्यक्ष इति प्रमेयबलम् । तस्य । शास्त्रस्येति 'दुर्दर्शोहं कुयोगिना'मिति प्रथमस्कन्धशास्त्रवद् 'युवयोः कामदित्सये'ति शास्त्रस्य । धर्म्यपेक्षया धर्मस्य गौणत्वात् । तुल्यत्वादिति विशेष्यांशे तुल्यत्वात् विहिताविहितत्वं विशेषणांशेऽतौल्यमिति फलैक्यम् । प्रकारस्येति ब्रह्मभावरूपस्य ब्रह्मत्वस्य पुत्रभावरूपपुत्रत्वस्य च । प्रकारस्यात् प्रयोजकत्वादिति पाठे वैदिका वेदे हलृकारं मध्ये पठन्ति । मद्गतिमिति मत्सम्बन्धिनीं गतिं फलम् । व्यापिवैकुण्ठाख्यामिति सालोक्यमुक्तिम् । अधिष्ठानलीलायामङ्गीकारात् । ज्ञानाङ्गभक्तिमत्त्वाच्च । ननु वक्ष्यमाण उत्तरार्धे वसुदेवस्य ब्रह्मभावे ब्रह्मभावपदस्मारिते सति 'परा'मिति विशेषणं न देयम्, ज्ञानमार्गीयत्वादित्याशङ्क्य समाधानमाहुः माहात्म्यज्ञानेति । तुल्यत्वादिति ज्ञानमार्गे वक्ष्यमाणेऽत्रोक्तस्नेहे च तुल्यत्वात् । ज्ञानमार्गे ज्ञानाङ्गभक्त्या श्रवणादिरूपयाच्युतविषयिण्या 'यथा यथात्मा परिमृज्यत' इति वाक्योक्तया सूक्ष्मज्ञानविषयस्याधाराधेयसम्बन्धे माहात्म्यज्ञानं देवत्वज्ञानं तस्मिन् सति स्नेहः । 'ज्ञाते स्नेह' इति भाष्यादतस्तौल्यात् । ननु ब्रह्मभावाधिकारिणि वसुदेवे वेदे स्नेहाय माहात्म्यज्ञाननिवेशे किं बीजमित्याकाङ्क्षायामाहुः अत एवेति । माहात्म्यज्ञानपूर्वकस्नेहस्य मुख्यत्वादेव । तेन मुख्यत्वं बीजमुक्तम् । गोपिकादीनामिति ज्ञानकाण्डीयब्रह्मभाववतीनाम् । उत्पादयिष्यतीति पुनः, 'ते तु ब्रह्महृदं नीता' इति वाक्ये ब्रह्महृदनयनानन्तरं कृष्णोद्धारकथनात् । अन्यथेति पुनर्माहात्म्यज्ञानप्रवेशाभावे । अत्र टिप्पणी । ननु ज्ञान एव विषयतया माहात्म्यं प्रविष्टं भक्तिमार्गे पुनर्माहात्म्यज्ञानस्य स्नेहाङ्गत्वेन प्रतिपादने कावश्यकतेत्याकाङ्क्षायां तदावश्यकत्वे युक्तिं वदन्तीत्याशयेन टिप्पण्यामाहुः यदीति । स्वातन्त्र्येणेति उत्तरार्द्धे उपदेक्ष्यमाणज्ञानेन ज्ञानिनां ज्ञाने माहात्म्यस्यापि विषयतया निवेशात् ज्ञानिकोटिनिविष्टस्यानुवादेपि स्वातन्त्र्येणेत्यर्थः । यथा कथञ्चिदिति विविधहरिभावेषु येन केनापि भावेन । अत्रेति निरोधस्कन्धार्थे । सुबोधिन्याम् । बोधांश इति पुनः क्रियमाणमाहात्म्यज्ञानांशः, वसुदेवज्ञानांशो वा । विविधभावेषु एको भावोधिक इत्यापाद्यते । ज्ञानोपदेशो यो निरोधः स्कन्धार्थे निविशते तं प्रतिपादयन्ति भक्तानां प्रपञ्चेति । 'संस्था दशमार्थ' इति द्वादशस्कन्धे । संस्था प्रलयः प्रपञ्चविस्मृतिः प्रपञ्चाभाव इति यावत् । स्मरणात्मकः प्रपञ्चः । नन्वापादितभावः क दृष्ट इति चेत्, तत्राहुः अत एवेति । यतो विविधभावेष्वस्यापि निवेशोत एव । अत एव 'पार्थिवानि विममे रजांसि न तु भगवद्गुणा'निति श्रुतिः । उत्पत्तीति यथा प्रथमाध्याये सुद्युम्ने ब्रह्मविष्णुशिवकृतस्त्रीत्वपुंस्त्वोभयत्वनिरूपणेन देवप्रसादयुक्तभक्तनिरूपणेन जीवस्वरूपतः । चतुर्विंशतिधा निरूपिताः । ननु तर्हि प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिर्निरोध इति प्रसिद्धभावे भगवदासक्तिः कदा जायत इत्यत आहुः प्रेम ज्ञानमिति । प्रेम प्रपञ्चविस्मृतिमतामुत्पन्नानां भक्तानां भगवदासक्तिः । ज्ञानं माहात्म्यज्ञानमपि । निरोधो विविधहरिभावाः । अत्रैवेति कारिकासु, 'एवंविधानन्तभावै'रित्येवम् । ननु मातृप्रार्थनयान्यत्र गमनस्यावश्यकत्वेपि तत्स्थलादिकमनुक्त्वा कथमत्र भगवता वाक्यं समापितमित्याकाङ्क्षायां समापनतात्पर्यमाहुः आर्थिकमित्यादि । यदत्रार्थश्छिद्रेतरत्वादिवत् सिध्यति तदत्र कण्ठतो नोच्यत इति हेतोः भगवता वाक्यपरिसमाप्तिः कृतेत्यर्थः । आर्त्येति गीतोक्ताधिकाररूपया । अत एवेति अधिकाराभावादेव 'लोकवत्तु लीलाकैवल्य'मितिसूत्रात् । अत इति प्राकट्यात्पूर्वम् । तदनन्तरं च दुःखात् । निर्बन्धोग्रे वक्तव्यः । अयमिति दण्डः । एवं स्मरणे स्नेहातिशयो दुर्लभ इत्याशङ्क्याहुः अद्भुतेत्यादि । विस्मयकर्मत्वात् । अत एव 'स विस्मयोत्फुल्लविलोचन' इति वाक्यम् । तस्येति स्नेहातिशयस्य । स्नेहातिशयं कारिकाभिराहुः आविर्भाव इत्यादि । पुत्रतयेति न तु पुरुषोत्तमत्वेन । तप इति द्वितीयस्कन्धनवमाध्याये साध्यसाधनभावः स्पष्टः । आर्तिः सन्तापोधिकाररूपः । व्यापारेण व्यापारिणो नाथासिद्धत्वात् । मुख्यं साधनमाहुः भक्तिमार्गीयमिति । मार्गणे भगवत्सान्निध्यात् प्रमेयबले पुष्टिमार्गीयं भक्तिज्ञानम् । इत्यात्मेति इति हेतोः आत्मवियोगं स्वविप्रयोगं संयोगानन्तरं लीलारसप्राप्त्यर्थम् । संयोगविप्रयोगयोर्विप्रयोगस्य विविधभावजनकत्वेन मुख्यत्वात् । तदा त्विति प्राकृतशिशुकाले । 'संयोगे विप्रयोगभावनं प्रेमे'ति भक्तिसूत्रात् संयोगे विप्रयोगभावानाहुः एतावन्तीति । तत्रेति बृहद्वने । अत्यार्त्येत्यधिकाररूपया । तयोर्वसुदेवदेवक्योः । मिथस्तथेति तयोरेव मिथस्तथाभावपूर्वकमालापतश्चकारादन्तःस्थितभगवत्प्रभावतः इन्द्रियाणामेकादशानां वृत्तयो हरिपरा आसन्नित्यर्थः । अत्यार्तौ भगवद्दर्शनं गुणप्रकरणे ऐश्वर्याध्याये निबन्धे विवृतम् । तादृशार्तावपि जीवने उपपत्तिमाहुः स एवेति । दर्शनं कदाचित् । हृदये स्थितिस्तु सततमित्यर्थः । तेनैकादश वर्षाणीति तृतीयस्कन्धे 'एकादश समास्तत्र गूढार्चिः सबलोवस'दिति । दशमस्कन्धे द्विचत्वारिंशाध्याये एकादशवार्षिकस्योपनयनम् । 'अथ शूरसुतो राजन् पुत्रयोः समकारयत् । पुरोधसा ब्राह्मणैश्च यथावद् द्विजसंस्कृति'मिति वाक्यात् 'एकादशवर्षं क्षत्रियमुपनये'दिति गृह्यसूत्रादाविति तथा । ननु 'सर्वा हरिपरा आस'न्नित्युक्त्या सर्वात्मभावको भवति स च

प्रदानसाध्य इति किं प्रदानमिति चेत् तत्राहुः युवां मामिति। एवेति 'प्रदानव'दितिव्याससूत्रादेवकारः। सत्वजाते नेति कंसवधानन्तरम्। शङ्किताविति ब्रह्मत्वज्ञानात्। एवं स्नेहातिशयः प्रासङ्गिक उक्तः ॥ ४५ ॥

इत्युक्त्वेत्यत्र एवमुक्त्वेति निरोधस्कन्धत्वात् कारिकोक्तनिरोधवन्तौ प्रत्युक्त्वा कीर्तनभक्तित्वेन। रूपान्तरेति 'बभूवे'त्युत्पत्त्यर्थको धातुः घटो भवतीत्यनेन। उत्पत्तिर्जन्मप्रकरणात्। 'जन्म त्वात्मतया शरीरस्वीकृतिं प्राहु'रितिवाक्यात्। तादृशकृत्यनुकूलो व्यापारः। अत्र कृतिव्यापारयोर्भेदः। ज्ञानस्यापीति कीर्तनजनकाप्राकृतज्ञानस्यापि। जानातीच्छति यतत इति। ज्ञानसत्त्वे तत्कार्यभावः तूष्णीम्भावो न स्यात्। यद्वा ज्ञानं क्रियेतिपञ्चरात्राज्ज्ञानस्य क्रियायास्तिरोभावो बाले दृष्टः। सर्वदुःखेति विहिताविहितभक्तिमतां सर्वेषां दुःखानां हन्ता। स्वरूपमिति यथार्थज्ञानरूपं अन्यथा तिरोभावे सति ज्ञानस्य प्राकृतज्ञानस्वीकारात्। भगवानितीति ऐश्वर्येण तथा न करिष्यतीत्यर्थः। रूपज्ञानेति रूपं चतुर्भुजं ज्ञानमखण्डब्रह्मज्ञानादि। तयोः कार्ययोः चतुर्भुजोत्थापनमखण्डज्ञानोपदेशश्च। सर्वभवनेति उक्तैश्वर्येणान्यथाकर्तुं सामर्थ्यमुक्तम्। अत्र टिप्पण्यां यद्यात्मतुल्या तदास्या मायात्वं कुत उक्तमित्यत आहुः संसारेत्यादि। तथा चैतत्कार्ये किञ्चित्तद्धर्मसाम्येन तथोक्तम्। कौण्डपायिनामयनेऽग्निहोत्रशब्दवत्। तर्ह्यात्मशब्दस्य किं प्रयोजनमित्यतस्तदाहुः वस्तुत इत्यादि। एतमर्थं न्यायेनोपोद्बलयन्ति एवं सतीत्यादि। कर्मधारय इति आत्मा चासौ मायेति तेन भगवत्सदाव्यवधानस्य मायाया भगवदीयत्वाप्रापकत्वेप्यक्षतिः। भगवच्छक्त्येति आत्ममायया। अनन्येति दर्शितरूपादनन्यलभ्यत्वात्। तद्विरुद्धेति लीलाविरुद्धाविषयकत्वं स्वस्य सर्वभवनेत्यादिप्रघट्टकस्यार्थे यदैव तूष्णीं स्थित इत्यादिसुबोधिन्या बालकस्वेद्भुतरसं स्मारयन्त आहुः वस्तुतस्त्वित्यादि योजनेत्यन्तम्। शिशुरूप इति प्रथमस्कन्धवाक्यसुबोधिन्यां भगवानेवैवमवस्थो जात इतिसुबोधिन्याम्। नन्वेवं सति सर्वत्र पदेष्वासीदितिक्रियया सम्बद्धेषु सत्सु बभूवेति क्रियान्तरं व्यर्थमसङ्गतं वा स्यादित्याकाङ्क्षायां तद्वैयर्थ्यमाहुः अपरोक्षेत्यादि। सोंश इति अप्राकृतत्वांशः। तथा च 'प्राकृतो बभूवे'ति भिन्नं वाक्यमतो न वैयर्थ्यादिदोष इति भावः। लिडिति परोक्षार्थकलिट्प्रयोगः। प्राकृतो बभूवेति वेदविद्ययोर्दर्शनेपि प्रकारस्य कथनत्वमभिप्रेत्य पक्षान्तरमाहुः अपरं चेत्यादि। इत्याद्युक्तमिति प्रघट्टकार्थत्वाल्लौकिकेत्यादिसुबोधिन्याष्टिप्पण्युक्तरीत्या लोकज्ञाने नैपुण्यं परमार्थस्य ब्रह्मणो ज्ञाने नैपुण्यं च ग्राह्यम्। 'युवां मा'मितिवाक्यात्। ननु 'प्राकृतो बभूवे'त्यस्य दर्शनप्रकारकथनत्वाङ्गीकारे भवनक्रियां प्रति प्राकृत इत्यस्य कर्तृत्वमसङ्गतं स्यादित्यतः पक्षान्तरमाहुः अथवेत्यारभ्योक्तमेवेत्यन्तम्। 'युवां मा'मितिवाक्यादाहुः लौकिकालौकिकेति। अस्मिन् पक्षे कल्पनाक्लेशादरुच्या पक्षान्तरमाहुः यद्वेति। पूर्ववदिति 'अथवे'त्याद्युक्तपक्षवत्। चतुर्थाध्याये तस्योत्पत्तिर्निरूपितेत्युक्तत्वादधुना तत्स्वीकार इत्याशयेनैतद्व्याख्याने प्राकृतपदस्यार्थान्तराण्युक्तानि। (सुबोधिन्याम्।) लौकिकज्ञानेत्यादि। अत्र टिप्पणी। 'न भगवत्सामर्थ्यस्य प्रतिबन्धक'मिति सुबोधिनीपाठः। पूर्वव्याकृतष्टिप्पण्यविरोधेनाधुना तु भगवत्सामर्थ्यस्य प्रतिबन्धकमिति नञ्रहितपाठमप्यङ्गीकृत्याहुः सामर्थ्यस्येत्यादिना। श्रीवल्लभलेखेप्ययं पाठः। लोकविद्वेषेति अलौकिकचतुर्भुजरूपे तथा। मातुरिति लोकविद्वेषभियेत्यादिनान्वेति। यथाश्रुत एवान्वयो वा। एतद्रूपेति चतुर्भुजरूपोपसंहारः। न तदिति न भयम्। 'अभिसरत्युदायुध' इतिवाक्यात्। उक्तरूपस्येति 'अत्रैव वसुदेवदेवक्योः सामर्थ्यस्ये'त्यादिग्रन्थेनोक्तरूपस्य भयहेतुत्वं सूच्यते न तु अभिधीयते अभिधावृत्तेः 'पित्रोः सम्पश्यतो'रित्यत्रोपक्षीणत्वात्। तथात्वमिति सामर्थ्यस्य प्रतिबन्धकत्वम्। सुबोधिन्याम्। उभयोरेकतरनैपुण्यस्य वक्ष्यमाणभगवल्लीलाप्रतिबन्धकत्वमित्याशयेनाहुः उभयमपीति। विद्यमानमिति 'ज्ञानं यथा न नश्येते'तिवाक्याज्ज्ञानमपि विद्यमानमेव मोक्षायेतिज्ञेयम्। भगवत्क्रीडाया मोक्षरूपायाः। 'लोकवत्तु लीलाकैवल्य'मिति व्याससूत्रादित्यर्थः ॥ ४६ ॥

ततश्च शौरिरित्यत्र स्वीकृत्य रूपान्तरमिति तेन 'हेतूद्यमकापट्यस्वीकरणैः प्रथमो महा'निति कारिकायां बहुष्वनियमोसूचि। यथा हरिहरगुरवः गुरुहरिहराः इत्यत्र। तेन कापट्यं चतुर्थेध्याये। अयमपपाठो 'हेतूद्यमस्वीकरणकापट्यैः प्रथमो महा'नित्येव पाठः। तत्रेति मथुरायाम्। तस्य चाज्ञानादिति तच्छब्देन प्रधानरूपस्य शिशुभाविनः परामर्शः तस्य शिशोरज्ञानात्। तस्य रूपान्तरस्वीकारस्येति वा ज्ञानं यथा स्वप्ने। एवं स्वीकारवैयर्थ्यावैयर्थ्ये ज्ञानाज्ञाने सर्वं तस्य समाधानार्थम्। तं बोधयित्वेति वसुदेवं बोधयित्वा। मां नय कन्यामानयेत्यादिप्रकारं मनसा बोधयित्वेत्यर्थः। तूष्णीं भावस्योक्तत्वात्। 'भगवत्प्रचोदित' इतिपदस्यार्थः। अयमर्थः। वसुदेवो बुद्ध्वा तं बोधयित्वा मनसा मानसीनरूपेण व्यापकेन तस्य तूष्णींभावो नोक्तः। रूपान्तरस्वीकारज्ञानाज्ञानयोरेवम्। मूलनिष्ठज्ञानाज्ञानयोरप्येवम्। समुपसर्गस्यार्थमाहुः उत्तमेति। इयेषेति इषु इच्छायाम्। भयाभाव इति शूरस्य भयाभावः तत्सम्बन्धात् पुत्रस्यापि स इति प्रसिद्धो भगवदधिष्ठानम्। स इति भगवत्स्तोता भगवद्भाषणयोग्यश्चेति वार्थः। भगवद्वाक्य इति 'युवां मां पुत्रभावेने'तिवाक्ये। प्राकृते चेति च पुनः प्राकृते। प्राकृतेव जातेति श्रीवल्लभलेखे। वकार इवार्थे इति च। आत्ममायाकार्यम्। साधारणमायाकार्यं वा तामसत्वात्। अग्रेपि। साधारणमोहस्येति अत्र टिप्पण्यां तथेत्यर्थ इति साधारणेत्यादिः। साधारणत्वमिति चौरवसुदेवयोर्ज्ञाने साधारणत्वम्। मोह एव भवेदिति मोहाभावप्रतियोगी मोहः अन्यथा कस्याभावे भवेदित्येवकारः अन्यत् स्पष्टम्। सुबोधिन्याम्। भगवतः कार्योपायाः। योगमायाकृतानाहुः गमन स्वाच्छन्द्यमित्यादि। आत्मन इवेति मोहे दृष्टान्तः। आत्मानं माया मोहयतीति स्पष्टम्। प्रस्वाप इति योगमायेतिनामतः प्रमादालस्यनिद्रं तत्कार्यसाम्यम्। मुहूर्तान्तरमिति 'नवम्यां योगनिद्राया जन्माष्टम्यां हरेरतः नवमीसहितोपोष्या रोहिणीबुधसंयुते'तिभविष्योत्तरवाक्यात् नवम्यां सा

जातेतिज्ञायते। किञ्च 'अथ सर्वगुणोपेत' इति सन्दर्भे निरूपितस्याधिदैविककालात्मकपञ्चचत्वारिंशच्छद्चत्वारिंशद्घटिकाद्वयरूपनिशीथस्यारम्भे मथुरायां पुरुषोत्तमजन्माभूत्, निशीथावसानसमये नन्दगृहे पुरुषोत्तमजन्म। एव मथुरायां श्रीगोकुले च पुरुषोत्तमजन्मनः एक एव निशीथकालः। तावत्येवाष्टमी तिथिः वक्ष्यमाणवाक्यात्, तदनन्तरं नवमी प्रवृत्ता। तस्यां गोकुले मायाजन्म। भविष्ये 'नवम्यां योगनिद्राया जन्माष्टम्यां हरेरतः नवमीसहितोपोष्या रोहिणीबुधसंयुते'त्यनेन, विष्णुपुराणे प्रथमाध्याये 'प्रावृट्काले च नभसि कृष्णाष्टम्यां महानिशि उत्पत्स्यामि नवम्यां च प्रसूतिंत्वमवाप्स्यसी'त्यनेन चाष्टम्यां पुरुषोत्तमजन्म नवम्यां मायाजन्मकथनात्। एवं चोक्तमुहूर्ते आद्यन्तयोः कृष्णजन्माष्टम्यां मुहूर्तानन्तरं नवम्यां माया जातेत्युपपन्नम्। रोहिणीति 'अथ सर्वगुणोपेत' इत्यत्र 'यर्ह्येवाजनजन्मर्क्ष'मितिनिशीथारम्भे रोहिण्यारम्भकथनाद् रोहिणी तु भगवन्मायाजन्मनोस्तुल्या। तेन रामानुजमतीयैर्यत् कृत्तिकाविद्धा रोहिणी नाद्रियते तदचारु उक्तवाक्यविरोधात्। दोषायेवेति 'सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी अविद्धायां सरक्षायां जातो देवकीनन्दनः' इतिब्रह्मवैवर्तवाक्यात्। अन्तःस्थित इति कारागृहे स्थिते। न भवतीति ज्ञानरूपभगवता तमोरूपमायोद्गमो नाशाञ्च भवति। तर्ह्येव जातेति गमनस्वाच्छन्द्यादिस्वकार्यकाल एव। योगार्थमित्यस्य व्याख्यानं कार्योपायार्थमिति। कार्ये गमने उपायः प्रतिबन्धकाभावः तदर्थम्। लोकान् पौरान् व्यामोहयति शाययतीत्यर्थः स्वतन्त्रेति कार्योपायं जानातीच्छति यतत इत्यत्र माया यत्ने स्वतन्त्रा कर्त्रीत्वात्। इमं पक्षम्। नन्दजाययेति स्वतन्त्रकर्त्र्या। 'स्वतन्त्रः कर्ते'तिसूत्रात्। भगवानिवेति 'विष्णुः सर्वगुहाशयः आविरासी'दित्युक्तस्वतन्त्र इव ॥ ४७ ॥

तया हृतेत्यत्र संशयादय इति आदिना विपर्यासनिश्चयस्मृतयः। आसुराभिभवमाशङ्क्य सर्वपदार्थं वदन्तोनूपसर्गार्थमाहुः मायेति। मुग्धाः स्वयं मायया स्वदेवतया मोहिताः मूर्छिताः मायाविशेषकार्यवन्तः। एवकारः 'मायेत्यसुरा' इतिवाक्यात्। अप्रभाववन्तोज्ञानवत्त्वाद् यशोदादयः। तानाहुः यशोदादय इति। तुः आसुरपक्षं व्यावर्तयति। क्रमेणेति अनुक्रमेण। द्वा स्था मुग्धाः असुराश्च न् मूर्छिताः। पौरा इति पूर्ववत्। पूर्ववदिति कार्योपायार्थं लोकपौरव्यामोहवत् बुद्धिरेव गृहीताऽऽवृता। लोकान्तरमिति देशान्तरम्। कार्यमेवेति प्रत्ययवृत्तिहरणमनुशायनं च। भिन्नप्रक्रमार्थका'थ' शब्दादेवकारः। अन्यत्त्विति द्वारपिधानादिकं तु कंसाज्ञया पूर्वमेव जातं स्थितम्। व्याघ्रा दुर्गं। कचिदिति नगराद् बहिररण्ये। बन्ध इति द्वारपालकैः। 'बृहत्कपाटायसकीलशृङ्खला' इतिपाठे आहुः बृहन्तीति। अयं न बहुव्रीहिः किन्तु पिहिता इत्यस्यार्थकथनमिति श्रीवल्लभाः। तेन तृतीयान्तः पाठः न प्रथमान्तं पाठान्तरम् ॥ ४८ ॥

ताः कृष्णवाह इत्यत्र जाता इति द्वार इत्येव भगवत्क्रीडोपयोगित्वप्रादुर्भावो निरूपितः। सर्वमोचेति स्वयमित्यस्यार्थः। अचेतनानामिति व्रजतीति व्रजः तत्सम्बन्धिकपाटानाम्। अचेतनानामिति भगवन्माहात्म्यार्थम्। अतितामसैरिति द्वास्थैः। आसुरैः। मुक्तिरिति सदानन्दतिरोभावनेन चित्प्राकट्यान् मुक्तिः। त्रयं वा प्रकटम्। अन्येषामिति चेतनानाम्। जडभेदवत्त्वात्। ननु मुक्तिः सायुज्यं कथं जातमित्यत आहुः यदीति। यदि शुद्धसत्त्वं जडान्यनिष्ठं भगवद्ग्राहकं विशुद्धसत्त्वं च यदि तदा विशुद्धसत्त्वस्य व्यापकत्वात् सायुज्यमित्यर्थः। सत्त्वरूपज्ञानानामपि सायुज्यम्। एतदिति विशुद्धसत्त्वे भगवद्ग्राहकत्वप्रदर्शनार्थम्। अयमेवेति कृष्णवाहवसुदेव एव। एवकारोऽक्षरज्ञानं व्यावर्तयति। योगमायात्वात्। स्वत एवेति पुरुषोत्तमादेव, तमःस्वभावादेवेति वार्थः। नान्यथेति अक्षरज्ञानेन न। निर्गतेष्विति वसुदेवेन निष्क्रान्ते तु। निष्क्रमणकर्मीकृतेषु। उभयोः साम्मुख्य इति मायाभगवतोः साम्मुख्ये। योगमायाकार्यमाहुः वृष्टिरपीति। पर्जन्यः क्रियाशक्तिर्वेदार्थः उपांशुगर्जितं आरण्यके विद्युच्छब्दः। शब्दार्थावुक्तौ भगवत्साम्मुख्ये फलं वीर्यं फलमासीत्। द्वारां पृथ्वीत्वात् कृष्णस्य द्यौस्त्वात् आसीत्। अत्र मायासाम्मुख्यमप्याहुः एतावन्माययेति। आन्तरालिकसृष्टिरूपम्। प्रवृत्तमिति प्रमादालस्यनिद्रारूपम्। शेष इति शेषः शब्दो वैदिकः अन्वगमनं योगमायाकार्यम् तेनोभयसाम्मुख्यकार्यमुक्तम्। योगमायाकार्यं पाताले स्थितं शेषस्य भगवति योजनम्। फणैरिति मायिकैः। तत्कृतं शेषकृतम्। भगवत्साम्मुख्यकार्यमाहुः अन्तरिक्ष इति। अन्तरिक्षमाकाशः 'आकाशरीरं ब्रह्मे'तिश्रुतेः ॥ ४९ ॥

श्रीमातृपितृतोषिणी—श्रीसुबोधिनीजी—

युवां मां पुत्रभावेन—यह भगवान् का चतुर्दश अन्तिम श्लोक है, भगवान् कहते हैं कि पूर्वजन्म में मोक्ष की कामना नहीं की थी लेकिन इस जन्म में मोक्ष के न माँगने पर भी मोक्ष होगा। क्योंकि आप दोनों स्नेह के द्वारा परम गति को प्राप्त हो जाओगे, कारण यह है कि इस समय प्रमेय बल प्रकट किया है वस्तुशक्ति को ही प्रधानता दी गई है, शास्त्र की इस समय गौणता अप्रधानता है, इस कारण शास्त्र में जिसका विधिरूप से कर्त्तव्यरूप से वर्णन नहीं उस अविहित भक्ति स्नेह के द्वारा पुत्र भाव से अथवा शास्त्र में जिसका कर्त्तव्य रूप से विधिरूप से वर्णन है उस विहित भक्ति स्नेह के द्वारा ब्रह्म भाव से किसी भी प्रकार से मुझ में स्नेह करने पर व्यापि वैकुण्ठ नाम वाली मेरी परागति को प्राप्त हो जाओगे। बात यह है कि स्नेह का विषय तो समान ही रहेगा पुत्रभाव से स्नेह का विषय भी मैं ही रहूँगा और ब्रह्मभाव से भीस्नेह का विषय मैं ही रहूँगा। स्नेह के प्रकारों में अवश्य भेद है, एक प्रकार है पुत्रभाव प्रयुक्त स्नेह, अथवा दूसरा प्रकार है ब्रह्मभाव प्रयुक्त स्नेह परन्तु परम गतिरूप फल की सिद्धि के लिये अमुक भेद ही उपयुक्त है ऐसी बात नहीं है, **यथा कथञ्चित्** विहित मर्यादा भक्ति और

पुष्टि भक्ति से मुझ में स्नेह करना ही आवश्यक है उसके द्वारा परमगति प्राप्त हो ही जायगी। अभ्यर्थना किये बिना ही मुक्ति हो ही जायगी। नित्य लीला प्रवेश ही यहाँ पर मुक्ति पदार्थ है। प्रकार भेद होते हुए भी स्नेह मात्र से समान फल या एक ही फल की सिद्धि इसलिये असम्भावित नहीं कि उक्त फल के प्रति जिस स्नेह को कारण बतलाया है वह **माहात्म्यज्ञानपूर्वस्तु-सुदृढः सर्वतोधिकः। स्नेहो भक्तिरिति प्रोक्तः तयामुक्तिर्न चान्यथा॥** माहात्म्य ज्ञान पूर्वक एवं सबसे अधिक होना चाहिये उसमें ब्रह्मरूप से या पुत्र रूप से होने के प्रकार विशेष का निर्देश नहीं है। माहात्म्य ज्ञान आप लोगों को हो चुका है, अब तो स्नेह मात्र से ही कार्य सिद्धि है, वह स्नेह पुत्र भाव से हो या ब्रह्म भाव से हो, दोनों प्रकारों में माहात्म्य ज्ञानपूर्वक सुदृढ़ सर्वतोऽधिक स्नेह तो तुल्य ही है। स्नेह में माहात्म्य ज्ञान की आवश्यकता है तभी तो श्रीगोपीजनों को भी माहात्म्य ज्ञान का उदय आगे कराया जायेगा। यदि स्नेह में माहात्म्य ज्ञान अपेक्षित नहीं रहता तो इस दशम स्कन्ध में ज्ञान की चर्चा अनावश्यक समझी जाती क्योंकि इसमें तो निरोध प्रतिपाद्य है, और भक्तों के प्रपञ्च की निवृत्ति या अभाव ही निरोध कहलाता है। उक्त निरोध की सिद्धि भगवान् की मधुर लीलाओं से सम्पन्न हो सकती है फिर उद्धवजी के द्वारा ज्ञान का प्रसङ्ग दशम स्कन्ध-प्रतिपाद्य निरोध में समावेश पाने के योग्य न होकर अपनी अधिकता को या अनुपयुक्तता को झलकायेगा, या स्पष्ट बतलायेगा। भक्ति में निरोध अंश भी अपेक्षित है इसलिये दशम निरोध स्कन्ध से पूर्व नवम स्कन्ध में उत्पत्ति के निरूपण से भक्तों के स्वरूप का ही निरूपण किया है उन भक्तों को प्रेम, ज्ञान और निरोध जिस प्रक्रिया से होते हैं वह इस दशम स्कन्ध में ही कहेंगे, यदि **"कंसाद्बिभेषि त्वं तर्हि मां गोकुले नय"** यह पाठ आचार्यचरणों ने नहीं माना, इस विषय को कहते हैं कि जो बात बिना कहे ही प्रतीत होती है उसके लिये शब्द प्रयोग की आवश्यकता नहीं, अतः हमको गोकुल ले चलिये वहाँ पधराकर वहाँ से कन्या को ले आईये, इस बात को मुख से नहीं कहा, **"यास्यथे मद्गतिं पराम्"** इतना कहकर ही भगवान् ने मान लिया ऐसा समझना चाहिए। **एभिर्वचनैर्भगवता वसुदेवदेवक्योः स्वावतारात्पूर्व तदनन्तरञ्च**–भगवान् ने इन वचनों द्वारा अपने अवतरणके पूर्व और उसके अनन्तर भी श्रीदेवकी जी और वसुदेव की दुःखी प्राप्ति में हेतु का भी निरूपण किया है, ऐसा जानना आवश्यक है, जैसे कि देखिये **"तथाहि मत्तः कामानभीप्सन्तौ"** भगवान् ने कहा कि मेरी अभिलाषा को रखते हुवे आपने तप किया इस वाक्य से स्पष्ट होता है कि प्रश्नि एवं सुतपाजी ने कामप्राप्ति के लिये भगवान् का आराधन किया था, भगवत्प्राप्ति के लिये नहीं। लेकिन सकाम भी आराधन तो भगवान् का था वह भगवान् का आराधन निष्फल नहीं होता अतः भगवान् श्रीहरि का आविर्भाव हुआ। आविर्भाव होने पर भगवान् की सुन्दरता को देखकर भगवान् जैसा पुत्र वरदान रूप से माँगा, स्नेह से आर्त होकर प्रभु के प्राकट्य की याचना नहीं किया था, स्नेह जनित आर्ति के अभाव में प्रभु प्राकट्य की इच्छा कैसे हो सकती थी, इसलिये **'वरं मत्सदृशं सुतम्'** इत्यादि वाक्य से अपनी अभीष्ट प्राप्ति होने के अनन्तर भी विषय सुखों का सेवन करते रहें, ऐसा कहा है। ऐसी परिस्थिति में भगवान् ने अपने तुल्य को अन्यत्र नहीं देखकर अपने को ही पुत्र रूप से प्रकट करने का निश्चय किया। जिसके कारण मुक्तात्माओं के लिये भी दुर्लभ कठिनता से प्राप्त होने वाले अपने स्वरूप को थोड़े से कार्य के लिये प्रकट करना पड़ा, भगवान् ने स्वमुख से **'अदृष्ट्वाऽन्यतमम्'** इस वाक्य से यह ही आशय सूचित किया है। अतः इस समय प्रभु के प्राकट्य के निमित्त से श्रीदेवकीजी एवं श्रीवसुदेवजी को कंस के द्वारा किये गये बन्धन प्रयुक्त कष्ट का अनुभव उपस्थित हुआ। श्रीप्रश्नि एवं श्रीसुतपाजी का पुत्र रूप में आग्रह था अतः इनके कीर्तिमान् आदि पुत्रों का नाश भी हुआ, वह दुःख भी इन्हें भोगना पड़ा, एवं समानता में आग्रह था कि आप जैसा पुत्र हो और वह समानता तो भगवान् के ऐश्वर्य वीर्य-यशः श्री- ज्ञान-वैराग्य नाम के षड्गुणों से ही सम्भावित है अतः षड्गुणों के समान संख्यावाले षट् ६ पुत्रों का ही नाश हुआ। भगवान् अद्भुतकर्मा हैं अतः उन्होंने ही मर्यादा की रक्षा के लिये इनको यह दण्ड जैसा विधान किया है, अद्भुतकर्मा भगवान् के एक कार्य में अनेक कार्य होते हैं अतः इनका वह क्लेश अधिक स्नेह का कारण बन गया क्योंकि क्लेश से प्राप्त हुई वस्तु में अधिक स्नेह आवश्यक है॥ ४५॥

कारिकार्थः—आविर्भावे इत्यतः''''''न शङ्कितौ इति कारिकाओं का अर्थ—श्रीमदाचरणों ने आगे श्रीसुबोधिनीजी में कहा कि स्नेह और आर्ति के अभाव में भगवान् कैसे पधारें, इसका स्वयं समाधान इन कारिका से करते हैं कि **"आविर्भावे पुत्रतया साधनं तु तपोभवत्"** श्रीमद्गोकुल में भगवान् के ११ वर्ष पर्यन्त रहने का प्रयोजन बतलाया है कि भगवान् के पुत्र रूप से प्रकट होने में श्री देवकीजी और वसुदेवजी का अगले जन्म का साधन तो तप हुआ, परन्तु आगे लीला रस की प्राप्ति और अनुभूति में भक्ति मार्गीय साधन तो विचारणीय ही है॥ १॥ पुष्टि भक्ति मार्गीय स्नेह मार्गीय श्रीहरि ने अपने वियोग को साधन रूप से उपस्थित किया तब तो श्रीदेवकीजी और श्रीवसुदेवजी की स्वतः ही भगवद्भाव पुष्टि होने लगी॥२॥ वह भगवद्भाव ऐसा था कि दोनों लालनकों को इतने दिन हो गये अब ऐसा करते होंगे, आज तो इतने मास के हो गये ऐसा ऐसा करते होंगे। इतने वर्ष के हो गये, उस कारण से इस प्रकार की शुभ लीलाओं को करते हुए बड़े भैया श्री रोहिणीनन्दन श्रीबलदाऊजी के साथ श्री लालन् वहाँ पर विराजते होंगे॥ ३–४॥ श्री बलभद्र के साथ आप प्रसन्न तो हैं कब मैं उनको सकुशल देखूँगा, इस

प्रकार के अनन्त भावों से अत्यन्त विरह जन्य वेदना के कारण श्री देवकीजी और श्री वसुदेवजी उन दोनों को भगवान् का दर्शन विप्रयोग दशा में कारावास में होता रहता था ॥ ५ ॥ विप्रयोग दशा में वह दोनों माता पिता परस्पर में पूर्वोक्त प्रकार से बातचीत करते रहते थे इसलिये माता-पिता के इन्द्रियों की वृत्तियाँ सर्वथा भगवत्परायण हो गई, वह भगवान् ही निरन्तर उनके हृदय में विराजमान रहते थे ॥ ६ ॥ भगवद्वियोग ताप सन्तप्त माता-पिता के हृदय में भगवान् का विराजना ही दोनों के जीवन का कारण था, इन्द्रियों को एकादश ११ संख्या होने के कारण एकादश वर्ष पर्यन्त भगवान् श्रीहरि माता-पिता की इन्द्रिय वृत्तियों को अपने स्वरूप परायण करते हुए व्रज में विराजे ॥ ७ ॥ **'युवां माम्'** इस वाक्य से भगवान् ने श्री देवकीजी और श्रीवसुदेवजी को यह ही वर दिया था कि आप दोनों पुत्र भाव से या ब्रह्मभाव से बार बार मेरा चिन्तन करते करते स्नेह द्वारा परम गति को प्राप्त करोगे यदि भगवान् ऐसा वर नहीं देते तो इस प्रकार के भाव की कहीं भी संभावना नहीं थी ॥ ८ ॥ अतः श्री देवकीजी और श्री वसुदेवजी को माहात्म्य ज्ञान सहित स्नेह हुआ तभी तो कंस बध के अनन्तर एकादश वर्ष व्यतीत होने पर प्रभु को प्राप्त करके भी माहात्म्य ज्ञान से शङ्कित हुए माता पिताओं ने पुत्र वात्सल्य प्रयुक्त आलिङ्गन नहीं किया ऐसा आगे स्पष्ट उल्लेख है श्रीमदाचार्य चरणों ने **"युवां मां पुत्रभावेन"** श्लोक के **असकृत् चिन्तयन्तौ** इन पदों का इन कारिकाओं से विशद रूप से विवेचन किया है ॥ ९ ॥

श्री विट्ठलेश प्रभुचरणजी ने **"आत्ममाया'** शब्द पर उत्तम मननीय अत्यन्त ही आदरणीय विमर्श किया है। श्री प्रभुचरण आज्ञा करते हैं कि यहाँ आत्म शब्द के प्रयोग के बिना **'भगवान्'** शब्द के रहने से ही भगवच्छक्ति रूप माया का बोध होते हुए भी 'आत्म' शब्द का प्रयोग इस माया की विलक्षणता सूचित करता है कि यह माया भगवत् स्वरूपा है। जिस प्रकार आत्मा-भगवान् निर्विकार हैं शुद्ध है सत्य है और षडैश्वर्य सम्पन्न है वैसे यह माया भी वैसी ही है इस माया का विनियोग केवल भगवान् की निर्विकार विशुद्ध सत्य लीलाओं के अनुभव कराने में ही है। असत्य पदार्थ का अनुभव कराने वाली संसार की बीज रूप माया से यह सर्वथा विपरीत है। ऐसा होने पर भी इसको **'माया'** इसलिये कहा जाता है कि यह भक्तों को अपने स्वरूप का विस्मरण करा देती है और भगवान् में आसक्ति करा देती है। तात्पर्य यह है कि जैसे साधारण माया जीव के सहज आनंदांश स्वरूप का विस्मरण कराकर लौकिक विषयों में आसक्ति कराती है, वैसे यह माया भक्तों को अपने स्वरूप को भूलाकर भगवान् में आसक्ति करा देती है। यह आत्ममाया भगवान् का ही एक अन्यतम स्वरूप है। सूर्य का प्रकाश सूर्य से भिन्न नहीं उसी भाँति यह आत्ममाया भी आत्मरूपा भगवद्रूपा ही है। इसलिये आत्मा से, भगवान् से पृथक् नहीं है। इस आत्ममाया से ही श्री देवकी वसुदेव माता पिता हुए हैं अन्यथा गर्भाधान, प्रसव आदि के न होने पर भी इन्हें माता पिता कैसे कहा जा सकता है। इस आत्ममाया से ही श्रीदेवकीजी श्रीवसुदेवजी को इनका अच्छी रीति से दर्शन भी हो रहा है अन्यथा मानुष रूप में ईश्वर का भलि-भाँति ज्ञान असम्भव ही था इस स्वरूप का दर्शन नयनों के सामर्थ्य से नहीं किन्तु **'आत्ममाया'** के अनुग्रह से हुआ है। यहाँ पर **'प्राकृत'** शब्द का भी तात्पर्य यह है कि इस शिशु रूप भगवान् का स्वरूप सब को अपनी प्रकृति के अनुसार प्रतीत होता है जैसे रङ्गभूमि में मल्लों को वज्र, स्त्रियों को काम आदि रूप से प्रतीत होंगे। लौकिक प्रकृति के जीव भगवान् को लौकिक समझते हैं और अलौकिक प्रकृतिवालों को अलौकिक रूप से प्रतीत होते हैं। यहाँ पर प्राकृत शब्द का **'प्रकृत्या प्राह्यम्' 'प्राकृतम्'** इस उत्पत्ति से उपरोक्त मर्म स्पष्ट किया है। इसी प्रकार के निगूढ आशयों से 'रूपान्तर स्वीकार का तृतीय अध्यायार्थ माना है' इसी रूपान्तर स्वीकार के समय ही श्रीमद्गोकुल में पुरुषोत्तम का का प्राकट्य है उसी का यहाँ पर दर्शन देवकी वसुदेव को हुआ है।

एवमुक्त्वा रूपान्तरस्वीकरणं कृत्वा—आचार्यचरण कहते हैं कि इस प्रकार कहकर भगवान् ने रूपान्तर का अङ्गीकार किया। यद्यपि इस श्लोक में भगवान का मौन होना नहीं कहा गया तो भी वह तो स्वतःसिद्ध ही है उस मौन के सूचन के लिये किसी शब्द प्रयोग की आवश्यकता नहीं परन्तु इस मर्म की सूचना देने को आप के चुप होने का शब्दतः उल्लेख किया है कि जैसे भगवान् ने अलौकिक रूप को छुपाया वैसे अपने अलौकिक दिव्य ज्ञान को भी छुपा लिया। भगवान् ने जिस प्रकार प्राकृत रूप का स्वीकार किया उसी प्रकार प्रभु ने ज्ञान भी प्राकृत स्वीकार किया, क्योंकि वैसा करने पर रूपान्तर का स्वीकार सर्वथा सुसङ्गत होगा और सर्वांश में संघटित होगा। यदि कोई शङ्का करे कि प्रभुने इस प्रकार अपने स्वरूप से विरुद्ध धर्म का स्वीकार क्यों किया ? तब इस संशय की निवृत्ति **'हरि'** शब्द से होती है कि भगवान् हरि हैं सर्व दुःखों का हरण करने वाले हैं, रूपान्तर के स्वीकार किये बिना भक्तों का दुःख निवृत्त नहीं होता अतः कृपासिंधुने वैसा किया। कहीं भगवान् अपने मूल स्वरूप को भी आकार और ज्ञान की भाँति अन्यथा न करलें ! ऐसी कोई शङ्का करे तब इस शङ्का के निवारणार्थ **'भगवान्'** शब्द का उल्लेख किया है कि प्राकृत रूप में भी वह मूल स्वरूप भगवान् ही है। अब आचार्यचरण **'आत्ममायया'** पद का विवेचन करते हैं कि यदि भगवान् ही है तो प्राकृत रूप और प्राकृत ज्ञान के कार्य प्रकट नहीं हो सकते। यहाँ पर तो भगवान् के वात्सल्य माधुर्य आदि रस का अनुभव एवं आसुर व्यामोह, आदि भगवान् के कार्य क्रमशः प्राकृत, रूप

एवं प्राकृत ज्ञान के कार्य होते हैं, उनको सम्भव नहीं हो सकेगा, यदि ऐसी कोई शङ्का करे तब उसका समाधान करने को **'आत्ममायया'** इस पद का प्रयोग किया है। भगवान् ने अपनी सर्वभवनसामर्थ्य सब कुछ होने की शक्ति नाम की आत्ममाया से ही प्राकृत रूप एवं ज्ञान का स्वीकार किया है। इस कारण अपनी इच्छा से जब निज मूल रूप का कार्य करने का अवसर पड़ेगा तब अर्जुन के प्रति गीता के उपदेश और भीष्मपितामह के मुक्ति प्रसङ्ग पर दिव्य रूप एवं ज्ञान प्रदान आदि कार्य करेंगे। अब मूल रूप का कार्य नही होगा तब अन्य काल में तो माता श्री देवकी की प्रार्थना से प्राकृत रूप से ही दर्शन प्रदान करेंगे। भगवान ने जब ही मौन लिया उसी समय तत्काल ही प्राकृत बालक हो गये। नाभि के नालच्छेद की अवस्था से पूर्वावस्था में दर्शन देने लगे। साधारण नटों को रूप परिवर्तन करने में रंगभूमि के प्रेक्षकों की परोक्षता अपेक्षित है लेकिन भगवान् तो असाधारण नटवर है इससे प्रभु के सम्बन्ध में यह जवनिका-परदा अपेक्षित नहीं इस कारण कहते हैं कि माताजी एवं पिताजी के देखते देखते ही प्राकृत शिशु रूप बन गये, श्रीदेवकी माताजी लौकिक ज्ञान में निपुण है, और पिता पारमार्थिक अलौकिक ज्ञान में निपुण है, इससे दोनों की दोनों प्रकार की निपुणता उपस्थित होते हुए भी भगवान् के सामर्थ्य का प्रतिबन्ध नहीं कर सकीं, और स्वयं अद्भुत बालक प्रभु तो माता पिताजी के सन्मुख ही प्राकृत शिशु रूप में उपस्थित हो गये ॥ ४६ ॥

आचार्यचरण आज्ञा करते हैं कि **"एवं स्वीकृत्य रूपान्तरं तत्र स्थितौ प्रयोजनाभावात्"** भगवान् ने इस प्रकार रूपान्तर का स्वीकार कर लिया फिर वहां स्थित रहने में कोई प्रयोजन नहीं था, और स्वयं पधारने में रूपान्तर के स्वीकार की सार्थकता नहीं होती, तथा वसुदेवजी को यह कुछ ज्ञान नहीं था कि अब कहां भगवान बालमुकुन्द जी को पधरावें इन सब कारणों से सर्व प्रकार की समस्याओं के समाधान करने को वसुदेवजी को मानसिक प्रेरणा देकर श्रीवसुदेवजी के द्वारा स्वयं श्रीमद्गोकुल पधारे इस प्रसंग का निरूपण है, **'ततश्च'** प्राकृत भाव होने के अनन्तर 'च' शब्द से यह भी सूचित होता है कि भगवान् की आज्ञा के भी अनन्तर **'शौरि'** शूर नाम के राजा के तनय श्रीवसुदेवजी ने सुत रूप में भगवान् को श्रम न हो इस तरह उत्तम पात्र को लेकर उसमें उत्तम वस्त्र को बिछा कर और उस कोमल गद्दी ऊपर बालक को पधरा करके सूतिका सदन से जब बाहर पधारने का मनोरथ किया उसी समय श्री नन्दजाया श्री यशोदा ने योगमाया को जन्म दिया। "शौरि" शब्द का तात्पर्य यह है कि वसुदेवजी को ऐसी विकट परिस्थिति में रात्रि के समय महावन के प्रति प्रस्थान करने में किसी प्रकार का भय नहीं था यह सूचित होता है। अब आचार्य चरण 'सः' पद का रहस्य कहते हैं कि 'स' शब्द पूर्व परामर्शक होने से भगवान् के वाक्य में विश्वास की सूचना करता है कि वसुदेवजी को भगवान् के साथ वार्तालाप होने के बाद भगवद् वाक्य में दृढ विश्वास हो चुका है। अब आचार्य श्री **'सुतम्'** पद का रहस्य कहते हैं कि यहाँ **'सुतम्'** शब्द से यह विदित किया जाता है कि वसुदेवजी को भगवान् के प्रति पुत्र बुद्धि प्राकृत जैसी हो गई थी। **'सूतिकागृहात्'** शब्द से यह भी स्पष्ट जान पड़ता है कि प्रसव के धर्म उस गृह में भी प्रकट हुए थे और श्रीदेवकी के भी **'सूतिकात्वं'** प्रसववर्तीत्व प्रसव देने वाली माता के सर्व धर्म प्रकट हुए साधारण मोह की निवृत्ति साधारण ज्ञान से हो सकती है, इसलिये गोकुल जाने में स्वच्छन्दता का होना और द्वारों का खुल जाना उचित है। यहाँ पर जो **"साधारणमोहस्य निवर्तकं साधारणं ज्ञानम्"** जो सुबोधिनी जी के वाक्य हैं उन वाक्यों का तात्पर्य यह है कि भगवान् ने वसुदेवजी को अपने गोकुल पहुँचाने और नन्दालय से कन्या को लाने की प्रेरणा दी है, केवल इतने ही कार्य में वसुदेवजी भगवान् की ज्ञानशक्ति से सम्पन्न थे इस कारण वसुदेव जी को योगमाया से उत्पन्न होने वाला सर्व लोक साधारण मोह बाधक नहीं हुआ। उस साधारण मोह की निवृत्ति उस साधारण ज्ञान से हो गई। साधारण ज्ञान का मर्म यह है कि वसुदेवजी का वह भगवत्प्रेरणालभ्य साध्य था वह ज्ञान साधारण ही था अतः वसुदेव जी को गोकुल जाने में स्वच्छन्दता का भान होने से धीरे धीरे चरणों को रखते हुए जाना पड़ा क्योंकि उन्हें असाधारण ज्ञान तो था नहीं कि यह भगवत्कार्य अवश्यमेव सिद्ध होगा अतः वसुदेवजी को धीरे धीरे चरण विन्यास करने की चतुरता करनी पड़ी।

आत्मन इव देहस्यापि विस्मरणं यथा भवति तदर्थं तस्मिन्नेव समये योगमाया जाता– गोकुलवासी जिस प्रकार अपने आपको बिसर गये उसी प्रकार देह को भी विस्मृति हो जावे और कुमार हुआ या कुमारी ऐसा न समझ पावें इसलिये उसी समय योगमाया प्रकट हुई। भगवान् के प्राकट्यकाल में यदि प्रकट होती तो श्री देवकी जी और वसुदेव जी भी सो जाते, उनको भी योगमाया से नींद आ जाती, इससे विदित होता है कि भगवान् के प्राकट्य के बाद एक मुहूर्त पीछे योगमाया प्रकट हुई है और माया ने नवमी तीथि के आने पर जन्म ग्रहण किया है। भगवान और योगमाया के जन्म के समय रोहिणी नक्षत्र समान ही था, अतः व्रतोपवास करने में रोहिणी नक्षत्र का कृत्तिका नक्षत्र से वेध होना दोष जनक नहीं। सप्तमी तिथि का अष्टमी के साथ वेध तो दोषावह है ही। श्रीनन्दालय में नन्दलाल जी प्राकट्य महोत्सव आदि तो नवमी में ही हुआ था अतः शुद्ध अष्टमी के न मिलने पर केवल नवमी के दिन ही उपवास करना आवश्यक है। भगवान् के हृदय में विराजने पर माया का हृदय में प्रादुर्भाव नहीं हो सकता अतः जब ही बाहर जाने की इच्छा की उसी समय माया ने जन्म लिया ऐसा कहा है, वह माया योग के लिये ही उपयुक्त है, भगवान् के कार्यों में उपायों की सिद्धि के लिये लोगों को व्यामोहित करती है, प्रस्तुत में

भगवान् का गोकुल पधारना ही कार्य है उसमें विघ्न उपस्थित न होने के उपाय को सिद्ध करने के लिये नागरिक जनों को शयन करा देना ही मोहित कर देना है। अब आचार्य श्री "नन्दजायया" पद का रहस्य बतलाते हैं कि माया को स्वतन्त्र न समझा जावै इसलिये नन्दजायया श्रीनन्दरायजी की जाया पद से सूचित किया है कि यशोदा ने उसे जन्म दिया है, भगवान् की तरह वह स्वय ही प्रकट नहीं हुई जाया शब्द का अर्थ वह है कि जो संतान के जन्म देने वाली होती है और पत्नी शब्द का अर्थ यह है कि जो पति के साथ यज्ञ में बैठती है ॥ ४७ ॥

तस्या: कार्यमाह तयेति तया माययाहृता:— उस योगमाया का कार्य बतलाते हैं कि उस योगमाया ने द्वारपाल पुरुषों में रही हुई प्रत्यय ज्ञान विवेक वृत्तियों का हरण कर लिया, जिससे नागरिक और जागरुक जन के सर्वविध ज्ञानों की व्यापारात्मक वृत्तियाँ विलुप्त हो गई, उन्हें किसी भी प्रकार का भान नहीं रहा, जाग्रत एवं स्वप्न इन दो अवस्थाओं में सर्व प्रत्यय या ज्ञानों की संशय आदि वृत्तियाँ उत्पन्न होती रहती हैं, माया से मोहित हुए द्वारपाल लोग तो मूर्छित हो गये, जगत् में माया के उत्पन्न होने पर उसका प्रभाव पड़ा। श्री गोकुलवासी जन एवं श्री यशोदा आदि तो मुग्ध हो गये, उनकी सावधानता चली गई। तत्पश्चात् क्रम से मथुरा में द्वारपाल, तदनन्तर मथुरा के नागरिक लोग भी मुग्ध हो गये, माया ने केवल पूर्ववत् बुद्धि का हरण मात्र ही किया हो इतनी ही बात नहीं किन्तु निद्रा के द्वारा अतिरिक्त बुद्धि भी सम्पन्न करदी, जिस प्रकार अत्यन्त दीर्घ काल अन्य लोक के प्रति चले जाने वालों की भांति असावधानी से चला जाता है उस प्रकार माया ने लोगों को निद्राधीन किया सर्वको सुषुप्ति को प्राप्त करा दिया ऐसी परिस्थिति हो जाने पर द्वार स्वयं खुल गये, इस माया ने इतना ही कार्य किया कि लोगों की ज्ञान वृत्तियों का हरण किया और निद्रा से उनका अत्यन्त जड़ भाव सम्पादन किया बस इतना तो माया का कार्य हुआ और अन्य कार्य तो अन्य प्रकार से सम्पन्न हुआ यह बतलाने को अथ अव्यय का प्रयोग किया है, क्योंकि अथ अव्यय भिन्न प्रकार से क्रम के परिवर्तन का बोधक है, कपाटों के स्वयं खुलजाने में माया का प्रभाव कारण नहीं किन्तु भगवत्प्रभाव ही कारण है। अब दुरत्यया: पद का तात्पर्य कहते हैं कि वह सब ही द्वार प्रथम से उन्हीं द्वार के द्वारपालों ने बड़े बड़े कपाटों से और लोहे की कील व जंजीरों से बन्द कर रखे थे, और स्वभाव से भो दुर्गम थे जिन्हें प्राप्त करना या उल्लंघन करना सर्वथा कठिन था। "**गजा व्याघ्रा:**" जहां पर हाथी थे, व्याघ्र थे कहीं कहीं सिंह थे तथा ऊँची नीची विषम और विकट भूमि थी यह सब दिन में भी जाने में सर्वदा एवं सर्वथा भय के कारण उपस्थित रहते थे। जिन द्वारों पर साधारण लोग तो जाते ही कैद कर लिये जाते थे, उस पर भी उस रात्री के समय तो वह द्वार बद्ध थे जिनमें बड़े बड़े किवाड़ लगे थे, लोहे की कील व जंजीरें थीं, अथवा कील सहित जंजीरें थी, वह ताली से ही खोले जा सकते थे, उनके खोलने की ताली भी बड़ी विषम और विकट थी, ताली लगाने की रीति को जानने वाला ही काम में ला सकता था, ताली के हाथ में रहने पर भी सर्व साधारण के लिये उससे कपाटों का उद्घाटन नहीं हो सकता था ॥ ४८ ॥

श्रीमदाचार्य चरण कहते है कि "**एतादृशा अपि कृष्णवाहे वसुदेवे समागते स्वयमेव व्यवर्यन्त**—इस प्रकार के भी वह दुर्गम द्वार भगवान् कृष्ण को पधराकर वसुदेवजी के आने पर स्वयं ही खुल गये। वह सारे द्वार विशीर्ण हो गये, उनकी दृढता शीथिल हो गई उन द्वारों के कपाट पट भी स्वयं ही अलग अलग हो गये, इस वर्णन से यह बतलाना है कि भगवान् मोक्ष के दाता हैं अतः जड़ जातीय कपाट जिन्हें अत्यन्त तमोमय लोह कील श्रृङ्खलाओं ने बन्धन में डाल रखा था उनको भी मुक्त कर दिया, इस प्रकार तामस कर्मबद्ध मूढों को भी मुक्ति का सूचन कराया गया है, इससे अन्य ज्ञान शून्य व्यक्तियों की मुक्ति का भी स्पष्टीकरण कर दिया है। अब **कृष्णवाहे वसुदेव** आगते इन पदों के मर्म को आचार्य चरण बतलाते है कि जड़ों की तामसों की मुक्ति हो गई तब यदि शुद्ध सत्त्व भगवान् को धारण करता हो तो मुक्ति होना अनिवार्य है यह सूचित करने के लिये "**कृष्णवाहे और वसुदेवे**" इन पदों का उल्लेख किया है "**सत्त्वं विशुद्ध वसुदेवशब्दितम्**" इस वाक्य के अनुसार, रजोगुण, तमोगुणों से अस्पृष्ट शुद्ध सत्त्वात्मक अन्तःकरण में यदि श्रीकृष्ण की धारणा सिद्ध हो जाय तो मोक्ष सहज सिद्ध है। मोक्ष प्राप्ति का यह ही उपाय है यह बतलाने को दृष्टान्त कहते हैं कि "**यथा तमो रवे:**" जिस प्रकार सूर्य के उदय होने पर अन्धकार विलीन हो जाता है, अन्यथा हजारों उपायों के करने पर भी सम्पूर्ण अन्धकार निवृत्त नहीं होता, किन्तु सूर्य के उदय होते ही अंधकार स्वतः चला जाता है उसी प्रकार शुद्ध अन्तः करण के भगवद्भाव पूर्ण होने पर बन्धन करने वाली अविद्या का, माया का सर्वथा संपूर्णतः नाश हो जाता है।

सर्वासाध्यानां स्वत एव सिद्धिर्नान्यथेति निरूपितम्—यहां भगवान की सामर्थ्य से समग्र असाध्य कार्यों की सिद्धि स्वतः हो जाती है जो अन्य प्रकार से नहीं हो पाती, इस विषय का यहां निरूपण किया है, श्री बाल मुकुन्द जी को लेकर वसुदेव जी के अन्तर्द्वारों के निकल जाने पर, नगरी के भीतरी दरवाजों के पारकर जाने पर, माया का प्रवेश हुआ है। **उभयो: साम्मुख्ये** भगवान् और माया इन दोनों के सम्मुख होने पर जो दृश्य उपस्थित हुआ उसे अब कहते हैं कि वृष्टि होने लगी, वृष्टी भी सब लोगों के न उठने में कारण हुई वर्षा के कारण सब लोग पड़े ही रहे, मेघों का उपांशु मन्द मन्द गर्जन भी

लोगों की सुखमय नींद में का कारण बना तथा अन्य शब्दों के कर्णगत न होने में भी कारण बना, मेघ की मन्द गर्जना के कारण अन्य कोई किसी के आने जाने का शब्द कर्णगोचर नहीं होता था, अधिक गर्जना होती तब तो सब लोग उस गर्जना से ही जाग उठते इसलिये मन्द गर्जना लोगों के न जागने में कारण सिद्ध हुई, केवल वर्षा मात्र ही माया का कार्य सर्व साधारण रूप से प्रवृत्त हुआ और वर्षा कार्य वसुदेवजी को भी खेद का जनक हुआ अतः उस खेद की निवृत्ति के लिये शेष जी पीछे पीछे चलने लगे। भगवान् शेष पाताल से आकर फणों के द्वारा मेघ के जल को रोकते हुवे अनुगमन करने लगे। श्री शेष जी वसुदेवजी के पीछे की ओर से चल रहे थे, क्यों शेष के सर्प रूप होने से भगवान् के सम्बन्ध में वसुदेवजी के मन में होने वाले भय का सम्भव नहीं रहा। कुछ विद्वानों का कहना है कि शेषजी अन्तरिक्ष प्रदेश आकाश में चल रहे थे जिससे भगवान् के निमित्त श्री वसुदेव जी को भय और चिन्ता न हो, यदि ऐसा माना जाय तब तो शेषजी के सारे शरीर के द्वारा भो वृष्टि का रोकना सम्भव था, यहां तो शेषान्वगात् वारि निवारयत् फणैः फणों से वारि जल का निवारण कहा है, एवं ऊपर चलना न कहकर अन्वगात् पद से अनुगत पीछे से चलना कहा है। अतः स्पष्ट होता है कि शेषजी वसुदेवजी के पीछे से ही छत्रधारी परिचारक की भांति चल रहे थे ॥ ४९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनो

इदानीं तु ताभ्यामप्रार्थितमपि मोक्षं प्रयच्छति, लीलाकार्यस्य सिद्धत्वात्। युवामिति ॥ इदानीं तु पुत्रभावेन ब्रह्मभावेन चासकृत् पुनःपुनर्मां चिन्तयन्तौ मयि कृतस्नेहौ च युवां परां सर्वत उत्कृष्टां मम लोकप्राप्तिरूपां गतिं मोक्षं यास्येथे ॥ ४५ ॥ इत्युक्त्वा हरिस्तूष्णीमासीत्। अत्र 'यदि कंसाद्बिभेषि त्वं तर्हि मां गोकुलं नय। मन्मायामानयाशु त्वं यशोदागर्भसम्भवाम्, इत्ययं श्लाकशेषो ज्ञेयः, 'भगवत्प्रचोदित' इति लिङ्गात्। ततश्च पित्रोर्देवकीवसुदेवयोः सम्पश्यतोरेव सतोर्भगवानात्ममायया स्वेच्छया सद्य एव प्राकृतः शिशुरिव बभूव। 'बबन्ध प्राकृतं यथा' इति वक्ष्यमाणत्वादत्रापि चेति शेषः ॥ ४६ ॥ ततश्च भगवता प्रचोदितः स शौरि वसुदेवः सुतं सम्यक् आदाय आस्तृतकोमलवस्त्रे पात्रे संस्थाप्य गृहीत्वा यदा सूतिकागृहाद्बहिर्गन्तुमियेष ऐच्छत् तर्ह्येव या अजाशब्दवाच्यत्वेन प्रसिद्धा योगमाया, सा नन्दजायया यशोदया निमित्तभूतया अजनि जाता ॥४७॥ अथानन्तरमेव तया योगमायया हृताः प्रत्ययार्थाः ज्ञानहेतुभूताः सर्वा वृत्तयश्चक्षुरादिवृत्तयो येषां जाग्रतामपि तथाभूतेषु द्वारपालेषु सत्सु, तथा पौरेषु पुरवासिजनेष्वपि शायितेषु सत्सु या बृहद्भिः कपाटैः आयसैर्लोहमयैः कीलशृङ्खलैश्च पिहिता आच्छादिताः, अत एव दुरतिक्रमाः द्वारस्तु सर्वा वसुदेवे आगते स्वयं व्यवर्यन्त व्यशीर्यन्त विवृत्ता जाता इत्यन्वयः। 'व्यव्रियन्त' इति वक्तव्ये गुणश्छान्दसः। 'व्यशीर्यन्त' इति पाठान्तरम्। अनेनैव वसुदेवपादनिगडोऽपि स्वयमेव पतित इति ज्ञेयम्। तत्र हेतुं सूचयन् वसुदेवं विशिनष्टि कृष्णवाह इति। संसारबन्धमपि कर्षति निवर्तयति स कृष्णः, तस्य वाहे आगते द्वारविवृतौ किमाश्चर्यमित्याशयः। तत्र दृष्टान्तमाह यथा तमो रवेरिति। रवेः सूर्यस्यागमने तमोऽन्धकारो यथा विशीर्यते तद्वदित्यर्थः। उपांशु मन्दं मन्दं गर्जितं यस्य, तथाभूतः पर्जन्यो मेघो ववर्ष। पूर्वं वर्षातो निवृत्तोऽपि तदा मार्गे जनसञ्चाराभावाय ववर्षेत्याशयः। तदा च फणैर्वारि निवारयन् शेषः अनन्त अन्वगात् वसुदेवस्य पृष्ठतो जगाम ॥४८-४९॥

अन्वितार्थप्रकाशिका

युवामिति ॥ इदानीं तु पुत्रभावेन ब्रह्मभावेन चासकृत् पुनः पुनर्मां चिन्तयन्तौ मयि कृतस्नेहौ च युवां परां सर्वत उत्कृष्टां मम लोकप्राप्तिरूपां गतिं मोक्षं यास्येथे। तत्कार्षः ॥ ४५ ॥ इतीति ॥ इत्युक्त्वा हरिस्तूष्णीमासीत्। अत्र "यदि कंसाद्बिभेषि त्वं तर्हि मां गोकुलं नय ॥ मन्मायामानयाशु त्वं यशोदागर्भसंभवाम् ॥" इत्ययं श्लोकः शेषो ज्ञेयः। भगवत्प्रचोदित इति लिङ्गात्। ततश्च पित्रोर्देवकीवसुदेवयोः संपश्यतोरेव सतोर्भगवानात्ममायया स्वेच्छया सद्य एव प्राकृतः शिशुरिव बभूव ॥ ४६ ॥ ततश्चेति ॥ ततश्च भगवता प्रचोदितः स शौरिः वसुदेवः स्वपादनिगडं स्रस्तं वीक्ष्य सुतं सम्यक् आदाय आस्तृतकोमलवस्त्रे पात्रे संस्थाप्य गृहीत्वा यदा सूतिकागृहाद्बहिर्गन्तुमियेष ऐच्छत् तर्ह्येव या अजाशब्दवाच्यत्वेन प्रसिद्धा योगमाया सा नन्दजायया यशोदया निमित्तभूतया अजनि जाता। अत्र हरिवंशे तु—"देवकी च यशोदा च सुषुवाते समं तदा।" इत्युक्तं तत उभयोरेकवाक्यतायै इदमवसीयते। यदैव देवकी कृष्णं सुषुवे तदैव यशोदाऽपि कृष्णं सुषुवे। तदनन्तरसमये योगमायां च सुषुवे इति कालभेदेन तस्याः द्विःप्रसव एवेति। अत एव "अदृश्यतानुजा विष्णोः सायुधाऽष्टमहाभुजा।" इति वक्ष्यते। किंच यशोदाप्रसूतस्य कृष्णस्य चतुर्भुजत्वाद्यनुक्तेः। नराकृतिपरब्रह्मत्वाच्च द्विभुजत्वमेव बुद्ध्यत इति टीकान्तरम् ॥ ४७ ॥ तयेति द्वयम् ॥ अथान्तरमेव तया योगमायया हृताः प्रत्ययार्थाः ज्ञानहेतुभूताः सर्वा वृत्तयश्चक्षुरादिवृत्तयो येषां जाग्रतामपि तथाभूतेषु द्वाःस्थेषु द्वारपालेषु सत्सु तथा पौरेषु पुरवासिजनेष्वपि शायितेषु सत्सु या बृहद्भिः कपाटैः आयसैर्लोहमयैः कीलशृङ्खलैश्च पिधिता आच्छादिता अत एव दुरत्यया बृहद्भिः कपाटादिभिर्दुरत्यया इति वा। ताः द्वारस्तु सर्वाः कृष्णवाहे वसुदेवे आगते रवेः सूर्यस्यागमने तमोऽन्धकारो यथा विशिर्य्यते तथा स्वयं व्यवर्यन्त व्यव्रियन्त विवृता जाताः। गुण आर्षः कर्मकर्त्तरि लङ्। अनेनैव वसुदेवपादनिगडोऽपि स्वयमेव पतित इति ज्ञेयम्। उपांशु मन्दं मन्दं गर्जितं यस्य तथाभूतः पर्जन्यो मेघो ववर्ष। तदा च छत्रीकृतैः फणैर्वारि निवारयन् शेषः अनन्तः अन्वगात् वसुदेवस्य पृष्ठतो जगाम॥ ४८-४९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु त्वयि परमेश्वरे प्रसन्न सत्यपि कथमावयोः पुनः पुनर्जन्मेति चेत्तस्य तथैव कारणमासीदितः परं तु न भविष्यतीत्याह। युवामिति ॥ असकृत्, पुत्रभावेन, असकृत् ब्रह्मभावेन वापि, मां चिन्तयन्तौ स्मरन्तौ, युवां मयि, कृतस्नेहौ सन्तौ, परां सर्वोत्तमां, मद्गतिं, यास्येथे गमिष्यथः। एतेनैतावत्कालपर्यन्तं पुत्रैषणयैव युवां मामस्मरतमतः पुनः पुनर्जन्माभूदतः परं तु स्नेहातिशयेन मच्चिन्तनात्तन्नैव स्यादिति सूचितमिति भावः ॥ ४५ ॥ इतीति ॥ हरिः, इतीत्थं उक्त्वा, तूष्णीं आसीत्। ततः, पित्रोर्वसुदेवदेवक्योः, संपश्यतोः सतोरेव, भगवान् षाड्गुण्यपूर्णः सन्नेव, सद्यस्तदैव, आत्ममायया स्वाधीनया योगात्मकस्वशक्त्या, प्राकृतः मानुषः शिशुः बालः, बभूव ॥ ४६ ॥ तत इति ॥ ततः शिशुभवनानन्तरं, भगवत्प्रणोदितः शिशुरूपेण भगवताऽऽदिष्टः, हे शौरे, त्वं मामित आदाय गोकुलं गत्वा तत्र नन्दगृहे यशोदाशयने मामवस्थाप्य, यशोदाप्रसूतकन्यामादाय, तामत्र देवकीशयने निधेहीति संदिष्ट इत्यर्थः। सः शौरिर्वसुदेवः, चकारस्त्वर्थः। सुतं समादाय गृहीत्वा, सूतिकागृहात्, बहिः यदा गन्तुं इयेष ऐच्छत्, तर्हि, नन्दजायया यशोदया, अजा प्रकृत्यभिमानिनी, या योगमाया शक्तिः, अजनि जज्ञे केचित्त्वस्मात् श्लोकात्पूर्वं यः श्लोकस्तत्पूर्वं यदि कंसाद्बिभेषि त्वं तर्हि मां गोकुलं नय। मन्मायामानयाशु त्वं यशोदागर्भसंभवाम्, इति श्लोकं पठन्ति, तत्रापि वक्तव्यार्थापूर्णत्वात्क्षिप्तप्रायत्वाच्च परित्यक्तः ॥४७॥ तयेति तदा, तया योगमायया, हृताः प्रत्यया बुद्धयः सर्ववृत्तयः तत्पूर्वकसर्वेन्द्रियव्यापाराश्च येषां तेषु, द्वाःस्थेषु, सर्वेषु द्वारपालेषु, अथ पौरेषु पुरवासिजनेषु अपि, शायितेषु निद्रितेषु सत्सु, बृहत्सु कपाटेषु आयसानि लोहमयानि कीलानि परस्परबन्धकशङ्कुविशेषात्मकानि शृङ्खलानि च यासु ताः, अत एव, दुरत्ययाः दुरतिक्रमणीयाः, पिहिताः सर्वाः, द्वारः तु द्वाराण्यपि, ता इत्युत्तरेण संबन्धः। पाठान्तरे बृहद्भिः कपाटैः आयसैः कीलैः शृङ्खलैश्च, सर्वा द्वारः, पिहिताः आसन् ॥४८॥ ता इति ॥ ताः सर्वा द्वारः, कृष्णं वहतीति कृष्णवाहस्तस्मिन्, वसुदेवे आगते सति, रवेः उदये सति, तमः यथा, स्वयं एव व्यवर्यन्त। स्वयमेव विवृता इत्यर्थः। व्यव्रियन्तेति वक्तव्ये गुणश्छान्दसः। रवाविति पाठे, रवौ उदिते इति शेषो बोध्यः। तदा पर्जन्यः उपांशुगर्जितः मन्दगर्जितः सन्, ववर्ष। पथि इति शेषः। पौराणामप्रबोधार्थमिति भावः। शेषोऽनन्तः, फणैः, वारि वर्षजलं, निवारयन् सन्, अन्वगादनुययौ ॥ ४९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

इत्युक्त्वेतिः १९ ३.४६.

यावद् गोकुलवर्तिनी न भविता माया जगन्मोहिनी तावन्मां सुजनाश्चतुर्भुजमिमे पश्यन्त्यनायासतः।
जाते तत्प्रतनूदये त्वहमलं गोप्ता स्वरूपं क्षणादित्यर्थं ननु बोधयन् प्रभुरुरीचक्रेऽर्भकत्वं तदा ॥११२॥

ततश्चेतिः १०.३.४७.

यद्गोकुलं गोवलये प्रकामं यशोदयाऽलङ्कृतमस्ति तत्र। आविर्भवामीति च वाचमीशस्तातं नितान्तं सरसामुवाच ॥११३॥

तया हृतेतिः १०.३ ४८.

महान्तोऽपि निशाग्रस्तमनसो यद्विमोहिताः। जायन्ते कंसशास्यानां क्षुद्राणां तत्र का कथा ॥ ११४ ॥
पूर्वं येनारिवर्गोपरतिरिह कृता यत्नतस्तस्य पुंसः पश्चादात्माऽपरोक्षं स्फुटमिति सुधियः केऽपि कामं वदन्तु।
सत्यध्यक्षे त्वयीशे योगपदरिचयो लीनवृत्ति प्रचारः स्यादर्थादेव काराप्रकटनमिह ते तत्र दृष्टान्तयामः ॥ ११५ ॥
यद्विष्णोः पदमर्चितं निजकरैः सूर्याश्रयः पर्वसु यत्तारोल्लसिता स्थितिश्च सततं यद्देवतापोषणम्।
तत्सर्वं फलितं यदद्य समभूच्छ्रीशोऽन्ववाये ममेत्यानन्दादुदितो बभूव विविधा गा अर्पयंश्चन्द्रमाः ॥ ११६॥
अस्मिन् पर्वणि सत्योऽहं न पुरा हरिणाश्रितः। इति वक्तुं जनानिन्दुरुच्चैर्गिरिसमाश्रितः ॥ ११७ ॥
राजाऽस्मि यद्यपि जने भजेऽद्यान्वर्थतामहम्। इति किं समभूदिन्दुर्भूभृन्मौलिपदस्तदा ॥ ११८ ॥
अर्धं पत्नीति सा प्रेम्णा पश्यत्येव सुताननम्। ध्रुवं तद्दर्शनोत्कण्ठः स्वयं स्वार्धात्मना ययौ ॥ ११९ ॥
साक्षादेष रमापतिः प्रभुरभूदस्यान्वयालङ्कृतिरित्यानन्दवताऽब्धिना बहुसुतप्रेम्णा समालिङ्गितः।
चन्द्रः सोऽपि निजान्वयोदित-हरिप्रेक्षा-समुन्मानसो यज्जातो ह्यवभासते जनदृशा तेनायमर्धाकृतिः ॥ १२० ॥

ताः कृष्णेतिः १० ३.४९.

यन्नामश्रुति-चेतसोऽपि पुरुषस्यासंख्यजन्मार्जितस्नेहस्निग्धदशीर्ण-पूर्णगुणयुक्-प्रारब्धबन्धच्युतिः।
वक्षोऽलङ्करणं स यस्य भगवानद्धा बभूवास्य किं जीर्णायाकृत-पादबन्धनमभूद् विश्लिष्टमत्राद्भुतम् ॥ १२१ ॥
हृदयपद्मकपाटविघाटनं भवति योगकलाभिरितीरितम्। त्वदनुयोगकलाभियुजः पितुस्तदुचितं तु कपाटविमोचनम् ॥१२२॥
यथा वारिदोहं तथावाऽरिदोऽयं प्रभुस्तन्मदीयस्वरूपानुकारी। क्षितिं मद्भदेवोऽपि कर्ता सपङ्ककबन्धामुवाचेति किं गर्जितेन ॥१२३॥

धन्योऽस्मि लोके यदितः कवीन्द्रा मामीशरूपोपममावदेयुः । स्ववृत्तिदं नीरनिधिं प्रवक्तुं हर्षादितीवाम्बुधरो जगर्ज ॥१२४॥
त्वयार्पितं यद्वसु तन्मयापि वितीर्णमीशार्पणसंविदेव । पयोधिमूचे स किमम्बुवाहस्तदीयदानोत्सुकताभिवृद्धौ ॥१२५॥
अस्माभिस्तु समर्पितं वसु यथाशास्त्रयच्युतायाऽम्बुधे ! जामाता यदसौ तवास्ति च ततो दित्सास्ति चेच्चेतसि ।
देयं तद्वयमद्य तस्य सविधं नीत्वाऽर्पयामोऽचिरादित्यब्दाः किमवोचुराहितरवाः सन्मार्गमस्याश्रिताः ॥ १२६ ॥
तिष्ठत्यनन्त शरणागत दीनबन्धुस्त्वय्यच्युतस्तदनुजा च तथैव देवी ।
स्वावासभूमिमिह मामचिरात् प्रकर्त्रीत्यब्दः श्रुतं किमिति गर्जनतो ह्यपृच्छत् ॥१२७॥
जडोद्धारे दीक्षाग्रहणमवतारे त्विह विभोः समाकर्ण्याम्भोदः प्रमुदितमनाः स्वां जडगतिम् ।
ध्रुवं वृष्टिव्याजात्सपदि भुवि कृष्णाङ्घ्रिकमलप्रणामार्थं नम्रामकृतगिरमुवार्यं कृपणाम् ॥ १२८ ॥
पक्षक्षयेण धृतशाड्वलकाननेभ्यो भूभृद्वरेभ्य इह मा तमतेति भूयः ।
आश्वासनं वसुधरो वसुदानपूर्वं दृष्ट्वेशजन्मसुखकृद् ध्वनितो ददौ किम् ॥ १२९ ॥
प्राप्तं यद्वसु धीमता विधिवशादीशार्पणं चेत्कृतं तद्भूयादिह भूरिकीर्तिजनकं लोके प्रतिष्ठावहम् ।
सोऽपि प्रोन्नतिमेत्य चान्यवसुमत्तेजस्तिरस्कारकः स्यात्स्याज्जीवनरोऽपि सर्वजगतामब्दोऽत्र दृष्टान्तभूः ॥१३०॥
मालिन्यभाग् बहुजडोऽप्यनिशं निशासु सञ्चार्यपीह यदि मत्पदवृत्तिशाली ।
तद्दत्तभक्तिरसशीतलिताखिलाङ्गः सद्यो भवेयमिति बोधितमम्बुधृत्या ॥ १३१ ॥
कं संप्राप्ता प्राप्नुयाल्लोपवृद्धिः कं संप्राप्ता नेति किं ज्ञापनाय । कं संप्राप्तं पङ्कतामानिनाय कं संप्राप्तं किञ्चिदङ्गे दधार ॥१३२॥
न गोकुलव्यवह्रुतिर्वसुसंग्रहमन्तरा । रम्या भवेदितीशोऽपि तदर्थं तदुपाददे ॥ १३३ ॥
शेषोऽन्वगादिति

विधायानुकम्पामकम्पामनेन स्वकीयाग्रजत्वं मयि न्यस्तमस्ति । तथाप्यस्य सेवैव मे मुख्यधर्मः किमागादहीशोऽम्बुपातापहृत्यै ॥१३४॥
अतिसन्निहितेऽपि सेवके यत् प्रभुणा वारिकृतान्वभावि पीडा । तदवद्यपदः स सेवकोऽस्मिन् भवतीति स्वशिरः पुरश्चकार ॥१३५॥
त्यक्त्वा रसामुपरि यत्त्वमुपागतोऽसि नागेन्द्र नैतदुचितं कृतोमत्यहीशः ।
गच्छ त्वमच्युतकृतं परिहर्तुमम्बुधृत्या रसाश्रितफणः किमसौ बभूव ॥ १३६ ॥
वृत्तिर्यस्य निसर्गतोऽन्यवनिताभोगोत्सुका वर्तते द्रव्यं चेदनुकूलतामुपगतं किं तस्य वाच्यं ततः ।
आलोच्यैवमुदञ्चदुज्ज्वलरसोल्लासो भुजङ्गाधिपो युक्तं तन्निजवासिने वसु मनाग् दत्वा यदन्वग्रहीत् ॥ १३७ ॥
यद्द्रव्यं भवतीह विष्णुपदसंस्पृष्टं समुत्पद्यते तत्र स्वत्वमुपासकस्य यदतो ग्राह्यं च तेनैव तत् ।
जानन्नेव विधिं विधिस्तुतयशाः शेषोऽप्यशेषं तथा सम्प्राप्तं वसु यच्छिरोभिरवहत्तत्साधु मन्यामहे ॥ १३८ ॥
विष्णुपदामृतममृतान्धोभिरपि स्पृह्यमानमतिपूतम् । युक्तं दधार शिरसा ह्यशेषवैष्णवशिरोमणिः शेषः ॥ १३९ ॥
कृष्णत्विट्कृतनिर्जयां निजरुचिं दृष्ट्वाऽम्बुदोऽतिक्रुधा निःशङ्कं शरवृष्टिमेवमकरोन्मन्येऽर्धचन्द्रोत्कटाम् ।
दृष्ट्वा च प्रभुपादसेवनरतिः शेषोऽपि तामागतामीशे युक्तमपाकरोदनलसश्चक्रीकृताङ्गस्थितिः ॥ १४० ॥
यो यस्य धर्मस्तेनाऽसौ कृतश्चेत् किमु विस्मयः । युक्तं चकार तच्छेषो विषभृद् विषधारणम् ॥ १४१ ॥
जडात्मानो विष्णोः पदविगलिताः पङ्कजनकाः पुनस्तेषामेषां नहि परपदप्राप्तिरुचिता ।
इति ज्ञात्वा शेषो नयनिपुणबुद्धिर्निजफणैरधोगानां तेषामकृत किमु दूरापसरणम् ॥ १४२ ॥
अपि स्थिता विष्णुपदे सहन्ते परोपकारार्थमधःस्वपातम् । कथं न ते वा बलिवत् सुवन्द्याः शिरोभिरित्येष दधार शेषः ॥ १४३ ॥
अनन्तवसुभृत् समर्पितवसौ प्रजेशस्तुते गजेन्द्रसुमनोहरे जगति चामरश्रीयुते ।
अनेकमणिमण्डितं फणसितातपत्रं प्रभौ श्रियः प्रियतमे दधावुचितमेतदुर्वीधरः ॥ १४४ ॥
यो यत्कृते श्रममहर्निशमेव भुङ्क्ते यो यच्छिरः स्थिततरसावनबद्धकक्षः ।
तस्मिन् हि गोकुलसुखानुभवाभिलाषे साहाय्यकं स कृतवानिति युक्तमेव ॥ १४५ ॥
जडोद्धारणसामर्थ्यं श्रीशवच्छ्रीशसेवके । अस्तीत्यबोधयच्छेषः कृत्वाऽऽत्मानमुदाहृतिम् ॥ १४६ ॥
माभूदस्य कदाचिदप्यरिकृता बाधाऽल्परोमस्वपीत्यम्भोदः सहसा निजामृतरसैरासीत् तदा वृष्टिकृत् ।
त्रैलोक्येष्वमृतप्रदः प्रभुरयं नित्यामृतात्मा च यत् किं वाऽनेन विषाभिधामृतरसेनाऽस्येत्यपोऽवारयत् ॥ १४७ ॥

कृष्णप्रिया

हे अम्मा ! आप दोनों पुत्र भाव से अथवा ब्रह्म भाव से बार बार मेरा चिन्तन करते हुवे स्नेह करने से मेरी परागति को, व्यापि वैकुण्ठ को प्राप्त करोगे ॥ ४५ ॥ श्रीशुकाचार्यजीने कहा कि (राजन्) इस प्रकार कहकर भगवान् श्री हरिने मौन ले लिया और आत्ममाया से माता पिताओं के देखते देखते तत्क्षण ही प्राकृत साधारण शिशु रूप हो गये ॥ ४६ ॥ और राजन्

परीक्षित् भगवान्ने प्राकृत स्वरूप को स्वीकार के अनन्तर भगवान् की आज्ञा से प्रेरित होकर श्री वसुदेवजी जब प्रसूति मन्दिर से पुत्र को लेकर बाहर पधारने लगे उसी समय श्री नन्दजाया श्री यशोदा ने योगमाया को जन्म दिया जो 'अजा' भी कहलाती है ॥ ४७ ॥ योगमाया ने द्वार रक्षक पुरुषों की एवं नगर निवासियों की भी समस्त ज्ञान वृत्तियों का हरण कर लिया और सबको निद्रा के आधीन भी कर दिया, और द्वार तो सर्व प्रथम में ही उन द्वार रक्षकों ने बड़े बड़े किवाड़ और लोहे की जञ्जीरों से बन्द कर दिये थे और जहाँ से निकलना बड़ा कठिन था। वे बड़े बड़े द्वार श्रीकृष्ण के शिर पर धारण करनेवाले श्रीवसुदेवजीके आते ही सूर्य से अन्धकार के हट जाने की भाँति स्वयं ही खुल गये, मन्द मन्द गर्जना के साथ मेघ वर्षा करने लगा, वर्षा से बालमुकुन्दजी भींग न जाय, इसलिये भगवान् श्री शेषजी फणों के द्वारा जल का निवारण करते पीछे से चल रहे थे ॥४८-४९॥

मघोनि वर्षत्यसकृद् यमानुजा गम्भीरतोयौघजवोर्मिफेनिला ।
भयानकावर्तशताकुला नदी मार्गं ददौ सिन्धुरिव श्रियः पतेः ॥ ५० ॥
नन्दव्रजं शौरिरुपेत्य तत्र तान् गोपान् प्रसुप्तानुपलभ्य निद्रया ।
[1]शिशुं यशोदाशयने निधाय [2]तत्सुतामुपादाय पुनर्गृहानगात् ॥ ५१ ॥
देवक्याः शयने न्यस्य वसुदेवोऽथ दारिकाम् । प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ॥ ५२ ॥
यशोदा नन्दपत्नी च जातं [3]परमबुध्यत । न तल्लिङ्गं परिश्रान्ता निद्रयापगतस्मृतिः ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे [4]श्रीकृष्णजन्म नाम तृतीयोऽध्यायः ॥ ३ ॥

कर्दमक्षमा

अन्वयः—असकृत् मघोनि वर्षति गभीरतोयौघजवोर्मिफेनिला भयानकावर्तशतकुला नदी यमानुजा श्रियः पतेः सिन्धुः इव मार्गं ददौ ॥ ५० ॥ शौरिः नन्दव्रजम् उपेत्य तत्र तान् गोपान् निद्रया प्रसुप्तान् उपलभ्य यशोदाशयने शिशुं निधाय तत् सुताम् उपादाय पुनः गृहान् अगात् ॥ ५१ ॥ अथ वसुदेवः देवक्याः शयने दारिकाम् न्यस्य पदोः लोहम् प्रतिमुच्य पूर्ववत् आवृतः आस्ते ॥५२॥ नन्दपत्नी यशोदा च जातं अबुध्यत परं परिश्रान्ता निद्रया अपगतस्मृतिः तल्लिङ्गं न अबुध्यत ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यमानुजा । गंभीरो यस्तोयौघस्तस्य जवेन ये ऊर्मयस्तैः फेनिला फेनव्याप्ता । भयानकैरावर्तशतैर्व्याप्ताऽपि । श्रियः पतेः सीतापतेः ॥ ५० ॥ निद्रया अजया ॥ ५१ ॥ पदोः पादयोः लोहं निगडं प्रतिमुच्य बद्धा आस्ते स्म ॥ ५२ ॥ जातं किंचिदिति परं केवलमबुध्यत न तु पुत्रः कन्या वेति तल्लिंगम् । यतो योगनिद्रया चापगतस्मृतिः ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायां कृष्णजन्मनि तृतीयोऽध्यायः ॥ ३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यमानुजा यमुना ॥ ५० ॥ तत्र नंदव्रजे । तान् नंदप्रभृतीन् । किञ्च—यदा वसुदेवः स्वपुत्रं गृहीत्वा नंदालयमितस्तदा तेन यशोदासूनुर्भगवद्योगमायापिहितदृष्टिना तत्र स्थितो नावलोकितोऽपि तु तदुपरि स्वसुतं न्यधापयत्स च तदा तस्मिन्नेवांतर्हितोऽभूदिति तदाह—सुतमिति । यशोदया सह यशोदायां वा प्रादुर्भावात्प्राक् शेते इति यशोदाशयनः गोलोकेशः परतमो द्विभुजाकृतिः श्रीकृष्णस्तस्मिन्निधाय वसुदेवनंदनस्तु वैकुंठेशो विष्णुस्तस्य गोलोकेशेन्तर्धानं प्रपंचितं श्रीगर्गाचार्यैर्गोलोकखंड इति । किं च यावदक्रूरागमनं तावत्स तत्रैवांतर्हितस्तस्थावक्रूरेण साकन्तु वसुदेवनंदन एव ययौ 'तां संप्रविष्टौ वसुदेवनंदनौ' इति वक्ष्यमाणत्वात् नन्दनन्दनस्तु तत्रैव तस्थौ "वृंदावनं परित्यज्य पादमेकं न गच्छति" इत्युक्तेर्गोपीनां तद्वियोगस्तु द्वारकास्थपट्टराज्ञीवत्प्रातिभासिक एव न तु वास्तव इति ध्येयम् । तत्सुतां यशोदासुताम् किं च कंसात्स्वपुत्ररक्षणार्थं मित्रपुत्र्यावधानार्थं जानतोऽपि परमधार्मिकस्यापि वसुदेवस्यायमन्यायो न दूषणं प्रत्युत भूषणमेव पुत्रीभूते भगवति वर्द्धिष्णुस्नेहेनैव तादृशविवेकापहारात् । तथा चकारेति भावः । अत्र गृहं भार्या 'गृहिण्येव गृहं प्रोक्तम्' इत्युक्तेः बहुत्वं तस्या मुहुश्चिंतनात् । कंसकारागृहस्य वसुदेवगृहाभावात् ॥ ५१ ॥ दारिकां कन्याम् ॥ ५२ ॥ नंदपत्नी चेति चकारोनुक्तसमुच्चायकः । यथा वसुदेवपत्नी तथा नंदपत्नी च जातं स्वगर्भादुत्पन्नमपत्यं परं सर्वोत्कृष्टमबुध्यत तन्माधुर्यास्वादशक्त्यैव तद्वत्तया तदीयस्वरूपभूतानंदमनुभवगोचरी चकारेत्यर्थः । किं तु तस्य लिंगं परमेश्वरोऽय-

---

[1] सुतं—श्रीधर. वंशी. वीर. गिरि. भक्त. च. पु. । [2] सुतां समादाय—इति कस्यचित् । [3] पुत्रम्—इति कस्यचित् । [4] पूर्वार्धे कृष्णजन्मनि—श्रीधर. ; कृष्णावतारे तृतीयो.—इति कस्यचित् ।

मेवेति विशेषं नाबुध्यतेति भेदः। ननु तस्या गर्भजः कृष्ण इति न प्रसिद्धं तत्राह—यशोदेति। तद्यशो ददाति देवक्यै सखीभावात्। "द्वे नाम्नी नंदभार्याया यशोदा देवकीति च। अतः सख्यमभूत्तस्या देवक्या शौरिजायया॥" इत्यादि पुराणादिति व्याख्यातं भागवतामृतवैष्णवतोषिण्यानन्दवृन्दावनचम्प्वादिसंतत्यैवेति नोपेक्षणीयम्। परिश्रांताऽतिसौकुमार्यात्प्रसवोत्थश्रमयुता प्रसवांते चानंदेन श्रमोपशांत्या निद्रयेत्याहेति वा॥ ५३॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे तृतीयोऽध्यायः॥ ३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मघोनि शक्रे स्वयमेव वर्षतीति सत्यपि मायामोहितजनत्वे तदज्ञानादसौ श्रीवसुदेवादर्शनाद्यर्थमेव वृष्टिमकरोत् या खलु जलभूम्योरेकतापादनेन तस्य सहसा यमुनावगाहेऽपि हेतुरभूत् तत्रासक्तत्वं च तत् क्लेशशङ्कया मध्ये मध्ये विच्छेदनात् स च विच्छेदो निर्जनदेश इति ज्ञेयं यमानुजेति तदानीं परमभीषणत्वाद्यभिप्रायेण तदेवाभिव्यञ्जयति—गम्भीरेत्यादिविशेषणाभ्याम् अत एव नदीति महाशब्दयुक्तत्वं च श्लेषेणोक्तं तथापि यथा सीतापतेः समुद्रस्तथा सा श्रीवसुदेवस्य मार्गं ददौ परावृत्तावपि तस्यैव तद्दानात् अत एव तैरपि सीतापतेरित्येव व्याख्यातं तथा च श्रीविष्णुपुराणे "यमुनां चातिगम्भीरां नानावर्तशताकुलाम्। वसुदेवो वहन् विष्णुं जानुमात्रवहां ययौ" इति॥ ५०॥ उपेत्य समीपे गत्वेपि वर्त्मादिकमजानतोऽपि तस्य दैवसाहाय्यं सूचितं द्वारबन्धादिविमोकस्तु पूर्ववत् तदानीं श्रीयशोदासमीपे समभिव्यक्तशैशवमाधुर्येण श्रीवसुदेवस्य स्वस्य चाकृष्टचित्तत्वाच्छिशुमित्युक्तं सुतमिति क्वचित् पाठः निधाय निधिमिव गूढं न्यस्य तस्याः सुताम् उपादाय मायात्वेन कन्यात्वेन च कंसवञ्चनार्थमुपादेयत्वेन च गृहीत्वा एष च श्रीभगवति स्नेहभर एव यदर्थं मायात्वेन ज्ञाताया अपि स्वीकारः तथा मित्रपुत्रीत्वेन प्रतीयमानाया अपि कंसकार्यवधदोषानपेक्षणं गृहानिति चिन्ताव्याकुलस्य श्रीदेवकीलक्षणस्य निजगृहस्य ततो मुहुः स्फुरितत्वेन बहुत्वनिर्देशः॥ ५१॥ दारिकां बालिकां शयने न्यस्येति तस्या उदर्कशोकवृद्धिशङ्कया अनादरेणैव शयन एव न्यस्य न पुनरङ्क इत्यर्थः। पूर्ववदावृतः कपाटादिभिर्निरुद्धः॥ ५२॥ यशोदेति। तादृशपुत्रोत्पत्त्या श्रीनन्दस्य व्रजस्य च कीर्त्तिविस्ताराभिप्रायेण तथा नन्दयति पुत्रोत्पत्त्या जगदिति नन्दत्वात्तस्यापि तदानन्दता सूचिता तस्य पत्नीति तस्या अपि जगदानन्दकत्वं तथा तत्पतित्वेन तस्यापि यशोविस्तारणं सूचितं परिश्रान्ता प्रसवस्वभावेन जाताऽत्यन्तश्रमा निद्रया योगनिद्रया अतः सुतरां तत्परिजनानामपि तादृशत्वमूह्या तथा च श्रीविष्णुपुराणे "तस्मिन् काले यशोदाऽपि मोहिता योगनिद्रया। तामेव कन्यां मैत्रेय प्रसूता मोहिते जने" इति पश्चात्पुत्रदर्शनेन परमहृष्टाऽभूदिति च ज्ञेयं तथा च तत्रैव "ददृशे च प्रबुद्धा सा यशोदा जातमात्मजम्। नीलोत्पलदलश्यामं ततोऽत्यर्थं मुदं ययौ" इति॥ ५३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिवैष्णवतोषिण्यां तृतीयोऽध्यायः॥ ३॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

मघोनि शक्रे स्वयमेव वर्षतीति लोकस्य कस्यचिदपि बहिर्निःसरणार्थमन्धकाराधिक्येन श्रीवसुदेवादर्शनाद्यर्थञ्च वृष्टेर्बाहुल्यं सूचितम्। यमानुजेति तदानीं परमभीषणत्वाद्यभिप्रायेण; तदेवाभिव्यञ्जयति—गम्भीरेत्यादि विशेषणाभ्याम्, अत एव नदीति महाशब्दयुक्तत्वञ्च श्लेषेणोक्तम्, तथापि यथा सीतापतेः समुद्रस्तथा श्रीवसुदेवस्य मार्गं ददौ। तथा च तत्रैव (वि॰ पु॰ ५।३।१८) 'यमुनां चातिगम्भीरां नानावर्त्तशताकुलाम्। वसुदेवो वहन् विष्णुं जानुमात्रवहां नदीम्' इति॥ ५०॥

नन्दस्य व्रजं प्रायो गवावासमिति तत्र द्वारबन्धादिशंका निरस्ता। उपेत्य समीपे प्राप्येति सद्यस्तत्र गमनं बोधयति; यद्वा, उपायेन गत्वेति प्रयत्नविशेषम्; श्रीव्रजेश्वराज्ञया सर्वतो निखातकण्टकावरणादिना दुष्प्रवेशत्वात्; तान् श्रीनन्दादीन्, निद्रया स्वाभाविक्या; किं वा तान् जागरणशीलानपि योगमायया हेतुना प्रकर्षेण निःसंज्ञतया सुप्तानुपलभ्य दृष्ट्वेत्यर्थः। शिशुमिति प्राकृततया स्नेहभरोदयेन श्रीवसुदेवस्य निजबालकाभिमानात्; यद्वा, अशिशुमपि शिशुत्वं प्राप्तमिति श्रीबादरायणेर्भक्तिभरोक्तिः। एवमन्यदप्यूह्यम्। तस्याः सुतामुपायेनोपकारार्थं वा आदायेति श्रीवसुदेवस्य श्रीभगवति स्नेहभरो दर्शितस्तदर्थं मायाया अपि स्वीकारात्, तथा मित्रपुत्र्याः कंसकार्य्यवधदोषानपेक्षणाच्चेति; गृहान् निजबन्धनागारम्॥ ५१॥

दारिकां बालिकां तां पूर्ववदावृतो निरुद्ध इति तदागमनानन्तरं पुनर्द्वारबन्धादि-निष्पत्तेः॥ ५२॥

यशोदेति सत्पुत्रोत्पत्त्या श्रीनन्दस्य व्रजस्य च तथा स्वगर्भतो जननेन योगमायायाश्च कीर्त्तिविस्तारणाभिप्रायेण। किञ्च, नन्दयति जगदिति नन्दस्तस्य पत्नीति तस्या अपि तत्पुत्त्रोत्पत्त्या जगदानन्दकत्वं तथा तत्पतित्वेन नन्दस्यापि योगमायादि यशोविस्तारणञ्च सूचितम्। अप्यर्थे चकारः, व्रजेश्वरीत्वेन बहुलपरिजनवृतापीत्यर्थः। परिश्रान्ता प्रसवस्वभावेन जातात्यन्तश्रमा; अपगता स्मृतिरनुसन्धानं यस्याः सा, तत्परिजनानामपि तादृशत्वमूह्यम् तथा च तत्रैव (वि॰ पु॰ ५।३।२०)—'तस्मिन् काले यशोदापि मोहिता योगनिद्रया। तामेव कन्यां मैत्रेय प्रसूता मोहिते जने॥' इति। अन्यत्तैर्व्याख्यातम् यद्वा, ततश्च परमुत्तमं पुत्रं जातमबुध्यते, तस्य कान्तिविशेषप्रसरादिदर्शनात् तस्य श्रीवसुदेवकृतपुत्रपरिवर्त्तनादेर्लिंगं लक्षणम् अन्यत् समानम्। पश्चात्

पुत्रदर्शनेन परमहृष्टाऽभूदिति ज्ञेयम् तथा च तत्रैव (वि० पु० ५।३।२२) 'ददृशे च प्रबुद्धा सा यशोदा जातमात्मजम् । नीलोत्पलदलश्यामं ततोऽत्यर्थं मुदं ययौ ॥' इति ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामि-पादकृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशमटिप्पण्यां तृतीयोऽध्यायः ॥ ३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

यमानुजा यमुना श्रियःपतेः सीतापतेः ॥ ५०–५१ ॥ शौरिर्वसुदेवः लोहनिगडम् आवृतः कवाटपिहितद्वारः ॥५२–५३॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृते शुकपक्षीये तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

असकृन्मेघे नितरां वर्षति सति गम्भीरस्य जलपूरस्य जवेन ये ऊर्मयः तैः फेनिलाः फेनान्यस्यास्सन्तीति तथा भयङ्कराणामावर्तानां शतैराकुला त्थापि यमानुजा यमुना नदी मार्गं वसुदेवाय ददौ यथा सिन्धुः समुद्रः श्रियः पतेः सीतायाः पतेः श्रीरामचन्द्रस्य ददौ तद्वदित्यर्थः ॥ ५० ॥ ततः शौरिर्वसुदेवः नन्दव्रजमुपेत्य तत्र योगमायया हेतुभूतया नितरां सुप्तान् तान्नन्दादीन् गोपानुपलभ्य ज्ञात्वा यशोदायाः शयने शय्यायां स्वसुतं निधाय तस्या यशोदायाः सुतां मायात्मिकामादाय पुनर्गृहान् स्वनिवासभवनान्यगात् ॥ ५१ ॥ ततस्तां दारिकां पुत्रीं देवक्याः शयने न्यस्य निधाय पूर्ववच्छृङ्खलां पादयोः कृत्वा आबध्याऽऽवृतः पिहितकवाटः सन्नास्ते पूर्ववदवर्त्तत प्रतिमुच्य पदोर्लौहमिति पाठे लौहः लोहमयं निगडं पदोः पादयोः प्रतिमुच्य पुनर्धृत्वेत्यर्थः ॥ ५२ ॥ नन्दस्य पत्नी यशोदा तु जातमपत्यं पुत्रं परमबुद्ध्यत तत्पुरुषमात्रमबुद्ध्यत न तु तल्लिङ्गं तद्गतचिह्नानि तत्र हेतुः परिश्रान्ता तत्रापि हेतुर्निद्रया मायाशक्त्युपबृंहितया निद्रयाऽपगता स्मृतिर्यस्याः तथा यद्वा जातमपत्यं न सुतं नापि कन्यां चाबुद्ध्यत किन्तु जातमात्रमबुद्ध्यत तत्र हेतुः तल्लिङ्गे स्त्रीपुंसान्यतरचिह्नपरामर्शे परिश्रान्ता तत्र हेतुर्निद्रया अपगतस्मृतिः पूर्ववदर्थः ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मघोनि इन्द्रे यमानुजा यमुना तोयौघजवः जलप्रवाहवेगस्तद्युक्ता ऊर्मयो यस्यां सा तथा फेनिला फेनवती गम्भीरा च तोयौघजवोर्मिश्च फेनिला च सा तथेति भयानका भयङ्करा आवर्ताः पयसां भ्रमास्तेषां शतैराकुला श्रियः पतेर्दशरथरामस्य सिन्धुः समुद्र इव । ५० ॥ नन्दव्रजं नन्दगोकुलम् उपलभ्य दृष्ट्वा निद्रया दुर्गाया सुषुप्तान् गृहानिति बहुवचने पुल्लिङ्गः "गृहाः पुंसि च भूम्न्येव" इत्यमरः गृहशब्दस्य भार्यावाचित्वेन नपुंसकत्वं तद्व्यावृत्त्यर्थं बहुवचनम् ॥ ५१ ॥ दारिकां कन्यकाम् ॥ ५२ ॥ परं केवलं जातमबुध्यत तस्य जातस्य लिङ्गं स्त्रीपुरुषविवेकलक्षणं नाज्ञासीत् तत्र निमित्तमाह—परिश्रान्तेति । प्रसूतिवेदनयेति शेषः ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां तृतीयोऽध्यायः ॥ ३ ॥
(विजयध्वजतीर्थपाठेन चतुर्थोऽध्यायः)

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

तदा मथुरातो महावनागमने मध्यवर्त्तिनी यमुना च स्वयमेव पन्थानं ददावित्याह—मार्गं ददौ सिन्धुरिव श्रियः पतेः । सिन्धुरिव गभीरत्वाद् दुस्तरापि सा यमुना श्रियः पतेस्तस्य मार्गं ददौ ॥ ५१–५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीबृहत्क्रमसन्दर्भे तृतीयोऽध्यायः समाप्तः एवं चतुर्थोऽपि समाप्तः ॥ ३–४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तोयौघस्तोयसमूहः श्रियः पतेः सीतापतेः ॥ ५० ॥ तत्सुतामुपादायेति कंसात्स्वपुत्रस्य रक्षणं मित्रपुत्र्या वधं जानतोऽपि परमधार्मिकस्यापि वसुदेवस्यायमन्यायो न दूषणं प्रत्युत भूषणमेव पुत्रीभूते भगवति वर्द्धिष्णुस्नेहेनैव तादृशविवेकापहारात् ॥५१॥ प्रतिमुच्य बद्ध्वा पादयोर्लौहं निगडम् आवृतः आस्ते स्म ॥ ५२ ॥ परं केवलं जातमबुद्ध्यत न तु पुत्रः कन्या वेति तस्य जातस्य चिह्नं तत्र हेतुः परिश्रान्ता अतिसौकुमार्य्यात् प्रसवोत्थश्रमयुता प्रसवान्ते चानन्देन श्रमोपशान्त्या च निद्रयेति किञ्चात्र चकार उक्तसमुच्चये यथा वसुदेवपत्नी तथा नन्दपत्नी च जातं स्वगर्भादुत्पन्नमपत्यं परं सर्वोत्कृष्टम् अबुद्ध्यत तन्माधुर्य्यास्वादशक्त्यैव तद्दत्तया तदीयस्वरूपभूतानन्दमनुभवगोचरी चकारेत्यर्थः । किन्तु तस्य लिङ्गं परमेश्वरोऽयमेवेति लिङ्गविशेषं न अबुद्ध्यतेति भेदः । ननु, तस्याः गर्भजः कृष्ण इति यशो न प्रसिद्धं तत्राह यशोदा तद्यशो ददाति देवक्यै सखीभावात् द्वे नाम्नी नन्दभार्य्या या यशोदा देवकीति च अतः सख्यमभूत्तस्या देवक्या शौरिजाययेत्यादिपुराणवचनावगतादित्यर्थः । व्याख्यानमिदं भागवतामृतवैष्णवतोषिण्यानन्दवृन्दावनादि सम्मत्यैवेति नोपेक्षिणीयम् ॥ ५३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । तृतीयो दशमस्कन्धे सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गम्भीरतोयौघजवेन ये ऊर्मयस्तैः फेनिला फेनव्याप्ता ॥ ५० ॥ निद्रया योगनिद्रया ॥ ५१ ॥ पदोः पादयोर्लोहं निगडं स्वयं प्रतिमुच्य बद्ध्वा आस्ते स्म ॥ ५२ ॥ यशोदा चकारात्तत्रत्यजनता परं केवलं जातमबुध्यत न तु लिङ्गं स्त्रीपुंसोरेकतरलक्षणमबुध्यत निद्रया योगनिद्रया ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे तृतीयाऽध्यायार्थप्रकाशः ॥ ३ ॥

श्रीपांथरीनारायणाचार्यकृतो विरोधोद्धारः

मार्गं ददौ सिंधुरिव श्रियः पतेः। अत्र श्रियःपतिशब्देन दाशरथेर्ग्रहणं न संभवति। श्रीशब्दस्य सीतावाचकत्वेऽनुशासनाभावात्। न च श्रीसीतयोश्चैतन्याभेदेन युक्तता। कीर्त्यादीनामपि तदभेदाद्वामनादीनामपि ग्रहणापातात्। नापि समुद्रेण मार्गदानं तत्रैव युज्यत इति। विप्रगुरुपुत्रानयनवेलायां कृष्णायापि समुद्रेण मार्गदानात्। तस्माद्रामार्थकत्वे श्रियःपतिशब्दस्य न निश्चय इत्यत उच्यते। त्रिभुवनजयलक्ष्मीर्मैथिली तस्य दारा इति नाटकेऽनुशासनसद्भावात् श्रीः सीतेति युज्यते। यद्वा। पतेरित्यावृत्त्या योज्यं। समुद्रस्य सरित्पतित्वेन यमुनापतित्वे सिद्धेऽपि। पतेः। स्वपतेः। अनुसारेणेति शेषः। श्रियः स्वकन्यायाः लक्ष्म्याः। पतेः भगवतः। पारिबर्हरूपं स्वयमनुस्मृत्य मार्गं ददाविति समुद्रेण स्वकन्यायां दत्तायां तदनुस्मृत्येदानीं पारिबर्हरूपमार्गदानं यमुनया कृतमिति भावः। अथवा। कालिंदीति समाख्याता वसामि यमुनाजल इति कालिंद्युक्तेः। पू पूरेण सिंधुरिव वर्तमानाऽपि यमुना स्वाश्रितत्वाच्छ्रीनाम्न्याः स्वानुजायाः कालिंद्याः पतेः भविष्यभर्तुर्लज्जयेति शेषः। मार्गं ददौ। स्त्रीजातिमत्याः स्वशालागमने स्वौद्धत्यप्रदर्शनं न न्यायमिति मत्वा लज्जया संकुचितत्वेन मार्गदानमर्थसिद्धमिति भावः। शालकत्वस्य भविष्यकत्वेनार्थवैलक्षण्यद्योतनायैव पतेरिति वैलक्षण्यप्रयोगः कृतः। अन्यथा पत्युरिति युक्तं स्यात्। सा सूर्यपुत्री यमुनानुजाता तपश्चरंती कृष्णपत्नीत्वकामेति हि तात्पर्यनिर्णये ॥ ५१ ॥

इति श्रीभागवते चतुर्थोऽध्यायः ॥ १०–४ ॥ (अस्मत्क्रमे तृतीयोऽध्यायः)

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मघोनीन्द्रेऽसकृद्देववसुदेवोपरि मन्दं तदितरत्रासकृद्बहुलं वर्षति सति गम्भीरतोयौघजवोर्मिफेनिला गम्भीरतोयौघस्य प्रवाहस्य वेगस्तज्जाता ऊर्मयस्तरङ्गास्तैः फेनिला फेनवती। अनेन मम यमसयमनी पुर्यसुरैः पूरिता भवतीति सन्तोषेणेति ध्वन्यते। भयानका भयप्रापका आवर्ता अम्भोभ्रमास्तेषां शतैराकुला व्याप्ता यमानुजा नदी यमुना श्रियः पतिस्तस्य। षष्ठ्या अलुकि समासे श्रियः पतेरिति सम्भवतीत्येके पतिरित्याख्यातः पतिः। पदभेदं पदशब्दो भिन्न इत्यन्ये। सखिना वानरेन्द्रेण पतिते पतौ सीतायाः पतये नम इत्यादिकं निदर्शयन्तो वदन् श्रियः पतेः रघुपतेः सिन्धुः समुद्र इव श्रियः पतेः कृष्णस्य मार्गं ददौ जानुदघ्नजलाऽभवदिति भावः। रामस्येव कृष्णस्येति विशेषनामाभाषमाणः साधारण्येन श्रीपतेरितीरयंस्तयोर्न तिलतुलविशेष इति ध्वनयामासेति ज्ञेयम् ॥ ५० ॥ नन्दव्रजं नन्दगोकुलमुपेत्य प्राप्य निद्रया श्रीहरिमायारूपिण्या तान्गोपान्प्रसुप्तान्प्रस्वापितानुपलभ्य दृष्ट्वा शिशुं स्वदारकं यशोदाशयने निधाय तत्सुतामुपादाय पुनर्गृहान्। गृहाः पुंसि च भूम्न्येवेत्यमरः। स्वगृहमगात्। यथोक्तम् हरिवंशे। स यत्र गर्भवसतिं वसत्यात्मेच्छया हरिः। यशोदाऽपि समाधत्त गर्भं तदहरेव तु। विष्णोः शरीरजां निद्रां विष्णुनिर्देशकारिणीं। तामेव रजनीं कृष्णो जज्ञे विष्णुकुले प्रभुः। तामेव रजनीं कन्यां यशोदाऽपि व्यजायत। अनुज्ञाप्य पितृत्वेन नन्दगोपगृहं नय। वसुदेवस्तु संगृह्य दारकं क्षिप्रमेव तु। प्रगृह्य दारिकां चैव देवकीशयने न्यसत्। यशोदाया गृहं रात्रौ विवेश सुतवत्सलः। यशोदया त्वविज्ञातस्तत्र निक्षिप्य दारकं। परिवर्ते कृते ताभ्यां गर्भाभ्यां भयविह्वलः। वसुदेवः कृतार्थो वै निर्जगाम निवेशनात्। उग्रसेनसुतस्याथ कंसस्यानकदुन्दुभिः। निवेदयामास तदा तां कन्यां वरवर्णिनीमिति ॥ ५१ ॥ अथ तत्र पुत्रं प्रस्थाप्य गमनानन्तरं दारिकामानीतां देवक्याः स्वभार्यायाः शयने न्यस्य निधाय पदोर्लोहं तन्मयशृङ्खलां प्रतिमुच्य स्थापयित्वा पूर्ववदावृतोऽप्रकाशितार्थो गुप्तो वाऽऽस्ते। स्मे क्रियाप्रबन्धे लट् ॥ ५२ ॥ नन्दपत्नी यशोदा परं केवलं जातमबुद्धयताज्ञासीत्। तल्लिङ्गं स्त्रीपुरुषभेदकं चिह्नं नावबुद्ध्यत। तत्र तन्त्रं परिश्रान्तेति। प्रसववेदनातो निद्रया भगवदङ्गजदुर्गयाऽपगतस्मृतिस्तद्विवेकहेतुस्मृतिरहिता ॥ ५३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे चतुर्थोऽध्यायः ॥ १०–४ ॥ (अस्मत्क्रमे तृतीयोऽध्यायः)

श्रीसुबोधिनी

यथा यथा गोकुलनिकटे गमनं तथा तथा मायासान्निध्याद् गमने क्लेशाधिक्यं भगवत् सान्निध्याच्च तदभाव इति ज्ञापयितुं यमुनोत्तरणे प्रकारमाह मघोनि वर्षतीति, भगवज्जन्मसमये सर्वतो निवृत्ता अपि मेघा मायाजन्मनि सर्वे समागताः, इन्द्रोपि मायामोहितो मेघप्रेरको जातः, केवलाश्चेद् भगवति गच्छति निवृत्ता अपि भवेयुः, अल्पानां मोहितानामल्पधैर्यवत्त्वेन

महति विरोधासम्भवात् , अत आह **मघोनीन्द्रे सकृद् वर्षति** सति, स्वभावतोपि **यमुना क्रू**रेत्याह **यमानुजे**ति, अत एव **गम्भीरतोयौघजवोर्मिफेनिला, गम्भीरो** भयानको गाधो **यस्तोयौघस्तस्य जवेन** वायुवशाच्च य **ऊर्मय**स्तत्सहिता **फेनिला** च, त्रिविधोपि दोषस्तस्या निरूपितः, अतिवेगो राजसः, फेनादिस्तामसः, एवं कालकृतं दोषमुक्त्वा स्वाभाविकं दोषमाह **भयानकावर्तशताकुले**ति, **भयानका** भयजनका ये **आवर्ता** भ्रमरास्तेषां **शतै**राकुला, समप्रवाहरहिता व्यग्रा वा, आवर्तास्तामसाः, वैयग्र्यं राजसं, एवं स्वाभाविका अपि त्रयो दोषाः, **एव दुष्टापि भयान् मार्गं ददौ**, सर्वा नद्यः समुद्रपत्न्यः, रामावतारे समुद्रोपि मार्गमप्रयच्छन् शोषितः किं पुनस्तस्याल्पसत्त्वा भार्या ? अतः स्वरूपादेव प्रच्युता भविष्यामीति **सिन्धुरिव मार्गं ददौ**, किञ्च यमुनाजलेग्रे लक्ष्मीभिः सह क्रीडां करिष्यति, अतः सन्तोषादपि ददौ, यथा लक्ष्मीपतेर्जामातुः श्वशुरः समुद्रः कदाचित् स्वगृहे नयन् मार्गं प्रयच्छति, अथवा श्रीः सीतेव, तस्या एकस्याः कामुकश्चेत् समुद्रशोषं कृतवान् बहूनां गोपिकानां कामुकः कथं न कुर्यात् ? ॥५०॥ एवं मार्गवन्नदीमुत्तीर्य गोकुले गतस्य कृत्यमाह **नन्दव्रजमि**ति **शौरि**रित्यभये नन्दस्य च मित्रत्वात् , व्रजे च गवामपि कदाचिच्छब्दो भवत्यतः पुरुषगमनशब्देनापि न तत्रत्यानां जागरणं, **उपेत्य** समीपे गत्वा, अनेन शनैर्गमनं सूचितं, **तत्र** च **तान्** सर्वदा जागरणयुक्तानपि तदा **प्रसुप्ता**नुपलभ्य, केवलमपि शयनं सम्भवतीति **निद्रये**त्युक्तं, **शिशुं** बालकं भगवन्तं भगवत्त्वज्ञानेन पुत्रत्वस्य वक्तुमशक्यत्वान्नामान्तराणामकृतत्वाद् भगवत्त्वे स्थापनस्यायुक्तत्वाच्छिशुमित्युक्तं, **शयने** शय्यायां, अयुक्तमित्याशङ्क्य शयनपदं दत्तं, **यशोदायाः शयने** सति यशोदायाः शयनं यत्रेति **निधाय** नितरां स्थापयित्वा **तत्सुतां** मायामुपादाय पुनस्तेनैव मार्गेण **स्वगृहानगात्** ॥ ५१ ॥ **ततो देवक्याः शयने** तस्या अपि शय्यास्थानं कृत्वा तां स्थापयित्वा, **अथे**ति भिन्नप्रक्रमे, यशोदाशयने **तूष्णीं** शनैरज्ञापयन् , अत्र तु तदभावः, **दारिकां** कन्यां, अनादरे दारिका, स्वयमेव **पदोः** पादयोर्लोहं **प्रतिमुच्य पूर्ववदेव** यदा भगवज्जन्म न जातं तदा यथा ॥ ५२ ॥ अत्र यशोदायाः शयनं न सम्भवति, प्रसवे लोके ज्ञानासम्भवादित्याशङ्क्याह **यशोदे**ति, यशो ददातीति प्रसवे ज्ञाते भर्तुः सुखं भवतीति, **नन्दस्य पत्नी**ति, तादृशे समयेन्यदापि जागरणं जातकर्माद्यावश्यकत्वात् **पत्नी भूत्वा**पि सावधानापि, **जातमेव परमबुध्यत** न तु जातस्य लिङ्गं पुत्रः पुत्री वेति, यतः **परिश्रान्ता** प्रसवार्थं वेदना महती जाता, पश्चाच्छ्रान्ता यदा तदैव प्रसवो जात इति प्रसवेन सह निद्रापि जाता, तया कृत्वापगता **स्मृतिर्यस्याः**, मम प्रसवो जात इति पूर्वानुसन्धानं स्मृतिः, अतः **पूर्वं वसुदेवकृतं सुस्थम्** ॥ ५३ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे तृतीयाध्यायविवरणम् ॥ ३ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

यमानुजेत्यत्र कालकृतदोषमध्ये गाम्भीर्यं सात्त्विकं **फेनादि**रित्यादिपदेन ऊर्मयो मकरादयो जीवाः, **स्वाभाविकदोषनिरूपणे** समप्रवाहराहित्यं सात्त्विकं सात्त्विकस्य स्तम्भहेतुत्वात् ॥ ५०–५३ ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाशे तृतीयाध्यायविवरणम् ॥ ३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

मघोनीत्यत्र **गम्भीरतोयौघजव**सहिता ऊर्मयो यत्रेत्यन्तं बहुव्रीह्यन्तं पदं विधाय **फेनिले**त्यनेन कर्मधारयो ज्ञेयः, **अतिवेग** इति, तथा च गम्भीरत्वाद् भयानकत्वं सात्त्विको दोषो ज्ञेयः अग्रिमविशेषणेपि तथा ॥ ५० ॥

॥ लेखे तृतीयाध्यायः समाप्तः ॥

बुभुत्सुबोधिका

मघोनि वर्षतीत्यत्र **निवृत्ता** इति सर्वगुणोपेतः काल उक्तः, 'अथ सर्वगुणोपेत' इति श्लोक उक्तः । 'मेघच्छन्नेह्नि दुर्दिन'मितिकोशः । **समागता** इति अविद्यागर्भत्वात् । **दुर्दिनं** जातम् । **महती**ति भगवति । महत्परिमाणेनोपादानं विरोधस्य दुर्दिनस्यासम्भवे हेतुत्वार्थम् । **अतिवेग** इति तेन वेगः सात्त्विक इत्युक्तम् । **राजस** इति कर्मबाहुल्यात् । **तामस** इति निन्दितत्वात् । **तामसा** इति अधो नीत्वा मज्जनसामर्थ्यात् । **राजस**मिति चित्तविक्षेपरूपत्वात् । **त्रय** इति समप्रवाहः सात्त्विकः समप्रवाहराहित्यं वा । सात्त्विकस्य स्तम्भहेतुत्वात् । **अग्र** इति फलप्रकरणे जलक्रीडायाम् । **लक्ष्मीभि**रिति लक्ष्मीरूपाभिर्गोपीभिः । **जामातु**रिति लक्ष्मीः समुद्रपुत्री यतः । **बहूना**मिति बहवश्च बह्व्यश्च बहवः तेषाम् । गोपिकाकदम्बानां फलप्रकरणषष्ठाध्यायलीलायां स्वीकृतानाम् । यद्वा श्रुतिरूपाः भगवत्सेवानुकूलत्वलक्षणपुंस्त्ववन्त इति वेदाः । कुमारिका (ऋषिरूपा) णां वृन्दम् । कामपुरुषार्थवत्त्वेन मोक्षपुरुषार्थाभावान् नपुंसकतौल्यात् । नित्यसिद्धायूथः । यमुनाजितां यूथ इति सामान्ये नपुंसकं वा विशेषणम् । **कामुक** इति काम इच्छा प्रेमेतियावत् । प्रेमवान् । कुमारिकाणां कामुकः । नित्यसिद्धानां यमुनाजितां च कामधर्मवान् । तत्र स्थापितलक्ष्म्याम् अर्थकामुकः ॥५०॥

नन्दव्रजमित्यत्र शौरिरिति शूरस्यापत्यमिति । नन्दभयं नास्तीत्याहुः नन्दस्येति । अयं नन्दो न वसुदेवपुत्रः नवमस्कन्धोक्तः किन्तु भ्राता । 'दिष्ट्या भ्रातः प्रवयस' इति पञ्चमाध्यायवाक्यात् । अत आहुः । यद्वा पुत्रः तत्सम्बोधनं च वाक्य इत्यत आहुः मित्रत्वादिति । द्वितीयपक्षे पुत्रे राजधर्मे पितुर्वचनं भ्रातुरित्युपपद्यते । ननु द्वितीयपक्षे 'प्रवयस' इति पुत्रेनुपपन्नं पदमिति चेन्न प्रवयसः लघुकाले वलीपलितयुक्तस्येत्यर्थात् । अत इति शब्दस्य जागरणहेतुत्वाभावात् । जागरवोत्ति प्राहरिकान् । भगवत्त्व इति व्यापकत्वात् स्थापनस्य । स्वगृहानिति भगवत्प्रादुर्भावस्थानत्वेन मान्यत्वाद् बहुवचनम् ॥ ५१ ॥

देवक्या इत्यत्र अत्र स्थिति देवकीशयने । अनादर इति भगवन्तमिवास्थापयित्वा ॥ ५२ ॥

यशोदेत्यत्र पत्नीशब्दः 'पत्युर्नो यज्ञसंयोग' इतिसूत्रा न्निष्पन्न इति यज्ञसंयोगमाहुः तादृशे समय इत्यादि । तादृशासमयः कालः जागरणं निद्राविरुद्धं ज्ञानकम् । अयं यज्ञः । नन्दस्य पत्नीत्यनेनोक्तः । नन्द आभीरः वेदाधिकारी । त्रैवर्णिकत्वात् । अतः पूर्वमिति अपगतस्मृतित्वात् पूर्वश्लोकोक्तम् । सुस्थमिति स्त्रीस्वभावकृतकार्याभावादविघ्नमित्यर्थः । इति श्रीति कृष्णजन्मेति त्रिभिर्व्यूहैः कृष्णजन्म । चतुर्थाध्याये धर्मेनिरुद्धः चतुर्थव्यूहः ॥ ५३ ॥

इति श्रीमद्वल्लभचरणैकतानश्रीगोपेश्वरविरचितायां शास्त्ररीत्या बुभुत्सुबोधिकायां तृतीयाध्यायव्याख्यानम् ॥ ३ ॥

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

"यथा यथा गोकुलनिकटे गमनं तथा तथा मायासान्निध्यात्" आचार्यचरण आज्ञा करते हैं कि भगवान को शिर पर धारण करके श्रीवसुदेवजी का जैसे जैसे गोकुल के निकट पहुँचना तैसे तैसे माया के समीप होने के कारण पहुँचने में क्लेश का अधिक होना, एवं भगवान् के सन्निधान से उन क्लेशों का अभाव हो जाना यह बतलाने को यमुना के पार करने के प्रकार को कहते हैं कि मघोनि इन्द्र के वृष्टि करते रहने पर यमुना का प्रवाह भयावह था परन्तु भगवान् के सान्निध्य के कारण कोई क्लेश उपस्थित नहीं हुआ। भगवान् के जन्म समय में मेघ सब ओर निवृत्त हो गये थे तो भी माया के जन्म के समय में सब वापिस आ गये, इन्द्र भी माया से मोहित होने के कारण मेघों को प्रेरणा देने लगा। यदि मेघों को इन्द्र की प्रेरणा न होती, केवल मेघ ही होते तब तो भगवान् के गोकुल पधारने के अवसर पर मेघ निवृत्त हो भी जाते क्योंकि अल्प योग्यता वाले साधारण मायामोहित लोगों का धैर्य अल्प ही होता है अतः वह महान् पुरुषों के प्रति विरोध नहीं करते। यहाँ क्षुद्रजातीय मेघों का भगवान् से विरोध करने की सम्भावना नहीं है यह बतलाना है, परन्तु इन मेघों को तो राजा इन्द्र से प्रेरणा मिल रही थी अतः वे वर्षा बरसाते रहे, रूके नहीं इसलिये कहा कि **"मेघोनि वर्षति"** यहाँ मेघ वर्षते नहीं थे किन्तु स्वयं मघवा इन्द्र के बार बार वर्षा करने पर वैसी परिस्थिति हो गई। मायामोहित इन्द्र की आज्ञा को पाकर परवश मेघ वर्षते ही रहे जिससे यमुना का प्रवाह भयावह हो गया। आचार्यचरण **"यमानुजा"** पद का रहस्य समझाते हैं कि **यमस्य अनुजा** यमराज की भगिनी होने के कारण भाई यमराजा का जैसे स्वाभाविक कठोर स्वभाव है वैसे बहिन यमुना के स्वभाव की क्रूरता बतलाई है। यह क्रूरता भयङ्कर परिस्थिति के वर्णन में अनुकूल है अत एव गम्भीर जल प्रवाह के वेग से एवं उमंग की तरंगों से तथा फेन से युक्त बतलाया गया है। श्री यमुना का प्रवाह गम्भीर था और जल की अगाधता-गहराई भयानक थी, और प्रवाह वेग से तथा वायु के कारण उठती हुई हजारों लहरों से युक्त थी तथा फेन से परिपूर्ण थी। यहाँ पर यमुना के तीन प्रकार के दोष का कथन इस विशेषण से हुआ है, अत्यन्त वेग से राजस दोष है, फेन बुद् बुदे झाग बबुला आदि तामस दोष है, और गहराई सात्त्विक दोष है। इस प्रकार वर्षा कालजनित दोषों को कहकर तीन प्रकार के स्वाभाविक दोष बतलाते हैं कि सैकड़ों भयङ्कर भवरों से आकुल थी, जल प्रवाह सम नहीं था वह ऊँचा नीचा विषम रूप से बहता था, अथवा तो उन भंवरों से व्यग्र थी, और निजी घबड़ाहट बतला रही थी। यहाँ पर आवर्त भंवर तामस दोष है, व्यग्रता राजस दोष है, और समान प्रवाह का न होना सात्त्विक दोष है इस प्रकार स्वाभाविक तीनों दोषों का भी निरूपण किया है। इस प्रकार स्वाभाविक एवं आगन्तुक दोषों के रहने पर भी भय के कारण मार्ग देने में अनुकूल हो गई और मार्ग दे दिया, भगवत्सेवा में विघ्न नहीं किया। सब ही नदी समुद्र की पत्नी होती हैं। रामावतार में समुद्र भी भगवान् को मार्ग न देने के कारण शुष्क कर दिया था, तब उस समुद्र की अल्प सामर्थ्य वाली एक पत्नी की तो बात ही क्या है। यमुना ने विचार किया यदि विरोध करूँगी तब तो स्वरूप से ही भ्रष्ट हो जाऊँगी इस भय से समुद्र की भाँति मार्ग दे दिया, अथवा भगवान् आगे लक्ष्मी श्री गोपीयों से रास में जल क्रीड़ा करेंगे इस अवसर पर जल रास के कारण मुझे भगवान का संग हो जायगा मेरा भी सौभाग्य सिद्ध होगा इस संतोष से श्री यमुना ने मार्ग दे दिया, जिस प्रकार लक्ष्मीपति अपने दामाद भगवान् श्रीराम को श्वसुर समुद्र कभी उन्हें अपने घर में ले जाने को मार्ग देता है वैसे मार्ग दे दिया। अथवा श्री शब्द से सीताजी का ही ग्रहण अभीष्ट है एक सीता के अभिलाषुक श्री रघुनाथ जी ने विलंब करने वाले समुद्र को यदि सुखा दिया था तब बहुत सी गोपिकाओं के अभिलाषुक भगवान कृष्ण मुझे क्यों न सुखा देंगे इस भय से यमुना जी ने मार्ग दे दिया ॥ ५० ॥

एवं मार्गवन्नदीमुत्तीर्य गोकुले गतस्य कृत्यमाह—अब श्री आचार्यचरण कहते हैं कि इस प्रकार मार्ग की तरह नदी को पारकर गोकुल में पहुँचे हुए श्री वसुदेवजी का कार्य बतलाते हैं कि **शौरिः**—शूरनन्दन श्री वसुदेव जी वहाँ जाकर गोपों को सोया हुआ पाकर सुकुमार शिशु को वहाँ श्री यशोदा की शय्या पर पधराकर गृह के प्रति लौट आये। यहाँ पर "शौरि" शब्द का प्रयोग श्री वसुदेवजी के अभय का सूचक है, और नन्दव्रजं श्रीनन्दराय जी के व्रज में जाने में हर्ष प्रकर्ष का होना स्वाभाविक है क्योंकि श्री नन्दराय जी श्री वसुदेवजी के मित्र हैं अतः निर्भयता पूर्वक प्रसन्नता से व्रज पहुंचे। 'व्रज' गौओं के निवास स्थान को कहते हैं वहाँ कभी कभी गौओं का शब्द होता ही रहता है अतः मनुष्य के चलने की आहट से भी व्रजवासीजन का जाग जाना सम्भव नहीं। 'उपेत्य' शब्द 'समीप में जाकर' इस अर्थ का वाचक है, इससे श्री वसुदेवजी के धीरे धीरे जाने की सूचना मिलती है तात्पर्य यह है कि वसुदेवजी चुपके से चरण रखते हुए व्रज गये जिससे कोई जाग न जावे और वहाँ पर उन सदा जागने वाले गोपों को भी उस समय मायागमन से सोता हुआ पाया। शयन का अर्थ तो निद्रा के बिना केवल बिछौने पर पड़े रहने को भी कह देते हैं अतः 'निद्रया' शब्द का प्रयोग करके कहा कि वह लोग निद्रा से सो रहे थे। यहाँ पर बालक-रूप भगवान् के प्रति 'शिशु' शब्द का प्रयोग अत्यन्त उपयुक्त है, क्योंकि वसुदेवजी को उनके भगवान् होने का ज्ञान है इस दृष्टि से 'पुत्र' शब्द का प्रयोग करना उचित नहीं था। अन्य नामों का अभी आविर्भाव हुआ नहीं है, और 'भगवान्' शब्द का प्रयोग करना भी स्थानान्तर के अवसर पर सुसंगत नहीं क्योंकि भगवान् होने पर उनका भय से अन्यत्र स्थापन युक्तियुक्त नहीं, अतः 'शिशु' शब्द ही उपयुक्त होने से प्रयुक्त किया है, "**यशोदाशयेन**" शयन शब्दार्थ की चर्चा करते हुवे आचार्यचरण कहते हैं कि "शयन" यद्यपि शय्या को कहते हैं परन्तु यहाँ शय्यापद का प्रयोग अयुक्त है सज्जनों के लिये परस्त्री की शय्या का स्पर्श निषिद्ध है अतः श्लोक में शय्या पद का प्रयोग न करते हुए, शय्या पद के स्थान में "शयन" शब्द का प्रयोग किया है। और शयन का अर्थ शय्या-बिछाना अर्थ न करना किन्तु दूसरा अर्थ लेना है इसलिये "शयन" पद की व्याख्या करते हैं कि अथवा श्री यशोदा के शयन करने पर उनके सो जाने पर, या श्री यशोदा जिस स्थान पर शयन करती थी उस स्थान पर शिशु को स्थापित कर भली भाँति पधराकर श्री यशोदा की सूता माया को लेकर पुनः उसी मार्ग से अपने गृह आ पहुँचे ॥ ५१ ॥

आचार्यचरण कहते हैं कि **ततो देवक्याः शयने तस्या अपि** इसके पश्चात् देवकी की शय्या पर उस कन्या को शयन करने का स्थान सिद्ध कर उसे वहाँ स्थापित कर वसुदेवजी पूर्व की भाँति बद्ध हो गये। यहाँ पर अथ शब्द भिन्न प्रकार की प्रक्रिया का सूचक है, श्री वसुदेवजी ने पूर्व में श्रीयशोदा की शय्या पर चुपचाप धीरे धीरे शिशु का स्थापन किया था क्योंकि वहाँ किसी को विदित न हो, यह आशङ्का थी, लेकिन यहाँ उस प्रक्रिया को बदल दिया है क्योंकि यहाँ उस प्रकार की कोई शङ्का नहीं है। दारिका शब्द से उसके अनादर की सूचना है, कि उस परम मनोहर पुत्र की स्मृति क्या इससे शान्त होगी, वसुदेवजी स्वयं ही अपने पैरों में लोह की बेड़ियों को डालकर भगवान् के जन्म से पूर्व स्थिति की भाँति आबद्ध हो गये ॥५२॥

अत्र यशोदायाः शयनं न संभवति—आचार्यचरण इस श्लोक के उत्थान में कहते हैं कि प्रसव के काल में श्री यशोदा का शयन तो असम्भावित है क्योंकि लोक में प्रसव अवस्था के होने पर प्रसव ज्ञान तो होता है फिर अज्ञान कैसे ? उक्त शङ्का की निवृत्ति करते हुए शुकदेवजी कहते हैं, कि नन्दपत्नी यशोदा इतना ही समझ सकी कि कुछ प्रसव हुआ परन्तु वह पुत्र है या पुत्री है ऐसा नहीं जाना। इस श्लोक में यशोदाशब्द के द्वारा एवं उसके विशेषण "नन्दपत्नी" शब्द के द्वारा नन्द और यशोदाजी के नाम की सार्थकता बतलाई है। यशोदा शब्द का मर्म यह है कि प्रसव के ज्ञात होते ही पति को यश देती है कि आप बड़भागी हो आप की उपासना आज सिद्ध हुई, नाथ मेरा आप के द्वारा पाणिग्रहण सार्थक हुआ, चिरकाल तक लोक में नाम चलेगा इत्यादि सुमङ्गल, सुमधुर वचनों से नन्दरायजो को यश देती है इसलिये यशोदा नाम सार्थक है। और नन्दराय को भी प्रसव के ज्ञात होते ही सुख एवं अपार आनन्द होता है कि मेरा भर्ता होना आज सार्थक हुआ और अब इस भार्या के भरण करने में मुझे पूर्ण सफलता प्राप्त हुई है, इत्यादि भावनाओं से सुख होने के कारण उन्हें 'नन्द' पदवी प्राप्त होती है। अन्य अवसरों पर भी वैसे समय में बालक के जात कर्म आदि संस्कार आवश्यक कर्म होते हैं। अतः जागना ही होता है, शयन का सम्भव नहीं। 'नन्द-पत्नी' पद के अन्तर्गत जो 'पत्नी' शब्द का प्रयोग किया है वह स्त्री की एक विशिष्ट योग्यता का सूचक है उस योग्यता के आधार पर उसे पति के साथ पारलौकिक स्वर्ग आदि फलदायक यज्ञादि कर्म में अधिकार प्राप्त होता है। अतः पत्नी को प्रसवकालीन जात कर्मादि संस्कारों के लिये स्वरूपस्थ न रहना आवश्यक है। श्री यशोदा श्री नन्द की पत्नी होकर भी सावधान होते हुए भी केवल इतना ही जान सकी कि जन्म हुआ, कोई बालक प्रकट हुआ, प्रकट हुए बालक का चिह्नविशेष कि यह पुत्र है या पुत्री है ऐसा नहीं जान सकी, क्योंकि यशोदा 'परिश्रान्त थी' प्रसव के निमित्त वेदना अधिक हो चुकी थी, पीछे जिस समय परिश्रान्त हुई उसी समय प्रसव हुआ कि उसके साथ ही निद्रा भी आ गई, उस निद्रा से उसकी स्मृति लुप्त हो गई, मेरे प्रसव हुआ है इस प्रकार के पूर्व वृत्तान्त के अनुसन्धानात्मक स्मरण भी न रहा ऐसी अभान दशा में वसुदेवजी का किया हुआ सब कुछ शिशु का स्थापन कन्या का उत्थापन आदि सुन्दर और सरल

प्रकार से सम्पन्न हुआ। भगवान् श्री कृष्ण की जयन्ती तिथि को जन्माष्टमी कहते हैं इस तिथि की यह संज्ञा श्री कृष्ण की परब्रह्मता का परिचय देती है। 'रामनवमी' 'नृसिंहचतुर्दशी' "वामनद्वादशी" आदि जयन्तियों को 'जन्म नवमी' या 'जन्म चतुर्दशी' अथवा जन्म द्वादशी नहीं कहा जाता, जब प्रभु प्राकट्य तिथि को जन्माष्टमी कहा जाता है इस आकस्मिक शब्द प्रवृत्ति से यदि इस प्रकार स्वीकार किया जावे कि जन्म प्रयुक्त विशेषता को लेकर उक्त जन्माष्टमी संज्ञा प्रचलित हुई है तो वह विशेषता अजन्मा परब्रह्म भगवान् श्री कृष्ण के जन्म से ही तो सम्बन्धित है। श्री यशोदा भी 'जातं परमबुध्यत, न तल्लिङ्गम्; धन्य श्री यशोदे ! उस परब्रह्म की कोई पहिचान नहीं, आपने उसके जन्म को जान लिया या उसकी जन्मतिथि का नामकरण कर दिया। कोटि कोटि नति तति श्रीयशोदोत्सङ्ग लालित लालन को और लालन जननी को ॥ ५३ ॥

इति श्रीमद्भागवत दशमस्कन्ध निरोध लीलाजन्मप्रकरण के अन्तर्गत रूपान्तर स्वीकार संज्ञक तृतीय अध्याय
श्रीसुबोधिनीजी अनुवाद मातृपितृतोषिणी टीका समाप्त। इति तृतीयोऽध्यायः ॥ ३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मघोनि इन्द्रे असकृत् पुनः पुनः वर्षति सति गम्भीरोऽगाधो यस्तोयौघो जलपूरस्तस्य जवेन वेगेन ये ऊर्मयस्तरङ्गास्तैः फेनिला फेनव्याप्ता, आवर्ता भ्रमाः तेषां शतैराकुला व्याप्ता, अतएव भयानका अपि यमानुजा यमुनानदी वसुदेवाय मार्गं ददौ जानुमात्रजला जाता। यथोक्तं विष्णुपुराणे—"यमुनां चातिगम्भीरां नानावर्तशताकुलाम्। वसुदेवो वहन् विष्णुं जानुमात्रवहां ययौ" इति। मार्गदाने दृष्टान्तमाह—सिंधुरिवेति। श्रियः पतेः 'राघवत्वेऽभवत्सीता' इति वाक्यात् सीतापतेः श्रीरामस्य समुद्रो यथा मार्गं ददौ तथेत्यर्थः ॥ ५० ॥ शौरिर्वसुदेवः नन्दव्रजमुपेत्य सम्प्राप्य तत्र निद्रया योगमायया तान् नन्दादीन् गोपान् प्रसुप्तानुपलभ्य दृष्ट्वा तं सुतं यशोदायाः शयने शय्यायां निधाय संस्थाप्य तस्याः सुतामुपादाय गृहीत्वा स्वगृहान् पुनरगात्। द्वारविवृतिरत्रापि बोध्या ॥ ५१ ॥ ततस्तां दारिकां कन्यां देवक्याः शयने शय्यायां न्यस्य निधाय अथानन्तरं पदोः पादयोः लोहं निगडं प्रतिमुच्य बद्ध्वा आवृतः पिहितकपाटः सन् पूर्ववदास्ते स्म ॥ ५२ ॥ नन्दस्य पत्नी यशोदा तु परं केवलं मयि किञ्चिज्जातमित्येवाबुध्यत, तस्य लिङ्गं कन्या पुत्रो वेति तु नाबुध्यत। तत्र हेतुद्वयमाह—प्रसवपीडया परिश्रान्तेति। निद्रया योगमायया अपगता स्मृतिः विवेको यस्याः सा ॥ ५३ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र हरेर्जन्मनिरूपणे। तृतीयो विवृतोऽध्यायः प्रादुर्भावनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

मघोनीति ॥ मघोनि इन्द्रे असकृत्पुनः पुनः वर्षति सति अत्र वर्षणं लोकानां वसुदेवदर्शनं मा भूदिति असकृत्त्वं च तत् क्लेशाशङ्कया मध्ये मध्ये विच्छेदात् गम्भीरोऽगाधो यस्तोयौघो जलपूरस्तस्य वेगेन ये ऊर्मयस्तरङ्गास्तैः फेनिला फेनव्याप्ता आवर्ता भ्रमाः तेषां शतैराकुला व्याप्ता अत एव भयानका अपि यमानुजा यमुना नदी श्रियः पतेः सीतापतेः श्रीरामस्य समुद्र इव वसुदेवाय मार्गं ददौ। तदा जानुमात्रजला जाता इत्यर्थः ॥ ५० ॥ नन्दव्रजमिति ॥ शौरिर्वसुदेवः नन्दव्रजमुपेत्य संप्राप्य तत्र निद्रया योगमायया तान् नन्दादीन् गोपान् प्रसुप्तानुपलभ्य दृष्ट्वा तं सुतं यशोदायाः शयने शय्यायां निधाय संस्थाप्य तस्याः सुतामुपादाय गृहीत्वा स्वगृहान् पुनरगात्। द्वारविवृतिरत्रापि बोध्या। कंसात्स्वपुत्ररक्षणे मित्रपुत्र्या वधं जानता धार्मिकेणापि वसुदेवेन भगवन्मायामोहितेनैवेदं कृतमिति न वसुदेवस्य दोष इति ॥ ५१ ॥ देवक्या इति ॥ वसुदेवः ततस्तां दारिकां कन्यां देवक्याः शयने शय्यायां न्यस्य निधाय अथानन्तरं पदोः पादयोः लोहं निगडं प्रतिमुच्य बद्ध्वा आवृतः पिहितकपाटः सन् पूर्ववदास्ते स्म ॥ ५२ ॥ यशोदेति ॥ नन्दस्य पत्नी यशोदा तु पूर्वं प्रसवपीडया परिश्रान्ता प्रसवानन्तरं तु निद्रया योगमायया अपगता स्मृतिः विवेको यस्याः सा तथा सती परं केवलं मयि किंचिज्जातमित्येवाबुध्यत तस्य लिङ्गं कन्या पुत्रो वेति तु नाबुध्यत। परिजना अपि मायामोहिता वसुदेवागमनं न विदुरिति ज्ञेयम्। किं च व्याख्यान्तरम्। चकारः समुच्चये यथा वसुदेवपत्नी तथा नन्दपत्नी च जातं स्वगर्भादुत्पन्नं यत्परं सर्वोत्कृष्टम् अबुध्यत न तु परमेश्वरोऽयमिति तल्लिङ्गमबुध्यत। यशोदा इति नन्दपत्नीविशेषणम्। तद्यशो ददाति देवक्यै सखीभावात्। "द्वे नाम्नी नन्दभार्याया यशोदा देवकीति च ॥ अतः सख्यमभूत्तस्य देवक्या शौरिजायया ॥" इत्यादिपुराणवचनादिति शेषं समानम् ॥ ३ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाद्दशमस्य तृतीयके ॥
इति भागवते दशमे पूर्वार्धे तृतीयोऽध्यायः ॥ ३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मेघ इति। असकृत् पुनः पुनः, मेघे वारिवाहे, अत्यतितरां, वर्षति सति, मघोनीति पाठे, मघोनीन्द्रे, वर्षति प्रसिद्धत्वादनुक्तमपि जलमिति कर्म ज्ञेयम्। गम्भीरस्य गभीरतावतस्तोयौघस्य जलपूरस्य जवो वेगस्तेन ये ऊर्मयस्तरङ्गास्तैः फेनिला

संजातबहुविधकफा, भयानकानां भयंकराणामावर्त्तानामम्भोभ्रमाणां शतैराकुला व्याप्ता, यमानुजा यमुना, नदी, वसुदेवायेति शेषः। सिन्धुः समुद्रः, श्रियः पतेः सम्प्रदानस्य शेषत्वविवक्षया षष्ठी। सीतापतये रामचन्द्राय इव, मार्गं पन्थानं, ददौ ॥ ५० ॥ नन्दव्रजमिति। ततः, शौरिर्वसुदेवः, नन्दव्रजं उपेत्य, तत्र व्रजे, निद्रया योगमायोद्भावितनिद्रया हेतुभूतया, प्रसुप्तान् नितरां सुप्तान्, तान् व्रजवासित्वेन प्रसिद्धान्, गोपान्नन्दादीन्, उपलभ्य ज्ञात्वा, यशोदाशयने नन्दपत्न्याः शय्यायां, सुतं स्वपुत्रं, निधाय संस्थाप्य, तत्सुतां तस्या मायात्मिकां पुत्रीं, उपादाय, पुनः गृहान् निजभवनं, अगात्। गृहशब्दस्य पुंसि बहुवचनान्तत्वात् गृहमिति वक्तव्ये गृहानित्युक्तम् ॥ ५१ ॥ देवक्या इति। अथानन्तरं, वसुदेवः, दारिकां तां कन्यां, देवक्याः शयने शय्यायां, न्यस्यास्थाप्य, पदोः लोहं निगडं, प्रतिमुच्याबद्ध्य, पूर्ववत् आवृतः पिहितकपाटादिः सन्, आस्ते स्म ॥ ५२ ॥ यशोदेति। नन्दपत्नी यशोदा चापि परं केवल, जातं मया किंचित् प्रसूतं, इति अबुद्ध्यत। न तु तल्लिङ्गं पुत्रः कन्या वेति, यतः परिश्रान्ता, निद्रया, अपगता स्मृतिर्यस्याः सा, अतो नाबुद्ध्यतेति संबन्धः ॥ ५३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे तृतीयोऽध्यायः ॥ ३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मघोनीति : १०.३.५०.

सन्मानसे लसति यत्पदपद्मरेणुः सोऽयं स्वयं प्रभुरुपैति ममाद्य तीरे।
सूर्यात्मजेत्यतितरां मुदमुद्वहन्ती साऽऽनन्द-बाष्पलहरीभिरभूदपारा ॥ १४८ ॥
लोकोत्तरं सुखमनङ्गरसं दिशन्त्याः श्रीतोऽपि चास्यरतिरस्तु मयि प्रकामम्।
इत्युल्लसद्धृदयभूर्भुवनाधिकश्रीः स्पष्टीचकार कमलाधिकभावमङ्के ॥ १४९ ॥
निर्वेलवारिवहनान्मिहिरात्मजा सा चासीत्तदा भगवदध्वनि रोधकर्त्री।
कोऽप्यप्रगल्भमतिरेवमिह ब्रवीतु रोधस्थितिः क्षयकरीत्यवभासते नः ॥ १५० ॥
यमस्वसेयं यमधर्मकर्त्री प्रायो भवेदेवमधोक्षजेन। न जातुचिच्छक्यमिति स्रवन्ती चक्रे तदानीं भुवनप्रसारम् ॥ १५१ ॥
शौरिर्भवत्ययमहं भुवि शूरजाता तद्युक्तमस्य पुरतो मम शौर्यमित्थम्।
सञ्चिन्त्य तस्य चरणे बहुधा कबन्धराशीनदर्शयदलं किल वाहिनी सा ॥ १५२ ॥
गोपालनायैव सनातनोऽसौ व्रजं प्रयातीत्यवलोक्य सा किम्। आवर्तलक्षा मुखलोलफेनाश्चक्रे तदग्रे निजगाः समग्राः ॥१५३॥
एको मय्युपविश्य तिष्ठति बलान् त्रासप्रदोऽहिः परोप्याप्यातोऽयमिति क्रुधा शतधनुर्ज्याभागभाजो जवात्।
शेषं श्रीधरमस्तकोद्यतफणं वीक्ष्याऽऽपगा शूरजा चक्रे तद्विनिवृत्तये शरभरान् विष्वक्प्रसारानसौ ॥१५४॥
अनन्तशम्बरोल्लासि हृदयं सदयं सदा। तवेवेश ममाप्यस्तीत्यापगा किमबोधयत् ॥ १५५ ॥
अगाधे जलेऽस्या कथं वाम्बुकेलिर्मयाऽग्रे विधेयेति शङ्कां प्रमार्ष्टुम्।
कच्चिज्जानुदघ्ना कच्चिन्नाभिदघ्ना कच्चित्कण्ठदघ्ना च साकिं तदाऽऽसीत् ॥ १५६ ॥

मार्गं ददाविति :

लोके दयालुमवलोक्य परं तदग्रे दुःखी विदीर्णहृदयो भवतीति कृष्णा।
स्वान्तस्थकालियभवव्यसना निरीक्ष्य कृष्णं विदीर्णहृदया किमभूत्तदा सा ॥ १५७ ॥
दृष्ट्वा मदीयमिदमभ्रभनीरसत्वं माभूदसौ मयि निकाममुदासितात्मा।
सर्वाशिकी सरिदितीव निजां तरङ्गराजद्रसां वसतिमीशमदर्शयत् किम् ॥ १५८ ॥
अग्रे भाव्यमिहास्ति चास्य गृहिणीस्थाने मया मूर्तया मय्यस्याधुनिकं निरीक्ष्य चरितं मा भूदुदासीनता।
इत्युच्छलल्लतां विहाय चतुरा सूर्यात्मजा दर्शयन्त्यध्वानं विनयादखण्डयदुदासीनत्वमीशाङ्घ्रिगम् ॥ १५९ ॥
यन्मेघजीवनमिदं भुवि पूर्वमासीद्याऽच्युतस्य पददर्शनतः प्रयातम्।
इत्यापगा किमु तदा विशदान्तरङ्गशोभामदर्शयदसौ द्विजराजलोकान् ॥ १६० ॥
अस्याऽऽवासो विलसति पितुर्भर्तुरन्तर्गृहे यद्बाह्यां दृष्ट्वोरपथगतिमिमां स्यात् प्रवक्ता तदग्रे।
तस्माद् भूयादुभयकुलयोर्वाच्यता मे वृथैवेत्यध्वव्याजाद् हृदयमनघं दर्शयामास वाऽसौ ॥ १६१ ॥
भूत्वा सूर्यकुले पुरा हरिरयं मार्गप्रदानालसं तातं चन्द्रमसो विलोक्य जलधिं क्रोधादबध्नाद् यथा।
एवं सूर्यजयाऽधुनापि च मया मार्गो न दीयेत चेद्बध्नीयाद्विधुवंशजोऽयमिति किं भीत्या द्विभागाऽभवत् ॥ १६२ ॥
मत्सखीजनक एष आगतो मद्गृहेऽद्य किल सुष्ठु दिष्टतः। इत्थमुत्सुकमनास्तदा नदी स्वान्तरालयमदर्शयत् किमु ॥ १६३ ॥
भगवत्यन्तरोद्भासिन्यद्भुतं सुखमीरितम्। मुनिभिस्तत्स्वयं भोक्तुं साऽभूत्स्वान्तरमापतिः ॥ १६४ ॥

साधारणस्य हृदयेऽपि जगन्निवासस्फूर्तिर्लसत्यविकला सुजनस्य लोके।
बाह्येऽन्तरेऽपि मयि कृष्णरसैकमय्यामस्फूर्तिरस्य कथमित्यभवत् तथा सा ॥ १६५ ॥
या स्यात् स्वतातसदृशी दुहिताऽभ्युपैति लोके प्रगल्भपदवीमिति जानती सा।
नारायणोल्लसितमध्य रवेः सुता सा श्रीशं स्वमध्यमनयत्किमु वाऽध्वदानात् ॥ १६६ ॥
अत्यन्तपूतभगवत्पदपद्मयोर्न स्पर्शो भवत्विह कबन्धततेरितीव।
कृत्वा द्विभागमुदकं निजमापगा सन्मार्गं ददौ भगवते किमु सा पवित्रम् ॥ १६७ ॥

दृष्ट्वा मां बलभद्ररञ्जितपदां कोपोऽस्य मा भूत् पुरः पापस्पर्शनमन्यसङ्गजनितं मा भूत् तथेत्याशयात्।
सा सूर्यात्मभवा लसद्हृदयभूर्मध्येऽध्वदानच्छलाद्योगो नैव हरेरदर्शयदरं देहद्वयावस्थितिम् ॥ १६८ ॥
एकः श्रुत्युदितोऽस्ति यद्यपि रसो यस्त्वत्स्वरूपस्तथाप्याराद् गोकुलवासिसङ्गतिवशाद् द्वित्वं प्रयाति प्रभो।
द्वैताद्वैतपदस्थितिं श्रुतिमयोद्भूतेदृशीं दर्शयन्त्यासीद् गोकुलवासकामुकमसौ कृष्णं द्विभागा किमु ॥ १६९ ॥

जडनिधिरपि भक्तिं प्रापितो गोप्रवाहैः श्रुतिमयतनुभूत्या नित्यमेवं स्वकीर्तिः।
भजतु विकलतां नेत्याशयोल्लासितात्मा निजहृदि यमुना सा भक्तिमाविश्चकार ॥ १७० ॥

सिद्ध एव हि सर्वेषामुदरेऽग्निरसंशयम्। किमत्र चित्रं यत्कृष्णवर्त्माऽऽसीद्यामुनोदरे ॥ १७१ ॥

यः प्रेम्णा हृदि मां दधात्यविकलं स्यात्तस्य बन्धच्युतिर्मुक्तिद्वारकवाटमुक्तिरपि तद्रोधिद्विषां लीनता।
धीपीयूषकरोदयो भवनदो गुल्फप्रमाणोदका लुप्यद्वृत्ति च गोकुलं करगता मायाऽपि तत्र स्थिता ॥ १७२ ॥

श्रीशेनैवं व्रजभुवमनुप्रस्थितं स्वीयतातं लक्ष्यीकृत्य त्रिजगति समुद्घोषितः स्वाशयो यः।
तं जानन्तोऽप्यहह मनुजा व्यासवाग्देशिकास्याद् भूयोभूयस्तदपि च भवे चित्रमत्र भ्रमन्ति ॥ १७३ ॥

नन्दव्रजमिति : १०.३.५१.

उपसंहृतस्वरूपा स्ववशाऽपि च भवति खलु सतां माया। अद्भुतचरिताऽप्यविकलमिह मानं गोकुले स वसुदेवः ॥ १७४ ॥
हित्वा चिन्तामणिमनुशयो ग्रहीतुश्च योऽल्पकाचाळिम्। सोऽभूद् वसुदेवस्य स्वसुतत्यागाच्च तत्सुताऽऽदानात् ॥ १७५ ॥
अतिलङ्घ्य भवाटवीं बलाद् विषयाराधनदीं तथा प्रतीर्य। यदि गोकुलवासरेव भूयात् स वृतः स्यादिह माययेति युक्तम् ॥ १७६ ॥

मायात्यागः श्रीशलाभः प्रयत्नात् साध्यो भक्त्या चेत्यलं केवला वाक्।
व्यत्यस्तार्थो देवकीजानीरासीत् तस्मादेवं देवता वाऽत्र हेतुः ॥ १७७ ॥

वसुदेवहृदयविलसद्विभवामालोक्य तां महामायाम्। वसुमत्सुता पुरेव प्रादाद् वसुदानपूर्वकं वर्त्म ॥ १७८ ॥
अघटितघटने शक्तिर्मायावत्येव भाति परमेशे। अयमपि तथास्ति किं वा कुर्यादधुनेति तादृगजनि भिया ॥ १७९ ॥

याः कुर्वन्त्यपरोक्षवत् प्रियजने भर्तुः परोक्षेऽप्यलं चित्तेनाजडवृत्तिना प्रतिपदं सेवामपापाः स्त्रियः।
ता एवात्र भवन्ति भर्तुरतुलप्रेमर्द्धिभाजः सदेत्यालोच्येव पुरेव तद्व्रतिकृते साऽभूदपापाऽन्तरा ॥ १८० ॥

त्वं तातभर्तृपदवासिनमीशमेवं वीक्ष्यागतं झटिति मार्गमदाः सहर्षम्।
मन्मातरं नहि कुतो यमुने ददासीत्यासीत् पुरेव हि हठाज्जडजातमेव ॥ १८१ ॥

देवक्या इति : १०.३.५२.

यत्क्लेशलेशकलितः पुरुषोऽरिरुद्धो बद्धः प्रपञ्चनिगडैर्भवतीति तस्याः।
किं चित्रमत्र कलनाद् वसुदेव एष प्राप स्थितिं बत पुनः प्रथमानुभुक्ताम् ॥ १८२ ॥
लब्धेशदर्शनसुखः खलु दैवयोगान् मायावृतोऽपि मनुजो न स दुःखमेति।
कन्यायुतावपि च तौ भृशमन्तरे यदानन्दमापतुरुदीक्षितकृष्णरूपौ ॥ १८३ ॥

यशोदेति : १०.३.५३.

निद्राद्यक्षणजनिबोधवर्त्मगम्यो मायापाकृतिसमयोदित स्वबोधः।
योगीन्द्रैरपि विदितागमाङ्गसारैर्न ज्ञातः किमिह यशोदयेति चित्रम् ॥ १८४ ॥

यस्मात्सौख्यमतीव यत्र विहृतिः स्यात् साधुवृन्दावनक्रीडाहेतुरनन्तचित्रचरितख्यातिश्च यस्याऽऽश्रयात्।
क्षुद्रं लोकदृशाऽतिलघ्वपि तदेवात्यादरादाश्रयेद्धीमानित्युपपादितं भगवता प्राप्तेन गोष्ठं स्वतः ॥ १८५ ॥
सिद्धा बल्लवजातिरेव भुवने मुग्धस्वभावात्तथा सिद्धं गोकुलमप्यनन्तविषयं घोषाविशेषप्रियम्।
एवं सत्यपि यद्धरिः शुकमुखब्रह्मर्षिहर्षप्रदः प्राप्तस्तत्र रिरंसुरत्र न परो हेतुर्विना स्वावनम् ॥ १८६ ॥

केचित् कंसभयाद्वदन्तु कतिचित् पित्रोर्विमोहात् परे पुण्यानन्दयशोदयोः कति परे गोपीष्टदिष्टादिति।
यद्गोष्ठागमनं तवेश तदभूत् सज्जातिवृन्दावनक्रीडाभ्यासमनन्ययोगसुलभं कर्तुं त्वहं वच्म्यहो ॥ १८७ ॥
पल्लीलाश्रयणं विधाय सुधियो ये संसृतिक्रयाप्लुतास्तेषामस्मि यथा तथा न सुलभो विद्वद्वराणामपि।
इत्थं स्वाशयमच्युतो विशदयन्नेवागतो गोकुलं मन्ये यद्धि तदेव भाति भुवने पल्लीलयाऽलङ्कृतम् ॥ १८८ ॥
गोपा गोपपतिस्तथा तदबलास्तद्गोकुलं वा कियत् वर्ण्यं वर्णविवर्णनिर्णयविधावालब्धवर्णैरपि ।
नित्यानन्दपदप्रदानरसिकस्याप्यच्युतस्याऽच्युताऽऽनन्दावाप्तिरनन्तयोगकलिता जाता हि यत्रोज्ज्वला ॥ १८९ ॥

निवेश्य निजगोकुले सदयमिन्दिरेशं ततः प्रकृत्यपसृतिं व्यधात् स वसुदेव इष्टार्थधीः।
सुगूढमिति भाति मे यदिह तत्प्रभृत्यस्य हि सतीमतिरनन्तभागभयदा सदानन्ददा ॥ १९० ॥
दीनत्राणपरायणस्य तमिनं जन्मोत्सवं श्रीपतेरस्मिन् सत्त्वसुखाकरं सुरगणैरावृष्टपुष्पोत्करम्।
आलोक्यैव विविक्तवृत्तिसरणी वाणी ममाप्युत्सवादासीत् स्विष्टसुवर्णपुष्पभगवत्कीर्तिस्रजाऽलङ्कृता ॥ १९१ ॥

श्रीशाकल्प तरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासिकविवरहरिसूरिविरचिते भक्तिरसायने तृतीयोऽध्यायः ॥ ३ ॥

कृष्णप्रिया

इन्द्र के सतत धारा से बार बार वर्षा बरसाने के कारण गम्भीर जल राशि के प्रवाह से बहती लहरियों से लहराती, झागों से झगड़ती और भयानक हजारों भंवरों से आकुल व्याकुल रूप से बहती महारानी श्री यमुना नदी ने वसुदेवजी को उस प्रकार मार्ग दे दिया जिस प्रकार सीतापति श्री रामचन्द्रजी को लङ्का जाने के अवसर पर सिन्धु ने मार्ग दिया था ॥ ५० ॥ श्री शौरि वसुदेवजी श्रीनन्दरायजी के व्रज में पहुँचकर वहाँ उन गोपों को निद्रा के कारण सोया हुआ पाकर श्री यशोदा की शय्या पर बाल शिशु को स्थापित कर उनकी सुता को उठाकर फिर अपने घर लौट आये ॥ ५१ ॥ इसके अनन्तर श्री वसुदेवजी श्री देवकी की शय्या पर कन्या को रखकर अपने पैरों में लोहे की जंजीरों को डाल कर पहले की तरह बद्ध हो गये ॥ ५२ ॥ श्री नन्दपत्नी श्रीयशोदा ने इतना ही जान पाया कि कुछ हुआ है, पुत्र या पुत्री का कोई चिह्न नहीं पहिचान सकी क्योंकि प्रसववेदना से अत्यन्त थक चुकी थी और निद्रा ने उनकी स्मृति का अपहरण कर लिया था ॥ ५३ ॥

इति श्रीमद्भागवतमहापुराणे दशमस्कन्धे जन्मप्रकरणे श्लोकार्थे तृतीयोऽध्यायः ॥ ३ ॥

* * *

ॐ नमः श्रीकृष्णाय

श्रीमद्बलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अथ प्रथमोऽध्यायः

श्रीराधादिभिरात्मशक्तिनिकरैरुद्वीक्ष्यमाणक्षणः श्रीरूपादिमधुव्रताश्रितपदद्वन्द्वारविन्दासवः ।
गोविन्दः स्फुरदिन्दुसुन्दरमुखः सद्रक्षणैकव्रती पूर्णब्रह्मतयोदितः श्रुतिगणैः श्रीमान् स जीयात् प्रभुः ॥ १ ॥
नीलाभ्रप्रतिमः कृपार्द्रहृदयो गोविन्दलीलासुधा-वृष्टिं यस्तृषिते परीक्षिति विभुर्भूरत्यनल्पां व्यधात्।
सद्भक्ताटविमाववल्लरिसमुल्लासैकहेतुः सदा तद्गन्धैरपि संनियोजयतु मां श्रीमान् स वैयासकिः ॥ २ ॥
श्रीमद्यशोदासुतकेलिसिन्धुं विगाहमानस्य ममाल्पशक्तेः। सनातनश्रीधरविश्वनाथ दयालवः सम्प्रतिशक्तिराशिः ॥ ३ ॥
अत्र श्रीदशमे कृष्णो नवलक्षणलक्षितः। आश्रयो वर्ण्यते दुष्टनिरोधस्त्वनुषङ्गतः ॥ ४ ॥
औरस्यो नन्दराजस्य वसुदेवस्य चाच्युतः। निगूढागूढभावेन शुकेनोक्तस्तदिच्छया ॥ ५ ॥
गोकुलादित्रिधामस्वाल्लीला तस्य त्रिधा भवेत्। नवत्या मुनिनाध्यायैः साश्चर्यं या प्रकीर्तिता ॥ ६ ॥
आद्यैः पञ्चभिरध्यायैः सप्रसङ्गं हरेर्जनिः। भूभारहृतये देवैरर्थितस्य निरूप्यते ॥ ७ ॥
ततो नवभिराख्याता बाल्यलीलाः परेशितुः। षड्भिः गौगण्डलीलास्ताः कैशोररसभाविताः ॥ ८ ॥
ततः कैशोरलीलानां भवन्त्वेकोनविंशतिः। अक्रूरस्तुतिरेकेन यमुनाम्भसि दर्शिता ॥ ९ ॥
प्रोक्तैकादशभिर्लीला मथुरायां जगत्पतेः। अवशिष्टैः कुशस्थल्यामित्थं नवतिरीरिताः ॥ १० ॥
प्रथमस्यादिमे श्रोतृवक्त्रोर्वाङ्माधुरी मिथः। देवाशाकाशवाक्कंसात् शौरेः षट्तनया हताः ॥ ११ ॥

श्रीकृष्णावतारकथापीयूषसिन्धुनिर्वृतः परीक्षिद्वाचयितव्येष्वर्थेषु वक्तुरुत्साहं वर्द्धयन्नौत्सुक्यात् प्रोक्तानुवादपूर्वकं पृच्छति,—कथित इति सार्द्धकम्, एवमग्रेऽपि। 'इहान्वितानां वाक्यानामस्का बोध्या विचक्षणैः। सूर्यात्सोमस्य पूर्वनिपातः। विरिञ्चिप्रपौत्रात्तस्मात्तस्य तत् पौत्रत्त्वेन तदंशत्वेन मनोऽधिष्ठातृत्वेन स्वयं भगवत्स्वीकृतकुलत्वेन चाभ्यर्हितत्वात्। उभयवंश्यानां सोमसूर्यवंशजातानां राज्ञां परमाद्भुतं दिग्विजयादि चरितं कथितम्। यद्यपि स्वायम्भुवस्य तद्वंश्यानाञ्च तृतीयादिष्वद्भुतानि चरितानि कथितानि तथापि तद्वंशो नावसानरम्यः, सोमसूर्ययोर्वंशस्तु श्रीयदुनाथरघुनाथचरितान्तिमत्वादवसानरम्यः इति तयोरुत्कर्षणोल्लेखः। यदोश्च चरितं कथितं, तस्य पित्राज्ञोल्लङ्घिनोऽपि हरिभक्तिमत्वान्नितरां धर्मशीलत्वं भक्तिस्तस्य नवमे प्रसिद्धा तथैकादशे च ॥ १ ॥ तत्रेत्यर्द्धकम्। तत्र यदोर्वंशेऽन्शेन बलभद्रेण सहावतीर्णस्य विष्णोर्व्यापकस्य पूर्णस्य कृष्णस्य वीर्य्याणि नोऽस्मान् प्रति शंस स्तुतिवद्वर्णयेत्यर्थः, अंशेन सहेति बलभद्रवीर्य्यश्रवणेऽपि तृष्णा द्योतिता। न इति बहुवचनं तच्छुश्रूषयात्मनो बहुत्वमननात्स्वसङ्गिनोऽपेक्षया वा, यद्वा तत्रावतीर्णस्य कीदृशस्य अंशेन विष्णोः यस्यांशो विष्णुस्तस्य पूर्णस्य स्वयं भगवत इत्यर्थः ॥ २ ॥ ननु "जातो गतः पितृगृहाद्व्रजमेधितार्थ" इत्यादिना तद्वीर्य्याण्युक्तानीति चेत्तत्राहावतीर्य्येति। तेन मत्तृप्तेरभावाद्विस्तरेण वदेति। भूतानि भावयति प्रेमार्द्राणि करोतीति प्रयोजनमुक्तं "नृलोकं रमयामास मूर्त्या सर्व्वाङ्गरम्यया" "अवितृप्तदृशां नृणां" "स्वमूर्त्या लोकलावण्यनिर्मुक्तये" त्यादिभ्यस्तथैव प्रत्ययात्। विश्वानि सर्वाणि जनानां चक्षुरादीनि करणान्यतति व्याप्नोति सौन्दर्य्यादिभिरिति सः ॥ ३ ॥ ननु कृष्णचरितान्यसकृद्वर्णितानि पुनः किं पृच्छसि तत्राह,—उत्तमश्लोकस्य कृष्णस्य गुणानुवादात् को विरज्येत न कोऽपीत्यर्थः। कीदृशात् ?। निवृत्त्या तर्षा विषयतृष्णा येषां तैराविर्भूतस्वात्मानन्दैरात्मारामैरुपाधिक्येन गीयमानात्। मुमुक्षूणां भवौषधात् संसाररोगनिवर्त्तकात् मुक्तानां शब्दार्थमाधुरीभ्यां श्रोत्रमनसोरभिरामात्। मुमुक्षुजीवन्मुक्तमुक्तनिषेव्यादिति पुमर्थरूपत्वं व्यक्तम्। पशुघ्नाद्विनेति पश्यत्यविशेषेणेति पशुः कृष्णतदन्यचरितयोः साम्यदर्शी विमुखस्तथाभूतमात्मानं सम्पाद्य हन्त्यधः पातयतीति तस्मादेना। यद्वा पशुघ्नः स्वर्गार्थी कर्मठस्तस्माद्विना "त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः। कथाया"मित्युक्तेः पशुघ्नो व्याधस्तस्माद्विनेति वा। स खलु सन्ततहिंसानुविद्धबुद्धिर्लोकद्वयसुखस्पृहावर्जित इत्यर्थः। अस्त्वागर्भात् तेनैव पालितः संप्रति मुमुर्षुस्तच्चरितान्येव विशेषत उपजीवामीति ॥ ४ ॥

मत्कुलदैवतत्वात् कृष्णस्य चरितानि मम श्रोतव्यानीति भाववानाह,—पितेति। अमरान् इन्द्रादीन् जयन्तीति तैः। देवव्रतो भीष्मस्तदाद्यैरतिरथैस्तिमिङ्गिलसदृशैः। दुरत्ययं दुष्पारमपि कौरवसैन्यसागरं वत्सपदमिव कृत्वा मे पितामहा अतरन्। यतो यत्प्लवाः कृष्णनौकाः सन्तः। तस्य वीर्य्याणि वदस्वेति तृतीयेन सम्बन्धः ॥ ५ ॥ मदेकरक्षकत्वाच्च तच्चरितानि मे श्रोतव्यानीत्याह,—द्रौण्यस्त्रेण विप्लुष्टं दग्धं मदङ्गम्, इदमिति तर्जन्या वक्षः स्पृशति। आत्तचक्रो धृतसुदर्शनः। प्रथमस्कन्धसंवादाद्गदया तदस्त्रं निरस्य जुगोप। चान्मातुरङ्गञ्च ॥ ६ ॥ सर्वगतिप्रदत्वाच्च श्रव्याणीत्याऽह—अखिलानां देहभाजां प्राणिनां मध्ये येऽन्तरन्तर्मुखा भक्तास्तेभ्यः पुरुषरूपैर्द्विभुजचतुर्भुजपुरुषाकारैरमृतं परमानन्दं, ये च बहिर्बहिर्मुखा भक्तविद्रोहिणस्तेभ्यः "कालोऽयमिति विह्वल" इत्यादिवाक्यात् कालरूपैर्म्मारकतया विभातैर्मृत्युमुतानन्तरममृतञ्च प्रयच्छतः कृष्णस्य वीर्य्याणि वदस्व गोप्यान्यपि प्रकाशय। "भासनोपसम्भाषे"त्यादिसूत्राद्वदेस्तङ्। यद्वा, हे स्व मदेकबन्धो श्रीमुनीन्द्र! अतो मद्धितायावश्यं ब्रूहीति, भावः। पित्तदूषितरसनेषु सितापानकस्य तिक्तत्ववत्तेष्वानन्दमूर्त्तेरपि दारुणतयावभासः। कीदृशस्य तस्येत्याह,—मायेति। "माया वयुनं ज्ञानमिति" निघण्टुकोषाद्विज्ञानरूपमनुष्यस्येत्यर्थः। तमेकं गोविन्दं सच्चिदानन्दविग्रहमिति श्रवणात्। न हि मनुष्याकारं स्वर्णपिण्डो मनुष्य इति भावः मायया मनुष्या यस्येति वा यन्मायया मनुष्यसृष्टिरित्यर्थः ॥ ७ ॥ विशेषं पृच्छति रोहिण्या इति चतुर्भिः। नवमे सङ्कर्षणो रामस्तस्या रोहिण्यास्तनयः प्रोक्तः स एव देवकीपुत्रेष्वपि गणितः, देहान्तरं विना तद्गर्भसम्बन्धः कथं घटते ? ॥ ८ ॥

पितृवसुदेवस्य गेहाद्व्रजं बृहद्वनं कस्माद्धेतोर्गतः। तद्गतोऽपि "नन्दः स्वपुत्रमादाये" त्युक्तेः पितुर्नन्दस्य गेहाद्बृहद्वनात् क्व किं विशिष्टे स्थाने ज्ञातिभिर्गोपैः सार्द्धं वासं कृतवान्। "ज्ञातीन् वो द्रष्टुमेष्याम" इति गोपान् ज्ञातीन् वक्ष्यति ॥ ९ ॥ यदूनां पूर्य्यां श्रीमथुरायां द्वार्व्वत्याञ्च। मातुर्भ्रातरं कंसं कस्मादवधीत्। मातुलत्वादद्धा तदहणं वधायोग्यम् ॥ १० ॥ देहं श्रीविग्रहं मनुष्यसन्निवेशित्वान्मनुष्यचेष्टाप्राचुर्य्याच्च मानुषमाश्रितं चक्षुराश्रित्य रूपे स्थित इत्यादिवत् प्रकाशेत्यर्थः। मधुपूर्य्यां कति वर्षाण्यवासीत् मनुष्यसन्निवेशित्वं तस्य स्वरूपलक्षणं "गूढं परं ब्रह्म मनुष्यलिङ्ग" मिति नारदः। पराशरश्च, "यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म नराकृती"त्यभाणीत्। यो यच्चेष्टाप्रचुरः स तत्तथा व्यपदिश्यते; यथा मनुष्योऽपि राजा देववत् सिंहवच्च विचेष्टनान्नृदेवो नृसिंहश्चेति। मानुषं भौतिकं देहमाश्रित्य गृहीत्वेत्यर्थस्तु दुर्धीविजृम्भित एव। "तत्त्वं परं योगिना"मिति तद्देहस्य परतत्त्वत्वेनोक्तेः ॥ ११ ॥ अनभिज्ञेन मया ते विशेषाः कति प्रष्टव्याः ? स्वयमेव सर्वज्ञेन भवता सर्व्वे ते कथ्यन्तामिति भावेनाह सर्व्वमिति ॥ १२ ॥

न च क्षुत्तृड्व्याकुलस्त्वं क्षणं विरमेति वाच्यमित्याह नैषेति ॥ १३ ॥ हे भृगुनन्दन शौनक! भागवता भक्ता एव मान्यतया प्रधानानि यस्य स वैयासकिः ॥ १४ ॥ व्याहर्त्तुमारभतेत्युक्तमपि पुनः श्रीशुक उवाचेत्युक्तिस्तस्य शुकवन्मधुरभाषित्वबोधनाय। "व्यास! त्वदीयतनयः शुकवन्मनोज्ञं ब्रूते वचो भवतु तच्छुक एव नाम्ने"ति ब्रह्मवैवर्त्ते श्रीकृष्णोक्तेः। हे राजर्षिसत्तम!

तव बुद्धिः सम्यग् व्यवसितं निश्चयो यस्यास्तादृशी । यद्यतो बुद्धेः ॥ १५ ॥ तत्कथाप्रश्नं स्तौति वासुदेवेति । तत्पादसलिलं श्रीगङ्गा यथा त्रीन् लोकान् पुनाति तथा तत्कृतस्तत्कथाप्रश्ने वक्त्र्यादीन् पुरुषानिति त्वयाहं मुनयश्च तदकथनतदश्रवणादिहेतुमालिन्यात् पाविता, इति भावः । यथापूर्वमत्र श्रेष्ठयाम् ॥ १६ ॥

तत्र तावद्भगवदवतारे प्रसिद्धं हेतुमाह भूमिरिति । दृप्तनृपव्याजादितिवंशोद्भवत्वाभावेऽपि ये कर्मणैव दैत्यास्तेषामनीकशतायुतैरसंख्यातैः सैन्यैस्तत् पापपुञ्जैर्यो भूरिभारस्तेनाक्रान्ता भूमिः सुमेरुशिखरस्थं ब्रह्माणं शरणं ययौ प्राप्ता ॥ १७ ॥ गौर्भूत्वेति दयोत्पादनाय व्यसनं दुःखम् ॥ १८ ॥ ब्रह्मा तद्व्यसनमुपधार्य निशम्य अथेत्यधिकत्वादिदं लक्ष्यते । सृष्टिर्मत्कर्म-रक्षणन्तु विष्णोरतस्तं क्षीरधिनिलयं प्राप्येदं निवेद्यमिति विममर्श ततः सुमेरुशिखरात् क्षीरपयोनिधेस्तीरं जगाम । तया भूम्या सह ॥ १९ ॥ जगन्नाथमिति तत्र गमनस्य न्याय्यत्वम् । देवदेवमिति तन्निवेदनश्रवणार्हत्वम् । वर्षति वाञ्छितमाकम्पयति दुःखमिति प्रयोजनसंपादकत्वम् । पुरुषसूक्तेनोपतस्थे तुष्टाव समाहित एकाग्रचित्तः सन् ॥ २० ॥

तदाज्ञां ब्रह्मा देवानवोचदित्याह,—गिरमिति । समाधौ तत्रापि गगने समीरितामदृष्टवक्तृकामित्यर्थः । गां वाणीम् । पौरुषीं पौरुषेणोक्ताम् । अत्रांशांशस्य क्षीराब्धिपतेर्ब्रह्मादिदुर्लभदर्शनत्वेन महैश्वर्येण तत्परमांशिनः कृष्णस्यैश्वर्यं महानतिशयो व्यज्यते । तथापि देवमानवादिनिखिललोकलक्षतया तच्चरिताभिधानं तत्कृपातिशयहेतुकम् । तद्धि निगूढपारमैश्वर्यं चरितं फलकाधरमुकुरवन्मनोहरं भवति ॥ २१ ॥ पौरुषीं वाणीमनुवदति,—पुरैवेति चतुर्भिः । धराया भूमेर्ज्वरः भवद्विज्ञापनात् पूर्वमेव पुंसा श्रीकृष्णेनावधृतो ज्ञातः । तावद्भवद्भिर्यदुषु तदंशैरुद्धवादिभिः संभूय तत्पुत्र-पौत्ररूपेणोपजन्यताम् । तावत् कियदित्याह,—स यावत् स्व-कालशक्त्या भूमेर्भारं क्षपयितुं भुवि चरेत् प्रकटः स्यादिति सत्वरं भवद्भिर्भाव्यम् । कीदृशः स ? इत्याह,—ईश्वराणामस्मदादीनामीश्वरः स्वयं भगवानित्यर्थः ॥ २२ ॥ एतदेवाह, वसुदेवस्य विशुद्धसत्त्वावतारस्य नन्दनृपस्य शौरेश्च गेहे । 'सत्त्वं विशुद्धं वसुदेवशब्दित यदीयते तत्र पुमानपावृत' इति चतुर्थे रुद्रोक्तेः, पुरुषो जनिष्यते न त्वहं जनिष्ये इत्युक्तेः स किं गर्भोदशयः नेत्याह,—पर इति । तर्हि किं कारणोदशयः ? नेत्याह,—भगवानिति । तर्हि किं परव्योमाधिपतिः ? नेत्याह,—साक्षादिति । अनन्यापेक्षिरूपः स्वयं भगवान् श्रीकृष्ण इत्यर्थः । तत्प्रियार्थं श्रीराधिकारुक्मिण्यादीनां सख्यार्थं, सुरस्त्रियस्तदंशभूता उपेन्द्राजितादिमन्वन्तरावतारस्त्रियः । पूर्वाचरिततद्भजनबलात् पृथग्भूताः सम्भवन्तु जायन्तामित्यर्थः ॥ २३ ॥ स्वेन भ्रात्रा कृष्णेन सह राजते स्वराट् । हरिर्भर्तृहरिरितिवद्देवो बलदेवः । अग्रतः पूर्वमेव भविष्यति । य एवांशेन सहस्रवदनोऽनन्तः । "यस्यैकांशेन विधृता जगती जगतः पते"—रिति वक्ष्यमाणात्, —यो वासुदेवस्य कृष्णस्य कला भागः । हरेः प्रियेति । मयि ज्येष्ठे सति नैश्चिन्त्येनायं लीलायिष्यते इति भावः ॥ २४ ॥

अपिच । विष्णोर्माया च सम्भविष्यति । प्रकटिष्यति । प्रभुणा नैवादिष्टा सती । कीदृशीत्याह—भगवती । पराख्या योगाख्या च येश्वरीत्युच्यते । परायां मायाशब्दः, "स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः" । "अतो मायामयं विष्णुं प्रवदन्ति सनातन"मिति श्रवणात् । यथांशेन स्वप्रतिच्छविभूतेन प्रधानेन त्रिगुणेन जगन्मोहितम् । तथा च त्रिगुणया सह परा सम्भविष्यतीत्यर्थः । किमर्थं ? तत्राह—कार्यार्थ इति, देवकी-सप्तमगर्भ-समाकर्षण-यशोदास्वापनादिसम्पादनाय । त्वच्छत्रुः काप्यभूदिति कंस-वञ्चनादिसम्पादनाय चेत्यर्थः । आद्यं परया सम्पाद्यते, न हि तत्र त्रिगुणा प्रभवेत् । द्वितीयं तु त्रिगुणया, तादृशदुष्टेषु तस्या एव प्रभावात् पराख्यस्वरूपशक्तेरंशस्त्रिगुणेति दृष्टं नारदपञ्चरात्रे,—जानात्येका परा कान्तं सैव दुर्गा तदात्मिका । या परा परमा शक्तिर्महाविष्णुस्वरूपिणी । यस्या विज्ञानमात्रेण पराणां परमात्मानं मुहूर्त्ताद्देवदेवस्य प्राप्तिर्भवति नान्यथा । एकेयं प्रेमसर्वस्वरूपा श्री-कुलेश्वरी । अनया सुलभो ज्ञेय आदिदेवोऽखिलेश्वरः । अस्या आवरिका शक्तिर्महामायाखिलेश्वरी । यया मुग्धं जगत् सर्वं सर्वे देहाभिमानिन इति । एकेत्येकानंशाभिधानेत्यर्थः ॥२५॥ इतीति–विष्णुज्ञानुवादप्रकरणेन । परमं स्वधाम सत्यलोकम् ॥२६॥ वसुदेवगृहे हरेर्जन्म कथयिष्यंस्तदुपयोगिनीं कथामाह— पुरेति, विषयान् देशान् ॥ २७ ॥ राजधानी नृपनिवासः यत्र "नित्यं सन्निहित" इत्यनेन तस्याश्च नित्यत्वमुक्तम् "नित्यां मे मथुरां, विद्धि नित्यं वृन्दावनं तथे"तिपद्मोक्तेश्च । किञ्च; सर्वादिकल्पेऽवतरिष्यन् कृष्णस्स्वयं तत्परिकरांश्च प्रागाविर्भाव्य तस्यामवतरति, विहृत्य तस्यामेवान्तर्धत्ते, पुनः समये सत्येवं यावत् प्राकृतिकः, प्रलयो न स्यात् न तु प्रतिसमयं, कुतश्चिद्वैकुण्ठादागत्यावतरतीति सूच्यते । किञ्च तदवतारसमये परव्योमादिभ्यो धामभ्यस्तदधीशांशास्तस्मिन् सम्भवन्ति, तल्लीलावसाने स्वस्वधामानि गच्छन्ति, परावरेशो महदंशयुक्तोह्यजोऽपि जातो भगवान् यथाग्नि'रिति तृतीयवचनात् । तैरेव तस्य तत्तल्लीलास्तस्यां भवन्ति । प्राकृतिके प्रलये तु प्रकाशद्वयमेकतां नीत्वोपरितने स्वलोके विराजतीति तत्त्वविदः ॥ २८ ॥

सूर्यया नवोढया, प्रयाणे उद्वाहोत्तरवासरे स्व-गृहं प्रयातुम् । एतदुद्वाहे द्रोणपर्वणि विशेषः—"यदोरभूदन्ववाये देवमीढ इति श्रुतः । यादवस्तस्य तु सुतः शूरस्त्रैलोक्यसम्मतः । शूरस्य शौरिर्नृवरो वसुदेवो महायशाः । धनुष्यनवरः शूरः कार्तवीर्यसमो युधि ॥" तद्वीर्यश्चैव तत्रैव कुले शिनिरभून्नृपः (प !) । एतस्मिन्नेव काले तु देवकस्य महात्मनः ॥ दुहितुः स्वयम्वरे राजन् ! सर्वक्षत्रसमागमे । तत्रैव देवकीं देवीं वसुदेवार्थमाशु वै ॥ निर्जित्य पार्थिवान् सर्वान् रथमारोपयच्छिनिः ॥ तां दृष्ट्वा देवकीं शौरेरथस्थां पुरुषर्षभः । नासृष्यत महातेजाः सोमदत्तः शिनेर्नृपे"त्यादिना ॥ २९ ॥ स्वसुर्भगिन्या देवक्याः, रश्मीन् प्रग्रहान् ; स्वयं सारथ्यमकरोदित्यर्थः ॥ ३० ॥ चतुरिति द्विकम् । पारिबर्हमुपस्करं, हेम्नां मालाः सन्तोषाम् । त्रिषट् शतं—

तत्तत्प्रकारभेदेन समवर्गत्रयात्मकमष्टादशशतमित्यर्थः । सुकुमारीणां नवयौवनानां समलङ्कृते तदुत्सवोपयोगिविचित्रोत्तमवस्त्रभूषणादिभिर्यथाविध्यलङ्कृते । प्रकर्षेण श्रद्धयादात् ॥ ३१--३२ ॥

प्रग्रहिणं गृहीताश्वरश्मिं कंसमाभाष्य—"अरे कंसे"ति सम्बोध्य गर्भपदोक्तिः—अष्टम्यां कन्यायां दृष्टायामपि तस्या-सन्देहाय । यां वहसे रथेन भर्तृ-गृहं प्रापयसि । हे अबुधेति—शत्रुजनयित्रीवहनात् स्वमरणाज्ञानाच्च, स्वमातरि स्निग्धं कंसं हरिः कथं हन्यादिति तत्प्राकट्यशैथिल्यशङ्कयातिव्यग्राणां देवानां तस्यां तस्यापराधोत्थापनार्थमदृष्टशरीराणां तेषामियं वाणी । हरिमातरं हन्तुं नायं शक्नुयादिति निश्चयश्च तेषां विज्ञेयः ॥ ३३ ॥ इत्युक्त एव ननु विचारिततदर्थः । भगिनीं हन्तुमारब्धः सद्य एव प्रवृत्तः । आदिकर्मणि कर्त्तरि चेति क्तः । खड्गपाणिः सन् कचेऽग्रहीत् । यतः खलः, योऽतिस्नेहाद्भगिन्याः सारथ्यमकरोत् स तदैव त्यक्तरश्मिप्रतोदो गृहीततत्केशः खड्गेन तां हन्तुं प्रवृत्त इति खलस्नेहस्येयं रीतिः । पापं पापमूर्त्तित्वाच्च कुतश्चित् पापाच्छङ्कमानः । कुलपान् वंशधरानंसति कुलपांसनः कुलदूषण इत्यर्थः । अंस समाघाते ॥ ३४ ॥ नृशंसं क्रूरम् । ननु ? तादृशः स कथं तत्-सान्त्वनं शृणुयात्तत्राह— महाभाग इति । भाग्यवतः प्रतिकूलतां व्याघ्रादयोऽपि न कुर्वन्तीति भावः । परिसान्त्वयन् - साम्नायुक्तिभिर्भेदेन स्नेहोत्पादनेन च क्रमेण प्रबोधयन् ॥ ३५ ॥ सम्बन्धलाभावुपकृत्यभेदौ गुणकीर्त्तनम् । साम पञ्चविधं भेदो दृष्टादृष्टभयं वच" इति साम्नः पाञ्चविध्यं भेदस्य द्वैविध्यं वर्ण्यते । तत्रादौ साम्ना प्रबोधयति श्लाघनीयेति । स्त्रियं तत्रापि भगिनीं तत्रापि तदुद्वाहपर्वणीति, अपि तु नैव तां हन्तुमर्हतीति, अन्यथा शौर्ययशसोर्हानिः । तत्र श्लाघनीयेति गुणकीर्तनम् , भोजेति सम्बन्धः, भगिनीमित्यभेदः, कथं हन्यादिति शत्रुजनन्याः स्त्रिया वधाद्विनिवृत्त्या यशोलाभः, उद्वाहेति मम पत्नीप्राप्त्या परोपकृतिश्च । स्त्रिया भगिन्या उद्वाहपर्वणि इति तद्धनने यशस्विनस्तव ऐहिकं दुर्यशः, पारत्रिकं नरकं चेति दृष्टादृष्टभयलक्षणेन द्विविधेन भेदेन च प्रबोधनमुक्तम् । गीर्देवी त्वेवं व्यनक्ति; श्लाघ्येषु मध्ये गुणो न्यूनः, भोजो कलहित्वेन ख्यातास्तेषां यशः कलहाधिक्यं तत्करः स कथं भगिनीमेकां हन्यादपि तु निखिलं कुलमिति ॥ ३६ ॥

मृत्युभयेनैनां हन्मीति चेत्तत्राह--हे वीर जन्मवतां लब्धजन्मनां देहेन सहैव मृत्युर्जायते; प्रतिक्षणं परिणामस्य दर्शनात् । वीरेति; तत्र वीरत्वं न स्यादिति भावः । तथापि कालविलम्बार्थं हन्मीति-चेत्तत्राह—अद्यवेति । वा शब्दाभ्यामुभयोः पक्षयोः प्राधान्य बोध्यते । तथा चावश्यके मृत्यौ सति विलम्बमात्रार्थमीदृशपापार्जनं न युक्तमिति; अनुपार्जितपापस्य पुनर्जन्मनि सुखभोगा भविष्यत्येवेति भावः ॥ ३७ ॥ भावं स्फुटयन्नाह—देहे इति । देहे पञ्चत्वं मरणमापन्ने सति, आदि कर्मणि क्तः । देही जीवो देहान्तरं प्राप्यानुपश्चात् प्राक्तनं वपुस्त्यजति । कर्मानुग इति —कर्मरचिते परदेहे भोगः स्यादेवेति; भोगसाधनत्वबुद्ध्या वर्तमानदेहरक्षार्थे पापाचरणं नोचितमितिभावः । अवश इति तद्रक्षणेऽपि नायं समर्थ इत्यर्थः ॥ ३८ ॥ परदेहलाभानन्तरमेव पूर्वदेहत्यागे दृष्टान्तः,— व्रजन् पुरुषो यथैकेन पुरोधृतेन पदा तिष्ठन् पश्चादन्येन पूर्वदेशादुत्पाट्याग्रे निहितेन गच्छति, न चोभाभ्यां पादाभ्यां युगपत् पूर्वदेशं परित्यज्य परदेशं गच्छति । अत्र प्राप्तित्यागावेकस्या भूमेरेवेत्यसन्तोषादन्यं दृष्टान्तमाह—यथेति, तृणजलौका खलु तृणान्तरमवष्टभ्यैव पूर्वं तृणं त्यजतीति । एवं कर्ममार्गे वर्त्तमानोऽन्योऽपीति ॥ ४० ॥

नन्वेष देह एवात्मा, ताम्बूलरागन्यायेन ज्ञानं तस्य धर्मः, न खल्वेतद्देहादन्यस्मिन्नात्मनि मानमस्ति तस्माद्देहस्यात्मनो रक्षां कार्येति शङ्का-निरासाय देहात्मनोर्भेदमाह त्रिभिः । स्वप्ने यथेदृशं जाग्रद्देहसदृशं प्रेमास्पदं देहं पश्यति, जाग्रदपि मनोरथेन चरन् कोऽपि राजा इन्द्रश्च भवति; तं तं देहं पश्यतीत्यर्थः । तस्मिन् देहे दृष्टे अभिनिविष्टचेतनो लब्धात्माभिमानो भवति । तत्र साधनमाह— दृष्टं राजादि, श्रुतमिन्द्रादि ताभ्यामाहितसंस्कारेण मनसानुचिन्तयन् भावयन्निति । अपस्मृतिविस्मृतजागरदेहः सन् तत् किमपि स्वप्नादिशरीरं प्रपद्यते, एतद्देहस्यात्मत्वे तद्धर्मश्चेतनान्यत्र न संक्रमते । तथा च नानादेहानुगतात्मानुभवाद्देहादन्य आत्मेति न च ज्ञानं देहस्य धर्मस्तस्मिन् मृते तस्याप्रत्ययात् ॥ ४१ ॥ मृत्युसमये दैवेन फलाभिमुखेन कर्मणा चोदितं प्रेरितं मनो यतो यतो यं यं विकारात्मकं देवमानवादिदेहं धावति, धावत् सत् आप लभते स्म । असौ देही पञ्चसु गुणेषु भूतेषु हरिमायया देहादिरूपेण चरितेषु तेन मनसा सह जायते । प्रपद्यमानः "पुत्रे पुष्टे अहमेव पुष्टः" इति तन्मनोधर्ममभिनिवेशं तस्मिन् प्राप्नुवन्निति बहुदेहानुगस्यैकस्यात्मनस्तेभ्यो भेदः सिद्धः ॥ ४२ ॥ एवं देहात्मनोर्भेदं प्रतिपाद्य देहधर्मानुत्पत्त्यादीन् देही स्वस्मिन् मन्यते, इत्यत्र दृष्टान्तमाह ज्योतिरिति । अदश्चन्द्रादिप्रतिबिम्बज्योतिर्यथोदकपूरितेषु पार्थिवेषु पात्रेषु समीरवेगमनुगतं सत् सकम्पं विभाव्यते — वायुहेतुकोदकम्पस्तत्र प्रतीयत इत्यर्थः । एवमसौ पुमान् जीवः स्वतो निर्विकारोऽपि स्वाधिकारिण्या परेशमायया चरितेषु गुणेषु देहेन्द्रियादिषु रागेण मनोधर्मेणानुगतो विमुह्यति—आत्मनि देहाभिमानं मोहं विन्दतीत्यर्थः । तथा चात्माजन्मादिविकारशून्यो देहस्तु तद्वानिति तादृशस्य रक्षार्थे नरकनिपातहेतुः स्त्रीवधो न विधेयः । आकाशवागुद्दिष्टान्मृत्योश्चेद्भयं, तर्हि तस्याः प्रामाण्याद्देवकीजन्मान्तरपुत्रात् स स्यादेव, चिरं चेत्तद्रक्षामपेक्षसे, तर्हि मार्कण्डेयादिवत् सत्कर्मैवानुतिष्ठेति ॥ ४३ ॥ सामोपायं विधाय पुनर्भेदमाह यस्माद्द्रोग्धुः पुरुषस्य परतो यमादितः सकाशाद्दुर्निवारं भयं तस्मात्तथाविधो विनाशिदेहः कस्यचिज्जनस्य द्रोहं नाचरेत् ॥ ४४ ॥

पुनरनिवृत्तं वीक्ष्य दयां लज्जाञ्च जनयन् साम्नाहैवेति पुत्रिकोपमा दयनीयपुत्रीसमा पुत्तलिकावद्भयेन चैतन्यहीनां वा। कल्याणीं निर्दोषां यतस्त्वं दीनवत्सलः गीर्देवीत्येवं सूचयति दीनादपि राजकरत्वेन वत्समपि लासि गृह्णासीति ॥ ४५ ॥ चोद्यमानः प्रबोध्यमानः पुरुषादान् दैत्यान् ॥ ४६ ॥ आनकदुन्दुभिरित्यस्यायंभावः,—यस्य जन्मसमये देवैरतिहृष्टैर्दुन्दुभिर्वादितस्तस्य मे नेदृशममङ्गलं भावीति विचिन्त्य प्राप्तं कालं मृत्युं प्रतिवोढुं वञ्चयितुं तत्र तदेदमन्वपद्यत विनिश्चितवान् ॥४७॥ अपोह्यः प्रतिकार्यः। यावान् बुद्धिबलस्योदयो यत्र तद्यथास्यात्तथा, तथापि यद्यसौ मृत्युर्न निवर्त्तेत तदोपेक्षाहेतुकोऽपराधः यापनः ॥ ४८ ॥

तत्रैवम्विधास्यामीति स्वगतमाह—द्वयेन, मृत्यवे कंसाय। नन्वेतदप्ययोग्यमित्याशङ्क्याह सुता इति। यदि मे सुता न जायेरन् तर्हि न काचिच्चिन्ता, यदि जायेरन् तावतापि कालेन मृत्युः कंसो न म्रियेत तदात्वयोग्यमेव स्यात् सम्प्रति देवकी तु जीवेत् कंसे मृते तु नैश्चिन्त्यमेव भावि ॥ ४९ ॥ विपर्ययो वेति। समर्पितो मत्पुत्रस्त्वं हन्याद्वा, ननु बालात् त्वत्पुत्रात् प्रौढस्य तस्य वधः कथं तत्राह—गतिरिति अस्यास्त्वामष्टमो गर्भो हन्तेति वक्तुर्धातुर्गतिर्दुरत्यया दुर्लङ्घ्या एवञ्च सति कंसहस्तादुपस्थितो देवकीमृत्यु निवर्त्तेत तथा प्रपुत्रार्पणरूपमत्प्रतिज्ञया निवृत्तोऽपि कंसस्य मृत्युः पुनरापतेदागतः स्यात् ॥ ५० ॥ मद्विचिन्तितमिदं नासम्भवं यतः प्राणिनामदृष्टमवितर्क्यमिति सदृष्टान्तमाह—अग्निरिति—अग्निः कश्चिदन्तिकस्थं तरुं न दहति दूरस्थं चोल्लुत्य दहति एवं वनं दहतोऽग्नेर्यौ दारुणौ वियोगयोगौ तयोरदृष्टतोऽन्यन्निमित्तं नास्ति तरूणां सुखदुःखादृष्टमेव तत्र हेतुः एवमेव जन्तोः प्राणिनः शरीरसंयोगवियोगयोर्हेतुर्दुर्विभाव्यो दृष्टविशेष एव ॥ ५१ ॥ शौरिर्वसुदेवः यावत् यत्प्रमाणमात्मना बुद्ध्या निदर्शनं ज्ञानं यत्र तद्यथास्यादेवं विमृश्य तं पापं कंसं पूजयामास बहिस्तुष्टाव ॥ ५२ ॥

तद्रक्षणाय प्रसन्नमुखोऽन्तःसन्तप्यमानः ॥ ५३ ॥ हे सौम्य! अस्या देवक्याः सकाशात्ते भयं नास्ति किन्त्वष्टमात् पुत्रादिति सा अशरीरवाग् यद्यथाह—अतोऽष्टापि पुत्रांस्ते समर्पयिष्यामि यतः पुत्रात्ते भयमुत्थितः स एव त्वया वध्यतामष्टावेव वा परम्परापेक्षया सर्वेषामष्टमत्वादित्यतिविस्रम्भो दर्शितः ॥ ५४ ॥ तस्य वसुदेवस्य वाक्ये यः सारो युक्तिस्तद्वित्। प्रशस्य धर्मिष्ठोऽसीति संस्तूय ॥ ५५ ॥ काले सन्तानोदयसमये उपावृत्ते प्राप्ते सति सर्वेषां ब्रह्मादीनामपि देवता भगवन्मातृत्वात् पूज्या। अनुवत्सरमिति विभक्त्यर्थेऽव्ययीभावः, अष्टसु वर्षेष्वष्टौ पुत्रान् प्रसुषुवे कन्यां चैकां सुभद्राम् ॥ ५६ ॥

कृच्छ्रेण कष्टेन अनृताद्भीतः ॥ ५७ ॥ ननु वसुदेवोऽनृताद्बिभेतु नाम स्वसमक्षं पुत्रवधः कथं तेन सोढव्यस्तत्राह—किमिति साधूनां सत्यसन्धानाम्। ननु विनापि कंसाज्ञां पुत्रमात्रसमर्पणं कथं प्रतिज्ञातं तत्राह—विदुषां किमिति परतत्त्वविदां पुत्रैः किमिति भावः। ननु सत्यसन्धस्य तस्य स्वयमेव वधायानीतं बालं कंसो जातदयः सन्न हन्यात्तत्राह—किमकार्यमिति कदर्य्याणामतिपापिनाम्। ननु देवकी कथं पुत्रान् तत्याज तत्राह—दुस्त्यजं किमिति धृतो ह्यात्मा हरिर्यैस्तेषामिति यद्गर्भादाविर्भूय हरिः कंसं सगणं निहत्यानन्दान् वर्षिष्यतीति तदाशया तत्पूर्वपुत्रार्पणं सर्वदुखञ्च तया सोढमिति भावः ॥ ५८ ॥ समत्वं पुत्रेष्वपि ममत्वविरहात् सर्वत्र साम्यम् ॥ ५९-६१ ॥

एतन्नारदोऽभ्येत्य कंसायाहेत्युत्तरेण सम्बन्धः। एतत् किं तत्राह—नन्दाद्या ये इति युग्मकं याश्चामीषां योषितो यशोदादयः। वसुदेवाद्या वृष्णय इति यदूनामुपलक्षणं च शब्दात्तद्भृत्याश्च परश्च शब्दोऽप्यर्थे ते च ताश्चेत्यर्थः। उभयोर्नन्दवसुदेवकुलयोः। देवताप्राय इति यदुषु केषाञ्चिदसुरत्वात्। ये च कंसं प्रत्यनुव्रता भक्तायमाना ज्ञातयः सपिण्डाः बन्धवः सम्बन्धिनः सुहृदो मित्राणि ॥ ६२ ॥ भगवान् सर्वज्ञः कंसस्य शान्त्या हरेरवतारे विलम्बः स्यात् तेन देवाश्च भक्ताश्च पितरो व भूमिश्चानन्दभाजो न स्युरिति जानन्नित्यर्थः। कंसकर्त्तृकेन सतां विद्रोहेण कंसं घातयितुं मिथ्यासौहार्दाविष्कारेणैतत् शशंस दैत्यानां वधोद्यमं देवैः कृतं सुमेरुशिखरे देवसमाजे साक्षाच्छ्रुतं शशंसेति योज्यम् ॥ ६३ ॥ ऋषेरिति युग्मकम्। नारदस्य विनिर्गमे यदून् नन्दादीन् वसुदेवादींश्च सुरान् मत्वा, स्ववधं प्रति विष्णुञ्च मत्वा, पूर्वशत्रुर्विष्णुर्देवक्यामाविर्भूय त्वां हनिष्यतीति नारदादवगत्येत्यर्थः। अजनो विष्णुस्तच्छङ्कया ॥ ६४ ॥

कंसस्य दौर्जन्यान्नैतच्चित्रमित्याह—मातरमिति यथापूर्वं गौरवाधिक्यम् ॥ ६५ ॥ जानन्नारदवाक्यात् ॥६६॥ शूरसेनानिति माथुराणां तदन्तर्गतत्वाद्ग्रहणम् ॥ ६७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां प्रथमोऽध्यायः ॥ १ ॥

॥ अथ द्वितीयोऽध्यायः ॥

प्रापय्य गर्भं देवक्या रोहिण्यां योगया प्रभुः। तस्याः कुक्षि गतः कृष्णो द्वितीये स्तूयते सुरैः ॥

यदुभिः स व्यरुध्यतेत्युक्तं विरोधः वर्णयति प्रलम्बेति ? द्विकम्। महाशनोऽघासुरः। अरिष्टो वृषाकृतिर्दानवः। मागधसंश्रयो जरासन्ध-सहायः ॥ १-२ ॥ कुर्वादीन् देशान्निविविशुः ॥ ३ ॥ एके इत्यर्थकम् अक्रूरादयस्तं कंसमनुरुद्धानास्तदाज्ञावहाः श्रीकृष्णावतारदिदृक्षयेति बोध्यम् ॥ ४ ॥

हतेष्विति सार्द्धकम्। देवक्याः सप्तमो गर्भो बभूव; यं गर्भमनन्तं प्रचक्षते। कीदृशं ? वैष्णवं धाम विष्णोर्व्यापिनः कृष्णस्यांशमित्यर्थः। परमानन्दस्यादरगतत्वाद्धर्षः, कंसः कदनं करिष्यतीति विमर्शाच्छोकः, तयोर्विवर्द्धनः ॥ ५ ॥ नारदोपजापस्य फलं त्वरया हरेरवतरणं दर्शयति भगवानपीति। यदूनां भयं विदित्वा योगमायां विमलादीनां नवानां परांशानां पञ्चमीं समादिशत् ॥ ६ ॥ गच्छेति सार्द्धकम्। अलङ्कृतमिति स्वाभाविकसम्पत्तिमत्त्वम्। नन्दगोकुले इति षड्गर्भवधोत्तरं तस्या गर्भं सम्भाव्य वसुदेवेनैव तत्राप्तद्वारा प्रेषितेति बोध्यं न केवलं सैवैका किन्त्वन्याश्च तस्य भार्याः विवरेषु गमनस्थानेषु तेन प्रेषिता निवसन्ति ॥७॥ जठरे सन्तं गर्भं भ्रूणम्। कीदृशमित्याह—शेषाख्यमंशेनेति बोध्यम्। मामकं धाम स्वरूपमाश्रयञ्च तस्याधारशक्तिरूपत्वात्। सम्यक् सुखपूर्वकमलक्षितम् नितराम् कृष्ट्वा, तस्य नित्यरोहिणीमातृकत्वेऽपि पूर्वं देवक्याः गर्भे प्रवेशो मञ्चिवासशय्यादिरूपशेषांशस्थापनायेति रहस्यः, पत्युः सकाशात् सगर्भेयमिहागतेति गोकुले ख्यातिर्बोध्या ॥ ८ ॥

किमर्थमेवं कार्यं तत्राह—अथेत्यन्तरमेव तेन बलदेवस्याल्पकालाग्रजत्वं व्यज्यते। अंशभागेनाहं देवक्याः शौरिपत्न्याः वक्ष्यमाणार्थान्नन्दपत्न्याश्च पुत्रतां प्राप्स्यामि। अंशानां भागो भजनमनुवृत्तिर्यत्र तेनेति वा। अंशैर्ज्ञानबलादिभिर्भागो भक्तेष्वनुवृत्तिर्यस्य तेनेति वा। अंशानां ब्रह्मादीनां भागेन भागधेयेनेति वा परिपूर्णेनेत्यर्थः। अत्राहुः अंशभागेनांशांशेन देवक्याः पुत्रतामिति तस्या मयि पारमैश्वर्यप्रधानत्वात् पुत्रभावो गौणः। श्रीयशोदायास्तु मयि तद्भावो माधुर्यप्रधानत्वान्मुख्यो भावी। त्वं यशोदायां भविष्यसीति सा त्वां न वेत्स्यति। अलक्ष्यविग्रहैव व्रजे स्थास्यसीति भावः ॥ ९ ॥ त्वदाभासशक्तिं मायां वसुदेवेनानेष्यमाणां वञ्चितकंसां विन्ध्याचलादिस्थानेषु राजमानां मनुष्याः पूजयिष्यन्तीत्याह—त्रिभिः। यतः सर्वकामानां निखिलवस्तु वाञ्छतां लोकानां वरामीश्वरीम्। नामेति युग्मकम्। कुर्वन्ति करिष्यन्ति। माधवस्य भगिनी माधवी ॥ १०-१२ ॥

रामेत्यत्र सहसुपेति समासः ॥ १३ ॥ तथेति पुनरोमिति परमादरेण हरेर्वचः प्रतिगृह्य गां पृथिवीं गता सा। तत्तदनन्तरम् ॥ १४ ॥ विस्रंसितः कंसेनैव मन्त्रजपादिना पातित इति देवक्यां स्निग्धा जना विचुक्रुशुर्विलेपुर्न तु तद्विदुः ॥ १५ ॥ भगवानपि कृष्णः अंशेन स्वविलासपरव्योमाधीशाद्यंशसमूहेन भागेनैश्वर्यादिभागसमूहेन च सहानकदुन्दुभेर्मन आविवेश "परावरेशो महदंशयुक्त" इत्यादि तृतीयात् तादृशः सन् तन्मनस्याविरासीत् ॥ १६ ॥

पौरुषं पुरुषस्य कृष्णस्य धाम मूर्त्तिं बिभ्रत्। "धाम देहे गृहे रश्मा" विति विश्वः। दुरासदो राजकीयैः सन्निधातुमशक्यः। दुर्द्धर्षः कंसेनाप्यभिभवितुमशक्यः ॥ १७ ॥ अथ देवकीदेहं प्राविशदित्याह—ततो वसुदेवमनसः सकाशात् तत्पौरुषं धाम देवी परात्मा देवकी मनस्तो मनसि दधार। कीदृशं ? जगतो मूर्त्तिमन्मङ्गलम्। न च्युत एकोऽप्यंशो यस्य तं निखिलांशपूर्णमित्यर्थः। शूरसुतेन वसुदेवेन वेधदीक्षयाकाण्वाम्नायख्यातया समाहितमर्पितमिति हरेस्तदौरसत्वं व्यक्तम्। सर्वेषां भक्तानां सर्वस्य शिवस्य चात्मनो मनसः कं सुखं यस्मात्तम् आत्मना स्वयमेवाविर्भूतं ननु योगिवद्यत्नेन धारणया मनस्यानीतमित्यर्थः। अनुरूपं दृष्टान्तमाह—काष्ठा प्राची दिक् यथानन्दकरं चन्द्रमिति। तदुत्तरं कुक्षौ च दधारेति बोध्यम्। "दिष्ट्याम्ब ! ते कुक्षिगतः परः पुमा"निति देववाक्यात्। अयं भावः, वसुदेवदेवक्योर्देहसम्बन्धेन हरेर्नापुरुषार्थो जीवस्येव स्वमातापित्रोर्देहसम्बन्धेन भवेत्। "सत्त्वं विशुद्धं वसुदेवशब्दित" मित्यादि चतुर्थवाक्येन "त्वं परा प्रकृतिः सूक्ष्मे"ति वैष्णवोक्तदेवकीस्तोत्रेण च तयोः परावतारत्वोक्तेः। न खलु सौरभिणी रत्नमन्दिरे तिष्ठन्नृपतिरपुमर्थभाक् प्रतीत इति ॥ १८ ॥ स परात्मा देवकी सर्वजगन्निवासस्य कृष्णस्य निवासभूतापि स्वयं तदनुभवेन जातात्यानन्दापि सती नितरां निखिलजनानन्दकतया न रेजे, किन्तु स्वपार्श्वस्थद्वित्रान्तरङ्गजनसहितस्वानन्दकतयैवेत्यर्थः। यतो भोजेन्द्रस्य कंसस्य गृहे रुद्धा। यथा घटाद्यवरुद्धा दीपशिखा गृहं न प्रकाशयति। यथा सरस्वती ज्ञानखले विद्यावञ्चके रुद्धा परोपकाराय न भवति। दीपशिखा यथा प्रबला सती स्वरोधकस्य गृहं निर्दहेत्, सरस्वती च स्वरोधकं पापातिशयेन विनाशयेत् तथा स्वापराधेन कंसं स्वरोधकं सेति व्यज्यते ॥ १९ ॥ अजितान्तरां कुक्षिगताजितां, प्रभया भुवनं विरोचयन्तीं तां देवकीं वीक्ष्य कंसः स्वगतमाह—मे मत्तकरीन्द्रस्य हरिः सिंहः गुहां कुक्षिं गत इयं पूर्वमीदृशी नासीत् ॥ २० ॥

स्फुटमाह—तस्मिन् पूर्वमद्वैरिणि विष्णौ मयाद्य किमाशु कार्यं गर्भस्य एवैष न हन्तव्यः यतोऽर्थतन्त्रः स्वार्थपरोऽपि लोको विक्रमं न हन्ति गर्भस्थवधे मे विक्रमहानिरित्यर्थः। न केवलं तद्धानिरेव धर्मादिहानिश्चेत्याह—स्त्रिया इति। गुरुमत्या गर्भिण्याः अनुक्षणं तत्क्षणमेव ॥ २१ ॥ भ्रूणहत्यया जीवनं निन्द्यमित्याह—स इति—अत्यन्तनृशंसितेन तद्धत्यालक्षणेनातिक्रौर्येण जीवदेहात्तस्मात् भीता मनुजा मनसैव शपन्ति तद्देहे मृते तु सति अरे महापापिन् कुम्भीपाके निपतेति साक्षेपमुच्चैराक्रोशन्ति। ततश्च तनुमानिनः प्राणिहत्ययापि स्वतनुं मानयतो लालयतो जनस्य यदन्धं तमस्तदेव ध्रुवं सङ्गता गमिष्यतीति। तस्माद् गर्भस्थोऽयं न हन्तव्यः किन्तु जातस्तरुणो हन्तव्यस्तेन मे विक्रमस्थितिरिति भयहेतुकोऽपि स्वदौर्जन्यस्तम्भो विवेकहेतुकतयैव तेन कल्पित इति बोध्यम् ॥ २२ ॥ स्वयमभिमानी प्रभुरुपायज्ञः ॥ २३ ॥ वैरानुबन्धहेतुकं कंसस्य चिन्तावेशमाह—आसीन इति। संविशन् शयानः हृषीकेशं निखिलेन्द्रियविषयीभूतं चिन्तयन् जगत्तन्मयं तत्प्रधानमपश्यत्। प्रेम्णा तन्मयत्वदर्शनमानन्दकरं भयेन तु दुःखकरमिति विवेच्यम् ॥ २४ ॥

वृषणं लीलामृतवर्षिणं कृष्णवलाहकमैडयन् तुष्टुवुः। तत्र ब्रह्मा चतुर्दशभुवनमहाक्षेत्रकर्षक इव, भवश्चोल्लासितसत्पक्षो नृत्यन्नीलकण्ठ इव, नारदादिभिस्तदेकजीवातुभिश्चातकैरिव, देवैश्च कंसादिदावाग्निपरिवृतैर्गजेन्द्रैरिव साकमिति सूच्यते ।। २५ ।। स्वभक्तरक्षणैकव्रतत्वात् कूटस्थत्वाच्च प्रपत्तियोग्यस्त्वमिति तावदाहुः—हे भगवन् त्वां वयं शरणं प्रपन्ना इत्यन्वयः। कीदृशमित्याह—सत्यमबाधितं त्वाश्रितत्राणरूपं व्रतं यस्य तं, कौन्तेय! प्रतिजानीहि न मे भक्तः प्रणश्यती''ति त्वदुक्तेः। सत्येभ्यो जीवप्रधानकालेभ्यः परं श्रेष्ठं तिस्रो ज्ञानबलक्रियाः सत्या यस्य तं "परास्य शक्ति''रित्यादौ "स्वाभाविकी ज्ञानबलक्रिया चे''ति श्रवणात्। सत्यस्य विश्वस्य योनिं कारणं याथातथ्यतोऽर्थान् व्यदधादितिश्रवणात्। "ब्रह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः, सत्याद्भूतानि जातानि सत्यं भूतमयं जग''दिति स्मरणाच्च। सत्ये परमव्योम्नि तदुपरि श्रीगोकुलादौ च निहितं स्थितम्। सत्यस्य जीवात्मवृन्दस्य सत्यं तदपेक्षयाप्यतिसत्यम्। "प्राणा वै सत्यं तेषामेव सत्य''मिति श्रवणात्। जीवात्मनां ज्ञानसङ्कोचविकासरूपपरिणामाभासस्तद्विरहात् परमसत्यमित्यर्थः। ऋतं सुनृता वाणी सत्यं च समदर्शनं तयोर्नेत्रं स्वाश्रितेषु प्रापकं सत्य आत्मा श्रीविग्रहो यस्य तं सत्यात्मकं नित्यमूर्तिमित्यर्थः ।। २६ ।। ननु विग्रहगुणधामविशिष्टोऽहं च प्रपञ्चश्च यदि सत्यस्तर्हि मत्तः सकाशान्न किञ्चित् प्रपञ्चे वैलक्षण्यमिति चेत् कालच्छेद्यत्वेन तत्र तदस्तीत्याहैकायन इति। असौ समष्टिव्यष्टिलक्षणः प्रपञ्चः प्रथमतः प्रवृत्तत्वादादिः कालेन वृश्च्यत इति वृक्षः, एका प्रकृतिरयनमाश्रयो यस्य, द्वे सुखदुःखे फले यस्य, त्रीणि सत्त्वरजस्तमांसि मूलानि यस्य, चत्वारो धर्मार्थकाममोक्षा रसा यस्य, पञ्च श्रोत्रादीनीन्द्रियाणि विधा ज्ञानप्रकारा यस्य, षट् शोकमोहजरामृत्युक्षुत् पिपासा ऊर्म्मय आत्मानः स्वभावा यस्य, सप्त त्वगसृङ्मांसमेदोऽस्थिवसाशुक्राणि धातवस्त्वचो यस्य, पृथिव्यादयः पञ्च मनोबुद्ध्यहङ्काराश्चेत्यष्टौ विटपाः शाखा यस्य, नवद्वाराण्यक्षाच्छिद्राणि यस्य, दशप्राणाश्छदाः पत्राणि सन्ति यस्य, द्वावीशजीवौ खगौ पक्षिणौ यत्र सः, ईदृशो वृक्षो यमाश्रितस्तं त्वामिति पूर्वेण सम्बन्धः उभयोऽसत्यत्वेऽपि नित्यत्वानित्यत्वाभ्यां वैलक्षण्यमस्तीति त्वमेव नित्यत्वात् प्रपत्तव्यः ।।२७।। ननु 'ब्रह्मा देवानां प्रथमः संबभूव, विश्वस्य कर्त्ता भुवनस्य गोप्ताः, एको रुद्रो न द्वितीयोऽवतस्थे' इति ब्रह्मरुद्रयोश्च जगत् कर्त्तृत्वश्रवणान्ममैव तत्कर्त्तृत्वं कुतो ब्रूथेति चेत्तत्राहुस्त्वमिति अस्य सतः सत्यस्य जगत एक एव त्वं प्रसूतिः प्रकर्षेण सूतिरुत्पत्तिर्यस्मात् स स्वतन्त्रस्तन्त्रकर्त्तेत्यर्थः। सम्यक् निधीयतेऽत्रेति संनिधानं लयाधारः अनुगृह्णाति पालयतीत्यनुग्रहः पालकश्च, ये त्वन्मायया संवृतचेतसस्ते ब्रह्मादिरूपेण त्वां नाना पश्यन्ति, ये विपश्चितः श्रुतितात्पर्यज्ञास्ते खलु त्वामेव तत्तद्रूपं पश्यन्तीति "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तै''रिति निर्णयात्त्वमेव ब्रह्मा रुद्रश्च भवसि "यं कामये तं तमुग्रं कृणोमि तं ब्रह्माण''मिति श्रुत्यर्थनिर्णयेन तत्तदन्तःस्थस्त्वमेव तथेति न कोऽपि सन्देहगन्धः ।। २८ ।।

अवतारान्तरैरप्यन्यदापि त्वं विश्वरक्षां कृतवानसीत्याह बिभर्षीति। अवबोधश्चिदेकरस आत्मा विभुस्त्वं रूपाणि मत्स्यकूर्मवराहादीनि बिभर्षि प्रकटयसि किमर्थं? लोकस्य क्षेमाय रक्षणाय। कीदृशानि? सत्त्वेन निरतिशयेन बलेनोपपन्नानि। सतां सुखावहानि। खलानामभद्राणि दुःखावहानीति अधुनापि तथा कुर्विति भावः ।। २९ ।। सतां सुखावहानीत्येतद्विवृणोति त्वयीति। अखिलसत्त्वानां देवमानवादिसमस्तप्राणिनां धाम्नाश्रये त्वयि समाधिना त्वद्दिव्यचरितादिनिदिध्यासनेनावेशितं यच्चेतस्तेन हेतुना लब्धेन त्वत्पादपोतेनैके वैष्णवा अग्रे भवाब्धिं गोवत्सपदं तद्वर्तिजलचुलुकमिव कुर्वन्ति तदस्तित्वं न जानन्तीति भावः। महत्कृतेन महद्भिस्तत्तया सम्पादितेन ।। ३० ।। ननु महान्तस्तत्पादपोतेन तरन्ति स कथमन्यैर्लभ्यस्तत्राह—स्वयमिति। हे द्युमन्! विज्ञानघनमूर्त्ते! उपायान्तरैः सुदुस्तरं भीमं भवार्णवं ते स्वयं समुत्तीर्य भवत्पदाम्भोरुहरूपां नावमत्र सम्प्रदायरूपेण निधाय तत्पारं स्वद्धाम याताः यतस्तेऽदभ्रं बहुसौहृदं भूतेषु दया येषां तादृशाः, ननु नाविकं विना कथं नावश्चालनं तत्राह, सत्स्वनुग्रहो यस्य स भवान् त्वमेव, सद्भिः सम्प्रदायः चालयेदिति भावः ।। ३१ ।। अनीदृशास्तु विद्वांसोऽपि संसरन्तीत्याह येऽन्ये इति। हे अरविन्दाक्ष ये त्वदनुगृहीतेभ्यः सद्भ्योऽन्ये य "आत्मोपहतपाप्मेति प्रजापत्युक्तमष्टगुणं स्वात्मानं विज्ञानं ब्रह्म चेद्वेदे''त्यादिश्रुतिनिखिलफलदत्वेन जानन्तस्य समाधिना कृष्णेन परं पदं तदात्मवस्त्वारुह्य साक्षात्कृत्य विमुक्तिमानिनो जातास्माकं विमुक्तिरिति सगर्वाः सन्तो नादृतयुष्मदङ्घ्रयः किमनेन साकारत्वादनित्येनेति त्वच्चरणौ नाद्रियन्ते ते त्वयि सर्वस्वामिन्यस्तभावात् भावत्यागाद्वैमुख्यादविशुद्धबुद्धयो विषयरागकलुषितधियः सन्तः ततः पदात् कृच्छ्रारूढादधः पतन्ति "जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति कर्मभिः। यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिन'' इत्यादि स्मृतिभ्यः तथा च परब्रह्मविग्रहस्त्वं त्वां तथा जानन्तो मूर्खा एव जैवस्वरूपसाक्षात्कारोऽपि त्वदुक्तिसाचिव्यादेव "युक्त आसीत मत्पर'' इत्यादि श्रीगीताभ्यः ।। ३२ ।।

ननु मां भजन्तोऽपि केचिद्भ्रष्टा दृष्टाः किमिति त एव तथोच्यन्ते, तत्राह तथा नेति यथा त्वदङ्घ्र्यवज्ञातारो भ्रश्यन्ति तथा तावका नेति व्यतिरेको दृष्टान्तः मार्गादपि न किमुत मृग्यात्त्वत्त इत्यर्थः चेत् कदाचिद् भ्रश्यन्ति तदापि त्वयि बद्धसौहृदा एव तिष्ठन्ति "क्षिप्रं भवति धर्मात्मे''त्यादित्वदुक्तेरेव भरतचित्रकेत्वादीनां त्वदुक्तानां विभ्रंशेऽपि त्वयि सौहृदवृद्धेः प्रत्ययादिति भावः। त्वयाभिगुप्ताः सन्तो विनायकानीकपानां विघ्नवृन्दसेनापतीनां मूर्द्धसु विचरन्ति त्वत्पक्षपातान्निर्भयाः सन्तो विघ्नान् विजित्य त्वां संभवन्तीत्यर्थः ।। ३३ ।। भक्तिप्रचाराय त्वद्रूपस्य प्राकट्यमित्याह, विशुद्धं सत्त्वं वपुः श्रीविग्रहं भवान् श्रयते प्रकाशयति चक्षुः श्रयन् रूपे स्थित इत्यत्र श्रयतिः प्रकाशार्थः किमर्थं तत्राह शरीरिणां जीवानां स्थितौ त्वयि चित्तस्थैर्याय स्वभक्तिप्रचारफलको भवान्

भक्तियोगविधानार्थमिति कुन्तीवाक्यात्, कीदृशं तत् श्रेयसां पुमर्थानामुपायनं परमाश्रयं फलमत उपपत्तेरिति न्यायाच्च येन वपुषाऽवनेन जनः सत्प्रसङ्गी वेदादिभिश्चतुराश्रमधर्मैश्चतुर्भिः सार्द्धं तवार्हणमर्चां समीहते करोति ॥ ३४ ॥ ननु मद्वपुः किं जडं सत्त्वं अथ तत्राह, सत्त्वमिति हे धातः इदं सत्त्व वपुश्चेन्निजं विज्ञानं स्वप्रकाशसंविच्छक्तिरूपं न भवेत्, कीदृशं ? अज्ञानभिदा या विविधा ज्ञानस्य मार्जनं विनाशकं तर्हि गुणस्य सत्त्वस्य प्रकाशैर्भवाननुमीयेतैव, नतु साक्षात्क्रियेतेत्यर्थः । ननु कथं ममानुमानं तैः स्यात्तत्राह—यस्य गुणः प्रकाशते येन वा गुणः प्रकाशत इति । प्राकृतस्य सत्त्वस्य त्वदव्यभिचारिसम्बन्धित्वमात्रेण वा त्वदेकप्रकाश्यतामात्रेण वा तल्लिङ्गमिति यथारुणोदयस्य सूर्योदयसन्निधिलिङ्गत्वं यथा च धूमस्याग्निलिङ्गत्वं तथा च विज्ञानरूपं सत्त्वं संविच्छक्तिभूतं त्वद्वपुर्न तु रजस्तमःसंपृक्तं मायिकं सत्त्वं तस्य विज्ञानशब्दितत्वाभावात् “अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिन” इत्यादिस्मृत्या मायिकसत्त्वस्य तत् संपृक्तत्वाभिधानाच्च यद्यप्यात्मनो वपुर्न भिन्नः तथापि विशेषाद्भेदभानं सत्ता सतीत्यादिवत् ॥ ३५ ॥ भक्तानुग्रहखलनिग्रहायाविर्भावितानि रूपाणि नामानि च भाव्यान्येव तेषामियत्वालाभाय न प्रयतनीयमतर्क्यत्वादानन्त्याच्चेत्याशयेनाह—न नामेति साक्षिणस्तस्य तव गुणादिभिः सह नामरूपे निरूपयितव्यः साकल्येन निर्णेतुं शक्ये न भवतः “जन्मकर्माभिधानानि सन्ति मेऽङ्ग ! सहस्रशः । न शक्यन्ते तु सङ्ख्यातुमनन्तत्वान्मयापि ही”ति वक्ष्यमाणात् । तत्र गुणाः सार्वज्ञसार्वैश्वर्यभक्तवात्सल्यादयः, जन्म नन्दात्मजवसुदेवसुतेत्यादि, कर्म-पूतनावधगोवर्द्धनोद्धारादि, नाम गोविन्द कृष्णेत्यादि, रूपं-श्यामसुन्दरेत्यादि एतानि सामस्त्येन निरूप्याणि नेत्यर्थः । तथापि क्रियायां श्रवणस्मरणादिविशुद्धसत्त्वभक्तौ सत्यां त्वदुक्तास्तैः सह ते प्रतियन्त्यनुभवन्तीत्यर्थः । तदियत्ता तु न लभ्येति भावः । तव कीदृशस्येत्याह, मनसा वचसा चानुमेयं वर्त्म यस्य तार्किकास्त्वां जगत्कर्तारमनुभवन्ति भक्ताश्च साक्षात् कुर्वन्तीत्यर्थः ॥ ३६ ॥

किञ्च नामरूपयोरुच्चारणस्मरणाभ्यास एव कार्यो नतु तयोरियत्तालाभाय यत्न इत्याह—क्रियासु लौकिकीष्वपि स्थितो जनो भवाय न कल्पते किन्तु मुच्यते एवेत्यर्थः ॥ ३७ ॥ भूमेर्भारोऽवश्यमपनेय इति भङ्ग्या निवेदयन्ति भवतः पदः “पद्भ्यां भूमि”मिति श्रुतेः पादोद्भूतया भूमेर्भारापनीत इति दिष्ट्या भद्रमेतत् अद्यैव कंसादीन् हतान् जानीम इति भावः । त्वत्पदकैः सुकोमलैर्ध्वजवज्राङ्कुशादिचिह्नसुशोभनैर्गां भूमिं द्यां स्वर्गं चाङ्कितां द्रक्ष्यामः ॥ ३८ ॥ अस्मदभ्यर्थनयास्मदादिरक्षार्थमवतीर्णोऽसीत्यस्माकमभिमान एव केवलं वस्तुतस्तु स्वतन्त्रस्य तवानन्दरूपा क्रीडैवेयमित्याह—न ते इति । हे ईश ! ते भवस्य देवक्यामाविर्भावस्य कारणं वयं न च तर्कयामहे किन्तु विनोदं विनेति जगत्सर्गादौ लीलैव कारणं न त्वन्यत् किमपीत्याह—सूत्रकारः “लोकवत्तु लीलाकैवल्य”मिति । कीदृशस्येत्याह—अभवस्येति अपूर्वदेहयोगो भवस्तद्रहितस्य पूर्वसिद्धदेहस्यैव प्राच्यामिन्दोरिव देवक्यां प्रादुर्भवत इत्यर्थः । यत आश्रयात्मनि त्वयि त्वामाश्रित्य विद्यमानया अविद्यया मायया भवादयो जीवानां कृताः हे अभय भयनिवर्त्तक ! यद्विचिन्तनादेव कालभयमपि निवर्तते तत्र त्वयि कः कंसो वराक इति भावः ॥ ३९ ॥ तथाप्यधीराणामस्माकं विज्ञापनमवधारयेत्याह—मत्स्येति, अश्वेषु हयग्रीवः, राजन्येषु रामचन्द्रः, विप्रेषु परशुरामः, विबुधेषु वामनः, त्वं न त्रिभुवनपतीन् त्रिभुवनञ्च यथा सर्वदा पासि तथाधुना भुवो भारं हरेति पूर्णस्य ते नतिरेव पूजेत्याह- वंदनं ते इति वदन्तः शिरोभिः प्रणेमुः ॥४०॥

हरिमातरं स्तुवन्त आश्वासयन्ति दिष्ट्येति । योंऽशेन परः पुमान् कारणोदशयः स साक्षाद्भगवान् स्वयं प्रभुरित्यर्थः । भवाय भूत्यै ॥ ४१ ॥ यस्य रूपमनिदं प्रपञ्चातीतं विज्ञानानन्दमयमित्यर्थः । ब्रह्मेशानौ पुरोधायेति,—अस्मान् वञ्चयित्वा किमप्यद्भुतमेतौ ईक्ष्यत इति मन्वानास्तावग्रे कृत्वेत्यर्थः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां द्वितीयोऽध्यायः ॥ २ ॥

॥ अथ तृतीयोऽध्यायः ॥

मङ्गले कालदेशादावुभय व्रजनिर्हरेः । स्तुतिः पितृभ्यां प्राप्तिश्च नन्दगेहे तृतीयके ॥

अथेति मङ्गलार्थः । यर्ह्येवाजनस्यापूर्वदेहयोगलक्षणजन्मशून्यस्य हरेर्जन्मर्क्षमभूत्तदेव सर्वगुणोपेतः कालोऽभूदित्यनुषङ्गः “जन्मर्क्षं न प्रकाशये”दिति वचनात् श्लेषेण तन्नाम च निर्दिष्टं अजनान्नारायणाज्जन्म यस्य तस्याजनजन्मनो ब्रह्मणो नक्षत्रं रोहिणी नामकं यदैवाभूदित्यर्थः । तत् कीदृक् ? शान्तानि ऋक्षाणि अश्विन्यादीनि ग्रहाश्च यत्र तत् ॥ १ ॥ कालस्य सर्वगुणोपेततामाह—दिश इति वर्षायां शरद्गुणः स्वच्छत्वमुक्तम् । पञ्चभूतानां प्रसादमाह - गगनमित्याकाशस्योर्द्ध्वस्थस्य महीत्यधस्थाया भूमेः ॥२॥ मध्यगतानां त्रयाणामाह- द्वाभ्यां नद्यः प्रसन्नेति वर्षायां शरद्गुणः ह्रदा जलरुहेति निशि वा शरद्गुणः । द्विजालिकुलानां सन्नादा धवनयस्तबकाः पुष्पगुच्छाश्च यास्विति वर्षायां वसन्तगुणः ॥ ३ ॥ सुखस्पर्शेति शैत्यं पुण्येति सौगन्ध्यं पुण्यो मनोहरः “पुण्यन्तु चार्वपी”त्यमरोक्तेः । शुचिरिति मान्द्यं धूल्याद्यसंसर्गकृतेन विमलत्वेन तद्व्यञ्जनात् । द्विजातीनां त्रैवर्णिकानामग्नयः शान्ता निर्वाणतां गच्छन्तोऽपि सम्यग्दक्षिणावर्ततयेन्धत दीप्ता बभूवुरिति द्वापरेऽपि त्रेतागुण अड्भाव आर्षः ॥ ४ ॥

असुरकर्तृको द्रोहो येभ्यस्तेषां साधूनां मनांसीति पूर्वं तत्कर्तृकेन द्रोहेण तन्मनःस्वप्रसादोऽभूदिति भावः । जायमाने आसन्नप्रसवे सति अजने श्रीकृष्णे ॥ ५-६ ॥ सुमनांसि पुष्पाणि अनुकृतः साम्यं नीतः सागरो येन तद्यथा स्यात्तथेति गाम्भीर्यं गर्जनस्योक्तम् । एवं समयादिशोभामभिधायोभयत्र हरेराविर्भावमाह—सार्द्धकेन निशीथेऽर्द्धरात्रेऽकस्मान्मेघमालोद्गमात्—

तमसोत्कर्षेण भूते व्याप्ते सति "भू प्राप्ता" वित्यस्य रूपं, देवक्यां व्रजनाथपत्न्यां जनार्दने हरौ जायमाने प्रादुर्भवति सति देवक्यां शौरिपत्न्यां विष्णुः स एव जनार्दन आविरासीत्। यथा यथावत् पूर्वसिद्धेनैव रूपेणेत्यर्थः। कीदृश्यामित्याह—देवस्य यद्रूपं विज्ञानघनं तद्यस्या वर्तत इति तद्गर्भसम्बन्धस्तस्य न दोषावह इति भावः। भावे सप्तम्या युगपदेवोभयत्र जन्म बोध्यते। "गर्भकाले त्वसंप्राप्ते अष्टमे मासि ते स्त्रियौ। देवकी च यशोदा च संसुवाते समं तदे"ति श्रीहरिवंशाच्च। तदनन्तरमेव दुर्गायाश्च यशोदायां जन्म "ततश्च शौरिर्भगवत् प्रचोदित" इति वक्ष्यमाणवाक्यार्थात् तस्याः कृष्णानुजात्वोक्तेश्च; तथा च किञ्चित् पूर्वोत्तरभावेन यशोदायाः पुत्रकन्यारूपमपत्यद्वयं तच्च क्रमाद्वसुदेवयशोदाभ्यामदृष्टमिति बोध्यम्; देवकीशब्देनात्र यशोदा चोक्ता "द्वे नाम्नी नन्दभार्याया यशोदा देवकीति च। अतः सौख्यमभूत्तस्या देवक्याः शौरिजायये"त्यादि पुराणवचनात्। स च शब्द उभयान्वयी, मध्ये पाठसामर्थ्येन देहलीप्रदीपन्यायलाभात्। कीदृशः स इत्याह—सर्वासु गुहासु तद्वदगम्यासु परव्योमगततत्तद्धामसु जीवहृदयदरीषु च तत्तद्रूपेण यः शेत इति स्वयं रूप इत्यर्थः। एतमर्थं दृष्टान्तेनाह—पुष्कल इन्दुरिवेति एतेन लौकिकबालवत् प्राकट्यं नेति वस्तु व्यज्यते जातपत्रं चैवं दैवज्ञैरलेखि, "उच्चस्थाः शनि-भौम-चान्द्रि-शनयो लग्नं वृषो लाभगो, जीवः सिंहतुला वियुक्तमवशात् पूषो शनौ राहवः। नैशीथः समयोऽष्टमो बुध दिनं ब्रह्मर्क्षमत्र क्षणा श्रीकृष्णाभिधमम्बुजेक्षणमभूदाविः परं ब्रह्म त"दिति। इदमत्र बोध्यम् "आविवेशांशभागेने"त्यादितो यथा वसुदेवे हरेरावेशस्तथा "नन्दस्त्वात्मज उत्पन्ने" "नन्दः स्वपुत्रमादाय" "पशुपाङ्गजाये"ति लिङ्गेभ्यो नन्दे च तस्यावेशः, तं यथा वसुदेवो देवक्यां तथा नन्दो यशोदायां दधार गुरुरिव शिष्यः; दुर्गा तु भगवन्निदेशात् यशोदा गर्भमाविवेश, रोहिणीगर्भमिव संकर्षणः "देवक्या जठरे गर्भमि"त्यादि वाक्याभ्यां तथा च देवक्या इव यशोदायाश्च हरिरौरसः "यशोदा नन्दपत्नी चे"त्यादिना स्फुटीभावात्। नन्दगोपगृहे पुत्रो यशोदागर्भसंभव" इत्यसन्देहवचनाच्चादिपुराणे इत्थञ्च "नन्दस्त्वात्मज" इत्यादीनि वाक्यानि मुख्यार्थानि भवेयुः अन्यार्थस्य सुगोप्यत्वात् भगवत्तन्त्रो मुनिरपि निगूढभावेन तमुपादिशत् यशोदासुतेन सह देवकीसुतस्यैक्यात् तदेकस्य मथुरादावन्तरान्तरा व्रजे कुरुक्षेत्रे चागमात् तत् सुगोप्यतापि भज्यते ॥ ७–८ ॥

तमिति युग्मकम्। तमद्भुतं बालकं वसुदेव इक्षतेत्युत्तरेण सम्बन्धः। अद्भुतत्वबोधकानि विशेषणान्यम्बुजेक्षणमित्यादीनीति परिकरोऽलङ्कारः न हि लोके गर्भान्निर्गतस्येदृशत्वं श्रुतं गलेन कण्ठेन शोभते तादृशः कौस्तुभो यत्र तं महार्हमनर्घं यद्वैदूर्यं नीलपीतरक्तच्छविकं रत्नं तद्विशिष्टं किरीटं च कुन्तले च तेषां त्विषा परिष्वक्ताः स्फुरन्तः सहस्रमपरिमिताः कुन्तला यस्य तम् ॥ १०–११ ॥ विविधाभूषणादिविशिष्टतयैव जातस्य दर्शनेन यो विस्मयस्तेनोत्फुल्ले लोचने यस्य सः। कृष्णस्य पुत्रस्यावतारे जन्मनि कमुत्सवमहं करोमीति जातसंभ्रमः मुदा हर्षेणाप्लुतः स्नातः सन् गवामयुतमस्पृशन् मनसा ददौ कंसकारागारस्थितस्य साक्षाद्दानासंभवात् स्पृशिर्दानार्थः "विश्राणनं वितरणं स्पर्शनं प्रतिपादन"मित्यमरोक्तेः ॥ १२ ॥ अथेति पुरुषमवधार्य परेशोऽयमस्मदादिपुत्र इति विज्ञाय गतभीर्निवृत्तपूर्वपुत्रकदनवीक्षणजातभयः यतः प्रभाववित् तत्पराक्रमज्ञः कृतधीस्तस्मिन्नेव कृता निवेशिता पारमैश्वर्यप्रधानापुत्रबुद्धिर्येन सः ॥ १३ ॥ गतभीरस्मीति निवेदयन् स्तौति हे भगवन्! मया त्वं विदितोऽसि कीदृशत्वेनेति चेत्तत्राह, त्वं साक्षादनन्यापेक्षिवपुः यः प्रकृतेः परः पुरुषस्तद्वीक्षकस्तन्नियन्ता स भवान् यः सर्वबुद्धिदृक् निखिलान्तर्यामी गर्भोदशयः क्षीरोदशयश्च स भवान् तत्तदंशोपेतः भगवानित्यर्थः। ननु किं धातुरहं तत्राह केवलो विशुद्धो योऽनुभवस्तदभिन्नो य आनन्दस्तत् स्वरूप इति देहदेहिभेदशून्यो विज्ञानसुखस्वरूप इत्यर्थः ॥ १४ ॥ ननु त्वद्गृहे प्रविष्टं परिच्छिन्नं मां किमेवं स्तौषि तत्राह, स उक्तलक्षण एव त्वं स्वमाययेदं त्रिगुणात्मकं जगत् सृष्ट्वा तदनु सर्गानन्तरमप्रविष्ट इव प्रविष्ट इव च भाव्यसे निर्णीयसे जगतोऽनुरूपलम्भादप्रविष्ट इव बहिरप्युपलम्भात् प्रविष्ट इव ॥ १५ ॥

अत्र दृष्टान्तो यथेति युग्मम्। इमेऽविकृता भावा महदादयो यथा तथैव त्वमिति दृष्टान्तं विवृणोति, अविकृतास्ते विकृतैः षोडशभिः सह सन्निपत्य मिलित्वा विराजं ब्रह्माण्डं जनयन्ति सन्निपतने हेतुः—यतः पृथग्भूताः सन्तो नानावीर्याः विराडुत्पादनक्षमा न भवन्ति अतः सन्निपत्येति ततश्च विराजं समुत्पाद्यानुगताः प्रविष्टा इव दृश्यन्ते न तु प्रविष्टाः, कुतः? उत्पत्तेः प्रागेव कारणतया विद्यमानत्वात् अतस्तेषामिह सृष्टकार्ये पश्चात् सम्भवः प्रवेशो नेत्यर्थः ॥ १६–१७ ॥ दार्ष्टान्तिके योजयति एवं भवानिति। ननु सर्वगतश्चेदहं तर्हि रूपादीन् गृह्णन्तश्चक्षुरादयो मां कुतो न गृह्णन्ति, तत्राह—बुद्ध्या रूपादिज्ञानेनानुमेयानि लक्षणानि स्वरूपाणि येषां तैर्गुणैरिन्द्रियैः कर्तृभिः ग्राह्यै रूपादिभिः सह सन्नपि स्थितोऽपि भवान् तद्गुणाग्रहस्तैर्गुणै रूपादिभिः सह न गृह्यते यथाकाशः सर्वत्र स्थितोऽप्ययोगात्वाच्चक्षुरादिभिर्न गृह्यते तद्वत्, तर्हि जगति प्रविष्टस्य मे ततो बहिः सत्त्वं न स्यात्तत्राह—ते बहिरन्तरं नास्ति, कुतः? अनावृतत्वाद्विभुत्वात् बहिरन्तर्भूतञ्च वस्तुत्वशक्त्या त्वमेवेत्याह सर्वस्येति। तर्हि किञ्चिज्जडवपुरहं तत्राह—सर्वात्मन इति सर्वम् अतति व्याप्नोतीति तस्य तदन्तःस्थस्येत्यर्थः। तर्हि किमाकाशवत्ताटस्थ्यं तत्राहात्मवस्तुनश्चेतनस्य धीपूर्वकं निखिलं व्याप्नुवत इत्यर्थः वक्ष्यति चैवमुपरि "न चान्तर्न बहिर्यस्ये"त्यादिना तथा च विभोस्तयाचिन्त्यशक्त्या मद्गृहे व्यक्तित्वेन प्रवेश इति महन्मे भाग्यम् ॥ १८ ॥ ननु कर्मजडः कश्चित् कर्मैव श्रौतं निखिलपुमर्थहेतुं स्रक्चन्दनवनितादिकं स्वर्गशब्दितं तत् सिद्धं पुमर्थं मन्यते न तु मामुक्तविधमिति चेत्तत्राह, यः कर्मजड आत्मनः स्वस्य दृश्येषु गुणेषु विषयेषु मध्ये स्रक्चन्दनादिरर्थः सन्नूत्तमो नित्य इति व्यवस्यते निश्चिनोति तल्लाभाय कर्म करोति न तु त्वां सर्वेशं सर्वकर्त्तारं सर्वफलदञ्च मन्यते स पुमानबुधः श्रुत्यर्थज्ञानशून्यः,

कुतः ? स्वव्यतिरेकतः स्वस्मिंस्तस्य सर्वदा संयोगाभावादनित्यत्वाच्चेत्यर्थः, ननु स मनीषिणमात्मानं मन्यते कथमबुधस्तत्राह विनेति नु निश्चितं वादं कलहं विना तन्मनीषितं पाण्डित्यं सम्यक् न भवति वेदान्तनिष्ठैर्निरस्तत्वादिति शेषः। यतो विवेकिभिर्घृणास्पदतया त्यक्तमेवार्थमुपाददद्वर्त्तते ॥ १९ ॥ उक्तजगत्कर्त्तृतां दर्शयति- त्वत्तोऽस्येति, अस्य विश्वस्य वदन्ति यतो वा इमानीत्याद्याः श्रुतयः। ननु वर्द्धकेरिव कार्यमीहमानस्य हर्षविषादादिर्विकारश्च श्रमचिन्तादिः स्यात्तत्राह-अनीहादित्यादि, सङ्कल्पेनैव करणान्नवर्द्धकिवदीहा ततो न श्रमादिर्विकारः मायागुणशून्यत्वाच्च न हर्षविषादमोहा इत्यर्थः। नन्वनीहोऽरिक्तः करोति सर्वमिति कथं सम्भवेत्तत्राह ईश्वरे मायाकालयोर्नियन्तरि ब्रह्मणि सत्यसंकल्पादि बृहद्गुणके त्वयि तन्न विरुध्यते ननु क्वचिद्गुणाः कर्त्तारः कथ्यन्ते तत्राह तवैककर्त्तृत्वं गुणैः करणैरुपचर्यते कर्त्तारमीशमिति श्रुतेर्गुणेषु तद्भक्तिमित्यर्थः। एवं कुतस्तत्राह तदाश्रयत्वादिति त्वदीक्षया तेषु चैतन्यागमादित्यर्थः। अयःपिण्डस्य दग्धृत्वं वह्नेरेव तत् संयोगहेतुकत्वात् तथा च जगत्कर्त्ता त्वं जगतोऽन्य उपास्य इति ॥२०॥

संकर्षणरूपेणैतदण्डं निर्माय तदगर्भोदे प्रद्युम्नरूपेण शयानो विष्ण्वादिभिरवतारैः सदैव जगत्कार्याणि करोषीत्याह स त्वमिति। स प्रसिद्धस्त्वं स्वया मायया पराख्यया शक्त्या शुक्लं शुद्धमित्यर्थः। जगत्पालकस्य विष्णोरतसीकुसुमप्रभत्वादिति भावः। रक्तं कृष्णं चेति न ब्रह्मरुद्रयोरूपे तयोः कनकचन्द्रप्रभत्वात् तस्मात्तेशब्दात् तत्तद्गुणधर्मेषु लाक्षणिकाः रजसोपबृंहितमित्यादिवत् सत्त्वेनोपबृंहितमित्यनुक्तेर्विष्णोर्दूरत एव सत्त्वप्रवर्त्तकत्वं ब्रह्मादेस्तु रजादिभ्यामावरणमित्युक्तम् ॥ २१ ॥ ननु, पितः ! त्वं विज्ञाततत्त्वोऽसि अधुना त्वद्गृहे मत्प्राकट्यस्य प्रयोजनं ब्रूहीति चेत्तत्राह त्वमिति। अस्य लोकस्येमं लोकं राजन्यसंज्ञैरसुरकोटियूथपैर्निर्व्यूह्यमाना इतस्ततश्चाल्यमानाश्चमूः सेनाः सद्रक्षणाय निहनिष्यसि ॥ २२ ॥ ज्ञातपुत्रैश्वर्योऽपि वात्सल्योदयात्तत्स्वभावात् कंसाद्बिभ्यदाह अयमिति,—असभ्यः खलः तव जन्म नौ गृहे नारदात् श्रुत्वा तेऽग्रजान् न्यवधीत् स खलस्तेऽवतारं पुरुषैर्द्वारपालैः समर्पित निवेदितं श्रुत्वाभिसरत्यायाति वर्त्तमानसामिप्ये वर्त्तमानवत् यद्यपि युधि कार्तवीर्यसम्मोहस्त्वं निहन्तुं समर्थस्तथापि तन्मुक्तेरासन्नत्वात्तस्याश्च त्वदेकसाध्यत्वान्नाहं तमहतं यावत्तदवसरो न स्यात्तावत्समाधानं रच्यतामितिभावः ॥ २३ ॥ उपाधावत्तुष्टाव वात्सल्योदयात् कंसाद्भीता ॥ २४ ॥

भीताप्यहं निर्भयं त्वां वीक्ष्य प्राणिमीति निवेदयति रूपमिति चतुर्भिः। यत्तत् किमप्यलौकिकं रूपं वस्तु प्राहुर्वेदान्ताः स त्वमित्यन्वयः तद्वस्तु किं तत्राहाव्यक्तमिति तत्र हेतुराद्यमिति कारणमित्यर्थः। तर्हि किं नैयायिकानामिव परमाणुवृन्दं तत्राह ब्रह्मेति बृहदित्यर्थः। तर्हि किं साङ्ख्यानामिव प्रधानं तत्राह ज्योतिरिति चेतनमित्यर्थः। तर्हि किं वैशेषिकानामिव ज्ञानगुणकं जडं तत्राह निर्गुणमिति। गुणान्निर्गतं ज्ञानस्वरूपमेव विशेषाऽज्ञानगुणकतया विभातमित्यर्थः। तर्हि किं विज्ञानवादिबौद्धानामिव ज्ञानपरिणामि तत्राह निर्विकारमिति परिणामशून्यमित्यर्थः। ननु स्याद्वादिनां जैनानामिवानियतसत्ताकं तत् स्यात्तत्राह सत्तेति। सत्तया मीयते परिच्छिद्यत इति सत्तामात्रं नियतसत्ताकमित्यर्थः। ननु द्वैतिनां सतां जगच्चेदृक् तत्राह निर्विशेषमिति निश्चितो विशेषो जगन्नियन्तृत्वलक्षण आधिक्यं यत्र तत् "निर्निश्चयनिषेधयो"रित्यमरः। नन्वस्त्वीदृशं किं तेन प्राणिना तत्राह निरीहमिति। नितरामीहयति स्वस्मिन् सन्मुखान् जनानभिलाषयतीत्यतिस्निग्धं स्वपर्यन्तसर्वपुमर्थप्रदमित्यर्थः। ननु साम्मुख्यमेव कथं तत्राहाध्यायेति। अध्यात्मं स्वविषयकं ज्ञानं तस्य दीप इति सद्भिः स्वज्ञानं प्रदाय साम्मुख्यञ्च करोतीत्यर्थः। ईदृशस्य ते न भयगन्धशङ्केति ॥ २५ ॥ अथ महाप्रलये स्थितस्य तव कुतो भयशङ्केत्याह नष्टे इति। महाभूतेषु पृथिव्यादिषु पञ्चसु खयोनिमादिभूतमहङ्कारं गतेषु सत्सु व्यक्ते चाहं महद्रूपे स्थूले कालवेगेनाव्यक्तं प्रधानं गते सति द्विपरार्द्धस्य ब्रह्मायुषोऽवसाने लोके ब्रह्माण्डे नष्टे सति भवानेवैकः शिष्यते हतः शेषसंज्ञः ॥ २६ ॥ कालवेगेनेति विदितस्त्वोतन्त्रात् कालात् कदाचिद्भयं स्यात्तत्राह योऽयमिति। हे अव्यक्तबन्धो ! प्रकृतिस्वामिन् ! योऽयं सर्वसंहारकः कालः प्रलये वर्त्तेत तं तव चेष्टां प्रकृतिमाहुः। येन त्वच्चेष्टारूपेण कालेनेदं विश्वं चेष्टते स क इत्याह निमेषादिरिति महीयानिति वत्सरावृत्याद्विपरार्द्धवपुरित्यर्थः। तं त्वां प्रपद्ये। कीदृशं ? कालस्य प्रधानस्य चेशं नियन्तारं ज्ञः कालकालः प्रधानक्षेत्रज्ञपतिरितिश्रवणात् क्षेमस्याभयस्य धामाश्रयं स्वरूपं वेत्यर्थः ॥ २७ ॥ त्वच्चरणप्रपन्नो निर्भयः स्यात् किं पुनस्त्वमित्याह मर्त्य इति। सर्वान् विरिञ्चिस्थानपर्यन्तान् लोकान् प्रति पलायन् धावन् निर्भयं भयाभावं मर्त्यो नाध्यगच्छत्, यदृच्छया यादृच्छिकसत्सङ्गलब्धया भक्त्या त्वत्पादरूपमब्जं धन्वन्तरिं प्राप्य स्वस्थो निर्भयः शेते "अब्जोऽस्त्री शङ्खेनानिचुले ···· च हिमकिरणे इति मेदिनी तथा च त्वदुक्तायास्त्वन्मातुश्च मम कंसात्तुच्छाद्भयमिदं चित्रमिति भावः ॥२८॥

अभयमिच्छन्त्याह स त्वमिति। यतो भूत्येति। ननु कंसादिदुष्टवधायावतीर्णोऽहमागतं कंसमधुनैव हन्मीति वदन्तः पुत्रमाशङ्क्य वात्सल्योदयादाह—रूपं चेदमिति। पौरुषमैश्वरं ध्यानस्य धिष्ण्यमास्पदं मां सदृशां मनुष्याणां प्रत्यक्षं मा कृषीष्ठा मा कुरु अद्यैव युद्धक्लेशो माभूदन्यदपि दुःखमावां सहेव समये हनिष्यसीति ॥ २९ ॥ जन्मेति मा विद्यान्न जानातु कुत एवं वदसि तत्राह भवदिति। भवतः कल्याणमिच्छन्ती कंसादहं समुद्विजे यद्यपि मधुसूदनत्वात् कंसमागतं हन्यास्तथापि जननीत्वादहमधीरधीरस्मीति मत्प्रत्यक्षं युद्धकष्टं माभूदिति भावः ॥ ३० ॥ नन्वागतः कंसो मद्रूपं पश्येद् भवेदेव तेन साकं मे युद्धमिति चेत्तत्राहोपसंहरेति अलौकिकमिति। लौकिकनरबालकतुल्यो भव यथा त्वां क्वचिद् गोपितुं शक्नुयामिति वात्सल्यभयाद्युदयः ॥ ३१ ॥ ननु मातः कथमिदमैश्वरं रूपमुपसंहार्यं तवानेन कीर्तिर्भवेत् परेशस्य जननी देवकीति चेत्तत्राह विश्वमिति। निशान्ते मन्दिरे "निशान्तवस्त्यसदनभवनागारमन्दिर" मित्यमरः। परः पुरुषो भवानेतद्विश्वं यथावकाशमसङ्कोचतः स्वतनु-

मन्दिरे बिभर्त्ति सोऽयं विभुः परिमितायां मम गर्भगोऽभूदिति नृलोककर्त्तृकं मे विडम्बनमनादरणं तथा च नाहं कीर्त्तिमिच्छामि किन्तु त्वत्कल्याणमेवेति, रूपमिदमुपसंहर कंसेऽष्टमगर्भावेदनन्तु मायान्तरेण भावीति अत्र वसुदेवदेवक्योर्भयादिकं न मायिकं किन्तु पराख्यशक्तिविलासभूतमेव वात्सल्यमयमिति विष्णोर्माया भगवतीति पद्यटिप्पण्यां निर्णीतम् ॥ ३२ ॥

भो मातः ! किमेवं दैन्यं मन्यसे, न त्वं प्राकृती मानुषी किन्तु परांशभूतैव यदहं बहुकृत्वस्त्वत्पुत्रोऽस्मीत्याह त्वमेवेति चतुर्दशभिः हे सति ! स्वायम्भुवे मन्वन्तरे त्वमेव पृश्निः अयं वसुदेवः सुतपाः ॥ ३३–३४ ॥ वर्षेति युग्मकम् । वर्षादीन् कालगुणान् सहमानौ श्वासरोधः प्राणायामः मनोमलोरागादिः उपशान्तेन रागादिशून्येन ॥ ३५–३६ ॥

मदात्मनोर्मदेकमनसोः ॥ ३७ ॥ भावितो भावविषयतां नीतः ॥ ३८–३९ ॥ अपवर्गं सुखैश्वर्यप्रधानं मोक्षं मायया पुत्रस्नेहलक्षणया परया मोहितौ तदनुभवेन विचित्रतां गतौ "वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभु"रिति वक्ष्यति ॥ ४० ॥

ग्राम्यान् भोगान् मादृशपुत्रोत्पत्तीच्छया व्यवायान् "व्यवायो ग्राम्यधर्मश्च"त्यमरः ॥ ४१ ॥ पृश्निगर्भो यो ध्रुवाय वरमदात् त्रेतावतारोऽयं विष्णुर्यज्ञः पृश्निगर्भ इति तत्प्रासङ्गिकोक्तेरेकादशे ॥ ४२ ॥ अदित्यं कश्यपाद्वा मम आसेति यत्तदपि तद्रूपयोर्युवयोरहमेव पुनरासमित्यर्थः ॥ ४३ ॥ तृतीये भवे जन्मनि अत्राहं पृश्निगर्भोऽहं वामन इति कृष्णांशत्वं तयोरुक्तं त्वमेव पृश्निरभूदिति पृश्न्यदित्योर्देवक्यांशत्वं तदायं सुतपा इति सुतपःकश्यपयोर्वसुदेवांशत्वं चाभिमतं हे सति कोविदे ! "सन् सुधीः कोविद बुधः" इत्यमरः ॥ ४४ ॥

एतच्चतुर्भुजं रूपं वां युवयोर्दर्शितं किमर्थं तत्राह प्राग्जन्मेति वरदानमारभ्य प्राचीनतदाकारप्रादुर्भावत्रयस्मरणायैव न तु प्राधान्यापेक्षया नराकृति परब्रह्मणो मे प्राधान्यात् अन्यथा मर्त्यलिङ्गेन रूपेण परिपूर्णेनापि मद्भवं ज्ञानं न जायते भवत्यस्मिन् भवो विषयः अहं प्राचीनतदाकारो युष्मद्दृष्टो विषयो यस्य तत् ॥ ४५ ॥ श्रीगोकुलं यास्यन् स्वप्राप्तिविश्रम्भेण पितरौ हर्षयति युवामिति पुत्रभावेनोपसर्जनीभूतपारमैश्वर्येण ब्रह्मभावेनोपसर्जनीभूतपुत्रभावेन परां गतिमिति अद्य गोकुलं प्रति मे गतिः पूर्वा एकादशे वर्षे मथुरां प्रति या भाविनी सा परा तां युवां यास्येथे प्राप्स्यथः सम्प्रति विच्छेदो मया सह भवेदितिखिन्नता माभूदिति, न च परां गतिं मोक्षलक्षणां मद्भक्त्या प्राप्स्यथः यां मायामोहिताभ्यां युवाभ्यां प्राक् न वृतेति व्याख्येयं "एते हि यादवः सर्वे मद्गणा एव भाविनी"त्यादिवाक्यव्याकोपात् किञ्च विशुद्धसत्त्वस्य वसुदेवः पराख्याशक्तेस्तु देवक्यवतार इति द्वयोर्नित्यमुक्तत्वमेव तथाप्यन्यथा चेष्टितं हरेरिव जनसंग्रहायेति प्राहुः ॥ ४६ ॥ आत्ममायया निजेच्छया आत्ममाया तदिच्छा स्याद्गुणमाया "जडात्मिके"ति महासंहितावचनात् प्राकृतः प्रकृत्या स्वरूपेणैव व्यक्तः शौषिक्रोणसंसिद्धिप्रकृतीत्विमे स्वरूपञ्च स्वभावश्च निसर्गश्चेत्यमरः स्वभावः प्रकृतिशीलमिति निधनं जयश्च तस्य शिशोर्गोकुले गतस्य परब्रह्मत्वाद्यभिमानात् ॥ ४७ ॥ ततश्चेति त्रिकम् । बिभेषि चेन्मां यशोदावेश्मनि निधाय तत्कन्यामानीय कंसाय देहीति भगवता प्रचोदितः शौरिः स्वपादौ निगडौ वीक्ष्य सुतं हरिं समादाय सूतिकागृहाद्बहिर्गन्तुं यदेयेष तर्हि तस्मिन्नेव समये नन्दजायया निमित्तेन या योगमाया विष्णोर्माया भगवतीत्यत्रोक्ताऽजनि जाता तया कर्त्र्या त्रिगुणया स्वांशेन हृताः प्रत्ययस्य ज्ञानस्य सर्वा वृत्तयो येषां तेषु द्वाःस्थेषु शायितेषु सत्सु या द्वारः कपाटैः पिहितास्ताः कृष्णवाहे वसुदेवे आगते सति स्वयमेव व्यवर्यन्त विवृता उद्घाटितकपाटा बभूवुः मृदुवस्त्रास्तृतायां पेटकायां निहितं कृष्णं परानन्दं शिरसि वहतीति कृष्णवाहस्तस्मिन् कीदृश्यस्ता इत्याह— बृहद्भिः कपाटैस्तद्गतैरायसकीलैः शृङ्खलैश्च दुरत्यया दुर्लभ्याः रवेर्निमित्तात् उपांशु मन्दं गर्जितं यस्य स पर्जन्यो मेघः फणैच्छत्रीकृतः "शय्यासनपरीधानपादुकाछत्रचामरैः । किं नाभूत्तस्य देवस्य मूर्तिभेदैश्च मूर्तिष्वि"ति ब्रह्माण्डवचनात् ॥ ४८-५० ॥

मघोनीन्द्रे असकृद्वर्षति सति यमानुजा नदी यमुना मार्गं ददौ जानुदघ्नजला बभूव, कीदृशी ? गम्भीरा चासौ तोयौघजवेन वारिप्रवाहवेगेनोर्मयो यस्यां सा च फेनिला चेति भयानका भयङ्करा ये आवर्त्ता जलभ्रमास्तेषां शतैराकुला व्याप्ता श्रियः पतेः श्रीरामस्य लङ्कां जिगमिषोः सिन्धुरिव ॥ ५१ ॥ नन्देति । अत्रापि नन्दनृपद्वारपालानां गोपानां प्रस्वापो योगनिद्रया परांशभूतया बभूव, द्वारश्च सर्वा मुक्तकपाटाः स्वयमासन् , यशोदा च तथैव स्वापं प्राप, तत्पुत्रं वसुदेवो नापश्यत् स्वपुत्रं तत्र निधाय तत्कन्यां नीत्वा अगात् । द्वौ डिम्भौ मेघखण्डाविवैकतां गताविति बोध्यम् । सा कन्या कंसेन हन्तुमशक्येति ज्ञानसत्वाद्वसुदेवस्य न छद्मित्वं दोषः ॥ ५२ ॥ पदोः पादयोः लोहं निगडं प्रतिमुच्य बद्धा आवृतः कारानिरुद्धः ॥ ५३ ॥ निशीथे इत्यादिना हरेर्मथुरायां गोकुले च जन्मोक्त्या पूर्वत्र पितृभ्यां तस्य स्तुतिः सम्भाषणं चोक्ते उत्तरत्र किमभूत्तदाह—यशोदेति; वसुदेवपत्नीव नन्दपत्नी च स्वगर्भाज्जातं परं परेशमबुध्यत तत्करचरणगतानि चिह्नानि वीक्ष्यानादिमत् पुत्रोऽयं परेशोमां प्रमोदयन्नवातरदित्यवैदित्यर्थः । ननु देवकीव तुष्टाव पुत्रभावेन तदैश्वर्यधियोऽन्यग्भूतत्वात् जातां कन्यां तु नापश्यदिति बोध्यम् । ननु तत्र वसुदेवोऽप्यागत्य कन्यां नीत्वा गतवानिति कुतो नाबुध्यत तत्राह—न तदिति तस्य वसुदेवागमादेर्लिङ्गं चिह्नं नाबुध्यत । "लिङ्गं चिह्ने तु मानेऽपी"ति विश्वः न तद्वेदेति केचित् पठन्ति । तद् वसुदेवागमनं न वेदेति तत्र हेतुर्निद्रयेति रहस्यरक्षिण्या योगमाययेत्यर्थः ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां तृतीयोऽध्यायः ॥ ३ ॥

* * *

अथ चतुर्थोऽध्यायः

श्लोकाः	अनु.	वंशस्थ	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४७	४६	१	८	१५२०	४४	३९	१६०३	५०	३

श्रीशुक उवाच

बहिरन्तःपुरद्वारः सर्वाः पूर्ववदावृताः । ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः ॥ १ ॥
ते तु [1]तूर्णमुपव्रज्य देवक्या गर्भजन्म तत् । आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्षते ॥ २ ॥
स तल्पात् तूर्णमुत्थाय कालोऽयमिति विह्वलः । सूतीगृहमगात् [2]शीघ्रं प्रस्खलन् मुक्तमूर्धजः ॥ ३ ॥
तमाह भ्रातरं देवी कृपणा करुणं सती । स्नुषेयं तव कल्याणं[3] स्त्रियं मा हन्तुमर्हसि ॥ ४ ॥

कर्दमक्षमा

अन्वयः—बहिः अन्तः सर्वाः पुरद्वारः पूर्ववत् आवृताः ततः बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः ॥ १ ॥ ते तु तूर्णम् उपव्रज्य देवक्याः तत् गर्भजन्म भोजराजाय आचख्युः यद् उद्विग्नः प्रचक्षते ॥ २ ॥ सः तूर्णम् तल्पात् उत्थाय अयम् कालः इति विह्वलः मुक्तमूर्धजः प्रस्खलन् शीघ्रं सूतीगृहम् अगात् ॥ ३ ॥ कृपणा करुणं सती देवी तम् भ्रातरम् आह हे कल्याण ! इयम् तव स्नुषा स्त्रियम् हन्तुम् मा अर्हसि ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चतुर्थे चण्डिकावाक्यमाकर्ण्यातिभयाकुलः । दुर्मन्त्रिभिर्हितं मेने कंसो बालादिहिंसनम् ॥ १ ॥

तदष्टमं जन्म ॥ २ ॥ कालो मृत्युः ॥ ३–५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दुर्मन्त्रिभिरहितोपदेष्टृत्वात्कुमन्त्रिभिः । आदिपदेन गोविप्राद्यो ग्राह्याः (१) । ततो द्वारावृत्यनंतरम् । बालध्वनिं रोदनशब्दम् । गृहपाला इति श्लेषेण श्वान इव । यथा श्वानः किञ्चिच्छब्दादि श्रुत्वा भषंते तद्वत्तेऽपीति भावः । 'श्वस्वामिनौ सद्मपालौ' इति वरतंतुः ॥ १ ॥ यदष्टमम् । उद्विग्नस्त्रस्तः । प्रतीक्षते कदोत्पत्स्यत इत्येवं मृशति ॥ २ ॥ यद्वा बालकं हंतुमयं कालः समयः । कालांतरे किं भविष्यतीति विह्वल आकुलः । प्रस्खलन्नित्यपशकुनं कालांतरे तत एव तन्मृत्युसूचकमिति ॥ ३ ॥ स्वपुत्रस्य गोपितत्वादन्तर्द्योतमाना सख्याः कन्येयमपि जीवत्विति कृपणा सती तत्प्रतारणे कोविदा 'सन् सुधी कोविदो बुधः' इत्यमरात् । स्नुषा तव भाविनः पुत्रस्य वधूरियं भविष्यतीति बुद्ध्या तदपि बलादाच्छिद्य । जिघृक्षंतमाह—स्त्रियं पश्येयमबला । हे कल्याणेति । स्त्रीवधोत्थपापेन तवाकल्याणं मा भवत्विति भावः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आवृताः लग्ना बभूवुः स्वयमेव ततस्तदनन्तरमेव बालस्य बालजातेर्ध्वनिं जातमात्रस्य स्वभावतो रोदनशब्दम् अतः सामान्यतो न स्त्रीत्वं गृहपाला रक्षिणः श्लेषेण कुक्कुरा इव सम्यक सावधानमुद्यतास्तत्रयोत्थिताः ॥ १ ॥ उपव्रज्य तत्र तेषामनधिकारेऽपि समीपे गत्वा भोजराजाय तं विज्ञापयितुम् ॥ २ ॥ कालः हन्तुं समयोऽयं किं वा साक्षान्मृत्युरयमागात इति विह्वलो भयव्याकुलः अत एव प्रस्खलन् इतस्ततो निपतन् उत्तरार्द्धे शीघ्रं तूर्णमिति वा पाठः ॥ ३ ॥ भ्रातरमिति तं प्रति तादृशोक्तौ योग्यता तस्य तु दुरात्मतोक्ता करुणं यथा स्यात् सतीति तस्या वैक्लव्येन तस्य सानुगस्याचिरादेव नाशः समुचित एवेति भावः । देवी स्वपुत्रस्य गोपनं दिष्ट्यैव मया कृतम् इत्यन्तर्द्योतमाना प्रियसख्या यशोदायाः कन्यकावधशङ्कया कृपणा दुःखिता च सती तव स्नुषा पुत्रवधूर्भविष्यतीति प्रथमं तावल्लोभं जनयति – तदवज्ञाय अष्टमगर्भतामाशङ्क्य च तामाच्छेत्तुमुद्यतं प्रत्याह—स्त्रियमिति । असमर्थामवध्यां चेत्यर्थः । तच्च तव युक्तमेवेत्याह—कल्याण, हे धार्मिकेति यद्वा हे आयुष्मन् ! इति मृत्युभयं निवर्त्तयति अष्टमे गर्भेऽस्मिन्नबलाया एवोत्पत्तेः इति मृत्युभयं निवर्त्तयति ॥ ४ ॥

---

१. शीघ्रमुप–इति कस्यचित् । २. तूर्णं–श्रीधर. वंशी. गिरि. भक्त. । ३ कल्याणी–इति कस्यचित् ।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

आवृता लग्ना बभूवुः स्वयमेव; ततश्च तदनन्तरमेव बालस्य ध्वनिं जातमात्रस्वभावतो रोदनशब्दम्, सामान्यतः पुंस्त्वम् गृहपालैः पुत्रतयैव निश्चयाद्वा; किं वा, बालो जात इति श्रीवसुदेवकृतध्वनिम्, किं वा बालमत्यल्पं सद्योजातशिशोरिव ध्वनिम्, गृहपालाः रक्षिणः, श्लेषेण कुक्कुरा इव सम्यक् सावधानमुद्यतास्तयोस्थिताः ॥ १ ॥ उपव्रज्य समीपे गत्वा ॥ २ ॥ कालो हन्तुं समयोऽयम्, किंवा साक्षान्मृत्युरयमागत इति विह्वलः सम्भ्रान्तोऽतिभीतो वा, अत एव प्रस्खलन् इतस्ततो निपतन् ॥ ३ ॥ भ्रातरमिति तं प्रति तादृशोक्तौ योग्यतोक्ता। करुणं यथा स्यात्तथाह—सती साध्वी भर्त्तुर्मतानुसरणात्, देवी स्वपुत्रस्य गोपनादन्तर्द्योतमाना, अतोऽकृपणापि कंसवञ्चनार्थं दीना सती; यद्वा, प्रियसख्या यशोदायाः कन्यका भावि-वधेन दुःखितैव सती स्नुषा पुत्रवधूर्भविष्यतीति लोभं जनयति ननु पितृष्वसृकन्या-परिणयोऽत्रायुक्त इति चेत्तथापि स्त्रीत्वादेव हननानर्हेत्याह—स्त्रियमिति। तच्च तव युक्तमेवेत्याह—कल्याण! हे धार्म्मिकेति; यद्वा, हे आयुष्मन्निति मृत्युभयं निवर्त्तयति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

॥ १–६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं भगवदवतारं सप्रपञ्चं प्रस्तुत्य अथ ततःप्रभृति कंसोद्योगं प्रस्तौति—बहिरिति। यदा वसुदेवः पूर्ववदास्त तदा बहिरन्तश्च सर्वाः पुरद्वारः द्वाराणि पूर्ववदेवावृताः पिहिताः ततो बालध्वनिं शिशुरोदनमाकर्ण्य गृहपालाः वसुदेवाधिष्ठितकारागृहपालाः समुत्थिता बभूवुः ॥ १ ॥ ते चातितूर्णमुपव्रज्य कंससमीपमेत्य देवक्या गर्भजन्म गर्भस्थशिशूत्पत्तिं भोजराजाय कंसायाचख्युः कथम्भूतं यद्गर्भजन्मनैव समुद्विग्नो मृत्युभयभीतः कंसः प्रतीक्षते तथाभूतमित्यर्थः ॥ २ ॥ स भोजराजः कालोऽयमित्ययमेव तद्वधकालः अन्यथा प्रवर्द्धितो मामेव हन्यादिति बुद्ध्या तूर्णं तल्पाच्छयनादुत्थितो विह्वलः कातरोऽनवहित इति यावत् अत एव प्रस्खलन् विक्षिप्तगतिः मुक्ता विक्षिप्ताः मूर्द्धजाः केशा यस्य तथाभूतः शीघ्रं सूतिकागृहमगात् ययौ ॥ ३ ॥ तमागतं भ्रातरं कंसं देवी देवकी कृपणा दीना करुणं यथातथोवाच, तदेवाह—स्नुषेयमिति सार्द्धद्वयेन। हे कल्याण! तवेयं स्नुषा भगिनी सुता एनां स्त्रियं हन्तुं त्वं नार्हसि ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

देवानां देवस्वभावोऽसुराणामासुरस्वभावो मध्यमानां मिश्रस्वभावो दुस्त्यज इत्येतदर्थकं प्रतिपाद्यतेऽस्मिन्नध्याये, तत्र कंसादिषु सन्तोऽसन्त इति द्विजीवाः सन्ति तदुक्तम्—

"पूतनाकंसनरकशिशुपालादिषु द्विधा। जीवाः सन्तस्त्वसन्तश्च तत्र बन्ध्वादिरूपिणः ॥
विष्णोः सन्त इति ज्ञेया असन्तः शत्रुरूपिणः। शुभजीवप्रकाशेन कदाचिच्छुभबुद्धयः" ॥ इत्यादि।

तत्रासतां स्वभावं दर्शयितुमुपक्रमते—बहिरन्त इति। बालध्वनिं रोदनम् ॥ १ ॥ यस्माद्भीत् उद्विग्नः भीतः ॥ २ ॥ सूतीगृहमितिदीर्घश्छान्दसः वैलक्षण्यद्योतको वा ॥ ३ ॥ करुणं दयाजनकं वचनमिति शेषः स्नुषा पुत्रभार्या ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

बालस्य बालकजातेर्ध्वनिः ॥ १–२ ॥ मम कालोऽयं जात इति स्नुषाभविष्यत् पुत्रस्य वधूर्भविष्यति तदेव जानन्तमाह—स्त्रियमिति। दीनदीनवदिति दृष्टान्तः न तु गौणतोक्तिः श्रीयशोदाया निजसखीत्वात् समुद्विजे भवद्धेतोरित्यादिवत् स्नेहलस्वभावत्वाच्च ॥ ३–६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

मायावाक्येन कंसस्याऽनुतापो देवकीक्षमा। दुर्मन्त्रिभिर्मन्त्रणा च चतुर्थे कथ्यते कथा ॥

बालध्वनिञ्जातमात्रबालकरोदनशब्दं गृहपालाः श्वान इव ॥ १ ॥ तदष्टमं गर्भजन्म ॥ २ ॥ कालः बालकं हन्तुमयमेव समय इति यद्वा मन्मृत्युरिति भयेन ॥ ३ ॥ देवीस्वपुत्रस्य गोपितत्वादन्तर्द्योतमाना सख्याः कन्येयमपि जीवत्विति कृपणा सती तत्प्रतारणे कोविदा स्नुषा तव भाविनः पुत्रस्येयं वधूर्भविष्यतीति बुद्ध्या तदपि बलादाच्छिद्य जिघृक्षन्तं तमाह—स्त्रियं पश्येयमबला हे कल्याणेति स्त्रीवधोत्थपापेन तवाकल्याणं मा भवत्विति भावः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदनन्तरं किं वृत्तमित्याकांक्षायां सूचीकटाहन्यायेन कन्यकावृत्तप्रतिपादनाय चतुर्थोऽध्याय आरभ्यते—बहिरन्त इति ॥१॥ ते तु तूर्णं त्वरितम् उपव्रज्य निकटं गत्वा यत्प्रतीक्षते तदष्टमं जन्म ॥ २ ॥ अयमष्टमो गर्भः कालः मम विनाशहेतुः ॥ ३ ॥ स्नुषेयं तव त्वत्पुत्राय दास्यामीति भावः ॥ ४–५ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

देवीवाक्येनानुतापो भगिनी मामयोः क्षमा । दुर्मन्त्रिभिर्मन्त्रणश्च कंसस्यासीच्चतुर्थके ॥

बहिरन्तःपुरयोर्या द्वारस्ताः सर्वाः पूर्ववदावृताः कपाटपिहिता बभूवुः, बालध्वनिं जातमात्रबालरोदनशब्दं, गृहपालाः श्वान इव ॥ १ ॥ तदष्टमं गर्भजन्म यस्मादुद्विग्नः सन् प्रतीक्षते ॥ २ ॥ कालो मे मृत्युरयमिति भयेन विह्वलः ॥ ३ ॥ देवी स्वात्मजस्य गोपितत्वात् स्वसख्याः कन्यापि नानेन मरिष्यतीति ज्ञानसत्वाद्यान्तर्द्योतमाना बहिः कृपणा धृतदैन्या करुणं दयोत्पादनं यथा स्यात्तथाह सती तद्रक्षने कोविदा हे कल्याण! तवेयं कन्या स्नुषा भावित्वात् पुत्रवधूर्भविष्यति स्त्रियमिति स्त्रीवधपापं माभूदित्यर्थः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वसुदेवस्यैवं निवासवासानन्तरं का कथा प्रवृत्तेत्यतस्तद्वृत्तान्तमाह ॥ बहिरन्तरिति । बहिर्द्वारोऽन्तःपुरद्वारश्चेत्यन्वयः । सर्वाः पूर्ववत् । आवृता आच्छादितास्ततो बालध्वनिं श्रुत्वा गृहपालाः कंसस्थापिता उत्थिता ध्वनितः सारांशस्तु न किञ्चिदप्येतत्कृत्यमत्ययहेतुरिति सारमेयोपमा एत्विति गृहपालेत्यालपतेति ज्ञेयम् ॥ १ ॥ गर्भजन्म तज्जननं यदुद्विग्नो यद्गर्भाद्भीतः प्रतीक्ष्यते कदोत्पत्तिर्भवेदिति तदाचख्युः ॥ २ ॥ तल्पाच्छय्यातस्तल्पात् । ल्यब्लोपनिमित्तेयं पञ्चमी । तल्पं कलत्रं परित्यज्य शय्येति पदशय्यां विहायेवं वचनवृत्त्याऽमुमर्थं सूचयामासेति ज्ञेयम् । तल्पमट्टकलत्रयोरिति विश्वः । कालोऽयमयमेव समयो मम संहारकोऽयमिति वा सूतीगृहं सूतिकागारम् । सूतिः संवीतसन्तत्योररवि विश्वः । सूतेव सूतकेति भानुः । ततश्च सूतागृहमिति सुपठम् । प्रस्खलन्निद्रया भीत्या वा मुक्तमूर्धजो मुक्ता मूर्धजा यस्य येन स वा केशवोत्पत्तिरिति मिमितो नावकाशोऽभूत्केशबन्धन इति तावती त्वरा ज्ञेया । पद्मनाभमुक्तो मूर्धजः कृष्णः केशकाल इति विह्वल इति कवयितुर्हृदयं मन्तव्यमित्येके ॥ ३ ॥ देवी कृपणा सती करुणं यथा भवेत्तथा तं स्वभ्रातरमाह प्राह हे कल्याण मङ्गलपुरुष । आन्तरङ्गिको भावस्तु कालनेमिविवक्षया कलिना आ सम्यक् अणते प्रेर्यत इति कल्याणेति सम्बोधितवतीति ज्ञेयम् । स्नुषा भगिनीपुत्रीति स्त्रियं हन्तुं माऽर्हसि । मायं तव स्पष्टमप्रतिभानमत इत्याह । तमेति । तमातत्स्वपि गीयत इति रात्रेर्नाम ह शोके ॥ ४ ॥

श्रीसुबोधिनी

मायायाः कार्यमधुना चतुर्थे विनिरूप्यते । अन्यथा भगवत्कार्यं न भवेदनिमित्ततः ॥ १ ॥
ज्ञापने दुःखसुखदे ततोपि ज्ञापने तथा । कंसस्य सहभृत्यस्य धर्मबाधो न चान्यथा ॥ २ ॥
तामसप्रमुके राज्ये कुतो धर्मस्तु तद्गतः । अतः पूर्वस्य नाशो वै कर्तव्यं तामसाश्च ते ॥ ३ ॥
ब्राह्मणा अपि तद्देशे स्वभावात् तामसा मताः । कालस्तथाविधो यस्मात् पश्चाज्जातस्तु सात्त्विकः ॥४॥

भगवत्कार्यवैपरीत्यं मायाकार्यम् इति ज्ञापयितुमुद्घाटितकपाटानां द्वाराणां पुनः पिधानमाह बहिरन्तरिति, पुरो बहिर्द्वाराण्यवान्तरद्वाराणि च सर्वाः पूर्ववदेवावृताः, वैलक्षण्ये रक्षकाणां ज्ञानसम्भवाज्ज्ञानं भवेदिति पुनर्बन्धनं मायाकार्यमुक्त्वा पूर्वं वसुदेवदेवक्योर्निवृत्तस्यापि भयस्य जननार्थं रोदनमपि कृतवती, तेन रोदनेन सर्वेषां जागरणं जातमित्याह तत इति, बालस्योत्पन्नस्य ध्वनिं श्रुत्वा गहपालाः सूतीगृहरक्षकाः सम्यगुत्थिताः ॥ १ ॥

तेषां कृत्यमाह ते त्विति, देवक्यादिभिः प्रार्थिता अपि तत्प्रार्थनां न कृतवन्त इति ज्ञापनार्थस्तुशब्दः, तूर्णमिति मध्ये कृत्यान्तरव्यावृत्त्यर्थं, दूरात् कथने निलायनादिकं सम्भविष्यतीति तन्निवृत्त्यर्थमुपकण्ठेत्युक्तं, देवक्या गर्भस्य जन्म, न तु पुत्रः कन्यका वेतिभेदः, तदिति, सिद्धमष्टमं, अकथनेनिष्टं करिष्यतीतिज्ञापनार्थं भोजराजायेत्युक्तं, यज् जन्म प्रतीक्षत एव कदा भविष्यतीति, अर्थादेतादृशाय, प्रतीक्षायां हेतुमाहोद्विग्न इति ॥ २ ॥

ततः कंसस्य कृत्यमाह, सोपि शय्यायां पतित एव स्थितः स महानपि तल्पाच्छय्यातस्तूर्णमविचारेण प्रथमत उत्थितः पश्चात् कालोयमिति विह्वलः, अतः परं जीवसम्भावना नास्तीतिनिश्चयात् , अयं भगवानेव कालो मृत्युदः, विह्वलः सर्वावयवविकलः, सूतीगृहं प्रसूतिस्थानं, शीघ्रमिति सर्वकार्यपरित्यागे सर्वसाधनाननुसन्धाने हेतुः, प्रस्खलन्निति मार्गाज्ञानं, मुक्तमूर्धज इति देहाज्ञानम् ॥ ३ ॥

दृष्ट्वा लिङ्गमज्ञात्वा पुत्रबुद्ध्यैवमारणार्थं प्रवृत्तौ यशोदायाः कन्याया मारणं स्वपुत्रमारणादप्यधिकदुःखदं जातमिति ज्ञापयितुं तस्या वाक्यमाह तमाहेति त्रिभिः,

त्वदीया कन्यका चेयमतो मह्यं प्रदीयताम् । भगिनी दानपात्रं हि हेतुकार्यफलैस्त्रिभिः ॥ १ ॥

तं कंसं भ्रातरमाह, यतो देवी सात्त्विक्यपि स्त्री, ज्ञात्वा वा दैन्यप्रदर्शनार्थं तथा कृतवतीति, असत्यमपि प्राणसङ्कटे परार्थं वक्तव्यमितिज्ञापनार्थं वा कृपणानालोचितयाचिका, 'कृपणः स तु विज्ञेयो योनालोच्चितयाचक' इति वाक्यात् , करुणं यथा

भवति तथा तमाहेतिसम्बन्धः, सतीति कालज्ञानात् याचनं, सर्वात्मकत्वाद् भगवतस्तथा करिष्यति, भर्तुर्दोषनिवृत्त्यर्थं वा सतीति, अन्यथा स्वपुत्रं स्थापयित्वा परकन्यामारणे दोषः स्यात् , स्नुषेति, मातुलकन्यापरिणयनपक्षे पितृष्वसुरपि कन्या परिणेया यथा मित्रविन्दा, यदा कंसस्य पुत्रो देवकीकन्यामुद्वहेत् तदेयं स्नुषा भवति, अनेन तस्याः स्वकन्यात्वं सहजमित्युक्तं, ननु पुत्र एव नास्ति कथमियं स्नुषेति चेत् तत्राह कल्याणेति, त्वं पुत्रजननसमर्थः, मदपत्यरक्षणेन तवापि पुत्रो भविष्यतीति, अथवा मास्तु स्नुषा स्त्रियं हन्तुं मार्हसि, अन्यथाहमेव कथं न हता ? 'स्त्रियाः स्वसुर्गुरुमत्या वधोय'मिति यतस्त्वयैव निरूपितम् ।। ४ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

चतुर्थाध्यायेनिमित्तत इति, भक्तदुःखाभावादित्यर्थः, ज्ञापने इति, मायाकृतरोदनेन स्वज्ञापनं ततो गृहपालकृतबालजन्मज्ञापनं च कंसे, एते उभे अपि तथेत्यर्थः, ततोपीति, एतदुभयज्ञापनानन्तरं 'यत्र क वा जात' इति मायाकृतं भगवज्जन्मज्ञापनं कंसकृतज्ञापनं च मन्त्रिषु, एते उभे अपि दुःखसुखदे इत्यर्थः, न चान्यथेति, मायामोहं विना नेत्यर्थः, ननु धर्मस्थापनहेतोर्भगवदवतारस्य तन्नाशहेतुत्वं कथमुच्यते 'जातः खलु तवान्तकृद् यत्र क वे'तिवाक्यश्रवणेनैवा'निर्दशान्निर्दशां'श्चेत्यादिमन्त्रणस्य जातत्वादित्यत आहुस्तामसप्रभुक इति, तामसाश्च त इति, तद्रताः पश्वादय इत्यर्थः, एवमपि कण्टकन्यायेन धर्मप्रतिपक्षदूरीकरणं युक्तमितिभावः, पश्चादिति, तमः कार्यनिवृत्तेः पश्चाज्जातो धर्मस्तथेत्यर्थः ।। १ ।।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अथ चतुर्थाध्यायं विवरिषवो जन्मप्रकरणार्थस्य हेतूद्यमरूपान्तरस्वीकरणकापट्याख्यार्थचतुष्टयघटितत्वात् तत्र स्वीकरणस्यैव मुख्यत्वात् तत्पूर्वाङ्गयोर्हेतूद्यमयोः पूर्वाध्यायद्वय उक्तत्वात् तत्स्वीकरणोत्तरमत्रोत्तराङ्गभूत कापट्यं वक्तव्यं, तदत्रावसरसङ्गत्या निरूपयति, यद्वा कापट्यं विना रूपान्तरस्वीकरणं न सम्भवतीति प्रकृतघटकोपोद्घातसङ्गत्येदं निरूपयतीत्याशयेनाहुर्मायायाः कार्यमित्यादि, तच्च कपाटावरणादिसर्वधर्मनाशान्तं ज्ञेयं, नन्वेतन्निरूपणस्य किं प्रयोजनमत आहुरन्यथेत्यादि, यदि कापट्यरूपं मायाकार्यं न भवेत् तदानिमित्ततो भगवत्कार्यं न भवेत्, अनिमित्तत इत्यस्यार्थं टिप्पण्यामाहुरनिमित्तत इत्यादि, तथा च मायाकार्याभावे भक्तदुःखाभावात् तत्सुखदानरूपं भगवत्कार्यं न भवेत् , अतस्तदर्थं तत्प्रयोजकं मायाकार्यमत्रावश्यं निरूपणीयमिति प्रथमकारिकार्थः, यद्वा ननु मायाकार्यं पूर्वाध्याये निरूपितमित्यधुनेतिकथनं न सम्भवतीत्याशङ्क्याह चतुर्थेति, यद्यपि पूर्वाध्याये निरूपितं तथापि तत्र भगवत्प्राकट्यकार्योपयोगि किन्तु नाट्योपयोगि, अधुना तु चतुर्थे चतुर्थस्यानिरुद्धस्य प्राकट्यं निरूप्य तन्निमित्तं निरूप्यत इति न दोषः, तद् विशदयन्त्यन्यथेति, मायाकार्याभावेनिरुद्धप्राकट्याभावेन भगवत्कार्यं सर्वधर्मरक्षा देवक्यादिबन्धननिवृत्तिश्च न स्यादित्यर्थः, यद्वा पूर्वनिरूपितमपि मायाकार्यं निरूप्यते, तदनिरूपणे संवादाद्यभावे कंसेनापराधाद्यकरणे भक्तदुःखाभावात् पूर्वोक्तं भगवत्कार्यं नाट्यं देवक्यादिबन्धनिवृत्तिर्गोकुलीयलीला च तथेत्यर्थः, एवं सङ्क्षेपेणाध्यायार्थं तत्प्रयोजनं चोक्त्वा तदवान्तरार्थानग्रे कारिकात्रयेणाहुर्ज्ञापने इत्यादि, तदेतट्टिप्पण्यां विवृण्वन्ति ज्ञापने इत्यादि, ज्ञापने इति पदं प्रथमाद्विवचनान्तं ज्ञेयं, 'मायामोहं विना ने'ति, इद 'मिति प्रभाष्ये'त्यस्य सुबोधिन्यां स्फुटिष्यति ।। १ ।।

ते तु तूर्णमित्यत्र निलायनादिकमिति, बालकस्य निलायनं, आदिपदेन शब्दान्तरेण प्रतिबन्धश्च ।। २ ।।

तमाहेत्यत्र सात्त्विक्यपि स्त्रीति, यद्यपि ज्ञानयुक्ता तथापि स्त्रीस्वाभाव्यादाहेत्यर्थः, अनालोचितयाचिकेति, न विचारितं कन्यायाचने कंसस्य स्वरूपं यया तादृशीत्यर्थः, कृपणशब्दस्य तादृशार्थवाचकत्वे प्रमाणमाहुः कृपण इत्यादि, कालज्ञानादित्यादि, अयं याचनस्य काल इति ज्ञानाद् याचनं कृतवती, तथा च याचनया कन्यादाने भगवान् सर्वात्मक इति भगवतस्तथात्वात् तं दातुं प्रेरयिष्यति तदा तदपराधक्षमामपि करिष्यति तदा कदाप्यनिष्टं न भविष्यतीतिज्ञापनाय सतीपदमित्यर्थः, प्रयोजनान्तरमाहुर्भर्तुरित्यादि, अन्यथेति, अयाचने सति कन्यामारणे ।। ४ ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

चतुर्थाध्याये मायायाः कार्यमिति, 'अनिर्दशनिर्दशा'शिशुहननादि मायाकार्यं भगवत्कार्यसिद्ध्यर्थं निरूप्यते, अध्यायार्थस्तु निबन्धोक्तमनिरुद्धकार्यमेवेतिभावः, ज्ञापने इति टिप्पण्यां विवृतं, ज्ञापनद्वयमपि वसुदेवादीनां दुःखदं कंसस्य सुखदमित्यर्थः, ननु शिशुहननादेः कथं मायाकार्यत्वं मायाया अनुक्तत्वादित्याशङ्क्ये'ति प्रभाष्ये'तिश्लोके व्याख्यास्यमानसंवादानन्तरमपि जातमस्तीत्याशयेनाहुः कंसस्येति, मायामोहं विना तथा करणं न सम्भवतीति तस्यापि मायोक्तत्वान् मायाकार्यत्वमित्यर्थः ।। १ ।।

ते स्वित्यत्र प्रार्थनां न कृतवन्त इति, व्याजान्तरमुक्त्वा ततो निर्गता भोजराजाय निवेदितवन्त इत्यर्थः, निलायनादिकमिति, दूरादुक्ते देवक्यपि शृणुयात् ततो बालस्य निलायनं कुर्यादित्यर्थः ।। २ ।।

तमाहेत्यत्र कालज्ञानादिति, क्षत्रियस्य याचनानौचित्येप्यापत्काले तदुचितमेवेति तादृशकालज्ञानादित्यर्थः, तथा करिष्यतीति, भगवानितिशेषः, याचनानुरूपं तस्या मोचनं भगवान् सम्पादयिष्यत्येवेत्यर्थः ।। ४ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

चतुर्थाध्याये तमाह भ्रातरमित्यत्र यतो देवी सात्त्विक्यपि स्त्रीत्यादि, देवत्वात् सात्त्विकत्वं देवशब्दार्थः स्त्रीत्वं तु क्लीबर्थः, तथा च देवत्वाद् दयया परकन्यामोचनार्थं करुणा कृता स्त्रीत्वेन तामसत्वा'द्दङ्गमां चरमां प्रजा'मितिमृषोक्तमित्यपिशब्दार्थः, तदुक्तं सात्त्विक्यपि स्त्रीति, ज्ञात्वा वेति, देवीत्वात् सर्वोपायवित्त्वमतोयं दुष्टः कंसो,त्युग्रं स्तुतिभि'रितिन्यायेन दैन्येनैव सन्तोषणीय इति ज्ञात्वा दैन्यं कृतवतीतिभावः, ननु देवत्वादनृतभाषित्वं न सङ्गच्छते'नृतं वै मनुष्याणा'मितिश्रुतेरतः कथं मृषोक्तवतीति चेत् तत्राहुरसत्यमपीत्यादि, 'वृत्त्यर्थे प्राणसङ्कटे गोब्राह्मणार्थे हिंसायां नानृतं स्याज् जुगुप्सित'मितिवाक्यात् परकन्याप्राणपालनमसत्यवाक्येनापि युक्तमेव ॥ ४ ॥

इति श्रीमद्गोवर्धनधरश्रीवल्लभाचार्यवरश्रीविट्ठलेश्वरचरणानुचरसेवकेन लालूभट्टोपनामकेन दीक्षितबालकृष्णेन
विरचितायां दशमस्कन्धसुबोधिनीयोजनायां जन्मप्रकरणसुबोधिनीयोजना सम्पूर्णा ॥ ४ ॥

(५) भगवदीयनिर्भयरामभट्टनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

चतुर्थाध्याये मायाया इत्यादि ।

अधुना चतुर्थेऽध्याये मायायाः कार्यं सर्वेषां दुःखदानं धर्मनाशश्च निरूप्यते, अन्यथा मायाकार्याभावेनिमित्तत भक्तदुःखात्मकनिमित्ताभावाद् भगवत्कार्यं देवक्यादीनां बन्धनिवृत्तिः सर्वेषां सुखदानं धर्मरक्षादिकं च न भवेदित्यर्थः ॥ १ ॥ ज्ञापने इति प्रथमाद्विवचनान्तं, मायाकृतेन रोदनेन स्वज्ञापनं (ततो गृहपालकृतबालजन्मज्ञापनं च कंसे), एते उभे अपि ज्ञापने दुःखसुखदे इत्यर्थः, वसुदेवादीनां दुःखदे कंसस्य सुखदे इति भावः, ततोपीति, एतदुभयज्ञापनानन्तरं 'यत्र क वा जात'मिति मायाकृतभगवज्जन्मज्ञापनं कंसे कंसकृतज्ञापनं च मन्त्रिषु एते उभे अपि ज्ञापने तथा दुःखसुखदे इत्यर्थः, न चान्यथेति, अन्यथा मायामोहं विना भृत्यसहितस्य कंसस्य धर्मबाधो न स्यादित्यर्थः ॥ २ ॥ ननु धर्मस्थापनहेतोर्भगवदवतारस्य धर्मनाशहेतुत्वं कथमुच्यत इत्याशङ्क्याहुस्तामसप्रभुक इति, तामसाश्च त इति, कंसेन हृता पश्वादयोपि तामसा इत्यर्थः, अतस्तामसप्रभुके राज्ये यज्ञाङ्गानां पश्वादीनां तामसत्वात् तत्र कृतो यज्ञादिधर्मस्तामस एवेति पूर्वस्य धर्मस्य नाशः कर्तव्य एवेत्यर्थः ॥ ३ ॥ अन्येषामपि धर्माङ्गानां तामसत्वादेव नाश इत्याशयेनाहुर्ब्राह्मणा इत्यादि, पश्चाविति, तमःकार्यनिवृत्तेः पश्चाज्जातो धर्मस्तु सात्त्विक इत्यर्थः ॥ ४ ॥

तमाह भ्रातरं देवीत्यादिश्लोकत्रयप्रतिपाद्यानार्थानाहुस्त्वदीयेति,

त्वदीया कन्यका चेयमतो मह्यं प्रदीयताम् । भगिनी दानपात्रं हि हेतुकार्यफलैस्त्रिभिः ॥ १ ॥

फलकार्यहेतुनिरूपकैस्त्रिभिः श्लोकैः कारिकोक्तानर्थानाहेत्यर्थः, तत्र त्वदीया कन्यका चेतिफलनिरूपणं प्रथमश्लोकार्थः, अतो मह्यं प्रदीयतामितिदानलक्षणकार्यनिरूपणं द्वितीयश्लोकार्थः, भगिनी दानपात्रं हीतिहेतुनिरूपणं तृतीयश्लोकार्थः, मूले प्रथमतः फलनिर्देशः कंसप्ररोचनार्थः, कारिकायां हेत्वादिक्रमेण निर्देशो लोके हेतुकार्यफलानां पौर्वापर्यप्रसिद्धिमादायेति प्रतिभाति ॥ ४ ॥

बुभुत्सुबोधिका

अथ चतुर्थाध्यायं विवरिषवो जन्मप्रकरणार्थस्य हेतूद्गमस्वीकरणकापट्याख्यार्थचतुष्टयघटितत्वात् तत्पूर्वाङ्गयोर्हेतूद्गमयोः पूर्वाध्यायद्वय उक्तत्वात् स्वीकरणोत्तरमत्रोत्तराङ्गभूतं कापट्यं वक्तव्यं तदत्रावसरसङ्गत्या निरूपयतीत्याशयेनाहुः । यद्वा कापट्यं विना रूपान्तरस्वीकरणं न सम्भवतीति प्रकृतघटकोपोद्घातसङ्गत्येदं निरूपयतीत्याशयेनाहुः मायायाः कार्यमित्यादि । तच्च कपाटावरणादिसर्वधर्मनाशान्तं ज्ञेयम् । माया कापट्यम् । 'दासवद् यदमायये'त्यत्र 'मायये'त्यस्याकापट्येनेत्यर्थात् । अध्यायार्थस्तु निबन्धोक्तमनिरुद्धकार्यमिति भावः । एतयोः परस्परमन्वयस्तु कारिकोक्त एव । भगवत्कार्यमनिरुद्धकार्यं तस्य भवनार्थं मायायाः कार्यं निरूप्यत इति कार्यकारणभावेन । नन्वेतन्निरूपणस्य किं प्रयोजनमत आहुः अन्यथेत्यादि । यदि कपटरूपं मायाकार्यं न भवेत् तदाऽनिमित्ततो भगवत्कार्यं न भवेत् । अतस्तदर्थं तत्प्रयोजकं मायाकार्यमत्रावश्यं निरूपणीयमित्यर्थः । अनिमित्तत इति अत्र टिप्पणी स्पष्टार्था । यद्वा । ननु मायाकार्यं पूर्वाध्याये निरूपितमित्यधुने'ति कथनं न सम्भवतीत्याशङ्क्याहुः चतुर्थ इति । यद्यपि पूर्वाध्याये निरूपितं तथापि तत्र भगवत्प्राकट्यकार्योपयोगि किन्तु नाट्योपयोगि, अधुना तु चतुर्थे च चतुर्थस्यानिरुद्धस्य प्राकट्यनिमित्तं निरूप्यत इत्यदोषः तद्विशदयन्ति अन्यथेति । मायाकार्याभावेऽनिरुद्धप्राकट्याभावेन भगवत्कार्यं सर्वधर्मरक्षा देवक्यादिबन्धननिवृत्तिश्च न स्यादित्यर्थः । अध्यायावान्तरार्थान् कारिकाभिराहुः ज्ञापनेत्यादि अत्र टिप्पणी । तत्र स्वज्ञापनमिति बालज्ञापनं गृहपालेषु । तथेत्यर्थ इति दुःखसुखदे इत्यर्थः । पितृभ्यामितिबोध्यम् । दुःखसुखदे इति वसुदेवादीनां दुःखदं कंसस्य सुखदमिति वा । सुबोधिनी । कंसस्य ह प्रसिद्धभृत्यस्य स प्रसिद्धः धर्मबाधः गोब्राह्मणहिंसनहितमाननरूप इत्येवं स्पष्टार्थेति तां विहाय न चान्यथेति कारिकांशं व्याकुर्वन्ति स्म मायामोहमिति । इदं 'इति प्रभाष्ये'त्यस्य सुबोधिन्यां स्फुटम् । भगवदेवेति अनिरुद्धस्य । वाक्यश्रवणे-

नैवेति वाक्यश्रवणस्य तन्नाशहेतुत्वमित्युक्तम्। एवकारो भगवदवतारस्य तन्नाशयोगहेतुत्वयोर्व्यवच्छिनत्ति। तामसप्रभुक इति निन्दितकरणात् कंसस्तामसः भृत्यैः कृतोऽधर्मः तद्गतो राजगतः कालपाशावृतत्वरूपो धर्मः अन्यथा भृत्याः कालपाशावृताः स्युः। अत इति तथा चावतारस्य तामसराज्यकतामसधर्मैर्धर्मनाशकैर्निरोधकत्वात्, पूर्वस्य प्रतियोगिनो धर्मस्य नाशो वै निश्चयेन कर्तव्यः धर्मरक्षकेनानिरुद्धावतारेणेत्यर्थः। तामसाश्च त इत्यत्र तद्भृताः पश्वादय इति पशूनां हननकर्मत्वाधिकार उक्तः। कण्टकेति 'कण्टकं कण्टकेनैवे'ति वाक्ये कण्टकन्यायस्तेन। धर्मेति धर्मप्रतिपक्षः तामसधर्मपदेनापि शून्यः। तस्य दूरीकरणम्। सुबोधिनी। नित्यक्रीडास्थस्य ज्ञानवतः कंसस्य सर्वश्रेयोहनने कर्मणि प्रवृत्तिनैरपेक्ष्यमाशङ्क्योपपत्तिमाहुः ब्राह्मणा इत्यादि। तद्देश इति तामसराजकस्य देशे। स्वभावादिति चिक्रीडिषया स्वभावस्तस्मात्। तथाविध इति भगवत्सेवार्थमागत बालकाकाङ्क्षानुकूलत्वात् तामसः। तम काङ्क्षायाम्। यस्मादिति बालेच्छावशात् इत्येवं स्फुटार्थेति न व्याख्याता। पश्चादित्यादिकारिकां विवृण्वन्ति तमःकार्यनिवृत्तेरिति। पश्चात् सात्त्विकप्रकरणं जातः। तथेति सात्त्विकः॥ १॥

ते त्वित्यत्र ननु पक्षव्यावर्तनार्थकतुशब्दप्रयोगे व्यावर्त्यपक्षः क इत्याकाङ्क्षायामाहुः देवक्यादिभिरिति। तुशब्द इति पक्षव्यावर्तकः। निलायनादिकमिति दूरादुक्ते देवक्यपि शृणुयात् ततो बालस्य निलायनं कुर्यात्। आदिना शब्दान्तरेण प्रतिबन्धश्च कंसश्रवणे। वस्तुतस्त्वतद्गुणसंविज्ञानः निगडगृहीतानां निलायनासम्भवात्। एतादृशायेति प्रतीक्षमाणाय। उद्विग्न इतीति ओविजी भयचलनयोः। क्तप्रत्ययः 'ओदितश्चे'ति नत्वम्॥ २॥

स तल्पादित्यत्र महानिति ससेवकः। उत्थित इति भयात्। 'भयात् कंस' इति वाक्यात्। भयाज्जीवन्मुक्तो वा तदा जातः। उत्थितोऽणुरूपेणाङ्गुष्ठमात्रेण सदेहः। देहस्य विद्यमानत्वाज् जीवन्मुक्तत्वेपि॥ ३॥

तमाहेत्यत्र हननेऽदर्शनं लिङ्गज्ञानं च कारणं सर्वावयवविकलस्य मार्गाज्ञानवतो देहाज्ञानवतश्चापि। तेन हननजन्यभयमपि तस्य भगवद्धर्मांशः। 'स्त्रिय'मितिविशेषणाभिप्रायमाहुः पुत्रबुद्ध्य वेति। ननु 'मा हंतु'मिति हनननिषेधो कंसस्य मारणार्थं प्रवृत्तौ सम्भवत्यत आर्थिकार्थमाहुः मारणार्थमिति। दृष्ट्वेत्यादि। अधिकेति। तस्या देवक्या एव। त्वदीयेति पापस्य तव सम्बन्धिनी। कन्येव कन्यका इवार्थे कन्। भ्रातृत्वात्। हेतुकार्यफलैरिति प्रतिलोमक्रमः। दाने स्नुषात्वं फलम्। अष्टममारणं कार्यं हतपुत्रेषु। अवरजात्वादि हेतुः। त्रिषु श्लोकेषु। सात्त्विक्यपि स्त्रीति यद्यपि ब्रह्मविद्यात्वाज्ज्ञानयुक्ता तथापि स्त्रीस्वाभाव्यादाहेत्यर्थः। देवीत्यत्र दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिष्विति धातोरर्थानाहुः ज्ञात्वेत्यादि। द्युतिरर्थो दिवेः। कृतवतीति पचाद्यच् प्रत्ययार्थः। दिवेर्व्यवहारार्थमाहुः असत्यमपीति। अनेन क्रीडार्थोप्युक्तः। 'प्राणसंकटे नानृतं स्याज्जुगुप्सित'मिति वाक्यात्। अनालोचितेति न विचारितं कन्यायाचकस्य कंसस्य स्वरूपं यया तादृशी। अनालोचितेति अनालोचितो याचको येन। अनालोचितस्य याचकोनालोचितयाचकः इति वा। कालज्ञानादिति क्षत्रियस्य त्रिकर्मत्वाद्याचनानौचित्येपि आपत्काले तदुचितमेवेति तादृशकालज्ञानात् तथेति भगवान् तथायाचनानुरूपं तस्या मोचनं करिष्यति कंसक्रियायाः भगवदीयत्वात्। दाने प्रतारकत्वदोषनिवृत्त्यर्थमिति नार्थः। कन्यानैकट्याभावादित्याशयेनाहुः अन्यथेति। अयाचने, कन्यामारणे। मातुलेति मातुर्भ्राता मातुलः। अयं पक्षः क्वचित् वर्तते 'त्यक्त्वा चांद्रायणं चरे'दिति वाक्ये तादृशवाक्ये क्वचिन्मातुलकन्यापरिणयनपक्षाभावे तत्त्यागो नोपपद्येत। पितोग्रसेनो यथा तथा देवकोपि पितृभ्रातृत्वात्। तस्य कन्या देवकी कंसस्य स्वसा भगिनी। तस्याः कन्या तव सुतेन परिणेया। यथा माता तद्भ्राता तयोः सम्बन्धस्तुल्यः तथा पिता कंसस्तत्स्वसा देवकीति कंसपुत्रसम्बन्धस्तुल्यः। तत्र दृष्टान्तः यथेति। 'राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः प्रसह्य हृतवान् कृष्णः राजन् राज्ञां प्रपश्यता'मिति वाक्यात्। पितृष्वसुः वसुदेवभगिन्याः तनयामित्यर्थः। स्नुषा भवतीति ष्णु प्रस्रवणे। स्नु व्रश्चिकृत्यृषिभ्यः किदिति सः। षत्वम् 'समाः स्नुषाजनीवध्व' इतिकोशात्। त्रीणि पुत्रभार्यायां इति व्याख्यानम्। तथापि 'समा' इति पदस्यान्यत्रापि शक्तिमाहुः अनेनेति। स्नुषेति पुत्रीपुत्रभार्यासमपददानेन समतया भ्रातृभगिन्योः पुत्रिकेतिवक्ष्यमाणत्वात्। पुत्रिकेतिवक्ष्यमाणपदे तवपदव्यवहितस्य देवीपदस्य नान्वय इति यशोदादेवकीकंसानां समा पुत्रिकेयमिति सहजमिति कन्यया सह प्रादुर्भूतम्। पुत्र एवेति नवमस्कन्धेऽनुक्तेरेवकारः। व्याख्यानतो विशेषप्रतिपत्तेराहुः त्वं पुत्रजननेति। तवापि पुत्रो भविष्यतीति पुत्रिकाधर्मेणापि॥ ४॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

श्रीमद्भागवतजी के दशम स्कन्ध के जन्मप्रकरण के चार अध्यायों में से प्रथम तीन अध्यायों में क्रमशः (१) हेतु (२) उद्यम (३) रूपान्तर स्वीकरण ये तीन विषय आये। प्रथम अध्याय में भगवान के भूतल पर पधारने के कारणरूप भक्तजन के दुःखों का निरूपण किया है। द्वितीयाध्याय में चतुर्भुज से द्विभुजरूप को स्वीकार करना यह रूपान्तर स्वीकरण है इसका वर्णन तृतीयाध्याय में है। अब इस चतुर्थाध्याय में माया के कार्य का निरूपण होने से "कापट्य" नाम का चतुर्थ विषय का निरूपण किया जा रहा है और धर्मरक्षार्थ अनिरुद्धव्यूह का प्राकट्य भी इसी अध्याय में कहा गया है। किसी से जिसका अवरोध नहीं किया जावे वही अनिरुद्ध है और जो किसी से अवरुद्ध नहीं होता वही धर्म की रक्षा कर पाता

है। परन्तु धर्मरक्षण की तभी आवश्यकता पड़ती है जब माया अधर्म का प्रसार करे। इसी अन्तिम बात का निरूपण नीचे की कारिका से किया जा रहा है।

कारिकार्थ :— प्रथम कारिका—**मायायाः कार्यमधुना चतुर्थे विनिरूप्यते**—अब आचार्यचरण प्रथम कारिका में आज्ञा करते हैं कि इस चतुर्थ अध्याय में सब को दुःख देना, धर्म को नष्ट करना आदि जो माया के कार्य हैं उनका निरूपण करते हैं। यदि माया ऐसा कार्य नहीं करती तो माता देवकी जी को बन्धन से छुड़ाना, सबको सुख देना, तथा धर्मरक्षा आदि कार्यों के करने के लिये भगवान् के पधारने की आवश्यकता नहीं होती। अतः भगवान् के इन सर्व कार्यों में "भक्तों को दुःख देना आदि माया के कार्य ही" कारण हैं माया यदि कंस द्वारा भक्तों को दुःख दिलाना आदि कार्य न करती तो भगवान् के उपरोक्त कार्य भी नहीं होते ॥ १ ॥

द्वितीय कारिका—**ज्ञापने दुःखसुखदे ततोऽपि ज्ञापने तथा**—अब आचार्य द्वितीय कारिका में जतातें है कि माया ने रुदन कर के द्वारपालों को यह बताया कि मैं उत्पन्न हो गई हूं (१) इस के पश्चात् गृहरक्षकों ने भी कंस को बालक का जन्म होना बताया (२) ये दोनों बातें दूसरी कारिका के प्रारभ में आये प्रथमा द्विवचनान्त "ज्ञापने" पद से बताई गई है। यह "ज्ञापने" प्रथमा विभक्ति का द्विवचनान्त पद है। अत एव माया का अपने आप को बताना और कंस को रक्षकों द्वारा सूचित कराना, ये दो कार्य माया के कहे गये हैं। कारिका के द्वितीय पाद में आया हुआ ज्ञापने पद का तात्पर्य यह है कि माया के ये कार्य वसुदेवादि को दुःख देने वाले और कंस को सुख देने वाले हुए। बाद में माया ने **जातः खलु तवान्तकृत्** "तेरा मारने वाला कहीं पैदा हो गया है" ऐसा कहा (१) और इसी बात को कंस ने अपने मन्त्रियों को बताया। (२) यह दो बात कारिका में आये दूसरे "ज्ञापने" पद से कही है। ये दोनों कार्य भी भक्तों को दुःख देने वाले और कंसादि को सुख देने वाले हुए। यदि माया यह कार्य नहीं करती तो कंस और कंस के सेवक धर्मनाश के लिये प्रयत्नशील नहीं होते ॥ २ ॥

तामसप्रभुके राज्ये कुतो धर्मस्तु तद्गतः—अब आचार्यचरण तृतीय कारिका में कहते हैं कि भगवान् का अवतार तो धर्मरक्षा के लिये होता है तो यह अवतार धर्मनाश में कारण कैसे बना ? क्योंकि भगवान् के प्राकट्य के भय से ही कंस ने ये सब पाप किये इस लिये भगवान् का प्राकट्य ही इस अधर्म में कारण हुआ किन्तु यह भगवान के कारण होना उचित नहीं था यदि ऐसी आशंका करें तो इस पर कहते हैं कि कंस तामसवृत्ति का राजा था अतः उसके राज्य में पशु आदि तथा उनसे होने वाले यज्ञादि धर्म सब ही तामस थे। इस कारण उनका नाश कराना आवश्यक था ॥ ३ ॥

ब्राह्मणा अपि तद्देशे स्वभावात् तामसा मताः—अब आचार्यचरण चतुर्थ कारिका में जताते हैं कि यज्ञादि धर्म-संपादन में अंगभूत जो ब्राह्मण थे वे भी उस प्रदेश में स्वभावतः तामसवृत्ति के थे एवं वह समय भी तामस था। इसलिये कंस के द्वारा निवृत्ति कराने के अनन्तर जो धर्म स्थापित किया गया वह सात्त्विक धर्म हुआ ॥ ४ ॥

भगवत्कार्यवैपरीत्यं मायाकार्यम् इति ज्ञापयितुमुद्घाटितकपाटानां द्वाराणां पुनः पिधानमाह।

भगवत्कार्यवैपरीत्यं मायाकार्यम् भगवान् का कार्य आवरणों को दूर करना एवं बन्धन से मुक्त करना है इसलिये भगवान् के पधारने पर सब द्वार खुल गये और श्री वसुदेवजी बन्धन से मुक्त हो गये। लेकिन माया का कार्य भगवान् के कार्य से विपरीत प्रकार का होता है, माया धर्म का नाश करती है और जीवों को बन्धन में डालती है तथा आवरण को पैदा करती है। इसी लिये माया के आने से आवरणरूप बाहर भीतर के द्वारों के किंवाड बन्ध हो गये और वसुदेवजी पहिले की भांति बन्धन में पड़ गये। इस विषय को नीचे के श्लोक में कहते हैं।

बहिरन्तरिति पुरो बहिर्द्वाराण्यथान्तरद्वाराणि च आचार्यचरण कहते हैं कि माया के आने पर मथुरा नगरी के बाहर एवं भीतर के सभी दरवाजे पहिले की तरह बन्द हो गये। यदि गृहपालों के जागने तक दरवाजे खुले ही रहते और श्री वसुदेवजी बन्धनमुक्त पाये जाते तो द्वारपालों को विलक्षणता मालूम पड़ती और वे यह समझ जाते कि वसुदेवजी ने ही गुप्त-रूप में कुछ गडबडी की है इसलिये माया ने पुनः पहिले की स्थिति पैदा कर दी। भगवान् के प्राकट्य से, पूर्व में भगवान् के दर्शन और वचनामृतों से वसुदेवजी देवकीजी के निवृत्त हुए भय की पुनः उत्पत्ति करने के लिये ही मायाने रोदन किया, बालिका के रोदन से सब प्रसूतिगृह के रक्षक द्वारपाल जाग गये, यह प्रसङ्ग श्लोक में आये हुए "ततः" पद से कहा है। यहां "ततः" पद का "इसके अनन्तर" यह अर्थ नहीं है किन्तु "उस रोदन से" ऐसा अर्थ है अर्थात् उत्पन्न हुए बालक के रोदन से प्रसूतिगृह के रक्षक ठीक रूप से जाग गये ॥ १ ॥

तेषां कृत्यमाह ते त्विति देवक्यादिभिः प्रार्थिता अपि— आचार्यचरण कहते हैं कि व्यास महर्षि "ते तु" श्लोक से द्वारपालों के कार्य को कहते हैं। उस समय उन रक्षकों को देवकी आदि ने प्रार्थना की कि तुम जाकर राजा-कंस को बालक जन्मकी कथा न कहो परन्तु उन्होंने उनकी प्रार्थना को न माना और कंस को कह ही दिया; यह आशय श्लोक में आये "तु

अव्यय'' से कहा गया है श्लोक में आये "**तूर्णं**" पद का यह अभिप्राय है कि रक्षकों ने बीच में दूसरा कोई कार्य नहीं किया और शीघ्रता से जाकर कहा कि देवकी के गर्भ का जन्म हो गया है। रक्षकों ने विचार किया कि यदि हम दूर से ही कहेंगे तो वसुदेवजी व देवकी अपने बालक को संभव है छिपा दें, इसलिये कंस के समीप में जाकर उन्होंने कहा। रक्षकों ने कन्या या बालक का विशेष निर्देश नहीं करते हुए यही कहा कि देवकी के सन्तान हो गया। इस श्लोक में आया हुआ "तत्" पद प्रसिद्धार्थक है, उसका अर्थ यह है कि देवकी के गर्भ से-"प्रसिद्ध आठवें सन्तान ने जन्म ले लिया" है यह बात कंस को कही। श्लोक में आये "**भोजराजाय**" पद का अभिप्राय यह है कि वह कंस भोजवंशियों का राजा है। राजा की आज्ञा का पूरा पालन नहीं किया जाय तो वह दण्ड देता हैं। इस लिये रक्षकों ने सोचा कि यदि हमने राजा को सूचना नहीं दी तो कंस, राजा होने से हमें दण्ड देगा। इसी भय के कारण बालक के जन्म की सूचना कंस को दे दिया जो राजा कंस इस संवाद की प्रतीक्षा ही में था, प्रतीक्षा का कारण यह था कि वह उस गर्भ से उद्विग्न था ॥ २ ॥

ततः कंसस्य कृत्यमाह–आचार्यचरण कहते हैं कि रक्षकों से सूचना प्राप्त होने के बाद कंस का कार्य '**स तल्पात्तूर्णम्**' इत्यादि श्लोक से कहते हैं कि वह कंस शय्या पर पड़ा हुआ ही था, वह महान बलवान कंस भी तत्काल शय्या से शीघ्र बिना कुछ विचार के प्रथम उठ बैठा, बाद में 'यह मेरा काल है' यह विचार कर घबड़ाया, कि अब आगे मेरे जीवित रहने की सम्भावना नहीं, यह अष्टम बालक भगवान् ही मेरा मृत्युदायी है, उस समय के बाद सब अङ्ग विकल हो गये, वह बेचैन हो गया, शीघ्रता के कारण अन्य सब कार्य छोड़कर किसी भी साधन के अनुसन्धान को न कर सका, मार्ग भी उसे ज्ञात न रहा, ठोकर खाता हुआ, बिखरे हुए केश, देहानुसन्धान रहित वह प्रसवस्थान को पहुँचा ॥ ३ ॥

कारिकाः—स्वकीया कन्यका चेयमतो मह्यं प्रदीयताम्—अब श्रीमदाचार्यचरण चतुर्थ श्लोक के विवेचन के पूर्व में "**स्वकीया कन्यका**" इस कारिका से हेतु-कार्य-फल इन तीन विषयों का आगे के तीन श्लोको में निरूपण किया जायगा ऐसी आज्ञा करते हैं। देवकी पहिले श्लोक में यह कहती है कि तेरी यह कन्या है यदि दैवसंकेत से भविष्य में तेरे लड़के की स्त्री होने से तेरी यह कन्या के समान है इसलिये इसे तू मुझे दे दे क्योंकि बहिन दान का पात्र है अतः मुझे उसे देना ही चाहिये। यह विषय यहां क्रमशः तीन श्लोकों में कहा है। इन तीन श्लोकों में से प्रथम श्लोक में "**तमाह भ्रातरं देवी**" से तुझे पुत्रवधू रूप फल प्राप्त होगा; "**पुत्रिकैका प्रदीयताम्**" इस दूसरे श्लोक के अंश से दान रूप कार्य का निरूपण और "**नन्वहं ते ह्यवरजा**" से हेतु का निरूपण किया है। शंका होती है कि पहिले के श्लोक में फल का निरूपण है, दूसरे श्लोक में दान रूप कार्य का और तीसरे श्लोक में हेतु का निरूपण है तो कारिका में भी उसी प्रकार से फल, कार्य और हेतु का निर्देश होना चाहिये, फिर हेतु-कार्य-फल ऐसा उलटा उल्लेख क्यों किया गया ? इसका समाधान यह किया है कि लोक में देखा गया है कि पहिले कारण होता है फिर कार्य और तत्पश्चात् फल। बस, इसी प्रसिद्धि को लेकर कारिका में "**हेतुकार्यफलैः**" ऐसा कहा है। उस प्रसिद्ध, क्रूर अपने भाई कंस को देवकी जी ने कहा। देवकी यद्यपि देवी रूप है अर्थात् देवता रूप है, देवता सात्त्विक होते हैं, सत्त्वगुण से "**सत्त्वात् संजायते ज्ञानं**" के अनुसार ज्ञान होता है इसलिये देवकी ज्ञानवती भी है परन्तु स्त्रीस्वभाववश, उसने कन्या को कंस से मांगा। शङ्का होती है कि ज्ञान जिसमें होता है उसमें वैराग्य भी होता है तो फिर देवकी जी का उस कन्या में इतना मोह क्यों है ? तो कहते हैं कि स्त्री स्वभाव वश देवकी जी ने ऐसा किया क्योंकि "**स्वभावो मूर्ध्नि वर्तते**" जो जीव का स्वभाव है वह सबके शिर पर रहता है अतः स्त्रीस्वभाव के अधीन होकर ऐसा किया। स्त्री में स्वभावतः अधिक मोह होता है। देवकी देवी है इसलिये उसे प्रत्येक कार्य की सिद्धि के लिये सब उपायों का ज्ञान है, वह यह समझती है कि कंस अत्यन्त उग्र है इसलिये "**उग्रं स्तुतिभिः**" उग्र व्यक्ति को प्रशंसा से प्रसन्न करना चाहिये इस न्याय के अनुसार दीनता दिखाते हुए इसे प्रशंसा से प्रसन्न करना चाहिये इस विचार से जानबूझ कर भी उस देवकी ने कन्या को छुड़ाने के लिये अपनी दीनता दिखाई। यहां यह शंका होती है कि देवकी देवी होने से देवता थी उसे तो मिथ्या नहीं बोलना चाहिये था क्योंकि "**सत्यं देवेषु**" देवताओं में सत्य की स्थिति है ऐसा श्रुति भगवती ने कहा है। ऐसी दशा में देवकी ने "यह मेरी अन्तिम सन्तान है" यह मिथ्या कैसे कहा तो कहते हैं "**स्त्रीषु नर्मविवाहेषु वृत्त्यर्थे प्राणसंकटे**" इस शास्त्र वचन के अनुसार किसी के प्राणों पर संकट हो तो मिथ्या बोलना निन्दित नहीं है। इसलिये देवकी जी ने मिथ्या कहा सो शास्त्रसंमत कार्य किया। श्लोक में जो देवकी के लिये "**कृपणा**" पद का विशेषण दिया है उस पद का अर्थ बिना विचारे मांगने वाली है, जैसा कि कृपण का लक्षण कहा है "**कृपणः स तु विज्ञेयो योऽनालोचितयाचकः**" कृपण वह होता है जो यह नहीं समझता कि किससे याचना करनी चाहिये और किससे नहीं। देवकी ने कंस के स्वरूप को न समझ याचना की इसलिये वह कृपणा हुई। इस प्रकार कंस के स्वरूप को न जानने वाली वह देवकी करुण याने कृपण हो जैसे कंस से बोली। देवकी सती थी इस लिये उसे यह ज्ञान था कि मैं क्षत्रिया हूँ, क्षत्रिय की याचना नहीं करनी चाहिये तो भी यह याचना का समय है इस लिये मुझे याचना करनी ही चाहिये, यदि मेरी याचना पर भगवान् के सर्वात्मक होने से कदाचित् भगवान् कंस को कन्या देने के लिये प्रेरित करदे तो कंस का अनिष्ट कभी भी नहीं

होगा। अथवा सती पद का दूसरा यह भी अभिप्राय है कि देवकी सन्नारी है। जैसे सत्पुरुष अनिष्ट करने वाले का भी हित चाहते हैं वैसे ही देवकी सत्स्त्री होने से सोचती है कि यदि कंस को भगवान् कन्या देने के लिये प्रेरित कर दें तो कंस का भी अनिष्ट न हो कन्या का भी रक्षण हो जाय। यहां "सती" पद का यह भी अभिप्राय है कि सती स्त्री सदा पति का इष्ट ही चिन्तन करती है इस लिये उसने विचार किया कि यदि मैं कंस से कन्या को छुड़ाने का आग्रह नहीं करूँगी तो लोग मेरे पति वसुदेवजी को यह दोष लगायेंगे कि वसुदेवजी कैसे व्यक्ति हैं जो अपने पुत्र को तो रख आये और मारने के लिये दूसरे की कन्या को ले आये। देवकी ने आग्रह पूर्वक जब कन्या को छुड़ाने का प्रयत्न किया तो वसुदेवजी को उक्त दोष नहीं लगा क्योंकि ऐसी स्थिति में विवशता मालूम पड़ी। यहां "स्नुषा" पद का तात्पर्य यह है कि मामा की लड़की के साथ जैसे विवाह करने का पक्ष है वैसे ही पितृस्वसा बूवा की लड़की के साथ विवाह करने का पक्ष है। जैसे भगवान् ने मित्रविन्दा के साथ विवाह किया परन्तु यह सब कुछ तब ही हो सकता है जब कंस का पुत्र देवकी की कन्या के साथ विवाह करे। परंतु कंस के पुत्र नहीं है तो ऐसा सम्बन्ध न बनने से देवकी की कन्या कंस की स्नुषा पुत्रवधू कैसे होगी तो देवकी कहती है कि हे भाई! हे कल्याण! तू कल्याण-रूप है अतः पुत्र पैदा करने में समर्थ है क्योंकि कल्याण रूप होने से तेरे पुत्र अवश्य होगा और एक बात यह भी है कि मेरी सन्तान की यदि तू रक्षा करेगा तो तेरे भी पुत्र अवश्य होगा। यदि तू समझे कि यह मेरी पुत्रवधू नहीं होगी तब भी यह स्त्री जाति की होने से मारने योग्य नहीं है। भैया ऐसा तुझे विवेक है भी; यदि ऐसा विवेक न होता तो मुझे ही तू ने क्यों न मार दिया। तू ने स्वयं कहा है कि "स्त्रियाः स्वसुर्गुरुमत्या वधोऽयम" सबसे प्रथम स्त्री जाति को ही मारना उचित नहीं है फिर सगर्भा स्त्री उसमें भी छोटी भगिनी का वध कैसे किया जाय! भैया यदि तेरे ही यह वचन है तो यह भी कन्या है तो मत मार मुझे दे दे तेरा भला होगा ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मायावाक्यं समाकर्ण्य कंसो भीतोऽथ मन्त्रिभिः। मन्त्रं समर्थयामास चतुर्थे तन्निरूप्यते ॥ १ ॥

एवं सप्रपञ्चं भगवदवतारं निरूप्याथ तदग्रिमं वृत्तं निरूपयति—बहिरिति। बहिर्द्वारः पुरद्वारः अन्तःपुरद्वारश्च सर्वाः पूर्ववदेवावृताः मायाप्रभावेण स्वयमेव पिहिता जाताः। तावत् सा कन्याऽपि न रुरोद। ततस्तदनन्तरं च बालध्वनिं कन्यारोदनं श्रुत्वा वसुदेवाधिष्ठितगृहपालाः समुत्थिताः ॥ १ ॥ ते गृहपालाः तूर्णं शीघ्रमुपव्रज्य कंससमीपं गत्वा यत् गर्भजन्म उद्विग्नो भीतः सन् प्रतीक्षते तत् देवक्या अष्टमगर्भजन्म भोजराजाय कंसाय आचख्युः ॥ २ ॥ स कंसः श्रुत्वा तूर्णमेव तल्पादुत्थाय तूर्णमेव सूतीगृहमगादित्यन्वयः। तत्र हेतुमाह– कालोऽयमिति। तद्वधसमयोऽयमित्यर्थः। मृत्युरयमिति वार्थः। इति कृत्वा विह्वलः व्याकुल इति। व्याकुलतालिङ्गमाह—प्रस्खलन् विक्षिप्तगतिः सन्, तथा मुक्ता विक्षिप्ता मूर्धजाः केशा यस्य स इति। अनेन तस्य प्रस्थान एवापशकुनं जातमिति सूचितम्। अत एवाग्रे कन्यामारणरूपेष्टाप्राप्तिः शोकरूपानिष्टप्राप्तिश्चेति ज्ञेयम् ॥ ३ ॥ तं भ्रातरं देवी देवकी करुणं दैन्यं यथा स्यात्तथाऽऽहेत्यन्वयः। तत्र हेतुमाह– कृपणेति। पूर्वबालकवधस्मरणेन दीनेत्यर्थः। हेत्वन्तरमाह— सतीति। धर्मबुद्धिरित्यर्थः। "स्वपुत्रं सङ्गोप्य तत्प्रतिनिधितया मारणार्थं परकीयकन्याप्रदाने महानधर्म" इति ज्ञात्वा तन्मा भूदित्याशयवतीत्याशयः। तद्वाक्यमाह—स्नुषेयमिति सार्द्धद्वयेन। प्रसादित एव त्यक्ष्यतीत्याशयेन दुष्टमपि सुजनत्वेन सम्बोधयति– कल्याणेति। स्त्रियं हन्तुं नार्हसीति स्त्रियाः सकाशात्तव भयाभावात्, एतद्वधे दोषाधिक्याच्चेत्याशयः। दीना चेयमित्याह— स्नुषेयं तवेति। स्नुषावत्त्वया पालनयोग्येत्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

तुर्ये चण्डीगिरो भीतः कंसो बालादिहिंसनम्। दुर्मन्त्र्युक्तं हितं मेने श्लोकास्तत्राद्रिवार्द्धयः (४७) ॥

चत्वार्युवाचेति सार्द्धाः सप्तवेदा (४७।) अनुष्टुभः ॥ ४ ॥ बहिरिति द्वयम् ॥ बहिर्द्वारः पुरद्वारः अन्तःपुरद्वारश्च सर्वाः पूर्ववदेवावृता मायाप्रभावेण स्वयमेव पिहिता जाताः। ततो बालध्वनिं कन्यारोदनं श्रुत्वा समुत्थिताः वसुदेवाधिष्ठितगृहपालाः तूर्णं शीघ्रमुपव्रज्य कंससमीपं गत्वा यद्गर्भजन्म उद्विग्नो भीतः सन् प्रतीक्षते तत् देवक्या अष्टमगर्भजन्म भोजराजाय कंसाय आचख्युः ॥ १–२ ॥ स तल्पादिति ॥ स कंसः तल्पात् शयनात् तूर्णमुत्थाय बालं हन्तुमयमेव काल इति। यद्वा। अयं बालः मम कालो मृत्युरस्तीति एवं विह्वलो व्याकुलः प्रस्खलन् विक्षिप्तगतिः सन् मुक्ताः विक्षिप्ता मूर्द्धजाः केशा यस्य स तादृशः सन् तूर्णमेव सूतीगृहमगात् ॥ ३ ॥ तमाहेति ॥ कृपणा दीना सती सद्बुद्धिः देवी देवकी तं भ्रातरं करुणं दैन्यसहितं यथा स्यात्तथा आह स्म। हे कल्याण! अष्टमगर्भे कन्योत्पत्त्या कल्याण इयं तव स्नुषा पुत्रवधूर्भविष्यति स्नुषावत् पाल्या वा अतः स्त्रियम् असमर्थामवध्यां चेत्यर्थः। एतां हन्तुं मा अर्हसि ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चण्डिकावाक्यमाकर्ण्य चतुर्थेऽतिभयाकुलः । बालादेर्हिसनं कंसो दुर्मन्त्र्युक्तमवेद्धितम् ।। १ ।।

एवं भगवतारं सप्रपञ्चं प्रस्तुत्याथेतः प्रभृति कंसोद्योगं प्रस्तौति । बहिरिति । यदा वसुदेवः पूर्ववदास्ते तदेति शेषः । बहिः अन्तश्च, सर्वाः पुरद्वारः, पूर्ववत् आवृताः । ततः, बालध्वनिं शिशुरोदनं, श्रुत्वा आकर्ण्य, गृहपालाः वसुदेवाधिष्ठितकारागृहपालाः, समुत्थिताः बभूवुः ।। १ ।। ते त्विति । ते तु ते गृहपाला अपि, तूर्णं शीघ्रं, उपव्रज्य कंससमीपमेत्य, देवक्याः, तत् गर्भजन्म गर्भस्थशिशूत्पत्तिं, भोजराजाय कंसाय, आचख्युः । कथंभूतं गर्भजन्म, यद्गर्भजन्म एव, कंसः उद्विग्नः मृत्युभयभीतः सन्, प्रतीक्षते तथाभूतमित्यर्थः ।। २ ।। स इति । स भोजराजः, कालः अयं, मम मृत्युरेवायं जात इति बुद्ध्वेत्यर्थः । यद्वा, अयमेव काल एष एवैतद्वधकालोऽस्मिन् काले एतद्वधेऽविहितेऽसावेव मां हन्यादिति बुद्ध्वेत्यर्थः । तूर्णं तत्क्षणमेव, तल्पाच्छयनात्, उत्थाय, विह्वलः कातरः अनवहित इति यावत् । अत एव, प्रस्खलन् विक्षिप्तगतिः, मुक्ता विक्षिप्ता मूर्द्धजाः केशा यस्य स तथाभूतः सन्, तूर्णं शीघ्रं, सूतीगृहं सूतिकागृहं, अगात्प्राप्तवान् ।। ३ ।। तमिति । तमुक्तप्रकारेणागतं, भ्रातरं कंसं, देवी देवकी, कृपणा दीना सती, करुणं यथा तथा, आहोवाच । तदेवाह । स्नुषेयमिति सार्द्धद्वयेन । हे कल्याण, तव इयं स्नुषा पुत्रभार्या, तव पुत्रेण विवाहयिष्यामीत्यर्थः । अतः, एनां स्त्रियं, त्वं हन्तुं, मा अर्हसि योग्यो न भवसि ।। ४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

बहिरन्त इति : १०.४ १.

स्वशक्तिमैशीमपि शक्तिमैशी विबोधयन्त्यात्मनि सा तदानीम् । चक्रेऽखिलद्वारपिधानयोगं तद्द्वारस्थनिद्राऽपगमं च युक्तम् ।। १ ।।

तमाहेति : १०.४.४.

स्वकार्यमात्रार्पितदृक्परस्य विनाशयेदिष्टमसौ कृतघ्नः । भवत्यतो युक्तमधात् प्रयत्नं सती यशोदा तनयावनार्थम् ।। २ ।।
स्वापत्यादप्यलं रक्ष्यं स्वाप्तापत्यमितीरितम् । सल्लक्षणं सदा सद्भिरिति साऽऽसीत्प्रयत्नभाक् ।। ३ ।।
पश्यन्त्या अपि रूपमैशमुदभून्मायाश्रितायास्तदा देवक्या हृदये ममत्वमिति यत् तद्युक्तमेतत् पुनः ।
चित्रं भूर्यविवेकिनोऽपि ममतामायासमालम्बिनः कंसस्याविरभून्न चेतसि मनागज्ञाततत्त्वस्थितेः ।। ४ ।।

कृष्णप्रिया

श्री शुकदेवजी ने कहा कि राजन् जब श्री वसुदेवजी लौट आये तब मथुरा नगर के बाहर तथा भीतर के सभी दरवाजे पहिले की तरह बन्द हो गये । पुनः बालक के रोने की ध्वनि को सुनकर उसमें प्रसूतिगृह के रक्षक ठीकरूप से जाग गये ।। १ ।। वे द्वारपाल शीघ्र भोजराज कंस के पास पहुँचे और आठवें गर्भ ने जन्म ले लिया यह कहा । कंस यही प्रतीक्षा कर रहा था कि बालक का जन्म कब होगा प्रतीक्षा में कारण यह था कि वह उससे उद्विग्न आकुल व्याकुल था ।। २ ।। द्वारपालों की बात सुनते ही शीघ्रता से कंस शय्या से उठ खड़ा हुआ और "मेरा काल पैदा हो गया" इस विचार से विह्वल होकर लड़खड़ाता हुआ केश बिखरे हुए ही प्रसूतिगृह की ओर वेग से पहुँच गया ।। ३ ।। उस कंस से बिना विचार किये ही मांगने वाली वह देवकी देवी करुण की तरह अपने भाई से बोली कि हे भाई ! यह कन्या तेरी पुत्रवधु होगी इसलिये, और स्त्री जाति की होने से तुझे इसे मारना ठीक नहीं है ।। ४ ।।

बहवो हिंसिता भ्रातः शिशवः पावकोपमाः । त्वया दैवविसृष्टेन पुत्रिकैका प्रदीयताम् ।। ५ ।।
नन्वहं ते ह्यवरजा दीना हतसुता प्रभो । दातुमर्हसि मन्दाया अङ्गेमां चरमां प्रजाम् ।। ६ ।।

[1]

उपगुह्यात्मजामेवं [2]रुदन्त्या दीनदीनवत् । याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ।। ७ ।।
तां गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुताम् । अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ।। ८ ।।

कर्दमक्षमा

अन्वयः—भ्रातः पावकोपमाः बहवः शिशवः दैवविसृष्टेन त्वया हिंसिताः एका कन्या (त्वया) प्रदीयताम् ।। ५ ।। प्रभो ! अहम् हतसुता दीना ते हि अवरजा हे अङ्ग । मन्दायाः इमाम् चरमां प्रजाम् दातुम् अर्हसि ।। ६ ।। आत्मजाम् इति उपगुह्य दीनदीनवत् रुदन्त्या एवं याचितः विनिर्भर्त्स्य खलः हस्तात् ताम् आचिच्छिदे ।।७।। जातमात्राम् तां स्वसुः सुताम् चरणयोः गृहीत्वा स्वार्थोन्मूलितसौहृदः अथ शिलापृष्ठे अपोथयत् ।। ८ ।।

---

१. श्रीशुक उवाच-श्रीधर. वंशी. गिरि भक्त. । २. रुदत्या—श्रीधर. वंशी. ; रुदन्त्या—गिरि. भक्त. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अंग हे भ्रातः ॥ ६ ॥ दीनदीनवत् दीनादपि दीनवन्न तु तथा। पुत्रस्यान्यत्र नीतत्वात्सा च योगमायेति ज्ञातत्वात्। याचितोऽप्याचिच्छिदे हस्तादाकृष्य जग्राह ॥ ७ ॥ अपोथयद्बलेन चिक्षेप ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बह्व इति निर्दयत्वमुक्त्वा शंकमानाह—दैवेति। ममैवैतद्दुर्दिष्टं तव को दोष इति भावः। प्रदीयतामिति। त्वमपि मां शून्यक्रोडां मा कुर्वित्यर्थः ॥ ५ ॥ चरमाम्। इतोग्रे मम संतत्याशा नेति भावः ॥ ६ ॥ बलाद्ग्रहणे हेतुः—खल इति ॥ ७ ॥ 'अर्थी दोषं न पश्यति' इति न्यायमाश्रित्याह– स्वार्थेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भ्रातरिति स्नेहं जनयति, पावकवत् तेजस्विनः बह्व इति निर्दयत्वमुक्त्वा शङ्कमानाह—दैवेति। एकेति गूढोपालम्भं दैन्यं कार्पण्यात् ॥ ५ ॥ स्नेहमुत्पादयन्ती पुनरपि तथैव प्रार्थयते—नन्विति। निश्चये हि यतः दीना बन्धनागारवासादिना प्रभो हे अदेयदानेऽपि समर्थ! मन्दायै पुत्रभाग्यहीनायै मे मह्यं इमामिति पाठे इमामपीत्यर्थः। सद्योजातां किञ्चिदपि कर्तुमक्षमां ननु अष्टमगर्भत्वादियं कन्याऽवश्यहन्तव्या यतः चरमां वार्द्धक्येन त्वद्भयेनाप्यन्यापत्योत्पत्तिसम्भावनानिवृत्तेः ॥ ६ ॥ आत्मजामिति। श्रीयशोदया सहास्याः साख्येनाभिन्नमन्यत्वविवक्षया अत एव दीनदीनवदिति दीनदीनो यो जनस्तद्वत् कर्मधारयवदुत्तरपदेष्वित्यधिकारस्थेन "प्रकारे गुणवचनस्य" (८।१।१२) इति सूत्रेण द्विरुक्तथा हि दीनदीनः सिद्ध्यति "भीतभीत इव शीतमयूखः" इतिवत् मायादित्वज्ञानेऽपि स्नेहलस्वभावेन "क्रूरे नीचेऽधमे खलः" इति विश्वः ॥ ७ ॥ खलत्वमेव दर्शयति—तामिति। जातमात्रां गर्भजलादिक्लिन्नामित्यर्थः। तथा च श्रीहरिवंशे "सा गर्भशयनक्लिष्टा गर्भाम्बुक्लिन्नमूर्द्धजा" इति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

भ्रातरिति स्नेहं जनयति। पावकोपमास्तेजसा जाज्वल्यमाना इत्यर्थः। दैवम् तेषामेव तादृगदृष्टं तेनैव प्रेरितेनेति तत्र तव दोषो नास्तीति भावः; तत्त्ववस्तु परमनिर्दयत्वमुक्तम्, तादृश-बहुल-बालक-हननात्। एकेति पश्चादन्यपुत्रजन्माभावात्; अतएव वक्ष्यति—चरमामिति ॥ ५ ॥ कार्पण्यात् स्नेहमुत्पादयन्ती पुनरपि तथैव प्रार्थयते– नन्विति निश्चये; हि यतो दीना बन्धनागारवासादिना; प्रभो! हे अदेयदानेऽपि समर्थ! मन्दायाः पुत्रभाग्यहीनाया मे—चतुर्थ्यर्थे षष्ठी। 'इमाम्' इति पाठे सद्योजातां किञ्चिदपि कर्तुमक्षमाम् नन्वष्टमत्वादियमवश्यं हन्तव्या, अन्या जनिष्यमाणा दातव्या? तत्राह—चरमामिति, वार्द्धक्येन त्वद्भयेनाप्यन्यापत्योत्पत्ति-सम्भावना-निवृत्तेः। प्रजामपत्यम् श्लेषेण राज्ञस्तव प्रजावत् परिपाल्यामित्यर्थः ॥ ६ ॥ आत्मजमिति स्वपुत्रपरिवृत्त्या नीतत्वात्, किंवा सख्येन श्रीयशोदया महाभेदात्। दीनेति तैर्व्याख्यातम्। यद्वा, दीनादपि दीनः परमदुःखितो जनो यथा, तथैव रुदत्या निजपुत्राणां मारणादपि श्रीयशोदाकन्या–मारणे दुःखविशेषात् ॥ ७ ॥ खलत्वमेव दर्शयति—तामिति। जातमात्रां गर्भजलादिक्लिन्नामित्यर्थः; तथा च श्रीहरिवंशे (विष्णु०-प० ४।३४)—'सा गर्भशयनक्लिष्टा गर्भाम्बुक्लिन्नमूर्द्धजा' इति। स्वसुः सुतामित्यवध्यत्वं बोधयति। स्वार्थं स्वदेहमात्ररक्षार्थमुन्मूलितं सौहृदं येन सः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आचिच्छिदे हृतवान् ॥ ७ ॥ अपोथयत् अताडयत् स्वार्थोन्मीलितसौहृदः स्वप्रयोजनार्थं त्यक्तस्नेहः ॥ ८–१३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दैवनिसृष्टेन दैवप्रेरितेन दैवेन मत्पुत्रमृत्युतया कल्पितेनेत्यर्थः। त्वया बह्वः पावकवत्प्रकाशमाना मम शिशवो हताः हे भ्रातः! इयमेका पुत्रिका प्रदीयताम् ॥ ५ ॥ ननु, हे भ्रातः! अहं तवावरजा कनीयसी दीना च हताः सुताः यस्यास्तथाभूता चातो हे प्रभो अङ्ग हे भ्रातः मन्दभाग्यायाः ममैकां चरमामन्त्यां प्रजां कन्यां दातुमर्हसीति ॥ ६ ॥ इत्थमात्मजामुपगुह्योरसि बाहुभ्यां संवेष्ट्य दीनदीनवत् दीनादपि दीनस्तद्वत्नितरां दीनवदित्यर्थः। वक्करणेन स्वसुतस्यान्यत्र स्थितत्वाद्वस्तुतो दैन्याभावः सूच्यते रुदन्त्या तया याचितोऽपि खलो दुरात्मा कंसस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे हृतवान् ॥ ७ ॥ तां जातमात्रामेव न तु कृतनालच्छेदाम् इत्यर्थः। भगिन्याः सुतां चरणयोर्गृहीत्वा स्वप्रयोजनार्थं त्यक्तभगिनीसत्सुतास्नेहः शिलापृष्ठेऽपोथयदताडयत् ॥८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दैवेन निसृष्टेन प्रेरितेन ॥ ५ ॥ चरमां प्रजाम् अवरसन्ततिम् ॥ ६ ॥ आचिच्छिदे आकृष्टवान् ॥ ७ ॥ अपोथयत् अताडयत् स्वार्थेन स्वप्रयोजनेन उन्मूलितम् उत्पादितं सौहृदं स्नेहलक्षणं यस्य स तथा ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आत्मजामिति भिन्नात्मतयैवोक्तम् ॥ ७-८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बहव इति निर्दयत्वमुक्त्वा शङ्कमानाऽऽह—दैवेति। ममैवैतद्दुरदृष्टं तव को दोष इति भावः। प्रदीयतामित्यनेन त्वयापि मां शून्यक्रोडां मा कुर्विति दैन्यम् ॥ ५ ॥ अङ्ग, हे भ्रातः! ॥ ६ ॥ एवमनेन प्रकारेणात्मजां स्वकन्यामेवेत्यर्थः। दीनदीनवत् दीनादपि दीनजन इव न तु तथा तस्याः स्वापत्यत्वाभावात् तां देवकीम् आचिच्छिदे आकृष्य जग्राह ॥ ७ ॥ अपोथयत् बलेन चिक्षेप ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे अङ्ग हे भ्रातः ॥ ६ ॥ आत्मजामुपगुह्य दीनादपि दीनवद्रुदन्त्याः हस्तात् एवमुक्तप्रकारेण याचितोपि त्वामष्टमो गर्भो हन्तेति सामान्योक्त्या कन्यामपि ताम् आचिच्छिदे आकृष्य जग्राह आत्मजामिति आत्मजशब्दः औरसे यौगिकोपि पुत्रत्वेन परिगृहीते तु रूढः जनकात्मजेत्यादिवत् मृगं प्रति पञ्चमे आत्मजविश्लेषेति भरतोक्तेश्च तथा च पुत्रो यशोदायाः पुत्रिकादेवक्यास्तयोर्विनिमयात् अत एव नन्दस्त्वात्मजे इत्यादियोगाः सङ्गच्छन्ते ॥ ७ ॥ अपोथयत् प्रक्षाल्यवस्त्रमिव बलेन चिक्षेप ॥८-११॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

बहव इति निर्दयतामभिधाय शङ्किता आह दैवेनेति मद्दृष्टं तत्र हेतुः तव न किञ्चिद्दूषणमिति भावः ॥ ५ ॥ अवरजा कनिष्ठा भगिनी मन्दाया भाग्यहीनायाः, अङ्ग हे भ्रातः! इमां चरमां प्रजां दातुमर्हसीति अनयापि शून्यक्रोडां मा कुरु ॥ ६ ॥ आत्मजां कंसवञ्चनाय प्रकाशितात्मजाभावां तां देवीमुपगुह्य एवं पूर्वोक्तवचनायाः दीनदीनवदतिदीनजनवद्रुदन्त्या देवक्या हस्तादाचिच्छिदे आकृष्य जग्राह दीनदीनवदिति वस्तुतो न तथा भगवताश्वासितत्वात् कन्येयं देवीति ज्ञानाच्च याचितः चरमामिमां प्रजां देहीत्यर्थितोऽपि तां देवकीं निर्भर्त्स्य त्वं कपटिनी मयि मिथ्यास्नेहं करोषि अष्टमादस्माद्गर्भान्मन्मृत्युमिच्छसीति तिरस्कृत्येत्यर्थः ॥ ७ ॥ अपोथयत् उच्चैश्चिक्षेप यथा चूर्णितावयवा स्यात् ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे भ्रातः पावकोपमाः शिशवो बहवो हिंसिताः। त्वयेत्युक्त्वा पुनः क्षमापयन्त्याह। दैवनिसृष्टेनेति। अनेन न त्वदुपरि शब्द इत्युक्तवतीति ध्वन्यते। एकेयं पुत्रिका प्रदीयताम् ॥ ५ ॥ अङ्ग भ्रातरहं तेऽवरजा भगिनी ननु हतसुतेति मन्दायै मह्यमिमां चरमाम्। उभयोर्वृद्धतया भविष्यत्ताकाशा केति तात्कालिकतत्कोपोपशमनाय चरमामित्युक्तिः। प्रजां दातुमर्हसि। दीनेति च मन्दाया इति चान्वये रमां प्रजामिति कटाक्षित आन्तरङ्गिको भावोऽवसेयः। चर गृहं प्रतीति शेषः। मां रमारूपिणीप्रजामिति वा चरमामवरसन्ततिमिति व्याकुर्वते ॥ ६ ॥ किं कंसोऽसौ भगिन्या गिरं श्रुत्वा निववृत उत स्वजीवनाशतोपकृतः प्रववृते तद्विनाश इत्यत आह। उपगूह्येति। दीनदीनवत्। तत्र तस्येवेति षष्ठ्यन्ताद्वतिः। तस्या इव। आत्मजामुपगूह्यालिङ्ग्यैवं याचितोऽपि रुदन्त्या देवक्या हस्तात्तां देवकीं निर्भर्त्सयित्वाऽऽचिच्छिदे आचकर्ष। सर्वसम्भावकमाह। खल इति ॥ ७ ॥ तां स्वसुः सुतां जातमात्रां सद्यो जातां चरणयोः पादयोः। अनेन तदन्तर्गतभूगोश्चरणस्पर्शायोग्यतावत्त्वात्तदनुयानं ध्वन्यते। मुख्यकर्मत्वं तच्छब्दार्थस्य ग्रहणाधिकरणताबोधकतयोपपद्यते चरणयोरिति। महाभाष्येगोज्ञायशांसक्थिनि कर्णे वा गृहीत्वाऽऽन्तर्दयतीवत्तत्त्वनिर्णयटीकायां च शृङ्गे कर्णे वा गृहीत्वा गामिव नागमो नारायणं गमयतीत्युक्तेः। गृहीत्वा शिलापृष्ठेऽपोथयत्तताड। स्वजीवनार्थमेवोन्मूलितं सौहृदं स्नेहो यस्य स्वार्थात्स्वनाशादेप्यत उन्मूलितं सौहृदं येनेति वा। अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः ॥ ८ ॥

श्रीसुबोधिनी

अष्टमो मारणीय इति चेत् तत्राह बहवो हिंसिता भ्रातरिति, स्त्रिया मारकत्वं शास्त्रे न सिद्धं, पुत्रास्तु हता एव, यद्यप्येक एव मारणीयस्तत्स्थाने बहवो हताः, भ्रातरितिसम्बोधनं दयार्थम्, आकृत्या पराक्रमोपि तेषु सम्भाव्यत इति तदर्थमाह पावकोपमा इति, स्नेहे त्यक्ष्यतीति तस्य दोषाभावमाह त्वया दैवनिसृष्टेनेति, 'अनुरक्तो गुणान् भ्रूत' इतिवाक्याद् दैवेन भगवदिच्छया प्रेरितेन भवता पुत्रा हताः, एषा त्ववध्येति दैवेन न प्रेर्यत इतिभावः, एकेयं पुत्रिकाभ्रातृमतीतीमामध्यन्ततो गत्वा पुत्रिकाधर्मेण दत्वा ससन्ताना भविष्यामीति ज्ञापयत्येकेति, यद्यपरोत्पत्स्यते तदा मारणीयेति ज्ञापितं, प्रकर्षेण दीयतामिति कालान्तरेऽप्यमारणीया ॥५॥ अवश्यदाने हेतुमाह नन्वहमिति, अवश्यं दानमेव फलं, नन्वितिसम्बोधनं युक्तिग्रहणार्थं अहं ते ह्यवरजेति, अवरजत्व उभयानुभवः प्रमाणम्, अवरजा दयापात्रं, दीना दुःखिता शोकादिना, तत्र हेतुर्हतसुतेति, प्रभो इतिसम्बोधनं दानसामर्थ्यद्योतनार्थम्,

अत एव **दातुमर्हसि, मन्दाया** इत्यतः परं रजोभावः सूचितः, **अतश्चरमां प्रजामिमामिति,** अन्या कन्यात्वेन न देयेयमेव देयेति ॥६॥ तथापि न त्यक्तवानित्याहोपगूह्येति, **एवमात्मजामुपगूह्य** विलापनपूर्वकं **रुदन्त्या हस्तात्** तां बालामाचिच्छिदे देवकीं **विनिर्भर्त्स्य,** विनिर्भर्त्सने **हेतुस्तां याचितः सन्,** **आत्मजामिति,** आत्मनो भगवतः सकाशाज्जातां, 'व्यवहारे शब्दाः परमार्था एवे'तिन्यायाद् देहादावात्मशब्दवदात्मजशब्दोपि पुत्रत्वेन परिग्रहमात्रत्वेपि वक्तुं शक्यते, **एवमितिपदा**देतानीदृशानि वाक्यानि बहुवारमुक्तानीति ज्ञापितं, रोदनं यशोदाकन्यकेति, **दीनादपि दीना** यथा दैवहता पुत्रभर्त्रादिरहिता व्याधिग्रस्तापि भवति सा **दीनदीना** तथेयं स्वपुत्रनाशं दृष्टवती परापत्यनाशमपि पश्यतीति, **हस्तादिति,** एकेन हस्तेन तस्या एकं हस्तं धृत्वा द्वितीयेन तस्या द्वितीयहस्तादाचिच्छिदे, **एवङ्करणे हेतुः खल इति** ॥ ७ ॥ गृहीत्वा यत् कृतवांस्तदाह **तां गृहीत्वेति, चरणयोरिति,** मारणार्थमेव विपरीततया ग्रहणमात्रेणैव तस्या नाशः सूचितः, **जातमात्रामिति,** नालादिसहितां, अतिकोमलत्वप्रदर्शनेन तस्य 'खल'त्वं समर्थितं, **स्वसुः सुतामिति** सर्वथा विरुद्धकर्तृत्वमुक्तम्, **अपोथयत्** प्रक्षाल्यमानवस्त्रमिव प्रक्षिप्तवान्, शिलाङ्कणस्था यथा स्नानार्था भवति, ननु सौहार्दमुभयविषयकं कथं त्यक्तवानित्याह **स्वार्थोन्मूलितसौहृद इति,** स्वार्थमुन्मूलितं सौहृदं येन ॥ ८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

नन्वहमित्यत्र **फलमिति,** याचनफलम् ॥ ६ ॥ **उपगूह्ये**त्यत्र ननु कन्यायां श्रीदेवक्या आत्मजत्वप्रतीतेरभावात् तत्र सर्वज्ञत्वेन शुकस्यापि तदभावाच्छुकेनात्मजापदं किमित्युक्तमित्यत आहुरात्मन इत्यादि, **न व्यवहार** इत्यादि, यथा नामपल्लव्यां भाषायां कथमर्थे केनचित् सङ्केतितादपि केवलशब्दात् तज्ज्ञानं कथमस्यैव बोध इतरेषां तु नेतिवदत्र शुकैरात्मजाशब्द उक्त इत्यर्थः, शुकस्यैवङ्कथने प्रयोजनाभाव इत्यरुच्या पक्षान्तरमाहुर्देहेत्यादि ॥ ७ ॥

बुभुत्सुबोधिका

वहव इत्यत्र लोकाख्यायिकायां काचित्स्त्रियाः हंत्रीत्वमत आहुः **शास्त्र इति** । **हता इति** तत्र मंडलेष्टानां कृतेष्टमोपि हत इतिभावः । **बहव इति** कंससंतोषार्थम् । **पराक्रमोपीति** कंसस्य सः । **तस्येति** कंसस्य । **आहेति** दैवसृष्टेनेति विशेषणेनाहेत्यर्थः । **अभ्रातृमतीति** दाने हेतुः । भ्रातृमतो तु न देया । **दत्वेति** कंसपुत्रायापि ॥ ५ ॥ नन्वहमित्यत्र **हेतुमिति** कारिकोक्तफलकार्ये पूर्वश्लोकाभ्यामुक्ते इति भावः । अधुना तु हेतुकार्यफलेरितिकारिकांशमानुलोम्यक्रमेणाहुः **अवश्येति** । **फलमिति** याचनफलम् । तेन पूर्वश्लोके दानपात्रकार्यं याचनम् । ततः पूर्वश्लोके दानपात्रे हेतुरित्यपि बोध्यम् । **उभयेति** कंसदेवक्योरनुभवः । **सूचित इति** मंदशब्दार्थाः विश्वकोशे 'मंदः खले मंदरवे मूर्खेऽल्परोगिणि अभाग्येपि च पातंगिगजजातिप्रभेदयो'रिति । अयं तु सूचितार्थ इत्यर्थः । मंदाल्परोगिणीत्यर्थः । **अत इति** रजःशुक्रमिश्रणाभावात् ॥ ६ ॥ **उपगूह्ये**त्यत्र यशोदात्मजात्वेन स्वात्मजत्वाभावाच्छुकोक्तात्मजपदाभिधौ वार्थमाहुः **आत्मन इत्यादि** । 'अहं बीजप्रदः पिते'तिवाक्यात् । नन्वेवं शुकस्य परमार्थोक्तिः कुत इत्यत आहुः **व्यवहार इत्यादि** । यतो घटपटादिशब्दा अन्येपभ्रंशशब्दाः । गवाक्ष इत्यादयो भवंति तत्र 'गोख' इत्यादयः : अन्ये भिन्नाः यथा नामपल्लव्यां भाषायां कथमर्थे केनचित्संकेतितादपि केशवशब्दात् तत् ज्ञानं कथमर्थस्यैव बोध इतरेषां तु नेतिवदत्र शुकैरात्मजाशब्द उक्त इत्यर्थः । **देहादाविति** भाषायां तथाप्रयोग आत्मोपनिषदुक्तपरमार्थोनामेव । **अपीति** अपिनात्मजाशब्दः । **'हस्ता'दित्यत्रै**कत्वं विवक्षितमित्याशयेनाहुः **एकेनेति** । **हेतुरिति** स्नेहसूचनेन संचयकरणाद्देवक्याः खलत्वं संचायकत्वं हेतुः । खल संचय इति धातुपाठात् । सकलदोषनिधानत्वं खलत्वं तु नास्ति । 'जिघांसंतं जिघांसीया'दितिमनुवचनात् । सौहृदोन्मूलनस्य वक्ष्यमाणत्वात् । सति सौहृदे तन्मूलनस्य युक्तत्वात् ॥ ७ ॥ तां **गृहीत्वे**त्यत्र **खलत्वमिति** यद्ययं निरभिमानः स्वमरणो तिष्ठेत् तदा भगवान् कंसं न मारयेदतः खलत्वं सकलदोषनिधानत्वं व्यंजनया समर्थितम् । **उभयेति** भगिनीतत्पुत्रीविषयकम् । **स्वार्थमिति** स्वजीवनार्थम् । अत्र कंसस्य देवक्यां स्नेहो गत इत्याहुः **उन्मूलितमिति** । सौहृदं स्नेहः ॥ ८ ॥

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

आचार्यचरण आगे की बात को समझाते है कि **'अष्टमो मारणीय इति चेत्'** तब माता देवकीजी ने कहा कि यह अष्टम बालक है इसलिये मारना आवश्यक है इस पक्ष का निरूपण करते हुए कहा है कि **'बहवो हिंसिता भ्रातः'** इत्यादि । स्त्री का मारना शास्त्र में सिद्ध नहीं, पुत्रों को तो मार ही दिया है, यद्यपि एक को ही मारना था, उसकी जगह बहुतों को मार दिया है **'भ्रातः'** यह सम्बोधन कंस को दया के लिये किया है, उन मारे गये शिशुओं की आकृति से उनमें पराक्रम की भी सम्भावना की जा सकती है, अतः **'पावकोपमाः'** कहा कि वह अग्नितुल्य थे, स्नेह के होने पर छोड़ देगा, अतः कंस के दोष का अभाव कहा है कि **'त्वया दैवनिसृष्टेन'** **'अनुरक्तोगुणान्ब्रूते'** स्नेही गुणों को कहता है—इस वाक्य के अनुसार यह कहा गया है कि दैव या भगवदिच्छा प्रेरित हुए तुमने उन पुत्रों को मारा, उसमें तुम्हारा दोष नहीं, यह कन्या तो वध के योग्य नहीं—अतः दैव की प्रेरणा इसके वध के लिये नहीं हैं, यह भाव है, एक यह पुत्री है, इसको विना भ्राता नहीं होने के कारण आखिर में पुत्री का धर्म से या इसमें उत्पन्न पुत्र को अपना पुत्र बनाने की प्रतिज्ञा से किसी को देकर मैं सन्तान वाली हो

जाऊँगी। यह 'एका' पद से सूचित किया है। यदि अन्य पुत्री उत्पन्न होगी तो वह मार दी जावे, यह भी सूचित हुआ है। **'प्रदीयताम्'** पद में **'प्र'** उपसर्ग प्रकर्षार्थक है, अतः प्रकर्ष से देने की प्रार्थना का तात्पर्य यह है कि इस कन्या को भैया! भविष्य में भी मत मारना ॥ ५ ॥

अवश्यदाने हेतुमाह– आचार्यचरण आज्ञा करते हैं कि अब इस **'नन्वहन्ते'** श्लोक से अवश्य देने में देवकीमाता **'हेतु'** का निरूपण करती है भैया इस कन्या का दान अवश्य ही मुझे देना चाहिये क्योंकि यह ही मेरे मागने का फल है **'ननु'** यह अव्यय अपनी युक्ति के स्वीकारार्थ किया है, यद्यपि ननु सम्बोधनार्थक पद है फिर भी 'ननु' पद वहाँ आता है जहाँ युक्ति दिखानी होती है। ननु का अर्थ निश्चय होता है। भैया, निश्चय है कि मैं तेरी छोटी बहिन हूँ, भैया तेरा और मेरा दोनों का अनुभव प्रमाण है; कि मैं देवकी तुमसे छोटी हूँ। छोटी बहिन दया का पात्र होती है। **'भैया दीना'** शोकादि से मैं दुःखित हूँ, क्योंकि **'हतसुता'** मेरे पुत्र नष्ट किये जा चुके हैं; **'प्रभो!'** यह सम्बोधन दान सामर्थ्य की सूचना करने के लिये किया है कि भैया आप सर्व करने के लिये समर्थ हो, अतः देने योग्य है तू। भैया मैं मन्दभागिनी हूँ क्योंकि मेरा मासिक धर्म निवृत्त हो चुका है यह भाव **'मन्दाया:'** पद से देवकी माता ने सूचित किया है। अतः अन्तिम इस प्रजा सन्तति को दे—यह कहा है, **'इमां'** पद से कहा है कि किसी अन्य लड़की को मुझे कन्या रूप से देना उचित नहीं इसी को देना उचित है ॥ ६ ॥

श्रीमदाचार्यचरण कहते हैं कि **"तथापि न त्यक्तवान्"** श्रीदेवकीजी ने दीनता से इतना कहा फिर भी खल कंस ने नहीं माना यह बात अब इस श्लोक से कही जायगी, इस प्रकार लड़की को छिपा कर विलाप करती हुई देवकी को झिड़क कर कंस ने उसके हाथ से कन्या को छीन लिया। झिड़का इसलिये कि देवकी ने माँगा था। इस श्लोक में आये **"आत्मजा"** पद का अर्थ अपने से पैदा हुई लड़की ऐसा होता है परन्तु यहाँ शंका होती है कि देवकी यह नहीं समझती थी कि यह मेरी लड़की है और श्री शुकदेवजी सर्वज्ञ थे इसलिये वे भी इसे देवकी की कन्या नहीं समझते थे तो फिर श्लोक में **"आत्मजा"** यह शब्द कैसे कहा। इस आशङ्का की निवृत्ति के लिये आत्मजा शब्द की व्याख्या करते हुए आचार्यचरण आज्ञा करते हैं कि भगवान् से उत्पन्न हुई इस कन्या को आत्मजा कहा ऐसा यहाँ **"आत्मजा"** पद का अर्थ है। आत्मन् शब्द से यहाँ भगवान् अर्थ समझा जाता है जैसा कि कहा है **"व्यवहारे शब्दाः परमार्था एव"** व्यवहार में आने वाले शब्द अपने मुख्य अर्थ का परित्याग नहीं करते। "आत्मा" शब्द का मुख्य अर्थ भगवान् है इसलिये यहाँ आत्मजा शब्द का अर्थ "भगवान् से उत्पन्न हुई कन्या" है। यहाँ कहते हैं कि श्रीशुकाचार्य का ऐसा अर्थ करने में कोई तात्पर्य नहीं था इसलिये ऐसा अर्थ मानना उचित नहीं है तो दूसरे पक्ष को लेकर कहते हैं कि जैसे देह इन्द्रिय आदि में आत्मा शब्द का प्रयोग लोग करते हैं ऐसे ही पुत्र मान लेने पर तथा दत्तक लेने पर आत्मजत्व न होने पर भी आत्मज शब्द का प्रयोग होता है, श्रीदेवकी माताजी ने निज पुत्र के स्थान में लाई गई इस बालिका के अपने पुत्र की तरह मानी थी इसलिये ही यहाँ आत्मजा शब्द का प्रयोग हुआ है। श्लोक में आये **"एवं"** अव्यय से यह सूचित किया कि देवकी ने इस प्रकार के वाक्य अनेक बार कहे। रोदन इसलिये किया कि यह यशोदाजी की कन्या मेरे कारण मारी जा रही है। कंस को कहने के समय देवकी दीनातिदीन थी। जैसे कोई भाग्यहीन होने से पुत्रादि मर जाय तो दीन होती है और वही रोगग्रस्त हो जाने पर अतिदीन बन जाती है, इसी प्रकार अपने पुत्रों के मर जाने से देवकी दीन तो थी ही उस पर भी जब दूसरे की सन्तान को मारता देखा तो वह अत्यन्त दीन हो गई। **हस्ताद्–आचिच्छिदे खलः**— कंस ने एक हाथ से देवकी के एक हाथ को पकड़ा और दूसरे हाथ से कन्या को देवकी के हाथ से छीना। कंस ने ऐसा क्यों किया तो कहते हैं कि वह **"खलः"** दुर्जन था। खल को बुरे कार्य का कोई खयाल नहीं होता ॥ ७ ॥

गृहीत्वा यत् कृतवान् तदाह—आचार्यचरण कहते हैं कि खल कंस ने देवकीजी के हाथ से कन्या को छीन कर जो कुछ किया सो अब इस **'तां गृहीत्वा'** इत्यादि श्लोक से कहा है। **'चरणयोः'** इस पद से मारने ही के लिये उसे पैरों में उलटी पकड़ने से ही उसका नाश सूचित किया है। **'जातमात्राम्'** इस पद से कहा कि तात्कालिक जन्मवाली जिसका नाभिगत नाल आदि भी अलग नहीं हो पाया है, यह पद कन्या की अत्यन्त कोमलता को दिखलाकर कंस की खलता का समर्थन करता है। इस श्लोक में **'स्वसुः सुताम्'** पद बहिन की लड़की को मारना, कंस के विरुद्ध आचरणपरता के लिये कहा है। **'अपोथयत्'** पद का तात्पर्य धोने के कपड़े की तरह उसे पछाड़ दिया जो आँगन में एक शिला पड़ी थी जैसे स्नान के लिये पड़ी रहती है। बहिन, बहनोई दोनों के विषय में कंस ने प्रीति का त्याग कैसे किया। इस पर कहा है कि **'स्वार्थोन्मूलितसौहृदः'** अपने लिये कंस ने सौहृद प्रीति को उखाड़ कर फेंक दिया है ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'मयि तव क्रौर्यमयुक्तम्' इत्याशयेन सम्बोधयति—**भ्रातरिति**। एकस्यैव हन्तव्यत्वेपि त्वया बहवः शिशवो हताः। **'न च ते हिंसनयोग्या, निरपराधित्वाच्छोभातिशयवत्त्वाच्च'** इत्याशयेनाह–**पावकोपमा** इति। त्वया हिंसिता इत्युक्ते तद्दौमनस्यमाशङ्क्य तत्प्रसादार्थमाह—**दैवनिसृष्टेनेति**। अस्मत्प्रारब्धप्रेरितेन त्वया निमित्तमात्रेण हिंसितास्तेन न तव कोऽप्यपराध इत्यर्थः। इयमेका

पुत्रिका प्रदीयतामिति। यदि किञ्चिदन्यदपत्यं जायेत तदा तद्धन्तव्यमित्येकपदेन सूचितम् ॥ ५ ॥ स्वदैन्यं दर्शयन्त्युक्तमेव स्पष्टयति-नन्विति। मयि तव कृपैव युक्तेत्याशयेन सम्बोधयति-हे अङ्गेति। तत्र हेतुमाह— ते तवावरजा कनीयसी भगिनी। 'अत्र तु तवापि न सन्देहः' इत्याशयेनाह-हीति। तत्रापि दीनेति। तत्र हेतुमाह-हतसुतेति। 'अत्रापि न सन्देह' इत्याह-नन्विति। त्वं च मत्प्रार्थितदाने समर्थोऽसीत्याशयेन सम्बोधयति-हे प्रभो इति। मन्दायै मन्दभाग्यायै मह्यमिमां प्रजां कन्यां दातुमर्हसि। 'इतोऽग्रे को वेदापत्यान्तरं भविष्यति न वा' इत्याशयेनाह—चरमामिति ॥ ६ ॥ एवं तया याचितोऽपि कंसस्तां विनिर्भर्त्स्य वचसा तिरस्कृत्य आत्मजां कन्यामुपगुह्य उरसि बाहुभ्यां संवेष्ट्य दीनादपि दीनवद्रुदन्त्यास्तस्या हस्तात्तामाचिच्छिदे आकृष्य जग्राह। 'तस्यैवं क्रौर्यं नाश्चर्यम् स्वभावत्वात्' इत्याशयेनाह—खल इति। 'क्रूरे नीचेऽधमे खलः' इति विश्वकोशः। वस्तुतस्तु न दीना, 'पुत्रस्यान्यत्र नीतत्वात्' इति वतिप्रयोगः ॥ ७ ॥ तां कन्यां चरणोर्विपरीततया गृहीत्वा अङ्गणे स्नानाद्यर्थं स्थापितायाः शिलायाः पृष्ठे उपरि अपोथयत् बलात् प्रक्षिप्तवान्। निर्दयत्वेन खलत्वं समर्थयन्नाह—जातमात्रामिति। अतिकोमलामित्यर्थः। सर्वथा विरुद्धकर्तृत्वं सूचयन्नाह—स्वसुः सुतामिति। एवं विरुद्धाचरणे हेतुमाह—स्वार्थेति। स्वप्रयोजनमुद्दिश्योन्मूलितं त्यक्तं सौहृदं स्नेहो येन सः ॥८॥

अन्वितार्थप्रकाशिका

बहव इति। हे भ्रातः! दैवनिसृष्टेन अस्मत्प्रारब्धप्रेरितेन अत्र तत्रापि दोषो नास्तीत्यनुनयार्थम्। त्वया पावकोपमाः वह्निवदुज्ज्वलवर्णा बहवः शिशवो हिंसिताः। अतः इयमेका पुत्रिका प्रदीयताम् ॥ ५ ॥ नन्वहमिति। अङ्ग हे भ्रातः! हे प्रभो! ननु हेतौ यतः अहं ते अवरजा कनिष्ठा भगिनी हतसुता अत एव दीना तस्मात् मन्दायै मन्दभाग्यायै मह्यम् इमां चरमामन्तिमां प्रजां दातुमर्हसि वार्द्धकस्य जातत्वात्। इतोऽग्रे सन्तानोत्पत्त्याशाया अभावात् ॥ ६ ॥ उपगुह्येति। एवं देवक्या याचितोऽपि खलः क्रूरः कंसस्तां विनिर्भर्त्स्य वचसा तिरस्कृत्य आत्मजां कन्यामुपगुह्य उरसि बाहुभ्यां संवेष्ट्य दीनादपि दीनवद्रुदन्त्याः। तुमार्थः। वतिप्रयोगाच्च तथा रोदनं पुत्रस्यान्यत्र प्रेषितत्वात्। तस्याश्च योगमायात्वेन ज्ञातत्वात् मायात्वेन ज्ञातत्वेऽपि स्नेहस्वभावाद्वा रोदनम्। दीनसदृशवदिति वा। "प्रकारे गुणवचनस्य" इति द्वित्वम्। तस्या हस्तात्तामाचिच्छिदे बलादाकृष्य जग्राह ॥ ७ ॥ तां गृहीत्वेति ॥ स्वार्थं स्वप्रयोजनमुद्दिश्योन्मूलितं त्यक्तं सौहृदं स्नेहो येन सः कंसः जातमात्रां "गर्भाम्बुक्लिन्नमूर्धजाम्" इति हरिवंशोक्तेः। स्वसुः सुतां तां कन्यां चरणयोर्विपरीततया गृहित्वा अङ्गणे स्नानाद्यर्थं स्थापितायाः शिलायाः पृष्ठे उपरि अपोथयत् बलात्प्रक्षिप्तवान् ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बहव इति। हे भ्रातः, दैवनिसृष्टेन दैवप्रेरितेन, दैवेन मृत्युतया कल्पितेनेत्यर्थः। त्वया मम पावकोपमाः पावकवत् प्रकाशमानाः, बहवः शिशवः, हिंसिताः हताः। एका इयं, पुत्रिका प्रदीयताम् ॥ ५ ॥ नन्विति। अङ्ग हे भ्रातः, हे प्रभो, अहं ते तव, अवरजा कनीयसी, दीना हताः सुता यस्याः सा तथाभूता चास्मि ननु। अतः, मन्दाया मन्दभाग्यायाः, इमां चरमामन्त्यां, प्रजां कन्यां, दातुम् अर्हसि हि। 'अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल। सुभद्रा च महाभागा तव राजन् पितामही' इति नवमस्कन्धे उक्तत्वात्, चरमामित्यस्यान्त्यामित्यर्थे विरोधापाताच्चरैर्मनुष्यैर्मीयते प्रमाणीक्रियते इति चरमा इत्यर्थोऽत्र बोद्धव्यः ॥६॥ उपगुह्येति। एवमित्थं उक्त्वा, आत्मजां, उपगुह्य उरसि धृत्वा, बाहुभ्यां संवेष्ट्य, दीनदीनवद्दीनापि दीनवत् नितरां दीनवदित्यर्थः। वत्करणेन स्वसुतस्यान्यत्र स्थितत्वाद्वस्तुतो दैन्याभावः सूच्यते। रुदन्त्या तया, याचितोऽपि, खलो दुष्टात्मा कंसः, तां देवकीं विनिर्भर्त्स्य, हस्ताद्देवक्याः पाणितः, आचिच्छिदे हृतवान् ॥ ७ ॥ तामिति। जातमात्रामेव न तु कृतनाभिनालच्छेदां, स्वसुर्भगिन्याः, तां सुतां, चरणयोः गृहीत्वा, स्वार्थोन्मूलितं स्वार्थेन मूलत उत्पाटितं सौहृदं यस्य सः, स्वप्रयोजनार्थं त्यक्तभगिनातत्सुतास्नेहः कंस इत्यर्थः। शिलापृष्ठे तत्र पूर्वत एव निपतितायाः शिलायास्तले, अपोथयदताडयत् ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

उपगुह्येति : १०.४.७

जहाति नित्यं हृदि भावितेशान् सदा वृणोत्यच्युतभक्तशत्रून्। सा चित्रकृत्या प्रकृतिस्तदा तद्धस्तात्करं तस्य गतेति युक्तम् ॥ ५ ॥

तां गृहीत्वेति : १०.४.८

निर्विघ्नं निजदीर्घजीवितसुखप्रेप्सू रजःसंश्रयात् तद्धिंसाभिनिवेशधर्षितमतिः स्पष्टं तमःसंश्रयात्।
त्राह्येनामिति तद्गिरोऽपि च तिरस्कारादसत्त्वाश्रितः तद्युक्तं त्रिपदां दधार पदयोस्तां तादृशो निर्घृणः ॥ ६ ॥
यदियं पृष्ठतो याता ततो मद्धतिभाग्भूत्। इति किं ध्वनयन् हिंस्रः शिलापृष्ठे व्यपोथयत् ॥ ७ ॥

कृष्णप्रिया

मेरे भैया ! मेरे अग्नि के समान तेजस्वी बहुत पुत्रों को तू ने भगवदिच्छा से प्रेरित होकर मार दिया, अब यह एक कन्या जिसके कोई भाई नहीं, ऐसी शेष रही है इसे मुझे दे दे भैया इसे न मार ॥ ५ ॥ हे समर्थ भाई ! मैं तेरी छोटी बहिन हूँ, मेरे बालक नष्ट किये गये हैं इसलिये मैं दीन हूँ अब रजोधर्म नहीं आयगा इसलिये मैं मन्दभागिनी हूँ इसलिये प्यारे भैया इस अन्तिम सन्तान को दे दे ॥ ६ ॥ इस प्रकार बालिका को हृदय से चिपकाकर अत्यन्त दीन की तरह विलाप करती हुई देवकी को झिड़ककर कस ने उसके हाथ से कन्या को छीन लिया, झिड़का इसलिये कि उसने याचना की थी ॥ ७ ॥ नाल आदि से युक्त ऐसी नवजात अपनी भानजी के पैर पकड़ कर कंस ने उसे शिला पर पटक दिया क्योंकि कंस ने स्वार्थवश सौहाद को सर्वथा निर्मूल कर दिया था ॥ ८ ॥

सा तद्धस्तात् समुत्पत्य सद्यो देव्यम्बरं गता । अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ॥ ९ ॥
दिव्यस्रगम्बरालेपरत्नाभरणभूषिता । धनुःशूलेषुचर्मासिशङ्खचक्रगदाधरा ॥ १० ॥
सिद्धचारणगन्धर्वैरप्सरःकिन्नरोरगैः । उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ॥ ११ ॥

देव्युवाच

किं मया हतया मन्द जातः खलु तवान्तकृत् । यत्र क्वचित् पूर्वशत्रुर्मा हिंसीः कृपणां वृथा ॥ १२ ॥

कर्दमक्षमा

अन्वय—तद्धस्तात् समुत्पत्य सद्यः अम्बरं गता विष्णोः अनुजा सा देवी सायुधाष्टमहाभुजा अदृश्यत ॥ ९ ॥ दिव्यस्रगम्बरालेपरत्नाभरणभूषिता धनुःशूलेषुचर्मासिशंखचक्रगदाधरा उपहृतोरुबलिभिः सिद्धचारणगन्धर्वैः अप्सरःकिन्नरोरगैः स्तूयमाना इदम् अब्रवीत् ॥ १०–११ ॥ मन्द मया हतया किम् ! तव अन्तकृत् पूर्वशत्रुः यत्र कचित् जातः खलु कृपणां वृथा मा हिंसीः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सद्य एव देवी भूत्वा ॥ ९–११ ॥ कृपणानिति अन्यानपिशून्हनिष्यतीति ज्ञात्वा वारयति । पाठांतरे मा मां कृपणां वृथाऽहिंसीर्हिंसितवानसीति ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सा कन्या जनैरदृश्यतेति । समुत्पत्याधःक्षिप्यमाणापि बलादुत्प्लुत्य । "कंसासुरस्योत्तमांगे पादं दत्त्वा गता दिवम्" इति भविष्योत्तरे । अनुजा विष्णोरिति कृष्णस्यापि यशोदागर्भजत्वं सूचयति सायुधाष्टेति तस्य भीषणार्थं स्ववाचि विश्वासोत्पत्यर्थञ्च ॥ ९–१० ॥ उपाहृता उपानीता उरवो बलयः पूजा यैस्ते तथा ॥ ११ ॥ पाठांतरे 'कृपणाम्' इति पाठे । यद्यहं हता स्यां तदापि मया हतया किं तव मरणस्यावश्यंभावित्वादित्याह—जात इति । यत्र क वेति वक्तुमनर्हदेशे तद्देशाकथनेन देवकीवसुदेववधेऽस्य प्रवृत्तिरधुना मा भूदिति भावः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सा तद्धस्तादिति । सद्यः समुत्पत्य अधः क्षिप्यमाणापि बलादूर्ध्वमुत्प्लुत्य अत्र विशेषो भविष्योत्तरे "कंसासुरस्योत्तमांगे पादं दत्वा गता दिवम्" इति देवी दिव्यरूपा सती अदृश्यत कंसादिभिः सर्वैः तत्र निजोक्तौ कंसस्य विश्वासार्थं महाभुजत्वेन महाकायत्वं च विभीषिकार्थं श्रीविष्णोः श्रीदेवकीयशोदयोर्मनसि युगपत्प्रविष्टस्येति तस्यास्तदनुजात्वं साधितम् अनुजेति तदापि श्रीयशोदादि दंपतीद्वयस्यैकात्मतां बोधयति एवमात्मजामप्युक्तम् ॥ ९–१० ॥ सिद्धेत्याद्युपलक्षणम् ॥ ११ ॥ मन्द हे अल्पबुद्धे ! मया हतया इति यद्यहं हताप्यभविष्यमित्यर्थः । यस्तवान्तं करिष्यति स यत्र कचिन्निश्चित्य वक्तुमनर्ह देशे जात इत्यतो मयाद्य त्वं न हन्यस इत्यर्थः । स तावत्कः ? इत्यपेक्षायामाह—पूर्वशत्रुः पूर्वजन्मनि यस्त्वां हतवानित्यर्थः । कृपणां देवकीं बन्धनादिना मा हिंसीः पतिसहितामेनां बन्धनान्मोचय धनादिकं च प्रत्यर्पयेत्यर्थः । कृपणानिति पाठे तद्धर्मेणान्यान् बालकान् तौ तत्सम्बन्धिनश्चेत्यर्थः ॥ १२ ॥

---

१. देव्युवाच इति अन्यत्र न दृश्यते । २. क्व वा—श्रीधर. वंशी. गिरि. भक्त. ; क्वचिदा—इति कस्यचित् । ३. कृपणान्—श्रीधर. वंशी. गिरि. भक्त. ।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अदृश्यत कंसादिभिः सर्वैर्वक्ष्यमाणनिजोक्तौ कंसस्य विश्वासार्थमत एव तादृशरूपादिप्रकाशनञ्च ज्ञेयम्। विष्णोः श्रीदेवकीगर्भादौ प्रवेशनशीलस्य भगवतोऽनुजा; श्रीयशोदागर्भजातत्वादयं सर्वत्रैव हेतुर्द्रष्टव्यः। आलेपोऽनुलेपः ॥ ९–१० ॥ उपहृतास्तस्यै आनीय समर्पिता उरवो महान्तो बलयो मधुदुग्धाद्युपहारा यैस्तैः ॥ ११ ॥ मन्द! हे अल्पबुद्धे! अन्तकृदिति नाशं करिष्यति यः स यत्र कचिद्देशे जातोऽतो मयाद्य न त्वं हन्यस इति भावः। स भावत्क इत्यपेक्षायामाह—पूर्वशत्रुः पूर्वजन्मनि यस्त्वां हतवानित्यर्थः। कृपणां देवकीं मां हिंसीर्बन्धनादिनास्या हिंसां मा कुरु - बन्धनान्मोचय, धनादिकञ्च तदीयं प्रत्यर्पयेत्यर्थः। श्रीदेवक्या गर्भसम्बन्धेनैव श्रीवसुदेवस्य बन्धनात्तस्या मोचनेन तस्यापि स्वतस्तत् सिद्धेः पृथङ्नोक्तम्। 'कृपणान्' इति पाठे देवकीं वसुदेवं तत्सम्बन्धिनश्चेत्यर्थः। वृथेति तद्वधे प्रयोजनाभावात् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सा विष्णोरनुजा कन्या तस्य कंसस्य हस्तात् समुत्पत्य ऊर्ध्वमुत्पत्य सद्य एव देवी स्वरूपं बिभ्रती सत्यम्बरमाकाशं गताऽधिष्ठिता अदृश्यत कंसादिभिर्दृष्टा बभूव कीदृश्यायुधैः सहिताश्च अष्टौ महान्तो भुजा यस्याः ॥ ९ ॥ दिव्यस्रगादिभिः भूषिता अम्बरं वस्त्रम् आयुधान्येव दर्शयन् विशिनष्टि–धनुरादीन् बिभर्तीति तथा ॥ १० ॥ तत उपाहृता समर्पिताः बलय उपायनानि यैस्तैः सिद्धादिभिः स्तूयमानेदं वक्ष्यमाणमब्रवीत् ॥ ११ ॥ तदेवाह किमिति। हतयापि मया तव किं प्रयोजनं न किञ्चिदपि हे मन्द! तवान्तकृत् नाशकृत्पूर्वशत्रुरशरीरवाण्या पूर्वमुक्तः शत्रुः यत्र कचित्प्रदेशे जात एव खलु इत ऊर्ध्वं जनिष्यमाणानपि शिशून् हन्यादिति सम्भाव्य वारयति कृपणान् शिशून् वृथा मा हिंसीः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अदृश्यत जनेनेति शेषः ॥ ९–१० ॥ उरवः बलयः पूजा यैस्ते तथा तैः ॥ ११ ॥ त्वया हतया मृतया तव कोर्थ इति शेषः, कुत इत्यत्राह, जात इति खलु विचारशून्यस्त्वम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विष्णोरनुजेति च ॥ ९–११ ॥ हतया यद्यहं हताप्यभविष्यमित्यर्थः ॥ १२–१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

समुत्पत्य अधः क्षिप्यमाणापि बलादुत्प्लुत्य "कंसासुरस्योत्तमाङ्गे पादं दत्त्वा गता दिवम्" इति भविष्योत्तरम् अनुजा विष्णोरित्यनेन कृष्णस्य यशोदागर्भजत्वं सूचयति—सायुधाष्टेत्यादि कंसस्य भीषणार्थं स्ववाचि विश्वासोत्पत्त्यर्थं च ॥ ९–११ ॥ मया हतया किमिति यद्यहं हताप्यभविष्यमित्यर्थः। यत्र। कचित् वक्तुमनर्हे देश इत्यर्थः। कृपणां देवकीं कृपणानिति पाठे अन्यान् शिशून् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृपणां गुप्तप्रभावां मात्रङ्कगतां मा माम् अहिंसीः हिंसितवानसि ॥ १२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

समुत्पत्येति अधःक्षिप्यमानाप्यतिबलादुत्प्लुत्य कंसशिरसि पादप्रहारं कृत्वेत्यर्थः "कंसासुरस्योत्तमाङ्गे पादं दत्त्वा गता दिव"मिति भविष्योत्तरवचनात् विष्णोरनुजेति कृष्णस्य यशोदागर्भजत्वं द्योत्यते, सायुधाष्टेत्यादिकं कंसस्य भयोत्पादनार्थं स्ववाचि तत्प्रत्ययार्थञ्च ॥९ ११॥ किं मया हतयेति यद्यहं हतापि स्यां तथापि ते मृत्युर्न निवर्त्तेतेति भावः। यत्र क वा वक्तुमनर्हे तवाप्यगम्ये देशे इत्यर्थः। कृपणान् दीनान् बालान् ॥ १२ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

मां हिंसीः कृपणां वृथेत्यस्य कृपणामिव वृथा मा मामहिंसीरित्यर्थः। ममावध्यत्वात्त्वदीयहननव्यापारो व्यर्थ इति भावः। एतेन कंसेन शिलापृष्ठे पोथने कृतेऽपि तद्धस्तात्समुत्प्लुत्यांबरगतत्वेनावध्यत्वस्य कार्पण्याभावस्य च निश्चयत्वात्। कृपणां मां वृथा माहिंसीरिति प्रार्थनं व्यर्थमिति चोद्यं पराकृतम्। कृपणामित्यतः परमिवेत्यस्य शेषमंगीकृत्वा मेत्यस्मच्छब्दद्वितीयैकवचनांतत्वं चाभ्युपगम्याहिंसीरिति पदच्छेदं च स्वीकृत्य कृपणामिव वृथा मा मामहिंसीरित्यर्थस्योक्तत्वात् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सा विष्णोरनुजा देवी तद्धस्तात्कंसहस्तात्समुत्प्लुत्याम्बरे आकाशे गता सती सायुधाष्टभुजाऽदृश्यत ॥ ९ ॥ दिवि भवानि दिव्यानि मनोहराण्यष्टौ। तदायुधाभिधानान्यभिधत्ते। धनुरित्यादिना। ननु काली पीताम्बरधरा गजकुम्भोपमस्तनी। चक्र-

विस्तीर्णजघना चन्द्रवक्त्रा चतुर्भुजेति हरिवंशे शंसनाद्भुजाष्टकोक्तिरेतद्विरुद्धेति चेन्न। भागवतस्य तदुत्तरत्वेन भुजाष्टकतद्गतायुधाष्टकप्रतिपादकतया निरवकाशत्वेन चतुर्भुजेति तदुक्तेरेकभागवतभुजमात्रकथकतया सावकाशताप्रकाशनसम्भवात्। आवृत्याऽन्वयनेनाष्टकलाभो वा ज्ञेयः। पञ्चमतात्पर्ये। यथा भागवते तूक्तं भौवनं कोशलक्षणम्। तस्याविरोधतो योऽयं सर्वग्रन्थान्तरे स्थितम्। मण्डोदे पूरणं चैव व्यत्यासं क्षीरसागरे। राहुसोमरवीणां च मण्डलाद्द्विगुणाक्तिताम्। विनैतत्सर्वमुन्नेयमित्याद्युक्तेराचार्याभ्यनुज्ञानमेतदादौ ज्ञायते। प्रथमे च स्वमोऽयमतो नेषोक्ताविरोध इत्याद्युक्तेरेवं व्याकरणं सम्भवि। चित्रैर्कौलिख्यते भित्तौ मन्त्रशास्त्रेषु वर्ण्यते इति निरवकाशं भागवतम्॥ १०॥ उपाहृता उरवो बलयो यैस्तं तैः स्तूयमाना॥ ११॥ किं मया हतया मन्देत्यारभ्य भुवि भौमानीति पर्यन्तश्लोकैः कथ्यमानानि बन्धुत्वं तथा शत्रुत्वं दैवाधीनाः सहासत इति सर्वस्य भगवदधीनत्ववेदनं च कंसस्यासुरस्य कथमित्यतः प्रमाणेन तत्तात्पर्यमाह। पूतनेति। यद्यपि पुराणे पूतनादिमूलं कंस इति स एवादौ ग्राह्यस्तथाऽपि सर्वापेक्षया पूर्वं पूतनाव्रजव्रजनादीति कंससंसारपीठकारूपिणीति तन्निरूपणमदाविति ज्ञेयम्। द्विधा प्रकारप्रकारिणोरभेदादेव मुक्तिरिति वा। द्विधा व्यया तृतीयाया लोपे प्रकारद्वयेन जीवा ज्ञेयाः। एकस्मिंस्तदुभयघटनप्रकारमाह॥ शुभेति। शुभजीवानामूर्वश्यादीनां प्रकाशेन तदावेशविशेषेण कदाचिदेव शुभबुद्ध्योऽसुरप्रवेशे विपर्यये। अन्यथा चाशुभबुद्धयस्तत्र शुभा इतो गता हरिं ययुरसुराश्च घोरं तमो ययुः। यदि तत्र शरीरे मध्यमा अभिमानिनः स्युस्ते मध्यमां गतिमेवापुः। एकदेहगता अपीत्यधिकारिसामान्यान्वयीति ज्ञेयः॥ ततश्चायं श्लोकसप्रकार्थः॥ हे मन्द अज्ञ मया हतया तव किं किं प्रयोजनम्। अष्टमो गर्भो योषित्पुरुषो वेत्यनिर्धार्योभिधानात्त्वमेव मम मृत्युरिति त्वद्जीवनं मज्जीवनकारणमिति तव नाशा भवन्त्वित्याह। तवान्तको मृत्युर्यत्र क्वचिज्जात इति खलु। देवादिनिवेदितासुगाद्यास्वादनं कुर्वन्ती नृत्यन्ती च हसन्ती च विपरीतेन भास्वती। विहायसा गता रौद्रा पिबन्ती पानमुत्तमम्। जहास च महाहासं कंसं च रुषिताऽब्रवीदिति हरिवंशशंसनात्। खलु स्याद्वाक्यभूषायां जिज्ञास्वादे च सान्त्वन इति विश्वः। कृपणानुत्तरत्र भविष्यतस्तोकान्मा हिंसीर्न हिंसय। कृपणामिति पाठे मा मां कृपणां वृथा त्वमहिंसीर्हतवान्। मत्सामर्थ्येनाहं विहायेन देहं विहायसा गता तव तु स्त्रीहत्यादोष आयात एवेत्यायताक्ष्यास्तात्पर्यम्। कृपणां मन्मातरं देवकीं वृथा मा हिंसीर्नोपद्रुतां कुर्वित्यपि व्याकुर्वते। कृपणान्पूर्वजान्मा च वृथा हिंसीरिति वाऽन्वयो ज्ञेयः। स जातः पोतः प्राक् त्वद्घातक इत्याह॥ पूर्वशत्रुरिति। पूर्वं त्वामशातयदिति शत्रुः॥ १२॥

श्रीसुबोधिनी

ततो यज्जातं तदाह सा तद्धस्तादिति, यदैव पाषाणं प्रति प्रक्षिप्तवांस्तदैव हस्तात् सम्यगुत्पत्योत्पतनं कृत्वा सद्य एव सा देवतारूपा जाता, ततोऽम्बरं गता, आकाशे श्येनवत् स्थिता कंसादिभिः सर्वैरेव तथादृश्यत, तस्यास्तथात्वे सामर्थ्यं विष्णोरनुजेति यशोदा देवकी परस्परविचारेणैकैव, पश्चाच्च जाता, यदि वा भगवान् यशोदासुतो यदि वा देवक्या उभयथापि सानुजा लोकप्रसिद्धेः, विष्णोरनुजात्वेन तथा सामर्थ्यं ज्ञापितं, द्विगुणं रूपमाह सायुधाष्टमहाभुजेति, भगवत्कार्यं स्वकार्यं च करिष्यतीत्यष्टभुजत्वं, भगवत्कार्यं देवक्यादीनां बन्धनिवृत्तिः, स्वकार्यं सर्वेषां दुःखदानं धर्मनाशश्च, भगवत्कृतिसिद्ध्यर्थमायुधसहिता अष्टौ महाभुजा यस्याः, यथा भगवानाविर्भावे विपरीतं रूपं प्रदर्शितवानेवमियमपि॥ ९॥

आविर्भावादिदानीं रूपान्तरं गृहीतवतीति तस्याः सामग्रीमाह दिव्येति, दिव्याः स्रजो मालाः, अम्बराणि वस्त्राणि दिव्यान्येन, आलेपश्चन्दनादि, रत्नयुक्तान्याभरणानि च, एवमलङ्करणचतुष्टयसहिता, दर्शनकृतोयं क्रमः, प्रथमतो गन्धाद्दृष्टाया अपि स्रजः प्रतीतिः, ततो वस्त्राणां, ततश्चन्दनाभरणानामिति, आयुधानि गणयति धनुरिति, धनुर्वामभागहस्ते, शूलमिषुश्च दक्षिणयोः चर्म वामे, असिर्दक्षिणे, शङ्खो वामे, चक्रं दक्षिणे, गदा वाम इति गदान्तानि बिभर्तीति गदाधरः॥ १०॥

तस्याः स्वरूपं भगवत इव सर्वजनीनमिति ज्ञापयितुमाह सिद्धचारणेति, सिद्धचारणगन्धर्वास्त्रिगुणाः, अन्ये च, अप्सरैरिति 'बहुलं छन्दसी'त्यनेन, ऐकपद्यं तु सुगमं, अस्याः षड्गुणोपजीवका एते कंसदर्शन एव, उपाहृता उरुबलयः पूजासाधनानि यैः, बलिशब्दो जयजयादिशब्दानामप्युपलक्षकः, अतस्तैः स्तूयमाना कंसवधं कर्तुं शक्ताहमिति ज्ञापयन्तीदं वक्ष्यमाणमब्रवीत्॥११॥

द्वयमत्र वक्तव्यं कथं न हन्यते कथं वा रक्षार्थं न स्थीयत इत्युभयसमाधानं तदाह किं मयेति, मया हतया किम्? अहं तु हननेप्यपकारं न करोमि, किं पुनरहता? अत एतद्वृत्तान्ताज्ञानात् त्वं मन्दः, अवधे हेतुर्जातः खलु तवान्तकृदिति, यस्तु तवान्त नाशं करिष्यति स तु जात एव क्वचित्, यत्र क्वचिदितिविशेषाकथनं देवगुह्यं, ननु शत्रुत्वाविशेषेपि सामर्थ्ये विद्यमानेपि यद् भगवतैव हन्यते न त्वयेति को विशेष इति चेत् तत्राह पूर्वशत्रुरिति, मम त्विदानीं भवाञ्छत्रुः तदप्यन्यबुद्ध्या, भगवांस्तु भवतः पूर्वशत्रुरतस्तेनैव हन्तव्यः, आकाशवाण्यापि तथैवोक्तं, अतः कृपणां देवकीं मा हिंसीः, तस्या वधे न कोपि पुरुषार्थः सिध्येत्, अतो वृथैव मा हिंसीः॥ १२॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः।

सा तद्धस्तादित्यत्रानुजात्वं हि न भगवज्जन्मोत्तरकालिकजन्मताप्रयुक्तमतिप्रसङ्गात् प्रकृते च समातृकत्वसपितृकत्वयोरभावाच्छुकेन कथमस्यामनुजात्वमुक्तमित्यत आहुर्यशोदेत्यादि, कृष्णोपनिषदि 'यो नन्दः परमानन्दो यशोदा मुक्तिगेहिनी'ति

श्रावितं, तथा 'देवकी ब्रह्मविद्या सा या वेदैरुपगीयते निगमो वसुदेवोय'मिति च श्रावितं, तत्र ज्ञेयस्य ज्ञानरूपलाभहेतुत्वमर्थस्य च शब्दप्रयोगहेतुत्वं लोकेपि स्पष्टं, एवं सति श्रीयशोदाया मुक्तिरूपत्वेन श्रीदेवकीरूपब्रह्मविद्याविषयतयाधिदैविकत्वमिति सेयं च परस्परविचारेणैकैव, आधिदैविकाध्यात्मिकयोस्तथात्वात्, भगवज्जन्मनः पश्चान्माया जाता, एवं तयोरैक्यत्वात् पश्चाज्जातत्वे सिद्धे यदि भगवानाधिदैविक्याः सुतो यदि वाध्यात्मिकया उभयथापि सानुजा, तत्र हेतुर्लोकसिद्धेरिति, लोकप्रसिद्धिरैतिह्य' तस्मात्, 'श्रुतिप्रत्यक्षमैतिह्य'मितिश्रुतौ भगवद्वाक्ये च तस्य प्रमाणत्वेनाङ्गीकारादित्यर्थः ॥ ९ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

सा तद्धस्तादित्यत्रानुजात्वं साधयन्ति यशोदेति, वसुदेवनन्दयोर्धर्मभ्रातृत्वं, तथा च भ्रातृपुत्रयोरप्यन्योन्यं भ्रातृभगिनीव्यवहारस्य लोकसिद्धत्वात् तत्तत्पत्नी भ्रात्रोः परस्परविचारेणैकैव, अन्योन्यं भ्रातृत्वविशिष्टसुताः पञ्चापि पाण्डवाः परीक्षितः पितामहा भीष्मश्चैषां तत्र यथा प्रपितामहपुत्रत्वेन तेषामैक्यमादाय पितामहत्वं तथात्र भर्त्रोर्भ्रातृत्वेनैक्यात् तत्पत्न्योश्चैक्यमादाय तत्पुत्रयोर्भ्रातृभगिनीव्यवहार इति तयोरैक्यमितिभावः, ननु भगवतो यशोदासुतत्वपक्षे भगवत्प्रादुर्भावोत्तरक्षणे मायाजननाङ्गीकारे च सहजातयोर्मध्येनन्तरोत्पन्नस्य ज्येष्ठत्वव्यवहारात् कथमस्या अनुजात्वमित्यत आहुः पश्चाच्चेति, यशोदासुतपक्षेप्यनु पश्चाज्जातेति-यौगिकार्थमादाय तथेत्यर्थः, फलितमाहुर्यद्वि वेति, भगवत्कार्यमिति, निबन्धोक्तप्रकारेणानिरुद्धकार्यमित्यर्थः ॥ ९ ॥

किं मयेत्यस्याभासे न हन्यत इति, कंस इति शेषः, रक्षार्थमिति, देवक्यादीनामितिशेषः, अहं न त्वदपकारकर्त्र्यतो मया देवक्या रक्षा कर्तुं न शक्यते इति प्रथमचरण उक्तं, तवान्तकृदन्योस्त्यतो मया त्वं न हन्यस इत्युक्तं, अग्रे वाक्यं त्विति, भगवता सह वाच्यवाचकभावसम्बन्धयुक्तं मायया तु वाच्यवक्तृत्वसम्बन्धयुक्तं अष्टमगर्भरूपा माया तु वक्त्री हन्ता त्वन्य एवेत्यर्थः, तथा चाकाशवाण्या विरुद्धवाक्यमाकर्ण्येत्यर्थः ॥ १२ ॥

बुभुत्सुबोधिका

सा तद्धस्तादित्यत्र अनुजात्वं हि न भगवज्जन्मोत्तरकालिकजन्मता। तत्कालजातेष्वतिप्रसंगात्। प्रकृते च सममातृकत्वस्य विष्णुमाययोरभावाच्छुकेन कथमस्यामनुजात्वमुक्तमित्यत आहुः यशोदेत्यादि। एकैवेति यशोदामुक्तिरैक्यरूपा देवकीरूपब्रह्मविद्यासाध्या। अतः साधनफले एकीकृत्य निरूपिते। यथा भाष्ये फलाध्याये तथा च श्रुतौ। कृष्णोपनिषदि। 'यो नन्दः परमानन्दो यशोदा मुक्तिगेहिनी'ति। तथा 'देवकी ब्रह्मविद्या सा या वेदैरुपगीयत' इति। पश्चाच्च जातेति अनुजापदस्यार्थः। देवक्यां विष्णुः यशोदायां माया विष्णोः पश्चाज्जाता। लोकप्रसिद्धेरिति ऐतिह्यरूपायाः। 'श्रुतिः प्रत्यक्षमैतिह्य'मितिश्रुतौ प्रमाणत्वेनाङ्गीकारात्। भगवत्कार्यमिति ,निबन्धोक्तप्रकारेणानिरुद्धकार्यम्। विपरीतमिति बालरूपमलौकिकरूपाद् विपरीतम्। इयं तु लौकिकरूपं कृत्वा तद्विपरीतमलौकिकं रूपं प्रदर्शितवती। अतो भगवत्कृतिसिद्धिः। तस्या मायाया निवृत्तेर्ज्ञानसाध्यायाः सर्वेष्टत्वात्। 'बन्ध इन्द्रियविक्षेपो मोक्ष एषां च संयम' इति निरोधेयं मोक्षो भवति। एवमियमपीत्यस्य गृहीतवतीत्यनेन ग्रन्थेन नान्वयः, किन्तु 'प्रदर्शितवती'त्यन्वयः। विष्णोरनुजा देवी प्रसादकरदृश्यतेत्यन्वयः ॥ ९ ॥

दिव्यस्रगित्यत्र तस्याः सामग्रीमाहेत्याभासो न किन्त्वाविर्भावादित्यादिग्रन्थ आभासः। पोथानन्तरं मृतकमदृष्ट्वा रूपान्तरमलौकिकमम्बरं गताम्बररूपं आविर्भावाद्धेतोः गृहीतवतीतिहेतोस्तस्याः रूपान्तरेण भिन्नायास्तच्छब्दवाच्यायास्तच्छब्दार्थधर्मरूपायाः सामग्री कारणकलापमाहेत्यर्थः। दिव्याः स्रज इति 'आकाशस्तल्लिङ्गा'दितिव्याससूत्रादनुजात्वेनाकाशशरीरिण्या आकाश आकाशः शरीरिणि शरीरिणी लीना। मुक्ता जाता। तस्या आविर्भावात् 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति शारीरब्राह्मणोक्ता न सामग्री किन्तु सायुधाष्टमहाभुजाया अदृष्टायाः शाब्दप्रतीतिविषयायाः। दिव्याः स्रजः सामग्री आविर्भावकारणम्। दिवि देवी दिवि भवा दिव्या स्रजः वर्तमानस्य वस्तुनो दर्शनविषयत्वयोग्यतारूपाविर्भावकारणम्। दर्शनं तु देवीप्रसादकानाम्। एवमम्बराणीत्यादि अलङ्करणेति जातेष्टेरावश्यकत्वात् सङ्ख्यातात्पर्यम्। अलङ्करणचतुष्टयसाहित्येन चतुष्पाद्ब्रह्मणेनां समयतीति फलम्। देव्या अदर्शनं सामग्र्या दर्शनमत आहुः दर्शनेति। गन्धादिति खपुष्पाभावात्, यथा 'सम्पुष्पितस्य वृक्षस्य दूराद् गन्धो वातो'तिश्रुते'वृक्ष इवस्तब्धो दिवि तिष्ठत्येक'इत्युक्तपुरुषस्य पुष्पाणां गन्धात्। तान्युद्दामानि। सूत्रप्रोतानि वा। अदृष्टाया मायायाः स्रजां कर्णकरकण्ठसम्बन्धिनीनां प्रतीतिरनुपासकानामपि। धनुर्वामेति स्त्रीणामङ्गस्फुरणं वामे श्रेष्ठमिति वामपरावृत्तायुधधारणम्। धनुषो धनुर्वेदोक्तस्य देहसम्बन्धित्वं यजुर्वेदोपवेदत्वात्। यजुर्वेदस्तु मानुष'इति मनुस्मृतेः अतः प्राथम्यम्। वामप्रथमहस्ते। शूलं सप्तमे दक्षिणहस्ते। इषु पञ्चमे दक्षिणहस्ते। चर्म वामे चतुर्थे। असिर्दक्षिणेऽष्टमे। शङ्खो वामे द्वितीयहस्ते। चक्रं दक्षिणे षष्ठे हस्ते। गदा वामे तृतीये करे। गदाधरा। भगवदायुधानां ज्ञानरूपाणां शङ्खचक्रगदाशूलानामावरकैर्धनुरिषुचर्मासिभिरावरणमित्येवमायुधक्रमः। भूम्नः शूलस्थाने पद्मम् ॥ १० ॥

सिद्धेत्यत्र भगवत इवेति 'देवी भगवती'तिवाक्यात्। त्रिगुणा इति तया सृष्टाः सत्त्वगुणः सिद्धाः। रजोगुणश्चारणाः। तमोगुणो गन्धर्वाः। रजस्तमसो व्युत्क्रमो वा। चारणानां तमोगुणत्वम्। अन्ये चेति अप्सरआदयः। अप्सराः सत्त्वगुणः।

किन्नरा रजोगुणः। उरगस्तमोगुणः प्रसिद्धः। ऐकपद्यमिति 'अप्सरःकिन्नरोरगै'रित्येवमैकपद्यम्। षड्गुणेति षड्गुणैः सत्त्वादिभिरुपजीवनं सिद्धया वंशशंसनेन गानेन नृत्येन किञ्चिन्नरत्वेन उरगत्वजात्या च भगवद्धर्मैश्वर्याद्यावरकैः कुर्वन्ति। कंसदर्शन इति सतिसप्तमी। कंसदर्शनकालसमानाधिकरणाः। कंसदर्शनकाल इत्यर्थः। कंसवधमिति स्तवनेन स्त्रीस्वाभाव्यात् तथा, भगवदावेशेन मृत्यौ कंसस्य निरभिमानत्वाभावाद् वा ॥ ११ ॥

किं मयेत्यत्र न हन्यत इति कंसः। रक्षार्थमिति देवक्यादीनाम्। तदाहेति उभयसमाधानमाह। न करोमीति समर्थोपि सङ्कर्षणकार्यत्वेन स्वाकार्यत्वात्। मन्द इति अज्ञानी मम कर्तृत्वस्य। प्रथमचरणेन द्वितीयं समाधानमुक्तं 'हतये'त्यस्यासत्ययेत्यर्थात्। प्रथमसमाधानं पादद्वयेनाहुः अवधे हेतुरित्यादिना देवगुह्यमिति देवगोप्यं प्रियम्। 'अस्याः त्वामष्टमो गर्भ' इतिवाक्ये गर्भपदोपादानात् 'देवाः प्रत्यक्षद्विषो' यतः। भगवानिति भवान् कालः। अबुद्ध्येति अहं तु हननेप्यपकारं न करोमीतिवृत्तान्ताज्ञानेन। पूर्वशत्रुरिति पूर्वस्य कालनेमेः शत्रुः। तथैवेति गर्भ इत्यत्र पुंस्त्वविवक्षणात्। अत इति यत्र कश्चिदष्टमगर्भस्य जातत्वात्। न कोपीति पुत्रान्तरेऽष्टमत्वाभावान्न कोपि शत्रुहननरूपः ॥ १२ ॥

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

आचार्यचरण कहते हैं कि—**"ततो यज्जातं तदाह"**—फिर क्या हुआ वह **'सा तद्धस्ताद्'** श्लोक से कहा है। **यदैव-पाषाणं प्रतिप्रक्षिप्तवान्**—कंस ने जब ही कन्या को पाषाण की ओर फेंका तब ही कंस के हाथ से बड़ी तेजी से उछलकर शीघ्र ही वह देवता रूप हो गई, बाद में आकाश में बाज पक्षी की तरह खड़ी हो गई, कंस आदि सब लोगों ने ही उसी तरह उसे देखा, उसके उस प्रकार सामर्थ्य होने में कारण यह है कि वह **'विष्णोरनुजा'** भगवान की छोटी बहिन है, क्योंकि यशोदा व देवकी परस्पर के विचार से एक ही हैं, भिन्न नही, और बाद में प्रकट हुई है। चाहे भगवान यशोदा के सुत हो, चाहे देवकी के, दोनों प्रकार से वह उनकी छोटी बहिन है। क्योंकि लीला में वैसी ही प्रसिद्धि[1] है, भगवान की अनुजा होने से उसका वैसा सामर्थ्य बतलाया गया है, भगवान से दुगुना उसका रूप बतलाया है कि **'सायुधाष्टमहाभुजा'** आयुध सहित आठ भुजा वाली वह है, भगवान तो चतुर्भुज ही प्रकटे हैं। भगवत्कार्य व अपना कार्य वह करेगी अतः ८ आठ भुजा वाली हुई हैं। देवकी आदि के बंधन की निवृत्ति भगवत्कार्य हैं, व सबको दुःख देना व धर्म का नाश उसका अपना कार्य है, भगवान की कृति को सिद्ध करने के लिये, आयुधों के सहित, अष्ट भुजायें उसकी हैं, जेसे भगवान ने प्रकट होने में विपरीत रूप दिखलाया, ऐसे इसने भी दिखलाया है ॥ ९ ॥

आचार्यचरण कहते हैं कि—**"आविर्भावादिदानीं रूपान्तरं गृहीतवती इति तस्याः सामग्रीमाह"**—श्रीदेवी ने जन्म से इस समय अन्य रूप का स्वीकार किया है, अतः अन्य रूपवती की सामग्री को **'दिव्यस्रग्'** श्लोक से कहते हैं।

कि दिव्य मालाये, व वस्त्र, एवं चन्दनादि आलेप वं रत्नजटित आभूषण, इन चार प्रकार के शोभाजनक पदार्थों के सहित वह रूप था, दर्शनकृत क्रम यह कहा गया है, प्रथम तो सुगन्ध से ही बिना देखे हुए भी माला की प्रतीति हो जाती हैं, उसके बाद वस्त्रों की, व उसके बाद चन्दन, व आभूषणों की, आयुधों की गणना करते हैं कि **'धनुः शूल'** इत्यादि। वाम भाग के हस्त में धनुष, शूल व बाण दक्षिण हस्तों में, ढाल वाम हस्त में, तलवार दक्षिण में शङ्ख वाम में, चक्र दक्षिण में, गदा वाम हस्त में, गदा पर्यन्त आठ आयुधों को धारण किये हैं ॥ १० ॥

तस्याः स्वरूपं भगवत इव सर्वजनीनमिति ज्ञापयितुमाह—आचार्य चरण आज्ञा करते हैं कि, उस देवी का स्वरूप भगवान् की तरह सर्वजन प्रसिद्ध है, यह बतलाने को **'सिद्धचारण'** यह श्लोक कहा है कि सिद्ध, चारण, गन्धर्व, इन सत्त्वादि तीन गुण वालों द्वारा, व अन्य, अप्सरा, किन्नर, उरग, इन गुणत्रयात्मकों द्वारा, उसकी स्तुति की जा रही हैं। निर्दिष्ट यह सिद्ध आदि छ हैं, देवी के ऐश्वर्य आदि षड्गुणों के आश्रित हैं, कंस के देखने में ही यह सब दीख रहे थे। देवी के अर्चन के लिये वह सब पुष्कल भेंट ला रहे थे, **'अप्सरैः'** यह पाठ भी छान्दस होने से सङ्गत ही हैं, यदि एक पद है तब तो सुगम ही है आचार्यचरणों को **अप्सरैः** और **अप्सरःकिन्नरोरगैः** दोनों पाठ अभिप्रेत ऐसा जान पड़ता है बलि शब्द पूजा सामिग्री का वाचक होते

---

[1] यहां इस प्रसङ्ग पर श्री लेखकार का यह आशय है कि श्री वसुदेवजी एवं नन्दरायजी धर्म के भाई थे अतः इन दोनों भाईयों के होने वाली सन्तान भाई बहिन हो सकती है, जैसे नन्दरायजी एवं वसुदेवजी धर्म के भाई होने से एक समझे जाते हैं वैसे ही उनकी दोनों पत्नियां भी एक ही समझी जायगी, अतः एव अलग २ माता से उत्पन्न हुए सभी पाण्डव परीक्षित के पितामह कहलाये क्योंकि पाण्डु के होने से कुन्ती एवं माद्री एक ही समझी गई।

श्रद्धेयशील श्री वल्लभजी महाराज कहते हैं कि निबन्ध की रीति से यह माया "अनिरुद्ध" का कार्य करने आई है।

लोकप्रसिद्धि इतिहासरूप से प्रमाण है, और कृष्णोपनिषद् में नन्द को परमानन्द व यशोदा को मुक्ति कहा है, एवं वसुदेव को वेद, व देवकी को ब्रह्मविद्या कहा है अतः देवकी व यशोदा का व वसुदेव और नन्द का आध्यात्मिक, आधिदैविक भाव से ऐक्य हैं।

हुए 'जय जय' 'नमो नमः' आदि शब्दों का भी उपलक्षक है, अतः उनसे स्तुति जिसकी की जा रही है वह देवी 'मैं कंस वध कर सकती हूं' ऐसा ज्ञात कराती हुई आगे कहे जाने वाले इस वचन को बोली ॥ ११ ॥

आचार्यचरण कहते हैं कि "**द्वयमत्र वक्तव्यं कथं न हन्यते कथं वा रक्षार्थं न स्थीयत इत्युभयसमाधानमाह्** —यहाँ देवी की उक्ति में दो बातें कहना आवश्यक है कि कंस क्यों नहीं मेरे से मारा जा रहा है, व देवकी आदि की रक्षा के लिये क्यों नहीं मेरे से ठहरा जा रहा है, इन दोनों का समाधान '**किं मया हतया मन्द**' इस श्लोक से कहा जाता है। भगवती ने कहा कि हे मन्द '**मया हतया किम्**' मैं तो मारने पर भी मारने वाले का अपकार नहीं करती हूँ, फिर बिना मारे तो अपकार करने की चर्चा ही क्या, अतः देवकी आदि की रक्षा के लिये मैं नहीं ठहरती क्योंकि तेरे अपकार करनेवाली मैं नहीं हूँ। तुझे इस बात का ज्ञान नहीं अतः तू मन्द है, मूर्ख है, और जो तेरा अन्त करने वाला है, वह तो जहाँ कहीं प्रकट हो ही गया है, अतः मैं तूझे नहीं मारती हूँ। भगवान श्रीकृष्णजी का विशेष रूप से प्रकट होने का स्थान नहीं कहा, क्योंकि देवकार्य गोपनीय होता है, यह शंका की जा सकती है, कि शत्रुता तो कंस से देवी की भी है हा क्योंकि अभी मारने को शिला पर फेंकी ही थी, व सामर्थ्य भी उसमें उसे मारने का है ही तब भगवान् ही कंस को मारे तू 'देवी' न मारे इसमें क्या विशेष बात है, उस शङ्का पर कहा हैं कि '**पूर्वशत्रुः**' मेरा तो तू 'कंस' अभी का ही शत्रु है, सो भी अन्य समझकर शत्रुता की है, परन्तु भगवान् तो तेरा पूर्वकाल से शत्रु है, अतः भगवान से ही तू मारा जावे, यह ही उचित है, आकाशवाणी ने भी वैसा ही कहा था, अतः तू दीन इस बेचारी देवकी को न मार, उसके मारने में कोई पुरुषार्थ सिद्ध न होगा, अतः वृथा ही मत मारे ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सा तस्य हस्तान्न शिलापृष्ठे पतिता, किंतूत्पत्य ऊर्ध्वं गत्वा सद्य एव देवी सती अम्बरं आकाशे गता। तत्र स्थिता सती सायुधो आयुधैः सहिताः अष्टौ महान्तो भुजा यस्याः, तथाविधा कंसादिभिः सर्वैरदृश्यत। न च तस्या इदमत्याश्चर्यमित्याशयेनाह–विष्णोरनुजेति विष्णोराज्ञया एवंविधानेककार्यार्थं तत्पश्चाज्जाता योगमायेत्यर्थः ॥९॥ तां वर्णयति–दिव्यस्रगादिभिर्भूषिता। स्रजो मालाः, अम्बराणि वस्त्राणि,आलेपश्चन्दनादिः, रत्नयुक्तान्याभरणानि च। आयुधानि दर्शयन् विशिनष्टि-धनुरादिगदान्तानि धारयतीति तथा॥१०॥ उपाहृताः समर्पिता उरवो बलयः पूजासाधनानि यैस्तैः सिद्धादिभिः स्तूयमानेदं वक्ष्यमाणं कंसं प्रत्यब्रवीत् ॥ ११ ॥ तद्वाक्यमाह–किमिति। मन्द हे मन्दबुद्धे! हतयाऽपि मया तव किं प्रयोजनं सिद्ध्यति? न किमपि तत्र हेतुमाह—जात इति। खलुशब्दोऽवधारणे। तवान्तकृत् नाशकर्ता पूर्वशत्रुः पूर्वजन्मनि त्वां हतवान् स यत्र क्व वा प्रदेशे जात एव। अतः कृपणान् दीनानन्यान् वृथा प्रयोजनं विना मा हिंसीः। 'कृपणाम्' इति पाठे तु देवकीं वृथा मा हिंसीः, यद्वा मा मां कृपणां वृथा हिंसीः हिंसितवानसीति ॥ १२ ॥

अन्वितार्थप्रकाशिका

सा ॥ तद्धस्तादिति ॥ विष्णोरनुजा सा कन्या नीचैः क्षिप्यमाणाऽपि तस्य हस्तान्न शिलापृष्ठे पतिता किंतूत्पत्य ऊर्ध्वं गत्वा कंसशिरसि पादं दत्त्वा "कंसासुरस्योत्तमाङ्गे पादं दत्त्वा गता दिवम्।" इति भविष्योत्तरम्। सद्य एव देवी भूत्वा अम्बरम् आकाशं गत्वा तत्र स्थिता सती कंसभयार्थं स्ववचोविश्वासार्थं च सायुधा आयुधैः सहिताः अष्टौ महान्तो भुजा यस्याः तथाविधा कंसादिभिः सर्वैरदृश्यत ॥ ९ ॥ दिव्येति ॥ दिव्याः स्रजो मालाः अम्बराणि वस्त्राणि आलेपश्चन्दनादिः रत्नयुक्तान्याभरणानि च तैर्भूषिता धनुः शूलम् इषुर्बाणः चर्म फलकम् असिः शङ्खः चक्रं गदा एषां धरा धारिका ॥ १० ॥ सिद्धेति ॥ उपाहृताः समर्पिता उरवो बलयः पूजासाधनानि यैस्तैः सिद्धचारणादिभिः स्तूयमाना सा इदं वक्ष्यमाणं वचनं कंसं प्रत्यब्रवीत् ॥ ११ ॥ किं मयेति ॥ मन्द हे मन्दबुद्धे! हतयाऽपि मया यद्यहं हताऽप्यभविष्यं तदापि तव किं प्रयोजनं सिद्ध्यति न किमपि। खलु हेतौ। यतः तवान्तकृत् नाशकर्त्ता पूर्वशत्रुः पूर्वजन्मनि यस्त्वं हतवान् स यत्र क्व वा वक्तुमनर्हे प्रदेशे जात एव। अतः कृपणान् दीनानन्यान्वृथा प्रयोजनं विना मा हिंसीः मा जहीति अन्यशिशून् न हनिष्यति। इति वारयति। कृपणामित्येकवचनपाठे मा मां वृथा अहिंसीः हिंसितवानसीति ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सेति। विष्णोः अनुजा, सा कन्या, तस्य कंसस्य हस्तस्तस्मात्, समुत्पत्य उड्डीय, सद्यस्तत्क्षणमेव, देवी द्योतमाना दिव्यं स्वरूपं बिभ्रतीति यावत्। अम्बरमाकाशं, गता अधिष्ठिता, आयुधैः सहिता अष्टौ महाभुजा यस्याः सा एवंभूता सती, अदृश्यत। कंसादीनां नयनविषया बभूवेत्यर्थः ॥ ५ ॥ तां विशिनष्टि चतुरक्षरन्यूनद्वाभ्याम्। दिव्येति। दिव्याः स्रजश्चाम्बराणि वस्त्राणि चालेपः शरीरे सुगन्धिचन्दनालेपनं च रत्नाभरणानि रत्ननिचितालंकाराश्च तैर्भूषिता, धनुश्चापं च शूलं त्रिशूलं च इषुर्बाणश्च चर्म फलकं च असिः खड्गश्च शङ्खः कम्बुश्च चक्रं रथाङ्गं च गदा च ताः धरति बिभर्त्तीति तथाभूता ॥ १० ॥ सिद्धेति। उपाहृताः समर्पिता उरवो बहवः बलय उपायनानि यैस्तैः, सिद्धाश्च चारणाश्च गन्धर्वाश्च तैः, अप्सरसश्च किन्नराश्च उरगाश्च तैः, स्तूयमाना

सती, इदम्, अब्रवीत्। इति द्वयोरेकसंबन्धः ॥ ११ ॥ तदेवाह। किमिति। हे मन्द मन्दबुद्धे कंस, हतयाऽपि, मया किं, तव कस्य प्रयोजनस्य सिद्धिः, न किंचिदपि। तव, अन्तकृन्नाशकृत्, पूर्वशत्रुः, अशरीरवाण्युक्तस्तव पूर्वरिपुरित्यर्थः। यत्र क्व वा, यस्मिन् कस्मिंश्चित्प्रदेशे, जातः खलु। इत ऊर्ध्वं जनिष्यमाणानपि शिशून् हन्यादिति संभाव्य वारयति। कृपणान् शिशून्, वृथा मा हिंसीः। पाठान्तरे, कृपणां, मा मां, वृथा अहिंसीः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सा तद्धस्तादिति : १०. ४. ९.

प्रक्षाल्यमानाम्बरवच्छिलायामयं खलो मां क्षिपतीत्यवेक्ष्य। न मूर्खं तादृग्यहमम्बराङ्का किं त्वीदृगूचे इति तद्गतेन ॥ ८ ॥
तामष्टबाहुं प्रसमीक्ष्य सिद्धादयः परेशाद्विगुणस्वभावाम्। निश्चित्य सन्तर्प्य बलिं च तुष्टां संतुष्टुवुर्युक्तमभीष्टवाचा ॥ ९ ॥
स्वरूपाप्तौ स एवैको हेतुर्विष्णुपदाश्रयः। व्यञ्जयन्तीव साकाशं गत्वा स्वं रूपमाप यत् ॥ १० ॥

किं मयेति : १०. ४. १२.

यदा चिदाकाशपदोदिता भवेत्तदैति माया गुणसृष्टिचातुरीम्। यत्सा तदाकाशमवाप्य तादृशं रजस्तमःसत्त्वयुतं वचोऽब्रवीत् ॥१०॥
नोक्तं मया यदधुनाऽच्युतजन्मजातं तन्मोचयेन्न कृपणौ पितरौ नृशंसः।
नाधर्मधीश्च भवितेति विचिन्त्य देवी पित्रात्मसौख्यदमुवाच वचः क्षमं तत् ॥ १२ ॥

कृष्णप्रिया

वह कन्या उस कंस के हाथ उछल कर सद्यः देवतारूप बन गई और आकाश में स्थित हो गई। सर्वत्र व्यापक श्रीकृष्ण की छोटी बहिन थी। पुनः आयुध धारण किये हुए आठ भुजाओं सहित आकाश में स्थित हुई, कंस आदि को दिख पड़ी ॥ ९ ॥ वह देवी दिव्य माला, दिव्य वस्त्र, दिव्य चन्दन, एवं रत्नजडित आभरणों से विभूषित तथा धनुष, त्रिशूल, बाण, ढाल, तलवार, शङ्ख, चक्र, गदायुक्त हाथ वाली दिखायी पड़ी ॥१०॥ कर कमलों में बहुत सामग्री को लेकर जिनके श्री चरणों में अर्पित करते हुए सिद्ध, चारण, गन्धर्व, अप्सरा, किन्नर और नागगणों ने स्तुति की, वह देवी कंस से इस प्रकार बोली ॥ ११ ॥ आकाशगत श्री देवकीजी ने कहा कि हे मूर्ख, मुझे मारने से तुझे क्या लाभ है, तेरा मारने वाला, जो तेरा पूर्वजन्म का शत्रु है वह जहाँ कहीं पैदा हो गया है अतः इस दीन देवकी को व्यर्थ न मार ॥ १२ ॥

श्रीशुक उवाच[1]

इति प्रभाष्य तं देवी माया भगवती भुवि। बहुनामनिकेतेषु बहुनामा बभूव ह ॥ १३ ॥
[2]तयाकथितमाकर्ण्य कंसः परमविस्मितः। देवकीं वसुदेवं च विमुच्य प्रश्रितोऽब्रवीत् ॥ १४ ॥

कंस उवाच[3]

अहो भगिन्यहो भाम मया वां बत पाप्मना। पुरुषाद इवाभ्येत्य[4] [5]बहवो हिंसिताः सुताः ॥ १५ ॥
स त्वहं त्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत् खलः। [6]काँल्लोकान् [7]सङ्क्रमिष्यामि ब्रह्महेव मृतः श्वसन् ॥ १६ ॥

कर्दमक्षमा

अन्वयः— इति तम् प्रभाष्य भगवती माया देवी भुवि बहुनामनिकेतेषु बहुनामा बभूव ह ॥ १३ ॥ तया कथितम् आकर्ण्य परमविस्मितः कंसः देवकीम् च वसुदेवम् विमुच्य प्रश्रितः अब्रवीत् ॥ १४ ॥ अहो भगिनि अहो भाम बत मया पाप्मना पुरुषाद इव अभ्येत्य वां बहवः सुताः हिंसिताः ॥ १५ ॥ त्यक्तकारुण्यः त्यक्तज्ञातिसुहृद् खलः सः तु अहम् ब्रह्महा इव श्वसन् मृतः कान् लोकान् सङ्क्रमिष्यामि ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

बहुनामनिकेतेषु वाराणस्यादिस्थानेषु ॥ १३ ॥ परमविस्मितः कथं दैवी वागनृता जातेति ॥१४॥ भाम हे भगिनीभर्त्तः। पुरुषादो राक्षसो यथा स्वापत्यमेव हिनस्ति तद्वत् ॥ १५–१७ ॥

---

१. अन्यग्रन्थेषु श्रीशुक उवाच पाठो नास्ति। २. तयाभिहित—श्रीधर. वंशी. वीर. विश्व. गिरि. भक्त.। ३. अन्यप्रत्यां "कंस उवाच" पाठो न दृश्यते। ४. पत्यं—श्रीधर. वंशी. जीव. गिरि ; इवोपेत्य—वीर. विज. भक्त.। ५. सुहृदो—इति कस्यचित्। ६. हा कान् लोकान्—विज.। ७ वै गमिष्यामि- श्रीधर. वंशी. गिरि. भक्त.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इति एवं "इति हेतुप्रकरणप्रकाशादिसमाप्तिषु" इति यादवोक्तेरिति अत्र प्रकारे ॥ १३ ॥ दैवी वागाकाशवाणीरूपा ॥ १४ ॥ "भामस्तु भगिनीभर्ता" इत्यमरः ॥ १५ ॥ ब्रह्महा ब्राह्मणहंता । मृतः श्वसन् । जीवन्मृतः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रभाष्य आदिश्य भगवती पूर्वोद्दिष्टभगवत्प्रसादेनाधिकैश्वर्ययुक्ता सती बहुनामेति नानानामसु निकेतेषु नानानामत्वेन पूज्याभूदित्यर्थः ह हर्षे ॥ १३ ॥ विमुच्य कारागारान्निःसार्य विशब्देन रक्षिसङ्कोचाच्च निगडान्मोचनमग्रे वक्ष्यति देवक्याः प्राग्विमोचनं स्त्रीणामेव तद्युक्तेः विशेषतो भगिनीत्वात् तस्या दुःखविशेषाच्च अन्यत्तैः यद्वा तया अभिहितमाकर्ण्य तां तं च विमुच्य नम्रः सन्नब्रवीत् कीदृशो भूत्वा कन्याया आकस्मिकवैभवादि तादृशवाक्यैश्चात्यन्तविस्मितो भूत्वेति ॥ १४ ॥ अहो द्वयमार्त्तिसम्बोधने बत खेदे पुरुषादा हि पुरा स्वापत्यादा आसन् तत्रैकां राक्षसीं स्वापत्यमदन्तीं दृष्ट्वा देव्या कृपयोक्तम् इतः प्रभृति राक्षसबालाः जन्मत एव प्रबुद्धा भवन्त्विति ॥ १५ ॥ त्यक्तकारुण्यः बालानां भागिनेयानां निर्दोषाणां बहूनां वृथा मारणात् इति धर्मो नापेक्षित एव लोकश्च नापेक्षित इत्याह, त्यक्ता ज्ञातयो देवकादयः सुहृदश्च बन्धवो भवदादयो येन सः अत एव खलः नु वितर्के कांल्लोकान् वै इति पाठे वै निश्चये मृतः सन् कान् लोकान् गमिष्यामि व्यतिरेके दृष्टान्तोऽयं ब्रह्महा यथा कांश्चिल्लोकान् न गच्छति तद्वच्च कांल्लोकान् गमिष्यामि न कानपि तस्य प्रसिद्धैर्महारौरवादिभिः प्रायश्चित्तपर्याप्तिर्न तु ममेति मम त्वन्यास्तेभ्योऽपि दुर्गतय इत्यर्थः । हे स्वसरिति दैन्यात् श्वसन्निति पाठे इह लोकेऽपि जीवन्मृत इत्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रभाष्यादिश्य, भगवती पूर्व्वोद्दिष्ट-श्रीभगवत्प्रसादेन सर्व्वैश्वर्य्ययुक्ता सती; बहुनामेति कस्मिंश्चित् स्थाने किमपि नामेत्येवं श्रीमथुरायामन्यत्रापि काशी-कामरूपादिबहुलस्थानेषु दुर्गा-कामाख्येत्यादिभिर्बहुलसंज्ञाभिः पूज्याभूदित्यर्थः । ह हर्षे ॥१३॥ विस्मितः कन्या-वैभव-रूपादिभिः; विमुच्य कारागारान्निःसार्य्य, वि-शब्देन रक्षिसंकोचाच्च । निगडान्मोचनमग्रे वक्ष्यति । देवक्याः प्राग्विमोचनम्,—भगिनीत्वात्तस्यास्तस्या दुःखविशेषाद्वा; किंवा वसुदेव-प्रीत्यर्थम् ॥ १४ ॥ अहो—द्वयमार्त्तिसम्बोधने; बत खेदे; पाप्मना 'पापं पापानुबन्धि स्यात्' इति न्यायतः पूर्व्वपापेन हेतुना पापस्वरूपेण मयेति वा ॥ १५ ॥ त्यक्तकारुण्यो बालानां भागिनेयानां निर्दोषाणां बहूनां वृथा मारणादिति धर्म्मो नापेक्षित इत्याह—त्यक्ता ज्ञातयो देवकादयः सुहृदश्च बन्धवो भवदादयो येन सः; अत एव खलो दुष्टः । नु वितर्के । मृतः सन् कान् लोकान् गमिष्यामि, तन्न जाने; यद्वा, न कानपीत्यर्थः । नरकभोगस्यापि नियतकालतया मत्पापस्य चानन्त्येन शुद्ध्यर्थपापभोगायोग्यस्य नरकस्याप्यभावादित्थं परमशोकोक्तिः । ब्रह्महेत्यप्रायश्चित्तत्वं प्राणत्यागपर्य्यन्त-प्रायश्चित्तत्वं वा सूचयति । हे स्वसरिति दैन्यात् 'श्वसन्' इति पाठे इह लोकेऽपि जीवन्मृत इत्यर्थः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

बहुनामनिकेतेषु नानासञ्ज्ञेषु ॥ १४ ॥ भामः भगनीपतिः पाप्मना पापवता सुताः वामित्यन्वयः ॥ १५ ॥ मृतः श्वसन् जीवन्मृतः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीत्थं तं कंसं प्रभाष्य सा भगवती पूज्या माया देवी भुवि बहुनामनिकेतेषु नानासंज्ञकस्थानेषु बहूनि पूर्वं भगवदुक्तानि दुर्गादीनि नामानि यस्यास्तथाभूता बभूव हेत्याश्चर्ये ॥ १३ ॥ ततस्तया माययाऽभिहितमाकर्ण्य कंसः सुतरां विस्मितः देवकीं वसुदेवं च विमुच्य निगडान्निर्मोच्य विनीत इदमब्रवीत् ॥ १४ ॥ तदेवाऽऽह—अहो इति सार्द्धैरष्टभिः । भगिनीपतिर्भामः पुरुषाद इव राक्षस इव राक्षसेनेवेत्यर्थः । विभक्तिव्यत्यय आर्षः । उपेत्य समीपमेत्य मया पाप्मना पापात्मना वां युवयोः बहवः सुताः हिंसिताः बतेति खेदे ॥ १५ ॥ स तु त्वत्पुत्रहन्ताऽहं तु त्यक्तं कारुण्यं येन त्यक्ता ज्ञातयः सुहृदश्च येन तथाभूत अत एव खलोऽत एव कांस्तु लोकान् प्राप्स्यामि नरकानपि न गमिष्यामि केवलं स्थावरतां गमिष्यामीति भावः । अत एव ब्रह्महेव श्वसन् जीवन्नपि मृतः मृततुल्यः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

"माया भगवती दुर्गा" इति शब्द आदिवचनः इत्यादीत्यर्थः "इति हेतुप्रकरणप्रकारादिसमाप्तिषु" इति यादवः ॥ १३ ॥ सतां स्वभावं दर्शयति—तयाभिहितमिति ॥ १४ ॥ बत खेदे बहवो राक्षसाः यत्क्रूरकर्म कुर्वन्ति सम्भूय तन्मयैकेन कृतमित्यतः पुरुषादैरिति बहुवचनम् ॥ १५ ॥ ब्रह्महा ब्राह्मणं हतवान् मृतः श्वसन् जीवन्मृतः ॥ १६–१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

बहुनामनिकेतेषु वाराणस्यादिस्थलेषु ॥ १३ ॥ परमविस्मितः कथं मानुष्या देवक्या गर्भे दुर्गा देवी जाता कथं वा दैवी वागनृताभूदिति ॥ १४-१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

बहुनामनिकेतेषु अनेकनामसु स्थानेषु ॥ १३ ॥ परमविस्मितः परमं दुस्तरं विस्मयं संशयं प्राप्तः ॥१४॥ अहो इत्याश्चर्यपूर्वकसंबोधने अहो भाम हे भगिनीभर्तः बत इति खेदे वां युवयोः ॥ १५-१७ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

बहूनामनिकेतेषु वाराणस्यादिस्थानेषु ॥ १३ ॥ परमविस्मितः मानुष्या गर्भात् दुर्गा देवी कथमभूत् कथं वा आकाशवाक् मिथ्येति जातविस्मयः ॥ १४ ॥ हे भाम भगिनीपते ! पुरुषादो राक्षसो यथा स्वापत्यं हिनस्ति तद्वत् ॥ १५ ॥ श्वसन्नपि मृतोऽहम् ॥ १६-१७ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

इतीति । अत्र बहुनामेति पाठः साधु । तस्य स्त्रियां ङीपोऽपेक्षितत्वात् । अतोविरोधस्तस्मादुच्यते । बहून् अनेकान्नामयति प्रह्वीकरोतीति बहुनामा तस्याभिधानार्थकत्वे ङीपोऽपेक्षितत्वेऽपि प्रह्वीभावार्थकत्वे टापोऽपि युक्तत्वात् न बहुनाम्नीति पाठस्यावश्यकत्वमित्यर्थः । यद्वा । बहुनामेति क्रियाविशेषणम् । बहूनाम यथास्यात्तथा आबभूवेत्यर्थः अथवा । बहुना दुर्गाभद्राकालीत्याद्यनेकनामविशेषेण । अमा सह । बभूव । अमा सह समीपे चेत्यमरः । बहुमाने सह वा । अपि वा । मः शिवो मा रमायां चेति विश्वात् । मा रमा बहुनामा निकेतेषु बहूनि त्रीणि नंदभीष्मसत्राजिदिति नामानि येषां तेषां निकेतेषु गृहेषु दारेषु वा बहुना योगनिद्रा रुक्मिणी सत्यभामेत्यादिरूपत्रयेण । अपर्यवसितबहुत्वस्य त्रित्वेपर्यवसानमिति न्यायात् । पूर्णरूपेण वा । बहुः पूर्णतायामित्युक्तेः । भुवि बभूव । श्री भूदुर्गेति त्रीणि रूपिणी रमा त्रिरूपैर्भगवत्सेवार्थमवतीर्णा बभूवेति भावः । कृष्णजन्मकाले रुक्मिणीसत्यभामयोरवताराभावेन लिटोऽनुपपत्तिरिति चेन्न । वक्तुः शुकस्य कथनसमयात्पूर्वमेव तिसृणामप्यवतीर्णत्वात् । तस्मान्न प्रयोगासाधुत्वम् ॥ १३ ॥ अत्र केचित् पुरुषाद इवापत्यमिति पाठं कल्पयति । तदयुक्तम् । कर्त्रोर्वैयधिकरण्यापातात् । न चात्रापि वचनासाम्यम् । तस्यान्वयानुपपत्त्यभावेनादोषत्वात् ॥ १५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

बहुनामवत्सु निकेतेषु काश्यादिसदनेषु बहुनामा बहूनि नामानि यस्याः सा । डाबुभाभ्यामिति डाबन्तानान्तो वाऽयं शब्दः । स्थानानि च नरा भुवि दुर्गेति भद्रकालीत्यारभ्याम्बिके चेत्यन्तसार्धश्लोकेन भगवदुक्तप्रकारबहुनामा बभूव । हेति प्रसिद्धिसूचकम् । वसुदेवदेवकीदृश्या त्वन्येषां तल्पे बालरूपिण्यवात्सीदित्यर्थसूचको वा हशब्दः । यथोक्तमाचार्यैः । पुनर्न देवकीतल्पे शयद्बालरूपैव दुर्गा नाज्ञासिषुस्तामथ केचन । ऋते हि मातापितरौ गुणाढ्यामिति ॥ १३ ॥ आकर्ण्य श्रुत्वा प्रश्रितः प्रह्वः ॥ १४ ॥ भामभगिनीभर्तौ वां युवयोः पाप्मना तद्वता मया पुरुषादैरिव बहुराक्षसकार्यं कृतमेकलेन किल मयेति बहुवचनं स्वापत्यमित्यनवेक्षण च तद्धर्म इति तन्निदर्शनमिति मन्तव्यम् । सुता हिंसिताः । शात्रवं चेत्पुत्रादिहिंसा कंसविहितेत्यत आह । सुहृदोरिति ॥ १५ ॥ स्वभावाक्रूरणमित्यूह्यम् । स्वं निन्दति । श्वसन्मृत इति । सोऽहं तु ब्रह्महेव कान् लोकान्गमिष्यामीत्यन्वयः । त्यक्तकारुण्य इत्यादिकं सुलोकदौर्लभ्यहेतुः ॥ १६ ॥

श्रीसुबोधिनी

एवमुक्त्वा गतेत्याह इतीति, प्रकर्षेण भाषित्वा स्पष्टतया निरूप्य, अनेन संवादान्तरमपि कंसेन सह कृतवतीति लक्ष्यते, अन्यथा ब्राह्मणैः सह विरोधं न कुर्यात्, तेन सह संवादेनैव कार्यं सर्वं सिद्धमिति ज्ञातवतीत्यत्र हेतुमाह देवीति, यद्यन्याप्यागत्य स्पष्टमन्यथा वदेत् तथापि तया मोहितः कंसो नान्यदङ्गीकुर्यादित्यत्र हेतुमाह भगवतीति, सा हि भगवद्भावप्राकट्यं कृत्वा लोके पूजां प्राप्स्यतीति भगवद्वाक्यानुसारेण **बहुनामनिकेतेषु** भूमौ यावन्ति स्थानानि यन्नामानि तत्र सर्वत्रैव स्थिता बहूनि रूपाणि कृत्वा **बहुनामा बभूव**, दुर्गादिमूर्तिषु रूपभेदस्य स्पष्टत्वाद्, देवकीवसुदेवयोर्निर्बन्धो व्यर्थः ॥ १३ ॥

शत्रुस्तु 'जात' इति मायावचनं श्रुत्वा कंसः किं कृतवानित्याकाङ्क्षायामाह तयेति, वाक्यं तु भगवत्सम्बन्धि तया तु परं केवलमभिहितं, तदाकर्ण्य **परमं विस्मयं** आप्तवान्, यदीयं देवता ज्ञायेत धृत्वैव स्थाप्येत, तद्वाक्यविश्वासाद् **देवकीं वसुदेवं च विमुच्य** शृङ्खलां दूरीकृत्य देवीवाक्यादुत्पन्नशुद्धभावः, **प्रश्रितो** विनीतोऽब्रवीत्, कायिकं मानसं च शुद्धभावं प्रदर्श्य वाचिकं प्रदर्शितवानित्यर्थः ॥ १४ ॥

तस्य वाक्यान्याहाहो इत्यष्टभिः ।

स्वापराधस्य कथनं फलस्यापि च कीर्तनम् । भ्रमाच्चैवापराधोयं शोकदूरीकृतिस्तथा ॥ १ ॥
एवं चतुर्भिर्लोकोक्त्या शोकाभावो निरूपितः । तत्त्वावबोधनेनापि चतुर्भिः शोकनाशनम् ॥ २ ॥
आत्मनो न हि शोकोस्ति ज्ञानदृष्टेश्च नश्यति । अतः शोको न कर्तव्यः कर्माज्ञानवशो यतः ॥ ३ ॥

प्रथमतः स्वापराधकीर्तनेन क्षमापयति, अहो इत्याश्चर्येण सम्बोधनं, आश्चर्याविष्टस्तथैवागत्य देवकीं वसुदेवं च पृथक् प्रार्थयते, अहो इति पृथग्वचनं, 'भामस्तु भगिनीपतिः', सम्बन्धेन सम्बोधनं स्नेहार्थं, वां युवयोः, पापस्य स्वस्य च भेदाभावं वदन्नाह पाप्मनेति, बतेति खेदे, पश्चात्तापेन वदामीति ज्ञापयति, न त्विदं प्रतारणार्थं, पुरुषादो राक्षसः, स हि भक्षणार्थं बालकान् नयति, तथा मया स्वदेहरक्षाभ्रमाद् युवयोर्बहवः सुता विहिंसिताः, राक्षसानां सम्बन्धाद्यपेक्षा शास्त्रापेक्षा च नास्ति किन्तु प्राणरक्षार्थमेव सर्वेषां सर्वपुरुषार्थसाधकान्यपत्यानि भक्षयन्ति तथा मया मारिता इति तुल्यता, ततोपि विशेषस्तु बह्व इत्यनेन ज्ञापितः ॥ १५ ॥

एवमपराधस्य फलमपि सम्भावयति स त्वहमिति, दैत्यावेशात् कृतं स्वतस्त्वं समीचीन इति न तव नरकसम्भावनेत्याशङ्क्य तु शब्दस्तं पक्षं व्यावर्तयति, मया कृतमिति य एव मन्यते स एव तत्फलं प्राप्नोतीति यतः सोहं, 'जिघांसन्तं जिघांसीया'दिति वाक्यात् तव को दोष इति चेत् तत्राह त्यक्तकारुण्य इति, प्रथमतो ये हतास्ते तु न जिघांसवो भवन्ति तथा त्वं वा, यदा ते मारयितुमायान्ति समर्था वा तदैव वध्या न तु बालका दीनाः, अतो येषु कारुण्यं कर्तव्यं बालकेषु भागिनेयेषु तेषु न कृतमिति त्यक्तकारुण्यः, ननु सम्भावनयापि शत्रवो मार्यन्ते शत्रुपुत्राश्चातो राज्ञां सम्भवनयापि वधो न दोषायेति चेत् तत्राह त्यक्तज्ञातिसुहृदिति, त्यक्ता ज्ञातयः सुहृदो मित्राणि च येन, नन्वात्मघातकाः सर्व एव वध्या 'भ्रातापि भ्रातरं हन्या'दिति तत्राह खल इति, मयैव परं ते मारिता न तु तैरहं, अतोहमेव खलो वृथैव परघातकः, अतो दुष्टकर्मणः कृतत्वात् कान् लोकान् सङ्क्रमिष्यामि ? ननु सिद्धा एव तामिस्रादयो घातकानां ये तत्राह ब्रह्महेवेति, ननु 'ब्रह्महा पच्यते घोरे पुनरावृत्तिवर्जित' इति वाक्यात् कः सन्देह इति चेन्न, प्रायश्चित्तस्य करिष्यमाणत्वाद् वधजनितो दोषो न भविष्यति परं महतामपचारात् प्रायश्चित्तं दुर्बलं न वेति सन्देहादेवं वचनं, ननु प्रायश्चित्ते नास्त्येव नरकः कथं सन्देह इति चेत् तत्राह मृतः श्वसन्निति, अयं पुरुषः श्वसन्नेव मृतः, अपकीर्तेर्जातत्वात्, अतो ज्ञायते यदि पापं गच्छेत् तदा तदभावः सर्वजनीनः स्यात् सर्वात्मकत्वाद् भगवतः, अतो मृतः श्वसन् यतो वर्ते, प्रायश्चित्तशास्त्रस्य च प्रामाण्यात् सन्देहकथनम् ॥ १६ ॥

(५) भगवदीयनिर्भयरामभट्टनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या ।

अहो भगिनीत्याद्यष्टश्लोकानां वाक्यार्थानाहुः स्वापराधस्य कथनमित्यादिना ।

बुभुत्सुबोधिका

इति प्रभाष्येत्यत्र गतेति निकेतेषु स्वप्रतिमासु गता । अनेनेति प्रोपसर्गेणोक्तस्य निरूपणस्य परपक्षनिराकरणपूर्वकस्वपक्षस्थापनरूपत्वेन । संवादान्तरं पूर्वपक्षनिराकरणरूपमित्यर्थः । अहं तु हननेप्यपकारं न करोमीति स्वपक्षस्थापनात् । अन्यथेति सर्वस्य मायाकार्यत्वाज्ञाने । न कुर्यादिति कंसः । भ्राहृत्वादिति भावः । तेनेति कंसेन । सर्वमिति अर्चनकर्मत्वादिकं स्वस्य । देवीति तेन दिवेधु तिर्ज्ञानमत्रार्थः । स्वरूपमुक्त्वा तस्या मोहरूपं कार्यमाहुः यद्यन्य इति । अन्यथा चरेदिति मायावादविरुद्धं चरेत् । चदेदितिपाठे चद याचने भ्वा० उभ० से० । भगवद्भावेति भगवतीत्वप्राकट्यम् । भगवद्वाक्येति 'अर्चिष्यन्ति मनुष्यास्त्वा'मिति भगवद्वाक्यानुसारेण । रूपभेदस्येति द्विभुजचतुर्भुजत्वादिरूपभेदस्य ॥ १३ ॥

तया कथितमित्यत्र वाक्यं त्विति भगवता सह वाच्यवाचकसम्बन्धोस्यास्तीति वाच्यवाचकसम्बन्धि तस्य भावस्तत्ता । तया । तस्या असत्त्वात् । विस्मयमाहुः यदीयमिति । मारिताप्यनपकारकर्त्री । धृत्वैवेति ज्ञानसाधनाद्धृदि धृत्वा स्थाप्येत । मायासिद्धान्तस्योक्तत्वात् । शृङ्खलां दूरीकृत्येति तेन विभागानुक्तफलो व्यापारो मुञ्चतेरर्थः । शुद्धभाव इति मानसः । प्रश्रित इति कायिकशुद्धभावः । वाचिकमिति 'अब्रवी'दित्यनेन वाचिकं शुद्धभावम् ॥ १४ ॥

अहो इत्यत्र फलस्येति स्वापराधफलस्य मृत इव श्वासस्य । भ्रमाच्चेति मारकपुत्रभ्रमाद् वृथैव शिशुहननरूपः शोकदूरीकरणं 'मा शोचतं' इत्यत्र स्पष्टः । आत्मनो न हीति भावार्थः । ज्ञानाद् दृष्टश्चेति मायिको दृष्टः आत्मभेदः । मायासिद्धान्तस्योक्तत्वात् । शोको न कर्तव्य इति 'मानुशोचत' इतिपदेन स्पष्टः । 'यावद्धतोस्मी'त्यत्र स्पष्टः । कर्माज्ञानेति कर्माज्ञानयोर्वशः । तथैवेति आश्चर्येणैव । प्राणरक्षार्थमिति राक्षसाः भक्षणाभावे म्रियन्ते । सर्वोपि । तत इति राक्षसेभ्यः ॥ १५ ॥

स त्वहमित्यत्र दैत्यावेशादिति इदमाविष्टदैत्ये दोषजनकम् । त्वं स्वतः समीचीनः । तं पक्षमिति आविष्टे दोषपक्षम् । करिष्यमाणत्वादिति ज्ञानोक्त्या ज्ञानयज्ञस्य करिष्यमाणत्वात् । तदभाव इति अपकीर्त्यभावः । सर्वजनीनत्वं व्युत्पादयन्ति स्म सर्वात्मकत्वादिति । भगवत इति भयात् प्राप्तस्य जीवन्मुक्तताकारणस्य । अत्रापराधफलं मृतश्वास उक्तः ॥ १६ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

आचार्यचरण आज्ञा करते हैं कि **एवमुक्त्वा गता इत्याह**—प्रकट हुई यह अष्टभुजा देवी ऐसा कह कर चली गई, यह बात **'इति प्रभाष्य'** इस श्लोक से कही है कि इस तरह वह स्पष्ट रूप से कह कर चली गई। **'प्रभाष्य'** पद में आये प्र उपसर्ग से स्पष्ट कथन कहा है, तात्पर्य है कि इससे ऐसा ज्ञात होता है कि कंस के साथ कुछ अन्य संवाद भी देवी ने किया था। अन्यथा ब्राह्मणों के साथ कंस विरोध न करता, कंस के साथ किये गये संवाद से ही वह समझ गई कि कार्य सिद्ध हो गया, ऐसा समझने में हेतु यह है कि वह 'देवी' है, देवता को कार्यसिद्धि का ज्ञान युक्त ही है, यदि अन्य कोई देवता भी आकर स्पष्ट इसके संवाद के विरुद्ध कुछ कहे तो भी उस देवी से मोहित हुआ कंस अन्य कथन का स्वीकार नहीं कर सकता, यह आशय **'माया'** शब्द से स्पष्ट किया गया है। 'भगवती' शब्द से कहा है कि वह भगवद्भाव को प्रकट कर लोक में पूजा ग्रहण करेगी, भगवान् के वाक्यों के अनुसार वह **'बहु ामनिकेतेषु'** भूमि में विभिन्न नामवाले अनेक स्थानों में स्थित हुई, बहुत से रूपों को धारण कर बहुत नामवाली हो गई, 'ह' शब्द से दुर्गा आदि मूर्तियों में रूपभेद की स्पष्टता बतलाई है ॥ १३ ॥

आचार्यचरण कहते हैं कि "**शत्रुस्तु जातं इति माया वचनं श्रुत्वा कंसः किं कृतवान् इत्याकांक्षायामाह**—श्रीदेवकी वसुदेवजी का बन्धन व वध व्यर्थ है तेरा शत्रु तो प्रकट जहाँ कहीं हो गया है इस प्रकार माया देवी के वचन को सुनकर कंस ने क्या किया, इस जिज्ञासा के समाधानार्थ **'तया कथितम्'** इस श्लोक को कहते हैं उस देवी ने तो केवल कथनमात्र किया है, वास्तव में वह वाक्य तो भगवान् का ही है, भगवान् ने अपना वक्तव्य देवी के द्वारा दिया है। उसे सुनकर कंस अत्यन्त आश्चर्य को प्राप्त हुआ, यदि यह देवता ज्ञात हो जाती तो कंस उसे पकड़ कर रख लेता, उसके वाक्य पर, विश्वास के कारण कंस ने देवकी व वसुदेव को बन्धन से मुक्त कर दिया, और कंस को देवी के वाक्य से शुद्ध भाव उत्पन्न हुआ है, अतः **'प्रश्रितः'** विनीत होकर बोला। राजा कंस ने दोनों को बेड़ियों से छुड़वा कर दोनों के प्रति कायिक व मानसिक शुद्ध भाव दिखलाकर वाचिक शुद्ध भाव दिखलाया यह प्रश्रित शब्द का आशय है ॥ १४ ॥

श्रीमदाचार्यचरण "राजा कंस के मुख से निकले हुए" **अहो भगिन्यहो भाम**—इत्यादि श्लोक १५ से २२ श्लोक पर्यन्त के श्लोकों के वाक्यार्थ को तीन कारिकाओं से स्पष्ट करते हैं। इन तीन कारिकाओं में यह प्रथम कारिका है **'स्वापराधस्य कथनं फलस्यापि च कीर्तनम्। भ्रमाच्चैवापराधोयं शोकदूरीकृतिस्तथा॥'**' राजा कंसने (१) **'अहो भगिन्यहो भाम'** हे बहिन और हे बहनोई मैंने आपके अनेक पुत्रों का वध किया, ऐसा १५ वें श्लोक में **'स्वापराधस्य कथनं'** अपराध को स्वीकार किया। (२) **'स त्वहं त्यक्तकारुण्यः'** इस १६वें श्लोक से मैं मेरे इन पाप कर्मों से किन लोकों को प्राप्त करूँगा ऐसा, **'फलस्यापि कीर्तनम्'** अपने पाप कर्मों का फल कहा। (३) **'दैवमप्यनृतं वक्ति'** इस १७वें श्लोक से मैंने देव वाक्य श्रवण से **'भ्रमाच्चैवापराधोयं'** भ्रम वश मैंने अपराध किया। (४) **'मा शोचत महाभागौ'** इस १८वें श्लोक से हे देवकी एवं वसुदेवजी **'शोकदूरिकृतिः'** शोक न करे ऐसा शोकदूरीकरण किया। प्रथम कारिका के चार चरणों में चार श्लोकों के वाक्यार्थ को समझाया।

दूसरी कारिका—**एवं चतुर्भिर्लोकोक्त्या शोकाभावो निरूपितः। तत्त्वाववाधेनेनापि चतुर्भिः शोकनाशनम्॥** अब द्वितीय कारिका में आचार्यचरण कहते हैं कि इस प्रकार राजा कंस ने श्रीवसुदेव और श्रीदेवकीजी को जैसे लोक में समझाया जाता है वैसे लौकिक रीति से इन चार श्लोकों से समझाया। अब आगे के १९ से २२ श्लोक पर्यन्त के चार श्लोकों में तत्त्वज्ञान को समझा कर श्रीदेवकीजी एवं श्रीवसुदेवजी के शोक की निवृत्ति के लिये प्रयत्न किया है।

तीसरी कारिका—**'आत्मनो नहि शोकोऽस्ति ज्ञानदृष्टेश्च नश्यति। अतः शोको न कर्तव्यः कर्माज्ञानवशो यतः॥** अब राजा कंस **'भुवि भौमानि भूतानि'** इस १९वें श्लोक में दोनों के तत्त्वज्ञान की दृष्टि से कहता है कि (१) **'आत्मनो नहि शोकोऽस्ति'** भूतल पर केवल भौतिक देह का जन्म-नाश होता है आत्मा का नाश नहीं होता इसलिये शोक न करें। पुनः **'यथा नेवंविधो भेदः'** इस २०वें श्लोक से (२) 'ज्ञानदृष्टेश्च नश्यति' आत्म ज्ञान से शोक निवृत्त होता है यह कहा। पुनः **'तस्माद् भद्रे स्वतनयान्'** इस २१वें श्लोक से और **यावद् हतोऽस्मि हन्तास्मि'** इस २२वें श्लोक से अतः **'शोको न कर्तव्यः कर्माज्ञानवशो यतः'** कहा कि (३) जीव कर्म फल विवेश होकर एवं (४) अज्ञान वश हो अपना अशुभ फल भोगता है। अत एव आप दोनों से मेरा निवेदन है कि विवेक सम्पादन करके शोक न करें।

आचार्यचरण कहते हैं कि **प्रथमतः स्वापराधकीर्तनेन क्षमापयति** अब इस श्लोक में प्रथम तो कंस अपने अपराध को कहकर क्षमा कराता है। 'अहो' यह आश्चर्य द्योतक सम्बोधन किया गया है। आश्चर्यचकित वह कंस समीप में आ करके देवकी व वसुदेवजी से पृथक् पृथक् प्रार्थना करता है। श्लोक में 'अहो' शब्द का कथन पृथक् पृथक् पुनरावर्तन है। 'भाम' शब्दकोष में भगिनी के पति का वाचक शब्द है, सम्बन्ध सूचक सम्बोधन से स्नेह प्रकट किया है। 'वां' तुम दोनों

बहिन बहनोइयों के पुत्रों को मैंने मारा है, 'पाप्मना' मैं पाप स्वरूप हूँ, पाप में व मुझ में भेद नहीं 'बत' बड़ा ही खेद है। पश्चाताप से मैं जला जा रहा हूँ, मैं आप से जो प्रार्थना कर रहा हूँ, उसमें कुछ भी वञ्चना या दिखावट नहीं, पुरुषाद राक्षस जैसे अपने भक्षण या खाने को बच्चों को ले जाता है, उस तरह मैंने अपने शरीर की रक्षा के भ्रम से तुम्हारे बहुत बच्चे मार दिये, राक्षसों को सम्बन्ध आदि की अपेक्षा नहीं होती और न उनको शास्त्र की अपेक्षा होती है। किन्तु वह अपने प्राणों की रक्षा के लिये सबही के सब पुरुषार्थ साधक सन्तानों को खा जाते हैं। वैसे ही मैंने उन्हें मार दिये हैं, मैं राक्षस तुल्य तो हूँ ही, उससे भी अधिक यह है कि एक दो नहीं बहुत बच्चों को मारा है, यह 'बहवः' शब्द का भाव है ॥ १५ ॥

आचार्यचरण कहते हैं कि—'स त्वहं त्यक्तकारुण्यः' इस श्लोक से कंस अपने किये अपराध के फल की भी सम्भावना को व्यक्त करता है कि मैं निर्दय किस गति को प्राप्त करूँगा। यदि कंस से यह कहा जाय कि वह अपराध तो कालनेमि नामक दैत्य के आवेश के कारण हुआ है, स्वतः तो तू भला है अतः तुझको नरक की सम्भावना नहीं, ऐसी आशङ्का करके कंस 'तु' शब्द से उस पक्ष को निरस्त करता है कि मैंने किया है, ऐसा जो मानता है, वह ही उस किये गये कर्म का फल पाता है, अतः कहता है कि 'स तु अहम्' मारने वाला वह अपराधी तो मैं हूँ, यदि कहा जाय कि 'जिघांसन्त' जिघांसीयात' मारना चाहने वाले के मारने की इच्छा करना उचित है, तो तेरा क्या दोष है? तो वह भी संगत नहीं, क्योंकि मैं तो 'त्यक्तकारुण्य' हूँ, करुणा को छोड़कर बैठा हूँ, पहले तो बात यह है कि जिनको मैंने मारा है, वह तो मारने के इच्छुक नहीं हो सकते, उनका मारने की इच्छा से युक्त होना तो तब सम्भव है, जब वह मारने को आते हों, वे समर्थ हों, वैसी दशा में उनका बध उचित हो सकता है, न कि बालक दीन असमर्थ बध योग्य हो सकते हैं। अतः मुझे जिन पर करुणा करनी चाहिये उन बच्चों पर बहिन के लड़कों पर करुणा नहीं की, मैं निर्दय हूँ, यदि यह कहा जाय कि सम्भावना ही से शत्रुओं का वध किया जाता है, व शत्रु के पुत्रों का भी वध किया जाता है, अतः राजा लोग सम्भावना से भी मार डालते हैं, उनका ऐसा करना दोषजनक नहीं होता, तो यहाँ पर वैसी बात नहीं है, यह तो शत्रु नहीं बान्धव हैं, मैं ही 'त्यक्तज्ञातिसुहृत्' हूँ। अपने बान्धव व मित्रों का त्याग मैंने ही किया है। यद्यपि अपने मारने वाले कोई भी हों, उनको मारना ही उचित है, कहा भी गया है कि 'भ्रातापि भ्रातरं हन्यात्' भाई भी भाई को मार दे, परन्तु वह कथन यहाँ उपर्युक्त नहीं, क्योंकि मैंने ही केवल उनको मारा है, उनने तो मुझे नहीं मारा अतः मैं ही 'खलः' खल हूँ वृथा ही पर घात करने वाला हूँ, अतः दुष्ट कर्म करने से मैं किन लोकों में जाऊँगा, हत्यारों को तामिस्र आदि नरक लोक यद्यपि प्रसिद्ध है, किन्तु यह हत्या साधारण हत्या नहीं यह तो ब्रह्महत्या के समान है। 'ब्रह्महेव' ब्रह्म हत्या करने वाले की तरह मुझे किन नरकों में जाना पड़ेगा, यद्यपि 'ब्रह्महा पच्यते घोरे पुनरावृत्तिवर्जिते' पुनरावृत्ति रहित घोर नरक में ब्रह्म हत्यारा को यातना मिलती है, इस वचन से संदेह करना उचित नहीं, परन्तु कंस प्रायश्चित्त करेगा अतः हत्याकृत दोष तो निवृत्त हो जायगा, तो भी महान् पुरुष के अपकार से प्रायश्चित दुर्बल हैं, या नहीं इस संदेह से कंस का इस तरह संदेह वचन है, यदि प्रायश्चित करने पर नरक नहीं होता, अतः संदेह नहीं होना चाहिये, वहाँ कहता है कि 'मृतः श्वसन्' अपकीर्ति होने से, यह पुरुष जीवित होता हुआ भी मरा हुआ हा है, यदि पाप नष्ट हो जाता तो पाप निवृत्ति को सब ही लोग मान लेते क्योंकि भगवान् सर्वात्मक है, परन्तु वैसा नहीं हुआ, मैं स्वयं अनुभव कर रहा हूँ कि मेरा जीवन मरण ही है, जीवन नहीं अतः अपकीर्ति से पाप की अनिवृत्ति, प्रायश्चित शास्त्र के प्रमाण होने से पाप की निवृत्ति, यह दोनों विरुद्ध ज्ञान कंस को हो रहे हैं, अतः उसका संदेहात्मक वचन है कि 'काँल्लोकान्' मैं किन लोकों में जाऊँगा ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्येवं तं कंसं प्रभाष्य सा भगवती माया भुवि बहुनामनिकेतेषु नानासंज्ञकस्थानेषु बहूनि दुर्गासङ्कटादीनि नामानि यस्यास्तथाभूता देवी पूज्या बभूव तत्प्रसिद्धिं द्योतयति-हेति ॥ १३ ॥ तया माययाऽभिहितं कथितमाकर्ण्य कंसः परमविस्मितः 'कथं देववाणी अन्यथा जाता' इत्याश्चर्ययुक्तः शत्रोरन्यत्र जातत्वाद्देवकीवसुदेवयोर्निबन्धस्य व्यर्थत्वं मत्वा तौ विमुच्य प्रश्रितो विनीतः सन्नब्रवीत् ॥ १४ ॥ तदाह-अहो इति सार्धैरष्टभिः। अहो भगिनि! अहो भाम हे भगिनीपते! पाप्मना पापीयसा मया वां युवयोर्बहवः सुता हिंसिताः। बतेति खेदे। तत्त्वयुक्तं कृतम्। तदेव दृष्टान्तेन स्पष्टयति—पुरुषान् अत्तीति पुरुषादो राक्षसः, स यथा स्वापत्यमेव हिनस्ति तद्वदिति ॥ १५ ॥ स त्वहं त्वत्पुत्रहन्ता कान् नरकादिलोकान् गमिष्यामि?। लोकनिर्धाराभावेऽपि यातनालोकगमने तु निश्चय एवेत्याशयेनाह—वै इति। तत्र हेतुमाह-त्यक्तकारुण्य इति। करुणापात्रभगिनीपुत्रवधादित्याशयः। तत्र दृष्टान्तमाह—ब्रह्महेवेति। स यथा त्यक्तकारुण्यान्नरकं गच्छति तथेत्यर्थः। अयं लोकोऽपि न मम सुखद इत्याशयेनाह-श्वसन् जीवन्नप्यहं मृततुल्य एवेति। तत्र हेतुमाह त्यक्तेतित्यक्तास्तदननुमता चरणेनोपेक्षिता ज्ञातयः, सुहृदो मित्राणि च येन सः। अतस्तैर्धिक्कृतत्वादित्याशयः। तथाकरणे मम क्रूरतैव हेतुरित्याह— खल इति ॥ १६ ॥

अन्वितार्थप्रकाशिका

इतीति ।। इत्येवं तं कंसं प्रभाष्य सा भगवती माया भुवि बहुनामनिकेतेषु नानासंज्ञकस्थानेषु वाराणसीविन्ध्यादिषु बहूनि दुर्गासङ्कटादीनि नामानि यस्यास्तथाभूता देवी स्तुत्या बभूव । ह स्फुटार्थे ।। १३ ।। तयेति ।। तया माययाऽभिहितं कथितमाकर्ण्य कंसः परमविस्मितः कथं देवकीगर्भे दुर्गा देवी जाता कथं वा देववाण्यन्यथा जातेत्याश्चर्ययुक्तः अभूत् । शत्रोरन्यत्र जातत्वाद्देवकीवसुदेवयोर्निबन्धस्य व्यर्थत्वं मत्वा तौ विमुच्य प्रश्रितो विनीतः सन्नब्रवीत् ।। १४।। अहो इति अहो हे भगिनि ! अहो हे भाम भगिनीभर्त्तः ! पुरुषान् अत्तीति पुरुषादो राक्षसः स यथा स्वापत्यमेव हिनस्ति तद्वत् पाप्मना पापरूपेण मया वां युवयोः बहवः सुताः हिंसिताः । राक्षसा हि पुरास्वापत्यादा आसन् । तत्रैकां राक्षसीं स्वापत्यादां दृष्ट्वा देव्या कृपयोक्तं "बाला स्युर्जन्मतो वृद्धा इतः प्रभृति रक्षसाम् ।" इति । ततः प्रभृति स्वापत्यान् खादितुं न शक्नुवन्ति ।। १५ ।। स त्वहमिति ।। त्यक्तं कारुण्यं दया येन त्यक्ता उपेक्षिता ज्ञातयः सुहृदश्च येन श्वसन् जीवन्नपि मृतः सोऽहं खलः ब्रह्महा इव कान् अतिदुःखकरान् लोकान् गमिष्यामीति न वेद्मि ।। १६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति । इतीत्थं, तं कंसं, प्रभाष्य, भगवती पूज्या, माया देवी, भुवि, बहुनामनिकेतेषु नानासंज्ञकस्थानेषु, बहूनि नामानि यस्याः सा, प्राग्भगवदुक्तदुर्गादिबहुनामभागित्यर्थः । बभूव । हेत्याश्चर्ये ।।१३।। तयेति । तया मायया, अभिहितम् आकर्ण्य, तया तदुक्तं तच्छ्रुत्वेत्यर्थः । कंसः, परमविस्मितः सुतरां विस्मययुक्तः सन्, देवकीं वसुदेवं च, विमुच्य, निगडान्निर्मुच्येत्यर्थः । प्रश्रितः विनीतवदित्यर्थः । अब्रवीत् ।। १४ ।। तदेवाह । अहो इति । अहो हे भगिनि, अहो हे भाम भगिनीभर्त्तः, पुरुषादः इव, राक्षसवदित्यर्थः । उपेत्य भवदन्तिकं प्राप्य, पाप्मना पापरूपेण, मया, बतेति खेदे । वां युवयोः, बहवः षट् सुताः, हिंसिताः । राक्षसः स्वापत्यमपि हिनस्ति तद्वन्मया भागिनेया हिंसिता इत्यर्थः ।। १५ ।। स इति । सः त्वत्पुत्रहन्तृत्वेन प्रसिद्धतां प्राप्तः, अहं तु, त्यक्तं कारुण्यं येन सः, त्यक्ताः ज्ञातयः सुहृदश्च येन सः, अत एव, खलः एवंभूतोऽत एव, मृतः सन्, ब्रह्महा इव, श्वसन् जीवन्संश्च, यद्वा, श्वसन् जीवन्नपि, मृतो मृततुल्योऽहमित्यर्थः । कान् लोकान्, गमिष्यामि वै । केवलं स्थावरतां गमिष्यामीति भावः ।। १६ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अहो इति : १०.४.१५.

माया यतः समपयाति स कीदृशोऽपि सञ्जायते भुवि विवेकविशुद्धबुद्धिः ।
तत्सान्त्वनं निखिलराज्यतिलङ्घनं वा नो चेच्चकार हि कथं स दुरध्वचेताः ।। १३ ।।
शत्रुत्वं श्रीशमैत्रीं वा त्वन्मायैव सृजत्यहो । यौ हन्तुं योजितः कंसस्तौ स्तोतुं योजितः पुनः ।। १४ ।।

कृष्णप्रिया

श्री शुकदेवजी कहते हैं कि इस प्रकार स्पष्टतया अनेक बातें कहकर वह माया भगवती देवी पृथिवी के अनेक स्थानों में स्थित होती हुई बहुत नामवाली हुई ।। १३ ।। भगवती देवी द्वारा कहे गये वाक्यों को सुनकर कंस बहुत विस्मित हुआ और देवी के कथन में विश्वास कर श्री देवकी और श्री वसुदेवजी की बेड़ी को तोड़कर विनम्र होता हुआ कहने लगा ।। १४ ।। कंस परिताप करता हुआ आश्चर्य के साथ कहने लगा कि हे बहिन ! अजी बहिनोईजी ! मुझ पापी ने मनुष्यभक्षी राक्षस के समान जबरदस्ती आप दोनों के अनेक पुत्रों का वध किया, मुझे इसका बड़ा दुःख है ।। १५ ।। जिसने दया छोड़ दी है और ज्ञाति एवं मित्रों को भी छोड़ दिया है ऐसा दुष्ट मैं ब्रह्महत्या करने वाले की भाँति किन लोकों को प्राप्त करूँगा; मैं तो जीवित ही मृत हूँ।।१६।।

दैवमप्यनृतं वक्ति न मर्त्या एव केवलम् । यद्विश्रम्भादहं पापः स्वसुर्निहतवाञ्छिशून् ।। १७ ।।
मा शोचतं महाभागावात्मजान् [1]स्वकृतम्भुजः । जन्तवो न सदैकत्र [2]दैवाधीनाः सदा सते ।। १८ ।।
भुवि भौमानि भूतानि यथा यान्त्यपयान्ति च । नायमात्मा तथैतेषु विपर्येति यथैव भूः ।। १९ ।।
[3]यथानेवंविदो भेदो यत आत्मविपर्ययः । देहयोगवियोगौ[4] च संसृतिर्न निवर्तते ।। २० ।।

कर्दमक्षमा

अन्वयः—मर्त्या एव केवलम् अनृतं न वक्ति दैवम् अपि अनृतं वक्ति यद् विश्रम्भात् अहं पापः स्वसुः शिशून् हतवान् ।। १७ ।। हे महाभागौ ! स्वकृतम्भुजः आत्मजान् मा शोचतम् दैवाधीनाः जन्तवः सदा एकत्र न समासते ।। १८ ।। भुवि

---

१. सुकृतं—इति कस्यचित् । २. धीनास्तदाऽऽसते—श्रीधर. वंशी. ; धीनाः समासते—गिरि. ; धीनाः ; सहासते—जीव. भक्त. । ३. यदानैवंविधो—भक्त. ; यदानैवंविदाम्—केषां चित् । ४. वियोगैश्च—वीर. भक्त. ।

भौमानि भूतानि यथा यान्ति च अपयान्ति यथा भूः एव न विपर्येति तथा एतेषु अयम् आत्मा न एव विपर्येति ॥ १९ ॥ "यथा न एवं विदः" यतः आत्मविपर्ययः भेदः देहयोगवियोगौ च संसृतिः त निवर्तते ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे महाभागौ स्वकृतंभुजः स्वारब्धकर्मभोक्तॄन् स्वात्मजान्मा शोचतम् । किं च जन्तवः प्राणिनः सदा नासते किं स्वल्पकालमेव तदाऽप्येकत्र नासते किं तु वियुज्यंते यतो दैवाधीनाः ॥ १८ ॥ सदा नासत इत्यनेन यदुक्तं जन्ममरणादि । तदपि देहानामेव नात्मन इत्याह । भुवीति । भूतानि देहा एव यांत्यपयांति च । भवंति न भवंति चेत्यर्थः । यथा भुवि भौमानि घटादीनि तद्वत् । एतेषु भूतेषु जन्मादिभिर्विक्रियमाणेष्वयमपरोक्षतया प्रत्यभिज्ञायमानो न विपर्यति विपर्ययं न प्राप्नोति । एकरूप एव वर्तत इत्यर्थः । भौमेषु विक्रियमाणेषु यथा भूस्तथेति ॥ एवं विचार्यमाणे सति न शोकाद्यवकाशः ॥ १९ ॥ अज्ञानतस्तु न निवर्तत इत्याह । यथेति । यथा यथावदनेवंविद एवमजानत आत्मविपर्ययो देहात्मबुद्धिर्भवति यतो विपर्ययाद्भेदो भवति । देहाहंकारेण ह्यात्मनि परिच्छिन्ने सतीदंकारास्पदं भिन्नं भवति यतो भेदात्पुत्रादिदेहैर्योगो वियोगश्च ततः संसृतिः सुखदुःखे इति यावदज्ञानं न विवर्तत इत्यर्थः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दैवं देववचः । यद्वा—देवानां हेतुः कारणं परब्रह्म 'तन्मूला देवताः सर्वाः' इत्युक्तेः । 'नभोलिंगमलिंगमीश्वरम्' इत्युक्तेश्च । विस्मित आह—शुद्धसत्त्वस्वभावा देवा अपि तमोधर्ममनृतं वदंतीत्याश्चर्यम् । यद्विस्रंभात् । यद्विश्वासात् ॥ १७ ॥ कृतेप्यपराधे महात्मानोऽपराधिनं नोपालभंत इत्यभिप्रायेणाह-हे महाभागाविति । स्वकर्मभुजामपि नैकत्र स्थितिरित्याह—किञ्चेति । दैवाधीना दिष्टायत्ताः । दुर्गादेव्येवावयोरात्मजाभूत्किमन्यैः सुतैः स्वकृतभुग्भिरिति विमर्शेनापि मा शोचतमिति भावः ॥ १८ ॥ दृष्टांतादिनाह—भुवीति । इत्यर्थ इति । न हि भूतशब्देनाकाशादयोऽत्र ग्राह्यास्तेषामाप्रलयस्थितेरिति भावः । भौमेषु भूविकारेषु । घटशरावादिषु विक्रियमाणेषूत्पन्नविनष्टेषु यथाभूर्न विक्रियते यथेति ॥ १९ ॥ यावदज्ञानं यावत्कालपर्यंतमज्ञानं तिष्ठति तावत्संसृतिर्न निवर्तत इत्यर्थस्येत्युक्त देहैरेव पुत्रादिभिर्योगः । सुखकारणं वियोगो दुःखकारणमियमेव संसृतिरिति भावः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न केवलमत्र ममैव दोषः किन्तु मूलं देवानामेवेत्याह—दैवमिति देवता "सत्यमेव देवा अनृतं मनुष्याः" इति श्रुतिविरोधोपि जात इत्यर्थः । एवेति लोकोक्त्या नाधिकं पाप इति कथमन्यथा तद्विस्रम्भः ? स्यादिति भावः ॥ १७ ॥ महाभागौ, हे परमविवेकिनौ ! जन्तवः सर्व एव जीवाः न तु केचिदित्यर्थः । एकत्र एकस्मिन् स्थाने नासते तत्रापि सह सम्भूय परस्परमासज्य नासते किन्तु पृथक्पृथक् स्वस्वकर्मार्जितलोकादौ तिष्ठन्तीत्यर्थः ॥ १८ ॥ अपयान्ति नश्यन्ति भुवीति तत्र यानि सर्वाण्येवेत्यर्थः । यद्वा भुवि वर्त्तमानानीति भौमानां जन्मनाशयोः सर्वप्रत्यक्षतोक्ता एवं दार्ष्टान्तिकेपि ज्ञेयं न विपर्यति जन्मादिविक्रियां नाप्नोति अत्र श्रीवैष्णवमते भुव आश्रयत्वांश एव दृष्टान्तत्वं न कारणत्वांशेपीति ज्ञेयम् ईश्वरेऽपि मात्सर्येण कंसादीनां स्वद्वैतवादाश्रयत्वादंश इति वा तत्रैव जीवात्मनो व्यापकत्वांशे वा तदा च आयान्तीत्यादिकं यथा धात्वर्थमेव विपर्येति भ्रमतीत्यर्थः ॥ १९ ॥ आत्मन एवं देहाद्वैलक्षण्यमजानतां देहयोगवियोगोपि इति पाठो बहुत्र स च सर्वोपि द्वन्द्वो विभाषयैकवद्भवतीति न्यायेन "ऊकालोऽज्झ्रस्वदीर्घप्लुतः (१।२।२७) इतिवत् अद्वैतमते पूर्वोक्तप्रकारेणात्मज्ञानान्यथात्वं ततो भेदकल्पनं ततोभिन्नेऽध्यासः ततो देहयोगवियोगौ ततः संसृतिश्च न निवर्त्तत इति च स्यात् अनेवंविदामिति बहुवचनपाठ एव सर्वसम्मतः अत्र टीकायाम् इति एतत्पूर्वोक्तं सर्वं यावदज्ञानं तावन्न निवर्त्तत इति व्याख्येयम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

न केवलमत्र ममैव दोषः, किन्तु देवानामपीत्याशयेनाह—दैवमिति देवता, न केवलं मर्त्त्या एवानृतं वदन्तीति 'मर्त्येष्वनृतं प्रतिष्ठितम्' इत्यादिवचनतस्तेषु तत्सम्भवात्; पापः पापकृत् क्रूरो वा सन् ॥ १७ ॥ महाभागौ हे परमविवेकिनौ जन्तवः सर्व एव जीवाः, न तु केचिदित्यर्थः । एकत्र एकस्मिन् स्थाने नासते, तत्रापि सह सम्भूय नासते, किन्तु पृथक् स्वस्वकर्म्मोर्ज्जितलोकादौ तिष्ठन्तीत्यर्थः । यद्वा, स्वकृतं भुज इति लोकान्तरे स्वकर्म्मभोगार्थं गमनान्मरणे वियुज्यन्ते एवेत्युक्तम्, जीवनेऽपि वियुज्यन्त इति ॥ १८ ॥ तत्र दृष्टान्तो यथा भुवि भूतानि जातानि भौमानि रजांसि तृणादीनि वा वातवशादायान्त्यपयान्ति च, न चैकत्र सदा सहासते, तद्वदित्यर्थः । ते च देहा एव, न त्वात्मा, ब्रह्मांशत्वेन नित्यत्वादित्याह—नायमिति, एतेषु देहेषु स्थितोऽप्यात्मा तथा देहवन्न विपर्य्येति, निजस्वभावाद्वैपरीत्यं न याति, किन्तु तिष्ठतीत्यर्थः । अतो नश्वराणामवश्यं वियोगापत्त्याऽनश्वरस्य च सदा सत्तासिद्ध्या शोकेनालमिति भावः । अपयान्ति नश्यन्ति भुवि यानि तानि सर्वाण्येवेत्यर्थः, यद्वा, भुवि वर्त्तमानानीति भौमानां जन्मनाशयोः सर्वप्रत्यक्षतोक्ता एवं दार्ष्टान्तिकेऽपि ज्ञेयम्, न विपर्य्येति जन्मादिविक्रियां नाप्नोति ॥१९॥ एवं देहानामेव

जन्मादिविकारः, न त्वात्मन इत्येतद्विदां सामान्यापेक्षया बहुवचनपाठ एव सर्वसम्मतः। नन्वीदृशज्ञानवतामपि शोको नाम दृश्यते ? सत्यम्, ज्ञाननिष्ठाराहित्यादित्याह—यथेति यथावत् सम्यक् निष्ठया, एवमुक्तप्रकारं तत्त्वमजानतामेव भेदोऽयमहं मत्पुत्रोऽयमित्यादिलक्षणो भवति, यतो भेदाद्विपर्ययोऽहं भोक्ताहं कर्त्ता, सुखी दुःखी चेत्यादिलक्षणमात्मतत्त्ववैपरीत्यं भवति; ततश्च पुत्रादिदेहैर्योगो वियोगश्चेत्यर्थः। मम पुत्रोऽयं जातोऽयञ्च मृत इत्यादिबुद्धिर्भवतीत्यर्थः। अमूर्त्तस्यात्मनो योगवियोगासम्भवाद्देहशब्दप्रयोगः ततश्च शोकदुःखलक्षणा संसृतिर्नैव निवर्त्तते ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

स्वकृतंभुजः स्वकृतकर्म फलभोक्तॄन् ॥ १८ ॥ भौमानि भूतानि पार्थिवरजांसि सदा सहावस्थानभावे दृष्टान्ताः एतेषु शरीरेषु न विपर्येति नापयाति अनित्यशरीरसन्तानेष्वात्मनोऽनुवृत्ते दृष्टान्तमाह—यथैव भूरिति। यथा पृथिवीत्वजातिः पार्थिवरजस्सु अनुवर्त्तते तथा पूर्वपरदेहे स्वात्मानुवर्त्तत इत्यर्थः ॥ १९ ॥ अनेवम्विदः आत्मनोनुवृत्तत्वे न देहातिरेकमजानतः पुरुषस्य भेदः बाध्यबाधकतारूपभेदः स्यात् अत आत्मविपर्ययः अद्वेष्यता विषयभूतोऽभवदित्यर्थः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पूर्वं तु "अस्यास्त्वामष्टमो गर्भो हन्ता" इति दैवमुवाचेदानीन्तु यत्र क्वचित्तव मृत्युर्जात एवेति श्रुतमतो मानुषवद्दैवमप्यनृतं वक्त्येव यस्यैव वचने विश्वासादहं भगिनीसुतान् हतवानिदमतिजुगुप्सितं कर्म कृतवानस्मि किल ॥ १७ ॥ अथापि महाभागौ विवेकिनौ पुत्रानात्मजान् प्रति माऽशाचतं शोकं माकार्ष्टं तेषामशोच्यत्वं सूचयितुं विशिनष्टि स्वकृतम्भुजः स्वकृतकर्मफलभोक्तॄन् जन्तवः दैवाधीनाः स्वस्वकृतकर्मानुगुणप्रवृत्तदैववश्याः अत एव सदैकत्र नासते नावतिष्ठन्ते किन्तु तत्तत्कर्मानुगुणजन्ममरणादिभाजो भ्रमन्ति ॥ १८ ॥ सदा सहानवस्थाने दृष्टान्तमाह यथा भुवि भौमानि रजांसि यान्त्यपयान्ति अपगच्छन्ति तद्वद्भूतान्यपि कर्मवशात्कचित्संयुज्य पुनर्वियुज्यन्ते भौमानां गमनागमनाद्यवस्थावत्त्वेपि यथा न भुवः तथात्वं तथा शरीरेषु जन्ममरणादिविकारवत्स्वपि तद्धारकतयावस्थित आत्मा जीवः न विपर्येति विपर्ययं न प्राप्नोति नान्यथाभावं गच्छति किन्त्वेकरूपतया नित्यतया चावतिष्ठत इत्यर्थः। जन्ममरणाद्यवस्थावत्त्वस्वाभाव्याद्देहा न शोच्या नाप्यात्मा विक्रियाभावान्नित्यत्वाच्चेति भावः ॥ १९ ॥ ननु, जातोऽहं मृतोऽहं हतोऽहम् अहमस्मि इत्येवमात्मनोऽपि जननमरणहन्तृहन्तव्यभावप्रतीतेः कथं न स विपर्येतीत्यत्र सा प्रतीतिर्देहात्मभ्रान्तिमूला सैव च तस्य देहसंयोगवियोगरूपसंसृतिहेतुश्चेत्याह—यदेति। यदेवंविधो भेदः देहात्मनोर्वैधर्म्यरूपो भेदः न स्यादनुष्ठानपर्यन्तत्वेन नाध्यवसितः स्यात् यतः अनध्यवसितादेव भेदादात्मनि विपर्ययः देहधर्मप्रतीतिर्भवति तावत् देहसंयोगवियोगैरुपलक्षिता संसृतिर्न निवर्तते तत्संयोगादिरूपा संसृतिर्न निवर्त्तते चशब्दाद्धन्तृहन्तव्यप्रतीतिरपि न निवर्तत इत्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वकृतंभुजः स्वकृतादृष्टभुज इति यत्तन्माशोचेथाम् इतोपि शोको न कर्त्तव्य इत्याह जन्तव इति। कीटादिप्राणिनः ॥ १८ ॥ नन्वेवं तर्हि देहस्थस्य परमात्मनोप्यागमनापायौ स्यातामिति तत्राह भुवीति यथा भुवि भौमानि पार्थिवानि भूतानि चतुर्विधान्यायान्त्यपयान्ति च तथैतेषु भूतेषु स्थितोऽयमात्मा परमात्मा न विपर्येति आगमापायौ न प्राप्नोति कथं यथा भूरागमनापायौ नाप्नोति तथेत्यर्थः। यथा भूतानि उद्भूतानि भौमानि रजांसि आयान्त्यपयान्ति वायुनेति शेषः। अयमात्मा तथा न अनन्याधीनत्वात् अन्वयदृष्टान्तमाह यथा भूः पृथ्वी कठिनत्वेन स्थिरत्वादिति शेषः ॥ १९ ॥ जन्त्वागमागमवत् पुत्रादिकं विपर्येति भुव आगमापायाभाववत् परमात्मा न विपर्येतीति यदि तर्हीदं ज्ञानं कस्मान्नोदेतीत्याशंक्य भगवन्मायया मुग्धचेतस्त्वेन परमात्मविषयाभेदज्ञानबाहुल्याद् अनेन संसारानिवृत्तिस्तमःप्राप्तिश्च स्यातामित्याह, यत इति। अस्वपरविवेकबुद्ध्युत्पत्तिप्रभृतिपरमात्मविषयोऽभेदोऽनेकविधोऽहं ब्रह्मास्मीत्यादिको जीवस्य प्रतीयत इति यतस्तेन विपरीतज्ञानेन देहयोगादिलक्षणा वास्तवी यथार्था संसृतिर्न निवर्तत इति यतः आत्मविपर्ययः स्वस्य तम आद्यनर्थप्राप्तिश्च यतस्तस्मादात्मनि स्थितिं कृत्वा मानुशोचेत्यन्वयः "अहं ब्रह्मास्मि देवोस्मि नास्मि केवलमानुषः" इत्यादि सिद्धोयमर्थः अभेदप्रतीतिः असुरजातेरेव "तल्लक्षणैर्विहीनः सन् ब्रह्म देवोस्मि वापि तु" इत्यादेः सर्वः स्वकृतमदृष्टं भुंक्त इति यस्मात्तस्मात् ब्रह्मास्मीत्यादि चिन्तनं तर्हि कस्येत्यतः स्वयोग्यानामेव तदुक्तं "परब्रह्मण एकस्य ब्रह्मास्मीति विचिन्तनम्" इत्यादेः सर्वः परमात्मा स्वकृतं पूर्णं स्वमानन्दं विन्दते यतोऽवशः अवगतपरमानन्दः "सर्वः शर्वः शिवः स्थाणुः" इति च सर्वः देवादिश्च स्वकृतं देवोस्मीत्यादि यथार्थज्ञानफलं भुंक्ते अवशो विष्ण्वधीनः ॥ २०–२१ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

जन्तवः सदा नासते तत्राप्येकस्मिन् स्थाने नासते सह संभूयापि नासत इत्यर्थः ॥ १८ ॥ भुवीति दृश्यमानानीत्यर्थः। जीवात्मन आश्रय एव भुवो दृष्टान्तम् ॥ १९ ॥ न तु कारणत्वेऽपि यथा येन हेतुना एवमात्मतत्त्वमजानता भेदस्तस्मादन्यत्र तदुपाधौ दृष्टिर्भवति यतो हेतोस्तत्रैवात्मभावना भवतीत्यादि यत इति यतश्चेत्यर्थः ॥ २०–२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हे भाम, हे भगिनीपते ! पुरुषादो राक्षसो यथा स्वापत्यं हिनस्ति तद्वत् ॥१७॥ भुज इति किबन्तं स्वकृतमिति षष्ठ्यभाव आर्षः महाभागाविति दुर्गादेव्येव आवयोरात्मजाभूत् किमन्यैः सुतैः स्वकृतभुग्भिरिति विमर्शेन मा ऽशोचतं किञ्च विमर्शान्तरमप्याह, जन्तव इत्यादि ॥ १८ ॥ आत्मानात्मविवेकेनापि मा शोचतमित्याह—भुवि भूमौ आश्रितानि भौमानि घटादीनि आयान्ति जायन्ते अपयान्ति नश्यन्ति च यथा तथैव भूतानि देहा एव जायन्ते नश्यन्ति च तथैव तेषु भूतेषु देहेषु विपरियत्सु जन्माद्यनेकविकारं प्राप्नुवत्स्वपि अयमपरोक्षतया ज्ञायमान आत्मा न विपर्य्येति जन्मादिविकाररूपं विपर्य्ययं नाप्नोति एकरूपमेव वर्त्तत इत्यर्थः। यथैव भूर्न विपर्य्येति भौमेषु घटादिष्वनेकविपर्य्ययं प्राप्नुवत्स्वपीत्यर्थः ॥ १९ ॥ अनेवंविद एवमात्मतत्त्वमजानतः शरीरमात्मत्वेन जानत इत्यर्थः। यथा यथावदेव प्रथमं भेदो भवति पृथक् शरीराण्येव पृथक् पृथगात्मान इति भेदज्ञानं भवतीत्यर्थः। यतो भेदादेव आत्मनो विपर्य्ययः जन्मादिविकाररूपविपर्य्ययप्राप्तिः देहजन्ममरणाभ्यामेवात्मा जातो मृत इति ज्ञानं भवतीत्यर्थः। ततश्च देहैरेव पुत्रादिभिर्योगः सुखकारणं वियोगो दुःखकारणं चेयमेव संसृतिः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

जन्तवः प्राणिनः सदा एकत्र नासते यतो दैवाधीनाः स्वकृतकर्मतन्त्राः अतः स्वकृतंभुजः स्वकृतकर्मफलभोक्तॄन् माशोचतम् ॥ १८ ॥ देहानामेव जन्ममरणे नात्मन इत्याह—भुवीति। भुवि भौमानि भूतानि स्थावराणि वृक्षादीनि यान्त्युत्पद्यन्ते अपयान्ति विनश्यन्ति यथा तथैतेषु तादृशोत्पत्तिविनाशशालिषु देहेषु देवमनुष्यादिषु कर्मवशाद्भ्रममाणोऽपि अयं जीवात्मा न विपर्येति उत्पत्तिविनाशौ न प्राप्नोति। किञ्च देहानामपि कारणरूपेण नित्यताप्यस्तीत्याह— यथैव भूरिति। भौमानां मूलभूता भूर्यथा नित्या तद्वद्देहानामपि कारणं नित्यमेवेत्यर्थः ॥ १९ ॥ यथानेवंविदः यथावदेवमजानतः आत्मविपर्ययः अनात्मन्यात्माभिमानो भवति यत आत्मविपर्ययादेव देवोऽहं मनुष्योऽहं बालोऽहं तरुणोऽहमित्येवंविधश्च भेदो भवति देहयोगवियोगौ च भवतः संसृतिर्देहयोगवियोगनिबन्धनसुखदुःखप्रवाहरूपा न निवर्तते ॥ २० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

हे महाभागाविति दुर्गा देवी ययोरात्मजा तयोः स्वकृतभुग्भिः सुतैः किमिति विमृश्य माशोचतं, विमर्शान्तरमाह जन्तव इति ॥ १८ ॥ देहात्मविवेकेन शोको निवर्त्तनीय इत्याह—भुवीति। यथा भौमानि घटादीनि भुवि यान्त्योत्पद्यन्ते अपयान्ति नश्यन्ति च तथैतेषु भूतेषु देहेषु विपरीतेषूत्पत्तिनाशलक्षणं विकारं गच्छत्स्वप्ययं सोऽहमिति प्रत्यभिज्ञायमान आत्मा न विपर्येति तं विकारं न गच्छति यथैव भूरिति भौमेषु घटादिषु विकारं गच्छत्स्वपि भूर्यथा न विपर्येति तद्वत् तथा च पुत्रदेहानामेव नाशो न तु तदात्मनामिति शोको माभूदिति "स्वप्ने यथे"त्यादौ देहात्मवादोऽप्यनेनाभिमतः तदिदमसुराणामनिश्चितबुद्धित्वादेव ॥ १९ ॥ यथा यथावदनेवम्विदो देहादन्यमात्मानमज्ञानतो जनन्याभेदो देहात्मा भेदबुद्धिर्भवति यतो बुद्धेरात्मनो विपर्ययो जन्ममरणादिव्यवहारः देहयोगवियोगरूपजन्ममरणलक्षणा संसृतिर्न निवर्तते देहादन्यस्मिन्नात्मनि निवर्तते तु न संसृतिस्तस्य तद्वयाभावादित्यर्थः ॥ २० ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

क्षमध्वमिति। अत्रैतत्पद्यपूर्वार्धे देवकीवसुदेवयोः क्षमापनांगीकारे तयोर्द्वित्वेन क्षमध्वमित्यादिबहुवचनानुपपत्तिः। न च तयोर्बहुमानार्थं तदिति वाच्यम्। मा शोचतं महाभागावित्यत्र तदभावेनात्रैव तदंगीकारस्य नियामकाभावात्। किंच स्त्रीपुंसयोरुच्चारणे स्त्रीपूर्वकस्यैव दृष्टत्वात्। श्यालशब्दस्य चानल्पमात्रकत्वात् श्यालस्वस्रोरिति कथम् अपि च। श्यालशब्दस्य भार्याभ्रातृवाचकत्वेन भगिनीभर्तुर्भामशब्दवाच्यत्वेन च वसुदेवस्य च भार्याभ्रातृत्वाभावेऽपि कथं श्यालशब्दवाच्यत्वम्। अतोऽनेकविधविरोधोऽत उच्यते। ननु आवयोस्त्वद्दुरात्मतासहनेन शोकाभावेऽपि बाधकस्य दुःखमजानतस्तव बाध्यानामस्मत्पुत्राणां षण्णां मृतिजन्यदुःखप्रापकत्वात्कथं ते तव दुरात्मतां सहेयुरिति चेत् ॥ १७–२० ॥

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

किं मया हतया मंद जातः खलु तवांतकः। यत्र क्वचित्पूर्वशत्रुरित्यादिना हरेः कंसशत्रुत्वमुक्तम्। दैवमप्यनृतं वक्ति न मर्त्या एव केवलम् यद्विश्रंभादहं पापः स्वसुर्निहतवान्सुतानित्यनेन कंसस्य हरेर्मातुलरूपबंधुत्वं चोच्यते। तत्र लोकवदेकस्यैव कंसशरीरस्थजीवस्य हरिं प्रति बंधुत्वं शत्रुत्वं चेत्यन्यथा प्रतीयते। तथा मा शोचेथां महाभागावित्युत्तरश्लोके दैवाधीनाः सहासत इत्यनेन प्रतीयमानं यत्सर्वस्य भगवदधीनत्वज्ञानं तदसुरकंसस्यैवेति चान्यथा प्रतीयतेऽतस्तन्निरासाय प्रमाणेनैव तत्तात्पर्यार्थमाह ॥ पूतनाकंसनरकेति। अनेनात्रैव स्थलांतरे यत्पूतनादीनां बंधुत्वादिकं शुभज्ञानं चोक्तं तस्यापि तात्पर्यार्थं उक्तो

भवति । शुभजीवप्रकाशेन सज्जीवस्य शरीरेऽभिमानप्रकाशेन । विपर्ययेऽसज्जीवस्य शरीराभिमानाविर्भावे सति । अन्यथा चाशुद्धबुद्धयश्च स्युरित्यर्थः । तत्रैव तस्मिन्नेव शरीरं मध्यमाभिमानिनः स्युः । तर्हीति शेषः ॥ १ ॥ भुवि भौमानित्यादि श्लोकद्वये यथा भूतान्यायांत्यपयांति तथैतेषु शरीरेषु स्थितो ना पुरुषरूप्ययमात्मा जीवो विपर्येति नित्यचैतन्यस्वरूपाद्विपरीतनित्यदुःखादिकं प्राप्नोति । तत्र हेतुर्यतो नैकविध इति । यतो जीवे नेकविधभेदो भेदबुद्धिरत आत्मनि जीवे विपर्ययो यत आत्मनि विपर्ययोऽतो देहयोगवियोगश्च देहयोगवियोगादिरूपा संसृतिर्न निवर्तत इति जीवेश्वरादिभेदज्ञानस्य संसारहेतुत्वमुच्यत इति भ्रांतिनिरासाय तत्तात्पर्यार्थमाह । अयमात्मेत्यादिना । अनेन यत इति भागवतस्थयच्छब्दद्वयस्य परमात्मवाचित्वं तथा यतः परमात्मनोऽनेकविधभेदो यतः परमात्मन आत्मा विपर्ययः । प्रथमा तृतीयार्थे । आत्मविपरीतज्ञानेन देहयोगवियोगश्च देहयोगवियोगादिरूपः संसारो न निवर्तते स एवायमात्मा परमात्मा न विपर्येतीति श्लोकयोजना चोक्ता भवति । आत्मविपर्यय इति भागवतपदमात्मविपरीतज्ञानेनेत्येकप्रकारेण व्याख्याय स एवेत्येवकारव्यावृत्त्यर्थकत्वेन व्याचष्टे ॥ पुत्रादिकं त्विति । तुरवधारणे । अनेनात्मशब्दः पुत्राद्यर्थक ईश्वरातिरिक्तपुत्रादेरेव विपर्यय इति चोक्तं भवति ॥ १९–२० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

देव्या मोहनायोक्तं विश्वस्यास्यास्त्वामष्टमो गर्भो हन्ता यां नयसेऽबुधेति दैवी वागप्यन्यथा जातेति मत्वा स्वं कुत्सयति ॥ दैवमिति । अहं स्वसुः शोभना असवो यस्याः सा भगिनीति मत्वेति च ॥ १७ ॥ स्वकृतं स्वकर्मफलं भुञ्जत इति भुजस्ताञ्जन्तवः प्राणिनः सदैकत्र सह नासते । तत्र तन्त्रं दैवाधीना इति ॥ १८ ॥ भुवि भौमानीत्यादिश्लोकद्विके भूतान्यायान्त्यपयान्ति तथैव तच्छरीरस्थो ना पुमानात्मा जीवो विपर्येति चैतन्यात्मा दुःखादिमान्भवति । केनेत्यत आह ॥ यतोऽनेकविधो भेद इति । भेदस्तद्भ्रमस्तद्विपर्ययेण च देहयोगवियोगाद्यात्मा संसारो न निवर्तत इति भेदज्ञानं संसारसाधनमुच्यते इत्यन्यथाप्रतीतिप्रतीकारं तत्तात्पर्यवर्णनेन करोति ॥ अयमात्मेति । नात्मशब्दो जीवपरः किन्तु परमात्मपरः । भुवि यथा भौमानि भूतानि यान्त्यपयान्ति यथाऽयमात्मेषु भूतेष्वागतेषु न विपर्येति । भूरि बाव तिष्ठत इत्यात्मा च जीव इत्यन्यथाप्रतीतिनिरासायात्मपदार्थमाहेत्यवतारयन्ति । यतो ह्ययवाच्यः परमात्मेव यतः परमात्मनः सकाशादेवानेकविधमहं भोगी सिद्धोऽहं बलवान्सुखी । आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मयेत्याद्यनेकविधमैक्यं यतश्च तस्मादेवं विपर्ययो विपरीताऽयोऽयतेर्गत्यर्थत्वेन ज्ञानमर्थस्ततश्च विपर्ययो विपरीतज्ञानमिति लभ्यते । तृतीयान्तविवरणेन विपर्यये इत्यस्य तृतीयान्ततया विपरिणामो यत इत्यस्यावृत्त्या विपर्ययो भवति यतश्चेति सार्वविभक्तिकस्तसिरिति तृतीयान्तत्वेनेति विपरिणतस्य विपरीतज्ञानेन करणेन यतश्च परमात्मानं संसृतिर्देहयोगवियोगरूपिणी न विपर्येति । स एव भगवान्न निवर्तते । तर्हि को निवर्तत इत्यत आह ॥ पुत्रादिकं त्विति । आत्मशब्दः पुत्रादिपरोऽपीति दर्शयति । विपर्येतीत्यावृत्त्याऽन्वेतव्यमित्याह ॥ विपर्येतीति ॥ अथ मूलार्थः ॥ देहस्यागमापगमयोः सतोरन्तःस्थस्य भगवतोऽपि तौ स्यातामित्यतस्तात्कालिकापायविधुरां धरां स्थूलदृश्यविवक्षया दृष्टान्तीकृत्य भगवतस्तावित्याह ॥ भुवीति । यथा भौमानि भूतानि पार्थिवान्युत्पत्तिकाले आयान्ति लयकालेऽपयान्ति च । न च भूरागमापायवती यथा तथाऽयमात्मा परमात्मा भूतेषु विपर्ययवत्सु सत्स्वपि न विपर्येति । यतः परमात्मनः सकाशादनेकविधोऽभेदो मानने वक्ष्यति तदनेकविधा ताम् । अभेदो यतः परात्मन एवात्मविपर्ययो मिथ्याज्ञानेन । प्रथमा तृतीयार्थे । यतो येन विपरीतज्ञानेन प्राप्तो देहयोगवियोगश्चेति संसृतिर्न निवर्तते । आत्मविपर्यय आत्मनः पुत्रादेर्विपर्ययेऽपि यतो भवतीत्यावृत्त्याऽन्वयः । आत्मविपर्यय आत्मनः स्वदेहस्य विपर्ययः पुत्रीभवनं तदात्मविपर्ययः पितृत्वादिकं च भवतीत्यन्वेतव्यम् ॥ १९–२० ॥

श्रीसुबोधिनी

एवं सम्भावनया फलं निरूप्यायं मम सहजदोषो न भवतीति स्वदोषपरिहारं वदन्निवाह **दैवमप्यनृतं वक्तीति**, आकाशवाणी दैव'मेस्यास्त्वामष्टमो गर्भ' इति वाक्यं, दुर्गापि देवता एकं तु प्रत्यक्षसंवादि, आकाशवाण्यास्तु वाक्यं विसंवादि, देवगुह्याज्ञानादेवंवचनं, 'मर्त्येष्वनृतं प्रतिष्ठित'मिति वाक्यान्मनुष्याणामनृतं देवेषु सत्यं, तदत्र विपरीतं, न केवलं मर्त्या एवानृतवादिनः, किन्तु **दैवमप्यनृतं वक्ति**, अतो **यद्विश्रम्भाद्** यद्वाक्यविश्वासात् स्वसुः सुतान् वृथैव निहतवान्, ननु 'सन्देहे प्रमाणमन्तःकरणप्रवृत्तय' इति तद्धृदये कथं भातमिति चेत् तत्राहाहं पाप इति, महतां हि हृदयं प्रमाणं न तु पापनिष्ठानां शिशूनिति वयःसख्ये विरुद्धे निरूपिते, अष्टम एक एव हन्तेति सामर्थ्यप्रतिपादकवाक्यात् ॥ १७ ॥

नन्वतः परं किं कर्तव्यमित्याशङ्क्याह **मा शोचतमिति**, महतां शोके हेतुभूतः प्रायश्चित्तेऽप्यनधिकारी भवतीति मत्कृपया शोको न कर्तव्यः, नन्वपकारिणि कथं कृपेति चेत् तत्राह महाभागाविति सम्बोधनं, महतां शत्रुमित्रोदासीनभावो नास्ति, ननु महत्त्वादेव शोकाभावे सिद्धे कथं शोकाभावो बोध्यत इति चेत् तत्राह स्वात्मजानिति, न हि स्वाकृतार्थत्वेन शोकः किन्तु बाला अकृतार्था गता इति, तेषां शोकाविषयत्वे हेतुमाह स्वकृतभुज इति, यद्यपि मरीचिपुत्रा एवं जाता इति न जानाति तथापि कार्यादनुमिनोति, अतस्तैरपि तादृशं कर्म कृतमस्ति येन बाला एव हताः, ननु न वयं ताञ्छोचामो नात्मानं किन्त्वेकत्रोभयेषां स्थितिर्ना-

भूदिति शोचाम इति चेत् तत्राह **जन्तव** इति, ये हि निरन्तरं जायन्ते 'जायस्व म्रियस्वे'तिमार्गवर्तिनस्ते **सर्वैकत्र नासते** यतो भगवदिच्छा तथैव तेषु, तदाह **दैवाधीना** इति, यदापि तिष्ठन्ति तदापि पूर्ववासनया शत्रुमित्रोदासीनत्वस्य नित्यत्वान्न सम्यगासते **सहासत** इति वा पाठः ॥ १८ ॥

एवं लौकिकन्यायेन स्वापराधाभावं प्रार्थयञ्छोकापनोदनं कृतवान् पुनः शास्त्रानुसारेणापि शोकापनोदनमाह **चतुर्भिः**, **भुवी**ति, पूर्वं ते म्रियन्त इत्यङ्गीकृत्य शोकापनोद उक्त इदानीं ते न म्रियन्त एवेत्युच्यते, आत्मा 'नित्यः सर्वगतः स्थाणु'रिति वाक्याद् व्यापको गमनागमनादिशून्यः कूटस्थः, साङ्ख्यानामेवमेव मतं दैत्यानां हृदये समायातीति तदेवोच्यते, देहास्त्वाकाशे-ऽतमःप्रकाशा इवोच्चावचाः समायान्ति गच्छन्ति च न त्वाकाशे कश्चन विकार उत्पद्यते तथा पुत्राणामप्यात्मत्वात् तेषां देहे गते न काचित् क्षतिः, स्पष्टतया व्यवहार्यत्वाद् भूमिदृष्टान्तो बुध्यत इति तमाह **यथा भौमानि** भूविकाराणि **भूतानि** कृमिकीटादीनि वृक्षादीनि वा **यथा यान्ति भूमेः** सकाशादुत्पद्यन्ते पृथग् भवन्त्यपयान्ति च भूमावेव लयं प्राप्नुवन्ति तेषूद्गतेषु लीनेषु वा **भूमिस्तु न विक्रियते** तथात्मन्यपि देहा **यान्त्यपयान्ति** चात्मोपार्जितकर्मवशादेवोत्पद्यन्ते लीयन्ते च तथाप्यात्मा न वोत्पद्यते न वा लीयत इत्यर्थः, **यथा भूस्तथा** देहानामपि भौतिकत्वान्न पृथङ्निरूपणं, **भुवि भौमानि** भित्त्यादीनीत्येव सम्बध्यते **भूतानी**ति त्वात्मनीति वा, भूतानि जातानि वा, तेष्वेव भूतेषु विद्यमान आत्मा न तथेति वक्तुं दृष्टान्त एव प्रवेश उक्तः, यथा बहिस्स्थिता पृथिवी न विक्रियत एवमन्तःस्थित आत्मापि **तथैतेष्वि**ति भिन्नं वाक्यं, **एतेषु** मनुष्यदेहेष्वप्यात्मा न विक्रियत इति, उक्तेषु मनुष्यादिदेहेषु भूम्यविकारः प्रत्यक्षसिद्धः, वर्षाकालोद्भवेषु तृणादिषु चात्माविकारश्च प्रत्यक्षसिद्धः, अन्यथात्मानन्त्यकल्पना प्रसज्ज्येत, यथा देहे लोमानि न पृथगात्माधिष्ठितानि तथा भूमावप्येक एवात्मा तत्सम्बन्धात् कोटिशस्तृणादीन्युत्पद्यन्ते विलीयन्ते च, अधिष्ठात्र्यो देवतास्तु भिन्नाः१९

नन्वेवमैकात्म्ये कथं लोके भेदव्यवहार इति चेत् तत्राह **यथे**ति, **यथा** यथावदनेवंविदो भेदो न त्वेवंविदः, आपातत एवंविर्त्त्वेपि भेदप्रतीतिर्न गच्छतीति यथेत्युक्तं, **यथानेवंविद** इत्येकं पदं, समासान्तस्त्वनित्यः, भेदस्तु द्वित्वसाध्यः, न ह्येकस्मिन् भेदबुद्धिर्भवति, द्वित्वं त्वपेक्षाबुद्धिजन्यं, अतो द्वित्वं न वस्तुनिष्ठं किन्तु बुद्धिस्थविषयकमेव, बुद्ध्या बहिर्विषयोत्पादनासम्भवात् अतोऽज्ञानकृत एव भेदो भवति, अपेक्षाविषयाणामभावात्, निरपेक्षेष्वपेक्षाबुद्धिरज्ञानकृतैव ननु 'भेदः पारमार्थिकः श्रुतिस्मृतिव्यवहारोपयोगित्वादात्मव'दित्यनुमानाद् भेदः पारमार्थिक एवेति चेत् तत्राह **यत आत्मविपर्यय** इति, यदि भेदः पारमार्थिकः स्यात् तत्कृतेन व्यवहारेणात्मविपर्ययो न स्यात्, अज्ञानस्य भेदोत्पादकत्वेनैवान्यथाबुद्धिहेतुत्वात्, अन्यथा सुषुप्तावज्ञानस्य विद्यमानत्वादन्यथाबुद्धिर्भवेत्, किञ्च न केवलं विपर्ययमात्रजनकत्वं किन्तु **देहयोगवियोगावपि** भेदकृतावेव, यथा देवदत्तस्य यज्ञदत्तदेहे जाते गते वा स्वस्य न कापि विक्रियोत्पद्यत एवं स्वस्याप्यात्मन एकत्वे ज्ञाते नोत्पद्येत, चकारस्तु सर्वव्यवहारसमुच्चयार्थः, किञ्च भेदस्त्वपारमार्थिक इति कार्यान्तरादप्यवसीयते, तदाह **संसृतिर्न निवर्तत** इति, भेदज्ञाने विद्यमाने जन्ममरणयोर्विद्यमानत्वात् संसारो न निवर्तेत आत्मनोविकृतत्वं ज्ञातव्यं तदविकृतत्वमपरिच्छेदकूटस्थत्वव्यतिरेकेण न सिध्यतीति कूटस्थो व्यापकोविकृत आत्मा ज्ञातो भवति, तस्मिन् ज्ञाते शोको न सम्भवति ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

ननु **भुवि भौमानि यथा यान्त्यपयान्ति तथात्मा न याति** नापयातीत्येतावतैव वाक्योर्थः सम्पद्यत इत्यन्यानि पदानि व्यर्थानि किञ्च यथा भूर्न विक्रियत इतिद्वितीयो दृष्टान्तो बाधितो भौमानां भूविकारत्वादित्यरुच्या पक्षान्तरमाहुर्भुवि **भौमानि भित्त्यादीनी**त्यादि, **भुवि भौमानि** भित्त्यादीनि यथा यान्त्यपयान्ति च भूतान्यबादीनि च यान्त्यपयान्त्यात्मा त्वेतेषु भूतेषु विद्यमान एव न तथा, न याति नापयातीत्यर्थः, एतेन भूतानीतिपदस्यात्मनि सम्बन्धे प्रकार उक्तः, यद्यप्येवमपि भूतपदमेतेष्वित्यादिपदानि च न सार्थकानि भवन्ति तथापि तेषु विद्यमानस्यापि तद्धर्मासम्बन्धकथनात् तथात्वं, अन्यथैतदर्थाप्राप्तेः, **दृष्टान्त एवे**ति, दृष्टान्तनिरूपकवाक्ये भूतपदस्यापि प्रवेश उक्त इत्यर्थः, अतः परं **यथा भू**रितिदृष्टान्तं विवृण्वन्ति **यथा बहि**रित्यादिना, भौमानि यदा विक्रियन्ते तदा तेभ्यो बहिःस्थिता स्थूला भूर्न विक्रियते तथैतेष्वन्तःस्थित आत्मापि तथा, एवं सति न तथैतेष्वित्यस्यावृत्तिः कार्या, तदेतदुक्तं तथैतेष्विति भिन्नं वाक्यमित्यनेन, अस्मिन्नेव पक्षे एतेष्वित्यादिपदानि प्रकारान्तरेण व्याकुर्वन्त्येतेषु **मनुष्यदेहेष्वपी**त्यादिना, यथा बहिःस्थिता भूर्मनुष्यदेहेषूत्पद्यमानेषु न विक्रियते तथात्मापीत्यर्थः, अग्रे तूक्तेर्थे प्रमाणमुक्तमुक्तेष्वित्यादिना, अथ प्रकारान्तरेणार्थमाहुर्वर्षाकालेत्यादिना, एतेषु तृणादिषूत्पद्यमानेषु यथा भूर्विक्रियते न तदन्तर्गत आत्मेत्यर्थः, व्यतिरेकेत्र दृष्टान्तः, 'यः पृथिव्यां तिष्ठन् पृथिवी मन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीर'मितिश्रुतेः पृथिव्यन्तर्गतोभिमान्यात्मास्तीति मन्तव्यं, विपक्षे बाधकमाहुरन्यथेति, एकतृणरूपेणैकस्यात्मनो विकृतौ सत्यां निरवयवत्वेनांशभेदस्य वक्तुमशक्यत्वाद् द्वितीयादिषु तेषु भिन्नो भिन्न आत्माङ्गीकार्यः स्यादित्येकस्मिन् पृथिवीलक्षणशरीरेनन्ता आत्मानः कल्पनीयाः स्युरित्यर्थः, **अधिष्ठात्र्य** इति, त्वगादिगोलकेषु लोमादीनामिन्द्रियाणामोषध्यादयो देवताः शरीराभिमान्यात्मनः सकाशाद् भिन्ना इत्यर्थः ॥ १९ ॥

इति श्रीमद्विट्ठलेश्वरप्रभुचरणविरचितायां श्रीटिप्पण्यां चतुर्थोध्यायः ॥ ४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

मा शोचतमित्यत्र मत्कृपयेति, मयि कृपां कृत्वेत्यर्थः ॥ १८ ॥ **भुवि भौमानीत्यत्रै**तच्छ्लोकं व्याख्याय प्रकारान्तरेण व्याकुर्वन्ति **भुवि भौमानीति,** अस्मिन् पक्षे पूर्वार्धे दार्ष्टान्तिकवाक्यं भिन्नं कथनीयं, तथा च यथा **भौमानीति**पदं **भुवी**त्यनेन सम्बध्यते तथा भूतानीतिपदमध्याहृतेनात्मनीतिपदेन सम्बध्यते, शेषाणि पदान्यावर्तन्ते, अस्मिन् पक्ष आत्मपदाध्याहारदोषात् पक्षान्तरमाहुर्भूतानि जातानि वेति, यथा भुवि भौमानि यथा भुव्येव भूतान्यबादीनीत्यर्थः, भूस्त्वधिकरणत्वेनेव वर्तत इति तत्र विद्यमानभूतान्याकाशातिरिक्तान्यबादीन्येवेति तान्येव जातपदेनोक्तानीति ज्ञातव्यं, अस्मिन् पक्षे चकारेण दृष्टान्तान्तरस्य समुच्चयान्न पदावृत्तिदोषः, ननु **भौमानि** भित्यादीनीति यद् द्वितीयं व्याख्यानं तस्य किं प्रयोजनमित्याकाङ्क्षायां टिप्पण्यां तदुक्त्वा व्याकुर्वन्ति **ननु भुवी**त्यादि, **जातानी**त्यस्यार्थो**ऽबादी**नीत्यादि, अस्मिन् पक्षे दार्ष्टान्तिकाकाङ्क्षा भवति तां व्याख्यानेन पूरयन्त्यात्मेत्यादि, **एतेनेति,** दार्ष्टान्तिकवाक्यव्याख्यानेन, **प्रकार** इति, वैपरीत्यरूपः, **एवमपीति,** उक्तयोजनायामपि, **न सार्थकानि भवन्तीति, नायमात्मा** तथेत्येतावतैव चारितार्थ्यात् तथा, **तथात्वमिति,** सार्थकत्वं, **मूल एवमेव** पदसार्थकत्वं विवक्षितमित्यत्र गमकं सुबोधिन्यामाहुस्तेष्वित्यादि, तदेतट्टिप्पण्यां व्याकुर्वन्ति **दृष्टान्त एवे**त्यादि, **एवं सतीति,** न तथैतेतिपदानां पूर्वार्धेन्वये सति, **विपक्ष इति** आत्मनोऽप्युत्पत्त्यादिविकाराङ्गीकारे ॥ १९ ॥ **यथानेवंविद इत्यत्रैकं पदमिति,** 'वेदनं वित्, भावे क्विप्, तत एवमित्यनेन केवलसमासस्ततो नैवंविदनेवंविदितितत्पुरुषः, ततो यथावदनेवंविद् यस्येतिबहुव्रीहिः, तत्र 'शेषाद् विभाषे'ति कप्रत्ययः प्राप्तः स त्वनित्यो वैकल्पिक इत्यर्थ' इति श्रीवल्लभः, तन् ममापि सम्मतमितिदिक्, ननु भेदस्यानेवंविद्विषयत्वे किं मानमित्याकाङ्क्षायां तस्य तथात्वमुपपादयन्ति **भेदस्त्वि**त्यादि, ननु द्वित्वमेव भेदसाध्यं कुतो न भवतीत्यत आहुर्न हीत्यादि, तथाचैकस्मिन् दृष्ट एक एवेतिबुद्धिर्भवति न त्वभिन्न इत्यतो द्वित्वसाध्य एव भेदो न तु भेदसाध्यं द्वित्वमित्यर्थः, नन्वपेक्षाबुद्धेर्भ्रान्तत्वे भेदस्याज्ञानकृतत्वं स्यात् तस्यास्तथात्वमेव कथमित्याकाङ्क्षायामपेक्षाबुद्धेरज्ञानकृतत्वे हेतुमाहुरपेक्षाविषयाणामभावादित्यादि, भावप्रधानो निर्देशः, अपेक्षाविषया ह्यात्मानो वाच्यास्ते च स्वाहंवित्तिवेद्या एव न परस्य विषयाः, अतस्तेषां तथात्वाभावात् तथैवेत्यर्थः, भेदस्य पारमार्थिकत्वमनुमानेनाशङ्कन्ते **ननु भेद** इत्यादि, **भेद इति,** आत्मनां परस्परं भेदः, एवमनुमानं बाधकतर्केण दूषयन्त्यात्मविपर्ययो न स्यादितिबाधकतर्कप्रणयनं, तथात्मा नाशोत्पत्तिशाली प्रतिशरीरं भिन्न इत्याकारकमन्यथाज्ञानं तादृशविपर्ययस्त्वात्मनः स्तनपानादिक्रियाजनकसंस्कारशालितया नित्यत्वे सर्वशरीरगतचैतन्योपलम्भेन व्यापकत्वे चानुमितेपि भेदकृतव्यवहारेण जायते, अन्यथा तदुत्पत्तिनाशाभ्यां स्वस्यान्यस्य च हर्षशोकादिकं न स्यात्, तथा च 'भेदो न पारमार्थिकः संसारहेतुत्वाद् यद्यत् संसारहेतुस्तत्तन्न पारमार्थिकमन्यथाबुद्धिव'दिति च प्रतिपक्षसद्भावान् पूर्वोक्तानुमानेनात्मभेदसिद्धिर्न चात्मन उत्पादविनाशशालित्वसिद्धिरित्यर्थः, नन्वात्मविपर्ययोऽज्ञानेन न तु भेदेनेत्यत आहुरन्यथेति, तथा चैवमङ्गीकारेप्यज्ञानस्य नाज्ञानत्वेनात्मविषयकान्यथाबुद्धिजनकत्वं किन्तु भेदजनकत्वेनेति भेदादेवात्मविपर्यय इत्यर्थः, भेदस्यैव कार्यान्तरमाहुः किञ्चेत्यादि, **एकत्वे ज्ञात इति,** नित्यत्वेन पूर्वापरदेहयोरेकत्वे ज्ञाते **सर्वव्यवहारेति,** श्यामोहं गौरोहमित्यादिव्यवहारेत्यर्थः, भेदस्यैव पुनः कार्यान्तरमाहुः किञ्चेत्यादि ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

भुवि भौमानीत्यत्र प्रथमपक्षे **विपर्येती**त्यनेनोक्तो विकार उत्पन्नेनोक्तो विकार उत्पत्तिलयरूपः स एव यान्तीत्यनेनोक्तः, द्वितीयपक्षे **यान्त्यपयान्ती**त्यनेन गमनागमने उक्ते, **विपर्येती**त्यनेन विकारोऽन्यथाभावरूप उच्यते, तत्रैवमन्वयः, यथा भुवि भित्यादीनि यान्त्यपयान्ति तथैवात्मनि भूतान्यबादीनि जातानि वा यान्त्यपयान्ति, एतेषु विद्यमान एवात्मा न तथा न याति नापयातीतिदृष्टान्तेनात्मनो गमनागमने निषिद्धे, द्वितीयदृष्टान्तेन विकारं निषेधति **न तथैतेष्विति,** पदत्रयस्यावृत्तिं कृत्वा यथा भूमिर्बहिः स्थिता न विपर्येति तथैतेषु भूतेष्वन्तर्विद्यमान आत्मापि न विपर्येतीति, अत्रैव पक्षे भूमेर्विकारोपलब्धेररुचिं मत्वा **यथा भूरि**त्यत्र नकारमसंयोज्य यथा भूर्विक्रियते तथात्मा न विक्रियत इतिव्यतिरेकदृष्टान्तपक्ष उक्तः ॥ १९ ॥ **यथानेवंविद इत्यत्रैकं पदमिति,** वेदनं वित्, भावे क्विप्, तत एवमित्यनेन केवलसमासस्ततो नैवंविदनेवंविदितितत्पुरुषः, ततो यथावदनेवंविद् यस्येतिबहुव्रीहिः, तत्र 'शेषाद्विभाषे'ति कप्रत्ययः प्राप्तः, स त्वनित्यो वैकल्पिक इत्यर्थः, **अपेक्षाबुद्धिजन्यमिति,** यज्ञदत्ताद् देवदत्तो द्वितीय इति यज्ञदत्तापेक्षाजन्यमित्यर्थः, **बुद्धीति,,** बुद्धिस्थो यज्ञदत्तादिरूपो विषयः कं स्थानं यस्येत्यर्थः, **यत आत्मविपर्यय इति,** आत्मनो विपर्ययो देहत्वेन ज्ञानविषयत्वमित्यर्थः, **अन्यथाबुद्धिरिति,** यज्ञदत्तरूपदेहोहमिति बुद्धिरित्यर्थः ॥ २० ॥

बुभुत्सुबोधिका

दैवमित्यत्र न भवतीति किन्तु भ्रमाद्वैवापराधोयमिति स्वदोषपरिहारमित्यादि। स्वदोषपरिहारो न वाक्यार्थ इतीवशब्दप्रयोगः। दुर्गायां त्वनृतवक्तृत्वाभावाद्दैवपदार्थमाहुः आकाशेति। वाक्यमिति अनृतम्। दुर्गेति विष्णोरनुजा। अपिना माया साधारिणी। आकाशवाणी वा 'दुर्गा देवता पर्वतेराध्यास'मितिश्रुतेः देवतास्मरणम्। एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति न्यायात्। प्रत्यक्षेति 'यत्र क्वचित् पूर्वशत्रु'रित्यादि। विसंवादीति अष्टमो गर्भो हतः न तु हन्तेति विसंवादि। ननु न विसंवादि

कृष्णो हनिष्यतीति चेत् तत्राहुः देवगुह्ये ति । देवरूपदेवगुह्यस्य गोप्यस्य प्रियस्याज्ञानात् कंसस्येत्यर्थः । विपरीतमिति सत्यविपरीतमनृतम् । यद्वेति वाक्यात् यद्वा विश्वासात् । सुतानिति सुताश्च सुता च सुताः तान् । वृथैवेति दुर्गापि देवतेति विश्वासाद् वृथा । सन्देह इति देववाक्यात् सन्देहः । यत्र कश्चित् पूर्वशत्रुर्हतो वापूर्वशत्रुर्वेति । प्रकृतय इति हृदि धृत्वा स्थापिताः माया देवदुर्गाः । भगवत्य इति प्रमाणम् । 'अत्र प्रमाणं भगवा'नितिवाक्यात् । अन्तःकरणप्रवृत्तय इति पाठे अन्तःकरणस्य प्रवृत्तयो याभिरिति पूर्वोक्त एवार्थः । हृदयमिति हृदेव हृदयम् । हरतेः अयं च हृक् च । वधः प्रसिद्धं विरुद्धं हनने । विरुद्धां सङ्ख्यामाहुः अष्टम एक इति । सामर्थ्येति शब्दसामर्थ्यमष्टमो गर्भो हन्तेतिवाक्येष्टमपदैकसङ्ख्यासामर्थ्यं 'कपिञ्जलानालभेते'त्यत्र त्रित्वे बहुत्वपर्यवसानवत् । हन्तायमिति सप्तसु ज्ञानं नास्ति किन्त्वष्टम एवेत्येकत्वे शब्दसामर्थ्यम् ॥ १७ ॥

मा शोचतमित्यत्र कर्तव्यमाहुः महतामित्यादिना । महतां देवकसम्बन्धिनामखण्डब्रह्मज्ञानाधिकारिणा शोके शोकनिमित्तं शोकफलाय । प्रायश्चित्तेप्यनधिकारी ब्रह्मवित्, 'एतं ह वाव न तपती'तिश्रुतेः । एतं ब्रह्मविदं साधुकर्म असाधुकर्म वा न तपतीति श्रुत्यर्थः । शोके हेतुभूतो न भवतीत्यर्थः । भवतोति नञ्रहितपाठेऽविद्यया विद्योपमर्दात् प्रायश्चित्तेऽनधिकार्यपि शोके हेतुभूतो भवतीत्यर्थः । अनधिकारी वसुदेवोत्र । मत्कृपयेति मयि कंसे कृपया । भागोत्र शत्रुमित्रोदासीनभावाभाव इत्याहुः महतां शत्रुमित्रेत्यादि । स्वाकृतार्थत्वेनेति न कृतोऽर्थः लोकजयलक्षणः पुत्रोत्पादनेन येन सोकृतार्थः । मरीचिपुत्रा इति उत्तरार्धे षट्त्रिंशाध्याये भगवद्वाक्यानि 'आसन् मरीचेः षट् पुत्रा ऊर्णायां प्रथमान्तरे । देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतम् । तेनासुरीमगन् योनिमधुनावद्यकर्मणा । हिरण्यकशिपोर्जाता नीतास्ते योगमायया । देवक्या उदरे जाता राजन् कंसविहिंसिता' इति बलिं प्रति । तेन एवं जाता इत्यस्याः देवकीपुत्रा जाताः । न जानातीति 'आत्मजा'निति पदात् । कार्यादिति 'स्वकृतंभुज' इत्यत्र स्वकृतपदार्थः । अनुमिनोतीति स्वकृतंभुजः तादृशकर्मकर्तृत्वात् । अस्मदादिवदिति अनुमानं करोति । तैरिति हिरण्यकशिपोर्जातैः । हता इति पूर्वं द्वितीयाध्याये षट् पुत्रा ऐश्वर्यादिरूपा वेदान्तानुसारेणोक्ताः । उत्तरार्धे तु वेदमार्गानुसारेण मरीचिपुत्रा भगवतोक्ताः । वेदान्ते पुरुषोत्तमोर्थात्मकः वेदे पुरुषोत्तमोत्तमः शब्दात्मकः वेदोपि शब्दः । जायस्वेति अयं तृतीयकर्ममार्गश्छान्दोग्ये । दैवाधीना इतीति फलबलकल्प्या हि भगवदिच्छोक्ता । न सम्यगिति नैकरूपतया । 'समासत' इति पाठमङ्गीकृत्योक्तम् । अत्र शोकदूरीकरणं कारिकोक्तं स्पष्टम् ॥ १८ ॥

भुवि भौमानीत्यत्र म्रियन्त इति 'जायस्व म्रियस्वे'ति तृतीयकर्ममार्गः । न कदाचिदनीदृशं जगदिति जैमिनिः कर्मतत्त्वज्ञः । कूटस्थो निर्लेपः । ननु मायादेवदुर्गाधृतवतः कंसस्य वेदवेदान्तप्रकारः कथमित्यत आहुः साङ्ख्यानामित्यादि । प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेप इति साङ्ख्यसूत्रम् । भूमावेव लयमिति कार्याणां स्वस्वकारणे लयनियमात् तथा । भूमित्वेन भूमिः दृष्टाविरोधेन लयस्थानम् । न चाप्सु लय इति वाच्यम् । अत्रिवृत्कृतभूविषयत्वा'दद्भिः पृथिवी'तिश्रुतेः । एतेन श्रुतिस्मृत्योर्विरोधे श्रुतिः प्रबलेति श्रुतिकृतबाधः प्रत्युक्तः । आत्मोपेति मायादिहृदयः विद्यापूर्वप्रज्ञो न मन्यते । चतुर्थस्कन्धे 'माया मनः सृजति कर्ममय'मित्युक्तेः । अत एवैवकारः । भुवि भौमानीति अत्र टिप्पणी तेषु विद्यमानस्येति तेषु भूतेषु विद्यमानस्यात्मनः । तद्धर्मेति विकृतत्वभूतधर्मेत्यर्थः । तथात्वमिति सार्थकत्वम् । सुबोधिनी । आत्मपदमावृत्त्य सप्तम्यन्तं परिणमय्य भूतानीत्यनेनान्वितकरणे गौरवमालोच्य पक्षान्तरमाहुः भूतानि जातानि वेति । एवं स्पष्टार्थेति तां त्यक्त्वा दृष्टान्त एवेति सुबोधिनीं व्याकुर्वन्ति स्म दृष्टान्तनिरूपकेति । भिन्नं वाक्यमिति एकतिङ्वाक्यमिति तिङन्तरग्रहणेन तथा । अग्रे त्विति उक्तेषु मनुष्यादिदेहेष्विति ग्रन्थे । उक्तेष्वेतेष्विति टिप्पण्यां पाठः । सुबोधिन्याम् । तथा चैवमन्वयः । प्रथमपक्षे 'विपर्ये'तीत्यनेनोक्तो विकार उत्पत्तिलयरूपः, स एव 'यान्त्यपयान्ती'त्यनेनोक्तः । द्वितीयपक्षे 'यान्त्यपयान्ती'त्यनेन गमनागमने उक्ते । 'विपर्येती'त्यनेन विकारोन्यथाभावरूप उच्यते । तत्रैवमन्वयः । 'भुवि भौमानि भित्त्यादीनीत्येव सम्बध्यत' इति सुबोधिन्यामेवकारेण 'भौमानि'भूविकाराणि 'भूतानि' कृमिकीटादीनि वृक्षादीनि वेति सहैवान्वयस्य व्यवच्छेदकेनेवकारेण । यथा भुवि भित्त्यादीनि यान्त्यपयान्ति तथैवात्मनि भूतान्यबादीनि जातानि वा यान्त्यपयान्ति । एतेषु विद्यमान एवात्मा 'न तथा' न याति नापयातीति । दृष्टान्तेनात्मनो गमनागमने निषिद्धे । द्वितीयदृष्टान्तेन विकारं निषेधति । न तथैतेष्वितिपदत्रयस्यावृत्तिं कृत्वा यथा भूमिर्बहिः स्थिता न विपर्येति तथैतेषु भूतेष्वन्तर्विद्यमान आत्मापि न विपर्येतीति । अत्रैव पक्षे भूमेर्विकारोपलब्धेररुचिं मत्वा यथा भूरित्यत्र नकारमसंयोज्य यथा भूर्विक्रियेत तथात्मा न विक्रियत इति व्यतिरेकदृष्टान्तपक्ष उक्तः । तेनात्मनो न हि शोकोस्तीति कारिकोक्तशोकाभाव इति भावः ॥ १९ ॥

यथा नैवमित्यत्र ऐकात्म्य इति देहेषु भिन्नेष्वात्मा एक एव तस्य भावः । आहेति ज्ञानाद् दृष्टो भेदो नश्यतीत्याहेत्यर्थः । यथेत्युक्तमिति यथावदर्थकयथेत्युक्तम् । एकं पदमिति वेदनं वित् भावे क्विप् । तत् एवमित्यनेन केवलसमासः । ततो न एवंविदनेवंविदिति नञ्तत्पुरुषः । ततो यथावदनेवंवित् यस्येति बहुव्रीहिः । समासान्त इति शेषाद् 'विभाषे'तिसूत्रेण कप् प्राप्तः । स त्वनित्यो वैकल्पिक इत्यर्थः । ननु भेदस्यानेवंविद्विषयत्वे किं मानमित्याकाङ्क्षायां भेदस्यानेवंविद्विषयत्वमुपपादयन्ति स्म भेदस्त्वित्यादि । इमौ द्वौ घटपटौ अयमस्माद् भिद्यत इति । भेदप्रत्यक्षे प्रत्यक्षं प्रमाणमुक्तम् । ननु द्वित्वमेव भेदसाध्यं कुतो नेत्यत आहुः न ह्येकस्मिन्निति । तथा चैकस्मिन् दृष्टे एक एवेति बुद्धिर्भवति न तु भिन्न इत्यतो द्वित्वसाध्य एव भेदो न तु भेदसाध्यं द्वित्वमित्यर्थः ।

अपेक्षाबुद्धीति अयमेकोयमेक इमौ द्वावित्यपेक्षाबुद्धिः। वस्त्विति आत्मनिष्ठम्। अतस्तत्साध्यो भेदोपि नात्मनिष्ठः। बुद्धिस्थेति यथावदनेवंविद्बुद्धिः अपेक्षाबुद्धिः, आत्मा तत्स्थं विशेषेण सिनोति बध्नाति यद् द्वित्वं तद्बुद्धिस्थविषयं स्वार्थे कः। यथावदनेवंविद्बुद्धिस्थ आत्मा विषयो यस्य द्वित्वस्येति बहुव्रीहौ कव्वा। एकरसश्रुतेरेवकारः। नन्वान्तरं द्वित्वाभाववति द्वित्वप्रकारकं ज्ञानं भ्रमः स न युज्यतेन्यत्र स्थितस्यान्यत्रारोपाङ्गीकारात्। तस्माद् बहिर्द्वित्वं (द्वित्वसाध्यो भेदः) बुद्ध्याकाशादौ घटपटनिष्ठे उत्पाद्यते तदनन्तरात्मन्यध्यस्यते इति पक्षं निराकुर्वन्ति बुद्ध्येति। यथा यन्मायया बहिःक्षिप्ता ख्यायते बुद्धिरर्थवच्छुक्तिरजतादौ तथा विषयोत्पादनासम्भवात्। तेन किमत आहुः अत इति। अज्ञानं यथावदनेवंविस्त्वं तत्कृत एव भेदो द्वित्वसाध्यः, न तु बुद्धिकृत इत्यर्थः। नन्वात्मन इदमित्थतया ज्ञानाविषयत्वं भाष्य उक्तमिति यथा कथञ्चिद् भेदोपि द्वित्वसाध्यः बुद्धिकृत इति चेत् तत्राहुः अपेक्षेति। पदस्य पदान्तराभावप्रयुक्तान्वयाननुभावकत्वमपेक्षा। तत्र विषयतया प्रविष्टानां द्वित्वसाध्यभेदानां परमार्थेऽभावात्। आत्मरूपे तु भवतु मा वेत्यन्यदेतत्। निरपेक्षेष्विति घटः पटः कुड्यं कुसूल इत्यादिशब्देषु। उक्तापेक्षा तद्विषयिणी बुद्धिरित्यर्थः।

अज्ञानेन तमसा कृता तामसी। अतत्त्ववति तत्त्वप्रकारकज्ञानरूपत्वादेवकारो नैयायिकमतेनापि। भेद इति आत्मनां परस्परं भेदः। एतदनुमानं बाधकतर्केण दूषयन्ति आत्मविपर्ययो न स्यादिति। बाधकतर्कप्रणयनं तत्र व्याप्तिरोधकमन्यथाज्ञानम्। तथा ह्यात्मभेदः अपारमार्थिकः स्वकृतव्यवहारेणात्मविपर्ययादन्यथाज्ञानवदिति प्रत्यनुमानेन सत्प्रतिपक्षत्वं पूर्वानुमानस्येति भावः। आत्मविपर्यय इति आत्मविकारः यथा शरावादिरूपेण भिन्ना भूर्भेदेन विकृता। अन्यथाबुद्धीति अभेदवति आत्मनि भेद (विकृतत्व) प्रकारकबुद्धिहेतुत्वात्। नन्वात्मविपर्ययोऽज्ञानेन न तु भेदेनत्यत आहुः अन्यथेति। नोत्पद्येतेति विक्रिया नोत्पद्येत। भिन्नयोर्देवदत्तयज्ञदत्तदेहयोर्विक्रिया षड् भावविकारा भवन्त्येव। प्रत्याहारन्यायेन देहयोगवियोगाभ्यां षड् भावविकाराः प्राप्ताः चकारस्य कोर्थ इत्याकाङ्क्षायामाहुः चकार इति। सर्वव्यवहारेति भेदकृतगौरोहं श्यामोहमिति सर्वव्यवहारसमुच्चयार्थः। संसार इह प्रपञ्चोहन्ताममतात्मको वेत्याशयेनाहुः भेदज्ञान इत्यादि। मायाकार्ये भेदज्ञाने विद्यमाने। 'भिदा मायामात्र'मितिवाक्यात्। जन्ममरणयोरिति तमोऽविद्याकार्ययोरन्यथाज्ञानाभावरूपयोर्विद्यमानत्वं भेदमायाकार्यत्वात्। माया तत्कार्यान्यतरसत्त्वे संसारः प्रपञ्चोहन्ताममतात्मको वा न निवर्तते। 'आत्ममायामृते राजन् परस्यानुभवात्मनः न घटेतार्थसम्बन्ध' इति वाक्यात्। 'अर्थसम्बन्धो' देहसम्बन्धः। अत इति जन्ममरणोपलक्षितषड्भावविकाराणां विद्यमानत्वात्। कूटस्थ इति मायादैवदेवतानां हृत्स्थत्वात् कंसस्य कूटस्थः मायिकस्थः। न तु सर्वोपनिषदुक्तः कूटस्थः, उपनिषत्तु 'ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिरष्टविशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यत' इति। शोको न सम्भवतीति ज्ञानाद् दृष्टो भेदो नश्यतीति शोको न सम्भवति द्वितीयाभावात् ॥ २० ॥

श्रीमातृपितृतोषिणी-श्रीसुबोधिनीजी-

आचार्यचरण इस श्लोक के आभास में आज्ञा करते हैं कि—**एवं संभावनया फलं निरूप्य अयं मम सहजदोषो न भवतीति स्वदोषपरिहारं वदन्निवाह**— इस प्रकार पाप की संभावना से अपने को मिलने वाले फल का निरूपण कर; यह मेरा सहज दोष नहीं, ऐसे स्वदोष के परिहार को कहता हुआ कंस आगे कहता है कि **'दैवमप्यनृतं वक्ति न मर्त्या एव केवलम्'**।

देवता भी असत्य बोलता है, आकाशवाणी देवता है **'अस्यास्त्वामष्टमो गर्भः'** इस देवकी का आठवाँ गर्भ तुझे मारेगा—यह उसका कहा हुआ वाक्य है, दुर्गा भी देवता ही है; एक तो प्रत्यक्ष अनुभव का विषय होने से यथार्थ है, दुर्गा का वचन तो अनुभव से अविरुद्ध है, परन्तु आकाशवाणी का वचन, अनुभव विरुद्ध है, अयथार्थ है, कंस को देव कार्य के गुह्य होने का ज्ञान नहीं, अतः ऐसा कह रहा है **'मर्त्येष्वनृतं प्रतिष्ठितम्'** मनुष्यों में असत्य प्रतिष्ठित है इस वाक्य से असत्य मनुष्यों में बतलाया गया है, देवताओं में सत्य कहा है, वह यहाँ पर विपरीत है, केवल मनुष्य ही असत्यवादी होते हैं, यह बात नहीं, किन्तु देवता भी असत्य बोलता है जिस देवता के वाक्य पर विश्वास करके मैंने बहिन के बच्चों को मारा है, वृथा ही उनको मार दिया, सन्देह में तो अन्तःकरण की प्रवृत्तियों को प्रमाण कहा है, अतः आकाशवाणी का कथन हृदय में प्रतीतिकर कैसे हो गया, अतः कहा है कि **'अहं पापः'** महापुरुषों का हृदय प्रमाण होता है न कि मुझ जैसे पापीओं का, मैं तो पापी नहीं खुद पापरूप हूँ, **'शिशून्'** शब्द से अवस्था तथा संख्या को विरुद्ध कहा गया है क्योंकि एक अष्टम ही मारने वाला होगा, इस प्रकार मारने के सामर्थ्य वाली प्रौढ़ अवस्था का व एकत्व संख्या का प्रतिपादन उस वाक्य से हुआ है ॥ १७ ॥

आचार्यचरण इस श्लोक के अवतरण में आज्ञा करते हैं कि—**नन्वतः परं किं कर्तव्यमित्याशङ्क्याह**— तो फिर आगे क्या करना उचित है, ऐसी आशङ्का करके कंस आगे का श्लोक कहता है **'मां शोचतं महाभागौ'**।

महान पुरुषों के शोक में जो कारणरूप बनता है वह पुरुष तो प्रायश्चित करने का भी अधिकारी नहीं होता। यदि आप महानुभाव शोक करेंगे तो मैं प्रायश्चित्त का अधिकारी नहीं बनूँगा और प्रायश्चित्त के बिना शुद्धि न होने से मुझे नरक भोगना पड़ेगा अतः मुझ पर कृपा करके शोक न करें। यदि अपकारी पर कृपा कैसे की जाय, यह कहें, तो वह कहना आप को

शोभा नहीं देता। आप **'महाभागौ'** महाभाग वाले हैं, इस सम्बोधन से सूचित करता है कि महान पुरुषों को शत्रु, मित्र, उदासीन, ऐसा भेदभाव नहीं होता, जब महान् होने के कारण शोक नहीं, यह सिद्ध है, तो शोक न करने का बोध कैसे किया जा रहा है, तहाँ कहता है कि **'स्वात्मजान्'** आप को अपने अकृतार्थता के कारण शोक नहीं हैं, किन्तु बालक बिना कृतार्थ हुये ही चले गये, यह शोक है, उनका शोक न करें, क्योंकि **'स्वकृतभुजः'** अपने कृतकर्मों का फल मनुष्य भोगते हैं, यद्यपि मरीचि महर्षि की पत्नी ऊर्णा के षट् पुत्र इस प्रकार उत्पन्न हुए ऐसा कंस नहीं जानता, तो भी कार्य से कारण का अनुमान करता है, कि इस तरह मारे जाने से सिद्ध होता है, कि उनने भी वैसा कर्म किया है, जिससे बालक ही वह मार दिये गये। यदि आप यह कहें कि हमको न अपना शोक है न बच्चों का किन्तु एक स्थान पर हमारी और उनकी स्थिति न हो सकी, हम और वह दोनों साथ न रह सके, अतः शोक होता है, तो यह कहना भी उचित नहीं, क्योंकि 'जन्तवः' जो निरन्तर जन्म लेते रहते हैं, **'जायस्व म्रियस्व'** इस पुनः पुनः जन्म मरण वाले मार्ग पर चलते रहते हैं, वह सदा ही एक स्थान पर नहीं ठहरते हैं, क्योंकि उनके विषय में वैसी ही भगवान की इच्छा होती है, अतः कहा है कि **'दैवाधीनाः'** वह सब भगवदिच्छा के अधीन हैं। जब साथ साथ रहते हैं, तब भी पूर्व वासना से शत्रु मित्र उदासीन, ता के भाव नित्य बने रहते हैं, अतः सुख शांति से अच्छी तरह नहीं रह पाते, **'समासते'** पाठ के अनुसार उक्त व्याख्या है, अथवा **'सहासते'** ऐसा पाठ है, व्याख्या स्पष्ट है ॥ १८ ॥

इस प्रकार लौकिक रीति से कंस ने अपने अपराध के न होने की प्रार्थना करते हुये देवकी वसुदेवों के शोक का निवारण किया है, अब पुनः शास्त्र के अनुसार भी शोक निवारण करना **'भुवि भौमानि'** इत्यादि ४ श्लोकों से कहा है, पूर्व तो यह मान कर शोक निवारण किया था कि वह शरीर मरते हैं, अब वह मरते ही नहीं, यह कहा जाता है, दैत्यों के हृदय में साङ्ख्य वालों का ऐसा ही मत, अच्छी तरह से आ जाता है, कि **'नित्यः सर्वगतः स्थाणुः'** इस वाक्य के अनुसार आत्मा व्यापक है, आता जाता नहीं है, निश्चल या कूटस्थ है, दैत्यरूप कंस उसी मत को कहता है, कि देह तो आकाश में मेघ, अन्धकार, व प्रकाश की तरह, ऊँच, नीच अनेक प्रकार के आते जाते रहते हैं, परन्तु आकाश में कोई भी विकार नहीं होता, इसी तरह वह पुत्र भी आत्मा है, अतः उनके देह के जाने पर कोई हानि नहीं। स्पष्टरूप से व्यवहार का विषय होने के कारण भूमि का दृष्टान्त समझा जा सकता है, अतः यहाँ आकाश का दृष्टान्त न कह कर भूमि का ही दृष्टान्त कहा है, कि जैसे भूमि में भूमि के विकार छोटे बड़े कोड़े, या वृक्ष आदि प्राणी भूमि से उत्पन्न होते हैं, उससे पृथक् होते हैं, और उसमें ही लीन भी हो जाते हैं, उनके उत्पन्न होने पर, या लीन होने पर भूमि तो विकार रहित ही रहती हैं, वैसे आत्मा में भी देह आत्मकृत कर्म के वश ही उत्पन्न और लीन होते रहते हैं, तो भी आत्मा न उत्पन्न होता है, न वह लीन होता है, जैसे पृथिवी वैसा आत्मा ज्ञातव्य है देहादि भी भौतिक ही होते हैं, अतः उनका श्लोक में नामतः पृथक् उल्लेख नहीं किया है, 'वह अनुक्त सिद्ध ही हैं। अथवा भौम शब्द से गृहादि की भित्ति आदि विवक्षित है, जैसे भूमि में गृहादि की भित्तियाँ, बनती बिगड़ती रहती हैं, उसी प्रकार से ही 'भुवि' व भौमानि' पदों का सम्बन्ध है, 'भूतानि' पद का सम्बन्ध तो अध्याहृत 'आत्मनि' पद के साथ विवक्षित है, कि उसी तरह आत्मा में भूत पञ्चभूतात्मक शरीर बनते बिगड़ते रहते हैं।

[1] अथवा भूत शब्द प्रकट होने वाले जल आदि भूतों का वाचक है जैसे भूमि में भौम भित्ति आदि व उसमें प्रकट होने वाले जलादि भूत आते जाते रहते हैं यह अर्थ है।

यद्यपि भूत शब्द का दृष्टान्त वाक्य में प्रवेश अनावश्य प्रतीत होता है, परन्तु जिन भूतों का भूमि में आना जाना होता है, उन भूतों में ही विद्यमान आत्मा का वह आना जाना नहीं होता, यह स्पष्ट करने को 'भूतानि' पद का प्रवेश दृष्टान्त वाक्य में कहा है।

कि जैसे भूतों से बाह्यस्थित भूमि भूतों के विकृत होने से विकृत नहीं होती, ऐसे ही भूतों के अन्तःस्थित आत्मा भी विकृत नहीं होती।

उत्तरार्ध में प्रयुक्त **'तथैतेषु'** वाक्य जब पूर्वार्ध प्रयुक्त **'भूतानि'** पद से सम्बन्धित है, यह मानकर 'भूतों के अन्तः स्थित आत्मा विकृत नहीं' इस प्रकार व्याख्या की है। तब 'तथैतेषु' उस वाक्य की आवृत्ति कर उसे भिन्न जानना चाहिये।

इस व्याख्या के पक्ष में ही **'तथैतेषु'** इत्यादि भिन्न वाक्य की अन्य प्रकार से भी व्याख्या अपेक्षित है, क्योंकि आवृत्ति की गई है।

अपेक्षित वह व्याख्या यह है कि **'एतेषु'** इन मनुष्य आदि शरीरों में भी आत्मा विकार रहित ही है, जैसे बाह्य भूमि मनुष्यादि देहों के उत्पन्न होने पर विकृत नहीं होती वैसे आत्मा भी विकृत नहीं होती, उक्त इन मनुष्य आदि देहों में भूमि के विकार का अभाव प्रत्यक्षसिद्ध ही है।

---

१. इस व्याख्यान में दो अरुचियां प्रतीत होती है, एक तो भूतानि व एतेषु इत्यादि पदों की व्यर्थता, दूसरी भूमि की निर्विकारता, अतः भिन्न प्रकार से आगे व्याख्या नहीं। २. उस व्याख्या में अध्याहार दोष अरुचिकर है, अतः पुनः पक्षान्तर से व्याख्या की है।

व्यतिरेक मुखेन यह दृष्टान्त भूमि के विकार पक्ष में भी इस प्रकार जानना चाहिये, कि वर्षाकाल में उत्पन्न होने वाले तृण आदि में भूमि का विकार जैसे प्रत्यक्षसिद्ध है, वैसे तृणादिगत आत्मा का विकाराभाव भी प्रत्यक्ष सिद्ध ही है। '**यः पृथिव्यां तिष्ठन्**' इत्यादि श्रुति से पृथ्वी के अन्तर्गत अभिमानी आत्मा तृणादि रूपं पृथिवी में एक ही है, यह मानना तो अनिवार्य ही है, वह विकृत नहीं होता, अन्यथा यदि एक तृणरूप से एक आत्मा को विकृत मानेंगे तो आत्मा के अवयवरहित होने के कारण अंश भेद तो कहा नहीं जा सकता, अतः अन्य अन्य तृणों में भिन्न भिन्न आत्मा मानना पड़ेगा, तब तो एक ही पृथिवी रूप शरीर में अनन्त आत्माओं को कल्पना करनी पड़ेगी।

जिस प्रकार देह में कोटिशः रोम होते हैं, वह सब पृथक् पृथक भिन्न आत्मा से अधिष्ठित नहीं होते, एक देहाभिमानी आत्मा ही उन रोमों का अधिष्ठाता होता, उसी प्रकार भूमि में भी एक ही आत्मा है, उसके सम्बन्ध से कोटिशः तृण आदि भूमि में उत्पन्न व विलीन होते रहते हैं। शरीर के रोम रूप इन्द्रियों के अधिष्ठान त्वचा में घ्राणादि इन्द्रियों के अधिष्ठान नासिका आदि में जैसे अधिष्ठाता देवता शरीराभिमानी आत्मा से भिन्न होते हैं, वैसे ही रोमों के भी अधिष्ठाता औषधि रूप देवता भिन्न होते हैं, शरीराभिमानी तो अधिष्ठातृ देवताओं से भिन्न एक ही हैं[१] ॥ १९ ॥

आचार्य चरण इस श्लोक के अवतरण में कहते हैं कि "**नन्वेवमैकात्म्ये कथं लोके भेदव्यवहार इति चेत् तत्राह**— यहाँ पर ऐसी शंका होती है कि जब एक ही आत्मा है तो लोक में देवदत्त की आत्मा भिन्न है और यज्ञदत्त क आत्मा भिन्न है ऐसा व्यवहार कैसे होता है अथवा देवोऽहं मनुष्योऽहं आदि भेद व्यवहार कैसे होता है तो कहते हैं कि '**यथानैवंविदो भेदः**'।

कि यथावत् इस प्रकार के ऐकात्म्य ज्ञान से रहित पुरुष को ही भेद प्रतीत होता है, न कि इस प्रकार ज्ञान वाले को भेद प्रतीत होता है। साधारणतया ऐसा ज्ञान होने पर भी भेदप्रतीति नहीं हटती है, अतः वैसा ज्ञान यथावत् अपेक्षित है, अतः '**यथानैवंविद**' इस पद में यथा शब्द कहा गया है, यह एक ही समस्त बहुव्रीहि पद है। यथा—(यथावत्) न (नास्ति) एवं (ऐकात्म्यप्रकारिका) विद् (ज्ञानं) यस्य इस विग्रह वाले इस बहुव्रीहि में समासान्त 'कप्' प्रत्यय अनित्यता के कारण नहीं है। तात्पर्य यह है यहां समासान्त क प्रत्यय इसलिये नहीं हुआ कि "शेषाद्विभाषा" वार्तिक में विभाषा पद है उससे विकल्प से "क" प्रत्यय होता है विभाषा का अर्थ है विकल्प।

भेदप्रतीति ऐकात्म्य ज्ञान हीन व्यक्ति को इसलिये होती है कि भेद द्वित्व संख्या से सिद्ध किया जाता है, क्योंकि बिना द्वित्व संख्या के एक वस्तु में भेद बुद्धि नहीं हो सकती, द्वित्व संख्या तो "अपेक्षाबुद्धि" का कार्य, हैं, जैसे 'इस व्यक्ति से वह व्यक्ति द्वितीय है' ऐसा कहने में व्यक्ति की अपेक्षा बुद्धि से ही द्वितीयता रूप द्वित्व पैदा होता हुआ प्रतीत होता है।

अतः द्वित्व संख्या वस्तुगत नहीं किन्तु बुद्धिस्थविषयगत ही है, बुद्धि से बाहर विषयों की उत्पत्ति नहीं की जा सकती है अतः भेद अज्ञानकृत ही होता है, क्योंकि जब भेद का मूल द्वित्व संख्या व द्वित्व संख्या का भी मूल अपेक्षात्मक बुद्धि हैं, वह बुद्धि स्वगत विषयों में या काल्पनिक विषयों में ही द्वित्व संख्या के द्वारा भेदजनक होती है, वास्तव में अपेक्षात्मक बुद्धि के विषय आत्मा नहीं हो सकते, आत्माओं में अपेक्षा बुद्धि अज्ञानकृत ही है तो भेद के अज्ञानकृत होने में कोई संशय हो नहीं।

यदि भेद को वास्तविक मानने के लिये अनुमान किया जाय कि भेद तो वास्तविक ही होना चाहिये, क्योंकि वह भेद तो उसी प्रकार, श्रुति, स्मृति, व्यवहारों से सिद्ध हैं, जिस प्रकार आत्मा श्रुति आदि से सिद्ध हैं, तो यह अनुमान सङ्गत नहीं, तर्क से बाधित ही है, अतः कहा है कि '**यत आत्मविपर्ययः**' यदि भेद वास्तविक हो, तो भेदकृत व्यवहार से अन्यथा ज्ञानात्मविपर्यय नहीं होना चाहिये, अभिप्राय यह है कि यद्यपि बालक के स्तनपानादि क्रियाजनक संस्कार आदि से, आत्मा की नित्यता का अनुमान होता है, और शरीरगत चैतन्य के अनुभव से आत्मा की व्यापकता का भी अनुमान होता है तो भी, भेदकृत व्यवहार से अन्यथा ज्ञान होता रहता है कि आत्मा उत्पन्न होता है व मरता है, आत्मा प्रत्येक शरीर में भिन्न है, यदि

---

[१] इस श्लोक की व्याख्या करते हुए श्री वल्लभजी महाराज आज्ञा करते हैं कि पृथ्वी से कृमि कीट आदि उत्पन्न होते हैं और उसी में लीन हो जाते हैं। यह अर्थ "यान्ति" इत्यादि पदों से लिया गया है। देह और आत्मा के पक्ष में "यान्ति अपयान्ति" का अर्थ यह है कि देह आते जाते रहते हैं परन्तु आत्मा में यह बात नहीं है। यहां विकार से अन्यथाभाव अर्थ लेना। श्री वल्लभजी महाराज श्लोक का अन्वय इस प्रकार करते हैं कि जिस प्रकार पृथ्वी में भित्ति आदि बनते हैं और बिगड़ते हैं, उसी प्रकार जल आदि महाभूत जो पैदा हुए हैं वे आते हैं और जाते हैं परन्तु इनमें विद्यमान आत्मा न जाता है और न आता है। इस दृष्टान्त से आत्मा के आने जाने का निषेध किया है। दूसरे दृष्टान्त से आत्मा में विकार नहीं होता यह "न" तथा "एतेषु" इन पदों की आवृत्ति कर यह अर्थ किया कि जैसे बाहिर रही हुइ पृथ्वी विकृत नहीं होती वैसे ही इन पञ्च महाभूतों में रहने वाला आत्मा भी विकृत नहीं होता। परन्तु पृथ्वी में तो विकार देखा गया है इसलिये उक्त कथन में अरुचि आई तो श्री वल्लभजी कहते हैं कि "यथा भूः "के साथ" "न" कार का सम्बन्ध न कर व्यतिरेक दृष्टान्त से यह कहा कि जैसे पृथ्वी में विकार होता है वैसे आत्मा में विकार नहीं होता।

ऐसा अन्यथा ज्ञान न होता हो तो लोगों को जन्म व मरण से हर्ष शोक आदि भी न होना चाहिये; अतः यह सिद्ध हो जाता है, कि अज्ञान भेद को उत्पन्न करके ही, अन्यथा ज्ञान को उत्पन्न करता हैं, यदि भेद को उत्पन्न किये बिना ही अज्ञान से अन्यथा ज्ञान उत्पन्न होता हो तो सुषुप्ति अवस्था में भी अज्ञान के विद्यमान रहने से अन्यथा ज्ञान होना चाहिये, ऐसी स्थिति में यह स्वीकार करना अनिवार्य है कि भेद अज्ञान जनित होने से, पारमार्थिक नहीं।

और वह अज्ञानकृत भेद केवल विपर्यय या अन्यथा ज्ञान का ही जनक नहीं, किन्तु देह के संयोग वियोग भी भेदकृत ही हैं, जैसे देवदत्त नाम वाले पुरुष को, यज्ञदत्त नामक पुरुष के देह के उत्पन्न व नष्ट होने पर, अपना कोई भी बिकार उत्पन्न नहीं होता, ऐसे अपने भी देह के संयोग वियोगो में भी आत्मा के एक होने के, ज्ञान होने पर कोई विकार न उत्पन्न होना चाहिये, क्योंकि नित्य होने से आत्मा पूर्व देह व अन्य देह में एक ही है, ऐसा होते हुए भी देह संयोग वियोगों में जो अपने को विकार उत्पन्न होता है, उसका कारण अज्ञानकृत भेद ही है, 'च' शब्द से तो 'मैं श्याम वर्ण हूँ, गौर वर्ण हूँ, स्थूल या कृश हूँ" इत्यादि सर्व व्यवहार भी भेद कृत ही है, यह सूचित किया है।

और भी भेद तो अवास्तविक है, ऐसा अन्य कार्य से भी निश्चित होता है, उसे कहता है कि 'संसृतिर्न निवर्त्तते' भेद ज्ञान के रहते जन्म मरणों के रहने से संसार निवृत्त नहीं होता, अतः आत्मा की निर्विकारता का ज्ञान आवश्यक है वह निर्विकारता आत्मा के देश कालादि परिच्छेदरहित, कूटस्थता या निश्चलता के बिना सिद्ध नहीं होती, अतः कूटस्थ, व्यापक, अविकृत आत्मा ज्ञात होता है, उसके ज्ञान होने परशोक नहीं हो सकता ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

न केवलमत्र ममैव दोषः, 'किन्तु देवेषु सत्यं मनुष्येष्वनृतम्, इति शास्त्रीयनियमविपर्ययादप्यकार्यं कृतमित्याह-दैवमिति। यद्विश्रम्भादिति। यस्य 'अस्या अष्टमो गर्भस्त्वां हन्ता' इति वचनस्य विश्वासादहं स्वसुर्भगिन्याः शिशून् मुग्धान् पुत्रान् निहतवान्। ननु 'तवापि तत्र विश्वासः कथं जातः ?' इत्यपेक्षायां 'पापवशात्, इत्याशयेनाह–पाप इति ॥ १७ ॥ "शोकस्तु दुष्कृतिनामविवेकिनामेव भवति,युवां तु सुकृतिनावतो विवेकेन शोको न युक्त" इति सूचयन् सम्बोधयति–हे महाभागाविति। युवामात्मजान् प्रति मा शोचतम्। तत्र हेतुमाह—स्वकृतंभुज इति। स्वप्रारब्धफलभोक्तृनित्यर्थः। तैरपि पूर्वं तादृशमेव कृतम्, येन बाला एव मद्धस्तान्मृता इत्याशयः। शोकस्तैः सह संवासेन सुखानुभवार्थमेव, स च जीवानां सर्वेषामपि दुर्लभ एवेत्याह जन्तव इति। जन्तवो जीवाः सदैकत्र नैवासते, एकत्र वासेऽपि सम्यक् सुखपूर्वं तु नैवासते। तत्र हेतुमाह – दैवाधीना इति। प्रारब्धकर्माधीना इत्यर्थः। तथाच प्रारब्धकर्मणो विचित्रत्वात् कर्माधीनानां मध्ये केनचित् पुरुषेण प्रारब्धवशात् सुखं भोक्तव्यम्, केनचिच्च प्रारब्धानुसारेण दुःखं भोक्तव्यम्। तद्भोगयोः परस्परविरुद्धतया स्नेहपूर्वकसहसंवसतामसम्भवात् तद्भोगसिद्ध्यर्थं जीवा वियुज्यन्ते विरुद्ध्यन्तेवेति भावः। 'सहासत' इति पाठान्तरम् ॥ १८ ॥ 'जन्तवः सदा नासते' इत्यनेन यज्जन्ममरणादिकमुक्तं तदपि देहानामेव नात्मन इति सदृष्टान्तमाह-भुवीति। यथा भुवि आधारभूतायां भौमानि घटादीनि आयान्ति अपयान्ति च भवन्ति न भवन्ति च तथात्मन्याधारभूते भूतानि देहा एवायान्ति अपयान्ति च। यथा चैतेषु भौमेषु विक्रियमाणेष्वपि नूनं विक्रियते तथैव देहेषु जन्ममरणादिभिर्विक्रियमाणेष्वव्ययमपरोक्षतया प्रत्यभिज्ञायमान आत्मा जीवो न विपर्येति जन्मादिविकारं न प्राप्नोतीत्यर्थः ॥१९॥ 'एवं निर्विकारैकात्मज्ञाने सति न शोकाद्यवकाशः। अज्ञानतस्तु कदापि संसारदुःखं न निवर्तते' इत्याह–यथेति। यथा यथावत् अनेवंविदः एवं निर्विकारैकात्मतत्त्वमजानतः आत्मविपर्ययः देहेन्द्रियान्तःकरणादावात्मबुद्धिर्भवति, यत आत्मविपर्ययाद्भेदः 'अहं भिन्नोऽयं भिन्न, इदं मदीयमिदं परकीयम् इति भेदबुद्धिर्भवति, ततस्तदनुरूपं कर्म, तदनुरूपेण देहेन योगवियोगौ भवतः। अतः संसृतिः जन्ममरणादिदुःखं न निवर्तते ॥२०॥

अन्वितार्थप्रकाशिका

दैवमिति ॥ केवलं मर्त्या मनुष्या एव अनृतं न वदन्ति किन्तु दैवं देवसमूहोऽपि अनृतं वक्ति। अत एवाकाशवाक् मिथ्याभूता। यस्य अष्टमो गर्भस्त्वा हन्तेति वचनस्य विश्रम्भात् विश्वासात् पापोऽहं स्वसुः शिशून् निहतवान् ॥ १७ ॥ मा शोचतमिति ॥ हे महाभागौ ! स्वकृतं स्वप्रारब्धफलं भुजः भोक्तॄन् स्वात्मजान् मा शोचतम्। भुज इति क्विबन्तम्। स्वकृतमिति कृद्योगे षष्ठ्यभाव आर्षः। तदहंमिति ज्ञापकाद्वा। क्वचित् "धायैरामोदमुत्तम्' इति भट्टिः। यतो हेतोः दैवाधीनाः जन्तवः सदा न आसते तत्रापि एकत्र नासते तत्रापि सह संभूय नासते। समासत इत्यपि पाठः ॥ १८ ॥ भुवीति ॥ यथा भुवि आधारभूतायां भौमानि घटादीनि आयान्ति अपयान्ति च भवन्ति न भवन्ति च तथात्मन्याधारभूते भूतानि देहा एवायान्ति अपयान्ति च। यथा चैतेषु भौमेषु विक्रियमाणेष्वपि भूर्न विक्रियते। तथैव देहेषु जन्ममरणादिभिर्विक्रियमाणेष्वप्ययमपरोक्षतया प्रत्यभिज्ञायमान आत्मा जीवो न विपर्येति एकरूप एव वर्त्तते। जन्मादिविकारं न प्राप्नोतीत्यर्थः। देहानामेव जन्मादिकं न त्वात्मन इत्यर्थः। एवं विचार्यमाणे न शोकावकाशः ॥ १९ ॥ अज्ञानिनस्तु न निवर्त्तत इत्याह—यथेति ॥ यथा यथावत् अनेवंविदः एवमजानतः आत्मविपर्ययः देहादावात्मबुद्धिर्भवति यतो विपर्ययाद्भेदो भवति। देहाहङ्कारेण ह्यात्मनि परिच्छिन्ने सति इदमहङ्कारास्पदं भिन्नं भवति। यतो भेदान् पुत्रादिदेहैर्योगो वियोगश्च भवति। ततः संसृतिः सुखदुःखे इति यावदज्ञानं न निवर्त्तते ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दैवमिति ॥ पूर्वं तु 'अस्यास्त्वामष्टमो गर्भो हन्ता' इति दैवमुवाचेदानीमियं देवी तु 'यत्र क्व च तव मृत्युर्जात' इत्युवाचेति श्रुतं, तत्र वक्ति दैवमिति। दैवम् अपि, अनृतं वक्ति, केवलं, मर्त्याः एव न वदन्ति, अतः मानुषवत् दैवमपि यदाऽनृतं वक्त्येव, तदा न कोऽपि विश्वसनीयवचन इति भावः। यद्विश्रम्भाद्यस्य दैववचसो विश्वासात्, पापः पापरूप एव, अहं स्वसुः शिशून् निहतवान्। इदमतिजुगुप्सितं कर्म कृतवानस्मि किलेति भावः ॥ १७ ॥ मा शोचतमिति ॥ अथापि, महाभागौ विवेकिनौ युवां, स्वकृतंभुजः स्वकृतकर्मफलभाक्तन्, आत्मजान् प्रति, मा शोचतं शोकं मा कार्ष्टम्। तथा हि। जन्तवः प्राणिनः, दैवाधीनाः स्वकृतकर्मानुगुणप्रवृत्तदैववश्याः, भवन्ति। अत एव, सदा एकत्र सह, न आसते। नावतिष्ठन्ते इत्यर्थः। किं तु तत्तत्कर्मानुगुणजन्ममरणादिभाजो भ्रमन्ति ॥१८॥ सदा सहानवस्थाने दृष्टान्तमाह। भुवीति। यथा भुवि भौमानि भूमेरेव संभूतानि रजांसि, यान्ति कस्मात्चन प्रदेशाद्वायुवशत उड्डीय प्रदेशान्तरं प्रति आयान्ति अपयान्ति। पुनस्तान्येव तथैव ततः प्रदेशान्तरं प्रति गच्छन्ति च। भूस्तद्धरा भूमिस्तु, यथा एव, यथाविधा वर्त्तते, तथैव तिष्ठतीत्यर्थः। तथा भूतानि शरीराणि अपि, कर्मवशात् यान्ति, अपयान्ति। कर्मवशतः कच्चित् संयुज्यन्ते पुनर्वियुज्यन्ते च। एतेषु भूतेषु, विपर्ययं प्राप्तवत्सु सत्स्वपि, अयं आत्मा, न विपर्येति विपर्ययं न प्राप्नोति। भौमानां रजसां गमनागमनाद्यवस्थावत्त्वेऽपि, यथा न भुवस्तथात्वं, तथा शरीरेषु जन्ममरणादिविकारवत्स्वपि तद्धारकतयाऽवस्थितः अयं आत्मा अन्यथाभावं न गच्छति, किं त्वेकरूपतया एवावतिष्ठते इति भावः। अस्यायं निगूढोऽभिप्रायः। जन्ममरणाद्यवस्थावत्त्वस्वाभाव्याद्देहा न शोच्या नाप्यात्मा विक्रियाभावान्नित्यत्वाच्चेति ॥ १९ ॥ ननु जातोऽहं मृतोऽहं हतोऽस्महं हन्मीत्येवमात्मनोऽपि जन्ममरणहन्तृहन्तव्यभावप्रतीतेः कथं न स विपर्येतीत्युच्यते, इति चेत्, सा प्रतीतिर्देहात्मभ्रान्तिमूला, सैव तस्य देहसंयोगवियोगरूपसंसृतिहेतुश्चेत्याह ॥ यदेति ॥ यदा, एवंविधः उक्तप्रकारः, भेदः देहात्मनोर्भेदेन ज्ञानं, न स्यात्, तदाऽयं देहात्माभिमान्येव जातः। यतः यावत्, आत्मविपर्ययः आत्मनि देहधर्मप्रतीतिमान्, तावत्, देहयोगवियोगैः उपलक्षिता, संसृतिश्च संसरणमपि, न निवर्त्तते। यद्वा चशब्दाद्धन्तृहन्तव्यप्रतीतिरपि न निवर्त्तते इत्यर्थः। 'यथाऽनेवंविदो भेद' इति पाठे, यथा यथावत्, अनेवंविदः एवमजानतः पुंसः, आत्मविपर्ययः देहात्मबुद्धिः भवति, यतो विपर्ययात्, भेदः, भवति, भेदात्, पुत्रादिदेहैर्योगवियोगौ भवतः, ततः संसृतिः सुखदुःखे इत्यर्थः। यावदज्ञानं न निवर्त्तते ॥ २० ॥

कृष्णप्रिया

केवल मनुष्य ही झूठ नहीं बोलते, किन्तु देवता भी झूठ बोलते हैं। देवता के विश्वास पर ही मुझ पापी ने अपनी बहिन के बहुत बालकों को मार दिया ॥ १७ ॥ हे परम श्रेष्ठ भाग्यशाली देवकी वसुदेवजी ! अपने पुत्रों का शोक न करो क्योंकि उन्होंने अपने किये हुए कर्मों का फल भोगा है, भगवदिच्छा से जो जन्म एवं मरण के मार्ग में हैं वे सदा एक साथ नहीं रहते ॥ १८ ॥ जैसे मृत्तिका से घट आदि उत्पन्न होते हैं और नष्ट हो जाते हैं परन्तु मृत्तिका में विकार नहीं होता वैसे ही शरीर बनते बिगड़ते रहते हैं परन्तु आत्मा में कोई विकार नहीं होता अथवा यों कहिये कि जैसे घट तृण भित्ति आदि पैदा होते हैं और नष्ट होते हैं परन्तु पृथिवी में स्थित अन्तर्यामी रूप परमात्मा में कोई विकार नहीं होता वैसे ही देह के उत्पन्न एवं नष्ट होने पर आत्मा में कोई विकार नहीं होता ॥ १९ ॥ जिसे ठीक रूप से यह ज्ञात नहीं कि आत्मा एक है उसे भेद प्रतीति होती है और उसी भेद प्रतीति से आत्मा की अनित्यता, भिन्नता तथा देह के संयोग वियोग मालूम पड़ते हैं, और संसार भी उसी के कारण निवृत्त नहीं होता ॥ २० ॥

तस्माद् भद्रे स्वतनयान् मया व्यापादितानपि। मानुशोच[1] यतः सर्वः स्वकृतं [2]भुञ्जतेऽवशः ॥ २१ ॥
यावद्धतोऽस्मि हन्तास्मीत्यात्मानं मन्यतेऽस्वदृक्[3]। तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् ॥ २२ ॥
क्षमध्वं मम दौरात्म्यं साधवो [4]दीनवत्सलाः। [5]श्रीशुक उवाच इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथाग्रहीत् ॥ २३ ॥
मोचयामास[6] निगडान्[7] विस्रब्धः[8] कन्यकागिरा। देवकीं वसुदेवं च दर्शयन्नात्मसौहृदम् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—भद्रे ! तस्मात् मया व्यापादितान् अपि स्वतनयान् मा अनुशोच यतः सर्वः अवशः स्वकृतं भुञ्जते ॥ २१ ॥ यावद् हतः अस्मि हन्ता अस्मि इति अस्वदृक् आत्मानं मन्यते तावद् तद् अभिमानी अज्ञः बाध्यबाधकताम् इयात् ॥ २२ ॥ मम दौरात्म्यम् क्षमध्वम् साधवः दीनवत्सलाः इति उक्त्वा अश्रुमुखः श्यालः अथ स्वस्रोः पादौ अग्रहीत् ॥ २३ ॥ कन्यकागिरा विस्रब्धः आत्मसौहृदम् दर्शयन् देवकीं च वसुदेवम् निगडान् मोचयामास ॥ २४ ॥

---

[1] मानुशोचयत–वीर.। [2] विन्दते–श्रीधर. वंशी. जीव. वीर. गिरि. भक्त.। [3] सुदृक्–इति कस्यचित्; स्वदृक्–जीव. भक्त.। [4] बन्धुवत्सलाः–जीव. वीर. भक्त.। [5] अन्यत्र्यां श्रीशुक उवाच पाठो न दृश्यते। [6] मोक्षयामास–इति कस्यचित्। [7] निगडाद्–श्रीधर. वंशी. जीव. गिरि. भक्त.। [8] विश्वब्धः–श्रीधर. वंशी. गिरि. भक्त.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवमुक्तप्रकारेण नैते तव तनया अहं तु तावन्न घातितवांस्तथाप्यज्ञानदृष्ट्या स्वतनयान्मया व्यापादितानपि माऽनुशोचेति सांत्वयति । तस्मादिति । अज्ञानाश्रयमेव कर्मवादमाह । यत इति ॥ २१ ॥ कथं तर्हि ब्राह्मणादिहंतुस्तद्वध्यस्य च प्रायश्चित्तश्रवणमज्ञानमूलमेवेत्याह । यावदिति । अस्वदृक् देहाभिमानी । तावत्तदभिमानी तस्य देहस्य हननमात्मन्यभिमन्यमान इत्यर्थः २२ श्यालः कंसः । स्वस्रोरिति । स्वसृशब्देन द्विवचनानुपपत्त्या मिथुनगणनद्वारा मिथुनीलक्षणया स्वसृतत्पत्योरभिधानम् । लिंगसमवायन्यायेन प्राणभृत उपदधातीतिवद्देवकीवसुदेवयोः प्रत्येकं पादमग्रहीदित्यर्थः । श्यालशब्देन वा कथंचिद्वसुदेवाभिधानम् ।२३। आत्मसौहृदं प्रियवादादिना दर्शयन् ॥ २४–२६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमुक्तप्रकारेण देहादिव्यतिरिक्तात्मज्ञानेन । एते ये मृता यद्यपि ते तनया न तथाप्यज्ञानदृष्ट्या देहादिष्वात्मबुद्ध्या व्यापादितान्मारितान् । सांत्वयति साम्ना बोधयति । यत इति हेतौ सर्वः प्राणिमात्रम् । यद्वा 'सर्वः शर्वः शिवः स्थाणुः' इति सर्वपदस्य शिवपर्यायत्वेपीन्द्रादिदेवपरत्वमेवोपलक्षणत्वेन ज्ञेयम् । श्रीशिवस्य परमेश्वरतया कर्मानधीनत्वात्तत्परत्वेन नेयम् । अवशः कर्मवशः हरिवशो वा देवादिरपि स्वकृतं भुंक्तेऽन्येषां तु का कथेति भावः ॥ २१ ॥ यदि देहाद्यात्मबुद्धिर्विपर्ययज्ञानमस्ति तर्हि ब्राह्मणादिदेहहंतुर्द्वादशाब्दादिप्रायश्चित्तश्रवणमनर्थकं स्यादित्याशंकते कथमिति । तद्वधस्य ब्राह्मणादिवधस्य । इत्यर्थ इति । अज्ञत्वात्सविपर्ययज्ञानवशेन बाध्यबाधकतां नाश्यनाशकतां यातीति भावः ॥ २२ ॥ मयि पुत्रहंतृत्वमारोप्याधिना रोदिषि चेत्तर्हि सत्यमहं दुष्ट एव बुद्धिपूर्वकं, पापमकरवमेव तत्रापि निष्कृतिर्युष्मत्कृपयैवेत्याह—क्षमध्वमिति । स्वसृशब्देन स्वसृतत्पत्योर्भगिनीभार्ययोरभिधानं कथनं द्विवचनानुपपत्त्या एकत्र द्विवचनप्रयोगायोग्यतया मिथुनगुणं द्वारा द्वित्वसंख्यां द्वारीकृत्य मिथुने द्वये लक्षणया वृत्त्या लिंगसमवायेन "लिङ्गसमवायात्" इति जैमिनिसूत्रेण प्राणभृत उपदधातीतिवदिति दृष्टांतः । लिंगं वाच्योर्थस्तस्य समवायः समुदाये प्रवेशस्तेन । यथा छत्रिणो यांतीति एकस्मिन्नपि समुदाये छत्रिणि सति सर्वेषु यथा छत्रिपदं प्रयुज्यते तद्वदेकस्यामेव स्वसृपदवाच्यायामत्र सत्यामपि द्वयोस्तत्प्रयोग इति । एकस्वसृशब्देन स्वसृपतिर्लक्ष्यते इत्येकः स्वसृशब्दो लक्षकोऽन्यो वाचकस्तयोरेकशेषात् वसुदेवदेवक्योः प्रत्येकं पादावग्रहीदित्यर्थः । प्राणभृत इत्यस्य विवरणमाह—प्रयांतरसंमत्या । "सृष्टिवत्प्राणभृत्तत्र सादृश्यं लिंगभूमतः । अत्रैकमंत्रगो लिंगसमवायो विशिष्यत" इति (१) प्राणभृतं उपदधातीत्यत्रापि सृष्टिन्यायेन सृष्टिप्रतिपादकसूत्रेण मंत्रविधिरिति पूर्वः पक्षः । लिंगप्रकरणप्राप्तमंत्रानुवादेनेष्टकोपधानविधिः एतस्यैव प्राणान्दधातीत्यस्य वक्ष्यमाणार्थवादस्योपपत्तये प्राणभृच्छब्देन मंत्रानुवादः । पूर्वत्र सृष्टिन्याये द्वितीयादिमंत्रेषु सृष्टिलिंगानां बाहुल्यमस्ति इह तु प्रथमं मंत्रम् एव प्राणभृल्लिंगमाम्नायते "अयं पुरोभुवस्तस्य प्राणो भौवायन" इत्येकस्यैव मंत्रस्य प्राणभृत्त्वेपि छत्रिणो यांतीतिवत्तत्सहचरिताः सर्वे मंत्रा प्राणभृच्छब्देनोच्यंते तद्वदत्रापीति ध्येयम् । तदेवाह—देवकीत्यादि । इत्यर्थ इति । न द्वयोरेकैकं पादं गृहीत्वा द्वौ पादावग्रहीदिति वाच्यम् । कथंचित् कयापि रीत्या श्यालस्वस्रोरित्येकं पदं कृत्वा । लोके हि ग्रामसमीपे पृष्टः श्यालोऽयं ते क इति श्यालोऽयं ममेत्युत्तरं ददातीति लोकरीत्या वसुदेव एव श्यालपदेन ग्राह्य इत्यर्थाश्रयणेऽन्यायाश्रयणश्रमो नास्तीत्यर्थः ॥ २३ ॥ निगडाद्बंधनशृंखलातः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भद्रे, हे सद्बुद्धिमतीति तामधिकशोकां विशेषतः सम्बोधयति, यतश्च विन्दते भुङ्क्ते अवशः अनिच्छन्नपीत्यर्थः ॥२१॥ अज्ञः तत्त्वज्ञानहीनः अयं सर्वत्रैव हेतुः अन्यत्तैः । यद्वा ननु, एवं जानन्नपि त्वं किमिति मरणाद्बिभेषि ? किंवा तान् हतवानसि ? स्वानुभवाभावादित्याह—यावदिति । स्वदृक् शास्त्रदृष्ट्या आत्मतत्त्वज्ञोऽपि हतप्रायोऽस्मि अत एव तान् हनिष्यामीत्येवमभिमानं कुरुते यतो अज्ञः स्वानुभवरहितः ॥ २२ ॥ ननु, अस्माकमपि स्वानुभवो नास्तीति चेत् तथापि मदपराधः क्षन्तव्य इत्याह—क्षमध्वमिति । बहुत्वं देवकाद्यपेक्षया यतो यूयं साधवो बन्धुवत्सलाश्च दीनेति पाठे क्षमार्थमात्मदैन्यं सूचयति साधवो दीनवत्सला भवन्तीत्यर्थः । अथ अनन्तरं सद्यः वदन्नेवाग्रहीत् इत्यर्थः । अन्यत्तैः तत्र मिथुनगणनो मातापितृप्रभृतिकः प्राणाभृच्छब्देन तन्मन्त्रसंस्कृतेष्टकोच्यते बहुत्वानुपपत्त्या च तद्गणपातिन्योऽपि गृह्यन्त इति "वा शरि" (८।३।३६) इत्यस्य सकारपक्षमाश्रित्याजहल्लक्षणया व्याख्यातम् "अनचि च" (८।४।४७) इत्यस्य द्वित्वपक्षमाश्रित्य जहल्लक्षणया व्याचष्टे—स्यालेति । एवमध्यात्मज्ञानादिकमपि श्रीभगवद्विमुखानां प्रत्युत क्रूरतापोषायैव भवतीति प्रकरणतात्पर्यम् ॥२३॥ निगडात् लोहशृङ्खलात् तदा तं कर्त्तयामासेत्यर्थः ॥२४॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

भद्रे ! हे सुबुद्धिमतीति शोकाधिक्येन तान् विशेषतः सम्बोधयति । विन्दते भुङ्क्ते । अवशोऽनिच्छन्नित्यर्थः, कर्म्माधीनत्वात् । ननु वसुदेवस्येदृग् ज्ञानमस्त्येव; तच्च त्वया पूर्व्वं ज्ञायत एव । स्त्रियाश्च मम तादृशं कथं सम्भवेदिति चेत्तथापि सर्व्वेषामेव

साक्षात् कर्म्माधीनतानुभवात्तन्न्यायेनापि शोकं त्यजेत्याह—तस्मादिति। यद्वा, नन्वावयोरेतज्ज्ञानमस्त्येवेत्यनुतापो न कार्य्य एव, किन्तु बालानां तेषां जातमात्राणामेव मरणात् किञ्चित् सत्कर्म्माद्यनुत्पत्त्या का गतिः स्यादिति तान् प्रति शोचामि? तत्राह—तस्मादिति। तेषामिह स्वकर्म्मवशेन बाल्ये मरणपुत्रायामपि त्वयि स्वकर्म्मानुरूपं फल भावि, तत्र तव शोकेन किं स्यादिति भावः। मयापि निजपूर्व्वदुष्कृतजनितस्यास्य पापस्य फलमचिराद्भोक्तव्यमेवेति निश्चिन्ता भवेति भावि-दैवसूचनम् ॥ २१ ॥ नन्वेवं जानन्नपि त्वं किमिति मरणाद्बिभेषि? किंवा तान् हतवानसि स्वानुभवाभावादित्याह—यावदिति। स्वदृक् शास्त्रदृष्ट्यात्मतत्त्वज्ञो 'हतप्रायोऽस्मि, अतएव तान् हनिष्यामि' इत्येवमभिमानं कुरुते; यतोऽज्ञो ज्ञाननिष्ठारहितस्तत्त्वज्ञानहीनो वा, अयं सर्व्वत्रैव हेतुः, अन्यत् सर्व्वं तैर्व्याख्यातम् ॥ २२ ॥ नन्वस्माकमपि ज्ञाननिष्ठा नास्तीति चेत्तथापि मदपराधः क्षन्तव्य इत्याह—क्षमध्वमिति। बहुत्वं देवक्याद्यपेक्षया, यतः साधवो बन्धुषु दुष्टेष्वपि वत्सला भवन्ति। दीनेति पाठे क्षमार्थमात्मदैन्यं सूचयति। अथानन्तरं सद्यो वदन्नेवाग्रहीदित्यर्थः। अन्यत्तैः ॥ २३ ॥ निगडाल्लौहशृंखलात्। तदातं कर्त्तयामासेत्यर्थः। आत्मनः सौहृदं हृदयाकौटिल्यं दर्शयन् निगडान्मोक्षणेन वाक्यसम्वादि-व्यवहारात्। यद्वा, बन्धुत्वमभिव्यञ्जयन्निति गृहीतं तदीयं द्रव्यमन्यच्च परितोषार्थं किञ्चिद्ददावित्यर्थः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सर्वश्चेतनवर्गः ॥ २१ ॥ तदभिमानी देहाभिमानी आत्मनो विनाशानर्हत्वात् तस्मिन् बाध्यबाधकत्वबुद्धिभ्रमः स च देहात्माभिमानावधि इत्यर्थः ॥ २२ ॥ स्यालो वसुदेवः स्वसा देवकी ॥ २३–२४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्माद्देहात्मनोर्विलक्षणस्वभावत्वादत एवाशोच्यत्वाच्च हे भद्रे मया व्यापादितानपि व्यापत्तिं प्रापितानपि हतानपीति यावत् स्वसुतान् प्रति युवां मानुशोचयतं णिजर्थस्त्वविवक्षितः। यतः सर्वोऽपि जन्तुरवशोऽस्वतन्त्रः कर्मवश्यः स्वकृतं स्वकृतकर्मफलरूपं जन्ममरणादिकं विन्दते लभते ॥ २१ ॥ किञ्च यावदस्वदृक् देहविलक्षणात्मयाथात्म्यदर्शी सन् हतोऽस्मि हननविषयोऽस्मि हन्ताऽस्मि हननकर्तास्मीत्यात्मानमभिमन्यते देहात्मभ्रान्त्या देहगतं हन्तृहन्तव्यभावमात्मन्यनुसन्धत्ते तावदेव तदभिमानी तन्मूलकहन्तृहन्तव्यभावाभिमानी चात एवाज्ञस्सन् बाध्यबाधकतां बध्यघातुकभावमिति यावत् प्राप्नुयात् तत्प्रयुक्तशोकमायादिकं प्राप्नुयादित्यर्थः ॥ २२ ॥ अतः साधवो बन्धुवत्सलाश्च यूयं मम दौरात्म्यं क्षमध्वम् इत्युक्त्वाऽथाश्रूणि मुखे यस्य तथाभूतः स्यालः स्वस्रोर्देवकीवसुदेवयोः पादावग्रहीत् पत्नीभ्रातृवाचितया प्रसिद्धापि स्यालशब्दोऽत एव प्रयोगाद्भगिनीभर्तर्यपि वर्तते ॥ २३ ॥ ततः कन्यकाया गिरा विस्रब्धः एतौ निर्दुष्टौ इति विश्वस्तः स्वस्य सौहृदं दर्शयन् देवकीं वसुदेवञ्च निगडान्मोचयामास पूर्वोक्तमेव मोचनं सप्रश्नं स्मारितमिति न पौनरुक्त्यम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तर्ह्यस्य कियन्तं कालं संसारानुवृत्तिरिति तत्राह—यावदिति। अस्वदृगनात्मानं देहम् आत्मत्वेन पश्यतीति तदभिमानी देहाभिमानी ॥ २२–२५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कथं तर्हि तव मोहस्तत्राह—यावदिति। तर्हि नास्माकं कथं भवेत् ॥ २२ ॥ तत्राह—क्षमध्वमिति। बन्धुवत्सलाः तेषामपराधग्राहका इत्यर्थः। दीनेति पाठः सुगमः ॥२३॥ निगडात् लौहशृङ्खलतः तं कर्त्तयित्वापीत्यर्थः। पूर्वं बन्धनागारान्मोचनं ज्ञेयम् २४

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तनयान् देहानामनात्मत्वात् तनयबुद्ध्या तान् बहिर्दृष्ट्या मया हतानपि मानुशोचेत्यर्थः। मया पञ्चभूतात्मका देहा एव हता इत्यतो मय्यपि दोषदृष्टिर्न कार्य्येति भावः। ममैवमात्मतत्त्वज्ञानं नास्तीति चेत् तदपि मानुशोचेत्याह—यत इत्यादि, अज्ञानाश्रये कर्मवादेऽप्येवं विचारेण न शोकाऽवकाश इति भावः ॥ २१ ॥ मम तु त्वत्पुत्रहन्तृत्वमेव तावन्नास्ति ज्ञानित्वादित्याह—यावदिति। अस्वदृक् न स्वमात्मानं पश्यति किन्तु देहमेव पश्यत्यतोऽज्ञः तेन मम देहाभिमानाभावात् "हत्वापि स इमान् लोकान्न हन्ति न निबध्यते" इति वचनान्न त्वत्पुत्रहन्तृत्वं नापि बन्ध इति भावः ॥ २२ ॥ तदपि मयि पुत्रहन्तृत्वमारोप्याधिकं चेद्रोदिषि तर्हि सत्यमहं दुष्ट एव बुद्धिपूर्वकं पापमकरवमेव तत्र निष्कृतिर्युष्मत्कृपैवेत्याह—क्षमध्वमिति। श्यालः कंसः स्वस्रोरिति द्विवचनानुपपत्या स्वसृशब्देन स्वसृपतिर्लक्ष्यते इत्येकः स्वसृशब्दो लक्षकः अन्योन्यवाचकः तयोरेकशेषात् स्वस्रोर्वसुदेवदेवक्योः पादौ प्रत्येकं पादमग्रहीदित्यर्थः ॥ २३ ॥ निगडात् लोहशृङ्खलात् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वसुदेवः स्वयमेतज्जानातीति मत्वा देवकीं प्रत्याह–तस्मादिति । यद्यपि ते तनयाः स्वकृतकर्मविपाकभोक्तृत्वेनान्यनिरपेक्ष-जन्ममरणाः स्वरूपतोऽविनाशिनश्च देहानामपि कारणदृष्ट्या मरणं नास्ति तथापि मयैव व्यापादितान् मन्यसे चेत्तदापि अहमभद्रः त्वं भद्रा साधुस्वभावा एतन्ममाभद्रत्वं तव भद्रत्वं दैवतन्त्रम् । सर्वोभयप्रकारो जनोऽवशः दैवतन्त्रः स्वकृतं भुञ्जते यतस्तस्मात् हे भद्रे ! स्वतनयान्मानुशोचेत्यर्थः ॥ २१ ॥ सुखदुःखरूपा संसृतिर्न निवर्तते इत्युक्तं तस्या अवधिमाह, यावदिति । अस्वदृक् देहात्मबुद्धिः ॥ २२ ॥ स्यालस्वस्रारिति देवकीवसुदेवयोः स्यालशब्देन कथञ्चित् वसुदेवस्य ग्रहणं स्यालः इति विसर्गान्तपाठे तु स्यालः कंसः स्वस्रोः स्वसृभामयोः पादौ प्रत्येकमग्रहीदेकशेषस्त्वार्षः ॥ २३ ॥ कन्यकागिरा विस्रब्धः नत्वासुराद्भावान्निवृत्तः आत्मसौहृदं दर्शयन्नेव केवलं न च तदस्तीति भावः ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तस्माद्देहानामनात्मत्वात् स्वतनयान् तनयबुद्ध्या गृहीतान् तद्देहान् मया व्यापादितान्मारितानपि विनाशित्वबुद्ध्या मानुशोचतम्, ननु देहादन्य आत्मेति सत्यं तथापि मज्जातदेहयोगेन ते मत्पुत्रा यदानन्दकरा देहविनाशान्मदानन्दक्षतिरिति चेत्तत्राह यतः सर्व इति तेषां कर्मैवेदृशमासीद् येन मत्करान्मृत्युरिति मयि च दोषदृष्टिर्माभूत् ॥ २१ ॥ वस्तुविचारे तु त्वत्पुत्रहन्ता नाहमित्याह–यावदिति नित्यमेवात्मानमनित्यदेहाभेदधिया हतोऽस्मि हननकर्मास्मीति कालरूपेश्वराधीनोऽपि हन्तास्मि रिपुदेहहनने स्वतन्त्रोऽस्मीति च यावन्मन्यते कालाधीनं सर्वमिति, बलिराह "कालः सर्वं समादत्ते कालः सर्वं प्रयच्छति । कालेन विहित सर्वं माकृथाः शत्र पौरुष"मिति मोक्षधर्मेऽस्वदृक् आत्मयाथात्म्यानभिज्ञः अज्ञः कालस्वातन्त्र्यानभिज्ञः तावद्बाध्यबाधकतां हतहन्तृता-लक्षणाम् संसृतिमियात् तस्मात्त्वत्पुत्रदेहाः कालेनैव नाशिता न मयेति भावः ॥ २२ ॥ तथापि चेन्मयि पुत्रहन्तृत्वमारोप्याधिकं खिद्यथैव तर्हि सत्यमहं दुष्टोऽस्मि मद्दोषनिष्कृतिस्तु युष्मत्कृपयैव भवेदित्याह—क्षमध्वमिति, श्यालः कंसः स्वस्रोर्भगिनीतत्पत्योः प्रत्येकं पादावग्रहीत् स्वसा च स्वसा चेत्येकशेषात् स्वस्रोः पूर्वोवाचकः परस्तु लाक्षणिको बोध्यः ॥ २३ ॥ निगडाल्लोहशृङ्खलात्, आत्मसौहृदं प्रियभाषणादिना दर्शयन् भ्रातुः कंसस्य दोषं क्षान्त्वा रोषं शोकञ्च व्यसृजत् ॥ २४–२५ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

तानेव क्षमापयामीत्याशयेन तान्स्वमनस्यभिमुखीकृत्याह ॥ क्षमध्वमिति । हे साधवः । परदुःखमसहमानाः । अत एव दीनवत्सलाः हे देवकि पुत्रा मम दौरात्म्यं क्षमध्वम् । यतोऽहमिति शेषेणाश्रुमुख इति योज्यम् । पूर्वजन्मकालिकः पितेत्यर्थः । पिता पितामहश्चैव तथैव प्रपितामहः । त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिता इति ब्राह्मोक्तेः । अतोऽनेन तेषां क्षमापनेन स्वपितृ-त्वमेव हेतुरुक्तो भवति । तदुक्तम् । मरीचिजाः षण्मुनयो बभूवुस्ते देवलं प्राहसन्कार्श्यहेतोः । तच्छापतः कालनेमिः प्रसूतावध्यतार्थं तप एव चक्रुः । धाता प्रादाद्वरमेषां तथैव शशाप तान्क्ष्मातले संभवध्वम् । तत्र स्वतातो भवतां निहंतेत्यात्मान्यतो वरलिप्सून्हिरण्यः । इति तात्पर्यनिर्णये । श्यालः वसुदेवभार्याभ्राता कंसः । इत्युक्तप्रकारेण पुत्रप्रकारेण क्षमापनमुक्त्वा वसुदेवं समाधत्ते ॥ स्वस्रोरिति । अत्र श्यालस्वस्रोरित्युक्तम् । तदसाधु । पुंस्त्रीद्वंद्वे स्त्रीवाचकशब्दस्य पूर्वनिपातनियमात् । स्वसृशब्दापेक्षया श्यालशब्दस्य मात्राधिक्याच्च न च स्वसुः सकाशात् श्यालस्य पुरुषत्वेनाभ्यर्हितत्वात्पूर्वनिपातः । सर्वत्र पुरुषस्याभ्यर्हितत्वेन कुत्रापि स्त्रियाः पूर्वनिपातायोगात् । तस्माद्विरुद्धमत उच्यते । प्रथमांतश्यालशब्देन कंसः कर्तोच्यते । स्वस्रोः स्वां भगिनीं सरणशीलत्वेन स्यस्तुर्वसुदेवः स्वा आत्मसंबंधि-त्वाद्भगिनी । सृ गतौ ताच्छील्यार्थादुनस्तथेत्यनुव्याख्याने । यद्वा । स्वात्मानं स्रावयति अधःपातयति स तथा । अत्रांतर्णिच् । तस्य वसुदेवस्य । पादावग्रहीदित्यन्वयः । भगिन्यर्थकस्वसृशब्दांगीकारे एषा तवानुजा बालेति वसुदेवोक्त्या देवक्याः कंसानुजत्वसिध्या तत्पादग्रहणे महान्विरोधः प्रसज्येत । किंच श्यालस्वस्रोरिति द्विवचनांगीकारे पादाविति द्विवचनमयुक्तम् । उभयोश्चतुष्पादसिद्धेः । यद्वा । पिता पितामहश्चैव तथैव प्रपितामहः । त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिता इति ब्राह्मोक्त्या स्वपित्रादीनामश्रुमुखसंज्ञयाऽत्राश्रुमुख इत्येकवचनेन पितुरेव ग्रहणसिद्धेः । अश्रुमुख इति प्रथमाया सप्तसु प्रथमेति सूत्रेण षष्ठ्यर्थकत्वात्पितुः स्वसृत्वेन स्वस्य च स्वसृत्वेन पितृष्वसा च स्वस्वसा च स्वसारौ तयोरित्युभयस्वसृविवक्षया एकस्यैव द्विवचनोपपत्त्या देवक्या इत्येवार्थः । तदुक्तम् । बभूव गंधर्वमुनिस्तु देवकनामास्य तस्मादजनिस्म देवकी । अन्याश्च या कश्यपस्य भार्या ज्येष्ठां तु तामाहुक आत्मपुत्रीं । चकार तस्माद्धि पितृष्वसा । स्वसा च कंसस्य बभूव देवकीति तात्पर्यनिर्णये । किंच अहो भगिन्यहो भामेत्युक्त्या भगिनीभर्तुर्भामशब्दप्रयोगेणैव स्त्रीभ्रातुः श्यालशब्दप्रयोगसिद्धेः । अत्र श्यालः कंस इत्यर्थः । तथा च । श्यालः कंसः । अश्रुमुखः स्वपितुः स्वसृत्वात् द्विवचनविषया एव स्वस्रोर्देवक्याः पादावग्रहीत् । पितृष्वसृत्वसंबंधेन पादग्रहणे दोषाभाव एव । अतो न किंचन शब्दप्रयोगासाधुत्वम् ॥ २३ ॥

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

तस्माद्भद्रे स्वतनयानिति श्लोके यतः सर्वो जनोऽवशः सन् स्वकृतं विंदते तस्मात्स्वतनयान्माऽनुशोचयत इति देवक्या-स्तनयशोकाकरणे तनयानां कर्मफलप्राप्तिर्हेतुरुच्यते । साऽसंगतैवाभाति । न हि तनयानां कर्मफलप्राप्तिर्देवक्यास्तनयविषयशोकाकरणे

हेतुर्भवितुमर्हति । व्याप्त्यभावादित्यतः पूर्वश्लोकोक्तमर्थं तस्मादित्यनेन परामृश्य कर्मफलप्राप्तेर्हेतुत्वं घटयति ॥ तस्मात्तस्मिन्नेवेति । तस्मात्परमात्मनोऽविपर्ययात्तस्मिन्नेव परमात्मन्येव स्थितिं निष्ठां कृत्वा परमात्मा सर्वोत्तमः सर्वनियामकस्त्वत्तनयादिसर्वजगतः कर्मानुसारेण हननादिकर्तेति ज्ञात्वेत्यर्थः । अनेन यतः परमात्मा स्वाधीनतत्तत्कर्मानुसारेण त्वत्तनयादिसर्वजगतो हननादिकं करोत्यतः शोके कृतेऽपि हननादेरपरिहार्यत्वाच्छोको व्यर्थस्तस्माच्छोको न कार्य इति हेतुहेतुमद्भावः संघटितो भवति । तथाऽवशो अकारवाच्यविष्णुवश इति भागवतपदं च व्याख्यातं भवति । तथा यो व्यर्थः स प्रेक्षावद्भिर्न क्रियत इति व्याप्तिश्च प्रदर्शिता भवति । एवं भुवि भौमानि भूतानीत्यादिश्लोकत्रयं स्ववचनेन व्याख्यायानेकविधोऽभेद इति यदभेदस्यानेकविधत्वमुक्तं तत्प्रमाणेनैव दर्शयंस्तेनैव प्रमाणेन स्वोक्तार्थं च द्रढयति ॥ अहं ब्रह्मास्मि देवोऽस्मीत्यादिना । इत्यादिकेत्यादिशब्देनेंद्रियरहितोऽहंमित्यभेदबुद्धिर्ग्राह्या । देहादिष्वित्यादिशब्देनेंद्रियाधिष्ठानगोलकं ग्राह्यम् । अधममध्यमेऽधमयुक्तो मध्यमोऽधममध्यमस्तस्मिन् । अधमे मध्यमे च जीवे देहादिष्वहं जातोऽस्म्यहं वर्धे वर्धयाम्यहं धनवान् अहं म्रियेऽहमिंद्रियरहित इत्यादिका । देहादिना सहाभिधाय यन्मायया जातान्मोहात्सदा दृश्यते । देवेष्वहं देवोऽस्मीति देवेन सहाभिदा । परे ब्रह्मणि चाहं ब्रह्मास्मीति ब्रह्मणा सहाभिदा । यन्मायया जातान्मोहान्नित्यं संदृश्यते । अधमस्य मध्यमस्य जीवस्य स्वस्मिन्नहं जातोऽस्मि वर्धे म्रिय इत्यादिका देहादिप्रतियोगिकाभेदबुद्धिरहं देवोऽस्मीति प्रतियोगिकाभेदबुद्धिरहं ब्रह्मास्मीति ब्रह्मप्रतियोगिकाभेदबुद्धिर्यन्मायया जातान्मोहाद्भवति स ईशो न विपर्येतीत्यर्थः । अनेनाभेदस्य देहाद्यनेकप्रतियोगिकत्वेनानेकविधत्वमुक्तं भवति । यतः पूर्वं पुत्रादिरेव पश्चात्पित्रादिर्भवत्यतः पुत्रादिकं विपर्येतीत्यन्वयः । पुत्र एव स्वस्यापत्योत्पत्त्यनंतरं पिता भवति स एवापत्यस्यापत्योत्पत्त्यनंतरं पितामहः प्रपितामहश्च भवति । अतः पुत्रादिकं विपर्येति । पुत्रादेः पुत्रत्वादिकं नैकप्रकारेण तिष्ठतीति भावः । ननु यदहं ब्रह्मास्मि देवोऽस्मीत्याद्यभेदबुद्धेर्मोहजनकत्वमुक्तम् । तदयुक्तम् । तथात्वे परब्रह्मणो ब्रह्मास्मीति ब्रह्माभेदबुद्धेस्तथा देवानामहं देवोऽस्मीति देवाभेदबुद्धेरपि मोहजनकत्वं स्यात् । नचैवम् । प्रमाणबाधितत्वादित्याशंकां तथाऽधममध्यम इत्यधमेन सहोक्त्याऽधममध्यमस्याहं ब्रह्मास्मि देवोऽस्मीति ब्रह्माभेददेवाभेदबुद्धिर्भवतीति भ्रांतिं च प्रमाणेनैव परिहरति ॥ तल्लक्षणैर्विहिन इति । तुशब्दोऽसुरेभ्यो मानुषजनस्य विशेषसूचकः । असुरा ब्रह्मास्मि देवोऽस्मीति च प्रतिपद्यंते ज्ञानवंतो भवंति । मानुषा जना जन्मादिरहं जातोऽस्मि वर्धयामि म्रिय इति जन्मादियुक्तदेहाद्यैक्यं प्रतिपद्यंत इत्यन्वयः । अत्र तल्लक्षणैर्विहीनः सन्नित्यनेन तल्लक्षणरहितानां तदभेदबुद्धिरेव मोहजा न तु तल्लक्षणवतां तदभेदबुद्धिः अतः परब्रह्मादेर्ब्रह्मास्मीत्याद्यभेदबुद्धिर्न मोहजा । परब्रह्मादेर्ब्रह्मादिलक्षणयुक्तत्वादिति पूर्वशंका परिहृता भवति । तल्लक्षणैर्विहीनः सन्नित्युक्तमेव स्पष्टयन्नैक्यबुद्धिनां फलं च दर्शयति ॥ परब्रह्मण एकस्येति । एकस्य परब्रह्मण एवाहं ब्रह्मास्मीति चिंतनं विधीयते । वेदादाविति शेषः । किं तदित्यत आह ॥ परब्रह्मेति । जन्माद्यस्य इत्यादिनोक्तपरब्रह्मलक्षणैः रामाद्येव परब्रह्मेत्यवधारयेत् । आदिपदेन कृष्णाद्यनंतरूपाणि ग्राह्याणि । चोऽवधारणे । देवानामेव देवोऽस्मीति चिंतनमपि विहितं स्यात् । न च तथास्त्विति । तस्यानिष्टसाधनत्वोक्तेरित्यत आह ॥ तच्चेति चोऽवधारणे । स्वलक्षणैरित्यनेन संबध्यते । तद्देवोऽस्मि चतुर्मुखोऽस्मीत्यादिचिंतनं स्वलक्षणैर्देवचतुर्मुखादिस्वरूपभूतलक्षणसदृशलक्षणैर्युक्तानामेव ऋज्वादीनां विहितं ज्ञेयं न तु तत्स्वलक्षणरहितानामित्यर्थः । एवं मर्त्यानां स्वलक्षणैर्युक्तानामेव जीवानां मानुषोऽस्मीति प्रतिपत्तिर्विधीयते न तु तल्लक्षणरहितानामित्यर्थः । कुत एतदित्यतो विपक्षे बाधकमाह ॥ अन्यथेति । प्रतिपत्त्या चेति चस्त्वर्थः । तमश्चेति चोऽवधारणे । यांतीत्यनेन संबध्यते ॥ २०–२१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तस्माद्भद्रे स्वतनयानिति श्लोकेऽवशः स्वकृतं विन्दते सर्वो जन इति कर्मस्वातन्त्र्यं प्रतीयते । तनयानां कर्माधीनमृतिज्ञानेन देवक्या शोकोऽकर्तव्यश्च कथमित्यतस्तस्यापि यः प्रेरकस्तस्मिन्स्थिरमतिश्चेत्सर्वं सुघटमित्याह ॥ तस्मादिति । तस्मात्परमात्मनो विपर्यासात्तस्मिन्नविपर्ययस्ते भगवति स्थितिं स एव तत्तत्कर्मानुसारेण हननादिकर्तेति निष्ठां कृत्वा माऽनुशोच न शोकं कुरु ॥ ततश्चायं श्लोकार्थः ॥ हे भद्रे सप्तमी तादर्थ्ये वा । मङ्गलार्थं मया स्थूलदृष्ट्या व्यापादितान्संहृतान्स्वतनयानपि ततो माऽनुशोच नानुशोच । अवशो विष्णुवशः सर्वो जनो यतः स्वकृतं विन्दते भद्रे नित्यमङ्गलमूर्तौ । अपिना स्थितिं कृत्वा माऽनुशोचेति वा भद्रे भगवत्यनेकविधो लोकदृष्ट्या रामोऽहं सुख्यहं स्वतन्त्रोऽहमित्यादिरभेदोऽने प्राणे तदुपलक्षितऋजुगणेकविधोऽभेदो ब्रह्माहं स्यामित्यादिरूपः । एवं सर्वः शर्व एवं सर्वस्तत्तत्पदयोग्यस्तत्तत्पदमाकाङ्क्षन्स्वकृतं सु अकृतं क्लृप्तमित्यकृतं तत्परं विन्दत इत्यतस्तात्पर्यानुसारेणार्थोऽवसेयः । तस्मादपरिहार्यार्थे न त्वं शोचितुमर्हसीति तात्पर्यं ज्ञेयम् । मया व्यापादिताः स्वतनया मत्पुत्रा एवेति माऽनुशोच इत्ययं ग्रन्थकृदान्तरङ्गिक उत्तरार्धे वक्ष्यमाणरीत्या भावोऽवसेयः ॥ २१ ॥ स्वयं श्लोकत्रिकव्याकृत्यानेकविधतामभेदस्य दर्शयन्मानेन तेनैव स्वोक्तार्थं द्रढयति ॥ अहं ब्रह्मास्मीत्यादिना । अहं ब्रह्मास्मीत्येकविधमैक्यं देवोऽस्मीत्यैक्यमेकं केवलमानुषो यादृशतादृशमानुषो नास्म्यपि तु मनुष्योत्तम इत्येकविधं जातो वर्धे धनवान्म्रिये इत्येकविधम् । आदिपदादहङ्कारादेर्ग्रहणम् । यद्यप्यहं ब्रह्मास्मीत्याद्यनुरोधेन परब्रह्मणि देवेषु देहादिष्विति वक्तव्यं तथा देहे जातोऽस्मीत्याद्यभेदाकारबाहुविध्योपपादनात्तदनुपदमेव देहादिष्विति निरूपणं युक्तमिति व्युत्क्रमोक्तिर्यथायोग्यमन्वयः । अहं ब्रह्मास्मि देवोऽस्मीति परब्रह्मणि देवेषु तद्विषयेऽभिदाऽभेदधीर्देहादिषु च साऽनुमानागमाभासजन्या देहे तद्धर्मेषु न प्रात्यक्षिकी सा । यथोक्तं भक्तिपादीयानुव्याख्यानसुधयोः । क्वचित्प्रत्यक्षतः प्राप्तमनुभागमबाधितं देहात्मत्वं

यदि न तत्प्राप्तं प्रत्यक्षतः क्वचित्। मम देह इति ह्येव न देहोऽहमिति प्रमा। उपचारतश्च कृष्णोऽहमिति कर्दमलेपने। वक्तस्य यद्वदेवं स्यादित्यादीकृत्य क्षमा इत्यन्तेन ग्रन्थेन। देहात्मत्वं प्रत्यक्षप्राप्तमेव न भवति। अतः प्रत्यक्षतः प्राप्तस्यानुमानाबाध इत्यत्र नेदमुदाहरणम्। अयमभिसन्धिः। नास्त्येव देहात्मत्वप्रतीतिर्योऽनुमानादिना बाध्येत। येषां चास्ति नास्तिकादीनां तेषामपि नेन्द्रियजा किन्त्वनुमानागमाभासजन्यैवेति। मा भूत्पण्डितरूपाणां देहात्मत्वप्रतीतिः पामराणामस्त्येव सैवास्माकमुदाहरणं भविष्यतीत्यतः क्वचिदित्युक्तम्। तदुपपादयति॥ ममेति। सर्वस्यापि जन्तोर्मम देह इत्येव हि प्रमाप्रतीतिर्न तु कस्यापि देहोऽहमिति। यद्वा यस्मात्सर्वेषां मम देह इत्येव प्रमा सम्यक्प्रतीतिः सदाऽनुवर्तते तस्माद्देहोऽहमिति प्रतीतिर्नावकाशमासादयतीति। देहात्मप्रतीत्यभावेऽपि देहधर्माणां कार्ष्ण्यादीनामात्मनिष्ठत्वप्रतीतिस्तावदस्त्येव कृष्णोऽहमित्यादिव्यवहारदर्शनात्। सा च लिङ्गाद्यनपेक्षयैव जायमाना प्रत्यक्षजन्यैव। बाध्यते चानुमानादिनेति सैवोदाहरणं भविष्यतीत्यत आह॥ उपचारतश्चेति। कृष्णोऽहमिति प्रतीतिर्नास्तीत्यनुवर्तते। कथं तर्हि व्यवहारः कृष्णोऽहमिति व्यवहारस्तूपचार एवेति योजनेत्यादिना। तदेवं स्वभावतः प्रबलेन प्रत्यक्षेण विरुद्धावनुमानागमाभासावेवेत्यन्तेन ग्रन्थेन। अधमश्च मध्यमश्च। सर्वो द्वन्द्व इत्येकवद्भावः। अधमेन सहितो मध्यमस्तस्मिन्निति वा यन्मायया यस्य भगवत इच्छया तत्कृतो यो मोहस्तस्मादधममध्यमे दृश्येते। अनुमानागमाभासैः सः स्वेच्छानिमित्तकमोहादभिदामतिदाता कदाचन स्वयं न विपर्येति। ईश इत्यतिप्रसक्तं जीवादेरपि प्रभुर्हि जीवो जडमपेक्ष्य सोऽपि स्वतनुभवनादेरीष्ट इत्यादेरित्यतो मानं स्वगतमीशपदं वक्त्येतादृशेशस्त्वमिति स्वयमेव व्याकरोति॥ सर्वेशत्वादिति। यद्यपि मध्यमाधम इति वक्तव्यम्। तथाऽपि ते च बहवोऽसुरा बहुला यस्मादित्यादेर्मध्यमा न्यूना इति च द्योतयितुमेवमुक्तिरिति मन्तव्यम्। आत्मविपर्ययपदस्यार्थान्तरमाह॥ पुत्रादिकं विपर्येतीति। तद्विवृणोति॥ पुत्रादिश्च यतो भवेदिति। पुत्रस्य पुत्रे जाते पित भवति तस्य च पुनरपत्योत्पत्तौ पितामह इत्यादिप्रकारेण पुत्रादिकं विपर्येति व्यवस्थां न भजत इति। अहं ब्रह्माऽहं देव इत्यादिनाऽभेदधियो यन्मोहजत्वमुक्तं तदयुक्तम्। ब्रह्मणो ब्रह्माऽहं देवस्य देवोऽहमिति मतिरपि मोहजा जायेत। इदं च मानावमानितम्। किञ्चाधमेन सह द्वन्द्वनिर्दिष्टमध्यमस्याधमसमता स्यात्सा चानुपपन्नेत्यतः प्रमाणेन तदर्थमाह॥ तल्लक्षणैरिति। तुरधमासुरादेर्मध्यमस्याहं ब्रह्मास्मीत्याद्यभिदामतिफलतमोयोग्यत्वाभावविशेषद्योतकः। तल्लक्षणैर्ब्रह्मदेवादिलक्षणैर्विहीनः सन्नपि ब्रह्मा देवो वाऽस्मीत्यसुराः प्रतिपद्यन्ते। प्रातिस्विकं पृथक् पृथक् प्रतिपत्तिरित्येकवचनं विहिनः सन्निति। ते सर्वेऽप्येकफलका इति द्योतयितुमसुरा इति बहुवचनमिति ज्ञेयम्। एवमुत्तरत्रापि। मानुषा जना जन्मादिं जातोऽस्मि वर्धे धनवानित्यादिं प्रतिपद्यन्ते। अनेनातल्लक्षणः स्वयं संस्तत्त्वेन प्रतिपत्ता मोहवांस्तल्लक्षणयुतास्तत्त्वेनात्मानं प्रतिपत्तारस्तु तत्त्वज्ञा इति तच्छङ्कापरास आसेति ज्ञेयम्। एतमर्थं स्पष्टं दर्शयन्मानमाह॥ परब्रह्मण इति। एकमेवाद्वितीयमित्यादेरेकस्य परब्रह्मणो ब्रह्माऽस्मीति विचिन्तनं न मोहजं लक्षणलक्षितत्वात्तानि चैवं ज्ञेयानीत्याह॥ परं ब्रह्मेति। रामादिं भगवदवतारं लक्षणैस्तदसाधारणैश्चिन्हैस्तृणाक्षीकरणविश्वरूपप्रदर्शनादिभिः परब्रह्मेति आगमिकजन्मादिलक्षणैर्वा। अवधारयेत्। आदिपदेन वासुदेवादयो ग्राह्याः। स्वलक्षणैः शास्त्रशंसिततल्लक्षणैर्युतानां देवानां देवोऽस्मीति विचिन्तनं न दोषावहम्। स्वलक्षणैर्ब्रह्मादिपदयोग्यलक्षणैर्युतानामृज्वादीनां ब्रह्मादिरस्मीति विचिन्तनमिति वा। एवं मर्त्यानां मानुषोऽस्मीति प्रतिपत्तिर्विधीयते। अन्यथाख्यायाः फलमाह॥ अन्यथेति। अब्रह्मलक्षणकेषु स्वेषु तत्त्वप्रतिपत्त्या विनिश्चयात्तमो यान्ति। तानपि निर्धारयितुं पुनराह॥ अन्यथेति। असुरजना इत्यन्वयः। ज्ञानात्सम्यग्ज्ञानात्परं परमात्मानं सुरा यथा तथा नियतं प्रतिपद्यन्ते नियतं तमश्च घोरं यान्ति अत्र केचित्प्रमाणान्तरेण स्पष्टयन्नैक्यबुद्धीनां च फलं दर्शयति। परब्रह्मण एकस्येत्यवतारयन्नुपसंहरत्यन्यथेतीति केचित्। पृथगभिधानानभिधानाद्ब्रह्मपुराणभागविशेषगतमिति चेत्यन्तवाक्यद्वन्द्वमित्यद्वन्द्वोध्वा॥ अथ मूलार्थः॥ कंसः संसारानुवृत्तिः कियत्पर्यन्तमित्यतः शंसति॥ यावदिति। अस्वदृगस्वं वस्तुतो देहादिकं स्वं पश्यतीति तदभिमानी निन्दिताभिमानवान्यावदहं हन्ताऽस्मि अहं हतोऽस्मीत्यात्मानं मन्यते तावदज्ञोऽयं बाध्यबाधकतां बाध्यत्वं बाधकत्वं चेयात्प्राप्नुयात्। परमार्थस्तु नाहं हन्ता ते तनयाश्च न मया व्यापादिता अतस्त्वया न शोकः कार्य इति कंसवचसो ज्ञेयः। सु अत्यन्ताज्ञ इति वा॥ २२॥ साधवो बन्धुवत्सला इति निकटनिविष्टजनानभिलक्ष्य मम दौरात्म्यमियता समयेनानुष्ठितं मष्वमित्युक्तिर्वा तयोरेव संमाननार्थं बहुत्वारोपेणोक्तिर्वा। शालस्वस्रोरिति पाङ्क्तः पाठोऽनेकेषु कोशेषु दर्शनात्। शालश्च स्वसा चेति तयोः। ननु श्यालाः स्युर्भ्रातरः पत्न्या इत्यमरात्कथमयं शालो वसुदेव इति चेत्तर्हि भिन्नपदतायां भिन्नोदरजः कंसोऽपि कथं भगिनीभ्रातेति त्वयाऽपि वाच्यम्। न च वाच्यं पितृव्यतनयाऽपि नयतो भगिनीति। भगिनीभ्राता कंसो भवतीति शङ्कितं नातङ्कितमिति तु भाक्तं कंसस्य भगिनीभ्रातृत्वं स्वीकुर्वतां युष्माभिः कंसभार्याऽपि वसुदेवभगिनी जातेति तद्भ्रातृत्वं वसुदेवस्योररीकृतप्रायमिति भारोऽवतारितोऽस्मच्छिरस इत्यवेहि। भिन्नं पदमेकत्र दृष्ट्वा स्वस्रोरिति घटयितुं बहुगहननिविष्टा नाद्यापि पारङ्गताः। पादाविति शालस्य स्वसुश्चेति पृथगन्वयनाद्युच्यते। ग्रन्थकृत्कंसोऽङ्गस्मरणविकल इति चरणौ जग्राह। देवकीतो ज्यैष्ठ्यात्तद्ग्रहणं न मया कण्ठतो वाच्यमिति पदानीत्यनुदाजहारेति ध्वनिः॥ २३॥ कन्यकागिरा मायावाण्या विस्रब्धो विश्वासमाप्तो देवकीं वसुदेवं च निगडान्मोक्षयामास। मुच्धातुर्मोचयामासेत्यपि पठन्ति। आत्मसौहृदं स्वसुहृद्भावं दर्शयन्मोचयामासेत्यन्वयः॥ २४॥

श्रीसुबोधिनी

तत् तु भवद्भ्यां ज्ञायत एवेति शोको न कर्तव्य एवेत्याह **तस्मादिति**, वसुदेवस्तु शोकं न करिष्यतीति देवकीसम्बोधनं **भद्रे** इति, अतः परं तव कल्याणमपत्यं च भविष्यतीति ज्ञापितं, **स्वतनयान्** देवकीतनयान् **मानुशोच**, प्रथमत आत्मानं शोचति ततः पुत्रमित्यनुपदं, यद्यपि ते स्वकर्मवशादेव मृता न तु मया व्यापादितास्तत्कर्मैव मां च प्रेरितवदथापि बहिर्दृष्ट्या मयैव व्यापादिता इत्यङ्गीक्रियते तथापि मा शोचेत्याह **मया व्यापादितानपीति**, अननुशोके बहिर्मुखानामप्येकास्त्युपपत्तिस्तामाह **यतः सर्वः स्वकृतं भुञ्जतेवश** इति, अनिच्छन्नपि परवश एव कर्माधीनो भूत्वा सर्वोपि स्वकृतं भुङ्क्ते, अस्य मते न सृष्टेश्चातुर्विध्यं, भुञ्जत इति बहुवचनप्रयोग एकवचने देहभेदेन भोगेन नानात्वप्रतीतेः सिद्धत्वज्ञापनाय, अनेन मयापि बहिर्मुखत्वेन कृतं कर्म भोक्तव्यमित्यविचारितोपि दण्डो भविष्यतीति दण्डाभावेनापि चिन्ता न कर्तव्या ॥ २१ ॥

ननु त्वया ज्ञानमुपदिष्टमुपदेष्टुर्दृढं ज्ञानं भवतीति न तव दण्डसम्भावनेति चेत् तत्राह **यावदिति** यावदयं जीवः शास्त्रोत्पन्नज्ञानोपि **हतोस्मि हन्तास्मी**त्यात्मनः कर्मत्वं कर्तृत्वं वा **मन्यते तावद् बाध्यबाधकतामियादेव**, कर्मत्वे बाधकत्वमिति, अक्रिय आत्मनि यथैव क्रियां मन्यते तथैव क्रियां प्राप्नोतीत्यर्थः, नन्वविद्यमानधर्मप्रतीतौ को हेतुस्तत्राहास्वदृगिति, न स्वस्मिन् दृष्टिर्यस्य, शास्त्रज्ञानं शास्त्रीयत्वेनैव जानाति न तु स्वविषयत्वेन, ततोपि किमत आह **तावत् तदभिमानी भवतीति**, स्वरूपे ज्ञाते देहाद्यध्यासो न भवति, अध्यासे पुनः स्वरूपाज्ञानमिति तदभिमान्यज्ञ एव भवति, अतो **बाध्यबाधकभावः** ॥ २२ ॥

एवं भवद्बालकानामस्माकं च कर्मवशात् सर्वं जातं भविष्यति चातः शोको दण्डो वा न चिन्तनीयः परमतिक्रमदोषो मदीयः सोढव्य इति वदन् क्षमापनार्थं नमस्कारं करोति क्षमध्वमिति, **मम दौरात्म्यं क्षमध्वं**, अविचारेणान्यायकर्ता **दुरात्मा**, अत आज्ञोल्लङ्घनं पुत्रमारणादिकं च यत् कृतं तत् सर्वं **महतां हृदयेनुशये स्थिते शोको भूयान्** भवति, क्षमापनार्थं न किञ्चिद् दातव्यं, यतः **साधवो दीनेषु वत्सलाः**, मम च दीनत्वमपकीर्तिनरकभाक्त्वेन, स्वस्य दैन्यं न केवलं वचनेन निरूपितं किन्तु रूपेणापि तदभिव्यक्ति कृतवानित्याहेत्युक्त्वाश्रुतमुखो जात इति, अश्रूणि मुखे यस्य, विकलत्वात् प्रोञ्छनमपि न करोति यद्ययमकर्तव्यमपि कनिष्ठभगिन्याः पादग्रहणं करोति तदान्यत् किं न कुर्यात् गृहीतधनादिदानं वातिरिक्तदानं वा ? **स्वसृशब्दे नव** स्वसृतत्पती अभिधीयेते इति तत्सम्बन्धादेव वसुदेवस्य मान्यत्वात् साक्षात् तं प्रति नमस्कारेपि दोषाभावादेकस्या एव पादौ द्विवद् गृहीतवानिति ज्ञापयितुमेकशेषः, एकशेषशास्त्रे 'पुमान् स्त्रिये'त्यादिसूत्रेषु चतुर्षु तृतीया ज्ञापय'त्यप्रधानं न शिष्यत' इति, अन्यथा 'स्त्रीपुरुषाभ्या'मितिप्रयोगो न स्यात् 'स्त्रीपुम्भ्या'मिति च, अत्रापि तद्भर्त्रा सहिता स्वसैवावशिष्यते, अथेति भिन्नप्रक्रमो दैत्यावेशस्य राजसभावस्य च त्यागार्थः ॥ २३ ॥

निरोधं च दूरीकृतवानित्याह **मोचयामासेति**, निगडौ स्तम्भबद्धावतो **निगडान् मोचयामासे**त्युक्तं, अर्थादुभावपि, तत् तु बन्धनागारं भवतीति न निगडदूरीकरणं, नन्वेतावच्छुद्धावाकाशवाणी च प्रमाणमत एताभ्यामेव किञ्चित् कापट्यं कृतमस्तीति कथं न विचारितवांस्तत्राह **विस्रब्धः कन्यकागिरेति**, कन्यका या माया तस्या वचनमसत्यमपि सम्भाव्यते तथापि तत्रैव विश्वासं कृतवान्, 'यत्र क्वचि'दिति 'कृपणा'मितिलिङ्गवचने देवक्या दोषाभावसूचके, वसुदेवेनैव तथा कृतत्वात्, अन्यथास्फूर्तिकर्तृत्वं तु मायायाः सिद्धमेव, प्रथमतो देवकीं पश्चाद् वसुदेवं चकारात् तत्सम्बन्धिनश्च स्वयं परिचर्यां कुर्वन्नात्मनः **सौहृदं च दर्शयन्** जातः ॥ २४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

तस्मादित्यत्रास्य मत इत्यादि, दैत्यमते सृष्टेः, पुष्टिप्रवाहमर्यादाचर्षणीभेदेन **चातुर्विध्यं न** ॥ २१ ॥ **यावदित्यत्राक्रिय** इति, **कर्मत्वपक्षे** क्रियाजन्यफलशालिनीत्यर्थः, **कर्तृत्वपक्षे** क्रियानुकूलकृत्यनाश्रय इत्यर्थो बोध्यः ॥ २२ ॥

क्षमध्वमित्यत्र श्यालः कंसः, **स्वसृशब्दे नेत्य**त्र न तृतीया किन्तु नेति भिन्नं पदं, **स्वस्रोरि**तिद्विवचनं साधयितुं श्रीधरमतं दूषयति, श्रीधरीये 'स्वस्रोरिति स्वसृशब्देन द्विवचनानुपपत्त्या मिथुनगणनद्वारा मिश्रितलक्षणया स्वसृतत्पत्योरभिधानं लिङ्गसमवायेन 'प्राणभृत उपदधातीतिव'दित्युक्तं, तदयुक्तं, स्वसृशब्दस्य तत्पतावभिधाया अभावात् तदभावे 'चाभिधान'मितिप्रयोगस्य वक्तुमशक्यत्वात्, न च स्वस्रोरितिप्रयोगान्यथानुपपत्त्या लक्षकस्याप्यभिधायकत्वमङ्गीक्रियत इति वाच्यं, तथा सति लक्षणोच्छेदापत्तेः, न च मास्त्वभिधायकत्वं तथापि प्रयोगसिद्ध्यर्थं वाचकलक्षकयोरपि शब्दसारूप्यमङ्गीकृत्य कथञ्चिदेकशेषः समर्थ्यत इति वाच्यं, वाचकलक्षकयोरेकशेषस्य क्वाप्यदर्शनात्, न च 'प्राणभृत उपदधाती'त्यत्र दृश्यत इति वाच्यं, तत्र लैङ्गिकसादृश्यस्य सूत्रकाराभिमतत्वात्, अन्यथा 'तद्धानासामुपधानो मन्त्र' इति सूत्र 'आसा'मितिपदं न वदेत्, न चायं न्यायोत्र वक्तुं शक्यः, तादृशस्यात्र प्रमाणभावेनाङ्गीकर्तुमशक्यत्वात्, तदेतत् सर्वमभिसन्धाय **स्वसृशब्दे नैवाभिधीयेते** इत्याचार्यैरुक्तं, ननु भामस्वस्रोरित्येवमुक्तेपि भामशब्दमहिम्नैवार्थात् कंसस्य श्यालत्वप्राप्तावपि यत् स्वस्रोरिति प्रयुक्तं तेन पूर्वोक्त एव व्यासाशय इत्याशङ्कायामाहुः**स्तत्सम्बन्धा**दित्यादि, तथाचैतज् ज्ञापयितुमेवम्प्रयोग इत्यर्थः, ननु भवत्वेवं तथापि सरूपैकशेषस्य वक्तुमशक्यत्वात् स्वसृतत्पत्यो-

विरूपैकशेषस्य च पाणिनीयानामननुशिष्टत्वात् कथं प्रयोगसिद्धिरित्यत आहुरेकशेषेत्यादि, तथा सति स्वसा च तत्पतिश्च **स्वसारौ**, तत्र यद्यपि साक्षात्पाणिनीयमेकशेषानुशासनं नास्ति तथापि सूत्रचतुष्टयोक्त्या तृतीययाप्रधानं न शिष्यत' इत्येव ज्ञाप्यत इति ज्ञापकसिद्धोत्र विरूपैकशेष इति सुखेन प्रयोगसिद्धिरित्यर्थः, ननु तृतीययेदमेव ज्ञाप्यत इत्यत्र किं मानमत आहुरन्यथेत्यादि, यदि हि स्त्रिया सहोक्तौ पुमानेवावशिष्यत इति विरूपैकशेषनियमः स्यात् तदा द्वन्द्वघटिते स्त्रीपुरुषशब्देपि द्वित्वविवक्षायामेकशेषे प्राप्ते तत्र सरूपस्य स्त्रीपुरुषशब्दान्तरस्याविवक्षितत्वात् सरूपसूत्राप्राप्तौ 'पुमान् स्त्रिये'तिसूत्रेण विरूपैकशेषे पुरुषयोः 'पुमांसा'वित्येव प्रयोगः स्यात्, स तु न दृश्यते, अतस्तत्र तृतीयाप्रधानं न शिष्यत इत्येवं ज्ञापयतीति मन्तव्यं, एवं 'स्त्रीपुंसौ' 'मातापितरा'वित्यादि-प्रयोगान्यथानुपपत्तिबलाद् यत्रोभयप्राधान्यं विवक्षितं तत्र न विरूपैकशेषो यत्र स्वप्राधान्यं विवक्षितं तत्रैव स इति प्राप्त्या प्रकृते भर्तुरप्राधान्यस्य विवक्षितत्वादत्रापि **तद्भर्त्रा सहिता स्वसैवावशिष्यत** इति न पाणिनीयविरोधः, लक्ष्यैकचक्षुष्कतापक्षस्यैव महाभाष्यकृताङ्गीकारेण वैयाकरणानां प्रयोगशरणत्वादितिदिक् ॥ २३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तस्माद्भद्र इत्यत्र **चातुर्विध्यमिति, कालकर्मस्वभावभगवदिच्छाभिः** सृष्टिर्जायत इति प्रकारोस्य **मते नास्तीत्यर्थः** ॥२१॥ **यावदित्यत्राध्यास** इति, अध्यासश्च ज् जातस्तदा **स्वरूपाज्ञानं** सिद्धमेव कार्येण कारणानुमानमित्यर्थः ॥ २२ ॥ **क्षमध्वमित्यत्रानुशय** इति, अनुचिन्तने स्थिते महतां हृदये शोको भूयान् भवत्यतो महतः पूर्वापराधमविचार्य क्षमैवोचितेतिभावः, ननु यद्यपि साधवो धनादिकमनपेक्ष्य स्वत एव दीनवत्सलास्तथापि स्वस्य धनादिदानमुचितमित्यत आहुर्यद्यमिति, अयुक्तमपि चेत् करोति तदा युक्तं तु पूर्वगृहीतस्य धनादेर्दानमतिरिक्तस्य वा धनादेर्दानं कैमुत्येनैव प्राप्तमित्यर्थः ॥ २३ ॥

बुभुत्सुबोधिका

तस्माद् भद्र इत्यत्र शोको न कर्तव्य इति कारिकोक्तः। न करिष्यतीति शुद्धसत्त्वत्वात् न करिष्यति। अपत्यमिति नवमस्कन्धे 'बलं गदं सारणं चे'त्यष्टकथनं क्रीडोपयोगिनाम्। 'स्नुषेयं तव कल्याणी'तिवाक्यसत्यत्वार्थम्। मानुशोचेति मूले शोचेति यत इति च भिन्नं पदद्वयमिति ज्ञापितम्। 'माङि लुङ् सर्वलकारापवादः' 'लोट् चे'ति सूत्राभ्याम्। व्यापादिता इति मृता इति रूढोर्थः। यौगिकार्थस्तु, तनयाः षण्मरीचिपुत्राः, अकृतार्थगतत्वात्, यन्नैवं तन्नैवम्, देवदत्तवदित्येवमनुमाने यदि मरीचितनया न स्युः अकृतार्था न गच्छेयुरित्येवं मारितषट्पुत्रेषु मरीचितनयत्वमापाद्यते। अतो मया व्यापादिताः षट्। अनुशोक इति कर्माननुसन्धानरूपान्तर्मुखानामननुशोके उपपत्तिर्युक्तिः। अनुपपत्तिः कर्मानुसन्धाननिषेधरूपा। कर्मानुसन्धानं पदार्थसम्भावनार्थकापेरर्थः तदभावो द्योत्यः। एवं बहिर्मुखानां मध्यविशेषेणेत्यर्थः। एवं अनुशोके बहिर्मुखानामप्येकानुपपत्तिः तामाहेति पाठेर्थ उक्तः। अथ पाठान्तरम्। अननुशोके बहिर्मुखानामस्त्युपपत्तिः तामाहेति। यतः सर्व इति प्रतीकसर्वपदार्थमाहुः बहिर्मुखानामपीति। तथा च बहिर्मुखान्तर्मुखरूपः सर्वः। भुञ्जत इत्यत्र विन्दत इत्यपि पाठः। भुङ्क्त इति तेन 'भुञ्जत' इति बहुवचनं छान्दसं मूले। ततः प्रेरककर्माननुसन्धानमिति भावः, यत्तदोर्नित्यसम्बन्धात्। यतः कर्मणः सर्वोवशः स्वकृतं कर्मफलं भुङ्क्त, ततः कर्मणः प्रेरककर्माननुसन्धानमितिपदद्वयरहितोत्तरार्धार्थः। अस्य मत इति दैत्यमते सृष्टेः पुष्टिप्रवाहमर्यादाचर्षणीभेदेन चातुर्विध्यं न। आत्मा एक उक्तः। तस्य नानात्वप्रतीतावुपाधिभेदः कारणं, तेन तथा प्रतीतिमाहुः भुञ्जत इतीति। 'उपाधिभिर्भिद्यते न तद्वा'नितिसाङ्ख्यप्रवचनीयसूत्रोक्तसिद्धान्त उक्तः। मयेति कंसेन। दण्डाभावेनेति निमित्तेन। अपिना देवक्याः ॥ २१ ॥

यावदित्यत्र कर्मत्वमिति हत इत्यत्र कर्मणि क्तप्रत्ययात्। कर्तृत्वमिति हन्तेत्यत्र कर्तरि तृचः। नन्वेवकारो न देयः हतत्वहन्तृत्वयोरुपाधिदेहधर्मत्वादित्यत आहुः कर्मत्व इत्यादि। अनेन कर्माज्ञानवश इति कारिकोक्तं कर्मोक्तम्। तदुपपादयन्ति स्म अक्रिय इति। मन्यत इति अभिमन्यते। प्राप्नोतीति प्रकृतिस्थामात्मनि दैवेभिमानेन प्राप्नोति। आत्मा दैवं बाध्यो बाधको वेति। दृष्टिः प्रत्यक्षम्। जानातीति शाब्दज्ञानविषयं करोति। एवकारव्यावर्त्यमाहुः न त्विति। जानातीति सम्बध्यते, न तु प्रत्यक्षज्ञानविषयं करोतीत्यर्थः। देहाद्यध्यास इति देहोहं स्थूलोहमित्यादिरित्यन्यत्रान्यावभासः। स्वरूपेति दैवत्वेन मायात्वेन देवतात्वेन वा स्वरूपस्याज्ञानं देहत्वेन स्थूलत्वेन वान्यधर्मेण ज्ञानम्। तदभिमानी बाध्यबाधकस्वरूपदेहधर्माभिमानी। अज्ञ इति दैवत्वादिना स्वरूपं जानातीति ज्ञः, तद्भिन्नोज्ञः। तेन कारिकोक्तमज्ञानमुक्तम्। एवेति एवकारो यथारूपत्वेन घटादिज्ञानवानज्ञः तथेति ॥ २२ ॥

क्षमध्वमित्यत्र हृदय इति हृदि अनुशये पश्चात्तापे 'भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयो'रिति विश्वः। भूयानिति मनसः करणत्वात् यावदात्मानं न गृह्णाति तावत् शोको भूयान् भवति। 'तरति शोकमात्मवि'दिति श्रुतेः। अतो महतां पूर्वापराधमविचार्य क्षमैवोचितेति भावः। पादग्रहणमिति क्रियाविशेषणम्। अकर्तव्यमपि करोति चेत् कर्तव्यं तु कुर्यादेवेत्याहुः गृहीतेति। इदं कैमुत्यन्यायेनोक्तम्। स्वस्रोरिति द्विवचनं साधयितुं श्रीधरमतं दूषयन्ति स्म स्वसृशब्देनेत्यादिना। अभिधीयेते इति एकयोक्त्याभिधीयेते यथा पुष्पवच्छब्देन दिवाकरनिशाकरौ ह्यभिधीयेते। इति न स्वसृपदे श्रीधरोक्तमिश्रलक्षणा। 'लक्षणां नैव वक्ष्या'मीति प्रतिज्ञातत्वात्। तदुक्तम्। महाभाष्ये 'साधूनेव प्रयुञ्जीते'ति। तथा च स्वसा च स्वसा च स्वसारौ तयोः स्वस्रोः। 'सर्वे सर्वार्थवाचका' इति श्रुतेरेकं

स्वसृपदं तत्पतिवाचकम्। यथैकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ। स्वसृपदेन तत्पतिग्रहणे हेतु (युक्ति) माहुः तत्सम्बन्धादेवेति स्वसृसम्बन्धादेव। अन्यथा ज्ञातिरिव मान्यः स्यात्। तथा च मान्यत्वद्योतनाय वसुदेवे स्वसृपदप्रयोगः। तं प्रतीति वसुदेवं प्रति। एकशेषे लुप्तस्य स्वसुः पादाभ्यां नान्वय इत्याहुः लुग्विधानसामर्थ्यात् सति बाधके। एकस्या एवेति एवकारो वसुदेवयोगं व्यवच्छिनत्ति। द्विवदिति 'पादा'वित्यत्र द्वित्वसमर्थनम्। द्वितीयान्ताद्वतिः। राजकर्तृकपादग्रहणकर्मत्वस्यैकपादे पर्यवसानम्। कपिञ्जलबहुत्वस्य त्रित्वे पर्यवसानवत्। एकशेषे लुप्तस्य पादस्याग्रहीदित्यत्रानन्वयाच्च लुग्विधानसामर्थ्यात् सति बाधके भवति अन्यथा लोपं लुक्स्थाने वदेत् सूत्रे। 'न लुमताङ्गस्ये'तिपाणिनिसूत्रात्। एवं 'स्वस्रो'रित्यत्रापि द्वित्वसमर्थनम्। अथै'कशेषे'त्यादि'रिति चे'त्यन्तो ग्रन्थोनतिप्रयोजनः काकपाददानात्। तथापि व्याक्रियते ग्रन्थस्थत्वात्। ननु स्वरूपैकशेषस्य स्वसा तत्पतिश्चेति द्वन्द्वे वक्तुमशक्यत्वाद्विरूपैकशेषस्य पाणिनिनाननुशिष्टत्वात्। कथं स्वस्रोरिति प्रयोगसिद्धिरित्यत आहुः एकशेषेत्यादि। तृतीयेति 'स्त्रीपुंसयोः पुमा'निति सूत्रयितव्ये तृतीयाघटितसूत्रेऽप्रधाने तृतीयेत्यर्थः। न च शरीरगौरवमिति वाच्यम्। अकारस्य विष्णुवाचकस्य सत्त्वेन विष्णुसहस्रादिस्तोत्रापलापप्रसङ्गात्। न चादृष्टोत्पत्तिः सूत्रपाठे स्यादिति वाच्यम्। महाभाष्ये 'भीत्रार्थानां भयहेतु'रित्यादिसूत्राणां प्रत्याख्यानात्। ननु यथाव्याख्यानं तृतीयास्तु किं ज्ञापनेनेत्यत आहुः अन्यथेति। पुरुषयोरित्येव स्यात्। पुम्भ्यामिति च प्रयोगः स्यात्। उभयोः प्राधान्ये त्वेवं प्रयोगः स्यादेव। अतिप्रयोजनानतिप्रयोजनग्रन्थसाधारण्येनाहुः अत्रापीति। स्वसैवेति तत्पत्युः स्वसृसम्बन्धेन मान्यत्वात् स्वसुः प्राधान्यात्। एवकारस्तु श्रीभागवतप्रामाण्यात्। भिन्नप्रक्रम इति दैत्यावेशस्याऽगेमृतमिव जातत्वेन राजसभावस्य च त्यागात्॥ २३॥

मोचयामासेत्यत्र दैत्यावेशस्येति अयं ग्रन्थः पूर्वान्वय्यप्यत्र श्लोकाभासेपि पुस्तके वर्ततेत्यणिजनुभावेनाथेत्यनुवर्त्य तदर्थत्वेन व्याख्येयः, स्वकृतिभिन्नेन भृत्यप्रेरणप्रक्रमेण स प्रक्रमः दैत्यावेशस्येत्याद्यर्थः। निरोधं चेति निगडम्। तामसं निरोधं प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपं च स्वस्येतः परं 'भयात् कंस' इति वाक्यात् भयेन निरोधो नावेशदशायाम्। 'निगडौ मोचयामासे'त्यनुक्त्वा पञ्चम्युक्तेस्तात्पर्यमाहुः निगडाविति। निगडेति तेन न निगडौ मोचयामास भृत्यद्वारेति णिजन्तप्रयोगः। अश्रुव्धाविति 'यत्र कच्चिज्जातस्तवात्मज' इति वसुदेवगृहे निषेधसूचनात् हृष्टौ। एताभ्यामिति वसुदेवदेवकीभ्याम्। विचारितवानिति वसुदेवदेवकी हर्षेण विचारितवान् अनुमितवान् तौ कापट्यवन्तौ तादृशवाक्येन हर्षात्। तादृशास्मदादिवदिति। असत्यमपीति तमोरूपत्वेन मायाया भ्रान्तिविषयवाक्यमसत्यम्। अपीति सत्यं विष्णोरनुजात्वात्। लिङ्गवचने इति विश्वासहेतोर्वचने। वसुदेवेनैवेति एवकारो देवकीयोगव्यवच्छेदकः। तथाकृतत्वादिति यत्र कच्चिज्जातत्वेन कृतत्वात्। ननु कृष्णेन यत्र कच्चिज्जातत्वं न देवक्याः कृपणात्वमिति मायायाः कंसेऽन्यथाबुद्धिकर्तृत्वमत आहुः अन्यथेति। सिद्धमेवेति माया च तमोरूपेति नृसिंहतापिनीये सिद्धमेव। असिद्धत्वयोगव्यवच्छेदकैवकारः। पाठक्रमेणाहुः प्रथमत इति। स्वयं परिचर्यामिति सौहृदं स्नेहवाचकम्। स्नेहेन परिचर्येत्यवैधभक्तौ सिद्धम्। स्वयमिति च भयकार्यम्। सौहृदं स्नेहम्॥ २४॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

अब श्रीमदाचार्यचरण इस श्लोक के अवतरण में आज्ञा करते हैं कि "तत्तु भवद्भ्यां ज्ञायते एवेति शोको न कर्तव्य एवेत्याह—अब इस श्लोक से कंस श्री देवकीजी और वसुदेवजी को कहता है कि आत्मा का निर्विकार रूप तो आप दोनों जानते ही हैं, अतः शोक करना उचित ही नहीं, 'तस्माद भद्रे' इसलिये हे बहिन! आप दोनों को उचित है कि शोक न करें।

कंस का मन्तव्य है कि विवेकविद् श्रीवसुदेव जी तो शोक न करेंगे। माता देवकी अवश्य करेगी इसलिये श्री देवकी को ही सम्बोधन किया है कि 'हे भद्रे' इससे आगे तेरा कल्याण ही होगा व सन्तान भी होगी, ऐसा ज्ञात कराया गया है। तू अपने पुत्रों का शोक न कर 'अनुशोच' इस 'अनु' पद के प्रयोग से व्यक्त होता है, कि देवकी प्रथम तो अपना शोक करती है कि मैं कैसी दुर्दशाग्रस्त हूँ, बाद में वह पुत्रों का शोक करती है, कि कंसे निर्दयता से मारे गये हैं, यद्यपि वह अपने कर्मों के वश से मरे हैं, मैंने तो मारे नहीं, उनके कर्म ने ही मुझे उनके मारने को प्रेरणा की थी, तो भी बाह्य दृष्टि से मैंने ही मारे—ऐसा स्वीकार किया जाता है, फिर भी तू शोक न कर अतः कहा है कि 'मया व्यापादितानपि'। बहिर्मुख लोगों की भी शोक न करने में जो युक्ति है, उस युक्ति को कहता है कि 'यतः सर्वः' इत्यादि। इच्छा न करता हुआ भी परवश ही कर्माधीन होकर सब ही प्राणी स्वकृत कर्म फल को भोगता है, कंस के मत में दैत्य मत कहा है, इस मत में पुष्टि, प्रवाह मर्यादा व चर्षणी इस प्रकार से सृष्टि के चार भेद नहीं है अतः सबको ही कर्माधीन कहा है। कर्ता के एक वचन होने पर 'भुञ्जते' यह बहुवचन का प्रयोग सूचित करता है कि देहों के भेद से भोग के द्वारा एक आत्मा का नानात्व प्रतीति सिद्ध है, इस कथन से यह व्यक्त किया गया है कि मैंने भी बहिर्मुखता से जो कर्म किया है, उसका फल मुझे अवश्य भोगना पड़ेगा, अतः बिना विचार किये ही मुझे दण्ड होगा, इसलिये मुझे दण्ड न होने से भी तुझे चिन्ता करना उचित नहीं॥ २१॥

अब आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि देवकी जी कंस को यदि ऐसा कहे कि "ननु त्वया ज्ञानमुपदिष्टं उपदेष्टुर्दृढं ज्ञानं भवतीति न तव दण्डसंभावना चेत्तत्राह-भैया तुम तो ज्ञान का उपदेश करते हो तो सुना है कि

उपदेशक को सुदृढ ज्ञान होता है इसलिये तेरे में सुदृढ ज्ञान होने के नाते तू दण्डभागी नहीं बनेगा तब इसके उत्तर में कंस **''यावद्धतोऽस्मि''** श्लोक को कहता है।

बहिनजी, बात तो ठीक है लेकिन जबतक यह जीव शास्त्रजनित ज्ञानवान् होता हुआ भी 'मैं मरा हूँ मैं मारने वाला हूँ', इस प्रकार अपने को मारे जाने वाला, मारने वाला मानता है, तब तक वह वध्य मरने वाला घातक मारनेवाले धर्म को प्राप्त होता ही है। मारणक्रिया का यदि फल अपने में मानता है, तो वध्यता को प्राप्त होता है, और यदि मारण क्रिया को अपने में मानता है, तो घातकता को प्राप्त होता है। वास्तव में आत्मा तो क्रियारहित है, उस अक्रिय आत्मा में, जिस प्रकार क्रिया को फल रूप से या क्रिया रूप से अपने में मानता है, उसी प्रकार क्रिया को फल रूप से प्राप्त करता है।

यह शङ्का हो सकती है कि आत्मा में, जब क्रिया रूप धर्म विद्यमान ही नहीं है, तो उसकी प्रतीति में क्या कारण है ? उक्त शङ्का पर कहा है कि 'अस्वदृक्' जिस जीव की दृष्टि आत्मा पर नहीं है, शास्त्र के ज्ञान को, शास्त्रसम्बन्धीरूप से ही जानता है न कि अपने आत्मस्वरूप विषयकरूप से, उस ज्ञान को धारण करता है। उससे भी क्या ? अतः कहा है कि 'तावद्' इत्यादि, जब तक शास्त्रीय ज्ञान के आत्मविषयक रूप से धारण न करने तक वह देहाभिमानी रहता है, आत्मस्वरूप के ज्ञात होने पर देहाध्यास नहीं होता, परन्तु देहाध्यास के होते हुए आत्मस्वरूप का ज्ञान नहीं अतः देहाभिमानी अज्ञानी ही है, अज्ञानी होने से उसे बाध्य-बाधकता भाव प्राप्त होता है ॥ २२ ॥

श्रीमदाचार्यचरण इस श्लोक के अवतरण में कहते हैं कि कंस श्रीदेवकीजी को उपरोक्त बात कहकर अब आगे कहना चाहता है कि **''एवं भवद्बालकानामस्माकञ्च कर्मवशात् सर्वं जातं भविष्यति च अतः शोको दण्डो वा न चिन्तनीयः परमतिक्रमदोषो मदीयः सोढव्यः इति वदन् क्षमापनार्थं नमस्करोति''**—आप दोनोंको इस प्रकार आप के बालकों को कर्मवश फल मिला है और मुझे भी फल मिलेगा। अतः आप पुत्रों का शोक न करें और मेरे लिये दण्ड का भी विचार न करें क्योंकि मुझे भी मेरे कर्मों से दण्ड मिलेगा ही लेकिन मैंने जो आप का अतिक्रमण-अपराध किया है उसे सहन करें। ऐसा कहता हुआ कंस क्षमा चाहने के लिए देवकीजी वसुदेवजी को नमस्कार करता है कि **'क्षमध्वं मम दौरात्म्यम्'** मेरी दुष्टता को, मुझ दुष्ट को क्षमा करें।

जो विना विचारे अन्याय करने वाला है वह दुरात्मा कहा जाता है, अतः आज्ञा का उल्लङ्घन व पुत्रों का मारण जो कुछ मैंने किया वह सब कुछ मुझ दुरात्मा का दुष्कर्म क्षमा करदें, महान् पुरुषों के हृदय में अपराधी के अपराध का अनुचिन्तन यदि बना रहता है, तो महान् शोक होता है। अतः पूर्वकृत अपराध का विचार न कर क्षमा करना ही उचित है, क्षमा कराने को कुछ देना नहीं है क्योंकि आप जैसे साधु पुरुष तो मुझ जैसे दीन जनों पर वात्सल्य रखते हैं। अपकीर्ति व नरक का भाजन होने से मेरी दीनता स्पष्ट ही है। कंसने अपनी दीनता केवल वचन से ही प्रकट नहीं की किन्तु अपने स्वरूप से भी दीनता प्रकट की **अश्रुमुखः विकलत्वात् प्रोञ्छनमपि न करोति** वह ऐसा कहकर रोने लगा, उसके इतने आँसू बह रहे थे, मुख पर आँसू आ रहे थे, वह बिकल होने से उन आँसुओं को पोछता भी नहीं था। जब कंस ने छोटी बहिन के पैरों को पकड़ लिया जो कि बड़े भाई को उचित नहीं तब उसने अन्य उचित कार्य भी क्यों न किये होंगे !। जैसे उनके छीने हुए धन को लौटा देना, व अतिरिक्त अधिक धन आदि को देना, वह सब भी उसने अवश्य ही किया था। यहाँ **'श्यालः'** पद से कंस को वसुदेव का साला बतलाया गया है, व **'स्वस्रोः'** इस द्विवचनान्त पद से श्रीदेवकी और वसुदेवजी को बहिन, बहनोई कहा गया है। यहाँ **'स्वसा च स्वसृपतिश्चेति तयोः स्वस्रोः'** इस प्रकार 'एकशेष समास है। एक शेष में एक शब्द तो शेष रहता है, शब्दान्तर का लोप हो जाता है। प्रधानवाचक यहाँ स्वसृ शब्द है। अतः वह शेष रहा है, अप्रधानवाचक स्वसृ पति का लोप हुआ है। जो शब्द शेष रहता है वह लुप्त हुए शब्द के अर्थ का भी वाचक होता है, अतः स्वसृ शब्द से ही स्वसा भगिनी व उसका पति, यह दोनों कहे गये हैं, यद्यपि शुकदेव **'अहो भगिन्यहो भाम'** इस पूर्वोक्त कंसोक्ति के अनुसार यहाँ **'भामस्वस्रोरथाग्रहीत्'** इस प्रकार कह सकते थे, श्याल शब्द के प्रयोग की आवश्यकता नहीं थी, क्योंकि भाम शब्द के सामर्थ्य से ही अर्थतः कंस का श्यालत्व प्राप्त ही था, तो भी 'भामस्वस्रोः' ऐसा द्वन्द्व समास का प्रयोग न कर **'स्वस्रोः'** यह विरूप शब्दों का एकशेष उन्होंने किया, उससे शुकदेवजी यह बतलाते हैं कि बहिन देवकी के सम्बन्ध से ही वसुदेव कंस के मान्य है, स्वतः नहीं, अतः वसुदेव के प्रति स्पष्ट रूप से साक्षात् कंस नहीं भी झुके, तो भी कोई दोष नहीं, इस कारण कंस ने एक देवकी के ही दोनों चरणों को दोनों देवकी वसुदेवों के चरणों की भाँति पकड़ा था, एकशेष शास्त्र में पठित 'पुमान् स्त्रिया 'व अन्य चार सूत्रों' में प्रयुक्त 'स्त्रिया' इत्यादि तृतीया विभक्ति से ज्ञात कराया गया है कि अप्रधान शेष नहीं रहता, प्रधान ही शेष रहता है, अतः यहाँ कंस की मान्यता में अप्रधान होने से स्वसृपति का शेष नहीं किन्तु प्रधान होने से स्वसृशब्द का ही

---

१. पाणिनीय व्याकरण में कुछ सूत्रों की रचना करते हुए भी पाणिनि ने 'तदशिष्यं संज्ञाप्रमाणत्वात्' लिङ्गमशिष्यम्' ऐसा कहा है। महाभाष्यकार पतञ्जलि ने एकशेष को अशिष्य कहा है, अतः प्रयोगानुसार ही व्यवस्था अभिमत है।

शेष रहा है, अन्यथा यदि स्त्री के साथ कहने पर पुरुष का ही शेष हो ऐसा नियम विरूप शब्द स्थल में माना जाय तब तो **'स्त्रीपुरुषाभ्यां'** **'स्त्रीपुम्भ्याम्'** इत्यादि प्रयोग न हो सकेगा, क्योंकि **'पुमान् स्त्रिया'** सूत्र से पुरुष वाचक का शेष व स्त्री वाचक का लोप करने पर **'पुरुषाभ्यां'** **'पुम्भ्याम्'** ऐसा ही प्रयोग रहेगा, अतः जहाँ दोनों की प्रधानता बतलाता हो वहाँ वह द्वन्द्व समास में **'स्त्रीपुरुषौ'** आदि प्रयुक्त हों जहाँ पुरुष की प्रधानता बतलाना हो वहाँ **'पुरुषौ'** आदि एकशेष का प्रयोग हो यह व्यवस्था है। यहाँ भी प्रधानता भगिनी की है उसका पति तो उसके साथ होने से अप्रधान ही है, अतः स्वसा ही अवशिष्ट रही है[1]। **'अथाप्रहीत्'** इस **'अथ'** शब्द से प्रक्रम का भेद बतलाया है, जिससे यह सूचित किया है कि कंस का दैत्यावेश व राजस भाव निवृत्त हुआ ॥ २३ ॥

अब आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **"निरोधं च दूरीकृतवानित्याह"** कंस ने श्रीदेवकीजी और श्रीवसुदेवजी के निरोध कैद **शृंखला** को दूर किया, यह प्रसङ्ग **"मोचयामास निगडान्"** इस श्लोक से कहा जायगा कैदखाने में दो शृङ्खलायें पृथक् पृथक् बन्धनस्तम्भों में बँधी है, अतः शृङ्खला से देवकी को व वसुदेव को दोनों को मुक्त कर दिया। वह स्थान तो बन्धन गृह होता है, अतः शृङ्खला तो वहाँ बँधो ही रहती है उनको स्तम्भ से अलग नहीं किया।

कंस ने यह विचार क्यों नहीं किया कि इन दोनों को किसी प्रकार का चित्त में क्षोभ या विकार नहीं हो रहा है, व आकाशवाणी तो प्रमाण ही है, अतः इन दोनों ने ही कुछ छल या कपट किया होगा, उक्त शंङ्का पर कहा है। **'विश्रब्धः कन्यकागिरा'** आकाश में सुनी हुई कन्यका माया के वचनों पर कंस विश्वस्त था। वह कन्या यद्यपि माया है, उसका वचन असत्य भी हो सकता है, तो भी उस पर कंस ने विश्वास किया, अतः वह वैसा विचार नहीं कर सकता। योगमाया ने अपने शब्दों में **'यत्र क्वचन'** जहाँ कहीं शत्रु का पैदा होना कहा था और **यत्र क्वचित्पूर्वशत्रुर्मा हिंसीः कृपणां वृथा"** इस पंक्ति में **'कृपणां'** पद का स्त्रीलिङ्ग व एकवचन का प्रयोग कर देवकी को दोषरहित सूचित किया था, क्योंकि बालक को अन्यत्र ले जाने का कार्य वसुदेव ने ही किया था। इसलिये यदि दोषित है तो वसुदेवजी ही हैं देवकीजी नहीं।

अन्यथा स्फूर्ति करना तो माया का प्रसिद्ध कार्य ही है, प्रथम तो देवकी को पश्चात् वसुदेव को मुक्त किया। **देवकीं वसुदेवं च** यहाँ **'च'** कार अव्यय से उनके सम्बन्धी जनों की भी बन्धनमुक्ति एवं परिचर्या स्वयं करता हुआ अपना सौहार्द दिखाने लगा ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उक्तमेवोपसंहरति—**तस्मादिति**। यतः सर्वोऽपि प्राणी अवशः सन् स्वकृतं स्वकृतकर्मफलं जन्ममरणसुखदुःखादिकं विन्दते लभते। तस्मात् हे भद्रे! मया व्यापादितानपि स्वतनयान् माऽनुशोचेरयन्वयः। वसुदेवापेक्षया व्याकुलताधिक्यात् स्नेहाधिक्याच्च सुबुद्धित्वेन सान्त्वयन् देवकीं सम्बोधयति– **भद्रे** इति। अपिशब्दो यद्यप्येवं परमार्थविचारे मम दोषो नास्ति, तथाप्यज्ञव्यवहारे तथेति सूचनार्थः ॥ २१ ॥ ननु "यदि सर्वः स्वकृतमेव विन्दते, तर्हि कथं हन्तुः प्रायश्चित्तविधानं तद्विना नरकादिश्रवणं च सङ्गच्छत" इत्याशङ्क्याह–**यावदिति**। यावत् 'हतोऽस्मि, हन्तास्मि, इत्यात्मानं मन्यते देहगतमेव हननस्य कर्मत्वं कर्तृत्वं चात्मगतं मन्यते तावत् बाध्यबाधकतामियात् तज्जनितं पापं तत्फलं दुःखं च प्राप्नुयात्। विहितनिषिद्धसर्वकर्मणामुपलक्षण-

---

[1] श्रीधर स्वामी ने यहां कहा है कि मिश्रित लक्षणा से स्वसृ शब्द से पति का भी अभिधान है अर्थात् अभिधा वृत्ति से स्वसृ-शब्द से पति भी लिया गया है परन्तु पुरुषोत्तमजी महाराज कहते हैं कि स्वसृ शब्द से अभिधा वृत्ति से पति का बोध नहीं हो सकता क्योंकि "स्वसृ" शब्द का पति अर्थ अभिधेय नहीं है किन्तु बहिन अर्थ ही अभिधेय (वाच्य) है। यदि कहें कि द्वित्व विवक्षा में स्वसृ-स्वसृ-औ ऐसे मानने पर एक स्वसृशब्द अभिधा से बहिन को कहेगा और दूसरा स्वसृ शब्द लक्षणा से पति अर्थ को कहेगा तो कहते हैं कि ऐसी स्थिति में एकशेष हो ही नहीं सकता क्योंकि वाचक और लक्षक का कहीं भी एकशेष नहीं देखा गया है। उपर्युक्त सब भाव को लेकर श्रीसुबोधिनीजी में "नैव अभिधीयेते" ऐसा कहा है।

शङ्का होती है कि "श्यालस्वस्रोः" के स्थान पर "भामस्वस्रोः" ऐसा पाठ मानने से भाम पद से बहिनोई लिये जाने से श्याला अर्थ अपने आप ले लिया जायेगा तो न एकशेष का झगड़ा रहेगा और न श्याला अर्थ लेने में ही अड़चन आयेगी तो फिर उपर्युक्त पाठ न मान कर "श्यालस्वस्रोः' पाठ मानने में व्यासजी का क्या आशय है तो कहते हैं कि यहां स्वसृ शब्द से ली गई बहिन प्रधान है, उससे बहिनोई भी ले लिये जायंगे। इसी आशय से व्यासजी ने ऐसा कहा है।

शंका होती है कि समानरूप हो तो '**सरूपाणां**' सूत्र से एकशेष हो सकता है परन्तु स्वसृ और पति शब्द का सारूप्य न होने से एकशेष कैसे होगा तो कहते हैं कि यहां "स्वसा च पतिश्च स्वसारौ" ऐसा विग्रह मानना चाहिये। और पुमान् स्त्रिया आदि चार सूत्रों में आदि तृतीया से ज्ञापन करना चाहिये कि विरूप के एक शेष में जो अप्रधान विवक्षित हो वह नहीं रहता। ऐसा मानने पर उपर्युक्त विग्रह करने पर दोष नहीं आता।

मिदम्। तत्र हेतुमाह-तदभिमानी इति। देहात्माभिमानीत्यर्थः। तत्रापि हेतुमाह-अज्ञ इति। अज्ञत्वमेव स्पष्टयति—अस्वदृगिति। न स्वरूपभूतमात्मानं पश्यतीति तथा सः॥ २२॥ ननु "त्वमपि देहात्माभिमान्येव, नात्मज्ञः, देहाभिमानं विना शत्रुत्वादिकल्पनासम्भवात्। त्वं च शत्रुत्वं प्रकल्प्य मत्पुत्रान् हतवान्। अतस्तद्दोषात् कथं तव "निस्तार" इत्याशङ्क्य 'युष्मत्क्षमया' इत्यभिप्रेत्याह-क्षमध्वमिति। मम दौरात्म्यं पुत्रहननरूपं दुष्टत्वं यूयं क्षमध्वम्, यतो भवादृशाः साधवो दीनवत्सलाः मादृशेषु स्वपराधवशेन नरकादिदुःखस्यावश्यंभावित्वाद्दीनेष्वपि प्रीतियुक्ता भवन्ति। महत्त्वद्योतनाय बहुवचनम्। इत्येवमुक्त्वा अथानन्तरमेवं वदन्नेव अश्रूणि मुखे यस्य तथाभूतः श्यालो वसुदेवस्य पत्नीभ्राता कंसः स्वस्रोर्वसुदेवदेवक्योः पादावगृहीत् पादग्रहणपूर्वकं प्रणामं कृतवान्। 'स्वस्रोः' इति द्विवचनानुपपत्त्या अजहत्स्वार्थलक्षणया एकेन स्वसृशब्देन तत्पतेर्वसुदेवस्य ग्रहणम्। यथा प्राणशब्दलिङ्गवन्मन्त्रोपधेयेष्टकया सम्बन्धेन प्राणभृत उपदधातीत्यत्र बहुत्वानुपपत्त्या तद्गुणनयात्यनेकेष्टकाग्रहणम्॥ २३॥ उक्तमेव विमोचनमुपसंहरति-मोचयामासेति। एवमात्मनः सौहृदं प्रेम पादग्रहणादिना दर्शयन् देवकीं वसुदेवं च निगडात् पादबन्धनभूतात् लोहशृङ्खलान्मोचयामासेत्यन्वयः। तत्र हेतुमाह- कन्यकागिरा विश्रब्ध इति। 'एतौ निर्दुष्टाविति कृतविश्वास' इत्यर्थः॥ २४॥

अन्वितार्थप्रकाशिका

तस्मादिति॥ हे भद्रे! यतः सर्वोऽपि प्राणी अवशः सन् स्वकृतं स्वकृतकर्मफलं जन्ममरणादि विन्दते। तस्मात् यद्यप्येवं परमार्थतो नैते तव पुत्राः नाप्यहं तान् घातितवान्। तथापि हे भद्रे! अज्ञानदृष्ट्या मया व्यापादितानपि स्वतनयान्मानुशोच॥२१॥ कथं तर्हि ब्रह्मणादिहन्तुः प्रायश्चित्तमिति चेत् तदप्यज्ञानमूलकमेवेत्याह—यावदिति॥ अस्वदृक् न स्वरूपभूतमात्मानं पश्यति स तदभिमानी देहात्माभिमानी अज्ञः यावद्धतोऽस्मि हन्ताऽस्मीत्यात्मानं मन्यते। देहगतमेव हननस्य कर्मत्वं कर्तृत्वं चात्मगतं मन्यते तावत् बाध्यबाधकतामियात् तज्जनितं पापं तत्फलं दुःखं च प्राप्नुयात्॥ २२॥ क्षमध्वमिति॥ मम दौरात्म्यं पुत्रहननरूपं दुष्टत्वं यूयं क्षमध्वं यतो भवादृशाः साधवो दीनवत्सलाः नरकदुःखभागितया दीनेषु मादृशेषु वत्सलाः प्रीतियुक्ता भवंति। इत्येवमुक्त्वा अथानन्तरमेवं वदन्नेव अश्रूणि मुखे यस्य तथाभूतः श्यालो वसुदेवस्य पत्नीभ्राता कंसः स्वस्रोर्वसुदेवदेवक्योः प्रत्येकं पादावग्रहीत् पादग्रहणपूर्वकं प्रणामं कृतवान्। स्वस्रोरिति द्विवचनान्यथानुपपत्त्या एकः स्वसृशब्दः स्वसृपत्युर्लक्षकः अन्यः स्वसुर्वाचकः तयोरेकशेषः इति सुगमः पन्थाः। एवमध्यात्मज्ञानादिकमपि कंसस्येव भगवद्विमुखानां क्रूरतापोषायैव भवतीति प्रकरणतात्पर्यम्॥ २३॥ मोचयामासेति॥ कन्यकाया योगमायाया गिरा विश्रब्ध एतौ निर्दोषाविति जातविश्वासः कंसः आत्मनः सौहृदे प्रेम पादग्रहणादिना दर्शयन् देवकीं वसुदेवं च निगडात् लोहशृङ्खलात् मोचयामास॥ २४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्मादिति। तस्माद्देहात्मनोर्विलक्षणतयाऽशोच्यत्वादित्यर्थः। हे भद्रे, मया व्यापादितान् अपि हतानपि, स्वतनयान्, मा अनुशोच। यतः, सर्वः जन्तुः, अवशोऽस्वतन्त्रः सन्, स्वकृतं कर्म, विन्दते। स्वकृतकर्मफलरूपं जन्ममरणादिकं विशेषतो लभते इत्यर्थः॥ २१॥ यावदिति। किं च पुमान्, यावत् अस्वदृक् देहविलक्षणात्मयाथात्म्यादर्शी सन्, हतः अस्मि हननविषयोऽस्मि हन्ता हननकर्त्ताऽस्मि, इति, आत्मानं मन्यते अभिमन्यते। देहात्मभ्रान्त्या देहगतं देहहन्तृहन्तव्यभावमात्मन्यनुसंधत्ते इत्यर्थः। तावत्, तदभिमानी देहात्माभिमानी तन्मूलहन्तृहन्तव्याभिमानी च, अत एव, अज्ञः सन्, बाध्यबाधकतां वध्यवधकभावं, इयात् प्राप्नुयात्। तत्प्रयुक्तशोकपापादिकं प्राप्नुयादित्यर्थः॥ २२॥ क्षमध्वमिति। अथाऽतः, साधवः, बन्धुवत्सलाश्च यूयं, मम दौरात्म्यं, क्षमध्वम्। इतीत्थं, उक्त्वा, अश्रूणि मुखे यस्य तथाभूतः, श्यालः वसुदेवश्यालकः कंसः, स्वस्रोर्देवकीवसुदेवयोः, पादौ अग्रहीत्। स्वसृशब्दे द्विवचनानुपपत्त्या मिथुनगणनद्वारा मिथुनलक्षणया स्वसृतत्पत्योरभिधानं लिङ्गसमवायन्यायेन। 'प्राणभृत उपदधाति' इति वत्। 'लिङ्गसमवायः' इति पूर्वमीमांसासूत्रम्। प्राणभृच्छब्देन मन्त्रसंस्कृता इष्टिका बोध्या। तत्संस्करणमन्त्रस्तु 'अयं पुरो भुवस्तस्य प्राणो भौवायनः' इत्यादि। प्राणभृत् संज्ञिका मन्त्रसंस्कृतेष्टिका एका एव तत् संबन्धेनान्यासामपि तत्संज्ञाभाक्त्वेन 'प्राणभृत उपदधाति' इति बहुवचनं यथा, तथाऽत्र द्वितीयस्वसृशब्देन तत्पत्युरेव ग्रहणम्। एवं सति देवकीवसुदेवयोः प्रत्येकं पादावग्रहीदित्यर्थः। सिद्धः। श्यालशब्दस्तालव्यादिर्दन्त्यादिश्च। 'श्यां मधुपर्कं लाति' इति तन्निरुक्तिरपि॥ २३॥ मोचयामासेति॥ ततः, कन्यकागिरा विश्रब्धः, एतौ निर्दोषौ स्त इत्येवं विश्वस्तः कंसः, आत्मसौहृदं, दर्शयन् सन्, देवकीं वसुदेवं च, निगडात्, मोचयामास। पूर्वोक्तमेव मोचनं सप्रपञ्चं स्मारितमिति न पौनरुक्त्यम्॥ २४॥

कृष्णप्रिया

हे कल्याणमयी! बहिन देवकी! मेरे द्वारा मारे गये अपने पुत्रों का तथा स्वयं का शोक न कर क्योंकि सर्वजीव अपने अपने कर्मों के अनुसार विवश होकर फल भोगते हैं॥ २१॥ शास्त्रीय ज्ञान होने पर भी जब तक देहाध्यासवश यह मानता है कि मैं इससे मारा गया और मैं इसे मारने वाला हूँ तब तक वह मरने वाला और मारने वाला होता ही है क्योंकि

उसने ज्ञान को अपने में क्रियान्वित नहीं किया है ॥ २२ ॥ पुनः कंस ने कहा कि मैंने जो विना विचारे अन्याय किया है उसे क्षमा करें क्योंकि आप साधुजन है। साधुजन दीनों से प्रेम करने वाले हैं। श्रीशुकदेवजी कहते हैं कि इस प्रकार कह कर वह कंस, जिसके मुख तक आंसू आ रहे हैं, अपनी बहिन और बहनोई के पैरों में गिर गया ॥ २३ ॥ अपना सौहार्द दिखाते हुए उस कंस ने योगमाया के वाक्य पर विश्वास कर अर्थात् देवकी वसुदेवजी निर्दुष्ट हैं ऐसा समझकर देवकी वसुदेवजी को लोह की शृङ्खला से छुड़ा दिया ॥ २४ ॥

भ्रातुः समनुतप्तस्य[1] क्षान्त्वा[2] रोषं च देवकी । व्यसृजद् वसुदेवश्च प्रहस्य तमुवाच ह ॥ २५ ॥

वसुदेव उवाच[3]

एवमेतन्महाराज[4] यथा वदसि देहिनाम् । अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः ॥ २६ ॥
शोकहर्षभयद्वेषलोभमोहमदान्विताः । मिथो घ्नन्तं न पश्यन्ति भावैर्भावं पृथग्दृशः ॥ २७ ॥

श्रीशुक उवाच

कंस एवं प्रसन्नाभ्यां [5]विशुद्धं [6]परिभाषितः । देवकीवसुदेवाभ्यामनुज्ञातोऽविशद् गृहम् ॥ २८ ॥

कर्वमक्षमा

अन्वयः— समनुतप्तस्य भ्रातुः च रोषं देवकी क्षान्त्वा वसुदेवः च (रोषं) व्यसृजत् प्रहस्य तम् उवाच ह ॥२५॥ महाराज यथा वदसि एतद् एवम् एव देहिनाम् अज्ञानप्रभवा स्वपरा इति अहंधीः यतः भिदा ॥ २६ ॥ शोकहर्षभयद्वेषलोभमोहमदान्विताः पृथग्दृशः भावैः भावं मिथः घ्नन्तं न पश्यन्ति ॥ २७ ॥ एवं प्रसन्नाभ्यां विशुद्धं परिभाषितः देवकीवसुदेवाभ्याम् अनुज्ञातः कंसः गृहम् अविशत् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वपरभेददर्शने किं भवति तदाह। शोकहर्षेति। भावैरेव निमित्तभूतैर्मिथो भावान् घ्नंतं भावमीश्वरं पृथग्दृशास्ते न पश्यंति किं त्वहमेव हंता हतश्चेति मन्यंत इत्यर्थः ॥ २७ ॥ विशुद्धं यथा भवति ॥ २८–२९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

समनुतप्तस्याहो मया वृथैव भागिनेया हताः केवलं पापमेवोपार्जितमित्येवं पश्चातापं कृतवतः कंसस्य सतः क्षांतो रोषो यस्याः सा तं व्यसृजद्विसर्जयामास। 'क्षांता रोषं च देवकी' इति पाठस्तु विजयध्वजसंमतस्स च सुगम एव ॥ २५ ॥ हे महाराजेति शास्त्रज्ञानं त्वयि घटेतैवेति भावः। पक्षेन राजत इत्यराजा महांश्चासावराजश्चेति। हे अत्यंतशोभमान मृत्युसान्निध्यादिति भावः। महाभागेति पाठे परमदुर्भगेत्यर्थः। एतत्त्वदुक्तम्। "भुवि भौमानि भूतानि" इत्यादिरूपम्। एवमित्थमेव नान्यथेत्यर्थः। यतः ययाऽहंधिया ॥ २६ ॥ तदाह-यद्भवति तद्ब्रूते भावैरेव नृपरोगव्याघ्रादिरूपैर्भावान्मनुष्यगवादिकान्। 'भावः सत्तात्मजन्मसु' इति कोशाद्भाव ईश्वरः। इत्यर्थ इति। ईशकृतं स्वस्मिन्नारोपयंतीति भावः। हंतुं साक्षादवतीर्णमपि तं त्वद्विधा न पश्यंतीति श्लेषार्थः ॥ २७ ॥ अनुज्ञातो विसृष्टः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भ्रातुः तत्र च सम्यगनुतप्तस्य क्षान्त्वा दौरात्म्यं सोढा रोषं चकाराच्छोकं च तत्याज वसुदेवस्तु ह स्फुटमुवाच प्रहस्येति। तस्यापि तादृशोक्तेः ॥ २५ ॥ एवमेतदिति मयेदं पूर्वमेवोक्तं भवतैव न मन्यत इति भावः। हे महाराजेति शास्त्रज्ञानं त्वयि घटेतैवेति व्यञ्जितं महाभागेति पाठे तथैवार्थः। पक्षे न राजत इत्यराजः हे महाराज ! हे अत्यन्ताशोभमान ! अमङ्गलसान्निध्यादिति भावः। तथा महानभागः अभाग्यं यस्य हे परमदुर्भग ! इति देहिनामहन्धीः तत्राहं भोक्ता कर्त्तेत्यादिमतिरज्ञानप्रभवा यतः अहन्धियः ॥२६॥ भावैर्भूतैः पृथग्दृशः बहिर्दृष्टयः अन्यस्तैः तत्र वस्तुत ईश्वर एव हन्ता न देहो नात्मा व हतश्च देह एव नात्मेत्यर्थः। मिथो निमित्तभूतैरिति योज्यं मिथोघ्नन्तमिति त्वद्विधान् हन्तुं साक्षादवतीर्णमपि तं त्वद्विधा न पश्यन्तीति श्लेषार्थश्च ॥ २७ ॥ एवं तद्वाक्यानुमोदनेन स्वसिद्धान्तनिरूपणेन च विस्रब्धं कंसस्य विश्वासजनकं यथा स्यात् विशुद्धमिति पाठे अकपटं यथा स्यात्तथा प्रतिभाषितः अनुज्ञातश्च सन् ॥ २८ ॥

---

१. वचनमाश्रित्य–विज. । २. क्षान्तरोषा–श्रीधर. वंशी. । ३. अन्यप्रत्यां 'वसुदेव उवाच' पाठो न दृश्यते । ४. महाभाग– श्रीधर. वंशी. वीर. गिरि. मत्क. । ५. विस्रब्धं–वीर. जीव. विजय. । ६. प्रतिभाषितः–श्रीधर. वंशी. जीव. गिरि. मत्क. ।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

भ्रातुस्तत्र च सम्यगनुतप्तस्यात एव क्षांत्वा तं प्रति क्षमां कृत्वा, किंवा अपराधं क्षान्त्वा रोषम्, चकाराच्छोकञ्च तत्याज 'च' तु वसुदेवस्तु, ह स्फुटमुवाच। प्रहस्येति तस्यापि तादृशोक्तेः; किंवा तद्वचनसिद्धये निजचित्तप्रसादबोधनार्थम् ॥ २५ ॥ हे महाराजेति शास्त्रार्थज्ञानं त्वयि घटेतैवेति भावः। महाभागेति पाठेऽपि तथैवार्थः। इदमपि पूर्ववदेव देहिनामहं धीरहं भोक्ता कर्त्तेत्यादिमतिरज्ञानप्रभवा, स्वः पर इतीति वक्तव्ये स्व-परेतीत्यार्षम्; यतोऽहंधीयः ॥ २६ ॥ भावैर्भूतैः, पृथग्दृशो भेददृष्टयः, शोकादीनामीश्वरादर्शने यथोत्तरं श्रैष्ठ्यम्। तत्रानुतापलक्षणाच्छोकाद्विषयभोगलक्षणस्य सुखस्य श्रैष्ठ्यम्, दुःखेन कदाचिदीश्वरज्ञानसम्भवाद्धर्षादपि मरणभयस्य श्रैष्ठ्यम्, भयेन चित्तव्याकुलताधिक्यात्। अन्यत् स्पष्टम्। मिथो घ्नन्तमिति यादवैर्जरासन्धबलानि पाण्डवादिभिश्च दुर्योधनादीन् हन्तुं साक्षादवतीर्णमपि भगवन्तं तद्विमुखा न पश्यन्तीति श्लेषार्थः ॥ २७ ॥ एवं तद्वाक्यानुमोदनेन स्वसिद्धान्तनिरूपणेन च विश्रब्धं कंसस्य विश्वासजनकं यथा स्यात्तथा, 'विशुद्धम्' इति पाठे अकपटं यथा स्यात्तथा प्रतिभाषितोऽनुज्ञातश्च सन् कंसस्य तादृशज्ञानञ्च पूर्वोक्तश्रीवसुदेवोपदेशेन तत्र च मरणभयादविरत-श्रीभगवत्स्मरणस्वभावादेवोत्पन्नमिति ज्ञेयम्। एवं दैत्यानामपि कर्म्मवश्यत्वात्मतत्त्वयोर्ज्ञानं स्यादेव, न तु कदाचिदपि भक्तिरिति तस्य ज्ञानस्य तुच्छत्वमपि सूचितम् ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

क्षान्त्वा क्षमां कृत्वा रोषं व्यसृजत् ॥ २५ ॥ अज्ञानप्रभवा स्वपरसुताहतिः देहात्माभिमानकृतशत्रुमित्रवैषम्यबुद्धिरेव भ्रान्तिः आत्मनाशहेतुः न तु कश्चिद्धन्ति अशक्यत्वादित्यर्थः ॥ २६ ॥ पृथग्दृशः आत्मव्यतिरिक्तदेहविषयबुद्धिमन्तः भावैरचेतनैः खड्गादिभिः भावमचित्पदार्थं घ्नन्तमीश्वरं न पश्यन्तीत्यर्थः ॥ २७–३० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं भ्रातुः कंसस्य समनुतप्तस्य सतः देवकी क्षान्त्वा क्षमां कृत्वा रोषं व्यसृजत् तथा वसुदेवोपि क्षान्त्वा प्रहस्य तं कंसम् उवाच ॥ २५ ॥ तदेवाह–एवमिति द्वाभ्याम्। हे महाभाग! त्वं यथा वदसि तदेवमेव तथैव किं मयोक्तं यदनुमन्यसे इत्यत्राह—देहिनामहन्धीरहन्ताऽहं हत इत्येवंरूपा धीरज्ञानप्रभवा देहात्मभ्रमजा यद्वाऽहन्धीर्देहात्मधीरज्ञानप्रभवाऽऽत्मयाथात्म्यानवभासमूला, अहन्धियं विशिनष्टि यतोऽहन्धियः स्वपरेतिभिदा शत्रुमित्रभिदा भवति ॥ २६ ॥ एतदेवोपपादयति—शोकेति। पृथग्दृशः आत्मनः पृथग्भूते देहे दृगात्माभिमानो येषां तथाभूताः अत एव शोकादिभिरन्विताः भावैरचेतनैः खड्गादिभिर्भावमचित्पदार्थं घ्नन्तमीश्वरं न पश्यन्ति किन्तु केवलं स्वपरभेदमेव पश्यन्तीति भावः। तत्तत्कर्मानुगुणप्रवृत्तस्येश्वरस्यैव जन्ममरणादिहेतुत्वान्न केनाप्यपराद्धमिति भावः ॥ २७ ॥ इत्थं विस्रब्धं विश्वासयुक्तं यथा भवति तथा आभाषितः कंसः प्रसन्नाभ्यां देवकीवसुदेवाभ्यामनुज्ञातः स्वगृहं प्राविशत् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

परमात्मा न विपर्येति पुत्रादिकं विपर्येतीति जीवपरभेदज्ञानं मुक्तिसाधनमन्यत्तमःसाधनं यथा वदसि एतदेव सत्यम् एतदेव दृढयति—देहिनामिति। देवोऽहं मानुषो वेति विशेषं तत्र वापित्वित्यादेः यातनाशब्दमध्याहृत्य व्याख्येयम् अहं देवाद्यन्यतमः परमात्मा मदादिजीवराशेः सत्तादिप्रदत्वेनात्यन्तं प्रेष्ठ इति या भिदा तज्ज्ञानं देहिनामज्ञानप्रभवा यातना हन्तीति यत इत्यन्वयः। ननूत्तरश्लोके पृथग्दृश इति भेदज्ञाननिन्दावचनादत्रापि स एवार्थः किं न स्यात्? उच्यते–पृथग्दृश इति। पृथक्शब्दप्रयोगबलादन्योऽर्थस्तस्य तर्हि स क इत्युच्यते भगवद्दर्शनविरोधि यद्दर्शनं तत् पृथग्दर्शनं "भगवद्दर्शनाद्यस्य विरोधाद्दर्शनं पृथक्" इत्यादेः—

स्वरूपभेदो हि परजीवयोर्जीवगो मिथः। परस्परेण वस्तूनां विशेषः शास्त्रदर्शितः ॥ इत्यादेः।

उक्त एवार्थ इति सन्तोष्टव्यम् ॥ २६–३० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

क्षान्त्वा क्षमामवलम्ब्य ॥ २५–२६ ॥ भावैर्भूतैर्मिथो निमित्तभूतैः पृथग्दृशो बहिर्दृष्टयः ॥ २७–३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भ्रातुरपराधं क्षान्त्वा रोषं शोकं च ॥ २५ ॥ यतोऽहन्धिय एव हेतोरयं स्वः अयं पर इति भिदा "सह सुपा" (२।१।४) इति समासः ॥ २६ ॥ मिथः परस्परं भावैर्नृपव्याघ्ररोगादिभिर्भावं मनुष्यगवाश्वादिकं घ्नन्तमीश्वरमिति शेषः। पृथग्दृशो बहिर्दृष्टयः ॥ २७ ॥ विशुद्धमकपटं यथा स्यात् विस्रब्धमिति पाठे सविश्वासम् ॥ २८–२९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तौ च तस्मिन्नसाधुस्वभावेऽपि साधुस्वभावावित्याह—भ्रातुरिति ॥ २५ ॥ अहन्धीः देहे अहम्बुद्धिः यतो बुद्धेः पाञ्चभौतिके साधारणे देहे भिदा इदं मम इदमन्यस्येति पृथग्दृष्टिः भवति ॥ २६ ॥ अत एव पृथग्दृशस्ते भावैरज्ञानमूलैरहङ्कारैः शोकाद्यन्विताः मिथोऽन्योन्यं तैरेवाहङ्कारैर्घ्नन्तं भावमात्मानं पश्यन्ति तेऽन्योन्यमात्मघ्ना इत्यर्थः ॥ २७ ॥ एवं विशुद्धाभ्यां यथा स्यात्तथा भाषितः ॥ २८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एवमिति देहात्मनोर्भेदस्य परेशस्वातन्त्र्यस्य च यदज्ञानं तत्प्रभवाद्देहादहं धीर्भवति यतो धियो हेतोर्गेहधनादौ स्वस्येदं परस्य चेदमिति भिदा जायते ततः संसृतिः वस्तुतो गेहादीनां परेशाधीनत्वात् स्वकीयं स्वस्वातन्त्र्यञ्च नास्तीति भावः ॥ २६ ॥ स्वकीयस्व-स्वस्वातन्त्र्यज्ञानस्य फलमाह शोकेतिशोकादिभिरन्विताः पृथग्दृशः बहिर्दृष्टयः पामराः भावैः शत्रुशस्त्राग्निजलादिभिः पदार्थैर्निमित्तमात्रैर्भावान् घ्नन्तं मारयन्तं स्वतन्त्रप्रदेशं न पश्यन्ति न जानन्ति किन्तु स्वतन्त्रोऽहमेनं हन्मीति मन्यन्त इत्यर्थः ॥२७॥ विशुद्धमकपटं यथा स्यात्तथा ॥ २८–२९ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

शोकादियुक्ता मिथो घ्नंतो भावैः शोकादिधर्मैर्निमित्तैर्भवान् जीवेश्वरभेदादिधर्मान्न पश्यंति किंतु पृथग्दृशो भगवद्दर्शनविषयजीवेश्वरभेदादि विरुद्धजीवेश्वराभेदादि विषयज्ञानवंतो भवंतीति। एतेन भावैरित्येतद्व्यर्थमिति चोद्यं निराकृतम्। शोकादीनां मिथो हनन एव निमित्तत्वमितिभ्रमं परिहर्तुं मिथो हनने जीवेश्वरभेदादि ज्ञानाभावे च निमित्तत्वमिति वक्तुं भावैरित्युक्तमिति स्वीकारात्। पृथग्दृश इत्यस्योक्तार्थे भगवद्दर्शनाद्यस्य विरोधाद्दर्शनमित्यादि ॥ ता० अर्थः ॥ भगवद्दर्शनाद्भगवत्कर्तृकजीवेश्वरभेदादिदर्शनात्। विरोधाद्विरोधेन विशिष्टं यद्दर्शनम्। जीवेश्वराभेदादि दर्शनमिति यावत्। तत्पृथग्दर्शनम्। यस्य पुरुषस्य स पुरुषः पृथग्दृष्टिरिति विज्ञेयः। सद्भेददर्शनोऽबाधितजीवेश्वरभेदादिदर्शनः पृथग्दृष्टिर्न तु नैवेति ॥ २७ ॥

इति श्रीभागवतटिप्पण्यां पंचमोऽध्यायः ॥ १०—५ ॥ (अस्मत्पक्षे चतुर्थोऽध्यायः)

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

भ्रातुरिति। अत्र देवकीवसुदेवश्चेति कर्तृसमुच्चयपक्षे ल्यबंतक्रिययोरेककर्तृकत्वनियमात् भ्रातुर्वचनमाश्रित्येत्यनेन वसुदेवस्यापि कंसभ्रातृत्वापातोऽत उच्यते। देवकी। भ्रातुः कंसस्य। वचनमाश्रित्य। क्षांत्वा क्षमां कृत्वा। रोषं व्यसृजदित्येकोऽन्वयः। अन्यस्तु। वसुदेवश्च प्रहस्य तमुवाच हेति। यद्वा। देवकीति षष्ठ्यर्थे। वसुदेवः क्षांत्वा देवक्या भ्रातुर्वचनमाश्रित्य रोषं व्यसृजत् प्रहस्य तमुवाचेत्येक एवान्वयः ॥ २५ ॥ कंस इति। अत्र कंसो देवकीवसुदेवाभ्यां विशुद्धं पतिभावितः सन्निति योजनायां भ्रातुर्वचनमाश्रित्येति श्लोके एकवसुदेवभाषणांगीकारेण विरोधोऽत उच्यते। एवं विशुद्धं प्रतिभाषितः कंसः प्रसन्नाभ्यां देवकीवसुदेवाभ्यामनुज्ञातः सन् गृहमाविशदित्यन्वयः। देवक्यादितृतीयान्वयस्तु अनुज्ञातपदेन प्रतिभाषितपदे तत्र वसुदेवेति शेषः। अतो न विरोधः ॥ २८ ॥

श्रीछलारीनारायणाचार्यविरचिता श्रीभागवततात्पर्यटिप्पणी

एवमेतन्महाराजेति श्लोके यतोऽज्ञानप्रभवा अज्ञानकल्पिता स्वपरेति भिदा स्वो जीवो भिन्नः परः परमात्मा भिन्न इति भिदा भेदज्ञानं देहिनां हंति दुःखादिरूपं नाशं करोति। अतो जीवेश्वरादिभेदज्ञानं न संपादनीयमिति त्वं यथा वदसि यद्वदसि एतदेवमेव सत्यमेवेति जीवेश्वरादिभेदस्य मिथ्यात्वं तज्ज्ञानस्यानिष्टसाधनत्वं चोच्यत इत्यन्यथाप्रतीतिनिरासायापेक्षिताऽध्याहारेण तत्तात्पर्यार्थमाह ॥ देहिनामिति। अनेनाज्ञानप्रभवा इति। भागवतपदं द्वितीयाबहुवचनांतमध्याहृतस्य यातना इत्यस्य विशेषणमित्युक्तं भवति। स्वोक्तार्थं प्रमाणेन स्पष्टयति ॥ देवोऽहं मानुषो वेति। अहं देवोऽहं मानुष इति विशेषमहं मानुषोऽहं देव इति च विशेषं यः सम्यग्भेदेनात्यंतभेदेन पश्येत्तथा तत्र देवेषु मानुषेषु च परस्परं विशेषं तथैव तु विशेषेण परमात्मानमपि ब्रह्मजीवयोर्विशेषं च स्वातंत्र्यपारतंत्र्यादिविशेषं च यः सम्यग्भेदेन पश्येत्स तत्प्रसादाद्ब्रह्मप्रसादादज्ञानप्रभवा यातना हंति परमात्मानं च गच्छतीति योजना ॥ २६ ॥ ननु यद्येवं जीवेश्वरादिभेदज्ञानस्य परमात्मप्राप्तिरूपमोक्षसाधनत्वं स्यात्तर्हि शोकहर्षभयद्वेषेति श्लोके पृथग्दृशो जीवेश्वरादिभेदज्ञानिनः शोकाद्यन्वितोक्तिरयुक्ता स्यादित्यतः प्रमाणेनैव पृथग्दृश इति पदं व्याचष्टे ॥ भगवद्दर्शनादिति। यस्य दर्शनं ज्ञानं भगवद्दर्शनात्पृथक् स एव पृथग्दृष्टिरिति ज्ञेयं न तु सद्भेददर्शन पृथग्दृष्टिरिति ज्ञेयम् इति योजना। ननु सद्भेददर्शनस्यापि दर्शनं भगवद्दर्शनात्पृथगेव। अन्यथाऽपसिद्धांतः स्यादतः कथं सद्भेददर्शनो न पृथग्दृष्टिरित्युच्यत इत्यत उक्तम् ॥ विरोधादिति। विरोधात्पृथगुच्यत इत्यन्वयः। अत्र भगवद्दर्शनात्पृथक्त्वं नाम भिन्नत्वं न विवक्षितं किंतु भगवद्दर्शनविरुद्धत्वमेव। तच्च सद्भेददर्शनज्ञानस्य नास्त्यतः सद्भेददर्शनो न पृथग्दृष्टिरित्युक्तं

युक्तमेवेति भावः। ननु सद्भेददर्शन इति सद्भेदज्ञानिनः पृथग्दृष्टित्वाभाव उक्तः। तत्र सद्भेदः क इत्यतः प्रमाणेनैव सद्भेदं दर्शयंस्तत्प्रसंगादसद्भेददर्शनं च दर्शयंस्तज्ज्ञानाज्ञानफलं च दर्शयति ॥ स्वरूपभेदो हीत्यादिना। हीति स्वोक्तार्थे प्रमाणं दर्शयति। यः शास्त्रदर्शितः परजीवयोः स्वरूपभेदो मिथः परजीवगः परस्परवस्तूनां विशेषः सोऽयं सद्भेदः समुद्दिष्ट इति योजना। शत्रुमित्रादिभेदिता विष्णोरित्यनुवर्तते। लोकवद्विष्णोः स्वनिष्ठदोषगुणाभ्यां लोकं प्रति शत्रुत्वमित्रत्वादिभेदवत्त्वं शास्त्रविद्विष्टं शास्त्रेण वेदादिना विशेषेण द्विष्टं द्वेषि। विरुद्धमिति यावत्। इतरादसद्भेददर्शनादित्यर्थः ॥ २७ ॥

इति श्रीभागवततात्पर्यटिप्पण्यां पंचमोऽध्यायः ॥ १०-५ ॥ (अस्मत्पक्षे चतुर्थोऽध्यायः)

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भ्रातुः कंसस्य वचनं भुवि भौमानीत्यादिवचनमाश्रित्य क्षान्त्वासमाधानं प्राप्य देवकी वसुदेवश्च तद्ववचनमाश्रित्य रोषं व्यसृजत्। अनन्तरं प्रहस्य तं प्रत्युवाच। अविश्वसनीयोऽयमिति ह शोके ॥ २५ ॥ एवमेतन्महाराजेति श्लोके यतोऽज्ञानप्रभवाऽज्ञानजाता पर इति स्व इति च भिदा भेदज्ञानं देहिनां हन्ति देहिनोऽनर्थं दत्वा नाशयतीति यद्वदसि तत्तथैवेति कंसशंसितमनुमेने वसुदेव इत्ययार्थं ब्रह्माण्डवचनोक्तप्रकारेण किञ्चिदध्याहृत्य ते तदज्ञानप्रभवा इति द्वितीयाबहुवचनं सदन्वेतीति वदंस्तं पराकरोति ॥ देहिनामिति। स्वपरेति भिदा कर्त्री तज्ज्ञानमिति यावत् देहाभिमानवतामज्ञानप्रभवा यातनाः प्राप्य तीव्रवेदना हन्ति। देवो देवोऽहं मानुषोऽहं मानुष इति विशेषं वैपरीत्येन वा तत्रापि विशेषं तरतमभावरूपम्। तथैवात्मानं सर्वस्वामिनं परं सर्वोत्तमं ब्रह्मजीवयोश्चतुर्मुखतदितरजीवयोः परमात्मानं पश्येत् ब्रह्मजीवयोः परमात्मजीवयोरिति वा। सम्यग्भेदेन। विशेषमित्येवोक्तौ भेदाभावेऽपि विशेषस्तत्प्रतिनिधिरङ्गीकृतो भगवद्रूपगुणादाविति तमादाय पुनरुक्तशङ्कोत्तेजनं स्यादिति सम्यग्भेदेनेत्युक्तिः। यः पश्येत्सोऽज्ञानसम्भवा यातना हन्ति तत्प्रसादादेवं ज्ञातभगवत्प्रसादात्। न केवलं यातनाघातोऽपि तु परमात्मानं गच्छति प्राप्नोति ॥ ततश्चायं श्लोकार्थः ॥ परमात्मा न विपर्येति पुत्रादिकं विपर्येति मा शुच इत्यादि देहिनामज्ञानप्रभवा यातनाः स्वपरेति भिदा भेदमतिर्यता हन्ति ततो यथा वदसि त्वमेवमेतदिति योजना ॥ २६ ॥ शोकेति श्लोके पृथग्दृश इति भेददृशो निन्दनात्कथं तदभिनन्दनमित्यतः प्रमाणेनैव पृथक् पदं व्याचष्टे ॥ भगवद्दर्शनादिति। यस्य भगवद्दर्शनाद्विरोधद्वैपरीत्यादर्शनं तदेव पृथग्दर्शनं तद्वान्पृथग्दृष्टिरिति विज्ञेयः संश्चासौ भेदश्च तं पश्यतीति स वा सद्भेददर्शनं यस्य स वा न पृथग्दृष्टिर्विज्ञेय इत्यर्थः। स च सद्भेदः किमन्तर्भेदोऽसंश्च भेदः कतिविधः। तयोः फलं च किमित्यतः प्रसङ्गप्राप्तमिदं सर्वं मानेनाह ॥ स्वरूपभेद इति। परजीवयोः परमात्मनो जीवसर्गस्य च तथा मिथो जीवगः परस्परेण वस्तूनां विशेषो मानमपि स्वं जीवेश्वरभिदा चैवेत्यादिमूलसहितमाह ॥ शास्त्रदर्शितो विशेष इति। अयं सद्भेदः समुद्दिष्टो मे मत्तः शृणु स्वरूपाणां मत्स्यादीनां गुणानां ज्ञानादीनां विष्णोश्च भेदस्तथा परस्पराद्रूपस्यावताररूपस्यावतारान्तरेति परस्पराद्भेदो सन्विष्ण्वतन्त्रत्वं अ विष्ण्वधीनत्वं विष्णोः शत्रुमित्रादिभेदता शत्रुरयमिदं मित्रमिति भेदवता। भेदितेति प्रचुरपाठ उभयत्राप्यर्थः समः। शास्त्रविद्विष्टं शास्त्र भेदादिकं तेन वि उपक्रमाद्यानुकूल्यविशेषाद्विष्टं द्वेषवन्निषिद्धं यच्चान्यत्सोऽसद्भेद ईरित इत्यन्वयः। सद्भेददर्शनान्मोक्षो भविष्यति। न केवलमसद्भेदाज्ज्ञाता तमो व्रजेत्किन्तु सद्भेदादर्शनाच्च तमो व्रजेत्। इतरात्स्वरूपाणामित्यादिना निरूपितासद्भेददर्शनं तेन गम्यत इति कर्मणि क्विपि वा। तेन अतनं यस्येति भावे सम्पदादिक्विपि वा रूपं मोक्षविशेषणम्। इतरस्मादिति वक्तव्यमिति शङ्काऽनेन निरस्तेति ज्ञेयम्। कर्मव्यतिहारे सर्वनाम्नो द्विर्भावः समासवच्च बहुलमिति द्वित्वे परेण परेणेत्यादित्वेन स्थितौ पूर्वपदस्थटादेः सुप्त्वेऽस्य विसर्जनीये कुत्वोः कः पौ चेति अपवादेन कस्कादित्वे परस्परेणेत्यादिसिद्धिर्ज्ञेया। दलद्वये टाबभावः क्लीबाद्वा विरहः स्वमोः समासे सोरलुक्चेति सिद्धं बाहुलकात्त्रयम्। अदृष्टपरस्परैरित्यादौ सोर्लुक्च प्राप्तः सर्वं बाहुलकबलेन समाधेयम्। स्त्रियामिति सूत्रेऽन्योन्यसंश्रयत्वे तदिति भाष्यं च तत्र प्रमाणमिति कौमुद्युक्तेः। परस्परार्पितहस्ततालं तात्कालमालीभिरहस्य तालम्। परस्परेण छुरितामलच्छवीति तृतीयसर्गे नैषधप्रथमसर्गमाघाद्युक्तेः परस्परात्परस्परेणेत्युपपन्नेति ज्ञेयम्। शोकादिभिर्युता मिथः परस्परं घ्नतः संहरन्तः पृथग्दृशो भगवद्दर्शनविरोधिदर्शनवन्तो भावैर्ब्रह्मत्वदेवत्वप्रकारैर्भावांस्तद्युक्तान्धर्मिणस्तथा न पश्यन्ति न जानते ये न पश्यन्ति तेऽपृथग्दृश इत्यन्वयो वा ॥ २७ ॥ प्रतिभाषित एवमेतन्महाराजेत्यारभ्य पृथग्दृशेत्यन्तेनोत्तरितार्थः कंस एवं प्रसन्नाभ्यां वसुदेवदेवकीभ्यामनुज्ञात आज्ञप्तो विश्रब्धो गृहमाविशत् ॥ २८ ॥

श्रीसुबोधिनी

प्रसादे प्रार्थिते ताभ्यां प्रसादः कृत इत्याह भ्रातुरिति सम्यगनुतप्तस्य पश्चात्तापेन तप्तस्य तत्रापि भ्रातुः सम्बन्धिरोषं क्षान्त्वा क्षमित्वा, क्षान्तरोषा वा, तत्कृतं पूर्वापराधं व्यसृजद् रोषं वा, पाठभेदात् तदीयो रोषः सोढः स्वकीयं तु त्यक्तवती, कृतकार्यस्य तद्रोषस्य सहनं, अकृतकार्यस्य स्वकीयस्य परित्यागः, एवं वसुदेवश्च, चकारादन्येपि, रोषमपराधं च क्षान्त्वा, यतो देवकी देवतारूपा, वसुदेवोपि तथा तस्यास्तु शोकाभावो मुखप्रसादेनैव ज्ञातः, वसुदेवस्तु गूढहृदय इति कदाचिदप्रसन्नो भवेदित्याशङ्क्य हास्यं वचनं चाह प्रहस्य तमुवाचेति, हेत्वाश्चर्यं पुत्रमारकस्त्वसंभाष्य इति ॥ २५ ॥

तदुक्तं ज्ञानं तस्यैव हृदयारूढं भवत्विति तस्यानुमोदनं करोत्येवमेतदिति महाराजेतिसम्बोधनं मारणस्यादोषज्ञापनार्थं यत् त्वमात्थैवमेतत्, तन्निष्पिण्डितमनुवदति देहिनामज्ञानप्रभवाहन्धीरिति, देहादावहम्बुद्धिरज्ञानादेव जायते, तस्मात् स्वपरेतिभिदा

स्वः पर इति, एतन्मूलक एव सर्वोपि व्यवहारः, **देहिनामिति** देहाध्यासवतां, अहङ्कारस्याज्ञानजनितत्वे देहाध्यासः प्रयोजक इत्यधिकारत्वेन निरूपितः, **अन्यथा ज्ञानमहम्बुद्धिः**, तदज्ञानकृतं, अन्यथा स्वरूपे भासमाने अन्यन्न भायात् ॥ २६ ॥

एवं तदुक्तं ज्ञानं नित्यानित्यवस्तुविवेकोपयोगित्वेन निरूप्य स्वसिद्धान्तसिद्धं ज्ञानं कृपयोपदिशति **शोकेति**, अत्र वस्तुतः स्वयं न मारयतीतिसत्यं, अस्वतन्त्रत्वात्, किन्तु केनचित् प्रेरितो मारयति, इतोपि मुख्यः सिद्धान्तो भगवानेव सर्वत्र प्रविष्टो मारयतीतिशास्त्रं, **तस्य ज्ञाने** जीवानां षड् धर्मा बाधका भगवत्प्रतिपक्षाः, शोक ऐश्वर्यस्य, स हि कर्तुमकर्तुमन्यथा कर्तुं समर्थः तत्कृतेर्थे कथं **शोकः** ? अन्यथा, अपेक्षितं स्वांशानामन्यो न नाशयेत्, **हर्षश्च** प्राप्तौ भवति, तद् भगवतो वीर्ये कालरूपे ज्ञाते न भवेत्, **भयं च** न भवेद् यदि भगवतो यशो जानीयात्, स ह्ययुक्तं न करिष्यति, अन्यथा यशो न स्यात्, **द्वेषश्च** न भवेल् **लोभश्च** यदि भगवदीयां श्रियं जानीयात्, **द्वेषश्च** स्त्रीकृतो भवति **लोभश्च** धनकृतः, तदुभयं भगवत एवेति न स्वस्य तथा कर्तुमुचितं ज्ञाने भगवदीये ज्ञाते **मोहाभावः** प्रसिद्धः, **मदस्तु** वैराग्याभावात्, सर्वथैवाविरक्तो मत्तो भवति, **अतोन्योन्यं** मारयन्तमपि **जना न पश्यन्ति**, अन्यथैक एव घातकः स्यात्, नन्वैकात्म्ये कथं वध्यघातकभावो भगवच्छास्त्रे उपपद्यत इति चेत् तत्राह **भावैर्भावमिति**, भवन्तीति **भावा** धर्माः, बाधकैर्धर्मैर्बाध्या धर्मा एवापोह्यन्ते न तु धर्मी, ये हि भवन्ति ते नश्यन्तीति, यथैकस्मिन् वस्त्रे शुक्लादयो धर्मा रञ्जकद्रव्यसम्बन्धादुत्पद्यन्ते विलीयन्ते च, परं बलीयस्त्वं नियामकं, यद्बाधार्थमेव यस्मिन् भावे भगवान् निविशति स तं भावं दूरीकरोतीति भवदादीनां करणत्वमेव न तु कर्तृत्वं, न हि करणं क्वचिदुपालभ्यते स्तूयते वा, अदर्शने हेतुः **पृथग्दृश इति**, करणे सम्बद्ध एव कर्ता करणाच्चेत् पृथग् ज्ञायते करणं वा ततस्तदेवम्बुद्धिर्भवति न तु सर्वत्राविष्टं भगवन्तं ज्ञातवतः, अतो मत्पुत्रा अपि भगवतैव मारितास्त्वमपि मारणीय इति त्वयापि शोको न कर्तव्य इति भावः ॥ २७ ॥

एवं मायाकृतं ज्ञापनं सकार्यं निरूप्योपसंहरति **कंस इति**, एवं **प्रसन्नाभ्यां** स्वसिद्धान्तकथनेन सम्यक् प्रसादो लक्षितः, **विशुद्धं परिभाषित इति**, **राजन्निति** सम्बोधनेन तदुक्तानुवादेन च निरूपितौ, एकस्यैव वचनं निरूपितमिति देवक्या अप्रसादशङ्कां वारयितुमुभयोर्ग्रहणं, अतस्ताभ्यामनुज्ञातः प्रतीकारमकृत्वा **गृहमेवाविशत्** ॥ २८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

एवमेतदित्यत्रान्यथेति, एतस्यैव व्याख्यानं **स्वरूप** इत्यादि ॥ २६ ॥ **शोकहर्षेत्यत्र** **तस्य ज्ञान इति**, सिद्धान्तशास्त्रस्य ज्ञाने, **शोकस्यैश्वर्यप्रतिपक्षत्वं** व्युत्पादयन्ति **स हीत्यादि**, तथा च **स हि** ज्ञात्वैव करोतीति तदज्ञानादेव **शोकः**, भगवद्विचारात् प्रकारान्तरेण **यदपेक्षितं स्वांशानां** जीवानां तदन्यो **न नाशयेत्** सामर्थ्याभावाद् दण्डप्राप्तेश्च, किन्तु भगवानेव नाशयतीतिज्ञानाजननादैश्वर्यविरुद्धः **शोक** इत्यर्थः, **हर्षभययोर्वीर्यप्रतिपक्षत्वं** व्युत्पादयन्ति **हर्षश्चे**त्यादि, तथा च हर्षभये वीर्यविरुद्धे, द्वेषस्य यशोविरुद्धत्वं व्युत्पादयन्ति **यदीत्यादि**, यशसो ज्ञाने लोभस्य श्रियः प्रतिपक्षत्वमाहुर्**लोभश्चे**त्यादि, **न भवेदिति** शेषः, तत्र हेतुमाहुर्**द्वेषश्चे**त्यादि, **तथेति** लोभद्वेषादिकं, **मोहस्य** ज्ञानप्रतिपक्षत्वमाहुर्**ज्ञान** इत्यादि, तथा च वध्यत्वात् प्रतिपक्ष इत्यर्थः, **अत इति**, शोकाद्युत्पत्तिसद्भावात्, **अन्यथेति**, यदि पश्येयुः, एवञ्च नोपलभ्यतेतो जना न पश्यन्तीत्यर्थः ॥ २७ ॥ **अग्रिमे निरूपिताविति**, प्रसन्नाविति शेषः ॥ २८ ॥

(३) श्रीवल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एवमेतदित्यस्याभासे तस्यैवेति, तदुक्तमतस्यासुरत्वात् स्वस्य हृदये **मायात्विति** वसुदेवाशयं सूचयितुमेवकारः ॥ २६ ॥ **शोकहर्षेत्यत्रान्यथैक एवेति**, घातको ज्ञात इति शेषः, मारयितुर्भगवतो दर्शने स एव घातको ज्ञातो भवेदित्यर्थः, **भावैर्भावमित्यत्र** **करणे सम्बद्ध एवेति**, **करण** इन्द्रियादौ सम्बद्धो जीव एव **कर्ता भवति** भगवांस्तु **करणात् पृथक्** करणासम्बद्ध इति चेज् **ज्ञायते** तदा जीव एव कर्ता न भगवानितिबुद्धिर्भवतीत्यर्थः, **करणं वेति**, करणं ततो भगवतः पृथग् भगवन्निरूपितसम्बन्धयुक्तं नेत्यर्थः ॥२७॥ **कंस** इत्यत्र **निरूपिताविति**, विशुद्धप्रसादौ निरूपितावित्यर्थः ॥ २८ ॥

बुभुत्सुबोधिका

भ्रातुरित्यत्र प्रसाद इति स्नेहेन परिचर्याफलं प्रसादः। 'यद्वृत्त्या तुष्यते हरि'रितिवाक्यात्। 'जातो भवे'दिति पूर्वसुबोधिन्यां 'जात' इत्यत्र सुबुत्पत्त्यै क्रियापदस्य विवक्षणात् प्रार्थनायां लिङ्कतः प्रार्थिते। 'क्षान्त्वा रोषे'त्यत्र 'क्षान्त्वा रोष'मिति पाठं मत्वाहुः रोषं क्षान्त्वा क्षमित्वेति। क्षमूष् सहने। भ्वा० आ० सेट्वा। तस्य रूपमिति द्योतितं व्याख्यानेन। क्त्वोविचारे विशेषो नात्र। तेन नात्र क्षनू बन्धे इत्यस्य तनादेरुदितः सेटो रूपमिति बन्धित्वा बध्वेति वा व्याख्यानं छान्दसमिडभावं कृत्वा न भवतीति भावः। पाठभेदादिति 'क्षान्त्वा रोष'मिति पाठभेदात्। 'रोषं क्षान्त्वे'ति वा पाठः। अतो रोषं वा व्यसृजदित्यत्र कर्म। सोढ इति क्षान्तः सोढो रोषः पूर्वापराधो यया। तथा स्वकीयं रोषं तु व्यसृजत् त्यक्तवतीत्यर्थः। कृतकार्यस्येति कृतं कार्यं मायाहननं येन कंसरोषेण तस्य। अकृतेति न कृतं कार्यं ब्रह्मविद्यया येन स्वकीयेन रोषेण तस्य। गूढहृदय इति गूढं प्रसादज्ञापने गुप्तं हृदयं हृदयस्येति तथोक्तः ॥ २५ ॥

एवमेतदित्यत्र तस्यैवेति मायाप्रधानकंसस्य। एवकारो ब्राह्मयोगव्यवच्छेदकः, न तु ब्राह्मस्येति। अज्ञानादिति देहादिप्रविविक्तात्माज्ञानात्। एवकारो ज्ञानयोगव्यवच्छेदकः। मायामुक्त्वा तत्सृष्टिं भेदरूपामाहुः तस्मात् स्वपरेति। देहाध्यासेति देहोहमित्यध्यासवताम्। संयोगः सम्बन्धो देहिनामित्यत्र। अहङ्कारस्येति अहं देहोहं स्थूल इत्यहङ्कारस्यात्मानात्माविवेकरूपाज्ञानजनितत्वे देहाध्यासः प्रयोजक इति देहाध्यासी अहङ्कारीति अधिकारत्वेनाध्यासो 'यत' इतिपदेन मूले निरूपितः। न च यतः अहंधियः स्वपरेति भिदेति योजनया न पूर्वोक्तमिति वाच्यम्। अहंधियः स्वपरभिदारूपमायाकारणत्वाभावात्। एवं चाज्ञानप्रभवा, यतोध्यासात् प्रभवाहंधीः स्वपरेति भिदा यस्याम्। अहंधीरित्यत्राहं स्त्रं विषयः तत्सम्बन्धिपरोपि विषयः स्वं पर इति भिदा स्वनिष्ठा परनिष्ठा चेति सापि विषयः। तथा च यत इत्यस्याध्यासादित्यर्थः। तथा सत्यन्वयमाहुः अन्यथेति। अज्ञानप्रभवा पुनर्देहाध्यासात् प्रयोजककारणाच्चाहंधीरित्यर्थः। तदिति अन्यथाज्ञानम्, अज्ञानं माया तत्कृतम्। 'अज्ञानप्रभवे'तिपदस्यार्थः। अन्यथेति स्वरूपे स्थौल्येन देहोहमिति प्रत्ययेऽस्मदर्थे भासमाने। अन्यत्र भावः स्थौल्यस्येति बोध्यम्। अन्यत्र भावादिति पाठः। अन्यत्र मायादिति पाठान्तरम्। अन्यत्र आत्मनि स्थौल्यं मायादित्यर्थः। 'यत' इत्यस्याहंधियः अहं स्थूल इत्यध्यासरूपाया इत्यर्थः। यद्यप्यहंधीरित्यत्राहं स्थूल इत्यप्रत्ययः अहंधीरित्यस्य तु नाध्यासरूपत्वम्। अस्मदर्थस्य धियाऽभेदात् 'ज्ञानमात्रपरं ब्रह्मे'त्युक्तेः। धीरपि मनोवृत्तिः 'स मानसी न आत्मे'ति मनोवृत्तिरात्मापि, तथापि धर्मज्ञानस्य धर्मिज्ञानेध्यास एव ॥ २६ ॥

शोकहर्षेत्यत्र तदुक्तमिति कंसोक्तम्। नित्यानित्येति नित्य आत्माऽनित्यो देहः। यथा 'भुवि भौमानी'त्यनेनाविकृत आत्मा भूर्विकृता नित्याऽनित्या च। कृपयेति साधुत्वदीनवत्सलत्वाभ्यां कृपा। 'साधवो दीनवत्सला' इतिवाक्यात्। न मारयतीति 'यावद्धतोस्मि हन्तास्मी'तिवाक्ये। स्वसिद्धान्तं स्वीयवेदान्तसिद्धान्तमाह किन्तु केनेति। अन्तर्यामिणा अन्तरो यमयतीत्यन्तर्यामिब्राह्मणात्। प्रविष्ट इति 'तत्सृष्ट्वा तदेवानुप्राविश'दितिश्रुतेः। मारयतीति 'कर्ता शास्त्रार्थवत्त्वा'दित्यधिकरणे 'जीवीयकर्तृत्वं परा'दित्युक्तत्वात्। शास्त्रं भाष्यं वेदान्तं वा। बाधका इति भगवतो ज्ञानं धर्मैस्तादृशज्ञानरूपधर्माणां तामसत्वान् मायाकृतधर्माः बाधकाः आवरकाः। 'परोपि मनुतेनर्थं तत्कृतं चाभिपद्यत' इतिवाक्यात्। भगवदिति ज्ञानप्रतिपक्षाः अज्ञानरूपाः। स हीति ईश्वरो हि। तत्कृतेर्थे जीवैंशतः कर्तुमकर्तुमन्यथा कर्तुं सामर्थ्यस्य सत्त्वात् साक्षात्स्रष्टौ। कथं शोक इति जगत आनन्दत्वेन शोकाभावः। आनन्दावरकत्वेनानन्दाभावः शोकः कथमिति प्रश्नः। मायासत्त्वात् स्वरूपे शोकाभावेपि जीवे शोकः 'मायां च तदपाश्रयां यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकं परोपि मनुत' इति प्रश्न एव शास्त्रपरिसमाप्तिः। परन्तु समाधिभाषावासनावतां पुंसाम्। परस्य जीवस्य मायासम्बन्धं तत्कृतं शोकं चाह। शरीरसम्बन्धे मायाशरीरसम्बन्धानन्तरं शोको मायागुणः। आनन्दरूपे जगति शोके युक्तिमाहुः अन्यथेति। शोकाभावे अन्यथापेक्षितं भगवद्विचारात् प्रकारान्तरेण यदपेक्षितं शोकजनकं नाशप्रतियोगि स्वांशानां जीवानां तत् अन्यो भगवदंशः परः न नाशयेत्। आनन्दजनकस्य नाशयोग्यत्वाभावात् प्रतियोगित्वाभावात्। अन्यस्य सामर्थ्याभावात्। दण्डप्राप्तेश्च भगवानेव नाशयतीति ज्ञानाभावादैश्वर्यविरुद्धः शोक इत्यर्थः। हर्षभययोः वीर्यविरुद्धत्वं व्युत्पादयन्ति स्म हर्षश्चेत्यादि। कालरूपवीर्यकृते स्वांशानामपेक्षितनाशेर्थे कथं हर्षो भयं चेति प्रश्नः पूर्ववत्। तदिति अव्ययम्। हर्षः। न भवेदिति पाठः। भगवतो वीर्यं कालः प्राप्तिविरुद्धः इति ज्ञाते प्राप्तिजन्यो हर्षो न भवेदित्यर्थः। भयविरुद्धवीर्यरूपकालश्चेद् भयं न भवेदित्यर्थः। द्वेषस्य यशोविरुद्धत्वं व्युत्पादयन्ति स्म न भवेदिति। तत्कृतेर्थे यशोविरुद्धो द्वेषश्च न भवेदित्यर्थः। द्वेषशब्दो मूर्धन्यान्तः। यथा स्त्र्युपाधिको दोषस्तथा धनोपाधिको लोभ इत्याहुः द्वेषश्चेति। तदुभयमिति 'कामस्यान्तं हि क्षुत्तृड्भ्यां क्रोधस्यान्तं फलोदया'दित्युक्त्वा 'लोभस्यान्तं न विद्यत' इति सप्तमस्कन्धात्। त्रित्वसामर्थ्येन स्वरूपलक्षणगतेन भगवत एव। एवकारव्यावर्त्यमाहुः न स्वस्येति। वसुदेवस्य मायाया वा। भगवता तथा कर्तुमुचितम्। द्वेषस्यापकारित्वात् लोभस्य भक्तिविरोधात्। प्रसिद्ध इति ज्ञानस्य भगवद्धर्मत्वात् मोहस्य मायाधर्मत्वात् प्रसिद्धः। ज्ञानस्य तमोनाशकत्वात्। ज्ञानविरुद्धो मोहः। मदस्त्विति वैराग्यविरुद्धो मद इति भावः। अत इति साधनाभावात्। मारयन्तमिति भगवन्तं न पश्यन्ति। अन्यथेति यदि पश्येयुः। एको भगवान् घातकः ज्ञातः स्यात्। भगवच्छास्त्र इति श्रीभागवते वेदान्ते वा। 'भावैर्भाव'मित्यस्य 'भावैः' कंसवाश्यादिभिर्विषयैर्मिथो घ्नन्तं 'भावं' भगवन्तमविषयं न पश्यन्ति चक्षुरादिकरणस्य भावेषूपक्षयात्। न पश्यन्तीत्यन्वयेपि भावानां बाधकानां करणत्वं बाध्ये भगवद्रूपे भावेऽभावाद् बाध्याकाङ्क्षायामाहुः बाध्या इति। एवकारव्यावर्त्यमाहुः न तु धर्मीति। 'भाव'मितिपदेनोक्तो भावः। कुत इत्यत आहुः ये हीति। बलीयस्त्वमिति उत्पादने विलये च, बलहीनास्तु नोत्पद्यन्ते, न विलीयन्ते च, तत्तत्सत्त्वावत्। वक्ष्यमाणस्य करणे सम्बन्धस्य वक्तुं बाध्यं भावं धर्मिणो भावात् पृथक्कर्तुं क्रीडेच्छया प्रवेशमाहुः यद्बाधार्थमिति। एवकारोत्राबाध्ययोगं व्यवच्छिनत्ति। भाव इति बाधके भावे। निविशतीति अनुदात्ते तामात्मनेपदानित्यत्वम्। स तमिति स भगवान् निविष्टद्वारा तं बाध्यम्। भवदादीनामिति कंसादीनाम्। आदिना वाश्यादि। करणमिति कंसवाश्यादि। उपालभ्यते स्तूयते वेति त्वं कुण्ठितधारं त्वं तीक्ष्णधारम् इति। कुण्ठितधारं तीक्ष्णधारमिति तूपालभ्यते स्तूयते च। सम्बन्ध एवेति पाठे दशा करणे कंसवाश्यादौ सम्बन्धो न त्वेकात्मनि। सम्बद्ध इति पाठे कर्त्रेत्यनेन सम्बध्यते। कर्तेति आत्मा देवदत्तादिश्च। करणं वेति करणं वा कर्तुः पृथक् ज्ञायत इत्यर्थः। तत इत्यादि तदनन्तरम्। एवंबुद्धिरिति वध्यघातकभावबुद्धिः। त्वमिति कंसः। न कर्तव्य इति अस्मद्वत् ॥ २७ ॥

कंस एवमित्यत्र सकार्यमिति कंसवसुदेवज्ञानसहितम्। 'परिभाषित' इत्यत्र परिशब्दार्थमाहुः राजन्निति। 'एवमेतन् महाभागे'त्यत्र 'महाराजे'ति सुबोधिनीपाठाद् राजसभावस्य ज्ञानकथनेन गतत्वान् महत्पदरहितं सम्बोधनमुक्तम्। 'एवमेत'दिति कंसकृतानुवादस्तेन निरूपितौ विशुद्धिप्रसादौ निरूपितौ, प्रसन्नौ कंसवसुदेवौ निरूपिताविति या। 'प्रतिभाषित' इतिपाठे प्रतिनिधिज्ञानेन भाषित इत्यर्थः। देवकीवसुदेवाभ्यामित्यस्य तात्पर्यमाहुः एकस्येति। वसुदेवस्यैव एवकारो देवकीयोगव्यवच्छेदकः। प्रतीकाररूपकर्मणोनुक्तौ न्यूनं पूरयन्ति स्म प्रतीकारमकृत्वेति गृहातिरिक्तकर्मयोगव्यवच्छेदार्थक एवकारः॥ २८॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **'प्रसादे प्रार्थिते ताभ्यां प्रसादः कृत इत्याह'** श्रीवसुदेव और देवकीजी की प्रसन्नता की कामना और क्षमा की भी याचना करने पर देवकी वसुदेव ने प्रसन्नता व्यक्त की यह **'भ्रातुः समनुतप्तस्य'** श्लोक में कहा जायगा। अब राजा कंस पश्चाताप से तप्त हो रहा है, उस पर भी वह निज भ्राता है इस दृष्टि से श्रीदेवकीजी ने कंस के किये रोष या क्रोध को क्षमा कर उसके पूर्वापराध को छोड़ दिया, अपने हृदय से उसके प्रति रोष व अपराध को निकाल दिया।

आचार्यचरण कहते हैं कि इस श्लोक में पाठभेद है **'क्षान्त्वारोषं'** व **'क्षान्तरोषा'** ऐसे ऐसे दो पाठ मिलते हैं अतः क्षान्तरोष पद का अर्थ यह भी होगा कि देवकीजी ने कंस के रोष को सहन किया, और अपने रोष का त्याग किया, यह अर्थ पाठान्तर के अनुसार है। कंस का रोष तो बालहत्या रूप कार्य को कर चुका था, अभी श्री देवकीजी के रोष ने शाप प्रदान या कटु शब्द आदि कुछ नहीं किया था। उस अपने रोष का श्रीदेवकीजी ने त्याग दिया। इसी तरह श्रीवसुदेवजी ने **'च'** कार से अन्य सम्बन्धियों ने भी उसके रोष व अपराध को सहन किया, क्योंकि देवकी देवता रूप है, और वसुदेव भी देव रूप ही है। देवकी को शोक नहीं रहा यह तो देवकी के मुख की प्रसन्नता से ही ज्ञात हो गया, परन्तु वसुदेव का हृदय गूढ़ है, अतः वह कदाचित् अप्रसन्न हो, इस आशङ्का के निवारणार्थ उनके हास्य व वचन को कहा गया है कि **'प्रहस्य तमुवाच'** वह हँसकर कंस से बोले। **'ह'** शब्द आश्चर्यसूचक है, क्योंकि पुत्रमारक तो सम्भाषण योग्य नहीं होता॥ २५॥

श्रीमदाचार्यचरण इस श्लोक के अवतरण में **'तदुक्तं ज्ञानं तस्यैव हृदयारूढं भवत्विति तस्यानुमोदनं करोति'** कंस का कहा हुआ ज्ञान कंस के ही हृदय में आरूढ़ रहे, उसका आसुर सिद्धान्त अपने हृदय में न आ जाय, इस दृष्टि से श्रीवसुदेवजी **'एवमेतन्महाराज'** इस श्लोक के वाक्यों से कंस का अनुमोदन या मनःसमाधान करते हैं। श्रीवसुदेवजी का राजा कंस के प्रति किया गया 'महाराज' सम्बोधन, मारने के दोष का अभाव सूचित करने के लिये है, जो आप कहते हैं, यह ऐसे ही है, उसके कथन का गोल अर्थ में अनुवाद करते हैं कि देहाभिमानियों के अज्ञानजनित देहादि में अहंबुद्धि होती है, उससे अपने पराये का भेद होता है, इस भेद के कारण से, सारा व्यवहार है। **'देहिनाम्'** पद से बतलाया गया है कि देहाध्यासवान् लोगों का भेदबुद्धि में अधिकार है, उनको ही भेदबुद्धि होती है, अहङ्कार के अज्ञानजनित होने में देहाध्यास ही प्रयोजक या हेतु होता है, अतः अध्यास का अधिकार रूप से निरूपण उक्त पद द्वारा किया गया है। अहम्बुद्धि या अहङ्कार अन्यथा ज्ञान है, अन्यथा ज्ञान अज्ञान से होता है, यदि अज्ञान नहीं तो वास्तव में स्वरूप का भान होते हुए अन्य का भान नहीं हो सकता॥ २६॥

श्रीमदाचार्यचरण इस श्लोक के अवतरण में **'एवं तदुक्तं ज्ञानं नित्यानित्यवस्तुविवेकोपयोगित्वेन'** **'निरूप्य स्वसिद्धान्तसिद्धं ज्ञानं कृपयोपदिशति'** इस प्रकार कंस कथित ज्ञान का, नित्य, अनित्य, वस्तुओं के विवेक में उपयुक्त होने से निरूपण करके श्रीवसुदेवजी स्वसिद्धान्तसिद्ध ज्ञान का उपदेश कृपावश **'शोकहर्षभयद्वेषलोभमोहमदान्विताः'** श्लोक के पदों से करते हैं।

यहाँ कंसोक्ति में जो कहा गया था कि आत्मा स्वयं नहीं मारता है, यह तो सत्य ही है, क्योंकि वह स्वतन्त्र नहीं, परन्तु किसी की प्रेरणा से प्रेरित वह मारता है, इससे भी उत्तम मुख्य सिद्धान्त यह है कि सर्वत्र प्रविष्ट हुए भगवान् ही मारते हैं, यह शास्त्र का सिद्धान्त है। उस सिद्धान्त शास्त्र के ज्ञान होने में जीवों के ६ षड् धर्म बाधक है। वह शोक-हर्ष भय-द्वेष-लोभ-मोह-मद, आदि जीव धर्म भगवान् के ऐश्वर्यादि धर्मों के प्रतिकूल होते हैं। (१) शोक ऐश्वर्य के प्रतिकूल है, क्योंकि भगवान् सब कुछ करने को, व सब कुछ न होने देने को व सब कुछ बदल देने को समर्थ हैं। भगवान् के किए हुए में कैसे शोक उचित हो सकता है, भगवान् के विचार से अन्यथा जो भगवदंश जीवों को अपेक्षित होता है, उस अन्यथा अपेक्षित विषय का नाश कोई अन्य तो कर नहीं सकता, भगवान् ही उसका नाश करते हैं, परन्तु शोक भगवत्कृति के ज्ञान को उत्पन्न नहीं होने देता है अतः वह शोक भगवदैश्वर्य से विरुद्ध है। (२) हर्ष तो अपेक्षित वस्तु की प्राप्ति होने पर होता है, यदि भगवान् के कालस्वरूप वीर्य का ज्ञान हो कि अपेक्षित के लाभालाभ तो कामाधीन है तो हर्ष नहीं हो सकता, अतः हर्ष भगवद्वीर्य विरुद्ध है। भगवान् में वीर्य है,

वे सभी विपत्तियों को मिटा सकते हैं, यदि ऐसा जान लें तब तो किसी से भय की सम्भावना ही नहीं है लेकिन जीव में भगवान् के वीर्य के विरुद्ध भय है इसलिये समझा जाता है कि वह भगवान् के वीर्य को नहीं जानता। इस प्रकार श्रीपुरुषोत्तमजी महाराज ने भय को वीर्य के विरुद्ध और द्वेष को यश के विरुद्ध कहा है। (३) यदि भगवान् के यश का ज्ञान हो तो भय नहीं हो सकता, क्योंकि भय किसी के अनुचित व्यवहार से होता है जब भगवद्यश का ज्ञान हो कि भगवान् अनुचित नहीं करेंगे। वह तो उचित ही करते हैं, अन्यथा उनका यश समस्त जगत् में न होता, तब भय कहाँ रह सकता है।

(४) द्वेष तथा लोभ भी, भगवान् की श्री का यदि ज्ञान हो जाय तो नहीं हो सकते हैं। द्वेष स्त्री के कारण होता है, और लोभ धन के कारण होता है, वह स्त्री व धन तो भगवान् के ही हैं, अतः अपने को द्वेष या लोभ करना उचित नहीं। (५) मोह का नाश तो भगवद्धर्म ज्ञान के ज्ञात हो जाने पर तो प्रसिद्ध ही है। (६) मद तो वैराग्य के अभाव से होता है, सर्वथा ही वैराग्यरहित जन मदयुक्त होता है।

अतः शोकादि के उत्पन्न होने से लोग, परस्पर एक को अन्य से मरवाने वाले भी उस भगवान् को नहीं देखते हैं, अन्यथा यदि देख ले तो एक ही मारने वाला ज्ञात हो जाय।

जब कि एक ही आत्मतत्त्व है, तो भगवत्सम्बन्धी शास्त्र में एक का वध्य व अन्य का घातक होना कैसे सह्य हो सकता है ? इस शङ्का पर कहा है कि '**भावैर्भाव**'मित्यादि। भाव शब्द 'भवन्तीतिभावाः' इस निरुक्ति से धर्म का वाचक है। बाधक धर्मों से बाध्य धर्मों को ही हटाया जाता है, धर्म तो नहीं हटाया जाता है, क्योंकि जो होते हैं वे ही नष्ट भी होते हैं, जैसे एक वस्त्र पर शुक्ल, पीत आदि धर्मरूप वर्ण रङ्ग के द्रव्य के सम्बन्ध से उत्पन्न होते हैं व विलीन भी होते हैं, परन्तु जो रङ्ग या धर्म अधिक बलवान् होता है, वह अन्य धर्मों को दबा देता है, अतः जिसका नाश करने को ही भगवान् जिस भाव में निविष्ट होते हैं, वह भगवन्निविष्ट भाव उस नाशनीय भाव को दूर कर देता है, अतः आप लोग तो मारण में निमित्तमात्र ही है, कर्त्ता नहीं है, कहीं पर भी उपालम्भ या स्तुति बुराई या भलाई निमित्त या साधन भी नहीं की जाती, सर्वकर्ता भगवान् के न देखने में, कारण तो लोगों का पृथग्दर्शी होना है, अतः कहा है '**पृथग्दृशः**' करण या साधन में सम्बन्ध वाला कर्त्ता ही यदि उस कारण या साधन से पृथक् समझा जाता है, अथवा वह साधन कर्त्ता से पृथक् समझा जाता है, तो ही अन्य को अन्य मारता है, ऐसी भेदबुद्धि होती है। परन्तु जो सर्वत्र निविष्ट भगवान् को जान लेता है, उसकी ऐसी बुद्धि नहीं होती है। अतः मेरे पुत्र भी भगवान्ने ही मरवाये हैं, और तुझे भी उन्हें मरवाना है, अतः शोक करना उचित नहीं, यह श्रीवसुदेव का आशय है ॥ २७ ॥

श्रीमदाचार्यचरण इस श्लोक के अवतरण में एवं **मायाकृतं सकार्यं निरूप्योपसंहरति**—इस प्रकार माया के किये हुए ज्ञापन, व ज्ञापन का कार्य, कंसानुतापादि सब कुछ कह कर '**कंस एवं**' **प्रसन्नाभ्यां** श्लोक से श्रीशुकाचार्य महाराज इस प्रसङ्ग का उपसंहार करते हैं।

इस प्रकार '**प्रसन्नाभ्यां**' वसुदेव द्वारा स्वसिद्धान्त के कथन से देवकीजी और वसुदेवजी दोनों मुझ पर प्रसन्न हैं और मुझे करण मानते हैं नाश कर्त्ता नहीं मानते हैं, ऐसा कंस ने निश्चय किया, ऐसा लक्षित होता है। '**विशुद्धं परिभाषितः**' वसुदेवकृत 'महाराज !' इस सम्बोधन, व कंस के कथन के अनुवाद से देवकी वसुदेव का कंस से कथन विशुद्ध भाव मे है यह लक्षित होता है, दोनों की प्रसन्नता सूचित हुई, एक वसुदेव का ही वचन कहा है, अतः देवकी प्रसन्न न हुई हो, इस शङ्का के निवारणार्थ दोनों का ग्रहण किया है, दोनों की अनुमति प्राप्त कर, वैरशुद्धि न कर वह अपने राजमहल में प्रविष्ट हुआ ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

देवकी सम्यगनुतप्तस्य भ्रातुर्दौरात्म्यं क्षान्त्वा क्षमां कृत्वा रोषं च व्यसृजत् तत्याज। वसुदेवश्च क्षमां कृत्वा भगवन्मायामाहात्म्यानुसन्धानेन प्रहस्य तं कंसमुवाच। तयोर्धैर्यस्याश्चर्यं सूचयति–हेति ॥ २५ ॥ हे महाभागेति सम्बोधनं प्रशंसार्थम्। पाठान्तरे 'महाराज' इति सम्बोधनं मारणस्यादोषज्ञापनार्थम्। यथा त्वं वदसि तदेतदेवमेव तथैव। तदेव स्पष्टयति–देहिनामात्माज्ञानप्रभवैव देहादावहंधीः। यतोऽहंधियः स्वपरेति भिदा भेददृष्टिर्भवति ॥ २६ ॥ भेददर्शने दोषमाह– शोकेति। पृथग्दृशः देवाद्यात्माध्यासेन भेददर्शिनः शोकादिभिरन्विताः युक्ताः सन्तो भावैर्देवदैत्यादिभिर्निमित्तभूतैर्भावं देवदैत्यादिरूपं मिथः परस्परं घ्नन्तमपि कालरूपं परमेश्वरं न पश्यन्ति, किन्त्वात्मानमेव तत्र कारणं मन्यन्ते, तेन च नरकादिदुःखमनुभवन्तीत्याशयः। शोके इष्टविघाते सन्तापः। हर्षः इष्टप्राप्तौ मोदः। इष्टविघातकाद्भयं तत्र द्वेषश्च। लोभ इष्टलाभेऽपि तदाधिक्येच्छा। मोहः कर्तव्याकर्तव्याननुसन्धानम्। मदो विद्याधनाभिजनादिभिः गर्वः। एते सर्वे दोषा भेददर्शनादेव भवन्ति, नान्यथा ॥ २७ ॥ प्रसन्नाभ्यां देवकीवसुदेवाभ्यामेवं विशुद्धं निष्कपटं यथा स्यात्तथा प्रतिभाषितोऽनुज्ञातश्च कंसो गृहमविशत् ॥ २८ ॥

अन्वितार्थप्रकाशिका

भ्रातुरिति ॥ देवकी सम्यगनुतप्तस्य भ्रातुर्दौरात्म्यं क्षान्त्वा क्षमां कृत्वा रोषं च व्यसृजत् तत्याज। वसुदेवश्च क्षमां कृत्वा ह स्फुटं भगवन्मायामाहात्म्यस्मरणेन प्रहस्य तं कंसमुवाच। क्षान्तरोषेति पाठे क्षान्तः रोषो यया सा देवकी व्यसृजत् शोकमिति शेषः। यद्वा बाष्पमिति शेषः। "कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः" इतिवक्ष्यमाणत्वात्। अयं च पाठष्टीकाकृतामसम्मत इति तोषणी ॥ २५ ॥ एवमिति ॥ हे महाभाग ! नञ्प्रश्लेषाद् दुर्भाग्येति वास्तवोऽर्थः। यथा त्वं वदसि तदेतत् एवमेव देहिनां देहादावात्मधीः अज्ञानप्रभवा एव। यतः अहंधियः स्वः पर इति भिदा भेददृष्टिर्भवति। स्वपरेति सुप्सुपेति समासः ॥ २६ ॥ शोकेति ॥ पृथग्दृशः भेददर्शिनो जना शोकहर्षादिभिरन्विताः सन्तः भावैर्देवदैत्यादिभिर्निमित्तभूतैर्भावं देवदैत्यादिरूपं मिथः परस्परं घ्नन्तमपि कालरूपं परमेश्वरं न पश्यन्ति किंत्वहमेव ह हन्ता हतो वेत्यादि मन्यन्ते इत्यर्थः ॥ २७ ॥ कंस इति ॥ एवं प्रसन्नाभ्यां देवकीवसुदेवाभ्यां विशुद्धं निष्कपटं यथा स्यात्तथा। विश्रब्धमित्यपि पाठः। प्रतिभाषितोऽनुज्ञातश्च कंसो गृहमविशत् ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भ्रातुरिति। इत्थं, भ्रातुः कंसस्य, समनुतप्तस्य सतः, देवकी, क्षान्त्वा क्षमां कृत्वा, रोषं, व्यसृजत्। च तथा वसुदेवः चापि, क्षान्त्वा प्रहस्य च, तं कंसं, उवाच ह स्फुटम् ॥ २५ ॥ तदेवाह द्वाभ्याम्। एवमिति। हे महाभाग, त्वं यथा वदसि, एतत् एवं एव, किं मयोक्तं मन्यसे इत्यत्राह। देहिनां, अहंधीः अहं हन्ता एष मया हत इत्येवंरूपा धीः, अज्ञानप्रभवा देहात्मभ्रमजा। यद्वा, अहंधीर्देहात्मधीः अज्ञानप्रभवा आत्मयाथात्म्यानवभासमूला। अहंधियं विशिनष्टि। यतो यस्या अहंधियः सकाशात्, स्वपरेति भिदा शत्रुमित्रमननात्मको भेदः, भवति ॥ २६ ॥ एतदेवोपपादयति। शोकेति। पृथग् आत्मनः सकाशात् पृथग्भूते देहे दृक् आत्माभिमानो येषां तथाभूताः, अत एव, शोकश्च हर्षश्च भयं च द्वेषश्च लोभश्च मोहश्च मदश्च तैरन्विताः जनाः, भावैरचेतनैः खड्गादिभिः, भावमचित्पदार्थं, मिथः परस्परं, घ्नन्तं घातयन्तं, अन्तर्भावितण्यर्थोऽत्र हन्तिः। ईश्वरं, न पश्यन्ति। किं तु स्वपरभेदं पश्यन्तीति भावः। तत्तत्कर्मानुगुणप्रवृत्तस्येश्वरस्यैव जन्ममरणादिहेतुत्वान्न केनाप्यपराद्धमिति भावः ॥ २७ ॥ कंस इति। एवं, विश्रब्धं विश्वासयुक्तं यथा तथा, प्रतिभाषितः कंसः, प्रसन्नाभ्यां देवकीवसुदेवाभ्यां, अनुज्ञातः सन्, गृहम् अविशत् स्वभवने प्राविशत् ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

भ्रातुरितिः १०.४.२५.

यद्यन्तरे निजसुखस्थितिरक्षताऽस्ति तर्हि द्विषत्स्वपि समन्तुषु दुर्जनेषु।
कुर्यादनुग्रहमरोषतयेति नीतिनैपुण्यधीः स तमुवाच विहस्य युक्तम् ॥ १५ ॥
माया-कालनिशाविशालविषयध्वान्तैकविध्वंसकः प्रारब्धादुदितो यदेन्द्रियचरो दीपो विवेकात्मकः।
रक्ष्योऽसावतियत्नतः सुमतिना दुःसङ्गतिस्पर्शनात् नैवं चेदचिरादनिष्टजनकः स्यात्तत्र कंसे स्फुटम् ॥ १६ ॥
असन्मार्गात् सद्भिः कथमपि परावर्तितमतिः, विवेकं प्राप्तोऽपि क्षणमथ खलः पूर्वचरितम्।
चरत्येवाऽऽचारं पुनरपि यदम्बावचनतः स्तुवन् कंसो योऽसौ पुनरपि पुरेवाकरुणधीः ॥ १७ ॥
यन्नामाकृतमन्तुमप्यरिजनो गोविप्रभक्तादिसल्लोकं निन्दति यश्च पीडयति वा तत्रैकहेतुर्भवान्।
ब्रूषे यद्यहमस्मि तत्कथमिति श्रीनाथ नाश्रावि किं मन्त्रो दैत्यनृशंस कंसरचितस्त्वद्वैरमात्रार्थकः ॥ १८ ॥

कृष्णप्रिया

भैया को अधिक पश्चात्ताप युक्त देखकर श्री देवकीजी ने उसके रोष को क्षमा कर दिया और अपने रोष को छोड़ दिया, वैसे ही वसुदेवजी एवं अन्य लोगों ने भी किया। आश्चर्य की बात तो यह है कि पुनः श्री वसुदेवजी कंस राजा से हँसकर बोले ॥ २५ ॥ अब श्री वसुदेवजी कहते हैं कि हे महाराज कंस, जैसा तुम कहते हो वैसा ही है क्योंकि प्राणियों को देह आदि में अहंबुद्धि अज्ञान से ही होती है और उसीसे यह अपना है यह दूसरे का है ऐसी भेददृष्टि होती है ॥ २६ ॥ श्री वसुदेवजी कहते हैं कि जो लोग शोक, हर्ष, भय, द्वेष, लोभ, मोह एवं मद से युक्त हैं वे परस्पर में अर्थात् एक धर्म में प्रविष्ट होकर दूसरे धर्म को नष्ट कराते हुए भगवान् को नहीं देखते। कारण यह है कि वे भगवान् में इन्द्रियों का सम्बन्ध नहीं मानते। वे मानते हैं कि इन्द्रियवाला जीव ही कर्त्ता हो सकता है निरिन्द्रिय भगवान् कर्ता नहीं हो सकता ॥ २७ ॥ श्री शुकाचार्यचरण कहते हैं कि हे परीक्षित् ! इस प्रकार अपने सिद्धान्त के कहने से प्रसन्न दिखाई देने वाले वसुदेवजी ने जब विशुद्ध भाव से कंस को कहा तो कंस उनकी अनुमति लेकर अपने महल में चला गया ॥ २८ ॥

तस्यां रात्र्यां व्यतीतायां कंस आहूय मन्त्रिणः । तेभ्य आचष्ट तत् सर्वं यदुक्तं योगनिद्रया ॥ २९ ॥
आकर्ण्य [1]भर्तुर्गदितं तमूचुर्देवशत्रवः । देवान् प्रति कृतामर्षा दैतेया नातिकोविदाः ॥ ३० ॥

[2]दैत्या ऊचुः

एवं चेत्तर्हि भोजेन्द्र पुरग्रामव्रजादिषु । अनिर्दशान् निर्दशांश्च हनिष्यामोऽद्य वै शिशून् ॥ ३१ ॥
किमुद्यमैः करिष्यन्ति देवाः समरभीरवः । नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—तस्यां रात्र्यां व्यतीतायां कंसः मंत्रिणः आहूय योगनिद्रया यद् उक्तं तत् सर्वम् तेभ्यः आचष्ट ॥ २९ ॥ भर्तृगदितम् आकर्ण्य देवान् प्रति कृतामर्षाः न अतिकोविदाः देवशत्रवः दैतेयाः तम् ऊचुः ॥ ३० ॥ राजेन्द्र एवं चेत् तर्हि पुरग्रामव्रजादिषु अनिर्दशान् च निर्दशान् शिशून् वै अद्य हनिष्यामः ॥ ३१ ॥ नित्यम् तव ज्याघोषैः उद्विग्नमनसः समरभीरवः देवाः उद्यमैः किं करिष्यन्ति ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नातिकोविदा दृष्टमात्रमतयो न दीर्घदर्शनाः ॥ ३० ॥ न निर्गतानि दश दिनानि येषां तानन्यांश्च ॥ ३१–३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तेभ्यो मंत्रिभ्यः । यदुक्तम् । 'किं मयाहतया' इत्यादि ॥ २९ ॥ दृष्टमात्रमतयो धर्माधर्मविचारहीनाः ॥ ३० ॥ राजेंद्रेति । इंद्रतुल्यस्य सर्वे राजानोऽर्चका एव न कोप्युद्यतो भविष्यति । 'भोजेंद्र' इति पाठे । यादवाः सर्वे त्वत्तो भीता एव तेष्वपि न कोपि वारयितुं समर्थ इति भावः । आदिपदेन खेटखर्वटादयो ज्ञेयाः ॥ ३१ ॥ ज्याघोषैर्गुणशब्दैः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तज्ज्ञानमपि भगवद्विमुखानां तेषां हृदि सुस्थिरं न स्यादिति दर्शयन् कंसस्य स्वोक्तज्ञानविरुद्धव्यवहारमाह, तस्यामित्यादिना, यावत्समाप्ति । मन्त्रिणः प्रलम्बकेशिचाणूरादीन् ॥ २९ ॥ स्वभावत एव देवानां शत्रवः पुनः कृतामर्षाः सन्तः ॥ ३० ॥ हे राजेन्द्रेति सम्बोधनमिन्द्रस्पर्द्धया भोजेन्द्रेति पाठोऽपि तथैव वै एव अद्यैव ॥ ३१ ॥ ननु, तर्हि देवा युद्धार्थमुद्यमं करिष्यन्ति तत्राहुः—किमिति । ज्याघोषैः पूर्वं युद्धे कृतैः सदा लीलायामपि वा ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्तज्ज्ञानमपि दुष्टानां तेषां हृदि सुस्थिरं न स्यादिति दर्शयन् कंसस्य स्वोक्तज्ञानविरुद्धव्यवहारमाह तस्यामित्यादिना यावत् समाप्ति मन्त्रिणः प्रलम्बकेशिचाणुरादीन् ॥ २९ ॥ स्वभावत एव देवानां शत्रवः पुनः कृतक्रोधाः सन्तः ॥ ३० ॥ हे राजेन्द्रेति त्वया निर्जिताः सर्वे राजानोऽप्यस्माकं साहाय्यं करिष्यन्तीति भावः । भोजेन्द्रेति पाठेऽपि तथैवार्थः, श्लेषेण भवान् विषयभोगं कुर्वन् निश्चिन्तस्तिष्ठत्विति, वै एव, अद्यैव ॥ ३१ ॥ ननु तर्हि देवैर्युद्धार्थमुद्योगः कार्यः ? तत्राहुः—किमिति; ज्याघोषैः पूर्वं युद्धे कृतैरधुना वा लीलयान्यार्थं क्रियमाणैरपि नित्यमुद्विग्नमनसः पलायनपरा विमुखतया धावन्त इत्यर्थः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अनिर्दशान् दशाहाऽनतीतान् ॥ ३१–४१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ प्रभाते मन्त्रिणः आहूय कंसस्तेभ्यो मन्त्रिभ्यः योगमायोक्तमाह ॥ २९ ॥ ततः कंसोक्तमाकर्ण्य ते देवानां शत्रवः दैतेयाः मन्त्रिणः देवान् प्रत्युद्दिश्य कृतोऽमर्षो यैस्तथाभूता नातिकोविदाः कार्याकार्यविवेकरहितास्तं कंसमूचुः ॥ ३० ॥ तदेवाह—एवमित्यादिनैवंदुर्मन्त्रिभिरित्यतः प्राक्तनेन । एवं चेत् माययैवमुक्तं चेत्तर्हि हे भोजेन्द्र ! पुरादिष्वनिर्दशाननतिक्रान्तदशदिनान्निर्दशांश्च शिशूनद्य हनिष्यामः ॥ ३१ ॥ एवं चेत्समरभीरवो देवाः किमस्मानुद्यमैः प्रयत्नैः करिष्यन्ति न किञ्चिदपि, किञ्च, ते तव धनुषो ज्याघोषैरेव नित्यमुद्विग्नं भीतं मनो येषां तथाभूताः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अनिर्दशान् अनिर्गतानि दशाहानियैस्ते तथा ताननतिक्रान्तदशाहानित्यर्थः । निर्दशानतिक्रान्तदशाहान् ॥ ३१–३२ ॥

---

[1] भर्तुर्गदितं–श्रीधर. वंशी. शुक. गिरि. ; भर्तृगदितं–भक्त. । [2] अन्यप्रत्यां दैत्या ऊचुः पाठो न दृश्यते ।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नातिकोविदाः न कोविदा इत्यर्थः। अतीत्यनधिकारार्थम् ॥ ३० ॥ अनिर्दशान् दशदिनेभ्यो न निर्गतान् निर्गतांश्च ॥ ३१–३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रात्र्यां विशेषत आसुरो भावः स्वकार्यं प्रतिवर्द्धते तं भावमधिगम्य तस्यां व्यतीतायां प्रभाते योगनिद्रया यदुक्तं शत्रुजन्मादिकं तत्तस्य सर्वं प्रतिकारं तेभ्य आचष्ट इत्यन्वयः ॥ २९ ॥ प्रथमतस्तु देवशात्रवः पुनश्च भर्तुर्गदितमाकर्ण्य देवान् प्रति कृतामर्षा जाताः तथाभूताः तं भर्तारमूचुः। ननु, बहूनामेकस्मिन् कार्ये प्रायो मतिः शुभैवोत्पद्यतेऽतः शुभमेव किञ्चिदुक्तवन्तः किन्नेत्याह—नातिकोविदा इति। आत्मविनाशायैव दुर्मन्त्रं प्रत्युक्तवन्त इति भावः ॥ ३० ॥ यत्र क्वचन तव शत्रुर्जातस्तर्हि देशतः कालतश्च तन्निश्चयाभावात्सर्वत्र पुरादिषु न निर्गतानि दशाहानि येषां तान् निर्दशांश्च स्वकुलेतरान् सर्वज्ञातिषूत्पन्नान् सामान्यतः शिशून् हनिष्यामः मारयिष्यामः ॥ ३१ ॥ तमप्यनर्थे प्रवर्तयितुं प्रोत्साहयन्ति—किमिति चतुर्भिः ॥ ३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

नातिकोविदा मन्त्रेष्वकुशलाः अतीत्यनधिकार्थः ॥ ३० ॥ अनिर्दशान् दशदिवसेभ्यो न निर्गतान्निर्गतांश्च ॥ ३१ ॥ ननु देवैः कृतोऽयं मद्वधोद्यमस्तस्य कः प्रतीकारस्तत्राह किमुद्यमैरिति ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इतो गत उत्तरत्र चकार किं कंस इत्यतः शंसति॥ तस्यामित्यादिना। योगनिद्रया भगवद्भगिन्या यदुक्तं तत्सर्वं मन्त्रिभ्योऽमात्येभ्य आचष्ट ॥ २९ ॥ भर्तुर्गदितं वचनं देवसत्रवः प्राग्रारभ्य देवान्प्रति कृतामर्षा नातिकोविदा इति न समासोऽस्त्यकोविदा इति तदर्थः। तं कंसं प्रत्यूचुः ॥३०॥ अनिर्दशान्निर्गता दशभ्योऽहोभ्य इति निर्दशास्तेनेत्यनिर्दशाः। सङ्ख्यायास्तत्पुरुषस्य वाच्यत इति वार्तिकाड्डच्। तानेवं निर्दशाननतिक्रान्तदशाहानतिक्रान्तदशाहांश्चेत्यर्थः। मृत्युरन्यत्र जात इति मायोक्तेस्त्र्यादिसन्देहावस्कन्दनाद्बालकानित्युक्तिरिति ज्ञेयम् ॥ ३१ ॥ सर्वान्सुपर्वाण आशङ्क्य तदसामर्थ्यं स्फोरयित्वा सर्वं सहाधिपं स्वस्वामिनं प्रोत्साहयन्ति॥ किमिति। समरभीरवोऽमरा उद्यमैः स्वकृतैः किं करिष्यन्ति। धनुषो ज्याघोषैर्मौर्वीरवैरुद्विग्नं मनो येषां ते तथा येषां समरे भीरवो भयध्वनिस्ते किं करिष्यन्तीति वा ॥ ३२ ॥

श्रीसुबोधिनी

एवं मायाकार्यं भगवत्प्रेरणया कृतं निरूप्य स्वतन्त्रतया तत्कृतं निरूपयितुमाह तस्यामिति यावदध्यायपरिसमाप्ति, यदीदं न कुर्यादवध्य एव स्यात्, तच्च देवानामनिष्टमिति देवतामाया तत्कार्यं कृतवती, असुराणां वा भगवद्रूपा तेषां मुक्त्यर्थं तान् स्वधर्मनिष्ठान् कृत्वा सर्वशास्त्रविरोधिमोक्षं सम्पादयतीति तथाकथा, राजधर्मो हि अनुल्लङ्घनीया यथा पूर्वमविचारेण कृतं तदन्यथा जातमतः परं विचारेण कर्तव्यमिति विचार्य मन्त्रिण आहूय विचारार्थं पूर्ववृत्तान्तमुक्तवानित्याह तस्यामिति, ज्ञानस्य जातत्वात् कार्यस्य विलम्बसहिष्णुत्वाच्च तस्यां रात्र्यां व्यतीतायामित्युक्तं, मन्त्रिणोपि तामसस्य तामसा एवेति तन्नाम्ना ज्ञापितं, देववाक्यादौ विनयो यः कृतः स तु नोक्तः, योगनिद्रया यदुक्तं तत्सर्वमाचष्ट यथा कंसो विवेकरहितस्तथा तन्मन्त्रिणोपि ॥ २९ ॥

तेषां दौरात्म्यमाहाकर्ण्येति, भर्तुः कंसस्य गदितमाकर्ण्य श्रुत्वा विचार्य च तं प्रत्यूचुः, एतेषां कंसरक्षायां न कापि बुद्धिः किन्तु देवद्वेषकरणेवसरो जात इति हृष्टा इत्याह देवशत्रव इति ॥ ३० ॥

प्रथमतः स्वबुद्ध्या निश्चितं प्रतीकारमाहुरेवञ्चेदिति, यदि कश्चिद् बालक एव जातः स तु मासमध्ये जातो भविष्यतीत्यनिश्चयेपि सर्वानेव बालकान् मारयिष्यामः, ते बालकाः पुरस्था ग्रामस्था व्रजस्था वा भवन्तु, तरतमभावनिरूपणार्थं त्रयाणां ग्रहणं, अस्माकं तु न विलम्बः, तदाहाद्येति, राजेन्द्रेतिसम्बोधनमाज्ञापनार्थं, न निर्गतानि दशाहानि येषां तेनिर्दशा अतिबालका निर्दशास्त्वतिक्रान्तदशाहाः उभयानपि विशेषाकारेण सर्वे एव वयं हनिष्यामः, अत्र सन्देहो नास्तीति वैशब्दः, दैत्यगृहेष्वपि स्वसम्बन्धिष्वपि जाता हन्तव्या इति, राज्ञा चेद् भगिनीपुत्रा मारिता अन्यैरपि स्वकीया अपि मारणीया इति तैर्ज्ञातं, अन्यथा प्रभुर्न वदेदिति ॥ ३१ ॥

एवं स्वकृत्यमुक्त्वा तस्या भयाभावार्थं तं प्रोत्साहयन्ति किमुद्यमैरितिषड्भिः, तथा भगवतः षड् गुणास्तथा तव षड् गुणाः,

सामर्थ्यं च जयश्चैव दीनत्वं च दया यथा। शत्रूणामल्पता चैव राजनीतिस्तथैव च ॥ १ ॥

यदि बालका हन्यन्तेन्यमुपायं करिष्यन्ति देवा इत्याशङ्क्याहुः किमुद्यमैरिति, उद्यममात्रं तेषां न तु क्रियासामर्थ्यं, यतः समरे भीरवः, सङ्ग्रामं दृष्ट्वैव बिभ्यति, तथा भये तेषां निमित्तमाह नित्यमुद्विग्नमनस इति, अयं हि दिग्विजये सर्वानेव मारि-

तवान्, इन्द्रोपि भीतः पलायितः, ब्रह्मादयोपि लीनाः, धृत्वा च देवान् यातनां प्रापयति, अतो यद्यन्यार्थमपि धनुष्टङ्कारं कुर्यात् तथापि देवा उद्विग्नमनसो भवन्तीति नित्यमुद्विग्नमनसः, तवेति सम्मत्यर्थं निरूपितम् ॥ ३२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

तस्यामित्यत्र तस्याः स्वतन्त्रतया कार्यकरणस्य किं प्रयोजनमित्याकाङ्क्षायामाहुर्यदीत्यादि, ज्ञानस्येति, स्वशत्रूत्पत्तिज्ञानस्य ॥ २९ ॥ एवं चेदित्यत्रान्यैरपीति, त्वदीयैरितिशेषः, अन्यथेत्यादि, भगिनीपुत्रमारणाभावे प्रभू राजा न वदेत्, आज्ञामितिशेषः, अयमर्थः, स्वयं चेद् भगिनीपुत्रमारणं न कृतं न स्यात् तदा स्वकीया अशेषां मदुक्तिं न मंस्यन्त इति प्रभुरपि न वदेत्, अधर्मरूपत्वादेवमाज्ञायाः, स्वयं तथाकरणे तु 'यथा राजा तथा प्रजे'तिन्यायादाज्ञादाने निःशङ्कता स्यादिति तथा ॥ ३१ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तस्यामित्यत्र नन्वसुरा बहवस्तेषां सर्वेषामैकमत्येन दौरात्म्यरूपस्वधर्मनिष्ठता कथमित्यत आहू राजधर्मा ह्योति, राजा यान् धर्मानास्थितस्ते धर्माः सर्वेषामनुल्लङ्घनीया भवन्त्यतः कंसस्य दुरात्मत्वात् सर्वेपि दुरात्मान इत्यर्थः ॥ २९ ॥ आकर्ण्येत्यत्र नातिकोविदा इत्यस्यार्थो यथा कंस इत्यादिनाभास उक्तः, तृतीयचरणस्यार्थो देवद्वेषकरण इत्यनेनानूदितः ॥ ३० ॥

॥ इति श्रीचतुर्थाध्यायलेखः ॥

बुभुत्सुबोधिका

तस्यामित्यत्र भगवत्प्रेरणयेति 'गच्छ देवि व्रजं भद्र' इत्यत्र लोटा भगवत्प्रेरणा प्रतीयते तया । स्वतन्त्रतयेति भगवत्प्रेरणां विनापि स्वातन्त्र्येण । ननु तस्याः स्वतन्त्रतया कार्यकरणस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः यदीति । अवध्य एवेति कंसोऽवध्य एव । मृत्यौ निरभिमानत्वात् । एवकारोऽक्लिष्टकर्मत्वाद् भगवतः । एवं च मायाया अस्वतन्त्रीत्वेपि भगवदिच्छया स्वातन्त्र्यमुक्तं तत्तत्पुराणसिद्धम् । दैवं देवता मायेति तिस्रः योगमायापदेन मूले व्यावर्त्यन्त इत्याहुः न च देवानामिति । अनिष्टमितीति इति हेतोः दैवं माया न तत्कार्यं क्षतवत् किन्तु देवतामायेत्यादिः । 'न चे'त्यन्वेति । सर्वशास्त्रेति अन्धं तमः । सम्पादयतेति 'न चे'त्यत्राप्यन्वेति । तथा कथेति योगमायात्वेन योगमायाकथनम् । राजधर्मा इति कनिष्ठत्वेन राजधर्मादरः सूचितः । पूर्वमिति देवक्युद्वाहे । कृतमिति देवकीहननकम् । अन्यथेति शत्रुहननं न जातं प्रत्युतास्मद्धननकं प्राप्तमित्यन्यथा । पूर्वेति भगवच्छक्तियोगमायोक्तम् । ज्ञानस्येति आत्मज्ञानस्य स्वशत्रूत्पत्तिज्ञानस्येति वार्थः । कार्यस्येति यत्र कुत्र जातहननस्य । विलम्बसहिष्णुत्वादिति पाठः । विलम्बासहिष्णुत्वादित्यपि पाठः । तन्नाम्नेति कंसपदस्य पुनरुपादानप्रयोजनम् । स तु नोक्त इति 'यदुक्तं योगमायये'त्यस्य कर्मतया 'चष्टे'त्यत्रान्वयादिति भावः । योगनिद्रापि योगमाया नाम तदाहुः योगनिद्रयेति । आचष्टेति चक्षिङ् व्यक्तवाचि । अदादिः आ० सेट् । लङ् ॥ २९ ॥

आकर्ण्य भर्त्रित्यत्र तेषामिति 'यथे'त्यादिनोक्तानां नातिकोविदानां दैतेयानाम् । अतिकोविदास्तु 'विवेकस्तु हरिः सर्वं निजेच्छातः करिष्यती'त्याचार्योक्तविवेकवन्तः । देवद्वेषेत्यादिना 'देवान् प्रति कृतामर्षा' इत्यस्यार्थस्यानुवादः । अतः सुबोधिन्यामुत्तरार्धं न व्याख्यातम् ॥ ३० ॥

एवं चेदित्यत्र भविष्यतीति इतिर्निश्चयसमाप्तौ । तरतमेति पॄ पालनपूरणयोः । पचाद्यचि गुणः । पालयति विष्णुः सात्त्विक इति पुरस्थाः सात्त्विकाः । पुर अग्रगतौ वा । तु० प० से० । ग्रामस्थास्तामसाः । ग्रस अदने । ग्रसेरा चेति मन् आत्वम् । व्रजस्था राजसाः व्रजतीति व्रज इति कर्मप्रधानत्वात् । अतिक्रान्तेति अतिक्रान्तानि दशाहानि यैरिति विग्रहः । समासान्तः । विशेषाकारेण स्त्रीपुं विशेषाकारेणेत्यर्थः । दैत्यग्रहेष्विति उग्रग्रहेषु दैत्यसम्बन्धिष्वपि । हन्तव्या इति निश्चयाकारः । अन्यैरपीति त्वदीयैरिति ज्ञेयम् । न वदेदिति यदुक्तं योगमायया तन्न वदेन् मन्त्रिभ्य इत्यर्थः ॥ ३१ ॥

किमुद्यमैरित्यत्र स्वकृत्यमिति दैत्यकृत्यम् । तस्येति कंसस्य । तं कंसम् । तवेति भयात् प्राप्तजीवन्मुक्तिकस्य । सामर्थ्यं चेति राज्ञो जीवन्मुक्तस्यैश्वर्यादिषड्गुणा अनाविष्टस्यैते । दीनत्वं यद्यपि तृतीयश्लोके भीतेषु तथापि 'यथा राजा तथा प्रजे'तिवाक्यात् कंसे राज्ञि कारिकोक्तं सामर्थ्यमुक्तम् ॥ ३२ ॥

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि 'एवं मायाकार्यं भगवत्प्रेरणया निरूप्य स्वतंत्रतया निरूपयितुमाह तस्यामिति यावदध्यायपरिसमाप्ति' इस प्रकार भगवत्प्रेरणा से किया गया माया का कार्य बतलाया, अब स्वतन्त्र रूप से मायाकृत कार्य का कथन 'तस्यां राव्यां' २९ श्लोक से लेकर ४८ श्लोक पर्यन्त अध्याय समाप्ति तक करते हैं ।

यदि माया स्वतन्त्रता से कार्य न करती, तो कंस का बध नहीं होता वह अवध्य ही रहता, वह देवताओं को अभीष्ट नहीं था। अतः माया भी देवता है, उसने देवताओं की अभीष्ट सिद्धि के लिये स्वतन्त्र रूप से कार्य किया। अथवा माया असुरों को भगवद्रूप है, असुर माया के उपासक होते हैं, अतः माया ने असुरों की असुरोचित अन्धं तमः प्रवेश रूप मुक्ति करने को उन्हें असुर धर्म निष्ठ करके सर्वशास्त्र विरोधि असुर मोक्ष किया है, अतः उस प्रकार की कथा कही है।

राजा के धर्मों का उल्लंघन नहीं किया जाता है, मन्त्रियों से परामर्श राजधर्म है, पूर्व में तो कंस ने बिना ही कुछ विचार के कर डाला वह अन्याय ही हुआ, अब आगे विचारपूर्वक करना उचित है, यह सोचकर मन्त्रियों को बुलाकर विचारार्थ पूर्व वृत्तान्त उनसे कहा।

शत्रु के उत्पन्न होने का ज्ञान हो चुका था, जो कार्य करना है वह कुछ विलम्ब की अपेक्षा भी रखता है, अतः कहा है कि **'तस्यां रात्र्यां व्यतीतायां'** उस रात्रि के बीत जाने पर मंत्रियों को बुलवाया, उस तामस पुष्ट कंस के मन्त्री भी कंस जैसे तामस ही थे, यह कंस नाम से सूचित किया है। कंस ने देवकी आदि के विषय में जो विनय किया था, वह तो कुछ नहीं कहा, योगनिद्रा ने जो कहा वो सब उसने कह दिया, जैसे कंस स्वयं विवेकहीन था वैसे ही उसके मंत्री भी विवेकशून्य ही थे ॥२९॥

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **'तेषां दौरात्म्यमाह'** उन मंत्रियों की दुष्टता **'आकर्ण्य भर्तृगदितं'** श्लोक से कही गई है कि राजा कंस के वह मन्त्री अपने भर्त्ता कंस का वचन सुनकर व समझकर, उस कंस से बोले, इन लोगो की मति कंस की रक्षा के निमित्त थोड़ी भी नहीं है, किन्तु देवताओं से द्वेष करने का अवसर मिल गया। हर्षित हो गये, इस कारण कहा है कि **'देवशत्रवः'** वे तो देवताओं के शत्रु थे ॥ ३० ॥

श्रीमदाचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **'प्रथमतः स्वबुद्ध्या निश्चितं प्रतीकारमाह'** पूर्व हो वह मन्त्री लोग अपनी बुद्धि से निश्चित किये हुए प्रतीकार को **'एवञ्चेत्तर्हि राजेन्द्र'** श्लोक में कहने लगे—अये राजेन्द्र कंस यदि कहीं पर बालक ही हुआ, वह तो एक महीने के अन्दर हुआ होगा, अतः स्थान के निश्चय के अभाव में हम सब ही बालकों को मार देंगे। **'ते बालकाः पुरस्था ग्रामस्था व्रजस्था वा भवन्तु'** वह बालक नगरस्थ हो या ग्रामस्थ हो या घोष आदि में स्थित हों, स्थानों को छोटा बड़ा बतलाने को **'पुरग्रामव्रजादिषु'** पद में पुर-ग्राम व्रज इन तीनों का ग्रहण हुआ है, हमको तो कुछ भी विलम्ब नहीं। **'अद्य'** आज ही मार देंगे। **'राजेन्द्र'** सम्बोधन कंस की आज्ञा प्राप्त करने को है। जिन बच्चों के दश दिन नहीं निकले उन बहुत ही छोटे, व उससे बड़े दश दिन से ऊपर वालों को दोनों प्रकार के बच्चों को विशेष आकार द्वारा सब ही हम मार डालेंगे। **'वै'** शब्द से सूचित करते हैं कि इसमें संदेह नहीं, दैत्यों के घर भी अपने सम्बन्धियों में भी जो उत्पन्न हुए हों वह सब मार देना चाहिये। उन मन्त्रियों ने यह समझा है कि जब राजा ने बहिन के बच्चे मार दिये तो अन्य हम लोगों को भी अपने सम्बन्धि बच्चों का मारना उचित है, अन्यथा भगिनी पुत्रों के न मारने पर राजा इस प्रकार की अधार्मिक आज्ञा को नहीं कहता ॥ ३१ ॥

आचार्यचरण इस श्लोक के अवतरण में आज्ञा करते हैं कि **'एवं स्वकृत्यमुक्त्वा तस्य भयाभावार्थं तं प्रोत्साहयन्ति किमुद्यमैरिति षड्भिः, यथा भगवतः षड्गुणः तथा तव षड्गुणः सामर्थ्यं च जयश्चैव दीनत्वं च दया तथा। शत्रूणामल्पता चैव राजनीतिस्तथैव च ॥ १ ॥ यदि बालकाः हन्यन्तेऽन्यमुपाय करिष्यन्ति देवा इत्याशंक्याहुः'** इस प्रकार वह मन्त्री लोग अपने कार्य को बतलाकर उस कंस के भय निवारणार्थ **'किमुद्यमैः'** इत्यादि ६ षड् श्लोकों से उसे प्रोत्साहित करते हैं। यहाँ षड् श्लोक संख्या का तात्पर्य यह है कि जैसे भगवान् के ऐश्वर्यादि षड् गुण है, वैसे तेरे भी षड् गुण है। इन ६ श्लोकों से प्रतिपाद्य अर्थों का संग्रह **'सामर्थ्यञ्च'** इत्यादि एक कारिका में किया है, प्रथम श्लोक से कंस का सामर्थ्य, द्वितीय श्लोक से कंस का जय कहा है, तृतीय श्लोक देवताओं की दीनता, चतुर्थ श्लोक से कंस की दया, पञ्चम श्लोक से शत्रुओं की न्यूनता कही गई है। व षष्ठ श्लोक से राजनीति का कथन हुआ है। यदि बालक मारे जाते हैं तो देवता कुछ अन्य उपाय करेंगे, इस आशङ्का पर **'किमुद्यमैः'** श्लोक कहा है कि उन देवताओं का तो केवल उद्यम ही उद्यम है, वह कुछ कर नहीं सकते, क्योंकि उनका प्रयत्न में क्रिया में सामर्थ्य नहीं और वह समर में भीरू हैं, सङ्ग्राम देखकर ही डर जाते हैं, उनके डरने में कारण यह है कि वह नित्य ही उद्विग्न मन रहते हैं। कंस ने दिग्विजय में सबको मारा था, इन्द्र भी डर गया था वह भाग गया, ब्रह्मा आदि भी छिप गये, कंस देवताओं को पकड़कर, उनको तीव्र वेदना पहुंचाता रहता है। **'तव'** शब्द के प्रयोग से कंस की सम्मति सूचित की है, कि यह सब तुम जानते ही हो, यदि अन्य शत्रुओं के लिये भी आप धनुष को टंकराते हैं तो भी देवता घबड़ा जाते हैं ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जातमपि विवेकज्ञानं भगवद्विमुखानां हृदि सुस्थिरं न भवति' इति प्रदर्शयन्नाह-तस्यामिति। पूर्वमविचारेण स्वत एव बालहननादिकं यत् कृतं तत् सर्वमन्यथा जातम्, अतोऽतः परं यत्कर्तव्यं तद्विचारेण कर्तव्यमिति विचारार्थं मन्त्रिण आहूय

यद्योगनिद्रया यदन्यत्र शत्रुजन्मादिकमुक्तं तत् सर्वं तेभ्यः कंस आचष्ट कथितवानित्यन्वयः ॥ २९ ॥ भर्तुः कंसस्य गदितं वचनमाकर्ण्य दैतेयास्तं कंसं प्रत्यूचुरित्यन्वयः। 'भगवदवतारस्य देवपक्षपातित्वात् तच्छ्रवणेन तेषां देवान् प्रत्यमर्ष एव जातः' इत्याह—देवानिति। तत्र हेतुमाह— देवशत्रव इति। 'ननु यदि भगवानेव देवपक्षपाती, तदा तेषामुपायविचारेऽपि किं स्यात्' इत्याशङ्क्याह नातिकोविदा इति। केवलं शुष्कतर्कनिष्ठा, न परमार्थविचारे निपुणा इत्यर्थः ॥ ३० ॥ तदुक्तिमेव दर्शयति-एवमिति त्रयोदशभिः। आज्ञामात्रं त्वया कर्तव्यमिति सूचयन्तः सम्बोधयन्ति-भोजेन्द्रेति। एवं योगनिद्रयोक्तं चेत्तर्हि पुरग्रामादिषु वर्तमानान् अनिर्दशान् अनिर्गतदशदिनान्निर्दशान् निर्गतदशदिनांश्च शिशून् अद्य वै अविलम्बेनैव हनिष्याम इत्यन्वयः। तथाच यदि कश्चिज्जातोऽस्ति तदा बालेष्वेव भविष्यति। एवं च कुत्र क इति निश्चयाभावेऽपि बालेषु सर्वेषु हतेषु सत्सु सोऽपि हत एव स्यादिति भावः ॥ ३१ ॥ नन्वेवं बालवधे आरब्धे क्रुद्धा देवा अपि युद्धाद्युद्यमान् करिष्यन्तीत्याशङ्क्याहुः — किमिति। देवा उद्यमैः किं करिष्यन्ति? तत्र हेतुमाहुः—समरभीरव इति। तत्रापि हेतुमाहुः— तव धनुषो ज्याघोषैर्नित्यमुद्विग्नं भीतं मनो येषां ते ॥ ३२ ॥

अन्वितार्थप्रकाशिका

तस्यामिति। तस्यां रात्र्यां व्यतीतायां सत्यां कंसः मन्त्रिण आहूय यद्योगनिद्रयाऽन्यत्र शत्रुजन्मादिकमुक्तं तत्सर्वं तेभ्य आचष्ट कथितवान् ॥ २९ ॥ आकर्ण्येति। देवानां शत्रवः अत एव देवान् प्रति कृतोऽमर्षो यैस्ते नातिकोविदाः विचारे नैपुण्यरहिताः दृष्टमात्रमतयः दैतेयाः भर्त्तुः कंसस्य गदितं वचनमाकर्ण्य तं कंसं प्रत्यूचुः ॥ ३० ॥ एवं चेदिति। हे भोजेन्द्र! राजेन्द्रेत्यपि पाठः। एवं योगनिद्रयोक्तं चेत्तर्हि पुरग्रामादिषु वर्त्तमानान् अनिर्दशान् अनिर्गतदशदिनान् निर्दशान् निर्गतदशदिनांश्च शिशून् अद्य वै अविलम्बेनैव हनिष्यामः। एवं च बालेषु सर्वेषु हतेषु सत्सु सोऽपि हत एव स्यादिति भावः ॥ ३१ ॥ किमुद्यमैरिति। समरे भीरवः अत एव तव धनुषो ज्याघोषैर्नित्यमुद्विग्नं भीतं मनो येषां ते देवाः उद्यमैः किं करिष्यन्ति ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्यामिति। तस्यां रात्र्यां व्यतीतायां सत्यां, कंसः मन्त्रिणः आहूय, तेभ्यः यत् योगनिद्रया उक्तं, तत् सर्वम्, आचष्ट आह ॥ २९ ॥ आकर्ण्येति। भर्त्तृगदितं स्वभर्त्रा कंसेनोक्तम्, आकर्ण्य, ते देवशत्रवः, दैतेया मन्त्रिणो दैत्याः, देवान् प्रति, देवानुद्दिश्येत्यर्थः। कृतोऽमर्षो यैस्तथाभूताः, नाऽतिकोविदाः कार्याकार्यविवेकरहिताः सन्तः, तं कंसम्, ऊचुः ॥ ३० ॥ तदेवाह त्रयोदशभिः। एवं चेदिति। हे भोजेन्द्र, एवं चेत् माययैवं कथितं चेत्, तर्हि, पुराणि च ग्रामाश्च व्रजाश्च ते आदयो येषां तेषु, अनिर्दशान् अनतिक्रान्तदशदिनान्, निर्दशानतिक्रान्तदशाहांश्चापि, शिशून्, अद्य वै, हनिष्यामः ॥ ३१ ॥ नन्वेवं कृते देवकार्यविघातात्तेऽस्मान् हनिष्यन्तीत्याशङ्कां निराकुर्वन्त आहुः। किमुद्यमैरिति। हे राजन्, समरभीरवः देवाः, उद्यमैः प्रयत्नैः, अस्मान् किं करिष्यन्ति न किंचिदपि कर्त्तुं समर्थाः। किं च तव, धनुषः, ज्याघोषैः एव, नित्यम् उद्विग्नं भीतं मनो येषां तथाभूताः, वर्त्तन्ते ॥३२॥

कृष्णप्रिया

शुकमुनिने कहा महाराज! उस रात्रि के बीत जाने पर कंस ने मन्त्रियों को बुलाया और जो योगमाया ने कहा था वह सब वृत्तान्त कंस ने उनको सुनाया ॥ २९ ॥ अपने स्वामी के वचनों को सुनकर देवताओं के शत्रु तथा देवताओं पर क्रोध करने वाले वे दैत्य जो पूर्णतया नीति में कुशल नहीं थे कंस से बोले ॥ ३० ॥ दैत्यों ने कहा कि हे राजाओं के स्वामी कंस। आज ही हम शहरों में, छोटे गांवों में, व्रज आदि में जन्म लिए हुए बालकों को जो दश दिन के भीतर के हैं अथवा जो दश दिन के ऊपर के हैं मारेंगे ॥ ३१ ॥ दैत्यों ने कहा राजन् देवताओं के केवल उद्योग से क्या हो सकता है। युद्ध में डरने से वे क्रिया तो कर ही नहीं सकते। उन्हें भय होने में कारण यह है कि तुम्हारे धनुष के टङ्कार से वे उद्विग्न रहते हैं ॥ ३२ ॥

अस्यतस्ते शरव्रातैर्हन्यमानाः समन्ततः। जिजीविषव उत्सृज्य पलायनपरा ययुः ॥ ३३ ॥
केचित् प्राञ्जलयो [1]भीता न्यस्तशस्त्रा दिवौकसः। [2]मुक्तकच्छशिखाः केचिद् भीताःस्म इति वादिनः ॥ ३४ ॥
न त्वं विस्मृतशस्त्रास्त्रान् विरथान् [3]भयसन्नतान्। हंस्यन्यासक्तविमुखान् भग्नचापानयुध्यतः ॥ ३५ ॥
किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः। रहोजुषा [4]किं हरिणा शम्भुना वा वनौकसा ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—अस्यतः ते शरव्रातैः समन्ततः हन्यमानाः जिजीविषवः पलायनपराः उत्सृज्य ययुः ॥३३॥ केचित् न्यस्तशस्त्राः मुक्तकच्छशिखाः दिवौकसः भीताः प्राञ्जलयः (स्थिताः) केचित् भीताः स्म इति वादिनः (स्थिताः) ॥ ३४ ॥ त्वम् विस्मृतशास्त्र-

---

[1] दीना—श्रीधर. वंशी जीव.; भीता—वीर. विज. गिरि. भक्त. । [2] मुक्तकच्छशिखाः—विज. । [3] संवृतान्—श्रीधर. गिरि. वंशी.; संनतान्—वीर. विज. भक्त. । [4] वा—इति कस्यचित् ।

अस्त्रान् विरथान् भयसन्नतान् अन्यासक्तविमुखान् भग्नचापान् अयुध्यतः न हंसि ॥ ३५ ॥ असंयुगविकत्थनैः क्षेमशूरैः विबुधैः **किम्** रहोजुषा हरिणा किम् वनौकसा शंभुना वा किम् ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्यतो विध्यतः सतः । उत्सृज्य रणं त्यक्त्वा ॥ ३३-३४ ॥ अन्यासक्तान्विमुखांश्चेति न हंसि न हिनस्सि ॥ ३५ ॥ **क्षेमे** निर्भयदेशे शूरैः संयुगादन्यत्र विकत्थनं प्रौढिवादो येषां तैः । ननु हरेर्बिभेमि शंभोश्चेति । चेत्तत्राहुः । रहोजुषेति सर्व-**स्याप्यंतःप्रविष्टेन** कचिदपि बहिरदृष्टेनेत्यर्थः । पुरुषप्रवृत्तिरहितमिलावृतवनमोको यस्य तेन शंभुना वा ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अस्यत इत्यादिना सूचितः कदाचित्कंसकृतदेवगणजयो ज्ञेयस्तदुक्तं विष्णुपुराणे "किं न दृष्टोऽमरपतिर्मया संयुगमेत्य सः । पृष्ठेनैव वहन्बाणानपगच्छन्न वक्षसा ॥ मद्राष्ट्रे वारिता वृष्टिर्यदा शक्रेण किं तदा । मद्बाणभिन्नैर्जलदैर्नापो मुक्ता यथेप्सिताः" इति **कंसवाक्यम्** ॥ ३३ ॥ मुक्ते कच्छशिखे यैस्ते तथा कच्छं धोतवस्त्रस्य बंधनप्रदेशः । शिखा प्रसिद्धा ॥ ३४ ॥ विमुखा न् अन्यत्र **मुखान्** ॥ ३५ ॥ प्रौढिवादो वृथावाग्वादः । देवेषु विष्णुशिवेंद्रब्रह्माण एव सबलास्तेभ्यो भयमाशंकते—नन्विति । इत्यर्थ इति । **न हि संमुखमनागतस्य** दर्शनागोचरस्य भयं दृष्टचरमिति भावः । यद्वा—यदि बलं स्यात्तर्हि किमिति प्रकटीभू युद्ध्यते किमिति **लोकानामंतःकरणे** प्रविश्य निह्नूयत इति भावः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अस्यत इत्यादिना सूचितः कदाचित् कंसस्य देवगणजयो ज्ञेयः तथा च श्रीविष्णुपुराणे तदुक्तौ "किन्न दृष्टो ऽमरपतिर्मया **संयुगमेत्य** सः । पृष्ठेनैव वहन् बाणानपगच्छन्न वक्षसा । मद्राष्ट्रे वारिता वृष्टिर्यदा शक्रेण किं तदा । मद्बाणभिन्नैर्जलदैर्नापो मुक्ता **यथेप्सिताः**" इति पलायनपरा विमुखतया धावन्त इत्यर्थः ॥ ३३ ॥ **प्रबद्धो** मूर्द्धिन धृतोऽञ्जलिर्यैस्तादृशा बभूवुरिति शेषः । यतो **दीनाः** दुःखिता क्षीणचित्ताः वा भीता इति क्वचित्पाठः ॥ ३४ ॥ अहो तव धर्मपरिपालनेनैव देवा जीवन्तीत्याहुः—न त्वमिति । **धृतान्यपि** भयाकुलतया विस्मृतानि खड्गादीनि शरादीनि च यैस्तान् ॥ ३५ ॥ ननु, तथापि जीवन्तस्तेऽभिमानिनोऽवश्यं विक्रमं **दर्शयिष्यन्ति** तत्राहुः— किमिति सार्द्धकम् । असंयुगं क्षीपार्श्वादि अन्यत्सैः तत्र सर्वस्येत्यादिवास्तवार्थः दैत्यानामभिप्रेतस्तु क्षीरोदादौ **त्वद्भयेन** निह्नूत्य तिष्ठतीत्येव इति ताभ्यां तव रणसङ्घट्टे नागन्तव्यमेवेति भावः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अस्यत इत्यादिना सूचितः कदाचित् कंसस्य देवगणजयोऽपि ज्ञेयः । तथा च श्रीविष्णुपुराणे (५।४।६-७) तदुक्तौ—

'किं न दृष्टोऽमरपतिर्मया संयोगमेत्य सः । पृष्ठेनैव वहन् बाणानपगच्छन्न वक्षसा ॥
मद्राष्ट्रे वारिता वृष्टिर्यदा शक्रेण किं तदा । मद्बाण-भिन्नैर्जलदैर्नापो मुक्ता यथेप्सिताः ॥" इति ॥

प्रकृष्टो मूर्ध्नि निबद्धोऽञ्जलिर्यैस्ते, यतो दीना दुःखिताः क्षीणचित्ता वा; भीता इति पाठेऽप्यर्थः स एव ॥ ३४ ॥ अहो ! **तव धर्म्मप्रतिपालनादेव** देवा जीवन्तीत्याहुः न त्वमिति । विस्मृतानि केवलं धृतान्येव, न तु भयाकुलतया प्रयोक्तुं शक्तानि **शस्त्राणि** खड्गादीन्यस्त्राणि च परादीनि यैस्तान् । विशेषणानामेषां यथोत्तरं वध्यत्वे न्यूनत्वं कैमुतिकन्यायेन व्याख्येयम् ॥ ३५ ॥ **ननु,** तथापि जीवद्भिस्तैरभिमानिभिरवश्यं विक्रमो दर्शयितव्यः, तत्राहुः—किमिति । असंयुगं क्षीपार्श्वादि । अन्यत्तैर्व्याख्यातम् । **यद्वा,** रहोजुषा रहसि निर्ज्जने प्रीतेन; यद्वा, त्वद्भयेन निह्नूत्य निर्ज्जने तिष्ठता, वनौकसा तच्छंकया वने एव सदा तिष्ठतेति ताभ्यां **तव संग्रामसंघट्टे** नागन्तव्यमेवेति भावः । ननु तथापि देवेन्द्रोऽवश्यमागन्ता ? तत्राह—किमिति । ननु ब्रह्मा तत्सहायो भविता ? **तत्राह—ब्रह्मणेति** तपःपरत्वेन युद्धे साहाय्यं नैव कर्त्ता, किंवा विक्रमाभावात्तेन सहायेनापि सता किमित्यर्थः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अस्यतः शरान् क्षिपतस्तव शरसङ्घैर्हन्यमानाः जीवितुमिच्छवः पलायनमेव परं रक्षणोपायो येषां तथाभूताः उत्सृज्य **स्वस्थानानीति** शेषः । समन्ततो ययुः ॥३३॥ **केचिच्च** दिवौकसो देवाः भीतास्त्वत्त इति शेषः । अत एव त्यक्तानि शस्त्राणि यैस्तथाभूताः **केचिच्च मुक्ताः** विश्लथाः कच्छाः शिखाश्च येषां मुक्तकक्ष्यशिखा इति पाठे मुक्तग्रन्थयः शिखा येषां तथाभूताः भीताः स्म इति **वदन्तः** प्राञ्जलयस्तस्थुरिति शेषः ॥ ३४ ॥ अथापि त्वं विस्मृतानि शस्त्राण्यस्त्राणि च यैः मन्त्रशक्त्युपबृंहितान्यस्त्राणीतराणि तु **शस्त्राणि** इति विवेकः । विगता रथा येषां तान् भयात् सन्नतान् कृतप्रणामान्न हंसि न हतवान् शरणागतरक्षकत्वादिति भावः । तथाऽन्या-**सक्तान्** युद्धं विहाय प्रयोजनान्तरासक्तान् पराङ्मुखांश्च भग्नचापान् भग्नधनुष्कानत एवायुद्ध्यतश्च देवान्न हंसि ॥ ३५ ॥ **क्षेमे स्वगृह एव शूरैः** संयोगादितरत्र विकत्थनं प्रागल्भ्यं वचो येषां तैर्विबुधैः किं न किञ्चिदपि कर्तुं शक्यमित्यर्थः । आस्तां तावत्सामान्य-

देवानां वार्ता, देवश्रेष्ठैर्हरिहरेन्द्रहिरण्यगर्भैरपि न किञ्चिदित्याहुः— रह इति। रहोजुषा त्वद्भयान्निर्जनदेशसेविना यद्यपि तैः किञ्चिदपि कर्तुं न शक्यं तथापि सापत्न्याच्छत्रुत्वाद्देवाः नोपेक्षणीया इति मन्यामहे ततस्तन्मूलखनने सपत्नमूलोन्मूलने निमित्तेऽनुव्रतान् भृत्यानस्मान्नियुङ्क्ष्वाज्ञापय ॥ ३६–३७ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अस्यतः क्षिपतः ॥ ३३ ॥ कक्ष्या काञ्ची "कक्ष्या करिवरत्रायां काञ्च्यां गेहे प्रकोष्ठके" इति यादवः ॥३४–३५॥ क्षेमशूरैः असंयुगविकत्थनैः रणादन्यत्र विविधजल्पैः रहोजुषा एकान्तसेविना वेदशिरःप्रतिपाद्येन वा वनौकसा कैलासशिखरकान्तारमन्दिरेण भासामाश्रयेण तेजोमूर्तिनेत्यर्थः। "ओकसी मन्दिराश्रयौ" इति यादवः "वनं भास्यप्सु कानने" इति च ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

रहोजुषा निलीयस्थितेनेति तेषां विवक्षितं टीकायान्तु वास्तवार्थ एव ॥ ३६–३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अस्यतः विध्यतः सतः उत्सृज्य रणं त्यक्त्वा ॥ ३३–३४ ॥ तव धार्मिकत्वमेव तेषां वृद्धौ हेतुरित्याहुः—न त्वमिति, तेनातःपरं धार्मिकत्वं त्यज्यतां धर्मस्य नायं काल इति भावः ॥ ३५ ॥ वयं तु तेभ्यः कदापि न बिभीम इत्याहुः क्षेमे निर्भये देशे शूरैः संयुगादन्यत्रैव विकत्थनं प्रौढिवादो येषां तैः न च हरेः शम्भोर्वा भेतव्यं तयोरपि त्वत्तुल्यबलत्वाभावादित्याहुः रहोजुषेति। यदि बलं स्यात्तदा किमिति प्रकटीभूय न युद्ध्यते किमिति लोकानामन्तःकरणेषु प्रविश्य निह्नूयते इति भावः। वनौकसा पुरुषप्रवेशरहितमिलावृतवनमोको यस्य तेन ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अस्यतः बाणान् क्षिपतस्ते सतः शरव्रातैस्त्वन्निसृष्टैर्बाणसमूहैर्हन्यमानाः समरमुत्सृज्य पलायनपराः सन्तो ययुः अपगच्छेयुः ॥ ३३ ॥ तेषु केचिज्जीवनोपायज्ञाः सर्वत्र तव चक्रभयज्ञाः एवं करिष्यन्तीत्याहुः केचिदिति ॥ ३४ ॥ अन्यत्र कलत्रादावासक्ताश्च ते विमुखाश्च तान् युध्यतोऽपि न हंसि न हिनस्सि ॥ ३५ ॥ ननु, केचिदतिबलास्ते कथमपयास्यन्ति कथन्तरामञ्जलिकर्मादिपरा वा भविष्यन्तीत्यत आहुः—किमिति। क्षेमे निर्भये देशे काले च शूरैः असंयुगे असंग्रामे अजेया वयमित्यादिविकत्थनं येषां तैः विबुधैः किं न किमपि ननु विष्ण्वाद्याः न क्षेमशूराः न चासंयुगविकत्थना अत्राहुः रहोजुषेत्यादि ॥ ३६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अस्यतो विध्यतः सतस्तव उत्सृज्य समरं विहाय कंसोऽतिपराक्रमी दिग्विजयोऽस्य हरिवंशोऽभिहितः ॥ ३३–३४ ॥ तव धार्मिकतैव तेषां वृद्धौ हेतुरित्याहुर्न त्वमिति। अन्यासक्तानन्यैः सह युध्यमानान् विमुखान् युद्धात् पलायमानान् न हंसीति महासुरोऽसीति भावः। इदानीं धार्मिकता हेया नायं तस्याः समय इति भावः ॥ ३५ ॥ वयन्तु देवेभ्यः कदाचिदपि न बिभीम इत्याह किमिति सार्द्धकं क्षेमे निर्भये देशे शूरैः संयुगादन्यत्र स्त्रीपार्श्वे विकत्थनैः स्वश्लाघिभिः, न च हरिहराभ्यां देवदेवाभ्यां भयमस्तीत्याह रहोजुषा हृद्वर्तिना क्वचिदपि बहिरदृष्टेनेत्यर्थः। वनौकसा पुंप्रवेशशून्यमिलावृतवनमोकः स्थानं यस्य तेनेत्यर्थः। बलं चेत्तर्हि बहिर्भूयास्माभिर्युध्यतैवेति भावः ॥ ३६ ॥

श्रीगांधरीनारायणाचार्यकृतो विरोधोद्धारः

रहोजुषेति। अत्र शंभुना वावनौकसेत्यनेन मंत्रिकृतं रुद्रहेलनं कथं श्रुतम्। कंसस्य तद्भक्तत्वात्। रुद्रपरमभक्तजरासंधजामातृत्वात्। विशंसतु पशून्मेध्यान्भूतराजाय मीढुषे इत्याज्ञापनाच्च। अतो विरोधस्तस्मादुच्यते ॥ रहोजुषेति। हरिहेलनं श्रुत्वा कंसः शंकते। न केवलं हरो रहोजुट् किंतु जलस्थोऽपि। महोदधिशयोंऽतक इत्युक्तेः। लोकरूढ्याऽस्माकं जले दृश्यत इति भावः। तत्र मंत्रिभिरनूद्योत्तरितम् ॥ वनौकसेति। यद्यपि जीवनं भुवनं वनमिति कोशाज्जलाश्रयत्वम्। तथापि शंभुनावेत्यनेन शंभुः नौः तरणसाधनं यस्य तेनेति। अनेनास्माकं प्रीतिकृत् शंभुस्तारयेन्नास्मदप्रियमिति सूचितम्। अतो जलस्थस्यापि हरेर्जलतरणे स्वातन्त्र्याभावात्तेन किं भयमस्माकमिति भावः ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अस्यतः क्षिपतः ॥ ३३ ॥ मुक्ताः कक्ष्याः काञ्च्यः शिखाश्च यैस्ते। कक्ष्या करिवरत्रायां काञ्च्यां गेहे प्रकोष्ठक इति यादवः। भीताः स्म इति वादिनः ॥ ३४ ॥ स्वस्वामिधर्मानाहुः। नेति ॥ ३५ ॥ क्षेमशूरैर्निर्भयस्थानगमने शूरैः क्षेमानां स्वपरिचारकाणां पुरस्तेषु वा शूरैः। क्षेमं स्यान्मङ्गले मात्ररक्षणे चारकेऽपि चेति विश्वः। असंयुगविकत्थनैः संयुगादन्यत्र तरुण्यादिपुरो

विकत्थनानि वृथा भाषणानि येषां ते तथा तै रहोजुषा रह एकान्तं जुषत इति रहोजुट् तेन हरिणा विष्णुना किम्। अन्तः समुद्रं शेते भीत इति तेन रुष्टेन तुष्टेन न किञ्चन भविष्यतीति भावः। वनोकसा कैलासवासिना शम्भुना रुद्रेण। इलावर्ते पुंमात्रगमन- शून्यवनौकसा॥ ३६॥

श्रीसुबोधिनी

धनुष्टङ्कारमात्रेणैवोद्वेग। पूर्ववृत्तान्तं हेतुत्वेनाहास्यत इति, **अस्यतः** शरान् क्षिपतस्ते सतः सम्मुखमनागता अपि तैः क्षिप्तैरेव **शरव्रातैः** सर्वतो हन्यमानाः सञ्छिन्नभिन्नसर्वाङ्गा **जिजीविषवो** भूत्वा धर्मं सङ्ग्रामं चोत्सृज्य **पलायनपराः** सन्तो **ययुः**, देशस्याविवक्षितत्वाद् यत्र क्वापि, ये तु दूरस्थास्ते पलायिताः॥ ३३॥

येपि निकटस्थास्तेपि जिजीविषवो भूत्वा पलायनासम्भवादुपायान्तरं कृतवन्त इत्याहुः **केचिदिति**, **प्राञ्जलय**, स्तोतुमिव प्रवृत्तानां कायिकव्यवस्था प्रदर्शिता, **भीता** इत्यन्तःकरणस्य, त्यागे न हन्यत इति शास्त्रार्थपरिपालनाय **न्यस्तशस्त्रा**, तर्हि तेषां कथं स्वधर्मत्यागे स्वर्गो भविष्यतीत्याशङ्क्याहुर्**दिवौकस** इति, स्वर्ग ओको गृहमात्रं न तु स्वर्गभोग इत्यर्थः, ननु देवाः कथमयुक्तं कृतवन्त इत्याशङ्क्याहुर्**मुक्तकच्छशिखा** इति, मुक्ताः कच्छाः शिखाश्च येषां, परमापदा वैकल्यं तेषामुक्तं, आपदि स्वधर्मास्त्यक्तुं शक्यन्ते, येषां पुनर्दैवगत्या मुक्तकच्छशिखात्वं न जातं तेषां का गतिरितिचेत् तत्राह **केचिद् भीताः स्म** इति **वादिन** इति, शरीरे भीतकार्यस्यादर्शनान् मुखत एव भीता वयमित्याहुः॥ ३४॥

ननु ये वध्यास्ते सर्वथैव वध्या इति वचनेपि किं स्यात् तत्राहुर्न त्वमिति, सङ्ग्रामधर्मस्त्वया न त्यज्यतेतो ये देवा **विस्मृतशस्त्रास्त्रा भयात्**, शस्त्राणि धृत्वा यैर्मार्यते, अस्त्राणि दूरात्, मन्त्रयुक्तानि वा, भयादुभयविधान्यपि विस्मृतानि, **विरथो** येषां, सारथ्यादीनां वधात्, प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवि'दितिवाक्याद् विरथोप्यवध्यः, भयेन सम्यङ्नताः शरणागताः, प्रसङ्गादन्यानप्याहान्या**सक्तविमुखान् अन्यासक्ताश्च ते विमुखाश्चोभयविधा वा भग्नचापानयुध्यतः**, निरीक्षकान् **न हंसीति**- सम्बन्धः, एते षड्विधाः सप्तविधा वा न हन्तव्याः, अतस्त्वया स्वधर्मे परिपाल्यमाने पूर्वन्यायेन देवा जीविता इति भावः॥ ३५॥

एवं साधारणानामप्रयोजकत्वमुक्त्वा महतामप्याह **किं क्षेमशूरै**रिति, येपि वाय्वग्निवरुणादयः शूरा प्रसिद्धास्तेपि **क्षेमशूरा** एव, क्षेमे सति गृहे भार्यायां वा शूरा यत्राक्षेमशङ्कैव नास्ति, न हि भार्या पतिं मारयिष्यतीतिसम्भावना, यत्र पुनः सम्भावना मारयिष्यतीति तत्र पलायनमेव, एतदर्थपरिज्ञानादेव **विबुधाः**, एतच्छारीरशौर्यं तेषां निरूप्य वाचनिकं शौर्यं निरूपयन्त्य**संयुगविकत्थनै**रिति, विकत्थनं स्वशौर्याविष्करणवाक्यं तदपि न **संयुगे**, केनापि सह यदा न युद्धसंयोगस्तदैव विकत्थनं एवं देवान् दूषयित्वा मुख्यांश्चतुर आहुः, अस्ति हरिः शूरः, परं कस्यापि स सम्मुखो न भवति, **यस्त्वेकान्ते तदेकपरस्तिष्ठति हरिरपि तस्य सम्मुखो** भवतीति स्तुतिपक्षे यथाश्रुतमेव, पक्षान्तरे स्त्रीतुल्यता निरूपिता, हरिरिति, सर्वदुःखनिवारकत्वं निरूपितं, यतो **दुःखितेष्वेव** शौर्यादिरहितेषु तस्याविर्भावो निरूपितः, अस्ति च त्रिपुरान्तकः शूरः, सोपि सर्वदा वनवासी तपस्वी, न हि वनस्थस्तपस्वी कस्यचिद् द्विष्टो भवति, असमत्वात्॥ ३६॥

बुभुत्सुबोधिका

अस्यत इत्यत्र हन्यमान इति हननमत्र हन्यमाननिष्ठम्। तच्चेत् प्राणवियोगानुकूलव्यापारवद् भवेत् 'समन्तत' इत्याद्यग्रेतनश्लोकविरोध इति तदनुरोधेन हन्यमानपदार्थमाहुः संछिन्नेति। तथा च हन्यमाना इत्यत्र न हि सार्थकहन्तेः प्रयोगः। प्राणवियोगाभावात्। किन्तु हन्यमाना अस्त्रैर्गम्यमानाः सर्वाङ्गेष्विति गत्यर्थकहन्तेः प्रयोगः। चेति प्राणवियोगमिति चकारार्थः। 'जिजीविषव' इतिपदेन द्योत्यते। 'ययु'रित्यत्र कर्म किमित्याकाङ्क्षा तु देशस्याविवक्षणाद् यं कमपि देशमिति पूरणीया। कारिकोक्तजय उक्तः॥ ३३॥

केचिदित्यत्र अन्तःकरणस्य त्याग इति युद्धे तथा जाते दयावता त्वया न हन्यते। 'भयसन्नता'निति वक्ष्यमाणवाक्यात्। अन्तःकरणस्य अवस्था प्रदर्शितेत्यन्वयो वा। युद्धत्यागे सति न हन्यत इति च। यद्वा त्यागे सति न हन्यत इति शास्त्रपरिपालनाय न्यस्तशस्त्रा इति। स्वधर्मेति युद्धत्यागे। स्वर्ग इत्यात्मसुखकम्। कार्यकारणभावात्। स्वर्गभोग इति स्वधर्मफलमित्यर्थः। केषाञ्चिदिति बोध्यम्। साधनतरतमभावात्। देवा इति स्वर्गक्रीडावन्तः। दिवु क्रीडाविजिगीषेति धातुपाठात्। येषामिति सुमनसाम्। परमापदाविति परमपदा औ इति छेदः। औ अव्ययमम्बुध्यर्थकम्। परमापदा औ अम्बुधिः तस्मिन्। तेषां धर्माणां शास्त्रे उक्तं विकल्पमुक्तवानित्यर्थः। एवं परमापदौ विकल्पं तेषामुक्तमिति पाठेर्थ उक्तः। परमापदा वैकल्यं तेषामुक्तमिति पाठेर्थः सुगमः। केचिदिति पुनरुक्तेरभिप्रायमाहुः येषां पुनरिति। कारिकोक्त दीनत्वमुक्तम्। 'यथा राजा तथा प्रजा' इति प्रजानिष्ठम्॥ ३४॥

न त्वमित्यत्र वचनेपीति 'प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवि'दिति वचने 'भीताः स्मे'ति वचने वा। विमुखाश्चेति कर्मधारयः। चकारः समुच्चयार्थकः। द्वन्द्वेनाहुः उभयेति। तथा चान्यासक्ताः विमुखाश्चेति विग्रहः। अत्र श्लोके कारिकोक्तद्योक्ता॥ ३५॥

किं क्षेमशूरैरित्यत्र सप्तेति द्वन्द्वसमासे सप्तविधाः। पूर्वन्यायेनेति 'न हंसी'ति पूर्वश्लोकोक्तन्यायेनेत्यर्थः। साधारणानामिति देवानाम्। महतामिति वाय्वग्निवरुणादीनाम्। विबुधा इति विशेषेण परितो बुधाः। बुध ज्ञाने। 'इगुपधज्ञाप्रियकिरः क' इति सूत्रेण कः। वाचनिकमिति मानसिकमपि बोध्यम्। 'यन् मनसा ध्यायति तद्वाचा वदती'तिश्रुतेः। यस्त्वेकान्त इति 'रहोजुषे'त्यत्र रहः'पदार्थः। 'जुषे'त्यस्यार्थमाहुः तदेकचर इति। एवं रहोजुषा सह वर्तमानेन हरिणेत्यर्थः। रहोजुषा हरिणेतिपक्षार्थमाहुः हरिरपीति। रहस्करं जुषतीत्यर्थः। पक्षान्तर इति अप्रयोजकत्वपक्षे खतुल्यता प्रयोजकता। हर्यक्षरयोर्महानारायणे पर्यायता स्तूयते। 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः स हरिः सेन्द्रः सोक्षर' इति। अतः खतुल्यता। 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यह'मिति गीता। द्वितीयव्युत्पत्त्याहुः सर्वदुःखेति। निरूपित इति 'रहोजुषे'तिपदेन निरूपितः। असमत्वादिति वैराग्यातिशयेपि त्रिपुरान्तकत्वेनासमत्वात्। अत्र शत्रूणामल्पता कारिकोक्तोक्ता। शत्रूणामल्पता शौर्ये बोध्या। विशेष्यविशेषभेदेनाभासोक्तं चतुष्ट्वम्। विशिष्टं शुद्धान्नातिरिच्यत इति हरिः सात्त्विकः। नीलमुत्पलमितिवद् विशेषणस्य व्यावर्तकत्वे राजससात्त्विकः। द्वौ भेदौ। विशिष्टं शुद्धान्नातिरिच्यत इति शम्भुः तामसः। नीलमुत्पलमितिवद् विशेषणस्य व्यावर्तकत्वे सात्त्विकतामसः। 'वने तु सात्त्विको वास' इतिवाक्यात्। एवं चत्वारः। सार्धश्लोकाभासो वा। तेन हरिशम्भ्विन्द्रब्रह्माणश्चत्वारः॥ ३६॥

मातृपितृतोषणी (श्रीसुबोधिनीजी)—

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **"धनुष्टङ्कारमार्गणैरोद्वेगे पूर्ववृत्तान्तं हेतुत्वेनाह"** धनुष के टङ्कार मात्र से घबड़ा जाने में कारण रूप से पूर्व वृत्तान्त को **'अस्यतस्ते' शरव्रातैः हन्यमानाः समन्ततः**—बाणों को चलाते हुए आपके सामने तो वह आते ही नहीं है फिर भी आपके चलाये गये बाण समूहों से सब ओर से घायल हुए वह देवता अपने जीवन की इच्छा से धर्म व सङ्ग्राम को छोड़कर भागते भागते जहाँ कहीं भी चले जाते हैं, और जो दूरवर्ती हैं वह तो भाग ही जाते हैं॥ ३३॥

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि—**"येऽपि निकटस्थास्तेऽपि जिजीविषवो भूत्वा पलायमाना संभवादुपायान्तरं कृतवन्त इत्याहुः"** दैत्य कहते हैं कि राजन् जो समीपस्थ हैं वह भी जीवन की इच्छा से अन्य उपाय करते रहे हैं क्योंकि वह भागने में असमर्थ रहे, उनका भागना सम्भव नहीं। यह **'केचित् प्राञ्जलयोभीताः न्यस्तशस्त्रास्त्रविग्रहाः'** श्लोक से कहा है। **'प्राञ्जलयः'** पद से स्तुति करने को जैसे प्रवृत्त हुए उन लोगों की हाथ जोड़ने की कायिक अवस्था दिखलाई गई है। **'भीताः'** पद से उनके अन्तःकरण की दशा दिखलाई है। अत्र **न्यस्तशस्त्राः'** पद का भाव कहते हैं कि **शस्त्र** त्याग करने पर नहीं मारे जाते हैं। इसलिये अपनी रक्षा के लिये वह **शस्त्र** त्याग कर देते हैं। यदि वे **न्यस्तशस्त्र** हैं तो फिर उनको धर्म त्याग करने पर स्वर्ग कैसे होगा? इस शङ्का पर कहा है कि **'दिवौकसः'** स्वर्ग तो उनका केवल रहने ही को गृहमात्र है। स्वर्ग सुख का भोग उन्हें नहीं प्राप्त होता, देवताओं ने अपने लिये अनुचित माना जाय वैसा धर्म त्याग कैसे किया? इस शङ्का पर कहा है कि **'मुक्तकच्छशिखाः'** वह आपत्ति से इतने विकल हो गये कि उनकी लंगोटी व चोटी भी खुल पड़ी थीं। आपत्ति में स्वधर्मों का त्याग किया जा सकता है, परन्तु दैवगति से जो मुक्त कच्छ शिख न हो पाये, वह अपने मुख से ही 'हम भयभीत हैं' ऐसा बोलते हैं। क्योंकि उनके शरीर पर तो कोई डरने का चिह्नरूप कार्य दीखता नहीं अतः उन्होंने अपने बचने के लिये मौखिक भीतता व्यक्त की॥ ३४॥

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **'ननु ये वध्यास्ते सर्वथैव वध्या इति वचनेऽपि किं स्यात् तत्राह—** कंस के मन्त्री आगे बढ़कर कहते हैं कि जो वध के योग्य हैं, वह तो सर्वथा वध के योग्य ही होते हैं, अतः उनके कहने पर भी क्या हो सकता है, उस पर समाधान के लिये **'न त्वं विस्मृतशस्त्रास्त्रान् विरथान् भयसन्नतान्'** श्लोक कहा है। सङ्ग्राम धर्म को आप छोड़ते नहीं, अतः, जो देवता लोग भय से **शस्त्र** व **अस्त्रों** को भूल जाते हैं, **शस्त्र** वे कहलाते हैं जिनको पकड़ कर प्रहार किया जाता है, जैसे तलवार। **अस्त्र** वे होते हैं जो दूर से फेंके जाते हैं, जैसे बाण आदि, अथवा मन्त्रसहित जिनका प्रयोग होता है। भय से दोनों तरह के वह **शस्त्र अस्त्रों** को भूल जाते हैं, एवं सारथि आदि के मारे जाने से जिनका रथ नहीं रहता, **'प्रपन्नं विरथं भीत'** इत्यादि वाक्य से रथहीन भी अवध्य है, और जो भय से अत्यन्त झुक जाते हैं, शरणागत हो जाते हैं। प्रसंगवश और भी कहे हैं कि **'अन्यासक्तविमुखान्'** जो अन्यत्र आसक्त होने से विमुख होते हैं अथवा जो अन्यासक्त है और विमुख हैं इन दोनों प्रकार के लोगों को आप नहीं मारते, तथा जिन लोगों के धनुष टूट गये हों, अथवा जो युद्ध न करते हों, युद्ध का निरीक्षण करते हों, उनको भी आप नहीं मारते हैं, उक्त यह छ या सात प्रकार के लोग मारने योग्य नहीं होते हैं, अतः आप धर्म का पालन करते हैं, ऐसी स्थिति में वह देवता पूर्व श्लोकोक्त प्रकार से जीवित हैं॥ ३५॥

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **"एवं साधारणानामप्रयोजकत्वमुक्त्वा महतामप्याह"**— कंस राजा के मन्त्री लोग इस प्रकार साधारण देवताओं की उपेक्षणीयता बतलाकर महान् देवों की भी उपेक्षणीयता **'किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः'** श्लोक से बतलाते हैं—उन देवताओं में जो भी वायु, अग्नि, वरुण आदि शूर प्रसिद्ध है, वह

भी क्षेम शूर ही हैं, क्षेम के रहते गृह में या भार्या में उनकी शूरता नियत है, जहाँ अक्षेम या अकुशल की संम्भावना ही नहीं, भार्या पति को मारेगी यह सम्भावना ही नहीं होती, जहाँ फिर सम्भावना होती है कि मारेगा, वहाँ तो भाग जाना ही होता है, इस बात को यह अच्छी तरह समझते हैं, अतः वह **'विबुधाः'** विबुध कहलाते हैं, यह उनकी शारीरिक शूरता बतलाई गई है तदनन्तर वाचनिक शूरता को बतलाते हैं **'असंयुगविकत्थनैः'** अपनी शूरता को प्रकाशित करने वाला वचन भी वह लोग वहीं ही बोलते हैं, जहाँ किसी से युद्ध का संयोग नहीं होता, इस प्रकार देवताओं की बुराई करके उनमें मुख्य जो चार हैं, उनको भी बतलाते हैं कि उनमें हरि शूर है परन्तु वह तो किसी के सम्मुख नहीं होता है, वह तो एकान्तसेवी है, उससे क्या, हरि के विषय में कहे गये यह शब्द हरि की स्तुति के पक्ष में यथाश्रुत ही है। वास्तव में जो एकान्त में हरितत्पर होकर रहता है, उसके ही सम्मुख हरि भी होते हैं परन्तु दैत्योक्ति पक्ष में उन शब्दों से हरि की स्त्रीतुल्यता सूचित हुई है, हरि शब्द से सर्व दुःख निवारकता बतलाई है, क्योंकि दुखित जन, जो शूरता आदि से रहित होते हैं, उनमें ही वह प्रकट होते हैं, और त्रिपुर का नाशक शम्भु शूर है, वह भी सर्वदा वनवासी व तपस्वी है, वनस्थ तपस्वी किसी का द्वेषी नहीं होता, क्योंकि वह उनके समान नहीं रहता, अतः द्वेषका विषय ही नहीं रहता ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतदेव स्पष्टयन्तस्तत्र हेतुमाहुः अस्यत इति। अस्यतो विध्यतस्ते तव शरव्रातैः शरसमूहैः समन्ततः हन्यमानाः अतो जिजीविषवो जीवितुमिच्छवः, अतएव पलायनं परं जीवनोपायं येषां तथाभूताः सन्तो रणभूमिमुत्सृज्य परित्यज्य ययुरित्यन्वयः ॥ ३३ ॥ एवं ये दूरस्थास्ते पलायिताः, ये तु निकटवर्तिनः पलायनेऽशक्तास्तेषामवस्थामाहुः केचिदिति। दीना भयेन प्रकम्पितगात्राः, अतएव न्यस्तानि त्यक्तानि शस्त्राणि यैस्तथाभूताः केचिद्दिवौकसो देवाः प्राञ्जलयः मूर्द्धनि बद्धाञ्जलिपुटा जाताः। केचिच्च मुक्ताः कच्छा शिखाश्च यैस्तथाभूताः सन्तो 'भीताःस्म' इति वादिनो जाताः ॥३४॥ विस्मृतानि अस्त्राणि समन्त्राणि शस्त्राणि च यैस्तान्, विरथान् रथहीनान्, भयेन संवृतान् शरणागतान्, अन्यासक्तान् अन्येन युद्धकर्त्रा सहागतान्, विमुखान् युद्धात्पराङ्मुखान्, भग्नचापान् अयुध्यतः युद्धमकुर्वतश्च त्वं न हंसि। एवं स्वधर्मपालनमेव तेषां जीवनहेतुः, अन्यथा पूर्वमेव ते मृताः स्युरिति भावः ॥ ३५ ॥ यद्यप्येवं भीतानां देवादीनां तावदुद्यम एव न सम्भवति, तथापि यदि करिष्यन्ति तदा तेषामुद्यमोऽस्मास्वकिञ्चित्कर एवेत्याहुः – किं क्षेमेति सार्द्धेन। विबुधैर्देवैः किं किमनिष्टं कर्तुं शक्यम्? न किमपीत्यर्थः। कुत इत्यपेक्षायां सामर्थ्याभावे हेतुं सूचयन्त आहुः – क्षेमे स्त्रीसन्निधानादिनिर्भयप्रदेशे शूरैरिति। "तत्र शूरत्वमेव कथं स्यात्? युद्धादावेव तत्प्रसिद्धिर्भवति' इत्याशङ्क्य 'आत्मश्लाघामात्रमेव तेषां शूरत्वम्' इत्यभिप्रेत्य शूरत्वमेव स्पष्टयन्ति असंयुगे संयुगादन्यत्रैव विकत्थनं प्रौढिवादो येषां तैः। तथा हरिणाऽपि किम्? न किञ्चिद्भयमित्यर्थः। तत्रापि सामर्थ्याभावे हेतुं सूचयन्त आहुः–रहोजुषेति। लोकातीतवैकुण्ठादिस्थानवासिनेत्यर्थः। तथा शम्भुना रुद्रेणापि किं भयम्?। तत्रापि सामर्थ्याभावे हेतुमाहुः–वनौकसेति। अल्पवीर्येणेन्द्रेणापि किम्? ब्रह्मणा वाऽपि किम्? तस्यापि दुर्बलत्वं सूचयन्त आहुः—तपस्यतेति। तपोनिष्ठेन ॥ ३६ ॥

अन्वितार्थप्रकाशिका

अस्यत इति ॥ अस्यतो विध्यतस्ते तव शरव्रातैः शरसमूहैः समंततः हन्यमानाः अतो जिजीविषवो जीवितुमिच्छवः अत एव पलायनं परं जीवनोपायो येषां तथाभूताः सन्तो रणभूमिमुत्सृज्य परित्यज्य ययुरिति अनेन कदाचित्कंसस्य देवगणजयो विष्णुपुराणोक्तः सूचितः ॥ ३३ ॥ केचिदिति ॥ दीना भयेन प्रकम्पितगात्राः अत एव न्यस्तानि त्यक्तानि शस्त्राणि यैस्तथाभूताः केचिद्दिवौकसो देवाः प्राञ्जलयः मूर्द्धनि बद्धाञ्जलिपुटा जाताः। केचिच्च मुक्ताः कच्छाः वस्त्रग्रन्थयः शिखाश्च यैस्तथाभूताः सन्तो भीताः स्म इति वादिनो जाताः ॥ ३४ ॥ न त्वमिति ॥ विस्मृतानि शस्त्राणि अमन्त्राणि अस्त्राणि समन्त्राणि च यैस्तान् विरथान् रथहीनान् भयेन संनतान् शरणागतान्। संवृतानित्यपि पाठः। अन्यासक्तान् अन्येन युद्धकर्त्रा सहागतान् अन्येन सह युद्धमानान्वा अन्यत्र विषये व्यग्रान्वा विमुखान् युद्धात्पराङ्मुखान् भग्नचापान् अयुध्यतः युद्धमवाञ्छतः। न युद्धमिच्छन्तीति क्यच्। त्वं न हंसि ॥३५॥ किं क्षेमेति सार्द्धम् ॥ क्षेमे स्त्रीसंनिधानादिनिर्भयप्रदेशे शूरैः असंयुगे संयुगादन्यत्रैव विकत्थनं प्रौढिवादो येषां तैः विबुधैर्देवैः किं किमनिष्टं कर्त्तुं शक्यं न किमपीत्यर्थः। एवमग्रेऽपि रहो गुप्तमन्तःकरणं जुषत इति क्षीरोदादि दूरं विजनं वा सेवमानेन हरिणा किं यदि बलमस्ति तदा किमिति प्रकटीभूय न युद्धयतेति भावः। गुप्तं सर्वजनहृदयं प्रविष्टेनेति वास्तवोऽर्थः। पुरुषप्रवेशहीनमिलावृतवनमोको यस्य तेन शम्भुना वा किं निर्वैरतया वने स्थितेनेति तत्त्वार्थः। अल्पवीर्येण इन्द्रेण वा तपस्यता तपोनिष्ठेन ब्रह्मणा वा किम्। सर्वक्षेमार्थं तपस्यतेति तत्त्वार्थः ॥ ३६ ॥

भगवत् सादाचार्यविरचिता भक्तमनोरञ्जनी

अस्यत इति ॥ अस्यतः शरान् क्षिपतः, ते तव, शरव्रातैः बाणसंघैः, हन्यमानाः, जिजीविषवः जीवितुमिच्छवः, पलायनमेव परो रक्षणोपायो येषां ते तथाभूताः सन्तः, उत्सृज्य स्वस्वस्थानानीति शेषः। समन्ततः, ययुः ॥ ३३ ॥ केचिदिति ॥ केचित्,

दिवौकसो देवाः, भीताः, त्वत्त इति शेषः। अत एव, न्यस्तानि त्यक्तानि शस्त्राणि यैस्तथाभूताः सन्तः, केचिच्च, मुक्ता विश्लथाः कच्छाः शिखाश्च येषां ते, मुक्तकक्ष्याः शिखाः' इति पाठे, मुक्ताः कक्ष्याः काञ्चयः शिखाश्च येषां ते, 'कक्ष्या करिवरत्रायां काञ्च्यां गेहप्रकोष्ठके' इति यादवः। भीताः स्मः, इति वादिनो वदन्तः, प्राञ्जलयः सन्तः, तस्थुरिति शेषः ॥ ३४ ॥ न त्वमिति ॥ अथापि, त्वं विस्मृतानि शस्त्राणि अस्त्राणि च यैस्तान्, मन्त्रशक्त्युपबृंहितान्यस्त्राणि। इतराणि तु शस्त्राणीति विवेकः विगता रथा येषां तान्, भयेन संवृतास्तान्, 'भयसंवृतान्' इति पाठे भययुक्तान्, न हंसि। तव शरणागतरक्षकत्वादिति भावः। तथा, अन्यासक्तविमुखान् अन्यासक्तान् विमुखांश्च, भग्नचापान्, अयुद्ध्यतश्च, न हंसि। ततः, क्षेमे स्वगृहे एव शूरास्तैः, असंयुगे संयुगादन्यत्र विकत्थनं प्रागल्भ्यवचो येषां तैः, विबुधैर्देवैः, किं न किंचिदपि कर्त्तुं शक्यमित्यर्थः ॥ ३५ ॥ आस्तां तावत् सामान्यदेवानां वार्त्ता, देवश्रेष्ठैर्हरिहरेन्द्रब्रह्मभिरपि न किंचिदित्याहुः ॥ रह इति ॥ रहोजुषा त्वद्भयात्समुद्रमध्यरूपनिर्जनदेशसेविना, हरिणा विष्णुना, किं, न किंचित्तेन त्वयि कर्त्तुं शक्यमिति भावः। वनौकसा हिमाद्रिकान्तारगतकैलासशिखरमन्दिरेण, शंभुना शिवेन वा, किम्। अल्पवीर्येण अल्पवीर्यत्वात्पार्ष्णिग्राहबलेन जयमिच्छतेति भावः। इन्द्रेण किं वा। तपस्यता पुष्करद्वीपे पद्मासनमधिष्ठाय तपश्चरता, ब्रह्मणा च किम् ॥ ३६ ॥

कृष्णप्रिया

राजन् जब आप बाणवर्षा करते हैं तब बाणों के समूह से चारों ओर से मारे जाते हुए अपने जीवन रक्षा की कामना रखने वाले वे देवता लोग धर्म और युद्ध को छोड़कर भागने लगते हैं ॥ ३३ ॥ कुछ देवता जिन्होंने शस्त्र डाल दिये हैं, जो डरे हुए हैं और जिनकी चोटी एवं कच्छ खुल गये हैं हाथ जोड़ कर आपके सामने खड़े हैं और कुछ यह कह रहे हैं कि हम भयभीत हैं हमारी रक्षा करो ॥ ३४ ॥ जो भय के मारे शस्त्र अस्त्र भूल गये हैं, रथहीन हैं, भय से शरणागत हैं, अन्य कार्य में आसक्त होकर युद्ध से विमुख हैं अथवा जो अन्यासक्त हैं और युद्ध से विमुख हैं, जिनके धनुष टूट गये हैं और जो युद्ध न कर दर्शक के रूप में उपस्थित हुए हैं उन्हें तुम नहीं मारते ॥ ३५ ॥ देवता वहीं वीर बनते हैं जहां अपने अकल्याण की संभावना न हो। वे रण के बाहर बड़ी बड़ी डींग मारनेवाले हैं। उनसे तथा एकान्त में रहने वाले हरि भगवान् से, वनवासी शंकर से अपना क्या बिगाड़ हो सकता है ॥ ३६ ॥

किमिन्द्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता। तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ॥ ३७ ॥
ततस्तन्मूलखनने नियुङ्क्ष्वास्माननुव्रतान् ॥ ३८ ॥
यथाऽऽमयोऽङ्गे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुम्।
यथेन्द्रियग्राम उपेक्षितस्तथा रिपुर्महान् बद्धबलो न चाल्यते ॥ ३९ ॥
मूलं विष्णुर्हि देवानां यत्र धर्मः सनातनः। तस्य च ब्रह्म गोविप्रास्तपो यज्ञाः सदक्षिणाः ॥ ४० ॥

कर्दमक्षमा

अन्वयः— अल्पवीर्येण इन्द्रेण किम् तपस्यता वा ब्रह्मणा किम् तथापि सापत्न्यात् देवाः न उपेक्ष्याः इति मन्महे ॥ ३७ ॥ ततः तन्मूलखनने अनुव्रतान् अस्मान् नियुंक्ष्व ॥ ३८ ॥ यथा अङ्गे समुपेक्षितः रूढपदः आमयः नृभिः चिकित्सितुम् न शक्यते यथा उपेक्षितः इन्द्रियग्रामः (न शक्यते) तथा बद्धबलः महान् रिपुः न चाल्यते ॥ ३९ ॥ देवानां मूलं हि विष्णुः यत्र सनातनः धर्मः तस्य च मूलं ब्रह्म गो विप्राः तपः सदक्षिणाः यज्ञाः मूलम् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यद्यप्युद्यमैर्देवा न किंचिदपि कर्तुं समर्थास्तथापि नीतिरनुसर्तव्येत्याहुः तथापीति ॥ ३७ ॥ रूढपदो बद्धमूलः ॥ ३८ ॥ देवानां मूलं विष्णुः स च यत्र धर्मस्तत्राऽऽस्ते। तस्य धर्मस्य मूलं वेदादय इति ॥ ३ –४१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नीती राजनीतिः। अनुसर्त्तव्याऽनुगंतव्या ॥ ३७ ॥ आमयो ज्वरादिः। चिकित्सितुमपनेतुम् ॥ ३८ ॥ यत्र सनातनो वेदविहितो धर्मस्तत्र देवानां मूलं विष्णुरास्ते इति शेषं कृत्वान्वयः। तस्य धर्मस्य ॥ ३९ ॥ सर्वात्मना सर्वप्रकारेण। हविर्दुघा यज्ञोपयोगिघृतादिदात्र्यः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, तथापि देवेन्द्रोऽवश्यमागन्ता तत्राह किमिति। ननु ब्रह्मा तत्सहायो भविता तत्राहुः—ब्रह्मणेति तपःपरत्वेन विक्रमाभावात् तपो व्ययभिया शापाप्रवृत्तेश्च तेन सहायेनापि सता किमित्यर्थः। मन्महे मन्यामहे ननु, देवा भीताः पलायिष्यन्त

एव तत्राहुः तत इति । तेषां देवानां मूलस्य बालकरूपेणावतीर्य्य स्थितस्य गुप्तस्य विष्णोः खनने हिंसनेऽस्मान् नियुंक्ष्व ॥३७॥ ननु, गुप्तश्चेदसमर्थ एव स मम इति किङ्करिष्यति तत्राहुः—यथेति । कदाचिन्महौषधादिप्रभावेण तच्चिकित्सासम्भवमाशङ्क्य दृष्टान्तान्तरमाहुः—यथेन्द्रियेति । बद्धबलत्वादेव महान् विवृद्धः सन्न चाल्यते स्थानाद्भ्रंशयितुमपि न शक्यते किमुत हन्तुमित्यर्थः ॥३८॥ अथ मूलस्य तस्य गुप्तस्यापि हननोपायं सार्द्धैश्चतुर्भिर्वदन्तौ मूलत्वमेव तद्रहस्यविदामृषीणां वचनानुवादेनापि सपरिकरं निर्दिशन्तस्तद्धननमेव दृढीकुर्वन्ति मूलमिति हि वेदे प्रसिद्धं सनातनः अनादिसिद्धो वेदप्रसिद्धः न तूपधर्मादिरित्यर्थः । धर्मः अपूर्वः तपः स्वधर्माचरणं नित्यनैमित्तिकलक्षणं यज्ञशब्देन काम्यकर्माण्युपलक्ष्यन्ते सदक्षिणा इति तथैव साङ्गतया धर्ममूलतासिद्धेः ॥ ३९ ॥ अथ तथापि तस्य विष्णोरहोजुष्टत्वेपि तत्परिकरहननेनैव हननं स्यादित्याहुः— तस्मादिति । सर्वात्मना सर्वेणैव प्रयत्नेन हन्मः तेषां हननमेवास्माकं तद्धर्मोपमर्दकः परमो धर्म इति तान् हन्यामेवेत्यर्थः । हे राजन्निति तव प्रभावेणैव सुतरामेवेति भावः । ब्राह्मणहनने हेतवः ब्रह्मेत्यादि तन्नाशे स्वतो वेदादिनाशसिद्धेः गोहनने हेतुः हविर्दुघाः घृतादियज्ञीयद्रव्यप्रदाः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

तेषां मूलस्य खनने उत्पाटनेऽनुव्रतान् त्वदेकभक्तान् ॥ ३७ ॥ ननु, ते यदोद्यमं करिष्यन्ति, तदैव हन्तव्यास्तावदधुनोपेक्ष्यन्तम् ? तत्राहुः—यथेति । नृभिरिति तेष्वेव प्रायोरोगोत्पत्तेस्तेषामेव तच्चिकित्साशक्तेश्च, कदाचिन्महौषधादिप्रभावेण तच्चिकित्सासम्भवमाशंक्य दृष्टान्तान्तरमाहुः—यथेति । बद्धबलत्वादेव महान् विवृद्धः सन् न चाल्यते निर्जेतुं न शक्यत इत्यर्थः ॥३८॥ मूलखनने इत्युक्तम्, मूलमेवाहुः मूलमिति हि निश्चितम्; सनातनः स्थिर इत्यर्थः, इति फलाभिसन्धिराहित्यम्, किंवा अविच्छिन्नत्वमच्छिद्रत्वादिकञ्चाभिप्रेतम्; तपः स्वधर्म्माचरणं नित्यनैमित्तिकलक्षणम्; यज्ञशब्देन काम्यकर्म्माण्युपलक्ष्यन्ते; सदक्षिणा इत्यन्यथा यज्ञानां सांगत्वाभावेन धर्म्ममूलत्वासिद्धिः ॥ ३९ ॥ सर्वात्मनाशेषप्रकारेण विविधोपायैरित्यर्थः । ब्राह्मणहनने हेतवः ब्रह्मेत्यादिः; तद्वधेन स्वत एव वेदादिनाशसिद्धेरिति भावः । हे राजन्निति त्वत्प्रभावादेवेति भावः । गोहनने हेतुः—हविर्दुघा घृतादियज्ञीयद्रव्यप्रदा इति ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सापत्न्यान्नोपेक्ष्या इत्येतदेव सदृष्टान्तमुपपादयन्ति— यथेति । यथाऽङ्गे शरीरे समुत्पन्न आमयो व्याधिस्तावन्नृभिर्यत्नं मूलोन्मूलने तूपेक्षितोऽत एव रूढमूलः तनश्चिकित्सितुं प्रतिकर्तुं न शक्यते यथा च तावद्योगिभिरुपेक्षितः इन्द्रियग्रामस्ततो दुर्निग्रहस्तथा रिपुरपि तावदुपेक्षितस्ततो रूढबलश्चालयितुमपि न शक्यते तर्हि किं तत्सपत्नानां मूलं यद्विनाशितव्यम् इत्यत्राहुः— मूलम् इति । सनातनोऽनादिनिधनाविच्छिन्नसम्प्रदायवेदोपवेदबोधितो धर्मः वर्णाश्रमानुगुणो यत्र विष्णौ यद्विष्ण्वधीनः स विष्णुर्देवानां मूलं रहस्सेवी स कथं छेत्तव्य इत्यत्राहुः तस्येति ब्रह्म वेदः गावश्च विप्राश्च गोविप्राः तप इति पृथक् पदं ब्रह्मादयस्तस्य विष्णोर्मूलम् इत्यनुषङ्गः ॥ ३८-३९ ॥ तस्मात् हे राजन् ! सर्वात्मना नानोपायेन ब्रह्मवादित्वादिगुणयुक्तान् ब्राह्मणान् हविः सान्नाय्यं दुहन्तीति तथा ताश्च गाः हन्मः हनिष्यामः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तेषां मूलोत्पाटने ॥ ३७ ॥ अङ्गे शरीरे आमयः कुष्ठादिः रूढं पदं व्याप्तं स्थानं येन सः ॥ ३८ ॥ कः साक्षात् मूलमित्यत्राह—मूलमिति । तस्य विष्णोर्मूलम् ॥ ३९ ॥ हन्मः हनिष्यामः हविर्दुघाः यज्ञयोग्यं घृतं दुहन्तीः छन्दसि हकारस्थाने वकारः ॥ ४०–४४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसंदर्भः

यथेति । बद्धबलत्वेन महान् विवृद्धः सन् ॥ ३८ ॥ धर्मोऽपूर्वः तपः स्वधर्मः यज्ञाः काम्यधर्माः ॥ ३९ ॥ सर्वात्मना सर्वेणैव प्रयत्नेन ॥ ४० ४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदपि क्षुद्रा अपि शत्रवो नोपेक्षणीया इति नीतिशास्त्ररीतिरनुसरणीयैवेत्याहुः—तथापीति ॥ ३७ ॥ रूढपदो बद्धमूलः ॥ ३८ ॥ धर्मः सनातन इति धर्म एव तं जीवयंस्तस्य मूलमित्यर्थः । तस्य धर्मस्य मूलं वेदादयः ॥ ३९ ॥ तेषामपि मध्ये ब्राह्मणवधेनैव सर्वे नङ्क्ष्यन्तीत्याहुः–तस्माद् इति । किञ्च यज्ञानां कारणं हविस्तस्य गाव इति ताश्च वध्या इत्याहुर्गाश्चेति ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तथापि शत्रुपेक्षा दोषावहा इत्याहुस्तथापीति ॥ ३७ ॥ रूढपदः बद्धमूलः सन् ॥ ३८ ॥ प्रथमतस्तु तव शत्रुः कन्यकावाक्याद्यत्र क्वचन जातस्तद्वधोपायस्तूक्त एव अथ मुख्यमिममुपायं शृण्वित्याहुः—मूलमिति । देवानां मूलं विष्णुः स च यत्र धर्मस्तत्र वसति तस्य धर्मस्य मूलं तु ब्रह्मगोविप्रादयः ब्रह्म वेदः ॥ ३९–४४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

यद्यप्यकिञ्चित्करा देवास्तथापि शत्रुत्वात्तेषामुपेक्षा न युक्तेत्याहुस्तथापीति एवन्नीतेरिति भावः ॥ ३७ ॥ दृष्टान्ताभ्यामनुपेक्षां पुष्यन्ति यथेति रूढपदे बद्धमूलः इन्द्रियग्रामो योगिभिरुपेक्षितो जेतुं न शक्यते ॥ ३८ ॥ देवानां मूलं विष्णुः स च यत्र धर्मस्तत्रास्ते तस्य धर्मस्य मूलं ब्रह्मादयः ब्रह्म वेदः ॥ ३९ ॥ तेषां मध्ये विप्राणां वधेनैव सर्वे ते नङ्क्ष्यन्तीत्याहुः तस्मादिति किञ्च यज्ञानां कारणं हविस्तस्य गावः त्यश्च वध्या इत्याहुर्गाश्चेति ॥ ४० ॥

श्रीपांथरीनारायणाचार्यकृतो विरोधोद्धारः

मूलमिति । अत्र तस्य चेत्यविना विष्णोर्ब्रह्मगवादिमूलकत्वमुक्तम् । तदयुक्तम् । सर्वकारणकारण इत्यनेन विरोधादत उच्यते । इदमसुरोक्तत्वादासुरं मतम् । यद्वा । तस्य विष्णोः । ब्रह्मगवादयः । चशब्दसंगृहीतमूलानि । वचनविपरिणामात् । मूल-संवरण इति धातोराच्छादका इत्यर्थः ॥ ३९ ॥

इति श्रीभागवते पंचमोऽध्यायः ॥ १०–५ ॥ (अस्मत्पक्षे चतुर्थोऽध्यायः)

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

किमिन्द्रेणाल्पवीर्येण तपस्यता तपः कुर्वता ब्रह्मणा वा चतुराननेन किम् । तथाऽप्येवं सर्वदौर्बल्येऽनुभूतेऽपि सापत्न्याज्ज्ञातित्वाद्वैरित्वाद्वा ते नोपेक्ष्या इति वयं मन्महे जानीमस्तन्मूलखनने तेषां मूलोत्पाटनेऽनुव्रतानस्मान्नियुङ्क्ष्वाज्ञापय ॥ ३७ ॥ ननु सद्यो जातः पोतो भविष्यति तेन किं बलवान्भवतु तदा पश्याम इति न वद स्वामिन्निति सति सनिदर्शनं वदन्ति ॥ यथेति । अङ्गे शरीरे आमयो रोगो रूढपदो रूढं पदं स्थानं यस्य स सन्निरूढपदो रोगश्चिकित्सितुं नृभिरुपेक्षितो नृभिर्भिषग्भिर्न शक्यते रोगस्य पारक्यस्योपेक्षणं न विहितम् । विहितं च रक्षणं शरीरस्येतीरितं सत्यम् । परन्तु देवाः स्वकीयाः कथं कर्तव्यमित्यतो न च स्वकोऽप्युपेक्षणीयो विहितं इत्यत्र निदर्शनान्तरमाह । यथेन्द्रियग्राम इति । इन्द्रियसमूह उपेक्षितश्चेद्दुर्विषयेषु गच्छन्नच्छमपि तुच्छं करोति जनमित्युपेक्ष्यो यथा न तथा रिपुर्लब्धबलो महांश्चाल्यते न चलयितुमशक्य इतीदानीमेव तन्मूलविलयनं कर्तव्यमिति भावः । महालब्धबल इति पाठेऽपि नार्थभेदः ॥ ३८ ॥ मूलं किं कथं तन्मथनमित्यतः कथयन्ति । मूलमिति । हि यतो विष्णुर्देवानां मूलं मुख्यम् । स क्वेत्यत आहुः । यत्रेति । सनातनो धर्मो यत्र तत्र स आस्ते तस्य च धर्मस्यापि ब्रह्म च वेदो गावश्च विप्रास्तपः सदक्षिणा यज्ञाश्च मूलमित्यन्वयः ॥ ३९ ॥ ब्रह्मवादिनस्तपस्विनो यज्ञशीलान्ब्राह्मणांस्तस्मात्सर्वात्मना प्रकाशवर्त्मनोपायेन हन्मो हनिष्यामः । हविः क्षीरं दुहन्तीति हविर्दुघा गाश्च हनिष्यामः । एवं चेन्मूलसङ्क्षालनं भविष्यतीति भावः । दुहः प्रपूरणेऽस्माद्दुहः कप् घश्चेति कप्रत्ययो घश्चान्तादेशः कित्त्वान्न गुणः ॥ ४० ॥

श्रीसुबोधिनी

देवेन्द्रस्तु यद्यपि वृत्रहा तथाप्यल्पवीर्यः, अन्यथा वज्रादिप्रार्थनां कथं कुर्यात् ? ब्रह्मा यद्यपि महान् भवति तथापि ब्राह्मण एव तपस्वी, एवं यद्यपि सर्वे देवा अप्रयोजकास्तथापि राजनीतिविचारेण ते नोपेक्ष्या इत्याहुस्तथापीति, देवानां दैत्यानां च सापत्न्यमस्ति कश्यपदायादाः सर्वे भिन्नमातृजास्ते शत्रव एव परस्परं भवन्ति, अतः सहजद्वेषित्वाद् यदैव ते पुष्टा भविष्यन्ति तदैव मारयिष्यन्तीति नोपेक्ष्याः क्षीणदशायामेव मारणीयाः, अयमर्थो भवति न वेति विचारका जानन्ति वयं त्वेवं मन्महे ॥ ३७ ॥ एवं माहात्म्यं नीतिं चोक्त्वा किं कर्तव्यमित्याकाङ्क्षायामाहुस्तत इति, यदेव देवानां मूलं भविष्यति तस्यैव खनने नियुङ्क्ष्वाज्ञापय, अनुव्रतानिति, योगेन रूढ्या च सर्वथा भवन्तमनुसृता वयं, मूलमग्रे वक्तव्यं खननं च मध्ये ॥ ३८ ॥

उपेक्षायां को दोष इति चेत् तत्राहुर्यथेति, आमयो रोगो ज्वरादिरङ्ग आविर्भूतस्तमनादृत्य यदि स्नानभोजनादिकं कुर्यात् तदा रूढपदः संश्चिकित्सितुं न शक्यते, अङ्गमेव नाशयति, सद्वैद्येनापि तज्जनिते सन्निपाते चिकित्साशक्या, अनेन सम्बन्धे विद्यमाने कथं मारणीया इति शङ्का निवारिता तेषां सर्वनाशकत्वादिति लौकिकबाधकत्वेन निरूपितं, वैदिकबाधकत्वेन दृष्टान्तान्तरमाह यथेन्द्रियग्राम उपेक्षित इति, योगिना परमपुरुषार्थे साध्य इन्द्रियसमूहो नोपेक्षणीयः, तेषामुपेक्षाया'मिन्द्रियैर्विषयाकृष्टै'रितिन्यायेन सर्वनाशो भवति, प्रबलं चेदिन्द्रियं पश्चान्निवारयितुमशक्यं यथैहिकामुष्मिकनाश एताभ्यां तथा सर्वनाशो देवैर्दैत्यानां, तदाह रिपुर्महान् बद्धबलो न चाल्यत इति, महान् स्वापेक्षयापि स्वरूपतः, ते चेत् सम्बद्धबला भवन्ति तदा चालयितुमप्यशक्या अतो नोपेक्षणीयाः ॥ ३९ ॥

मूलमाह मूलं विष्णुरिति, देवानां मूलं विष्णुः, विष्णुप्रभवा देवाः, सत्त्वगुणा देवाः, तस्याधिष्ठाता तु विष्णुः, इमां युक्तिं हि शब्द आह, प्रकारान्तरेणापि देवानां मूलं विष्णुरित्याह यत्र धर्मः सनातन इति, धर्मो यागादिः, स तु देवतोद्देशेन द्रव्यत्यागात्मकः, स केवलं वेदोक्तः सनातनः, 'तानि धर्माणि प्रथमान्यास'न्निति श्रुतेः, यज्ञाभावे देवानां भक्ष्याभावाद् यज्ञो

देवानां मूलं, स च स्वदेवतानियम्यः, तस्य च देवता **विष्णुः**, '**यज्ञो वै विष्णु**'रितिश्रुतेः, न केवलं तस्य नियामकत्वं किन्त्वाधारत्वमपि, तदाह यत्रेति, **यत्र** विष्णौ **सनातनो धर्मः**, 'धर्मस्य प्रभुरच्युत' इति वाक्यात्, तस्माल्लौकिकवैदिकदेवानां मूलं विष्णुः, तस्यापि मूलमाह तस्येति, चकाराद्देवानामपि, **ब्रह्म वेदः, गावो विप्राश्च तपो यज्ञाः सदक्षिणाः**, प्रमाणं वेदः, हविरेकत्र मन्त्राश्चैकत्र, द्विविधो हि धर्मः, प्रवृत्तिनिवृत्त्यात्मकः, प्रवृत्त्यात्मको **यज्ञो** निवृत्त्यात्मकस्तपः, **सदक्षिणाः** दक्षिणा यज्ञस्य भार्या, अनेन प्रवृत्तिधर्मत्वं तस्योक्तं, पञ्चात्मको वा मूलत्वेन निरूपितः, अनेन द्वयं मूलत्वेनोक्तं **ब्राह्मणा गावश्च**, तत्र दुहन्त्यो गावो यज्ञकर्त्तारस्तपस्विनो वेदविदो ब्राह्मणाः ॥ ४० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तस्य चेत्यत्रानेनेति, दक्षिणाया भार्यात्वनिरूपणेन, तस्येति, यज्ञस्य, तथा च विष्णुदेवयोर्मूलं द्विविधो धर्म इति भावः, पक्षान्तरमाहुः पञ्चात्मको वेति, वेदात्मको यज्ञात्मको गवात्मको विप्रात्मकस्तप आत्मको विष्णुरेव वा देवानां मूलमित्यर्थः, प्रकारान्तरेण द्वयमेवमूलमित्याहुरनेनेति, मूलनिरूपकवाक्येनेत्यर्थः तत् किं द्वयम्? अत्राहुर्ब्राह्मणा गावश्चेति, इयं व्याख्याग्रिमश्लोकस्वरससिद्धेति बोध्यम् ॥ ३९ ॥

बुभुत्सुबोधिका

किमिन्द्रेणेत्यत्र 'ब्रह्म जानाति ब्राह्मण' इति विग्रहः गोपालतापिनीये प्रसिद्धः। तपस्वीति द्वितीयस्कन्धनवमाध्याये 'अतप्यत स्माखिललोकतापनं तप' इति वाक्यात्। 'अतप्यते'ति तप ऐश्वर्ये इत्यस्य रूपं लङि। अयं० दिवा० आत्म० अनि० तप इति तप सन्तापे भ्वा० प० अ० तस्य रूपम्। तथा च तपोनिष्ठैश्वर्यानुकूलभूतव्यापारवानिति ब्रह्मविशेषणम्। राजनीतीति कारिकोक्तः षष्ठो धर्मः कंसस्य। कश्यपेति 'पश्यकः कश्यप' इत्यारण्यकेऽस्ति। तस्य दायं भागमदन्ति ते कश्यपदायादाः। 'वयं मन्महे' इत्यनेनान्येषामपि ज्ञानं व्यज्यते तदाहुः अयमर्थ इति ॥ ३७ ॥

तत इत्यत्र योगेन रूढ्या चेति अनुव्रतं येषामिति योगः, भृत्ये रूढिः। अग्र इति 'मूलं विष्णु'रिति श्लोके। मध्य इति 'तस्मा'दिति श्लोके दैत्यमतिदैत्यकृत्योर्मध्ये ॥ ३८ ॥

यथामय इत्यत्र उपेक्षायामिति 'उपेक्ष्या' इति पूर्वश्लोकोक्तायाम्। मारणीया इति सापत्न्याः। सर्वनाशेति आत्ममात्रद्वेषित्वे सति कुलद्वेषित्वात्। षडङ्गनाशकत्वमाहुः इन्द्रियैर्विषयेति। 'इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः। चेतनां हरते बुद्धेः स्तम्बस्तोयमिव ह्रदा'दितिवाक्यम्। चालयितुमपीति सापत्न्या इतोऽन्यत्र गच्छन्त्विति चालयितुमपिना मारयितुं जेतुं वा ॥ ३९ ॥

मूलं विष्णुरित्यत्र स त्विति यागादिः। 'यथेन्द्राय स्वाहे'ति। इन्द्रमुद्दिश्य हविस्त्यागः। यज्ञो देवानां मूलमिति यज्ञस्य विष्णोः कार्यं पालनं भक्ष्यं मूलम्। पालनमित्यत्र करणे ल्युट्। मूलशब्दो विष्णौ तत्कार्ये चोक्तः। स चेति स च यज्ञः। 'यज्ञो वै विष्णु'रिति आधिदैविकाध्यात्मिकयोरभेदान्वयः 'तच्चक्षुर्देवहित'मिति श्रुत्यन्तरे यथा। पञ्चात्मकत्वं वक्तुमधिष्ठानकारणं वदत एव धर्मद्वैविध्यमावृत्त्याहुः न केवलमिति। आवृत्तेः फलं लौकिकदेवानां लौकिकधर्मो वैदिको धर्मः। अधिष्ठानकारणत्वं च। प्रभुरित्याधिदैविकः। 'मूल'माधार इत्युक्तम्। तस्मादिति धर्मद्वैविध्यादधिष्ठानकारणत्वाच्च। लौकिकेति लौकिकदेवा अक्षरमूलाः। वैदिकदेवाः शब्दमूलाः। 'शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्या'मितिसूत्रात्। मूलमधिष्ठानम्। तस्यापीति विष्णोः, अपिना तत्कार्यस्य पालनस्य यागस्य (भक्ष्यस्य)। मूलमाहेति विष्णोर्द्रव्यदेवतयोर्यागरूपयोश्च मूलमाधारमाहेत्यर्थः। ब्रह्म वेद इति वेदो देवानां मूलम्। 'शब्द इति चेन्नातः प्रभवा'दितिव्याससूत्रात्। विष्णोर्मूलं कारणमपि वेदः। शब्दार्थयोरौत्पत्तिकसम्बन्धात्। 'औत्पत्तिकं नित्यं ब्रूम' इति शाबरभाष्यात्। विष्णुकार्ययाग (भक्ष्य) रूपपालनाधारौ 'गावो विप्राश्चे'त्युक्तौ। गोषु हविर्द्रव्यम्। विप्रेषु मन्त्राः 'मन्त्रमयी देवते'ति भाट्टदीपिकायाम्। तपोधिकारः। यज्ञाः साधनानि। परं सदक्षिणाः। एवं षड्गुणो यज्ञ उक्तः। तमाहुः प्रमाणं वेद इति। एकत्रेति गोषु। एकत्रेति विप्रेषु। भार्येति चतुर्थस्कन्धेऽस्ति। अनेनेति दक्षिणाया भार्यात्वनिरूपणेन गृहस्थाश्रमत्वसूचनेन। तस्येति यज्ञस्य। गृहस्थाधिकारात्। पक्षान्तरमाहुः पञ्चात्मको वेति। 'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्। शरीरवाङ्मनोभिर्यः कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः। तत्रैवं सति कर्तारमात्मानं केवलं तु यः। पश्यत्यकृतबुद्धित्वान् न स पश्यति दुर्मति'रिति। प्रकारान्तरेण द्वयमेव मूलमित्याहुः अनेनेति। मूलनिरूपकवाक्येनेत्यर्थः। द्वयं किमित्युक्ते 'ब्राह्मणा गावश्चे'त्युत्तरश्लोकाभासोक्तमनुषज्यते ॥ ४० ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि अब दैत्यमंत्री इन्द्रादि की परिस्थिति को "**किमेन्द्रेणाल्पवीर्येण**" श्लोक में बतलाते हैं कि—देवराज इन्द्र तो यद्यपि वृत्रासुर को मारनेवाला है, तो भी अल्प पराक्रमी ही है, अन्यथा **वज्र** आदि की याचना क्यों करता ? ब्रह्मा यद्यपि महान् है, परन्तु ब्राह्मण तपस्वी ही तो है वह, इस प्रकार और सब ही देवता

यद्यपि कुछ भी नहीं कर सकते तो भी राजनीति के विचार से उनकी उपेक्षा करना अनुचित ही है, देवता और दैत्यों का परस्पर सापत्न्य शत्रु भाव है, यह दोनों कश्यप के दायाद हैं, भिन्न भिन्न माताओं में प्रकट हुए यह कश्यप पुत्र परस्पर शत्रु ही हैं। अतः सहज शत्रु होने से वह जब ही पुष्ट होवेंगे तब ही मारेंगे, अतः उपेक्षा योग्य नहीं, क्षीण दशा में ही मार देना उचित है। यह कर्त्तव्य अर्थरूप है या अनर्थरूप है, यह तो विचारक लोग जानते हैं, परन्तु हम ऐसा मानते हैं ॥ ३७ ॥

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **एवं माहात्म्यं नीतिं चोक्त्वा किं कर्तव्यमित्याकाङ्क्षायामाह—** मंत्रीलोग कंस राजा को इस श्लोक में इस प्रकार कंस का महान् पराक्रम व नीति, को कहकर, क्या करना चाहिये इस आकाङ्क्षा में कहते हैं कि **'ततस्तन्मूलखनने'** इत्यादि, जो ही देवताओं का मूल हो, उस मूल के ही खोदने में हमको नियुक्त करें, आज्ञा दें, **'अनुव्रतान्'** हम लोग आपका अनुसरण करने वाले हैं, **'अनुकूलं व्रतं येषाम्'** इस योग से तथा रूढि से सर्वथा आपके अनुयायी हैं। मूल को आगे कहा जायेगा, मध्य में उसका खनन कहा जायगा ॥ ३८ ॥

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **"उपेक्षायां को दोष इति चेत्तत्राहुः"** उपेक्षा करने में दोष बतलाते हैं कि **'यथाऽऽमयोऽङ्गे'** जैसे ज्वर आदि रोग अङ्ग में पैदा हो गया हो, उसकी उपेक्षा करके यदि स्नान भोजन आदि करें तो उस रोग का जमाव जम जाता है, उसकी चिकित्सा नहीं हो सकती, वह अङ्ग को ही नष्ट कर देता है, उत्तम वैद्य द्वारा भी इस रोगजन्य सन्निपात के होने पर चिकित्सा करना अशक्य हो जाता है, उक्त कथन से इस शङ्का का निवारण किया गया है, कि सम्बन्ध के रहते हुए कैसे मारे जाँय, क्योंकि वह सर्वनाश करने वाले हैं अतः मारना आवश्यक है, इस प्रकार लौकिक बाधकरूप से अन्य दृष्टान्त कहा है कि **'यथेन्द्रियग्रामः'** इत्यादि।

योगीजन को परम पुरुषार्थ सिद्ध करना हो तो इन्द्रियवर्ग की उपेक्षा नहीं करनी चाहिये, उपेक्षा करने पर **'इन्द्रियैर्विषयाकृष्टैः'** इत्यादि कथित प्रकार से योगियों का सर्वनाश हो जाता है, प्रबल होने पर बाद में इन्द्रियों का रोकना शक्य नहीं जैसे लौकिक पारलौकिक सुखनाश इन रोग व इन्द्रियों की उपेक्षाओं से होता है, वैसे दैत्यों का सर्वनाश देवताओं से उनकी उपेक्षा द्वारा हो सकता है, वह कहते हैं कि **'रिपुर्महान्'** इत्यादि,

अपने से भी अधिक महत्त्वशाली तो वह स्वरूपतः हैं ही, वह फिर यदि दृढ़बल हो जावें तो हिलाये भी न जा सकेंगे, अतः उपेक्षणीय नहीं ॥ ३९ ॥

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **"मूलमाह"** दैत्य लोक देवताओं के मूल को **'मूलं हि विष्णुः'** श्लोक से कहते हैं।

देवताओं का मूल विष्णु है, विष्णु से देवताओं का प्रभव है, क्योंकि सत्त्वगुणरूप देवता होते हैं, उस सत्त्वगुण का तो अधिष्ठाता विष्णु ही है 'हि' शब्द से उक्त युक्ति सूचित की है। अन्य प्रकार से भी देवताओं का मूल विष्णु है—यह बतलाते हैं कि **'यत्र धर्मः सनातनः'** सनातन धर्म विष्णु पर ही आधारित है। धर्म यागादिरूप होता है, और याग तो देवताओं के उद्देश्य से द्रव्य का त्याग ही है, वह केवल वेदोक्त है, अतः सनातन है। **'तानि धर्माणि प्रथमान्यासन्'** श्रुति से धर्मों की प्राथमिकता स्पष्ट है। यज्ञ के अभाव में देवताओं को मोक्ष नहीं मिल सकता, अतः यज्ञ देवताओं का मूल है और वह यज्ञ अपने नियामक देवतारूप विष्णु से नियम्य है—**'यज्ञो वै विष्णुः'** इस श्रुति से यज्ञ को विष्णु रूप कहा गया है, अतः विष्णु ही यज्ञ के नियामक देवता हैं, व यज्ञ के आधार भी विष्णु ही हैं, अतः 'यत्र' पद से आधारता कही है, कि जिस विष्णु में सनातन धर्म रहता है **'धर्मस्य प्रभुरच्युतः'** इस वाक्य से अच्युत प्रभु विष्णु को धर्म का आधार बतलाया गया है, अतः लौकिक दानादि व वैदिक यागादि धर्म व उसके उद्देश्य देवताओं का मूल विष्णु है, उस विष्णु के भी मूल को कहते हैं कि **'तस्य च'** इत्यादि, उस विष्णु का 'च' कार से देवताओं का भी मूल **ब्रह्म** अर्थात् वेद है, तथा गौ, ब्राह्मण, तप, एवं दक्षिणा सहित यज्ञ भी उनके मूल हैं। वेद धर्मादि का प्रमाण है, गौ में हवि घृत रहता है, ब्राह्मण में मंत्र रहते हैं, धर्म द्विविध है, प्रवृत्तिरूप व निवृत्तिरूप, यज्ञ प्रवृत्ति धर्म है, तप निवृत्ति धर्म है। दक्षिणा यज्ञ की भार्या है, दक्षिणा के यज्ञ के भार्या होने के कथन से यज्ञ की प्रवृत्ति धर्मरूपता स्पष्ट की है। इस प्रकार विष्णु व देवताओं का मूल द्विविध धर्म बतलाया है, अथवा वेद, गौ, ब्राह्मण तप यज्ञ रूप पञ्चात्मक विष्णु को देवताओं का मूल बतलाया है, इस मूल प्रतिपादक वाक्य से प्रधानतया गौ और ब्राह्मण यह दो ही मूल बतलाये गये हैं, यह अग्रिम श्लोक से स्पष्ट हो जाता है, उन गौओं में व ब्राह्मणों में दूध देने वाली गौ व यज्ञकर्त्ता तपस्वी वेदज्ञ ब्राह्मण विवक्षित हैं ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं यद्यपि देवा न किमप्यनिष्टं कर्तुं शक्तास्तथापि, सापत्न्यात् शत्रुत्वात्ते नोपेक्ष्याः। अकिञ्चित्करत्वेन नोपेक्षणीया इति वयं मन्महे मन्यामहे। ततस्तस्मात्तेषां मूलखनने अनुव्रतान् स्वसेवकानस्मान् नियुंक्ष्व आज्ञापय ॥ ३७ ॥ उपेक्षायां को दोष

इत्यपेक्षायामाह—यथेति । यथा अङ्गे शरीरे उत्पन्नः आमयो ज्वरादिरोगो नृभिर्यथेष्टस्नानभोजनादि कुर्वद्भिः प्रथमं समुपेक्षितः अचिकित्सितः, अतएव यदा रूढपदः बद्धमूलस्तदा चिकित्सितुमौषधादिप्रयोगेण निवर्तयितुं न शक्यते । एवं लौकिकं दृष्टान्तमुक्त्वाऽलौकिकं दृष्टान्तमाह—यथा चेन्द्रियग्रामः इन्द्रियसमूहः प्रथमत उपेक्षितः असन्नियमितो यदा विषयासक्तो भवति तदा संयमितुं न शक्यते तथोपेक्षितो रिपुरपि यदा बद्धबलो महान् भवति, तदा न चाल्यते स्थानाच्चालयितुमपि न शक्यते । तद्धननं तु दूरत इत्यर्थः ॥ ३८ ॥ तर्हि किं तेषां मूलं यद्विनाशितव्यमित्यपेक्षायामाहुः—विष्णुरेव देवानां मूलमिति । हीत्यवधारणे । ननु "तस्य रहोजुट्त्वोक्तेः कथं विनाशः सम्भवति" इत्यपेक्षायामाह—यत्रेति । यत्र सनातनः सनातनवेदप्रतिपादितो धर्मः पुण्यादृष्टापूर्वादिपदवाच्यस्तत्रैव स आविर्भवतीति शेषः । तद्धि पूर्वस्याप्यदृष्टत्वात् कथं तज्ज्ञानमित्यपेक्षायामाहुः—तस्येति । तस्य च धर्मस्य ब्रह्मादयो मूलमित्यनुषङ्गः । ब्रह्म वेदः उपायज्ञापकः, गावः हविर्हेतुभूताः, विप्रा उपदेष्टारः, तपः कृच्छ्रादि, सदक्षिणा यज्ञाश्चोपायभूताः ॥ ३९ ॥ तस्मात् विष्णोराविर्भावहेतुत्वात् हे राजन् ! ब्रह्मवादिनः वेदोपदेशकर्तॄन् ब्राह्मणान् तपस्विनश्च यज्ञशीलान् यज्ञाद्यनुष्ठातॄन् हविर्दुघा गाश्च सर्वात्मना सर्वप्रयत्नेन वयं हन्म इत्यन्वयः । सम्बोधनेन तव प्रभावादिति सूचितम् ॥ ४० ॥

अन्वितार्थप्रकाशिका

तथापीति ॥ तथापि अकिञ्चित्करत्वेऽपि सापत्न्यात् शत्रुत्वाद्धेतोः देवाः न उपेक्ष्याः किन्तु शत्रुतया योद्धव्या इत्यर्थः । इति वयं मन्महे । ततः अनुव्रतान् स्वसेवकानस्मान् तेषां देवानां मूलखनने मूलभूतस्य बालकरूपगुप्तस्य विष्णोः हनने नियुङ्क्ष्व आज्ञापय ॥ ३७ ॥ यथेति ॥ यथाऽङ्गे शरीरे उत्पन्नः आमयो ज्वरादिरोगो नृभिर्यथेष्टस्नानभोजनादि कुर्वद्भिः प्रथमं समुपेक्षितः अचिकित्सितः अत एव यदा रूढपदः बद्धमूलस्तदा चिकित्सितुमौषधादिप्रयोगेण निवर्तयितुं न शक्यते । यथा चेन्द्रियग्रामः इन्द्रियसमूहः प्रथमत उपेक्षितः असंनियमितो यदा विषयासक्तो भवति तदा संयमितुं न शक्यते तथा उपेक्षितो रिपुरपि यदा बद्धबलो महान् भवति तदा न चाल्यते स्थानाच्चालयितुमपि न शक्यते तद्धननं तु दूरत इत्यर्थः ॥ ३८ ॥ मूलमिति ॥ हि निश्चये स विष्णुरेव देवानां मूलं स च यत्र सनातनो धर्मस्तत्र तिष्ठति तस्य धर्मस्य च ब्रह्म वेदः गावः विप्राः तपः सदक्षिणा यज्ञाश्च मूलम् ॥ ३९ ॥ तस्मादिति ॥ तस्मात् विष्णोराविर्भावहेतुत्वात् हे राजन् ! ब्रह्मवादिनः वेदोपदेशकर्तॄन् ब्राह्मणान् तपस्विनश्च धर्मशीलान् यज्ञाद्यनुष्ठातॄन् यज्ञशीलानित्यपि पाठः । हविर्दुघा होमसाधनघृतादिप्रदाः गाश्च सर्वात्मना सर्वप्रयत्नेन वयं हन्मः ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यद्यप्युग्रमैर्देवा न किंचिदपि कर्तुं समर्थास्तथापि नीतिरनुसर्त्तव्या इत्याहुः ॥ तथापीति ॥ तथापि तवाग्रे एतेषामकिंचित् करत्वेऽपि, सापत्न्याद्देवानामस्माकं च परस्परं शत्रुभावाद्धेतोः, देवाः, न उपेक्ष्याः नोपेक्षणीयाः, इति मन्महे मन्यामहे । ततः, 'समूलघातमघ्नन्तः पराञ्नोद्यन्ति मानिनः । ध्रियते यावदेकोऽपि रिपुस्तावत् कुतः सुखम्' इति नीतिवक्तृभिर्युक्तोक्तेश्च हेतोः, अनुव्रतांस्त्वद्भृत्यान्, अस्मान्, तन्मूलखनने सपत्नमूलोन्मूलने निमित्ते, नियुङ्क्ष्व आज्ञापय ॥ ३७ ॥ सापत्न्यान्नोपेक्ष्या इत्येतदेव सदृष्टान्तमुपपादयन्ति ॥ यथेति ॥ यथा, अङ्गे शरीरे, आमयः समुत्पन्नो व्याधिः, नृभिः समुपेक्षितः प्रथमत एव नृभिरुपेक्षां गमितः, अत एव, रूढपदः निरूढमूलः, स्याच्चेत्तदा, चिकित्सितुं प्रतिकर्तुं, न शक्यते । यथा च, योगिभिः उपेक्षितः तावदेवोपेक्षां नीतः, इन्द्रियग्रामः, महान् दुर्जयः । तथा दृष्टान्तद्वयवत्, बद्धबलः रिपुरपि, न चाल्यते । चालयितुमल्पमात्रमपि न शक्यते इत्यर्थः ॥ ३८ ॥ तर्हि किं सपत्नानां मूलं यद्विनाशितव्यमित्यत्राहुः ॥ मूलमिति ॥ सनातनः अनादिनिधनाविच्छिन्नसंप्रदायवेदबोधितः, धर्मः वर्णाश्रमानुगुणो वृषः, यत्र विष्णौ तिष्ठति, स विष्णुः, देवानां, मूलं हि । तस्य विष्णोः चापि, मूलं, ब्रह्म वेदाश्च गावश्च विप्राश्च ते, तपः, सदक्षिणाः दक्षिणाभिः सहिताः, यज्ञाः ॥ ३९ ॥ तस्मादिति ॥ हे राजन्, तस्माद्धेतोः, सर्वात्मना सर्वप्रकारेण, ब्रह्मवादिनः, तपस्विनः, धर्मशीलान्, ब्रह्मवादित्वादिगुणयुक्तानित्यर्थः । ब्राह्मणान्, हविः दुहन्तीति हविर्दुघाः, यज्ञयोग्यघृतादिदुहन्तीः, छन्दसि हकारस्य घकारः । गा धेनूश्च, हन्मः हनिष्यामः ॥ ४० ॥

कृष्णप्रिया

यद्यपि अल्पवीर्य वाले इन्द्र से तथा तप करने वाले ब्रह्मा से कुछ भी नहीं बिगड़ सकता फिर भी शत्रुता के नाते देवता लोग उपेक्षणीय नहीं हैं ऐसा हम मानते हैं ॥ ३७ ॥ इसलिये उनके मूल को उखाड़ने के लिये हमें आज्ञा दीजिये क्योंकि हम सर्वथा आपका अनुसरण करने वाले हैं ॥ ३८ ॥ जैसे शरीर में होने वाले ज्वर आदि रोग की उपेक्षा की जाय तो वह अपनी जड़ जमा लेता है और फिर असाध्य हो जाता है, जैसे इन्द्रियों की उपेक्षा करने वाले योगी का उनके द्वारा सर्वनाश हो जाता है वैसे ही शत्रु की उपेक्षा की जाय तो उसके प्रबल होने पर उसका दबाना कठिन हो जाता है और उससे अपना सर्वनाश हो जाता है ॥ ३९ ॥ देवताओं का मूल विष्णु है जिसमें यज्ञादिरूप सनातन धर्म रहता है, उस विष्णु के तथा देवताओं के मूल-वेद गायें, ब्राह्मण, तप तथा दक्षिणा सहित यज्ञ हैं ॥ ४० ॥

तस्मात् सर्वात्मना राजन् ब्राह्मणान् ब्रह्मवादिनः । तपस्विनो यज्ञशीलान् गाश्च हन्मो हविर्दुघाः ॥४१॥
विप्रा गावश्च [१]वेदाश्च तपः सत्यं दमः शमः । श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ॥४२॥
स हि सर्वसुराध्यक्षो ह्यसुरद्विड् गुहाशयः । तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः ॥४३॥
अयं हि तद्वधोपायो यदृषीणां विहिंसनम् ।

[२]

एवं दुर्मन्त्रिभिः कंसः सह सम्मन्त्र्य दुर्मतिः । [४]ब्रह्महिंसा हितं मेने कालपाशावृतोऽसुरः ॥४४॥
संदिश्य साधुलोकस्य कदने कदनप्रियान् । कामरूपधरान् दिक्षु दानवान् गृहमाविशत् ॥४५॥
ते वै रजःप्रकृतयस्तमसा [५]रूढचेतसः । सतां विद्वेषमाचेरुरारादागतमृत्यवः ॥४६॥
आयुः श्रियं यशो धर्मं लोकानाशिषः एव च । हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥४७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशकस्कन्धे [६]चतुर्थोऽध्यायः ॥ ४ ॥

कर्दमक्षमा

अन्वयः — तस्मा त् राजन् सर्वात्मना ब्रह्मविदः ब्राह्मणान् यज्ञशीलान् तपस्विनः च हविर्दुघाः गाः हन्मः ॥ ४१ ॥ विप्राः गावः वेदाः तपः सत्यं दमः च शमः श्रद्धा दया च तितिक्षा क्रतवः हरेः तनूः ॥ ४२ ॥ सः हि सर्वसुराध्यक्षः हि असुरद्विट् गुहाशयः सचतुर्मुखाः सेश्वराः सर्वाः देवताः तन्मूलाः अयं हि तद् वधोपायः ऋषीणां यद् विहिंसनम् ॥ ४३ ॥ कालपाशावृतः दुर्मतिः असुरः कंसः दुर्मन्त्रिभिः सह सम्मन्त्र्य ब्रह्महिंसाम् हितम् मेने ॥ ४४ ॥ साधुलोकस्य कदने कदनप्रियान् कामरूपधरान् दानवान् दिक्षु सन्दिश्य गृहम् आविशत् ॥ ४५ ॥ रजःप्रकृतयः तमसारूढचेतसः आराद् आगतमृत्यवः ते वै सताम् विद्वेषम् आचेरुः ॥ ४६ ॥ पुंसः महद् अतिक्रमः आयुः श्रियम् यशः धर्मं लोकान् आशिषः च सर्वाणि श्रेयांसि हन्ति एव ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे चतुर्थोऽध्यायः समाप्तः ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च विप्रादयो हरेरेव तनवो मूलं च यस्मात्तस्मादयमेव तद्वधोपाय इत्याहुः । अयमिति ॥ ४२–४४ ॥ आरात्समीपमागतो मृत्युर्येषां ते ॥ ४५ ॥ सतां विद्वेषो न मृत्युमात्रहेतुः किं तु बह्वनर्थकारीत्याह । आयुः श्रियमिति ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे टीकायां कंसोद्यमनिरूपणं नाम चतुर्थोऽध्यायः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तपः स्वधर्मः । तनूस्तनवः शरीराणि अंगानि वा ॥४१॥ स हि हरिः । तन्मूला विष्णुमूलाः । सेश्वराः सशिवाः ॥ ४२ ॥ अंगेषु नष्टेष्वंगी स्वत एव नश्यतीत्याह – किञ्चेति । अयं कस्तत्राह – यदिति । कार्यायतिमनालोच्य कर्तारो दुर्मन्त्रिणस्ते चेह केश्यादयः । दुर्मन्त्रिसंग्रहात्स्वयमपि दुर्मतिः । हितं हितकरम् । कुतो मेने यतः कालपाशावृतः "गतश्रीर्गणकान्द्वेष्टि गतायुश्च चिकित्सकान् । गतश्रीश्च गतायुश्च ब्राह्मणान्द्वेष्टि भारत ।" इत्युक्तेः ॥ ४३ ॥ कदने कदननिमित्तम् 'कदनं मर्दपापयोः' इति मेदिनी । मर्दनार्थमिति यावत् । कदनप्रियान्पापप्रियान् । संदिश्याज्ञाप्य ॥ ४४ ॥ मूढचेतसः कर्त्तव्याकर्त्तव्यानुसंधानहीनाः ॥४५॥ ते तु मृत्युतोऽप्यधिकानर्थकरे कर्मणि प्रवृत्ता इत्याह महतामिति । महदतिक्रमः पूज्यापराधः । "किमुत्पथस्थः कुशलाय कल्पते" इत्याद्युक्तेः । श्रियं संपदम् । धर्मं पूर्वकृतं पुण्यं लोकान्स्वर्गादीन् । आशिषो धनपुत्राद्यभिलाषान् । किं बहुना सर्वाणीति ऐहिकपारत्रिकश्रेयस्कराणि ॥ ४६ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न केवलं ते विष्णोः परिकरा अपि तु तनुनिर्विशेषाः अपीति पूर्ववदनुवदन्ति—विप्रा इति । "तपः स्वधर्माचरणं सत्यं यथार्थभाषणम्" इति साधारणधर्माः दमादयः प्रायो निवृत्तिधर्माः क्रतवश्च प्रायः प्रवृत्तिधर्मा इति विवेचनीयं पूर्वतोऽत्राधिक्येन दैत्यादीनामुक्तिस्तद्वतामप्यृषीणां जिघांसया तनूरित्येकत्वं समाहारप्राधान्येन तनुरिति ह्रस्वान्तपाठो न बहुत्र ॥ ४१ ॥ एवं तद्धनने

---

१. देवाश्च—इति कस्यचित् । २. वै—श्रीधर. वंशी. गिरि. भक्त. । ३. श्रीशुक उवाच—श्रीधर. वंशी. गिरि. भक्त । ४. हितां—इति कस्यचित् । ५. मूढ—श्रीधर. वंशी. गिरि. भक्त. । ६. पूर्वार्धे चतुर्थोऽध्यायः—श्रीधर. ; असुरमन्त्रणं नाम चतुर्थोऽध्यायः —इति कस्यचित् ।

सति देवतान्तरहिंसा तु पिष्टपेषणमेवेत्याहुः—स हीति—स हि स एव तथा असुरद्विडपि स एव द्वितीयो हि शब्दः प्रसिद्धौ तर्हि कथमसौ साक्षादेव न हिंस्येत तत्राहुः गुहाशयः सदैवादृश्यवासत्वात्सम्प्रति पृथिव्यां जातत्वेऽपि गुप्तत्वादसौ न दृश्यते अन्यथा जीयतैवेति भावः। तस्मात् पूर्वयुक्तिमेव संक्षिप्योपसंहरन्ति—अयमित्यर्द्धकेन। गुप्तत्वाद्बाल्यबालेष्वपि प्रायो नैव प्राप्यः गावस्त्वत्र दुग्धादिना राज्यजीविका अपि भवन्ति तेषां धर्ममूलत्वमप्येषामेव हिंसयाऽस्य गच्छेदित्यभिप्रेत्याहुः - ऋषीणामिति। ब्रह्मवादिप्रभृतीनामेव तद्वधोपाय इत्यस्य तु अयं भावः पूर्वं खलु धर्मस्य तज्जीविकात्वेनैव तदाश्रयत्वमुक्तं तस्य च वेदादयो मूलानि अतस्तत्तनुतुल्या एव ते तत्र च विप्रास्तेषामप्याश्रयाः ततस्तस्य दुर्गपतेरिव गुहाशयस्य तल्लक्ष्ममूलजीविकास्थानहिंसयैव हिंसा स्यादिति ॥ ४२ ॥ स्वतो दुर्मतिः पुनश्च दुर्मन्त्रिभिः सह सम्मन्त्र्य हितमिति हितामिति वा पाठः ॥ ४३ ॥ कदने निमित्ते ॥ ४४ ॥ रजःस्वभावत्वात् कुपथगामिबुद्धयः उद्रिक्तेन तमसा च साधुदर्शितमपि सत्पथमपश्यन्तः विद्वेषफलमाह—आरादित्यादिना ॥ ४५ ॥ लोकान् धर्मसाध्यस्वर्गादीन् आशिषः निजवाञ्छितानि आयुरादीनां यथोत्तरं श्रैष्ठ्यं किं पृथङ्निर्देशेन सर्वाण्यपि श्रेयांसि साध्यसाधनानि पुंसः साधिताशेषपुरुषार्थस्यापि जनस्य महतां तादृशां श्रीविष्णोरप्युप जीव्यशीलत्वेन प्रसिद्धानाम् अतिक्रमो वाचनिकाद्यनादरोऽपि ॥४६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

तपः—स्वधर्म्माचरणम्, सत्यञ्च यथार्थभाषणमिति साधारणधर्म्मः, शमादयः प्रायो निवृत्तिधर्म्माः; क्रतवश्च प्रायः प्रवृत्तिधर्म्मा इति विवेचनीयम्। पूर्व्वतोऽत्राधिक्येन शमादीनामुक्तिस्तद्वतामृषीणां जिघांसया, तनूरधिष्ठानम्, एकत्वमार्षम्; सर्व्वेषामपि प्रत्येकं पृथक् हरितनुत्वाभिप्रायेण वा ॥ ४१ ॥ हि एव—स एव; हि अपि, असुरद्विडपि, स एव। एवमग्रेऽपि। गुहाशय इति सदा निभृतादृश्यस्थानवासित्वादसौ न दृश्यते, अन्यथा तु जीवेतैवेति भावः। वै एव, अयमेव। ऋषीणामिव विप्रवर्य्याणां हिंसनेन यज्ञाप्रवृत्त्या गवामनादरेण स्वत एव गवां हिंसनम्; तथा यज्ञाभावेन देवानां स्वत एव तप आदीनां चेत्येवं सर्व्वासां तत्तनूनां हिंसनात्तद्वधः सिद्ध एवेति भावः ॥ ४२ ॥ स्वतो दुर्म्मतिः पुनश्च दुर्मन्त्रिभिः सह संमन्त्र्य। कदने निमित्ते कामरूपधरान् स्वेच्छया विविधरूपधारिणः ॥४३-४४॥ तमसा श्रीविष्णुवैष्णव-द्रोहोद्भूत-तमोगुणेन क्रोधेन वा। वै प्रसिद्धौ ॥४५॥ लोकान्—धर्म्मसाध्यस्वर्गादीन्; आशिषो निजवाञ्छितानि; आयुरादीनां यथोत्तरं श्रेष्ठ्यम्; किं पृथङ्निर्देशेन? सर्व्वाण्यपि श्रेयांसि साध्यसाधनानि पुंसः साधिताशेषपुरुषार्थस्यापि जनस्य महतां श्रीवैष्णवानामतिक्रमोऽभिभवस्तेषु कश्चिदपराधोऽपीति वा ॥४६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्व्वार्द्धे श्री श्रीलसनातनगोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

गुहाशयः हृदयगुहानिगूढः ॥ ४२-४५ ॥ महदतिक्रमः महतामतिक्रमः ॥ ४६ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे शुकपक्षीये श्रीसुदर्शनसूरिकृते चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

विप्रादयो हरेस्तनूः शरीरम् ॥४१॥ स हि विष्णुः सुराणामध्यक्षोऽधिपतिः असुरान् द्वेष्टीति तथाभूतश्च हृदयगुहानिगूढः स विष्णुरेव मूलं यासां तथाभूताः सेश्वरा इन्द्रादिलोकपालैः सहिताः चतुर्मुखरुद्रसहिताश्च सर्वा देवताश्च एवं सत्ययमेव तस्य विष्णोर्वधोपायः, कोसौ? यदृषीणां विहिंसनमित्येषः यद्वा तद्वधोपायः देववधोपायः ऋषिविहिंसनेन तच्छरीरे विष्णौ नष्टे सति तन्मूला देवाः स्वयमेव नङ्क्ष्यन्तीति भावः ॥ ४२ ॥ इत्थं दुर्मन्त्रिभिः सह सम्मन्त्र्य आलोच्य स दुर्मतिरसुरः कंसः कालपाशेन यमपाशेनावृतो ऽतएव ब्रह्महिंसामेव हितं मेने अमन्यत ॥ ४३ ॥ ततः साधुजनस्य कदन उपद्रवे निमित्ते तत् कदनमेव प्रियं येषां तान् कामरूपधरान् दानवान् दिक्ष्वाज्ञाप्य स्वयं गृहमाविवेश ॥ ४४ ॥ ततस्ते दानवाः रजसा विक्षिप्तस्वभावास्तमसा विमूढमावृतं चेता येषामत एव ते सतामेव विद्वेषणमपीति दुःखमिति यावत् चेरुश्चक्रुः, कथम्भूताः? सन्निहितमृत्यवः सद्विद्वेषणस्य मृत्युसान्निध्यावहत्वादिति भावः ॥४५॥ न केवलं मृत्युमेवावहन्त्यपित्वायुरादीन्यपि हन्तीत्याह—आयुरिति। महदतिक्रमः महद्विषयापचारः पुंसामपचरतामायुरादीनि सर्वाणि श्रेयांसि हन्ति नाशयति श्रीः सम्पत्तिः धर्मः पुण्यं लोकाः धर्मप्राप्यफलानि यद्वा देहानुबन्धिनो जनाः आशिषः कामाः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

आरात् समीपे ॥ ४५ ॥ विष्णवादिमहदतिक्रमफलमाह—आयुरिति ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अतिक्रमो वचसाऽपि ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ब्राह्मणवध एव तस्य शरीरपातो भावीत्याहुः—विप्रा इति ॥ ४१ ॥ ऋषीणां विहिंसनमिति सर्वमूलस्य विष्णोरपि मूलत्वादिति भावः ॥ ४२-४४ ॥ भीतं राजानमाश्वासयति-आरादित्यादिना ॥ ४५-४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । चतुर्थो दशमस्कन्धे सङ्गतः सङ्गतः सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आरादन्तिके आगतो मृत्युर्येषां ते आसन्नमृत्यव इत्यर्थः ॥ ४५ ॥ न केवलं सद्विद्वेषस्य मरणमात्रं फलमपित्वायुरादीनां बहुपदार्थानां संक्षय इत्याह–आयुरिति ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुर्थाध्यायार्थप्रकाशः ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

विप्रादयो हरेस्तनुः पूजार्थं प्रतिमाः पूजाक्षये दुर्बलो मरिष्यतीत्यर्थः ॥ ४१ ॥ सहीति सार्द्धकं सर्वभूतगुहाशयोऽपि सर्वसुराध्यक्षस्तत्पक्षपाती असुरध्रुक् सर्वासां देवतानां मूलम् अयमिति ऋषीणां विहिंसने तत्सम्प्रदायप्रवर्त्यभावादसुरानुगामिनः सर्वे स्युरिति भावः ॥ ४२ ॥ दुर्मन्त्रिभिः प्रलम्बादिभिः ॥ ४३-४४ ॥ आरान् समीपमागतः कृष्णरूपो मृत्युर्येषां ते ॥ ४५ ॥ सतां विद्वेषः सर्वश्रेयो विनाशीत्याह आयुरिति लोकान् स्वर्गादीन् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वोक्तकर्मकर्तव्यतां द्रढयितुमुक्ताननुक्तैर्धर्मैः सह वदन्ति। विप्रा इति। सत्यं भूतहिताभिहतिर्हरेस्तनूस्तन्वस्तनूर्विद्धीति शेषो वा। तनूः शरीरमिति प्रथमैकवचनं वा। ऊकारान्तः स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः। स विष्णुः सर्वसुपर्ववर्योऽसुरद्विट् गुहाचरः सेश्वराः सेन्द्राः सचतुर्मुखाः सविधयः सर्वा देवतास्तन्मूलाः स मूलं येषां ते तथा ॥ ४२ ॥ फलितं लपन्ति। अयमिति। यदृषीणां हिंसनमयं तद्वधोपाय इत्यन्वयः। दुष्टाश्च ते मन्त्रा आलोचनानि च ते येषां सन्तीति ते तथा दुष्टाश्च ते मन्त्रिणश्चेति वा। दौष्ट्यं तु मन्त्रेषु यथायोग्यतयान्वेति। ते वदन्तु स्वयं विवेकी कथमिदमशृणोदित्यत आह। दुर्मतिरिति। सोऽपि तादृश इत्यर्थः ॥ ४३ ॥ ब्रह्महिंसां तदादिध्वंसं कंसः स्वस्मै हितं क्षेमङ्करं मेने। तन्मननसाधनमाह। कालपाशावृत इति। तदावृतता कुत इत्यत आह। असुर इति। साधुलोकस्य कदने कदनमेव प्रियं येषां ते तथा तान्सन्दिश्याज्ञाप्यकामरूपधरान्दानवान्दिक्षु स्वयं गृहमाविशन्निविविशे ॥४४॥ ते कंससन्दिष्टा रजःप्रकृतयो रजोगुणसर्जनमितमिति रजःप्रकृतयोऽसुरजातित्वात्तमसा रूढचेतसः सतां देवभूदेवादीनां विद्वेषमाचेरुरकुर्वन्। आरादागता मृत्युर्येषां ते तथा ॥ ४५ ॥ सामान्यत एवं कुर्वतामवमान्यतैवमित्याह। आयुरिति। लोकान्प्रशस्यान् आशिषोऽभिलाषविशेषान्। किमुत सर्वाणि श्रेयांसि महदतिक्रमो महदुल्लङ्घनं हन्ति नाशयति ॥ ४६ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे पञ्चमोऽध्यायः ॥ १०-५ ॥ (अस्मत्पक्षे चतुर्थोऽध्यायः)

श्रीसुबोधिनी

तेषां खननमाह तस्मादिति, सर्वात्मना लौकिकवैदिकसाधनैः स्वतः परतः साक्षात् परम्परया च यथैव ते निवृत्ता भवन्ति, ब्राह्मणानां विशेषणं ब्रह्मवादिनो वेदवेदार्थविदः, उभयविधं च कुर्वन्तीति, तपस्विनो यज्ञशीलाश्च, हविर्दुघाः पयोदोग्ध्र्योगाः, हन्धातोर्लङि बहुवचनं हन्म इति ॥ ४१ ॥ एवं विष्णुमूलत्वेन ब्राह्मणगवां निराकरणं निरूप्य भगवच्छरीरत्वेनाप्येतान् निरूपयन्ति साक्षान्निराकरणाय विप्रा इति, विप्रा गावश्चकारादन्यान्योऽप्यङ्गानि, वेदाः, चकारादङ्गानि व्रतानि वा, तपः सत्यं दमः शम इति ब्रह्मचर्याद्याश्रमधर्माः, तपः शारीरो धर्मः, सत्यं वाचः, दम इन्द्रियाणां शमोन्तःकरणस्य, श्रद्धा सर्वत्र, दया च सर्वेषु, तितिक्षातिक्रमसहनं, एवं दशविधो दशावतारः, क्रतवोसङ्ख्याता ज्योतिष्टोमादयः, एते सर्वे सर्वदुःखहर्तुर्भगवतस्तनूस्तन्वः, तस्माद् विष्णौ प्रयत्नः प्रतिष्ठितः ॥ ४२ ॥

उपसंहरंस्तस्य मूलत्वमाह **स हीति**, 'मुख्ये कार्यसम्प्रत्यय' इति न्यायाद् गौणानां देवानां निराकरणं व्यर्थं पूर्वोक्तन्यायेन **सर्वसुराणां** विष्णुरेवाध्यक्षः प्रभुः, किञ्चान्ये देवास्तथासुरान् न द्विषन्ति, कदाचित् सहभावोपि लक्ष्यते, हरिस्त्वसुरद्विडेव, मारयितुमपि न शक्यते साक्षाद् यतो **गुहाशयः**, गुप्तेन्तःकरणे वा तिष्ठतीति, अध्यक्षत्वं च न लौकिकप्रभुवत् किन्तु मूलभूतापीत्याह **तन्मूला** इति, स्त्रीलिङ्गप्रयोगोवगणनार्थः, महादेवस्य ब्रह्मणश्च स्वतन्त्रतामाशङ्क्याहुः **सेश्वराः सचतुर्मुखा** इति, अतो विष्णोः प्रतीकारः कर्तव्यः, प्रतीकारश्चर्षीणां निराकरणमेवेत्याहायमिति, ऋषिपदेनैव सर्वे धर्मा उक्ताः ॥ ४३ ॥ एवं तेषां वचनं श्रुत्वा किं कृतवानित्याशङ्क्याहैवमिति, नन्वयं क्षत्रियो ब्राह्मणरक्षकः कथं ब्रह्महिंसां हितत्वेन मेने ? तत्राह **दुर्मन्त्रिभिरिति**, एते दुष्टा मन्त्रिणः, पर्यवसानदोषदर्शनाभावात्, तैः सह सम्यङ् मन्त्रणं कृत्वा **दुर्मतिर्जातः**, बुद्ध्या हि सर्वनिर्णयः, बुद्धिनाशकस्तु दुःसङ्गस्तत्रापि मन्त्रित्वेन गृहीतः, अत एव **ब्रह्महिंसां** स्वस्य हितत्वेन **मेने**, ननु दुःसङ्गेपि कथं स्वाभाविको भावोन्यथा जात इति चेत् तत्राहासुरः कालपाशेनावृतश्च, असुरत्वात् स्वभावदुष्टः कालपाशावृत आपद्ग्रस्तः, आपदि सर्वबुद्धिनाशो भवति, तत्रापि कालपाशपदाभ्यां महत्यापदा निरूपिता ॥ ४४ ॥

एवं बुद्धिभ्रंशे जाते यत् कृतवांस्तदाह **सन्दिश्येति**, **साधुलोकस्य कदने** पीडायां **कदनप्रियान्** स्वतोपि कदनेच्छून् कदनकरणार्थं तत्तत्साधकनानारूपधारकान् दशदिक्ष्वप्यादिश्य स्वविषयेन्यविषये च **कामरूपधराणां** सर्वत्रैव सामर्थ्यसम्भवात्, **दानवानिति, क्रूरान्**, राक्षसमात्रे दानवप्रयोगः, **स्वगृहमाविशत्**, यथोपद्रवे कश्चित् प्रभोः स्थाने गतो दर्शनमेव न प्राप्नुयात्, एतदर्थं गृहे प्रवेशनम् ॥ ४५ ॥ ते च ततोप्यधिकं कृतवन्त इत्याह, **वै** निश्चयेन, **ते** स्वभावत एव **रजःप्रकृतयः**, राजसाः क्रूरा भवन्ति, आगन्तुकेन च पुनस्तमसारूढं चित्तं येषां, पूर्वसिद्धविवेकनाशार्थं **तमः**, रजस्तमोभ्यां व्याप्ताः सात्त्विकान् द्विषन्त्येव, अतः **सतां विद्वेष** विशेषेण द्वेषो यस्मात् तादृशमुपद्रवं धर्मधनादिनाशनमासमन्ताच्चेरुः कृतवन्तः, अनेन तेषां स्वरूपतोन्तःकरणनाशाद् धर्मतश्चोपद्रवं कृतवन्त इत्युक्तं भवति, ननु स्वाम्याज्ञाताधिकं किमर्थं कृतवन्तस्तत्राहाराद्दागतमृत्यव इति, मृत्युग्रस्तास्तथा कृतवन्तः, विकलो ह्यन्यथा करोत्येव ॥ ४६ ॥ माययैवैतत् कारितं सर्वनाशार्थमिति ज्ञापयितुं महदतिक्रमस्य फलमाहायुः श्रियमिति, जीवानां षड् उत्तमा गुणाः, तदभावे प्राण्यकृतार्थः स्यात्, तत्र प्रथममायुः, जीवता हि सर्वं भवति, ततः श्रीः, स्पष्टस्तस्या उपकारः, ततो यशः कीर्तिः, ततोन्तरङ्गो धर्मः, तैः साध्या लोकाः स्वर्गादयः, तत्र लोके सर्वा एवाशिषः, चकारादैहिका अपि पुत्रादयः, एवकारेण सर्वेषामेवाशीष्ट्वं प्रदर्शितं, अतो यस्य यदभीष्टं तदेव नाशयतीत्युक्तं भवति, अन्यथा गणिताश्चेत् तस्याभीष्टा न भवेयुस्तदेवमेव चेष्टितमिति महदतिक्रमः किं कुर्यात् ? अतो यत्किञ्चिदेवाभीष्टं तदेव हन्ति, लोकसिद्धास्तु गणिताः, अनुक्तसर्वसङ्ग्रहार्थं **सर्वाणीति, पुंस इति**, स्वतन्त्रस्यापि **महतो** भगवदीयस्यातिक्रम उल्लङ्घनं, महत्त्वं भगवत्सम्बन्धादेव, अन्यथात्ममात्रस्य कथं महत्त्वं स्यात् ? एवं भगवच्चरित्रसिद्ध्यर्थं मायाकार्यं निरूपितम् ॥ ४७ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे चतुर्थाध्यायविवरणम् ॥ ४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः ।

तस्मात् सर्वात्मनेत्यत्रोभयविधमिति, कर्मज्ञानात्मकं वेदार्थं, हन्धातोरित्यादि, तथा च वर्तमानसामीप्ये वर्तमानवद्वेत्यनुशासनान्मन्त्रकरणसमय एव तत्करणज्ञापनार्थो हन्म इति प्रयोग इत्यर्थः ॥ ४१ ॥ विप्रा इत्यत्रान्यान्यप्यन्नानीति, हविःसाधनानि व्रीहियवादीनि, अन्नपदमुपलक्षकं, तथा च यावन्ति हविःसाधनानि तावन्ति ज्ञातव्यानि ॥ ४२ ॥ **स हीत्यत्र गुहापदार्थमाहुर्गुप्त** इत्यादि गुप्ते रक्षिते लक्ष्ये वा स्थाने 'गुहां प्रविष्टा'विति श्रुत्यन्तःकरणे वा, तथा चान्तःकरणपक्षे यद्यपि समीपे वर्तते तथाप्यन्तःकरणस्याणुत्वेन नित्यत्वात् तन्मध्यवर्ती परमसूक्ष्मो दृश्यतरो नित्यतरश्च कथं प्रतीकार्यः ? यद्वा मारणार्थं विचारे क्रियमाणेन्तःकरणवृत्तित्वाद्विचारांशज्ञस्तिरोहितः स्यात्, यद्वा स्वदेहमारणं विना स्वान्तःकरणवर्ति मारणं न भवतीति यदा तं तथाकर्तुमुद्यतः स्यात् तदा पूर्वं स्वयं मृतः पश्चात् कं मारयेदिति सोप्रतीकार्य इत्यर्थः, **प्रतीकार** इति, इतोन्यः प्रतीकारः ॥ ४३ ॥ **एवमित्यत्र मन्त्रित्वेन गृहीत** इति, दुष्टो यदि दुष्टत्वेन गृहीतस्तदा तत्सङ्गस्तथा न बाधको मन्त्रित्वेन गृहीतस्य तु सर्वथा बाधक इत्यर्थः, मन्त्रित्वेनेतिपाठेपि तथैवार्थः, एकस्यैवेयं व्यवस्था बहूनां तथात्वे तु किं वक्तव्यमितिभावः ॥ ४४ ॥ सन्दिश्येत्यत्र **स्वविषय** इति, विषये देशे ॥ ४५ ॥ ते वै रज इत्यत्रानेनेत्यादि, अनेन श्लोकेन तेषां दुर्मन्त्रिणां स्वरूपतोन्तःकरणनाशात्, अन्तःकरणं हि वैकारिककार्यत्वाज् ज्ञानजनकत्वाच्च स्वरूपसात्त्विकं तत्स्वरूपनाशश्च रजोरूपत्वे सत्त्वरूपस्य तस्य धर्मो ज्ञानं तमसा ज्ञानमात्रनाशाद्धर्मतश्च नाश इति तथेतिभावः ॥ ४६ ॥ **आयुःश्रियमित्यस्याभासे सर्वनाशार्थमिति**, सर्वदैत्यनाशार्थं, **समाप्तावेवमित्यादि**, एवं प्रकारेण यन्मायाकार्यं सर्वदुःखात्मकं निरूपितं तद्भगवतोनिरुद्धस्य यच्चरित्रं सर्वधर्मरक्षारूपं तत्सिद्ध्यर्थं हेतुत्वेन निरूपितमित्यर्थः ॥ ४७ ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाशे चतुर्थाध्यायविवरणम् ।

बुभुत्सुबोधिका

तस्मादित्यत्र ब्राह्मणा गावश्चेति एतयोः पूर्वान्वय उक्तः । तत्रेति उभयोर्मध्येत्र श्लोके गावो दुहन्त्यो ग्राह्याः ‘हविर्दुघा’ इति विशेषणात् । प्रातिलोम्यक्रमेण । यज्ञकर्तारो मूले ‘दानशील’पदेनोक्ताः । यजेर्दानार्थस्य ग्रहणात् । नञ् तपस्विन इति स्पष्टम् । अधिकारार्थत्वात् । ब्रह्मवादिनो वेदान्तविदः । वेदविदो ‘ब्राह्मणा गाव’श्चेत्यत्र पूर्वमुक्ताः । विशेषणस्य व्यावर्तकत्वात् । खनन-मिति तेषां दर्शनाद्धन्म इत्यनेन खननं विखनःसृष्टित्वात् । खननमासुरभावत्याजनेन शुद्धया स्वकर्मयोग्यतासम्पादकं निराकरणम् । खन अवदारणे भ्वा० उ० से० सम्पादकमित्यन्तं अवोपसर्गार्थः क्रियारूपः । दारणं दृङ् अनादरे तु० आ० अ० इत्यस्य रूपं तस्यार्थो निराकरणम् । ‘कामक्रोधादयो दैत्या’ इति कृष्णोपनिषदः नित्यक्रीडास्थाः पूतनादयो बाहिर्मुख्येन्तर्दृष्टिसम्पादकाः । विखनसा कृतं वैखानसं मतम् । विखनःसृष्टिकृतमन्तर्दृष्टिसम्पादनं मतम् । ‘दैतेया नातिकोविदा’ इति वाक्यात् । वेदवेदार्थविद इति ब्रह्मणोर्वादिनो ब्रह्मवादिना इति षष्ठीतत्पुरुषे वेदो ब्रह्म न च वेदादृते किञ्चिच्छास्त्रं ब्रह्माभिधायकमिति कौम्योत् ब्रह्मार्थ इति तथोक्ताः । वेदशब्देन वेदान्ता वा । उभयमिति कर्मज्ञानात्मकमिति लेखेर्थः । ब्रह्म कुर्वन्तीत्यर्थः । ‘तमेव धीरो विज्ञाय प्रज्ञां कुर्वन्ति ब्राह्मणा’ इति बृहदारण्यकात् । ज्ञानात्मकं ब्रह्म कुर्वन्ति । ‘प्रज्ञा’ भावना वा । भावना ज्ञानं स्मरणं कर्म च, भू सत्तायाम् । क्रियावाचिनो भ्वादय इति च । उभयविधं च कुर्वन्तीति पाठः । यज्ञशीलाः । दानशीला नित्यत्रार्थत्रयमुपलक्षणीयमित्यर्थः । लटीति ‘वर्तमानसामीप्ये वर्तमानवद्वे’तिसूत्रान् मन्त्रकरणसमीप एव ब्राह्मणादिनिराकरणज्ञापनार्थो ‘हन्म’ इति प्रयोग इति भावः ॥४१॥

विप्रा गाव इत्यत्र साक्षादिति साक्षाद्विष्णुनिराकरणाय तनुद्वारा । अन्यस्य साक्षात्त्वेपि निराकरणाविषयत्वात् । अन्यान्यप्यङ्गानीति गोनिष्ठपयसोन्यानि हविःसाधनानि व्रीहियवादीनि उपलक्षणविधया । ‘विप्रा गाव’ इत्याभ्यां द्रव्यदेवात्मक-यागाधारावुक्तौ । तत्प्रतिपादका वेदाः । अङ्गानि शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षट् । वेदप्रतिपाद्यधर्मानाहुः तपः सत्यमित्यादि । क्रमेणाश्रमधर्माः कायिकवाचिकैन्द्रियकमानसधर्मा अप्येत इत्याहुः तपः शारीर इत्यादि । सर्वत्रेति आश्रम-धर्मेषु । मूलोक्ततनुपदसामर्थ्यादाहुः एवं दशेति । अवतरणं तनुषु हरेरवतारः । विप्रो वामनः गौः पृथिव्याधिदैविकी गन्धरूपापीति नासाग्रविवरप्राणरूपवराहेपि । सत्यं नवमोपदेशरूपं कृष्णः । दया बुध इत्येवं वा ज्ञेयम् । सङ्ख्यातात्पर्यं जन्मप्रकरणत्वात् सा । ‘ब्रह्मवादिन’ इत्यत्र वेदवेदान्तयोर्ब्रह्मपदेनोक्तत्वात् वेदान्त उक्त्वा वेद आहुः क्रतव इति । ज्योतिष्टोमादय इति आदिना कारीर्यादयः । सर्वदुःखेति हरेरित्यस्यार्थः । प्रयत्न इति साङ्ख्योक्तं प्रणिधानम् । उभयविधं च कुर्वन्तीत्युक्तं कर्म । प्रतिष्ठितः पर्यवसितः दैत्यानां वा विष्णौ प्रयत्नः प्रतिष्ठितः ॥ ४२ ॥

स हीत्यत्र उपसंहरन्निति दैत्यमन्त्रणम् । तस्येति विष्णोः । पूर्वोक्तेति मूलन्यायेन ‘मूलं विष्णुर्हि देवाना’मिति श्लोकोक्तेन । सहभाव इति असुरैः सहभावो देवानाम् । एवकारोसुरसहभावयोगं व्यवच्छिनत्ति न त्वसुरसहभाववान् । न शक्यत इति सहभावे कदाचिद्धननशक्तिः तदभावान् न शक्यते विष्णुः सत्त्वोपाधिनं गुहाशय इत्यत आहुः गुप्त इति । गुह संवरणे भावप्रत्ययः । गुपू रक्षणे भावे क्तः । रक्षणे गुहायां सत्त्वगुणे शेत इति । गुहा हृदयाकाश इत्यत्र वा सात्त्विके हृदि । अवगणनेति इन्द्रपरा-धीनत्वात् तथा । अयमित्यत्र एवेति साक्षात्प्रतीकारयोगव्यवच्छेदक एवकारः असुराद्विट्त्वात् गुहाशयत्वाच्च । ऋषीति ऋषयो मन्त्रद्रष्टारः । सर्व इति मन्त्रैः सर्वे धर्मा इति तथा ॥ ४३ ॥

एवमित्यत्र तेषामिति दैत्यानाम् । कृतवानिति कंसः । हितत्वेनेति मेने । पर्यवेति यद्ययं कंसः स्वमरणे निरभिमान-स्तिष्ठेदक्लिष्टकर्मा भगवान् न तं मारयेदतः साभिमानपर्यवसाने दोषः कंसमारणं तस्य दर्शनस्याभावात् । जात इति ब्राह्मणरक्षकत्व-स्वभावतिरोभावात् । दुर्मतित्वमुत्पन्नम् । तत्रापीति दुःसङ्गेपि । मन्त्रित्वेन गृहीत इति मन्त्रित्वेन गृहीतो मन्त्री दुष्टश्चेत् तदा तस्य सङ्गो दुःसङ्गः बाधकः । यदा तु दुष्टत्वेन गृहीतो मन्त्री तदा तत्सङ्गस्तथा न बाधक इत्यर्थः । मित्रत्वेनेति पाठेपि तथैवार्थः । अत एवेति दुष्टस्य मन्त्रित्वेन ग्रहणादेव न तु दुष्टत्वेनेत्यर्थः । भाव इति ब्राह्मणरक्षकत्वरूपः । अन्यथेति दुर्मतित्वेन परिणतः । आपद्-ग्रस्त इति ‘कालपाश’ आपत् । ‘आवृतो’ ग्रस्तः । तत्रापीति कालपाशेपि अथवा आपद्ग्रस्तत्वेपि । ‘काल’ आकाशवाणी शब्दभयं, ‘पाशो’ दुर्मन्त्रिणः ॥ ४४ ॥

सन्दिश्येति कदनेति कदनमन्यायपीडितम् । स्वविषय इति स्वदेशेन्यदेशे च । स्वविशय इति तालव्यमध्यपाठे तु कंससंशय इत्यर्थः । प्रवेशनमिति प्रवेश उक्तः ॥ ४५ ॥

ते वै रज इत्यत्र द्विषन्त्येवेत्यत्यन्तायोगव्यवच्छेदकैवकारः सात्त्विकविद्वेषसम्भावनायै । चेरुः कृतवन्त इति चर गतिभक्षणयोरस्य प्रकृत्यर्थः । ‘विद्वेष’पदेनोक्त इति व्यापारमात्रार्थ उक्तः, कृतवन्त इत्यनेन । अनेनेति अनेन श्लोकेन । तेषां दुर्मन्त्रिणां स्वरूपतोन्तःकरणनाशात् अन्तःकरणं हि वैकारिककार्यत्वाज् ज्ञानजनकत्वाच्च स्वरूपतः सात्त्विकम् । तत्स्वरूपनाशश्च रजोरूपत्वे संशयेऽज्ञानस्यापि निवेशात् । तस्य धर्मो ज्ञानं तमसा ज्ञानमात्रनाशाद्धर्मतश्च नाश इति उपद्रवं कृतवन्त इत्युक्तं भवतीत्यर्थः । मृत्युग्रस्ता इति ‘नैवेह किञ्चनाग्र आसीत् मृत्युनैवावृतमासी’दिति बृहदारण्यकात् ॥ ४६ ॥

आयुः श्रियमित्यत्र विकल इति कलावतां कृष्णादिद्रोहासम्भवाद् विकलः। सर्वनाशार्थमिति सर्वदैत्यनाशार्थम्। महदतिक्रमस्येति सतां विद्वेषकृतमहदतिक्रमस्येत्यर्थः। महदतिक्रमत्वेनायुरादिहतित्वेन कार्यकारणभाव उक्तः। जीवा मुक्ता जीवन्मुक्ताः साधारणाश्च, तत्र मुक्तानां जीवानां भगवद्गुणाः स्पष्टाः। जीवन्मुक्तगुणाः कंसस्य 'सामर्थ्यं च जयश्चैव दीनत्वं च दया तथा। शत्रूणामल्पता चैव राजनीतिस्तथैव चे'तिकारिकया 'किमुद्यमै'रितिश्लोके पूर्वमुक्ताः। साधारणानां जीवानामाहुः जीवानामिति। उत्तमा इति आत्ममाययार्थसम्बन्धो जीवस्य द्वितीयस्य नवमाध्याय उक्तः। षड् मायागुणा निकृष्टाः। उक्ता मध्यमाः। एते उत्तमा इत्यर्थः। जीवन्मुक्तगुणसादृश्यात्। अकृतार्थ इति न कृतः ऐहिकः आमुष्मिकः अर्थः प्रयोजनं येन स तथोक्तः। अन्तरङ्ग इति यशसो हि श्यपेक्षा। धर्मस्य श्यपेक्षा। सन्तापात्मकार्त्यधिकारसत्त्वादधनिकस्यापि धर्मसिद्धेः स्वल्पापेक्षत्वलक्षणमन्तरङ्गत्वं वर्तत एव। पुत्राद्य इति आदिशब्देन स्त्रीधनकर्माणि। पूर्णत्वं पञ्चानां सत्त्वे भवति। बृहदारण्यकात्। पूर्णत्वं प्रपञ्चस्य 'पूर्णमदः पूर्णमिद'मिति श्रुतेः। नन्वन्धंतमःप्रवेशे मुक्तौ मायिकायुरादिपञ्चहतिः प्रकृते इष्टैवेति दैत्यचेष्टितमिष्टमेवेति चेत् तत्राहुः एवकारेणेति। षड्गुणेषु प्रविष्टाप्याशीराशिष्ट्वेन पञ्चातिरिक्ताशिषं गृह्णानायुरादिनिष्ठाशीष्ट्वं न जहाति। 'आशिष एवे'त्यस्याशिषः द्वितीयाबहुवचनान्तं, 'एव' समान् , एवकारः साम्यार्थकः। सन्निहितत्वादाशीष्ट्वेन व्यापकधर्मेण समा सर्वानित्यर्थः। नाशयतीति महदतिक्रमः नाशयति। नन्वेवं गौरवेण व्याख्यानस्य किं प्रयोजनमिति चेत् तत्राहुः अन्यथेति। तस्येत्यनधिकारिणः। चेष्टितमिति दैत्यादिभिश्चेष्टितम्। किं कुर्यादिति किमनिष्टं कुर्यात्। गणिता इति षड्गुणाः। स्वतन्त्रस्येति अतिक्रमकर्तुः। 'स्वतन्त्रः कर्ते'त्यनुशासनात्। न विशेषेण भगवत्सम्बन्धेन महान् किन्तु भगवदीयत्वमात्रम्। तस्य। भगवत्सम्बन्धादिति आरामेति जीवस्य। 'तथा तृतीये प्रद्युम्नश्चतुर्थे तुर्य ईर्यते। न निबद्धो यतः कैश्चिदतः सर्वे विमोचिताः। धर्मरक्षार्थहेतूक्त्यै धर्मबाधश्च वर्ण्यते' इति चतुर्थाध्यायार्थ उक्तस्तमाहुः एवं भगवदिति। एवं प्रकारेण यन् मायाकार्यं सर्वदुःखात्मकं निरूपितं तद् भगवतोऽनिरुद्धस्य यच्चरित्रं सर्वधर्मरक्षारूपम् , तत्सिद्ध्यर्थं हेतुत्वेन निरूपितमित्यर्थः। तथा च सर्वविमोचन-धर्मबाधश्च यत्राग्रे कृतः सोऽनिरुद्धांश इति भावः॥ ४७॥

इति श्रीमद्वल्लभचरणैकतानश्रीगोपेश्वरविरचितायां शास्त्ररीत्या बुभुत्सुबोधिकायां चतुर्थाध्यायव्याख्यानं जन्मप्रकरणं समाप्तम्।

श्रीमातृपितृतोषिणी–श्रीसुबोधिनीजी–

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि—**''तेषां सततमाह''**—दैत्य मंत्री लोग उन मूलों के खनन या विनाश के उपाय को **'तस्माद्' 'सर्वात्मना'** राजन् श्लोक में कहते हैं कि लौकिक साधनों से व अभिचारादि वैदिक साधनों से भी स्वतः या परतः, साक्षात् या परम्परा से जैसे भी वे निविष्ट किये जा सकें, उन ब्रह्मवादी वेदार्थवेत्ता ब्राह्मणों को नष्ट करें, वह ब्राह्मण कर्म एवं ज्ञानरूप दोनों प्रकार के वेदार्थ का सम्पादन करते रहते हैं, वह तपस्वी एवं यज्ञशील याज्ञिक होते हैं। तथा गौ दुग्ध देती रहती हैं, अतः उनको हमलोग अभी मारते हैं, विलम्ब न होगा **'हन्यः'** यह हन् धातु से लट् लकार में बहुवचन हैं, अतः मन्त्रणा समय में ही बध करने की सूचना करने को अति निकट भविष्य को वर्तमानवत् किया है॥ ४१॥

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि—**''एवं विष्णुमूलत्वेन ब्राह्मणानां निराकरणं निरूप्य भगवच्छरीरत्वेनापि एतान् निरूपयति''** इस प्रकार विष्णु के मूलभूत होने के कारण ब्राह्मण व गौओं का निराकरण बतलाकर वह मन्त्री दैत्य लोग **''विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः''** इस श्लोक से गौ, ब्राह्मणों के साक्षात् निराकरणार्थ इन गौ, ब्राह्मणों का भगवान् के शरीर रूप से भी प्रतिपादन करते हैं, कि विप्र एवं गौ **'गावश्च'** इस चकार से अन्य भी हवि के साधन अन्न व्रीहि यव आदि, वेद **'वेदाश्च'** इस चकार से वेदाङ्ग या व्रत, तप, सत्य, दम, शम यह ब्रह्मचर्यादि आश्रम धर्म तप शारीरिक धर्म है, सत्य वाणी का, दमन इन्द्रियों का व शमन अन्तःकरण का है। सर्व आदरणीयों में श्रद्धा, व सर्व जीवों पर दया तथा तिरस्कार का सहनरूप तितिक्षा, इस प्रकार से विप्रादि तितिक्षान्त यह दश विध दश अवतार वाला विष्णु कहा है। ज्योतिष्टोम आदि यज्ञ असङ्ख्यात होते हैं, अतः असङ्ख्य अवतार विष्णु के कहे गये हैं, यह सब सर्व दुःख हरणकर्त्ता भगवान् के शरीररूप हैं, उक्त कारण से विष्णु के विषय में हम लोगों का प्रयत्न करना स्थिर हुआ है॥ ४२॥

अब आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि—**''उपसंहरंस्तस्य मूलत्वमाह''**—अब प्रसङ्ग का उपसंहार करते हुए मन्त्री उस विष्णु की मूल रूपता को **'स हि सर्वसुराध्यक्षो ह्यसुरद्विड् गुहाशयः''** इस श्लोक में **'गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः'** इस न्याय से गौण देवताओं का निराकरण व्यर्थ है, पूर्वोक्त रीति से सब देवताओं का विष्णु ही अध्यक्ष या स्वामी है, और अन्य देवता दैत्यों से वैसा द्वेष भी नहीं करते, कभी २ साथ होना भी उनका देखा जाता है, परन्तु हरि तो असुरद्वेषी ही है, यह साक्षात् मारा भी नहीं जा सकता क्योंकि गुहाशय है, गुप्त, सुरक्षित, अलक्ष्य स्थान में रहता है, **'गुहां प्रविष्टौ'** श्रुति के अनुसार अन्तःकरण में रहता है। लौकिक स्वामी के समान उसकी अध्यक्षता भी नहीं है, किन्तु वह उनका मूलभूत भी है, अतः कहते हैं **'तन्मूलाः'** इत्यादि। **'देवताः'** यह स्त्रीलिंग का प्रयोग देवगण की अवज्ञा का सूचक है, महादेव व ब्रह्मा की

स्वतन्त्रता की शङ्का कर कहते हैं कि **'सेश्वराः'** इत्यादि। ईश्वर शिव, चतुर्मुख ब्रह्मा के साथ सब ही देवताओं का मूल विष्णु है अतः विष्णु का प्रतीकार करना आवश्यक है और वह प्रतीकार यह है कि ऋषियों का निराकरण किया जाय, ऋषि पद से ही सर्व धर्म कहे हैं, धर्मनाश ही विष्णु के वध का उपाय है ॥ ४३ ॥

श्रीमदाचार्यचरण इस श्लोक के अवतरण में कहते हैं कि—**"एवं तेषां वचनं श्रुत्वा किं कृतवानित्याह"**—कंस ने ऐसे मन्त्रियों के वचन सुनकर क्या किया, इस आशङ्का के समाधानार्थ श्रीशुकाचार्यजी **"एवं दुर्मन्त्रिभिः कंसः सह सम्मन्त्र्य दुर्मतिः"** श्लोक का प्रारंभ करते हैं कि—राजन् परीक्षित् राजा कंस तो क्षत्रिय है, अतः उसका कर्त्तव्य ब्राह्मण रक्षक होना चाहिये, जिसमें उसका हित है लेकिन उसने ब्रह्म हिंसा को हितकर कैसे माना, उस शङ्का पर कहा है **'दुर्मन्त्रिभिः'** यह मंत्री सब दुष्ट थे, क्योंकि परिणाम के दोष का विचार ही नही किया उनके साथ मन्त्रणा करने से कंस दुर्मति हो गया था, बुद्धि से ही सब निर्णय होता है, बुद्धि का नाशक तो दुष्ट सङ्ग ही होता है, उस पर भी मन्त्री के रूप से यदि दुष्ट का संग हो जाय तो बुद्धि का नाश अनिवार्य ही है। इसी कारण कंस ने ब्रह्महिंसा को अपने हितकर रूप से माना, दुसङ्ग होने पर भी स्वाभाविक भाव अन्यथा कैसे हो गया? इस शङ्का पर कहा है कि कंस असुर था व कालपाश से घिरा हुआ था। असुर होने से स्वभावतः दुष्ट था कालपाश बद्ध होने से वह आपद्ग्रस्त था, आपत्ति में बुद्धि का सर्वांश में नाश हो जाता है, उस पर भी काल, व पाश पदों द्वारा यहाँ महाआपत्ति कही गई है, अतः कंस का बुद्धिनाश सम्भव है ॥ ४४ ॥

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **"एवं बुद्धिभ्रंशे यत्कृतवांस्तदाह"**—ऐसे बुद्धि नाश होने पर जो कंस ने किया वह **"सन्दिश्य साधुलोकस्य"** श्लोक से कहा है।

कि साधु जन के पीडनार्थ उन स्वभावतः पीड़ा प्रिय, एवं पीड़ित करने के लिये विभिन्न प्रकार की पीड़ाओं के साधक नाना रूपों के धारण करने वाले दुष्टों को दशों दिशाओं में उपद्रव के लिये कंस ने आदेश किया, अपने देश में व अन्य देश में भी यथेच्छ रूप धारण करने वालों का सर्वत्र ही सामर्थ्य हो सकता है, अतः सर्वदिशाओं में उनको भेजा **'दानवान्'** दानव शब्द से उनकी क्रूरता या हत्याशीलता कही है। राक्षसमात्र में दानव शब्द का प्रयोग होता है, आदेश देकर वह कंस अपने घर में घुस गया, जैसे उपद्रव होने पर कोई राजा के स्थान पर पहुँचे तो उसे राजा का दर्शन ही प्राप्त न हो सके, इसलिये घर में उसका घुस जाना कहा है ॥ ४५ ॥

आचार्यचरण इस श्लोक के अवतरण में कहते हैं कि **'ते च ततोऽप्यधिकं कृतवन्तः'** उन दैत्यों के तो पूर्व विचारित धर्मनाश से भी अधिक दुष्कर्म किया, यह प्रसङ्ग **'ते वै रजःप्रकृतयस्तमसारूढचेतसः'** श्लोक में कहा है कि वह स्वभाव से ही रजोगुण प्रकृति के हैं, यह निश्चित है, राजस, होते हैं वे क्रूर होते हैं, और फिर वह आगन्तुक या अस्वाभाविक अतिथिवत् प्राप्त तमो गुण से आक्रान्त मनवाले हो गये, तमो गुण ने उनके पूर्व सिद्ध विवेक का नाश कर दिया, रजोगुण तमो गुण से व्याप्त हुए लोग सात्त्विकों से द्वेष करते ही हैं, अतः उन दैत्यों ने सत्पुरुषों का विद्वेष किया, विशेष रूप से धर्म, धन आदि का नाशक उपद्रव सब ओर से किया।

इस श्लोक से यह बतलाया है कि उन दैत्यों के अन्तःकरण का रजोगुण से[1] स्वरूपतः नाश हुआ व तमोगुण से ज्ञान मात्र का नाश होने से उनके अन्तःकरण का धर्मतः नाश हुआ, अन्तःकरणहीन दैत्यों ने अत्याचारमय उपद्रव किया, उन्होंने स्वामी की आज्ञा से भी अधिक उपद्रव क्यों किया, तब कहा है कि **'आराद्‌आगतमृत्यवः'** मृत्युग्रस्त होने से वैसा किया, व्याकुल पुरुष तो अन्यथा करता ही है ॥ ४६ ॥

आचार्य चरण इस श्लोक में कहते हैं कि **"माययैवतत् कारितं सव नाशार्थमिति ज्ञापयितुं महदतिक्रमणस्य फलमाह**—यह सब माया ने ही सर्व दैत्यों के नाशार्थ करवाया था, यह बतलाने को यहाँ पुरुषों के तिरस्कार का फल है **'आयुः श्रियं यशः धर्मं लोकानाशिष एव च'** इस श्लोक में कहते हैं—जीवों के छ गुण उत्तम हैं, उन गुणों के अभाव में प्राणी कृतार्थ नहीं हो सकता, उन गुणों में प्रथम गुण आयु है, जीवित रहने से ही सब हो सकता है। उसके बाद श्री है, लक्ष्मी का उपकार स्पष्ट ही है, उसके बाद यश या कीर्ति है, उससे धर्म अन्तरङ्ग है, उन आयु आदि व धर्म से सिद्ध किये जाने वाले स्वर्गादि लोक हैं, उस लोक में सभी आशी अभीष्ट पदार्थ होते हैं। **'एव च'** इस चकार से इस लोक के अभीष्ट पुत्र आदि का भी सङ्ग्रह है तथा एव शब्द से आयु श्री आदि सबका अभीष्टता दिखलाई गई है, अतः यह सूचित होता है कि जिसको जो अभीष्ट है उसी का नाशक महदतिक्रम होता है, अन्यथा यहाँ पर जिनकी गणना की गई है, वह आयु आदि यदि उपद्रव कर्त्ता के अभीष्ट न हो तो आयु आदि का नाश तो उसको अभीष्ट ही है, वह किया तो उससे कुछ अनिष्ट तो हुआ नहीं, महदतिक्रम ने क्या कर लिया? यह आक्षेप हो सकता है, अतः जो कुछ अभीष्ट होता है उसी का नाशक है, लोकप्रसिद्ध अभीष्टों की गणना

---

[1] अन्तः करण सात्त्विक अहङ्कार का कार्य होता है, अतः ऐसा कहा है।

तो की ही है, अन्य भी जो नहीं कहे गये वह सब ही **'सर्वाणि'** पद से संङ्गृहीत हैं। **'पुंसः'** पद से स्वतन्त्रता सूचित की है, कि स्वतन्त्र पुरुष के भी आयु आदि गुण महान पुरुष भगवदीय जन के अतिक्रम या उल्लङ्घन द्वारा नष्ट हो जाते हैं, जिनका महत्व भगवत्सम्बन्ध से ही है, अन्यथा आरा के अग्रभाग जसे अणु जीव का महत्व कैसे हो सकता है, ऐसे अनिरुद्ध व्यूह भगवान् के धर्म रक्षात्मक चरित्र की सिद्धि के लिये सर्व दुःखरूप माया कार्य बतलाया गया है ॥ ४७ ॥

पं० विदुर जी सवह्यकिशोरकृत भा० द० स्कन्ध चतुर्थ अध्याय के सुबोधिनी जी का हिन्दी अनुवाद समाप्त।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उक्तमेव स्पष्टयन्ति—विप्रा इति। यतो विप्रादयो हरेस्तनूः तन्वः, अतस्तेषां वध एव तद्वध इत्याशयः ॥ ४१ ॥ हिशब्दोऽवधारणे। द्वितीयो हिशब्दो हेतौ। हि यस्मात् स हरिरेवासुरद्विट्, अतः स एव हन्तव्य इति शेषः। ननु "देवा अपि द्वेषिणः सन्त्येव, कथं स एवेत्यवधारणम् ?" तत्राहुः—सर्वेषां सुराणामध्यक्षः स्वामीति। "स्वामित्वमपि न लोकवत्, किन्तु तन्मूलतया" इत्याहुः—तन्मूला देवताः सर्वा इति। एवमुक्तेऽपि 'रुद्रस्य ब्रह्मणश्च स्वातन्त्र्यशङ्का माभूत्' इत्याशयेनाहुः—सेश्वराः सचतुर्मुखा इति। सर्वमूलत्वे हेतुमाहुः—गुहाशय इति। गुहा अन्तःकरणं तत्र शेतेऽनियामकतया तिष्ठतीति तथा "एवं विप्रादीनां हरितनुत्वेऽपि तेषु वेदज्ञा ऋषय एव मुख्या, उपदेष्टृत्वात्। अतस्तेषां हिंसनमेव तद्वधे मुख्य उपाय" इत्याहुः—अयमिति ॥ ४२ ॥ एवं दुष्टैर्मन्त्रिभिः सह कंसः सम्मन्त्र्य ब्रह्महिंसां हितं मेन इत्यन्वयः। ननु "क्षत्रियस्य ब्राह्मणरक्षणमेव युक्तम्, ब्राह्मणहिंसा तु सर्वथाऽनुचितैव, अनर्थहेतुत्वात्। इति मन्त्रिणं दुष्टत्वेऽपि तां कथं हितं मेने" इत्याशङ्क्याह—असुर इति। ननु 'असुरा अपि प्रह्लादबलिप्रभृतयो धर्मिष्ठाः श्रुता' इत्याशङ्क्याह—दुर्मतिरिति। तत्रापि हेतुमाह—कालपाशावृत इति। आसन्नमृत्युरित्यर्थः ॥ ४३ ॥ ततश्च सर्वदिक्षु साधुलोकस्य सदाचारनिष्ठब्राह्मणादिजनस्य कदने दुःखोत्पादने दानवान् सन्दिश्य आज्ञाप्य स्वयं गृहमाविशत्।' 'दानवानामपि तदाज्ञया महानुत्सवो जात' इत्याशयेन विशिनष्टि—कदनप्रियानिति। कदनं परदुःखोत्पादनं प्रियं येषां तानित्यर्थः। तेषां सर्वत्र गमने सर्वोपद्रवे च सामर्थ्यं सूचयन्नाह—कामरूपधरानिति। यथेष्टवेषधारिण इत्यर्थः ॥ ४४ ॥ ते कंसाज्ञप्ता दैत्या अपि सतां विद्वेषमुपद्रवमाचेरुः कृतवन्त इत्यन्वयः। तेषामपि असदाचरणेदुर्बुद्धित्वमेव हेतुमाह—रजःप्रकृतय इति। रजसा गुणेन विक्षिप्तस्वभावा इत्यर्थः। तमसा मूढमर्थानर्थविवेके असमर्थं चेतो येषां ते। एवं बुद्धिभ्रंशेऽपि हेतुमाह—आरात् समीपमागतो मृत्युर्येषां ते इति ॥ ४५ ॥ न केवलं पुंसः आयुरेव महतामतिक्रमस्तिरस्कारो हन्ति, किन्त्वायुरादीनि सर्वाण्येव श्रेयांसि हन्तीत्यन्वयः। श्रेयांस्येव दर्शयति—श्रियं धनसम्पत्तिम्, यशः कीर्तिम्, धर्मं पुण्यम्, तत्प्राप्यान् स्वर्गादिलोकांश्च, आशिषः अन्यांश्चाकाङ्क्षितान् पुत्रादीन् ॥ ४६ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र हरेर्जन्मनिरूपणे ॥ चतुर्थो विवृतोऽध्यायः कंसोद्यमनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

विप्रा इति ॥ विप्रा गावश्च वेदाश्चेत्यादयः हरेस्तनूः शरीरम् एकत्वं समुदायाभिप्रायमिति ऋजुः पन्थाः यद्वा एताः हरेस्तनूर्हन्त्यः ॥ ४१ ॥ सहीति सार्द्धम् ॥ हि यस्मात् स एव असुरद्विट् गुहाशयः अन्तःकरस्थः अलक्षितः सर्वेषां सुराणामध्यक्षः स्वामी सेश्वराः सशिवाः स चतुर्मुखाश्च सर्वा देवताः स विष्णुरेव मूलं यासां तथाभूताः सन्ति। अतो देवतामूलं विष्णुस्तन्मूलं च ब्राह्मणादयस्तेष्वपि ब्राह्मणो मुख्यः अतः यत् ऋषीणां विहिंसनम् अयमेव मुख्यः तस्य विष्णोर्वधस्य उपायः ॥ ४२ ॥ एवमिति ॥ कालस्य पाशेनावृतः आसन्नमृत्युः असुरः सुरविरोधी स्वयं दुर्मतिः कंसः दुर्मन्त्रिभिः सहैवं संमन्त्र्य ब्रह्मणां ब्राह्मणानां हिंसां हितं मेने। हितं हितमिति पाठद्वयम् ॥ ४३ ॥ संदिश्येति ॥ कदनं परदुःखोत्पादनं प्रियं येषां तान् कामरूपधरान् यथेष्टवेषधारिणः दानवान् सर्वदिक्षु साधुलोकस्य सदाचारजनस्य कदने संदिश्य गृहमाविशत् ॥ ४४ ॥ ते वै इति ॥ रजःप्रकृतयः रजोगुणेन विक्षिप्तस्वभावाः तमसा मूढचेतसः आरात्समीपमागतो मृत्युर्येषां ते दानवाः सतां विद्वेषमाचेरुः कृतवन्तः ॥ ४५ ॥ आयुरिति ॥ महतामतिक्रमोऽनादरः पुंस आयुः श्रियं यशः धर्मं लोकान् स्वर्गादीन् आशिषः कामितान् पुत्रादीन् किं बहुना सर्वाणि श्रेयांसि हन्ति। अतोऽसौ न मृत्युमात्रहेतुः किंतु बह्वनर्थकारी ॥ ४६ ॥

इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां चतुर्थोऽध्यायः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विप्रादयो न केवलं विष्णोर्मूलमात्रमपि तु हरेस्तनुरपीत्याहुः। विप्रा वेदविदादयो ब्राह्मणाः, गावो हविर्धान्यश्च, वेदा ऋगादयश्च, तपः कृच्छ्रचान्द्रायणाचरणादिरूपं, सत्यं यथार्थभाषणं, दमो बाह्येन्द्रियनिग्रहः, शमोऽन्तरिन्द्रियनिग्रहः, श्रद्धा,

सत्कर्माचरणविषया त्वरा, दया कारुण्यं, तितिक्षा क्षमा, क्रतवो यज्ञाश्च, हरेः तनूः शरीरम् ॥ ४१ ॥ स इति ॥ स हि स एव विष्णुः, सर्वसुराध्यक्षः सकलदेवानामधिपतिः, असुरान् द्वेष्टीति असुरद्विट् निरीहः सन् देवपक्षपातं कृत्वा असुरैर्द्वेषमाचरति । एवंभूतः सन्नपि, गुहाशयः सर्वभूतहृदयगुहानिगूढः, हि । सेश्वराः सशिवाः, सचतुर्मुखा ब्रह्मणा सहिताः, सर्वाः देवताः, स विष्णुरेव मूलं येषां तथाभूताः, एवं देवानां तन्मूलत्वेऽपि स गुहाशयः कथं हन्तव्य इति चेद्विप्रादय एव हन्तव्या इत्याहुः । अयमिति । ऋषीणां विहिंसनं यत्, अयं वै एव, तद्वधोपायः, ऋषिविहिंसनेन तच्छरीरे विष्णौ नष्टे सति तन्मूला देवाः स्वयमेव नङ्क्ष्यन्तीति भावः ॥ ४२ ॥ एवमिति । एवमित्थं, दुर्मन्त्रिभिः सह, संमन्त्र्यालोच्य, दुर्मतिः, असुरः, कालपाशावृतः कंसः, ब्रह्महिंसामेव, हितं स्वहितकारिणीं, मेनेऽमन्यत ॥ ४३ ॥ संदिश्येति ॥ कंसः, कदनं प्राणिनां व्यसूकरणं प्रियं येषां तान्, कामरूपधरान् नानारूपधरान् दानवान्, साधुलोकस्य साधुगुणवतो ब्राह्मणजनस्य, कदनेऽर्दने कदननिमित्ते, दिक्षु संदिश्य दिशासु प्रयातुमाज्ञाप्य, गृहं स्वभवनं, आविशत् ॥ ४४ ॥ त इति ॥ ततः, आरादन्तिके, आगतमृत्यवो निकटागतमरणा इत्यर्थः । ते असुराः, रजःप्रकृतयः रजसा क्षिप्तस्वभावाः, तमसा, मूढामावृतं चेतो येषां ते तथाभूताः सन्तः, सतां वै, विद्वेषमप्रीतिं दुःखमिति यावत् । आचेरुः । 'सतां विद्वेषणं चेरुः' इत्यपि पाठः ॥ ४५ ॥ सतां विद्वेषो न केवलं मृत्युमात्रहेतुः, किं तु बह्वनर्थकारीत्याह । आयुरिति । महदतिक्रमः महद्विषयापचारः, पुंसामपचरतां पुरुषादीनां, आयुर्दीर्घकालजीवनम्, श्रियं संपत्तिं, यशः कीर्त्तिं, धर्मं पुण्यं, लोकान् धर्मप्राप्यफलानि, देहानुबन्धिनो जनान्वा । आशिषः विप्राद्याशिषा लब्धान् भोगान्, किं बहुना । सर्वाणि श्रेयांसि चापि, हन्ति विनाशयति एव ॥ ४६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे पूर्वार्द्धे चतुर्थोऽध्यायः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ते वै इति : १०.४ ४५.

यो ह्यत्र गोद्विजमुनीश्वरसज्जनार्यान् विद्वेष्टि दुष्टमतिरिष्टविनष्टदृष्टिः ।
स्पष्टं स कष्टतरदिष्टदनष्टभावं याति स्वतो द्रुतमिहेत्यृषिणा प्रदिष्टम् ॥ १९ ॥

आयुः श्रियमिति : १० ४ ४६.

सर्वांशतोऽप्यभयदायिनि जागरूके सद्रक्षणाय सततं सति विश्वनाथे ।
सद्रोमलेशविकलीकरणाय नालं स्याद् दुष्ट इत्यकथि तेषु स शापवाचा ॥ २० ॥
कुर्वन्तु नाम विद्वेषं सतां सर्वत्र दुर्जनाः । ततो नहि भयं तेषामास्ते यद् गोकुले हरिः ॥ २१ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने चतुर्थोऽध्यायः ॥ ४ ॥

कृष्णप्रिया

इसलिये अपने से, दूसरों से साक्षात् एवं परम्परा से जैसे भी लौकिक वैदिक साधन कर सकें वैसे हम वेद एवं वेदार्थ जाननेवाले, तपस्वी तथा जिनका यज्ञ करने का स्वभाव है ऐसे ब्राह्मणों का और हविष्य देनेवाली गायों का वध करेंगे ॥ ४१ ॥ वेदज्ञ विप्र लोग गायें, हविष्य के उपयोगी सभी अन्न, वेद एवं उनके अंग अथवा व्रत, तप, सत्य, इन्द्रियों का दमन, अन्तःकरण का शमन, श्रद्धा, दया, तितिक्षा तथा ज्योतिष्टोमादि याग ये सब हरि भगवान् के शरीर हैं ॥ ४२ ॥ वह विष्णु सर्व देवताओं के अध्यक्ष हैं दैत्यों के शत्रु हैं अन्तःकरण में गुप्तरूप से रहने वाले हैं तथा ब्रह्मा महादेव सहित सब देवताओं का मूल हैं, अतः उस के मारने का उपाय यही है कि ऋषियों को मारना ॥ ४३ ॥ इस प्रकार वह कंस दुष्ट मन्त्रियों से मन्त्रणाकर दुर्बुद्धिवाला हो गया और उसने ब्राह्मणों की हिंसा को अपना हित माना क्योंकि वह असुर होने से स्वभाव से दुष्ट था और कालपाश से आवृत भी था ॥ ४४ ॥ स्वयं पीड़ा देने की इच्छा वाले एवं इच्छानुसार रूप धारण करनेवाले उन राक्षसों को सत्पुरुषों को पीड़ा देने के लिये दशों दिशाओं में जाने का आदेश देकर वह कंस अपने महल में चला गया ॥ ४५ ॥ निश्चय कर के रजोगुण के स्वभाव वाले और आगन्तुक तमोगुण से व्याप्तचित्त वाले उन दैत्यों ने सत्पुरुषों के साथ द्वेष किया क्योंकि उनकी मृत्यु पास ही आ गई थी । जो आसन्नमृत्यु होते हैं उन्हें कर्तव्याकर्तव्य का ज्ञान नहीं रहता ॥ ४६ ॥ आखिर अध्यायसमाप्ति में श्रीशुकाचार्यजी ने कहा कि राजन् ! जो लोग महापुरुषों का अतिक्रमण, उल्लंघन करते हैं उनका वह कुकृत्य आयु, लक्ष्मी, यश, धर्म, एवं उससे प्राप्त होने वाले स्वर्गादिलोक, पुत्र आदि जो भी अभीष्ट हैं उनको और अन्य सब कल्याणों को नष्ट कर देता है ॥ ४७ ॥

इति चतुर्थाध्याय का अनुवाद समाप्त हुआ ।

* * *



अपराधः सकृद् भर्त्रा सोढव्यः स्वप्रजाकृतः ।
क्षन्तुमर्हसि शान्तात्मन् मूढस्य त्वामजानतः ॥
अनुगृह्णीष्व भगवन् प्राणांस्त्यजति पन्नगः ।
स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयताम् ॥

परिशिष्टम्

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः पूर्वार्धः

अथ प्रथमोऽध्यायः

राजोवाच

कथितो वंशविस्तारो भवता सोमसूर्ययोः । राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥ १ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

॥ श्रीसहजानंदाय हरिकृष्णाय भक्तिधर्मात्मजाय श्रीनीलकंठाय नमो नमः ॥

श्रीमंतं सहजानन्दं स्वभक्तानां सुखप्रदम् । गोपालानन्दनामाहं ध्यायामि हृदयाम्बुजे ॥ १ ॥

आविर्भूयात्र यो वै निजरुचिरपुरात् ब्रह्मधामाभिधानात् पाता धर्मं ससैन्यं बहुजनसुखदो धर्मसूनुर्दयालुः ।
यस्मिन्नासक्तचित्ता बहुजननिकरा ब्रह्मधाम प्रयांति तं वंदे मुक्तनाथं सकलगुणगणालंकृतं दिव्यमूर्तिम् ॥ १ ॥

हरिकृष्णं परं ब्रह्म नत्वा कुर्वे स्वदेशिकम् । दशमस्कंधव्याख्यानं निगूढार्थप्रकाशकम् ।
मिताक्षरैः सुललितं कृष्णमाहात्म्यबोधकम् ॥ २ ॥

नवमस्कंधे प्रोक्तयोः सूर्यचंद्रवंशयोर्मध्ये चंद्रवंशोत्पन्नस्य यदोः कुले अपरिमितैश्वर्ययुक्तस्वदिव्यमनोहरमूर्तिनिवासभूतादपरिमितकोटिसूर्यचंद्रसदृशप्रकाशवतो ब्रह्मपुरादनेकजनोद्धारणाय भूभारावतरणाय च मनुष्यभावेन प्रादुर्भूतस्याधर्मध्वांतनाशकभक्तजनपद्मविकाशकभास्करस्य । क्षितिभरभूतभूपाद्यसज्जनतस्करसंकोचकभक्तजनविरहजसंतापनिवारकचंद्रस्य दिव्यभावमनुष्यभावमिश्रचरित्रकर्त्तुः श्रीवसुदेवनंदनस्य दशमस्कंधे नवतिभिरध्यायैर्व्रजमधुपुरद्वारिकासुकृतजनपावनातिविशुद्धसमाहात्म्यभक्तिबोधकदिव्यमानुष्यचरित्रवर्णनेन वैरप्रेमादिभिस्तदासक्तजनवृत्तीनां दुष्टानां च निरोधाभिधमष्टमं लक्षणं निरूपयति । तत्रादौ चतुर्भिरध्यायैर्भारपीडितभूमिप्रार्थितविधिप्रार्थनया कृष्णजन्म सविस्तरं निगद्यते । तत्र प्रथमे कंसो नभोगिरा प्रोक्तं देवकीतनयात्स्वमृत्युं श्रुत्वा देवकीपुत्रषट्कं न्यहन्निति वर्ण्यते । तत्रादौ स्वेष्टश्रीकृष्णलीलाश्रवणैकतानः परीक्षिद्राजा पृच्छति कथित इति । भवता चंद्रार्कयोः अन्वयस्य विस्तारः कथितो नवमस्कंधे प्रोक्तः तेन कथनेन च मया उभयवंश्यानां चंद्रार्कवंशोत्पन्नानां राज्ञां चरितं ज्ञातम् । यदोश्चेति । चकारात्तत्रोभयविधेष्वपि राजन्येषु नितरां धर्मशीलस्य धर्मिष्ठस्य चंद्रवंश्यस्य यदोश्चरितं परमाद्भुतम् अत्यंताश्चर्यजनकं तत्र हर्याविर्भावात् जातमिति भाव इत्युत्तरेण संबंधः ॥ १ ॥ तत्र यदुवंशे अंशेन स्वांशभूतेन संकर्षणेन सह अवतीर्णस्य विष्णोः बद्धमुक्तक्षेत्रज्ञनिकरेष्वंतर्यामिशक्त्या प्रवेशनशीलस्य श्रीकृष्णस्य वीर्याणि पराक्रमान् नोऽस्मभ्यं शंस कथय ॥ २ ॥ एवं संक्षेपतो वीर्याणि पृष्टानि सांप्रतं विस्तरतः सचरित्रपराक्रमान् पृच्छन्नाह अवतीर्येति । भूतानि स्थावरजंगमानि वा बद्धमुक्तक्षेत्रज्ञवृंदानि भावयति पालयतीति भूतभावनः अतएव विश्वात्मा सर्वांतर्यामी भगवान् भगं सर्वज्ञातृत्वादि उत्पत्तिं प्रलयं चैवेत्यादि ऐश्वर्यस्य समग्रस्येत्याद्यनेकविधमैश्वर्यषट्कं लोके प्रसिद्धमप्रसिद्धं चास्ति तद्वान् यानि सपराक्रमाणि चरित्राणि कृतवान् तानि नोऽस्मभ्यं विस्तरतो वद ॥ ३ ॥ ननु पुनः पुनः श्रवणे न किं स्यादित्याशंक्य अत्राजे स्थितानां मुक्तमुमुक्षुविषयिणां मध्येऽस्मिन्न कस्याप्यलंबुद्धिरिति वक्ति निवृत्ततर्षैरिति । विगततृष्णैर्विषयबंधमुक्तैः गीयमानात् भवबंधमुमुक्षूणां च तदौषधात् विषयिणां च श्रोत्रमनसोरभिरामात् आनंदजनकादित्यर्थः । उत्तमश्लोकस्य श्रेष्ठकीर्त्तेर्हरेर्गुणानाम् अनुवादात् पुनः पुनः कथनाच्छ्रवणाच्च पशुघ्नात् विना अपगता शुक् शोको यस्मात्तं शोकरहितं मुक्तनरं हंतीत्यपशुघ्नस्तस्माद्विनेति वा को विरज्येत निवृत्तिं प्राप्नुयात् न कोपीत्यर्थः । यतः सर्वश्रवणीयचरित्रोऽस्मत्कुलेष्टदेवश्च श्रीकृष्णोस्ति अतस्तस्यैव प्रतापेन वयं सुखिन इत्याशयेनाहपितेति द्वाभ्यां मे पितामहाः अर्जुनप्रभृतयः पंच समरे युद्धे अमरान्देवान् जयंतीति तथोक्तैः देवव्रतो भीष्मस्तदाद्यैरतिथैः यथा तिमिंगिलैर्दुस्तरं तथा तिमिंगलसदृशैर्दुरत्ययं तत्र तेषां स्थित्या नाशायोग्यं कौरवसैन्यरूपं सागरं समुद्रं वत्सपदं तत्तुल्यं कृत्वा यः श्रीकृष्ण एव प्लवो नौका येषां ते यत्प्लवाः संतः अतरन् । स्मेतिपादपूरणे । तस्य वीर्याणि वदस्वेति तृतीयश्लोकवाक्येनान्वयः ॥ ५ ॥ द्रौण्येति । चो भिन्नोपक्रमे पांडवरक्षणादनंतरं यः श्रीकृष्णः शरणंगतायाः प्राप्तायाः । मे मातुरुत्तरायाः कुक्षिंगतस्तस्यां प्रविष्टः गदा च चक्रं तत् आत्तं येन स आत्तचक्रः गृहीतगदारथांगः सन्नित्यर्थः । अत्र विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वा वाच्य इत्यनेन पूर्वपदस्य लोपः । द्रौणेः

द्रोणपुत्रस्यास्त्रेण ब्रह्मास्त्रेण विप्लुष्टं दग्धप्रायं कृतं यतः कुरुपांडवानां संततेर्बीजं कारणमस्ति अत इदं ममांगं वपुर्जुगोप ॥ ६ ॥ **वीर्याणीति** । पुनश्च पुरुषकालरूपैः अखिलदेहभाजां समग्रदेहिनाम् अंतःपुरुषरूपैः रामकृष्णाद्यवतारैर्दर्शनश्रवणादिद्वारा अंतःकरणे प्रविश्य अमृतं मोक्षं प्रयच्छतः प्रदातुः तेषां बहिश्च कालरूपैः संवत्सरादिपरिवृत्तैर्मृत्युमपि प्रदातुः मायया जनोपरि कृपया मनुष्यस्य मनुष्यभावं प्राप्तस्य तस्य परमदिव्यमनोहरमूर्त्तेः प्रत्यक्षश्रीकृष्णस्य वीर्याणि वदस्व । विद्वन्नितिशुकस्य हरिस्वरूपस्वभावादीनां ज्ञानवत्त्वात्तत्संबोधनम् । पुनश्च वीर्यश्रवणाय प्रश्नान् पृच्छति **रोहिण्या इति** । त्वया नवमस्कंधे रोहिण्यास्तनयः सुतः तस्य नवमे प्रोक्तो देवक्या गर्भसंबंधः अन्यदेहं विना कथं घटते ॥ ८ ॥ कस्मादिति सत् श्रीकृष्णाख्यं परं ब्रह्म विद्यते एषु ते सत्वन्तः आर्षत्वात्साथिकाणलोपेन सत्वंत एव सात्वंतस्तेषां पातः व्रजवासानंतरं क बाल्याद्यवस्थासु मध्ये कस्यामवस्थायां ज्ञातिभिः सार्द्धं यदुभिः सहवासं कृतवान् यद्वा कस्मिन्कस्मिन् स्थले युद्धाद्यर्थं ज्ञातिभिः यादवादिस्वसंबंधिभिः सहेति ॥ ९ ॥ यतो मातुर्भ्रातरं कंसं ततस्तस्य वधस्यानर्हमयोग्यम् अद्धा साक्षात् कुतो हतवान् ॥ १०–११ ॥

श्रद्दधानाय श्रवणे त्वरायुक्ताय । विस्तृतं सविस्तरम् ॥ १२ ॥ स्वश्रद्धां द्योतयन्नाह **नैषेति** । अतिदुःसहा सोढुमशक्या । एषा क्षुधा त्यक्तोदकमपि मां न बाधते न व्यथां करोति । यतस्तव मुखांभोजात् मुखचन्द्रात् च्युतं निःसृतं हरिकथारूपममृतं पिबन्तम् ॥१३॥ भृगुनंदन हे शौनक व्यासपुत्र एवं साधुवादं समीचीनवचनं निशम्य श्रुत्वा । अथ भागवतप्रधानो हरिभक्ताग्रणीः अतः भगवान् हरेः सकाशाल्लब्धैश्वर्यः । सः शुकः । विष्णुना उत्तराकुक्षिप्रविष्टेन श्रीकृष्णेन रातं द्रौण्यस्त्रात् रक्षणेन दत्तं परीक्षितं प्रत्यर्च्य प्रशंस्य । व्याहर्त्तुं व्याख्यातुम् आरभत ॥ १४ ॥ सम्यग्व्यवसिता समीचीननिश्चययुक्ता । यत् यस्या बुद्धेः ॥ १५ ॥ स्वेतरच्चेतनाचेतनेषु वसतीति वासुः स चासौ देवश्च वासुदेवस्तथाभूतो वसुदेवपुत्रः श्रीकृष्णस्तस्य कथायाः प्रश्नः । तस्य पादयोः सलिलं गंगोदकं वा चरणामृतं यथा पिबंतं श्रोतारं द्रष्टारं च तथा त्रीन्नरान् पुनाति ॥ १६ ॥ आदौ भगवदवतारहेतुमाह **भूमिरिति नवभिः** । दृप्ता गर्विष्ठा नृपमिषा ये दैत्यास्तेषामनीकानि सैन्यानि तेषां शतायुतैः असंख्यातैः योऽतिशयभारस्तेन आक्रांता पीडिता । शरणं रक्षकम् ॥ १७ ॥ अश्रणि मुखे यस्याः सा । खिन्ना खेदं प्राप्ता । करुणं यथा क्रंदंती आक्राशंती सती । विभोः विधेः । अंतिके समीपे उपस्थिता वर्त्तमाना क्षितिः । स्वं स्वकीयं दुःखम ॥ १८ ॥ तदुपधार्य दुःखं श्रुत्वा । तया भूम्या । सहितः । स त्रिनयनः सशंकरः । क्षीरसमुद्रस्य तटम् ॥ १९ ॥

तत्र तीरे गत्वा समाहितः सावधानः सन् । वृषस्य धर्मस्य अकं दुःखं पिबंति तस्माद्रक्षणेन निर्वर्त्तयतीति वृषाकपिस्तं यद्वा वृषं न कंपयति स्थापनेन स्थिरीकरोतीति तं यद्वा वर्षति भक्तकामानिति वृषः आकंपयति भक्तशत्रूनिति आकपिः स चासौ स च तम् उपतस्थे चित्तैकाग्र्येण स्तुतिमकरोत् ॥२०॥ एवं स्तुत्या जातसमाधिर्ब्रह्मा समाधौ श्रुतां हरिवाणीं समाधेः परावृत्य देवानुपदिशन्नाह **गिरमिति** । समाधौ जाते सति गगने चिदाकाशे हरिणा समीरितां प्रोक्तां गिरं निशम्य श्रुत्वा वेधाः विधिः त्रिभिरधिकानि दशवयोवर्षाणि येषां ते त्रिदशाः नित्यं किशोरावस्थावंतो देवा इत्यर्थः । यद्वा तृतीया यौवनाख्या दशा सदा येषां ते त्रिदशाःनित्यं यौवनावस्थावंतो देवा इत्यर्थः । त्रिशब्दस्य तृतीयार्थता त्रिभागवत् । तानुवाच हे अमराः पुरुषस्य अन्नादिसिद्धदिव्यपुरुषाकारस्य आत्मैवेदमग्र आसीत् पुरुषविध इति श्रुत्युक्तस्य नारायणमुनेरिमां पौरुषीं गां वाणीं मत्तः शृणु, पुनस्तथैव आशु शीघ्रं विधीयतां क्रियतां मा चिरं विलंबं मा कुरुत ॥ २१ ॥ अस्मद्विज्ञप्तेः पूर्वमेव हरिणा वृत्तांतं ज्ञातमिति निरूपयन्नाह पुरेति । पुंसा नारायणेन धरायाः ज्वरवत् पीडा । पुरैव अवधृतो ज्ञातः सः नारायणः स्वकालशक्त्या उर्व्या भूमेः भारं क्षपयन् निवारयन् सन् भुवि यावत् विचरेत् तावत्पर्यंतं भवद्भिः अंशैः कृत्वा यदुषूपजन्यतां जनित्वा स्थातव्यमित्यर्थः ॥ २२ ॥ तत् प्रियार्थम् तस्य वासुदेवस्य प्रसन्नतार्थम् । पातिव्रत्यादिधर्मपालनेन प्रसादयितुमित्यर्थः ॥ २३ ॥ प्रियंकर्त्तुमिच्छया ॥ २४ ॥ प्रभुणा कार्यार्थे आदिष्टा आज्ञप्ता सती । अंशेन संभविष्यति कार्यं च देवकीगर्भमाकृष्य रोहिण्युदरप्रवेशनादि ॥ २५ ॥ इत्यादिश्य इत्थं पौरुषीं गां गदित्वा ॥ २६ ॥ हरेर्जन्मवर्णनाय कथाप्रसंगमाह विषयान् देशान् मथुरामावसन् उपान्वध्याङिति कर्मत्वम् ॥ २७ ॥ ततः शूरसेनोपभोगानंतरं सा मथुरा सर्वेषां यादवभूभुजां यदुकुलोत्पन्नभूपानां राजधानी राजानो धीयंतेऽस्यां तथाभूता अभून् । यत्र यस्यां सन्निहित उपस्थितः ॥ २८ ॥ तस्यां मथुरायां शौरिः शूरपुत्रः कृतोद्वाहः सन् सूर्यया नवोढया प्रयाणे स्वगृहगमनार्थम् ॥ २९ ॥ स्वसुः देवक्यभिधपितृव्यपुत्र्या भगिन्याः प्रियं हितं कर्त्तुमिच्छया रौक्मैः सुवर्णरचितैः हयानां रश्मीन् बंधनरज्जूः जग्राह ॥ ३० ॥

पारिबर्हं विवाहे प्रदेयं वस्तुवृंदम् ॥ देवकः ॥ प्रादात् सार्द्धम् अयुतं पंचदशसहस्रं रथानां च त्रिरावृत्ता षट् त्रिषटे अष्टादशेत्यर्थः । संख्यया व्ययेत्यादिना सुजर्थे बहुव्रीहिः त्रिषट् च तत् शतं च त्रिषट्शतं अष्टादशशतम् पारिबर्हं देवकः प्रादादिति प्रत्येकं संबंधः ॥ ३१ ॥ दुहितरि पुत्र्यां वत्सलः स्नेहयुक्तो देवकः उग्रसेनभ्राता दुहित्रे सुतायै ॥ उक्तं पारिबर्हं प्रादात् ॥ ३२ ॥ समम् एककालावच्छिन्नं न नेदुः तेन नादेन तावत् प्रथमं प्रयाणस्य प्रक्रमे आरंभे तयोः सुमंगलम् अभूत् ॥३३॥ प्रग्रहिणं गृहीतरश्मिं कंसम् आभाष्य रे रे कंसेति संबोधनं कृत्वा अशरीरवाक् नभोवाणी आह–हे अबुध यां देवकीं त्वं वहसे अस्याः अष्टमो गर्भोऽपत्यं

त्वां हंता हनिष्यति । ३४ ॥ पापः पापिष्ठः कुलपांसनः कुलदूषणः । आरब्धः उद्यतः खड्गपाणिः असिहस्तः सन् । कचे कबरे ॥ ३५ ॥ जुगुप्सितं निंदितं कर्म यस्य तम् ॥ नृशंसं क्रूरं निरपत्रपं निर्लज्जं परिसांत्वयन् सामाद्युपायेनाश्वासयन् ॥३६॥ श्लाघनीयाः स्तुत्या गुणा यस्य । भोजानां भोजकुलजानां कीर्त्तिकरः । उद्वाहस्य पर्वणि शुभदिने हननेन यशोहानिरित्यभिप्रायः ॥ ३७ ॥ कीर्त्तिनाशादपि जीवनं श्रेष्ठमिति भीतस्य मरणावश्यकत्वं दर्शयन् भेदोपायेन भयं निवर्त्तयन्नाह **मृत्युरिति** । स्वप्रारब्धानुसारेण मरणस्यावश्यंभावित्वात् त्वया स्वसृवधादिपापं न कर्त्तव्यमित्यभिप्रायः ॥ ३८ ॥ ननु देहं विनाऽहं कथं स्थास्यामीति चेत्तत्राह **देह इति** । देहे पञ्चत्वं मरणकालं प्राप्ते सति कर्म अनु पश्चात् गच्छतीति कर्मानुगः अतोऽवशः पराधीनो देही जीवात्मा देहान्तरम् अन्यदेहं स्वकर्मानुसारेण प्राप्य पूर्वं वपुः देहं त्यजते देहे नष्टेऽपि न देहस्यावश्यंभावित्वाद्देहिनो मरणाभावाच्च मरणभयेन हिंसा न कार्येति भावः ॥ ३९ ॥ तदेव स्पष्टयति **व्रजन्निति** । यथा नरः व्रजन् गच्छन् सन् एकेन स्वाग्रभूम्यां धृतेन पादेन तिष्ठन् भूमिमवलंब्य देहं धारयन् सन् अवलंबितभूप्रदेशात् एकेन द्वितीयेन पदा एवान्यभूप्रदेशं गच्छति । द्वितीयो दृष्टांतः यथा तृणजलौका एकेन पदार्थतृणम् आलंब्य तिष्ठती सती आलंबिततृणात् द्वितीयेन पदा तृणान्तरं प्राप्नोति तथा देही जीवात्मा कर्मणो गतिं नानाविधसंसृतिं गतः सन् प्रारब्धकर्मणा एकं देहमालंब्य तिष्ठन् सन् आलंबितदेहात् देहांतरप्रापककर्मणा अन्यदेहं प्राप्नोति देहं विना जीवो न तिष्ठति अतो देहरक्षार्थं हिंसा न कार्येति भावः ॥ ४० ॥

पुनश्च दृष्टांतद्वयेन देहत्यागाविष्कारौ दर्शयति **स्वप्न इति** । यथादृष्टश्रुताभ्यां दृष्टं धनिकराजादीनां दर्शनं श्रुतम् इन्द्रवरुणादिश्रवणं च ताभ्यां प्राप्तसंस्कारेण मनसानुचिंतयन् दृष्टश्रुतौ देहौ स्मरन् सन् ईदृशं जाग्रद्दृष्टश्रुतसदृशं किमपि कमपि तत्तं धनिकवरुणादिरूपं देहं पुरुषः स्वप्ने पश्यति तदनंतरम् अभिनिविष्टचेतनः दृष्टश्रुतदेहे प्रविष्टमतिः सन् शीघ्रं तदेवाहमिति प्रपद्यते मन्यते ततश्चापगतस्मृतिः जाग्रद्देहविस्मृतिमान् भवति । अन्यो दृष्टांतः मनोरथेन दृष्टं श्रुतं च चिंतयन् जाग्रत्यपि ईदृशं देहं पश्यति शेषं पूर्ववत् । यद्वा एक एव दृष्टांतः मनोरथेन दृष्टश्रुतवस्तुनि अभिनिविष्टचेतनः अत एवादृष्टश्रुताभ्यां प्राप्तसंस्कारेण मनसानुचिंतयन् स्वप्ने ईदृशं कमपि देहं पश्यति तदनंतरं शीघ्रं तदेवाहमिति मन्यते ततश्च जाग्रद्देहविस्मृतिमान् भवति तथा प्राक्तनं देहं त्यक्त्वा देहान्तरं प्राप्नोतीत्यर्थः॥४१॥ कया रीत्या देहं प्राप्नोतीत्याशंक्य तत्प्रकारमाह **यत इति** । मायारचितेषु ईश्वरेण मायाया नानाविधदेवमनुष्याद्याकारेण कृतेषु पंचसु गुणेषु भूतेषु देहावसानसमये दैवेन कर्मफलप्रापकेश्वरेण नोदितं विकारात्मकं नानाविकाररूपं मनो यतोयतो यं देहं प्रतिधावति धावच्च सत्यमाप अत्यासक्त्या प्राप्नुयात् । तत्र देहेऽसौ जीवात्मा प्रपद्यमानः स एवाहमिति मन्यमानः तेन सह जायते तेनाकारेणोत्पद्यते ॥ ४२ ॥ तथा पूर्वोक्ता विधाः प्रकारा यस्य सः द्रोग्धुर्जनद्रोहकर्त्तुः परतः ईश्वरादन्यपुरुषाच्च भयमस्ति ॥४३॥ पुत्रिकोपमा भयेन काष्ठादीनां प्रतिमा सदृशी भवति अत इमां कल्याणीं शुभाम् ॥ ४४ ॥ सामभिः सामोपायैः । भेदैर्भेदोपायैः पुरुषान् अदंतीति तान् राक्षसान् अनुसृतः स्वयं दारुणः कौरव्य हे कुरुकुलोत्पन्न ॥४५॥ **निबंधमिति** । तस्य कंसस्य तं देवकीवधरूपं निर्बन्धमाग्रहं ज्ञात्वा तज्जन्मनि देवैः हर्षेण कृतात् आनकदुंदुभिघोषणान्नाम्ना आनकदुंदुभिः वसुदेवः कालं प्रतिव्योढुं वंचयितुं तत्र तद्रक्षणे इदं वक्ष्यमाणमपत्यार्पणमन्वपद्यत अन्वबुध्यत ॥४६॥ जनानां मरणप्राप्तिसमये धर्मिष्ठस्य करणीयमाह **मृत्युरिति** । तावत् जनस्य मृत्युः अपोह्यो निवारणीयः असौ मृत्युः देहिनः मृत्युनिवारकस्य ॥ ४७ ॥ बुद्धिबलोदयमाह पञ्चभिः—मृत्यवे यदि सुता जायेरन् तर्हि मृत्युः कंसो न म्रियेत वा किं न म्रियेत ॥ ४८ ॥ वा पक्षांतरे विपर्ययो मत्सुतात् कंसनिधनं किं न स्यात् कुतो धातुर्नभोवाणी वक्तुरीश्वरस्य गतिः देवक्यष्टमगर्भात् कंसमृत्युरूपः कर्त्तकंसाय प्रदाय दत्त्वा कृपणां दीनां ननु मारणाय पुत्रदाने हिंसा स्यादिति चेत्त्याह देवक्यां मे कृता मार्गो दुरत्ययाः अनिवार्यो अतोऽपत्यार्पणप्रतिज्ञया उपस्थितो देवकीमृत्युः निवर्तेत निवृत्तो मृत्युः पुनः कालांतरे आपतेत् तत्पुत्रान् प्रत्यागच्छेत्तदा धातृगतेर्दुरत्ययत्वात् निवर्त्तेत ॥ ४९ ॥ जनानामदृष्टदुर्विभाव्यतां दृष्टांतेनाह **अग्नेरिति** । अग्नेः वनदाहकस्य वह्नेर्दारुवियोगः समीपस्थितकाष्ठवियोगश्च संयोगो दूरस्थकाष्ठसंयोगश्च तयोः अदृष्टतः अदृष्टं विना काष्ठस्थजंतुकर्मफलप्रदातारं विना अन्यत् निमित्तं कारणं यथा नास्ति एवं तथा जंतोः जीवस्यापि शरीरस्य संयोग उत्पत्तिश्च वियोगो नाशश्च तयोर्हेतुः कारणं दुर्विभाव्यो दुर्ज्ञेयः ॥ ५० ॥

एवं यावदात्मनि दर्शनं स्वज्ञानावधि विमृश्य विचार्य शौरिर्वसुदेवः बहुमानः पुरस्सरो मुख्यो यस्मिन् कर्मणि यथा भवति तथा तं पूजयामास ॥ ५१ ॥ तद्विश्वासार्थं प्रसन्नमुखपद्मः दूयमानेन परितप्यमानेन मनसा तं प्रति प्रहसन् इदं वक्ष्यमाणम् ॥ ५२ ॥ सौम्य हे सुन्दर सा अशरीरिणी वाक् यत् मरणभयमाह अस्या देवक्याः सकाशात् यद्भयं तव नास्ति यतो येभ्यः ते भयमुत्थितमुत्पन्नं तान् अस्याः पुत्रान् समर्पयिष्येऽहं दास्यामि ॥ ५३ ॥ वसुदेववाक्यसारज्ञः वधात् निवृत्तः तं कंसं प्रशस्य तत्प्रशंसां कृत्वा ॥ ५४ ॥ काले प्रसूतिसमये उपावृत्ते प्राप्ते सति सर्वा देवताः पुत्रभूता यस्याः सा स्वयमदितिरित्यर्थः । एका कन्या च अष्टपुत्राः ॥ प्रोक्ता नवमे वसुदेवस्तु देवक्यामष्टपुत्रानजीजनत् कीर्त्तिमन्तं सुषेणं च भद्रसेनमुदारधीः । मृदुं संमर्दनं भद्रं संकर्षणमहीश्वरम् । अष्टमस्तु तयोरासीत् स्वयमेव हरिः किलेति ॥५५॥ अनृतात् असत्यवाक्यात् अतिविह्वलो व्याकुलः कृच्छ्रेण कष्टेन ॥ ५६ ॥ वसुदेवो वधार्थं स्वपुत्रं कथं दत्तवानित्याशंक्याह **किमिति** । साधूनां साधुस्वभावानां किं नु दुःसहं किमसह्यं दुःखमस्ति जनानामतिप्रियः पुत्रस्तेन कथं दत्त इत्याशंक्याह विदुषाम् आत्मपरमात्मस्वरूपविदां किमपेक्षितं प्राकृतवस्तु किमपि

नेष्टमस्ति भागिनेयो बालकः मातुलेन कथं वध्यः स्यादित्याशंक्याह कदर्याणां जीवनरूपधनलुब्धानां महापापादि किं न कार्यं ननु, देवक्या पुत्रः कथं त्यक्तस्तत्राह–धृत आत्मा परमात्मा यैस्ते धृतात्मानस्तेषां किं पुत्रादि दुस्त्यजम् ॥ ५७ ॥ तत् प्रसिद्धं समत्वं पुत्रोत्पत्तिनाशयोस्तुल्यत्वं सत्ये स्वप्रतिज्ञायां स्थितिम् ॥५८–५९॥ आदाय गृहीत्वा असतो दुर्ज्जनस्य अविजितात्मनः अजितमनसः यद्वाक्यं तन्नाभ्यनंदत सत्यं न ज्ञातवान् ॥ ६० ॥

भूभारभूतानां दैत्यानां नाशाय देवा इहागता इति नारदोक्तिमाह त्रिभिः ॥ ६१ ॥ उभयोः गोपयदुकुलयोः ॥ ६२ ॥ वधोद्यमं क्षीरसारगमनादिभिर्देवकृतं हननोद्योगं च शशंस कथयामास ॥ ६३ ॥ स्ववधं प्रति स्ववधार्थं देवक्या गर्भे संभूतमुत्पन्नं विष्णुं मत्वा ॥ ६४ ॥ निगडैः शृंखलैः गृहे बंधनागारे निगृह्य निक्षिप्येत्यर्थः । अजनस्य विष्णोः शंकया ॥ ६५ ॥ असुतृपः प्राणेन्द्रियतृप्तिपराः प्रायशो बहुशः ॥ ६६ ॥ प्राक् देवदैत्यसंग्रामे विष्णुना हतं कालनेमिम् आत्मानं स्वम् इह उग्रसेनगृहे संजातं जानन् स कंसो यदुभिः सहावरुध्यत विरोधं कृतवान् ॥ ६७ ॥ यदुप्रभृतिकुलत्रयाधिपं निगृह्य कारागृहे निक्षिप्य शूरसेनान् देशान् स्वयं बुभुजे ॥ ६९ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकानन्तकोटिजनसंसारसमुद्रोद्धारकदर्शनभजनकर्तृजनब्रह्मपुरादिस्वधामदर्शकसज्जनपद्मविकाशना-
धर्मध्वांतनाशकदिनमणिगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके पुराणार्क-
श्रीमद्भागवतस्य दशमस्कंधव्याख्याने कृष्णावतारोपक्रमनामा प्रथमोऽध्यायः ॥ १ ॥

◆

अथ द्वितीयोऽध्यायः

श्रीशुक उवाच

प्रलम्बबकचाणूरतृणावर्तमहाशनैः । मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ १ ॥

इदानीं द्वितीयेऽध्याये कंसनाशाय देवकीगर्भगतः कृष्णो ब्रह्मादिदेवैः स्तुतस्तदनंतरं सा च तैः सांत्वितेति निगद्यते तत्रादावुक्तं विरोधमेव निरूपयति प्रलंबेत्यादिचतुर्भिः महाशनोऽघासुरः ॥ १ ॥ कदनं पीडनं बली बलवान् कंसः मागधसंश्रयः जरासंधसहायवान् ॥ २ ॥ कुर्वादीनष्टौ देशान् ॥ ३ ॥ तं कंसम् अनुरुंधानाः अनुसृताः एके केचित् उग्रसेनापत्येन ॥ ४ ॥ धामनि वासस्थानं हर्षशोकविवर्द्धनः गर्भलाभाद्धर्षः कंसभयाच्च शोकस्तयोर्विवर्द्धनः ॥ ५ ॥ समादिशत् आज्ञापयत् ॥ ६ ॥ तत्र नंदगोकुले व्रजे कंसेन संविग्ना उद्वेजिताः विवरेषु अज्ञेयस्थलेषु ॥ ७ ॥ जठरे उदरे धाम स्थानं तत्संनिवेशाय आरोपय ॥ ८ ॥ नन्वेतावानुद्योगः किमर्थस्तत्राह अथेति । अंशाः मत्स्याद्यवतारा भागा लोकभजनीया यस्य तेन पूर्णस्वरूपेण अहं पुरुषोत्तमः पुत्रतां प्राप्स्यामि भजधातोर्बाहुलकाद्दर्शार्थेवत् अंशभागेनेत्यस्य कृतो योऽर्थस्तस्मादर्थांतरकल्पने सति अन्ये चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति वचनव्याघातप्रसंगात् ॥ ९ ॥ तां प्रोत्साहयन्नाह त्रिभिः ॥ १०–१२ ॥

गर्भस्यैव प्रलयकाले विश्वसंकर्षणात् यद्वा गर्भस्य देवक्युदरस्थस्य देव्या संकर्षणात् आकर्षणात् तं बलदेवं भुवि लोकाः संकर्षणं प्राहुः लोकान् रमयति क्रीडयति वा लोकेषु रमणात् क्रीडनात् वा लोकानारंभणात् श्रोत्रमनोऽभिरामेति तं संबोधयीष्यंति बलवद्दुःच्छ्रयाद्बलवद्भोजनेभ्य उच्छ्रयाद्बलाधिक्याद्बलम् ॥ १३ ॥ संदिष्टाज्ञप्ता सती तथेति पुनः पुनः परमादरेणाहं सत्यम् इति तस्य हरेर्वचः प्रतिगृह्य स्वीकृत्य तं परिक्रम्य प्रदक्षणीकृत्य च गां भूमिम् ॥ १४ ॥ रोहिण्यां प्रणीते रोहिण्युदरं प्रापिते सति तस्याः गर्भो विस्रंसितो विध्वस्तः विचुक्रुशुः परस्परं प्रोचुः ॥ १५ ॥ भक्तानामसुरभयनिवर्त्तनाय हरेर्वसुदेवमनसि पूर्णस्वरूपेणाविर्भावमाह भगवानिति । मनः मनसि अंशभागेन पूर्णस्वरूपेण प्रविष्टः ॥ १६ ॥ पौरुषं धाम पुरुषोत्तमस्य पूर्णस्वरूपं भ्राजमानः प्रकाशमानः भूतानां दुरासदो दुःप्रापः अतिदुर्धर्षोऽपराभवनीयः न च न लोकाव्ययेति षष्ठीनिषेध इति वाच्यं माषाणामश्नीयादित्यादिवत्संबंधसामान्यविवक्षायां षष्ठीविधानात् ॥ १७ ॥ जगन्मंगलाय हरेः देवकीमनसि प्रवेशमाह तत इति । ततो वसुदेवमनस्याविर्भावानंतरं जगन्मंगलं जगत्कल्याणकारकं सर्वेषां चेतनानामात्मांतर्यामी सर्वात्मा स एव सर्वात्मकस्तम् अत आत्मभूतं वसुदेवस्यात्मनि क्षेत्रज्ञेऽपि वर्त्तमानं वसुदेवेनादौ मनसि धृतम् अच्युतांशम् अच्युताः च्युतिरहिता अंशा अवताराः सत्यशौचादयो गुणा वा यस्य तदुक्तं प्रथमे एते चान्ये च भगवान् नित्या यत्र महागुणाः प्रार्थ्यमहत्त्वमिच्छद्भिर्न वियंति स्म कर्हिचिदिति एवंभूतं पूर्णं हरिं देवीश्रवणकीर्त्तनादिनवविधभक्तिगुणैर्द्योतमाना देवकी मनस्तो मनसा दधार न त्वितरजीववद्वीर्यद्वारेणेत्यभिप्रायः । अत्र सदृशं दृष्टांतं निरूपयति यथा काष्ठा पूर्वदिशा आनंदकरं पूर्णेंदुं तथेति संबंधः ॥ १८ ॥ देवक्याः स्थितिं निरूपयति सर्वजगन्निवासस्य श्रीकृष्णस्य निवासभूताऽपि भोजेंद्रगेहे कंसनिर्मितबंधनालये रुद्धा सत नितराम् अत्यंतं न रेजे न शुशुभे । तत्र दृष्टांतो कलशादिषु रुद्धाऽग्निशिखा दीपो यथा सती सरस्वती वेदपुराणादिसद्विद्या ज्ञानखले ज्ञानालंबनेन लोकवंचके

रुद्धा अन्येषामनुपकारेण स्थिता सती न शोभते यथा तद्वत् ॥ १९ ॥ तामिति अजितो हरिः अंतरा उदरमध्ये यस्यास्ताम् अत एव प्रभया भवनं कारागृहं विरोचयंतीं प्रकाशयंतीं तां वीक्ष्य आह एष प्रकाशमानो हरिः गुहाश्रितः देवकी कुक्षौ स्थितः ध्रुवं निश्चितं यत् यतः इयं पुरा ईदृशी प्रकाशमाना नाभूत् ॥ २० ॥

कंसः स्वकरणीयं विचारयन्नाह द्वाभ्यां **किमिति** । तस्मिन् देवकी कुक्षिगते हरौ मया अद्य किम् आशु शीघ्रं करणीयमस्ति नन्वियं देवकी एव हंतव्येत्याशंकयाह यद्यतः अर्थतंत्रः स्वकार्यप्रधानोपि पुमान् स्वं विक्रमं पराक्रमं न विहंति स्त्रीवधेन न नाशयति विक्रमादिनाशे हेतुमाह गुरुमत्याः गर्भवत्याः अयं वधः अनुकालं प्रतिक्षणं यश आदीन्येतानि हंति ॥ २१ ॥ यः अत्यंतनृशंसितेन अतिक्रूरस्वभावेन वर्त्तेत सः जीवन् सन् संपरेतो मृतः मनुजास्तं शपंति शापप्रकारमाह तनुमानिनोऽस्य जीवस्य देहे मृते नष्टे सति अंधंतमः घोरनरकं गंता गमिष्यति ध्रुवम् ॥ २२ ॥ सन्निवृत्तो निवृत्तिं प्राप्तः तस्य श्रीकृष्णस्य जन्म प्रतीक्षन् प्रतीक्षां कुर्वन् वैरानुबंधकृतवैराग्रहं कुर्वन् ॥ २३-२४ ॥ वृषणं स्वमनोरथवर्षिणं ऐडयम् तस्य स्तुतिं चक्रुः ॥ २५ ॥ श्रीकृष्णस्य सत्यप्रतिज्ञां दृष्ट्वा प्रसन्नाः संत आदौ सत्यत्वेन तं स्तुवंत ऊचुः **सत्यव्रतमिति** । सत्यव्रतं सत्यसंकल्पं सत्येभ्यो बद्धमुक्तक्षेत्रज्ञवृंदेभ्यः परं श्रेष्ठम् ॥ यस्मात्क्षरमतीतोहमक्षरादपि चोत्तम इत्युक्तेः । त्रिषु सृष्टेरादावंते मध्ये चेति त्रिकालेषु सत्यम् अविनाशि मूर्त्तिं सत्यस्यैकांतिकधर्मस्य वामुक्तभावस्य योनिं जीवेषूत्पादकं सत्ये अक्षरसंज्ञे ब्रह्मपुरे निहितं नित्यं स्थितं यद्वा सत्ये बद्धमुक्तकोटिनिकरे निहितं व्याप्तं सत्यस्य चेतनवृंदस्य मध्ये सत्यमंतर्यामितया सतं यद्वा सत्यस्य बद्धमुक्तव्रातस्य सत्यं तेभ्योपि परमसत्यमित्यर्थः । **ऋतसत्यनेत्रं** ऋतं भगवत्कथारूपा सुनृता वाणी च सत्यम् उत्कृष्टनिकृष्टप्राकृतविषयेषु समदर्शनं च तयोर्नेत्रं नेत्रवत् प्रकाशकं वक्तारमित्यर्थः । सत्यात्मकम् अनादिनित्यसिद्धदिव्यसुंदरविग्रहं त्वां शरणं शरणागतरक्षकं वयम् ॥ २६ ॥ हरेः सर्वकारणत्वप्रतिपादनाय विश्वं वृक्षत्वेन निरूपयंत आहुः **एकायन इति** ॥ एका एव प्रकृतिः अयनम् आधारो यस्य द्विफलः सुखदुःखरूपद्विफलवान् त्रिमूलः सत्वादयस्त्रयो गुणा मूलानि यस्य चतूरसः धर्मार्थकाममोक्षार्थरूपचतूरसवान् पंचविधः पंचेन्द्रियाणि विधा ज्ञानप्रकारा यस्य षडात्मा जायतेऽस्ति वर्धते विपरिणमते अपक्षीयते नश्यति इति षट् आत्मनः स्वभावा यस्य सप्तत्वक्सप्तधातुभिः त्वग्वान् अष्टविटपः पंचभूतानि मनोबुद्धिरहंकाराश्चेति अष्टशाखायुक्तः नवाक्षः नवद्वारवान् दशच्छदी प्राणापानव्यानसमानोदाननागकूर्मकृकलदेवदत्तधनंजया इति दश प्राणाः छदाः पत्राणि संति यस्येति । द्विखगः द्वौ जीवेश्वरौ खगौ पत्रिणौ यस्मिन् असौ विश्वरूपः आदिवृक्षः ॥ २७ ॥ **त्वमिति** ॥ सतः कार्यभूतस्य अस्य विश्वतरोः त्वम् एक एव प्रसूतिः प्रकर्षेण सूतिर्जनिर्यस्मात् सः कारणमित्यर्थः । सम्यक् निधीयते यस्मिन्निति सन्निधानं प्रलयस्थानं त्वमेव अनुगृह्णाति गोपायतीत्यनुग्रहश्च त्वमेव नन्वेतत्कारकास्त्वन्ये ब्रह्मादयो देवाः संति नाहमिति चेत्तत्राहुः **त्वन्माययेति** । संवृत्तचेतसः आच्छादितज्ञाना ये जनास्ते नाना ब्रह्मादिविविधकर्तॄन् पश्यंति ये विपश्चितस्त्वत्स्वरूपज्ञानवंतस्ते तु तान्न पश्यंति ब्रह्मादीनां सर्वेषां कर्त्तारं त्वामेव पश्यंति ॥ २८ ॥ भवद्भिर्देवकीपुत्रोहमेवं कथं वर्ण्यते इत्याशंकायामाहुः **बिभर्षीति** । अवबोधो ज्ञानघनमूर्त्तिः आत्मा परमात्मा त्वमेव सत्त्वोपपन्नानि सत्त्वधर्मज्ञानवैराग्यादिशुद्धसत्त्वगुणसंपत्तिस्तत्प्रकृत्यर्थमुपपन्नानि प्राप्तानि शाकपार्थिवादित्वादुत्तरपदलोपः यद्वा सत्त्वाय सत्त्वगुणसंपत्तिं प्रवर्त्तयितुं उपपन्नानि क्रियार्थोपपदस्येत्यादिना कर्मणि चतुर्थ्यन्ते समासः ॥ अत एव सतां धर्मसर्गयुक्तानां साधूनां सुखावहानि खलानाम् अधर्मसर्गवतामभद्राणि ध्वंसकानि ॥ रूपाणि अवतारान् मुहुः पुनः पुनः ॥ २९ ॥ **त्वयीति** । हे अंबुजाक्ष हे कमलनयन अखिलसत्त्वानां सर्वजीवेश्वराणां धाम्नि आधारभूते त्वयि वासुदेवे समाधिना आवेशितेन चेतसा अंतःकरणन हेतुना एके साधवः महत्कृतेन महद्भिः शरणीकृतेन तव पादपोतेन अंघ्रिनौकया कृत्वा भवाब्धिं संसारसागरं गोवत्सपदं तत्तुल्यं कुर्वन्ति अनायासेनैव तरंतीति भावः ॥ ३० ॥

स्वयमिति । द्युमन् हे प्रकाशमूर्त्ते ते जनाः भीमं भयजनकं दुस्तरं दुर्लंघ्यं भवसागरं स्वयं समुत्तीर्य समुल्लंघ्य अदभ्रं भूरि सौहृदं येषां ते अदभ्रसौहृदाः जीवानामत्यंतहितकारकाः संत इत्यर्थः । त्वच्चरणकमलरूपां नौकाम् अत्र निधाय संस्थाप्य इह लोके एकं त्वच्चरणारविंदप्रापकमेकांतिकमत्पादकभक्तिमार्गं प्रवर्त्तयित्वेत्यर्थः । ये पारंयालाः ताम् सतः साधून् अनुगृह्णातीति सदनुग्रहः तेषां स्वधाम्नि स्वसेवायां स्थापको भवानस्तीत्यर्थः ॥ ३१ ॥ ये तव चरणोपासका न भवंति ते विद्वांसोऽप्यधः पतन्तीत्याहुः **य इति** । हे अरविंदाक्ष विमुक्तमानिनः अहं ब्रह्मास्मीति मुक्तत्वाभिमानवंतः त्वयि प्रत्यक्ते अस्तो न प्राप्तो भावो भक्तिस्तस्मात् भक्तिहीनत्वाद्धेतोः न विशुद्धा बुद्धिर्येषां ते यद्वा त्वयि अस्तमाः इति पदच्छेदः । अस्तमतयः वादेष्वेव विशुद्धबुद्धयः अतो ये त्वद्भक्तेभ्योऽन्ये अनादृतयुष्मदंघ्रयः अन्याश्रितत्वच्चरणाः संतः कृच्छ्रेण बहुकालकृतसाधनरूपकष्टेन परं श्रेष्ठं पदं मोक्षोपयोगि ज्ञानवैराग्यतया श्लाघ्यं ब्राह्मणकुलादिस्थानम् आरुह्य प्राप्य ततः अधः पतंति असज्जन्म प्राप्नुवंतीत्यर्थः ॥ ३२ ॥ मार्गात्त्वैकांतिकभक्तिपथात् तावकाः न पतंति विनायकाः भक्तिमार्गविघ्नकर्त्तारस्तेषाम् अनीकानि वृंदानि यांति ये तेषां मूर्द्धसु मस्तकेषु निर्भयाः संतो विचरंति विघ्नान् पराभवंतीत्यर्थः ॥३३॥ पूर्वं बिभर्षि रूपाणीत्युक्तं तत्र विष्णुरूपं निरूपयंत आहुः **सत्त्वमिति** । शरीरिणां वेदक्रियायोगतपःसमाधिभिः श्रेय उपायनं चतुर्वर्गप्रापकं विशुद्धं सत्त्वं शुद्धसत्त्वात्मकं वपुः विष्णुरूपं स्थितौ जगतः स्थितिनिमित्तं भवान् श्रयते येन वपुषा जनः तवार्हणं पूजनं समीहते करोति ॥ ३४ ॥ एवं जगत्स्थितिहेतुभूतं विष्णुरूपं स्तुत्वा इदानीं प्रत्यक्षमूर्त्तिं स्तुवंत आहुः **सत्त्वमिति** ।

हे धातः सतः परब्रह्मणो भावः सूचकधर्मरूपः सत्त्वं परब्रह्मसूचकमित्यर्थः । इदं देवक्यामाविर्भूतं निजं तावकं सुंदरं वपुर्न भवेत् प्रत्यक्षं न स्याच्चेत्तर्हि अज्ञानभिदापमार्जनम् अज्ञानं त्वत्स्वरूपाऽवेदनं तस्य या भिदा हरिस्वरूपं साकारं वा निराकारं वा प्राकृतं वा अप्राकृतमिति भेदस्तस्या अपमार्ज्जनं नाशकं विज्ञानं स वै किलायं पुरुषः पुरातन इति श्लोकोक्तरीत्या योऽप्राकृतदिव्यपुरुषाकारो धामस्थः पुरुषोत्तमोस्ति स एवायं प्रत्यक्ष इति विशिष्टं ज्ञानं न भवेत् । यद्वा अज्ञानभित् विज्ञानं मार्ज्जनं नाशम् अप्राप्तमेव तर्हि किंचिदपि ज्ञानं न भवेदित्याशंक्याहुः बुद्धेः गुणानां गुणकार्याणामुत्पत्त्यादीनां जाग्रदाद्यवस्थानां च जीवकर्मफलानां च प्रकाशाः अंतर्यामिरूपेण प्रकाशनानि तैः भवाननुमीयते तेषां कर्त्ता साकारो वा निराकारो वा प्राकृतो वाऽप्राकृतो यः कश्चिदीश्वरोस्तीति तेषां बुधानां ज्ञानं भवेदित्यर्थः। पुनः पक्षांतरेण तदेवाह यस्य हरेः गुणउत्पत्त्यादीनां प्रकाशकसामर्थ्यं येन प्रकाशते स कश्चिदीश्वरोस्तीति वा अनुमीयते ॥ ३५ ॥ अप्रत्यक्षस्य तव स्वरूपादिनिरूपणमपि न भवेदित्याहुः नतामेति । हे देव हे दिव्यमूर्त्ते मनोवचोभ्याम् अनुमेयमार्गस्याऽप्रत्यक्षस्य साक्षिणो जीवशुभाशुभकर्मणां द्रष्टुः तस्य स्वधामस्थस्य तव गुणाः सत्यशौचादयश्च जन्मानि धर्मकश्यपवसुदेवादीनां गृहेषु जनूंषि च कर्माणि तत्तदवतारकृतानि च ते करणैः नाम गुणाद्यवलंबनेन कृतं नारायणवामनकृष्णादिनामवृंदं च ऋषिक्षत्रियादिरूपं च ते द्वे न निरूपितव्ये निरूपणयोग्ये न भवतः इहाविर्भूतस्य तव तु निरूपणयोग्ये भवतः अतो विज्ञानं भवेदिति संबंधः । अथापि अनुमेयमार्गे त्वयि सत्यपि एकांतिकभक्तास्तुर्यां क्रियायाम् उपासनायां प्रतियंति साक्षात् पश्यंति हि प्रसिद्धम् ॥ ३६ ॥ अतस्तत्र श्रवणकीर्त्तनादिभिरेव जनानां भवबंधनमोचनमस्तीत्याहुः शृण्वन्निति । ते इहाविर्भूतस्य तव नामादीनि स्मरणादिषु कुर्वन् अपरान्संस्मारयन् संज्ञापूर्वकविधेरनित्यत्वादार्षत्वाच्च वृद्ध्यभावः ॥ ३७ ॥ सांप्रतं देवक्याः सूनुमाधिक्येन स्तुवंति दिष्ट्येति । ईशितुस्तव जन्मना भवतः पदः वामनावतारे पादनिक्षेपणभूताया अस्या भुवो भारः अपनीतो गतः दिष्ट्या भद्रं जातः सुशोभनैः सुष्ठु ध्वजपद्मादिभिश्चिह्नैः शोभितैः स्वलक्षणैस्तव मृदुपदैः अंकितां गां भूमिं द्यां दिवं च तव त्वयानुकंपितां द्रक्ष्यामः ॥३८॥ ननु ममापि कर्माधीनजीववज्जन्मेति चेन्नेत्याहुः नेति । हे ईश कालमायादिनियमक अभवस्य नास्ति भवः कर्माधीनजीववज्जन्म यस्य जीवकल्याणार्थं स्वतंत्रजन्मेत्यर्थः । तस्य तव भवस्य जन्मनः कारणं विनोदं क्रीडां विना न तर्कयामहे अभयस्य मोक्षस्य आश्रयः आधारः प्रापक इत्यर्थः । सत्संबुद्धिः अजस्य हरेर्जन्मविनोदं विना न संभवतीति यदुक्तं तद्धेतुना द्रढयति यतो हेतोः आत्मनि जीवात्मवृंदेऽपि भवादयः ते तवाधीनमायोत्पन्नया अविद्यया कृताः ते स्वतंत्रे त्वयि तु कुतः संभवन्ति ॥ ३९ ॥ राजन्या ऋषभपृथुरामादयः । विप्रा दत्तकपिलनारायणादयः विबुधा यज्ञवामनादयः एवं मत्स्यादिकृता अवतारा येन तथाभूतस्त्वं त्रिभुवनं नोऽस्मांश्च यथा पासि तथा हे ईश अधुना भुवो भारं हर हे यदूत्तम ते वंदनम् अस्तु ॥ ४० ॥

संप्रति देवकीमाश्वासयंत ऊचुः दिष्ट्येति । नोऽस्माकं भवाय उदयाय अंशेन संकर्षणेन सहपरः पुमान् वासुदेवः ते कुक्षिगत आविर्भूतः ततो मुमूर्षोर्मरणेच्छोः भोजकुलपतेः कंसाद्भयं माभूत् ॥४१॥ यस्य हरेः रूपम् इदं प्रकृतिजन्यं न भवतीत्यनिदं दिव्यं यथा तथा पुरुषम् अनादिसिद्धनित्यदिव्यपुरुषाकारविग्रहं हरौ तयोरतिप्रीतिमत्त्वान्नो वंचयित्वोभावत्र स्थास्यत इति जानंतो देवाः ब्रह्मेशा नौ पुरोधाय अग्रतः कृत्वा ॥ ४२ ॥

इति श्री शुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके
श्रीमद्भागवतस्थदशमस्कंधव्याख्याने गर्भगतहरेर्ब्रह्मादिकृतस्तुतिनाम द्वितीयोऽध्यायः ॥ २ ॥

◆

अथ तृतीयोऽध्यायः

श्रीशुक उवाच—अथ सर्वगुणोपेतः कालः परमशोभनः । यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकम् ॥ १ ॥

इदानीं तृतीयेऽध्याये चतुर्भुजरूपेण श्रीकृष्ण आविर्भूतः पितृभ्यां संस्तुतश्च पित्राकं समयेन व्रजं प्रापितश्चेतिवर्ण्यते । तत्रादौ भगवदाविर्भावसमयशोभां निरूपयति अथेति सप्तभिः । अथ देवगमनानंतरं यर्हि सर्वैर्गुणैरुपेतो युक्तः अत एव परमशोभनः परमं शोभनं मंगलं यस्मिन् एवंभूतः कालः समयः बभूव तर्हि देवरूपिण्याम् अदितिरूपायाम् देवक्यां विष्णुराविरासीदित्यष्टमश्लोकवाक्येन संबंधः कालस्य शोभनत्वं दर्शयति शांतर्क्षग्रहतारकं शांतानि अनुद्वेगकराणि ऋक्षाण्यश्विन्यादीनि च तथाभूता ग्रहाश्च तारकाश्च यस्मिंस्तत् अजनान्नारायणाज्जन्म यस्य तस्य विधेः ऋक्षं रोहिणीनक्षत्रं यर्हि बभूव यर्हीति सर्वत्र संबध्यते ॥ १ ॥ प्रसेदुः निर्मला बभूवुः उडुगणानामुदयो यस्मिंस्तत् गगनं मंगलभूयिष्ठाः शोभाबहुलाः पुरादयो यस्यां सा आकराः खन्यः ॥ २ ॥ निर्मलजलाः नद्यः जलरुहैः निर्मलपद्मैः श्रीर्येषां ते ह्रदाः द्विजालिकुलानां पक्षिभ्रमरवृंदानां सन्नादवंतः स्तवका यासु ताः वनवृक्षपंक्तयः ॥३॥ तत्र तर्हि समिंधत सम्यक् प्रज्वलिता अभूवन्नित्यर्थः । आर्षत्वादडागमाभावः ॥ ४ ॥ असुरद्रुहां देवानां च अजने श्रीकृष्णे जायमाने आसन्नप्रसवे सति तस्मिन् काले ॥ ५ ॥ समं सह ॥ ६ ॥ सुमनांसि पुष्पाणि सागरमनुसृत्य ॥ ७ ॥ तमउद्भुतम् उत्कटम् अधिकं यस्मिन् तस्मिन् निशीथे मध्यरात्रौ सति तदनंतरं जनार्दने विरहिजनपीडके चंद्रे जायमाने उदयाभिमुखेति च प्राच्यां पूर्वस्य पुष्कलः

पूर्णः ॥ ८ ॥ वसुदेवोऽद्भुतमाश्चर्यजनकं बालकमैक्षतेत्युत्तरेण संबंधः । अन्यैर्हेतुगर्भैर्विशेषणैरद्भुतत्वं निरूपयति शंखश्च गदा च अरिश्चक्रं चोदायुः पद्मं च तानि धत्तेऽसौ तम् उदकम् आयुर्जीवनं यस्य उदायुः उदकस्योदः संज्ञायामिति उदकस्योदादेशः पृषोदरादित्वात्पलोपश्च श्रीवत्सचिह्नं गलेन कंठेन शोभते इति गलशोभी सः कौस्तुभो यस्मिन् तं पीतम् अंबरं वस्त्रं यस्य तं सांद्रपयोदो निविडमेघस्तद्वत् सौभगं सौंदर्यं यस्य तम् ॥९॥ महार्हवैडूर्याणां बहुमूल्यवैडूर्यमणिवतां मुकुटं कुंडलादीनां त्विषा प्रभया परिष्वक्ताः स्फुरंतः सहस्रकुंतलाः असंख्यकेशा यस्य यस्मिन्वातं उद्दामैर्मनोहरैः कांच्यादिभिर्युक्तः स्वतः प्रकाशमानं च ॥ १० ॥

विस्मयेन अद्भुतबालकदर्शनाश्चर्येण उत्फुल्लविलोचनः प्रफुल्लनेत्रः कृष्णावतारोत्सवे संभ्रम आनंदभरो यस्य सः आप्लुतः स्नातः गवामयुतं दशसहस्रं मुदा हर्षेणास्पृशत् अंतःकरणेन दत्तवान् ॥११॥ अथेति । परं पुरुषम् अक्षरात्परतः पर इत्युक्तम् । सर्वोत्कृष्टमनादिसिद्धपुरुषविग्रहं परमेश्वरं ज्ञात्वा पुनः कथंभूतं हे भरतकुलोत्पन्न स्वकांत्या सूतिकागृहं प्रकाशयंतम् । प्रणतोत्तमांगःकृतधीः पवित्रमतिः प्रभावविन् । महत्त्वज्ञः अस्तौत् ॥ १२ ॥ तथाहि **विदित इति** । केवलौ शुद्धौ अनुभवानंदौ स्वरूपे मूर्त्ती यस्य सः । ज्ञानानंदयुक्तमूर्तिमत्त्वात् । सर्वेषामक्षरपुरुषादीनां बुद्धीःपश्यतीति सर्वबुद्धिदृक् अत एव प्रकृतेः परः पुरुषः पुरुषोत्तमः साक्षाद्भवान् अस्तीति त्वं मयाविदितोऽसि ॥ १३ ॥ ननु देवक्युदरागतबालकस्य ममैवं कथनमघटमानमस्तीत्यत्राह **स इति** । स एव त्वम् अग्रे सृष्टिसमये प्रकृत्या त्रिगुणात्मकदेवमनुष्यतिर्यगादिरूपम् इदं विश्वं सृष्ट्वा तदनुप्रविष्टः स्वब्रह्मपुरधाम्नि दिव्यविग्रहेण स्थितः सन् त्वं प्रविष्ट इव । इवशब्दात् विकसितांतर्यामिशक्त्या नानाविधविश्वस्य न्यूनाधिककर्मफलप्रदानाय अन्वितः न तु स्वयमिति भाव्यसे अस्माभिर्ज्ञायसे ॥ १४ ॥ प्रवेशेऽप्रवेशे च दृष्टांतमाह **यथेति** । यथा इमे महदाद्याः भूम्यन्ताः अविकृता भावाः स्वस्वरूपेण पृथक् स्थिताः संतः विराडादिमनुजांतेषु देहेषु स्वस्वांशेन प्रविष्टाः तथा स्वधामस्थितः सन् अंतर्यामिशक्त्या प्रविष्टो भाव्यसे तदेव दृष्टांतं पुनः स्पष्टयति **त इति**। नानावीर्याः पृथक् पृथक् सामर्थ्यवंतः अत एव पृथग्भूता आदौ पृथक् तया स्थितास्ते महदाद्याः पश्चात् स्वस्वांशेन विकृतैः षोडशविकारैः सह सन्निपत्य मिलित्वा विराजं वैराजपुरुषदेहं जनयंति उत्पादयंति अविकृता विकृताश्च भावाः उक्ताः सांख्यकौमुद्यां मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडकश्च विकार इति उत्तरश्लोकस्थसन्निपत्येति यत् पदं तदत्रान्वेतव्यम् ॥१५॥ सन्निपत्येति । एवं समुत्पाद्य विराजम् उत्पादयित्वा ते अनुगताः प्रविष्टा इव दृश्यंते पुनर्न प्रविष्टाः कुत उत्पत्तेः प्रागेव सर्वत्र विद्यमानत्वात् तेषामिह उत्पन्ने कार्ये पुनर्न संभवो न प्रवेशो यथातथा सदा अंतर्यामिशक्त्या तव सर्वत्र विद्यमानत्वात् इह विश्वे देवक्युदरे च संभवः प्रवेशः उत्पत्तिश्च न घटते ॥ १६ ॥ पुनस्तदेव वदति **एवमिति** । एवं यथोक्तं तथा ननु सर्वत्र व्यापकतया इह प्रत्यक्षतया च वर्त्तमानस्य मम सर्वेण ग्रहणं स्याद्वा नेत्यत्राह बुद्ध्यनुमेयलक्षणैः बुद्ध्या अनुमेयं यद्रूपादिग्राहकं तदिंद्रियमस्तीत्यनुमातुं योग्यं लक्षणं स्वरूपं येषां तैः गुणैः चक्षुरादीन्द्रियैः कृत्वा पुंसा गुणैः सह अग्रहः गुणाग्रहः तैः गुणाग्रहः तद्गुणाग्रहः त्वं तैः ग्रहीतुमर्हैः रूपादिभिः सह सन् वर्त्तमानोपि भवान् अयं प्रत्यक्षः परोक्षोंऽतर्यामी च गुणैः सहः अग्रहः गुणाग्रहः तैः गुणाग्रहः त्वं पुंसा तैरिंद्रियैः कृत्वा गुणैः रूपादिभिः साकं न गृह्यस इत्यर्थः । यः प्रत्यक्षस्तु रूपादिवदिंद्रियग्राह्यतया वर्त्तमानोऽपि अयं पुरुषोत्तमो भगवानिति त्वम् अज्ञजनैश्चक्षुरादीन्द्रियैः कृत्वा न गृह्यसे परोक्षोंऽतर्यामी तु व्याप्येषु भूम्यादिचतुर्विंशतितत्त्वेष्वंतर्यामिरूपेण व्याप्तोऽपि त्वम् अयमंतर्यामीति जनैश्चक्षुरादीन्द्रियैः कृत्वा न गृह्यसे किंतु केवलं तैस्तद्रूपादीनामेव ग्रहणं स्यात् रूपादिवत्तव तु ग्रहणं नेति कुतः सर्वस्य अचेतनचतुर्विंशतितत्त्वात्मकविश्वस्य सर्वात्मनः स समग्रचेतनवर्गस्य च तयोः आत्मसु स्वरूपेषु वसति अंतर्यामितया तिष्ठतीत्यात्मवस्तु तस्य परब्रह्मणः प्रकृत्या तज्जन्यतत्त्वैश्च अनावृतत्वात् आवरणशून्यत्वात् बहिरंतरं न बाह्यत्वमाभ्यंतरत्वं च न वक्तुं शक्यते यथा सर्वव्यापकः सर्वाधार आकाशस्तस्य बाह्याभ्यंतरं त्वं नास्ति तद्वदित्यर्थः ॥ १७ ॥ सांप्रतं कालमायापुरुषादयः परमेश्वरान्वयं विना सृष्ट्यादिनिर्माणे समर्थाः संतीति जानन्तं निंदन्नाह **य इति** । आत्मनः परमात्मनस्तव दृश्यगुणेषु दृश्येषु कालमायापुरुषेषु गुणेषु महदादिषु च व्याप्येषु स्वव्यतिरेकतः त्वदन्वयं विना कश्चिदपि सृष्ट्यादिनिर्माणे समर्थः सन्नस्तीति यः व्यवस्यते निश्चितो सोऽबुधः तन्मनीषितं तस्य विचारितं च अनुवादं विना कथनमात्रं विना नास्ति कुतः यतो हेतोर्नारदादिभिस्त्वदन्वयं विना सृष्ट्यादिकर्तृत्वेऽसमर्थत्वेन त्यक्तं कालमायापुरुषादिवस्तु यः पुमान् उपाददत् उपादत्तेः सृष्ट्यादिकर्तृत्वे तत्स्वातंत्र्यमस्तीति स्वीकरोति अतः सोऽबुध इति संबंधः बाहुलकाल्लटः स्थाने लङ् प्रयुक्तः ॥ १८ ॥ पुनस्तदेव स्पष्टीकरोति **त्वत्त इति** । अगुणात् सत्त्वादिप्राकृतगुणशून्यात् अनीहात् निवृत्तिधर्मरतात् अविक्रियात् कामक्रोधादिविकारशून्यात् अगुणादिविशेषेण विशिष्टे विश्वकर्तृत्वादि कथं घटेतेत्याशंक्याह ब्रह्मणि बृहत्त्वाद्यनेकगुणविशिष्टे ईश्वरे सर्वनियामके त्वयि कर्तृत्वादि न विरुध्यते ननु परमदयालौ मयि सृष्टिप्रलयादिघोरकर्मकर्तृत्वं कथं संभवेत्तत्राह त्वदाश्रयत्वात् तव रूपाणां संकर्षणादित्रयाणामाश्रयत्वात्कुर्वद्भिः गुणैः गुणाभिमानिभिर्ब्रह्मादित्रिभिः कृतं सृष्ट्यादिकार्यं सर्वनियामके त्वयि तत्कर्तृत्वमुपचर्यते उपचारमात्रं निरूप्यते यथा भृत्यकृतं क्रूरं कार्यं परमदयालौ राज्ञि उपचर्यते तथा त्वयीतिभावः ॥ १९ ॥ पुरा त्वया विश्वोत्पत्त्याद्यर्थे त्रिगुणात्मकसंकर्षणाद्यवतारा धृताः सांप्रतं तु त्वं स्वयमेव जनकल्याणार्थं भूभारावतरणाद्यर्थं चावतीर्ण इत्याह **द्वाभ्यां सत्त्वमिति** । स्वमायया स्वेच्छाशक्त्या स एवंभूतस्त्वं त्रिलोकस्थितये सत्त्वेन युक्तम् आत्मनः स्वस्य शुक्लं वर्णं प्रद्युम्नरूपं सर्गाय सृष्टिकरणार्थं रजोगुणयुक्तं रक्तम् अनिरुद्धरूपं तम सायुक्तं कृष्णं संकर्षणरूपं जनानाम् अत्यये नाशनिमित्तं बिभर्षि ॥ २० ॥

त्वमिति लोकं रिरक्षिषुः रक्षितुमिच्छुः राजन्यसंज्ञा येऽसुरकोटियूथपास्तैः निव्यूह्यमानाः यतस्ततश्चाल्यमानाः चमूः पूतनाः नाशयिष्यसि ॥ २१ ॥ तथापि त्वया सावधानतया स्थेयमित्याह **अयमिति** । असभ्यः सभायामसाधुः पापिष्ठः तवाग्रजान् ज्येष्ठभ्रातॄन् न्यवधीत् हतवान् समर्पितम् उक्तं श्रुत्वा उदायुधः उद्युक्तास्त्रः अधुनैवाभिसरति आगच्छति ॥ २२ ॥ शुचिस्मिता शुद्धहास्या उपाधावत् अस्तौत् ॥ २३ ॥ इदानीं देवकीकृतस्तुतिं प्रपंचयत्यष्टभिः **रूपमिति** । प्राकृतैः करणैः न व्यज्यत इत्यव्यक्तम् आद्यं सर्वकारणं ब्रह्म बृहत्वादिगुणयुक्तं निर्गुणं प्राकृतगुणवर्जितं ज्योतिः प्रकाशमानं ब्रह्मज्योतिरित्येकपदे तु ब्रह्मरूपं ज्योतिः प्रसृतं यस्मात्तद्दिव्यविग्रहमित्यर्थः । ततो निर्गुणमिति विशेषणं सत्तामात्रं सत्यस्वरूपं निर्विशेषं प्राकृतविशेषणशून्यमित्यर्थः । निरीहं निवृत्तिधर्मरतमित्यर्थः । यत् तत् किमपि रूपं स्वरूपं वेदाः प्राहुः सः अध्यात्मदीपः आत्मसु अक्षरपुरुषादिसमग्रचेतनेष्वित्यध्यात्मं तत्र दीपवत्प्रकाशकः वा अध्यात्मशास्त्रप्रकाशकः विष्णुः व्यापनशीलो वासुदेवः साक्षात् मम दृष्टिगोचरस्त्वं जातोऽसि ॥२४॥ एवंभूतस्य तव भयशंका कदापि नास्तीत्याह **नष्ट इति** । परस्य ब्रह्मायुषोऽर्द्धं परार्धं द्वे परार्द्धे यस्मिं तत् द्विपरार्द्धं ब्रह्मायुस्तस्य अवसाने अंते लोके नष्टे सति महाभूतेषु भूम्यादिषु तेषामादिभूतम् अहंकारं गतेषु सत्सु कालवेगेनेति प्रतिवाक्यं संबंधनीयं व्यक्ते साहंकारे महत्तत्त्वे अव्यक्तं प्रधानं प्रतियाते सति एवं सर्वेषां नाशे सति अयं शेषोऽवशिष्ट इति संज्ञाकथनं यस्य ॥ २५ ॥ कोऽसौ काल इत्याशंक्याह **योऽयमिति** । अव्यक्तबंधो हे मायाप्रवर्त्तक निमेषादिः संवत्सरांतः अतिशयमहान् ब्रह्मायूरूपः योयं कालोऽस्ति तं तस्य तव चेष्टां क्रियामाहुः त्वा त्वाम् ईशानं क्षेमधाम अभयस्थानमहं प्रपद्ये ॥ २६ ॥ त्वच्चरणारविंदप्राप्तिरेवाभयस्थानमित्याह **मर्त्य इति** । मृत्युरेव व्यालः महासर्पस्तस्मात् भीतः मर्त्यः मरणधर्मा जनः लोकान् प्रतिपालयन् निर्भयस्थानं न प्राप्तवान् हे अज यदृच्छया केनापि भाग्योदयेन अस्मात् त्वदाश्रितजनात् अपैति परावर्त्तते ॥ २७ ॥ कर्त्तव्यविज्ञप्तिं द्योतयति स इति ॥ घोरात् हिंसकात् कंसात् । त्रस्तान् भीतान् । नोऽस्मान् त्राहि । यतो भृत्यानां वित्रासहासि हंता त्वमसि । ध्यानधिष्ण्यं ध्यातणां ध्यानेन निवासस्थानं मांसदृशां चर्मचक्षुषाम् ॥ प्रत्यक्षं त्वं मा कृषीष्ठाः माकृथाः ॥ २८ ॥ कंसात् भवद्धेतोस्त्वदर्थं समुद्विजे बिभेमि अतोऽऽधीरमनाः ॥ २९ ॥ अदः सर्वदृष्ट्या गोचरम् उपसंहर ॥ शंखादीनां श्रिया शोभया जुष्टं सेवितम् ॥ ३० ॥

स्तुत्युपसंहारमाह निशांते रात्रिप्रलयावसाने ॥ यथावकाशमसंकोचतः नृलोकस्य मध्ये महत् विडंबनं उपहास्यम् ॥३१॥ संप्रति निजस्वरूपदर्शनदाने यत् कारणं तद्धरिराह चतुर्दशभिः । पूर्वसर्गे आद्यजन्मनि ॥ प्रश्निर्नाम अभूः स्वायंभुवे मन्वंतरे अयं शौरिः ॥ ३२ ॥ आदिष्टौ आज्ञप्तौ तेपाथे तेपथुः ॥ ३३ ॥ वर्षादिकालगुणान् अनुसहमानौ श्वासरोधेन विनिर्धूतौ नाशितौ मनोमलौ याभ्यां तौ ॥ ३४ । शीर्णपर्णानां शुष्कपत्राणां अनिलस्य चाहारो ययोस्तौ ॥ ३५ ॥ मदात्मनोर्मन्मनसोस्तप्यतोराचरतोः वां युवयोः इयुः गतानि ॥ ३६ ॥ अमुना चतुर्भुजेन हृदि भावितः चिंतितः ॥ ३७ ॥ कामान् दातुमिच्छया वरः व्रियतामित्युक्ते सति वां युवाभ्यां मया सदृशः सुतो वृतः ॥ ३८ ॥ अजुष्टौ असेवितौ ग्राम्यौ ग्रामभवौ प्राकृतौ विषयौ याभ्यां तौ मे मत्तः अपवर्गं मोक्षं न वव्राथे न वृत्तवंतौ ॥ ३९ ॥ युवां युवाभ्यां वरं दत्त्वा मयि गते सति ॥ ४० ॥

मत्तोऽन्यतमम् अदृष्ट्वा ॥४१॥ **तयोरिति** । कश्यपात् अदित्यां वामन आस इति या वेदप्रसिद्धिरस्ति सापि तयोस्तद्रूपयोः अहमेव पुनरासमित्येतेषामस्माकमेवास्ति ॥ ४२ ॥ भवे जन्मनि तेनैव वपुषा तयैव मूर्त्या । हे सति । युवां प्रतिभूयो जातः तयोः पृश्निसुतपसोः व्याहृतमुक्तम् ॥ ४३ ॥ प्राक् आदौ तावदेतद्रूपं दर्शितं मे जन्मनः स्मरणाय ज्ञानाय अन्यथा मत्स्वरूपदर्शनं विना मद्भवं मत्संबंधि ज्ञानं मर्त्यलिंगेन मनुष्यदेहेन ॥ ४४ ॥ असकृत् वारंवारं पराम् उत्कृष्टां मद्गतिं मत्तो गतिं ब्रह्मपुरप्राप्तिम् ॥ ४५–४६ ॥ तत इति दिव्यरूपदर्शनसमये भगवता प्रणोदितः मां गोकुलं प्रापय मन्मायां यशोदासुतामत्रानयेति प्रेरितः गंतुम् इयेष ऐच्छत् तर्ह्येव अजापि या योगमाया सा हरेराज्ञाधीना सती यशोदया अजनि प्रसूता ॥ ४७ ॥ **तयेति** । हृताः प्रत्यया ज्ञानरूपं सर्वा वृतयो येषां तेषु द्वाःस्थेषु पुरगृहद्वारपालेषु पौरेषु पुरजनेषु शायितेषु निद्रितेषु सत्सु द्वारा द्वाराणि पिहिताः आवृत्ताः बृहद्भिः कपाटादिभिः दुरत्ययाः यद्वा बृहत्सु कपाटेषु लोहकीलयुक्तशृंखलैः अनुलंघ्याः ॥ ४८ ॥ **ता इति** । ताः द्वारः व्यवर्यंत स्वयमेव विवृत्ताः व्यध्रियंतेति वक्तव्ये गुणश्छांदसः कर्मकर्त्तरि लङ् उपांशुगर्जितः मंदगर्जनायुक्तः वारिजलं वसुदेवमन्वगात् ॥ ४९ ॥ मघोनि इंद्रे गंभीरो यस्तोयौघो जलसमूहस्तस्य जवेन वेगेन ये उर्म्मयस्तरंगाः तैः फेनिला फेनव्याप्ता भयानकैः भीप्रदैः आवर्त्तानां जलभ्रमराणां शतैः आकुला व्याप्तापि यमानुजा यमुना श्रियःपतेः सीतापतेः ॥ ५० ॥

निद्रया मायया । प्रकर्षेण सुप्तान् उपलभ्य बुद्ध्वा ॥ ५१ ॥ दारिकां पुत्रीं । पदोः पादयोः लोहं निगडं प्रतिमुच्य बध्वा पूर्ववदावृतः आस्ते बभूव ॥ ५२ ॥ परं केवलम् अपत्यं जातमबुध्यत । न तस्य लिंगं स्त्रीत्वं पुंस्त्वं वा ज्ञातवती ॥ ५३ ॥

इति श्री शुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके
श्रीमद्भागवतस्थदशमस्कंधव्याख्याने श्रीकृष्णजन्मनि तृतीयोऽध्यायः ॥ ३ ॥

◆

अथ चतुर्थोऽध्यायः

इदानीं चतुर्थेऽध्याये स्वहतभगिनीपुत्रीरूपदेव्युक्तां वाणीं श्रुत्वा भयातुरः कंसो मंत्रिरूपदैत्यैः प्रोक्तां यज्ञबालादिहिंसां हितकारिणीं मेने इत्युच्यते बहिरिति । बहिःपुरद्वारः बाह्यानि गोपुराणि अन्तःपुरः अंतःपुरः राजगेहे स्वनिवासगृहद्वाराणि ॥ १ ॥ तदष्टमम् आचख्युः उक्तवंतः उद्विग्नः सन् यत् जन्म प्रतीक्षते यस्य प्रतीक्षां करोतीत्यर्थः ॥ २ ॥ तल्पात् शय्यायाः कालो मम मृत्युः मुक्तमूर्द्धजो विकीर्णकेशः ॥ ३ ॥ इयं कन्या तव स्नुषा पुत्रपत्नीं कर्त्तुं योग्या कल्याण हे सुंदर ॥ ४ ॥ पावकोपमा अग्नितुल्या दैवनिसृष्टेन त्वत्प्रारब्धकर्मप्रेरितेन ॥ ५ ॥ तेन अवरजा त्वत्तः पश्चादुत्पन्ना अंगेतिसंबुद्धिः चरमाम् अंतिमाम् ॥६॥ स्वसुतामुपगुह्य हृदयेनोपगोप्य दीनादपि दीनवत् याचितोपि हस्तात् आचिच्छिदे पाणेराकृष्य जग्राह ॥ ७ ॥ अपोथयत् बलेन प्रचिक्षेपकृतः स्वार्थेन उन्मूलितमुत्पाटितं सौहृदं येन ॥ ८ ॥ सा कन्या समुत्पत्य उड्डयित्वा सद्य एव देवी भूत्वा अंबरं गगनं गता सती अदृश्यत तेन दृष्टा ॥ ९-१० ॥ उपाहृता बहवो बलयनानि यैस्तैः सिद्धादिभिः ॥ ११ ॥ तवांतकृत् नाशकृत् यत्र क्व यत्रकुत्रस्थले पूर्वशत्रुः कालनेमिरूपस्य तव प्रथमारिः ॥ १२-१३ ॥ तथा अभिहितम् उक्तं प्रश्रितो नम्रः ॥ १४ ॥ संप्रत्यसुराणां वक्तव्यं भिन्नं करणीयं च भिन्नमस्ति तदनुसारि ज्ञानमिश्रं वाक्यमाह सार्द्धाऽष्टभिः । अहो इति भाम हे स्वसृपते पाप्मना पापिष्ठेन पुरुषादो राक्षसः यथा स्वापत्यमेव हंति ॥ १५ ॥ त्यक्तं कारुण्यं दयालुत्वं येन ब्रह्महा विप्रहंता इति श्वसन् जीवन् सन् मृतः ॥ १६ ॥ दैवं दैववाक्यमशरीरवागपीति यावत् अनृतम् असत्यं वक्ति यस्य दैवस्य विश्रंभात् विश्वासात् ॥ १७ ॥ हे महाभागौ स्वकृतं भुजः स्वप्रारब्धकर्मभोक्तॄन् युवां मा शोचतं सदा एकस्मिन् स्थाने सह नासते न वसंति ॥ १८ ॥ इदानीं केवलम् आसुरं ज्ञानं प्रपंचयति भुवीत्यादिना । यथा भुवि पृथिव्यां भौमानि भूविकारघटादीनि यांति भवंति ॥ अपयांति नश्यंति च । तथा । भूतानि देहा उद्भवंति नश्यंति च यथा भौमेषूत्पन्नेषु नष्टेषु च भूः । विपर्येति तथा एतेषु देहेषूत्पन्नेषु नष्टेषु च अयमात्मा न विपर्ययं प्राप्नोति यथा घटादीनामुत्पत्त्यादौ भूर्विकृता भवति । तथा ॥ देहानामुद्भवादौ आत्मा विकृतो नास्ति अतएव वैधर्म्यदृष्टांतः आसुरज्ञानप्रसंगाद्धेतोर्ज्ञातव्यः ॥ १९ ॥ एवमजानतः पुंसो न संसृतेनिवृत्तिरित्याह यथेति । यथा यथार्थम् । अनेवंविदः एवमज्ञातुर्नरस्य आत्मनो जीवात्मनो विपर्ययः देह एवात्मा तस्योत्पत्त्यादौ आत्मैवोत्पत्तिनाशौ प्राप्नोतीति विपरीतज्ञानमस्ति यतो विपर्ययाद्भेदः । अयं मम पुत्रः अस्याहं पिता अयं च स्वकीयाः अयं च परकीयः अयं च मम घातको रक्षकश्चेति भेदबुद्धिः यतो भेदाच्च पुत्रमित्रादिदेहैः संयोगवियोगौ भवतः ततः संसृतिः सुखदुःखरूपा न निवर्त्तते यावदेवं विपरीतज्ञानमस्ति तावदिति शेषः ॥ २० ॥

एवं नैते तव पुत्रास्तेषां नाहं घातक इत्युक्ते सत्यपि अनिवृत्तशोकांतामतिदेहाभिमानी सद्धर्मविरुद्धाचारः खलः सांत्वयन्नाह तस्माविति । व्यापादितान् विहिंसितान् मोहाश्रितं कर्मवादमाह ॥ सर्वः समग्रो जनपराधीनः सन् लभते स्वखलत्वेन स्वकृतपापकर्मणां स्वस्मिन्निर्लेपत्वं द्योतयन् सद्धर्मविरुद्धवाक्यमाह यावदिति । अस्वदृक् आत्मदृष्टिहीनो यो नरः केनचिन्नरेणाहं हतोस्मि कस्यचिन्नरस्याहं हंतास्मि इति ॥ आत्मानं स्वं यावन्मन्यते तदभिमानी देहहननाभिमानवान् अज्ञः सः तावत् हननरूपपापेन बाधितुं योग्यो बाध्यश्च कर्त्तारं बाधयति दूषितं करोतीति बाधकं पापकर्म च तयोर्भावस्तत्ताम् ॥ २२ ॥ श्यालः कंसः स्वस्रोः देवकीवसुदेवयोः स्वस्रोरिति द्विवचनानुपपत्त्या अजहल्लक्षणया स्वसृतत्पत्योर्ग्रहणम् ॥ २३ ॥ निगडात् पादयोर्लोहात्मकबंधनात् विश्रब्धो विश्वासं प्राप्तः आत्मसौहृदस्वस्नेहभावम् ॥२४॥ समनुतप्तस्य तप्यमानस्य भ्रातुरुपरि रोषं क्रोधं क्षांत्वा सहित्वा व्यसृजत् गृहं प्रति गंतुमाज्ञां ददौ वसुदेवश्च तमुवाच ॥२५॥ देहिनाम् अज्ञानात्प्रभव उत्पत्तिर्यस्याः सा अहंधीः देहेऽहंबुद्धिः यथा त्वं वदसि एतद्वाक्यं एवमस्ति यतोऽहंबुद्धेः स्वः अयं स्वकीयः परः अयं परकीय इतिभिदा भेदोस्ति स्वःपरो यस्यां सा ॥ २६ ॥ शोकादिभिरन्विताः अतः पृथग्दृशः आत्मनः पृथग्भूते देहगेहादौ दृग्दृष्टिर्येषां ते ॥ भावैः व्याघ्रचौरसर्पादिभिः मिथः परस्परं जंतून् घ्नंतं भावं कालरूपमीश्वरं न पश्यंति ॥ २७ ॥ विशुद्धं यथा तथा प्रतिबोधितः अनुज्ञातो मनोऽनुकूलमाज्ञप्तः ॥ २८ ॥ व्यतीतायां रात्र्यां सत्यां तेभ्यो मंत्रिभ्यः आचष्ट उक्तवान् ॥ २९ ॥ आकर्ण्य श्रुत्वा कृतामर्षाः कृतकोपा नातिकोविदाः अदीर्घबुद्धयः ॥ ३० ॥ अनिर्दशान्निर्गतानि दश दिनानि येषां ते निर्दशास्ते न भवंतीत्यनिर्दशास्तान् निर्दशांश्च निर्गतदशदिवसाम् । बहुव्रीहौ संख्येय

इति इच्प्रत्ययः ॥ ३१ ॥ समरभीरवः संग्रामे भयशीलाः ज्याघोषैः प्रत्यञ्चशब्दैः ॥ ३२ ॥ अस्यतः शरान् प्रक्षिपतः तव शराणां व्रातैः समूहैः उत्सृज्य युद्धं त्यक्त्वा ॥ ३३ ॥ न्यस्तशस्त्राः त्यक्तायुध्याः दिवं स्वर्गं ओकः स्थानं येषां ते ॥ ३४ ॥ न हंसि न हिनस्सि ॥ ३५ ॥ असंयुगे संग्रामहीनस्थाने वयं शूरा इति विकत्थनं आत्मश्लाघा येषां तैः क्षेमे भयवर्जिते देशे शूरैः ननु हरेर्बिभेमि शंभोश्चेत्याशंकायामाहुः रहो बदरिकाश्रमश्वेतद्वीपाद्येकांतस्थानं जुषते सेवते इति रहोतूस्तेन ॥ ३६ ॥ एवं सामर्थ्यहीना देवाः संति तथापि सापत्न्यात् शत्रुत्वात् सापत्न्या इति पाठे सापत्न्याः सापत्न्याः शत्रवः स्वार्थिकः ष्यञ्प्रत्ययः ततो हेतोरनुव्रतान् अनुसृतान् नियुंक्ष्व नियोजय ॥ ३७ ॥ अंगे देहे उत्पन्नः आमयो रोगो गद इति यावत् समुपेक्षितः आदावौषधैर्न निवारितः अत एव रूढपदः बद्धमूलः सन् नृभिश्चिकित्सितुं औषधैर्निवारितुं न शक्यते एवं द्वितीये दृष्टांते सिद्धान्ते च योजनीयम् ॥३८॥ देवानां मूलं विष्णुरस्ति यत्र विष्णौ सनातनः वेदोक्तः एकांतिको धर्मोस्ति अतो यत्र धर्मः तत्र विष्णुरास्ते तस्य धर्मस्य मूलं वेदादयः ।३९। हन्मो हंतारो भवामः ॥ ४०-४१ ॥ समग्रसुरश्रेष्ठः गुहाशयोऽतर्यामी सेश्वराः ईश्वरैः शिवादिमुक्तभक्तैः सहिताः चतुर्मुखेन ब्रह्मणा सहिताः ॥ ४२ ॥ संमंत्र्य विचार्य ॥ ४३ ॥ कदनप्रियान् हिंसाप्रियान् दिक्षु संदिश्य आज्ञाप्य ॥ ४४ ॥ राजसस्वभावाः मूढं विवेकशून्यं चेतोंतःकरणं येषां ते आरादागतमृत्यवः समीपप्राप्तमरणाः अतएव ॥ ४५ ॥ सतां द्वेषो न मृत्युमात्रस्य कारणं किंतु सर्वश्रेयोनाशक इत्याह आशिषः ईप्सितभोगान् महतामतिक्रमः अपराधः ॥ ४६ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य-
दशमस्कंधव्याख्याने कंसमंत्रो नाम चतुर्थोऽध्यायः ॥ ४ ॥

◆

श्रीकृष्णाय नमः

श्रीप्रभुप्राकट्ये विचारः

(श्रीगो० श्रीविठ्ठलरायात्मजश्रीवल्लभकृतः)

ननु 'पुरुषोत्तमस्तु नन्दगृहे एव मायया सह जात' इति वाक्यात् तस्याश्च **नवम्यां** जातत्वाद्भगवतस्तत्सहभावोक्तेस्तस्यामेव भगवतो जन्मेति प्रतिभाति। तत् किं तथैव, अहोस्विदन्यथेति शङ्कायां 'पुरुषोत्तमस्तु' इत्यारभ्य 'वासुदेवोऽत्रैवाविर्भूत' इत्यन्तग्रन्थो विचार्यते। ननु नवम्यामेवास्तु, को दोष इति चेत्। तत्त्वविचारितरमणीयम्। तथा हि। न हीदं 'पुरुषोत्तमस्तु' इतिवाक्यं नन्दगृहे पुरुषोत्तमाविर्भावसाधकम्, किन्तु 'देवकीजठरभू'रितिवत् 'तव सुत' इतिभक्तवाक्य 'तन्मातरा' वितिशुकवाक्यश्रुतार्थापत्तिः प्रमाणम्। तथा च नवम्यास्तत्र कुत्राप्यनुक्तत्वात्तदुपजीवकवाक्ये कथं सा समागच्छेत्। मायासाहित्यकथनादेवेति चेत्, अत्रापि तया सहभावः पुत्रीभूतया सह वाच्यः। तथा सति युग्मजन्मप्रसङ्गः। अस्तु तथेति चेत्, न, उभयजन्मनोः प्रधानत्वात् जन्मनि भगवत एव प्रधानत्वं विरुध्येत। लोकवत् पौर्वापर्येण क्षणभेदेन तथा कल्पनेपि विरोधो **दुष्परिहर एव, साहित्याभावश्च**। न च धर्मान्तरवत् पूर्वं शक्तित्वेनैवाविर्भाव इति वाच्यम्। 'भगवत्समानकाल' इत्यारभ्य, **'नवम्यां च सा जाते'** त्यन्तग्रन्थविरुद्धत्वात्। तथा हि, अत्र देवकीवसुदेवप्रस्वापाभिभवान्यथानुपपत्त्या मायाया भगवत्समानकालजन्माभावात् **मुहूर्तानन्तरं** सा जातेति ज्ञायत इत्युक्तम्। तत्र क्षणपादार्धपूर्णघटिकान्तरायेणापि भगवत्समानकालाभावो भवति, **तदनन्तरमेव नवम्यां** सा जातेत्यनुक्त्वा मुहूर्तानन्तर्ये मानाभावात् मुहूर्तानन्तरमिति यदुक्तं तस्यायमाशयः। अत्र मुहूर्तानन्तरशब्देन घटिकाद्वयानन्तर्यं नोच्यते, किन्तु निशीथशब्दवाच्यमुहूर्तस्यानन्तर्यम्। तस्यैव भगवत्कालत्वात्। एवं सति यद्यपि 'प्रथमातिक्रमे कारणाभावा'दितिन्यायेन निशीथारम्भ एव भगवज्जन्मप्राप्तावपि **'अर्धरात्रं निशीथं पञ्चचत्वारिंशत्षट्चत्वारिंशद्घटिकाद्वयमिति श्रीमदाचार्योक्तेरहोरात्रस्य** समानत्वे सिद्धे **चन्द्रोदयस्य अष्टम्यां पञ्चचत्वारिंशद्घटिकान्तर्भावित्वनियमेन विशेषेण इन्दुसंयुतायाम्**, अर्धरात्रे तु योगोयं तारापत्युदये तथा' इत्यादिवाक्योक्तचन्द्रोदयलक्षणविशेषस्य निशीथमध्य एव प्राप्त्या तत्रैव भगवत्प्रादुर्भावनिश्चयेन घटिकानन्तरमेव सा जातेति निष्कर्षः। अनुपदमेव **'नवम्यां च सा जाते'** त्युक्तत्वात्, नवम्यपि तदैव जाता, तस्यां च पुनः सा जातेत्युक्तमिति ज्ञायते। अग्रे यदातर्हिपदान्ते एवकारेण सुतादानक्षणाव्यवहितोत्तरगमनेच्छाक्षण एव सा जातेत्युक्तेः क्षणाभावेन न शक्तित्वेनाप्याविर्भावः। अन्यच्च 'पुरुषोत्तमस्तु नन्दगृह' इत्येतट्टिप्पण्यां नन्दगृहप्रादुर्भावपूर्वपक्षानन्तरं समाधानकथने नन्दगृहे प्रादुर्भूतस्यैव वसुदेवगृहे 'बभूव प्राकृतः शिशु'रित्यनेनाविर्भाव उक्तः। स न ह्याविर्भावो नवम्याम्। तथा च, प्रादुर्भूतस्येति भूतार्थप्रयोगात् नन्दगृहीयतन्मूलभूताविर्भावः कुतस्तरां नवमीं प्राप्नुयादित्यप्यनुसन्धेयम्। **इतोपि न तत्साहित्येन नवम्यामाविर्भाव इति सिद्धम्।**

अष्टम्यामेवावरणशक्तित्वेन पूर्वमाविर्भाव इत्यपि न युक्तम्। निद्रयैवाज्ञानसंभवे तत्प्रयोजनाभावात् निद्रापि तत्कृतैवेति चेत्, तदग्रे निराकरिष्यते। जननं तु पुत्रीभावेनैव। अन्यथैश्वर्यादिधर्मवदनुक्तसिद्धत्वेन पृथक् तज्जन्मकथनमनर्थकं स्यात्। ननु तर्हि मायया सह जात इति वाक्यमनुपपन्नमितिचेत्, न तदर्थानवबोधात्। तथाहि। नन्दगृहे प्रादुर्भावो न चतुर्विधकार्यार्थः, किन्तु केवललीलार्थः। तथा च, केवलतदेकसाधिका आत्ममायापदवाच्या परमानन्दरूपा या माया तामादायैव तत्राविर्भूतो भगवान् इति निश्चीयते। अन्यथा निषेकजननाद्यभावेन सुतत्वासंभवात् 'तव सुत' इति वाक्यं विरुध्येत। नन्दयशोदयोः लीलार्थं पितृत्वमुच्यमानमपि बाधितं स्यात्। 'इत्युक्त्वासी' दित्येतट्टिप्पण्यां वसुदेवदेवक्योः पितृत्वविषये 'यथात्ममायया पित्रो'रित्यनेनोक्तम्, तथैवात्रापीति ज्ञेयम्।

मायानिद्राशब्दयोरर्थविचारः। 'आत्ममायये'तिपदं 'मायया सह जात' इत्येतस्य मूलम्। तस्यां मायापदप्रयोगस्तु भक्तानां लीलासंबन्धिपदार्थेष्वासक्तिजननात् स्वस्वरूपविस्मरणात् लौकिकानां च विस्मारणात्। वस्तुतस्तु स्वरूपभूतैवेति आत्ममाययेत्यत्र कर्मधारयेण टिप्पण्यां निरूपितम्। तथा चैतादृश्या न लोकव्यामोहकमायामोहवद्भगवदज्ञानसाधको मोहो, न वा लोकेषु। तन्मोहस्य पुष्टिमार्गे भावप्राचुर्यजनकत्वस्य 'इयं विशेषमाये' त्यादिग्रन्थस्य टिप्पण्यामुक्तत्वात्। एवं च सति व्रजे भगवदाविर्भावाज्ञानं न वैतत्कार्यम्, न वा तत्कार्यम्। तस्या भावित्वात्। एतस्याश्च भगवदज्ञानासाधकत्वात्। अत एव श्रीमदाचार्यैः प्रसवार्थवेदनाजनितश्रम एव निद्रायां हेतुत्वेन व्याख्यातः। तयैवाज्ञानमिति दिक्।

मायाकार्यत्वे तु श्रमस्य हेतुत्वेन कथनं नोपपद्येत। शुकोपि श्रान्तनिद्रापदे विहाय 'माययापगतस्मृति'रित्येव वदेत्। महती वेदनापि स्वाविर्भावार्थं भगवत्कृतैव, अन्यथातिश्रमाभावेन निद्राभावात् प्रसवज्ञानं भवेदेव। तस्मिन् सति प्राकृतशिशुभवनादिकार्याणि बाधितानि स्युः, सर्वचरित्राणामभिनिवेशोपि। जागरणे मुख्या यशोदा, सा चेन्न प्रबुद्धा तदा सर्वस्यापि व्रजस्य

सहजनिद्रायामप्रबोधो युक्त एव । अत एव व्रजस्यापि स्वापे मूले 'गोपान् प्रसुप्तानुपलभ्य निद्रये'ति निद्रैव हेतुरुक्ता । निद्रापदेन श्रीमदाचार्यैरपि निद्रैव व्याख्याता, न तु माया । अत एव 'कार्यार्थे सा भविष्यती'त्यस्य विवरणे यशोदायाः स्तन्यं संकर्षणं कंसादिव्यामोहो वसुदेवादिमोचनमित्येतावदेव कार्यमुक्तम् । न तु व्रजस्थानां निद्रापि । 'कंसादी'त्यनेन लीलाप्रतिबन्धकेषु तन्मोह इत्युक्तम् । तेन लीलाप्रतिबन्धकव्रजस्थेष्वपि तत्कृतः स इति सूचितम् । स एवोक्तः फलप्रकरणे 'मन्यमानाः स्वपार्श्वस्था'मित्यनेन । मूले 'गोपा'नितिपदेन स्वामिनीनां तु शीघ्रप्रियप्राकट्यार्तिजनितमुहुर्गतागतश्रान्तानां मातृचरणप्रसववेदनादर्शनासहिष्णुतया तत्र स्थातुमशक्तानां तादृक्समये निद्राया असंभवात्तच्चिन्तानिमग्नतया मूर्च्छयैवाप्रबोधः । कोपि न प्रबुद्ध इति तु भगवच्चरितम् । मायाविर्भावार्थं तु न वेदना । यद्यपि भगवतोप्याविर्भावे न सापेक्ष्यते, अलौकिकत्वात्, तथापि भगवतः स्वामिनीभावस्वरूपत्वाद्भावस्य च लोकसजातीयत्वेन तन्मनोरथपूर्त्यर्थं स्वस्मिन् यशोदासुतत्वप्रकटनपूर्वकं तथव लीलानां चिकीर्षितत्वात् लोकजन्मनस्तत्पूर्वं कृतत्वात् तथाभावपोषार्थं निद्रार्थं च अपेक्षितैव । यया सह भगवान् जातो न तस्या भगवदावरकत्वमिति तु पूर्वमेवोक्तम् । योगमायाजन्मनि तु तावन्मात्रार्थकत्वात् तस्यास्तथाभावेन भगवत इव लीलाऽभावादघटनघटनापटीयस्त्वात्तद्भावः । न वा भगवदीयेषु भगवत्कार्यानुपयोगित्वात् तत्कृतपीडासंभवे मायाकार्यत्वकथने को हेतुरिति चेत्, तत्रोच्यते । बाललीलारसार्थमन्तःस्थितबालपोषणार्थं च स्तन्यमावश्यकम् । तथा च तद्भगवता तु न संभवति, यतो भगवता प्राकृतशिशुरूपे स्वस्मिन् नन्दयशोदयोः प्राकृतसुतबुद्धिरेव संपादिता, न तु स्वयं तथा जातः । ततश्च न तथाबुद्ध्यैव तदुत्पद्यते, किन्तु प्राकृतगर्भसंबन्धेन । प्राकृतगर्भभावस्तु मायायाः संभवतीति तदर्थं तामेवाज्ञापयद्भगवान् 'त्वं नन्दपत्न्यां भविष्यसी'ति । तदेव विवरणे विवृतं 'यशोदायाः स्तन्य'मिति । तत्तु प्राकृतमेव । भगवतस्तथोत्पत्तौ भगवान् तत्र न जात इति ताभिर्ज्ञातमि'त्यजनमुब्जगु'रित्येतस्य विवरणं विरुध्येत । आत्ममायया तु न तत् संभवति । तस्या अपि तथोत्पत्त्यसंभवात् । एवञ्च तद् भगवदुपभोगयोग्यं कथमित्यनुपपत्तिस्तन्निवारणार्थमुक्तं 'वासुदेवोऽत्रैवाविर्भूत इति सिद्धान्त' इति । सिद्धान्तपदेन चैतत् ज्ञापितम् । भगवदुपभोगान्यथानुपपत्त्यैव नन्दगृहे वासुदेवाविर्भावः स्तन्यशुद्ध्यर्थमेव मन्तव्य एव । पूतनादिमोक्षदानं तु मथुरायामाविर्भूय समागतेनापि भवेदिति । तच्छुद्धिसंपादनानन्तरं व्यापकत्वेनोभयत्र स्थितौ प्रयोजनाभावात् तस्यैव मथुरायां तुरीयव्यूहरूपेण तस्मिन्नेव समये दर्शनम् ।

चतुर्व्यूहविचारः

भगवद्व्यूहानामाविर्भावः सप्रयोजनक एव । प्रयोजनानि तु 'देवक्यां विष्णुरूपिण्या'मित्यस्य विवरणे धर्मरक्षादीनि निरूपितानि । ततो 'जायमानेऽजने' 'जायमाने जनार्दने देवक्यां' 'विष्णुः सर्वगुहाशय' इति वाक्यत्रयेण विवरणेऽनिरुद्धसंकर्षणप्रद्युम्ना नियतकार्या निरूपिताः । तदानीं तत्कार्याणामावश्यकत्वात् । वासुदेवस्तु नोक्तः । तदानीं तत्कार्याभावात् । एवं सति चतुर्भुजदर्शनान्यथानुपपत्त्या तदानीमेव तस्याप्याविर्भावो मन्तव्यः । स कुत्रेत्याकांक्षायां 'नन्दगृहे वासुदेव' इति विवरणे पूर्वमुक्तम् ।

जातः पुत्र एवायमिति नन्दस्य बुद्धिर्जाता ।

ननु नन्दगृहे वासुदेव इति पूर्वमुक्तत्वात् 'नन्दस्त्वात्मज उत्पन्न' इत्यस्य विवरणे 'आत्मनः सकाशात् जातः पुत्र एवायमिति नन्दस्य बुद्धि'रित्युक्तेरनुपदमेव 'वासुदेवोऽत्रैवाविर्भूत' इत्युक्तत्वात् सिद्धवत्कारेण 'आत्मज उत्पन्न' इति शुकोक्तेश्च भगवत उत्पत्तेरसंभवात् सुतत्वेन वासुदेव एवाविर्भूत इत्युक्तमिति ज्ञायते । तथा च देहस्थानीयवासुदेवोत्पत्त्या आत्मस्थानीयपुरुषोत्तमाविर्भावो निरूपितो, 'देवदत्तो जात' इतिवत् । तन्न वसुदेवगृहाविर्भाववैशिष्ट्येन केवलाविर्भावबोधकवाक्यविरोधात् व्रजीयलीलानामपि वासुदेवकार्यत्वप्रसंगात् श्रीमत्स्वामिनीनां वासुदेवद्वारा पुरुषोत्तमसंबन्धे 'अन्यसंबन्धगन्धोपि कन्धरामेव बाधत' इति प्रभुवाक्योक्तशुद्धपुष्टिमार्गीयव्यवस्थाविरोधात् 'तव सुत' इति शुद्धपुरुषोत्तमाविर्भावसाधकप्रमाणवाक्ये लक्षणाप्रसङ्गेन पुरुषोत्तमाविर्भावे मानाभावप्रसङ्गाच्चेत्याद्यनेकहेतुभ्यो न साधीयः । तथा च तदर्थस्तु, पूर्वं 'यस्य यथा प्रतीतिः, तथैव शुकेनानूद्यत' इत्युक्तेर्भगवत आत्मजत्वे शुकस्य ताटस्थ्यमायातम् । एवं सति तस्या भ्रममूलकत्वस्यापि संभवेन तद्भावेन स्नेहातिशयेन भगवति प्रतिक्षणं क्रियमाणा उपचारा भ्रान्तिमूला एव भवेयुरिति तद्बुद्धेर्भगवत्कार्यत्वमुक्तं 'भगवतैव तथाबुद्धेः संपादना'दिति । भगवता स भावोंगीकृतश्चेत्, सा बुद्धिः सत्यैव, न तु भ्रमकार्यम् । ननूपचारास्तु भ्रमादभ्रमाद्वा भगवति क्रियन्त इति सत्या एव, तथा बुद्धिस्तु माययैव, अज्ञानमूलत्वाद्, भगवच्चरित्रत्वे मानाभावादित्याशंक्य, तथा बुद्धिसंपादनस्य भगवच्चरित्रत्वं साधयन्तः 'वासुदेवोऽत्रैवाविर्भूत' इत्यनेन 'सिद्धवत्कारेण च शुको न वदे'दित्यनेन च भगवत आत्मजत्वे सामान्यविशेषहेतू आहुः । तत्र स्तन्ययोग्यत्वकरणेनानुमानविधया पूर्वं सामान्यं हेतुमाहुः वासुदेवेति । भगवान् स्वयं सुतो जातश्चेत्, साक्षात्स्वस्यैव स्तन्यपानमावश्यकम्, तत् केवलमायाजन्यं पानयोग्यं नेति योग्यत्वकरणार्थं वासुदेवाविर्भावः । अन्यथा वासुदेवाविर्भावे प्रयोजनाभावात् । योग्यत्वकरणं तु, वासुदेवो मोक्षदाता, स हि सत्त्वेन प्राकृतभावं दूरीकृत्य ब्रह्मभावसंपादनेन भगवत्संबन्धयोग्यतां संपादयति । स आविर्भूत एव तथा करोति, न त्वनाविर्भूतः । अतो भगवता सहैव धर्मत्वेनाविर्भूय प्राकृतं स्तन्यं तत्त्वं दूरीकृत्य साक्षाद्ब्रह्मद्रवरूपं कृतवानिति । इदमेवैतज्जनितत्वमस्य, द्विजत्ववत् । अतः पुरुषोत्तमस्यैव साक्षादात्मजत्वे सामान्यहेतुरुक्तः । अन्यत्राप्याविर्भावेन चतुर्भुजदर्शनोपपत्तावपि स्तन्यं तथा न भवेदिति अत्रैवेत्युक्तम् ।

ननु स्तन्यपानेनैव नात्मजत्वासिद्धिः, धात्र्यादावपि पानसंभवादिति, तत्र विशेषहेतुमाहुः 'सिद्धवत्कारेण च शुको न वदे'दिति। नन्दादीनां भ्रमः संभवेदपि, शुकस्तु ब्रह्मवित्तमो भगवज्ज्ञानवान्, अतस्तस्य भ्रमाभावात् सिद्धवत्कारेण तदुक्त्या तस्यापि भगवति नन्दात्मजत्वेनैव ज्ञाननिश्चयान्नन्दात्मजत्वं वास्तवमेवेति द्वितीयो विशेषहेतुरुक्तः। अतस्तथाबुद्धिसंपादनं भगवच्चरित्रमेवेति सर्वं सुस्थम्।

वासुदेवसाहाय्यं कथम्

नन्वेवं वासुदेवसाहित्येन नन्दगृहे प्रादुर्भूतस्य केवलत्वभङ्गप्रसङ्ग इति चेत्, न। नात्र प्रद्युम्नमुख्यत्वेन वसुदेवगृह इव प्राकट्यम्, किन्तु केवलस्यैव। तथा चैश्वर्यादिधर्मवद्वासुदेवसाहित्येनापि न केवलत्वहानिः। विशेषतः यावद्वासुदेवाविर्भावकथनप्रयोजनं तु पूर्वमेवोक्तम्। ननु स्तन्यस्य स्वोपभोगयोग्यता स्वेनैवास्तु, कृतं वासुदेवेनेति चेत्। न। स्वस्य फलरूपत्वात् पुष्टिकार्यकर्तृत्वाच्च। न हि भक्तभावसंपादनं पुष्टिकार्यम्, न वा फलं मर्यादाकार्ये सा रसतामापद्यते कश्चित्। अतो वासुदेवनियतकार्यमेव तत्।

निशीथे आविर्भावः

ननु निशीथे वासुदेवप्राकट्यमेवास्तु, भगवतस्तु नवम्यामिति चेत्, तदसंगतम्। न हि व्रजे केवलव्यूहस्य प्राकट्यं क्वचिदप्युक्तम्। तथा सति तस्यापि मुख्यता स्यात्। प्राकट्यत्रयं च कल्पनीयं भवेत्। भगवत्साहित्येन तत्कार्यसिद्धौ पृथक् तज्जन्मकल्पनाया अन्याय्यत्वात्। तस्माद्वसुदेवगृहे चतुर्व्यूहदर्शनान्यथानुपपत्त्या नन्दगृहे निशीथ एवात्ममायावासुदेवसहितकेवलभगवत्प्राकट्यमित्येव मन्तव्यम्।

श्रीव्रजभक्तानां कृतेऽयमाविर्भावः

एवं सति 'आविरासी'दित्यग्रे 'दासीनां सर्वरक्षार्थ'मित्येतत्कारिकाकथनमपि संगच्छते। अर्थस्तु, अत्र दासीपदेन व्रजसीमन्तिन्य एवोच्यन्ते। सर्वात्मभावेन दास्यं तास्वेव प्रतिष्ठितमिति। तासां सर्वभावेन रक्षा सर्वरक्षा तदर्थमित्यर्थः। सर्वभावेन रक्षा तु, पूर्वश्रुतीनां साक्षात्पुरुषोत्तमदर्शनेन पुष्टिमार्गीयभावोत्पत्त्यनन्तरभजनानन्दप्रार्थनया भगवदाज्ञा जाता, 'व्रजे गोप्यो भविष्यथे'ति। ततो गोपीभूतानां तासां देहप्राणेन्द्रियान्तःकरणजीवात्मिका भगवद्भोग्या सामग्री भगवदाविर्भावविलम्बे कालेन विशकलिता भवेत्, अतस्तद्रक्षा सर्वभावेन रक्षा। यद्वा। शुद्धपुष्टिमार्गीयाणां भगवद्भोग्यसामग्र्या भगवदनुपयोगे महता क्लेशेन भगवद्विरहेण च स्वरूपान्यथाभावेन भजनानन्दानुभवाभावात् सर्वनाश एव भवेत्। तथा च तत्संबन्धिपदार्थानां सर्वेषां रक्षार्थमित्यर्थः। न हीदं लोकवेदप्रसिद्धपुरुषोत्तमस्य कार्यम्, किन्तु तदतीतस्यैव। तेन तदर्थमाविर्भूतस्य तदतीतत्वं बोधितम्। अन्यच्च। पुरुषोत्तमादिपदानि विहाय तत्र 'मम स्वामी'ति पदमुक्तम्, तेन स्वस्य शुद्धपुष्टिलीलान्तःपातित्वात् साक्षाद्दास्यरूपत्वाय अन्यत्र स्वामित्वाभिमानस्यानुचितत्वात् लोकवेदातीतशुद्धपुरुषोत्तम एव श्रीमदाचार्यैस्तदभिमानो दर्शितः श्रीस्वामिनीभिरियं प्रथमतया श्रीमुखारविन्ददर्शनानुपदमेव रक्षैव प्रार्थिता 'चिरं पाही'ति। सैवाविर्भावकार्यत्वेनात्र श्रीमदाचार्यैरुक्ता 'दासीनां सर्वरक्षार्थ'मिति। तेनेयं कारिकाष्टम्यधिकरणकव्रजीयाविर्भावस्यैव बोधिकेति निश्चयः। नवम्यामाविर्भावे 'त्वाविरासीद्यथे'त्येतदनुपदमेवैतत्कथनमनुपपन्नं स्यात्। अत एव तादृशप्राकट्ये हेतुरपि तादृश एवोक्तो 'निमित्तीकृत्य तादृश'मित्यनेन। तादृशपदेन भक्तदुःखमुच्यते। तथा च यादृशः स्वप्राकट्ये हेतुः तादृशं तं निमित्तीकृत्येत्यर्थः।

प्राकट्ये भक्तदुःखदूरीकरणं हेतुः

एतच्च प्रकरणादौ ज्ञापितम् 'यथायोग्यं दुःखमेषा'मित्यनेन। अर्थस्तु, एषां यथायोग्यं दुःखं यथायोग्याविर्भावहेतुरिति हेतोरत्र प्रथमाध्याय एव हेतुत्वेन तन्निरूप्यत इति हेतुत्वावच्छेदकभक्तदुःखत्वसामान्येन व्रजस्थानामनुक्तमपि तदाक्षिप्तं भवति। योग्यमनतिक्रम्य वर्तत इति यथायोग्यम्। भूमिमातृदुःखनिवारणयोग्ये हि चतुर्व्यूहावतारः। तथा च, तयोर्गं कंसादिकृतं कालकृतं च तयोर्दुःखम्, तेन सव्यूहाविर्भावः। तथा केवलपुरुषोत्तम एव व्रजभक्तानां दुःखदूरीकरणयोग्यः, तत्प्राकट्ये च तेषां भगवान् कदाविर्भविष्यतीत्यज्ञानजमार्तिरूपं दुःखं योग्यम्, तेनैव तदाविर्भावः। तत्तु भगवता वाक्यैर्निराकरणीयम्। 'वाक्यैरज्ञानसंभूत'मिति निबन्धवाक्यात्। तानि च 'यशोदायाः सुतो जात' इत्येवंरूपाणि तच्छ्रवणेनैव तेषां दुःखनिवृत्तिरिति 'गोप्यश्चाकर्ण्य मुदिता' इत्यत्र निरूपितम्। तानि वाक्यानि तद्दुःखदूरीकरणार्थं तत्तन्मुखेन भगवतैवोक्तानीति ज्ञायते। तत उक्तं 'तादृशं निमित्तीकृत्य प्रादुर्भूत' इति। तादृशमिति सामान्यपदोक्त्या स्वाविर्भावयोग्यलीलाकालाविर्भावार्थं भूभारहरणविषयकब्रह्मादिप्रार्थनया चतुर्भुजावतारं सर्वलोकप्रसिद्धं निमित्तत्वेन परिकल्प्य तादृशे साक्षात् स्वयं गुप्ततया व्रजे प्रादुर्भूत इत्यप्यर्थो ज्ञापितः। अत एव शुकैः स्वामिनीहृदयान्तर्गतहेतुरपि प्रथमाध्याये स्फुटो नोक्तः। तेन तदानीं मुख्यकार्यार्थं मुख्यतया व्रज एवाविर्भाव इति फलितम्।

आविर्भावस्य रसदानार्थत्वेन गुप्तता ।

अयमाविर्भावो भक्त्यैवेति स्नेहभावानन्तरमेव 'बभूव प्राकृतः शिशु'रित्युक्तम् । तद्वचनानन्तरं वसुदेवस्य प्राकृतेव सुतबुद्धिः, देवक्याः प्रसवधर्माविर्भावश्च । एतत्सर्वमात्ममायाकृतमेव । तत्रापि सुतत्वेनैव लीलायाः करिष्यमाणत्वात् । योगमायाया जनिष्यमाणत्वाच्च । वसुदेवस्य मानुषत्वेन भानं तु योगमायोत्पत्त्यनन्तरं नवम्यामेव जातम् । तस्य तन्मात्रकार्यत्वेन तदुत्पत्त्यनन्तरभावित्वात् । साधारणमोहस्येत्येतट्टिप्पण्यां वसुदेवस्य योगमायां गृहीत्वा पुनरागतिपर्यन्तं भगवज्ज्ञानशक्त्यैव व्याप्तत्वोक्तेः तावत्पर्यन्तं न योगमायाजनितमोहकृतं मानुषत्वेन भानम्, पश्चात्तु तज्जातमिति विमर्शः । तदैव नन्दस्यापि तथाभानम् । न च लीलामध्यपातिनां भगवति तत्कार्यं तथाभानं किमर्थमितिशङ्कनीयम् । यतः यत्र प्रभोर्देहसंबन्धित्वेन लीला चिकीर्षिता, तत्र जगद्व्यामोहकमायाकार्यं मानुषत्वेन भानं तथालीलापोषार्थमारादुपकारकम्, स्वामिनीषु तु नैव तत्प्रकारकं तत्कार्यम् । तत्र निरुपधिप्रियत्वेनैव लीलायाश्चिकीर्षितत्वात् । तथा प्रियस्त्वात्मैव । तत्वेन प्रिये तथाभानस्याप्रयोजकत्वात् । अत एव स्वामिनीवाक्यं 'तव सुत' इति 'तन्मातरा'विति शुकवाक्यं च श्रुतार्थापत्तिप्रमाणत्वेन श्रीमदाचार्यैरुक्तम्, न तु नन्दस्य बुद्धिरपि । तत्र यत्किञ्चित्तत्कार्यस्यापि संभवात् । स्वामिनीषु तदसंभवात् । अत एव 'न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृगि'ति तासां वाक्यमपि संगच्छते । पित्रोरपि भ्रमरगीते श्रीमदुद्धववाक्योपदेशानन्तरं सर्वथा प्राकृतभावनिवृत्तिपूर्वकं 'भगवान् मे सुतो जात' इति बुद्धिप्रयुक्तः स्नेह एव स्वकार्यत्वाद्भगवता स्थापितः । तत एवेदं 'मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रया' इति 'रतिर्नः कृष्ण ईश्वर' इति च वाक्यद्वयमपि संगतम् । पूर्वतोप्यन्तरनुभूयमानो बाललीलारसोऽधिक एव जात 'इत्यन्तरं तु महाफल'मिति पूर्णो निरोधः फलित इति सर्वं सुस्थम् ।

अथ शुद्धाष्टमीविचारः

एवं पूर्वोक्तप्रकारेण शुद्धाष्टम्यामेव श्रीभागवतानुसारेण नन्दगृहीयाविर्भावः श्रीमदाचार्याभिमतः । अतस्तत्र प्राकट्यतत्प्रयुक्तमानसोत्सवयोर्जातत्वाद्भगवदावेशार्थं पुष्टिमार्गीयैर्मुख्यतया सैवोपोष्या । विद्धायां तदुभयाभावात् तदर्थकोपवासनिषेधः । विद्धाक्षये तु पुत्रोत्सवादिकं तु शुद्धनवम्यामेव जातमिति शुद्धाष्टम्यभावे नवम्युपोष्येति उत्सवमात्रमादाय गौणतया नवम्यामुपवासविधिः । शुद्धाशुद्धविवेकस्तु, सूर्योदयकालमारभ्येति शुद्धनवम्यामितिपदेन सूर्योदयकालवर्तिनवम्यां सर्वप्रकारेण पुत्रोत्सवादिकं प्रातरारभ्यैव जातम् । सूर्योदयावश्यागमनादिसंभ्रम एव सर्वेषामिति ज्ञायते । अतः शुद्धाष्टम्यभावे शुद्धैव नवम्युपोष्या ।

यत्तु 'पूर्वविद्धाष्टमी या वि'ति वाक्यात् पूर्वविद्धायाः परदिने मुहूर्तमपि सत्त्वे एव पूर्वविद्धायास्त्यागो, न त्वसत्त्वेऽपीतीत्युक्तम्, तत्तु तस्यैव वचनस्य व्याख्यानान्तरत्वात् केचिन्मतपरम् । इतीतिप्रकारवचनम् । तथा च, पूर्वविद्धेत्येतस्यैव वचनस्य केचिदेवमर्थं वदन्तीतिपदस्य वदन्तीत्यग्रिमपदेनैव संबन्धः । एवञ्च, जन्माष्टमी विद्धायामेव कर्तव्या भवेत् शुद्धाभावे, तदर्थं तथावादिनं प्रति केचित्तु जन्माष्टमीं पूर्वविद्धामिति प्रतिवादिवाक्यमिति जानीमः । तत्र मुहूर्तमात्रसत्त्वे सोपोष्येति तु का वार्ता, विद्धात्यागावश्यकत्वात् 'तदभावेपि सोपोष्या' यतः । एवमाग्रहे व्यासवचनादिति प्रतिवादिवाक्यहेतुरुक्तः । तद्वचनस्य तथावचनव्याख्यानानपनोद्यत्वज्ञापनाय द्वितीयोपि हेतुरुक्तो वचनबलादिति । तस्य साक्षात् नारायणावतारत्वेन सर्वोपजीव्यत्वात् । अन्यथा द्वितीयहेतुकथनं व्यर्थं स्यात् । यद्वा । वचनबलादित्यनेनैतस्य व्यासवचनत्वे मूलवचनानि बहूनि भवन्ति तेषां बलादित्यर्थः । तथा चैतादृशं वचनं प्रतिवादिना वचनबलस्य तद्वचन एव प्रतिष्ठितत्वात् समूलकत्वेनांगीक्रियते तदा सर्वोपजीव्यव्यासोक्तरीतिरेवास्माभिरनुसर्तव्या । निर्मूलकत्वेनांगीक्रियते चेत्, तदा तु तद्वचनपूर्वोक्ततदुक्त्यैवेति कटाक्षोक्तिः । तेन न वा तन्निर्मूलकम्, न वा प्रतिवाद्युक्तकरणमिति फलितम् । स्वस्य निर्णयकर्तृत्वात् स्वमतानाग्रहज्ञापनाय 'यदी'त्युक्तमिति वा । शेषं पूर्ववत् । तथा च 'शुद्धाष्टम्यभावे नवम्युपोष्ये'तिसुबोधिन्या सह न विरोध इति सर्वमनवद्यम् ।

हृदिस्थौ यत्सदा श्रीमद्वल्लभाधीशविठ्ठलौ । निर्णयो मन्मुखाज्जातो जन्मसंदेहवारकः ॥ १ ॥

इति श्रीविठ्ठलरायात्मजश्रीवल्लभजीकृतः श्रीपुरुषोत्तमप्राकट्यनिर्णये शुद्धाष्टमीसिद्धान्तः ।

* * *

अथ पञ्चमोऽध्यायः

श्लोकाः	अनु.	वसन्त.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
३२	३१	१	३	१०४८	१९	५०	१११७	३४।।	५

श्रीशुक उवाच

नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः । [1]आहूय विप्रान् वेदज्ञान् स्नातः शुचिरलंकृतः ॥ १ ॥
वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै । कारयामास [2]विधिवत् पितृदेवार्चनं तथा ॥ २ ॥
धेनूनां नियुते प्रादाद् विप्रेभ्यः समलंकृते । तिलाद्रीन् सप्त [3]रत्नौघान् शातकौम्भाम्बरावृतान् ॥ ३ ॥
कालेन स्नानशौचाभ्यां संस्कारैस्तपसेज्यया । शुध्यन्ति दानैः सन्तुष्ट्या द्रव्याण्यात्माऽऽत्मविद्यया ॥ ४ ॥

कर्मक्षमा

अन्वयः—आत्मने उत्पन्ने (सति) जाताह्लादः महामनाः नन्दः दैवज्ञान् विप्रान् आहूय स्नातः शुचिः अलङ्कृतः स्वस्त्ययनं वाचयित्वा आत्मजस्य जातकर्म तथा विधिवत् पितृदेवार्चनं कारयामास ॥ १–२ ॥ समलंकृते धेनूनां नियुते रत्नौघशातकौम्भाम्बरावृतान् सप्त तिलाद्रीन् विप्रेभ्यः प्रादात् ॥ ३ ॥ कालेन स्नानशौचाभ्यां संस्कारैः तपसा इज्यया दानैः संतुष्ट्या द्रव्याणि शुद्ध्यन्ति आत्मा आत्मविद्यया (एव शुद्ध्यति) ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पंचमे जातकं नंदः सूनोः कृत्वा महोत्सवम् । गत्वाऽथ मथुरां प्राप वासुदेवागमोत्सवम् ॥ १ ॥

महामना उदारचित्तः । १–२ ॥ नियुते द्वे लक्षे सप्त तिलपर्वतांश्च प्रादात् । कथंभूतान् । रत्नौघैः रत्नसमूहैः शातकौंभांबरैः सुवर्णरसाक्तैरंबरैश्चावृतान् ॥ ३ ॥ द्रव्याणां गोहिरण्यादीनां मध्ये केषांचिद्दानैरेव शुद्धिर्यथा तथाऽन्नदानादियुक्तजातकर्मादिसंस्कारैरेव गर्भाणां शुद्धिरिति दर्शयितुं प्रतिनियतानि शोधकानि दृष्टांतत्वेनोदाहरति । कालेनेति । कालेन भूम्यादि । स्नानेन देहादि । शौचेनामेध्यलिप्तादि । संस्कारैर्गर्भादि । तपसा इन्द्रियादि । इज्यया ब्राह्मणादि । दानैर्द्रव्याणि । संतुष्ट्या मनः । आत्मा त्वात्मविद्यया शुध्यति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सूनोः पुत्रस्य । महोत्सवं जातकर्मादौ महद्दानादिरूपम् (१) । नंदस्त्विति युग्मम् । आत्मनो हृदयाज्जायत इत्यात्मजः "हृदयादभिजायते" इति श्रुतेः । आत्मजत्वं चेह पुत्रभावेनात्मनि प्रादुर्भूतत्वमेव नान्यद्ग्राह्यं तत्खलु "आविवेशांशभागेन मन आनकदुंदुभेः—ततो जगन्मंगलमच्युतांशं समाहितं शूरसुतेन देवी" इत्यादिवच्छ्रीनंदयशोदयोरपि गम्यते "यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः ॥" इति श्रुतेः । इत्याह—महामना इति "भक्तिःस्यान्नौ महादेवे" इत्यग्रे वक्ष्यमाणवाक्यस्या अत्यंततादात्म्यापत्त्या महच्छ्रीकृष्ण एव मनो यस्य सः । यद्वा—श्रीकृष्णधारणसामर्थ्येन महन्मनो यस्य । यद्वा—महान् श्रीकृष्णो मनसि यस्येति चंद्रशेखरवत्समासः । उपलक्षणं चैतच्छ्रीयशोदाया अपि । उत्पन्नत्वं नाम तथात्मनोर्बहिस्सादरात्प्राकट्यमेव तथानयोस्तन्निर्विशेषमेव । ननु 'नंदस्त्वात्मज उत्पन्ने' इह विनापि तुशब्दं पादपूर्तेस्तदर्थं तुकारकल्पना व्यर्थेति न च तुकारस्तर्हि व्यर्थ एव आत्मनो जात आत्मजस्तस्मिन् जनिधातुप्रयोगादेवाभीप्सितसिद्धेर्नंतुशब्दौ नंदगृहे उत्पत्तिं साधयतीति वाच्यम् । 'उपगुह्यात्मजामेवं' इहान्योत्पन्नेऽप्यात्मजप्रयोगात् । किं च नाडीछेदात्पूर्वमेव जातकर्मोपक्रमश्रवणात् नाडीछेदस्तु गर्भजत्वं विना कथं संभवेत् । किं च कृष्णस्य नंदपुत्रत्वे नैकद्वाः प्रयोगः । किं तु बहव एव न तु सर्वेऽमुख्यार्थी भवितुमर्हंति । तथाहि 'अदृश्यतानुजा विष्णोः' इति समर्थितं चैतद्ब्रह्मणापि 'पशुपांगजाय' इति देवर्ष्यवतारभूपतेर्गोपैरपि च "मायाहतो महाव्यालो यशोदानंदसूनुना" इति गोपानां देवर्ष्यवतारत्वम् 'नैते सुरेशा ऋषयो न चैते' इति श्रीबलदेवोक्तेर्ज्ञेयम् । साक्षाच्छ्रुत्यवतारैर्गोपीभिरप्ययमर्थ उपबृंहितोऽस्ति "नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः" इति "नंदसूनुरनघे तव वत्सः" इति

---

१. आहूय विप्रान् दैवज्ञान–श्रीधर. वंशी. गिरि. भक्त. ; वेदज्ञान–जीव. वीर. । २. विधिना–जीव. । ३. रत्नौघशात्–श्रीधर. वंशी. वीर. जीव. शुक. गिरि. भक्त. ।

"व्रजस्त्रियः पुत्र न तु स्त्रियो हि नूनं श्रुतीनामथ मूर्त्तयस्ताः। नाहं शिवो वा कमला कदाचित्समाश्च ताभिः कुत एव चान्ये ॥" इत्यादिपुराणे नारदं प्रति ब्रह्मवाक्येन गोपीनां श्रुतिरूपत्वं ध्येयम्। आगमेपि 'नंदगोपतनयो देवता' इति। गर्गेणापि सर्वज्ञमुनिना "प्रागयं वसुदेवस्य कचिज्जातस्तवात्मजः" इत्ययमर्थ आविष्कृतः। नीलकंठेनापि महाभारतटीकायामादिपर्वणि नंदनंदनोपासनमुक्तं मोक्षकारणम्। किञ्च तुकारेण वसुदेव आत्मज उत्पन्न जातह्लादोपि कंसभयात्संकुचितमना जातकर्मादि कर्तुं न प्राभून्नंदस्तु कारयामास। तुकारादेवैतन्मात्रे वसुदेवाद्भेदे प्राप्ते नंदगृहेपि श्रीकृष्णस्योत्पत्तिः। श्रीमन्मुनीन्द्राभिप्रेतावगम्यतेऽन्यथा 'नंदस्त्वात्मज आयाते' इत्येवं कथं न प्रावोचदिति। पुत्रेण सहाह्लादोऽपि जात इति सहोक्तिः। पुत्रव्याजेनाह्लाद एव जात इत्युत्प्रेक्षा च। शुचिरूर्ध्वपुंड्राचमनादिना पवित्रः। जातकर्म पुत्रोत्पत्तिकाले क्रियमाणं वैदिकं कर्मविशेषम्। तैराहूतैर्विप्रैः कारयामास तेषामेव तत्र कर्तृत्वविधानात्। तत्र च कर्मफलं प्रयोक्तरीति न्यायात्फलं तस्यैव यथाविधि स्वयमकरणे जाताह्लाद इत्यनेनानंदजाड्यमेव हेतुः। यद्वा—महे उत्सवे पुत्रोत्पत्तिकालिकहर्षे असमंतात्। मनो यस्य। यद्वा—महति परमेश्वरे वा मनो यस्येति महत आत्वमार्षम् ॥ १-२ ॥ तिलाद्रिप्रमाणं भविष्ये—"उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिर्मतः। त्रिभिः कनिष्ठो राजेन्द्र तिलशैलः प्रकीर्त्तितः ॥" इति द्रोणपरिमाणम्। "खारी द्रोणाढकप्रस्थाः कुडवं च पलं पिचु। शाणको माषकश्चेति यथापूर्वं चतुर्गुणाः" इति ॥ ३ ॥ अथ गर्भशुद्धयुपोद्घातरूपामन्यपदार्थशुद्धिमाह—द्रव्याणामिति। प्रतिनियतानि प्रातिस्विकानि। येषां द्रव्याणां यानि शोधकानीति यावत्। भूम्यादि—आदिपदेन जलादयो ज्ञेयाः। यत्र भूमौ मलाद्युत्सृष्टं तत्र विनापि लेपादिना शोधकेन बहुकालेन स्वयमेव शुद्ध्यति सेत्यर्थः। तथा जलानामपि कालेन "कालं मेघोदकं ग्राह्यं वर्ज्यं तु त्र्यहमेव हि। अकाले दशरात्रं तु ततः शुद्धिः" इत्युक्तेः। देहादि आदिपदे वस्त्रादि। अमेध्यमशुचिद्रव्यं तेन लिप्तम् आदिना स्पृष्टम्। शौचेन मृज्जलादिना शोधनेन। संस्कारैः पुंसवनसीमंतजातकर्मादिभिः। आदिना देहादि। इज्यया देवार्चनयागादिना। "ब्राह्मणः सर्वदा शुद्धः पितृदेवार्चने रतः" इत्युक्तेः। आदिना क्षत्रियादि। "यतो दानं न जायेत तद्द्रव्यं मलवत्स्मृतम्" इति स्मृतेर्द्रव्याणामन्नादिरत्नांतानां दानेनैव शुद्धिर्नान्यथेति भावः। इन्द्रियाणि वागादीनि। तपसा मौनादिरूपेण। यद्वा—तपसैकादश्युपवासादिना आदिना देहपरिग्रहः। मनः संतुष्ट्या। 'संतोषेण मनः शुचि' इति वाक्यात्। आत्मा जीवः। आत्मविद्ययाऽध्यात्मविचारेण। शुद्धस्वरूपावाप्त्या जीवभावरूपामशुचितां जहातीत्यर्थः। दीपकोऽत्रालंकारः। "प्रस्तुताप्रस्तुतानाञ्च तुल्यत्वे सति दीपकम्" इति तल्लक्षणात्। अत्र प्रस्तुतगर्भशुद्धेरप्रस्तुतानां भूम्यादीनामपि शुद्धेर्वर्णनादिति समन्वयः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्दस्त्विवति युग्मकम्। नन्दयति जगदिति श्रीनन्दस्य यथार्थसञ्ज्ञत्वं दर्शयन् तुशब्दोऽस्यैश्वर्यज्ञानप्रधानात् श्रीवसुदेवादपि शुद्धवात्सल्यरीत्या सौभाग्यभरमभिव्यञ्जयति—आत्मजेत्यादिना, कुरूद्वहेत्यन्तेन। अतः श्लाघिष्यते च राज्ञा "नन्दः किमकरोद्ब्रह्मन्नित्यादिभ्याम्" आत्मज इति। अत्रात्मजस्योत्पन्नत्वमात्मजत्वेनोत्पन्नत्वमित्यर्थद्वयं प्रत्येकान्वयाभ्यां व्यज्यते नीलोत्पलवत् तत्रान्यथाप्रतिपत्तिनिरासार्थं तत्रात्मजत्वं पुत्रभावेनात्मनि प्रादुर्भूतत्वमेव नान्यत् तत्खलु—"आविवेशांशभागेन मन आनकदुन्दुभेः"। "ततो जगन्मङ्गलमच्युतांशम्" इत्यादिवच्छ्रीनन्दयशोदयोरपि गम्यते—

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" ॥

इत्यादेः "भक्तिरेवैनं गमयति भक्तिरेवैनं दर्शयति" इत्यादेश्च श्रुतेस्तु "भक्त्याहमेकया ग्राह्यः" इति श्रीभगवदुक्तेश्चाविर्भविष्यते तादृशा प्रेमास्पदतया परमपुरुषार्थरूपाय तत्प्राकट्याय सततत्तन्मनस्त्वलक्षणभक्तेरावश्यकत्वात् श्रीनारदपूर्वजन्मनि श्रीध्रुवप्रह्लादादिषु च दृष्टत्वात् तत् क्रतुन्यायेन "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति श्रीभगवदुपनिषत्प्रामाण्येन च तत्प्राकट्यविशेषाय तद्विशेषस्य चापेक्षितत्वात् अनयोरेतादृशभक्तिदिग्दर्शनं तु प्रस्तावे करिष्यते एतदेवाह—महामना इति। अत्यन्ततादात्म्यापत्त्या महान् श्रीकृष्ण एव मनो यस्य तद्धारणसामर्थ्येन महन्मनो यस्येति वा "यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः" इत्युक्तानुसारेण महामनस्त्वं खल्वत्रैव मुख्यं यत्रौदार्यादयोऽपि गुणा अन्तर्भवन्तीति उपलक्षणञ्चैतत् श्रीयशोदाया अपि वक्ष्यते च "नन्दः किमकरोद्ब्रह्मन् श्रेय एवं महोदयम्। यशोदा च महाभागा" इति तदेवमनयोस्तयोश्चात्मनि तस्य जातत्वे समानेऽपि फलेन फलकारणमनुमीयत इति न्यायेनास्ति विशेषः तयोश्चतुर्भुजत्वेन अनयोः द्विभुजत्वेनेति अथोत्पन्नत्वं नाम च बहिस्तादृशप्राकट्यमेव ननु जीववत् प्रकारान्तरं तत्रानयोस्तयोर्निर्विशेषमेव आत्मजत्वेन पुत्रतयोत्पन्नत्वे त्वस्ति विशेषोपि प्रेरणां विनैव पुत्रत्वव्यञ्जिकया ऽऽकृत्या प्रकृत्या चानयोः प्राकट्यात् तयोस्तु पुत्रत्वाप्रत्यायिकाया तथा तथा च प्राकट्यात् तत्तु युक्तम् अनयोरेव प्रीतेः शुद्धपितृभावमयत्वादुत्कृष्टत्वाच्च तत्तु नन्दस्त्विवत्यादिना शब्दद्वयवैशिष्ट्येन अत्र दर्श्यते परत्र च दर्शयिष्यते तयोस्त्वैश्वर्यज्ञानाच्छन्नमेव विदितोसीत्यादिना तद्दर्शितं तादृशभावं विना तु श्रीवसुदेवस्य न ब्रह्मपुत्रत्वेन श्रीकृष्णदेवस्य च नोत्तरा पुत्रत्वेन प्रसिद्धिः तयोस्तस्य तस्य नाभिमानोऽपि तस्मात् सर्वांशेन श्रीनन्दस्यात्मजत्वेनोत्पन्नोऽसौ क्रियया त्वन्यास्पृष्टतयैव वक्ष्यते आहूयेत्यादिग्रन्थेन अत एव श्रीमता गर्गेणात्रैव प्रधानता वक्ष्यते च "प्रागयं वसुदेवस्य कचिज्जातः तवात्मजः" इति श्रीब्रह्मणाऽपि स्वपुरुषार्थता समर्थयिता "नौमीड्यते" इत्यादौ "पशुपाङ्गजाय" इति सर्वतो वैशिष्ट्येन भगवता श्रीशुकदेवेन च

"नायं सुखापो भगवान् देहिनां गोपिकासुतः" इति आगमविद्भिरपि "सकललोकमङ्गलो नन्दगोपतनयो देवता" इति तस्मात् "नन्दस्त्वात्मज उत्पन्ने" इत्येवोक्तं नतु नन्दस्तमात्मजं मत्वेति अतोऽत्र मायाजन्म च श्रीवसुदेवादौ व्याजमात्रायेव तत्राप्यस्यैवान्तरङ्गत्वज्ञातं तस्या मातुरुदरान्तरे स्थितिरस्य तु हृदय इति तदेवं समानमातृकत्वेनैव विष्णोरनुजात्वेन सा प्रोक्ता तदेवं स्थिते यदा स्वाविर्भूतचतुर्भुजरूपाच्छादनाय श्रीदेवकीच्छा जायते तदा यशोदाहृदयस्थद्विभुजरूपस्य तद्रूपाच्छादनपूर्वकाविर्भावस्तत्रासीदिति गम्यते अत एव "प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः" इति स्वप्रोक्तसमाधानार्थं श्रीगर्गेण पुनर्वक्ष्यते "बहूनि सन्ति रूपाणि नामानि च सुतस्य ते" इति। अथ पूर्ववद्गर्गवाक्येन च श्रीनन्दयशोदयोरभिमत्या सिद्धान्तगत्या च श्रीकृष्णो निजात्मजत्वं मुख्यत्वेनैव स्थापितं देव्यां तु तत्तदात्मनानुभूतं वृत्तं निश्चिन्वत्योः श्रीवसुदेवदेवक्योस्तत् तदभावात् उपगुह्यात्मजामित्यस्मिन्निव न गौणत्वेनेति विवेचनीयं तदेवं सिद्धान्ते स्थिते महोत्सवानुकूल्येन तदेव प्रथयिष्यामः। पुत्रे चोत्पन्ने जाताह्लाद इति न केवलं पुत्रो जातः किन्त्वाह्लादोऽपि जात इति सहोक्तिः पुत्रव्याजेनाह्लाद एव जात इत्युत्प्रेक्षा स्वतः सम्भविवस्तुना व्यज्यते तेन चाह्लादस्य प्राचुर्यं ध्वनयत इत्यालङ्कारिकाः एतच्च महोत्सववैशिष्ट्ये हेतुः विशेषतः प्रान्ति पूरयन्ति कामानिति विप्रास्तान् तत्रापि वेदज्ञानजातकर्मादिवैदिकविधिसम्यग्विदः श्रोत्रियान् "यावतीर्वै देवताः सर्वास्ता वेदविदि ब्राह्मणे वसन्ति" इति श्रुतेः। शुचिः वैष्णवतिलकाचमनादिना विशेषतः पवित्रः सन् जातकर्म "भूयास्त्वपि" इत्यादिमन्त्रैर्मेधाजननादिकर्ममयं वैदिककर्मविशेषं तैर्विप्रैः प्रयोज्यकर्तृभिः कारयामास तेषामेव तत्र कर्तृत्वाभिधानात् तत्र च "कर्मफलं प्रयोक्तरि" इति न्यायात् फलं तस्यैव वै इति पाठे तच्च प्रसिद्धमेवेत्यर्थः। विधिना यथाविधीत्यर्थः। विधिवदिति क्वचित्पाठः अस्य यथापेक्षं पूर्वैः परैश्च सर्वैरन्वयः चार्थे तथापितृदेवार्चनं च नान्दीमुखश्राद्धेन कारयामासेत्यनेन स्वयमकरणमुक्तं तत्र च जाताह्लाद इत्यनेनानन्दजाड्यमेव हेतुरुक्तः यद्वा तथाप्यत्र तदाम्रेडिताद्यवष्टम्भेन चकारेत्यर्थः ॥ १–२ ॥ नियुते विंशतिर्लक्षाणि एतच्च द्वादशाध्याये प्रकटीकरिष्यामः तत्र क्षीरस्वामिकारिकायां दिग्दर्शनं यथा 'एकं दशशतसहस्राण्ययुतं प्रयुताख्यलक्षमथ नियुतम्" इति सम्यगलङ्कृते यथोक्तरौप्यखुरस्वर्णशृङ्गादिभूषिते तिलाद्रिपरिमाणादिकमुक्तं भविष्योत्तरे—

"उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिर्मतः। त्रिभिः कनिष्ठो राजेन्द्र ! तिलशैलः प्रकीर्तितः ॥
पूर्ववच्चापरं सर्वं विष्कम्भं पर्वतादिकम्" ॥

तच्चोक्तं तत्रैवादौ धान्याद्रिप्रसङ्गे "इत्थं निवेश्यामरशैलमग्र्यमतस्तु विष्कम्भगिरीन् क्रमेण। तुरीयभागेन चतुर्दिशं च संस्थापयेत्पुष्पविलेपनाढ्यान्" इत्यादि ते च मन्दरादयश्चत्वारः तथा तत्रैव "मेरुर्महान् व्रीहिमयस्तु मध्ये सुवर्णवृक्षत्रयसंयुतः स्यात्। पूर्वेण मुक्ताफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः। पश्चाच्च गारुत्मतनीलरत्नैः सौम्ये च वैडूर्यसरोजरागैः। ब्रह्माथ विष्णुर्भगवान् पुरारिर्दिवाकरोऽप्यत्र हिरण्मयः स्यात्। किञ्च "शुक्लाम्बराण्यम्बुधरावली स्यात् पूर्वेण कृष्णानि च दक्षिणेन। वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतो घनानि" इत्यादि द्रोणसंख्या चोक्ता "खारीद्रोणाढकप्रस्थाः कुडवं च पलं पिचुः। शाणको मासकश्चेति यथा पूर्वं चतुर्गुणाः" इति एवं षट्पञ्चाशदधिकपलशतद्वयेनैव द्रोणः स्यात् तदेवाभिव्यञ्जयंस्ततोपि वैशिष्ट्यमाह- रत्नौघेति। शातकौम्भाम्बरावृतत्वं सुमेरोर्वर्णस्यापि सादृश्याय ततः पूर्वेभ्योऽन्यान्येतानि तादृशानि सप्तबहुलरत्नादियुतान् प्रकर्षेण पादप्रक्षालनादिपूर्वकं निजजनैस्तत्तत् गृहेषु तत्तत्प्रस्थापनादिप्रकारेणादात् ॥ ३ ॥ ननु, यद्यानन्दजडोऽभूत्तर्हि स्वयं कर्तुं कालविलम्बं कथं न कृतवान् ? उच्यते पुत्रप्रेम्णैवेत्याह—कालेनेति। तत्र दृष्टान्तैर्यथा कालं गर्भशुद्धेरावश्यकत्वमभिप्रेतम् अन्यत्तु अत्र भूम्यादीत्यध्याहृतानि द्रव्याणि अर्थाः गर्भशुद्धेर्दार्ष्टान्तिकत्वं द्रव्यशुद्धेस्तु दृष्टान्तत्वं पूर्वस्यैव साध्यत्वात् अतस्तथाशब्देन पूर्वत्र यथेति गम्यते यथा तथेति पाठश्च क्वचित् भूमिशुद्ध्यादीना तूपादानं दृष्टान्तपोषणार्थमेवेति व्यञ्जितं यद्वा कालादिभिर्द्रव्याणि भूम्यादीनि शुद्ध्यन्त्येव आत्मा तु आत्मविद्यया स्वरूपज्ञानेनैव किंवा भगवद्भक्त्यैव न त्वन्यथा अत एव द्रव्याणीत्यनेन गृहीतस्याप्यात्मनः पृथङ्निर्देशः तस्य तु श्रीमन्नराकृतिपरब्रह्मणा स्वयं भगवता पुत्रतया जायमानेनैव सद्यो जगदपि शोधितं तथापि तेन परमप्रेम्णैव तत्कृतम् इति सर्वेषां मादृशां च महासुखदमिति भावः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

नन्दयति हर्षयति जगदिति श्रीनन्दस्य यथार्थसंज्ञत्वं दर्शयन् तु–शब्दोक्तं श्रीवसुदेवतो वैशिष्ट्यमभिव्यञ्जयति–आत्मज इत्यादिना (१९) कुरूद्वहेत्यन्तेन। तत्र स्नेहविशेषबोधनार्थमात्मज उत्पन्ने इत्यन्यदीयपुत्रत्वादिशंका निरस्ता। तद्दार्ढ्यार्थमग्रेऽपि पुनस्तथैवोक्तिः। यद्यपि श्रीवसुदेवोऽपि प्राकृतशिशौ सति श्रीभगवति स्नेहभरातुरस्तद्रक्षार्थं परमव्यग्रः सन् तत्परिवर्तन मायामप्यानीतवान् तथापि तस्येश्वरज्ञानादिसम्बन्धेन विशुद्धभक्तिनिष्ठाच्छ्रीनन्दान्न्यूनत्वमेव कल्पत इति। यद्वा, श्रीवसुदेवात्मजभावपरित्यागेन श्रीभगवता श्रीनन्दात्मजतयैवात्मनः सर्वथावबोधादात्मज इत्युक्तम्। वैष्णवाः केचिदेवं व्याचक्षते–श्रीवसुदेवगृहे श्रीभगवानेक एव जातः, श्रीनन्दगृहे तु मायया सहेति परमरहस्यत्वात्तत्प्रसंगः पूर्वं नोद्दिष्टः। तत्र तु श्रीवसुदेवेन मायापरिवर्त्तन विषयतः पुत्रः श्रीनन्दात्मजेनैवैक्यं प्राप्त इति मुख्ययैव वृत्त्या तदात्मजत्वं घटत इति अत एव ब्रह्मणापि वक्ष्यते (भा० १०।१४।१)

'पशुपांगजाय' इति, अत एव रुद्रयामले–'कृष्णोऽन्या यदुसम्भूतो यः पूर्णं सोऽस्त्यतः परः। वृन्दावनं परित्यज्य स कदाचिन्नैव गच्छति ॥' इति। महामनाः प्रकृत्यैवोदारचित्तः, पुत्रे चोत्पन्ने जाताह्लाद इति जातकर्म्ममहोत्सवादिकरणे हेतुः। विशेषतः प्रान्ति पूरयन्ति कामानिति विप्रास्तान्, तत्रापि वेदज्ञान् जातकर्म्मादिवैदिकविधिविशेषविदः श्रोत्रियान्, (सह वै० १९) 'यावतीर्वै देवताः सर्वास्ता वेदविदि ब्राह्मणे सन्ति' इति श्रुतेः। शुचिर्वैष्णवतिलकाचमनादिना विशेषतः पवित्रः सन् तैर्विप्रैः। वै इति पाठे तत्र प्रसिद्धमेवेत्यर्थः। विधिना यथाविधीत्यर्थः। अस्य यथापेक्षं पूर्वैः परैश्च सर्वैरन्वयः। चार्थे तथा पितृदेवार्चनञ्च नान्दीमुखश्राद्धेन ॥ १–२ ॥

सम्यगलंकृते यथोक्त-रौप्यखुर-सौवर्णश्रृंगादिविभूषिते, तिलाद्रिपरिमाणादिकमुक्तं; भविष्योत्तरे उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिर्मतः। त्रिभिः कनिष्ठो राजेन्द्र तिलशैलः प्रकीर्त्तितः। पूर्ववच्चापरं सर्वं निष्कम्भपर्वतादिकम् ॥' तत्रोक्तं तत्रैवादौ धान्याद्रिप्रसंगे 'इत्थं निवेश्यामरशैलमग्र्यमतस्तु निष्कम्भगिरीन् क्रमेण। तुरीयभागेन चतुर्दिशञ्च संस्थापयेत् पुष्पविलेपनाढ्यान् ॥' इत्यादि। ते च विष्कम्भगिरयो मन्दरादयश्चत्वारः। तथा च तत्रैव—'मेरुर्महान् व्रीहिमयस्तु मध्ये, सुवर्णवृक्षत्रयसंयुतः स्यात्। पूर्वेण मुक्ताफलवज्रमुक्तो, याम्ये च गोमेदकपुष्परागैः। पश्चाच्च गारुत्मतनीलरत्नैः, सौम्ये च वैदुर्यसरोजरागैः। ब्रह्माथ विष्णुर्भगवान् पुरारिर्दिवाकरोऽप्यत्र हिरण्मयः स्यात्।' किञ्च, शुक्लाम्बराण्यम्बुधरावली स्यात्, पूर्वेण कृष्णानि च दक्षिणेन। वासांसि पश्चादथ कर्बुराणि, रक्तानि चैवोत्तरतो घनानि ॥' इत्यादि। द्रोण-संख्या चोक्ता वैद्यके–'खारी द्रोणाढकप्रस्थाः कुडवश्च पलं पिचु। शानको माषकश्चेति यथापूर्वं चतुर्गुणाः ॥' इति। एवं षट्पञ्चाशदधिकपलशतद्वयेनैको द्रोणः स्यात्। तदेवाभिव्यञ्जयति, किं वा ततोऽपि वैशिष्ट्यमाह–रत्नौघेति। शातकौम्भं स्वर्णसमूहः सौवर्णाभरणजातं वा, यद्वा, तिलाद्रिश्च व्रजेऽत्र सुप्रसिद्धश्रीगोवर्द्धनाद्रेरुच्चतया तुल्यो ज्ञेयः, तादृशान् सप्तबहुलरत्नादियुतान् प्रकर्षेण पादप्रक्षालनादिपूर्वकं निजजनैस्तत्तद्गृहेषु तत्तत्प्रस्थापनादिप्रकारेणादात् ॥ ३ ॥

ननु कुतस्तदानीमेव तथा तत्तत् कृतमित्यत्राह–कालेनेति; तत्तद्दृष्टान्तैर्यथाकालं जातकर्म्मदानयोरावश्यकत्वमभिप्रेतम्। अन्यत्तैर्व्याख्यातम्। यद्वा, कालादिभिर्द्रव्याणि शुद्ध्यन्त्येव, आत्मा त्वात्मविद्यया स्वरूपज्ञानेनैव, किं वा भगवद्भक्त्यैव, न त्वन्यथा। अत एव द्रव्याणीत्यनेन गृहीतस्याप्यात्मनः पृथङ्निर्देशस्तस्य च गृहे साक्षात् परमात्मनः स्वयं गमनाच्छुद्धिमहिमा केन वर्ण्यः? यद्वा, कालादिषु मध्ये केनचित् कदाचित् कस्यापि शुद्धिः, श्रीभगवत्पुत्रत्वेन च तस्य युगपत् सर्वशुद्धिरेव सिद्धेति किं वक्तव्यं ताभ्यां तत्तच्छुद्धिरिति भावः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

॥ १-३ ॥ प्रसङ्गात् द्रव्यशुद्धिहेतूनाह—कालेनेति कालश्चोदितकालः ॥ ४–८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं "तस्यां रात्र्यां व्यतीतायाम्" इत्यादिना मथुरायां प्राभातिकवृत्तान्त उक्तः अथ व्रजे तद्वृत्तान्तमाह–नन्द इत्यादिना तत आरभ्येत्यतः प्राक्तनेन। आत्मजे उत्पन्ने सति जात आह्लादो यस्य महदौदार्यप्रवणं मनो यस्य तथाभूतो नन्दो वेदज्ञान् ब्राह्मणानाहूय स्वयं स्नातः शुचिरलङ्कृतश्च ॥ १ ॥ ततः स्वस्त्ययनं माङ्गलिकं सूक्तं वाचयित्वा यथाविधि जातकर्म कारयामास तथा पितॄणां देवानां चार्चनं कारयामास ॥ २ ॥ ततः सम्यगलङ्कृते द्वे धेनूनां नियुते लक्षे विप्रेभ्यः प्रायच्छत्तथा रत्नौघैः शातकौम्भाम्बरैः सुवर्णरजताङ्कवस्त्रैः सुवर्णनिष्कैरम्बरैर्वा दक्षिणार्थं निहितैरावृतान् सप्त तिलपर्वतान् प्रादात् ॥ ३ ॥ किमर्थमेवं स्नानादि कर्म अकरोत् कारयामास प्रादाच्च? इत्यत्राह-कालेनेति। आत्मा आत्मविद्ययेति दृष्टान्तार्थं यथाऽऽत्मविद्यया परमात्मोपासनया आत्मा प्रत्यगात्मा शुद्ध्यति हेयगन्धरहितो भवति तथा द्रव्याण्यपि कालादिभिरेव शुद्ध्यन्ति इत्यभिप्रायेण तद्विशुद्ध्यर्थमकरोदित्यर्थः। द्रव्यशब्दोऽत्रानुबन्धिगेहदेहापत्यदेवतापशुहिरण्यादिवित्तधान्येन्द्रियाभिप्रायकः तत्र कालेन दशदिनात्मकेन गेहस्य शुद्धिः स्नानशौचाभ्यां देहस्य जातकर्मादिसंस्कारैरपत्यस्य तपसा मन्त्रजापेनेज्यया च गृहदेवतायाः दानैः पशुहिरण्यधनधान्यानां सन्तुष्ट्या मनस इति विवेकः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भगवदवतारहृष्टमनसो नन्दस्य भगवद्भक्त्यतिशयेन चित्तविश्रमणे सद्भक्तानां भगवद्भक्तिश्चन्द्रोदय इव समुद्रवृद्धिः स्वाभाविकीति प्रकाश्यतेऽस्मिन्नध्याये, जाताह्लादः प्रादुर्भूतानन्दः ॥ १ ॥ स्वस्त्ययनं माङ्गल्यवचनं तथापि पितृदेवगन्धर्वाद्यर्चनं कारयामास नन्दयामास ॥ २ ॥ शातकौम्भान्तरावृतान् गर्भीकृतशातकुम्भान् ॥ ३–४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आत्मज इति पुत्रीभूत इत्यत्र व्याख्यास्यते पूर्वमेव महामनाः श्रीकृष्णाविष्टचित्तः अधुना तु तस्मिन्नेव आत्मजे जाते जाताह्लाद इत्यादिभिः आविवेशांशभागेन मन इत्यादि साम्यं बोधयन्नपि भाववैशिष्ट्यं बोधयति—कारयामासेति। आनन्द-

जाड्यात् ॥ १–२ ॥ धेनूनामिति नियुतमत्र शतगुणितमयुतं ज्ञेयम् "एकं दश सहस्रमयुतं प्रयुताख्यलक्षमथ नियुतम्" इति क्षीरस्वाम्युक्तेः विलम्ब्य कथं स्वयं न कृतवान् उच्यते ॥ ३ ॥ पुत्रप्रेम्णैवेत्याह—कालेनेति । द्रव्याणि भूम्यादीनि तत्र भूमेः कालेनेत्यादि ज्ञेयम् ॥ ४–९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

अथ यशोदाङ्के कृष्णं निक्षिप्य तत्र स्थितां योगमायां गृहीत्वा वसुदेवे गतवति भगवान् श्रीकृष्णो नन्दयशोदे पितृमातृत्वेन स्वीचकार । नन्दो मे पिता यशोदा मे मातेति यत्, तदेव तद्गृहे जन्म । वस्तुतस्तु श्रीनन्दयशोदयोर्नित्यापत्यत्वेनायं स्थित एव । वसुदेव–देवकयोस्त्वागन्तुकापत्यत्वमस्य सम्प्रति तु वस्तुतः प्राकृतवन्न देवकीजठरे जन्म, न यशोदाजठरे च; अपि तु स्वरूपेणाविर्भावः, स त्वविशेषादुभयत्रैव तुल्यः । तेनायमन्य एवावतार एवेत्याह–नन्दस्त्वात्मज उत्पन्न इत्यादि । आत्मज उत्पन्ने सति तनयादिशब्दमनुपादायात्मजशब्दोपादानेनायमर्थः प्रकाशितो भवति–आत्मना स्वयमेव जायते प्रादुर्भवतीति, तेनात्मजश्चात्मजश्चेत्येकशेषः । आत्मजत्वेन स्वयंप्रकाशत्वेन । आत्मजे पुत्र उत्पन्ने सतीत्यर्थः, जातोह्लादः आत्मजस्याह्लादात्मकत्वात्तद्धृदयेऽप्याह्लादरूपेणाविशदिति द्वयोः पितृमातृत्वेन स्वीकारः ॥ १ ॥ 'जातकर्मात्मजस्य वै' इति वै-शब्दोऽप्यर्थः । आत्मजस्य स्वप्रकाशस्यापि जातकर्मादि कारयामासेत्यर्थः ॥ २ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नन्दस्त्वात्मज इत्यादि । आत्मना जायते इत्यात्मजः स्वप्रकाशस्तस्मिन्नुत्पन्ने आविर्भूते ॥ २ ॥ जातकर्माजातस्येत्यादि वैशब्दोऽत्रापि स्वप्रकाशस्यापि । (३–१२)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृष्णजन्मोत्सवो दातुं करं श्रीमथुरागमः । नन्दस्य वसुदेवेन संलापः पञ्चमेऽभवत् ॥

नन्दस्त्विति तुकारेण वसुदेव आत्मजे उत्पन्ने जाताह्लादोऽपि कंसभयात् सङ्कुचितमना जातकर्मादिकं कर्त्तुं न प्राभूत् । नन्दस्तु आत्मजे उत्पन्ने जाताह्लादो महामना अतिविस्मृतमनाः स्वस्तिवाचनपूर्वकं जातकर्म कारयामासेति तुकारादेवैतन्मात्रे वसुदेवादुभेदे प्राप्ते नन्दगृहेऽपि कृष्णस्योत्पत्तिः श्रीमन्मुनीन्द्राभिप्रताऽवगम्यते "गर्भकाले त्वसम्पूर्णे" इति पूर्वोक्तवैशम्पायनसम्मताऽपि न च तुकारोऽत्र पादपूर्णार्थ इति वाच्यं "नन्द आत्मज उत्पन्ने जाताह्लादो महामनाः" इति विनापि तुकारेण पादपूर्त्तेः । न च तदपि तुकारोऽनर्थक एव आत्मनो जात आत्मजस्तस्मिन्निति जनिधातुप्रयोगादेवाभीप्सितसिद्धेरिति वाच्यम् "उपगुह्यात्मजामेवम्" इत्यत्रानौरसापत्येऽप्यात्मजशब्दप्रयोगात् किञ्च नाडीच्छेदात्पूर्वमेव जातकर्मोपक्रमश्रवणात् नाडीच्छेदश्च गर्भजत्वं विना कथं सम्भवेत् ? किञ्च कृष्णस्य नन्दपुत्रत्वे खलु नेकधा प्रयोगाः किन्तु बहव एव न ते सर्वं एवामुख्यार्थीभवितुमर्हन्ति तथाहि "अदृश्यतानुजा विष्णोः" इति "प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः" इति "नौमीड्य ! ते" इत्यादौ "पशुपाङ्गजाये"ति "देहिनां गोपिकासुत" इति गौतमीये "वल्लवीनन्दनं वन्दे" इति क्रमदीपिकायामपि "देवतासकललोकमङ्गलो नन्दगोपतनयः समीरितः" इति । मन्त्रेऽपि "नन्दपुत्रपदं गेतुम्" इत्यादयः केचित्तु कृष्णस्य वसुदेवपुत्रत्वविजयसखत्वरुक्मिणीकान्तत्वादिभ्योऽपि प्रेममिश्रसम्बन्धमूलकेभ्यः सकाशात् नन्दपुत्रत्वसुबलसखत्वगोपीकान्तत्वानि प्रेमैकमूलकानि कृष्णस्य नन्दाद्यतिवश्यत्वव्यञ्जकान्यार्षवचनपरश्शतेन महानुभावसहस्रानुभवेन च परमोत्कृष्टानीत्यतस्तादृशभावतारतम्येनैव तत्तद्व्यपदेशतारतम्यमन्यथा वराहदेवस्य ब्रह्मपुत्रत्वं कृष्णस्य चोत्तरागर्भगतत्वेनोत्तरापुत्रत्वमपि प्रसिद्ध्येतेति ब्रुवाणा यशोदागर्भजत्वाभावमेव स्वाभीष्टसाधकं मन्यन्ते न च नन्दयशोदयोः कृष्णे स्वपुत्रत्वं बुद्ध्यैव तत्रापि सम्बन्धस्योपाधित्वं वाच्यं नहि वस्तुशक्तिर्बुद्ध्या पराहन्यत इति न्यायात् नहि निर्हेतुकः प्रेमाहेतुबुद्ध्यैव सहेतुको भवति न हीश्वरे जीवबुद्ध्यैवेश्वरो जीवो भवति किन्तु कृष्णस्य मृद्भक्षणादावनृतभाषणस्यापि सत्यत्वमिव कृष्णस्य प्रियपरिकराणामपि ज्ञानभाषणादेरनृतस्यापि सत्यत्वमात्मारामैरप्युपादेयत्वमुपास्यत्वं प्रेमपदत्वं चेति सिद्धान्तः । जाताह्लाद इति पुत्रेण सहाह्लादोपि जात इति सहोक्त्यलङ्कारः पुत्रव्याजेनाह्लाद एव जात इत्युत्प्रेक्षा च कारयामासेत्याह्लादोत्थजाड्येन स्वयङ्करणासामर्थ्यात् ॥ १–२ ॥ नियुते विंशतिलक्षाणि "एकं दशशतसहस्राण्ययुतं प्रयुताख्यलक्षमथ नियुतम्" इति क्षीरस्वामी । तिलाद्रिपरिमाणमुक्तं भविष्योत्तरे—

"उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिर्मतः । त्रिभिः कनिष्ठो राजेन्द्र ! तिलशैलः प्रकीर्तितः" ॥

द्रोणसङ्ख्या च—

खारीद्रोणाढकप्रस्थाः कुडवश्च पलम्पिचुः । शाणको मासकश्चेति यथापूर्वं चतुर्गुणाः" इति ॥ ३ ॥

आवश्यकस्य विविधदानादियुक्तजातकर्मणो गर्भशोधकस्य प्राक् बालकस्य दृष्टान्तान् दीपकालङ्कारेणाह—कालेनेति । कालादिभिर्द्रव्याणि शुद्ध्यन्ति तत्र कालेन वर्त्मादीनि स्नानेन देहादीनि शौचेनामेध्यलिप्ताङ्गादीनि संस्कारैर्गर्भादीनि तपसा इन्द्रियादीनि इज्यया ब्राह्मणादीनि दानैर्धनादीनि सन्तुष्ट्या मनः आत्माऽऽत्मविद्यया परमात्मनः स्वरूपानुभवेन जीवः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीनन्दं श्रीयशोदां च बालं वन्दे तयोर्मुदा। तत्प्रियां श्रीमतीं सर्वं गोपीर्गोपगवादिकम् ॥
चतुर्भिर्वर्णितं जन्म वसुदेवगृहे हरेः। अथान्यद्दुष्करं दिव्यं श्रीनन्दोत्सवपूर्वकम् ॥
संसारतापशान्त्यर्थं भुक्तिमुक्तिप्रदं नृणाम्। सपञ्चत्रिंशताध्यायैर्व्रजे कर्मापि वर्ण्यते ॥
"जन्मकर्म च मे दिव्य"मित्युक्तं हरिणा स्वयम्। तद्वयं मोक्षमिच्छद्भिः श्रोतव्यं परमादरात् ॥

श्रीवसुदेवेन भगवदिच्छयैव सुज्ञाततत्त्वेन भगवत्स्वरूपगुणादिवर्णनमात्रतः पूजयित्वा श्रीनन्दगृहे भगवान् संस्थापितः इत्युक्तं श्रीनन्दस्तु पूर्वोक्तरहस्येन स्ववेश्मनि प्रविष्टं पुत्रवत्सलतयाऽऽराधितवानित्याह—नन्दस्त्विति। जातः आह्लादः दैहिकहर्षातिशयो यस्य सः महामनाः प्रफुल्लितान्तःकरणः स्नातः शुचिः कटककुण्डलादिभिरलङ्कृतः विप्रानाहूय स्वस्त्ययनं मङ्गलं सूक्तं वाचयित्वा आत्मजस्यापत्यस्य यथाविधि जातकर्म कारयामास पितृदेवार्चनं तथा विधिवत् कारयामासेति द्वयोरन्वयः ॥१–२॥ धेनूनां नियुते लक्षे रत्नौघैः शातकौम्भाम्बरैः सुवर्णरसाक्तैरम्बरैश्चावृतान् सप्त तिलाद्रींश्च विप्रेभ्यः प्रादादित्यन्वयः ॥ ३ ॥ जातकर्मादिसंस्कारैरपत्यशुद्धिरिति दृष्टान्तैरुपपादयति—कालेनेति। अत्रापत्यमित्यध्याह्रियते द्रव्याणि यथाकालादिभिर्यथायथं शुद्ध्यन्ति तथा संस्कारैः जातकर्मसंस्कारैरपत्यं शुद्ध्यतीत्यन्वयः। तत्र कालेन भूम्यादिस्नानेन देहादिशौचेन प्रक्षालनसङ्घर्षणादिरूपेण अमेध्यलिप्तादि तपसेन्द्रियादि इज्यया ब्राह्मणादिदानैर्न्यायार्जितसुवर्णान्नवस्त्रादि सन्तुष्ट्या मनः आत्मा जीवः आत्मविद्यया परमात्मोपासनया ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

सूनोर्जन्मोत्सवं कृत्वा व्रजेशो मथुरामगात्। शौरिणा तत्र संलापं व्यधादित्याह पञ्चमे ॥

स्वामिनः श्रीहरेरिच्छया यन्त्रितः श्रीशुको मुनिराजः श्रीनन्दराजमन्दिरे तस्य जन्म सुगोप्यभावेनाभिधाय तदुक्तेच्छया नियन्त्रितस्तत् प्रकटयंस्तदुत्सवं प्रदर्शयति नन्दस्त्विति युग्मं तु भिन्नोपक्रमार्थः। शौरिरात्मजे जाते सति जाताह्लादोऽपि कारानिरुद्धत्वात्तज्जातकोत्सवं कर्तुं नाशकत् मनसापि गवामयुतमेव प्रादात् नन्दस्तु महामना आत्मजे उत्पन्ने अन्तःपुरजनादुपश्रुते सति जाताह्लादः सन् वेदज्ञान् भागुरिप्रभृतीन् विप्रानाहूय वारां मुदाञ्च धारया स्नातः शुचिरूर्ध्वपुण्ड्रधारणाचमनादिना विशेषतः पवित्रः सन् अलङ्कृतो धृतानर्घ्यभूषणः विधिवदात्मजस्य जातकर्म कारयामास चकारेत्येतदंशेन भेदः आत्मजेन सहाह्लादो जात इति सहोक्तिस्तद्व्याजेन स एव जात इत्युत्प्रेक्षा च व्यज्यते अन्यत् स्फुटार्थं अत्रात्मजत्वस्याभ्यासाल्लिङ्गात् कृष्णस्य नन्दराजौरसत्वं स्फुटीकृतं यशोदायाः सुतोद्भवं आत्मजस्योदयाय च नन्दः स्वपुत्रमादायेत्यादिभिर्बहुकृत्वो भ्यसिष्यति ॥ १–२ ॥ तदानीमतिहृष्टस्य नन्दनृपस्य दानमाह धेनूनामिति। नियुते विंशतिलक्षाणि एकदशशतसहस्राण्ययुतं प्रयुताख्यलक्षमथ नियुतमिति क्षीरस्वामिवचनात् नियुतमेव भास्करेण प्रयुतमुच्यते समलङ्कृते इति एवमुक्तं हेमाद्रेर्दानखण्डे "दशसौवर्णिके शृङ्गे खुराः पञ्चपलान्विताः। पञ्चाशतपलिकं पृष्ठं पुच्छे मुक्ताविभूषिताम्। स्वर्णशृङ्गीं रौप्यखुरीं ताम्रपृष्ठविभूषिताम्। सवत्सां वस्त्रसहितां सघण्टां कांस्यदोहनीम्। उधस्वन्तीं रोगहीनां सुशृङ्गीञ्च मनोहराम्। एवं गां यो नरो दद्यात् स सुरैः सह मोदते" इति दानान्तरमाह तिलाद्रीनिति प्रत्यजिरं चरितानिति ज्ञेयं कीदृशानित्याह रत्नानामौघैराशिभिः शातकौम्भाम्बरैः सुवर्णरसाक्तैर्वस्त्रैश्चावृतान् तिलाद्रिपरिमाणमुक्तं भविष्योत्तरे उत्तमो दशभिर्द्रोणैर्मध्यमं पञ्चभिर्मतः। त्रिभिः कनिष्ठो राजेन्द्र तिलशैलः प्रकीर्त्तितः। पूर्ववच्चापरं सर्वं विष्कम्भपर्वतादिकं तच्चोक्तं तत्रैवादौ धान्याद्रिप्रसङ्गे "इत्थं निवेश्यामरशैलमग्र्यमतस्तविष्कम्भगिरीन् क्रमेण"। तुरीयभागेन चतुर्दिशश्च संस्थापयेत् पुष्पविलेपनाढ्यानित्यादि ते च मन्दरादयश्चत्वारः तदुक्तं तत्रैव "मेरुर्महान् व्रीहिमयश्च मध्ये सुवर्णवृक्षत्रयसंयुतः स्यात्। पूर्वेण मुक्ताफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः। पश्चाच्च सारुत्मतनीलरत्नैः सौम्ये च वैदूर्यसरोजरागैः। ब्रह्माथ विष्णुर्भगवान् पुरारिर्दिवाकरोऽप्यत्र हिरण्मयः स्यात्। शुक्लाम्बराण्यं बुधरावली स्यात् पूर्वेण कृष्णानि च दक्षिणेन। वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतो घनानीत्यादि तिलादिषु शातकौम्भाम्बरावृतिर्मेरुसादृश्याय बोध्या द्रोणसंख्या चोक्ता खारीद्रोणाढकप्रस्थाः कुडवश्च पलम्पिचु। शाणको मासकश्चेति यथा पूर्वश्चतुर्गुणा इति ॥ ३ ॥ विविधदानादियुक्तजातकर्मणो गर्भशोधकस्य प्राकरणिकस्य दृष्टान्तान् दीपकालङ्कारेणाह कालेनेति। कालादिभिर्द्रव्याणि शुध्यन्ति तत्र कालेन दूषितभूम्यादि, स्नानेन देहादि, शौचेनामेध्यलिप्ताङ्गादि संस्कारैर्गर्भादि तपसेन्द्रियादि, इज्यया त्रैवर्णिकं, दानैः प्रतिगृहीतधान्यादि, सन्तुष्ट्या मनः आत्मविद्ययात्मा, जीवः तथा च गर्भशुद्धेः संस्कारहेतुकत्वात् कर्तव्यास्तत्संस्कारा इति ॥ ४ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

॥ हरिः ॐ ॥ कालेन द्रव्याणि भूम्यादि द्रव्याणि शुद्ध्यन्ति। स्नानशौचाभ्यां द्रव्याणि देहादिद्रव्याणि शुद्ध्यन्ति। संस्कारैर्द्रव्याणि गर्भादिद्रव्याणि शुद्ध्यन्ति। तपसा द्रव्याणीन्द्रियाणि शुद्ध्यन्ति। भगवज्ज्ञानानुकूल्यानि भवन्ति। इज्यया द्रव्याणि ब्राह्मणादि द्रव्याणि शुद्ध्यन्ति। ब्राह्मणादिनिष्ठब्राह्मणादिकं स्थिरं भवतीति यावत्। संतुष्ट्या दानेन द्रव्याणि गवादि द्रव्याणि

शुद्धयंति। अभिवृद्धानि भवंति। आत्मविद्यया परमात्मविद्ययाऽऽत्मा जीवः शुद्धयति मुक्तो भवतीति विचार्य नियुतगवादिकं प्रादादिति। एतेन कालेनेति पद्यं पूर्वोत्तरपद्याभ्यामनन्वितमिति दूषणं निरस्तम्। आत्मविद्ययेत्यतः परमिति विचार्येति विशेषणमंगीकृत्य गवादिकं प्रादादिति पूर्वेणान्वय इत्यभ्युपरामात्। अत्र कालेनेत्यादि दृष्टांतार्थम्। एतेन नियुतगवादिकं कथं प्रादादित्याशंकापरिहारोपयोगित्वात्संतुष्ट्या दानैर्द्रव्याणि शुद्धयंतीत्येव वक्तव्यं न तु कालेन द्रव्याणि शुद्धयंतीत्यादि। एति चोद्यं परिहृतम्। कालादिना यथा द्रव्याणि शुद्धयंति। तथा संतुष्ट्या दानैर्द्रव्याणि शुद्धयंतीति दृष्टांतं वक्तुं कालेनेत्यादिकं प्रवृत्तमित्यूरीकरणात्॥ ४॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

॥ हरिः ॐ॥ कालेनेति। अत्र द्रव्याणीत्यनेनैवात्मलाभे पुनः पार्थक्येनात्मग्रहणमयुक्तमित्यत उच्यते। चेतनोऽचेतनश्चेति भावोऽपि द्विविधो मत इति द्रव्यवैविध्यविवक्षया पृथगात्मग्रहणेऽपि नायुक्तता। तथा च क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मन इति कारिकोक्तनवद्रव्याणामित्थं शुद्धिः शूद्रान्नं त्रिदिनैः शुध्येदित्यादिना कालेन पार्थिवभागस्य शुध्या। कालेन क्षितिः सतां स्नानेनापो हरंत्यघं तेंऽगसंगात्तेष्वास्ते ह्यघभिद्धरिरिति गंगां प्रति भगीरथोक्तेः शौचेन तापादिना संपादितशुध्या तेजोंऽशभूतं सुवर्णादि। तापादिना हेम मलं जहातीत्युक्तेः। संस्कारैः रेचनपूरणकुंभकाद्यैर्मरुत् प्राणरूपो वायुः। प्राणान्संशोध्य यत्नेन पूरककुंभकरेचकैरित्युक्तेः। तपसा। तप आलोचन इति धातोः। ध्यानरूपालोचनेन व्योमः हृदयाकाशः। हृदिस्थेध्ययननिष्ठयेत्युक्तेः। इज्यया। यजपूजादाविति धातोः पूजादिनाऽशौचसंपादकोपरागादिकालः। दानैः। दो अवखंडन इति धातोः। मामंतिकाहितखंडनैरित्यर्थः। दिशः प्राच्यादयः। संतुष्ट्या कामादिभिरनाविद्धं प्रशांताखिलवृत्ति यच्चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचिदिति वचनेन कामाद्यनुपहतप्रशांताखिलवृत्तित्वेन। ब्रह्मदर्शनसुखेनेत्यर्थः। मनो मानसम्। ननु पूर्वमात्मशुद्धिसाधनमुक्त्वा व्यवहितमनःशुद्धिसाधनमुक्तम्। अतो व्यत्ययः कथम्। अत्रोच्यते। अचेतनजातिमद्द्रव्याणां मध्ये एकस्यैव चेतनत्वेन द्विजातीयस्यात्मनो ग्रहणेऽस्वारस्यं मत्वा मनोनंतरमेवात्मग्रहणं युक्तमिति प्रदर्शनार्थमादौ मनःशुद्धिसाधनोक्तिरिति ज्ञेयम्। अध्यात्मविद्यानामिति। विभूतिकथनेन सर्वोत्तमात्मज्ञानार्थकात्मविद्याया आत्मा जीव एतानि द्रव्याण्येते शुध्यंतीत्यन्वयः। एतैः कैरित्याशंकायां कालेनेत्यादि विविच्य दर्शितम्॥ ४॥

पञ्चमाध्यायतो दशमाध्यायस्याष्टाविंशश्लोकपर्यन्तं श्रीछलारीकृतभागवततात्पर्यटीप्पणी नास्ति। (सं.)

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ॥ कन्यामादाय विन्यस्य दायादं यथापूर्वमागत्य वसुदेव उदवसिते वसति सति व्रजे गोपव्रजे कथा का प्रवृत्तेत्यतस्तां कथयत्यस्मिन्नध्याये। तत्रादौ नन्दस्यानन्दतुन्दिलतया जातपोतजातकर्मादिप्रवर्तनं कथयति श्रीशुकः। तुशब्द आन्तरङ्गिकसर्वविशेषसूचकः। जात आह्लादो यस्य स महामना महन्मनो यस्य स मनस्वी वेदज्ञान्वेदज्ञानिनो न प्रथामात्रेण तदा करणं किन्तु यान्स्वयं ज्ञान् जानातीति ज्ञास्तान्वेद तान्विप्रान्नाहूयेति वाऽलङ्कृतस्तथा च याज्ञिकाः स्वयमलङ्कृत्येति वदन्ति॥ १॥ स्वस्त्ययनं पुण्याहवाचनं ॐ पुण्याहं ॐ पुण्याहमिति वदन्ति तद्वाचयित्वा तथा पितृदेवार्चनं पित्रोर्मातृदेवो भव पितृदेवेत्यादिनाऽर्यमादिवृद्धपितृपितामहादीनां देवाद्यर्चनं विधिना कारयामास जातकर्म च कारयामास। वैशब्दोऽनन्तनामाऽप्यनन्तोऽनुनयेन स्वीचकार कारुणिक इति द्योतकः। वै अनुनयेऽपि चेति विश्वः॥२॥ नियुते द्वे लक्षे समलङ्कृते सुन्दरपादसुवर्णशृङ्गरूप्यखुरेत्याद्युक्तालङ्कारसहिते। समलङ्कृत इति पाठस्तु न सरलः। अनुपदं शुचिरलङ्कृत इत्युक्तेः। तथाऽपि वित्तवितरणे तस्य शक्ततां सम्यगलं पूर्णत्वेन कृत इति वा सम्यगलं फलपर्यवसायि कृतं कर्म यस्य स इति वा बाधयति तदिति ज्ञेयम्। अन्तरा मध्ये शातकुम्भानां सुवर्णराशीनां स्थापितानामावृतमावरणं स्वैर्येषां तान्सप्ततिलाद्रींस्तिलपर्वतान्पर्वताकारेण स्थापितांस्तिलानित्यर्थः। रत्नौघांस्तत्सङ्घान्विप्रेभ्यः प्रादात्॥ ३॥ स्नातशुचिरित्यादिप्रसङ्गसङ्गत्येयतां वस्तूनामियतां साधनेन शुद्धिरित्याह। कालेनेति। कालेन भूम्यादिकं देहादिस्नानेनास्पृश्याङ्गस्पर्शादिशौचेन गर्भादिकं संस्कारैस्तपसेन्द्रियादीज्यया यागेन ब्राह्मणादिदानैर्द्रव्याणि। बहुवचनेन शुद्धयर्था अत्रोक्ता द्रव्यपदेनापि ग्राह्या इति सूचयति। सन्तुष्ट्या प्रतिग्रहीतृविप्रादिसन्तोषेणापि द्रव्यस्य शुद्धिर्ज्ञेयेति ज्ञेयम्। दातुरपि सन्तुष्ट्यर्थः। विना तोषं वितरणे न फलमिति भावः। आत्मा मन आत्मविद्यया भगवदवगमेनेति द्रव्याणि शुद्धयन्तीत्यकृतविवरणं नन्द इति भावः। आत्मविद्ययेत्युपसंहारेण तन्मुख्यतायां सत्यां तस्यां मुक्तसाधने सत्यसति च शुद्धिकाऽभिप्रैतीति च ज्ञेयम्॥ ४॥

श्रीसुबोधिनी

एवं चतुर्भिरध्यायैर्जन्म विष्णोर्निरूपितम्। हेतूद्यमोत्तराङ्गैश्च राजसादिगुणैर्युतम्॥ १॥
सप्तसप्ततिभिः कृत्यं हरेरत्र निरूप्यते। भगवान् स्वेन धर्मैश्च सप्तधैकादशेन्द्रियैः॥ २॥
कृत्यं चकार यस्माद्धि ततस्तावद्भिरुच्यते। त्रिविधानि च कर्माणि त्रिविधानां हिताय हि॥ ३॥
तस्यातिक्रमणे रोधस्तामसे राजसे भवेत्। कालातिक्रमणे शिष्टे कालस्तत्रैकविंशतिः॥ ४॥

“द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश” इतिश्रुतेः
लौकिकेषु तु धर्मेषु यत्रैव हरिवेशनम् । निवर्तते तथैवात्र वह्निर्दारुमयं यथा ।। ५ ।।
स्वभावस्याऽन्यथाभावो न वै शक्यः कथञ्चन । अतस्त्रिविधजीवेषु त्रिविधा भगवत्कृतिः ।। ६ ।।
लौकिकं तामसे मुख्यं कामान्ता च कृतिः स्फुटा । कामोद्भूते तथाप्रीतिस्तेनादौ तन् निरूप्यते ।। ७ ।।
बाललीला मध्यलीला प्रौढलीला तथैव च । कामलीलेति लोके वै चतस्रः सुखदाः स्मृताः ।। ८ ।।
एकं भागवतः कार्यं बह्वर्थानां च साधकम् । प्रपञ्चविस्मृतिः सर्वा तदासक्तिश्च वर्ण्यते ।। ९ ।।
येनैव त्रिविधा भक्ता न स्मरन्ति जगत् क्वचित् । कृष्णे च सन्नतात्मानस्तत् कार्यं भगवत्कृतम् ।।१०।।
बाललीला सप्तविधा प्रथमं सा निरूप्यते । बालभावरता ये हि तेषां रोधस्ततो भवेत् ।। ११ ।।
उत्सवाविष्टचित्ता ये येऽप्याश्चर्याभिवेशिनः । अलौकिकरता ये च य चोपद्रवणोत्सुकाः ।। १२ ।।
स्त्रीस्वभावरता ये वै ये च तत्त्वे च लौकिके । सर्वोद्योगपरा ये च तेषां रोधो निरूप्यते ।। १३ ।।
जन्मोत्सवो हरेरत्र पञ्चमे विनिरूप्यते । आवश्यकं परित्यज्य कृतं तदिति चोच्यते ।। १४ ।।
अन्यथाज्ञानशङ्का च तेनैव विनिवार्यते । उत्सवस्त्वन्यथा न स्यात् द्रव्यानयनमेव च ।। १५ ।।
आसक्तिबोधनार्थाय तस्यान्ते भयवर्णनम् ।। १५½ ।।

पूर्वं “यशोदाशयने सुतं निधाय तत्सुतामादाय गृहानगा”दित्युक्तं, “जातं परमबुध्यत” इति च, ततो मायायां निर्गतायां यशोदा प्रबुद्धा पुत्रं ज्ञातवती, ततः सर्वेषु यदासीत् तदाह **नन्दस्त्वात्मज** इति, पितुः पुत्रः, अतो **नन्दो जातकर्म कारयामासे**तिसम्बन्धः, तुशब्दः पूर्वकथां व्यावर्तयति शङ्कां च व्यावर्तयति, तदाह **आत्मज उत्पन्न** इति, यस्य यथा प्रतीतिस्तथैव शुकेनानूद्यते, भगवता तथैव तेषां बुद्धेः सम्पादनात्, अन्यथा तद् भगवच्चरित्रं न स्यात्, अत **आत्मनः** सकाशाज्जातः पुत्र एवायमिति **नन्दस्य** बुद्धिः, तदाह **आत्मज उत्पन्न** इति, वासुदेवोऽत्रैवाविर्भूत इति सिद्धान्तः, अन्यथा केवलमायाजनितं स्तन्यं भगवान् न पिबेत्, सिद्धवत्कारेण च शुको न वदेत्, अन्तःकरणप्रतीत्यापि पुत्रोऽयमिति निश्चयार्थमाह **जाताह्लाद** इति, यद्यपि पुत्रजन्मज्ञान एवाह्लादस्तथाप्यन्यथाज्ञानमपि भवेदिति तद्व्यावृत्त्यर्थं जन्मैव निमित्तत्वेनोक्तं, रूपान्तरेऽपि स्वीकृतेऽनुभावो वर्जनीयो भवत्येव, अतः प्राकृतोऽपि **नन्दो महामना जातः**, प्राकृतानामल्पमेव मनो भवत्यल्पकार्यकारि, महत् महत्कार्यकारि मनो यस्य महान्तमुत्सवं करिष्यामीति, सोऽपि विधिपूर्वकं कर्तव्य इति ब्राह्मणाकारणं कृतवानित्याहाहूयेति, विशेषेण प्रान्तीति तेषां पूरकत्वमुक्तं, अन्यथार्थनाशकत्वेन ते निन्दिताः स्युः, उत्सवे तेषामाकारणे हेतुमाह वेदज्ञानमिति, “यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ती”ति श्रुतेः, सर्वदेवतासान्निध्ये हि महानुत्सवः, तत्र विहितानि कर्माण्याह **स्नात** इत्यादि, **स्नानं** नैमित्तिकं, सूतकसम्भावनायामाह **शुचि**रिति, अन्यामपि शुद्धिं सम्पादितवान्, **अलङ्कृत** इति, अलङ्करणं शुभसूचकं, विशिष्टालङ्कार उत्सवः सर्वजनीनो भवति ।। १ ।। सर्वकर्मस्वादौ **स्वस्तिवाचनं**, **जातकर्म**ति कर्मनामधेयं, क्षत्रियवैश्ययोरन्यद्वारा कारणं, **विधिः** पुरोहितशाखानुसारेण, **आत्मजस्ये**ति पुत्रे यो विधिः, भगवान् स्वस्मिन् पुत्रत्वं प्रकटितवानिति वैदिककर्मणां सार्थकत्वं गार्भिकबैजिकदोषाभावकीर्तनं च तथैव, नैमित्तिको वात्मसंस्कारपक्षः, भगवच्चरित्रमेवेदमितिसिद्धान्तः, **पितृदेवार्चनं** नान्दीश्राद्धं, **तथा** विधानपूर्वकं युगलेन संस्कारनिरूपणं प्रवृत्तिमार्गनिष्ठत्वाय ।। २ ।।

“**महामना**” इतिविशेषणस्य कृत्यमाह **धेनूना**मिति, **नियुतं** लक्षं लक्षद्वयमपि प्रत्येकमलङ्कृतं, भगवत्सान्निध्याद् द्रव्यक्रियाणां न परिक्षयः, **विप्रेभ्य** इति समुदायेन दानं, सङ्कल्पमात्रव्यावृत्त्यर्थमाह **प्रादा**दिति, विशेषेण पूरकत्वान्नास्यापि परिक्षयः, **तिलाद्री**निति तिलपर्वतान्, **रत्नौघा**निति पृथक्, **रत्नानामोघः** समूहो येष्विति वा, **शातकौम्भेन सुवर्णनाम्बरैश्चावृतान्**, अन्नेषु **तिला** मुख्याः, “गावो हिरण्यं वासांसि तिला रत्नानि चे”तिपञ्चानां दानं, **सर्वाण्येव** सर्वदेवत्यानि ।। ३ ।। बहु दत्तमितिशङ्कां वारयितुं तस्य ततोऽपि बह्वस्तीति वदन् शुद्ध्यर्थमपि तेनैतावद् दातव्यं भवतीति वदन् समानैरन्यैः कालादिभिः सह द्रव्यं निरूपयति **काले**नेति, **कालादिना** प्राणिनः सर्वे शुध्यन्ति, नव शोधकानि, तत्र कालो मुख्यः सर्वं कालोद्भवमिति, उत्पन्नः पुत्रः शतं वर्षाणि जीवति, तत्र दश दिनानि षट्त्रिंशच्छतानामेको भागो भवति, सम्पूर्णं काले तावान् कालस्त्वशुद्धः, एवं द्रव्याण्यपि ज्ञातव्यानि, जननादौ **कालेनैव** शुद्धिर्न स्नानादिना, वंशशुद्धिजनकः **कालः**, **स्नानं** सम्पूर्णदेहशोधकं, **शौचमेक**देशस्य, लौकिकव्यवहारार्थं त्रिधेयं शुद्धिः, अदृष्टाद्युत्पत्त्यर्थं त्रिधा शुद्धिमाह, **संस्कारै**र्जातकर्मादिभिर्देहो वैदिककर्मार्थं संस्कृतो भवति, एतेषां भूतसंस्कारकत्वमेव, तपस्त्वन्तःकरणशोधकं, अदृष्टोत्पत्तिद्वारेति केचित्, **इज्या** यागः, तेन भगवान् सन्तुष्यति, एवमाधिभौतिकस्याध्यात्मिकस्याधिदैविकस्य संस्कारकर्माणि त्रीणि निरूपितानि, एवं षड्विधैरपि सर्वे शुध्यन्ति, बहिःशुद्धिमाह **दानै**रिति, **दानैर्द्रव्याणि शुध्यन्ति**, दानव्यतिरेकेण द्रव्याणां न शुद्धिः, वित्तानुसारेण च दानं, अतो लक्षद्वयदानं गवां शुद्ध्यर्थमेव, अल्पानि प्राप्तानि सन्तुष्ट्या **शुध्यन्ति**, अतो द्रव्यशुद्धौ द्वयमुक्तं, **आत्मा** तु जीवः, **आत्मविद्यये**व शुध्यति “सोहमस्मी”त्यादिरूपया ।। ४ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पञ्चमाध्याये प्रकरणार्थसन्दर्भे, स्वभावस्येति। भक्तस्वभावानुसरणे भगवतः परमदयालुत्वं भक्तिमार्गोत्कर्षश्च सिध्यति। तदन्यथाकरणे क्लिष्टकर्मत्वं स्यादनेकविधत्वं रसालता च लीलाया न स्यादिति भावः। सात्त्विकं 'विहायादावेव तामसप्रकरणनिरूपणेऽस्य तामसत्वेनोक्तौ च हेतुमाहुः **लौकिकं तामस** इति। इदमत्र आकूतम्। पुरुषोत्तमस्वरूपमेव फलं, नेतरदिति हि भक्तिमार्गे मुख्यः सिद्धान्तः, तत्सम्बन्धादेव अन्यत्र फलत्वोक्तिः। एवं सत्यत्र स्वभावान्यथाकृत्यभावेन सात्त्विकानां ज्ञानादिविहितमार्गरुच्या राजसानां च विक्षेपतो लौकिकालौकिककर्मव्यासङ्गेन स्वरूपविस्मृतिसम्भवेन सम्यग्निरोधासिद्धिः, तामसानां तु मौढ्यात् यत्राग्रहः पतति तत्र स न गच्छति कथञ्चनेति लोके दृश्यते। व्रजवासिनां च भगवत्स्वरूपविषयकः स्नेहस्तादृशो जातो येन स्वरूपातिरिक्तस्य भगवदुक्तस्यापि धर्मस्यानङ्गीकारोभूत्तथैवाप्रेतनज्ञानस्यापि। तेन सर्वात्मना निरोध एतेष्वेव फलित इत्येतद्धर्मसाम्येन पुष्टिमार्गस्य मर्यादातो विपरीता गतिरिति ज्ञापनाय च तामसत्वं प्रकरणस्योच्यते। वस्तुतस्तु निर्गुणमेव। 'तस्मान्मद्भक्तियुक्तस्ये'त्यारभ्य 'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति भगवद्वाक्यात् 'स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन' इति वाक्यात्तत्साध्यमोक्षस्यापि नरकतुल्यत्वेन गणना, अतोपि भक्तिमार्गाद् ज्ञानमार्गस्य हीनत्वमिति भगवदेकनिष्ठविशुद्धभाववतां सर्वाधिकत्वं शास्त्रसिद्धमिति दिक्। एतदेव लौकिकत्वं तामसे मुख्यमिति पदेनोच्यते। व्यापकत्वेनात्मत्वेनान्तर्हृदि हरिरस्त्येवेति श्रवणेपि बहिर्लोके प्रकटं यद्रूपं तदेवोक्तरीत्या मुख्यमत्र, नान्तरात्मादिरूपमित्यर्थः। मर्यादामार्गतो वैलक्षण्यात् स्त्रियोऽत्र मुख्या इति ज्ञापयितुं तत्रापि मर्यादायां यो मुक्तिप्रतिबन्धकत्वेन सम्मतः कामः स एवात्र भगवत्प्रापक इति च ज्ञापयितुं काम एवान्तःफलं यस्यास्तादृशी सेत्यर्थः। अत्रासम्भावितत्वभानं न कार्यम्, यत एतादृश्येव कृतिरग्रे स्फुटा निरूपयिष्यत इत्यर्थः। किञ्च, मर्यादायां विहितभक्त्या भगवदाविर्भावः, अत्र तु कामवशादेव दैन्ये सति प्रकटे प्रभौ स्नेहः, सोपि तथा, तच्छास्त्रानुसारी, न तु विध्यनुसारीत्यर्थः। 'एका भ्रुकुटिमाबध्ये'त्यादिकथनात्। तथा चात्र निःसाधनेभ्यो ब्रह्मादीनामपि साधनैरप्यप्राप्यं भजनानन्दं तदधीनत्वमङ्गीकृत्य दत्तवानिति सर्वोत्कर्षवत्त्वेन तत्तथेत्यर्थः। यद्वा, अग्रे गजदृष्टान्तदानैर्भगवान् स्वयं कामवशाद्भक्तानां समीपमागच्छतीति ज्ञाप्यते। तथा चोक्तरीत्या कामेनोद्धृते प्रिये स्नेह इत्यर्थः। न ह्येवमन्यत्र सम्भवतीति युक्तमादौ तत्कथनमिति भावः। लौकिकसारूप्येण चतुर्विधलीलाकरणे लौकिकत्वेन भगवति ज्ञानवतां निरोधासिद्धिरित्याशङ्क्याहुः **एकमिति।** यथैकेन पूतनासुपयःपानेन लोके वीर्यप्राकट्यं, तस्याश्च मुक्तिः, प्रमेयबलप्राकट्यं लोके वेदे च, पूर्वभक्षितानां बालानां कृतार्थता, अन्येषां च रक्षा, 'तोकेनामीलिताक्षेणे'तिवाक्यादग्रे व्रजवासिनां माहात्म्यज्ञानपूर्वकः स्नेहस्तात्कालिकश्च विस्मयोन्येषां श्रवणादिफलं चेत्याद्यनेककार्याणि जातानि, तथा सर्वापि लीलेत्यर्थः। एवं सति प्रतिपाद्यानुगममाशङ्क्य तदनुगमकं रूपमाहुः **प्रपञ्चे**ति। आसक्तिरत्र मुख्या, तद्विस्मृतिरङ्गम्, तया विना सर्वथासक्त्यसम्भवात्तथा च निरोधत्वमेव तथेत्यर्थः। नन्वत्र बलदेवादिकार्यमप्युच्यत इति न सर्वा भगवल्लीलेत्याशङ्क्याहुः **येनैवेति।** आविष्टचरित्रमिति भावः। अन्यथा निरोधः तेनापि न स्यात्। अत एव 'बलपार्थभीमव्याजाह्वयेन हरिणे'ति ब्रह्मणोक्तम्। एवं सति प्रपञ्चविस्मृतिरित्यनेनैवास्य श्लोकस्य गतार्थतेति शङ्का निरस्ता ज्ञेया। पूर्वं प्रतिपाद्यत्वेनात्र तु परिचायकत्वेन तदुक्तिः। उत्सवाविष्टेत्यादिना क्रमेणैतत्प्रकरणस्थाध्यायप्रतिपाद्यनिरोधाधिकारिण उक्ताः। समुच्चय एवास्य, न त्वेतन्मात्रत्वम्। भगवदासक्तानां तत्सम्बन्धमात्रेण सर्वासां लीलानां हृद्यत्वात्। आद्ये स्पष्टम्। तृतीये 'नन्दादयश्चाद्भुतदर्शनाकुला' इति वाक्यात्। 'अहो बतात्यद्भुत'मिति 'मानयामास विस्मित इति च। 'आसीत् सुविस्मिते'ति च वाक्यैराश्चर्याभिनिवेशिनो निरुद्धाः। तुरीयेध्याये शास्त्रे पुरुषोत्तमनामत्वेन प्रसिद्धानि कृष्णवासुदेवादिनामान्यत्र कृतानीत्यलौकिकम्। गर्गेण स्पष्टतयोक्तेपि नन्दाबोधोपि तथा। अलौकिकत्वेन ज्ञात्वा तेषु नामसु ये रतास्तेऽतः परमस्यैवैतानि नामानीति ज्ञात्वास्मिन्निरुद्धा भविष्यन्तीति च। रिङ्गणलीलाप्यलौकिकरीत्या दैत्यनाशनपूर्वकभक्तेष्टदेति तथा। लोके हीनत्वापादकत्वं चौर्यं भगवत्युत्कर्षाधायकं निरोधसाधकत्वादेवमपि भक्तमनीषितकरणाच्चालौकिकत्वम्, मृत्स्नाभक्षणं, तत आस्ये विश्वदर्शनं शरणागतिर्महदनुग्रहश्चे'ति सर्वमलौकिकमिति तादृशानामेतच्छ्रवणेन निरोधः सेत्स्यतीति तथा। पञ्चमे दधिभाण्डभेदनादिकं लोकदृष्ट्योपद्रावकमिति तथा। अग्रिमा लीला स्वभक्तोपद्राविका चेति। षष्ठे नलकूबरमणिग्रीवौ स्त्रीस्वभावरताविति तत्कथा तथा। स्त्रियश्च स्वभावश्च राजसतामसादिस्तयो रता इत्यर्थः। नात्र क्रमो विवक्षित इति। अतःपरं द्वितीयाध्यायतात्पर्यमुच्यते। तत्रादौ हरिशरणगमनेनैव भयनिवृत्तिरिति तत्त्वम्। अनधिकारिमुक्त्युक्त्या प्रमेयबलतत्त्वं चोच्यते। रक्षाकरणेन स्वामिनीनां च तत्त्वमलौकिकत्वतादृक्स्नेहवत्त्वादिलक्षणम्। हरौ रक्षाकरणं लोकरीत्येति लौकिके तत्त्वे रतास्तथा। सप्तमे वृन्दावनावासपर्यन्तं महानेवोद्यमो निरूपितो 'गोपीभिः स्तोभित' इत्यादिना। अग्रे च लीलोद्यम उक्त इति तथा। अथवा। यथाक्रममेव निरूपणं ज्ञेयम्। तथाहि। पूतनाया आगमनप्रकारागमनभगवत्कर्मकग्रहणपूतनाकर्मकमारणप्रकारतद्दोषानाक्रमणतन्मुक्तितत्सहजरूपतद्दाहगन्धादयः सर्वं आश्चर्यरूपा इति तादृशानां निरोधः। तृतीये स्वोत्सवार्थमपि लौकिकप्रवाहधर्मासक्त्या स्वविस्मृतौ प्रकारान्तरेणास्मरणे शकटं भङ्क्त्वा मातुर्निरोधकरणमलौकिकम्। तस्य वैपरीत्येन तथात्वमपि तथा। प्रवालमृद्वङ्घ्रिस्पर्शमात्रेण तथाकृतिरपि तथा। अकस्माद्गुरुत्वप्रकटनमारभ्य कुशलेनागमनपर्यन्तं सर्वमलौकिकम्। जम्भालीलायां तथात्वं स्पष्टम्। उक्तत्रिविधलीलायामाश्चर्यरूपत्वमप्यस्तीति तादृशानामप्यत्र निरोध इति समुच्-

यार्थोपिशब्दः । तथाप्यलौकिकत्वं मुख्यमिति पृथक्त्वम् । चतुर्थे चौर्यादिलीलाया लोकप्रतीत्योपद्रावकत्वमिति तथा । नामरूपादेरलौकिकत्वेनोक्तनिरोधस्यापि समुच्चयार्थश्च । पञ्चम आवश्यकत्वज्ञानेन दास्याद्यभावे स्वयमपि कर्मकरणम् । पुत्रे च शिक्षार्थं तथा करणं स्त्रीस्वभावः । षष्ठे नारदोक्तिभिर्लौकिकतत्त्वम् । परमार्थतस्तत्त्वं स्तुत्येत्युभयत्र रतास्तथा । सप्तमे मन्त्रणपूर्वस्थानत्यागापूर्वतत्परिग्रहतत्रगमनाद्युद्यमोक्तेस्तादृशास्तथेति । अत्रोक्ताधिकारिणो यथासम्भवं लीलास्थास्तदन्ये च ज्ञेयाः । सप्तस्वप्यध्यायेषूक्तासु लीलासु सप्तविधा अपि यथासम्भवमधिकारिण इति ज्ञेयम् । **आवश्यकमिति** । तदनन्तरमेव शीघ्रं करदानार्थगमनोत्कयेति शेषः । यदि केनाप्यंशेन नन्दो वसुदेवागमनं जानाति तदाकाशवाणीवृत्तान्तज्ञत्वेन सञ्जातवृत्तान्तशङ्कया स्वपुत्रत्वे सन्दिहान एव चोत्सवं कृतवानिति कस्यचिच्छङ्का स्यात् सापि तदैव मथुरागमननाशास्तेत्याहुः **अन्यथाज्ञानेति** । उपपत्त्यन्तरमाहुः **उत्सवस्त्विति** । यथाकथञ्चिद्गमनसम्भवेऽप्युत्सवस्तु स्वपुत्रत्वनिश्चयं विना न स्यादित्यर्थः । नन्दः स्वपुत्रमादायेत्यत्रोदारधीरिति विशेषणसूचितं महार्हानेकविधभगवदुपयोगिद्रव्यानयनं चान्यथा न स्यादित्याहुः **द्रव्येति** । यद्यपि भ्रमप्रमासाधारणं तथाज्ञानमात्रमेवाह्लादहेतुस्तथापि महतामन्तःकरणमतथाभूतं वस्तु न गृह्णातीत्याशयेनाहुः **अन्तःकरणप्रतीत्यापीति** ।

अलङ्कृत इत्यस्याभासः । **अन्यामपि शुद्धिमित्यादि** । अत्रायं भावः । बाह्याभ्यन्तरभेदेन शुद्धिर्द्वेधा । एतत्तारतम्येन भगवदानन्दानुभवतारतम्यमिति मर्यादा । प्रकृते चोत्सवरसानुभावकमलङ्करणमिति तथात्वमिति ॥ १ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अथ पञ्चमाध्यायं विवरिषवः पूर्वप्रकरणस्य समाप्तत्वादुत्तरस्य प्रारप्स्यमाणत्वात् पूर्वप्रकरणसङ्गतिं वक्तुं प्रथमप्रकरणार्थमनुवदन्त्येवमित्यादि, **एवमित्यग्रिमनिरूपणकारणत्वेन**, तथा च हेतुत्वमत्र सङ्गतिरित्यर्थः; ननु जन्मनिरूपणं हि तृतीयाध्याय एव तथा चान्यत्रापि जन्मनिरूपितमितिकथनमयुक्तं तत्राहुर्हेतूद्यमेत्यादि युतमित्यनेनान्वेति, **उत्तराङ्गं** कापट्यं, तथा च हेतूद्यमौ जन्मनः पूर्वाङ्गं कापट्यं तूत्तराङ्गमितिप्रधानाङ्गाभ्यां जन्मैव तत्र निरूपितमिति न दोषः, यद्वा '**प्रद्युम्नश्चानिरुद्ध**' इत्यादिपूर्वोक्तदिशा प्रत्यध्यायं जन्म निरूपितमेवेत्याहू **राजसादीति**, **राजसपदेन** राजसभक्ता **आदिना** तामसा सात्त्विकाश्च **गुणा** ऐश्वर्यादयः, तथा चाग्रे राजसादिभिर्गुणैर्युक्तं यद्यत् स्वरूपं निरूप्यं तत्तदेकैकस्मिन् भिन्नंभिन्नं जनितं निरूपितमिति चतुर्ष्वपि जन्मकथनमुपपद्यत इत्यर्थः, न चैवं सति पुरुषोत्तमजन्म कुत्रापि नोक्तमित्यायातीति वाच्यं 'जायमानेजने तस्मि'न्निति 'सिञ्चन्त्योजनमुज्जगु'रितिवाक्याच्च तज्जन्माभावस्येष्टत्वात् , न च जन्मानुपपत्ति 'रजायमानो बहुधा विजायते' इति श्रुत्या व्यूहजन्मनैव पुरुषोत्तमजन्मनोऽङ्गीकारादिति न काचिदनुपपत्तिरत एव कारिकायां **विष्णोरित्युक्तं**, एतेन प्रकरणचतुष्टयेऽप्युपजीव्यत्वात् तन्निरूपणं पूर्वमुचितमितिभावः, यद्यप्युपजीव्यं पूर्वं निरूप्यमेवेति न नियमस्तथापि राज्ञावतीर्णस्य वीर्याणि पृष्टानि तानि च नावतारनिरूपणात् प्राङ् निरूपयितुं शक्यत इति, अत्र तु नियम एवेत्यर्थः, एवं प्रकरणसङ्गत्यर्थं पूर्वप्रकरणार्थं निरूप्य प्रस्तूयमानस्य प्रकरणस्यार्थमाहुः **सप्तेत्यादि**, **अत्रेति** सप्तसप्तत्यात्मके महाप्रकरणे, **सप्तसप्ततिभिर्निरूपणे** किं बीजमत आहु**र्भगवा**नित्यादि, गुणप्रकरणे तु धर्मैरेव लीलां कृतवानिति तत्र षडेवाध्याया इति भावः, ननु भवत्वेवं **सप्तसप्ततिभिस्तथापि** भगवान् निर्गुणः किमर्थं राजसादिभावेन लीलां कृतवानित्याकाङ्क्षायां सप्तसप्तत्यावान्तरप्रकरणानि विभक्तुमुपोद्घातेनाहु**स्त्रिविधा**नीत्यादि, ननु यद्येवं तर्हि प्रत्यवान्तरप्रकरणं पञ्चविंशतिपञ्चविंशत्यध्याययोगे पञ्चसप्ततिर्भविष्यति न तु सप्तसप्ततिरित्याकाङ्क्षायामवान्तरप्रकरणेषु न समानः कर्मविभाग इति बोधयन्तः सप्रयोजनं तद्विभागप्रकारं पादत्रयेणाहुस्तत्त्वेत्यादि, **शिष्ट** इति सात्त्विके, तर्हि **कालातिक्रमणे** किमित्ये**कविंशति**रित्याकाङ्क्षायां कालस्य तत्सङ्ख्याकत्वं सप्रमाणमाहुः **काल** इत्यादि, **तत्रेति** तस्मिन् प्रकरणे, तथा च भगवन्मते तत्त्वानामष्टाविंशतिसङ्ख्याकत्वाच्छ्रुतौ च कालस्यै**कविंशति**सङ्ख्याकत्वात् तत्तदतिक्रमे तेषां तेषां निरोधः सिध्यतीति तत्तत्प्रकरणे तावन्तस्तावन्तोऽध्यायास्तत्तदतिक्रमजनककर्मबोधका इत्यतः **सप्तसप्तति**रित्यर्थः, ननु तत्त्वकालसङ्ख्याकाभिर्लीलाभिः कथं तत्तदतिक्रम इत्याकाङ्क्षायां तत्प्रकारमाहु**र्लौकिके**ष्वित्यादि, तथा च यथा काष्ठस्थितो वह्निर्न तद् दहति तत उद्धृतस्तु पुनस्तत्र प्रविशंस्तद् दहत्येवं लौकिकेषु तत्त्वकालादिषु यत उद्धृत्य **यत्रैव हरिप्रवेशनं तदेव स्वपूर्वरूपान् निवर्तते** भगवद्रूपं भवति भगवत्कार्यमेव करोतीत्ययं प्रकार इत्यर्थः, ननु भगवतो जीवस्वभावान्यथाकरणसामर्थ्ये सत्यपि भगवान् निर्गुणो भक्तानुरोधेन **त्रिविधानि कर्माणि** कुतः कृतवानित्याकाङ्क्षायामाहुः **स्वभावस्ये**त्यादि, तदेतट्टिप्पण्यां विवृण्वन्ति **स्वभावस्ये**त्यादि, **सुबोधिन्यां तामसप्रकरणे प्रमाणप्रमेयसाधनफलभेदेन** प्रकरणचतुष्टयमस्तीति ज्ञापयितुं तत्प्रकरणप्रतिपाद्यानर्थानाहु**र्बाललीले**त्यादि, अत्रैव किञ्चिदाशङ्क्य परिहरन्तीत्याशयेन टिप्पण्यामाहु**र्लौकिके**त्यादि **तदुक्ते**रित्यन्तं, सुबोधिन्यां बाललीलायाः सप्तभिर्निरूपणे प्रयोजनमाहु**र्बाललीलासप्ते**त्यादि, **बालभावरतानां** कथं सप्तविधत्वमित्याकाङ्क्षायामाहुरुत्सवेत्यादि, तदाशयं टिप्पण्यां स्फुटीकुर्वन्त्यु**रुत्सवाविष्टे**त्यादि, तत्तदध्यायावान्तरार्थानुरोधेन पक्षान्तरमाहुः **समुच्चय** इत्यादि, अत्र **क्रमो न विवक्षित** इति द्वितीयाध्यायार्थस्य वक्ष्यमाणत्वात् तमनुक्त्वा तृतीयाध्यायार्थमाहु**स्तृतीय** इत्यादि, यद्यप्यत्राध्यायावान्तरार्थानुरोधेनात्रैव समुच्चयकथनं युक्तं तथाप्याचार्योक्तः **क्रमस्तु** बाध्येतैवेत्यरुच्या पक्षान्तरमाहु**रथ** वेत्यादि **ज्ञेय**मित्यन्तं, एवं सामान्यतः प्रमाणप्रकरणीयाध्यायार्थ उक्तो विशेषतस्तु तत्तदध्याये वक्तव्य इति प्रथमाध्यायार्थमाहु**र्जन्मे**त्यादि-

साधोभ्यां, **अत्रेति** प्रमाणप्रकरणीयप्रथमाध्याये, **पञ्चम** इति स्कन्धस्यादित इत्यर्थः, **आवश्यकमित्यारभ्य द्रव्यानयनमेव** चेत्येतस्यार्थं टिप्पण्यामाहु**रावश्यकमितीत्यादि**, नन्वेतावता श्रीनन्दस्य मनसि तथाशङ्का नास्तीत्यागतं परं **वसुदेवः** कथं जानीयाच्छ्रीनन्दो मत्सुतं न जानातीति तत्राहु**रासक्तीत्यादि**, **श्रीनन्दस्य** स्वपुत्रत्वनिश्चयेन या परमासक्तिस्तया यद् बोधनं ज्ञानं तेन योऽर्थो निश्चिन्तता स्वकृत्यज्ञानरूपा वसुदेवस्य तन्निमित्तं **तस्यान्ते** संवादान्ते वा **भयवर्णनमित्यर्थः**, अयमाशयः, यद्ययं श्रीकृष्णे स्वपुत्रत्वेनैव ज्ञानवान् भविष्यति तदायं भयकथने झटिति गमिष्यत्यन्यथा तु नेति तदर्थं तथा, यद्य'प्येकावशिष्टे'ति वाक्ये श्रीनन्दैर्निःसन्दिग्धं निरूपितं तथापि स्थूणाखननन्यायेनेदमुक्तमिति ज्ञेयम् ॥

नन्दस्त्वात्मज इत्यत्र **पितुःपुत्रेत्यादि**, श्रीनन्दो हि **पितुः** स्वपितुः **पुन्नाम्नो नरकत्राणेन पुत्रो** भवति तस्मात् **त्राणं** च पुत्रोत्पादनेनातः पुत्रोत्पादनात् तथेत्यर्थः, ननु **शुकः** 'सर्वज्ञो भगवन्तमजनं' जानातीति कथमत्रात्मजपदं प्रयुक्तवानितिशङ्कायामाहु**र्यस्येत्यादि**, तथा चाजनत्वं भगवतो जानन्नपि तद्बुद्ध्यनुरोधेन तस्याश्च भगवच्चरित्रत्वेन **शुकस्तथोक्तवानित्यर्थः**, ननु भवत्वेवं तथाप्यजनत्वं **जानन्नुत्पन्न** इति किमित्युक्तवानित्यत आहु**र्वासुदेव** इत्यादि तथा चात्र **वासुदेवप्राकट्यात्** तथोक्तवानित्यर्थः, यद्यपि निबन्धे वसुदेवहृदि **वासुदेवप्रादुर्भावः** प्रथमाध्यायार्थत्वेनोक्तस्तथाप्यत्र तु **बहिरितिविशेषः** तत्र गमकमाहु**रन्यथे**त्यादि, **न वदे 'दुत्पन्न'** । इति न **वदेत्**, तथा चेतदुभयान्यथानुपपत्त्या प्रादुर्भावेवश्यंवक्तव्ये स कस्येतिचिन्तायां वंशसम्बन्धस्यात्रादर्शनाच्छत्रुहननधर्मरक्षयोश्चात्र कादाचित्कत्वादत्र यस्यैकं मोक्षभक्त्योर्निरूपकं चरित्रं स **वासुदेवव्यूहोत्राविर्भूत इति सिद्धान्त** इत्यर्थः, टिप्पण्यां **जाताह्लादपदाभासतात्पर्यं** वक्तुमाहु**र्यद्यपीत्यादि**, **सुबोधिन्यां** ननु **पुत्रस्ते जात** इत्यादिवाक्यजन्यज्ञानोत्तरमेव लोक आह्लाददर्शनादत्रापि तज्जन्मज्ञानस्यैवाह्लादहेतुत्वं वक्तव्यं न तु **जन्मन** इत्याकाङ्क्षायामाहु**र्यद्यपीत्यादि**, तथा चाह्लादं प्रति ज्ञानस्य हेतुत्वेपि तस्य **भ्रमत्ववारणाय** तथोक्तमित्यर्थः, **प्राकृत** इति ग्रामीणः, तदुपपादयन्ति **प्राकृतानामित्यादि**, **शुचिरिति** सूतकस्य सम्भवेपि नालच्छेदात् पूर्वं जातके शुचित्वस्य स्मृत्या बोधनात् तथेत्यर्थः, टिप्पण्या**मन्यामपीतिवाक्यस्य स्वरूपं** तात्पर्यं चाहुरत्रायमित्यादि ॥ १ ॥

सुबोधिन्यां वाचयित्वेत्यत्र सार्थकत्वमिति, अन्यथा तद्बोधकवेदस्य भगवत्परत्वाभावे "सर्वे वेदा यत्पद"मितिश्रुतिर्विरुध्येतातस्तथेत्यर्थः, **तथेवेति** भगवल्लीलया पुत्रत्वमेव, नन्वेवं भगवति **गार्भिकादिदोषसम्बन्धकथने** पूर्वग्रन्थविरोधः स्याच्छ्रवणकटुत्वं च भासेतेति तदभावार्थं पक्षान्तरमाहु**र्नैमित्तिक** इत्यादि, ननु तथा सति तु **कर्मणां सार्थकता** न स्यादत आहु**र्भगवदिति**, **आत्ममायया सर्वं कृतवानिति** तथा, अन्यथा परमार्थरूपे भगवति का वा माया स्यादतो **भगवच्चरित्रमेवेदमुक्तम्** ॥ २ ॥

धेनूनामित्यत्र द्रव्यक्रियाणामिति द्रव्यस्य तज्जनितानामलङ्करणक्रियाणां, **अस्येति** दानस्य ॥ ३ ॥

कालेनेत्यत्र समानैरिति श्रीनन्दमाहात्म्यख्यापकत्वेन शोधकत्वेन च तुल्यैः, तथा च द्रव्यनिरूपणे शोधकान्तरसामानाधिकरण्यं यत् तदेवागतद्रव्यशुद्ध्यर्थदानस्य लिङ्गमित्यर्थः, कालस्य प्रथममुक्तौ हेतुमाहु**र्नवेत्यादि**, **नवानां** शोधकत्वे प्रकारं वदन्तः **प्रथमं कालस्याहुरुत्पन्न** इत्यादि, तत्र शतवर्षमध्ये **दश दिनान्यशुद्धानि** यतः **षट्त्रिंशच्छतानां** दशवर्षात्मकानां दिनानां समूहः **शतवर्षस्यैको भागोंशो** भवति, तथा चैकैकस्मिन् भाग एकैकं दिनमशुद्धमिति तथा, यद्यप्येवं तत्तद्भागारम्भे तदीयतदीयप्रथमदिनस्याशुद्धत्वमायातीति न प्रथममेव दशदिनानामशुद्धत्वं वक्तुं शक्यं तथापि तस्य दिनस्याशुद्धेर्दुर्ज्ञेयत्वादृषिभिस्तथैव व्यवस्था **कृतेति** प्रथममेव दशदिनानामशुद्धत्वमित्यर्थः, तदेतत् स्फुटीकुर्वन्ति **सम्पूर्ण** इत्यादि, द्रव्यादिष्वप्यतिदिशन्त्येवं **द्रव्याण्यपीति**, यथा षट्त्रिंशच्छतदिनेष्वेकं दिनमशुद्धमेवं षट्त्रिंशच्छतमुद्रास्वेका मुद्राशुद्धा, तथा च यथा कालस्तावत्परिहृतः शेषकालशोधकस्तथा द्रव्यमपि तावत् परिहृतं शेषद्रव्यशोधकमित्यर्थः, **अपिशब्दाद्** भूमिस्तत्र सङ्ख्यापदैर्ज्ञातव्या, एवं चात्र श्रीनन्दैर्ये गवादयो दत्ताः शुद्ध्यर्थं एतयैव व्यवस्थयेति महासमृद्धिर्व्यज्यते, नवानां प्रयोजनमाहु**र्वंशेत्यादि** ॥ ४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

पञ्चमेऽध्याये पूर्वप्रकरणार्थमुक्तविवक्षितयोः सङ्गतिबोधनायानुवदन्ति **एवमिति**, हेतुः प्रथमाध्याये, **उद्यमो** द्वितीये, **उत्तराङ्ग** रूपान्तरस्वीकरणं तृतीये, तत्र रूपान्तरज्ञानार्थं पूर्वरूपमपि **निरूपितमिति चकारः**, इदं त्रयं साक्षाद्भगवता कृतमिति **समासः**, मायाद्वारा कृतं चतुर्थाध्याये निरूपितं, तदाहुः **राजसादीति**, राजसो **गुणः** आदिर्मुख्यो येषां सत्त्वरजस्तमसां **तैर्गुणैर्युतं** तस्येत्यन्वयः, व्यामोहस्य रजःकार्यत्वाद् रजःप्रधानगुणतया कथनेन तत्कार्यं व्यामोहोऽध्यायार्थ उक्तः, **चतुर्भिरध्यायार्थैः सह** विष्णोर्व्यापकस्य **जन्म** एकदेशे प्राकट्यं प्रकरणार्थो निरूपित इत्यर्थः, लीलायाः प्राकट्यहेतुकत्वाद्धेतुतासङ्गत्या लीला निरूप्यत इत्याशयेनाहुः **सप्तेति**, **लौकिकेष्विति** लौकिकधर्मेष्वष्टाविंशतितत्त्वेषु मध्ये **यत्रैव** तत्त्वे **हरेर्वेशनं** सङ्गतिर्भवति **तदेव** तत्त्वं स्वरूपतो **निवर्तते** एवं सर्वतत्त्वनिवृत्तावलौकिकदेहसिद्ध्या प्रपञ्चविस्मृतिपूर्विकासक्तिः सिद्धा भवतीत्यर्थः, सात्त्विकप्रकरणे लौकिकधर्मपदेन कालावयवा ज्ञेयाः, **दृष्टान्तो वह्नेरिति**, दारुमयेषु मध्ये **यत्रैव** दारुपात्रे वह्निः स्थापितो भवति **तदेव** दारुमयं पात्रं स्वरूपतो निवर्तते अग्निरूपमेव भवति, तथा **यत्रैव** तत्त्वे भगवत्सङ्गतिस्तदेव तत्त्वं स्वरूपतो **निवर्तते** भगवद्रूपमेव भवति, तेनालौकिकदेहसिद्ध्या सर्वात्मना रोधः सिद्धो भवतीत्यर्थः, **लौकिकमित्यत्र** प्रकरणस्य तामसत्वे हेतुराद्यचरणेनोक्तः, आदौ तत्कथने हेतुराद्येन

द्वितीयतृतीयाभ्यां चोक्त इति टिप्पण्यनुसारेण ज्ञेयं, **अन्यथाज्ञानेति** नन्दोन्यथाज्ञानयुक्त एवोत्सवं कृतवानित्याकारिका श्रोतुः शङ्केत्यर्थः ॥ १–१५½ ॥

नन्दस्त्वात्मज इत्यस्याभासे ननु तृतीयाध्याये सर्वेषां सुषुप्तिर्यशोदायाः पुत्रलिङ्गाज्ञानं चोक्तं तथा च तद्व्यवस्थामनुक्त्वा जातकर्मादिकथनं कथमित्यत आहुः **तत इति**, मायाकृतं हि तत्, तथा च मायानिर्गमकथनेन प्रबोधो ज्ञानं चोक्तमेवेतिभावः, व्याख्याने, ननु ब्रह्मणि प्राकट्यस्यैवोत्पत्तित्वेन पुत्रत्वाभावादत एव नन्दे पितृत्वाभावाच्च कथं जातकर्मादिकारणमित्याशङ्क्य**ात्मजे उत्पन्ने** इतिपदद्वयेन सूचितमर्थमाहुः **पितुः पुत्र इति**, अत्र हि न नृसिंहहंसादिवत् प्रकटः किन्तु आत्मजत्वेनोत्पन्नः पितुः पुत्रो जातः, नन्दे पितृत्वं स्वस्मिन् पुत्रत्वं च स्वीकृत्य प्रकट इत्यर्थः, तथा च भगवतैव तथाङ्गीकृतत्वाज् जातकर्म कारयामासेत्यर्थः, ननु तथापि यथा वसुदेवेन जातकर्माद्यकृत्वा स्तुतिरेव कृता तथात्रापि स्तुतिरेव भवेन् न तु जातकर्मणि प्रवृत्तिः, किञ्च भगवति लौकिके इवोत्पन्नधर्मासम्भवादलौकिकोयं बालक इति ज्ञाने वसुदेवागमनवृत्तान्तसम्भावनया स्वपुत्रत्वे शङ्का स्यादतोपि न जातकर्मणि प्रवृत्तिरित्याशङ्क्याहुः **तुशब्द इति**, **पूर्वकथां** वसुदेववत् स्तुतिकथां **शङ्कां कीदृशोयं बाल** इतिशङ्कां व्यावर्तयतीत्यर्थः, **तदाहेति तत्** तुशब्दकृतमेव व्यावर्तनं हेतुपूर्वकमाहेत्यर्थः, 'एतद् वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे' इति वाक्यात् पूर्ववृत्तान्तस्मरणार्थं वसुदेवगृहे तादृशरूपेण प्रकट इति तत्र स्तुतिः कृता, अत्र तु **आत्मजः** शिशुरूप एव प्रकटः अतः पूर्वकथाव्यावृत्तिः, **उत्पन्नः** लौकिकस्येव धर्मैर्नालादिभिः सहित एव प्रकटः, अतोऽलौकिकत्वशङ्काव्यावृत्तिरित्यर्थः, ननु तथाप्यात्मज उत्पन्ने इति पदद्वयं न वक्तव्यमवयवार्थासम्भवात् किन्तु 'पुत्रे प्रकटे' इत्यादि वाच्यमित्यत आहुः **यस्येति**, **तथैवेति** तेनैव प्रकारेणेत्यर्थः, **अन्यथेति** तत्प्रकारकानुवादाभावे इत्यर्थः, **अत इति** एवम्प्रकारिका नन्दबुद्धिर्जाता अतो **हेतोस्तत्** तत्प्रकारानुवादकं **आत्मजे उत्पन्ने** इति पदद्वयमाहेत्यन्वयः, तथा च पूर्वं पदार्थ उक्तः अनेनावान्तरपदार्थः अक्षरार्थश्चोक्त इति ज्ञेयं, ननु तथापि वस्तुतोवयवार्थाभावान् नन्दबुद्धेर्भ्रान्तत्वं स्यादित्याशङ्क्यावयवार्थमपि साधयितुमाहुः **वासुदेव इति**, मथुरायां कार्येत आविर्भावेपि स्वरूपतः स्तन्योत्पादनायात्रैव विर्भूतः वसुदेवाद् देवक्यां व्यूहत्रयविशिष्टो भगवानिव नन्दाद्यशोदायां जननावधि स्थित्वा प्रादुर्भूत इत्यर्थः, पुरुषोत्तमस्य तु सर्वात्मभाववद्भक्तहृदये एव निरावृतस्थितेरत्र मायावृतत्वेनैव स्थितिरतो न स्तन्योत्पादकत्वं, जननक्षणे वासुदेवावृतः सन् प्रकटो दर्शनयोग्यतां सम्पादितवांस्तया सामान्यतो ज्ञानं 'जातं परमबुध्यते'ति जातं, तदुत्तरक्षणे विशेषदर्शनं सम्पद्येत, तावन्माया जातेति सर्वेषां व्रजस्थानां व्यामोहाद् व्रजे कस्यापि न भगवद्दर्शनं, वसुदेवदेवक्योस्तु पूर्वप्रादुर्भावसमये एव योग्यतासम्पत्तेर्नन्दगृहोत्पत्तिक्षणे एव तस्यापि दर्शनमितिभावः, जननात् पूर्वमपि यशोदायां वासुदेवावृतत्वेन स्थितौ देवक्या इव यशोदाया अप्यलौकिकी प्रभा स्यात् जननक्षणेपि मायावृतत्वे मथुरायामपि दर्शनं न स्यादत एवं विवेकः, वासुदेवस्योभयत्राविर्भावे प्रयोजनाभावान् नन्दगृह एवाविर्भाव इत्येवकारः, अयमर्थः कण्ठतोनुक्तोपि पूर्वापरविचारेण साध्यते इति **सिद्धान्त** इत्युक्तं, **अन्यथेति** वासुदेवाविर्भावाभावे पुरुषोत्तमस्य मायावृतत्वेनैव स्थितेः **स्तन्यं केवलमायाजनितं स्यात्** तच्च **भगवान् न पिबेत्**, अत्रायं भावः, भगवतः स्तन्यपानं ह्यन्तःस्थितबालकपोषार्थमिति वक्ष्यते, तथा च केवलमायाजनितस्तन्यपाने ते व्यामुग्धा एव भवेयुः न तु लीलारसं प्राप्नुयुरतो मायादोषनिवर्तकवासुदेवसम्बन्धोपि वाच्यः, केवलवासुदेवसम्बन्धेपि लीलारसं नानुभवेयुः किन्तु मुक्ता एव भवेयुः, अतः उभयसम्बन्धबोधाय **केवलपदं**, **सिद्धवत्कारेणेति** तृतीयाध्याये व्यूहत्रयविशिष्टस्यैव प्राकट्योक्तेः सर्वांशविशिष्टे स्वरूपे उत्पन्ने इतिपदं **सिद्धवत्** सर्वप्राकट्यबोधकं **न वदेदि**त्यर्थः, तथा च पुरुषोत्तमे मायावृतत्वादवयवार्थाभावेपि वासुदेवस्य तथा स्थितत्वात् तस्याप्येतत्स्वरूपे एव स्थितत्वाद् वासुदेवमादायावयवार्थस्याप्युपपत्तेर्नन्दज्ञानं न भ्रान्तमितिभावः, "पुरुषोत्तमस्तु नन्दगृहे जात" इतिरूढार्थमादायोक्तं, **आत्मजपदयौगिकार्थज्ञानं पुरुषोत्तमे** बुद्धिमात्रं वासुदेवे तु सत्यमेव, **अन्तःकरणेति** मदन्तःकरणमतथाभूते नाह्लादयुक्तं भवेदितिस्वान्तःकरणविश्वासेनापीत्यर्थः, पूर्वं भगवन्निष्ठेनोत्पन्नत्वधर्मेण स्वपुत्रत्वनिश्चय उक्तः अधुना नन्दनिष्ठेनाह्लादधर्मेण स उच्यते इत्यपिशब्दः, **यद्यपीति** आत्मज उत्पन्ने इत्यनेन जातकर्मणि हेतुरुक्तः, आह्लादे तु ज्ञानस्य हेतुत्वात् ज्ञानबोधकं पुत्रोत्पत्तिं ज्ञात्वेत्यादिपदं वक्तव्यं, तथापि तथोक्ते सति ज्ञाने भ्रमत्वमपि शङ्क्येत तत् तु महतामन्तःकरणमतथाभूतं वस्तु न गृह्णातीति टिप्पण्युक्तदिशा नन्दे असम्भावितमत आह्लादहेतुत्वेनापीदमेव पदद्वयमुक्तमितिभावः, तथा चात्मजत्वेनोत्पन्नस्तयैव चोत्पत्त्या नन्दो जाताह्लादो जातोतः शङ्कारहितः सन् **जातकर्म कारयामासे**त्यन्वयः, **प्राकृतोपीति** ग्रामवासी न तु नागर इत्यर्थः, **सम्पादितवानिति** सर्वेभ्यो बोधितवानित्यर्थः ॥ १ ॥

वाचयित्वेत्यत्र **पुत्रे यो विधिरिति** आत्मजे स्वपुत्रे न तु दत्तकविक्रीतादौ **यो विधि**रित्यर्थः, **गार्भिकेति** तथैव भगवत एव निर्दोषत्वात् तादृशपुत्रे एव सार्थकमित्यर्थः, ननु पूर्वमेव दोषस्याभावात् तदभावसम्पादनं किमर्थमित्याशङ्क्याहुः **नैमित्तिको वै** इति, अयमात्मसंस्कारपक्षो **वै** निश्चयेन **नैमित्तिकः** पुत्रजन्मनि निमित्ते जाते वै निश्चयेन कर्तव्य एव न तु दोषसत्ताविचारस्तत्रेति भावः, ननु तथापि वस्तुतस्तत्प्रयोजनं न सिद्धमित्यत आहुः **भगवच्चरित्रमिति**, इदं दोषाभावसम्पादनं भगवत्सम्बन्धि चरित्रं भगवत्सेवैव भगवत्कृतानुमोदनरूपत्वात् यथान्ये पुष्पादिसमर्पणाद्युपचारास्तथेदमपीत्यर्थः, इदं पूतनाप्रसङ्गे टिप्पण्यां व्युत्पादयिष्यते ॥ २ ॥

धेनूनामित्यत्र द्रव्यक्रियाणामिति सुवर्णादयस्तत्परिधापनक्रियाश्च नोपक्षीणाः, एकस्यां गवि सम्पादिता क्रिया सर्वत्र गोधने व्याप्तेत्यर्थः, अन्यथा तावतोनामलङ्करणे भूयान् कालो भवेदितिभावः, **नास्यापीति** गोधनस्यापीत्यर्थः ॥ ३ ॥

कालेनेत्यत्र तत्रेति षट्त्रिंशच्छतानां भागानां मध्ये **एको भागः** षट्त्रिंशच्छततमो भाग इत्यर्थः, **एवं द्रव्याण्यपीति** द्रव्यमपि किञ्चिदंशे अशुद्धं तावतो दानेवशिष्टं शुद्धं भवतीत्यर्थः, **एतेषामिति** संस्कारा देहशोधका एव न त्वन्तःकरणान्तर्यामिणोरित्येवकारः, तयोस्तु शोधिके तपइज्ये इतिभावः, अन्तर्यामिणः शुद्धिमाहुः **इज्येति**, शुद्धिस्वरूपमाहुः **सन्तुष्यतीति** "परमात्मा मे शुद्धयन्ता"मिति श्रुतावपीदमेव शुद्धिस्वरूपं ज्ञेयं, इदं च तृतीयस्कन्धे पञ्चमाध्याये 'हृदि स्थितो यच्छति भक्तिपूत' इत्यत्र विवृतम् ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

घोषाधीशपुराणपुण्यनिचयप्रोद्भूतकल्पद्रुम त्वं मज्जीवन जागृहीतिवचनं श्रुत्वा जनन्या मुहुः ।
त्यक्तस्वप्नदशस्य गोपरमणीदृग्वृष्टितुष्टात्मना निद्रालस्ययुतस्य गोकुलपतेः पातां प्रशस्याक्षिणी ॥ १ ॥

तामसप्रकरणारम्भे कारिकासु **हेतूद्यमोत्तराङ्गैरिति, हेतुरुद्यम उत्तराङ्गं च हेतूद्यमोत्तराङ्गानि तैः**, उत्तराङ्गशब्देन रूपान्तरस्वीकरणकापट्ये ज्ञेये, तथा च हेतूद्यमस्वीकरणकापट्यैः सहितं **विष्णोर्जन्म** निरूपितमिति पूर्वेणान्वयः, **राजसादिगुणैर्युतमिति राजसादिगुणैर्युतं हरेः कृत्यं सप्तसप्ततिभिर्निरूप्यते** इति परेणान्वयः, एवं प्रकारत्रयस्य सप्तसप्तत्यध्यायाः, तत्र तामसराजससात्त्विकानां निरोधोपयोगि भगवत्कृत्यं बाललीलादिरूपं निरूप्यते, तेषां निरोध्यभक्तानां राजसादिगुणयुक्तत्वात् तन्निरोधोपयोगि कृष्णचरित्रमपि राजसादिगुणयुक्तमित्यर्थः, यद्यपीह तामसराजससात्त्विकानां क्रमेण निरोधात् तामसादिगुणैर्युतमितिवक्तव्यं तथापि कारिकायां क्रमविवक्षामकृत्वा गुणेषु रजोगुणस्य प्राथम्याद् **राजसादिगुणैर्युतमित्युक्तं भगवान् स्वेन धर्मैश्चेति स्वेन स्वरूपेण धर्मैरैश्वर्यादिभिरेवं सप्तधेत्यर्थः, एकादशेन्द्रियैरिति** निरोध्यभक्तानामेकादशेन्द्रियैः सहेत्यर्थः, भगवान् भक्तानां चक्षुराद्येकादशेन्द्रियैः सह यां यां लीलां करोति सा सा लीला तामसादिप्रकरणत्रये निरूप्यते, तत्राप्यैश्वर्यादिगुणैः स्वस्वरूपेण च करोतीत्येकादशेन्द्रियैः सह क्रियमाणा एकादशविधलीला प्रत्येकं सप्तधेति सप्तसप्तत्यध्यायास्तामसादिप्रकरणत्रयस्य, इदं प्रकरणत्रयाध्यायानां सङ्ख्यातात्पर्यं, इहेदं तत्त्वं, भगवान् निरोध्यभक्तचक्षुर्विषयीभूय स्वानन्दं प्रयच्छन् क्रीडति सा चक्षुषा लीला, वेणुनादादिद्वारा व्रजसुन्दरीविरचितगुणगानदशायां वा श्रोत्रविषयीभूय स्वानन्दं ददत् परमानन्दयुक्तो विहरति सा श्रोत्रेण लीला, एवं समयविशेषे भावविशेषेण त्वगिन्द्रियविषयो भूत्वा विलसति सा त्वगिन्द्रियेण लीला, एवं सर्वत्रेति भक्तानामेकादशेन्द्रियैर्लीला ज्ञेया, 'अक्षण्वतां फलमिद'मिति व्रजसुन्दरीवाक्याद 'क्षण्वता'मिन्द्रियवतामितिविवरणाद् 'भगवता सह संलापो दर्शनं मिलितस्य चे'तिवेणुगीताध्यायसुबोधिन्यां ता लीलाः स्फुटमभिहिताः, किञ्च भक्तानां चक्षुर्विषयीभूतैश्वर्यधर्मप्राधान्येन लीलां करोति सा चक्षुलीला ऐश्वर्येण, यत्र भक्तचक्षुर्विषयीभूय वीर्यप्राधान्येन कृतां लीलां प्रदर्शयति सा चक्षुर्लीला वीर्येण, यशःप्रधानलीलां कुर्वत् स्वरूपं प्रदर्शयति सा चक्षुर्लीला यशसा, श्रीप्रधानलीलां कुर्वाणमात्मानं यत्र प्रदर्शयति सा चक्षुर्लीला श्रिया, ज्ञानप्रधानलीलायुक्तं स्वरूपं यत्र प्रदर्शयति सा चक्षुर्लीला ज्ञानेन, वैराग्यप्रधानलीलायुतं स्वरूपं चक्षुर्विषयीकरोति सा चक्षुर्लीला वैराग्येण, यत्र सर्वगुणसमानभावयुक्तेन धर्मिणा स्वेन कृतां लीलां भक्तदृग्गोचरीकरोति चक्षुर्लीला धर्मिणा, एवमेका चक्षुर्लीला सप्तविधा, एवं भक्तश्रोत्रादिभिरिन्द्रियैरपि प्रत्येकं लीला सप्तविधेति एकादशेन्द्रियैः सह सप्तसप्ततिप्रकारा लीला, तत्सूचनाय तामसादिप्रकरणस्य सप्तसप्तत्यध्याया इति भावः ।

नन्दस्त्वात्मज इत्यस्य विवृतौ **पितुः पुत्र** इति नेह मत्स्यकूर्मवराहनृसिंहवदाविर्भावः किन्तु नन्दपुत्रत्वेनाविर्भावः, तथा च श्रीनन्दस्य भगवत्पितृत्वाज् जातकर्मकरणं युक्तमत उक्तं पितुः पुत्र इत्यादि, आत्मज उत्पन्न इत्यस्य विवृतौ **यस्य यथा प्रतीतिस्तथैवेत्यादि**, ननु शुकस्य सर्वज्ञत्वाद् भगवत्स्वरूपाभिज्ञत्वेन भगवतस्तु जन्मादिराहित्येनाजत्वात् तादृशे आत्मजत्वकथनमयुक्तमित्याशङ्क्याहुः **यस्य यथा प्रतीतिस्तथैव शुकेनानूद्यत** इति, नन्दस्य भगवत्यात्मजत्वप्रतीतेस्तद्बुद्धिमनुसृत्य चात्मजत्वकथनं न तु शुकबुद्धिस्तादृशी अतो न भगवति जन्मादिधर्मवत्त्वमित्यर्थः, नन्वेवं नन्दबुद्धेर्भ्रान्तत्वात् तदनुवादे को वा गुण इत्याशङ्क्याहुः **भगवता तथैवेत्यादि**, स्वस्य पुत्रभावेन रमणार्थं श्रीनन्दहृदये तथा भगवता आनीतमतो भगवत्कृतत्वेन भगवल्लीलात्वाद् वर्णनमिति न दोषः, नन्वेवं पुत्रत्वबुद्धेरवास्तवत्वापत्त्या तल्लीलानामप्यवास्तवत्वं स्यादित्याशङ्क्याहुः **आत्मनः सकाशाज् जातः पुत्र एवायमितिनन्दस्य बुद्धिरिति**, न हि पुत्रत्वबुद्धिर्मायिकी पुत्रभावेन भगवतः प्रादुर्भावात्, तथा सति पुत्रभावकृतलीलापि न मायिकी किन्त्वात्मजत्वबुद्धिर्मायिकी, आत्मशब्दस्य देहवाचकत्वेन तज्जातत्वमादाय तादृग्बुद्धेः प्रवृत्तत्वात्, देहजातत्वं तु प्रभावसम्भावितं निषेकसम्भूतत्वाभावात्, अतस्तादृश्या आत्मजत्वबुद्धेर्भ्रान्तत्वमेवाङ्गीकार्यं, तदेवाचार्यवर्यैः स्फुटीकृतमात्मनः **सकाशाज् जातः पुत्र एवायमिति नन्दस्य बुद्धिरिति**, भ्रमात्मिकेत्यर्थः, ननु पुत्रत्वेनाविर्भावे किं मानमिति चेत् तत्राहुः **वासुदेवोऽत्रैवाविर्भूत इति सिद्धान्त** इति, तत्रान्यथानुपपत्तिं प्रमाणयन्ति **अन्यथा केवलमायाजनितमित्यादिना**, प्रद्युम्नानिरुद्धसङ्कर्षणानां वसुदेवगृहे प्राकट्यस्योपपादितत्वाच् चतुर्थस्य वासुदेवव्यूहस्य नन्दालये प्राकट्यं, यथा वसुदेवगृहे प्रद्युम्नव्यूहस्य पुत्रभावेन प्राकट्याद् गर्भ-

सम्बन्धाद् भगवतो देवकीपुत्रत्वं वास्तवम् एवं वासुदेवव्यूहस्य पुत्रभावेन यशोदागर्भसम्बन्धेन नन्दसदने प्राकट्यात् पुरुषोत्तमस्य यशोदापुत्रत्वं वास्तवमेव, पुरुषोत्तमस्तु वसुदेहगृहे नन्दगृहे चालौकिकरीत्या प्रादुर्भूतो न तु गर्भसम्बन्धमङ्गीकृत्येतिज्ञेयं, किञ्च यदि नन्दालये पृथक् प्रादुर्भावो नाङ्गीक्रियेत तदा श्रीनन्देन जातकर्मकारणार्थमाकारिता ब्राह्मणा मिथ्याभूते पुत्रभावे वैदिकमन्त्राणां कर्मणश्च विनियोगं न कुर्युः, 'आहूय विप्रान् वेदज्ञा'निति वाक्यात् तेषां वेदज्ञातृत्वेन परमधार्मिकत्वाद् भ्रान्तिकल्पितपुत्रे वेदमार्गप्रचारणासम्भवात्, अपि च 'यावतीर्वै देवतास्ता सर्वा वेदविदि ब्राह्मणे वसन्ती'तिश्रुतेस्तेषां सर्वदेवतामयत्वेन सर्ववृत्तान्ताभिज्ञत्वाद् देवानां च सत्यप्रधानत्वेन मिथ्याभूतपुत्रभावे हरौ जातकर्मकरणं न स्यात्, तेषु ब्राह्मणेषु भ्रान्तेर्वक्तुमशक्यत्वात्, अतः परब्रह्मणि श्रीकृष्णे नन्दपुत्रत्वज्ञानं प्रमारूपमेवेति गतदोषः पन्था आर्याणाम् ॥ १ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

पञ्चमेऽध्याये **एवं चतुर्भिरिति का० १०१।** एतत्कारिकोत्तरार्धं प्रकारभेदैर्विवृण्वन्ति व्याख्यातारः। भक्तदुःखात्मको भगवज्जन्महेतुः प्रथमाध्यायार्थः, मायाज्ञापनादिरूपो भगवदुद्यमो द्वितीयाध्यायः, एतद्द्वयं तृतीयाध्यायोक्तस्य जन्मनः पूर्वाङ्गम्, चतुर्थाध्यायोक्तं मायाकार्यं कापट्यं जन्मनः **उत्तराङ्गम्**, एवं हेतूद्यमोत्तराङ्गैः सहितं **विष्णोर्जन्म पूर्वप्रकरणे निरूपितमित्यर्थः।** **राजसादिगुणैर्यु**तमित्यर। का० ¼ **सप्तसप्ततिभिः कृत्यं हरेस्तत्र निरूप्यते** का० ¾ इत्युत्तरेणान्वयः। यद्यप्यत्र तामसप्रकरणस्य प्राथम्यात् तामसादिगुणैरितिवक्तव्यम्, तथापि रजःसत्त्वतमसां उत्पत्तिस्थितिप्रलयकारणत्वात् तत्क्रमाभिप्रायेण "राजसादिगुणै"रित्येवोक्तम्। **भगवानित्यादि** का० १¾ एतेन तामसादिप्रकरणत्रयाध्यायसङ्ख्यातात्पर्यमुक्तम्, **भगवानेकादशेन्द्रियैः प्रत्येकं स्वेन** धर्मिणा षड्भिर्धर्मैश्च कृत्यं लीलां **चकार** ततः कारणात् **तावद्भिः** सप्तसप्ततिभिरध्यायैरुच्यत इत्यर्थः। तामसादित्रिविधलीलाकरणे प्रयोजनमाहुः **त्रिविधानीत्यादि का० २¼।** तामसादिप्रकरणत्रयस्य प्रत्येकमध्यायसङ्ख्यातात्पर्यमाहुः **तत्त्वेति का० २¾** अष्टाविंशतितत्त्वानां वक्ष्यमाणप्रकारेणातिक्रमे सति **तामसभक्तनिरोध** इति बोधयितुं तत्र तावन्तोऽध्यायाः, एवं **राजसेपि, कालस्य एकविंशतिविधत्वात् शिष्टे** अवशिष्टे सात्त्विकप्रकरणे तावन्तोऽध्यायाः। कालस्य एकविंशतिसङ्ख्याकत्वे प्रमाणमाहुः **द्वादशमासाः पंचर्तवस्त्रय इमे लोकाः असावादित्य** इति। हेमन्तशिशिरयोरैक्यविवक्षया पञ्च ऋतव इत्यन्यत्र विस्तरः। **तत्त्वातिक्रमप्रकारमाहुः लौकिकेषु का० ४¼ लौकिकेषु धर्मेषु** देहेन्द्रियादिरूपेषु तत्त्वेषु मध्ये **यत्रैव हरिनिवेशनं तदेव पूर्वस्वरूपान्निवर्तते** भगवद्रूपं भवति, तत्र दृष्टान्तः **वह्नेर्दारुमयं यथेति।** ननु भगवतो जीवस्वभावान्यथाकरणसामर्थ्ये सत्यपि भगवान्निर्गुणो भक्तानुरोधेन त्रिविधानि कर्माणि कुतः कृतवानित्याकाङ्क्षायामाहुः **स्वभावस्येति का० ५¼।** स्वभावान्यथाभावो जीवानां **स्वकृतसाधनासाध्य** एव भगवतोऽप्यक्लिष्टकर्मत्वाद् भक्तस्वभावान्यथाकरणमयोग्यमतो यादृशलीलया यादृशभक्तनिरोधो भवति तत्र तादृशीं लीलां करोतीत्यर्थः, तदुक्तं टिप्पण्यां भक्तस्वभावानुसरणे भगवतः परमदयालुत्वं भक्तिमार्गोत्कर्षश्च सिध्यतीति, सात्त्विकं विहायादावेव तामसप्रकरणनिरूपणेऽस्य तामसत्वेनोक्तौ हेतुमाहुर्लौकिकं **तामस** इत्यादि का० ६¼। लोके बहिः प्रकटं यद् रूपं तदेव तामसभक्तानां मुख्यं नान्तरात्मादिरूपमित्यर्थः, तथा च तामसानां कर्माद्यासक्त्यभावेन बहिःप्रकटे रूप एवाग्रहदार्ढ्यात् तामसत्वमुच्यते वस्तुतस्तु निर्गुणत्वमेव,

कामान्ता च कृतिः स्फुटेति काम एव अन्तः फलं यस्याः सा कामान्ता तादृशी **कृतिरित्यर्थः, किञ्च कामोद्भूते कामेनाविर्भूते प्रभौ प्रीतिः स्नेहः,** सोपि **तथा** कामशास्त्रानुसारी न तु विध्यनुसारीत्यर्थः, **तेन** हेतुना **तत्** तामसप्रकरणमा**दौ** निरूप्यते, प्रमाणादिप्रकरणचतुष्टयप्रतिपाद्या लीला आहु**र्बाललीलेति का० ७¼–९¾।** तेन बलदेवादिचरित्रमपि तदाविष्टपुरुषोत्तमचरित्रमेव ज्ञेयं, **कृष्णे च सन्नतात्मान** इति आसक्तात्मान इत्यर्थः, तथा च प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपनिरोधजनकं भगवतश्चरित्रमित्यर्थः, बाललीलायाः सप्तभिरध्यायैर्निरूपणे प्रयोजनमाहु**र्बाललीला सप्तविधेति का० १०¼।** प्रमाणप्रकरणस्थाध्यायसप्तकप्रतिपाद्यनिरोधाधिकारिण आहुरु**त्सवाविष्टे**त्यादिना का० ११¼। अत्रो**त्सवाविष्टचित्तादयः** सप्तविधा **अधिकारिणः** प्रमाणप्रकरणीयप्रथमाध्यायमारभ्य सप्तस्वध्यायेषु प्रायशः क्रमेण सर्वथा वा क्रमेण प्रतिपाद्या इति व्याख्यातं बहुविस्तरेण टिप्पण्यां, **स्त्रीस्वभावरता** इत्यस्य प्रथमव्याख्याने प्रमाणप्रकरणीयषष्ठाध्यायोक्तनलकूबरमणिग्रीवकथाभिप्रायेण **स्त्रियश्च स्वभावश्च** राजसतामसादिस्तयो रता इत्यर्थः, द्वितीयव्याख्याने तु पञ्चमाध्यायोक्तकथानुसारेण **स्त्रीस्वभावो** यशोदास्वभाव इति स्फुटं, तत्रैव प्रथमाध्यायार्थमाहु**र्जन्मोत्सव इति का० १२¼।** प्रमाणप्रकरणीयप्रथमेऽध्याय आदितः पञ्चमे जन्मोत्सवो निरूप्यते, ननु नन्दः स्वगृहे वसुदेवागमनं तत्र स्वपुत्रस्थापनं कन्यानयनं च जानाति न वा यदि जानाति चेत् तर्हि नन्दः स्वपुत्रत्वे सन्दिहान एव उत्सवं कृतवानिति कस्यचिच्छङ्का स्यात् तत्परिहारायाहुः **आवश्यकमिति,** आवश्यकं कार्यं कंसाय करदानात्मकं **परित्यज्य तत्** उत्सवलक्षणं कार्यं **कृतमिति सूच्यते,** उत्सवानन्तरं शीघ्रं करदानार्थगमनोक्त्या सूच्यत इतिभावः, तेन मथुरागमनेनैव **अन्यथाज्ञानशङ्कापि निवार्यते,** यदि वसुदेवपुत्रत्वं जानीयात् तदा मथुरायां न गच्छेदित्यर्थः, उपपत्यन्तरमाहुरुत्सवस्त्विति, स्वपुत्रत्वनिश्चयं विनोत्सवो न स्यादित्यर्थः, **द्रव्यानयनं भगवदर्थमुत्तमवस्तूनामानयनं चान्यथा न स्यादित्यर्थः,** यद्यपि मूले नन्दकर्तृकं **द्रव्यानयनं** नोक्तं तथापि 'नन्दः स्वपुत्रमादाये'त्यत्रो'दारधी'रिति विशेषणसूचितं तदितिज्ञेयं, ननु अध्यायान्ते 'सन्त्युत्पाताश्च गोकुल' इत्यनेन नन्दस्य भयवर्णनं किमर्थमित्याकाङ्क्षायामाहु**रासक्तीति का० १४¼। तस्य नन्दस्यान्तेऽध्यायान्ते** ॥ १४¾ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

कारिका—एवं चतुर्भिरध्यायैर्जन्म विष्णोर्निरूपितम् । हेतूद्यमोत्तराङ्गैश्च राजसादिगुणैर्युतम् ॥ १ ॥

कारिकार्थ—एवं चतुर्भिरध्यायै : - अब श्रीमदाचार्यचरण कहते हैं कि :—इस प्रकार दशम स्कन्ध के पूर्वार्ध के प्रथम चार अध्यायों में हेतु, उद्यम और उत्तरांग से, राजसादि गुणों से युक्त, श्री विष्णु भगवान श्रीकृष्ण के जन्म का निरूपण किया गया ॥ १ ॥

अब श्रीमदाचार्यचरण जन्म प्रकरण के चार अध्यायों का श्री सुबोधिनीजी द्वारा विवेचन करने के बाद दूसरा तामस प्रकरण का विवेचन का प्रारंभ करना चाहते हैं तब तामस प्रकरण के साथ जन्म प्रकरण क संगति सम्बन्ध बतलाने के लिये **'एवं चतुर्भिः'** कारिका को लिखते हैं ॥ १ ॥

प्रकाश - सबसे प्रथम तो यह संदेह होता है कि सिर्फ तृतीय अध्याय में प्रभुजी के प्राकट्य का निरूपण है तब फिर चारो अध्यायों की "जन्म प्रकरण संज्ञा कहना समुचित नहीं होता क्योंकि और तीन अध्यायों में तो अन्य कथाप्रसङ्ग ही है तब उसका समाधानार्थ कहते हैं कि यद्यपि भगवान् के प्राकट्य का निरूपण तीसरे अध्याय में है, तो भी शेष प्रथम द्वितीय तृतीय तीन अध्याय भी जन्म प्रकरण के हैं। क्योंकि प्रथम और द्वितीय अध्यायों में जन्म के कारण 'हेतु' एवं 'उद्यम' का कथन है और चतुर्थ अध्याय में माया का कापट्य कार्य भगवत्प्राकट्य में सहायक है; अतः 'हेतु' और 'उद्यम' ये दोनों जन्म के पूर्वाङ्ग है और माया का कार्य उत्तराङ्ग है। इसलिये पूर्वाङ्ग एवं उत्तराङ्ग सहित प्राकट्य का वर्णन एक ही प्रकरण का विषय होने से चारों अध्यायों की जन्म प्रकरण की संज्ञा को मानने में कोई आपत्ति अथवा अनौचित्य नहीं है यह श्रीप्रकाश कारजी का एक समाधान है।

फिर श्रीप्रकाशकारजी 'अथवा' कहकर दूसरे प्रकार से भी समाधान करते हैं कि महाप्रभुजी ने संगतिकारिका में 'राजसादिगुणैर्युतं जन्म", इस चतुर्थ चरण में बताया है कि राजस, तामस और सात्त्विक भक्तों से लीला कारणार्थ स्वरूपभूत व्यूहों की आवश्यकता होगी और वासुदेव, संकर्षण, प्रद्युम्न एवं अनिरुद्ध का क्रमशः एक एक अध्याय में पृथक् पृथक् वर्णन होने से चार अध्याय जन्म प्रकरण के हैं। इस प्रकार से भी जन्मप्रकरण संज्ञा सर्वथा संगत ही है। यहाँ पर ऐसी शंका को भी अवसर नहीं है कि चारों अध्यायों में वासुदेवादि चार स्वरूपों का प्राकट्य है इसलिये चार अध्याय जन्म प्रकरण के हैं तो इसका तात्पर्य यह हुआ कि पूर्ण पुरुषोत्तम का जन्म हुआ ही नहीं ? क्योंकि पुरुषोत्तम स्वरूप तो अजन्मा है किन्तु 'अजायमानो बहुधा विजायते' 'अजन्मा ब्रह्म अनेक प्रकार से प्रकट होता है' इस श्रुति के अनुसार वासुदेवादि व्यूहात्मक स्वरूपों के जन्म से ही 'पुरुषोत्तम' का जन्म माना जाता है। कारिका में 'विष्णोः जन्म' जिस व्यापक सर्वात्म स्वरूप में व्यूहादि स्वरूप भी स्थित हैं उस पूर्ण पुरुषोत्तम स्वरूप का प्राकट्य हुआ है ऐसा स्पष्ट करने के लिये 'विष्णोः' यह पद लिया गया है।

आचार्यचरणों की इस संगति कारिका के हेतूद्यमोत्तराङ्गैः पद का स्वारस्य श्रीलेखकार बताते हैं कि पूर्वाङ्ग—भगवान् के जन्म का हेतु भक्त-दुःख है। यह पहले अध्याय का अर्थ है।

भगवान् के जन्म का हेतु उद्यम माया को आज्ञा देना संकर्षणजी को रोहिणीजी के उदर में स्थापित करना आदि कार्य जो "उद्यम" करना यह दूसरे अध्याय का अर्थ है।

चतुर्भुज भगवान् का रूपान्तर स्वीकरण द्विभुज बाल रूप होना यह तीसरे अध्याय का अर्थ है। कारिका में हेतूद्यमोत्तराङ्गैश्च इस चरण में जो "च" शब्द दिया है, इसका आशय यह है कि द्विभुज रूप में यह चतुर्भुज स्वरूप भी विराजमान है। उत्तराङ्ग—इस कारिका में 'हेतूद्यमोत्तराङ्गैः' यह समासान्त पद इसलिये दिया है कि ये तीनों कार्य साक्षात् भगवान् ने किये हैं। माया द्वारा किये हुए कार्यों का वर्णन चतुर्थ अध्याय में हैं।

अब कारिका के चतुर्थ चरण 'राजसादिगुणैः युतं जन्म' राजसादि गुणों के साथ जन्म हुआ इसका आशय लेखकार बताते हैं कि चतुर्थ अध्याय में माया के कार्य 'व्यामोह' को सिद्ध करने के लिये यह पंक्ति दी है क्योंकि 'व्यामोह' करना रजोगुण का कार्य है जो माया के द्वारा हुआ है। इसलिये 'माया का कार्य व्यामोह' चौथे अध्याय का अर्थ है।

अब इस कारिका में राजसादिगुणैर्युतम्" पद में प्रथम "राजस" शब्द क्यों लिया इसका विमर्श करते हैं कि दशम स्कन्ध में प्रथम तामस प्रकरणीय लीलाओं से प्रारम्भ होने के कारण यहाँ कारिका में 'तामसादिगुणैः' ऐसा पाठ कहना चाहिये था वह न कहकर आचार्यचरण ने 'राजसादिगुणैः' कहा है। उसका आशय यह है कि सृष्टि उत्पत्ति आदि लीला में प्रथम रजोगुण का कार्य-उत्पत्ति होता है। उस क्रम को लेकर 'राजसादिगुणैः' कहा है और प्रथम कारिका के चतुर्थ पद का द्वितीय कारिका के पहले आधे भाग के साथ अन्वय करते हैं कि 'अत्र राजसादिगुणैः युतं हरेः कृत्यं सप्तसप्ततिभिः निरूप्यते'। यहाँ निरोध लीला में सतहत्तर अध्यायों में राजसादि गुणों से युक्त हरि की लीलाओं का वर्णन किया जाता है।

श्रीमद्भागवतजी के निरोध लीला दशम स्कन्ध में नव्बे ९० अध्याय मिलते हैं फिर सत्तासी अध्यायों का निर्देश क्यों किया जाता है ? इसके उत्तर में कहते हैं कि दशम स्कन्ध में ९० अध्याय हैं उनमें तीन प्रक्षिप्त निकालने से शेष सत्तासी बचते हैं। **छ अध्यायों में**

कारिका—सप्त सप्ततिभिः कृत्यं हरेरत्र निरूप्यते । भगवान् स्वेन धर्मैश्च सप्तधैका दशेन्द्रियैः ।। २ ।।
कृत्यं चकार यस्माद्धि ततस्तावद्भिरुच्यते । त्रिविधानि च कर्माणि त्रिविधानां हिताय च ।। ३ ।।

कारिकार्थ—सप्त सप्ततिभिः—जन्म प्रकरण कह कर अब यहाँ भगवान् की निरोध लीला सतहत्तर अध्यायों में वर्णित की जाती है । धर्मी भगवान् ने अपने स्वरूप से एवं छ ऐश्वर्यादि धर्मों से सात प्रकार से भक्तों को एकादश इन्द्रियों से लीलाएँ कीं, इससे सतहत्तर अध्यायों से लीला का वर्णन किया जाता है ।

तामस, राजस और सात्त्विक तीन प्रकार के भक्त हैं उनके हित के लिये भगवान् श्रीकृष्ण ने तामसादि तीन प्रकार से लीलाएँ की हैं ।। २–३ ।।

इन कारिकाओं में श्री महाप्रभुजी ने सतहत्तर अध्यायों का कारण व भावार्थ बताया है कि भगवान् ने भक्तों की ग्यारह इन्द्रियों में से प्रत्येक इन्द्रिय से धर्मी भगवान् एवं छ धर्मों को मिलाकर सात प्रकार से लीला की है इसलिये ११ को ७ से गुणा करने से गुणनफल सतहत्तर अध्याय कहे गये हैं ।। २–३ ।।

कारिका—तत्त्वातिक्रमणे रोधः तामसे राजसे भवेत् । कालातिक्रमणे शिष्टे कालस्तत्रैकविंशतिः ।। ४ ।।

कारिकार्थ—तत्त्वाति क्रमणे :—अट्ठाईस तत्वों का अतिक्रमण करके भगवान ने तामस एवं राजस प्रकरण में, तामस तथा राजस भक्तों का निरोध किया है । इक्कीस प्रकार के काल का अतिक्रमण करके प्रभुने सात्त्विक प्रकरण में, सात्त्विक भक्तों का निरोध किया है ।। ४ ।।

तामस प्रकरण में निरोध करने योग्य तामस भक्तों का अट्ठाइस अध्यायों में की हुई लीलाओं द्वारा प्रपञ्च विस्मृति और भगवान में आसक्ति नाम का निरोध हुआ है । एक एक अध्याय की लीला से एक एक तत्त्व का अतिक्रमण भगवान् ने किया है, इस प्रकार अट्ठाईस तत्त्वों का अतिक्रमण अट्ठाईस अध्यायों में हो जाने से तामस भक्तों का निरोध सिद्ध किया है । "अतिक्रमण" का तात्पर्य यह है कि तत्वों एवं काल के धर्मों का लोप होना उसको आचार्यचरण अतिक्रमण कहते हैं । जैसे तामस प्रकरण में अट्ठाईस तत्त्वों के और काल के धर्मों का लोप कर तामस भक्तों का निरोध किया वैसे भगवान ने ही राजस प्रकरण के अट्ठाईस अध्यायों से राजस भक्तों का निरोध सिद्ध किया । भगवान ने सात्त्विक भक्तों का निरोध इक्कीस अध्यायों की लीला द्वारा किया । कारण यह है कि वहाँ श्रीकृष्ण भगवान् ने इक्कीस प्रकार के काल का इक्कीस अध्यायों में की हुई लीलाओं द्वारा अतिक्रमण किया है । कालातिक्रमण से सात्त्विक भक्तों का निरोध सिद्ध किया है । श्रुति भगवतीजीने काल के इक्कीस प्रकार बताये हैं आगे यह प्रसङ्ग आयेगा ।

सात्त्विक भक्तों को प्रमाण की आवश्यकता नहीं होती है । इसलिये इस सात्त्विक प्रकरण में प्रमेय के सात साधन के सात और फल के सात अध्याय हैं लेकिन प्रमाण के सात नहीं कहे हैं । तीनों मिलाकर समग्र सात्त्विक प्रकरण में इक्कीस अध्याय हैं ।। ४ ।।

कारिका—"द्वादशमासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश" इति श्रुतेः ।
लौकिकेषु तु धर्मेषु यत्रैव हरिवेशनम् । निवर्तते तदेवात्र वह्नेर्दारुमयं यथा ।। ५ ।।

कारिकार्थ—द्वादश मासाः पञ्चर्तवस्त्रय इमे लोकाः—श्रुति कहती है कि बारहमास, पाँच ऋतुएँ, तीन लोक, एक आदित्य ऐसे काल इक्कीस प्रकार का है जैसे कि लकड़ी में आग प्रवेश से लकड़ी का लकड़ीपन नष्ट हो जाता है और वह लकड़ी अग्निरूप बन जाती है वैसे,देह इन्द्रियादि रूप तत्वो में–लौकिक धर्मों में श्रीहरि भगवान लीलाओं द्वारा प्रवेश करते हैं वहाँ उन तत्त्वों का प्राकृत लौकिक धर्मपन चला जाता है और वे तत्त्व भगवद्रूप हो जाते हैं ।। ५ ।।

अब श्रीमदाचार्य चरण अट्ठाईश तत्त्वों एवं इक्कीस प्रकार के काल के अतिक्रमण का तात्पर्य यह कहते हैं कि उन तत्त्वों तथा काल के धर्म उनमें से लुप्त हो जावें और उनमें भगवद्धर्मों का प्रवेश हो जाता है जिससे भक्तों पर "तत्त्वों" एवं "काल" के लौकिक धर्मों का प्रभाव न ही होता । किन्तु भगवद्धर्म के सामर्थ्य से भक्तजनों की प्रपञ्च की आसक्ति छूट जाती है और

भगवान् ने केवल ऐश्वर्यादि छ गुणों से लीलाएँ की हैं, उन छ को एवं चार 'जन्म प्रकरण' के अध्यायों को पृथक् करने से शेष सतहत्तर रहते हैं । उनमें भगवान् ने उपर्युक्त प्रकार से लीलाएँ की है ।

योजनाकार श्रीलालूभट्टजी कहते हैं कि जब निरोध्य भगवान् श्रीकृष्णचन्द्रजी भक्त के नेत्रों का विषय स्वयं बन जाते हैं तब भक्त के नेत्रों में भगवान् का आनन्दमय स्वरूप एवं आनन्दमय लीलाओं का ही दर्शन होता रहता है जिससे वह भक्त प्रपञ्च भूल जाता है और उस आनन्द में लीन होकर आनन्दी हो जाता है । "रसं लब्ध्वा आनन्दी भवति" श्रुति के अनुसार जीव अपने मूल रस स्वरूप को पाकर स्वयं भी आनन्द रूप हो जाता है । (१)

भगवदासक्ति ही बन जाती है। आचार्य चरण दृष्टान्त से समझाते हैं कि काष्ठ में अग्नि के प्रवेश से काष्ठ से काष्ठ के धर्म लुप्त होकर, अग्नि के धर्म काष्ठ में आ जाते हैं उस समय काष्ठ पर हाथ रखने से हाथ में उष्णता प्रवेश करती है। वैसे ही तत्व एवं काल में भगवद्धर्मों के प्रवेश से तत्व एवं काल भी भगवद्रूप होकर भक्तों के निरोध में सहायक होते हैं। फलितार्थ यह है कि भक्तों के तत्त्वरूप देहेन्द्रियादि में भगवान् के प्रवेश से भक्तों की लौकिकता निवृत्त होकर, उनमें अलौकिकत्त्व सिद्ध हो जाता है। जिससे प्रपञ्च विस्मृति हो कर अलौकिक भगवद्रूप में आसक्ति होती है। इसी प्रकार सात्त्विक प्रकरण में काल का प्रभाव नष्ट हो जाता है। जिससे उन भक्तों का भी निरोध सिद्ध होता है ॥ ५ ॥

कारिका—स्वभावस्यान्यथा भावो न वै शक्यः कथंचन । अतस्त्रिविधजीवेषु त्रिविधा भगवत्कृतिः ॥ ६ ॥

कारिकार्थ—स्वभावस्यान्यथा - स्वभाव किसी भी प्रकार बदल नहीं सकता है, इसलिये तीन प्रकार के जीवों के साथ भगवान् ने तीन प्रकार से लीला की है ॥ ६ ॥

स्व सामर्थ्य से जीव अपने स्वभाव बदल नहीं सकते हैं भगवान श्रीकृष्ण यदि भक्तों के स्वभाव को बदल कर लीला करते तो लीला तो हो सकती थी; किन्तु इसमें भगवान् को परिश्रम होता और लीला में रसालता न आती एवं वैविध्य भी न होता। अतः सर्वकरण समर्थ एवं निर्गुण स्वरूप होते हुए भगवान् ने भक्त के स्वभावानुकूल लीलाएँ कीं। जिससे इस कार्य में भगवान् की भक्तवत्सलता, परम दयालुता तथा भक्ति मार्ग की उत्तमता सिद्ध होती है।

इस जगत में गुणानुसार तीन प्रकार के जीव होते हैं—कोई सात्त्विक, कोई राजस तो कोई तामस। इसलिये उनके स्वभाव भी एक प्रकार के नहीं होते हैं। भगवान् श्रेष्ठ गुरु दयालु एवं उद्धारक हैं, इसलिये भक्त की भूमिका का विचार कर स्वयं भक्त स्वभावानुकूल बन, उस प्रकार की लीलाएँ कर सबका उद्धार करते हैं। भक्तिमार्ग में भगवान् श्रीकृष्ण ही परम फल हैं। भगवान् में स्नेह और भगवान् की सेवा को ही वेदों ने श्रेष्ठ और प्रधान फल बताया है।

कारिका—लौकिकं तामसे मुख्यं कामान्ता च कृतिः स्फुटा । कामोद्भूते तथा प्रीतिस्तेनादौ तन्निरूप्यते ॥ ७ ॥

कारिकार्थ—लौकिकं तामसे—तामस भक्तों में लौकिक मुख्य है। इसलिये इस तामस प्रकरण में काम लीला का स्पष्ट वर्णन है। तामस में जब काम उत्पन्न होता है तब ही प्रीति होती है। इसलिये तामस प्रकरण का पहले वर्णन किया है।

भक्तिमार्ग में पुरुषोत्तम स्वरूप की सेवा और स्नेह श्रेष्ठ एवं मुख्य फल है, अन्य मोक्षादि फल तो पुरुषोत्तम के सम्बन्ध से ही फल माने जाते हैं। भगवान् पूर्ण निरोध करना चाहते हैं, वह उन भक्तों में हो सकता है, जो दृढ़मति एवं दृढ आग्रही हों। तामस जीवों की बुद्धि ऐसी होती है कि वे एक बार जिसको अपना लेते हैं, उसका वे कदापि त्याग नहीं करते; अतः तामसमति कहते हैं। सात्त्विक बुद्धि वाले जीव शास्त्रीय सिद्धान्त के अनुकूल चलते हैं, उनको जैसा कोई मार्ग बताता है, उसमें उनकी प्रवृत्ति हो जाती है, वे लोग प्रायः अस्थिर विचार वाले होते हैं। राजस गुण वाले विक्षिप्त चित्त वाले होते हैं, जिससे लौकिक तथा अलौकिक में आसक्त होने से उनको स्वरूप विस्मृति हो जाती है। अतः इन दोनों का पूर्ण निरोध तमोगुण वालों के समान नहीं होता है। तमोगुण वालों में लौकिक मुख्य है। व्रज भक्तों में तमोगुण के कारण आग्रहीपन था, इसलिये जिसमें भी उनका अनुराग हो गया उसे उन्होंने कभी छोड़ा नहीं। लौकिक में भी यही सर्वत्र देखा जाता है। व्रजवासियों का प्रकट पूर्णानन्द श्रीकृष्ण स्वरूप में ऐसा दृढ़ स्नेह हो गया था, जो वे उस स्वरूप के अतिरिक्त कुछ नहीं चाहते थे। उन्होंने भगवान के उपदिष्ट धर्म एवं उद्धव के द्वारा मिले हुए ब्रह्मज्ञान की भी तिलांजलि दे दी। इन कारणों से सर्वात्मभाव से पूर्ण निरोध इन व्रजभक्तों को ही सिद्ध हुआ है। इसलिये पुष्टिमार्ग की गति, मर्यादा मार्ग से विपरीत है। इसको समझाने के लिये ही इस प्रकरण को तामस प्रकरण कहते हैं। वास्तव में तो यह प्रकरण निर्गुण ही है।

मर्यादा मार्ग से इस पुष्टि भक्ति मार्ग की विशेषता यह है कि जो "काम" मर्यादा मार्ग में मुक्ति का प्रतिबन्धक है, वही "काम" यहाँ अगणित आनन्द रूप, अन्तिम फल का दाता है।

मर्यादा मार्ग में, मर्यादा, भक्ति अथवा ज्ञान से भगवान् का प्राकट्य होता है। पुष्टिभक्ति में, 'काम' से अर्थात् प्रभु प्राप्ति की आन्तरिक अखंड सतत कामना से भक्त में दीनता आती है, जिस दीनता से प्रभु प्रकट होते हैं। उस स्वयं प्रकट आनन्द स्वरूप में भक्त का सुदृढ़ स्नेह होता है न कि मर्यादानुसारी स्नेह होता है। इस प्रकरण में भगवान् ने निःसाधन दीन भक्तों को वह भजनानन्द दिया, जो साधनों से अप्राप्य एवं ब्रह्मादिको को भी दुर्लभ है। भगवान् ने व्रज-भक्तों की अधीनता स्वीकार की किन्तु आत्माराम स्वयं भगवान् में भी भक्तों के साथ रमण की कामना होती है। इसी प्रकार भक्त एवं भगवान् दोनों में परस्पर मिलने की इच्छा से दोनों में गाढ़ स्नेह उत्पन्न होता है। उस उत्पन्न अलौकिक स्नेह से ही लीलाएँ हुई हैं।

कारिका—बाललीला मध्यलीला प्रौढलीला तथैव च । कामलीलेति लोके वै चतस्रः सुखदाः स्मृताः ॥ ८ ॥

कारिकार्थ—बाललीला मध्यलीलाः—लोक में निश्चय से बाललीला, मध्यलीला प्रौढलीला और कामलीला ऐसी चार प्रकार की लीलाएँ सुख देने वाली होती हैं।

२८ अध्यायों के इस तामस प्रकरण में 'प्रमाण', 'प्रमेय', 'साधन' और 'फल' नाम के चार अवान्तर प्रकरण हैं। इस कारिका में जिस प्रकरण में जो जो लीला की है, वह बतलाते हैं। पहले प्रमाण प्रकरण में बाललीला की है। दूसरे प्रमेय प्रकरण में पाँच वर्ष से ग्यारह वर्ष पर्यन्त पौगण्ड मध्यलीला तीसरे साधन प्रकरण में प्रौढ़लीला और चौथे प्रकरण में रासलीला फलात्मक लीला की है। ये भगवान् की चारों लीलाएँ भक्तों को सुख देने वाली हैं।

कारिका—एकं भगवतः कार्यं बह्वर्थानां च साधकम् । प्रपञ्चविस्मृतिः सर्वा तदासक्तिश्च वर्ण्यते ॥ ९ ॥

कारिकार्थ—एकं भगवतः कार्यं-भगवान् की एक लीला बहुत अर्थों के प्रयोजनों को सिद्ध करती है। समग्र प्रपञ्च की विस्मृति और भगवान् में पूर्ण आसक्ति का वर्णन है।

यदि संशय हो कि भगवान ने उपर्युक्त बाल, मध्य, प्रौढ एवं कामलीला चारों लीलाएँ मनुष्यरूप तथा लौकिक रीति से दिखाई है तब भगवान् को मनुष्य समझने से उनका निरोध कैसे सिद्ध हुआ होगा? तब ऐसी शंका की निवृत्ति इस कारिका से करते हैं कि भगवान् की एक लीला अनेक कार्य सिद्ध करती है। जैसे कि भगवान् ने पूतना के दूध को पीते हुए उसके प्राण लेने की एक ही लीला से अनेक कार्य सिद्ध किये हैं।

(१) पूतना वध से अपना वीर्य प्रकट किया, (२) पूतना की मुक्ति, (३) लोक और वेद में अपने प्रमेय बल की विशेषता, (४) पूतनाभक्षित बालकों का उद्धार, (५) अवशिष्ट अन्य बालकों की रक्षा, (६) माहात्म्य ज्ञान से व्रज वासियों का श्रीकृष्ण में स्नेह होना, (७) पूतना मोक्षादि लीला श्रवण से विस्मय—इत्यादि अनेक कार्य हुए। वैसे ही अन्य लीलाओं से भी अनेक कार्य हुए।

कारिका—येनैव त्रिविधा भक्ता न स्मरन्ति जगत् क्वचित् । कृष्णे च सन्नतात्मानस्तत्कार्यं भगवत्कृतम् ॥ १० ॥

कारिकार्थ—येनैव त्रिविधा भक्ताः—प्रपञ्च की विस्मृति और भगवदासक्ति के कारण ही तीनों प्रकार के भक्त कभी भी जगत् का स्मरण नहीं करते हैं और सर्वदा कृष्ण में ही मन वाले होते हैं कि यह कार्य भगवान् ने किया है ॥ १० ॥

दशम स्कन्ध की निरोध लीलाओं में श्री बलदेवजी ने भी लीलाएँ की हैं तो इससे सब चरित्र श्रीकृष्ण चरित्र कैसे माना जाय? इसके उत्तर में कहते हैं कि फलितार्थ से जाना जाता है कि सम्पूर्ण लीलाएँ भगवान् की ही हुई हैं। इसलिये सब भक्त श्रीकृष्ण स्वरूप में ही नतात्मा अनुरक्त हैं। बलदेव चरित्र भी पुरुषोत्तम का ही चरित्र है। क्योंकि वे लीलाएँ श्रीकृष्ण स्वरूपाविष्ट बलदेवजी ने की हैं न कि केवल बलरामजी ने की हैं। इसलिये, मुख्य स्वरूप लीलाकर्ता, श्रीकृष्ण ही थे; अतः सब का निरोधादि श्रीकृष्ण में ही हुआ है। इसलिये ब्रह्माजी ने २-७-३५ श्लोक में कहा है कि 'बलपार्थभीष्मव्याजाह्वयेन' अर्थात् बलराम, अर्जुन, भीष्मादिक के तो केवल नाम मात्र हैं वास्तव में सब कुछ आपने ही किया है।

कारिका—बाललीला सप्तविधा प्रथमं सा निरूप्यते । बालभावरता ये हि तेषां रोधस्ततो भवेत् ॥ ११ ॥

कारिकार्थ—बाललीलाः सप्तविधा—सात प्रकार की बाललीला है। बालभाव के अनुरक्त भक्तों का बाललीला से निरोध होता है। इसलिये प्रथम उसका निरूपण है ॥ ११ ॥

२८ अध्यायों के तामस प्रकरण में बाललीला का वर्णन प्रथम अवान्तर प्रमाण प्रकरण के सात अध्यायों में किया गया है। सात अध्याय इसलिये हैं कि भगवान् ने बाललीला सात प्रकार से करके, जो जो भक्त जिस जिस बालभाव के प्रेमी थे उनका उन उन लीला द्वारा निरोध सिद्ध किया है।

कारिकाएँ—उत्सवाविष्टचित्ता ये ह्याश्चर्याभिनिवेशिनः । अलौकिकरता ये च ये चोपद्रवणोत्सुकाः ॥ १२ ॥
स्त्रीस्वभावरता ये वै ये च तत्त्वे च लौकिके । सर्वोद्योगपरा ये च तेषां रोधो निरूप्यते ॥ १३ ॥
जन्मोत्सवो हरेरत्र पञ्चमे विनिरूप्यते । आवश्यकं परित्यज्य कृतं तदिति चोच्यते ॥ १४ ॥
अन्यथा ज्ञानशङ्का च तेनैव विनिवार्यते । उत्सवस्त्वन्यथा न स्यात् द्रव्यानयनमेव च ॥ १५ ॥
आसक्तिबोधनार्थाय तस्यान्ते भयवर्णनम् ॥ १५½ ॥

कारिकार्थ—उत्सवाविष्टचित्ता ये :—अब आचार्यचरण इन कारिकाओं से सात प्रकार के भक्तों के भावों का स्पष्टीकरण करते हैं—(१) प्रथम तो जो उत्सव में आविष्ट चित्तवाले, (२) और अवश्य आश्चर्ययुक्त मन वाले, (३) अलौकिक

के अनुरागी, (४) उपद्रव देखने की इच्छा रखने वाले, (५) स्त्रीस्वभाव वाले, (६) लौकिकत्व के चाहने वाले, (७) सर्व प्रकार के उद्यमशील। इन सात प्रकार के भक्तों के निरोध का वर्णन प्रथम प्रमाण प्रकरण में किया है।

पाँचवे अध्याय में भगवान् के प्रकट होने के उत्सव का वर्णन किया गया है वह उत्सव नन्दरायजी ने आवश्यक कार्य छोड़ कर किया है।

अन्यथाज्ञान शंका :—इससे अर्थात् आवश्यक कार्य छोड़कर जन्मोत्सव करने से ही अन्यथा ज्ञान की शङ्का को मिटाया गया है यह बालक दूसरे का पुत्र है मेरा पुत्र नहीं ऐसे अन्यथा ज्ञान की सम्भावना ही नहीं है। यदि यह शंका न मिटी होती तो उत्सव होता ही नहीं और भगवान् के उत्सव के लिये इतने उत्तम द्रव्य सामान न मंगाये जाते और न दान में दिये जाते।

नन्दरायजी की आसक्ति को जताने के लिये राजा कंस को कर देने के बाद **"नेह स्थेय बहुतिथं सन्त्युत्पाताश्च गोकुले"** ऐसा भयका वर्णन है।

अब श्रीमदाचार्यचरण आज्ञा करते हैं कि—तामस-राजस और सात्विक प्रकरण के अवान्तर प्रमाण प्रमेण-साधन-फल प्रकरणों के सात सात अध्याय हैं। भगवान धर्मी है और भगवान् के ऐश्वर्य-वीर्य-यशः-श्री-ज्ञान और वैराग्य छ धर्म हैं इन ऐश्वर्य आदि धर्मों का प्रत्येक अध्याय में क्रम से वर्णन है और धर्मी का वर्णन सातवे अध्याय में है इसलिये प्रमाण आदि प्रकरण के सात अध्याय है। तामस प्रकरण के प्रथम 'प्रमाण अवान्तर प्रकरण' में सात अध्याय में भगवान ने की हुई बाललीला के अधिकारी सात प्रकार के हैं। उन सात प्रकार के अधिकारियों के स्वभाव का वर्णन बारहवीं तथा तेरहवीं कारिका में आया है।

भगवान् में आसक्त चित्त वाले भक्तों के हृदय में भगवान् के सम्बन्ध मात्र से सकल लीलाएँ स्फुरित हो जाती हैं।

उत्सवाविष्टचित्ता:—पांचवे अध्याय में नन्दरायजो द्वारा किये हुए भगवान् श्रीकृष्ण के प्राकट्य के महोत्सव से 'उत्सव' में संमिलित आविष्ट चित्त वाले भक्तों का निरोध सिद्ध हुआ।

छठे अध्याय में **'हरिं जगाम शरणं'** हरि के शरण जाने से ही भय-निवृत्ति हो सकती है, ऐसा बताने वाली लीला ही तत्त्व है तथा **"पूतना लोकबालघ्नी राक्षसी रुधिराशना"** जैसा अनधिकारी जीव की मुक्ति से 'प्रमेय बल का तत्वपना बताया गया है। नारदोक्ति के द्वारा लोक तत्त्व जताया है इत्यादि। लौकिक एव परमार्थ तत्वों की लीला से शरणागतहीन तत्त्व से प्रेमी भक्तों का निरोध सिद्ध किया गया है।

आश्चर्याभिनिवेशिन:—सातवें अध्याय के **'शकटभञ्जनादि'** लीला से भगवान् ने आश्चर्ययुक्त मन वाले, भक्तों का निरोध सिद्ध किया है।

अलौकिकरता:—आठवें अध्याय में, अनुरक्त और श्री गर्गजी से कहे गए भगवान के कृष्ण वासुदेव आदि नामकरण लीला एवं रिंगण लीला भी, दैत्यनाशपूर्वक भक्तों का, इष्ट साधन वाली अलौकिक है। लोक में निन्दित नवनीत चौर्य, मृत्तिका-भक्षण, और मुखारविन्द में विश्वदर्शन आदि लीलाओं के अलौकिकत्व से आश्चर्य-चकित भक्तों का निरोध सिद्ध किया है।

नवम अध्याय में दधिभाण्डादि भंजन के उपद्रवों को भी अलौकिक समझने वाले उपद्रव-प्रिय भक्तों का निरोध सिद्ध किया है। दशवें अध्याय में नलकूबर, मणिग्रीव की लीला से, स्त्रीभाव राजस और तामस भाव में प्रेम वाले स्त्री स्वभाव-रत भक्तों का निरोध सिद्ध किया गया है।

सात प्रकार की लीलाओं से इस तरह सात अध्यायों में सात प्रकार के अधिकारियों का निरोध सिद्ध किया गया है।

आचार्यचरण आगे चतुर्थ अध्याय के अन्त में कहते है कि वसुदेवजी यशोदाजी की शय्या पर अपने पुत्र को विराजमान कर उनकी कन्या को लेकर घर गए। ऐसा कहा और पहले यशोदाजी ने जाना कि मेरे कुछ उत्पन्न हुआ है। पुनः माया के जाने पर यशोदा जागी और उनको पता चला कि मुझे पुत्र उत्पन्न हुआ है। ऐसा जानने पर जो सब कुछ हुआ वह **'नन्दस्त्वात्मज'** श्लोक से शुकदेवजी कहते हैं।

पुत्र वह है जो पिता से उत्पन्न होकर उसको 'पुन्नाम' नरक से बचावे। यह पुत्र नन्दजी से उत्पन्न हुआ है इसी से पुत्र होने के कारण नन्दजी उसका जात-कर्म संस्कार कराने लगे। मूल श्लोक में जो 'तु' अव्यय दिया है वह तु पद वसुदेवजीके गृह की भगवत् प्रादुर्भाव की कथा से उसका भेद दिखलाता है। इसीलिये यह कहा गया है कि **'नन्दस्त्वात्मज'** इति। यह बालक मेरी आत्मा से उत्पन्न होने से मेरा पुत्र है। जिसको जैसा अनुभव होता है शुकदेवजी वैसा ही कहते हैं; क्योंकि भगवान् ने उनकी बुद्धि वैसी ही बना दी है। यदि भगवान् ऐसी बुद्धि न बनाते, तो न भगवान् की लीला ही हो सकती थी और न भगवान् को, जो जो चरित्र करने थे, वे ही हो पाते, इसलिये यह पुत्र मुझसे ही उत्पन्न हुआ है, ऐसी नन्दजी

की बुद्धि हो गई। इसलिये कहा है, कि 'आत्मज उत्पन्न इति' पुत्र प्रकट हुआ। वासुदेव व्यूह का प्राकट्य यहाँ ही हुआ है, यह सिद्धांत है। यदि ऐसा न होता और केवल माया ही प्रकट होती तो, माया के लिये उत्पन्न हुए दूध को, भगवान् नहीं पीते और न निश्चयात्मक रूप से शुकदेवजी ही ऐसा कहते जाताह्लादः—अन्तःकरण की प्रतीति से भी यह मेरा पुत्र है–ऐसे निश्चय को बताने के लिये, नन्दरायजी को अपूर्व आह्लाद हुआ है, इसलिये श्रीशुकाचार्यजी ने कहा है कि 'जाताह्लाद इति'। श्रीनन्दरायजी के आह्लाद का कारण, पुत्र जन्म ही था। नन्दरायजी को अन्यथा ज्ञान नहीं था कि यह पुत्र और कहीं से आया है या किसी से सुना है कि तुम्हारे पुत्र हुआ है; किन्तु नन्दबाबा को सत्य एवं सुदृढ ज्ञान था कि मेरी आत्मा से ही यह पुत्र उत्पन्न हुआ है। इस दृढ सत्य निश्चय के कारण, आह्लाद होते ही, प्राकृत जन–सामान्यजन श्री नन्दजी भी "महामना" परम उदार मन वाले हो गये। यद्यपि प्राकृतजन का मन सामान्य होता है, इसलिये वे सब कार्य सामान्य ही करते हैं, किन्तु श्री नन्दरायजी ने महत् मन से महोत्सव की तैयारी की। वह महोत्सव केवल लौकिक रीति से ही नहीं मनाया; किन्तु शास्त्रविधि के अनुसार कार्य करने के लिये वेदों को जानने वाले विप्रों को बुलाया, जिससे कार्य व्यर्थ और निन्दित न हो। श्रुति भगवती ने कहा है कि 'यावतीर्वै देवतास्ताः सर्वाः वेदविदि ब्राह्मणे बसन्ति' वेद जानने वाले ब्राह्मणों में सब देवता रहते हैं। सर्व देवताओं के सान्निध्य में ही महान् उत्सव होते हैं। श्री नन्दरायजी ने उत्सव में वेद और लोक के अनुसार सब कर्तव्य किये। 'स्वतः' स्नान कर देह की शुद्धि की। जनना-शौच में वैदिक कर्म कैसे किया इस शङ्का के निवारण के लिये कहते हैं कि वे 'शुचि' नालच्छेदन विधि के पूर्व में पवित्र थे किन्तु दूसरी भी शुद्धि करने लगे। उत्सवादि शुभ कार्यों में अलङ्कार अवश्य पहनने चाहिये, इसलिए 'अलंकृत' कहा है। यदि उत्सवकर्ता अलङ्कार न पहने तो उत्सव की शोभा ही न हो। इसलिये कहा है कि 'विशिष्टालङ्कार उत्सवः' जब वस्त्र आभूषणादिकों से सब सुसज्जित होते हैं तब वह उत्सव कहा जाता है या समझा जाता है।

प्रकाशकारः—पितुः पुत्रः—श्री प्रकाशकार श्री पुरुषोत्तमजी, आचार्यचरणों के "नन्दस्त्वात्मज उत्पन्ने" श्लोक के विवरण में श्री सुबोधिनीजी में दिये हुए पितुः पुत्रः शब्दों पर प्रकाश डालते है कि पितुः पुत्रः का "श्रीनन्दरायजी" ऐसा भावार्थ है। क्योंकि अपने घर पुत्र की प्राप्ति होने से श्री नन्दरायजी ने पितृओं को "पुन्नाम" नाम के नरक से मुक्त किये इसलिये श्रीनन्दरायजी यथार्थ रूप में पिता के पुत्र बने अतः पितुः पुत्रः का श्रीनन्दः ऐसा तात्पर्य समझना। श्री नन्दरायजी भी भगवान् श्रीकृष्णजी को पुत्र स्वरूप से प्राप्त कर स्वयं भी मुक्त हुये और पितरों के ऋण से भी सर्वथा मुक्त बन गये ऐसा मन में समझने लगे कि अब मेरा भी उद्धार होगा।

आत्मज उत्पन्ने—यदि ऐसा संशय मन में आवे कि सर्वज्ञ श्रीशुकाचार्यजी ने अजन्मा भगवान् के लिये "आत्मज" पद का प्रयोग कैसे किया? तब श्री सुबोधिनीजी में उसका समाधान बताया कि शुकदेवजी आत्मवेत्ता भक्तों में श्रेष्ठ एवं सर्वज्ञ होने के कारण यह जानते थे कि भगवान की यह लीला है कि भगवान ने निज स्वरूप में नन्दजी की पुत्रमति करा दी है इसलिये श्री नन्दबाबा भगवान को निश्चिततया अपना पुत्र ही जानत थे और नन्दजी का ऐसी ही प्रतीति हो रही है। इस हेतु से सर्वज्ञ श्री शुकाचार्य जी ने "नन्दस्त्वात्मज उत्पन्ने" इस श्लोक में "आत्मज" शब्द का प्रयोग किया है।

य द ऐसा संशय हो कि अजन्मा भगवान् के लिये "उत्पन्न" जन्म लिया ऐसा पद शुकदेवजी ने, क्यों कहा? इस संशय के निवारण के लिये श्री सुबोधिनी में उत्पन्न पद का भावार्थ कहा है कि यह शब्द 'वासुदेवोऽत्रैवाविर्भूतः' वासुदेव व्यूह यहाँ श्री नन्दरायजी के गृह में हुआ अर्थात् शुकदेवजी ने जो 'उत्पन्न' शब्द श्लोक में कहा है वह अजन्मा पुरुषोत्तम के लिये नहीं दिया है, किन्तु वासुदेव व्यूह जो नन्दरायजी के घर में प्रकट हुआ है उसके लिये दिया है।

यहां पर एक संशय होगा कि आचार्यचरणों ने "निबन्ध" में वासुदेव का प्रादुर्भाव वसुदेवजी के हृदय में कहा है, और यहाँ श्री सुबोधिनी में नन्दरायजी के घर उसका प्राकट्य कैसे कहा गया?

तब इस संशय के निवारण के लिये श्री सुबोधिनीजी में कहते हैं कि यहाँ तो वासुदेव व्यूह से बाहर प्रकट हुए और यदि बाहर प्रकट न होते तो माया के लिये उत्पन्न दूध को भगवान् कैसे आरोगते? और वासुदेव के कार्य–मोक्ष, भक्ति, पद चरित्र जो व्रज में करने थे, वे कार्य कौन करता? इसलिये वासुदेव यहां ही प्रादुर्भूत हुए, यह सिद्धान्त है।

श्लोक में दिये हुए 'शुचिः' का रहस्य समझाते हैं कि नालच्छेदन के बाद "जनना" शौच लगता है। और जातकर्म, नालच्छेदन से पहिले किया जाता है, इसलिये जात-कर्म करने के समय, 'जनना' शौच न होने से नन्दरायजी पवित्र थे उनको 'जनना' शौच नहीं था।

अब योजनाकार श्री लाल्लू भट्टजी का इस विषय में अभिप्राय देखिये आप कहते है कि आचार्यचरणों ने 'पितुः पुत्रः' ऐसा जो सुबोधिनीजी में कहा है इसका आशय ऐसा कि यहाँ भगवान् का पधारना मत्स्य-कूर्म-वराह-नृसिंहके प्राकट्य के समान

नहीं है किन्तु श्री नन्दरायजी के पुत्र बनकर पधारना हुआ है इसलिये 'पितुः पुत्रः' का आशय कि नन्दजी को भगवान् के पिता होने के नाते उनका जात-कर्म कराना योग्य ही था इसलिये कहा है कि 'पितुः पुत्रः'।

यदि आप संशये करें कि भगवान् में नन्दजी की पुत्रत्वबुद्धि वास्तविक नहीं थी तो की हुई लीलाएँ भी वास्तविक नहीं होंगी ? तब समाधान सुनिए कि श्री नन्दजी की पुत्रत्वबुद्धि का आशय यह है कि उनकी पुत्रत्वबुद्धि, मायिकी नहीं थी और न लीलाएँ ही मायिकी थीं, किन्तु नन्दजी का यह समझना कि यह मेरा पुत्र मेरी देह से लौकिक पुत्रवत् उत्पन्न हुआ है, ऐसी जो नन्दजी की बुद्धि थी वह उचित नहीं थी। अवशिष्ट पुत्रत्वबुद्धि सत्य थी, क्योंकि भगवान् यहाँ अलौकिक रीति से प्रकट तो हुए ही थे और पुत्र भाव से, रमण के लिये स्वयं प्रभु ने श्री नन्दरायजी के हृदय में, अपने में पुत्रभाव की बुद्धि उत्पन्न कर दी थी।

अब श्रीलेखकार श्रीवल्लभ लालजी महाराज श्री श्रीसुबोधिनीजी की **"नन्दस्त्वात्मज"** श्लोक की भी सुबोधिनीजी की **"तुशब्दः पूर्वकथां व्यावर्तयति शङ्कां च व्यावर्तयति"** इस पंक्ति का तात्पर्य स्पष्ट करते हैं कि कारागृह में भगवान् के प्राकट्य समय जैसे श्रीवसुदेवजी ने जातकर्म न कराके केवल स्तुति ही की थी वैसे यहाँ नन्दरायजी को भी स्तुति ही करनी चाहिये थी न कि जात-कर्म संस्कार कराना चाहिए एवं यह अलौकिक बालक है, वसुदेवजी के आने की सम्भावना से, यह मेरा पुत्र है या नहीं, ऐसी शंका होती तो, जात-कर्म में नन्दजी की प्रवृत्ति नहीं होती।

इन दोनों विचारों के निवारण के लिये 'तु' शब्द की व्याख्या **'पूर्वकथां'—'वसुदेववत् स्तुतिकथां कीदृशोऽयं बाल इति शंकां व्यावर्तयति'**—वसुदेवजी के समान स्तुति कथा और यह कैसा अद्भुत रूप बालक है, इसका निवारण करते हैं। वसुदेवजी के वहाँ तो भगवान् ने पूर्व जन्म स्मरणार्थ चतुर्भुज रूप से दर्शन दिये थे इसलिये वहाँ पर वसुदेवजी ने स्तुति की; परन्तु यहाँ नन्दालय में तो लौकिक बालवत् दर्शन देने से पूर्व कथा से इसकी पृथकता दिखा दी और नालसहित बालक रूप में दर्शन देने से अलौकिकता की शंका भी मिटा दी।

श्री लेखकारजी अब श्री सुबोधिनीजी का **'केवलं मायाजनितं स्तन्यं भगवान् न पिबेत'** इस पंक्ति का रहस्य बताते हैं कि—भगवान् श्रीकृष्णजी का यशोदाजी के स्तन्य पान का कारण अन्तःस्थित बालकों का पोषण है। यदि मात्र, मायाजनित स्तन्य होता तो, वे बालक मुग्ध होने से, लीला रस पान नहीं कर सकते थे इसलिये माया के दोष की निवृत्ति के लिये, 'वासुदेव' का सम्बन्ध यहाँ आवश्यक था। यदि मात्र 'वासुदेव' जनित स्तन्य होता तो, बालक मुक्त हो जाते, तो भी लीला रस ले नहीं सकते थे। इसलिये 'केवल' शब्द देकर समझाया है कि, 'माया' और 'वासुदेव' दोनों साथ थे, दोनों का प्राकट्य नन्दरायजी के यहाँ हुआ है। ऐसे स्तन्य पान से, बालक न मुग्ध हुए और न मुक्त हुए परन्तु स्तन्य से पुष्ट होकर लीला-रस पान करने लगे।

श्री पुरुषोत्तमजी महाराज द्वितीय श्लोक की श्री सुबोधिनीजी में दिये हुए 'सार्थकत्वं' पद का रहस्य बताते हैं कि—यदि भगवत्प्राकट्य पर, जात कर्म वेद विधि-पूर्वक न होता तो **'सर्वेवेदाः यत्पदम्'** यह श्रुति सार्थक न होती, और भगवती श्रुति कुपित होती इसलिये नन्दजी ने कर्म द्वारा श्रुति की सार्थकता सिद्ध की। यों तो अजन्मा भगवान् किसी के आत्मज नहीं होते हैं किन्तु लीला के कारण ही, भगवान् ने नन्दरायजी के मन में, अपने में, पुत्र की भावना को उत्पन्न किया है।

यदि कोई ऐसी शंका करे कि यदि भगवान् में, गर्भ और बीजादि, दोषनिवृत्तिनिमित्त जात कर्म किया गया ऐसा मानेंगे तो, प्रथम जो भगवान का अलौकिक स्वरूप और प्राकट्य माना गया है, उसका विरोध होगा और भगवान् में गर्भादि दोष मानना, ये शब्द कर्णकटु लगते हैं। ऐसी शंका की निवृत्ति के लिये **'नैमित्तिकः'** शब्द श्रीसुबोधिनीजी में दिया है; उसका तात्पर्य, श्री पुरुषोत्तमजी बताते हैं कि यह जात-कर्म संस्कार गर्भादि दोषों की निवृत्ति के लिये नहीं किया गया था, किन्तु प्राकट्य के निमित्त किया गया था। भगवान् में तो गर्भादि दोष लेश मात्र भी नहीं है। केवल नन्दरायजी को पुत्र भाव स्थिर कराने के लिये ऐसी प्रतीति हुई है।

कोई कहे कि आप के कथन के अनुसार माना जायगा तब तो भगवान के लिये भी कर्मों की आवश्यकता माननी पड़ेगी तब उसका समाधान करते हैं कि यह सब भगवच्चरित्र है। यह सब भगवान् ने अपनी इच्छा से किया है। नहीं तो परमार्थ स्वरूप भगवान् में वैदिक मर्यादादि की कौनसी आवश्यकता है ?

लेखकार द्वितीय श्लोक में श्री सुबोधिनीजी के 'भगवच्चरित्र' में **'वेदमिति सिद्धान्तः'** इसका भाव बताते हैं कि यद्यपि भगवान् में गर्भ और बीज से होने वाले कोई दोष नहीं जन्म निमित्त हि जात-कर्म संस्कार हुआ, किन्तु उन दोषों के न होते हुए भी उन गार्भिकादि दोषों के अभाव के लिये किया हुआ संस्कार भी, एक प्रकार से भगवत्सेवा ही है। ऐसा करने से बालमुकुन्द भगवान् को प्रसन्नता होगी। जैसे भगवान् को पुष्पादि समर्पण आदि उपचारों से आनन्द आता है वैसे ही जात-कर्म से भी आनन्द प्राप्त हुआ। इस विषय का विशेष विश्लेषण पूतना प्रसंग को टिपणीमें देखिये ॥ २ ॥

श्री लेखकार तृतीय श्लोक की श्री सुबोधिनीजी में निर्दिष्ट **‘द्रव्यक्रियाणां’** इसका तात्पर्य बताते हुए लिखते हैं कि ‘द्रव्य’ सुवर्णादि पदार्थ और गौओं के सजाने की क्रिया में कमी आई नहीं। एक ही गौ को सजाने में सब गौ सज गई अन्यथा अलग-अलग सजाने में समय बहुत लगता।

सर्व वैदिक कर्मों में पहले **‘स्वस्तिपुण्याहवाचन’** किया जाता है। अतः नन्दरायजी ने भी पहले स्वस्तिवाचन पढ़वाया। जन्म के समय किये जाने वाले, वैदिक संस्कार का नाम—‘जात कर्म संस्कार’ है तथा क्षत्रिय व वैश्यों का यह वैदिक कर्म ब्राह्मण द्वारा होता है। कर्म की विधि यजमान के पुरोहित की शास्त्रानुसार होती है। उत्पन्न हुए पुत्र का विधि अनुसार संस्कार हुआ क्योंकि भगवान् ने अपने में पुत्र भाव प्रकट किया था, इसलिये वैदिक कर्म की सार्थकता एवं गर्भ के बीजसम्बन्ध के दोषों का भी, अभाव हुआ। यह जात कर्म संस्कार, नैमित्तिक था। वास्तव में यह सब भगवान् की लीला ही थी। यह सिद्धान्त है कि पितृदेवार्चन का तात्पर्य “नान्दी” श्राद्ध है। नन्दरायजी एवं यशोदाजी ने मिलकर शास्त्रानुसार यह जात कर्म संस्कार वैदिक मार्ग में अपनी निष्ठा दिखाने के लिये किया ॥ २ ॥

शुकाचार्यजी श्री नन्दरायजी को महामना कहते हैं उसका भाव आचार्यचरण बताते हैं कि परमोदार श्री नन्दरायजी ने अलंकृत दो लाख गौ देने का केवल सङ्कल्प नहीं किया, किन्तु दे दी। इसे बताने के लिये श्लोक में ‘प्रादात्’ पद दिया है। भगवत् सान्निध्य होने के कारण द्रव्य एवं क्रियाओं में कमी नहीं हुई। विप्र का अर्थ विशेष रीति से पूरक होने के कारण गोधन की भी कमी न हुई। गौ के अतिरिक्त रत्नों के समूह, सोने और वस्त्रों से आवृत तिल के पर्वतों का दान किया। अन्नों में तिल मुख्य है। ‘गौ, हिरण्य, वस्त्र, तिल, रत्न’ इन पाँचों पदार्थों का दान किया। ये सब प्रकार के दान देवसम्बन्धी हैं ॥ ३ ॥

बहुदत्तमिति—यदि ऐसा मनमें विचार आया कि श्रीनन्दरायजीने बहुत दान दिया तब समाधान करते हैं कि इतना देने पर भी श्रीनन्द बाबा के पास अभी बहुत है यह बात स्पष्ट करने के लिये कहते हैं कि **“शुद्ध्यर्थम्”** द्रव्यों की शुद्धि के लिये भी श्रीनन्दरायजी को इतना दान देना चाहिये यह बताते हुए दूसरों के समान कालादि के साथ नव द्रव्यों का निरूपण करते हैं कि **कालेनेति**—कालादि से प्राणी और सर्व पदार्थ शुद्ध होते हैं। नव प्रकार के द्रव्य शुद्धि करने वाले हैं, उनमें काल मुख्य है कारण कि सर्व पदार्थ काल द्वारा उत्पन्न होते हैं। **उत्पन्नः पुत्रः शतं**—उत्पन्न हुआ पुत्र सौ वर्ष पर्यन्त जीता है ऐसा वेद भगवान ने कहा है। इन सौ वर्ष के दस दशक बनते हैं उन प्रत्येक दशक के छत्तीस सौ दिनों का एक भाग अर्थात् दस दशक का एक दिवस अशुचि माना गया है। इस प्रकार सारी आयु के दस दशक के दस दिवस का काल अशुचि गिना जाता है। इसलिये संतान के जन्म के समय दस दिनों का आशौच शास्त्र ने बताया है। इसी प्रकार प्रत्येक द्रव्य का भाग भी अशुद्ध होता है। इन सब की अशुचिता कैसे निवृत्त हो सके उसको अब सूचित करते हैं। **“कालेन”** पद से कहते हैं कि जननाशौच की शुद्धि केवल स्नान से नहीं होती किन्तु दस दिन के काल से वैदिक कर्मों के लिये और सोलह दिन के काल से पुष्टिमार्गीय सेवादि कार्यों के लिये शुद्धि होगी। उसी तरह दस दिन का या सोलह दिन का काल वंश की शुद्धि करता है। शौच से देह का एक भाग शुद्ध होता है और स्नान से सर्वाङ्गशुद्धि होती है। लौकिक व्यवहार के लिए “काल-स्नान-शौच” यह तीन प्रकार की शुद्धि बताई। अब अदृष्ट आदि निमित्तों से बनी हुई अशुद्धि भी तीन प्रकार से निवृत्त होती है यह बताते हैं (१) **“संस्कारैः”**—बालक के जन्म समय किये जाने वाले “जातकर्मादि” संस्कारों से गर्भादि दोषों से संयुक्त ‘देह’ शुद्ध बन कर वैदिक यज्ञ यागादि वैदिक कर्मों के लिये अधिकारी बनता है। इनको पञ्चभूत संस्कारत्व ही कहते हैं। (२) **“तपसा”** तपश्चर्या करने से अन्तःकरण की पवित्रता होगी। कितने महानुभाव अदृष्ट की उत्पत्ति द्वारा अन्तःकरण की शुद्धि करते हैं। (३) **‘इज्या’** इज्या का अर्थ याग होता है, याग से भगवान् प्रसन्न होते हैं। आचार्यचरण आज्ञा करते हैं कि इसी प्रकार संस्कारों से आधिभौतिक के, तप से आध्यात्मिक के और यज्ञ से आधिदैविक के तीन संस्कार अर्थात् तीन प्रकार की शुद्धि बतायी। इसी प्रकार काल-स्नान-शौच-संस्कार-तप-यज्ञ आदि छह प्रकार के संस्कारों से सर्व अन्तः शुद्ध होते हैं।

बहिः शुद्धिमाह—अब बाहर की शुद्धि कहते हैं—‘शुध्यन्ति दानैः’ दान से ही द्रव्यों की शुद्धि होगी। तात्पर्य यह कि दान के बिना और किसी प्रकार से द्रव्य शुद्धि नहीं होती। दान में भी अपने वित्त के अनुसार ही दान करना चाहिये। श्रीनन्दबाबा नेद्रव्य की शुद्धि के निमित्त ही दो लाख गोप्रदान किया। दान देने मात्र से द्रव्य की शुद्धि नहीं मानी गयी लेकिन यदि अल्प द्रव्य प्राप्त हो तो उसकी शुद्धि सन्तोष से होगी। तात्पर्य यह है कि दान और सन्तोष दोनों को द्रव्य शुद्धि के हेतु बताये। ‘सोहमस्मि’ मैं ब्रह्म हूँ इस प्रकार के ज्ञान से याने आत्मविद्या से जीवात्मा शुद्ध होता है। आत्मविद्या से अविद्या की निवृत्ति हो जाने पर स्वरूप को समझ अपने कर्त्तव्य के योग्य बनता है।

महामना नन्दरायजी ने आनन्दविभोर बनकर परम उत्साह से पुत्रजन्म महोत्सव मनाया उसके बाद अन्य आवश्यक सर्व कार्य छोड़ कर, शीघ्र ही कंस को वार्षिक कर देने के लिये मथुराजी गये। इससे यह बात सिद्ध होती है कि श्रीनन्दजी के मन में दृढ़ निश्चय था कि यह बालक मुझसे उत्पन्न हुआ है और मेरा ही पुत्र है। यदि नन्दरायजी के मन में स्वल्प भी शंका

होती, तो इस प्रकार उदार होकर, पुत्र के लिये अमूल्य वस्तुएँ न मंगाते और न पुत्र को प्यार से उठाकर गोदी में लेते। ये सब बातें सिद्ध करती हैं कि नन्दजी की निश्चित बुद्धि थी कि यह मेरा ही पुत्र है। महान् पुरुषों का ऐसा निर्मल मन होता है जो कभी पराई चीजों को अपनी कभी भी नहीं समझते हैं यह प्रसिद्ध है ॥ ४ ॥

अब प्रकाशकार श्रीपुरुषोत्तमजी श्री सुबोधिनीजी में कहा हुआ "समानैः" पद का रहस्य खोलते हैं कि यह दान श्री नन्दरायजी के माहात्म्य का ख्यापक और शोधक होने से उचित है और वैसे ही अन्य शोधकों के सामान्याधिकरण (समान भाव) बताता है कि, यह इस द्रव्य का शोधक है, किन्तु आने वाले द्रव्य की शुद्धि के लिये दान का चिह्न है।

अब पुरुषोत्तमजी सौ वर्ष की आयु में दस दिन अशुद्ध हैं इसका स्पष्टीकरण करते हैं कि शत वर्ष का एक दसवां भाग दस वर्ष का होता है। प्रत्येक दस वर्ष का प्रथम एक दिन अशुद्ध है, इसी से एक साथ तो दस दिन अशुद्ध नहीं होते हैं तो जन्म के समय एक साथ दस दिन अशुद्ध क्यों मानते हो? इस प्रकार के संशय का समाधान करते हैं कि दस दस वर्ष में पहला एक दिन, साधारण मनुष्य नहीं गिन सकेगा और वैसे नियम से अव्यवस्था हो जायगी और कोई वह आशौच पालन नहीं कर सकेगा, अतः सब की सुविधा के लिये ऋषियों ने जन्म समय के साथ में ही दस दिन के आशौच की व्यवस्था की, जिससे सबको सुविधा हो गई। इसी प्रकार द्रव्य की भी व्यवस्था समझना, तात्पर्य कि छत्तीस सौ रुपये पर एक रुपया अशुद्ध समझना चाहिये, उसकी शुद्धि स्नान से नहीं किन्तु दान से होती है।

नन्दरायजी ने गौएँ और द्रव्य का इतना महादान किया, जिससे पता चलता है कि श्री नन्दरायजी के पास भी बड़ी समृद्धि थी।

श्री लेखकारजी आचार्यचरणों के **'एतेषां भूतसंस्कारत्वमेव'** का स्पष्टीकरण करते हैं कि जातकर्मादि संस्कार से देह की शुद्धि होती है, न कि अन्तःकरण और अन्तर्यामी की शुद्धि होती है। परंतु तप से अन्तःकरण की शुद्धि और यज्ञ से अन्तर्यामी की शुद्धि होती है। अन्तर्यामी की शुद्धि का तात्पर्य है कि, यज्ञ करने से, अन्तर्यामी प्रसन्न होता है।

'परमात्मा मे शुद्धयन्ताम् (१) इससे जाना जाता है कि श्रुति में भी, यही शुद्धि का स्वरूप है। इसका विस्तार तृतीय स्कन्ध के पाँचवे अध्याय में **'हृदिस्थितो यच्छति भक्तिपूते'** इस श्लोक की टीका में किया गया है।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं चतुर्भिरध्यायैः कृष्णजन्म निरूपितम्। अष्टाविंशतिभी रोधस्तामसानां निरूप्यते ॥ १ ॥
पञ्चमे जातकं कृत्वा नन्दो दातुं करं गतः। मथुरां वसुदेवेन सङ्गतश्चेति वर्ण्यते ॥ २ ॥

एवं 'तस्यां रात्र्यां व्यतीतायाम्' इत्यादिना कंसकृत उद्योगो निरूपितः। अथ व्रजे भगवज्जन्ममहोत्सवं निरूपयति–नन्दस्त्वित्यादिना। तुशब्देन वसुदेवान्नन्दे विशेषं सूचयति–भगवत्प्राकट्ये वसुदेवो जाताह्लादोऽपि कंसभिया सङ्कुचितमनाः, अत एव जातकर्मादिकं कर्तुं नाशक्नोत्। नन्दस्त्वात्मजे उत्पन्ने श्रीकृष्णे पुत्ररूपेण प्रादुर्भूते सति जाताह्लादः, अत एव महामनाः अतिविस्तृतमनाः दानादावत्युदारचित्तो दैवज्ञान् ज्योतिर्विदो विप्रान् आहूय स्वयं स्नातः, अत एव शुचिः। ततोऽलङ्कृतश्च सन्। 'वेदज्ञान्' इति पाठे तु "यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति" इति श्रुतेः सर्वदेवतासान्निध्यार्थं वेदविदामाह्वानं ज्ञेयम् ॥ १ ॥ ब्राह्मणैः स्वस्त्ययनं माङ्गलिकं सूक्तं वाचयित्वा आत्मजस्य पुत्रस्य जातकर्माख्यं संस्कारविशेषं विधिवत् कारयामास। वै इति सन्देहाभावाय। तथा विधिवत् पितृदेवार्चनं नान्दीश्राद्धादिकं च कारयामास। विधिवदित्यस्याग्रेऽपि यथोचितं सम्बन्धः ॥२॥ सम्यगलङ्कृते धेनूनां नवप्रसुतानां गवां नियुते द्वे लक्षे। तथा रत्नौघैः रत्नसमूहैः शातकौम्भेन सुवर्णेन अम्बरैः उत्तमवस्त्रैश्चावृतान् सप्तसङ्ख्याकान् तिलाद्रींश्च विप्रेभ्यः प्रादादित्यन्वयः। अद्रिपरिमाणं तु भविष्योत्तरे उक्तम्—'उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिर्मतः ॥ त्रिभिः कनिष्ठो राजेन्द्र तिलशैलः प्रकीर्तितः" ॥ द्रोणसङ्ख्या च—"खारी द्रोणाढकप्रस्था कुडवं च पलं पिचु। शाणको मासकश्चेति यथापूर्वं चतुर्गुणा" इति ॥ ३ ॥ ननु 'किमर्थं जातकर्मादिकरणम्' इत्यपेक्षायामाह—कालेनेति। यतः कालादिभिर्द्रव्याणि शुद्धयन्ति, यतश्चात्मविद्यया 'अहं ब्रह्मास्मि' इति साक्षात्कारेण भगवदुपासनया वा आत्मा जीवः शुद्धयति, अतो जातस्य पुत्रस्य विशुद्धयर्थं तत् सर्वं कृतवानित्याशयः। विशुद्धयर्थमित्युपलक्षणं भगवत्प्रसादादेः, 'विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च' इति वक्ष्यमाणत्वात्। तत्र कालेन भूमिपाषाणादीनां जन्ममरणादिप्रयुक्ताशौचवतां च शुद्धिः, स्नानेन देहस्य, शौचेन प्रक्षालनेन हस्तपादादिदेहावयवानां वस्त्रपात्रादीनां चामेध्यस्पृष्टानाम्, संस्कारैर्जातकर्माभिषेकादिभिः बालस्य राजादेश्च, तपसेज्यया च इन्द्रियाणां मनसश्च, दानैर्व्यवहारोपार्जितधान्यादिद्रव्याणाम्, मनसश्च, सन्तुष्टयाऽपि मनस इति विवेकः ॥ ४ ॥

अन्वितार्थप्रकाशिका

पञ्चमे तूत्सवं सूनोर्नन्दः कृत्वा प्रसन्नधीः ॥ मथुरां गतवांस्तत्र श्लोका द्वात्रिंशदीरिताः (३२) ॥
चत्वार्युवाचेति (४) पादहीना देवा (३२ ॥।) अनुष्टुभः ॥ ५ ॥

नन्दस्त्विति द्वयम् ॥ आत्मजे उत्पन्ने श्रीकृष्णे पुत्ररूपेण प्रादुर्भूते सति जाताह्लादः अत एव महामनाः दानादावत्युदारचित्तो नन्दस्तु दैवज्ञान् ज्योतिर्विदो विप्रान् आहूय स्वयं स्नातः अत एव शुचिः ततोऽलंकृतश्च सन् ब्राह्मणैः स्वस्त्ययनं वाचयित्वा स्वस्तिवाचनं कारयित्वा आत्मजस्य पुत्रस्य जातकर्माख्यं संस्कारविशेषं विधिवत्कारयामास । तथा ततः पूर्वं विधिवत् पितृदेवार्चनं नान्दीश्राद्धादिकं च कारयामास । अर्थक्रमेण पाठक्रमस्यागात् विधिवदित्यस्य अग्रेऽपि यथोचितं संबन्धः । अत्र प्रेमभक्ताः । यशोदाया द्विभुजः श्रीकृष्णः प्रादुर्भूतः स एव वासुदेवावतारः अत एवात्र आत्मज उत्पन्न इत्युक्तम् अन्यथा "नन्दस्तमात्मजं मत्वा" इति ब्रूयात् एवं स्थिते चतुर्भुजरूपाच्छादनाय देवक्या प्रार्थिते यशोदाहृदयस्थद्विभुजस्य तद्रूपाच्छादनपूर्वकं तत्रैवाविर्भाव आसीत् । स एवानीय वसुदेवेन पुनर्यशोदाशयने निहितः स एव व्रजादौ मधुपुर्यादौ च विजहार देवकीहृदयस्थचतुर्भुजरूपस्य तु तत्प्रार्थनयाऽन्तर्धानमेवासीत् । कृष्णस्य यशोदानन्दपुत्रत्वे खलु नैकद्वाः प्रयोगाः किंतु बहव एव । न ते सर्व एवामुख्यार्था भवितुमर्हन्ति । तथाहि "अदृश्यतानुजा विष्णोः" इति । "प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ।" इति नौमीड्य त इत्यादौ पशुपाङ्गजायेति "देहिनां गोपिकासुतः" इति । गौतमीये "बल्लवीनन्दनं वन्दे" इति क्रमदीपिकायामपि दैवतासकललोकमङ्गलो नन्दगोपतनयः समीरित इति मन्त्रेपि नन्दपुत्रत्वसुबलसखत्वगोपीकान्तत्वादीनि परःसहस्राणि वचनानीति प्राहुः ॥ १-२ ॥ धेनूनामिति ॥ सम्यगलंकृते धेनूनां नवप्रसूतानां गवां नियुते द्वे लक्षे नियुतं दशलक्षमिति मते विंशतिर्लक्षाणि तथा रत्नौघैः रत्नसमूहैः शातकौम्भैः सुवर्णरसाक्तैः अम्बरैश्चावृतान् इदं च मेरुसाम्याय सप्तसंख्याकान् तिलाद्रींश्च विप्रेभ्यः प्रादात् । उत्तमस्तिलाद्रिर्दशद्रोण इत्यादि ज्ञेयम् ॥ ३ ॥ संस्कारैरेव गर्भशुद्धिरित्यत्र दृष्टान्तानाह—कालेनेति ॥ कालेन भूम्यादिनूतनजलादिद्रव्याणि स्नानेन देहादिशौचेन क्षालनेन वस्त्रादिसंस्कारैर्गर्भादि तपसेन्द्रियादि इज्यया ब्राह्मणादि दानैर्धनधान्यादि सन्तुष्ट्या मनो द्रव्यम् एवमेतानि द्रव्याणि कालादिभिः शुद्ध्यन्ति आत्मा तु आत्मविद्ययैव ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं पंचमे नंदस्य पुत्रजातकर्म मथुरागमनं वसुदेवसमागमश्चोच्यते नंद इति अत्रात्मजशब्दप्रयोगस्तु नंदस्य स्वकीयपुत्रत्वप्रतीतेः न तु तदात्मजः कुतो भगवत्प्रणोदितेन वसुदेवेन नंदगृहं प्रापितत्वात् ॥१॥ तैः ज्योतिर्विद्भिर्विप्रैः ॥ २ ॥ नियुते द्वे लक्षे सप्ततिलगिरींश्च प्रादात् कथंभूतान् रत्नाघ्रातैः शातकौंभं सुवर्णं तत्तं तु युक्तैरंबरैर्वस्त्रैश्चावृतान् ॥ ३ ॥ गर्भादीनां शुद्धिप्रकारमाह कालेनेति । कालादिभिः द्रव्याणि शुद्ध्यन्ति कालेन वसुधादिद्रव्यं स्नानेन शरीरादि शौचेन प्रक्षालनेनामेध्यलेपादि संस्कारैर्गर्भादि तपसा इन्द्रियाणि इज्यया यज्ञेन ब्राह्मणादिदानैर्धनानि संतुष्ट्यासंतोषेण मनः आत्मविद्यया परमात्मोपासनेन जीवात्मज्ञानेन चात्मा एतैर्द्रव्याणां यथा शुद्धिस्तथा दानादि पुत्रजातकर्मादि संस्कारैरेव गर्भाणां शुद्धिरित्यर्थः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्दो महोत्सवं कृत्वा जातकं पञ्चमे शिशोः । मथुरामथ गत्वाऽऽप वसुदेवेक्षणोत्सवम् ॥ १ ॥

एवं 'तस्यां रात्र्यां व्यतीतायां' इत्यादिना मथुरायां जातः प्राभातिकवृत्तान्त उक्तोऽथ व्रजे जातं वृत्तान्तमाह । नन्द इत्यादिना तत आरभ्येत्यतः प्राक्तनेन ग्रन्थेन । नन्द इति । आत्मजे पुत्रे, उत्पन्ने सति, जातः आह्लाद आनन्दो यस्य सः । महदौदार्यप्रवणं मनो यस्य सः, नन्दः तु, दैवज्ञान् विप्रान् आहूय, स्नातस्तदुक्तप्रकारेण कृताप्लवः, अत एव, शुचिर्दानाधिकारतां प्राप्तः, अलंकृतश्च, आसीत् ॥ १ ॥ वाचयित्वेति । ततः, स्वस्त्ययनं माङ्गलिकं सूक्तं, वाचयित्वा, विधिवद्यथाविधि, आत्मजस्य जातकर्म कारयामास । तथा, पितरश्च देवाश्च तेषामर्चनं, कारयामास वै ॥ २ ॥ धेनूनामिति । ततः, समलंकृते वस्त्राभरणादिना सम्यगलंकृते, धेनूनां नियुते द्वे लक्षे, विप्रेभ्यः, प्रादात् प्रायच्छत् । तथा, रत्नौघा रत्नसंघाश्च शातकौम्भाम्बराणि सुवर्णरजताङ्कवस्त्राणि च तैरावृतास्तान्, सप्त, तिलाद्रीन् तिलपर्वतान् अपि, प्रादात् । अत्र तिलग्रहणं सप्त धान्योपलक्षणमत एव सप्तेत्युक्तम् । एतेषां सप्तधान्यकृतसप्ताद्रीणां विरचनप्रकारस्तु सत्सङ्गिजीवनीयतृतीयप्रकरणगतजयाकृततद्दानप्रकरणतोऽवगन्तव्यः ॥ ३ ॥ हिरण्यादिद्रव्याणां मध्ये केषांचिद्दानादिभिरेव यथा शुद्धिस्तथाऽन्नदानादियुक्तजातकर्मादिसंस्कारैरेव गर्भाणां शुद्धिरिति दर्शयितुं प्रतिनियतानि शोधकानि दृष्टान्तत्वेनोदाहरति । कालेनेति । यथा, कालेन दशदिनात्मकेन, गेहभूम्यादिः शुद्ध्यति, स्नानं च शौचं च ताभ्यां, तत्र स्नानेन देहादिः शुद्ध्यति । शौचेनामेध्यलिप्तादिः शुद्ध्यति । तपसा इन्द्रियादिः शुद्ध्यति । इज्यया ब्राह्मणादिः शुद्ध्यति । दानैः द्रव्याणि शुद्ध्यन्ति । संतुष्ट्या मनः शुद्ध्यति । आत्मा आत्मविद्यया परमात्मोपासनया शुद्ध्यति । तथा संस्कारैर्जातकर्मादिभिः, गर्भादेः शुद्धिः ॥ ४ ॥

श्रीहरिसूरिविरचित श्रीभक्तिरसायनम्

धेनूनामिति : १०.५.३.

हरौ प्राप्ते साक्षादतनुफलदानादिमगुरौ किमाश्चर्यं पश्चादतनुत स नन्दो वितरणम् ।
यदीयप्राप्त्याशा हृदि समुदिता यस्य कुरुते स चाप्यस्मिन् लोके तदधिकमुदारो वितरणम् ॥ १ ॥
यदङ्घ्र्यब्जं संसृत्युदधितरणिर्यस्य नयनं तमस्तोमध्वंसी तरणिरिह तस्मिंस्त्वयि गृहे ।
उपेत्याराम्नन्दः स च वितरणित्वं यदुपते सुखाब्धौ मग्नोऽभूच्चरितमिति चित्रं तव विभो ॥ २ ॥

कृष्णप्रिया

श्री शुकाचार्यजी ने कहा राजन् श्री नन्दरायजी तो पुत्र जन्म होने पर अत्यन्त प्रसन्न हुए स्वयं परम उदार मना बनकर वेदों वेद जानने वाले विप्रों को वाहन भेजकर निमंत्रित किये पुनः नैमित्तिक कर्माङ्ग स्नान किया, आभूषण पहन कर तैयार हुए और स्वयं पवित्र ऐसे श्री नन्दरायजी ने स्वस्ति पुण्याहवाचन पढ़वा कर पुत्र का जातकर्म संस्कार तथा पितृओं और देवताओं का विधिपूर्वक अर्चन कराया ॥ १-२ ॥ अच्छी तरह से अलंकृत दो लाख गौ एवं रत्न समूह सहित जरी के वस्त्रों से वेष्टित सात तिलों के पर्वत विप्रवरों को दान में दिये ॥ ३ ॥ काल, स्नान, शौच, संस्कार, तप और यज्ञ से प्राणी शुद्ध होते हैं, दान से द्रव्य शुद्ध होता है, और संतोष से अन्तःकरण की तथा आत्मविद्या से आत्मा की शुद्धि होती है ॥ ४ ॥

सौमङ्गल्यगिरो विप्राः सूतमागधवन्दिनः । गायकाश्च जगुर्नेदुर्भेर्यो दुन्दुभयो मुहुः ॥ ५ ॥
व्रजः सम्मृष्टसंसिक्तद्वाराजिरगृहान्तरः । चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ॥ ६ ॥
गावो [1]वृषाश्च वत्साश्च हरिद्रातैलरूषिताः । विचित्रधातुबर्हस्रग्वस्त्रकाञ्चनमालिनः ॥ ७ ॥
महार्हवस्त्राभरणकञ्चुकोष्णीषभूषिताः । गोपा समाययू राजन् नानोपायनपाणयः ॥ ८ ॥
गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवम् । आत्मानं भूषयांचक्रुर्वस्त्राकल्पाञ्जनादिभिः ॥ ९ ॥
नवकुङ्कुमकिञ्जल्कमुखपङ्कजभूतयः । बलिभिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥ १० ॥
गोप्यः सुमृष्टमणिकुण्डलनिष्ककण्ठ्यश्चित्राम्बराः पथि शिखाच्युतमाल्यवर्षाः ।
नन्दालयं सवलया व्रजतीर्विरेजुर्व्यालोलकुण्डलपयोधरहारशोभाः ॥११॥
ता आशिषः प्रयुञ्जानाश्चिरं [2]पाहीति [3]बालके । हरिद्राचूर्णतैलाद्भिः सिञ्चन्त्यो जनमुज्जगुः ॥१२॥

कर्दमक्षमा

अन्वयः—विप्राः सूतमागधवन्दिनः सौमङ्गल्यगिरः गायकाः च जगुः, भेर्यः दुन्दुभयः मुहुः नेदुः ॥ ५ ॥ सम्मृष्टसंसिक्तद्वाराजिरगृहान्तरः व्रजः (अभवत्) चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः (व्रजः समलङ्कृतः) ॥ ६ ॥ हरिद्रातैलरूषिताः विचित्रधातुबर्हस्रकवस्त्रकांचनमालिनः गावः वृषाः च वत्साः च (सुशोभिताः) ॥७॥ राजन् महार्हवस्त्राभरणकञ्चुकोष्णीषभूषिताः नानोपायनपाणयः गोपाः समाययुः ॥ ८ ॥ यशोदायाः सुतोद्भवम् आकर्ण्य गोप्यः च (तत्रागन्तुकाः) मुदिताः वस्त्राकल्पाञ्जनादिभिः आत्मानं भूषयांचक्रुः ॥९॥ नवकुङ्कुमकिञ्जल्कमुखपंकजभूतयः पृथुश्रोण्यः चलत् कुचाः बलिभिस्त्वरितं जग्मुः ॥१०॥ सुमृष्टमणिकुण्डलनिष्ककण्ठ्यः च चित्राम्बराः पथि शिखाच्युतमाल्यवर्षाः व्यालोलकुण्डलपयोधरहारशोभाः सवलयाः नन्दालयं व्रजतीः गोप्यः विरेजुः ॥ ११॥ ताः चिरं पाहि इति बालके आशिषः प्रयुञ्जानाः हरिद्राचूर्णतैलाद्भिः सिञ्चन्त्यः जनम् उज्जगुः ॥१२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सौमंगल्यगिरः स्वस्तिवाचका विप्रादयो बभूवुः । तत्र "सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः ॥ बंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥" इति ॥ ५ ॥ संमृष्टानि संसिक्तानि च द्वारादिकानि यस्मिन्सः । तत्र अजिराण्यंगणानि गृहांतराणि गृहमध्यानि च यस्मिन्स तथा । चित्रध्वजेषु पताकानां स्रजश्च चैलपल्लवतोरणानि च तैर्भूषितः ॥ ६ ॥ हरिद्रातैले रूषिता लिप्ताः । विचित्रा धातवश्च बर्हस्रजश्च वस्त्राणि च कांचनमालाश्चालंकारतया विद्यते येषां ते । तथाभूता गवादयो बभूवुरित्यर्थः ॥ ७-८ ॥ आकल्पा अलंकाराः ॥ ९ ॥ नवकुंकुमकिंजल्कैर्मुखपंकजेषु भूतिः श्रीर्यासां ताः ॥ १० ॥ सुमृष्टान्युज्ज्वलितानि मणिमयानि

---

[1] वृषा वत्सतरा–श्रीधर. वंशी. गिरि. भक्त; वृषाः सवत्साश्च हरि–इति कस्यचित् । [2] जीवेति–इति कस्यचित् । [3] पालके–इति कस्यचित् ।

कुंडलानि यासां ताः । निष्काः पदकानि कंठेषु यासां ताश्च । शिखाभ्यश्च्युतानि माल्यवर्षाणि यासां ताः नंदालयं व्रजतीर्व्रजंत्यः पथि विरेजुः । सवलयाः कंकणभूषिताः । व्यालोलैः कुंडलादिभिः शोभा यासां ताः ॥ ११ ॥ जनं सिंचंत्यः अजनमुज्जगुरिति वा ॥ १२-१४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वकृतस्तुतिपाठकाः सूताः । परकृतस्तुतिजीविनो मागधाः । प्रबंधस्तुतिपाठिनो वंदिन इति ॥५॥ संमृष्टानि संमार्जितानि । तोरणं द्वारबर्हिर्भागः 'तोरणोऽस्त्री बहिर्द्वारम्' इत्यमरः । पताकानां स्रजः पंक्तयः । भूषित इति शेषः ॥ ६ ॥ बर्हस्रजः शिखिपिच्छमालाः । इत्यर्थ इति । क्रियाशेषेणान्वयः कार्य इति तात्पर्यम् ॥ ७ ॥ कंचुकं चोलकं शिरो विहाय सर्वांगावरकं वस्त्रम् "कंचुको वारबाणे स्यान्निर्मोके करभेपि च । वर्द्धापकगृहीतांगस्थितवस्त्रे च चोलके" इति मेदिनी । उष्णीषं शिरोवेष्टनवस्त्रम "उष्णीषं तु शिरोवेष्टे किरीटे लक्षणांतरे" इति च ॥ ८ ॥ "आकल्पः कल्पने वेशेऽलंकारे शक्तिमत्तरे" इति धरणिः । आदिना चंदनादिग्रहः ॥ ९ ॥ नवकुंकुमकिंजल्काः नूतनकेशरपत्राणि । बलिभिः स्वर्णरत्नादिभिर्युताः पृथुश्रोण्यो विशालकटितटाः अपि हर्षौत्सुक्याद्वेगेन जग्मुरिति भावः ॥ १० ॥ वर्णिता अपि गोपीर्भक्तिभरेणातृप्त्या वर्णयति व्रजतीः प्रथमार्थे द्वितीया ॥ ११ ॥ किमुज्जगुरित्यपेक्षानिवृत्तयेऽजनं श्रीकृष्णमित्यर्थांतरम् । ता गोप्यो बालके इत्याशिषं प्रयुंजाना इति किम् । राजपुत्रत्वाद्राजा भूत्वा चिरं पाहीति । परस्येष्टार्थप्रशंसनमाशीः' इति लक्षणात् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भेर्य आनकभेदाः सुषिरभेदाश्च दुन्दुभयश्च आनकभेदाश्च युग्मत एव हस्ताभ्यां काष्ठीद्वयेन वाद्यन्ते ते नेदुः स्वयमेव मुहुरित्यस्य सर्वैरन्वयः हर्षभरेण तेषां तत्र तत्राऽतृप्तेः ॥ ५ ॥ संशब्दाभ्यामन्यदिनतो विशेषो बोध्यते चैलानि खण्डितवस्त्राणि अन्यत्तैः तत्र पताकानां स्रजो मालाकारेण सन्निवेशाः भूषित इत्यध्याहारात् यद्वा स्रजः पुष्पमालाः चित्राणि विविधानि यानि ध्वजादीनि तैः सममन्यत् ॥ ६ ॥ चकारौ पूर्वकैमुत्यप्रतिपादिकौ तेन महिष्यादयोऽप्युपलक्ष्यन्ते वृषा वत्सतरा इति पाठः क्वचित् ॥७॥ तदेवं सर्वस्यैव गोकुलस्य श्रीनन्दयशोदे प्रति परममनुरागं दर्शितवान् दर्शयति च—महार्हेति सप्तभिः । सम्यगाययुरिति स्वस्वगृहे तत्तन्मङ्गलरचनां प्रवर्त्यैवाययुरित्यर्थः व्रजः संमृष्टेत्युक्तत्वात् सम्यक्त्वमेव दर्शयति परमहर्षव्यञ्जकाभ्यां महदित्यादिविशेषणाभ्यां महार्हैर्बहुमूल्यैर्निधिवत् गृहान्तः सुरक्षितैरपि वस्त्रादिभिर्भूषिताः सन्तः यान्येव परमोल्लासेन दास्यन्ते च नानोपायनैर्महार्हरत्नादिभिर्युक्ताः पाणयो येषां ते राजन्निति श्लेषेण हे प्रेम्णाविराजमान यद्वा राजदित्युपायनविशेषणं गोपा इति गवासक्त्या तत्स्वभावमापन्नया जात्यैव सुस्निग्धचित्ता इति भावः । श्लेषेण तत्र च तादृशतत्प्रेम्णा गां पृथ्वीमपि पान्तीति एवमग्रेपि ॥८॥ गोप्यः श्रीयशोदाया मातृभूतयः चशब्द उक्तसमुच्चये ततो गोपा आकर्ण्येति पूर्वेणाप्यन्वयः आसां पश्चाद्भावोऽन्तःपुरवासात् मुदिता इत्यनेन तेभ्योऽपि मोदविशेषं दर्शयति—यशोदायाः व्रजयशःप्रदाया अनपत्यायाः श्रीव्रजेश्वर्याः सुतस्य उद्भवमुत्पत्तिमाकर्ण्यैव मुदिताः तस्यां तस्मिंश्च नित्यसहजप्रेमसद्भावात् अत एव वस्त्रादिभिः आत्मानमभूषयन् ॥ ९ ॥ नवकुङ्कुमाकिञ्जल्कादपि मुखपङ्कजानां भूतिः शोभा यासामिति तदानीमनुरागावेशेन मुखशोभातिशय उक्तः किञ्च बलिभिः महारत्नादिमयैरक्षतपात्राद्युपहारैः सह तान् गृहीत्वेत्यर्थः मोदविशेषमेवाह—त्वरितमित्यादिना । पृथुश्रोण्योऽपि त्वरितं जग्मुः तत्र चलत्कुचा इत्यतिशयस्य लक्षणं सर्वं चोत्कण्ठातिशयस्येति ज्ञेयम् ॥ १० ॥ भक्तिविशेषेण पुनस्ता एव वर्णयति—गोप्य इति । शिखाः धम्मिल्लाग्राणि नन्दालयं व्रजन्त्य एव विशेषतो रेजुरिति तासां देहादिशोभाशतसम्पत्तौ सत्यामपि श्रीनन्दनन्दनप्रेमसम्बन्धेनैव विशेषतः शोभेति भावः ॥ ११ ॥ चिरं पाहीति तासामत्युल्लासोक्तिः तया च तस्य सार्वदिकीं सर्वसम्पत्तिमात्मना सङ्गतिमात्मनि प्रीतिं चाशासत अल्पार्थे कः अत्यन्तबाल्यात् बालक इति तदानीं तस्मिन् तदेवोचितमिति भावः । यद्वा बालकेऽपि ततश्च प्रेमस्वभावादेवेति अजनं भगवन्तमुज्जगुः उच्चैर्मङ्गलगीतप्रबन्धेन बालकमङ्गलार्थं तमकीर्त्तयन् जीवेति पाठस्तु तासामतिकारुण्योक्तिः उपलक्षणं चैतत्सर्वेषाम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

भेर्य्य आनकभेदाः शुषिरभेदाश्च । दुन्दुभयश्च आनकभेदा युग्मतयैव हस्ताभ्यां कोषद्वयेन वाद्यन्ते; ते नेदुः स्वयमेव; मुहुरित्यस्य सर्व्वैरन्वयः,—हर्षभरेण तेषां तत्र तत्रातृप्तेः ॥ ५ ॥

सं—शब्दाभ्यामन्यदिनतो विशेषेण सम्मार्ज्जनादिकं बोध्यते । चैलानि खण्डितवस्त्राणि । अन्यत्तैर्व्याख्यातम् । तत्र भूषित इत्याध्याहारात् , किंवा विशेषणे तृतीया; यद्वा, स्रजः पुष्पमालाश्चित्राणि विविधानि ध्वजादीनि तैः । सममन्यत् ॥ ६ ॥

च—कारयोरेक उक्तस्य समुच्चये, अन्योऽनुक्तस्य; तेन महिष्यादयोऽप्युपलक्ष्यन्ते ॥ ७ ॥

सम्यगाययुरिति सनाक्त्वमेव दर्शयति—महार्हेत्यादिविशेषणाभ्याम्—महार्हैर्बहुमूल्यैरुत्सवार्थं गृहान्तःसुरक्षितैर्वस्त्रादिभिर्भूषिताः सन्तः । हे राजन्निति राजगृहोत्सवे प्रजागमनप्रकारवृत्तं भवता ज्ञायत एवेति किं तद्विवरणेनेति भावः । यद्वा, राजन्ति शोभमानानि नानाविधोपायनानि पाणिषु येषां ते । गोपा इति प्रकृत्यैव सुस्निग्धचित्ताः, श्लेषेण गां पृथ्वीं पान्ति भगवद्भक्तिविस्तारणेन रक्षन्तीति गोपाः । अतस्तादृश-सद्वेशादिना भगवन्महोत्सवे सम्यगागमनं युक्तमेवेति भावः । एवमग्रेऽपि ॥ ८ ॥

च शब्दस्त्वर्थे पूर्वतो वैशिष्ट्यार्थ; तदेव दर्शयति यशोदाया व्रजयशःप्रदाया अनपत्याया व्रजेश्वर्याः सुतस्योद्भवमुत्पत्तिमाकर्ण्यैव मुदितास्तस्मिन् नित्यसहजप्रेमसद्भावादत एव वस्त्रादिभिरात्मानमभूषयन्। आदि-शब्दान्माल्यानुलेपादयः। आत्मशब्दप्रयोगस्तासां सच्चिदानन्दविग्रहत्वेन तत्त्वतो देहस्य देहितुल्यत्वेन भेदाभावाभिप्रायेण ॥ ९ ॥

'किञ्च, नवेति तैर्व्याख्यातम्' तत्र नवकुंकुमकिञ्जल्कैर्भूषितमुखपंकजाः सत्य इत्यर्थ इति। यद्वा, नवकुंकुमकिञ्जल्कस्येव मुखपंकजानां भूतिः शोभा यासामिति गौरांगीणामप्यनुरागावेशेन मुखपद्मानां रागोत्पत्त्या शोभातिशय उक्तः। किञ्च, बलिभिर्बलवद्भिः परिजनैः सहायैरिति त्वरितगमनसाधनम्; बलिभिर्बलित्रयेण विशिष्टा इति वा। यद्वा, अक्षतपात्राद्युपहारैः सह तान् गृहीत्वेत्यर्थः। पृथुश्रोण्योऽपि चलत्कुचाः सत्य इति त्वरितगमनलक्षणम्; यद्वा, कुचानामपि पृथुत्वात्त्वरितगमनासामर्थ्येऽपि त्वरित जग्मुरित्यर्थः ॥ १० ॥

भक्तिविशेषेण पुनस्ता एव वर्णयन्ति-गोप्य इति। शिखा धम्मिल्लाग्राणि अन्यत्तैर्व्याख्यातम् यद्वा, पथि शिखाभ्यश्च्युतमाल्यवर्षाः, त्वरितगमनात् किञ्च, व्यालोलेति व्यालोलैः कुण्डलैः पयोधरवर्त्तिभिर्हारैश्च शोभा यासाम्; नन्दालयं व्रजन्त्य एव विशेषतो रेजुरशोभन्तेति तासां देहादिशोभागतसम्पत्तौ सत्यामपि श्रीनन्दनन्दनप्रेमसम्बन्धेनैव विशेषतः शोभेति भावः ॥ ११ ॥

चिरं पाहीत्युक्तिः पाहीत्युक्तिचातुर्य्येण तस्य दीर्घायुष्ट्वमात्मविषयक-कारुण्यादिकञ्च प्रार्थयन्ते। अल्पार्थे कः अत्यन्तबाल्याद्बालक इति तदानीं तस्मिन् तदेवोचितमिति भावः। यद्वा, बालकेऽपि ततश्च बन्धुस्वभावादेवेति; वस्तुतस्तु बालः 'कः' ब्रह्मापि यस्येति परमेश्वरत्वात्। सदास्मान् रक्ष, कदापि न परित्यजेति। अजनं भगवन्तमुज्जगुरुच्चैर्गाथाबन्धेन तन्नामान्यकीर्त्तयन् भगवद्गीतान्यगायन्निति वा, अजनामेति लौकिकजन्माभावेऽपि श्रीयशोदायामुद्भवेन तासामुद्गान-प्रीतिभरहेतुः सूचितः। जीवेति पाठे काश्चित् पितृव्यपत्न्याद्या वृद्धाश्च 'चिरं जीव' इत्याशिषः प्रयुञ्जाना बभूवुः अन्याश्चोज्जगुरिति ज्ञेयम् ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आकल्पो भूषणम् ॥ ९–१० ॥ कुण्डलं कर्णभूषणं निष्कं कण्ठाभरणं सवलयः सोपहाराः ॥ ११–१९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा विप्राः सौमङ्गल्यगिरः स्वस्तिपाठका बभूवुः सूतादयो गायकाश्च जगुः पुराणादीनीति शेषः। तत्र सूताः पौराणिका मागधाः वंशावलीपाठकाः वन्दिनः स्तुतिपाठकाः भेर्यो दुन्दुभयश्च मुहुर्मुहुर्नेदुः ॥ ५ ॥ संमृष्टानि सम्मार्जिन्या शोधितानि संसिक्तानि चन्दनोदकादिभिः सम्यक् स्नापितानि द्वाराजिराण्यङ्गणानि गृहान्तराणि गृहमध्यानि च यस्मिन् तथाभूतो व्रजो बभूव तथा विचित्रध्वजादिभिरलङ्कृत इति शेषः। ध्वजादीनामितरेतरयोगद्वन्द्वः चित्रपदं प्रत्येकान्वयि द्वन्द्वादौ श्रुतत्वात् ॥६॥ गवादयो हरिद्रातैलाभ्यां रूषिताः उपलिप्ताः विचित्राः गैरिकादिधात्वादयः एषां सन्तीति तथाभूता बभूवुः तत्र बर्हस्रजो मयूरपिञ्छमालाः महार्हाण्यनर्घाणि वस्त्रादीन्येव भूषणान्यलङ्कारा येषां भूषिता इति पाठे तैर्भूषिता अलङ्कृताः उपायनानि पाणिषु येषां तथाभूता गोपाः हे राजन् समाययुराजग्मुः ॥ ७–८ ॥ तथा गोपानां स्त्रियोऽपि यशोदायाः सुतोद्भवमाकर्ण्य मुदिता हृष्टाः वस्त्रादिभिरात्मानमलञ्चक्रु आकल्पा भूषणानि आदिशब्देन चन्दनलेपादिसङ्ग्रहः ॥ ९ ॥ नवाः कुङ्कुमकिञ्जल्का येषु तेषां मुखपङ्कजानां भूतिः श्रीः शोभा यासां ताः कुङ्कुमानां किञ्जल्कत्वरूपणेन मुखानां पङ्कजत्वरूपणं पुष्कलं पृथुश्रोण्यः पृथुजघनाः चलन्तौ कुचौ यासां ता बलिभिरुपायनैः सहिताः त्वरितं यथा तथा जग्मुः ॥ १० ॥ संमृष्टानि निर्मलीकृतानि मणिकुण्डलानि यासां ताश्च निष्काः पदकाख्यभूषणानि कण्ठं यासां ता इति बहुव्रीहिद्वयगर्भकर्मधारयः चित्राण्यम्बराणि यासां पथि शिखाभ्यः च्युतानां गलितानां माल्यानां पुष्पाणां वृष्टयो यासां व्यालोलानां गतिरभसेन चलतां कुण्डलादीनां शोभा यासां ताः वलयैः सहिताः नन्दस्याऽऽलयं प्रति व्रजतीर्व्रजन्त्यः विरेजुः ॥ ११ ॥ ता गोप्यः पाहीत्यस्मानिति शेषः। बालके आशिषः प्रयुञ्जानाः हरिद्रातैलचूर्णैर्हरिद्रायास्तैलमिश्रचूर्णैरद्भिश्च यद्वा हरिद्रया तलेन चूर्णैः सुधाख्यद्रव्यचूर्णैरद्भिर्दधिमिश्रोदकैश्च परस्परं जनं सिञ्चंत्य उज्जगुः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

स्वकृतस्तुति पाठकाः सूताः परकृतस्तुतिजीविनो मागधाः प्रबन्धस्तुतिपाठका वन्दिनः ॥ ५ ॥ द्वारञ्च अजिरं च गृहान्तरञ्च द्वाराजिरगृहान्तराणि संमृष्टानि संशोधितानि संसिक्तानि चन्दनजलादिना प्रोक्षितानि द्वारादीनि यासां तास्तथा चित्रध्वजपताकया सकचैलपल्लवैश्चैव युतास्तोरणा यासां तास्तथा ॥ ६ ॥ विचित्रधातवः बर्हस्रजः पिञ्छमालावस्त्राणि कांचनमालाश्च येषां सन्तीति विचित्रधातुबर्हस्रग्वस्त्रकाञ्चनमालिनः॥७॥महार्हाणि महायोग्यानि वस्त्राणि आभरणानि कञ्चुकानि कवचानि उष्णीषाणि शिरोवेष्टनवस्त्राणि भूषणानि येषां ते तथा ॥ ८ ॥ आकल्प आभरणम् ॥ ९ ॥ नवकुङ्कुमकिञ्जल्कानि अभिनवकुंकुमकेसराणीव मुखपङ्कजभूतयः मुखकमलश्रियो यासां तास्तथा बलिभिर्युताः पृथुश्रोण्यः विशालकटितटाः ॥ १० ॥ व्रजतीः व्रजन्त्यः लोलत्वं कुण्डलादीनां गमनविशेषेण सवलयाः सकटकाः सापाङ्गनयनाः ॥ ११ ॥ हरिद्रातैलचूर्णाद्भिर्जनं सिञ्चंत्यः अजनं कृष्णमिति केचित् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नवेति अत्युल्लासात् नवकुङ्कुमकिञ्जल्कादपि मुखपङ्कजभूतिः यासां बलिभिरुपहारैः सह ॥ १०–११ ॥ पाहीत्युल्लासेनाशीः जीवेति पाठस्त्वतिकारुण्येन अजनं श्रीविष्णुं मङ्गलार्थम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदा विप्राः सौमङ्गल्यगिरः सौमङ्गल्यं गीर्षु येषां ते शुभाशीर्वादका बभूवुः सूतादयो जगुः—

"सूताः पौराणिका प्रोक्ताः मागधाः वंशशंसकाः । बन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः" ॥ ५ ॥

आदौ सम्यक् मृष्टानि पश्चात् चन्दनपुष्पादिरसैः संसिक्तानि द्वाराण्यजिराण्यङ्गणानि गृहमध्यानि च यस्मिन् सः चित्रध्वजपताकाभ्यां तथा चित्राणां स्रजां चैलानां चेलखण्डानां पल्लवानां चेति त्रिविधैस्तोरणैर्विभूषितोऽभूदिति शेषः ॥ ६ ॥ रूषिता लिप्ताः ॥ ७–८ ॥ गोप्यः श्रीयशोदाया यातृप्रभृतयः ॥ ९ ॥ नवकुङ्कमकिञ्जल्कादपि मुखपङ्कजे भूतिः शोभा यासां ता बलिभिः स्वर्णमुद्रारत्नहारानर्घवस्त्रनारिकेलादिफलाक्षतदूर्वाचन्दनपुष्पमालाद्यैः स्वर्णपात्रस्थैः स्वर्णरसरञ्जितवस्त्राच्छादितैर्वामपाणिगृहीतैः सहिता इत्यर्थः । पृथुश्रोण्योऽपि त्वरितं जग्मुः हर्षौत्सुक्यावेगवशात् ॥ १० ॥ वर्णिता अपि ताः पुनर्भक्तिभरेणातृप्त्या वर्णयति–गोप्य इति । शिखा धम्मिल्लाग्राणि व्रजतीर्व्रजन्त्यः ॥ ११ ॥ सूतिकान्तर्गृहं प्रविश्य चिरं पाहीति राजपुत्रत्वेन राज्ञाभूत्वेति भावः । जीवेति पाठे वात्सल्यकामरूपोदयः ततो बहिर्निस्सृत्य हरिद्रादिभिः परस्परं जनं सिञ्चन्त्य उच्चैर्जुगुः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदा विप्रादयः सौमङ्गल्यगिरो बभूवुः गायकाश्च जगुः भेर्यो दुन्दुभयश्च नेदुः मुहुरिति सर्वत्रान्वेति ॥ ५ ॥ किञ्च सम्मृष्टानि मार्ज्जन्यादिभिः शोधितानि संसिक्तानि सुगन्धोदकैस्स्नापितानि च द्वाराणि अजिराण्यङ्गणानि अन्तराणि गृहान्तराणि च यस्मिन् तथा चित्रैः ध्वजादिभिर्भूषित इति शेषः व्रजो बभूव ॥ ६ ॥ हरिद्रातैलाभ्यां रूषिताः उपलिप्ताः विचित्राः नानावर्णाः धातवः गैरिकादयः बर्हस्रजः मयूरपिञ्छमालाश्च वस्त्राणि च काञ्चनमालाश्च विद्यन्ते येषां ते तथाभूता बभूवुः ॥ ७ ॥ महार्हैर्बहुशुल्कैर्वस्त्रादिभिर्भूषिताः अलङ्कृताः नानाविधानि उपायनानि पाणिषु येषां ते ॥ ८ ॥ आकल्पाः अलङ्काराः आदिना ताम्बूलसुगन्धादिसङ्ग्रहः ॥ ९ ॥ नवकुङ्कुमकिञ्जल्कैः मुखपङ्कजेषु भूतिः श्रीर्यासां ताः बलिभिरुपायनैः सहिताः त्वरितं जग्मुः ॥ १० ॥ सुमृष्टमणिकुण्डलाश्च ताः निष्ककण्ठ्यश्च शिखाभ्यश्च्युतं माल्यवर्षं यासां ताः वलयैः कङ्कणैः सहिताः व्यालोलैः कुण्डलादिभिः शोभा यासां ताः नन्दालयं व्रजतीः व्रजन्त्यः पथि विरेजुः ॥ ११ ॥ हरिद्राचूर्णतैलाद्भिः परस्परं सिञ्चन्त्यः बालके श्रीनन्दनन्दने आशिषः प्रयुञ्जानाः अजनं विष्णुमुज्जगुः ॥ १२–१४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तदा विप्राः सौमङ्गल्यगिरः आशीर्वादका बभूवुः सूतादयश्च जगुः नन्दनृपसिंहद्वारि चन्द्रशालायां भेर्यो दुन्दुभयश्च मुहुर्नेदुर्महोत्सवावसरत्वात् ॥ ५ ॥ आदौ संमृष्टानि पश्चाच्चन्दनोशीरपद्मीरनीरैः सिक्तानि द्वाराण्यजिराणि चत्वराणि गृहान्तराणि भवनमध्यानि च यस्मिन् स व्रजः चित्राभ्यां ध्वजपताकाभ्यां तथा चित्राणां स्रजां चैलानां वस्त्रखण्डानां पल्लवानां च तोरणैः चन्दनमालाभिर्विभूषितो बभूवेति शेषः ॥ ६ ॥ गवादीनां शोभामाह गाव इति । हरिद्रामिश्रतेन तैलेन रुषिताः शृङ्गेषु लिप्ता विचित्रा धातवश्च बर्हस्रजः पिञ्छमालाश्च विचित्राणि वस्त्राणि च काञ्चनमालाश्च विद्यन्ते अलङ्कारतया येषां तादृशा गवादयो बभूवुरित्यर्थः ॥ ७ ॥ महार्हैर्बहुमूल्यैर्वस्त्रादिभिर्भूषिताः सन्तः गोपाः श्रीनन्दराजसमकक्षाः प्रभया सुरपतिमप्यूनयन्तः नानाविधान्युपायनानि महार्हरत्नादीनि प्राणिषु येषां ते गृहीतोचितवलय इत्यर्थः ॥ ८ ॥ गोप्यः श्रीव्रजेश्वरीसमकक्षास्तद्यातृप्रभृतयः वस्त्रादिभिरात्मानं भूषयाञ्चक्रुः परिहितविचित्रचीनवसनाः धृतमणिकुन्तलहारवलयनूपुराः पृथुमुक्ताढ्यविशोभमाननासाग्रा कज्जलरेखारञ्जितनेत्राः प्रभान्यग्भावितशाचीकास्ता इत्यर्थः ॥ ९ ॥ नवात् कुङ्कुमात् किञ्जल्कात् पद्मकेसरादपि मुखपङ्कजेषु भूतिः शोभा यासां ताः बलिभिरुपायनैः स्वर्णमुद्रारत्नहारार्घ्यवस्त्रनारिकेलफलाक्षतदूर्वाचन्दनपुष्पस्रगादिभिः कनकपात्रस्थैश्चित्रवस्त्राच्छादितैर्वामपाणिधृतैः सहिता आजग्मुः त्वरयागमनेन चलत्कुचाः ॥ १० ॥ वर्णिता अपि ता भक्तिभरेण वितृप्तेः पुनर्वर्णयति गोप्य इति । सुमृष्टमणिकुन्तलाश्च निष्ककण्ठ्यश्च रत्नपदकशोभितवक्षस इत्यर्थः । शिखाधम्मिलाग्राणि तेभ्यश्च्यूतानि माल्यानि वर्षन्तीति ताः गतिप्रसन्नाः शिखाः पादेभ्यो माल्यानि ददुरित्युत्प्रेक्ष्यते व्रजतीर्व्रजन्त्यः नन्दस्यालयमिति आलीयते पश्यतां मनोऽस्मिन्निति योगार्थात् वैदूर्यादिमणिनिर्मितस्तम्भं कनकरचितनीव्रव्रजं वज्रादिमणिघटितजालकूलं स्फटिकविस्फुरच्चन्द्रशालं बृहद्वलयकुलशोभितं कपिशिरोवृन्दसुन्दरप्राकारं बहुभूमत्वाच्चन्द्रबिम्बं स्पृशद्बहुचत्वरं विलसद्विचित्रपताकं सुनिष्कुटं रत्नकूपवत् रम्यजनताकुलं यमुनातटनिविष्टं गोपमुख्यभवनैर्विधरमित्यर्थः । राजभवनत्वाद्भगवन्निवासत्वात् "चिन्तामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषु सुरभीरभिपालयन्त"मिति ब्रह्मोक्तेश्च ॥ ११ ॥ ताः सूतिकागृहं प्रविश्य राजपुत्रत्वात् युवराजो भूत्वा नश्चिरं पाहीत्याशिषः प्रयुञ्जानाः ततो बहिर्निर्गम्य हरिद्राचूर्णसुगन्धितैलसम्पृक्ताभिरद्भिर्मिथो जनं सिञ्चन्त्य उच्चैर्मङ्गलानि जगुः अजनं हरिमुज्जगुरित्यन्ये ॥ १२ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

ता इति । अत्र चिरं पाहीत्यसंगतम् । कं प्रति को वक्तेत्यस्याज्ञानात् । किं च गोप्यः किमज्ञा वा सुज्ञाः । नाद्यः । भगवद्दर्शनप्रसङ्गात् । द्वितीये भगवद्रक्षणविषयेऽन्यप्रार्थनायोगात् । अतोऽपि विरोधः । अत उच्यते । हे बालके इति जीवंतिकाख्यप्रसूतिदेवतां प्रति गोप्युक्तिः । बालाः शिशवः काः ब्रह्माणः यस्यास्तादृशभगवन्नामिके देवतेत्यर्थः । अत एव जीवंतिकेत्याख्या जीवंति सप्राणा भवंति काः ब्रह्माणो ययेति विग्रहेण समानार्थकत्वात् । यद्वा । व शब्दस्य सुखार्थकत्वात् । वाः सुखरूपाः अलकाः केशा यस्य इति हृषीकेशाख्यत्वात् वस्य सुखात्मकमूलरूपस्य केशरूपे कृष्णे इति सप्तमी वा । तथा च त्वम् । इममिति शेषः । चिरं पाहीति बहुकालं रक्षेति आशिषः प्रयुंजानाः सत्य इत्यन्वयः । अथवा । हे बालकाख्यभगवद्देवते । न इति शेषः । चिरं पातुः चिरंजीवनान्यथाऽनुपपत्त्या सिध्यास्ताश्चिरंजीवनामका आशिषा प्रयुंजानाः । अपि वा । ता गोप्यः । बालके कृष्णे । चिरं पाहि चिरंजीवेति । आशिषः प्रयुंजानाः । अनेकार्था हि धातव इति भागुर्युक्तेः ॥ ११ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सौमङ्गल्याः सुमङ्गलताविषयिण्यो गिरो येषां ते तथा । शुभमस्त्वित्यादिवादिनः सूताः स्वयं प्रबन्धं बद्ध्वा वक्तारो मागधा अन्यकृततत्पाठका बन्दिनः कृतकर्मनिरूपका गायका गतम् । भेर्यो वादयितृसङ्केततो मन्द्रं ध्वनन्त्यो दुन्दुभयः पुंभेर्यः पृथुध्वनिर्मतोऽत एव नेदुरित्येकक्रियान्वयः । दुन्दुभिर्दितिजे भेर्यामक्षबिन्दुत्रिकद्वय इति विश्वः । दुन्दुभिः पुमानित्यमरः । दुन्दुभिरक्षेष्विति लिङ्गानुशासनम् । अक्षेषु किम् । अयं दुन्दुभिर्वाद्यविशेष इति तट्टीकोक्तेश्च । भेर्यो मानुष्यो दुन्दुभयो नाभसा इति वा मुहुः पुनः पुनः ॥ ५ ॥ सम्मृष्टानि शोधितानि प्राक्संसिक्तानि मलयजजलादिना प्रोक्षितानि द्वाराण्यजिराण्यङ्गणानि गृहान्तराणि याभिस्ताः प्रजाश्चित्रा ध्वजा एकजिह्वाः पताका द्विजिह्वा विपर्ययो वा तां स्रजस्तत्र तत्र याभिस्ताश्च ताश्चैलपल्लवैर्युतानि तोरणानि बहिर्द्वाराणि याभिस्ताश्च ताश्च वासःखण्डकिसलयमण्डिततोरणा इत्यर्थः । व्रजः सम्मृष्टसंसिक्तद्वाराजिरगृहान्तरश्चैलपल्लवतोरण इति पठन्ति । अजिरशिशिरेति निपातितः शब्दः ॥ ६ ॥ हरिद्रामिश्रतैलरूषिता विचित्रधातवो गैरिकाद्यास्तैश्चित्रा बर्हाणां पिच्छानां स्रजो येषां ते च वस्त्राणि च काञ्चनमाला येषां सन्तीति पुंशेषः ॥ ७ ॥ महदर्हं मूल्यं येषां तानि च तानि वस्त्राण्याभरणानि कञ्चुकाः कवचानि च । कञ्चुको वारबाणे स्यान्निर्मोके कवचेऽपि चेति विश्वः । उष्णीषाणि शिरोवेष्टनानि किरीटानि वा । उष्णीषं तु शिरोवेष्टे किरीटे लक्षणान्तर इति विश्वः । तैर्भूषिता गोपा नानोपायनानि मङ्गलसमये राजपुरतः स्थापनीयानि पाणिषु येषां ते सन्तः समाययुः । राजन् हे परीक्षित् राजन्ति प्रकाशमानानि नानोपायनानि पाणिष्वेषामिति वा ॥ ८ ॥ यशोदायाः सुतोद्भवं पुत्रोत्पत्तिमाकर्ण्य श्रुत्वा मुदिता गोप्य आत्मानं वस्त्राण्याकल्पा भूषणान्यञ्जनानि कज्जलानि चादयो येषां तैर्हारादिभिर्भूषयाञ्चक्रुरिति द्वे पदे । अभूषयन् । आकल्पो भूषण इति विश्वः । नवानि कुङ्कुमान्येव । कुक आदानेऽस्मात्कुक्यते कामिनीभिरिति कुमः किप्रत्यये आच्छीनद्योरिति योगविभागान्नुमि रूपम् । अथ कुङ्कुममित्यमरः । काश्मीरजन्मेत्यादिः । स एव किञ्जल्काः केसराणि येषु तानि च तानि मुखपङ्कजानि तेषां भूतयः शोभा यासां ताः पृथवः श्रोण्यो नितम्बबिम्बा यासां ताश्च ताश्चलन्तः कुचा यासां ताः ॥ ९–१० ॥ सम्मृष्टत्वं कुण्डलेषु निष्केष्वपि ज्ञेयमिव मण्यात्मकता च द्वयोर्ज्ञेया । सुमृष्टानि मणिमयानि कुण्डलानि मणिमयानि निष्काणि कण्ठाभरणानि च कण्ठेषु यासां ताः । कुण्डलं वलये पाशे कुण्डलं कर्णभूषणे । निष्कं दीनारकर्षयोर्वक्षोऽलङ्करण इति विश्वो । चित्राण्यम्बराणि यासां ताः पथि तीव्रव्रजनसमये मार्गे शिखाभ्यश्च्युतानि माल्यानि माल्या वा । माल्यं मालाप्रसूनयोरिति विश्वः । तेषां वर्षं यासां ताः । यूषकरीषविमिश्रवर्षाणि नपुंसके चेति लिङ्गानुशासनात् । वृष्टिर्वर्षमित्यमरः सवलयाः कङ्कणहस्ता व्रजतीव जन्त्यः कुण्डलवत्कनकगिरिवद्विद्यमानौ च तौ पयोधरौ स्तनौ च तयोर्हारास्तदुपरि परिपतन्मुक्तामाला व्यालोलाश्च ते कुण्डलपयोधराश्च तैः शोभाः यासां ताः । कुण्डलं कर्णभूषणे गुडूच्यां काञ्चनाद्रौ चेति विश्वः । पूर्वं मणिः कुण्डलेति तद्ग्रहणेऽपि लोलतया पृथगुक्तिरिति केचित् । वर्तुलतया कुण्डलौपम्यमिति चापरे ॥ ११ ॥ ता वनिता बालके आशिषः प्रयुञ्जानाः स्वाभिलाषान्विज्ञापयन्त्य इत्यर्थः । चिरं पाहीत्याशिषः प्रयुञ्जाना इति पातनिकम् । तद्वृद्ध्यै युयुजुरित्यर्थः । स्वयमेव चिरं पाहीत्यनेन ग्रन्थकृत्पराचकारेति ज्ञेयम् । हरिद्राचूर्णतैलसहितोदकैः । ऋक्पूरब्विति समासान्तविधेरनित्यत्वान्नप्रत्ययः । अजं संचिन्त्य उज्जगुर्गानं चक्रुः । अजनं लोकजनिरहितं बालमुज्जगुरिति वा । अजनमुदिति स्वरूपसुखमदेति जगुरिति ॥ १२ ॥

श्रीसुबोधिनी

एवं प्रसङ्गान्नन्दस्य माहात्म्यमुक्त्वाग्रे वक्ष्यमाणमुत्सवमुपपत्त्या निरूप्योत्सवमनेकप्रकारमाह **सौमङ्गल्येति**दशभिः, विद्याकृतो वाचानुत्सवः स प्रथमं निरूप्यते, **सौमङ्गल्यं** सुमङ्गलता, यैर्वेदैः पौराणैर्वाक्यैर्मङ्गलं भवति तच्च निरन्तरं पठन्तीति सौमङ्गल्यप्रतिपादिका गिरो येषामित्युक्तं, गिरां वैयर्थ्याभावो **विप्र**पदेनोक्तः, **सूताः** पौराणिकाः, **मागधा** वंशशंसकाः, **बन्दिनो** वैतालिकाः, तेपि **सौमङ्गल्यगिरो** जाताः, **गायका** अन्ये केवला नृत्यादिसहिताश्च, **स्त्रियश्च** वाद्यवादकाश्च **नेदुः**, **भेर्य** उत्सवसूचिकाः, **दुन्दुभयो** मङ्गलवाद्यानि शुभकर्ममात्रे प्रवृत्तानि, **मुहुः** श्रमपर्यंतं वादयित्वा पुनर्निवृत्ता वादयन्तीति, एतद् वाद्यमपि

सङ्गीतशास्त्रप्रसिद्धं, अतो विद्याकार्यं सर्वमुक्तम् ॥ ५ ॥ भूसंस्काराननेकविधानाह **व्रज** इति, **सम्यङ् मृष्टा** रजोदूरीकरणेनोज्ज्वलीकृतास्ततः **सम्यक् सिक्ता गन्धोदैर्द्वारादयो** यस्मिन्, द्वाराणि बाह्यानि, अन्तराणि च, **अजिरमङ्गणं, गृहान्तरं** गृहमध्यं, गृहा अन्तराणि च तदुपरिभागानामपि मार्जनं भवति, एतादृशो **व्रजो** जातः, **चित्रध्वजादिभिरपि** युक्तो जातः, एते बहिःशोभाजनकाः, गरुडादिचिह्निता **ध्वजाः**, जयपत्राङ्किताः **पताकाः**, उभये विचित्राः, **स्रजो** मालाः पुष्पनिर्मिताः, **चैलैः पल्लवैश्च** कृतास्तोरणा इति वस्त्रादिभिर्यावानलङ्कारो भवति स सर्वोपि तत्र कृत इत्यर्थः ॥ ६ ॥ गवां शोभामाह **गाव** इति, **गावो** बलीवर्दा धेनवश्च, **वृषाश्च** स्थूलककुदो महान्तः, चकारादवान्तरभावापन्ना वृद्धाश्च, **वत्सा** वत्सतर्यश्च, सर्वे **हरिद्रायुक्ततैलेन रूषिताः, विचित्रा** गैरिकादिधातवः, **बर्हाणि** मयूरपिच्छानि, **वस्त्राणि काञ्चनमालाश्च** वर्तन्ते येषां, **हरिद्रातैलं मङ्गलार्थं, धात्वादयः** शोभार्थाः ॥ ७ ॥ गोपानां शोभामाह **महार्हे**ति, अमूल्यानि वस्त्राणि यानि स्थापितानि तान्यपि तस्मिन् परिहितानीति ज्ञापयितुमाह **महार्हे**ति, अमूल्यानि वस्त्राणि परिधेयान्याभरणान्यपि तथा, बहिः **कञ्चुकोष्णीषैर्भूषिताः** कटिबन्धनैरपि, तेषामकथनमुत्सवासक्तिख्यापनार्थं, **गोपा** व्रजान्तरस्थिता अपि यावन्तो नन्दपरिचिताः सर्वे **सम्यगाययुः**, **राजन्निति**सम्बोधनमुत्सववर्णनायां सम्मत्यर्थं, **नानाविधान्युपायनानि** वस्त्राभरणदुग्धदध्यादीनि, रिक्तहस्तगमनाभावार्थमेतदुक्तं न तु **नन्दस्य तैः** काचित् **समृद्धिः** ॥ ८ ॥ गोपीनामप्युत्सवमाह चतुर्भिः, गोप्यश्चतुर्विधाः सम्बद्धा असम्बद्धाश्चोभयविधा अपि सङ्गता असङ्गताश्च, **गोप्य** इति, चकारादन्या अपि तत्र तत्र निलीनास्तथाविधा भूत्वा गता इति निरूप्यते, ब्राह्मणस्त्रियोन्याश्च, तासां नन्दप्राधान्याभावात्, **यशोदाया** अपत्योत्पत्तिसम्भावनारहितायाः **सुतस्याकस्मादुद्भवं श्रुत्वा** श्रवणेनैवान्तःसन्तोषस्तासां जातः, चतुर्विधपुरुषार्थस्तासां विशेषाकारेण सेत्स्यतीत्याकर्ण्यैव **मुदिता** न तु निश्चयमप्यपेक्षन्ते, तासां निवेदनीय आत्मैवेत्यात्मानमेव **भूषयाञ्चक्रुः**, **आत्मपदप्रयोगश्च शरीरादीनामप्यविकृतत्वाय**, सशरीराणामेव ब्रह्मानन्दानुभवात्, उत्तमानि वस्त्राणि परिधाय तथाकल्पान्याभरणान्यपि, **अञ्जनं** कज्जलं, आदिशब्देन तिलकमाल्यादीनि ॥ ९ ॥ श्रवणादि गमनपर्यन्तमात्मालङ्कारो यावता भवति तावत् कृत्वा गता इत्याह **नवे**ति, ताः सर्वा देवतारूपा भगवत्सम्मुखे गच्छन्त्यो विकसितवदना जाताः सोऽलौकिको विकास इति तं वर्णयति, चर्वितताम्बूलाः सुलक्षणवशाद् वारक्तरेखायुक्ता मुखभागास्तासां, नूतनं कुङ्कुमं काश्मीरं तस्य ये किञ्जल्का उत्तमा आरक्तास्त एव योजितास्तिलकादौ पिष्टा वा रेखाकाराः कृतास्तत्सदृशा वा **किञ्जल्काः**, एतादृशानि मुखपङ्कजानि तैर्भूतिर्यासां,

गन्धो रूपं तथा स्पर्शः कटाक्षभ्रमरोक्तयः । ताभिश्चतुष्टयं ज्ञेयं रसं ज्ञास्यति माधवः ॥ १ ॥

बलिः पूजासाधनानि स्रगादीनि, यद्यपि सर्वस्वमेव नेयं तथापि **त्वरितं जग्मुः**, त्वरागमनं तासामत्यशक्यं, यतः **पृथुश्रोण्यश्चलत्कुचाः**, अत्युच्चतया कुचयोश्चलनं गमनप्रतिबन्धकं भवति, यत्राशक्यं ताः सम्पादयन्ति तत्र शक्ये कः सन्देह इतिभावः, अत एव माल्यानां बन्धनं शिथिलं, त्वरया यथाकथञ्चिद्बन्धनात्, तेन मार्गे च्युतिरग्रिमवाक्ये कथयिष्यते ॥ १० ॥ एवं गच्छन्तीनां स्वरूपमुक्त्वा **नन्दगृहे प्रविशन्तीनां** स्वरूपमाह **गोप्य** इति, दूरादागत्य यथाकथञ्चिद् यदा ता निकटे समागतास्तदा सर्वशोभानां प्राकट्याद् विरेजुरिति ता वर्णयति, **गोप्य** इतिपुनर्ग्रहणमग्रपश्चाद्भावेन समागतानां सम्भूय गमनार्थं, **नन्दालयं व्रजन्तीर्विरेजुर्**विशेषेण रेजुः, **पूर्वं** पिहिताभरणा अपि प्रकटाभरणा जाताः, तथा प्रकटवस्त्राः, **माल्यानां पुष्पाणां शिखातश्च्युतानां** गतिसूचिका **वृष्टिरिव** मार्गे जाता, **वलयानामपि** शब्दतो रूपतश्च प्राकट्यं, **व्यालोलाः कुण्डले पयोधरौ** हाराश्च, तैः शोभा यासां,तद्गता राजसास्तामसाः सात्त्विकाश्च लोला जाताः, अनेन तासामुत्सवासक्तिरुक्ता, सुष्ठु **मृष्टे** उज्ज्वले मणियुक्ते **कुण्डले** यासां, **निष्कयुक्तः कण्ठो** यासामस्ति ता **निष्कण्ठ्यः**, पूर्वोक्ताश्च ता निष्ककण्ठ्यश्च, **विचित्राण्यम्बराणि** यासां, **पथि शिखातश्च्युतानां माल्यानां वर्षा** यासां ताः, **नन्दालयं** नन्दगृहं, **सवलया** वलयसहिताः, **व्यालोलकुण्डलपयोधरहाराणां शोभा** याभिः ॥ ११ ॥ तत्रागतानां कृत्यमाह **ता आशिष** इति, ता गोप्य एवमुत्कण्ठतया समागता **आशिषः प्रयुञ्जाना** जाताः, तासां भगवदावेशात् सत्या एवाशिषो निर्गता इत्याह **चिरं पाहीति बालके**, आशिषो न परोक्षतया निरूपयन्ति किन्तु प्रत्यक्षतयेति **पाही**तिमध्यमपुरुषप्रयोगः, तासां सर्वभावेन पालनमल्पकाल एवेति ज्ञात्वा बहुकालरक्षार्थं प्रार्थना, एतदपि प्रत्येकं वचनं, तासां प्रत्येकं भगवत्स्फुरणात्, **एवमाशिषः प्रयुञ्जाना** भगवद्भावेनात्यन्तं मत्ता हरिद्राचूर्णतैलजलान्येकीकृत्य परस्परं **सिञ्चन्त्यो जनं** भगवन्तमुज्जगुः, **हरिद्राचूर्णयोर्मेलन आरक्तो भवति**, तैलेन च सम्पृक्तं न कदापि त्यजति बहुकालमिममर्थं ज्ञापयति, जले योजितं प्रसृतं भवति, ननु कुलस्त्रीणां कथमेवम्भावस्तत्राहाजनमुज्जगुरिति, भगवद्भावस्य ज्ञापकमजनपदं, स हि भगवांस्तत्र जात इति ताभिर्ज्ञातं, अतो भगवति प्राप्ते सर्वापेक्षाभावात् तथा सिञ्चन्त्य उच्चैर्जगुः ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

मूलस्थपाणिपदतात्पर्यमाहुः **रिक्ते**त्यादि ॥ ८ ॥ **सम्बद्धा** इति कुलदेहसम्बन्धयुक्ता इत्यर्थः ॥ ९ ॥ **नवकुङ्कुमे**त्यत्र, मुखेषु तादृक्पङ्कजत्वोक्त्या व्यञ्जितमर्थमाहुः **गन्ध** इत्यादिना । भावज्ञापकत्वसाम्येन कटाक्षोक्त्योरैक्यविवक्षया चतुष्टयत्वमुक्तम् । कटाक्षयुक्तास्ता इति वा । तथा च गन्धादिवक्रोक्तिगानपर्यन्तं ताभिर्ज्ञापितं ज्ञास्यति । यतस्तच्चतुष्टयं ज्ञेयम् । लोभात्मकं रसं तु स्वत एव

ज्ञास्यतीति योजना । एतेन भगवतस्तु रूपादिपञ्चविधविषया ये भोग्यास्ते एता एवेति सूचितम् । तेनैतासु भगवत आसक्तिः सूचिता भवति, मिथश्चित्तव्यतिषङ्गोपि । चतुष्टयज्ञेयपदे रसस्यैव वा विशेषणे ॥ १० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

सौमङ्गल्येत्यस्याभास उपपत्त्येति यत्र पूर्वोक्तरीतिकं दानबाहुल्यं तत्रोत्सवो भवत्येवेत्युपपत्तिस्तयेत्यर्थः ॥ ५ ॥ **गोपा इत्यत्र रिक्तेत्यादिना** सुबोधिन्या यदुक्तं तट् टिप्पण्यां विवृण्वन्ति **मूलेत्यादि** । **गोप्य इत्यत्र सम्बद्धा** इति सुबोधिन्यां यदुक्तं तद् विवृण्वन्ति टिप्पण्यां **सम्बद्धा** इत्यादि ॥ ८ ॥ **नवकुङ्कुमेत्यस्याभासे श्रवणादि गमनपर्यन्तमिति**, श्रवणे कर्णे तदारभ्य गम्यत आभ्यामिति **गमने** पादौ तत्पर्यन्तं यावता ताटङ्कहंसकनूपुरादिनेत्यर्थः, यद्यपि शिरोभूषणमेव प्रथमं वक्तव्यं तथापि कर्णावेव पूर्वं भगवज्ज्ञापकौ जाताविल्यभ्यर्हितत्वात् ताभिस्तावेव पूर्वं भूषिताविल्याचार्यैरपि तथोक्तं, यद्वा ननु गमने विलम्बं कुतः कृतवत्य इत्याशङ्क्याहुरात्मालङ्कार इत्यात्मन एव समर्पणीयत्वात् **तदलङ्कारो** यावता कालेन भवति तावद्विलम्बमावश्यकत्वात् कृतवेत्यर्थः, विवृतौ ननु शुकस्य किं प्रयोजनं यदेवं वर्णयतीत्याकाङ्क्षायामाहुस्ता इत्यादि, अर्थस्तु स्पष्टः, टिप्पण्यां गन्ध इत्यादिकारिकाप्रयोजनं वर्णयन्ति **नवेत्यादि** ॥ ९ ॥ **ता आशिष** इत्यत्र नन्वाशिषि प्रयोक्तव्यायां "चिरं जीवे"त्येवं वक्तव्यं "पाही"तिप्रार्थनासम्मिलिततत्कथनस्य किं प्रयोजनमत आहुस्तासामित्यादि, मथुरागमने सर्वभावेन पालनं न भविष्यति **बहुकालमिति** तदभावार्थं तथेत्यर्थः, यद्वा भगवतः सदात्र स्थितिमत्त्वेपि तासां रात्रिपरिमितकाल एव सर्वभावेन **रक्षणमिति** तदभावाय तथेत्यर्थः, अस्मिन् व्याख्याने 'स्त्रीषु रेमे ह्यहर्निशं' मितिवक्ष्यमाणरीत्याशिषां सत्यता स्यात् न तु पूर्वव्याख्यायामिति ज्ञेयं, तर्हि सदेत्येव कुतो नोक्तवत्य इति चेत् किञ्चित्कालविच्छेदाभावस्य रसाननुभावकत्वादिति बुध्यस्व, एतेन मथुरागमनशङ्काप्यपास्तान्यथा सर्वज्ञत्वेन सदेत्येव वदेयुः, यद्वा रात्रावपि त्यक्त्वा न गन्तव्यमिति सूचयन्ति, एवं वाचा भगवन्तं प्रार्थयित्वा तमर्थं क्रिययापि सूचयन्तीत्याशयेनाहुर्हरिद्रेत्यादि, अयं भावः, यथा हरिद्राचूर्णसंयोगेन जातः शोणिमा तैलयुक्ते पटे समवेतः कदापि पटं न त्यजत्येवमुभयसंयोगेन जातोनुरागोयुतसिद्धत्वात् स्नेहयुक्तं कदापि न त्यक्ष्यतीति तथाकृतः, **बहुकालमित्यत्रापि** पूर्वोक्त एवार्थः, यथा वा जले पतितं तैलं बहुरूपं भवति तथास्माकमुपरि पतितस्तथेत्यर्थः, **भगवद्भावस्येति** भगवतो यो भावः स्वस्मिन् विद्यमानता ब्रह्मभाव इतियावत् तस्य ज्ञापकम**जनपद**मन्यथा जन्मोत्सवे वक्तव्ये जनपदं शुको न वदेदतस्तथेत्यर्थः, तद् विशदयन्ति **स ह्या**त्यादि, हि यतो हेतोः **सोस्मद्वरदाता भगवान्** षड्गुणैश्वर्यसम्पन्नोक्षर एव विद्यमानस्तत्र भूमौ न जातः किन्त्वक्षरं प्रकटीकृत्य तत्रैवाविर्भूत **इति ताभिर्ज्ञातमतस्तथेत्यर्थः** ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

सौमङ्गल्येत्यस्याभासे माहात्म्यमुक्त्वेति, महानात्मान्तःकरणं यस्य तादृशत्वं पूर्वोक्तं महामनस्त्वमित्यर्थः, तथा च 'धेनूना'मितिश्लोकस्याभासे उक्तोर्थोऽनेनोपसंहृत इति ज्ञेयं, व्याख्याने, **सुमङ्गलेति** सुष्ठु मङ्गलं येषां तत्ता मङ्गलमित्यर्थः, **तच्चेति** मङ्गलजनकं वाक्यमित्यर्थः, तथा च मङ्गलप्रतिपादिका गिरो वाक्यानि येषामित्यर्थः, **गायका अन्ये** इति सूतादिभ्योऽन्ये न तु तन्मध्यस्था एव केचनेत्यर्थः, तेषां द्वैविध्यमाहुः **केवला नृत्यादिसहिताश्चे**ति, आदिपदेन वीणायां केचन गायन्ति तेपि, **गायकाश्चे**ति चकारस्यार्थमाहुः **स्त्रियश्च वाद्यवादकाश्चे**ति, वाद्यानां मृदङ्गादीनां वादकास्तेपि जगुरित्यर्थः ॥ ५ ॥ **महार्हेत्यस्याभासे गोपानामाहे**ति शोभामितिपूर्वाभासानुवृत्तिः, व्याख्याने, **परिधेयानीति** अन्तरीयरूपाणि धौत्रवस्त्राणीत्यर्थः, कञ्चकोष्णीषयोः पृथगुक्तेरितिभावः ॥ ८ ॥ **गोप्यश्चे**त्यस्याभासे **सङ्गता** इति भगवति सङ्गता भगवद्भोग्या इत्यर्थः, इदं सङ्ख्यातात्पर्यमुक्तं न तु प्रत्येकं श्लोकेषु तथाविभागः, व्याख्याने, प्रथमश्लोके नन्दसुनत्वमुक्तमत्र यशोदासुतत्वमुक्तं तत्तात्पर्यमाहुः **तासामिति**, **चतुर्विधेति** 'पुष्टिमार्गे हरेर्दास्यं धर्मोर्थो हरिरेव च । कामो हरेर्दिदृक्षैव मोक्षः कृष्णस्य चेद् ध्रुव'मितिरूप इत्यर्थः, **आकर्ण्येत्यत्राङ** ईषदर्थत्वमभिप्रेत्याहुर्न **तु निश्चयमिति**, पूर्वेषां गृहाद्यलङ्करणमुक्तमेतासामात्मालङ्करणमुच्यते तत्तात्पर्यमाहुः **तासां निवेदनीय** इति, गृहादिकं तु त्याज्यमत **आत्मैवेत्येवकारः**, **आत्मा** स्वस्वरूपमित्यर्थः, एतद्देहादीनामविकृतत्वे विनिगमकमाहुः **सशरीराणामिति**, ब्रह्मानन्दानुभवो हि देहेन्द्रियादीनां विकृतत्वात् तन्नाशे सति जायते, अत्र तु सशरीराणामेव वक्तव्यः, अतो ज्ञायते एतासां शरीरेन्द्रियादीन्यविकृतान्यात्मरूपाण्येवेति, गोपानामप्यलौकिकदेहसम्पादनानन्तरमेव ब्रह्मानन्दानुभवः, परं तेषामग्रे लीलया तत् सम्पादनीयमेतासां तु सिद्धमेवास्तीतिविशेषः, एतत्श्लोकवाक्यार्थ आभासेनुक्त इत्युपसंहारव्याजेनानुवदन्ति **तावत् कृत्वे**ति ॥९॥ **नवेत्यत्र देवतारूपा** इति शरीरादीनामात्मत्वस्योक्तत्वाद् देवतात्मकमविकृतं रूपं देहादिकं यासामित्यर्थः, किञ्जल्कसाहित्यकथनेन सूचितमर्थं गौणवाक्यार्थत्वेनाहुः **विकसितवदना जाता** इति, पङ्कजे किञ्जल्कदर्शनं विकासे सत्येव भवतीतिभावः, **अलौकिक** इति लोकैरवेद्यो भगवदेकवेद्य इत्यर्थः, तथा च विकसितवदना जाता इति स्फुटं विकासो वाच्यो भवति परन्त्वलौकिकत्वाद् **वर्णयति** ध्वनिनैव बोधयतीत्यर्थः, **तत्सदृशा वेति** वक्ष्यमाणपक्षे मुखेषु किञ्जल्कपदार्थं बोधयितुमाहुः **आरक्तरेखायुक्ता** इति, लोमस्थितरेखा एव किञ्जल्का इतिभावः, **तत्सदृशा वा किञ्जल्का** इति येष्वितिशेषः, तथा च नवकुङ्कुमसदृशाः किञ्जल्का येष्विति बहुव्रीहिः, **प्रथमपक्षे नवकुङ्कुमस्य किञ्जल्का** येष्विति व्यधिकरणपदो बहुव्रीहिः, तादृशैर्मुखपङ्कजैर्भूतिर्यासामिति पुनर्बहुव्रीहिः, **गन्धो रूपमित्यत्र भ्रमरोक्तयो** भ्रमरस्येवोक्तयः पङ्कजे भ्रमरोक्तयस्तत्स्थानीया मुखे वक्रोक्तय इत्यर्थः, टिप्पण्यां **तादृक्पङ्कजत्वोक्त्ये**॥

सकिञ्जल्कपङ्कजत्वोक्त्येत्यर्थः, विकसिते एव किञ्जल्के दर्शनं भवतीति किञ्जल्कसाहित्यकथनेन विकसितत्वं सूच्यते, तथा च विकसितपङ्कजस्य यथा गन्धादिचतुष्टयानुभावकत्वं न तु रसानुभावकत्वं तथात्रापि सूचितं भवतीत्याशयेनाहुः **गन्ध** इति, **रसं स्वत एव ज्ञास्यती**ति भ्रमरशब्देन शब्दानुभावकत्वं पङ्कजस्य ज्ञेयं, चतुष्टयपदस्य रसविशेषणत्वे चतुर्विधमित्यर्थः, 'सुरतवर्धनं शोकनाशन'मिति श्लोकोक्तं चातुर्विध्यं ज्ञेयम् ॥ १० ॥ **स्वरूपमुक्त्वे**ति 'विकसितवदना' इत्युक्तगौणवाक्यार्थस्यानुवादोयं, **गोप्यः सुमृष्टे**त्यत्र पूर्वश्लोके गमनं मुख्यत्वेनोक्तं, तेन द्वितीयश्लोके प्रवेशस्य मुख्यत्वे वक्तव्येपि तस्य गौणत्वमुक्त्वा शोभाया मुख्यत्वमुक्तं, तत्तात्पर्यमाहुः **दूरादागत्ये**ति, 'कुण्डलहारशोभा' इत्यस्य तेषां शोभा याभिस्तैः शोभा यासामितिविग्रहद्वयमप्यभिप्रेतमितिज्ञेयम् ॥ ११ ॥ **ता आशिष** इत्यत्र **भगवद्भावस्ये**ति एतासां पुरुषोत्तमे भावो न तु वासुदेवव्यूहे, तथा च वासुदेवव्यूहमादायैवात्मजपदावयवार्थस्य समाहितत्वादेतासां भगवान् पुत्रत्वं स्वस्मिन् नन्दे च पितृत्वं स्वीकृत्य प्रकटो न तु नन्दात्मनः सकाशाज् जात इतिभाव इत्यर्थः, तथा च **भगवद्भावे**त्यस्य पुरुषोत्तमभावेत्यर्थः, नन्दस्य त्वात्मनः सकाशाज् जात इतिबुद्धिरतस्तद्भावो वासुदेवपर्यवसायीतिभावः, अयमेवांशो 'न माता न पिता तस्ये'त्यादिनोद्धवेन निवारणीय इति ज्ञेयं, **स ही**ति पुरुषोत्तम इत्यर्थः, पुरुषोत्तमस्याजनत्वमेवोचितमिति हिशब्दः, **भगवति प्राप्ते** इति पुरुषोत्तमे इत्यर्थः, **सर्वापि**त्येति पुरुषोत्तमप्राप्तौ लोकवेदापेक्षाभावस्य 'न बिभेति कुतश्चन' 'एतं ह वाव न तपति किमहं साधु नाकरव'मिति श्रुतिसिद्धत्वादितिभावः ॥ १२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गोप्यश्चाकर्ण्येत्यत्र **सम्बद्धा** इत्यादि **सम्बद्धाः** कुलदेहसम्बन्धयुक्ता इत्यर्थ इति श्रीमत्प्रभुचरणैर्व्याख्यातं, **असम्बद्धाः** कुलदेहसम्बन्धरहिता ज्ञातीया इत्यर्थः, **सङ्गताः** परिचर्यादिकृतौ विनियुक्ताः **असङ्गताः** समानकक्षापन्ना अनाश्रिता इत्यर्थः ॥ ९ ॥ **गन्धो रूपं तथा स्पर्श** इत्यादि **नवकुङ्कुमकिञ्जल्कमुखपङ्कजभूतय** इत्यनेन गोपवधूषु गन्धरूपस्पर्शशब्दरसा भगवतो भोग्याः पञ्च विषया सर्वोत्कृष्टा विद्यन्त इति सूचितं, तदेतद् कारिकया विवृण्वन्ति **गन्धो रूप**मित्यादिना, तत्र **नवकुङ्कुम**पदेन सुगन्ध उक्तः, **किञ्जल्क**पदेन सौन्दर्ययुक्तं रूपं, **मुखपङ्कजे**त्यनेन सुस्पर्शसुशब्दसुरसाः सूचिताः, पङ्कजस्य सुस्पर्शत्वात् भ्रमरगुञ्जितेन सुशब्दत्वान् मकरन्दवत्त्वेन सुरसत्वाच् च, एवं भगवतो नासिकानयनादीनां भोग्याः पञ्च विषया एतासामेवाङ्गेषु विराजन्त इति तात्पर्यं सिद्धं, तत्र सुगन्धसुरूपसुस्पर्शाः प्रत्यवयवेष्वेतासां भगवद्भोग्याः, सुशब्दो द्वेधा, भाषणात्मकः किङ्किणीनूपुरादिरवात्मकश्च रसो लोभात्मकावयवे स्थित इति ज्ञेयम् ॥ १० ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

नवकुङ्कुमेत्यत्र मुखेषु 'किञ्जल्कपङ्कज'त्वोक्त्या व्यञ्जितमर्थमाहुर्**गन्ध** इति का० १५$\frac{३}{४}$। अत्र टिप्पण्युक्ते प्रथमव्याख्याने **कटाक्षाश्च भ्रमरोक्तयश्चे**ति द्वन्द्वः, कटाक्षभ्रमरोक्तयोर्भावज्ञापकत्वसाम्येनैक्यविवक्षया चतुष्टयत्वमुक्तं, **भ्रमर**शब्देन पङ्कजस्य शब्दानुभावकत्वं ज्ञेयं, भ्रमरोक्तिस्थानीया मुखे वक्रोक्तयः, द्वितीयव्याख्याने तु कटाक्षयुक्ता वक्रोक्तय इति मध्यमपदलोपी समासः, तथा च **ज्ञेयं** गन्धादिचतुष्टयं **ताभिर्ज्ञापितं ज्ञास्यति माधवः, रसं तु स्वत एव ज्ञास्यती**ति योजना, चतुष्टयज्ञेयपदयो रसविशेषणत्वपक्षे 'सुरतवर्धन'मिति श्लोकोक्तप्रकारेण चतुर्विधं **ज्ञेयं रसं स्वत एव ज्ञास्यती**त्यन्वयः, तथा च यथा विकसितपङ्कजस्य गन्धादिचतुष्टयानुभावकत्वमेव रसं तु मधुरः स्वयमेव भुङ्क्ते तथात्रापीतिभावः ॥ का० १५$\frac{३}{४}$।

मातृपितृतोषिणी (श्रीसुबोधिनीजी)—

"एवं प्रसङ्गान्नन्दस्य" एवं प्रसङ्गप्राप्त नन्दरायजी का माहात्म्य कहकर आगे कहे जाने वाले उत्सव को 'उत्पत्ति' से निरूपण करके उत्सव के विविध प्रकार बताते हैं। विविध प्रकारों में प्रथम '**सौमङ्गल्य**' आदि दस श्लोकों में विद्या से हुए उत्सव का वर्णन किया जाता है। **"सौमङ्गल्यम्"** सर्वमङ्गलकारक वेदवाणी को विप्र, पुराणगाथा गाने वाले सूतवृन्द, वंशमहिमा का गान करने वाले मागध-भाटगण, वर्तमान राजा के यशोगान करने वाले वन्दीजन, ये सब मङ्गलमय वाक्यों का उच्चार करने लगे। इन सब की वाक्यावली श्रुति गान करने वाले विप्रर्षिओं के संसर्ग से मङ्गलमयी बनी और सफल भी हुई। एवं विप्रों के सम्पर्क से सूत, मागध और वैतालिकों को भी वाक्यावली मङ्गलमय हुई। आचार्यचरण कहते हैं कि मागध बन्दीगण से पृथक् दो प्रकार के गायक थे : एक—केवल गान करने वाले और दूसरे—नाच आदि के साथ गानकर्ता। गाने वालों में स्त्री गायिकाएँ थीं। मृदङ्गादि वाद्य बजाने वाले भी थे। भेरियाँ उत्सव की सूचक थीं और दुन्दुभि मंगल वाद्य शुभ कर्म में ही बजाये जाते हैं। भेरी और दुन्दुभि बजाते २ थक जाते तो कुछ विश्राम कर फिर बजाते। यह वाद्य भी संगीतशास्त्र में प्रसिद्ध है। इससे विद्या का सब कार्य बताया।

श्री लेखकारजी—'**नन्दस्य माहात्म्यं**' का भावार्थ बताते हैं कि नन्दरायजी का '**धेनूनाम्**' इस दो लाख गौ आदि पदार्थों के दान बाहुल्य से बताया हुआ महामनस्त्व ही उनका माहात्म्य सूचक है।

आचार्यचरण के **"उत्सवमुपपत्या"** सुबोधिनीजी के पद का भाव बताते हैं कि जहाँ उपर्युक्त रीति से दान की बाहुल्ता बताई गई है, वहाँ अवश्य विशेष उत्सव हुवा होगा।

"भूसंस्कारानेकविधानाह" श्रीशुकाचार्यजी महाराज इस श्लोक में अनेक प्रकार से किये हुए भूमि के संस्कारों का वर्णन करते हैं **'व्रज इति'** सारे व्रज में पहले रास्तों के एवं गृह के ऊपर भाग आदि, बाहर के और भीतर के द्वार, आंगन, इनके भीतरी भाग की धूलि को दूर कर स्वच्छ किया, पुनः सुगन्धित जल से सिञ्चन किया। गरुड़ादि चिह्नों वाली ध्वजाओं से, जय पत्रों से अंकित पताकाओं से, ध्वजा पताकाएँ विचित्र बनी हुई थीं। पुष्पों की मालाओं से एवं वस्त्र और पत्तों के तोरणों से, सारी व्रजभूमि सुसज्जित की गई थी। वस्त्रों से जितनी भी नाना प्रकार की सजाने वाली वस्तुएँ बन सकती हैं, वे सब वहाँ बनाई गई थी जिससे अभूतपूर्व शोभा वाला व्रज हो गया था ॥ ६ ॥

"गवां शोभामाह" श्री शुकमुनि इस श्लोक में गौओं की शोभा का वर्णन करते हैं। 'गाव' शब्द से गौ और बैल 'वत्सा' से बछड़े और 'च' कार से बहुत छोटी बछड़ियां भी थीं। आचार्यचरणों का कहना है कि "वृष" शब्द से बड़े कंधे और बड़े शरीर वाले बैल कहे गये हैं और "च" अव्यय से बूढ़े बैल भी सजाये गये थे। ये सब हल्दीमिश्रित तैल से रंगे गये थे, रंग बिरंगे गेरू आदि धातुएँ उन पर लगाई थीं एवं मोर पंख, झूलें और सुवर्ण की मालाएँ पहनाई गई थीं। हल्दी से मिलाया तैल मंगलसूचक और शोभावर्धक है। गेरू आदि धातुएँ सुषमा के लिये लगाई गई थीं ॥ ७ ॥

"गोपानां शोभामाह" श्री आचार्यचरण कहते हैं कि श्री शुकाचार्यजी इस श्लोक से गोपों की शोभा का वर्णन करते हैं—**'महार्हेति'** बहुत मूल्य वाले सुन्दर वस्त्र जो जो गोपों ने अपने यहाँ रक्खे थे, वे प्रभु प्राकट्य के दिन पहने क्योंकि आज ऐसे आनन्दमय महोत्सव में तो ऐसे ही अमूल्य एवं उत्तम कपड़े और आभूषण पहनने चाहिये। शिर पर पगड़ी तथा अंगों में अंगरखे पहने और कटिबन्ध कमर में बांधे। **"कटिबन्धैरपि"** पदों से आचार्यचरण का सूचन है कि श्री शुकाचार्यजी नन्दमहोत्सव के अलौकिक रस में डूब गये कि गोपों के कमर में बँधे हुए कटिबन्ध का वर्णन करना भूल गये। इसी प्रकार व्रज के भीतर तथा बाहर रहने वाले भी गोप विविध प्रकार की सामग्री भेंट भूषण वस्त्र दूध दही आदि लेकर आए। इन भेंटों के लाने का कारण यह था कि मन्दिर में, जन्म आदि उत्सव में खाली हाथ नहीं लेकिन भेंट ले जाना चाहिये। इसलिये नहीं कि नन्दजी के यहाँ कोई कमी थी। इन भेंटों से नन्दजी की कोई समृद्धि नहीं हुई ॥ ८ ॥

"गोपीनामुत्सवमाह चतुर्भि." श्री शुकाचार्यजी अब चार श्लोकों से गोपियों के उत्सव का वर्णन करते हैं। आचार्यचरण आज्ञा करते हैं कि सम्बद्ध गोपियाँ चार प्रकार की थीं और असम्बद्ध भी चार प्रकार की थीं। श्री टिप्पणीकारजी "श्री नन्दबाबा के देह और कुल से सम्बन्ध वाली गोपियों को" सम्बद्ध गोपी कहते हैं। योजना में नन्दरायजी के कुल और देह के सम्बन्ध से रहित गोपीजन को असम्बद्ध कहा है। दोनों प्रकार की सम्बद्ध एवं असम्बद्ध गोपियाँ संगत और असंगत होने से दो प्रकार की थीं। श्री लेखकार जी **"सङ्गताः** का अर्थ करते हैं **भगवद्भोग्याः"** जिन गोपियों को भगवत्सेवा में अङ्गीकार किया है। श्री योजनाकारजी **"सङ्गताः"** का अर्थ करते हैं कि भगवान की सेवा में विशेष प्रकार से जिनकी नियुक्ति की गई है और **"असङ्गताः"** का यह भाव है कि जो समान कक्षावाली और अनाश्रित गोपी है। 'च' अव्यय का आशय बताते हुए कहते हैं कि जहाँ तहाँ छिपी हुई गोपियों के अतिरिक्त ब्राह्मणों की स्त्रियाँ तथा दूसरों की स्त्रियाँ भी आईं, जिनके ऊपर नन्दजी का कोई अधिकार नहीं था। जिस यशोदा के यहाँ सन्तानउत्पत्ति की आशा नहीं थी, ऐसी यशोदा को अचानक पुत्र उत्पन्न हुआ जानकर गोपियों के अन्तःकरण में भी सन्तोष हुआ। क्योंकि अब गोपियों का चतुर्विध पुरुषार्थ सिद्ध होगा; इससे सुनते ही उनके मन में परमानन्द हुआ। पहले, जन्म प्रकरण में श्रीकृष्ण भगवान् का वसुदेव-पुत्र कहा, यहाँ यशोदापुत्र कहा, उसका भाव बताने के लिये लिखते हैं कि, **'चतुर्विधपुरुषार्थस्तासां विशेषाकारेण सेत्स्यति'** गोपियों के चतुर्विध पुरुषार्थ सिद्धि, विशेष रूप से, यहाँ ही होगी। इसलिये यशोदापुत्र कहकर जताया कि यह सिद्धि इस स्वरूप से ही होगी। **पुष्टिमार्गीय चतुर्विध पुरुषार्थ,** 'पुष्टिमार्गे हरेर्दास्यं धर्मोऽर्थो हरिरेव हि। **कामो हरेर्दिदृक्षैव मोक्षः कृष्णस्थले ध्रुवम्** ॥' 'आकर्ण्य' पद में 'आ' उपसर्ग अल्प अर्थ में है, न कि, निश्चयार्थ में जिससे गोपियों ने पुत्र प्राकट्य के निश्चय की भी अपेक्षा नहीं की और आत्मा को अलंकृत करने लगीं। आत्मा को इसीलिये विभूषित करने लगीं कि उन्हें आत्मा ही भगवान को अर्पण करनी थी। 'आत्मा' शब्द के प्रयोग से यह बताया कि इनके शरीर आदि सर्व अलौकिक एवं अविकारी है। ऐसे अविकारी शरीरों से महानन्द का अनुभव किया जाता है न कि पुरुषोत्तम के भजनानन्द का। उन्होंने उत्तम वस्त्र पहन कर तथा आभूषणों से सुसज्जित हो, कज्जल लगा के, पुष्पमालाएँ गले में डाल, और भाल में सुन्दर तिलक की बिन्दी लगा कर अपने आप को अलंकृत किया ॥ ९ ॥

'श्रवणाविगमनपर्यन्तमात्मा' आचार्यचरण कहते हैं कि व्रजनारी अपने कानों से लेकर चरणों तक यथा शक्य अपनी आत्मा को विभूषित कर नन्दजी के घर गईं। इसका वर्णन शुकाचार्यजी **'नवकुङ्कुम'** श्लोक से करते हैं।

वे सब गोपियाँ देवता रूप थीं इसलिये भगवान् के सम्मुख पधारने के अवसर पर प्रफुल्लित मुखवाली हो गई। गोपीजनो के इस अलौकिक सौन्दर्य का वर्णन करते हैं कि जैसे तांबूल भक्षण से लाल मुखवाली अथवा पद्मिनो आदि सुलक्षण होने के कारण, आरक्त रेखायुक्त मुखवाली अथवा नवीन केसर की उत्तम लाल केसराओं को तिलक आदि से मिला दिया है अथवा केसर की केसराओं को पीस कर उनसे मुख पर रेखा करली है अथवा तो नवीन केसर की केसराएं ओष्ठ पर स्वाभाविक लाल रेखाओं के सदृश शोभित हो रही हैं वैसी गोपियाँ कृष्णदर्शनको चली। नव कुकुंम केसराओं से सुशोभित मुखारविन्द से विभूति वाली गोपियों को प्रभु के समीप जाने के समय सर्वस्व लेजाना था, किन्तु शीघ्रता के कारण केवल पूजा की सामग्री, पुष्पादि लेकर गई। यद्यपि शीघ्र जाने में गोपियों के स्थूल नितम्ब एवं अति उन्नत चलायमान स्तन प्रतिबन्धक होते थे तो भी शीघ्र गई। वे जहाँ अशक्य को शक्य कर सकती हैं वहाँ शक्य को शक्य करने में कौनसा संदेह है। शीघ्रता से जाने के कारण वेणियों में जैसे तैसे बांधी हुई मालाओं के बन्धन शिथिल होने से पुष्प रास्ते में गिरने लगे इसका वर्णन आगे के श्लोक में शुकाचार्यजी करेंगे।

कारिका—गन्धो रूपं तथा स्पर्शः कटाक्षभ्रमरोक्तयः। ताभिश्चतुष्टयं ज्ञेयं रसं ज्ञास्यति माधवः॥ ११॥

कारिकार्थ—गन्ध, रूप, स्पर्श, शब्द और रस इन पांचों में से गन्ध, रूप, स्पर्श और शब्द–याने कटाक्ष और भ्रमर की गुंजार ये चार उन गोपी जनों के द्वारा जाने जाएँगे, रस तो माधव प्रभु आप ही जानेंगे।

श्री पुरुषोत्तमजी प्रकाश टीका में सुबोधिनी में दिये हुए **'आत्मालंकारो यावता'** का भावार्थ दो प्रकार से है। यावता पद से 'ताटंक हंस नूपुरादिना' नूपुर आदि से जितना बन सका उतना आत्मा को सजाया। यावता कालेन जन्म सुनते ही आनन्दित हुई तो जाने में विलम्ब क्यों? इस पर कहा है कि आत्मा सुशोभित करने में जितना समय लगा उतना आवश्यक विलम्ब हुआ। **"ताः सर्वदेवताः"** वाक्य का प्रकाशकारजी रहस्य बताते हैं कि शुकदेवजी ने गोपियों का इस तरह वर्णन क्यों किया? इसलिये सुबोधिनीजी में आचार्य श्री ने कहा कि गोपियाँ साधारण स्त्रियां नहीं थी किन्तु **'ताः सर्वदेवताः'** ये देवताओं की स्त्रियां थी, इसलिये श्री शुकदेवजी ने इस प्रकार वर्णन किया।

श्री लेखकारजी श्री आचार्यचरण के **'ताः सर्वा देवतारूपाः'** का भावार्थ बताते हैं कि गोपियों के देह की आत्मा शब्द से कहा गया है, इससे वह देह अविकृत होने से अलौकिक थीं, इसलिये गोपियों को देवतारूप कहा है। नवकिञ्जल्क आदि से उनकी शोभा या उत्तमता का वर्णन गौण है। मुख्य तो उनकी शोभा, मुखारविन्द का विकास आदि अलौकिक था। इसलिये अलौकिक विकासादि को भगवान् ही जानते थे। अलौकिकता के कारण उसका ज्ञान ध्वनि से ही मालूम होता है। **'आरक्तरेखायुक्ता'** का आशय कहते हैं कि 'अधरस्थित रेखाएँ ही किञ्जल्क हैं अथवा किञ्जल्क अधर के समान हैं, और इसी प्रकार नवीन केसर के समान किञ्जल्क जिनमें नवीन केसर की किञ्जल्क जिनमें ऐसे सुन्दर विकसित मुखकमलों से शोभावाली गोपिकाएँ प्रभुदर्शनार्थ पधारी॥ १०॥

श्री योजनाकार का आशय यह है कि—'नवकिञ्जल्क' श्लोक से शुकदेवजी ने यह बताया है कि गोपियों में गन्ध रूप, स्पर्श, शब्द एवं रस ये सबसे उत्तम और अलौकिक पाँचों विषय भगवद्भोग्य हैं इसका स्पष्टीकरण आचार्यश्री ने **"गन्धो रूप"** कारिका में किया है। मूल श्लोक के **'नवकुङ्कुम पद से सुगन्ध'**, 'किञ्जल्क पद से' रूप 'मुखपंकज' पद से स्पर्श शब्द एवं रस बताये हैं। पंकज का स्पर्श सुखकारक है इससे इनके स्पर्श की आनन्दप्रदता सूचित की। कमल पर भ्रमर गुंजार करते ही हैं इससे गोपियों में 'मुख' शब्द बताया। कमल में मकरन्द रहता है इससे गोपियों को रसवती कही। यों कहने का भाव यह है कि भगवान् के नासिका नयनादि से भोग्य पांचों विषय गोपियों के अलौकिक अंगों में विराजते हैं।

इस प्रकार आगे नवमें एवं दसवें श्लोक में मार्ग में जाती हुई गोपियों के स्वरूप का वर्णन किया गया अब नन्दालय में प्रवेश करती हुई गोपियों के स्वरूप का वर्णन करते हैं **"गोप्यः सुमृष्टमणिकुण्डल इति"**— दूर सुदूर गावों से आई हुई गोपियाँ जैसे तैसे किसी प्रकार नंदालय के समीप आकर जब वे आपस में मिलीं तब उन सब के साथ मिलने से शोभा विशेष बढ़ी। **"गोप्य" इति पुनर्ग्रहणं** पद से आचार्यचरणों का कहना है कि नवम श्लोक में **"गोप्यश्चाकण्य"** पद से गोपीजनों का उल्लेख किया है फिर यहां पुनः **"गोप्य"** इसलिये कहा है कि गोपियाँ सब एक स्थान से नहीं आई थीं, किन्तु भिन्न-भिन्न स्थानों से आकर सब नन्दालय के निकट मिलकर इकट्ठी हुईं और नन्दालय में, साथ ही प्रविष्ट हुई।

यद्यपि व्रजनारियाँ आभूषणादि तो, पहले से ही पहने हुए थीं, किन्तु सर्व आभूषण वस्त्रों के भीतर ढके हुए थे, अब अलंकारों की शोभा घर में आने पर, खुले होने से दिखाई देने लगी, जिससे सभों ने जाना कि इन्होंने सर्वांग में विविध आभूषण धारण किये हैं। ऐसे ही वस्त्रों की शोभा भी नन्दालय में आने पर ज्ञात हुई। रास्ते में केशकला से गिरते हुए पुष्पों की वर्षा गोपियों की त्वरित गति एवं जाने के मार्ग की सूचना दे रही थी। कंकणों ने भी रूप और शब्द से अपना स्वरूप

बताया कि दूसरे आभूषणों के समान हम भी हैं। गोपियाँ हिलते हुए कुण्डल, पयोधर और हारों से सुशोभित देखने में आईं। 'तद्गता:' ? इन कुण्डल पयोधर और हारों में से, आभूषणों में कुण्डल राजस पयोधर तामस और हार सात्विकता के प्रतीक थे। कुण्डल, पयोधर और हारों में चंचलता आ जाने के कारण सर्व प्रकार की गोपियों की उत्सव में आसक्ति बताई। कानों में उज्ज्वल मणियुक्त कुण्डल वाली, कण्ठ में पदकों के हार और विविध रङ्ग के उत्तम अम्बर वस्त्र वाली और मालाओं के फूलों को रास्ते में वर्षा करने वाली गोपियों ने नन्दमहल में प्रवेश किया। जिस प्रकार गोपियां आभूषणों से सुशोभित थीं उसी प्रकार कंकण सहित चलायमान कुण्डल, स्तन और हार भी गोपियों के कारण सुशोभित हो रहे थे।

श्री लेखकार जी का कथन है कि यदि अग्रिम दशम श्लोक में श्री व्रजवनिताओं का श्री नन्दालय में 'गमन' का मुख्य रूप से वर्णन किया गया तब इस ग्यारहवें श्लोक में 'प्रवेश' का मुख्य रूप से वर्णन करना चाहिये, फिर शोभा की मुख्यता का वर्णन क्यों किया ? ऐसे संदेह का निवारण करने के लिये आचार्यचरणों ने कहा है कि **'दूरादागत्य'** दूर दूर से आकर एक स्थान पर सब गोपियां मिलीं तब गोपियों की आभूषणों से और आभूषणां की गोपियों से परस्पर शोभा बनी। इसलिये **'व्यालोल-कुण्डल-पयोधर-हार-शोभा'** इस संस्कृत पद के दो प्रकार के विग्रह करके दो भाव बताये हैं। इसलिये प्रवेश की मुख्यता न बताकर शोभा की मुख्यता बताई गई है ॥ ११ ॥

श्री आचार्यचरण कहते है **"तत्रागतानां कृत्य"** नन्दगृह में आई हुई गोपियां के इस प्रकार बहुत स्नेह से आशिष देने लगी। उनके आशीर्वाद सत्य थे क्योंकि गोपियों में भगवदावेश था। इसलिये उन्होंने कहा कि **'चिरं पाहि'** बहुत समय तक हमारी रक्षा करो। यह आशीर्वाद भी भगवान् का परोक्ष समझ कर नहीं दिया किन्तु प्रत्यक्ष नयन गोचर हो रहे हैं, ऐसा समझकर 'पाहि' ऐसा मध्यम पुरुष का रूप दिया। गोपियों का सर्वभाव से भगवान् पालन थोड़े समय तक ही करगे। यह जान कर ही बहुत काल तक रक्षा के लिये प्रार्थना की। यह प्रार्थना केवल एक गोपी ने नहीं की किन्तु प्रत्येक गोपी जनने स्वतन्त्र अपने मुख से अपने लिये प्रार्थना करते **'चिरं पाहि'** का उच्चारण किया, क्योंकि प्रत्येक गोपी में भगवत्स्फूर्ति थी। इस प्रकार आशिष प्रदान करती हुई भगवद्भाव से अत्यन्त विभोर बन गई और प्रेमाविष्ट हो गई। प्रेममग्नता के कारण तो हल्दी, चूना, तैल और पानी मिलाकर आपस में छिड़कती हुई भगवान् के गीत गाने लगीं, हल्दी में चूना मिलाने से लाल रंग हो जाता है, फिर उसमें तैल मिला कर किसी को लगाने से वह रंग मिटता नहीं, बहुत समय तक लगा रहता है और जल में मिलने से वह रंग फैल जाता है। ऐसा करने का आशय यह है कि भगवान् के प्रति हमारा प्रेम चिरंतन रहे और वृद्धिंगत बने, मिटे नहीं। यदि शंका की जाय कि कुलीन स्त्रियों में ऐसा भाव पर पुरुष में कैसे हुआ ? तब कहते हैं कि ये तो पर पुरुष नहीं परंतु अजन पूर्ण पुरुष भगवान है। अजन भगवदावेश से गोपियों न यह जान लिया था कि नन्दजी के यहाँ साधारण मानव का जन्म नहीं हुआ है, किन्तु अजन्मा भगवान् स्वयं पधारे हैं। इसलिये भगवान् के मिलने पर अन्य सबकी अपेक्षा जाती रहती है उनके मन में भगवद्भाव के अतिरिक्त लौकिक आदि का उद्भाव हीं नहीं होता। इससे प्रेममत्त हो सिञ्चन करती हुई वे गोपियाँ भगवान् का जोर जोर से यशोगान करने लगीं।

श्रीप्रकाशकारजी "चिरं पाहि" पदकी समालोचना करते हुए कहते हैं कि प्रसिद्ध प्रकार से गोपी जनों को आशीर्वाद में तो 'चिरंजीव' इतना कहना था साथ में 'पाहि' हमारी रक्षा करो ऐसा क्यों कहा ? इसका भाव बताते हुए सुबोधिनी में 'तासां भगवदावेशात् सत्या एवाशिषः' कहा है कि गोपियों में भगवान का आवेश होने से यह कहना सत्य है। वे जानती थीं कि भगवान् श्रीमथुरा पधारेंगे और अल्प समय तक ही हमारी रक्षा करेंगे। इसलिये चिरं पाहि ये दो पद साथ में कहे। अब दूसरा भाव बताते हैं कि भगवान् मथुराजी भी जायं तो भी रात्रि के समय तो हमारी रक्षा करेंगे, दिन का नहीं करेंगे, इसलिये दिन के समय भी रक्षा करें इसलिये 'चिरं पाहि' बहुत समय तक 'दिन रात्रि' में हमारी रक्षा करो इस प्रकार कहा यह आशिष सत्य हुई क्योंकि 'क्षोपु रेमेह्यनिशं' कहा है भगवान् गोपीजनां में निरंतर रमण करते थे। यदि ऐसी ही इच्छा थी तो 'चिरं' अव्यय का प्रयोग न कहकर 'सदा' रक्षा करो कहना चाहिये तब कहते है कि 'सदा' इसलिये गोपियों ने नहीं कहा कि वे जानती थी कि यदि हम सदा रक्षण की प्रार्थना करेंगी तो प्राप्त रस का अनुभव न कर सकेंगी। इसलिए 'सदा' न कह कर 'चिरं' कहा।

प्रकाशकारजी "हरिद्राचूर्ण" पदों का मर्म बताते हैं कि इस प्रकार वाणी से प्रार्थना कर क्रिया से भी उस आशय को बताती है। हल्दी में चूर्ण तैल जल आदि मिलाकर सिंचन करने से यह कहा कि जैसे लाल रंग व्यापक होकर मिटता नहीं है वैसे ही आपका और हमारा प्रेम ऐसा सुदृढ और व्यापक हो किन्तु कदापि क्षीण न हो।

आगे चलकर प्रकाशकारजी "अजन" पद पर कहते कि गोपियों ने ऐसे भाव जो प्रकट किये उसका कारण यह था कि गोपियों में भगवान् कृष्ण के लिए मनुष्यभाव नहीं था किन्तु ब्रह्मभाव था। वे जानती थी यह प्रकट बाल स्वरूप भगवान् है।

अब प्रकाशकारजी कहते हैं कि 'स हि' पदों में सः पद और हि अव्यय के निर्देश से सुबोधिनी में बताया गया है कि गोपियों ने जान लिया हैं कि ये वे ही भगवान् है जिन्होंने हमको वरदान दिया था। वे भगवान् षड्गुणैश्वर्य संयुक्त अक्षर में ही

विराजमान हैं। अन्य बालक की तरह भूतल पर इनका जन्म नहीं हुआ है किन्तु अक्षर को प्रकट कर उसमें आपका प्रादुर्भाव हुआ है। गोपियों ने भगवदावेश होने से ऐसा समझा था।

श्रीलेखकारजी सुबोधिनीजी के "अतो भगवति प्राप्ते" पदों के भाव प्रकट करते है कि यहाँ भगवान् शब्द से पुरुषोत्तम समझना चाहिये। पुरुषोत्तम जिनको मिले हैं उनको लोकवेद की अपेक्षा नहीं रहती है क्योंकि श्रुति कहती है कि 'न बिभेति' ब्रह्मज्ञानी किसी से डरता नहीं ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

विप्रादयः सौमङ्गल्यगिरः स्वस्तिवाचका बभूवुः। तत्र "सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः। बंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः" इति भेदः। मुहुरित्यस्य सर्वत्रान्वयः। अन्ये च गायका जगुः, भेर्यो दुन्दुभयश्च नेदुः ॥ ५ ॥ सम्यक् मृष्टानि निःसारितरजस्कानि ततश्चन्दनपुष्पादिजलैः संसिक्तानि च द्वाराणि अजिराणि अङ्गणानि गृहान्तराणि गृहमध्यानि च यस्मिंस्तथाभूतो व्रजश्चित्रध्वजादिभिर्भूषितो जात इति शेषः चित्रेति प्रत्येकविशेषणम्, गरुडादिचिह्निता ध्वजाः, जययन्त्राङ्किताः पताकाः। स्रजां पुष्पमालानां, चैलानां वस्त्रखण्डानां, पल्लवानां च त्रिविधानि तोरणानि च तैः ॥ ६ ॥ हरिद्रायुक्ततैलेन रूषिता लिप्ताः, विचित्रा धातवो गैरिकादयश्च बर्हाणि मयूरपिच्छानि च स्रजः पुष्पमालाश्च वस्त्राणि च काञ्चनमालाश्चालङ्कारतया विद्यन्ते येषां तथाभूता गवादयो बभूवुरिति शेषः ॥ ७ ॥ "राज्ञामेवमुत्सवो भवति, तं त्वं जानास्येव" इति सूचयन् सम्बोधयति—राजर्षिति। महार्हाणि अमूल्यानि यानि वस्त्रादीनि तैर्भूषिताः नानाविधान्युपायनानि प्रदेयानि वस्त्राभरणादीनि पाणौ येषां ते गोपाः सम्यक् सादरा हृष्टाः आययुः ॥ ८ ॥ यशोदायाः सुतोद्भवमाकर्ण्य प्रमुदिताः प्रहृष्टा गोप्यश्चात्मानं वस्त्रादिभिर्भूषयाञ्चक्रुरित्यन्वयः। आकल्पा अलङ्काराः आदिपदेन चन्दनमालादिसङ्ग्रहः ॥ ९ ॥ नवकुङ्कुमकिञ्जल्कैर्मुखपङ्कजेषु भूतिः शोभा यासां ताः। बलिभिः स्वर्णमुद्रारत्नहारानर्घ्यवस्त्रनारिकेलादिफलाक्षतदूर्वाचन्दनपुष्पमालाद्यैः पाणिभिर्गृहीतैः सह त्वरितं यथा स्यात्तथा नन्दगृहं जग्मुरित्यन्वयः। यद्यपि स्थूलश्रोणिकुचत्वात् तासां बलिं गृहीत्वा त्वरितगमनमसम्भावितमेव, तथाप्यत्यौत्सुक्यवशात्तथा जग्मुरित्याशयेनाह—पृथुश्रोण्यश्चलत्कुचा इति ॥१०॥ ताश्च गोप्यो नन्दालयं नन्दगृहं प्रति व्रजन्त्यः पथि मार्गे विशेषतो रेजुरित्यन्वयः। शोभातिशयं प्रदर्शयंस्ता विशिनष्टि—सुमृष्टानि निर्मलीकृतानि मणिमयानि कुण्डलानि यासां ताश्च, निष्काः पदकाख्यभूषणानि कण्ठे यासां ताश्च, चित्राणि अम्बराणि वस्त्राणि यासां ताः। शिखाभ्यश्च्युतानि गलितानि माल्यानि, तेषां वर्षाणि वृष्टयो यासु ताः। वलयैः कङ्कणैः सहिता भूषिता इति सवलयाः। व्यालोलैर्गतिवशेन प्रचलद्भिः कुण्डलपयोधरहारैः शोभा यासां ताः ॥ ११ ॥ तत्रागतानां कृत्यमाह—ता इति। ता गोप्यो बालके श्रीकृष्णे चिरं पाहीत्येवमाशिषः प्रयुञ्जानाः सत्यो हरिद्राचूर्णतैलाद्भिर्मिलितैर्जनं सिञ्चन्त्यश्च उच्चैर्जगुरित्यन्वयः। चिरं पाहीत्यनेन लोके हि बालके 'त्वं चिरं जीव' इत्येवमेवाशिषः प्रयोगो भवति, स तु भगवत्यनुचित एवेति तासां तत्र स्नेहाधिक्यात् तत्कृपया यथोचितमेव प्रयोगो जातः। एवमपि चिरजीवनं तु फलत्येवेति ज्ञेयम्। यद्वा 'भो परमेश्वर ! एनं चिरं पाहि' इत्याशिषः प्रयुञ्जानाः ॥ १२ ॥

अन्वितार्थप्रकाशिका

सौमङ्गल्येति। तदा विप्राः सूतमागधबन्दिनश्च मुहुः सुमङ्गलमेव सौमङ्गल्यं तद्बोधिका गिरो येषां ते सौमङ्गल्यगिरो बभूवुः। गायकाश्च मुहुर्जगुः भेर्यः दुन्दुभयश्च मुहुः नेदुः। "सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः। बन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः।" ॥ ५ ॥ व्रज इति। पूर्वं सम्यक् मृष्टानि मार्जन्यादिभिर्मार्जितानि ततः चन्दनादिजलैः संसिक्तानि च द्वाराणि अजिराणि अङ्गणानि गृहान्तराणि गृहमध्यानि च यस्मिंस्तथाभूतो व्रजः चित्राभ्यां ध्वजपताकाभ्यां तथा चित्राणां स्रजां चैलानां चैलखण्डानां पल्लवानां चेति त्रिविधैस्तोरणैर्विभूषितोऽभूदिति शेषः। यद्वा। चित्रध्वजेषु पताकानां स्रजश्चैलपल्लवतोरणानि च तैर्भूषितः ॥ ६ ॥ गाव इति। गावः वृषा वत्सतराः त्रिहायना वत्साः वृषाश्च। वत्साश्चेति पाठे चकारौ महिष्यादिग्रहणार्थौ एते हरिद्रायुक्ततैलेन रूषिताः लिप्ता विचित्रा धातवो गैरिकादयश्च बर्हाणि मयूरपिच्छानि च स्रजः पुष्पमालाश्च वस्त्राणि च काञ्चनमालाश्चालंकारतया विद्यन्ते येषां तथा गवादयो बभूवुः ॥ ७ ॥ महार्हेति। हे राजन् ! महम् उत्सवम् अर्हन्ति महार्हाणि वस्त्राणि आभरणानि कञ्चुकाः उष्णीषाः शिरोवेष्टनानि तैर्विभूषिताः नानाविधान्युपायनानि प्रदेयानि वस्त्राभरणादीनि पाणौ येषां ते गोपाः सम्यक् सादरा हृष्टाः स्वगृहे ध्वजादि मङ्गलं प्रवर्त्य आययुः ॥ ८ ॥ गोप्य इति। यशोदायाः सुतोद्भवमाकर्ण्य प्रमुदिताः प्रहृष्टा गोप्यश्चात्मानं वस्त्राणि आकल्पाः अलंकारा अञ्जनानि तैः आदिना मालादिभिश्च भूषयांचक्रुः ॥९॥ नवकुङ्कुमेति। नवकुङ्कुमस्य किञ्जल्कात् केसरादपि नवकुङ्कुमकिञ्जल्कैर्वा मुखपङ्कजेषु भूतिः शोभा यासां ताः पृथुश्रोण्योऽपि कबभाव आर्षः। हर्षवेगवशात् चलत्कुचाः ता गोप्यः बलिभिः स्वर्णमुद्रारत्नहारवस्त्रफलदूर्वाद्यैः सह त्वरितं यथा स्यात्तथा नन्दगृहं जग्मुः ॥ १० ॥ पुनर्भक्तिवशाद्गोपीर्वर्णयति—गोप्य इति। सुमृष्टानि निर्मलीकृतानि मणिमयानि कुण्डलानि यासां ताश्च निष्का पदकाख्यभूषणानि कण्ठेषु यासां ताः चित्राण्यम्बराणि यासां ताः शिखाभ्यो धम्मिल्लाग्रेभ्यश्च्युतानि पतितानि माल्यानि तेषां वर्षाणि वृष्टयो यासु ताः

वलयैः कङ्कणैः सहिता भूषिता इति सवलयाः व्यालोलगतिवशेन प्रचलद्भिःकुण्डलैश्च पयोधरेषु हारैश्च शोभा यासां ताः इति चलत्कुचा इत्यनेन न पौनरुक्त्यम्। गोप्यः नन्दालयं प्रतिव्रजतीः व्रजन्त्यः पथि विशेषतो रेजुः। व्रजतीरिति नुमभावः पूर्वसवर्णदीर्घश्चार्षः ॥ ११ ॥ ता आशिष इति। ता गोप्यो बालके श्रीकृष्णे चिरं पाहि हे परमेश्वर! एनं बालं चिरं पाहि इत्येवं राजपुत्रत्वेन युवराजो भूत्वाऽस्मान्पाहीति वा आशिषः प्रयुञ्जानाः सत्यः। चिरं जीवेत्यपि पाठः। हरिद्राचूर्णतैलाद्भिर्मिलितैर्जनं सिञ्चन्त्यश्च उच्चैर्जगुः। अद्भिरिति समासान्ताभाव आर्षः। मिथः सिञ्चन्त्यः अजनं हरिमुज्जगुरिति वा ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सुमङ्गलमाचष्टे इति। सुमङ्गलयतीति सुमङ्गलिः सैव सौमङ्गल्या सुमङ्गलवाचिका गीर्येषां ते तत्करोति तदाचष्टे इति णिच् तदंतात् अच इरिति इप्रत्ययस्तदंतात् स्वार्थे ष्यञ् ॥५॥ व्रज इति संमृष्टानि संमार्जितानि संसिक्तानि च द्वाराणि अजिराणि अंगणानि च गृहान्तराणि गेहमध्यानि च यस्मिन्सः चित्रध्वजेषु चित्रितध्वजदण्डेषु पताकानां स्रजः पंक्तयश्च चैलानां वस्त्राणां पल्लवानां नवांकुराणां च तोरणानि तैः विभूषित इति शेषः ॥ ६ ॥ वत्सतराः नवीनवत्साः हरिद्रतैलैः रूषिता लिप्ताः विचित्रा धातवो गैरिकादयश्च बर्हस्रजश्च वस्त्राणि च काञ्चनमालाश्च एतानि भूषणतया संति येषाम् एवं गवादयो अलंकृता इत्यर्थः ॥ ७ ॥ उष्णीषं मस्तकवेष्टनम् ॥ ८ ॥ सुतोद्भवं पुत्रजन्म आकल्पा आभरणानि ॥ ९ ॥ नवकुंकुमानां किंजल्कैः परागैः मुखपद्मेषु भूतिः श्रीर्यासां ताः ॥ १० ॥ सुमृष्टानि उज्ज्वलानि मणियुक्तानि कुंडलानि यासां ताः। निष्काः कण्ठाभरणानि कंठे यासां ताः। ताश्च तास्ताश्च शिखाभ्यः कबरेभ्यः च्युतानि पुष्पवर्षाणि यासां ताः सवलयाः सकंकणाः व्यालोलैश्चलद्भिः कुंडलादिभिः शोभा यासां ताः। नंदगेहं व्रजतीः व्रजंत्यः गोप्यः पथि विरेजुः ॥ ११ ॥ ताः गोप्यः हे बालक नोऽस्मान् चिरं जीवन् सन् पाहि इति बालके आशिषः आशीर्वादान् प्रयुंजानाः कथयंत्यः परस्परं सिंचिंत्यः अजनं हरिम् उज्जगुः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सौमङ्गल्येति। तदा विप्राः, सौमङ्गल्यगिरः स्वस्तिपाठकाः, बभूवुः। सूतमागधबन्दिनः; गायकाश्च, जगुः। तत्र सूताः पौराणिकाः पुराणवार्त्ता जगुः। मागधा वंशावलीपाठकाः वंशावलीर्जगुः, बन्दिनः स्तुतिपाठकाः, स्तुतीर्जगुः, गायकास्तालस्वरपूर्वं पद्यानि जगुः, भेर्यः, दुन्दुभयश्च, मुहुः नेदुः ॥ ५ ॥ व्रज इति। तदा, व्रजः, संमृष्टानि संमार्जन्या संशोधितानि संसिक्तानि चन्दनोदकादिभिः स्नापितानि द्वाराणि प्रतीहाराः अजिराण्यङ्गणानि गृहान्तराणि गृहाणां मध्यप्रदेशाश्च यस्मिन् स तथाभूतः। ध्वजाश्च पताकाश्च स्रजश्च चैलपल्लवतोरणानि च चित्राणि यानि ध्वजादीनि तैः, अलंकृतश्च, बभूव। ध्वजादीनामितरेतरयोगद्वन्द्वत्वाच्चित्रशब्दस्य द्वन्द्वादौ श्रुतत्वाच्चित्रपदं प्रत्येकान्वयि ॥ ६ ॥ गाव इति। गावो धेनवः, वृषा वृषभाः, वत्सतराः स्पष्टतारुण्या वत्साः, हरिद्रा च तैलं च ताभ्यां रूषिता उपलिप्ताः, विचित्रा ये धातवस्ते च बर्हस्रजो मयूरपिच्छमालाश्च वस्त्राणि च काञ्चनमालाश्च अलंकारतया विद्यन्ते येषां तथाभूताश्च, बभूवुः। भूषिता इति पाठे, तैर्भूषिता अलंकृताः ॥ ७ ॥ महार्हेति। हे राजन्, महार्हाणि महामूल्ययोग्यानि च तानि वस्त्राणि च आभरणानि च कञ्चुकानि च उष्णीषाणि च तैर्भूषिताः, गोपाः, नानोपायनानि पाणिषु येषां तथाभूताः सन्तः, समाययुः ॥ ८ ॥ गोप्य इति। गोप्यश्च गोप्योऽपि, यशोदायाः सुतोद्भवं, आकर्ण्य, मुदिताः सत्यः, वस्त्राणि च आकल्पा अलंकाराश्च अञ्जनानि च तान्यादयो येषां चन्दनलेपादीनां तैः, आत्मानं, भूषयांचक्रुः ॥ ९ ॥ नवेति। नवाः कुङ्कुमकिञ्जल्का येषु तेषां मुखपङ्कजानां भूतयः शोभा यासां ताः, पृथुश्रोण्यः पृथुजघनाः, चलन्तौ कुचौ यासां ताः, बलिभिरुपायनैः सहिताः सत्यः, त्वरितं यथा तथा, जग्मुः। नन्दालयं प्रतीति शेषः ॥ १० ॥ गोप्य इति। सुमृष्टानि उज्ज्वलानि मणिमयानि कुण्डलानि यासां ताः, निष्काः पदकानि कण्ठेषु यासां ताश्च ताः, ताश्च, बहुव्रीहिद्वयगर्भः कर्मधारयः। चित्राण्यम्बराणि यासां ताः, पथि मार्गे, शिखाभ्यश्च्युतानि माल्यवर्षाणि यासां ताः, वलयैः करकङ्कणैः सहिताः सवलयाः, व्यालोलानां गतिरभसेन चलतां कुण्डलपयोधरहाराणां शोभा यासां ताः, गोप्यः, नन्दालयं प्रति, व्रजतीर्व्रजन्त्यः सत्यः, विरेजुः ॥ ११ ॥ ता इति। ताः गोप्यः, चिरं पाहि, अस्मानिति शेषः। इत्येवं, बालके, आशिषः प्रयुञ्जानाः, हरिद्राचूर्णतैलाद्भिः हारिद्रायास्तैलमिश्रैश्चूर्णैरद्भिश्च, जनं सिञ्चन्त्यः सत्यः, उज्जगुः। यद्वा। परस्परं सिञ्चन्त्यः सत्यः, अजनं भगवन्तं, उज्जगुरुच्चस्वरेणागायन् ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

महार्हेति : १०.५८.

लसत्स्रग्वासोऽलङ्कृतिधृतिवहे गोपनिवहे न रोषो वा दोषो बत विषयितायाः प्रणिहितः।
कचिद्बालङ्कृत्यभिरुचिरुदोताः यदि तदा सरोषं यद् ब्रूषे वद किमु सखाऽसौ रिपुरहम् ॥ ३ ॥

कृष्णप्रिया

विप्र, सूत, मागध, बंदी, ये सब मांगलिक वचन कहने लगे, गायक-नर्तक और स्त्रीवृन्द नृत्य गान करने लगे और भेरियां तथा दुंदुभि भी बारंबार मांगलिक ध्वनि करने लगी ॥ ५ ॥ सम्पूर्ण व्रज में सबके द्वार, आंगन, गृहों के भीतर के

भाग और गली राजमार्ग आदि सब झाड़े, स्वच्छ किये और छिड़के गए। चित्र विचित्र ध्वजाओं एवं पताकाओं की मालाएँ एवं वस्त्र और पल्लवों की बन्दनवारों से द्वार और मार्ग सुशोभित किये गए ॥ ६ ॥ गाय, बैल बूढे बैल और बछड़ों को हल्दी-युत तैल से रंगे, विचित्र धातु गेरू, आदि लगाये, मोरपंख लगाई, झूल ओढ़ाई और सुवर्ण की मालाएँ पहनाई इससे गौओं की शोभा और बढ़ी ॥ ७ ॥ हे राजन्! अतिशय अणमोल और श्रेष्ठ वस्त्र एवं आभूषण पहन, अंगरखे, पगड़ी आदि से भूषित होकर सब गोप जन विविध प्रकार की भेटें करकमलों में लेकर नन्दालय में आए ॥ ८ ॥ श्रीयशोदा के यहाँ लालन का प्राकट्य सुनकर, प्रसन्नमन गोपियों ने वस्त्र आभूषण और अंजन आदि से अपनी आत्मा को अलंकृत किया ॥ ९ ॥ पिसी हुई नवीन केसर के तिलक एवं बिंदियों से सुशोभित मुखकमल एवं पुष्ट नितम्ब वाली और चलने से चलायमान स्तन वाली व्रज-नारी करकमलो में सामग्री भेटें लेकर शीघ्र ही भगवान् के दर्शन के लिये नन्दरायजी के घर जाने लगी ॥ १० ॥ गोपियां कानों में उज्ज्वल मणियों से जड़ित कुण्डल पहिने हैं, गले में पदकों के हार धारण किये हैं, हाथों की कलाइयों में कंकण पहिने हैं एवं विविध, विचित्र वस्त्र पहिने हैं, जिनकी वेणियों में से मार्ग में फूलों की वृष्टि हो रही है और जिनके स्तन, कुण्डल और हार हिल रहे हैं, ऐसी शोभामयी गोपियों की श्री नन्दालय में प्रवेश करते समय विशेष शोभा हुई ॥ ११ ॥ गोपियां बालक भगवान को आशीर्वाद प्रदान करती हुई तथा यह कहती हुई कि आप हमारी बहुत समय तक रक्षा करो, हलदी, चूना, तैल और पानी मिला के परस्पर एक दूसरे पर सिंचन करती हुई उस अजन भगवान् का जोर से यशोगान करने लगीं ॥ १२ ॥

अवाद्यन्त विचित्राणि वादित्राणि महोत्सवे । कृष्णे विश्वेश्वरेऽनन्ते [1]नन्दस्य व्रजमागते ॥ १३ ॥
गोपाः परस्परं हृष्टा दधिक्षीरघृताम्बुभिः । आसिञ्चन्तो [2]विलिपन्तो नवनीतैश्च चिक्षिपुः ॥ १४ ॥
नन्दो महामनास्तेभ्यो वासोऽलङ्कारगो[3]धनम् ।[4] सूतमागधबन्दिभ्यो येऽन्ये विद्योपजीविनः ॥ १५ ॥
तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् । विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥ १६ ॥
रोहिणी च महाभागा नन्दगोपाभिनन्दिता । व्यचरद् दिव्यवासःस्रक्कण्ठाभरणभूषिता ॥ १७ ॥
तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमान् । हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप ॥ १८ ॥
गोपान् गोकुलरक्षायां निरूप्य मथुरां गतः । नन्दः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ॥१९ ॥
वसुदेव उपश्रुत्य भ्रातरं नन्दमागतम् । ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनम् ॥ २० ॥

कर्दमक्षमा

अन्वयः—नन्दस्य व्रजम् विश्वेश्वरे अनन्ते कृष्णे आगते (सति) महोत्सवे विचित्राणि वादित्राणि अवाद्यन्त ॥ १३ ॥ हृष्टाः गोपाः दधि-क्षीर-घृत-अम्बुभिः परस्परं आसिञ्चन्तः विलिम्पन्तः ॥ १४ ॥ महामनाः नन्दः सूतमागधबन्दिभ्यः ये अन्ये विद्योपजीविनः तेभ्यः वासः-अलंकार-गोधनम् प्रादात् ॥ १५ ॥ अदीनात्मा विष्णोः आराधनाय च स्वपुत्रस्य उदयाय तैः तैः कामैः यथा उचितम् अपूजयत् ॥ १६ ॥ नन्दगोपाभिनन्दिता महाभागा रोहिणी च (अन्याः) दिव्य-वास-स्रक्-कण्ठ-आभरण-भूषिता व्यचरद् ॥ १७ ॥ नृप ततः नन्दस्य व्रजः सर्वसमृद्धिमान् हरेः निवास–आत्मगुणैः रमाक्रीडम् अभूत् ॥ १८ ॥ कुरुनन्दन ! गोपान् गोकुलरक्षायां निरूप्य नन्दः कंसस्य वार्षिक्यं करं दातुं मथुरां गतः ॥ १९ ॥ वसुदेवः भ्रातरम् नन्दम् आगतम् उपश्रुत्य राज्ञे दत्तकरम् ज्ञात्वा तद् अवमोचनम् ययौ ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तेभ्यः प्रादात् ॥ १५ ॥ यथोचितमन्यानप्यपूजयत् ॥ १६–१७ ॥ हरेर्निवासेन ये आत्मनि व्रजे गुणाः सर्वप्रियत्वादय आसंस्तै रमाया आक्रीडं विहारस्थानम् ॥ १८ ॥ वार्षिक्यं प्रतिवर्षदेयम् ॥ १९ ॥ भ्रातरं सखायम् । तदवमोचनं तस्य नंदस्य वसतिस्थानम् ॥ २०–२३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आगते प्राप्ते ॥ १३ ॥ हृष्टा गोपाः परस्परं विचिक्षिपुरिति संबंधः । यद्वा—क्षीरादिभिरासिञ्चंतो नवनीतैर्विलिम्पंतो दधि चिक्षिपुः यद्वा—नीतैर्गृहीतैर्दध्यादिभिर्नवशब्दोपलक्षितान्नवनदांस्तत्संबंधिनश्च विचिक्षिपुरित्यर्थः ॥ १४ ॥ तेभ्यः गोपेभ्यः सूतादिभ्यश्च । विद्यास्तु चतुर्दशधा धर्ममीमांसादिरूपास्ताभिरुपजीवंतीति तथा ॥ १५ ॥ तैस्तैर्यान्या न याचतेत्यर्थः । यथोचितं

---

१. नन्द व्रजमुपेयुषि–वीर. विज जीव. । २. विलिम्पन्तो–श्रीधर. वंशी. जीव. गिरि. ; विलिम्पन्त–वीर. भक्त. । ३. गोधनैः–इति कस्यचिद् । ४. ददौ प्रीतमनास्तत्र पुत्रजन्मसुखैधितः–इति क्वचिदधिकः पाठः ।

विद्यागौरवमनतिक्रम्येत्यर्थः। आराधनार्थाय संतोषाय। अनेन दानादिना विष्णुः प्रसीदतु तत्प्रसादेन मत्पुत्रः कुशल्यस्त्विति संकल्पयन्नित्यर्थः। चकारान्नवग्रहदिक्पालादिप्रसादोऽपि ध्येयः ॥ १६ ॥ महाभागा वसुदेवपत्नीभ्यस्सर्वाभ्योऽपि श्रीकृष्णबाल्यलीलोत्सवलाभादिति भावः। नंदगोपेन नंदराजेन 'गोपो भूपेपि' इत्यमरः। यद्वा–नंदशब्देन नवनंदा ग्राह्यास्तेषां राज्ञा "नवलक्षमिता गावो यद्गृहे संति सर्वदा। स नंदो नंदराजस्तु ज्ञेयोऽसंख्यगवाधिपः।" इति गर्गोक्तेः। अभिनंदिता त्वदागमनादेव मत्पुत्रोऽयं जात इति श्लाघिता व्यचरत्समागतस्त्रीजनसंमाननार्थमितस्ततश्चचार। दिव्यवासादिभिश्श्रीयशोदानंदाभ्यां दत्तैर्भूषिता पत्युर्बंधनादिदुःखं स्वस्य च तद्विच्छेदादिदुःखं कृष्णजन्मोत्सवानंदेन विस्मृत्यैवेत्यर्थः ॥ १७ ॥ नन्वभिमतपूरणं तु धनदेनाप्यशक्यं कथं नंदेन कृतम्। तत्राह–तत इति। गुणाः सर्वपालनादयः। रमायाः सर्वसंपत्तेः 'रमा श्रीसर्वसंपदोः' इति यादवः। यदा सर्वसंपत्तिरेव क्रीडितुमारेभे तदा कस्य देयवस्तुनस्तत्राभाव इति भावः। यद्वा–'नायं श्रियः' इत्याद्युक्तरीत्या वैकुंठश्रीतोऽपि व्रजदेवीनामेव परमरमात्वोक्तेस्तासामपि परमरमा श्रीराधा तस्या अपि तदानीमाविर्भावात्तस्याश्च क्रीडास्थानं तदारभ्याभूदिति। किञ्च चिंतामणिसद्मादीनामपि निगूढनित्यक्रीडायां श्रवणात्तद्रमाक्रीडमेवेति तत्त्वम्। तदुक्तं "चिंतामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषु सुरभीरभिपालयन्तम्। लक्ष्मीसहस्रशतसंभ्रमसेव्यमानं गोविंदमादिपुरुषं तमहं भजामि। इति ब्रह्मसंहितायाम् ॥ १८ ॥ चिरात्सर्वमनोहरपुत्रोत्पत्त्या प्राप्तमहानिधिरिव 'श्रेयांसि बहुविघ्नानि' इति विमृश्य श्रीनंदराजो यथा पितृदिक्पालग्रहादीन्पूजादिभिः प्रसादयामास तथा देशाध्यक्षं दुष्टनृपं कंसमपि स्वर्णमुद्राद्युपहारेण प्रसादयितुं वार्षिककरदानमिषेण। तत्समीपं गंतुं न विलंब इत्याह–गोपानिति। हे कुरूद्वहेति। यथा कुरुकुलसंतानैकहेतोस्तव रक्षार्थं श्रीयुधिष्ठिरादयो व्यग्रास्तथेति संबुद्ध्यभिप्रायः ॥ १९ ॥ भ्रातरं वैश्यकन्यायां शूरवमात्रेयभ्रातुर्जातत्वादिति भारततात्पर्ये श्रीमध्वाचार्यैरुक्तं ब्रह्मवाक्यम्। "तस्मै मया स वरः संनिसृष्टः स चास नंदाख्य उतास्य भार्या। नाम्ना यशोदा स च शूरतातसुतस्य वैश्याप्रभवोथ गोपः," इति वैश्याप्रभव इति पितामह्यास्तज्जातित्वात्। अत एव "यादवानां हितार्थाय धृतो गिरिवरो मया" इति भगवद्वाक्यम् "यादवेषु च सर्वेषु भवंतो मम वल्लभाः" इति तद्भ्रातॄन्प्रति बलदेववाक्यम्। "भ्राता सहोदरे मित्रे पितृव्यादिसुतेऽपि च" इति धरणिः। अत्र समंतान्मुच्यते शकटादिकं यत्र तत्कृतावासस्थानमित्यर्थः। 'त्यागे स्थाने ऽवमोचनम्' इति च। यद्वा–'मार्गवासोऽवमोचनम्' इति कोशाच्छिबिर(डेरा)मित्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अवाद्यन्त वादकैरिति शेषः। विचित्राणि "ततं वीणादिकं वाद्यमानद्धं मुरजादिकं वंशादिकं तु सुषिरं कांस्यतालादिकं घनम्" इति चतुर्विधानि एकैकस्यावान्तरवैचित्र्याद्वादनवैचित्र्या च विचित्राणि किंवा अवाद्यन्त व्रजवादित्रेषु वाद्यमानेषु जगति यानि वादित्राणि तान्यपि स्वयं जनैश्च वादितानि बभूवुरित्यर्थः। तत्र हेतुः महोत्सवे यावदुत्सवे यावदुत्सवोपरि विराजमाने तन्महसि तत्राऽपि हेतवः कृष्णे जगच्चित्ताकर्षकमाहात्म्यतया स्वयमवतीर्णे भगवति विश्वेश्वरे सर्वप्रभौ अनन्ते स्वरूपैश्वर्यमाधुर्यैरपरिच्छिन्ने नन्दस्य व्रजं परमप्रेमानन्दामृतसमुद्रतया परमं निजोचितपदम् ईयुषि तस्मिन्नन्दयतीत्यर्थः। आगत इति क्वचित्पाठः ॥१३॥ हृष्टाः सन्तो दध्यादिभिः परस्परम् आ सम्यक् सिञ्चन्तः नवनीतैश्च परस्परं विशेषेण लिम्पन्तः परस्परं चिक्षिपुः बलेन प्रच्छन्नतया वा पिच्छिलपङ्के स्खलयामासुः ॥ १४ ॥ नन्द इति युग्मकम्। तेभ्यो गोपीभ्यो गोपेभ्यश्च तथा सुतादिभ्यश्च ये चान्ये विद्योपजीविनः गायकवादकादयः तेभ्योऽपि वास आदिकं प्रादादिति शेषः। तत्र धनं स्वर्णरूप्यादि यथोचितमित्युत्तरपद्यपदेनात्राप्यन्वयः। स्वत एवाऽदीनात्मा उदारचित्तः सम्प्रति तु महामना इति पुनरुक्तिः पूर्ववत् श्रीकृष्णमनस्त्वेन तत्रौदार्यविज्ञत्वादिगुणानां मुहुरतिशयिताभिप्रायेण न केवलं तावता तृप्तवान् किञ्च तैस्तैरिति तैस्तैः कामैः सह पुनश्च ये ये स्वैरं प्रार्थितास्तत्तत्कामदानपूर्वकं सर्वांस्तान् यथोचितं जातिवयोविद्याऽनुरूपम् अपूजयत् स्रक्चन्दनताम्बूलप्रोत्साहनादिभिः सम्मानितवांश्च दानादेरुद्देश्यमाह विष्णोराराधनस्य योऽर्थः फलं तत्सन्तोषः तस्मै परमवैष्णवत्वात् कामितार्थानन्त्यकामत्वाच्च तत्पूर्वमाम्नाय तथा स्वपुत्रस्याभ्युदयाय च अनेन कर्मणा श्रीविष्णुः सन्तुष्यतु तत्प्रसादेन च मम पुत्रस्याभ्युदयो भवत्विति सङ्कल्पयन्नित्यर्थः। अथ च विष्णोराराधनस्य यत्फलं तद्रूपाय तदभ्युदयाय तद्गृहे रूपगुणलीलैश्वर्यप्रकाशनायेति पदश्लेषेण यदेव मननप्राप्तं तच्च तस्य रागप्राप्तत्वात् परममहदिति प्रकरणार्थेन च मुनीन्द्रः सिद्धान्तमपि विन्यास्थदिति ज्ञेयम् अत्र चशब्दोऽप्यर्थे स च दुर्लभत्वं सूचयति "नन्दः किमकरोद् ब्रह्मन्" इत्यादेः "नेमं विरिञ्चः" इत्यादेः "युवां श्लाघ्यतमा" इत्यादेश्च ॥ १५–१६ ॥ रोहिणी रोहयति जनयति व्रजसुखं तच्छीलेति रोहिणी अद्यैव स्वनामनिरुक्तिसाफल्यपरमोत्कर्षं प्राप्तेति भावः। सा च महाभागा तादृशस्वीयपुत्रोदयेन तस्यापि परमाश्रयस्य निजप्राणसहचर्य्याः श्रीयशोदायास्तनयस्याभ्युदयेन च तत्तद्बाल्यादिलीलामाधुर्यलाभेन च अन्याभ्यः श्रीवसुदेवपत्नीभ्यः श्रीदेवकीतश्च भाग्यविशेषवती त्वदागमनमात्रेण मङ्गलेनायं मम पुत्रो जात इति श्रीमन्नन्दाभिधगोकुलराजेनाभिनन्दिता सती "गोपो भूपेऽपि" इत्यमरः। श्रीमन्नन्देन गोपैश्चाभिनन्दिता सतीति वा यदुल्लासेनैव तद्दत्तानि दिव्यानि मर्त्यदुर्लभानि यानि वास आदीनि स्वयमपि तदुल्लासेनैव सर्वं दुःखं विस्मृत्य तैर्मण्डिता सती व्यचरत् महोत्सवे तस्मिन् प्रीत्या विविधव्यापारेण इतस्ततो बभ्रामेत्यर्थः। एतदर्थमेव स्वगृहान्तः शायितस्य तदीयाभिनवबालकस्यात्रानुक्तिरिति ज्ञेयम् ॥ १७ ॥ ननु, सद्य एव धेनुनियुतद्वयस्य सम्यगलङ्कारसम्पादनं सप्ततिलाद्र्यादि-

साधनं व्रजासङ्ख्येयधेनुवृषाद्यलङ्करणं बहुलवस्त्रालङ्कारादिदानं च कथं सिद्धम्?” इत्यपेक्षायामाह–तत इति। प्राक् स्वत एव “मथुरा भगवान् यत्र” इत्यादिन्यायेन “योऽसौ गोपेषु तिष्ठति” इति तापनीश्रुत्या “जयति जननिवासः” इति “भीयान्न इन्द्रो गवाम्” इति “भगवान् गोकुलेश्वरः” इति श्रीशुकोक्तथा च हरेर्निवासभूतो य आत्मा तस्य स्वस्यैव ये गुणास्तैः सर्वसमृद्धिमान् व्रजः तत इति तत् तस्य जन्मारभ्य तु रमाक्रीडंबभूव “चिन्तामणिप्रकारसद्मसु कल्पवृक्षलक्षावृतेषु सुरभीरभिपालयन्तम्। लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानं गोविन्दमादिपुरुषं तमहं भजामि” इति ब्रह्मसंहितानुसारेण तत्तन्मन्त्रादौ स्वयं भगवन्नित्यप्रेयसी तया सेव्यत्वेन “नायं श्रियः” इत्यादौ वैकुण्ठश्रीविजयेन तासु स्वयोषिदादिसर्वान्ययोषित्वपरिहारेण च व्रजदेवीनामेव परमरमारूपाणां तासामपि परमरमायाः श्रीराधायाश्च तदानीमेवाविर्भावाद्विहारस्थानमपि बभूवेत्यर्थः। यदि च तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमान् सन् हरेर्निवासात्मगुणैरमाक्रीडं यथा स्यात्तथाऽभूदिति सरलान्वयः क्रियते तदपि पूर्ववदेवार्थः प्रसज्जते तदारभ्य तस्य व्रजः सर्वसमृद्धिमानासीदिति मात्रं किं वक्तव्यं यः खलु हरिनिवासलक्षणस्य स्वरूपस्य गुणैरममाणां तासामप्याक्रीडतयाऽऽसीदिति ततो जगल्लक्ष्मीमात्रदृष्ट्याप्याकस्मिकसर्वसम्पत्तिसम्भवात्तदानीं तत्र किमिवासम्भवं यत्र चिन्तामणिमन्दिरादयोऽपि निगूढलीलायां सन्तीति भावः। तां चाष्टाविंशाध्यायादौ प्रतिपादयिष्यामः तदेवं प्रसङ्गतः श्रीव्रजदेवीनामपि भगवद्वत् प्राकट्यमात्रं जन्म सूचितं रमाक्रीडशब्देन च सर्वसमृद्धिमत्त्वे वाच्ये पौनरुक्त्यं स्यात् रमान्तराक्रीडत्वे वाच्ये प्रसिद्धिविच्युतिर्भवति “हरेर्निवासात्मगुणै” इत्येतावता विवक्षितसिद्धेरात्मपदवैयर्थ्यं जायते तस्मादविचारप्रतीतमर्थान्तरं नादृतम्॥ १८॥ पूर्वमपुत्रत्वेन धनादौ ममत्वाभावतः श्रीनन्दस्य कंसाद्भयमकिञ्चनस्येव नासीत् अधुना तु पुत्रमहारत्नप्राप्त्या सर्वतः शङ्कोत्पत्त्या तद्रक्षार्थं व्यग्रस्सन् दुष्टतरभयसमाधानार्थं राजधानीं शीघ्रं स्वयमेव गत इत्याह—गोपानिति। निरूप्य नियुज्य वार्षिक्यं श्रावणस्य वर्षान्तरारम्भकत्वात्तदेव देयं हे कुरूद्वहेति यथा कुरुकुलसन्तानैकहेतोस्तव रक्षार्थं श्रीयुधिष्ठिरादयो व्यग्रास्तथेति भावः॥ १९॥ उपश्रुत्य जनपरम्परया श्रुत्वा श्रीवल्लवेन्द्रस्य सर्वजनादृतत्वात् ततश्चरद्वारा राज्ञे कंसाय दत्तकरं च ज्ञात्वा अन्यथा व्यग्रचित्ततया सुखगोष्ठ्यसम्भवात् भ्रातरं वैश्यकन्यायां शूरवैमात्रेयभ्रातुर्जातत्वादिति श्रीमध्वाचार्याः तथोक्तं ब्रह्मवाक्ये “तस्मै मया सवरः सन्निसृष्टः स चास नन्दाख्य उतास्य भार्या। नाम्ना यशोदा स च शूरतातसुतस्य वैश्याप्रभवोथ गोपः” इति वैश्याप्रभव इति पितामह्यास्तज्जातित्वात् अत एव स्कान्दे “यादवानां हितार्थाय धृतो गिरिवरो मया” इति। श्रीभगवद्वाक्यं “यादवेष्वपि सर्वेषु भवन्तो मम वल्लभाः” इति हरिवंशे तद्भ्रातॄन् प्रति श्रीरामवाक्यं च तस्य अवमोचनं शकटादिकम् अवसमन्तात् यत्र तत्कृतवासस्थानं तस्य पूर्वं गमनं पुत्रवार्तोत्कण्ठया तद्रक्षणाय झटिति प्रस्थापयितुमिच्छया च॥ २०॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अवाद्यन्त वादित्राणि वादकैर्वादयाञ्चक्रिरे; विचित्राणि—‘ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्। वंशादिकन्तु शुषिरं कांस्यं तालादिकं घनम्॥’ इति चतुर्विधानि; यद्वा, एकैकस्य वादनवैचित्र्या विचित्राणि; किंवा अवाद्यन्त स्वयमेव वादितानि बभूवुस्तत्र हेतुः—महोत्सव इति; तत्रापि हेतुः–अनन्तेऽपरिच्छिन्ने विश्वस्येश्वरे नियन्तरि कृष्णे जगच्चित्ताकर्षकमाहात्म्यतया स्वयमवतीर्णे भगवति; यद्वा, कृष्णे परब्रह्मणि परमेश्वरे सौन्दर्य्यमाधुर्य्यादिना परिच्छिन्ने निजाशेषभगवत्ताप्रकटनार्थावतीर्णत्वात्। नन्दव्रजं निजोचितपदं प्राप्ते सतीति॥ १३॥ हृष्टाः सन्तो दध्यादिभिः परस्परम् आ सम्यक् सिञ्चन्तो नवनीतैश्च परस्परं विशेषतो लिम्पन्तश्चिक्षिपुर्वलादितस्ततोऽन्योऽन्यमेव दध्यादीनि वा प्रक्षिप्तवन्तः॥ १४॥ तेभ्यो गोपेभ्यो गोपीजनेभ्यश्च तथा सूतादिभ्यश्च। ये चान्ये विद्योपजीविनो गायकवादकादयस्तेभ्योऽपि वास-आदिकं प्रादादिति शेषः। तत्र धनं साक्षात् स्वर्णरूप्यादि। महामना इति पुनरुक्तिः परमौदार्य्यस्य सर्वाभीष्टविज्ञानस्य चाभिप्रायेण। तैस्तैरिति यस्य यानि कामितानि, तैः; यद्वा, सुप्रसिद्धैरुत्तमोपभोगः। अन्यत्तैर्व्याख्यातम्। यद्वा, ये विद्योपजीविनोऽन्ये च ये दीनास्तेभ्योऽपि न केवलं तत्तद्दानमात्रमपि तु बहुधा सम्माननं चाकरोदित्याह—तैरिति। विप्रादीन् सर्वानपूजयच्च; तत्र च यथोचितं जाति-विद्याद्यनुसारेण तत्तन्मनोरथपरिपूरणेनेत्यर्थः; यतोऽदीनत्वादुदारस्वभावः। यद्वा, तैस्तैरनिर्व्वचनीयैरात्मारामाद्यगोचरैरात्मना पुत्रभार्य्यादिना च भगवद्वशीकरणमित्यर्थः। भगवद्वशीकरणार्थकैः कामैर्हेतुभिर्न तु ज्ञानपरवन्निष्कामतयेत्यर्थः, तादृशकामानां निष्कामतायाः शिरोधार्य्यत्वात्—बहुत्वं बाहुल्यस्य गौरवस्य वापेक्षया। तानेवाह—विष्णोरिति, सहजवैष्णवप्रवरत्वेन श्रीविष्णुसन्तोषार्थं स्नेहविशेषेण स्वपुत्रस्योदयाय चैत्यैहिकामुष्मिक-मंगलायेत्यर्थः। यद्वा, विष्णोराराधनरूपो योऽर्थः पुरुषार्थस्तदर्थञ्च स्वपुत्रस्योदय उत्कर्षस्तदर्थं परमैकान्तित्वात्; तत्त्वतस्तु विष्णोराराधनस्यार्थः फलम्, तद्रूपाय स्वपुत्रोदयायेत्यर्थः॥ १५–१६॥ श्रीरोहिणी श्रीवसुदेवविरहदुःखित्वादधिकं सम्मानितेत्याह—रोहिणीति। महाभागेति श्रीभगवदाविर्भावानुभवात् सर्व्वत्र कृष्णेनाविच्छेदाच्च श्रीनन्दव्रजे वसतेश्च। अतो नन्दो यो गोपो गां पृथ्वीं पातीति महाराजस्तेन; यद्वा, नन्देन गोपैश्च; यद्वा, महाभागा परमभाग्यवती श्रीयशोदा; किंवा, महाभागाः श्रीयशोदाद्याः सर्व्वगोप्यस्ताभिर्नन्दनगोपैश्चाभिनन्दिता सम्मानिताभितो हर्षिता वा। अतो विरहिणीत्वादनिच्छुरपि तैर्दिव्यवास-आदिभिर्भूषिता। एषामेवोक्तिमुख्यत्वादन्यान्यप्याभरणानि ज्ञेयानि। दिव्येति श्रीयशोदादिभिर्निजवस्त्रादिभ्योऽप्युत्तमवस्त्रादि-दानात्। व्यचरत् महोत्सवे तस्मिन् प्रीत्या विविधव्यापारैर्गतस्ततो बभ्रामेत्यर्थः। एतदर्थमेव स्वगृहान्तःशायितस्य

तदीयाभिनव-बालकस्यात्रानुक्तिः ॥ १७ ॥ ननु, सद्य एव धेनुलक्षद्वयस्य सम्यगलंकारसम्पादनं सप्ततिलाद्र्यापि-साधनं व्रजासंख्येयधेनुवृषाद्यलंकरणं बहुलवस्त्रालंकारादि दानं च कथं सिद्धमित्यपेक्षायामाह—तत इति। प्राक् स्वत एव सर्व्वसमृद्धिमान् विशेषतस्ततः श्रीभगवज्जन्मन आरभ्य व्रजः सर्वघोषो रमाक्रीडं महालक्ष्म्या आक्रीडत्वेन वैकुण्ठादप्यधिकोऽभूत्। तत्र हेतुः—हरेरिति। स्वीयेषु सर्वगुणप्राप्यस्य भगवतो नितरां वासेनात्मशब्देन श्रीनन्दो व्रजो वा, गुणाः परमौदार्य्यादयो भक्तिलक्षणा वा तैस्तत्र चिन्तामणिमन्दिरकल्पद्रुम-कामधेन्वादयोऽपि सम्भाव्याः; किं पुनस्तत्तदिति भावः। हे नृपेति महाराजस्य भवादृशोऽपि तत् सुदुर्लभमिति भावः। आश्चर्य्येण वा सम्बोधनम् ॥ १८ ॥ पूर्वमपुत्रेण धनादौ ममत्वाभावतः श्रीनन्दस्य कंसाद्भयमकिञ्चनस्येव राज्ञो नासीत्; अधुना तु पुत्रमहारत्न-प्राप्त्या सर्वतः शंकोत्पत्त्या तद्रक्षार्थं व्यग्रः सन् दुस्तर-भयसमाधानार्थं राजधानीं स्वयमेव गत इत्याह—गोपानिति। निरूप्य नियुज्य वार्षिक्यं (प्रतिवर्षारम्भे) वर्षाकाले देयम्। हे कुरूद्वहेति यथा कुरुकुलसन्तानैकहेतोस्तव रक्षार्थं श्रीयुधिष्ठिरादयो व्यग्रास्तथेति भावः ॥ १९ ॥ उपश्रुत्य समीप एव श्रुत्वा श्रीवल्लवेन्द्रागमनवार्त्तायाः सर्वत्रैव प्रचाराद्राज्ञे कंसाय च दत्तकरं च ज्ञात्वा, अन्यथा व्यग्रचित्ततया सुखगोष्ठ्यसम्भवः, यद्वा, उपश्रवणे हेतुः—राज्ञे दत्तकरमिति बहुल-गोरसादि-कर-दानेन सुप्रसिद्धिप्राप्तेस्तस्य नन्दस्यावमोचनं शकटोत्तारस्थानम्, श्रीनन्दस्य श्रीवसुदेवेन सह समागमार्थं तत्सद्मन्यगमनं कंसभयात्। किंवा, यावदयं याति, तावदेव पुत्रस्नेहव्यग्रतया त्वरया श्रीवसुदेवस्यैव तत्रागमनात् ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तदवमोचनं यत्र समवहारा मुच्यते तदवमोचनं प्रयाणे निवासस्थानम् ॥ २०–२३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अंशेन बलरामेण सह विश्वेश्वरे श्रीकृष्णे नन्दव्रजमुपेयुषि सति तस्मिन् महोत्सवे विचित्राणि वाद्यान्यवादयन्त ॥ १३ ॥ गोपास्तु हृष्टाः दध्यादिभिः परस्परमासिञ्चन्तः नवनीतैर्विलिम्पन्तश्च ते चिक्षिपुः ॥ १४ ॥ नन्दस्तु विपुलकीर्तिरत एव तेभ्यः सूतादिभ्योऽन्ये च ये विद्योपजीविनः भरतशास्त्रादिविद्ययोपजीवन्तीति तथाभूतेभ्यश्च वस्त्रादिकं ददौ ॥ १५ ॥ तैस्तैस्तेषामभीष्टैरुच्चावचैः कामैर्यथोचितमदीनात्मोदारमनाः नन्दः सम्यगपूजयद्विष्णोर्गृहदैवतस्याराधनार्थं स्वपुत्रस्याभ्युदयार्थं च ॥ १६ ॥ दिव्यैर्वासःप्रभृतिभिर्भूषिता सती महाभाग्यवती रोहिणी नन्देनान्यैर्गोपैश्चाभिनन्दिता व्यचरत् ॥ १७ ॥ अथ नन्दवसुदेवयोः यादृच्छिकसमागमं विवक्षुस्तावद्व्रजस्य सर्वसम्पत्समृद्धत्वमाह–तत इति। तत आरभ्य भगवतः प्रवेशादारभ्य नन्दस्य व्रजः सर्वाः समृद्धयः भोग्यभोगोपकरणादिसमृद्धयोऽस्य सन्तीति तथा हरेर्निवासेन हेतुना ये आत्मगुणाः महोत्सवादयः तैः रमाक्रीडं लक्ष्मीविहारस्थानंचाभूत्। हे नृप! आक्रीडम् इति नपुंसकत्वमार्षं सामान्ये नपुंसकं वा क्रियाविशेषणं वा ॥ १८ ॥ एवं सति कदाचिन्नन्दो गोकुलरक्षायां निमित्ते व्रजरक्षार्थं गोपान्निरूप्यादिश्य कंसस्य वार्षिक्यं वर्षे देयं करं स्वाभिग्राह्यं भागं दातुं हे कुरूद्वह! मथुरां गतः ॥ १९ ॥ तदा वसुदेवोऽपि भ्रातरमागतं नन्दमाकर्ण्य राज्ञे कंसाय दत्तः करो येन तं च ज्ञात्वा तस्य नन्दस्यावमोचनं निवेशस्थानं ययौ अपमुच्यन्ते गमनोपयुक्तपरिकरबन्धा यत्रेति तदवमोचनमवतरणस्थानम् ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उपेयुषि प्राप्तवति ॥ १३–१४ ॥ तेभ्यो गोपेभ्यः यथोचितं दत्वा अपूजयत् ये अन्ये विद्योपजीविनः तेभ्यश्च यथोचितं दत्वा ॥ १५ ॥ किं फलमुद्दिश्येति तत्राह–विष्णोरिति ॥ १६–१७ ॥ रमाक्रीडं लक्ष्मीविहारस्थानं क्रियाविशेषणं वा ॥ १८ ॥ वार्षिक्यं प्रतिवत्सरं देयम् ॥ १९ ॥ तदवलोकतः तस्य नन्दस्य दर्शनेच्छुः ॥ २०–२२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अवादयन्त त्रैलोक्ये तत्र हेतुः कृष्णेत्यादि नन्दस्य व्रजं पराकाष्ठापन्नप्रेमत्वात्तदभीष्टलीलायोग्यमित्यर्थः। परस्परं चिक्षिपुः स्खलयामासुः ॥ १३–१५ ॥ तैरिति विष्णोराराधनस्य योऽर्थः फलं तत्सन्तोषः तदर्थं स्वपुत्राभ्युदयार्थञ्च अनेन कर्मणा विष्णुः सन्तुष्यतु तेन च मत्पुत्रस्य श्रेयो भवत्विति सङ्कल्पयन्नित्यर्थः। तदागमनेन जाताभीष्टत्वान्नन्दगोपाभिनन्दिता व्यचरन्महोत्सवकार्यार्थं ततः ॥ १६–१८ ॥ स्वबालके जाते पूतनादिदुष्टगणात् कंसात् भीत्या शीघ्रमेव करं दातुम् ॥ १९ ॥ उपश्रुत्य परम्परया श्रुत्वा पश्चाद्दूतमुखात् दत्तकरं ज्ञात्वा अस्य पूर्वं गमनं पुत्रसम्बन्धेनोत्कण्ठाविशेषात् भ्रातरं पितृव्यजं तदेतच्चतुर्थसन्दर्भे पञ्चदशोत्तरशततमवाक्ये द्रष्टव्यम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसंदर्भः

व्यापकोऽपि भगवान् परिच्छिन्नत्वेन स्थित इत्याह–कृष्णे विश्वेश्वरेऽनन्ते नन्दस्य व्रजमीयुषि। अनन्ते व्यापकेऽपि विश्वेश्वरेऽपि नन्दव्रज एव स्थित इत्यर्थः ॥ १४–३२ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अवाद्यन्तेति त्रिलोक्यामेव यतः कृष्णो विश्वस्यैवेश्वरे तानि वाद्यान्यनन्तान्येव यतोऽनन्ते इति ॥ १३ ॥ चिक्षिपुः प्रयासार्थं बलेन प्रच्छन्नतया पिच्छलपङ्के स्खलयामासुः ॥ १४ ॥ महामना महोदारमनाः प्रादात् येऽन्ये तेभ्योऽपि विद्याः नृत्यगीतवाद्यशास्त्राद्याः तैस्तैरिति यान् यान् अयाचन्तेत्यर्थः । यथोचितं विद्यागौरवादिकमनतिक्रम्येत्यर्थः । दानादेः फलमाह– विष्णोराराधनस्यार्थः विष्णुसन्तोषस्तस्मै तस्यापि फलं स्वपुत्रस्याभ्युदयः अनेन दानादिकर्मणा विष्णुः प्रसीदतु विष्णोः प्रसादेन मत्पुत्रः कुशली भवत्विति सङ्कल्पयन्नित्यर्थः । चकारेण नवग्रहदिक्पालादीनामपि स्वपुत्रं प्रतिप्रसादार्थम् ॥ १५–१६ ॥ महाभागा वसुदेवपत्नीभ्यः सर्वाभ्योपि श्रीकृष्णबाल्यलीलोत्सवलाभादिति भावः । नन्दगोपेन नन्दराजेन "गोपो भूपेऽपि" इत्यमरः । अभिनन्दिता त्वदागमनमङ्गलेनैव मत्पुत्रोऽयमभूदिति व्यचरत् समागतस्त्रीजनसम्माननार्थमित्यर्थः । दिव्यवास आदिभिः श्रीयशोदानन्दाभ्यां दत्तैर्भूषिता पत्युर्बन्धनादि दुःखं स्वस्य च तद्विच्छेदादिदुःखं श्रीकृष्णजन्मोत्सवानन्देन विस्मृतैवेति भावः ॥१७॥ ननु, कुबेरेणाप्यशक्यं नराणां कामितपूरणं श्रीनन्दराजेन कथं कृतमित्यत आह—तत इति । हरेर्निवासभूतस्य आत्मनो गुणव्रजः सर्वसमृद्धिमानेव सर्वदा तत आरभ्य तु रमायाः सर्वसम्पत्तेराक्रीडं क्रीडास्पदमभूत् यदि सर्वसम्पत्तिरेव नन्दभवने क्रीडितुमारेभे तदा कस्य देयवस्तु नस्तत्राभाव इति भावः ॥ १८ ॥ चिरात् सर्वमनोहरपुत्रोत्पत्त्या प्राप्तमहानिधिरिव "श्रेयांसि बहुविघ्नानि" इति विमृश्य श्रीनन्दराजो यथा देवपितृदिक्पालग्रहादीन् पूजादिभिः प्रसादयामास तथा देशाध्यक्षं दुष्टनृपं कंसमपि स्वर्णमुद्रारत्नवस्त्राद्युपहारेण प्रसादयितुं वार्षिककरदानमिषेण तत्समीपङ्गन्तुं न विललम्बे इत्याह गोपानिति ॥ १९ ॥ भ्रातरं वैश्यकन्यायां शूरवैमात्रेयभ्रातुर्जातत्वादिति भारततात्पर्ये श्रीमध्वाचार्यचरणैरुक्तं ब्रह्मवाक्यं "तस्मै मया स वरः सन्निसृष्टः स चास नन्दाख्य उतास्य भार्या नाम्ना यशोदा स च शूरतातसुतस्य वैश्याप्रभवोऽथ गोपः" इति वैश्याप्रभव इति पितामह्यास्तज्जातित्वात् अत एव स्कान्दे "यादवानां हितार्थाय धृतो गोवर्द्धनो मया" इति भगवद्वाक्यं "यादवेषु च सर्वेषु भवन्तो मम वल्लभाः" इति तद्भ्रातॄन् प्रति रामवाक्यं च तदवमोचनं तस्य वसतिस्थानम् ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तेभ्यो गोपेभ्यः सूतादिभ्यश्च प्रादात् ॥ १५ ॥ विष्णोः परम्परागतस्योपास्यस्याराधनार्थाय तस्यैव स्वपुत्रस्योदयाय च यथोचितमपूजयत् पूजार्हानिति शेषः ॥ १६–१७ ॥ ततः श्रीनन्दगृहे भगवत्प्रवेशादारभ्य हरेर्निवासाद्धेतोर्थे आत्मनि गुणाः सर्वसमृद्धिमत्वादयस्तैः रमायाः आक्रीडं क्रीडास्थानम् ॥ १८ ॥ निरूप्य आदिश्य वार्षिकयं प्रतिवर्षं देयम् ॥ १९ ॥ तस्य नन्दस्य अवमोचनं निवेशस्थानम् ॥ २० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अवाद्यन्तेति विश्वस्मिन्नेव यतः कृष्णो विश्वेश्वरे तानि चानन्तान्येव यतोऽनन्ते तानि च विचित्राणि तत्सुरघनानद्धरूपाणि सुरपतेरपि दुर्लभानीत्यर्थः ॥ १३ ॥ चिक्षिपुरिति प्रहासाय दधिनवनीतपङ्के बलेन प्रच्छन्नतया लयञ्चक्रुरित्यर्थः ॥ १४ ॥ नन्द इति युग्मकं रत्नमयमहासभा वेश्मनि दिव्यासनस्थितो ज्ञातिभिर्बन्धुभिश्च मण्डितपार्श्वः सुरपतिरिव विभ्राजमानो महामनाः नन्दः तेभ्यो गोपेभ्यः सूतादिभ्यश्च प्रादात् येतेभ्योऽन्ये विद्योपजीविनो नृत्यगीतवादित्रकुशलाः पाठितशुकशारिका विलसत्कराः शिक्षितकोकिलबर्हिचकसारसाः कपिक्रीडातिपटवो हासपण्डिताः कृष्णजन्मोत्सवे नानादेशेभ्यः समागतास्तेभ्योपीत्यर्थः । तैस्तैरिति यैर्यानि याचितानि तेभ्यस्तानीत्यर्थः । यथोचितमिति विद्यागौरवादिकमनतिक्रम्य यद्वा पूज्येभ्यः स्वहस्ताभ्यामितरेभ्यस्ते सेवकैर्द्वारेत्यर्थः । अपूजयत् सत्कृतवान् अदीनात्मात्युदारचित्त इति पुनरुक्त्यावसाने तु मुक्तकोशकपाटो बन्धुभिः सार्द्धं कोशलुण्ठनं पश्यन् विहसन्तस्थाविति द्योत्यते दानादेः फलमाह विष्णोरिति । विष्णोराराधनस्यार्थः फलं तत्परितोषः स्वपुत्रस्य हरेरुदयाय कल्याणाय चेतिवात्सल्यभवोदयात् ॥ १५–१६ ॥ महाभागा सर्वाभ्यः शौरपत्नीभ्योऽतिभाग्यवती सङ्कर्षण स्वपुत्रकृष्णजन्मोत्सवलाभादितिभावः । नन्दगोपेन नन्दराजेनाभिनन्दिता गोपो भूपेपीत्यमर त्वदागममङ्गलेनैव मे पुत्रोयं ज्ञात इति प्रहर्षितेत्यर्थः । श्रीयशोदयार्पितैर्दिव्यवास आदिभिर्भूषिता सती समाजतन्त्रीजनसम्माननाय व्यचरत् हरिजन्मोत्सवेन पतिनिरोधतद्विरहक्लेशं व्यस्मरदिति भावः ॥ १७ ॥ व्रजे श्रीनन्दराजात् कृष्णस्य भगवतो जन्म निगूढतयैवोक्तं तत्प्रेयसीनां श्रीराधादीनाञ्च श्रीवृषभान्वादिभ्यस्तस्मिन् जन्माभूदिति तथैवाह तत इति हरेर्निवासभूतो य आत्मा स्वरूपं तस्यैव गुणैः सर्वसमृद्धिमान् सर्वदैव कुबेरादिदुर्लभनिखिलसम्पत्तिविशिष्टो नन्दस्य व्रजस्ततः श्रीकृष्णजन्मन आरभ्य रमाणां श्रीराधादीनामाक्रीडं विहारास्पदमभूत् तज्जन्मानन्तरं तासाञ्च जन्माभूदित्यर्थः । तासां रमात्वन्तु श्रिय एकान्तवल्लभमित्युपरिष्टाद्वक्ष्यति –

"चिन्तामणिप्रकारसद्मसुकल्पवृक्षलक्षावृतेषु सुरभीरभिपालयन्तम् ।
लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानं गोविन्दमादिपुरुषं तमहं भजामि ॥"

इति ब्रह्मसंहितावाक्याच्च तासु श्रीराधादेव्या प्राधान्यान्महारमात्वमिति पञ्चाध्यायीमधिवदिष्यामः सरलान्वयेपि नोक्तार्थहानिः हरेर्निवासस्यात्मनो गुणैरमाणामाक्रीडमित्यस्य तत्समर्पकत्वात् व्रजस्य हरिनिवासत्वञ्च 'योऽसौ गोपेषु तिष्ठे'तीत्यादिश्रुतेः 'पायाञ्च इन्द्रो गवाम्' 'भगवान् गोकुलेश्वरः।' जयति जननिवास' इत्यादि श्रीशुकोक्तेश्च एतेनैव धेनुनियुतद्वयस्य समलङ्कृतस्य तिलाद्रिसप्तकस्य च दानमसङ्ख्येयधेनुवृषाद्यलङ्करणञ्च जनानां वाञ्छितपूरणञ्च कथं नन्दनृपे न सिद्धमिति शङ्कितं निरस्तं कथमल्पे स्थाने कोटिसंख्यानां गवां समावेश इति च हरेर्निवासात्मगुणैरित्यनेन परिहृतं भगवद्विग्रहस्येव व्रजस्याचिन्त्यवस्तुत्वात् ॥ १८ ॥ एवं सर्वोत्तमपुत्रजन्मना तदुत्सवेन च महतात्यानन्दितो नन्दनृपतिर्यद्यपि कंसोऽस्मद्विद्रोहं कर्तुमक्षमः, शक्तयश्च विद्वज्जनस्मत्सामन्तैर्निरसितुं, तथापि हरिभक्तानां नः किं कलहेन, किन्तु दुष्टोऽपि ज्येष्ठस्थानस्थितत्वात् किञ्चित् सत्कार्य इति विमृश्य तत्सम्मानाय भ्रातुः संलापानन्दाय च मथुरां जगामेत्याह गोपानिति । गां भूमिं पान्तीति गोपाः स्वभूमिरक्षणक्षमा महावीरा यद्भयात् कंसः तद्वीराश्च व्रजे नाभ्यपतन् येषां बलमत्तता मल्लयुद्धञ्च कंसमल्लैरुक्ते नित्यं प्रमुदिता गोपा इत्यादिना तान् गोकुलरक्षायां निरूप्य नियोज्य वार्षिक्यं वर्षदेयं करं किञ्चित् सुवर्णमुद्रादि ॥ १९ ॥ भ्रातरमिति देवमीढस्य यदुश्रेष्ठस्य क्षत्रिया वैश्या चेति द्वे पत्न्यौ बभूवतुश्च क्षत्रियायां शूरः शूराद्वसुदेवः वैश्यायां पर्जन्यः यो मातृकुलवृत्तिधरो महागुणो यदुभिरुग्रसेनादिभिश्च व्रजराज्येऽभिषिक्त इति ख्यातं पर्जन्यान्नन्द इति । एवञ्च ब्रह्मवाक्यं मध्वमुनिनोक्तं 'तस्मै वरः स मया सन्निसृष्टः, स चासौ नन्दाख्य उतास्य भार्या । नाम्ना यशोदा स च शूरतातसुतस्य वैश्याप्रभवोथ गोपः ॥' इति शूरतातसुतस्येति शूरसपत्नीमातृजस्य पर्जन्यस्य सकाशाज्जात इत्यर्थः । वैश्याप्रभव इति पितामह्यास्तज्जातित्वात् एवञ्च नन्दराजन्ययादवत्वमुक्तं यादवानां हितार्थाय धृतो गिरिवरो मयेति स्कान्दे भगवद्वाक्यं यादवेष्वपि सर्वेषु भवन्तो मम वल्लभा इति श्रीहरिवंशे तद्भ्रातृन् प्रति श्रीबलदेववाक्यञ्चार्थवत् राज्ञे दत्तकरं ज्ञात्वेति नान्यथा सुखगोष्ठी सम्भवेदिति भावः । तस्य नन्दस्यावमोचनं अवमुच्यते रथादिकमत्रेति तदीयं स्थानमित्यर्थः ॥ २० ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

गोपा हृष्टाः संतो दधिक्षीरघृतांबुभिः परस्परमासिंचंतो दधिक्षीरघृतांबुभिर्नवनीतैश्च परस्परं विलिंपंतो नवनीतानि परस्परं विचिक्षिपुरिति । एतेन नवनीतानि चिक्षिपुरिति वक्तव्यं नवनीतैश्चिक्षिपुरिति वचनमयुक्तमिति चोद्यं निरस्तम् । नवनीतैरिति तृतीयाबहुवचनस्य नवनीतानीति द्वितीयाबहुवचनांततयाऽर्थवशाद्विपरिणाममंगीकृत्य नवनीतानि चिक्षिपुरित्यर्थस्योक्तत्वात् ॥१३॥ महामना नंदस्तेभ्यो गोपेभ्यो सूतमागधबंदिभ्यश्च वासोलंकारगोधनान्यदात् । अदीनात्मोत्कृष्टांतःकरणो नंदो येऽन्ये विद्योपजीविनस्तान्वासोऽलंकारगोधनैस्तैस्तैः कामैस्तत्तदपेक्षितपदार्थैश्च यथोचितं भवति तथाऽपूजयत् । एतेन तानपूजयदिति वक्तव्यम् । तेभ्योऽपूजयदिति कथनमनुपपन्नमिति दूषणं निरस्तम् । तेभ्य इत्यस्यापूजयदित्यनेनान्वयमनंगीकृत्यादादित्यध्याहृतेनान्वयोस्योक्तत्वात् । एतेनैव वासोऽलंकारगोधनानीति वक्तव्यम् । वासोलंकारगोधनैरिति कथनमयुक्तमिति चोद्यं निरस्तम् । वासोऽलंकारगोधनैरिति तृतीयाबहुवचनांतस्य वासोऽलंकारगोधनानीति द्वितीयाबहुवचनांततयाऽर्थवशाद्विपरिणाम इत्यंगीकारात् ॥ १४ ॥

श्रीपांघरीनारायणाचार्यकृतो विरोधोद्धारः

वसुदेव इति । अत्र नंदवसुदेवयोः वैश्यक्षत्रियत्वेन भ्रातृत्वमयुक्तमित्यत उच्यते । तस्मै वरः समया संन्निसृष्टः स चासौ नंदाख्य उतास्य भार्या । नाम्ना यशोदा स च शूरजातः सुतश्च वैश्याप्रभवोऽथ गोप इति तात्पर्यनिर्णयोक्तेर्भ्रातृत्वं युक्तमेवातो न विरोधः ॥ १९ ॥

इति श्रीभागवते षष्ठोऽध्यायः (पञ्चमोऽध्यायः) ॥ ५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विश्वेश्वरे जगदधिपे नन्दव्रजमुपेयुषि प्राप्तवति ॥ १३ ॥ नवनीतैर्विलिम्पन्तश्च तानि परस्परं चिक्षिपुः ॥ ४१ ॥ महामनाः स्वनीयमनस्क उदारचेतास्तेभ्यो गोपेभ्यो यथोचितं दत्वा सूतमागधवन्दिभ्यश्च दत्वा वासोऽलङ्कारगोधनैर्येऽन्ये विद्योपजीविनो विद्यापन्नास्तान्सर्वांस्तैस्तैः कामैः काम्यैर्विषयैरपूजयत् । तेभ्यः सूतमागधवन्दिभ्य इति पञ्चम्यौ । गोपेभ्यः सकाशात् वासोऽलङ्कारगोधनैरुपायनत्वेनोपनीतैः सूतमागधवन्दिभ्यो या विद्या तया च महामनाः सन् येऽन्ये च स्वोपजीविन इत्यादिजनमुचितं तत्तत्सत्कारयोग्यं तैस्तैः कामैर्यथा सम्यगपूजयत् । यथा दीनात्मा भवेत्तथाऽपूजयदित्यपि योजयन्ति । शसस्तृतीयादेशः । तानि दत्वेत्यपि वर्णयन्ति । कुतोऽयमेवमपूपुजयज्जनं नन्द इत्यत आह विष्णोरिति । आराधनरूपप्रयोजनमुद्दिश्य स्वपुत्रस्य मङ्गलाय अपूजयदित्यन्वयः । ग्रन्थकृद्वदयं तु षष्ठ्योः सामानाधिकरण्यमाराधनाभ्युदयसमुच्चये च इति । हृदयेऽपि हृदयं सु अपुत्रस्येति मन्तव्यम् ॥५–१६॥ रोहिणी च नन्दगोपाभिनन्दिता भ्रातृवसुदेवपत्नीत्वाद्व्यचरत्सुवासिनीसत्कारादौ ॥ ७॥ निवासमनुसृत्याप्ता ये गुणास्ते रमाक्रीडं लक्ष्मीविहारं यथा भवति तथा । तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमानभूदित्यन्वयः । रमाक्रीडं स्थानमित्याहुः । क्वचिद्रमाक्रीड अभून्नृपेति पाठस्तत्र शक्य अहमेवंविध इत्यादिवद्विवक्षाभावादभावः सन्धेरिति भावोऽवसेयः ॥१८॥

वार्षिक्यं ष्यञ् स्वार्थे प्रतिवर्ष देयं वार्षिक्यम् ॥ १९ ॥ तदवलोकनस्तस्यावलोकनेच्छुर्नयतीति नः। नो नेतेति विश्वः। तस्यावलोकं नयत्यात्मानमिति स वा। तदवमोचनमिति पठित्वाऽवमोचनमावासस्थानमिति वदन्ति। दत्तकरं च ज्ञात्वेत्यनेन वा स्थानकृत्यं गच्छेत्स इति त्वरा द्योत्यते ॥ २० ॥

श्रीसुबोधिनी

एवं विद्यावतां भूमेर्गवां गोपानां गोपीनां चालङ्कारा निरूपिताः, लौकिकवाद्यकृतमुत्सवमाह–**वाद्यन्तेति**, स्वभावतो दशविधानि **वाद्यानि विचित्राणि** ततोऽप्यनन्तानि **महोत्सवे** भगवतो जन्मोत्सवे वादका वादयामासुः, महोत्सवे निमित्तमाह **कृष्णे विश्वेश्वर** इति, कृष्ण इति, सञ्ज्ञा नामकरणानन्तरमेव भवतीति भगवति नियमाभावात् पूर्वसञ्ज्ञानामेव गर्गेणोक्तत्वात् "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचक" इतिवाक्यात् **कृष्णः** सदानन्दः, आनन्दे चावश्यं **वादित्राणि**, किञ्च **विश्वेश्वरे** विश्वस्यैव नियन्तरि, महति समागतेऽन्ततो गत्वा वादित्राण्यपि वादनीयानि, बालके बालकान्तरवच्छङ्का नास्तीति सर्वथा महोत्सवः कर्तव्य इत्याहानन्त इति, न विद्यतेऽन्तो यस्य, **अनन्तः** कालो वा, अन्यथा स मारयेदिति, तत्रापि **नन्दस्याल्पस्य** तत्रापि **व्रजेऽल्पगृहे** महति समागते महोत्सवः कर्तव्य एव, अन्यथा महानपकुर्यात, किञ्च "द्रोणो वसूना"मित्यारभ्य "ततो भक्तिर्भगवति" "कृष्णो ब्रह्मण आदेश" मित्यन्तैर्वाक्यैः परमभक्तत्वेन **नन्दस्य** तदा **वादित्रवादनमुचिततरम्** ॥ १३ ॥ गोपिकानां भगवत्स्मरणेनैव भगवदावेशो जातो गोपानां तु भगवत्सन्निधाने भगवद्धर्मप्राकट्य आवेश इति भगवदाविष्टानां गोपानामुत्सवप्राकट्यमाह **गोपा** इति, **दधिक्षीरघृताम्बुभिर्मिलितैः परस्परमासिञ्चन्तो** दध्यादि **मुखेषु विलिम्पन्तो नवनीतैः** पिण्डैश्चिक्षिपुरन्योन्यस्योपरि प्रक्षिप्तवन्तः, अथवा यस्य यत्प्राप्तिः केचिद् दध्ना केचित् क्षीरेण केचिद् घृतेनाम्बुभिश्च, **आसिञ्चनं** तुल्यतया, लिम्पनमाधिक्ये, अति, रसाविष्टे **नवनीतैः** क्षेपोतिमत्ततया, एवं सर्वेषां महानुत्सव उक्तः ॥ १४ ॥

एवं सर्वकृत उत्सवे सर्वेभ्यो दानरूपं नन्दस्योत्सवमाह **नन्दो महामना** इति त्रिभिः, विद्यावतामन्येषां च स्त्रीणां च सर्वाभीष्टदानं, तत्र विद्यावतां प्रथमतो दानमाह **महामना** इति, विद्यातारतम्येन दानं, तत्रैक एव बहुविधो भवति तथा सति बहुदानं तत्र कर्तव्यं भवति तत्राल्पसत्त्वस्य क्षोभः स्यात् तन्निवृत्त्यर्थमाह, **तेभ्यः** पूर्वोक्तेभ्यः, **वासांस्यलङ्करणानि गावो धनं च** **गोधनं** गोष्ठं वा, अनेन ब्राह्मणेभ्य एव वस्त्रालङ्कारपूर्वमेकैकस्मा एकमेकं गोष्ठं दत्तवानिति लक्ष्यते, अन्येषामनुवादाद्वान्येभ्यो यथायोग्यं दत्तवानित्याह **सूतेति**, एतेभ्यो दानं कीर्त्यर्थं, **ये चान्ये** गायका वैद्या ज्योतिर्विदश्च, **अन्येऽपि** शाकुनिकाः स्त्रियश्च तेभ्यः सर्वेभ्य एव **वासोलङ्कारगोधनानि** दत्तवानितिसम्बन्धः ॥ १५ ॥ अन्येभ्यो दानमाह **तैस्तैरिति**, येषां येषां ये ये कामा अभिलषितास्तैस्तैः **कामैर्विष्णुबुद्ध्या तानपूजयत्**, **अदीनात्मेति**, न **दीनोलुब्ध आत्मान्तःकरणं** यस्य, ननु यद्यदेयं प्रार्थयेत् कश्चिद्दैत्यो वा तदा किं कुर्यात् तत्राह **यथोचितमिति**, उचितमनतिक्रम्य देये सम्प्रदाने, नोचितत्वम्, एवं सर्वेषां पूजनप्रयोजनमाह **विष्णोराराधनार्थायेति**, विष्णुप्रीत्यर्थं, **स्वपुत्रस्याभ्युदयार्थं च**, तस्य ज्ञानानुरोधाद् भिन्नतया कथनं **चकाराद् ब्रह्मादिप्रार्थनार्थम्** ॥ १६ ॥

स्त्रीभ्यो दाने रोहिण्यै दत्तं भयादप्रकटं भवेदिति भगवदावेशाद् दातुः प्रतिग्रहीतुश्च भयाभावं ज्ञापयितुं रोहिणीचरित्रं निरूपयति **रोहिणी चेति**। भगवदागमनव्यतिरेकेणापि **बलभद्रोत्पत्त्यैव** सा कृतार्थेत्याह **महाभागेति**, यद्यपि **देवकीव्यतिरिक्ता** अन्या अपि वसुदेवस्त्रियो भाग्यवत्यस्तथापीयं बाललीलादि द्रक्ष्यतीति **महाभागेति** वा, **चकारात्** सर्वा एव **स्त्रियः**, **स्त्रिष्वेव** गुप्ततया प्रचारं वारयति **नन्दगोपाभिनन्दितेति**, प्रचारार्थं निर्भयस्थित्यर्थं च, अत एव **दिव्यानि वासांसि स्रजः कण्ठाभरणानि तैर्भूषिता**, त्रिविधानि हि स्त्रीणामलङ्करणानि भवन्ति वस्त्रमयानि **सुवर्णमयानि** पुष्पमयानि च, तत् त्रयं **निरुक्तं**, **चरणहस्तयोः** स्वभावतोपि भवन्ति, कण्ठाभरणानि तु पदकहारादीनि वैशेषिकाणि, अतस्तेषां ग्रहणं, **विशेषेणाचरत्**, गृहिणीव सर्वकार्यकर्त्री जाता, अनेन रोहिणीसम्बन्धादयं **कृष्ण** इतिज्ञानकृतं भयमपि निवारितम् ॥ १७ ॥

एवं सर्वैः प्रकारैः सर्वस्वे व्ययिते **नन्दस्य** सर्वसमृद्ध्यभावमाशंक्य भगवन्निवासात् तस्य महती **समृद्धिर्जातेत्याह तत आरभ्येति**, यदा पूर्वोक्तदानानि दत्तवांस्ततःप्रभृति विष्णुबुद्ध्या पूजितत्वात् तस्याप्यानुषङ्गिकमेव तत् फलं, **सर्वा** धनपशुज्ञानादि**समृद्धयो** न केवलं **नन्दस्य** किन्तु सर्वेषामित्याह **व्रज** इति, न केवलं समृद्धिमात्रं किन्तु वैकुण्ठवत् कान्तिविशेषोपि जात इत्याह **हरेरिति**, गोकुले गवां सम्मर्दात् स्थानं कुश्लिष्टमेव भवत्यतस्तदभावार्थमेतद् वक्तव्यं, कान्तिश्चाधिदैविका सर्वोत्तमा, सा लक्ष्मीनिवासादेव भवतीति तदाह **रमाक्रीडमभूदिति** **रमाया** आसमन्तात् क्रीडा यस्मिंस्तद् **रमाक्रीडं** वैकुण्ठस्थानं तदभूत्, **हरेर्निवासात्मगुणैरिति**, स हि सर्वदुःखहर्ता भक्तानां वैकुण्ठपर्यन्तं गमनमप्यसमानं इहैव वैकुण्ठं समानीतवानित्यर्थः, आनीतेपि वैकुण्ठे यदि भगवान् न तिष्ठेत् तत्रापि त्रिभुवसुन्दररूपेण तत्राप्यैश्वर्यादिष्वसर्वगुणप्राकट्येन तदा वैकुण्ठेति शोभा न स्यात् तदाह पदत्रयेण **निवासात्मगुणैरिति**, **निवासः** स्थानं गृहं स्थितिर्वा, **आत्मा** देहः परमानन्दरूपः, **गुणा** ऐश्वर्यादयः, तैः कृत्वा रमायाः **क्रीडनं**, स्थितौ स्थितिः परमानन्दविग्रहेण रमणं गुणैरासमन्ताद् रमणमिति, **नृपेतिसम्बोधनं** यत्रैव राजा तिष्ठति सैव राजधानी भवतीतिज्ञापनं सम्मत्यर्थम् ॥ १८ ॥

एवमुत्सवं निरूप्य तस्य स्थानस्य वैकुण्ठत्वं चाकृत्रिमोत्सवार्थं निरूप्योत्सवसिद्धिपर्यन्तमत्यावश्यकमपि न कृतवानिति ज्ञापयितुं जात उत्सवेन्तरासक्तिज्ञापनार्थं भगवदर्थमुत्तमवस्तूनामानयनार्थं च मथुरां प्रति गतवानित्याह **गोपानिति**, अथवा देवकी-वसुदेवयोरपि स्नेहातिशयाद् गोकुले भगवज्जननं कोपि जानाति न वेतिसंशये मनसि खेदो भवतीति श्रीनन्दसंवादेन तन्निराकरण-पूर्वकं तयोरप्युत्सवः सम्पत्स्यत इत्युत्सवानन्तरमव्यवधानेनैव **व्रजेन्द्रस्य मथुरागमनमुच्यते**, एवं सत्युत्सवलक्षणोध्यायार्थोप्यान्तः सङ्गच्छत इति तमाह **गोपानिति**, एतेन वसुदेवकृतस्थितिनिषेधानन्तरं व्रजेन्द्रस्य पुनर्मथुरायामनागमनाद् व्रज एव कंसनैरपेक्ष्येण यथासुखं स्थित्या भगवदैश्वर्यमपि निरूपितं भविष्यति, पूर्वं रक्षायामनादरः स्थितः, इदानीमादरेण **गोकुलरक्षार्थं** गोपानन्तरङ्गा-नादिश्य स्वयं **मथुरां गतः**, करो हि सर्वाभिः प्रजाभिर्दीयते, इदानीमपि तस्मिन् देशे श्रावण्यनन्तरमेव करप्रवृत्तिः, वर्षपर्यन्तं यद् देयं तदेकदा दीयते महद्भिः, नन्दस्तु महान् भवतीति तन्नामग्रहणं, **कुरुद्वहेति**सम्बोधनं राजधर्मज्ञापनार्थं, यद्यप्यासक्तिज्ञापनार्थं पश्चात् **करदानं** निरूपितं तथापीश्वरे भगवति विद्यमानेन्येभ्यः करदानमनुचितमिति ततःप्रभृति तन्निवृत्त्यर्थम् ॥ १९ ॥

वसुदेवपुत्रो भविष्यतीतिशङ्कानिवृत्त्यर्थमुत्सवाधिक्यस्य ज्ञातत्वात् कंसकृतोपद्रवाभावार्थं **कंसमन्त्रणस्य** श्रुतत्वाद् विशेषरक्षार्थं च शीघ्रं **नन्दं** ततः प्रेषयितुं वसुदेवसमागमनवार्ता निरूप्यते, चतुर्णां मध्य एकस्याप्यभावे नोत्सवः सिध्येदिति, तत्र प्रथमं वसुदेवसमागमनमाह **वसुदेव** इति, मायाकृतस्य ज्ञापनं भगवत्कार्यमिति भगवच्चरित्रता, वसुदेवस्य नन्दस्य च धर्मभ्रातृत्वं यस्मिन् कल्पे वस्वादिदेवा ब्रह्मण एव जाताः कश्यपोपि भवति ब्रह्मण एव तदा भ्रातृत्वं सिद्धमेव, ततः पूर्वजन्मनि तथैवेति जन्मान्तरेपि धर्मभ्रातृत्वं, तदाह **भ्रातरमिति**, आगमनात्पूर्वं चेच्छृणुयान्निवारयेदेव, करदानात् पूर्वमपि चेज्जानीयात् तदा न दापयेत्, दानपर्यन्तं च राजकीयास्तदवमोचने समायान्ति, तेषामज्ञानार्थं ज्ञात्वा **दत्तकरं राज्ञ** इति चोक्तं, **अवमोचनम्** उत्तरणस्थानं, शकटादिकमवमुच्य यत्र स्थीयते ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कृष्णे विश्वेश्वर इत्यत्र **सञ्ज्ञेत्यादि**। ननु विश्वेश्वरादिपदसामानाधिकरण्यात्तद्वत् कृष्णपदमप्यानन्दहेतुत्वेनोक्तम्, न तु नामत्वेनेति सञ्ज्ञेत्यादिकथनं न घटते। अस्तु वा, तथापि व्रजवास्युक्तिः परं न घटते। शुकस्तु जानात्येवेति युक्तं तदिति कथमेवमिति चेत्, सत्यम्। यदा यादृशी लीला भवति तत्कालीनां तादृशीमेव तां शुको वदति। यथा 'चिरं पाहीति बालक' इति। तथा च तदा लोके तन्नामप्राकट्यं भगवता न कृतमिति तत्कथनमयुक्तमित्याशयेन तदुक्तम्। यत्तु नामत्वेन नोक्तमित्युक्तम्, तत्राप्युच्यते। पुरुषोत्तमस्वरूपं सदानन्दात्मकमिति केवलस्वरूपवाचित्वेन कृष्णपदमेव मुख्यं नाम। न त्वीश्वरादिपदवद्धर्मपुरःसर-त्वमिति तत्सामानाधिकरण्येप्यस्य नामत्वेनैवोपस्थितिः। यथान्यशब्दानां धर्मपुरःसरं धर्मिवाचकत्वेपि सत्ताशब्दस्य न तथात्वम्, तथात्रापीति। **मारयेदिति**। वादकानिति शेषः। **मङ्गलानपकुर्यादिति**। पूज्यपूजाव्यतिक्रमजन्यदोषप्रयोजको भवेदित्यर्थः ॥ १३ ॥ **तत आरभ्येत्यत्र, यदा पूर्वोक्तेत्यादि**। अत्रायं भावः। रमाक्रीडत्वोक्त्यैव सर्वसमृद्धिमत्त्वस्य प्राप्तावपि पृथक् तन्निरूपणाद्धरेर्नि-वासेत्यनेनैव हेतुकथनेपि तत आरभ्येति पार्थक्येन पूर्वावधिकथनाच्च पश्चादिसमृद्धौ विष्ण्वाराधनस्यैव नैकट्यात् हेतुत्वमवगम्यते। तादर्थ्यं चतुर्थ्याराधनस्यैव मुख्यफलत्वेनानुषङ्गिकत्वमत्रेति ॥ १४–१८ ॥

(२) श्रीपुरुषोत्तमचरणप्रतीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

कृष्णे विश्वेश्वर इत्यत्र टिप्पण्यां **संज्ञेत्यादि**ग्रन्थस्य तात्पर्यं निश्चाययितुं शङ्कन्ते **नन्वित्यादि, अस्तु वेति, अस्तु वा** कृष्णपदस्य संज्ञात्वं, कथमेवमिति शुकोक्तित्वेन तत्र शङ्कानुदयात् संज्ञेत्यादिनोक्तं समाधानं किमाशयगर्भमित्यर्थः, अत्र समादधते **सत्यमित्यादि, अयुक्तमिति** शुकस्याप्ययुक्तम् अवान्तराशङ्कामनूद्य समादधते **यत् त्वित्यादि**, तथात्रापीत्यन्तं, तथा च **कृष्णशब्दस्य** सदानन्दवाचकत्वमौत्सर्गिकं न तु सङ्कुचितमितिज्ञापनाय स ग्रन्थ इत्यर्थः, अत्राग्रिमं स्फुटं, सुबोधिन्यामलङ्कारा इति सद्वाणी-संस्कारवेशगानरूपाः ॥ १३ ॥ **नन्द** इत्यत्र **वासोलङ्कारगोधनमित्यस्य** श्लिष्टप्रयोगं ज्ञापयन्तः किञ्चिद्विशेषं बोधयितुं "गोकुलं तु गोधनं स्याद् गवां व्रज" इतिकोशात् पक्षान्तरमाहुर्**गोधनं गोष्ठं** वेति; तथा च **वासोलङ्कारेतिपदं** पुनरप्यावर्तते तस्मिन् पक्षे वासःपदस्य पूर्वत्वं त्वभ्यर्हितत्वविशेषाद् बोध्यं, **तेभ्य** इति **तच्छब्दस्य** पूर्वपरामर्षित्वात् पूर्वं च 'विप्रसूतमागधबन्दिनाम्'मुक्तत्वात् सर्वेभ्यः समानमेव दानं समायाति न तु ब्राह्मणेभ्योधिकं तथा सति हीनसम्प्रदानकत्वेनांशतस्तस्य दानस्य तामसत्वमापद्येत किञ्चास्मिन् श्लोके दानवाचकपदाभावादग्रिमश्लोकद्वयेपि तदभावाद् दानव्याख्यानमेवायुक्तमिति तन्निवृत्त्यर्थमाहुर्**नन्वित्यादि**, वासोलङ्कारसमभिव्याहारकथनेन कर्मत्वबोधकद्वितीयानुपपत्त्या च ब्राह्मणेभ्यो दत्तवानिति लक्ष्यतेतो नांशतस्तामसत्वापत्ति-रित्यर्थः, ननु तादृशदानस्य तामसत्वं वैधत्व एव न तूत्सवनिमित्तकत्वेन्यथा तूत्सव एव न स्यादतस्तेभ्य इत्यस्य ब्राह्मणपरत्वं न युक्तमित्यत **आहुरन्येषामित्यादि**, प्रथमपक्षमनुसृत्यान्येषां दानप्रकारमाहुर्**अन्येभ्य** इत्यादि **सम्बन्ध** इत्यन्तं, तथा चानुवादभेदाद् दानेपि प्रकारभेदो लक्ष्यत इत्यर्थः ॥ १५ ॥ **तैस्तैरित्यत्र तस्य ज्ञानानुरोधादिति तस्य नन्दस्य** भगवति यत् स्वपुत्रत्वेन ज्ञानं तदनुरोधेन, **अभ्युदयार्थमिति** भिन्नतया **शुकेनोक्तमित्यर्थः** ॥ १६ ॥ **रोहिणीत्यत्र महाभागेत्यस्यार्थान्तरमाहुर्यद्यपीत्यादि**,

भाग्यवत्य इत्यग्रिमलीलादर्शनात् तथा रोहिणी तूभयं द्रक्ष्यतीति तथेतिभावः, **अनेनेत्यादि** रोहिणीविचारणेन, **रोहिणीसम्बन्धादयं कृष्णो वसुदेवपुत्र इतिकंसज्ञानकृतं भयं निवारितं**, यदि हि **श्रीरोहिणी** न प्रचरेत् तदा रोहिण्या एव पुत्रो जातो मिथ्यैव **नन्दस्य** जात इति वदन्तीति **कंसो** जानीयात् प्रचारे तु तादृशज्ञानाभावात् तत्कृतं **भयमनेन** श्लोकेन **निवारितमित्यर्थः** ॥ १७ ॥ **तत आरभ्येत्यत्र** टिप्पण्यां **यदा पूर्वोक्तेत्यादि**फक्किकायास्तात्पर्यमाहुरत्रेत्यादि, **तन्निरूपणादिति** सर्वसमृद्धिनिरूपणात्, चतुर्थीसूचितमर्थमाहुस्तादर्थ्येत्यादि, तथा चैवं हेतुचतुष्टयं **विष्ण्वाराधनस्यैव** फलमित्यर्थः ॥ १८ ॥ **गोपानित्यत्रायमै**श्वर्याध्याय इति ज्ञापयितुमाहुरेतेनेत्यादि, एवमग्रेपि तत्तदध्यायेषु **वीर्यादि**निरूपणमर्थबलेन ज्ञातव्यम् ॥ १९ ॥ **वसुदेव** इत्यत्राभासे **वसुदेवपुत्रो भविष्यतीतिशङ्कानिवृत्त्यर्थ**मिति **नन्दस्य** या **वसुदेवपुत्रो** भविष्यतीतिशङ्का तन्निवृत्तिज्ञापनार्थं, नन्वेतावत्कार्यार्थं **वसुदेवागमन**मित्युक्तौ किं बीजमत आहुश्**चतुर्णा**मित्यादि, **नोत्सवः सिध्ये**दिति, उदर्काभावान्नन्दवसुदेवयोरन्येषां वा न **सिध्ये**दित्यर्थः, तथा चाध्यायार्थोप्यन्यथा भवेदित्याशयः, **तत्रे**ति निमित्तसप्तमी, तथा चोत्सवनिमित्तमित्यर्थः, श्लोकविवरणे ननु **वसुदेवागमन**संवादादिकं न भगवत्कृतमिति न दशमस्कन्धमध्यपातित्वमेतावता ग्रन्थस्य वक्तुं शक्यमत आहु**र्मायाकृतस्य ज्ञापन**मिति, **मायावेशकृतस्य** कंसमन्त्रणस्य **श्रीनन्दे ज्ञापनं** तद् भगवत्कारितत्वाद् भगवत्कार्यमिति तस्यापि **भगवच्चरित्रते**ति सुखेन वसुदेवागमनादेः स्कन्धमध्यपातित्वं वक्तुं शक्यत इत्यर्थः, यद्वा स्वयं कापट्येन यत् कृतं तस्य ज्ञापनेपि श्रीनन्दज्ञानं तथेति तथा, एतच्च सामान्यत उक्तं विशिष्य त्वग्रे निरूप्यम् ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अवाद्यन्त इत्यत्र **दशविधानीति** "मृदङ्गशङ्खभेर्यश्च वीणापणवगोमुखाः धुन्धुर्यानकघण्टाद्या नेदुर्दुन्दुभिभिस्तदे"ति प्रथमस्कन्धोक्तानि ज्ञेयानि, एतेषां स्वत एव वादनं न सम्भवतीत्यास्तेयलभ्यं विधिमाहुः **वादका वादयामासु**रिति, **अनन्तः कालो वेति** 'अथ सर्वगुणोपेत' इत्यत्रोक्तो लीलाकालो भगवद्रूप इति 'तमद्भुत'मितिश्लोके विवृतत्वात् तद्रूप इत्यर्थः, **अन्यथे**ति लीलाकाले प्रादुर्भूते सेवकैस्तदनुरूपसेवाऽकरणे स कालस्तान् सेवकान् वादकान् दण्डयेदिति टिप्पण्यनुसारेणार्थः ॥ १३ ॥ **गोपा** इत्यत्र **लिम्पनमिति** लिम्पतीति लिम्पः, **अनुपसर्गाल् लिम्पविन्दे**त्यादिना शप्रत्ययः, तत आचारक्विबन्ताद् भावे ल्युट् ॥ १४ ॥ **नन्दो महामना** इत्यत्र श्लोकत्रयस्यार्थमाहुः **विद्यावतामित्यादि**पदत्रयेण, **अनेने**ति विद्यातारतम्येन दानकथनेनेत्यर्थः, **दत्तवानिति सम्बन्ध** इति **तेभ्य** इति तच्छब्देन 'धेनूनां नियुते प्रादा'दिति श्लोकोक्ता विप्रा उच्यन्ते, तथा च तत्सहचारेण 'प्रादा'दितिपदोक्तं दानमप्यनुवर्तनीयं तेन सम्बन्ध इत्यर्थः ॥ १५ ॥ **तैस्तै**रित्यत्र **विष्णुबुद्ध्ये**ति मूलार्थानुरोधाद् विष्णुः प्रीयतामितिबुद्ध्येत्यर्थः॥१६॥ **तत आरभ्ये**त्यत्र टिप्पण्यां **विष्ण्वाराधनस्यैवे**ति आराध्यतेनेनेतिकरणव्युत्पत्त्या विष्ण्वाराधनार्थकबुद्ध्या कृतस्य दानादेरित्यर्थः, सुबोधिन्यां, **तस्यापीति** विष्णुबुद्धिकृतपूजनस्यापीत्यर्थः, **सर्वा इति धनं पशवश्च** पूर्वकाण्डप्रतिपादितं फलं ज्ञानमुत्तरकाण्डप्रतिपादितं, विष्ण्वाराधनबुद्ध्या कृतं कर्मतत्समृद्धिमप्यवान्तरफलं साधयतीतिभावः, **भक्तानां वैकुण्ठपर्यन्तं गमन**मिति भक्तानां तावत्साधनक्लेशमसहमान इहैवाधिभौतिके लोकसिद्धे व्रज एव **वैकुण्ठं** 'यत्र गावो भूरिशृङ्गा अयास' इत्यादिश्रुतिप्रतिपाद्यमाधिदैविकं व्रजं नित्यसिद्धं **समानीतवान्** प्रकटितवानित्यर्थः ॥ १८ ॥ **गोपानि**त्यस्याभासे **अकृत्रिमोत्सवार्थ**मिति भगवत उत्सवलीलाया नित्यत्वाद् वैकुण्ठ एव सा तिष्ठति, अन्यत्राविर्भाविता कृतिमैव भवति, अतः स्थानस्य वैकुण्ठत्वं निरूपितं, तेनोत्सवस्याकृत्रिमत्वं ज्ञापित भवति, तथा चाकृत्रिमोत्सवत्वार्थमित्यर्थः ॥ ९ ॥ **वसुदेव** इत्यत्र **मायाकृतस्येति** तथा कंसमन्त्रणं मायाकार्यमिति चतुर्थाध्याये कारिकायां निरूपितत्वाद् दैत्यकृता उत्पाता मायाकृतास्तेषां 'सन्त्युत्पाताश्च गोकुले' इत्यनेन ज्ञापनमित्यर्थः ॥ २० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तैस्तैरित्यत्र **विष्णोराराधनार्थाये**त्यस्य व्याख्याने, ननु 'विष्णोराराधनार्थाये'त्युक्त्वा 'स्वपुत्रस्ये'तिभिन्नतया कथनं न युक्तं स्वपुत्रस्यैव विष्णुत्वाद् विष्णुशब्दस्य पुरुषोत्तमवाचकत्वादित्याशङ्क्याहुः **तस्य ज्ञानानुरोधाद् भिन्नतया कथनमिति**, **तस्य** श्रीनन्दस्येत्यर्थः, **ज्ञानानुरोधात्** पुत्रत्वज्ञानानुरोधादित्यर्थः, न हि नन्दस्य श्रीकृष्णे विष्णुबुद्धिः अतो नन्दबुद्धिमादाय नन्दपुत्रविष्णोर्भेद उक्तः ॥ १६ ॥ **तत आरभ्येत्यत्र हरेर्निवासात्मगुणै**रित्यस्य व्याख्याने **आत्मा देहः परमानन्दरूप** इति 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत" इतिश्रुतेः कृष्णः सदानन्दः परं ब्रह्मेतिनिर्विवादं, तत्र स्वरूपात्मक एव देहो न त्वात्मातिरिक्तः स्वरूपस्यानन्दरूपत्वाद् देहस्य परमानन्दरूपत्वमुक्तं, अत एव "सच्चिदानन्दविग्रह"मित्यादिश्रुतिषु विग्रहस्य सच्चिदानन्दरूपतोक्ता 'सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे' इति गोपालतापनीयेपि तथैवोक्तं, 'आनन्दरूपममृतं यद् विभाती'ति श्वेताश्वतरोपनिषत्स्वप्युक्तं, नन्दव्रजजनानन्दी सच्चिदानन्दविग्रह' इति ब्रह्माण्डपुराणे धरणीशेषसंवादे श्रीकृष्णाष्टोत्तरशतनामस्तोत्रे उक्तमतः श्रुतिपुराणसिद्धत्वात् सच्चिदानन्दविग्रहः श्रीकृष्ण इति ज्ञेयम् ॥ १८ ॥ **वसुदेव उपश्रुत्ये**त्यस्य व्याख्याने **मायाकृतस्य ज्ञापनमिति** कंसं प्रति माययोक्तं 'जातः खलु तवान्तकृत् यत्र क्वचित् पूर्वशत्रुर्मा हिंसीः कृपणां वृथे'ति, इह तव शत्रुरन्यत्र जातो न तु मथुरायामित्युक्त्या अन्यत्रोपद्रवः कर्तव्य इति बोधितं, अत एव "कृपणां देवकीं वृथा मा हिंसी"रित्युक्तं,

तथा च ये ये दैत्याः कंसेन श्रीगोकुले प्रेषणीयास्ते सर्वे मायया बोधनात् प्रेषिता इति तदागमनादेर्मायाकृतत्वमेव तद् वसुदेवेन श्रीनन्दं प्रति ज्ञापितं 'सन्त्युत्पाताश्च गोकुल' इत्यनेन, तत् ज्ञापनं भगवत्कार्यं, यतः श्रीनन्दो वसुदेववचः श्रुत्वैव सावधानो भूत्वा भगवद्रक्षातत्परोऽभूदत इदं भगवत्कार्यं, तन्निरूपणं भगवच्चरित्रनिरूपणमेवेत्यर्थः ॥ २० ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

आचार्यचरण कहते हैं कि 'एवं विद्यावतां' आगे के ५ से ११ पर्यन्त आठ श्लोकों में वेद पुराण आदि विद्याओं के जानने वाले के, व्रज भूमि के, गाय, गोप और गोपियों के अलङ्कारों का वर्णन किया। अब 'अवाद्यन्त' श्लोक में लौकिक बाजों के बजने से हुए उत्सव का वर्णन करते हैं।

"स्वभावतो दशविधानि" स्वभाव से मृदङ्ग-शंख-भेरी-वीणा-पणव-गोमुख-धुन्धुरी-आनक-घण्टा और दुन्दुभि आदि दश प्रकार के वाद्य होते हैं परन्तु भगवान श्रीकृष्णजी के प्रादुर्भाव के समय हर्षान्वित होकर वादकोंने और भी अनेकविध बाजे बजाये। यह वाजित्र हस्तिनापुर से द्वारिका की ओर प्रस्थान के अवसर पर बिना बजाये स्वयं बजने लगे थे, लेकिन यहाँ बजाने वालों ने आनन्दमग्न होकर वादित्र बजायें। महोत्सव करने का निमित्त कारण, विश्व के नियामक कृष्ण का प्राकट्य है। यदि कोई कहे कि अभी तो बालक का जन्म हुआ है; नामकरण तो हुआ ही नहीं, तो कृष्ण नाम शुकदेवजी ने कैसे कहा? तब आचार्यचरण कहते हैं कि '**भगवति नियमाभावात्**' नामकरण संस्कार में नाम तो लौकिक बालकों का धरा जाता है इसलिये लौकिक बालक के नाम का ज्ञान, नामकरण होने पर होता है। भगवान् के लिये यह नियम लागू नहीं होता है क्योंकि भगवान् जैसे वे नित्य हैं वैसे ही उनके नाम सदैव नित्य है। यदि ऐसा है तो गर्गाचार्यजी ने नामकरण संस्कार में नाम क्यों धरे? ऐसे प्रश्न के समाधान में कहते हैं कि 'पूर्वसंज्ञानामेव गर्गेणोक्तत्वात्' गर्गजी ने नये नाम नहीं धरे थे किन्तु वेदख्यात ही नाम कह सुनाये थे। जैसे "**कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः' 'तयोरैक्यं परंब्रह्म कृष्ण इत्यभिधीयते**'– गोपालतापिनीयोपनिषद् में कहा है कि सत्तावाचक कृष शब्द आनन्द वाचक ण शब्द है। इन दोनों शब्दों के ऐक्य से 'कृष्ण' बना है, उन कृष्ण को परब्रह्म कहते हैं। तात्पर्य यह है कि "**कृष्ण**" सदानन्द स्वरूप हैं यह नाम किसी नक्षत्र में जन्म के कारण नहीं है। आनन्द होने पर सामान्यतया वाजित्र अवश्य बजने चाहिये जिस पर यहाँ तो विश्वनियन्ता का प्राकट्य हुआ है इसलिये विश्वेश्वर के पधारने पर स्वयं उसके पास जाकर बाजे भी अधिक बजाने चाहिये। यह तो दूसरे बालकों जैसा ही बालक है, ऐसा विचार भी मन में नहीं लाना चाहिये क्योंकि श्रीशुकाचार्यजी ने इनको 'अनन्त' कहा है इसलिये यह लौकिक बालक जैसा साधारण बालक नहीं है किन्तु जिनका कोई अन्त नहीं है ऐसे महान् है, अथवा तो अनन्त काल रूप हैं इसलिये यदि अन्यथा किया जायगा और महोत्सव नहीं मनाया जाएगा तो कालरूप होने से वे नष्ट कर देंगे। इसके अतिरिक्त नन्दजी छोटे हैं और उनका व्रज भी छोटा घर है, वहाँ विश्व के 'ईश्वर' 'सदानन्द' 'अनन्त' पधारे हैं। अल्प के अल्प ग्रह में यदि महान आ जाए तो उनके आगमन पर अवश्य महोत्सव मनाना चाहिये। इससे पधारने वाले का स्वागत सम्मान होता है, नहीं तो उसका अपमान होता है। जिससे अप्रसन्न होकर वह कुछ हानि भी करे। इन सब विचारों के साथ साथ नन्दजी द्रोण हैं और भगवद्भक्त हैं। तथा भगवान् कृष्ण ब्रह्माजी के वचन सत्य करने के लिये, व्रज में पधारे हैं। इसलिये महामना नन्दरायजी ने आह्लाद में जो बाजे बजाने का महोत्सव किया सो बहुत उचित था।

श्रीटिप्पणीकारजी कहते हैं कि कई महानुभावों का मन्तव्य है कि तेरवें श्लोक में निर्दिष्ट 'कृष्ण' शब्द 'विश्वेश्वर' और 'अनन्त' शब्द के समान भगवान् का सदानन्द स्वरूप बताने के लिये कहा गया है न कि कृष्ण का नाम है। ऐसी अवस्था में यह शंका करनी ही व्यर्थ है कि नामकरण से पहले शुकदेवजीने 'कृष्ण' नाम कैसे दिया। लेकिन यह कथन समुचित नहीं है क्योंकि 'विश्वेश्वर' और 'अनन्त' आदि शब्द पहले धर्म बता कर, धर्मी का ज्ञान कराते हैं, किन्तु 'कृष्ण' शब्द धर्म कहकर धर्मी का ज्ञान नही कराता है वह तो स्वयं आनन्द की सत्तारूप है, इसलिये यह 'कृष्ण' नाम है न कि किसी का धर्म बताने वाला शब्द है। अतः यह संशय वास्तविक होने से ऐसा समाधान किया गया है कि पुरुषोत्तम का स्वरूप सदानन्दात्मक है, 'कृष्ण' पद केवल सदानन्दात्मक स्वरूप का वाचक होने से 'मुख्य नाम' हैं। इसलिये शुकदेवजी ने यहाँ 'कृष्ण' पद नामवाचक ही दिया है।

श्रीसुबोधिनीजी में काल के लिये लिखा है कि '**अनन्तः कालो वा**" इसका भाव श्रीलेखकारजी बताते हैं कि यह काल भी भगवद्रूप है जैसा कि '**अथ सर्वगुणोपेतः**' श्लोक में कहा है और '**तमद्भुतं**' श्लोक में भगवान् का विशेष विवरण है। इसलिये यह 'काल' साधारण काल नहीं, किन्तु भगवद्रूप है। भगवान् के लीला काल के प्रादुर्भाव होते हुए यदि सेवक पूर्णतया सेवा न करें, तो सेवकों का अहित ही होता है। इसलिये भगवद्रूप काल का आगमन के कारण, सब सेवक सेवा करने लगे। अन्यथा दण्डपात्र होते हैं। '**कालः**' यह लीलाकाल "**अनन्तः**" भगवद्रूप है, इसलिये लीला काल के समय, यदि सेवक सेवा न करें, तो वह कालरूप भगवान्, उन सेवकों को दण्ड देंगे ॥ १३ ॥

"गोपिकानां भगवत्स्मरणेनैव" गोपिकाओं में भगवान् का आवेश भगवत्स्मरण से हुआ और गोपों में तो भगवान् के सन्निधान में भगवद्धर्मों के प्राकट्य के कारण, भगवान् का आवेश हुआ। भगवदावेश होने पर, हर्ष से प्रफुल्लित गोपों के, मनाये हुए उत्सव का वर्णन श्रीशुकाचार्यजी "गोपाः" श्लोक से करते हैं।

दधि, दूध, घी एवं जल को मिला कर आपस में सिंचन करने लगे; दही आदि एक दूसरे के मुखों पर लेपन करते हुए परस्पर मक्खन के गोले फेंकने लगे। अथवा जिसको जो वस्तु हाथ लगी जैसे किसी को दही हाथ लगा तो वह दही से दूसरे के मुख पर लेप करने लगा, यदि किसी को दूध या जल हाथ लगा तो वह दूध या जल उडेलने लगा। इसी प्रकार घृत एवं जल से सिञ्चनादि किये। दधि-घृत-जल आदि का सिञ्चन, समान आनन्द वाले और अधिक आनन्द वाले करते थे और विशेष रस में मत्त होने पर नवनीत के गोलों की वर्षा करते थे। इसी प्रकार देव किन्नर मनुष्य आदि सबों के उत्सव का वर्णन किया है ॥ १४ ॥

"एवं सर्वकृत उत्सवे" इस प्रकार सबों के आनन्द से उत्सव मनाने का वर्णन कर, अब नन्दरायजी के दानरूप उत्सव मनाने का वर्णन श्रीशुकाचार्यजी **"नन्दो मनाः"** श्लोक से करते हैं कि—आनन्दनिमग्न श्री नन्द बाबा ने विद्याभ्यासंगी विप्रों को, दूसरों को और स्त्रीजनों के मनचाहा दान दिया। दान प्रकार के क्रम में प्रथम विद्योपासकों के दान का वर्णन करते हैं। यदि ज्ञान के तारतम्य से न्यूनाधिक प्रमाण में दान दिया जाय तब तो अधिक विद्या वालों को अधिक मिलता और अल्पविद्या वालों को अल्प मिलता तब अल्पदान पाने वालों के चित्त में क्षोभ होता और यह कामना होती कि नन्दबाबा हमको भी इतना देते तो हम प्रसन्न होते इस प्रकार के लोभ का विचार किसी को न हो, इसलिये प्रत्येक ब्राह्मण को सर्व समान वस्त्र, अलंकार गौएँ और धन अथवा गौओं का एक एक गोष्ठ दान में दिया। सूत आदि को अनुवाद प्रथित कथन करने से ब्राह्मणों के समान न देकर योग्यतानुसार दिया। सूतों को यश के लिये दिया, दूसरे गाने वाले, वैद्य, ज्योतिषी, शकुन जानने वाले और स्त्रियाँ आदि जो उत्सव में आई थीं उन सबको शिरोपाव में वस्त्र अलंकारादि दिये।

श्रीलेखकारजी कहते हैं कि पन्द्रहवे श्लोक में प्रादात् क्रियापद अनुकर्ष न्याय से ५वें श्लोक से आता है। १५वें श्लोक में सूत मागध आदि पदों से भिन्न और अन्य पद से दूसरों का पृथक् विवरण देने के कारण दूसरों के दान में भी भेद है उन्हें ब्राह्मणों जैसा दान न मिला किन्तु अपनी योग्यतानुसार ही उन्हें दान मिला ॥ १५ ॥

आचार्यचरण कहते हैं कि श्रीशुक भगवान् **'तैः तैः कामैः'** श्लोक से दूसरों को भी दान दिया उसका वर्णन करते हैं। नन्दरायजी का अन्तःकरण परम उदार था और निर्लोभी था। परमोदार नन्दजी ने जिसके मन में जो जो पाने की इच्छा थी उस इच्छा के अनुसार उनका भी विष्णुबुद्धि से आदर सत्कार किया। यदि कोई आसुरस्वभाव वालों ने कुछ माँगा तब भी नन्दबाबाने उनकी योग्यता अनुसार अर्चन किया, और जिसकी जैसी योग्यता थी उसको उतना दिया और जो कुछ देने योग्य था वही दिया क्योंकि देने और दान में, योग्यता आवश्यक है। इस प्रकार सर्वसमर्चन करने का प्रयोजन यह था कि विष्णु की प्रसन्नता हो और अपने पुत्र की उन्नति हो इसलिये सूत मागधादि सर्व का आदर किया। इस श्लोक में **"उदयाय च"** पद में दिये हुए **"च"** अव्यय का यह आशय है कि ग्रहादि की पूजा भी की गई। इस श्लोक में **"विष्णोराराधनार्थाय"** श्रीविष्णु की प्रसन्नता और **"स्वपुत्रस्योदयाय"** श्रीनन्दलालजी की उन्नति के लिये अर्चन किया ऐसा उल्लेख किया गया है उसका सुबोधिनीजी में अर्थ बताया कि **"तस्य ज्ञानानुरोधाद् भिन्नतया कथनम्"** इस वाक्य का श्रीयोजनाकारजी तात्पर्य कहते हैं कि नन्दरायजी श्रीकृष्णजी को, अपने पुत्र को विष्णु से पृथक् अपने पुत्ररूप समझा था। श्रीशुकदेवजी ने श्रीनन्दरायजी की यह बुद्धि के अनुसार ऐसा उल्लेख किया है। **'च'** का आशय कहकर महाप्रभुजी ने वैष्णवों को कहा है कि पुत्र-जन्म आदि के समय, वैदिक कर्म ग्रहादि पूजन भी वैष्णवों को करना चाहिये। तदनुसार गोस्वामी बालक एवं वैष्णव समुदाय वैदिक मर्यादा अनुसार सर्व संस्कार अनासक्ति से करते हैं। संस्कारादि के समय अन्य देव ग्रहादि के पूजन से अनन्यता का नाश नहीं होता क्योंकि सर्व देव श्रीकृष्ण के ही अंग हैं। अङ्ग और अङ्गी का अभेद है। इसलिये आचार्यचरण ने श्रुति गीता के १७वें श्लोक में आज्ञा की है कि **'भगवत्वेन देवतान्तरभजनं न कोऽपि दोषः'** ॥ १६ ॥

'स्त्रीभ्यो दाने' आचार्यचरण कहते हैं कि स्त्री वर्ग के दान में, रोहिणीजी को कंस के भय के कारण गुप्तरूप से दिया होगा। ऐसा नहीं है क्योंकि प्रत्येक के हृदय में भगवदावेश होने से दान करने वाले एवं लेने वाले को कोई भय नहीं था। इसलिये नन्दरायजी ने, जो रोहिणीजी का सत्कार छिपकर नहीं और न रोहिणीजी ने भय से गुप्त रहकर लिया ऐसी रोहिणीजी की निर्भयता दिखाने के लिये रोहिणीजी के चरित्र का वर्णन करते हैं कि **'रोहिणी च महाभागा'** रोहिणीजी **'महाभागा'** बड़भागिनी थी कि भगवान् कृष्ण के पधारने से पहले ही रोहिणीजी से बलरामजी प्रकट हो गये थे। यद्यपि देवकी के अतिरिक्त वसुदेवजी की सब पत्नियाँ भी भाग्यशालिनी थीं, किन्तु बाललीला आदि सब लीलाएँ रोहिणीजी देखेंगी, दूसरी पत्नियाँ बाललीला नहीं देखेंगी, इसलिये यह बड़भागिनी है। श्रीरोहिणीजी नन्दरायजी से अभिनन्दित होने के कारण केवल स्त्री-वर्ग में ही नहीं घूमती थीं, किन्तु सब जगह घूमती हुई सारा गृह-कार्य करती थीं और गृहिणी के समान देख-भाल

करती थीं। श्रीरोहिणीजी लालन के प्राकट्य की बधाई देने के लिये और निर्भयता दिखाने के लिये सुन्दर वस्त्र, मालाएँ तथा कण्ठाभरणों से अलंकृत हुई थीं। **'च'** अक्षर से बताते हैं कि अन्य स्त्रियाँ भी दिव्य वस्त्र मालाएँ, कण्ठाभरण पहनकर सुशोभित हुई थीं। स्त्रियों के वस्त्रों के, पुष्पों के और सुवर्ण के तीन आभूषण होते हैं। इससे उन्होंने तीन प्रकार के आभूषण धारण किये थे। पैर और हाथों के आभूषण तो यों ही स्त्रियों के नित्य रहते हैं, लेकिन कण्ठाभरण पदकहार आदि तो विशेष उत्सवों पर पहने जाते हैं। इसलिये कण्ठाभरणादि का यहाँ वर्णन किया गया है। इससे रोहिणीजी के सम्बन्ध के कारण यह कृष्ण वसुदेवजी के पुत्र यहाँ आये हैं यह भय भी मिटा दिया। रोहिणीजी को बड़भागिनी इसलिये कहा है कि वह 'कृष्ण' की व्रज की बालादि लीलाएँ और दूसरी भी लीलाएँ देखेंगी। वसुदेवजी की दूसरी पत्नियाँ कृष्ण की बाललीलाएँ नहीं देखेंगी। कंस के मरने के बाद जो लीलाएँ होंगी वे ही देखेंगी इसलिय वे स्त्रियाँ केवल भाग्यवतियाँ थीं। रोहिणीजी पूर्ण शृङ्गार से सुसज्जित होकर चारों ओर घूम रही थी इससे 'कृष्ण' वसुदेवजी के पुत्र हैं यह शंका कंस के मन में भी न होगी। इसी प्रकार कंस के भय का भी निवारण हुआ ॥ १७ ॥

महोत्सव में इस प्रकार, सर्वस्व देने पर भी स्वयं भगवान् के निवास स्थल होने से नन्दरायजी के पास पहले से भी अधिक समृद्धि हुई इसका वर्णन शुकाचार्य **'तत आरभ्य'** श्लोक से करते हैं। **'यदा पूर्वोक्तदानानि'** नन्दरायजी के पहले कहे हुए दान देने और विष्णु बुद्धि से पूजन करने के कारण उस दिन से धन, पशु, ज्ञान आदि सर्वप्रकार की समृद्धियाँ केवल नन्दजी के पास ही नहीं, किन्तु समग्र व्रज में हो गईं, पर यह विष्णुप्रसन्नता की बुद्धि से किये हुए दान का गौण फल है। न केवल समृद्धियाँ ही हुई किन्तु व्रज की वैकुण्ठ जैसी विशेष शोभा हुई, क्योंकि व्रज भगवान् का निवास बन गया, उसमें अपनी आत्मा श्रीविग्रह और षड्गुणों सहित आप विराजमान् हुए। यों तो व्रज में गौएँ अधिक रहने से वह स्थान गोमयादि के कारण असुन्दर होता है, किन्तु वहाँ तो आधिदैविकी कान्ति सब से उत्तम हुई, वह तो लक्ष्मीजी के निवास से ही होती है, इसलिये कहते हैं कि वह व्रज रमा के विहार स्थल वैकुण्ठ बन गया। गोमयादि से असुन्दरता मिट गई और उनमें आधिदैविकता आने से सर्वत्र अलौकिक सुन्दरता आ गई।

भक्तों को वैकुण्ठ में जाने का परिश्रम भी न हो, अतः सर्वदुःखहारी श्रीहरि भगवान् यहाँ पर ही वैकुण्ठ को लाए। यदि लाए हुए वैकुण्ठ में भी भगवान् न हों, तो वह वैकुण्ठ भी भक्तों को आनन्ददायी नहीं होता। इसलिये भक्तेच्छापूरक भगवान् ने भक्तों की अभिलषित कामनाओं की पूर्ति के लिये, अपनी आत्मा श्रीविग्रह तथा षड्गुणसहित व्रज को अपना निवास बनाया। भगवान् उनकी आनन्दमय आत्मा तथा षड्गुण के वहाँ विराजने से स्वयं रमा की विहारस्थली वैकुण्ठ हो गया। परमानन्द स्वरूप का लीला स्थान होने से व्रज अत्युत्तम स्थान हुआ। हे नृप! यह सम्बोधन से यह भाव बताया कि, जहाँ राजा रहता है, वह 'राजधानी' होती है। और राजधानी में लक्ष्मी रहती है। आप राजा हो, आपको तो यह अनुभव है ही। जब भगवान् स्वयं व्रज में रहे तो, वह व्रज भगवान् का धाम, वैकुण्ठ बन ही गया, इसमें कोई आश्चर्य का अवकाश नहीं। टिप्पणीकार कहते हैं कि प्रथम दान करने से नन्दरायजी को समृद्धि मिली और मुख्य फल विष्णु का आराधन मिला, जिससे नन्दजी ने सबका विष्णुबुद्धि से पूजन किया। दान का गौण फल है।

विष्णुबुद्धि से पूजन करने से वेद के दोनों काण्डों में से पूर्व काण्ड का फल धन, पशु और उत्तर काण्ड का फल ज्ञान मिला।

श्री लेखकारजी, कहते हैं कि **'यत्र गावो भूरिशृङ्गा'** इस श्रुति में आधिदैविक नित्यसिद्ध, लोक में प्रसिद्ध व्रज को वैकुण्ठ कहा गया है। आधिभौतिक व्रज में वैकुण्ठ को लाए।

श्री योजनाकारजी कहते है कि **'हरेर्निवासात्मगुणैः'** पदों से शुकमुनि ने देह और षड्गुणों सहित भगवान् का व्रज में निवास बताया है यहाँ देह शब्द से भगवान् की मनुष्यवत्, लौकिक भौतिक देह नहीं है क्योंकि श्रुति ने भी कहा है कि भगवान् और भगवान् की देह भिन्न नहीं हैं, वह भगवद्रूप ही है, इसलिये देह के स्थान में 'आत्म' शब्द दिया है। शास्त्रों में भी, भगवान् के श्रीविग्रह को आनन्द रूप कहा है। 'कृषिर्भूवाचक' पद से कृष्ण को सदानन्द स्वरूप कहा गया है। 'सच्चिदानन्दरूपाय' गोपालतापिनी उपनिषद् में सच्चिदानन्द रूप कहा है। 'अनन्दरूपममृतं यद् विभाति' श्वेताश्वतर उपनिषद् में 'आनन्द रूप अमृत कहा गया है। 'सच्चिदानन्दविग्रह' नन्दव्रज जनानन्दी ब्रह्माण्ड पुराण में नन्द के व्रज को आनन्ददाता सच्चिदानन्दशरीरधारी कहा है। इत्यादि प्रमाणों से कृष्ण आनन्दस्वरूप है, उनकी देह उनसे भिन्न नहीं होती और वह देह आनन्दात्मक ही है।

लेखकारजी कहते हैं कि लौकिक कृत्रिम उत्सव नहीं था! भगवान् की अकृत्रिम उत्सव की लीला तो नित्य वैकुण्ठ में ही होती है। भूतल पर तो, जो लीला होती है वह कृत्रिम लौकिक ही होगी, आप कैसे कहते हो कि लीला, अकृत्रिम थी इस संशय को हटाने के लिये ही भगवान् ने गोकुल को वैकुण्ठ बना दिया था। इससे सिद्ध होता है कि उत्सव अलौकिक था ॥१८॥

आचार्यचरण १९ वें श्लोक के अवतरण में कहते है कि अग्रिम श्लोक पर्यन्त श्री शुकदेवजी ने इस प्रकार जन्मोत्सव का वर्णन किया, जिसमें यह दिखाया कि यह उत्सव कृत्रिम लौकिक नहीं था, क्योंकि भगवान् के प्राकट्य के कारण उत्सव मनाया गया था, यद्यपि नन्दजी की बुद्धि भगवान है ऐसी नहीं थी तो भी वास्तव में तो, आनन्दरूप भगवान् के प्राकट्य के कारण सब के मन में उल्लास का आविर्भाव हुआ, जिससे इतना महान् महोत्सव मनाया गया और वह स्थान वैकुण्ठ बन गया। ऐसे महोत्सव में लगने के कारण, नन्दजी दूसरे आवश्यक कार्य भी न कर पाए, लेकिन उत्सव पूर्ण होते ही, अन्तरासक्ति होने पर भी भगवान् के लिये सुन्दर वस्तु लाने को मथुरा गए ऐसा 'गोपान्' श्लोक से शुकजी वर्णन करते हैं। दूसरा हेतु यह भी है कि वसुदेवजी और देवकीजी का भी भगवान् में अति अनुराग होने से भगवान् को हम गोकल में रख आए हैं इसका ज्ञान किसी को हुआ भी है या नहीं, इस संशय से उनके मन में खेद होता था। नन्दरायजी से मिलने पर श्री वसुदेव जी का संशय और क्लेश दूर होकर मनकी प्रसन्नता होगी। इस कारण से भी नन्दरायजी उत्सवपूर्ति होते ही बिना विलम्ब मथुरा जी पधारे जिसका वर्णन अब करते हैं। ऐसा करने से इस अध्याय का अर्थ उत्सव है, इसकी भी सिद्धि हो जाती है। मथुरागमन का वर्णन 'गोपानिति' इस श्लोक से करते हैं।

आचार्यचरण इस अध्याय की कथा को ऐश्वर्य लीला कहते हैं क्योंकि अब राजाधिराज भगवान गोकुल पधारे हैं फिर कंसको क्यों कर देना! इसलिये वसुदेवजी नन्दरायजी को मथुरा में रहने का निवेदन करेंगे, फलतः नन्दजी व्रज में लौट कर पुनः मथुरा नहीं जाएँगे। भगवत्सान्निध्य से कंस की चिन्ता न कर व्रज में ही निश्चिन्त रूप से सुखपूर्वक निवास करेंगे। श्रीनन्दराय जी की निर्भयता से भगवान् के ऐश्वर्य गुण का दिग्दर्शन हुआ। भगवत्प्राकट्य के पूर्व गोकुल की रक्षा में नन्दजी का इतना आदर न था अब तो अत्यन्त आदर से गोकुल की रक्षा के लिये, अन्तरंग गोपों को आदेश देकर कर देने के लिये मथुरा गए। कारण कि सारी प्रजा 'कर' देती है। अभी भी इस देश में श्रावणी पूर्णिमा के अनन्तर कर देने की पद्धति है। सारे वर्ष में जो कर देना हो वह एक ही दिन बड़े साहूकार और व्यापारी दे देते हैं। नन्दजी तो महान् व्रज के नरेश हैं इसलिये उनका नाम करदाताओं में अग्रगण्य है। श्रीशुकाचार्यजी ने परीक्षित को कुरूद्वह! सम्बोधन राजधर्मज्ञापन के लिये दिया है। श्री पुरुषोत्तमजी आज्ञा करते हैं कि 'गोपान्' इस श्लोक से सिद्ध करते हैं कि यह पाँचवा अध्याय "ऐश्वर्याध्याय" है। क्योंकि नन्दरायजी वसुदेवजी के निषेध करने के बाद फिर मथुरा में नहीं आवेंगे, व्रज में ही रहेंगे। कंस की थोड़ी सी भी चिन्ता न कर, निश्चिन्त वहाँ सुख पूर्वक समय बिताएँगे ॥ १९ ॥

श्रीनन्दरायजी की उत्सव में आसक्ति को सूचित कर, यद्यपि यह जताया है कि अब 'कर' नहीं देना चाहिये ऐसा निरूपण किया है, किन्तु तत्त्वदृष्टि से भगवान् के विद्यमान होते हुए, अन्य को 'कर' देना उचित नहीं। यह समझाने के लिये वसुदेवजी का नन्दजी से मिलना आवश्यक है, जिसका वर्णन शुकमुनि **'वसुदेव उपश्रुत्य'** श्लोक से करते हैं। इस श्लोक के रहस्य को स्पष्ट करते हुए श्री आचार्यचरण श्रीनन्दरायजी से वसुदेवजी के मिलन में चार आशय बताते हैं कि—श्रीनन्दरायजी ने बड़े चाव से नन्दलाल प्राकट्य महोत्सव मनाया है वह श्रीकृष्ण श्रीवसुदेवजी के पुत्र होंगे ॥ १९ ॥

श्रीनन्दरायजी ने बड़े चाव से श्रीकृष्ण जन्म का उत्सव मनाया है या नहीं? वसुदेवजी के इस संशय की निवृत्ति के लिये, वसुदेवजी का नंदजी से मिलना आवश्यक था।

दूसरा आशय कंस को महान् उत्सव का पूर्णतया ज्ञान न हो जाय अन्यथा वह बहुत उपद्रव करेगा। यह कहने के लिये वसुदेवजी का नंदजी से मिलना आवश्यक था।

तृतीय हेतु कंस ने मंत्रणा कर दूतों को गोकुल आदि स्थानों में बालकों का नाश करने के लिये भेज दिये हैं, यह बात वसुदेवजी जानते थे उसकी सूचना नंदजी को देनी थी इसलिये उन दोनों का मिलना आवश्यक था।

चतुर्थ लक्ष्य यह था कि श्रीनन्दरायजी गोकुल शीघ्र लौटें और वहाँ पर ही रहें एवं बालकों की रक्षा करें यह सूचित करना था। इसलिये वसुदेव नन्दराय मिलना आवश्यक था।

ऊपर जताये हुए चारों में से एक का भी यदि अभाव रहा, तो उत्सव की सिद्धि नहीं होगी। अब प्रथम वसुदेव नन्दराय मिलन का वर्णन करते हैं। माया के कार्य का कथन भी भगवत्कार्य होने से भगवत् चरित्र ही है। वसुदेवजी और नंदरायजी दोनों धर्मभ्राता थे। जिस कल्प में वसु आदि अष्ट देव, ब्रह्मा के पुत्र थे; उसी कल्प में कश्यप भी ब्रह्माजी के पुत्र थे। इस प्रकार पूर्व जन्म में ये दोनों भ्राता थे। इस दूसरे जन्म में भी पूर्व संस्कार से धर्मभाई हुए हैं, इसलिये शुकदेवजी ने नंदजी को 'भ्रातरं' कहकर सिद्ध किया कि ये दोनों भाई हैं। यदि वसुदेवजी जानते कि नंदजी कर देने के लिये मथुरा आ रहे हैं तो वे नंदजी को यहाँ आने से ही रोक देते तथा यहाँ आने पर भी कर देने के लिये निषेध करके कर देना बंद करवा देते। मथुराजी आने पर जब तक नंदजी कर नहीं देंगे तब तक राज कर्मचारी डेरे पर आते रहेंगे, अतः वसुदेवजी ने जब

जाना कि नंदजी ने कर दे दिया है, अब कोई भी राज-कर्मचारी नंदजी के पास नहीं आएगा और इनसे मेरे मिलने का पता कंस को नहीं होगा, ऐसा समझ कर अब नंदजी के डेरे पर मिलने आए। श्रीप्रकाशकारजी कहते हैं कि चारों में से एक के भी अभाव से नन्दजी एवं वसुदेवजी तथा अन्यों का उत्सव भी अपूर्ण रहता। जिससे अध्याय का अर्थ 'उत्सव' भी सिद्ध न होता।

नन्दजी के डेरे पर मिले हुए वसुदेवजी और नन्दजी का संवाद भगवत्चरित्र न होने के कारण दशम स्कन्ध में यह प्रसंग नहीं देना चाहिए। ऐसा न विचारें क्योंकि सुबोधिनीजी में **'मायाकृतस्य ज्ञापनं भगवत्कार्यमिति'** भगवच्चरित्रता इन पदों से कहा है कि माया वेशधारी कंस ने जो मंत्रणा की, वह वसुदेवजी ने नन्दजी को सुनाई। अतः यह भी भगवत्कार्य था, इसलिये यह भगवत्चरित्र होने से दशम स्कन्ध में सन्निवेश किया है ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्रीकृष्णे नन्दस्य व्रजं प्रत्यागते अवतीर्णे सति यो महानुत्सवस्तस्मिन् विचित्राणि नानाविधानि वादित्राणि अवाद्यन्त इत्यन्वयः। 'श्रीकृष्णावतारो दुर्लभ' इति सूचयन्नाह—विश्वेश्वर इति। तत्र हेतुं सूचयन्नाह—अनन्ते इति। देशकालवस्तुपरिच्छेद-रहिते इत्यर्थः ॥ १३ ॥ हृष्टा गोपाश्च दध्यादिभिः परस्परमासिञ्चन्तो, नवनीतैर्मुखं विकिम्पन्तश्च चिक्षिपुः। परिहासार्थं दध्यादि-पङ्के पातयामासुरित्यर्थः ॥ १४ महामना अत्युदारचित्तो नन्दश्च तेभ्यः पूर्वोक्तेभ्यो गोपेभ्यो गोपीभ्यश्च, सूतादिभ्यस्तथा येऽन्ये च विद्योपजीविनो गायकाः, वादकाः, वैद्याः, ज्योतिर्विदो, नर्तकाः शाकुनिकाश्च तेभ्यश्च वासोऽलङ्कारगोधनं दत्तवानिति शेषेणान्वयः ॥ १५ ॥ न केवलमेतावन्मात्रमेव दत्तवान्, किन्तु ये यान् यान् कामान् अयाचन्त तान् तैस्तैः कामैः पदार्थैः अदीनात्मा उदारचित्ततया प्रहृष्टचित्तो यथोचितं जातिविद्याद्यनुरूपं यथा स्यात्तथा अपूजयत्, स तत्तत्प्रदानेन सत्कृतवानित्यर्थः। एवं दानादेः प्रयोजनमाह—विष्णोरिति। आराधनं सन्तोषस्तदर्थमित्यर्थः। तस्यापि प्रयोजनमाह—स्वपुत्रस्योदयाय, समृद्धये इत्यर्थः। चकारान्नवग्रहदिक्पालादीनपि तदर्थमपूजयदिति ज्ञेयम् ॥ १६ ॥ यद्यपि कंसभयाद्व्रजे स्थिताया रोहिण्या उत्साहो न सम्भवति, तथापि भगवत्प्राकट्यप्रभावात्तस्या अप्युत्साहोऽभूत्तमाह—रोहिणी चेति। नन्दगोपेनाभिनन्दिता 'त्वदागमनमङ्गलेनैव मम पुत्रो जातः। यशोदायाः पुत्रजन्मना कार्ये निरोधात् तदतिरिक्तस्याभावाच्च त्वयैव सर्वं कार्यं कर्तव्यम्' इति प्रोत्साहिता दिव्यवस्त्रादिभि-र्भूषिता च सती रोहिणी विशेषेण श्रीकृष्णजन्मोत्सवानन्देन गृहिणीवाचरत्। समागतस्त्रीजन्मसन्मानादिकर्त्री जातेत्यन्वयः। श्रीकृष्णबलदेवयोर्जन्ममहोत्सवबालचरित्राद्यानन्दानुभवात् तद्भाग्यमाहात्म्यातिशयमाह—महाभागेति। देवक्यादीनामेतदननुभवात् ताभ्यो महाभाग्यवतीत्यर्थः ॥ १७ ॥ ननु 'एवं सर्वेषां वाञ्छितप्रदानं नन्देन कथं सम्भवति? यथाकथंचित् सर्वस्वदानेन वाञ्छापूरणेऽपि नन्दस्य समृद्ध्यभावः स्यात्' इत्याशङ्क्याह-तत इति। ततो भगवत्प्रादुर्भावादारभ्य नन्दस्य व्रजो धनपुत्रपश्वादि-सर्वसमृद्धिमान् जातः। अतो नन्दस्य समृद्धौ किं वक्तव्यम्? तत्र हेतुमाह—हरेरिति। हरेर्निवासेन हेतुना ये आत्मनो व्रजस्य गुणाः सर्वप्रियत्वादयस्तैः रमायाः आक्रीडं विहारस्थानमभूत्। 'यत्रैव राजा तिष्ठति तत्रैव सर्वोऽपि समृद्धिरिति तु तत्र विदितमेव' इत्याशयेन सम्बोधयति—नृपेति ॥ १८ ॥ राज्ञे द्रव्यदानमप्यावश्यकमिति तु तवापि सम्मतमित्याशयेन सम्बोधयति—कुरूद्वह इति। एवं श्रीकृष्णजन्ममहोत्सवं कृत्वा गोकुलरक्षायां गोपान्निरूप्य आदिश्य कंसस्य वार्षिक्यं प्रतिवर्षं देयं करं स्वामिग्राह्यं भागं दातुं नन्दो मथुरां गत इत्यन्वयः ॥ १९ ॥ ततश्च वसुदेवो भ्रातरं सन्मित्रं नन्दमागतमुपश्रुत्य तस्य नन्दस्यावमोचनम्, अवमुच्यते शकटादि यत्र 'तद्वसतिस्थानं' ययावित्यन्वयः। 'करदानात् पूर्वं तु तत्र राजभृत्यानामागमनसम्भवात्तदग्रे प्रश्नादिकरणे नन्दे मैत्री प्रकटा स्यात् तच्छ्रवणात् कंसः किं कुर्यात्' इति भयात् पूर्वं न गतः। राज्ञे दत्तः करो येन तथाभूतं ज्ञात्वा तु ययौ ॥ २० ॥

अन्वितार्थप्रकाशिका

अवाद्यन्तेति। विश्वस्य सर्वस्येश्वरे अनन्ते श्रीकृष्णे नन्दस्य व्रजं प्रत्यागते अवतीर्णे सति यो महानुत्सवस्तस्मिन्विचित्राणि नानाविधानि वादित्राणि सर्वत्र त्रैलोक्ये अवाद्यन्त ॥ ३ ॥ गोपा इति। हृष्टाः गोपाः दधिक्षीरघृताम्बुभिः परस्परमासिञ्चन्तः नवनीतैर्मुखं विलिम्पन्तश्च चिक्षिपुः। परिहासार्थं दध्यादि पङ्के पातयामासुरित्यर्थः ॥ १४ ॥ नन्द इति द्वयम्। महामनाः अत्यु-दारचित्तः अदीनात्मा प्रहृष्टचित्तः नन्दश्च विष्णोः आराधनस्यार्थो विष्णुतोषः तस्मै तथा स्वपुत्रस्य उदयाय समृद्धये च तेभ्यो गोपेभ्यः गोपीभ्यः सूतमागधबन्दिभ्यश्च वासोऽलंकारगोधनं दत्तवान् इति शेषः। तथा येऽन्ये च विद्योपजीविनो गायकाः वाद्यकाः वैद्याः ज्योतिर्विदो नर्त्तकाः शाकुनिकाश्च ते यान् यान् कामान् अयाचन्त तांस्तैस्तैः कामैः पदार्थैः यथोचितं जातिविद्याद्यनुरूपं यथा स्यात्तथा अपूजयत्। स तत्तत्प्रदानेन स्रक्चन्दनादिभिश्च सत्कृतवान् इत्यर्थः ॥ १५–१६ ॥ रोहिणीति। महाभागा सर्वाभ्यो वसुदेवपत्नीभ्योऽप्यधिकभाग्या श्रीकृष्णबाललीलोत्सवलाभात् तथा नन्दगोपेन नन्देन गोपैश्चेति वा। अभिनन्दिता त्वदागमन-मङ्गलेनैव पुत्रो जात इत्यादिना प्रोत्साहिता दिव्यैः वासःस्रक्कण्ठाभरणैः भूषिता रोहिणी विशेषेण श्रीकृष्णजन्मोत्सवानन्देन पत्युर्बन्धनादिदुःखं विस्मृत्येव गृहस्वामिनीवाचरत् समागतस्त्रीजनसम्मानादिकर्त्री जाता ॥ १७ ॥ तत इति। हे नृप! ततो भगवत्प्रादुर्भावादारभ्य नन्दस्य व्रजो धनपुत्रपश्वादिसर्वसमृद्धिमान् जातः। यतः हरेर्निवासेन हेतुना ये आत्मनो व्रजस्य गुणाः

सर्वप्रियत्वादयस्तैः रमायाः आक्रीडं विहारस्थानमभूत् ॥ १८ ॥ गोपान् इति । हे कुरूद्वह ! नन्दः एवं श्रीकृष्णजन्ममहोत्सवं कृत्वा गोकुलरक्षायां गोपान् निरूप्य आदिश्य कंसस्य वार्षिक्यं प्रतिवर्षं देयं करं स्वामिग्राह्यं भागं वार्षिकं तत्र साधुरत्नाद्युपायनयुक्तं दातु मथुरां गतः ॥ १९ ॥ वसुदेव इति । वसुदेवः भ्रातरं सन्मित्रं नन्दम् आगतमुपश्रुत्य राज्ञे दत्तः करो येन तथाभूत ज्ञात्वा च तस्य नन्दस्यावमोचनम् अवमुच्यते शकटादि यत्र तत् स्थानं ययौ । भ्रातरमित्यत्र वैश्यकन्यायां शूरपत्नीभ्रातृजातत्वेन मातुलपुत्रत्वात् । अत एवाग्रे भ्रातरिति मुहुरुक्तिः । मध्वाचार्याश्च वैश्यकन्यायां शूरवैमात्रेयभ्रातुर्जातत्वादिति ब्रह्मवाक्यं च । "तस्मै मया स वरः सन्निसृष्टः स चास नन्दाख्य उतास्य भार्या । नाम्ना यशोदा स च शूरतातसुतस्य वैश्याप्रभवोऽथ गोपः ।" इति प्राहुः । एवमन्येऽपि गोपा यादवविशेषा एव वैश्यकन्योद्भवत्वात् परं वैश्यत्वम् । अत एव स्कान्दे मथुराखण्डे । "रक्षिता यादवाः सर्वे इन्द्रवृष्टिनिवारणात् ।" इति । "यादवानां हितार्थाय धृतो गोवर्द्धनो मया ।" इति च हरिवंशेऽपि । "यादवेष्वपि सर्वेषु भवन्तो मम बान्धवाः ।" इति रामवाक्यम् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दध्यादीनि परस्परं विलिंपंतः संतः दध्यादीनि चिक्षिपुः ॥ १४ ॥ सूतादिभ्यो येऽन्ये तेभ्योपि प्रादादिति शेषः ॥ १५ ॥ अदीनात्मा उदारचित्तः तैः तैः वस्त्रादिभिः यथोचितं यथार्हमितरानपि आर्चत् ॥ १६ ॥ अभिनंदिता प्रशंसिता ॥१७॥ हरेर्निवासेन ये आत्मनि गुणाः रमणीयत्वादयस्तैः रमाया लक्ष्म्याः आक्रीडं रमणस्थानं चाभूत् ॥ १८ ॥ वार्षिक्यं प्रतिवर्षं देयम् ॥ १९ ॥ तस्य नंदस्य अवमोचनं प्रतिवर्षमागमने निवासस्थानम् ॥ २० ॥

श्रीभगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अवाद्यन्तेति ॥ अनन्ते बलभद्रे, विश्वेश्वरे कृष्णे च, नन्दस्य व्रजं आगते 'विश्वेश्वरेंऽशेन' इति पाठेऽपि, अंशेन बलरामेण सहेत्यर्थो बोध्यः । महोत्सवे तस्मिन् महामहे, विचित्राणि वादित्राणि, अवाद्यन्त ॥ १३ ॥ गोपा इति ॥ हृष्टाः प्रसन्नतां प्राप्ताः, गोपाश्चापि, परस्परं, दधिक्षीरघृताम्बुभिः, आसिञ्चन्तः, नवनीतैः विलिम्पन्तः सन्तश्च, चिक्षिपुस्तैरेव प्रजह्रुः ॥ १४ ॥ नन्द इति ॥ महामना विपुलकीर्त्तिः, नन्दस्तु, वासोऽलंकारगोधनं, तेभ्यः, सूतमागधबन्दिभ्यः, ये अन्ये विद्योपजीविनस्तेभ्यश्च, ददौ ॥ १५ ॥ न केवलं तेभ्यो वास आदिकमेव ददौ किं तु तत्तदभीष्टकामैरपि तानपूजयदित्याह ॥ तैस्तैरिति ॥ अदीनात्मा उदारमना नन्दः, विष्णोः आराधनार्थाय, स्वपुत्रस्य उदयाय च, तैः तैः कामैः, याचकजनानां यथाविधाः कामास्तैस्तैस्तत् कामैरित्यर्थः । यथोचितं, अपूजयत् ॥ १६ ॥ रोहिणीति ॥ महाभागा रोहिणी चापि, नन्दगोपाभिनन्दिता, नन्देन गोपैश्चाभिनन्दिता सती, दिव्यवासांसि च स्रजश्च कण्ठाभरणानि च तैर्भूषिता सती, व्यचरत् ॥ १७ ॥ अथ नन्दवसुदेवयोर्यादृच्छिकसमागमं विवक्षुस्तावद्व्रजस्य सर्वसंपत् समृद्धत्वमाह ॥ तत इति ॥ हे नृप, ततः भगवतः प्रवेशात् आरभ्य, नन्दस्य व्रजः, सर्वाः समृद्धयोऽस्य सन्तीति तथाभूतः, अभूत् । हरेः निवासेन हेतुना ये आत्मगुणा महोत्सवादयः सर्वप्रियत्वादयो वा तैः, रमाक्रीडं लक्ष्मीविहारस्थानं च, अभूत् । आक्रीडमिति नपुंसकत्वमार्षम् । 'पुमानाक्रीड उद्यानम्' इत्यमरेऽस्य नियतपुंस्त्वदर्शनात् । यद्वा 'ज्ञेयमाक्रीडमुद्यानम्' इत्यन्यकोशं चालक्ष्याऽऽक्रीडशब्दस्य क्लीबत्वेऽपि न बाधः । हरेरप्रकटरूपस्य नित्यं निवासभूतो य आत्मा स्वयं तस्य स्वस्यैव ये गुणास्तैरिति केचित् ॥ १८ ॥ गोपानिति ॥ हे कुरूद्वह, एवं सति कदाचित् नन्दः, गोकुलरक्षायां, गोपान् निरूप्यादिश्य, कंसस्य, वार्षिक्यं वर्षे देयं करं, स्वामिग्राह्यभागमित्यर्थः । दातुं, मथुरां गतः ॥ १९ ॥ वसुदेव इति ॥ तदा वसुदेवः, भ्रातरं नन्दम् आगतं, उपश्रुत्याकर्ण्य, राज्ञे कंसाय, दत्तः करो येन तं च ज्ञात्वा, तदवमोचनं नन्दस्य शकटोत्तारस्थानमवतरणस्थानमित्यर्थः । ययौ भ्रातरमिति यदुक्तं तत्तु शूरसेनपत्न्याः भ्रात्रा काचिद्गोरक्षणात्मकवैश्यवृत्त्या जीवतो गोपस्य कन्योपभोगार्थं रक्षिता, तस्यां नन्दस्तत उत्पन्नः, स च शूरसूतस्य वसुदेवस्य मातुलपुत्रः, यो मातुलपुत्रः स भ्राता एवेत्यभिप्रायेणोक्तमिति तोषणीसाराख्यभागवतटीकायामुक्तमस्ति ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तत आरभ्येति : १०.५.१८.

यस्य प्राप्तिः स्फुरति भुवि मे स्यादसावर्थहीनः श्रीनाथेदं वितथकथनं व्यर्थभीतिप्रदं नः ।
प्राप्तः श्रीमान् यदहनि भवान् गोकुलं तद्दिनादि प्राप्तोत्कर्षं समजनि यतः सर्वसंपत्समृद्धम् ॥ ४ ॥

गोपानिति : १०.५.१९.

स्यादिष्टदिष्टवशतः क्वचिदीश्वराप्तिः प्राग्वासना निरसनं तु तथाप्यसाध्यम् ।
मन्ये यतो लसति सद्मनि वासुदेवे नन्दो जगाम नृपमुद्गतवार्षिकेच्छः ॥ ५ ॥
जाते श्रीधरदर्शने मतिमता प्राग्वृत्तिनिर्वाहकृत् सत्कार्यः सकृदेव पूर्ववदलं जीवस्तदिष्टार्पणात् ।
पश्चात्तेन कृतोऽप्युपद्रवचयो बाधां न धत्ते मनाक् कुब्जेनाप्यसुरेष्टवृत्तिकलितेनापीति सञ्ज्ञमये ॥ ६ ॥

रहस्यमृषिणा वेदसिद्धमाविष्कृतं ध्रुवम् । मन्ये तादृङ् नन्दकृतसकृत्तद्वार्षिकार्पणात् ॥ ७ ॥ (युग्मम्)
पूर्णानन्दतिरस्कारकार्यैकं नृपशासनम् । सिद्धमित्यभवत् स्पष्टं नन्दे कंसभयावहे ॥ ८ ॥
दुर्नृपप्रीतिजामोदोऽधिकोऽखिलसुखादपि । यन्नन्दो दृष्टपुत्रास्यस्तत्प्रीत्या मोदमादधे ॥ ९ ॥

वसुदेव इति : १०.५.२०.

गन्तव्यं वसुदेवसद्मनि यदि स्थातुं मया संप्रति स्थातव्यं बहुकालमेव हि ततस्तत्सौख्यकृद्वाग्जुषा ।
आचिन्त्यैवमुपात्तकार्यधिषणो वासं चकारान्यतः स्वप्राणप्रिय-पुत्रदर्शन-सुखप्रेप्सुस्तदेतत् क्षमम् ॥ १० ॥
यस्मिन् येन निजेष्टवस्तु निहितं पुंसातिगूढं यदि तत्तद्गुप्तिकृते न तेन बहु संवासो विधेयो बहिः ।
नीतिज्ञो वसुदेव एवमनिशं कंसात्तभीः स्वात्मजा स्पष्टीकारमतिस्तदा स्वसुहृदं नन्दं गृहं नानयत् ॥ ११ ॥
धीरान्तरोऽस्मि यदतो भगवच्चरित्रं गूढं न यद्यपि वदामि तथापि वक्त्री ।
योषास्वभावसुलभा यदि देवकी स्यात् तत्स्यादनिष्टकृदिति स्वत एनमागात् ॥ १२ ॥

कृष्णप्रिया

श्री नन्दरायजी के व्रज में जगत् के नाथ अनन्त श्रीकृष्ण भगवान के प्रकट होने के कारण प्राकट्य महोत्सव में विचित्र बाजे बजने लगे ॥१३॥ हर्षविभोर गोपगण दही, दूध, घृत और जल एक दूसरे पर सिंचन करने लगे और दही आदि से मुख लेपन करते हुए माखन फेंकने लगे ॥ १४ ॥ परमोदार श्री नन्दरायजी ने उन सूत, मागध और वन्दीजनों को, अन्य विद्योपजीवियों को एवं और सर्व का वस्त्र अलंकार और गौएँ दीं ॥ १५ ॥ अदीन, निर्लोभी (महान्) आत्मा (मन) वाले नन्दरायजी ने आये हुए का कामनानुसार विष्णु की प्रसन्नता के लिये और अपने पुत्र के उदय के लिए यथायोग्य पूजन किया ॥ १६ ॥ नन्दरायजी द्वारा अति सम्मानित बड़भागिनी श्रीरोहिणीजी सुन्दर वस्त्र, माला और कण्ठाभरणों से विभूषित हो नन्द महोत्सव में घूम रही थीं ॥ १७ ॥ हे राजन् परीक्षित्! कृष्णप्राकट्य दिन से श्री नन्दरायजी का सारा व्रज सम्पूर्ण समृद्धिवाला हुआ । भगवान् के निवास से एवं भगवान की आत्मा विग्रह तथा ऐश्वर्यादि छः गुणों के निवास से वह व्रज लक्ष्मी का क्रीडा भवन हो गया ॥ १८ ॥ हे कुरुनन्दन ! नन्दरायजी गोकुल की रक्षा के लिये गोपों को नियुक्त कर, स्वयं श्रीनन्दराय राजा कंस को वार्षिक 'कर' देने के लिए मथुरा गए ॥ १९ ॥ निज भ्राता नन्दरायजी का आगमन सुना और राजा कंस को कर दिया, यह जानकर श्री वसुदेवजी नन्दराय के डेरे पर गए ॥ २० ॥

तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतम् । प्रीतः प्रियतमं दोर्भ्यां सस्वजे प्रेमविह्वलः ॥ २१ ॥
पूजितः सुखमासीनः पृष्ट्वानामयमादृतः[1] । प्रसक्तधीः स्वात्मजयोरिदमाह विशाम्पते ॥ २२ ॥

वसुदेव उवाच

दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते । प्रजाशाया निवृत्तस्य प्रजा यत् समपद्यत ॥ २३ ॥
दिष्ट्या संसारचक्रेऽस्मिन् वर्तमानः पुनर्भवः । [3]उपलब्धो भवानद्य दुर्लभं प्रियदर्शनम् ॥ २४ ॥
नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणाम् । ओघेन [4]व्युह्यमानानां प्लवानां स्रोतसो यथा ॥ २५ ॥
कच्चित् पशव्यं [5]विरुजं भूर्यम्बुतृणवीरुधम् । बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः ॥ २६ ॥
भ्रातर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे । तातं भवन्तं मन्वानो भवद्भ्यामुपलालितः ॥ २७ ॥
पुंसस्त्रिवर्गोऽभिहितः[6] सुहृदो ह्यनुभावितः । न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते ॥ २८ ॥

कर्दमक्षमा

अन्वयः—तं दृष्ट्वा सहसा उत्थाय देहः आगतम् प्राणम् इव प्रीतः प्रेमविह्वलः दोर्भ्याम् प्रियतमम् सस्वजे ॥ २१ ॥ पूजितः सुखम् आसीनः अनामयम् पृष्ट्वा आदृतः स्वात्मजयोः प्रसक्तधीः इदम् आह विशाम्पते ॥ २२ ॥ भ्रातः प्रवयसः इदानीम् अप्रजस्य प्रजाशायाः निवृत्तस्य ते यत् प्रजा सम् अपद्यत दिष्ट्या ॥ २३ ॥ दिष्ट्या अस्मिन् संसारचक्रे वर्तमानः पुनर्भवः अद्य भवान् उपलब्धः प्रियदर्शनम् दुर्लभम् ॥ २४ ॥ स्रोतसः ओघेन व्यूह्मानानां प्लवानां यथा (तथा) चित्रकर्मणां सुहृदाम् एकत्र

---

[1] मात्मनः-इति कस्यचित् । [2] वसुदेव उवाच–गिरि. । [3] उपालब्धा–इति कस्यचित् । [4] व्युह्यमानानां–श्रीधर. वंशी. वीर. विज. जीव. विश्व. गिरि. । [5] निरुजं–श्रीधर. वंशी. सुदर्शन. वीर. विजय. जीव. विश्व. शुक. गिरि. भक्त. । [6] विहितः–श्रीधर. वंशी. वीर. विश्व. शुक. गिरि. भक्त. ।

संवासः न ॥ २५ ॥ सुहृद्वृत्तः अधुना यत्र त्वम् आस्से तद् बृहद्वनं कच्चिद् पशव्यं विरजं भूरि अम्बु तृणवीरुधम् कच्चित् ॥२६॥ भ्रातः ! भवन्तम् तातम् मन्वानः भवद्भ्याम् उपलालितः मम सुतः भवद्व्रजे मात्रा सह कच्चित् कुशली ? ॥ २७ ॥ पुंसः त्रिवर्गः अभिहितः सुहृदः हि अनुभावितः अर्थाय कल्पते तेषु क्लिश्यमानेषु त्रिवर्गः अर्थाय न कल्पते ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुनर्भवः पुनर्जात इव । तत्र हेतुगर्भं विशेषणं संसारचक्रे वर्तमान इति दुर्लभमिति च ॥ २४ ॥ दुर्लभत्वमेवाह । नैकत्रेति । प्रियश्चासौ संवासश्च प्रियसंवासः हे प्रियेति वा स्रोतस ओघेन नीयमानानां प्लवंतीति प्लवास्तृणकाष्ठादयस्तेषां यथैकत्र स्थितिर्नास्ति तद्वत् ॥ २५ ॥ कच्चिदिति । पशव्यादिरूपे तस्मिन्वने निर्दोषगोपयोदध्यादिप्रभूतगोपिकास्तन्यादिना पुत्रक्षेमजिज्ञासया पृच्छति । 'प्रसक्तधीः स्वात्मजयोः' इत्युक्तत्वात् ॥ २६ ॥ भवद्भ्यामुपलालितः सन्कच्चिद्वर्तत इति शेषः ॥ २७ ॥ पुत्रादर्शनक्लेशानाह । पुंस इति । सुहृदो बंधून्प्रत्यनुभावितः तदर्थं संपादितो यस्त्रिवर्गः स हि पुंसो विहितो युक्तः शास्त्रेण वा प्रोक्तो न स्वमात्रपर्यवसितः । अतस्तेषु क्लिश्यमानेषु स त्रिवर्गोऽर्थाय न कल्पते सुखाय भवतीत्यर्थः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रियतमं प्रियतरपुत्ररक्षकत्वात् । पुत्रस्मृतिजप्रेम्णा विवशः पूजितः पाद्यादिना नंदेनार्चितः स्वस्थानागतत्वात् ॥ २१ ॥ वर्णज्येष्ठस्यापि वसुदेवस्य श्रीनंदेनाकृतनमस्कारत्वाद्वयसाऽनुजत्वं गम्यते । अनामयं कुशलं नंदेनादृतः कृतादरः । तत्कुशलप्रश्नमिषेण निजात्मजयोस्तत्पृच्छतीत्याह—स्वात्मजयोरिति ॥ २२ ॥ प्रगतं वयो यस्य स प्रवया वृद्धस्तस्य 'प्रवयःस्थविरौ समौ' इत्यमरः । इतः पूर्वमप्रजस्य निःसंतानस्य पुत्रो जात इत्युक्ते मिथ्योक्तिः कन्येत्युक्ते नंदस्याप्रतीतिरिति हेतोर्मत्पुत्रन्यासं स्वकन्याचौर्यं कथंचिन्नंदो जानाति न वेति शंकयापि प्रजाशब्दप्रयोगेणाह—प्रजेति ॥ २३ ॥ बंधनादिक्लिष्टस्य मम पुनर्भवो वर्तमानोऽयं पुनर्जन्मैवाभूदित्यर्थः । यतो भवानुपलब्ध इत्येतावत्कालपर्यंतमहं भवदनुपलंभान्मृत इवेति भावः ॥ २४ ॥ संवास इह समुपसर्गेणैव वासे प्रियत्वावगतेः पुनः प्रियशब्दे न समासो न श्रेष्ठ्याधायक इति हेतोराह—हे प्रियेति वा । तद्वत्सुहृदामपीत्यर्थः ॥ २५ ॥ गूढाभिसंध्या पृच्छति । कच्चिदिति । बृहद्वनं महावनम् । पशव्यं पशुभ्यो हितम् । निर्गता रुक् गोगोपीभ्यो यत्र तत्तथा समासांतोऽच्प्रत्ययः । यद्वा—भागुरिमतेन टापि निर्गता रुजेति व्याख्येयम् । भूरयोऽधिका अंबुतृणवीरुधो यत्रेति ॥ २६ ॥ मम सुत इत्येकत्वेऽपि ममेति पदं द्वित्वमेव सूचयतीति मात्रा रोहिण्या ॥ २७ ॥ त्रिवर्गः धर्मकामार्थरूपः युक्त उचितः । औचित्यं कथमित्याकांक्षायामाह—शास्त्रेण । इत्यर्थ इति । लोकगर्हाहेतुत्वादिति भावः । तदुक्तम् "येन जीवेन जीवंति विप्रा मित्राणि बांधवाः । सफलं जीवितं तस्य स्वात्मार्थं को न जीवति ॥" इति । तोषिण्यां तु मित्रपुत्रादीनामपि पालनादिना भवतः परमकृतार्थता वृत्तैव अहं त्वधुना धनादिमानपि पुत्रकलत्रमित्रादिदुःखेनाकृतार्थ एवेत्याह वसुदेवः—पुंसः पुंमात्रस्य श्लेषेण तदेव पौरुषमिति भावः । हि एव अनुभावित एव निष्पादित एव । क्लिश्यमानेषु क्लेशं प्राप्तवत्सु । अर्थाय सुखाय न कल्पते किं तु दुःखायैवेति भावः । तेषां दुःखे सति धर्मस्याप्यनादरणीयत्वात् । "वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः अप्यकार्यशतं कृत्वा भर्त्तव्यौ मनुरब्रवीत् ॥" इति स्मृतेः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तद्दृष्ट्वेत्यादौ नन्द इत्यद्धयाहार्यं ततश्च कंसभयादिना तस्यागमनासम्भवेऽपि सहसैवागतं तं श्रीनन्दं दृष्ट्वा यद्वा सहसा सपद्येवोत्थाय प्रीतः लब्धः परमानन्दः ततश्च प्रेम्णा विह्वलः कम्पादिविकारैराकुलः सन् यतः प्रियतमं यद्वा ततः प्रेमविवशश्च क्षणं बभूव । तत्र श्रीनन्दस्तमागतमित्येतावत्यंशे देहः प्राणमिवेति दृष्टान्तः न तु दृष्ट्वेत्याद्यंशेपि तत्रासम्भवेनाव्याप्तेः ततश्च तं दृष्ट्वेत्यादिकं सर्वं योजयित्वा पश्चात् कः किमिवागतमित्युदक्यं योजनीयं देहः प्राणमिवेति वर्णज्येष्ठस्यापि श्रीवसुदेवस्य श्रीमन्नन्देन नमस्कृतत्वाद्वयनमऽनुजत्वं लक्ष्यते तच्च पुनर्जनिष्यमाणापत्यस्य वचसा व्यक्तीभविष्यति "दिष्ट्या भ्रातः प्रवयसः" इत्यादिना ॥ २१ ॥ ततश्चार्थात् श्रीनन्देन पाद्यादिना पूजितः श्रीवसुदेवः तच्च स्ववासागतत्वात् अनामयं कुशलमित्यर्थः । सविनयवचनादिना आदृतश्च सन् इदं वक्ष्यमाणमाह—प्रसक्तधीरिति । वक्ष्यमाणस्य सर्वस्यापि पुत्रार्थकत्वात् स्वशब्देन तदानीं तत्सङ्गस्वभावेन तस्य भगवद्बुद्धिमिश्रत्वेऽपि वात्सल्यमेवासीदिति भावः । तत्र श्रीशुकेन स्वानुमोदनं च व्यञ्जितं विशाम्पते प्रजानाथ ॥ २२ ॥ दिष्ट्येति । अनेन रहस्यं दूतप्रस्थापनं गम्यते बहुलयज्ञादिप्रयासैरप्यनुत्पत्तेः प्रजामात्रस्याशाया निवृत्तस्यापि इदानीं यत्प्रजा समपद्यत परमोत्तमपुत्रत्वेन सम्पन्नतया जातेत्यर्थः । एतद्दिष्ट्या सोऽयं सिद्धान्तसरस्वतीसंवादः स्वमते तु छलेनैव तथोक्तं सम्यगप्राप्यतेत्येवार्थः प्रजेत्येव वा छलोक्तिः सन्ततिमात्रार्थत्वात् अत्रैवं विवेचनीयम् अनेन तदभिप्रायाज्ञानादेव प्रजामात्राशा तस्य दर्शिता तस्य तु तादृशप्रजनाया एवाऽऽशा प्रागासीत् फलेन फलकारणानुमानात् अत एव दुर्लभत्वगापनाय विलम्बोऽप्यभूत् तथा तस्य प्रवयस्त्वादिकमपि तत् ज्ञापनं तु पुत्रतापन्ने श्रीभगवति स्नेहभरोद्दीपनार्थं लोके हि वयोधिकस्यानपत्यस्य बहुप्रयत्नेनाप्यप्राप्तापत्यस्य अत एव निराशस्याकस्मादुत्पन्ने पुत्रोत्तमे अत्यन्तस्नेहोदृश्यत इति ॥ २३ ॥ अथ

दिष्ट्या भवानुपलब्धः यतः प्रियदर्शनं दुर्लभं ननु मम तु त्वद्दशस्य न दुर्लभत्वं तत्राह पुनर्जात इव भवानिति तच्च कुतः संसारचक्रे वर्त्तमानः क्षणे क्षणे मृत्युसम्भावनादित्यर्थः। एतच्चानिष्टाशङ्कीनि बन्धुहृदयानीत्यत उक्तमिति तेषामभिप्रायः। यद्वा संसारचक्रे वर्त्तमानो भवानस्मिन्नेव जन्मनि पुत्ररूपेण पुनर्जात इव दिष्ट्योपलब्धः यतः प्रियमात्रस्य दर्शनं दुर्लभं किमुतैतादृशानन्दयुक्तस्येत्यर्थः। यद्वा दिष्ट्या भद्रं कथम् अस्मिन् संसारचक्रे अद्य पुनर्भवो जन्मैव वर्त्तमानः ममेत्यर्थात् यतो भवानद्योपलब्धो दृष्ट इति तत्र हेतुः दुर्लभमिति ॥ २४ ॥ एकत्र संवासः सदास्थितिर्न स्यात् तत्र हेतुः चित्रेति व्यूह्यमानानां विविधं नीयमानानां "वह प्रापणे" ॥ २५ ॥ निरुजं नीरुजं ह्रस्वत्वं छन्दोनुरोधात् रुजाशब्दश्चायं टाबन्तः अधुना यत्रास्स इति पशूनां सुखानुसारेण श्रीमथुरामण्डले कदाचित् कस्मिंश्चिद्वने स्थितेः यद्वा अधुनेत्यस्य पूर्वार्द्धे सर्वैरपि पदैरन्वयः। विशेषतस्तदानीं तत्तदपेक्षया सुहृद्भिर्वृत इति तत्रापि तत्तद्गुणानां बहुदेशव्यापितापेक्ष्य इति भावः ॥ २६ ॥ उपलालितः निजपुत्रवल्लालितो यः स कच्चित् कुशली वर्त्तत इत्यर्थः। अन्यत्तैः। यद्वा किं भवन्तं तातं मन्वानो भवति इति स्नेहं वर्द्धयति वस्तुतस्तु जातमात्रस्य तद्भावो न सम्भवेत् मम सुत इति पुरैव श्रीवसुदेवेन तज्जन्मनोपि श्रवणात् तथा च श्रीहरिवंशे "प्रागेव वसुदेवस्तु व्रजे शुश्राव रोहिणीम्। प्रजातां पुत्रमेवाग्रे चन्द्रात्कान्ततराननम्" इति अस्यार्थः प्रजातां जनितवतीम् अग्रे श्रीनन्दनन्दनजन्मनः पूर्वमिति तयोर्जन्म च प्रायः समकालमेव ज्ञेयं तथा च तत्रैव तदानीं श्रीवसुदेवोक्तौ "वर्द्धमानावुभावेतौ समानवयसौ यथा। शोभेतां गोव्रजे तस्मिन् नन्दगोप! तथा कुरु" इति। अत एव तयोर्युगपद्रिङ्गणादिलीला वक्ष्यते श्रीपुरुषोत्तम द्वारिति तज्जन्मनक्षत्रे क्रियते तच्च श्रीकृष्णस्याष्टमासिकत्वात् तस्य तु द्वादशमासिकत्वादुपपद्यत इति ॥ २७ ॥ एवं मित्रपुत्रादीनामपि पालनादिना भवतः परमकृतार्थता वृत्तैव अहं त्वधुना धनादिमानपि पुत्रकलत्रमित्रादिदुःखेनाकृतार्थ एवेत्याह—पुंस इति। पुम्मात्रस्य तोषेण तदेव पौरुषमिति भावः। हि एव अनुभावित एव क्लिश्यमानेषु क्लेशं प्राप्नुवत्सु अर्थाय सुखाय न कल्पते किन्तु दुःखायैवेत्यर्थः। तेषां क्लेशे सति धर्मस्याप्यनादरणीयत्वात् "वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्" इति स्मृतेः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

तं श्रीवसुदेवं सहसाकस्मादेव श्रीनन्दो दृष्ट्वा सहसेति कंसभयादिना तस्य तत्र गमनासम्भवात्। यद्वा, सहसा सपद्येवोत्थाय; तत्र दृष्टान्तः—देह इति। प्रीतत्वादेव प्रेम्णा विह्वलः कम्पादि-विकारैराकुलः सन्, यतः प्रियतममिति प्राणेभ्योऽप्याधिक्यं सूचितम्। यद्वा, ततः प्रेमविवशश्च क्षणं बभूव, श्रीवैष्णवप्रवरसंगमस्वभावात् ॥ २१ ॥ ततः श्रीनन्देन पूजितः पादप्रक्षालनादिनानामयमारोग्यं पृष्ट्वेदं वक्ष्यमाणमाह श्रीवसुदेवः, स्वात्मजयोः प्रसक्तधीरिति वक्ष्यमाणस्य सर्व्वस्यापि पुत्रार्थकत्वात्। स्वशब्देन भावद्बुद्धिर्निरस्ता, अतएव सामान्येन द्वित्वम्। यद्वा, सुशोभनयोरात्मजयोरत एव स्नेहभरेण प्रसक्तधीः। विशाम्पते प्रजानाथ ॥ २२ ॥ प्रजाशाया निवृत्तस्यापीति बहुलयज्ञादि-प्रयासैरप्यनुत्पत्तेः, प्रजा पुत्र इदानीं वार्द्धक्ये यत् समपद्यत सम्पन्ना, एतद्दिष्ट्या भद्रमभूत्। समपद्यतेति प्रजायाः परमोत्तमत्वात्, तज्ज्ञानञ्च तत्कृतमहोत्सवेन लोकविख्यातत्वात्, पाठान्तरे सम्यगजायतेति स्वकृत-परिवर्त्तनादि-संगोपनार्थम्,—अत्रापि संशब्देन परमोत्तमतोक्तैव। श्रीनन्दस्य प्रवयस्त्वादिकं श्रीभगवदेकस्नेहभरार्थम्—लोके हि वयोऽधिकस्यानपत्यस्य, अतएव निराशस्याकस्मादुत्पन्ने पुत्रोत्तमे अत्यन्तस्नेहोत्पत्तेः ॥ २३ ॥ संसारचक्रे वर्त्तमान इति सदा मृत्युग्रस्तप्रायत्वमुक्तम्; तच्च 'अनिष्टाशंकीनि बन्धुहृदयानि भवन्ति' इत्यादिन्यायात्। अन्यत्तैर्व्याख्यातम्; यद्वा, अस्मिन् सहसा मरणादिधर्म्मण्यपुत्रत्वादिदुःखमये संसारचक्रे वर्त्तमानोऽपि भवान् पुनर्भवः पुत्रादिरूपेण पुनर्जात इव यदुपलब्धो मया,—एतद्दिष्ट्या महाभाग्येनेत्यर्थः; यतः प्रियस्य दर्शनं दुर्लभम्। यद्वा, संसारचक्रे वर्त्तमानो भवानद्य पुनर्भवः पुनर्जात इव यदेतद्दिष्ट्या; यतः प्रवयस्त्वेन दुर्लभमपि प्रियस्य पुत्रस्य दर्शनं भवानद्य वार्द्धक्ये उप निकटे वार्द्धक्यागम-मात्रे लब्ध इति। यद्वा, संसारचक्रे वर्त्तमानोऽप्यहं दिष्ट्या पुनर्जात इव, यतो भवान् मत्प्रियतमो दुर्लभं प्रियस्य पुत्रस्य दर्शनमुपलब्ध इति ॥ २४ ॥ संवासः सदा स्थितिर्न स्यात्, तत्र हेतुः—चित्रेति। तत्तद्भोगार्थं तत्र तत्र नयनेन स्वेच्छाभंगात्, व्यूह्यमानानामिति पाठे 'वह'—प्रापण इति स एवार्थः ॥ २५ ॥ निरुजं नीरुजम्—ह्रस्वश्छन्दोऽनुरोधात्। अधुना यत्रास्स इति पशूनां सुखानुसारेण श्रीमथुरामण्डले कदाचित् कस्मिंश्चिद्वने स्थितिः; यद्वा, अधुनेत्यस्य पूर्व्वार्द्धे सर्व्वैरपि पदैरन्वयः। विशेषतस्तदानीं तत्तदपेक्षया; सुहृद्भिर्वृत इति तैः सह तस्य तेषामन्योऽन्यश्च स्नेहापेक्षया ॥२६॥ मात्रा रोहिण्यो सहितो निजपुत्रादनुलालितः, विनयोक्तिरियम्; अन्यत्तैर्व्याख्यातम्। यद्वा, किं भवन्तं तातं मन्यमानो भवतीति स्नेहं जनयति; यद्वा, भवद्व्रजे किमास्ते - किं कंसभयादिनान्यत्र न गतोऽस्तीत्यर्थः। मम सुत इति पुरैव श्रीवसुदेवेन तज्जन्मश्रवणात्; तथा च श्रीहरिवंशे (विष्णु. प. ५।१)—'प्रागेव वसुदेवस्तु व्रजे शुश्राव रोहिणीम्। प्रजातां पुत्रमेवाग्रे चन्द्रात् कान्ततराननम् ॥' इति। अस्यार्थः प्रजातां जनितवतीमग्रे श्रीनन्दनन्दनजन्मनः पूर्व्वमिति तयोर्जन्म च प्रायः समकालमेव ज्ञेयम्। तथा च तत्रैव (हरिवंशे, विष्णु. प. ५।९) तदानीं श्रीवसुदेवोक्तौ—'वर्द्धमानावुभावेतौ समानवयसौ यथा। शोभेतां गोव्रजे तस्मिन्नन्दगोप तथा कुरु ॥' इति; अतएव तयोर्युगपद्रिंगणादिलीला वक्ष्यत इति दिक् ॥ २७ ॥ एवं मित्रपुत्रादीनामपि पालनादिना भरतः परमकृतार्थता वृत्तैवाहं त्वधुनाद्यनादिमानपि पुत्रकलत्र-मित्रादिदुःखेनाकृतार्थ एवेत्याह—पुंस इति पुंमात्रस्य, श्लेषेण तदेव पौरुषमिति भावः। हि एव, अनुभावित एव; क्लिश्यमानेषु क्लेशं प्राप्नुवत्सु

सत्सु सुखाय न कल्पते, न भवति, किन्तु दुःखायैवेत्यर्थः । धर्म्मस्यापि प्रायोऽर्थकामफलकस्य सुहृत्क्लेशेन, दुःखात्मतायामेव पर्य्यवसानात् । अन्यत्तैर्व्याख्यातम् । यद्वा, विहितः कृतोऽपि सुहृद प्रत्यनुभावित एव सन् अर्थाय फलाय कल्पते समर्थो भवति, न च तेषु क्लिश्यमानेषु सुहृदामुपयोगेनैव सम्यक् फलसिद्धेः । अन्यत् समानम् ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पुनर्भवः पुत्ररूपेणोत्पत्तिः दक्षिणा भवति ॥ २४ ॥ चित्रकर्मणां विविधकर्मणा प्लवशब्दः काष्ठपरः ॥ २५ ॥ पशव्यं पशुहितं निरुजमरोगम् आस्से वससि ॥ २६–२७ ॥ अर्थाय प्रयोजनाय ॥ २८–२९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तमागतं वसुदेवं दृष्ट्वा प्राणं प्रति देह इव यथाप्राण आगते सति देह उत्तिष्ठति तद्वदनेन प्राणवन्निरतिशयप्रीतिविषयत्वं सूचितं सहसाऽऽशु उत्थाय नितरां प्रीतः प्रेम्णा विह्वलश्च प्रियतमं वसुदेवं दोर्भ्यां सस्वजे आलिङ्गितवान् ॥ २१ ॥ ततस्तेन पूजितो वसुदेवः सुखं यथा तथा आसीनमुपविष्टं नन्दमनामयमारोग्यमाधिव्याधिराहित्यमादरयुक्तः पृष्ट्वा हे विशाम्पते ! आत्मजयोः प्रसक्तधीरासक्तचित्तः इदं वक्ष्यमाणमाह ॥ २२ ॥ तदेवाह–दिष्ट्येति षड्भिः । हे भ्रातः ! अप्रजस्यानपत्यस्य सतः प्रवयसो वृद्धस्य अतएव प्रजाशायाः सन्तानवाञ्छायाः निवृत्तस्य तवाधुना प्रजा पुत्रः समपद्यत जात इति यदेतद्दिष्ट्या दिष्ट्येत्यानन्दद्योतकमव्ययमस्माकं महानानन्दो जात इत्यर्थः । एवमुत्तरत्रापि ॥ २३ ॥ अस्मिन् संसारचक्रे वर्त्तमानः पुमान् पुनर्भवः पुत्ररूपेणोत्पन्नः इत्येतद्दिष्ट्या तदद्य भवान् मयोपलब्धो दृष्ट इत्येतत् दिष्ट्या तत्र हेतुः दुर्लभं हि प्रियस्य दर्शनमिति यद्वा अस्मिन् संसारचक्रे वर्तमान एवाहं पुनर्भवः पुनर्जातः कथञ्चित्कंसभयान्निवृत्तः पुनर्जातप्राय इत्यर्थः। यद्वा अस्मिन्नेव जन्मनि मया पुनर्जातप्रायेण त्वमुपलब्ध इत्येतत् दिष्ट्या शृङ्खलितस्य मम प्रियतमभवद्दर्शनं दुर्लभं हीत्यर्थः ॥२४॥ दुर्लभत्वमेवाह–नैकत्रेति । सुहृदाम् एकत्र प्रियसंवासः प्रियश्चासौ सम्वासश्च प्रियेण प्रियगोष्ठिपूर्वकं सहवास इति वा हे प्रियेति वा न सुलभः किन्तु दुर्लभ इत्यर्थः । यथा स्रोतसः प्रवाहस्यौघेन पूरेण व्यूह्यमानानामितस्ततो विविधं नीयमानानामत एव चित्रकर्मणां विविधधर्मोणां प्लवानां प्लवन्तीति तथा प्लवानामुत्प्लुत्य प्लवन्ति उत्प्लुत्य गच्छन्तीति तथा तेषां प्लवानां काष्ठादीनामेकत्र वासो दुर्लभस्तद्वत् ॥ २५ ॥ यत्पशव्यं पशुभ्यो हितं निरुजं नीरोगं भूरि बहुलमम्बु जलं तृणानि वीरुधो गुल्मानि च यस्मिन् त्वं सुहृद्भिर्युक्तः आस्से तद्वनमधुना कच्चिदास्ते कच्चिदितीष्टप्रश्नद्योतकमव्ययं कुशलमास्ते किं तदस्माकमिष्टमित्यर्थः ॥ २६ ॥ तथा हे भ्रातः ! मम सुतो बलरामः मात्रा रोहिण्या सह भवतो व्रजे कच्चित्, कथम्भूतः ? भवन्तमेव तातं पितरं मन्वानः भवद्भ्यां दम्पतीभ्यां पुत्रवदुपलालितः ॥ २७ ॥ अथ सत्यपि सन्ताने तद्दर्शनस्पर्शनोपलालनाद्यभावान्निर्विण्णः किञ्चिल्लोकपरिपाट्याऽऽह–पुंस इति । त्रिवर्गस्त्रयाणां धर्मार्थकामानां वर्गः स यदि सुहृदो देहानुबन्धिनः प्रत्यनुभावितोनुभवप्रापितः तर्हि स पुंसो युक्तः यद्वा विहितः शास्त्रानुमतः अन्यथा त्रिवर्गे स्वानुभवमात्रपर्यवसिते सत्यत एव हेतोः सुहृत्सु क्लिश्यमानेषु च सत्सु त्रिवर्गोऽर्थाय प्रयोजनाय न कल्पते व्यर्थ इत्यर्थः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रवयसः वृद्धस्य इदानीं प्रजा समजायतेति यत् अतो दिष्ट्या ॥ २३ ॥ इदञ्चैकं मङ्गलमभूदित्याह—दिष्ट्येति । पुनः पुनर्भवतीति पुनर्भवः तस्मिन् किञ्चोद्यमिति ? तत्राह–दुर्लभमिति ॥ २४ ॥ दुर्लभत्वमुपपादयति–नैकत्रेति । प्रियसंवासः हर्षेण निवासः प्रियैः सवासो वा चित्रकर्मणां नानाविधपुण्यपापवतां स्रोतसो नद्याः ओघेन प्रवाहेण व्यूह्यमानानां विविधं नीयमानानां प्लवानां काष्ठादीनां पोतानां वा ॥ २५ ॥ कच्चिदिति साऽनुनयप्रश्नः पशव्यं पशुहितं निरुजं नीरोगकरम् ॥ २६ ॥ नन्दस्य कृष्णो मम सुत इति भ्रान्तिं निवारयति–भ्रातरिति ॥ २७ ॥ त्रिवर्गो धर्मादिः पुंसः विहितो वेदे इति शेषः । स सुहृदामनिमित्तबन्धूनां जनानामनुभावतः प्रभावान्निश्रयाद्वा भवति हि यस्मात्तस्मात् तेषु सुहृत्सु क्लिश्यमानेषु सत्सु त्रिवर्गः अर्थाय प्रयोजनाय न कल्पते समर्थो न भवति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

दृष्ट्वा प्रीतः सस्वजे तदङ्गसङ्गाच्च प्रेमविवशो जातः ॥ २१ ॥ अत्र वर्णकनिष्ठेनापि श्रीनन्देनानमस्कृतत्वात्तस्य ज्येष्ठत्वं गम्यते आदृतो विनयवाक्यादिना स्वात्मजयोरिति, तस्य वात्सल्यं सूचितम् । तत्र तस्य प्रजाया आशा न साधारण्याः किन्तु तादृश्या एव अन्यथा तदप्राप्तेः ॥ २२–२३ ॥ पुनर्भवो जन्म वर्त्तमानोऽभूत् ममेत्यर्थात् तत्र हेतुः उपेति संसारचक्रेऽस्मिन् प्रियदर्शनं दुर्लभमिति ॥ २४ ॥ सम्वासः सदास्थितिः ॥ २५ ॥ निरुजं नीरुजं रुजा रोगः अधुनेत्यन्यत्र पूर्वमासीदिति ज्ञापितम् ॥२६–२७॥ सम्प्रति कंसान्मुक्तस्य नानास्थानगतस्वजनस्य तद्भयेन तदपालस्य सर्वं व्यर्थमित्याह, पुंस इति ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तं वसुदेवं सस्वजे नन्दः न तु नमश्चकार वयसा ततो ज्येष्ठत्वात् ॥ २१ ॥ आह वसुदेवः ॥ २२ ॥ प्रवयसो वृद्धस्य पुत्रो जात इत्युक्ते मिथ्योक्तिः कन्येत्युक्ते नन्दस्याप्रतीतिरतः प्रजेत्यपत्यवाचकशब्दप्रयोगः मत्पुत्रन्यासं स्वकन्याचौर्यं च कथञ्चिन्नन्दो

जानाति न वेति शङ्कयापि तच्छब्दप्रयोगः ॥ २३ ॥ दिष्ट्येति बन्धनादिक्लिष्टस्य मम पुनर्भवो वर्तमानोयं पुनर्जन्मैवाभूदित्यर्थः। यतो भवानुपलब्ध इत्येतावत्कालपर्य्यन्तमहं भवदनुपलम्भान्मृत इवासमिति भावः ॥ २४ ॥ नन्वेवञ्चेदावामेकत्रैव वसावस्तत्राह—नैकत्रेति। हे प्रिय! ओघेन स्रोतसो वेगेन व्यूह्यमानानां विविधं नीयमानानां प्लवन्तीति प्लवास्तृणकाष्ठादयस्तेषाम् ॥ २५ ॥ पशुभ्यो हितं पशव्यं निरुजं ह्रस्वत्वं छन्दोनुरोधात् रुजाटाबन्तः ॥ २६ ॥ मम सुतः सुखं वर्तत इति शेषः। मन्वान इति वर्तमानसामीप्यान्मंस्यमान इत्यर्थः ॥ २७ ॥ मम तु गृहाश्रमो विफल एवेत्याह—पुंसः सुहृदः स्त्रीपुत्रादीननुलक्षीकृत्य त्रिवर्गः शास्त्रेण विहितो भावितः स्वकर्मभिः निष्पादितः तेषु सुहृत्स्वति स्त्रीपुत्रयोर्मद्विच्छेदात् मम च पुत्रलालनादिसुखानवात्या न अर्थाय न प्रयोजनाय ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तं श्रीवसुदेवं पूजितः श्रीनन्द इति शेषः ॥ २१–२२ ॥ दिष्ट्या भद्रम् ॥ २३ ॥ पुनर्भवः पुनर्जातो यथा भवानुपलब्धः मयेति शेषः ॥ २४–२५ ॥ यत्र त्वमधुनास्ते तद्बृहद्वनं कच्चित्किंपशुभ्यो हितम्। निरुजं निर्गतरोगम् ॥ २६ ॥ मम सुतः रौहिणेयः भवद्भ्यां दम्पतीभ्यामुपलालितः सन् भवद्व्रजे वर्तते इति शेषः ॥ २७ ॥ यत्र तत्र कंसभयाद्वर्तमानानि बहुकलत्राणि रौहिणेयं च संस्मृत्य तत्कारुण्यवशादाह–पुंस इति। सुहृदः स्वकीयान् प्रति अनुभावितः सम्पादितस्त्रिवर्गः अर्थधर्मकामसमूहः पुंसो विहितः शास्त्रेण सार्थकतया प्रोक्तः तेषु क्लिश्यमानेषु तु अर्थाय न कल्पते किन्तु निरर्थो भवतीत्यर्थः ॥ २८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तं वसुदेवं दृष्ट्वा नन्द उत्थाय सस्वजे तस्माद्वयसा ज्येष्ठत्वात् नमस्कारं न चकारेति भावः ॥२१॥ आह वसुदेवः ॥२२॥ बहुयज्ञानुष्ठानेनापि प्रजानुदयात्तदाशाया निवृत्तस्य ते प्रजावदिति स्वरहस्यरक्षार्थमुक्तम् ॥ २३ ॥ दिष्ट्येति कारानिरोधादपरिक्लिष्टस्य मम पुनर्भवो जन्मैवाभूत् यतो भवानुपलब्ध इति एतावत्कालं भवदनुपलम्भादमृतकल्पोऽहमासमिति भावः ॥ २४ ॥ नन्वेवञ्चेदेकत्रैव निवसावस्तत्राह–नैकत्रेति। हे प्रिय! ओघेनाम्बुप्रवाहेन व्यूहमानानां विविधं नीयमानानां प्लवानां तृणकाष्ठादीनां प्लवन्त इति व्युत्पत्तेः। चित्रकर्मणामिति लोकरीत्योक्तम् एवं नूनमित्यादौ बोध्यम् ॥ २५ ॥ पशुभ्यो हितं पशव्यं तस्मै हितमित्यर्थे (उ) गवादिभ्यो यदिति यत् रुजा यानि गतनिरुजं ह्रस्वत्वमार्षम् ॥ २६ ॥ मम सुतः सुखमस्तीति शेषः तातं भवन्तमिति स्नेहं वर्द्धयितुं अतिबालस्य तद्भावासम्भवात् श्रावण्यां बलः भाद्रकृष्णाष्टम्यां कृष्णो बभूवेति प्रसिद्धेः ॥ २७ ॥ मम गृहाश्रमो व्यर्थ इत्याह सुहृदः स्त्रीपुत्रादीननु लक्षीकृत्य पुंसस्त्रिवर्गः शास्त्रेण विहितः भावितः स्वकर्मभिर्निष्पादितः तेषु सुहृत्सु अर्थाय फलाय मम स्त्रीपुत्रयोर्विच्छेदान्न गृहाश्रमः फलवानित्यर्थः ॥ २८ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

नंदः प्रियतममागतं वसुदेवं दृष्ट्वा प्रेमविह्वलः सन् प्राणं प्राप्य देह इव सहसोत्थाय प्रीतः सन् दोर्भ्यां सस्वज इति। एतेन देहस्य प्राणदर्शनाभावात्। प्राणं दृष्ट्वा देह इवेति कथनमनुपपन्नमिति दूषणं परास्तं प्राणमित्यस्य दृष्ट्वेत्यनेनान्वयमनंगीकृत्याध्याहृतेन प्राप्येत्यनेनान्वयमंगीकृत्य प्राणं प्राप्य देहो यथोत्थितो भवति। तथा सहसोत्थायेत्यर्थस्योक्तत्वात् ॥ २१ ॥ पुनर्भवे पुनर्भवतीति पुनर्भवं तस्मिन्संसारचक्रेवर्तमानानां प्रियदर्शनं प्रियाणां दर्शनं दुर्लभमतः संसारचक्रे वर्तमानो भवानथ मयोपलब्धः संसारचक्रेवर्तमानोऽहं त्वयोपलब्ध इति च यद्दिष्ट्याऽदृष्टप्रेरकेश्वरानुग्रहेणेति ॥ २४ ॥

इति श्रीभागवतटिप्पण्यां षष्ठोऽध्यायः ॥ ६ ॥ (पञ्चमोऽध्यायः)।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तं वसुदेवं दृष्ट्वा प्रीतः प्रेम्णा चञ्चलश्च नन्दः सहसोत्थाय देह आगतं स्वं प्राप्तप्राणं यथा स्वजते तथा सस्वजे आलिलिङ्गे। देहस्य प्राणं जनं च सर्वेन्द्रियचेष्टात्मकं ज्ञेयम्। देहस्य प्राणदर्शनासम्भवाद्दृष्ट्वेत्यन्वयनमनुपपन्नमिति निरस्तमनेनेति ज्ञेयम् ॥ २१ ॥ अनामयं नीरोगं क्षेममिति यावत् स्वात्मजयो रामकृष्णयोर्विषये प्रसक्तधीस्तत्कुशलप्रश्नविषयिणीति प्रसक्ताधीर्यस्य स तथा ॥ २२ ॥ हे भ्रातर्नन्द प्रवयसः प्रगतं वयो यौवनं यस्य तस्य प्रजाशाया निवृत्तस्य प्राक् चाप्रजस्य प्रजावर्जितस्य तव। यत्प्रजा समजायत तद्दिष्ट्या सुखम्। प्रजेति वदता स्त्र्यपत्यमिति हृदयं विभावनीयम् ॥ २३ ॥ पुनर्भवेऽनुः पुनः पुनर्भवत्यसुर्यस्मिंस्तस्मिन्संसारचक्रे तत्समूहे तदाख्ये चक्रे भ्रमद्रथाङ्गे वा। चक्रो गणे चक्रवाके चक्रं सैन्यरथाङ्गयोरिति विश्वः। चक्र[illegible]कारसारवारक्षीरतोमरशृङ्गारभृंगारमन्दारोशीरतिमिरशिशिराणि नपुंसके चेति लिङ्गानुशासनोक्तेश्चक्रश्चक्रं वा। वर्तमानो भवानथोपलब्ध इति दिष्ट्या सुखम्। किं कारणमिदमद्भुतमित्यत आह ॥ दुर्लभं प्रियदर्शनमिति। दिष्ट्या शमित्यादिरव्ययमिति [illegible]। दिष्टं दिष्टिस्तया दैवेनेति वा ॥ २४ ॥ तद्दुर्लभता चैतन्निमित्तेति तदाह ॥ नैकत्रेति। सुहृदां सन्मनसां सतां सम्बन्धिनां

च प्रियश्चासौ संवासश्च स एकत्र न भवति। तत्र तन्त्रं चित्रकर्मणामिति। तत्र दृष्टान्तमाचष्टे। स्रोतसो ओघेन वेगेन वेति व्यूह्यमानं वहतेः सम्प्रसारणे रूपम्। दीर्घपाठस्तु लेखककरकृतः। ऊहतेरुपसर्गाद्ध्रस्व ऊहतेरिति ह्रस्वतायामपि तस्य वितर्कणार्थत्वात्। प्रकृते च तदसङ्गतेः। प्लवानां दारूणां नौकानां वा संवासो यथा तथेति। प्लवः कारण्डवे भेके कुलके फलके कपौ। प्लवङ्गमे कैवर्ते मुस्तकेऽपि च। काष्ठे नावि प्लव इति विश्वमेदिन्यौ ॥ २५ ॥ पशव्यं पशुभ्यो हितं नि न रुजो रोगो यस्मिंस्तत्। निखिलसाक्षिको निरयमतो न दीर्घः। नीरोगमिति यावत्। बृहद्वनं भूर्यम्बुतृणवीरुधं भूरीति त्रिकान्वयि। अयमपि वीरुधाशब्दः। भूरीण्यम्बूनि तृणानि भूरिण्यो वीरुधाश्च यस्मिंस्तत्। कच्चिदिति कुशलप्रश्न। अस्मदावासो न तत्रेत्येतदादेः। सत्त्वेऽसत्त्वं वा किं तवेत्यत आह ॥ स्वम्। सुहृद्वृतो यत्रास्स इति। उपविशसि वसतीति यावत्। आस्त इति पाठे पुरुषव्यत्ययेन वा रेतस्त्वजायां कविरादधेऽज इत्यादिवन्न तन्नियम इति ऋग्भाष्यटीकाद्युक्तेस्तन्मध्यमतानियमाभावेन वा समाधिरवधेयः। विस्तृतं प्रागनुसन्धेयम् ॥ २६ ॥ कंसस्य देवक्यर्भकभ्रनभ्रंशाय गर्भप्ररोहिणीति रोहिणी पुरा मधुरापुरात्प्रेषिता किल तया सह नन्दनो मम सुख्यास्ते किमिति वसुदेवः पृच्छति। भ्रातरिति। मात्रा रोहिण्या सह भवद्व्रजे त्वद्गोष्ठे भवन्तं तातं मन्वानो मत्वेन तत्रैवोत्पत्तस्त्वामेव जानन् भवद्भार्यामुपलालितो मम सुतो बल आस्ते कच्चित् सुखेन वर्तते किमित्यर्थः। न कृष्णप्रश्नविषयोऽयं श्लोकः। तथा व्याकरणे नन्दगोपमनोरसा भासतेव मात्रा सहेत्युक्तेरयुक्तत्वेनेव अहो ते देवकि पुत्राः कंसेन बहवो हताः। एकावशिष्टाऽवरजा कन्या साऽपि दिवं गतेत्युत्तरत्रत्यनन्दगोपानुयोग इव न शक्यं च परिहर्तुं हरिवंशविरोधापत्तिरिति च न विद्म तदभिप्रायम्। तथा हि स तत्रेमौ दारकौ गत्वा जातकर्मादिभिर्गुणैः। योजयित्वा व्रजे तात संवर्धय यथासुखम्। रोहिणेयं च मे पुत्रं परिरक्ष शिशुं व्रजे। अहं वाच्यो भविष्यामि पितृपक्षेषु पुत्रिणाम्। योऽहमेकस्य पुत्रस्य न पश्यामि शिशोर्मुखम्। ह्रियते हि बला प्राप्स्यामि यतो मम। अस्माद्धि मे भयात्कंसान्निर्घृणाच्च शिशोर्वधे। तद्यथा रोहिणेयं त्वं नन्दगोप ममात्मजम्। गोपायसि तथा तथा कुरु विघ्ना हि बहवो लोके बालानुत्त्रासयन्ति हि। स च पुत्रो मम ज्येष्ठः कनीयांस्तव चात्मजः। उभावपि समं साम्ना निरीक्षस्व यथातथमिति ॥ २७ ॥ कुत एतर्हीयान्कुशलानुनय इत्यत आह ॥ पुंस इति। त्रिवर्गो धर्मादिः पुंसो विहितो यः स सुहृदामनिमित्तबन्धूनां त्वदादिसुमनसां वाऽनुभावतः प्रभावादर्थाय प्राप्तप्रयोजनाय तत्सम्प्राप्तये कल्पते समर्थो भवति हि यतस्तेषु सुहृत्सु विलश्यमानेषु क्लेशिषु सत्सु त्रिवर्गोऽर्थाय न कल्पतेऽतस्तव मम सुहृत्त्वात्तवाक्लेशे च त्रिवर्गसम्पत्तिः सैव मत्सम्पत्तिरिति ममैतात्राननुयोग इति भावः ॥ २८ ॥

श्रीसुबोधिनी

भ्रातृत्वज्ञापनार्थं नन्दस्य सन्मानमाह **तं दृष्ट्वेति** सहसोत्थानमत्यादरज्ञापकं, लोकव्यवहारादपि भवतीति तद्व्यावृत्त्यर्थमाह **देहः प्राणमिवागतमिति**, मूर्छितो देहः प्राणे समागते शीघ्रमुत्तिष्ठति तेजोविशेषं च प्राप्नोति यथायःपिण्डोग्निसम्बन्धे तथा सर्वदेवतामये वसुदेवे निकटे समागते तेजो ज्ञानं सर्वे च सद्गुणा वसुदेवनिष्ठा अत्र समागता वसुदेवाधिदैविकं रूपं च, तदाह **प्राणे समागते देह इवेति**, इदं तु भगवच्चरित्रमेव, अत एवात्यन्तं **प्रीतः**, आगमनेन सर्वस्वप्राप्त्या चात्यन्तं **प्रीतः**, **प्रियतमस्तु** व्यवहारे स्निग्धो भवति परमार्थश्च मायां दूरीकृत्य भगवन्तं दत्तवानिति, नह्येतादृशादधिकः प्रियो भवति, इदानीं च सर्वस्वं दत्तवान्, चेमालिङ्गनमाह **दोर्भ्यां सस्वज इति**, अन्यत् तु कृत्यमालिङ्गनत्यागं च न कृतवानित्यत्र हेतुमाह **प्रेमविह्वल इति**, **प्रेम्णोद्गतेन** विवशो जातः, एतादृशोपि पुनः स्थानस्थितोग्रिमकार्यं कृतवानिति भगवच्चरित्रम् ॥ २१ ॥

लौकिकमाह पूजित इति, अन्यथा देवगुह्यमुच्यमानमस्मिन् न स्थिरीभवेत्, आदौ **पूजितस्ततः** सङ्कोचाभावेन **सुखमुपविष्टः स्वयमप्यनामयमारोग्यं पृष्ट्वा** "वैश्यं पृच्छेदनामय"मिति वाक्यादादृतो नन्देन परमादरेण गृहीतः देवगुह्यकथनार्थं हेतुमाह **प्रसक्तधीः, स्वात्मजयोरिति**, एकः पुत्रो नन्देनापि ज्ञायते परस्तु न ज्ञायत इति साक्षादुभयोः कुशलं प्रष्टुमशक्यमतः साधारणं प्रष्टव्यमिति तस्य प्रकृतानुपयोगित्वमाशङ्क्य हेत्वर्थमाह **प्रकर्षेण सक्ता** धीर्यस्येति, इदं वक्ष्यमाणं, साधारणं रूपमाह **विशां पत** इति, देशानां राजेतिसम्बोधनं गूढवचनज्ञानार्थम् ॥ २२ ॥

आदौ तं पुत्रवत्त्वेन प्रोत्साहयति **दिष्ट्येति**, हे भ्रातः **प्रवयसो वृद्धस्य ते प्रजाशायां निवृत्तायां प्रजाशायाः** स्वयमपि **निवृत्तस्य प्रजा समपद्यतेति** यद् **दिष्ट्या** परमभाग्येन, **इदानीमप्यप्रजस्येति**, यद्यपि स्पष्टतया निरूपितः प्रजाभावस्तथाप्यन्वये भ्रमो भगवत्कृतो निरूपितः, **अप्रजस्येति**, कृत्रिमप्रजापि न सम्पादितेति ज्ञापितं, वृद्धत्वात् स्वरूपायोग्यता निरूपिता, **आशाया निवृत्तत्वात्** प्रयत्नो निवारितः, इच्छाया अपि निवृत्तत्वात् पुरोहितादिद्वारापि प्रयत्नो निवारितः, **प्रजा**शब्दोपत्यमात्रवाची, अतो नानृत, **समपद्यते**त्यकस्मादागमनं, **मायायामपि** रेतोजनितत्वाभावाय वृद्धत्वादिकीर्तनं, तं प्रति भगवत्यपि तथात्वज्ञापनायोभयं भगवदिच्छयातो **दिष्ट्ये**त्युक्तं, अनेन सामान्यतस्तस्य स्वरूपमप्युक्तं, अन्यथा भ्रातृत्वज्ञाने दोषः स्यात् ॥ २३ ॥

आगमने जातं दर्शनं चाभिनन्दति **दिष्ट्येति**, **अस्मिन् संसारचक्रे वर्तमानः पुनर्भवः** पुनरुत्पन्नो **मयोपलब्ध** इति यदेतदपि **दिष्ट्या**, संसारो हि **चक्र**भ्रमात्मकः, भ्रमणे पतितोत एवाधो गच्छेत्, दूरे स्थितस्तु परिभ्रमेत्, **चक्रे** वर्तमानस्तु

पुनर्न दृश्यत एव, चक्र एव वर्तमाने उभयोरन्यतरस्य वा मज्जनसम्भवात्, मग्नश्चेत् पुनरुत्तिष्ठति तस्य पुनर्भव एव, तथा सर्वमारकस्य कालस्य संवत्सरात्मकस्य वशं गताः पुनर्वत्सरान्ते चेत् तिष्ठन्ति तदा पुनर्भूता एव, संवत्सरः प्रजापतिर्जातो जनकत्वात्, अन्यथा कालो भवेत, तत्रापि पुत्रादिसौख्यं चेत् प्राप्नुयात् तदा पुनरुत्पन्नः पुत्ररूपेणालौकिकः स्यात्, एतद् भाग्यव्यतिरेकेण न भवतीति **दिष्ट्या**, अतः **संसारचक्रे** स्थितिरपि **दिष्ट्या, पुनर्भवोपि दिष्ट्या,** मयोपलब्धोपि **दिष्ट्या,** मृत्युरस्मन्निकटे सदा वर्तत इति, **भवानिति** स्नेहः, अथ त्यलभ्यलाभः, एतस्य केवलमदृष्टसाध्यत्वे हेतुमाह **दुर्लभं प्रियदर्शनमिति**, संसारे सर्वमप्रियं दुःखदत्वात्, तत्र **प्रियदर्शनं दुर्लभमेव, प्रियस्य** प्रीतिजनकस्य ॥ २४ ॥

एवं खेदेत्रैव स्थातव्यमितिशङ्कां परिहरन्नागमनदोषं च परिहरन् दर्शनस्य दुर्लभत्वमुपपादयति **नैकत्रेति, प्रिययोरेकत्र सवासो** न सम्भवति, तत्रापि **सुहृदां** बन्धूनां मध्ये **प्रिययोः**, तत्र **हेतुश्चित्रकर्मणामिति**, यद्येकं कर्म भवेदेकत्रोत्पन्ना भवेयुः प्रपायामेकदा सह समागता इव, तत्राप्यनियमः, तदैव मिलितानां **चित्रं कर्म** येषां कर्माधीनाः कर्मणैवोत्क्रान्तिगत्यागतिमन्तो भवन्ति, न केवलं कर्माधीना एव, तत्रापि कालो महान् बाधक इति दृष्टान्तेन कालस्य बाधकत्वमाहौघेनेति, **प्रवाहेण यथा** विशेषत उह्यमानाः क्षणं मिलिताः पुनर्वियुक्ता भवन्ति, तत्रापि **प्लवा** नौकारूपाः, तत्रोभयोः प्रवर्तकत्वं जलस्य कर्णधारस्य च, प्रवाहस्य सहजत्वख्यापनाय **स्रोतस** इत्युक्त, अनेन **प्लवानां** गमनागमनमध्ये सङ्गतिः क्षणमात्रमेव भवतीति निरूपितं पारेगतस्यापि दर्शनाभावश्च ॥ २५ ॥ एवं दर्शनं नन्दं चाभिनन्द्य देवगुह्यप्रकारेणाह **कच्चिदिति, कच्चित्** सम्भावनाप्रश्ने, **बृहद्वनं पशव्यं कच्चित्?** पशूनां हितं **पशव्यं**, यत्र पशवो रमन्ते परम्परया पशुस्थान आधिदैविकपशुसद्भावे वा पशूनां रमणं, तत्रापि **निरुजं**, कश्चिद् देशविशेषे पशूनां रोगा भवन्ति यत्रैवाकाले पशुनाशः, सर्वथा रोगाभावस्तु भगवत्सान्निध्यादिति सामान्याभावेन भगवत्त्वं ज्ञापितं, पशूनां भक्ष्यादिसम्पत्तिं च पृच्छति, **भूरीण्यम्बूनि तृणादीनि वीरुधो** लताश्च यस्मिन्, जलानां बहुत्वं सरसताख्यापकं, तेन दुग्धसम्पत्तिरपि निरूपिता, **तृणानां** बहुत्वं पशूनामभिवृद्धिहेतुः, **वीरुधामाधिक्यं** घृताधिक्यजनकं सौगन्ध्यजनकं च, सम्भावनायां हेतुमाह **बृहद्वनमिति**, अर्थत शब्दतश्च **बृहद्वनं**, शब्दतो धर्महेतुश्चोक्तः, तदिति प्रसिद्धं, **अधुना यत्रास्स** इति, सर्वदास्थितिस्थानं तु प्रष्टव्यं न स्यात्, कदाचित् तस्य स्थितिर्गोष्ठेष्वपि भवतीति तद्व्यावृत्त्यर्थमाह **सुहृद्वृत** इति, बन्धुभिः कुटुम्बेनापि सहितो यत्र वर्तस इत्यर्थः ॥ २६ ॥ एवं देशकुशलतां पृष्ट्वा बालकयोः कुशलं पृच्छति **भ्रातरिति**, अन्यत्र भार्यापुत्रयोः स्थापनमनुचितमिति **भ्रातरित्युक्त, मम सुत** इति स्वानुभवः, मात्रा सह भवद्व्रजे कुशली कच्चित्? रक्षामात्रमेव तत्र कर्तव्यं, बालकशुश्रूषा त्वन्यत एव सिद्धा, भाराधिक्यं वा, **तातं भवन्तं मन्वान** इतिदीनत्वं, पालनादिकं लौकिकं न प्रष्टव्यमेव यतो **भवद्भ्यां नन्दयशोदाभ्यामुपलालितः**, पालनप्रीणनानन्तरमुपलालनमतस्ते च निरूपिते, भगवांस्तु न प्रष्टव्य एव, प्रकारान्तरेण तु पृष्ट एव ॥ २७ ॥ नन्विदानीं तवापि सर्वा समृद्धिरस्त्यतः कथं दैन्यं भाषस इत्याशङ्क्याह **पुंस** इति, **पुंसस्त्रिवर्गो** धर्मार्थकामाख्यः **शास्त्रेभिहितः** कर्तव्यत्वेन समीचीनत्वेन च परं **सुहृदः** सम्बन्धी चेत्, एकाकिना तु मोक्षः किल सम्पादनीयो न धर्मादित्रयं, हि युक्तश्चायमर्थः, एकाकिनस्त्रिवर्गविषयभावात् प्रयोजनाभावाच्च, सुहृत्पदेन चेतनविषयमात्रत्वमुक्तं, तेन यत्र क्वापि त्रिवर्गफले **सुहृदो** भवन्त्येव, किञ्च न सुहृत्सम्बन्धमात्रेण त्रिवर्गस्योपयोगः किन्तु सुहृदैवानुभावितः, पुष्टः सह संवर्धित इत्यर्थः, ततः किमत आह **न तेष्विति, तेषु क्लिश्यमानेषु सुहृत्सु** सत्सु **त्रिवर्गः** पुरुषार्थाय **न कल्पते** पुरुषार्थरूपो न भवति, तेषां तत्र मुख्यत्वात्, यथात्मनः कंसस्य पुत्रमारकत्वान्नाकारणं देवकीपुत्रत्वं सम्भाव्येतेति, अतो दीनत्वमुचितमेव ॥ २८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

दिष्ट्या भ्रातरित्यत्र इदानीमित्यादि । वसुदेवबुद्धिमनुसृत्येदमुक्तमिति ज्ञेयम् । वस्तुतस्तु प्रजाशब्दोपत्यमात्रवाचीत्यग्रे वचनादिदानीमप्रजत्वोक्तिः कन्याभिप्रायेण तस्या गतत्वात्तथात्वम् । प्रजा यत्समपद्येति तु भगवदभिप्रायेण । अन्यथेदानीमप्रजस्य प्रजा समपद्यतेति विरुद्धं वाक्यं स्यात् ॥ २३ ॥ **न तेष्वित्यत्र, यथात्मन इत्यादि** । नन्दस्यातिप्रियत्वात् तत्तोषार्थं **स्वगृहे** नन्दाकारणमुचितं यद्यपि, तथापि तथाकृते भगवति देवकीपुत्रत्वं कंसः सम्भाव्य नन्दानिष्टं कुर्यात्तदा सुहृन्नन्दः क्लिष्टो भवेदतो नाकारणम् । इदमप्येकं दुःखमेतदुक्त्या ज्ञाप्यते, तेन यथात्मनो नन्दस्य **स्वगृहे** नाकारणमिति सम्बन्धः शेषं हेतुत्वेनोक्तम् ॥२८॥

निःसाधनफलात्मायं प्रादुर्भूतोऽस्ति गोकुले । अतो वयं सुनिश्चिन्ता जाताः सर्वत एव हि ॥ १ ॥

इति पञ्चमोध्यायः ॥ ५ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तं दृष्ट्वेत्यत्र वसुदेवाधिदैविकं रूपमिति निगमात्मकस्य **वसुदेवस्य** यदाधिदैविकं रूपं "यो नन्दः परमानन्द" इतिमन्त्रोक्तं तदिदानीं वस्ववतारूपे **श्रीनन्दे** समागतमित्यर्थः, **इदं** त्वित्यन्याधिदैविकस्यान्यत्रस्थापनम् ॥ २१ ॥ **पूजित इत्यत्रा**-भावेति **वसुदेवपूजनाभावे** 'पूज्यपूजाव्यतिक्रम'जन्यदोषभावत्वेनेत्यर्थः, **तस्येत्यादि** साधारणप्रश्नस्य विशेषप्रश्नानुपयोगित्वमाशङ्क्य प्रश्नमात्रे **हेत्वर्थमुभयत्रासक्तिमुक्तवानित्यर्थः** ॥ २२ ॥ **दिष्ट्या भ्रातरित्यत्रेदानीमित्यादि, अन्वय** इति लौकिकरीतिकप्रजान्वये,

टिप्पण्यां श्रीनन्दगृहे भगवत्प्रादुर्भावस्य पूर्वमुपपादितत्वादत्र 'प्रज'पदस्यैवं व्याख्यानं कुत इत्याकाङ्क्षायामाहु**र्वसुदेव** इत्यादि, पक्षान्तरमाहु**र्वस्तुत** इत्यादि, **अस्य** वसुदेववाक्यत्वात् तद्बुद्ध्यनुसरणस्य युक्तत्वेपि यत् पक्षान्तरकथनादिकं तत् सरस्वतीसत्यत्वसमर्थनाय ज्ञेयं "वाचालं बालिश" मित्यादिवत्, **सुबोधिन्यामुभय**मिति **रेतोजनिता**दिरूपः **प्रजाभावः** प्रजासम्पत्तिश्चे**त्युभय**मित्यर्थः, **अनेने**ति **दिष्ट्ये**तिपदाद् भगवदिच्छाबोधनेन ॥ २३ ॥ **नैकत्रे**त्यत्रा**नागमनदोष**मित्येतावदवधि मिलनार्थ**मनागमने दोषम्**, **तत्रापीति प्रपाया**मप्यागमनस्येत्यर्थः, **तदैवे**ति धर्मसमयेपीत्यर्थः, दार्ष्टान्तिके **कालस्य** प्रवाहत्वं **कर्मणः** कर्णधारत्वं ज्ञेयम् ॥ २५ ॥ **परम्परये**ति पारम्पर्येणेत्यर्थः। **सामान्याभावेने**ति रोगप्रतियोगिकेनेत्यर्थः, **बृहद्वन**मित्यत्र **बृहद्वनशब्दतो धर्महेतुश्चोक्त** इतिबृहद्वनरूपो देशो बृहत्त्वादक्षररूपत्वात् तथेत्यर्थः ॥ २६ ॥ **चेतनविषयमात्रत्व**मिति स्त्रीपुम्प्रभृतिसर्व**चेतनविषयत्वं**, तथा च सुहृत्पदेन न केवलं पूर्वसिद्धकुटुम्बिन एव ग्राह्याः किन्तु यथाकथञ्चित्सम्बन्धि रथ्यादिमात्रं ग्राह्यमितिभावः, तदेवाहु**स्तेने**त्यादिना, **टिप्पण्यां यथात्मन** इतिफक्किकायाः प्रयोजनमर्थं चाहु**र्यथे**त्यादि ॥ २८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तं दृष्ट्वेत्यत्र **अत एवे**ति स्वस्मिन् भगवच्चरित्रस्य सिद्धत्वादित्यर्थः, **अत्यन्तप्रीत** इति **प्रियतम**वदेतिशयितप्रीतेरनुवादादत्रापि **प्रीत** इति पदेनातिशयिता प्रीतिरुक्तेतिभावः, **आलिङ्गनत्यागं चे**ति वसुदेवाधिदैविकं रूपं तत्रैव **स्थित**मित्यालिङ्गित एव स्थित इति भावः, तथा चान्यत् कृत्यं नमस्कारादिकं तु पुनरालिङ्गनत्यागं च प्रेमविह्वलत्वान् न कृतवानित्यर्थः ॥ २१ ॥ **पूजित** इत्यत्र **अन्यथे**ति नन्दकृतवसुदेवपूजाभावे इत्यर्थः, वसुदेवस्य देवगुह्यवक्तृत्वेन गुरुस्थानीयत्वादितिभावः ॥ २२ ॥ **दिष्ट्या भ्रात**रित्यत्र **प्रजाशात** इति **इच्छाया अपी**त्यग्रे वक्ष्यमाणत्वात् प्रजेच्छात इत्यर्थः, **आशाया** इति "तमाशाब्रवी"दित्यत्रोक्ता देवतारूपा **आशा** एतस्मान् **निवृत्ता** तिरोहिता, अतो वैदिकः **प्रयत्न** आशायै चरुनिर्वापरूपो **निवारितो** देवतायास्तिरोहितत्वादित्यर्थः, अत्र पाठद्वयमप्यभिप्रेत्य प्रजाशायां निवृत्तायामिति पाठानुसारेणेदमुक्तं, **प्रजाशाया निवृत्तस्ये**ति पाठे आशापदमिच्छावाचकमित्याशयेनाहुः **इच्छाया अपी**ति, "किं प्रजया करिष्याम" इति शास्त्रपर्यालोचनादिति भावः ॥ २३ ॥ **दिष्ट्ये**त्यस्याभासे **स्वदर्शनं चे**ति पूर्वश्लोकाभासमादाय चकारः, प्रोत्साहयति **दर्शनं चाभिनन्दती**त्यन्वाचयः, व्याख्याने, **चक्रभ्रमात्मक** इति चक्राकारभ्रमात्मक इत्यर्थः, भ्रमस्वरूपमाहु**र्भ्रमणे** इति, **अत एवे**ति भ्रमणादेवेत्यर्थः, चक्रस्वरूपमाहुः **चक्र** इति, **चक्र एवे**ति एतादृशेन आवर्तनेनेत्यर्थः, **अलौकिकः स्यादि**ति पुत्ररूपेण स्वस्यैवोत्पत्तिः "रात्मा वै पुत्रनामासी"ति श्रुतिगम्या न तु लौकिकप्रमाणगम्या, तथा च लौकिकप्रमाणागम्यः स्यादित्यर्थः ॥ २४ ॥ कच्चिदित्यस्याभासे **देवगुह्यं** इति द्वितीयाद्विवचनान्तमिदं, व्याख्याने **आधिदैविके**ति वैकुण्ठागमनवत् 'यत्र गावो भूरिशृङ्गा अयास' इत्यादिश्रुत्युक्तनित्यलीलास्थपशूनामागमने इत्यर्थः, **सामान्याभावेने**ति रोगाणां सामान्यत एवाभावेनेत्यर्थः, **शब्दत** इति बृहत् ब्रह्मरूपं वनमितिव्युत्पत्तेः **शब्दतो** धर्मे तद्वनं हेतुरुक्तः, 'अयं हि परमो धर्मो यद् योगेनात्मदर्शन'मितिस्मृतेः, तथा च तत्र गोचारणरूपो धर्मः सम्यक् सेत्स्यतीति भावः ॥ २६ ॥ **भ्रात**रित्यस्याभासे **देशकुशलता**मिति देशकुशलप्रश्नो भगवत्कुशलतापूर्वक इत्युक्तत्वाद् देशेन कुशलं ययोस्तत्तां बालकयोः पृष्टवेत्यन्वयः, **कुशल**मिति बलस्येति शेषः ॥२७॥ **पुंस** इत्यत्र ननु कामे सुहृदामुपयोगः स्पष्टः धर्मार्थयोः कोपयोग इत्यत आहुः **चेतने**ति, चेतनो विषयः सर्वोपि सुहृत्पदवाच्यः, तथा च धर्मे तत्साधका ऋत्विगादयोऽर्थे च तत्साधकाः सेवकादयः सुहृद इत्याहुः **यत्र क्वापी**ति, **न तेष्वि**त्यत्र ननु भयात् स्वगृहेऽनाकारणेपि उपढौकनीयं तावत् द्रव्यमत्रैव देयमित्याशङ्क्याहुः **द्रव्यादिदानं त्वि**ति ॥ २८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तं दृष्ट्वेत्यत्र "देहः प्राणमिवागत"मित्यस्य व्याख्याने, **वसुदेवाधिदैविकं रूपं चे**ति वसुदेवाधिदैविकं रूपं नन्दे समागतमित्यर्थः, एतत्समागमनस्य प्रयोजनं तु मथुरायां भगवतो गमनानन्तरं वसुदेवपुत्रत्वे ज्ञातेपि श्रीनन्दस्य भगवति स्वपुत्रभावदार्ढ्यं अन्यथा वसुदेवगृहे पुत्रत्वेन भगवत्स्थितिज्ञाने रुक्मिणीविवाहादिज्ञाने स्वपुत्रत्वबुद्धिनिवृत्तौ पुत्रत्वस्नेहो निवर्तेत, तथा सति कृतो निरोधोप्यकृतो भवेत्, अतः श्रीनन्दे वसुदेवाधिदैविकस्वरूपस्य समागमनं कारितं प्रभुणा, तथा सति वसुदेवपुत्रत्वज्ञानेपि स्वपुत्रत्वबुद्धिः स्थिरैव ॥ २१ ॥ **पूजितः सुखमासीन** इत्यस्य विवरणे **अन्यथा देवगुह्य**मित्यादि यदि नन्दो वसुदेवं सत्कारादिना न पूजयेत् तदा वसुदेवेनोपदिश्यमानं भगवत्सम्बन्धिज्ञानं व्रजराजे स्थैर्यं न प्राप्नुयात् ज्ञानस्थैर्यस्य गुरुपूजासाध्यत्वात् वसुदेवस्य गुरुत्वात्, अतो गुरुपूजाया आवश्यकत्वात् **पूजित** इत्युक्तम् ॥ २२ ॥ **प्रजाशाया निवृत्तस्य प्रजा यत् समपद्यत** इत्यस्य व्याख्याने **प्रजाशब्द अपत्यमात्रवाची, अतोनानृत**मिति मायारूपकन्यात्मकप्रजाया जातत्वात् 'प्रजा यत् समपद्यते'ति वचो नानृतमित्यर्थः, **तं प्रति भगवत्यपी**ति श्रीनन्दं प्रति पुत्रे श्रीकृष्णे रेतोजनितत्वाभावज्ञापनाय **प्रवयस** इति पदेन वृद्धत्वादिकीर्तनमित्यर्थः, **उभयं भगवदिच्छये**ति भगवदाविर्भावो मायाजन्म **चेत्युभयं भगवदिच्छयैव** केवलया न तु स्त्रीपुरुषसंयोगादिकं कारणमस्ति उभयोर्मायाभगवतोः शुक्रजन्यत्वाभावात्, **अनेन सामान्यतस्तस्य स्वरूपमप्युक्त**मिति **तस्य** श्रीव्रजराजसमीपे भगवतो ह्यजत्वादिरूपं **स्वरूपमप्युक्त**मित्यर्थः ॥ २३ ॥ **संवत्सरः प्रजापतिर्जात** इति "संवत्सरो वै प्रजापति"रिति श्रुतेः **संवत्सरस्य प्रजा-**

पतित्वं, तत्वं च पदार्थोत्पादकत्वं, एवं सति यदा संवत्सरे नाशो न जातस्तदा तेन संवत्सरेणैवायमुत्पादितः, अतः **प्रजापति**रित्यर्थः, **अन्यथा काल** इत्यादि यदा संवत्सरो मारयेत् तदा न संवत्सरस्य प्रजापतित्वं किन्तु कालत्वं मृत्युरूपतेत्यर्थः, संवत्सरस्य मृत्युरूपताया अपि प्रमाणसिद्धत्वात् ॥ २४ ॥ **कच्चित् पशव्यं निरुजमित्यस्य** विवृतौ **आधिदैविकपशुसद्भावे** वेति 'गोप्यो गाव ऋचस्तस्य यष्टिका कमलासन' इति कृष्णोपनिषत्सु या गावो निरूपितास्तेषां सद्भावे इत्यर्थः ॥ २६ ॥ **न तेषु क्लिश्यमाने**ष्वित्यस्य विवृतौ **यथात्मनः कंसस्य पुत्रमारकत्वान् नाकारणमिति** आत्मनः नाकरणमित्यन्वयः, **आत्मनो** वसुदेवस्य व्रजराजेन स्वगृहे पुत्रोत्सवसमये **नाकारणमित्यर्थः**, तत्र हेतुः **कंसस्य पुत्रमारकत्वादिति**, तत्रापि **हेतुर्देवकीपुत्रत्वमिति**, नन्दपुत्रे **देवकीपुत्रत्वं सम्भाव्येता**तो वसुदेवस्य नाकारणं, एवं सति यदा तादृङ्मित्रस्यापि नाकारणं तदा कुतोऽप्युत्सवस्तादृगानन्दं न जनयेदतः सुहृदां सान्निध्ये सुहृदां क्लेशाभाव एव त्रिवर्गस्य पुरुषार्थत्वं नान्यथेति वसुदेवाशयः ॥ २८ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

आचार्यचरण कहते हैं कि अब **'तद्दृष्ट्वा'** श्लोक से वसुदेवजी के साथ **'भ्रातृपन'** बताने के लिये नंदरायकृत सम्मान का वर्णन करते हैं। 'यकायक उठना' विशेष आदर का सूचक है। लोक व्यवहार में भी आप्तजन के घर आने पर उठकर आदर किया जाता है, लेकिन यहाँ तो लोक व्यवहार नहीं था, इसलिये शुकदेवजी ने **'देहः प्राणमिवागतम्'** कहा है, इसका मधुर भाव यह है कि जैसे मूर्छित देह में प्राण आते ही, देह शीघ्र उठ कर खड़ी हो जाती है तथा शरीर में तेजस्विता आ जाती है, जैसे लोहे का गोला अग्निप्रवेश से विशेष तेजोमय लगता है। वैसे ही सर्वदेवतारूप, वसुदेवजी के समीप आने से वसुदेवजी के ज्ञान और सब सद्गुण और वसुदेवजी का आधिदैविक स्वरूप ये सब नन्दजी में प्रविष्ट हुए इसलिये कहा है कि प्राण आने पर, देह की तरह नन्दजी भी सब गुणों से सम्पन्न बने, स्फूर्तिमान् हो गए। यह सब भगवान् की लीला है इस कारण से नन्दजी अत्यन्त प्रसन्न हुए। वसुदेवजी का समागम और प्राणों की तरह सर्वस्व दान दोनों विशेष प्रसन्नता के कारण बने। विशेष प्रियतम तो स्वभाव से दयालु एवं मनोहर होता है। वसुदेवजी ने भी नन्दजी से माया लेकर भगवान् का दान किया। ऐसे दयालु भ्राता से विशेष प्रिय कौन होगा ? इस समय वसुदेवजी ने तो तेज, ज्ञान एवं आधिदैविक रूप आदि सर्व दे दिया। फलतः नन्दजी ऐसे प्रेमविवश हुए कि प्रेम से वसुदेवजी का दोनों भुजाओं से गाढ़ आलिंगन किया और छोड़ नहीं सके। वस्तुतः नंदजी और वसुदेवजी एकरूप हो गये। ऐसे प्रेममग्न एकरूप होते हुए भी स्थान पर ही आगे के कार्य करने लगे यह भी भगवल्लीला है।

प्रकाशकारजी कहते हैं कि वसुदेवजी का **'नन्दः परमानन्दः'** इस श्रुति में जो आधिदैविक स्वरूप वर्णन किया है यह नन्दजी में प्रविष्ट हुआ। आधिदैविक वसुदेवजी को नमस्कारादि कार्य न दिये किन्तु आलिङ्गन किया। श्रीयोजनाकारजी वसुदेवजी के आधिदैविक रूप का नन्दजी में प्रवेश का तात्पर्य कहते हैं कि श्रीनन्दनन्दन का व्रज से मथुरा में पधारने के बाद नन्दजी को ज्ञात होगा कि वे वसुदेवजी के पुत्र हैं तो भी नन्दजी का जो उनमें उत्कट वात्सल्य भाव था, वह कम न हुआ और निरंतर श्रीकृष्ण को वे अपना पुत्र ही समझते रहे। यदि वसुदेवजी के आधिदैविक स्वरूप का प्रवेश नन्दजी में न होता तो भगवान् को वसुदेवजी के घर में पुत्र की तरह स्थिति और रुक्मिणी से विवाहादि का ज्ञान होने पर 'मेरा पुत्र है' यह बुद्धि मिट जाती और पुत्रस्नेह भी नष्ट हो जाता एवं नन्दजी का निरोध भी न रहता। ऐसा न होकर नन्दजी की वही बुद्धि बनी रहे, इसलिये भगवान् ने वसुदेवजी के आधिदैविक स्वरूप का नंदजी में प्रवेश कराया। जिससे वसुदेवजी के पुत्र का ज्ञान होने पर भी **'स्वपुत्रबुद्धि'** मेरा पुत्र है यह बुद्धि स्थिर ही रही ॥ २१ ॥

आचार्यश्री आज्ञा करते हैं कि श्रीशुकमुनिजी इस श्लोक में लौकिक प्रकार कहते हैं कि श्रीनन्दराय ने वसुदेवजी का पूजन किया यदि वसुदेवजी नंदजी द्वारा पूजादि से आदर न पाते तो वसुदेवजी, जो देवगुह्य कथा नंदजी को सुनाते, वह नंदरायजी के हृदय में स्थिर न होती इसलिये नन्दजी ने पहले वसुदेवजी का पूजन किया। पूजन होने से वसुदेवजी के हृदय से देने आदि का संकोच निकल गया और सुखपूर्वक बैठे। पुनः वसुदेवजी ने भी **'वैश्यं पृच्छेत् अनामयम्'** वैश्य से मिले तब आरोग्य पूछे ऐसे शास्त्र वचनानुसार नन्दजी से पहले आरोग्य पूछा फिर नंदजी का आदर किया। वसुदेवजी ने नंदजी से देवगुह्य बातें क्यों सुनाई तो कहते हैं कि, **'प्रसक्तधीः'** वसुदेवजी अपने पुत्रों में अत्यन्त आसक्त बुद्धि वाले थे, इस कारण से वसुदेवजी देवगुह्य बातें भी नंदरायजी से छिपा नहीं सके। यद्यपि नंदजी को एक पुत्र बलदाऊ का तो ज्ञान था कि यह वसुदेवजी का पुत्र है किन्तु दूसरे श्रीकृष्ण का ज्ञान नहीं था कि यह मेरा पुत्र भी वसुदेवजी का ही पुत्र है। श्रीकृष्ण को तो वे अपना ही पुत्र समझते थे, इसलिये दोनों की कुशलता स्पष्ट पूछना कठिन था, इसलिए साधारण रीति से पूछना चाहिये। यह अवसर इसके पूछने का नहीं है तो भी 'आसक्तधी' होने से साधारण रूप से पूछेंगे इसलिये कहा **'विशाम्पते'** हे देशों के राजा ! यह सम्बोधन नन्दजी को गूढ़ वचनों का ज्ञान कराने के लिए है। श्रीपुरुषोत्तमजी कहते हैं कि मनुस्मृति आदि

शास्त्र में कहा है कि **'पूज्यपूजाव्यतिक्रम'** पूजनीय की पूजा न करने से 'दोष' लगता है इसलिए यदि नन्दजी वसुदेवजी का पूजन न करते तो दोष के भागी होते। इस दोष से बचने के लिये शास्त्रवचनानुसार नन्दजी ने वसुदेवजी का पूजन किया। इससे देवगुह्य भी नन्दजी के चित्त में स्थिर हुआ। यहाँ पर योजनाकार लालूभट्टजी कहते हैं कि गुरु की पूजा से ही ज्ञान स्थिर होता है। वसुदेवजी ने उपदेश दिया इससे नन्दजी के गुरु हैं और गुरु का पूजन आवश्यक होने से नन्दजी ने वसुदेवजी का अर्चन किया, यों गुरुपूजन करने से वसुदेवजी का उपदेश नन्दजी के हृदय में स्थिर हुआ। और सलाह मान कर त्वरित गोकुल गये ॥ २२ ॥

आचार्यचरण कहते हैं कि श्री वसुदेवजी नन्दजी को प्रथम पुत्र वाले बता कर फिर **'दिष्ट्या'** इस श्लोक से प्रोत्साहित करते हैं—हे मेरे भैया! वृद्धावस्था के कारण प्रजा होने की आशा छूट गई थी एवं आपने भी प्रजा की आशा त्याग दी थी, किन्तु बड़े भाग्य से बिना प्रजा वाले भी आपको प्रजा प्राप्त हुई, इसकी आपको बधाई है कि वृद्धावस्था में भी बिना प्रजावाले आपको प्रजा हुई यह वसुदेवजी ने स्पष्ट कह दिया। श्लोक में **'अप्रजस्य'** शब्द के साथ में 'इदानीं' शब्द दिया है इससे इदानीं शब्द को **'अप्रजस्य'** के साथ लाने पर अर्थ होता है कि अभी भी आप प्रजा वाले नहीं हो। तात्पर्य कि संकेत से वसुदेवजी ने ऐसा बता दिया कि यह कृष्ण मेरा पुत्र है। यदि **'इदानीं'** शब्द इसके साथ न लिया जाय तो अर्थ होगा कि आप पहले बिना प्रजावान् थे **'इदानीं'** अभी आपको संतान हो गई है। इस तरह अन्वय में भ्रम भगवत् इच्छा से हुआ। जिससे वसुदेवजी का भूठापन भी मिट जाता है और कंस को भी यह ज्ञान न हो कि वह वसुदेवजी का पुत्र है। **'अप्रजस्य'** बिना प्रजावाले आपको इस शब्द से यह भी संकेत कर दिया कि आपके दत्तक आदि सन्तान भी नहीं है। **'वृद्ध'** कहने से सन्तान उत्पन्न करनेवाले स्वरूप की अक्षमता बताई। आशा न रही, इससे प्रयत्न को भी आवश्यकता न रही, इच्छा ही न रही, इसलिये पुरोहितों द्वारा भी प्रयत्न न कराये। प्रजा शब्द अपत्यवाचक प्रजा शब्द कहने से वसुदेवजी ने झूठ भी नहीं कहा। श्लोक में **'समपद्यत'** शब्द का भावार्थ बताते हैं कि अचानक भगवदिच्छा से कोई आजावे यह अर्थ है, इसलिये आपके यहाँ किसी का जन्म नहीं मात्र अचानक भगवानका आना हुआ है। 'माया' भी वीर्य से उत्पन्न न हुई थी इसी तरह भगवान् भी स्वयं पधारे हैं वीर्य से नहीं। फिर भैया आप वृद्ध तो हो ही, तो यह सब जो कुछ हुआ है वह केवल भगवद् इच्छा से ही हुआ है इससे प्रसन्नता है। यों कहने से सामान्य रीति से सारी बात का सच्चा स्वरूप, बता दिया और भगवान् का स्वरूप भी कह दिया। यदि यों नहीं कहते तो भ्रातृवञ्चना के अपराध से वसुदेवजी को दोष लगता।

श्री गुसांईजी टिप्पणी में आज्ञा करते हैं कि—शुकाचार्यजी ने नन्दबाबा को **'इदानीं अप्रजस्य'** कहा उसका भावार्थ है कि एक कन्या हुई थी वह भी आपके पास रही नहीं, इसलिये आप अब अप्रज सन्तान रहित हो। **'प्रजा समपद्यत'** का भाव बताते हैं जो कि पहली कन्या रही नहीं अब तो पुत्र सन्तति आ गई। यह भगवान् के यहाँ पधारने से वसुदेवजी ने कहा। यह सब वसुदेवजी की बुद्धि के अनुसार कहा गया है। यदि इस तरह अभिप्राय न हो तो 'बिना प्रजावाले' आपको प्रजा हुई इन दोनों में परस्पर विरुद्ध वाक्य की संगति नहीं होती।

श्रीपुरुषोत्तमजी श्री सुबोधिनीजी के **"तथाऽप्यन्वयं भ्रमः"** वाक्य में जो **"अन्वयः"** शब्द आया है उसका आशय बताते हैं कि—लौकिक रीति से उत्पन्न प्रजा को अन्वय माने वंश कहा जाता है। यहाँ लौकिक रीति से प्रजा नहीं हुई है इसलिये **'अप्रजस्य'** कहना सत्य है। अर्थात् इस समय आपके प्रजा नहीं है। टिप्पणीकार प्रभुचरण ने पहिले नन्दगृह में भगवान् का प्राकट्य कहकर, अब **'अप्रजस्य'** का भाव बिना प्रजावाला कैसे बताया। इसका समाधान करते हैं कि यह कहना वसुदेवजी की बुद्धि के अनुसार है। नन्द के गृह में प्रकट स्वरूप का ज्ञान वसुदेवजी को नहीं है, वसुदेवजी को तो अपने यहाँ प्रकट भगवान् एवं नन्दजी के यहाँ प्रकट हुई माया रूप कन्या का ज्ञान था। कन्या को आप ले गए और भगवान् को वहाँ विराजमान कर गए। इस ज्ञान के कारण वसुदेवजी ने जो कहा उसका अनुवादमात्र यहाँ किया गया है, अर्थात् वसुदेवजी की बुद्धि के अनुसार वर्णन किया गया है। सुबोधिनीजी में दो प्रकार बताये हैं—प्रथम प्रकार माया और भगवान् दोनों लौकिक रीति, वीर्यादि से उत्पन्न नहीं हुए, इसलिये प्रजा का अभाव। दूसरा प्रकार भगवान् प्रकट हुए इसलिये प्रजा सम्पत्ति वाले नन्दजी हैं।

श्री योजनाकारजी का कहना है कि—प्रजाशब्द अपत्य पुत्र या पुत्री हो उसको कहा जाता है। इसलिये माया रूप कन्या का जन्म हुआ। इसलिये वसुदेवजी का कहना असत्य नहीं ॥ २३ ॥

आचार्यचरण कहते हैं कि अब इस श्लोक में श्रीशुकाचार्यजी कहते हैं कि श्रीवसुदेवजी ने अग्रिम श्लोक में नन्दजी को बधाई दी अब इस श्लोक से श्री नन्दरायजी के दर्शन का अभिनन्दन करते हैं—कि भैया? संसार भंवर में भटकते हुए आपको आज मैंने पाया है यह भी हमारा आपका नया जन्म है इसलिये हर्ष की बात है। संसार घूमते हुए जल के भँवर के समान है उस चक्कर में जो पड़ा नीचे चला जाता है, दूर रहने वाला चक्कर काटता है और चक्कर में गिर जाने पर तो अदृश्य ही हो जाता है। वसुदेवजी नन्दजी से कहने लगे कि बाबा इस भवसागर में हम दोनों ही डूब जाते अथवा कोई एक

डूब जाता और जो डूब कर बाहर निकलता और बच जाता तो उसका पुनर्जन्म ही कहा जाता है। सर्व नाशकारी संवत्सररूपी काल के आधीन होने पर भी यदि कोई व्यक्ति संवत्सर पार कर जीवित रहता है तो उसका जन्म नया ही समझना चाहिये। संवत्सर काल रूप होते हुए भी प्रजापतिरूप कहलाता है कि वह किसी किसी को अपने संवत्सर के पश्चात् दूसरे संवत्सर में नया जन्म देता है। यदि ऐसा न करे तो प्रजापति नाम अन्वर्थ न होता और केवल काल रूप ही रहता। इसमें भी जो कदाचित् संवत्सर पूर्ण होने के अनन्तर सन्तानादि सुख की भी प्राप्ति हो गई हो, तो पुत्र रूप से फिर उत्पन्न होना तो अलौकिक श्रुतिसंमत **"आत्मा वै पुत्रनामासि"** वेदसंमानित ही है। यह भाग्य के अतिरिक्त नहीं होता है, इसलिये बधाई है।

भैया नन्दराय आपका संसारचक्र में रहना भी परम हर्ष का विषय है। नया जन्म भी महाभाग्य है। मुझे मिले यह भी महान् उत्सव है। मृत्यु तो अपने पास ही सदा रहती है। नन्दजी के लिये कहा गया 'भवान्' शब्द स्नेह का प्रतीक है। भवान् शब्द से निश्चित रूप से अपना स्नेह सिद्ध होता है। **"अद्य"** शब्द से यह भाव निकलता है कि मुझे एवं आपको दुर्लभ लाभ मिला है। इसका मिलना केवल प्रारब्ध से ही है, कहा है कि **'दुर्लभं प्रियदर्शनम्'** प्रिय का दर्शन सर्वथा दुर्लभ है। संसार में बहुत करके पदार्थ दुःख देने वाले होते हैं, आनंद देने वाला मात्र प्रियतम भ्राता ही है, जिसका मिलना दुर्लभ है, सो आज मिला है॥ २४॥

आचार्यचरण कहते हैं कि नन्दबाबा को मिलकर वार्ता करते हुए वसुदेवजी के मन में दो विचार आये कि प्रथम यह विचार आया कि क्या नन्दरायजी के मन में यह शंका हुई हो कि मैं लौटकर शीघ्र ही गोकुल जाऊँगा तो वसुदेवजी को खेद होगा कि दो दिन भी न रहे इसलिये यहाँ ही रह जाऊँ। दूसरा विचार यह आया कि मेरे दुःख के दिन में इतने दिन नहीं आया इससे वसुदेवजी अप्रसन्न हुए होंगे। नन्दरायजी के खेद की शंका और देरी से आने के दोष को मिटाने के लिये श्रीवसुदेवजी ने **'नैकत्र'** इस श्लोक से कहा कि नन्दरायजी मेरे दुःख के दिनों में आप न आ सके उसमें आपका दोष नहीं है और आपको यहाँ रहने की शंका भी नहीं करनी चाहिये। क्योंकि प्रेमियों का एक स्थान पर निवास नहीं होता है। उसमें भी जो सुहृद् और सम्बन्धियों में जो प्रिय हैं उनका सहवास सर्वथा दुर्लभ है। कारण कि प्रत्येक पथिक के कर्म भिन्न भिन्न होते हैं। एक ही कर्म यदि हो तो प्याऊँ में एक बार मिले हुए के समान सब का एकत्र जन्म होता। इसमें भी कोई निश्चित नियम नहीं है कि प्याऊँ में मिले हुए भी जैसे जल के प्रवाह से इधर उधर हो जाते हैं वैसे ही एक गृह परिवार में उत्पन्न होते हुए भी किन्हीं कारणों से बिछुड़ जाते हैं। इसलिये प्राणीमात्र का कर्म से ही परलोक गमन तथा इहलोक में आगमन आदि होता है। जीव न केवल कर्म के अधीन है किन्तु वहाँ भी काल महान् बाधक है। अब दृष्टान्त से काल की बाधकता दिखाते है कि जैसे **'ओघेन व्यूह्यमानानां'** प्रवाह से नदी में थोड़ी देर मिले हुए पदार्थ फिर प्रवाह से अलग हो जाते हैं जैसे नावें भी नदी में परस्पर मिलती हैं इनको मिलाने वाले मुख्य जल और नाविक होते हैं। यहाँ प्रकाशकारजी का कहना है कि काल प्रवाहरूप है और कर्म नाविक रूप है। प्रवाह को सहज कारण होने से 'नदी' कहा है, इससे समझ में आता है कि नावों का आने जाने के समय मिलाप जैसे क्षणिक है वैसे ही जीवमात्र का भी मिलाप क्षण मात्र ही होता है। पार पहुंचने पर जैसे नाव देखने में नहीं आती है वैसे ही वियोग के बाद प्रिय सम्बन्धियों, मित्रों आदि के भी दर्शन नहीं होते हैं॥ २५॥

आचार्यचरण कहते हैं कि **एवंदर्शनं नन्दं चाभिनन्द्य**—इस प्रकार नन्दजी और उनके दर्शन का अभिनन्दन कर, देवगुरु प्रकार से भाषा में **'कच्चित्पशव्य'** श्लोक से प्रश्न करते हैं। कच्चित् अव्यय का संभावना अर्थ में प्रश्न करने पर उपयोग किया जाता है जैसे कहा जाता है कि ऐसा है न? तो यहाँ वसुदेवजी भी महावन के विषय में इसी प्रकार से पूछते हैं कि **'कच्चित् पशव्यं बृहद्वनं'** महावन पशुओं का हितकारी है न? और महावन में पशु आनन्द से रमण करते हैं न? यहाँ परम्परा से गोचर भूमि है यहाँ के पशु आधिदैविक अलौकिक है इसलिये पशुओं का रमण होता है न?। यह स्थान भी आधिदैविक है इसलिये **'विरुजं'** रोग रहित है न? कोई देश ऐसे भी है जहाँ पशु रोगी होते हैं और अकाल में ही मर जाते हैं। गोष्ठ में कुछ भी रोग न हो यह तो भगवान् के बिराजने पर होता है। सामान्य रीति से रोग का अभाव दिखा कर यह बता दिया है कि यहाँ भगवान् विराजते हैं।

पशूनां भक्ष्यादिसम्पत्तिं च पृच्छति—पीने के लिये पानी भी पुष्कल है न? तृण लताएँ आदि से भी तो वन हरा-भरा है न? जल की बहुलता से वन सरस हरा होता है तो दूध भी वहाँ विशेष उत्पन्न होता है और दूध की समृद्धि का भी इससे पता चलता है। घास की विशेषता पशुओं के वृद्धि का कारण है। वीरुध अधिक हो तो घृतविशेष उत्पन्न होता है और वन सुगन्धित रहता है। वसुदेवजी ऐसी सम्भावना इसलिये करते हैं कि इसको **'बृहद् वनं'** महावन कहा है, महावन नाम के अर्थानुसार जल घास लता आदि पदार्थों का इसमें अधिक होना स्वाभाविक है। **'बृहद्वनं'** शब्द से यह भी जाना जाता है कि यह 'वन' धर्म का भी हेतु है। श्लोक में जो 'तत्' पद है इससे महावन की प्रसिद्धि सूचित की गई है। श्लोक में **'अधुना यत्र आसते'** अभी जहाँ रहते हो इस प्रश्न से सर्वदा रहने का तो पूछना ही नहीं था क्योंकि कभी तो आप गोष्ठों में भी रहते हैं। इस

गोष्ठों में रहना भी सर्वदा नहीं, इसलिये पूछते हैं कि बन्धुजन और सम्बन्धियों के साथ जहाँ रहते हो वहाँ तो सब प्रकार से कुशल है न ? आचार्यचरणों ने **'आधिदैविकपशुसद्भावे'** जो कहा उसका लेखकारजी भाव कहते हैं कि भगवान् जैसे 'गोकुल' में वैकुण्ठ लाये वैसे ही वहाँ के गौ आदि पशु भी आये । इसलिये श्रुति में **'यत्र गावो भूरिश्रृङ्गा'** लिखा है । जिस वैकुण्ठरूप गोकुल में बड़े बड़े श्रृङ्ग वाली गौएँ है अतः वे आधिदैविक हैं । इन गौओं में रोगादि भी नहीं ।

श्रीलालूभट्टजी का कहना है कि कृष्णोपनिषद् में **'गोप्योगाव ऋचस्तस्य यष्टिका कमलासनः'** । इसमें गोओं और गोपियों को श्रुतिरूपा कहा है ऐसी ये गौएँ आधिदैविक हैं ।

प्रकाशकारजी का कहना है कि **'बृहद्वनं'** बृहत् शब्द से वन को धर्म का हेतु और अक्षर रूप बताया गया है ।

श्रीलेखकारजी कहते हैं कि **'बृहद्वनं'** पद का तात्पर्य यह है कि भगवान् के यहाँ गोचारण रूप धर्म कीसिद्धि होगी ।२६।

"एवं देशकुशलतां पृष्ट्वा" इस प्रकार देश का कुशल पूछकर अब वसुदेवजी बालकों का कुशल पूछते हैं कि **भ्रातर्मम सुतः**—श्रीनन्दजी को **'भ्रातः'** कहने का यह भाव है कि किसी के पास स्त्री व पुत्र छोड़ना अयोग्य है, लेकिन मैंने दूसरे के पास नहीं छोड़े हैं, ये तो मेरे भाई हैं, मैंने तो मेरे भाई के पास भेजे हैं ये दूसरे नहीं । **'मम सुतः'** का भाव यह है कि वसुदेवजी को अपना स्पष्ट अनुभव था कि मेरा पुत्र है । माता के साथ कुशल से तो हैं न ? मेरे भैया ! बालक के साथ है वह और अन्य यशोदा आदि लालन के लाड़न पालन पोषण तो करेंगे लेकिन रक्षा तो हे भाई ! आप को ही करनी है । **'तातं भवन्तं मन्वानः'** भाव यह है कि आपको पिता मानकर बालक दीनता प्रकट करता है । भैया ! पालनादि तो लौकिक है, उसके पूछने की आवश्यकता नहीं है, क्योंकि नन्द, यशोदा आप दोनों पालन, पोषण और प्रीणन के अनन्तर उपलालन—ये सब प्रेम से करते ही हो । भगवान् के लिये तो पूछना ही नहीं किन्तु दूसरी रीति से तो पूछ ही लिया है ।

लेखकारजी कहते हैं कि २६ वें श्लोक में देशकुशलता के पूछने का आन्तरिक आशय तो भगवान् की अथवा दोनों बालकों की कुशलता पूछने का था । यदि देश में घृत, धान्य, आरोग्य आदि हैं तो हमारा पुत्र भी सुखपूर्वक आनन्द में होगा । श्री वसुदेवजी इस श्लोक में स्पष्ट रूप से बलभद्रजी की कुशलता पूछते हैं परन्तु सामान्य प्रश्न से दोनों बालकों की कुशलता पूछ ली है ॥ २७ ॥

'नन्विदानीं तवापि' नन्दजी के मन में यह शङ्का हो कि भैया आप के पास भी सर्व समृद्धि है फिर क्यों दीनता दिखा रहे हो ? ऐसी शङ्का हो तब कहते हैं कि **पुंसस्त्रिवर्गोऽभिहितः**—यद्यपि शास्त्रों में पुरुष के लिये त्रिवर्ग सिद्ध करने का विधान है, किन्तु उस त्रिवर्ग से सुहृदों को भी लाभ हो, न कि प्राप्त करने वाले अकेले को ही लाभ हो । अकेले के लिये तो, त्रिवर्ग सिद्ध करने का शास्त्रविधान नहीं है । अकेला तो चौथे पुरुषार्थ मोक्ष को ही सिद्ध करे । श्लोक में 'हि' शब्द इसी अर्थ में दिया है कि निश्चयपूर्वक अकेले को मोक्ष हो सिद्ध करना चाहिये । सुहृद् पद से चेतन मात्र का ग्रहण करना इससे कहीं न कहीं त्रिवर्ग के फल में सुहृद मिल ही जाते हैं । सुहृदों के सम्बन्ध मात्र से, त्रिवर्ग का उपयोग नहीं है, किन्तु सुहृदों द्वारा रस पुष्ट हुआ त्रिवर्ग सार्थक होता है; ऐसा हो तो क्या ? इसका उत्तर देते हैं कि उस त्रिवर्ग सुहृदों को यदि लाभदायी न हो और सुहृदों को कष्ट हो, तो त्रिवर्ग सिद्धि पुरुषार्थ रूप और सार्थक नहीं है । त्रिवर्ग भोग में सुहृद् ही मुख्य हैं, जैसे वसुदेवजी के पास त्रिवर्ग धर्म, अर्थ और काम सिद्ध भी थे किन्तु वसुदेवजी नन्दजी को अपने घर बुला नहीं सकते हैं क्योंकि नन्दजी को बुलाने से वसुदेवजी के पुत्रों का नाश करने वाले कंस को यह निश्चय होगा कि नन्दजी के यहाँ जो बालक श्रीकृष्ण है वह वसुदेवजी का पुत्र है इसलिये वसुदेवजी नन्दजी को अपने पास नहीं बुलाते हैं । जिससे वसुदेवजी का त्रिवर्ग सुहृदों के उपयोग न आने से व्यर्थ ही है । इस कारण से वसुदेव को दीनता दिखाना योग्य ही है ।

श्रीवल्लभलालजी लेख में स्पष्ट करते हैं कि सुहृद् शब्द से मात्र सम्बन्धी न समझे किन्तु चेतनमात्र को समझे यद्यपि तीन पुरुषार्थों में से काम पुरुषार्थ में तो सम्बन्धियों का स्पष्ट उपयोग होता है किन्तु धर्म और अर्थ में दूसरों का भी उपयोग होता है जैसे यज्ञादिक धर्म कार्य में ऋत्विक् एवं व्यापारादि अर्थ कार्य में काम करने वाले सेवक आदि का उपयोग होता है । अतः **'सुहृद्'** शब्द से चेतनमात्र का ग्रहण करना चाहिये ।

श्रीलालूभट्टजी योजनाकार **'आत्मनः कंसस्य पुत्रमारकत्वान्नाकारणं देवकी पुत्रत्वं संभाव्येत'** के सम्बन्ध में अपनी सम्मति देते हैं कि नन्दजी ने वसुदेवजी को नन्द महोत्सव में नहीं बुलाया कारण कि कंस वसुदेवजी के पुत्रों का विनाशक है एवं उनके बुलाने से कंस समझेगा कि यह देवकीजी के पुत्र हैं तो अनर्थ होगा इसलिये नन्दजी ने मुझे बुलाया नहीं किन्तु सुहृदों के न होने से उत्सव में आनन्द नहीं हुआ । अतः नन्दजी के त्रिवर्ग की भी मेरी तरह सार्थकता नहीं हुई । इस पंक्ति के कहने से वसुदेवजी का यह आशय प्रकट होता है ।

श्रीविट्ठलनाथजी का मन्तव्य है कि **'आत्मनः कंसस्य'** वसुदेवजी के नन्दजी अतिप्रिय थे इसलिये नन्दजी को प्रसन्न करने के लिए उन्हें अपने घर पर बुलाना उचित था। तो भी वसुदेवजी ने इसलिये नहीं बुलाया कि इससे कंस समझेगा कि यह देवकी का पुत्र है तो नन्दजी का अनिष्ट करेगा। जिससे मेरे प्रिय नन्दजी दुःखी होंगे इसलिये नहीं बुलाया। इस तरह दोनों का सम्बन्ध बताया। साधन बल का त्याग जिन्होंने भगवदाश्रय ही लिया है उनका फलरूप भगवान् गोकुल में प्रकट हुआ है इसलिये हम सब तरह से निश्चिन्त हुए हैं ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तं प्रियतममागतं वसुदेवं दृष्ट्वा प्रीतः प्रसन्नचित्तः प्रेम्णा विह्वलो व्याकुलश्च नन्दः सहसा झटिति उत्थाय दोर्भ्यां भुजाभ्यां सस्वजे आलिङ्गितवानित्यन्वयः। उत्थाने दृष्टान्तमाह—देह इति। मूर्च्छितो देहो यथा प्राणे समागते शीघ्रमेवोत्तिष्ठति तथेत्यर्थः ॥ २१ ॥ ततश्च नन्देन पूजितः पाद्यासनादिना सत्कृतः अनामयं कुशलं पृष्ट्वा आदृतश्च। अतः सुखं यथा स्यात्तथा आसीन उपविष्टो वसुदेवो नन्दं प्रतीदं वक्ष्यमाणमाहेत्यन्वयः। एवमागत्य प्रश्ने हेतुं सूचयन्नाह-प्रसक्तेति। आत्मजयो रामकृष्णयोः प्रसक्ता धीर्यस्य सः! तद्वृत्तान्तज्ञानार्थं भङ्ग्यन्तरेण पृष्टवानित्याशयः। 'तद्दृढप्रश्नाभिप्रायज्ञाने त्वं समर्थोऽसि, बहुदेशाधिपतित्वात्' इत्याशयेन सम्बोधयति—विशां देशानां पते इति ॥ २२ ॥ तद्वाक्यान्येवाह—दिष्ट्येति षड्भिः। हे भ्रातः! अप्रजस्य अपत्यरहितस्य ते तव इदानीं यत् प्रजा समपद्यत प्राप्ता तत् दिष्ट्येत्यन्वयः। 'दिष्ट्या' इति आनन्दद्योतकमव्ययम्। तेनास्माकं महानानन्दो जात इत्यर्थः। एवमग्रेऽपि। आनन्दाधिक्ये हेतुमाह-प्रजाया आशाया निवृत्तस्येति। तत्रासामर्थ्ये हेतुमाह—प्रवयस इति। वृद्धस्येत्यर्थः। न च "अग्रे मथुरावासिनां वृद्धानामपि भगवद्दर्शनादिना यौवनप्राप्तेर्वक्ष्यमाणत्वान्नन्दादीनां सा कुतो न" इति शङ्कनीयम्, वृद्धस्याभिनवबालके स्नेहाधिक्यस्य तद्बालचरित्रानुभवसुखाधिक्यस्य च प्रसिद्धत्वात्तदर्थं भगवदिच्छयैव तेषां वृद्धत्वस्थितिः। पुत्रपदोपादानेऽनृतवादः स्यात्, कन्येत्युक्तौ च नन्दस्य भ्रमः प्रश्नादिकं च स्यात्, अत उभयं विहाय उभयसाधारणस्य प्रजापदस्योपादानमिति बोद्धव्यम् ॥ २३ ॥ अद्य भवान् पुनर्भवः पुनर्जात इव उपलब्धो दृष्ट इत्यपि दिष्ट्येत्यन्वयः। तत्र हेतुमाह—संसारेति। "यथा चक्रे स्थितानां पिपीलिकादीनां तत्र स्थितिरपि दुर्लभा, परस्परं दर्शनं मेलनं त्वशक्यमेव, यदि कदाचिद्दर्शनादिकं भवति तदा पुनर्जातस्येव भवति, तथा संसारेऽपि" इति सूचयितुं चक्रपदम्। तत्रापि दुखहेतुपापानां बाहुल्यात्तद्वशाच्छत्रूणां दर्शनं सम्भवत्यपि प्रियाणां मित्राणां दर्शनं तु दुर्लभमेव, सुखहेतुपुण्यानां दुर्लभत्वादित्याशयः ॥ २४ ॥ उक्तमेव स्पष्टयति-नेति। हे प्रिय! सुहृदां मित्राणां सम्यक् सुखपूर्वकमेकत्र वासो नैव भवति। तत्र हेतुमाह—चित्रकर्मणामिति। कर्मणां विचित्रत्वात्तद्वशवर्तिनां मध्ये कस्यचित् पुण्यवशात् सुखं भोक्तव्यम्, कस्यचित् पापवशाद्दुःखं भोक्तव्यम्, तथा चोभयविधभोगयोः परस्परविरोधेन परस्परप्रीतिपूर्वकमेकत्र स्थितानामसम्भवात्तद्वशाद्वियुज्यन्ते इत्यर्थः। तत्र दृष्टान्तमाह—ओघेनेति। प्लवन्तीति प्लवाः तृणकाष्ठादयः, तेषां स्रोतसो नद्या ओघेन प्रवाहेण व्यूह्यमानानां नीयमानानां क्षणमात्रं मिलितानामपि यथा एकत्र स्थितिर्न भवति तद्वदित्यर्थः ॥ २५ ॥ पुत्रयोः प्रसक्तबुद्धित्वात् पशव्यादिरूपे तस्मिन् वने निर्दोषगोपयशोदयादिप्रभूतगोपिकास्तन्यादिना पुत्रक्षेमविवित्सया पृच्छति—कच्चिदिति। यत्र त्वमास्से, तद्बृहद्वनं कच्चित् पशव्यं पशूनां हितमस्तीत्यन्वयः। कच्चिदितीष्टपरिप्रश्ने, तेन तदस्माकमित्यर्थः। पशव्यत्वमेव स्पष्टयति—निरुजं रोगरहितम्। भूरीणि अम्बूनि तृणानि वीरुधो लताश्च यस्मिंस्तत्। कालान्तरनिवासस्थानप्रश्नस्यानुपयोगादाह—अधुनेति। अधुनाऽप्येकाकी कदाचित् कार्यार्थमन्यत्रापि तिष्ठति तत्प्रश्नोऽप्ययुक्तोऽत आह—सुहृद्भिः बंधुभिर्वृत इति ॥ २६ ॥ हे भ्रातः! मात्रा सह मम सुतो भवन्तं तातं पितरं मन्वानो भवद्भ्यां दम्पतिभ्यामुपलालितो भवद्व्रजे कच्चित् कुशलमास्ते इति शेषेणान्वयः ॥ २७ ॥ एवं पुत्रयोः कुशलं पृष्ट्वा "त्वमस्माकं सुहृदामुपकारेण कृतार्थ एव, यशोधर्मादिलाभात्। मम तु कंसभयात् पुत्रादीनां स्थानेषु निलीयस्थितत्वात्तत्पालने सामर्थ्याभावेन धनादिकं सर्वं व्यर्थमेव" इत्याशयेन सामान्यतो लोकमर्यादामाह—पुंस इति। हि यस्मात्। पुंसस्त्रिवर्गो धर्मार्थकामाख्यः सुहृदो भ्रातृपुत्रादिबन्धून् प्रति अनुभावितः सम्पादित एव विहितो वृद्धैरनुज्ञातोऽतस्तेषु सुहृत्सु क्लिश्यमानेषु सत्सु त्रिवर्गोऽर्थाय न कल्पते सुखाय न भवति ॥ २८ ॥

अन्वितार्थप्रकाशिका

तं दृष्ट्वेति ॥ तं प्रियतममागतं वसुदेवं दृष्ट्वा प्रीतः प्रसन्नचित्तः प्रेम्णा विह्वलो व्याकुलश्च नन्दः देहो मूर्छितो यथा प्राणे समागते शीघ्रमेवोत्तिष्ठति तथेत्यर्थः। सहसा झटिति उत्थाय दोर्भ्यां भुजाभ्यां सस्वजे आलिङ्गितवान्। ननु नमश्चकार वयसा ज्येष्ठत्वात्। प्रेमवैवश्याद्वा ॥ २१ ॥ पूजित इति ॥ हे विशांपते राजन्! ततश्च नन्देन स्ववासे समागतत्वात् पूजितः पाद्यासनादिना सत्कृतः अनामयं कुशलं पृष्ट्वा आदृतश्च अतः सुखं यथा स्यात्तथा आसने आसीनः उपविष्टः आत्मजयो रामकृष्णयोः प्रसक्ता धीर्यस्य सः वसुदेवो नन्दं प्रतीदं वक्ष्यमाणमाह स्म ॥२२॥ दिष्ट्येति ॥ हे भ्रातः! अप्रजस्य सन्तानरहितस्य असिजभाव आर्षः। प्रवयसः वृद्धस्य प्रजाया आशाया निवृत्तस्य च ते तवेदानीं यत्प्रजा समपद्यत प्राप्ता तत् दिष्ट्या भद्रं जातम्। पुत्रो जात इत्युक्ते मिथ्योक्तिः। कन्येत्युक्ते नन्दस्याप्रीतिः। अतः प्रजेति सामान्यापत्यवाचकशब्दप्रयोगः। मत्पुत्रन्यासं स्वकन्याचौर्यं च नन्दो जानाति न वेति शङ्कया वा प्रजाशब्दप्रयोगः। नन्दस्य प्रवयस्त्वादिकं पुत्रे स्नेहाधिक्यसूचनार्थम् ॥ २३ ॥ दिष्ट्येति ॥ अस्मिन् संसारचक्रे वर्त्तमानः

भवान् अद्य पुनर्भवः पुनर्जात इव उपलब्धो दृष्टः इत्यपि दिष्ट्या। यतः प्रियदर्शनं दुर्लभं यद्वा बन्धनादिक्लिष्टस्य मम पुनर्भवो जन्मैव वर्त्तमानः पुनर्जन्मैवाद्याभूदित्यर्थः। यतो भवानुपलब्ध इत्येतावत्कालपर्यन्तमहं भवदनुपलम्भान्मृत इवासमिति भावः ॥२४॥ नैकत्रेति। हे प्रिय! चित्रकर्मणां नानाविधकर्मवशवर्तिनां सुहृदां स्रोतसो नद्या ओघेन प्रवाहेण व्यूह्यमानानां नीयमानानां प्लवन्ते प्लवाः तृणकाष्ठादयस्तेषां क्षणमात्रं मिलितानामपि यथैकत्र स्थितिर्न भवति तद्वत् एकत्र संवासो न भवति। प्रियश्चासौ संवास इत्येकं पदं वा ॥ २५ ॥ कच्चिदिति ॥ यत्र सुहृद्भिर्वृतः त्वम् अधुना आस्से तत् बृहद्वनं कच्चित् इति प्रश्ने। पशव्यं पशूनां हितं निरुजं नीरोगम्। ह्रस्वत्वं छन्दोनुरोधात्। रुजा टाबन्तः। भूरीणि अम्बूनि तृणानि वीरुधो लताश्च यस्मिंस्तादृशमस्ति। अत्र पशव्यादिरूपे तस्मिन्वने निर्दोषगोपयोदध्यादिप्रभूतगोपिकास्तन्यादिना स्वपुत्रक्षेमजिज्ञासया प्रश्नः। "प्रसक्तधीः स्वात्मजयोः" इत्युक्तत्वात् ॥ २६ ॥ भ्रातरिति ॥ हे भ्रातः! मात्रा सह मम सुतो भवंतं तातं पितरं मन्वान इति वर्त्तमानसामीप्यान्मंस्यमान इत्यर्थः। भवद्भ्यां दम्पतिभ्यामुपलालितो भवद्व्रजे कच्चित्कुशलमास्त इति रामकृष्णयोर्जन्माप्यल्पकालान्तरमेव। अत एवैतयोर्युगपद्रिङ्गणादि वक्ष्यते ॥ २७ ॥ पुत्रादर्शनक्लेशानाह पुंस इति ॥ हि यस्मात् पुंसस्त्रिवर्गो धर्मार्थकामाख्यः सुहृदो भ्रातृपुत्रादिबन्धून् प्रत्यनुभावितः संपादित एव विहितो युक्तः वृद्धैः शास्त्रेण चानुज्ञातो वा नतु स्वमात्रपर्यवसितः। अतस्तेषु सुहृत्सु क्लिश्यमानेषु सत्सु त्रिवर्गोऽर्थाय न कल्पते सुखाय न भवति ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सस्वजे मिलितवान् ॥ २१ ॥ अनामयं कुशलं विशांपते हे मनुष्याणां पते ॥ २१ ॥ हे भ्रातः प्रवयसो वृद्धस्य प्रजा संततिः समपद्यत जाता इति यत् तद्दिष्ट्याभद्रम् ॥ २३ ॥ अस्मिन् संसारचक्रे वर्त्तमानः पुनर्भवः मम पुनर्जन्म इव मया अद्य उपलब्धः प्राप्तः कुतः यतः प्रियदर्शनं दुर्लभं जनानां पुनर्जन्मतुल्यं भवति ॥ २४ ॥ हे प्रिय सुहृदामतिस्नेहवतां एकत्र संवासो न स्यात् तेषां विचित्रकर्मत्वात् स्रोतसो जलप्रवाहस्य समूहेन प्लवानां तृणकाष्ठादीनां यथा एकत्र स्थितिर्न स्यात् तद्वत् ॥ २५ ॥ पशोर्हिं जनकं पशव्यं भूरीणि अंब्वादीनि यस्मिन् निरुजं कुशलं कच्चित् रुजेरिगुपधलक्षणः कप्रत्ययः यत्र वने त्वं आसे स्थितोऽसि ॥ २६ ॥ मम सुतः रामः मात्रा रोहिण्या सह दंपतिभ्यामुपलालितः सन् निरुजः कच्चिदस्ति ॥ २७ ॥ सुतादर्शनखेदेनाह पुंस इति सुहृदः आसन्नसंबंधि पुत्रादीन् प्रतिप्रापतः धर्मार्थकामरूपः यः त्रिवर्गः स हि पुंसो नरस्य विहितो योग्यः महद्भिः प्रोक्तो वा ततः तेषु क्लिश्यमानेषु सत्सु सोऽर्थाय न कल्पते सार्थको न भवतीत्यर्थः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ नन्दः, आगतं स्वावमोचने समायातं, तं स्वभ्रातरं वसुदेवं, दृष्ट्वा, आगतं प्राणं प्रति, देहः इव, सहसा उत्थाय प्रीतः, प्रेमविह्वलश्च सन्, प्रियतममतिप्रेमास्पदं वसुदेवं, दोर्भ्यां, सस्वजे समालिङ्गितवान्। अनेन निरतिशयप्रीतिविषयत्वं सूचितम् ॥ २१ ॥ पूजित इति ॥ ततः पूजितः नन्देन कृतपूजनो वसुदेवः, सुखं यथा तथा, आसीनमुपविष्टं नन्दं, आदृत आदरयुक्तः सन्, अनामयमारोग्यमाधिव्याधिराहित्यमिति यावत्। पृष्ट्वा, हे विशां पते, स्वात्मजयोः स्वीयद्वयोरपि पुत्रयोः प्रसक्तधारासक्तचित्तः सन्, इद वक्ष्यमाणं, आह ॥ २२ ॥ तदेवाह षड्भिः ॥ दिष्ट्येति ॥ हे भ्रातः, अप्रजस्यानपत्यस्य सतः प्रवयसः वृद्धस्य, अत एव, प्रजाशायाः संतानवाञ्छायाः, निवृत्तपुत्राशस्येत्यर्थः। ते तव, इदानीमधुना, प्रजा पुत्रः, समपद्यत जातः। इति यत्, एतत्, दिष्ट्या। दिष्ट्येत्यानन्दद्योतकमव्ययम्। अयमस्माकं महानानन्दो जात इत्यर्थः। एवमुत्तरत्रापि ॥२३॥ दिष्ट्येति। अस्मिन् संसारचक्रे, वर्त्तमानः भवान्, पुनः भवतीति पुनर्भवः पुत्ररूपेण पुनरुत्पन्नः, एतत् दिष्ट्या। तथा अद्य भवान्, मया उपलब्धो दृष्टः इत्येतदपि, दिष्ट्या। तत्र हेतुः। प्रियदर्शनं दुर्लभम्। यद्वा, अस्मिन् संसारचक्रे वर्त्तमानः एव अहं पुनर्भवः, कंसभयस्य कथंचिन्निवृत्तत्वात् पुनर्जातप्राय एवेत्यर्थः। एवंभूतेन मया, अद्य भवान् उपलब्ध इति। अन्यत्पूर्ववत्। यद्वा। पूर्वार्द्धं पूर्ववत्। अद्यास्मिन्नेव जन्मनि, भवान् उपलब्धः संप्राप्तः, एतद्दिष्ट्या प्राक् शृङ्खलितस्य मम, प्रियदर्शनं प्रियतमस्य भवतो दर्शनं, दुर्लभम् ॥२४॥ दुर्लभत्वमेवाह। नैकत्रेति। हे प्रिय प्रेमास्पदीभूत नन्द, चित्राणि नानाविधानि कर्माणि येषां तेषां, सुहृदां, एकत्र एकस्मिन्नेव स्थाने, संवासः, न भवति, कथमिव। स्रोतसः प्रवाहस्य, ओघेन पूरेण, व्यूह्यमानानामितस्ततो विविधं नीयमानानां, प्लवन्त्युत्प्लुत्य गच्छन्तीति प्लवास्तृणकाष्ठादयस्तेषां, यथा एकत्र वासो दुर्लभस्तद्वत्। प्रियश्चासौ संवासश्च प्रियेण सह संवास इति वा। चित्रकर्मणामिति प्लवानामपि विशेषणम् ॥ २५ ॥ पशव्यादिरूपे तन्निवासभूतवने निर्दोषगोपयोदध्यादिना प्रभूतगोपिकास्तन्यादिना पुत्रक्षेमजिज्ञासया पृच्छति। कच्चिदिति। हे भ्रातः, यत्र बृहद्वने, त्वं सुहृद्वृतः स्वसुहृज्जनसहितः, अधुना, आस्से निवससीत्यर्थः। तत् बृहद्वनं, पशव्यं पशुभ्यो हितकरं, निरुजं निरोगकरं, अम्बु जलं च तृणानि घासाश्च वीरुधो गुल्मानि च भूरयो जलादयो यस्मिन् तथाविधं, कच्चित्। कच्चिदितीष्टप्रश्नद्योतकमव्ययम्। सर्वथा कुशलमास्ते किमित्यर्थः ॥ २६ ॥ भ्रातरिति। हे भ्रातः; भवन्तमेव, तातं पितरं मन्वानः, मम सुतः रोहिण्यास्तनय इत्यर्थः। मात्रा स्वजनन्या सह, भवद्व्रजे, भवद्भ्यां, उपलालितः उपलालनतां गमितः, कच्चित्। कुशल्यास्ते किमित्यर्थः ॥ २७ ॥ अथ सत्यपि संताने तद्दर्शनस्पर्शनोपलालनाद्यभावान्निर्विण्णः किंचिल्लोकपरिपाट्याह। पुंस इति। त्रयाणां धर्मार्थकामानां वर्गस्त्रिवर्गः, सः यदि, सुहृदः देहानुबन्धिनः प्रति, अनुभावितोऽनुभवं प्रापितः, तर्हि

तु पुंसः, सः विहितः युक्तः । अन्यथा तु नेत्याह । तेषु सुहृत्सु, क्लिश्यमानेषु सत्सु, त्रिवर्गः, अर्थाय प्रयोजनाय, न कल्पते हि । गृहिणां स्वाश्रमे धर्माद्यनुसेवनमेव परमसुखरूपं तच्च पुत्रादिसुहृद्भिः सह संसेवितं स्यात्तदा तु तत्तथाविधमेव, सुहृदादीन्विहाय यदा संशीलितं तदा तन्न सुखावहमिति भावः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पूजित इति १०. ५. २२.

जानन् जगत्पतिरयं खलनाशकश्च श्रीकान्त इत्यनुभवादपि तत्त्वदृष्ट्या ।
आनर्द यत्तदवनाय स नन्दमस्मात् मन्ये ममत्वसरणिर्भुवि दुर्विलङ्घ्या ॥ १३ ॥

कृष्णप्रिया

जैसे देह में प्राण संचार होने पर, देह उठ खड़ी हो जाती है वैसे ही नन्दजी भी वसुदेवजी को देखकर सहसा उठ खड़े हो गये, प्रसन्न हुए और प्रेम से व्याकुल हो दोनों भुजाओं से प्रियतम से आलिङ्गन किया ॥ २१ ॥ नन्दरायजी से सुपूजित, सुख से विराजमान, कुशल प्रश्नों से समादर पाये हुए अपने पुत्रों में आसक्त बुद्धि वाले वसुदेवजी यह कहने लगे कि हे वैश्यों के स्वामी ! हे नन्दराय ! हे व्रजराज ॥ २२ ॥ हे भाई ! आप तो अत्यन्त वृद्ध हो गये आपको न कोई सन्तान थी भैया ! आप संतान की आशा भी छोड़ चुके थे। यह बड़े आनन्द की बात है कि अग्रज तुम्हें अब संतान प्राप्त हुई ॥ २३ ॥ परम हर्ष की बात है कि इस संसार चक्र में चक्कर काटते हुए मैंने नया जन्म पाया है कि आज मुझे मिले हो। यह सद्भाग्य से हुआ है क्योंकि प्रियतम के दर्शन दुर्लभ होते हैं ॥ २४ ॥ जल के प्रवाह से बहती हुई नौका, तृण और काष्ठ आदि का निवास जैसे एक स्थान पर नहीं होता, वैसे ही विचित्र प्रारब्धवाले सम्बन्धियों का सुख देनेवाला निवास एक स्थान पर संभवित नहीं ॥ २५ ॥ प्यारे भैया ! आप आज जिस महावन में अपने बन्धु बान्धवों के साथ विराजमान हो वह महावन तुम्हारे पशुओं के रमण युक्त है न ! फिर तुम्हारे पशु, रोग आदि रहित तो है न ! और वहाँ जल, घास और लता आदि की विपुलता तो है न ! ॥२६॥ मेरे भैया ! मेरा पुत्र जो आपको पिता करके मानता है एवं आप दोनों प्रेम के साथ जिसका लालन पालन करते हो, वह लालन निज माता के साथ आप के गोकुल व्रज में कुशल है न ! ॥ २७ ॥ पुरुष के लिए वही (धर्म, अर्थ, काम नामका त्रिवर्ग शास्त्रविहित है जिससे बन्धु बान्धवों का भी अभ्युदय हो यदि निज बन्धु बान्धव क्लेशों को भोग रहे हैं तो वह त्रिवर्ग श्रेयस्कर नहीं है ॥ २८ ॥

[1]

अहो ते देवकीपुत्राः कंसेन बहवो हताः । एकावशिष्टावरजा कन्या सापि दिवं गता ॥ २९ ॥
नूनं ह्यदृष्टनिष्ठोऽयमदृष्टपरमो जनः । अदृष्टमात्मनस्तत्त्वं यो वेद न स मुह्यति ॥ ३० ॥

वसुदेव उवाच

करो वै वार्षिको दत्तो [2]राज्ञे दृष्टा वयं च वः । नेह स्थेयं बहुतिथं[3] सन्त्युत्पाताश्च गोकुले ॥ ३१ ॥

[4]

इति नन्दादयो गोपा[5] प्रोक्तास्ते शौरिणा ययुः । अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य[6] गोकुलम्॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे[7] नन्दवसुदेवसङ्गमो नाम पञ्चमोऽध्यायः ॥ ५ ॥

कर्दमक्षमा

अन्वयः—अहो ते बहवः देवकीपुत्राः कंसेन हताः एका अवरजा कन्या अवशिष्टा सा अपि दिवं गता ॥ २९ ॥ नूनम् अयम् जनः अदृष्टनिष्ठः अदृष्टपरमः आत्मनः तत्वम् अदृष्टम् (एवं) यः वेद स न मुह्यति ॥ ३० ॥ वार्षिकः करः राज्ञे वै दत्तः च वयं वः दृष्टाः इह बहुतिथं न स्थेयं च गोकुले उत्पाताः सन्ति ॥ ३१ ॥ शौरिणा इति प्रोक्ताः नन्दादयः गोपाः तम् अनुज्ञाप्य अनडुद्युक्तैः अनोभिः गोकुलं ययुः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

---

१. नन्द उवाच–श्रीधर. वंशी. गिरि. भक्त. । २. राज्ञो–इति कस्यचित् । ३. बहुदिनम्–वीर. विजय. । ४. शुक उवाच–श्रीधर. वंशी. गिरि. भक्त. । ५. गोपाः श्रीधरः वंशी. वीर. गिरि. भक्त. । ६. अनुज्ञाय–वीर. । ७ पूर्वार्धे श्रीधर. ; नन्दवसुदेवसमागमः पञ्चमो श्रीधर. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

नंदो वसुदेवं सांत्वयन्नाह । अहो इति ॥ २९ ॥ अदृष्टे एव निष्ठा समाप्तिर्यस्य सः यदैव पुत्रादिसुखप्रदमदृष्टं हीयते तदैव ते पुत्रादयो न भवंतीत्यर्थः । तथा अदृष्टपरमः अदृष्टमेव परमं यस्य सः । यद्यपि पुत्रादयो वियुक्तास्तथाऽपि तानदृष्टमेव पुनः संगमयतीत्यर्थः । एवमदृष्टमात्मनस्तत्त्वमव्यभिचारिकारणं सुखदुःखयोर्यो वेद स न मुह्यति तस्मादिदानीं त्वया न दुःखं भावनीयं मृतानामपि वियुक्तानामपि च कालांतरे दर्शनयोगयोः संभवात् । अस्मदादिभिरपि कालांतरे तद्वियोगे सत्यतप्यत एव न दुःखं संभावनीयमिति नंदस्य दैवी वागेषा भावि सूचिका ॥ ३० ॥ तां बुद्ध्वा वसुदेवो दुःखं त्यक्त्वा नंदमाह । करो वै इति । वो युष्माभिः ॥ ३१–३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पू० टीकायां पंचमोऽध्यायः ॥ ५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नंद इति श्रुत्वा । सांत्वमाह त्वत्पृष्टं मद्व्रजे क्षेममहं किं ब्रवीमि यदहं त्वद्दुःखेनैव महादुःखीत्याह—अहो इति । किञ्च मत्पुत्रन्यासादिकमस्य न विदितमिति ज्ञात्वा वसुदेवो गताशंकोन्तरानंदितो बभूवेत्यपि ज्ञेयञ्चात्र ॥ २९ ॥ इत्यर्थ इति । अदृष्टाधीनमेव दुःखादीत्यर्थः । अदृष्टं प्राचीनं कर्म । इत्यर्थ इति । संयोगवियोगावप्यदृष्टाधीनाविति भावः । मृतानामपीति जमदग्निसत्यवदादौ तथा दृष्टत्वादिति भावः । अस्मदादिभिरपि तद्वियोगे रामकृष्णवियोगे । कालांतरे आगामिनि समये । न दुःखं विभावनीयमिति संबंधः । यद्वा—न मृषेति हेतोर्हरिं मनोहरं स्वसुतं पथि विशेषतो न जाने तत्र किं वृत्तमिति चिंतयन् शरणं निजगृहं जगाम । दैवी दैवोच्चारिता । एषाऽस्मदादिभिरपीत्यादिरूपा । भाविसूचिका भविष्यद्बोधिका ॥ ३० ॥ तां नंदप्रोक्तां वाचम् । इह मथुरायाम् । बहुतिथं चिरकालं पूरणप्रत्यये डटि तिथुगागमः "बहुपूगगणसंघस्य तिथुक्" इति सूत्रेणेति । उत्पाता अनर्थसूचका उपद्रवाः ॥ ३१ ॥ अनोभिः शकटैः "अनः स्याद्वासुदेवान्ये जनन्यां शकटेऽपि च" इति धरणिः । अनडुद्युक्तैर्वृषयुक्तैः ॥ ३२ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भवता यद्व्रजक्षेमं पृष्टं तदस्त्येव वयं तु त्वद्दुःखेन तदपि कथयितुं न शक्नुम इति व्यञ्जयंस्तमेवानुशोचति—अहो इति खेदे ॥ २९ ॥ सान्त्वयति – नूनं निश्चये हि एव अदृष्टनिष्ठ एव न मुह्यति मोहेन शोकं न प्राप्नोतीत्यर्थः । अन्यत्तैः । तत्र न भवन्ति दर्शनं न प्राप्नुवन्तीत्यर्थः । मृतानामपीति जमदग्निसत्यवदादौ दृष्टत्वादिति भावः । तस्मादित्यादिकं स्वस्यैव मत्यनुसारेण नतु श्रीमन्नन्दस्येति न रसभङ्गः सत्यपीत्यस्य दर्शनयोगयोः सम्भवादित्यनेनैव सम्बन्धः यद्वा अदृष्टादेव निष्ठा मरणं यस्येति तव तत्पुत्राणां च तादृशादृष्टत्वात्ते मृता इत्यर्थः । ननु, तर्हि जन्मैव वरं तत्राह, अदृष्टमेव परमं जन्मकारणं यस्येति एवं च परस्परसंवादो मनुष्यलीलयैवेति ज्ञेयम् ॥ ३० ॥ अहो ते देवकीपुत्रा इत्यादि श्रीनन्दोक्त्या लोकेषु पुत्रपरिवर्तनज्ञानादिशङ्कानिवृत्तेः परमहृष्टः श्रीवसुदेवस्तं प्रति समागममूलमुपदिशति—कर इति । वो युष्माभिः करो दत्त एव वयं च दृष्टा एव तस्माद्वो युष्माभिर्महाधनित्वेन विख्यातैरिह लुब्धस्यास्य समीपे बहुतिथं चिरकालं न स्थेयम् अत एव व इति पौनरुक्त्यं व इति बहुत्वं गौरवात् तत्सङ्गिसङ्ग्रहाद्वा वयमिति च तद्दर्शनेनात्मनो बहुमानात् व इति पौनरुक्त्यं भिन्नवाक्यत्वाददोषः । यद्वा वो युस्मदीयाः वयं त्वत्स्नेहेन दिनकतिपयतिष्ठासुन्तं प्रत्याह, बहुतिथम् अत्र राजधान्यां न स्थेयं तथा च श्रीविष्णुपुराणे "दत्तो हि वार्षिकः सर्वो भवद्भिर्नृपतेः करः । यदर्थमागतास्तस्मान्नात्र स्थेयं महाधनैः" इति करो वै इति क्वचित्पाठः बहुतिथमिति पूरणप्रत्यये झटिति थुगागमात् "बहुपूगगणसङ्घस्य तिथुक्" (५।२।५२) इत्यनेन ततो बहुतिथं यथा स्यात्तथा न स्थेयमिति लब्धे बहूनां पूरणीया स्थितिः सा नानुष्ठेयेत्यर्थे चिरकालं न स्थेयम् इत्येव विवक्षितं तथापि निजसङ्गसुखापेक्षया शीघ्रमजिगमिषुमिवालक्ष्य भाषयति सन्तीति ॥ ३१ ॥ प्रकर्षेण न्यायदर्शनादिनोक्ताः अनड्वाहः अनोवहनसमर्थाः महावृषभास्तद्युक्तैरिति शीघ्रगमनार्थं तमनुज्ञाप्य तदनुज्ञामादाय गोकुलं ययुः प्रतस्थिरे ॥ ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां पञ्चमोऽध्यायः । ५ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्थं दुःखशोकपरं श्रीवसुदेवमालक्ष्य तेन पृष्टमपि निजक्षेमवृत्तं विनयेन साक्षादनिरूप्याप्रत्युत्तरेणैव सर्वमनुमोद्य तं सान्त्वयति-अहो इति खेदे ॥ २९ ॥ नूनं निश्चये, 'हि' एव, अदृष्टनिष्ठः एव; न मुह्यति मोहेन शोकं न प्राप्नोतीत्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, अदृष्टादेव निष्ठा मरणं यस्येति तव त्वत्पुत्राणाञ्चैतादृशादृष्टत्वात्ते मृता इत्यर्थः । ननु तर्हि जन्मैव वरम् ? तत्राह

अदृष्टमेव परमं जन्मकारणं यस्येति ॥ ३० ॥ अहो ! ते देवकीपुत्रा इत्यादि श्रीनन्दोक्त्या लोकेषु पुत्रपरिवर्तनज्ञानादि शंकानिवृत्तः परमहृष्टः श्रीवसुदेवस्तं प्रति समागममूलमुपदिशति–कर इति। 'वः' इति बहुत्वं गौरवात्तत्सन्धि-संग्रहाद्वा, वयमिति च तद्द्रष्टृत्वेनात्मनो बहुमानात्। व इत्यस्य पुनरुक्तिर्भिन्नवाक्यत्वाददोषः। यद्वा, वो युष्माकं देयः सर्वोऽपि करः, वो युष्मदीया वयमिति वा, किंवा वो युष्माभिर्महाधनिभिरित्यर्थः। बहुतिथं चिरकालमिह राजधान्यां न स्थेयम्, तथा च श्रीविष्णुपुराणे (५।५।२) 'दत्तो हि वार्षिकसर्वो भवद्भिर्नृपतेः करः। यदर्थमागतास्तस्मान्नात्र स्थेयं महाधनैः ॥' इति, तथापि निजसंगसुखापेक्षया शीघ्रमजिगमिषुमालक्ष्य भावयति–संगीति। एतदपि सर्वं (२२ श श्लो०) स्वात्मजप्रसक्तधीत्वोक्तौ पर्य्यवस्यति, उत्पाताशंकया श्रीनन्दस्य पुत्रार्थं गोकुलत्यागनिवारणात्तथा विविधप्रयत्नेन तदासक्तिविवर्द्धनाच्च यद्यपि यथा कथञ्चिद्भगवत्सम्बन्धमात्रेणाशेषोत्पातानामभावः कुतः साक्षात्तन्निवासवरे श्रीनन्दगोकुले तत्सम्भावनापि, तथापि निखिललोकानन्दकश्रीभगवन्माहात्म्यविहारविशेषसम्पत्त्यर्थम्, तथा तदुत्पातशंकतः श्रीभगवति तत्रत्यानां स्नेहभरवृद्धये च तदिच्छयेव ते स्युरिति ज्ञेयम्। तच्चाग्रे तत्र तत्र व्यक्तं भाति ॥ ३१ ॥ प्रकर्षेण न्यायप्रदर्शनादिनोक्ताः। अनड्वाहो महावृषभास्तद्युक्तैरिति शीघ्रगमनार्थं तमनुज्ञाप्य तदनुज्ञामादाय गोकुलं ययुस्तत्र प्रस्थानं चक्रुः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषिण्यां
श्रीदशम-टिप्पण्यां पञ्चमोऽध्यायः ॥ ५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अदृष्टमात्मन इति आत्मनोपेक्षितं दृष्टान्तत्वेन यो वेदेत्यर्थः ॥ ३०–३१ ॥ शौरिणा वसुदेवेन अनोभिः शकटैः ॥ ३२ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे शुकपक्षीये श्रीसुदर्शनसूरिकृते पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ वसुदेवं सान्त्वयन्नाह नन्दः—अहो इति द्वाभ्याम्। अहो इति खेदे क्षेत्रजत्वशङ्काव्यावृत्तये ते इत्युक्तम् ॥ २९ ॥ एवमनुशोच्याथ तत्त्वबोधेन समाधत्ते—नूनमिति। अयं परिदृश्यमानो जनो नूनं ध्रुवम् अदृष्टनिष्ठ अदृष्ट एव निष्ठा समाप्तिर्यस्य सः अदृष्टसमाप्त्यनुसमाप्तसुखदुःखादिक इत्यर्थः। पुत्रोत्पत्तिविपत्तिप्रयुक्तसुखदुःखकारणभूतादृष्टानुरोधित्वात्तदुत्पत्तिविपत्तिप्रयुक्ते सुखदुःखे न नियते इत्यर्थः—

"यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ !। समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते" ॥

इत्युक्तरीत्या सुखदुःखयोरनियतत्वात्तन्न सामान्येन भवितव्यमिति भावः। अत एवादृष्टपरमः अदृष्टमेव परमं प्रभुः वशी यस्य स अदृष्टायत इत्यर्थः। एवमात्मनः स्वस्य तत्त्वं तस्य सुखदुःखादिमतो भावस्तत्त्वं सुखदुःखादिमत्त्वमदृष्टमदृष्टमूलकं यः पुमान् वेद स न मुह्यति समसुखदुःखो भवतीत्यर्थः। यद्वा सुखदुःखादिकमदृष्टायत्त मत्वाऽदृष्टमतीन्द्रियं स्वसंवेद्यमात्मनस्तत्त्वं याथात्म्यं यो वेद देहविलक्षणात्मयाथात्म्यानुभवपरो भवेत्स न मुह्यति देहतदनुबन्धि प्रयुक्तसुखदुःखवैचित्र्यं न प्राप्नोतीत्यर्थः ॥ ३० ॥ एवं विवेकोद्बोधकं नन्दवचो निशम्य नन्दं प्रति प्रकृत वक्तव्यमाह वसुदेवः—कर इति। राज्ञे कंसाय वार्षिकः करो दत्तः अतः प्रयोजनं नावशेषितमिति भावः। ते त्वया वयं दृष्टाश्चातोऽत्र त्वया बहुदिनं बहूनां दिनानां समूहः तन्न स्थेयम् अत्यन्तसंयोगे द्वितीया बहुदिनमिति वो हेत्वर्थः यतः गोकुले बहव उत्पाताः सन्त्यतो नात्र स्थेयमित्यर्थः ॥ ३१ ॥ इत्थं शौरिणा वसुदेवेन प्रोक्तास्ते नन्दादयो गोपास्तं वसुदेवमनुज्ञायापृच्छ्य तं कंसं चाऽनडुद्भिर्वृषभैर्युक्तैरनोभिः शकटैर्गोकुलं ययुः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां पञ्चमोऽध्यायः ॥ ५ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सुतास्तेऽपि सुखिनः कच्चिदिति शेषः ॥ २९ ॥ वसुदेवस्य स्वस्य तत्त्वज्ञानमस्तीति सूचयति—नूनमिति। नूनं प्रायः अयं जनः दृष्टे प्रत्यक्षे कार्ये निष्ठा नितरां स्थितिर्यस्य स तथा हि एवम् अदृष्टपरमो न दृष्टमेव जानाति नादृष्टमित्यर्थः। अत्र य आत्मनः अदृष्टमव्यक्तं तत्त्वं वेद स पुमान् न मुह्यति विपरीतज्ञानी न भवति यथातत्त्वं जानातीत्यर्थः ॥ ३० ॥ नूनमिदानीमस्मिन् काले च उत्पाता अनर्थसूचकाः ॥ ३१ ॥ अनडुद्युक्तैः वृषभयुक्तैः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां पञ्चमोऽध्यायः ॥ ५ ॥

(विजयध्वजतीर्थरीत्या षष्ठः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यद्यपि त्वत्पृष्टं व्रजकुशलं विद्यते तथापि तद्विज्ञापयितुं त्वद्दुःखमेव न शक्नुम इति व्यञ्जयंस्तमेवानुशोचति—अहो इति ॥ २९–३० ॥ कर इति च करादत्र दण्डभयञ्च तथा वैष्णवे तद्वाक्यं नात्र स्थेयं महाधनैरिति बहुतिथमिति पूरणप्रत्ययान्तं बहुकालपर्य्यन्तं व्याप्येत्यर्थः ॥ ३१ ॥ अनडुद्युक्तैरिति शीघ्रगमनार्थप्रसिद्धमेवोक्तम् अनडुद्विशेषव्यञ्जनया ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्वत्पृष्टं मद्व्रजक्षेममस्तीति किं ब्रवीमि यदहं त्वद्दुःखेनैव महादुःखीत्याह—अहो इति । ततश्च मत्पुत्रन्यासादिकमस्य न विदितमिति ज्ञात्वा वसुदेवो गताशङ्कोऽन्तरा नन्दितो बभूवेति ज्ञेयम् ॥ २९ ॥ भो भ्रातः ! अयन्दुष्पारोऽपि विपत्सिन्धुर्विवेकपोतेनैव तीर्य्यतामित्याह—नूनमिति । अदृष्ट एव निष्ठा समाप्तिर्यस्य सः यदैव पुत्रादिसुखप्रदमदृष्टं हीयते तदैव पुत्रादयो न भवन्तीत्यर्थः । अदृष्टमेव परमं मृतवियुक्तपुत्रादीनामपि सङ्गमकारणं यस्य सः एवमदृष्टमात्मनस्तत्त्वं यो वेदेति त्वत्तुल्यः कोऽन्यो विवेकीति तव माऽस्तु मोह इति भावः ॥ ३० ॥ ज्ञाततत्त्वो वसुदेवो यद्वक्तुमागतस्तदाह—कर इति । वै निश्चितं वो युष्माभिः बहुतिथं चिरकालम् ॥ ३१–३२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमे पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीनन्दस्तु नैतावन्मात्रं तव दुःखमन्यदपीत्याह—अहो इति ॥ २९ ॥ सर्वं भगवदायत्तमतस्तत्प्रावण्यं सर्वदुःखनिवृत्तिहेतुरित्याह—नूनमिति । अदृष्टे अतीन्द्रिये भगवति निष्ठा स्थितिर्यस्य सः अदृष्टः परमः प्रवृत्त्यादिहेतुर्यस्य सः भगवदायत्तस्थितिप्रवृत्त्यादिमानयं सर्वोऽपि जन इत्यर्थः । "यदासीत्तदधीनमेवासीत्" इति श्रुतेः—

"सुखं दुःखं भवो भावो भयं चाऽभयमेव च । अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ॥
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ।

इति श्रीमुखोक्तेश्च, यस्तु अदृष्टमेव आत्मनः स्वस्य तत्त्वं मूलं वेद सन् मुह्यति मोहं न प्राप्नोति संसाराद्विमुक्तो भवतीत्यर्थः "ब्रह्मविदाप्नोति परम्" इति श्रुतेः "ज्ञात्वा मां शान्तिमृच्छति" इति श्रीमुखोक्तेश्च ॥ ३० ॥ भगवतः प्रभावं श्रुत्वा प्रसन्नधीस्तल्लीलादर्शनार्थं श्रीनन्दं प्रवर्तयति—कर इति वो युष्माभिः ॥ ३१ ॥ अनडुद्युक्तैरनोभिः शकटैः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चमाऽध्यायार्थप्रकाशः ॥ ५ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

यद्व्रजे क्षेममेवास्ति तद्वक्तुं नाहं प्रभवामि त्वत्क्लेशेन क्लिष्टत्वादितिभावेनाह अहो ते इति । एकावशिष्टेति ततश्च मत्पुत्रन्यासतत्कन्यानयने नन्दो न वेदेति प्रजायदितिरहस्यरक्षणवचनमबाधमिति शौरेर्निःशङ्कताभूदितिबोध्यं यद्यपि नन्दः शौरिश्च ज्ञानित्वात् तत्तत्सर्वं जानीयादेव तथापि पराशक्तिस्तद्रहस्यरक्षिणी कदाचित् किञ्चित् ज्ञानमावृणुयादितिबोध्यम् ॥ २९ ॥ भ्रातः क्लेशनदीं विवेकपोतेन तीर्यतामित्याह नूनमिति । निश्चयेनायं जनोऽदृष्टनिष्ठः अदृष्टे निष्ठा समाप्तिर्यस्य स यदैव पुत्रादिसुखदमदृष्टं क्षीयते तदैव ते पुत्रादयो न भवन्तीत्यर्थः । अदृष्टमेव परमं मृतवियुक्तपुत्रादीनां संयोगहेतुर्यस्य सः योऽदृष्टमेवात्मनस्तत्त्वं दुःखसुखयोर्निमित्तं वेद स न विमुह्यतीति विवेकेन मोहं जहीति भावः ॥ ३० ॥ भ्रातुः स्वस्य च हितमिच्छन्नाह करो वै इति बहुतिथं चिरकालम् ॥ ३१ ॥ अनोभिः स्यन्दनैः "अनः शता शकटः स्यन्दनः कथ्यते रथः" इति हलायुधः न च रथयानसम्पत्तिर्नास्तीति शक्यं युक्तं व्रजः सर्वसमृद्धिमानिति व्याकोपात् गोप्यो रूढरथा इति तत्प्रजानां तत्सम्पत्त्यभिधानाच्च तस्य कैमुत्येन तत्सिद्धेः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां पञ्चमोऽध्यायः ॥ ५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं वसुदेवाभिनन्दितो नन्दः किमाहेत्यत आह ॥ नन्द इति । देवकीपुत्रास्तज्जातपोताः कंसेन बहवो हता एका कन्याऽवरजा चरमकुमारी सापि दिवं गतेति । अवशिष्टा उर्वरिताः देवकीपुत्रा इत्यनेनार्थादन्यासां पुत्राः सन्तीत्यायातम् । ते सुताः सुखिनः कच्चिदिति शेष इति व्यातन्वते ॥२९॥ वसुदेवोपदिष्टतत्त्वो नन्दः स्वस्यापि तत्त्वसंविद्वत्तेत इति दर्शयति नूनमिति । अयं जनो दृष्टनिष्ठो दृष्टे प्रात्यक्षिकेऽर्थे निष्ठा स्थितिर्यस्य स नूनं प्रायो हि यतस्ततोऽदृष्टं परमो दैवं वा वासुदेवो वा यथा कारयति तथा

भविष्यतीत्यदृष्टं हर्यादिकं परमं यस्य स तथा स न अतो मुह्यति संसारादौ मोहयुक्तो भवति। आत्मनस्तत्त्वं फलोपलम्भकं वेद स जनो न मुह्यति। त्वं चादृष्टपरमेष्वेक इति मया किं वक्तव्यमिति तात्पर्यम्। तत् त्वमिति वा पदे। तददृष्टत्वं जगदन्यद्धर्याख्यं वसु स भवान्वेदेति न मुह्यतीति योजना वा ॥ ३० ॥ वयं वो युष्माभिर्दृष्टा वो युष्मांश्च द्वयं दृष्टवन्त इत्यन्वेतव्यमिति सूचयति। स्वस्यैध्यज्ञतां दर्शयति ॥ नेह स्थेयमित्यादिना ॥ ३१ ॥ अनड्डुद्भिर्वृषभैर्युक्तैरनोभिः शकटैः। वृषोऽनड्वान् क्लीबे न शकटोऽस्त्रीत्युभयतश्चामरः। तं वसुदेवमनुज्ञाप्य गोकुलं ययुः ॥ ३२ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे षष्ठोऽध्यायः ॥ १०–६ ॥ ५ ॥

श्रीसुबोधिनी

द्रव्यादिदानं तु भेदजनकं, एतत् **पृष्टमवचनेनैवाङ्गीकृत्य** वसुदेवस्य सम्भावनामाह नन्द **अहो** इति, लोकरीत्या तस्य दुःखे निरुक्ते दुःखाभावो भवति, परमार्थज्ञाने च वसुदेवस्य सुखं भवति, वृत्तान्तकथनेन स्वस्यैतदन्वेषणं सर्वदेति ज्ञापितं, यद्यपि वसुदेवस्य बहवः स्त्रियस्तासां पुत्राश्च कुशलिनोपि **देवकीपुत्राः कंसेन बहव** एव षड् हताः, सप्तरेव भगवद्गुणैः सह तस्य द्रोहः सिद्धः, अत एव **अहो** इत्याश्चर्यं, एको हि मारणीयः, **एका त्ववशिष्टावरजा**, सर्वान्ते जाता, एतद् भगवच्चरित्रं, अन्यथान्यवचनानां निरूपणमत्र नोपयुज्येत, **सापि** चेदपत्यादिकमुत्पाद्य विवाहानन्तरं गच्छेत् तथापि देवक्याः कृते वंशस्तिष्ठेत् तद्व्यावृत्त्यर्थमाह **कन्येति, सापि** सिद्धापि देवतारूपापि पुत्राभावखेदनिवर्तिकापि **दिवं गता** स्वयमेवोड्डीय सशरीरं गता, अनेन न केवलं **कंसस्यैव** दोषो भाग्यमेव तादृशमिति ज्ञापितं, अन्यथा पश्चात् सा समागच्छेत् ॥ २९ ॥ **कंसकृतं तु** भयं तस्या नास्तीति तस्मादेतादृशेर्थेऽदृष्टमेव प्रयोजकमित्याह **नूनमिति**, सर्वस्यापि पुरुषस्यादृष्टे निष्ठा, अयं तु कर्मप्रधानः, यत् किञ्चित् करोतु पर्यवसानमदृष्टाधीनमित्यर्थः, प्रारम्भोप्यदृष्टाधीन एवेत्याहादृष्टपरम इति, **अदृष्टमेव परमं** नियामकं प्रवर्तकं यस्य, अदृष्टादेव प्रवर्तते, अदृष्टानुसारेणैव फलं च प्राप्नोतीत्युक्तं, अत्र हेतुर्जन इति, यस्तु जायते स कर्मवशादेव, कर्मवादिनां तथैव सिद्धान्तः, अतः कर्माधीनं सर्वं ज्ञात्वा यस्तिष्ठति तस्य शोको न भवतीत्याहादृष्टमिति, **आत्मनस्तत्त्वं** यथार्थरूपं प्रवर्तकनिवर्तकं यथा ब्रह्मवादिनां ब्रह्म यथा भगवांस्तथा कर्मात्मतत्त्वमिति यो मन्यते **स न मुह्यति**, पक्षान्तरेषूपालम्भोपि कश्चित् स्यात्, कर्मपक्षे स्वकृतत्वान्न कोप्युपालम्भो न प्रार्थनीयः, पक्षान्तरे तु प्रकारान्तरेण मोहः स्यात्, एवं शोकापनोदनार्थं कर्मतत्त्वमुपदिष्टम् ॥ ३० ॥

एवं सम्भाषणेन कियत्कालं स्थित्वा ततो नन्दं प्रेषयितुं वसुदेवस्तस्य भयमुत्पादयति **कर** इति, तत्कृतमनूद्यते कृतकार्यत्वज्ञापनाय, **वार्षिकः करो राज्ञे दत्तो वयं च सुहृदो दृष्टा** अतः कौतुकार्थं **नेह बहुतिथं स्थेयं**, तत्र हेतुर्गोकुले चकारादन्यत्राप्युत्पाताः सन्ति, तथामन्त्रणस्य श्रुतत्वात् ॥ ३१ ॥ एतावच्छ्रवणमात्रेणैव नन्दादयस्ततः शीघ्रं निर्गता इत्याहेतीति, निर्गमने प्रधानगुणभावस्य विस्मृतत्वान् नन्दादय इति, निर्गमने सर्व एवोक्ताः, इत्येवं शौरिणोक्ताः न त्वधिका काचित् सम्भावना जाता, स्वस्तेषां गमनेपि सामर्थ्यं न जातमिति साधनानां पुरस्कारमाहानोभिरिति, **अनडुद्युक्तैर्योजितबलीवर्दैः**, **तमनुज्ञाप्य** तमपि ततः स्वगृहं प्रेषयित्वा लोके यथा स्नेहोभिव्यक्तो न भवति तथा कृत्वा **गोकुलं ययुः**, मध्ये कंसाद्युपद्रवमप्राप्य सुखेन गोकुलं प्रविष्टा इत्यर्थः।

गोकुलोत्सवमीशानं गोपगोपीगवां हितम्। ज्ञानतः कर्मतश्चैव तामसानां नमाम्यहम् ॥ १ ॥ ३२ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणे-
वान्तरप्रमाणप्रकरणे ऐश्वर्यनिरूपकप्रथमाध्यायस्य स्कन्धादितः पञ्चमाध्यायस्य विवरणम्

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अहो ते इत्यत्रैतदित्युत्यवरजात्वज्ञानं, नन्ववरजात्वं न लोकरीत्योक्तं किन्त्वन्यप्रजोत्पत्तिसम्भवाभावेनेत्यत आहुरन्यथेत्यादि, अग्रे प्रजोत्पत्तिसम्भावनायां **नूनमित्यादिकं न वदेदित्यर्थः** ॥ २९ ॥ **नूनमित्यत्र यथा भगवानिति** भक्तानामितिशेषः ॥ ३० ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः
प्रकाशे पञ्चमाध्यायविवरणम् ॥ ५ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अहो इत्यत्र एतत्श्लोकतात्पर्यमाहुः **लोकरीत्येति**, अग्रिमश्लोकतात्पर्यमाहुः **परमार्थज्ञाने चेति** ॥ **नूनं** हीत्यत्र **यथा भगवानिति** भगवदीयानामिति शेषः। **ब्रह्मपदेनोत्तरकाण्डप्रतिपाद्या** ज्ञानशक्तिः **कर्मपदेन** पूर्वकाण्डप्रतिपाद्या क्रियाशक्तिः **भगवत्पदेन** भागवतप्रतिपाद्यो ज्ञानक्रियाशक्तिमानिति विभेदः, **पक्षान्तरेष्विति** ब्रह्मपक्षे भगवत्पक्षे कालपक्षे स्वभावपक्षे चेत्यर्थः, **प्रकारान्तरेणेति** उपालम्भे प्रार्थनायां वा तदनुरूपफलादाने शोकः स्यादित्यर्थः ॥ ३० ॥ अध्यायार्थप्रकरणार्थौ कारिकया निरूपयन्तो

नमस्यन्ति गोकुलोत्सवमिति, आद्यविशेषणाभ्यां लक्ष्यलक्षणभेदेनोत्सव ऐश्वर्यं चाध्यायार्थो निरूपितः, उत्सवो लक्षणमैश्वर्यं लक्ष्यमितिनिबन्धे निरूपितम "न्यत्रापि गतः कृष्ण" इत्यनेन, प्रकरणार्थमाहुः **गोपेति, तामसानां गोपगोपीगवां ज्ञानतः कर्मतश्च हितं** गुणज्ञानकार्यं, भगवान् पुष्टिमार्गीयज्ञानवान् अता गुणान् गापयतीत्यर्थः, एतेन उत्तरदलानुभवो निरूपितः, पूर्वदलानुभवमाहुः **कर्मत** इति, भगवत्क्रिययैव व्याप्ता यथोचितं भजनं कुर्वन्ति, तदुक्तं "गोप्यो लब्ध्वाच्युतं कान्तं" इतिश्लोकविवरणे "भग क्रियाशक्त्यैव व्याप्ता न तु स्वक्रिया काचि"दिति । एवं दलद्वयानुभव उक्तः, इदं निरूपितं निबन्धे "ज्ञानं तु गुणगानं ही"ति कारिकाद्वयेन, तथाच एवं हितं दलद्वयानुभावनेन निरोधस्थैर्यसम्पादकमित्यर्थः ॥ ३२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गोकुलोत्सवमीशानं गोपगोपीगवां हितम् । ज्ञानतः कर्मतश्चैव तामसानां नमाम्यहम् ॥ इति, गोकुलोत्सवपदेनोत्सवोध्यायार्थत्वेन निरूपितः, ईशानपदेन प्रमाणप्रकरणप्रथमाध्याये क्रमप्राप्तं ऐश्वर्यं निरूप्यत इतीश्वरत्वेन भगवान् निरूपितः, **गोपगोपीगवां** हितमिति **तामसानां गोपगोपीगवां ज्ञानतः कर्मतश्च** हितं, इह वियोगावस्थायां यो भगवतोन्तःस्थित्यनुभवः स **ज्ञानशब्देनो**च्यते, तथा च स्ववियोगावस्थायामन्तः प्रकटीभूय हितकारकमित्यर्थो भवति, संयोगावस्थायां यो लीलया नानाविधविहारः स **कर्म**शब्देनाभिधीयते, तथा च तादृशविहारेण संयोगावस्थायां परमानन्ददानेन हितकर्तृत्वमेव नोक्तं, एवं वियोगसंयोगावस्थाभेदेन दलद्वयानुभवानन्दमनुभावयित्वा सर्वदा व्रजस्थितान् परमानन्दयुक्तान् यः करोति तमहं **नमामी**तितामसप्रकरणस्यार्थो निरूपितः, वियोगावस्थाया ज्ञानरूपतोक्तिः संयोगावस्थायाः कर्मरूपत्वोक्तिः परोक्षवादेन ज्ञेया, यतो ज्ञानमार्गे अन्तरेव भगवत्स्फूर्तिरेवं वियोगेपि तथेति ज्ञानरूपतोचिता, एवं कर्ममार्गे सर्वोपि बहिर्व्यापार एव मुख्य एवं संयोगेपीति संयोगस्य कर्मत्वकथनमुचितं, अस्यां कारिकायां यत् सर्वदा गोकुलवासिनां हितकारकत्वमुक्तं तत् केन प्रकारेणेतिप्रकारविशेषजिज्ञासायां श्रीमत्प्रभुकृतं श्रीगोकुलाष्टकमनुसन्धेयं, "श्रीमद्गोकुलसर्वस्वं श्रीमद्गोकुलमण्डन" मित्यादिनाम्नामर्थस्तात्पर्यं च सम्यक्तया भावनीयं, श्रीगोकुलाष्टके हि "श्रीमद्गोकुलसर्वस्व"मित्यादिनामसु कस्मिंश्चिन् नाम्नि संयोगावस्था कुत्रचिद् वियोगावस्था निरूपितेति गोकुलाष्टकमेतत्कारिकाविवरणरूपमिति तदाश्रितैराकलनीयम् ॥ ३२ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

गोकुलोत्सवमिति का० १६३ । **तामसानां गोपगोपीगवां ज्ञानतः कर्मतश्च हितं गोकुलोत्सवमीशानं नमामी**ति, एतेन अध्यायप्रकरणार्थौ निरूपितौ, **गोकुलोत्सवमीशान**मितिपदद्वयेन लक्ष्यलक्षणभेदेन उत्सव ऐश्वर्यं च अध्यायार्थो निरूपितः, लक्ष्यमैश्वर्यं लक्षणमुत्सवः, प्रकरणार्थमाहुर्गोपेति, **ज्ञानं** गुणगानकार्यं, एतेन उत्तरदलानुभवो निरूपितः, **कर्मत** इत्यनेन सेवात्मककर्मरूपपूर्वदलानुभवो निरूपितः ॥ का० १६३ ॥

इति पञ्चमोध्यायः ।

मातृनितृतोषिणी (श्रीसुबोधिनीजी)

द्रव्यादिदानं तु भेदजनकं—वसुदेवजी नन्दजी को कंस के डर से निज निवास न ले गये तो द्रव्य भेंट देकर नन्दजी का सत्कार क्यों न किया तब कहते हैं कि 'द्रव्यादिदानं तु भेदजनकं' सुहृद संबन्धियों को द्रव्य देना भेद का जनक है। बन्धुजन को द्रव्य देने से बन्धुत्व न रहेगा और भेद भाव देखने में आएगा। लोकरीति से, दुःखो वसुदेवजी के दुःख का वर्णन करने से उनका दुःख कम होगा और वास्तविक स्थिति का ज्ञान होने से वसुदेवजी को सुख की प्राप्ति होगी। वार्तालाप में सारी घटना कही जाय तो वसुदेवजी को निश्चय होगा कि सचमुच नन्दजी मेरे हैं, जो मेरी सब बातों का ध्यान सदा रखते हैं। वसुदेवजी को तो बहुत स्त्रियाँ हैं, उनके पुत्र भी हैं और कुशल भी हैं। कंस ने देवकी के छः पुत्र मारे। वे भगवान् के छः गुणरूप थे इससे कंस ने इनको मार कर भगवद्गुणों से विद्रोह किया। नन्दजी आश्चर्यकर अहो अव्यय से बताते हैं कि मारना तो एक को था तो भी छः पुत्र मार दिये। अन्त में उत्पन्न एक कन्या बची थी, यह सब भगवान् की चरित्रलीला है, नहीं तो दूसरे प्रसङ्गों का यहाँ कहना योग्य नहीं था। श्लोक में दिये हुए 'कन्या' पद का आशय यह है कि, वह बची हुई कन्या भी, यदि विवाह कर पुत्रादि उत्पन्न कर बाद में चली जाती तो भी देवकी का वंश तो रह जाता, वह भी न हुवा यह 'कन्या' पद से कहा। वह भी साधारण कन्या नहीं थी, किन्तु सिद्धा, देवतारूपा होते हुए भी तथा पुत्र न होने के दुःख की निवारिका होकर भी स्वयं ही उड़ कर शरीर सहित आकाश में चली गई। इससे ज्ञात होता है कि मात्र कंस का ही दोष नहीं, किन्तु वसुदेवजी के भाग्य का भी दोष है। वसुदेवजी का प्रारब्ध मन्द न होता तो वह कन्या ऐसी थी जो लौटकर आ जाती लेकिन आई नहीं। **कन्या को कंस का भय तो था ही नहीं। इससे यह स्पष्ट होता है कि इसमें प्रारब्ध ही मूल नियामक है, यह बात अब 'नूनं' इस श्लोक से बताते हैं ॥ २९ ॥**

"सर्वस्यापि पुरुषस्य" प्रत्येक पुरुष अदृष्ट के अधीन है यह सिद्धान्त कर्म को ही आत्मा और प्रवर्त्तक मानने वालों का है। जो कर्म का आरंभ, कर्म की प्रवृत्ति, कर्म की समाप्ति ये प्रारब्ध के अधीन है यह बात श्लोक में कही कि **'अदृष्टपरमः जनः'** जीव प्रारब्ध के अधीन है प्रवृत्ति भी प्रारब्ध कराता है तथा फल भी उसके अनुसार ही देता है। शास्त्रों में मनुष्य के लिये 'जन' शब्द आया है, वह भी इसलिये कि वह कर्म के अनुसार जन्म लेता है। यह कर्मवादियों का सिद्धान्त है। जो मनुष्य ने समझ लिया सब कुछ कर्माधीन है फिर उनको शोक नहीं होता है। तात्पर्य यह है कि मनुष्यों को जब कुछ भी सुख-दुःख होता है तो वे कहते हैं कि यह हमारा भाग्य है तदनुसार उनका सिद्धान्त दिखाते हुए आचार्यचरण आज्ञा करते हैं कि इस आशय से श्लोक में भी **'अदृष्टं'** पद दिया है। **'आत्मनस्तत्त्वं'** मूल में जो कहा कि आत्मा का तत्त्व अदृष्ट है उसका यह तात्पर्य है कि कर्ममार्ग में आत्मतत्त्व का सच्चा स्वरूप यह है कि कर्म में प्रवर्तक और कर्म से निवर्तक अदृष्ट है ऐसा जानने से मोह नहीं होगा। ब्रह्मवादियों का आत्मतत्त्व जैसे ब्रह्म है और भक्तों का भगवान् है, वैसे ही कर्मवादियों का आत्मतत्त्व कर्म है। इस प्रकार जो समझ लेता है वह मोहित नहीं होता है। दूसरे सिद्धान्तों में किसी को उलहना भी दिया जा सकता है किन्तु कर्म सिद्धान्त में स्वयं कर्म करने वाला है, इससे किसी का न तो उलहना दे सकता है न किसी की प्रार्थना करनी पड़ती है। दूसरे पक्षों में दूसरे प्रकार से मोह भी होता है। इस प्रकार नन्दरायजी ने शोक मिटाने के लिये वसुदेवजी को कर्मतत्त्व का उपदेश दिया।

श्री प्रकाशकार जी **"आत्मनस्तत्त्वं"** का तीन प्रकार से तात्पर्य बताते हैं कि—भक्तों का आत्मतत्त्व 'भगवान्' है। वेद के पूर्व काण्ड में 'कर्म' नाम द्वारा ब्रह्म की क्रिया शक्ति का वर्णन है, उत्तर काण्ड में 'ज्ञान' नाम द्वारा ब्रह्म की ज्ञान शक्ति का वर्णन है और भागवत में ज्ञान और क्रियाशक्तियुक्त ब्रह्म का भगवान् नाम से वर्णन है, वह भक्तों का शेष हैं अर्थात् ब्रह्मवादी ज्ञानी एक ज्ञानशक्ति को ही आत्मतत्त्व मानते हैं कर्मवादी क्रियाशक्ति को ही आत्मतत्त्व मानते हैं किन्तु भक्त, भगवान् (ज्ञान और क्रिया शक्तिरूप पूर्ण ब्रह्म) को आत्मतत्त्व मानते हैं ॥ ३० ॥

इस प्रकार नन्दजी और वसुदेवजी ने कुछ समय वार्तालाप किया पुनः श्री वसुदेवजी नन्दजी को शीघ्र ही गोकुल लौटने के लिये **'करो वै'** इस श्लोक से उनके मन में भय उत्पन्न करते हैं।

नन्दबाबा ने कर प्रदानादि कार्य पूर्ण किये थे इसी बात की सूचना वसुदेवजी को नन्दजी कहने के लिये उनके किये हुए कार्यों को दोहराते हैं कि राजन् आपने कंस राजा को वार्षिक कर दे दिया, तथा हम परस्पर सुहृद मिले। अब कुतूहल के कारण विशेष समय यहाँ न ठहरें कारण कि गोकुल में उपद्रव हो रहे हैं। श्लोक में 'च' अव्यय है उसका आशय कहते हैं कि राजन् केवल गोकुल में ही नहीं किन्तु अन्यत्र व्रज में भी उपद्रव हो रहे हैं। मैंने सुना है कि कंस ने अपने मंत्रियों से मन्त्रणा करके उपद्रव करने का निश्चय किया है, इसलिए अब आप यहाँ न ठहरते शीघ्र गोकुल पधारते ॥ ३१ ॥

एतावच्छ्रवण—इतना सुनते ही नन्दजी आदि वहाँ से शीघ्र जाने के लिये तैयार हुए। जाने की शीघ्रता में आगे सेवक पीछे सेवक बीच में राजा आदि छोटे बड़े के क्रम का ध्यान न रखकर **'नन्दादयः'** नन्दादिक एक साथ कह दिया। सभी ने साथ में ही मथुरा से प्रस्थान किया। श्री वसुदेव जी ने भी इसी प्रकार से जाने के लिये शीघ्रता की थी, इससे अधिक और कोई सम्भावना नहीं थी। पैदल जाने का भी साहस नहीं था। इसलिये जाने के साधन बैल गाड़ी की तैयारी की। उसी समय वसुदेवजी से आज्ञा लेकर उनको भी अपने घर शीघ्र भेज दिये कि परस्पर प्रेम का लोक में प्रकाश न हो। इस प्रकार सब कार्य समाप्त करके, नन्दरायजी गोकुल गये। श्लोक में दिये **'ययुः'** क्रिया का आशय यह हैं कि मार्ग में कंसादिक का कोई उपद्रव न हुआ तथा वे सब सुखपूर्वक गोकुल पहुँच गये।

कारिका—गोकुलोत्सवमीशानं गोपगोपीगवां हितम्। ज्ञानतः कर्मतश्चैव तामसानां नमाम्यहम् ॥ १ ॥ १७३ ॥

कारिकार्थ—तामस भक्त गोप, गोपी और गौओं के ज्ञान तथा कर्म द्वारा कल्याण करने वाले गोकुलोत्सव प्रभु को प्रणाम करता हूं।

श्रीवल्लभलालजी महाराज लेख में स्पष्ट करते हैं कि "ज्ञान" शब्द का भाव बताते हुए कहा है कि जैसे वेद के उत्तरकाण्ड में निरूपित "ज्ञान" द्वारा ज्ञानियों को अनुभवानन्द होता है वैसे ही तामस भक्तों को गुणगान द्वारा अनुभवानन्द करा कर "ज्ञान" से उनका हित किया और जैसे वेद के पूर्व काण्ड में कही हुई क्रियाशक्ति द्वारा कर्मात्मा का पूजन कर, कर्म परायण उपासक आनन्दानुभव करते हैं वैसे ही गोपीजनों को अच्युत भगवान् , कान्त रूप से, रमण क्रिया में मग्न कर, आपने उनका कर्म द्वारा हित किया। इसी प्रकार दोनों दलों द्वारा अनुभव करा कर निरोध को स्थिर किया।

आचार्यचरणों ने कारिका में **'गोकुलोत्सव'** और **'ईशान'** पद दिये हैं एवं **'ज्ञानतः'** और **'कर्मतः'** पद दिये हैं उनका तात्पर्य श्रीयोजनाकारजी बताते हैं कि यहाँ **'गोकुलोत्सव'** पद द्वारा **'उत्सव'** पञ्चमाध्याय का अर्थ कहा और **"ईशान'** पद द्वारा

भगवान् के ईश्वरत्व को कहा। वियोगावस्था में जो भगवान् की अन्तःस्थिति का अनुभव होता है उसको यहाँ ज्ञान नाम से कहा गया है। इसका तात्पर्य यह है कि भगवान ने व्रजभक्तों को जो विरहावस्था में, अन्तःकरण में प्रकट होकर आनन्दानुभव कराया वह अनुभव उत्तरकाण्डस्थ ज्ञान के समान होने से यहाँ ज्ञान नाम से कहा गया है। संयोगावस्था में जो लीलाओं द्वारा अनेक प्रकार का विहार होता है वह विहार यहाँ 'कर्म' नाम से कहा गया है। भगवान् स्वयं प्रकट होकर, भक्तों के साथ साक्षात् स्वरूप से लीलाएँ करते हैं इन लीलाओं से तामस भक्तों को आनन्दानुभूति होती है वह पूर्वकाण्डनिर्दिष्ट यज्ञात्मक कर्मात्मक की क्रियाशक्ति होने से इसको 'कर्म' संज्ञा दी गई है। इसी प्रकार ज्ञान और कर्म से तामस भक्तों के हितकारी हुए। भगवान् तामस भक्तों को संयोग वियोग दोनों अवस्थाओं द्वारा आनन्दानुभव कराकर, सदा व्रजभक्तों को परमानन्दसंयुक्त करते हैं। यह तामस प्रकरण का अर्थ है।

वियोगावस्था को ज्ञानरूपता और संयोगावस्था को कर्मरूपता दी। ज्ञानमार्ग में अन्तःकरण के भीतर ही भगवत्स्फूर्ति होती है तथा वियोगावस्था में भी अन्तःकरण में ही भगवत्स्फूर्ति होती है। इसलिये वियोगावस्था को ज्ञानरूपता कहा वह योग्य ही है। जैसे कर्म मार्ग में सारी क्रिया बाहर होती है वैसे ही संयोगावस्था में सब क्रियाएँ साक्षात् होती हैं। इससे संयोगावस्था को 'कर्म' कहना उचित है। इस कारिका में गोकुलवासियों को सर्वदा सर्वथा भगवान् कैसे हितकारक हैं ऐसी जिज्ञासा (जानने की इच्छा) हो तो श्रीप्रभुचरणकृत श्रीगोकुलाष्टक पढ़ कर अनुभव करना चाहिये। गोकुलाष्टक इस कारिका की टीका है।

इस कारिका द्वारा इस अध्याय के दो अर्थ 'गोकुलोत्सव' विशेषण से उत्सव और 'ईशान' विशेषण से ऐश्वर्य बताये हैं। निबन्ध में उत्सव को लक्षण और ऐश्वर्य को लक्ष्य कहा है। ज्ञान और कर्म द्वारा तामस गोप, गोपी तथा गौओं का जो हित किया है वह प्रकरणार्थ है ॥ ३२ ॥

श्रीमद्भागवत पुराण दशम स्कंध पूर्वार्ध पञ्चम अध्याय सुबोधिनीजी की मातृपितृतोषिणी समाप्त ॥ ५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं वसुदेवेन पृष्टो नन्दः 'त्वत्पृष्टं मद्व्रजपशव्यादिकमस्त्येव, तत् किं वक्तव्यम्? तव दैन्यानुभवेन ममापि सुखं नास्ति' इत्याशयेनाह—अहो इति। 'धर्मात्मनोऽपि दुःखमाश्चर्यमेव' इत्याह—अहो इति। देववाणीप्रामाण्याद्यदि शत्रुत्वेन मारणीयस्तदाऽष्टम एक एव मारणीयः, कंसेन तु दुष्टतया ते तव भार्याया देवक्याः पुत्रा बहवो हताः। एका अवरजा पश्चाज्जाता कन्याऽवशिष्टा तन्मारणादुर्वरिता, साऽपि दिवं स्वर्गं गता ॥ २९ ॥ "यदि साऽत्र तिष्ठेत्तदा तत्पुत्रादिद्वारापि देवकीवंशः प्रवर्तेत। तदपि नाभूदिति न केवलं कंसस्यैवायं दोषः, किन्तु स्वभाग्यमपि तादृशम्। अन्यथा तस्या देवतात्वेन कंसकृतभयाभावादत्रैव तिष्ठेत्" इति सूचयन् एतादृशेऽर्थे सर्वत्रादृष्टमेव प्रयोजकमिति सामान्यत आह—नूनमिति। निश्चितमयं जनः अदृष्टनिष्ठः, अदृष्ट एव निष्ठा स्थितिर्यस्य तथाविधः। अदृष्टशब्दवाच्यपुण्यपापाधीनमेवास्य जन्ममरणयोगवियोगसुखदुःखादिकं सर्वमित्याशयः। तथाऽदृष्टपरमः, अदृष्टमेव परमं नियामकं यस्य सः लौकिकालौकिकव्यापारे प्रवृत्तिरप्यस्य पूर्वादृष्टाधीनेत्यर्थः। हि यस्मादेवमतोऽदृष्टमेवात्मनः स्वस्य तत्त्वं संयोगवियोगदुःखसुखादिकारणं यो वेद जानाति स न मुह्यति। तथाच त्वयाऽपि मोहो न कार्य इत्याशयः ॥ ३० ॥ एवं प्रश्नोत्तराभ्यां स्वपुत्रयोःकौशल्यं नन्दस्य स्वकर्तृकपुत्रप्रस्थापनकन्यानयनज्ञानाभावं च निश्चित्य कंसकृतमन्त्रश्रवणेन उपद्रवशङ्काकुलचित्तो नन्दं भयमुत्पादयन् व्रजं प्रेषयति कर इति। वो युष्माभिर्वार्षिकः करो राज्ञे दत्तो, वयं च दृष्टाः। अतः कार्यस्य जातत्वादिह स्थाने बहुनिथं बहुकालं न स्थेयम्। तत्र हेतुमाह—गोकुले उत्पाताः सन्तीति। चकारो 'धनिनां राजसन्निधाने चिरं स्थितौ ततोऽपि भयं स्यात्' इति सूचनाय। वैष्णवे स्पष्टं तथोक्तेः ॥ ३१ ॥ शौरिणा वसुदेवेन इत्येवं प्रोक्ता नन्दादयो गोपास्तं वसुदेवमनुज्ञाप्य पृष्ट्वा अनडुद्युक्तैर्वृषयोजितैरनोभिः शकटैर्गोकुलं ययुरित्यन्वयः ॥ ३२ ॥

इति श्रीवल्लभाचार्य—वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने पञ्चमो विवृतोऽध्यायो जन्मोत्सवनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

मम व्रजादिकुशलं किं ब्रवीमि अहं तव दुःखेनैव दुःखितोऽस्मीत्याह अहो इति। अहो इति खेदे। कंसेन दुष्टतया ते तव भार्याया देवक्याः पुत्रा बहवो हताः। एका अवरजा पश्चाज्जाता कन्याऽवशिष्टा तन्मारणादुर्वरिता साऽपि दिवं स्वर्गं गता। ततश्च मत्पुत्रन्यासादिकमस्य न विदितमिति ज्ञात्वा वसुदेवोऽन्तरानन्दितो बभूवेति ज्ञेयम् ॥ २९ ॥ नूनमिति। निश्चितमयं जनः अदृष्टनिष्ठः अदृष्टे प्राक्तनपुण्यपापकर्मणि एव निष्ठा स्थितिर्यस्य तथाविधः अदृष्टाधीन इत्यर्थः। तथा अदृष्टपरमः अदृष्टमेव परमं

नियामकं यस्य सः यदैव सुतादिप्रदमदृष्टं हीयते तदैव पुत्रादयो न भवन्ति। वियुक्तानपि चादृष्टमेव संगमयति। अतः अदृष्टमेव आत्मनः स्वस्य तत्त्वं वियोगसंयोगदुःखसुखादिष्वव्यभिचारिकारणं यो वेद जानाति स न मुह्यति तस्मादिदानीं दुःखं न भावनीयम्। मृतानां वियुक्तानां चापि कालान्तरे मेलसम्भवात् अस्माकमपि मेलो यथा जातस्तथा इति नन्दस्य दैवी वागेषा भाविसूचिका ॥ ३० ॥ कर इति। वो युष्माकं युष्माभिः। शेते षष्ठी। वार्षिकः करो राज्ञे दत्तः वयं च दृष्टाः। अतः कार्यस्य जातत्वादिह स्थाने लोभिनः कंसस्य समीपे भवद्भिर्धनिकत्वेन ख्यातैः बहुतिथं बहुकालं न स्थेयम्। यतः गोकुलेऽपि उत्पाताः सन्ति। चोऽप्यर्थे ॥ ३१ ॥ इतीति। शौरिणा वसुदेवेनेत्येवं प्रोक्ताः नन्दादयो गोपास्तं वसुदेवमनुज्ञाप्य पृष्ट्वा अनडुद्युक्तैर्वृषयोजितैरनोभिः शकटैर्गोकुलं ययुः ॥ ३२ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्। गङ्गासहायो दशमपञ्चमे निरमादिमाम्।
इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां पञ्चमोऽध्यायः ॥ ५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ते तव देवकी नाम स्त्रीस्तस्याः पुत्राः अवरजा सर्वपुत्रेभ्यः कनिष्ठा ॥ २९ ॥ एवं दुःखमुद्भाव्य पुनस्तस्य शांतिमाह अदृष्टे ईश्वरप्रेरितस्वप्रारब्धकर्मणि निष्ठा स्थितिर्यस्य सः अदृष्टनिष्ठः देहधनपुत्रादिसुखदं अदृष्टं यावदस्ति तावद्देहादयो भवंतीत्यर्थः। अत एव अदृष्टमेव परमं प्रधानं यस्य सः पुत्रादयः अदृष्टेनैवोत्पद्यंते अदृष्टेनैव नश्यन्ति चेत्यर्थः। एवंभूतम् अदृष्टम् आत्मनो जीवात्मनः तत्त्वं सुखदुःखप्राप्तौ कारणं यो वेद स न मुह्यति ॥ ३० ॥ राज्ञे कंसाय वार्षिकः प्रतिवर्षदेयः। वो युस्माभिः बहुतिथं बहवः, तिथयो यस्मिन् यथा तथा बहुदिनं न स्थेयम् ॥ ३१ ॥ अनुज्ञाप्य अनडुद्युक्तैः बलीवर्दयुक्तैः। अनोभिः शकटैः ॥ ३२ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके
श्रीमद्भागवतस्य दशमस्कंधव्याख्याने नंदवसुदेवसंगमो नाम पञ्चमोऽध्यायः ॥ ५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ नन्दो वसुदेवं सान्त्वयन्नाह द्वाभ्याम्। अहो इति खेदे। हे वसुदेव, ते तव देवकीपुत्राः देवक्यां जाताः सुताः, कंसेन बहवः हताः। क्षेत्रजत्वशङ्काव्यावृत्तये ते इत्युक्तम्। एका, अवरजा पुत्रेभ्यः पश्चाज्जाता, कन्या स्वयं अवशिष्टा। सापि, दिवं गता ॥ २९ ॥ एवमनुशोच्याथ तत्त्वबोधेन समाधत्ते। नूनमिति। यः अयं परिदृश्यमानः जनः, नूनं ध्रुवं, अदृष्टे एव निष्ठा समाप्तिर्यस्य सः, अदृष्टसमाप्तेरनुसमाप्तसुखदुःखादिक इत्यर्थः। अदृष्टमेव परमं यस्य सः, अदृष्टायत्तः सन्नित्यर्थः। अदृष्टम् एव, आत्मनः तत्त्वं वेद। सुखदुःखादिमत्त्वमदृष्टमूलकमिति यो वेत्तीत्यर्थः। सः, न मुह्यति। जीवकृतशुभाशुभकर्मानुगुणमन्तस्थः सन्, सुखदुःखादिरूपं फलं यः प्रयच्छति, सोऽन्तरात्मेहादृष्टशब्देन बोध्यः। न तु कर्मकालादिकं, कर्मादीनां तदन्तराऽकिंचित्करत्वादिति रहस्यम् ॥ ३० ॥ एवं विवेकोद्बोधकं नन्दवचो निशम्य नन्दं प्रति प्रकृतवक्तव्यमाह। कर इति। हे नन्द, राज्ञे कंसाय, वार्षिकः प्रतिवर्षं देयः करः, दत्तः। प्रयोजनं नावशेषितमस्तीति भावः। वयं च दृष्टाः, अथेह, वो युष्माभिः, बहुतिथं बहुदिनं, न स्थेयम्। चो हेत्वर्थः। यत इत्यर्थः। गोकुले, बहवः उत्पाताः, सन्तिः ॥ ३१ ॥ इतीति। इतीत्थं, शौरिणा वसुदेवेन, प्रोक्ताः, ते नन्दादयः गोपाः, तं वसुदेवं, अनुज्ञाप्यापृच्छ्य, तं कंसं वा, अनडुद्भिर्वृषभैर्युक्तान्यनडुद्युक्तानि तैः, अनोभिः शकटैः, गोकुलं प्रति, ययुर्जग्मुः ॥ ३२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थवि-
बोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे पूर्वार्द्धे पञ्चमोऽध्यायः ॥ ५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

करो वा इति : १०.५.३१.

सत्कर्मस्वखिलेष्वपि प्रभवति प्रायोऽन्तरायोदयः तत्रापीशपदापरोक्षफलके योगे त्वसौ निश्चितः।
तस्माद्गोकुलरक्षणं मतिमताऽरिभ्यो विधेयं सदेत्यालोच्यानकदुन्दुभिर्लघु पुनर्यानाय नन्दं जगौ ॥ १४ ॥
सह्यं दुःखं तदचिरलयं बुद्धिमद्भिर्नयज्ञैः, यस्मादग्रे प्रभवति सुखं स्थास्नु लोकोत्तरं च।
पुत्रत्राणोदितहितदृशा देवकीजानिना तद्युक्तोऽकारि प्रियविरहजक्लेशितानादरोऽसौ ॥ १५ ॥

श्रीशकल्प० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने पञ्चमोऽध्यायः ॥ ५ ॥

कृष्णप्रिया

अहो ! बड़े खेद एवं आश्चर्य की बात है कि देवकीजी से उत्पन्न आपके बहुत से पुत्र कंस ने मार दिये । अन्त में उत्पन्न हुई एक कन्या ही शेष थी वह भी स्वयमेव स्वर्गलोक को चली गई ॥ २९ ॥ निश्चय ही मनुष्यों की निष्ठा अदृष्ट में ही है। अथवा जीवमात्र अदृष्टवश है । अदृष्ट ही सब जीवों का परम नियामक है । आत्मा का तत्त्व अदृष्ट ही है । जो इस कर्मरूप आत्मतत्त्व को जानता है वह मोह में नहीं फँसता लेकिन उसका मोह नष्ट हो जाता है ॥ ३० ॥ श्री नन्दजीने कहा भैया वसुदेव ! आपने राजा को कर तो दे दिया । हम एक दूसरे से मिल भी लिये अब आपको मथुरा में बहुत समय ठहरना नहीं चाहिये, क्योंकि गोकुल में उपद्रव हो रहे हैं ॥ ३१ ॥ वसुदेवजी के वचन सुनकर नन्दजी आदि गोपों ने बैलों के गाडे जोड़े और वसुदेव जी से आज्ञा लेकर गोकुल गये ॥ ३२ ॥

इति पञ्चमाध्याय का हिन्दी अनुवाद समाप्त ।

* * *

अथ षष्ठोऽध्यायः

श्लोकाः	अनु.	उप.	वंशस्थ	इन्द्रवंशा	वसंत	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४४	३३	७	१	१	२	२	१६००	१२	३७	१६४६	५१॥	१

श्रीशुक उवाच

नन्दः पथि वचः शौरेर्न मृषेति विचिन्तयन् । हरिं जगाम शरणमुत्पातागमशङ्कितः ॥ १ ॥
कंसेन [1]प्रेषिता घोरा पूतना बालघातिनी । शिशूंश्चचार निघ्नन्ती [2]पुरग्रामव्रजादिषु ॥ २ ॥
न यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु । कुर्वन्ति सात्वतां भर्तुर्यातुधान्यश्च[3] तत्र हि ॥ ३ ॥
सा खेचर्येकदोपेत्य[4] पूतना नन्दगोकुलम् । [5]योषित्वा माययाऽऽत्मानं प्राविशत् कामचारिणी ॥ ४ ॥

कर्दमक्षमा

अन्वयः—नन्दः पथि शौरेः वचः न मृषा इति चिन्तयन् उत्पातागमशङ्कितः हरिं शरणं जगाम ॥ १ ॥ कंसेन प्रेषिता घोरा बालघातिनी पूतना पुरग्रामव्रजादिषु शिशून् निघ्नन्ती चचार ॥ २ ॥ यत्र स्वकर्मसु रक्षोघ्नानि सात्वतां भर्तुः श्रवणादीनि न कुर्वन्ति तत्र हि यातुधान्यः च ॥ ३ ॥ कामचारिणी खेचरी सा एकदा मायया आत्मानं योषित्वा नन्दगोकुलं प्राविशत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

षष्ठे सख्युर्गिरां नंदो व्रजं गच्छन्मृतां पथि ॥ दृष्ट्वा तु राक्षसीं तस्या मृत्युं श्रुत्वाऽथ विस्मितः ॥ १ ॥

कृष्णविषये शंकमानं राजानं प्रत्यविषये प्रवृत्ता सैव मरिष्यतीति सूचयन्नाह । न यत्रेति । यत्र श्रीकृष्णस्य श्रवणादीनि न संति तत्रैव तासां शक्तिः ॥ साक्षात्तस्मिन्नेव सति का शंकेति भावः ॥ १–३ ॥ योषित्त्वा वेषतो वरां नारीमिवात्मानं विधाय । ननु निर्लज्जा निर्विशंका च सती कथं परसद्मनि प्रविष्टेत्यत आह । कामचारिणीति । नहि कामचारिणीष्विदं चित्रमित्यर्थः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सख्युर्वसुदेवस्य । तस्या राक्षस्याः (१) शौरेर्वसुदेवस्य । हरिं शरणं जगाम । हे हरे मम गृहे कश्चिदुत्पातो न भवेद्यदि भवेत्तर्हि त्वमेवास्माकं रक्षक इति प्रार्थयामासेत्यर्थः ॥ तव तुल्यः कोऽत्र विवेक्यस्ति । अतो मोहो नोचित इति भावः ॥ १ ॥ प्रहिता प्रेषिता निघ्नंती मारयंती । तदुक्तं वैष्णवे "यस्मै यस्मै स्तनं रात्रौ पूतना संप्रयच्छति । तस्य तस्य क्षणेनांगं बालकस्योपहन्यते ॥" इति । आदिना सार्थादिग्रहः ॥२॥ तत्प्रेषणे राजशंकामपानुदति अविषये मारणाद्यगोचरे । सैव पूतनैव । बाहुभ्यां समुद्रं तरन्निवेति दृष्टांतोऽत्र ध्येयः । यत्र यस्मिन्स्थाने । तत्रैव श्रीकृष्णश्रवणादिवर्जितस्थान एव । तासां यातुधानीनाम् । तस्मिन्नेव श्रीकृष्ण एव । इति भाव इति । दृष्टादृष्टकर्मण्यपि वर्त्तमाना जना यत्र श्रवणादीनि कुर्वंति तत्रैव प्रभवंति किमुत यत्र प्राधान्येन कुर्वंति तत्र न प्रभवंतीति किमुततरां यत्र कैवल्येन कुर्वंति किमुततमां साक्षादेव यत्र स प्रादुर्भूयास्त इति तात्पर्यम् । यातुधानीपदमत्रोपलक्षणम् "न तत्र दानवाः संति न पिशाचा न राक्षसाः । यक्षकिन्नरवेतालभूतप्रेतविनायकाः ॥ यत्र देवो गृहे विष्णुः कीर्त्यते हि सदा सताम्" इति रामायणात् । यत्र स्वकर्मसु यज्ञादिषु । सात्वतां भर्तुर्हरेः । श्रवणादीनि नरा न कुर्वंति तत्र हि यातुधान्यः संतीत्यन्वयः । किंभूतानि रक्षोघ्नानि रक्षआदिनिवर्त्तकानि । यद्वा—स्वित्यव्ययं शोभनेर्थे पृथगेव पदं यत्र रक्षोघ्नानि सात्वतां भर्त्तुः श्रवणादीनि न तत्रैव यातुधान्यः स्वकर्म मारणादिरूपम् । सुशोभनं कुर्वंतीत्यन्वयः ॥ ३ ॥ सा या प्रेषिता खेचरी बकी । "अहो बकीयं किल कालकूटम्" इत्यत्र श्रवणात् नारीणां हि परगृहप्रवेशे लज्जाशंके भवतस्तस्यास्ते कथं नेति शंकते—नन्विति । कामेनेच्छया चरितुं शीलमस्या इति कामचारिणी । स्वेच्छानुरूपवपुःकरणसमर्था । योषित्वा योषयित्वा णिज्लोपस्त्वार्षः । निजसौंदर्येण सर्वजनान्मोहयित्वा गृहांतःपुरादिषु सहसा प्रवेष्टुमिति भावः । यद्यपि जगन्मोहिनी मायापि तत् सिद्धभक्तान्मोहयितुं न क्षमा तथापि कृष्णलीलाशोभासिद्ध्यर्थमैंद्रजालिकमायेन तानपि पूतनादिमाया भगवदिच्छया मोहयतीति भावः । इत्यर्थ इति स्वच्छंदेष्विदमेवोचितमिति भावः । 'गोपित्वा' इति पाठे विधायेत्यर्थः ॥ ४ ॥

---

[1] प्रहिता–श्रीधर. वंशी. वीर. विज. जीव. गिरि. भक्त. । [2] पुरग्रामाकरादिषु–इति कस्यचित् । [3] धानाश्च–इति कस्यचित् । [4] दोत्पत्य–जीव. विश्व. । [5] गोपित्वा–इति क्वचित् ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पथि विचिन्तयन् हरिं सर्वभयहरं निजेष्टदेवत्वेन सर्वशरणमपि विशेषतः स्वपुत्रमङ्गलार्थं मनसा शरणं जगाम। यद्वा न मृषेत्यतो हेतोर्हरिं मनोहरं स्वसुतं पथि विशेषतश्चिन्तयन् न जाने तत्र किं वृत्तमस्तीति तत्र चिन्तां कुर्वन् शरणं निजगृहं जगाम गच्छन्नभूत् ॥ १ ॥ अथ व्रजवृत्तमाह—तत्र च यद्यपि पूर्वं तन्मन्त्रिभिर्ऋषीणामेव हिंसा निश्चिता तथाप्यतिभीतेन कंसेन तु परम्परयैवोपायोऽयमिति प्रथमं तामनङ्गीकृत्य साक्षाद्बालहिंसैवानुमतेत्यभिप्रेत्याह, कंसेनेति। प्रहिता प्रागेव नियुक्ता यतो घोरा बालघातिनी च अत एव नितरां घ्नन्ती घ्नती दुर्विषस्तनदानेन सद्यो मारयन्ती तथा च श्रीविष्णुपुराणे "यस्मै यस्मै स्तनं रात्रौ पूतना सम्प्रयच्छति। तस्य तस्य क्षणेनाङ्गं बालकस्योपहन्यते" इति। आकरः रत्नाद्युत्पत्तिस्थानं ग्रामं व्रजेति वा पाठः आदिशब्दात् सार्थादयश्च ॥ २ ॥ शिशून् निघ्नन्ती पुरादिषु चचार इत्युक्तम्। ननु, तर्हि श्रीनन्दव्रजबालानां हन्त का वार्त्ता इत्यपेक्षायामाह—नेति। स्वकर्म्मसु यज्ञादिषु तत्साद्गुण्यार्थान्यपि यत्र श्रवणादीनि न कुर्वन्ति किम्पुनः स्वप्रधानानीत्यर्थः। सात्वतानां भक्तानां भर्तुरिति तेषामपि श्रवणादिभिस्ता नश्यन्ति किम्पुनस्तस्येत्यर्थः। त्वर्थे चकारोऽनुक्तसमुच्चये वा अन्ये च दुष्टा हि एव तत्रैव प्रभवन्तीति शेषः। यद्वा किन्तदानीन्तनाः सर्वे शिशवस्तया बत हताः तत्राह, नेति। पूर्ववदर्थः अन्ये च भगवद्विमुखाः कंसपक्षीयाः ये तेषां बालाः श्रीभगवता तद्द्वारैव घातिता इति भावः। इति कंसस्य मौढ्यं दर्शितम्। तदेवं तेन साक्षादधिष्ठितेऽपि तादृशदुष्टागमनं निखिललोकानन्दक-श्रीभगवल्लीलाविशेषसम्पत्त्यर्थं तथा तादृशहेतुकोत्पातश्च तज्जनन्यादीनां तद्विषयकप्रेमविशेषवर्द्धनार्थं तदीयस्वरसानुसारिलीलाशक्त्यैव सम्पाद्यत इति भावः। लीलानाम्नी शक्तिश्च श्रीभूलीलेति मुख्यशक्तित्रये श्रीवैकुण्ठे पाद्मोत्तरखण्डादिप्रसिद्धा सैव पाद्मकार्तिकमाहात्म्यादौ तुलसीत्वेन वृन्दात्वेन च वर्ण्यत इति श्रीकृष्णलीलायां वृन्दारूपैव सा ज्ञेया यदधिष्ठानं वृन्दावनमिति ॥ ३ ॥ एकदा रात्राविति पराशरवैशम्पायनौ, उत्पत्याकाशमार्गेणागत्य उपेत्येति पाठः क्वचित् यतः खेचरी सा घोरात्वादेव योषित्वेति अत्र योषितं करोतीति णिचि टिलोपे क्त्वाप्रत्यये योषयित्वेति वक्तव्ये णिचो लोप आर्षः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

पथि विचिन्तयन् हरिं सर्व्वभयहरं भगवन्तं शरणं जगाम। भगवन्! रक्ष रक्षेत्यार्त्या जगाद, हृदा प्रार्थयामासेति वा,—नित्यं श्रीकृष्णप्रियत्वेन सदा तन्मयत्वेन। सदा तन्मयस्यापि तस्य विशेषतस्तदानीं तदर्थं भागवतवर्य्यत्वात्तच्छरणगमनमुत्पातनिवृत्तये वैष्णवा भगवन्तमेव शरणं गच्छेयुर्न चान्यत् किमपि कुर्य्युरिति साधुवर्गशिक्षणार्थमिव, वस्तुतस्तु स्नेहभरस्य स्वभावत एवेति। यद्वा, न मृषेत्यतो हेतोर्हरिं मनोहरं स्वसुतं पथि विशेषतश्चिन्तयन्—न जाने तत्र किं वृत्तमस्तीत्यादिचिन्तां तदर्थं कुर्व्वन् शरणं निजगृहं जगाम गच्छन्नभूत ॥ १ ॥ प्रहिता प्रागेव नियुक्ता, यतो घोरा बालघातिनी च, अतएव नितरां घ्नन्ती घ्नती दुर्व्विषस्तनदानेन सद्यो मारयन्ती। तथा च श्रीविष्णुपुराणे (५।५।८)—'यस्मै यस्मै स्तनं रात्रौ पूतना संप्रयच्छति। तस्य तस्य क्षणेनांगं बालकस्येह हन्यते ॥' इति। आकरो रत्नाद्युत्पत्तिस्थानम्, आदिशब्दात् सार्थादयः, पुरादीनां यथोत्तरं गृहादिसत्तापेक्षया न्यूनत्वम; पाठान्तरेऽपि तथैवार्थः ॥ २ ॥ शिशून्निघ्नन्ती पुरादिषु चचारेत्युक्तम्। ननु तर्हि श्रीनन्दव्रजबालानां हन्त! का वार्त्तेत्यपेक्षायामाह—नेति। आदिशब्दात् कीर्त्तन-स्मरणादीनि स्वकर्म्मस्वपि साद्गुण्यार्थं तेषु तेषामवश्यापेक्ष्यत्वात्। सात्वतां भक्तानां भर्त्तुः पत्युरिति श्रवणादिपराणां रक्षा तस्यावश्यं कृत्वेति; यद्वा, सात्वतानां यादवानां निजाशेषैश्वर्य्यप्रकटनार्थं यदुकुलेऽवतीर्णस्य तस्य श्रवणादिस्थाने दुष्टप्रवेशो न सम्भवतीति भावः। त्वर्थे चकारोऽनुक्तसमुच्चये वा; अन्ये च दुष्टाः। हि—एव, तत्रैव। अन्यत्तैर्व्याख्यातम्। यद्वा, तर्हि किं तदानीन्तनाः सर्व्वे शिशवस्तया बत हताः? तत्राह—नेति। भगवच्छ्रवणादिस्थानवर्त्तिनो बालकाः सर्व्वे कुशलिन इत्यर्थः। तदर्थं तदानीं श्रीभगवदवतारेण सर्व्वत्र तच्छ्रवणादिभक्तिप्रवृत्त्या तत्कालीनबालककुलहननाशक्तेस्ततश्च निघ्नन्तीति निहन्तमित्यर्थः। अथवा, यत्र भगवतः श्रवणादीनि वर्त्तन्ते, तत्रापि राक्षस्यो न सन्ति; श्रीनन्दगोकुले च साक्षाद्वर्त्तमाने तस्मिन् यत्तस्यास्तत्रागमनम्, तत् केनापि भाग्योदयेन श्रीभगवन्माहात्म्यविशेषकृतेनैवेति भावः। अतएवाग्रे वक्ष्यते (७ म श्लो०), यदृच्छयेति ॥ ३ ॥ एकदा षष्ठदिन इति लोकप्रसिद्धेस्तत्रापि रात्राविति श्रीपराशरवैशम्पायनौ। उत्पत्याकाशमार्गेणागत्योपेत्येति पाठः क्वचित्, यतः खेचरी सा घोरात्वादेव योषित्वा ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सात्वताम् एकान्तिनां भर्त्तुः भगवतः ॥ १–३ ॥ गोपित्वा तिरोधाय योषित्वेति पाठे योषित्वं कृत्वेत्यर्थः ॥ ४–५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ व्रजं प्रति नन्दगमनात्पूर्वमेव तत्र वसुदेवसूचितोत्पातं भगवता तन्निर्हरणप्रकारं निर्हृतवतस्तस्य रक्षाविधानप्रकारञ्चाह-नन्द इत्यादिना। तावन्नन्दादय इत्यतः प्राक्तनेन ग्रन्थेन, यदा नन्द इति, यदा नन्दः पथि गतः न तु व्रजङ्गतः तदा स

शौरेर्वसुदेवस्य वचो न मृषा किन्तु तथ्यमेव स्यादिति चिन्तयन्नत्पातागममुत्पातोपनिपातसंभावनामाशङ्कितः । यद्वा पथ्युत्पातागमाद्वा पक्षिचलनादिरूपात् व्रजे कञ्चिदुपद्रवं संभाव्य हरिं स्वाराध्यदेवं शरणं जगाम रक्षणोपायत्वेनाध्यवस्यत् ॥ १ ॥ तदा नन्दागमनात्पूर्वमेव कंसेन प्रहिता प्रेषिता बालघातिनी पूतनाख्या राक्षसी तत्र पुरादिषु शिशून् निघ्नन्ती सती चचार ॥ २ ॥ कृष्णोऽपि तत्कृतः कश्चिदुपद्रवो बभूव किम् ? इत्याशङ्कां तावन्निराह नेति । सात्वतामेकान्तिनां भक्तानां भर्तुर्भगवतः श्रवणादीनि गुणश्रवणकीर्तनादीनि कथम्भूतानि रक्षोघ्नानि यत्र देशे स्वकर्मसु स्वस्वव्यापारेषु सत्स्वपि न कुर्वन्ति जनास्तत्रैव हि यातुधान्यः राक्षस्यः न श्रवणादिकर्तृजनाधिष्ठितदेशे किं पुनस्साक्षाद्भगवदधिष्ठितदेश इति भावः ॥ ३ ॥ सा पूतना खेचरी कदाचिद्गोकुलसमीपमेत्य मायया आश्चर्यवेषेणात्मानं गोपित्वा स्वासाधारणरूपं तिरोभाव्य तत्सामर्थ्यं सूचयन्विशिनष्टि—कामं यथेष्टरूपपरिग्रहेण चरतीति तथा प्राविशत् गोकुलं प्राविशत् योषित्वेति पाठे माययाभिमतरूपपरिग्रहोपयुक्तैश्वर्यशक्त्यात्मानं योषित्वा योषिद्रूपं कृत्वेत्यर्थः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गुणश्रवणवत् पराक्रमश्रवणमपि ज्ञानसाधनमिति प्रतिपादयति–पूतनावधलक्षणं तच्चरित्रमस्मिन्नध्याये तत्रोत्पातपरिहारो नारायणशरणप्राप्त्या भवतीत्याशयेनाह–नन्द इति ॥१॥ प्रहिता प्रेषिता पुरं राजमन्दिरं नानाजनाधिवासो ग्रामः व्रजो गोकुलम् ॥२॥ यातुधान्यः राक्षस्यः सात्वतां भर्तुः श्रवणादीनि रक्षोघ्नानि इतरेषामिति शेषः । न सन्ति साक्षात्कृष्णो यत्र वसति तत्र का शङ्केति भावः ॥ ३ ॥ गोपित्वा विधाय ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

न यत्रेति । ततो यथा कथञ्चिद्भगवत्सम्बन्धविनाभूतानां दैत्यस्वभावानामेव बालं घ्नती भगवतस्तादृशलीलेच्छयैव श्रीगोकुले प्रवेशासमर्थाऽभूदित्यागतं तत एव वल्गुस्मितापाङ्गेत्यादि च योषित्वेति तत्करोतीति णिचि क्विरूपं टेर्ल्लोपात् ॥ ३ ॥ एतत्तु गोपप्रयुज्यमानदिव्यबालभियेति ज्ञेयं कामचारिणी अव्याहतगमनापि ॥ ४–५ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ योगमायामुखतः (भा० १०।४।१२) "किं मया हतया मन्द जातः क्वापि तवान्तकः" इति श्रुत्वा नवबालकवधार्थं पूतना नाम राक्षसी कंसेन प्रहितेति तत्प्रस्तावमाह—कंसेन प्रहितेत्यादि । बालघातिनीति ताच्छीलिको णिनिः । शिशून् निघ्नन्तीति तुमर्थे शतृप्रत्ययः, शिशून् हन्तुमित्यर्थः । पुरग्रामादिषु–चचारेति तादृशानां शिशूनामन्वेषणाय, न तु क्वापि शिशून् जघान । अन्यथा भगवत्कृते निरपराधानां बालानां हननं भगवतो निर्दयत्वाभिव्यञ्जकं स्यात् , सर्वान्तर्यामिना तेन तथा न कारितम् , वस्तुतस्तु तदानीं श्रीकृष्णे प्रादुर्भूते सर्वत्रैव श्रीकृष्णवार्तारूपं मङ्गलं सञ्चरितमिति ॥ १–२ ॥ कुत्रापि तस्याः प्रागल्भ्यं नाभूदिति बोधयितुमाह,—न यत्र श्रवणादीनीत्यादि । सात्वतां भर्त्तुः श्रीकृष्णस्य श्रवणादीनि न यत्र तत्रैव यातुधान्य इति पूर्वार्थपरिपोषः ॥ ४–६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

शिशूंश्चचार निघ्नन्तीत्यादि । शिशून् निघ्नन्तीति ताच्छील्यार्थे शतृ, शिशुहननशीलेति भावः । पुरग्रामाकरादिषु चचार, तादृशशिशूनामन्वेषणेनेत्यर्थः । अन्यथा भगवत्कृते निरपराधानां शिशूनां निरर्थकं हननं भगवतः करुणाव्यञ्जकं न स्यात् । यद्वा, शिशून् निघ्नन्तीति निहनिष्यती पुरग्रामादिषु चचार ॥ १–२ ॥ तेषां विशेषमाह—न यत्र श्रवणादीनि, यत्र पुरग्रामादिषु श्रवणादीनि न सन्ति, तत्र विचचारेत्यर्थः । यत्र च स्वयमेवावतीर्णः, तत्र चरणे मरणमेवाभूदिति भावः ॥ ४–६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

"षष्ठे सौरूप्यकारूप्ये जीवन्मृततनोरिह । निर्वर्ण्योक्तः पूतनायाः दाहो नन्दस्य चागमः" ॥

श्रीकृष्णविषये शङ्कमानं राजानम्प्रति विषये प्रवृत्ता सैव मरिष्यतीति सूचयन्नाह—नेति । यत्र पुरादिषु सात्वतां भर्तुः श्रवणादीनि दृष्टादृष्टफलेषु स्वकर्मस्वपि वर्तमाना जना न कुर्वन्ति तत्रैव यातुधान्यः प्रभवन्तीति शेषः । किमुत यत्र प्राधान्येन कुर्वन्ति तत्र न प्रभवन्तीति किमुततरां यत्र कैवल्येन कुर्वन्ति किमुततमां साक्षादेव यत्र स प्रादुर्भूयास्त इति भावः ॥ १–३ ॥ तदपि पूतनावधलीलाया आवश्यकत्वाल्लीलाशक्तिप्रेरणवशादेव मृत्युना निमन्त्र्यमाणेव मर्त्तुं गोकुलं जगामेत्याह—सेति । एकदा रात्रौ आकाशमुत्पत्य गोकुलं प्रविश्य माययात्मानं योषित्वा योषितं कृत्वा णिज्लोप आर्षः । सौन्दर्य्येण सर्वजनान् मोहयित्वा गृहान्तःपुरादिषु सहसा प्रवेष्टुमिति भावः । यद्यपि जगन्मोहिनी भगवन्मायापि तान् सिद्धभक्तान्मोहयितुं नोत्सहते तदपि कृष्णलीलाशोभासिद्ध्यर्थम् ऐन्द्रजालिकमायेव तानपि पूतनादिमाया मोहयति—भगवदिच्छावशादिति ज्ञेयम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

षष्ठाध्याये यन्निमित्ताद्यदुक्तं नेह स्थेयं बहुतिथं सन्त्युत्पाताश्च गोकुले इति तत्र पूतनावधादिकमुच्यते नन्द इति ॥ १–२ ॥ नन्दगोकुले विघ्नं कर्तुं प्रवृत्ताया अपि तस्या न किञ्चिच्छामर्थ्यमित्याह—यत्र सात्वतां भर्तुः श्रीकृष्णस्य रक्षोघ्नानि श्रवणादीनि श्रवणकीर्तनस्मरणादीनि न सन्ति तत्र यातुधान्यः स्वकर्मसु कुर्वन्ति ॥ ३ ॥ अतो नन्दगोकुलं प्राप्य तया न किञ्चिदपकृतं किन्तु स्वयमेव विनष्टेत्याह—सेत्यादिना । आत्मानं मायया स्वविचित्रविद्यया योषित्वा बकीरूपमन्तर्धाय वरनारीरूपं कृत्वा ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ॐ नमः । षष्ठे शौरेर्गिरा नन्दो व्रजं गच्छन् मृतां पथि । विलोक्य पूतनां तस्या मृत्युं श्रुत्वा च विस्मितः ॥

शौरेर्वचो न मृषेति तस्य राजर्षित्वादितिभावः । हरिं स्वसेवां नारायणम् ॥१–२॥ नन्दबाले जातशङ्कं परीक्षितं प्रत्यविषये प्रवृत्ता सैव विनङ्क्ष्यतीति द्योतयन्नाह न यत्रेति । यत्र पुरादिषु सात्वतां भर्तुः कृष्णस्य श्रवणादीनि दृष्टादृष्टफलेषु कर्मसु वर्त्तमाना जना न कुर्वन्ति तत्रैव यातुधान्यः प्रभवन्ति कीदृशानीत्याह रक्षोघ्नानीति नन्दगृहे स एव साक्षाद्वर्तते तत्र किं तच्छङ्कयेति ॥ ३ ॥ यद्यपि व्रजे तस्या न प्रभावस्तथापि तद्वधलीलायाः कार्यत्वाल्लीलाशक्तिप्रवर्त्तनान्मृत्युना निमन्त्रितेव सा मर्तुं तत्र प्रापेत्याह सेति । सा पूतना एकदा निशि खमुत्पत्य नन्दगोकुलमुपेत्य माययात्मानं योषित्वा वरां स्त्रियं विधाय भवनमध्यं प्राविशत् तादृशतां विना तत्र प्रवेशो न स्यादिति भावः । नन्वेवं कर्तुं कथं शक्नोति तत्राह कामचारिणी अतिमायाविनीत्यर्थः ॥ ४ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

॥ हरिः ॐ ॥ अत्रोपगमप्रवेशार्थकयोर्ल्यबंतक्रिययोर्गोकुलैककर्मत्वांगीकारे उपगमं विना प्रवेशानुपपत्त्याऽर्थतस्तत्सिद्धौ पुनस्तद्ग्रहणस्य व्यर्थत्वमतोऽर्थांतरमुच्यते । कंसेन प्रहिता घोरा पूतनेत्यादिना पूतनायाः प्रकृतत्वेन ग्राह्यत्वेऽपि परोक्षतया तच्छब्देन वचनात् । या पूर्वं तुंबुरोः संगता कुबेराच्छापं प्राप्ता सोर्वशीत्यर्थः । खेचरी स्वर्वेश्या उर्वशीमुखा इत्युक्तांतरिक्षचारिणी । यद्वा । 'आत्मन आकाशः संभूत' इति श्रुत्या आत्माख्य नरजातत्वान्नारशब्दः खवाची स आकाशोऽयनं मार्गो यस्य स नारायणः खेचरशब्दवाच्यः । तत्संबंधित्वात्खेचरी उर्वशी तत्पुत्रीत्वेन प्रसिद्धेः एकदा कुबेरशापावाप्त्यनंतरकाले । पूतनानंदगोकुलमित्येकं पदम् । पूतनायाः पूर्वंताटकायाः । आनंदाः । आनंदनाम ते लोका इति श्रुतेः । दुःखकारकाः । या गावः इन्द्रियाणि । तासाम् । कुं आश्रयं । लाति स्वीकरोतीति । तं पूतनादेहम् । गौः स्वर्गे इत्यारभ्य भूगवादिषु योषितीति विश्वः । गोत्रा कुः पृथिवीत्यमरः । ला आदाने इति धातुश्च ॥ उपेत्य । आविश्य ॥ आत्मानम् । आदत्तं पूतनादेहम् ॥ मायया । मोहकशक्त्या ॥ गोपित्वा । आच्छाद्य ॥ कामचारिणी । कामं गोपानां मन्मथं चारयति प्रवर्तयत्यात्मनीति तथाभूता सती प्राविशत् । प्रायेण यमुनातटे वस्त्रनिर्मितं गृहमिति शेषः । तदुक्तं । सा ताटकाचोर्वशीं संप्रविष्टा कृष्णावज्ञानान्निरयं संजगाम । सा तूर्वशी कृष्णभुक्तस्तनेन पूता स्वर्गं प्रययौ तत्क्षणेन । सा तुंबुरोः संगत आविवेश रक्षस्तनुं शापतो वित्तपस्य । कृष्णस्पर्शाच्छुद्धरूपा पुनर्दिवं ययौ । तुष्टे किमलभ्यं रमेशे । इति तात्पर्यनिर्णये । विवेश नंदस्य गृहं बृहद्वनं प्रांते हि मार्गे रचितं प्रयाणे । तीरे भगिन्यास्तु यमस्य वस्त्रगृहे शयानं पुरुषोत्तमं तमिति च ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ यदर्थमत्यर्थमर्थितः प्रादुरभूद्भगवान्भुवि तं पराक्रममङ्कूरयामास कुमारः पूतनामारणेनेतीरयंस्तत्रोत्पातपातो न नारायणशरणयानं विना भविष्यति वसुदेवश्च न वितथकथन इति तं मनसा स्मरन्परमपुरुषं जगाम व्रजमित्यादौ वदति । नन्द इति । उत्पातानामागम एष्यंस्तेन शङ्कितो हरिं सर्वारिष्टहरं शरणं जगाम । शरणं यातः सच्छरणं स्वगोकुलगृहं च जगामेत्यावृत्त्याऽन्वयः ॥ १ ॥ प्रहिता प्रेषिता पुराणि राजायासस्थानानि ग्रामो बहुजनाकीर्णो व्रजो गोकुलमेतदादिषु । बालघातिनीति नोपलक्षणमित्याचष्टे । शिशून्निघ्नन्ती चचारेति ॥ २ ॥ शङ्का तत्रासम्भाविता किमुतेति भावेनाह । नेति । सात्त्वतां भागवतानां यादवानां वा भर्तुः स्वामिनः कृष्णस्य तत्कथाया रक्षोघ्नानि रक्षांसि घ्नन्तीति तानि स्वकर्मसु श्रवणादीनि न कुर्वन्ति । तत्र यातुधान्यः स्वकर्मस्वित्यावर्तते प्रवर्तन्त इति शेषः । कुर्वन्ति स्वकार्यमिति वा शेषः । यच्चरितचरितश्रवणास्तत्र तत्पीडा यदा तदा साक्षाच्छ्रीघासावासे प्रादुर्भूतानि कथं भवेयुरायातानि तन्मारकतया स्वश्व्यात्ये तेनैवानीतानीति कर्तुं किं शक्तानि नक्तं चर्यादीनीति तात्पर्यम् ॥ ३ ॥ खेचरी राक्षस्यात्मानं मायया गोपित्वाऽऽच्छाद्य कामचारिणी कामं चरतीति सा तथा नन्दगोकुलं प्राविशत् । आनन्द गोकुलमिति पदद्वयम् । मायया करणेन गवां तत्रत्यजननेत्राणां कुलं समूहं याऽऽनन्दं बबन्ध सा प्राविशदित्यप्यन्वयः । अत एव सेति सुलभम् ॥ ४ ॥

श्रीसुबोधिनी

चरित्रमद्भुतं शास्त्रे लोकेपि भगवत्कृतम् । पूततासुपयःपानं षष्ठे रक्षा निरूप्यते ॥ १ ॥
एकं कार्यं भगवतो बह्वर्थानां तु साधकम् । अतो दुष्टवधो रक्षा बालकानां ततः कृता ॥ २ ॥
वीर्यं भगवतो वर्ण्यं मायया भगवत्कृतम् । दुःखं तस्मात् तु मुक्तेर्हि निरोधोक्तेर्न दूषणम् ॥ ३ ॥
भयं निवर्त्यं वीर्येण द्विविधं बाह्यमान्तरम् । आन्तरं शब्दजं बाह्यं पूतनाजनितं तथा ॥ ४ ॥

प्रथमं वाक्यादुत्पन्नमन्तर्भयं भगवत्स्मरणेन नाशयत इत्याह **नन्द** इति, श्रवणमात्रेणैव भयान्निर्गता मध्ये गन्तुमप्यशक्ता वाक्यं विचारितवन्तः किमस्माकं भयं कंसकृतं भविष्यतीति ततो निर्गमनार्थमुक्तमाहोस्विद् **यथाश्रुतमेव** गोकुले भयमस्तीति तद्वाक्यं विचार्यान्यार्थमपि बाधितार्थं वदन्ननृतीभवतीति निश्चित्य निर्णयमाह **शौरेर्वचो मृषा न भवतीतीममर्थं** विशेषेण **चिन्तयन् पथि** कार्यान्तराभावान्निश्चिन्ततया **तमेवार्थं** विचारयन् हृदयेनापि संवादं प्राप्य भयनिवृत्त्यर्थं **हरिं शरणं जगाम**, 'सन्ती'तिवचनं न विचारितं, अन्यथा जीवनमेव न स्यात् , किन्तु शङ्कामात्रं जातं, तदप्युत्पातागमनस्य, कदाचिदुत्पात आगच्छेदिति न त्वागत इति नापि निश्चयस्तदाहोत्पातागमशङ्कित इति, उत्पातागमार्थं शङ्कां प्राप्तः, एवंसन्देहकरणं भगवच्चरित्रं वस्तुतस्तु यदा **वसुदेव** आह तदैव पूतना गोकुले समागता ॥ १ ॥

एवमान्तरं भयं निवर्त्य बाह्यं भगवान् निवर्तयतीति प्रथमतो भयप्राप्तिमाह **कंसेनेति** सार्धैरष्टभिः, प्रथमतः सामान्यस्तस्याः सर्वोपद्रवकर्तृत्वमाह यतो मारणायेति, **कंसेन प्रेषिता शिशून् निघ्नन्ती चचारे**तिसम्बन्धः, ईश्वरप्रेषितायाः कार्यमावश्यकं स्त्रिया बालेषु स्नेहो भवतीति कथं प्रेषणमितिचेत् तत्राह **घोरेति**, जन्मादिसंस्कारेण संस्कृतान् वैदिककर्मणा सम्बद्धांस्तत्तदधिष्ठातृदेवतादिरक्षितान् कथं मारयतीत्यत आह **पूतनेति**, पूतानपि नयतीति **पूतना**, पुरुषानप्युत नयतीति वा, अतोतिबलिष्ठा, सर्वानेव मारयितुं शक्ता, ननूक्तं देवादीनां रक्षकत्वं तत्राह **बालघातिनीति**, यथा देवानां रक्षणसामर्थ्यं तथा तस्या बालघातकत्वं, भगवता तथैव निष्पादिता, अत एव **शिशूंस्त्रिवर्षपूर्वान् निघ्नन्ती चचार**, यदि भक्षयेत् तदाल्पेनापि निवृत्ता भवेत् , किन्तु बालकानां प्राणान् पीत्वा पीत्वा गच्छति, त्रिगुणेष्वपि स्थानेषु तस्या अप्रतिघात इति **पुरेषु** सात्त्विकेषु **ग्रामेषु** राजसेषु **व्रजेषु** तामसेषु च विद्यमानाच् **शिशून्** मारयन्ती तदेकप्रयोजना **चचार**, **आदि**शब्देन खेटखर्वटवाटीष्वपि ॥ २ ॥ नन्वेवं सति पूर्वमपि कोपि बालकस्तदापि न जीवेदत आह **न यत्रेति**, यत्र **सात्त्वतां भर्तुर्**भगवतो देवादिपोषकस्य **श्रवणादीनि** नवविधानि षड्विधानि वा तत्रापि **रक्षोघ्नानि** वा यैर्गुणै राक्षसा एव हन्यन्ते यथा रघुनाथचरित्राणि ताटकादिमारणरूपाणि, **स्वकर्मसु** रक्षककर्मसु स्वधर्मेषु वा '**स्व**शब्देनाधर्मशाखाः सर्वा एव निवारिताः, तत्र तु भवन्त्येव **यातुधान्यः**, तदीया वा ते, "यस्य स्मृत्या चे"तिवाक्यात् स्वधर्मा भगवच्छ्रवणाद्यभावे पूर्णा एव न भवन्ति, रक्षांसि सर्वत्र देशादिषु तिष्ठन्ति, अत एवा"पहता असुरा" इत्यादिमन्त्राः, अत एव रक्षसां पूर्वं तत्र सम्बन्धात् तत्सम्बन्धेन **यातुधान्यः** समायान्ति, यातुधानसम्बन्धी यत्रकुत्रचिदिति सर्वत्र तत्तत्स्वामिनिराकरणसमर्थाः, युक्तश्चायमर्थः, भर्तृषु विद्यमानेषु स्त्रीणां गतिरबाधिता भवतीति, रक्षोमारकैरेव रक्षोनिवृत्तिर्यथा वायुवशाद् दीपे गच्छति तैलेन न प्रतीकारस्तथा रक्षोघ्नव्यतिरिक्तैर्न प्रतीकारः, मंत्राणां तु स्वाध्यायपोषितानामेवापहतपाप्मत्वाद् "अग्निं वै जात"मित्युपाख्यानेपहतपाप्मत्वं तस्यैव निरूपितं, मर्यादायामाधिदैविकाध्यात्मिकाधिभौतिकेषूत्तरमुत्तरं बलीयः सापेक्षसामर्थ्याच्च तदधिष्ठातृदेवताप्रेरणेन परस्मिन् फलजननसामर्थ्यात् , भगवांस्तु सर्वगतः, भक्तिमार्गश्च स्वप्राकट्यार्थं विशेषेण हेतुः कृतः, अतः **सात्त्वतामेव भर्तुः श्रवणादीनि रक्षोघ्नानि** भवन्ति, आगन्तुकैरागन्तुकानामेव निवारकत्वं न तु सहजानां, एवं प्रबलदुर्बलभावे बाध्यबाधकभाव उचितः, अनेनाग्रे श्रोतुः शङ्कापि निवारिता, वर्णाश्रमधर्मवत्त्वेन स्वमात्रसम्बन्धिषु न तु भगवदर्थकेषु कर्मसु यत्र भगवन्नामश्रवणेनैव रक्षोनिवृत्तिस्तत्र साक्षाद्भगवति विद्यमाने का चिन्तेति, एतदर्थमेव **स्व**पदम् ॥ ३ ॥ एवं तस्याः सर्वोपद्रवकर्तृत्वं सूपपत्तिकमुपपाद्य गोकुलेपि तस्यां समागमनमाह **सा खेचरीति**, **एकदेति** यस्मिन् काले देवादीनां न सम्बन्धः, आश्लेषानक्षत्रे विषघटिकायां मृत्युयोगे भूमिष्ठे भगवति, भूमिः सर्वदेवरक्षितेति कथं तस्या आगमनमित्याशङ्क्याह **खेचरीति**, तद्धर्मवत्त्वेन प्रतिपादितं वैकुण्ठादेरागतस्य मर्यादानाशकत्वबोधनार्थं, **नन्दस्य गोकुलमिति**, नन्दे विद्यमाने गोषु वागन्तुं न शक्नुयात् , उभयोरपि तत्राभावात् **समागतेति**, आदौ निकटे समागत्य यत्र स्थिता माया प्रवेशं कृतवती तत्र स्थित्वा ततोग्रे गमनासामर्थ्यात् स्वस्येष्टदेवतां मायारूपं भगवन्तं ध्यातवती तदा भगवान् मायारूपस्तां स्त्रीरूपां यशोदादितुल्यां कृतवान् "मायेत्यसुरा" इति श्रुतेः "तद्धैनान् भूत्वावती"ति च, तदाहोपेत्यात्मानं **मायया योषित्वेति**, आत्मानं योषितं कृत्वेत्यर्थः, तदाप्राविशत् , ननु तथाप्यज्ञाता स्त्री कथं प्रवेशं प्राप्तवतीति तत्राह **कामचारिणीति**, **कामं** यथेच्छं **चरतीति** तथा, प्रवेशे तरुणीरूपं कृतवतीति पुरुषा न निवारयिष्यन्तीतिनिश्चयः, यत्रयत्र कामप्रवेशस्तत्रतत्र प्रवेष्टुं शक्तेति, अतो यथा मूर्तिमति काम उद्रिक्ते वा प्राणिनामन्धत्वमेवं तस्यामपीत्युक्तम् ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

षष्ठेऽध्याये वीर्ये वर्णनीये भक्तदुःखोक्तिरनुपपन्नेत्याशङ्क्याह **मायये**ति । 'मायेत्यसुरा' इति श्रुतेरसुराणां तद्रूप एवोपास्य इति तत्सम्पादितपूतनारूपं मायारूपमिति तया करणभूतया कृत्वा भगवतैव कृतं दुःखमित्यर्थः । अत एव स्वामिनीनां श्रीत्वमानम्, अन्यथा ताभिरेव सा निवर्त्येत । अत एव तदभावाय मुक्तिदानं च । अन्यथान्यत्र प्रविश्य पुनर्दुःखदानसम्भवेन सर्वात्मना तन्निवृत्तिर्न स्यात् । तर्हि सुतरां दुःखमनुपपन्नमित्याशङ्क्य भगवति भक्तचित्तवृत्तिनिरोधहेतुत्वेन पुरुषार्थरूपं तद्दुःखमिति नेदं भक्तिमार्गे दूषणमित्याहुः **निरोधोक्ते**रिति । एतेन निरोधमार्गो मर्यादाभक्तिमार्गाद्विलक्षण इति सूचितम् । यद्वा । ईश्वरे रक्षाकरणं नोचितमित्याशङ्क्यैतदुक्तम् ॥ १-४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

षष्ठाध्यायतात्पर्यं निरूपयन्तो यथा पूर्वाध्यायोक्तलीलायां स्वरूपप्राकट्यमात्रेण निरोधं कृतवांस्तथा नाग्रे किन्तु लीलयापीति वक्तुं किञ्च पूर्वाध्याये यथोत्सवकृतिर्निरोधबोधिका तथात्र रक्षाकृतिरिति बोधयितुमत्रेदं **चरित्रं रक्षा च प्रसङ्गसङ्गत्या निरूप्यते**, एतस्य **चरित्रस्य शास्त्रेद्भुतत्वं** तु 'तोकेन जीवहरण'मितिद्वितीयस्कन्धवाक्याद् दुष्टभाववत्याः शास्त्रीयसाधनरहिताया **मुक्तिदानाच्च ज्ञेय**मित्यर्थः, यद्वा "**पूतनासुपयःपानं रक्षे**"तिरूपकं तथा सत्येकमेवात्र निरूप्यं, ननु **पूतनासुपयःपानस्य रक्षात्वं** कुत इत्यत आहुरेकमित्यादि, एतस्य **वीर्या**ध्यायत्वं वक्तुं तत्प्रकारमाहु**र्वीर्य**मित्यादि, तदकस्मान्न प्रकटीभवतीति तदाविर्भावे हेतुमाहु**र्मायये**त्यादि, **टिप्पण्यां** तत् स्फुटीकुर्वन्ति दुःखमिति वीर्याविर्भावे हेतुभूतमित्यर्थः, **अत एवे**ति मायात्वाभावादेव, **अत एवे**त्यादि स्वामिन्यनिवर्त्यत्वादेव दुःखाभावाय तस्या मुक्तिदानं **चे**त्यर्थः, **तर्हि सुतरा**मिति दुःखस्य सर्वथानिवर्त्यत्वे "प्रक्षालनपङ्क"न्यायेन **तदुक्त**मिति **निरोधोक्ते**रित्यायुक्तं, **सुबोधिन्यां शब्दज**मिति **शब्दः** श्रीवसुदेववाक्यमाप्तवाक्यत्वात् तज्जनितमित्यर्थः । **नन्द** इत्यत्र **नापि निश्चय इत्युत्पातागमस्य निश्चयः** ॥ १ ॥ **कंसेने**त्यत्र **पूतना**शब्दे"न्येभ्योपि दृश्यन्त" इति डो डित्वाट्टिलोपष्टाप, द्वितीयपक्षे 'सध्यगा'दिशब्दव 'दुत' शब्देन समासः, 'राम' शब्दव्युत्पत्तिश्रुतौ 'रा' इत्येकदेशस्य राक्षसवाचकत्ववदत्र 'पु' इत्येकदेशस्य पुरुषवाचकत्वं बोध्यम् ॥ २ ॥ **न यत्रेवं**त्यत्रैवं **सती**ति पूतनायाः सर्वदा तदेकप्रयोजनकत्वे **सति**, **षड्विधानि वे**ति "यत्कीर्तनं यच्छ्रवण"मितिद्वितीयस्कन्धोक्तरीत्या षड्विधानि दास्यादीनां दुर्लभत्वादसार्वत्रिकत्वात् ततः पूर्वाणीति वा, **तत्रापी**ति श्रवणादिष्वपि, वेति **वा**शब्दो वाक्यालङ्कारे, **अधर्मशाखा** इति "विधर्मो"दिरूपाः पञ्च त इत्यधर्माः, ननु **स्वधर्मेषु** रक्षोनिराकरणस्य किं प्रयोजनमत आहु **रक्षांसी**त्यादि, **निराकरणसमर्था** इति रक्षोघ्नाः श्रवणादय इति शेषः, ननु **मन्त्रैरेव यातुधानी**निवृत्तिसम्भवे श्रवणादीनां किं प्रयोजनमत आहु**र्मन्त्राणा**मित्यादि, **तस्ये**ति स्वाध्यायस्य, नन्वेवं सति स्वाध्यायापोषितैरेतैर्निवृत्तिरस्त्विति चेत् तत्राप्याहु**र्मर्यादाया**मित्यादि, तथा च तादृशमन्त्रापेक्षयाधिभौतिक्यास्तस्या बलिष्ठत्वान्न निवृत्तिरित्यर्थः, अत एवेल्वलादिवधोपि युध्यतेन्यथर्षिभिरेव मार्येत, मन्त्राणां निर्बलत्वे हेत्वन्तरमप्याहुः **सापेक्षे**त्यादि, यद्वा ननु तर्हि वेदोक्तं रक्षोघ्नत्वं मन्त्राणां भज्येतेति व्यवस्थयोभयेषामपि तथात्वमित्याहु**र्मर्यादाया**मित्यादि **भवन्ती**त्यन्तं, तत्र **सामर्थ्या**दित्यन्तं मर्यादामार्गीया व्यवस्था **भगवांस्त्वि**त्यारभ्य **भक्तिमार्गस्ये**ति बोध्यं, नन्वेवमुभयो रक्षोघ्नत्वेपि न मार्गभेदादेव व्यवस्था किन्तु हन्तव्यभेदादपीत्याहु**रागन्तुकै**रिति, **निवारकत्व**मिति निवारणमित्यर्थो घटवत्त्वं घट इति वत्, तथा चागन्तुकीनां यातुधानीनामागन्तुकैर्मन्त्रैर्निवृत्तिर्भगवदीयैस्तु सहजानां रक्षसामित्यर्थः, तदेव विशदयन्त्येवमित्यादि, **उचित** इति द्विविधोप्युचित इत्यर्थः, वस्तुतस्तु मन्त्राणामपि भगवच्छ्रवणाद्यभावे फलसाधकत्वाभावादसार्वत्रिकत्वाच्च भगवच्छ्रवणादीनामेव तथात्वमित्यभिप्रायेत एव मूलेपि न मन्त्रनामग्रहणं, उक्तस्य प्रबलदुर्बलभावस्य फलान्तरमाहु**रनेने**त्यादि, यत्र भगवच्छ्रवणादिभिरेव यातुधान्यादिनिवृत्तिस्तत्र भगवति विद्यमाने सा कथं समागतेति श्रोतुः शङ्कापि प्रबलदुर्बलभावनिरूपणेन निवारिता, तथा च **तस्यास्तदानीं** तेभ्योपि बलीयस्त्वमतः सा समागतेत्यर्थः, **स्वकर्मस्वि**त्यत्रोक्तस्य स्वपदस्य तात्पर्यमाहु**र्वर्णे**त्यादि ॥ ३ ॥ **सा** खेचरीत्यत्राश्लेषानक्षत्र इत्यत्राश्लेषानक्षत्रे पूतनाया **आगमन**कथनेन पूतनामारणावसरे भगवान् **षड्दिन** इति ज्ञायते, उक्तं च **पाद्मोत्तरखण्डे** "भाद्रासितचतुर्दश्यां नन्दजः पूतनामह"न्निति, हरिवंशे त्वियं शकुनीशब्देनोच्यते, न च हरिवंशोक्तरीत्यनुरोधेन तदा षाण्मासिक एवाङ्गीकर्तव्य **आश्लेषा**यास्तदापि सम्भवादत्र तु विशेषस्यानुक्तत्वादिति वाच्यं, उत्सवोत्तरं तदैव करदानार्थगतव्रजेन्द्रवसुदेवसंवादसमय एव पूतनागमनस्योक्तत्वात् "तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोपवृत्त" इति द्वितीयस्कन्धोक्तब्रह्मवाक्येपि शकटासुरमारणसमये त्रैमासिकत्वकथनेन तत्पूर्वकालीनलीलायां न षाण्मासिकत्वं वक्तुं शक्यमतस्तत् कल्पान्तरीयमितिदिक्, **तद्धर्मवत्त्वेने**त्यादि भूचरत्वे **मर्यादानाशनसामर्थ्यं** यथा खेचर्यास्तथागतस्य **वैकुण्ठादे**रमाक्रीडस्वरूप**मर्यादानाशकत्वबोधनार्थ**मस्याः**खेचरीत्वे**नान्यथा कालातीतस्य कालादिदोषसम्बन्धोक्तिरपि विरुध्येतेत्यर्थः, **मायाप्रवेश**मिति मायया प्रतिपादनं, **प्रकृष्टं वेशम्** ॥ ४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

षष्ठाध्याये **चरित्रमिति पूतनासुपयःपानं** ततो बालरक्षा च **चरित्रं षष्ठे निरूप्यत** इत्यन्वयः । ननु तन्मारणे तद्देहान्तर्गतबालानामपि मरणमेव सम्पद्येत स्त्रिया मृतौ तद्गर्भस्येवेति कथं बालानां रक्षेत्यत आहुः **एकमिति** । **नन्द** इत्यस्याभास **इत्याहेति** । इति हेतोः स्मरणसूचकं शरणगमनमाहेत्यर्थः, **उत्पातागमार्थ**मित्यत्रार्थशब्दो निवृत्तिवाची, मशकार्थे धूममितिवत्, तथा **चोत्पात**निष्ठो **आगम** आगत्यनुकूलो व्यापारस्तं निवर्तयितुमित्यर्थः, विग्रहस्तत्पातागमस्य **शङ्कित** इति पूर्वं व्याख्यात एव ॥ १ ॥ **कंसेने**त्यत्र **ईश्वरप्रेषिताया** इति तस्या **ईश्वरः** कंसस्तेन **प्रेषिताया** इत्यर्थः, **ननूक्त**मिति संस्कृतनयनं पूतनापदनिरुक्त्या साधितं, अधिष्ठातृदेवादीनां रक्षकत्वं यदुक्तं तद्रक्षाभावः कथं साधनीय इत्यर्थः ॥ २ ॥ **न यत्रे**त्यत्र श्रवणादीनां नवानामप्युक्तौ **रक्षोघ्ना**नीतिपदं दास्यादिषु रक्षःसम्बन्धशङ्काभावादकथनीयं स्यादित्यत आहुः **षड्विधानीति**, दास्यादित्रये रक्षःसम्बन्धशङ्काभावादितिभावः, तथापि प्रयोजनं रक्षोघ्नपदस्य स्वरूपबोधकत्वे न सिध्यतीत्यरुच्या व्यावर्तकत्वमाहु**स्तत्रापी**ति **तत्र त्विति** । श्रवणादिरहितेषु **रक्षककर्मसु स्वधर्मेषु वा यातुधान्यो भवन्त्येव**, तैः कर्मभिर्न निवर्तन्त इत्यर्थः, **यैर्गुणै राक्षसा एव हन्यन्ते** तेषां श्रवणादीनीति शेषः, अस्मिन् पक्षे श्रवणादिपदं त्रिविधवाचकमेव सम्भवतीतिज्ञेयं **तदीया वेति ते** श्रवणादिरहिता धर्मास्**तदीया** रक्षःसम्बन्धिनो भवन्त्यतो राक्षस्यः समागच्छन्तीति भावः, अस्मिन् पक्षे **यातुधान्यो भवन्ति** समागच्छन्तीत्यर्थः, उभयत्रापि हेतुमाहुः **यस्येति**, प्रथमपक्षे कर्मणः पूर्णत्वाभावान् न तन्निवृत्तिः, द्वितीयपक्षे 'यदस्य कर्मणोत्यरीरिचं यद्वा न्यूनमिहाकर'मितिश्रुतौ न्यूनकर्मणः पापत्वकथनेनासुरत्वसूचनाद् राक्षसीनामागमनमित्यर्थः, नन्वपूर्तिमात्रेणासुरत्वं कथं भवेदित्याशङ्क्य मूले हिशब्देन सूचितां युक्तिं विवृण्वन्ति **रक्षांसीति**, **यातुधानसम्बन्धा** इति यातुधानैः सम्बन्धो यासां तादृश्य इत्यर्थः, **मूले तत्रे**तिपदस्यार्थमाहु**र्यत्र कुत्रचिदिति सर्वत्रे**ति, **तत्तत्स्वामिनिराकरणसमर्था** इति तस्य कर्मण आसुरत्वात् स्वयं प्रबलास्तत्तन्मन्त्रस्वामिनां देवानां निराकरणे समर्था भवन्तीत्यर्थः, **रक्षोघ्ना**नीतिपदस्य तात्पर्यमाहुः **रक्षोमारकैरेवेति**, कर्मणः पूर्णतया आसुरत्वासम्पादनेन स्वरूपसम्पादकत्वं चरित्रमात्रश्रवणादेर्न त्वागन्तुकविघातकनिवर्तकत्वं, तादृशत्वं तु रक्षोघ्नचरित्रश्रवणादेरेवेत्यर्थः, **रक्षोघ्नव्यतिरिक्तै**स्तेषां **प्रतीकारो** निवृत्तिर्न भवतीति दृष्टान्तेन साधयन्ति **यथेति**, तैलं दीपस्वरूपसम्पादकं न तु विघातकनिवर्तकं तथेत्यर्थः, ननु 'रक्षोहणोवो बलगहन' इत्यादिमन्त्रा अपि रक्षोघ्ना उक्तास्तान् विहाय **श्रवणादिकमेव** रक्षोनिवर्तकं कथमुच्यते इत्याशङ्क्य तत्र स्वनिर्वाहे कुण्ठितत्वारुचिं स्फुटीकुर्वन्ति **मन्त्राणां त्विति**, अपहताः पाप्मानो यैस्तादृशत्वं रक्षोनिवर्तकत्वमित्यर्थः, **सुष्ठु आ** समन्तादध्यायोऽध्ययनं शोभनं नियमैर्युतं आ सर्वतः पुनस्तत्र यथा शङ्का न जायते इत्युक्तप्रकारकमध्ययनं तेन **पोषितानामि**त्यर्थः, **तस्यैवेति** स्वाध्यायस्यैवेत्यर्थः, तथा च मन्त्रा अपि रक्षोनिवर्तकास्तथापि स्वनिर्वाहकसापेक्षा इतिभावः, तत्र हेतुद्वयमाहु**र्मर्यादाया**मिति, **आधिदैविका** गायत्र्यादिमन्त्रजपादयः **आध्यात्मिका** न्यासादयः, **आधिभौतिकाः** स्नानादयः, तथा च रक्षःसम्बन्धादाधिभौतिकदेहादिशुद्ध्यभावे मन्त्रस्वरूपमेव न सिद्ध्येदितिभावः, इदं दोषद्वयं प्रकृते नास्तीत्याहु**र्भगवांस्त्विति**, **आगन्तुकैरिति** स्वाध्यायेन पोषितत्वादा**गन्तुकैर्मन्त्रैः** करणैरागन्तुकानामेव रक्षसां निवारकत्वं, रक्षकस्य पुरुषस्येतिशेषः, **एतदर्थमेवेति** कैमुत्यसूचनार्थमेवेत्यर्थः, श्लोकद्वयार्थमनुवदन्ति **एकमिति**, उपपत्तिकथनं "न यत्रे"ति श्लोकस्यार्थः, **सूपपत्तिकं** सुष्ठु उपपत्तिर्यत्र तादृशमित्यर्थः ॥ ३ ॥ **सा खेचरी**त्यत्र **वैकुण्ठादेरिति** वैकुण्ठेष्वादिर्मुख्यो व्यापिवैकुण्ठस्तस्येत्यर्थः, **नन्दे विद्यमाने** इति नन्दे विशुद्धसत्त्वस्थापनस्योक्तत्वाद् **गवां च** धर्महेतुत्वाद् रक्षोनिवर्तकत्वं, अत एव तद्दोषनिवारणाय गोमूत्रेण स्नापनं नन्देन च वात्सप्रेण सूक्तेनाघ्राणं वक्ष्यति, **नन्दो** मथुरां गतो गावश्चरणार्थं गताः किन्तु स्थानमात्रमस्तीत्यर्थः, गवां कुलं यत्र तादृशं स्थानमिति विग्रहः ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

षष्ठेऽध्याये कारिकासु **रक्षा बालकानां ततः कृतेति** दुष्टायाः पूतनाया मारणेन व्रजस्थानां रक्षा जाता अन्यथा नन्दगृहागमनात् पूर्वं यथा पूतनया बाला मारितास्तथा पुनरपि मारयेत्, **आन्तरं शब्दजमिति** अन्तः हृदये उद्भूतं **आन्तरं** वसुदेवोक्तिश्रवणानन्तरं श्रीनन्दस्य हृदये भयमुत्पन्नं तदनन्तरं वसुदेवोक्तशब्दश्रवणजन्यत्वात् **शब्दज**मित्यर्थः । **उत्पातागमशङ्कित** इत्यस्य व्याख्याने, **एवं सन्देहकरणं भगवच्चरित्र**मिति अत्र वसुदेवस्य परमाप्तत्वात् तेन च 'सन्त्युत्पाताश्च गोकुल' इत्यनेनोत्पातनिश्चयस्यैवोक्तत्वादुत्पाताः सर्वथा श्रीगोकुले भवन्तीत्येव नन्दमनसि ज्ञानमुचितं, तथाप्युत्पातो भवेन् न वेत्येवोभयकोट्यवगाहि संशयात्मकं ज्ञानं व्रजराजस्याभून् तत् तु भगवत्कृतमेवेतिभावः, अन्यथोत्पातनिश्चये भगवद्विषयकस्नेहस्य प्राबल्याज् जीवनमेव न स्यात्, अतः संशय एव भगवतोत्पादितः, तदेतन् मूले उक्तं **उत्पातागमशङ्कित** इति, **सन्देहकरणं भगवच्चरित्रमिति** व्याख्यातं च ॥ १ ॥ **पूतना बालघातिनी**त्यस्य व्याख्याने पूतनाशब्दनिरुक्तौ **पूतानपि नयतीति पुरुषानप्युतन यतीति** वेति व्युत्पत्तिद्वयमपीदं न व्याकरणसाध्यमपि तु निरुक्तसाध्यमितिज्ञेयं, 'अल्पाक्षरसाम्येन निर्ब्रूयान् न संस्कारमाद्रियेते'ति निरुक्तानुशासनात्, अत एव 'भाति सर्वेषु भूतेषु रतिः सर्वत्र जन्तु' ष्वित्यादिभारतशब्दस्य निरुक्तिर्दृश्यते पुरि शेत इति पुरुष इत्यादि च ॥ २ ॥ **न यत्र श्रवणादीनी**त्यस्य व्याख्याने, **मन्त्राणां तु स्वाध्यायपोषितानामि**त्यारभ्योत्तर**मुत्तरं बलीय** इत्यन्तं, ननु वेदमन्त्रैरेव राक्षसादीनां निवृत्तौ सिद्धायां किं भगवच्छ्रवणकीर्तनादिभिरित्याशङ्क्याहुः **मन्त्राणां त्वित्यादि**, नियमादिपूर्वकाध्ययन-

पोषितानां मन्त्राणामेव फलसाधकत्वं, तादृशनियमादीनां दुष्करत्वेन मन्त्रैः कार्यासिद्धिं ज्ञात्वा भगवच्छ्रवणकीर्तनादयो दुष्टनिवारकत्वेन निरूपिताः यतो भगवच्छ्रवणकीर्तनादीनां नियमादिराहित्येऽपि फलसाधकत्वेन स्वतन्त्रत्वं, अतोत्र त एवोक्ताः, वेदमन्त्राणां फलसाधकत्वं तदा स्याद् यदा देशकालादिसर्वसाधनसौष्ठवं भवेत्, तस्य दुर्लभत्वाद् देशादिसाधनानपेक्षाः फलं साधयितुं समर्थाः श्रवणादय एव पुरस्कृताः, वेदमन्त्राणां फलसाधकत्वे दौर्लभ्यमाहुः **मर्यादायामिति**, वेदमार्गे इत्यर्थः, **आधिदैविकाध्यात्मिकाधिभौतिकेष्विति** त्रिविधेषु साधनेष्वित्यर्थः, तत्र **भौतिकं** देहशोधकं स्नानादिरूपं, **आध्यात्मिकं** श्रद्धारूपं, **आधिदैविकं** वैदिकमन्त्रात्मकं रक्षोघ्नादिरूप, एवं त्रिषु साधनेष्वाधिदैविकस्य वेदमन्त्रस्य फलदातृत्वं श्रद्धाधीनं, न हि श्रद्धां विना पठिता मन्त्राः फलदा भवन्तीत्यत आध्यात्मिकस्य श्रद्धारूपसाधनस्याधिदैविकमन्त्रात्मकसाधनापेक्षया बलीयस्त्वं, एवमाध्यात्मिकश्रद्धारूपसाधनस्य फलदत्वं स्नानादिशुद्ध्यधीनं, न हि स्नानादिरहितस्य श्रद्धामात्रेण फलं भवत्यत आधिभौतिकस्य स्नानादेराध्यात्मिकश्रद्धारूपसाधनाद् बलिष्ठत्वं, अतः सुष्ठुक्तमा**धिदैविकाध्यात्मिकाधिभौतिकेषूत्तरोत्तरं बलीय** इति, **सापेक्षसामर्थ्याच्** चेति आधिदैविकस्य भौतिक**सापेक्षसामर्थ्या**दित्यर्थः, देवता हि फलं प्रयच्छन्त्यो भौतिकद्वारैव प्रयच्छन्ति, यथाधिदैविकी गङ्गा प्रवाहरूपभौतिकसम्बन्धेनैव शुद्ध्यादिरूपं फलं ददाति, अत आधिदैविकस्य भौतिक**सापेक्षसामर्थ्यत्वं, तदधिष्ठातृदेवते**त्यादि आधिदैविकब्राह्मणाधिदैविकसुरभ्यादिदेवताप्रेरणेन परस्मिन् आधिभौतिकब्राह्मणे आधिभौतिक्यां गवि च फलजननसामर्थ्यं यतो जायते, तत्प्रेरणेन भौतिका एव फलं प्रयच्छन्ति, अत आधिदैविकानामपि फलदाने भौतिकापेक्षास्तीति भौतिकानां बलवत्त्वं, तथा च सिद्धमेतत् भौतिकापेक्षा आधिदैविकानां, भौतिका देशकालादयो ह्यशुद्ध्यादिदोषवशाद् दुर्बला इति देशादिषट्कशुद्धिनिरपेक्षाः श्रवणकीर्तनादय एव सर्वदा सर्वफलसाधका इति त एव राक्षसादिनिवारणार्थमुक्ता इतिभावः, तदेतदाहुः **भगवांस्तु सर्वगत** इति, तु शब्देन वेदो न सर्वगत इत्युक्तं, वेदस्य त्रैवर्णिकमात्रविषयत्वाद् देशादिशुद्धिसापेक्षत्वेन स्वनिर्वाहे कुण्ठितसामर्थ्यवत्त्वाच्च च, **भगवांस्त्विति** श्रवणकीर्तनस्मरणादिना सेव्यमानो भगवांस्त्वित्यर्थः, **सर्वगत** इति श्रवणादेः सर्वाधिकारकत्वेन श्रवणादिविषयीभूतस्य भगवतः सर्वगतत्वं, तेन न श्रवणादेः कुत्रापि कुण्ठितशक्तितेतिभावः ॥ ३ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

षष्ठाध्याये **चरित्रमद्भुतं शास्त्र** इति का० १७३⁄४। पूतनाया असुभिः सहितस्य पयसः **पानं रक्षा** पूर्वभक्षितबालानां कृतार्थतान्येषां च रक्षेत्यर्थः, **एकमिति** का० १८३⁄४। एकस्य कार्यस्य बह्वर्थसाधकत्वं टिप्पण्यां पञ्चमाध्याये कारिकाव्याख्याने स्फुटीकृतं, **वीर्य**मिति का० १९३⁄४। "मायेत्यसुरा" इति श्रुतेरसुराणां मायारूप एव भगवानुपास्य इति मायासम्पादितपूतनारूपं मायारूपमिति तया करणभूतया कृत्वा भगवतैव कृतं दुःखमित्यर्थः, तस्मात् करणाद् दुःखाभावाय पूतनायाः मुक्तिदानं, ननु भक्तदुःखाभावाय पूतनामारणे पूर्वमपि भक्तदुःखमनुपपन्नमित्याशङ्क्याहु**र्निरोधोक्तेर्न दूषण**मिति, तादृशदुःखस्य भगवति चित्तवृत्तिनिरोधहेतुत्वेन पुरुषार्थरूपत्वाद् भक्तिमार्गे न दूषणमित्यर्थः, तथा चैवमन्वयः, अत्राध्याये **भगवतो वीर्यं** पूतनामारणरूपं **वर्ण्यं**, तत्र हेतु**र्मायया भगवत्कृतं दुःखं, तस्मान् मुक्तिः** पूतनायाः, **निरोधोक्ते**र्निरोधसाधकत्वात् तद् दुःखं न **दूषण**मिति, **भय**मिति का० २०३⁄४। **शब्दज**मिति "सन्त्युत्पाताश्च गोकुले" इति वसुदेववाक्यजन्यमित्यर्थः ॥ २०३⁄४ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

कारिकाः - **चरित्रमद्भुतं शास्त्रे लोकेऽपि भगवत्कृतम्। पूतनासुपयःपानं षष्ठे रक्षा निरूप्यते ॥ १ ॥**
एकं कार्यं भगवतो बह्वर्थानां तु साधकम्। अतो दुष्टवधो रक्षा बालकानां पुनः कृता ॥ २ ॥
वीर्यं भगवतो वर्ण्यं मायया भगवत्कृतम्। दुःखं तस्मात् तु मुक्तिर्हि निरोधोक्तेर्न दूषणम् ॥ ३ ॥
भयं निवर्त्यं वीर्येण द्विविधं बाह्यमान्तरम्। आन्तरं शब्दजं बाह्यं पूतनाजनितं तथा ॥ ४ ॥

कारिकार्थ—पूतना के स्तन्य एवं प्राण और पूतना में रहे हुए बालकों के प्राण खींच लेना और बालकों की रक्षा करना ये भगवान् के चरित्र लोक और भागवत शास्त्र में भी अद्भुत कहे और समझे जाते हैं इनका अब छठे अध्याय में निरूपण किया जाता है ॥ १ ॥ यद्यपि भगवान् की एक लीला होती है लेकिन वह अनेक अर्थों को सिद्ध करती है—जैसे पूतना-वध की लीला से दुष्टों का नाश, पूतना द्वारा प्रथम मारे हुए बालकों का हित, एवं पूतनावध से भविष्य में दूसरे बालकों का मरने से रक्षण करना आदि कार्य सिद्ध हुए ॥ २ ॥ इस अध्याय में भगवान् के वीर्य गुण का वर्णन करना है। भगवान् ने माया द्वारा दुःख दिलाकर, फिर उस दुःख से व्रज को मुक्त किया, ऐसा करने में किसी प्रकार का दोष नहीं है; क्योंकि यह दुःख निरोध सिद्धि के लिये दिलाया था ॥ ३ ॥ वीर्य द्वारा भीतरी और बाहरी दोनों प्रकार का भय मिटाना है। भीतरी भय शब्द द्वारा पैदा हुआ है और बाहरी भय पूतना द्वारा हुआ है। श्रीवसुदेवजीने श्रीनन्दरायजी को मथुराजी में कहा था कि आप शीघ्र व्रज पधारिये व्रज में उपद्रव हो रहे हैं यह भय "शब्दज" भय था ॥ ४ ॥

श्रीपुरुषोत्तमजी प्रकाश में कारिकाओं का विवेचन करते हैं कि पाँचवें अध्याय की लीलाओं में निज रसमय श्रीविग्रह प्रकट करके भगवान् ने भक्तों का निरोध किया है अब आगे की लीलाओं में मात्र स्वरूप से ही नहीं, किन्तु स्वरूप एवं लीलाओं द्वारा भक्तों का निरोध करेंगे। जैसे 'पंचम अध्याय में भगवान् के प्राकट्य अवसर पर किया हुआ नन्दमहोत्सव निरोध सिद्ध करने वाला था। वैसे ही छठे अध्याय में पूतना से बालकों की रक्षालीला, निरोध बतलाने वाली है। इसे समझाने के लिये इस चरित्र और रक्षा प्रसंग की संगति बताई जाती है। इस पूतनाचरित्र को भागवत शास्त्र में २-७-२८वें **'तोकेन जीवहरणं'** श्लोक में ३-२-२३ वें **'अहो बकीयं'** श्लोक में एवं २०-६-४४ वें श्लोक में अद्भुत इसलिए कहा गया है कि दुष्ट स्वभाव वाली शास्त्रीय साधन रहित पूतनाने मुक्ति के लिए शास्त्रविहित कोई भी साधन नहीं किया। ऐसी को भी मुक्ति दे दी। भगवान् का इससे विशेष अनूठा चरित्र क्या होगा? अथवा पूतना के प्राण रूपी स्तन्य के पान द्वारा बालकों की रक्षा की इस कार्य को रूपक मान ले तो इस अध्याय में एक ही लीला बताई गई है। लेकिन भागवत शास्त्र में रूपक कथा नहीं है।

पंडितप्रवर निर्भयराम भट्टजी कारिकार्थ में जताते हैं कि—भगवान् ने पूतना के प्राणों के साथ दूध पीकर, जो बालकों की रक्षा की, उस रक्षा में पूतना द्वारा प्रथम मारे हुए और पूतना के उदर में रहे हुए बालकों को भगवानने अपने श्रीअङ्ग में स्थापित कर बालकों को कृतार्थ किए और अन्य बालकों की पूतना के मरजाने के कारण रक्षा हुई।

श्रीलालूभट्टजी योजना में **'अतो दुष्टवधो रक्षा बालकानां ततः कृता'** इसका अर्थ बताते हैं कि दुष्ट पूतना के वध द्वारा व्रजस्थों की रक्षा की। नहीं तो नन्दजी जब तक नहीं पहुंचे थे, तब तक जैसे बालकों का पूतना ने मारा था वैसे ही नन्दजी के पहुंचने पर भी मारती। इसलिये पूतना-वध से बालकों की रक्षा हुई और साथ ही नन्दजी का अन्तर्भय भी, जो वसुदेवजी के शब्द सुनने से हुआ था, वह कम हुआ ॥ २ ॥

श्रीवल्लभलालजी लेख में कहते हैं कि पूतना के वध से, पूतना द्वारा मारे गये बालक, पूतना के उदर में थे वे भी पूतना के साथ मर गये होंगे; क्योंकि गर्भवती माता के मरने पर जो बालक उदर में होता है वह भी मर जाता है, वैसे ही वे भी मरे होंगे, इस शङ्का को इस कारिका द्वारा मिटाया गया है।

श्रीविट्ठलनाथजी आज्ञा करते हैं कि यदि कोई कहे कि छठे अध्याय में वीर्य का वर्णन करते हुए भक्तों के दुःखों का वर्णन करना उचित नहीं तब इसका समाधान करते हैं कि **'मायया'** भगवान् ने माया द्वारा भक्तों को दुःख दिया और उस माया रूपी पूतना को मार कर, भक्तों का दुःख मिटा कर निरोध किया। यह सब भगवान् की वीर्यलीला होने के कारण, इस अध्याय में भक्तों के दुःख का वर्णन है, इस कारण से भक्तिमार्ग में यह दोष नहीं है। श्रुति में कहा गया है कि **'मायेत्यसुराः'** असुर लोगों का भगवान् माया है—इसका तात्पर्य कि असुर लोग, मायारूपी भगवान् के सेवक हैं उसकी सेवा करते हैं। माया रूप पूतना का यह स्वरूप मायारूप भगवान् ने ही भक्तों को दुःख देने के लिये तैय्यार करवाया था। इसलिये भगवान् ने ही पूतना को साधन रूप बना कर भक्तों को दुःख दिया था। इसलिये उस पूतना में व्रज-भक्तों का लक्ष्मी भाव हुआ था, नहीं तो वे ही उसको निकाल देते। दूसरे बालकों को अब कष्ट न हो, इसलिये भगवान् ने पूतना को मुक्ति-प्रदान किया। यदि पूतना मुक्त न होती तो फिर दूसरे किसी में प्रवेश कर दुःख देती। अब वह सम्भावना सदा के लिए मिट गई। इस कारण से निरोध मार्ग मर्यादा भक्ति मार्ग से विलक्षण है। ईश्वर की रक्षा करने योग्य न थी, इसका समाधान भी यही है कि प्रेमलक्षण निरोध मार्ग मर्यादा मार्ग से अनूठा है; क्योंकि उसमें स्नेह ही मुख्य है।

आचार्यचरण कहते हैं कि **'प्रथमं वाक्यादुत्पन्नं'** अब श्रीशुकाचार्यजी प्रथम श्रीवसुदेवजी के वचनों के श्रवण से पैदा हुआ भीतरी भय ईश्वर की शरण में जाने से नष्ट होगा, इसका वर्णन **'नन्दः पथि'** श्लोक से करते हैं। श्रीवसुदेवजी के वचनमात्र सुनते ही नन्दादि गोप भयभीत होकर मथुरा से निकले, मार्ग में भय के मारे चलने के लिये भी क्षीणशक्ति हो गये थे चल नहीं पाते थे और वसुदेवजी के वाक्यों को विचारते थे, क्या हमको कंस द्वारा भय होगा? इसलिये मथुरा से जाने के लिये वसुदेवजी ने सूचन किया, अथवा जैसे उनसे सुने गए शब्द हैं कि गोकुल में उत्पात हैं इस कारण वसुदेवजी का विचार हमको मथुरा से निकालने का था, इसलिए शब्द कहे। नहीं नहीं, ऐसा नहीं हो सकता। श्रीवसुदेवजी कभी झूठ नहीं बोलते। उत्पात का केवल निमित्त बताया ऐसा कहें तो असत्यवादी हो जाँय।" इससे यह निश्चय किया कि वसुदेवजी ने जो कुछ कहा वह कदाचित् सत्य भी हो जाय। इस प्रकार शंकितचित्त और भीतर भय वाले नन्दरायजी गोकुल चले।

ऐसा विचार करते हुए मार्ग में किसी भी प्रकार का कार्य न होने से निश्चिन्त हो कर वसुदेवकथित भय को मिटाने के लिये नन्दजी ने श्रीहरि की शरण ली। 'गोकुल में उत्पात है', ऐसे वसुदेवजी के वाक्य पर नन्दजी ने ध्यान न दिया लेकिन स्मरण करने लगे। यदि इन वचनों पर ध्यान देते तो नन्दजी के प्राण भी निकल जाते। नन्दजी के मनमें केवल उपद्रवों की शंका हुई, वह भी उपद्रवों के आने की शङ्का हुई कि कदाचित् उपद्रव होंगे; परंतु अब हो रहे हैं, यह निश्चय

नन्दजी को नहीं हुआ। शुकाचार्यजी ने श्लोक में यह कहा है कि उत्पात आने की शङ्का वाले नन्दजी थे। नन्दजी के मन में इस प्रकार का संदेह ही रहा, यह भी भगवान् का चरित्र है, सचमुच तो जिस समय वसुदेवजी ने नन्दरायजी को 'गोकुल में उपद्रव हैं' कहा था उस समय ही 'पूतना' गोकुल में पहुंच गई थी।

योजनाकार श्रीलल्लूभट्टजी **'उत्पातागमशंकितः'** वाक्य का मर्म कहते हैं कि जब कि नन्दराय को निश्चय था कि वसुदेवजी सत्यवक्ता हैं, उन्होंने जो कहा वह सत्य ही है। वसुदेवजी ने स्पष्टतया कह दिया था कि गोकुल में उत्पात हो रहे हैं, फिर भी नन्दजी के मन में जो सन्देह हो रहा था, उसका कारण भगवान् का चरित्र है स्वयं भगवान् चाहते हैं कि नन्दरायजी को इस विषय में सन्देह ही हो, नहीं तो, भगवान् में विशेष वात्सल्य स्नेह होने से, नन्दजी के प्राण निकल जाते, इससे भगवान् ने ही नन्दजी के मन में सन्देह कराया, निश्चय होने नहीं दिया। इसलिये सुबोधिनी में यह सन्देह उत्पन्न कराना भगवच्चरित्र है, इस प्रकार व्याख्या की है ॥ १ ॥

आचार्य श्री कहते हैं कि **"एवमान्तरं भयं निवर्त्य"** इस प्रकार आन्तर भय दूरकर बाहरी भय भगवान् मिटाते हैं। इसलिये पहिले बाहरी भय का वर्णन **'कंसेन'** इस श्लोक से लेकर **"तस्मै रतनं बुर्जर"** श्लोक पर्यन्त ८॥ श्लोकों में करते हैं।

पूतना सब जगह सब उपद्रव करने वाली है, इस लिये यह मारने योग्य है इसको प्रथम सामान्य ढंग से वर्णन करते हैं।

कंस की भेजी हुई घोर पूतना, बच्चों को मारती हुई, सब जगह घूम रही थी। पूतना का शासक (स्वामी) कंस था, शासकने जिस कार्य के लिये भेजा, वह कार्य अवश्य करना चाहिये लेकिन पूतना स्त्री थी स्त्री-जाति का बालकों में सहज स्नेह होता है इसलिये वे बच्चों से प्यार करेगी मारेगी नहीं; ऐसा जानते हुए भी कंस ने स्त्री को क्यों भेजा ? इसका समाधान करते हुए शुकदेवजी कहते हैं कि यह पूतना अन्य स्त्रियों के समान कोमलहृदय नहीं है किन्तु घोरा क्रूरा है इसलिये कंस ने बच्चों को मारने के लिये भेजा। जात-कर्म आदि संस्कारों से पवित्र, वैदिक कर्मों से सम्बन्धित कर्मों की अधिष्ठात्री देवताओं आदि द्वारा सुरक्षित बालकों को किस प्रकार मारेगी ? इस पर शुकदेवजी समाधान करते हैं कि वह 'पूतना' है; उसके ऐसे घोर कर्मों के करने के कारण उसका 'पूतना' नाम धरा गया है। **'पूतान् नयति इति पूतना'** पवित्रों को भी जो ले जाती है उसको पूतना कहा जाता है। यह केवल बच्चों को ही ले जाती है, ऐसा नहीं अपितु पुरुषों को भी ले जाती है, इसलिये इसका नाम पूतना है। पुरुषान् अपि उन्नयति' इस व्युत्पत्ति से पुरुषों को भी ले जाने वाली पूतना को ऐसी घोर स्त्री समझ कंस ने इसको भेजा है। इन कारणों से यह बहुत बलवाली है, सबको मारने की शक्ति रखती है। संस्कारों के करने के कारण, जब देवता रक्षक हैं तब उन्हें यह कैसे मारती है ? तब कहते हैं कि **'बालघातिनी'** जैसे देवताओं में रक्षा करने की शक्ति है, वैसे पूतना में बालकों को मारने की शक्ति है। भगवान् ने ऐसी ही शक्ति उसको दी है। इससे ही तीन वर्ष से छोटे बच्चों को मारती हुई घूमती रहती थी। जो बच्चों को खा जावे, तो थोड़ों से ही पेट भर जाने के कारण मारना छोड़ दे, लेकिन बालकों के प्राण मात्र चूस चूस कर चली जाती है। तीनों गुणों वाले स्थानों में जाने की इसको रुकावट न थी, इससे सात्विक गुणी नगरों में, राजसगुणी गांवों में और तामसगुणी गोष्ठों में रहने वाले बालकों को मारती हुई, इस कार्यमात्र के लिये वहाँ घूमती हुई इधर उधर चक्कर काटती थी। श्लोक में 'आदि' शब्द है उसका भाव है कि वह केवल नगर, गाँव और गोष्ठों में ही नहीं किन्तु **'खेटखर्वटवाटीषु अपि'** खिड़कों और वाड़ियों में भी घूम घूम कर बच्चों के प्राण चूसती थी ॥ २ ॥

अब आचार्य श्री अग्रिम श्लोक के अवतरण में कहते हैं कि जो पहले भी इस प्रकार पूतना का बालकों को मारना ही केवल प्रयोजन होता तो उस समय भी कोई बालक जीवित न रहता। इस शङ्का को **'न यत्र'** श्लोक से मिटाते हैं कि—

जहाँ मनुष्य, अपने रक्षार्थ किये हुए कर्मों में और स्व शब्द कहकर स्व का अर्थ अपने धार्मिक कर्मों में, अधर्म को शाखाओं को हटाने या रोकने में, देवादिकों के पोषण करने वाले वैष्णवों के पति भगवान् के, सप्तम स्कंध में प्रह्लादोक्त नव प्रकार के अथवा श्री शुकाचार्य कथित २–४–१५ श्लोक में निर्दिष्ट छः प्रकार के श्रवणादि भजन और इसी प्रकार जिन भगवद् गुणों के गान से राक्षसों का नाश होता है जैसे कि ताटकादि राक्षसों के नाश करने वाले श्री रघुनाथजी के चरित्र गान वगेरे पवित्र कर्म जहाँ नहीं होते हैं, वहाँ राक्षसियाँ होती ही हैं और आकर उपद्रव करती ही हैं क्योंकि वे कर्म श्रवणादि न करने से राक्षसों के सम्बन्धवाले हो जाते हैं।

वैदिक शास्त्रोक्त कर्म की समाप्ति के समय **"यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्"** इस विधि वाक्य में कहा है कि भगवान् के श्रवणादि के अभाव में सर्व कर्म अपूर्ण ही रहते हैं, भगवान् के स्मरण एवं नाम ग्रहण से ही पूर्ण हो जाते हैं। राक्षस तो सब जगह होते ही हैं इस कारण से ही उनके नाश के लिये **'अपहतासुराः'** ये मन्त्र पढ़े जाते हैं। इससे जाना जाता है कि राक्षसों का तो वहाँ जहाँ भगवत्स्मरण आदि नहीं है पहले से

ही सम्बन्ध है इसलिये राक्षसों से सम्बन्ध वाली राक्षसियाँ भी जहाँ तहाँ आ और जा सकती है एवं पृथक् पृथक् मन्त्रों के स्वामियों का निराकरण भी कर सकती हैं। यह अर्थ योग्य है कारण कि पतियों की उपस्थिति में स्त्रियाँ प्रबल होने से कहीं भी जा सकती हैं कोई उनको रोक नहीं सकता। इससे राक्षसों का नाश करने के लिये 'रक्षोघ्न' मन्त्र जप पाठ आवश्यक है उन मंत्रों के पठन विना उपद्रव नष्ट नहीं होंगे। राक्षसों के नाश हो जाने पर राक्षसियाँ कुछ नहीं कर सकेंगी। जैसे प्रबल वायु से दीपक बुझ जाता है और उसमें रहा हुआ तेल दीपक को बुझने से बचा नहीं सकता; इसी प्रकार राक्षसों के नाश होने से राक्षसियाँ बेकार बन जाती हैं। इसलिये उपद्रवों का प्रतीकार सामना एकमात्र 'रक्षोघ्न' नाशक मन्त्रों के सिवाय दूसरा कोई नहीं है। पूर्ण शुद्ध विधि से पढ़े हुए मन्त्र ही पापों का नाशक होते हैं। 'अग्नि वै जातं' इस उपाख्यान में ऐसे ही मन्त्रों से पाप-नाश होना कहा गया है। मर्यादा मार्ग में आधिदैविक, आध्यात्मिक और आधिभौतिक; इन तीनों को उत्तरोत्तर प्रबल बताया गया है। परस्पर सामर्थ्य की अपेक्षा होने से, उसके अधिष्ठाता देवता की प्रेरणा से दूसरे में फल पैदा करने की शक्ति आती है।

भगवान् तो सब जगह विद्यमान् हैं और भगवान् के प्राकट्य का विशेष कारण 'भक्तिमार्ग' को बनाया है। भक्ति से भगवान् का प्राकट्य और सकल विघ्न, दोषों आदि का नाश भी हो जाता है। इसलिये वैष्णवों के पति परमात्मा के श्रवणादि भक्ति द्वारा 'रक्षोघ्न' मन्त्रों का फल राक्षस नाश है।

अब आचार्यचरण 'स्वकर्मसु' पद में रहा हुआ "स्व" शब्द का स्पष्टार्थ करते हैं कि **आगन्तुकानां** यकायक राक्षसादि द्वारा आने वाले दुःखों का एवं राक्षसों का निवारण मन्त्रों द्वारा ही हो सकता है। किन्तु सहज पैदा हुए दोनों का निवारण मन्त्रों द्वारा नहीं हो सकता। इस प्रकार प्रबल और दुर्बल भाव होने पर, बाध्य बाधक भाव होना उचित हो है। जहाँ एक बलवान् हो, दूसरा निर्बल हो, तो वहां यदि एक बाधक और दूसरा बाध्य हो जाय, तो वह योग्य ही है। इससे आगे श्रवण करने वाले की शङ्का भी मिटाई गई। वर्णाश्रम धर्म वाले जो कर्म करते हैं वे देह-मात्र से सम्बन्ध रखने वाले होते हैं तथा उन कर्मों का सम्बन्ध भगवान् से कुछ नहीं होता। जहाँ भगवान् के नाम सुनने से ही राक्षस भाग जाते हैं, वहाँ स्वयं भगवान् की उपस्थिति में राक्षसों की चिन्ता कैसी ? इसलिये ही 'कर्मसु' के पहले 'स्व' शब्द दिया है।

श्री वल्लभ जी महाराज का मन्तव्य है कि श्रवणादि नव प्रकार की भक्ति कहकर, फिर छः प्रकार की भक्ति का भी विधान किया इसका कारण है कि दास्य, सख्य और आत्मनिवेदन इन तीन प्रकार की भक्तियों से राक्षसों के सम्बन्ध की शङ्का ही नहीं है। इससे राक्षसों के नाशक रघुनाथजी के चरित्र गाने के लिये कहना नहीं चाहिये, इसलिये कहते हैं अथवा छः प्रकार की भक्ति जहां होती है वहाँ राक्षसियों का प्रवेश नहीं होता ॥ ३ ॥

"एवं तस्याः सर्वोपद्रवकर्तृत्वं' इस प्रकार पूतना का सब प्रकार के उपद्रव करने के स्वरूप को हेतुओं से सिद्ध कर अब उसका गोकुल में आने का 'सा खेचरी' श्लोक से वर्णन करते हैं—पूतना जिस समय देवादिकों का सम्बन्ध न था एवं आश्लेषा नक्षत्र, विष घटिका, मृत्यु योग था एवं भगवान् पृथ्वी पर विराजमान थे उस समय एक बार गोकुल में आ पहुंची। श्लोक में 'खेचरी' विशेषण देने का तात्पर्य यह है कि भूमि की सर्व देव लोग रक्षा करते हैं इसलिये वह भूमि पर आ नहीं सकती थी, इससे वह पक्षी की तरह आकाश में उड़ती हुई गोकुल में आई। यों तो गोकुल मर्यादा धर्म वाला है, किन्तु वैकुण्ठ से पधार कर आये हुए भगवान् जहाँ बिराजें वहाँ मर्यादा धर्म न ही रह पाता इसलिये गोकुल न कहकर श्रीशुकाचार्य-जी ने प्रययौ 'नंदगोकुल' कहा है। पूतना नंदगोकुल में आ नहीं सकती, किन्तु जिस समय नंदजी एवं गौ दोनों गोकुल में नहीं थे, उस समय वह आ गई।

पूतना गोकुल के समीप तो आ गई लेकिन भीतर जाने की शक्ति न थी, तब पूतना ने अपने इष्ट, माया रूप भगवान् का ध्यान धरा तब माया रूप भगवान् ने उसको यशोदा आदि स्त्रियों के समान, सौन्दर्य पूर्ण स्त्री रूप का दान दिया श्रुति में कहा है कि **'मायेत्यसुरा' 'तद्वैनान् भूत्वाऽवती'ति 'च'** माया असुर है वे प्रकट हो इनकी रक्षा करते हैं। इसलिये श्लोक में कहा है कि **'उपेत्यात्मानं मायया योषित्वा'** गोकुल आकर माया से अपना रूप स्त्री जैसा बनाकर, गोकुल में प्रवेश किया। श्लोक में दिये हुए "कामचारिणी" पद का भाव यह है कि अजान स्त्री होते हुए भी प्रवेश कर सकी क्योंकि वह स्व इच्छा से वहाँ भी प्रवेश कर सकने की शक्ति रखती थी, एवं उसने युवती स्त्री का रूप भी इस निश्चय से लिया था कि मैं गोकुल में प्रवेश करूं तो मेरे रूप को देख कर कोई पुरुष भी मुझे रोके नहीं। जहाँ-जहाँ काम का प्रवेश था, वहाँ-वहाँ ही प्रवेश कर सकी। जैसे साक्षात् काम हो वा विशेष काम का वेग हो तो वहाँ प्राणी अन्धे हो जाते हैं।

श्रीपुरुषोत्तमजी प्रकाश से प्रकाश डालते हैं कि भगवान् का प्राकट्य रोहिणी नक्षत्र में हुआ और छठे दिन आश्लेषा नक्षत्र में पूतना आई। इससे जाना जाता है कि भगवान् ने पूतना को मारा तब भगवान् 'छः' दिन के ही थे। पद्मपुराण में लिखा है कि श्रीकृष्ण ने भाद्रपद कृष्णा चतुर्दशी को पूतना के प्राण लिये। इससे भगवान् श्रीकृष्ण उस समय 'छः' दिन के ही थे हरिवंश में लिखा है कि छः मास के भगवान् ने पूतना को मारा, यह कथा दूसरे कल्प की है।

लेखकार श्रीवल्लभजी का मानना है कि जहाँ सत्त्वगुण और धर्म होता है, वहाँ राक्षसादि प्रवेश नहीं पा सकते हैं, इसलिए कहा कि पूतना उस समय आई जिस समय गोकुल में सत्त्वगुण रूप नन्दजी नहीं थे एवं धर्म रूप गौ भी नहीं थीं ॥४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

षष्ठे तु पूतनामोक्षः कृष्णस्याद्भुतकर्मणः । लीला रक्षा च गोपीभिराश्चर्यं च निरूप्यते ॥ १ ॥

'शौरेर्वसुदेवस्य वचो न मृषा' इति विचिन्तयन् उत्पातागमशङ्कायुक्तो नन्दः पथि मार्ग एव हरिं शरणागतदुःखहारिणं भगवन्तं शरणं जगामेत्यन्वयः ॥ १ ॥ कंसेन प्रहिता प्रेषिता पूतना पुरग्रामादिषु शिशून्निघ्नन्ती चचारेत्यन्वयः । 'न केवलं कंसप्रेरणयैव बालान् हन्ति, किन्तु तस्या अपि तत्राग्रहः' इत्याशयेनाह—बालघातिनीति । ननु "स्त्रीणां बालेषु स्नेहाधिक्यात् कथं तया बालहननं सङ्गच्छते ?" तत्राह—घोरेति । क्रूरस्वभावेत्यर्थः ॥ २ ॥ ननु "यदि तस्याः स्वभावत एव बालघातकत्वं, तदा कथं बालकानां जीवनम् ? व्रजेऽपि बालास्तया मारिताः स्युः" इत्यपेक्षायामाह—नेति । यत्र पुरादिषु स्वकर्मसु दृष्टादृष्टफलकेषु लौकिकालौकिकव्यापारेषु वर्तमाना जनाः सात्वतां भक्तानां भर्तुः पालकस्य भगवतः श्रवणादीनि न कुर्वन्ति, तत्रैव यातुधान्यो राक्षस्यः, चकारादन्येऽपि विघ्नकर्तारो विघ्नान् कुर्वन्ति इति शेषेणान्वयः । तत्र हेतुमाह—रक्षोघ्नानीति । श्रवणादिनवभक्तीनां रक्षोविनाशकत्वात् तदन्यतरसत्त्वे विनाशभिया तेषां तत्र गमनाभावान्न तत्रत्यबालविनाशो, व्रजे तु साक्षाद्भगवतो विद्यमानत्वान्न तत्रत्यानां बालकानां विनाशः ॥ ३ ॥ यद्यपि जगन्मोहकारणभूतमायाधिपतेर्भगवतो विद्यमानत्वान्न तत्र पूतनाया आगमनं मायाप्रभावश्च सम्भवति, तथाप्यद्भुतकर्मणः स्वलीलासिद्ध्यिच्छावशात् तत्रागमनादिकं जातं तन्निरूपयति—सेति । सा खेचरी आकाशचारिणी पूतना एकदात्मानं योषित्त्वा वरां नारीमिव कृत्वा नन्दगोकुलमुपेत्यागत्य गृहं प्राविशदित्यन्वयः । आकाशचारित्वे निःशङ्कतया परगृहप्रवेशादौ च तत्सामर्थ्यमाह—कामचारिणीति । यथेष्टरूपधारणान्तर्धानगमनादौ समर्थेत्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

षष्ठे कृष्णेन निहता पूतना स्तनपानतः ॥ गोपीभिः कृष्णरक्षा च श्लोका वेदकृता (४४) इह ॥

अनुष्टुभस्तु पञ्चाशद् (५०) द्वे (२) उवाचेति कीर्तिते ॥ ६ ॥

नन्द इति ॥ शौरेर्वसुदेवस्य वचो न मृषेति विचिन्तयन् उत्पातागमेन शङ्कितः शङ्कायुक्तो नन्दः पथि मार्ग एव हरिं शरणं जगाम ॥ १ ॥ कंसेनेति ॥ कंसेन प्रहिता प्रेषिता घोरा भीषणा बालघातिनी पूतना पुरग्रामव्रजादिषु शिशून् निघ्नन्ती चचार । नुमार्थः ॥ २ ॥ अविषये प्रवृत्ता सैव मरिष्यतीति सूचयति—न यत्रेति ॥ यत्र पुरादिषु स्वकर्मसु दृष्टादृष्टफलकेषु वर्तमाना जनाः रक्षोघ्नानि सात्वतां भक्तानां भर्तुः पालकस्य भगवतः श्रवणादीनि न कुर्वन्ति तत्रैव यातुधान्यो राक्षस्यः चकारादन्येऽपि विघ्नकर्तारः प्रभवन्ति विघ्नान् कुर्वन्ति च । यत्र साक्षादेव भगवान् विद्यते तत्र तासां कुतो बलमिति ॥ ३ ॥ सा खेचरीति ॥ कामचारिणी यथेष्टरूपधारणादौ समर्था अनिवार्यगृहप्रवेशा खेचरी आकाशचारिणी सा पूतना एकदा रात्रौ इति पराशरवैशम्पायनाविति तोषणी । मायया आत्मानं योषित्वा वरां नारीं कृत्वा । योषिच्छब्दाद्योषाशब्दाद्वा तत्करोतीति णिजन्तात् क्त्वा इटि णिलोप आर्षः । आकाशमार्गेण नन्दगोकुलमुपेत्यागत्य । उत्पत्येत्यपि पाठः । गृहं प्राविशत् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं षष्ठेऽध्याये गोकुले पूतनागमनं तस्या मरणं च नंदादीनां पथि पतितपूतनादेहदर्शनं च तन्मरणश्रुत्या विस्मयश्च वर्ण्यते नंद इति ॥ १–२ ॥ श्रीकृष्णे मृत्युभयशंकाप्राप्तस्य राज्ञस्तां निवारयन्नाह न यत्रेति । यत्र स्थानेषु स्वकर्मसु च जनाः रक्षोघ्नानि सात्वतां भर्तुः श्रवणादीनि नवविधभजनानि न कुर्वंति तत्र तत्र यातुधान्यो राक्षस्यः चकाराद् भूतप्रेतादयोपि वसंतीति शेषः ॥३॥ खेचरी राक्षसी आत्मानं देहं मायायोषित्ववेषेण सुंदरं स्त्रीरूपं कृत्वा कामं यथेच्छं चरति गच्छतीति कामचारिणी ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्दः सख्युर्गिरा षष्ठे व्रजं गच्छंस्तु राक्षसीम् । दृष्ट्वा मार्गे मृतां तस्याः श्रुत्वा मृत्युं हि विस्मितः ॥ १ ॥

अथ व्रजं प्रति नन्दागमनात्पूर्वमेव तत्र वसुदेवसूचितोत्पातं भगवता कृतं तन्निर्हरणप्रकारं निर्हृतवतस्तस्य रक्षाविधानप्रकारं चाह नन्द इत्यादिना तावन्नन्दादय इत्यतः प्राक्तनेन ग्रन्थेन ॥ नन्द इति ॥ नन्दः, पथि गच्छन्, शौरेः वसुदेवस्य, वचः मृषा न, इति विचिन्तयन्, अत एव, उत्पातागमशङ्कितः सन्, हरिं शरणं जगाम । रक्षणोपायत्वेनाध्यवस्यात् ॥ १ ॥ कंसेनेति ॥ तदा नन्दगमनात् पूर्वमेवेति शेषः । कंसेन प्रहिता प्रेषिता, घोराऽतिक्रूरा, बालघातिनी, पूतना पूतनाख्या राक्षसी, पुरग्रामव्रजादिषु, शिशून् निघ्नन्ती सती, चचार ॥ २ ॥ कृष्णेऽपि तत्कृतः कश्चिदुपद्रवो बभूव किमित्याशङ्कां तावन्निराकुर्वन्नाह ॥ नेति ॥ सात्वतामेकान्तिकानां भक्तानां, भर्तुः भगवतः, रक्षोघ्नानि, श्रवणादीनि गुणश्रवणकीर्त्तनादीनि, यत्र देशे, स्वकर्मसु स्वव्यापारेषु, जनाः न कुर्वन्ति । तत्र हि तत्रैव, यातुधान्यो राक्षस्यः, स्युः । न तु श्रवणादिकर्तृजनाधिष्ठिते देशे इति भावः । यद्वा । यत्र

सात्वतां भर्तुः रक्षोघ्नानि श्रवणादीनि, न सन्ति, तत्र यातुधान्यः चोऽप्यर्थे। स्वकर्म हननादिस्वक्रियां कुर्वन्ति सुतरां सुखेन वा कुर्वन्तीत्यर्थः। हि ॥ ३ ॥ सेति ॥ खेचरी आकाशचारिणी, सा पूतना, एकदा कदाचित्, नन्दगोकुल, नन्दगोपगोकुलसमीपमित्यर्थः। उपेत्य, मायया राक्षससंबन्धिन्याश्चर्यवेषधारणात्मिकया स्वमाययेत्यर्थः। आत्मानं स्वदेहं, योषित्त्वा नवयौवनयोषितः समानाकारं कृत्वेत्यर्थः। कामचारिणी स्वच्छन्दचारिणी सती, प्राविशत् गोकुलं प्रविष्टवती ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नन्द इति : १०.६ १.

गोपाञ्जियोजितविनिद्रसमग्रकार्यान् कृत्वा गतोऽपि मथुरां जगदीशनन्दः।
किञ्चिन्निशम्य शरणं मनसा जगाम त्वामेव निश्चितमतस्त्वमिहार्तिहन्ता ॥ १ ॥
जातश्चेदिह कश्चनापि भगवत्सेवानुरक्तेन्द्रियो विघ्नस्तत्र वराङ्गना प्रथमतः प्रादुर्भवत्युत्कटः।
तन्निष्ठात्मनि चेद् दृढाऽतुलदयस्तं विघ्नमुत्सारयत्याबोधाति च पूतनागमनतस्तन्नाशतो गोकुले ॥ २ ॥

कंसेनेति : १० ६.२

लोकत्रयातिशयशूरगणोत्करस्य यो वैरभावमवलम्ब्य ममाप्युदीतः।
नापूत एष भवितेत्यवलोक्य जाल्मस्तन्नामदृक् प्रहितवान् किमु पूतनां सः ॥ ३ ॥

न यत्रेति : १०.६ ३.

रक्षोघ्नता स्फुटतरा भुवि मन्त्रजाते यन्नामशोभि-पदसङ्कुलिते विभाति।
अद्धा स यत्र लसति प्रभुरिन्दिरायास्तद्गोकुलं त्वभयमत्र न कापि शङ्का ॥ ४ ॥

सा खेचरीति : १०.६ ४.

खेचर्यस्म्येव तन्मे का क्षतिर्गोकुलयानतः। इति मत्वा ययौ मूर्खा सा तदा नन्दगोकुलम् ॥ ५ ॥
तद्गोकुलमच्युतबलशाल्यपि मत्त्वाऽखिलाबला कलितम्। नन्दादि गोपयानाद्ययौ व्रजं युक्तमेव हि बकी सा ॥ ६ ॥
हेमाङ्गने एव विमोहनैकतात्पर्यहेतू खलु गोकुलस्य। सा मन्यमानैवमुरीचकार रूपं सुवर्णाङ्गनायाः ॥ ७ ॥

कृष्णप्रिया

श्रीशुकाचार्यजी ने कहा कि श्रीवसुदेवजी के वचन झूठे नहीं होंगे, ऐसा मार्ग में विचार करते हुए, उपद्रव होने की शंका से युक्त श्रीनन्दरायजी भगवान की शरण में आये ॥ १ ॥ कंस की भेजी हुई बालकों को मारने वाली घोर पूतना नगर, गांव और व्रज में बालकों को मारती हुई घूमती थी ॥ २ ॥ जहाँ मनुष्य, अपने कर्मों में, राक्षसों के नाश करने वाले वैष्णवों के भर्ता, भगवान् के श्रवणादि, कुछ नही करते हैं, वहाँ ही राक्षसियाँ अपना काम (मारना, दुःख देना) करती हैं ॥ ३ ॥ आकाश में विचरण करने वाली, उस पूतना ने एक बार नन्दजी के गोकुल के समीप पहुंचकर और कपट से अपना सुन्दर स्त्री का रूप बना कर स्वच्छन्द घूमती हुई गोकुल में प्रवेश किया ॥ ४ ॥

तां केशबन्धव्यतिषक्तमल्लिकां बृहन्नितम्बस्तनकृच्छ्रमध्यमाम्।
सुवाससं कम्पितकर्णभूषणत्विषोल्लसत्कुन्तलमण्डिता[1]ननाम् ॥ ५ ॥
वल्गुस्मितापाङ्गविसर्गवीक्षितैर्मनो हरन्तीं वनितां व्रजौकसाम्।
अमंसताम्भोजकरेण रूपिणीं गोप्यः श्रियं द्रष्टुमिवागतां पतिम् ॥ ६ ॥
बालग्रहस्तत्र विचिन्वती शिशून् यदृच्छया नन्दगृहेऽसदन्तकम्।
बालं प्रतिच्छन्ननिजोरुतेजसं ददर्श तल्पेऽग्निमिवाहितं भसि ॥ ७ ॥
विबुध्य तां बालकमारिकाग्रहं चराचरात्माऽऽस निमीलितेक्षणः।[2]
[3]तमङ्कमारोपयदन्तकान्तकं[4] यथोरगं सुप्तमबुद्धिरज्जुधीः ॥ ८ ॥

---

[1] भूषिताननाम्—इति क्वचित् पाठः।

[2] महिसुरत्वेऽपि च बालभावं विभावयत् किञ्चिदुवाच न प्रभुः। अजानमानाऽथ निशाचरी हरिं निसर्गविज्ञातजगद्विचेष्टितम्॥

अयम् अधिक पाठः वीर. विज. मतेन।

महेश्वरत्वे सति बालभावं विभावयामास चराचरप्रभुः। अज्ञावमज्ञाय निशाचरी हरिं निसर्गविज्ञातजगद्विचेष्टितम् ॥

अयं भक्त. अधिको पाठो दृश्यते।

[3] अनन्त-श्रीधर. वंशी. जीव. विश्व. शुक. गिरि. भक्त.। [4] दङ्कमन्तकं-श्रीधर. वंशी. गिरि. भक्त.।

कर्दमक्षमा

अन्वयः—केशबन्धव्यतिषक्तमल्लिकां बृहन्नितम्बस्तनकृच्छ्रमध्यमां सुवाससं कम्पितकर्णभूषणत्विषोल्लसत्कुन्तलमण्डिताननम् ॥ ५ ॥ वल्गुस्मितापाङ्गविसर्गवीक्षितैः व्रजौकसां मनः हरन्तीं रूपिणीं वनितां गोप्यः अम्भोजकरेण पतिम् द्रष्टुम् आगतां श्रियम् इव अमन्यत ॥ ५-६ ॥ बालग्रहः तत्र शिशून् विचिन्वती यदृच्छया नन्दगृहे तल्पे प्रतिच्छन्ननिजोरुतेजसम् असदन्तकं बालं भसि आहितम् अग्निम् इव ददर्श ॥ ७ ॥ चराचरात्मा सः तां बालकमारिकाग्रहं विबुध्य निमीलितेक्षणः (संवृत्तः) अबुद्धिरज्जुधीः सुप्तम् उरगं यथा (तथा) अन्तकान्तक तम् अङ्कम् आरोपयत् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तां वनितां पतिं द्रष्टुमागतामतिरूपवतीं श्रियमिव गोप्योऽमंसतेत्युत्तरश्लोकस्थेनान्वयः। श्रीसाम्यार्थानि विशेषणानि। केशबंधव्यतिषक्तमल्लिकां धम्मिल्लसंसक्तमल्लिकाकुसुमाम्। बृहता नितंबेन स्तनाभ्यां चोभयत आक्रांतमिव कृच्छ्रं कृशं मध्यमुदरं यस्यास्ताम्। सुवाससं शोभने रमणीये वाससी यस्यास्ताम्। कंपितयोः कर्णभूषणयोस्त्विषोल्लसद्भिः कुंतलैर्मंडितमाननं यस्यास्ताम् ॥ ५ ॥ वल्गुस्मितापांगविसर्गवीक्षितैः वल्गु रम्यं स्मितं येषु ते तथाभूता अपांगविसर्गा येषु तैर्वीक्षितैर्व्रजौकसां मनो हरंतीम्। अतो गोपाहृतमनस्त्वेन तां न निवारितवंत इत्युक्तं भवति। गोप्यश्च श्रियमिव मत्वा तूष्णीमासन्। अतः केनाप्यनिवारिता सती प्रविवेशेति भावः ॥ ६ ॥ बालग्रहः पूतना असदंतकं बालं ददर्श। असतामंतकं दृष्ट्वा कथं न बिभेति तत्राह। प्रतिच्छन्ननिजोरुतेजसं बालनाट्येन प्रतिच्छन्नं तिरोहितं निजमुरु तेजो येन तम्। कमिव। भसि भस्मन्याहितमग्निमिवेति ॥ ७ ॥ चराचरात्मत्वादेव तां विबुध्य निमीलितेक्षण आस स्वयमनंतं दुष्टानामंतकं बालं मत्वा एवमपि सांकमारोपयत। यथोरगं सुप्तमबुद्धिश्चासौ रज्जुधीश्च सोऽज्ञानतो रज्जुबुद्ध्या गृह्णाति तद्वदिति ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तां स्वेच्छारूपं कृत्वा गताम्। श्रीसाम्यार्थानि श्रीतुल्यताबोधकानि। उभयतः पार्श्वद्वयतः। आक्रांतं भेदशंकयेव निरुद्धम् ॥ ५ ॥ श्रियं मूर्तिमतीं रत्नादिधनसम्पत्तिमिवांभोजकरेणोपलक्षितां पतिं श्रीव्रजेंद्रस्येष्टदेवं नारायणं द्रष्टुमिवागताममंसत वनितामत्यनुरागवतीम्। "वनिता जनितात्यर्थानुरागायां च योषिति" इत्यमरः। अहो रूपमहो अनुराग इति व्रजौकसां मनो हरंतीम्। इति भाव इति। सुरूपवस्त्रालंकारयुतनिवारणम्। गृहे विशतो भाग्यवच्छंकया न केनचिदपि क्रियते किं तु विरूपालंकारवस्त्रहीनस्यैव तत्क्रियते इति तात्पर्यम् ॥ ६ ॥ पूतनारेवतीज्येष्ठाकोटराभीषणश्याशुष्कानंदादिभेदैः षोडश बालग्रहा बालतंत्रे प्रोक्ताः। बालग्रहः—पुस्त्वमार्षिष्टलिंगत्वात् ॥ ७ ॥ निमीलितेक्षणः संमीलितलोचनः। अत्रायं भावः येन नेत्रयोगो भवेत्पुनस्तस्य निष्टं नोत्पादनीयम्। 'प्रीतिनयनयोगतः' इत्युक्तेर्मित्रद्रोहता मयि मा भवेदित्यालोच्य नेत्रनिमीलनं कृतवान्। यद्वा—विषप्रभावो यथा शिवे न जातस्तथा मय्यपि मा भूदिति नेत्रमीलनेन शिवं दध्यौ विषजर्जरतामय इति। यद्वा—बालघ्न्या दुष्टाया दर्शनमन्याय्यमिति। यद्वा—स्वस्यात्यंतबालत्वभीरुत्वज्ञापनाय। यद्वा—मद्दृष्टिस्वभावत एवैतद्विधभयजनिका भीतेयं मा निवर्ततामिति। यद्वा—मातृभावदर्शिकायास्तस्याः स्वकर्तृकवधे लज्जानुत्पत्त्यै चेति विश्वनाथः। ततश्चानंतं तमंकमारोपयत् अंतकं स्वस्येति संहारशक्तेः सेवावसरोऽत्र यस्य देशतः कालतश्चांतो नास्ति तमनंतमप्यंकमारोपयदत्र विरोधेनाद्भुतरसो व्यंजितः। अंतकमनंतमिति शब्दविरोधः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तामिति युग्मकम्, व्यतीति मल्लिकानां मिथो योजनया बहुधा सौष्ठवं बोध्यते कर्णभूषणयोः कम्पितत्वं लीलागत्यादिना अत एव सर्वतः प्रसरन्त्या तयोस्त्विषा उल्लसद्भिरलकैर्मण्डिताननां मनोहरन्तीं मनोहरवदाचरतीं वनितां जनितात्यर्थानुरागां स्त्रियम् अम्भोजयुक्तकरेण लक्षणेन रूपिणीं श्रियमेवागताममंसत श्रीरत्र जगत्सम्पत्तिः किं कर्तुमिव ? पतिं द्रष्टुमन्वेष्टुमिव कश्चित्पुण्यलक्षणं जनं निजाश्रयत्वेन वरीतुमिव तादृशलक्षणां तु सर्वोपरि श्रीव्रजेन्द्रतनय एव दृश्यत इत्याशयास्ततो न निवारितवत्य इति भावः। अत्र पतिशब्दस्य धववाचित्वं तेषामपि न मतम्, अग्रे च जननीभावस्यैव दर्शयिष्यमाणत्वात्। अन्यत्तैः। तत्र आक्रान्तमिव आक्रान्तत्वादिवेत्यर्थः। कृच्छ्रं कृशमिति कार्यकारणयोरभेदोपचारेण तदाक्रमाद्यद्दुःखं जातं तस्मादिव कृशमित्यर्थः। तथा अतिमनोहरणाद्धेतोर्यद्धृतमनस्त्वं तेनेति कर्तृधर्मकर्मधर्मयोर्भेदादपौनरुक्त्यम् ॥ ५-६ ॥ सेति प्रकरणवशाल्लभ्यते बालग्रह इति तद्विशेषणमेव अजहल्लिङ्गत्वान्न स्त्रीत्वं तत्र गोकुले शिशून् विचिन्वती मृगयमाणा ततश्च यदृच्छया स्वैरितया भगवत एव तादृशलीलाशक्तिप्रेरणेनानुसन्धानं विनापीत्यर्थः। सहसा श्रीनन्दगृह एवाऽऽगत्य विचिन्वती तमेव तल्पे ददर्श "यदृच्छा स्वैरिता" इत्यमरः। असदन्तकमपि बालं बाल्यमाधुरीमाविष्कुर्वन्तम् अत एव तल्पे आहितं सन्तं प्रतिच्छन्ननिजोरुतेजसं तदाभिमुख्येन छन्ननिजमहाप्रभावं ददर्श। तत्र दृष्टान्तः अग्निमिति यथा कश्चिद्भस्मन्याहितमग्निं तादृशं पश्यति तद्वदित्यर्थः। व्रजौकसां मनोहरन्तीमित्यादिकमपि लीलाशक्तिकौतुकमेव ॥ ७ ॥ बालकमारिकासञ्ज्ञं ग्रहं चराचरस्यात्मा परमात्मा बाल्यलीलया सर्वभावग्रहणात्

मुद्रितनेत्राब्जो बभूव तच्च तस्यां निजात्यन्तबालत्वभीरुत्वबोधनाय तादृशदुष्टदर्शनाभावाय स्वदृष्टिस्वाभाविकतद्विधधर्षणाभावाय तद्धितार्थावश्यककृत्येऽपि वधे सर्वसद्गुणनिधेः स्वस्य साक्षाल्लज्जाच्छादनाय मरणे तद्वैकल्यदर्शनाभावाय च स्वयमनन्तं तादृशानामन्तकं अबुद्धिविपरीतज्ञानपूर्वकं यथा स्यात्तथाऽऽरोपयत् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

व्यतिशब्देन मल्लिकानां बहुधा बन्धनसौष्ठवं बोध्यते। कर्णभूषणयोः कम्पितत्वं लीलागत्यादिना। अत एव सर्वतः प्रसरन्त्या तयोस्त्विषा उच्चैर्लसद्भिः शोभमानैः कुन्तलैरलकैर्मण्डिताननाम्, वनितां जनितात्यर्थरागां स्त्रियम्; अम्भोजयुक्तकरेण हेतुना रूपिणीमत्यन्तसौन्दर्य्यवतीम्, तेन विशिष्टां वा श्रियम्; अनेन पूतनाकरेऽपि सौन्दर्य्यविशेषार्थं लीलाकमलमुह्यम्; यद्वा, अम्भोजेति पूतनाया एव विशेषणम्; अतो गोप्यः श्रियममंसत ताम् ननु कुतस्तत्र श्रीर्घटेत ? तत्राह—पतिं निजभर्तारं द्रष्टुमिवागतामिति; इवेत्युत्प्रेक्षायाम्, तत्त्वतस्तदर्थतदागमनाभावात्; यद्वा, श्रियमिव पतिं तासां पालकं श्रीव्रजेश्वरपुत्रत्वात्। यद्वा, पतिं श्रीनारायणं द्रष्टुं निजलोकादागतां श्रियमिव तां वनितां गोप्योऽमंसत। तादृशाद्भुतसौन्दर्य्यवेषसौष्ठवादतिशयेन तत्तया भानस्य सम्भवात् ॥ ५–६ ॥ तत्र गोकुले शिशून् विचिन्वन्ती मृगयमाना तल्पे बालपर्य्यंके आहितं शायितमसदन्तकमपि बालं बाल्यलीलां कुर्वन्तं ददर्श। यद्वा, असदन्तकमिति श्रीरोहिण्येयो व्यावर्तितः, तस्य कदाचिद्दुरुपेक्षणात्। एवं तदानीं तस्य स्थितिः श्रीरोहिणी गृहान्तर्ज्ञेया। बालमिति सहजतदीयबाल्यलीलापेक्षयैव, किंवा भक्तिविशेषेण श्रीबादरायणे कौतुकोक्तः एवमग्रेऽप्यूह्यम्। कथम्भूतम् ? प्रतिच्छन्नं विनष्टं निजं पूतनाया उर्वपि तेजो यस्मात्तमिति परमतेजस्वितोक्ता। तत्र दृष्टान्तः—भसि अगारे निहितमग्निमिव। तत्र ह्यग्नेस्तीक्ष्णतेजः–स्फूर्तेः। ननु कथं तर्हि भयेन न भग्ना, कुतो वा दुष्टाया असदन्तकदर्शनम् ? तत्राह—यदृच्छया श्रीभगवन्महिम्ना केनापि भाग्योदयेनेति। अयं हेतुरग्रेऽपि द्रष्टव्यः। तथा तस्या गोप-मनोहर-तादृशवेषे श्रीगोपीभिर्लक्ष्मीमनने च; अन्यथा गोपगोपीभिस्तन्निवारणापत्तेः बालकानां मारिका मारी तस्या ग्रहम्, आविष्टलिंगत्वात् पुंस्त्वम्; निमीलितक्षणो मुद्रितनेत्राब्ज आस बभूव; तच्च तस्यामत्यन्तबालत्व भीरुत्वबोधनार्थम्; किंवा साक्षाद्दृष्टौ तया ग्रहणाशक्तेः; किंवा तद्धितार्थावश्यकृत्येऽपि वधे सर्वसद्गुणनिधेः साक्षाल्लज्जाद्युत्पत्तेः, श्रीरोहिणेयस्य मातृवेषत्वात् मरणे तद्वैकल्यदर्शनाशोक्तेर्वा ॥ ७–८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अपाङ्गविसर्गः सपाङ्गमोक्षः अमंसत अमन्यन्त ॥ ६ ॥ भसि भस्मनि ॥ ७—८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

योषिद्रूपधरां तां वर्णयति–तामिति। तां गोप्यः श्रियमिवामंसत इत्युत्तरेणान्वयः। केशबन्धे व्यतिषक्ताः संसक्ता मल्लिकाः तत्कुसुमानि यस्या बृहद्भ्यां नितम्बाभ्यां स्तनाभ्यां च कृच्छ्रः कष्टः भज्यमान इवावस्थितः इति यावत् सूक्ष्मत्वादिति भावः। स मध्यमः कटिप्रदेशो यस्याः शोभनं वासो यस्याः चलितयोः कर्णभूषणयोस्त्विषा उल्लसद्भिः कुन्तलैः केशैर्मण्डितमलङ्कृतमाननं यस्याः ॥ ५ ॥ वल्गु सुन्दरं स्मितं येषां तैस्तत्सहितैरित्यर्थः। तथाभूतैरपाङ्गयोर्नेत्रान्तयोर्विसर्गः प्रसारो येषां तैश्च वीक्षितैः कटाक्षैः व्रजौकसां व्रज ओकः स्थानं येषां तेषां गोपानां मनो हरन्तीम् अम्भोजकरेण पद्मयुक्तपाणिना उपलक्षितां रूपिणीं प्रशस्तरूपवतीं पतिं श्रीकृष्णं द्रष्टुमागतां लक्ष्मीम् इव तां वनितां गोप्योऽमंसतामन्यन्त ॥ ६ ॥ स योषिद्रूपो बालग्रहः तत्र तत्र व्रजस्थान् शिशून्विचिन्वती अन्वेषयन्ती यदृच्छया नन्दगृहे बालं ददर्श स्वसौन्दर्यावलोकनपरवशाभिर्गोपीभिरनिवारिता ददर्शेत्यर्थः। कथम्भूतम् ? असतामन्तकं मृत्युं तर्हि निर्भया कथं ददर्श ? इत्यतो विशिनष्टि—प्रतिच्छन्नं तिरोधापितं निजं स्वासाधारणं उर्वधिकं तेजो येन भसि भस्मन्याहितं तिरोहितमग्निमिव स्थितम् ॥ ७ ॥ तथा स चराचरात्मा सर्वबुद्धिदृग्भगवान् अत एव तां बालकमारिकाग्रहं बालघ्नग्रहं बुद्ध्वा निमीलिते ईक्षणे येन तथाभूतः स्वयमीश्वरत्वे सत्यपि प्रभुरपि स्वसङ्कल्पमात्रेणैव हन्तुं समर्थोऽपि बालभावं बालत्वं विभावयन्ननुकुर्वन् न किञ्चिदुवाच तूष्णीमास्तेत्यर्थः। अथ सा निशाचरी तं बालं हरिं दुष्टप्राणहरं निसर्गतः स्वभावतो विज्ञातं जगतो विचेष्टितं येन तं निसर्गत इति पदेन तस्य सर्वबुद्धिद्रष्टृत्वं स्वाभाविकमेव नतु कर्मायत्तमित्यभिप्रेतम् अन्तकमात्मनो मृत्युभूतमज्ञात्वाऽनन्तं त्रिविधपरिच्छेदरहितमथापि मनुष्यचेष्टानुकरणेन परिच्छिन्नतां प्राप्तमिव स्थितमिति भावः। अत एवाङ्कमारोपयदङ्के निदधे इत्यर्थः। यथाऽबुद्धिर्मूढा ऽत एव रज्जुरिति धीर्यस्य सा सुप्तमुरगमङ्के निदधाति तद्वत् ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

केशपाशे केशभारे व्यतिषक्ता निगूढा मल्लिका यस्यां सा तथा बृहन्नितम्बेन कलशस्तनाभ्यां च कृच्छ्रो भग्नो मध्यमो यस्याः सा तथा ताम् ॥ ५ ॥ अपाङ्गविसर्गः कटाक्षमोक्षः वनितां संभाजनीयां व्रजौकसो गोपाः व्रजौकसामिति पाठे मनो हरन्तीमिति सम्बन्धः श्रियमिव न तु श्रियम् अमंसत मेनिरे ॥ ६ ॥ बालग्रही बालकमारिका असदन्तकं भसि भस्मनि विचिन्वती मृगयन्ती ॥ ७ ॥ बालकमारिकाग्रहं बालानां मृत्युभूतग्रहं सुरत्वे पूर्णैश्वर्ये देवदेवत्वे वा "सुरैश्वर्ये" इति धातुः ग्रही अतिप्रश-

स्तोत्सवः महामपीश्वरत्वेऽपि वा ईश्वरत्वाप्रकटने वचनाभावे च बालभावप्रकाशनहेतुः ॥ ० ॥ अथ सात्त्विकक्रियः स्वभावप्रकटनानन्तरम् । यद्वा राक्षस्याः स्वभावः प्रारभ्यते । यद्वा यतो निशाचरी अथ तस्मादजानमाना "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इति "अथातोनन्तराप्यर्थविकल्पारम्भमङ्गले" इत्यमरयादवौ । हरेः पूतनावृत्तचेष्टिताज्ञानं नास्तीत्याशयेनोक्तं निसर्गेति ज्ञानाविर्भावतिरोभावौ न स्त इति द्योतनाय निसर्गेति पदं देवदत्तज्ञानवत्कतिपयं पदार्थज्ञानविषयं नेश्वरज्ञानमित्यतो जगदिति हरिशब्दस्य अनेकार्थत्वे नात्र किञ्चिद्विवक्षितमित्यत उक्तम् अनन्तमिव एककुण्डलोऽनन्त इत्यस्यापि सन्दिग्धार्थत्वमित्यत उक्तम् अन्तकमिति रुद्रो माविशान्तकवचनात् उक्तशङ्काऽनिस्तारादित्यतो निसर्गेति इदं लक्षणं नारायणस्यैव नान्यस्य "अहं रुद्राय धनुरातनोमि, यः सर्वज्ञः" इत्यादेः पूतनाऽनन्तं बालमङ्कमारोपयदित्यन्वयः । हन्तुमिति शेषः । न केवलं हरिमजानमानाऽपि तु तमात्मनोऽन्तकम् अजानमाना परिमिताङ्कारोपणं च तमनन्तमपरिच्छिन्नं मरणशून्यं वा तमजानमाना चेत्यर्थः । कथमित्यत्र दृष्टान्तमाह-अबुद्ध्या अज्ञानेन रज्जुरियमिति । धीर्ज्ञानं यस्याः सा तथा सुप्तमुरगम् अङ्कमारोपयति अबुद्धिश्च रज्जुधीश्चेति विग्रहः तथा चाबुद्धिरज्ञानी यथा सुप्तमन्तकमङ्कमारोपयति रज्जुधीः सुप्तमुरगमिति विभागः केचिद्दृष्टान्तकं सुप्तं नाम्नानन्तमुरगमित्युरगविशेषो वा काचिन्निशाचरी उलूपिका सुप्तं हरिं सिंहं शिवाबुद्ध्येति शेषः । "ध्वाङ्क्षारातिर्निशाटनः" इत्यमरः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स तदित्यस्यावतारिकाप्रघट्टके वल्गु अम्भोजकरेण लक्ष्येन रूपिणीं श्रियम् अमंसत पतिं द्रष्टुं कञ्चित् शुभलक्षणभाजं जनं निजाश्रयत्वेन वरीतुमिति तस्य श्रीकृष्ण एव पर्यवसानं वितर्क्य ताभिर्न निवारिता इत्यर्थः ॥ ६ ॥ बालग्रह इति विशेषणमेव सति विशेष्यं प्रकरणवशात् यदृच्छया भगवतः स्वैरलीलेच्छया सहसा नन्दगृह एवागत्य इति शेषः । प्रति तदाभिमुख्येन भसि भस्माभ्यन्तरे दृष्टान्तोऽयम् ॥ ७ ॥ छन्नतां संग्रहम् आत्मा परमात्मा स्वयमनन्तं तादृशामन्तकम् अत एव अबुद्धि यथा स्यात्तथाऽऽरोपयत् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु यत्र तस्य श्रवणादीनि, तत्रैव यातुधान्यो न भवन्ति; यत्र तु स्वयमेवासौ, तत्र कथं नन्दगृहे जगामेत्याह—बालग्रहस्तत्रेत्यादि । वधयोग्यान् शिशून् विचिन्वती अन्वेषयन्तीति पूर्वं कृतबालान्तरानुसन्धानेति मन्तव्यम् । यदृच्छया निजमृत्युयोगेन नन्दगृहे गता सती बालं ददर्श । कीदृशम् ? असदन्तकमसतामन्तकम् । बालत्वे लिङ्गम्-प्रतिच्छन्ननिजोरुतेजसम् । ऐच्छिकया प्रकाशिकया मायया बालत्वेन प्रतिच्छन्नं निजमुरु नित्यकिशोरत्वेन महत्तेजः प्रकाशो येन, तथापि अग्निमिव असदन्तकत्वेन असन्तं प्रति वह्निमिव दहन्तम् । अथवा, प्रतिच्छन्न-निजोरुतेजसमग्निमिव बालं ददर्शेत्यन्वयः । बालत्वाग्निशिखमग्निमिव । कीदृशं बालम् ? तल्पे आहितम् । तल्पे कीदृशे ? भसि, भसभर्त्सनदीप्त्योरिति बभस्तीति क्विप् । तत् तस्मिन् दीप्तिमतीत्यर्थः ॥ ७-१२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

विचिन्वती शिशून् वधयोग्यान् शिशून् विचिन्वती विचारयन्तीति, अतः स्वच्छन्दहननं नाभूदेव, यदृच्छया नन्दगृहे गत्वा सती असदन्तकं बालं बालकाकारत्वेन प्रतीयमानं प्रतिच्छन्ननिजोरुतेजसं तल्पे आहितं निहितम् । कमिव ? अग्निमिव दहन्तं ददर्श । तल्पे कथम्भूते ? भसि बभस्तीति भस् तस्मिन्, भस भर्त्सनदीप्त्योः क्विपि सिद्धम् ॥ ७-१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तां श्रियं रूपिणीं मूर्तिमतीं रत्नादिधनसम्पत्तिमिव अम्भोजकरेण उपलक्षितां पतिं श्रीव्रजराजेष्टदेवं श्रीनारायणं द्रष्टुमिव आगताम् अमंसतेत्युत्तरेणान्वयः । बृहता नितम्बेन स्तनाभ्यां च उभयत आक्रान्तमिव कृच्छ्रं कृशं मध्यमुदरं यस्यास्तां वनितामत्यनुरागवतीं "वनिताजनितात्यर्थानुरागायां च योषिति" इत्यमरः अहोरूपमहोऽनुराग इति व्रजौकसां मनो हरन्तीमत एवैते सहसाऽन्तःपुरं प्रविशन्तीमपि न निवारयामासुरिति भावः ॥ ६ ॥ बालग्रहः पूतना असदन्तकं स्वहन्तारमपि स्ववध्यत्वेन प्रतीयमानं बालं ददर्श यतः प्रतिच्छन्नेति भसि भस्मन्याहितमन्तरर्पितं भस्माच्छादितमग्निमिवेत्यर्थः ॥७॥ चराचरात्मेति दुष्टागमनकाले सर्वज्ञताशक्तेः सेवावसरो दर्शितः तां विबुद्ध्य बाल्यस्य भावेनैव निमीलितेक्षण आसदिदीपे निजात्यन्तबालत्वभीरुत्वज्ञापनाय च तादृशामङ्गलदर्शनाभावाय च स्वदृष्टिस्वाभाविकतद्विधधर्षणाभावाय च मातृभावदर्शिकायास्तस्याः स्वकर्तृकवधे लज्जाऽनुत्पत्त्येव तन्मरणवैकल्यदर्शनाभावाय च मुद्रितनेत्रत्वं ततश्चानन्तं तम् अङ्कमारोपयत् अन्तकं स्वस्येति संहारिकाशक्तेः सेवावसरः यस्य देशतः कालतश्च अन्तो नास्ति तमनन्तमपि अङ्कमारोपयदित्यर्थविरोधेनाऽद्भुतरसो व्यञ्जितः । अन्तकमनन्तमिति शब्दविरोधः यथा सुप्तमुरगं अबुद्ध्या अल्पबुद्ध्या हेतुना रज्जुधीर्जनो गृह्णाति तद्वदित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तां गोप्यः रूपिणीं श्रियमिवामंसतेत्यग्रिमेनान्वयः। केशबन्धे व्यतिषक्ताः मल्लिकाः यस्यास्तां बृहद्भ्यां नितम्बाभ्यां स्तनाभ्यां च कृच्छ्रं भज्यमानामिव मध्यमुदरं यस्यास्तां सुवाससं शोभने वाससी यस्यास्तां कम्पितयोः कर्णभूषणयोः त्विषा प्रभया उल्लसद्भिः कुन्तलैः केशैर्मण्डितमाननं यस्यास्ताम् ॥ ५ ॥ वल्गुस्मिताः सुन्दरस्मितयुताः अपाङ्गविसर्गाः येषु तैर्वीक्षितैर्व्रजौकसां मनो हरन्तीम् अतः गोपैर्न निवारितेति सूचितम्। गोप्यस्तु अम्भोजकरेण जलजयुक्तेन पाणिनोपलक्षितां रूपिणीं श्रीकृष्णानुरूपसुभगरूपवतीं पतिं श्रीपुरुषोत्तमं द्रष्टुमागतां श्रियमिवामंसतामन्यन्त अतः केनापि न निवारितेति भावः ॥ ६ ॥ तत्र श्रीमन्नन्दगोकुले बालग्रहः पूतना शिशून् बालान् विचिन्वती अन्वेषयन्ती यदृच्छया नन्दगृहे तल्पे बालं ददर्श कथम्भूतमसदन्तकम्। नन्वसती स्वघातकं कुतो नाबुध्यदत आह, प्रतिच्छन्ननिजोरुतेजसमिति। प्रतिच्छन्नं सर्वैर्दुर्लक्ष्यं निजं स्वासाधारणमुर्वधिकं निःसमानातिशयं तेजो यस्य तं निजरूपेण संस्थितोऽपि श्रीकृष्णः स्वानुग्रहभाजनैरेव ज्ञायते नान्यैरित्यर्थः। “नाहं प्रकाशः सर्वस्य” इति श्रीमन्मुखवचनात् ॥ ७ ॥ बालकमारिकाग्रहं विबुध्यापि निमीलितेक्षण एवास कपटेनापि अङ्कारोपणादिना स्नेहं कर्तुं प्रवृत्तां चक्षुषाऽन्यथा नापश्यदित्यर्थः। सा तु अनन्तं अङ्कम् आरोपयत् कपटयुक्तेनापि आराधितस्तद्वश्यो भवतीति सूचितम्। एतादृशभक्तानामनिष्टदेहादेर्निवारकतया प्रतिकूल इवाभाति भगवानिति सूचयति दृष्टान्तेन, यथा अबुद्धिश्चासौ रज्जुधीश्च उरगं गृह्णाति तद्वदन्तकं स्वदुष्टशरीरविनाशकमारोपयत् दुर्लक्ष्यत्वे दृष्टान्तोऽग्निमिवाहितं भसीति भसि भस्मनि ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तामिति युग्मकम्। गोप्यस्तां रूपिणीं मूर्तां श्रियं सम्पदधिष्ठात्रीममंसत अम्भोजकरेणोपलक्षितां पतिं व्रजनाथपूजितं नारायणं द्रष्टुमिवागतां केशबन्धे वेण्यां व्यतिषक्ता ग्रथिता मल्लिका यस्यास्तां बृहता नितम्बेन बृहद्भ्यां स्तनाभ्यां चोभयत आक्रान्तमिव कृच्छ्रं कृशं मध्यं यस्यास्तां कम्पितयोः कर्णभूषणयोस्त्विषा उल्लसद्भिः कुन्तलैर्भूषितमाननं यस्यास्तां वल्गु चारु स्मितं येषु तादृशा अपाङ्गविसर्गा येषु तैर्वीक्षितैर्व्रजौकसां मनोहरन्तीम् अतो गोपैर्गोपीभिश्चानिवारिता प्राविशदितिभावः। पूतना मायया व्रजौकसां मोहस्तद्वधलीलाकर्तुरिच्छयैवेति बोध्यम्। वस्तुतस्तु मनोहरेवाचरन्तीति न विमोहः ॥ ५–६ ॥ बालग्रहः पूतना तत्र नन्दगोकुले शिशून् विचिन्वती यदृच्छया नन्दगृहे असतामन्तकं स्वहन्तारमपि स्ववध्यत्वेन विदितं बालं तल्पे ददर्श यतः प्रतिच्छन्नेति भसि भस्मन्याहितं भस्माच्छादितमग्निमिव ॥ ७ ॥ चराचरात्मा निखिलान्तर्यामी स नन्दबालस्तां बालकमारिकाग्रहं विबुध्य बालस्वभावेनैव निमीलितेक्षणः सन्नास दिदीपे धात्रीवेषधारिण्यास्तस्याः स्वकर्तृके वधे त्रपानुदयाय तन्मृत्युक्लेशादर्शनाय च मुद्रितनेत्रोऽभूदिति भावः। ततश्च सातमनन्तमन्तकं स्वमारकमङ्कमारोपयत् प्रसूरस्य लालने निपुणा न भवेदतोऽहमेनं लालयानीति बोधयन्तीवेतिशेषः। यथा रज्जुधीः पुमान् सुप्तमुरगम् अबुद्धि यथा स्यात्तथा ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गोपादिविस्मापकं गोपनमङ्कस्यैवमित्याह। तामिति। केशबन्धे केशपाशे व्यतिषक्ता सम्बद्धा मल्लिकास्तृणशून्यानि यस्यां सा तां बृहन्तौ नितम्बौ कटितटौ बृहन्तौ स्तनौ च तैः कृच्छ्रमाभीलं कष्टं यस्य समध्यमो मध्यदेशो यस्याः सा तां सुवासो वस्त्रं यस्याः सा ताम्। उल्लसन्तः कुन्तलास्तैर्मण्डितमलङ्कृतमाननं यस्याः सा ताम्। तत्र तन्त्रं कर्णभूषणयोः कर्णधृतकुण्डलयोस्त्विषा कान्त्या। त्विषेत्याकारान्ततापक्षे त्विषयोल्लसत्कुन्तलमण्डिताननामिति पदमेकं वा ॥ ५ ॥ अपाङ्गविसर्गः कटाक्षमोक्षो वल्गुस्मितं चापाङ्गविसर्गसहितानि वीक्षितानि च तैरपाङ्गस्थानङ्गस्योद्रेको यैस्तानि च तानि तैरिति वा। व्रजौकसां मनोहरन्तीं वनितां वन सम्भक्तौ बाहुलकादितच्। सम्भजनीयां रूपिणीमेतदाकारवतीमम्भोजकरेण तद्युक्तहस्तेन तन्मुखचिह्नत्वात् पतिं द्रष्टुमिहागतां श्रियं गोपाश्च बहिरन्तश्च गोप्योऽमंसत व्यजानन। व्रजौकस इति पाठे गोपा इत्यर्थो गतम् ॥ ६ ॥ बालग्रही कुमारमारिका शिशूंस्तत्र विचिन्वती यदृच्छया स्वमारकहरीच्छया नन्दगृहेऽसदन्तकं दुर्जनभर्जनकरं स सहिंसकश्चेन्न तस्यास्माद्भीतिस्तद्गृहगमने मरणगमनं स्यादित्यतो वाऽऽह। असदन्तकमिति। असन्न विद्यमानोऽन्तको यस्य स इति। स तनु तनुमानिति वाऽऽह ॥ असदन्तकमिति। दन्तैः सहितः पोतो हि सदन्तको न सदन्तकोऽसदन्तक इति। भसि भस्मन्याहितं गृहितमग्निमिव प्रतिच्छन्नं निजं स्वाभाविकमुरुत्कृष्टं तेजः सामर्थ्यं विलक्षणप्रकाशश्च यस्य तं तल्पे शय्यायां बालं ददर्श ॥७॥ त्रैलोक्येशो विलोक्य किं चकारेत्यत इमां घाटीमाटीकतेत्याह ॥ विबुध्येति। चराचरात्मा जगत्स्वामी सर्वव्यापी वा स कृष्णस्तां बालकमारिकाग्रहं विबुध्य ज्ञात्वाऽपि महत्त्वं दर्शयितुकाम इत्युत्सववान्सुरत्वेऽपि देवत्वेऽपि बालभावं बालत्वं विभावयन्निमीलितेक्षणः सन् प्रभुर्न किञ्चिदुवाच। सुरत्वे सुरवर्गे प्रभुः। उतामृतत्वस्येशान इत्यादिवत्। स्वसूदनामायातां मधुसूदनः कुत उपेक्षितवानित्यतो वाऽऽह ॥ चराचरात्मेति। यश्चात्ति विषयानिहेत्यादेः। गृहान्भक्षयतः पुंसः कवाटं पर्पटायत इति वत्। सर्वभक्षकस्य का क्षपाचरीभीरिति भावः। मही किञ्चित्स्वभारावतारणादिरूपमुवाचेति न प्रभुरसमर्थ इव निमीलितेक्षण आसेत्यपि योजना। मह्या रमया सह सु सम्यग्रमत इति महीसुरो रमारमणस्तत्त्वेऽपीति वा ॥ अन्तर उपपत्तेः। अन्तःस्थित्वा रमणकृदित्यादेः। रमेर्बमन्ताइ इति डः। चुटू इतोत्संज्ञायां तस्य लोपे डित्वसामर्थ्यादभस्यापि टेर्लोपे

र इति रूपम् । विस्तरस्त्वन्तराधिकरणसुधावाक्यार्थचन्द्रिकादितोऽवसेयः । यथोक्तम् । मह्या अदितय इत्यणुभाष्यटीकयोः । स चादितिर्महती तन्मही च । मह्या अदितय इत्यादित्वराविषयमुक्तं तत्केन निर्वचनेनेत्यत आह ॥ श्रीर्वेति वाशब्दश्चशब्दार्थे । श्रीश्चानेनैव निर्वचनेन महीत्युक्तेत्यादि । मही चासौ सुरश्च तस्य भावस्तत्त्वं तस्मिन्नपीति वा ॥ ८ ॥

श्रीसुबोधिनी

सर्वव्यामोहनार्थं भगवत्कृतं तस्या रूपं वर्णयति तां **केशे**तिद्वाभ्यां **स्वरूपचेष्टा**भेदेन, मायाकृतमेव रूपमिति हिरण्याभरणाम्बरादिभिरेव तस्या मोहकत्वमुच्यते, **केशबन्धे व्यतिषक्ता मल्लिका** यस्यां, दूराद् दर्शनेन गन्धेन च व्यामोह उक्तः, बन्धे मल्लिकास्तु न पतन्ति, **मल्लिका** तत्कालपुष्पोपलक्षिका, सौन्दर्यं गन्धश्च तत्रैव प्रतिष्ठितौ, **स्थूलनितम्बस्तनै**रल्पमध्येन च सर्वबन्धसहितसम्भोगयोग्यता निरूपिता, **वस्त्रं** चोत्तमं रसजनकं, **कम्पिते ये कर्णभूषणे** कुण्डले तयोस्त्विषोल्लसन्ति यानि **कुन्तलानि तैर्मण्डितमानन**मिति, मुखे सौन्दर्यं मोहार्थं निरूपितं, **कर्णभूषण**मुपरिभागस्थं वा, तेन कुण्डलयोरपि कान्तिः, भूषणस्य सर्वोत्तमत्वं निरूपयति ॥ ५ ॥ तस्याश्चेष्टामाह **वल्गुस्मिते**ति, सहजस्मिताभावाय **वल्गुस्मित**मित्युक्तं, तत्सहितं **अपाङ्ग**निरीक्षणं कटाक्षदर्शनं तदप्यनेकविधमलसवलितादिरूपं तदाह बहुवचनेन, अपाङ्गानां **विशेषेण सर्गो** यत्र **वीक्षितेषु**, अतो **व्रजौकसां मनो हरन्तीं**, **व्रज**स्थिता विवेकरहिता भवन्ति, अनेनैव गोपैर्निवारणं प्रतिषिद्धं, **मन** इत्येकवचनं सर्वेषामेकरूपत्वबोधनाय, अत एव गोपैः सा सम्यग् दृष्टापि न गोपिभिरेव परं दृष्टा, तास्तु पूर्णज्ञानवत्योपि भगवत्कृतं तद्रूपं मत्वा भगवच्चरित्रत्वाद् घातकत्वमबुद्ध्वा स्वभोगार्थं लक्ष्मीमेवाकारितवानिति ज्ञातवत्यः, न हि लक्ष्म्यां दासीनां वैमनस्यं सम्भवति, तदाह **गोप्यो द्रष्टुमायतां तां श्रियमेवामंसत**, तथैव च भगवान् रूपं सम्पादितवानिति, लक्ष्म्या असाधारणं चिह्नमाहा**म्भोजकरे**णोपलक्षितेति, लीलाकमलयुक्तेन **करेण**, अनेन रिक्तहस्ततापि निवारिता, **रूपिणी**मिति स्वस्मिन्नावेशातिरिक्तरूपां, तत्रापि **पतिं द्रष्टुकामा** न केनापि निवार्या, अतो **गोप्यः** पुरस्कारमेव कृतवत्य इति न तासां बाधकत्वम् ॥ ६ ॥ सा गोकुलेपि बालकान्वेषणार्थमेव प्रवृत्ता न तु साक्षाद्भगवन्निकटे स्वतो गतेत्याह **बालग्रह** इति, बालान् गृह्णातीति **बालग्रहः**, भगवांस्तु न बाल इति तत्र तस्या नाग्रहः, **तत्र** गोकुले **शिशून् विचिन्वती चचार**, विचयन एव प्रवृत्ता जाता, न तु कञ्चिन्मारितवती भगवतो रक्षकत्वात्, तदा भगवान् स्वनिकट एव तामानीतवानित्याह **यदृच्छया नन्दगृहे बालं ददर्शे**ति, भगवदिच्छाव्यतिरेकेण सर्वैरेवोपायैस्तत्र गमनमशक्यं नन्वेषा कृत्रिमा दुष्टा कथं भगवन्तं दृष्टवतीत्याशङ्क्याहासदन्तकमिति, **असतामन्तको** मारकः, तांश्च दृष्ट्वैव मारयति, अतो मारणीयानामपि दर्शनं न बाधितं **नन्दगृहे**ऽप्यसन्तो भगवता निवारणीयाः, तस्या बालाविष्टचित्तायास्तत्र विचारो न जात इति सूचनार्थमाह **बाल**मिति, तथाप्यलौकिककान्त्या कथं न विचारो जात इत्यत आह **प्रतिच्छन्ननिजोरुतेजस**मिति, **प्रतिच्छन्नं** स्वेनैवाच्छन्नं प्रतिकूलार्थं वाच्छन्नं **निजं यदुरु तेजः**, वैष्णवतेजसि प्रकटे सुरघातकं तदिति दन्दह्यमाना निवर्तेत, सर्वथा कान्तितिरोधाने यशोदादीनां भयं स्यादत आहोर्विति, यावता तस्या आगमनं सम्भवति तावत् तिरोधानं, भगवतः क्रियाज्ञानशक्ती अतिरोहिते सर्वदा प्रकृतेपि च तदुपयोगात्, ततः कथं ताभ्यां न निवारितेत्याशङ्क्याह **तल्प** इति **तल्पे** शयानो बालकः क्रियारहितो भवति, अवस्थया क्रियाशक्तेस्तिरोभावः, तत उत्थाने चलनेन सह क्रियाविर्भविष्यति, ज्ञानशक्तेः प्रकाशः सहजो यतो ब्रह्मविदामपि ज्ञाने सति तद् भवति स कथं न बाधक इत्याशङ्क्याहा**ग्निमिवाहितं भस्मी**ति, यथाग्निहोत्रिणा भस्मनाग्निस्तिरोहितः क्रियते काले प्रादुर्भावार्थं तत्तेजोन्यन् नाशयेन्न तु स्वजनितं, अतो ज्ञानशक्त्या जनिता येच्छा तया तिरोहितं प्रवृत्तिपर्यन्तं न बाधकं भवति ॥ ७ ॥ स्वतो ज्ञानशक्तेर्बोधकत्वमाशङ्क्य तस्या अपि तिरोधानमाह **विबुध्ये**ति, ज्ञानशक्तेः स्वरूपमेतत् कीर्तितं, न तु बोध उत्कर्षार्थमुक्तः, पुरोवर्तीन्द्रियसन्निकर्षे सङ्केतितस्य स्मरणमिव तस्या दर्शनेन तदीया गुणा उद्भूता इत्येतदर्थमाह तां **बालकमारिकाग्रह**मिति, प्रसिद्धिप्रेरणादिकं तच्छब्देनोक्तं, मुख्यं दोषमनुवदति **बालकानां मारिका** बालघातिनी, तथाभूता सती ग्रहरूपा च, गृह्णन्तीति ग्रहाः, मारयितुं चेन्न शक्नुवन्ति शीघ्रं गृहीत्वापि तावत् तिष्ठन्ति तथा प्रतीकारेपि, ननु तदुत्थाय कथं न मारितवांस्तत्राह **चराचरात्मे**ति, स्थावरजङ्गमानामयमात्मा यदि मर्यादां त्यजेत् तदा जीवजडयोर्विलय एव स्यात्, अस्तु विलय इति चेत् तत्राह **स** इति, **स** मूलभूता जगत्कर्ता, ज्ञानमतिरोहितमेव भवतीति तस्य तिरोधानार्थं यत्नं कृतवानित्याह **निमीलितेक्षणो जात** इति, एवं सर्वांशेनाबाधे जाते सा समागत्य भगवन्तं गृहीतवतीत्याहा**नन्त**मिति, ग्रहणे शङ्काभावार्थमनन्तपदं, अनेनान्यदपि सूचितमक्लिष्टकर्मा भगवान् स्वतो न कञ्चिन्मारयति तथैव परं स्वतः कालो गृहीत इति निकट उपविश्य **तमङ्के समारोपयत्**, काला हि घातकानां हितकारीतिशङ्काव्युदासार्थमाहा**न्तक**मिति, स हि सर्वमारकः, नन्वारोपणे क्रियाशक्तिः प्रबुद्धा कथं न बाधिका जातेत्याह **यथोरगं सुप्त**मिति सर्पाणामाततामसत्वात् तेषामत्यन्तं निद्रा, अतो मारणपर्यन्तं न क्रिया तेषु, तथा भगवतोपि क्रिया सर्वथा नाविर्भूता, ननु स्पर्शेन ज्ञानशक्तिस्तेजः कथं नाविर्भूतमिति चेत् तत्राहा**बुद्धिरज्जुधी**रिति, **अबुद्ध्या**ऽज्ञानेन सर्पे रज्जुधीर्यस्य, रज्जुर्बन्धिका, सर्पो मारकः, स्नेहेन स्तने दत्ते मय्यनुरक्तो भविष्यतीत्यापाततो बुद्धिर्न तु मारकत्वं जानाति यथा रज्जुबुद्ध्या गृहीतः **सर्पः स्वस्पर्शे**पि न ज्ञानं जनयति, अतो भगवज्ज्ञानं तेजोपि स्पर्शेन नाविर्भूतमित्यर्थः ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अमंसताम्भोजकरेणेत्यत्र, स्वातन्त्र्येण सम्बन्धमत्रालभमाना गोपीद्वारा सम्बन्धेप्सया तत्राविशतीत्याशयेनाहुः **स्वस्मिन्नावेशातिरिक्तरूपा**मिति ॥ ६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

वल्गुस्मितेत्यत्र 'श्रियममंसते'त्येतावतैव चारितार्थ्येऽपि **यद्रूपिणी**मित्युक्तं तत् कुत इत्याकाङ्क्षायां तदाशयं **स्वस्मिन्नावेशातिरिक्तरूपा**मित्यनेन वदन्तीति टिप्पण्यामाहुः **स्वातन्त्र्येणे**त्यादि, **तत्रे**ति गोपीषु, तथा च **स्वस्मिन्** गोपीजनात्मनि य **आवेश**स्तस्मादतिरिक्तं रूपं यस्यास्तामित्यर्थः, यद्वा **स्वस्मिन्** स्वात्मनि य **आवेशो** लक्ष्म्या भगवत्स्त्रीत्वाभिमानस्तदतिरिक्तं गोपीदास्यात्मकं रूपं यस्या इति गूढाभिसन्धिर्वा टिप्पणीस्थो ज्ञेयः ॥ ६ ॥ **बालग्रह** इत्यत्र **नन्दगृहेष्वसन्त** इत्यन्यावेशादय इत्यर्थः ॥ ७ ॥ **विबुध्ये**त्यस्याभासः **स्वत** इत्यादि, मास्तु **ज्ञानशक्तिप्रकाशस्य बाधकत्वं** तथापि प्रकाशाधारभूताया ज्ञानशक्तेरग्निवद् विद्यमानत्वात् स्वतः स्वरूपतो बाधकत्वमित्याशङ्क्याहेत्यनेन श्लोकार्धेनाहेत्यर्थः, **कीर्तितमिति विबुध्येतिपदेन कीर्तित**मित्यर्थः, **न त्वि**त्यादि 'चराचरात्मे'त्यनेन महोत्कर्षस्य वक्ष्यमाणत्वादनेन नोक्त इत्यर्थः, **गुणा उद्भूता** इति मायाकृता **गुणा** भगवद्ज्ञानशक्तिविषयीभूता जाता उच्चैर्निवृत्ता इति वा, **अनन्ते**ति न विद्यतेऽन्तो यस्मादितिनिर्वचनेन, **यथोरग**मित्यत्र **तथा भगवत** इति स्वेच्छया ज्ञानशक्तेरत्यन्ततिरोधानेनेत्यर्थः; **नाविर्भूत**मिति पूतनाबुद्धिगोचरं न जातमित्यर्थः ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तां केशेत्यत्र मल्लिका वसन्तर्तावेव भवन्तीत्यधुना प्रावृषि तदसम्भवादाहुर्मल्लिकेति; मल्लिकापदं प्रावृट्कालीनपुष्पाणामुपलक्षकं ज्ञापकमित्यर्थः, तथा च मल्लीसदृशी मल्लिका इवार्थे कप्रत्ययः मालत्यादिरित्यर्थः। सादृश्यसम्पादकं धर्मद्वयमाहुः **सौन्दर्यं गन्धश्चे**ति, **कुण्डलमण्डिताननामि**तिपाठमभिप्रेत्य कर्णभूषणमन्यमाहुः **उपरिभागस्थं** वेति ॥ ५ ॥ **बालग्रह** इत्यस्याभासे इत्याहेति **इति हेतो**र्यदृच्छया भगवदिच्छया दर्शनमाहेत्यर्थः, बालग्रह इति पुंस्त्वमजन्तस्य तथानुशासनात्, **आनीतवानित्याहेति यदृच्छये**तिपदकथनाद् भगवत्कर्तृकमानयनं विवृतावुक्तं, तल्पपदस्याभासे **तत** इति भगवतः सकाशादित्यर्थः। **ज्ञानशक्तेरिति ज्ञानशक्तेः प्रकाशो लौकिकं** तेज इत्यर्थः, **तद् भवती**ति अलौकिकं तेजो भवतीत्यर्थः ॥७॥ **विबुध्ये**त्यस्याभासे **स्वत** इति, पूर्वं धर्मरूपज्ञानस्य शक्तिरलौकिक तेज उक्तमत एव तत्र ब्रह्मविदो दृष्टान्तार्थमुक्ताः, **अत्र** ज्ञानस्वरूपमुच्यत इति विभेदः, तथा च ज्ञानरूपा या शक्तिस्तस्याः स्वतः स्वरूपत इत्यर्थः, **तिरोधानमाह** अक्षिनिमीलनेनेतिशेषः, व्याख्याने, **गुणा उद्भूता** इति भगवन्मनसीतिशेषः, तेजसस्तिरोभावः पूर्वश्लोके दृष्टान्तेनोक्तः स्वरूपतस्तिरोभावार्थं भगवत्कृतो यत्नो निरूप्यते, तत्र हेतुमाहु**र्ज्ञानमतिरोहितमेवे**ति, उत्तरार्धस्याभासमाहु**रेवं सर्वांशे**नेति, पूर्वमाभासः पूर्वार्धस्यैवोक्त इति ज्ञेयं सहेतुकभगवद्ग्रहणं विशिष्टवाक्यार्थः ॥ ८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

विबुध्या तामित्यस्य विवृतौ **ज्ञानशक्तेः स्वरूपमेतत् कीर्तितं न तु बोध उत्कर्षार्थमुक्त** इति तस्याः पूतनायाः सर्वदुष्टप्रकारविशिष्टस्वरूपज्ञानं भगवतो यदभूत् तन्न भगवतः प्रतिष्ठाजनकं सर्वपदार्थविषयकापरोक्षज्ञानवत्त्वात्, तर्हि किमर्थं शुकेनोक्तमित्याकाङ्क्षायामाहुः **ज्ञानशक्तेः स्वरूप**मित्यादि ॥ ८ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

आचार्यचरण आज्ञा करते हैं कि **"सर्वव्यामोहनार्थं भगवत्कृतं"** सबको मोहित करने के लिये भगवान् द्वारा बनाये हुए पूतना के रूप का शुकाचार्यजी दो श्लोको में वर्णन करते हैं। उनमें ५वें श्लोक में रूप का एवं ६ठे में चेष्टाओं का वर्णन है।

पूतना का यह रूप, माया रूप भगवान् ने किया है। पूतना की रूप मोहकता सोने के आभूषण एवं सुन्दर वस्त्रों के कारण थी। उसके केश कलाप में गूंथे हुए मोगरों के कुसुम वेणी से गिरते नहीं थे। श्लोक में 'मल्लिका' उपलक्षण है, लेकिन वेणी में उस ऋतु के विविध फूल गूंथे हुए थे कुसुमों में सौन्दर्य और सुगन्धि थी। बड़े स्तन तथा नितम्ब एवं पतली कमर के कारण, सब प्रकार के आसनों द्वारा, भोग करने योग्य थी, उत्तम वस्त्र रसजनक थे, हिलते हुए कुण्डलों की कान्ति से झलकते केशों से सुशोभित मुख की सुन्दरता का मोह के लिये ही निरूपण है। अथवा कानों के ऊपर के भाग में पहने हुए आभूषणों से ही कुण्डलों जैसी कान्ति होती थीं, प्रायः कुण्डल धारण नहीं किये थे, तो भी, उन आभूषणों से कुण्डलों की कान्ति का भान होता था। इससे उन भूषणों की सर्वोत्तमता बताई गई। गो श्रीवल्लभजी महाराज का कहना है कि – पूतना के आने के समय वर्षा ऋतु थी उस काल में मोगरे होते नहीं, लेकिन वर्षा ऋतु के पुष्पों में मोगरे जैसी शोभा एवं सुगन्ध होने से 'मल्लिका' पुष्प का उल्लेख किया है। इसलिये आचार्य श्री ने **"मल्लिका तत्कालपुष्पोपलक्षिका"** ऐसा अर्थ किया है ॥ ५ ॥

छठे श्लोक में पूतना की चेष्टा का वर्णन करते हैं। पूतना में स्वाभाविक स्मित नहीं था, इसलिये श्लोक में 'स्मित' को **'वल्गु'** विशेषण दिया, जिसका आशय है कि पूतना का हास्य कृत्रिम था। ऐसे कृत्रिम स्मित से और अलस विलास से लपेटे हुए कटाक्षों को विविध प्रकार से दिखाती, व्रजवासियों के मन को हरण करती, बिना रोक-टोक के गोकुल में आ गई। व्रजवासी सरल, भले होते हैं, इससे पूतना के कृत्रिम हास्य एवं कटाक्षादि को पहचान न सके और मोहित हो गये और उसको रोक नहीं सके। गोप बहुत थे, तो भी 'मन' एक वचन इसलिये दिया कि सब गोपों का मन एक सरीखे विवेकरहित सरल थे। इससे गोपों पूतना को पूर्ण रीति से जान न सके। गोपों ने अच्छी तरह से देखा भी किन्तु गोपियों की तरह नहीं देखा। गोपियों ने तो पूरी तरह से देखा, वे तो पूर्ण ज्ञानवाली थीं, वे जान गई कि इसका रूप भगवान् का बनाया हुआ है। लेकिन भगवान् की लीला से उसकी घातकता न समझ सकीं, पुनः यों समझा कि अपने रमण के लिये भगवान् ने लक्ष्मीजी को बुलाया है। लक्ष्मी भगवान् की पत्नी है। उससे दासियों का वैमनस्य या बैर नहीं होता है; इसलिये श्लोक में कहा है कि गोपियों ने दर्शन के लिये आई हुई उसको लक्ष्मी ही समझा। भगवान् ने वैसा ही रूप बनाया है इसलिये उसके हाथ में लीला कमल था। यही लक्ष्मी रूप से पहचान का असाधारण कारण था और खाली हाथ से दर्शन न होना इसका भी समाधान हुआ वह अपने में आवेश से बढ़े हुए स्वरूप के कारण सुन्दर रूपवती हुई थी। पति-दर्शन के लिये आई हुई जानकर, किसी ने उसको रोका नहीं। गोपियों ने तो उसका समादर किया, इसलिये गोपियों का न रोकना गोपियों के लिये बाधक नहीं।

श्रीप्रभुचरण का कथन है कि पूतना स्वतन्त्रता से स्वयं गोकुल में आ नहीं सकती थी इसलिये आचार्यचरणों ने श्री सुबोधिनीजी में कहा है कि **'स्वस्मिन्नावेशातिरिक्तरूपां'** गोपियों के सम्बन्ध की इच्छा से वहाँ पूतना ने प्रवेश किया।

श्रीपुरुषोत्तमजी प्रकाश में कहते हैं कि जब वल्गुस्मित एवं भ्रियममंसत से ही उसकी शोभा चेष्टा और रूप का वर्णन हो गया फिर श्लोक में 'रूपिणी' क्यों कहा? इसका भावार्थ समझने के लिये श्रीसुबोधिनीजी में **'स्वस्मिन्नावेशितातिरिक्तरूपां'** कहा। इस सुबोधिनीजी की पंक्ति को श्री प्रभुचरण ने टिप्पणी में समझाया कि पूतना अपने आप गोकुल में नहीं आ सकती थी इसलिये गोपियों के सम्बन्ध की इच्छा से गोपियाँ जहाँ थी वहाँ प्रवेश किया। इस टिप्पणी एवं सुबोधिनी के संस्कृत **'स्वस्मिन्नावेशातिरिक्तरूपां'** को विशेष स्पष्ट समझाते हैं कि "स्वस्मिन्"—गोपीजनों में जो आवेश था, उससे पूतना का भी रूप विशेष सुन्दर हो गया, अथवा स्वस्मिन्—पूतना में जो लक्ष्मी के आवेश से अभिमान था; इससे भी सुन्दर रूपवती देखने में आई और गोपीदास्यात्मक आवेश से भी सुन्दर रूपिणी हुई। इन्हीं सब कारणों से श्लोक में 'रूपिणी' कहा गया है।६।

आचार्यचरण कहते हैं कि **"सा गोकुलेऽपि बालकान्वेषणार्थम्"** वह पूतना गोकुल में भी बालकों के ढूढ़ने में ही प्रवृत्त रही, न कि भगवान् के निकट आप ही गई। यह बात **'बालग्रह'** श्लोक से शुकाचार्यजी कहते हैं—जो बालकों को पकड़े, उसे **'बालग्रह'** कहते हैं। पूतना बालकों को पकड़ ले जाती, इसलिये पूतना को 'बालग्रह' कहा गया है। बालकों के पकड़ने में, आग्रह वाली थी भगवान् बालक नहीं किन्तु भगवान् थे। इसलिये भगवान् के समीप न गई किन्तु गोकुल में बालकों को ढूंढती फिरने लगी। वह ढूंढने में ही लगी रही, न कि, किसी को भी मारा, कारण कि भगवान् उनके रक्षक थे। जब वह बालकों को ढूंढती रही, भगवान् के पास न गई, तब भगवान् ने निज इच्छा से उसको अपने पास बुलाया, इसलिये श्लोक में **'यदृच्छया'** पद दिया है। भगवान् की इच्छा के बिना पूतना का सकल उपायों से भी नन्दगृह में आना अशक्य था। कृत्रिम सुन्दर रूप वाली और दुष्टा स्त्री पूतना को भगवान् के दर्शन कैसे हुए? तब कहते हैं कि **'असदन्तकं'** भगवान् दुष्टों का काल है इसलिये जिन दुष्टों को मारना है उसको देखकर ही मारते हैं इस कारण से मारने वालों को भी दर्शन होने में कोई विरोध नहीं। भगवान् को नन्दगृह में दुष्टों के आने को भी रोकना था। बालकों के हरण में ही चित्त वाली उसको यह विचार ही न आया कि यह भगवान् है और दुष्ट असुरों के नाशक हैं। पूतना ने भगवान् को साधारण बालक के रूप में देखा, इसलिये श्लोक में **'बालं'** पद दिया है। यद्यपि बालक रूप था तो भी बालक की अलौकिक कान्ति से यह विचार क्यों नहीं आया कि यह 'भगवान्' है? तब श्लोक में कहते हैं कि **'प्रतिच्छन्ननिजोरुतेजसं'** भगवान् ने अपना अधिक अलौकिक तेज छिपा लिया था। यदि प्रभु तेज को न छिपाते तो उस तेज से असुर जलने के कारण दूर से ही भाग जाते तो मरते नहीं। यदि प्रभु बिल्कुल तेज छिपा लेते तो यशोदादि व्रजवासियों को असुरों से डर होता। इसलिए **'उरु'** शब्द से बताया कि अधिक तेज छिपा लिया। भगवान् की ज्ञान और क्रिया-शक्ति तो सर्वत्र सदैव रहती ही है, किन्तु लीलार्थ तिरोहित सी दीखती है। अतः जब तक पूतना भगवान् के पास पहुंची, तब तक उस तेज को कुछ छिपाने जैसा कर लिया, कारण कि भगवान् उस समय पर्यङ्क पर पौढ़े थे पौढ़ने के समय क्रिया-शक्ति कार्य नहीं करती है। बाल्यादि अवस्था अथवा निद्रादि काल से क्रिया-शक्ति का तिरोभाव होता है। निद्रा से उठकर चलने फिरने से वह क्रिया-शक्ति आविर्भाव पाती है। ज्ञान-शक्ति का प्रकाश तो स्वाभाविक है, जिससे ब्रह्मज्ञानियों को भी ज्ञान होने पर उनमें प्रकाश आ जाता है। वह ज्ञान-शक्ति का प्रकाश पूतना के लिये क्यों न बाधक हुआ? तब श्लोक में कहते हैं कि **'अग्निमिवाहितं'** जैसे अग्निहोत्री अग्नि को भस्म से ढांक

देते हैं, फिर हवन के समय भस्म को हटाने पर, वह अग्नि अपना तेज दिखाती है, वह अग्नि दूसरों को तो जलाती है किन्तु अपने में से पैदा हुई भस्म को नहीं जलाती है, वैसे ही ज्ञान-शक्ति से उत्पन्न इच्छा, उस इच्छा से तिरोहित प्रकाश रूप शक्ति प्रवृत्ति होने तक बाधक नहीं होती है ॥ ७ ॥

आचार्यश्री कहते हैं कि **स्वतो ज्ञानशक्तेर्बाधकत्वमाशङ्क्य**' ज्ञान-शक्ति अपने आप उसके आने में रुकावट करदे तो, इस शङ्का के समाधान में श्रीशुकदेवजी इस श्लोक में कहते हैं कि '**विबुध्यतां बालकमारिकाग्रहं**' उस पूतना को बालकों को मारने वाला ग्रह समझ कर, यह पंक्ति कह कर, भगवान् के ज्ञान होने का उत्कर्ष नहीं बताया है, किन्तु ज्ञान-शक्ति का केवल स्वरूप बताया है। भगवान् की ज्ञान-शक्ति ऐसी है कि कोई किसी भी रूप में आवे, तो भी उसके आन्तर स्वरूप को पहचान लेती है। '**विबुध्यतां मारिकाग्रहं**' यह पंक्ति इसलिए भी कही कि जैसे इन्द्रियों का सन्मुख आने वाले पदार्थ से सम्बन्ध होते ही, संकेतित के स्मरण की तरह, उसके गुण स्वयं प्रकट हो जाते हैं, वैसे ही उस पूतना के देखने से, उसके भी गुण प्रकट दिखाई देने लगे। यहाँ पूतना को देखने मात्र से भगवान् को भी उसके गुण प्रत्यक्ष दीखने लगे। आचार्य श्री '**तां**' शब्द का रहस्य बताते हैं कि इस '**तत्पद्**' से पूतना की प्रसिद्धि और कंस की प्रेरणा भी कहदी और साथ साथ पूतना का मुख्य दोष बालकों को मारना और पकड़ कर ले जाना भी बता दिया। ग्रहशब्द का अर्थ यह है कि जो पकड़ लेते हैं, उनको '**ग्रह**' कहा जाता है। उनमें मारने की शक्ति नहीं हो तो भी वे शीघ्र पकड़ कर, जब तक शक्ति चलती है तब तक पकड़ रखते हैं, कभी कभी प्रतीकार होने पर भी पकड़ रखते हैं। जब पूरे प्रतीकार से शक्ति नष्ट हो जाती है, तब छोड़ते हैं। इसलिये पूतना को ग्रह कह कर यह बताया है कि जब तक प्रतीकार से इसकी शक्ति नष्ट न होगी, तब तक यह इस कार्य को छोड़ेगी नहीं। यदि ऐसा है तो भगवान् ने उठकर क्यों नहीं पूतना का नाश किया? तब कहते हैं कि चराचरात्मा भगवान् यदि स्वयं ही मर्यादा छोड़ दे, तो जीव, जड़ दोनों का नाश हो जाय। यदि कोई कहदे कि भले प्रलय हो जाय, इस पर कहते हैं कि श्रीशुकदेवजी ने श्लोक में कहा है कि '**सः**' यह बालक साधारण बालक नहीं है, किन्तु यह वह मूलरूप जगत्कर्ता है। इसलिये वह मर्यादा तोड़, अब प्रलय कैसे करे? मूलभूत की ज्ञान-शक्ति, तो सदैव रहती है। उसके छिपाने के लिये यह प्रयत्न किया कि आंखें मूंद लीं।

इस प्रकार सब तरह के प्रतिबन्ध निवृत्त होने पर पूतना ने आकर अनन्त भगवान् को उठा लिया।

उठाने में उसको किसी प्रकार की शंका न हुई, क्योंकि भगवान् अनन्त रूप थे। 'अनन्त' पद का दूसरा यह भी आशय है कि जगतकर्ता भगवान् किसी को स्वयं मारते नहीं, क्योंकि आप अक्लिष्टकर्मा है। यहाँ पूतना ने खुद ही काल को पकड़ लिया। उसके समीप बैठ गोद में बैठाया। काल तो हत्यारों का हितकारी है ऐसा कोई कहे तब समाधान के लिये '**अन्तक**' विशेषण दिया है कि वह अनन्त सब को मारने वाला है।

अब आचार्यचरण श्लोक में दिये गये '**यथोरगं सुप्तम्**' पदों का भावार्थ बताते हैं कि यदि कोई शंका करे कि बालरूप भगवान् को गोद में लेने पर, भगवान् की क्रियाशक्ति तो प्रकट हुई होगी तो उसको ऐसा करने में क्यों न बाधा डाली? इसपर कहा है कि जैसे निद्राधीन सर्प अति तामस प्रकृति वाला होने के कारण गाढ नींद लेता है। इससे जब तक उसको प्रहार न किया जाय तब तक वह कोई क्रिया नहीं करता है। और उसमें किसी प्रकार की चलनक्रिया नहीं होती है वैसे ही भगवान् की भी क्रिया-शक्ति का कोई भी कार्य प्रकट न हुआ।

अच्छा, आप का कथन ठीक है कि क्रिया-शक्ति का कोई कार्य न हुआ; किन्तु ज्ञान-शक्ति का तेज तो प्रकट होना चाहिये था, वह क्यों न प्रकट हुआ? इसका उत्तर देते हैं कि अबुद्धिरज्जुधीः' जैसे सर्प को रस्सी समझने वाला बेसमझी से सर्प को पकड़ता है तो उस पकड़ने वाले को सर्प अपने स्वरूप का ज्ञान नहीं कराता है कि मैं तुझे मार डालूंगा। रस्सी तो बन्धन करने वाली है, लेकिन सर्प तो मारने वाला है। पूतना ने भी बेसमझी से समझा था कि स्नेह से स्तन्य पान कराने के कारण मुझ पर प्रसन्न ही होंगे। पूतना ने यह न समझा कि यह मेरा अंत करने वाला काल है। जैसे रस्सी समझ सर्प को पकड़ने वाला नहीं जानता है कि यह मुझे काटेगा, वैसे ही पूतना भी इसको साधारण बालक समझ, गोद में ले स्तन्यपान कराने लगी। इस कारण से भगवान् का ज्ञान, तेज, वा प्रकाश भी स्पर्श से प्रकट न हुआ।

श्री लेखकार जी इस श्लोक के विवरण में लिखते हैं कि ७ वें श्लोक में धर्म रूप ज्ञान का तिरोधान होने के कारण ब्रह्मविद् का दृष्टान्त दिया था। अब ८ वें श्लोक में ज्ञान-शक्ति के धर्मी स्वरूप का तिरोधान हुआ है इतना भेद है। यद्यपि भगवान् की कोई भी शक्ति तिरोहित होती ही नहीं है, सदैव प्रकट ही रहती है; किन्तु लीलार्थ भगवान् कभी ऐसा दिखावा देते हैं, अतः यहाँ पूतना आ सके, इसलिये आँखे मूंद कर ज्ञान-शक्ति को स्वरूपतः तिरोहित सा कर दिया। ज्ञान-शक्ति प्रकट न हुई और पूतना की बुद्धि को यह मालूम न पड़ा कि यह भगवान् हैं।

अब प्रकाशकारजी आज्ञा करते हैं कि भगवान् ने अपनी इच्छा से ज्ञान-शक्ति का अत्यन्त तिरोधान कर लिया था। भगवान् का महान् उत्कर्ष 'चराचरात्मा' पद से बताया है इसलिये पूतना के दोषों के ज्ञान से उत्कर्ष नहीं बताया है।

श्री योजनाकार आज्ञा करते हैं कि इस श्लोक में शुकदेवजी ने ज्ञान-शक्ति का स्वरूप ही बताया है, क्योंकि भगवान् तो अपरोक्ष ज्ञान वाले होने से सब छिपे हुए पदार्थों को भी जानते ही हैं, इससे पूतना के सर्वदोषों के ज्ञान से, भगवान् का कुछ भी उत्कर्ष प्रकट नहीं किया। इसलिये प्रथम ७ वें श्लोक में तिरोधान में ब्रह्मविद का दृष्टान्त दिया यहाँ भगवान् ने आँखें मूँदना रूप यत्न किया है ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तां प्रविशन्तीं व्रजवासिनः कुतो न वारितवन्तः ?' तत्राह—तामिति। तां राक्षसीं गोप्यो वनितां वरस्त्रियममंसतेत्युत्तरेणान्वयः। तथा च न वारितवत्यः। तत्सौन्दर्यातिशयं दर्शयन् दृष्टान्तमाह—अम्भोजेति। अम्भोजयुक्तेन करेण हेतुना पतिं भगवन्तं द्रष्टुमागतां रूपिणीं सुन्दरीं श्रियं लक्ष्मीमिवेत्यन्वयः। सौन्दर्यमेव स्पष्टयंस्तां विशिनष्टि—केशबन्धे धम्मिल्ले संसक्ता मल्लिका कुसुमानि यस्यास्ताम्। बृहद्भ्यां नितम्बाभ्यां स्तनाभ्यां च बृहद्भ्यामुभयत आक्रान्तमिव कृच्छ्रं कृशं मध्यमुदरं यस्यास्ताम्। सुवाससं सुष्ठु रमणीये वाससी यस्यास्ताम्। कम्पितयोः कर्णभूषणयोस्त्विषा दीप्त्या उल्लसद्भिः कुन्तलैर्मण्डितमाननं यस्यास्ताम् ॥५॥ वल्गु रम्यं स्मितं येषु तथाभूताः अपाङ्गविसर्गाः कटाक्षमोक्षा येषु तैर्वीक्षितैर्व्रजौकसां मनो हरन्तीम्, अतो गोपा अपि हृतमनस्त्वेन तां न वारितवन्तः। तथा च केनाप्यनिवारिता सती नन्दगृहं प्रविवेशेत्याशयः ॥ ६ ॥ तत्र नन्दगृहे यदृच्छया स्वमरणहेतुप्रारब्धेन प्रविष्टा तल्पे शय्यायां शयानमसतां दुष्टानामन्तकं मारकं बालकं श्रीकृष्णं ददर्शेत्यन्वयः। ननु ''नन्दगृहे वैभवातिशयस्य सत्त्वात् तत्र कुतो न दृष्टवती ?'' इत्याशङ्क्य 'बालान्वेषणपरायास्तस्या ऽन्यत्रासक्त्यभावात्' इत्याशयेनाह-शिशून् विचिन्वतीति। तत्र हेतुमाह—बालग्रह इति। बालान् मारयितुं गृह्णातीति, तथा दृष्ट्वा च तमङ्कमारोपयत्। ननु 'स्वयमप्यसतामन्तकं दृष्ट्वा कुतो न बिभियात्' इत्यत आह—प्रतिच्छन्नेति। बालनाट्येन प्रतिच्छन्नं तिरोहितं निजमुरु अधिकं तेजो येन तमित्यर्थः। तत्र दृष्टान्तमाह—अग्निमिवेति। भसि भस्मन्याहितं स्थापितमग्निमिवेत्यर्थः ॥ ७ ॥ तेजस आच्छादनप्रकारमेव विशेषतो दर्शयति—विबुध्येति। तां पूतनां बालकमारिकाग्रहं विबुध्य ज्ञात्वा स भगवान्निमीलितेक्षणो जातः। तथा ज्ञाने हेतुमाह—चराचराणामात्मा, अन्तःकरणसाक्षीत्यर्थः। ननु 'असदन्तकत्वेऽपि कदाचित्तस्याप्यन्तः स्यात्' इत्याशङ्क्याह—अनन्तमिति। भ्रान्त्या तस्याङ्कारोपणे दृष्टान्तमाह—यथेति। अबुद्धिश्चासौ रज्जुधिश्च स, यथा कश्चिदज्ञानतो रज्जुबुद्ध्या सुप्तमुरगं गृह्णाति तद्वदित्यर्थः ॥ ८ ॥

अन्वितार्थप्रकाशिका

तामिति द्वयम् ॥ केशबन्धे धम्मिल्ले व्यतिषक्ता संसक्ता मल्लिका तत्कुसुमानि यस्यास्तां बृहद्भ्यां नितम्बाभ्यां च बृहद्भ्यामुभयत आक्रान्तमिव कृच्छ्रं कृशं मध्यमुदरं यस्यास्तां सुवाससं सुष्ठु रमणीये वाससी यस्यास्तां कम्पितयोः कर्णभूषणयोस्त्विषा दीप्त्या उल्लसद्भिः कुन्तलैर्मण्डितमाननं यस्यास्तां वल्गु रम्यं स्मितं येषु तथाभूताः अपाङ्गविसर्गाः कटाक्षमोक्षा येषु तैर्वीक्षितैर्व्रजौकसां मनो हरन्तीं पदद्वयं मनोहरवदाचरन्तीमिति वा। आचारे क्विप्। अतोऽन्तःपुरं प्रविशत्यपि गोपैरपि न वारिता। तां वनितां जनितानुरागां स्त्रियम् ''वनिता जनितात्यर्थानुरागायां च योषिति'' इत्यमरः। पतिं स्वामिनं महाधनवन्तं द्रष्टुमागताम् अम्भोजयुक्तकरेण उपलक्षितां रूपिणीं श्रियं मूर्तिमतीं रत्नादिधनसम्पत्तिमिव अमंसत। अतो गोप्यः श्रियं मत्वा न वारितवत्यः। पतिं द्रष्टुमागतां श्रियम् इव वरस्त्रियममंसत इत्यपि कश्चित्। पतिशब्दः स्वामिपर्यायः धवपर्यायस्तु अत्र न। वक्ष्यमाणमातृभावविरोधात् ॥ ५–६ ॥ बालग्रह इति ॥ शिशून् विचिन्वती बालग्रहः सा पूतना अजहल्लिङ्गं विशेषणम्। विशेष्यं तु पूतनेव अतो विचिन्वतीति स्त्रीत्वम्। तत्र नन्दगृहे यदृच्छया स्वमरणहेतुप्रारब्धेन प्रविष्टा तल्पे शय्यायां शयानमसतां दुष्टानामन्तकं मारकं बालनाट्येन प्रतिच्छन्नं तिरोधापितं निजमुरु अधिकं तेजो येन तं बालकं श्रीकृष्णं भसि भस्मन्याहितं स्थापितं भस्माच्छन्नमग्निमिव ददर्श ॥ ७ ॥ विबुद्ध्येति ॥ चराचराणाम् आत्मा साक्षी भगवान् तां बालकानां मारिका मारणं तत्कर्तारं ग्रहं विबुद्ध्य बालनाट्येन निमीलितेक्षणः आस दिदीपे। निजात्यन्तबालत्वभीरुत्वज्ञापनाय तादृशामङ्कदर्शनाभावाय मातृभावदर्शिकायास्तस्याः स्वकर्तृकवधे लज्जानुत्पत्त्यै च नेत्रनिमीलनम्। ततः सा अबुद्धिश्चासौ रज्जुधीश्च सः यथा कश्चिदज्ञानतो रज्जुबुद्ध्या सुप्तमुरगं गृह्णाति तद्वत् अन्तकं कालरूपम् अनन्तम् अपरिच्छिन्नमपि अङ्कम् आरोपयत्। इति शाब्दो विरोधः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

द्वयोः सहान्वयमाह केशबंधः केशपाशो धम्मिल्ल इति यावत् तस्मिन् व्यतिषक्तानि संलग्नानि मल्लिकापुष्पाणि यस्यास्तां बृहता नितंबेन कटिपश्चाद्भागेन स्तनाभ्यां च उभयतः आक्रांतमिव कृच्छ्रं कृशं मध्यमम् उदरं यस्यास्तां सुवाससं सुंदरवस्त्रां कंपितयोः कर्णभूषणयोस्त्विषा उल्लसद्भिः शोभमानैः कुंतलैः केशैः भूषितं मंडितम् आननं यस्यास्ताम् ॥ ५ ॥ वल्गु सुंदरं स्मितं

हास्यं येषु ते भूताः अपांगानां कटाक्षानां विसर्गाः येषु तैः वीक्षितैः व्रजौकसां मनो हरंती मनः कर्षती तां वनितां पतिं द्रष्टुमागताम् अंभोजकरेण कमलयुक्तकरेण पद्मतुल्यकरेण वा रूपिणीम् अतिरूपवतीं श्रियमिव गोप्योऽमंसतेत्युत्तरश्लोकस्य पद्येन संबंधः ॥ ६ ॥ तत्र गोकुले विचिन्वती मार्गयंती बालग्रहः पूतना नंदगृहे बालं यदृच्छया स्वभावेन ददर्श कथभूतम् असताम् दुर्जनानामंतकं नाशकं ननु नाशकदर्शनेन कथं न भीता तत्राह प्रतिच्छन्ननिजोरुतेजसं बालत्वाचरणेन प्रतिच्छन्नम् आच्छादितं निजं स्वकीयम् उरु तेजो येन तं कमिव भसि भस्मनि आहितं स्थितमग्निमिव तल्पे स्थितं ददर्शेति संबंधः ॥७॥ बालकानां मारिकासंज्ञं ग्रहं तां विबुध्य निमीलिते ईक्षणे येन सः आस तदनंतरं सा अनंतं स्वयं नाशहीनं दुर्जनानामंतकं बालं मत्वेति शेषः ॥ अंकम् उत्संगमारोपयत् यथा अबुद्धिश्चासौ रज्जुधीश्चाज्ञानतो रज्जुबुध्या सुप्तम् उरगं सर्पं गृह्णाति तद्वत् ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

योषिद्रूपधरां तां वर्णयति द्वाभ्याम् ॥ तामिति ॥ केशबन्धे केशोच्चये व्यतिषक्ताः मल्लिकास्तत्कुसुमानि यस्यास्ताम्, बृहद्भ्यां नितम्बाभ्यां स्तनाभ्यां च कृच्छ्रः सूक्ष्मत्वाद्भज्यमान इव स्थितः मध्यमः कटिप्रदेशो यस्यास्ताम्, शोभनं वासो वस्त्रं यस्यास्ताम्, कम्पिते चलिते ये कर्णभूषणे तयोस्त्विट् दीप्तिस्तया, उल्लसन्तोऽधिकं शोभमाना ये कुन्तलाः केशास्तैर्मण्डितमलंकृतमाननं मुखं यस्यास्ताम् ॥ ५ ॥ वल्ग्विति ॥ वल्गु रम्यं येषु तथाभूता अपाङ्गविसर्गा येषु तथाभूतानि यानि वीक्षितानि तैः, व्रज ओकः स्थानं येषां तेषां, व्रजवासिगोपजनानामित्यर्थः। मनः, हरन्तीं, अम्भोजं पद्मं तेन युक्तो यः करो हस्तस्तेन, पद्मयुक्तपाणिनेत्यर्थः। उपलक्षितां, रूपिणीं प्रशस्तरूपवतीं, पतिं श्रीकृष्णं द्रष्टुं, आगतां उपागतां श्रियं लक्ष्मीम् इव, तां वनितां गोप्यः, अमंसत अमन्यन्त ॥ ६ ॥ बालग्रहः स्वयं बालग्रहरूपा सत्यपि, धृतदिव्यस्त्रीस्वरूपा पूतनेत्यर्थः। तत्र व्रजे, शिशून् व्रजस्थान्बालकान्, विचिन्वती गवेषयन्ती सती, यदृच्छया नन्दगृहे, असतामसत्पुरुषाणां अन्तकं मृत्युरूपं, तथापि प्रतिच्छन्नं तिरोहितं निजं स्वासाधारणमुर्वधिकं तेजो येन तं, अतः भसि भस्मनि, आहितं, अग्निं इव, तल्पे शय्यायां, स्थितं बालं, ददर्श। स्वसौन्दर्यावलोकनपरवशाभिर्गोपीभिरनिवारिता सत्यपश्यदित्यर्थः ॥ ७ ॥ विबुध्येति ॥ चराचरात्मा, सर्वबुद्धिदृक् स्वयं भगवानित्यर्थः। तां पूतनां, बालकमारिकाग्रहं विबुध्य, निमीलिते ईक्षणे नयने येन तथाभूतः, आस बभूव। महेश्वरत्वे स्वस्य परमेश्वरभावे सत्यपि, चराचरप्रभुः अपि, स्वसंकल्पमात्रेणैव तां हन्तुं समर्थः। सन्नपीत्यर्थः। बालभावं निजबालत्वं, विभावयामास। बालभावानुकृतत्वात्तूष्णींभावं स्वीकुर्वन्न किंचिदप्युवाचेत्यर्थः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वल्गुस्मितेति : १०.६.६.

सुमनोवरहरणं मम कार्यमिहाग्रेऽपि सा विचिन्त्यैवम्। अकृत तदभ्यसनार्थं किमवेक्षणतः पुरा मनोहरणम् ॥ ८ ॥

अनङ्गसङ्गसन्तोषा योषा पतिमुपैति हि। युक्तेयमुपमा तस्मात्तस्यास्तादृग्विपाकतः ॥ ९ ॥
सा रत्नमङ्गलवृत्त्या यत्सद्रूपं तादृगादधे। भाति तत्तत्र भव्यार्थं श्रीसमद्युतितः स्फुटम् ॥ १० ॥

साक्षाच्छ्रियं तदनु नव्यनराधिपं वा द्रष्टुं नरा न चतुरा यदलं भवन्ति।
तत्साधु कृत्रिमतरादृततत्स्वरूपतद्दर्शनस्तिमितदृक् स बभूव लोकः ॥ ११ ॥

विधिमेव पुरस्कृत्य गता सा व्रजमङ्गना। युक्तं नैवाशृणोत्तत्र निषेधं तत्कृतं क्वचित् ॥ १२ ॥
नेति नेति निषेधोऽस्ति सदा श्रुतिसमन्वितः। चित्रं तदा निषेधोऽसौ नासीत्तच्छ्रुतिगोचरः ॥ १३ ॥

बालग्रह इति : १०.६.७.

प्रतापिनो हव्यजुषोऽनलस्य प्रभावतोऽस्र बत योग्यता का। विषस्य वा दुर्विषयस्य वास्तीत्ययोचि युक्ताऽग्न्युपमेन्दिरेशे ॥ १४ ॥

विबुध्येति : १०.६.८.

सुप्तानुकारिणि मयीह भवत्यनार्यं स्वैरप्रवृत्तिरघदा किल नान्यथेति।
तत्तादृशस्थितितया प्रभुणा व्यबोधि तत्स्वैरसंविहरणेष्वपि सर्ववेत्रा ॥ १५ ॥

ह्यस्तनेऽपि न दृष्टेयं श्वस्तने तु न जात्विति। स्वस्तनात्तविषां योषां नापश्यद्युक्तमच्युतः ॥ १६ ॥
कार्यं स्वावनमेव केवलमितः किं वा त्रिकालोदितत्रैलोक्याखिलबालपालनमपीत्यन्तर्दृशा वीक्षितुम्।
दीनत्राणपरायणोऽतुलकृपो बालैककल्याणदृग् दुष्टध्वंसनदीक्षितः किमु विभुस्तादृक्तयाऽऽसीत्तदा ॥ १७ ॥

एषा स्वकामैकदृगस्ति यस्मात् तद्युक्तमस्यास्त्वहमस्मि विद्वान्। द्रक्ष्याम्यमुं मातृपदां कथं नु पत्नीस्वरूपादिति किं तथासीत् ॥१८॥
ऐहिकं तु नहि साधनमस्या दृश्यतेऽथापि पुरातनमस्ति। किं नवेति भगवान् ध्रुवमन्तश्चिन्तनाय कृतनेत्रपिधानः ॥ १९ ॥

अनायत्या प्राप्तः कश्चिदपि पुरा यो न विहितः प्रसङ्गश्चेत्तस्या वहनमिह कार्यं मतिमता ।
निमील्याक्षीत्येवं जनसरणिमालोच्य किमसौ तथा चक्रे कर्तुं तदघकरसंस्पर्शवहनम् ॥ २० ॥
महानिष्टनिवृत्तावप्यलं योग इति प्रभुः । क्षुद्रदृष्टिनिवृत्त्यर्थं तन्निमिषाद्योगभागभून् ॥ २१ ॥
दातुं स्तन्यमिषा द्विषं किल धृतोद्योगे यमास्ते यतः पीतं चेत्प्रभुणा पुरो बत गतिः का वाऽस्मदीया भवेत् ।
इत्थं व्याकुलितान्निजोदरगतानालोक्य लोकान् प्रभुर्वक्तुं भात्यभयप्रदानवचनं च क्रेऽक्षिसम्मीलनम् ॥ २२ ॥
या स्त्री बहिर्मृदुपदा निजमातृभावं लोके प्रदर्श्य विषवद् हृदये नृशंसा ।
कार्यं न तन्मुखनिरीक्षणमित्यनन्तः सम्बोधयन् स निजनेत्रपिधानमाधात् ॥ २३ ॥
दृष्टा चेत् करुणादृशेयमनघास्याद्योग्रया भस्मसादेवं चेदवशिष्यते ह्युभयथा तद्धानिनासंस्कृतिः ।
एतस्या हृदये तया च भविता जन्मान्तराप्तिः पुनः सा माभूदिति दीर्घदृष्टिरकरोदीशः स्वदृङ्मीलनम् ॥ २४ ॥
अस्ये दुष्टान्तराये रिपुहितमतये कामपीशो नु दद्यान्निम्नां वा प्रोन्नतां वा गतिमिह यदसौ सर्वतन्त्रस्वतन्त्रः ।
आवाभ्यां स्वात्ममार्गो मुनिसुजननुतो दीयते नेति मन्ये श्रेशं चक्रेऽक्षियुग्मं रविविधुलसितं पक्ष्मसद्द्वारगुप्तिम् ॥ २५ ॥
यो हिंस्रबुद्धिजनवर्धितमुख्यशोभः स्वीयोऽप्यसौ सुकृतिना न निरीक्षणीयः ।
तत्पूतनाक्षियुगवीक्षणवर्जनार्थं युक्तं तदक्षियुगमैशमभूत्तदैवम् ॥ २६ ॥
चराचरात्मा यदयं ततोऽन्तर्दृशा भृशं पश्यतु दुर्मनस्काम् । बहिर्दृशा नार्हनिरीक्षणेति कृतं तथा तन्निमिनाऽक्षियुग्मम् ॥ २७ ॥
सूर्याश्रितश्च द्विजराजयुक्तः स्पष्टं यदि स्यां तदियं तमोभूः । नक्तञ्चरी व्यक्तगतिर्व्युसुश्च भवेद् द्रुतं नेति तदा तथासीत् ॥ २८ ॥
अनर्हवीक्षाऽनुत्कण्ठा प्रसिद्धैव महात्मनाम् । ईशाक्षिराजहंसाभ्यां युक्तं नैक्षि बकीमुखम् ॥ २९ ॥
चन्द्रो यथा तद्वदियं निशाचरी स्तन्यार्पणान्मे भुवि बन्ध्यतापदम् । तद्रूपिणीं कर्तुमतः पुरैव किं कृपाब्धिना सा हरिणाङ्कमाश्रिता ॥३०॥

कृष्णप्रिया

केशों के जूड़ों में वेणीमें गूंथे हुए मोगरों के पुष्प वाली, बड़े नितम्ब, स्तन और पतली कटिवाली, सुन्दर वस्त्रों वाली, हिलते कुण्डलों की कान्ति से झलकते केशों से मण्डित मुखवाली, मनोहर मुस्कान भरे कटाक्षों के निक्षेप वाली दृष्टि से व्रजवासियों के मन को हरने वाली उस रूप वती स्त्री को गोपियों ने हाथ में कमल धारण करने के कारण समझा कि लक्ष्मी अपने स्वामी के दर्शन के लिये आ रही है ॥ ५-६ ॥ बालकों के लिए ग्रह स्वरूप वह पूतना गोकुल में बालकों को ढूँढती हुई भगवदिच्छा से नन्दजी के घर आई। वहाँ पूतना ने शय्या पर सोये हुए दुष्टों के काल समान लेकिन भस्माच्छादित अग्नि के समान अपने प्रचण्ड तेज को छिपा कर रहे हुए बालक कृष्णजी का दर्शन किया ॥ ७ ॥ चल और अचल के आत्मा भगवान् श्रीकृष्ण ने उस पूतना को बाल हत्याकारी ग्रह जानकर नेत्र मूंद लिये। अबुध मनुष्य जैसे सोते सांप को रज्जु समझ कर उठा ले वैसे ही पूतना ने अनन्त काल रूप भगवान् को साधारण बालक समझ गोद में ले लिया ॥ ८ ॥

तां तीक्ष्णचित्तामतिवामचेष्टितां वीक्ष्यान्तरा कोशपरिच्छदासिवत् ।
वरस्त्रियं तत्प्रभया च धर्षिते निरीक्षमाणे जननी ह्यतिष्ठताम् ॥ ९ ॥
[2]तस्मै स्तनं दुर्जरवीर्यमुल्बणं घोराङ्कमादाय शिशोर्ददावथ ।
गाढं कराभ्यां भगवान् प्रपीड्य तत् प्राणैः समं रोषसमन्वितोऽपिबत् ॥ १० ॥
सा मुञ्च मुञ्चालमिति प्रभाषिणी निष्पीड्यमानाखिलजीवमर्मणि ।
विवृत्य नेत्रे चरणौ भुजौ मुहुः[3] प्रस्विन्नगात्रा क्षिपती रुरोद ह ॥ ११ ॥
तस्याः स्वनेनातिगभीररंहसा साद्रिर्मही द्यौश्च चचाल सग्रहा ।
रसा दिशश्च प्रतिभेदिरे जनाः पेतुः क्षितौ वज्रनिपातशङ्कया ॥ १२ ॥

कर्दमक्षमा

अन्वयः—अन्तरा कोशपरिच्छदासिवत् अतिवामचेष्टितां तीक्ष्णचित्तां वरस्त्रियं तां वीक्ष्य तत् प्रभया धर्षिते च निरीक्षमाणे जननी हि अतिष्ठताम् ॥ ९ ॥ अथ घोरा शिशोः अङ्कम् आदाय दुर्जरवीर्यम् उल्बणम् तस्मै स्तनम् ददौ ॥ ५३ ॥

---

१. अथ-इति क्वचित् पाठः । २. तस्मिन्-श्रीधर. वंशी. जीव. वीर. विज. विश्व. गिरि. भक्त. । ३. मुहुर्निस्विन्नगात्रा-शुक. गिरि. भक्त. । ४. प्रतिनेदिरे-श्रीधर. वंशी. जीव. वीर. विज. शुक. गिरि. भक्त. ।

भगवान् रोषसमन्वितः कराभ्यां तत् गाढं प्रपीड्य प्राणैः समं तत् अपिबत् ॥ १० ॥ अखिलजीवमर्मणि निष्पीड्यमाना सा मुञ्च मुञ्च अलम् इति प्रभाषिणी नेत्रे विवृत्य मुहुः चरणौ भुजौ क्षिपती प्रस्विन्नगात्रा ह रुरोद ॥ ११ ॥ तस्याः अतिगभीररंहसा स्वनेन साद्रिः मही च सग्रहा द्यौः चचाल रसाः च दिशः प्रतिनेदिरे वज्रनिपातशंकया जनाः क्षितौ पेतुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु यशोदारोहिण्यौ तां कथं न न्यवारयेतां तत्राह । तामिति । वामं वल्गु जनन्या इव चेष्टितं यस्यास्तां वरस्त्रियं च सहसैवांतरा गृहमध्ये वीक्ष्य । अंतस्तैक्ष्ण्ये बहिर्मार्दवे च दृष्टांतः कोशपरिच्छदासिवत् । मृदुचित्रचर्ममयः कोशः परिच्छद आवरणं यस्यासेः खड्गस्य तद्वत् । तत्प्रभया च धर्षिते अभिभूते । अहमस्य जननीयं वेति मोहिते च सत्यौ जननी जनन्यौ निरीक्षमाणे एव केवलमतिष्ठतां न तु निवारितवत्यौ ॥ ९ ॥ तस्मिन्स्थाने दुर्जरं वीर्यं विषं यस्मिंस्तं स्तनं श्रीकृष्णमंकमादाय सा घोरा तस्मै शिशवे ददौ । अथानंतरमेव प्रपीड्य केवलं विषमपथ्यमिति मत्वेव तस्याः प्राणैः सहापिबत् ॥ १० ॥ चरणौ भुजौ च मुहुर्मुहुः क्षिपंती । प्रस्विन्नानि स्वेदयुक्तानि गात्राणि यस्याः सा ॥ ११ ॥ रसाः रसातलानि च ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृष्णमातरौ कुत्र गते तदेत्यभिप्रेत्याह—नन्विति । तां पूतनाम् 'वामः क्रूरे मनोहरे' इति यादवः । जननीति द्विवचनम् "इदिकारादक्तिनः" इति ङीबभावपक्षेऽयं प्रयोगः । यद्वा—आर्षत्वादेकत्वम् । "कोशोऽस्त्री कुड्मले पात्रे दिव्यखड्गपिधानके । जातिकोषेऽर्थसंघाते पेश्यां शब्दादिसंग्रहे ॥" इति मेदिनी । 'परिच्छद आवरणे संविधाने विवस्त्रके' इति धरणिः ॥ ९ ॥ शिशोरिति चतुर्थ्यर्थे षष्ठी । तत आह शिशवे । "अहिफेनं रामठेन युक्तं त्वविषवद्भवेत्" इत्यादिवाक्यैः केवलं विषमपथ्यमिति रोषसमन्वित इति रोषः मदीयव्रजबालकानपीयं जिघांसतीति रोषमयी दुष्टसंहारिका भगवच्छक्तिः तस्या अपवित्रान्प्राणानपिबत् न तु सः कुठारसमन्वितो वृक्षमच्छिनदितिवत् ॥ १० ॥ अखिलजीवमर्मणि सर्वस्मिन् जीवस्थाने "यस्मिन्क्षते मर्दिते च जीवो नश्यति देहतः । तदंगं मर्म विज्ञेयं सूक्ष्मं दुर्ज्ञेयमेव तत् ॥" इति वाक्यात् । कंठवृषणादीनि मर्माणि । नेत्रे विवृत्य प्रसार्य । मुंचमुंचेतिवदलमित्यपि वारणेऽत्र वीप्साया अभावस्तु वक्तुमशक्यत्वादेव ॥ ११ ॥ वज्रनिपातो विद्युत्पातः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ कार्त्स्न्ये काकाक्षिन्यायेनोभयत्राप्यन्वयः । अतीति चित्सुखपाठः वामचेष्टितत्वेन दुःखप्रदता निरस्ता तत्रान्तरा वीक्ष्येत्यन्तर्दुष्टतानुमितिश्च खण्डिता अन्तर्दुष्टजनस्य सहसा परगृहान्तःप्रवेशे सहसासामर्थ्यात् तत्रापि वरस्त्रियमित्यविश्वसनीयता च निराकृता विशेषतश्च तत्प्रभया मातृवत् स्नेहप्राकट्यप्रतिभयाधर्षिते जननी इति प्रथमाद्विवचनस्य पूर्वसवर्णश्छान्दसः "सुपां सुलुक् पूर्वसवर्णा" (७।१।३९) इत्यादिना ॥ ९ ॥ तस्मिन्नेव स्थाने इति धाष्ट्र्यमुक्तं उल्वणं स्पर्शेनापि मारकमित्यर्थः । अत एव वीर्यं तद्विषरूपमेवेति तथा तैर्व्याख्यातम् आदाय आकृष्य अतो द्विकर्मकत्वमपि तस्तं स्तनं व्रजबालकानामपि वधार्थमागतत्वेन रोषसमन्वितः सन् प्राणैः समम् अपिबत् यतो दम्भिन्यां तस्यां दम्भेनैव प्राणापहारो योग्य इति भावः । रोषसमन्वितत्वं च तत्स्तन्यप्राणपानार्थमेवोक्तं ततश्च रोषरूपं तत्तेज एव तान् दुष्टभावमयान् अपवित्रानपिबत् अशोषयदित्यर्थः । कुठारसमन्वितो वृक्षमच्छिनदिति वत् स्वयं तु तदनुकरणमात्रं कृतवानित्यर्थः । फलं तु तदनुकरणमात्रादपि स्यादिति सर्वत्रैवेत्थं व्याख्येयं रोषश्चायमापातत एव परिणामतस्तु परमकृपामेवाकरोदित्याह–भगवानिति । कारुण्यादिस्वगुणाव्यभिचार्येव सन्नित्यर्थः । एतच्चाग्रे व्यक्तम् । किञ्चेदं बाल्यलीलावेशेऽपि तादृशशक्तौ हेतुः तदावेशेऽपि सर्वासां शक्तीनां स्वसमयप्रतीक्षकत्वाल्लीलानुरूपा प्रवृत्तिः स्यादेवेति भावः । अन्यत्तैः । तत्र अपथ्यमिति मत्वेवेत्यन्ते विषमयजन्तोः प्राणा हि तद्विषवात्या न भवन्ति ततस्तदात्मतापादनाय तत्प्राणानेव स्वप्राणेषु मिश्रयामीति च मत्वैवेति भावः ॥ १० ॥ मुञ्च मुञ्चेति वदलमित्यपि निवारणे अत्र तु वीप्साया अभावः पुनर्वक्तुमशक्तत्वात् अखिले जीवमर्मणि जीवनाश्रये रुरोद उच्चैः सरोदनमार्त्तनादं चकार ह हर्षे ॥ ११ ॥ रसाश्चेलुः प्रतिनेदुश्च दिशस्तु प्रतिनेदुरेवेत्यर्थः । वज्रेति लोके तदूदुर्ध्वशब्दस्याऽप्रसिद्धेः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथापि; तां वरस्त्रियमपि । वामं वक्रं चेष्टितं यस्यास्तथाभूतां तथा तीक्ष्णचित्ताम्, तत्र च अन्तरा सहसा गृहमध्ये पुत्रान्तिके वीक्ष्यापि जनन्यौ निरीक्षमाणे एवातिष्ठताम्, न तु न्यवारयेताम् । तत्र हेतुः– तस्याः प्रभया शोभया मातृवत् स्नेहप्रकटनप्रतिभया वा अवधर्षिते विस्मयेन मोहिते सत्यौ । यद्वा, तस्य प्राणसहित–पूतनास्तनपानेच्छोर्भगवतस्तेजसाभिभूत, अन्यथा ताभ्यां निवारणे कृते तया स्वांके तद्ग्रहणाशक्तेः । अथवा, तीक्ष्णचित्तामपि तां वामं मातृवल्लालनादिवल्गुचेष्टितं यस्यास्तथाभूताम्, वीक्ष्येत्यन्तर्दुष्टता निरस्ता; दुष्टजनस्य हि सहसान्यगृहान्तःप्रवेशाशक्तेस्तत्रापि वरस्त्रियमित्यविश्वसनीयता च । विशेषतश्च तत्प्रभयावधर्षिते निरीक्ष्यमाणे केवलमतिष्ठताम्, न तु किञ्चित् कृतवत्यौ । निजकार्याक्षमत्वे दृष्टान्तः—कोशेति ॥ ९ ॥

तस्मिन् स्थानेऽवसरे वा। घोरात्वं दर्शयति—दुर्जरेति; अतएवोल्बणमतितीक्ष्णं स्पर्शमात्रेणापि मारकमित्यर्थः । अंकं प्रति प्रकर्षेणातिशयेन पीडयित्वा स्तनं भगवान् कारुण्यादिसद्गुणयुक्तोऽपि प्राग्बहुलबालकवधेन परमक्रुद्धः सन्; यद्वा, रोषसमन्वित इव प्राणैः सह पानात्; वस्तुतस्तु परमकृपामेवाकरोदित्याह—भगवानिति। एतच्चाग्रे व्यक्तं भावि ॥ १० ॥ अलमत्यर्थम्, प्रभाषिणी उच्चैर्भाषमाना, अखिले जीवस्य मर्म्मणि निवासस्थाने रुरोदोच्चैरार्त्तनादं चकार, ह हर्षे ॥ ११ ॥ रसाश्च चेलुः; किंवा विवरमयत्वात् प्रतिनेदुरेव, जना इति लोकाः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

वामं प्रतिकूलं कोशपरिच्छदासिवत् कोशपरिच्छन्नखड्गवत् अन्तः क्रूतरेत्यभिप्रायः (जननीवत्) ॥ ९——११ ॥ रसा पातालं निजरूपं पूर्वरूपम् ॥ १२——१३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

रोहिणीयशोदे अपि तां न न्यवारयेतामित्याह—तामिति। कोशपरिच्छदासिवन्मृदुलचर्मनिर्मितं कोशपरिच्छदमावरणम् पिधानं यस्य तमसिं खड्गमिवान्तस्तीक्ष्णचित्तां क्रूरतरामपि बहिर्वामचेष्टितां शोभनचेष्टितामनुकूलचेष्टितामिति यावत्तां वरस्त्रियं श्रेष्ठस्त्रियमिव स्थितां परस्त्रियमिति पाठे परस्यान्यस्य कस्यचित्पुंसः स्थितां वीक्ष्य तस्याः प्रभया धर्षिते अभिभूते जननी जनन्यौ पूर्वसवर्णदीर्घ आर्षः। निरीक्षमाणे अपि अतिष्ठतां तूष्णीमासातां न तु न्यवारयतामित्यर्थः ॥५॥ अथ घोरा घोरचेष्टिता पूतना तं शिशुं श्रीकृष्णमादाय शिशोस्तस्मिन्मुखे स्तनं ददौ कथम्भूतं दुर्जरवीर्यं दुःखेनापि जरयितुं जीर्णयितुमशक्यं वीर्यं विषरूपं यस्मिन् अत एवोल्बणं दुःसहं वीर्यस्य उल्बणत्वादुल्बणम् अथ श्रीभगवान्। रोषसमन्वितः प्रपीड्य स्तनमित्यनुषङ्गः प्राणैः समं सह तत्स्तन्यमपिबत्तस्याः प्राणैः सह स्तनमपिबदिति वा ॥ १० ॥ तदा साखिलजीवमर्मसु सर्वप्राणमर्मसु पीड्यमानाऽलम् एतावताऽलम् आशु मुञ्च मुञ्च इति प्रभाषिणी नेत्रे विवृत्य परिभ्राम्य चरणौ भुजौ च मुहुर्मुहुः प्रक्षिपति स्विन्नानि स्वेदयुक्तानि गात्राण्यङ्गानि यस्याः सा रुराव जुघोष हेत्याश्चार्यम् ॥ ११ ॥ अति गभीरं रभसो वेगो वा यस्य तेन तस्याः स्वनेन सपर्वता मही भूः सग्रहा द्यौश्च चचाल रसातलं दिशश्च प्रतिनेदिरे प्रतिदध्वनुः वज्रनिपातशङ्कया जनाः अशनिनिपातशङ्कया क्षितौ निपेतुः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अतिवामचेष्टिताम् अधिकक्रूरव्यापाराम् "अति स्यादधिकार्थोक्तौ प्रशंसायामतिक्रमे" इति यादवः "वामः क्रूरे मनोहरे" इति च अन्तरा मध्ये कोश एव परिच्छदः परिकरभूषणलक्षणो यस्य सोऽन्तराकोशपरिच्छदः स एवासिरन्तराकोशपरिच्छदासिः स इव गूढाकारबाह्याभ्यन्तरकोशालङ्कृतखड्गवत्स्थितेत्यन्वयः। अन्तराकोशपरिच्छदः वर्जितकोशलक्षणालङ्कारोऽसिर्यथा तथा वामचेष्टितामिति वा तस्याः पूतनायाः प्रभया वरोद्भूतलक्षणया धर्षिता विह्वलिता तस्य कृष्णप्रभया वा इदानीमेव पूतनाप्राणवियोगसूचनाय जननी अतिष्ठदिति सन्धिकार्याकरणवैदिकप्रयोगानुकरणं वा ॥ ५ ॥ तस्मिन् काले दुर्जरवीर्यं जीर्णीकर्तुमशक्यं वीर्यं यस्य स तथा अत एवोल्बणं दुःसहक्रौर्योपेतम् अथशब्दो विकल्पार्थः। अथ स्तनं ददाविति विषमिति तस्याः प्राणैः ॥१०॥ अखिलजीवमर्पिणी समस्तप्राणापहारिणी रुराव रोदनमकरोत् हिशब्दो हेतौ श्रोतॄणामनुकम्पाजनकः ॥११॥ रसा पातालं प्रतिनेदिरे प्रतिशब्दं चक्रुः ॥१२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कपटमातृस्नेहमय्या तत्प्रभया तस्मिन् प्रसङ्गे सति ॥ ५ ॥ दुर्ज्जरेत्यादिभ्यां विषमयत्वं गम्यते आदाय आकृष्य अतो द्विकर्मकत्वं तमिति शेषः। प्रपीड्य स्तनमिति पूर्वेणैवान्वयः। रोषसमन्वितत्वं तत्स्तन्यपानार्थमुक्तम् ॥ १० ॥ ततश्च रोषद्वारापिबदनाशयदिति रोषरूपं तत्तेज एव तानपिबत् न स्वयमित्यर्थः ॥ ११ ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

ननु, यशोदारोहिण्यौ कथं तां न न्यवारयेतां? तत्राह—तामिति। वामं वल्गु जनन्या इव चेष्टितं यस्यास्ताम् अन्तरा गृहमध्य एव वीक्ष्य अन्तस्तैक्ष्ण्ये बहिर्मार्दवे च दृष्टान्तः मृदुचर्ममयः कोशः परिच्छद आवरणं यस्य तथाभूतमसिमिवेति तस्याः प्रभयाऽवधर्षिते अभिभूते मत्पुत्रस्याभ्युदयाय किमियमम्बिका किमियमिन्द्राणी मूर्त्तिमती त्रैलोक्यसम्पत्तिर्वा वात्सल्येन स्तन्यं पाययती मोहिते सत्यौ जननी जनन्यौ निरीक्षमाणे एव केवलमतिष्ठतां न तु निवारितवत्यौ ॥ ९ ॥ तस्मिन्नेव स्थाने दुर्ज्जरं विषरूपं वीर्यं यस्य तत् घोरा पूतना शिशोः शिशवे गाढं प्रपीड्येति तया त्याजयितुमशक्यः सन्निति भावः। रोषसमन्वित इति मदीयं व्रजबालकानपीयं जिघांसतीतिरोषमयी दुष्टसंहारिका शक्तिरेवाऽपवित्रान् प्राणान् स्तनं च अपिबदशोषयत्। न तु स इति कुठारसमन्वितो वृक्षमच्छिनदितिवत् ॥ १० ॥ निष्पीड्यमाना अर्थाद् बालकेन चरणौ भुजौ च मुहुर्मुहुर्निक्षिपती ॥११॥ रसा रसातलानि च॥१२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गोपैर्गोपीभिश्चोक्तप्रकारेणानिवारिता नन्दगृहे बालं ददर्शेत्युक्तम् । अथ यशोदारोहिण्यावपि तां न न्यवारयेतामित्याह—तामिति, कोशपरिच्छदासिवत् मृदुचर्ममयः कोशः परिच्छदमावरणं यस्य स चासावसिश्च तद्वत् तीक्ष्णचित्ताम् अन्तरतितीक्ष्णस्वभावामतिवामचेष्टितां बहिरतिवाममत्यन्तं मृदुचेष्टितं यस्यास्ताम् वरस्त्रियमन्तरागृहमध्ये वीक्ष्य तत्प्रभया च धर्षितेऽभिभूते जननी जनन्यौ निरीक्षमाणे एव केवलमतिष्ठतामासाताम् ॥ ९ ॥ घोरा क्रूरा पूतना अङ्कमादाय बालमिति शेषः । उल्बणं दुःखेनापि जरयितुमशक्यं दुर्जरं वीर्यं विषं यस्मिन् तं स्तनं शिशोरतस्मिन् श्रीमन्मुखे ददौ । अथानन्तरं भगवान् रोषसमन्वितः तदनुग्रहार्थं तत्क्रौर्यानुरूपः स्तनं गाढं प्रपीड्य प्राणैः समं सह तत् स्तन्यमपिबत् ॥ १० ॥ निःस्विन्नानि निःशेषतः खेदयुक्तानि गात्राणि यस्याः सा चरणौ भुजौ च मुहुः क्षिपती ह स्फुटं रुरोद ॥ ११ ॥ अतिगभीररंहसाऽतिगभीरवेगेन रसाः रसातलानि ॥ १२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु यशोदारोहिणीभ्यां बालैकचित्ताभ्यां कुतः सा न निवारिता ? तत्राह तामिति, वामं मनोज्ञं जनन्या इव चेष्टितं यस्यास्तां वरस्त्रियमन्तराभुवनमध्येऽपि वीक्ष्य अन्तस्तैक्ष्ण्ये बहिर्मृदुत्वे च दृष्टान्तः कोशो मृदुचित्रचर्ममयः परिच्छद आवरणं यस्य तादृशमसिमिवेति तस्य प्रभया प्रधर्षिते अभिभूते मत्पुत्रस्याभ्युदयार्थिनी किमियमिन्द्राणी रुद्राणी वा स्नेहेन स्तन्यं पाययतीति मोहिते जननी मातरौ "सुपां सुलुक्" (३–७–३५) इत्यौकार विभक्तेर्लुक् निरीक्ष्यमाणे एवातिष्ठतां न तु निवारितवत्यौ ॥ ९ ॥ तस्मिन् स्थाने घोरा सा पूतना कृष्णमङ्कमादाय शिशोस्तस्य सम्बन्धे स्तनं ददौ तन्मुखेऽर्पयामास कीदृशं दुर्जरं विषरूपं वीर्यं यस्मिन् अतः उल्वणं स्पर्शेनापि मारकं भगवान् स बालः स्तनं गाढं प्रपीड्य तया त्याजयितुमशक्यः सन् रोषसमन्वितस्तत् प्राणैः सममपिबत् मद्वयस्यान् व्रजडिम्भानपि पापिष्ठेयं जिघांसतीति रोषोदयः दुष्टसंहारिणी तद्रोषशक्तिरेव सप्राणं स्तनमशोषयदिति भावः । कुठारसमन्वितस्तरुमच्छिनदितिवत् ॥ १० ॥ अखिले जीवमर्मणि निपीड्यमाना सा नेत्रे विवृत्य बहिर्निष्कास्य चरणौ भुजौ च मुहुर्भुवि निक्षिपन्ती निस्विन्नानि स्वेदवन्ति गात्राणि यस्याः सा रुरोद ह हेति बालकमस्तनपानमात्रेण तस्या एवं पीडा जातेति आश्चर्यं सूचयति ॥ ११ ॥ रसा इति रसातलानि प्रतिनेदिरे प्रतिध्वनिं चक्रुः ॥ १२ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

हरिः ॐ गिरेत्यस्य गिरमित्यर्थः । एतेन भाषणक्रियां प्रति गिरःकर्मत्वात् । गिरं प्रभाषिणीति वक्तव्यं गिराप्रभाषिणीत्ययुक्तामिति चोद्यं परिहृतम् । गिरेति तृतीया द्वितीयादेश इति स्वीकृत्य गिरेत्यस्य गिरमित्यर्थ इत्युक्तत्वात् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अथ बालभावविभावनानन्तरं विसर्गविज्ञातजगच्चेष्टितं निसर्गेण स्वभावतोऽनन्याधीनालोचनत इति यावत् विज्ञातं जगच्चेष्टितं येन तं निसर्गं उत्पत्तिरहितश्चासौ जगद्विचेष्टितश्चेति वा निसर्ग इति विज्ञातश्चासौ जगतो विचेष्टितं चेष्टा तदभावो वा येन स चासौ स च तमनन्तं न विद्यतेऽन्तो नाशो यस्य तमन्तकं स्वनाशकं च हरिं चाजानमाना निशाचर्यङ्कमुत्सङ्गमारोपयदारोपयामास । तत्र निदर्शनमाह ॥ यथेति । सुप्तमुरगमबुद्धिरज्जुधीर्न विद्यते बुद्धिस्तज्ज्ञानं यस्य स चासौ रज्जुरिति धीर्यस्य स च यश्चानन्तमारः सौन्दर्ये तदुपम इति भावः । अपयदङ्कोऽपयन्नपगतोऽङ्कः कलङ्को यस्य तं वा । अनन्ताबद्धा च सा मा च तस्या आरोपमारोहमेतीति यत्सोऽङ्क उत्सङ्गो यस्य तं । उपयदङ्कमुपर्यश्चाङ्कः स्वोत्सङ्गो यस्य तं । अनन्तं आरेति वा । अबुद्धिः सर्वथा मतिरहितं बालापत्यं यथा च रज्जुधीर्भ्रान्तः पुमानिति वा । अनन्ता या मायाऽऽरोप उरसि यस्य यच्च तद्यच्च तन् । अन्तर्बहिर्व्याप्तब्रह्मरूपमिति वा । यदित्यङ्कं चिह्नमसाधारणं यस्य तमिति वा । यथोक्तं बृहद्भाष्ये । यथा बाह्ये तथैवान्तस्ततो यदिति चोच्यत इति । नायं मृत्युः परिहार्यं इत्यप्याह ॥ अजानमानेति । अजेन ब्रह्मणाऽनानां प्राणानां मानं परिमाणमवसानमिति यावत् तद्यस्या इति । मानं ज्ञानं लयश्चैव मर्यादा चेत्यादेः ॥ ९ ॥ ननु यशोदारोहिण्यौ किं चक्रतुर्न चक्रपाणिपाणिग्रहनिग्रहमित्यत आह ॥ तामिति । तीक्ष्णं चित्तं यस्याः सा तां बहिर्वामं चेष्टितं यस्याः सा तामन्तरागारमध्ये कोशपरिच्छदासिवत्तमिव चित्रमृदुचर्मनिर्मितकोशः परिच्छद आवरणं यस्य स चासावसिः खड्गश्च तमिव बहिर्वामचेष्टितामन्तस्तीक्ष्णचित्तां वरस्त्रियं वीक्ष्य दृष्ट्वाऽपि तस्याः प्रभया मायिकया धर्षिते वशीकृते निरीक्षमाणे केवलमवलोकयन्त्यौ जननी जनन्यौ । सुपां सुलुगिति पूर्वसवर्ण ईदूदे इति प्रगृह्यसंज्ञायां रूपं । अतिष्ठतां प्रथमैकवचनपाठे जननी यशोदा तत्प्रभया च धर्षिता निरीक्षमाणाऽतिष्ठत् । मातुरसन्धिः पीतस्येति सूचयितुमसन्धिनिर्देश इति ज्ञेयं ॥ १० ॥ तस्मिन्काले दुर्जरस्य जरयितुमशक्यस्य विषस्य वीर्यं सामर्थ्यं यस्मिंस्ते उल्बणमितरेषां घोरा राक्षस्यङ्कं प्रत्यादाय स्तनं शिशोः ददौ । अथ तद्दानानन्तरं भगवान्कराभ्यां गाढं प्रपीड्य मर्दयित्वा तत्प्राणैस्तस्याः प्राणाः पञ्च तैः समं साकं रोषसमन्वित एकस्या राक्षस्या रोषः स्वमारणकारणं तेन समन्वितः सफलीकर्तव्यत्वेन तत्समन्वित एकस्या ऊर्वश्या उपरि दुःसहवासविघटकक्षमापर्यायस्तेन रोषेण समन्वित इत्यर्थः । यथोक्तं बृहद्भाष्ये । क्रोधः क्षमात्मको यस्य चिदानन्दात्मकः

सदेति। यत्र यत्र कोपः श्रूयते तत्र तत्रेयं गतिर्ज्ञेया। अपिबत्पपौ ॥ ११ ॥ सा पूतना मुञ्च मुञ्च त्यज त्यजेति गिरा प्रभाषिणीति गिरा यस्याः सा। इति गिरा टाबन्तता च मेरुर्गिरायां गुरुरित्यादेः मुञ्चालमिति पाठेऽलमितोऽलं पर्याप्तं। मुञ्चेत्यन्वयः अखिलजीवमर्माणीति पाठः समर्मकः। जीवस्यमर्मापायस्थानमखिलं च तज्जीवमर्म च तस्मिन्। निष्पीडयमानाऽखिलजीवमर्षिणीति पाठेऽपि सुमर्षणीयः। अखिलाञ्जीवान्मर्षयति हिनस्तीति धात्वनेकार्थ्यात्। सा नेत्रे विवृत्य चरणौ भुजौ च मुहुर्विक्षिपती विक्लिन्नगात्रा खेदोदकक्लिन्नं गात्रं यस्याः सा सती रुराव रोदनमकरोत् ह खेदे। नेत्रे नियन्त्रे मुञ्च मुञ्चेति प्रभाषमाणेति वा। अमुञ्च श्रीकृष्णं प्रति मुहुर्मुञ्चेति प्रभाषिणीति वा योजना ॥ १२ ॥

श्रीसुबोधिनी

ननु यशोदारोहिणीभ्यां कथं सा न निवारितेत्याह **तां तीक्ष्णचित्ता**मिति, **तां** निरीक्ष्य **तत्प्रभया धर्षिते जननी** जनन्या**वतिष्ठतां** निवारयितुं वाशक्ते जाते **यशोदारोहिण्यो**र्मोहाभावात्, भगवत्समीपे मायाया विलयात्, तद्गता धर्मा सर्वे भाता इत्याह **ता**मित्यादिपदैः, **तच्छब्देन** तद्गताः **पूर्वधर्माः** सर्वे निरुक्ताः, पूर्वं प्रवेशार्थं व्यग्रचित्ता मोहनाभिनिविष्टा च, इदानीं तु **तदुभयाभावात्** चित्तक्रौर्यं प्रकटीभूतं ताभ्यां ज्ञातं निरूपयति **तीक्ष्णचित्ता**मिति तस्या अन्तर्गतो दोषो निरूपितः, बहिर्गतान् निरूपयत्य**तिवामचेष्टिता**मिति, अत्यन्तं **वामं** वक्रं कठिनस्पर्शादिरूपं **चेष्टितं** यस्याः, एवमन्तर्बहिस्तस्या दोषं दृष्ट्वापि स्वतो निवारणेऽशक्तावपि रक्षकेभ्यो निवेदनाभावे **हेतुमाहान्तराकोशपरिच्छदासिवदिति अन्तरा गृहमध्येतन्वौ महतां,** तत्रागमनमयुक्तं मध्यस्थितानां चाप्रयोजकत्वं ज्ञातं, **किञ्च कोश एव परिच्छदो** वेष्टनसाधनं यस्यैतादृशो**सिः** खड्गः, **आसमन्तात् कोश** इति, वा अतिधनयुक्तः परिच्छदो वा यस्य, अनेन बहिर्मुखलोका अन्तर्गतं दूषणं तद्गतं येनकेनचिदुच्यमानं न गृह्णन्त्येव, अत एवं ज्ञात्वा ताभ्यां न कश्चिज्ज्ञापितः, तथाभूतं प्रकृते विशेषणमाह **वरस्त्रिय**मिति, **वरणीया स्त्री** परमसुन्दरी, अतः पुरुषमात्रेणैव वरणीयेति न कोप्येनां मारयिष्यतीतिभावः, **स्त्रीणां** स्वसामर्थ्यमेव, तथापि भगवत्स्नेहात् प्रयत्न एव कर्तुमुचितो न त्वौदासीन्यमिति चेत् तत्राह **तत्प्रभया च धर्षिते** इति, तस्याः **प्रभा** भगवत्कृता, राक्षसो भावो मानुषभावोपमर्दकः, अतस्तस्याः **प्रभयोभे** अपि **धर्षि**ते, **च**काराद् भगवदिच्छया च, अत एव **निरीक्षमाणे एवातिष्ठतां, अजननी**त्यपि, जनने हि सहजो भावो भवति, **जनन्याव**पीति वा ॥ ९ ॥ एवमप्रतिबन्धे यत् कृतवती तदाह **तस्मा** इति, तस्मै सम्भृतसर्वधर्माय भगवते स्तनं ददौ, अन्यथा दातुमेव न शक्नुयात्, **स्तनमेकं,** ननु दत्ते स्तने तस्याः कः पुरुषार्थ इति चेत् तत्राह **दुर्जरवीर्य**मिति, **दुर्जरं वीर्यं** यस्य **स्तन्यस्य,** स्तने स्तन्यं तिष्ठतीति स्तन्यदानमप्रत्यक्षमिति **स्तनपदप्रयोगः,** न केवलं परिणामाहितकर्तृत्वं किन्तू**ल्बणं** क्रूरं, ग्रहणदशायामप्यनिष्टजनकं, नन्वेवं भगवति **कथं कृतवती** तत्राह **घोरे**ति, कदाचित् स्तनं न पिबेदिति लालनार्थं शिशोर**ङ्कमादाय** बालकस्याङ्कस्थानं स्पृशन्त्युत्तोलयन्ती ततो भगवतः पृष्ठभाग ऊरुणा परिगृहीतः, दक्षिणहस्तेन स्तनं निःपीडयन्ती वामहस्तेन भगवतोङ्कस्थानमुत्तोलयन्ती स्तनं ददावित्यर्थः ॥ ९ ॥

अथ तस्याः क्रियासमाप्त्यनन्तरं भिन्नप्रक्रमेण भगवान् स्तन्यमपिबदित्याह **गाढ**मिति, यथा निर्बन्धेन पाययिष्यामीतियत्नं कृतवती तथा भगवान् स्तन्यमप्यदत्वा पलायिष्यतीति निग्रहस्यावश्यकर्तव्यत्वात् **कराभ्यां गाढं स्तनं प्रपीड्यापिब**दितिसम्बन्धः, एवं निर्भयतया स्तनपानप्रवृत्तौ हेतुमाह **भगवा**निति, **ईश्वरत्वात्** स्त्रीमारणदोषः परिहृतः, "पुमान् योषिदुत क्लीब" इतिवाक्याद् वीर्यवत्वाज् जीरणादिसामर्थ्यं द्योतितं, यशोवत्वादलौकिकचरित्रकरणं, श्रीयुक्तत्वान्न प्रकारान्तरेण मारणं तादृशशोभानाशप्रसङ्गात्, ज्ञानित्वात् तस्या दोषपरिज्ञानेन मारणावश्यकत्वं, वैराग्ययुक्तत्वाद् दैत्यपक्षवधो न बाधकः, एवं तस्या मारणे हेतुषट्कं, गुणैर्धर्मिणा च मोक्षदानं, अन्यथा न पिबेत्, अत एव तस्याः सर्वप्रायश्चित्तार्थं **प्राणैः सममपिबत्,** प्राणरक्षार्थं हि तया सर्वं कृतं, प्राणे तु भक्षिते सर्वं भगवदर्पणं भवति, शिशूनां प्राणा अप्यत्र सन्तीति तेषामपि मुक्तिः सूचिता, बहुवचनेन च **प्राणपदे**नेन्द्रियाण्यपि गृह्यन्ते, ततः सर्वैव सामग्री तदीया पीता भवति, ननु निन्दितपदार्थं **भगवान्** कथं गृहीतवानपहतपाप्मा हि स तत्राह **रोषसमन्वित** इति, **रोषेण सम्यगन्वितः,** यथा तदीयोंशो दुष्टो भगवति **सम्बद्धो न** भवति यथा वा स सर्वोप्यंशो दग्धो भवति, भगवान् **सर्वसमन्वित**-इति क्रोध**समन्वितत्वे**पि न दोषः, पूर्वं रोषसम्बन्धो नास्तीति वक्तुं **प्राणैः समं रोषसमन्वित** इत्युक्तं, सर्वात्मकत्वात् नासङ्गत्वक्षतिः, न तु तस्या मारणार्थं रोषोपेक्ष्यते, वीर्यस्योक्तत्वात् स्तनद्वारापि प्राणपानं न विरुध्यते, साधनफलरूपा तदीया क्रिया नाशितेति ज्ञापयितुं **कराभ्या**मित्युक्तम् ॥ १० ॥

अतो भगवता पेपीयमाने स्तने तत्र स्थितो भगवान् मायारूपोपि भगवत्येव प्रविष्टः, तत्सङ्ग आधिदैविकी पूतनापि भगवति प्रविष्टा, आध्यात्मिक्यास्तु **कृत्यमाह सा मुञ्चमुञ्चे**ति, **सा पूर्व**मेवं निर्बन्धयुक्तापि भगवता निःपीडिता तदानीमपि भगवत्स्वरूपमज्ञात्वा वचनत्रयमुक्तवती **मुञ्चमुञ्चाल**मिति, यथा प्राकृते बालके पेपीयमाने च स्तनव्यथायां **मुञ्चे**त्युच्यते, अतिव्यथायां पुनः, पुनर्बालकस्य क्षुन्निवृत्तेति ज्ञात्वालमित्याह, **बालो हि स्वबुद्ध्या पूर्णतां** न जानात्यन्योक्तं च गृह्णात्यत आह, अन्तःस्थितो दुष्टभावो गतः, तेन **लौकिकभाषोक्ता,** मात्रोश्च परिज्ञानार्थं गतेपि प्रायो भगवत्सम्बन्धस्य विद्यमानत्वात् प्राणवत्या एव तस्याश्चेष्टामाहेति**प्रभाषिणी**ति, "भगवान् कराभ्यां प्रपीड्य"ति यदुक्तं तद् बालकेन स्तने मर्दनं पीडाजनकं न भविष्यतीत्याशङ्क्याहा**खिलजीवमर्मणि निष्पीड्यमाने**ति, जीवस्य **मर्मस्थानानि** बहूनि यत्र प्रहारेण जीवो गच्छति, **अखिल एव जीवमर्मणि** मर्मस्थाने

नितरां पीडयमाने सति, निष्पीड्यमाना वा, वस्तुतस्त्वखिलेत्युक्त्या **मर्मणी**त्येकवचनं यदुक्तं तेनाखिलपदं **जीवविशेषणमेव**, तथा च तया स्वस्मिन्नानीता ये बालकानां जीवास्ते स्वजीवमर्मस्थाने स्थापिताः सन्तीति तान् स्वस्मिन्नानेतुं भगवांस्तन्निष्पीडनमेव कृतवानित्यभिप्रेतोर्थः, बालकद्रोहाज्ञायां भगवानेव निमित्तमिति तादृशानां स्वस्मिन्नानयनमावश्यकमिति तथा, अत एव बाललीलारसं ताननुभावयन् मृत्स्नामप्यनुभावितवानत एव "नाहं भक्षितवानि"तिवचनं सत्यं, अत एव **तस्या उरसो** भगवत्क्रीडायोग्यतापि भक्तानां तत्र स्थितिरासव्यतः, एत एव व्रतप्रसङ्गे च "**वयस्यै**"रितिपदेन वक्ष्यन्ते, तदातिव्यथया निवृत्तवाक् **नेत्रे विवृत्य** विपरीततया प्रसार्य **चरणौ भुजौ** चेतस्ततः **क्षिपन्ती नितरां स्विन्नं सम्पूर्णं गात्रं** यस्यास्तादृशी सती **रुरोद**, उच्चैःशब्दं कृतवती, अतिबालकस्पर्श एवम्भाव आश्चर्यजनको भवतीति **हेत्युक्तं**, अनेनान्तःपीडा महती तस्याः सूचिता भगवतश्च पराक्रमः, आकर्षणात्मकवायौ प्रविष्ट एवं कृतवानिति वीर्यं निरूपितं, सात्त्विके नेत्रे हस्तपादौ राजसौ गात्रं तामसमिति त्रिगुणपीडा निरूपिता, रजो मध्यस्थमुभयसङ्गतं भवतीति द्वयं निरूपितं, निर्गमनसमये प्राणस्य महान् घोषो रोदनं तेनाकृष्ट एव प्राणो भगवताकृष्ट इति ज्ञापितम् ॥ ११ ॥

भगवतो माहात्म्यं शृङ्गग्राहिकया प्रदर्शयिष्यन् भगवदाकृष्यमाणप्राणकृतस्वनस्य माहात्म्यमाह **तस्याः स्वनेने**ति, शब्दस्त्वमूर्तो मूर्तकार्यं चेत् कुर्यात् तदालौकिकं भवति, चरणाद्याघातेन हि कम्पो भवति, शब्देनैव तथा जातमित्याह **मही द्यौश्च चचाले**ति, तत्तदधिष्ठातृदेवतानां भीतत्वात् कम्प इति केचित्, पुरुषोत्तमस्य वीर्यमवताराणामपि वीर्यादधिकमिति ज्ञापयितुं ब्रह्माण्डविग्रहस्य पुरुषस्यापि स्वनेन कम्पो जात इत्युच्यते, एकदैव सर्वत्र कम्पजनने हेतु**रतिगभीररंहसे**ति, अत्यन्तगभीरमधस्तलविदारणसमर्थमुपरिस्थितमज्जनसमर्थं च **रंहो** वेगो यस्य तेन, पर्वतसहिता पृथिवी ग्रहनक्षत्रादिसहिता **द्यौः**, **चकारात्** तदुपरितना लोकाः, पर्वतानां महत्त्वात् स्थिरत्वात् कम्पाभावमाशङ्क्या**द्रिसहिते**त्युक्तं, ग्रहाणां भचक्रे ध्रुवे प्रतिष्ठितानां चलनाभावमाशङ्क्य **सग्रहे**ति, उभयोरुभयं वरप्राप्तं च 'नक्षत्रविहिताहं चित्रविहिताह''मितिश्रुतेः, पातालदिशामसम्बन्धाद् दूरस्थितत्वाच्चलनाभावमाशङ्क्याह **रसा दिशश्चे**ति, तासामपि चलनं प्रतिस्वनजननं चाधिकं, तत्रत्यानां तु न किञ्चिदवशिष्टमित्याह **जनाः पेतुः क्षिता**विति, ननु कम्प उपपत्तिरुक्ता देवताभयात् पुरुषभयाद्वेति जनानां विवेकधैर्यादियुक्तानां पाते को हेतुरितिचेत् तत्राह **वज्रनिपातशङ्कये**ति, **वज्र** एव पतितः क्वचित् पतिष्यति वा तेन भयादेव पातः, विवेकेनापि पातः सम्भवति, उच्चैःस्थिते तस्य तेजोसहमानो वज्रस्त मारयेदिति ॥ १२ ॥

(१) श्री प्रभुचरणविरचिता श्रीटिप्पणी

रसा दिशश्चेत्यत्र, **तासामपि चलनमिति**। तद्देवतानामित्यर्थः। प्राणैः समपानोक्त्यैव व्यसुत्वे प्राप्तेपि पुनस्तदुक्तिराध्यात्मिकादिभेदविवक्षयेत्याशयेनात्र तद्भेदा उक्ताः। अत एव जीवमर्मोक्तिरपि मूले ॥ १२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तां तीक्ष्णचित्तामित्यत्र **मोहाभावा**दिति, गोपानां कामो **मोह**जनकः स्वामिनीनां त्वस्यां स्वभावानुरोधाल्लक्ष्मीत्वप्रत्यय एतयोस्तु तदुभयाभावेन **मोहाभावात्**, **अन्तरे**तिपदस्य **वीक्ष्ये**त्यनेनान्वयमभिप्रेत्य तस्यार्थमाहुरन्तरेत्यादि, **अन्तरा गृहमध्येन्तर्वा महता**मिति, अत्र द्वितीयः पक्षोग्रे गोष्ठे निजरूपस्थानकथनानुरोधाज् ज्ञेयः तत्र द्वितीयपक्ष **आसमन्तात् कोश** इति व्याख्यानं ज्ञेयं, **धर्षिते** इतीतिकर्तव्यतामूढे, धृष प्रसहने प्रसहनमितिकर्तव्यतामोहादिरूपेण **प्रकर्षेण सहन**मिति तथा, पराहते इति वा ॥ ९ ॥ **तस्मा** इत्यत्र तच्छब्दार्थमाहुः **सम्भृतसर्वधर्माये**ति, **सम्यग् भृता** यज्ञसम्भारवद् गुप्ततया स्थापिता स्वकीयाः क्रियात्मज्ञानादिरूपा **धर्मा येन** तादृशाय, अन्यथेति धर्माणां प्रकटतया स्थापने, **आधिदैविकी पूतने**ति श्रवणाद्यनाश्या भगवदेकनाश्या सेत्यर्थः ॥ १० ॥ **सा मुञ्चे**त्यत्रालमित्युक्तेः प्रयोजनमाहु**र्बालो**हीत्यादि, **लौकिकभाषे**ति, **लौकिक**समानं तस्या **भाषणं**, **परिज्ञानार्थ**मिति पूतनामरणपरिज्ञानार्थं, अत्र **वस्तुत** इत्यारभ्य **वक्ष्यन्त** इत्यन्ते ग्रन्थेयमाशयः, भगवज्जन्मानन्तरं द्वितीयदिने कंसमन्त्रनिश्चयोत्तरमन्यदुर्मन्त्रिवत् पूतनाऽपि 'पुरग्रामव्रजादिषु बालान् निघ्नन्ती' षष्ठे दिवसे **श्रीनन्दव्रजे** समागता तथा सति तावत्पर्यन्तं हतानां बालानां ये प्राणास्ते सजीवास्तस्यां समागताः, न च तेषां जीवानां सलिङ्गानां यमगतिः शङ्क्या **साधना**ध्यायप्रथमपादे रंहत्याद्यधिकरणेष्वर्चिरादिगतीनामपि विचारितत्वान् तत्र च जननात् पूर्वं वृष्ट्यन्नरेतोभावोपि सलिङ्गानां जीवानामुक्तः स एव न्यायोन्यत्राप्यवगन्तव्यः, एवं सति यथा ते जीवा आहुतिद्वारा वान्यकर्मद्वारा वा **वृष्ट्यादौ प्रविशन्ति** तथात्र भगवल्लीलाचिकीर्षारूपमूलकारणवशात् केनचिद् द्वारेण पूतनायामेव प्रविष्टा **इत्यखिल**पदमत्र जीवविशेषणमेव, पूतना चाधिदैविकी तान् स्वजीवमर्मणि स्थापितवतीति तान् स्वस्मिन्नानेतुं भगवांस्तथा कृतवानित्यभिप्रेतोर्थः, ननु भगवतः किमावश्यकं येनैवं कृतवानित्यत आहु**र्बालके**त्यादि, किमत्र गमकमित्यत **आहुरत एवे**ति स्वस्मिन्नानयना**देव**, तथा च भगवतः सत्यवाक्त्वाद् वक्ष्यमाणवाक्यार्थापत्तिरेव गमकमित्यर्थः, ननु भगवतः सर्वात्मकत्वाद् वाक्यमन्यथाप्युपपाद्यत इत्याशङ्क्य गमकान्तरमाहुरत एव **तस्या** इत्यादि, तेषां बहिःप्राकट्येपि वाक्यान्तरार्थापत्तिं प्रमाणयन्त्यत एवेति, **वक्ष्यन्त** इति साक्षित्वेन **वक्ष्यन्ते**, **रज मध्यस्थ**मिति रजोगुणस्य पूर्वापरगुणसङ्गतत्वेन द्विरूपत्वात् तत्स्थानीयं नेत्रं गात्रं चेतिद्वयम् ॥ ११ ॥ **तस्याः स्वनेने**त्यत्रोभय **उभय**मित्यादि, महीदिवोः सम्बन्धि यदुभयं पर्वतग्रहात्मकं च, चोर्थे, 'नक्षत्रे'त्यादिवक्ष्यमाणश्रुत्या ताभ्यां वरप्राप्तमपि चचालेतिफलितोर्थः, वरप्राप्तस्य चलनाभावमाशङ्क्यैतदुक्तं, श्रुतिस्तु

तैत्तिरीयसंहिताद्वितीयाष्टकपञ्चमाध्यायद्वितीयानुवाके 'ते अब्रूतां द्यावापृथिवी **मा** प्रहारावयोर्वै श्रित इति ते अब्रूतां वरं वृणावहै नक्षत्रविहिताहमसानीत्यसावब्रवीच्चित्रविहिताह'मिति, अर्थस्तु द्यावापृथिव्याविन्द्राद् वरं याचितवत्यौ नक्षत्रैर्विहितालङ्कृतासानि स्यामिति दिवो वरः, चित्रेण मनुष्यपशुवृक्षनगनदीसमुद्रादिरूपेण विहितालङ्कृतेति पृथिव्या वरः, दिशाममूर्तत्वेनाकाशतुल्यतया वरणाभावमाशङ्क्य **तासाम**पीत्यादिना यत् सुबोधिन्यामुक्तं तत्तात्पर्यं **टिप्पण्यामाहुस्तासामपी**त्यादि, सुबोधिन्यां **देवताभयात् पुरुषभयाद् वेत्यधिष्ठातृदेवतानिष्ठाद् भयाद् ब्रह्माण्डपुरुषनिष्ठाद् भयाद्** वेत्यर्थः, **विवेकेन** पातं व्युत्पादयन्त्युच्चैरित्यादि, **उच्चैः-स्थिते पुरुषे तस्योच्चैः** स्थितस्य यत् तेजो निर्भयत्वं तदसहमानस्तथेत्यर्थः ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनोल्लेखः

"तां तीक्ष्ण"'त्यस्याभासे **इत्याहेति**, **इतिशङ्कातो** हेतोरग्रिमं श्लोकमाहेत्यर्थः, व्याख्याने, **प्रभा भगवत्कृते**ति तदुपास्यमायारूपेण भगवता कृतेत्यर्थः, **सहजो भाव** इति लौकिकः पुत्रत्वभाव इत्यर्थः, अत्र तु भगवत्सम्पादितोऽलौकिक एव भावः, स च भगवदिच्छानुरूप एव भवतीति भगवदिच्छया धर्षितत्वे तथा स्थितिरितिभावः ॥ ९ ॥ **तस्मै स्तनमि**त्यत्र **सम्भृतसर्वधर्माये**ति **सम्भृता** बहिरप्रकटिताः सर्वे धर्मा येनेतित्रिपदत्वान् नानिच् , **न बाधक** इति स्तनपाने प्रवृत्तौ **न बाधक** इत्यर्थः, **ततः सर्वं सामग्री**ति आधिदैविकीतिशेषः ॥ १० ॥ **तत्सङ्गे आधिदैविकी**ति लीलोपयोगिदेहेन्द्रियादिविशिष्टा **भगवति प्रविष्टा** मुक्ता, यदा पुनः कृष्णावतारो भविष्यति तदा सा पूतनापि पुनस्तथैवाविर्भविष्यति 'सम्पद्याविर्भावः स्वेनशब्दा''दितितत्त्वसूत्रन्यायादितिभावः, **आध्यात्मिकया** इति लौकिकेन्द्रियप्राणान्तःकरणरूपाया इत्यर्थः, लौकिकदेहरूपा आधिभौतिकी तस्याः पातोऽग्रे वक्ष्यते, इहायमभिसन्धिः, लीलापदार्थास्तदुपयोगिदेहेन्द्रियादिविशिष्टा नित्या भगवति तिष्ठन्ति, यदा भगवानवतरति तदा तेऽप्यवतरन्ति, स्वकार्यान्ते पुनर्भगवत्येव प्रविशन्तीति, येषां मुक्तिर्नोक्ता ते प्रकृतौ तिष्ठन्ति। **सा मुञ्च मुञ्चे**त्यत्र **गतेपि प्राणे** इति आधिदैविके इतिशेषः, प्राणस्य वागादिषु सामर्थ्यजनकत्वं बृहदारण्यके छान्दोग्ये कौषीतक्यां च प्राणविद्यायां व्युत्पादितं, तत्राधिदैविक एव प्राणो ज्ञेयः, 'द्वया ह प्राजापत्या' इतिप्रसङ्गे तस्यैवापहतपाप्मत्वस्य वेधाद्यर्थभेदादितितार्तीयाधिकरणे निर्णीतत्वेन तदभावे एव शरीरस्य पापिष्ठत्वसम्भवात् , वायुरूपभौतिकप्राणविद्यया "यद्यप्येनच्छुष्काय स्थाणवे ब्रूयाज् जायेरन्नेवास्मिञ् छाखाः प्ररोहेयुः पलाशानी"ति छान्दोग्योक्तफलासम्भवाच्च, तथा चाधिदैविकप्राणस्य भगवति प्रविष्टत्वाद् भाषणादिकं कथं सम्भवतीत्याशङ्क्य तदुक्तं, **निष्पीड्यमाने**त्यत्र, सप्तम्यन्तः प्रथमान्तश्चेतिपाठद्वयमभिप्रेत्य व्याख्यानद्वयमुक्तं, चरणयोर्भुजयोश्च विवर्तनं विवृण्वन्ति **इतस्ततः क्षिपन्ती**ति, **आकर्षणात्मके**ति भगवता तत्प्राण आकृष्टः, तत् भगवत्कृतमाकर्षण**मात्मा** स्वरूपभूता शक्तिर्यस्य क्रियाया वायुशक्तित्वादितिभावः, तादृशे **वायावन्तः प्रविष्टे** सति एवं **कृतवान्** , आध्यात्मिको **गुण** इति शेषः, राजसकथने चरणो भुजौ चेतिद्वयमुक्तं तत्तात्पर्यमाहुः, **रजो मध्यस्थं** भवत्यत **उभयत्र** सात्त्विके तामसे च **सङ्गतं भवती**तिहेतोर्द्वयमुक्तमित्यर्थः, आध्यात्मिकपूतनाया मरणमुक्तमित्यग्रे वक्ष्यते, अतो मरणमेतच्छ्लोके वाक्यार्थस्तं व्युत्पादयन्ति **निर्गमने**ति, मृङ् प्राणत्यागे इतिपाठान् मरणं प्राणत्यागः, अत्र **रुरोदे**तिपदेन **निर्गच्छतः प्राणस्य घोष** उच्यते, तथा च कार्यपुरःसरं मरणं प्राणत्याग एवोक्तः इतिभावः, **तेने**ति यदा तया स्वस्मिन् **प्राण आकृष्टस्तदा भगवता स्वस्मिन्नाकृष्ट इति तेन** महाघोषकथनेन **ज्ञापितं**, अन्यथा तादृशघोषो न स्यादितिभावः ॥ ११ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

रोषसमन्वित इत्यस्य विवृत्तौ **सर्वात्मकत्वान् नासङ्गत्वक्षति**रिति नन्व 'सङ्गो ह्ययं पुरुष' इति श्रुतेः **कथं** भगवतः समन्वय इत्याशङ्क्याहुः **सर्वात्मकत्वा**दित्यादि, 'पुरुष एवेदं सर्व'मितिश्रुतेः सर्वस्य भगवदभेदात् स्वरूप एव स्वसमन्वय इति नासङ्गत्वबाध इत्यर्थः ॥१०॥ **तत्सङ्गे आधिदैविकी पूतनापी**ति 'मायेत्यसुरा' इति श्रुतेरसुरोपास्येन मायारूपेण भगवता विनिर्मिता श्रीलक्ष्मीभ्रमोत्पादिकाधिदैविकीत्युच्यते, सा भगवदुत्पन्नत्वाद् भगवति तिरोहितेत्यर्थः, **तया स्वस्मिन्नानीता ये बालकानां जीवा** इत्यारभ्य **"वयस्यै"**रितिपदेन **वक्ष्यन्त** इति, अत्रेदं ज्ञेयं, ये श्रीरामावतारे दण्डकारण्यवासिन ऋषयस्तेषां भगवद्रूपयौवनसौन्दर्यवशात् स्त्रीरूपेण रिरंसाभूदतो गौडदेशे कुमारिकारूपेणाजनिषत, तेषां ये पुम्भावास्ते बालकरूपेण गोकुले उत्पन्नास्ते पूतनया भक्षिताः पूतनाजीवमर्मस्थाने स्थापितास्ते पूतनासुपयःपाने भगवता **स्वस्मिन्नानीता**स्तेषां पुम्भावरूपाणां योन्तरङ्गलीलासम्बन्धे प्रतिबन्धकीभूतो दोषः पुंस्त्वाख्यः स तु पूतनासम्बन्धेन नाशितः सद्वैद्यशोधितविषौषधसम्बन्धे महारोग इव, यश्च पुम्भावे स्वतन्त्रताप्रागल्भ्यादिरूपो गुणः स रमणौपयिकत्वाद् रक्षितः, एवं शुद्धान् तान् पुम्भावरूपान् जीवान् लौकिकविग्रहान् विधाय भक्तिरूपचरणालोडितमृद्भक्षणेन व्रजवरवधूसदनस्थचौर्यगृहीतदधिदुग्धादिरूपस्वोच्छिष्टमहाप्रसादभक्षणेन तादृशलीलाधिकारं सम्पाद्य वस्त्रदानसमये कुमारिकासु तत्तत्पुम्भावरूपान् तासु तासु योजयिष्यति भगवान् , ततश्च गुप्तलीलौपयिकप्रागल्भ्यस्वातन्त्र्यादिगुणरूपपुम्भावयुक्ताः कुमारिका रासोत्सवे भगवता सह पुम्भावेनापि रंस्यन्त इति श्रीकृष्णहार्दविदां श्रीमदाचार्यश्रीविट्ठलेश्वराणां निगूढ आशयो भाग्यवद्भिर्बोध्यः, ननु पुम्भावस्य मनोधर्मत्वात् कथं बालकत्वं कथं वा विग्रहप्राप्तिरिति चेत् , शृणु, तृतीयस्कन्धे "क्रोधं दुर्विषहं जातं नियन्तुमुपचक्रमे धिया निगृह्यमाणोपि भ्रुवोर्मध्यात् प्रजापतेः सद्योजायत तन्मन्युः कुमारो नीललोहित"

इत्यनेन मनोधर्मस्य क्रोधस्य कुमाररूपतोक्ता, एवमत्रापि ज्ञेयं, किञ्च "येऽहीयन्ताऽमुतः केशा अहयस्तेङ्ग जज्ञिर" इत्यनेन कमलासनकेशानामहिरूपजीवत्वं विग्रहवत्त्वं चोक्तमेवमिहापि, "वेदा यथा मूर्तिधरास्त्रिपृष्ठ" इत्यत्र शब्दरूपाणां वेदानां विग्रहवत्त्वं वर्णितं तद्वदिहापि, न च कमलासनस्य देवोत्तमत्वात् तद्धर्मस्य क्रोधस्य भवतु कुमारत्वमिह तु दण्डकारण्यवासिनामृषीणां पुम्भावस्य कथं बालकरूपेणावतरणं सम्भवति तेषामृषीणां लौकिकत्वादितिवाच्यं, "गोप्यो गाव ऋचस्तस्य यष्टिका कमलासन" इति कृष्णोपनिषद्भ्यस्तासां गौडदेशोद्भवानां कुमारिकाणां वेदरूपत्वेनात्यलौकिकत्वात्, यत्र भगवत्सेवकस्य कमलासनमनोधर्मस्य क्रोधस्य कुमाररूपत्वं तत्र भगवद्भोग्यानां कुमारीणां मनोधर्मस्य पुम्भावस्य विग्रहवत्त्वे किमाश्चर्यमितिदिक्, अत एव नवमस्कन्धे अम्बरीषप्रसङ्गे दुर्वाससा क्षिप्ताया जटाया अपि विग्रहवत्त्वमलौकिकत्वात्, 'तामापतन्तीं ज्वलतीमसिहस्तां पदा भुव'मितिवाक्यात्, अतो ह्यलौकिकप्रमेये ह्यलौकिकी रीतिरेव श्रुतिपुराणेषु सर्वत्र दृश्यत इति न युक्तिविरोधो दोषसम्पादक इति ज्ञेयं, न च कमलासनमनोधर्मक्रोधस्य कुमारत्वनिरूपणं तु तस्य क्रोधस्याधिदैविकत्वात् युक्तमिह तु कथं विग्रहवत्त्वमितिवाच्यं, एतत्पुम्भावस्याप्याधिदैविकत्वात्, **निःस्विन्नगात्रा क्षिपती रुरोद** हेत्यस्य व्याख्याने **तेनाकृष्ट एव प्राण** इति तेन पूतनाकृतरोदनेन **इति ज्ञापित**मित्यन्वयः, किं ज्ञापितं, तदाहुः **आकृष्ट एव प्राणो भगवताकृष्ट** इति, तया स्वदेहे प्राणस्थापनार्थं बहुधा स्वप्राणाकर्षणं कृतं बहुधा स्वबलेन यत्नः कृतस्तथापि भगवता तत्प्राणाकर्षणे कृते पूतनाकृतयत्नवैयर्थ्यं जातमिति रोदनेन ज्ञापितमितिभावः ॥ ११ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

"ननु यशोदा रोहिणीभ्याम्" अब कहते है कि यशोदा तथा रोहिणी ने पूतना को घर में प्रवेश करने पर क्यों नहीं रोका ? तब कहते हैं कि तां तीक्ष्णचित्तां बहुत तेज वाली उस पूतना को देखकर उसके तेज से दबी हुई दोनों माताएँ रोकने में असमर्थ हो गईं ! इसलिये देखती ही रह गईं और यशोदा रोहिणी को इतना मोह आसक्ति भी न थी, जो कि जननी प्रसव देने वाली में होना चाहिये, क्योंकि वे दोनों अजननी थी। अजननी पद का रहस्य यह हैं कि श्री यशोदा माता भगवान की लौकिक पुत्र के प्रसव देने वाली जननी जैसी जननी नहीं है लेकिन अलौकिक पुत्र भगवान् की जननी-माता है वैसे रोहिणी जी में भी अलौकिक वात्सल्य भाव था इस बात की स्पष्टता "सहज भाव" पद से बतायी है। तो अलौकिक भाव था; वह भगवान् की इच्छानुसार ही होता है। भगवान् की इच्छा थी की पूतना को कोई रोके नहीं, भले ही वह आवे, मैं इसका उद्धार करूँगा, इसलिये वे दोनों उसके तेज से दब गईं और कुछ न किया। 'ता' शब्द का भाव बताते हैं कि भगवान् जहाँ बिराजते हैं वहाँ माया अपने कार्य करने में असमर्थ होती है इससे माया के कारण जो पूतना के चित्त की क्रूरता आदि 'धर्म छिप गये वे अब भगवान् की इच्छा से प्रकट हो गये। 'अति तीक्ष्ण चित्ता' बहुत तेज चित्त वाली कह कर, उसके भीतर के दोष जताये और 'अति वाम चेष्टिता' कहकर उसके बाहर के दोष बताये जब इस प्रकार दोनों माताएँ ये दोष प्रत्यक्ष देख कर समझ गई थीं, तब उसको यदि स्वयं रोकने में असमर्थ थीं, तो अन्य गोपजनों को क्यों न कहा ? माता गोपों को कहतीं, तो वे उसको रोकते। ऐसा संदेह समाधान 'अन्तराकोशपरिच्छदासिवत्' पद से करते हैं 'अन्तरा' शब्द से यह बताया है कि वह घर के भीतर आ गई, जहाँ पुरुषों का आना योग्य नहीं। और 'कोशपरिच्छदासिवत्' पद से यह बताया है कि जैसे म्यान में छिपी तलवार अथवा कोश में छिपे हुए धन को बाहर का बेसमझ आदमी पहचान नहीं सकता है, वैसे ही इसके छिपे हुए दोष बहिर्मुख लोग समझ नहीं सकेंगे, इसलिये पुरुषों को कहना व्यर्थ है। विशेष में यह पूतना "वरस्त्री" सौन्दर्य मयी स्त्री थी तब माता (यशोदा और रोहिणी ने समझा कि यह रूपवती सब पुरुषों के वरण मोहित करने वाली है, इससे इसको कोई पुरुष मारेगा नहीं। इस कारण से भी गोपों को न बताया और न कहा। स्वयं मारने व भगाने में असमर्थ थीं, तो भी भगवान् के प्रेम के कारण प्रयत्न तो करना ही चाहिये था और इस प्रकार उदासीन होना अच्छा नहीं था तब कहते हैं कि वे दोनों स्वयं उसके तेज से दब गई थीं भगवान् ने ही उसमें इतना तेज किया था।

मनुष्यभाव राक्षसभाव के प्रभाव से दब जाता है इस कारण से उस राक्षसी की प्रभा से ये दोनों दब गईं। तथा श्लोक में दिए हुए 'च' का आशय है कि भगवान् की इच्छा ऐसी थी। इससे वे खड़ी-खड़ी देखती ही रहीं।

इस पर प्रकाशकार प्रकाश डालते हैं कि गोपों के न रोकने का कारण था कि पूतना अत्यन्त रूपवती बनकर आई थी। उसको देख कर, कामोत्पत्ति के कारण वे मोहित हो गये थे। गोपियों ने इसलिये न रोका कि उसके स्वरूप में उनको लक्ष्मीजी का भाव हुआ, इन दोनों माताओं में ये दोनों कारण न होने से उनमें मोह का अभाव था, किन्तु केवल भगवदिच्छा से ये दोनों उसके तेज से दब गई इसलिये वे रोक न सकी।

एवं प्रतिबन्धे यत्कृतवती—इस प्रकार पूतना को रोकने के लिये जब कोई प्रतिबन्धक न रहा तब पूतना ने भीतर सब धर्म धारण करने वाले उस बाल रूप भगवान् को अपना स्तन दूध पिलाने के लिये मुख में दिया। यदि भगवान् ने अपने धर्म भीतर न छिपाये होते तो पूतना भगवान् के मुख में स्तन दे न सकती, एक स्तन दिया।

स्तन देने में उसका कौनसा अर्थ था ? इसका उत्तर देते हैं कि उसके स्तन में दुर्जर पचने में कठिन वीर्य वाला उग्र भाव का स्तन्य था उस दूध को पीने से शरीर अस्वस्थ रहे। '**तस्यै स्तन**''—स्तन्य शब्द न कहकर स्तन शब्द इसलिये कहा कि दूध पिलाने का कार्य किसी को मालूम न हो। यह स्तन्य-पूतना का दूध ऐसे वीर्य वाला उग्र था, जो केवल परिणाम में ही हानि नहीं पहुंचाता किन्तु उल्बणं होनेके कारण अत्यन्त क्रूर भी है इसलिये लेने के समय में ही हानि करने वाला है। घोरा:- पूतना ने ऐसा अनर्थ का कार्य भगवान् के साथ क्यों किया ? तो कहा है कि वह 'घोरा' क्रूर भयानक थी। पूतना के मन में यह शंका आई कि कदाचित् कृष्ण स्वयं दूध न पीए तो इसलिये उसने लाड़ करने के लिये अपने उत्संग में ले, बांये हाथ से भगवान् को पिठ को पकड़ करडुलाती हिलाती और दाहिने हाथ से दूध निकालने के लिये स्तन को दबाती पूतना भगवान् के मुख में देने लगी ॥ ९½ ॥

अथ तस्याः क्रियासमाप्त्यनन्तरं – अब पूतना की भगवान को दूध पिलाने की क्रिया पूर्ण हो गई तब भगवान् दूसरे प्रकार से उसके दूध को पीने लगे इसका निरूपण 'गाढ' इस श्लोक में करते हैं—

पूतना आग्रहपूर्वक दूध पिलाने का प्रयत्न करने लगी। भगवान् ने सोचा कि इसको मारना आवश्यक है ऐसा न हो कि दूध पिलाये विना ही शायद भारा जाये, इसलिये दोनों करों से दृढ़तापूर्वक स्तन को पकड़ कर और दबा कर दूध पीने लगे। छोटे बालक के लिये ऐसा व्यवहार संगत नहीं लेकिन इस प्रकार निर्भय होकर स्तन पान में प्रवृत्त होना केवल भगवान के लिये संभवित है। ईश्वर होने से आपको स्त्री को मारने का दोष भी लगता नहीं है 'पुमान् स्त्री षंड' यह वाक्य ईश्वर होने से लागू नहीं। इससे भगवान् ने ऐश्वर्य धर्म दिखाया।

पूतना का दूध दुर्धर विष वाला और उल्बण पीते ही प्राण लेने वाला एवं अपच था, उसको भी पीकर, आपने अपना वीर्य धर्म प्रकट किया। अलौकिक चरित्र कर यशोधर्म प्रकट किया पूतना ने दूध पिलाकर भगवान् को जिस प्रकार मारना चाहा, उसी प्रकार भगवान ने भी, दूध पीते ही पूतना के प्राण ले लिये। प्रभु यदि दूसरे प्रकार से मारते तो शोभा नहीं होती इसलिये आपने इस चरित्र से, श्रीधर्म प्रकट किया। पूतना में छिपे हुए दोषों के ज्ञान से, उसको मारना हीं आवश्यक जाना, इससे अपना ज्ञानधर्म प्रकट किया। दैन्य पक्ष भी उसके (पूतना के) नाश करने में बाधक हुआ, इससे वैराग्य धर्म दिखलाया। इस प्रकार छः गुणों को प्रकट करने में छः हेतु दिखलाते हुए पूतना को मारा और धर्मी स्वरूप से उसको मोक्ष दान दिया। जो भगवान् को यदि पूतना के पापों के प्रायश्चित और मोक्ष दान लीला न करनी होती तो स्तन्य पान न करते। भगवान ने उसके पापों का सर्व प्रायश्चित्त कराने के लिये ही प्राणों के साथ दूध पिया।

पूतना ने अब तक बालवध बालहरण आदि जो कुछ किया वह सर्व अपने प्राणों की रक्षा के लिये किया, इसलिये उसके प्राण लेने से, पूतना का सब कुछ भगवान् को समर्पित हुआ। पूतना में हरण किये हुए बालकों के प्राण भी थे, इससे उनकी भी मुक्ति हो गई।

श्लोक में '**प्राणैः**' बहुवचन दिया है, उसका आशय है कि भगवान् ने न केवल प्राणों को पिया, किन्तु इन्द्रियों को भी, इस कारण से उसका जो कुछ था, सबका भगवान् ने अंगीकार किया।

"**अपहतपाप्मा**" पापरहित इसके समाधान के लिये भगवान् ने निन्दित पदार्थों को स्वीकार कैसे किया ? श्लोक में कहा कि 'रोषसमन्वितः'। भगवान् इस लीला के समय रोषसंयुक्त थे। जिससे उसके दुष्ट अंश का भगवान् से सम्बन्ध न हुआ अथवा वह दुष्ट भाग क्रोध स्पर्श से जल कर भस्म हो गया। भगवान् का तो सर्व सम्बन्ध है कोई वस्तु भगवान् के सम्बन्ध से रहित नहीं है। अतः भगवान् को क्रोध समन्वित होने का कोई दोष नहीं है। भगवान् में पहले रोष सम्बन्ध नहीं था, इसलिये श्लोक में '**प्राणैः समं रोषसमन्वितः**' अर्थात् प्राण पान के समय रोष वाले हुए ऐसा कहा है।

जैसे '**असंगोऽयं पुरुषः**' इस श्रुति में भगवान् को असंग कहा गया है तो भी भगवान् सर्वात्मक होने से सर्व के संग वाले है वैसे रोषयुक्त होने में कोई हानि नहीं है। पूतना को मारने के लिये भी रोष की अपेक्षा न थी, किन्तु लीला के कारण रोष का नाटक किया। क्योंकि आपने वीर्य गुण प्रकट किया था। अतः स्तन द्वारा प्राणपान करने में कोई विरोध नहीं।

श्लोक में '**कराभ्यां**' द्विवचन दिया है कि भगवान् ने पूतना के स्तन को दोनों हाथों से दबाया इसका आशय यह है कि, भगवान् ने पूतना की साधन रूप एवं फल रूप दोनों क्रियाओं का नाश किया ॥ १० ॥

"**अतो भगवता पेपीयमाने स्तने**" आचार्यचरण कहते हैं कि अगले श्लोक में भगवान् ने पूतना के स्तन पान के साथ, पूतना में स्थित माया रूप भगवान्, एवं उसके साथ आधिदैविक पूतना को भी अपने में प्रविष्ट कर लिया। अब इस श्लोक में आध्यात्मिक पूतना के कार्य का वर्णन करते हैं कि पूतना प्रथम से ही दुराग्रह से दूध पिलाती थी, परन्तु जब भगवान् से पीड़ित हुई, तब भी भगवान् के स्वरूप को पहचान न सकी। इससे तीन वचन मुञ्च मुञ्च अलम् छोड़दे, छोड़दे, अब बस

बोलने लगी। जैसे कोई लौकिक बालक माता का जोर से दूध पीता है तब स्तन में पीड़ा होने के कारण माता बालक को कहती है छोड़दे वह छोड़ता नहीं तो विशेष पीड़ा होने पर फिर भी कहती है कि भैया छोड़दे पर वह छोड़ता नहीं तब माता बच्चे को तृप्त समझ कहती है कि अरे अब बस कर भैया। बालक स्वयं नहीं समझता कि मेरा पेट भर गया है किन्तु माता का कहना मानता है। अब पूतना के भीतर रहा हुआ दुष्ट भाव नष्ट हुआ तब पूतना ने लौकिक प्रकार की भाषा से मुंच मुंच अलं छोड़दे-छोड़दे बस कहा एवं इसलिये भी कहा कि माताओं को भी ज्ञात हो जाय। यदि कोई संदेह करे कि बृहदारण्यकादि उपनिषदों में कहा है कि वाणी आदि इन्द्रियां में बोलने आदि व्यवहार का सामर्थ्य प्राणों से ही प्राप्त होता है, पूतना प्राण जाने पर भी बोलती थी, यह क्यों ? तब समाधान करते हैं कि आधिदैविक प्राण, भगवान् में स्थित थे, और भगवान का स्पर्श पूतना से था, इस स्पर्श के कारण ही पूतना बोलना आदि क्रिया कर सकती थी इसलिये श्लोक में कहा है कि **'प्रभाषिणी'** बोलने वाली थी। **'भगवान् कराभ्यां प्रपीड्य'** भगवान् के दोनों हाथों से दबाने से कुछ भी पीड़ा न होनी चाहिए क्योंकि यह भगवान् बालक है तो ऐसा न समझे इसलिये कहा है कि **'अखिलजीवमर्मणि निष्पीड्यमाना'** पूतना प्रत्येक मर्म स्थान में पीड़ित थी, क्योंकि पूतना ने जिन बालकों के प्राण हरण किये थे, वे प्राण, पूतना के मर्म में रहे हुए थे। भगवान् को उन सब बालकों के प्राण अपने में प्रविष्ट करने थे इसलिये सर्व मर्म स्थानों का मर्दन होने से, सर्व मर्म स्थानों में पीड़ा हुई। यहाँ पर अखिल शब्द, जीव शब्द का विशेषण है।

बालकों से द्रोह करने की आज्ञा पूतना को कंस ने दी थी परन्तु इसमें मूलकारण भगवान् ही हैं, इसलिये बालकों को अपने में प्रवेश कराना आवश्यक था। बालकों को अपने में रख कर उनको मृत्स्ना भक्षण आदि बाललीला रस का अनुभव कराने के लिये ही प्रभुने अपने मुख द्वारा उनको मिट्टी खिलाई। इसलिये अपनी माता को कहा कि **'नाहं भक्षितवानम्ब'** यह आपका कहना सत्य हुआ। इस प्रकार पूतना से मारे हुए भक्त बालक, पूतना के हृदय में थे, इसलिये ही पूतना का वक्षःस्थल भगवान् के क्रीड़ास्थल योग्य बना। इन ही बालकों का व्रतचर्य्या के प्रसंग में **'वयस्यैः'** पद से वर्णन करेंगे। तब अत्यन्त पीड़ित होने से कुछ बोल न सकी। आंखे फाड़कर, हाथ पैर उलटे-सुलटे, जहाँ-तहाँ फैलाकर, पसीने से भींगे हुए शरीर वाली रोने लगी। जोर से रोने का शब्द करने लगी। श्लोकस्थ 'ह' अव्यय से भगवान् का माहात्म्य बताया है, जैसे कि छोटे बालक के खेल से उसके भीतर कठोर पीड़ा होना असम्भव है, परन्तु यह भगवान् का पराक्रम एवं माहात्म्य है। आकर्षण शक्ति वाले, वायु में प्रवेश कर ही भगवान् ने यह लीला की, इससे वीर्य दिखलाया। नेत्र सात्विक थे, हाथ पैर राजस थे और शरीर तामस था यों तीन गुणों से दी हुई पीड़ा का निरूपण किया है। रजोगुण दोनों दो स्थानों से गुणों के बीच में आने के कारण दोनों से मिला हुआ है इससे उसका हाथ पैर सम्बन्ध बताया है। निकलने के समय प्राणों की कठोर ध्वनि हुई उससे आकृष्ट ही प्राण भगवान् ने खींच लिये यह जताया ॥ ११ ॥

श्रीमदाचार्यचरण कहते हैं कि शुकाचार्यजी **"तस्याः स्वनेन"** इस श्लोक से **भगवतो माहात्म्यं शृङ्ग्राहिकया प्रदर्शयिष्यन्**—सींग के समान ग्रहण कराने वाली ध्वनि से, भगवान् का माहात्म्य दिखाते हुए, भगवान् द्वारा खींचे हुए पूतना के प्राणों से उठे हुए शब्दों का माहात्म्य, वर्णन करते हैं।

अमूर्त शब्द, जब मूर्त के समान कार्य करे, तब वह अलौकिक शब्द होता है चरण आदि के चोट से ही कम्पन होता है, वह कम्पन, यहाँ, शब्द से हुआ बताने के लिये, श्लोक में पर्वतों सहित पृथ्वी और ग्रहों सहित आकाश में, कम्पन होने का वर्णन किया है। किसी का कहना है कि पर्वत आदिकों के अधिष्ठाता देवों के भयभीत होने के कारण इन्हों में कम्पन हुआ है। ब्रह्माण्ड विग्रह पुरुष को भी, इस शब्द से कम्पन हुआ, इससे यह बताया कि धर्मी पुरुषोत्तम का वीर्य, अंशावतारों के वीर्य से विशेष है। एक ही समय में सब ठिकाने, कम्प का कारण बताने के लिये ही कहा कि पूतना का शब्द अति गंभीर वेग वाला था। ऐसा होने के कारण, उसमें इतनी शक्ति थी, जो अति गंभीर होने से पृथ्वी पर्वत आदि निम्न भाग के टुकड़े करने में समर्थ था एवं वेग वाले होने से आकाश तारागण आदि उपर के प्रदेश को डुबाने में समर्थ था। श्लोकस्थ 'च' अव्यय से इसके ऊपर के लोक में भी कम्पादि हुआ। पर्वत बड़े और स्थिर होने से, उनमें कम्प कैसे हुआ होगा। इसलिये श्लोक में पृथ्वी सहित पर्वतों में कम्प हुआ कहा है। इसी प्रकार ग्रहों का चक्र ध्रुव में स्थित होने से, उनमें भी कम्प कैसे हुआ होगा। इसलिये कहा कि, ग्रहों सहित आकाश चलायमान हुआ। पर्वतों सहित पृथ्वी, ग्रहों सहित आकाश चलायमान क्यों हुआ उनका प्रमाण देकर स्पष्टीकरण करते हैं कि दोनों ने वर प्राप्त किये हैं जैसा कि **'नक्षत्रविहिताऽहं चित्रविहिताऽहं'** तैत्तरीय. सं. अ. २ प्रपा. ५ अनु. २ इस श्रुति में कहा है कि आकाश ने यह वर प्राप्त किया है, कि मैं सदैव तारागणों से समृद्ध रहूं और पृथ्वी ने भी वर लिया है कि मैं सदैव अनेक प्रकार के पदार्थों से सुसमृद्ध रहूँ। इस कारण इनका कम्प साथ में ही हुआ लिखा है। पाताल और दिशाओं का सम्बन्ध न होने से और दूर होने से उनमें कम्प तो हुवा होगा ? इसके उत्तर में कहते हैं कि श्लोक में पाताल और दिशाओं का 'च' देकर भिन्नता बता कर, वह जताया है कि उनमें भिन्न कम्प हुआ एवं दूर होने के कारण उनमें

कम्प शब्द की प्रतिध्वनि से हुआ। सबमें कम्प हुआ कोई शेष नहीं रहा। शेष मनुष्यों के लिये कहा कि वे पृथ्वी पर गिर पड़े। यहाँ शङ्का करते हैं कि दूसरों में कम्प तो देवता भय से वा पुरुष भय से हुआ, किन्तु विवेक और धैर्य वाले मनुष्य पृथ्वी पर क्यों गिरे ? इस शङ्का के उत्तर में श्लोक में कहा है कि मनुष्य इसलिये गिरे, कि उनको वज्र के गिरने का भय हुआ, उस भय से मनुष्य गिरे। भय के विचार से भी पात हुआ क्योंकि वे ऊँचे स्थित थे, उन्होंने विचारा कि वज्र गिरेगा तो उसका तेज हम सहन न कर सकेंगे तो हमारी मृत्यु होगी, इससे भी वे गिरे ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'यशोदारोहिण्यौ तां कथं न न्यवारयेताम्, तत्राह—तामिति। तीक्ष्णं क्रूरं चित्तं यस्यास्ताम्, अतिशयेन वामं मनोहरं चेष्टितं यस्यास्ताम्, वरस्त्रियं सहसैव अन्तरा गृहमध्ये वीक्ष्य तस्याः प्रभावाद्भगवदिच्छया च धर्षिते अभिभूते मोहिते सत्यौ जननीजनन्यौ निरीक्षमाणे एव व्यतिष्ठताम्, नतु निवारितवत्यावित्यन्वयः। अन्तरतैक्ष्ण्ये बहिर्मार्दवे दृष्टान्तमाह—कोशापरिच्छदासिवदिति। मृदुचित्रचर्ममयः कोशः परिच्छदः आवरणं यस्य असेः खड्गस्य तद्वदित्यर्थः ॥ ९ ॥ एवं सर्वथा प्रतिबन्धाभावे सति यत् कृतवती तदाह—तस्मिन्निति। सा घोराऽतिक्रूरस्वभावा तमङ्कमादाय तस्मिन् शिशोर्मुखे इति शेषः। दुर्जरं वीर्यं यस्य, तथाभूतं विषं यस्मिंस्तम्। अत एव उल्बलं प्राणहरत्वेन भयङ्करं स्तनं ददौ ॥ अथानन्तरमेव रोषसमन्वितो भगवान् गाढं दृढं यथा भवति तथा कराभ्यां तत्तस्याः स्तनं प्रपीड्य अप्रसूतायास्तस्मिन् स्तन्याभावात् केवलं विषमपथ्यं मत्वा प्राणैः समं सह अपिबत् ॥ १० ॥ बालरूपेणापि भगवता तथाग्रहणेन स्तनपानेन तस्या महती पीडा जाता तामाह—सेति। सा पूतना भगवतो ग्रहणेन स्तनपानेन चाखिलं यज्जीवस्य मर्म, यस्मिन् किञ्चिदपि प्रहारमात्रेण जीवो देहं त्यजति, तस्मिन्निष्पीड्यमाना अत एव 'मुञ्च मुञ्च, अलम्' इति प्रभाषिणी, नेत्रे विवृत्य चरणौ भुजौ च मुहुः पुनः पुनः क्षिपती चालयन्ती, निःस्विन्नानि स्वेदयुक्तानि गात्राणि यस्यास्तथाभूता च सती रुरोद आर्तनादं चकार। 'ह' इत्याश्चर्ये। 'बालग्रहणमात्रेणापि तस्या एवं पीडा जाता' इत्याश्चर्यम् ॥ ११ ॥ एवं प्रभावाऽपि सा भगवता स्तनद्वारा प्राणाकर्षणमात्रेण मारितेति भगवन्माहात्म्यं प्रदर्शयिष्यन् तदाकृष्यमाणप्राणकृतशब्दमाहात्म्यमाह—तस्या इति। तस्याः पूतनायाः अतिगभीररंहसा महावेगवता स्वनेन साद्रिः पर्वतसहिता मही, सग्रहा आदित्यादिग्रहसहिता द्यौश्च चचाल। रसातलानि अधोलोका दिशश्च प्रतिनेदिरे। वज्रनिपातशङ्कया भयेन जनाश्च क्षितौ निपेतुरित्यन्वयः ॥ १२ ॥

अन्वितार्थप्रकाशिका

तामिति ॥ तीक्ष्णं क्रूरं चित्तं यस्यास्तामतिशयेन वामं जनन्या इव मनोहरं चेष्टितं यस्यास्ताम्। अयं चित्सुखसम्मतः पाठः। वल्गुचेष्टितामिति वा पाठः। वरस्त्रियं सहसैव कोशपरिच्छदासिवदिति मृदुचित्रचर्ममयः कोशः परिच्छदः आवरणं यस्य स चासौ असिः खड्गः तद्वत् इति अन्तस्तैक्ष्ण्ये बहिर्मार्दवे दृष्टान्तः। अन्तरा गृहमध्ये एव वीक्ष्य तस्याः प्रभया धर्षिते अभिभूते मत्पुत्रस्याभ्युदयाय स्वयमिंद्राणीसम्पत्तिर्वा वात्सल्येन स्तनं पाययतीति मोहिते सत्यौ जननी जनन्यौ निरीक्षमाणे हि एव अतिष्ठताम् नतु निवारितवत्यौ। जननी इति पूर्वसवर्णदीर्घ आर्षः ॥ ९ ॥ तस्मिन्निति ॥ सा घोराऽतिक्रूरस्वभावा श्रीकृष्णमङ्कमादाय तस्मिन् स्थाने शिशोर्मुखे इति शेषः। दुर्जरं विषरूपं वीर्यं यस्य तथाभूतम् अत एव उल्बणं प्राणहरत्वेन भयंकरं स्तनं ददौ। अथानन्तरमेव मदीयव्रजबालकानियं जिघांसतीति रोषसमन्वितो भगवान्गाढं दृढं तया त्याजयितुमशक्यं यथा भवति तथा कराभ्यां तत् तं तस्याः स्तनं प्रपीड्य अप्रसूतायास्तस्यास्तस्मिन् स्तन्याभावात् केवलं विषमपथ्यं मत्वा प्राणैः समं सह अपिबत्। अत्र रोषमयी दुष्टसंहारिका शक्तिरेव तस्याः अपवित्रान् प्राणानशोषयत्। न तु सः कुठारसमन्वितो वृक्षमच्छिनदितिवत् ॥ १० ॥ सा मुञ्च मुञ्चेति ॥ सा पूतना भगवतो ग्रहणेन स्तनपानेन चाखिलं यज्जीवस्य मर्म यस्मिन् किंचिदपि किंचिदपि प्रहारमात्रेण जीवो देहं त्यजति। तस्मिन्निष्पीड्यमाना अतएव मुञ्च मुञ्चालमिति प्रभाषिणी नेत्रे विवृत्य चरणौ भुजौ च मुहुः पुनः पुनः क्षिपती चालयन्ती निःस्विन्नानि स्वेदयुक्तानि गात्राणि यस्यास्तथाभूता च सती रुरोद आर्तनादं चकार ॥ ११ ॥ तस्या इति ॥ तस्याः पूतनायाः अतिगभीररंहसा महावेगवता स्वनेन साद्रिः पर्वतसहिता मही सग्रहा आदित्यादिग्रहसहिता द्यौश्च चचाल। रसाः रसातलानि अधोलोकाश्च लुः प्रतिनेदिरे च दिशश्च प्रतिनेदिरे एव। कर्मव्यतिहारे तङ् आर्षो वा। वज्रनिपातशङ्कया भयेन जनाश्च क्षितौ पेतुः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नन्वंकारोपणसमये यशोदारोहिण्यां न ग्राह्योयमिति कथं नोक्तं तत्राहतामिति अथ अनंतरं मृदुः चित्रितचर्ममयः कोश एव परिच्छदः आवरको यस्य सः असिः खड्गस्तद्वत् आभ्यंतरे तीक्ष्णचित्तां क्रूरमानसीं उपरि वामं सुन्दरं मातुरिव चेष्टितं यस्यां ताम् अंतरा गृहमध्ये वीक्ष्य तूभयाधर्षिते पराभूते जननीजनन्यौ पुंस्त्वमत्र छांदसम् निरीक्ष्यमाणे सत्यावेवातिष्ठतां न तु निवारितवंत्यौ ॥ ९ ॥ तस्मिन्निति। घोरा क्रूरा पूतना तस्मिन् स्थाने हरिमंकमादाय दुर्जरं वीर्यं विषरूपं यस्मिन् तं उल्बणं

भयानकं स्तनं तस्मै ददौ । अथ अनंतरं भगवान् कराभ्यां गाढं यथातथाऽत्यंतं प्रपीड्य तस्याः प्राणैः समं स्तनमपिबत् ॥ १० ॥ सेति ॥ अखिलः समग्रश्चासौ जीवश्च तस्य स्तनरूपे मर्मणि मर्मस्थाने निष्पीड्यमाना मुंच मुंच अलं जातमिति प्रतिभाषिणी निःखिन्नगात्रा स्वेदयुक्तांगा सा नेत्रे विवृत्य उद्घाट्य चरणौ भुजौ च मुहुर्मुहुः क्षिपति सती रुरोद ॥ ११ ॥ अतिगभीरः अतिदीर्घो रंहो वेगो यस्य तेन साद्रिः सपर्वता सग्रहा सतारका द्यौः स्वर्गश्च रसाः अधोलोकाः प्रतिनेदिरे क्षितौ भूम्याम् ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अज्ञातमिति ॥ निशाचरी पूतना, अन्तकमात्मनो मृत्युभूतं, अज्ञाय अज्ञात्वा, अनन्तं त्रिविधपरिच्छेदरहितं, अज्ञातविदितस्वरूपं, निसर्गेण स्वभावत एव विज्ञातं जगतो विचेष्टितं येन तं, हरिं दुष्कृतप्राणहरं भगवन्तं, अबुद्धिर्मूढोऽत एव रज्जुरिति धीर्यस्य तथाभूतो जनः, सुप्तं उरगं यथा, प्रसुप्तं सर्पमिवेत्यर्थः । अङ्कं, आरोपयत् ॥ ९ ॥ ननु यशोदारोहिण्यौ तां कथं न न्यवारयेतां तत्राह ॥ तामिति ॥ कोशः मृदुचर्मनिर्मितं पिधानं परिच्छदो भूषणवच्छोभाकरो यस्य स चासावसिस्तेन तुल्यं तद्वत् । अन्तराऽभ्यन्तरप्रदेशे, तीक्ष्णचित्तां, बहिः अतिवामान्यतिशोभमानानि चेष्टितानि यस्याः सा तां, वरस्त्रियं श्रेष्ठां स्त्रियमिव स्थितां च, तां पूतनां वीक्ष्य, गृहान्तःप्रविष्टां दृष्ट्वा, तत्प्रभया, धर्षिते अभिभूते, जननी जनन्यौ, निरीक्षमाणे सत्यौ, इव, अतिष्ठताम् । न तु निवारितवन्त्यौ । पूर्वसवर्णदीर्घ आर्षः ॥ १० ॥ तस्मिन्निति ॥ अथ, तस्मिन् समये, घोरा घोरचेष्टिता पूतना, आदाय, शिशुमिति शेषः । अङ्कं स्वोत्सङ्गं नीत्वा, शिशोः आस्ये इति शेषः । दुर्जरं दुःखेनापि जरयितुमशक्यं वीर्यं विषरूपं यस्मिंस्तथाभूतं, अत एव उल्बणं दुःसहक्रौर्योपेतं स्तनं, ददौ । भगवान्, कराभ्यां, तमिति शेषः । गाढं यथा तथा, प्रपीड्य, रोषसमन्वितः क्रोधयुक्तः सन्, तत्प्राणैस्तस्या असुभिः, समं साकं, अपिबत् ॥ ११ ॥ सेति ॥ तदा अखिलजीवमर्मसु सर्वप्राणमर्मसु, निष्पीड्यमाना, सा पूतना, अलमेतावता पूर्णम् । मुञ्च मुञ्च इति, प्रभाषिणी सती, नेत्रे विवृत्य परिभ्राम्य, चरणौ भुजौ च, मुहुः क्षिपती, निःस्विन्नगात्राऽतिप्रस्वेदयुक्तशरीरा सती च, ह अतिस्फुटं यथा तथा, रुराव जघोष । रुरोदेत्यपि पाठः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तां तीक्ष्णेति : १०.६.९.

गोपैर्न तद् युवतिभिर्न च वा जनन्या त्वत्सन्निधौ बत बकी समुपागताऽपि ।
प्रोत्सारितेत्यनुभवन्नपि मां ब्रवीषि त्वत्सङ्कटं हरतु ते कथमाप्तवर्गः ॥ ३१ ॥

तस्मिन् स्तनमिति : १०.६.१०.

कलशपयोधर–निर्गतमधायि बाह्यं हरेण विषमखिलम् । अन्तर्गतमहमधुना पिबेयमित्याशयात् पपौ तत्किम् ॥ ३२ ॥
तार्क्ष्यशेषपरिचारकृतो मे केयमल्पगरलाशनभीतिः । चिन्तयन्निति पपौ तदशङ्कं श्रीधरः स हि विषाशनवन्द्यः ॥ ३३ ॥
विषसम्भृत एव वारिदः सुषमामावहतीति केशवः । रुचिमस्य लषन् स्वयं तदा किमु जग्राह विषं पयोधिजम् ॥ ३४ ॥

श्रीधरस्त्वेक एवाहमिममर्थं समर्थयन् । स्वीचकार श्रियं श्रीशस्तदा तत्र पयोधिजाम् ॥ ३५ ॥
विषाकर्षस्तथाकार्यो नशिष्टं स्यादितो मनाक् । इति स्वकरसम्मर्दपूर्वमेवापिबत् प्रभुः ॥ ३६ ॥

यावज्जगज्जीवनहेतुभूतोऽप्येष स्तनः सम्प्रति दुष्टसङ्गात् । काकोलदानोद्यत इत्यवेक्ष्य युक्तं कराभ्यामदयं ममर्द ॥ ३७ ॥
सविषां तां समालक्ष्य सरोषोऽसाविति क्षमम् । यत्सुरोचितता तस्य तद्रूपे च विकारिता ॥ ३८ ॥

जलनिधिविषपानं कुर्वतः पार्वतीशा दतिशयितमशेषान् दर्शयन् स्वीयमोजः ।
यदुपतिरतितोषात् तद्विषं प्राश्य तस्यै जडतरगतयेऽदात् स्वामृतं तत्क्षणे किम् ॥ ३९ ॥
यस्मादुल्बणवीर्यवगरमलं निर्वीर्यमेतद् हृदि कृत्वा भूरि निरामयस्थितितया तिष्ठन्त्यशेषासवः ।
तस्मात्साधनमेतदेव यदि मे काकोलवीर्यच्छिदः संप्राह्या: प्रकृते मयेति सह तत्प्राणैः पपौ तद्विषम् ॥ ४० ॥
प्राणैः समं रोषसमन्वितोऽपिबत् स्तनं तदीयं प्रभुरेतदुक्तौ । रोषोऽखिलासूनपिबत्स्वयं पयो भात्यर्थ ईदृग् विबुधैर्विलोक्यः ॥ ४१ ॥

स्यात्काकोलमपि स्तनेऽमृतमयं मातृस्वभावादिति प्रेक्ष्याधाव्य विशङ्कमेव हि मया तत्पुत्रभावात्मना ।
मातृघ्नत्वमितो न युक्तमिति सञ्चिन्त्याच्युतोऽभूत्तदा सक्रोधः स हि तद्गतासुहृतये विज्ञातरुड्विक्रमः ॥ ४२ ॥
विषमितं किल यद्हृदयं भुनक्तयनुपदं त्वनुरूपमसौ फलम् । अभवदेव बकीचरिते स्फुटं तदुभयोरपि तत्र निदर्शनम् ॥ ४३ ॥

दुर्वर्त्मगोऽस्तु यदि वा विषमस्वभावो मां चेद्धिया हृदि दधाति यया कयापि ।
तं मोचयामि भवबन्धनतस्तदैवेत्येतत् स्फुटीकृतमिहेश्वर [पूतनायाम् ॥ ४४ ॥
कश्चित्प्राणापहारावधि दुरपकृतिं दुर्जनः सञ्चिकीर्षुः प्राप्तश्च द्यमुष्मिन्नुपकृतिनिरतेनैव भाव्यज्जनेन ।
श्रीखण्डेनेवसाधूनिति किल भवता हृत्स्थितं ज्ञापयित्रा पापिन्यां पूतनायामुपकृतमपरं नैव बीजं प्रतीमः ॥ ४५ ॥

कृष्णप्रिया

म्यान में छिपी हुई तलवार के समान खूब तीक्ष्ण-निर्दय चित्तवाली और बुरे काम करने वाली घर में आई हुई उत्तम रूप वाली उस पूतना की कान्ति से दबी हुई दोनों माताएँ केवल उसको देखती ही रहीं ॥ ९ ॥ अब पूतना भीतर आई और उस दुष्टा ने बालक को गोदी में लेकर, दुर्धर जहर से भरा हुआ गाढ कठोर स्तन उस बाल मुकुन्द के मुख में दिया ॥९½॥ जब पूतना ने इस प्रकार स्तन भगवान के मुख में दिया तब भगवान् रोष सहित दोनों हाथों से स्तन को जोर से दबाते हुए, प्राणों के साथ स्तन्य पीने लगे ॥ १० ॥ अपने प्रत्येक मर्म स्थान में पीड़ित हुई पूतना बाबा 'छोड़दे छोड़दे अब बस' ऐसा कहती हुई आँखें फाड़ कर, बार बार हाथ पैर पछाड़ती पसीने से भरे अङ्ग वाली जोर से रोने लगी ॥ ११ ॥ उस पूतना के अत्यंत गंभीर वेग वाले शब्द से पर्वतों सहित पृथ्वी और ग्रहों सहित आकाश चलित हुआ । रसातल एवं दिशाओं में प्रतिध्वनि उठने लगी वज्रपात होने की शंका से मनुष्य पृथ्वी पर गिर गये ॥ १२ ॥

निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि ।
प्रसार्य गोष्ठे निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप ॥ १३ ॥
पतमानोऽपि तद्देहस्त्रिगव्यूत्यन्तरद्रुमान् । चूर्णयामास राजेन्द्र महदासीत् तदद्भुतम् ॥ १४ ॥
ईषामात्रोग्रदंष्ट्रास्यं गिरिकन्दरनासिकम् । गण्डशैलस्तनं रौद्रं प्रकीर्णारुणमूर्धजम् ॥ १५ ॥
अन्धकूपगभीराक्षं पुलिनारोहभीषणम् । बद्धसेतुभुजोर्वङ्घ्रि शून्यतोयह्रदोदरम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—नृप इत्थं व्यथितस्तना निशाचरी व्यसुः निजरूपम् आस्थिता गोष्ठे केशान् चरणौ अपि भुजौ प्रसार्य वज्राहतः वृत्र इव अपतत् ॥१३॥ राजेन्द्र ! पतमानः अपि तद् देहः त्रिगव्यूति अन्तरद्रुमान् चूर्णयामास तद् महद् अद्भुतम् आसीत् ॥१४॥ इषामात्रप्रदंष्ट्रआस्यं गिरिकन्दरनासिकं गण्डशैलस्तनं रौद्रं प्रकार्णरुणमूधजम् ॥ १५ ॥ अन्धकूपगभीराक्षं पुलिनारोहभीषणं बद्धसेतुभुजोर्वङ्घ्रि शून्यतोयह्रदोदरम ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्यादाय मुखं विवृत्य केशादीन्प्रसार्य । निजरूपमास्थिता । मरणसमये कपटमयुक्तमिति भावः । वृत्रो वज्राहत इव ॥ १३ ॥ पतन्नपि तस्या देहः षट्क्रोशमध्यवर्तिनो द्रुमांश्चूर्णीचकार ॥ १४ ॥ ईषामात्रोग्रदंष्ट्रास्यं ईषा लांगलदंडस्तत्प्रमाणोग्रा दंष्ट्रा यस्मिंस्तत्तथाभूतमास्यं यस्मिंस्तत्तस्याः कलेवरं वीक्ष्य गोपा गोप्यश्च संतत्रसुः । संत्रासहेतुत्वेन पुनरष्टभिः पदैर्विशिनष्टि । गिरिकंदरवन्नासिके यस्मिंस्तत् । गिरेश्च्युतौ स्थूलोपलौ गण्डशैलौ ताविव स्तनौ यस्मिंस्तत् । रौद्रं घोरम् । प्रकीर्णा अरुणा मूर्द्धजा यस्मिंस्तत् ॥ १५ ॥ अंधकूपाविव गभीरे अक्षिणी यस्मिंस्तत् । पुलिनवदारोहौ जघने ताभ्यां भीषणम् । बद्धाः सेतव इव भुजौ ऊरू अंघ्री च यस्मिंस्तत् । शून्यतोयह्रद इवोदरं यस्मिंस्तत् ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

निजरूपमुलूकिकारूपम् । गोष्ठे लक्षणया तत्समीपदेशे गोदोहार्थावरोधनस्थले न तु जनवासे च न तु द्रुमाणामेव चूर्णितत्वेनोक्तत्वात् । चरणयोः पक्षात्मकभुजयोश्च विक्षेपणोत्पातात् "सा खेचर्येकदोपेत्य" इति पूर्वोक्तेः एतादृशकथोद्बोधनेन त्वं नृपासीति संबुद्ध्यभिप्रायः । निजरूपाश्रयणं तु मृत्युपीडितायास्तस्या मायाया नष्टत्वात्तद्रूपस्य च 'योषित्वा माययात्मानम्' इत्युक्तेर्मायिकत्वात्कारणाभावे कार्यं स्वयमेव नश्यतीति भावः । व्यसुः सत्यपतत् ॥ १३ ॥ पतमानः पीडावैयग्र्यवशादन्तः पुरात्तस्मादुत्प्लुत्य ग्राममप्युल्लंघ्य तद्बहिःप्रदेशेऽपतन्नित्यर्थः । अपिकारेण न केवलं जीवंत्येव सा जीवान् जघानापि तु मृतापीति भावः । षट्क्रोशमध्यवर्त्तिनो द्रुमान् । तावतां द्रुमाणां चूर्णनं द्रुममात्रचूर्णनं ग्रामोल्लंघनं च भगवल्लीलाशक्तेरेव महिमेत्यवगमयितुं स्तौति—हे राजेंद्रेति । हे भक्तिराजमानमुख्येत्यभिप्रायः । द्रुमाश्च ते कंसारामस्थास्तद्भोग्यफला एवेति विश्वनाथः । गव्यूतिः स्त्री क्रोशयुगम्' इत्यमरः ॥ १४ ॥ ईषा लांगलदंडो रथावयवोपि । "गंडशैलास्तु च्युताः स्थूलोपला गिरेः" इत्यमरः ॥ १५ ॥ गभीरे निम्ने 'निम्नं गभीरं गंभीरम्' इत्यमरः । शून्यं तोयं यत्र स चासौ ह्रदश्च ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निजरूपम् उलूकीस्वरूपं गोष्ठे लक्षणया गोष्ठसमीपदेशे गोदोहार्थावरोधनस्थाने न तु जनवासे द्रुमाणामेव चूर्णितत्वेन कथ्यमानत्वात् चरणयोः पक्षात्मकभुजयोश्च विक्षेपेणोत्पतनात् सा खेचर्येकदोत्पत्येति पूर्वदर्शितत्वाच्च हे नृप ! एतादृशकथोद्-

बोधनेन नृन् पासीति भावः ॥ १३ ॥ तत्रान्यदाश्चर्यमाह—पतेति। न केवलं जीवन्नेव जीवान् जघान म्रियमाणोऽप्यतितरामित्यपि शब्दार्थः तदेव षट्क्रोशीद्रुमचूर्णित्वं तत्रापि तन्मात्रचूर्णित्वं च यत्तदद्भुतं महदेवासीत् स एव च तस्याः श्रीभगवल्लीलाशक्तेरेव महिमा इत्यवगमयितुं स्तौति, राजेन्द्रेति ॥ १४ ॥ इषेति त्रिकम्। रौद्रत्वमेव दर्शयति—ईषेत्याद्यष्टविशेषणैः। तथा च भीषणमिति पुनरुक्तिर्जघनयोरतिभयङ्करत्वाभिप्रायेण तस्या निष्ठुरतरनादेन अधुना च तद्बालहरणमजानन्तो गोपा गोप्यश्च तादृग्देहदर्शनेन सम्यक् त्रस्ता बभूवुरित्यर्थः। स्म प्रसिद्धौ एतद्व्यक्तमेवेत्यर्थः ॥ १५-१६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

व्यथितस्तनेति व्यसुत्वे स्तनव्यथाया एव मुख्यहेतुत्वात्; यद्वा, व्यथितः सत्यथो व्यथितस्येव स्वनो नादो यस्याः सा, वृत्र इवेति शरीरस्य बृहत्तरत्वात्, अन्ते सद्गतिप्राप्तेश्च। हे नृपेति प्रहर्षात्; यथा भवादृक् दुष्टेभ्यो नॄन् पाति तथा श्रीकृष्णोऽपि पूतना–देहाद्व्रजवासिनो रक्षिता इति भावः ॥१३॥ तदेवाह—पतमान इति। पूर्वं जीवेन प्राणिनो मारयामास, अधुना मरणेऽपि बहून् जीवान् जघानेत्यपिशब्दार्थः यद्वा, पतन्नपीति परमार्त्ततया, किं वा, तद्देहोऽपीति बृहत्तरतया सर्व्वमारकता सम्भाविता; तथापि षट्क्रोशीमध्यवर्त्तिनो द्रुमानेव चूर्णयामास, न त्वन्यानत एव परमविस्मयेन सम्बोधयति राजेन्द्रेति, राजेन्द्रत्वात्तवैवात्र विश्वासः, न त्वन्यस्यादिति भावः ॥ १४ ॥ रौद्रत्वमेव दर्शयति–ईषेत्यद्यष्टविशेषणैः। तत्र च भीषणमिति पुनरुक्तिर्जघनयोरतिभयंकरत्वाभिप्रायेण; पूर्वं तस्या निष्ठुरतरनादेनाधुना च तादृग्देहदर्शनेन दैत्यज्ञानतः श्रीकृष्णार्थं स्नेहभरेण सम्यक् त्रस्ता बभूवुरित्यर्थः। स्म प्रसिद्धौ—एतद्व्यक्तमेवेत्यर्थः ॥ १८–१७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

गव्यूतिः क्रोशद्वयं त्रिगव्यूत्यन्तरं सार्द्धयोजनावकाशम् ॥ १४ ॥ ईषा युगाग्रयष्टिः गण्डशैलः पर्वताद् गलितस्थूलपाषाणः ॥ १५–२१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

व्यथितौ पीडितौ स्तनौ यस्याः सा निशाचरी व्यादाय मुखं विवृत्य केशादीन् प्रसार्य गोष्ठे व्रजे निजरूपमास्थितामरणस्य स्वासाधारणरूपगतत्वादिति भावः। हे नृप ! वज्रेण हतो वृत्रासुर इवापतत् ॥ १३ ॥ तस्या देहः पतमानोऽपि षट्क्रोशवर्त्तिनो द्रुमांश्चूर्णीचकार हे राजेन्द्र ! तच्छरीरं महदद्भुतमासीत् ॥ १४ ॥ अद्भुतत्वमेव दर्शयितुं तद्रूपं विशिषन् तद्वीक्ष्य गोपा गोप्यश्च अबिभयुरित्याह—ईषेति त्रिभिः। ईषा लाङ्गलदण्डः तत्प्रमाणोग्रा दंष्ट्रा यस्मिंस्तदास्यं यस्मिन् गिरिकन्दरे इव नासिके यस्मिन् गण्डशैलवदुन्नतौ पृथू च स्तनौ यस्मिन्रौद्रं भीमं प्रकीर्णा अरुणाश्च मूर्द्धजाः केशा यस्मिन् ॥ १५ ॥ अन्धकूपाविव गभीरेऽक्षिणी यस्मिन् पुलिनवदारोहो जघने ताभ्यां भीषणं बद्धाः सेतव इव भुजावूरू अङ्घ्री च यस्मिन् शून्यं तोयं यस्मिंस्तथाभूतो ह्रद इव उदरं यस्मिन् ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

व्यसुः विगतप्राणाः ॥ १३ ॥ त्रिगव्यूत्यन्तरे षट्क्रोशमध्ये ये द्रुमाः वृक्षाः तान् "गव्यूतिः स्यात् क्रोशयुगम्" इत्यमरः ॥ १४ ॥ ईषा रथदारुविशेषः कन्दरो गुहा रोगविशेषव्यावृत्त्यर्थं गिरीति विशेषणं गण्डशैल स्थूलपाषाणः ॥ १५ ॥ आरोहो नितम्बः बद्धसेतुवत् स्थिरा भुजोर्वङ्घ्रयो यस्य तत्तथा भुजौ उरू च अङ्घ्री च भुजोर्वङ्घ्रयः शून्यं तोयं यस्मिन् शून्यतोयः स ह्रद इव उदरं यस्य तत्तथा ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वस्तुतस्तु भगवान् रोषेऽपि कारुण्यादिगुणाव्यभिचारी गोष्ठे गोदोहार्थगवावरोधनस्थले न तु गवाद्यावासे द्रुमाणामेव चूर्णितत्वेन कथ्यत्वात् ॥ १३ ॥ पतेति, अत्र तावत् द्रुमचूर्णयितृत्वं तथापि न मनुष्यगवादिवर्जित्वं चेत्युभयमत्राद्भुतं तच्च भगवच्छक्तिव्यञ्जकमेव ॥ १४–१६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ स्तन्येन सह पीतप्राणायास्तस्याः पूतनाया देहो यदा न्यपतत्, तदाह—पतमानोऽपीत्यादि। त्रिगव्यूत्यन्तरद्रुमान् पातयामासेति कथं संगच्छताम् ? वस्तुतस्तु गृहमध्ये गत्वा स्तनं ददौ, तत्रैव ममार च। तत्रैव चेत् शरीरवृद्ध्या सह मरणम्, तदा गृहादि-भङ्ग-प्रसङ्गः; तदन्यथाभावे गृहाद्बहिर्भूय कियद्दूरं गत्वा स्तनं ददौ, न तदपि संगच्छते। तेन स्तनं पिबतैव तेन तामादाय विनिर्गच्छता पुराद्विदूरे निक्षिप्ता। तदासङ्गेन परितो द्वादश-दण्ड-परिमितभूभागे ये द्रुमाः स्थितास्ते चूर्णा बभूवुरिति सन्दर्भः ॥ १५–२४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पतमानोऽपि तद्देहस्त्रिगव्यूत्यन्तरद्रुमानित्यनेन श्रीकृष्णमादाय गृहाद् बहिर्भूतायास्तस्या देह इति मन्तव्यम्। अन्यथा गृहादिभङ्गप्रसङ्गोऽपि स्यात्। अथवा, स्तनं पीत्वा अद्भिरिव तत्तनुस्तेनैव दूरे निक्षिप्ता ॥ १५–२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निजरूपमास्थिता मृत्युपीडितया तया निजमायया रक्षितुमशक्यत्वात् ॥ १३ ॥ पतमानः पीडावैयग्र्यवशादन्तःपुरात्तस्मादुत्पत्य ग्राममप्युल्लङ्घ्य तद्बहिःप्रदेशे पतन्नित्यर्थः। अपिकारेण न केवलं जीवन्त्येव सा जीवान् जघान अपि तु मृता अपीति भावः। षट् क्रोशमध्यवर्त्तिनो द्रुमान् तावतां द्रुमाणां चूर्णनं द्रुममात्रचूर्णनं ग्रामोल्लङ्घनं चेत्यद्भुतं द्रुमाश्च ते कंसारामस्थास्तद्भोग्यफला इति वैष्णवतोषिणी ॥ १४ ॥ तस्याः कलेवरं वीक्ष्य गोपा गोप्यश्च तत्रसुः। ईषा लाङ्गलदण्डस्तत्प्रमाणा उग्रा दंष्ट्रा यस्मिंस्तदास्यं यस्य पुलिनवदारोहो जघनं तेन भीषणं बद्धाः सेतव इव भुजावूरू अङ्घ्री च यस्मिन् तत् शून्यतोयह्रद इव उदरं यस्मिन् तत् पूर्वं तु तस्याः शब्देन भिन्नानि विदीर्णानि हृदादीनि येषां ते ताश्च ॥ १५–१७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

व्यादाय मुखं विवृत्य ॥ १३–१४ ईषा हलीषा तत्प्रमाणाः उग्राः दंष्ट्राः यस्मिन् तदास्यं यस्मिन् तत् गिरिकन्दरेव नासिका यस्मिन् तत् गण्डशैलाविव गिरिच्युत्तस्थूलोपलाविव स्तनौ यस्मिन् तत् ॥ १५ ॥ अन्धकूपाविव गभीरे अक्षिणी यस्मिन् तत् पुलिनाकाराभ्यां जघनाभ्यां भीषणं बद्धसेतव इव भुजोर्वङ्घ्रयो यस्मिन् तत् शून्यतोयह्रदवदुदरं यस्मिन् तत् ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

व्यादाय मुखं प्रसार्य निजरूपमास्थितेति रक्षसां प्राणसङ्कटे स्वमायाया रक्षितुमशक्यत्वादित्यर्थः ॥ १३ ॥ पतमानः पीडातिशयादन्तः पुरादुत्प्लुत्य नगराद्बहिः प्रदेशे पतत् त्रिगव्यूत्यन्तरद्रुमान् क्रोश षट्कमध्यवर्तिनो वृक्षान् दिव्यस्वादुफलपूर्णान् चूर्णयामास दुष्टेन कंसेन नन्दनृपभूम्यां हठेन निर्मितानारामानिति बोध्यं तेन तद्बुद्ध्ये प्रवृत्तापि तत् क्षतिं व्यधादिति सूच्यते मृतापि प्राणिद्रोहिणीत्यपिशब्दात् तदिदं पुराद्बहिः तस्याः पतनं कंसारामद्रुममात्रचूर्णनं च हरेः कर्माद्भुतमासीत् ॥ १४ ॥ ईषेति त्रिकं गोपा गोप्यश्च तत्कलेवरं वीक्ष्य सन्तत्रसुरित्यन्वयः। ईषा लाङ्गलदण्डस्तन्मात्रयस्तत् प्रमाणा उग्रा दंष्ट्रा यस्मिंस्तादृशमास्यं यत्र तत् रौद्रं घोरं पुलिनतुल्याभ्यामारोहाभ्यां जघनाभ्यां भीषणं भयङ्करं बद्धाः सेतव इव भुजावूरू अङ्घ्री च यत्र तत् शून्यतोयः शुष्को ह्रदस्तत्तुल्यमुदरं यत्र तत् पूर्वमेव तन्निस्वनितेन घोर-शब्देन भिन्नानि विदीर्णप्रायाणि हृदादीनि येषां यासाञ्च तथा ॥१५–१७॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

पतमान इति अत्र षट्क्रोशपर्यंतं द्रुमादिचूर्णीभाव उक्तः। तदा व्रजस्य कथं सत्त्वेन स्थितिरित्यतोविरोधोऽत उच्यते। दुर्गाजन्मन प्राक् कंसाय करं दातुं व्रजान्निर्गतस्य नंदस्यानुवृत्त्या गताया यशोदाया मार्गमध्ये यमुनातीरे पटवेश्मनि प्रसवे जाते तत्र चतुर्मासं वसतौ कृतायां पूतनावधस्य तत्रैव संभवाद्बृहद्वनास्थितव्रजस्य न चूर्णीभावः। तदुक्तं। पूर्वं हि नंदः स करं हि दातुमित्यारभ्य पपात सा व्याध्यवनं समस्तमित्यंतं तात्पर्यनिर्णये। अत एवाद्भुतामिवेत्युक्तं। अस्याल्पद्रष्टृणामद्भुतत्वेऽपि बहुद्रष्टृणामद्भुतमिवाभवत्। न त्वद्भुतमिति भावः। नन्वेवं चेत्प्रजाः संमृष्टमससिक्तेत्यादिना गोपीमोदवर्णनेन च विरोध इति चेन्न। गोपाः समाययू राजन्निति बलिभिस्त्वरितं जग्मुः। पृथुश्रोण्य इति च कथनेन बृहद्वनस्थव्रजमलंकृत्य जन्मोत्सवदर्शनार्थं गमनलाभात्। रोहिण्या अपि तथैवागमनांगीकारात्। कासांचिद्गोपीनां व्रजं त्यक्त्वा सूतिकासंनिधौ स्थित्यभ्युपगमेन च न कश्चिद्विरोधः ॥ १५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अतिगम्भीरं रंहो यस्य स तेन रंहो वेगः स्वनेन साद्रिः सपर्वतः पर्वतावृता मही भूर्द्यौरन्तरिक्षं सा च सग्रहा नवग्रहसहिता रसा रसातलादिसप्तकं चचाल दिशः खं चेत्येतानि प्रतिनेदिरे प्रतिध्वनिं चक्रुः। वज्रनिपातशङ्कयाऽऽकस्मिक्या क्षितौ जनाः पेतुः ॥ १३ ॥ इत्थं प्राग्व्यथिता निशाचरी क्षितौ चरणौ भुजावपि प्रसार्य केशान्विकीर्य व्यसुर्विगता असवो यस्याः सा निजरूपं पुरातनपूतनाकारमास्थिता सती वज्रहतो वृत्रासुर इवापतत् ॥ १४ ॥ तद्देहस्तस्याः पूतनाया देहः पतमानः पतंस्त्रिगव्युत्यन्तरं द्रुमान्। गव्यूतिस्त्रीकोशयुतमित्यमरः। त्रिगव्युत्यन्तरे मध्ये विद्यमानाश्च ते द्रुमाश्च तांश्चूर्णयामासेति यत्तन्महदद्भुतमासीत् ॥ १५ ॥ ईषामात्रे लाङ्गलदण्डप्रमाणे। ईषा लाङ्गलदण्डः स्यादित्यमरः। उग्रे दंष्ट्रे यस्य तच्च तदास्यं वक्त्रं यस्य तद्गिरिकंदरवन्नासिका यस्य तद्गण्डशैलाविव स्तनौ यस्य तत्। शैलो भूभृतीत्यमरः। रौद्रं भीषणं प्रकीर्णा अरुणमूर्धजा यस्य तत् ॥ १६ ॥

श्रीसुबोधिनी

एवं स्वनवृत्तकार्येण वीर्यमाहात्म्यमुक्त्वा भगवदाकृष्टानां प्राणानां पुनरावृत्तिमाशङ्क्य तत् परिहरन् पूतनायाः सर्वजनीनं मरणमाह निशाचरीति, इत्थं व्यथितस्तना व्यसुर्भूत्वाऽपतत्, निशाचरीति कठिनप्राणत्वं निरूपितं, तादृश्याः शीघ्रं प्राणपरित्याग

आश्चर्यहेतुर्भवति, **रक्षसा** व्यथां महतीमपि सहन्ते, तादृश्यपीत्थं **व्यथितस्तना** जाता, येन साङ्गे सम्पूर्ण एव शरीरे महान् क्षोभो जातः, ततः प्राणानपि त्यक्तवती, प्राणत्यागोपि वैकल्यात्, तदाह **व्यादाय मुखं केशांश्चरणौ भुजावपि प्रसार्य गोष्ठेवीरवद्भूमावपि** कृत्रिमरूपग्रहणकारणाभावाद् भगवत्सम्बन्धेन कृतार्थत्वा**न्निजरूपमास्थितापतत्**, तस्याः स्वरूपमत्यन्तं स्थूलं सर्वोपद्रवकारीति दृष्टान्तेनाह **वृत्र इ**वेति, **वृत्र स्वे**च्छयापि पतति ततः पुनरुत्थानं भवेदिति **वज्राहत** इत्युक्तं **नृपे**तिसम्बोधनं महत्त्वेन विश्वासार्थं, **मुखव्यादा**नादिकं **प्राणोत्क्रमणार्थं न** भवति किन्तु न हीनां वायुवशादाकर्षे तथा सर्वचेष्टा, मुखव्यादानेनैव देहक्लेशो निरूपितः, आदिमध्यावसानेषु क्लेशो जात इति वक्तुं **केशचरणभुजा**नां ग्रहणं, **प्रसारणं** सत्त्वपरित्यागेन मुक्तिसूचकं, **निजरूपं** राक्षसं रूपं, यथा **वृत्रे** हते त्रयो **लोकाः स्वस्था**स्तथापूतनावधे जाता इति, एवमाध्यात्मिकपूतनाया मरणमुक्तं, **आधिभौतिक्या भूमौ** पातः ॥ १३ ॥

साधारणस्थितिर्लोके पूर्वाध्याये निवारिता। अविद्यापूतना नष्टा गन्धमात्रावशेषिता ॥ १ ॥
अतः परं निरोधस्तु **गोकुले** सुगमो **भवेत्**। प्रपञ्चविस्मृतिः सा हि कृष्णासक्तिसमन्विता ॥ २ ॥

एवं **पूतनाया** वधमुक्त्वा काचित् स्त्र्यप्रयोजिका मारितेतिशङ्कां दूरीकर्तुं तस्या देहस्य मृतस्यापि महत्त्वमाह **पतमानोपी**ति, **अपि**शब्देन कृत्रिमसामर्थ्ये ततोपि महद् रूपं भवतीति सूचितं, **त्रिगव्यूत्यन्तरद्रुमान्** क्रोशषट्कमध्यस्थितवृक्षांश्**चूर्णयामासे**तिभारशैल्यमुक्तं लम्बताप्युक्ता, भगवद्वीर्यस्य स्पष्टत्वात्, लोके तदेव **महदद्भुतमासीत्**, अलौकिकात्मनेपदप्रयोगेण तद्देहदाह एव तानि काष्ठान्युपयोक्ष्यन्त इति ज्ञाप्यत एवञ्च भगवदिच्छयेति च, **गोकुल**वासिनां गव्यूतिरेव प्रसिद्धा, त्रिगव्यूत्यधिको **देशस्तैर्न** दृष्ट इति तावदेवोक्तं, **राजेन्द्रे**ति, **इन्द्रेण वृत्र**वधः कृत इति तन्नाम्ना सम्बोधनं विश्वासार्थम् ॥१४॥ तद्रूपमवयवशो वर्णयती**षे**तिद्वाभ्यां, **ईषा** लाङ्गलदण्डश्चतुर्हस्तः **ईषामात्रोग्रा दंष्ट्रा** यस्मिन्नास्ये, **अनेन** तत्र कृषीवलानां दण्डस्थानीया एव दंष्ट्रा जातेत्युक्तं, तादृश**मास्यं** यस्मिन् रूपे, **गिरेः कन्दरप्राया नासिका** यस्य, क्रीडास्थानं तज्जातमिति, **गण्डशैलाः** पर्वताच्च्युताः स्थूलाः पाषाणाः, **गण्डशैलाविव स्तनौ** यस्य, **प्रकीर्णा अरुणवर्णा मूर्धजा** यस्य ॥ १५ ॥ **अन्धकूपवद् गभीरे अक्षिणी** यस्य, **पुलिनवन्** नदीसैकतप्रदेशवदारो**ह**स्थानं जघनभागस्तद् **गुह्येन भीषणं** भयानकं, **बद्धाः सेतव** इव **भुजावूरू अङ्घ्री** यस्य, **शून्यं तोयं** यस्मिन् तादृशह्रदव**दुदरं** यस्य, नव विशेषणानि **प्राकृतगुणानां सर्वेषां समवायार्थानि**, अविद्या हि **नवधा भीषिका** ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

ननु भगवत्यागते गोकुले सर्वोत्कर्षवर्णनमेवोचितम्, न त्वेतादृशोपद्रवस्येत्याशङ्क्य पूतनावधोक्त्याऽलौकिकेभ्य उत्कर्ष उक्त इति वक्तुमुत्कर्षस्य च लौकिकालौकिकभेदेन द्विविधत्वाल्लौकिकः स पूर्वाध्यायेनोक्त इत्याहुः **साधारणस्थिति**रिति ॥१३॥ तादृगुत्सवेन तत आरभ्येति वाक्येन गोकुल इति पदात्तदतिरिक्ते तदभावः सूचित इति तत्रैवोत्पातोक्त्या च लोकसाधारणी स्थितिर्गोकुलस्य तथेत्यर्थः। तेन लौकिकेभ्य उत्कर्ष उक्तो भवति। अलौकिकेभ्य उत्कर्षमाहुः **अविद्ये**ति। अत्रायं भावः। सा हि स्वरूपाज्ञानदेहेन्द्रियप्राणान्तःकरणाध्यासलक्षणपञ्चपर्वात्मिका। तत्र 'तत्प्रभया धर्षिते निरीक्ष्यमाणे अतिष्ठता'मित्युक्त्या जनन्योस्तत्कृतस्वस्वरूपविस्मृतिरुक्ता। ततो नष्टायां तस्यां सर्ववृत्तान्तानुभवे सत्यस्मत्तूष्णींस्थित्यैतादृशमभवत्कार्यमित्यतः परं सावधानतया भगवद्रक्षा कार्या, अन्या काप्यत्र न प्रवेशनीयेत्यवधृतिरभूदिति। तयोर्जननीत्वधर्मो यादृशस्तादृशो ह्यागत इति निरोधरूपस्मृतिरुक्ता भवति। गोपानां च रक्षकत्वेन स्थापितानां तद्रूपजमोहेनोक्तस्वरूपविस्मृतिरभूत। ततश्च जननीवदेतेषामपि भावो ज्ञेयः। एतेषां स्त्रीरूपेण मोहाद्धि तदनिवारणम्। तत्र च पुंस्त्वमेव हेतुरिति देहाध्यासस्य तदनिवारणे हेतुत्वमायाति। तस्यां सौन्दर्यमल्लिकादिसत्त्वेन रूपगन्धादिभिर्मनोहरणे चेन्द्रियाध्यासस्तथा। वज्रनिपातशङ्कायां भगवानधुना क्वास्ति कथमस्ति इति विचार एवोचितस्तमकृत्वा स्वप्राणरक्षार्थं क्षितौ पातस्तदध्यासहेतुकः। व्रजसीमन्तिनीनामन्तःकरणे भगवत्सम्बन्धसत्त्वेन तस्यैवात्रापि स्फुरणेन तदवारणमभूदित्यन्तःकरणाध्यासस्य तद्धेतुत्वम्। तथाचैवं तूष्णींभावस्य तन्मारणानन्तरं भगवद्नाभिस्वानिष्टपर्यवसायित्वं दृष्ट्वा यथाकथञ्चित् कुशलिनं प्रियं प्राप्य पश्चात्तापयुक्ताः सन्तोऽतः परं नैवं स्थेयं, किन्तु तत्परतयैवेति ज्ञानमभूदिति सुष्ठूक्त'मविद्या पूतना नष्टा,' 'अतःपरं निरोधः सुगम' इति च। अत एव व्रजौकसां साधारणानां गोपीनां जनन्योश्च भावा उक्ताः। अत एवाग्रे 'सन्त्रसु'रित्युक्त्वा 'गोप्यस्तूर्णं जगृहु'रित्युक्तम्। कृष्णासक्तिसमन्विता प्रपञ्चविस्मृतिः। सा निरोधरूपेत्यर्थः ॥ १४ ॥ **ईषामात्रे**त्यत्र, **अनेने**ति। हस्तादिमानं हित्वेषामात्रत्वकथनेनेत्यर्थः। कन्दराद्युपमाने हेतुमाहुः **क्रीडे**ति। तत् तस्याः शरीरम्। 'तस्या उरसि क्रीडन्त'मिति वाक्यात्तथाजातमिति क्रीडायोग्यस्थानैरुपमीयत इत्यर्थः। तज्ज्ञानेन्द्रियं दुष्टमिति तथोपमा ॥ १५ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

निशाचरीत्यत्र**साङ्ग** इति प्रत्यङ्गपीडाबोधनार्थः, मूले **व्यादाये**त्यादिना तथोक्तत्वात्, ननु मूले गोष्ठ उत्पातादिकथनस्य किं प्रयोजनमित्यत आहु**र्गोष्ठ** इत्यादि, **अवीरवद्भूमौ** गवां वृषाणां वत्सानां च चरणार्थं वने गतत्वात् तैः सह गोपिकापतिपुत्राणामपि चारणार्थं गतत्वा**दवीरवती** पतिपुत्ररहिता भूमिर्यस्मिंस्तादृशे गोष्ठे कृत्रिमरूपग्रहणस्य **कारणं** मायारूपो भगवांस्तस्याभावात् तत्रापि हेतुर्भगवत्सम्बन्धेनाधिदैविकरूपायाः **कृतार्थत्वान्** निजं राक्षसरूपमास्थिता सत्यपतत्, तथा च तद्देहस्य पाते

कस्यापि चेतनस्य जङ्गमस्य क्लेशो न जात इतिबोधनार्थं **गोष्ठपद**कथनं, किञ्चान्तः सूतिगृह एव निजरूपास्थाने तत्र तस्य मातुमशक्यतया गृहावरणादिभङ्गप्रसक्तिरिति तदनुक्त्या व्यथितस्तना सा भगवत्वाहितेत्र ततो बहिरन्तर्गोष्ठे **निजरूपमास्थिता** जातेतिबोधनार्थं च तत्कथनमित्यर्थः, तदेव व्युत्पादयन्ति **तस्या** इत्यादि, **व्यादाना**युक्तिप्रयोजनमाहु**र्मुखे**त्यादि, **न भवती**ति **स्तन्यद्वारैव** भगवता प्राणानां ग्रहणान् **न भवति, सत्त्वपरित्यागे**नेति **सत्त्वं** देहे प्राणानां विद्यमानता **तत्परित्यागेन**, **एवमाध्यात्मिके**त्यादि यदुक्तं तदाशयं टिप्पण्यामाहुः **प्राणै**रित्यादि, **तद्भेदा** इत्याध्यात्मिकादिभेदाः, तथा **चाधिदैविकी** भगवत्यैव प्रविष्टा, आध्यात्मिकी तु 'सलिङ्गा सा व्यसुरभूत्' प्राणा इन्द्रियाणि च भगवति लीनानि शेषापतदिति बोध्यम्, **अत एवे**त्या**ध्यात्मिक्या** मारणा**देव**, **मर्म**शब्दस्य 'मृङ् प्राणत्याग' इत्यतो निष्पत्तेः सर्वजीवप्राणत्यागस्थलोक्तिरित्यर्थः, **'चरित्रमद्भुतं शास्त्र'** इत्यादिना यदुक्तं तदिदानीं **कारिका**द्वयेन व्युत्पादयन्तीत्याशयेनाहु**र्नन्वि**त्यादि, **तथे**ति वारिता, प्रासङ्गिकमुक्त्वा प्रस्तुतमाहु**रलौकिके**भ्य इत्यादि, **अलौकिके**भ्य इतिशुकसनकादिभ्यः, तथा **चैतेन** चरित्रेणालौकिक**साधारण्य**पि **गोकुलस्थिति**र्वार्यत इत्यर्थः, नन्वविद्यायाः पञ्चपर्वसु विविक्तजीवस्वरूपस्य यदज्ञानं तत् स्वरूपाज्ञानं देहादिषु या आत्मत्वेन बुद्धयस्ताः पर्वान्तराणीति हि शास्त्रे स्थितं तत्पञ्चकं तु गोकुलस्थेषु दृश्यत एवेति कस्तस्या नाशःकथं चैतेषामुत्कर्ष इत्याकाङ्क्षायामाहु**रत्रायं भाव** इत्यादि, मूलाविद्या ह्युक्तपञ्चपर्वात्मिका सात्र नष्टात्वेन नाभिप्रेता किन्तु **तूलाविद्या शुक्तिरजता**दिस्थले यत् शुक्त्याद्यज्ञानरजताद्यध्यासश्च तद्यथा तस्याः कार्यं तथा स्वदेहादावपि भयकामादिना मोहे स्वात्माज्ञानाद्यपि तत्कार्यमिति द्रष्टव्यम्, एवं सति प्रकृते मातृचरणप्रभृतीनां ये स्वरूपाज्ञानादय उक्तास्ते तस्या एव कार्याणि पर्वरूपाणि **पूतनानाशे** च ते **सर्वे** निःशेषं निवृत्ताः, यद्यपि ते भिन्नभिन्ननिष्ठा उक्तास्तथाप्युपलक्षणविधया सार्वत्रिका एव ज्ञेया इति ज्ञातव्यम्, एवं स्वविवक्षितरूपे स्वरूपज्ञानादौ जाते निरोधस्तेषां जातः, तदेतदाहु**स्ततश्च जननीवदेतेषामपि भावो ज्ञेय** इति गोपानामपि सावधानत्वेन **रक्षाकर्तृभावो ज्ञेय** इत्यर्थः, **तदध्यासहेतुक** इति प्राणाध्यासहेतुकः, एवं तस्याः पर्वाणि तेषां निवृत्तिं चोक्त्वा निगमयन्ति **तथा** चेत्यादि **ज्ञानमभू**दित्यन्तं, तदेतत् सुबोधिन्यां निगमयन्ति **सुष्ठूक्त**मित्यादि, तथा चायं **कारिकार्थः**, पूर्वं "जायमाने जनार्दन"इत्यत्र सर्वाविद्यानाशकस्य प्रादुर्भाव उक्तस्तत्कार्यमविद्यानाश इति साविद्या पूतनानेन चरित्रेण नष्टा सती "कटधूमस्ये"त्यत्र वक्ष्यमाणेन **गन्धमात्रेणावशेषिता स्थापिता**, **अतः परं** तन्नाशनगन्धस्थापनयोरनन्तरं गोकुले **निरोधः सुगमो भवे**दिति, **अत एवे**ति तस्या अविद्यात्वा**देव**, **उक्ता** इति सुबोधिन्या**मुक्ताः**, **अत एवात्र** इति निरोधसौगम्या**देव**, कारिकाशेषं व्याकुर्वन्ति **कृष्णे**त्यादि, **हि**र्हेतौ, तथा च यतो हेतोर्निरोधरूपा सा तथातोहेतोरलौकिकसनकादि**साधारणी स्थितिर्गोकुलस्यानेन** चरित्रेणात्र वारिता **शु**कादीनामेवं निरोधस्य क्वाप्यनुक्तत्वादितिभावः, न चास्यां नष्टायामपि मूलाविद्यापर्वणां देहाध्यासादीनां व्रजस्थेषु दर्शनात् कथं तन्नाशोवगन्तुं शक्य इति शङ्क्यम्, अस्या मूलाविद्याया अपि भिन्नत्वात् तृतीयस्कन्धे **विंशाध्याये** "ससर्जच्छाययाविद्या"मित्यत्र तस्याः पूर्वाविद्याभिन्नत्वेनोक्तत्वात् तत्सुबोधिन्यां तस्या लीलोपयोगित्वस्य दिङ्मात्रेणोक्तत्वाच्च, अतः **साधारणी नेति** न किञ्चिदनुपपन्नमितिदिक् ॥ १३ ॥ **पतमानोपी**त्यत्र **कृत्रिमसामर्थ्ये ततोपी**ति **कृत्रिमरूप**करण**सामर्थ्ये** सति साहजिकादपि यथा म्रियमाणेन घटोत्कचेनाक्षौहिणीपरिमितसैन्यनाशकं शरीरमाकाशे गत्वा **कृतं तद्वत्**, **अलौकिकात्मनेपदप्रयोगेणे**ति **पतमान** इतिप्रयोगेण, **अत्रायं भावः**, कर्तृगामिनि क्रियाफले सत्यात्मनेपदं भवति नष्टेयं तु लीलार्थं वर्तमानाविद्या तत्कार्याविद्यापर्वनाशः, तथा चात्रा**लौकिकात्मनेपदप्रयोगेण** पतनक्रियाफलं देहे महत्त्वमात्रं स्यात्, एवं तु पतनक्रियाजन्यशाकलीभावशालिवृक्षजवह्निजन्यफलं दाहरूपं देहे ज्ञापितं भवतीति तथोक्तमित्यर्थः। **अलौकिकप्रयोगे** ह्यंशद्वयं तेन किञ्चित् फलं परस्मै किञ्चिदात्मन इति तथा, **प्रसिद्धे**त्यत्र हेतुमाहु**स्त्रिगव्यूती**त्यादि ॥ १४ ॥ ईषेत्यत्रानेनेत्यारभ्या**क्षिणो यस्ये**त्यन्तस्य तात्पर्यमाहुष्टिप्पण्या**मनेने**त्यादि **तथोपमे**त्यन्तं **तथोपमे**त्यन्धकूपोपमा, सुबोधिन्यां **सर्वेषा**मित्यादि सत्त्वरजस्तमःकामक्रोधलोभमोहमदमात्सर्याणामविद्यागुणानां प्रतिजीवं भिन्नानां यः समवाय एकत्रस्थितिस्तत्प्रयोजनकानि, नन्वेवं विशेषणतात्पर्योक्तौ किं कारणमत आहु**रविद्या ही**त्यादि ॥ १५ ॥

(३) श्रीमद्वल्लमहाराजकृतः श्रीसुबोधिनीलेखः

निशाचरीत्यस्याभासे **पूतनाया** इति आधिभौतिक्या इतिशेषः, सर्वजनीनं **मरणं भूमौ** पात इत्यर्थः, उपसंहारे तथोक्तत्वात्, व्याख्याने, **साङ्गे** इति नेत्रचरणभुजसहिते इत्यर्थः, अयं सर्वोपि पूर्वानुवादो **मूले आस्थिते**त्यन्तेनोक्तः, एतद्वाक्यार्थस्तु पात उक्तः, **मुखव्यादानादिक**मिति प्राणोत्क्रमस्तु स्तनद्वारैव जात इतिभावः, **सत्त्वपरित्यागेने**ति सत्त्वे सति परित्यागः प्राणानामिति शेषः, सत्त्वावस्थायां प्राणपरित्यागे **मुक्तिर्भवति**, "ऊर्ध्वं गच्छन्ति सत्त्वस्था" इतिवाक्यात्, प्रसारणमवयवानां यथास्थानां स्थितिः सत्त्वावस्था, "यदा चित्तं प्रसीदेत इन्द्रियाणां च निर्वृतिः देहेऽभयं मनोऽसङ्गं तत् सत्त्वं विद्धि मत्पद"मितिवाक्यात् ॥१३॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

अविद्या पूतना नष्टेतिकारिका, तत्र पूतनाया अविद्यात्वं कृष्णोपनिषत्सूक्तं, तथा च श्रुतिः "लोभक्रोधादयो दैत्या" इति कृष्णावतारे ये दैत्या हतास्ते सर्वे लोभादिष्वन्यतररूपा इत्यर्थः, दैत्यपदेन पूतनापि ग्राह्या, दैत्योत्पन्नत्वात्, अत एव

बकभगिनीत्वं, तत्र यस्मिन् दैत्ये यस्य दोषस्य सादृश्यमायाति स तद्दोषात्मक इतिनिर्णयः, तत्र पूतनाया अविद्यासादृश्यादविद्यारूपतोक्ता, **अविद्यासादृश्यं** श्रीमत्प्रभुचरणंष्टिप्पण्यां विवृतं, अतो ह्यविद्यारूपाक्तिः सूपपन्नेव, **पतमानोपि तद्दह** इत्यस्य विवृतौ, **अलौकिकात्मनेपदप्रयोगेणे**ति पत्लृ गतौ इति धातोः परस्मैपदित्वात् **पतमान** इति प्रयोगो लोके न भवति, शानचः आत्मनेपदत्वात् , अतोयमलौकिकः प्रयोग इति तेन आत्मगामि फलमपेक्षितं, तदाहुः तद्देहदाह **एव तानि काष्ठान्युपयोक्ष्यन्त इति ज्ञाप्यत** इति ॥ १४ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

निशाचरीत्थमित्यत्र साधारणस्थितिरिति का० ॥ २१¾ ॥ तादृगुत्सवेन "तत आरभ्य नन्दस्ये"ति वाक्येन श्रीगोकुलस्योत्कर्षोक्त्या तत्रैव "सन्त्युत्पाताश्च गोकुल" **इत्युत्पातोक्त्या च गोकुलस्य लोकसाधारणी स्थितिर्वारिता, अविद्येति** गोकुलस्थानाम**विद्यारूपा पूतना नष्टा, गन्धमात्रे**ति "कटधूमस्य सौरभ्य"मितिवक्ष्यमाणप्रकारेणेत्यर्थः, तेन भक्तेष्वपि सेवोपयोगिसंसारः स्थापित इतिभावः, **अतः परमिति** का० ॥ २२¾ ॥ **अतः परं** पूतना नाशोत्तरं **से**ति निरोधरूपेत्यर्थः ॥ २२¾ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

आचार्यचरण कहते हैं कि **एवं स्वेन कार्येण**—इस प्रकार पूतना की भारी आवाज से हुए कार्य से भगवान् के वीर्य ऐश्वर्य का माहात्म्य कह कर भगवान् ने खींचे हुए पूतना के प्राणों के पूतना में पुनः प्रवेश की शंका का निवारण करने के लिये सम्पूर्ण मरण का वर्णन, 'निशाचरी श्लोक से करते हैं।

इस तरह, स्तनों की व्यथा से व्याकुल पूतना प्राण रहित हो गिर गई। राक्षसी शब्द से बताया कि राक्षसों के प्राण कठिन होने से शीघ्र नहीं निकलते हैं परन्तु राक्षसी होते हुए भी उसके प्राण शीघ्र निकलना आश्चर्यजनक है। राक्षस तो घोर पीड़ा भी सहन कर सकते हैं, किन्तु भगवान् द्वारा स्तन पकड़ने से, भारी पीड़ा हुई कि वह राक्षसी होते हुए भी स्तन पीड़ा पीड़ित होने से शरीर के प्रत्येक अंग में घबराहट हुई, जिससे उसने प्राणों को भी छोड़ दिया। घबराहट के कारण, प्राण छोड़ने से मुख खुल गया, बाल बिखर गये और हाथ पैर फैल गये। मायारूप भगवान् न होने से, कृत्रिम रूप न रहा; भगवान् के सम्बन्ध से कृतार्थ हो उसने असली रूप पाया। वीरों के समान अवीर भूमि गोष्ठ में गिर गई। श्रीपुरुषोत्तमजी 'अभूमि' बिना वीरों की भूमि का तात्पर्य कहते हैं कि व्रज के बाल प्रौढ आदि सर्व गोप गौ और वत्सों को चराने बन में गये थे इसलिए पुरुष लोग वहाँ नहीं थे इस हेतु को लक्ष्य में लेकर 'अवीर भूमि' ऐसा सुबोधिनीजी में उल्लेख किया है। इसका स्वरूप असीमित स्थूल सबको उपद्रव हानि करने वाला है, यहाँ वृत्रासुर का दृष्टान्त देकर यह समझाया है कि वृत्र अपनी इच्छा से गिरकर, फिर उठता था इसलिये वज्र से मारे हुए वृत्र का दृष्टान्त देकर यह बताया कि यह भी वैसे ही गिरी जैसे वज्र से मारा हुवा वृत्र गिर कर फिर न उठ सका, तैसे इसमें फिर प्राण न आये। 'नृप' शब्द का रहस्य है कि राजन् आप श्रद्धालु और महान् हो, इसलिये इस चरित्र को सद्रूप से समझोगे।

प्राणों के उत्क्रमण के अवसर मुख खुलना, काया में कम्प होना आदि क्रियाएँ न हुई थी, किन्तु वायु द्वारा नाड़ियों के आकर्षण के कारण यह सब चेष्टा हुई थी। मुख खुल जाने से ही देह क्लेश होना बताया। केश, चरण और भुजाओं के स्वरूप के वर्णन से यह बताया कि पूतना को प्रथम, मध्य और अन्त के तीनों कालों में क्लेश हुआ। प्रसार्य पद से सत्त्वगुण से प्राण परित्याग बता कर, मुक्ति का सूचन किया। निज राक्षस रूप छोड़ा जैसे वृत्र के मरने पर तीनों लोक सुखी हुए तैसे ही पूतना के मरने से भी सब प्रसन्न हुए। भगवान् में प्रविष्ट होना वही आध्यात्मिक पूतना के मरण का वर्णन यहाँ किया। आधिभौतिक पूतना पृथ्वी पर गिरी। इस विषय में प्रकाशकारजी स्पष्टता करते हैं कि आधिदैविक पूतना का भगवान में प्रवेश प्रथम कहा गया है यहाँ आध्यात्मिक पूतना के लिंग देह सहित प्राण और इन्द्रियादिक का भगवान में प्रवेश बताया है, और आधिभौतिक रूप शेष पूतना का शरीर धरणी पर गिरा ॥ १३ ॥

कारिकाः—साधारणस्थितिर्लोके पूर्वाध्याये निवारिता। अविद्यापूतना नष्टा गन्धमात्रावशेषिता ॥ १ ॥
अतः परं निरोधस्तु गोकुले सुगमो भवेत्। प्रपञ्चविस्मृतिः सा हि कृष्णासक्तिसमन्विता ॥ २ ॥

कारिकार्थ—पंचम अध्याय में यह बताया है कि लोक में गोकुल की स्थिति साधारण नहीं थी, लेकिन गोकुल का कुछ महत्त्व था कारण कि वहाँ नन्द-महोत्सव से हर्ष था और उत्पात से खेद था, अविद्या रूप पूतना का नाश हुआ किन्तु केवल उसकी गन्ध रही ॥ १ ॥ अब पूतना के नाश के बाद गोकुल में रहने वालों का निरोध सरल रीति से होगा। कारण कि अब व्रजवासियों को भगवान् कृष्ण में आसक्ति संयुक्त प्रपञ्चविस्मृति होने लगी है ॥ २ ॥

श्री टिप्पणीकारजी कहते हैं कि आनन्दकन्द श्री कृष्ण चन्द्रजी के पधारने पर तो गोकुल में सर्व प्रकार से उत्कृष्टता का वर्णन करना चाहिये था न कि उपद्रवों का। फिर क्यों उपद्रवों का वर्णन किया ? तब कहते हैं कि उत्कर्ष दो प्रकार का

होता है—एक लौकिक दूसरा अलौकिक। लौकिक उत्कर्ष पांचवे अध्याय में नन्दमहोत्सव से बताया है कि ऐसा उत्सवानंद दूसरे स्थान में नहीं हुआ एवं वहाँ उत्पात होने के कारण ही गोकुल की साधारण स्थिति कही गई है। इससे लौकिक उत्कर्ष कहा गया। अब अविद्या पूतना से गोकुल का अलौकिक उत्कर्ष बताते हैं। वह पूतना "स्वरूपविस्मृति-देहाध्यास-इन्द्रियाध्यास-प्राणाध्यास-अन्तःकरणाध्यास" रूप पांच पर्वात्मिका अविद्या है। उसके प्रत्येक पर्व के सामर्थ्य का निर्देश किया जाता है :—

१. स्वरूपविस्मृति—श्री यशोदा जी और श्री रोहिणीजी पूतना के तेज से प्रभावित हो गई निज मातृस्वरूप को विसर गई इससे पूतना को रोका नहीं और नन्दलाल को गोद में लेने दिया। जब प्रभुने पूतना का नाश किया तब दोनों माताओं को अपने स्वरूप का अनुसंधान हुआ उन्हें ज्ञात हुआ कि हमारे मौन रहने से इस पूतना राक्षसी ने ऐसे ऐसे कार्य किये इसलिये अब हम लालन की रक्षा में सावधान रहेंगी जिससे दूसरी कोई भी ऐसी स्त्री यहाँ न आ सके, ऐसा दृढ़ विचार किया और यथार्थ मातृत्व धर्म हृदय में प्रगट हुआ। भगवान् ने अविद्यारूप पूतना का नाश कर माताओं का निरोध किया और रूप 'स्वरूपस्मृति' कराई।

२. देहाध्यास—भगवान् की रक्षा के लिए नियुक्त गोप भी, पूतना के सौन्दर्यपूर्ण स्त्रीरूप पर मोहित हो गये और अपने देहाध्यास के कारण अपना रक्षक स्वरूप को भूल गये, उन्होंने पूतना को आने से रोका नहीं। जब प्रभुने पूतना का नाश किया तब गोप अपनी भूल समझने लगे और भगवान् की रक्षा में तत्पर रहने लगे। इस प्रकार गोपों की भी स्वरूप स्मृति रूप निरोध सिद्ध हुआ।

३. इन्द्रियाध्यास—पूतना का सौन्दर्य एवं बेनी में गूँथे हुए मल्लिकादि पुष्पों की सुगन्ध से गोपगण मुग्ध हो गया यह इन्द्रियाध्यास गोपों को हुआ जिससे भी पूतना को रोकने की क्रिया न कर सके।

४. प्राणाध्यास—गोपों को जब भूतल पर वज्र के गिरने का संदेह हुआ, तब उनका कर्त्तव्य था कि नन्द लाल की खोज करनी चाहिये कि श्रीकृष्ण कहाँ है? किस स्थिति में है? ऐसा न कर अपने प्राणों के रक्षण में लग गये, गोपों ने यह कार्य **प्राणाध्यास** के कारण किया। पूतना की दृष्टि द्वारा अविद्या उनके भीतर घुस कर, उनमें 'प्राणाध्यास' उत्पन्न किया, जिससे वे कृष्ण की चिन्ता न कर, अपने प्राणों की चिन्ता करने लगे।

५. अन्तःकरणाध्यास—गोपिकाओं के अन्तःकरण में भगवत्सम्बन्ध होते हुए भी पूतना के रूप को लक्ष्मी रूप समझा, जो न रोका, उसका कारण अन्तःकरणाध्यास था।

एवं पूतनाया इस प्रकार पूतना के वध का वर्णन कर, अब यदि किसी के हृदय में ऐसी शंका उत्पन्न हो जाय कि भगवान् ने बिना प्रयोजन एक स्त्री को मार दिया, तो उस संदेह के समाधान के लिये आगे **'पतमानोऽपि'** श्लोक से कहते हैं कि उस मरी हुई पूतना की देह भी कैसी भयंकर थी! श्लोक में **पतमानोऽपि** वाक्य में **अपि** शब्द से इस शङ्का का निवारण करते हैं कि पूतना साधारण स्त्री न थी, किन्तु सामर्थ्यवती एवं भयंकर तथा बालहत्यारिणी थी। वह इतनी तो समर्थ थी जो प्रथम कृत्रिम रूप बनाया और मृत्यु के समय भारी वजनदार रूप बना दिया, जिससे छः कोस के पेड़ चूर्ण हो गये। यहाँ प्रकाशकार कहते हैं कि पूतना निजी शक्ति से कृत्रिम आकृति बना सकती थी गोकुल आने के समय लक्ष्मीजी के समान रूप लिया, मरने के समय भी घटोत्कच के समान बड़ा रूप धारण किया। जैसे घटोत्कच ने मरते समय आकाश में जाकर एक अक्षौहिणी सेना का चूर्ण करने योग्य महत् रूप बनाया था, वैसे ही पूतना ने भी मरते समय छः कोस का रूप बना लिया। जिसने देखे वे अचंभे में डूब गये तथा भयवश कहने लगे कि यह जीती तो अन्य बालकों को दुःख देती। इसलिये पूतनावध व्यर्थ नहीं किया गया किंतु अन्य बालकों की रक्षा के लिये आवश्यक था।

छः कोस के घेरे के वृक्षों के चूर्ण हो जाने से, पूतना के देह की स्थूलता लम्बाई और भार का परिज्ञान हो जाता है। इस महान् अद्‌भुत लीलाकार्य से, भगवान् के द्वितीय धर्म वीर्य गुण का महत्व स्पष्ट समझ में आ जाता है। **'चूर्णयामास'** इस अलौकिक आत्मनेपद की क्रिया के प्रयोग का तात्पर्य यों समझ में आता है कि पूतना की देह के जलाने में ही ये काष्ठ काम आएँगे। श्री पुरुषोत्तमजी **'अलौकिक आत्मनेपद'** का तात्पर्य कहते हैं कि यों तो आत्मनेपद तब दिया जाता है जब क्रिया का फल करने वाले को मिले, लेकिन यहाँ क्रिया का फल करने वाले को और दूसरों को भी मिला है। भाव यह है कि गिरने की क्रिया हुई उसका फल वृक्षों को मिला वे चूर चूर हो गये और पूतना को भी मिला कि उन चूर्ण हुई लकड़ियों से वह जलाई गई। इसलिये श्रीआचार्यचरणों ने कहा है कि यह आत्मनेपद अलौकिक है। यह सब भगवान् की इच्छा से हुआ। गोकुल-वासियों ने छः कोस से विशेष देश देखा ही नहीं है उनमें 'गव्यूति' शब्द ही प्रसिद्ध है इसलिये इतना ही कहा गया है। राजा को शुकदेवजी ने इस श्लोक में 'राजेन्द्र' यह सम्बोधन, विश्वास के लिये दिया है कि इन्द्र ने वृत्र का वध किया आप भी राजाओं में इन्द्र हो इससे आप भी विश्वास रक्खो॥ १४॥

तद्रूपमवयवशो वर्णयति—श्रीशुकाचार्यजी दो श्लोकों में पूतना के रूप का वर्णन करते हैं। उसके मुँह में चतुर्हस्त लम्बी किसानों के हल के दण्डे के समान भयानक दाढ़ें थीं, पर्वत की गुफा के समान नाक थी, पर्वत से गिरे बड़े पाषाणों के समान स्तन थे, बिखरे हुए लाल केश थे, जलशून्य गहरे कूप जैसे नेत्र थे, नदी के रेतीले करारों के समान जघन भाग उसके गुह्यभाग के कारण भयंकर था, पुल के बाँध जैसे बाहु, जांघ और पाँव थे, और जलरहित तालाब सदृश पेट था। यहाँ पर पूतना के शरीर के वर्णन में नव विशेषणों से प्राकृत नव गुणों का समावेश बताया और नव विशेषण का तात्पर्य बताते हैं कि अविद्या नव प्रकार से डराती है। श्रीपुरुषोत्तमजी कहते हैं कि सत्त्व-रज-तम काम-क्रोध-लोभ-मोह-मद-मात्सर्य ये नव पूतना के नव प्राकृत दोष हैं। पूतना अविद्या है इसलिए यह पूतना भी नव अवयवों से डराने वाली हुई ॥ १५–१६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आकृष्टानां प्राणानां पुनरावृत्तिमाशङ्क्य सर्वजनीनं तस्या मरणमाह—निशाचरीत्थमिति। इत्थं प्रपीडनेन व्यथितस्तना प्राणाकर्षणेन नाडीनामप्याकर्षणात् मुखं व्यादाय उद्घाट्य मृत्युपीडया स्वमायाधारणायां सामर्थ्याभावान्निजरूपं राक्षसीरूपमास्थिता व्यसुःप्राणविहीना केशान् चरणौ भुजावपि प्रसार्य वज्रेणाहतो वृत्रासुर इव गोष्ठे व्रजे अपतत्। नृपेति सम्बोधनं विश्वासार्थम् ॥ १३ ॥ तस्या अल्पत्वशङ्कानिरासार्थं देहस्य महत्त्वमाह—पतमानोऽपीति। पतन्नपि तस्या देहः त्रिगव्यूत्यन्तरद्रुमान् षट्कोशमध्यवर्तिनो वृक्षान् चूर्णयामास। अपिशब्देन कृत्रिमसामर्थ्यदशायां तु ततोऽपि महान् भवितुमर्हतीति सूचितम्। यद्वा न केवलं जीवन्नेव जीवान् जघान, किंतु पतन्नपीति सूचितम्। तद्गोमनुष्यादीन् विहाय द्रुममात्रं चूर्णीकरणं महदद्भुतमाश्चर्यमासीत् ॥ १४ ॥ रौद्रं भयंकरं तत् कलेवरं वीक्ष्य गोपा गोप्यश्च तत्रसुरिति तृतीयेनान्वयः। रुद्रत्वहेतुभूतानि विशेषणान्याह—ईषालाङ्गलदण्डः, तत्प्रमाणा उग्रा दंष्ट्रा यस्मिंस्तदास्यं यस्मिंस्तत्। गण्डशैलौ गिरेश्च्युतौ स्थूलोपलौ, ताविव स्तनौ यस्मिंस्तत्। प्रकीर्णा अरुणा मूर्धजाः केशा यस्मिंस्तत् ॥ १५ ॥ अन्धकूपाविव गम्भीरे अक्षिणी यस्मिंस्तत्। पुलिनवदारोहौ जघने, ताभ्यां भीषणम्। बद्धाः सेतव इव भुजौ ऊरू अङ्घ्री च यस्मिंस्तत्। शून्यतोयह्रद इव उदरं यस्मिंस्तत् ॥ १६ ॥

अन्वितार्थप्रकाशिका

निशाचरीति ॥ हे नृप ! इत्थं प्रपीडनेन व्यथितस्तना निशाचरी पूतना मुखं व्यादाय उद्घाट्य निजरूपम् उलूकपक्षिणीरूपं राक्षसीरूपं वा आस्थिता मृत्युसमये पीडितया तया स्वमायां रक्षितुमशक्यत्वात् व्यसुः प्राणविहीना केशान् चरणौ भुजावपि प्रसार्य वज्रेण हतो वृत्रासुर इव गोष्ठे व्रजे तत्समीपदेशे अपतत् ॥ १३ ॥ पतमानोऽपीति ॥ हे राजेन्द्र ! पतमानः पीडावेशाद् ग्राममप्युलङ्घ्य तद्बहिः पतन्नपि। आर्षः शानच् चानश् वा। तस्या देहः त्रिगव्यूत्यन्तरद्रुमान् षट्कोशमध्यवर्तिनो वृक्षान् चूर्णयामास। तत् चूर्णनं महत् अद्भुतम् आश्चर्यमासीत्। द्रुमाश्च ते कंसारामस्थास्तद्भोग्यफला इति तोषणी। दुष्टः स्वयं म्रियमाणोऽपि परान् मारयति इति सूच्यते ॥ १४ ॥ ईषामात्रेति त्रयम् ॥ ईषा लाङ्गलदण्डस्तत्प्रमाणा उग्रा दंष्ट्रा यस्मिंस्तदास्यं यस्मिंस्तत् गिरेः कन्दरे इव नासिके यत्र तत् गण्डशैलौ गिरेश्च्युतौ स्थूलोपलौ ताविव स्तनौ यस्मिंस्तत् प्रकीर्णा अरुणा मूर्धजाः केशा यस्मिंस्तत्। उलूकपक्षिणीपक्षे केशस्तनादिमत्त्वम् उलूकस्य प्रायो नरसाम्यात्स्यात्स्यादिति काशीनाथोपाध्यायः। अन्धकूपाविव गभीरे अक्षिणी यस्मिंस्तत् पुलिनवदारोहौ जघने ताभ्यां भीषणं बद्धाः सेतव इव भुजौ ऊरू अङ्घ्री च यस्मिंस्तत् शून्यतोयह्रद इव उदरं यस्मिंस्तत् रौद्रम् उग्रं तत्कलेवरं वीक्ष्य गोपा गोप्यश्च तत्रसुः। पूर्वं तु तस्याः निःस्वनितेन शब्देन भिन्नानि हृत्कर्णमस्तकानि येषां तादृशा अभूवन्। पूर्वं तु तन्निष्ठुरनादेन तत्रसुरधुना च बालवृत्ताज्ञानेन तादृक् देहवीक्षणेन च सम्यक् त्रस्ता इत्यर्थः। स्म प्रसिद्धौ ॥ १५–१७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निशाचरी राक्षसी व्यसुः गतप्राणा व्यादाय वदनं विवृत्य निजरूपं राक्षसीरूपम् आस्थिता आश्रिता सती वज्रेण इन्द्रशस्त्रेण आहतो वृत्रासुर इव गोष्ठ गोकुले अपतत् ॥ १३ ॥ पतमानः पतन्नपि तस्या देहः त्रिगव्यूत्परंद्रुमान् षट्कोशमध्यस्थान् वृक्षान् गव्यूतिः क्रोशयुगलम् ॥ १४ ॥ ईषामात्रा लांगलदंडप्रमाणा उग्रा दंष्ट्रा यस्मिन्नेवंभूतं आस्यं मुखं यस्मिंस्तत् इत्यादि नवविशेषणविशिष्टं तस्याः कलेवरं देहं वीक्ष्य गोपादयः संतत्रसुरिति तृतीयश्लोकेन संबंधः। गिरेः कंदरा गुहा तत्तुल्ये नासिके नासाविवरे यस्मिंस्तत् गंडशैलौ गिरेश्च्युतौ स्थूलपाषाणखंडौ तत्तुल्यौ स्तनौ यस्मिंस्तत् रौद्रं भयानकं प्रकीर्णा अरुणा मूर्धजाः केशा यस्मिंस्तत् ॥ १५ ॥ यौ अंधकूपौ तत्तुल्ये गभीरे अक्षिणी यस्मिंस्तत् पुलिनतुल्यौ आरोहौ जघने ताभ्यां भीषणं बद्धाः सेतव इव भुजौ च ऊरू च अंघ्री च यस्मिंस्तत् शून्यतोयह्रदोदरं जलवर्जितह्रदतुल्यम् उदरं यस्मिंस्तत् ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्या इति ॥ अतिगभीरमत्यन्तं गभीरं रंहो वेगो यस्य तेन, तस्याः स्वनेन, साद्रिः सपर्वता, मही भूमिः, सग्रहा ग्रहैः सह वर्त्तमाना, द्यौः द्युलोकश्च, चचाल। रसा रसातलानि, दिशश्च प्रतिनेदिरे प्रतिध्वनुः। जनाः, वज्रनिपातशङ्कया, क्षितौ पेतुर्व्य-

पतन् ॥ १३ ॥ निशाचरीति ॥ इत्थमुक्तप्रकारेण, व्यथितौ पीडितौ स्तनौ यस्याः सा, निशाचरी पूतना, व्यादाय मुखं वितत्य, केशान् शिरोरुहान्, चरणौ, भुजौ अपि, गोष्ठे व्रजे, प्रसार्य, निजरूपम् आस्थिता, व्यसुः गतप्राणा सती, हे नृप, वज्राहतः वज्रेण प्रहृतः, वृत्रो वृत्रासुर इव, अपतत् ॥ १४ ॥ पतमान इति ॥ तद्देहस्तस्याः पूतनायाः, देहः कलेवरं, पतमानः पतन् सन्नपि, त्रिगव्यूत्यन्तरद्रुमान् षट्क्रोशवर्त्तिनो भूरुहान्, चूर्णयामास चूर्णीचकार। हे राजेन्द्र, तच्छरीरं, महदद्भुतं, आसीत् ॥१५॥ अद्भुतत्वमेव दर्शयितुं तद्रूपं विशिंषन्, तद्वीक्ष्य गोपा गोप्यश्च बिभियुरित्याहेषेति त्रिभिः ॥ ईषेति ॥ ईषा लाङ्गलदण्डः तत्प्रमाणा उग्रा दंष्ट्रा यस्मिंस्तदास्यं यस्मिन् तत्, गिरिकन्दरे इव नासिके यस्मिन् तत्, गण्डशैलवदुन्नतौ पृथू च स्तनौ यस्मिन् तत्, रौद्रं भीमं, प्रकीर्णा अरुणाश्च मूर्द्धजाः केशा यस्मिन् तत् ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पतमान इति : १०. ६. १४.

निर्विषां तां यथा चक्रे प्रभुर्निर्विषयामपि । देहोऽतिविषयस्थोऽभूत् तद्धेतुः पूर्वसंस्कृतिः ॥ ४६ ॥
नाप्रत्यक्षं प्रमाणं न च जगति परः कोऽपि देहातिरिक्तः स्वात्मा देहोऽयमित्थं भ्रमितमतिमतान्येव षट् तत्स्वरूपः ।
देहोऽर्वाक् पूतनायास्तदनु निपतितः पूर्वरूपावलम्बी षट्क्रोशेष्वेव भङ्क्त्वा विमतमततरून् स्पष्टदृष्टेशरूपः ॥ ४७ ॥

कृष्णप्रिया

राजन्, इस प्रकार स्तनों की व्यथा से पीड़ित राक्षसी मरने के अवसर अपना गोकुल में अपने असली रूप पाकर, केश—चरण एवं हाथों को फैलाकर वज्र से मरे हुए वृत्रासुर के समान, गिर गई और उसका मुंह भी फट गया ॥ १३ ॥ राजेन्द्र परीक्षित ! गिरते गिरते पूतना के शरीर ने छः कोस के घेरे में आये हुए वृक्षों को चूर्ण कर दिया, यह बड़ा आश्चर्यकर कार्य हुआ ॥ १४ ॥ प्रथम तो पूतना के (गिरने और रोने के) कठोर शब्द से गोप और गोपियाँ के हृदय कर्ण—और मस्तक विदीर्ण हो गये और उसके मुंह में हल के समान लम्बी और भयानक दाढें, पर्वत की गुफा के समान नाक, पर्वत से गिरी बड़ी बड़ी शिलाओं समान स्तन बिखरे हुए लाल केश, जल रहित अन्ध कूप जैसे गहन नेत्र, नदी के करारों के समान भीषण जंघाएं, बद्ध पुल के समान भुज घुटने और पांव, जल रहित शुष्क तालाब समान पेट से ॥ १५-१६ ॥

संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरम् । पूर्वं तु [1]तन्निस्वनितभिन्नहृत्कर्णमस्तकाः ॥ १७ ॥
बालं च तस्या [2]उरसि क्रीडन्तमकुतोभयम् । गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसम्भ्रमाः ॥ १८ ॥
यशोदारोहिणीभ्यां ताः समं बालस्य [3]सर्वतः । रक्षां विदधिरे सम्यग्गोपुच्छ[4]भ्रमणादिभिः ॥ १९ ॥
गोमूत्रेण स्नापयित्वा पुनर्गोरज[5]सार्भकम् । रक्षां [6]चक्रुःसशकृता द्वादशाङ्गेषु नामभिः ॥ २० ॥

कर्दमक्षमा

अन्वयः—गोपाः गोप्यः पूर्वं तु तत् निस्वनितभिन्नहृत्कर्णमस्तकाः तत् कलेवरं वीक्ष्य सन्तत्रसुः स्म ॥ १७ ॥ जातसम्भ्रमाः गोप्यः तूर्णं समभ्येत्य तस्याः उरसि क्रीडन्तं च अकुतोभयम् बालं जगृहुः ॥ १८ ॥ ताः यशोदारोहिणीभ्यां समं बालस्य सर्वतः गोपुच्छभ्रामणादिभिः सम्यक् रक्षां विदधिरे ॥ १९ ॥ गोमूत्रेण पुनः गोरजसा अर्भकं स्नापयित्वा द्वादशाङ्गेषु सशकृता नामभिः रक्षां चक्रुः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पूर्वमेव तस्याः शब्देन भीताः पुनर्दर्शनेनातितत्रसुरित्याह । पूर्वं त्विति । तस्या निःस्वनितं शब्दस्तेन निर्भिन्नानि हृत्कर्णमस्तकानि येषां ते ॥ १७–१९ ॥ द्वादशांगेषु ललाटादिषु केशवादिद्वादशनामभिः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्कलेवरं वीक्ष्येति संबंधः ॥ १७ ॥ तूर्णं शीघ्रम् । जातसंभ्रमाः जातसंवेगाः "संभ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि" इति मेदिनी। क्रीडंतं हस्तपादनर्त्तनादिना क्रीडां कुर्वंतम् । गोप्यः श्रीयशोदा सवयस्का यशोदारोहिण्यौ मोहव्याप्ते परित्यज्य

---

१. तन्निः स्वनित—श्रीधर. गिरि. भक्त ; तन्निःश्वसित—वीर. ; तन्निस्वनित—वंशी. । २. उपरि—इति कस्यचित् । ३. सर्वशः—जीव. विश्व. । ४. भ्रामणादिभिः—इति कस्यचिद् पाठः । ५. सा सुतम्—इति कस्यचित् । ६. चक्रुश्च शकृता—श्रीधर. वंशी. जीव. वीर. विश्व. गिरि. भक्त. ।

मातृवत्स्नेहाकुला मृतपूतनादेहात्कृष्णमुत्तार्य गृहमानिन्युः ॥ १८ ॥ समं सार्द्धम्। सर्वशः सर्वप्रकारेण। रक्षाविधाने यशोदारोहिण्योरप्राधान्यं तु शोकाविष्टत्वात्तयोस्तत्राशक्तेरिति ज्ञेयम् ॥ १९ ॥ आदिना सर्षपनिर्मंछनसूर्पस्पर्शादिग्रहः। प्रकारमेवाह—गोमूत्रेणेत्यादि। गोशकृता गोमयेन। 'शकृते' इति पाठे गोरिति शेषः। द्वादशांगेषु द्वादशतिलकस्थानेषु। नामभिस्तत्तत्तिलकविहितैः। तथाहि "ललाटे केशवः पातु नाभौ नारायणोऽवतु। माधवः पातु हृदये गोविंदः कंठतस्त्वधः। दक्षकुक्षौ तथा विष्णुस्तद्भुजे मधुसूदनः। त्रिविक्रमस्तु तत्कंठे वामकुक्षौ तु वामनः। श्रीधरो वामबाहौ च हृषीकेशस्तु तद्गले। कट्यां वै पद्मनाभस्तु ककुदामोदरोऽवतु" इति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ बालहरणवृत्तं जानत्यः श्रीयशोदानिकटस्था गोप्यस्तु मोहव्याप्ते श्रीयशोदारोहिण्यौ परित्यज्य विद्रुतास्तन्मृतकदेहात्तं बालं गृहीत्वा गृहमानीतवत्य इत्याह—बालं चेति। तत्र बालमिति तथापि तल्लीलामात्राविष्कारेण तासां तद्बुद्ध्या च स्नेहवृद्धिः सूचिता बालत्वादेवाकुतोभयं वस्तुतस्तु न कुतोऽपि भयमन्येषामपि यस्मात्तम् अत एव तस्या उरसि क्रीडन्तं सहसावलोकपूर्वकश्रीहस्तपादनर्त्तनादिना क्रीडां कुर्वन्तम् अत एव जातः सम्भ्रमो विस्मयो हर्षावेगो वा यासां तथाभूताः सत्यः साक्षात् पतितपूतनामहोच्चदेहारोहणेऽप्यतिर्यक्तयाऽभिमुखं गत्वा जगृहुः यतो गोप्यः श्रीकृष्णे सहजस्नेहाकुलत्वेन प्रसिद्धाः तेनैव सर्वशक्तिमत्यश्चेत्यर्थः। तथैव न्यासादितत्त्वज्ञानमपि वक्ष्यते एता हि प्रायः श्रीव्रजेश्वरीसवयस्का ज्ञेयाः मातृवत् स्नेहेन रक्षाद्याचरणात् ॥ १७-१८ ॥ बालस्येति, स्नेहभरेण तादृशरक्षायोग्यत्वं बोधयति। एवमग्रेऽपि यशोदारोहिणीभ्यां सममिति तयोः प्राक्पुत्रारिष्टशङ्कयाऽतिव्याकुलत्वेन किञ्चित्कर्त्तुमशक्तेस्तत्राप्राधान्यात् साहित्यञ्च तयोः सम्यक् शोकोपशमनार्थं ज्ञेयं सर्वश इति बह्वर्थात्कारकात् माङ्गलिकार्थोऽयं शस्प्रत्ययः बाह्याभ्यन्तरादिभेदेन सर्वत्रैवेत्यर्थः। सम्यगुत्तमप्रकारं यथा स्यात् आदिशब्देन सर्षपनिर्मञ्छनसूर्पकोणस्पर्शनादीनि ॥ १९ ॥ सम्यक्त्वमेव दर्शयति—गोमूत्रेणेति। ललाटादिद्वादशाङ्गेषु केशवादिद्वादशनामभिः शकृता गोमयेन रक्षां चक्रुः तानि च विविच्योक्तानि पाद्मोत्तरखण्डे तिलकनिर्माणविधौ—

"ललाटे केशवं ध्यायेन्नारायणमथोदरे। वक्षःस्थले माधवं तु गोविन्दं कण्ठकूपके ॥
विष्णुं च दक्षिणे कुक्षौ बाहौ च मधुसूदनम्। त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके ॥
श्रीधरं वामबाहौ तु हृषीकेशं तु कन्धरे। पृष्ठे तु पद्मनाभं च कट्यां दामोदरं न्यसेत्" ॥ इति

एवं सहजपरमवैष्णवतया श्रीभगवन्नामभिरेव रक्षाविधिः कृत इति ज्ञेयम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

बालमिति तस्मिन् बालबुद्ध्या तासां स्नेहभरः सूचितः। न कुतोऽपि भयमन्येषामपि यस्मात्तम्, अत एव तस्या उरसि क्रीडन्तं सहासावलोकपूर्वकश्रीहस्तपादनर्त्तनादिना क्रीडां कुर्वन्तम्; यद्वा, न जातं कुतोऽपि तन्महानादादेर्भयं यस्य तथाभूतञ्च, अत एव जातः सम्भ्रमो विस्मयो हर्षावेगो वा यासां तथाभूताः सत्यः सम्यक् पतितपूतना महोच्चदेहारोहणेऽप्यतिर्यक्तयाभिमुखं गत्वा जगृहुर्यतो गोप्यः सहजस्नेहाकुलाः सर्वशक्तिमत्यश्चेत्यर्थः। एता हि प्रायः श्रीव्रजेश्वरीसख्यो ज्ञेयाः, मातृवत् स्नेहेन रक्षाद्याचरणात् ॥ १८ ॥ बालस्येति स्नेहभरेण तादृशरक्षायोग्यत्वं बोधयति; एवमग्रेऽपि। यशोदारोहिणीभ्यां सममिति तयोः प्राक्पुत्रानिष्टशंकयातिव्याकुलत्वेन किञ्चित् कर्त्तुमशक्तेस्तत्राप्राधान्यात्, साहित्यञ्च तयोः सम्यक् शोकोपशमनार्थं ज्ञेयम्। सर्वश इति द्रव्यभेदेन बाह्यान्तरादिभेदेन च सम्यगुत्तमप्रकारं यथा स्यात्। आदिशब्देन सर्षपनिर्म्मञ्छनपूर्वकोणस्पर्शनादीनि ॥ १९ ॥ सम्यक्त्वमेवाह—गोमूत्रेणेति ललाटादिद्वादशांगेषु केशवादिद्वादशनामभिः शकृता गोमयेन रक्षां चक्रुः। तानि च विविच्योक्तानि पाद्मोत्तरखण्डे तिलकनिर्म्माणविधौ —

'ललाटे केशवं ध्यायेन्नारायणमथोदरे। वक्षस्थले माधवन्तु गोविन्दं कण्ठकूपके ॥
विष्णुञ्च दक्षिणे कुक्षौ बाहौ च मधुसूदनम्। त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके ॥
श्रीधरं वामबाहौ तु हृषीकेशन्तु कन्धरे। पृष्ठे च पद्मनाभञ्च कट्यां दामोदरं न्यसेत् ॥' इति।

एते च क्रमेण मार्गादिद्वादशमासाधिपाः। यद्यपि बहवोऽन्ये रक्षाविधयः सन्ति, तथापि सहजपरमवैष्णवतया श्रीभगवन्नामरक्षाविधिरेव ताभ्यो रोचत इति तथैव रक्षाञ्चक्रुः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्कलेवरं वीक्ष्य गोपा गोप्यश्च सन्तत्रसुः, कथम्भूताः? पूर्वं पूतनात्पूर्वं तस्याः निश्वसितं शब्दः निश्वासमारुतो वा तेन भिन्नानि हृदादीनि येषां तथाभूताः ॥ १७ ॥ तथा तस्य उपरि क्रीडन्तं न कुतोऽपि भयं यस्य तं बालं च वीक्ष्येति पूर्वेणान्वयः जगृहुरित्युत्तरेण वा तूर्णं यथा तथा समभ्येत्य जातः तस्या मरणाद्बालस्य जीवनाच्च जातः सम्भ्रमो यासां ता गोप्यः जगृहु-

राददुः ॥ १८ ॥ ततस्ता गोप्यो यशोदारोहिणीभ्यां सह बालस्येश्वरस्य श्रीकृष्णस्य गोपुच्छभ्रमणादिभिरुपायै रक्षां चक्रुः ॥ १९ ॥ तदेव प्रपञ्चयति गोमूत्रेणेत्यादिना । आदिशब्दग्राह्यान्या दर्शयति—गोमूत्रेणेति । तावच्छिशुं गोमूत्रेण स्नापयित्वा ततो गोरजसा च स्नापयित्वा गोशकृता गोमयेन द्वादशस्वङ्गेषु द्वादशपुण्ड्रस्थानेषु ललाटादिषु केशवादिभिर्द्वादशनामभिः रक्षाञ्चक्रुः ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सन्तत्रसुः भीता अभूवन् तस्याः निःस्वनितेन अशनिवत् क्रूरशब्देन भिन्नानि हृत्कर्णमस्तकानि यासां तास्तथा ॥ १७ ॥ तूर्णं शीघ्रम् ॥ १८–१९ ॥ गोरजसा गोरेणुना गोशकृता गोमयसहितेन केशवादिनामभिः ललाटादिद्वादशावयवेषु ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रीयशोदाद्योरप्राधान्यं शोकवैवश्येन ॥ १७–२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उरसि पर्वतवदुत्तुङ्गे क्रीडन्तं प्रवेष्टुं सूतिकागारमनीशानां वनौकसां दिदृक्षापूर्तय इव निष्क्रान्तं स्वपुराद्बहिः ॥ १८ ॥ रक्षाविधाने यशोदारोहिण्योरप्राधान्यं तयोः शोकोत्थवैयग्र्यातिशयेन सर्वशः सर्वेष्वङ्गेषु आदिशब्देन सर्षपनिर्मञ्छनसूर्पकोणस्पर्शादीनि ॥ १९ ॥ शकृता गोमयेन द्वादशाङ्गेषु ललाटादिषु नामभिः केशवाद्यैः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्तस्याः कलेवरं शरीरं तत्तस्याः निःस्वसितेन शब्देन निर्भिन्नानि हृत्कर्णमस्तकानि येषां ते ॥ १७–१८ ॥ समं सहिताः ॥ १९ ॥ नामभिः केशवादिभिः द्वादशाङ्गेषु ललाटादिषु ॥ २० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एवमुद्विग्नानां व्रजौकसां स नन्दबालः सद्यः प्रमोदकृद्बभूवेत्याह—बालमिति । उरसि शैलवदुत्तुङ्गे सूतिकासदनं प्रवेष्टुमनीशानां व्रजौकसां दिदृक्षितदृशां प्रमोदाय हरेः पुराद्बहिर्निर्गमस्तेन कंसमन्त्रिण्या महाबलायाः पूतनायास्तयैव सदारामस्य च विनाशस्तस्याद्योटितश्चेति प्रकरणस्य भावः ॥ १८ ॥ शोकवैयग्र्येण यशोदाद्यो रक्षाविधावप्राधान्यात्तृतीया "सहयुक्तेऽप्रधाने" (२।३।१९) इति पाणिनिः आदिशब्दात् सर्षपनिर्मञ्छनसूर्पकोणस्पर्शनादीनि ॥ १९ ॥ शकृता गोमयेन द्वादशस्वङ्गेषु ललाटादिषु केशवाद्यैर्दामोदरान्तैर्द्वादशभिर्नामभिः तानि च पाद्मे तिलकविधावुक्तानि—

"ललाटे केशवं ध्यायेन्नारायणमथोदरे । वक्षस्थले माधवन्तु गोविन्दं कण्ठकूबरे ॥
विष्णुञ्च दक्षिणे कुक्षौ बाहौ च मधुसूदनम् । त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके ॥
श्रीधरं वामबाहौ तु हृषीकेशन्तु कन्धरे । पृष्ठे च पद्मनाभञ्च कट्यां दामोदरं न्यसेत् ॥"

इति भगवन्नामभिरेव रक्षाविधानाच्छुद्धं वैष्णवत्वं व्यक्तम् ॥ २० ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

गोप्य इति । अत्र बीजन्यासमित्यत्र व्याख्यातृभिरस्पष्टाक्षरन्यासमिति व्याख्यातम् । अष्टाक्षरस्य वैदिकत्वेन स्त्र्यनधिकारिकत्वाद्गोपीनां च कर्तृत्वाद्विरोधोऽत उच्यते । प्राहुरप्युत्तमस्त्रीणामधिकारं तु वैदिके इत्युक्तेः । देवस्त्रीणां गोपीरूपत्वेनावतीर्णत्वादुत्तमत्वेनाधिकारसद्भावात् । वस्तुतस्तु गोप्यः ॥ १७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अन्धकूपवद्गभीरे अक्षिणी यस्य तत्पुलिने इव विद्यमानौ च तावारोहौ नितम्बौ च ताभ्यां भीषणमारोहो दैर्ध्यमानयोः । आरोहणो नितम्बे चेति विश्वः । बद्धा ये सेतवस्तद्वद्विद्यमाना भुजौ चोरू चाङ्घ्री यस्य तच्छून्यं तोयं यस्मिन्स चासौ ह्रदश्च तद्वद्विद्यमानमुदरं यस्य तत् ॥ १७ ॥ गोपा गोप्यश्च तत्कलेवरं वीक्ष्य सन्तत्रसुः स्म । अनिन्दंश्च मनसा । स्म पादपूरणेऽतीते सामिनिन्दार्थयोर्मतमिति विश्वः । स्मातीतं गतप्राणमिति वा । पूर्वं तु पूर्वमेव तस्या निःश्वसितेन शब्देन भिन्नं हृत्कर्णमस्तकं याश्च ये चेति येषां ते तथा ॥ १८ ॥ बलवतामियं दशा चेत्का बालकाशेत्यत आह । बालं चेति । तस्या उरसि क्रीडन्तमकुतोभयं न विद्यते कुतोऽपि भयं यस्य सोऽकुतोभयः । मयूरव्यंसकादिः समासः । जातसम्भ्रमा मुहुः उः उत्क्रुष्टोऽसीति जातसम्भ्रमा जगृहुर्जातादरास्तूर्णं समभ्येत्य बालं जगृहुः ॥ १९ ॥ गोपुच्छभ्रमणं भ्रामणमादिर्येषां तैः क्रियाविशेषैः ॥ २० ॥

श्रीसुबोधिनी

अत एव तादृशावयवैर्बिभीषिका जातेत्याह सन्तत्रसुरिति सम्यक् तत्रसुर्भीताः स्मेति प्रसिद्धे, भगवत्सान्निध्याद् भयाभावमाशङ्क्य प्रमाणं कथयन्नाह संवीक्ष्येति, प्रथमत अज्ञानान्न तथा भयं सम्यग्दर्शने तु भयं जातमिति, गोपा गोप्यश्च इति, तेषां

मुग्धभावेन सम्यग्दर्शनप्राप्तिर्निरूपिता, **कलेवरं** मृतशरीरं, नन्वेतावत्कालमदर्शनं कुतस्तत्राह **पूर्व**मिति, तस्या **निस्वनितेन** रोदनेन **भिन्नानि हृदयकर्णमस्तकानि** येषां, तामसभूयिष्ठत्वात् त्रिविधावयवाः सर्वत्र निरूप्यन्ते ॥ १७ ॥ एवं तस्या रूपं सकार्यं निरूप्य स्वापेक्षया भगवन्तमुत्कृष्टं दृष्टवन्त इति वक्तुं भगवन्तं पूतनाहृदये स्थितं वर्णयति **बाल**मिति, एतावतीं पूतनां मारयिष्यन्नपि न स्थूलरूपं कृतवान् , अत एव कृष्णावतारचरित्रमत्यलौकिकं, अवस्थासाधनविरुद्धकार्यत्वात् **च**कारात् **बालं ददृशुः पूतनां च** चस्त्वर्थे वा स्वसमानधर्मव्यावृत्त्यर्थं, **तस्या उरसि क्रीडन्त**मिति सर्वेषां हृदयेन्तर्बहिरपि क्रीडतीति सूचितं, न हि तल्लोकदृष्ट्या क्रीडास्थानं भवति नापि मुग्धभावेन क्रीडा तथा सत्यपरिचितदर्शने भयाविष्कारं कुर्यात् , तत् तु नास्तीत्याह **अकुतोभय**मिति, "संवीक्ष्य तत्रसुरिति" पूर्वेणैव सम्बन्धः, **दृष्ट्वे**त्येव वा, त्रासस्य भिन्नविषयत्वापत्तेः, कलेवरदर्शने त्रासः स्वविषयकः, भगवद्दर्शने तु भगवद्विषयकः ।१७½।

इत्येवं दृष्ट्वा यत् कृतवत्यस्तदाह **गोप्य** इति, **गोपापेक्षया गोपीनां स्नेहः साहसं वाधिक**मिति ता एव ग्रहीतुं प्रवृत्ताः, अत एवाविचारेण **तूर्णमभ्येत्य जगृहुः**, भगवद्ग्रहणानन्तरं **जातसम्भ्रमा** जाताः पूतनादेहं दृष्ट्वा भगवत्सम्बन्धं च महानयमुत्पात इति मनसि सञ्जातभया जाताः ॥ १८ ॥ ततः स्वातन्त्र्येण किञ्चित् कर्तुमशक्ता यशोदारोहिणीभ्यां सहिता जाताः, यशोदारोहिण्योः स्त्रीप्रकृतिकत्वाद् **गोपी**नामग्निकुमारत्वेनर्षित्वाद् **गोपा**नां तत्तदभिमानिदेवत्वात् , तत्रापि केवलभगवदुपासकानां गोपसम्बन्धरहितत्वादुपायमन्त्रद्रष्टृत्वेन प्रसिद्धा इति **ता** इत्युक्तं, **यशोदारोहिणीभ्यां समं बालस्ये**ति वा सम्बन्धः, सहार्थे **सम**शब्दः, **सम**मित्यव्ययं, ननु भगवानयमिति ज्ञात्वा कथं रक्षां चक्रुस्तत्राह **बालस्ये**ति, यतो भगवान् **बालभावं** प्राप्तः, अतो यथान्य उपचारास्तथैतदपि कर्तव्यमित्यर्थः, **सर्वत** इति, अन्तर्बहिः केनाप्यंशेन यथानिष्टसम्बन्धो न भवति तथा, **रक्षां** कर्मविशेषं मन्त्राभिमन्त्रणरूपं, **विदधिरे** कृतवत्यः, **सम्य**गित्याधिदैविकप्रकारेण तत्तद्दैवतं तत्रतत्र स्थापितवत्य इत्यर्थः, आदौ स्थितस्य दैत्यसम्बन्धस्य परितो वा विद्यमानस्याधिभौतिकादित्रितयस्य निवृत्तिं **गोपुच्छभ्रामणादिभिः** कृतवत्यः, आधिभौतिकमनिष्टं तीर्थस्नानादिना गच्छति, **गवां पुच्छेषु तीर्थानि सन्ति,** तेषां भ्रामणे मन्त्रेण तत्रत्यानि तीर्थानि परितः स्थापितानि भवन्ति, **आदि**शब्देन मन्त्रध्याने अपरयोर्निवर्तके ॥ १९ ॥ एवमेकप्रकारेण बाह्यतो रक्षा कृता लोकसिद्धा परम्परया प्राप्ता, आर्षज्ञानेनापि सिद्धां रक्षामाह **गोमूत्रेणे**ति, बालकं तथैव **गोमूत्रेण स्नापयित्वा** पुनर्गवामागतानां सम्मुखं **खुरोद्धरजसा स्नापयित्वा,** आर्द्रे शरीरे रजः सर्वत्र सम्बद्धं भवतीति पुनःस्नानं, ननु कथं भगवति संस्काराः क्रियन्त इत्याशङ्क्याह **अर्भक**मिति, पूर्वं केवलमन्त्रेण कृता रक्षा, इदानीं सद्रव्येणेति रक्षायां विशेषः, **सशकृता गोरजसे**ति गोमयेन सहिता गोखुरमृत्तिका पुनरङ्गेषु स्थापिता, **द्वादशाङ्गानि** भवन्ति पुरुषे "द्वे सक्थी" इत्यादिश्रुतेः, स्मार्तानि वा, "ललाटं बाहुमूले च हृदयं नाभिपार्श्वकं कण्ठः स्कन्धौ कटिर्मूर्धा स्तनौ चेति विदुर्बुधाः", **नामभिः** केशवनारायणमाधवगोविन्दविष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेशपद्मनाभदामोदरेति ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

ननु पूर्वमात्मभूषणकर्त्रीभिः प्रियतमे गोमूत्रसम्बन्धः कथं कारितस्तत्राह **अर्भक**मिति। प्रिये दुष्टसम्बन्धज्ञानेनातिकातर्येण सर्वविस्मृतिर्यथाकथञ्चिदमंगलानि वृत्त्याशंसा च स्नेहस्वाभाव्यादवश्यं सदैव भवितुमुचिता, किं पुनरर्भकभावापन्न इति ज्ञापयितुमर्भकपदम्। मूले अयमेवार्थो 'ननु कथ'मित्यादिना पितृचरणैरुक्त इति ज्ञेयम्। नन्वितरार्भकवत्तत्कालोचितरूपदर्शनाभिप्रायेण तदुक्तमिति शङ्कनीयम्। क्रीडन्तमकुतोभयमिति पदेन पूर्वमेव तन्निरासात्। ननु स्नेहवशाद्रक्षाकृतिरिति सत्यम् , परन्तु तस्या उपयोग क्वेति विचारणीयम्। न च दोषाभावे, तेषामेवाभावात्। न च तदारोपाभावे, भ्रममूलकत्वापत्त्या रक्षाया अप्रामाणिकत्वापत्तेः। एवं सति भक्तिमार्गीयभजनमात्रस्य तथात्वापत्त्या महानेवानर्थश्च स्यात्। स्नेहस्य भ्रमजनकत्वेन दोषापत्तिश्च। न चैवमपि वक्तुं शक्यम् , सर्वप्रमाणविरोधात्। न च प्रमाणानामन्यपरत्वम्। स्नेहस्यैव भक्तिपदार्थत्वेन विवृतत्वात् सर्वत्र। नन्वत्र यथाकथञ्चिन्निरोध एव साध्यः। रक्षाकृत्या चासक्तिविशेषरूपः स सिद्ध इति न किञ्चिदनुपपन्नमिति चेत् , एवं सति देहाद्यध्यासरूपाज्ञानमूलकत्वेन स्रक्चन्दनादिसुखस्य हेयत्वं यथा, तथा लीलारसस्याप्यज्ञानमूलकत्वेन तथात्वं स्यात्। मोक्षाद्प्याधिक्यं भक्तौ तत्र तत्र निरूप्यत इति न तथा वक्तुं शक्यं चेत्युभयतः पाशारज्जुरिति चेत्। अत्रेदं प्रतिभाति। माहात्म्यज्ञानदशायामपि स्नेहजो भावो दृश्यत इति नाज्ञानमूलकत्वं वक्तुं शक्यम्। तदुक्तं देवकीस्तुतौ, 'रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां त्वं कृषीष्ठा' इत्युपक्रम्य 'समुद्विजे भवद्धेतोः कंसादहमधीरधी'रित्यादि। एवं सति ज्ञानभक्त्योर्युगपत्सत्त्वेपि स्नेहकार्यस्यैव सम्भवेन स्नेहस्य ज्ञानमार्गीयज्ञानाद्बलिष्ठत्वं ज्ञायते। तथा च 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इत्यादिश्रुतिभ्यः शास्त्रीयज्ञानपूर्वकभगवत्साक्षात्कारवति भ्रमसम्भावनापि न कर्तुं शक्या, अतः स्नेहजभावस्य न भ्रमत्वमिति सर्वथा मन्तव्यम्। तथा सति विषयाबाधश्च वाच्यः। प्रकृतेऽपि 'पतिं द्रष्टुमागतां श्रियममंसते'ति वाक्याद्भगवत्त्वेन ज्ञानवतीभिरेव रक्षा कृतेति ज्ञायते। एवं सति यथैकस्मिन्नेव पुरुषे पुत्रत्वभाववत्याः स्त्रियास्तद्दर्शने वात्सल्योत्पत्तिः स्वपोषणपुष्टत्वपोष्यत्वादिज्ञानस्य च, पतिभाववत्या विनयविशेषपूर्वकरसभावो ममैहिकपारलौकिकनिर्वाहक इति च भाव उत्पद्यते। जारभाववत्यास्तु तत्प्रत्यङ्गेषु स्वरसपोषकत्वज्ञानेन प्रौढिपूर्वकविविधरसभावविशेषोत्पत्तिस्तदनुरूपभावाः पुंस्यप्युत्पद्यन्ते। न ह्युक्तभावविषया धर्माः पुंस्यसन्त इति वक्तुं शक्यम् , अनुभवविरोधात्। तथा च तत्र विद्यमाना अपि धर्मास्तत्तद्भावैकगम्यत्वेन

तत्तद्भाववतीनामेव विषयास्तथा स्नेहभावे सत्येव ये धर्मा भगवन्निष्ठाः स्फुरन्ति ते तत्र सन्त एव तादृगेकवेद्या एव तथेति न भ्रमत्वशङ्कापि। यथा 'न चान्तर्न बहिर्यस्ये'ति श्लोकोक्तधर्मवत एव दाम्नावच्छिन्नत्वम्, तथा लोकविलक्षणत्वेन माहात्म्यज्ञानजनकत्वेन ज्ञानप्रकरणोक्तधर्मविपरीतधर्मा लीलारूपा अपि प्रभौ सन्तीति नानुपपत्तिः काचित्। अत एव 'अतृप्तमुत्सृज्य जवेन सा ययो'वित्युक्तं शुकैः, अन्यथा 'न चान्त'रित्यादिधर्मवतः स्तन्येन तृप्तिस्तदप्राप्त्या चातृप्तिर्विरुद्धा नोक्ता स्यात्। किञ्च। शास्त्रं हि यथाधिकारं ब्रह्मस्वरूपं निरूपयति। ज्ञानमार्गीयेभ्यो भक्तिरसादानान्मोक्षमात्रदानाच्च रसात्मकब्रह्मधर्मबोधने प्रयोजनाभावान्नैतान् धर्मान् ज्ञानमार्गे निरूपयति। नह्येतावता तदतिरिक्तधर्माभावः सिध्यति। येषु तज्ज्ञापनप्रयोजनमस्ति तान् ज्ञापयतीति व्रजसीमन्तिन्यादिषु तद्ज्ञापनम्। ते च ब्रह्मधर्माः स्नेहे जाते स्वत एवानुभूयन्त इति फलरूपत्वेन साधनमार्गे तदकथनं युक्तं च। ज्ञानकर्मादीनां विहितत्वेन साधनमार्गीयत्वात्। ननु ज्ञानमार्गस्याक्षरविषयत्वेन तथात्वस्य युक्तत्वेपि भक्तिमार्गीयेष्वपि केषाञ्चिन्मुमुक्षूणामुक्तधर्मास्फूर्तिः स्नेहवतां तु तत्स्फूर्तिः, तत्रापि तारतम्यमिति कथमिति शङ्का 'यथैकस्मिन्नेव पुरुष' इत्यादिना निरस्ता ज्ञेया। यथा प्रत्यासत्तिसाम्येपि न चक्षुषा गन्धादिग्रहोऽयोग्यत्वात्तथात्रापीति ज्ञेयम्। किञ्च 'रसो वै स' इत्यादिश्रुत्या लीलायाः स्वरूपात्मकत्वान्नानुपपत्तिः काचित्। यथैतत्तथा **विद्वन्मण्डने** प्रपञ्चितमस्माभिः। यद्वा। 'तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे' इत्यादिश्रुतौ ब्रह्मणः पावनं श्रूयते। तच्च ब्रह्मात्मकातिशयविशेषप्राकट्यमेव। प्रकृते च 'रसो वै स' इत्यादिश्रुत्या भगवतो रसात्मकत्वात्तस्य च भावात्मकत्वाद्रक्षाकृत्या स्वामिनीभावविशेषरूपातिशयप्राकट्यमभूदिति तत्रैवोपयोगो रक्षाकृतेः। सौन्दर्यविशेषाभिव्यक्तौ मण्डनकृतेरिव। अत एवाधुनापि स्वक्षुत्पिपासादि ज्ञापयति भक्ते हरिः। पूतनातः स्वस्मिन्नानीतानां बालकानामग्रे विनियोगयोग्यतासिद्ध्यर्थं राक्षसीस्पर्शजदोषोऽवश्यं निवारणीय इति स्वामिनीकृतरक्षायास्तन्निवारणमप्येकं प्रयोजनं भगवदभिमतमिति ज्ञेयम्। एकस्या भगवल्लीलाया अनेककार्यसाधकत्वात्॥ २०॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

सन्तत्रसुरित्यस्याभासे**त एवे**त्यादि, **अत एव** नवधाविभीषिकत्वादेतन्नवकत्वेनाविद्यात्वं ज्ञाप्यत इत्यर्थः, यद्वा यतस्तादृशावयवैः सर्वेषां भक्तानां **बिभीषिका** भगवद्विषयकभयजनिका, **मृतशरीर**मिति यद्यपि **कलेवर**पदं **शरीर**मात्रबोधकं तथापि प्रकरणान् मृतत्वेन विशेषितं ज्ञेयं, **तामसे**त्यादि रोदनस्य सात्त्विकोपद्रवकारित्वेन **तामसभूयिष्ठत्वात्** सात्त्विकाश्चिविधावयवाः सर्वत्र भयेषु दुःखित्वेन निरूप्यन्त इत्यर्थः॥ १७॥ **बाल**मित्यत्रो**त्कृष्ट**मिति निर्भयं, **बालश्चे**त्येर्धस्योत्तरेण सम्बन्धमभिप्रेत्य पक्षान्तरमाहुर्दृष्ट्वेत्येव **वे**ति, तथा च **दृष्ट्वे**त्यस्याध्याहारो वा **संवीक्ष्ये**त्यस्यानुषङ्गो वा, एवं व्याख्याने हेतुमाहु**स्त्रासस्ये**त्यादि, तद् व्युत्पादयन्ति **कलेवरे**त्यादि, तथा चैवं विषयभेदलाभादयं पक्ष उत्तम इत्यर्थः॥ १८॥ **यशोदे**त्यस्याभासे **ततः स्वातन्त्र्येणे**त्यादि, ननु मात्रोर्गोपानां च विद्यमानत्वेपि गोपीभिरेव कुतो रक्षाकरणमित्याकाङ्क्षायां मूलस्थस्य **ता** इतिपदस्य तात्पर्यमाहु**र्यशोदारोहिण्यो**रित्यादि, तथा च मात्रोस्तथान्यादेव तासां **ऋषित्वाद् गोपानां चाभिमानित्वेन** प्रेरकत्वात् कासाञ्चित् सम्बन्धराहित्याद् विवक्षितमन्त्रद्रष्टृत्वं तास्वेवातस्तथेत्यर्थः, कृष्णोपनिषच्छ्रुतौ 'गोपान नः स्त्रीश्च नो कु'र्विति भगवन्तं प्रति देवप्रार्थनाश्रावणाद् गोपा गोप्यश्च देवा एव 'गोप्यो गाव ऋचस्तस्ये'ति च तत्रैव श्रावणात् काश्चिदृग्रूपा अपि बृहद्वामनपुराणे तु सामान्यतः 'श्रुतय' इत्युक्त"मग्निपुत्रा महात्मान"इति वाक्य ऋषिरूपत्वमप्युक्तमेवं नानारूपत्वे सत्यग्निपुत्रेषु गोपसम्बन्धित्वं तदसम्बन्धित्वं चेत्युभयमपि कल्पयितुं शक्यं केषाञ्चित् स्त्रीत्वमात्रमेव केषाञ्चिद् भगवत्कर्तृकस्त्रीत्वमित्युभयरूपत्वान्न विरोध इति सुस्थं, **अपरयो**रित्याध्यात्मिकाधिदैविकयोरनिष्ठयोरित्यर्थः॥ १९॥ **गोमन्त्रेणे**त्यत्रार्षज्ञान**सिद्धाया** रक्षायाः किं प्रयोजनमित्याकाङ्क्षायां तत्रोपपत्तिं वदन्तीत्याशयेन **टिप्पण्या**माहु**र्ननु पूर्व**मित्यादि, **अन्यपरत्व**मिति भक्तिपरत्वं, रक्षाया निरोधपरत्वमाशङ्कन्ते **नन्वि**त्यादि, तां परिहरन्त्ये**वं सती**त्यादि, **लीलारसस्ये**ति लीलया कृतस्य भक्तिरूपस्य **रसस्ये**त्यर्थः, सिद्धान्तेन समादधते**त्रे**दमित्यादि, **अत** इति स्नेहस्य ज्ञानापेक्षयाधिक्यात्, **विषयाबाध** इति रक्षा**विषयस्य** बालभावानुरूपस्य धर्मस्येत्यर्थः, "वा प्रकरणभेदात् परोवरीयस्त्वादिव"दितिसूत्रमनुसृत्य समादधते **किञ्च शास्त्र**मित्यादि, सूत्रार्थस्तु भाष्यादवगन्तव्यः॥ २०॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

बालं चेत्यस्याभासे **सकार्य**मिति रूपस्य कार्यं त्राससन्तत्सहितमित्यर्थः, **उत्कृष्ट**मिति भयरहितमित्यर्थः, व्याख्याने, **चकारा**दित्यस्य **पूतनां चे**त्यनेनान्वयः, **संवीक्ष्य तत्रसु**रिति पूर्वेण सम्बन्धोग्रे व्युत्पादस्तत्र **संवीक्ष्ये**ति गौणक्रिया **ददृशु**रित्यनेनात्र विवृतेतिज्ञेयं, तुशब्दार्थकत्वपक्षे चशब्दकथनस्य प्रयोजनमाहुः **स्वसमाने**ति, स्वस्य समानो **धर्म**स्त्रासः, भगवति तदव्याप्त्यर्थमित्यर्थः, **दृष्ट्वेत्येव वेति तत्रसु**रितिपर्यन्तं नान्वयः किन्तु **संवीक्ष्ये**त्यनेनैवान्वयः, तथा च **संवीक्ष्य तर्णं समभ्येत्य जगृह**रित्यग्रिमेणान्वयः, तत्र हेतुमाहु**स्त्रासस्ये**ति, दृश्यमानविषयकस्त्रासो न सम्भवतीति, यथा तत्कलेवरदर्शने **स्वविषयकस्त्रास**स्तथा भगवद्दर्शनेपि भगवद्भिन्नविषयकः स्यात् न तु **भगवद्विषयक** इत्यर्थः, विवक्षितस्तु तत्रैव स्वविषयकोत्र तु भगवद्विषयक इत्याहुः **कलेवरे**ति॥ १८॥ **यशोदारोहिणीभ्यां** सा इत्यत्र पूर्ववाक्यस्थस्य गोप्य इतिपदस्य तच्छब्दं विनापि सान्निध्यादेवानुवृत्ति-

सम्भवात् पूर्वपरामर्षार्थकत्वे **ता** इतिपदमप्रयोजनकं स्यादतः प्रसिद्ध्यर्थकत्वमित्यभिप्रेत्य तां प्रसिद्धिं विवृण्वन्ति **यशोदारोहिण्यो**रिति, एतयारप्राधान्ये हेतुमाहुः **स्त्रीप्रकृतिकत्वा**दिति, गोपसम्बन्धेन प्रसिद्धिबोधकं गोपीपदं विहाय प्रसिद्ध्यन्तरबोधकतच्छब्दकथने हेतुमाहु**र्गोपीना**मिति, अत्र कर्मणि गोप्यो द्विविधाः, कुमारिकाः श्रुतिरूपाश्च, तत्र कुमारिकाणामग्निकुमारत्वेन ऋषित्वान् न गोपसम्बन्धः, श्रुतिरूपाणामपि तथेत्याहुः **गोपाना**मिति, एतेषां **तत्तदभिमा**नयुक्त**देवत्वमेव** न तु वस्तुतः सम्बन्धः, अत एव "**केमाः स्त्रिय**" इत्यस्य द्वितीयव्याख्याने पुत्रोत्पत्त्यादिकं तु सर्वभवनसमर्थादलौकिकप्रकाराद् भगवत एवेत्यादि वक्ष्यते, **तत्रापी**ति श्रुतिरूपास्वपि काश्चिदनन्यपूर्वास्तासां त्वाभिमानिकोपि सम्बन्धो नास्ति, अतः सर्वास्वपि वस्तुतो गोपसम्बन्धाभावान् मान्त्रिकरक्षाकर्मणि च यथार्थप्रसिद्धेरेव वक्तव्यत्वाद् रक्षोपायभूतमन्त्रत्वेन श्रुतिरूपाणां तद्द्रष्टृत्वेनाग्निकुमाराणां प्रसिद्धिं वक्तुं **ता** इतिपदमुक्तवानित्यर्थः, गोपीनां मध्ये कासुचिदग्निकुमारत्वेनर्षित्वादन्यासु च गोपानां तत्तदभिमानिदेवत्वादित्यन्वयः, **उपाये**ति उपायमन्त्रत्वेन द्रष्टृत्वेन चेत्यर्थः, अत्र टिप्पण्यां ननु पूर्वमात्मभूषणकर्त्रीभिः प्रियतमे गोमूत्रसम्बन्धः कथं कारित इत्युक्त्वाच्छ्रुतिरूपा अपि सन्तीतिज्ञेयं, श्रुतिरूपाणां मध्ये मन्त्रभागे येषां येषां मन्त्राणां ये ये देवास्ते ते तासां तासामत्र पतयः, तत्र तत्तन्मन्त्रेषु तेषां तेषामभिमान एव, वस्तुतस्त्वखिलमन्त्राधिपतिर्भगवानेव, ब्राह्मणभागे देवाभावात् तद्रूपा अत्र केवलभगवदुपासका उक्ता इति ज्ञेयं, मात्रोः स्त्रीप्रकृतिकत्वेपि मातृत्वाद् रक्षाकर्मण्यप्राधान्यं नोचितमित्याशयेन पक्षान्तरमाहु**र्यशोदे**ति **इति वा सम्बन्ध** इति, **अपरयोर्निवर्तके** इति आध्यात्मिकाधिदैविकदैत्यसम्बन्धयोरित्यर्थः ॥ १९ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

बालं च तस्येत्यस्य विवृतौ **पूर्वेणैव सम्बन्ध** इति **बालं च संवीक्ष्य** तत्रसुरिति पूर्वेण सम्बन्ध इत्यर्थः, दृष्ट्वेत्येव वेति दृष्ट्वेति **संवीक्ष्ये**त्यस्य पर्याय उक्तो न तु दृष्ट्वेतिपदं मूलेस्ति न वाध्याहार्यं किन्तु संवीक्ष्येतिपूर्वं पदमस्ति तेनैवान्वयः, अस्मिन् पक्षे **तत्रसु**रितिपदपर्यन्तं नान्वयः किन्तु **बालं च तस्या उरसि संवीक्ष्य गोप्यो जगृहु**रित्युत्तरक्रिययान्वयः ॥ १७–१८ ॥ **यशोदारोहिणीभ्यां ता** इत्यस्य विवृतौ **गोपीनामग्निकुमारत्वेने**ति **गोपीनां** मध्ये कासाञ्चिद**ग्निकुमारत्वेने**त्यर्थः, **गोपानां तत्तदभिमानिदेवतात्वा**दिति श्रुतिरूपगोपिकानां ये पतित्वेन प्रसिद्धास्ते तु न पतयः किन्तु श्रुतिमन्त्ररूपा एता गोप्यस्तन्मन्त्राभिमानिदेवरूपा एते गोपाः, पतिस्तु भगवानेव, अत एव टिप्पण्यां 'मन्यमानाः स्वपार्श्वस्था'नितिवाक्यात् स्वपार्श्वस्थाभिमानमात्रं यथा रासोत्सवसमये गोपानां तथा सर्वदैवभोगाद्यभिमानमात्रं न तु वस्तुतो गोपानां स्वपत्नीषु भोगस्तासां भगवदेकभोग्यत्वादितिसिद्धान्तितं सप्तदशाध्यायप्रसङ्गे, तर्हि पुत्राद्युत्पत्तिः कथमिति चेत् , भगवत एवालौकिकप्रकारेणेतिबोध्यं, तर्हि किमर्थं पतित्वेन स्वीकार इति चेत् , परकीयतारसपोषार्थमिति ज्ञेयं, **तत्रापि केवलभगवदुपासकाना**मिति अनन्यपूर्वाणामग्निकुमाराणामित्यर्थः, केचित् तु श्रुतिरूपास्वपि काश्चिदनन्यपूर्वाः सन्ति ताः केवलभगवदुपासका इत्याहुः, तथा च सिद्धमेतत् , अनन्यपूर्वाणामृषिरूपाणां **गोपसम्बन्ध**राहित्यं स्फुटमेव, श्रुतिरूपाणामन्यपूर्वात्वेप्यभिमानमात्रमिति न गोपसम्बन्धः, श्रुतिरूपास्वपि कासाञ्चिदनन्यपूर्वात्वे सुतरां गोपसम्बन्धाभावः, एवं सर्वत्र गोपसम्बन्धाभावसूचनार्थं "यशोदारोहिणीभ्यां ता" इतिश्लोके तच्छब्द उक्तः, अन्यथा न वदेत् , "गोप्यस्तूर्ण"मिति पूर्वपठितेन गोपीपदेनाकाङ्क्षापूर्तेः ॥ १९ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

आगे के श्लोक में इस वस्तु का वर्णन करते हैं **'सन्तत्रसुः'** इति–श्लोक में 'त्रस' पद से जताया कि गोप गोपीजन भयग्रस्त हो गये । अब यह प्रश्न उठता है कि यदि भगवान समीप में विराजते थे तो फिर व्रजजन को भय क्यों ? तब कहते हैं कि **'संवीक्ष्य'** उस पूतना को अच्छी तरह से देखने से डरे । पहले जब तक पूतना के वास्तविक स्वरूप का ज्ञान नहीं था तब तक तो निर्भय थे, लेकिन उसके इस विचित्र भयानक रूप को देखकर डर गये । वास्तविकता का ज्ञान होने पर पूतना के सम्यक् दर्शन का निरूपण किया । अब यह संदेह होगा कि अब तक कलेवर क्यों न देखा ? तब समाधान करते हैं कि 'पूर्वं' पहले तो इसके रोने के शब्द से उन गोप गोपियों के हृदय, कान और मस्तक फट गये थे, कुछ समय तक तो वे निकम्मे जैसे हो गये थे इसलिये कलेवर की तरफ उनका ध्यान न गया । पूतना का रोदन विशेष तामस होने के कारण तीन प्रकार के अवयवों का सर्वत्र निरूपण किया है । यहाँ पर श्री प्रकाश कारजी का मन्तव्य है कि पूतना का रुदन अतिशय तामस था इससे भक्तजनों के मस्तक हृदय कान इन तीन सात्त्विक अङ्गो को दुःख हुआ ॥ १७ ॥

"एवं तस्या रूपं सकार्यं निरूप्य" आचार्य चरण कहते हैं कि इस प्रकार उस पूतना का कार्य सहित रूप का निरूपण कर, अब आगे शुकाचार्य जी कहते है कि गोप गोपियों ने भगवान् को अपने से भी निर्भय देखा । क्योंकि भगवान् ने 'बालं' बालरूप से ही पूतना का वध किया, अपना रूप बड़ा न किया । इसी से निश्चय होता है कि कृष्णावतार के चरित्र अलौकिक हैं । यह स्पष्ट है कि भगवान् कृष्ण के कार्य, आयुष्य एवं साधनों से बालसामर्थ्य से विरुद्ध हैं; बाल सामर्थ्य से पूतना को मारने के लिये सुदृढ युवोचित बड़ी देह से बड़ी आयु और शस्त्रादि साधन होने चाहियें, वे भी नहीं, इन सबके अभाव में बालक रूप से, पूतना जैसी

राक्षसी को मारना, यह चरित्र लौकिक हो नहीं सकता अतः श्री कृष्णचरित्र अलौकिक है। 'च' अव्यय बालक और पूतना दोनों को देखने के लिये दिया गया है अथवा 'च' का भाव यह है कि जैसा भय उनको देखकर गोपियों को हुआ, वैसा भय बालक श्रीकृष्ण जी को न था। श्रीकृष्ण जी तो उसके हृदय पर खेल रहे थे। इससे यह भी स्पष्ट किया कि वह बालक है, बालक का स्वभाव खेलना ही होता है और यह बालक तो सदा सबके हृदय के भीतर बाहर खेलता ही है। इसको सूचित करने के लिये ही पूतना के हृदय पर भी खेलते हुए दर्शन दिये। पूतना का वक्षःस्थल लौकिक दृष्टि से क्रीडास्थान तो नहीं हो सकता था और न मुग्धभाव की क्रीड़ा थी। यदि मुग्ध भाव से होती तो अपरिचित के दर्शन से भय होता परन्तु यहाँ भय तो कुछ नहीं था इसलिये 'अकुतोभयम' सर्वथा निर्भय होकर खेल रहा था ऐसा कहा इधर गोप गोपी डर गये, इनको दो डर हुए एक तो पूतना को देखकर स्वयं को डर हुआ और दूसरे भगवान् को देखकर उनके लिये डर हुआ, न जाने अब बालमुकुन्द का क्या होगा? ऐसा सोचने लगे। पूतना के हृदय पर खेलते हुए श्री बालकृष्ण को देखकर गोपी जनने जो कुछ किया उसका वर्णन इस १८ वें श्लोक के उत्तरार्द्ध से करते हैं। गोपों से भी गोपियों में स्नेह और साहस अधिक है इसलिये वे ही कृष्ण को लाने के लिये प्रवृत्त हुई, कुछ भी विचार न किया और त्वरित जाकर बालकृष्ण को ले आई। भगवान् के ले आने पर गोपियों के मन में विशेष विचार आया कि पूतना की ऐसी भयानक भारी देह से इस छोटे बालक का सम्बन्ध अतिशय उत्पात अमंगल है इससे भय उत्पन्न हुआ ॥ १८ ॥

ततः स्वातन्त्र्येण किञ्चित्कर्त्तुमशक्ताः—अब श्री आचार्य चरण आज्ञा करते हैं कि-गोपीजन लालन को अतिशीघ्र ले आये किन्तु स्वतंत्र रूप से कुछ कर नहीं पाये किन्तु स्वतन्त्रता से तब माता यशोदाजी एवं रोहिणीजी को साथ में लिया। यशोदा एवं रोहिणी दोनों स्त्री प्रकृति वाली थीं, अग्निकुमारत्व से गोपियाँ ऋषिरूपा थीं, गोप तत् तत् मन्त्रों के अभिमानी देव थे, इसलिये उस अवसर पर भी, जो गोप सम्बन्ध रहित होने से केवल भगवान् की उपासिकाएँ थीं एवं रक्षा के उपाय तथा मन्त्र द्रष्टा रूप से उनकी प्रसिद्धि थी उन गोपियों के ग्रहण के लिये शुकाचार्य जी ने श्लोक में "ताः" पद का संकेत किया। अब दूसरे प्रकार से अर्थ करते हैं कि श्री यशोदा जी, श्री रोहिणी जी, एवं गोपीजन ने सब साथ मिलकर बालक की रक्षा की। श्लोक में दिये 'समं' अव्यय 'सह' अर्थ में लिया गया है इससे सब साथ मिलकर रक्षा करने लगे।

'ननु भगवानयमिति ज्ञात्वा' अब कहते हैं कि श्रीकृष्ण प्रभु तो भगवान् है ऐसा जानकर भी रक्षा क्यों की? तब समाधान करते हैं कि श्लोक में **'बालस्य'** पद का प्रयोग है उसका तात्पर्य यह है कि भगवान् होते हुए भी, लोक की तरह लीला करने के लिये, बाल भाव से प्रकट हुए हैं, इसलिए जैसे अन्य जात कर्म आदि उपचार किये जाते हैं वैसे ही यह रक्षा भी कर्त्तव्य है। अब **'सर्वतः'** पद का तात्पर्य बताते हैं कि अन्दर, बाहर किसी भी तरह अल्प भी अनिष्ट न हो इस प्रकार मन्त्रों आदि द्वारा रक्षा करने लगीं। अब **'सम्यक्'** का रहस्य बताते हैं कि आधिदैविक प्रकार से उस देवता को वहाँ स्थापित कर रक्षा की। पहले दैत्य सम्बन्ध से, चारों तरफ रहने वाले आधिभौतिकादि तीन अमङ्गल गो पूँछ आदि घुमाने से दूर किये। आधिभौतिक अनिष्ट तीर्थ स्नानादि से नष्ट होते हैं। अतः गोपुच्छ घुमाये, क्योंकि शास्त्रों में वचन है कि **'गवां पुच्छेषु तीर्थानि सन्ति'** गौओं की पुच्छों में तीर्थ रहते हैं। उनके घुमाए हुए मन्त्र से, पुच्छ स्थित तीर्थ, बालक के चारों ओर शरीर में प्रविष्ट होते हैं जिससे आधिभौतिक अनिष्ट निवृत्त हो जाते हैं। आदि शब्द से, मन्त्र और ध्यान आध्यात्मिक और आधिदैविक अनिष्ट की भी निवृत्ति कर देते हैं ॥ १९ ॥

एवमेकप्रकारेण बाह्यतो रक्षा—अब श्रीवल्लभमहाप्रभुजी ने कहा कि गोपीजनने प्रथम लोकरीति से चली आई पद्धति से बाहर की रक्षा की। अब आर्ष ज्ञान से सिद्ध प्रकार से की हुई रक्षा का वर्णन श्रीशुकाचार्यजी 'गोमूत्रेण' इस श्लोक से कहते हैं।

गोपियों ने प्रथम श्री लालन को गोमूत्र से नहलाया पुनः बन से आती हुई गौओं के खुरों से उड़ी हुई रज से नहलाया तब लालन के आर्द्र श्री अङ्ग पर वह रज चिपक गई, इसलिए पुनः जल से लालन को स्नान कराया। अब प्रश्न होगा कि लालन भगवान है फिर भगवान् के संस्कार क्यों! तब कहा कि यहाँ भगवान के लिए 'अर्भकं' पद दिया है इससे यह नन्हा सा वा मुग्ध बालक है ऐसा जताया। प्रथम रक्षा की विशेषता बताते हुए कहते हैं कि पहले केवल मन्त्रों से रक्षा की गई अब द्रव्यों सहित रक्षा की जाती है। इस प्रकार गोमूत्र एवं गोरज आदि से स्नान कराके अनन्तर गोबर के साथ गौ के खुरों की मृत्तिका लालन के श्री अंगों पर लगाई। पूर्ण पुरुष भगवान् के बारह अंग होते हैं। 'द्वे सक्थी' इतिश्रुतेः 'दो जांघ' आदि यों श्रुति में कहा है। स्मृति में भी कुछ प्रकार भेद से ललाट, दो बाहुमूल, हृदय, नाभि के पास का भाग, कण्ठ, दो कन्धे, कमर, मस्तक, दो स्तन ये प्रकार बताये हैं ऐसा विद्वान् लोग कहते हैं। इन द्वादश अंगों की भगवान् के १-केशव, २-नारायण, ३-माधव, ४-गोविन्द, ५-विष्णु, ६-मधुसूदन, ७-त्रिविक्रम, ८-वामन, ९-श्रीधर, १०-हृषीकेश, ११-पद्मनाभ, १२-दामोदर, इन बारह नामों से रक्षा की। यहाँ श्रीटिप्पणीकारजी कहते हैं कि जिन गोपियों ने प्रभु के

प्राकट्य का श्रवण कर, अपनी आत्मा को भूषित किया उन गोपियों ने अपने प्रियतम प्रभु को गोमूत्र से कैसे स्नान कराया यदि ऐसा संशय हो तो समाधान करते हैं कि अपने प्रिय का दुष्ट राक्षसी के सम्बन्ध से कुछ भी अनिष्ट न हो जाय, इससे स्नान कराया। भगवत् प्राकट्य के माहात्म्य की सब बातें सहज स्नेह के कारण भूल गई, और मनमें यही भावना रही कि हमारे प्रिय बालक स्वरूप की, कैसे भी हम रक्षा करें। इसलिए प्रभु को गोमूत्र से नहलाने में भी संकोच न किया। भगवान् की रक्षा भी स्नेहवश होकर ही की है। भक्तों को भगवान् के माहात्म्य ज्ञान की दशा में भी भगवान में सहज स्नेह रहता है जिससे भक्त ज्ञान को गौण बना कर, स्नेह से सब कुछ करता है। यही ज्ञान से भक्ति की विशेषता है। इससे कहा जाता है कि ज्ञान से भक्ति बलवती है ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'पूर्वं तु तस्याः शब्देनापि भीता' इत्याह —पूर्वं त्विति। तस्याः निस्वनितेन शब्देन भिन्नानि हृदादीनि येषां ते। एतच्चरितं शाखान्तरप्रसिद्धमिति सूचयति– स्मेति ॥ १७ ॥ तस्याः पूतनायाः उरसि अकुतोभयं निर्भयं यथा स्यात्तथा क्रीडन्तं हस्तपादादि चालयन्तं बालं च वीक्ष्य जातः सम्भ्रमः स्नेहौत्कण्ठ्येन त्वराविशेषो यासां ता गोप्यस्तूर्णमेव समभ्येत्य समीपं गत्वा जगृहुरित्यन्वयः। अनेन गोपापेक्षया गोपीनां तस्मिन् स्नेहाधिक्यं साहसं च सूचितम् ॥ १८ ॥ ताः गोप्यो यशोदारोहिणीभ्यां समं सह बालस्य सर्वशः सर्वेष्वङ्गेषु गोपुच्छभ्रमणादिभिः सम्यग् रक्षां विदधिरे इत्यन्वयः। अत्र यशोदारोहिण्योः शोकातिशयेन वैयग्र्यादप्राधान्यं बोध्यम् ॥ १९ ॥ आदिशब्दोक्तानि रक्षासाधनान्तराणि प्रदर्शयन् उक्तां रक्षामेव विवृणोति--गोमूत्रेणेति। अर्भकं बालं गोमूत्रेण स्नापयित्वा पुनर्गोखुररजसा च स्नापयित्वा शकृता गोमयेन केशवादिभगवन्नामभिश्च द्वादशाङ्गेषु तिलकस्थानेषु रक्षां चक्रुरित्यन्वयः। तानि नामानि स्थानानि चोक्तानि पद्मोत्तरखण्डे– 'ललाटे केशवं ध्यायेन्नारायणमथोदरे। वक्षःस्थले माधवं तु गोविन्दं कण्ठकूबरे ॥ विष्णुं च दक्षिणे कुक्षौ बाहौ च मधुसूदनम्। त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके ॥ श्रीधरं वामबाहौ तु हृषीकेशं तु कन्धरे। पृष्ठे च पद्मनाभं च कट्यां दामोदरं न्यसेत्' इति ॥ एवं भगवन्नामभी रक्षाकरणेन तासां सहजं वैष्णवत्वं बोधितम् ॥ २० ॥

अन्वितार्थप्रकाशिका

बालं चेति ॥ तस्याः पूतनायाः उरसि अकुतोभयं निर्भयं यथा स्यात्तथा क्रीडन्तं हस्तपादादि चालयन्तम्। प्रवेष्टुं सूतिकागारमनीशानां वनौकसां दिदृक्षापूर्त्तय इव विनिष्क्रान्तं पुराद् बहिः बालं च वीक्ष्य यशोदारोहिण्यौ च विह्वले दृष्ट्वा जातः सम्भ्रमः स्नेहौत्कण्ठ्येन त्वराविशेषो यासां ता गोप्यस्तूर्णमेव समभ्येत्य समीपं गत्वा जगृहुः ॥ १ ॥ यशोदेति ॥ ताः गोप्यो यशोदारोहिणीभ्यां समं सह बालस्य सर्वशः सर्वेष्वङ्गेषु बह्वर्थान्। मङ्गलार्थं शस्। इति तोषिणी। बहिरन्तश्चेति गोपुच्छभ्रमणादिभिः आदिना सर्षपनिर्मञ्छनशूर्पकोणस्पर्शनादिभिः सम्यक् रक्षां विदधिरे। अत्र यशोदारोहिण्योः शोकव्यग्रतया प्राधान्याभावः ॥ १९ ॥ गोमूत्रेणेति ॥ अर्भकं बालं गोमूत्रेण स्नापयित्वा पुनर्गोखुररजसा च स्नापयित्वा शकृता गोमयेन केशवादिभगवन्नामभिश्च द्वादशाङ्गेषु तिलकस्थानेषु रक्षां चक्रुः। केशवादिनामानि च पाद्मे। "ललाटे केशवं ध्यायेन्नारायणमथोदरे। वक्षःस्थले माधवं तु गोविन्दं कण्ठकूबरे ॥ विष्णुं च दक्षिणे कुक्षौ बाहौ च मधुसूदनम्। त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके ॥ श्रीधरं वामबाहौ तु हृषीकेशं तु कन्धरे। पृष्ठे च पद्मनाभं च कट्यां दामोदरं न्यसेत् ॥" इति। एतेन गोपीनां वैष्णवत्वं बोधितम् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पूर्वं तु तस्याः निस्स्वनितेन शब्देन भिन्नानि उत्कर्णमस्तकानि येषां ते ॥ १७ ॥ उरसि हृदये जातः संभ्रम आनंदभरो यासां ताः तूर्णं शीघ्रम् ॥ १८ ॥ समं ताभ्यां सह सर्वशः सर्वाः ताः गोप्यः बालस्य रक्षाम् ॥ १९ ॥ शकृता गोमयेनेत्यादित्रिभिः तं स्नापयित्वा द्वादशांगेषु पादादिषु अजादिनामभिः रक्षां चक्रुः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्धकूपेति ॥ अन्धकूपाविव गभीरे अक्षिणी यस्मिन् तत् पुलिनवदारोहौ जघने ताभ्यां भीषणं तत्, बद्धा सेतव इव भुजौ ऊरू अङ्घ्री च यस्मिन् तत्, शून्यं तोयं यस्मिंस्तथाभूतो ह्रद इवोदरं यस्मिन् तत् ॥ १७ ॥ संतत्रसुरिति ॥ तदुक्तप्रकारं, कलेवरं पूतनादेहं, गोपाः गोप्यश्च, वीक्ष्य, संतत्रसुः। कथंभूता गोपगोप्यः। पूर्वं पतनात् प्रथमतस्तु, तस्याः निःस्वनितमशनिवत् क्रूरशब्दस्तेन भिन्नानि हृत्कर्णमस्तकानि येषां तथाभूताः, पाठान्तरे तस्या निःश्वासमारुतेन भिन्नानि हृत्कर्णमस्तकानि येषां तथाभूताः ॥ १८ ॥ ॥ बालमिति ॥ तस्या उक्तविधायाः पूतनायाः, उरसि उरःप्रदेशे, क्रीडन्तं, न कुतोऽपि भयं यस्य तं, बालं च, वीक्ष्यति शेषः। गोप्यः, तूर्णं यथा तथा, समभ्येत्य, जातः तस्याः मरणाद्बालस्य जीवनाच्च संजातः संभ्रमो यासां ताः एवंभूताः सत्यः, जगृहुराददुः ॥ १९ ॥ यशोदेति ॥ ततः, ता गोप्यः, यशोदारोहिणीभ्यां, समं सह, बालस्येश्वरस्य, गोपुच्छभ्रमणादिभिः, सम्यक्, सर्वतः, रक्षां विदधिरे चक्रुः ॥ २० ॥

कृष्णप्रिया

उक्त भयंकर कलेवर को देखकर अतिशय भयग्रस्त हो गये ॥ १७ ॥ सम्भ्रमयुक्त गोपियां पूतना के वक्षस्थल पर निर्भय और खेलते हुए लालन श्री बालकृष्ण को शीघ्रता से समीप जाकर उठा आई ॥ १८ ॥ श्री गोपीजन ने यशोदा जी एवं रोहिणा जी के साथ मिलकर गौ की पूँछ घुमाने आदि द्वारा सर्व प्रकार से अच्छी तरह ब लक की रक्षा की । प्रथम लालन को गोपियों ने गो-मूत्र से नहलाया पुनः गोरज से नहला के गोबर और गौ के खुरों की रज से भगवान् के द्वादश नाम लेते हुए द्वादश अंगों की रक्षा की ॥ २० ॥

गोप्यः संस्पृष्टसलिला अङ्गेषु करयोः पृथक् । न्यस्यात्मन्यथ बालस्य [1]बीजैर्न्यासमकुर्वत ॥ २१ ॥
अव्यादजोऽङ्घ्रि मणिमांस्तव जान्वथोरू [2]यज्ञोऽच्युतः कटितटं जठरं हयास्यः ।
हृत् [3]केशवस्त्वदुर ईश इनस्तु कण्ठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम् ॥ २२ ॥
चक्र्यग्रतः [4]सहगदो हरिरस्तु पश्चात् त्वत्पार्श्वयोर्धनुरसी मधुहाजनश्च ।
कोणेषु शङ्ख उरुगाय उपर्युपेन्द्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः समन्तात् ॥ २३ ॥
इन्द्रियाणि हृषीकेशः प्राणान् नारायणोऽवतु । श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु ॥ २४ ॥

कर्दमक्षमा

अन्वयः—गोप्यः संस्पृष्टसलिलाः (प्रथमं) पृथक् अङ्गेषु (पुनः) करयोः आत्मनि न्यस्य अथ बालस्य पृथक् अङ्गेषु करयोः बीजैः न्यासं अकुर्वत ॥ २१ ॥ अजः अङ्घ्रिम् अणिमान् तव जानू अथ यज्ञः उरू अच्युतः कटितटं हयास्यः जठरं केशवः हृत् ईशः उरः इनः तु कण्ठं विष्णुः भुजम् उरुकमः मुखम् ईश्वरः कम् अव्यात् ॥ २२ ॥ चक्री अग्रतः सहगदः हरिः पश्चात् धनुरसी मधुहा च अजनः त्वत् पार्श्वयोः शङ्खः उरुगायः कोणेषु उपेन्द्रः तार्क्ष्यः उपरि हलधरः क्षितौ पुरुषः समन्तात् अस्तु ॥२३॥ हृषीकेशः इन्द्रियाणि अवतु नारायणः प्राणान् अवतु, श्वेतद्वीपपतिः चित्तं अवतु, योगेश्वरः मनः अवतु ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनाचांता एव प्रथममतिसंभ्रमेणैवं रक्षां कृत्वा किंचिल्लब्धश्वासाः पुनस्तात्पर्येण बीजन्यासमकुर्वतेत्याह । गोप्य इति । संस्पृष्टसलिला आचांताः आत्मनि प्रथममंगेषु करयोश्च पृथक् अजाद्येकादशबीजानां मध्ये करशुद्धौ त्रीणि करयोः संधिषु चत्वारि चत्वारि तथा अंघ्र्यादावेकैकस्मिन्नंगे अजाद्ये एकैकं बीजं न्यस्य बालस्याप्यंगेषु तथैवाकुर्वत ॥ २१ ॥ अंघ्रिम् अंघ्री । जानु जानुनी । भुजं भुजौ । कं शिरः ॥२२॥ तथा दिक्षु रक्षामकुर्वन्नित्याह ॥ चक्र्यग्रत इति । चक्रसहितो हरिस्तवाग्रतोऽस्तु । सहगदो गदासहितो हरिस्तव पश्चादस्तु । त्वत्पार्श्वयोर्धनुर्धरो मधुहाऽसिधरोऽजनश्च तावास्ताम् । शंखधर ऊरुगायश्चतुष्कोणेषु । क्षितावधस्तादित्यर्थः ॥ २३ ॥ एवं बही रक्षां कृत्वांतरंगामकुर्वन्नित्याह । इंद्रियाणीति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

संभ्रमेण कृत्वापि पुनरसंभ्रमेण चक्रुरित्याह–अनाचांता एवातिसंभ्रमेणैव रक्षां कृतवत्यो गोप्यः पुनर्यथाविधानमेव रक्षां चक्रुः । बीजन्यासमजादीनामाद्यक्षरस्य सानुस्वारनमोंतस्य न्यासं तेन अंनमोऽजस्तवांघ्री अव्यात् । मं नमः मणिमांस्तव जानुनी अव्यादित्येवमणिमान्नामा भगवतः प्रादुर्भावविशेष इति विश्वनाथः । हृत् जीवाधारपद्मम् । त्रीणि अजो मणिमान्यज्ञश्च मे करौ शोधयंत्विति वाच्यम् । अच्युतहयास्यकेशवेशा मे दक्षिणकरसंधीन् शोधयंतु । इनविष्णूरुक्रमेश्वरा मे वामकरसंधीन् शोधयंत्विति ॥ २१ ॥ अज इति "न जातोऽहं न जायेयं न जनिष्ये कदाचन । क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः ॥" इति महाभारते । मणिमान्कौस्तुभधरः 'मणिधरः क्वचिदागणयन्गाः' इत्यग्रे वक्ष्यमाणत्वाद्वा । गोगणनार्थं तुलस्यादिमणिधर इति कल्पांतरीयानुपूर्व्या भाविनामसूचनम् । "यज्ञो वै विष्णु"रिति श्रुतेर्यज्ञावतार आकूतिसूनुः । इज्यते मखेषु तत्तद्देवतारूपेणेति व्युत्पत्तेः । सर्वदेवरूपो वा । अच्युतः यास्कोक्तषड्भावविकारहीनः । "शाश्वतं शिवमच्युतम्" इति श्रुतेः । जठरमुदरम् । हयास्यो हयग्रीवः । केशसंज्ञिताः सूर्यादिसंक्रांता अंशवस्तद्वत्तया केशवः । "अंशवो ये प्रकाशंते ममैते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमाः ॥" इति भारते । ब्रह्मविष्णुरुद्राख्याः शक्तयः केशसंज्ञितास्तद्वत्तया वा केशवः । "को ब्रह्मेति समाख्यात ईशोऽहं सर्वदेहिनाम् । आवां तवांशसंभूतस्ततः केशवनामवान् ॥" इति हरिवंशे । कश्च ईशश्च केशौ तौ वेति जनयति 'वी गतिव्याप्तिप्रजने' इत्याद्यर्थकधातोः प्रयोगः । त्वदुरस्तव वक्षः । ईष्टे इतीशः सर्वाधिपः एष सर्वेश्वरः । इनः सूर्यरूपः "स्यादिनः स्वामिसूर्ययोः" इति वैजयंती । "ध्येयः

---

[1] बीजन्यास–श्रीधर. वंशी. वीर. बिज. गिरि. भक्त. । [2] जङ्घे–विश्व. । [3] हृत्केशवस्त्युदर–वीर. । [4] सहदरो– सु. च. पु. ।

सदा सवितृमंडलमध्यवर्ती नारायणः" इति भविष्ये। वेवेष्टि व्याप्नोतीति विष्णुः "विष्लृ–व्याप्तौ" नुक् प्रत्ययः। वेति दीव्यतीति वीगत्यादौ कांत्यर्थाद्वेतेः ष्णुप्रत्ययो धातोर्ह्रस्वश्च। विशेषेण क्रामतीति विपूर्वात्क्रमेः ष्णुप्रत्ययो धातुलोपश्च पृषोदरादित्वादिति। तदुक्तं महाभारते—"व्याप्ते मे रोदसी पार्थ कांतिश्चाप्यधिका स्थिता। क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः॥" इति। उरु अधिकमेकैकपादेनैकैकं भुवनं क्रामति प्रमातीत्युरुक्रमो वामनः। "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्" इति श्रुतेः। ईश्वरः सर्वशक्तिमान् "एषोऽनंतशक्तिः" इति श्रुतेः॥ २२॥ यथांगेषु रक्षां गोप्योऽकुर्वंस्तथा दिक्ष्वप्यकुर्वन्नित्यर्थः। धनुरसिशब्दौ तद्वति लाक्षणिकौ शंखोऽस्यास्तीति शंखः मत्वर्थीयोच्। विजयध्वजस्तु—मदुहादयश्चत्वारश्चतुःकोणेष्विति जगाद उपरिदेशे "ममोपरि यथेंद्रस्त्वं स्थापितो गोभिरीश्वरः। उपेंद्र इति कृष्ण त्वां गास्यंति भुवि देवताः" इति हरिवंशे॥ २३॥ अंतरंगां शरीरांतर्देशेष्वित्यर्थः। इंद्रियाणि श्रोत्रादीनि "सूर्याचंद्रमसौ शश्वदंशुभिः केशसंज्ञितैः। बोधयन्स्वापयंश्चैव जगदुत्तिष्ठते पृथक्॥ बोधनात्स्वापनाच्चैव जगतो हर्षणं भवेत्। अग्निषोमकृतैरेवं कर्मभिः पांडुनंदन॥ हृषीकेशो हृषीशानो वरदो लोकभावनः॥" इति भारते। नरः परमात्मा ततो जातानि। आकाशादीनि नाराणि "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादिश्रुतेः। तान्ययते कारणात्मना व्याप्नोतीति नारायणः। "यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेपि वा। अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥" इति मंत्रात्। श्वेतद्वीपपतिरनिरुद्धः। योगेश्वरः कपिलः॥ २४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ रक्षानन्तरं गोप्य इति श्रीयशोदारोहिण्यौ व्यावर्त्तयति पूर्ववत् अत एव वक्ष्यतेऽपि गोपीभिरिति, मातेति च, ताभ्यः पृथक्त्वेन ताभ्यास्तत्र वक्ष्यमाणरीत्या अजादीश्वरान्तैकादशबीजानि सानुस्वारतत्तदाद्यक्षररूपाणि नमःशब्दान्तानि ज्ञेयानि॥२१॥ ततश्च पद्यैरेतैरक्षां चक्रुरित्याह-अव्यादिति। अङ्घ्रिजान्वित्यनयोः 'सुपां सुलुक्' (७।१।३९) इत्यादि छान्दससूत्रेण सुब्लुक् भुजमित्यत्र 'सुपांसुपः' इति औट्स्थाने अमादेशः अजाद्याः केशवादिवत्तत्तन्नामप्रधाना मूर्तिभेदाः मणिमानित्यपि तन्नामा भगवत्प्रादुर्भावविशेषः हृत् जीवाधारपद्मम् उरो वक्षः॥ २२॥ तार्क्ष्यसहित उपेन्द्रः पुरुषः पुरुषोत्तमः॥ २३॥ इन्द्रियाणीति सार्द्धकम्। अवत्विति पुनरुक्तिः रक्षणेऽत्यन्तवैयग्र्यात् एवमग्रे पात्वित्याद्यपि परो भगवान् यः स्वयं भगवानित्यर्थः। सरस्वती-संवादश्चायं तेषां तदंशत्वेन ममतास्पदत्वात् स्वस्य स्वयं भगवत्त्वेनवाहन्तास्पदत्वाच्च अंशेनांशस्य रक्षा भवतु स्वयं च स्वस्येति प्रार्थयामह इत्यर्थः। अतस्तत्तदङ्गावतारास्तदावरणरूपाश्च ते इति ज्ञेयम्॥ २४–२५॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ रक्षानन्तरं गोप्य इति श्रीयशोदारोहिण्यौ व्यावर्त्तयति, तयोः पुत्रस्नेहाकुलतया न्यासादिना रक्षाविधिविशेषासक्तेः। अतएव वक्ष्यते (३० श.—श्लो.)—गोपीभिरिति, मातेति च; ताभ्यः पृथक्त्वेन न्यस्याजादीश्वरान्तैकादशबीजानि तेषामेव न्यासं चक्रुः॥ २१॥ तदेव विविच्याह—अव्यादिति। अजादीनां प्रायो नाममात्रत्वे तात्पर्य्यम्। मणिमान् कौस्तुभी, यद्यपि साम्येन सर्व्वेषामेव नाम्नां सर्व्वत्रोपयोगस्तच्च श्रीभगवन्नामकौमुदीकारादिभिर्विवृतमेव, तथापि तत्तद्वचनानां मन्त्रात्मकतया तथा तथैव तत्तच्छक्त्युद्रेकाविर्भावाभिप्रायेण; किंवा, श्रीविष्णुधर्म्मोद्युक्तानुसारेण प्रयोजनविशेषापेक्षया तत्र तस्य नाम्नस्तत्र तत्रव विनियोगः, हृदुरसोरधऊर्द्ध्वभागभेदेन भेदः॥ २२॥ पुरुषः—पुरुषोत्तमः॥ २३॥ अवत्विति पुनरुक्ती रक्षयोऽत्यन्तवैयग्र्यात्। एवमग्रे 'पातु' इत्याद्यपि। परो भगवान् श्रीवासुदेवः॥ २४॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अजशब्दवाच्यतत्त्वद्वयनियन्ता सर्वजगत्कारणं श्रीमन्नारायण इति तासां परतत्त्वज्ञानित्वमनेनोच्यते उत्तरत्नामसु तदेवतत्त्वं विख्याप्यत इति भावः॥ २२-३४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमनाचान्ता एव तावत्सम्भ्रमेण रक्षां विधायाथ लब्धश्वासा आचान्ताः विशेषतो रक्षां चक्रुरित्याह—गोप्य इति। संस्पृष्टसलिला आचान्ताः गोप्यः आत्मनि स्वशरीरे करयोरितरेष्वङ्गेषु पृथगेकैकशो न्यस्य अकारादिक्षकारान्तानि मातृकाबीजानि विन्यस्याथ बालस्यात्मनि करयोरङ्गेषु च बीजन्यासमकुर्वत अकुर्वन् चिकीर्षिताजादिभगवन्नामघटितविष्णुकवचपटनयोग्यतायै तत्स्थबीजस्फूर्तये च तावत्स्वाङ्गेषु बीजन्यासं विधायाथ तत्कवचमन्त्रजापपूर्वकरक्षाप्रार्थनायाः सुप्रतिष्ठितत्वाय बालस्याङ्गेषु बीजन्यासं चक्रुरित्यर्थः॥ २१॥ अथ कवचमन्त्रजपपूर्वकरक्षाविधानं दर्शयति-अव्यादित्यादिना, प्रणयेत्यतः प्राक्तनेन। अजादि-शब्दाभ्यां योगरूढिभ्यां भगवदसाधारणाः अजः कर्मायोत्पत्तिरहितः भगवानङ्घ्री तवात्तोङ्घ्री अव्याद्रक्षतु जानु जानुनी अणिमा अणोर्जीवस्याप्यन्तरात्मतया प्रवेशयोग्यः पातु ऊरू यज्ञः यज्ञाराध्यो यज्ञभुक्तत्फलदश्च कटितटमच्युतः आश्रितान्न च्यावयतीत्यच्युतः हयास्यो हयग्रीवः जठरमव्यात् हृच्च केशाश्च तेषां समाहारस्तदीशः पातु वस्ति मूत्रकोशः वरत्युदरहृत्केशमिति क्रमोऽत्र विवक्षितः।

अव्यादजोऽङ्घ्रिमीश्वरः कमित्युपक्रमोपसंहाराभ्यां पादादिशिरःपर्यन्तावयवक्रमस्यात्र विवक्षितत्वप्रतीतेः जठरं नाभेरुपरि भागः तत उपरिभाग उदरमिति विवेकः, केशशब्दोऽत्र लोमपरः कण्ठमिनः सर्वव्यापकः "इण् गतौ" इति धातुः। यद्वा गत्यर्था बुद्ध्यर्थाः सर्वज्ञः अत एव विष्णुरित्यनेन न पौनरुक्त्यं विष्णुर्व्यापकः "विष्लृ व्याप्तौ" इति धातुः मुखम् उरवस्त्रिलोकसङ्ग्राहकाः क्रमाः पादविक्षेपा यस्य सः कं मूर्द्धानमीश्वरः सर्वान्तरात्मा ईशः सर्वाधिपतिरिति न पौनरुक्त्यं विष्णुशब्देन व्याप्तिमात्रम् ईश्वरशब्देन तु प्रशासनपूर्वकव्याप्त्याधारकत्वम् ॥ २२ ॥ एवं पादादिशिरःपर्यन्तं रक्षां विधायाथ दिक्षु रक्षां विदधुः चक्री अग्रतः पुरतश्चक्रधरः पश्चात्पृष्ठतः सहगदो गदासहितो हरिराश्रितार्तिहरः पार्श्वयोस्तु धनुरसी धनुःखड्गौ बिभ्रताविति शेषः। मधुहाऽजितश्च धनुर्द्धरो मधुहाऽसिधरोऽजितश्चेत्यर्थः। कोणेष्वाग्नेयादिषु शङ्खः शङ्खोऽस्यास्तीति अर्श आदित्वान्मत्वर्थीयोऽच् उपर्युर्ध्वायां दिश्युपेन्द्रः क्षितावधस्ताद्धलधरः सङ्कर्षणः समन्तात्सर्वतोऽनुक्ता दिशः काश्चित्सन्ति चेत्तत्र सर्वत्र पुरुषः सर्वप्राणिहृदयगुहावस्थितः ॥ २३ ॥ एवं बहिरङ्गरक्षां सम्प्रार्थ्याथान्तरङ्गरक्षां प्रार्थयामासुः—इन्द्रियाणीति। हृषीकाणाम् इन्द्रियाणाम् ईशोऽन्तःप्रविश्य नियन्ता योगेश्वरो योगनिर्वाहकः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

संस्पृष्टसलिलाः आचान्ताः अङ्गेषु न्यस्य पृथक्करयोश्च न्यस्य आत्मनि मध्ये देहे च न्यस्य अथानन्तरं मङ्गलकरं वा बालस्य बीजन्यासम् अष्टाक्षरन्यासम् अकुर्वत ॥ २१ ॥ अत्राजादयो मूर्तिविशेषाः अङ्घ्रिम् अङ्घ्री जानु जानुनी अङ्घ्रिमित्यन्वयः अणिमान् गरिमानित्यर्थः ॥ २२ ॥ मधुसूदनादयश्चत्वारः चतुर्षु कोणेषु ॥ २३–२४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

बीजम् अजादीनां प्रथमाक्षरं सानुस्वारम् ॥ २१ ॥ अङ्घ्रिजान्विति "सुपां सुलुक्" (७।१।३९) इत्यादिना सुलुक् ॥ २२ ॥ तार्क्ष्यसहित उपेन्द्रः पुरुषः प्रकृतिद्रष्टा ॥ २३–२४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

प्रथममनाचान्ता एवातिसम्भ्रमेणैव रक्षां कृत्वा पश्चाल्लब्धश्वासा यथाविधानमेव रक्षां चक्रुरित्याह—गोप्य इति। संस्पृष्टसलिला आचान्ता आत्मनि आत्मनः अङ्गेषु करयोश्च न्यस्य अङ्गन्यासकरन्यासौ कृत्वेत्यर्थः। अथ अनन्तरं बालस्याङ्गेष्वङ्घ्र्यादिषु बीजस्याजादिनामाद्येकैकाक्षरस्य सानुस्वारस्य नमःशब्दान्तस्य न्यासं तेन अंनमोऽजस्तवाङ्घ्री अव्यात् मं नमो मणिमांस्तव जानुनी अव्यादित्येवं प्रयोगः ॥ २१ ॥ ततश्च पद्यैरेतै रक्षां चक्रुरित्याह–अव्यादिति। अङ्घ्रि अङ्घ्री मणिमान् तन्नामा भगवत्प्रादुर्भावविशेषः जानु जानुनी जङ्घेऽच्युत इति सन्धिरार्षः यज्ञोऽच्युत इति च पाठः हृज्जीवाधारपद्मम् उरो वक्षः ॥ २२ ॥ तथा दिक्षु रक्षामकुर्वन्नित्याह—चक्र्यग्रत इति। चक्रसहितो हरिस्तवाग्रतोऽस्तु सहगदो गदासहितो हरिस्तव पश्चादस्तु त्वत्पार्श्वयोर्धनुर्धरो मधुहा असिधरोऽजनश्चास्तु कोणेषु शङ्खधर उरुगायोऽस्तु उपर्युपेन्द्रोऽस्तु तार्क्ष्यः क्षितावधःस्तादस्तु हलधरः पुरुषः समन्तादस्तु ॥ २३–२६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सम्भ्रमापन्नत्वेनानवहिताभिर्गोपीभिर्यत्कृतं तदुक्तमथ किञ्चित् स्वास्थ्यं प्राप्य ताभिर्यत्कृतं तदाह—गोप्य इति नवभिः। संस्पृष्टसलिलाः आचान्ताः प्रथममात्मनि स्वदेहे अङ्गेषु अङ्घ्र्यादिषु करयोश्च पृथक् पृथक् अजाद्येकादशबीजानां मध्ये करशुद्धौ त्रीणि करयोः सन्धिषु चत्वारि चत्वारि अङ्घ्र्याद्यङ्गेषु च वक्ष्यमाणक्रमेण बीजानि न्यस्य बालस्याप्यङ्गेषु तथैवाकुर्वत ॥ २१ ॥ अजः कर्मायत्तजन्मशून्यः श्रीवासुदेवः तव अङ्घ्रि अङ्घ्री अव्यात् रक्षतु मणिमान् कौस्तुभी जानुनी इनः सर्वगः "इण् गतौ" ॥ २२ ॥ दिक्षु रक्षामप्यकुर्वन्नित्याह—चक्रीति। पार्श्वयोः धनुरसी धनुर्द्धरः असिधरश्च भगवदीयानामायुधानां केवलानामपि सर्वसामर्थ्यसूचनाय धनुरसीत्युक्तम् कोणेषु चतुष्कोणेषु मधुहा अजनः शङ्खः शङ्खधरः उरुगायश्च अस्तु क्षितौ अधस्तात् ॥ २३ ॥ अन्तरङ्गां रक्षामप्युपकुर्वन्नित्याह—इन्द्रियाणीति ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

आदावतिसम्भ्रमादनाचान्ता एव रक्षां कृत्वा पश्चाद्रक्षसानाविष्टं कुशलिनं बालं विज्ञायाश्वस्ता विधिनैव रक्षां चक्रुरित्याह–गोप्य इति। संस्पृष्टसलिलाः कृताचमनाः साधकेन स्वदेहे रक्षां कृत्वा साध्यरक्षा कार्येति पूर्वमात्मनि स्वदेहे अङ्गेषु करयोश्च पृथक् पृथक् अजाद्येकादशबीजानां मध्ये करशुद्धौ त्रीणि करयोः सन्धिषु चत्वारि चत्वारि तथैवाङ्घ्र्यादावेकैकस्मिन्नङ्गे अजाद्येकैकबीजं न्यस्याथ बालस्याङ्गेषु तथैवाकुर्वत तानि चाजादीनीश्वरान्तान्येकादशबीजानि सानुस्वारतत्तदाद्यक्षररूपाणि नमोन्तानि अंनमो अजस्तवाङ्घ्री अव्यात् मं नमो मणिमांस्तवजानुनी अव्यादित्येवमादिरूपाणि बोध्यानि ॥ २१ ॥ ततश्च पद्यैरेतैस्ता रक्षां चक्रुरित्याह

अव्यादिति। अङ्घ्रिजान् इत्यनयोः "सुपां सुलु"गिति सुपोलुक् अङ्घ्री जानुनी इत्यर्थः। भुजमित्यत्र "व्यत्ययोर्बहुल"मित्यौकारविभक्तेरम् कंशिरः॥ २२ ॥ अथ दिक्षु रक्षामाह चक्रीति स चक्री हरिस्तवाग्रतोस्तु सगदस्तु तव पश्चादस्तु त्वत्पार्श्वयोर्धनुर्धरी मधुहा असिधरोऽजनश्चास्तु कोणेषु शङ्खधर उरुगायोस्तु उपर्युपेन्द्रोस्तु तार्क्ष्यः क्षितावधस्तादस्तु हलधरः पुरुषः समन्तादस्तु ॥२३॥ अथान्तरङ्गां रक्षामकुर्वन्नित्याह—इन्द्रियाणीति सार्द्धेन ॥ २४ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

संस्पृष्टसलिला। उपस्पृष्टोदकाः। सत्यः॥ करयोः। करांगुलीष्वित्यर्थः॥ अंगेषु। हृच्छिरः शिखादिपंचांगेषु। पृथक्। कर्णबीजपार्थक्येन। न्यस्य। भूरनन्तात्मनेऽनिरुद्धायेत्यादि सत्यं सत्यात्मने नारायणायेत्यंतानां न्यासं कृत्वा॥ अथ। उभयेन्यासानंतरं। बालस्य॥ आत्मनि। शिर आदिजीवबिंबरूपांतस्थानेष्वित्यर्थः॥ बीजन्यासं। अं अजायनम् इत्यादि क्षं नृसिंहाय नम इत्यंतं मातृकान्यासं॥ अकुर्वत। चक्रुः। यद्वा। आत्मनि शिरोहृत्पादरूपांगेष्वित्यर्थः। बालस्य बालकृष्णस्य। बीजन्यासं क्लीमिति बीजन्यासं अकुर्वत। केचिदाबालयोरुभयोर्न्यासकरणं व्याचक्षते। तच्चिंत्यं। तथात्वे न्यस्यात्मनोऽथ बालस्येति न्यस्यात्मन्यथ वा बालस्येति पाठः स्यात्। षष्ठीसप्तम्योस्तु पृथग्विभक्तिप्रदर्शने कारणाभावात्। अयमप्यर्थो व्याख्यातृहृदं वरवर्ती। अविरुद्धत्वात्प्रादर्शयिष्यमाणत्वाच्च॥ २२ ॥ अव्यादिति। अत्र पादादिशिरोंऽतन्यासोक्त्या लयन्याससिद्धेः। तन्न्यासस्य च यत्याधिकारिकत्वात्कृष्णे च तदाश्रयाभावात्कथमयं न्यासो युज्यतेऽत उच्यते। नायं न्यासः किंतु इयमंगरक्षाऽतो न विरोधः। तथांऽगीकारपक्षे व्याख्यातृभिः पूर्वं द्वादशांगेषु नामभिरित्यत्र द्वादशांगेषु ललाटादिद्वादशावयवेष्विति व्याख्यानात्। आत्मानं भगवान्पर इत्यत्रात्मानं मध्यक्षिति व्याख्यास्यमानत्वात् पूर्वश्लोके न्यस्यात्मन्यथेत्यत्रात्मशब्दस्य मध्यार्थकत्वात्। तेन च सृष्टिलययोर्मध्यस्थत्वेन स्थितिन्याससिद्धेश्च। अत्र च लयन्यासोक्त्या त्रयाणामप्याश्रमाणां स्वावयवेभ्यो जनकस्य कृष्णस्योपनयनाभावेन पृथगेकैककरणायोगात् त्रयाणामपि न्यासानां युक्तत्वं बोद्धव्यम्॥ २३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गोमूत्रेण स्नापयित्वा। मित्वस्य ग्लास्नेति वैकल्पिकत्वाद्दीर्घः। गोरजसा तत्पदधूल्या पुनः स्नापयित्वा गोशकृता द्वादशाङ्गेषु ललाटादिषु नामभिः केशवाद्यभिधानं रक्षां दिग्बन्धादिपूर्वं चक्रुः। मत्सङ्गो रमाया एवेतीश्वरः किञ्चित्त्वं योषितामेव प्रेरणया तत्सङ्गमङ्गलमेव सम्पादयामासेति तात्पर्यं ज्ञेयम्। यथोक्तं शान्तिपर्वणि गोलक्ष्मीसंवादे। चञ्चलेत्यादिप्रकारेण ताभिर्निषिद्धा रमा वक्ति। माननामहमिच्छामि भवत्यः सततं शिवाः। अप्येकाङ्गेऽथो वस्तुमिच्छामि च सुकुत्सिते। अवश्यं मानना कार्या यद्यस्माभिर्यशस्विनि। शकृन्मूत्रे वस त्वं च पुण्यमेतद्धि नः शुभे। श्रीः। दृष्ट्या प्रसादो युष्माभिः कृता मेऽनुग्रहात्मकः। एवं भवतु भद्रं वः पूजितोऽस्मि सुखप्रदाः। एवं कृत्वा तु समयं श्रीर्गोभिः सह भारत। पश्यन्तीनां ततस्तासां तत्रैवान्तरधीयत। एवं गोशकृतः पुत्रमाहात्म्यं तेऽनुवर्णितमिति॥२१॥ गोप्यः संस्पृष्टसलिलाः पादधावनाचमनाद्युपयुक्तोदकाः सत्य आत्मनि स्वस्मिन्नादावङ्गेषु विशिष्टावयवेषु करयोरिति पृथक् पृथक् न्यस्य बीजाक्षराणि। अथानन्तरं बालस्याङ्गेषु करयोरिति पृथक् पृथक् च बीजन्यासमष्टाक्षरादिन्यासमकुर्वत॥ २२ ॥ अजादयश्च भगवन्मूर्तिविशेषाः क्वचिदेवार्थानुगमोऽजो न जायत इति। अज गतिक्षेपणयोरिति स्मरणात् एरजित्यच प्रत्यये बहुलं तणीति वीभावाभावः। अजा विष्णुहरच्छागा इत्यमराद्विष्णुः। अङ्घ्रिमवयवादीनां परस्परमभेदादेकवचननिर्देशो निर्देशः। क्वचिदूरू इति च विशेषतो व्यवहारविशेष इति सूचक इति ज्ञेयम्। अधिरपि गत्यर्थो गतिमानिति गतिसाधनं पादमव्यादित्यर्थः। अणिमानणिरस्यास्तीति स स चास्थिविशेषो दृढतरकः। अणिराणिवदक्षाग्रकीले स्यादश्रिसीमयोरिति विश्वः। जान्वथोरू यज्ञोऽच्युतः कटितटो हयास्यो जठरं केशवो हृत्त्वदुर ईश इनः कण्ठं विष्णुर्भुजमुरुक्रमस्त्रिविक्रमो मुखमीश्वरः कं शिरोऽव्यादित्यन्वयः। अणिर्गं तरस्यास्तीत्यणिमान्वा। गतेश्चाङ्घ्रिजानुसाध्यत्वाद्द्विवारमुक्तिरिति केऽपि॥ २३ ॥ अग्रतोऽग्रे चक्री चक्रधरो हरिरेवं सहगदौ गदया सहितो सगदः। वोपसर्जनस्येत्युक्तेः सहगद इति सम्भवति। हरिः पश्चात्पृष्ठभागेऽस्त्विति विपरिणतं यथायथमन्वेति। त्वत्पार्श्वयोर्धनुरसी तद्धरौ रूपविशेषौ धरणीयौ। एवमुत्तरत्रापि। मधुहा मधुसूदनोऽजनो जनार्दनः शङ्ख उरुगायश्चेत्येते चत्वारश्चतुर्षु कोणेषु। एकदेशेषु। याम्यादिः कोणोऽप्येकदेश इति विश्वः। उपर्युपेन्द्रस्तार्क्ष्यो गरुडध्वजः सोऽप्युपरि क्षितौ तदधो हलधरः शेषान्तर्गतसङ्कर्षणः। तस्य पातालतलालयत्वात्। गरुडशेषौ वा। तार्क्ष्यहलधरपदयोरसाक्षादधोक्षजप्रतीतिजनकत्वेन संविधानसापेक्षार्थकत्वेऽपि प्रस्तुतस्तनपीतविषविषमताभ्रान्त्युपशान्त्यै तदुक्तिरिति मन्तव्यम्। एकस्य तु तत्परिहारकतयैकस्य विषस्वामित्वेन विघ्नेशवत्तत्स्मरणेन तन्नाश इति द्वयोर्ग्रहो युक्तियुक्त इति सन्तोष्टव्यम्। पुरुष-परमपुरुषः समन्तात्सर्वत्र॥ २४ ॥

श्रीसुबोधिनी

एवमियं द्वितीया रक्षा निरूपिताध्यात्मिकी, आधिदैविकीमाह गोप्य इति, पूर्वं कर्तृकर्मणोरसंस्कारः, कर्मण एव मध्यमे, कर्तुरपि तृतीये, प्रथममात्मसंस्कारो द्विविधो निरूप्यते संस्पृष्टसलिला इति, बहिः स्नानमन्तराचमनं चोक्तं, ततो बीजमन्त्राने-

काद्शात्मनि **न्यासं कृतवत्यः**, स्वस्मिन्नागतायां देवतायामन्यस्मिन् स्थापनमनुभवसाक्षिकं भवति, ततस्त्याजित आधिदैविको दोषः स्वात्मानं वा गृह्णीयाद् बलिष्ठदोषस्य त्याजकग्राहकत्वाद्, "अग्निं वै जात"मित्यत्र तथोक्तेः, आत्मन्यपि द्विगुणा रक्षा कृता करणकर्तृभेदेन, साक्षात्करणे कर्तरि च दोषसम्बन्धसम्भवात्, तदाहाङ्गेषु वक्ष्यमाणेषूक्तेषु वा तैरेव नामभिः, **करयोरिति**, करतलकरपृष्ठाभ्यां सह दशाङ्गुलीषु दक्षिणाङ्गुष्ठमारभ्य वामाङ्गुष्ठपर्यन्तासु, **पृथगिति करयोरेव** वा सम्बध्यते, तेनाङ्गुलिचतुष्टये पर्वत्रये न्यासो भवति, "अङ्गुल्यङ्गुष्ठपर्वस्वि" तिवचनात्, **पृथगिति** दशन्यासा वा निरूपिता मातृकान्यासादयः, **एवमात्मनि न्यस्य** सर्वदेवताधारभूताः सत्योऽथ भिन्नप्रकारेण देवताः सर्वाः बहिः स्थिता विधाय **बालस्य** भगवतोऽङ्गेषु बीजैरेकादशभि**र्न्यासमकुर्वत** कृतवत्यः ॥ २१ ॥ बीजानि स्थानानि च गोप्यानीति भङ्ग्यन्तरेण **देवताप्रार्थनरूपेण रक्षां स्तोत्ररूपां** वदन्नाहाव्यादिति, भगवत एकादश रूपाणि मूलतः प्रसिद्धानि वैष्णवतन्त्रे, अन्यानि तु न समर्थान्युपढौकनेनारोपितसामर्थ्यानि वा भवन्ति, तत्र प्रथममजो न जायत इत्यविकृतो मूलभूत इति यावत् सोऽक्षरात्मको भवति, सोऽक्षरात्माजो भगवतोऽङ्घ्रि**मव्यात्**, अङ्घ्रिरयमाध्यात्मिकः, स त्वाधिदैविक इ"त्यन्तर्याम्यवतारादिरूपे पादत्रमस्ये"तिनिरूपणात्, ततः स एव सर्वोपास्यरूपो भवन् दुर्ज्ञेयत्वा**दणिमान्** भवति, बीजरूपाण्येतानि नामान्यविकृतानि भवन्ति, **जानुद्वयं सोऽव्यात्** स्थूलादग्रे सूक्ष्मभावात्, एतद् द्वयं प्रमेयबलेन रूपद्वयेन निरूपितं, प्रमाणबलेन पुनः पृथङ् निरूपयत्यथेति, अनेन भक्तिमार्गो ज्ञानमार्गश्च प्रमेयबलादेव सिध्यतीति ज्ञापितं, **यज्ञ ऊरू अव्यात्**, स हि प्रजननात्मकः, **अच्युतो** यज्ञस्यैवाधिदैविकं रूपं **कटितटमव्यात्**, स हि रक्षको न केनापि प्रकारेण च्युत इति, वेदानां यज्ञानां च नित्यताप्युक्ता, **हयास्यो जठरमव्यात्**, नष्टेषु वेदेषु रक्षणार्थमवतीर्णः, उदरं सर्वमेव जगत्, तच्च कर्मणा परिपाल्यत इति यज्ञे प्रादुर्भूत उक्तः, **हृद्** हृदयं **केशवोऽव्यात्**, कश्च शश्च केशौ तयोर्वं सुखं यस्मादिति, ब्रह्मशिवयोर्बुद्ध्यहङ्कारनियामकयोरपि सुखदातान्तर्यामी हृदयपरिपालको भूयात्, हृदयं स्तनयोर्मध्ये निम्नस्थानं, उरस्तूच्चस्थानं, स्तनादुपरि कण्ठादधस्त्वदुर **ईशोऽव्यात्**, यास्त्वाधिदैविककालरूपो येन प्रकृतेर्गुणाः क्षुब्धा भवन्ति, **त्वदुर** इति, उरसि लक्ष्मीरपि वर्तते, अतस्तद्व्यावृत्त्यर्थं त्वत्पदं, इनस्तु कण्ठं, तुशब्दो ब्रह्माण्डमध्यस्थितं वक्तुं बहिःस्थिताद् व्यावृत्तिमाह, इनः सूर्यान्तःस्थितो नारायणः स **कण्ठमव्यात्**, सरस्वतीस्थानं तत्, त्रयीमयात्मकश्च सः ततो जगद्रक्षायां स्थितः क्रियाशक्ति**र्विष्णुर्भुजमव्यात्** क्रिया भुजयोरेव प्रतिष्ठितेति, ततो भक्तबाधकत्वेन दैत्येषु समागतेषु तन्निवृत्त्यर्थं समागतो बलिबन्धनकर्तो**रुक्रमो वामनो मुखमव्यात्**, ततः कं शिर **ईश्वरोऽव्यात्**, यस्तु सङ्कर्षणरूपो "यस्य केशौ सितकृष्णौ" स शिरः प्रधानभूत इति शिरःपालनं युक्तमेव ॥ २२ ॥ एवं पादादिशिरोन्तानां रक्षा प्रार्थनया निरूपिता, बाह्यतः परितो रक्षामाह **चक्र्यग्र** इति, पुरुषस्य यावन्तो भागा बहिर्भवन्ति तेषु तत्र तत्र प्रयोजको रक्षत्विति प्रार्थयन्ति, **चक्री** चक्रपाणिश्चक्रं गृहीत्वाग्रे रक्षतु पूर्वभागं परिपालयतु, **सहगदो** गदाधरो गदासहितः **पश्चादव्यात्** पृष्ठभागं परिपालयतु, ननु महतः कथं पृष्ठभागपरिपालनमुच्यते तत्र प्रार्थनया हेतुमाह **हरिरस्त्विति**, स हि सर्वदुःखहर्ता, यथा वा प्रार्थनया गजेन्द्रमागत्योद्धृतवान् न तु वैमनस्यं विचारितवान्, अत इदानीमपि प्रार्थनया **पश्चाद्धरिः स्वयमस्तु** स्थितः सन् पालयत्वित्यर्थः, त्वत्पार्श्वयोर्दक्षिणवामयोर्धनुर्धरोऽसिधरश्च **मधुसूदनोऽजनश्चाव्यात्**, दक्षिणपार्श्वे धनुर्गृहीत्वा राक्षसांस्तत्रत्यान् दूरादेव (**मधुहा**) मारयतु, **अजन उत्तरपार्श्वे** सर्वज्ञानिसेव्यः सर्वेषां जन्मादिसर्वदुःखनाशकोऽसिं गृहीत्वाविद्याछेदकोऽव्यात्, आयुधयोरपि स्वतःसामर्थ्यं द्योतयितुं भिन्नतया निरूपणं, चकारादुत्तरभागस्थिता हरिवर्षादिमूर्तयोपि पालयन्त्वित्युक्तं, **कोणेषु** चतुर्षु **विदिक्षु शङ्खं** गृहीत्वो**रुगायश्चावतु**, शब्दो हि स सर्वेषां दैत्यानां दर्पहन्ता "विष्णोर्मुखोत्थानिलपूरितस्ये"ति वाक्यात्, अत एव प्रत्येकं कोणेषु भिन्ना निरुक्ताः, सोप्युरुगाय उरुभिर्नारदादिभिर्गीयत इति, अत एकेनैव सर्वत्र रक्षा सम्भवति, **उपर्युपेन्द्रस्तार्क्ष्योऽव्यात्**, गरुडारूढो मन्वन्तरावताररूपः, गरुडस्यापि रक्षकत्वं, उभावप्युपर्येव भवतः, **क्षितौ हलधरो** हलं गृहीत्वा **सङ्कर्षणोऽधोभागे** पालयतु, एवं प्रत्येकं रक्षामुक्त्वा सामान्यत आहुः **पुरुषः समन्तादिति**, **पुरुषो** नारायणः समन्तात् पालयतु, यस्योदरे सर्वे वर्तन्त इति स हि सर्वत्र तिष्ठति ॥ २३ ॥ एवं बाह्यरक्षामुक्त्वाध्यात्मिकांशभूतानां प्राणादीनां रक्षामाहुरिन्द्रियाणीति, **हृषीकाणामिन्द्रियाणामेव** नियामकत्वेन स्थितः, 'अव्यादि'ति पूर्वेण सम्बन्धः, **इन्द्रियाणि** दश, चक्षुषश्चक्षूरूपत्वाद् भगवतः **प्राणान् नारायणोऽवतु**, प्राणापानादयो दश प्राणाः, नारं जीवसमूहस्तदयति प्रेरयति प्रविशतीति वा, प्राणमूलकं हि सर्वमतो नारायणात् प्राणरक्षा, अन्तःकरणचतुष्टयस्य रक्षामाह श्वेतद्वीपपतिर्वासुदेवः, श्वेतद्वीपस्य शुद्धसत्त्वरूपत्वाच्चित्तरक्षकश्च स भवत्येव, **अनिरुद्धो** योगिभिः संराध्यः, अतो **योगेश्वरो मनोऽव्यात्**, योगशास्त्रं च मनोमूलकमेव ॥ २४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अङ्गानि करणानि आत्मा कर्ता । तदाहुः **करणकर्तृभेदेनेति** । **अव्यादज** इत्यत्र, **अङ्घ्रिरयमित्यादि** । अयं अवनीयत्वेनोच्यमान इत्यर्थः । परिदृश्यमान एवाधिदैविकोऽजपदेनोच्यते । स स्वाधिष्ठानभूतमाध्यात्मिकं स्वस्मिन्विद्यमानमेव वाक्यादिति प्रार्थनेति भावः ॥ २१–२२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

गोप्यः संस्पृष्टेत्यत्राधिदैविक्यां रक्षायां विशेषं वक्तुं पूर्वं कर्तृकर्मणोरसंस्कार इति प्रथमरक्षायां रक्षाकर्तुः स्वस्य रक्षाकर्मणो भगवतश्च **न संस्कारो मध्यमे** भगवत एव संस्कारस्तृतीये तु द्वयोरित्यर्थः, **बीजमन्त्राण्य**'व्या'दितिश्लोके वक्ष्यमाणानि, **करणकर्तृभेदेने**त्येतस्यार्थं **टिप्पण्या**माहु**रङ्गानी**त्यादि **सुबो**धिन्यां द्वैगुण्यप्रयोजनमाहुः **साक्षा**दित्यादि, **साक्षात्करण** इत्यव्यवधानेन रक्षाकरणे, **वक्ष्यमाणपक्षे बीजानामेव न्यास** उक्तपक्षे **केशवादिनामभि**रिति ज्ञेयं, नाम्नां विनियोगान्तरमाहुः **करतले**त्यादि, प्रकारान्तरमाहुः **करयो**रित्यादि, तथा सति द्वादशनाम्नामङ्गुलिचतुष्कपर्वस्वेव न्यासः, एवं करन्यासे प्रकारद्वयं, अथाङ्गन्यासादौ प्रकारान्तरमाहुः **पृथगि**त्यादि **मातृकान्यासा**देरिति ॥ २१ ॥ **अव्या**दित्यत्र **टिप्पण्यां मूलरूप**विचारेवताररूपविचारे 'चाक्षरस्य'पादत्वात् तस्य चाविकृतत्वेनात्रोक्तत्वा**दवनीयाङ्घ्रिः क** इत्याकाङ्क्षायां तं विवेचयन्तीत्याशयेना**ङ्घ्रिरय**मित्यादेरर्थमाहु**रय**मित्यादि, ननु तस्यै**वाधिदैविक**त्वमित्य**वनीयत्वं** कस्येत्यत आहुः **परी**त्यादि, तथा च स्वस्मिन् विद्यमानस्यैवावनीयत्वमित्यर्थः, सुबोधिन्यां **स्थूलामग्रे सूक्ष्मभावा**दिति **स्थूला**दक्षरभावाग्रेनन्तरं **सर्वोपास्य**तायां **सूक्ष्मभावाद् दुर्ज्ञेयत्वात्** तस्योपरि तत्राङ्गरक्षकत्वप्रार्थनेतिभावः, **एतद् द्वय**मित्यादि, "नैतन्मनो विशती"तिवाक्येनाक्षरस्य प्रमाणातीतत्वात् स्वरूपबलेन रूपद्वयेन रक्षाद्वयं निरूपितमित्यर्थः, **अनेने**त्य**ङ्घ्रिजानुनोः पूर्वं** रक्षानिरूपणेन मानान्मेयसिद्धिरितिन्यायमुल्लङ्घ्यापि पूर्वं प्रमेयबलनिरूपणेन च जानुनोर्ज्ञानमार्गत्वं भक्तिकर्मसन्दंशाज् ज्ञेयं, **यज्ञस्य कर्मरूपत्वा**दिति **भक्तिमार्गो ज्ञानमार्गश्च** भगवदक्षरयोः प्रत्यक्षहेतुत्वात् प्रमाणम् ॥ २२ ॥ **चक्री**त्यत्र **वैमनस्य**मितिविविधलिङ्गभिदाभिमानानां **ब्रह्मादीनां वैमनस्यम्** ॥ २३ ॥ **इन्द्रियाणीत्यत्राध्यात्मिकांशभूताना**मित्यक्षरांशभूतानामित्यर्थः, हृषीकेशस्य स्वरूपं विवृण्वन्ति **चक्षुषश्चक्षु**रित्यादिना, **तदयती**ति'**वी** गतिव्याप्तिप्रजनकान्त्यवसादने'ष्वित्यत्र **प्रश्लिष्टस्यायते** रूपम् ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गोप्यः संस्पृष्टेत्यत्र न्यस्येतिपदं विवृण्वन्ति **ततो बीजमन्त्रानेकादशे**ति, अग्रिमश्लोकोक्तान् नमोन्तान् स्वाङ्गेषु स्थापितवत्य इतिशेषः, **आत्मने**ति एवमितिशेषः, **अङ्गेषु वक्ष्यमाणेष्वि**ति एतत्पक्षे तेषामेकादशत्वाद् बीजमन्त्रानेकादशेत्युक्त एव प्रकारः, **उक्ते**ष्वितिपक्षे पूर्वश्लोकोक्ताङ्गानां द्वादशत्वात् तत्रोक्तैरेव केशवादिद्वादशनामभिरित्यर्थः, पूर्वश्लोके भगवदङ्गेषु न्यास उक्तः, अत्र स्वाङ्गेष्वितिविभेदः ॥ २१ ॥ **अव्यादज** इत्यस्याभासे **भङ्ग्यन्तरेणे**ति तत्तद् दैवतं तत्र तत्र तिष्ठत्वितिवक्तव्यं तथात्र नोक्तमित्यर्थः, भङ्ग्यन्तरस्यैव विवरणं **दैवतेति, वदन्नाहे**ति शुकस्तत्कृतां रक्षां **वदन्नाह** अग्रिमवाक्यानीतिशेषः, एतेनावान्तरप्रकरणार्थ उक्तः, एतद्वाक्यार्थस्तु एतच्छ्लोकोपसंहारे **एवं पादादी**त्यनेन सूचयिष्यते, **अव्यादज** इत्यत्र **अणिमा**नित्यस्य **दुर्ज्ञेय**त्वार्थकत्वेऽणिष्ठ इतिस्यादित्याशङ्क्या**हुर्नामान्यविकृतानी**ति, अतो नातीवाग्रहः कर्तव्यः इति भावः, **अनेने**ति चरणरक्षाप्रार्थनायां **प्रमेयबलकथने**नेत्यर्थः, जान्वोरपि चरणत्वमभिप्रत्येदमुक्तं 'विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य चे'ति द्वितीयस्कन्धवाक्याच् चरणस्य **भक्ति**रूपत्वमक्षरात्मकत्वाज् **ज्ञानरूपत्वं, प्रजननात्मक** इति प्रजननमात्मनि स्वरूपे यस्येत्यर्थः, 'अग्निहोत्रं जुहोति, यदेवं किञ्च यजमानस्य स्वं तस्यैव तद्रेतः सिञ्चति प्रजनने' इति श्रुतिसम्मतिसूचनाय हिशब्दः, **वेदाना**मिति वेदप्रतिपाद्यस्य यज्ञाधिदैविकस्य च्युतिराहित्यकथनादुभयोर्नित्य**तोक्ते**त्यर्थः, **उक्त** इति रक्षकत्वेनेतिशेषः ॥ २२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गोप्यः संस्पृष्टसलिला इत्यस्य विवृतौ **पूर्वं कर्तृकर्मणोरसंस्कार** इति गोपुच्छभ्रामणादिभिरित्यनेन पूर्वं भौतिकी रक्षोक्ता, तत्र रक्षाकर्त्रीणां रक्षाकर्मरूपस्य भगवतोप्यसंस्कार इत्यर्थः । **कर्मण एव मध्यम** इति **मध्यमे** रक्षणे **गोमूत्रेण स्नापयित्वे**त्यनेन रक्षाकर्मणो हरेः संस्कार इत्यर्थः, **कर्तुरपि तृतीय** इति **अपि**शब्दात् मर्मरूपस्य भगवतः संस्कारः, एवं तृतीये रक्षणे **गोप्यः संस्पृष्टसलिला** इत्युक्ते कर्तृकर्मणोर्गोपीभगवतोरुभयोरपि संस्कार इत्यर्थः ॥ २१ ॥ **अव्यादजोऽङ्घ्रिमणिमांस्तवे**त्यस्य विवृतौ **सः अक्षरात्माजः** भगवतः **अङ्घ्रिं अव्या**दित्यादि इह भगवदङ्घ्रिरक्षणमक्षरात्मकेन भगवता कर्तव्यमित्यत्राङ्घ्रिरयमाध्यात्मिकः स त्वाधिदैविक इत्यादिनोपपत्तिरुच्यते, व्यासचरणानामभिप्रेतैव, यतो 'जले रक्षतु वाराहः स्थले रक्षतु वामनः । अटव्यां नारसिंहश्च सर्वतः पातु केशव' इत्यादिभिरुपपत्तिपूर्वकमेव रक्षाया उक्तत्वाज् जले वराहरूपस्य प्रवेशसामर्थ्यात्, अत एवारण्ये नृसिंहस्य रक्षकत्वमुक्तं, अतो ज्ञायते तत्तन्नामभिस्तत्तद्रक्षा निरूप्यते, सोपपत्तिपूर्विकैवेति, अतः श्रीमदाचार्यैः सर्वत्रोपपत्तयो निरूपिताः, **अनेन भक्तिमार्गो ज्ञानमार्गश्चे**ति अनेन अक्षरस्य भक्तिमार्गरूपाधिदैविकचरणारविन्दरूपत्वकथनेनेत्यर्थः, अक्षरस्य हि रूपद्वयेन स्थलद्वयरक्षोक्ता, तत्र अजस्वरूपेण चरणरक्षोक्ता, तेन भक्तिमार्ग उक्तः, चरणस्य भक्तिरूपत्वात्, अणिमत्पदेन दुर्ज्ञेयत्वकथनात् ज्ञानमार्ग उक्तः, ज्ञानमार्गे प्रमेयस्य दुर्ज्ञेयत्वकथनात् "कश्चिद् धीरः प्रत्यगात्मानमैक्ष" दित्यादिषु दुर्ज्ञेयत्वोक्तेः, **स हि प्रजननात्मक** इति यज्ञस्य प्रजननात्मकत्वं "यज्ञाद् भवति पर्जन्य" इति गीतावाक्येनाम्बूत्पादकस्य पर्जन्यस्यापि यत उत्पादको यज्ञ उक्तोतो ज्ञेयं, ऊरुरपि प्रजननात्मकः "यदा हि नग्न ऊरुर्भवती"ति श्रुतौ ऊरोः प्रजनने प्रयोजकत्वात्, **अच्युतः कटितटमव्या**दित्युक्तं तत्रोपपत्तिमाहुः **अच्युतो**

यज्ञस्येवाधिदैविकं रूपं इति, यतो यज्ञरूपता अच्युतस्यातः पृथ्वीरूपायाः कटेः रक्षा युक्तैव, पृथिव्याः कर्मक्षेत्रत्वेनोपजीव्यत्वात् उपजीव्यरक्षा युक्तैव ॥ २२ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

एवमियं द्वितीया रक्षा निरूपिता ध्यात्मिकी—अब आचार्यवर विहंगावलोकन करते हुए कुछ स्पष्टीकरण करते हैं कि "रक्षां विदधिरे सम्यक्" इस श्लोक में श्री लालन की आधिभौतिक रक्षा की गई थी, किन्तु उसमें 'कर्ता' गोपीवृन्द एवं 'कर्म' की शुद्धि न हुई तथा गोमूत्रेण स्नापयित्वा श्लोक में आध्यात्मिक रक्षा की, तब केवल कर्म की शुद्धि की गई। अब इस आधिदैविक रक्षा के समय में, कर्ता की भी शुद्धि की गई है।

प्रथममात्मसंस्कारः—प्रथम गोपीजन ने अपना संस्कार दो प्रकार से किया स्नान कर देह का बहिरंग संस्कार किया, और आचमन लेकर आत्मा का अन्तरंग संस्कार किया। इस विधि के बाद ग्यारह बीज मन्त्रों का अपने में स्थापन किया। गोपीजनने इन बीज मन्त्रों द्वारा अपने में देवताओं को प्रविष्ट किया अथवा देवता स्वयं प्रविष्ट हो गए जिससे जिन अनुभव के आधार पर अपने में आए हुए देवता का दूसरे में भी स्थापना कर सकने का निश्चय होता है।

यदि संशय हुआ कि गोपियों ने बीज मन्त्रों द्वारा अपने में देवताओं का स्थापन क्यों किया ? तब समाधान करते हैं कि अग्नि वै 'जात' इस मन्त्र में कहा है कि दोष यदि विपक्ष में बलवान् रहा तब वह छुड़ाने वाले में जाकर बैठते हैं ऐसा नियम होने से गोपियों ने समझा कि हम भगवान् में स्थित दोषों का भगवान में देवता स्थापित कर निकालेंगे तब दोष हममें प्रवेश करेंगे इसलिये गोपियों ने पहले अपना संस्कार किया पुनः अपने में देवता स्थापित किए। गोपियों ने अपनी दुगुणी रक्षा की, क्योंकि गोपियाँ कर्ता और करण—साधन दोनों थीं। इससे जो साक्षात् करण–होता है एवं कर्ता होता है, उससे ही दोष का सम्बन्ध होता है। अब रक्षा के प्रकार का वर्णन करते हैं कि निर्दिष्ट बारह अंगों में भगवान् के बारह नामों से, दाहिने अंगूठे से बायें अंगूठे तक दस अंगुलियां में और हाथ के तल एवं पृष्ठ में न्यास किया, अथवा प्रकारान्तर से हाथ की बला है कि चारों अंगुलियों के तीन तीन पर्वों में न्यास किया। जैसे कहा है कि "अंगुल्यंगुष्ठपर्वसु" 'इति वचनात्' अङ्गुठे से अंगुलियों के पर्वों में न्यास करें। पृथक वा दूसरा आशय बताते हैं कि मातृका के स्थापन में भिन्न-भिन्न दश प्रकार के न्यास कहे हैं। इस प्रकार गोपियां बीज न्यास द्वारा सर्व देवता की आधारभूत हुई, अनन्तर देवताओं को बाहर स्थापित कर, भगवान् के अङ्गों में ग्यारह बीजों से देवता स्थापित किए ॥ २१ ॥

'बीजानि स्थानानि च' अब अगले श्लोक 'अव्यादजो' में मन्त्रों के बीज और देवों के स्थान गुप्त रखने योग्य हैं इसलिये दूसरे प्रकार से होने के कारण रक्षा के लिये स्तोत्र से देवता की प्रार्थना करते हैं।

भगवत एकादश रूपाणि वैष्णव तन्त्र में, भगवान् के ग्यारह रूप आरम्भ से प्रसिद्ध हैं, इन ग्यारह रूपों से जो अतिरिक्त रूप है वे शक्ति सम्पन्न नहीं है, उनमें शक्तिसंचार करने से वे आरोपित शक्ति वाले होते हैं।

उसमें प्रथम जो जन्मरहित, अविकारी, मूल रूप अज है, वह अक्षरात्मा होता है, वह अक्षर रूप आध्यात्मिक अज भगवान् चरणों की रक्षा करे। यह चरण जिसकी रक्षा की जाती है, आध्यात्मिक है क्योंकि अन्तर्यामी आदि अवतार, चरण रूप माने आध्यात्मिक रूप होते हैं। ऐसा शास्त्रों में निरूपण है। वह श्रीकृष्ण अज फलरूप तो आधिदैविक है।

वह ही अज सर्व का उपास्य रूप कठिनाई से जानने योग्य होने से 'अणिमान्' कहा जाता है। ये भगवान् के नाम बीजरूप होने से अविकारी हैं, स्थूल से सूक्ष्म भाव वाला 'अणिमान्' दो घुटनों की रक्षा करे। प्रमेय बल वाले अज और अणिमान् इन दोनों रूपों से चरण और घुटनों इन दोनों की रक्षा का निरूपण हुआ।

इस श्लोक में दिये 'अथ' अव्यय का प्रयोजन बताते हैं कि पूर्व में प्रमेय बल वाले अज रूपों और अणिमान् रूपों से रक्षा बताई अब अथ अव्यय से प्रमाण बल वाले रूपों के कार्य का पृथक् वर्णन करते हैं। इससे यह बताया कि भक्ति मार्ग और ज्ञान मार्ग की सिद्धि प्रमेय बल से ही होती है।

'यज्ञ' जङ्घाओं की रक्षा करे। कारण कि वह यज्ञ प्रजनन, वीर्य रूप, उत्पन्न करने वाला रूप है।

यज्ञ का आधिदैविक रूप अच्युत 'कमर' की रक्षा करे। वह (अच्युत) रक्षक किसी प्रकार से भी च्युत नहीं होता है। इससे यज्ञ एवं वेद की नित्यता कही।

१. योजनाकार श्री लालूभट्टजी का मन्तव्य है कि श्री आचार्यचरणों ने जिस जिस नाम द्वारा जिस जिस अंग की रक्षा की प्रार्थना की है, वह सब युक्ति पूर्वक युक्ति युक्त है। जैसे यहाँ अज भगवान् 'चरणों की' रक्षा करें इसको स्पष्ट समझाने के लिये श्री आचार्यचरण कहते हैं कि 'अज' के दो रूप हैं—एक आध्यात्मिक दूसरा आधिदैविक एवं चरण भी आध्यात्मिक है।

इसलिये आध्यात्मिक चरण की रक्षा की। प्रार्थना आध्यात्मिक स्वरूप अक्षरात्मा अजकी की गई है। भगवान् श्री कृष्ण जो नन्दाङ्गण में प्रत्यक्ष दर्शन दे रहे है वह तो मूलरूप अज है अतः आधिदैविक है। आधिदैवक स्वरूप श्रीकृष्ण में विराजमान आध्यात्मिक स्वरूप ही आध्यात्मिक चरणारविन्द की रक्षा करें।

श्री आचार्य चरण जैसे उपपत्ति में मानते हैं वैसे व्यास जी उपपत्ति में मानते है जैसे कि व्यासजी ने भी नारायण कवच में कहा कि जलेषु मां रक्षतु आदि में उपपत्ति पूर्वक रक्षा का वर्णन किया है।

योजना—अक्षर के दो रूप हैं—एक 'अज' दूसरा 'अणिमान्'। अज रूप से चरण रक्षा बताई। इससे यह सिद्ध हुआ कि अक्षर अज रूप से आधिदैविक रूप का चरणारविन्द होने से भक्ति रूप है, इसलिये यह भक्ति मार्ग है। 'अणिमान्' (सूक्ष्म) रूप से दो घुटनों की रक्षा बताई। सूक्ष्म रूप दुर्ज्ञेय होने से ज्ञान मार्ग कह कर, उस दुर्ज्ञेयता का वर्णन किया जैसे कि 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत कोई धीर पुरुष ही प्रत्यगात्मा को ज्ञान द्वारा देखता है।

'अणिमान्' शब्द का अर्थ बहुत सूक्ष्म जो कठिनाई से जानने में आवे करने पर 'अणिष्ठ' होना चाहिये। इस शंका का समाधान सुबोधिनीजी में महाप्रभुजी ने भगवान् के नाम, बीज रूप होने से अविकारी हैं। दूसरे शब्द व्याकरणानुसार बनते और बदलते हैं। नाम तो बने हुए ही हैं।

यज्ञ उत्पत्ति करने वाला है, जैसा कि गीता में कहा है यज्ञ से मेघ, मेघों से पर्जन्य द्वारा अन्नादि उत्पन्न होते हैं। इसलिये यज्ञ प्रजनन पैदा करने वाला रूप है श्रुति में जंघाओं को भी पैदा करने में प्रयोजक कहा है अतः प्रजनन रूप यज्ञ भगवान् पैदा करने में प्रयोजक जंघाओं की भी रक्षा करें यह शक्ति कहा।

अच्युत यज्ञ का आधिदैविक स्वरूप है। कटि पृथ्वी रूप है। पृथ्वी अन्नादिकों के उत्पत्ति का स्थान पैदा करने वाली है। इसलिये आधिदैविक यज्ञ स्वरूप अच्युत पृथ्वी रूप कटि की रक्षा करे। यह कहना भी उपपत्तिपूर्वक समझाया।

जठरं हयास्यः—भगवान् 'हयग्रीव' पेट की रक्षा करे। सम्पूर्ण जगत् भगवान् का उदर है उसकी रक्षा यज्ञ कर्म से होती है, इसलिये भगवान् वैयदिक ज्ञादि कर्मों की रक्षा के लिये हयग्रीव रूप से यज्ञ में प्रकट हुए।

हृत् केशवः—भगवान् 'केशव' हृदय की रक्षा करे। 'केशव' शब्द में 'क' 'ईश' और 'व' ये तीन अक्षर हैं। 'क' का अर्थ ब्रह्मा, 'ईश' शब्द शिव और 'व' का अर्थ अमृत है। इसलिये व्याकरणानुसार विग्रह करने से 'केशव' शब्द में द्वन्द्व और बहुव्रीहि दो समास हैं जैसे कि कश्च ईशश्च इति केशौ द्वन्द्व समास हुआ। जिसका अर्थ हुआ, ब्रह्मा और महादेव। अब केशयोः वं यस्मात् सः केशवः यह बहुव्रीहि समास हुआ। जिसका अर्थ ब्रह्मा और महादेव को आनन्द देने वाली है वह केशव है। बुद्धि एवं अहंकार के नियामक ब्रह्मा और शिव को अमृत देने वाला अन्तर्यामी केशव हृदय का परिपालन करे ऐसी आशा करती हैं। दोनों स्तनों के मध्य ढाल वाले स्थल को 'हृदय' कहा जाता है।

त्वदुर 'ईशः' प्रकृति के गुण को उत्तेजित करने वाला आधिदैविक काल रूप ईश भगवान् तुम्हारे वक्षः स्थल की रक्षा करे। यहाँ 'तुम्हारी' शब्द देने का रहस्य हैं कि केवल वक्षःस्थल की ही रक्षा के लिये प्रार्थना करती हैं न कि वक्षःस्थल पर विराजमान लक्ष्मीजी की रक्षा के लिये भी प्रार्थना है।

इनस्तु कण्ठ इन सूर्य के अन्दर विराजमान नारायण, कण्ठ की रक्षा करे। श्लोक में दिये हुए 'तु' शब्द का तात्पर्य हैं कि यहाँ ब्रह्माण्ड मध्यस्थित को प्रार्थना करती हैं न कि ब्रह्माण्ड से बाहर स्थित की प्रार्थना करती हैं। इसलिये शुकदेवजी ने श्लोक में 'तु' शब्द दिया है। 'कण्ठ' सरस्वती का स्थान होने से तीन वेदों का रूप है।

विष्णुर्भुजं 'विष्णु' भुजाओं की रक्षा करें। भुजाओं का कारण बताते है, कि 'क्रियाशक्ति' भुजाओं में ही रहती हैं।

मुखमुरुक्रमः—उरु क्रम श्री वामन भगवान् मुख की रक्षा करे। 'उरुक्रम' का तात्पर्य यह है कि जब दैत्यों द्वारा भक्तों को दुःख मिलते हैं तब आप पधारकर भक्तों को किसी प्रकार से भी दुःखों से बचाते हैं। जैसे बलि के हित के लिये बलि का बन्धन वामन रूप से किया, जिससे आप 'उरुक्रम' कहलाते हैं।

ईश्वरः कम्—सित कृष्ण केश सफेद और काले बाल वाला सङ्कर्षण ईश्वर भगवान् मस्तक की रक्षा करे। वह मुख्य होने के कारण 'शिर' की रक्षा करे यह प्रार्थना योग्य ही है॥ २२॥

एवं शावाविशिरोन्तानां रक्षा—अग्रिम श्लोक में इस प्रकार चरणों से लेकर शिरः पर्यन्त रक्षण की प्रार्थना की गई अब इस श्लोक में पुरुष के जिस जिस बाहर के भागों के प्रेरक देव है वे देव उन भागों की रक्षा करें ऐसी प्रार्थना की जायेगी।

चक्री भगवान् चक्र लेकर लालन के अग्र भाग का पालन करें, और गदाधर हरि गदा लेकर पृष्ठ भाग की रक्षा करें। पृष्ठ भाग की रक्षा के लिये महान् को कैसे कहा जाय ? इस संशय के समाधान में श्रीशुकदेवजी ने गदाधर को पृष्ट भाग की रक्षा की प्रार्थना की है, जैसे गजेन्द्र के प्रार्थना करने पर, वैमनस्य का विचार न कर, शीघ्र ही आकर उनकी रक्षा की; क्योंकि

भगवान् हरि 'सर्वदुःखहर्ता' हैं वैसे ही अब भी, प्रार्थना से स्वयं हरि यहाँ, पीछे स्थित होकर पालन करें। हे लालन, आप की बायें और दाहिने दोनों पसलियों की धनुर्धारी मधुसूदन और असिधारी अजन भगवान् रक्षा करें। हे लालन आप के दक्षिण पार्श्व की धनुष लेकर वहाँ स्थित राक्षसों को दूर से ही मधुसूदन भगवान् मारें। लालन आप के नाम पार्श्व में सब ज्ञानियों के सेव्य, सब के जन्मादि, सब प्रकार के दुःखों के नाशक, असिधारी अजन भगवान् अविद्या नाश करता हुआ रक्षा करे। प्रत्येक आयुध की सामर्थ्य दिखाने के लिये ही हर एक आयुध का भिन्न भिन्न नाम दिया है। श्लोक में अजनश्च पद में च अव्यय का उल्लेख किया, उसका तात्पर्य यह है कि गोपियों ने उत्तर की ओर स्थित हरिवर्य आदि स्वरूपों की ही रक्षा के लिये प्रार्थना की है।

शंख सहित उरुगाय भगवान् चारों कोनों में आप की रक्षा करें, भगवान् के शङ्ख की ध्वनि सब दैत्यों के अभिमान की विनाशिका है। विष्णोर्मुखोत्थानिलपूरितस्य" इत्यादि वाक्यों से शास्त्रकारों ने प्रत्येक कोने में भिन्न-भिन्न शंखों का विधान किया हैं। शास्त्र में कहा है कि विष्णु भगवान् के मुख से निकले वायु से भरे हुए शङ्ख का वायु प्रत्येक कोने में रहने वाले दैत्य का नाश करता है, इसलिये इसी एक से ही सब जगह रक्षा होती है। ऊपर के भाग में गरुड़ पर विराजमान मन्वन्तर का अवतार रूप उपेन्द्र और रक्षक होने से गरुड़ भी रक्षा करे। इस प्रकार हर एक की रक्षा की प्रार्थना कह कर अब सामान्य प्रकार से कहती हैं कि पुरुष नारायण सब जगह रक्षा करे क्योंकि उसके उदर में सब निवास करते हैं और वह सर्वत्र है ॥ २३ ॥

आचार्यचरण कहते हैं कि पूर्व श्लोक में बाह्य भाग की रक्षा को कह कर अब इस श्लोक में आध्यात्मिक के अंशरूप प्राण की रक्षा का विधान करते हैं श्रीप्रकाशकारजी स्पष्ट करते हैं कि आध्यात्मिक के अंशरूप का अर्थ अक्षर ब्रह्म के अंशरूप ऐसा करना। यहाँ श्रीलेखकारजी स्पष्टता करते हैं कि इन्द्रिय प्राण अन्तःकरण का संघात आध्यात्मिक है और प्राण अन्तःकरण अलग अलग उसके अंश कहलाते हैं। यहाँ प्राण शब्द से इन्द्रियाँ समझना क्योंकि "तथा प्राण" इस ब्रह्म सूत्र में और श्रुति में प्राण शब्द इन्द्रियों का उपलक्ष्यक माना गया है। इन्द्रियों का ईश हृषीकेश भगवान् नेत्रों का भी नेत्र होने से दश इन्द्रियों की रक्षा करे। बालकरूप भगवान् के प्राणापानादि दश प्राणों की जीव समूह को प्रेरणा करने वाला व उसमें प्रवेश करने वाला नारायण भगवान् रक्षा करे क्योंकि सब के प्राणों के मूल आप हैं एवं सबके जीवन का आधार भी प्राण हैं इसलिये नारायण से प्राण रक्षा होती है। श्वेत द्वीप शुद्ध सत्त्वरूप है इसलिए शुद्ध सत्त्व का स्वामी ही मन, बुद्धि, अहङ्कार और चित्त अन्तःकरण चतुष्टय की रक्षा करें, वासुदेव ही चित्त रक्षक है। योगियों के सेव्य योगीश्वर अनिरुद्ध भगवान् मनकी रक्षा करें। योगशास्त्र का मुख्य विषय मन आदि की स्थिरता होने से योगशास्त्र को मनोमूलक कहा गया है। यहाँ आचार्य चरणों को मूल श्लोक में "योगीश्वर" पाठ अभीष्ट होगा ऐसा सुबोधिनीजी को देखने से लगता है ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं प्रथममतिसंभ्रमेणानाचान्ता एव रक्षां कृत्वा किञ्चिल्लब्धाश्वासा यथाविधानं रक्षां चक्रुरित्याह—गोप्य इति। संस्पृष्टसलिलाः आचान्ताः आत्मनीति षष्ठ्यर्थे सप्तमी। प्रथममात्मन स्वस्याङ्गेषु करयोश्च पृथगजाद्येकादशबीजानि न्यस्याथानन्तरं बालस्याङ्गेषु तथैव बीजन्यासमकुर्वतेत्यन्वयः। तत्राजाद्येकादशबीजानां मध्ये करशुद्धौ त्रीणि, करयोः सन्धिषु चत्वारिचत्वारि, तथ कूर्चादावेकैकस्मिन्नङ्के एकैकमिति विवेकः ॥ २१ ॥ बालेऽङ्गे कृतां रक्षां दर्शयति—अव्यादिति। अजः कर्माधीनजन्मरहितो भगवान् अङ्घ्रिमङ्घ्री अव्यात् रक्षतु। तवेत्यस्य सर्वत्रान्वयः। तव जानु जानुनी अणिमान् दुर्ज्ञेयो भगवानव्यात्। अथ ऊरू यज्ञोऽव्यात्। कटितटमच्युतोऽव्यात्। जठरं नाभेरुपरिभागं हयास्यः श्रीहयग्रीवोऽव्यात्। हृत् हृदयं केशवोऽव्यात्। त्वदुरः तव वक्षः ईशः सर्वनियन्ताऽव्यात्। कण्ठमिनः सूर्यान्तःस्थितो नारायणोऽव्यात्। भुजं भुजौ विष्णुरव्यात्। उरुक्रमो वामनो मुखमव्यात्। ईश्वरः कं शिरोऽव्यात् ॥ २२ ॥ एवमङ्गेषु रक्षां कृत्वा बाह्यतोपि सर्वतो रक्षां कृतवत्यस्तामाहुः— चक्रीति। चक्री चक्रधरो हरिस्त्वदग्रतोऽस्तु रक्षतु। सहगदो गदाधरो हरिस्तव पश्चात् पृष्ठतो रक्षतु। धनुरसी धनुर्धरः असिधरश्च। धनुर्धरो मधुहा मधुदैत्यनिहन्ता भगवांस्तवैकपार्श्वतो रक्षतु। खड्गधरः अजनः कर्माद्यधीनजन्मरहितः स्वतन्त्रो भगवानेकपार्श्वतो रक्षतु। शङ्खधरः उरुगायो विपुलकीर्तिर्भगवान् कोणेषु उक्तावशिष्टशरीरचतुर्भागेषु रक्षतु। उपेन्द्रो वामनः उपरि रक्षतु। तार्क्ष्यः गरुडारूढः क्षितौ रक्षतु। हलधरः सङ्कर्षणः क्षितावधस्ताद्रक्षतु। पुरुषः सर्वान्तर्यामी समन्तात् चराचरेभ्यः सर्वतो रक्षतु ॥ २३ ॥ एवं बही रक्षां कृत्वाऽन्तरङ्गां रक्षामकुर्वंस्तामाहुः—इन्द्रियाणीति। हृषीकाणि इन्द्रियाणि, तेषामीशः तवेन्द्रियाणि अवतु। नारं जीवसमूहमयते प्रेरयति प्रविशति वा स नारायणः तव प्राणान् प्राणापानसमानव्यानोदानादीन् जीवनहेतुभूतान् वायुविशेषान् अवतु। अन्तकरण-चतुष्टयरक्षामाहुः—श्वेतद्वीपपतिः वासुदेवश्चित्तमवतु। योगेश्वरो योगिभिः संराध्योऽनिरुद्धो मनोऽवतु ॥ २४ ॥

अन्वितार्थप्रकाशिका

गोप्य इति ॥ प्रथममतिसंभ्रमेण अनाचान्ता एव रक्षां कृत्वा ततः किञ्चिदाश्वस्ताः संस्पृष्टसलिलाः आचान्ताः। आत्मनीति षष्ठ्यर्थे सप्तमी। प्रथमं स्वयोग्यत्वार्थमात्मनः स्वस्याङ्गेषु करयोश्च पृथगजाद्येकादश बीजानि न्यस्य अथ अनन्तरं बालस्याङ्गेषु

तथैव बीजन्यासमकुर्वत । तत्र अजादिनाम्नाम् आद्याक्षराणि सानुस्वाराणि नमोन्तानि न्यास्थन् । तच्चेत्थम् । अं नमो दक्षिणकरतले । अं नमो वामकरतले । एवं यं उभयोः करपृष्ठयोः । अं दक्षिणाङ्गुलिसन्धौ । हं दक्षिणमणिबन्धे । कं दक्षिणकूर्परे । ईं दक्षिणबाहुमूले । इं वामांगुलिसन्धौ । विं वाममणिबन्धे । उं वामकर्पूरे । ईं वामबाहुमूले । एवं अं पादयोः अं जानुनोः । यं ऊर्वोः । अं कट्योः । हं उदरे । कं हृदये । ईं उरसि । इं कण्ठे । विं भुजयोः । उं मुखे । ईं मूर्ध्नीति । यद्वा । अङ्गेषु करयोश्च न्यस्य अङ्गन्यासकरन्यासौ कृत्वेत्यर्थः । अथ अनन्तरं बालस्याङ्गेष्वङ्घ्र्यादिषु बीजस्याजादिनामाद्यैकैकाक्षरस्य सानुस्वारस्य । नमः शब्दान्तस्य न्यासम् अकुर्वत तेन अं नमोऽजस्तवाङ्घ्री अव्यात् । अं नमः अणिमांस्तव जानुनी अव्यादित्येवं प्रयोगः इत्येके ॥२१॥ ततो वक्ष्यमाणैः पद्यै रक्षामकुर्वन्नित्याह—अव्यादिति ॥ अजः भगवान् ते तव अङ्घ्रिम् अङ्घ्री अव्यात् रक्षतु । तवेत्यस्य अव्यादित्यस्य च सर्वत्रान्वयः । तव जानु जानुनी अणिमान् तन्नामा व्यक्तिविशेषो भगवान् अव्यात् । अथ ऊरू यज्ञः कटितटमच्युतः जङ्घेऽच्युत इति पाठे सन्धिरार्षः । जठरं नाभेरुपरिभागं हयास्यः हयग्रीवः हृत् हृदयं जीवाधारपद्मं केशवः त्वदुरः तव वक्षः ईशः कण्ठमिनः सूर्यान्तःस्थितो नारायणः भुजं भुजौ विष्णुः मुखम् उरुक्रमो वामनः कं शिरः ईश्वरोऽव्यात् । अङ्घ्रिजान्विति सुपो लुक् । भुजमित्यत्र "सुपां सुप" इति औङः अम् इति तोषणी तन्मते मणिमानित्येव न त्वणिमान् ॥ २२ ॥ चक्रीति ॥ चक्री चक्रधरो हरिस्त्वदग्रतोऽस्तु रक्षतु । सहगदो गदाधरो हरिस्तव पश्चात् रक्षतु । धनुरसी बिभ्रदिति शेषः । तेन धनुर्धरः असिधरश्चेति तेन धनुर्धरो मधुहा मधुदैत्यनिहन्ता भगवांस्तवैकपार्श्वतो रक्षतु । असिधरः अजनः भगवानन्यपार्श्वतो रक्षतु । शखधरः उरुगायो विपुलकीर्तिर्भगवान् कोणेषु उक्तावशिष्टशरीरचतुर्दिग्भागेषु रक्षतु । उपेन्द्रो वामनः उपरि रक्षतु । तार्क्ष्यः गरुडारूढः क्षितौ रक्षतु । हलधरः संकर्षणः क्षितावधस्ताद्रक्षतु । पुरुषः सर्वान्तर्यामी समन्तात् चराचरेभ्यः सर्वतो रक्षतु ॥ २३ ॥ बही रक्षां कृत्वाऽन्तरङ्गरक्षामाह—इन्द्रियाणीति ॥ हृषीकाणि इन्द्रियाणि तेषामीशः तवेन्द्रियाणि अवतु । नारायणस्तव प्राणापानादीन् अवतु । अन्तःकरणचतुष्टयरक्षामाहुः । श्वेतद्वीपपतिः वासुदेवश्चित्तमवतु । योगेश्वरो योगिभिः संराध्योऽनिरुद्धो मनोऽवतु ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इत्थं संभ्रमेण सूक्ष्मरक्षां कृत्वा इदानीं विस्तरतो रक्षां कुर्वंतीत्याह गोप्य इति ।संस्पृष्टसलिलाः कृताचमनाः आत्मनि स्वस्मिन् प्रथमं अंगेषु करयोश्च पृथक् पृथक् न्यस्य बीजन्यासं कृत्वा अथ च बाल्यस्यांगेषु बीजन्यासम् अकुर्वत ॥ २१ ॥ अंघ्रिपादौ जानु जानुनी जठरम् उदरं हृत् हृदयं तव उरः वक्षस्थलं भुजं भुजौ कं मस्तकम् ॥ २२ ॥ तथा दिक्षु रक्षणं व्यदधन्नित्याह चक्रीति । चक्री चक्रधरः धनुः धनुर्धरो मधुहा असिधरोऽजनश्च शखभृत् उरुगायः चतुष्कोणेषु त्वां रक्षत्वित्यध्याहृत्य प्रतिवाक्यं योज्यं क्षितौ अधस्तात् ॥ २३–२५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

रक्षाप्रकारमेव प्रपञ्चयति तत्रापि गोपुच्छभ्रमणादिभिरित्यत्रादिशब्दोपात्तान्पदार्थान् दर्शयति । गोमूत्रेणेति । तावत्, अर्भकं शिशुं, गोमूत्रेण स्नापयित्वा, पुनः ततः, गोरजसा गोपादस्पृष्टरजसा च, स्नापयित्वा, ततः, शकृता गोमयेन, द्वादशाङ्गेषु ललाटादिद्वादशाङ्गेषु, नामभि. केशवादिभिर्द्वादशनामभिः, रक्षां चक्रुः ॥ २१ ॥ एवमनाचान्ता एव तावत् संभ्रमेण रक्षां विधायाथ लब्धश्वासा आचान्ता विशेषतो रक्षां चक्रुरित्याह । गोप्य इति । संस्पृष्टसलिला आचान्ताः, गोप्यः, आत्मनि स्वशरीरे, करयो', अङ्गेषु इतरेष्वङ्गेषु च, पृथगेकैकशः, न्यस्य बीजानि विन्यस्य, अथ, बालस्य, आत्मनि करयोः, अङ्गेषु च, बीजन्यासम् , अकुर्वत व्यकुर्वन् । अत्रोत्तरश्लोकोक्तानामजादिशब्दानामाद्यमाद्यमक्षरमुपर्यद्धानुस्वारोपेतं भण्यते चेत्तर्हि तस्य तद्बीजत्वं बोध्यम् । तत्र करशुद्धौ त्रीणि बीजानि, करयोः संधिषु चत्वारि चत्वारि, अङ्घ्र्यादावेकैकस्मिन्नङ्गे अजाद्येकैकबीजं न्यस्य बालस्याप्यङ्गेषु तथैवाकुर्वतेति । अपरे अष्टाक्षरन्यासमकुर्वतेत्याहुः । इतरे तु बीजन्यासमकुर्वन्नेति सामान्यत एवाहुः ॥ २२ ॥ अथ रक्षाविधानं दर्शयति । अव्यादिति । अजादिशब्दा योगरूढिभ्यां भगवदसाधारणाः । अजः कर्मायत्तोत्पत्तिरहितो भगवान् , तव, अङ्घ्रिमङ्घ्री, अव्याद्रक्षतु । अणिमानणोर्जीवस्याप्यन्तरात्मतया प्रवेशयोग्यः, जानु जानुनी, अव्यात् । अथ यज्ञः यज्ञाराध्यः, यज्ञभुक् तत्फलदश्च, ऊरू, अव्यात् । अच्युतः, स्वस्याच्युतत्वात् स्वाश्रितान्न च्यावयतीति तथाभूतो भगवान् , कटितटम् , अव्यात् । हयास्यो हयग्रीवो भगवान् , जठरमुदरम् , अव्यात् । प्रशस्ताः केशाः सन्त्यस्येति केशवः भगवान् , हृत् हृदयम् , अव्यात् । ईशः सर्वेशानो भगवान् , त्वदुरस्त्वद्वक्षः, अव्यात् । इनः सर्वज्ञः भगवांस्तु, 'इण् गतौ' गत्यर्था बुद्ध्यर्थाः । कण्ठम् , अव्यात् । विष्णुर्व्यापको भगवान् , भुजं भुजावित्यर्थः । अव्यात् । उरवस्त्रिलोकीसंग्राहकाः क्रमाः पादविक्षेपा यस्य वामनो भगवान् , मुखम् , अव्यात् । ईश्वरः सर्वशास्ता भगवान् , कं मूर्धानं, अव्यात् । 'कं वारिसुखमूर्द्धसु' इति विश्वः ॥ २३ ॥ एवं पादादिशिरःपर्यन्तं रक्षां विधायाथ दिक्षु रक्षां विदधुः ॥ चक्रीति ॥ चक्री चक्रधरो भगवान् , अग्रतः पुरतः, अस्तु । सहगदः गदासहितः हरिः, पश्चात् पृष्ठतः, अस्तु । धनुरसी धनुर्धरः खड्गधरश्चेत्यर्थः । मधुहा अजनश्च, अजितः इत्यपि पाठः । त्वत्पार्श्वयोः, अस्तु । धनुर्धरो मधुसूदनो दक्षिणपार्श्वे खड्गधरोऽजनो वामपार्श्वेऽस्त्वित्यर्थः । शङ्खोऽस्यास्तीति अर्शआदित्वान्मत्वर्थीयोऽच् । शङ्खधर इत्यर्थः । उरुगायश्च भगवान् ,

कोणेषु आग्नेयादिषु, अस्तु । उपेन्द्रः भगवान्, उपर्यूर्द्ध्वाया दिशि, अस्तु । तार्क्ष्यः गरुडवाहः भगवान्, क्षितावधस्तात्, अस्तु । हलधरः संकर्षणः पुरुषो भगवान्, समन्तात् अस्तु । समन्ततस्त्वां रक्षत्वित्यर्थः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अव्यादज इति : १०. ६. २२.

भगवंस्त्वदपेक्षयापि शक्तिस्तवनाम्नि प्रबलेति मन्महे । त्रिजगत्कृतरक्षणस्य तेऽपि यदभूद्रक्षणकारि गोकुले ॥ ४८ ॥

कृष्णप्रिया

प्रथम गोपियों ने जल का स्पर्श कर, पहले अपने शरीर के पृथक् पृथक् अङ्गों में तथा करों में न्यास किया, पुनः बालक के अङ्गों एवं करों में न्यास किया ॥ २१ ॥ प्यारे लालन आज भगवान् आप के पैरों की, अणिमान घुटनों की, यज्ञ जङ्घाओं की, अच्युत कमर की, हयग्रीव उदर की, केशव हृदय की, ईश छाती की, इन सूर्यान्तर्गत नारायण कण्ठ की, विष्णु बाहु की, उरुक्रम मुख की, ईश्वर मस्तक की रक्षा करे ॥ २२ ॥ हे नन्दलाल ! चक्री भगवान् आगे, गदाधर हरि भगवान् पीछे, धनुषधारी मधुसूदन भगवान् और खड्गधारी अजन भगवान् दोनों पार्श्वो में, शंखधर उरुगाय भगवान् कोनों में, उपेन्द्र गरुड भगवान् ऊपर, हलधर भगवान् पृथ्वी पर और पुरुष भगवान् चारों तरफ रक्षा करें ॥ २३ ॥ हृषीकेश भगवान् इन्द्रियों की, नारायण प्राणों की, श्वेतद्वीप के पति चित्त की और योगेश्वर अथवा योगीश्वर मन की रक्षा करें ॥ २४ ॥

[1]पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान् परः । क्रीडन्तं पातु गोविन्दः शयानं पातु [2]माधवः ॥ २५ ॥
व्रजन्तमव्याद् वैकुण्ठ [3]स्त्वासीनं त्वां श्रियः पतिः । भुञ्जानं यज्ञभुक् पातु सर्वग्रहभयङ्करः ॥ २६ ॥
डाकिन्यो यातुधान्यश्च कूष्माण्डा येऽर्भकग्रहाः । भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः ॥ २७ ॥
कोटरा रेवती ज्येष्ठा पूतना मातृकादयः । उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः ॥ २८ ॥

कर्दमक्षमा

अन्वयः—पृश्निगर्भः तु ते बुद्धिं पातु परः भगवान् आत्मानं पातु, गोविन्दः क्रीडन्तं पातु माधवः शयानं पातु ॥ २५ ॥ वैकुण्ठः व्रजन्तम् अव्यात्, श्रियःपतिः आसीनं त्वाम् अव्यात् यज्ञभुक् सर्वग्रहभयंकरः भुञ्जानं पातु ॥२६॥ डाकिन्यः यातुधान्यः च कूष्माण्डाः ये अर्भकग्रहाः च भूतप्रेतपिशाचाः ये यक्षरक्षोविनायकाः ॥ २७ ॥ कोटरारेवतीज्येष्ठापूतनामातृकादयः, ये उन्मादाः हि अपस्माराः ये हि देहप्राणेन्द्रियद्रुहः ॥ २९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आत्मानमहंकारम् ॥ २५–२८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आत्मानमहंकारम् । परः पुरुषः '"पुरुषान्न परं किञ्चित्" इति श्रुतेः । आत्मानं स्वम् । परो भगवान्स्वयं भगवानित्यर्थः । सरस्वतीसंवादश्चायं तेषां तदंशत्वेन ममतास्पदत्वात्स्वस्य स्वयं भगवत्त्वेनैवाहंतास्पदत्वाच्चांशेनांशस्य रक्षा भवतु स्वयं च स्वस्येति प्रार्थयामहे इत्यर्थः । अतस्तत्तदंगावतारास्तदावरणरूपाश्च ते ते इति भाव इति विश्वनाथसंदर्भौ । "नष्टां वै धरणीं पूर्वमविदं यद्गुहागताम् । गोविंद इति तेनाहं देवैर्वाग्भिरभिष्टुतः ॥" इति मोक्षधर्मे । "अहं किलेंद्रो देवानां त्वं गवामिंद्रतां गतः । गोविंद इति लोकास्त्वां स्तोष्यंति भुवि शाश्वतम् ॥" इति । यद्वा—"गौरेषा भवतो वाणी तां च वेद यतो भवान् । गोविंदस्तु ततो देव मुनिभिः कथ्यते सदा ॥" इति हरिवंशे । 'मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान् । तस्मान्माधवनामासि धवः स्वामीति कीर्त्तितः ॥" इत्यपि तत्रैव ॥ २५ ॥ विगता कुंठा नाशो यस्य तद्विकुंठं ज्ञानं स्थानं वा तद्विद्यते स्वरूपत्वेनाश्रयत्वेन वास्येति वैकुंठः । ज्योत्स्नादित्वादण् यद्वा—जगदारंभे विश्लिष्टानि भूतानि संश्लेषयंस्तेषां गतिं प्रत्यबध्नादिति वैकुंठः । "मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना । वायुश्च तेजसा सार्द्धं वैकुंठत्वं ततो मम ॥" इति शांतिपर्वणि । यज्ञं भुनक्ति ब्रह्मरूपेण पालयतीति यज्ञभुक् "एवं विद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोभिरक्षति" इति श्रुतेः । सर्वे गृह्णंति स्वायत्तं कुर्वंत्यनवधानमिति ग्रहा ब्रह्मराक्षसादयः सर्वे च ते ग्रहास्तेषां भयंकरः नरसिंहः ॥ २६ ॥ डाकिनी कालखंडं मन्त्रबलेन निष्काश्य भक्षति या सा भवतीति । कौ पृथिव्यामूष्मा यस्मात्तदंडं येषां ते कूष्माण्डास्ते चोपद्रवविशेषाः विनायका नायकहीना विघ्नविशेषाः

---

१. र्भस्ततो–इति कस्यचित् । २. केशवः–इति कस्यचित् । ३. आसीनं–श्री. वंशी. गिरि. भक्त. ।

"विनायकस्तु हेरंबे तार्क्ष्ये विघ्ने जिने गुरौ" इति कोशात्। डाकिन्यादयो मातृकाद्यन्ता येऽर्भकग्रहा बालग्रहाः अर्भकरूपेण ये प्राणिनो गृह्णंति तेऽर्भकग्रहाः पिशाचभेदा इति केचिदाहुः 'अर्भकः कथितो बाले मूर्खेऽपि च' इति मेदिनी। ये उन्मादा देहस्मृतिविघातका अपस्माराः ये च देहादिनाशकाः महोत्पाता धूमकेतूदयादयस्तद्भयसूचका ये स्वप्नदृष्टा गर्दभयानकर्दमपातादयः। वृद्धा ये बालग्रहाः वृद्धा विद्यंते ग्राह्यत्वेन येषां ते मत्वर्थीयोऽच्। कासश्वासादयो रोगविशेषास्ते सर्वे नामग्रहणेनैव भीरवो भीताः संतो नश्यंत्विति द्वयोः संबंधः ॥ २७–२९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

क्रीडन्तमिति च सार्द्धकम्। गोविन्द इत्यादिकं तु तत्तत्क्रीडानुरूपेण तत्र गोविन्दो गोमध्ये क्रीडापरः कश्चिद्देव इति तासां भानं माधवः लक्ष्मीसंवाह्यमानचरणः शेषशायी वैकुण्ठो विकुण्ठासुतो जयविजयसनकादिसमाधानार्थं कृपया स्वयं पादव्रज्ययैव बहिर्निर्गतो यः स इत्यर्थः। श्रियः पतिः परमव्योमसिंहासनस्थो महानारायणः यज्ञभुक् स्पष्ट एवेति सर्वग्रहभयङ्कर इत्यस्य सर्वत्राप्यन्वयः। क्रीडादिषु ग्रहदोषेभ्योऽपि रक्षार्थम् ॥२६॥ डाकिन्य इति त्रिकम्। आदिशब्दात्खरकीज्वालामुखाद्या देव्यागणाः बालग्रहा इति पुनरुक्तिर्बालके तेभ्यो भयाधिक्यात् केचिदाहुः अर्भकरूपेण ये प्राणिनो ग्रह्णंति तेऽर्भकग्रहाः पिशाचभेदा इति ॥२८–२९॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

सर्व्वग्रहाणां भयंकर इत्यस्य सर्व्वान्ते निर्देशात् सर्व्वैरप्यन्वयः। क्रीडादिषु निजनिजसमये कदाचिदशुभानामपि ग्रहाणां तत्तन्नाम विशेषेण दोषनिवर्त्तनार्थम्। आदिशब्दाच्च बकी ज्वालामुख्याद्या देव्या गणाः; बालग्रहा इति पुनरुक्तिस्तदानीं तस्य बाल्यापेक्षया। केचित्त्वाहुः—'अर्भकरूपेण ये प्राणिनो गृह्णन्ति, तेऽर्भकग्रहाः पिशाचभेदाः' इति ॥ २५–२५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पृश्नेर्गर्भत्वादपत्यत्वात्पृश्नि र्भः भगवान् षाड्गुण्यपूर्णः परः प्रकृतिपुरुषविलक्षणः आत्मानम् इत्यनेन चित्ताहङ्कारौ विवक्षितौ ॥ २५ ॥ सर्वग्रहभयङ्कर इति एतद् यज्ञभुग्विशेषणम् ॥ २६ ॥ कूष्माण्डादयो ग्रहा वान्तरविशेषाः ॥ २७ ॥ देहादीनि दूषयन्तीति तथा ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

आत्मानं मध्यम् ॥ २५–२६ ॥ अर्भकग्रहाः बालग्रहाः ॥ २७–२९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

परो भवान् स्वयं भगवानित्यर्थः। सरस्वतीसंवादश्चायं "अतस्ते विष्णोः" इति च वक्ष्यते तेषां तदंशत्वेन ममतास्पदत्वात् स्वस्य स्वयं भगवत्त्वेनैवाहन्तास्पदत्वाच्च अंशेनांशरक्षा भवतु स्वयञ्च स्वस्य इति प्रार्थयामह इत्यर्थः ॥ २५–२६ ॥ अतस्तत्तद्ग्रहावतारास्तदावरणरूपाश्च ते त इति ज्ञेयम् अर्भकबालग्रहयोरैकार्थ्येन पुनरुक्तिर्बालकेभ्यो भयाधिक्यात् ॥ २७–३० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तथाविधमहोपद्रवे श्रीव्रजेश्वरीप्रभृतिभिः पुरपुरन्ध्रीभिस्तन्नामभिरेवैतद्रक्षा व्यधायीति वचित्र्यार्थं प्रदर्शयति–क्रीडन्तं पातु गोविन्द इत्यादि। गोविन्दादीनि नामानि नित्यसिद्धान्येव, गोविन्द आसङ्गवमात्तवेणुः' इत्याद्युक्तेः। तेन गोविन्दाभिषेक एव तन्नामोत्पत्तिरिति न मन्तव्यम् ॥ २६–३४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

'क्रीडन्तं पातु गोविन्दः' इत्यनेन गोविन्दादीनि नित्यसिद्धान्येव, न तु गोविन्दाभिषेकत एव (भा. ६।८।२०) "गोविन्द आसङ्गव" इत्युक्तेश्च ॥ (२६–३४)

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आत्मानमहङ्कारं परः सर्वमूर्तिः स्वयं पदार्थः ॥ २५–२९ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अथान्तरङ्गां रक्षामकुर्वन्नित्याह–इन्द्रियाणीति सार्द्धेन ॥ २४ ॥ आत्मानमहङ्कारं कर्म सुस्थितस्य रक्षामकुर्वन्नित्याह क्रीडन्तमिति सार्द्धेन ॥ २५ ॥ २६ ॥ डाकिन्य इति त्रिकम् ॥ २७ ॥ २९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

बही रक्षामेवं विधायान्तर्लक्ष्मीकान्तकायरक्षां तन्वङ्गयस्तन्वत इत्याह ॥ इन्द्रियाणीति । हृषीकाणीन्द्रियाण्याहुरित्यादेरिन्द्रियस्वामी हृषीकेश इन्द्रियाण्यवतु नारायणः प्राणान् श्वेतद्वीपपतिस्तत्पतिः । एकैकदिगवस्थितरूपविवक्षयैकवचनम् । वासुदेवादिः । यथोक्तं वराहपुराणे । श्वेतद्वीपे चतुर्दिक्षु चतस्रो मम मूर्तयः । पूज्यन्ते दैवतैः सर्वैर्वासुदेवादिकाः सदेति । चित्तं योगेश्वरः कपिलादिः । वृत्तिभेदाच्चितं मन इत्याद्युक्तिः ॥ २५ ॥ पृश्निगर्भस्त्वत्पूर्वरूपी । आत्मानमेवं स्वाभिन्नं भगवान्परः । ॐ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॐ । यथा ह वै मनः पञ्चधा व्यपदिश्यते मनो बुद्धिरहङ्कारश्चित्तं चेतनेत्यादेरात्मानमहङ्कारं वा पातु क्रीडन्तं गोविन्दः ॥ २६ ॥ सर्वग्रहभयङ्कर इति वैकुण्ठाद्यन्वयि ॥ २७ ॥ डाकिन्याद्या गणा अर्भका ग्रहा विनायकास्तेऽपि विघ्नप्रदा गणाः ॥ २८ ॥

श्रीसुबोधिनी

बुद्धिं प्रद्युम्नः सर्ववंशकर्ता प्रथमं पृश्निगर्भो जात इति स एवावतु, आत्मानमहङ्कारं भगवान् सङ्कर्षणोवतु, स चास्मात् परश्चतुर्मूर्तावुक्तः, आत्मानं जीवरूपं च परः पुरुषोत्तमोव्यात्, देहं च भगवान् सर्वनियामकोव्यादात्मानमेव वा भगवान्व्यादिति, कृत्रिमभगवत्त्वव्यावृत्त्यर्थं पर इति, सर्वावस्थासु रक्षां प्रार्थयन्ति क्रीडन्तं बालकलीलया शृङ्गचर्यादिष्वपि गच्छन्तं गोविन्दः पातु, यस्तु सदा गवामिन्द्रो गुप्ततया रक्षकः, शयानं माधवः पातु, लक्ष्म्यास्तत्र प्रयोजकत्वात् ॥ २५ ॥ व्रजन्तं शनैर्बाललीलया गच्छन्तं वैकुण्ठः पातु, स हि गतिदानार्थमेव वैकुण्ठं निर्माय स्थितः, अनेन सर्वत्र पदस्थापने कोमलत्वादिसुखदो भवत्विति प्रार्थितं, आसीनमुपविष्टं त्वां लक्ष्मीपतिरवतु, स हि लक्ष्मीविवाहसमय उपविष्टो लक्ष्म्या वृतः, तादृशभावापन्नः सर्वसौभाग्ययुक्तो लक्ष्मीपतिरासीनमवतु, सर्वमेव जगद् भगवत्युपविश्य तिष्ठतीति, तदर्थमाह त्वामिति, एवं देहावस्थाचतुष्टयमुक्त्वा क्रियावस्थायामाह भुञ्जानमिति, स्तन्यं दुग्धादिकं वा स्वतश्चौर्यादिना वा, यज्ञभोक्ता विष्णुः पातु, भोजने क्रियायां कालफलनियामका ग्रहाः सन्ति, तैरवश्यं स्वकालोद्भवं फलं देयमित्याशङ्क्याह सर्वग्रहभयङ्कर इति, सर्वेषां ग्रहाणां कालक्रियाद्रव्यादिनियामकानां नवग्रहाणां भयजनको भवति, अन्यथा यज्ञादीनां फलदातृत्वं न स्यात् तत्तत्कालफलमेव तेषां स्यात्, अतो यदा यज्ञभोक्ता फलं प्रयच्छति तदा ग्रहा निवृत्ता भवन्ति, निवृत्तिरपि न वचनादिना किन्तु रूपमेव दृष्ट्वा भीता निवृत्ता भवन्ति, तत उक्तं भयङ्कर इति ॥ २६ ॥ एवं सहदोषाणां निवर्तकैर्निवृत्तिं प्रार्थयित्वागन्तुकान् दोषान् गणयन्त्यः स्वत एव तेषां भगवन्नामोच्चारणेन निवृत्तमाहुर्डाकिन्य इतित्रिभिः, एके महादेवसम्बन्धिनो दोषाः स्थूला अन्य आध्यात्मिका मध्यमास्ततोप्याधिभौतिका निकृष्टाः, स्वप्नादिष्वेव तेषां भयजनकत्वं, डाकिन्यः स्त्रिय एव दुष्टा दास्य इव पतिरहिताः सेनारूपाः, यातुधान्यो यक्षादिस्त्रियः, चकारात् तदेवान्तरभेदाः, कूष्माण्डादयः पुरुषाः, कुत्सितो य ऊष्मा तत्कृता अण्डा इव ये भवन्ति, कूष्माण्डशब्दो यौगिको दुष्टमहादेवगणवाचकः, प्रलये तेषां विनियोगः, रूढो लौकिकः, नैमित्तिको वैदिकः, अतो दोषगणनायां तदुभयव्यावृत्त्यर्थं य इत्युक्तं, अर्भकग्रहा अर्भकरूपा ग्रहाः, तेपि पिशाचविशेषाः, बालका एव भूत्वा सर्वान् गृह्णन्ति, भूतप्रेतपिशाचाः प्रसिद्धा यक्षरक्षांसि च, विनायका विघ्नकर्तारः, ते सच्छिद्रभिन्ना भवन्तीति तेषामधिपतिर्विनायक उक्तः, स तु न क्वापि स्वत आयातीति तन्निवृत्त्यर्थं य इत्यत्राप्यनुसन्धेयम् ॥ २७ ॥ ततो हीनाः स्वतन्त्रस्त्रीरूपाः, कोटरा पूर्वदेशे "कुठारे"ति प्रसिद्धा, तथा रेवती, रेणुकेति केचित्, ज्येष्ठा दक्षिणदेशे प्रसिद्धा, पूतनेयमेव, अज्ञानात् कीर्तनं, वस्तुतस्त्वेते मन्त्रास्ते च यादृशास्तादृशा एव कीर्तनीयाः, अन्यथा "मन्त्रो हीनः स्वरतो वर्णतो वे"तिवाक्यान्मन्त्रस्यान्यथात्वेन रक्षोपयोगित्वं न स्यात्, तेन तथाकीर्तनं तज्ज्ञानेपि, अत एवाप्रस्तुतस्यापि वृद्धग्रहस्य कीर्तनं, मातृकाः षोडश प्रसिद्धाः, आदिशब्देन सर्वा एव ग्रामदेवताः, एतावत्यः स्त्रियः, उन्मादादयः पुरुषाः, उद्गतो मादो यैः, यतः प्राणिन उन्मत्ता भवन्ति, य इतियोगव्यावृत्त्यर्थं, अपस्मारा अपि बुद्धिभ्रंशहेतवः, यतो रोगरूपा अपि भवन्तीति य इति तेष्वपि ग्रहणं, उभयेषामुभयत्वं लोकसिद्धमिति तद्व्यावृत्तिर्युक्तैव, त्रिविधानन्यानाह देहप्राणेन्द्रियद्रुह इति, केचिद् देहद्रोहं कुर्वन्ति येन देहे निरन्तरं पीडा भवति तथा प्राणेषु येन क्षुधादिर्न भवतीन्द्रियाणां च स्वावबाधिर्यादि ॥ २८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

पृश्निगर्भ इत्यत्र भगवत्पदेन सङ्कर्षणोक्तौ हेतुमाहुः स चेत्यादि, स सङ्कर्षणः, अस्मात् प्रद्युम्नात् परोग्रिमः, यतश्चतुर्मूर्तिनिरूपण उक्तोतस्तथेत्यर्थः, आत्मानमित्यादेरर्थान्तरद्वयमाहुरात्मानं जीवरूपमित्यादि, क्रीडन्तमित्यत्र गुप्ततया रक्षक इति गोवर्धनोद्धरणव्याजेनालौकिकसामर्थ्यदातृत्वादितिभावः, लक्ष्म्यास्तत्रेति शयन इत्यर्थः ॥ २५ ॥ भुञ्जानमित्यत्र यज्ञभुजः सर्वग्रहभयङ्करत्व उपपत्तिमाहुरन्यथेत्यादि, यदि ग्रहाणामेव नियामकत्वं स्यात् तदा यज्ञैर्हि यत् फलं दीयते तत् पूर्वकर्मानुरूपग्रहादिप्रतिकूलं, तथा च तद्भयङ्करत्वाभावे तदुपमर्देन स्वतन्त्रतया फलदानसामर्थ्यं यज्ञानां न स्यात् किन्तु ग्रहैः कृत्वा तत्तत्कालफलमेव स्यादतो यज्ञैः फलदाने ग्रहनिवृत्तेरवश्यमपेक्षेत्यतस्तथेत्यर्थः ॥ २५ ॥ डाकिन्य इत्यत्र रूढ इति फलविशेषवाचकः नैमित्तिक इत्युपवीतादौ सूतकसम्भावनायां निमित्ते यो होमस्तत्र नैमित्तिकः कुष्माण्डशब्दो वैदिके कर्मणि प्रसिद्धः, स त्विति विघ्नकर्तॄणामधिपतिर्गणेश इत्यर्थः ॥ २७ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

चक्रयमत इत्यत्र अविद्याच्छेदक इति न जना अविद्या यस्मादिति व्युत्पत्तेरितिभावः, शब्दो हि स इति चतुर्थस्कन्धे ध्रुवस्य शङ्खस्पर्शेन वाक्सञ्जीवनतात्पर्यकथने निबन्धे 'अपां तत्त्वे स्वतृप्त्यर्थमासन्यो वर्तते हरे'रित्युक्तं तत्सम्मतिसूचनाय हि शब्दः, सापीति गृहीतशङ्कापीत्यर्थः ॥ २३ ॥ इन्द्रियाणीत्यस्याभासे आध्यात्मिकांशेति इन्द्रियप्राणान्तःकरणसङ्घात आध्यात्मिकः तदंशभूताः प्रत्येकमेते इत्यर्थः, प्राणादीनामिति अत्र प्राणपदेनेन्द्रियाणि तदादीनामित्यर्थः, इन्द्रियाणां प्राणपदवाच्यत्वं "तथा प्राण" इति सूत्रे श्रुतौ बहुशो व्युत्पादितं, व्याख्याने, चित्तरक्षकश्चेति 'यदाहुर्वासुदेवाख्यं चित्तं तन् महदात्मक'मित्यस्य सम्मतिः सूचिता ॥ २४ ॥ पृश्निगर्भस्तु इत्यत्र स चास्मादिति स चतुर्मूर्तावुक्तः सङ्कर्षणश्चकारात् पूर्वश्लोकोक्तहलधरश्चास्माद् बलदेवात् परः वासुदेवाविष्टसङ्कर्षणाविष्टशेषरूपो बल इति प्रथमाध्याये निरूपितमतस्तस्मात् परस्तत्राविश्य स्थित उत्कृष्टस्तन्नियामक इत्यर्थः, तं परिचाययन्ति चतुर्मूर्तावुक्त इति अन्तःकरणचतुष्टयमध्येऽहङ्कारदेवतात्वेनोक्त इत्यर्थः, 'हलककुदि कृतसुभगसुन्दरभुज' इति पञ्चमस्कन्धोक्तो हलधरो ज्ञेयः, एतयोर्वस्तुत ऐक्यमेवेति भिन्नतया कथनारुच्या आत्मपदस्य परपदस्य चार्थान्तरमप्याहुः आत्मानं जीवरूपं चेति, समुच्चयोयं न तु विकल्प इति चकारः, प्रयोजकत्वादिति प्रयोजनं फलं शयने तत्सम्पादिका लक्ष्मीरित्यर्थः ॥ २५ ॥ व्रजन्तमित्यत्र क्रियावस्थायामाहेति रक्षणमितिशेषः, अत्र यज्ञभुक्कृतरक्षाप्रार्थनात् तस्य च क्रियाप्रधानत्वादुपलक्षणविधया क्रियामात्रावस्थायां रक्षा प्रार्थितेति भावः, तथा च विशेषतश्चतुष्टयमुक्त्वा क्रियासामान्यावस्थायां यज्ञभुक्कृतरक्षणं तत्प्रार्थितं शुक आहेत्यर्थः ॥ २६ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

सब के वंश को बढ़ाने वाला, पहले पृश्नि के गर्भ से प्रकट हुआ वंशप्रवर्तक प्रद्युम्न ही बुद्धि की रक्षा करे (१) आत्मा अहंकार की भगवान् संकर्षण रक्षा करे। यह संकर्षण उस प्रद्युम्न से पर अर्थात् श्रेष्ठ है। यहाँ श्रीप्रकाशकारजी 'पर' शब्द का तात्पर्य कहते हैं कि चतुर्व्यूह श्रीवासुदेव संकर्षण प्रद्युम्न और अनिरुद्ध में क्रमशः प्रद्युम्न प्रथम संकर्षणजी आये हैं इसलिए 'पर' शब्द का अर्थ आचार्य प्रद्युम्न से पर ऐसा करते हैं। (यहाँ सुबोधिनीजी में 'च' अव्यय का ग्रहण किया है, इसलिए आत्मा के अन्तःकरण जीव और देह ऐसे तीन अर्थ लिए जाएंगे)। जीव रूप आत्मा की परः पुरुषोत्तम रक्षा करे, (३) देहरूप आत्मा की, सब का नियमन करने वाला भगवान् रक्षा करे, अथवा भगवान् आत्मा की रक्षा करे। यहाँ पर कृत्रिम भगवान् की निवृत्ति के लिए "परः" सब से श्रेष्ठ पद का प्रयोग किया है। अब हर अवस्था में रक्षा की प्रार्थना करती है कि बालक्रीडा करते समय पर्वत, अग्नि आदि जहाँ की ओर जावे, वहाँ भी गुप्त रीति से स्थिति कर रक्षा करने वाले गोविन्द रक्षा करें। सोते हुए की लक्ष्मीपति माधव रक्षा करे। शयन समये सेवानिष्ठ लक्ष्मीजी का प्रयोजन होने से 'माधव' कहा है ॥ २५ ॥

व्रजन्तं शनैर्बालल्लीलया—बाललीला करते हुए धीरे-धीरे जाते हुए लालन की वैकुण्ठ रक्षा करे क्योंकि वैकुंठ भगवान चलने में वेग देने के लिए ही वैकुण्ठ बनाकर स्थित है। इस प्रकार वैकुण्ठ भगवान् की प्रार्थना करने का आशय यह है कि जहाँ भी बालक चरण धरे, वह पृथ्वी कोमल गुणवाली होकर, वैकुण्ठ के समान सुखदायिनी बने बैठे हुए तुम्हारी लक्ष्मीपति रक्षा करे। वह लक्ष्मीपति लक्ष्मी के विवाह के समय, लक्ष्मी के साथ जिस भाव से बैठे थे। उस भाव को प्राप्त, सर्व सौभाग्य पूर्ण लक्ष्मीपति, बैठे हुए की रक्षा करे। सारा जगत् भगवान् में ही स्थित होकर रहता है इसलिए "त्वां" पद का उल्लेख किया है।

"क्रीडन्तं पातु से लेकर आसीनं त्वां" पर्यन्त देह की चारों अवस्थाओं को बताकर, अब क्रिया की अवस्था कहते हैं कि सहज रीति से चौसीदि से प्राप्त मातृ स्तन्य, दुग्ध, आदि भोज्य पदार्थ की यज्ञ भोक्ता विष्णु रक्षा करे। भोजन में और क्रिया में काल और फल के नियामक ग्रह हैं। ग्रह ही कालानुसार भोजनादि क्रिया के फल दाता हैं इसलिए वे ग्रह अवश्य फल देंगे। इस भय को मिटाने के लिए ही गोपियों ने भोजनादि में रक्षा करने के लिए यज्ञभोक्ता विष्णु की प्रार्थना की है, क्योंकि काल, क्रिया, द्रव्य आदि के नियामक नव ग्रह भगवान् विष्णु से डरते हैं। यदि वे ग्रह, विष्णु से डरते न होते तो, यज्ञादि का फल ही न होता। ग्रहों के अनुसार फल होता किन्तु ऐसा होता नहीं है। इससे जब यज्ञभोक्ता फल देता है तब ग्रह निवृत्त हो जाते हैं। ग्रहों की निवृत्ति वचनों से नहीं किन्तु विष्णु के केवल स्वरूप देखने से ही डरकर निवृत्त होते हैं। इसलिए कहा है कि 'सर्वग्रहभयङ्करः' विष्णु यज्ञभोक्ता, सर्व ग्रहों के लिए भयङ्कर है। सारांश यह है कि जिनकी वे रक्षा करते हैं वहाँ वे ग्रह कुछ नहीं कर सकते हैं ॥ २६ ॥

एवं सहजदोषाणां इस प्रकार सहज स्वाभाविक दोषों को निवृत्त करने वालों की प्रार्थना कर, अब आगन्तुक आने वाले दोषों की तीन श्लोकों से गणना करती हुई कहती है कि भगवान् का नाम उच्चारण करने से ही वे दोष स्वयं मिट जायेंगे।

कितने ही महादेव सम्बन्धी स्थूल दोष हैं, दूसरे आध्यात्मिक मध्यम दोष हैं, तीसरे स्वप्न में डरानेवाले आधिभौतिक क्षुद्र दोष हैं। डाकिन्य-डाकिनी दासियों की तरह पतिरहित दुष्ट स्त्री जाति सेना सदृश हैं। यातुधान्यः राक्षसियाँ यक्षों की

स्त्रियाँ हैं। श्लोक में दिये हुए 'च' का आशय है कि यातुधानियाँ अन्य प्रकार की भी होती हैं। 'कूष्मांड' महादेव के गणों में दुष्टगण पुरुष रूप हैं। कूष्मांड शब्द को कुत्सितोय उष्मा ऐसा यौगिक अर्थ कर, उनकी उत्पत्ति एवं आकृति बताते हैं कि बुरे, गरमी से पैदा हुए अंडों के समान आकृति वाले पुरुष रूप को कूष्मांड कहते हैं। प्रलय के समय इनसे काम लिया जाता है। 'कूष्मांड' यह लौकिक रूढ नाम है। 'कूष्माण्ड' यह नैमित्तिक क्रिया का नाम होने से, 'वैदिक' भी है। वैदिक कूष्माण्ड विधि से पृथक् दोष वाला 'कूष्मांड' अन्य है, यह बताने के लिये श्लोक में 'ये' पद दिया है, श्रीपुरुषोत्तमजी स्पष्टता करते हैं कि धार्मिक संस्कार के समय, अशौच की संभावना होती है, उन धार्मिक संस्कारों में अशौच से रुकावट न हों, इसलिए वैदिक मन्त्रों से 'होम' किया जाता है, उस होम को 'कूष्मांड' कहते हैं इसलिए 'कूष्मांड' यह शब्द वैदिक भी है। जो कूष्मांड' दोष वाले, दुष्टगण हैं उनका यहाँ निरूपण है, फल वाचक लौकिक और वैदिकों का ग्रहण किया नहीं। 'अर्भकग्रहा' अर्भक रूप ग्रह पिशाच जाति के हैं वे बालरूप धारण कर सब को पकड़ते हैं। भूत, प्रेत, पिशाच, यक्ष, राक्षस और विनायक विघ्न करने वाले प्रसिद्ध हैं। वे छेद वाले छिन्न भिन्न होते हैं उनका अधिपति विनायक कहा है। वह तो स्वयं कहीं भी नहीं आता है, यहाँ 'विनायक' नाम से कोई गणेशजी को न समझें, इसलिए श्लोक में दिये 'ये' पद का यहाँ भी उपयोग करना। 'ये' पद से यह बताया कि यहाँ दिये हुवे 'विनायक' शब्द से गणेश न समझना क्योंकि यह विनायक तो विघ्न करने वाला है और वह विनायक गणेशजी तो विघ्नविनाशक है ॥ २७ ॥

ततो हीनाः स्वतन्त्रस्त्रीरूपाः—२७ वें श्लोक में कहे हुये ये क्षुद्र और स्वच्छन्द स्त्रीरूप कोटरा नामक हैं जिनको पूर्वीय लोक कुठारे नाम से जानते हैं। तैसे 'रेवती' कोई उनको रेणुका कहते हैं, 'ज्येष्ठा' दक्षिण देश में प्रसिद्ध है 'पूतना' तो यही है किन्तु गोपियों ने अनजान में इसका भी नाम कह दिया है।

यथार्थ में तो ये मन्त्र हैं, इसलिये जैसे हैं वैसे ही पढ़ने चाहिये, नहीं तो उनका फल नहीं मिलेगा, क्योंकि शास्त्र में कहा है कि यदि स्वर का वर्ण आदि से न पढ़ा जाएगा तो वह मन्त्र व्यर्थ होगा, और इससे कोई लाभ न होगा। इसलिए मन्त्र का जो रूप हो उस प्रकार ही उसका कीर्तन ज्ञान सहित करना चाहिये।

पूतना की तरह, वृद्ध ग्रहों का कीर्तन भी सम्बन्ध बिना किया है। सोलह मातृकाएँ तो प्रसिद्ध हैं किन्तु श्लोक में दिये हुए आदि शब्द से सब ग्रामदेवियाँ समझना, ये सब स्त्रियाँ हैं। उन्मादि पुरुष हैं। ये पुरुषों को पागल बना देते हैं। 'अपस्मार' भी समझ नाशकर मिरगी आदि अचेतना के रोग करते हैं। वे दोनों ही, दोष और रोगरूप हैं इनको हटा देना आवश्यक है। अन्य भी तीन तरह के—देह, प्राण और इन्द्रियों को दुःख देने वाले हैं। इनसे देव में सदैव पीड़ा रहती है, प्राणों में व्याकुलता से भूख नहीं लगती है और इन्द्रियाँ निर्बल होती जाती हैं जिससे बधिरता आदि होती है ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पृश्निगर्भः प्रद्युम्नस्तु ते बुद्धिमवतु। परः सर्वसहर्ता सङ्कर्षणः भगवानात्मानमहङ्कारमवतु। क्रीडन्तं त्वां गोविन्दः पातु। शयानं त्वां माधवो लक्ष्मीपतिः पातु। नच "भगवन्नामभिरेव तस्य भगवतो रक्षा कथ सङ्गच्छते" इति शङ्क्यम्, तासाम् 'अयमेव भगवान्' इति ज्ञानाभावात्। नच "तदानीं कथं गोविन्दनामप्रसिद्धिः? इन्द्रेणाग्रे तस्य करिष्यमाणत्वात्" इति शङ्कनीयम्, भगवतो लीलानां नाम्नां मन्त्राणां चानादिशास्त्रसिद्धत्वात् ॥ २५ ॥ व्रजन्तं बाललीलया गच्छन्तं त्वां वैकुण्ठाख्यो भगवानव्यात्। आसीनं त्वां श्रियो लक्ष्म्याः पतिरव्यात्। यज्ञभुक् यज्ञभोक्ता विष्णुर्भुञ्जानं त्वां पातु। तस्य पालने सामर्थ्यमाहुः–सर्वेति। सर्वे ये दुःखप्रदा ग्रहास्तेषां भयङ्करः, 'यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयाद्' इति वाक्यात् ॥२६॥ तथा ये डाकिन्यादयो देहप्राणेन्द्रियद्रुहस्ते सर्वे नश्यन्त्विति तृतीयेणान्वयः। डाकिन्यो दुष्टाः स्त्रिय एव। यातुधान्यः यक्षराक्षसादिभिः। कूष्माण्डादयो रुद्रगणे प्रसिद्धाः। केचिदर्भकानेव गृह्णन्तीति तथा ॥ २७ ॥ नच "पूतना तु मृतैव, कथं पुनस्तन्नाशप्रार्थना?" इति शङ्कनीयम्, तासां तदज्ञानात्। अनादिसिद्धमन्त्रकथनमात्रमेतत्। हीति प्रसिद्धौ। उन्मादा अपस्माराश्च चित्तभ्रान्तिकर्तारो ग्रहविशेषाः ॥ २८ ॥

अन्वितार्थप्रकाशिका

पृश्निगर्भ इति ॥ पृश्निगर्भः प्रद्युम्नस्तु ते बुद्धिमवतु। परः सर्वसंहर्ता संकर्षणो भगवानात्मानमहङ्कारमवतु। क्रीडन्तं त्वां गोविन्दः गोषु क्रीडापरः पातु। शयानं त्वां माधवो लक्ष्मीसंवाहितपादः शेषशायी पातु ॥ २५ ॥ व्रजन्तमिति ॥ बाललीलया व्रजन्तं गच्छन्तं त्वां वैकुण्ठः वैकुण्ठवासी सनकाद्यर्थं पादव्रज्यया धावन् भगवानव्यात्। आसीनं त्वां श्रियो लक्ष्म्याः पतिः सिंहासनस्थो नारायणः अव्यात्। सर्वे ये दुःखप्रदा ग्रहास्तेषां भयङ्करः यज्ञभुक् यज्ञभोक्ता विष्णुर्भुञ्जानं त्वां पातु ॥ २६ ॥ डाकिन्य इति त्रयम् ॥ डाकिन्यो दुष्टाः स्त्रिय एव तथा यातुधान्यः यक्षराक्षसादिस्त्रियः कूष्माण्डाश्च। ये तु अर्भकानेव गृह्णन्ति ते अर्भकग्रहाः। यद्वा। अर्भकरूपा ग्रहाः तेन बालग्रहा इति न पुनरुक्तिः। भूताः प्रेताद्याः कोटराद्या बालग्रहाः उन्मादाः

अपस्मारश्च चित्तभ्रान्तिकर्तारो ग्रहविशेषाः स्वप्ने दृष्टा महोत्पाताः आधिदुःखमहोत्पातादिसूचकाः । तथा ये वृद्धग्रहाः बालग्रहाश्च ये डाकिन्यादयो देहप्राणेन्द्रियद्रुहः विष्णोर्नामग्रहणभीरवः ते सर्वे नश्यन्तु । पूतना मृताऽपि ताभिः पूतनात्वेनाज्ञानादेव मुक्तिः ॥ २७–२९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आसीनम् उपविष्टम् ॥ २६ ॥ दुःखदानाय अर्भकं बालं गृह्णतीत्यर्भकग्रहाः विनायकाः विघ्नकर्तारो दुर्देवाः ॥ २७ ॥ उन्मादा उन्मत्तकारकाः अपस्माराः स्मृतिविभ्रंशकाः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं बहिरङ्गरक्षां संप्रार्थ्याथान्तरङ्गरक्षां प्रार्थयामासुः ॥ इन्द्रियाणीति ॥ हृषीकाणामिन्द्रियाणामीशोऽन्तः प्रविश्य नियन्ता भगवान्, तव इन्द्रियाणि, अवतु रक्षतु । नारायणः प्राणान्, अवतु । श्वेतद्वीपपतिः, चित्तं, योगेश्वरो योगनिर्वाहकः, मनः, अवतु ॥ २५ ॥ पृश्नीति ॥ पृश्निगर्भत्वात् पृश्निगर्भाख्यः भगवान् तु, ते तव, बुद्धिं, पातु रक्षतु । भगवान् षाड्गुण्यपूर्णः, परः परमात्मा, तव आत्मानमहंकारं, पातु । गोविन्दः भगवान्, क्रीडन्तं, त्वां पातु । माधवः भगवान्, शयानं कृतशयनं त्वां, पातु ॥ २६ ॥ व्रजन्तमिति ।। वैकुण्ठ भगवान्, व्रजन्तं पथि गच्छन्तं, त्वां, अव्यात् । श्रियः पतिः लक्ष्मीकान्तः भगवान्, आसीनमुपविष्टं, त्वां अव्यात् । सर्वेषां ग्रहाणां भयंकरः सर्वग्रहभयंकरः यज्ञभुक् भगवान्, भुञ्जानं, त्वां पातु ॥ २७ ॥ डाकिन्य इति ॥ डाकिन्यः, यातुधान्यः, कूष्माण्डाः, ये अर्भकाः ग्रहाः भूतप्रेतपिशाचाः, यक्षाश्च रक्षांसि च विनायकाश्च ते च ॥ २८ ॥

कृष्णप्रिया

पृश्निगर्भ प्रद्युम्न आप की बुद्धि की, पर संकर्षण भगवान आप के आत्मा अहंकार को खेलते समय गोविन्द रक्षा करे और सोते समय माधव रक्षा करे ॥ २५ ॥ डाकिनी, राक्षसियाँ, कूष्मांड, बालग्रह, भूत, प्रेत, पिशाच, यक्ष, राक्षस, विनायक, कोटरा, रेवती, ज्येष्ठा, पूतना मातृका आदि उन्माद, अपस्मार, अन्य जो देह, प्राण एवं इन्द्रियों के द्रोही हैं ॥ २७–२८ ॥

स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये । सर्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः ॥ २९ ॥

श्रीशुक उवाच

इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम् । पाययित्वा स्तनं माता संन्यवेशयदात्मजम् ॥ ३० ॥
तावन्नन्दादयो गोपा मथुराया व्रजं गताः । विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ॥ ३१ ॥
नूनं बतर्षिः संजातो योगेशो वा समास सः । स एव दृष्टो ह्युत्पातो [1]यथाहानकदुन्दुभिः ॥ ३२ ॥

कर्दमक्षमा

अन्वयः–ये स्वप्नदृष्टाः महोत्पाताः ये च वृद्ध बालग्रहाः ते विष्णोर्नामग्रहणभीरवः ते सर्वे नश्यन्तु ॥२९॥ इतिप्रणयबद्धाभिर्गोपीभिः कृतरक्षणम् आत्मजम् माता स्तनं पाययित्वा सन्न्यवेशयत् ॥ ३० ॥ तावत् नन्दादयः गोपाः मथुरायाः व्रजं गताः पूतनादेहं विलोक्य अतिविस्मिताः बभूवुः ॥ ३१ ॥ नूनं सः बत ऋषिः सञ्जातः वा योगेशः समास आनकदुन्दुभिः यथा आह हि स एव उत्पातो दृष्टः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

संन्यवेशयत् छादयामास ॥ ३०–३१ ॥ विस्मयमेवाह । नूनमिति । बत विस्मये । सांप्रतं स वसुदेव ऋषिस्तपःप्रभाववान् योगेशो ज्ञानी वा सम्यगास । यतः यत् यं आह स एवोत्पातो दृष्ट इति ॥ ३२–३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्तनशब्दोऽत्र स्तन्ये लाक्षणिकः प्रणयरशनया बद्धाभिः । स्तनपानेनैवार्भकस्वास्थ्यज्ञानात्तद्पाययदित्यर्थः ॥ ३० ॥ यावन्माता संन्यवेशयत्तावन्नंदादय इति संबंधः ॥ ३१ ॥ विस्मयमभिनयति—इह यमिति तच्छब्दश्रुतेर्ज्ञेयम् । विस्मयमाह—किं शक्रेण प्रमादच्छिन्नपक्षः कोपि पर्वतो नभोव्यापिनोध्यत्रत्यान्द्रुमांश्चूर्णयित्वा पपात । किं वा—वयमेव साहजिकया भ्रांत्या

---

१. यदा–श्रीधर. वंशी. गिरि. भक्त. ; यथा–जीव. ।

कयापि योगिन्या वा देशांतरं प्रापिताः स्मः। किं वा–कस्याप्यैन्द्रजालिकस्येदं कर्मेति संदिहाना इत्यर्थः। व्रजं व्रजदर्शनयोग्यं देशं प्राप्ता अन्योन्यमूचुः वसुदेवः प्रागेतादृशो नासीदधुना ऋषिरास ऋषिवाक्यस्यैव प्रामाण्यात्सर्वज्ञत्वादनुमीयते योगेशो वा आस दीप्यते स्म 'आस दीप्तौ' ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति एवं कृतं रक्षणं रक्षा यस्य तं तत्र हेतुः प्रणयेन स्नेहेन बद्धाभिः वशीकृताभिः इति श्रीयशोदागृहे बद्धवत्तासां धात्री तया सदावस्थितिः तथा च श्रीभगवदर्थं परमव्यग्रतया विविधव्यापारपरता च ज्ञेया स्तनं पाययित्वेति मातुः स्नेहस्वभावतः तथा लोके स्तनपानेन बालस्य स्वास्थ्यज्ञानाच्च ॥ ३० ॥ तावदिति गमने शैघ्र्यमुक्तं मथुरापुर्योः सकाशात् व्रजं व्रजदर्शनयोग्यदेशं प्राप्ताः विलोक्य दूरतो विविधकल्पनया नभोव्यापिपर्वताकारत्वेन दूरत एव दर्शनासम्भवात् तत्र च श्रीवसुदेवोक्तसम्वादेनात्यन्तविस्मिता इत्यर्थः ॥ ३१ ॥ अतिविस्मितानां तेषामन्योन्योक्तिमाह—नूनमिति। वितर्के स प्राह्यानकदुन्दुभिः प्रागेतादृशो नासीत् अधुना च ऋषिः सम्यक ज्ञातो वृत्तः ऋषिवाक्यस्यैव प्रामाण्यात्। ननु ऋषित्वचिह्नं किमपि न दृष्टम् इत्याशङ्क्य पक्षान्तरमाह–योगेश इति। अन्तः उपासनानिष्ठः संशब्दाभ्यां तत्तन्निष्ठा बोध्यये। तत्र हेतुः स एवेति आनकदुन्दुभिरिति। तादृशजन्मत्वेन योग्यताम्बोधयन्ति, अन्यत्तैः। यद्वा कोऽपि यः पूर्वजन्मनि ऋषिर्योगेशो वा समास अत्र सन्देह एव विकल्पः स एवानकदुन्दुभिः सन् सञ्जातः अन्यत्समानम् एवं सर्वज्ञत्वादेव सोऽवददिति तैर्मतम् अत एव सुविस्मिताः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्येवं कृतं रक्षणं रक्षा यस्य तम्। तत्र हेतुः,—प्रणयेन स्नेहेन बद्धाभिर्वशीकृताभिरिति श्रीयशोदागृहे बद्धवत्तासां सदावस्थितिस्तथा श्रीभगवदर्थं परमव्यग्रतया विविधव्यापारपरता च ज्ञेया। स्तनं पाययित्वेति मातृस्नेहस्वभावतस्तथा लोके स्तनपानेन बालस्य स्वास्थ्यज्ञानाच्च ॥ ३० ॥ तावदिति गमने शैघ्र्यमुक्तम्। मथुरापुर्योः सकाशाद्व्रजं व्रजान्तिकं प्राप्ता विलोक्य वर्त्मन्येव दूरप्रदेशव्यापित्वादतिविस्मिता इत्यकस्मात् मृतकस्य शतनाद्बृहत्तरत्वाच्च विस्मितास्तत्र च श्रीवसुदेवोक्तसम्वादेनात्यन्तं विस्मिता इत्यर्थः ॥ ३१ ॥ अतिविस्मितानां तेषामन्योऽन्योक्तिमाह—नूनमिति वितर्के। स आनकदुन्दुभिः प्रागेतादृशा नासीदधुना च ऋषिः सम्यक् जातो वृत्तः,—ऋषिवाक्यस्यैव प्रामाण्यात्। ननु, ऋषित्वमात्रेण तादृग्ज्ञानं न स्यादित्याशंकायां पक्षान्तरमाह—योगेश इति। सम्यगास बभूव। 'सं'–शब्दाभ्यां तत्तन्निष्ठा बोध्यते। तत्र हेतुः—स एवेत्यानकदुन्दुभिरिति तस्य जन्मनि देवैरानकादिवादनेनार्थवितर्कं प्रमाणयन्ति; किंवा तस्य तादृशोक्तौ योग्यतां बोधयन्ति। अन्यत्तैर्व्याख्यातम्। यद्वा, कोऽपि यः पूर्व्वजन्मनि ऋषिर्योगेशो वा समासस्स एवानकदुन्दुभिः सन् सञ्जातः। अन्यत् समानम्। एवं सर्व्वज्ञत्वादेव सोऽवददिति तेर्गोपैर्मतम्, अतएव सुविस्मिताः, न तु कंसदुर्मन्त्रणज्ञानमित्यन्यथा कंसदुर्मन्त्रणकारणदेवीवाक्यज्ञाने सति 'जातः खलु तवान्तकृत्' इति तदुक्त्या स्वपुत्रे भगवत्त्वादिशंकायाः सम्भवः। सा चैवं निरस्ता, अत एव श्रीवसुदेवेनापि (भा० १०।५।३१) 'सन्त्युत्पाताश्च गोकुले' इति निर्विशेषमुक्तमित्येवमग्रेऽप्यूह्यम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

वृद्धग्रहाः बालग्रहाश्च ते सर्वे विष्णोर्नामानि गृह्णन्तीति तथा तेभ्यो भीरवः भीता नश्यन्तु ॥ २९ ॥ इत्थं प्रणयेन स्नेहेन बद्धाभिर्यन्त्रिताभिर्गोपीभिः कृतं रक्षणं यस्य तमात्मजं माता यशोदा स्तनं दुग्धं पाययित्वा सन्न्यवेशयत् शाययामास ॥ ३० ॥ तावत् तदा नन्दादयो गोपा मथुरायाः सकाशात् व्रजमागताः सन्तः पूतनाया देहमवलोक्यातीव विस्मिता बभूवुः ॥३१॥ वसुदेवोक्तं यथार्थमेवाभूदिति सोदाहरणं विस्मयन्ते–नूनमिति। आनकदुन्दुभिर्वसुदेवः समागतो यमुत्पातम् आह स एवोत्पातो ऽधुनाऽस्माभिर्दृष्टः अतः स आनकदुन्दुभिः ऋषिर्योगी वा पूर्वजन्मनि सन्नधुनैवंरूपेण नूनं सञ्जातः बतेति विस्मये ऋषित्वमुत्पत्तिसिद्धातीन्द्रियार्थदर्शित्वं योगित्वं तपःप्रभावकृतं तद्दर्शित्वम् इति विवेकः। स यद्गत इति पाठे स वसुदेवः ऋषिर्योगीशो वा सन् अधुनैवं सञ्जातः कुतः यत् यतः गतः समागतः आनकदुन्दुभिः यमुत्पातमाह—सोऽधुना अस्माभिर्दृष्ट एवेत्यर्थः ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रणयबद्धाभिः बद्धस्नेहाभिः संन्यवीविशत् संवेशं निद्रामकारयत् ॥ ३०–३१ ॥ वसुदेवः ऋषिः त्रिकालदर्शी योगेशः कपिलान्यतमः समासतः संक्षेपतः सङ्कोचं कृत्वा जातदृष्ट अस्माभिरिति शेषः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तावदिति विलोक्य ज्ञात्वा तत्र दूरतोऽपि दर्शनेन यत् किञ्चिच्छ्रवणेन चेति ज्ञेयं ते नीचजातयो व्रजौकसस्त एवेत्यर्थः ॥ ३१–३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रणयरशनया यशोदागृहे एत्र बद्धाभिः पाययित्वेति स्तनपानमेव बालानां स्वास्थ्यलक्षणमिति भावः। सन्निवेशयत् शाययामास ॥ ३० ॥ अतिविस्मिताः किं शक्रेण भ्रमादच्छिन्नपक्षः कोऽपि पर्वतो नभोव्यापिनोऽप्यत्रत्यान् महीरुहांश्चूर्णयित्वा पपात किम्वा वयमेव साहजिकया भ्रान्त्या कयापि योगिन्या वा देशान्तरं प्रापिताः स्मः किम्वा कस्याप्यैन्द्रजालिकस्येदं कर्मेति सन्दिहाना इत्यर्थः ॥ ३१ ॥ तत्र श्रीव्रजराजस्तु निश्चिनोति—नूनं निश्चितमेव ऋषिरस्मत्कुले वसुदेवः सर्वज्ञत्वादनुमीयते योगेशोऽष्टाङ्गयोगाभ्यासी योगजनेत्रेण भाविवृत्तदर्शित्वात् समास सम्यग्दीप्यते स्म "अस दीप्तौ" ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

संन्यवेशयत् सम्यक् शाययामास ॥ ३०–३१ ॥ बतेति विस्मये सः वसुदेवः यदाह स एवोत्पातः दृष्टः हि हेतौ नूनमिति निश्चये पूर्वम् ऋषिर्मन्त्रद्रष्टा योगेशः विष्णुध्याननिष्ठो वा सम्यगास इदानीं सञ्जातः अत एव आनकदुन्दुभिरिति हेतुगर्भं विशेषणम्। सामान्यस्य जन्मनि आनकादिना नादं देवा न कुर्वन्तीति भावः ॥ ३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

गोपीभिः कृतरक्षणमिति रक्षाविधिरयं तासां सर्वशास्त्रज्ञानं स्वभावसिद्धं बोधयति। तच्च न चित्रं तन्नित्यपार्षदत्वात् तासां कृष्णविषयकं स्वयं प्रभुत्वज्ञानं सदपि तद्विषयकवात्सल्ये लीनं बोध्यं कृष्णस्यैश्वर्यं माधुर्यं च व्रजौकसां ज्ञानं गृह्णात्यतः पूर्णप्रज्ञास्ते पूर्वविषयकमल्पं पद्विषयकं तु भूरीत्यतस्तन्निगिरतीति सर्वत्र भाव्यं प्राययित्वेति स्तन्ये पीते बालस्य स्वास्थ्यं निश्चितमितिभावः। माता व्रजेश्वरी सन्न्यवेशायत् शाययामास ॥ ३० ॥ अतिविस्मिता इति। किं वयं केनचिद् योगबलेन देशान्तरमानीताः किम्वा देवराजेनाच्छिन्नपक्षो महाशैलोऽत्र पातितोऽस्त्वीन्द्रजालविद्या वा काचिदियमिति सन्दिहाना बभूवुरित्यर्थः॥३१॥ अथ व्रजेश्वरो निश्चित्याह—नूनमिति। वसुदेवोऽस्मत्कुले ऋषिस्तपोनिष्ठो योगीवाऽनुष्ठिताष्टाङ्गयोगः समास सम्यग् दिदीपे तपोयोगमहिम्ना विज्ञातभाविवृत्तः स एवोत्पातो दृष्टः ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मातृकादय इति पृथग्वा कोटरादिमातृकादय इति समस्तं वा। उन्मादा उन्मादका अपस्मारास्तत्करा देहप्राणेन्द्रियक्षयो देहश्च प्राणाश्चेन्द्रियाणि च तेभ्यो द्रुह्यन्तीति ते ये ॥ २९ ॥ स्वप्नदृष्टा दुष्फलसूचकमहोत्पातास्ते सर्वे विष्णोर्नामग्रहणं तदुच्चारस्तस्माद् रवो नश्यन्तु। ते विष्णोरिति सामानाधिकरण्येनाप्यन्वयः ॥ ३० ॥ प्रणयेन स्वतनयप्रेमविशेषेण बद्धा महादिगमनमतिच्छन्त्य इति बद्धवद्विद्यमानास्ताभिर्गोपीभिर्वृद्धसुवासिनीभिः कृतरक्षणमात्मजं माता स्तनं पाययित्वा। उभयोरेकदा पेयत्वादेकवचनं। सन्न्यवीविशदुपवेशयामास शाययामास वा ॥ ३१ ॥ तावत्। यावत्तावत्परिच्छेदे कात्स्न्यें मानेऽवधारण इति विश्वः। तावति समये नन्दादयो गोपा मथुरायाः सकाशात्पतितं पूतनादेहं विलोक्यातिविस्मिता बह्वाश्चर्ययुक्ता बभूवुः ॥ ३२ ॥

श्रीसुबोधिनी

भौतिकानाह, स्वप्नदृष्टाः स्वप्न एव भयपलायनशिरश्छेदादिदर्शनहेतवो महोत्पाताश्च, तेषां लक्षणं स्वप्नाध्याये भवति, वृद्धबालग्रहाश्च भवन्ति, नियतास्ते भगवदीयं भ्रामयन्त्येव, अतः पिशाचवद् भ्रान्तवद् वृद्धो बालश्च तिष्ठति, अत्रापि कालरोगव्यावृत्त्यर्थं य इति, एवं सर्वाननूद्य विनियोगमाहुः सर्वे इति, उक्ता अनुक्ताश्च ते सर्वेऽस्मद्वाक्यात् स्वत एव नश्यन्तु पलायन्तां, तेषां निवृत्तौ नाधिक प्रयास इति विशेषणमाह नामग्रहणमात्रेणैव भीरव इति, विष्णोस्ते तवैव नामग्रहणेन न ते तिष्ठन्ति कुतः पुनस्त्वत्समीप इत्यतोऽस्माभिर्वचनादेव निराक्रियन्ते ॥ २९ ॥ एवं सर्वप्रकारेण त्रिविधामपि रक्षां कृतवत्यस्ततो यज्जातं तदाहेतीति, प्रणयेन स्नेहेन बद्धाभिर्न तु लौकिकन्यायेन बद्धपदाज्ञ प्रेरणया नापि निवारितास्तिष्ठन्तीति ज्ञापितं, गोपीभिरितिपुनर्वचनं मध्ये ब्राह्मणादिशिक्षया कृतमितिव्यावृत्त्यर्थं, कृतं रक्षणं यस्य, रक्षाबन्धनादिकमपि कृतमिति ज्ञायते, पूतनास्तनपानेनाजीर्णशङ्कां व्यावर्तयति पाययित्वा स्तनमिति, माता यशोदा, गोपिकादीनां भाव्यर्थज्ञानात् स्तनादानं, अनुपद्रवज्ञापकं च स्तनपानं, आत्मजं पुत्रं, सन्न्यवेशयत् सम्यक् पल्यङ्के न्यवेशयच्छायितवती ॥ ३० ॥ एवं बुद्ध्युत्पादनमेतद् भगवच्चरित्रं निरोधरूपं च स्पष्टमेव, एवं पूतनावधं कृत्वाग्रिमलीलासिद्ध्यर्थमज्ञानशेषं चाभिमन्त्रणादिना सम्यग् जातमिति स्थापयित्वा पूतनाया मोक्षो जात इति ज्ञापनार्थमग्रिमचरित्रमारभते तावदध्यायसमाप्ति, देहसौरभ्येण हि मुक्तेति ज्ञातव्यं, रूपदर्शनाद् भयं जायत इति गन्धाग्रहश्च, तत् दाहे स्पष्टं भवति, तद्दाहश्च प्रभुसा यः, अतो नन्दागमनमाह तावदिति, यावद् गोप्य एतावत् कृतवत्यस्तावत्काले जाते मथुरायां गता नन्दादयः पूर्वोक्तगोपिकानां पतये गोपिकाप्राधान्यात् प्राधान्ये नोक्ताः मथुरायाः सकाशाद् व्रजं गताः, शुकस्तत्रैव भगवति स्थित्वा वदतीति गता इत्युक्तवान् , तादृशं पूतनादेहं विलोक्यातिविस्मिता जाता लौकिकं न स्मृतवन्तः, अन्यथा तेषां निरोधो न

स्यात्, बालक्रीडायां तेषामासक्तिर्न वक्तव्येति तदर्थं व्यापारान्तरं कर्तव्यमिति ॥ ३१ ॥ तेषामत्र प्रमाणपरतामाह नूनमिति, बतेति खेदे, वसुदेवो नूनं ऋषिरेव सञ्जातः, पूर्वं क्षत्रियः स्थित इदानीमृषिर्जातः, ऋषिवाक्यमेव हि प्रमाणं, ननु लौकिके ऋषिरप्रयोजकोन्यथा मन्त्राणां लौकिकत्वं स्यादत आह योगेशो वा स सम्यगासेति, योगेश्वराः सर्वं जानन्ति योगचक्षुषा, समिति सभायामपि ज्ञानात्, स वसुदेवः प्रसिद्धत्वात्, तस्य तदुचितमिति नासम्भावना, तस्य वाक्यस्य संवादमनुवदन्ति स्वज्ञानदार्ढ्याय यमुत्पातमानकदुन्दुभिराह स एवास्माभिर्दृष्ट इति, हीति युक्तश्चायमर्थः, "तदुदितः स हि यो यदनन्तर" इतिन्यायाद् यादृच्छिकसंवादित्वं परिहरन्नाहानकदुन्दुभिरिति, आनका दुन्दुभयश्च तस्य जन्मनि नेदुरतः प्रामाणिकमेव तस्य ज्ञानम् ॥ ३२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तावदित्यत्रागता इति वक्तव्ये यद् गता इत्युक्तवांस्तत्र हेतुमाहुस्तत्रैव भगवति स्थित्वा वदतीति परीक्षितः समीप एव स्थित्वा भगवद्विषये वदतीति पारोक्ष्येणोक्तवानित्यर्थः ॥ ३१ ॥ नूनमित्यत्र लौकिक इत्यादि लौकिके वाक्य ऋषिरप्रयोजकः प्रामाण्यप्रयोजनको न भवत्यन्यथा यदि तत्रापि प्रयोजकः स्यात् तदा तथा स्यादित्यर्थः, स्वज्ञानदार्ढ्यायेति यद् वसुदेवोक्तप्रामाणिकत्वज्ञानं तद्दार्ढ्याय ॥ ३२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

इति प्रणयबद्धाभिरित्यत्र निरोधरूपं चेति शक्तिभिः सहानुशयनरूपमित्यर्थः ॥ ३० ॥ तावदित्यस्याभासे ज्ञापनार्थमित्यस्यानन्तरं भगवता कृतमितिशेषः, चरित्रमित्यस्यानन्तरं वक्तुमितिशेषः, तथा चेदं कृत्वा इति स्थापयित्वा इति ज्ञापनार्थं भगवता कृतमग्रिमं चरित्रं वक्तुं शुक आरभत इत्यन्वयः। अज्ञानशेषं चेति 'गन्धमात्रावशेषिते'त्युक्तत्वादभिमन्त्रणादिना सम्यग्ज्ञातमभिमानशेषं इत्येवं प्रकारेण स्थापयित्वेत्यर्थः, तावदित्यत्र रूपेति सौरभ्यज्ञानं विना मुक्तिज्ञानं न भवति, सौरभ्यं च भयाद् ग्रहीतुं न शक्यते, तत् तस्माद्धेनोर्दाहे सति देहदर्शनकृतभयाभावात् सौरभ्यं स्पष्टं भविष्यतीत्यर्थः, पूर्वोक्तेति 'यशोदारोहिणीभ्यां ता' इत्यत्रोक्तानां मध्ये अन्यपूर्वाणामित्यर्थः, गमने 'गोपान् गोकुलरक्षाया'मित्यत्र नन्दस्यैव प्राधान्यमुक्तमत्रागमने 'नन्दादयो गोपा' इत्यनेन सर्वेषां प्राधान्यमुच्यते, तत्र हेतुमाहुः गोपिकेति, अत्र रक्षायां यशोदाया अपि गौणत्वमुक्त्वा गोपिकानामेव प्राधान्यमुक्तमतस्तत्सम्बन्धात् तत्पतीनामपि प्राधान्यमित्यर्थः, तत्रैवेति मथुरास्थिते वसुदेवनन्दयोस्तथा संवादसम्पादके भगवति भावनया स्थित्वेत्यर्थः, एतत्संवादस्य भगवच्चरित्रत्वं तत्रैव विवरणे स्फुटम् ॥ ३१ ॥ नूनमित्यस्याभासे **बालक्रीडाया**मिति गोपानामासक्तिः **प्रमेयप्रकरणे** मध्यलीलायां वक्तव्येतिभावः, तदर्थमिति गोपानामासक्तिसिद्ध्यर्थं, आध्यात्मिकाऽविद्यानिवर्तनरूपव्यापारान्तरं **प्रमेयप्रकरणे** वक्तव्यमित्यर्थः, **प्रमाणपरतामाहे**ति तात्पर्यं इति शेषः, नूनमित्यत्र **तदुदित** इति कंसमन्त्रणानन्तरं जात उत्पातः कंसमन्त्रणोदित एवेत्यर्थः ॥ ३२ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

भौतिकानाहः—अब भौतिक दुःखों को कहते हैं—स्वप्न में देखे गए जैसे डर, भागना, शिरच्छेद और महान् उत्पात आदि दुःख। इनके लक्षण स्वप्नाध्याय में कहे गए हैं। वृद्धग्रह और बालग्रह अभकों को भ्रमित करते हैं वे पिशाच के समान तथा भ्रान्त के समान वृद्ध और बाल रूप होकर फिरते हैं। यहाँ भी जो श्लोक में 'ये' पद दिया है उसका आशय यह है कि ऊपर कहे हुए काल, रोग करने वाले नहीं है। इस प्रकार सब का वर्णन कर फिर सर्वे शब्द देने का तात्पर्य है कि जो कहे गये अथवा जो नहीं कहे गये हैं वे सब हमारे वचनों से आप ही निवृत्त हो जाओ, भाग जाओ। उन्ही के लिए अधिक परिश्रम करने की आवश्यकता नहीं है क्योंकि केवल विष्णु भगवान् के नाम ग्रहण से ही वे डर जाते हैं। कारण कि आप विष्णु सर्वत्र व्यापक हो। जब कि नाम लेने से ही डर कर भाग जाते हैं तो आपके बिराजते हुए आपके सामीप्य में कैसे ठहरेंगे। इस कारण से हम उनका अपने वचनों से ही निराकरण करती हैं ॥ २९ ॥

एवं सर्वप्रकारेणः—इस तरह सब प्रकार से गोपियों ने तीन तरह की रक्षा की। इसके बाद जो कुछ हुआ उसका वर्णन इस श्लोक में शुकदेवजी करते हैं। गोपियों ने लौकिक न्याय से सहज स्वाभाविक स्नेह से बद्ध होकर रक्षा की थी। इसलिये किन्हीं के हटाने से भी वे हटने वाली नहीं थी। यद्यपि १८वें श्लोक में कहा गया है कि यह रक्षा, गोपियों ने ही की, पुनः इस श्लोक में, 'गोपीभिः' पद देने का तात्पर्य यह हैं कि गोपियाँ तो स्वयं रक्षा कर रही थी, किन्तु कोई यों न समझे कि बीच में विप्रों ने उनको शिक्षा दी होगी कि रक्षा करो, इस शङ्का को मिटाने के लिए, यहाँ फिर 'गोपीभिः' पद दिया है। गोपियों ने न केवल वाणी से रक्षा की, किन्तु हाथों से रक्षा बन्धन आदि भी किया था, यों समझा जाता है। माता यशोदा ने स्तन पान कराके यह बताया कि पूतना के पयःपान से मेरे लाला को अजीर्ण आदि कुछ दुःख नहीं हुआ है। गोपिकाओं को भावी अर्थ का ज्ञान था, इसलिए उन्होंने स्तनपान स्वयं न कराया क्योंकि माता का स्तनपान शान्ति को जताने वाला था। फिर माताजी ने पुत्र को पलङ्ग पर अच्छे प्रकार से सुला दिया ॥ ३० ॥

एवं बुद्ध्युत्पादनादेतद्—इस प्रकार की बुद्धि उत्पन्न करने से यह भगवान् का चरित्र स्पष्ट निरोध चरित्र है। ऐसे पूतना वध कर आगे की लीला की सिद्धि के लिए अभिमन्त्रण से भलीभाँति बचे हुए अज्ञानशेष को स्थापन कर, पूतना के मोक्ष का ज्ञान कराने के लिए, इस श्लोक से अध्याय समाप्ति पर्यन्त आगे के चरित्र को कहते हैं।

पूतना की आकृति को देखने से तो, भय उत्पन्न होता है और ऐसा समझ में आता है कि पूतना का मोक्ष नही हुआ है, इस शङ्का को निवृत्ति के लिए, पूतना के देह के जलने से उत्पन्न हुए गन्ध से, उसके मोक्ष का ज्ञान होगा, इसलिए उसका उल्लेख किया जाता है। पूतना के जलाने पर सब को स्पष्ट सुगन्ध मिलेगी। लेकिन पूतना को जलाना सामान्य मनुष्य का काम नहीं था। ऐसी विशाल देह को जलाने वाला कोई बलवान होना चाहिये जिससे यह जलाई जाएगी। जब तक गोपियों ने यह सब कृत्य किया तब तक तो नन्दादिक मथुरा में रहे। यहाँ गोकुल में कार्य करने में गोपियाँ प्राधान्य थीं, इसलिए मथुरा से लौटते समय गोपियों के पतियों के नाम प्रधानता में न देकर नन्द का ही दिया है। शुकदेवजी वहाँ मथुरा में ही भगवान् में स्थित होकर कथा प्रसंग कह रहे थे, इसलिए 'व्रजम् आगताः' 'व्रज में आये' न कहकर 'व्रजं गताः' 'व्रज को गये' कहा है। नन्दादिक, पूतना के ऐसे रूप को देखकर, अचम्भे में पड़ गये। उस समय सब लौकिक भूल गये। यदि लौकिक स्मृति रहती तो निरोध न होता ॥ ३१ ॥

तेषां निरोधो न स्यात्—उन गोपों का इस बालक्रीड़ा में निरोध न कहना चाहिये अथवा निरोध न हो उनके लिये दूसरे प्रकार का व्यापार कहना चाहिये। क्योंकि वे प्रमाणपरायण हैं इसलिये प्रमाण के अधिकारी हैं इसका निरूपण अग्रिम श्लोक में करते हैं।

तेषामत्र प्रमाणपरतामाह:—उन गोपों की प्रमाणपरायणता का वर्णन करते हैं। 'बत' शब्द से खेद दिखाया है। वसुदेवजी प्रथम मात्र क्षत्रिय थे अब तो निश्चय रूप से वे ऋषि भी हो गए। ऋषियों का वचन ही प्रमाण माना जाता है। लौकिक में तो ऋषि अप्रयोजक हैं क्योंकि लौकिक का निर्णय लौकिक प्रमाण से होगा लेकिन जो अलौकिक विषय है वहाँ तो मन्त्रद्रष्टा–भविष्यद्रष्टा ऋषि ही प्रयोजक होते हैं यदि लौकिक में प्रयोजक मानेंगे तब मन्त्र भी लौकिक हो जाएँगे तो उनकी प्रामाणिकता में संशय रहेगा। इस शंका को मिटाने के लिये कहते हैं कि न केवल ऋषि हुए किन्तु पूरे पूरे योगेश भी हुए हैं। योगेश्वर योग रूप नेत्र से सब देख लेते हैं। सभा आदि में जो कुछ होता है उसका ज्ञान उनको हो ही जाता है। वसुदेवजी के कहने में किसी प्रकार की असम्भावना नहीं करनी चाहिये क्योंकि वसुदेवजी साधारण मनुष्य नहीं हैं किन्तु प्रसिद्ध विभूति है। हमने जैसा वसुदेवजी का स्वरूप समझा है वह सत्य है इस समझ की दृढ़ता के लिए वसुदेवजी के कहे हुए वाक्य की पुनरावृत्ति करते हैं कि जिस उत्पात के लिये वसुदेवजी ने कहा था वह उत्पात हमने देखा। श्लोक में 'हि' शब्द का भी यह ही आशय है कि वसुदेवजी का कहना सत्य है। 'तद्विदितः स हि यो यदन्तर' जो जिसके पीछे होता है वह उसमें होता ही है। इस न्याय के अनुसार भी यह कहना सत्य है। विशेष में कहते हैं कि उसका कहना प्रामाणिक इसलिये भी है कि वसुदेवजी के जन्म के समय आनक और दुन्दुभि बजे थे। जिससे उनकी आप्तता प्रकट है आप्त का अर्थ है यथार्थ वक्ता ॥३२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वप्ने दृष्टा महोत्पाता भाविदुःखमहोत्पातादिसूचकाः। तथा ये वृद्धग्रहा बालग्रहाश्च। ननु "कथमेवं प्रार्थनामात्रेण तेषां विनाशः सम्भवति ?" तत्राह—विष्णोर्नामग्रहणभीरव इति। अस्मत्कृतभगवन्नामग्रहणमात्रेण भयादपसरन्त्विति भावः ॥ २९ ॥ इत्येवं कृष्णो प्रणयेन प्रेमातिशयेन बह्वीभिर्गोपीभिः कृतं रक्षणं यस्य तमात्मजं माता यशोदा स्तनं पाययित्वा 'स्तनपानं हि बालानां स्वास्थ्यज्ञापकम्' अतस्तस्य तद्दृष्ट्वा स्वास्थ्यं ज्ञात्वा स्वयमपि स्वस्थचित्ता संन्यवेशयत् शनैः शाययामास ॥ ३० ॥ तावत्कालेन नन्दादयो गोपाः मथुरायाः सकाशाद्व्रजमागताः सन्तः पूतनायाः देहं विलोक्यातिविस्मिता बभूवुरित्यन्वयः ॥ ३१ ॥ विस्मितानां वाक्यमाह—नूनमिति। 'बत' इति विस्मये। नूनं निश्चितं आनकदुन्दुभिः पूर्वजन्मनि ऋषिः तपस्वी सन् इह सञ्जातः अथवा पूर्वजन्मनि योगेशोऽष्टाङ्गयोगवान् समास बभूव। कुतः ? हि यस्मात् वसुदेवः सः 'सन्त्युत्पाताश्च गोकुले' इति यदाह स [एवोत्पातो दृष्ट इत्यर्थः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

इतीति। इत्येवं कृष्णो प्रणयेन प्रेमातिशयेन बह्वीभिर्यशोदागृह एव स्थिताभिः गोपीभिः कृतं रक्षणं यस्य तमात्मजं माता यशोदा स्तनं पाययित्वा स्तनपानेन स्वास्थ्यं ज्ञात्वा स्वयमपि स्वस्थचित्ता सती संन्यवेशयत् शनैः शाययामास ॥ ३० ॥ तावदिति ॥ तावत्कालेन नन्दादयो गोपाः मथुरायाः सकाशाद्व्रजं व्रजदर्शनयोग्यं देशमागताः सन्तः पूतनाया देहं विलोक्यातिविस्मिता बभूवुः ॥ ३१ ॥ नूनमिति ॥ बतेति विस्मये। नूनं निश्चितम् आनकदुंदुभिः पूर्वजन्मनि ऋषिः तपस्वी सन्निह सञ्जातः अथवा पूर्वजन्मनि योगेशोऽष्टाङ्गयोगवान् समास सम्यग्दीप्यते स्म। कुतः हि यस्मात् स वसुदेवः "सन्त्युत्पाताश्च गोकुले" इति यदाह स एवोत्पातो दृष्टः इत्यर्थः ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ते सर्वे ॥ २९ ॥ प्रणयबद्धाभिः प्रेमबद्धाभिः संन्यवेशयत् स्वापयामास ॥ ३०–३१ ॥ ऋषिः संजातः उत्पन्नः कुतः स एव दृष्टः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कोटरेति ॥ कोटरा च रेवती च ज्येष्ठा च पूतना च मातृकाश्च ता आदयो यासां ताः, देहप्राणेन्द्रियाणि द्रुह्यन्तीति तथा, ये उन्मादाः, अपस्माराः, ते हि ॥ २९ ॥ स्वप्नेति ॥ ये स्वप्नदृष्टाः महोत्पाताः, वृद्धाश्च बालाश्च तेषां ग्रहाः, वृद्धग्रहाः बालग्रहाश्च, ते सर्वेऽपि, विष्णोर्नामानि गृह्णन्तीति तेभ्यो भीरवः भीताः सन्तः, नश्यन्तु। इति त्रयाणामेकसंबन्धः ॥ ३० ॥ इतीति ॥ इतीत्थं, प्रणयेन स्नेहेन बद्धा यन्त्रितास्ताभिः, गोपीभिः, कृतं रक्षणं यस्य तं, आत्मजं पुत्रं, माता यशोदा, स्तनं स्तन्यं पय इत्यर्थः। पाययित्वा, संन्यवेशयत् शाययामास ॥ ३१ ॥ तावदिति ॥ तावत्तदा, नन्दादयः गोपाः, मथुरायाः सकाशात् , व्रजं गताः प्राप्ताः सन्तः, पूतनादेहं पूतनाकलेवरं, वीक्ष्य, अतिविस्मिताः, बभूवुः ॥ ३२ ॥

कृष्णप्रिया

तथा स्वप्न में देखे हुए महान् उत्पात, वृद्ध और बालकों के ग्रह, वे सब विष्णु के नाम से डरने वाले होने के कारण, विष्णु के केवल नाम लेने से ही भाग जावें।। २९ ॥ इस प्रकार स्नेहबद्ध गोपियों द्वारा रक्षा किये हुए पुत्र नन्दलाल को माता यशोदा ने स्तन पान कराके शयन कराया ॥ ३० ॥ इतने में मथुरा से व्रज में पहुँचे हुए नन्दादिक गोप, पूतना की देह को देख के अति आश्चर्य में पड़े ॥ ३१ ॥ अहा! निश्चय रूप से श्रीवसुदेवजी तो ऋषि हो गए हैं अथवा तो वे योगेश्वर बन गए हैं क्योंकि जैसा उन्होंने कहा वैसा ही उत्पात देखा ॥ ३२ ॥

कलेवरं परशुभिश्छित्त्वा [1]ते तु व्रजौकसः। दूरे क्षिप्त्वावयवशो [2]ददहुः काष्ठवेष्टितम्[3] ॥ ३३ ॥
दह्यमानस्य देहस्य धूमश्चागुरुसौरभः। उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ॥ ३४ ॥
पूतना लोकबालघ्नी राक्षसी रुधिराशना। जिघांसयापि हरये स्तनं दत्त्वाऽऽप सद्गतिम् ॥ ३५ ॥
किं पुनः श्रद्धया भक्त्या कृष्णाय परमात्मने। यच्छन् प्रियतमं [4]लोके रक्तास्तन्मातरो यथा ॥ ३६ ॥

कर्वमक्षमा

अन्वयः—ते तु व्रजौकसः कलेवरं परशुभिः छित्वा अवयवशः दूरे क्षिप्त्वा काष्ठवेष्टितं कृत्वा ददहुः ॥ ३३ ॥ कृष्णनिर्भुक्तसर्पादि आहतपाप्मनः दह्यमानस्य देहस्य अगरुसौरभः च धूमः उत्थितः ॥ ३४ ॥ लोकबालघ्नी राक्षसी रुधिराशना पूतना जिघांसया हरये स्तनं दत्त्वा सद्गतिं आप ॥ ३५ ॥ पुनः श्रद्धया भक्त्या रक्ताः तन्मातरः यथा परमात्मने कृष्णाय लोके प्रियतमं यच्छन् (तत्कृते) किम् वक्तव्यम् ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विस्मयांतरमाह। दह्यमानस्येति। कृष्णेन निर्भुक्तोऽत एव सपद्याहतः पाप्मा यस्य ॥ ३४ ॥ प्रसंगात्कैमुत्यन्यायेन भक्तिवैभवमाह। पूतनेति ॥ ३५ ॥ श्रद्धया आस्तिक्येन। भक्त्या प्रेम्णा। रक्ताः स्निग्धाः। तन्मातर इति वत्साहरणलीलाभिप्रायेण बहुवचनम्। तत्र हि गोगोपिकास्तदा तन्मातरोऽभवन्निति ॥ ३६–४३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् षड्योजनगम्। अवयवशस्तत्तत्पादहस्ताद्यवयवं पृथक् पृथक् अत्राद्येरकारलोपश्छान्दसः व्रजौकस उपनंदाद्यादिष्टा अत्यंता निश्शेषेण देहं पुनर्जीवनशंकया विषधरजीवानां दाहेनैवोपशांतेः ॥ ३३ ॥ अन्यदप्यद्भुतमाह–निर्भुक्तः पानसंबंधेन भोगविषयीकृतः ॥ ३४ ॥ भक्तिवैभवं भक्त्युत्कर्षम् ॥ ३५ ॥ जिघांसयापि किमतौदासीन्येन किमुततरां श्रद्धया किमुततमां श्रद्धया भक्त्येत्यर्थः। हरये भगवत्प्रादुर्भावमात्राय किमुत कृष्णाय परमात्मने सर्वपरमस्वरूपायावतारिणे विषस्तनमपि किमुत विषेतरवस्तु किमुततरां प्रियं किमुततमां प्रियतरं किमुतातितमां प्रियतमम्। पूतनानाम्नी राक्षस्यपि किमुत मानुष्यः किमुततरां भक्ताः किमुततमां रक्ता अनुरागयुक्ताः तत्रापि किमुततमां तन्मातरोऽतिवत्सला वत्साहरणलीलागतास्तास्वप्यतितमा अनिर्वाच्यरत्नाच्छ्री यशोदा तु

---

१. तस्ते–श्रीधर. वंशी. गिरि. भक्त.। २. न्यदहन् काष्ठधिष्ठितम्–श्रीधर. गिरि.; प्रवयसो जिर्देहुः काष्ठवेष्टितम्–ददहुः काष्ठवेष्टितम्–विश्व. वीर.। ३. न्यदहन् काष्ठवेष्टितम्–वंशी भक्त.। ४. किं नु–श्रीधर. वंशी. जीव. गिरि.; किंचित्–भक्त.।

दूरत एव प्रणतिपात्रीकृत्यैव स्थापिता न तु लिखितेति करणसंप्रदानकर्मकर्तृपदेषु कैमुत्यमंडलीयम्। प्रियतमं पायसादि यच्छन् ददत्। किन्तु किञ्चित्। विजयध्वजस्तु–किञ्चित्प्रियतमम् इत्येव पपाठ लोकवंदितैर्ब्रह्मादिभिः। यस्याः पूतनायाः। सा पूतना। जननीगति मातृयोग्यां गतिं अपिना तस्यास्तद्योग्यत्वं सूच्यते । नहि पापकृतां रक्षसां स्वर्गो लब्धुं योग्य इति भावः। द्वयोरन्वयः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं यावच्छ्रीनन्दादयो निकटमायान्ति तावत्तैः गोकुलरक्षायां स्थितैः श्रीमदुपनन्दादिभिर्नियुक्तास्तदुचिता व्रजौकसो व्रजाश्रिताः कनिष्ठजातयो नितरामदहन् पुनर्जीवनशङ्कया निर्देहुरिति पाठः क्वचित् ॥ ३३ ॥ अगरुतोऽपि सौरभं यस्य सः धूमश्चेति चकारेण पूतनाया देहोऽपि कृष्णनिर्भुक्तत्वादगरुसौरभोऽभूत्तद्वक्त्रसम्बन्धादिसोप्युच्यते तत्र हेतुः कृष्णेन सौगन्ध्यसौरूप्यादिनिजाशेषोत्कर्षव्यञ्जकेन भगवता निःशेषेण भुक्तः प्राणैः सह स्तनपानात् अत एव सपदि धूमघ्राणसमय एव आ सम्यक् हतो नाशितः पाप्मा धूमसेविनामपि सर्वेषां येन स चासौ स च तस्य एवं भगवदुच्छिष्टस्य महिमा दर्शितः पवित्रं वस्तु भक्त्या समर्पितं किमुतेति वक्ष्यते च पूतनेत्यादिना ॥ ३४ ॥ पूतनेति युग्मकम्। जात्या राक्षसो तत्रापि लोकबालघ्नी तत्रापि रुधिराशना हरय इति तत्तद्दोषहरणाभिप्रायेण परमात्मने मृतप्रायेष्वन्तर्बहिरिन्द्रियेषु ज्ञानक्रियाशक्तिप्रदत्वेन सामान्यतस्तावद्धिताय कृष्णाय विशेषतः पूतनादीनामपि तादृशहितकारित्वरूपो यो गुणैकदेशस्तदादिगुणगणप्रकटनेन सर्वचित्तानां स्वभावत एव स्वस्मिन्नाकर्षकाय तस्मै तद्विद्विषाभावेन यच्छन् सद्गतिं सतां गतिं श्रीकृष्णमेव प्राप्नोतीति ॥ ३५ ॥ किंपुनः किमुतेत्यर्थः। तत्रापि श्रद्धया विश्वासेन किमुत तत्रापि भक्त्या आदरेण किमुत प्रियतममित्युक्तेः क्रमप्राप्त्या चायमर्थो लभ्यते तत्रापि प्रीत्या स्वस्य श्रीकृष्णस्य वा प्रियं यच्छन् किमुत तत्रापि प्रीत्यतिशयेन प्रियतरं यच्छन् किमुतेत्येवार्थः तत्राप्यतिप्रीत्यतिशयेन प्रियतमं यच्छन् किमुत इति किञ्च तत्रापि रक्तास्तदेकजीवनास्तत्सुखैकसुखाश्च यथा यच्छन्ति तथा यच्छन् किन्तु किमुतेत्येवार्थः पुनरुक्तिः कैमुत्येऽपि वैशिष्ट्याय तत्रापि तन्मातरो यथा यच्छन्ति तथा किमुतेति अत एव मातरः सर्वदृष्टान्तत्वेन सर्वोपरि पृथगेव स्थापिताः भोजनविषये मातृणामेव सर्वाधिकरागात्प्रेयस्यादयोपि न दृष्टान्तिता इति ज्ञेयम् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ते गोकुलरक्षायां श्रीनन्दनियुक्ता गोपाः, किं वा, पूतनादेहदर्शनादिना सन्त्रस्ताः सर्वेऽपि व्रजवासिनो निःशेषेणादहन् पुनर्जीवनशंकया ॥ ३३ ॥ अगुरुतोऽप्युत्कृष्टं सौरभं यस्य सः। कृष्णेन निजाशेषोत्कर्षाभिव्यञ्जकेन भगवता निःशेषेण भुक्तः प्राणैः सह स्तनपानादत एव सपदि धूमाघ्राण समय एव आ सम्यगाहतो नाशितः प्राप्तो धूमसेविनाम्यपि सर्वेषां येन स चासौ स च तस्य, एवं सपद्याहतप्राप्ता, तस्येत्येव लेखस्तेषां ज्ञेयोऽन्यथा निर्भुक्त इति प्रथमान्ततया असंगतिः। एतदुक्तं भवति–यथा मुमुक्षुभिरर्पितं श्रीभगवदुपभुक्तं सद्विषय–महाविषमपि संसारमहा–रोगहरं परमामृतं स्यात्तथा तदुपभुक्तं पूतनादेहमपि परमनिर्दोषं महापावनञ्च जातमिति तद्धूमसौरभ्यं युक्तमेवेति ॥ ३४ ॥ सतीमुत्तमाम्; यद्वा, सतां मुमुक्षुभक्तानामिव गतिं मोक्षावाप्त्या जन्ममरणादिदुःखनिवृत्त्या भक्तप्राप्यसाम्यापत्तेः। तत्र स्तनं दत्त्वेति स्तनदानफलमित्यत्रोक्तम्। राक्षसी, तत्रापि लोकबालघ्नी, तत्रापि रुधिराशना हरय इति तत्तद्दोषहरणाभिप्रायेण परमात्मने, आत्मनोऽप्यधिकप्रियायेत्यर्थः। अत एव श्रद्धया विश्वासेन भक्त्या च प्रेम्णा, किं तु किमप्युत्तमं द्रव्यम्? तत्रापि कृष्णस्यात्मनो वा प्रियतमं यच्छन् सन् कृष्णानुरक्ततन्मातर इव सद्भक्तिं प्राप्स्यन्तीति किं वक्तव्यमित्यर्थः। यच्छन्निति वर्तमानया तद्देहे एव तत्समये एवेति बोध्यते। यद्वा, किं पुनर्वक्तव्यम्–श्रद्धयास्तिक्येन भक्त्यादरेण प्रियतमं यथा यच्छन् सद्गतिमाप्नोतीत्यतश्च किं वक्तव्यम्–रक्ताः स्निग्धास्तन्मातरः प्राप्स्यन्तीत्यर्थः। किं वा रक्ताः स्वभावतोऽनुरक्ता जना यथा मातरस्तथा प्राप्नुवन्तीति ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सद्गतिमगमत् प्राणापहारकथनेन बुद्धिदोषस्य प्रायश्चित्तं कृतम् अतः पापीयस्या अपि भगवत्सम्बन्धात् सुगतिलाभो युक्तः ॥ ३५–३९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततस्ते व्रजौकसस्तत्पूतनाकलेवरमवयवशः परशुभिश्छित्वा दूरे क्षिप्त्वा काष्ठैर्वेष्टितं कृत्वा ददहुः ॥ ३३ ॥ विस्मयान्तरमाह—दह्यमानस्येति। दह्यमानस्य देहस्य सम्बन्धी यो धूमः सोऽगरुसन्निभः कृष्णागरुतुल्यगन्धः समुत्थितः यः समुत्थितः सोऽगरुसन्निभो बभूवेति शेषेण वाऽन्वयः अगरुसौरभ इति पाठे अगरोः सौरभ इव सौरभः यस्य सः इत्यर्थः। तत्र हेतुं वदन् देहं विशिनष्टि—कृष्णेति। श्रीकृष्णस्य भगवतो निर्भक्त्या हेतुभूतया सपद्येव कार्त्स्न्येन आहतं पापं यस्य तस्य कृष्णनिर्मुक्तेति पाठान्तरं तदा कृष्णेन भगवता हेतुना निर्मुक्त्या हेतुभूतयेत्यर्थः ॥ ३४ ॥ यतो हतपाप्माऽत एव मुक्तिमनर्हापि प्रापेत्याह—

पूतनेति । अपिशब्दस्य लोकबालघ्न्यादिभिः प्रत्येकं सम्बन्धः जिघांसया हन्तुमिच्छया हरये स्तनं दत्त्वापि सद्गतिं सतां प्राप्यां गतिं मुक्तिमवाप ।। ३५ ।। यतोऽप्रियं गरलं यच्छन्ती मुक्त्यनर्हापि केनचिद्भगवत्सम्बन्धमात्रेणैव सद्गतिमवाप किंपुनर्भगवद्भक्त्या सद्गतिं प्राप्नुवन्तीत्याह—किंपुनरिति । श्रद्धया भगवत्प्रियाचरणोपयुक्तया त्वरया भक्त्या श्रद्धया च परमात्मने श्रीकृष्णाय किञ्चित्प्रियतमं यच्छन् समर्पयन् सद्गतिं प्राप्नोतीति किंपुनर्वक्तव्यमित्यर्थः। प्रियं यच्छन् सद्गतिं प्राप्नोतीत्यत्र दृष्टान्तः रक्तास्तन्मातरो यथेति रक्ता अनुरक्ताः तस्य श्रीकृष्णस्य मातरो यशोदादयो यथा प्रियतमं यच्छ त्यः सद्गतिं प्रापुस्तद्वत् ।। ३६ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पूतनाविष्टोर्वशी सद्गतिं स्वर्गं पूतना त्वसद्गतिं नरकं "षद्लृ विशरणगत्यवसादनेषु" इति धातुः ।। ३५ ।। रक्ता अनुरक्ताः ।। ३६–३७ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कृष्णनिर्भुक्तेति तत्सौगन्ध्याधानमपि व्यञ्जितम् ।। ३४ ।। राक्षसी लोकबालघ्नी रुधिराशनेति क्रमशोऽधमताधिक्यम् ।। ३५ ।। परमात्मने ज्ञानक्रियाशक्तिप्रदत्वेन तत्सामान्यतन्तावद्धिताय कृष्णाय विशेषपूतनादीनामपि तादृशहितकारिता रूपो यो गुणैकदेशस्तदादिगुणगणप्रकटनेन सर्वचित्तानां स्वभावतः स्वस्मिन्नाकर्षकाय तस्मै तद्वद्द्वेषमात्राभावेन यथाकथञ्चित् किञ्चिदपि यच्छन् किं पुनः किमु ेत्यर्थः । तत्रापि श्रद्धया विश्वासेन किमुत तत्रापि भक्त्या आदरेण किमुत तत्रापि स्वस्य श्रीकृष्णस्य वा प्रियतरं यच्छन् प्रीत्येत्यर्थात् अत्रापि प्रीत्या प्रियं प्रीतिविशेषेण प्रियतरमिति क्रमः कार्यः अतः प्रीतिविशेषतररूपेण प्रेम्णा प्रियतममित्यत्रापि गम्यं तत्रापि रक्तास्तदेकजीवनास्तत्सुखैकसुखा यथा यच्छन्ति तथा यच्छन् किन्तु किमुतेत्येवार्थः पुनरुक्तिः किमुत्येऽपि वैशिष्ट्याय तत्रापि त मातरो तथा यच्छन्ति तथा किमुतेति ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

जिघांसयापि स्तनप्रदानेन सा जननीगतिमेव प्रापेति भगवत्कारुण्यं प्रदर्शयन्नाह—पूतना लोकबालघ्नीत्यादि सद्गतिं सती माता तस्या गतिम् ।। ३५–३७ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

स्तनं पीत्वा दत्त्वाप सद्गातिमित्यादि । सती माता तस्या गतिम् ।। ३५–३७ ।।

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

व्रजौकसोऽन्त्यजा उपनन्दाद्यादिष्टाः निःशेषेण देहुः पुनर्जीवनशङ्कया विषधरजीवानां दाहेनैवोपशान्तेः ।। ३३ ।। तद्देहस्य कृष्णमुखस्पर्शोत्थं महिमानमाह—दह्यमानस्येति । कृष्णनिर्भुक्तेन कृष्णकृतस्तन्यपानेन सपद्याहतः पाप्मा यस्य तस्य ।।३४।। प्रसङ्गात् कैमुत्यन्यायेन भक्तमहिमानमाह—पूतनेति । जिघांसयापि किमुतौदासीन्येन किमुततरां श्रद्धया किमुततमां श्रद्धया भक्त्येत्यर्थः । हरये भगवत्प्रादुर्भावमात्राय किमुत कृष्णाय परमात्मने सर्वपरमस्वरूपावतारिणे विषस्तनमपि किमुत विषेतरद्वस्तु किमुततरां प्रियं किमुततमां प्रियतरं किमुतातितमां प्रियतमं पूतनानाम्ना प्रसिद्धा राक्षस्यपि किमुत मानुष्यः किमुततरां भक्ताः किमुततमां रक्ताः अनुरागयुक्ताः तत्रापि किमुततमां तन्मातरोऽतिवत्सलाः वत्साहरणलीलागतास्तास्वप्यतितमामनिर्वाच्यत्व तु श्रीयशोदा तु दूरत एव प्रणतिपात्री कृत्यैव स्थापिता नतूल्लिखितेतिकरणसम्प्रदानकर्मकर्तृपदेषु कैमुत्यमण्डली ।। ३५–३६ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रथमं श्रीकृष्णसंस्पर्शादेव सपद्याहतः पाप्मा यस्य पुनः गोपैर्भगवदीयैर्दह्यमानस्य अगरुसौरभवत् सौरभो यस्य सः उत्थितः सन् कृष्णेन निर्भुक्तोऽभूत् ।। ३४ ।। अतः सोऽपि कृतार्थोऽभूदित्याह—पूतनेति । सद्गतिं मातृगतिम् ।। ३५ ।। यदा पूतना जिघांसया दुर्जरवीर्यमुल्बणं स्तनं देहधूमसौरभं च श्रीकृष्णाय दत्वा मातृगतिमाप तदा रक्ताः भक्ता भागवताः श्रद्धया भक्त्या च किञ्चिदपि प्रियतमं पत्रपुष्पादिकं कृष्णाय परमात्मने यच्छन् तन्मातरः यशोदादेवकीरोहिण्याद्याः यथा तथा गतिं प्राप्नुवन्तीति किं पुनर्वक्तव्यमित्यर्थः ।। ३६–३९ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तस्याः कलेवरं व्रजौकसोऽन्त्यजा उपनन्दादिभिरादिष्टानिर्दहुः पुनः कथञ्चिदियं जीवेदिति शङ्कया निःशेषेण दग्धं चक्रुः एवं यावच्छ्रीनन्दादयो निकटमायान्ति तावत्ते गोकुलरक्षायां स्थितैः श्रीमदुपनन्दादिभिर्नियुक्तास्तदुचिता व्रजौकसो व्रजमाश्रिताः कनिष्ठजातयो नितरामदहन् ।। ३३ ।। विस्मयान्तरमाह दह्यमानस्येति कृष्णेन यन्निर्भुक्तं स्तन्यपानं तेन सपद्याहतः प्रणष्टः पाप्मा यस्येति तन्मुखस्पर्शस्य महिमा दर्शितः ।। ३४ ।। प्रसङ्गात् कैमुत्येन भक्तमहिमानं कथयन् हतारिगतिप्रदत्वं कृष्णस्य गुणमाह

पूतनेति सतां विदुषां गतिं लिङ्गदेहच्छेदरूपां मुक्तिमित्यर्थः ॥ ३५ ॥ श्रद्धालुर्भक्तः प्रियतमं स्वातिप्रियं वस्तु यच्छन् सद्गतिमेवापेति किं वक्तव्यं किन्तु तद्वशीकारमेव प्राप्नुयादिति वक्तव्यमित्यर्थः । तत्र दृष्टान्तो रक्तास्तन्मातर इति बहुत्वं वत्सहरणचरिताभिप्रायेण ॥ ३६ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

पूतनेति । अत्र पूतनाया जिघांसया स्तनदानेन सद्गतिरुक्ता । तदयुक्तं । तं तथा यथोपासते तदेव भवति । ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति श्रुतिविरोधापातात् । अत उच्यते । राक्षसी ॥ पूतना । पूतिं दुर्गंधं नयति प्रवर्तयतीति सा तथा ॥ जिघांसया । वधेच्छया । निमित्तेन ॥ रुधिराशना । रुध्या निरोधे नरः अग्निराजतया दाहो यस्मिंस्तत्तमः अश्नाति प्राप्नोतीति सा तथा । अभूदिति शेषः । अशु प्राप्ताविति धातोः । या ॥ आलोकबालघ्नी । आलोकेन अवलोकनेन बालान् विषयाभिमुखत्वेन बालिशान् हंति अनर्थं प्रापयती सा तथा ॥ पूतना । पूतः तपसा पवित्रः विश्वामित्रादिना पुरुषो यस्याः सा । पूतान्नयति स्ववशमिति वा । नृशब्दात् स्त्रियां ङीषोऽपेक्षितत्वेऽपि टाप्सभानेति सूत्रोक्तदिशा ध्येयः । तादृगुर्वश्यपीत्यर्थः । हरये स्तनं दत्वा ॥ सद्गतिं । अप्सरस्स्वरूपां गतिं । आपेति न कोऽपि विरोधः ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ऋषिस्त्रिकालदर्शी कश्चित्सञ्जातः कश्चिद्योगेशो वा समासनः स्वस्वरूपमप्रकटयन्निति सङ्कोचतः सञ्जातो बत हर्षे नूनं निश्चयः । तद्विनिगमकमाह ॥ यथेति । आनकदुन्दुभिर्यथाऽऽह स एव तादृशोत्पातो दृष्टो हीति ॥ ३२ ॥ व्रजौकसो दूरे तत्कलेवरं क्षिप्त्वा तत्रैवावयवशः परशुभिश्छित्वा काष्ठवेष्टितं देहुः ॥ ३४ ॥ अगुरोः शिंशुपायाः । पिच्छला गुरुशिंशुपेत्यमरः । सौरभिमिव सौरभं यस्य तत्कृष्णस्य निर्भुक्तं स्तनपानरूपं भोजनं । भावे क्तः । तेन सपदि झटित्याहतः पाप्मा पापं यस्य तस्य देहस्य धूम उत्थितस्तदङ्गसङ्गमाहात्म्येनेयान्गन्ध उद्गत इति भावः । पुमान्पाप्मा पापमित्यमरः ॥ ३५ ॥ पूतना राक्षसी लोकबालघ्नी जिघांसया हरये स्तनं दत्वाऽपि सद्गतिमापेति बाह्यार्थविवक्षया । कैमुत्यमुत्तरत्रत्यम् । तथा याऽलोकबालघ्नो पूतना तदन्तर्गतोर्वशी हरये स्तनं दत्वाऽपिना सत्सहवासेऽपि सद्गतिमाप किमुतेति कैमुत्यं च ज्ञेयम् । सद्गतिमवसादनसाधननरकगतिम् । इतरत्र समीचीनां गतिमित्यर्थः ॥ ३६ ॥

श्रीसुबोधिनी

ततः सर्व एव व्यवहारसिद्ध्यर्थं तस्याः **कलेवरं परशुभिश्छित्वा** छित्त्वावयवशो **दूरे क्षिप्त्वा** राशीकृत्य गन्धादिव्यावृत्त्यर्थं **काष्ठवेष्टितं कृत्वा निर्दहन्** (निरदहन्), जले क्षिप्ते राक्षसानां गतिर्दुर्ज्ञेयेति पुनर्जीवेत् , अदाहे वा खण्डशो नयेयुः पश्चाद् योजयेयुः, अतो दाह एवोचित इति तेषां बुद्धिस्तस्या मुक्तिज्ञापनाय भगवता तथा सम्पादितं, भस्मान्त एव मुक्तिरिति श्रुत्यभिप्रायः ॥ ३३ ॥ तस्या मुक्तिलक्षणमाह **दह्यमानस्य देहस्य** सम्बन्धी **धूमः**, काष्ठभ्रमव्यावृत्त्यर्थं तथोक्तं, चकारादङ्गारा अपि सोज्ज्वला देहोपि घृतवज् ज्वलतीति ज्ञातव्यं, अगरुजनितधूमवत् सौरभ्यं यस्य **सोगरुसौरभः सर्वजनीनार्थमुत्थित** ऊर्ध्वंगतः, ऊर्ध्वगमनमप्युत्तमगतिज्ञापकं, ननु दुष्टाया देहस्य कथं तथात्वमित्याशङ्क्य हेतुमाह **कृष्णनिर्भुक्तसपद्याहतपाप्मन** इति, यदैव **कृष्णेन नितरां भुक्तं** तस्याः स्तन्यं प्राणाश्च **कृष्णभुक्त** एव **सपदि** तस्मिन् कृष्णभुक्तक्षण इत्यर्थः, **सपदी**त्यव्ययं, कृष्णभुक्तस्य सपद्यव्यवहितः क्षणस्तस्मिन्नेव समन्ताद् हतं नष्टं **पाप्म** यस्य देहस्य, आहतपाप्मा देहः ॥ ३४ ॥ ॥ ३५ ४० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

कलेवरमित्यत्र **निर्दहन्नि**तिपाठेऽडभावश्छान्दसः, श्रीधरीये **न्यदहन्नि**तिपाठः ॥ ३३ ॥ "पूतना लोकबालघ्नी"त्यादिषण्णां श्लोकानामव्याख्याने हेतुमाहुरत्रेत्यादि, **विगीता** इति क्षेपकाः, तेष्वेव श्लोकेषु **तन्मातर** इति पदस्यार्थमाहुस्**तन्मातर** इत्यादि, **व्याख्यातार** इति श्रीधरादयः, उपेक्षाबीजं तु **तन्मातृ**पदस्य वसुदेवस्त्रीपरत्वेन व्याख्याने बीजाभावः, अत्र तत्प्रसङ्गस्याभावादग्रिमश्लोके 'किमु गावो नु मातर' इति गोसमभिव्याहारेण वसुदेवस्त्रीणां ग्रहीतुमशक्यत्वं चेत्यादिबोध्यं, **भगवदनुभावस्यान्तःप्रवेश** इति भगवतो योनुभावः पूतनायां स्वसम्बन्धेन सुगन्धप्रवेशनरूपस्तस्य व्रजस्थानामन्तःप्रवेशश्चोक्त इत्यर्थः, तस्य प्रयोजनमाहुर्येनेत्यादि, **अन्तःस्थित** इति वासनारूपः, नन्वनुभावद्वारेवङ्करणस्य किं प्रयोजनमत आहुस्**तामस** इत्यादि, तथा च सजातीयस्य सजातीयनाशकत्वं तु गन्धतैलादौ दृष्टमतोत्र तामस्यामविद्यारूपायां पूतनायां स्वगन्धं सङ्क्रामयित्वा तां '**गन्धमत्रावशेषितां**' कृत्वा तया गन्धमात्रावशेषित आन्तरस्तामस आविद्यकः प्रपञ्चो नाशित इति नाशनसौकर्यमेव प्रयोजनमित्यर्थः ॥ ३६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

कलेवरमित्यत्र गन्धादीति मृतदेहस्य ज्वालने दौर्गन्ध्यं स्यात् , तद्व्यावृत्त्यर्थमित्यर्थः, तेषां बुद्धिमनुसृत्यैवमुक्तम् ॥ ३३ ॥ **दह्यमानस्ये**त्यत्र **सोज्ज्वला** इति उज्ज्वलवर्णसहिता इत्यर्थः, **सर्वजनीनार्थ**मिति सर्वजनप्रसिद्धगन्धार्थमित्यर्थः ॥ ३४ ॥

मातृपितृतोषिणी (श्रीसुबोधिनीजी)

ततः सर्व एव व्यवहारसिद्ध्यर्थः—इसके पश्चात् सब ग्वालों ने व्यवहार की सिद्धि के लिये, उस पूतना के शरीर को कुल्हाड़ों से काट के अवयवों को दूर फेंक कर ढेर किया। उसकी बदबू न आवे इसलिये उस ढेर को काष्ठ वेष्टित कर जला दिया। जल में इसलिये नहीं फका कि राक्षसों की दुष्टता समझ में नहीं आती है, कदाचित् जल में फेंकने पर, वह फिर जीवित हो जाय, यह ठीक नहीं इसलिये जलाना ही अच्छा समझा। जलावे भी नहीं और पानी में भी न डालें, यों ही खंड खंड कर भूमि पर छोड़ दिये जाँय यों करने से कदाचित् राक्षस उन भागों को लेकर जोड़ दें तब वह फिर जीवित हो जावे, इस प्रकार सब विचार कर उसको जलाना ही उचित समझा। उनकी ऐसी बुद्धि भगवान् ने इसलिये की, कि इसके जलाने से सुगन्धि निकलेगी, तो ये समझेंगे कि इसकी मुक्ति हो गई और श्रुति भी कहती है कि, इस शरीर को भस्म होने के बाद मुक्ति होती है ॥ ३३ ॥

जलते समय जो धुम निकला, वह काष्ठधूम नहीं था, यह सूचित करने के लिये मूल श्लोक में **'दह्यमानस्य देहस्य धूमः'** पद दिये हैं जिसका अर्थ है कि जलती देह का धूम लकड़ियों का नहीं है। श्लोक में दिये 'च' अव्यय का आशय बताते हैं कि **'अंगार'** भी उजले थे और देह भी घृत के समान जलती थी। अगर के जलने के धूम जैसी, उसके देह के जलने की धूम की सुगन्धि, धुएँ के साथ ऊपर जाने लगी। धुएँ का ऊपर जाना, सारी जनता को बताता है कि इसकी ऊर्ध्व गति हुई है। शंका होती है कि इस दुष्टा की उच्च गति क्यों हुई? इसके मिटाने के लिये कहते हैं कि श्रीकृष्ण ने स्तन्य पान कर, इसके सब पाप क्षणमात्र में नाशकर दिये थे, जिससे यह अब दुष्टा पापिनी नहीं रही, इसलिये इसकी ऊर्ध्व गति हुई, जिसका प्रमाण है कि उसकी पवित्र हुई देह से, अगर जैसी सुगन्धि निकल कर ऊंची जा रही थी ॥ ३४ ॥

आचार्यचरण पूतना लोकबालघ्नी ३५ श्लोक से तासामविरतं कृष्णे श्लोक ४० पर्यन्त के छ श्लोकों की कथा को कल्पान्तरीय मानते हैं इसलिये इन श्लोकों पर विवेचन करते नहीं है।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततस्ते नन्दादयो व्रजौकसस्तत्पूतनाकलेवरम् अवयवशः परशुभिश्छित्त्वा दुर्गन्धभयात् दूरे क्षिप्त्वा काष्ठधिष्ठितं काष्ठाधिष्ठितं काष्ठैर्वेष्टितं च कृत्वा न्यदहन्नित्यन्वयः ॥ ३३ ॥ विस्मयान्तरमाह—दह्यमानस्येति। दह्यमानस्य देहस्य सम्बन्धी अगुरुसौरभवत् सौरभं यस्य तथाभूतो धूम उत्थितः। तत्र हेतुमाह—कृष्णेति। कृष्णेन निर्भुक्तः स्तनः प्राणाश्च यस्य स कृष्णनिर्भुक्तः, अतः सपदि भोगसमय एव आसमन्तात् आहतः पाप्मा यस्य तस्य देहस्येति। भगवत्सम्बन्धादेव दुर्गन्धहेतुशवसम्बन्ध्यपि धूमः सुगन्धिर्जातः ॥ ३४ ॥ अत्र यद्यपि 'दह्यमानस्य देहस्य' इत्यस्य श्लोकस्य 'कटधूमस्य' इत्यनेनासङ्गतेः स्पष्टत्वात्तन्मध्ये षट् श्लोकाः प्रक्षिप्ता इत्याहुः श्रीमदाचार्यास्तथापि, सर्वपुस्तकेषु दर्शनात्तेऽपि व्याख्यायन्ते। प्रसङ्गात् कैमुत्यन्यायेन भक्तेर्महिमानमाह—पूतनेति षड्भिः। लोकबालघ्नी क्रूरस्वभावा पूतनाऽपि कृष्णाय स्तनं दत्त्वा यदि सद्गतिमाप, तदा सुशीलो दयालुः सद्गतिमाप्नुयात् अत्र किं पुनर्वक्तव्यमित्यन्वयः। स्तनं दत्त्वेत्यस्य विषं दत्त्वेत्यर्थः, पूर्वं दुर्जरवीर्यत्वोक्तेः। 'अहो स्वकीयं स्तनकालकूटम्' इति तृतीये उद्धवोक्तेश्च। यदि विषं दत्त्वाऽपि सद्गतिमाप, तदा प्रियतमं नवनीतादि दत्त्वा सद्गतिमाप्नुयादत्र किं पुनर्वक्तव्यम्?। राक्षसी जातितो दुष्टाऽपि यदि सद्गतिमाप, तदा उत्तमो ब्राह्मणादिस्तामाप्नुयादिति किं वक्तव्यम्?। रुधिरमशनं यस्याः सा आहारादिव्यवहारतोऽपि दुष्टा यदि सद्गतिमाप, तदा व्रतादिसदाचारनिष्ठस्तामाप्नुयादत्र किमसम्भावितम्?। जिघांसया तद्धननेच्छया दत्त्वाऽपि यदि सद्गतिमवाप, तदा श्रद्धया आस्तिक्येन भक्त्या प्रेम्णा च यच्छंस्तामाप्नुयादत्र किं वक्तव्यम्?। प्रेमवत्त्वे दृष्टान्तमाह—अनुरक्ताः प्रीत्यतिशययुक्तास्तस्य कृष्णस्य मातरो यथा प्रियतमं वस्तु तस्मै प्रयच्छन्ति स्म तथेति। एवं दुष्टेभ्योऽपि सद्गतिप्रदाने हेतुं सूचयन्नाह—हरय इति। दुःखहरणशीलत्वादित्याशयः। तत्र हेतुमाह—परमात्मन इति। परमात्मानुग्रहं विना दुष्टानामुद्धारासम्भवात् इत्याशयः ॥ ३५–३६ ॥

अन्वितार्थप्रकाशिका

कलेवरमिति। यावन्नंदाद्यो निकटमायान्ति तावदेव हीनजातयः तादृशकर्मणि प्रसिद्धा उपनन्दादिभिरादिष्टाः व्रजौकसस्तत्पूतनाकलेवरम् अवयवशः परशुभिश्छित्त्वा दुर्गन्धभयात् दूरे क्षिप्त्वा काष्ठाधिष्ठितं काष्ठैर्वेष्टितं च कृत्वा न्यदहन्। पुनर्विषसंचारभयान्निःशेषेणादहन्। ददुहुरिति पाठे एत्वाभ्यासलोपाभाव आर्षः ॥ ३३ ॥ दह्यमानस्येति ॥ कृष्णेन निर्भुक्तः स्तनः प्राणाश्च यस्य स कृष्णनिर्भुक्तः अतः सपदि भोगसमय एव आसमन्तात् हतः पाप्मा यस्य तस्य दह्यमानस्य देहस्य संबन्धी अगरुः इव सौरभं यस्य तथाभूतो धूम उत्थितः। भगवत्संबंधादेव शवधूमः सुगंधिर्जातः ॥ ३४ ॥ पूतनेत्यादिषट्श्लोकीं केचित् प्रक्षिप्तामाहुः। लोकबालघ्नी राक्षसी रुधिराशना पूतना जिघांसया अपि हरये स्तनं दत्त्वा सद्गतिम् आप ॥ ३५ ॥ किमिति ॥ पुनस्तदा

श्रद्धया भक्त्या परमात्मने कृष्णाय अनुरक्ताः प्रीत्यतिशययुक्तास्तस्य कृष्णस्य मातरो यथा प्रियतमं वस्तु तस्मै प्रयच्छंति स्म तथा किंचित् प्रियतमं वस्तु दत्त्वा सद्गतिम् आप्नुयात् । इत्यत्र किं नु वक्तव्यम् । अत्र जिघांसया किमुतौदासीन्येन किमुततरां श्रद्धया भक्त्या चेत्यर्थः । हरये भगवत्प्रादुर्भावमात्राय किमुत कृष्णाय परमात्मने सर्वपरमस्वरूपायावतारिणे विषस्तनमपि किमुत विषेतर-द्रव्यु किमुततरां प्रियं किमुतातितमां प्रियतमं पूतनानाम्ना प्रसिद्धा राक्षस्यपि किमुत मानुषः किमुततरां भक्ताः किमुततमां रक्ताः अनुरागयुक्ताः । तत्रापि किमुततमां त मातरोऽतिवत्सलाः वत्साहरणलीलागतास्तास्वत्यतितमामनिर्वाच्यत्वात् । श्रीयशोदा तु दूरत एव प्रणतिं पात्रीकृत्यैव स्थापिता न तूल्लिखितेति करणसंप्रदानकर्मकर्तृपदेषु कैमुत्यमण्डलीमातर इति बहुत्वं वत्साहरणाभिप्रायमिति स्वामिपादाः । एतेन द्वादशाद्यध्यायत्रयी न स्वामिसम्मतेति परास्तम् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ते नंदादयो गोपाः परशुभिः कुठारैः तद्वपुः अवयवशः अवयवैः दूरे क्षिप्त्वा काष्ठैर्वेष्टितं काष्ठारोपितं न्यदहन् निर्देहुः ॥३३॥ आश्चर्योत्तरमाह दह्यमानस्येति कृष्णेन निर्भुक्तः पीतदुग्धः अत एव सपदि आहतो नष्टः पाप्मा पापं यस्य ॥३४-३५॥ श्रद्धया विश्वासपूर्वकत्वरया भक्त्या स्नेहेन नरः प्रियतमं वस्तु तस्मै यच्छन् सन् सद्गतिं प्राप्नुयात् तत्र किं पुनर्वाच्यं रक्ताः स्नेहयुक्ताः तस्य गोपरूपैर्वत्सरूपैर्वत्साहरणे वर्त्तमानस्य कृष्णस्य मातरः गावो गोप्यश्च ताः यथावत्सद्गतिं प्राप्नुयुस्तत्र किंनु का शंका ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वसुदेवोक्तं यथार्थमेवाभूदिति विस्मयमानो नन्दो यदाह तदाह ॥ नूनमिति ॥ आनकदुन्दुभिर्वसुदेवः, समागतः सन्, यदमुत्पातं आह, सः एव, उत्पातः दृष्ट अस्माभिः साक्षाद्वीक्षितः । हि अतः, स आनकदुन्दुभिः, बतेति विस्मये । पूर्वजन्मनोति शेषः । ऋषिः कश्चिन्महान्मुनिः, वा अथवा, योगेशः सन्, अधुना एवंरूपेण, समागतः संजातः, नूनम् । ऋषित्वमुत्पत्तिसिद्धा-तीन्द्रियार्थदर्शित्वं, योगित्वं तपःप्रभावकृतमतीन्द्रियार्थदर्शित्वमिति विवेक ॥ ३३ ॥ कलेवरमिति ॥ ततः, ते ये नन्देन पूतना-देहदाहाय प्रेषितास्ते इत्यर्थः । व्रजौकसः, तत्पूतनासंबन्धि, कलेवरं, अवयवशः, परशुभिः कुठारैः, छित्त्वा, दूरे क्षिप्त्वा, काष्ठैर्वेष्टितं कृत्वा, न्यदहन् ॥ ३४ ॥ तदानीमपि जातं विस्मयान्तरमाह ॥ दह्यमानस्येति ॥ कृष्णेन निर्भुक्तः स्पृष्टः अत एव सपदि तत्क्षणमेव आ समन्तात् हतः पाप्मा यस्य तस्य, दह्यमानस्य देहस्य संबन्धी, यः धूमः, उत्थितः, सः, अगुरोः सौरभ इति सौरभः सुगन्धो यस्य तथाभूतः, उत्थितः ॥ ३५ ॥ पूतनेति ॥ लोकबालघ्नी, रुधिराशना, राक्षसी, पूतना, जिघांसया हन्तुमिच्छयाऽपि, हरये स्तनं, दत्त्वा, सद्गतिं सत्प्राप्यां मुक्तिमित्यर्थः । आप प्राप ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दह्यमानस्येति : १०. ६. ३४.

अस्या भूर्यनिवार्यकिल्बिषपुषो वर्ष्मांशसंशीलनात् क्लिष्टोऽहं बहुकालमासमधुना तत्क्लेशतो मोचितः ।
श्रीकान्तेन कृपाब्धिनेति जनितानन्देन मन्ये निजो भूभागेन शरीरगेण सुरभिस्तस्या गुणो व्यञ्जितः ॥ ४९ ॥
यः साक्षादभिमर्शितो भगवता हस्तेन यत्र स्थितं हृत्वा स्तन्यमिषादशेषकलुषं योऽकारि निष्कल्मषः ।
तद्देहस्य सुगन्धिधूमजनने तत्सङ्गिकाष्ठस्य वा का शङ्का किमु चित्रमत्र किमु वा तच्छृण्वतां विस्मयः ॥ ५० ॥
प्राप्तः सत्पदसङ्गोऽसतोऽपि धन्यान् करोति किमु सुजनात् । यत्पूतनाऽऽप रूपं परमात्मन एव पूतपदयोगात् ॥ ५१ ॥

पूतना लोकबालघ्नीति : १०. ६. ३५.

प्राक् कृत्यमालोच्य जना वदन्त्विदं सा पूतनाऽनाचरणप्रगल्भा ।
मन्येऽहमीशेन यदुद्धृता स्वयं सा पूतनानाचरणप्रगल्भा ॥ ५२ ॥

आलोच्य पूतनां यावद् दुर्मत्याविम-भूमिकाम् । श्रीशेनापि तदुद्धारात् कृपासीमा प्रदर्शिता ॥ ५३ ॥

श्रीशकल्पतरु० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने षष्ठोऽध्यायः ॥ ६ ॥

कृष्णप्रिया

पुनः उन ग्वालों ने पूतना के शरीर को कुल्हाड़ों से काट के सब अवयव दूर दूर फेंक कर ढेर बनाकर उनको लकड़ियों से आच्छादित कर जला दिया ॥३३॥ भगवान् श्रीकृष्ण के अति उपभोग करने से, तुरन्त पाप नष्ट होने वाली पूतना की जलती देह से अगर के समान निकला हुआ धूम ऊपर जाने लगा । ॥ ३४ ॥ लोगों के बालकों को मारने वाली और रुधिर पीने वाली पूतना, मारने की इच्छा से भी भगवान् को दूध पिलाने से मुक्त हो गई ॥ ३५ ॥ भला तब श्रद्धा तथा भक्ति से, श्रीकृष्ण को प्रिय वस्तु अर्पण करने वाली स्नेहमयी माताओं को मोक्ष प्राप्त हो, तो क्या आश्चर्य है ॥ ३६ ॥

पद्भ्यां भक्तहृदिस्थाभ्यां वन्द्याभ्यां लोकवन्दितैः। अङ्गं यस्याः समाक्रम्य भगवानपिबत् स्तनम् ॥ ३७ ॥
यातुधान्यपि सा स्वर्गमवाप [1]जननीगतिम्। कृष्णभुक्तस्तनक्षीराः किमु गावो नु मातरः ॥ ३८ ॥
पयांसि यासामपिबत् पुत्रस्नेहस्नुतान्यलम्। भगवान् देवकीपुत्रः कैवल्याद्यखिलार्थदः[2] ॥ ३९ ॥
तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणम्। न पुनः कल्पते राजन् संसारोऽज्ञानसम्भवः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—लोकवन्दितैः वन्द्याभ्यां भक्तहृदिस्थाभ्यां पद्भ्यां यस्याः अङ्गं समाक्रम्य भगवान् स्तनम् अपिबत् सा यातुधानी अपि जननी गतिं स्वर्गम् अवाप (तर्हि) कृष्णभुक्तस्तनक्षीराः किमु मातरः किमु नु गावः ॥ ३७-३८ ॥ कैवल्याद्यखिलार्थदः देवकीपुत्रः भगवान् यासां पुत्रस्नेहस्नुतानि पयांसि अलम् अपिबत् कृष्णे अविरतं सुतेक्षणं कुर्वतीनां तासां अज्ञानसंभवः संसारः हे राजन् पुनः न कल्प्यते ॥ ३९-४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृष्णेन भुक्तं पीतं स्तनक्षीरं यासां तास्तथा स्तनपदेन गवादिपयोनिवृत्तिः। भगवतो निष्कारणकृपादत्तं पूतनासौभाग्यं पश्यतेत्याह—पद्भ्यामिति द्वाभ्याम्। भक्तहृदिस्थाभ्यामिति पूतना न भक्ता नाप्यभक्ता किं तु वैरिणीति। ब्रह्मरुद्रादिभिरपि वंद्याभ्यामिति। पूतनया तु पादौ न वंदितौ नाप्यवंदितौ किं तु मरणसमये स्वहृदयान्निष्कासयितुमशक्नुवत्या स्वपाणिभ्यां यथाबलं ताडितावेवेति भावः। स्वर्गं वैकुंठं "ब्रह्मादयो लोकपालाः स्वर्वासं मेऽभिकांक्षिणः" इतिवत् 'पूतनापि सकुला त्वामेव देवापित' इति ब्रह्मोक्तेश्च। तदपि जनन्याः यशोदायाः प्रकाशभेदेन गतिर्यत्र तमिति गोलोकमेव न तु जननीसंबंधिनीं गतिमिति। 'रक्तास्तन्मातरो यथा' इति पूर्वत्र 'किमु गावो नु मातरः' इत्युत्तरत्र चोक्तेस्तन्मातृणामन्यासामपि तत आधिक्यप्रतिपादनात्। 'लेभे गतिं धात्र्युचिताम्' इत्युद्धवोक्तेश्च जननीपदेनात्र धात्र्येव ग्राह्येति ॥ ३७-३८ ॥ पुनर्द्वाभ्याम्—यासां गवां गोपीनाम्। देवकीयशोदा वसुदेवभार्या वा द्वयोर्देवकीनामवत्त्वात्। चतुर्वर्गांतत्वेपि कैवल्यस्य प्रेमपारवश्यात्कैवल्यादीत्युक्तं महामुनिना। यद्वा—कैवल्यमादि प्रधानं यत्र ते कैवल्यादयस्ते च तेऽखिलास्तत्प्रदः। कैवल्यस्यादिकारणं धर्मस्ततोऽखिला अर्थकाममोक्षास्तत्प्रदः ॥ ३९ ॥ अविरतं सततम्। 'संतताविरतानिशम्' इत्यमरः। सुतेक्षणं पुत्रदृष्टिम्। निरंतरं सुतदृष्ट्या भगवत्स्मृतेरज्ञानस्य नष्टत्वात्तत्कृतसंसारः कथं भवेदिति भावः। देवक्याः सकाशादपि तासामाधिक्यं ध्वनितं देवकीपुत्रोपि तासां स्तनमपिबन्न तु तस्या इति न च तासां संसारध्वंसरूपं फलं दातव्यमिति वाच्यं संसारो हि देहगेहपतिपुत्राद्यासक्तिलक्षणस्तत्रासां देहसंबंधि स्तन्यामृतं कृष्णः पिबति। गेहे कृष्णः खेलति पतिः कृष्णस्य पिता पुत्रः स्वयं कृष्ण एवेति तदाद्यासक्तेः संसारत्वं न घटतेति। अज्ञानसंभव इति ज्ञानिनां ब्रह्मानुभव एव संसारित्वाभावकरः। ब्रह्मानुभवतोऽपि ब्रह्मतया भगवदनुभवः श्रेष्ठ इति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, यद्येवं दुष्टा तर्हि कथं सद्गतिमाप ? उच्यते तन्महिमदृष्ट्या नाश्चर्यं तदपीति वदंस्तस्यास्तामेव सद्गतिं पुनराश्चर्यविशेषात परमविशेषतो दर्शयति—पद्भ्यामिति युग्मकेन। भक्तानामेव नान्येषां हृद्येव स्थिताभ्यां ननु साक्षात् कर्तुं शक्याभ्यां ये सर्वैरपि लोकैर्वन्दिता श्रीब्रह्मशिवादयोऽपि महाभक्तास्तैरप्युद्देशमात्रेण वन्दितुं योग्याभ्यां ननु साक्षात्सेव्याभ्यां सम्यगाक्रम्य न तु यथा कथञ्चित् स्पृष्ट्वा यस्याः स्तनमप्यपिबत् तथाभूता सती सद्गतिमापेति किमाश्चर्यमित्यर्थः। तत्र च मातृवेषभावानुकरण कारणात्तत्करुणैव कारणमिति भावः तदुक्तं "सद्वेषादिव पूतना" इति "कंवा दयालु शरणं व्रजेम" इति च "ब्रह्मा भवो लोकपालाः स्वर्गासम्मेभिकाङ्क्षिणः" इतिवत् स्वर्गं परमसुखानुभवस्थानं "य एतत्पूतनामोक्षम्" इति वक्ष्यमाणरीत्या प्रपञ्चातीतं "पूतनापि सकुलात्वामेव देवापिता" इति रीत्या "गोकुलं वनवैकुण्ठम्" इति श्रीकृष्णोपनिषद्रीत्या "गोकुलाख्यं महत्पदम्" इति श्रीब्रह्मसंहितारीत्या च श्रीगोकुलस्यैव प्रापञ्चिकलोकानभिव्यक्तत्वं "चिन्तामणिप्रकरसद्म" इत्यादिब्रह्मसंहितावर्णितप्रकारविशेषं गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामि" इति तत्र प्रसिद्ध्या श्रीगोलोकाख्यं श्रीकृष्णलोकमेव अत एव जननीगतिं तत्रापि जनन्या श्रीयशोदाया इव गतिं निजलालनाद्यधिकृतधात्रीवर्गप्रवेशमित्यर्थः। निषेत्स्यते च जननीनामन्यगतिरिति भावः। तदुक्तं "त्वामेव देवापिता" इति 'लभे गतिं धात्र्युचिताम्' इति च। ननु, तस्या दृष्टान्तत्वेन मातृणामपि तथैव गतिरभिप्रेयते नेत्याह— कृष्णेति। तस्मादेव गावो मातरश्च जननीगतिमवापुरिति किमु वक्तव्यं गावस्तास्तदीया गाव एव मातरश्च मातर एव नित्यमित्यर्थः। अप्रस्तुतानां गवां प्रयोगो मातृषु कैमुत्याय अनुमातर इति वा छेदः। यद्वा किमु गावः यतस्ता अनुमातरः मातृसदृश्य एव अतः श्रीयशोदा तु सर्वमूर्द्धमणिवदेव दूरे रक्षितेति ज्ञेयम् अत्र क्षीरपदाधिक्यात् पूतनायां तदनुकरणमित्येव च सिद्धम् ॥ ३७-३८ ॥ तस्याः स्वर्गं विशेष्टुं तद्विशेषणं जननीगतिं विशिनष्टि—पयांसीति, युग्मकेन। अयमर्थः

---

[1] जगतीपतिम्—वीर. भक्त. । [2] खिलप्रदः—श्रीधर. वंशी. विश्व. गिरि. भक्त. ; खिलार्थदः—वीर. जीव. ।

कैवल्याद्यखिलार्थदः कामिनां धर्मादिमात्रार्थदः नतु स्वस्वरूपव्यञ्जकः मुमुक्षूणां तु कैवल्यदो निर्विशेषब्रह्माख्यस्वस्वरूपतादात्म्यमात्रप्रापकः नतु सविशेषभगवदाख्यस्वस्वरूपोपलम्भकः तथा भगवान् भक्तानामपि भगवत्स्वरूपमात्रेण नतु ममताविशेषमयप्रेमविशेषप्रदेन पुत्रादिरूपेण तत्प्रापक इत्यर्थः । तथा श्रीदेवकीपुत्रः श्रीदेवक्या अपि जन्मनैव पुत्रः नतु पितरौ नन्वविन्देतामित्यादिना श्लाघिष्यमाणतादृशभावमयलालनेनापीत्यर्थः । स एष यासां गवां मातृणां च अलमर्थं पुत्रस्नेहस्नुतं अलमर्थमेवापिबत् परस्परं तद्भावस्य गाढत्वेनाधिक्येन च सर्वोत्तमत्वं दर्शितम् एतच्च "इत्थं सतां ब्रह्मसुखानुभूत्या" इत्यादिवज्ज्ञेयम् अतस्तासामज्ञानसम्भवः संसारः संसारित्वं न पुनर्नतु कल्पते घटते ज्ञानादुपर्य्युपरि समारूढत्वात् संसारिकेषु "मुक्तानामपि सिद्धानाम्" इत्यादिन्यायेन शुद्धभक्तस्याप्येकस्य परमदुर्लभत्वात्तद्विधानामसम्भव इति ॥ ३९ ॥ तदेव व्यञ्जयति—अविरतं नित्यमेव श्रीकृष्णे सुतेक्षणं सुतभावं कुर्वतीनामेव सतीनां यत्र श्रीकृष्णस्तत्र नित्यमेवैतादृशीनामेवेत्यर्थः । हे राजन् ! भगवत्तत्त्वज्ञाने विराजमानेति सिद्धान्ते सावधानं करोति अतः स्वर्गस्य जननीगतिमिति विशेषणेनाप्रापञ्चिकत्वमेव सुतरामिति चागतम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र च तादृश्या अपि तस्यास्तादृशसद्गतिप्राप्त्यातिविस्मितत्वात् पुनरपि तदेव प्रस्तवन् मातुरिव श्रीभगवता तस्या अंकमाक्रम्य स्तनपानान्मातृवद्गतिप्राप्तिमाह—पद्भ्यामिति सार्द्धेन । भक्तानां हृदिस्थाभ्यां सदा ध्यायमानाभ्यामित्यर्थः । लोकवन्दितैः श्रीब्रह्मादिभिर्वन्द्याभ्यामुद्देशमात्रेण वन्दितुं योग्याभ्याम्, तेषां तद्ध्यानेऽप्यशक्तेः । सम्यगाक्रम्यांके ग्रहणाज्जनन्याः श्रीदेवक्या वा, वत्सवत्सपरूपधारणे स्तन्यपानेन मातृताप्राप्तानामिव गतिं प्राप्यम् । तथा चोक्तमुद्धवेन (भा० ३।२।२३) 'लेभे गतिं धात्र्युचिताम्' इति । ननु, तर्हि किं वैकुण्ठलोकादिकम् ? नेत्याह—स्वर्गम्; तथा च वक्ष्यते—'यत्र तत् पूतनामोक्षम्' इति । यद्वा, जनन्या गतिम्; तामेवाभिव्यञ्जयति—स्वर्गमिति श्रीविष्णुलोकविशेषम्; तथा चाग्रे श्रीब्रह्मस्तुतौ (भा० १०।१४।३५)—'सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता' इति त्वां त्वत्सम्बन्धिसुखमित्यर्थः । एवमन्यदैत्येभ्यस्तस्या गतौ विशेष उक्तः । अतश्च कृष्णेन भुक्तानि स्तनक्षीराणि यासां ता गावः, नु समुच्चये, मातरश्च स्वर्गमवाप्स्यन्तीति किं वक्तव्यमित्यर्थः । पुनस्तथैवोक्तिः सर्व्वसन्देहनिरसनार्थम् । एवं तादृशानेकदोषवत्याजिघांसयैव स्तनमात्रं दत्तवत्यास्तादृशगत्यवाप्तौ मरणसमये तादृशश्रीमत्पादाब्जस्पर्शसौभाग्यमपि कारणान्तरं ज्ञेयम्; वस्तुतस्तु तस्या मरणं महादुःखदर्शनादिना परदुःखकातरस्य श्रीभगवतः कारुण्यभरोदयादेव सद्गतिप्राप्तिः । तथा चोक्तमुद्धवेन तत्तत्त्वज्ञेन (भा० ३।२।२३)—'ततोऽन्यं कं वा दयालुं शरणं व्रजेम' इति । तत्र च जननीवद्गतिर्मातृवत्स्तनदानेन लालनादि वल्गुचेष्टितेन चेति तत्त्वं, सिद्धान्तस्तु लिखित एव । अथवा, यातुधान्यपि स्वर्गमवाप, अतो गावो जननीगतिमवाप्स्यन्तीति किं वक्तव्यम् ? नु वितर्के । यतस्ता मातर एव; यद्वा, अनुमातर उपमातरस्तत् कुतः ? कृष्णभुक्तस्तनक्षीराः । अन्यत् समानम् ॥ ३७-३८ ॥ अतः कथमपि तन्मातॄणां किञ्चिदपि दुःखं नैव घटते, किन्तु सर्व्वथा परमसुखमेवेति प्रसंगादाह—पयांसीति द्वाभ्याम् । यासां पयांसि स्तन्यानि; देवकी-पुत्र इति—कः प्रजापतिर्दक्षः श्रीनन्द एव—'नन्दः प्रजापतिर्दक्षः' इति भविष्योत्तरेऽभिधानात्; कस्य पत्नी देवकी, चासौ की च देवकी यशोदा, तस्याः साक्षादेव पुत्र इति गोगोपीभ्यस्तदुत्कर्षः सूचितः । तासां न कल्पते निजस्वभावं दर्शयितुं समर्थो न भवति; तत्र हेतुः—अज्ञानेन सम्भवो यस्य स इति श्रीभगवद्भक्तिविशेषेण तासामशेषज्ञानसिद्धेः । पुनरिति वाक्यालंकारे, त्वर्थे वा पूर्व्वतो विशेषापेक्षया । किञ्च, कैवल्यं मोक्षः प्रेमा वा, तदादिकमखिलमर्थं भक्तेभ्यो ददातीति तथा सः । अलमपिबत्; पाने हेतुः—पुत्त्रस्नेहेन स्नुतानि स्वयं क्षरितानि, तत्रापि हेतुः—सुतेक्षणं मम सुतोऽयमिति दृष्टिमविरतं कुर्व्वतीनाम् । हे राजन्निति नरश्रेष्ठेन सर्व्वत्र प्रकाशमानेन वा त्वया तत्तत्त्वं बुध्यत एवेति भावः । यद्वा, राजमानः सर्व्वत्र स्फुटं वर्त्तमानोऽपि संसारोऽथवातः कथञ्चिदपि तासां मोक्षो न युज्यते, किन्तु श्रीवैकुण्ठलोक एवेत्याह—पयांसीति । सं सम्यक्सारश्चतुः पुरुषार्थश्रेष्ठो मोक्षो न कल्पते न योग्यो भवति । तत्र हेतुः—ज्ञानादपि सम्भव उदयो यस्य । परमभक्तिमतीनां तासां ज्ञानप्राप्यस्यार्थस्यायोग्यत्वात् । परमभक्तिमेव दर्शयति—अविरतमिति । अतो भगवानपि ताभ्यो मोक्षादिकं तुच्छमर्थं न ददातीत्याह—कैवल्यं मोक्ष आद्यं श्रेष्ठं येषु तानखिलानन्यूनान् श्रीवैकुण्ठलोकस्य तादृशस्नेहभरस्य वापेक्षयातितुच्छानर्थान् दयत्यवखण्डयतीति तथा सः । यद्वा, ननु पूतनापि चेत् संसारध्वंसेन नित्यं सुखविशेषं प्राप्ता, ततो जननीनां कथं संसारो दृश्यते ? तत्राह—तासामिति संसारो न कल्पते, न युज्यते, नास्त्येवेत्यर्थः, नित्यमुक्तत्वात् । अन्यत् समानम् ॥ ३९-४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सुतेक्षणं सुतबुद्धिं "न पुनः कल्पते राजन् ! संसारः" इति अस्मिन्नवतारे ईश्वरत्वस्य प्रकटत्वात् ईश्वरः पुत्रत्वं गत इति ज्ञातत्वान्मोक्षो युज्यते ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, मातॄणां सद्गतिप्राप्तिरसिद्धेति कथं दृष्टान्ततेत्याशंकायां तामपि कैमुत्यन्यायेन सिद्धवत्करोति—पद्भ्यामिति सार्द्धैश्चतुर्भिः । लोकैर्वन्दिता ये ब्रह्मादयस्तैरपि वन्द्याभ्यां भक्तानां हृदयकमलस्थाभ्यां पद्भ्यां भगवान् यस्याः पूतनाया अङ्कं समाक्रम्य

स्तनं विषपूर्णं स्तनमिहापिबत् ॥ ३७ ॥ सा यातुधानी पूतनापि स्वर्गं निरतिशयानन्दरूपं जगतीपतिं हरिमवाप किमुत कृष्णेन भुक्तं स्तनयोः क्षीरं यासां ता मातरः जगतीपतिमवापुरिति वक्तव्यमित्यर्थः। पौरवी भद्रा मदिरादिमात्रन्तराभिप्रायकं बहुवचनम् अनुशब्दोऽत्र यथा शब्दार्थकः यथा गावस्तद्वदित्यर्थः ॥ ३८ ॥ तासामपि मुक्तिरसिद्धेति दृष्टान्तानुपपत्तेरित्यतस्तां विशिनष्टि—यासां गवां पुत्रस्नेहेनैव स्नुतानि पयांस्यलं नितरां भगवानपिबत्, कथम्भूतः ? देवकीपुत्रः कैवल्याद्यखिलार्थदः कैवल्यं प्रकृतिसम्बन्धराहित्यं मुक्तिरिति यावत् तत्प्रभृतिपुरुषार्थचतुष्टयप्रदः कैवल्यादिपुरुषार्थप्रदानाय देवकीपुत्रत्वेनावतीर्ण इत्यर्थः ॥ ३९ ॥ कृष्णेऽविरतमविच्छेदं यथा तथा सुतेक्षणं सुतबुद्धिं कुर्वतीनां तासां मातॄणां हे राजन्! अज्ञानसंभवः संसारः पुनर्न कल्पते न प्रवर्त्तत इत्यर्थः ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अपि स्वर्गं गर्हितं स्वर्गं नरकमित्यर्थः। "अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु" (१।४।९६) इति पाणिनिः जने ये नीचास्तैर्गम्यत इति जननीगतिः स्पष्टोऽन्योऽर्थः यद्वा जनन्या इ गतिं विचित्रगतिं योग्यतानुसृतगतिमित्यर्थः "इर्विचित्रे स्मरे पुमान्" इति यादवः। अनेनापि पूतनाया नरकगतिः उर्वश्याः स्वर्गगतिरिति सूचितम्। नु सविकल्पां गतिं योग्यतयेतिशेषः। यद्वा अनु योग्यतासदृशीं "नु पृच्छायां विकल्पे च पश्चात्साहश्ययोरनु" इत्यमरः ॥ ३८–३९ ॥ सुतेक्षणं पुत्रदर्शनम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तन्महिमदृष्ट्या तु नाश्चर्यं तदपीत्याह—पद्भ्यामिति। तथाभूता सती सा सद्गतिमापेति किमाश्चर्यमित्यर्थः। तत्र च मातृवेषभावानुकरणकारणा तत्करुणैव कारणमिति भावः। तदुक्तं "सद्वेषादिव पूतना" अपीति "कं वा दयालुं शरणं व्रजेम" इति च ॥ ३७ ॥ एवं तस्याः सामान्यतः सद्गतिमुक्त्वा पुनराश्चर्यविशेषाय परमं विशेषतो दर्शयति—यात्वित्यर्द्धेन। स्वर्गं ब्रह्मा भवो लोकपालाः स्ववसं मेऽभिकांक्षिण इतिवत् परमसुखानुभवस्थानम् "य एतत् पूतनामोक्षम्" इति वक्ष्यमाणरीत्या च श्रीगोकुलस्यैव प्रापञ्चिकलोकानभिव्यक्त "चिन्तामणिप्रकरं सद्म" इत्यादि ब्रह्मसंहितावर्णितं प्रकाशविशेषं गोकुल एव निवसतीत्यादि तत्रैव प्रसिद्धं श्रीगोलोकाख्यं श्रीकृष्णलोकमेव अत एव जननीगतिं तत्रापि जनन्या अपि श्रीयशोदाया इव गतिं निजलालनाद्यधिकृतधात्रीवर्गप्रवेशमित्यर्थः। तदुक्तं त्वामेव देवापितेति लेभे गतिं धात्र्युचितामिति च ननु, तस्या दृष्टान्तत्वेन मातॄणामिति तथा गतिरभिप्रेयते नेत्याह—कृष्णेति। तस्मादेव गावो मातरश्च जननीगतिमवापेति किमु वक्तव्यं गावस्तास्तदीया मातरश्च मातर एवेत्यर्थः ॥ ३८ ॥ तस्याः स्वर्गं विशेषयितुं जननीगतिमपि विशिनष्टि पयांसीति द्वाभ्याम् "इत्थं सतां ब्रह्मसुखानुभूत्या" इत्यादिवच्चायमर्थः। यः कैवल्याद्यखिलार्थदः कामिनां धर्मादिमात्रार्थदः न तु स्वरूपमात्रव्यञ्जकः मुमुक्षूणाञ्च कैवल्यदो निर्विशेषब्रह्माख्यस्वस्वरूपतादात्म्यमात्रप्रापकः नतु सविशेषभगवदाख्यस्वस्वरूपोपलम्भकः तथा भगवान् भक्तानामपि भगवत् स्वरूपमात्रेण नतु ममताविशेषमयप्रेमविशेषप्रदेन पुत्रादिरूपेण तत् प्रापक इत्यर्थः। तथा देवकीपुत्रः श्रीदेवक्या अपि जन्मनैव पुत्रः नतु तादृशभावमयेन लालनेना पीत्यर्थः। स एव यासां गवां मातॄणाञ्च अलमत्यर्थं पुत्रस्नेहस्नुतम् अलमत्यर्थमेवापिबत् इति परस्परं तद्भावासक्तिर्दर्शिता तस्याः सर्वोत्तमता च अतस्ता सामज्ञानसम्भवः संसारः संसारित्वं न पुनर्नतु कल्पते युज्यते ज्ञानादुपर्युपरि समारूढत्वात् सांसारिकेषु "मुक्तानामपि सिद्धानाम्" इत्यादिन्यायेन शुद्धभक्तस्याप्येकस्याप्येकस्य परमदुर्लभत्वात् तद्विधामप्यसम्भवाच्च किमुत तासां तदेव व्यञ्जयति अविरतं नित्यमेव श्रीकृष्णे सुतभावं कुर्वतीनामेव सतीनां यत्र श्रीकृष्णस्तत्र नित्यमेव तादृशीमेवेत्यर्थः ॥ ३९–४० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अत आह—यातुधान्यपि या स्वर्गमवाप जननीगतिम्। सा पूतना स्वर्गं स्वः स्वर्गेषु ब्रह्मलोकपर्यन्तेषु गीयत इति स्वर्गं भगवल्लोकस्यावान्तरप्रदेशविशेषम्। कीदृशं। जननीगतिम् जननीलोकं नित्यसिद्धम्। एतेन भगवदवतारेषु या या जनन्यो ये ये वा जनकास्तासां तेषाञ्च पृथक् पृथक् लोकोऽस्तीति मन्तव्यम् ॥ ३९–४४ ॥

इति श्रीदशमे बृहत्क्रमसन्दर्भे षष्ठोऽध्यायः ॥ ६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एतदेव दूरे विवृणोति। यातुधान्यपि सा स्वर्गमवाप, जननीगतिं जननीलोकमवाप, कर्मलभ्यां गतिमित्यर्थः। एतेन जनकजनन्यादीनां पृथक् पृथक् लोकोऽस्तीति मन्तव्यम् ॥ ३९–४४ ॥

इति षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भगवतो निष्कारणकृपाप्रापितं पूतनायाः सौभाग्यं तावत् पश्येत्याह—पद्भ्यामिति द्वाभ्याम्। भक्तहृदिस्थाभ्यामिति पूतना न भक्ता नाप्यभक्ता किन्तु तस्य वैरिणीति भावः। लोकवन्दितैः ब्रह्मरुद्रादिभिरपि वन्द्याभ्यामिति पूतनया तु पादौ न वन्दितौ नाप्यवन्दितौ मरणसमये स्वहृदयात् सकाशात् निष्कासयितुं यतमानयाप्यशक्नुवत्या स्वपाणिभ्यां यावद्बलं ताडितावेवेति भावः।

सम्यगाक्रम्य न तु यथाकथञ्चित्स्पृष्ट्वा स्वर्गं "ब्रह्मादयो लोकपालाः स्वर्वासं मेऽभिकांक्षिणः" इतिवत् पूतनापि सकुला स्वामेव देवापितेति ब्रह्मोक्तं वैकुण्ठमेव न तु नश्वरं स्वर्गं तमपि कीदृशं जनन्याः श्रीयशोदायाः प्रकाशभेदेन गतिर्यत्र तमिति श्रीगोलोकमेव तस्येह स्वर्गपदेनोक्त्या सुखैश्वर्योत्तरं सालोक्यमवाप न तु प्रेमसेवोत्तरमिति बुद्ध्यते जनन्याः सम्बन्धिनीं गतिमिति तु न व्याख्येयं रक्तास्तन्मातरो यथेति पूर्वत्र "कृष्णभुक्तस्तनक्षीराः किमु गावोऽनुमातरः" इत्युत्तरत्र च ततः सकाशात्तन्मातृणामप्यन्यासामप्याधिक्यप्रतिपादनात् वैरित्वेन कंसादिसाम्येपि यस्या वेषभावानुकरणकारणादेवैतावत्कृपापात्री बभूव पूतना तस्याः श्रीयशोदाया गतिं प्राप्तुं योग्यतां सा कथं धत्ताम्? इत्यत एव "लेभे गतिं धात्र्युचिताम्" इत्युद्धवेनोक्तम् अत एवात्रापि जननीशब्देन धात्र्येव व्याख्येयेति केचित् तत्रापि धात्र्युचितेति शब्देन धात्रीसम्बन्धिनी गतिर्न लभ्यते महाराजोचिता सम्पदस्येत्युक्ते महाराजतुल्यैव सम्पत् प्रतीयते नतु महाराजसम्बन्धिनीति तस्मात्सुखैश्वर्योत्तरे गोलोके धात्री सारूप्यं पूतना प्रापेति सिद्धान्तः ॥ ३७ ॥ ननु किमु गावोऽनुमातर इति कैमुत्येन मातृणामपि वैकुण्ठप्राप्तिरेव यद्यभिप्रेयते तर्हि वैरभाववात्सल्यभावयोस्तुल्यत्वापत्तिः सा च भगवत्यविवेचकत्वलक्षणं दोषमेव समर्पयेद्यदि च यातुधान्यपि सा वैकुण्ठमवाप किमुतानुरक्ताः परमवत्सलाः मातरो गावश्च किन्तु तास्ततोऽप्युत्तमं फलं लभन्ते इमेत्यभिप्रेयते तर्हि तदेवाभिव्यज्यतां किन्तदित्यपेक्षायामाह—पयांसीति। अन्येभ्यः कैवल्याद्यखिलप्रदोऽपि यासां पयांसि अलम् अतिशयेन दुर्लभबुद्ध्या अपिबत् "स्तन्यामृतं पीतमतीव ते मुदा" इति ब्रह्मोक्तेश्च तेन ताभ्यः किमयं वाञ्छितं दास्यति प्रत्युत ता एवास्मै वाञ्छितं ददतीति स्ववाञ्छितपूरणयोग्यतालक्षणं फलङ्गोगोपीभ्यः कृष्णो ददावित्यर्थः आयातः ततश्च वैकुण्ठस्थितेः गोलोकस्थितेः सकाशात्तद्रूपैव स्थितिस्तासां सर्वोत्कृष्टेति सिद्धान्तोऽवगतः देवक्याः पुत्रोऽपि तासां पयांस्यपिबत् नतु तस्या इति तनोऽपि तासामुत्कर्षो ध्वनितः न च तासां संसारध्वंसलक्षणं फलमेव दातव्यमस्तीति वाच्यं संसारो हि देहगेहपतिपुत्राद्यासक्तिरूपस्तत्र तासां देहसम्बन्धिस्तन्यामृतं कृष्णः पिबति गेहे कृष्णः खेलति पतिः कृष्णस्य पिता पुत्रः स्वयं कृष्ण एवेति तदाद्यासक्तेः संसारत्वं न घटते इत्याह—तासामिति। सुतेक्षणं सुतभावं न तु कल्पते न घटते अज्ञानसंभव इति ज्ञानिनां ब्रह्मानुभव एव तावत् संसारित्वाभावप्रतिपादकः ब्रह्मानुभवादपि शान्तभक्तानां ब्रह्मतया भगवदनुभवः श्रेष्ठः ततोऽपि दास्यभाववतां भगवतः प्रभुत्वेनानुभवो भगवद्वशीकारकत्वात् श्रेष्ठः ततोऽपि सख्यभाववतां सखित्वेन भगवद्वशीकारातिशयात् ततोऽपि वात्सल्यवतां सुतत्वेनानुभवः श्रेष्ठः इति संसाराभावेपि किमुत्यं भक्तिरसामृतसिन्धोरवगन्तव्यम् ॥ ३८-४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अविरतं निरन्तरम् ॥ ४० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

उक्तमर्थमद्भुतत्वात् पुनराह—पद्भ्यामितियुग्मकम्। लोकवन्दितैर्ब्रह्मादिभिः तादृशाभ्यामपि पद्भ्यां यस्य भक्तिहीना या प्रत्युत शत्रुतामाचरन्त्या अङ्गं समाक्रम्य न तु स्पृष्ट्वैव भगवान् पूर्णषडैश्वर्यो नन्दबालः स्तनमपिबत् सा यातुधान्यपि स्वर्गं वैकुण्ठोर्ध्वस्थं गोलोकमवाप तत्र सुखैश्वर्यप्रधानं धात्रीपदमगादित्यर्थः। ब्रह्मादयो लोकपालाः स्वर्वासम्मेऽभिकाङ्क्षिणः इतिवत् स्वः शब्दोऽत्र तद्वाची जनन्याः श्रीयशोदायाः प्रकाशभेदेन गतिर्यत्रेति धात्रीवेषमात्रेणायमसाधारणः परितोषः कृष्णस्य महिमा यदि तादृश्याश्चैवं प्रसादस्तर्हि कृष्णभुक्तस्तनक्षीरा मातरो गावश्च तद्वशीकारलक्षणं प्रसादं प्रापुरिति किम्वाच्यमित्यर्थः ॥३७-३८॥ ननु परमहंसानामेव लक्षणस्तत्प्रसादो भवेत्—

> "तथा परमहंसानां मुनीनाममलात्मनाम्। भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः" ॥

इति कुन्तीवाक्यात् गोपीनान्तु संसारदर्शनात् स न घटेत्तत्राह पयांसीति युग्मं शत्रुभ्योऽपि स्वमारितेभ्यः कैवल्याद्यखिलार्थदो देवकीपुत्रो यशोदात्मजो भगवान् यासां पुत्रस्नेहेन तत्परमसांमुख्येन स्नुतानि पयांस्यपिबत् स्तन्यामृतं पीतमतीव ते मुदेति ब्रह्मोक्तेस्तानि पीत्वात्यानन्दमलभतेत्यर्थः ॥ ३९ ॥ तासां पूर्णायापि वाञ्छितानि यच्छन्तीनामज्ञानसम्भवस्तद्वैमुख्यहेतुकः संसारो न पुनर्नैव कल्पते घटते स्युरेवं न पुनर्वैचेत्यवधारणवाचकाः इत्यमरः न च पुनरप्रथमे भेदे विश्वकोषात्तासां द्वितीयः संसारो न स्यादिति व्याख्येयं नित्यतत्परिकरत्वश्रुतिस्मृतिव्याकोपात् तथैव व्यञ्जयन् विशिनष्टि अविरतमिति कृष्णो हतारेर्मोक्षप्रदे परब्रह्मणि भक्तैकवत्सलेऽविरतं सर्वदा सुतेक्षणं पुत्रबुद्धिं कुर्वतीनामिति तत्परमसांमुख्यभाजामित्यर्थः। यासां परब्रह्मसाक्षात्कारः सार्वदिकस्तासां संसारं कः शक्नुयाद्वक्तुं तथा च ये यथा मामित्यादिवद्वाक्यात्तत्पुत्रभावेन सर्वदा तद्वश्यः स वर्ततेति ततश्च तद्व्यवहारश्चिद्विलास एव भक्तिभिदान्तरिते ज्ञाने विचित्रो विभाति का च भिदान्तरिते चक्षुषि रूपराशिरिव कर्बुरे इत्यवसीयते ॥ ४० ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

किं पुनरिति। पूर्वश्लोके उर्वश्याः स्तनदानेन सद्गतिप्राप्त्युक्तौ किं पुनः शब्दासंगतिः। जिघांसयाऽपि स्तनदानेन सद्गतिप्राप्तौ श्रद्धया दातुरेव कैमुत्यकथनस्यौचित्यात्। अत उच्यते। जिघांसया युक्ता पूतना देहस्थितायास्तद्द्वारा स्तनदानेन

सद्गतिप्राप्तौ तत्संघविहीनाः पृश्न्यदितिदेवकीयशोदाख्या रक्ता भक्ता मातरो यथा सद्गतिमाप्नुयुस्तथा ॥ श्रद्धया । विश्वासयुक्तया ॥ भक्त्या । माहात्म्यज्ञानपूर्वकातिस्नेहेन । कृष्णाय ॥ किंचित् । किमपि । प्रियतमं ॥ यच्छन् । ददन् । सद्गतिं प्राप्नुयादिति किं पुनर्वक्तव्यमित्यंगीकारे नासंगतिदोषः । अयमर्थोऽग्रिमश्लोके व्यक्तो भविष्यतीति । ॥ ३७ ॥ पद्भ्यामिति । उर्वश्याः पूतनासंसृष्टत्वं कैमुत्यसिध्यर्थमुक्तं स्पष्टयति ॥ पद्भ्यामिति द्वाभ्यां ॥ अंगं पूतनाशरीरं समाक्रम्य । स्थितायाः इति शेषः ॥ यस्याः । उर्वश्याः । स्तनं भगवानपिबत् ॥ ३८ ॥ यातुधान्यपीति । सा ॥ यातुधानी । यातु पूतनाख्यं रक्षः तस्मिन्धीयत इति यातुधानी पूतनाविष्टाऽप्यूर्वशीत्यर्थः । जनन्याः यशोदायाः । गतिर्यत्र तं स्वर्गमवाप । कृष्णभुक्तस्तनक्षीरा अत एव । अनुमातरो हितापेक्षया मातृसमाना गावो जननीगतिमवापुरिति किमु वक्तव्यमित्यर्थः । ॥ ३९ ॥

इति श्रीभागवते सप्तमोऽध्यायः ॥ १०–७ ॥ (षष्ठोऽध्यायः)

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

श्रद्धाऽस्तीश्वर इति मतिर्भक्तिः प्रेमप्रवाहः । श्रद्धा सा कीदृशीत्यत आह ॥ आभक्त्येति । आ स्वस्वरूपानुरूप्येण भक्तिर्यस्याः सा तया किञ्चित्प्रियतमं कृष्णाय परमात्मने यच्छन् रक्ता अनुरक्तास्तन्मातरो यथा सद्गतिं गच्छन्ति तथा सद्गतिं गच्छेदिति किं वक्तव्यम् । पूर्वं पूतनेति स्त्रीप्रसक्तौ प्रसक्तौ चोत्तरस्मिन्नपि तस्या अन्तरा यच्छन्निति पुंनिर्देशो न तत्रापि पयोधरपानादित्याशयः किन्तु लोकानुकरणमित्युभयत्राप्यविशेष इति ज्ञापयितुमिति ज्ञेयम् ॥ ३७ ॥ भक्तानां हृदि तिष्ठत इति ताभ्याम् । सप्तम्या हृद्युभ्यामित्यलुक् । भक्तानां हृत्तस्मिन् । इना कामेन तिष्ठन इति भक्तहृदिस्थाभ्यां वा । इष्टदानात्तथेन्द्र इत्यृग्भाष्यटीकोदाहरणपूर्वकं प्राक् स्कन्धान्तरविवरणे विस्तृत्योक्तमनुसन्धेयम् । इतरप्रागुक्तद्विजीवपरतया योजनीयम् ॥३८॥ यातुधान्यप्यस्वर्गं नरकमवाप । हे अव पालकान्तरशून्य मामवेति या स्तनमदात्साऽपि जननीनां या गतिस्तां स्वयोग्यतानुसारिसुगतिमवाप सा स्वर्गं तद्रूपां गतिमवाप । यः कृष्णोऽपजनन्यपजनना जननरहिता मुक्तास्ते सन्ति सेवकतयाऽस्य सोपजननी भगवानिति पूर्वत्रान्वयः । अपजनिना युक्ता च सा इ अद्भुता च सा गतिस्तामिति वा । इ विचित्रे पुमानिति यादवः । नु एवमधिकारिवैकल्यानुसारे गतिवैकल्यद्योतने । अनु स्वयोग्यतामनुसृत्येति वा । नु पृच्छायां विकल्पे च पश्चात्सादृश्ययोरन्वित्यमरः । नु प्रश्ने च विकल्पार्थे । अनु हीने सहार्थे च पश्चात्सादृश्ययोरन्विति विश्वः । हीनां गतिमिति वा । कृष्णभुक्तस्तनक्षीरा इत्युभयान्वयि । गावो मातरश्च वसुदेवयुवतीनां बहुत्वाद्बहुवचनम् । राजगेहे उपमातॄणां स्तनदानां सतीनां बहुत्वं सम्प्रदायसिद्धमिति बहुवचनं वा । सद्गतिमाप्स्यन्तीति किमु ॥ ३९ ॥ यासां पयांसि पुत्रस्नेहो नरकादित्रातेति प्रेमा । तेन श्रुतानि भगवान्देवकीपुत्रः । उक्तार्थं सुततौपचारिकीति द्योतयितुम् । कैवल्याद्यखिलार्थद इति ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सामान्यतो भक्तानां सद्गतौ कैमुत्यन्यायं प्रदर्श्य व्रजभक्तानामपि सद्गतौ तमाह—पद्भ्यामिति द्वाभ्याम् । भगवान् श्रीकृष्णः पद्भ्यां यस्याः पूतनाया अङ्गं देहं समाक्रम्य स्तनमपिबत् सा यातुधानी राक्षस्यपि यदि जनन्योर्देवकीयशोदयोरुचितां गतिं स्वर्गमवाप, तदा कृष्णेन भुक्तं स्तनक्षीरं यासां ता गावो मातरश्च तां गतिमनुप्राप्ता इति किमु वक्तव्यमिति द्वयोरन्वयः । स्वर्गपदमत्र वैकुण्ठाख्यभगवद्धामपरम्, न तु देवलोकपरम् । "यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत् सुखं स्वःपदास्पदम्' इति श्रुतेः । 'ब्रह्मादयो लोकपालाः स्वर्वासं मेऽभिकाङ्क्षिणः' इति वैकुण्ठेऽपि स्वर्गपदप्रयोगदर्शनात्, 'पूतनापि त्वामेव देवापिता' इति भगवत्प्राप्तेर्वक्ष्यमाणत्वात्, 'जननीगतिम्' इत्युक्त्या देवलोकस्य नश्वरत्वेन जननीगतित्वासम्भवाच्च । "न केवलं स्तनपानमात्रमेव मोक्षहेतुः, किन्तु चरणसम्बन्धोऽपि" इति सूचयितुं 'पद्भ्यामङ्गं समाक्रम्य' इत्युक्तम् । तदेव स्पष्टयन्नाह—भक्तहृदिस्थाभ्यामिति । चरणसम्बन्धस्य मोक्षहेतुत्वज्ञापकमाह—लोकवन्दितैर्ब्रह्मादिभिरपि वन्द्याभ्यामिति । वत्साहरणलीलायां गोपवत्सरूपेण वर्तमानस्य ता गोप्यो गावश्च सर्वा एव मातरोऽभवन्निति बहुवचनम् ॥ ३७–३८ ॥ तासां पुनः संसारासम्भवमेवाह— पयांसीति द्वयेन । देवकीपुत्रः श्रीकृष्णः पुत्रस्नेहेन पुत्रदृष्ट्या यः स्नेहस्तेन स्नुतानि अवगलितानि यासां गवां गोपीनां पयांस्यलं सन्तोषपूर्वकमपिबत् तासामविरतं निरन्तरं कृष्णे सुतेक्षणं पुत्रदृष्ट्या स्नेहं कुर्वतीनां पुनः संसारो न कल्पते न योग्यो भवतीति द्वयोरन्वयः । तत्र हेतुमाह—अज्ञानेन सम्यग्भवतीति । तथेति भगवत्प्रेमवत्त्वेनाज्ञाननिवृत्तेरावश्यकत्वादिति भावः । तत्र हेतुमाह—कैवल्याद्यखिलप्रद इति । यतो मोक्षादिचतुर्विधपुरुषार्थप्रद इत्यर्थः । तत्र सामर्थ्यमाह—भगवानिति । 'राजन् !' इति सम्बोधनेन बुद्धिमत्त्वेन भगवत्प्रभावज्ञत्वान्नात्र किञ्चिदन्यथा मन्तव्यमिति सूचयति ॥ ३९–४० ॥

अन्वितार्थप्रकाशिका

पद्भ्यामिति ॥ भगवान् श्रीकृष्णः भक्तहृदिस्थाभ्यां लोकवन्दितैर्ब्रह्मादिभिरपि वन्द्याभ्यां पद्भ्यां यस्याः पूतनाया अङ्गं देहं समाक्रम्य स्तनमपिबत् ॥ ३७ ॥ सेति ॥ सा यातुधानी राक्षसी वैरिण्यपि यदि जनन्योर्देवकीयशोदयोरुचितां गतिं स्वर्गं वैकुण्ठाख्यम् अवाप स्वर्वासं मेऽभिकाङ्क्षिण इति वैकुण्ठेऽपि स्वर्गपदप्रयोगदर्शनात् । जनन्याः श्रीयशोदायाः प्रकाशभेदेन गति-

यत्र इति जननीगतिम् इत्यपि व्याख्यान्तरम् । तदा कृष्णेन भुक्तं स्तनक्षीरं यासां ताः गावो मातरश्च तां गतिमनुप्राप्ता इति किमु वक्तव्यम् ॥ ३८ ॥ पयांसीति ॥ हे राजन् ! देवकीपुत्रः कैवल्यादिकम् अखिलं पुरुषार्थजातं प्रददाति सः भगवान् पुत्रस्नेहेन पुत्रदृष्ट्या य स्नेहस्तेन स्नुतानि अवगलितानि यासां गवां गोपीनां च पयांस्यलं सन्तोषपूर्वकमपिबत् ॥ ३९ ॥ तासामिति ॥ तासामविरतं निरन्तरं कृष्णे सुते क्षणं पुत्रदृष्ट्या स्नेहं कुर्वतीनां पुनः अज्ञानेन सम्यक् भवतीति अज्ञानसभवः संसारो न कल्पते न योग्यो भवति ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

लोकवंदितैः शिवादिभिः वंद्याभ्यां पद्भ्यां समाक्रम्य संमर्द्य ॥ ३७ ॥ स्वर्गं स्वःदेवालये गीतं यद्धरीस्थानं तदवाप ॥३८॥ पुत्रस्नेहेन स्नुता निप्रस्रविता पयांसि क्षीराणि कैवल्यादिमुक्तीनां अखिलानां धर्मादित्रिवर्गाणां च प्रदः ॥ ३९ ॥ अविरतं निरंतरं सुतेक्षणं सुतत्वेनाऽवलोकनम् ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यतोऽप्रियं गरलं यच्छन्तीति मुक्त्यनर्हापि केनचित्पूर्वभवीयसत्कर्मजातेन भगवत्संबन्धमात्रेणैव सद्गतिं यदाऽवाप, तदा भगवद्भक्त्या सद्गतिं प्राप्नुवन्ति तत्र किं पुनर्वक्तव्यमित्याह ॥ किं पुनरिति ॥ यथा, रक्ताः भगवत्यतिस्निग्धाः, तन्मातरः श्रीकृष्णजनन्यः भगवते प्रियतमं स्तन्यं यच्छन्त्यः सत्यः, सद्गतिं प्राप्नुयुः । तथा, श्रद्धया आस्तिक्येन, भक्त्या प्रेम्णा, परमात्मने कृष्णाय, किंचित् प्रियतम, यच्छन् ददज्जनः, सद्गतिं आप्नुयात् । तत्र किं पुनः, किं पुनर्वक्तव्यमित्यर्थः । मातर इति बहुवचनं वत्साहरणलीलाभिप्रायेण, यतो गोगोपिकास्तदा तन्मातरोऽभवन् ॥ ३७ ॥ ननु मातॄणां सद्गतिप्राप्तिस्तदानीमसिद्धेति कथं दृष्टान्तितेत्याशङ्कायां तामपि कैमुत्यन्यायेन सिद्धवत्करोति पद्भ्यामिति सार्द्धश्चतुर्भिः ॥ पद्भ्यामिति ॥ लोकवन्दिता ये ब्रह्मादयस्तैरपि, वन्द्याभ्यां, भक्तहृदिस्थाभ्यां स्वभक्तजनहृदयकमलस्थिताभ्यां, पद्भ्यां, भगवान्, यस्याः पूतनायाः, अङ्गं, समाक्रम्य, स्तनं विषपूर्णमपि पयोधरं, अपिबत् ॥ ३८ ॥ यातुधानीति ॥ यातुधानी राक्षस्यपि, सा पूतना, जगतीपतिं, स्वः गीयतेऽसा स्वर्गः श्रीहरिस्तं, जगदेकनाथं भगवन्तमित्यर्थः । जननीगतिमिति पाठे मातृप्राप्यं भगवन्तमित्यर्थः । अवाप । तर्हि, कृष्णेन भुक्तं स्तनक्षीरं यासां ताः मातरस्तन्मातरः, गावश्च, तमवापुरित्यत्र किमु नु वक्तव्यम् ॥ ३९ ॥ एवं सत्यपि तासां मुक्तिरसिद्धवदेवेति दृष्टान्तानुपपत्तिरित्यतस्ता विशिनष्टि ॥ पयांसीति ॥ यासां मातॄणां गवां च, पुत्रस्नेहस्नुतानि पयांसि, अलं नितरां, देवकीपुत्रः, कैवल्याद्यखिलप्रदः कैवल्यं प्रकृतिसंबन्धराहित्यं तत्प्रभृतिपुरुषार्थचतुष्टयप्रद इत्यर्थः । भगवान्, अपिबत् । कैवल्यादिपुरुषार्थप्रदानाय देवकीपुत्रत्वेनावतीर्णत्वाद्भाव्यापि तद्गतिः सिद्धवदेव बोध्येति भावः ॥ ४० ॥

कृष्णप्रिया

भक्तों के हृदय में स्थित, लोकवन्दित देवताओं से भी पूजनीय चरणों से जिसके अंग को दबा के भगवान् ने जिसके स्तन का पान किया, वह राक्षसी भी माता जैसी गति को प्राप्त हुई तो जिन गौ और माताओं का कृष्ण ने दूध पिया, उनकी मुक्ति हो जाय तब उसमें कहना ही क्या ? मोक्ष आदि सर्व पुरुषार्थों को देने वाले भगवान् देवकी पुत्र ने, जिन माताओं के सुत-स्नेह से टपकते हुए दूध को पिया और जो माताएँ निरन्तर कृष्ण को पुत्र भावना से देखती हैं, हे राजन् ! उनको अज्ञान से उत्पन्न संसार फिर नहीं आता है ॥ ३७–४० ॥

कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः । किमिदं कुत एवेति वदन्तो व्रजमाययुः ॥ ४१ ॥
ते तत्र वर्णितं गोपैः पूतनागमनादिकम् । श्रुत्वा तन्निधनं स्वस्ति शिशो[1]रासन् सुविस्मिताः ॥ ४२ ॥
नन्दः स्वपुत्रमादाय [2]प्रोष्यागत उदारधीः । [3]मूर्ध्न्यवघ्राय परमां मुदं लेभे कुरूद्वह ॥ ४३ ॥
य एतत् पूतनामोक्षं कृष्णस्यार्भकमद्भुतम् । [4]शृणुयाच्छ्रद्धया मर्त्यो गोविन्दे लभते गतिम्[5] ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे[6] षष्ठोऽध्यायः ॥ ६ ॥

कर्दमक्षमा

अन्वयः—व्रजौकसः कटधूमस्य सौरभ्यम् अवघ्राय इदं किं कुतः एव इति वदन्तः व्रजम् आययुः ॥ ४१ ॥ ते तत्र गोपैः वर्णितं पूतनागमनादिकम् तन्निधनम् शिशोः स्वस्ति श्रुत्वा सुविस्मिताः आसन् ॥ ४२ ॥ कुरूद्वह ! प्रोष्य आगतः उदारधीः

---

[1] आसन्—श्रीधर. वंशी. जीव. वीर. गिरि. भक्त. । [2] प्रेत्यागतमुदारधीः- श्रीधर. वंशी. ; प्रोष्यागत उदारधीः—जीव. वीर. विज. विश्व. गिरि. भक्त. । [3] मूर्ध्न्युपा—श्रीधर. वंशी. गिरि. भक्त. ; मूर्ध्न्यवघ्राय—जीव. वीर. । [4] निशम्य श्रद्धया—वीर. ; निशम्य श्रद्धया युक्तो—भक्त. । [5] रतिम्—श्रीधर. वंशी. जीव. विश्व. ; गतिम्—वीर. गिरि. भक्त. । [6] पूर्वार्धे—श्रीधर. ; पूतनामोक्ष—इति कस्यचित् ।

नन्दः स्वपुत्रं आदाय मूर्ध्नि अवघ्राय परमां मुदं लेभे ॥ ४३ ॥ यः मर्त्यः एतत् पूतनामोक्षं कृष्णस्य अद्भुतम् अर्भकं श्रद्धया शृणुयात् गोविन्दे गतिं लभते ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे षष्ठोऽध्यायः ॥ ६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतदार्भकचरितम् । किं तत् । पूतनामोक्षमिति ॥ ४४ ॥

अस्तु दैत्यकुलानीशः पूतनायाः शिशुच्छलात् ॥ स्तन्यापोशनतः प्राणैः प्राणाहुतिमकल्पयत् ॥ १ ॥

इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां पूतनामोक्षो नाम षष्ठोऽध्यायः ॥ ६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कटधूमस्य शवधूमस्य "शवे श्रोणौ किलिंजे च गजगंडे भृशे कटे" इति शाश्वतः । किमिदमिति । किमेतावानगुरुधूम इन्द्रपुरान्निस्सृत्य भूतलमपि भित्वा सुतलं प्रवेष्टुमुत्सहते किं वा बलिसद्मनो निर्गत्यामरावतीमधिरोहति । किं वा कुबेरपुराद्वरुणपुराद्वेति बहुधा संदिहानाः धन्यो वसुदेव इत्येवं वदतोऽहो विना विष्णुं कोद्य बालरक्षां कुर्यादिति च वदंत आययुः ॥ ४१ ॥ ते नंदादयः । तत्र व्रजे तन्निधनं पूतनामरणम् ॥ ४२ ॥ प्रोष्य प्रवासं कृत्वा ॥ ४३ ॥ अद्भुतमतीव बालेनातिविस्तृतदेहपातनस्य दुर्घटत्वादाश्चर्यकरम् ॥ ४४ ॥ इति । शिशुच्छलात् बालच्छद्मना ईशः दैत्यकुलान्यस्तु भाक्तुमादौ स्तन्यापोशानतो राक्षस्या दुग्धरूपापोशानेन पूतनायाः प्राणैः पंचभिः प्राणाहुतिं पंचप्राणाहुतिमकल्पयदकरोदित्यर्थः । आपोशानप्राणहुतीर्विना भोजननिषेधात् । तदुक्तम् "आपोशान विना भुंक्ते यो भुंक्त दक्षिणामुखः । प्राणहुत्या विना चैव स भुंक्ते केवलं मलम् ॥" इति स्मृतेः । पूतनावधे श्रुतिः–"हेति पक्षिणी न दभ्नात्यस्मानाष्ट्र्यां पदं कृणुते अग्निधाने शन्नो गोभ्यः पुरुषेभ्यश्चास्तु मानो हिंसीदिह देवाः कपोतः" इति । अर्थस्तु हेतिरायुधवद्वधकारिणी पक्षिणी पूतना बकीरूपा अस्मान् व्रजस्थान् न दभ्नाति नाभिभवति प्रत्युताग्निधाने जाठराग्नेर्धाने निमित्ते शिशोर्जाठरमग्निं स्तनदानेन तर्पयति । आष्ट्र्याम् 'अस गतिदीप्त्यादानेषु' आसयति परलोकं गमयति मृत्युना ग्राहयति वा देहं दीपयतीति वा आष्ट्री कृष्णतनुस्तस्यां पदं स्थानं कृणुते कृष्णं पाययितुं स्वमृत्युरूपां तां तनुं स्पृशति स्मेत्यर्थः ॥ ४५ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे षष्ठोध्यायः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कटः श्मशानमिति क्षीरस्वामी व्रजौकसः ये तद्वृत्तान्तात् पूर्वमन्यत्र गतास्ते तथा ॥ ४१ ॥ ते पूर्वोक्ताः श्रीमन्नन्दादयश्च सम्प्रत्यागताः गोपैः श्रीगोकुलरक्षानियुक्तादिभिः तत्र व्रजे पूतनागमनादिकं विशेषतः श्रुत्वा आदिशब्दात् स्तनदानमहार्तनादादि शिशोश्च स्वस्ति श्रुत्वेति तेन सुविस्मयेन वात्सल्यपोषणं ध्वनितम् ॥ ४२ ॥ तेष्वपि नन्दस्य वैशिष्ट्यमाह–नन्द इति । सम्भ्रमे गते मति परमां मुदं लेभे तत्र हेतवः नाम्नैव तावच्छ्रीनन्दः तत्राप्युदारधीः दयादिगुणगणार्णवमानसः तत्रापि स्वपुत्रमादाय अङ्के कृत्वा प्रोष्यागतः तत्रापि मूर्द्धन्य वघ्रायेति किन्तु प्रोष्यागत इति हन्त मत्प्रवासादेतावाननर्थो जात इति पश्चात्तापवानपीति गम्यते कुरूद्वहेति पूर्ववत् एतदारभ्य च श्रीकृष्णस्याधोक्षजेत्याख्या व्रजजनैः कृता यथा च श्रीहरिवंशे वासुदेवमाहात्म्ये—

"अधोऽनेन शयानेन शकटान्तरचारिणा । राक्षसी निहता रौद्रा शकुनीवेषधारिणी ॥
पूतना नाम घोरा सा महाकाया महाबला । विषदग्धं स्तनं क्षुद्रा प्रयच्छन्ती जनार्दने ॥
ददृशुर्निहतां तत्र राक्षसीं वनगोचराः । पुनर्जातोऽयमित्याहुरुक्तस्तस्मादधोक्षजः ॥ इति ॥ ४३ ॥

अहो पूतनायाः साक्षात्सम्बन्धादिना तादृश्याकृतौ किमाश्चर्यं तद्वार्ताश्रवणेनापि सर्वोऽपि तस्मिन् रतिमपि लभत इत्याह—य इति । यो मर्त्यो मरणधर्मा यः कश्चिदेतच्छ्रीकृष्णस्याद्भुतार्भकचरितं शृणुयात् स गोविन्दे गोकुलेन्द्रे भगवति रतिं लभते इत्यर्थानुसन्धानमप्यनपेक्ष्य नामादिवद्वस्तुशक्तिरेव ख्यापिता तथाप्यर्थानुसन्धाने सति कारुण्यविशेषालोचनात्फलस्य शैघ्र्यवैशिष्ट्ये गम्येते कीदृशं पूतनाया अपि मोक्षः संसारात्तत्फलान्तराच्च निर्गमो येन तत् अत एवाद्भुतम् अर्भकभावापरित्यागेऽपि तादृशमारणमोक्षणादिना विस्मयकौतुकावहं निशम्येति पाठे यस्तस्मिन्निशम्य भवति स श्रद्धया सह रतिं लभते पाठस्त्वयं तेषामसम्मतः असङ्गतस्याप्यस्याव्याख्यानात्—

अविद्यायाः क्षयादेव लभ्योऽहमिति तन्मयीम् । प्रागहन् पूतनां कृष्णो राघवस्ताडकामिव ॥

किञ्च—

आरम्भादेव लीलाया बकीधात्रीगतिप्रदः । कृष्णः स्वगुणमाधुर्यं तृष्णयामास वैष्णवान् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां षष्ठोऽध्यायः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

कटधूमस्य शवधूमस्य, व्रजौकसो व्रजवासिनः श्री नन्दादय एव ॥ ४१ ॥ गोपैर्गोकुलरक्षार्थं नियुक्तैरन्यैश्च गोकुलस्थितैरमेऽभिगतैः। तत्र व्रजे पूतनागमनादिकम् आदि–शब्दात् (पूतनायाः) स्तनदान-महार्त्तनादादि ॥४२॥ तादृश-महाविस्मयेऽपि श्रीनन्दस्यानन्दभरोऽभूदित्याह नन्द इति। परमां मुदं लेभे तत्र हेतवः–स्वस्य पुत्रमादाय अंके गृहीत्वा; स्वशब्देन श्रीवसुदेव साकूतोक्त्यापि स्वकीयपुत्रज्ञानानपगमात्, तथा कस्मात् पूतना-पात-जनित-महाविस्मयानुमेयैश्वर्य्यज्ञानानुदयात् स्नेहविवृद्धः। विश्वोदारधीर्महाशयस्तादृशविस्मयेनाप्यक्षोभितचित्तत्वात्, किंवा, सहजश्रीभगवत्स्नेहार्द्रहृदयत्वात्। किञ्च, मूर्द्धिन पुत्र याघ्राय तदाघ्राणमादाय; एतच्च स्नेहविशेषलक्षणम्। एषां परममुदामुपलब्धिहेतुत्वेन यथोत्तरं श्रैष्ठ्यम्। कुरूद्वहेति कुरुकुलसन्तानबीजस्य परमभागवतस्य तव दर्शनादिना श्रीयुधिष्ठिराद्यो यथा परमानन्दं प्रापुरिति, किंवा श्रीनन्दस्य महाभाग्यानुसन्धानेन प्रहर्षात् सम्बोधयति ॥ ४३ ॥ अहो किं वक्तव्यम्-स्तनपानादिना श्रीकृष्णप्रभावात् पूतनामोक्षादिकम् ? तद्वार्त्ताश्रवणेनापि तस्मिन् प्रेमापि सर्वो विन्दतीत्याह—य इति, यो मर्त्यः शृणुयादित्यधिकार पेक्षा निरस्ता; मर्त्य इति प्रायस्तस्यैव श्रद्धया तच्छ्रवणादिसम्पत्तेः, स गोविन्दे श्रीगोकुलेन्द्रे भगवति इति लभते,–तादृशदुष्टपूतनाया अपि सद्गतिदानतस्तदीयकारुण्यमहिमालोचनेन स्वतो भक्तिसम्पत्तेः। निशम्येति पाठे–स एव श्रद्धायुक्तो मनुष्यः; यद्वा, यः श्रद्धया विशिष्टो भवति, स रतिं लभते स एव मर्त्यं अकारप्रश्लेषेणामर्त्यो वा-मरणलक्षणसंसारधर्मातीत इत्यर्थः। पाठस्त्वयं तेषामसम्मतोऽसंगतस्याप्यव्याख्यानात् ॥ ४४ ॥

अविद्यायाः क्षयादेव लभ्योऽहमिति तन्मयीम्। प्रागहन् पूतनां कृष्णो राघवस्ताडकामिव ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रील-सनातनगोस्वामिपादकृतायां
श्री बृहद्वैष्णवतोषण्यां श्रीदशमटिप्पण्यां षष्ठोऽध्यायः ॥ ६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कटधूमस्य शवधूमस्य ॥ ४१ ॥ शिशोः स्वस्ति सुखेनावस्थानम् ॥ ४२–४४ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृते शुकपक्षीये षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

व्रजौकसः कटधूमस्य शवधूमस्य सौरभ्यमाघ्राय किमिदमत्याश्चर्यमिदं कुतो वाऽस्य सौरभ्यमागतमित्येवं वदन्तः व्रजं जग्मुः ॥ ४१ ॥ ते मथुराया आगता नन्दादयः गोपैर्व्रजस्थैर्वर्णितं पूतनाया आगमनादिप्रकारं तन्निधनं मरणं शिशोः श्रीकृष्णस्य स्वस्ति सुखेनावस्थानं च श्रुत्वा सुनितरां विस्मिता बभूवुः ॥ ४२ ॥ प्रोष्य देशान्तरं गत्वा पुनरागतो नन्दः उदारधीर्विपुलानन्दयुक्तबुद्धिः स्वपुत्रमादाय मूर्द्धन्यवघ्राय हे कुरूद्वह परमां मुदं प्राप ॥ ४३ ॥ प्रकृतपूतनावृत्तान्तादिश्रवणफलमाह—य इति। किं यः पुमानेतत्पूतनामोक्षम् एतदिति सामान्याभिप्रायकं क्लीबत्वं यच्च श्रीकृष्णस्याद्भुतं कर्म चेष्टितं तच्च युक्तः समाहितचित्तो निशम्याकर्ण्य गोविन्दे गतिं लभते गत्यार्था बुद्ध्यर्थाः गतिं ज्ञानं भक्तिमिति यावत् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां षष्ठोऽध्याय. । ६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कटधूमस्य शवधूमस्य अन्ये व्रजौकसः ॥ ४–४२ ॥ प्रोष्य प्रवासं कृत्वा ॥ ४३ ॥ फलमाह—य इति ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां षष्ठोऽध्यायः ॥ ६ ॥
(विजयध्वजतीर्थरीत्या सप्तम)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कटेति। व्रजौकसः तत्वृत्तान्तात् पूर्वमन्येऽपि व्रजान्निर्गताः ते सम्प्रत्यागताः पूर्वमागताश्च विशेषतः श्रुत्वा ॥ ४१ ४३ ॥ य इति पूतनायाः मोक्षः संसारात् आसांसारिकात्तन्मूलफलान्तराच्च निर्गमो यत्र तत् केवलमार्भकस्य श्रवणेन तदवस्थ एव तस्मिन् अपि तु अर्भकपौगण्डकैशोरात्मके सर्वावस्थेपि गोविन्दे गोकुलाधिपतरि तस्मिन्नित्यर्थः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रासङ्गिकं सिद्धान्तं समाप्य प्रस्तुतमाह—कटधूमस्येति। "कटः श्मशानम्" इति क्षीरस्वामी, कुतः किमिदमिति किमेतावानगरुधूपधूम इन्द्रपुरान्निस्सृत्य भूतलमपि भित्वा सुतलं प्रवेष्टुमुत्सहते किंवा बलिसद्मतो निःसृत्यामरावतीमधिरोहति

किमु दिव्यात् कुबेरपुरात् किं वा प्रतीच्याद्वरुणालयादित्येवं बहुधा सन्दिहाना इत्यर्थः ॥ ४१ ॥ सुविस्मिता इति धन्यो वसुदेवः सत्यमाह—ईदृश्यामपि विपत्तौ शिशोः स्वस्ति नारायणं विना कः कुर्यादित्याद्युक्तवन्तः ॥ ४२ ॥ प्रोष्यागत इति हन्त मत्प्रवासादेतावाननर्थो जात इति किमहं मथुरामगच्छमिति पश्चात्तताप उदारधीरिति हन्त निर्बुद्धयो द्वारपालाः अपि केऽपि तां पुरं प्रवेष्टुं न न्यषिध्यन्निति सर्वेषां धियो निनिन्द ॥ ४३ ॥ य एतत् आर्भकम् अर्भकचरितं पूतनाया अपि मोक्षो यत्र तत् अत एवाद्भुतं शृणुयात् स रतिं लभते निशम्य पाठे तुष्येत् तिष्ठेदिति वाऽध्याहार्यम् । यद्वा यः श्रद्धया निशम्य लभते स गोविन्दे गोविन्दविषयकरतिमान् भवेदित्यर्थः ॥ ४४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । षष्ठोऽध्यायोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ ६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कटधूमस्य शवधूमस्य ॥ ४१–४३ ॥ आर्भकम् अर्भकचरितम् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षष्ठाऽध्यायार्थप्रकाशः ॥ ६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एवं प्रासङ्गिकं भक्तेर्महिमानमुक्त्वा प्रस्तुतमाह कटधमस्येति । कटः श्मशानमिति क्षीरः किमिदं कुत एवेति किमगरुधूम इन्द्रभवनात् पातालं प्रवेष्टुं प्रसर्पति बलिभवनाद्वा स्वर्गमधिरोढुमिति सन्दिग्धवचनाः सन्त इत्यर्थः ॥ ४१ ॥ सुविस्मिता इति वसुदेवः सिद्धस्तच्छुभध्यानादेव शिशोः कुशलमिति वदन्त इत्यर्थः ॥ ४२ ॥ प्रोष्यागत इति मयि मथुरां गते अनर्थोऽयमुदस्थात् किमर्थमहं तत्र गत इत्यनुतापमविन्दत् उदारधीरिति निर्बुद्धयो मे द्वारपालाः केऽपि प्रविशन्तीं तां न न्यषेधन्निति सर्वेषां धियः समाक्षिपदिति भावः । ननु नन्दादीनां यशोदादीनाञ्च सर्वशास्त्रविदां नारायणे स्वपूज्यबुद्धिः कृष्णे तु तदंशिन्यपि न तद्बुद्धिः किन्तु पुत्रबुद्धिरेवेत्येतत् कथमितिचेत् सत्यं एतद्रहस्यन्तु मृद्भक्षणाध्याये वदिष्यामः ॥ ४३ ॥ पूतनाया मोक्षो यत्र तत् आर्भकं शैशवं गोविन्दे नन्दसूनौ—

अविद्यायाः क्षयादेव लभ्योऽहमिति तन्मयीम् । प्रागहन् पूतनां कृष्णो राघवस्ताडकामिव ॥

किञ्च—

आरम्भादेव लीलाया बकीधात्रीगतिप्रदः । कृष्णः स्वगुणमाधुर्यैं तृष्णयामास वैष्णवान् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां षष्ठोऽध्यायः ॥ ६ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

कृष्णस्यार्भकचेष्टितमित्यस्यार्भकस्य कृष्णस्य चेष्टितमित्यर्थः । तेनार्भकस्येति वक्तव्यमिति दूषणस्यानवकाशः । अर्भकस्येति षष्ठ्याः सुपांसुलुगित्यनेन लुगित्यंगीकारात् ॥ ४५ ॥

इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ॥ १०–७ ॥ (षष्ठोऽध्यायः)

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सुते कृष्णे तद्रूपे साक्षाद्धरौ । अविरतं क्षणं तद्विषयं नित्योत्सवं कुर्वन्तीनामज्ञानसम्भवस्तद्धेतुकः संसारः पुनर्न कल्पते । स्फुट इतरोऽर्थ इतरस्मात् ॥ ४१ ॥ कटधूमस्य शवधूमस्य व्रजौकसो मथुरां गताः ॥ ४२ ॥ तन्निधनं पूतनावधं स्वस्ति च श्रुत्वा ॥ ४३ ॥ प्रोष्य प्रवासं कृत्वा ॥ ४४ ॥ पूतनाया एकत्र मोक्षो नाशो यस्मिन्नन्यस्मिंश्च मोक्षः सुगतिश्च येन तदेतत्कृष्णस्यार्भकचेष्टितं जयाङ्कुररूपं प्राथमिकं चेष्टितमिति यावत् गोदातरङ्गालिमरुत्कुमारा इति विद्याधीशविजयोक्तेरिवार्भकेति चेष्टितविशेषणतामेति । श्रद्धया निशम्य स्थितो मर्त्यो गोविन्दे रतिं लभते ॥ ४५ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे सप्तमोऽध्यायः ॥ १०–७ ॥ (षष्ठोऽध्यायः)

श्रीसुबोधिनी

एवं देहधूमे निर्गते यदासीत् तदाह कटधूमस्येति, अत्र षट् श्लोका विगीताः सर्वत्र दृश्यन्ते तेऽप्यध्यायत्रयवद् व्याख्येयाः, स्पष्टत्वाद् वोपेक्ष्यन्ते, तन्मातरो 'वसुदेवस्त्रिय' इति व्याख्यातारः, कटस्य प्रेतदाहस्थानस्य चितायाः सम्बन्धिधूमस्य सौरभ्यमवघ्राय व्रजौकसो गोरक्षणार्थं कार्यान्तरार्थं वा दूरे गताः किमिदमाश्चर्यमिति व्याकुलाः समीचीनं गन्धमाघ्रायागरुर्ज्वलतीति ज्ञात्वा कुत एवेतिवदन्तस्तत्तत्कार्यं परित्यज्य व्रजमेवाययुः, अनेन व्रजस्थानां सर्वेषामेव प्रपञ्चविस्मृतिरुक्ता भगवदनुभावस्यान्तःप्रवेशश्च, येनान्तःस्थितः प्रपञ्चो निवर्तिष्यते, तामसः प्रपञ्चस्तामसी च पूतना, अतो युक्तं गन्धस्य प्रपञ्चनाशकत्वम् ॥४१॥

तेषामपि निदानपरिज्ञाने विस्मय एव जात इत्याह **ते तत्रेति**, तत्र गोकुले **गोपैर्वर्णितं पूतनागमनादिकं श्रुत्वा**, **आदिशब्देन** स्तनदानादिप्रकारं **तन्निधनं** पूतनामरणं च **शिशोः स्वस्ति** कल्याणं त्रयं **श्रुत्वा**, **अत्यन्तविस्मिता** जाताः, सर्वेषामग्र आगमनमेवाश्चर्यं, अकस्मान्मरणं ततोपि तस्या महत्या भक्षको मृत्युर्बालं त्यक्तवानिति सुतरां विस्मयः ॥ ४२ ॥ नन्दस्य प्रोषितस्य पुत्राघ्राणं विहितमित्याजन्मदुर्लभं तदिदानीं कृतवानित्याह **नन्द इति**, आश्चर्ये जिज्ञासोत्पद्यते नटविद्यायां तथादर्शनात्, **स्वपुत्रं** बलभद्रव्यावृत्त्यर्थं, विहितत्वाद्दानाय हस्ते गृहीत्वा, तथाकरणे हेतुः **प्रोष्यागत इति**, नूतनमिदं कर्म कृत्वा बहु देयमिति मनसि कृतवान्, भगवते च नानाविधान्याभरणानि कृत्वा समानीतवांस्तदाह्**उदारधी**रिति, उदारा धीर्यस्य तदानीमुपपन्ना, सर्वापि बुद्धिरुदारा नन्दस्यापि मोक्षदात्री, तस्य तामवस्थां ये च भावयन्ति, मूर्ध्न्युपघ्राणं विहितं वात्सप्रेण सूक्तेन "दिवस्परी"त्यादिना, गन्धेन प्रपञ्चस्य नाशितत्वाद् भगवदाघ्राणो परमानन्दो हृदि जात इत्याह **परमां मुदमिति**, **कुरूद्वहेति** सम्बोधनं समस्तोपाख्यानविश्वासार्थम् ॥४३॥ पूतनाया मोक्षं स्थापयितुं कैमुतिकन्यायेन तच्चरित्रश्रोतृणामपि मोक्षादप्यधिकफलां भक्तिं फलत्वेनाह **य एतदिति**, **एतत् पूतनामोक्षं कृष्णस्यार्भकं** बाल्यसम्बन्धि चरित्रमद्भुतं लौकिकोपपत्तिरहितं, अनिष्टार्थं मारणमिष्टजनकमिति वा **निशम्य श्रद्धया युक्तो भवति**, **प्रमर्त्यो वा भवति**, देवभावं प्राप्नोति, देवा हि सत्ये प्रतिष्ठिताः, सर्वथेदं सत्यमिति मन्यते, **स गोविन्दे गतिं** मोक्षं **रतिं** वा **लभते**, इदमपि '**विगीत**'मिति केचित् ॥ ४४ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तर-
प्रमाणप्रकरणे वीर्यापरनामधर्मनिरूपकद्वितीयाध्यायस्य स्कन्धादितः षष्ठाध्यायस्य विवरणम् ।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

य एतदित्यत्र । इष्टजनकं मोक्षजनकमित्यर्थः ॥ ४४ ॥

इति षष्ठोऽध्यायः ।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

नन्द इत्यत्र ननु श्रीनन्दानां बालकेन स्तने गृहीते सा मृतेतिश्रवणानन्तरं जिज्ञासा कथं नोत्पन्ना बालकोऽयं कथं राक्षसीं मारितवानित्युत कथं वा मृतेति तत्राहुराश्चर्य इत्यादि, **आश्चर्य इति** सतिसप्तमी, ननु श्रीनन्दानामुत्पातागमस्य सन्देहः स्थित एव तथा च 'तस्याः स्वनेने'तिश्लोकोक्तधर्मविशिष्टस्वनश्रवण उत्पातनिश्चये प्राणस्थितिः कथं जातेतिशङ्का "तूत्पातागमशङ्कित" इत्यत्रैव श्रीमदाचार्यैर्निरस्तेतिदिक् ॥ ४३ ॥ **य एतदित्यत्रेष्टजनक**पदस्यार्थष्टिप्पणीतोवगन्तव्यः ॥ ४४ ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः
प्रकाशे षष्ठाध्यायविवरणम् ॥ ६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

य एतदित्यत्र आर्भकमिति पदच्छेदमभिप्रेत्याहुः **बाल्यसम्बन्धीति**, भावप्रधानादर्भकशब्दाच्छेषिकोऽण्, गतिं रतिमिति पाठद्वयमित्यभिप्रेत्य व्याख्यानं द्विधोक्तम् ॥ ४४ ॥

इति षष्ठोऽध्यायः ॥ ६ ॥

मातृशिरतोषिणी (श्रीसुबोधिनीजी)

एवं देहधूमे निर्गते—इस प्रकार देह के धूम निकलते हुए जो कुछ हुआ उसका वर्णन अब इस श्लोक से करते हैं ।

चिता सम्बन्धी धुम की सुगन्ध को सूंघकर व्रजवासी गौओं को चराने के लिए या खेल आदि कार्य के लिए दूर चले गये थे सुगन्ध से अचम्भे में पड़कर व्याकुल होकर कहने लगे कि यह अगर जल रहा है यों समझ, यह सुगन्ध कहाँ से आती है । ये शब्द कहते हुए उस कार्य को छोड़ कर व्रज में आ गये । इससे सब व्रजवासियों की प्रपञ्च विस्मृति बताई और भगवान् का प्रभाव उनके अन्तर प्रविष्ट हुआ, जिससे भीतर का प्रपञ्च भी नाश होगा । प्रपञ्च तमोगुणी है, पूतना भी तमोगुणी है इससे तामस द्वारा तामस का नाश होना योग्य ही है ॥ ४१ ॥

तेषामपि निदानपरिज्ञाने—उन गोपों को भी कारण जानने पर आश्चर्य हुआ । इसका वर्णन इस श्लोक में किया जाता है ।

वे मथुराजी से, खेत से, बन से आये हुए वे नन्द प्रभृति गोप गोकुल में गोपों से पूतना का आगमन और आदि अव्यय से गोपों ने स्तन पिलाने का ढंग भी बताया, फिर उसका मरण और बालक का कल्याण, ये तीनों सुनकर बहुत आश्चर्य चकित हो गये; सब गोप गोपियों के वहाँ होते हुए पूतना का नंदालय में आगमन ही आश्चर्य में डालने वाला कार्य था, ऐसे उसका यकायक मरण भी आश्चर्य का कारण था, इससे भी विशेष विस्मय इसका हुआ कि इस बलवान् पूतना को मारने वाले काल ने बालक को छोड़ दिया ॥ ४२ ॥

नन्दस्य प्रोषितस्य पुत्राघ्राणं विहितम्—वेद में कहा है कि विदेश से लौटा हुआ पिता पुत्र के मस्तक को सूंघे। विदेश से लौटे हुए नन्दजी को इस वृद्धावस्था तक दुर्लभ, यह आनन्द, अब मिला, उसका वर्णन इस श्लोक में करते हैं।

नटविद्या में उल्लेख है कि जिस बात को सुनकर आश्चर्य होता है, उस बात को जानने की इच्छा पैदा होती है। श्लोक में 'पुत्र' न कह कर जो 'स्वपुत्र' कहा उसका आशय, आचार्य श्री बताते हैं कि यदि केवल 'पुत्र' कहते तो, उससे कोई बलदेवजी को समझ ले, इस संशय को मिटाने के लिये '**स्वपुत्रः**' पद का प्रयोग किया है वेद में ऐसी आज्ञा होने से नन्दजी ने हाथ से श्रीकृष्ण को अपने निकट करके मस्तक सूंघा क्योंकि देशान्तर से आए थे। नन्दजी ने यह नवीन कार्य कर प्रभु को बहुत दूँगा ऐसा मन में बिचार किया ।

भगवान् के लिये, अनेक प्रकार के आभूषण बना करके ले आए थे, क्योंकि नन्दजी उदार बुद्धि वाले थे। नन्दजी की सम्पूर्णतया ऐसी उदार बुद्धि थी, जो नन्दजी को भी मोक्ष देने वाली तो थी ही, किन्तु नन्दजी जैसी उदारता की भावना करने वालों को भी मोक्ष देने वाली है।

'वात्सप्रसूक्त' में **'दिवस्परि'** इत्यादि से मस्तक को सूंघने का विधान है। गन्ध से प्रपञ्च नाश हो जाने के कारण भगवान् के मस्तक को सूंघने से नन्दजी के हृदय में अत्यन्त आनन्द उत्पन्न हुआ। इसलिये मूल में **'परमां मुदं'** पद दिया है जिसका अर्थ है परम आल्हाद। परीक्षित् को इस श्लोक में **'कुरूद्वह'** सम्बोधन देने का भाव यह है कि परीक्षित् का इस सम्पूर्ण चरित्र में विश्वास हो अथवा परीक्षित् को यह संकेत शुकदेवजी कराते हैं कि तूँ कुरु के कुल में उत्पन्न हुआ है। इसलिए तुझे इस चरित्र में विश्वास करना चाहिये ॥ ४३ ॥

पूतनाया मोक्षं स्थापयितुं—पूतना के मोक्ष को **'कैमुतिक'** न्याय से सिद्ध करने के लिये निम्न श्लोक में कहते हैं कि जो मनुष्य इस पूतना मोक्ष के चरित्र को सुनेंगे, उनको मोक्ष से भी विशेष, भगवान् में भक्ति रूप फल की प्राप्ति होगी।

यह पूतना को मोक्ष देने वाला, श्रीकृष्ण की बाललीला सम्बन्धी चरित्र, जो कि लौकिक उपपत्ति रहित विलक्षण चरित्र है कि जो लौकिक युक्तियों से समझ में ही नहीं आ सकता है। अनिष्ट अर्थ को जिससे संसार उत्पन्न होता है ऐसे अर्थ, अविद्या को नाश करने वाला है। इस मोक्ष को देने वाले चरित्र को सुनकर श्रद्धावाला अमर्त्य भाव देवभाव को प्राप्त होता है। तात्पर्य यह है कि वह इस चरित्र को सर्वथा, सत्य मानता है, क्योंकि देवता सत्य में ही प्रतिष्ठित हैं। इस चरित्र के सुनने से मनुष्य में देवभाव आ जाता है तथा उसकी भी सत्य में प्रतिष्ठा होती है। अतः उस मनुष्य को इस चरित्र के सूनने से गोविन्द भगवान् में मोक्ष अथवा रति होती है। कितने ही इस श्लोक को भी प्रक्षिप्त कहते हैं ॥ ४४ ॥

श्रीमद्भागवतजी के दशम-स्कंध पूर्वार्द्ध तामस प्रकरण के अवान्तर प्रमाण प्रकरण के द्वितीय अध्याय की
श्रीसुबोधिनीजी का मातृपितृतोषिणी हिन्दी भाषान्तर समाप्त ॥ ६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रासङ्गिकं समाप्य प्रस्तुतमाह कटधूमस्येति। कटस्य श्मशानस्य चितायां सम्बन्धिनो धूमस्य सौरभ्यमगुरुधूमसुगन्धतुल्यसुगन्धं ये पूतनागमनात् पूर्वमेव गोचारणार्थं दूरं गतास्ते व्रजौकसो व्रजवासिन्येऽवघ्राय किमिदमाश्चर्यम् ? कुतो वा गन्ध आयाति ?, इति वदन्तो व्रजमाययुः ॥ ४१ ॥ ते आगता गोपास्तत्र स्थितैर्गोपैर्वर्णितं पूतनागमनम् , आदिपदेन तत्स्वरूपचेष्टादिकं, तस्या निधनं मरणं, शिशोः कृष्णस्य स्वस्ति सुखेन स्थितिं च श्रुत्वा सुविस्मिता आसन्निति ॥ ४२ ॥ प्रोष्य मथुरायामुषित्वा आगतो नन्दः स्वपुत्रं श्रीकृष्णमादायाङ्कमारोप्य मूर्धन्युपाघ्राय परमां मुदं लेभे। तन्निर्मुक्तिनिमित्तं दानोत्सवादिकं च कृतवानिति सूचयन्नाह—उदारधीरिति। 'यथा त्वत्कुशलेन युधिष्ठिरादीनां परमानन्दोऽभूत्तथा' इति सूचयन् सम्बोधयति—कुरूद्वहेति ॥ ४३ ॥ एतच्छ्रवणादिफलमाह—य इति। कृष्णस्य सदानन्दस्वरूपस्य भगवतोऽद्भुतमार्भकं बालचरितमेतत् पूतनामोक्षाख्यं यो मर्त्यो मनुष्यो श्रद्धया आदरेण शृणुयात् श्रवणकीर्तनादिना धारयेत् स गोविन्दे तस्मिन्नेव रतिं लभत इत्यन्वयः। अद्भुतत्वं ह्येकस्यापि बह्वर्थकत्वं तथा ह्यनेन कर्मणा कंसस्य तिरस्कारः। नन्दादीनां स्वरक्षायां सावधानता। स्त्रीवधेऽपि स्वस्य निर्दोषता। बालरूपेणैव तस्या वधे कृते स्ववीर्यप्राकट्यं तस्यास्तत्कुलस्य तदाश्रितबालानां च मोक्षः। तेनासाधारणस्वयशसः प्रकटीकरणम्। असाधारणं हि यशोऽसाधारणे कर्मणि कृते सत्येव भवति, यदि स्नेहवत्स्वेव भक्तिं दद्यात्तदा सर्वसाधारणेनासाधारणं यशो न स्यात्। भयद्वेषादिमत्स्वपि स्नेहादिमत्समानफलदानेन त्वसाधारणेनासाधारणं यशो भवति। तच्छ्रवणादिपराणां माहात्म्यज्ञानपूर्वकसर्वतोऽधिकस्नेहरूपा भक्तिः। स्वसम्बन्धमात्रेण तस्यां सुगन्धाधाने व्रजौकसामाश्चर्यं, दुष्टाया राक्षस्यास्तन्यपानं निन्दितं कृतमिति कुतो भगवत्त्वमित्यज्ञानां मोहश्च। एवं सर्वत्रैकस्यापि भगवत्कर्मणोऽनेकार्थकत्वं बोध्यम् ॥ ४४ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने। षष्ठोऽध्यायो गतो वृत्तिं पूतनामोक्षबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

कटधूमस्येति ॥ कटस्य श्मशानस्य चितायाः संबन्धिनो धूमस्य सौरभ्यमगरुधूमसुगन्धतुल्यसुगन्धं ये पूतनागमनात् पूर्वमेव गोचरणाद्यर्थं दूरं गतास्ते व्रजौकसो व्रजवासिनो नन्दादयोऽन्ये च अवघ्राय किमिदमाश्चर्यं कुतो वा गन्ध आयातीति वदन्तो व्रजमाययुः ॥ ४१ ॥ ते तत्रेति ॥ ते आगताः गोपास्तत्र स्थितैर्गोपैर्वर्णितं पूतनागमनमादिपदेन तत्स्वरूपचेष्टादिकं तस्या निधनं मरणं शिशोः कृष्णस्य स्वस्ति सुखेन स्थितिं च श्रुत्वा सुविस्मिता आसन् ॥ ४२ ॥ नन्द इति ॥ हे कुरुद्वह ! प्रोष्य मथुरायामुषित्वा आगतः उदारधीः नन्दः पाठान्तरे प्रेत्य मृत्वा पुनरागतमिव स्वपुत्रं श्रीकृष्णमादायाङ्कमारोप्य मूर्धन्युपाघ्राय परमां मुदं लेभे। एतदारभ्यैव व्रजे भगवतोऽधोक्षजाख्याऽभूदिति हरिवंशे। अघः अघशब्दोपलक्षितकटगतेन पूतनामारणात् ततश्च गोपैः पुनर्जातोऽयमित्युक्तेश्चेति ॥ ४३ ॥ य एतदिति ॥ कृष्णस्य भगवतोऽद्भुतमार्भकं बालचरितत्पूतनामोक्षाख्यं यो मर्त्यो मनुष्यः श्रद्धया आदरेण शृणुयात् श्रवणकीर्तनादिना धारयेत् स गोविन्दे तस्मिन्नेव रतिं लभते ॥ ४४ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां षष्ठोऽध्यायः ॥ ६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कटस्य शवधूमस्तस्य सौरभ्यं सुगंधि कटः श्रोणौ क्रियाकरे कलिंजेऽतिशये शवे इति विश्वः ॥ ४१ ॥ ते नंदादयः अन्यैः गोपैः तस्याः निधनं च शिशोः स्वस्तिकुशलं च श्रुत्वा ॥ ४२ ॥ प्रेत्यागत प्रेत्यमरणं प्राप्य पुनरागतं प्रोष्यागतमिति पाठे देशांतरे उषित्वा आगतं मूर्द्ध्नि मस्तके ॥ ४३ ॥ आर्भकं बालचरित्रम् ॥ ४४ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके
श्रीमद्भागवतस्थदशमस्कंधव्याख्याने पूतनामोक्षो नाम षष्ठोऽध्यायः ॥ ६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तासामिति ॥ कृष्णे, अविरतं सुतेक्षणं कुर्वन्तीनां तासां मातॄणां, हे राजन्, अज्ञानसंभवः संसारः, पुनः न कल्पते न वर्त्तत एवेत्यर्थः। पञ्चत्रिंशं श्लोकमारभ्य श्लोकषट्कमिदं क्षेपकमपि रसातिशयत्वतो व्याख्यातमिति द्रष्टव्यम् ॥ ४१ ॥ एवं मात्रादिमुक्ति सिद्धवत् संपाद्य प्रकृतमाह। कटेति। व्रजौकसः, कटधूमस्य शवधूमस्य सौरभ्यं, अवघ्राय, किमिदं कुत एवेदं सौरभ्यं कुत आगतं, इत्येवं वदन्तः सन्तः, व्रजम् आययुराजग्मुः ॥ ४२ ॥ त इति। ते मथुराया आगता नन्दादयः, तत्र व्रजे, गोपैर्व्रजस्थैर्गोपालैः, वर्णितं पूतनागमनादिकं तन्निधनं पूतनामरणं, शिशोः, स्वस्ति आरोग्यं च, सुखेनावस्थानमित्यर्थः। श्रुत्वा सुविस्मिता अतिविस्मययुक्ताः, आसन् ॥ ४३ ॥ नन्द इति ॥ प्रोष्य परदेशं गत्वा, महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः' इति स्मृतेर्मथुरागोकुलयोर्यमुनाख्यमहानद्यन्तरत्वाद्गोकुलात् मथुरा परदेशः। पुनः, आगतः, उदारधीर्महाबुद्धिः, नन्दः, स्वपुत्रम् आदाय, मूर्ध्नि उपाघ्राय, हे कुरूद्वह, परमां मुदं, लेभे प्राप ॥ ४४ ॥ प्रकृतपूतनावृत्तान्तादिश्रवणफलमाह। य इति। य पुमान्, श्रद्धया युक्तः सन्, एतत् पूतनामोक्षं, एतदिति सामान्याभिप्रायं क्लीबत्वम्। यत् कृष्णस्य श्रीकृष्णभगवतः, अद्भुतं आर्भकमर्भभावकृतं चरित्रं, तत् निशम्याकर्ण्य, वर्त्तेत, सः गोविन्दे भगवति, गतिं ज्ञानं भक्तिमिति यावत्। गत्यर्था बुद्ध्यर्थाः। लभते ॥ ४५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे षष्ठोऽध्यायः ॥ ६ ॥

कृष्णप्रिया

व्रजनिवासी लोक चिता के स्थान से आये धूम की सुगन्ध सूंघकर कहने लगे कि यह क्या है, कहाँ से आ रही है ? यों कहते हुए व्रज में आ गये ॥ ४१ ॥ वे नन्दादि गोप गोपों द्वारा पूतना का व्रज में आगमन आदि और उसकी मृत्यु एवं बालक की कुशलता सुनके अत्यन्त आश्चर्ययुक्त हुए ॥ ४२ ॥ हे कुरु के वंश में उत्पन्न ! परीक्षित् राजन् ! देशान्तर से आये हुए उदारबुद्धि श्री नन्दजी ने अपने पुत्र को समीप में ले मस्तक सूंघ कर परम आनन्द को प्राप्त किया ॥ ४३ ॥ जो मनुष्य इस पूतना को मोक्ष देने वाले, श्रीकृष्ण के अद्भुत बाल-चरित्र को श्रद्धा से, यह सत्य है, ऐसा समझ के सुनेगा, वह गोविन्द की कृपा से मोक्ष प्राप्त करेगा ॥ ४४ ॥

इति श्रीमद्भागवतमहापुराणे दशमस्कन्धे जन्मप्रकरणे श्लोकार्थे षष्ठोऽध्यायः ॥ ६ ॥

* * *

अथ सप्तमोऽध्यायः

अनु.	उप.	इ. वं.	उ. व.	इ. व.	पुष्पि.	सं. श्लो.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. अ.	सं. श्लो. अ.	अक्ष.
२४	९	१	१	२	२	३९	२	१३८३	११	४७	१४४१	४०	१

[1]

[2]श्री राजोवाच

येन येनावतारेण भगवान् हरिरीश्वरः । करोति कर्णरम्याणि[3] चरितानि च नः प्रभो ॥ १ ॥
यच्छृण्वतोऽपैत्यरतिर्वितृष्णा सत्त्वं च शुद्ध्यत्यचिरेण पुंसः ।
भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव हारं वद मन्यसे चेत् ॥ २ ॥
अथान्यदपि कृष्णस्य [4]तोकाचरितमद्भुतम् । मानुषं लोकमासाद्य तज्जातिमनुरुन्धतः ॥ ३ ॥[5]

श्रीशुक उवाच

कदाचिदौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषिताम् ।
वादित्रगीतद्विजमन्त्रवाचकैश्चकार सूनोरभिषेचनं सती ॥ ४ ॥

कर्दमक्षमा

अन्वयः—प्रभो ! हरिः ईश्वरः भगवान् येन येन अवतारेण चरितानि करोति (तानि) च नः कर्णरम्याणि (सन्ति) यत् शृण्वतः अरतिः अपैति वितृष्णा अपैति च पुंसः अचिरेण सत्त्वं शुध्यति हरौ भक्तिः च तत्पुरुषे सख्यं भवति तदेव हारं मन्यसे चेत् वद ॥ २ ॥ अथ मानुषं लोकम् आसाद्य तज्जातिम् अनुरुन्धतः कृष्णस्य अन्यद् अपि तोकाचरितं (वद) ॥ ३ ॥ कदाचित् औत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषिताम् सती वादित्रगीतद्विजमन्त्रवाचकैः सूनोः अभिषेचनं चकार ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उत्क्षिपञ्छकटं व्योम्नि तृणावर्तमधः क्षिपन् । दर्शयन्विश्वमास्ये च कृष्णः क्रीडति सप्तमे ॥ १ ॥
कृष्णार्भकसुधासिंधुसंप्लवानंदनिर्भरः । भूयस्तदेव संप्रष्टुं राजाऽन्यदभिनंदति ॥ २ ॥

येन येनेति । येन येन मत्स्याद्यवतारेणापि यानि यानि कर्माणि करोति तानि नः कर्णसुखावहानि मनःप्रीतिकराणि च भवंत्येव ॥ १ ॥ तथापि यच्छृण्वतः पुंसः पुरुषमात्रस्यारतिर्मनोग्लानिस्तन्मूलभूता विविधा तृष्णा चापगच्छति । तथा सत्त्वशुद्धिहरिभक्तिहरिदाससख्यानि च भवंति तदेव हारं हरेश्चरितं मनोहरं वा वद । मन्यसे चेत् अनुग्रहं यदि करोषीति ॥२॥ अत्यौत्सुक्येन पुनर्विशिनष्टि । अथेति । अनुरुंधतोऽनुकुर्वतः ॥ ३ ॥ उत्थानं शिशोरंगपरिवर्तनं तत्र करणीये कौतुकाप्लवे उत्सवाभिषेके तथा तस्मिन्नेव दिने जन्मर्क्षस्यापि योगेऽतिमहोत्सवे समवेतयोषितां मिलितपुरंध्रीणां मध्ये वादित्रादिभिः शोभितमभिषेचनं सती यशोदा चकार ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उत्क्षिपन्नूर्द्ध्वं क्षिपन् (१) । कृष्णार्भक एव सुधासिंधुरमृताब्धिस्तत्र संप्लवः स्नानं तेनानंदनिर्भरमानंदाधिक्यं यस्य स तथा । तदेव कृष्णार्भकमेव । अन्यान्यावतारचरितमभिनंदति श्लाघते (२) । कर्णरम्याणि श्रोत्रसुखावहानि । क्वचित्कर्णरम्याणीति पाठस्तस्याप्ययमेवार्थः ॥ १ ॥ तथापि कर्णमनोरम्यत्वेपि । यच्चरितं शृण्वतस्तदेवेति हरचरितभ्रांतिवारणाय पक्षांतरं

---

[1] "एवं बहूनि कर्माणि गोपानां शंस योषिताम् । नन्दस्य गेहे ववृधे कुर्वन् विष्णुर्जनार्दनः ।।"—इत्यधिकः पठ्यते वीर. ।
एवं स ववृधे विष्णुर्नन्दगेहे जनार्दनः । कुर्वन्ननिशमानन्दं गोपालानां सयोषिताम् ।।—इत्यधिकं विजयध्वजपाठे ।
श्रीशुक उवाच—एवंविधानि चान्यानि गोपालानां सयोषिताम् । आनन्दमनिशं कुर्वन् ववृधे नन्दगोकुले ।—इत्यधिकः पठ्यते भक्त. ।

[2] राजोवाच—श्रीधर. वंशी. गिरि. भक्त. । [3] रम्याणि मनोज्ञानि—श्रीधर. वंशी. गिरि. भक्त. । [4] लोकाचरितम्—वीर. ।

[5] विस्तरेणेह कारुण्यात् सर्वपापप्रणाशनम् । वक्तुमर्हसि धर्मज्ञ ! दयालुस्त्वमिति प्रभो ।।—इत्यधिकः विजयध्वजपाठे ।

मनोहरम् । स्वेति । मनोग्लःनिश्चित्तवैकल्यम् । यद्वाऽरतिर्वासुदेवप्रीतिर्भवति । सत्त्वमंतःकरणम् । श्लेषेण हारं हारमिव हृदये धार्यम् । यद्यपि भगवच्चरितमात्रस्यारत्यादिनिवृत्त्या प्रेमांतवस्तुप्रापणे सामर्थ्यमस्ति तथापि श्रीकृष्णबाल्यादिचरितमचिरेणैव तत्तत्प्रापयतीति मन्यसे चेत् यदि तवैतत्संमतं स्यादिति भावः ॥ २ ॥ अत्यौत्सुक्येनात्युत्कंठया । तोकेन बालेन । आचरितं कृतम् । तज्जातिं गोपजातिम् ॥ ३ ॥ मंत्रान्ब्रुवन्तीति मंत्रवाचकाः । "ब्रुवो वचिः" । द्विजेषु मंत्रवाचका द्विजमंत्रवाचकाः । पुनर्वादित्रादिभिर्द्वंद्वः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

येनेति युग्मकम् । तत्र च "गोविन्दे लभते रतिम्" इत्युक्त्या श्रवणकीर्तनाद्यशेषसाधनानां परमफलरूपायाः श्रीभगवद्रतेः सिद्धिं बालचरितारम्भादेव श्रुत्वा स्वस्यापि तदुद्दीपनमनुभूय जातपरमानन्दः सन् परमौत्सुक्येन कदाचित् कथान्तरापातशङ्कया तादृशतच्चरितान्तरमेव प्रष्टुमादौ तदीयाशेषावतारचरितान्यभिनन्दति—येनेति । भगवानित्यादिपदत्रयेण तत्कर्मणामपि क्रमेण सर्वैश्वर्ययुक्तत्वं तथा अशेषदोषदुःखहरत्वमन्तर्बहिरिन्द्रियहरत्वं च तथावश्यसेव्यत्वमन्यथा दण्डकर्तृत्वमप्यभिप्रेतम् । कर्णरम्यत्वेन शब्दस्यैव तादृशमाधुरीमयत्वं ध्वनितं मनोज्ञत्वेनार्थस्य चेति प्रभो ! हे सर्वशक्तियुक्त ! इति सर्वमस्माकमिन्द्रियवृत्तिवृत्तं त्वया ज्ञायत एवेति भावः ॥ १ ॥ पिपृक्षितमाह—यच्छृण्वत इति । अरतिः श्रवणादौ मनोऽप्रवृत्तिः प्रवृत्तौ च सत्यां विविधा तृष्णा सत्त्वं चित्तं शुद्ध्यति दुर्वासनाक्षयेण नैर्मल्यात् रसग्रहणसमर्थं भवति अचिरेणेत्यस्य सर्वैरप्यन्वयः । अन्यैश्चिरेणैव तत्तत्सिद्धेः हरौ व्रजस्य मम तव च मनोहरे भगवति भक्तिः प्रेमा तस्य पुरुषे जने भक्ते इत्यर्थः । अन्यत्तैः । एतच्चाल्पबुद्धिरहं मन्ये किन्तु तत्र ममापि दृढता तव महाबुद्धेरभ्युपगमादेव स्यादित्याह–यदि त्व तथा मन्यसे तदा वद परमविनयोक्तिरियं यद्वा यदि पुनरधुनापि गुप्तं न करोषीत्यर्थः । सविनयनर्मोक्तिरियम् ॥ २ ॥ कीदृशं तत्तव चित्तस्थं हारं तत्राह—अथेति । अथ अनन्तरमेव न तूपोद्घातादिनापि व्यवधानेन श्रीकृष्णस्य लीलामाधुरीभिश्चित्ताकर्षकस्य तोकाचरितमेव वदेति पूर्वेणैवान्वयः । तदेवं स्वचमत्कारे हेतुमाह—अद्भुतं रूपगुणविलासलीलाचातुरीभिः क्वाचित्तदनुगतदुरूहैश्वर्यमिलनेन च विस्मयावहं तच्चास्मान् मनुष्यानेव कृपयितुं प्रकटितमित्याह—मानुषं लोकमासाद्य मर्त्यलोकेऽवतीर्य तज्जातिमपि स्वलीलयाऽऽत्मसात्कुर्वतः स्वाभेदेन व्यवहरत इत्यर्थः ॥ ३ ॥ श्रीशुकदेवोऽपि तदुक्तमेवानुमोदमानः क्रमप्राप्तां बाल्यलीलामेव कथयति—कदाचिदित्यादिना । कदाचित् मासत्रय एव वयः प्राकट्यसमये "त्रैमासिकस्य च पदा शकटोऽपवृत्तः" इति द्वितीयोक्तेः तत्रैव जन्मर्क्षयोगे इति नाक्षत्रमासोभिप्रेतः तत्रैव च दैवादौत्थानिकं यत्कौतुकं वृत्तं तस्याप्लवे सर्वतो व्याप्तौ सत्याम् औत्थानिकं बहिर्निष्क्रमणमिति केचित् तत्तु चिन्त्यम् "चतुर्थे मासि निष्क्रामः" इति स्मृतेः । तत्र च सावनमासग्रहणात् सूनोरिति । तदेकपुत्रायास्तस्याः स्नेहभरेण तन्महोत्सवे परमासक्तिं बोधयति सती सर्वकर्मस्वेवोत्तमेत्यर्थः । स्त्रीप्रधानकर्मत्वादस्या एव कर्तृत्वमुक्तं न तु प्राग्वच्छ्रीनन्दस्य ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

(भा० १०।६।४४) 'गोविन्दे लभते रतिम्' इत्युक्त्या श्रवणकीर्त्तनाद्यशेषसाधनानां परमफलरूपायाः श्रीभगवद्रतेः पूतनामोचन–तच्चरितादेव सिद्धेरन्यत्र कथयितव्यमित्याशंक्य तादृशचरितान्तरं प्रष्टुमादौ तदीयाशेषचरितान्यभिनन्दति–येनेति । भगवानित्यादिपदत्रयेण तत्कर्म्मणामपि क्रमेण सर्व्वैश्वर्य्ययुक्तत्वम्, तथाशेषदोषदुःखहरत्वं मनोहरत्वञ्च, तथावश्यसेव्यत्वमन्यथा दण्डकर्त्तृत्वमपि सूचितम् । एतदेवाभिव्यञ्जयति—कर्णेत्यादिपदद्वयेन । 'नः' इति बहुत्वम्—तादृशभगवच्चरितश्रवणेनात्मनो बहुमानात्, यद्वा, सर्व्वेषां श्रोतॄणामपेक्षया, सा च निजौद्धत्यपरिहारार्थम्, तच्चरितमाहात्म्यार्थं वा, प्रभो हे सर्व्वशक्तियुक्तेति सर्व्वमस्माकमिन्द्रियवृत्तिवृत्तं त्वया ज्ञायत एवेति भावः । शृण्वत इति वर्त्तमानतया श्रवणे प्रवृत्तमात्रस्येत्यर्थः । अरतिः श्रवणादौ मनोऽप्रवृत्तिः, प्रवृत्तौ च सत्यां विविधा तृष्णा, कामो लोभो वा; सत्त्वं चित्तं शुध्यति दुर्व्वासनाक्षयेण नैर्म्मल्याद्रसग्रहणसमर्थं भवति, अचिरेणेत्यास्य सर्व्वैरप्यन्वयः; अन्यैश्चिरेणापि तत्तदासिद्धेः । हरौ व्रजस्य मम तव वा मनोहरे भगवति भक्तिः, प्रेमा, तस्य पुरुषे जने भक्त इत्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, एतच्चाल्पबुद्धिरहं मन्ये, किन्तु तत्र सत्यता ममापि दृढता तव महाबुद्धेर्मननादेव स्यादित्याह—यदि त्वं तथा मन्यसे, तदा वद, परमविनयोक्तिरियम् ॥ १–२ ॥ तादृशन्तु श्रीकृष्णबाल्यचरितमेवेत्याशयेनाह—अथेति । अतो हेतोः कृष्णस्य साक्षाद्भगवतोऽन्यत् पूतनावधादितरदपि तोकाचरितं बाल्यलीलामद्भुतमलौकिकं बाल्यलीलायामपि मधुरपरमैश्वर्य्यप्रदर्शनेन परमविस्मयावहमित्यर्थः । तत्र हेतुः—मानुषं लोकमासाद्य मर्त्यलोकेऽवतीर्य्य मनुष्याकारं वा प्रकटीकृत्य, तत्रापि तां परमरसमयत्वादिनानिर्व्वचनीयां गोपलक्षणां जातिं प्राप्नुवतो बहुमन्यमानस्य वा; यद्वा, तज्जातिं सर्व्वानेव गोपगोपीगणानित्यर्थः, प्रेमविस्तारणेन वशीकुर्व्वतः परमेश्वरस्यापि तादृशबाल्यचरितात्, किंवा बाल्यलीलामयमपि पारमैश्वर्य्यप्रकटाददद्भुतमेवेत्यर्थः । अथवा, कृष्णस्य सर्व्वतश्चित्तकर्षकलीलस्य, अत एवाद्भुतं परममनोहरम्; अन्यत् समानम् ॥ ३ ॥ श्रीबादरायणिरपि तदुक्तमेवानुमन्यमानः क्रमप्राप्तां बाल्यलीलामेव कथयति—कदाचिदित्यादिना; कदाचित् मासत्रयवयः प्राकट्ये (भा० २।७।२७)—'त्रैमासिकस्य च पदा शकटोऽपवृत्तः इति द्वितीयस्कन्धोक्तेः । औत्थानिकं बहिर्निष्क्रमणमिति केचित् । सूनोरिति तदेकपुत्रायास्तस्याः स्नेहभरेण तन्महोत्सवे परमासक्तिं बोधयति । सती सर्व्वकर्म्मस्वेवोत्तमेत्यर्थः ।

अतः कलशस्थापनपूर्वकं ब्राह्मणक्रियमाणमन्त्रवत् प्रोक्षणादिनाऽभिषेकमकरोदिति ज्ञेयम्। श्रीनन्दस्य मुख्यत्वेऽपि तस्या एवात्र निर्देशस्तादृशकर्म्मसु पुरन्ध्रीणां प्राधान्यात् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

येनेति येन केनापीत्यर्थः। कर्णरस्यानि कर्णरसावहानि ॥ १ ॥ अपैति अपगच्छति अरतिर्बुद्धेरस्वास्थ्यं यस्मिन् सति सुखहेतवोऽपि न सुखाय भवन्ति वितृष्णा विविधा तृष्णा हारं मनोहारि चेष्टितम् ॥ २-३ ॥ उत्थापनकौतुकाप्लवे उत्थापनं गृहाद्बहिःप्रवेशः निष्क्रमणं तत्र कौतुके यत् स्नानकार्यं तस्मिन् तद्योगकाले इत्यर्थः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं तावत्पूतनानिर्हरणतन्मुक्तिप्रदानादिरूपं भगवद्बालचेष्टितमभिधायाथ चेष्टितान्तराणि विवक्षुस्तावद्राज्ञस्तत्पिपृच्छिषामुत्पादयति—एवमिति। एवंविधानि दुष्टनिर्हरणतन्मुक्तिप्रदानादिरूपाणि अन्यान्यपि बहूनि बालचेष्टितानि सयोषितां सस्त्रीकाणां गोपानां शम् आनन्दं च कुर्वन् विष्णुर्जनार्दनो भगवान्नन्दस्य गेहे ववृधे एधाम्बभूव ॥०॥ तर्हि तानि वद यानि भगवानकरोदिति पिपृच्छिषुस्तावदितरावतारचेष्टि भ्यः श्रीकृष्णावतारचेष्टितानां वैलक्षण्यं वदन् पृच्छति राजा—येनेति। भगवान् हरिरीश्वरो येन येन मत्स्याद्यवतारेण यानि यानि कर्माणि करोति चकार तानि नोऽस्माकं श्रोत्रसुखावहानि तथा हे प्रभो! मनोज्ञानि मनःप्रीतिकराणि च भवन्त्येवेत्यर्थः ॥ १ ॥ तथापि यत्कृष्णचेष्टितं शृण्वतः पुंसः पुरुषमात्रस्यारतिर्मनोग्लानिर्बुद्धेरस्वास्थ्यं वा यस्मिन् सति सुखहेतवोऽपि न सुखाय भवन्ति तथाविधं तद्विविधा तृष्णा शब्दादिविषयस्पृहा चापैत्यपगच्छति अचिरेण सत्त्वमन्तःकरणञ्च शुद्धयति हरौ भगवति रतिरनुरागस्सत्पुरुषेषु भगवद्भक्तेषु सख्यं च भवति तदेव चरिते भूयः पुनः भूयो विपुलं यथा तथा वद तदेव हारम् इति पाठे हारं मनोहारि चेष्टितमित्यर्थः। मन्यसे चेत् वक्तुमिष्टं मन्यसे चेद्वद स्वतन्त्रस्त्वमहं नियोक्तुमप्रभुरिति भावः ॥ २ ॥ किं तदित्यत्राह—मानुषं लोकमासाद्य मानुषावतारं प्राप्य तज्जातिं मानुषजातिमनुरुन्धतोऽनुकुर्वतः कृष्णस्य यदन्यदपि पूतनानिर्हरणरूपबालचेष्टितादन्यद्भूतं लोकाचरितं बालचेष्टितं तदेत्यनुषङ्गः ॥ ३ ॥ एवमापृष्टोऽन्यान्यपि बालचेष्टितानि विवक्षुस्तावच्छकटासुरवधात्मक चेष्टितं वर्णयति—कदाचिदित्यादिना एकदा इत्यतः प्राक्तनेन। औत्थानिककौतुकाप्लवे गृहाद्बहिः शिशोर्निष्क्रमणं तत्सबन्धयौत्थानिकं तस्मिन् कौतुके उत्सवे य आप्लवः स्नानं यस्मिन् तस्मिन् दिने जन्मर्क्षेण रोहिणानक्षत्रेणापि योगे सति महोत्सवे समवेतानां समुदितानां योषितां मध्य वादित्रादिभिः शोभितमभिषेचनं सूनोः सती यशोदा चकार ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भगवति भक्तिकरणार्थम् अनन्यसाध्यमाहात्म्यं वर्ण्यतेऽस्मिन्नध्याये; तत्र शुकः परिक्षितः प्रश्नबीजमुत्थापयन् वृत्तानुवादसूचनपूर्वकं कृष्णकथामाह-एवमिति। एवमुक्तप्रकारेण जनार्दनः दुष्टजनानर्दयति हिनस्तीति "अर्द हिंसायाम्" इति धातुः ॥ कर्णरम्याणि श्रोत्रसुखजनकानि मनोज्ञानि मनःप्रीतिजनकानि ॥ १ ॥ अरतिस्तत्र वितृष्णा विशिष्टतृष्णा विषयेषु रागबुद्ध्यभावो वा सत्त्वमन्तःकरणम् ॥ २ ॥ तोकाचरितं बालचरितम् ॥ ३ ॥ ननु वक्रं मह्यं किं ददासीति तत्राह—दयालुरिति ॥ उत्थापनकौतुकाप्लवे बहिर्निष्क्रमणोत्सवसम्भ्रमयो उत्सवहेतुकः प्लव इतस्ततः प्लुतिर्यस्मिन् स तथा तस्मिन् जन्मर्क्षयोगे कृष्णस्य जन्मनक्षत्रसंयोगो यस्मिन् तस्मिन् दिवसे इति शेषः कासां प्लव इति तत्राह—समवेतेति। सम्मीलितस्त्रीणां "क्रमनिम्नमहीभागे कपिप्लुतिखगप्लवाः" इति यादवः स्त्रीणां मध्ये सती प्रशस्तकर्मा ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

बाल्यलीलारम्भत एव रतिफलं श्रुत्वा स्वस्यापि तदुद्दीपनमनुभूय जातपरमानन्दस्तदेव भूयः पृच्छति—येनेति त्रिभिः ॥१॥ वदेत्यनेन यद्यपि तथापि यत्तदन्यदपीति शृङ्खलया त्रयाणां किञ्चिदध्याहारेणान्वयः। कर्णेति पदद्वयं शब्दार्थयोः पृथङ्माधुर्यानुभवेन हारं हारवत् स्पृहया हृदि धार्यं चेन्मन्यसे पूर्ववत् तृप्तं न करोषीत्यर्थः। तत्तादृशमन्यदपि तोकाचरितमेव वदेदित्यन्वयः ॥ २-३ ॥ अभिषेचनं कुशाग्रेणेति ज्ञेयं चकार कारयामास ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

पूतनाया वधं श्रुत्वा विस्मितमानसो राजा आत्मानं प्रति 'किमिदमतिचित्रमन्यदन्यदितोऽप्यतिविचित्रं तदप्याकर्णयामि' इत्याशयेनाह-अथान्यदपीत्यादि। मानुषं लोकमासाद्य भूतलं प्राप्य तज्जातिं तत्स्वभावं मानुषभावम् अनु अनुक्षणं रुन्धत आवृण्वतः, अप्रकाशयत इत्यर्थः। अतिमर्त्यां चेष्टां कुर्वतो लोकवदाचरितम् अतएवाद्भुतम् ॥ १-१८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अथान्यदपीत्यादि। मानुषं लोकं भूतलमासाद्य तज्जातिमनु लक्षीकृत्य रुन्धत आवृण्वतो मानुषलोकेऽपि मानुषभावमप्रकाशयतः ॥ १-१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्नातः सुप्तोत्थितः कृष्णः सप्तमेऽन उदक्षिपत् । तृणावर्त्तमहन्नास्ये विश्वं मातरमैक्षयत् ॥
रदच्छदबलं व्यक्तं पूतनास्तनचूषणे । शकटेऽङ्घ्रिबलं पाण्योस्तृणावर्तवधे बलम् ॥
विश्वरूपद्वये तावदैश्वर्यं निजमातरि । एवमादिममैश्वर्यंयुग्मे बाल्ये प्रदर्शितम् ॥

अहो भगवदवतारान्तरलीलामात्रस्याप्यस्मन्मनोहरत्वेऽपि श्रीकृष्णबाल्यलीला मामतिलोभयत्यतस्तामेव ब्रूहीत्याशयेनाह–येन येन मत्स्याद्यवतारेणापि यानि कर्माणि करोति तान्यपि नः कर्णाभ्यां रम्याण्यास्वाद्यानि मनोज्ञानि मनोऽप्यानन्दयितुं जानन्त्येव किन्तु तेऽत्रपि मध्ये यत् शृण्वन्तः पुंसः पुम्मात्रस्यापि अरतिः श्रवणादावप्रवृत्तिरपैति नश्यति अनर्थनिवृत्त्या निष्ठोत्पद्यत इत्यर्थः । ततश्च वितृष्णा तत्र तृष्णाभावः अपैति रुच्युत्पत्त्या आकाङ्क्षा जायत इत्यर्थः । ततश्च सत्त्वं चित्तं शुद्ध्यति दुर्वासनानिवृत्त्या भक्तिरसास्वादसामर्थ्यं भवति यथा पैत्तिकरोगनिवृत्त्या रसनासितामाधुर्यग्रहणसमर्था स्यात् आसक्त्युत्पत्त्या रतिर्जायत इत्यर्थः । अचिरेणेति सर्वत्र योज्यं ततश्च भक्तिप्रेमा स्यात् तत् पुरुषे वैष्णवे सख्यमिति यद्यपि भक्त्यारम्भत एव वैष्णवे सख्यं विहितं तदपि प्रेम्णि सत्येवं वैष्णवमात्रे निरुपाधिकं भवेदित्यत्रैवोक्तं हारं हरेश्चरितं श्लेषेण हारमिव हृदये धार्यं यद्यपि भगवच्चरितमात्रस्याप्यरतिनिवृत्त्यादिप्रेमान्तर्वस्तुप्रापणे सामर्थ्यमस्त्येव तदपि श्रीकृष्णबाल्यादिचरितमचिरेणैव तत्तत् प्रापयतीत्यत्रैवोक्त मन्यसे चेदिति यदि तवैतत् सम्मतं स्यादिति भावः ॥ १–२ ॥ अत्यौत्सुक्येन तदेव पुनः स्पष्टयति–अथेति । तज्जातिं मानुषजातिमनुरुन्धत इति मानुषजात्यनुरोधेनैव भूर्लोके प्राकट्यं न तु देवादिजात्यनुरोधेन देवादिलोक इति देवादिभ्योऽपि मानुषाणां सौभाग्यं द्योतितम् ॥ ३ ॥ कदाचिन्मासत्रयवयसि सति "त्रैमासिकस्य च पदा शकटोपवृत्तः" इति द्वितीयोक्तेः मासत्रयस्य चरणावुदगित्यत्र मासास्त्रयः परिच्छेदका यस्येति व्याख्येयम् उत्थानमुत्तानशायिनः शिशोस्तिर्यक् शयनसामर्थ्योद्गमः तत्र भवे कौतुकाप्लवे तद्द्रष्टुं व्रजवासिनां कुतूहलसमुद्रनिमज्जने सतीत्यर्थः । तस्मिन्नेव दिने जन्मर्क्षस्यापि योगे सति समवेतयोषितां मिलितपुरन्ध्रीणां मध्ये वादित्रादिभिः शोभितमभिषेचनं यशोदा चकार ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मत्स्याद्यवतारचरितमप्यस्माकमतिप्रियं भवति किं पुनः साक्षाद्धरेश्चरितमतस्तच्चरितं नो वदेत्याह–येनेति द्वाभ्याम् । येन येन मत्स्याद्यवतारेण यानि यानि चरितानि करोति तानि नोऽस्माकं कर्णरम्याणि श्रोत्रसुखावहानि मनोज्ञानि मनःप्रियाणि सन्ति ॥ १ ॥ तथापि यत् श्रीकृष्णचरितं शृण्वतः पुंस इत्युपलक्षणं श्रोत्रवतां सर्वेषाम् प्राणिनाम् अरतिः श्रीकृष्णपराङ्मुखत्वं वितृष्णा विविधा तृष्णा संसारप्रापिका च अपैति अपगच्छति येन सत्त्वं शुद्ध्यति हरिभक्तिर्हरिभक्तसख्यं च भवति तदेव हारं हरेश्चरितं वद अनुग्रहं यदि करोषि ॥ २ ॥ मानुषं लोकमासाद्य प्राप्य तज्जातिमनुरुन्धतः मानुषजात्यनुरोधेन वर्तमानस्यापि कृष्णस्य सदानन्दस्वरूपस्य अद्भूतमत्याश्चर्यमयं तोकाचरितं वदेत्यनुषङ्गः ॥ ३ ॥ एवं पृष्टः शकटोत्पाटनतृणावर्तनिष्पेषणादिभगवच्चरितं वर्णयति–कदाचिदित्यादिना । कदाचित् उत्थानं शिशोरङ्गपरिवर्तनं तत्र करणीयः औत्थानिकः कौतुकाप्लवः उत्सवयुक्तः आप्लवः महास्नानं यस्मिन् जन्मर्क्षस्य रोहिण्याश्च योगो यस्मिन् तस्मिन् दिने समवेतयोषितां मध्ये वादित्रादिभिः शोभितम् सूनोरभिषेचनं महास्नानं सती यशोदा चकार ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

औत्थानिकं स्नानमनोविभङ्गं कृष्णस्तृणावर्तवधं व्यधत्त । अदर्शयन्मातरमास्यविश्वे विश्वं शिशुः सप्तमके परेशः ॥

श्रीकृष्णचरितातितृष्णो राजा पृच्छति—येनेति । यद्यपि सर्वाणि भगवदवतारचरितानि नः कर्णरम्याणि मनोहराणि च भवन्त्येव ॥ १ ॥ तथापि तेषु मध्ये यच्चरितं शृण्वतः पुंसोऽनादिबहिर्मुखलक्षणाऽरतिरपैति—विषयेषु वितृष्णा विरक्तिर्भवति ततः सत्त्वं चित्तञ्च शुध्यति ततो भक्तिर्नैष्ठिकी जायते तत्पुरुषे भक्तजने सख्यञ्च भवति अचिरेणेति सर्वत्र योज्यं तदेव हारं हरेश्चरितं हारवद्धृदये धार्यं वा वद मन्यसे चेदिति यदि तव सम्मतं भवेदितिभावः । यद्यपि सर्वाणि भगवच्चरितान्यरतिनिवृत्त्यादिकराण्येव तथापि श्रीकृष्णचरितानि सद्यस्तत्कराणीति तेषु माधुर्यातिशयः ॥ २ ॥ स्वाभिमतं स्फुटयति—अथान्यदिति । वदेति सम्बन्धः तज्जातिमिति मनुष्यजात्यनुरोधेन चरितं प्रकटयत इत्यर्थः । मनुष्यरीतिच्छन्नं पारमैश्वर्यगर्भतत्कर्मचिन्ताधरमुकुरवदतिमनोहरमित्युक्तम् ॥ ३ ॥ कदाचिदिति मासत्रयवयसि सति त्रैमासिकस्य च पदा शकटोपवृत्त इति द्वितीये ब्रह्मोक्तेः उत्थानमुत्तानशायिनः शिशोरितर्यक् शयनं तत्र भवे कौतुकाप्लवे तद्वीक्षणाय व्रजौकसां विनोदसरोनिमज्जने सति तस्मिन्नेव दिवसे जन्मर्क्षस्यापि रोहिण्या योगे महामहोत्सवे सतीत्यर्थः । समवेतानां मिलितानां योषितां पुरस्त्रीणां मध्ये सती विज्ञा यशोदा वादित्रादिभिः सूनोर्मङ्गलमभिषेचनं चकार ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ अधुना मधुनाथकथाकथनमानसः शुको नापृष्टः कस्यचिद्ब्रूयादित्यादेः परीक्षिच्चेतसि शङ्कामङ्कुरयन्निव किञ्चित्सङ्कुकोचेवात्मानमेतद्विषय इति दर्शयन्नुपसंहरन्निवेरयतीति समीरयति । श्रीशुक इति । स योषितां गोपालनामानन्दं तोषमानन्दनमारभ्येति चानिशं निरन्तरम् । अनिशं निशं शमभावस्तन्न भवतीत्यनिशं सुसुखमिति द्वितीयपक्षेऽर्थः । कुर्वन्नन्दगेहे जनार्दनो विष्णुः सः साररूपी गुणाभावः साक्षाद्वृद्धिमन्तृगुणाभावसूचकः । अविभक्तिको वा निर्देशो यः कुर्वन्स इति वाऽन्वयः । ववृधेऽवर्धत तां वृद्धिं जनार्दन इतीरयन्नुपनहास । ततश्चापेक्ष्य लोकस्य हि मन्ददृष्टिमिति सिध्यतीति मन्तव्यम् ॥ १ ॥ येनयेनेति पदमेकम् । येनेत्येकपदस्य स्थाने समुदितादेशः । विस्तृतं चैतत्सर्वस्य द्वेसूत्रशेखरतत्त्वसुबोधिन्योर्बोध्यम् । कर्णरम्याणि श्रोत्रश्रोतृसुखकराणि । नीतिगाथादीनि तथा भवन्तीत्यत आह । मनोज्ञानीति । मनःप्रीतिसम्पादकान्यपि न सर्वाधिकारिसाधारण्येन तत्रादर इति कर्णरम्याणीति यानि यानि भगवान्हरिरीश्वरः कर्माणि सत्यव्रतादिरक्षणादीनि तानि तान्यपि नः श्रोतृणामुक्तरूपाणि भवन्ति । यद्भगवत्कर्म शृण्वतः पुंसोऽरतिः खेदोऽपैति गच्छति वितृष्णाऽन्यविषयस्पृहाभाववति । अरतिर्वितृष्णा विविधा तृष्णाऽऽकाङ्क्षा यस्याः सा मानसग्लानिरपैतीति वा सत्त्वं मनो हरौ च भक्तिर्भवति तत्पुरुषे च सख्यं तद्दासेषु मैत्री । एकैकं निमित्तीकृत्य तं लोके ख्यातिं विधातुं प्रायोऽवतरति हरिरिति तत्पुरुष इत्युक्तिरिति वाऽलमेक एव स्वसहवासेनोद्धर्तुं किं बहुना बहव इति सूचयितुमिति वा ज्ञेयम् । तत्राप्यान्तरङ्गिको राज्ञो भावस्तु तत्पुरुषे शिवात्मके त्वयीतीत्यानुपूर्व्योदाहर्तुरिति । तत्पुरुषाय विद्महे महादेवाय धीमहि । महेश महितोऽसि तत्पुरुषपूरुषाख्यो भवानित्यादेः । तदेव कर्म सारं घनं श्रेष्ठं घने सारं वरेण्यवत्सारमुदाहरन्तीति विश्वः । वद मन्यसे चेन्मां दयनीयमिति शेषः । तत्पुरुषे त्वयि सख्यं मम मन्यसे चेदित्यन्वयने नाध्याहारायास इति मन्तव्यम् । यत्सत्त्वं साधुत्वं वचनप्रयोजकं तत्पुरुषे मयि मन्यसे चेदिति वा । एतेन मन्यसे चेदिति वचनत आविर्भविष्यच्छुकदुश्चित्तताख्यावितेति सन्तोष्टव्यम् ॥ २–३ ॥ फलितमभिलपति । मानुषं तद्वदविद्धद्विदितमासाद्य प्राप्य तज्जातिं गोपालजातिमनुरुन्धतोऽनुकुर्वतः कारुण्याद्भक्तकृपापारवश्येन कृष्णस्य तोकाचरितं गतम् । अन्यदपि यत्सर्वं पापप्रणाशनं विस्तरेण वक्तुमर्हसि योग्यो भव । तत्र तत्र प्रभो त्वं दयालुरसीति । स्याद्दयालुः कारुणिक इत्यमरः । स्पृहिगृहिपतिदयीत्यालुच् ॥ ४–५ ॥

श्रीसुबोधिनी

पूतनासुपयःपानं भगवत्त्वाय यत् कृतम् । अलौकिकत्वज्ञानाय तत् षष्ठे विनिरूपितम् ॥ १ ॥
ततोप्यलौकिकं लोके विशेषासक्तिबोधकम् । सप्तमे त्रिविधं प्राह शकटोत्पाटनादिकम् ॥ २ ॥
उत्क्षेपणमवक्षेपः प्रसारणमितीर्यते । राजसानां तामसानां सात्त्विकानां च सङ्ग्रहे ॥ ३ ॥
सुप्तं चित्तमथोल्लास्य त्याजयित्वा च लौकिकान् । स्वासक्तिसिद्धये प्रीत्या दुःखं च कृतवान् कथ्चित् ॥ ४ ॥
यशो हि सर्वगं चेत् स्यात् स्वासक्त्यैव च तद् भवेत् । यशोदानन्दयोरत्र निःप्रपञ्चो विधीयते ॥ ५ ॥
आनुषङ्गिकमन्येषां गोपानां सर्वदेहिनाम् । गोपीनामिति अत्राद्ये यशोदाया वितन्यते ॥ ६ ॥

पूर्वाध्याय आश्चर्योत्पादनेन प्रपञ्चविस्मृतिं कारयित्वा विशेषाकारेण यशोदायाः स्वासक्तिं वक्तुं मतान्तरे प्रपञ्चविस्मृतिमात्रस्यैव पुरुषार्थत्वात् तदासक्तिं न वक्ष्यतीत्याशङ्क्य राजा पृच्छति **येनयेनेति**त्रयेण,

सर्वं चरित्रं हितकृद् गुणकृच्च ततोधिकम् । तत्रापि स्नेहजनकं तद् वक्तव्यमितिस्थितिः ॥ १ ॥

आदौ सर्वमेव चरित्रं भगवतः सर्वोत्तममित्याह, **येनयेन** मत्स्यकूर्मादिमध्ये यानियानि **चरितानि करोति** तानि **नः कर्णरम्याणी**तिसम्बन्धः, कृष्णावतारचरित्र एव कस्यचित् प्रीतिपक्षे तद्गतो भेदो द्वेषापरपर्यायः सिध्येदिति तन्निवृत्त्यर्थमेतद् वक्तव्यं **येनैवावतारेण करोती**ति, अवतारपरत्वे लौकिकबुद्धिर्भगवति भविष्यतीति तत्रानादरश्च वक्तव्यः, तदाह वीप्सया, वस्तुतस्तु **भगवान् करो**ति, कृतौ प्रयोजनं **हरि**रिति, तथाविर्भाव उपपत्तिरी**श्वर** इति, इदानीन्तनानामस्माकं तथाभाग्याभावाद् दर्शनाभावेपि भवदादिप्रसादात् **कर्णरम्याणि भवन्ति**, लोक उपनिबन्धनाभावशङ्कापि नास्तीत्याह **चरितानी**ति, उपनिबद्धं कृत्यं **चरित्रं**, **च**कारात् महतां मुखादकस्मादप्युक्तं, **न** इति श्रोतॄणां सर्वेषां, **प्रभो** इतिसम्बोधनमन्तःकरणज्ञानार्थमन्यथाकथने दण्डकरणे सामर्थ्यार्थं च ॥ १ ॥ यद्यपि साभिप्राये ज्ञाते सर्वमेव चरित्रमेतादृशगुणजनकं भवति तथाप्यापाततोपि यच्चरित्रं सर्वदोषनिवृत्तिपूर्वकं सर्वगुणदायकं भवति तद् वक्तव्यमित्याह **यच्छृण्वत** इति, यच्चरित्रं शृण्वतः पुरुषस्य भगवच्चरित्रविषयिणी या **रतिः सापैति** माहात्म्ये स्वोपकारे च ज्ञाते तथात्वं विशेषेण संसारविषयिणी **तृष्णा चापैति** संसारस्य बाधकत्वे ज्ञाते, गुणदोषाभावरूपावेतौ साधारणौ दोषाभावरूपौ वा, गुणानाह **सत्त्वं च शुध्यति**, **अचिरेण** शीघ्रमेव, **पुंसः** स्वतन्त्रस्य, **सत्त्व**मन्तःकरणं शुध्यति कामक्रोधादिवासनारहितं भवति, ज्ञानात्मनः संसारातीतचरित्रे श्रुते यथा भगवतो मुखारविन्दे त्रैलोक्यवर्णनं, किञ्च **भक्तिर्हरौ** यथोलूखलबन्धने, **तत्पुरुषे** भगवत्सेवके **सख्यं** यथा यमलार्जुनभञ्जने, चकारात् तत्सेवकसेवकेपि, तदेव **सारं** मनोहारि यथा भवति तथा **वदे**तिप्रार्थना, **यदि मन्यस** इति, तादृशं फलमस्य सिध्यत्विति यदि तव कृपा, यथाधिकारेण बोधने मनोहारि भवति,

एवं पञ्चविधं चरित्रं **पृष्टं**, तद् वक्ष्यति **क्रमेण तृणावर्तवधादि**, आश्चर्यरूपस्तृणावर्तवध इत्यरतिर्गच्छति, तृष्णा च संसारेण गच्छति, भगवति सर्वसत्त्वात , अन्तःकरणं देहेन्द्रियादिकमपि शुध्यति, भगवतो नामधौर्यादिश्रवणेन, उलूखलबन्धने भक्तिर्यमलार्जुनभङ्गे सख्यमिति ॥ २ ॥ एतत्पञ्चविधात् पूर्वमपरमेकं **कृष्णा**सक्तिजनकं साधारण्येन वक्तव्यमित्याहाथान्यदपीति **अथे**ति भिन्नप्रक्रमे, आदावेव वक्तव्यं, अनन्तरं शीघ्रमेव वक्तव्यं, **अन्यदपि** यथा बाल्ये पूतनावधः, तथापि बाल्ये **यच्चरित्रं**, **कृष्णस्ये**ति, अवतारान्तरबाल्यचरित्रव्युदासः, बाल्ये चरित्रसम्भवार्थं वा भगवतो नाम, **तोकाचरितं** तोकेनाचरितं, **तोक** उत्थानासमर्थः, **तदप्यद्भुतमलौकिकं**, लोके हेतुकल्पनारहितं तत्रापि लौकिकभावेन कृतमित्याह **मानुषं लोकमासाद्ये**ति, मनुष्यलोकं भूमिं **मानुषभावं चासाद्य** स्वीकृत्य, **तज्जातिं** शिशोर्जातिलीला**मनुरुन्धतो** जातिलीलामनतिक्रम्य यथा गोपालशिशोः, तादृशं पूतनावधतुल्यमेकं वक्तव्यमितिप्रार्थना ॥ ३ ॥ **शुक**स्तादृशमेव शकटभङ्गलक्षणं चरित्रमाह **कदाचिदि**तिचतुर्दशभिः सर्वेन्द्रियाणामन्तःकरणस्य च प्रीतिजनकं, आदावुत्सवमाह **कदाचिदि**ति, **औत्थानिकं** कर्म निष्क्रमणात्मकं "चतुर्थे मासि निष्क्रम" इति, तस्मिन्नेव दिवसे रोहिणीनक्षत्रं, **औत्थानिकं** कर्म **कृत्वा** तत्र **कौतुकाविष्टे** चित्ते जातउत्सवेन तत् कर्म कर्तव्यमिति विचिन्त्य **तस्मिन् दिवसे** जन्मर्क्षस्यापि **योगे** सति **समवेतानां योषितां** सर्वस्त्रीणां मध्ये **तूर्यादिवादित्रैर्नानाविधगीतैः** स्त्रीकर्तृकैः पुरुषकर्तृकैश्च **द्विजानां** ब्राह्मणानां **मन्त्रवाचकैः** सह **सूनोः** पुत्रस्या**भिषेचनं** कलशस्थापनपूर्वकं ब्राह्मणैः क्रियमाणं मन्त्रवत्प्रोक्षणरूपं **चकार**, मङ्गलस्नानादिकं तु पूर्वमेव कृतमस्ति, प्रोक्षणसंस्कारेऽभ्युदयो भवति, यतः सा **सती** पतिव्रता पत्युस्तथेच्छेति, अन्यत्रोत्सवकरणाभावार्थं वा ॥४॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सप्तमाध्यायप्रकरणार्थोक्तौ, सङ्ग्रह इति। अग्रे स्वोपयोगं ज्ञात्वोत्तमानामतादृशानां च स्वीयत्वेन स्थापनं हि लोके सङ्ग्रह इत्युच्यते। सोऽत्राधुनिकनिरोध एव। तथा च **सङ्ग्रह**निमित्त**मीर्यत** इति सम्बन्धः। सर्वेषां दुःखोक्तेस्तात्पर्यमाहुः **यश इति**। **सर्वगमिति**। चरित्रमिति शेषः। दुःखमिति वा। एवं सति तन्निवारके सर्वेषामासक्त्या चरित्रगानेन यशस्सिद्धिरित्यर्थः। आद्यपक्षे चरित्रस्य सर्वगत्वे हेतुमाहुः **स्वासक्तेति**। सर्वेषां तदा गानसम्भवेन तथेत्यर्थः। **तस्मिन्नेव दिवसे रोहिणीनक्षत्र**मिति वाक्यसन्ततिप्रयोजनमपि स्वरूपकीर्तनपरमिति ज्ञेयम् , न तु व्याख्यानमिति ॥ १–४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अथ **सप्तमाध्यायं विवरिषवः** सङ्गतिं वक्तुं पूर्वाध्यायार्थमनुवदन्ति, **पूतनासुपयःपानं यत् तद् भगवत्त्वाय** वीर्यप्राकट्याय **निरूपितमित्यग्रिमेण सम्बन्धः**, **यत्कृतं पूतनासुपयःपानकृतं** गन्धादिक**मलौकिकत्वज्ञानाय** चरित्रे **लोकवैलक्षण्यज्ञानाय**, **तदेतदुभयं षष्ठे** निरूपितमित्यर्थः, एवं **पूर्वाध्यायार्थ**सप्रयोजनचरित्राद**प्यलौकिकः**, तत्र हि **मर्मपीडया प्राणनाशः** सम्भवत्यपि कदाचिद् बालचरणोत्क्षेपणादिना शकटादिभङ्गस्तु न सम्भावयितुमपि लोके शक्य इति तथा, **तच्च त्रिविधं चरित्रं शकटोत्पाटनादिकं** भगवद्विषयक**विशेषासक्तिबोधकं सप्तमे** राजप्रश्नाच्छुक **आह**, तथा च **पूर्वस्मादप्यलौकिकबोधनात् प्रसङ्गः सङ्गतिः**, किञ्चालौकिकज्ञानस्य विशेषासक्तिं प्रति हेतुत्वात् तत्कृतोपि **प्रसङ्ग**स्तथेत्यर्थः, एवं **सङ्गतिबोधनायाध्यायार्थमुक्त्वा विशेषतो वक्तुं चरित्रस्य त्रैविध्यं प्रकटयन्त्युत्क्षेपणमित्यादि**, **त्रैविध्यप्रयोजनमाहू राजसानामित्यादि**, **टिप्पण्यां सङ्ग्रहशब्दार्थं तत्प्रयोजनं चाहुरग्र इत्यादि**, **आधुनिकनिरोध एवेत्याधुनिकानां सप्तमाध्यायोक्तानां** तत्सजातीयभाववतां च **निरोध एव**, **सङ्ग्रह** इति **तदर्थं**, **त्रिविधं चरित्रमीर्यत** इत्यर्थः, **सुबोधिन्यां** कथं **विशेषासक्तिरूपं** सङ्ग्रहं कृतवानित्याकाङ्क्षायामाहुः **सुप्तमित्यादि**, **अथे**तिभिन्नप्रक्रमे पूतनामारणोत्तरं **सुप्तं** मासत्रयपर्यन्तं **विशेषासक्त्यनुत्पत्त्या** सामान्यासक्तिमद्भक्तानां **चित्तमुल्लास्यविशेषासक्त्यनुकूलं कृत्वानुकूल्येन** चित्तस्य जागरणेन स्फुरितान् **लौकिकान्** विषयादीनपि **त्याजयित्वा** तेषां विशेषतः **स्वासक्तिसिद्धये प्रीत्या** भक्तविषयकस्नेहेन, **क्वचित्** तृणावर्तभङ्गलीलायां **दुःखमपि कृतवान्** , तथा चैवं **चित्तोल्लासादिभिः सङ्ग्रहं कृतवानित्यर्थः**, **अत्र लौकिक**रीत्या स्वासक्तिकरणं प्रथमलीलया प्रीत्या दुःखादिकरणं च द्वितीयलीलयासम्भावनानिवृत्तिर्या **प्रकृतसहकारिणी** सा तृतीयलीलयेति **ज्ञेयं**, ननु सम्बन्धाधिक्येनैवासक्तिर्भविष्यतीति भक्तेषु दुःखदानस्य किं प्रयोजनमित्याकाङ्क्षायां **टिप्पण्यामाहुः सर्वेषामित्यादि**, तथा च भाविनां भक्तानां **कृतार्थत्वाय यशोपेक्ष्यते तच्च** गानेन प्रसरति तदपि भगवदा**सक्त्यैव चेत्** तदा फलतीत्येतत् सर्वं विचार्य यशःप्रकटनार्थं तथा **कृतवानित्यर्थः**। एवं दुःखोत्पादनतात्पर्यमुक्त्वा निरोधाधिकारिणो विभजन्ते **सुबोधिन्यां यशोदेत्यादि**, **अत्रास्मिन्नध्याये** यशोदानन्दयो**र्निःप्रपञ्चो निर्गतो** विस्मृतः **प्रपञ्चो** यस्मात् तादृशो **निरोधो** भगवता **विधीयतेऽन्येषां गोपानामानुषङ्गिकं** प्रपञ्चविस्मृत्यादि **विधीयत** इति पूर्वेणैवान्वयः, अत्र **सर्वदेहि**पदेन गोपगोपीनामनुचरा बोध्याः, एवमधिकारिणो विभज्याद्ये चरित्रे यस्या निरोधस्तामाहु**स्तत्राद्य** इत्यादि, **वितन्यत** इति **मुख्यत्वेन विस्तार्यत** इत्यर्थः, ननु भवत्वेवं तथापि "व्रजे वसत् किमकरो"दिति राज्ञा प्रथममेव **पृष्टत्वाच्छुकश्चरित्रान्तरमपि** वक्ष्यत्येवेति पुनः प्रश्नान्तरस्य किं प्रयोजनमित्याकाङ्क्षायां तत्प्रयोजनमाहुः **पूर्वेत्यादि**, तथा चोक्तविशेषज्ञापनार्थं प्रश्न इत्यर्थः, श्लोकत्रयतात्पर्यं कारिकयाहुः **सर्वमित्यादि**, **इतिस्थितिरिति**, एषा स्नेहजननार्था मर्यादा, ननु **कृष्णावतारचरित्रे प्रष्टव्ये** सामान्यतश्चरित्रप्रशंसा कुत्रोपयुज्यत

इत्याशङ्क्य तत्तात्पर्यमाहुः **कृष्णेत्यादि**, **तद्गतश्चरित्रान्तरगतः**, तर्हि येनैवेति वक्तव्यं वीप्सायाः किं प्रयोजनमत आहुरवतारेत्यादि, प्रश्नस्यावतारत्वेवतारस्यालौकिकतेजः सङ्क्रमणरूपत्वात् तथा च **वीप्सया प्रश्नमाहेत्यर्थः**, **भगवान् करोतीत्यत्रा**वतारस्य करणत्वात् तथा ॥ १ ॥ **यच्छृण्वत** इत्यत्रैताविति भगवच्चरित्रविषयकोरत्यभावः संसारवैतृष्ण्यं च क्रमेण **गुणदोषाभावरूपौ**, **अरती** रत्यभावस्तदभावो रतिरेवेति गुणत्वं तदभावाभावस्य तद्रूपत्वात्, अस्मिन् पक्षे सत्त्वशुद्धेराधिक्यमायातीति तदभावाभावस्यातिरिक्तत्वमङ्गीकृत्य पक्षान्तरमाहुः **साधारणौ दोषाभावरूपौ** वेति, **संसारातीतेति संसार**मत्याययति नाशयतीति तादृशे **चरित्रे**, **तृष्णा** चेत्यादि **सत्त्वमित्यन्तेन** विश्वप्रदर्शनतात्पर्यमुक्तम् ॥ २ ॥ **अथेत्यत्र व्युदासपक्षेनादर** इवायातीतिपक्षान्तरमाहु**र्बाल्य** इत्यादि ॥३॥ **कदाचिदित्यत्र निष्क्रमणात्मकमिति** तत्स्वरूपं तु ‘बालकं मङ्गलेन स्नापयित्वेष्टदेवतापूजां विधायो‘द्गातेवे’त्यादिमन्त्रैः कुमारमलङ्कृत्य मङ्गलतूर्यनिर्घोषैः सह देवालयगङ्गादिनदीतीरे प्रशस्तारामबन्धुगृहाणामन्यतमस्थानं गत्वा बन्ध्वादिदत्तं पारिबर्हं गृहीत्वा पुनर्गृहं आगत्य पुण्याहवाचनादिकं कृत्वारातिकदक्षिणादिना **महोत्सवकरणं**, **तस्मिन्नेवे**तिफक्किकायास्तात्पर्यं **टिप्पण्यामाहुरस्मिन्नित्यादि**, **स्वरूपकीर्तनपरमिति रोहिणीनक्षत्रं** चतुर्थं पर्यावेष्टोत्तरशतदिवसे समायाति तथा सति “त्रैमासिकस्ये”तिवाक्यानुरोधाच्चतुर्थमासस्याष्टादशे दिवसे मार्गशीर्षशुक्लैकादश्यादिदिनादन्तरा न भवतीति तत्स्वरूपमात्रकथनपरमित्यर्थः, **अग्रिमे व्याख्यानवाक्ये** तदुल्लेखदर्शनात् तथेत्यर्थः, **सुबोधिन्यां सतिपदस्य** तात्पर्यान्तरमाहुरन्यत्रेत्यादि, **अन्यत्रे**ति पत्यसन्निधाने ॥ ४ ॥

(३) श्रीमद्वल्लमहाराजकृतः श्रीसुबोधिनीलेखः

सप्तमेध्याये कारिकासु **उत्क्षेपणमिति उत्क्षेपणं** शकटस्यावक्षेपस्तृणावर्तस्य **प्रसारणं** जृम्भालीलाया मुखस्येत्यर्थः, **सुप्तमिति** विशेषतः पदार्थग्रहणाक्षमं मूढं यशोदायाश्चित्तमौत्थानिकोत्सवप्रेरणेनोल्लास्य ततो **लौकिकान् धर्मान्** समागतगोपपूजनादीन् यशोदातस्त्या**जयित्वा प्रपञ्चविस्मृतिं** कारयित्वा ततोग्रिमप्रकरणे **स्वासक्तिसिद्धये** तथा **कृतवानि**तिप्रकरणद्वयार्थः, **स्वासक्त्यैवेति** चरित्रपक्षार्थस्तु टिप्पण्यामुक्त एव, दुःखपक्षेपि स्वासक्त्यैव सर्वगं दुःखं भवेत्, आसक्त्यभावे दुःखं न स्यादिति भावः, **निःप्रपञ्च** इति **निर्गतः प्रपञ्चो** यस्मात् तादृशो भावोत्र प्रमाणप्रकरणे इत्यर्थः, **आनुषङ्गिकमिति** प्रपञ्चाभावसम्पादनमिति शेषः, **तत्राद्ये** इति **आद्ये** शकटप्रकरणे केवलं **यशोदायाः**, आनुषङ्गिकत्वेनाप्यन्येषां नेत्यर्थः ॥ **कारयित्वेति** एतदनन्तरं भगवता सम्पादितामितिशेषो ज्ञेयः, तथा च **पूर्वाध्याये आश्चर्योत्पादनेन प्रपञ्चविस्मृतिं कारयित्वा** भगवता सम्पादितां **स्वासक्तिं** विशेषाकारेण वक्तुमाद्ये प्रकरणे **पुनर्यशोदाया निःप्रपञ्चो वितन्यते** इति पूर्वेणान्वयः । **येन येनेत्य**स्याभासे **मतान्तरे** इति तदापि ऋषीणां बहुधा विवादात् केषाञ्चिन् मते अविद्यानिवृत्तेरेव मोक्षत्वादिति भावः ॥ १ ॥ **यच्छृण्वत** इत्यत्र **ज्ञानात्मन** इति “यशोदाभयसम्भ्रान्तप्रेक्षणाक्षमभाषते”त्यत्र विवृतं ज्ञानमात्मनि स्वरूपे यस्येत्यर्थः ॥ २ ॥ **अथान्यदपीत्यत्र** अथशब्दस्यार्थद्वयमपीत्यभिप्रेत्यानन्तर्यमत्यर्थमाहुः **आदावेवेति**, **पञ्चविधचरित्रादादौ**, **न अन्तरं** यत्र प्रश्नाव्यवधानेनेत्यर्थः ॥ ३ ॥ **कदाचिदित्यत्र** सङ्ख्यातात्पर्यमाहुः **सर्वेन्द्रियाणामिति** इन्द्रियाणि दश अन्तःकरणचतुष्टयमेवं चतुर्दशेत्यर्थः, **अन्यत्रोत्सवेति** स्वपित्रादिगृहे उत्सवं न **कृतवती** सतीत्वादित्यर्थः ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

सप्तमाध्याये कारिकासूत्क्षेपणमवक्षेपः **प्रसारणमिति उत्क्षेपः** शकटस्यावक्षेपस्तृणावर्तस्य **प्रसारणं** जम्भालीलायां मुखस्येति ज्ञेयम् ॥ **सर्वं चरित्रं हितकृदित्यादि** हितकृद्गुणकृत्स्नेहजनकानि चरित्राणि **क्रमेण येन येनावतारेणेत्यादि**त्रिभिः **श्लोकैः पृष्टानि** ॥ १ ॥ **कदाचिदित्यस्याभासे कदाचिदिति चतुर्दशभिरिति सर्वेन्द्रियाणामन्तःकरणस्य च प्रीतिजनकमिति** मनःसहितानीन्द्रियाण्येकादश बुद्धिचित्ताहङ्कारा **अन्तःकरणत्रयरूपा एवं चतुर्दश** ॥ ४ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

सप्तमाध्याये सङ्गतिं वक्तुं पूर्वाध्यायार्थमनुवदन्ति **पूर्वेति** का० २३३ । **भगवत्त्वाय** भगवत्त्वबोधनाय, **तत** इति का० २४३ । **आदिपदेन** तृणावर्तवधो जम्भालीला चेति, **उत्क्षेपणमिति** का० २५३ । **उत्क्षेपणं** शकटस्य, **अवक्षेपस्तृणावर्तस्य**, **प्रसारणं** जृम्भालीलायां मुखस्येत्यर्थः, त्रैविध्यप्रयोजनमाहुः **राजसानामिति**, अत्र **सङ्ग्रहपदार्थो राजसादिभक्तानां** निरोध एव, तथा च सङ्ग्रहनिमित्तमीर्यत इति सम्बन्धः, अत्र क्रमो न विवक्षित इति प्रतिभाति निबन्धानुरोधात्, उक्तं हि दशमस्कन्धनिबन्धे “शकटं तामसं प्रोक्तं तृणावर्तस्तु राजसः । लालनं पुत्रभावेन सात्त्विकं मोहनं तथे”ति, तथा च शकटभङ्गादिभिस्त्रिभिश्चरित्रैः तामसराजससात्त्विकानां निरोधो ज्ञेयः, **सुप्तमिति** का० २६३ । **सुप्तं** विशेषासक्तिरहितं यशोदादीनां **चित्तं उल्लास्य** विशेषासक्त्यनुकूलं कृत्वा **लौकिकात् त्याजयित्वा स्वासक्तिसिद्धये प्रीत्या** भक्तविषयकस्नेहेन **क्वचित्** तृणावर्तभङ्गादिलीलायां **दुःखं कृतवान्**, सर्वेषां दुःखोक्तेस्तात्पर्यमाहु**र्यश** इति का० २७३ । यशस्तदेव सिध्येद् यदि चरित्रं दुःखं वा सर्वगं स्यात्, दुःखपक्षे दुःखनिवारके भगवति सर्वेषामासक्त्या गानसम्भवेन यशःसिद्धिरित्यर्थः, आद्यपक्षे चरित्रस्य सर्वगत्वे हेतुमाहुः **स्वासक्तेति**, सर्वेषां तदा गानसम्भवेन यशः सर्वगं भवेदित्यर्थः, एवं **यशोदानन्दयोर्निःप्रपञ्चो निर्गतः प्रपञ्चो** यस्मात् तादृशो निरोधो

निरूप्यत इत्यर्थः, आनुषङ्गिकमिति का० २८$\frac{३}{४}$। यशोदानन्दव्यतिरिक्तानां सर्वेषां निःप्रपञ्चसम्पादनमानुषङ्गिकं, तत्राद्ये शकटकरणे यशोदाया एव निःप्रपञ्चो विधीयत इत्यर्थः ॥ येन येनेत्यत्र, सर्वमिति का० २५$\frac{३}{४}$। हितकृद्गुणकृत्स्नेहजनकानि चरित्राणि क्रमेण "येन येनावतारेणे"त्यादित्रिभिः श्लोकैः पृष्टानि, अत्र हितशब्देन कर्णरसजननादयश्चरित्रश्रवणफलात्मकाः साधारणा गुणा विवक्षिताः, तादृशहितकृच्चरित्रं प्रथमश्लोकेन पृष्टं, गुणकृदिति गुणपदेन सर्वदोषनिवृत्तिपूर्वकसत्त्वशुद्ध्यादयो गुणा ज्ञेयाः, तादृशगुणकृच्चरित्रं प्रथमश्लोकोक्तचरित्रादधिकं "यच्छृण्वत" इति द्वितीयश्लोकेन पृष्टं, तत्रापि विशेषतो भक्तिजनकं शकटभङ्गलक्षणं चरित्रम "थान्यदपि कृष्णस्ये"ति तृतीयश्लोकेन पृष्ट, तच्चरित्रं विशेषतो वक्तव्यमितिस्थितिर्मर्यादेत्यर्थः ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सप्तमे शकटोत्क्षेपस्तृणावर्तविमर्दनम् । मुखे विश्वप्रकाशश्च कृष्णलीला निरूप्यते ॥ १ ॥

एवं श्रीकृष्णस्य बालचरित्रश्रवणेन निर्वृतः पुनस्तदेव प्रष्टुं प्रथमं तस्यान्यावतारचरितान्यभिनन्दति—येनयेनेति। अन्तःकरणवृत्तिज्ञानेऽन्यथाकथने दण्डे च सामर्थ्यं तवास्तीति सूचयन् सम्बोधयति—प्रभो इति। यद्यपि येन येन मत्स्याद्यवतारेण भगवान् यानि यानि कर्माणि करोति तानि नोऽस्माकं श्रोतॄणां कर्णयोः रम्याणि 'रस्यानि' इति पाठान्तरम्। शब्दत एव सुखावहानि तथा मनोज्ञानि अर्थतो मनसो हर्षकराणि च भवन्त्येव, तथापि यच्छृण्वतः पुंसः श्रवणाधिकारिप्राणिमात्रस्याचिरेण शीघ्रमेव हरौ भक्तिः प्रेमातिशयः तत्पुरुषे भगवद्भक्ते सख्यं च भवति, तदेव हरेश्चरित वदेति द्वयोरन्वयः। 'त्वां प्रार्थये, न त्वाज्ञापयामि' इत्याह—मन्यसे चेदिति। 'मद्भृत्योऽयम् , श्रवणेन कृतार्थो भवतु' इति यदि मन्यसे तर्हि वदेत्यर्थः। अवतारेण कर्मकरणे प्रयोजनं तु भक्तदुःखहरणमेव इत्याशयेनाह—हरिरिति। तत्र सामर्थ्यं सूचयन्नाह—ईश्वर इति। कर्तुमकर्तुमन्यथाकर्तुं समर्थ इत्यर्थः ॥ १ ॥ ननु 'मनोग्लानेः सत्त्वात् कथं हरौ भक्तिः स्यात् ?' तत्राह—अरतिरपैतीति। अरतिर्मनोग्लानिरपैति अपगच्छति। ननु 'ग्लानिकारणस्य तृष्णायाः सत्त्वे कथं सा न स्यात् ?' तत्राह—विविधा तृष्णा चापैतीति। अन्तःकरणाशुद्धौ तृष्णापगमोऽपि कथम् ? चमित्यत आह—सत्त्वमन्तःकरणं च शुद्ध्यतीति। कामक्रोधादिहेतुभूतदुरितरहितं भवतीत्यर्थः ॥ २ ॥ 'यच्छब्देन कीदृशं चरितं तव श्रोतव्येनाभिप्रेतम्' इत्यपेक्षायां सहेतुकं तत् स्पष्टयति—अथेति। यस्मान्महाफलमथ तस्मात् पूर्वोक्तादन्यदप्यद्भुतमाश्चर्यजनकं कृष्णस्य तोकाचरितं बालचरितं वदेति पूर्वस्यानुषङ्गः। 'अवतारान्तरकृतमपि चरितं कृष्णचरितमेव, तस्यावतारित्वात् इत्याशङ्क्याह—मानुषमिति। मानुषं लोकं भूलोकमासाद्य प्राप्य तज्जातिं मानुषजातिमनुरुन्धत अनुकुर्वत इत्यर्थः ॥ ३ ॥ एवं सम्प्रार्थित आह—कदाचिदिति। 'त्रैमासिकस्य च पदा शकटोपवृत्त' इति ज्ञापकात् तादृशस्यैवोत्थानसम्भवाच्च मासत्रयवयसि सति उत्थानं नामोत्तानशायिनः शिशोस्तिर्यक्शयनसामर्थ्योद्गमः, तस्मिन् सति करणीये कौतुकाप्लवे उत्सवाभिषेके तस्मिन्नेव दिने जन्मर्क्षस्य रोहिणीनक्षत्रस्य योगे च सति महोत्सवे समवेतानां मिलितानां पुरस्त्रीणां मध्ये वादित्रगीतैः ब्राह्मणानां मन्त्रवाचकैश्च सह ब्राह्मणैः क्रियमाणं प्रोक्षणरूपं सूनोरभिषेचनं सती यशोदा चकार इत्यन्वयः ॥ ४ ॥

अन्वितार्थप्रकाशिका

सप्तमे शकटोत्क्षेपस्तृणावर्त्तवधस्तथा। मुखे विश्वेक्षणं तत्र श्लोकाः सिन्धुह्लयः (३८) ॥
उवाचयुग्म (२) च चतुश्चत्वारिंशदनुष्टुभः (४४) ॥ ७ ॥

बालचरितसमापनमिवाशङ्क्य पुनः प्रेरयति—येन येनेति द्वयम् ॥ हे प्रभो ! यद्यपि भगवान् ईश्वरः हरिः येन येन मत्स्याद्यवतारेण यानि यानि कर्माणि करोति तानि नोऽस्माकं श्रोतॄणां कर्णयोः रम्याणि शब्दत एव सुखावहानि तथा मनोज्ञानि अर्थतो मनसो हर्षकराणि च भवन्त्येव। तथापि मन्यसे चेत् मद्भृत्योऽयं श्रवणेन कृतार्थो भवतु इति यदि मन्यसे तर्हि यच्छृण्वतः पुंसः पुंमात्रस्य अरतिर्मनोग्लानिः वितृष्णा विविधा तृष्णा च अपैति अपगच्छति। यद्वा। वितृष्णाया तृष्णाया अभावः अपैति रुचिरुत्पद्यत इति। सत्त्वम् अन्तःकरणं च शुद्ध्यति हरौ भक्तिः प्रेमातिशयः तत्पुरुषे भगवद्भक्ते सख्यं चेति सर्वमचिरेणैव युगपत् भवति तदेव हारं हरेश्चरितं मनोहरं हारवद्धृदये धार्यं वा वद। यद्वा। येन येनावतारेण हरिर्यानि यानि कर्माणि करोति तानि सर्वाण्यपि मनोज्ञान्येव। किंच यत्किंचिदपि हरिचरितं शृण्वतः पुंसः अरतिनिवृत्त्यादिफलं भवत्येव तथापि बालचरितमल्पमेव कथितमतः पुनरपि तदेव बाल्ये कृतमेव हारं हरेश्चरितं वदेति। शेषं प्राग्वत् ॥ १-२ ॥ अथेति ॥ अथ तस्मात् मानुषं लोकं भूलोकमासाद्य तज्जातिं मनुष्यजातिम् अनुरुन्धतः श्रीकृष्णस्य पूर्वोक्तात् अन्यत् अपि अद्भुतमाश्चर्यजनकं तोकाचरितं बालचरितं वद ॥ ३ ॥ कदाचिदिति ॥ त्रैमासिकस्य च पदा शकटोऽपवृत्त इति ज्ञापकात्तादृशस्यैवोत्थानसंभवाच्च कदाचित् मासत्रयवयसि सति "मास्यस्य चरणावुदक्" इत्यत्र तु मासा परिच्छेदका यस्येति व्याख्येयम्। उत्थानं शिशोरङ्गपरिवर्त्तनमिति स्वामिपादाः। उत्तानशायिनः शिशोस्तिर्यक्शयनसामर्थ्योद्गम इति चक्रवर्ती बहिर्निष्क्रमणमित्यन्ये। तस्मिन्सति करणीये औत्थानिके कौतुकाप्लवे उत्सवाभिषेके तस्मिन्नेव दिने जन्मर्क्षस्य रोहिणीनक्षत्रस्य योगे च सति नाक्षत्रमासारम्भे इति तोषणी। महोत्सवे समवेतानां मिलितानां

योषितां व्रजस्त्रीणां मध्ये सती यशोदा वादित्रैर्गीतैः द्विजानां ब्राह्मणानां मन्त्रवाचकैश्च सह ब्राह्मणैः क्रियमाणं प्रोक्षणरूपं सूनोरभिषेचनं चकार ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं सप्तमेऽध्याये शकटविपरीतकरणं तृणावर्त्तहननं स्वमुखे मातुर्विश्वदर्शनं एतानि हरिचरित्राणि कथ्यंते तत्रादौ राजा पृच्छति येनेति । येन येन वराहाद्यवतारेण यानि यानि करोति तानि तानि कर्माणि नः कर्णरम्याणि श्रोतृकमनीयानि मनोहराण्येव च संति ॥ १ ॥ यदिति यत् हरिचरित्रं शृण्वतः श्रूयमाणस्य पुंसो नरमात्रस्य अरतिः अवशो अत्रेतिः अपैति गच्छति विषयभोगे विविधा तृष्णा चापैति शीघ्रं सत्त्वं अंतःकरणं च शुद्ध्यति हरौ भक्तिः तस्य हरेः संबंधिनि पुरुषे भक्तसमूहे सख्यं च भवेत् तदेव हारं हरेः कर्मवरिष्ठं मन्यसे चेत्तर्हि वद ॥ २ ॥ आसाद्य प्राप्य तज्जातिं मनुष्यजातिं अनुरुंधतः स्वापरिमितमैश्वर्यं प्रकाशं च संकुच्य तदनुसारेण वर्त्तमानस्य अन्यदपि चरित्रं वद ॥ ३ ॥ तत्स्मरणोत्तरं कुर्वन् श्रीशुक उवाच कर्हीति कदाचित् कस्मिन्श्चित् समये उत्थानं बालस्यांगपरिवर्त्तनं तत्र कर्त्तव्ये औत्थानिके कौतुकाप्लवे उत्सवाभिषेके तथा तस्मिन्नेवाहिजन्मर्क्षस्य जनिनक्षत्रस्यापि योगे संयोगे अतिमहाकौतुके समवेतयोषितां मिलितव्रजवनितानां मध्ये सती यशोदा वादित्राणि च गीतानि च मंत्रवाचका मंत्रोच्चारकार्ये द्विजाश्च वादित्रगीतद्विजमंत्रवाचकाः राजदंतादित्वात्पूर्वप्रयोगर्हस्य मंत्रवाचकशब्दस्य परप्रयोगः तैः शोभमानं अभिषेचनं मंत्रैः जलप्रोक्षणं चकार ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अनः समुत्क्षिपन् व्योम्नि तृणावर्त्तं क्षिपन्नधः । स्वास्ये प्रदर्शयन् विश्वं सप्तमेऽक्रीडदीश्वरः ॥ १ ॥

एवं पूतनानिर्हरणमुक्तिप्रदानादिरूपं भगवदार्भकचेष्टितमभिधायाथ चेष्टितान्तराणि विवक्षुस्तावद्राज्ञः पिपृच्छिषामुत्पादयति । एवमिति । एवंविधानि दुष्टनिर्हरणतन्मुक्तिप्रदानादिरूपाणि, अन्यान्यपि, बहूनि बालचेष्टितानि कुर्वेति शेषः । सयोषितां सस्त्रीकाणां गोपालानां, अनिशं प्रतिदिनं, आनन्दं च कुर्वन्, भगवानिति शेषः । नन्दगोकुले, ववृधे ॥ १ ॥ तर्हि तानि वद यानि भगवानकरोदिति पिपृच्छिषुस्तावदितरावतारचेष्टितेभ्यः श्रीकृष्णावतारचेष्टितानां वैलक्षण्यं वदन् पृच्छति राजा । येनेति । भगवान् ईश्वरः, हरिः, येन येन, अवतारेण मत्स्यादिप्रादुर्भावेण, यानि यानि कर्माणीति शेषः । करोति चकारेत्यर्थः । हे प्रभो, तानि नोऽस्माकं, कर्णरम्याणि श्रोत्रसुखावहानि, तथा मनोज्ञानि मनःप्रीतिकराणि च, भवन्तीति शेषः ॥ २ ॥ यदिति । तथापि, यत् कृष्णचेष्टितं, शृण्वतः पुंसः पुरुषमतस्य, अरतिर्मनोग्लानिः, बुद्धेरस्वास्थ्यं वा, अपैति अपगच्छति । तथा, वितृष्णा विविधा शब्दादिविषयस्पृहा च, अपैति । अचिरेण सद्यः श्रवणसमकालमेवेत्यर्थः । सत्त्वमन्तःकरणं च, शुद्ध्यति । हरौ भगवति, भक्तिरनुरागविशेषः, तत्पुरुषेषु भगवद्भक्तेषु, सख्यं च भवति । अतः, तदेव, भूयः पुनः, विपुलं यथा तथा वा, मन्यसे चेत् वक्तुमिष्टं मन्यसे चेदित्यर्थः । तर्हि, वद । हारमिति पाठे मनोहारि चेष्टितमित्यर्थः । सारमिति पाठे साररूपं चेष्टितमित्यर्थः ॥ ३ ॥ किं तदित्यत्राह । अथेति । मानुषं लोकं आसाद्य, मानुषाकारं प्राप्येत्यर्थः । तज्जातिं मानुषजातिं, अनुरुन्धताऽनुकुर्वतः कृष्णस्य, अन्यत् अपि, पूतनानिर्हरणरूपबालचेष्टितादितरदित्यर्थः । अद्भुतमाश्चर्यकारकं, तोकाचरितं बालचेष्टितं, स्यात् । तदपीति शेषः । अथ साकल्येन, वदेत्यनुषङ्गः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

येन येनेति : १०.७.१.

सर्वं यद्यपि पापहारि चरितं श्रैशं तथाप्यादराद् गायेद्वा शृणुयात्तदेव सुजनो यत्कर्णचित्तप्रियम् ।
शृङ्गाराद्भुतवीरहास्यजनकं भक्तिप्रधानं च यत् स्यादेवं बहुधाऽऽशयोऽवनिपतेः प्रश्नाक्तितो दृश्यते ॥ १ ॥

कृष्णप्रिया

हे प्रभो ! हरि, ईश्वर, भगवान् जिन जिन अवतारों से जिन जिन चरित्रों को करते हैं वे चरित्र महापुरुषों के मुख से श्रवण करने से हमारे कर्णन्द्रिय को रसान्वित करने वाले हैं ॥ १ ॥ भगवान् में भक्ति और भगवान् के भक्तों में मैत्री पैदा होती है । जो आप चरित्रों को ऐसा मनोहर समझो तो कहो, अथवा ऐसे चरित्रों को आप योग्य समझो तो ऐसे प्रकार से वर्णन करो जैसे वे मनोहर हों ॥ २ ॥ भगवन् इन पाँच प्रश्नों के उत्तर के पूर्व में भगवान् श्रीकृष्ण का कोई दूसरा अद्भुत बाल-चरित्र कहिए, जो बाल-चरित्र मनुष्य लोक में आकर उन्होंने बाल जाति के अनुकूल किया हो ॥ ३ ॥ तीन मास की वय में पगों को उठाकर गाड़ी उलट देने से सब को आश्चर्य चकित करते हुए लाल बाल के जन्मनक्षत्र के दिन सब गोपियों के साथ माता यशोदा वाद्यगीत द्वारा ब्राह्मणो द्वारा वेद मन्त्रों द्वारा बालगोपाल का अभिषेक करने लगी ॥ ४ ॥

नन्दस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः ।
[1]अन्नाज्यवासःस्रगभीष्टधेनुभिः संजातनिद्राक्षमशीशयच्छनैः ॥ ५ ॥
औत्थानिकौत्सुक्यमना मनस्विनी समागतान् पूजयती व्रजौकसः ।
नैवाशृणोद् वै रुदितं सुतस्य सा रुदन् स्तनार्थी चरणावुदक्षिपत् ॥ ६ ॥
[2]अधः शयानस्य [3]शिशोरनोऽल्पकप्रवालमृद्वङ्घ्रिहतं व्यवर्तत ।
विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूबरम् ॥ ७ ॥
दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय[4] औत्थानिके कर्मणि याः समागताः ।
नन्दादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—कृतमज्जनादिकम् अन्नाद्यवासःस्रगभीष्टधेनुभिः सुपूजितैः विप्रैः कृतस्वस्त्ययनं सञ्जातनिद्राक्षं (तं बालं) नन्दस्य पत्नी शनैः अशीशयत् ॥ ५ ॥ औत्थानिकौत्सुक्यमनाः मनस्विनी सा समागतान् व्रजौकसः पूजयती सुतस्य रुदित न एव अशृणोत् वै स्तनार्थं रुदन् चरणौ उदक्षिपत् ॥ ६ ॥ अधः शयानस्य शिशोः अल्पकप्रवालमृद्वङ्घ्रिहतं विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूबरम् अनः व्यवर्तत ॥ ७ ॥ यशोदाप्रमुखाः याः औत्थानिके कर्मणि समागताः व्रजस्त्रियः नन्दादयः च शकटं दृष्ट्वा अद्भुतदर्शनाकुलाः (सन्तः) स्वयं कथं विपर्यगात् इति ब्रुवन्तः अतिविषादमोहिताः जनाः आर्तवत् समन्तात् परिवव्रुः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अन्नादिभिः सुपूजितैर्विप्रैः कृतमंगलम् । संजातनिद्रे अक्षिणी यस्य तमशीशयच्छायितवती । शकटस्याधस्तात्प्रेंखे ॥ ५ ॥ उदक्षिपदूर्ध्वं चालितवान् ॥ ६ ॥ तदधःशयानस्य शिशोरल्पकश्चासौ प्रवालवन्मृदुश्च योंघ्रिस्तेन हतमनः शकटं तदाकारोऽसुरः व्यवर्तत विपरीतमपतत् । कथम् । विध्वस्तानि नानारसवंति कुप्यभाजनानि स्वर्णरजतातिरिक्तकांस्यादिमयानि भाजनानि यथा भवंति तथा । चक्रे च अक्षश्च चक्राक्षः व्यत्यस्ताश्चक्राक्षा यस्मिन् विभिन्नः कूबरो युगंधरो यस्य तच्च तच्च यथा भवति तथा व्यवर्ततेति ॥७॥ अद्भुतदर्शनेनाकुला बभूवुः । तदेवाह । कथमिति । विपर्यगाद्विपरीतमपतदिति ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृतस्वस्त्ययनं कृतमांगल्यवचनम् । शकटस्याधस्तात्प्रेंखे इत्ययमर्थः स्वामिचरणैरक्षरैर्न गृहीतः किन्तु “कथं स्वयं वै शकटं व्यपर्यगात्” इत्युक्तेरिति ज्ञेयम् । शनैरिति । निद्राभंगशंकया क्रोडे निस्पंदं धृत्येव स्वयमपि शायित्वाऽशीशयत् । प्रेंखे आंदोलनयंत्रे ॥ ५ ॥ औत्थानिके औत्सुक्यं मनो यस्याः सा तथा ॥ ६ ॥ तदधः शकटाधोदेशे । कुप्यम् । ‘ताभ्यां यदन्यत्तत्कुप्यम्’ इत्यमरः । ताभ्यां हेमरूप्याभ्याम् । यद्वा–द्वीपांतरीयमृद्रचितानि पात्राणि कुप्यानि । अक्षश्चक्रप्रोतो लोहादिरचितो दंडः । ‘अनः शयानस्य’ इति पाठं तु विजयध्वजो व्याचख्यौ । क्वचित्तु ‘शिशोरनोल्पके’ इति पाठः । बहुषु पुस्तकेषु ‘शिशोरथाल्पके’ इति पाठस्तत्रान इति शेषः । शकटं व्यपर्यगादिति वक्ष्यमाणत्वाद्वा ज्ञेयम् । ‘शकटासुरभंजनः’ इति ब्रह्मांडोक्तेः शकटस्थासुराविष्टत्वेन भूप्रविष्टचक्रत्वमलक्ष्य तं पादाग्रेणाहन् अंतर्द्धाने नाविष्टमंतर्द्धानेनैवाहन् बाल्यलीलायामपि निजैश्वर्यदर्शनाच्छ्रीकृष्णमहिमाऽद्भुततम एव तदुक्तं विष्णुधर्मेऽर्जुनेन “तालोच्छ्रिताग्रगुरुभारसारमायामविस्तारवदप्य जातः । पादाग्रविक्षेपविभिन्नभांडः चिक्षेप कोन्यः शकटं यथा त्वम् ॥” इति ॥ ७ ॥ अद्भुतदर्शनाकुला आश्चर्यदर्शने त्रस्ताः । तदेवाद्भुतमेव । इतोऽग्रेर्द्धश्लोकोऽधिकोस्ति बहुषु पुस्तकेष्वनुपलंभादिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्दस्य पत्नीति तद्वदौदार्यं तत्र तस्यानुमतिः साहचर्यञ्च सूचितं कृतं तया गोपीभिश्च मज्जनादिकं यस्य तम् आदिशब्दाद्गोरोचनातिलकवेशादिपूर्वोक्ताभिषेकोत्यत्रान्तर्भाव्यते स्वस्त्ययनं स्वस्तिवाचनादि मङ्गलकर्म अन्नाद्यम् अन्नं तदुपकरणञ्च आज्यमिति केचित् स्रक् रत्नादिमाला अभीष्टम् आत्मनो विप्राणां वा यस्य यत्प्रियं द्रव्यं धेनुविशेषणं वा शनैरिति सुकुमारतया निद्राभङ्गशङ्कया च ॥ ५ ॥ अश्रवणे हेतुः, मनस्विनी परमोदारचित्तत्यभ्यागतपूजायां श्रद्धा दक्षता सावधानता चोक्ता तथा

---

१. अन्नादिवासः–वीर. । २. अनः–विज. । ३. शिशोरतल्पक–वीर. ; शिशोरथाल्पक–विज. । ४. स्त्रियो ह्यौत्थानिके–वीर. ।

औत्थानिके परमोल्लासमयपुत्रोत्सवविशेषे औत्सुक्यं कर्मसाङ्गतार्थमुत्कण्ठा वैयग्र्यं यस्य तथाभूतं मनो यस्याः तथाभूता च सती समागतान् सर्वानेव व्रजवासिनो जनान् गन्धमाल्याभरणादिभिः पूजयन्तीति अतो ये च वक्ष्यमाणा बालास्तत्रासंस्ते तथा पुत्रपार्श्वे रक्षिता एव प्रायशो भवेयुरिति ज्ञेयम्। एवकारेण किञ्चिदपि तच्छ्रवणं प्रत्याख्यातं वै निश्चये तेन च सत्यमेतदिति सशपथं तदेव दृढीकृतम् अन्यथा शेषकृत्यपरित्यागेनाप्यवश्यमागता स्यादिति भावः। स च रोदनेनापि मातरमप्राप्य स्तनार्थी रुदन्नेव चरणावूर्द्ध्वं मुहुरुत्क्षिप्तवानिति बाल्यलीलासौष्ठवमुक्तम् "शकटासुरभञ्जनः" इति ब्रह्माण्डपुराणोक्तानुसारेण शकटाविष्टस्य दैत्यस्य वधार्थमिति लभ्यते तच्चानुषङ्गिकमेव भवतु श्रीभगवच्चरितस्य स्वभावत एव सर्वसमाधानशक्तिमयत्वात् रोदनं च मातुः स्तन्यपानार्थं स्तनार्थीत्युक्तेः अस्य तन्मनःस्थितभावस्य मुनीन्द्रेणानुस्मरणाद्यथार्थमेव चेदं तच्च तद्वात्सल्यवश्यतामयबाल्यलीलावशेन ज्ञेयम् भक्तभाववश्यत्वात् "लोकवत्तुलीलाकैवल्यात्" इति सिद्धान्तः ॥ ६ ॥ अधः गृहाद्बहिर्महाशकटस्याऽधस्ताद्बालपर्यङ्किकायां शयानस्य अल्पकेन अत्यल्पप्रमाणन प्रवालतोऽपि मृदुना च अङ्घ्रिणैकेन हतं हननमुद्रया स्पृष्टमात्रमित्यर्थः। यद्वा हन्तेर्गत्यर्थत्वात् गतं प्राप्तमित्यर्थः। तच्च असुराविष्टत्वाच्छकटस्योच्चस्यापि भूमिप्रविशच्चक्रत्वान्निकटप्राप्तत्वेन भगवद्विग्रहस्य विभुतास्वभावेन वा सम्भाव्यम् असुरस्त्वन्तर्द्धानेन तदाविष्ट इत्यन्तर्द्धानेनैव विलयं प्रापित इति ज्ञेयम् एवं बाल्यलीलायामेव तदव्यभिचारेण निजैश्वर्यविशेषाविर्भावाच्छ्रीकृष्णस्य सर्वतो विशिष्टो महिमा दर्शितः यतः स्वयं श्रीविष्णुरूपेण नृसिंहाद्यवतारेण चासुरघातादिकं विग्रहाद्याटोपविक्रमविशेषेणैव श्रीरघुनाथाद्यवतारेण च बाल्ये केवलं लौकिकलीलैव अत्र तु विचित्रमधुरलौकिकबाल्यलीलानुगतमेवैश्वर्य्यमिति परमाद्भुतभगवत्ता माधुरी सिद्धा श्रीविष्णुधर्मेपि तदुक्तं श्रीमदर्जुनेन—

"तालोच्छ्रिताग्रं गुरुभारसारमायामविस्तारवदद्य जातः। पदाग्रविक्षेपविभिन्नभाण्डं चिक्षेप कोऽन्यः शकटं यथा त्वम्" ॥

इति अत्र तालशब्देन षष्टिहस्तप्रमाणपरिणततालवृक्ष एवोच्यते बृहत्त्वस्यैव विवक्षितत्वात् तथा श्रीब्रह्मणा द्वितीयस्कन्धे

"तोकेन जीवहरणं यदुलूकिकायाः त्रैमासिकस्य च पदा शकटोऽपवृत्तः।
यद्रिङ्गतान्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथाऽर्जुनयोर्न भाव्यम्" ॥ इति

अस्यार्थः तोकेन बालेन सता उलूकिकायाः पूतनायाम् अन्तरगतेन अर्जुनयोरेव मध्यप्राप्तेन कृष्णेन इतरथा श्रीकृष्णस्य भगवत्ताविशेषप्रकटनं विना न सम्भाव्यं न सम्भवेदित्यर्थः। अतः शकटस्यातिबृहत्तमत्वात् मातापि तदधः पुत्रं शायितवतीति ज्ञेयम् ॥ ७ ॥ याः श्रीयशोदाप्रमुखाः याश्च व्रजस्त्रियः औत्थानिके पर्वणि समागताः ये च नन्दादयस्ते सर्वे दृष्ट्वा शकटविपर्ययं वीक्ष्य तस्याद्भुतस्य उत्पाततया शङ्कितस्य दर्शनेन व्याकुलचित्ताः सन्तः कथं शकटं विपर्यगादित्यूचुरिति शेषः। पर्वणीत्यत्र कर्मणीति क्वचित्पाठः वै विस्मये ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

नन्दस्य पत्नीति तत्र तस्यानुमतिः साहाय्यञ्च तथा तस्या अपि तद्वदैश्वर्य्यं सर्व्वानन्दकत्वञ्च सूचितम्। कृतं तया गोपीभिश्च मज्जनादिकं यस्य तम्; आदि-शब्दाद्गोरोचनातिलकसौवर्णाभरणवेषादि। तथा च वाराहे गोपीतीर्थप्रसंगे एतल्लीलानन्तरमेव—'गोपीमंगलपाठेन स्नापितो हेमकुण्डलः' इति स्वस्त्ययनं रक्षाबन्धनादिमंगलकर्म्म। अन्नाद्ययोर्भक्ष्यभोज्यभेदेन वा भेदः। आज्यमिति केचित्, ततश्च घृतम्; सुग्रत्नादिमाला, अभीष्टमात्मनो विप्राणां वा यस्य यत् प्रियं द्रव्यम्, धेनुविशेषणं वा। संजातनिद्रे अक्षिणी यस्येति निद्रां प्रति श्रीभगवता स्वनेत्रयोर्वासप्रदानात्। तच्च भविष्योत्तरं शयनप्रसंगे व्यक्तमेव। यद्वा, शकटभञ्जनाय तदधः शयनार्थं निद्रयेवाक्षिमुद्रणात्। शनैरिति सुकुमारतया निद्राभंगशंकया वा ॥ ५ ॥ मनस्विनी परमोदारचित्तेत्यभ्यागतपूजायां श्रद्धा दक्षता चोक्ता; यद्वा, सर्व्वानुसन्धाननिपुणापि, किं वा, श्रीकृष्णसंलग्नचित्तापि नैवाश्रृणात्। कुतः? औत्थानिके पुत्रार्थोत्सवविशेषे औत्सुक्यं वैयग्र्यमुत्कण्ठा वा यस्य तथाभूतं मनो यस्याः सा; अतः समागतान् सर्व्वानेव व्रजवासिनो जनान् गन्धपुष्पादिभिः पूजयन्त्यतो निजदासबालकानेव पुत्रपार्श्वं रक्षितवतीति ज्ञेयम्। एवकारेण कथञ्चित् किञ्चिदपि तच्छ्रवणं नाभूदिति बोधितम्। वै प्रसिद्धम्, सत्यं वेति सशपथं तदेव दृढीकृतमन्यथाशेषकृत्यपरित्यागेनाप्यवश्यमागता स्यात्। स च रोदनेनापि मातरमप्राप्य स्तनार्थी सन् रुदन्नेव चरणावूर्द्ध्वं प्रसारयामासेति बाल्यलीलासौष्ठवमुक्तम्। केचित्तु 'शकटासुरभञ्जन' इति ब्रह्माण्डपुराणोक्तानुसारेण शकटाविष्टस्य दैत्यस्य वधार्थमित्याचक्षते—(कृष्णस्य) रोदनञ्च मातुः प्रेमवश्यतया, बुभुक्षया वा मातुः स्तन्यपानार्थम्,—स्तनार्थीत्युक्तेः; निजैश्वर्य्याच्छादनार्थं तथा सर्व्वेषां तत्रस्थानां स्नेहभरवृद्धये चेति। इत्थं श्रीभगवतश्चरितमेकमपि बहु प्रयोजनकरम्; तच्च जगतः क्षेमायैवेत्युक्तमेव ॥ ६ ॥ अधः शकटासुरखण्डनेच्छया गृहाद्बहिर्महाशकटस्याधस्ताद्बालपर्य्यङ्किकायां शयानस्याल्पकेन बाल्याविष्कारादत्यल्पप्रमाणेन, अतएव प्रवालतोऽपि मृदुनाङ्घ्रिणैकेन हतं प्रहृतम्। यद्वा, हन्तेर्गत्यर्थाद्गतं प्राप्तं स्पृष्टमित्यर्थः। विध्वस्तेत्यादि तैर्व्याख्यातमेव। यद्वा, कथम्भूतम्? सदित्येव तस्यैव विशेषणम्, तस्य च महाशकटस्यासुराविष्टस्यापि विध्वस्तेत्यादि सूचितम्। महावेगेन विपरीतपतनं श्रीभगवतो विचित्रलीलाविष्कारं बोधयति। एवं बाल्यलीलायामेव तदव्यभिचारेण निजैश्वर्य्यविशेषाविर्भावाच्छ्रीकृष्णस्य सर्व्वतो विशिष्टो महिमा दर्शितः, यतः स्वयं

श्रीविष्णुरूपेण श्रीनृसिंहाद्यवतारेण चासुरघातादिकं युद्धाटोपविक्रमविशेषेणैव, श्रीरघुनाथाद्यवतारेण च बाल्ये केवलं लौकिकलीलैव। अत्र च विचित्रम्, मधुरलौकिकबाल्यलीलासद्मानि तमेवैश्वर्यविशेषप्रकटनमिति समग्रभगवत्ता माधुरी सिद्धा, अत एवोक्तं श्रीब्रह्मणा द्वितीयस्कन्धे (भा० २।७।२७)—'तोकेन जीवहरणं यदुलुकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः। यद्रिंगतान्तरगतेन दिविस्पृशेन, उन्मुलनन्त्वितरथार्ज्जुनयोर्न भाव्यम् ॥' इत्यस्यार्थः—तोकेन बालेन सता, उलुकिकायाः पूतनाया अन्तर्गतेनार्ज्जुनयोरेव मध्यप्राप्तेन कृष्णेनेतरथा श्रीकृष्णस्य भगवत्ताविशेषप्रकटनं विना न भाव्यं न सम्भाव्यम्। भाविकथनाद्भविष्यन्निर्देशो न सम्भवेदित्यर्थः। अतएव तत्रैवादौ (भा० २।७।२६)—'भूमेः सुरेतरवरूथविमर्दितायाः, क्लेशव्ययाय कलयासितकृष्णकेशः। जातः करिष्यति जनानुपलक्ष्यमार्गः, कर्म्माणि चात्ममहिमोपनिबन्धनानि ॥' इत्यस्यार्थः,—सुरेतरा असुरांशोद्भूता राजानस्तेषां सैन्यैर्विमर्दिताया भारेण पीडितायाः, कलया श्रीबलदेवेन सह सिता वेणीत्रयाबद्धाः कृष्णाः केशा येन सः। अनेन सौन्दर्यं सदा दुष्टवधोद्यतत्वञ्चोपलक्षितम्। यद्वा, कलयांशेन यः सितकृष्णकेशो नारायणोऽपि यस्यांशः स इत्यर्थः। जनैर्जीवैरुपलक्षयितुमप्यशक्यो मार्गोऽपि यस्य सोऽपि जातः सन् आत्ममहिमा साधारणनिजमाहात्म्यभगवत्तालक्षणं तदुपनिबन्धनानि तदभिव्यञ्जनार्थानि कर्म्माणीति ॥ ७ ॥ दृष्ट्वा तथाभूतं शकटम्; दृष्ट्वेति स्वदृष्टिगोचरे शायितत्वादतएव शकटस्याधः, न तु गृहान्तरिति तत्त्वम्। याः समागतास्ताः सर्व्वा एवेत्यर्थः। यद्वा, याश्चान्याः समागता अद्भुतस्याकस्मान्महाशकटनिवर्त्तनस्य दर्शनेनाकुला उत्पातशंकया व्याकुलचित्ताः। अन्यत्तैर्व्याख्यातम्। यद्वा, परमाश्चर्यस्य श्रीकृष्णस्य तद्बाल्यचरितस्य वा सदा दर्शनेन प्रेमविवशाः, अतः कारणनिर्द्धाराशक्त्या शकटं स्वयं वृषाद्याघातं विना कथं विपर्य्यगादित्यूचुरिति परेणान्वयः। वै विस्मये ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अशीशयत् शायितवती ॥ ५ ॥ औत्थानिकम् उत्थापनमङ्गलम् ॥ ६ ॥ अनः शकटं व्यवर्त्तत विपर्यस्तमभवत् रसानां कुप्यानां भाजनं रसकुप्यभाजनं हेमव्यतिरिक्तं वस्तु कुप्यं स्थापितं शकटमिति शेषः ॥ ७–१२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अन्नाद्यैरन्यैर्वासोभिः स्रग्भिरन्यैश्च स्वाभीष्टैर्धेनुभिश्च सुपूजितैः विप्रैः कृतं स्वस्त्ययनं यस्य कृतं मज्जनादिकं यस्य आदिशब्देनाङ्गरक्षादिकं विवक्षितं सञ्जातनिद्रे अक्षिणी यस्य तं सुतं नन्दस्य पत्नी यशोदापि तं शनैः निद्राभङ्गभयादिति भावः। अशीशयत् शाययामास ॥ ४–५ ॥ औत्थानिके उत्सवे एवौत्सुक्ययुक्तं मनो यस्यास्तथाभूता मनस्विनि औदार्यप्रवणमनाः सा यशोदा समागतान् व्रजौकसः पूजयन्ती सुतस्य रुदितं नाशृणोन्न शुश्राव स हि स्तनार्थी रुदन् चरणावुदक्षिपदूर्ध्वमचालयत् ॥ ६ ॥ तदाऽधः व्योम्नि आपततोऽसुरात्मकस्य शकटस्याधोलम्बमानप्रेङ्ख इत्यर्थः। शयानस्य शिशोः श्रीकृष्णस्याल्पकश्चासौ प्रवालवन्मृदुश्च योऽङ्घ्रिस्तेन हतम् अनः शकटं व्यवर्तत विपरीतमवर्तत, तदेव दर्शयितुं विशिनष्टि–विध्वस्तानि नानारसवन्ति कुप्यभाजनानि स्वर्णरजतव्यतिरिक्तकांस्यादिमयानि पात्राणि यस्मिन् व्यत्यस्ते चक्रेऽक्षश्चक्राधारदारुविशेषश्च यस्मिन् कूवरो युगन्धरो यस्मिंस्तच्च ॥ ७ ॥ दृष्ट्वेति यशोदाप्रभृतयो व्रजस्त्रियो याश्चौत्थानिके कर्मणि समागतास्ताः नन्दादयो गोपाश्च दृष्ट्वाऽद्भुतदर्शनेनाकुलाः सम्भ्रान्ताः कथमेतच्छकटं स्वयमेव विपर्यगाद्विपरीतमभूत् ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अन्नाद्यवास आदयो येषां ते तथा तैः विप्रैः कृतस्वस्त्ययनं माङ्गल्यवचनं यस्य स तथा सञ्जाता निद्रा ययोस्ते तथा ते अक्षिणी यस्य स तथा तम् अशीशयत् शायितवती शयनगतमकारयदित्यर्थः ॥ ५ ॥ कदा तु उत्थानकम् उत्सुकयति पश्यतीति उत्थानकौत्सुक्यं स्वार्थे ष्यञ् प्रत्ययः तादृशं मनो यस्याः सा तथा मनस्विनी प्रशस्तमनाः उदक्षिपत् क्षिप्तवान् ॥ ६ ॥ अथ उत्क्षेपानन्तरम् अनः शकटं व्यवर्त्तत विपरीतमधोमुखमपतत् अल्पकौ अगुरौ प्रवालवन्मृदू अङ्घ्री अल्पकप्रवालमृद्वङ्घ्री ताभ्यां हतं पीडितं ध्वस्तानि इतस्ततो विक्षिप्तानि नानारसपूर्णकुप्यात्मभाजनानि यस्मिन् तत्तथा कुप्यानि द्वीपान्तरस्थमृद्विशेषरचितातिचक्रं रथाङ्ग वृत्तदारु अक्षो नाम चक्रप्रोतदारुविशेषः कूबरो युगन्धरः व्यत्यस्तौ न्यञ्चितौ चक्राक्षौ विभिन्नौ विशीर्णः कूबरश्च यस्य तत्तथा ॥ ७ ॥ तद्विपर्यगात् विपरीतं गतम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अन्नाद्यम् अन्नं तदुपकरणञ्च ॥ ५ ॥ स्तनार्थीति बाल्यलीलावेशो दर्शितः ॥ ६ ॥ अध इति शकटासुरभञ्जन इति। ब्रह्माण्डपुराणात् असुरावेशेनैव भूमौ प्रविशच्चक्रत्वादुच्चस्यापि शकटस्याल्पकेन चरणेन स्पर्शो ज्ञेयः ॥ ७–९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अन्नादिभिरन्नादिदानेन सुष्ठुपूजितैर्विप्रैः कृतमङ्गलं सञ्जातनिद्रे अक्षिणी यस्य तं बालं कृष्णं शनैरिति निद्राभङ्गशङ्कया क्रोडे निष्पन्दं धृत्वैव स्वयमपि शयित्वा अशीशयत् बृहत्प्राङ्गणैकदेशस्थस्य शकटस्याधः स्थिते पल्यङ्के निश्चलं निःशब्दं च

शाययामास । ततश्च निद्रापूर्तिं ज्ञात्वैव स्वयमुत्तस्थाविति शनैः पदेनैव द्योतितं ज्ञेयम् ॥ ५ ॥ औत्थानिके उत्सवे औत्सुक्ययुक्तं मनो यस्याः सा मनस्विनी वस्त्रालङ्कारमाल्यगन्धचन्दनतैलसिन्दूरादिकं ददाना व्रजौकसो महोत्सवागतनारीः नैवेति व्रजस्त्रीजनसम्माननवचनप्रतिवचनाद्यावेशवशादित्यर्थः । स्तनार्थीति निद्रान्त एव क्षुधोद्गमादिति भावः । मदीयरोदनशब्देन नावदधासि तिष्ठ त्वद्गृहशकटस्फोटनशब्देनैव त्वामवधापयानीति मात्रे कुप्यन्निव शकटभङ्गार्थमेव चरणौ उच्चिक्षेपेत्युत्प्रेक्षा गम्या ॥ ६ ॥ अल्पकश्चासौ प्रबालवन्मृदुश्च योऽङ्घ्रिस्तेन हतमिति तेन वामनावतारस्य कटाहभेदार्थमिव शकटभङ्गार्थं तच्चरणयुगं न वर्द्धितं नापि नृसिंहावतारस्य कठोरहिरण्यकशिपुविदारणार्थमिव जात्यैवातिकठिनमिति भावः । बाल्यादिलीलामाधुर्य्याविरोध्यतिसुदुर्घटम् ऐश्वर्य्यमेतत् कृष्णस्य पूर्णत्वप्रतिपादकं व्यवर्तत विपर्य्यस्तीभूयापतत् विध्वस्तानि नानारसवन्ति कुप्यभाजनानि स्वर्णरजतातिरिक्तकांस्यादिमयानि पात्राणि यत्र यद्यथा स्यात्तथा व्यत्यस्तानि विपर्य्यस्तानि चक्रे च अक्षाश्च चक्राक्षाः व्यत्यस्ताश्चक्राक्षा यस्मिन् विदीर्णः कूबरो युगन्धरश्च यत्र तद्यथास्यात्तथा शकटासुरभञ्जन इति ब्रह्माण्डपुराणात् असुरावेशेनैव भूमौ प्रविशच्चक्रत्वादुच्चस्यापि शकटस्य निकटे प्रान्तत्वेनाल्पकेन चरणेन स्पर्शो ज्ञेय इति वैष्णवतोषिणी ॥ ७ ॥ यशोदाप्रमुखाः याश्च व्रजस्त्रियः पर्वणि कर्मणीति च पाठः विपर्य्यगात् विपर्य्यस्तं सदपतदित्यूचुरिति शेषः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सञ्जातनिद्रे अक्षिणी यस्य तं शकटस्याधः अशीशयत् शायितवती ॥ ५ ॥ औत्थानिके कर्मणि औत्सुक्ययुक्तं मनो यस्याः सा उदक्षिपत् उदूर्ध्वमचालयत् ॥ ६ ॥ तदा अल्पकश्चासौ प्रबालवन्मृदुश्च योऽङ्घ्रिस्तेन हतम् अनः शकटं व्यवर्त्तत विपरीतमपतत् तस्मिन् शकटे प्रविष्टः शकटासुरोपि नष्टो ज्ञेयः "शकटासुरविनाशीच" इति वचनात् तदेवाह—विध्वस्तानि नानारसवन्ति कुप्यभाजनानि स्वर्णरजतव्यतिरिक्तानि कांस्यादिमयानि भाजनानि पात्राणि यथा भवन्ति तथा व्यत्यस्ते चक्रे अक्षश्च यस्मिन् विभिन्नः कूबरो युगन्धरो यस्मिन् तच्च तच्च यथा भवति तथा व्यवर्त्तत ॥ ७ ॥ अद्भुतस्याप्यस्याश्चर्यरूपस्य अकस्मात् शकटविपरीतपतनस्य दर्शनेन आकुला बभूवुः, तदाह—कथमिति । विपर्यगाद्विपरीतमपतत् ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अन्नाद्यैस्तद्दामैः सुपूजितैर्विप्रैः कृतस्वस्त्ययनं सञ्जातनिद्राक्षं बालं बृहत्प्राङ्गणैकदेशस्थितस्य शकटस्याधःस्थिते चित्रपर्यङ्के शनैरशीशयत् निद्राभङ्गशङ्कितातियत्नाच्छाययामासेत्यर्थः ॥ ५ ॥ औत्थानिके तस्मिन्नुत्सवे औत्सुक्यं तत्साङ्गतार्थोद्योगस्तद्युक्तं मनो यस्याः सा समागतान् तन्महोत्सवागतान् व्रजजनान् वस्त्रालङ्कारमाल्यगन्धादिभिः पूजयन्ती नन्दस्य पत्नी तत्पूजनावेशात् विनिद्रस्य सुतस्य रुदितं नैवाश्रृणोत् मनस्विनी महोदारचित्ताऽभ्यागतपूजने श्रद्धादक्षतावधानवतीत्यर्थः । तदा स सुतः स्तनार्थी सन् रुदन् चरणावुदक्षिपत् क्षुधितस्य मे क्रन्दनशब्दं न श्रृणोषि तिष्ठ गृहस्थितबृहच्छकटभङ्गं श्रोष्यसीति तस्यै कुप्यन्निव तद्भङ्गाय पादावुदूर्ध्वं चालितवानिति भावः । अत्र स्तनार्थीत्युक्तं तां स्तन्यकाम इति वक्ष्यते तेन तत्पाने तात्पर्यमुक्तं बोध्यम् ॥ ६ ॥ शिशोस्तस्याल्पकाभ्यां प्रवालमृदुभ्यामङ्घ्रिभ्यां हतं ताडितं सदनः शकटं व्यावर्त्तत उत्तानमपतत् विध्वस्तानि नानारसवन्ति कुप्यभाजनानि कांस्यादिपात्राणि तद्यथा स्यात्तथा स्वर्णरजताभ्यामन्यत् कुप्यमुच्यते व्यत्यस्ताश्चक्राक्षा विदीर्णः कूबरो युगन्धरश्च यत्र तद्यथा स्यात्तथा व्यवर्त्तत शकटोऽयं रसपूर्णपात्रनिधानार्थो महानन्तः पुरचत्वरस्थस्तं कश्चित् कंसभृत्योऽन्तर्द्धानेनैवाविश्य स्थितस्ततःक्रमाद्भूमिं प्रविशच्चक्रत्वेनोच्चस्यापि शकटस्य तदङ्घ्रिभ्यां स्पर्शः सोप्यन्तर्द्धानेनैव भयं प्रापित इति तन्नामस्तोत्रात् ॥ ७ ॥ शकटं कथं विपर्यगादित्यूचुरिति शेषः ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

औत्थानिककौतुकाप्लवे उत्थानं शिशोरङ्गपरिवर्तनं तत्कालिकं कौतुकं कुलपरम्परागतमङ्गलं तन्निमित्तको य आप्लवः स्नपनं तस्मिन्कर्तव्ये । कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोः । परम्परा समायातमङ्गले च कुतूहले । विवाहसूत्रगीतादिभोगकामेषु च स्मृतमिति विश्वाद्योग्यार्थोऽपि ज्ञेयः । तत्रापि जन्मर्क्ष्यं रोहिणीनक्षत्रं तद्योगेऽपि जाते सति समवेतयोषितां मिलितललनानां मध्ये सती स्वयं विद्यमाना नन्दस्य पत्नी वादित्रगीतैः सहिताश्च ते द्विजेषु ये मन्त्रवाचकास्तैर्द्विजाश्च ते मन्त्रवाचकाश्चेति वा तैः सह सूनोरभिषेचनं चकार तैः कारयामासेति वा । समवेतयोषितामुत्थापनकौतुकाप्लव इति च पाठः । कदाचिद्दिने आप्लव इतस्ततः प्लुतिस्तस्मिन्निति वा । क्रमनिम्नमहीभागकविप्लुतिखगाः प्लव इति यादवः । इति व्याकर्तारः ॥ ६ ॥ कृतमज्जनादिकमन्नाद्यधिवासः स्रगभीष्टधेनुभिः । अभीष्टेति काकाक्षिन्यायेन स्रग्धेनुपदाभ्यामभीष्टाः स्रजश्चाभीष्टा धेनवश्चेत्यन्वेति । अन्नमाद्यं येषां तैश्च वासो वस्त्रं च तेन स्रगभीष्टधेनुभिश्च सुपूजितैर्विप्रैः । आद्यं भक्षयितुं योग्यं समीचीनमिति यावत् तच्च तदन्नं । विशेषणस्य परनिपातः । ऋहलोर्ण्यदिति ण्यत् । तच्च स्रगभीष्टधेनुश्च ताभिरिति वा । कृतस्वस्त्ययनं सञ्जातनिद्राक्षं सञ्जाता प्रादुर्भूता निद्रा ययोस्ते अक्षिणी लोचने यस्य तं शनैर्निद्राभङ्गभीत्या मन्दमशीशयत् शाययामास शनैः स्वैरं स्वेच्छमिति यावत् । शनैः शनैश्चरे स्वैरं इति विश्वः । अनोऽधस्तनभाग इति शेषः ॥ ७ ॥ औत्थानिकौत्सुक्यमना औत्थानिके प्रारब्धाङ्गपरिवर्तनव्यापारे औत्सुक्यमुत्सुकता यस्य

तन्मनो यस्याः सा । शान्ता मनस्विनी प्रशस्तचित्ता समागतान्व्रजौकसः स्त्रीपुंसः पूजयती सभाजयन्ती सा सुतस्य रुदितं रोदनं नैवाश्रृणोन्नैव शुश्राव यदा तदा स्तनार्थी रुदंश्चरणावुदक्षिपदुद्धृत्याक्षिपत् । अनुनये कर्तव्ये सतीत्यपि सूचयति वैकारः । यस्य सुतस्य वैरुदितं विगतं रुदितं रोदनं यस्य स विरुदितस्तस्य भावो वैरुदितं कदाऽप्यरोदमानो तातस्य रुदितं न वै अश्रृणोदित्यपि योजयन्ति ॥ ८ ॥

श्रीसुबोधिनी

एवं महोत्सवमुक्त्वा बालकविस्मरणार्थं बालकस्य पर्यङ्के स्थापनमाह नन्दस्य पत्नीति, नन्दस्य पत्नी नन्दकार्यमवश्यं करोति, अन्यथा तदभावे ज्ञातीनां वैमनस्यं स्यात्, अतः कृतमज्जनादिकं भगवन्तं सञ्जातनिद्राक्षं शयनं कारितवतीतिसम्बन्धः, आदौ स्त्रीणामाकारणं कृत्वा स्नानस्थानमलङ्कृत्य नानाविधगीतैस्तैलेन नानाविधसुगन्धद्रव्यैः स्नानं कारयित्वाभरणानि परिधाप्य कस्तूरीगोरोचनादितिलकं दत्वा धूपादिना चार्द्रतां दूरीकृत्य सर्वाभरणभूषितं विधाय तदनन्तरं विप्रैः कृतस्वस्त्ययनं कृतं रक्षाबन्धनादिकं यस्य तादृशं, तेभ्यो ब्राह्मणेभ्यो बहु दत्वा सन्तुष्टानामाशिषं गृहीत्वा श्रान्ताभिनयने कृते सञ्जातनिद्राक्षं मन्यमाना शयनं कारितवती, अन्नमोदनः, आज्यं घृतं, स्रङ् माला, वासो वस्त्राणि, अभीष्टं प्रार्थितं, धेनवश्च, तैः सर्वैरेव पूजिता ब्राह्मणाः, तेषां ब्राह्मणानां ज्ञानशक्तिसङ्कोचार्थं सञ्जातनिद्राक्षता, अन्यथाशिषो न प्रयुञ्जीरन्, शनैरिति, यथा निद्राभङ्गो न भवति तथा हस्तलाघवेन, ब्राह्मणानां प्रीतिश्चतुर्विधा भवति, आदौ साज्यभोजनेन, पश्चाद् वस्त्रैः, उभाभ्यां स्वयं पूर्णा भूत्वैहिके यावदपेक्षितं तत् प्रार्थयन्ति, ततो वैदिककर्मसिद्ध्यर्थं धेनवश्च, एवं चतुर्भिः पूजिताः, लौकिकख्यापनार्थं मालया च, पूजिता अन्तःकरणपूर्वकं स्वस्त्ययनं कुर्वन्ति, तेषां यथा परमार्थसर्वदृष्टिस्तिरोहिता भवति तथा सम्यङ् निद्रा ॥ ५ ॥ एवं कृते प्रसङ्गात् सर्वेषामेव बहिर्मुखता जातेत्याहौत्थानिकौत्सुक्यमना इति, ब्राह्मणार्थे निमीलने कृते भगवतो ज्ञानशक्तेर्निमीलितत्वाल्लौकिकप्राबल्यं, अथापि प्रपञ्चात् पूर्वाध्यायाभ्यां निरोधस्योक्तत्वान्नात्यन्तं लौकिके यशोदाया बुद्धिः किन्तु भगवत्सम्बन्धिलौकिके, तदाहौत्थानिके कर्मणि शोभार्थं यदौत्सुक्यमुत्सुकता लौकिकाभिनिवेशस्तत्रैव मनो यस्या इति, भगवत्सम्बन्धस्य गौणत्वात् प्रवाहस्य बलिष्ठत्वाद् भगवदंशमपि परित्यज्य लौकिकसम्भावनार्थमभिमानवती च जातेत्याह मनस्विनीति, एवं बाह्याभ्यन्तरभेदेन तस्या बहिर्मुखत्वं जातं, स्वकार्यमपि कृतवतीत्याह समागतान् पूजयतीति, ये लौकिकव्यवहारेण सम्यगागतास्तान् पूजयती (पूजयन्ती), मालाकुङ्कुमोपहारैर्बालाः पुरुषाः स्त्रियश्च सर्वे पूजिता इति पुल्लिङ्गनिर्देशः, ते चेत् सन्तो भवेयुः सर्वथा भगवदीयास्तथापि न दोषः स्यादिति तद्व्यावृत्त्यर्थमाह व्रजौकस इति, व्रज एव तामसः ओकः स्थानं येषामिति तामसभूयिष्ठ एव स्थिता न तां पदवीमारोढुमर्हन्ति, भगवांस्तु निरोधार्थमेव समागत इति लौकिकप्रकारेणैव प्रपञ्चविस्मरणपूर्वकं स्वासक्तिं करिष्यन् रोदनं कृतवान् मदीया अप्येवं बहिर्मुखा जायन्त इति च ज्ञापयितुं, कल्पान्तरे ज्ञानशक्तितिरोभावे तस्मिन् शकटे दैत्यः कश्चिदाविष्टः स नेतुं समागत इति तन्निवृत्त्यर्थं रोदनं शकटाक्षेपश्चेत्याहुः, अत एव ब्रह्माण्डपुराणे "शकटासुरखण्डन" इति भगवन्नाम, अत्र तु शकटमात्रं तद्धर्माभिनिवेशो वा, साधारणधर्माणां परित्यागासम्भवात्, एवं सर्वभावेन बहिर्मुखत्वे भगवता प्रबोध्यमानापि प्रकारं न गृहीतवतीत्याह नैवाश्रृणोदिति, एवकारेण श्रवणसम्भावनापि निवारिता, ननु श्रुत्वैव कार्यव्यग्रोपेक्षां कृतवतीति कथं न कल्प्यते तत्राह वै निश्चयेन, अन्यथा चित्तसर्वमप्यन्यत्रागतं भवेत् तदाधिकरोदनेनापि समागच्छेत्, अतस्तन्निषेध एव, सुतस्य रुदितं श्रुतं न विलम्बं सम्पादयति, तत्रापि सा महता कष्टेन प्राप्तपुत्रा, अश्रवणे वा हेतुः पूर्वोक्तन्यायेन बहिर्मुखेति, तदा भगवान् रोदनमात्रेण कार्यासिद्धिं ज्ञात्वा स्वयमेव स्तनार्थी सन् चरणावूर्ध्वमुदक्षिपत्, यथा बालकाश्चरणावूर्ध्वघर्षणेन प्रसारयन्ति, वाक्यापेक्षया कृतेः प्रबलत्वात् तथाकरणं, अनेन भगवान् मनसैव निरोधं कथं न कृतवानिति परिहृतं, केवलक्रियायां क्रियाबुद्धिः स्यात्, शकटभङ्गेऽप्यक्लिष्टकारित्वं न स्यात्, एवं कृते त्वानुषङ्गिकं जातमिति न क्लिष्टं, पूर्वं रोदनं यशोदाया बहिर्मुखत्वज्ञापनायान्यथा मनसैव कथं न कुर्यात् ? अयं च निरोधः स्वार्थः, अन्यथा पञ्चानां परार्थानामग्रे वक्ष्यमाणत्वात् पञ्चपर्वाद्या तेनैव नाश्यत इति व्यर्थमेतत् स्यात्, तत्र स्वप्रयोजनं स्तनार्थित्वं, स्वार्थमुत्पन्नस्य स्वनियोगावश्यकत्वज्ञापनाय स्तनमेवापेक्षते न तु पानं, तदग्रे वक्ष्यति स्वयमेव "नाहं भक्षितवा"निति मृत्प्रसङ्गे, अतः पूतनास्तनपानसमये यावन्तो बालास्तद्भक्षिता अत्र समागतास्तेषामर्थमवश्यं स्तनापेक्षा, दुष्टत्वं पूतनासम्बन्धिक्रोधेनैव नाशितं, तान् स्वसमानत्वेन सम्पादयितुं स्वभोग्यगोपिकादर्शनदोषाभावार्थं तानेव तासु समारोपयितुं ज्ञानं चोपदेष्टुं प्रथमं स्वकीयमेव सर्वथा निर्दुष्टं तेभ्यो ददाति ते च बहवः पीडिता भवन्ति, अतः स्तनेऽर्थित्वं, भक्त्यैव तेषां निस्तारो जात इति ख्यापयितुं चरणयोर्व्यापार उक्तः, अवतारविषयिणी भक्तिरतिपुष्टेति ज्ञापयितुं द्विवचनम् ॥ ६ ॥ एवं कृते यज्जातं तदाहाधः शयानस्येति, अधस्तादवलम्बे शकटस्य पूर्वभागाधः पर्यङ्के शायिता भगवान् छायार्थं, यदि निरोधो नाङ्गीक्रियते तर्हि भवत्कृता छायापि माऽस्त्विति ज्ञापयितुं शकटाक्षेप इति ज्ञापयत्यधःशयानस्येति, शिशोरित्युत्थानासमर्थस्य, तथाबुद्धिः सम्पादितेति नान्यथा करणं, भगवतो भिन्नतया सम्बन्धित्वेन निरूपणं चरणस्यैव माहात्म्यज्ञापनार्थं, अनः शकटं, अल्पकप्रवालमृदङ्घ्रिहतं सद् व्यवर्तत विपरीततया पतितं, तद्गतानां कार्याणां नाशस्त्वग्रे वक्ष्यते, सकार्यस्यानसो भङ्गो जातः, पूतनायां तु भगवत ओष्ठद्वयसम्बन्धो हस्तद्वयसम्बन्धश्च जात इति तदपेक्षयाधिकमाहात्म्यज्ञापनार्थमङ्घ्रिसम्बन्धो वक्तव्यः, अत एव विचार-

क्रमेणैतानि चरित्राणि गृहीतानि, तदुक्तं द्वितीयस्कन्धविवरणे, अत्यन्तमल्पाल्पकौ प्रवालापेक्षयापि मृदू, अल्पको वा प्रवालो नूतनाम्रपत्रमत्यारक्त तदपेक्षयापि मृदु भगवच्चरणारविन्दं तथैवारक्तमूर्ध्वरेखायुक्तं च, तादृशाङ्घ्रिभ्यामङ्घ्रिणा वा हतमल्पं ताडितं सच् चलनेप्ययोग्यं विपरीततया पतितं, मारणसमये चरणस्य महत्त्वं जातं भविष्यतीतिशङ्काव्युदासाय प्रवालतुल्यतया वर्णितं, मृदुत्वमात्रे दृष्टान्तो मा भवत्वित्याकृतावपि समानमिति वक्तुमल्पकता निरूपिता, तदपेक्षयापि मृदुत्वकथनं शकटादेः प्रत्युत सुखजनकमिति ज्ञापयितुं "पदा शकटोपवृत्त" इति विचार एकमेव पदं गृहीतमत्र तु चरणावित्युक्तं, समासे सन्दिग्धत्वात् करणतैकस्यैव युक्तेत्यङ्घ्रिणा हतमितिसमासः, अतोवस्थासाधनवैपरीत्यं कार्ये निरूपितं, भाराक्रान्तमनो बालयितुं न शक्यमिति ख्यापयितुं विशेषणद्वयमाह बाह्याभ्यन्तरभेदेन विध्वस्तेति, विशेषेण ध्वस्तान्यधःपतितानि नानाविधरसयुक्तानि घृतमधुगुडदधिनवनीतादियुक्तानि कुप्यभाजनानि चर्मणा निर्मितानि रसस्थापनार्थं, कुप्यानि तस्मिन् देशे प्रसिद्धानि, अनेन तेषां स्थापनमपि भगवतो न सम्मतं सर्वनिधेर्भगवत एव विद्यमानत्वात्, भाजनपदेन तान्येव व्यवहारपात्राणीति ज्ञापितं, एवं शकटस्थितानां सर्वेषामधःपात उक्तः, न हि भगवदुपरि रसान्तरं स्थातुं शक्नोति, अतो भक्तेरल्पांशेनापि ते सर्वे निराकृताः, भिन्नरसवान् भगवदुपरि स्थितः स्वरूपतोपि नष्ट इत्याह व्यत्यस्तचक्राक्षविभिन्नकूबरमिति, व्यत्यस्ते इतस्ततः पतिते चक्रे तन्मध्ये स्थितोक्षोपि लोहमय इतस्ततः पतितो यस्य विशेषेण भिन्नकूबरमग्रिमभागो लम्बो यस्य, व्यत्यस्तचक्राक्षं च तद् विभिन्नकूबरं च, संसारकालचक्रे उभयसङ्ग्राहकश्चाहङ्कारो विशेषेणात्यन्तमस्तं गतो भवति, भक्त्येकदेशेनापि क्रियाशक्तेर्महत्वात् तथात्वमुचितमेव, कूबरमुखस्थानमप्यस्तीति कूबरं तद् विशेषेण कालात्मकेन भिन्नं भवत्येव, स्वभावत उच्चा अपि भगवद्विरुद्धधर्मा भक्त्यंशेन नश्यन्तीति, अनेन भगवांस्तद्गृहमेव दूरीकृतवानित्युक्तम् ॥ ७ ॥ तदा लौकिकनाशात् तन्नाशद्वारा तत्कर्तरि भगवत्यभिनिविष्टा इति वक्तुं प्रथमतस्सर्वेषां तन्नाशचित्तत्वमाह दृष्ट्वेति, दूरे पतितमन एव दृष्ट्वा न तु भगवन्तं तत्सम्बन्धं वा, स्त्रीषु यशोदा मुख्या पुरुषेषु नन्दः, गोपिकानां ज्ञानं भविष्यतीति तद्व्यावृत्त्यर्थमाह व्रजस्त्रिय इति, तथापि "मुख्ये कार्यसम्प्रत्यय" इतिन्यायेन गोपिका एव व्रजस्त्रियो भविष्यन्तीत्याशङ्क्याहौत्थानिके कर्मणि याः समागता इति, यशोदायाः साधारण्ये प्रवेशान्मुख्या अपि साधारणा एवाभिनिविष्टा नन्दादयोप्यौत्थानिकं कर्मेति कृत्वा गृह एव स्थिताः, अन्यतोपि समागता अन्ये चकारेणोक्ताः, स्त्रीणामपेक्षयाद्भुतदर्शनेनाकुला जाताः, किं जातं किं भविष्यतीति शकटपाते सर्वे हेतुं विचारयन्तीत्याह कथमिति, स्वयमेव बलीवर्दाद्याघातव्यतिरेकेणैव वै निश्चयेन स्वयमेव शकटं विपर्यगात् विपर्ययं प्राप्तवद् विपरीततया परितश्च भिन्नतया शकलतश्चागाद् कथं तावद्दूरे पतितमित्यर्थः ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

नन्दव्रजस्थानां भगवदीयत्वात्तत्पूजनं चेत्स्यात्रुदिताश्रवणं न स्यात्। किन्त्वन्यव्रजस्थानां तत्रापि केवलं भिक्षुकाणां तेन तथेत्याशयेन ते चेत्सन्त इत्याद्युक्तम् ॥ ६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

नन्दस्य पत्नीत्यत्रान्यथेत्यादि, ज्ञानशक्तिसङ्कोचाभावे भगवन्तं ज्ञात्वा स्तुत्यादिकमेव कुर्वीरन्निति भावः ॥ ५ ॥ औत्थानिकेत्यत्रैवं कृत इति भगवता नेत्रनिमीलने कृते, ते चेत् सन्त इत्यस्यार्थं टिप्पण्यामाहुर्नन्दव्रजेत्यादि, सुबोधिन्यामाहुरेति श्रीधरव्यतिरिक्ताष्टीकाकाराः, एतत्कल्पव्यस्थामाहुरत्रस्वित्यादि, नाशितमितिशेषः, तर्हि नाशनस्य किं प्रयोजनमत आहुस्तद्धर्मेत्यादि, तेषामसुराणां सम्बन्धिनो धर्मा येषु ते लौकिकपदार्थास्तेषु योभिनिवेशो यशोदादीनां स एव शकटभञ्जनेन नाशित इति शकटेन शकटद्वारासुरखण्डन इति व्युत्पत्त्या शकटासुरखण्डन इति नामसम्भवादासुरनाशनमेव प्रयोजनमित्यर्थः, ननु 'पूतनासुपयःपान' चरित्रेण मूलाविद्या पूर्वाध्याय एव नाशितेति मातृचरणानां कुत आसुराभिनिवेश इत्यत आहुः साधारणेत्यादि, लालोपयोगिन्याः अविद्याया मूलाविद्यायाश्च ये साधारणा धर्मास्तेषां त्यागासम्भवात्, यथा निमन्त्रितेषु भोजनार्थमागतेषु तत्सङ्ग सजातीयस्यान्यस्यागमने सोपि भोज्यते न तु त्यज्यते तद्वत् त्यागासम्भवात् तथा च साधारणबलेनासुराभिनिवेश इत्यर्थः, सेति तच्छब्दस्य तात्पर्यान्तरमाहुरश्रवण इत्यादि, अनेनेति चरणोत्क्षेपणेन, परिहृतमिति क्रियैकसाध्ये कार्ये मनसः प्रयोजकमात्रत्वेन प्रवेशात् परिहृतमित्यर्थः, स्वार्थ इति स्वस्यार्थः प्रयोजनं यत्र तादृश इत्यर्थः, स्वार्थत्वे गमकमाहुरन्यथेत्यादि, परार्थानामिति निरोध्यानां, प्रयोजनं स्फुटीकुर्वन्ति तत्रेत्यादि, ननु यथा भगवद्भक्तस्थित्या पूतनाहृदयस्य भगवत्क्रीडास्थानत्वं तथा पूतनासम्बन्धेन तद्गृहीतानां बालानां दुष्टत्वमपि सम्भाव्यत इति किं तेषामन्नदानेनेत्यत आहुर्दुष्टत्वमित्यादि, मास्तु दुष्टत्वं तथापि पोषणस्य किं प्रयोजनमत आहुस्तानित्यादि, शेषं स्पष्टं, इदं शकटभङ्गचरित्रं पद्मपुराण आश्विनशुक्लदशम्यामुक्तं, तथा सति भगवान् सार्धमासो भवति तदत्र नाभिप्रेतं 'त्रैमासिकस्ये'तिवाक्यविरोधादतस्तत् कल्पान्तरीयमिति ज्ञेयम् ॥ ६ ॥ अधः शयानस्येत्यत्र पल्यङ्के शायित इतीदं विष्णुपुराण उक्तं न तु 'प्रेङ्खपर्यङ्के' इति ज्ञातव्यं, तथाबुद्धिरित्यादि भगवता स्वस्मिन् शिशुत्वबुद्धिः सम्पादितेति न तद्विरुद्धकरणमित्यर्थः, भगवत्कृतेः केवललौकिकत्वासम्भवात् समभिव्याहारलभ्यं परमार्थं व्याकुर्वन्ति संसारकालचक्रेत्यादि, भक्त्येकदेशेनापि प्रत्येकेन श्रवणादिनापि संसारशकटकालचक्रोभयसङ्ग्राहकश्चाक्षस्थानीयोहङ्कारस्तथा भवति, तत्र हेतुमाहुः क्रियाशक्तेरित्यादि

क्रियाशक्तेर्भगवद्भजनस्य "साङ्कृत्यं पारिहास्यं वे"तिवाक्येन महत्त्वात् तथात्वं सर्वोपमर्दकत्वमुचितमेवेत्यर्थः, **कूबर उपस्थान**मित्यादि, **कूबरः**, पुनः 'कुब्जे युगन्धरे रम्य' इतिहैमकोशात् कूबरपदं कुब्जवाचकं, रम्यत्वाद्यवस्थानमपि सङ्गृह्णाति ततो मत्वर्थीयो 'शं आदिभ्यो'जिति सूत्रेणाच्प्रत्यये तेषामाकृतिस्तत् कूबरं विना कालेन भिन्नं यस्य तद् विभिन्नकूबरं भवत्येव, तत्र प्रकारमाहुः **स्वभावत** इत्यादि, **सिद्धमाहुरनेने**त्यादि **शकटभङ्गचारित्रेण**, तद्गृहमविद्याकृतसंसारजनकं लौकिकं गृहमेव दूरीकृतवानित्यर्थः, तथा च शकटं न नाशितं किन्तु तल्लौकिकमेव नाशितमित्यनया रीत्यापि 'शकटासुरखण्डन इति नाम सङ्गच्छत इत्यभिप्रायो बोध्यः ॥ ७ ॥ **दृष्ट्वे**त्यत्र **गोपिकानामिति** स्वामिनीनां, तथा च स्वामिन्यो नात्रेदानीं समागता इति बोध्यं, **मुख्या** इति श्रीरोहिणीप्रमुखाः ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नन्दस्येत्यत्र **व्रत** इति कार्यस्यावश्यकत्वाद्धेतोस्तत्करणार्थं, शयनं कारितवतीत्यन्वयः, **आप्लाविति** वैदिकमन्त्रैर्मङ्गलस्नानं निष्क्रमणात् पूर्वं प्रातरेव कृतं, अधुना मन्त्रैः प्रोक्षणमात्रं विधाय स्नानं लौकिकोत्सवपुरःसरमभिप्रेत्य सर्वोऽप्युत्सवप्रकार उक्त इति ज्ञेयम्, **आभरणानीति** बाललीलायामावश्यकानि सर्वदा परिधेयानि नूपुरादीनीत्यर्थः, **परमार्थसर्वदृष्टिरिति** निद्रायास्तात्पर्यं पूर्वमुक्तमत्र समुपसर्गस्यार्थ उच्यते, भगवन्मातृकृतपूजा न योग्येत्यपि दृष्टिर्न जाता, तथा च परमार्थविषयिणी सर्वा भगवदीयस्वरूपविषयिण्यपि दृष्टिस्तिरोहितेत्यर्थः ॥ ५ ॥ **औत्थानिकौत्सुक्ये**त्यत्र **मनस्विनीति** मत्वर्थीयोऽतिशायने इत्यभिप्रेत्याहुः **अभिमानवतीति** मनोबुद्धिश्चित्तमहङ्कार इतिक्रमान्मनसश्चतुर्थी अवस्था अहङ्कार इत्याशयः । भूयिष्ठतामसस्थित्या व्रजस्य तामसत्वमित्याशयेनाहुः **तामसभूयिष्ठे एवेति**, तामसा भूयिष्ठा यत्रेति, केचनान्येऽपि सन्तीति भूयिष्ठपदं, **तां पदवीमिति** भगवन्मातृकृतपूजामित्यर्थः, **शकटमात्रत्वे** तथा न कुर्यादित्याशयेन पक्षान्तरमाहुः **तद्धर्मानीति**, तद् व्युत्पादयन्ति **साधारणेति**, आसुरधर्माभिनिवेशाभावे **साधारणानां धर्माणां** शकटनिष्ठचक्राक्षादीनां **परित्यागं** वृथैव भगवान् न कुर्यादित्यर्थः, **पूर्वं रोदनमिति** शकटभङ्गात् पूर्वमित्यर्थः, **अन्यथेति** बहिर्मुखत्वाभावे **मनसैव कथं न कुर्यात्**, निरोधमिति शेषः, किमिति रोदनं कुर्यादित्यर्थः, मनसैव निरोधाकरणे हेत्वन्तरमप्याहुः **अयं चेति**, स्वस्य स्तनसम्बन्धरूपार्थो यस्मात् तादृशोऽयं निरोधः, तथा च मनसैव निरोधकरणे स्तनपानं न सिद्ध्येत्ततस्तत्सिद्ध्यर्थं रोदनेन निरोधकरणं न मनसेत्यर्थः, **स्वविनियोगेति** स्वेषु स्वकीयेषु विनियोग इत्यर्थः, **तेषामन्नार्थमिति** तेषामन्नसिद्ध्यर्थं भगवतः स्तनापेक्षा स्वस्य तु तदपेक्षाभावस्योक्तत्वात् पूर्वोक्तमेव प्रयोजनमिति स्तनमात्रार्थित्वमुक्तमितिभावः, **ज्ञानं चोपदेष्टुमिति** रमणोपयोगि ज्ञानं सम्पादयितुमित्यर्थः, इदं समारोपणकालिकमेवेति पूर्वोक्तेन समुच्चयबोधनाय चकारोऽत्र, तादृशज्ञानयुक्तानां तेषां तासु स्थापने तासामपि तावत्ज्ञानसम्पत्तिरन्यथा तासामप्रौढत्वेन तावत्प्रकारज्ञानाभावात् पूर्णरसदानं न भवेत्, शुद्धान्नसम्बन्धे तादृशज्ञानाधिकारो भवति, अधिकारं विना च तत् ज्ञानं तेषां पुंस्त्वादनर्थपर्यवसायि स्यादितिभावः, **सर्वथा निर्दुष्टमिति** मोक्षदातृवासुदेवव्यूहजनितत्वादितिभावः, **अवतारेति** अनवतारदशायां "सर्वतः पाणिपादान्तत्वा"दितिभावः, **प्रतिपुष्टा** निरोधलीलास्थानामितिशेषः ॥ ६ ॥ **अधःशयानस्ये**त्यत्र **तद्गतानामिति** अङ्घ्रिणा शकटस्यैव नाशो न तु कुप्यादिष्वप्यङ्घ्रिसम्बन्धः, तथा च शकटनाशादग्रे तेनैव तेषां नाश उत्तरार्धे वक्ष्यते इत्यर्थः, **विशेषेणेति** मूले विना भिन्नमितिविग्रहः, अत्र विपदं कालवाचकं, तथा च कालात्मको विशेषो भगवच्चेष्टारूपो धर्मस्तेन भिन्नमित्यर्थः ॥ ७ ॥ **दृष्ट्वे**त्यत्र **गोपिकानामिति** एतासां तु लीलाज्ञानं भविष्यत्यत एव 'तोकायित्वा रुदन्त्यन्ये'तिप्रकारकानुकरणं करिष्यन्ति इति हेतोर्गोपिकाव्यावृत्त्यर्थं व्रजमात्रस्य स्त्रिय इत्याहेत्यर्थः ॥ ८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

नन्दस्य पत्नी **कृतमज्जनादिक**मित्यस्य विवृतौ **आदौ स्त्रीणामाकारणं कृत्वे**त्यारभ्य **सर्वाभरणभूषितं विधाये**त्यन्तं मूले कृतमज्जनादिकमित्यत्र आदिशब्द उक्तस्तस्येदं विवरणं ज्ञेयं, सञ्जातनिद्राक्षमित्यस्य व्याख्याने, **अन्यथा आशिष** इति यदि ज्ञानशक्तेः सङ्कोचो न स्यात् तर्हि भगवन्तं पूर्णब्रह्म ज्ञात्वा आशीर्वादं न कुर्युस्तथा सति बाललीलारसानुभवो न स्यादतः सञ्जातनिद्राक्षतया ज्ञानशक्तेः सङ्कोच इत्यर्थः, **तद्धर्माभिनिवेश** इति शकटे आसुरधर्माभिनिवेश इत्यर्थः, आसुरधर्माभिनिवेशे प्रमाणमाहुः **साधारणधर्माणा**मित्यादि, यदि आसुरधर्माभिनिवेशस्तत्र न स्यात् तदा तेषां शकटधर्माणां चक्राक्षादीनां त्यागं भगवान् न कुर्यात्तत्त्यागान्यथानुपपत्त्यैव शकटधर्मेषु चक्राक्षादिष्वासुरधर्माभिनिवेशः कल्पनीय इत्यर्थः, **एवं कृते स्वानुषङ्गिकं जातमिति न क्लिष्टमिति** स्तनार्थित्वेन बाललीलया चरणोत्क्षेपे शकटभङ्गो जातो न तु तदुद्देशेन चरणोत्क्षेपः, अतो भगवतः कर्म अक्लिष्टमेव, अनेन "कृष्णमक्लिष्टकारिण"मित्यादिवचांसि समर्थितानि ॥ ५ ॥ अधःशयानस्येत्यस्य विवृतौ **तथाबुद्धिः सम्पादितेति नान्यथाकरणमिति** अयं नन्दनन्दन उत्थानासमर्थः शिशुत्वादित्याकारिका बुद्धिर्भगवतैव सम्पादितातो नान्यथाकरणं भगवता उत्थाय न किञ्चित् क्रियत इत्यर्थः, **अङ्घ्रिणा हतमितिसमास** इति "त्रैमासिकस्य च पदा शकटोऽपवृत्त" इति द्वितीयस्कन्धे परमेष्ठिवाक्ये एकेन पदाघात उक्तः, अतोऽत्राप्यङ्घ्रिणा हतमित्येकवचनान्तेन समासे कृते उभयत्राविरोधः सिद्धः, विभिन्नकूबरमित्यस्य विवृतौ तद्

विशेषेण कालात्मकेन भिन्नं भवत्येवेति विशब्दस्य कालवाचकत्वात्, "योयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहु"रितिदेवकीवाक्याद् भगवच्चेष्टायाः कालात्मकत्वात् कालात्मिकया भगवच्चरणचेष्टया भिन्नं भवतीत्यर्थः ॥ ७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्नादिभिः सुपूजितैः सत्कृतैर्विप्रैः कृतस्वस्त्ययनं कृतरक्षाबन्धनादिकं सञ्जातनिद्राक्षं सञ्जातनिद्रे अक्षिणी यस्य तं बालं नन्दस्य पत्नी यशोदा शनैर्निद्राभङ्गो यथा न स्यात्तथा आशीशयत् शकटस्याधस्तात् प्रेङ्खे शायितवतीत्यर्थः । 'नन्दस्य पत्नी' इत्यनेन, उत्सवे समागतानां सन्माननमवश्यतया कर्तव्यम्, अन्यथा तेषां वैमनस्यं स्यात् इति सूचितम् । 'कृतमज्जनादिकम्' इत्यादिशब्देन वस्त्राभरणादि परिधाप्य कस्तूरीगोरोचनतिलकादिकरणं गृह्यते । अन्नं च आद्यं तदुपकरणं च । 'अन्नाज्य' इति पाठे तु अन्नं च आज्यं च घृतं च वासांसि च स्रक्माला च अन्यच्चाभीष्टं प्रार्थितं येनवस्त्र तैः ॥ ५ ॥ औत्थानिके उत्थानोत्सवे औत्सुक्यमुत्साहयुक्तं मनो यस्याः सा । तत्र हेतुमाह–मनस्विनीति । उदारचित्ता सा यशोदा समागतान् व्रजौकसो वस्त्रालङ्कारादिभिः पूजयती सती सुतस्य रुदितं निश्चयेन नैवाशृणोत् । नच श्रुत्वाऽपि कार्यव्यग्रतयोपेक्षितवती । भगवांस्तु स्तनार्थी सन् रुदन् चरणावुदक्षिपत् ऊर्ध्वं चालितवान् ॥ ६ ॥ तदा शकटस्याधः शयानस्य शिशोरल्पकः अल्पप्रमाणश्चासौ प्रवालवन्मृदुश्च योऽङ्घ्रिस्तेन हतम्, अत एवातिध्वस्तानि नानारसवन्ति कुप्यभाजनानि स्वर्णरजतातिरिक्तकांस्यादिमयानि पात्राणि यथा भवन्ति तथा । तथा चक्रे च अक्षश्च चक्राक्षाः, व्यत्यस्ताश्चक्राक्षा यस्मिन् विभिन्नः कूबरो युगन्धरो यस्मिंस्तच्च तच्च यथा भवति तथा च अनः शकटं व्यवर्तत विपरीतमपतत् ॥ ७ ॥ यशोदा प्रमुखा यासां ता या औत्थानिके कर्मणि समागता व्रजस्त्रियः नन्दादयो गोपाश्च सर्वेऽपि जनाः तत् पतितं शकटं दृष्ट्वा तत्पतनमद्भुतमाश्चर्यजनकम्, अतस्तस्य दर्शनेनाकुलाः सम्भ्रान्ताः तथोत्पातशङ्कयाऽतिविषादेन दुःखेन मोहिताश्च सन्तः "कथं वै शकटं स्वयमेव विपर्ययात् विपरीतमपतत्" इति ब्रुवन्तः शकटं बालं च समन्तात् सर्वतः आर्तवत् परिवव्रुः परिवेष्टितवन्त इति सार्धान्वयः । क्वचित् 'इति ब्रुवन्त' इति श्लोकार्द्धं नास्ति । तत्र विपर्ययात् इत्यूचुरिति क्रियाविशेषणान्वयः ॥ ८ ॥

अन्वितार्थप्रकाशिका

नन्दस्येति ॥ कृतं मज्जनादि स्नानादि यस्य तम् आदिशब्देन वस्त्राभरणकस्तूरीतिलकादि गृह्यते । अन्नं च आद्यम् अदनीयं तदुपकरणं च । अन्नाज्येति पाठे तु अन्नं च आज्यं घृतं च वासांसि च स्रक् माला च अन्यच्चाभीष्टं प्रार्थितं येनवस्च तैः अन्नादिभिः सुपूजितैः सत्कृतैर्विप्रैः कृतस्वस्त्ययनं कृतरक्षाबन्धनादिकं सञ्जातनिद्राक्षं सञ्जातनिद्रे अक्षिणी यस्य तं बालं नन्दस्य पत्नी यशोदा शनैर्निद्राभङ्गो यथा न स्यात्तथा अशीशयत् शकटस्याधस्तात्प्रेङ्खे पर्यङ्के वा शायितवती ॥ ५ ॥ औत्थानिकेति ॥ औत्थानिके उत्थानोत्सवे औत्सुक्यमुत्साहस्तद्युक्तं मनो यस्याः मनस्विनी उदारचित्ता सा यशोदा बालान् स्वपुत्रपार्श्वे संस्थाप्येति ज्ञेयम् । समागतान् व्रजौकसो वस्त्रालङ्कारादिना पूजयती सती । नुमभाव आर्षः । तद्व्यापारासक्ता सुतस्य रुदितं नैवाशृणोत् । भगवांस्तु स्तनार्थी सन् रुदन् चरणावुदक्षिपत् ऊर्ध्वं चालितवान् । यदि मद्रोदनशब्देन नावदधासि तर्हि शकटस्फोटनशब्देनावधापयामि इति कुप्यन्निव शकटं भङ्क्तुं तथा कृतवान् ॥ ६ ॥ अधः इति ॥ तदा शकटस्याधः शयानस्य शिशोरल्पकः अल्पप्रमाणश्चासौ प्रवालवन्मृदुश्च योऽङ्घ्रिस्तेन हतमत एव विध्वस्तानि नानारसवन्ति कुप्यभाजनानि स्वर्णरजतातिरिक्तकांस्यादिमयानि पात्राणि यथा भवन्ति तथा । चक्रे च अक्षश्च चक्राक्षाः व्यत्यस्ताश्चक्राक्षा यस्मिन् विभिन्नः कूबरो युगन्धरो यस्मिंस्तच्च तच्च यथा भवति तथा अनः शकटं व्यवर्तत विपरीतमपतत् । शकटासुरभञ्जन इति ब्रह्माण्डपुराणगतभगवन्नामशतकस्तोत्रवचनात् । असुरावेशेनैव भूमौ प्रविशच्चक्रत्वादुच्चस्यापि शकटस्याल्पकेन चरणेन स्पर्शः दैत्यश्चान्तर्हित एव समारेति ॥ ७ ॥ दृष्ट्वेति यशोदा प्रमुखा यासां ताः या औत्थानिके कर्मणि समागताः । पर्वणीत्यपि पाठः । व्रजस्त्रियः नन्दादयो गोपाश्च सर्वेऽपि जनाः तत्पतितं शकटं दृष्ट्वा तत्पतनमद्भुतमाश्चर्यजनकमतस्तस्य दर्शनेनाकुलाः संभ्रान्ताः तथोत्पातशङ्कयाऽतिविषादेन दुःखेन मोहिताश्च सन्तः कथं वै शकटं स्वयमेव विपर्ययात् विपरीतमपतदिति ब्रुवन्तः शकटं बालं च समन्तात् सर्वतः आर्तवत्परिवव्रुः परिवेष्टितवन्त इति सार्धान्वयः । क्वचिदिति ब्रुवन्त इति श्लोकार्द्धं नास्ति । तत्र विपर्ययात् इत्यूचुरिति क्रियाशेषेणान्वयः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पत्नी यशोदा कृतस्नानादिकम् अन्नम् अपक्वान्नम् अद्यं पक्वान्नं च तत्प्रभृतिभक्ष्यादिभिः वासोमुख्यैश्च सुपूजितैः विप्रैः कृतस्वस्त्ययनं कृतमङ्गलं संजातनिद्रे नेत्रे यस्य तं बालकं शकटस्याधोभूते प्रेंखे अशीशयत् ॥ ५ ॥ औत्थानिके अंगपरिवर्त्तनकर्मकरणीये उत्सवे उत्सुक्यमनाः आनंदभरव्याप्तमनाः सा यशोदा सुतस्य रुदितं नैवाशृणोत् स्तनपानार्थी सुतः रुदन् सन् चरणौ उदक्षिपत् ऊर्ध्वं चिक्षेप ॥ ६ ॥ शकटस्याधः शयानस्य बालस्य अल्पको यः प्रवालवत् नवांकुरवत् मृदुश्चासावंघ्रिश्च तेन हतम् अनः शकटं व्यवर्त्तत विपरीतम् अपतत् कथं विपरीतं पतितं विध्वस्तानि भग्नानि नानारसवंति कुप्यभाजनानि कनकरजतेतरकांस्यादिमयानि यथा भवंति तथा चक्रे द्वे रथांगे च अक्षश्च चक्राक्षाः व्यत्यस्ता विपरीताश्चक्राक्षा यस्मिन् विभिन्नः कूबरो युगंधरो यस्य तच्च

तत्र यथा भवति तथा व्यवर्त्तत ॥ ७ ॥ औत्थानिके अंगपरिवर्तनोत्सवरूपे अस्याश्चर्यदर्शनेनाकुलाव्याकुलचिता अभूवन् कथं विपर्ययात् विपरीतं ययातेति जगृहुः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं राज्ञा पृष्टो मुनिरन्यान्यपि तद्बालचेष्टितानि विवक्षुस्तावच्छकटासुरवधात्मकं चेष्टितं वर्णयति कदाचिदित्यादिनैकदेत्यतः प्राक्तनेन ग्रन्थेन ॥ कदाचिदिति ॥ कदाचित्, उत्थानं गृहाद्बहिः शिशोर्निष्क्रमणं तत्संबन्ध्यौत्थानिकं यत् कौतुकमुत्सवस्तेन हेतुना आप्लवः शिशोः स्नानविधापनं यस्मिंस्तस्मिन्, जन्मर्क्षस्य रोहिणीनक्षत्रस्यापि योगो यस्मिंस्तस्मिन्, महोत्सवे इति शेषः। समवेतयोषितां समुदितानामङ्गनानां मध्ये, सती यशोदा, वादित्रवादनानि च गीतानि पद्यगीताचरणानि च द्विजमन्त्रवाचकानि ब्राह्मणविहितमन्त्रोच्चारणानि च तैः, शोभितं, सूनोः, अभिषेचनं संस्नापनं, चकार ॥ ५ ॥ नन्दस्येति ॥ अन्नानि भोज्यानि च अद्यानि भक्षणीयानि च वासांसि वस्त्राणि च स्रजो मुक्तादिमालाश्च अभीष्टानि तत्तदभीष्टवस्तूनि च धेनवो गावश्च ताभिः, सुपूजितैः सुतरामर्चितैः, विप्रैः, कृतस्वस्त्ययनं कृतमाङ्गल्यवचनं, कृतं मज्जनादिकं यस्य तं, आदिशब्देनाङ्गरक्षादिकं विवक्षितम्। संजातनिद्रे अक्षिणी यस्य तं सुतं, नन्दस्य पत्नी यशोदा, शनैः निद्राभङ्गभयादिति भावः। अशीशयत् शकटाधोवर्त्तिन्यां पर्यङ्किकायां शाययामास ॥ ६ ॥ औत्थानिकेति ॥ औत्थानिकं शिशोरभ्युत्थाननिमित्तो महोत्सवस्तस्मिन्नौत्सुक्यमुत्साहयुक्तं मनो यस्याः तथाभूता, मनस्विनी औदार्यप्रवणमनाः, सा यशोदा, समागतान् व्रजौकसः, पूजयती सती, सुतस्य रुदितं, न एव अशृणोत् नैव शुश्राव। स्तनार्थी स्तनपानकामः, अत एव, रुदन् बालकृष्णः, चरणौ द्वावप्यङ्घ्री, उदक्षिपदूर्ध्वमचालयत् वै ॥ ७ ॥ अध इति ॥ अधःशयानस्य असुराविष्टशकटाधोलम्बमानप्रेङ्खे शायितस्येत्यर्थः। शिशोः श्रीकृष्णस्य, अल्पकश्चासौ प्रवालवन्मृदुश्च योऽङ्घ्रिस्तेन हतं, अनः शकटं, व्यवर्त्तत विपरीतमपतत्। अन्तःप्रविष्टासुरभाराद्भूमौ चक्रप्रवेशपूर्वं तन्निकटप्राप्तिं संभाव्य भगवान् स्तनार्थीव रुदन् सन् तत् लत्तया प्रहृत्योत्पातयामास। अतस्तदनोऽदृश्यभावापन्नासुरं यथा तथाऽपतदिति भावः। शकटासुरभञ्जन इति ब्रह्माण्डपुराणोक्तेरेवं व्याख्यातम्। तद्यथाभूतं सद्व्यवर्त्तत तदेव दर्शयितुं तद्विशिनष्टि। विध्वस्तानि नानारसवन्ति कुप्यभाजनानि स्वर्णरजतव्यतिरिक्तकांस्यादिमयानि पात्राणि यथा भवन्ति तथा, चक्रे च अक्षश्च चक्राक्षाः व्यत्यस्ताश्चक्राक्षा यस्मिन् विभिन्नः कूबरो युगंधरो यस्य तत्र तत्र यथा भवति तथा, व्यवर्त्तत ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नन्दस्येति : १०. ७. ५.

शिष्टाचार इतीदृगित्युपगतप्रज्ञो जनो मामयं स्नेहार्द्रं कुरुतेऽथवाऽनुपधिकं प्रेमधिकामो मयि।
आस्ते इत्यपहाय कार्यमपरं पश्यामि तूष्णीं किमित्यासीन्मीलितदृक् शयालुरिव तत्सत्यावगत्यै प्रभुः ॥ २ ॥

श्रीनाथकौत्थानिकमङ्गलेऽस्मिन् प्राप्ताः समग्रा अपि गोपवध्वः।
मह्यं सुखं तत्र कथं मयेति निद्राशनैरीशदृशं किमागात् ॥ ३ ॥

औत्थानिकेति : १०. ७. ६.

उपस्थितं शत्रुमनोविभक्तुं जिगीषुणोत्थानविधिर्विधेयः।
इतीव तादृक् चरितं चिकीर्षुरुत्थानलीलां श्रितवान् पुरेशः ॥ ४ ॥

अनुभूय सुखं यान्तीं निद्रामालक्ष्य माधवः। रोदनच्छलतो मन्ये वसुना सत्कृतां व्यधात् ॥ ५ ॥

अनिवेद्य मां यदि कृतो मदुत्सवो न स तोषकृद्भवति मे स्विति प्रभुः।
भुवि बोधयन् स्वहितमार्गदर्शकः किमभूत्तदा स्तनजपानसस्पृहः ॥ ६ ॥

विभाव्य शूद्रनैपुण्यमनसः सदसत्कृतौ। युक्तं तत्राच्युतश्चक्रे तद्धेतुस्वाङ्घ्रियोजनम् ॥ ७ ॥
युष्मत्कन्याऽवनं कर्तुं मम साहाय्यवर्तनम्। भवतोर्युक्तमित्यङ्घ्री सूचयंस्तावुदक्षिपत् ॥ ८ ॥

अधः शयानस्येति : १०. ७. ७.

अव्ययमपि शंकटयति यः स पुरो मे समुच्छ्रितोऽस्ति कथम्।
इति शुभवितरणशीलः सरुषाऽहिंसीत् पदेन किमु शकटम् ॥ ९ ॥

किमर्थमग्रे ह्यल्पस्य समग्रबलदर्शनम्। कार्यमित्यच्युतस्तत्र पादेनैव जघान तम् ॥ १० ॥
अहर्निशमसज्जनस्खरप्रखरदत्तपीडा भुजां सतामतनुसङ्कुलन् नयनबाष्पवृष्टिच्छिदम्।
सुरार्यशुभसूचकं भुवि शनैश्चरेणाङ्घ्रिणा प्रभुः किमु स रोहिणीशकटभेदमद्धा करोत् ॥ ११ ॥

कृत्वाऽभिसादू वल्लवमल्लतल्लजैर्वकीकटं यच्छमितं प्रसह्य ।
पुनस्तदेवेदमिहोच्छ्रितं किमित्यद्धाऽकरोत्तच्छकटं विभिन्नम् ॥ १२ ॥

स्वीकृत्याधःस्थितिं पूर्वं ततश्चरणयोगतः । अधःपातं नयेच्छत्रुं क्षणादित्यकरोत्स्फुटम् ॥ १३ ॥

दुःखोद्रेकात्कृतमपि साधोः कर्मारिभञ्जनायैव । भवतीत्यबोधि हरिणा स्वपदध्वस्तानसा क्षुधार्तेन॥१४॥

अस्मिन् साधुसमुत्सवेऽद्य शकटस्याधः स्थितिर्मेऽधुना भव्या नेति विभाव्य तेन तदधःस्थं यत्कृतं साधु तत् ।
युक्तं चैतदपि प्रभंजनपदं नीतं तदानीं ततः चित्रं जातमधोगमप्यलमनो योग्यूर्ध्वधामस्थितम् ॥ १५ ॥

यश्चिन्तयत्यतिखलस्त्वदनिष्टमस्य सिद्धेव दुर्गतिरधोगतितः पृथिव्याम् ।
व्यक्तं तदेतदखिलं भगवन् यदुच्चं त्वद्द्वेषकृच्छकटमेव तदा तथासीत् ॥ १६ ॥

रिपुजातमनो विभङ्गमाशु स्वजनव्रातमनः सुखस्थितिं च ।
युगपन्नयताऽच्युतेन दिष्टं नयवर्त्म द्वितयार्थिनी क्रियैका ॥ १७ ॥

कृष्णप्रिया

नन्दरानी यशोदाजी ने ब्राह्मणों का खूब पूजन-सम्मान किया। उन्हें अन्न, वस्त्र, माला, गाय आदि मुँहमाँगी वस्तुएँ दीं। जब यशोदा ने उन ब्राह्मणों द्वारा स्वस्तिवाचन कराकर स्वयं बालक के नहलाने आदि का कार्य सम्पन्न कर लिया, तब यह देखकर कि मेरे लल्ला के नेत्रों में नींद आ रही है, अपने पुत्रको धीरे से शय्या पर सुला दिया ॥ ५ ॥ थोड़ी देर में श्यामसुन्दर की आँखें खुलीं, तो वे स्तन-पान के लिये रोने लगे। उस समय मनस्विनी यशोदाजी उत्सव में आये हुए व्रजवासियों के स्वागत सत्कार में बहुत ही तन्मय हो रही थीं। इसलिये उन्हें श्रीकृष्ण का रोना सुनायी नहीं पड़ा। तब श्रीकृष्ण रोते-रोते अपने पाँव उछालने लगे ॥ ६ ॥ शिशु श्रीकृष्ण एक छकड़े के निचे सोये हुए थे। उनके पाँव अभी लाल-लाल कोपलों के समान बड़े ही कोमल और नन्हे-नन्हे थे। परन्तु वह नन्हा सा पाँव लगते ही विशाल छकड़ा उलट गया। उस छकड़ेपर दूध-दही आदि अनेक रसों से भरी हुई मटकियाँ और दूसरे बर्तन रक्खे हुए थे। वे सब के सब फूटफाट गये और छकड़े के पहिये तथा धुरे अस्त व्यस्त हो गये, उसका जूआ फट गया ॥ ७ ॥ करवट बदलने के उत्सव में जितनी भी स्त्रियाँ आयी हुई थीं, वे सब, और यशोदा, रोहिणी, नन्दबाबा और गोपगण इस विचित्र घटना को देखकर व्याकुल हो गये। वे आपस में कहने लगे—'अरे, यह क्या हो गया? यह छकड़ा अपने-आप कैसे उलट गया?' ॥ ८ ॥

[1]ऊचुर[2]व्यवसितमतीन् गोपान् गोपीश्च बालकाः । रुदतानेन पादेन क्षिप्तमेतन्न संशयः ॥ ९ ॥
न ते श्रद्दधिरे गोपा बालभाषितमित्युत । [3]अप्रमेयं बलं तस्य बालकस्य न [4]ते विदुः ॥ १० ॥
रुदन्तं सुतमादाय यशोदा ग्रहशङ्किता । कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् ॥ ११ ॥
पूर्ववत् स्थापितं गोपैर्बलिभिः सपरिच्छदम् । विप्रा हुत्वार्चयांचक्रुर्दध्यक्षतकुशाम्बुभिः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—अव्यवसितमतीन् गोपान् गोपीः च बालकाः रुदता अनेन पादेन एतत् क्षिप्तं न संशयः (इति) ऊचुः ॥ ९ ॥ बालभाषितम् इत्युत ते गोपाः न श्रद्दधिरे ते तस्य बालकस्य अप्रमेयं बलं न विदुः ॥ १० ॥ ग्रहशङ्किता यशोदा रुदन्तं सुतम् आदाय विप्रैः सूक्तैः कृतस्वस्त्ययनं स्तनम् अपाययत् ॥ ११ ॥ बलिभिः गोपैः पूर्ववत्स्थापितं सपरिच्छदम् विप्राः हुत्वा दध्यक्षतकुशाम्बुभिः अर्चयाञ्चक्रुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अव्यवसितमतीननिश्चितमतीन्संशयारूढानित्यर्थः ॥ ९ ॥ न श्रद्दधिरे विश्वासं न जग्मुः । उत अपि । बालस्यैतन्न संभवति एते च बालाः किं जानंतीति ॥ १० ॥ रक्षोघ्नैः सूक्तैः कृत्वा ॥ ११ ॥ भगवत्प्रभावानभिज्ञविप्रचेष्टितं विडंबयन्नाह पूर्ववदित्यादिना । बलिभिः शक्तैः । यद्वा अष्टदिक्षु बलिभिः सहितं सपरिकरं यथा पूर्वं स्थापितं विप्राः दध्यादिभिरर्चयामासुः । हुत्वा ग्रहादिहोमं विधाय ॥ १२ ॥

---

१. इति ब्रुवन्तोऽतिविषादमोहिता जनाः समन्तात्परिवव्रुरातंवत्—वीर. विज. पाठे इदमर्धमधिकम् । २. तदोचुरव्यक्तमतीन्—वीर. ; ऊचुस्तदव्यक्तमतीन्—विज. । ३. अनन्तस्याप्रमेयस्य बलं तस्य—विज. । ४. न वै विदुः—वीर. विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अव्यवसितमतीन् अनिश्चितबुद्धीन्। अनेन शकटाधःस्थप्रेङ्खस्थेन ॥ ९ ॥ एतच्छकटपातनम्। अप्रमेयं प्रमातुमशक्यमिदमिति ज्ञातुमशक्यम्। तस्य कृष्णस्य। ते गोपाः ॥ १० ॥ ग्रहशंकिताय केनचिद्ग्रहेण रक्ष आदिनेदं पातितमिति शंकाकुलाः। रक्षोघ्नैः "कृणुष्वपाज—" इत्यादिमंत्रैः "रक्षोहणम्वलगहनम्" इत्यादिभिश्च ॥ ११ ॥ बहवस्तु निर्बला अपि महत् कार्यं कुर्वंति 'बर्वटतृणहस्तिबंधनन्यायेन' पुनर्बहुभिरिति बहुत्वस्य चमत्कृत्यनाधायकत्वादर्थांतरमाह—यद्वेति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अद्भुतदर्शनाकुलत्वादेव अव्यवसिता किं दैत्येन ग्रहादिना वेत्यादि विवर्त्तनकरणोन्नयने निश्चयमगता मतिर्येषां तान् बालकांस्तन्माधुरीकृष्टचित्तत्वेन तदेकदृष्टयः एतच्छकटम् अनेनेति एतदिति च प्रत्यक्षत्वं तत्कालीनत्वञ्च सूचयति अत एवाहुः संशयोप्यत्र नास्ति किमुताप्रतीतिरित्यर्थः ॥ ९ ॥ ते परमभगवत्प्रियत्वेन सर्वज्ञानयोग्या अपीत्यर्थः। अप्रमेयं भगवत्तया विशेषतस्तु बाललीलाविष्कारेण तर्कागोचरं बलं न विदुः ततो न श्रद्दधिरे च तत्र पुनस्ते इति हेत्वन्तरं पुत्रभावमयतत्प्रेमानन्दमत्ता इत्यर्थः। तादृशतत्प्रेम्णः सर्वाच्छादकत्वादिति भावः—

"श्रुत्वैतद्भगवान् रामो विपक्षीयनृपोद्यमम्। कृष्णं चैकं गतं हर्तुं कन्यां कलहशङ्कितः ॥
बलेन महता सार्द्धं भ्रातृस्नेहपरिप्लुतः। त्वरितः कुण्डिनं प्रागात् गजाश्वरथपत्तिभिः ॥"

इति श्रीबलदेवस्यापि तथात्वश्रवणात् "नेमं विरिञ्च" इत्यादौ तस्य स्तुतेश्च ननु, तादृशप्रेमवैवश्येन स्वतोऽनुसन्धानं नाम मास्तु अन्येषामुक्त्या सम्भवेदित्याशङ्क्य हेत्वन्तरमाह—उत अपि बालभाषितमित्यतोपीति गोपा अपि न श्रद्दधिरे किमुत गोप्य इत्यर्थः ॥ १० ॥ अत एव विशेषतः श्रीयशोदायाः स्नेहभरेण चेष्टितमाह—रुदन्तमिति। ग्रहेभ्यो बालग्रहादिभ्यः विप्रैः कर्तृभिः सूक्तैः रक्षोघ्नादिभिः करणैः "रक्षोहणो बलगहनः" इत्यादिभिः पश्चादाश्वस्ता स्तनमपाययत् ॥११॥ श्रीनन्दानुवर्त्तिनां विप्राणामपि तादृश एव भाव इति दर्शयन्नाह-पूर्ववदिति। बलिभिर्बलवद्भिरित्यादिना शकटस्य परमगुरुत्वं बृहत्त्वञ्च दर्शितं तदुक्तं "तलोच्छिताम्रम्" इत्यादि अतस्तदधोनिस्सङ्कोचं माता पुत्रं शायितवती हुत्वा आदावनिष्टनिवृत्यर्थम् आज्येन व्याहृतिभिः सामान्यतो ग्रहहोमं विधाय पश्चाद्दधिमिश्रैरक्षतैः कुशसहितप्रोक्षणजलैश्च शकटमर्चयामासुः गोपजातीनां तदाश्रयप्रधानत्वात् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अद्भुतदर्शनाकुलत्वादेवाव्यवसिता किं वृषेर्वात्यया दैत्येन गृहदोषेण वेत्यादि-विवर्तन-कारणोन्नयने निश्चयमगता मतिर्येषां तान्। एतत् शकटम्। अनेनेत्येतेन च प्रत्यक्षत्वं तात्कालिकत्वञ्च सूचयन्ति, अत एवाहुः-संशयोऽत्र नास्तीति ॥ ९ ॥ ते गोपा नन्दादयस्तस्य बालकस्याप्यप्रमेयं बलं न विदुः किम्? काका, विदन्त्येवेत्यर्थः, भक्तौ सर्वज्ञानसम्भवात्; तथापि न श्रद्दधिरे, बालोक्तौ विश्वासं न चक्रुः। कुतः? ते श्रीभगवत्प्रेमविवशा इत्यर्थः ननु, तादृशप्रेमवैवश्येन स्वतोऽनुसन्धानं नाम मास्तु, अन्येषामुक्त्या तु सम्भवेदित्याशंक्य हेत्वन्तरमाह-उतापि, बालभाषितमित्यतोऽपीति गोपा अपि न श्रद्दधिरे, किमुत गोप्य इत्यर्थः ॥ १० ॥ अत एव विशेषतः श्रीयशोदायाः स्नेहभरेण चेष्टितमाह-रुदन्तमिति, स्नेहविवृद्धय ईश्वरज्ञानानुदयार्थमेव तदानीमपि रोदनपरम्, अतो ग्रहेभ्यः शनैश्चरादिदृष्टितो बालग्रहादिभ्यो वा, किंवा, आग्रहो रोदनपरत्वम्, तेन शंकिता भीता सती, अतो विप्रैः कर्तृभिः सूक्तै रक्षोघ्नैर्मन्त्रविशेषैः कृत्वा; किंवा सुशोभनमुक्तमाशीर्वाद-क्षेम-प्रतिपादनादिलक्षणं येषां तैः कृतं स्वस्त्ययनं यस्य तथाभूतं सन्तं पश्चादाश्वस्तास्तनमपाययत् ॥ ११ ॥ श्रीनन्दानुवर्त्तिनां विप्राणामपि तादृश एव भाव इति दर्शयन्नाह-पूर्ववदिति। बलिभिर्बलवद्भिरित्यादिना शकटस्य परमं गुरुत्वं बृहत्त्वञ्च बोधितम्, अतस्तदधो निःशंकं माता पुत्रं शायितवती, अत एवाकस्माद्विवर्त्तनेन सर्वे व्याकुला बभूवुरित्युचितमेव। हुत्वा आदावनिष्ट-निवृत्त्यर्थमाज्येन व्याहृतिभिः सामान्यतो ग्रहहोमं विधाय पश्चाद्दधिमिश्रितैरक्षतैः कुशसहितप्रोक्षणजलैश्च शकटमर्चयामासुः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्येवं ब्रुवन्तः ब्रुवन्तश्च ब्रुवन्त्यश्च ब्रुवन्तः "पुमान्स्त्रिया" (१।२।६९) इत्येकशेषः अतीवविषादेन दुःखेन मोहिताः जना यशोदादयः आर्त्तवत् समन्तात् सर्वतः परिवव्रुः परिवेष्टिरे तदा अव्यक्ता शकटागमनतद्विपर्ययाद्यगोचरा मतिर्येषां तान् गोपान् गोपीश्च प्रति बालकाः श्रीकृष्णस्य समन्ततः क्रीडन्तो बालकाः ऊचुः, किमिति? एतच्छकटमनेन बालकेन कर्त्रा पादेन निक्षिप्तं विपर्ययं प्रापितमत्र न संशयः कार्य इति ॥ ९ ॥ ते नन्दादयो गोपा न श्रद्दधिरे विश्वासं न जग्मुः बालस्यैतन्न संभवत्येते च बालकाः किं जानन्तीति बालकस्याप्रमेयमपारं बलं च न वै विदुः ॥१०॥ ततो रुदन्तं सुतमादाय यशोदा बालग्रहशङ्किता कर्त्तरि क्तः बालग्रहमाशङ्कमाना ऽत एव विप्रैः कर्तृभिः सूक्तैः रक्षोघ्नमन्त्रैः करणैः कृतं स्वस्त्ययनं यस्य तं कृतानिष्टपरिहारककर्माणं शिशुस्तनमपाययत् ॥ ११ ॥ ततो बलिभिः शक्तैरथवाऽष्टदिक्षु बलिभिर्गृहशान्तिकारिभिः पूजात्मकैः सहितं सपरिकरं यथा पूर्वं स्थापितं विप्रा दध्यादिभिरर्चयामासुः हुत्वा ग्रहादिहोमं विधायार्चयाञ्चक्रुरित्यर्थः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अव्यक्तमतीननिश्चितबुद्धीन् न व्यक्ता मतिर्येषां तेऽव्यक्तमतयः तान् कुलवृद्धान् ॥ ९ ॥ बालभाषितवत् बालभाषितमिति विकल्प्य संशय्य "उताप्यर्थविकल्पयोः" इत्यमरः ॥ १०–११ ॥ स्थापितमन इति शेषः बलिभिः प्राणशक्तिमद्भिः सपरिच्छदं सपरिकरम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ते वात्सल्यपूर्णचित्ताः ॥ १०–१५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अव्यवसिता किन्दैत्यादेः किम्वा ग्रहादेः कर्मेदमित्यनिश्चिता मतिर्येषां ताम् ॥ ९ ॥ न श्रद्दधिरे न विश्वसन्ति स्म ॥१०॥ सूक्तैरक्षोघ्नमन्त्रैः कृतं स्वस्त्ययनं यस्य तम् ॥ ११ ॥ बलिभिर्बलवद्भिर्गोपैः पूर्ववदेव शकटं स्थापितमिति तस्य बृहत्त्वं व्यञ्जितम् अर्चयाञ्चक्रुरिति गोपजातीनां तदाश्रयप्रधानत्वात् सञ्चितधनास्पदत्वेन लक्ष्म्या अधिष्ठानत्वाच्च ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अव्यवसितमतीन् अलब्धशकटपतननिमित्तमतीन् ॥ ९–१० ॥ रक्षोघ्नैर्मन्त्रैः कृतं स्वस्त्ययनं मङ्गलं यस्य तम् ॥ ११ ॥ कर्मठविप्रस्वभावं प्रसङ्गात्सूचयति । बलिभिर्गोपैः सपरिच्छदं पूर्ववत्स्थापितं शकटं विप्राः हुत्वा ग्रहादिहोमं विधाय दध्यादिभिरर्चयाञ्चक्रुः ॥ १२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अव्यवसिता किं दैत्यानां किं वा ग्रहाणां कर्मेदमिति निश्चयशून्या मतिर्येषां तान् बालका ये मात्रा रक्षिण स्थापितास्ते बोध्याः ॥ ९ ॥ न श्रद्धिरे न विश्वसितवन्तः सर्वज्ञानयोग्या अपि बाल्याच्छन्नैश्वर्यज्ञानास्तस्याप्रमेयं बलं न विदुः ॥ १० ॥ सूक्तैः रक्षोघ्नमन्त्रैः कृतं स्वस्त्ययनं यस्य तम् ॥ ११ ॥ बलिभिः शक्तैर्गोपैः पूर्ववत्तच्छकटं स्थापितमिति तस्य महत्त्वं दर्शितं विप्रा हुत्वा ग्रहादिहोमं विधाय दध्यादिभिस्तदर्चयामासुः ॥ १२ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

हरिः ॐ ते गोपा इति रुदितानेन पादेन क्षिप्तमिति यद्बालभाषितं बालानां वाक्यं तत्रोत नैव श्रद्दधिर इति । एतेन बालभाषितमित्यस्य हेतुगर्भत्वात् । बालभाषितं न श्रद्दधिर इत्यनेनैव बालभाषितत्वान्न श्रद्दधिर इत्यर्थस्य लाभादिति शब्दो व्यर्थ इति दूषणं पराकृतम् । इति शब्दस्य हेत्वर्थकमनंगीकृत्य पूर्वोक्तवचनपरामर्शार्थकत्वांगीकारात् । एतेनैवोतशब्दो व्यर्थ इति दूषणं परास्तम् । उत शब्दस्यैवार्थकत्वांगीकारात् ॥ ९–१२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शयानस्य स्वाधस्ताच्छिशोः । अल्पकावत्यण । प्रवालो वल्लकी दण्डे विद्रुमे वनपल्लवे इति विश्वान्नवपल्लववन्मृदू वा । प्रवालवद्विद्रुमवद्रक्तौ च तौ मृदू चेति वा । तौ च तावङ्घ्री ताभ्यां हतं ताडितं । अनो विध्वस्तानि नाना नानाविधरसा येषु कुप्येषु तदितरभाजनेष्विति विध्वस्तानि नानारसकुप्यभाजनानि यस्मिंस्तत् । व्यत्यस्तौ चक्रं चाक्षश्च शकटसम्बन्धी दारुविशेषः स यस्य तत् । विभिन्नः कूबरो युगन्धरो यस्य तत् । व्यत्यस्तचक्राक्षं च तद्विभिन्नकूबरं च तत्सत् । व्यवर्तत विपर्यस्तमभूत् । राजसूयादिनिपातितः कुप्यशब्दः । ताभ्यां यदन्यत्कुप्यम् । कूबरस्तु युगन्धर इत्युभयत्रामरः । अनः समाविश्य दितेः सुतोऽसौ स्थितः प्रतीपाय हरेः सुपापः क्षित्यो नसिस्थः शकटाक्षनामा स विष्णुं नीत्वा सहितः पपात । ममार चाब्धिरयादि श्रीमदुक्तेर्विशेषोऽवसेयः ॥ ९ ॥ यशोदा प्रमुखं मुख्या यासां ता अस्वाङ्गत्वान्न ङीप् । व्रजस्त्रिय औत्थानिके कर्मणि याः समागता एतदन्या एता वा नन्दादयः पुमांसश्च दृष्ट्वा शकटमनः कथं स्वयं पातयित्रभावेऽपि विपर्ययाद्विपरीतं पपातेति । अद्भुतदर्शनेनाकुलाश्चञ्चलचित्ताः सन्तोऽब्रुवन् । इति ब्रुवन्त आर्तवदार्ता विषादमोहिता जनाः परिवव्रुः ॥ १० ॥ तदव्यक्तमतीस्तस्मिन्ननो व्यत्यस्तीभवनकर्मण्यव्यक्ता निश्चयमनाप्नुवाना मतिर्यासामेषां च तान्गोपीर्गोपांश्च बालकास्तत्रत्या रुदताऽनेन बालेन कर्त्रा पादेन करणेनैतदनः क्षिप्तं संशयो न नास्तीत्यूचुः । अनेन पादेनेत्यनेन प्राक् चरणाम्बुदक्षेपादिर्बालभावे स्वभावोऽयमित्यावेदयितुम् । वस्तुतस्तु तद्विपर्यास एकेनैवासेति द्योतयन्तीति मन्तव्यं । हस्तोऽपि क्षि : किमिति कश्चिदविपश्चिच्छङ्केत तदवकाशपदान्तरं यत्र करावकारः कथमित्यपि कथयन्तीति कथयति ॥ नेति । संशयः कोमलशयः पाणिर्न विनिक्षिप्त इत्यूचुः । पञ्चशाखः शयः पाणिरित्यमरः । सन्देहादिपदमसन्दानिता संशयपदं निबन्धान इदं योजनमसूचयत् ॥ ११ ॥ अनन्तस्य नाशरहितस्याप्रमेयस्य साकल्येन प्रमातुमशक्यस्य ते बलं न विदुर्वै यतस्तत इदं बालभाषितमित्युत तदन्तरं ते न श्रद्दधिरे न विश्वासं चक्रुः । उत भवेदथवा नेति विकल्पं कृत्वेति वा । उताप्यर्थविकल्पयोरित्यमरविश्वौ ॥ १२ ॥

श्रीसुबोधिनी

भगवत्यत्यन्तमसम्भावना तेनान्योक्तेपि निमित्ते तेषां विश्वासो न जात इत्याह द्वाभ्यामूचुरिति, ननु विपरीतभावनायुक्तेभ्यो न वक्तव्यमितिसिद्धान्तात् कथमुक्तवन्त इत्याशङ्क्याह **बालका** इति, ज्ञानवन्तोपि विवेकरहिताः परस्वभावाधिकारादिकं न विचारितवन्तः, तर्हि कथं ज्ञानवत्त्वमित्याशङ्क्य तेषां श्रोतॄणां विपरीतज्ञानं स्वभावदोषश्च नास्तीत्याहाव्यवसितमतीन् **गोपान् गोपीश्चेति**, न **व्यवसिता** निश्चयं प्राप्ता **मतिर्येषां**, उपायान्वेषणपरा एव न तु विपरीततया किञ्चिन्निश्चितवन्तस्तथा सति न वक्तव्याः स्युः, **गोपा गोप्य** इति स्वभावतो दोषाभावो गोरक्षणधर्मपातिव्रत्यधर्मश्चोक्तः, चकारात् तादृशा एव ब्राह्मणाः, अन्येपि, उपायान्वेषणेपृष्टेनापि वक्तव्यमित्यनेन **बालकेन रुदतैतदनः पादेन क्षिप्तं नास्त्यत्र संशयः**, न हि दृष्टेनुपपन्नं नाम व्याघातात्, दृष्टानुसारिण्येव कल्पना च कर्तव्या, अतः संशयाभाव इति बालाभिप्रायः, रोदनं निमित्तमिति नाव्यापि दोषः, कर्तृकरणयोरसम्भावनया नाङ्गीकृतवन्तः ॥ ९ ॥ प्रत्यक्षमेतत् प्रत्यक्षमूलकं च वाक्यं तर्कविरुद्धं नाङ्गीकर्तव्यमिति, तदाह **न ते श्रद्दधिरे गोपा** इति, गोप्यस्तु मध्यस्था जाताः, त इति बहिर्मुखाः, ज्ञानं तु जातं, अत्यन्तासत्यप्यर्थे शब्दाज् ज्ञानोत्पत्तिसम्भवात्, अतो ज्ञातवन्तो न तु श्रद्दधिरे, यतो **गोपा** अलौकिकज्ञानरहिताः, हेत्वन्तरमप्याह **बालभाषितमप्युतेति**, बाला भ्रमाददृष्टमपि वदन्ति, भूतादिना तथा कृते क्षिप्तोपि पादोन्यथासिद्धः करणत्वेन ज्ञात इति, बालास्तु भगवत्परा भगवत्सामर्थ्यं भूताद्यभावं च दृष्टवन्तः, अन्येस्तु तद्दर्शनाभावात् स्वप्रतीतिसिद्धमेवाङ्गीक्रियत इति, अश्रद्धायां हेतुमाहाप्रमेयमिति, **बालकस्य बलं न ते विदुः**, यद्यपि बलं न प्रत्यक्षं तथापि कार्येणानुमीयते, स्वस्मिन् कार्यकरणभावस्य प्रत्यक्षसिद्धत्वात्, यद्ययं बलिष्ठः स्यात् स्वयमप्यन्तत उत्तिष्ठेत् कार्यान्तरं वा कुर्याद् रोदनं च न कुर्यात्, अतो नैयायिकवदिदानीन्तनमीमांसकवद् वा भ्रान्ता **बलं न विदुरित्यर्थः**, तत्र हेतुरप्रमेयमिति, न तेषां दोषो नापि तर्कस्य, किन्तु तस्य **बालकस्य बलमेवाप्रमेयं** प्रमातुमयोग्य "मलौकिकास्तु ये भावा न तांस्तर्केण योजये"दिति तु न तेषां बुद्धिः, अलौकिकत्वनिश्चयाभावात् सन्देहस्त्वनेन जातः, जिज्ञासोत्पादिका तु पूतना, **वसुदेववाक्यपूतने** च सन्देहोत्पादिके, यद्यपि बालका अलौकिकं जानन्तीत्यपि न जानन्ति तथापि मुख्येनैव चरितार्थत्वादेकमेवोक्तम् ॥ १० ॥ ततोत्यन्तमविचार्य लौकिक एव प्रवृत्त इत्याह **रुदन्तमित्यादिसप्तभिः**, चतुष्टयमत्र कर्तव्यमुत्पातोयमिति रोदनप्रतीकारो ग्रहकृतोपद्रवस्य बालकानिष्टस्य निवृत्तिः शकटस्थापनं शकटसम्बन्ध्युत्पातपरिहारश्च, वस्तुतस्तु द्वयमेव कर्तव्यं रोदनप्रतिकारः शकटस्थापनं च, तथा सति लौकिकबुद्धिर्दृढा भविष्यतीति तन्निवृत्त्यर्थं भगवदिच्छयोत्पन्नभ्रमस्य वर्णनं भगवच्चरित्रत्वाय, तत्रादौ भगवद्विषयकं द्वयमाह तेषामज्ञानस्थापनार्थं भग्नेपि शकटे **रोदनं**, ग्रहसम्भावनायामपि सुतत्वाद् ग्रहणं, **यशोदेति** लौकिकबुद्धिनिपुणेति ग्रहशङ्कासम्भावना, कश्चिद् बालग्रहादिस्तत्र प्रविष्टो रोदनं कारयतीतिसम्भावना, अतः शीघ्रं स्तनं न दत्तवती किन्त्वभिज्ञैर्ब्राह्मणैः कृतं स्वस्त्ययनं यस्य रक्षाबन्धनाभिमन्त्रादिकं स्वस्त्ययनं सुष्टूक्तं येषां वचनं प्रमाणमतस्ते रक्षां कृत्वा तद्गतदोषादर्शनात् सुष्टूक्तवन्तः, ततः **स्तनमपाययत्** ॥ ११ ॥ एवं भगवति द्वयमुक्त्वा शकटे द्वयमाह षड्भिर्भगवद्गुणैरेवानिष्टनिवृत्तेः, **पूर्ववदिति**, यथा तस्यानसः संस्थानं पूर्वमासीद् यथा वा कुड्यस्थितिस्तदाह **पूर्ववदेव गोपैः स्थापितमिति**, **बलिभिरिति** तस्य महत्त्वमुक्तं, **परिच्छदादिसहित**, तस्य परितो भाण्डा एव **परिच्छदाः**, अथवा पूजार्थं **परिच्छदं** वा सम्पादितवन्तः, तादृशं शकटमेव शकटाधिष्ठात्रीं देवतां तत्रावाह्य **विप्रास्तदभिज्ञा** विशेषेण रिक्तपूरणसमर्थाः, प्रथमतोनिष्टनिवृत्त्यर्थं सामान्यतो **होमं** कृत्वाज्येन व्याहृतिभिः सर्वत्र निवृत्ते सामान्यहोमः पश्चात् तच्छकटमर्चयाञ्चक्रुर्दधिमिश्रिता **अक्षतास्तस्य** परितः स्थापिताः कुङ्कुमाक्षता इव **कुशसहितानि** प्रोक्षणजलानि च, ब्राह्मणैः क्रियमाणं समन्त्रकमेव भवति ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अप्रमेयं बलमित्यत्र । यद्यप्यत्र संशयो न कण्ठोक्तस्तथापि बालोक्ते श्रद्धाभावोक्त्या तन्निश्चयाभाव एवायाति, न तु विपरीतनिश्चयोपीति संशयप्राप्तिरित्याशयेनाहुः **सन्देहस्त्वनेनेत्यादि** ॥ १० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

ऊचुरित्यत्र **दृष्टानुसारिणीत्यादि**, शकटक्षेपो यथा जातो येन वा कृतस्तद् भवद्भिर्न दृष्टमस्माभिस्तु दृष्टमिति भवद्भिः शकटनाशे या वा **कल्पना कर्तव्या** साप्यस्मद्वाक्यविरुद्धा न प्रामाणिक्यतोस्मद्वाक्यविश्वासान्न सन्देहः कर्तव्य इति **बालाभिप्रायः** ॥ ९ ॥ **न ते श्रद्दधिर** इत्यत्र **बहिर्मुखा इति** लौकिकासक्तिभाजः, ननु मूले बालवाक्ये श्रद्धाभावमात्रमुक्तमितिसन्देहः कथं व्याख्यायत इत्याकाङ्क्षायां टिप्पण्यामाहुर्यद्यपीत्यादि, **तन्निश्चयाभाव** इति हेतुनिश्चयाभावः, **सुबोधिन्यामनेनेति** बालवाक्येन निश्चयाभावेनेति वा, ननु बालवाक्यस्य तर्कविरुद्धत्वाद् विपरीततयैव किञ्चित् कुतो न निश्चितवन्त इत्याकाङ्क्षायां ससामग्रीकं सन्देहबीजमाहुर्जिज्ञासेत्यादि, **यद्ययं बलिष्ठो न स्यान्** पूतनां कथं मारयेद् यद्यनेन सा मारिता न स्यान् "मुञ्च मुञ्चाल"मिति कथं वदेदितिबलिष्ठप्रतिपक्षतर्कसद्भावात् **पूतना जिज्ञासोत्पादिका**, न च तथा सति निश्चय एव कुतो न जात इति शङ्क्यं, "सन्त्युत्पाताश्च गोकुल" इति **वसुदेववाक्यं** "मुञ्च मुञ्चे"तिभाषिणी **पूतना** चेत्युभे कोटिद्वयमुपस्थापयत इति सन्देहोत्पादिके, तथा

च वसुदेवेनोक्त“मुत्पाताः सन्ती”त्युत्पातेनैव शकटं पातितमुत पूर्ववद् बालकेनेतिसन्देहजनिके इत्यर्थः, ननु तथाप्याप्तवाक्यस्यात्र सहकारित्वान्निश्चयो भवितुमुचित इत्याशङ्क्य बालानामाप्तत्वमेव तैर्न ज्ञातमिति न दोष इति वक्तुं पूतनावधेनापि भगवद्बलं तैर्न ज्ञातमिति कुतो बालभाषितं प्रमाणयिष्यन्तीत्याहुर्यद्यपीत्यादि, मुख्येन बालाज्ञानेनैव चरितार्थत्वाद् द्वितीयकोटिप्रतिघातादेकमश्रद्धानमेवोक्तमित्यर्थः ॥ १० ॥ रुदन्तमित्यत्र ग्रहकृतोपद्रवसम्भावनया स्वस्त्ययनादिकृतेः शकटसम्बन्ध्युत्पातपरिहारकृतेश्च भ्रान्तिमूलकत्वाद् द्वयस्यैव कर्तव्यत्वमित्यभिप्रेत्याहुर्वस्तुतस्त्वित्यादि, तथा सतीति चतुष्टयकर्तव्यत्वे सति, लौकिकबुद्धिरिति सामान्यबालकबुद्धिः, भ्रमस्येति ग्रहशङ्कारूपस्य भ्रमस्य, भगवच्चरित्रत्वायेत्यन्यथा तावतो ग्रन्थस्य भगवच्चरित्रप्रतिपादकत्वं न स्यादित्यर्थः, द्वयमाहेति भ्रमप्रमाप्रतिपन्नं कर्तव्यद्वयं, एवमग्रेपि ज्ञेयं, अज्ञानस्थापनार्थमिति बालकेनैव शकटं क्षिप्तमितिज्ञानाभावस्य स्थापनार्थं, तथा सति पूर्णमाहात्म्यज्ञाने लीला न सिध्येदिति भावः, कर्तव्यद्वयमेव स्फुटीकुर्वन्ति भग्न इत्यादि ॥ ११ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

रुदन्तमित्यत्र तथा सतीति चतुष्टये कृते सतीत्यर्थः, तन्निवृत्त्यर्थमिति ग्रहकृतोपद्रवशकटसम्बन्ध्युत्पातयोर्निवृत्त्यर्थमित्यर्थः, यशोदेतीति “यशोदाप्रमुखा” इत्यनेन लौकि व्रजस्त्रीषु मुख्यत्वकथनात् तथेत्यर्थः ॥ ११ ॥ पूर्ववदित्यत्र परिच्छदं वेति अत्र वाशब्द एवकारार्थो वाक्यालङ्कारे ॥ १२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

न ते श्रद्दधिरे इत्यस्य विवृतौ ज्ञानं तु जातमिति यद् बालकैरुक्तं “रुदतानेन पादेन क्षिप्तमेत”दिति श्रुत्वा शाब्दबोधे जाते तत्र भगवत्त्वसम्भावनाया बलिष्ठत्वात् तदनङ्गीकारो जातः, अत्यन्तसत्यप्यर्थं इति वन्ध्यापुत्रः शशशृङ्गं गगनकुसुममित्यादौ शब्देन ज्ञानस्य सर्वानुभवसिद्धत्वाज् ज्ञानमप्यत्राभूदित्यर्थः ॥ १० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा अव्यवसिता ‘किं कश्चिदुत्पातः, किंवा स्वाभाविकमस्य पतनम्’ इत्यत्र अनिश्चिता मतिर्येषां तान् गोपान् तथाभूता गोपीश्च ‘प्रतिरुदता अनेन बालेन पादेनैतच्छकटमाक्षिप्तं पातितम्, अत्र संशयो नास्ति’ इति तत्र क्रीडन्तो बालका ऊचुरित्यन्वयः ॥ ९ ॥ ते एवमुक्ता नन्दादयो गोपाः बालभाषितमिति कृत्वा न श्रद्दधिरे तद्वाक्ये विश्वासं न जग्मुः। ‘उत’ इति वितर्के। “बालेन कथमेतस्य महतः पातनं सम्भवति ? एते तु बालाः किं जानन्ति ?” इति तर्कितवन्त इत्याशयः। ‘कुत एवं विपरीतं तर्कितं’ तत्राह—अप्रमेयमिति। यस्मादप्रमेयममितं बुद्ध्यगोचरं बलं यत् तस्य बालकस्यास्ति तत् ते न विदुः’ अतो विपरीततर्केण श्रद्दधिरे इति ॥ १० ॥ ‘अतो लौकिकीं रीतिमेव कृतवन्त’ इत्याह—रुदन्तमिति। ग्रहशङ्किता ‘यस्मिन् प्रविष्टः कश्चित् ग्रहो रोदनं कारयति’ इति शङ्कायुक्ता यशोदा रुदन्तं सुतमादाय प्रथमं स्तनं न दत्तवती, किंतु प्रथमं सूक्ते राक्षोघ्नैर्मन्त्रैः कृत्वा विप्रैः कृतस्वस्त्ययनं कृतरक्षाबन्धनादिकं सन्तं स्तनमपाययत् ॥ ११ ॥ भगवत्प्रभावानभिज्ञविप्रचेष्टितमाह—पूर्ववदिति। बलिभिर्बलवद्भिर्गोपैः। यद्वा अष्टदिक्षु स्थापितैर्दध्यादिभिः सहितं सपरिकरं परिकरास्तदवयवत्वात्, तत्सहितं गोपैः पूर्ववत् स्थापितं शकटं विप्रा हुत्वा ग्रहादिशान्त्यर्थं होमं विधाय दध्यादिभिरर्चयाञ्चक्रुः ॥ १२ ॥

अन्वितार्थप्रकाशिका

ऊचुरिति ॥ तदा अव्यवसिता किं कश्चिदुत्पातः किंवा स्वाभाविकमस्य पतनमित्यत्रानिश्चिता मतिर्येषां तान् गोपान् तथाभूता गोपीश्च प्रति रुदता अनेन बालेन पादेनैतच्छकटमाक्षिप्तं पातितमत्र संशयो नास्तीति तत्र क्रीडन्तो बालका ऊचुः ॥ ९ ॥ न ते इति ॥ ते एवमुक्ता नन्दादयो गोपाः बालभाषितमिति कृत्वा। उत इति वितर्के। एतत् न संभवति एते बालाः किं जानन्ति इति तर्कयन्तः न श्रद्दधिरे तद्वाक्ये विश्वासं न जग्मुः। यस्मादप्रमेयममितमतर्क्यं बलं यत्तस्य बालकस्यास्ति तत् ते न विदुः ॥ १० ॥ रुदन्तमिति ॥ ग्रहशङ्किता अस्मिन्प्रविष्टः कश्चित् ग्रहो रोदनं कारयतीति शङ्कायुक्ता यशोदा रुदन्तं सुतमादाय प्रथमं स्तनं न दत्तवती। किंतु प्रथमं सूक्ते रक्षोघ्नैर्मन्त्रैः कृत्वा विप्रैः कृतरक्षाबन्धनादिकं सन्तं स्तनमपाययत् ॥ ११ ॥ पूर्ववदिति ॥ बलिभिर्बलवद्भिर्गोपैः। यद्वा। अष्टसु दिक्षु स्थापितैर्दध्यादिबलिभिः सहितं सपरिच्छदं अवयवाः तत्सहितं गोपैः पूर्ववत्स्थापितं महान्तं शकटं विप्राः हुत्वा ग्रहादिशान्त्यर्थं होमं विधाय दध्यक्षतकुशाम्बुभिरर्चयांचक्रुः। स्वाश्रयधनत्वात् लक्ष्म्यधिष्ठानत्वाच्च शकटस्य पूजनम् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अव्यवसितमतीन् अनिश्चितमतीन् अनेन बालेन क्षिप्तं पातितम् ॥ ९ ॥ न श्रद्दधिरे विश्वासं न प्रापुः ॥ १० ॥ बालग्रहघ्नैः सूक्तैः कृत्वा ॥ ११ ॥ बलिभिः समर्थैः सपरिच्छदं सामग्रीसहितं पूर्ववत् स्थापितं यद्वा दिक्षु दत्तैः बलिभिः सहितं शकटं विप्राः आदौ हुत्वा होमं कृत्वा ततो दध्यादिभिः अर्चयांचक्रुः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दृष्ट्वेति ॥ यशोदाप्रमुखाः यशोदाप्रभृतयः, व्रजस्त्रियः, याश्च, औत्थानिके कर्मणि, समागताः ताश्च स्त्रियः, नन्दादयो गोपाश्च, तेऽपि, दृष्ट्वा विपरीतभावापन्नशकटमवलोक्य, शकटमेतदनः, स्वयं वै स्वत एव, कथं विपर्ययात् विपरीतमभूत्। इत्येवं अद्भुतस्याश्चर्यस्य दर्शनं तेनाकुला भ्रान्ताः, बभूवुः ॥ ९ ॥ ऊचुरिति ॥ तदा, अव्यवसिता अनोविपर्ययाद्गोचरा मतिर्येषां तान्, गोपान् गोपीश्च प्रति, बालकाः श्रीकृष्णस्य समन्ततः क्रीडन्तो बालाः, एतच्छकटं, रुदता अनेन बालकेन कर्त्रा, पादेन करणेन, क्षिप्तं विपर्ययं प्रापितम्। न संशयः। अत्र संशयो न कर्त्तव्य इत्यर्थः। इति ऊचुः ॥ १० ॥ न त इति। ते नन्दादयः गोपाः, बालभाषितं बालैर्यथार्थतया कथितमपि, न श्रद्दधिरे तद्वचसि विश्वासं न जग्मुः। उत यतः, ते नन्दादयः, तस्य, बालकस्य, बलं अप्रमेयमपारं, भवति इति, न विदुः। बालैर्यथार्थमभिहितेऽपि बालकृष्णाप्रमेयबलाज्ञानाच्च तद्वचसि विश्वासं ययुरित्यर्थः ॥ ११ ॥ रुदन्तमिति ॥ यशोदा, रुदन्तं सुतं आदाय, ग्रहशङ्किता, कर्त्तरि क्तः। बालग्रहं शङ्कमाना सतीत्यर्थः। विप्रैः कर्तृभिः, सूक्तैः रक्षोघ्नमन्त्रैः करणैः, कृतस्वस्त्ययनं कृतानिष्टपरिहारकर्माणं बालं, स्तनं अपाययत् ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

न ते श्रद्दधिर इति : १०.७.१०.

अबलालङ्कृतस्यास्य कथमेवंविधं बलम्। इत्यर्भकगिरि श्रद्धां न दधुर्युक्तमेव ते ॥ १८ ॥

कृष्णप्रिया

वे इसका कोई कारण निश्चित न कर सके। वहाँ खेलते हुए बालकों ने गोपों और गोपियों से कहा कि 'इस कृष्ण ने ही तो रोते-रोते अपने पाँव की ठोकर से इसे उलट दिया है, इसमें कोई सन्देह नहीं' ॥ ९ ॥ परन्तु गोपोंने उसे 'बालकों की बात' मानकर उसपर विश्वास नहीं किया। ठीक ही है, वे गोप उस बालक के अनन्त बल को नहीं जानते थे ॥ १० ॥ यशोदाजी ने समझा यह किसी ग्रह आदि का उत्पात है, उन्होंने अपने रोते हुए लाड़ले लालको गोद में लेकर ब्राह्मणों से वेदमन्त्रों के द्वारा शान्तिपाठ कराया और फिर वे उसे स्तन पिलाने लगीं ॥ ११ ॥ बलवान् गोपों ने छकड़े को फिर सीधा कर दिया। उसपर पहले की तरह सारी सामग्री रख दी गयी। ब्राह्मणों ने हवन किया और दही, अक्षत, कुश तथा जल के द्वारा भगवान् और उस छकड़ेकी पूजा की ॥ १२ ॥

येऽसूयानृतदम्भेर्ष्याहिंसामानविवर्जिताः। न तेषां सत्यशीलानामाशिषो विफलाः कृताः ॥ १३ ॥
इति बालकमानीय[1] सामर्ग्यजुरुपाकृतैः। जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः ॥ १४ ॥
वाचयित्वा स्वस्त्ययनं नन्दगोपः समाहितः। हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणम् ॥ १५ ॥
गावः सर्वगुणोपेता वासःस्रग्रुक्ममालिनीः। आत्मजाभ्युदयार्थाय प्रादात्ते चान्वयुञ्जत ॥ १६ ॥

कर्दमक्षमा

अन्वयः—ये असूयानृतदम्भेर्ष्याहिंसामानविवर्जिताः तेषां सत्यशीलानाम् कृताः आशिषः विफलाः न (भवन्ति) ॥१३॥ इति समाहितः नन्दगोपः बालकम् आदाय सामर्ग्यजुरुपाकृतैः पवित्रौषधिभिः जलैः द्विजोत्तमैः अभिषिच्य स्वस्त्ययनं वाचयित्वा अग्निं हुत्वा महागुणम् अन्नं प्रादात् ॥ १४–१५ ॥ सर्वगुणोपेताः वासःस्रग्रुक्ममालिनीः गावः आत्मजाभ्युदयार्थाय प्रादात् च ते (आशिषः) अन्वयुञ्जत ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

असूया गुणेषु दोषाविष्करणम्। ईर्ष्या अक्षान्तिः। तेषामाशिषः कृतास्तैः प्रयुक्ताः ॥ १३ ॥ इत्येवमभिप्रेत्य सामर्ग्यजुर्भिरुपाकृतैरभिमंत्रितैः। पवित्रा ओषधयो येषु जलेषु तैः कृत्वा द्विजोत्तमैः कर्तृभिरभिषिच्याभिषेकं कारयित्वा ॥ १४ ॥ हुत्वा हावयित्वा ॥ १५ ॥ गावो गाश्च प्रादात्। अन्वयुञ्जत आशिषो युयुजुः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अनृतमसत्यभाषणम्। दंभो लोकवंचनार्थं मिथ्यानुष्ठानम्। हिंसा प्राणवियोगानुकूलव्यापारः। मानमभिमतिः ॥ १३ ॥ उपाकृतैः संस्कृतैः। ओषधयः विष्णुक्रांतादिबीजानि। प्रादादिति द्वयोः संबंधः ॥ १४ ॥ महागुणमनेकरसवत् ॥१५॥ सर्वगुणोपेताः अल्पाशनातिमिष्टाधिकदुग्धदानक्षमीपागतताडनदोहनानभिज्ञदोहप्रदानादिरूपबहुविधगुणयुक्ताः गाः। अभ्युदयः समृद्धिः कल्याणमिति यावत् ॥ १६ ॥

---

१. मादाय—श्रीधर वंशी गिरि भक्त.

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अधुनाऽन्येभ्यो विशेषतः श्रीवल्लवेन्द्रस्य श्रीयशोदावच्चेष्टितमाह—य इति चतुर्भिः। तत्र य इति त्रिकम्, तत्रैवैकेन तेषां ब्राह्मणानां सर्वोत्तमत्वमाह, य इति। असूयादिचतुष्कविवर्जनेन प्रायो धर्मपरत्वं हिंसामानविवर्जनेन च मोक्षपरत्वं "सत्यञ्च समदर्शनम्" इति—

नारायणपराः सर्वे न कुतश्चन बिभ्यति। स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः॥ इति च॥

एकवाक्यतया सत्यशीलत्वेन परमवैष्णवत्वं चोक्तम् अत एव सर्वश्रैष्ठ्य नास्यान्ते पृथगुक्तिः॥ १३॥ इतीति त्रिकालान्तयुग्मकं सामर्ग्यजूंषि तत्तद्वेदमन्त्राः पवित्रौषधयः सर्वौषधयो महौषधयश्च॥ १४॥ महागुणं रसामोदादि विशिष्टम्॥ १५॥ गाव इति सार्द्धकम्। अभ्युदयः सर्वोपद्रवशान्तिपूर्वकं वैभवं स एव निजपुरुषार्थः स्नेहभरात्तं साधयितुं ते च विप्राः अनु अन्नभोजनाद्यनन्तरं अयुञ्जत प्रयुक्तवन्तः आशिष इत्युत्तरस्वारस्यात्॥ १६॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुनान्येभ्यो विशेषतः श्रीवल्लवेन्द्रस्य श्रीयशोदावच्चेष्टितमाह—य इति चतुर्भिः। 'असूया' अदुष्टेषु दोषारोपणम्, 'अनृतम्' असत्यभाषणम्,—एतौ वाक्प्राधान्याद्वाचिकौ दोषौ; 'दम्भः' पर-वञ्चनार्थं चेष्टा,—प्रायोऽयं कायिक एव, 'ईर्ष्या' अक्षान्तिः, कस्यचिन्मते परोत्कर्षासहनम्,—अयं मानसः, 'हिंसा' परपीड़ा, 'मानः' अहंकारः,—एतौ सर्व्वसम्भवौ। समुच्चितौ; यद्यपि कामक्रोधादयोऽन्येऽपि सम्भवन्ति, तथाप्यसूयादिविवर्ज्जनेन तेषामपि स्वत एव वर्ज्जनसिद्धेः; किंवा, हिंसायामन्तर्भावात् पृथङ्नोक्ताः। तत्रासूयादि-चतुष्क-विवर्ज्जनेन प्रायो धर्म्मपरत्वम्, हिंसा-मान-विवर्ज्जनेन च मोक्षपरत्वम्। सत्यस्य भगवत इव; यद्वा, सत्यं तद्भजनमेव शीलं स्वभावो येषां तेषां परमवैष्णवत्वं चोक्तम्, अतएव सर्व्वतः श्रैष्ठ्य नास्यान्ते पृथगुक्तिः। सामर्ग्यजूंषि तत्तद्वेदमन्त्राः। पवित्रोषधयः सर्वोषधयो महोषधयश्च; ताश्च प्रतिष्ठाप्रसङ्गे श्रीहयशीर्षपञ्चरात्राद्युक्ता ज्ञेयाः; यथा—

'मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम्। शटी चम्पकमुस्तञ्च सर्व्वौषधिगणः स्मृतः॥
सहदेवी वचा व्याघ्री बला चातिबला तथा।
शङ्खपुष्पी तथा सिंही सूर्य्यावर्त्ता तथाष्टमी। महौषध्यष्टकं ह्येतन्महास्नाने नियोजयेत्॥ इति।

द्विजोत्तमैरेव स्वस्त्ययनञ्च वाचयित्वा पुण्याहवाचनादिकं कृत्वा। नन्दश्चासौ गोपश्च, महाराज इति महागौरवात्, एवमग्रेऽपि। किञ्चानेन तस्य तत्र तत्र परमाभिज्ञता समर्थता च, समाहित इति सर्व्वत्राच्छिद्रता श्रद्धा च बोधिता। अग्निं हुत्वा—वैश्योत्तमत्वात् स्वयमेव विप्रसन्निधाने होमं कृत्वा महागुणं रसामोदादि-विशिष्टमन्नं प्रादादभोजयदित्यर्थः॥ १३-१५॥ दक्षिणात्वेन सर्व्वालंकारयुक्ता उत्तमा गावो दत्ता इत्याह—गाव इति। सर्व्वैर्गुणैर्बहुलदुग्ध—नववयस्त्वादिलक्षणैर्युक्ताः। आत्मजस्याभ्युदयो देहबलादिवृद्धिरेव। धर्म्मादिस्तस्मै, द्वन्द्वैक्यम्, यद्वा, अभ्युदयो वैभवम्; स एव निजसर्व्व-पुरुषार्थः; स्नेहभरात्तदर्थमनु अन्नभोजनाद्यनन्तरम्॥ १६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सामर्ग्यजुरुपाकृतैः तन्मन्त्रसंस्कृतैः "शतमन्वपुः लेभिरे"॥ १३—१६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो येऽसूयादिदोषविवर्जितास्तेषां सत्यशीलानामनृतवादशीलानामाशिषः कदाचिदपि विफला न भवन्तीति बुद्ध्वा बालकमादायेत्यन्वयः। तत्र असूया गुणेषु सत्स्वपि दोषाविष्करणम् अनृतं मिथ्याभाषणं दम्भो वञ्चनम् ईर्ष्यात्वक्षमा हिंसा भूतद्रोहः मानः अहङ्कारः॥ १३॥ द्विजोत्तमैः कर्तृभिः सामर्ग्यजुर्मन्त्रैरुपाकृतैः संस्कृतैः पवित्रा ओषधयो येषु तैर्जलैरभिषिच्य स्नापयित्वा॥ १४॥ स्वस्त्ययनं वाचयित्वा च नन्दाख्यो गोपस्समाहितचित्तः हुत्वाऽग्निं हावयित्वा महागुणं षड्रसोपेतमन्नं द्विजातिभ्यः प्रादात् प्रायच्छत्॥ १५॥ साधुत्वबहुक्षीरत्वादिभिः सर्वैर्गुणैर्युक्ताः वासांसि स्रजः हेममालाश्चासां सन्तीति तथा ताः गाश्चात्मजस्याभ्युदयार्थं द्विजातिभ्यः प्रायच्छत् ते च मन्त्रविदो युक्ताः समाहिताः द्विजातयोऽन्वयुञ्जत प्रयुयुजिरे आशिष इति शेषः॥ १६॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

इति कृत्वा स्थिता एव विप्राः सत्याशिष इत्याह-य इति॥ १३॥ उपाकृतैः संस्कृतैः॥ १४-१५॥ पुत्रस्याभ्युदयार्थाय अभ्युदयप्रयोजनाय जातैः प्राक्सङ्कल्पिता इति शेषः। प्राग्जातेरग्रजस्य बलभद्रस्य वा॥ १६-२०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ते च विप्रा आशिषोऽन्वयुञ्जतेत्यन्वयः॥ १६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रीनन्दस्तु ब्राह्मणाशीर्भिरेव मे बालकः कुशलीति जानाति स्मेत्याह—य इति। मानो गर्वः तेषां तैः कृताः आशिषो न विफलाः इति विश्वस्येति शेषः ॥ १३ ॥ उपाकृतैः संस्कृतैः पवित्रा ओषधयः सर्वौषधिमहौषध्यादयो यत्र तैर्जलैः करणैर्द्विजोत्तमैः कर्तृभिरभिषिच्य अभिषेकं कारयित्वा हुत्वा हावयित्वा महागुणमतिस्वादामोदयुक्तम् ॥ १४–१५ ॥ गावः गाः गुणाः बहुपयस्स्वादयः ते विप्रा अनु अनन्तरम् अयुञ्जत स्वीचक्रुः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीनन्दस्तु वेदोक्तकर्मनिष्ठैर्द्विजोत्तमैर्बालाभिषेकादिकं कारयित्वा तेभ्यः स्वपुत्राभ्युदयार्थाय भोजनं बहुगुणवत्यः गावश्च प्रादादित्याह—य इति चतुर्भिः। तेषां तैः कृताः प्रयुक्ताः आशिषः विफला न भवन्ति ॥ १३ ॥ इति एवं विश्वासेन द्विजोत्तमैः वेदोक्तक्रियाकारयितृभिः सामादिसंस्कृतैः पवित्राः ओषधयो येषु तैर्जलैः अभिषिच्य स्नापयित्वा ॥ १४ ॥ हुत्वा हावयित्वा ॥ १५ ॥ ते द्विजातयः अन्वयुञ्जत आशिषो युयुजुः ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

गुणेषु दोषारोपोऽसूया, मिथ्याभाषणमनृतं, दम्भः स्वख्यातये धर्माचारः, ईर्ष्याऽक्षमा, हिंसा कायादिभिः प्राणिपीडा, मानो गर्वस्तैर्विवर्जिता ये भवन्ति तेषां सत्यशीलानां कृतास्तैः प्रयुक्ता आशिषो विफला न भवन्ति, तत्फलानां मत्पुत्रे परिदृष्टत्वात् ॥१३॥ इतीति युग्मकं इति विजानन्नन्दगोपो व्रजनाथो बालकं कृष्णमादाय द्विजोत्तमैः कर्तृभिर्जलैः करणैरभिषिच्याभिषेकं कारयित्वा जलैः कीदृशैः सामादिमन्त्रैरुपाकृतैः संस्कृतैः पवित्रा ओषधयो येषु तैः हुत्वा हावयित्वा द्विजातिभ्योऽन्नं प्रादात् महागुणं कोमलत्वमधुरत्वसौरभ्यविशिष्टम् ॥ १४–१५ ॥ गावो गाः सर्वैर्गुणैर्बहुपयस्स्वादिभिरुपेताः ते विप्राः आशिषोऽन्वयुन्त ददुः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ग्रहो मारिकाग्रहो विप्रैः सूक्तैः कृतस्वस्त्ययनं स्तनमपाययत् ॥ १३ ॥ पूर्ववत्स्थापितमनो बलिभिर्गृहशान्त्यर्थं प्रक्षिप्ताक्षादिभिः सपरिकरं सपरिच्छदं विप्रा हुत्वा दध्यक्षतकुशाम्बुभिरर्चयाञ्चक्रुः ॥ १४ ॥ असूया सत्सु गुणेषु दोषाविष्कृतिर्न मद्वशोऽसाविति चित्ततोदमात्सर्यमार्यो इत्याद्युक्तमात्सर्यं वा ईर्ष्याऽक्षमा वा दम्भोऽविद्यमानगुणप्रदर्शनं हिंसा परद्रोहादिर्मानो गर्व एतद्रादिविकला ये तेषां सत्यशीलानां। सत्यशब्दोऽनसूयादिसर्वोपलक्षकः। सत्यं ब्रह्म तन्निष्ठानामिति वा आशिषः क्वचिदपि विफला न भविष्यन्ति ॥ १५ ॥ इति हेतोः साम च ऋचश्च यजुश्च तैरुपाकृतैः संस्कृतैर्जलैः पवित्रौषधिभिः पृथग्वा जलमिलितैः सितसर्षपादिभिर्वा द्विजोत्तमैरभिषिच्य ॥ १६ ॥

श्रीसुबोधिनी

एवं सामान्यत उभयोः प्रतीकार उक्तः, यशोदाप्रेरणयैवैतदुभयं जातं, नन्दस्तु विशेषाकारेण द्वयमेकत्र स्थापयित्वा शान्तिं कृतवानित्याह येऽसूयानृतेतिचतुर्भिः, नन्दस्यादौ ब्राह्मणेषु वैशिष्ट्यबुद्धिस्ततः शकटे समारोप्याभिषेकस्तवः स्वस्तिवाचनादिपूर्वकं होमो दानं च, एवं कृतस्य वैयर्थ्याभावसाधनं च पञ्चमे वक्ष्यति, तत्रादौ ब्राह्मणेषु महत्त्वबुद्धिर्जातेत्याह य इति, ब्राह्मणे चेदलौकिकी बुद्धिस्तद्वाक्याद्भगवत्यप्यग्रे भविष्यतीति सूचितं, ब्राह्मणाः स्वभावत उत्तमा अविकृतब्रह्मस्वरूपा दोषषट्केन तु ते प्राकृता भवन्ति, भगवति तु षड् गुणा अधिकाः, निर्दुष्टो ब्राह्मणो धर्मी भगवांश्चैकस्तुल्यो वा, अतो यथा भगवद्विचारितं सत्यमेव भवति यथा ब्राह्मणोक्तमपि सत्यं भवति कृतं तु सर्वेषां पूर्वाविरोधि, तत्र ब्राह्मणेषु षड् दोषास्तत्सामर्थ्यप्रतिबन्धकास्तद्रहितास्तु निर्दुष्टास्तान् दोषान् वर्जनार्थं गणयति, कामक्रोधलोभा दोषा अव्यवस्थाविषयभेदेनैव दोषा भवन्तीति ते न गणिताः, तत्कार्यभूता एव सर्वावस्थासु सर्वविषया ये दोषास्ते दोषा इति षड् गण्यन्ते, असूया मुख्यो दोषः, अदुष्टे दोषारोपणात्, अयं बाह्यविषयको दोषः, अनृतं वाचनिको मिथ्याभाषणरूपः, दम्भः परस्य स्वोत्कर्षख्यापकचेष्टादिः, "निमित्ताभावे तु नैमित्तिकाभाव"श्चेत् तदा दम्भः, ईर्ष्या परगुणानामसहनेन दोषचिन्तनं मानसं, ततो हिंसा मारणं, तस्मिन्नपि सम्पन्ने मानोभिमानः, एवमेकेनैव त्रिदोषेण प्राणी नष्टो भवति किम्पुनर्द्वयेन ? असूयानृते दम्भहिंसे ईर्ष्यामानौ वाक्कायमनसामेत एव दोषाः, एतद्विवर्जिताश्चेत् तेषामाशिषो न विफलाः कृता भवन्ति, विफलकर्तारस्तु निवृत्ता इति, ननु प्रकृतिसम्बन्धो वर्तत इति कायवाङ्मनोदोषनिवृत्तावपि स्वभावदोषस्य विद्यमानत्वात् कथं निर्दुष्टतेत्याशङ्क्याह सत्यशीलानामिति, सत्यमेव शीलं स्वाभाविको धर्मो येषां, यद् भगवतः सत्यरूपमुक्तं तदेव तेषां स्वभावः सत्यव्रतादिः, एतादृशा ब्राह्मणा ब्रह्मविदः, तेषामिति पुनरनुसन्धानं वाक्यसमये दोषाभावत्वज्ञापनार्थम् ॥ १३ ॥ अत उत्पातेषु सत्स्वपि तेषां वाक्यान्निवृत्ता भविष्यन्तीति ज्ञात्वा बालकं शकटे समारोप्याभिषेकं कारितवानित्याहेतीति, स्वयं यशोदा हस्ताद्

गृहीत्वा तत्र शकटनिकटे समानीय वेदत्रयविद्भिर्ब्राह्मणैः सामर्ग्यजुर्भिर्विविधैरपि मन्त्रैरुपाकृतैस्तत्समीप आसमन्तात् कृतैर्मन्त्रैरलौकिकत्वेनोत्पादितजलैः पवित्रा ओषधयो येषु शतावर्यादयस्तादृशैः, पवित्रैरनुरहतैर्जलैरभिषिच्य स्नानं कारयित्वा मार्जयित्वा च ॥ १४ ॥ ततो भगवन्तमलङ्कृत्य स्वस्तिपुण्याहवाचनादिकं कारयित्वा स्वयं नन्दगोप उपविश्य स्वयमपि समाहितः सावधानो भूत्वा ब्राह्मणसन्निधाने होमं कृत्वा ब्राह्मणाग्नावपि होमं कृतवांस्तदाह द्विजातिभ्यः प्रादादन्नमिति, महागुणं बहुव्यञ्जनसहितं भोजितवानित्यर्थः ॥ १५ ॥ तदा दक्षिणा गावः सर्वगुणोपेता बहुदोग्ध्यः सुन्दर्यः साध्व्यश्च, गवामलङ्कारार्थं वासः स्रक् माला रुक्ममयाः सुवर्णमय्यो मालाश्च, सर्वालङ्करणयुक्ता गावो दत्ता इत्यर्थः, प्रयोजनमाहात्मजाभ्युदयार्थायेति, आत्मजस्य भगवतोऽभ्युदयोऽभिवृद्धिः स एव तस्यार्थः प्रयोजनं, अयमर्थशब्दोऽर्थान्तरव्युदासार्थः, ते चान्वयुञ्जत, अनु पश्चात् प्राप्त्यनन्तरमाशिषोऽयुञ्जत योजितवन्तः, न केवलमुक्तवन्तः ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

येऽसूयेत्यत्र । विप्रवाच एव सत्यत्वमुक्तम्, न कृतेरपीति यत्तत्तात्पर्यमाहुः **कृतं तु सर्वेषामिति** । सर्वेषां भगवतो विप्राणां च निर्दोषाणां कृतमपि सत्यमेव, परन्तु तद्वचनाविरोध्येव, न तु स्वच्छन्दचरितमपीत्यर्थः । स्वकर्तव्यजातीयत्वेन ग्रहविषयत्वाभाव एव कृतौ सत्यत्वाभावो ज्ञेयः ।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

येऽसूयेत्यस्याभासे स्वस्त्ययनग्रहशान्त्योः पूर्वं कृतत्वेन पुनस्तत्करणं कुत इत्याकाङ्क्षायां मूलोक्तं हेतुद्वयं द्वितीये प्रकारविशेषं च स्फुटीकर्तुमाहुर्यशोदेत्यादि, **द्वयमिति** भगवन्तं शकटश्चेत्यर्थः, **विवृतौ पञ्चम** इति श्लोके, ब्राह्मणवाक्यसत्यत्व उपपत्तिम् **हुर्ब्राह्मणा** इत्यादि, **एकस्तुल्यो वेति** सत्यरूपत्वादेकांशत्वाद् भगवत्तुल्यो वा, तथा च तद्रूपत्वे तुल्यत्वे वा भगवद्धर्मवत्त्वं जातमिति तथेतिभावः, ननु मूले ब्राह्मणोक्तानामाशिषामेव सत्यत्वमुक्तं कृतेः कुतो नोक्तमित्याकाङ्क्षायां टिप्पण्यामाहुर्विप्रेत्यादि, तथा 'चेश्वराणां वचस्तथ्य'मितिशुकवाक्यात् तथेतिभावः, सुबोधिन्यां **पूर्वाविरोधीति** यद् वाक्याविरोधि तत् सत्यमित्यर्थः, तर्हि कृतविचारस्य किं प्रयोजनमित्यत आहुष्टिप्पण्यां **स्वकर्तव्येत्यादि**, स्वस्य कर्तव्यं यच्छान्तिकर्म तत् पापभ्रमेण कृतप्रायश्चित्तवत् तस्य ग्रहशान्तिकर्मसजातीयत्वेन **ग्रहविषयत्वाभाव एव सत्यत्वाभाव** इति फलतोऽसत्यत्वज्ञापनमेव प्रयोजनमित्यर्थः, एवं दम्भस्वरूपकथने साहजिकतया चेष्टाया अपि दम्भत्वं स्यादिति तन्निवृत्त्यर्थं तज्ज्ञापकमाहुः सुबोधिन्यां **निमित्तेत्यादि** ॥ १३ ॥ **इतीत्यस्याभासे बालकं शकटे समारोप्येति**, ननु मूले शकटारोपणवाचकपदाभावात् कं हेतुमभिसन्धाय श्रीमदाचार्यैरिदमुक्तमिति चेदत्रेदं प्रतिभाति, यथा श्रीमातृचरणैरुभयत्र रक्षा कृता सामान्यतस्तथैव श्रीनन्दैरपि विशेषेण कृतेति ज्ञायतेऽन्यथा श्रीनन्दकर्तृकबालकानयनं 'समाहित'पदोक्तं समवधानत्वं च व्यर्थं स्यादत आनयनेऽधिकरणाकाङ्क्षापूर्त्यर्थं 'समाहित' त्वोक्त्युपपत्त्यर्थं च शकटारोपणरूपो विशेष आचार्योक्त इति ज्ञेयम् ॥ १४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

येऽसूयानृतेत्यत्र अनृतवर्जनकथने सत्यवचनं प्राप्तमेवेति सत्यशीलपदे सत्यपदार्थमन्यमाहुः **यद् भगवत इति**, **वाक्यसमये इति** तथा चानृतादयः कादाचित्का भवन्त्वपि, सत्यव्रतत्वादिकं तु सार्वदिकमपेक्षितमित्यर्थः ॥ १३ ॥ **इतीत्यत्र मार्जयित्वेति** अलङ्कृत्येति इदं द्वयं स्नानकथने अर्थात्सिद्धं, **ब्राह्मणाग्नाविति** तथा च पूर्वोक्तो वाक्यार्थो होम एव सिद्ध इति भावः ॥ १५ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

येऽसूयेत्यत्र पञ्चमे वक्ष्यतीति······**निमित्ताभावे तु नैमित्तिकाभावश्चेत् तदा दम्भ इति** ये हि शमदमादिज्ञापिकां भजनादिज्ञापिकां चेष्टां कश्चिद्धनादिदातारमवलोक्य कुर्वन्ति तदा तस्यां क्रियायां धनाशाया निमित्तत्वं, तथा च यदा धनादिप्राप्तिरसम्भाविता तदा न कुर्वन्तीति निमित्तस्य धनाशाया अभावे नैमित्तिकस्य शमदमादिभजनादिज्ञापकचेष्टितस्याभावो भवति तच्चेष्टितं दम्भरूपं बोध्यमित्यर्थः, **असूयानृते दम्भहिंसे ईर्ष्यामानाविति** असूयानृतयोर्वाग्दोषत्वं असूयाया गुणेषु दोषारोपरूपत्वात् अनृतस्य मृषाभाषणरूपत्वात्, दम्भहिंसयोः कायदोषत्वं दम्भस्य स्वोत्कर्षख्यापकपरप्रतारणचेष्टारूपत्वात् हिंसायाः परप्राणहरणचेष्टारूपत्वात्, ईर्ष्यामानयोर्मानसदोषत्वं स्फुटमेव ॥ १३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भगवत्प्रभावानभिज्ञस्य नन्दस्याभिप्रायं चेष्टितं चाह—ये इति चतुर्भिः । 'ये ब्राह्मणा असूयादिदोषविवर्जितास्तेषाम्, सत्ये यथार्थभाषणे शीलं येषां तेषां कृताः प्रयुक्ता आशिषो विफला न भवन्ति' इति समाहितः कृतनिश्चयो नन्दगोपो द्विजोत्तमैर्बालस्याभिषेकादिकं कारयित्वा द्विजातिभ्योऽन्नादिकं प्रादात्, ते च अनु अनन्तरमेव आशिष अयुञ्जत योजितवन्त इति

चतुर्णामन्वयः। असूया परगुणे दोषाविष्करणम्। अनृतं मिथ्याभाषणम्। दम्भः परं प्रति स्वोत्कर्षख्यापनम्। ईर्ष्या परगुणासहनम्। हिंसा परपीडनम् एवं कायवाक्मनोदोषराहित्यमित्युक्तम् ॥ १३ ॥ बालकमानीय सामर्ग्यजुभिर्मन्त्रैः उपाकृतैः अभिमन्त्रितैः पवित्राः सर्वारिष्टनिवर्तकाः ओषधयो येषु तैर्जलैः साधनभूतैर्द्विजैः कर्तृभिरभिषिच्याभिषेकं कारयित्वा ॥ १४ ॥ द्विजैः स्वस्त्ययनं पुण्याहं वाचयित्वा अग्निं हुत्वा ग्रहादिशान्त्यर्थं हावयित्वा महागुणं षड्रससुगन्धादियुक्तमन्नं द्विजातिभ्यः प्रादात्, भोजितवानित्यर्थः ॥ १५ ॥ सर्वगुणोपेता बहुदोग्ध्रीः सुन्दरीः साध्वीश्च अलङ्कारार्थं वासः स्रक् पुष्पमाला, रुक्ममयी माला च विद्यते यासां ता गावश्च गाः प्रादात्। दानप्रयोजनमाह—आत्मजस्याभ्युदयः 'सर्वोपद्रवशान्तिपूर्विकाऽभिवृद्धिः' स एवार्थः प्रयोजनं तदर्थमिति ॥ १६ ॥

अन्वितार्थप्रकाशिका

येऽसूयेति ॥ ये ब्राह्मणाः असूया परगुणेषु दोषाविष्करणम् अनृतं मिथ्याभाषणं दम्भः परवञ्चनाय धर्मानुष्ठानम् ईर्ष्या परगुणासहनं हिंसा परपीडनं मानः अभिमान एतैर्दोषैर्विवर्जितास्तेषां सत्ये यथार्थभाषणे शीलं येषां तेषां कृताः तैः प्रयुक्ताः। शेषे षष्ठी। आशिषो विफला न भवन्तीति ॥ १३ ॥ इतीति द्वयम् ॥ इति एवं समाहितः कृतनिश्चयो नन्दगोपो बालकमादाय सामर्ग्यजुर्भिर्मन्त्रैः उपाकृतैः अभिमन्त्रितैः पवित्राः सर्वारिष्टनिवर्तकाः ओषधयो येषु तैर्जलैः साधनभूतैः द्विजोत्तमैः कर्तृभिः अभिषिच्य अभिषेकं कारयित्वा द्विजैः स्वस्त्ययनं पुण्याहं वाचयित्वा अग्निं हुत्वा ग्रहादिशान्त्यर्थं हावयित्वा आत्मजस्याभ्युदयः सर्वोपद्रवशान्तिपूर्विकाभिवृद्धिः स एवार्थः प्रयोजनं तदर्थं महागुणं षड्रससुगन्धादियुक्तमन्नं द्विजातिभ्यः प्रादात्तान्भोजितवानित्यर्थः। अभिषिच्य हुत्वा इत्यन्तर्भावितण्यर्थौ ॥ १४-१५ ॥ गाव इति ॥ तथा सर्वगुणोपेता बहुदोग्ध्रीः सुन्दरीः साध्वीश्च अलङ्कारार्थं वासः स्रक् पुष्पमाला रुक्ममयी माला च विद्यते यासां ता गावः गाश्च प्रादात्। ते च द्विजातयः अनु अनन्तरमेव आशिषः अयुञ्जत योजितवन्तः। गाव इति प्रथमा आर्षी ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

असूया गुणेषु दोषारोपः ईर्षा स्वतुल्योत्कर्षे अक्षांतिः आशिषः आशीर्वादाः तेषां कृताः तैः प्रयुक्ताः न विफलाः ॥ १३ ॥ सामऋग्यजुषां मंत्रैः कृत्वा उपाकृतैः संस्कृतैः पवित्रौषधियुक्तैः जलैः कृत्वा द्विजोत्तमैः कर्तृभिः अभिषिच्य अभिषेचनं कारयित्वा॥१४॥ अग्निं हुत्वाविप्रैः हावयित्वा ॥१५॥ सर्वगुणोपेतासु स्वभावारुक्मं सुवर्णं अभ्युदयोवृद्धिस्तदर्थं द्विजेभ्यः गावः गाः प्रादात् ते द्विजाः आशीर्वादान् अन्वयुंज ततः प्रोक्ताया आशिषस्तास्तथैव अभवन् ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पूर्ववदिति। ततः बलिभिः शक्तैः, गोपैः सपरिच्छदं सपरिकरं, अन इति शेषः। पूर्ववत्, यथापूर्वमित्यर्थः। स्थापितम्। ततः विप्राः, हुत्वा ग्रहादिहोमं विधाय, दध्यक्षतकुशाम्बुभिः, अर्चयांचक्रुः तत्र पूज्यदेवार्चनं चक्रुः ॥ १२ ॥ य इति। ततः, असूया च अनृतं च दम्भश्च ईर्ष्या च हिंसा च मानश्च तैर्विवर्जिताः, ये विप्रादयः सन्ति। सत्यशीलानां तेषां कृताः, तैः प्रयुक्ता इत्यर्थः। आशिषः, विफलाः कदाचिदपि निष्फलाः, न भवन्ति। तत्र असूया गुणेषु सत्स्वपि दोषाविष्करणम्। अनृतं मिथ्याभाषणम्। दम्भो वञ्चनम्। ईर्ष्या अक्षमा। हिंसा भूतद्रोहः। मानोऽहंकारः ॥ १४ ॥ इतीति। इत्येवंविधया बुद्ध्या, बालकं, आदाय सामर्ग्यजुरुपाकृतैः, सामर्ग्यजुर्मन्त्रैः संस्कृतैः, पवित्रा ओषधयो येषु तैः, जलैः, अभिषिच्य स्नापयित्वा, द्विजोत्तमैः ॥ १५ ॥ वाचयित्वेति ॥ स्वस्त्ययनं वाचयित्वा च नन्दगोपः, समाहित एकाग्रचित्तः, अग्निं हुत्वा हावयित्वा च, द्विजातिभ्यः महागुणं षड्रसोपेतं अन्नं, प्रादात् प्रायच्छत्। इति द्वयोरेकसंबन्धः ॥ १६ ॥

कृष्णप्रिया

जो किसी के गुणों में दोष नहीं निकालते, झूठ नहीं बोलते, दम्भ, ईर्ष्या और हिंसा नहीं करते तथा अभिमान से रहित हैं—उन सत्यशील ब्राह्मणों का आशीर्वाद कभी विफल नहीं होता ॥ १३ ॥ यह सोचकर नन्दबाबा ने बालक को गोद में उठा लिया और ब्राह्मणों से साम, ऋक् और यजुर्वेद के मन्त्रों द्वारा संस्कृत एवं पवित्र औषधियों से युक्त जल से अभिषेक कराया ॥ १४ ॥ उन्होंने बड़ी एकाग्रता से स्वस्त्ययनपाठ और हवन कराकर ब्राह्मणों को अति उत्तम अन्न का भोजन कराया ॥ १५ ॥ इसके बाद नन्दबाबा ने अपने पुत्र की उन्नति और अभिवृद्धि की कामना से ब्राह्मणों को सर्वगुणसम्पन्न बहुत-सी गौएँ दीं। वे गौएँ वस्त्र, पुष्पमाला और सोने के हारों से सजी हुई थीं। ब्राह्मणों ने उन्हें आशीर्वाद दिया ॥ १६ ॥

विप्रा मन्त्रविदो युक्तास्तैर्याः प्रोक्तास्तथाऽऽशिषः । ता निष्फला भविष्यन्ति न कदाचिदपि स्फुटम् ॥ १७ ॥
एकदाऽऽरोहमारूढं लालयन्ती सुतं सती । गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत् ॥ १८ ॥
भूमौ निधाय तं गोपी विस्मिता भारपीडिता । महापुरुषमादध्यौ जगतामास कर्मसु ॥ १९ ॥
दैत्यो नाम्ना तृणावर्तः कंसभृत्यः [१]प्रणोदितः । चक्रवातस्वरूपेण जहारासीनमर्भकम् ॥ २० ॥

कर्दमक्षमा

अन्वयः—ते विप्राः मन्त्रविदः तैः याः आशिषः प्रोक्ताः ताः कदाचित् अपि निष्फलाः न भविष्यन्ति इति स्फुटम् ॥१७॥ एकदा आरोहम् आरूढम् सुतं लालयन्ती सती गिरिकूटवत् शिशोः गरिमाणं वोढुं न सेहे ॥ १८ ॥ भारपीडिता विस्मिता गोपी तं भूमौ निधाय जगतां महापुरुषं आदध्यौ कर्मसु आस ॥ १९ ॥ कंसभृत्यः प्रणोदितः नाम्ना तृणावर्तः दैत्यः चक्रवातस्वरूपेण आसीनम् अर्भकम् जहार ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तास्तथैव बभूवुरित्यर्थः ॥ १७ ॥ उत्क्षिप्य मृदुपादेन शकटं व्योम्नि लीलया ॥ तृणावर्तं पदाऽऽपीड्य भुव्यपातयदर्भकः ॥ आरोहमुत्संगम् ॥ १८ ॥ तृणावर्तात्स्वमृत्युपरिहाराय कृष्णेनैवात्मन उत्संगादुत्ताराय कृतं भारमजानत्युत्पातशंकया महापुरुषमादध्यौ । श्रीकृष्णोदरवर्तिनां जगतां भारेण पीडिता विस्मिता च सती । यद्वा जगतां मध्ये कर्मसु आस बभूव । न तु जगदुदरं तं वेदेत्यर्थः ॥ १९–२० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मंत्रविदोऽधीतवेदाः । युक्ताः संयताः । ता आशिषः यथा प्रोक्तास्तथेत्यर्थः । अथ शकटपातने श्रुतिः–"पृथु रथो दक्षिणाया अयोजितं देवासो अमृतासो अस्थुः कृष्णादुदस्थादर्या विहायाश्चिकित्संती मानुषाय क्षयाय" इति । अस्या अर्थः-पृथुर्महान् । रथः शकटं दक्षिणाया दिशः संबधी मृत्युकर इत्यर्थः । अयोजि योजितः । शत्रुभिरित्यर्थाल्लभ्यते तमेनं रथं देवासो देवाः । अमृतासोऽमृताः । आसमंतात् अस्थुः परिवार्य स्थितवंतः । एतस्मिन्नंतरे स रथः कृष्णात्कृष्णं प्राप्य तत्प्रेरणेन उदस्थात् उत्थितः । विहायाः आकाशाश्रितः विशेषेण हयते गच्छतीति वा यंत्रोत्सृष्टगोलकवदाकाशमार्गेणोत्थाय पतितः सन्नष्ट इत्यर्थः । ततश्च अर्या ईश्वरी स्वामिनी माता तत्रत्यप्रजा वा चिकित्संती संशयवती मानुषाय मानुषस्य क्षयाय नाशाय । एतेन पतता रथेनालं बालकः कथं न नाशित इत्यत्र कारणविशेषमपश्यंती माता संदिहानैवातिष्ठन्न त्वीश्वरकृत्यमेतदित्यवेदीदित्यर्थः ॥ १७ ॥ अर्भको नंदबालः (१) गिरिकूटवदद्रिशृंगवत् । "कूटोऽस्त्री निश्चले राशौ लोहमुद्गरदंभयोः । मायाद्रिशृंगयोस्तुच्छे सीरावयवयंत्रयोः । अनृते च" इति मेदिनी । गरिमाणं गुरुत्वम् ॥ १८ ॥ महापुरुषं भगवंतम् । योगमायया मोहिता तदंतस्थविश्वमजानंती । कर्मसु गृहकृत्येष्वास । जगतां भारेणेत्युक्तेः सर्वलोकभारस्य यशोदाकर्तृकधारणासंभवं मत्वार्थांतरमाह–जगतां संसारिणां मध्ये कर्मसु संसारप्रदेषु यज्ञादिष्वेवास न तु ज्ञानमार्ग इति भावः । इत्यर्थ इति । जगदुदरभगवद्वदने तु स्वप्नेऽपि जगत्कर्मणि प्रीतिर्नोदयत इति तात्पर्यम् ॥ १९ ॥ चक्रवातश्चक्राकार उद्धूतबहुधूलिर्वायुस्तेन स्वरूपेण जहार उत्थाप्य जगाम ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कीदृशास्ते ? वेदविदः वेदार्थाभिज्ञाः मन्त्रविद इति पाठो बहुत्र तथापि तदुपलक्षणत्वेन स एवार्थः । अतो युक्ता भगवद्भक्ता इत्यर्थः । "भगवान् ब्रह्मकार्त्स्न्येन" इत्यादेः "श्रद्धावान् भजते यो मां स मे युक्ततमो मतः" इति श्रीभगवद्गीतातः अतस्तैर्या आशिषः प्रोक्तास्त स्तथैव बभूवुः । तदिच्छानुसारेण यथावसरं ताः श्रीभगवति व्यक्ता बभूवुरित्यर्थः ॥ १७ ॥

व्रजे विराजमानोऽहं काञ्चिदर्हामि नावृतिम् । इति चिक्षेप भगवान् उपरिस्थमनः स्फुटम् ॥

एकदा एकाशब्दवयः प्राकट्ये "एकहायन आसीनम्" इत्यग्रे षड्विंशाध्यायोक्तेः लालयन्ती मुखचुम्बनं स्तनपानञ्च तथा कदाचिल्लीलया कराभ्यां उत्तोलनं चेत्यादिलालनं कुर्वन्ती सती परमाभिज्ञेत्यर्थः । इति लालने सौष्ठवमभिप्रेत वोढुं स्वबलेन पर्यापयितुम् अत्रास्या एकाकिनीत्ववर्णनम् "एका गृहदासीषु" इत्यादि वक्ष्यमाणप्रकारान्तरेण मन्तव्यम् ॥ १८ ॥ भूमौ निधायेति तैर्व्याख्यातं तत्र स्वसृत्वित्यत्र स्वशब्देन सैवोच्यते मृत्युशब्देन च पराभव एव तदसम्भवात् कृत प्रकाशितमित्यर्थः । अतः श्रीकृष्णोदरवर्त्तिनामिति विभुत्वेन तदुदरवर्तिनामिवेति व्याख्येयम् परिच्छिन्नत्वेपि विभुत्वन्तु दामोदरलीलायां स्थापयितव्यं विग्रहरूपत्वेपि विभुत्वं विभुत्वेऽपि अन्या स्पृष्टत्वमग्रिमाग्रिमलीलायां स्थापयितव्यम्, यद्वा, भूमाविति सम्भ्रमेण खट्वादेर्भारा-

---

[१] प्रचोदित–वंशी. वीर. जीव. गिरि. ।

सहनत्वाभिप्रायेण चेति भावः भारपीडितेति तादृशप्रसङ्गे तादृशशक्त्युदयादिति भावः। जगतां महापुरुषमीश्वरमित्यर्थः। कर्मसु स्वस्त्ययनादिरूपतद्वात्सल्यमयेषु "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" इत्यनेन तस्यां कैमुत्यात् ॥ १९ ॥ दैत्य इति युग्मकम्। वात्यारूपदैत्यत्वेन दुर्वृत्तत्वम्महाबलिष्ठत्वम् अप्रतिकार्यत्वं चोक्तं कंसभृत्य इति परमद्वेष्टृत्वं तत्र च प्रचोदितः पूर्वं बालघातित्वेन पूतनैव सामान्यतस्तावत् प्रस्थापिता तस्याश्च छद्मभयमूर्त्तेरपि मरणाच्छङ्काकुलस्सन्नमूर्त्त्यैव शकटासुरः प्रस्थापितः तस्य च विलायनादन्तर्भीतः सन् मूर्त्तामूर्त्तधर्मो बलवत्तरो दुर्ग्रहरूपो महावायुरेव प्रकृष्टतया प्रस्थापित इत्यर्थः। स च मूले निष्पीड्य गृहीत इति भाविकौतुकसूचनं चात्र आसीनं तत्र मातृदृष्टिपथ एवेति तस्या विस्मयो दुःखातिशयो दर्शितः, अर्भकं प्रकटितबाल्यं संवृतगौरवमित्यर्थ ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ताश्च सद्यःफला इत्याह—विप्रा इति, वेदार्थाभिज्ञाः, अतो युक्ता भगवद्भक्ता इत्यर्थः; (गी० ६।४७) 'श्रद्धावान् भजते यो मां स मे युक्ततमो मतः' इति श्रीभगवद्गीताद्यनुसारतः ॥ १७ ॥

व्रजे विराजमानोऽहं काश्चिदर्हामि नावृत्तिम्। इति चिक्षेप भगवानुपरिष्टादनः स्थितम् ॥

एकदैकाब्दवयः प्राकट्ये (भा० १०।२६।६)—'एकहायन आसीनः' इत्यग्रे षड्विंशाध्यायोक्तेः। यद्यपि सदाशेषभगवत्ता-प्रकटनपरस्य श्रीकृष्णस्य तद्वर्षमध्येऽन्यत्रापि विचित्राणि पराण्यद्भुतान्याचरितानि सम्भवन्ति, तथा कंसप्रहितश्रीधराख्यछद्मविप्राभिभवचातुरीमयादीन्यपि श्रीमाथुरलोकप्रसिद्धानि सन्ति, तथापि सर्वत्राप्रसिद्धत्वात्, किं वा श्रोतुः श्रीपरीक्षितः सप्ताहावधिजीवितत्वेन स्वल्पकाले तत्तदशेषकथनासिद्धेर्मुख्यान्येव श्रीशुकदेवोऽकथयदित्यूह्यम्, किञ्चैकाब्दे शिशोः प्रायो लोके पादचंक्रमणं दृश्यते। तत्र च बलिष्ठस्य तन्मध्येऽपि घटते, तथापि रिंगणलीलायाः प्रागस्याः कथनमद्भुतलीलाप्रसंगात्, किं वा तत्तल्लीलानामुत्तरोत्तरं माधुर्य्यातिशयापेक्षया। यश्च कश्चित्तद्व्यभिचारः, स केवलमानन्तर्य्यापेक्षया। एवं प्रायोऽत्र लीलाक्रमो नापेक्ष्यः। तच्च ग्रे तत्र तत्र व्यक्तं भावि। लालयन्ती मुखचुम्बनं स्तनपायनं तथा कदाचिल्लालया कराभ्यामुत्तोलनं चेत्यादि—लालनं कुर्वती सती परमाभिज्ञेत्यर्थः। इति लालने सौष्ठवमभिप्रेतम्। गिरेरन्नकूटस्य किं वा सुमेरोः कूटं स्वर्णादिमयश्रृंगम्; यद्वा, गिरीणां कूटः समूहस्तद्वद्गरिमाणं न सेहे न शशाक। यद्यपि विश्वम्भरं तं स्नेहभरेण सदा वहन्त्यास्तस्यास्तादृशोऽपि भावः कियान्? यद्वा, स्वभावेनागण्यब्रह्माण्डभारस्यापि निजनिजभक्तजने लघुरूपत्वमेव तस्य, तथापि नभसि तृणावर्त्तवधाय श्रीभगवता लालनासक्तमातृक्रोडादवतारितुमपूर्वोऽधिकं स प्रकाशित इति; किं वा तस्या वहनशक्तिः क्षणमपह्नुतेति ज्ञेयम् ॥ १८ ॥ अतएव भारेण पीड़िता सती भूमौ निधाय। विस्मिता उत्पातशंकया विगतसहजस्मिता; यद्वा, अकस्माद्भारभरेण विस्मयं प्राप्ता सती। जगतां महापुरुषं परमात्मानं स्वपुत्रक्षेमार्थम्, किं वा भारविशेषेण मनस्यागतं विश्वम्भरं श्रीनारायणमादध्यौ सम्यक् सस्मार, यतो गोपी सहजस्नेहार्द्रचित्तेत्यर्थ.। ततश्च क्षणात् स्वस्था कर्म्मस्वास, पुत्रार्थं गृहकृत्यव्यापृताभूदित्यर्थः ॥ १९ ॥ तृणमिवावर्त्तयति विपरीतं जगत् पातयति, यद्वा, गतिवेगेन तृणान्यावर्त्तयति परिभ्रमयतीति तृणावर्त्त इति महाबलिष्ठत्वमुक्तम्। कंसभृत्य इति परमदुष्टत्वम्; तत्र च प्रचोदितः कंसेन पूर्वमसुरमंत्रणे, सम्प्रति वा पूतनावधादिश्रवणेन हिंसार्थं प्रेरितोऽत एव जहार, आसीनं कुत्रापि गमनाशंका—निवृत्तये मातुः प्रीत्यर्थम्, किं वा, निःशंकं तृणावर्त्तेन हरणार्थमुपविष्टमर्भकं प्रकटितबाल्यं सम्भृतगौरवमित्यर्थः, अन्यथा हरणाशक्तेः ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

या आशिषः प्रोक्तास्तास्तथेत्यर्थः ॥ १७ ॥ गिरिकूटवदिति भाविकार्योपयोगाय गुरुत्वापत्तिः ॥ १८ ॥ जगतां भारेण पीडिता महापुरुषम् आदध्यौ कर्मसु गृहकृत्येषु आस अवर्त्तत ॥ १९–२४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यदभिप्रायेणाशिषोन्वयूयुजन् ताश्च तथैव बभूवुरित्याह—तत्विप्रैर्या आशिषस्तदा प्रोक्तास्ताः कदाचिदपि स्फुटं नूनं निष्फला न भविष्यन्ति ॥ १७ ॥ अथ तृणावर्त्तासुरवधात्मकमन्यदपि भगवतो बालचेष्टितं विवक्षुस्तावत्तदुपोद्घातरूपं चेष्टितमाह—एकदेति द्वाभ्याम्। कदाचित् सती यशोदा आरोहमुत्सङ्गमारूढं सुतं श्रीकृष्णं लालयन्तीति गिरिकूटवत् गिरिशृङ्गस्येव शिशोर्गरिमाणं भारं वोढुं न सेहे नासहत तृणावर्त्तान्मातुरपमृत्युपरिहाराय चिकीर्षितकार्योपयोगाय च तदङ्कादवरोढुं च भगवता कृतं भारं न सहे इति भावः ॥ १८ ॥ कदाचिदप्यस्य शिशोरेवंविधा गरिमा न दृष्टा इति विस्मिता भारेण पीडिता च शिशुं भूमौ निधायोत्पातशङ्कया महापुरुषं भगवन्तमादध्यौ ध्यातवती ततो जगतां कर्मसु गार्हीयकर्मसु आस प्रवृत्ता बभूव। यद्वा श्रीकृष्णोदरवर्तिनां जगतां भारेण पीडिता सती यद्वा जगतां मध्ये कर्मस्वास न तु जगदुदरं तं भगवन्तं वेदेत्यर्थः ॥ १९ ॥ तदा तृणावर्त्ताख्यो दैत्यः कंसस्य भृत्यः तेन च प्रचोदितः चक्रवातस्वरूपेणागत्यासीनं यशोदया त्यक्तमर्भकं श्रीकृष्णं जहार गृहीतवान् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ताश्च आशिषस्तैः प्रोक्तास्तत्तथैव बभूवुरिति शेषः। ब्रह्मण्यदेवत्वेन तत्तत् प्रकाशानामङ्गीकारादिति भावः ॥ १७–१८ ॥ जगतां महापुरुषम् ईश्वरमित्यर्थः। कर्मसु स्वस्त्ययनादिरूपतद्वात्सल्यमयेषु "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" इत्यनेन कैमुत्यात् पूतनादिना कार्यादिसिद्धेः कंसेन स्वमृत्युरेव प्रकटतया प्रेरित इत्यर्थः ॥ १९–२० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तृणावर्त्तनामा महावात्यारूपी कश्चिद्दैत्यः समागमिष्यति, मातुः क्रोडस्थं मां मात्रा सह व्युद्धुनोति, तदा माता न जीविष्यतीति मातृवत्सलः सर्वज्ञशिरोमणिस्तथागरिमाणं स्वीचकार, यथा माता वोढुमशक्ता सती भूमौ स्थापयतीति पूर्वोक्तं तोकाचरितमद्भुतमित्यद्भुतत्वं प्रदर्शयन्नाह—भूमौ निधायेत्यादि। महापुरुषमादध्यौ महापुरुषोऽयमिति चिन्तयामास। जगता सह कर्मसु मा आस, जगतिं नास, कर्मस्वपि नास, जगद्विस्मृतिः कर्मविस्मृतिश्चासीत्। तेन विस्मयवशादज्ञैव बभूव। अन्यथा तं बहिर्निधाय गृहकर्मकरणेन तं प्रत्यनादरः स्यादिति ॥ १९ ॥ चक्रवातस्वरूपेणेत्यादि। आसीनमिति मात्रा यत्र विन्यस्तस्ततोऽन्यत्र क्वापि गत्वा आसीनमित्यर्थः ॥ २०–३७ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे सप्तमोऽध्यायः ॥ ७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

भूमौ निधायेत्यादि। महापुरुषमादध्यौ गरिमाणं शिशोर्वोढुं नाशकदित्यादि—पूर्वोक्तभारपीडया तं भूमौ निधाय जगतां मध्ये महापुरुष एवायमित्यादध्यौ। तदनु कर्मसु गृहकृत्येषु आस बभूव। यद्वा, महापुरुषमादध्यौ महापुरुष एवायमिति चिन्तितवती, जगता सह कर्मसु मा आस, जगद्विस्मृतिः कर्मविस्मृतिश्च तस्या बभूव, केवलं तन्महिमस्मरणेनैव जाताह्लादा सती किमपि न सस्मार। अतएव तदा गृहे तनयमपि विस्मृतम् ॥ १९ ॥ जहारासीनमर्भकमिति। आसीनं मात्रा यथाविन्य स्तस्तथैव आसीनस्तम् ॥ २०–३७ ॥

इति सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ये विप्रा युक्ताः योगिनस्तैर्या आशिषः प्रोक्तास्तास्तथा बभूवुरिति शेषः ॥ १७ ॥ राजत्यखिलसम्पत्तौ मय्यपि सञ्चितैः किमेभिर्वस्तुभिरिति स्वमनोऽभिनदीश्वरः एकदा एकाब्दवयसि वृत्ते सति "एकहायन आसीनो ह्रियमाणो विहायसा" इत्यग्रेतनोक्तेः आरोहमुत्सङ्गमारूढं तं लालयन्ती भुजाभ्यामुत्तोलनान्दोलनादिभिरुल्लसन्ती गिरिकूटवत् गिरिशृङ्गस्येव शिशोर्गरिमाणं वोढुं न सेहे आगमिष्यन्तं तृणावर्त्तं समातृकमेवामुं हरिष्यन्तमालक्ष्य मातुर्यशोदायाः क्लेशो मा भूदित्यैश्वर्यैव शक्त्या तदुत्ताराय भारः कल्पयामासेति ज्ञेयं किञ्चिदप्युपरि तोलयान्व मां व्योम्नि खलितुमनायत्तोऽस्म्यहम् इत्थममुष्य किल सत्यकामतैवानयत्तृणाविवर्त्तनासुरम् ॥ १८ ॥ भूमाविति। सम्भ्रमेण विस्मिनेति मच्छिशोरयमाकस्मिको भारः कुतस्त्यो न जाने कस्यचिद्बालग्रहस्यावेशजनितो वेति शङ्कया जगतां महापुरुषं श्रीनारायणमादध्यौ वैकुण्ठदिशमूर्ध्वमालोक्य भगवंस्त्वयैव दत्तोयं सुतस्त्वयैव पालनीय इति ध्यानेनोवाचेत्यर्थः। ततश्च व्यग्रा तत्स्वस्त्ययनाद्यर्थं कर्मसु विप्राह्वानादिषु आस बभूव ॥ १९–२० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तादृशद्विजोत्तमप्रयुक्ताः आशिषः सर्वदा सत्या भवन्तीत्याह विप्रा इति ॥ १७ ॥ आरोहमुत्सङ्गं तृणावर्तान्मातृरक्षार्थं श्रीभगवतैवाविष्कृतं गरिमाणं भारम् ॥ १८ ॥ भारपीडिता तं भूमौ निधाय किमिदमिति विस्मिता स्वशिशुकुशलार्थं महापुरुषमादध्यौ तं च कुशलिनं दृष्ट्वा जगतां प्राणिनामावश्यकानि यानि कर्माणि तेषु आस प्रवृत्ता बभूव ॥ १९–२० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

युक्ताः योगिनः न कदाचिदपीति कृष्णे तत्फलानां सार्वदिकत्वादिति भावः ॥ १७ ॥ चरितान्तरमाहैकदेति। एकाब्दवयसि एकहायन आसीन इत्यादि वक्ष्यमाणात् आरोहमङ्कमारूढं सुतं कृष्णं लालयन्ती भुजाभ्यामुत्तोलनान्दोलनादिभिरुल्लासयन्तीत्यर्थः। शिशोस्तस्य गिरिकूटवत् शैलशृङ्गस्येव गरिमानं वोढुं न सेहे मातृभुजान्दोलाभ्युदितवियत् क्रीडेच्छेत्यूर्ध्वस्थित्यास्वक्रीडास्थानानि दिदृक्षौ च तस्मिन् सति तत् संपादकतृणावर्त्तागमः। तेन मे समातृकस्योन्नयने मातुः क्लेशः स्यादतस्तदङ्कात् पृथक् स्यामिति वाञ्छति सति गरिमोदयात् तदङ्कादवततार स्वोन्नयने तु लघिमोदयश्चेति बोध्यम् ॥ १८ ॥ गोपी राज्ञी यशोदा भारपीड़िता संभ्रमेण तं भूमौ निधाय शिशोरस्य कुतोऽयं भार इति विस्मिता बालग्रहनिमित्तो भवेदिति शङ्कमाना तच्छान्तये जगतां महापुरुषं नारायणमादध्यौ कर्मसु शान्तिकरब्राह्मणाकारणादिष्वास बभूव ॥ १९ ॥ प्रचोदितः कंसेन प्रेषितः ॥ २० ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

प्राग्जातेश्चान्वयुंजतेत्यस्य प्राग्जातेः प्राग्जातयः प्राक् क्षत्रियादिभ्यः पूर्वं जातिरुत्पत्तिर्येषां ते प्राग्जातयो ब्राह्मणेश्चाशिषोऽन्वयुंजत सम्यग्ययुजुरित्यर्थः। एतेन प्राग्जातयश्चाशिषोऽन्वयुंजतेति वक्तव्यं प्राग्जातेश्चान्वयुंजतेति कथनमनुपपन्नमिति शंका परिहृता। प्राग्जातेरिति षष्ठ्येकवचनं प्रथमाबहुवचनादेशः। आशिष इत्यस्य शेष इति च स्वीकृत्य प्राग्जातयश्चाशिषोऽन्वयुंजतेत्यर्थस्योक्तत्वात् ॥ १८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वस्त्ययनं च वाचयित्वाऽग्निं हुत्वा हावयित्वा महागुणं षड्रसोपेतमन्नं प्रादात् ॥ १७ ॥ गावः सर्वगुणोपेता इत्येव प्राकृतः पाठः। गावो गा इति केचिद्। वस्तुतस्तु गाः व इति पदद्वन्द्वं। इयं वो न ममेति सङ्कल्पपूर्वकं प्रादादित्यर्थः। एवमेव तदभिप्रायः प्राय इति। जित्वा वयं नेष्यति चाद्य गाव इति विराटपर्वोक्तेर्ज्ञायत इत्युत्तरत्रेत्थमनुसन्धेयं। पुत्रस्याभ्युदयार्थाय जातेः प्रागुत्पत्तेः पूर्वं सङ्कल्पिता प्राग्जातेः प्रथमवर्णभ्य इति वा ब्राह्मणसङ्घस्येति वा सर्वगुणोपेता अनसूयादिसर्वगुणसहितास्ते विप्रा आशिषोऽन्वयुञ्जत युयुजुरित्यन्वयः ॥ १८ ॥ ननु तैर्दत्ता नान्यथा भवन्तीति कुत इत्यत आह ॥ विप्रा इति। युक्ता एकैकेनोक्ता न निष्फलाः किमुत मिलितैरिति युक्ता इत्यनेन ध्वनयति। तैर्याः सुताशिष इति क्वचित्पाठः प्रस्तुतमात्रसङ्गतस्तथाऽऽशिष इति सर्वसरलः। ताः कदाचिदपि निष्फला न भविष्यन्ति। स्फुटं कदाचिदपीति शपथपूर्वकं तद्वैपरीत्यं द्योतयति। श्लोकद्विकस्याखण्डान्वयो वा। प्राग्जातेः पुत्रस्येत्यन्वयः। प्राग्जो ह्याद्यो ब्रह्मा तस्यातिः सम्यगानन्दो यस्मात्स तस्य पुत्रस्य येभ्योऽसर्वगुणोपेता वासःस्रग्रुक्ममालिनीर्गाश्च व इति प्रादात्। ते च विप्रा युक्ता आशिषोऽन्वयुञ्जत यास्ता विफलाः कदाचिदपि न भविष्यन्तीति ये मन्त्रविदो वेदज्ञास्तैः प्रोक्तास्तेऽपि नोपर्यवोक्तवन्त इत्याह ॥ स्फुटमिति। अतो नाविश्वसनीयतेति भावः। प्रागेव जो जेता चातिः पूर्णानन्दश्च तस्य पुत्रस्येति वा। जो जेता चेति विश्वः। प्राग्जातेर्बलभद्रस्यापीत्यर्थः ॥ १९ ॥ आरोहमङ्कं गिरिकूटस्येव तत्समूहस्येव। कूटं राशाविति विश्वः। गुरोर्भावो गरिमा तमिमनिजन्तः ॥ २० ॥

श्रीसुबोधिनी

ननु कथमेवं ज्ञायते तत्राह विप्रा इति, प्रथमतो विप्रा विशेषेण पूरका निर्दुष्टास्तदेव तेषां विशेषपूरकत्वं भवति, तत्रापि मन्त्रविद ऋषयस्तत्रापि युक्ताः सत्कर्मकर्तारः, एवं गुणत्रययुक्तैर्या आशिषः प्रोक्तास्ताः कदाचिदपि निष्फला न भविष्यन्ति, स्फुटं सत्यं, अतस्तैर्योजनं युक्तमेव ॥ १७ ॥ एवमेकं चरित्रं यशोदानन्दयोः भगवत्परतासाधकं निरूप्य पृष्टानां पञ्चानां मध्ये प्रथमस्योत्तरत्वेनोपाख्यानमारभत एकदेत्यष्टादशभिः।

वाचिकं कायिकं चोक्तं मानसं तूच्यतेऽधुना। अन्यथाज्ञानतः सर्वं करोतीति भविष्यति ॥ १ ॥
लौकिकेनापि भावेन यावत् कृष्णैकतानता। तावद्भूतनकृत्यानि न करोति हरिः स्वयम् ॥ २ ॥
वर्षेण तु परावृत्तिर्धर्माणां भवतीति हि। अतो वर्षान्तरे कृत्यं तृणावर्तगतं कृतम् ॥ ३ ॥
देहबुद्धिर्भगवति निवृत्ता चेन्निवर्तते। तत्पराणां देहमतिः सजातीयाविशेषतः ॥ ४ ॥

अष्टादशविद्यास्वपि भगवतो देहो नास्तीति ज्ञापयितुमेकदेव गुरुत्वं लघुत्वं चोच्यते,

पूतनावधमारभ्य कंसो जानाति गोकुले। हरिरस्ति जगद्वन्द्यो मम हन्तेति सर्वथा ॥ ५ ॥
तमानेतुं तृणावर्तं ततः प्रेषितवान् स्वयम्। त्रयो ह्यत्यन्तबलिनः सर्वकार्यविचक्षणाः ॥ ६ ॥
तृणावर्तो बकः केशी तत्राप्याद्यो महान् स्मृतः। तृणवत् सकलं विश्वमावर्तयति सर्वथा ॥ ७ ॥
तृणावर्तस्ततः प्रोक्तस्तमादौ प्राहिणोत् ततः ॥ ७½ ॥

भगवान् सर्वज्ञः, तृणावर्तं मथुरातः प्रचलितं ज्ञात्वा गुरुपदार्थं जनयतीति स्वयमेव गुरुर्जातः, तत्र यशोदाया गुरुत्वज्ञानं भवत्विति तस्यास्ततो व्युदासार्थं च तस्या अङ्क उपविष्टः स्तनं पिबन्नेव गुरुर्जातस्तद् भगवतः सहजं गुरुत्वं तदानीमाविर्भूतं, तद् गुरुत्वं यशोदा ज्ञातवतीत्याहैकदेति, कालविशेषस्तत्राज्ञातोनिमित्तश्च, रोहमङ्कमारूढमारुह्योपविष्टं, स्वयमेव लालयन्ती कुन्तलानि प्रसारयन्ती मुखचुम्बनादिना भगवतो हासं जनयन्ती जाता, सुते हि तत् कर्तव्यं, सतीति तस्यास्तथाभाग्ये हेतुभूतो धर्म उक्तः, लौकिकभावेनैव स्नेहादि करोतीति तन्निवृत्त्यर्थं गुरौ जाते शिशोर्गरिमाणं वोढुं न सेहे न शक्ता, गिरिकूटवद् गिरिसमूहमिव यथा भूमिरप्येकत्र पर्वतकोटीनां समुदायं न सहते, इयमप्यदितिराधिदैविकरूपापि न सेह इति वक्तुं दृष्टान्तः, अन्यथायुक्तो दृष्टान्तो नोक्तः स्यात्, क्रमेण भगवान् गुरुर्जात इति न तस्या भङ्गः ॥ १८ ॥ अत एव यावच्छक्यं गृहीत्वाशक्ये भूमौ स्थापितवतीत्याह भूमौ निषायेति, तं भगवन्तं, भूमौ स्थापने हेतुभूतस्याविवेकस्य निधानमाह गोपीति. यद्यपि महती तथापि गोपभार्या, स्थापनानन्तरं भारं स्मृत्वा विस्मृता, ननु पुत्रगुरुत्वं मातुः सुखदं भवतीति कथं विस्मय इति चेत् तत्राह भारपीडितेति, भारेण पीडिता,

अलौकिकोयं भारः पीडाजनकत्वाद्, अतो **विस्मिता,** अग्रे भीतापि भविष्यतीति क्रमेण माहात्म्यज्ञानात्, तदा किं कर्तव्यमिति विचार्योत्पातशङ्कया **महापुरुषं पुरुषोत्तमं दध्यौ** ध्यातवती, सर्वानिष्टनिवृत्त्यर्थं **महापुरुष** एवायमिति वा ध्यातवती **जगतां** ब्रह्माण्डकोटीनामपि मध्ये स्वामिनं, अयं सर्वजगतां महापुरुष इति, **सतीतिपदाद्** गुरुत्वेन पुरुषान्तरं ज्ञात्वा व्रतक्षतिभयभीतेव परमपुरुषं सर्वेषामेव भर्तारं ज्ञातवती, आसमन्ताद् **दध्याविति** भवत्ययं न वेति ध्यानं प्रतीत्यर्थं, ततो भगवन्तं ज्ञात्वा तस्य परिचर्यार्थं **स्नानादिकर्मस्वास,** तत्तत्कार्याणि कर्तुमारब्धवतीत्यर्थः, अन्यथा क्षणवियोगे प्राणा एव गच्छेयुः समागतस्तु मोहयिष्यतीति न काप्यनुपपत्तिः, लालनफलमानुषङ्गिकं ज्ञानमिति च, अज्ञानाद् वा जगतो भर्तारं भगवन्तं ध्यात्वा **गृहकर्मसु** गतेति, उभयोरोद्यः साधीयान् ॥ १९ ॥ एवं मातरि निर्गतायां तृणावर्तः समागत इत्याह, **दैत्या** इति जात्यैव क्रूर उक्तो **नाम्नैव तृणावर्त** इतिमाहात्म्यमप्रतीकारे हेतुः, **कंसभृत्य** इत्यवश्यानिष्टकर्तृत्वज्ञापकं, **प्रणोदित** इति तेनैव कंसेन प्रकर्षेण प्रेरितः, एवं चतुर्भिर्धर्मैस्तस्य महत्त्वमुक्तं तन्निराकरणे भगवन्माहात्म्यज्ञापनार्थं, **दैत्यत्वेन** देवविरोधित्वं **नाम्ना** महाबलत्वं **भृत्यत्वेन** स्वधर्मो वचनं ततोप्यावश्यकं, सत्त्वरजस्तमोगुणानां प्रत्येकसमुदायभेदेन विरोधित्वं चोक्तं तं तृणवद् भगवान् निराकरिष्यतीति चतुर्विधपुरुषार्थबाधकत्वेनोक्तस्तादृशः सर्ववञ्चनार्थं कृत्रिमवेषं कृत्वा **जहारेत्याह चक्रवातस्वरूपेणेति,** **चक्रस्वरूपो** वातश्चक्रवातः, चक्रवाते स्वरूपं यस्य, परितश्चक्रवातं कृत्वा वायुरायातीति भ्रममुत्पाद्य तत्सङ्ग एव लघुदेह उपविष्टं भगवन्तं निधिमिव **जहार,** ननु महत्त्वात् कथं जहारेत्याशङ्क्याह **अर्भकमिति,** वेगवशान्महाबलः स्वोपास्यभगवद्बलाद् भगवन्तं **जहार,** सहजबले उत्थातुमेव न शक्नुयात्, अत एव भगवानक्लिष्टकर्मा ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

एकदेत्यत्र, वाचिकमित्यादि । पूतनावधे रक्षाकरणे वाङ्नियुक्तेति तन्निरोध उक्तः । शकटभङ्गे भगवदर्थः कायिको व्यापार उक्त इति तथा । **तृणावर्तप्रसङ्गे** भगवन्निमित्तकं दुःखं वक्ष्यते **मानसमिति** । मानसो निरोधस्तथा । प्रकरणान्निरोध एव विशेष्य इति लिङ्गमविवक्षितमत्रेति ज्ञेयम् । उक्तत्रयसम्बन्धिनिरोधकरणं वा विशेष्यम् । रक्षाविधानशान्त्यादेर्भगवल्लीलात्व उपपत्तिमाहुः **अन्यथेति** । एतस्य निमित्तत्वाल्ल्यब्लोपे पञ्चमी ज्ञेया । तथा च तत्प्राप्य तद्विषयत्वं प्राप्येति यावत् । ज्ञानहेतुषु स्वरूपतद्धर्मेषु सत्स्वपि स्वलीलार्थं तेषामन्यथाज्ञानं स्वस्मिन् प्राकृततुल्यत्वेन ज्ञानमुत्पाद्य स्वयमेव सर्वं करोतीत्यर्थः । तेन रक्षाविधानादिना पूर्वस्माद्वैलक्षण्यभानं यथा लोके तथा स्वस्मिन्नपि प्रकटयतीति ज्ञेयम् । तथा ज्ञानाभावे तूक्तप्रकारको निरोधो न स्यादिति भावः । अन्यथाज्ञाने सति कायवाङ्मनोनिरोधकथनाच्छ्लाघ्यत्यद्भुतत्वं चरित्रेस्मिन् ज्ञापितं भवति । किञ्च । एकस्मिन् बाले सर्वेषां सहजस्नेहो लोके न सम्भवतीति तथात्वं यदत्र तद्भगवत्कृतमेवेति ज्ञायते । यद्वा । मानसिकनिरोधस्यावश्यकतामाहुः **अन्यथेति** । अत्र गुरुत्वात्मकस्वधर्मज्ञापनपूर्विका लीलोत्पद्यत इत्येतत्कथनाभावे जीवसहजाज्ञानतो हेतोर्नन्दयशोदादिः सर्वं करोतीति ज्ञानं सर्वेषां भविष्यतीति तदभावायैतदुच्यत इत्यर्थः । **अनिमित्तश्चेति** । अङ्कारोहे कालो न निमित्तमिति न विद्यते कालो निमित्तं यस्य तादृगारोह इति च न तत्कथनमित्यर्थः । **महापुरुषमादध्यावित्यत्र, आगतस्त्वित्यादि** । उक्तविधासक्तौ मातृत्वेन परानुरोधाभावाद्गोचारणरात्रिलीलादिकं सर्वं प्रतिबद्धं तथा स्यादुक्तज्ञाने सार्वदिके वा लीलारसानुभवो न भविष्यतीत्याशङ्क्य गोकुले समागमनं सर्वसुखदानार्थमिति यथैव तद्भविष्यति तथैव सम्पादयिष्यतीति न काप्यनुपपत्तिरित्युक्तमेतेन । किञ्च । **लालनेत्यादि** । आनुषङ्गिकफलस्यासार्वदिकत्वादपि ज्ञानमिदं न स्थास्यतीति भावः । मुख्यं फलं तदेव स्वयं, निरोधो वा तत्कृतः ।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

एकदेत्यत्र पृष्टानामित्यादि, यद्यपि 'यच्छृण्वत' इति राज्ञो वाक्य एकवचनात् पञ्चकार्यजनकमेकमेव चरित्रं पृष्टमिति ज्ञायते चरित्रं च सर्वमेव तादृशं तथापि यशोध्यायत्वाद् भगवतः प्रत्येकमेकैककार्यकरत्वमेवात्राभिप्रेतं चरित्र इति ज्ञात्वा **शुकः पृष्टानां पञ्चानां मध्ये** तथारभत इत्यर्थः, **वाचिकमित्यादिकारिकाणां** तात्पर्यं **टिप्पण्यामाहुः पूतनेत्यादि, तथेत्यधुनोच्यते, तथाज्ञानाभाव** इति वैलक्षण्यभानाभावे, **उक्तप्रकारक** इति रक्षाविधानादिरूपः, **अन्यथाज्ञाने सतीति** प्राकृतबालज्ञाने सति, **रक्षाविधानशान्त्यादेर्भगवच्चरित्रत्वमुत्सवाध्यायोक्तदिशापि** ज्ञातुं शक्यत इत्यरुच्या पक्षान्तरमाहुर्यद्वेत्यादि, अर्थस्तु स्पष्टः, **सुबोधिन्यां** ननु शकटभङ्गश्चतुर्थे मासि तृणावर्तवधस्तु **वर्षानन्तर** **"एकहायन आसीन"** इतिवाक्यात् तथा सति नाडीवर्धापनं षष्ठिकापूजनं सूतीस्नानं चन्द्रसूर्यदर्शनं कर्णवेधोन्नप्राशनं मुण्डनं चूडाकर्म चेत्यादि नवमासकृत्यं मार्कण्डेयपूजा च कुतो नोक्ता ? न च कुत्रापि पुराणे नोक्तातोत्रापि नोक्तेति शक्यं, 'नाडीवर्धापनं षष्ठी नामादेः करणं मम' इतिजन्माष्टमीपूजाविधौ वाक्यदर्शनेन पुराणान्तरसिद्धत्वात् कर्णवेधस्य च श्रीगोकुल इदानीमपि दर्शनात् नवमासपर्यन्तस्य लीला कुतो नोक्तेत्याकाङ्क्षायामाहु**र्लौकिकेनेत्यादिकारिकाद्वयं, कृतमिति** मारणं कृतं, तथा च नाडीवर्धापनादिषु केषाञ्चित् परकृतत्वात् सर्वेषां कृष्णैकतानतासाधकत्वेन निरोधानुकूलत्वात् तन्नोक्तं, राज्ञा प्रथमप्रश्नेत्र च द्वितीयप्रश्ने भगवत्कृतानामेव पृष्टत्वादिति, ननु पूतनानाशेन यद्यप्यविद्यापर्वाणि नष्टानि तथापि तूलाविद्याया एव नष्टानि न तु मूलाविद्याया इति सा पुनः व्रजवासिनः संसारे पातयेदिति तन्निवृत्त्यर्थं **प्रथमं गुरुत्वप्रकटनलीलया स्वस्मिन् देहबुद्धिं** निवर्तयतीत्याहु**र्देहबुद्धिरित्यादि, सजातीयाविशेषत** इति सजातीयत्वादित्यर्थः,

भगवतो देहाभावे प्रमाणमाहुरष्टादशेत्यादि, तांश्च "पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिता वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशे"ति याज्ञवल्क्येनोक्ताश्चतुर्दश चत्वारश्चोपवेदा इत्येवमष्टादशसु तथेत्यर्थः, ननु यथा पूतना पुरग्रामादिषु पूर्वं निघ्नन्ती पश्चात् गोकुले समागता तृणावर्तस्तु पूर्वमेव गोकुले समागतस्तत्र को हेतुः ? अत्राहुः **पूतने**त्यादि, **पूतनावधमित्यारभ्य गुरुर्जात** इत्यन्तं यदुक्तं तत् सर्वं स्कान्दादिपुराणे वृन्दावनमाहात्म्ये द्वादशाध्याये कण्ठत उक्तमिति ज्ञेयं, **अनिमित्त** इत्यस्यार्थमाहुष्टिप्पण्या-**मकारो हे**त्यादि ॥ १८ ॥ **महापुरुषमादध्या**वित्यत्र **सतीतिपदा**दिति पूर्वश्लोकोक्तात् **पदात्**, टिप्पण्यां **समागत** इत्यादेरर्थमाहु-**रागत** इत्यादि ॥ १९ ॥ **दैत्य** इत्यत्र **चतुर्विधपुरुषार्थबाधकत्वेनोक्त** इति भक्तानां तथात्वेनोक्त इत्यर्थः, **अत एवे**ति सहज-बलाप्रकटनादेव ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एकदा रोहमित्यत्र टिप्पण्यां, पूर्वाध्यायचरित्रस्य शास्त्रलोकयोरद्भुतत्वं तत्कारिकायां निरूपितं तथात्रापीत्याशयेन शास्त्रेऽद्भुतत्वं निरूप्य लोकेऽद्भुतत्वमाहुः **किञ्चे**ति, **तत्** तृणावर्तप्रसङ्गोक्तं **सर्वेषामेकबालकविषयकसहजस्नेहवत्त्वं भगवत्कृत-मेवे**त्यर्थः, सुबोधिन्यां, पूतनाप्रसङ्गे शकटप्रसङ्गे च कार्यमेव तथा कृतवान् न तु स्वधर्मं ज्ञापितवान्, अत्र तु स्वधर्मगुरुत्वज्ञापन-पूर्वकं लीलां कृतवांस्तत्तात्पर्यमाहुः **लौकिकेनापी**ति, **कृष्णैकतानता न भवती**तिशेषः, पूर्वमन्यचित्तता स्थिता, अत्र तु लालनाद् **भगवत्परता** जातेत्यर्थः । **नूतनकृत्यानि** गुरुत्वधर्मज्ञापनपूर्वकलीलेत्यर्थः, **वर्षणे**ति प्रपञ्चविस्मृतौ सत्यामपि वर्षस्यैकायूरूपत्वेनैक-कालत्वात् प्रपञ्चविस्मृतिशङ्का स्यादतो **वर्षान्तरे** द्वितीयायूरूपे तथा **कृत**मित्यर्थः, द्वितीयस्कन्धे 'आयुर्हरती'त्यत्र श्लोके उत्तमश्लोक-वार्तानीतक्षणकायुषो हरणाभावकथनेनैकायुषि सिद्धस्य धर्मस्य तदायुःपर्यन्तमनुवृत्तिः सूचितेति सम्मतिसूचनाय **हि**शब्दः, गुरुत्व-ज्ञापने हेत्वन्तरमप्याहुः **देहबुद्धि**रिति, तत्र हेतुमाहुः **सजातीये**ति, यत इतिशेषः, भगवति निर्दोषबुद्धिः सामान्यतः स्वदोषनिवर्तिका परं **सजातीया विशेषतो** निवर्तयतीत्यर्थः, प्रकरणीयश्लोकसङ्ख्यातात्पर्यमाहुः **अष्टादशे**ति, लघुत्व'मादाय मात्रे' इत्यत्र प्रतिपादितं, **गुरुपदार्थ**मिति गुरुत्वाभावे मथुरायां नयेदितिभावः, यावतोच्चैर्गमनं भवति तिर्यग्गन्तुं च न शक्नोति तावदेव गुरुत्वं प्रकटित-वानितिज्ञेयं, लालनं विवृण्वन्ति **कुन्तलानि**ति ॥ १८ ॥ **भूमौ निधाये**त्यत्र **अविवेकस्ये**ति विवेके सति अकस्मादयं तथा गुरुर्जातः अतोयं भगवानेवेतिज्ञानेन स्वदेहविस्मरणमेव भवेन् न तु स्वदेहभङ्गशङ्कया भूमौ स्थापनमितिभावः, **अपे** इति जृम्भालीलाया-मित्यर्थः, मूले **कर्मस्वि**ति सामान्यत उक्तं, तस्य **भगवत्परिचर्यार्थ**कत्वेन व्याख्यानेर्थोपपत्तिमाहुः **अन्यये**ति, कार्यान्तरकृतौ जाना-तीच्छति यतत इति नियमात् तत्तद्विषयकं ज्ञानं शङ्कितं स्यात्, तथा च भगवदसम्बन्धिकार्यविषयकज्ञानक्षये भगवत्सम्बन्धाभावात् तद्वियोगे सत्यधना भगवत्त्वे ज्ञानस्य जातत्वात् स्थितिर्न भवेदित्यर्थः ॥ १९ ॥ **दैत्यो नाम्ने**त्यत्र **सत्त्वे**ति आद्येन दैवविरोधकथनात् **सत्त्वविरोधित्वं**, द्वितीयेन रजःकार्यस्य विश्वस्य तृणवदावर्तकथनाद् **रजोविरोधित्वं**, तृतीयेन स्वधर्मनिःस्वकथनात् **तमोवि-रोधित्वं, चतुर्थेन समुदायविरोधित्व**मित्यर्थः, **चतुर्विधपुरुषार्थे**ति सङ्ख्यातात्पर्यमुक्तं, **चक्रवाते स्वरूपं य**स्येति **चक्रवाते स्वरूपं यस्य** देहस्य तेन देहेनेत्यर्थः, **अत एवे**ति आसीनस्य हरणकथनादित्यर्थः, तस्यैव पूर्वमपराध इति भावः ॥ २० ॥

(४) श्रीमदीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एकदा रोहमारूढमित्याद्यष्टादशश्लोकसङ्ख्यातात्पर्योक्तौ **भगवतो देहो नास्तीति ज्ञापयितु**मिति "आनन्दरूपममृतं यत् विभाति" "सच्चिदानन्दविग्रह" "सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे" इत्याद्युपनिषद्भ्यां "आनन्दमूर्तिमजहादति-दीर्घताप" मित्यादिपुराणादा"नन्दमात्रकरपादमुखोदरादि"रित्यादितन्त्राच्च आनन्दविग्रहे सिद्धे **प्राकृतदेहो नास्तीति ज्ञापयितु**-मित्यर्थः, प्राकृतस्यैव देहस्य देहपदवाच्यत्वात्, दिह उपचय इतिधातुना उपचयरूपभावविकारस्योक्तत्वात् ब्रह्मणस्तु षड्भाव-विकाररहित्येन न देहवत्त्वं, **गिरिकूटव**दित्यस्य व्याख्याने, **इयमप्यविति**रिति **इयं** यशोदा देवकीरूपत्वाददितिरूपेत्यर्थः, यदा वसुदेवः स्वाधिदैविकं वसुदेवं नन्दे स्थापितवांस्तदा ह्याधिदैविकी देवकी श्रीयशोदायां समागतेतिभावः, आधिदैविकवसुदेव-देवक्योर्नन्दयशोदयोः समागमनस्योपयोगस्तु भगवतो रासलीलायां वसुदेवनन्दनत्वे नन्दयशोदाभ्यां ज्ञातेपि स्वपुत्रभाव-दार्ढ्यस्थितौ ज्ञेयः, वसुदेवपुत्रत्वे ज्ञातेपि स्वपुत्रत्वज्ञानं नन्दस्य न निवृत्तं, स्वस्य वसुदेवत्वात्, एवं श्रीयशोदाया अपि भगवति देवकीपुत्रत्वज्ञानेपि स्वपुत्रत्वबुद्धिर्न गता स्वस्याः श्रीदेवकीरूपत्वात्, अन्यथा परपुत्रत्वे ज्ञाते स्नेहो न तिष्ठेत्, तथा सति कृतोपि निरोधो व्यर्थः स्यात्, अतः श्रीनन्दे आधिदैविकवसुदेवस्थापनं श्रीयशोदायामाधिदैविकदेवकीस्थापनमिति ज्ञेयम् ॥ १८ ॥ **दैत्यो नाम्ना तृणावर्त** इत्यस्य व्याख्याने, **दैत्यतृणावर्तकंसभृत्यप्रचोदि**तेतिपदैश्चतुर्भिश्चतुर्विधपुमर्थबाधकतोक्तेतिसङ्ख्या-तात्पर्यमुक्तम् ॥ २० ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एकदा रोहमारूढमित्यत्र **वाचिक**मित्यादि का० ३०३ । पूतनावधे रक्षाकरणे वाङ्नियुक्तेति वाचनिको निरोधः उक्तः, शकटभङ्गे भगवदर्थः **कायिको व्यापार** उक्त इति **कायिको** निरोध उक्तः, तृणावर्तप्रसङ्गे भगवन्निमित्तकं दुःखं वक्ष्यते **मानस**मिति,

मानसो निरोध उच्यते इत्यर्थः, प्रकरणान् निरोध एव विशेष्य इति नपुंसकलिङ्गमविवक्षितमत्रेति ज्ञेयं, निरोधकरणं वा विशेष्यं, **अन्यथाज्ञानत** इतिपदं टिप्पण्यां प्रकारद्वयेन व्याख्यातं, तत्राद्यपक्षे **अन्यथाज्ञानत** इति नञ्प्रश्लेषरहितमेकमेव पदं, तद्यथा, ननु रक्षाविधानशान्त्यादेः कथं भगवल्लीलात्वमित्याशङ्क्याहुरन्यथेति, ल्यब्लोपे पञ्चमी, तथा च **अन्यथाज्ञानं** प्राप्य अन्यथाज्ञानविषयत्वं प्राप्येति यावत्, लीलार्थं तेषामन्यथाज्ञानं स्वस्मिन् प्राकृततुल्यत्वेन ज्ञानमुत्पाद्य **स्वयमेव सर्वं करोती**त्यर्थः, अथ टिप्पण्युक्ते द्वितीयव्याख्यानेन्**यथा अज्ञानत** इतिपदच्छेदः, तथा च **अन्यथा** मानसनिरोधकथनाभावे **अज्ञानाद्धेतोर्नन्दयशोदादिः सर्वं करोतीति** ज्ञानं सर्वेषां **भविष्यती**ति तदभावाय **मानसनिरोधकरणमुच्यत** इत्यर्थः, एतदेवोक्तं टिप्पण्यां यद्वेत्यादिना, ननु शकटभङ्गश्चतुर्थे मासि, तृणावर्तवधस्तु द्वितीयवर्षे, "एकहायन आसीन" इतिवाक्यात्, तथा च तावत्पर्यन्तं तादृशीं नूतनलीलां कुतो न कृतवानित्याशङ्क्याहुर्**लौकिकेने**ति, का० ३१$\frac{३}{४}$। द्वितीयवर्षे नूतनलीलाकरणे हेतुमाहुर्**वर्षेणे**ति का० ३२$\frac{३}{४}$। गुरुत्वज्ञापने हेतुमाहुर्**देहबुद्धिध**रिति, का० ३३$\frac{३}{४}$। **भगवति** लौकिकदेहत्व**बुद्धिर्निवृत्ता चेत्** तदा **तत्पराणां** भगवत्पराणां **देहमतिं** देहात्ममतिं **निवर्तयेत्**, यद्यपि भगवति सर्वैव दोषाभावबुद्धिः सर्वदोषनिवर्तिका तथापि **सजातीया** बुद्धि**र्विशेषतो** निवर्तयेदित्यर्थः, यथा भगवति निःकामत्वबुद्धिः स्वस्य कामदोषनिवर्तिका तथा भगवति लौकिकदेहाभावबुद्धिः स्वस्य देहात्ममतिरूपसजातीयदोषस्य विशेषतो निवर्तिकेत्यर्थः, अत्रैवाग्रे **पूतनावध**मित्यादि का० ३४$\frac{३}{४}$–३७$\frac{३}{४}$।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ते च विप्रा मन्त्रविदो युक्ताः 'श्रद्धावान् भजते यो मां स मे युक्ततमो मत' इति वचनात् भगवदुपासकाः, अतस्तैर्या आशिषः प्रोक्तास्तास्तस्मिन् कदाचिदपि निष्फला अन्यथा न भविष्यन्ति, किंतु तथैव जाता इति स्फुटं निश्चितमेवैतत् ॥ १७ ॥ चरितान्तरमाह—एकदेति। 'एकहायन आसीन' इति षड्विंशाध्याये वक्ष्यमाणत्वात् एकाब्दवयसि सति आरोहमुत्सङ्गमारूढं सुतं लालयन्ती भुजाभ्यामुत्तोलनान्दोलनमुखचुम्बनादिभिरुल्लासयन्ती सती यशोदा गिरिकूटवत् गिरिसमूहवत् शिशोर्गरिमाणं भारं न सेहे अत्र यदि भगवान् गुरुर्न स्यात्तदाऽनवतारे सति तृणावर्तेन यशोदा मारिता स्यात्, एकदैव एवं गुरुत्वे च स्वकान्ता सा स्वेनैव सञ्चूर्णिता स्यात्, अतो मामुत्सङ्गादुत्तारयत्विति एतदर्थं तृणावर्तमायान्तं ज्ञात्वा स्वयमेव भगवान् क्रमेण गुरुर्जात इति बोध्यम् ॥ १८ ॥ एवं भारेण पीडिता, अत एव 'कथमकस्माच्छिशोरलौकिको भारो जात' इति विस्मिता च सती गोपी यशोदा तं बालं भूमौ निधाय उत्पातशङ्कया जगतां महापुरुषं सर्वारिष्टनिवारकं भगवन्तमादध्यौ 'त्वया दत्तः पुत्रस्त्वयैव संरक्षणीय' इति प्रार्थितवती। ततश्च गृहकर्मसु आस बभूव ॥ १९ ॥ तदा चासीनमर्भकं चक्रवातस्वरूपेण तृणावर्तो दैत्यो जहारेत्यन्वयः। 'दैत्य' इति तस्य भगवतो दुर्वृत्तत्वमुक्तम्। तृणवत् सकलं विश्वमावर्तयतीति व्युत्पत्त्या नाम्ना 'तृणावर्त' इति तस्य बलिष्ठत्वमुक्तम्। 'कंसभृत्य' इति शत्रुत्वमुक्तम्। 'तेन प्रचोदित' इत्यनेन "पूतनावधात् मत्प्राणहरो हरिरयमेव गोकुले स्यात्" इति कंसस्य सम्भावना जातेति सूचितम्। 'चक्रवातो' वातमण्डली, तेन स्वरूपेणाप्रतिकार्यत्वमुक्तम्। हरणसमये च भगवान् पुनर्लघुर्जातः, अन्यथा सोऽपि तं हर्तुं न शक्नुयादिति ज्ञेयम् ॥ २० ॥

अन्वितार्थप्रकाशिका

विप्रा इति ॥ ते च विप्राः मन्त्रविदो युक्ताः योग्याश्च अतस्तैर्या आशिषः प्रोक्तास्तास्तस्मिन्कदाचिदपि निष्फला अन्यथा न भविष्यन्ति किन्तु तथैव जाता इति स्फुटं निश्चितमेवैतत् ॥ १७ ॥ एकदेति ॥ एकहायन आसीन इति षड्विंशाध्याये वक्ष्यमाणत्वात् एकदा एकाब्दवयसि सति आरोहमुत्सङ्गमारूढं सुतं लालयन्ती सती यशोदा गिरिकूटवत् गिरिसमूहवत् गिरिशिखरवद्वा शिशोर्गरिमाणं भारं वोढुं न सेहे। अत्रास्या एकाकित्वं दासीनां कर्मान्तरनियुक्तत्वम्। अत्र यदि यशोदा कृष्णं नावतारयेत् तदा यशोदया सह तृणावर्त्तः कृष्णं नयेत्। अतः उत्सङ्गादुत्तारणार्थं भगवान् गुरुर्बभूव इति ज्ञेयम् ॥ १८ ॥ भूमौ इति ॥ एवं भारेण पीडिता विस्मिता च सती गोपी यशोदा पर्यङ्के स्थापने पर्यङ्कभङ्गभयात् तं बालं सास्तरणायां भूमौ निधाय उत्पातशङ्कया जगतां महापुरुषं भगवन्तमादध्यौ। त्वया दत्तः पुत्रस्त्वयैव संरक्षणीय इति प्रार्थितवती। ततश्च तत्स्वस्त्ययनाद्यर्थं कर्मसु ब्राह्मणाह्वानादिषु आस बभूव। भगवदुदरवर्तिनां जगतां भारेण पीडिता वाऽन्वयः ॥ १९ ॥ दैत्य इति द्वयम् ॥ कंसस्य भृत्यः प्रणोदितः कंसेन प्रेषितः नाम्ना तृणावर्तः तृणवत् सकलं विश्वमावर्तयति इति व्युत्पत्त्यातिदुष्टः दैत्यः रेणुभिः गोकुलं सर्वमावृण्वन् जनानां चक्षूंषि च मुष्णन् दर्शनायोग्यानि कुर्वन् महाघोरेण शब्देन प्रदिशः दिशश्च ईरयन् निनादयन् चक्रवातो वातमण्डली तेन स्वरूपेण आसीनम् अर्भकं जहार। हरणसमये च भगवान् पुनर्लघुर्जातोऽन्यथा सोऽपि तं हर्तुं न शक्नुयादिति ज्ञेयम् ॥ २०–२१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आरोहं अंकं प्रति आरूढं आस्थितं शिशोः गरिमाणं अतिभारवत्त्वं गिरिमाणं सुतमिति पाठे तु भारवत्त्वे गिरिर्मानं प्रमाणं यस्य तं गिरीणां कूटः समूहस्तद्वत् वोढुं न सेहे ॥ १७ ॥ तृणावर्त्तहनननिमित्तं यशोदोत्संगादुत्तरणाय भारवान् जातस्तं अजानती जगतां कर्मसु गृहादीनां कृतेषु आसस्थिताऽभूत् ॥ १८ ॥ तेन प्रणोदितः प्रेरितः आसीनं भूस्थितम् ॥ १९ ॥ **आवृण्वन् आच्छादयन् रेणुभिः रजोभिः मुष्णन् चोरयन् प्रदिशो विदिशः ईरयन् निनादयन्** ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गाव इति । विप्रा इति । ततः, सर्वगुणोपेताः साधुत्वबहुक्षीरत्वादिभिः सर्वैः गुणैः युक्ताः, वासांसि च स्रजः पुष्पमालाश्च रुक्ममालाः हेममालाश्च आसां सन्तीति तथाविधाः, गावो गाश्च, आत्मजस्य अभ्युदयार्थाय, द्विजातिभ्य इति शेषः । प्रादात् प्रायच्छत् । मन्त्रविदः युक्ताः समाहिताः, ते विप्राः, अन्वयुञ्जत प्रयुयुजुः । आशिष इति शेषः । तदा तैः विप्रैः, याः आशिषः प्रोक्ताः, ताः तथा सत्या बभूवुः कदाचिदपि, स्फुटं नूनं, निष्फलाः, न भविष्यन्ति । नाभवन्नित्यर्थः । ते यदभिप्रायेणाशिषोऽन्वयुञ्जंस्ताश्च तथैव बभूवुरित्यर्थः । इति द्वयोरेकान्वयः ॥ १७-१८ ॥ अथ तृणावर्त्तासुरवधात्मकम यदपि भगवतो बालचरितं विवक्षुस्तावत्तदुपोद्घातरूपं चेष्टितमाह द्वाभ्याम् । एकदेति । एकदा कदाचित्, सती यशोदा, आरोहमुत्सङ्गं, आरूढं सुतं श्रीकृष्णं, लालयन्ती सती, शिशोः स्वबालस्य, गिरिकूटवत् गिरिशृङ्गस्येव, गरिमाणं गौरवं, वोढुं न सेहे । तृणावर्त्तान्मातुर्मृत्युपरिहाराय चिकीर्षितकार्योपयोगाय च तदङ्कादवरोढुं च भगवता कृतं भारं न सेहे इति भावः ॥ १९ ॥ भूमाविति । विस्मिता कदाचिदप्यस्य शिशोरेवंविधो गरिमा न दृष्ट इदानीं कथमित्येवं विस्मययुता, भारपीडिता, गोपी यशोदा, तं शिशुं, भूमौ निधाय, महापुरुषं भगवन्तं, आदध्यौ ध्यातवती सती, जगतां कर्मसु गार्हीयक्रियासु, आस प्रवृत्ता बभूव । न तु भारानुमानेन जगदन्तरं तं शिशुं भगवन्तं वेदेत्यर्थः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एकदेति : १०.७.१८

यात्येव गुरुतां मात्राश्रितः सर्वत्र यल्लघुः । तदाश्रितस्य सा युक्ता लघोस्तस्याक्षरात्मनः ॥ १९ ॥

वाय्वस्त्रवीर्यप्रतिरोधिशास्त्रे प्रोक्तं धरेशैरचलात्वमेव । जानन् प्रभुस्तं धृतचक्रवातस्वरूपमासीदचलस्वरूपः ॥ २० ॥

विश्वोदये श्रुतिलसद्गिरि मेऽधिवासः प्रोक्तोऽचलो यदिह कूटवदित्यवेक्ष्य ।
तादृग् जगद्गुरुरभूत् विभुरेतदीड्यमीड्या च तादृगुपमा च पुरस्तदर्था ॥ २१ ॥

भूमाविति : १०.७.१९.

अहमिवेयमपि प्रकृते धरा भवति धात्र्यपि सर्वजनावनी । तदिह बालकवृत्त्यवनक्षमेत्यलमवेक्ष्य भुवीशमधादसौ ॥ २२ ॥

नीतोऽनेन सहानयाऽहमधुना दुष्टेन चेदम्बरे तज्जायेय यशोदया विलसितो भक्तैकयोग्येक्षणः ।
तस्मादस्य खलस्य नैव हननं भूयादतस्तत्क्षणे तन्नाशाय यशोदया विरहितः श्रीशोऽभवत्तन्मिषात् ॥ २३ ॥

सर्वेभ्योऽपि विशिष्य मातृविहिता रक्षाऽधिका बालके कुण्ठाऽसावपि यत्र कर्मणि निजाचिन्त्यप्रकारे प्रभो ।
त्राता तत्र च यत्त्वमेव भवसीत्येतत्स्फुटं त्वत्प्रसूस्त्वद्भव्यार्थमचिन्तयद् विभुमतस्त्वं रक्षकः सर्वतः ॥ २४ ॥

अपत्यागतोऽप्यस्मिन् प्रपञ्चासक्तिरुत्कटा । स्त्रीणां स्वभाव इत्यासीद् यशोदाकृत्यतः स्फुटम् ॥ २५ ॥

दैत्यो नाम्नेति : १०.७ २०.

वन्द्योऽप्यहं यदधिरोहणतो भजामि ग्रामस्थितिं सकलगोकुल-तृप्तिहेतुम् ।
तस्यानसो हतिरनेन कृताऽर्भकेणोत्यागात्तदुत्तरमसौ तृणनामधेयः ॥ २६ ॥

मन्नाम्ना यदहो तृणेन निखिलं सन्तोषितं गोकुलं देहस्यार्पणतोऽपि तत्प्रतिदिनं मद्वैरिणं सेवते ।
का चिन्ता तदिहाधुनैव विधुनोमीत्याप्तरोषस्तृणः सत्रं गोकुलमावृणोदुपलतो मन्येऽन्यथैतत् कुतः ॥ २७ ॥

आयातो यदि दुर्जनोऽपि सहसा स्वीयालये साधुना प्राक् प्रत्युद्गमनेन सत्कृतिपदं नेयस्ततस्तेन चेत् ।
स्वं दुष्टत्वमदर्शि तत्क्षणमसौ हन्तव्य एवेति किं व्याख्यातं हरिणा न चेद् गिरिगुरुः क्लेशः क्व चासौ तृणः ॥ २८ ॥

कृष्णप्रिया

यह बात स्पष्ट है कि जो वेदवेत्ता और सदाचारी ब्राह्मण होते हैं, उनका आशीर्वाद कभी निष्फल नहीं होता ॥१७॥ एक दिन की बात है, सती यशोदाजी अपने प्यारे लल्ला को गोद में लेकर दुलार रही थीं। सहसा श्रीकृष्ण चट्टान के समान भारी बन गये। वे उनका भार न सह सकीं ॥ १८ ॥ उन्होंने भार से पीड़ित होकर श्रीकृष्ण को पृथ्वी पर बैठा दिया। इस नयी घटना से वे अत्यन्त चकित हो रही थीं। इसके बाद उन्होंने भगवान् पुरुषोत्तम का स्मरण किया और घर के काम में लग गयीं ॥ १९ ॥ तृणावर्त नाम का एक दैत्य था। वह कंस का निजी सेवक था। कंस की प्रेरणा से ही बवंडर के रूप में वह गोकुल में आया और बैठे हुए बालक श्रीकृष्ण को उड़ाकर आकाश में ले गया ॥ २० ॥

गोकुलं सर्वमावृण्वन् मुष्णांश्चक्षूंषि रेणुभिः । [1]पूरयन् सुमहा[2]घोरं शब्देन प्रदिशो दिशः[3] ॥ २१ ॥
मुहूर्तमभवद् गोष्ठं रजसा तमसाऽऽवृतम् । सुतं यशोदा नापश्यत्स्वयं[4] न्यस्तवती यतः ॥ २२ ॥
नापश्यत् कश्चनात्मानं परं चापि विमोहितः । तृणावर्तवि[5]सृष्टाभिः [6]शर्कराभिरुपद्रुतः ॥ २३ ॥

इति खरपवनचक्रपांशु[7]वर्षे सुतपदवीमबलाविलक्ष्य माता ।
अतिकरुणमनुस्मरन्त्यशोचद् भुवि पतिता मृतवत्सका यथा गौः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—(स दैत्यः) सर्वं गोकुलं रेणुभिः आवृण्वन् चक्षुंषि च मुष्णन् प्रदिशः दिशः सुमहाघोरशब्देन ईरयन् गोष्ठं मुहूर्तमात्रं रजसा तमसा आवृतम् अभवत् यशोदा यतः सुतं न्यस्तवती तस्मिन् न अपश्यत् ॥ २१–२२ ॥ तृणावर्तनिसृष्टाभिः शर्कराभिः उपद्रुतः विमोहितः कश्चन आत्मानं परं च न अपश्यत् ॥ २३ ॥ इति खरपवनचक्रपांसुवर्षे (सति) सुतपदवीम् अविलक्ष्य अबला माता अतिकरुणम् अनुस्मरन्ती अशोचत् यथा मृतवत्सका गौः (सा) भुवि पतिता ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ईरयन्निनादयन्नित्यर्थः ॥ २१ ॥ यतो यत्र न्यस्तवती तस्मिन्स्थाने नापश्यत् ॥ २२–२३ ॥ खरपवनचक्रात्पांसुवर्षे सति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मुष्णन् हरन् । प्रदिशो विदिश आग्नेय्यादयः । दिशः प्राच्यादयः । ईरयन् सशब्दाः कुर्वन्नित्यर्थः ॥ २१ ॥ न्यस्तवती स्थापितवती ॥ २२ ॥ शर्कराभिः अतिसूक्ष्मपाषाणखंडैः ॥ २३ ॥ खरपवनश्चंडवायुस्तस्य चक्रात् । यद्वा–खरपवने चक्रपांसवो मंडलीकृतरजांसि तेषां वर्षे समूहे । सततमनुस्मरंती निरंतरं चिंतयंती ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अन्यथा हरणाशक्तेः रेणुभिरावृण्वन् अत एव तत्रत्यानां चक्षूंषि तज्ज्योतींषि च मुष्णन् प्रदिशः विदिशः दिशश्च ॥२१॥ रजसा तत्कृततमसा च श्रीभगवद्दर्शनविनाशकाभ्यां रजस्तमोगुणाभ्यामावृतं प्रथमं योगिनां हृदयमिवासीदिति श्लेषेणोपमा च तस्मिन् तत्रैव स्वपार्श्वे न्यस्तवत्यपि यतो यस्माद्रज आदेर्हेतोर्नापश्यत् तस्मिन्नित्यत्र स्वयमिति क्वचित्पाठः ॥ २२ ॥ परम् अन्यमात्मानमपि नापश्यत् चकारात् किञ्चिन्नाशृणोच्च विमोहितः किञ्चिदनुसन्धातुमप्यशक्त इत्यर्थः ॥ २३ ॥ एवमत्यन्तगौरवप्रकाशनेनात्मनोऽनन्यशक्यतनयनं श्रीभगवता तल्लीलाशक्त्यैव वात्सल्येन बोधितापि पुत्रादर्शनमात्रेणैवात्याकुला सती किञ्चिदनुसन्धातुमक्षमा बहु विललापेत्याह—इतीति । पूर्वोक्तप्रकारखरपवनचक्रसम्बन्धपांसुवर्षे सति सुतस्य पदवीं मार्गं केनापि लक्षणेनानधिगम्यैव अबला किञ्चित्कर्त्तुमनुसन्धातुं चाशक्ता केवलं भुवि पतिता सती अतिकरुणं काष्ठपाषाणवज्रसारादीनामपि भेदकं यथा स्यात्तथाऽनुस्मरन्ती अशोचत् तदर्थं विलापं चक्रे यद्वा, प्रागशोचत् पश्चात् मोहेन भुवि पतिता यतो माता हि खेदनिश्चये स्नेहभरेणानुसन्धानाभावे परमार्त्तत्वे च दृष्टान्तः मृतेति अदर्शनमात्रेण महानिष्टशङ्कोत्पत्तेः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

रेणुभिरावृण्वन्, अतएव चक्षूंषि तत्रत्यानां मुष्णन् नितरां मुद्रयन्नित्यर्थः । यद्वा, गोकुलं तमसाच्छादयन् चक्षूंषि रेणुभिर्मुष्णन् । एतच्च श्रीयशोदा-दृष्टिवञ्चनाय । प्रदिशो विदिशो दिशश्च सुमहाघोरशब्दश्च शिशोः क्रन्दनाशंकया तदश्रवणार्थमत एव तस्य वात्यारूपत्वम् । रजसेति जातावेकत्वम्, रजोभिस्तत्कृत-तमसा च; यद्वा, रजसा यत्तमस्तेन श्रीभगवद्दर्शनं विना रजस्तमोगुणाभ्यामिवावृतमासीदिति श्लेषार्थः । तस्मिन् तत्रैव स्वपार्श्वे न्यस्तवत्यपि, यतो यस्मात्तमसो हेतोर्नापश्यदिति हरणादर्शनं बोधितम् ॥ २१–२२ ॥ किञ्च, महादैत्योपद्रवेण तत्रत्याः सर्व्वेऽपि किञ्चिदपि नाविदन्नित्याह–नेति । परमन्यमात्मानमपि नापश्यत् । चकारान्न किञ्चिदशृणोच्च । परं परमेश्वरं श्रीकृष्णमपीति वा । विमोहितः किञ्चिदनुसन्धातुमप्यशक्त इत्यर्थः । तत्र हेतुः—तृणेति ।

---

१. ईरयन्–श्रीधर. वंशी. विज. विश्व. शुक. गिरि. ; पूरयन्–वीर भक्त. । २. सुमहाघोर–श्रीधर वंशी. गिरि. ; महता घोरशब्देन–भक्त । ३ दश–वीर. गिरि. । ४. नापश्यत्तस्मिन्–श्रीधर वंशी. जीव. विज. विश्व. गिरि. ; नापश्य स्वयं–इति कस्यचित् ; नापश्यत्स्वयं–भक्त. । ५. निसृष्टाभिः–श्रीधर वंशी. गिरि. भक्त. ; विसृष्टाभिः–वीर. । ६. सिकताभिरुपद्रुतः–भक्त. । ७ पांसुवर्षे–श्रीधर. वंशी. जीव. वीर. विज. विश्व. गिरि. भक्त. ; पांशुवर्षे–शुक. ।

तृणावर्त्तेन विसृष्टाभिः प्रक्षिप्ताभिः । एतत् सर्व्वं श्रीकृष्णस्य नभोजिगमिषयैवेति ज्ञेयम् ॥ २३ ॥ एवमत्यन्तगौरवप्रकाशनेनात्मनोऽनन्यशक्यनयनं श्रीभगवता तल्लीलाशक्त्यैव वा । छलेन बोधितापि पुत्त्रादर्शनमात्रेणैवात्याकुला सती किञ्चिदनुसन्धातुमक्षमा बहु विललापेत्याह—इतीति । सुतस्य पदवीं स्थितिमवस्थितिं स्थानं वा विलक्ष्य सौरभ्यादिलक्षणेनानधिगम्यैवाबला किञ्चित् कर्त्तुमनुसन्धातुञ्चाशक्ता भुवि पतिता सत्यति करुणतरं काष्ठपाषाणवज्रसारादीनामपि भेदकं यथा स्यात्तथा सुतमशोचत्, तदर्थं विलापं चक्रे । यद्वा, प्रागशोचत् पश्चान्मोहेन भुवि पतिता, यतो माता । अहो खेदे । पाठान्तरे—अनुस्मरन्ती सुतमिति शेषः, सुतपदवीमेव वा । स्नेहभरेणानुसन्धानाभावे परमार्त्तत्वे च दृष्टान्तः—मृतेति, अदर्शनमात्रेण महानिष्टशंकोत्पत्तेः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कथम्भूतस्सन् ? कृत्स्नं गोकुलं चक्रवातरूपेणावृण्वन् व्याप्नुवन् रेणुभिश्च जौकसां चक्षूंषि मुष्णन् पिधापयन् महता घोरेण च शब्देन दश च दिशः पूरयन् ईरयन्निति पाठे नादयन् ॥२१॥ तथा गोष्ठं मुहूर्त्तं रजसा तमसा च परागान्धकाराभ्यामावृतमभूत् तथा च यशोदा यतो यत्र न्यस्तवती निहितवती तत्र देशे सुतं नापश्यन्न ददर्श ॥ २२ ॥ तथा कोपि जनः परमन्यमात्मानं च नापश्यत, कुतः ? यतो विमोहितः तत्र हेतुः तृणावर्त्तेन विसृष्टाभिः प्रयुक्ताभिः शर्कराभिः सिकताभिरुपद्रुतः । २३ ॥ इतीत्थं खरात्कठिनात्पवनचक्रात्पांसुवर्षे सति सुतपदवीमविलक्ष्यादृष्ट्वाऽबला माता यशोदाऽतिकरुणं यथातथाऽनुस्मरन्ती भुवि पतिता यथा मृतवत्सा गौस्तद्वच्छुशोच ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ईरयन् शब्दयुक्ताः कुर्वन्नित्यर्थः ॥ २१ ॥ यतो यत्र न्यस्तवती तस्मिन् स्थले ॥२२॥ शर्क्कराभिः अणुतरशिलाभिः ॥२३॥ इति शब्दः प्रकारवचनः आदिवचनो वा "इति हेतुप्रकारादिसमाप्तिषु" इत्यमरः । खरश्चण्डः पवनो वायुः तेन चक्रपांसवः मण्डलीकृतरजांसि तेषां वर्षे समूहे सुतपदवीम् अविचक्षमाणा विगतदर्शना अपश्यन्तीत्यर्थः । पुत्रमनुस्मरन्ती निरन्तरसञ्चिन्तनोपेता अत एव भुवि पतिता अबला अतिकरुणमशोचदित्यन्वयः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तावदेव दैत्यो जहारेति तद्धरणकाले ऐश्वर्य्यैव शक्त्या भारलाघवं कृतमिति ज्ञेयं दिशो विदिशश्च ईरयन् प्रतिध्वनयन् यतो यत्र न्यस्तवती तस्मिन् स्थले ॥ २२–२३ ॥ खरपवनचक्रान् पांसुवर्षे सति अविलक्ष्य अदृष्ट्वा ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आवृण्वन् प्राप्नुवन् प्रदिशो दिशः ईरयन् निनादयन् ॥ २२–२३ ॥ इति एवं खरपवनचक्रात् कर्कषवातचक्रात् पांसुवर्षे सति ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

प्रदिशो विदिशः दश दिशः कंपयन् प्रतिनादयन् वेत्यर्थः । वात्यारूपदैत्यत्वेन दुर्वृत्तत्वं महाबलिष्ठत्वं अपतिकार्यत्वञ्चोक्तं कंसभृत्य इति परमद्वेष्टृत्वं तत्र च प्रचोदितः पूर्वं बालघातित्वेन पूतनैव सामान्यतस्तावत् प्रस्थापिता तस्याश्च द्वयमयमूर्त्तेरपि मरणाच्छङ्काकुलः सन्तमूर्त्यैव शकटासुरः प्रस्थापितः तस्य च विलापनावर्तभीतः सन्मूर्त्तामूर्त्ते धर्मो बलवत्तरो दुर्गंहात्तपोमहावायुरेव प्रकृष्टतया प्रस्थापित इत्यर्थः ॥ २१ ॥ यतो यत्र स्थाने ॥ २२–२३ ॥ खरात् पवनचक्रात् पांसुवर्षे धूलिविक्षेपे सति अविलक्ष्य अदृष्ट्वा ॥ २४ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

यशोदा एनं कृष्णं महापुरुषं नारायणमादध्यौ व्यजानात् । कर्मस्विति सप्तमी तादर्थ्ये । गृहकर्मार्थमाशु जगाम चेति । अयं भावः । यशोदाऽयं कृष्णः साक्षान्नारायण एवेति निश्चित्य शंकां परित्यज्य गृहकार्यार्थं जगामेति । एतेन महादिशंकया भगवद्ध्यानं कृतं चेद्महादिशंकापरिहारार्थं पूर्ववद्बहुप्रयत्नः कर्तव्यः । पुत्रं परित्यज्य गृहकार्यार्थं शीघ्रगमनमनुपपन्नमिति चोद्यं निरस्तं । महादिशंकापरिहारार्थं भगवद्ध्यानं कृतमित्युच्यत इत्यंगीकारात् ॥ २१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भारपीडिता दुर्भरदितिसुतादिभिस्तस्यां भूमौ तं निधाय गोपी विस्मिताऽऽपीतोऽप्येवं कुत इत्याश्चर्ययुता महापुरुषमादध्यौ पतन जाने जाने पालय बालमिममिति माधवं दध्यौ ध्यातवती । इममेव बालं महापुरुषं तदात्मकमादध्याविति वा । कर्मसु स्वगृहकृत्येषु तानि कर्तुमिति यावत् जगाम ॥ २१ ॥ कंसभृत्यो नाम्ना तृणावर्तो दैत्यः प्रचोदितो मृत्युना प्रेरितश्चक्रवातो मण्डलवायुस्तत्स्वरूपेणासीनमुपविष्टमर्भकं जहार ॥ २२ ॥ रेणुभिः शर्कराभिरावृण्वन्नाच्छादयन्मुष्णन्नपहरन्दिशः प्रदिशश्च

महाघोरशब्देनेरयन् शब्दापयञ्जहारेत्यन्वयः ॥ २३ ॥ गोष्ठं । गोष्ठं गोस्थानके मतमिति विश्वः । रजसा तन्निमित्तकतमसा चावृतं मुहूर्तमभवत् । यशोदा यतो यत्र स्थले सुतं न्यस्तवती तस्मिन्नापश्यत् ॥ २४ ॥

श्रीसुबोधिनी

तस्य तृणावर्तस्योपासितमायारूपस्य भगवन्माहात्म्यमाह पञ्चभिः, अविद्यारूपस्तेषामिति,

अयोग्यतादर्शने हि हरेश्चादर्शनं ततः । सर्वाज्ञानं ततः स्वस्मिन् यशोदास्नेह एव च ॥ १ ॥
गोपिकानां तथा स्नेहः पञ्चपर्वाणि लौकिकात् ॥

प्रथमतो ज्ञानं तत्कृतं वक्तव्यं, ज्ञानेंशत्रयं वेद्यांश इन्द्रियांशोन्तःकरणांशश्चेति त्रयाणामपि तत्कृतदोषसम्बन्धमाह, स हि न तूष्णीं जहार किन्तु **गोकुलं सर्वमावृण्वन्**नन्धकारेण वेष्टयन्, तमोगुणकार्यमेतत्, रजोगुणकार्यमाह **मुष्णन् चक्षूंषि रेणुभि**रिति, सर्वेषां दृष्टिः पांसुभिः कृत्वा हृता, देवतात्वात् सा दृष्टिस्तेन च गृहीता स पश्यति ते न पश्यन्तीति, न तु केवलं तिरोहिता, अन्तःकरणे वैयर्थ्यं चोत्पादयतीत्याह **पूरयन्**निति, **सुमहाघोरं** यथा भवति तथा **शब्देन दश दिशः पूरयन्** यथा कुसूले धान्यं निर्बन्धेनापि पूर्यत एवं यथा सर्वदिक्षु भयमुत्पद्येत तथा शब्दं पूरितवान्, आधिदैविकादित्रयस्यापि भयमुत्पादयितुं पदत्रयं **सुमहाघोर**मिति, **प्रदिश** इति प्रकृष्टा दिशो देवसम्बन्धिन्यः, अनेन देवपक्षपातिनामेव भयं न दैत्यपक्षपातिनामित्युक्तम् ॥ २१ ॥ ततो भगवद्दर्शनमाह **मुहूर्त**मिति, बहिःस्थितानां गोकुलदर्शनमपि न जातं, बहिर्मुखानां भगवद्दर्शनं कथं भविष्यतीति वदन् दृष्टान्तपूर्वकमाह, **मुहूर्तं** घटिकाद्वयं, **गोष्ठं** सर्वमेव गोकुलं **रजसा** पांसुना **तमसा** तमोरूपेण रजोजनिततमसा वावृतमासीत्, ततोन्तःस्थितं भगवन्तं यशोदापि नापश्यत्, सुतबुद्धिश्च जाता, ननु भगवद्दर्शनं सर्वेषामेव दुर्लभं किमाश्चर्यं यशोदा नापश्यदिति तत्राह **स्वयं न्यस्तवती यतः**, यतः स्वयमेव तत्र **न्यस्तवती** स्थापितवती, स्वस्थापितं स्वयं द्रष्टुमुचितमेव तथाप्यदर्शनमाश्चर्यं, **यत** इति सप्तम्यर्थे वा, **स्वयं न्यस्तवती**ति भ्रमाभावः ॥ २२ ॥ यथा भगवति विदिते सर्वं विदितं भवत्येवं भगवत्यविदिते सर्वमेवाविदितं जातमित्याह **नापश्य**दिति, **को**प्यात्मानं स्वदेहं **परं** परदेहं च **नापश्यत्**, चकाराद् घटपटादिकं च, शब्दादिनापि प्रतीतिर्न जातेत्याह **विमोहित** इति, विशेषेण मोहितः, किञ्चाज्ञानकार्यमपि प्राप्तवानित्याह, **तृणावर्तेन** विशेषेण **सृष्टाभिः शर्कराभि**र्विशेषेणोपद्रुतः पीडितः, तामसपीडैवाज्ञानकार्यम् ॥ २३ ॥ एवमज्ञानं सकार्यं निरूप्य तदपगमार्थं यशोदाया गोपिकानां च भगवति प्रेमातिशयमाह भिन्नवृत्तेन द्वाभ्यां, तत्र गोपिकायां भगवति पुत्रत्वेन स्नेहातिशयमाहेतीति, एवं तृणावर्तकृत उपद्रवे जात इत्येतावति सति, **खरः पवनो** यस्य चक्रस्य स **खरपवनचक्र**स्तृणावर्तस्तस्य **पांसुवृष्टिभिः** कृत्वा वर्षासु मार्गानिव **सुतपदवीं** पुत्रमार्गमितस्ततः पर्यटन्त्यप्य**विलक्ष्य** ध्वजवज्राङ्कुशाम्भोजचिह्नैरपि चिह्नितां भूमिमदृष्ट्वा **माता** सर्वथा स्नेहाधिकरणं कश्चिद् भगवानात्मानं विहाय गत इति भगवतः कृपोत्पादनार्थ**मतिकरुणं** यथा भवति तथानुस्मरन्त्य**शोचदा**त्मानं शोचितवत्यकृतार्थोहमिति, ततो भगवद्विरहाद् **भुवि पतिता** जाता, क्रियाशक्तिर्लुप्ता, ज्ञानशक्तिरपि लुप्तेति वदन् मूर्छिता जातेति दृष्टान्तेनाह **मृतवत्सका यथा गौ**रिति, **गौ**रज्ञानजन्तुस्तत्रापि वत्से गतेतिविवेकाभावान्मूर्छिता भवत्येव, **अमृतवत्सके**ति मृतवत्सका तु मृतमाघ्राय निवृत्तैव भवति, नष्टवत्सैव तथा भवति ॥ २४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गोकुलं सर्वमावृण्वन्नित्यादि प्रकरणार्थनिरूपणेऽविद्यापर्वपञ्चककथनं तन्नानुपपन्नम् । यशोदादिस्नेहे तथात्वस्यायोगादत आहुः **लौकिका**दिति । प्राकृतबालके तादृक्समये लोकानां यथा शङ्का तथात्रापि सात्ययुक्तेत्ययमंशो लौकिकः स तत्पर्वरूप उच्यते । न तु स्नेहदुःखादिरपि । अलौकिकत्वात् । एतदेवाहुः **लौकिका**दिति । लौकिकसजातीयत्वादुक्तभावस्य पर्वत्वमुच्यत इत्यर्थः ॥२१॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

गोकुलमित्यत्र ननु पूर्वाध्याये पूतनानाश एव तूलाविद्यापञ्चपर्वणां नाशस्योक्तत्वादत्र पुनस्तत्कथनस्य किं प्रयोजनमित्याकाङ्क्षायां टिप्पण्यामुपपाद्याहुर्**गोकुल**मित्यादि, तथा च साधारणधर्माणां परित्यागासम्भवस्य शकटप्रसङ्ग उक्तत्वात् तेत्र तिष्ठन्तीति सोत्रोक्त इत्यर्थः, **देवतात्वा**दिति तृणावर्तोपास्यस्येतिशेषः, 'देवतासत्त्वा'दितिपाठे तु तृणावर्तोपास्य**देवतायाः सत्त्वा**दित्यर्थः ॥ २१ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तस्य तृणावर्तस्येति तादृशभगवत्कृतं **तृणावर्तस्य माहात्म्यमाहे**त्यर्थः, सङ्ख्यातात्पर्यमाहुः **अविद्यारूप** इति तदुपासितमायारूपो **भगवांस्तेषां गोकुलस्थानामविद्यानिरूपको** जात इति मायायाः कार्यं विद्यारूपं गोकुले प्रकटमितिभावः, **प्रथमतोऽज्ञान**मिति न ज्ञायतेऽनेनेतिकरणव्युत्पत्त्या **दर्शनायोग्यते**त्यर्थः, **देवतात्वा**दिति दृष्टेरितिशेषः, अन्यथा अमूर्तस्येन्द्रियस्य हरणं न सम्भवतीतिभावः । **मुहूर्त**मित्यत्र दृष्टान्तेति वाक्यार्थो भगवद्दर्शनमेव, पूर्वार्धं तु दृष्टान्तार्थमुक्तं, रजस्तमोवृतत्वाद् गोकुलदर्शनं

बहिःस्थितानां न जातं तथा सुतदर्शनं यशोदाया न जातमिति बिम्बप्रतिबिम्बभावेन **दृष्टान्तालङ्कारपूर्वकमाहे**त्यर्थः, **बहिर्मुखत्वाद्** रजसा दृष्टिप्रतिरोधो जात इति भावः ॥ २२ ॥ **नापश्यदि**त्यत्र **तदपगमार्थमिति** एतयोः प्रेमातिशयेन भगवांस्तं मारयित्वा समायास्यति तदा सकार्यस्याज्ञानस्यापगमो भविष्यतीत्यर्थः ॥ २३ ॥ **इती**त्यत्र **यस्य चक्रस्ये**ति **यस्य** तृणावर्तस्य यत् चक्रं तस्येत्यर्थकथनं, विग्रहस्तु खरः पवनो यस्य तादृशं चक्रं यस्येति पुनर्बहुव्रीहिः ॥ २४ ॥

(४) श्रीमद्वीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

अविद्यारूपस्तेषामितीति अविद्यां स्वोपास्यमायां कार्यद्वारा रूपयति प्रकाशयतीत्यविद्यारूपः, तत्कार्याणि तु **अयोग्यता वर्णने** हीत्यादिकारिकाभिः स्फुटीकृतानि, तत्र यशोदास्नेहगोपिकास्नेहयोरविद्याकार्यत्वकथने दोषः प्राप्तः स तु श्रीमत्प्रभुचरणै-ष्टिप्पण्यां परिहृतः ॥ २१ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

गोकुलं सर्वमावृण्वन्नित्यादिश्लोकपञ्चकप्रतिपाद्यानर्थानाहुरयोग्यतेति का० ३८$\frac{१}{४}$–$\frac{३}{४}$ । "गोकुलं सर्वमावृण्व" न्निति श्लोकेन हरिदर्शने **अयोग्यतोक्ता, "मुहूर्तमभवद्गोष्ठ"** मित्यनेन हरेरदर्शनमुक्तं, "नापश्यत् कञ्चनात्मान" **मित्यनेन सर्वपदार्थाज्ञानं, "इतिखरपवन"** इत्यत्र भगवति **यशोदायाः स्नेहः,** "रुदितमनुनिशम्ये" त्यत्र **गोपिकानां स्नेहः,** इमान्यविद्यायाः **पञ्च पर्वाणि** ज्ञेयानि, ननु यशोदादिस्नेहेऽविद्यापर्वत्वोक्तिरनुपपन्नेत्याशङ्क्याहु**र्लौकिकादिति,** प्राकृतबालके तादृक्समये लोकानां यथा शङ्का तथा भगवत्यपि आशङ्काऽप्ययुक्तेत्ययमंशो लौकिकः, स अविद्यापर्वरूप उच्यते न तु स्नेहदुःखादिरपि, अलौकिकत्वात् एतदेवा-**हुर्लौकिकादिति,** लौकिकसजातीयत्वादुक्तभावस्याविद्यापर्वत्वमुच्यत इत्यर्थः ॥ ३८$\frac{३}{४}$ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तद्धरणार्थं यदुपायं कृतवांस्तदाह—गोकुलमिति । रेणुभिर्गोकुलं सर्वमावृण्वन् जनानां चक्षूंषि च मुष्णन् दर्शनायोग्यानि कुर्वन् महाघोरेण भयङ्करेण शब्देन दश दिश ईरयन् निनादयंस्तं जहारेति पूर्वेणान्वयः । 'प्रदिशो दिश' इति पाठान्तरम् ॥ २१ ॥ गोष्ठं व्रजं मुहूर्तमात्रं रजसा रेणुना तमसा अन्धकारेण चावृतमभवत् । यशोदा यतो यत्र सुतं न्यस्तवती स्थापितवती, तस्मिन् स्थाने तं नापश्यदित्यन्वयः ॥ २२ ॥ कश्चनापि जनः आत्मानं परं चकारात् घटपटादिकं च नापश्यत् । तत्र हेतुमाह–मोहित इति । व्याकुलचित्त इत्यर्थः । तत्रापि हेतुमाह—तृणावर्तेति । तृणावर्तेन निसृष्टाभिः प्रक्षिप्ताभिः शर्कराभिः सिकताभिरुपद्रुत इति ॥ २३ ॥ इत्येवं खरात्तीक्ष्णात् पवनचक्रात् पांसुवर्षे सति सुतस्य पदवीं मार्गमविलक्ष्य अदृष्ट्वा अबला 'तद्दर्शनोपाये असमर्था' माता यशोदा अतिकरुणमतिदैन्यं यथा भवति तथा तमनुस्मरन्ती 'अकृतार्थाऽहम्' इत्यात्मानमशोचत्, अथ भुवि पतिता च । शोकेन व्याकुलतायां दृष्टान्तमाह—मृतवत्सका यथा गौरिति ॥ २४ ॥

अन्वितार्थप्रकाशिका

मुहूर्तमिति । गोष्ठं व्रजं मुहूर्त्तमात्रं रजसा रेणुना तमसा अन्धकारेण चावृतमभवत् । यशोदा यतो यत्र सुतं न्यस्तवती स्थापितवती तस्मिन् स्थाने तं नापश्यत् ॥ २२ ॥ नापश्यदिति । तृणावर्तेन निसृष्टाभिः प्रक्षिप्ताभिः शर्करादिभिः सिकताभिरुपद्रुतः अतो मोहितः व्याकुलचित्तः कश्चनापि जनः आत्मानं परं चकारात् घटपटादिकं च नापश्यत् । चाज्ञात्पृणोच ॥ २३ ॥ इति खरेति । इत्येवं खरात्तीक्ष्णात् पवनचक्रात् पांसुवर्षे सति सुतस्य पदवीं मार्गमविलक्ष्य अदृष्ट्वा अबला तद्दर्शनोपाये असमर्था माता यशोदा अतिकरुणमतिदैन्यं यथा भवति तथा तमनुस्मरन्ती अकृतार्थाऽहमित्यात्मानमशोचत् । तथा मृतवत्सका गौर्यथा भुवि पतिता ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मुहूर्त्तं द्विघटिकापर्यंतं यतो यत्र न्यस्तवती स्थापितवती । तत्र स्थलेनापश्यत् ॥ २१ ॥ कश्चन जनः आत्मानं स्वं शर्कराभिरतिक्षुद्रपाषाणशकलैः उपद्रुतः पीडितः ॥ २२ ॥ खरस्य कठिनस्य पवनस्य चक्रात् पांसूनां रेणूनां वर्षणे सति सुतस्य पदवी मार्गम् अविलक्ष्याज्ञात्वा मृतवत्सका गौर्यथा अनुस्मरंती भुवि पतितासती अतिकरुणं यथा तथा अशोचत् अरुदत् ॥ २३ ॥ उपारतो विरतः पांसुवर्षणस्य वेगो यस्मिन् एवंभूते पवने सति तत्र तस्या यशोदायाः रुदितं श्रुत्वा अश्रुभिः पूर्णं मुखं यासां ता गोप्यः नंदसूनुं अनुपलभ्य अप्राप्य रुरुदुः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दैत्य इति ॥ तदा नाम्ना तृणावर्त्तः, तृणावर्त्ताख्य इत्यर्थः । दैत्यः, कंसस्य भृत्यः, अत एव प्रणोदितः भृत्यत्वात् कंसेनैव प्रणोदितः सन्, चक्रवालस्वरूपेण मण्डलीभूतवायुरूपेण, आगत्य, आसीनं यशोदया स्वोत्सङ्गादवतार्य यत्रोपवेशितस्तत्रैवोपविष्टमित्यर्थः । अर्भकं, जहार गृहीतवान् ॥ २१ ॥ कथंभूतः सन् गृहीतवांस्तत्राह ॥ गोकुलमिति ॥ वात्यारूपेण, सर्वं सकलं,

गोकुलं आवृण्वन् , रेणुभिः चक्षूंषि, मुष्णन्नपिधापयन् , महताऽपिदीर्घेण, घोरशब्देन अतिभयंकरनादेन, प्रदिशः आग्नेयादि-कोणान् , दिशः पूर्वादिकाः, पूरयन् ईरयन् , सुमहाघोरेति पाठे सुतरां महता घोरनादेन, ईरयन्निनादयन् ॥ २२ ॥ मुहूर्त्तमिति ॥ तथा गोष्ठं, रजसा तमसा च, रजोऽन्धकाराभ्यामित्यर्थः । मुहूर्त्तं घटिकाद्वयपर्यन्तं, आवृतं अभवत् । तथा, यशोदा सुतं स्वतनयं, यतः यत्र, न्यस्तवती निहितवती अभूत् , तत्र स्वयं न अपश्यत् ॥ २३ ॥ नापश्यदिति ॥ तृणावर्त्तनिसृष्टाभिः, सिकताभिर्धूलिभिः, शर्कराभिरिति पाठेऽप्ययमेवार्थः । उपद्रुतः उपद्रवं प्राप्तः, अत एव विमोहितः विशेषतो मोहं प्राप्तः, कश्चनापि जनः, परमन्यं, आत्मानं स्वं च, न अपश्यत् ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मुहूर्तमिति : १०.७२२.

यदात्मानीक्षणं धर्मो गोकुलस्य निसर्गजः । रजस्तमोभ्यां युक्तं चेत् किं वाच्यं तस्य तत्पुनः ॥ २९ ॥

कृष्णप्रिया

उसने व्रजरज से सारे गोकुल को ढक दिया और लोगों की देखने की शक्ति हर ली । उसके अत्यन्त भयङ्कर शब्द से दसों दिशाएँ काँप उठीं ॥ २१ ॥ सारा व्रज दो घड़ी तक रज और तम से ढका रहा । यशोदाजीने अपने पुत्र को जहाँ बैठा दिया था, वहाँ जाकर देखा तो श्रीकृष्ण वहाँ नहीं थे ॥ २२ ॥ उस समय तृणावर्त ने बवंडर रूप से इतनी बालू उड़ा रक्खी थी कि सभी लोग अत्यन्त उद्विग्न और बेसुध हो गये थे । उनको अपना-पराया कुछ भी नहीं सूझ रहा था ॥ २३ ॥ उस जोर की आँधी और धूल की वर्षा में अपने पुत्र का पता न पाकर यशोदा को बड़ा शोक हुआ । वे अपने पुत्र की याद करके बहुत ही दीन हो गयीं और बछड़े के मर जाने पर गाय की जो दशा हो जाती है, वही दशा उनकी हो गयी । वे पृथ्वी पर गिर पड़ीं ॥ २४ ॥

रुदितमनुनिशम्य तत्र गोप्यो भृशमनु[1]तप्तधियोऽश्रुपूर्णमुख्यः ।
रुरुदुरनुपलभ्य नन्दसूनुं पवन उपारतपांसुवर्षवेगे ॥ २५ ॥

तृणावर्तः शान्तरयो वात्यारूपधरो हरन् । कृष्णं नभोगतो गन्तुं नाशक्नोद् भूरिभारभृत् ॥ २६ ॥
[2]तमश्मानं मन्यमान आत्मनो गुरुमत्तया । गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकम् ॥ २७ ॥
गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः । अव्यक्तरावो न्यपतत् सहबालो व्यसुर्व्रजे ॥ २८ ॥

कर्दमक्षमा

अन्वयः—पवने उपारतपांसुवर्षवेगे (सति) अनुरुदितं निशम्य तत्र नन्दसूनुम् अनुपलभ्य भृशम् अनुतप्तधियः अश्रुपूर्णमुख्यः गोप्यः रुरुदुः ॥ २५ ॥ वात्यारूपधरः तृणावर्तः कृष्णं हरन् नभोगत भूरिभारभृत् शान्तरयः (अग्रे) गन्तुं न अशक्नोत् ॥ २६ ॥ आत्मनः गुरुमत्तया तम् अद्भुतार्भकम् अश्मानं मन्यमानः गले गृहीतः उत्स्रष्टुं न अशक्नोत् ॥ २७ ॥ गलग्रहणनिश्चेष्टः निर्गतलोचनः दैत्यः व्रजे सहबालः न्यपतत् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उपारतः पांसुवर्षस्य वेगो यस्मिंस्तथाभूते पवने सति तत्र तस्या रुदितमनुनिशम्य गोप्यो रुरुदुः ॥ २५ ॥ वात्या चक्रवातस्तद्रूपधरः कृष्णं हरन् शांतरयः कथंचिन्नभोगतस्ततः परं गंतुं नाशक्नोदित्यर्थः ॥ २६ ॥ गुरुमत्तयाऽतिगौरवेण तं तथा अश्मानमश्मवंतं पर्वतप्रायं मन्यमानस्तेनैवात्मनो गले गृहीतो धृतस्तं त्यक्तुमिच्छन्नपि नाशक्नोदित्यर्थः ॥ २७–२९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र नंदगृहे । तस्या यशोदायाः ॥ २५ ॥ ततो नभोगमनात्परम् । उपरिष्टाद्गंतुं कंससमीपं वा इत्यर्थ इति भावः ॥ २६ ॥ अश्मशब्दो लक्षणया तद्वत्परोत्रात आह—अश्मवंतमिति ॥ विश्वनाथस्तु—'अश्मन्तम्' इति पाठं मत्वा अश्मवन्तम् इति व्याचख्यौ तत्र वर्णलोपश्छान्दसः । आत्मनः स्वस्य । तं कृष्णम् । इत्यर्थ इति । न ह्यतिगुरुमद्गृहीतोऽजगरग्रस्तमंडूकवदात्मानं मोक्तुं प्रभवतीति भावः ॥ २७ ॥ निर्गतलोचनो बहिरागतनेत्रमांसपिंडः । अव्यक्तरावः वचनावृत्तिवर्जितः ॥ २८ ॥

---

१. अनुरक्तधियः—इति कस्यचित् । २. तमश्मन्तं—जीव. विश्व. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पवने उपारत पांसुवर्षवेगे सति गोप्यः प्रतिवेशिन्यः तत्र च श्रीव्रजेश्वरीगृहे रुदितम् अनुनिशम्य वीप्सया श्रुत्वा तत्र च श्रीनन्दसूनुमनुपलभ्य गत्वाप्यदृष्ट्वा भृशमनुतप्तधियः सत्यस्तत एवाश्रुपूर्णमुख्यः सत्यो रुरुदुः अनुरक्तेति पाठे श्रीनन्दपत्न्यां श्रीनन्दसूनौ च अनुरक्ता धीर्यासां ताः नन्दसूनुमिति श्रीनन्दस्य तदनुगत्वात् श्रीव्रजवासिनां च सर्वेषां रोदनं सूचयति ॥ २५ ॥ ततश्च तेषामार्तिरोदनेन नभोगमनलीलां विहाय दैत्यं हन्तुमुद्यत इत्याह—तृणेति। तृणावर्त्तो वात्याया रूपधरः कृष्णं हरन् नभोगतो भूत्वा तत्र तेनाविष्कृतभारेण भूरिभारवान् तत एव च शान्तरयः सन् गन्तुं नाशक्नोत् ॥ २६ ॥ अश्मन्तम् अश्मवन्तं नीलमणिपर्वतं न तु नन्दसूनुं तं मन्यमानः अतो हरणाशक्त्या च मोक्तुमिच्छन्नपि नाशकत् यतस्तेनैव गले गृहीतः अत एवाद्भुतं लोकातीतं कौतुकावहं वा अर्भकं अश्मन्तमिति युवोरनाकाविति ज्ञापकाच्छान्दसो वलोपः किन्तु पाठोयं क्वचिदेव अश्मानमिति पाठस्तु बहुत्र अत्र च मतुप्लोपः छान्दसः अश्मार्णमिति पाठश्च बहुत्र टीका च तत्र तत्र तत्तत्प्रकारेव अत्रार्णशब्देन वर्ण उच्यते आगमादौ तथा दृष्टत्वात् वर्णशब्देन चाभा भण्यते अश्मशब्देन कथञ्चित् पर्वत इति अत्र च यथाहि केनचिदुह्यमानो बालको भयाद्गलं गृह्णाति तद्वत् बालग्रहणादिना लौकिकबाल्यलीला च ॥ २७ ॥ बालग्रहणेनैव निश्चेष्टः हस्तपादप्रक्षेपणादावशक्त इत्यर्थः। गलग्रहणादेव निर्गतेव बहिर्निस्सृते लोचने यस्य सः किञ्च न व्यक्तः किमुक्तमिति बोद्धुमशक्यः रावः आर्तनादो यस्य सः सहबालः श्रीबालगोपालसहितः व्यसुर्मृतो व्रजमध्ये नितरां पृष्ठतः सर्वाङ्गपातमपतत् पूर्वं पूतनायाः पादादिविक्षेपेण महार्त्तनादेन च व्रजवासिनां महाभयं वृत्तमासीत् तदधुना माभूदिति गलग्रहणेन नभस्येव मारणम् अत एव नभसि गमनार्थं तृणावर्त्तेन स्वस्य हारणमपीति तत्त्वम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र निरन्तरपरमानन्दमये स्थाने रुदितमनुनिशम्य वात्या–सुमहाघोरशब्दोपरमात् पश्चाच्छ्रुत्वा भृशमत्यर्थमनुतप्तधियोऽत एवाश्रुपूर्णमुख्यः। यद्वा, यत्र रुदितं तत्र गत्वेति शेषः। उपारत–पांशुवर्षवेगेऽपि पवने सति नन्दस्य पुत्रद्वारा व्रजानन्दकरस्य वल्लवेन्द्रस्य सूनुमनुपलभ्य श्रीयशोदान्तिकेऽदृष्ट्वाप्राप्य वा, गोप्यः सर्वा एव रुरुदुः। अनुरक्तेति पाठे यतो यशोदायां नन्दसूनौ चानुरक्ताधीर्यासां ताः। नन्दसूनुमिति नन्दस्य व्रजवासिनाञ्च सर्वेषां रोदनमपि सूचयति ॥ २५ ॥ ततश्च तेषामार्त्तिरोदनेन नभोगमनलीलां विहाय दैत्यं हन्तुमुद्यत इत्याह—तृणेति। भूरि अतिदूरे आनयनार्थमीषद्गौरवाविष्कारात् स्वभावादेव वा महान् यो भारस्तम्; यद्वा, भूरिभारो यस्य तं बिभर्त्तीति तथा सः, आत्मनोऽपि सकाशाद्गुरुमत्तया हेतुनाश्मन्तमश्मवन्तं नीलमणिपर्वतम्, न तु नन्दसूनुं तं मन्यमानोऽतो हरणाशक्त्या च मोक्तुमिच्छन्नपि नाशक्नोत्; यतस्तेनैव गले गृहीतः अत एवाद्भुतं लोकातीतं कौतुकावहं वार्भकम्। अश्मानमिति पाठः क्वचित्; तद्व्याख्या च काचित्की। अत्र च, यथा हि केनचिदुह्यमानो बालको-भयात्तद्गलं गृह्णाति, तद्गलग्रहणादिना लौकिकबाल्यलीला तथा तस्य महादैत्यस्याप्यसह्यभारेण निजगलमोचनाशक्त्या च तथा तेन प्रकारेण मारणादिना चैश्वर्य्यं प्रकटमेवेति दिक् ॥ २६-२७ ॥ गलग्रहणेनैव निश्चेष्टोहस्तपादप्रक्षेपणादावशक्त इत्यर्थः। गलग्रहणादेव निर्गते बहिर्निःसृते लोचने यस्य सः। किञ्च, न व्यक्तो न स्पष्टो न वक्तुं शक्यो राव आर्त्तनादो यस्य येन वा सः, सहबालः श्रीभगवत्सहितः, यद्वा, स महाबलिष्ठत्वादिना प्रसिद्धो दैत्यो बालो मूर्खोऽयोग्येऽशक्ये च कर्मणि प्रवृत्तः, अत एव व्यसुर्मृतो व्रजमध्ये नितरां पृष्ठतः सर्वांगपातमपतत्। हर्षे। पूर्वं पूतनायाः पादादिविक्षेपेण महार्त्तनादेन च व्रजवासिनां महाभयं वृत्तमासीत्, तदधुना मा भूदिति गलग्रहणेन नभस्येव मारणमत एव नभसि गमनार्थं तृणावर्त्तेन हरणमपीति तत्त्वम् ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पवन इति सप्तमी स्पृशि स्प्रष्टुमशक्यम् ॥ २५–२७ ॥ व्यसुः गतप्राणः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततस्तस्य रुदितमाकर्ण्य भृशं नितरामनुतप्ताः धियो मनांसि यासामश्रूणि मुखे यासां तथाभूताः गोप्यः तत्रागत्य नन्दसूनुं श्रीकृष्णमनुपलभ्यादृष्ट्वा रुरुदुः उपारतः पांसुवर्षस्य वेगो यस्मिंस्तथाभूते पवने सति तत्र तस्या रुदितमनुनिशम्येत्यन्वयः ॥ २५ ॥ वात्या चक्रवातः तद्रूपधरस्तृणावर्तः श्रीकृष्णं हरन् शान्तवेगः कथञ्चिन्नभोगतः ततः परं नभो गन्तुं नाशक्नोत्तत्र हेतुः भूरिभारभृदिति ॥ २६ ॥ तं बालं गुरुमत्तया आत्मनः स्वास्याश्मानं कूपे पिपतिषोः कण्ठलग्नपाषाणतुल्यं मन्यमानः यद्वा आत्मनः स्वस्मादपि गुरुमत्तयाऽश्मानं बालव्याजं परं मन्यमानस्तेन दृढं गले गृहीतः समुत्सृष्टं त्याजयितुं नाशक्नोत् ॥ २७ ॥ गले ग्रहणेनैव निश्चेष्टो निर्गते उद्गते लोचने यस्य स दैत्यः अव्यक्तमस्पष्टं वाक्यं वचो यस्य तथाभूतः निबद्धगलत्वादिति भावः। बालेन श्रीकृष्णेन सहितो व्यसुर्गतप्राणो व्रजे न्यपतत् ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उपारतः उपरतः शान्तः पांसुवर्षवेगो यस्य पवनस्य स तथा तस्मिन् सत्यपि कृष्णस्य अन्तरिक्षगमनात् भुव्यदर्शनम् उपरि चक्षुर्दौर्बल्यादित्यर्थः ॥ २५ ॥ ननु, मूर्त्तद्रव्यादर्शनं देशान्तरसंयोगाद्देशान्तरप्रवेशलक्षणसंयोगाद्वत्युभयथा सम्भाव्यते अत्र कथमिति स्त्रीणां शङ्कामपनेतुमुपक्रमते; तृणावर्त इति, शान्तरयः निवृत्तवेगः ॥ २६ ॥ अश्मानं श्वेतपाषाणम् ॥ २७ ॥ निर्गतलोचनः निष्क्रान्तनेत्रमांसपिण्डः अव्यक्तवाक्यः वचनावृत्तिरहितः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अश्मन्तमिति बलोपश्छान्दसः ॥ २७–३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उपारतः पांसुवर्षस्य वेगो यस्मिंस्तथाभूते पवने सति तत्र व्रजेश्वर्या रुदितं निशम्य अनु पुरान्तरादपि गोप्य आगत्य तत्र रुरुदुः ॥ २५ ॥ प्रथमं कृष्णं बालकान्तरमिव हरन्नभः अत्यूर्द्ध्वं गतः ततश्च भूरिभारभृदिति तत्र ऊर्द्ध्वप्रदेशे महाभारं तं प्रतियन् शान्तरयः ततश्च वोढुमसमर्थ एव ततो गन्तुं नाशक्नोत् ॥ २६–२८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उपारतः पांसुवर्षवेगो यस्मिन् एवम्भूते पवने सति यशोदायाः रुदितमनुनिशम्य तत्र गत्वेति शेषः । नन्दसूनुमनुपलभ्य गोप्यो रुरुदुः ॥ २५ ॥ पूतनाग्राह्यरूपेण नन्दव्रजं प्राप्य विनष्टाऽतो वात्यारूपधरः वात्या चक्रवातस्तद्रूपधरः कृष्णं हरन् शान्तरयः मन्थरवेगोऽभूत् तथाभूतोपि कथंचिन्नभोगतस्ततः परं गन्तुं नाशक्नोत् यतो भूरिभारभृत् ॥२६॥ अद्भुतार्भकं दुर्ज्ञेयाचिन्त्यशक्ति बालकम् आत्मनः स्वस्माद्गुरुमत्तयाऽतिगुरुत्वेन अश्मानं गिरिकूटं मन्यमानः तमुत्स्रष्टुं नाशक्नोत् तत्र हेतुं दर्शयति गले गृहीतः तेन इति शेषः ॥ २७–२८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

उपारतः पांसुवर्षस्य वेगो यस्मिन् तथाभूते पवने सति तत्र गोकुले तस्या रुदितं निशम्य गोपास्तत्रागत्य नन्दसूनुमनुपलभ्य भृशमनुतप्तहृदयास्तद्रुदितमनुरुरुदुः ॥ २५ ॥ तृणावर्त्तः कृष्णं बालकान्तरमिव हरन्नभोगतस्तत्र भूरिभारभृदतिभारस्तं विजानन् शान्तरयः ततो वोढुमसमर्थ एव ततः परं गन्तुं नाशक्नोत् ॥ २६ ॥ ततश्च सिद्धवियद्विहारेच्छोद्दृष्टः स्वक्रीडास्थानः साधितदेववनितानन्दः स यशोदार्भकस्तं दैत्यं हन्तुमारेभे इत्याह तमिति । आत्मनः सकाशादपि गुरुमत्तयातिगौरवत्त्वेन हेतुना तमश्मानम् एकपाषाणवपुषं शैलं मन्यमानः त्यक्तुमिच्छन्नपि उत्स्रष्टुं त्यक्तुं नाशक्नोत् यतस्तेन गले गृहीतः बाल्यलीलावेशेन स्वपतनभयादिवेति भावः ॥ २७ ॥ गलग्रहणेनैव निश्चेष्टः अव्यक्तो एव आर्त्तनादो यस्य सः पूतनार्त्तनादेन व्रजौकसां त्रासो वृत्तः सोऽधुना माभूदिति कण्ठं निष्पीड्य नभस्येव मारित इति भावः । यतो व्यसुः प्राणहीनः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शर्कराभिः क्षुद्रपाषाणैः ॥ २५ ॥ इत्येवं प्रकारेण खरश्चण्डः पवनोऽनिलस्तत्सम्बन्धिनः पांसवो धूल्यस्तेषां वर्षे । क्वचित्तालव्यपाठः । तत्र तालव्याश्च व दन्त्याश्च शम्बसूकरपांसव इत्यादिमूलं । सुतपदवीं तस्य सृतिं । मार्गाः पन्थानः पदवी सृतिरित्यमरः । अविचक्षमाणा पश्यन्ती अबला मृतवत्सका । सुपः परत्वान्नप्रत्ययत्वं स्यादिति । गौर्यथा तथाऽनुस्मरन्ती भुवि पातिता सत्यतिकरुणं यथा स्यात्तथाऽशोचच्छुशोच । भुवि पतितेत्यनेन त्वदधीनः सूनुः कुतस्त्वं हे धरे श्रीधरं क यापितवतीति तदुपरि पात उचितो रचितोऽनयेति ध्वन्यत इति त्वद्भारापहाराय प्रादुर्भूतं दुर्भूतमुखे स्थापितवत्यसीति अहं तं मम पातेनापि करोमीति पपातेति ध्वन्यत इति वोत्प्रेक्षयन्ति । मृतवत्सकेति निदर्शनदर्शनेन न पुनस्तनयदर्शनं भविष्यतीत्याशा लोकदृशा यशोदाया इति सूचयति॥२६॥ तत्र तदानीं गोप्यो रुदितं यशोदाया इति शेषः । श्रुत्वा निशम्यानुतप्तानां धीरेव धीर्यासां तास्तथाऽश्रुभिः स्रवदुदकैः पूर्णं व्याप्तं मुखं यासां ताः स्वाङ्गात्कोष् । उपारतपांसुवर्षवेगे उपारतः पांसुवर्षस्त वेगो यस्मिंस्तस्मिन्पवने सत्यपि नन्दसूनुमनुपलभ्यादृष्ट्वा स्वयमपि रुरुदुः ॥ २७ ॥ मृत्या वाऽदर्शनं नीत्या केनचिदनीत्या वा मूर्तमूर्तेरत्र तु कथमिति शङ्कामुत्तमां वरोरूणामङ्गनानामपनेतुं यतते तृणावर्तं इति वात्याया वातसमूहस्य पाशादिभ्यो य इति यो यद्रूपं यस्तस्य धरः कृष्णं हरन्भूरि भारं बिभर्तीति सः शान्तरयः सन्नभोगतो गन्तुं पुरतो नाशक्नोत् ॥ २८ ॥

श्रीसुबोधिनी

एवं यशोदायाः परमस्नेहेन मूर्छापर्यन्तमवस्था निरूपिता, गोपिकानामाह रुदितमिति,, अनुनिशम्येति, गोप्यः स्वयमेव ज्ञानसम्पन्ना भगवति नीयमाने रोदनं कुर्वन्त्यः स्वरोदनं शृण्वन्त्योन्यरोदनमपि श्रुतवत्य इत्यनुनिशम्येत्युक्तं, तत्र भगवद्गृहे, गोप्यो भगवदीयाः, भृशमत्यर्थमनुतप्ता धीर्यासामस्माभिस्तत्र भगवन्तं गृहीत्वा कथं न स्थितमित्यनुतापयुक्ताः स्वबुद्धिदोषं

स्मरन्त्यो भृशं तप्ता अश्रुप्रोञ्छनेप्यशक्ता **अश्रुपूर्णमुख्यो** जाताः; अश्रुभिः पूर्णं मुखं यासामिति, स्वयं तत्र गृहे गत्वा **नन्दसूनुमनुपलभ्य** रोदनेपि लौकिकदोषनिवृत्त्यर्थं **प्रभुपुत्रमनुपलभ्य सर्वाः** संहत्य **रुरुदुः**, एवं रोदने क्रियमाणे देवतान्तर्हिता, तस्यामन्तर्हितायां **पवनोप्युपारत** पांशवर्षस्य **वेगो** यस्य तादृशो जातस्तस्मिन् ॥ २५ ॥ तथा जाते तृणावर्तोपि शान्तवेगो जात इत्याह **तृणावर्त** इति, प्राप्ते भगवति नयन एव सामर्थ्यस्य व्यापृतत्वात् पूर्वं **वात्यायां रूपधरो** भूत्वा **हरन्नाकाशं** गतः **कृष्णं हरन् गन्तुं नाशक्नोत्**, उच्चैर्गमन एव देवतावशाद् बलं जातं न तिर्यग्गमने, तत्र हेतुर्भूरिभारभृदिति, स्वसामर्थ्यापेक्षयाप्यधिकं भारं बिभ्रत् ॥ २६ ॥ ततोशक्तौ यत् कृतवांस्तदाह **तमश्मानमिति**, तं भगवन्तं बालकं सूक्ष्मरूपमतिगरिष्ठमश्मानं हीरकं नीलमणिं वा मन्यमानो जातस्तत्र हेतुरात्मनो **गुरुमत्तयेति**, **आत्मनोप्यतिबलिष्ठस्यापि गुरुमत्तयाशक्यगौरवेण कृत्वाश्मानं मन्यमानो** जातः, तत उत्स्रक्ष्यामीति विचार्य भगवता गले गृहीतस्सन्नुत्स्रष्टुमपि **नाशक्नोत्**, । ननु हस्तौ मोचयित्वा कथं न त्यक्तवानित्याहाद्भुतार्भकमिति, अद्भुतोलौकिकः, त्याजने क्रियमाणे सम्बन्धो भवति, विपरीता हि भगवल्लीला, प्राप्तव्य इत्युक्ते न प्राप्नोति त्यज्यत इत्युक्ते न त्यक्तो भवति ॥ २७ ॥ तदा भगवान् यत् कृतवांस्तदाह **गलग्रहणेति**, उच्चस्थाने बालकस्वभावव्यापक इव गलं गृह्णाति भगवान्, देहेन प्राणैः सह त्यक्तव्यः, तत्प्रियत्वस्यैव देहादौ समारोपणात्, तस्मिन् विद्यमाने भगवान् न त्यक्तो भवति, हस्ते गृहीत्वा त्यजन्निव तदा **गलग्रहणे निश्चेष्टो** जात इति, तदा भगवान् दयया त्यक्ष्यतीत्याशङ्क्याह **दैत्य** इति, अत एवातिनिःपीडनेन **निर्गते लोचने** यस्य, शब्देनापि भयं जनयिष्यामीति विचार्य ततोपि पीडितो **व्यक्तरावो** जातः, **न व्यक्तो रावः** शब्दो यस्य, तदा विवशः सन् हृदयस्थितबालक एव **व्रजमध्ये न्यपतत्**, न हि गोकुलसर्वस्वं कश्चिदन्यत्र नेतुं शक्तः नितरामपतदिति सर्वाङ्गे भूमिसम्बन्ध उक्तः ॥ २८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तमश्मानमित्यत्र गुरुशब्दस्य धर्मवाचकत्वेपि गुरुपाषाण इत्यादौ धर्मिण्यपि प्रयोगात् प्रकृते धर्मिभिन्नधर्मोभिप्रेत इत्याशयेनाहुरशक्यगौरवेणेति सोढुं न शक्तो भवति ॥ २७ ॥ **गलग्रहण** इत्यत्र भगवान् गलग्रहणं कुतः कृतवानित्याकाङ्क्षायां तदभिप्रायमाहुर्देहेनेत्यादि, अयं देहेन प्राणैः सह भगवता त्यक्तव्यो न तु पूतनावत् केवलदेहेन, तत्त्यागश्च तदा भवति यदायं प्रियत्वधर्मं त्यजति 'प्राणबुद्धिमनःस्वात्मदारापत्यधनादयो यत्सम्बन्धात् प्रिया आसंस्ततः को न्वपरः प्रिय' इति यज्ञपत्नीः प्रति भगवद्वाक्ये प्रियत्वस्य भगवद्धर्मत्वेन सिद्धत्वात् तस्यैव देहादावारोपणस्यापि सिद्धत्वाद् देहादिविषयेपि तस्मिन् भगवद्धर्मे विद्यमाने भगवान्न त्यक्तो भवत्यतो गृहीतवानित्यर्थः, इयं **फक्किका पूर्वश्लोकस्यैवेति** प्रतिभात्येतदग्रे **तदा भगवानित्याभासोपेक्ष्यत** इति च, नन्वेवं भगवत्त्यागाभावे बहिर्मुखानामपि भगवत्सम्बन्धापत्तिरिति चेदस्तु न च मुक्त्याद्यापत्तिः साधनाभावात् कृपाभावाच्च तदभावे व्यापकत्वकृतस्य सम्बन्धस्यैवास्याप्यप्रयोजनकत्वाच्च, या पुनः पुराणान्तरे तृणावर्तस्य मुक्तिरुक्ता तत्र पूर्वजन्मीनं साधनं स्वरूपसम्बन्धश्चेति हेतू स्फुटावेवेति न कोपि शङ्कालेशः, तद्यग्रे कथं त्यक्तव्य इत्यत आहुर्हस्त इत्यादि, तथा च निश्चेष्टायां व्यसुत्वे प्रियत्वस्य निवृत्तत्वात् तस्मिन् गते त्यक्त इत्यर्थः ॥ २८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तृणावर्त इत्यत्र अधुना शान्तरयत्वे हेतुमाहुः **प्राप्ते** इति ॥ २६ ॥ **तमश्मान**मित्यत्र **गुरुमत्तयेति** 'वस्तुनो लघुकाठिन्यमृदुगुर्वोष्णशीतता'मित्यत्र द्वितीयस्कन्धदशमाध्याये लघ्वादिशब्दा धर्मवाचकत्वेन व्याख्याता अतोत्रापि गुरुशब्दो धर्मवाचकस्तथा च गुरुमत्ता गौरवमित्यर्थः, अतिशायने मतुबित्यभिप्रेत्य अशक्यं यद् गौरवं तेनेतिव्याख्यातं, अद्भुतत्वं विवृण्वन्ति **विपरीता हीति** इदमवतारकालिकं ज्ञेयम् ॥ २७ ॥ **यत् कृतवांस्तदाहेति** अत्र सर्वत्र प्रायशो गौणवाक्यार्थ एवाभासेषूक्तः, **गलग्रहणे**त्यत्र भगवता तस्य गलग्रहणे उपपत्तिं विचारयन्ति **देहेनेति**, प्राणसहभूतेन **देहेन** कर्त्रा भगवांस्त्यक्तव्यः स्यात्, तथा तु भगवान् न त्यक्तो भवति, तत्र हेतुस्तत्प्रियत्वस्यैवेत्यारभ्य **विद्यमाने** इत्यन्तेन, **प्रियत्वस्य** भगवद्धर्मस्य तेन **देहादौ समारोपणात् तस्मिन्** प्रियत्वधर्मे देहादौ **विद्यमाने भगवांस्त्यक्तो न भवत्यतो** गलं गृह्णातीत्यर्थः, भगवदसम्बद्धे देहे आरोपितं जीवनिष्ठं प्रियत्वं भवति भगवत्सम्बद्धे तु देहादावारोपितं भगवद्धर्मरूपमेव भवति तस्य महत्त्वादितिभावः ॥ २८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गलग्रहणनिश्चेष्ट इत्यस्य विवृतौ तत्प्रियत्वस्यैव देहादौ समारोपणादिति "अहमात्मात्मनां धातः प्रेष्ठः सन् प्रेयसामपि अतो मयि रतिं कुर्याद् देहादिर्यत्कृते प्रिय" इति तृतीयस्कन्धे ब्रह्माणं प्रति भगवद्वाक्यात् जीवानां वस्तुतः प्रियो भगवानात्मत्वात्, तदज्ञानात् देहादावात्मबुद्धिं कृत्वा प्रियत्वमारोपितं, तदारोपितप्रियत्वाधिकरणदेहप्राणयोस्त्यागे वस्तुतः प्रियत्वाधिकरणरूपो भगवांस्त्यक्तो भवति, यदि वस्तुत आत्मरूपो भगवांस्त्यज्यते तर्हि आत्मत्वेन अभिमतौ देहप्राणावपि कुतो न त्याज्याविति भावः ॥२८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं यशोदायाः परमस्नेहेन मूर्च्छापर्यन्तावस्था निरूपिता। अथ गोपिकानामवस्थामाह—रुदितमिति। यावत्तृणावर्तो वात्यारूपेण वेगवानासीत्तावद्यशोदारोदनं गोपीभिर्न श्रुतम्। अनु पश्चात् उपारतो निवृत्तः पांसुवर्षस्य वेगो यस्मिंस्तथाभूते पवने सति तस्या रुदितं निशम्य तत्रागत्य नन्दसूनुमनुपलभ्य भृशमनुतप्ता धीर्यासां ताः, अतएवाश्रूणि मुखे यासां ता गोप्यो रुरुदुरित्यन्वयः ॥ २५ ॥ तृणावर्तोऽपि श्रीकृष्णं हरन् कियत्पर्यन्तं नभोगतः, ततोऽग्रे गन्तुं नाशक्नोदित्यन्वयः। तत्र हेतुमाह—शान्तरय इति। निवृत्तवेग इत्यर्थः। तत्र हेतुमाह—भूरिभारभृदिति। भगवता तस्य मारणाय पुनर्गुरुत्वं प्रकटितम्, अतस्तद्भारेण पीडित इत्यर्थः ॥ २६ ॥ गुरुमत्तया अनया अतिगौरवेण तं कृष्णमश्मानं नीलमणिं पर्वतप्रायं मन्यमान अत उत्स्रष्टुं त्यक्तुमिच्छन्नपि नाशक्नोदित्यन्वयः। तत्र हेतुमाह—आत्मनो गले गृहीत इति। अनेन तेन वात्यारूपं परित्यज्य दैत्यरूप गृहीतमिति ज्ञेयम्। ननु 'बालस्य तस्य हस्तौ गृहीत्वा कण्ठं मोचयित्वा कथं न त्यक्तवान्?' तत्र हेतुगर्भविशेषणमाह—अद्भुतार्भकमिति। महाबलत्वात् यं गृह्णाति तं नैव त्यजति, किन्तु संसारान्मोचयत्येवेति स्वभावत्वाच्चेत्यद्भुतत्वम् ॥ २७ ॥ गलग्रहणेनैव निश्चेष्टः, अत एव निर्गते लोचने यस्य सः, अव्यक्तः 'किं वक्तीति बोधायोग्यो' रावः शब्दो यस्य सः, व्यसुः प्राणरहितो दैत्यस्तृणावर्तो बालेन सह व्रजे, तत्रापि 'अत्रोपविश्य सर्वदोहानुसन्धानं कर्तव्यम्' इत्यर्थे स्थापितायां महत्यां शिलायां न्यपतदित्यन्वयः। 'पूतनायाः पादादिचालनेन भयङ्करशब्देन च व्रजवासिनां महाभयं जातम्, तदधुना माभूत्' इति तद्गलग्रहणेन नभस्येव मारणमिति ज्ञेयम् ॥ २८ ॥

अन्वितार्थप्रकाशिका

रुदितमिति। तृणावर्तवात्याशब्दे यशोदारोदनं गोपीभिर्न श्रुतम्। अनु पश्चात् उपारतो निवृत्तः पांशुवर्षस्य वेगो यस्मिंस्तथाभूते पवने सति तस्या रुदितं निशम्य तत्रागत्य नन्दसूनुमनुपलभ्य अदृष्ट्वा भृशमनुतप्ता धीर्यासां ताः अत एवाश्रुभिः पूर्णानि मुखानि यासां ता गोप्यो रुरुदुः ॥ २५ ॥ तृणावर्त इति। वात्यारूपधरः तृणावर्तः प्रथमं बालकान्तरमिव कृष्णं हरन् नभः अत्यूर्ध्वं गतः ततस्तस्य मारणाय पुनर्भगवता धृतं भूरि भारं बिभर्तीति तादृशः। अत एव भारवशाच्छान्तरयो निवृत्तवेगोऽभूत्। ततश्च वोढुमशक्तस्ततोऽग्रे गन्तुं नाशक्नोत् ॥ २६ ॥ तमश्मानमिति। आत्मनो गुरुमत्तया अतिगौरवेण तमद्भुतार्भकं श्रीकृष्णम् अश्मानं नीलपर्वतप्रायं मन्यमानस्त्यक्तवात्यारूपः कृष्णेन बाललीलया गले गृहीतः बालो हि पतनभयाज्जनं गाढं गले गृह्णाति तद्वत् अत उत्स्रष्टुं त्यक्तुमिच्छन्नपि नाशक्नोत्। अश्मानम् अश्मन्तमश्माणमिति पाठाः। पूर्वयोः क्रमान्मतुब्लोपवलोपौ छान्दसौ। अन्ते च अर्णशब्देन वर्णार्थेन प्रभोच्यते अश्मपदेन लक्षणादिना पर्वतः। यद्वा। अश्मार्णं शिलासमुद्रमिव इति टीकाकृतः ॥ २७ ॥ गलग्रहणेति। गलग्रहणेनैव निश्चेष्टोऽत एव निर्गते लोचने यस्य सः अव्यक्तः बोधायोग्यो रावः शब्दो यस्य स. व्यसुः प्राणहीनः दैत्यस्तृणावर्तः व्रजे दोहानुसन्धानायोपवेशार्थं स्थापितायां महत्यां शिलायां न्यपतत् नितरां पृथुतः सर्वाङ्गपातापतत्। पूतनाशब्दादिभिरिव व्रजवासिनां भयं मा भूदिति गलग्रहणेन नभस्येव मारणम् ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वात्या चक्रवातः तद्रूपधारकः कृष्णं हरन् तद्भारेण शांतरयः केनचित् प्रकारेण न भोगतः खं प्राप्तः भूरिभारभृत् सन् ततः परं गंतुं नाशक्नोत् ।।२५।। स्वस्य गुरुमत्तया अतिभारवत्त्वेन तं श्रीकृष्णं अश्मानपर्वततुल्यं मन्यमानः तेनैव आत्मनः स्वस्य गले कंठे गृहीतः सन् तमुत्स्रष्टुं तं त्यक्तुं कामयन् अपि नाशक्नोत् ॥ २६ ॥ निश्चेष्टो गतेहः निर्गते बहिरागते लोचने यस्य सः अव्यक्तरावः अव्यक्तशब्दवान् व्यसुः गतप्राणः ॥ २७ ॥ शिलायां स्थूलपर्वतशकले विशीर्णाः सर्वेऽवयवा अंगानि यस्य तं करालं भयानकं समेताः मिलिताः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं, खरः कठिनश्चासौ पवनश्च तस्य चक्रं मण्डलं तस्माद्यः पांसुवर्षो धूलिवर्षणं तस्मिन् सति, सुतपदवीं, अविलक्ष्य अदृष्ट्वा, अबला माता यशोदा, अतिकरुणं यथा तथा, अनुस्मरन्ती सती, मृतवत्सका गौः, यथा, तथा, भुवि, पतिता अशोचत् ॥ २५ ॥ रुदितेति ॥ ततः तस्याः रुदितं, अनुनिशम्य श्रुत्वा, भृशं नितरां, अनुतप्ता धियो मनांसि यासां ताः, अश्रुभिः पूर्णानि मुखानि यासां ताः, गोप्यः, उपारतः पांसुवर्षस्य वेगो यस्मिंस्तथाभूते, पवने सति, तत्र यशोदान्तिके आगत्य, नन्दसूनुं, अनुपलभ्य अदृष्ट्वा, रुरुदुः ॥ २६ ॥ तृणावर्त्तेति ॥ वात्या चक्रवातस्तद्रूपधरः, तृणावर्त्तः कृष्णं हरन्, शान्तरयः संशान्तवेगः, कथंचित् नभः गतः, परं तु यतः भूरिभारभृत्, ततः अतः परं गन्तुं, न अशक्नोत् ॥ २७ ॥ तमिति ॥ गुरुमत्तया अतिगौरवेण, अतिभारवत्त्वेनेति यावत्। तं श्रीकृष्णं, अश्मानमश्ममयाद्रिप्रायं, मन्यमानस्तृणावर्त्तः, गले गृहीतस्तेन बालेन गले उपात्तः, इति हेतोः, अद्भुतार्भकं तं बालकृष्णं, आत्मनः गलादिति शेषः। उत्स्रष्टुं त्यक्तुं, न अशक्नोत्। स्वकण्ठमोचनं विधापयितुमिच्छन्नपि समर्थो नाभूदित्यर्थः ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तमश्मानमिति : १०.७.२७.

जडेऽहं जडश्चेतने चेतनश्च भवाम्यत्र तादृक् तदीयप्रतीत्या ।
इति व्यक्तमाधातुमीशोऽश्मरूपो जडस्यास्य कण्ठेऽभवत् तत्प्रतीत्या ॥ ३० ॥

गलग्रहणेति : १०.७.२८.

हिंस्रः कोऽपि रजस्तमोव्यतिकराद् यद्दर्येद् गोकुलं मन्मात्राश्रयिणां सतामविकलं सत्त्वोल्लसद्वृत्तिकम् ।
भूत्वा तद्गलभृत्तदेव तरसा कृत्वा व्यसुं पातयाम्येतत्कृष्णनिरूपितं ननु तृणावर्तोऽसुनाशाच्छलात् ॥ ३१ ॥

कृष्णप्रिया

बवंडर के शान्त होने पर जब धूल की वर्षा का वेग कम हो गया, तब यशोदाजी के रोने का शब्द सुनकर दूसरी गोपियाँ वहाँ दौड़ आयीं । नन्दनन्दन श्यामसुन्दर श्रीकृष्ण को न देखकर उनके हृदय में भी बड़ा संताप हुआ, आँखों से आँसू की धारा बहने लगी । वे फूट फूटकर रोने लगीं ॥ २५ ॥ इधर तृणावर्त बवंडर रूप से जब भगवान् श्रीकृष्ण को आकाश में उठा ले गया, तब उनके भारी बोझ को न सम्हाल सकने के कारण उसका वेग शान्त हो गया । वह अधिक चल न सका ॥२६॥ तृणावर्त अपने से भी भारी होने के कारण श्रीकृष्ण को नीलगिरि की चट्टान समझने लगा । उन्होंने उसका गला ऐसा पकड़ा कि वह उस अद्भुत शिशु को अपने से अलग नहीं कर सका ॥ २७ ॥ भगवान् ने इतने जोर से उसका गला पकड़ रक्खा था कि वह असुर निश्चेष्ट हो गया । उसकी आँखें बाहर निकल आयीं । बोलती बंद हो गयी । प्राण-पखेरू उड़ गये और बालक श्रीकृष्ण के साथ वह व्रज में गिर पड़ा ॥ २८ ॥

तमन्तरिक्षात् पतितं शिलायां विशीर्णसर्वावयवं करालम् ।
पुरं यथा रुद्रशरेण विद्धं स्त्रियो रुदत्यो ददृशुः समेताः ॥ २९ ॥
[1]आदाय मात्रे प्रतिहृत्य[2] विस्मिताः कृष्णं च तस्योरसि[3] लम्बमानम् ।
तं स्वस्तिमन्तं पुरुषादनीतं विहायसा मृत्युमुखात् प्रमुक्तम् ॥ ३० ॥
[4]गोप्यश्च गोपाः किल नन्दमुख्या लब्ध्वा [5]ऽर्भकं प्रापुरतीव मोदम् ॥ ३१ ॥
[6]समेत्य चैकत्र कृताशिषोऽमला विचारयामासुरुपायमत्र ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—रुद्रशरेण विद्धं पुरं यथा (तथा) अन्तरिक्षात् शिलायां पतितं विशीर्णसर्वावयवं करालं तं समेताः रुदत्यः स्त्रियः ददृशुः ॥ २९ ॥ तस्य उरसि लम्बमानं कृष्णम् आदाय मात्रे प्रतिहृत्य विस्मिताः विहायसा पुरुषादनीतं मृत्युमुखात् प्रमुक्तं स्वस्तिमन्तं तं पुनः लब्ध्वा नन्दमुख्याः गोपाः गोप्यः च अतीव मोदं प्रापुः किल ॥ ३०–३१ ॥ च एकत्र समेत्य अमलाः कृताशिषः अत्र उपायं विचारयामासुः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्योरसि लंबमानं कृष्णमादाय मात्रे प्रतिहृत्य समर्प्य विस्मिताश्च बभूवुरिति । विहायसा गगनमार्गेण पुरुषादेन दैत्येन नीतं तथापि मृत्युमुखात्प्रमुक्तं पुनर्लब्ध्वा मोदं प्रापुरिति ॥ ३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुरं त्रिपुरसंज्ञं मयेन रचितम् ॥ २९ ॥ मृत्युमुखात्प्रमुक्तमित्यनेन स्वस्याधोक्षजत्वं प्रकटीकृतम् । "अधो न क्षीयते यस्माज्जातु तस्मादधोक्षजः" इति भारतात् । लब्धाशिषः श्रीकृष्णप्राप्त्याऽवाप्ताभिलषिताः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

शिलायां पशुपादसम्मर्दकर्दमानुद्भवार्थं गृहान्तिके शिलाबद्धभूभाग एव न त्वन्यस्य कस्यचिदुपरीत्यर्थः । अनेन पूतनावद्वृक्षवर्गचूर्णनं परिहृतम् अत एव विशेषतः शीर्णा भग्नाः सर्वे अवयवा यस्य करालं कठिनतराङ्गमपि यद्वा अत एव करालं रौद्रम्

---

१. प्रादाय–वीर. विज. जीव शुक. ; आदाय–विश्व. । २. प्रतिगृह्य–वीर. । ४. तस्योपरि–वीर. विज. । ४. गोप्यस्सगोपाः–विज. । ५. पुनः–श्रीधर. वंशी. वीर. विज. जीव. ; सुतं–इति कस्यचित् । ६. अन्यत्र अयं श्लोको न दृश्यते ।

आकाशान्निश्चेष्टतया पतने दृष्टान्तः। पुरमिति। अत्रापि विशीर्णेत्यादियोज्यं समेताः श्रीयशोदापार्श्वे मिलिताः यद्वा, अन्योन्यं मिलिताः सत्यो रुदन्त्यः रुदत्यो वा समेताः सर्वा एव युगपद्ददृशुः यतः स्त्रियः स्त्रीत्वेन प्रेमकोमलस्वभावतः स्नेहविशेषेण श्रीकृष्णासक्तचित्ता इत्यर्थः। अत एव तासां शोकाधिक्येन शीघ्रतदपनोदनार्थं तासामेवान्तिके निपातनादादौ ताभिस्तद्दर्शनम् ॥ २९ ॥ ततः श्रीकृष्णं च दृष्टवतीनां चेष्टामाह–प्रादायेत्यर्द्धकेन। हस्तद्वयगृहीताद्गलादुरसि लम्बमानं पूर्वमावेगस्य बलवत्वात्पश्चादेव विस्मयः दैत्योरसि लम्बमानत्वेनालक्ष्यलाभादिना तस्याः परमभाग्यानुसन्धानेन च विस्मिताः अनन्तरं यमुनायामेव तच्छरीरं वाहयामासुरिति ज्ञेयं स्वस्तिमन्तं सर्वथा कुशलिनं स्वस्तिमत्वमेवाह—विहायसा पुरुषादेन नीतम् अतोऽस्मद्दृश्यागम्यस्थाने भक्षकेन नीतत्वात् मृत्युतुल्यस्य तस्याहारत्वेन सुखं प्राप्तमपि तस्मात्प्रकर्षेण क्षतादिराहित्येन मुक्तम् उर्वरितमिति यद्वा विहायसा पुरुषादेन नीतमिति अत्युच्चपातादिसम्भवात् साक्षान्मृत्युमुखमिव प्राप्तमपि तस्मात् प्रमुक्तं गोप्यः श्रीयशोदाद्याः तासामादौ निर्देशः ताभिः प्राक् लब्धत्वात् स्नेहविशेषेण मोदाधिक्याच्च गोपाश्च किल निश्चित तादृशं लब्ध्वा पुनरिति पूतनादिभयापेक्षया किं वा जन्मापेक्षया पुनर्जातमिवेत्यर्थः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

शिलायां पशुपाद–सम्मर्दपंकानुद्भवार्थं गृहान्तिके शिलाबद्ध-भूभाग एव, न त्वन्यस्य कस्यचिदुपरीत्यर्थः। अनेन पूतनावद्वृक्षवर्गचूर्णनं परिहृतमतएव विशेषतः शीर्णा भग्नाः सर्व्वेऽवयवा यस्य। करालं कठिनतरांगमपि; यद्वा, अतएव करालं रौद्रम्, आकाशान्निश्चेष्टतया पतने दृष्टान्तः—पुरमिति। अत्रापि विशीर्णेत्यादि योज्यम्। समेताः श्रीयशोदापार्श्वे मिलिताः; यद्वा, अन्योऽन्यं मिलिताः सत्यो रुदत्यो रुदन्त्यो वा समेताः सर्व्वा एव युगपद्ददृशुः, यतः स्त्रियः स्वभावतः स्नेहविशेषेण श्रीकृष्णासक्तचित्ता इत्यर्थः। अतएव तासां शोकाधिक्येन शीघ्रं तदपनोदनार्थं तासामेवान्तिके निपातनादादौ ताभिस्तद्दर्शनं सर्व्वचित्ताकर्षकलीलं श्रीकृष्णञ्च ददृशुः। कथम्भूतम्? तस्य दैत्यस्योपरिलम्बमानं नीलमणिवद्गलतो लम्बित्वा स्थितं कराभ्यां गलग्रहणात्; किंवा पततः सतो गलत्यागेनोरसि शयनात् ॥ २९ ॥ ततस्तमादाय समर्प्य विस्मिता बभूवुः। दैत्योरसि लम्बमानत्वेन किंवाऽलभ्यलाभादिना तस्याः परमभाग्यानुसन्धानेन स्वस्तिमन्तं सर्व्वथा कुशलिनम्। स्वस्तिमत्त्वमेवाह—विहायसा पुरुषादेन नीतमतोऽस्मद्दृश्यागम्यस्थाने भक्षकेन नीतत्वान्मृत्युतुल्यस्य तस्याहारत्वेन मुखं प्राप्तमपि तस्मात् प्रकर्षेण क्षतादिराहित्येन मुक्तमुर्व्वरितमिति; यद्वा, विहायसा पुरुषादेन नितमित्यत्युच्चपातादिसम्भवात् साक्षान्मृत्युमुखमिव प्राप्तमपि तस्मात् प्रमुक्तम्। किञ्च, स्वस्तिमन्तं स्वास्थ्ययुक्तं दुष्टस्पर्शादिनापि किञ्चित् विकारेणाप्यसम्बन्धादतस्तं प्राप्यैव मोदं प्रापुः स्वस्तिमन्तं प्राप्य चातीव मोदप्राप्तेरित्यर्थः। गोप्यः श्रीयशोदाद्यास्तासामादौ निर्देशस्ताभिः प्राक् लब्धत्वात्, स्नेहविशेषेण मोदाधिक्याच्च। गोपाश्च किल निश्चितं तादृशं लब्ध्वा पुनरिति पूतनादि-भयापेक्षया, किंवा जन्मापेक्षया पुनर्जातमेवेत्यर्थः ॥ ३० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

स्वस्तिमन्तम् अपेतभयम् ॥ ३०—३१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अन्तरिक्षाच्छिलायां पतितमत एव विशीर्णाः सर्वावयवाः यस्य तं दैत्यं रुद्रशरेण विद्धं पुरमिव करालं भयङ्करं सङ्घीभूताः रुदन्त्यश्च स्त्रियो ददृशुः ॥ २९ ॥ ततस्तस्य दैत्यस्य उरसि लम्बमानं कृष्णमादाय मात्रे यशोदायै प्रतिगृह्य समर्प्य विस्मिता बभूवुः विहायसा गगनमार्गेण पुरुषादेन दैत्येन नीतमथापि मृत्युमुखात् प्रमुक्तं स्वस्तिमन्तं जीवन्तं बालं लब्ध्वा नन्दप्रधाना गोप्यश्च नितरां मोदं हर्षं प्रापुः किल ॥ ३० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पुरं त्रिपुरसंज्ञम् ॥ २९—३१ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

युवोरनाकौ" (७।१।१) इति ज्ञापकात् प्रमुच्यते प्रमुक्त इत्यर्थः ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च निष्पन्नस्वीयनभोविहाराभिलाषो निष्पादितस्वर्गपुरपुरन्ध्रीकर्त्तृकस्वदर्शनाभिलाषश्च बालकृष्णस्तं हन्तुं प्रववृते इत्याह–तमिति। आत्मनः सकाशादप्यतिगौरवत्वेन तम् अश्मन्तं अश्मवन्तं पर्वतं मन्यमानः उत्स्रष्टुं निःसारयितुं नाशकत् तत्र हेतुः गले गृहीतस्तेनैव बाल्यलीलया स्वपतनभयादिति भावः। अश्मन्तमिति "युवोरनाकौ" (७।१।१) इतिवद्वलोपश्छान्दसः अश्मानमिति पाठे मतुल्लोपश्च अश्मार्णमिति पाठे आश्मार्णवं शिलासमुद्रमिवेत्यर्थः ॥ २९ ॥ तस्योरसि लम्बमानं कृष्णमादाय मात्रे

प्रतिहृत्य विस्मिता बभूवुः उरसीति कृष्णस्य व्यथाभावः सूचितः। असुरस्य पृष्ठप्रदेशे एव शिलापतितत्वात् विहायसा गगनमार्गेण पुरुषादेन मनुष्यभक्षकेण नीतम् अत एव मृत्योर्मुखादिव मुक्तम् ॥ ३० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तं तृणावर्त्तं शिलायां पतितं ददृशुः ॥ २९ ॥ कृष्णं च तस्योरसि लम्बमानं प्रादाय मात्रे प्रतिहृत्य समर्प्य विस्मिता बभूवुः ॥ ३० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तमिति। शिलायामास्थाना प्राङ्गणस्थितायां बृहत्यामिति बोध्यम् ॥ २९ ॥ तस्योरसि लम्बमानं कृष्णमादाय मात्रे प्रतिहृत्य समर्प्य विस्मिता बभूवुः। उरसि लम्बमानमित्यर्भकस्य व्यथाभावः दैत्यस्य पृष्ठदेशेन शिलायां निपातात् विहायसाकाशमार्गेण पुरुषादेन मनुष्यभक्षकेण नीतम् अतएव मृत्योर्मुखादिव विमुक्तम् ॥ ३० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आत्मनः स्वस्य गुरुमत्तया गुरुत्वेनाश्मानं शिलातुलं मन्यमानो गले तेन गृहीतोऽद्भुतार्भकमुत्स्रष्टुं नाशक्नोन्न शशाक ॥ २९ ॥ गलग्रहणेन निश्चेष्टो निर्गतलोचनो निर्गते व्यत्यस्ते लोचने यस्य सोऽव्यक्तवाक्योऽव्यक्तं मन्दं वाक्यं यस्य स व्यसुर्विगता असवो यस्य सः। व्रजे सहबालो न्यपतत् ॥ ३० ॥ शिलायामन्तरिक्षात्पतितं विशीर्णाः शिथिलाः सर्वेऽवयवा यस्य तं करालं स्वराक्षसरूपतः पाताद्यथा रुद्रशरेण भगवद्रूपेण बाणेन विद्धं पुरं त्रिपुरं तथा। समेता रुदन्त्यः स्त्रियो ददृशुः ॥ ३१ ॥ तस्य मृतस्य तृणावर्तस्योपरि लम्बमानं स्वस्तिमन्तं क्षेमवन्तं विहायसाऽऽकाशेन पुरुषादेन पुरुषादानीतं रक्षसा नीतं मृत्युमुखात्प्रमुक्तं कृष्णमादाय मात्रे प्रतिहृत्य दत्वा विस्मिता अहो क्षेमो जात इत्याश्चर्यवत्योऽभूवन्। पुरुषादात्तृणावर्तादानीतं स्वेच्छयागतमिति यावत् पुरुषाच्चामावानीव प्राणी च तेनेतस्तमिति वा ॥ ३२ ॥ गोप्यो गोपा नन्दमुख्याः पुनः कृष्णं लब्ध्वाऽतीव मोदं प्रापुः किल वार्ता। स एष बालो रक्षसा निवृत्तिं गमितः पुनरभ्यगादहोऽद्भुतं बत ॥

श्रीसुबोधिनी

तदा मायायां गतायां पतन् सर्वजनीनो जात इत्याह **तमन्तरिक्षात्** पतितमिति, **अन्तरिक्षात्** दूरादाकाशान् निरालम्बाच्छिलायां पतितं भगवदासक्ताः **स्त्रियो ददृशु**रितिसम्बन्धः, व्रजमध्ये महान् पाषाणो भवति यत्र स्थितो **नन्दः** सर्वमेव दोहमनुसन्धत्ते, सा शिला **ब्रह्म**पुत्रीव स्थिता दैत्यघातिनी, अत एव **विशीर्णाः सर्वावयवा** यस्य, मृतोपि सर्वेषां भयानकः किं पुनर्जीवन्नित्याह **करालमि**ति, **करालः क्रूरो** भगवता मारणीयत्वे हेतुः, **पुरं यथा रुद्रशरेण विद्ध**मिति, सर्वोपद्रवकारीणि पुराणि त्रैलोक्या अतिपीडिता अतः सर्वदेवप्रार्थनया भगवांस्तं मारितवान् नो चेद्दृश्य एव भवेत्, न तु गच्छेत्, विकलस्यापि मारणे हेतू **रुद्रशरेण स्वेनैव नारायणेन विद्ध**मिति, न हि दुष्टेषु वधक्रियया व्याप्तेषु दयोचिता, **त्रिपुरं यथा शरेण विद्ध**मेव परिभ्रमत् पतति तथा पतितं **रुदन्त्यो** रोदनं विस्मृत्याश्चर्याद् **ददृशुः**, यथास्थानस्थिता अपि तदा **समेताश्च** जाताः ॥ २९ ॥ तथाभूता यत् कृतवत्यस्तदाहादायेति, तस्योपरि लम्बमानं भगवन्तमादाय **मात्रे प्रतिहृत्य** समर्प्य स्तनपानादिना स्वस्थं ज्ञात्वा **विस्मिता** जाताः परमाश्चर्यं प्राप्तवत्यः, राक्षसस्पर्शे सहजदोषजनकेपि दोषस्पर्शाभावात्, अपहतपाप्मन एवैतत् सम्भवति, अपहतपाप्मत्वनिश्चयाभावाद् विस्मयः, किञ्च विस्मयान्तरेपि हेतुमाहुः **कृष्णं च तस्योपरि लम्बमान**मिति, **वायुर्लघुः कृष्णः** पूर्वं गुरुरनुभूतो लघुरधस्तात् पतितो विशीर्णो भगवांस्तु तस्योपरिभागे तमस्पृष्ट्वैव पत्रपाषाणाविव पाषाणे पतिते पत्रं **तदुपरि लम्बमानं** शनैः शनैरायाति तद्वन् मध्यत एवादायेतिसम्बन्धः, अत **आदायैव च विस्मिताः**, **प्रतिहृत्य च विस्मिताः**, **चकारात्** पतितं दैत्यमपि **दृष्ट्वा विस्मिताः**, भगवन्तमभीतं दृष्ट्वा वा, एवमान्तरालौकिकदोषाभावाद् विस्मयत्रयमुक्तं, **बाह्यलौ**किकदोषाभावाद् विस्मयत्रयमाह **पुरुषादनीतं विहायसा मृत्युमुखात् प्रमुक्त**मिति, **पुरुषादा** राक्षसाः पुरुषमेवादन्तीति, तेन शरीरोपघातोवयवोपघातो वावश्यम्भावी, प्रमादाद् विगलितस्यापि तथेत्याह **विहायसे**ति, आकाशमार्गे उर्ध्वस्थस्योपि खेदं प्राप्नोति, न चानयोरन्यथापि सम्भवो यतो नियतमृत्युरूपावेतौ, तथापि सर्वथा सम्बन्धाभावे कदाचिदुर्वरितोपि भवेत् तदपि नास्तीत्याह **मृत्युमुखात् प्रमुक्तं**, ल्यब्लोपे **पञ्चमी**, **मृत्युमुखं** प्राप्य स्वेच्छया **प्रकर्षेण** मृत्युं मारयित्वा स्वयं **मुक्तं मृत्यु**र्दैत्ये स्थितो मुखमाकाशे, एव त्रिविधादपि **मृत्योर्मुक्त** इति लौकिकं आश्चर्याणि, एतादृशोपि **स्वस्तिमान्** कल्याणवान्, शोभा हर्षो वा केनाप्यंशेन न न्यून इति ॥ ३० ॥ एवं तासामाश्चर्याभिनिवेशमुक्त्वा प्रपञ्चे विस्मृते भगवदासक्त्या परमानन्दं च प्राप्तवत्य इत्याह **गोप्यश्चे**ति, गोप्यश्चकारादन्यस्त्रियोपि **गोपा अप्यर्भकं लब्ध्वा प्रमोदं प्रापुः**, तेषां विस्मयस्यानुक्तत्वात् प्रपञ्चविस्मरणाभावे **प्रकृष्टो** मोदो न सम्भवतीति युक्त्यभावेपि प्रमाणस्य बलिष्ठत्वाज्जात एवेति किलेत्याह, उपपत्तिं चाह **नन्द** एव **मुख्यो** येषामिति, मुख्ये प्रपञ्चविस्मरणस्य सिद्धत्वात् परमानन्द उचितः, तदाहार्भकं बालकं **लब्ध्वा**, अवस्थापि परमानन्दजनिका, **अतीव मोदं** परमानन्दं प्रापुः ॥ ३१ ॥ **अर्धमात्रमत्र पतितं** यत्र

सम्बन्धो निरूपितो भवति, सर्वा गोप्यो गोपा यशोदानन्दमुख्या एकत्रोपविश्य विमर्षं कृतवन्तस्तं विमर्षमाहाहो इतिद्वाभ्यां, समेत्य चैकत्र कृताशिषोमला विचारयामासुरुपायमत्र, एवमर्थः सखण्डो भवति ॥ ३२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तमन्तरिक्षादित्यत्र ब्रह्मपुत्रीवेति, रक्षोघ्नीसरस्वतीरूपगेवेत्यर्थः प्रतिभाति ॥ २९ ॥ **प्रादायेत्यत्रान्तराल्लौकिकदोषाभावादित्यस्वास्थ्यभयदुष्टस्पर्शात्मकाल्लौकिकदोषाभावात्** ॥ ३० ॥ **गोप्य** इत्यत्र **प्रपञ्चविस्मरणस्ये**ति पूर्वलीलाकृतस्य तस्य, **अर्धमात्र**मित्यर्धश्लोकमात्रं, **सर्वा गोप्य** इति स्वामिनीव्यतिरिक्ताः **सर्वा** इति ज्ञातव्यं, तासामेकत्रोपवेशनासम्भवात् पूर्णज्ञानवतीनां तादृग्विमर्षासम्भवाच्चेति प्रतिभाति ॥ ३१ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तमन्तरिक्षादित्यत्र ब्रह्मपुत्रीवेति अहल्यावदित्यर्थः, स्थितिमात्रे दृष्टान्तो न तु दैत्यनाशने, तस्यास्तथात्वाभावात्, **नोचे**दिति मारणाभावेऽवश्यः संस्तत्रैव तिष्ठेन् न तु व्रजाद् गच्छेदित्यर्थः ॥ २९ ॥ **गोप्यश्चे**त्यत्र **तदाहे**ति **तत्** तस्मात् परमानन्दस्योचितत्वात् परमानन्दमाहेत्यर्थः ॥ ३१ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तमन्तरिक्षादित्यत्र ब्रह्मपुत्रीवेति अहल्येवेत्यर्थः, "मुद्गलाद् ब्रह्म निर्वृत्तं गोत्रं मौद्गल्यसंज्ञित"मिति नवमस्कन्धवाक्याद् ब्रह्मत्वे सिद्धे ब्रह्मपुत्रीत्वमहल्यायाः, तथा च यथा अहल्या शिला स्थिता लोकेन ज्ञाता भगवता श्रीरामेणोद्धृता तथेयमपि शिला भगवतोद्धृता एतस्या अपि स्वरूपं किञ्चिद् वाच्यं, न त्वियं केवला शिला किन्तु कश्चिद् दैवजीवः शापादिना यमलार्जुनवदिह स्थितः प्राप्तशिलाभावो भगवता मोचितः, "अन्यैव काचित् सा सृष्टिर्विधातुर्व्यतिरेकिणी"ति वाराहवचनात् ॥ २९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तमन्तरिक्षात् निरालम्बादाकाशात् शिलायां पतितम्, अतएव विशीर्णसर्वावयवं करालं भयङ्कररूपं समेताः मिलिताः रुदत्यः स्त्रियः ददृशुः। तस्य पतने दृष्टान्तमाह—रुद्रशरेण विद्धं पुरं यथेति। तस्योरसि लम्बमानं श्रीकृष्णं च दृष्ट्वा तम् प्रादाय गृहीत्वा मात्रे यशोदायै प्रतिहृत्य समर्प्य विस्मिताश्च बभूवुरिति। 'स्त्रिय एवं कृतवत्य' इत्यनेन गोपेभ्यस्तासां प्रेमाधिक्यं साहसाधिक्यं च सूचितम् ॥ २९ ॥ तं श्रीकृष्णं स्वस्तिमन्तं पुनर्लब्ध्वा नन्दादयो गोपा गोप्यश्चातीव मोदं हर्षं प्रापुरित्यन्वयः। तत्र हेतुमाह—मृत्युमुखात् प्रमुक्तमिति। ल्यब्लोपे पञ्चमी। मृत्युमुखं प्राप्य एवं प्रकर्षेण तं मारयित्वा मुक्तमित्यर्थः। एतदेव स्पष्टयति—पुरुषादेति। "विहायसा आकाशमार्गेण आकाशात् पतनेनैव तावन्मृत्युर्निश्चितः, किं पुनः पुरुषान् अत्तीति पुरुषादो राक्षसस्तेन नीतस्य' इत्याशयः। किलेति प्रसिद्धौ। एवंभूतस्यागमने हर्षः प्रसिद्ध एवेत्याशयः ॥ ३० ॥

अन्वितार्थप्रकाशिका

तमन्तरिक्षादिति ॥ रुद्रस्य शरेण विद्धं पुरं यथा यद्वत् अन्तरिक्षान्निरालम्बादाकाशात् शिलायां पतितम् अत एव विशीर्णसर्वावयवं करालं भयङ्कररूपं त तृणावर्तं समेता मिलिता रुदत्यः स्त्रियो ददृशुः। रुदत्य इति नुंरहितः शुद्धः पाठ ॥ २९ ॥ प्रादायेत्यर्द्धम् ॥ तस्योरसि लम्बमानम्, आघाताभावेन निर्व्यथं श्रीकृष्णं च दृष्ट्वा तं प्रादाय गृहीत्वा मात्रे यशोदायै प्रतिसमर्प्य विस्मिताश्च बभूवुः। तृणावर्तशरीरं च गोपैर्यमुनायां वाहितमिति ज्ञेयम्। तमिति। विहायसा आकाशमार्गेण पुरुषादेन रक्षसा नीतमपि मृत्युमुखात् प्रमुक्तमिति। ल्यब्लोपे पञ्चमी। मृत्युमुखं प्राप्यैव प्रकर्षेण तं मारयित्वा मुक्तमित्यर्थः। तं श्रीकृष्णं स्वस्तिमन्तं पुनर्लब्ध्वा नन्दमुख्याः नन्दादयो गोपा गोप्यश्चातीव मोदं हर्षं प्रापुः। किल प्रसिद्धौ। पुनरिति पूतनापेक्षया ॥ ३० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्य तृणावर्तस्य उरसि हृदये लंबमानं हरिमादाय मात्रे यशोदायै प्रतिहृत्य दत्त्वा विस्मिताश्चासन् विहाय सा आकाशमार्गेण पुरुषादेन रक्षसा नीतं तथापि मृत्युवदनात्प्रमुक्तं तं पुनर्लब्ध्वानंदमुख्याः अतीव मोदम् अत्यन्तं हर्षं प्रापुरित्युत्तरेणान्वयः ॥ २९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गलेति ॥ गले ग्रहणं तेन निश्चेष्टः, निर्गते उद्गते लोचने यस्य सः, दैत्यस्तृणावर्तः, अव्यक्तमस्फुटं वाक्यं वचो यस्य, पाठान्तरेऽव्यक्तोऽस्फुटः रवः शब्दो यस्य तथाभूतः, व्यसुर्निष्प्राणः, सहबालो बालेन सहितः सन्, व्रजे न्यपतत् ॥ २९ ॥ तमिति ॥ अन्तरिक्षात्, शिलायां पतितं, अत एव, विशीर्णाः सर्वे अवयवा यस्य तं, रुद्रशरेण शिवबाणेन, विद्धं पुरं त्रिपुरासुरपुरं, यथा, तथा, करालं भयंकरं, तं दैत्यं, समेताः संघीभूताः रुदत्यः स्त्रियः ददृशुः ॥ ३० ॥ आदायेति ॥ ततः, तस्य दैत्यस्य, उरसि

उरःप्रदेशे, लम्बमानं कृष्णम् आदाय, मात्रे यशोदायै, प्रतिहृत्य समर्प्य, विस्मिताश्च बभूवुः। विहायसा गगनमार्गेण, पुरुषादनीतं दैत्येन नीतं, अथापि, मृत्युमुखात् प्रमुक्तं, स्वस्तिमन्तं तं बालं, लब्ध्वा, नन्दमुख्या नन्दप्रधानाः, गोपाः गोप्यश्च, पुनः अतीव नितरां, मोदं हर्षं, प्रापुः किल ॥ ३१ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तमन्तरिक्षादिति : १०.७.२९

शिलारूपेण तं ध्यायन् प्राणत्यागमधात् तृणः। शिलायां पतितो युक्तं तादृग्वासनयाऽऽश्रितः ॥ ३२ ॥
त्रिपुरहतिर्येन कृता प्रकृतेऽपि स एव तृणवपुर्हन्ता। इति बोधयन् मुनिरसौ रुद्रशरेणेत्युवाच भृशमुपमाम् ॥ ३३ ॥

प्रादायेति : १०.७.३०.

रजस्तमःसान्द्रमिदं हि गोकुलं तदाऽन्तिकस्थोऽपि विभुर्न गोचरः।
तच्छान्ततायां तु परोऽक्षिगोचरोऽस्त्येवेत्यभिव्यक्तमिदं चरित्रे ॥ ३४ ॥
कुर्वन् दैत्यमणुं तृणं निजजनन्यङ्के गरिम्णाश्रितस्तत्कण्ठे लघुतां गतश्च महिमोल्लासी च तद्ध्वंसने।
प्राकाम्यं भुवि पूरयन् स्वयमसावीशः सतां हृद्वशी प्राप्तो घोषजनैरिति प्रभुरभूत् स्पष्टाष्टसिद्धिश्रितः ॥ ३५ ॥

कृष्णप्रिया

वहाँ जो स्त्रियाँ इकट्ठी होकर रो रही थीं, उन्होंने देखा कि वह विकराल दैत्य आकाश से एक चट्टान पर गिर पड़ा और उसका एक-एक अङ्ग चकनाचूर हो गया—ठीक वैसे ही, जैसे भगवान् शङ्कर के बाणों से आहत हो त्रिपुरासुर गिरकर चूर-चूर हो गया था ॥ २९ ॥ भगवान् श्रीकृष्ण उसके वक्षःस्थल पर लटक रहे थे। यह देखकर गोपियाँ विस्मित हो गयीं। उन्होंने झटपट वहाँ जाकर श्रीकृष्ण को गोद में ले लिया और लाकर उन्हें माता को दे दिया। बालक मृत्यु के मुख से सकुशल लौट आया। यद्यपि उसे राक्षस आकाश में उठा ले गया था, फिर भी वह बच गया। इस प्रकार बालक श्रीकृष्ण को फिर पाकर यशोदा आदि गोपियों तथा नन्द आदि गोपों को अत्यन्त आनन्द हुआ ॥ ३० ॥

अहो बतात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोऽभ्यगात् पुनः।
हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद् विमुच्यते ॥ ३३ ॥
किं नस्तपश्चीर्णमधोक्षजार्चनं[1] पूर्तेष्टदत्तमुत[2] भूतसौहृदम्।
[3]यत्सम्परेतः पुनरेव बालको दिष्ट्या स्वबन्धून्[4] प्रणयन्नुपस्थितः ॥ ३४ ॥
दृष्ट्वाद्भुतानि बहुशो नन्दगोपो बृहद्वने। वसुदेववचो भूयो मानयामास विस्मितः ॥ ३५ ॥

कर्मक्षमा

अन्वयः—बत अहो रक्षसा एष बालः निवृत्तिं गमितः अपि पुनः अभ्यगात् (इति) अद्भुतम् खलः हिंस्रः स्वपापेन विहिंसितः साधुः समत्वेन भयात् विमुच्यते ॥ ३१ ॥ यत् संपरेतः बालकः स्वबन्धून् प्रणयन् पुनः उपस्थितः दिष्ट्या (अत्र) किं नः तपः अधोक्षजार्चनं पूर्तेष्टदत्तम् उत भूतसौहृदं चीर्णम् ॥ ३२ ॥ बहुशः अद्भुतानि बृहद्वने दृष्ट्वा नंदगोपः विस्मितः (सन्) भूयः वसुदेववचः मानयामास ॥ ३३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

परस्परं हर्षकथामाहुः। अहो बतेति। निवृत्तिं गमितो मृत्युं प्रापितोपि। कोऽत्र विस्मयो युज्यत एवैतदिति तेष्वेव केचिदाहुः। हिंस्र इति ॥ ३१ ॥ नोऽस्माभिश्चीर्णं कृतम्। पूर्तं वापीकूपादिनिर्माणम्। इष्टं पंचयज्ञाग्निहोत्रादि। दत्तं दानम्। यद्यस्मात्तपआदेः। प्रणयन्हर्षयन् ॥ ३२–३४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कोऽत्र विस्मयः किमत्राश्चर्यम्। युज्यत एव युक्तमेव। एतत् बालागमनं रक्षोमरणं च। तेष्वेव विस्मितगोपेष्वेव। केचिद्विज्ञा इत्यर्थः। हिंस्रो हिंसाशीलः। समत्वेन समदृष्ट्या 'द्वितीयाद्वै भयं भवति' इति श्रुतेः ॥ ३१ ॥ "अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम्। आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥ शरणागतसंत्राणं भूतानां चाप्यहिंसनम्। भूतसौहृदमित्युक्तं

---

१ तपस्तप्तमिति पाठः। २. दत्तं किमु भूत–विज.। ३. यस्संपरेतः–विज.। ४. बन्धूनमय–वीर।

तत्सर्वत्र सुखावहम् ।। बहिर्वेदि च यद्दानं तद्दत्तमभिधीयते'' ।। ३२ ।। वसुदेववचः 'सन्त्युत्पाताश्च गोकुले' इत्येवंरूपं मानयामास । अहो वसुदेवः कश्चिद्योगिराज एवातीतानागतवित्त्वात् तृणावर्त्तवधमाह श्रुतिः–''साकं यक्ष्म प्रपत चाषेण किकिदीविना साकं वा तस्य ध्राज्या साकं नश्य निहाकया'' इति । अर्थस्तु–खेचरत्वेन यक्षं पूज्यमिवात्मानं मनुते मिमीते तोलयति वा यक्ष्म हे यक्ष्म राक्षस तद्वत्पीडकेति वा । चाषेण तद्वर्णेन हरिणा तव हन्त्रा साकं प्रपत भूमाविति शेषः । किकिनाज्ञः सन् दीव्यतीति किकिदीविः । औणादिकः किप्रत्ययः उपधादीर्घश्च किधातोर्बाहुलकात्किप्रत्यये लिडभावे च चुत्वाभावे किकिर्विद्वान् तेन वा । तस्य वायोर्ध्राज्या गत्या यया धूलिवात्यारूपया एनमुपरि नीतवानसि तया साकं नश्य नाशं प्राप्नुहि । निहाकया गत्या च साकं वा साहित्यं पतन एव न तु नाशेऽतस्तेन सह पतितः सन्स्वयमेक एव नाशं प्राप्नुहीत्यर्थः । एवं देवैरुक्तस्तृणावर्तः पपात ममार चेत्यर्थः ।। ३३ ।। भामिनी तेजस्विनी । 'भामः क्रोधे रवौ दीप्तौ भगिनीदयिते प्रिये' इति धरणिः ।। ३४ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं तेषां निरन्तरं स्नेहविशेष एव व्यवर्द्धत न च तद्विघातकमीश्वरज्ञानं वृत्तमित्यन्योन्यं तेषां हर्षवार्त्तयैवाह–अहो बतेति । परमविस्मये अत्यन्तहर्षे वा अत्यद्भुतमेवाहुः, एष इत्यादिना एष व्रजैकप्राणरूपः परमसुकुमारोऽभिनवः बालः किञ्चिदपि कर्त्तुमशक्त इत्यर्थः । निवृत्तिङ्गमितोपि पुनरभ्यगात् अस्मदभिमुखं प्राप्तः अभि अभयं यथा स्यात्तथा वा शत्रोरपि तस्य मरणात् नाद्भुतं चैतदित्याहुः, हिंस्र इति । हिंस्रः विचारहीनं जिघांसुः खलः वञ्चकश्च अतः स्वपापेन विहिंसितः साधुर्हिंसामात्रादिदोषरहितः समत्वेन आत्मवत् परमसुखदुःखदर्शनजेन पुण्येन प्रमुच्यते प्रमुक्त इत्यर्थः । एवं पुनः पुनरुपद्रवेण दुष्टकंसादपि चिन्ता न कार्येति भावः । साधुरिति श्रीनन्दमुद्दिश्योक्तं गोपसाधारणवाक्यत्वात, यद्वा, हिंस्र इत्यादिकमर्थान्तरन्यासे तत्र च हिंस्यत इत्यर्थः ।। ३१ ।। पुनः प्रहर्षणात्मभाग्यमभिनन्दन्तस्तथैवाहुः किमिति अधोक्षस्यार्चनं यस्मात् तदर्पितत्वात् तद्भक्तिसाधकमित्यर्थः । ''स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे'' इत्युक्तेः । तादृशं तप आदि तत्र तपः कृच्छ्रादि पूर्त्तादिकञ्चोक्तम्—

> ''वापीकूपतडागानि देवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते ।।
> अग्निहोत्रं तपःसिद्धं वेदानाञ्चानुपालनम् । आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ।।
> शरणागतसन्त्राणं भूतानां चाप्यहिंसनम् । बहिर्वेद्यां च यद्दानं तद्दत्तमभिधीयते'' ।। इति

यद्वा, अधोक्षजस्यार्चनरूपं तप आदि तत्र तप एकादशी व्रतादिपूर्त्तादिकञ्च तत्सेवाङ्गत्वेन कृतमिति ज्ञेयम् एवं सादृश्ये सम्परेत इव पुनरपि स्वबन्धून् प्रणयन् कुर्वन् सृजन् जीवयन्निति यावत् उपस्थितः समीपमागतः ।। ३२ ।। एवं सामान्यतः सर्वेषां श्रीभगवति स्नेहभरो दर्शितः विशेषतः श्रीवल्लवेन्द्रस्योत्पातनिर्द्धारेण पुनस्तच्छङ्कयाऽसौ व्यवर्द्धततरामित्याशयेनाह—दृष्ट्वेति । बहुश इत्यनेनान्यान्यपि श्रीभगवतस्तादृशानि चरितानि सूचितानि तानि च श्रीमाथुरलोकप्रसिद्धानि श्रीधराख्यच्छद्मविप्राभिभवचातुरीमयादीनि श्रीमुनीन्द्रेण राज्ञोऽल्पायत्त्वेनानुक्तान्यपि ज्ञेयानि बृहद्वन एव नान्यत्रेति विशेषशङ्कानिदानम् । एवं व्रजानन्दात् पृथिवीपालनाच्च नन्दगोप इति श्लेष. ।। ३३ ।। रजस्तमःस्वभावं मद्भ्रामकं गुरुमानिनं निघ्नन्निजान् बिभर्म्मीति तृणावर्त्तद्रुहानपि अथ पूर्वपूर्वभयात् पुनरनिष्टाशङ्कया शुष्यन्तीमिव तां सान्त्वयितुं लीलाशक्तिरेव तस्मिन् कञ्चित् प्रभावं दर्शयति–एकदेत्यादिना । आदाय पर्य्यङ्किकायां शयानं तं ततो गृहीत्वा भूमौ क्रीडन्तं ततो वा बलात् गृहीत्वा भाविनी स्वभावतः सद्भावयुक्ताः विशेषतस्तादृशपुत्रस्नेहरसेन परिप्लुताऽत्यन्तं निमग्ना अत एव प्रस्नुतं प्रकर्षेण वस्त्राद्यार्द्रीकरणेन सदा क्षरत्स्तन्यम् ।। ३४ ।।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं तेषां निरन्तरं स्नेहविशेष एव व्यवर्द्धत, न च तद्विघातकमीश्वरज्ञानं वृत्तमित्यन्योऽन्यं तेषां वार्त्तयैवाह—अहो बतेति; परमविस्मयेऽत्यन्तहर्षे वा; अत्यद्भुतं महाश्चर्य्यम् , तदेवाहुः—एष इत्यादिना । यद्वा, अहो बत महाखेदे; अत्युद्भुतं यथा स्यात्तथा आकाशोपरि नयनादिनेत्यर्थः । एष व्रजैकप्राणरूपः परमसुकुमारोऽभिनवो बालः किञ्चिदपि कर्त्तुमशक्त इत्यर्थः । निवृत्तिं गमितोऽपि पुनरभ्यगात् सुखमागतः, यतः खलः क्रूरः,—यद्वा, खलोऽधमो हिंस्याहिंस्यविचारहीनो हिंस्रः, समत्वेन सर्व्वत्र शुद्धभावेन भयात् कथञ्चित् कदाचिदापतितात् संसार–लक्षणादपि वा, प्रकर्षेण सुखमपुनर्भवतया मुच्यते । अन्यत्तैर्व्याख्यातम् । यद्वा, पुनरपि वृत्तिमपुनरावृत्तिमिव गमितः, अभि अभयं यथा स्यात्तथागतः स्वस्थानं प्राप्तः, शत्रोरपि तस्य मरणात् । तदेवाहुः—हिंस्र इति । एवं पुनरुपद्रवेण दुष्टकंसादपि चिन्ता न कार्य्येत्याहुः—साधुरिति । एतच्च श्रीकृष्णमात्मानं चोद्दिश्योक्तम् ।। ३१ ।। पुनः प्रहर्षेणात्मभाग्यमभिनन्दन्तस्तथैवाहुः—किमिति; तपः कृच्छ्रादिकमधोक्षजस्येन्द्रियज्ञानागोचरस्यापि भगवतोऽर्चनरूपम् । एवमेतं पूर्व्वस्यापि विशेषणं तप आदेः श्रीभगवदर्पणेन तदर्चने पर्य्यवसानात् । यद्वा, अधोक्षजस्यार्चनं यस्मात्तद्भक्तिसाधकमित्यर्थः । पूर्त्तादिकञ्चोक्तम्—

> 'वापीकूपतडागादि–देवतायतनानि च । अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते ।।
> अग्निहोत्रं तपःसिद्धं वेदानाञ्चानुपालनम् । आतिथ्यं वैश्वदेवञ्च हीष्टमित्यभिधीयते ।।
> शरणागतसंत्राणं भूतानाञ्चाप्यहिंसनम् । बहिर्वेद्याञ्च यद्दानं तद्दत्तमभिधीयते ।। इति ।

सम्परेत इव, एवापि पुनरपि दिष्ट्या क्षेमेणाकस्माद्वोपस्थितः समीपमागतः ॥ ३२ ॥ एवं सामान्यतः सर्वेषां श्रीभगवति स्नेहभरो दर्शितः विशेषतश्च श्रीवल्लवेन्द्रस्योत्पात-निर्द्धारेण पुनस्तच्छंकयासौ व्यवर्द्धततरामित्याशयेनाह—दृष्ट्वेति। बहुश इत्यनेनान्यान्यपि श्रीभगवतस्तादृशानि चरितानि सूचितानि। तदशेषाकथने सिद्धान्तो लिखित एव। वसुदेवस्य वचः (भा० १०।५।३१)—'सन्त्युत्पाताश्च गोकुले' इति विस्मितः सन् तस्य ज्ञानातिशयेन। एवं व्रजानन्दनात् पृथ्वीपालनाच्च नन्दगोप इति श्लेषार्थः ॥ ३३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पूर्त्तं तटाकनिर्माणादि ॥ ३२-३५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ गोपादीनां मिथः सन्तोषवादमाह—अहो इति द्वाभ्याम्। रक्षसा निवृत्तिं गमितो विनाशं प्रापित एष बालः पुनरभ्यगात् अहो अत्याश्चर्यमेतत् कोत्र विस्मयः युक्तमेवैतदिति तेष्वेव केचिदाहुः हिंस्र इति। हिंस्रः क्रूरः खलः स्वपापेनैव निहतः साधुस्तु समत्वेन स्वस्मिन्नितरेषु च समभावेन भयान्मुक्तो भवतीति ॥ ३१ ॥ तत्रापि केचिदाहुः–किमिति। नोऽस्माभिः तप आद्यन्यतमं किञ्चिच्चीर्णं पूर्वजन्मनि सम्पादितं स्यात् कुतः यद्यस्मात् संपरेतो मृतोपि बालकः पुनरपि स्वबन्धून् रमयन्नुपस्थितः दिष्ट्यायं महानानन्दो जात इत्यर्थः। अन्यथैतदुर्लभमिति भावः। तपः कृच्छ्रचान्द्रायणादि पूर्त्तं स्मार्त्तं कर्म तटाकादिनिर्माणं वा इष्टं श्रौतं दत्तं दानं तेषां समाहारद्वन्द्वः प्रणयन्निति पाठे प्रणयन् हर्षयन्नुपस्थित इत्यर्थः ॥ ३२ ॥ एवंविधान्यन्यान्यद्भुतानि बहुशो बृहद्वने बृहति व्रजप्रान्तवने दृष्ट्वा नन्दगोपो विस्मितः पुनर्वसुदेवस्य वचो "नेह स्थेयं बहुदिनं सन्त्युत्पाताश्च गोकुले" इत्येतद्वचो मानयामास तमेवाभूदित्यमन्यत ॥ ३३ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

समत्वेन गुणेन "अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः" इति भारतवचनादधोक्षजशब्दो निरुक्तः वापीकूपतडागादि पूर्तम्—

"अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम्। आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ॥
शरणागतसन्त्राणं भूतानां चाप्यहिंसनम्। बहिर्वेदि च यद्दानं तद्दत्तमभिधीयते" ॥

प्रणयं स्नेहं कुर्वन् "प्रणयः प्रसर- समौ" इत्यमरः ॥ ३२—३३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अधोक्षजप्रीणनार्थं तप आदि ॥ ३२-३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवं बालत्वेऽपि महासुरहन्तृत्वलक्षणेनैश्वर्य्येण प्रकटादूभूतेनापि तेषां नन्दादीनां वात्सल्यं न जहास प्रत्युतावर्द्धतैवेत्याह अहो बतेति त्रिभिः। अद्भुतादपि यदद्भुतं तस्मादप्यत्यद्भुतमेतत् यदेष बालो निवृत्तिम् अमङ्गलव्यञ्जकत्वान्मरणनाशादिशब्देन वक्तुमनर्हां दशां प्रापितोऽपि अभ्यगात् पुनर्बन्धूनामभिमुखं प्राप्तः कोऽत्र विस्मयो युज्यत एवेति तेष्वेव मध्ये केचिदाहुः हिंस्र इति। स्वपापेन निरपराधनरबालकहरणलक्षणेन साधुर्बालकः समत्वेन बालत्वादेव शत्रुमित्रादिषु तुल्यबुद्धित्वेन ॥ ३१ ॥ श्रीनन्दादयस्तु यद्यस्य बालस्यामङ्गलमभविष्यत्तदा सर्वे वयममरिष्यामैवेत्यतोऽस्माकमेवैतद्बहुतरसुकृतफलमित्याहुः–किमिति चीर्णं कृतं पूर्त्तं वाप्यादिनिर्माणम् इष्टं पञ्चयज्ञादि यत् यस्मात् तप आदेः प्रणयन् कुर्वन् सृजन् जीवयन्निति यावत् प्रणयवन्तं कुर्वन्निति वा ॥३२-३४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निवृत्तिमदर्शनं गमितो नीतः ॥ ३१ ॥ किं तप आदि नोऽस्माभिश्चीर्णं कृतम्, यत् यस्मात्तप आदेः स्वबन्धून् प्रणयन् हर्षयन् ॥ ३२-३४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एषं महादैत्यविनाशदर्शनेन जायमानापीश्वरबुद्धिर्नन्दादीनां पुत्रबुद्ध्या तिरोभूता वाण्येव सरस्वतीत्याह–अहो बतेति। अतिमहाद्भुतमेतत् यदेष बालो रक्षसा निवृत्तिं वक्तुमनर्हामवस्थां गमितोऽपि पुनरभ्यगाद्बन्धूनामभिमुखे प्राप्तः ऐश्वर्यबुद्धेस्तिरोधानादेव वात्सल्यप्रेमानुरूपा भणितिरियं साधुषु न चित्रमेतदिति तेषु तत्समभावाः केचिदाहुर्हिंस्र इत्यर्द्धकेन स्वपापेन निर्दोषबालहरणेन समत्वेन बालत्वादेव शत्रुमित्रादिषु तुल्यबुद्धित्वेन ॥ ३१ ॥ एतस्य बालस्याक्षततयाऽऽगमने किं निमित्तमभूदिति

विमृशन्ति किं न इति । चीर्णं कृतं पूर्त्तं वाप्यादिनिर्माणम् , इष्टं पञ्चयज्ञाग्निहोत्रादि, दत्तं स्वभोग्यस्य न्यायार्ज्जितस्यान्नादेः सत्पात्रेभ्यो दानं, यद्यतो निमित्तात् प्रणयन् प्रहर्षयन् ॥ ३२-३४ ॥

श्रीसत्याभिनवयतिकृता बुधंटभावदीपिका

स्वबंधून्प्रणयन्नित्यस्य स्वबंधून्हर्षप्रकर्षेण प्रापयन्नित्यर्थः । एतेन स्वबन्धून्हर्षयन्निति वक्तव्यम् । प्रणयन्निति कथनमनुपपन्नमिति दूषणं परिहृतम् । हर्षमित्यस्य शेषेण प्रकर्षेण प्रापयन्नित्यर्थस्योक्तत्वात् ॥ ३४ ॥

इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ॥ १०-८ ॥ (अस्मिन्क्रमे सप्तमोऽध्यायः)

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हिंस्रो हिंसाशीलः खलः स्वपापेन विहिंसितो भवति साधुर्यः समत्वेन भयाद्विमुच्यत इति साधुरयं माधवो मुक्तो हिंस्रस्तृणावर्तो विहिंसित इत्यर्थः । एवमेतज्जीवने नोऽस्माभिस्तपश्चीर्णं किमधोक्षजार्चनं चीर्णम् । अधो न क्षीयते जातु यस्मात्तस्मादधोक्षज इति भारते । अधःकृताक्षजज्ञान इति वा । पूर्तेष्टाभ्यां सहितं दत्तं पूर्तं वापीकूपतटाकादि । अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् । आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते । शरणागतसन्त्राणं भूतानां चाप्यहिंसनम् । बहिर्वेदि च यद्दानं तद्दत्तमभिधीयत इतीष्टदत्ते । भूतसौहृदं प्राणिमात्रसुहृद्भावो यः सम्परेत इव विद्यमानः पुनर्बालकः स्वबन्धून्प्राणयंस्तोषयन्नुपस्थितो दिष्ट्या सुखम् ॥ ३४ ॥

श्रीसुबोधिनी

भगवतो नयनमारभ्य स्वस्यागमनपर्यन्तं यत् किञ्चित् कृत्यं तत् सर्वमहो आश्चर्यं, नात्रोपपत्तिः काचित् सम्भवति, आश्चर्यमपि लोके प्रसिद्धं भवति यथा नटविद्यायां मायायां स्वप्ने च, ततोप्येतदधिकमित्याहात्यद्भुतमिति, मायायां प्रदर्शनमात्रमिति, जातं त्वद्भुतं यत् पुनः क्षणान्तरेन्यथा न भवति, ततोपि यत् कदाचिदपि न जातं क्वचिदपि तदत्यन्तमद्भुतं, तत् स्वस्यात्यन्तमनिष्टमिति तत् स्मृत्वा बतेत्याहुः, एष इत्यक्षताव्याहतत्वं प्रत्यक्षेण प्रदर्शितं विपरीतहेतुः सुदृढो जात इत्याह रक्षसा क्रूरेण बालोतिसूक्ष्म इतो निवृत्तिं गमितो दूरे नीतोन्येन नीतः स्वयमागत इत्याश्चर्यं बालत्वात् , तत्रापि रक्षसा, निवृत्तिपदेन क्रियानिष्पत्तिरपि सूचिता, एवं सति पुनरागमने कोपपत्तिरितिशङ्कायामाहुर्हिंस्र इति, हिंस्रो मारको राक्षसः स्वपापेनैव विहिंसितः, मृत्युस्तत्र तिष्ठत्येवान्यमारणार्थं स तु पापपुरःसरमेव प्रवर्तते, अतःपूर्वं बहूनां वधानां कृतत्वात् स्वाधारे पापमस्ति, अपापे विषये चेत् प्रयुक्तस्तमगृहीत्वा व्याघुट्यागच्छन् स्वाश्रयमेव गृह्णातीति हिंस्रः स्वपापेन विहिंसितो भवति, किञ्च मृत्युरत्यन्तं दुष्ट आश्रये न तिष्ठति, अतोपि हेतोस्तं भक्षितवानित्याह खल इति, खलः पिशुनः न ततो दुष्टोस्ति जगति कश्चित् , विषये पापाभावमाहुः साधुः समत्वेन भयाद् विमुच्यत इति, अपहतपाप्मरूपं ब्रह्मैव, तस्यापि बहूनि रूपाणि सन्ति, तत्रापि यत् समं रूपं तत् सर्वदोषरहितं भवति, "निर्दोषं हि समं ब्रह्म"तिवाक्यात् , यः सर्वत्र समदृष्टिः स दोषाभावान्न हन्यते, यस्तु साधुः स समदृष्टिरेव भवति, अतोयं बालकोपि समदृष्टिः साधुर्भवितुमर्हति, अतः साधुरयं समत्वेन भयादुपस्थिताद् विशेषेण मुच्यते, एतावता कृत्रिमभगवत्त्वं ज्ञातमिति, एवं ज्ञाननिष्ठैर्निर्णयः कृतः ॥ ३३ ॥ कर्मनिष्ठानां निर्णयमाह किं नस्तपश्चीर्णमिति, पूर्वजन्मन्यस्माभिः सर्वैरेव किञ्चित् तपश्चीर्णं येन तपसैतादृशो बालको निधिरूपोऽस्माकं स्थाने तिष्ठति, एवं राजसानां सिद्धान्तः, सात्त्विकानामाहाधोक्षजार्चनमिति, न हि तपसालौकिकं प्राप्यते, अयं च बालको लोकोत्तरोतोयं विष्णुप्रसादादेव प्राप्यते, विष्णुश्च पूजितः प्रसन्नो भवति, तत्रापि साधारणरूपेण पूजितः साधारणमेव फलं प्रयच्छति, अस्माभिरस्त्वलौकिकप्रकारेण पूजितस्तदाहाधोक्षजेति, अधोक्षजं ज्ञानं यस्मात् , शास्त्रदृष्ट्या शोधितैरर्चनं नेन्द्रियबलकार्यं, तामसानां निर्णयमाह पूर्तेष्टदत्तमिति, पूर्तं खातादि, इष्टं यागादि, दत्तं तुलापुरुषदानादि, लौकिकप्रकारा एते, अतिबहिर्मुखानामेष निर्णयः, अन्तर्मुखानामाहोत भूतसौहृदमिति, सर्वेषु भूतेषु भगवानस्तीति तेषु दानमानादिभिः सौहृदं कर्तव्यं, तत् केवलं ज्ञानमार्गे प्रविशति तद्व्यावृत्त्यर्थमुतेत्युक्तं, पूर्वलोकभूतसौहृदमपि सह लोकवत् सर्वाण्येव कर्माणि कुर्वन् लोकसौहृदमपि करोति तस्येदं फलमित्यन्तर्मुखानां कर्मिणां सिद्धान्तः, एवं कल्पनायां हेतुमाह यदिति, कर्मिणां लौकिकत्वादमङ्गलवचनं लोकोक्त्या न निन्दितं, पुनरेव पूर्ववत् , बालकोपि दिष्ट्या स्वभाग्येनापि स्वगृहे स्वबन्धून् स्वस्य पित्रादीन् प्रकर्षेण नयन् सर्वलोकप्रसिद्धान् कुर्वन् उपस्थित इति यत् ॥ ३४ ॥ एवं सर्वेषां निर्णय उक्तः, नन्दस्तूत्पातसम्भवे हेत्वन्तरं ज्ञातवान् नान्य इति विशेषमाह दृष्ट्वेति, बहुशोद्भुतानि दृष्ट्वा वसुदेववचो मानयामासेतिसम्बन्धः, पूतनाशकटतृणावर्तास्त्रयः प्रसिद्धाः, अन्येप्येवंविधाः शतशः. सर्वाण्येवाद्भुतानि रसान्तर्विस्मारकाणि, नन्दगोप इति सम्पूर्णं नाम ज्ञानक्रियासमन्वितमनाश्चर्ये हेतुः परमैश्वर्यपरिज्ञानात् , बृहद्वन एवैतज्जायत इति भूयो वसुदेववचो मानयामास, स हि ज्ञान एव महत्त्वं मन्यते न तु क्रियायां, भाव्यर्थस्यैव तादृशत्वात् , किमाश्चर्यं यद्यस्यलौकिकं स्यात् पूर्वं कैरपि न ज्ञायते ज्योतिःशास्त्रादौ न प्रसिद्धमिति ततस्स ज्ञानमेव स्मृत्वा विस्मितश्च जातः ॥ ३५ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

दृष्ट्वेत्यत्र हेत्वन्तरमिति ज्ञापकरूपमित्यर्थः, शतश इति ते कुक्कुटादयः पुराणान्तराज् ज्ञातव्याः, ज्ञानक्रियासमन्वितमिति, 'टु नदि समृद्धा'वित्यस्मादचि कृते नन्द इति भवति 'समृद्धि'श्च ज्ञानस्यात्र ग्राह्या गोपत्वाद् गोरक्षणक्रिया च ताभ्यां समन्वित, ज्ञाने महत्त्वमानने हेतुमाहुर्भाव्यर्थस्येत्यादि ॥ ३५ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अहो इत्यत्र विपरीतहेतुरिति रक्षसा नयनमक्षताव्याहतागमनस्य विपरीतो हेतुः सोपि सुदृढो निवृत्तिपर्यन्तं जात इत्यर्थः ॥ ३३ ॥ दृष्टवेत्यस्याभासे हेत्वन्तरमिति कंसमन्त्रणरूप हेतुं वसुदेववाक्यात् ज्ञातवान् इतिविशेषं वसुदेववाक्यविश्वासकथनेन शुक आहेत्यर्थः, व्याख्याने, ज्ञानक्रियेति टुनदि समृद्धाविति पाठान् नन्दपदस्य समृद्धिवाचकत्वं, तेना'त्मलाभान् न परं विद्यते' इतिवाक्यात् ज्ञानसमन्वितत्वमुक्तं, गोपपदस्य गोरक्षारूपक्रियावाचकत्वात् , तेन क्रियासमन्वितत्वमुक्तमित्यर्थः ॥ ३५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तेषां परस्परं हर्षकथामाह—अहो इति । 'बत' इति हर्षे । अहो आश्चर्यम् , यतोऽत्यद्भुतमेतन्न क्वापि दृष्टं श्रुतं वा । तदेव दर्शयन्ति–"अतिप्रबलेन रक्षसा एष बालो निवृत्तिं मृत्युं गमितः प्रापितोऽपि स्वयमेव पुनरभ्यगात्" इति । "कोऽत्र विस्मयः ? युज्यत एवैतत्" इति तेष्वेव केचिदाहुः–हिंस्र इति । अयं खलः क्रूरस्वभावः अतः एव हिंस्रः परहिंसापरायणः । अतो हिंसाजनितेन स्वपापेनैव हिंसितः । साधुः सदाचारनिष्ठश्च समत्वेन समदृष्ट्या भयाद्विमुच्यते । 'वयं साधवः, अतोऽस्मद्बालोऽयं विमुक्त' इति भावः ॥ ३१ ॥ "एवं कार्यद्वारा पुण्यात्मानो वयमिति सामान्यतो ज्ञानेपि विशेषतस्तु किं तत् पुण्यमिति न जानीम" इत्याहुः-किं न इति । यत् यस्मात्तपआदिपुण्यविशेषात् परेतोऽपि मृत्युं गतोऽपि बालकः स्वबन्धून् अस्मान् प्रीणयन् हर्षयन् पुनरुपस्थितः समागतस्तत्किं नोऽस्माभिश्चीर्णमाचरितमिति न जानीमः । तप एकादशीव्रतकृच्छ्रचान्द्रायणादि, अधोक्षजस्य भगवतोऽर्चनम् , पूर्तं वापीकूपतडागादिनिमार्णम् , इष्टं पञ्चयज्ञादि अग्निहोत्रादि, दत्तं तुलापुरुषादिदानम् , भूतसौहृदं सर्वप्राणिषु भगवद्बुद्ध्या सन्माननम् । 'एवं विशेषज्ञानाभावेऽपि बालस्तावत् कुशल्यागत इत्येतद्भद्रमेव जातम्' इत्याहुः–दिष्ट्येति ॥ ३२ ॥ एवंविधानि पूतनाशकटतृणावर्तनिराकरणसदृशानि बहुशोऽद्भुतानि आश्चर्यजनकानि चरितानि बृहद्वने महावनाख्ये व्रजे नन्दगोपो दृष्ट्वा विस्मितः सन् भूयः पुनःपुनर्वसुदेवस्य 'नेह स्थेयं बहुतिथं सन्त्युत्पाताश्च गोकुले' इति वचो मानयामास, सत्यममन्यतेत्यर्थः ॥ ३३ ॥ एवं तृणावर्तस्य तृणवन्निराकरणं निरूप्य तदागमनसमये स्वगौरवदर्शनेन शङ्कितचित्तां स्वजननीं गौरवहेतुं स्वोदरस्थं सर्वं जगद्दर्शयामास, तत् सप्रसङ्गमाह–एकदेति चतुर्भिः । एकदा गृहकार्यादिवैय्यग्र्याभावेन पुत्रैकप्रवणचित्तादशायामर्भकं बालकमादाय क्रीडन्तं गृहीत्वा स्वाङ्कमारोप्य भामिनी परमसौभाग्यवती यशोदा प्रस्नुतं स्नुतं स्रवत्पयस्कं स्तनं पाययामास । पयःसंस्रवणे पायने च हेतुमाह—पुत्रस्नेहेन परिप्लुता व्याप्तेति ॥ ३४ ॥

अन्वितार्थप्रकाशिका

तेषां मिथो हर्षकथामाह–अहो इति ॥ बतेति हर्षे । अहो आश्चर्यम् अतिबलेन रक्षसा एष बालो निवृत्तिं मृत्युं गमितः प्रापितोऽपि अमङ्गलभयात् विनाशादिशब्दानुपादानं स्वयमेवं पुनरभ्यगात् अभिमुखमगात् । अभिभयरहितं यथा स्यात्तथा अगादिति वा इति अत्यद्भुतम् । अयं खलः क्रूरस्वभावः अत एव हिंस्रः परहिंसापरायणः अतो हिंसाजनितेन स्वपापेनैव हिंसितः । साधुः सदाचारनिष्ठश्च समत्वेन समदृष्ट्या भयाद्विमुच्यते । वयं साधवोऽतोऽस्मद्बालोऽयं विमुक्त इति भावः ॥ ३१ ॥ किं न इति ॥ यत् यस्मात् तपआदिपुण्यविशेषात् परेतोऽपि मृत्युंगतोऽपि बालकः स्वबन्धून् अस्मान् प्रीणयन् हर्षयन् उज्जीवयन् पुनरुपस्थितः समागतः तद्दिष्ट्या भद्रं जातम् । अत्र विषये किं नोऽस्माभिः तपः कृच्छ्रचान्द्रायणादि अधोक्षजस्यं भगवतोऽर्चनं पूर्तं वापीकूपतडागादिनिर्माणम् इष्ट पञ्चयज्ञादि अग्निहोत्रादि दत्तं तुलापुरुषादिदान भूतसौहृदं सर्वप्राणिषु भगवद्बुद्ध्या सम्माननं चीर्णमाचरितमिति न जानीमः । चीर्णमिति पृषोदरादित्वात् ॥ ३२ ॥ दृष्ट्वेति ॥ एवंविधानि बहुशः अद्भुतानि चरितानि बृहद्वने महावनाख्ये नन्दगोपो दृष्ट्वा विस्मितः सन् भूयः पुनः पुनर्वसुदेवस्य "सन्त्युत्पाताश्च गोकुले" इति वचः मानयामास सत्यममन्यत । बहुश इति । अन्यान्यपि माथुरलोकप्रसिद्धानि चरितानि सूचितानि । शुकस्तु सप्तदिनावधित्वात्तानि नोचे ॥ ३३ ॥ एकदेति ॥ एकदा अर्भकं बालकमादाय क्रीडन्तं गृहीत्वा स्वाङ्कमारोप्य भामिनी परमसौभाग्यवती स्नेहेन परिप्लुता व्याप्ता यशोदा प्रस्नुतं स्रवत्पयस्कं स्तनं पाययामास ॥ ३४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अन्योऽन्यं हर्षवचनमूचुः अहो बतेति । रक्षसा निवृत्तिं मरणं गमितो नीतः पुनः अभ्यगादागतः हिंस्रो हिंसकः ॥ ३० ॥ किमिति नोऽस्माभिः तपश्चीर्णं कृतं किं पूर्तं वापीकूपतडागादिनिर्माणं किं वा कृतं इष्टं पञ्च महायज्ञादि यज्ञकर्म च दत्तं दानं च एतेषां समाहारे पूर्तेष्टदत्तं एतत्कृतं किं वा यद्यतः संपरेतो मृतः पुनरुपस्थितः सन् स्वबन्धून् प्रीणयन् आनंदयन् वर्तते ॥ ३१–३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथोभयेषां परस्परं हर्षकथामाह । अहो इति द्वाभ्याम् ॥ अहो इति ॥ रक्षसा निवृत्तिं विनाशं, गमितः प्रापितः, एषः बालः, पुनः अभ्यगाज्जीवन्नेव नः प्राप्तवान् । अहो बत, अत्यद्भुतमत्याश्चर्यम् । युक्तमेवैतदिति तेष्वेव केचिदाहुः । हिंस्रः क्रूरः, खलः दैत्यः, स्वपापेनैव विहिंसितः हननं प्राप्तः, साधुरयं बालस्तु, समत्वेन स्वस्मिन्नितरेषु च समभावेन, भयात् विमुच्यते । विमुक्तो भवतीत्यर्थः ॥ ३२ ॥ तत्रापि केचिदाहुः ॥ किमिति ॥ नोऽस्माभिः, किं तपः कृच्छ्रचान्द्रायणादि, चीर्णं पूर्वजन्मनि संपादितं स्यात् । वा, अधोक्षजार्चनं भगवतः पूजनं, कृतं स्यात् । उताथवा, पूर्तेष्टदत्तं समाहारद्वन्द्वः । कृतं स्यात् । तत्र पूर्तं तटाकनिर्माणादि स्मार्तं कर्म । इष्टं पञ्चयज्ञाग्निहोत्रादिकम् । दत्तं दानं, अथवा, भूतसौहृदं भूतसुहृद्भावः, कृतं स्यात् । यत् यस्मात्, संपरेतो मृतोऽपि, योऽयं बालकः, पुनरेव पुनरपि, स्वबन्धून् रमयन्, उपस्थितः । दिष्ट्या अयं महानानन्दो जात इत्यर्थः । अन्यथैतत् दुर्लभमिति भावः । प्रीणयन्निति पाठे, हर्षयन् इत्यर्थः ॥ ३३ ॥ दृष्ट्वेति ॥ नन्दगोपः, बृहद्वने गोकुले, बहुशः अद्भुतानि दृष्ट्वा, बृहद्वने एवंविधान्यन्यान्यपि बहुशोऽद्भुतानि संवीक्ष्येत्यर्थः । विस्मितः सन्, भूयः पुनः, वसुदेववचः 'नेह स्थेयं बहुतिथं सन्त्युत्पाताश्च गोकुले' इत्येतद्वचनं, मानयामास सत्यमेवेत्यमन्यतेत्यर्थः ॥ ३४ ॥ अथ भगवान् तृणावर्तागमे प्रदर्शितस्य स्वगरिम्णः मूलं मात्रे दर्शयामासेत्याह ॥ एकदेति ॥ एकदा कदाचित्, भामिनी यशोदा, अर्भकं आदाय, स्वाङ्कं आरोप्य, स्वोत्सङ्गे उपावेश्येत्यर्थः । स्नेहपरिप्लुता अनुरागव्याप्ता सती, प्रस्नुतं स्रवन्तं, स्तनं, पाययामास ॥ ३५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पीतप्रायस्येति : १०.७.३५.

सदाखण्डलसत्प्रीतिव्यक्तये व्यक्तिमागता । विश्वरूपानुजातस्य जृम्भा तादृक् तदाऽप्यभूत् ॥ ३६ ॥

रजसि प्रसृतेऽपि गोकुले भविता यद्धृदयं मदच्युतम् । मयि विश्वमसौ विलोकयेत् स्फुटमीशोऽकृतविश्वदर्शनात् ॥ ३७ ॥

या मदीयजननी जननी सा नूनमस्ति जगतो निखिलस्य । चिन्तयन्निति स विश्वमुखेन स्तन्यपानमकरोत् किमु तस्याः ॥ ३८ ॥

यदन्तरगतं मनागपि न दर्शनीयं परानलक्ष्यगति वस्तु चेदपि न वञ्चनीयं बुधैः ।
समस्तगुरुदेवतात्मवपुषे स्वमात्रे इति प्रगूढमपि हृद्गतं जगदशेषमादर्शितम् ॥ ३९ ॥

स्तन्याद् विशुद्धादवधार्य तस्याः सत्त्वैकपूर्णं हृदयं दयालुः । मन्मुख्यरूपेक्षणवीक्षणार्हा जातेति तस्मिन् किमदर्शयत्तत् ॥ ४० ॥

स्तन्यं कियत् पिबसि भूर्यलमर्भकेति वर्तिष्यमाणवचनां जननीं विभाव्य ।
विश्वं बिभर्मि पयसोऽस्य न केवलोऽहमस्मादद‍र्शि हरिणा किमु विश्वमास्ये ॥ ४१ ॥

यत्स्तन्यं यदि पुत्रतृप्तिजननेनालं तदा तत्कृते तन्माता प्रददाति लोककलितां विश्वाद्यनन्तौषधिम् ।
माताऽसौ जगतस्तदा स्तनपयोऽपर्याप्तमालोचयन् प्रादात् किं परमामृतोदयकरीं विश्वादिमुख्यस्थितिम् ॥ ४२ ॥

वस्त्वन्तर्निहितं च यौ वितरतोऽन्योन्यं तयोरच्छलः स्नेहश्चान्यतरेण चेन्न विहितं तादृक् कृतघ्नो हि सः ।
दत्तं यत्प्रकृतेऽनया स्वहृदयस्थं मे पयो नैव चेद् दास्ये तन्न कथं कृतघ्न इति किं तत्तां तदाऽदर्शयत् ॥ ४३ ॥

वात्याऽपहृतमालक्ष्य मातर्भीतासि किं मुधा । अनन्तं मुख्यरूपं मे पश्येतीशो व्यदर्शयत् ॥ ४४ ॥

कृष्णप्रिया

वे कहने लगे—'अहो ! यह तो बड़े आश्चर्य की बात है । देखो तो सही, यह कितनी अद्भुत घटना घट गयी ! यह बालक राक्षस के द्वारा मृत्यु के मुख में डाल दिया गया था, परन्तु फिर जीता-जागता आ गया और उस हिंसक दुष्ट को उसके पाप ही खा गये ! सच है, साधु पुरुष अपनी समता से ही सम्पूर्ण भयों से बच जाता है ॥ ३१ ॥ हमने ऐसा कौन-सा तप, भगवान् की पूजा, प्याऊ-पौसरा, कूआँ-बावली, बाग-बगीचे आदि पूर्त, यज्ञ, दान अथवा जीवों की भलाई की थी, जिसके फल हमारा यह बालक मरकर भी अपने स्वजनों को सुखी करने के लिए फिर लौट आया ? अवश्य ही यह बड़े सौभाग्य की बात है' ॥ ३२ ॥ जब नन्दबाबा ने देखा कि महावन में बहुत-सी अद्भुत घटनाएँ घटित हो रही हैं, तब आश्चर्यचकित होकर उन्होंने वसुदेवजी की बात का बार-बार समर्थन किया ॥ ३३ ॥ एक दिन की बात है, यशोदाजी अपने प्यारे शिशु को अपनी गोद में लेकर बड़े प्रेम से स्तन-पान करा रही थीं । वे वात्सल्य-स्नेह से इस प्रकार सराबोर हो रही थीं कि उनके स्तनों से अपने-आप ही दूध झरता जा रहा था ॥ ३४ ॥

एकदार्भकमादाय स्वाङ्कमारोप्य भामिनी । प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ॥ ३६ ॥
पीतप्रायस्य जननी सा तस्य रुचिरस्मितम् । मुखं लालयती राजञ्जृम्भतो ददृशे त्विदम् ॥ ३७ ॥
खं रोदसी ज्योतिरनीकमाशाः सूर्येन्दुवह्निश्वसनाम्बुधींश्च ।
द्वीपान् नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजङ्गमानि ॥ ३८ ॥
[3]सा वीक्ष्य विश्वं सहसा राजन् संजातवेपथुः । सम्मील्य मृगशावाक्षी नेत्रे आसीत् सुविस्मिता ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे [4]तृणावर्तमोक्षो नाम सप्तमोऽध्यायः ॥ ७ ॥

कर्दमक्षमा

अन्वयः—एकदा अर्भकम् आदाय स्वाङ्कम् आरोप्य भामिनी स्नेहपरिप्लुता प्रस्नुतं स्तनं पाययामास ॥ ३४ ॥ पीतप्रायस्य तस्य रुचिरस्मितं मुखं लालयती सा जननी जृम्भतः इदं ददर्श ॥ ३५ ॥ खं रोदसी ज्योतिरनीकम् आशाः सूर्येन्दुवह्निश्वसनाम्बुधींश्च द्वीपान् अगान् तद्दुहितॄः वनानि स्थिरजङ्गमानि यानि भूतानि (ददृशे) ॥ ३६ ॥ राजन् सा सहसा विश्वं वीक्ष्य मृगशावाक्षी संजातवेपथुः नेत्रे संमील्य सुविस्मिता आसीत् ॥ ३७ ॥

इती श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तृणावर्तागमे दृष्टगौरवाशंकिनीं प्रसूम् । बोधयन्दर्शयामास जृंभमाणो मुखे जगत् ॥ १ ॥

पीतप्रायस्य पीतः प्रायः स्तनो येन तस्य ॥ ३५ ॥ नगान् गिरींस्तेषां दुहितॄर्नदीः ॥ ३६–३७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे टीकायां सप्तमोऽध्यायः ॥ ७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रसूं मातरं यशोदां बोधयन्नीश्वरत्वं ज्ञापयन् । पीतप्रायः पीत इव स्तनो येन कृष्णेन तस्य "प्रायः साहश्यबाहुल्यप्राणांतानशनेषु च" इति शाश्वतः । स्तनवदस्य लोपस्त्वार्षः । जृंभतो मुखं प्रसारयतः इदं दृश्यं विश्वम् ॥ ३५ ॥ रोदसी द्यावाभूमी । ज्योतिषां ताराणामनीकं गणम् । श्वसनो वायुः ॥ ३६ ॥ सा यशोदा । सहसेत्याकस्मिके मृग एकस्तच्छावस्तद्बालस्तत्तुल्यनेत्रा संमील्येति । विष्णोर्ध्यानार्थं भगवन्नारायण रक्षरक्ष मत्सुतमस्मादुत्पातादिति चित्रस्तद्दृष्टित्वान्मृगशावाक्षीति भावः ॥ ३७ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्धे सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पीतप्रायस्येति पीता गावो विभक्ता भ्रातर इतिवत् कर्त्तरि क्तः भावक्तान्तान् पीतं पानं प्रायमीषदसिद्धं यस्येति वा टीकामते स्तनशब्दलोपोऽत्रार्ष एव जननीति सुतस्येति च स्नेहभरं बोधयति तत्र च रुचिरस्मित इति परमसौन्दर्यम् अतो लालयन्ती जृम्भमाणस्य तल्लालनजनितानन्दभरालस्येन जृम्भां कुर्वतस्ततः मुखे मुखविवरान्तः द्वितीयान्तपाठे मुखं लालयन्ती तद्द्वारा जठरे ददर्शेति ज्ञेयं "कृत्स्नस्य चान्तर्जठरे जनन्या" इति ब्रह्मस्तुतेः सप्तम्यन्तः पाठ एव तेषां सम्मतः अग्रेऽपि मुखे दर्शनस्य व्याख्यानादिदमस्माभिर्यद्दृश्यते तदेव विश्वं न त्वन्यत् तस्य विग्रहस्याचिन्त्यशक्त्या विभुत्वादिति भावः । अत एव तत्र विश्वस्य सम्पर्को नास्ति तदुक्तं श्रीभगवदुपनिषत्सु । "मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्" इति जगदुदरत्वन्तु तदंशांशगर्भोदकशायिन एव तच्च प्रलयकाले सूक्ष्मतयैवेति ॥३५॥ इदन्तापरामृष्टमेवाह—खमिति । अन्तरिक्षं रोदसी दिवं भूमिं च एवं भुवःस्वर्भूरितित्रिलोकत्रयम् ॥ ३६ ॥ वीक्ष्य साक्षाद्दृष्ट्वा सहसा अकस्मात् युगपच्चेत्यमरः । विश्वम् अशेषं जगदेवेत्यनुक्तमपि तत्कारणादिकं संगृहीतं तच्चाग्रे पुनर्विश्वदर्शने वैकारिकाणीत्यादिना व्यञ्जयितव्यं सञ्जातवेपथुः परमाद्भुतत्वेन उत्पातशङ्कया वा नेत्रे संमिल्य तद्दर्शनाय निजाक्षिणी मुद्रयित्वा अनेन निजाभ्यां बहिर्नेत्राभ्यामेवैकदैव तत्तद्दर्शनं बोधितं न च दिव्यदृष्ट्यादिप्राप्तिः प्रत्युत ततः श्रीकृष्णप्रेमानन्दलक्ष्म्या एव दासीयमाना काचिदियमपि शक्तिस्तस्यां वर्त्तत इति लक्ष्यते नेत्रनिमीलनादनादृतैव सेति तर्क्यते तदुक्तं श्रीनारदपञ्चरात्रे—

"हरिभक्तिमहादेव्याः सर्वा मुक्त्यादिसिद्धयः । भुक्तयश्चाद्भुतास्तस्याश्चेटिकावदनुव्रताः" ॥ इति

तथापि तदानीमुद्भूतः वात्सल्यशालीलोदयावसरे स्वदास्यमेव सफलयन्ती विस्मयद्वारा तामात्मेश्वरीमुल्लासयितुमेवमनुवर्तते इति च गम्यते मृगशावाक्षीति मुनेः श्रीकृष्णवात्सल्यमयविस्मयशोभाविशेषविरोचमानतन्मातृलोचनसहजसौन्दर्यस्फुरणोल्लासमयं वचनम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां सप्तमोऽध्यायः ।

---

१. सुतस्य—वीर. विज । २. इदम्—श्रीधर. वंशी. विज. विश्व. शुक.; जगत्—वीर. । ३ संवीक्ष्य—विज. । ४. शकटतृणावर्तवधः—इति सम्पादित् ।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

जगद्भ्रामऽविभ्रंशान्भक्त्या भान्ति साधवः । अतो रजस्तमोनेतृतृणावर्त्तमहन् प्रभुः ॥

प्रसंगात् पुनरप्यद्भुतं चरितमाह—एकदेत्यादिना । एकदा कस्मिंश्चित् काले कालानियमः, श्रीभगवतः कालपारतन्त्र्याभावात् । किंवा, बालोऽपि तारुण्यस्य तारुण्येऽपि बाल्यस्य प्रदर्शनेन वयोनिर्द्धाराशक्तेरिति; आदाय भूमौ क्रीडन्तं तत आ बलाद्गृहीत्वा; किंवा पल्यंकिकायां शयानं तं ततो गृहीत्वा । भाविनी परमोत्तमा नारी श्रीयशोदा, अतः पुत्रस्नेहरसे परिप्लुताऽत्यन्तं निमग्ना, अतएव प्रस्नुतं प्रकर्षेण वक्षाद्यादीकरणेन सदा क्षरत्स्तन्यम् ; जननीति सुतस्येति च स्नेहभरं बोधयति । तत्र च रुचिरस्मित इति परमसौन्दर्य्यमतो लालयन्ती जृम्भमाणस्य तल्लालनजनितानन्दभरालस्येन जृम्भां कुर्व्वतः सतः; मुखे मुखविवरान्तः, द्वितीयान्तपाठे मुखं लालयन्ती तद्द्वारा जठरे ददर्शेति ज्ञेयम् ; (भा० १०।१४।१६)—कृत्स्नस्य चान्तर्जठरे जनन्याः' इति श्रीब्रह्मस्तुतेः; सप्तम्यन्तपाठ एव तेषां सम्मतः, अत्राग्रेऽपि मुख एव विश्वदर्शनस्य व्याख्यानात् । राजन्निति परमाश्चर्य्येण सम्बोधनम् ; यद्वा, यथा त्वत्पितामहेनार्ज्जुनेन भारतयुद्धे दृष्टम् , तद्वदिति न मन्तव्यम् ; किन्तु ततोऽपि विशिष्टमिति सूचयति ॥ ३४–३५ ॥ इदन्तापरामृष्टमेवाह—खमिति । अन्तरिक्षम् , रोदसी दिवं भूमिञ्च । एवं भुवः स्वभूरिति लोकत्रयम् ; तेन च तत्रत्या ज्ञेयाः । तत्रैव विशेषविवक्षयानुक्तानपि संगृह्य जाति-भूतानीति ॥ ३६ ॥ वीक्ष्य साक्षाद्दृष्ट्वा, सहसाकस्माद्युगपच्चेत्यर्थः । विश्वमशेषं जगदेवेत्यनुक्तमपि तत्कारणादिकं संगृहीतम् । तच्चाग्रे पुनर्विश्वदर्शने (भा० १०।८।३८)—'वैकारिकाणि' इत्यादिना व्यञ्जयितव्यम् । संजातवेपथुः परमाद्भुतत्वेनोत्पातशंकया वा नेत्रे निमील्य तद्दर्शनाय निजाक्षिणी मुद्रयित्वा, अनेन बहिर्नेत्राभ्यामेवैकदैव तद्दर्शनं बोधितम् । एवमर्ज्जुनतस्तस्या विशेषश्च, (गी० ११।८)—'दिव्यं ददामि ते चक्षुः' इति तं प्रति श्रीभगवदुक्तेरन्यथा विविधव्यवधानादिना विश्वस्य तस्मिन् युगपद्दर्शनासम्भवात् । अस्याश्च श्रीभगवत्स्नेहभरप्रभावेण दृग्भ्यामेव साक्षाद्दर्शनात् जठरान्तस्तद्दर्शनञ्च श्रीभगवतो जगदुदरत्वात् । तच्च सृष्ट्यारम्भे तत एव नाभिद्वारा लोकपद्माविर्भावादिना व्यक्तमेव । एतच्च तदंशेन नारायणेनाभेदादुक्तम् ; किंवा जठरान्तस्तद्दर्शनेनान्तर्दृष्टिरभिप्रेता, तया तस्य सत्त्वदर्शनमुपपद्यत एव, किन्तु बहिः सौन्दर्य्यादिदर्शनेन जायमानानन्दविशेषात्तत्तुच्छमेवेति दिक् । मृगशावाक्षीति सौन्दर्य्यविशेषेण कमललोचनस्य श्रीभगवतो मातृत्वयोग्यतोक्ता; अतस्तत्तद्दर्शनादिकं सम्भाव्यमेवेति भावः । सुविस्मितासीत्—किमिदं कुतो वा पश्यामीति परमविस्मयं प्राप्ता, अतस्तस्मिंस्तस्याः स्नेहविघातकमीश्वरज्ञानं नाभूत् ,—परमेश्वरे तत्सम्भावनया विस्मयानुत्पत्तेः; किन्तु स्वपुत्रस्वाभाविकविविधाश्चर्य्यमयताज्ञानोत्पत्त्यां पूर्व्वमकस्मात् पूतनामारणशकटभंगतृणावर्त्तनिपातादिजातबहुलशंकाया निरसनेन स्नेहो विवृद्ध एवेति ज्ञेयम् । यद्वा, अहो मम मनोविभ्रममहिमायम् , येन स्वबालकेऽप्यस्मिन्नेवं दृश्यत इति । सुशोभनं विशिष्टं चान्यतो विलक्षणं स्मितं यस्यास्तथाभूता बभूव, निजमनोभ्रमविशेषं मत्वा स्वयमेवात्मानं हसितवतीत्यर्थः । हे राजन् सर्व्वत्र प्रकाशमानेति तत्तत्त्वं त्वयैवावधार्य्यते, न त्वन्येनेति भावः । अत्र च स्व-सिद्धान्तोऽयम्—साक्षाच्छ्रीभगवद्दर्शनानन्दविघातकविश्वदर्शनस्य परिहाराय नेत्रनिमीलनं, साक्षाद्विराजमानेऽपि भगवत्यहो बत ! तदितरदर्शनं स्यादिति तन्मायाबलानुसन्धानेन भयकम्पः सुविस्मितत्वञ्चेति ॥ ३७ ॥

श्रीकृष्णकृपयानेकसिद्धान्तेषु स्फुरत्स्वपि । निजरुच्यनुसारेण सिद्धान्तोऽत्र विलिख्यते ॥

इती श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्व्वार्द्धे श्री श्रील-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशमटिप्पण्यां सप्तमोऽध्यायः ॥ ७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

नगान् पर्वतान् तद्दुहितॄः नदीः ॥ ३६—३७ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कंधे श्रीसुदर्शनसूरिकृतशुकपक्षीये सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ भगवान् तृणावर्तागमे प्रदर्शितस्य गरिम्णो मूर्तिं दर्शयामासेत्याह–एकदेति । प्रस्नुतं कर्त्तरि क्तः स्तनं प्रस्नुवत पाययामास कथम्भूता स्नेहेन परिप्लुता परितो व्याप्ता ॥ ३४ ॥

हे राजन् ! पीतप्रायस्य पीतप्रायस्तनस्य कृतस्तन्यपानस्येत्यर्थः । पीतमिति भावे क्तः पीतं पानमस्यास्तीति पीतम् अर्श आदित्वान्मत्वर्थीयोच् प्रत्ययः । यद्वा भुक्ता ब्राह्मणा इतिवत्कर्तरि क्तः प्रायशब्दः सदृशवाची सन्नप्यत्रानतिरिक्तार्थपरः तस्य सुतस्य रुचिरं सुन्दरं स्मितं यस्मिंस्तन्मुखं लालयन्ती चुम्बनादिना लालनं कुर्वन्ती जृम्भतः आस्यं विवृण्वतः सुतस्य मुखे इदं वक्ष्यमाणं खाद्यात्मकं जगद्ददर्श मुख इति पाठान्तर तदा रुचिरस्मितं सुतं लालयन्ती पीतप्रायस्य जृम्भतः मुखं विवृण्वतः सुतस्य मुखे इदं जगद्ददर्श इत्यन्वयः ॥ ३५ ॥ तद्दृष्टजगदन्तर्भूतपदार्थानाह–खमिति । खमाकाशं रोदसी पृथिव्यर्थकमव्ययं ज्योतिरनीकं

शुक्राङ्गारकादिज्योतिश्चक्रं तारादीनामपि इतरेतरयोगद्वन्द्वः नगान् गिरीन् तद्दुहितॄर्नदीः स्थावरजङ्गमात्मकानि भूतानि तानि च ददर्श इत्यन्वयः ॥ ३६ ॥ हे राजन् ! सा मृगशावाक्षी यशोदा सुतस्य मुखं खादियुक्तं विश्वमवलोक्य सञ्जातो वेपथुः शरीरकम्पो यस्यास्तथाभूता स्वकीये नेत्रे निमील्य विस्मिता बभूव ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां सप्तमोऽध्यायः ॥ ७ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भामिनी तेजस्विनी ॥ ३४ ॥ इदं वक्ष्यमाणं ददर्श आस्य इति शेषः ॥ ३५ ॥ रोदसी द्यावापृथिव्यौ ज्योतिरनीकं ज्योतिर्गणं तेषां पर्वतानां दुहितॄः नदीः ॥ ३६ ॥ मृगशावाक्षी मृगबालाक्षी ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां सप्तमोऽध्यायः ॥७॥ (विजयध्वजमतेऽष्टमोऽध्यायः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पीतेति। पीता गावो विभक्ता भ्रातर इत्यादिप्रयोगदर्शनात् कर्त्तरि क्तः आगतप्राय इतिवत् इदं यदस्माभिर्दृश्यते तदेव नान्यदित्यचिन्त्यशक्त्या तस्य विग्रहस्य विभुत्वं दर्शितं जगदुदरत्वं प्रलये तदंशांशस्य गर्भोदशायिन इत्यर्थः ॥ ३५—३७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पीतप्रायस्येति। पीता गावो विभक्ता भ्रातर इतिवत्कर्त्तरि क्तः स्तनं पीतवत्प्रायस्येत्यर्थः। मुखे मुखविवरान्तः द्वितीयान्तपाठे मुखं लालयन्ती तद्द्वारा जठरे ददर्शेति ज्ञेयं "कृत्स्नस्य चान्तर्जठरे जनन्या" इति ब्रह्मस्तुतेः इदमस्मद्दृश्यं विश्वमेव तदीयविग्रहस्य मातृक्रोडगतस्याप्यचिन्त्यशक्त्या विभुत्वेन सर्वजगदधिष्ठानत्वात् जृम्भत इति जृम्भणोचितक्षणेऽपि सविशेषसर्वविश्वदर्शनमचिन्त्यशक्त्यैव निष्पादितम् ॥ ३५ ॥ नगान् द्वीपाख्याकरान् जम्ब्वादिवृक्षान् पर्वतांश्च तद्दुहितॄर्नदीः ॥ ३६ ॥ सहसा अकस्मात् युगपच्च सञ्जातवेपथुरुत्पातशङ्कया सम्मील्येति श्रीविष्णुध्यानार्थं भगवन्नारायण रक्षरक्ष मत्सुतमत्पादुत्पातात् इति वित्रस्तदृष्टित्वान्मृगशावाक्षी "पूतनादिवधैश्वर्य्यं न प्रेम समचूकुचत्। प्रत्युतावर्द्धयत्तस्मिन्नरिष्टप्रतिशङ्कया॥ नन्दभार्य्यादिहेतूनां तत्राभूद्यदि कल्पनम्। ततो निर्हेतुरेवेयमैश्वरी शक्तिरागता। विभुत्वदर्शिका कृष्णदेहस्य स्फुटमेव हि॥ तथापि विस्मितैवासीन्मत्पुत्रस्येदमद्य किम्॥ नत्वैश्वर्यज्ञानसम्भ्रान्त्या वात्सल्ये शिथिलाभवत्॥ न चात्र सम्भवेत् किञ्चित् पूर्ववद्धेतुकल्पनम्॥ तथापि वस्तुतो गाढप्रेमोर्मिमयमेव हि॥ इति निष्कम्पताप्रेम्णः ख्यापितास्यान्मुहुर्मुहुः॥ एवं च—

"प्रेमदेव्याः परीक्षार्थमागच्छन्त्यन्तरान्तरा। शक्तिरेषा हरेः किन्तु तया दासी कृता भवेत्" ॥ इति ॥ ३७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। दशमे सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इदं विश्वम् ॥ ३५ ॥ दृष्टमाह–खमिति ॥ ३६—३७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तमाऽध्यायार्थप्रकाशः ॥ ७ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

पीतप्रायस्येति। पीतं पानं तद् यस्यास्ति स पीतः, मुखं लालयतीति चिबुकं गृहीत्वेतिशेषः। जृम्भतस्तस्य मुखद्वारा जठरे इदं विश्वं ददर्श 'कृत्स्नस्य चान्तर्जठरे जनन्या' इति वक्ष्यमाणात्, जृम्भणोचितकाल एव कृत्स्न–विश्वदर्शनं तदचिन्त्यशक्तिसिद्धं बोध्यम्, इयं मत्प्रसूः सर्वज्ञैव किन्तु मदैश्वर्यस्वरूपं सदैव जानाति, न तु दृष्टवती तद्दर्शनादेव मयि भयं शङ्कती तदेनामैश्वर्यं प्रदर्श्य निःशङ्कयामीति तददर्शयदिति भावः ॥ ३५ ॥ नगान् द्वीपातिधानाकरान् जम्ब्वादिवृक्षान् गिरींश्च तद्दुहितॄर्नदीः ॥ ३६ ॥ सहसा अकस्माद्युगपच्च सञ्जातवेपथुरित्याश्चर्यदर्शनात् निमील्य नेत्रे इति तद्दर्शनाय सुविस्मितेति कथमेतावत्युदरे विश्वमिदं भातीति विस्मयेन चित्रितेवाभूदित्यर्थः ॥ ३७ ॥

पूतनामोक्षयोस्पर्शाच्छकटं पादयोः शिशुः। भुजयोश्च तृणावर्त्तमहन्नास्ये क्षिताखिलः॥
अहीननरचेष्टाभिराभिर्लीलाभिरच्युतः। निजैश्वर्यस्य पूर्णत्वं माधुर्यञ्च व्यजिज्ञपत्॥

इती श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां सप्तमोऽध्यायः ॥ ७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

बहुशो बहुवारं नन्दगोपोऽद्भुतानि दृष्ट्वा विस्मितः सन्वसुदेववचो भूयो मानयामास ॥ ३५ ॥ भामिनी योषिदेकदाऽर्भकमादाय स्वाङ्कमारोप्य प्रस्नुतं स्तनं स्नेहपरिप्लुता सती पाययामास ॥ ३६ ॥ प्रीतप्रायस्य सुतस्य जननी रुचिरस्मितं मुखं लालयन्ती जृम्भतो मुख इति शेषः । इदं ददृशे विवक्षाभावात् ॥ ३७ ॥ इदमित्युक्तं वदति ॥ खमिति । खमाकाशं रोदसी द्यावापृथिव्यौ ज्योतिरनीकं ज्योतिर्मण्डलमाशाश्च सूर्यश्चेन्दुश्च वह्निश्च श्वसनो वायुश्चाम्बुधयश्च तान्द्वीपान् । दुव्यन्तरित्यप्शब्दाकारेकारः । नगांस्तद्दुहितॄः पर्वतप्रसूता नदी शतशः सहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसङ्ख्याता इति पञ्चमोक्तेः । वनानि स्थिरजङ्गमानि चेतनाचेतनानि भूतानि यानि तानि ॥ ३८ ॥ सहसा विश्वं वीक्ष्य सञ्जातवेपथुः गतम् । मृगशावाक्षी नेत्रे सम्मील्य सुविस्मिताऽऽसीत् ॥ ३९ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धेऽष्टमोऽध्यायः ॥ १०–८ ॥ (अस्मिन्क्रमे सप्तमोऽध्यायः)

श्रीसुबोधिनी

एवमेकमुपाख्यानं पञ्चानां मध्ये निरूपितं, द्वितीयमाहैकदेतिचतुर्भिः—

भक्तिर्ज्ञानं तथा पूर्णं विस्मयश्च ततः परम् । जातो लौकिकभावस्य दृढत्वादिति रूप्यते ॥ १ ॥

आदौ स्वतन्त्रा पूतना निवर्तिता ततः परतन्त्रोपि शकटस्ततः सर्वमारकः, हेत्वन्तरं च न प्रदर्शितं, तथाप्यसम्भावनाया दृढत्वान्न दृढा भगवत्यासक्तिर्भविष्यतीत्यसम्भावनानिवृत्त्यर्थं स्वस्मिन् भगवत्येव तादृशं रूपं स प्रदर्शितवान्, स्वधर्मनिष्ठधर्मपरिज्ञाने भक्तिरेव हेतुरिति प्रथमतो भक्तिमाह, एकदा गृहकार्यादिवैयग्र्याभावदशायां भगवदेकप्रवणचित्तदशायां वा, अर्भकं बालकं कलवाक्यं वर्षाधिकं, आदाय क्रीडन्तं बलात् स्वयं गृहीत्वा, स्वस्याङ्कं समारोप्य सर्वोत्तममासनं दत्वा भामिनी परमसौभाग्यवती, सर्वाभरणभूषितं च विधाय, भामिनो भामयुक्ता च, तेन भगिन्या अपि सौभाग्यं द्योतितं, एवं परम्परासौभाग्यवती स्वतः कर्मवशाच्चोत्तमा, प्रकर्षेण स्नुतं स्नेहवशान्निर्गतं स्नेहेन च परिप्लुतान्तर्बहिर्व्याप्ता जातस्नेहकार्या च स्तनं पाययामास, 'प्रयतात्म'त्वं भामिनीपदेनोक्तं, प्रशब्देन 'भक्त्युपहृत'त्वमुक्तं, स्नेहपरिप्लवाद् भक्त्यादानमुक्तं, अन्तःस्थितबालानामल्पतृमत्वात् स्वतोपानं, अपेक्षाया अपि विद्यमानत्वादन्यप्रेरणया पानं, अत एव भगवतो न सर्वपानं, अधिकपाने बालानामुपद्रवो भवतीति, प्रयोजककर्तृव्यापारनिवृत्त्यर्थं भक्तिप्रवणां कृत्वा स्वधर्मं दर्शितवान् "ये यथा मां प्रपद्यन्त" इतिन्यायेन भक्त्युद्गततद्धर्मं गृहीत्वा कृपया फलरूपं स्वधर्मज्ञानं सम्पादयति ॥ ३६ ॥

अतो दानाभिनिवेशं परित्यज्य कौतुकाभिनिविष्टा भगवद्धर्मपरा प्रदर्शितं धर्मं दृष्टवतीत्याह पीतप्रायस्येति, सर्वात्मना भगवता न पीतमेव, आपाततः पीतं, तथाकरणे हेतुर्जननीति, जननबुद्धिः स्वेनैवोत्पादितेतिभगवच्चरित्रं, सा पूर्वोक्तभक्तियुक्ता, कार्यार्थं भक्तेः पुनरनुसन्धानं कार्यदशायां सद्भावज्ञापनाय, तस्येति निरोधार्थमागतस्य, रुचिरं स्मितं यस्य मुखस्य, मोहसहितं स्नेहं जनयतीति परमसौन्दर्यं भावयन्ती तादृशं मुखं लालयन्ती जाता, राजन्निति सम्बोधनं राजलीलायामस्यानुभवः सिद्ध इत्यग्रे वक्ष्यमाणस्यापूर्वत्वात् सावधानतया स्थातव्यमितिज्ञापनार्थं, अग्निवायू ज्ञानक्रियारूपे ते यशोदायां योजयितुं जृम्भा भगवतः, अन्यथा द्रष्टुं सा न शक्नुयात्, भिन्नं जगन् मायिकं वा तत्र दृष्टवतीतिपक्षं व्यावर्तयितुं तुशब्दः, इदं जगज्जृम्भतो भगवतोर्थान्मुखद्वारा भगवति ददृशे, इदं ब्रह्माण्डमात्रस्यैव प्रदर्शनं अग्रे सम्यगधिकारे सिद्धे सर्वस्यापि प्रदर्शनं वक्ष्यति ॥ ३७ ॥ "द्युभ्वाद्यायतनं स्वशब्दा"दित्यधिकरणे प्रपञ्चाधारत्वे ब्रह्मत्वं सिद्धं तदचिन्त्यानन्तशक्तिमति सर्वं सम्भविष्यतीत्याश्चर्यं विहाय भगवत्परं चित्तं भवति, तत्र दृष्टं भ्रमव्यावृत्त्यर्थं गणयति खमिति, आदौ खमाकाशं विस्तीर्णं, ततो रोदसी द्यावापृथिव्यौ तत तु तदाधारं, तथा ज्योतिरनीकं ज्योतिश्चक्रं द्यावापृथिव्याधारं, दश दिशस्तत एव विभक्ताः, सूर्येन्दुवह्नयस्त्रिविधं ज्योतिः, श्वसनो वायुः, अम्बुधयः समुद्राः, भूम्याकाशावुक्तावेव, एवं पञ्च भूतान्युक्तानि, भूमिभेदा द्वीपादयोलौकिकज्ञानार्थं सप्त द्वीपाः, नगाः पर्वतास्तद्व्यावर्तकास्तद्वान्तरज्ञानहेतवः, तद्दुहितरो नद्यः, वनानि तदवान्तरभेदा अल्पीयांसोपि, ततोपि सूक्ष्मा दृष्टा इत्याह भूतानीति, यानि प्रसिद्धान्यपि यथा कल्पवृक्षा यथा वा नारदादयो ब्रह्मादयो वा, आधाराधेयभावस्तु तस्या न प्रतीतोकस्माज्जृम्भानन्तरमेव सर्वं दृष्टम् ॥ ३८ ॥ अग्नीषोमात्मकत्वाच्च जगतोद्यापि तस्यास्तथाधिकारो न जात इत्यधिकारार्थं प्रदर्श्य पुनर्नेत्रनिमीलने तत् तिरोहितं कृत्वा विस्मयाविष्टेव भगवता कृतेत्याह सा वीक्ष्येति, विश्वं तया पूर्वं श्रुतमिदानीं दृष्टं, सहसा गमनादिकारणव्यतिरेकेणैव, न जानाति भगवता द्वयं सम्पादितमिति, "तस्माज्जञ्जभ्यमानादग्नीषोमौ निरक्रामता"मितिश्रुतेः, तिरोभावप्रस्तावात् सिद्धवत्कारेणोक्तं, सहसेत्यकस्मात्, तस्मिन् दृष्टे सम्यग् जातो वेपथुः कम्पो यस्यास्ततः समीचीनमेव विश्वमधिकाराभावाद् भयानकं जातं, ततो नेत्रे सम्मील्य तत्र स्वभावो हेतुर्बलिष्ठ इति दृष्टान्तमिवाह मृगशाववदक्षिणी यस्याः, मृग एव भीरुस्ततोपि शावो बालकः, सौन्दर्यं चाक्ष्णोर्निरूपितं भगवद्दर्शनयोग्यत्वाय, ततोन्तःकरणे विस्मय एवोत्पन्न इत्याह सुविस्मितासीदिति, सुतरां विस्मितासीत्, पूर्वं कार्यदर्शनापेक्षयापि कारणे दृष्टेधिको विस्मयो जात इत्यर्थः ।

पूतनासुपयःपाता बालदुःखनिवारकः । प्रपञ्चस्मृतिहन्ता च गोकुले राजते हरिः ॥ १ ॥
स्वासक्त्यर्थं शकटभित् तृणावर्तविनाशकः । सामर्थ्यज्ञापनार्थाय विश्वाधारः प्रसीदतु ॥ २-३९ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तर-
प्रमाणप्रकरणे यशोनिरूपकतृतीयाध्यायस्य स्कन्धादितः सप्तमाध्यायस्य विवरणम् ॥ ७ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सा वीक्ष्येत्यस्याभासोक्तौ, अथापि तस्या इत्यादि । अत्रायमाशयः । मातुर्हि पुत्रत्वेनैवात्र स्नेहः, स च लौकिकसरूप एव वाच्यः, परन्तूत्कटः स्वरूपतोऽलौकिकश्च । तथा च तत्र लौकिकविजातीयधर्मदर्शनं प्रथमत एव स्नेहप्रयुक्तातिभयजनकम्, येन प्राणस्थितिर्न भवति, अतः क्रमेण किञ्चित् किञ्चित् तथाविधधर्मदर्शनेमे सहजभगवद्धर्मत्वेन ज्ञानाद्धैर्येण सर्वसामञ्जस्यं भविष्यतीत्यधुना तथा ज्ञानाभावाद्धैर्याभाव एवाधिकाराभावरूप उच्यते । तेन क्षणमात्रं प्रदर्श्य तिरोहितं कृत्वा विस्मयरसमुत्पादितवानिति सर्वं सुस्थमिति ।

इति सप्तमोध्यायः

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

एकदेत्यत्राभासे द्वितीयमिति तृष्णानिवर्तकं, **विवृत्तौ** "ननु पत्रं पुष्प"मितिगीतावाक्ये ये हेतवो भगवद्भोजन उक्तास्तेषामभावे भगवान् कथं स्तन्यं भुक्तवानित्याकाङ्क्षायां तेषां सत्तां मातृचरणेष्वाहुः **प्रयतात्मत्वमित्यादि दानमुक्तमित्यन्तं,** नन्वेवं सति **स्वत एव** कुतो न स्तन्यं गृहीतवानित्याकाङ्क्षायां अत्युक्तमनभ्रत्वं वैराग्यं च **हेतुत्वेन सूचयन्त्यस्तरित्यादि, व्यापारनिवृत्त्यर्थमिति** पानमितिशेषः, तर्हि तावत् करणस्य किं प्रयोजनमित्याकाङ्क्षायामग्रिमाभासमाहुर्**भक्तीत्यादि** ॥ ३६ ॥ **पीतप्रायेत्यस्य विवृतौ तथाकरण** इति मुखलालने, तथाच स्नेहाधिक्यात् तथाकृतिरितिभावः, **अस्येति** परीक्षितः मुखलालनादेर्वा, **सर्वव्यापीति** ब्रह्माण्डस्य तद्बहिःस्थस्यापि तत्प्रयोजनमाहुर्**यम्बायायतनमित्यादि भवतीत्यन्तम्** ॥ ३७ ॥ **खमित्यत्र तत्त तदाधारमि**त्याकाशं **द्यावापृथिव्योराधारं,** अवकाशाभावे तत्स्थित्यसम्भवेन तत्स्थितिजनकसहकारीत्यर्थः, **तत एवेति ज्योतिश्चक्रादेव, अलौकिकेति** कदाऽप्यस्मिन् जन्मन्यप्रत्यक्ष इत्यर्थः, **आधाराधेयभाव** इति भगवानाधारः सर्वमाधेयमिति भावः, **जृम्भानन्तरमेव दर्शने हेतुरग्नीत्यादि** ॥ ३८ ॥ **सा वीक्ष्येत्यस्याभासे जगतोऽग्नीषोमात्मकत्वात्** प्राणापानात्मकत्वादित्यर्थः, इदमग्रिमश्लोके स्फुटीकर्तव्यं, **अथापि तस्या** इत्यादि, एतत्तात्पर्यं टिप्पणीतोवगन्तव्यं, **विवृतौ द्वयमिति** विश्वदर्शनं जृम्भा च, **तत्र श्रुतिं प्रमाणयन्ति तस्मादित्यादि,** श्रुतिस्तु तैत्तिरीयाणां द्वितीयाष्टकेऽग्नीषोमीयपुरोडाशोपाख्यानेस्ति, **अर्थस्तु तस्माद् वृत्राज्** जञ्जभ्यमानाज् जृम्भया विकासितमुखादग्नीषोमौ प्राणापानात्मकौ देवौ निरक्रामतां निर्गतौ जाताविति तथा च जृम्भया विकासितमुखत्वे प्राणापानात्मकं **सर्वं** जगन् निर्गतमिति श्रुत्या कथनाद् भगवता जृम्भा जगत्प्रदर्शनं च सम्पादितमित्यर्थः, ननु विश्वदर्शनप्रस्तावे शुकेन जगदुत्पत्तिरपि संशयाभावाय कुतो नोक्ता सिद्धवदेव कस्मादुक्तमित्यत **आहुस्तिरोभाव** इत्यादि, राज्ञा हि तृष्णानिवृत्त्यर्थं यच्च चरित्रं पृष्टं तदुत्तरत्वेन शुकेरिदमुच्यते **तृष्णा** च तदवापैति यदा जगतोनित्यत्वं ज्ञायते तत्र 'यस्य ब्रह्म च क्षत्रं चे'त्यत्र सिद्धं, तत्र जगत ओदनत्वादिकं तदैव ज्ञातुं शक्यते यदा मुखे दृश्यतेतस्तिरोभावप्रस्तावात् सिद्धवत्कारेणोक्तमित्यर्थः, **कार्यदर्शनापेक्षयेति** गुरुत्वानुभवापेक्षया, **कारण** इति जगति, **सामर्थ्यज्ञापनार्थायेति सामर्थ्यज्ञापनेन** योर्थः सम्भवेत् तन्निवृत्तिरूपस्तन्निमित्तमित्यर्थः ॥ ३९ ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः
प्रकाशे सप्तमाध्यायविवरणम् ॥ ७ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एकदेत्यत्र परमसौभाग्यवतीति 'कोपना सैव भामिनी' त्युक्तत्वात् स्वाधीनपतिकेत्यर्थः, **स्वत** इति भामिनीत्वादङ्के भगवदारोपणाच्चेत्यर्थः, **प्रयतात्मत्वमिति** जितेन्द्रियाया एव पतिरधीनो भवतीतिभावः, एतेन 'पत्रं पुष्प'मितिवाक्योक्तमर्यादा सिद्धेतिभावः, **फलरूपं स्वधर्मज्ञानमिति** "भक्त्या मामभिजानाती"तिवाक्याद् भगवद्धर्मज्ञानं भक्तेः फलमिति भावः ॥३६॥ **पीतप्रायस्येत्यत्र मोहसहितमिति** स्मितस्य मायारूपत्वादितिभावः, **अग्निवायू** इति श्रुतौ 'इन्द्र आत्मनः शीतरूरावजनय' दित्युक्त्वाग्रे 'ताभ्यामेनमभ्यनयत् तस्माज् जञ्जभ्यमानादग्नीषोमौ निराक्रामता'मिति वृत्रप्रसङ्गे निरूपितं, 'शीतं' जाड्यं 'रूर'स्तज्जनितो ज्वरात्मकस्ताप इतिवेदभाष्ये निरूपितं, तत्र 'शीतं' वायुः, 'रूरो'ग्निः, अतो जृम्भा अग्निवायुजन्या, भगवद्धर्माणामलौकिकत्वादत्राग्निर्ज्ञानशक्तिरूपो **वायुः** क्रियाशक्तिरूप इतिभावः ॥ ३७ ॥ **खमित्यत्र पूर्वं** विश्वदर्शने ज्ञानक्रियायुक्तत्वं यशोदानिष्ठो हेतुरुक्तः, **अत्र** जगन्निष्ठमपि हेतुमाहुः **अग्निषोमात्मकत्वाच्चेति,** इदं बृहदारण्यके 'सोमोऽन्नमग्निरन्नाद' इति स्फुटं, यद्यपि श्रुतौ वृत्रस्य जृम्भया-

ग्नीषोमयोर्निष्क्रमणमुक्तं तथापि तत्सामर्थ्यं तदाविष्टभगवत एव, अत एव तत्राग्नीषोमयोः स्वरूपत एव निर्गमनं अत्र तु भगवतः पूर्णत्वात् तदात्मकविश्वस्य सर्वस्यैव निर्गमनमितिभावः ॥ ३८ ॥ **सा वीक्ष्येत्यत्र गमनादीति** भगवत्क्रियास्थापनाद् दर्शनार्थं तत्र तत्र द्वीपादिषु गमनमपि 'तदेजति तन्नैजती' तिप्रकारकमेत्र सम्पन्नमितिभावः, **इयं सम्पादितमिति** अग्नेः सोमस्य च निष्क्रमणमित्यर्थः, जृम्भया तन्निर्गमे श्रुतिं प्रमाणयन्ति तस्मादिति, सिद्धवत्कारेणेति वीक्ष्येति ल्यबन्तेनैवोपसंहार उक्तः ॥ ३९ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एकदार्भकमादायेत्यस्य विवृतौ **प्रयोजककर्तृव्यापारनिवृत्त्यर्थमि**ति स्तनपाने **प्रयोजककर्त्री** श्रीयशोदा तस्या आग्रहपूर्वकस्तनपानजनकव्यापारनिवृत्त्यर्थमित्यर्थः, **भक्तिप्रवणां कृत्वेति** शुद्धपुष्टिभक्तिरूपमुखारविन्ददर्शनपरां कृत्वेत्यर्थः, अन्यथाग्रहेण चेत् स्तनपानं कारयेत् तदा बालानामुपद्रवो भवेदितिभावः ॥ ३६ ॥ **पीतप्रायस्येत्यत्र अग्निवायू ज्ञानक्रियारूपे** इति जृम्भाया अग्निवायुजन्यत्वं तैत्तिरीयाणां द्वितीयाष्टके "इन्द्र आत्मनः शीतरूरावजनय"दित्यत्र पठितं, तत्र शीतरूरयोर्वाय्वग्निरूपता वेदभाष्ये निरूपिता, तथा च भगवता स्वसम्बन्धिक्रियारूपो वायुः स्वसम्बन्धिज्ञानरूपोऽग्निर्यशोदायां योजितः, स्वस्य क्रियाशक्तिज्ञानशक्ती योजिते इत्यर्थः ॥ ३७ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एकदार्भकमादायेत्यस्याभासे श्लोकचतुष्टयस्य क्रमेण वाक्यार्थानाहु**र्भक्तिर्ज्ञान**मिति का० ३९ ३/४ । "एकदार्भकमादाये"ति श्लोके **भक्तिः**, "पीतप्रायस्य जननी"त्यत्र **ज्ञानं**, "खं रोदसी"त्यत्र **पूर्णं ज्ञानं**, "सा वीक्ष्य विश्व"मित्यत्र विस्मयः । अध्यायसमाप्तौ पूतनेत्यादि का० ४० ३/४, ४१ ३/४ ।

इति सप्तमोऽध्यायः

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आश्चर्यश्रवणे सावधानतार्थं सम्बोधयति—राजन्निति । पीतप्रायः स्तनो येन तथाभूतस्य, संतोषपर्यंतं न पीत इति प्रायग्रहणम् । मुखं लालयती चुम्बनादिनोल्लासयन्ती सा जननी यशोदा जृम्भतस्तन्मुखे इदं बहिर्दृश्यमानं विश्वं ददृशे । लालने हेतुमाह–रुचिरं स्मितं यत्र तदिति ॥ ३५ ॥ तया दृष्टं विश्वं दर्शयति–खमिति । खमाकाशम् , रोदसी द्यावापृथिव्यौ, ज्योतिरनीकं ज्योतिश्चक्रस्थं गुर्वादिज्योतिःसमूहम् , आशा दश दिशः, सूर्यादींश्च, जम्ब्वादिसप्त द्वीपान् , नगान् पर्वतान् , तद्दुहितः नदीः, स्थिराणि स्थावराणि जङ्गमानि च यानि भूतानि तानि च ददृशे इति पूर्वेणवान्वयः ॥ ३६ ॥ राजन् ! सा यशोदा सहसा अकस्मादेकदैव एवं पुत्रमुखे विश्वं वीक्ष्य भीता सती 'एतद्दर्शनं माभून्' इत्यभिप्रायेण नेत्रे सम्मील्य सुविस्मिता 'किमिदं मया दृश्यते ?' इत्याश्चर्ययुक्ता आसीदित्यन्वयः । भयचिह्नमाह–सञ्जातवेपथुरिति । भयहेतुत्वेन तस्याः सौकुमार्यं सूचयन्नाह–मृगशावाक्षीति मृगशावो मृगपोतः, तस्याक्षिणी इव अक्षिणी यस्याः सा ॥ ३७ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने ॥ सप्तमो विवृतो ऽध्यायोऽनोभङ्गादिनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

पीतेति ॥ हे राजन् ! पीता गावो विभक्ता भ्रातर इतिवत् कर्माविवक्षया कर्तरि क्तः । प्रायेण पीतः पीतप्रायः यद्वा पीतं पानं प्रायमीषन्न्यूनं यस्य तस्य श्रीकृष्णस्य रुचिरं स्मितं यत्र तत् मुखं लालयती लालयन्ती । नुमभाव आर्षः । सा जननी यशोदा जृम्भतः जृम्भमाणस्य । आर्षः शता । तस्य कृष्णस्य मुखे इति शेषः । इदं वक्ष्यमाणं खादिकं ददृशे । तङार्षः । कृष्णस्य मुखं लालयन्ती तद्द्वारा जठरे ददर्शेति वा । "कृत्स्नस्य चान्तर्जठरे जनन्या" इत्युक्तेः । मुखे इत्यपि पाठः ॥ ३५ ॥ खमिति ॥ खमाकाशं रोदसी द्यावापृथिव्यौ ज्योतिरनीकं तारादिसमूहम् आशा दिशः सूर्यम् इन्दुं वह्निं श्वसनं वायुम् अम्बुधीन् समुद्रान् द्वीपान् जम्ब्वादीन् नगान् द्वीपाख्याकरान् जम्ब्वादिवृक्षान् पर्वतान् वा तद्दुहितृः नदीः वनानि स्थिराणि स्थावराणि जङ्गमानि च यानि भूतानि तानि च ददृशे ॥ ३६ ॥ सा वीक्ष्येति ॥ हे राजन् ! सा यशोदा सहसा अकस्मादेकदैवं पुत्रमुखे विश्वं वीक्ष्य भीता मृगशावस्येव त्रस्ते अक्षिणी यस्याः तादृशी अत एव जातवेपथुः सञ्जातकम्पा सती भयादेव एतद्दर्शनं मा भूदित्यभिप्रायेण नेत्रे संमील्य सुविस्मिता किमिदं मया दृश्यत इत्याश्चर्ययुक्ता आसीत् । यद्वा । विस्मिता भगवद्ध्यानार्थं नेत्रे निमील्य भगवन्नस्मादुत्पातान्मत्पुत्रं पाहीति चिन्तयन्ती आसीत् ॥ ३७ ॥

इति श्रीभागवते दशमेस्कन्धे सप्तमोऽध्यायः ।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वांकं स्वस्योत्संगम् आरोप्य स्थापयित्वा स्नेहेन परिप्लुता परिपूर्णा सती प्रस्नुतं स्तनं पीतप्रायस्य कृतपानस्य रुचिरं मनोहरं स्मितं हास्यं यस्मिन् तत् जृंभतो विजृंभमाणस्य सुतस्य मुखे इदं विश्वं ददृशे ददर्श ॥ ३४ ॥ खं गगनं रोदसी द्यावाभूमी ज्योतिरनीकं ज्योतिर्गणं श्वसनो वायुः अगान् गिरीन् तद्दुहितॄर्नदीः ददृशे इति पूर्वेण संबंधः। संजातवेपथुः प्राप्तकंपा मृगस्य शावो बालस्तस्याक्षिणी इवाक्षिणी यस्याः सा नेत्रे संमील्य ॥ ३६ ॥

इति शुध्धैकांतधर्मप्रवर्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढाऽर्थप्रकाशके श्रीमद्भागवते तस्यदशमस्कंधव्याख्याने तृणावर्त्तवधो नाम सप्तमोऽध्यायः ॥ ७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पीतप्रायस्येति ॥ हे राजन् , सा जननी यशोदा, पीतप्रायस्य पीतप्रायस्तनस्य, कृतस्तन्यपानस्येत्यर्थः। पीतमिति भावे क्तः। पीतं पानमस्यास्तीति पीतः। अर्शआदित्वान्मत्वर्थीयोऽच्। तत्प्रायः, यद्वा। भुक्ता ब्राह्मणा इतिवत्कर्त्तरि क्तः। तस्य सुतस्य, रुचिरं स्मितं यस्मिंस्तत् , मुखं लालयती चुम्बनादिना लालनं कुर्वती सती, जृम्भतः जृम्भणं कुर्वतः, सुतस्य, मुखे इति शेषः। इदं वक्ष्यमाणं खाद्यात्मकं जगत् , ददृशेऽपश्यत् ॥३६॥ तद्दृष्टजगदन्तर्भूतपदार्थानाह ॥ खमिति ॥ खमाकाशं, रोदसी द्यावापृथिव्यौ, एतत् द्यावापृथिव्यर्थकमव्ययम्। ज्योतिरनीकं शुक्राङ्गारकादिज्योतिश्चक्रं, आशा दिशः, सूर्यश्चेन्दुश्च वह्निश्च श्वसनश्चाम्बुधयश्च तान् , सूर्यादीनामितरेतरयोगद्वन्द्वः। द्वीपान् जम्ब्वादीनन्तरीपान् , नगान् गिरीन् , तद्दुहितॄर्नदीः, वनान्यरण्यानि, यानि स्थिरजङ्गमानि स्थावरजङ्गमात्मकानि भूतानि, तानि च, ददृशे ॥ ३७ ॥ सेति ॥ हे राजन् , मृगशावाक्षी मृगबालनयनसमाननयना, सा यशोदा, सुतस्य मुखे इति शेषः। विश्वं खादियुक्तं सकलं जगदित्यर्थः। वीक्ष्यावलोक्य, संजातः वेपथुः शरीरकम्पो यस्याः सा तथाभूता सती, सहसा, नेत्रे स्वकीयेऽक्षिणी, संमील्य, सुविस्मिता आसीद् बभूव ॥ ३८ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थवबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे सप्तमोऽध्यायः ॥ ७ ॥

श्रीहरिसूरिविचितं श्रीभक्तिरसायनम्

सा वीक्ष्येतिः १०.७.३७.

दिव्यानामपि मुनिसिंहचक्षुषां यद् द्रष्टुं न प्रभवति शक्तताऽत्र रूपे।
का शक्तिर्लघु-मृगशाव-नेत्रयोरि-त्यासीत् सा नयननिमीलितेति युक्तम् ॥ ४५ ॥

श्रीशकल्प० ॥

इती श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने सप्तमोऽध्यायः ॥ ७ ॥

कृष्णप्रिया

जब वे प्रायः दूध पी चुके और माता यशोदा उनके रुचिर मुसकान से युक्त मुख को चूम रही थी उसी समय श्रीकृष्ण को जँभाई आ गयी और माता ने उनके मुख में यह देखा ॥ ३५ ॥ उसमें आकाश, अन्तरिक्ष, ज्योतिर्मण्डल, दिशाएँ, सूर्य, चन्द्रमा, अग्नि, वायु, समुद्र, द्वीप, पर्वत, नदियाँ, वन और चराचर प्राणी समस्त स्थित हैं ॥ ३६ ॥ परीक्षित! अपने पुत्र के मुँह में इस प्रकार सहसा सारा जगत् देखकर मृगशावकनयनी यशोदाजी का शरीर काँप उठा। उन्होंने अपनी बड़ी-बड़ी आँखें बंद कर लीं। वे अत्यन्त आश्चर्यचकित हो गयीं ॥ ३७ ॥

इति सातवाँ अध्याय का हिन्दी अनुवाद समाप्त।

◆

अथाष्टमोऽध्यायः

श्लोकाः	अनु.	त्रि. उ.	व.	मंदा.	उ.	श्लो. अ.	उ. अ.	प. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
५२	४१	४	४	३	११	१९४०	६५	४७	२०५२	६४	४

[1]श्रीशुक उवाच

गर्गः पुरोहितो राजन् यदूनां सुमहातपाः । व्रजं जगाम नन्दस्य वसुदेवप्रणोदितः ॥ १ ॥
तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृताञ्जलिः । [2]आनर्चाधोक्षजधिया प्रणिपातपुरस्सरम् ॥ २ ॥
सूपविष्टं कृतातिथ्यं गिरा सुनृतया मुनिम् । नन्दयित्वाब्रवीद् ब्रह्मन् पूर्णस्य करवाम किम् ॥ ३ ॥
महद्विचलनं नृणां गृहिणां दीनचेतसाम् । निः[3]श्रेयसाय भगवन् कल्पते नान्यथा क्वचित् ॥ ४ ॥

कर्वमक्षमा

अन्वयः—राजन् वसुदेवप्रणोदितः सुमहातपाः यदूनां पुरोहितः गर्गः नन्दस्य व्रजं जगाम ॥ १ ॥ तं दृष्ट्वा प्रत्युत्थाय कृताञ्जलिः परमप्रीतः प्रणिपातपुरःसरम् अधोक्षजधिया आनर्च ॥ २ ॥ कृतातिथ्यं सूपविष्टं मुनिं सुनृतया गिरा नन्दयित्वा अब्रवीत् ब्रह्मन् पूर्णस्य किम् करवाम ? ॥ ३ ॥ भगवन् महद् विचलनं दीनचेतसां गृहिणां नृणां निःश्रेयसाय कल्पते क्वचित् अन्यथा न ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अष्टमे नामकर्मास्य बालक्रीडाकुतूहले ॥ मृद्भक्षणाभियोगे च विश्वरूपं निरूप्यते ॥ १ ॥
विश्वरूपादिबालस्य निशम्याऽऽशंकिनः पितुः ॥ नामकृद्गर्गवाक्येन निजं तत्त्वमसूसुचत्॥ २ ॥

पूर्णश्चेत्कथं धनिनां गृहमागतस्तत्राह । महद्विचलनमिति । महतां स्वाश्रमादन्यत्र विचलनं न स्वार्थं किन्तु गृहिणां मंगलाय । ननु तर्हि त एव महद्दर्शनार्थं किमिति नागच्छंति तत्राह । दीनचेतसां कृपणानां क्षणमपि गृहं त्यक्तुमशक्नुवतामित्यर्थः ॥ १–४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बालक्रीडायाः कुतूहले कौतुके मृद्दशनसंबंधे च (१) । आशंकिनः । शंकावतः । पितुः नंदस्य । निजं तत्त्वं स्वमैश्वर्यम् (२) सुमहातपाः सर्वतपस्विमुख्यः ॥ १ ॥ अधोक्षजधिया "अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि" इत्युक्तेः ॥ २ ॥ सूनृतया यथार्थमधुरया । पूर्णस्य कृतकृत्यस्य । नंदयित्वा श्लाघयित्वा ॥ ३ ॥ पूर्णत्वमाशंक्य समाधत्ते महदित्यादि । निश्श्रेयसत्वमाशंकते–नन्विति । यदि महद्विचलनं गृहिमंगलं तर्हि तदा । त एव गृहिण एव । इत्यर्थ इति । इदं कृतमिदं करिष्य इत्येवमिति कृत्यासक्तत्वात्तेषां नहि महद्दर्शनावकाश इति भावः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमैश्वर्यसम्वलितं बाल्यचरितमसुरमारणप्रसङ्गेन लीलान्तरव्यन्तरितमप्युक्त्वा पुनः परावृत्य केवलं बाल्यस्वाभाविकं परममनोहरं यथाक्रमं कथयन्नादौ दिगविशिषशताह इति ज्योतिःशास्त्राभिप्रायेण प्रायः शततमदिने नामकरणमाह—गर्ग इत्यादिना जना इत्यन्तेन । हे राजन्निति पूर्वलीलाश्रवणसुखाविष्टं राजानं कथान्तरेऽवधापयति, सुमहातपाः अनिर्वचनीयभाग्यवान् येन श्रीवसुदेवस्य श्रीनन्दस्य श्रीकृष्णस्य चैवं परमात्मीयतां प्राप्त इति भावः ॥ १ ॥ आनर्च नन्द इति शेषः । अधोक्षजधिया परमेश्वर इव भक्त्येत्यर्थः ॥ २ ॥ सूपविष्टं पादप्रक्षालनादिना पथि श्रमापनोदनेन सदासने सुखोपविष्टं कृतम् आतिथ्यं मधुपर्कार्पणलक्षणं यस्य तं सूनृतया मधुरस्तोत्ररूपया मुनिं नन्दाभिप्रेतश्रवणाय प्राक् कृतमौनमित्यर्थः । पूर्णस्य श्रीभगवद्भक्त्या सिद्धसर्वार्थस्य तत्र हेतुः ब्रह्मन् हे सर्ववेदार्थज्ञानेन बृहत्तम ! "भगवान् ब्रह्म कार्त्स्न्येन" इत्यादिना "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिना च तद्भक्तावेव तात्पर्यपर्यवसानात् ॥३॥ महतां श्रीभगवत्सेवादिनिष्ठत्वाद्विशेषेण चलनं स्वस्थानादन्यत्र

---

१. बादरायणिरुवाच–इति कस्यचित् । २. अभ्यर्च्या–इति कस्यचित् । ३. नैः श्रेयसाय–इति कस्यचित् ।

दूरे गमनं नृणामिति स्वभावत ऐहिकपारलौकिककर्मपराणामित्यर्थः। तत्रापि गृहिणां जायापुत्रादीनामपि तत्तद्विलक्षणानाम् अत एव दीनचेतसां निःश्रेयसाय सर्वमङ्गलाय भगवन् हे सर्वज्ञेत्यर्थः। प्रवृत्तिश्चेदित्यादिवचनात् अतो विज्ञानां भवद्विधानाम् अस्मद्विधेषु कृपया स्वयमागमनमुचितमेवेति भावः। कल्पते घटते अन्यथा दीनजननिःश्रेयसार्थव्यतिरेकेण कदाचिदपि न घटते महतां निःश्रेयसस्वाभाव्यात् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमैश्वर्य्यसम्वलितं बाल्यचरितमुक्त्वाधुना केवलं बाल्यस्वाभाविकं परममनोहरं यथाक्रमं कथयन्नादौ यथाकालं नामकरणमाह गर्ग इत्यादिना जना इत्यन्तेन। हे राजन्निति क्षत्रियाणां पुरोधसैव संस्काराः क्रियन्त इति व्यवहारा भवता ज्ञायत एवेति भावः। सुमहातपाः, यद्वा, श्रीभगवन्नाम–भाग्यवान्, यद्वा, महाभागवतोत्तम इत्यर्थः। वसुदेवेन प्रेरित इति पुत्रसंस्कारेऽप्याज्ञाया अपेक्ष्यत्वात् ॥ १ ॥ आनर्च्च नन्द इति शेषः। अधोक्षजधियेन्द्रियज्ञानागोचरोऽपि भगवानयं साक्षाद्भूत इति-बुद्ध्या, इति परमभक्तिरुक्ता; यद्वा, शकटस्य श्रीभगवदुपर्य्यपतनादिना शकटाक्षस्याधः पुनर्जात इवेत्येवं शकटभञ्जनानन्तरं व्रजेऽधोक्षजनाम्ना प्रसिद्धे तस्मिन् स्वपुत्रधिया तदासक्त्या तत्क्षेमार्थमित्यर्थः। प्रणिपातो दण्डवत्प्रणामो विनयेनातिनम्रता वा, तत्पूर्व्वकम् ॥ २ ॥ सुपविष्टं पादप्रक्षालनादिना पथि–श्रमापनोदनेन सदासने सुखोपविष्टम्; कृतमातिथ्यं मधुपर्कार्पणलक्षणं यस्य तम्; सूनृतया मधुरस्तोत्ररूपया मुनिं परमाच्य्यम्, किंवा श्रीनन्दाभिप्रेतश्रवणाय प्राक्कृतमौनमित्यर्थः। पूर्णस्य श्रीभगवद्भक्त्या सिद्धसर्व्वार्थस्य। तत्र हेतुः—महान्! हे सर्व्ववेदस्वरूपेति वेदस्य हि सृष्ट्यादौ स्तुत्या सुप्रसन्ने भगवति भक्तिविशेषेणाभीष्टसिद्धेः; तदाख्यानं बृहद्वामनपुराणे व्यक्तमेव; यद्वा, साक्षाद्ब्रह्मस्वरूपेति तस्य हि भगवन्महाविभूतित्वेन स्वत एव साक्षात् सर्व्वार्थसम्पत्तेः ॥ ३ ॥ महतां श्रीभगवत्सेवैकनिष्ठानां विशेषेण चलनं स्वस्थानादन्यत्र दूरे गमनम्। नृणामिति कर्म्मस्वधिकारेण सदा तत्पराणामित्यर्थस्तत्रापि गृहिणामत एव दीनचेतसां निःश्रेयसाय सर्व्वमंगलाय। भगवन्! हे सर्व्वज्ञेत्यर्थः, 'प्रवृत्तिश्च निवृत्तिं' इत्यादिवचनात्; यद्वा, साक्षाच्छ्रीनारायणेत्यर्थः,—पूजादौ भगवद्भागवतयोरभेदात्। एवं तस्य सर्व्वसामर्थ्यमपि सूचितम्। कल्पते घटतेऽन्यथा दीनजननिःश्रेयसार्थव्यतिरेकेण कदाचिदपि न घटते, यतः कथमपि महतां विपद्विरनाद्यभावात्; यद्वा, महतां विचलनं श्रीभगवत्सेवालक्षणात् स्वधर्म्मात् किञ्चित् स्खलनमपि गृहिणां निःश्रेयसाय समर्थं स्यादन्यथा तेषां स्वगृहे भगवत्सेवापरतयान्यत्राप्रस्थानेनान्यकर्म्मानाचरणेन च गृहासक्तानां कदाचिदपि निःश्रेयससिद्धेरित्यर्थः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तं गर्गं प्रीतः नन्दः सूनृतया मधुरया ॥ २–३ ॥ महद्विचलनं महतामागमनम् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ गर्गेण कृतसंस्कारस्य तत्सूचितमाहात्म्यस्य भगवतो मात्रे विश्वरूपप्रदर्शनं तद्विस्मापनादिरूपं च चरित्रमाहाष्टमे गर्ग इति। गर्गः यदूनां पुरोहितोऽत एव वसुदेवेन प्रचोदितः नन्दस्य व्रजं जगाम ॥ १ ॥ अधोक्षजधिया भगवद्बुद्ध्या नमस्कार-पूर्वकं यथा तथा आनर्च अर्चितवान्नन्द इति शेषः ॥ २ ॥ अतिथये निवेदितमन्नादिकमातिथ्यं तत्कृतं भुक्तं येन तं सूपविष्टं गर्गं सूनृतया मधुरया गिरा नन्दयित्वा हर्षयित्वा अब्रवीत्, उक्तिमेवाह—ब्रह्मन्नित्यादिना यदूनामहमित्यन्तः श्लोकत्रयेन। हे महन्! पूर्णस्याऽऽप्तकामस्य तव किं करवाम न किमप्यपूर्वप्रीतिकरं कर्म कर्तुं प्रभवामेत्यर्थः। यद्वा पूर्णस्य परब्रह्मानन्दानुभवपूर्णस्य तव किं करवाम किङ्करा वयमित्यर्थः ॥ ३ ॥ पूर्णश्चेदहं कथं धनिनां गृहमागतः? तत्राह—महद्विचलनमिति। हे भगवन्, महतां भवतां विचलनं स्वाश्रमादन्यत्र सञ्चारः विषयादिसङ्गदीनचेतसां मादृशां गृहिणां निःश्रेयसायैव कल्पते अन्यथा तु कदाचिदपि न कल्पते नतु स्वार्थं किन्तु मादृशानुग्रहार्थमेवेत्यर्थः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हरेस्तत्तदवतारे तत्तद्योनिविहितं कर्म कर्तव्यमिति देवजनशिक्षणार्थं तद्विधीयतेऽस्मिन्नध्याये ॥ १ ॥ आनर्च पूजितवान् ॥ २ ॥ सूनृतया यथार्थमधुरया पूर्णस्य कृतकृत्यस्य ॥ ३ ॥ महतां पुंसां विचलनं गमनम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अधोक्षजधिया तदधिष्ठानत्वेनाभेददृष्ट्या ॥ १–४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अष्टमे नामकरणं रिङ्खणं गव्यमोषणम्। मृद्भक्षणं विश्वरूपदर्शनं च निगद्यते ॥

असुरवधप्रसङ्गसङ्गत्यैव तृणावर्त्तवधमुक्त्वा तत्प्राचीनानि नामकरणादीनि चरितान्यनुस्मृत्य वक्तुमुपक्रमते—गर्गः पुरोहित इत्यादिना ॥ १–३ ॥ पूर्णस्य तव किं करवाम अपि तु न किमपि कर्त्तुं महीम इत्यर्थो वा किंशब्दस्य प्रश्नार्थत्वात् पूर्णस्य

तव किमपेक्षितं वर्तते तत् ब्रूहि वयं करवामेत्यर्थो वा आद्ये मम त्वद्गृहागमनस्य वैयर्थ्यं द्वितीये पूर्णत्वस्येति चेन्मैवमुभयत्राप्युभयं न व्यर्थं प्रत्युताभिनन्दनीयत्वात् परमसार्थकं कृपापारवश्यात् सनत्कुमारवामनादीनां परमपूर्णानामपि पृथुबलिप्रभृतीनां गृहागमनस्य दृष्टत्वादित्याह- महतां स्वाश्रमादन्यत्र विचलनं गृहिणां निःश्रेयसाय परममङ्गलाय कल्पते समर्थं भवति तदेव तेषामपेक्षितमपीत्यर्थः । नृणामिति गृहिष्वपि मध्ये नृणामेव न तु देवादीनाम् एवं नृष्वपि मध्ये गृहिणामेव न तु ब्रह्मचार्यादीनां तत्रापि दीनं तृणादपि दुर्भगम्मन्यं चेतो येषामिति तेष्वेव महत्कृपाधिक्यसम्भवात् न तूत्तमम्मन्यकठोरवक्रचेतसाम् इत्यर्थः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अष्टमे गर्गकृतं बालनामकरणं बालचरितं च वर्णयति-गर्ग इति ॥ १-३ ॥ महतां विशेषतः चलनं जनमुद्दिश्य गमनं निःश्रेयसाय भुक्तिमुक्तिरूपाय कल्याणाय ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

वर्णितं नामकरणं रिङ्गणं दधिमोषणम् । विश्वरूपेक्षणं मातुरैश्वर्यज्ञानं तथाऽष्टमे ॥

दुष्टवधप्रसङ्गेन तृणावर्तवधो विहितः ततः पूर्वाणि नामकरणादीन्यभिधत्ते गर्ग इति ॥ १ ॥ अधोक्षजधिया भगवत्तनूबुद्ध्या ॥ २ ॥ सूपविष्टं पादप्रक्षालनादिपूर्वकं सदासने स्थितं कृतम् आतिथ्यं मधुपर्कार्पणलक्षणं यस्य सूनृतया मधुरस्तोत्ररूपया पूर्णस्य श्रीहरिभक्त्या सिद्धसर्वार्थस्य ॥ ३ ॥ पूर्णश्चेद्धनिनां गृहे कथमागतस्तत्राह महदिति महतां स्वाश्रमादन्यत्र विचलनं गृहिणां निःश्रेयसाय न तु स्वार्थं ननु गृहिणस्तद्दर्शनाय कुतो न गच्छन्ति तत्राह दीनचेतसामिति जायापुत्रादिहितचिन्तया क्षीणमनसां गृहं त्यक्तुमसमर्थानामित्यर्थः । अन्यथा दीनजननिःश्रेयसार्थाद्विना न घटते ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ तत्तदवतारे तत्तत्कुलानुकूलकर्म कर्तव्यं द्विजमनुजशिक्षणार्थमिति मतिर्गर्गादिरचितसूचितं तत्समयेऽच्युतो न मेन इति शंसति ॥ गर्ग इत्यादीति । वसुदेवप्रचोदितो गर्गो नन्दस्य व्रजं जगाम ॥१॥ आनर्चापूजयत् । अधोऽक्षजधिया सर्वसभाजनभाजनं जनार्दन इति मत्या प्रणिपातो दण्डवदवनौ पातो नमनमिति यावत् तत्पूर्वकम् ॥ २ ॥ नन्दयित्वा सन्तोष्य पूर्णस्यास्मत्कर्तव्यकर्मरहितस्याथाऽपि किं करवामेति सूनृतया गिराऽब्रवीत् ॥ ३ ॥ महतां विचलनं सञ्चारो निःश्रेयसाय । अचतुरनिपातः । क्षेमायेह मोक्षाय च ॥ ४ ॥

श्रीसुबोधिनी

येनैव तु चरित्रेण सत्त्वं शुध्यति सर्वथा । सर्वस्य मूलं यद्यस्मात् तदष्टम उदीर्यते ॥ १ ॥
नामान्यग्रे शोधकानि ततो रूपाण्यनेकशः । ज्ञानं भक्तिश्च भाग्यं च पञ्चार्था सर्वशोधकाः ॥ २ ॥
संस्कृतान्येव नामानि शोधकानीति संस्कृतिः । स्वेच्छालीलाविशिष्टं हि रूपमानन्दभावतः ॥ ३ ॥
अन्येच्छया कृतान्यत्र चरित्राणि ततोऽन्यथा । ज्ञानं प्रत्यक्षतो दृष्टं माहात्म्यज्ञानपूर्वकम् ॥ ४ ॥
स्नेहश्चालौकिके तद्वद् हेतुश्च महतां कृपा । पूर्वस्मिन् हृदये सिद्धे स्वत एवाग्रिम भवेत् ॥ ५ ॥
तत्राद्यं द्वितीयं प्रोक्तं गुर्वर्थं सङ्गवर्जनम् ॥ ५½ ॥

निरोधे भगवदासक्तिसिद्ध्यर्थमन्तःकरणशुद्ध्यर्थं च भगवतो नामकरणोत्सवमाह गर्ग इत्येकविंशत्या, चिरकालोत्पन्नोसंस्कृत एव तिष्ठत्विति त्वतो नामाकरणं चिरकालातिक्रमश्च तथैव भगवत्प्रेरणात् कालस्य निमित्तत्वाभावाच्च कोपि दोषस्तज् ज्ञात्वा वसुदेवः स्वपुरोहितं प्रेषयामास क्षत्रियाणां पुरोधसैव संस्काराः क्रियन्त इति वसुदेवश्चात्मानमाधिदैविकवसुदेव नन्दे स्थापितवान्, तेन बलभद्रभगवतोरविशेषेण पुत्रत्वज्ञानादिकं न दोषाय, भयनिवृत्त्यर्थं बोधनं चापेक्षितं प्रकाशात्, अन्यथा प्राकृतानामलौकिकबुद्धिरपि बाधिकातो नामकरणहेतुभूतो गर्गः समागत इत्याह-गर्ग इति, राजन्निति सम्बोधनं गुणचर्या राजपरिज्ञातेति ज्ञापनार्थं, यदूनां पुरोहितो वंशस्यैव स्वत एव हितकारी, तेनान्तःकरणशुद्धिरुक्ता, महानुभावत्वमाह सुमहातपा इति, सुमहत् तपो यस्य सः अकस्मात् कार्यसिद्धिं मुहूर्तं ज्ञात्वा नन्दस्य व्रजं जगाम, अन्यत्र स्थितः शुको वदति, पितुराज्ञाव्यतिरेकेण पुत्रसंस्कारो न कर्तव्य इति तदर्थमाह वसुदेवेन प्रकर्षेण चोदितः प्रेरितः ॥ १ ॥ आगतस्य पुरस्कारमाह तं दृष्ट्वेति, आकाङ्क्षितपदार्थदर्शनात् परमप्रीतः, प्रत्युत्थानं धर्मनिष्ठताज्ञापनार्थं, कृताञ्जलिर्विनीतस्तेनान्तःकरणशुद्धिरुक्ता, अतिथिरयमित्यत्र भगवत्पूजां कृतवानित्याहानर्चेति, अतिथिबुद्ध्यापि पूज्यते हरिबुद्ध्याप्यतिथि "रातिथ्येन तु विप्राग्र्य" इति वाक्यात्, तदाहाधोक्षजधियेति, चतुर्भुजं भगवन्तं ज्ञात्वैवार्चां कृतवान्, तत्रापि भक्तिमार्गानुसारेणेत्याह प्रणिपातपुरःसरमिति, प्रणिपातोऽपराधदूरीकरणं, तद् दासस्यैव नित्यसेवकत्वं सम्भवति नान्यस्य ॥ २ ॥ एतदेव पुरस्सरमग्रे यथा भवति तथा प्रार्थना वक्तुं किञ्चिदुक्तवानित्याह सूपविष्टमिति, सुष्ठु

गमनक्लेशाभावेन वैयग्र्यं परित्यज्योपविष्टं, स्वकृत्यमाह कृतमातिथ्यं यस्मै यस्मिन्निति वा, अतिथेर्हितं भोजनान्तं कर्म तद् गृहस्थकर्तव्यं, भक्तिमार्गानुसारेण पूजितत्वादस्मिन् स्नेहेऽधिके जाते गद्गदया वाण्याब्रवीत्, येन स सर्वमेव सामर्थ्यं विनियुञ्ज्यात्, कापट्याभावायाह मुनिमिति, स हि सर्वज्ञस्तदेव सर्वं जानाति, अन्यत्र भगवद्बुद्ध्या स्तोत्रं क्रियमाणमारोपितविषयं भवतीति तन्निवृत्त्यर्थमाह सूनृतयेति स्तोत्रेण, नन्दयित्वा सन्तुष्टं ज्ञात्वाब्रवीत्, ब्रह्मन्निति सम्बोधनं ब्राह्मणस्य तत्परमोत्कर्षख्यापनं, अयं ब्रह्मशब्दः परब्रह्मवाचक इति ख्यापयितुं पूर्णस्य करवाम किमित्याह, "बृहत्त्वाद् बृंहणत्वाद् ब्रह्म" दश दिक्षु किमीरितमिह तादृशस्यान्यैः कर्तव्य उपकारे देशाभावात् कृत्रिमस्य हीनत्वात् तत्रापि सदृशस्याज्ञानात् किं करवाम ? देहेन्द्रियान्तःकरणानां न्यूनत्वात् तत्रोपकारः कर्तुं शक्यते, ब्रह्मभूतदध्यासनिवृत्तेस्तत्र कृतं न प्रयोजनाय भवतीति ॥ ३ ॥ एतावतास्माभिः कोऽप्युपकारः कर्तुं न शक्यत इत्युक्तं, त्वया त्वनुक्तमेव क्रियत इत्याह महद्विचलनमिति, महान्तः स्वतः कार्याभावान्न कुत्रापि गच्छन्ति तादृशाश्चेद् गच्छन्ति परोपकारार्थमेव गच्छन्तीति ज्ञातव्यं विशेषेण चलनं ग्रामान्तरगमनं न तु स्नानाद्यर्थं, तत्र परार्थे विचार्यमाणे यस्यैव गृहे गच्छन्ति तस्यैव कार्यं साधयन्तीति निश्चीयते, अन्यथा गृहासक्तचित्तानां वृद्धानां तत्रापि परमदुःखेन पीडितानां दीनचेतसां गृहे न गच्छेयुस्तेषां च मुख्यं प्रयोजनं तद्दुःखनिवृत्तिस्ततः परमानन्दावाप्तिरिति, अतो निःश्रेयसायैव गमनं, तादृशफलदाने सामर्थ्यं भगवन्निति, यद्यपि ते न प्रार्थयन्ति तथापि गमनमेव तथा कल्पते, अन्यथा एतत्फलानुद्देशे क्वचिदपि देशे गमनं न कल्पते ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अष्टमेऽध्याये प्रकरणार्थोक्तौ, संस्कृतान्येव नामानीति। सत्त्वशोधनस्य मर्यादामार्गीयत्वाद् गुरूपदेशलक्षणसंस्कारवन्त्येव तानि तथेत्यर्थः। इयदवधि यशोदाद्यधीनमेव गमनादिकमुक्तमस्मिन् सत्त्वशोधकाध्याये स्वातन्त्र्येण रिङ्गणादिलीलोक्त्या सत्त्वशुद्धिपर्यन्तं स्त्रीसम्बन्धि लीलाविशिष्टं रूपं न भावनीयम्। पाक्षिकोऽपि दोषः परिहरणीय इति न्यायात्। किन्तु केवलभगवत्कृतलीलाविशिष्टमेव रूपं तच्छुद्ध्यनन्तरं सा लीला भावनीयेति तात्पर्यं ज्ञाप्यते। एतदेवाहुः स्वेच्छा लीलेत्यादिना। स्वेच्छया, न त्वन्येच्छया कृता या लीला तद्विशिष्टं रूपं शोधकमिति सम्बन्धः। पूर्वस्मादेतस्य वैलक्षण्ये हेतुमाहुः आनन्देति। आनन्दस्वरूपत्वादित्यर्थः। गूढाभिसन्धिमुद्घाटयन्ति अन्येच्छयेति। भक्तानां भगवत्सम्बन्धेनैवानन्दो भगवांस्त्वानन्दरूप एवेत्यस्मिन्नध्याये न दुःखकथनम्, अन्याधीने चरित्रे कथंचिद्दुःखमप्युक्तमिति तस्माद्वैलक्षण्यमित्यर्थः। कंसस्यैतज्ज्ञानं स्वानिष्टमित्युक्त्या रहसि नामकरणाद्दुःसङ्गवर्जनमङ्गत्वेन सूचितमिति तदाहुः दुःसङ्गवर्जनमिति ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अथाष्टमाध्यायं व्याचिख्यासवोऽवान्तरसङ्गतेरवसरस्य स्फुटं प्रतीयमानत्वात् तामनुक्त्वैवाध्यायतात्पर्यं निरूपयन्तः पूर्वाध्यायोक्तलीलयैव स्वासक्तेः सिद्धत्वात् किमिमचरित्रेणेत्याकाङ्क्षायां तत्कथनप्रयोजनमाहुर्येनेत्यादि सत्त्वमन्तःकरणं तत् सर्वस्य निरोधस्य मूलं कृतस्य करिष्यमाणस्य च निरोधस्य सहकारि यस्मात् तस्माद् येनैव चरित्रेण सत्त्वं सर्वथा शुध्यति तच्चरित्रमष्टम उदीर्यते, तथा चोपोद्घातः स्कन्धार्थेऽध्यायसङ्गतिरित्यर्थः, यद्वा सत्त्वं देहेन्द्रियप्राणान्तःकरणात्मसङ्घातः, तथा चाविद्यानाशेऽपि घृतभाण्डे गन्धवत् तत्कार्यं न नष्टमिति तन्नाशनार्थमेतच्चरित्रमुदीर्यत इत्यर्थः, अत्र च तच्छोधनद्वाराविद्याकार्यनाशनं ज्ञेयं, न चोक्तसङ्घातशोधनमेवात्राभिप्रेतमित्यत्र किं मानमिति शङ्क्यं, शोधकपञ्चकोक्तेरेव मानत्वात्, तत्र नाम्नान्तःकरणस्य "यच् छृण्वतोपैत्यरति" रितिवाक्याद् रूपमिन्द्रियस्य दर्शनादिना भगवत्परतासाधकत्वाज् ज्ञानं देहस्याध्यासनिवर्तकत्वाद् भक्तिः प्राणस्य "प्राणबुद्धिमनःस्वात्मे"तिवाक्योक्तप्राणादिनिष्ठप्रियत्वस्य भगवदेकवृत्तित्वापादकत्वाद् भाग्यं चात्मनस्तस्य पूर्वजन्मीनत्वेन सर्वमूलत्वात्, तादृशी चात्र गुरुकृपा तां विना जीवे भगवदनुग्रहस्याजायमानत्वात् तत्राप्रसिद्धत्वात् तैः सत्त्वशोधने कारणमाहुर्नामानीत्यादि, अग्र इति पूर्वं, तथा चैतैः सङ्घातशुद्धिरित्यर्थः, ननु नामादीनां सर्वत्र प्रसिद्धत्वात् तैः सत्त्वशोधनं स्वतो भविष्यत्येवेति पुनरत्र कथनस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः संस्कृतानीत्यादि, तत्तात्पर्यं टिप्पण्यामाहुः सत्त्वेत्यादि, सुबोधिनीस्थकारिकोक्तपदानामर्थस्त्वेवं बोध्यः, शोधकानीति, संस्कृतिरिति, यतः संस्कृतान्येव नामानि सत्त्वशोधकानीतिहेतोः संस्कृतिः संस्कारोऽत्रोच्यत इत्यर्थः, हि यतो हेतो रूपं स्वेच्छालीलाविशिष्टमेवानन्दत्वाच्छीघ्रं सत्त्वशोधकं तत् तस्माद्धेतोरत्रान्येच्छया कृतानि चरित्राणि ततोऽन्यथा शीघ्रं सत्त्वशोधकानि न भवन्ति किन्तु विलम्बेन शोधकानीत्यर्थः, ज्ञानं माहात्म्यज्ञानपूर्वकं तत् प्रत्यक्षतो दृष्टं सत्त्वशोधकं च पुनरलौकिके स्नेहो भक्तिरितियावत् सोऽपि तद्वन्माहात्म्यज्ञानपूर्वक एव शोधक इत्यर्थः, हेतुर्हेतुभूता महतां कृपा भाग्यरूपा तद्वद् गुरुभगवतोर्माहात्म्यज्ञानपूर्विकैव सत्त्वशोधिकेत्यर्थः, पूर्वं नाम्नामेव कथने हेतुमाहुः पूर्वस्मिन्नित्यादि, नाम्नि चेद् द्वयं सिद्धं स्थिरं भवेत् तदिमं स्वत एव भवेदित्यर्थः, शुद्ध इतिपाठे लौकिकत्वेन ज्ञानयुक्ते त्वखण्डशब्दे ब्रह्मात्मकत्वेन ज्ञानयुक्त इतियावत् तादृशे हृदये सतीत्यर्थो बोध्यः, शेषं पूर्ववत् तथा च नाम्न्यलौकिकत्वज्ञानाभावे स्वरूपेऽपि तथा ज्ञानं न स्यात् तथा सति शोधनस्यैवासिद्धिरित्यर्थः, नाम्न्यप्यङ्गद्वयमाहुस्तत्रेत्यादि, इदं च रहसि नामकरणस्य तात्पर्यं ज्ञेयं, न च गुणवर्मविचारे पूर्वेऽध्याये स्वैश्वर्यवीर्ययशसां लीलाकरणत्वेन निरूपणाद्

श्रीस्तथा बाध्या सा चात्र न स्फुटेति शङ्क्यं, वासुदेवनामार्थनिरूपणे "श्रीमा" निति कथनाद् रूपनिरूपणे च "श्रीमुखालोकिनीभि" रित्यत्र श्रीव्याप्तिकथनाच्च तस्यापि कारणतायाः सूचितत्वादिति बोध्यं, एवं तात्पर्यं निरूप्य सामान्यतो जातेपि निरोधे विशेषासक्तिप्रभृतिसिद्ध्यर्थं पूर्वं नामकरणोत्सव उच्यत इत्याहुर्निरोध इत्यादि, अलौकिकभावरतानां विशेषतो न निरोधसिद्धिरिति तेषां स्वासक्तिसिद्ध्यर्थं सर्वेषामन्तःकरणशुद्ध्यर्थं चेयं लीलोच्यत इत्यर्थः, एकविंशत्येत्यत्र यदूनामपृथग्भावात् 'सङ्कर्षणमुशन्त्युते'ति तद्धर्मैकत्वेन गणितं तेनैकविंशतिरिति ज्ञेयं, तत्र पूर्वं कालातिक्रम उपपत्तिमाहुश्चिरेत्यादि न दोष इत्यन्तं, श्रीवसुदेवकृतगर्गप्रेषणस्य तात्पर्यमाहुस्तज् ज्ञात्वेत्यादि, तदिति नामकरणं, आधिदैविकवसुदेवमिति निगमात्मकं स्वस्वरूपं, गर्गागमनप्रयोजनमाहुर्भयनिवृत्त्यर्थं बोधनं चापेक्षितमित्यादि कंसज्ञानकृतस्य स्वकापट्यकृतस्य च भयस्य निवृत्त्यर्थं तदीयपुत्रत्वस्य बोधनमप्यपेक्षितं प्रसङ्गस्य विद्यमानत्वात्, अन्यथा पुत्रत्वज्ञानाभावे प्राकृतानां मान्याणामलौकिकबुद्धिरपि बाधिका रहसि करणाज्ञायां किमित्ययं लोकविरुद्धं वदतीतिबुद्धिर्विविधसन्देहोत्पादिका स्यात्, अपिशब्दात् स्वस्यापि कापट्यमतस्तथेत्यर्थः ॥ १ ॥ तं दृष्ट्वेत्यत्र चतुर्भुजमित्यधोक्षजपदतात्पर्यम् ॥ २ ॥ सूपविष्टमित्यत्र गद्गदयेति गिरेत्यस्य तात्पर्यं सूनृतये'त्यत्र पाठान्तरं वा, बृहत्त्वादित्यादि, तादृशस्येति ब्रह्मभूतस्य, देशाभावादिति तदीयदेशाभावात्, ननु पूजायां वस्तुतो भगवदीयमपि स्वीयत्वेनाभिमतं पूज्याय भगवते दत्तं भगवानुपकारत्वेन मनुते तथात्रापि स्यादत आहुः कृत्रिमस्येत्यादि, स्वीयत्वेनाभिमतस्य वस्तुन उपकृतिरूपत्वाभावेन हीनत्वात्, ननु तथापि स्वविहितमार्गीयत्वात् तेन फलभवने "प्रत्युपाहृतं भक्तै'रितिवाक्याद् भक्तिमार्गानुसारेण सर्वमप्युपकृतिरूपं भविष्यतीत्यत आहुस्तत्रापीत्यादि भक्तिमार्गेपि तादृशस्य भगवद्रुचिविषयस्याज्ञानात् कृतमप्यकृतप्रायमित्यर्थः, नन्वीश्वरस्य देहाद्यभावान् न तत्कृतोपचारोपेक्ष्यते गर्गे तु तत्सद्भावादुपचारो नानुचित इत्याशङ्कायामाहुर्देहेत्यादि, तथा च ब्रह्मभूतत्वान् न तस्यापि तदपेक्षेत्यर्थः ॥ ३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अष्टमेध्याये कारिकासु येनैवेति, येनैव चरित्रेण सत्त्वं शुद्ध्यति तच् चरित्रमष्टमे उदीर्यते, तत्र हेतुः सर्वस्येति, यस्माद्धेतोस्तत् सत्त्वशोधनं सर्वस्य साधनकलापस्य मूलमत इत्यर्थः, अन्येच्छयेति अन्येच्छया कृतानि यानि चरित्राणि तत्र दुःखमप्युच्यते, अत्र स्वाधीनचरित्रे भगवत आनन्दरूपत्वात् ततोन्यथा प्रकारान्तरेण दुःखानुक्तिप्रकारेणोच्यते इतिशेषः, एवमन्वयः, आनन्दभाव इत्यस्याग्रिमकारिकायामन्वयः, अर्थस्तु टिप्पण्यां स्फुटः, प्रत्यक्षतो दृष्टमिति शोधकमितिशेषः, माहात्म्यज्ञानपूर्वकमलौकिके स्नेहश्च तद्वत्, शोधक इत्यर्थः, हेतुश्चेति एतच्चतुष्टये महत्कृपा हेतुः, तथा च कृपा परम्परया शोधिका, तथाप्यव्यभिचारितत्वात् साप्युक्तेतियुक्तिबोधनाय चकारः, पूर्वस्मिन्निति चतुष्टयमध्ये पूर्वस्मिन् पदार्थे हृदये सिद्धे स्वत एव तत्सामर्थ्यादेवाग्रिमं भवेत्, न तु साधनान्तरापेक्षा, नामश्रवणे सिद्धे तत्सामर्थ्यादेव रूपदर्शनं, तस्मिन् सिद्धे तादृशं ज्ञानं, तस्मिन् सिद्धे तादृशी भक्तिरिति, तत्राङ्गेति 'पुरुषश्च कर्मार्थत्वा'दितिप्रतितन्त्रन्यायेन गुरुरप्यङ्गमितिभावः। निरोधे इति निरोधनिरूपकस्कन्धे नामकरणोत्सवं प्रयोजनद्वयसिद्ध्यर्थमाहेत्यन्वयः ॥ १ ॥ तमित्यत्र चतुर्भुजमिति एकादशस्कन्धे पूजाविधाने 'लसच्चतुर्भुजं शान्तं ध्यायन्नर्चेत् समाहित'इत्यनेनातिथौ चतुर्भुजत्वेन ध्यानकथनादितिभावः ॥ २ ॥ सूपविष्टमित्यत्र आतिथ्यपदस्य निरुक्तिमाहुः अतिथेर्हितमिति, ब्राह्मणादित्वात् कर्मणि ष्यञ्, अतिथेर्हितरूपं तत्सम्बन्धि कर्म भोजनान्तमित्यर्थः ॥ ३ ॥ महद्विचलनमित्यत्र तेषां चेति मतभेदेन दुःखनिवृत्तिरानन्दावाप्तिश्च मोक्ष इतिद्वयमपि निःश्रेयसत्वेनोक्तम् ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

अष्टमाध्यायार्थकथने कारिकासु नामान्यग्रे शोधकानीत्यादि पूर्वमत्र नामकरणप्रसङ्गस्ततोग्रे "कालेन व्रजताल्पेने"त्यादिना रूपाणि निरूपितानि, तेन भगवन्नाम्ना शुद्धहृदयस्य भगवद्रूपदर्शनात् शुद्धिः रूपनिरूपणानन्तरं मृद्भक्षणप्रसङ्गेन भगवज्ज्ञानं, तस्य ज्ञानस्य सत्त्वशोधकत्वं, तत "इत्थं विदिततत्त्वाया" इत्यादिना भक्तिर्निरूपिता तस्याः शोधकत्वं, ततो "नन्दः किमकरोद् ब्रह्म"न्निति प्रश्ने 'द्रोणो वसूनां प्रवर' इत्यादिना भाग्यं निरूपितं, एवं भगवन्नामरूपज्ञानभक्तिभाग्यानि सत्त्वशोधकानि सिद्धान्याध्यात्मिकपक्षे। आनर्चाधोक्षजधियेत्यस्य विवृतौ चतुर्भुजं भगवन्तमिति अधोक्षजपदेनेन्द्रियातीतत्वकथनाद् द्विभुजस्य पुरुषोत्तमस्येन्द्रियग्राह्यत्वात् तत्र न सर्वेषामधोक्षजत्वबुद्धिरतश्चतुर्भुजरूपमेव अधोक्षजपदेनोच्यत इति तथोक्तम् ॥ २ ॥

(५) भगवदीयनिर्भयराममिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

अष्टमेध्याये येनैवेति का० ४२३। अत्राध्यायेवान्तरप्रकरणानि विभजन्ते नामानीति का० ४२३। 'गर्ग' इत्येकविंशत्या नामप्रकरणं, 'कालेनाल्पेने'त्यादिदशभी रूपप्रकरणं, 'एकदे'त्येकादशभिर्ज्ञानं, इत्थं विदिततत्त्वाया' इत्यादित्रिभिर्भक्तिः, 'नन्दः किमकरोद् ब्रह्म'न्नित्यादिसप्तभिर्नन्दभाग्यं, संस्कृतानीति का० ४४६। स्वेच्छया न त्वन्येच्छया कृता या लीला तद्विशिष्टं रूपं शोधकमिति सम्बन्धः, पूर्वस्मादेतस्य वैलक्षण्ये हेतुमाहुरानन्दभावत इति, आनन्दरूपत्वादित्यर्थः, इयदवधि यशोदाधीनमेव

गमनादिकमुक्तं, अस्मिन् सत्त्वशोधकाध्याये स्वातन्त्र्येण रिङ्गणादिलीलोक्ता, तथा च केवलभगवत्कृतलीलाविशिष्टमेव रूपं शोधकमिति भावः, गूढाभिप्रायमुद्घाटयन्ति अन्येच्छयेति का० ४५३/४। अन्येच्छया कृतानीत्यनन्तरं यानीतिशेषः, तथा चान्येच्छया कृतानि यानि चरित्राणि ततस्तेभ्यश्चरित्रेभ्योऽत्राध्याये उक्तानि चरित्राण्यन्ययेत्यन्वयः, तदेतद् व्याख्यातं टिप्पण्यां, भक्तानां भगवत्सम्बन्धेनैवानन्दो भगवांस्त्वानन्दरूप एवेत्यस्मिन्नध्याये न दुःखकथनं, अन्याधीने चरित्रे क्वचिद् दुःखमप्युक्तमिति, तस्माद् वैलक्षण्यमित्यर्थ इति, एवं नामादीनां पञ्चानां मध्ये नामरूपयोः सत्त्वशोधकत्वमुपपाद्य ज्ञानभक्तिभाग्यानां सत्त्वशोधकत्वमाहुर्ज्ञानमिति का० ४६३/४। ज्ञानं प्रत्यक्षत एव शोधकं दृष्टं, एवं माहात्म्यज्ञानपूर्वकं यथा स्यात् तथा अलौकिके भगवति स्नेहश्च तद्वच्छोधकः, महतां ब्रह्मादीनां भगवद्भक्तानां कृपा सत्त्वशुद्धौ हेतुः; पूर्वस्मिन्निति का० ४७३/४। पञ्चानां मध्ये पूर्वस्मिन् नामादिके द्वये सिद्धे सति अग्रिमं रूपादिकं स्वत एव हृदये सिद्धं भवेदित्यर्थः, तत्राङ्गेति रहसि नामकरणाद् दुःसङ्गवर्जनमकृत्वेन सूचितम् ॥ ४७३/४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नामकर्मास्य गर्गेण बाललीला तथैव च । मुखे विश्वप्रकाशादि चाष्टमे विनिरूप्यते ॥ १ ॥

अथ नामकरणवृत्तान्तमाह—गर्ग इति । हे राजन्! यदूनां पुरोहितः, अत एव पुत्रयोर्नामकरणार्थं वसुदेवेन प्रचोदितो गर्गो नन्दस्य व्रजं जगाम आगतः । तस्य भगवत्संस्कारकरणयोग्यतां सूचयन्नाह—सुमहातपा इति । तं गर्गं दृष्ट्वा नन्दः परमप्रीतः प्रत्युत्थाय कृताञ्जलिश्च सन् प्रणिपातपुरःसरं यथा भवति तथा अधोक्षजधिया 'भगवानेवागत' इति बुद्ध्या आनर्च ॥ २ ॥ एवं कृतातिथ्यं कृतमतिथेर्हितं पादप्रक्षालनादिभोजनान्तं यस्मै तम्, अतएव सूपविष्टं सुष्ठु सुखेन मार्गश्रमराहित्येन उपविष्टं मुनिं भगवत्तत्त्वमननशीलं गर्गं सूनृतया मधुरया गिरा नन्दयित्वा हर्षयित्वा नन्दो 'हे ब्रह्मन्! पूर्णस्य निजानन्दपूर्णस्य तव वयं किं करवाम ? कमप्युपकारं कर्तुं न समर्थाः' इत्यब्रवीदित्यन्वयः ॥ ३ ॥ 'पूर्णश्चेत् कथं तव गृहमागत ?' इति शङ्कां निराकुर्वन् 'भवांस्त्वं प्रार्थित एव महान्तमुपकारं कृतवान्' इत्याह—महद्विचलनमिति । हे भगवन्! महतां भवादृशानामाप्तकामानां विचलनं स्वाश्रमात् परगृहे गमनं नैव सम्भवति, प्रयोजनाभावात् । यदि कश्चित् गमनं भवति, तदा नृणां निःश्रेयसाय मङ्गलायैव कल्पते घटते, नान्यथा । स्वप्रयोजनाय न घटत इत्यर्थः । ननु "यदि महतां दर्शनस्पर्शनादिना नृणां निःश्रेयसं सिद्ध्यति, तदा तद्दर्शनार्थं ते एव तदाश्रमं कुतो न गच्छन्ति" इत्याशङ्क्याह—दीनचेतसामिति । दीनं व्याकुलतया विवेके असमर्थं चेतो येषां तेषामित्यर्थः । व्याकुलत्वे हेतुमाह—गृहिणामिति । तत्तन्मनोरथैस्तत्तद्व्यापारवत्त्वेन व्यग्रचित्तानां गृहस्थानामित्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

अष्टमे नामकरणं तथा मृज्जग्धियोगतः ॥ मुखे विश्वनिरीक्षाऽत्र श्लोकाः सार्द्धा द्विमार्गणाः (५२॥) ॥
सप्तवाचेति पादोना एकषष्टिरनुष्टुभः (६०॥।) ॥ ८ ॥

असुरवधप्रसङ्गात्तृणावर्तवधमुक्त्वा तत्प्राचीनानि नामकरणादीन्युपक्रमते इदं च नामकरणं जन्मतः शततमे दिने शकटोच्चाटनानन्तरं गर्गागमे कृतं शतमे दिनेऽपि विधानात् । गर्ग इति ॥ हे राजन्! सुमहत्तपो यस्य तादृशः यदूनां पुरोहितः अत एव पुत्रयोर्नामकरणार्थं वसुदेवेन प्रचोदितो गर्गो नन्दस्य व्रजं जगाम आगतः ॥ १ ॥ तं दृष्ट्वेति ॥ तं गर्गं दृष्ट्वा नन्दः परमप्रीतः प्रत्युत्थाय कृताञ्जलिश्च सन् प्रणिपातपुरःसरं यथा भवति तथा अधोक्षजधिया भगवानेवागत इति बुद्ध्या आनर्च ॥२॥ सूपविष्टमिति ॥ नन्दः एवं कृतमतिथेर्हितमातिथ्यं पादप्रक्षालनादिभोजनान्तं यस्मै तम् अत एव सूपविष्टं सुष्ठु सुखेन मार्गश्रमराहित्येन उपविष्टं मुनिं गर्गं सूनृतया मधुरया गिरा नन्दयित्वा हर्षयित्वा हे ब्रह्मन्! पूर्णस्य निजानन्दपूर्णस्य तव वयं किं करवाम । कमप्युपकारं कर्तुं न समर्था इत्यब्रवीत् ॥ ३ ॥ महदिति ॥ हे भगवन्! महतां भवादृशानामाप्तकामानां विचलनं स्वाश्रमात्परगृहे गमनं दीनचेतसां व्याकुलचित्तानां गृहिणां गृहस्थानां क्षणमपि गृहं त्यक्तुमशक्तानां नृणां मादृशानां निःश्रेयसाय मङ्गलायैव कल्पते घटते । अन्यथा स्वप्रयोजनाय कश्चित् न घटते वामनसनत्कुमारादीनामाप्तकामानामपि बलिपृथुप्रभृतिगृहागमनदर्शनात् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीमष्टमेऽध्याये हरेर्नामकरणं गर्गकृतं प्रशंसनं च मृद्भक्षणरूपं बालचरित्रं च तन्मुखे मात्रा विश्वदर्शनं च यशोदानंदयोः पूर्वरूपं चोच्यते तत्रादौ नामकरणाय गर्गागमनमाह गर्ग इति यदूनां पुरोहितो गुरुः ॥ १ ॥ कृतः अंजलिः करपुटो येन सः कृतांजलिः प्रत्युत्थाय अभ्युत्थानं कृत्वा प्रणिपातो नमस्कारः पुरःसरो मुख्यो यस्मिन् कर्मणि यथा भवति तथा ॥ २ ॥ नंदयित्वा प्रशंस्य ॥ ३ ॥ ननु पूर्णस्य स्वाश्रमाद्न्यत्र गमनं किमर्थमित्याशंक्याहमहद्विचलनमिति ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नामकर्माष्टमे त्वस्य बालक्रीडनकौतुके। अभियोगे मृदाशस्य विश्वरूपप्रदर्शनम् ॥ १ ॥
निशम्य विश्वरूपादि बालस्याशङ्किनः पितुः। तत्त्वं स्वं नामकृद्गर्गवाक्येन समसूचयत् ॥ २ ॥

अथ लीलान्तरमाह। गर्ग इति। हे राजन्, यदूनां पुरोहितः सुमहातपाः, गर्गः, वसुदेवप्रचोदितः सन्, नन्दस्य व्रजं, जगाम ॥ १ ॥ तमिति। तं गर्गं दृष्ट्वा, परमप्रीतः नन्दः, प्रत्युत्थायाभ्युत्थानं कृत्वा, कृताञ्जलिः सन्, प्रणिपातपुरःसरं नमस्कारपूर्वकं यथा तथा, अधोक्षजधिया भगवद्दृष्ट्या, आनर्च अर्चितवान् ॥ २ ॥ सूपविष्टमिति। कृतमातिथ्यं यस्य तं, सूपविष्टं सुखेन कृतोपवेशनं, मुनिं गर्गं, सूनृतया मधुरया, गिरा वाचा, नन्दयित्वा हर्षयित्वा, हे ब्रह्मन्, पूर्णस्य ते, किं करवाम। इति नन्दः अब्रवीत् ॥ ३ ॥ पूर्णश्चेत्कथमहं धनिनां गृहमागतस्तत्राह। महदिति। हे भगवन्, महद्विचलनं भवादृशानां महतां स्वाश्रमादन्यत्र प्रचलनं, दीनचेतसां विषयासङ्गेन दीनमानसानां मादृशानां, गृहिणां नृणां, निःश्रेयसाय कल्याणाय एव, कल्पते भवति। न तु क्वचित् कदाचिदपि, अन्यथा कल्पते। कल्प्यते इति पाठेऽस्माभिरेवं कल्पना विधीयते इत्यर्थः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गर्ग इति : १०.८.१.

यदा सङ्कल्पो विश्वं स्वस्मिन्नाविष्करोत्यसौ। युक्तं तदाऽस्य नामादीत्यगाद् युक्तं ततो मुनिः ॥ १ ॥
स्वयं क्लिष्टोऽप्यन्तर्बहिरपि रिपुक्लेशविकलोऽप्यपत्यश्रेयोर्थी नर इति न वै दूषणमिदम्।
तथाभूतोऽपि त्वज्जनकवसुदेवस्तव कृते न किं गोष्ठे गर्गं यदुकुलललाम प्रहितवान् ॥ २ ॥

कृष्णप्रिया

श्रीशुकाचार्यजी ने कहा—राजन्! श्रीवसुदेवजी की विशेष प्रार्थना से यदुओं के कुलाचार्य सुमहान् तपस्वी श्रीगर्ग महर्षि श्रीनन्दरायजी के व्रज में पहुंचे ॥ १ ॥ महर्षि गर्गाचार्यजी के दर्शन से परम प्रसन्न श्रीनन्दरायजी ने अभ्युत्थान देते हुए अञ्जलिबद्ध प्रथम दण्डवत प्रणाम किया पुनः श्रीविष्णु भगवान की भावना से उनका अर्चन किया ॥ २ ॥ पुनः विश्राम पाकर विराजमान श्रीगर्गाचार्यजी का आतिथ्य सत्कार करते हुए सत्य सुमधुर वचनों से अभिनन्दन करते हुए श्रीनन्दरायजी निवेदन करने लगे कि ब्रह्मन् आप तो सर्वथा पूर्ण हैं फिर भी बतलाइये कि आप का क्या सत्कार किया जाय ॥ ३ ॥ भगवन्! आप सदृश महान् पुरुषों का श्रम लेकर पधारना गृहासक्त दीन मानस मनुष्यों के लिए परम कल्याणकारक हो होता है। इसके अलावा अन्य कोई प्रयोजन नहीं होता और पधारना अन्यथा नहीं बनता ॥ ४ ॥

ज्योतिषामयनं साक्षाद् यत्तज्ज्ञानमतीन्द्रियम्। प्रणीतं भवता येन पुमान् वेद परावरम् ॥ ५ ॥
त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान् कर्तुमर्हसि। बालयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ॥ ६ ॥

गर्ग उवाच

यदूनामहमाचार्यः ख्यातश्च भुवि [1]सर्वतः। सुतं मया संस्कृतं ते मन्यते देवकीसुतम् ॥ ७ ॥
कंसः पापमतिः सख्यं तव चानकदुन्दुभेः। देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ॥ ८ ॥

[illegible]

अन्वयः—यत् साक्षात् अतीन्द्रियं ज्ञानं तत् ज्योतिषाम् अयनं भवता प्रणीतं येन पुमान् परावरं वेद ॥ ५ ॥ ब्रह्मविदां श्रेष्ठः त्वं हि अनयोः बालयोः संस्कारान् कर्तुं अर्हसि ब्राह्मणः जन्मना गुरुः ॥ ६ ॥ अहं यदूनां आचार्यः च भुवि सर्वतः ख्यातः मया संस्कृतं ते सुतं देवकीसुतं मन्यते ॥ ७ ॥ पापमतिः कंसः तव च आनकदुन्दुभेः सख्यं (संचिन्तयन्) देवकीदारिकावचः श्रुत्वा देवक्याः अष्टमः गर्भः स्त्री भवितुं न अर्हति ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्वया बालयोर्नामकरणादि करणीयमिति वक्तुं तस्य ज्ञानातिशयमाह। ज्योतिषामयनमिति ॥ यदतीन्द्रियज्ञानसाधनं ज्योतिषामयनं तत्प्रतिपादकं ज्योतिःशास्त्रमित्यर्थः। तत्साक्षाद्भवता प्रणीतं येनान्योऽपि पुमान्परावरं परं कारणं पूर्वजन्मकृतं कर्म अवरं कार्यं तस्मिन् जन्मनि भाविफलं तद्वेद। उक्तं च जातके। "यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ॥

---

[1] सर्वदा–रा. पु.।

व्यंजयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥" इति ॥ ५ ॥ विवक्षितमाह । त्वं हीति । दैवज्ञो मन्त्रविच्च त्वमतो नामकरणादिसंस्कारान्कर्तुमर्हसीत्यर्थः । नन्वेतद्गुरुणा करणीयमिति चेत्तत्राह । नृणामिति ॥ ६ ॥ अत्युत्साहिनं नंदं प्रति गुप्तमेतत्कार्यमित्यभिप्रायेण प्रत्याचक्षाण इवाह । यदूनामिति । भवतु तथापि त्वमत्रागत इति को विद्यादिति चेद्त आह । ख्यातश्चेति । ततः किमत आह । सुतमिति । कंसो मन्यते मन्येत कल्पयेदित्यर्थः ॥ ७ ॥ ननु यदुकुमार इति कथंचिज्जानातु । तत्र वसुदेवस्य सुतस्तत्रापि देवक्यां जात इति कुतो जानीयात्तत्राह । पापमतिरित्यादि ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बालनामकरणाद्यर्थं गर्गं श्लाघते नंद इत्याह— त्वयेति । गर्गेण इत्यर्थ इति । अयनशब्देन शिशुमारादि न ग्राह्यं किन्तु शास्त्रमेवेति तात्पर्यम् । येन ज्योतिःशास्त्रेण अन्योऽर्वाचीनोपि । जातके बृहज्जातके । उपचितं संपादितम् । अन्यजन्मन्येतत्कालिकजन्मप्राग्जन्मनि । व्यंजयति प्रकाशयति । ग्रहाणां स्थानयोगदृष्ट्यवस्थादिवशादिति । एतज्ज्योतिः प्रकाशकं शास्त्रमित्यर्थः ॥ ५ ॥ इत्यर्थ इति । उभयविद एव संस्कारकरणेऽधिकारो न त्वेकैकविद इति भावः । पुनराशंकते—नन्विति । नृणामिति जन्मना ब्राह्मण इत्युक्तेः "यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकम् । यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥" इत्यपास्तं तथा च जातितो यो ब्राह्मणस्तपोविद्यायुतः स एव गुरुः कार्यो न तु क्षत्त्रियादिः । "संस्कर्त्ता चोपदेष्टा च विप्र एव न चेतरः । सर्वैर्विप्रगुणैर्युक्त इत्याह भगवान्मनुः ॥" इति । किञ्च "वर्णानामाश्रमाणां च मुख्योऽभूद्ब्राह्मणो गुरुः । अन्योन्यगुरवो विप्रा न ह्येषामपरो गुरुः ॥" इति वरतंतूक्तेः ॥ ६ ॥ एतत्संस्कारादि प्रत्याचक्षाण इव निवर्त्तयन्निव । नंदो वक्ति भवद्विति । ख्यातः प्रसिद्धः । ततः ख्यातेः । इत्यर्थ इति । मन्यतेः संभावनार्थत्वमत्रेति तात्पर्यम् ॥ ७ ॥ कंस इति । 'कसि—हिंसायाम्' इति धातुः हिंसाशीलस्तादृशस्य पापमतित्वं सहजमेव पापिनां मनस्यनंतशंकोदयस्य संभवादिति भावः । द्वयोरन्वयः ॥ ८–९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ज्योतिषां ग्रहाणाम् अयनमिति करणे ल्युट् अयतेर्गत्यर्थतया ज्ञानार्थः तत् करणस्यापि हेतुत्वात् तत्प्रतिपादकमित्येवार्थः । तच्च प्रणीतमित्युक्त्या ज्योतिःशास्त्रमित्येव पर्य्यवसीयते कीदृशं तत् ज्ञानं ज्ञानान्तरस्यापि साधनं तथा अतीन्द्रियम् इन्द्रियागोचरज्ञानजनकत्वात्तदतिक्रान्तं तदेवं विशेषणद्वयस्य अतीन्द्रियज्ञानसाधनमित्येव निर्गलितोर्थः । यद्वा, अयनं ज्ञानसाधनं शास्त्रमित्यर्थः । यत् यस्मात् तत् भवदादिषु विख्यातमतीन्द्रियं ज्ञानं स्यादिति परं पूर्वजन्मवृत्तम् अवरम् एतज्जन्मभाविफलं तद्वेदेति बालयोस्तत्तद्भवता कथनीयमिति भावः । तत्र पूर्वजन्मवृत्तजिज्ञासा तु पूर्वजन्मनि शुभादस्मिन्नपि शुभं भावीत्यभिप्रायेण अत एवाग्रे श्रीभगवतः पूर्ववृत्तकथनं पुमान् यः कश्चित्पुरुष इति तच्छ्लाघ्यस्य सुगमत्वादिगुण उक्तः ॥ ५ ॥ हि यतो ब्रह्मविदां श्रेष्ठः महाभागवतोत्तमत्वात् अत एव संस्कारान् जात्यनुरूपान् जन्मना जात्यैव किं पुनर्ज्ञानादिनेत्यर्थः ॥ ६ ॥ यदूनामिति त्रिकम् । सर्वतः सर्वस्यां पापमतिः दुष्टबुद्धिः अपि हन्तेति सम्भावनार्थस्यापि शब्दस्य यदीत्यर्थः । हन्ता देवकीपुत्रादिहननशीलः कंसो यदि प्राप्ताशङ्कः स्यात् तर्हि तत्संस्कारकर्मास्माकं महानेवान्यायरूपः स्यादित्यर्थः । टीकायां तु हन्ता गन्ता तदा सद्य एवेति व्याख्येयम् ॥ ७ ॥ तत्रेदं ज्ञेयम् विविक्ते नामकरणदित्सया भयमुत्पादयति वस्तुतस्तु गत्यर्थोद्धनधातोः गमनेन प्राप्स्यति आयास्यतीत्यर्थः । अपीत्येवपाठो युक्तः यद्यपि देवीवाक्ये "जातः खलु तवान्तकृत् यत्र क्वचित्पूर्वशत्रुः" इत्युक्त्या प्रत्युतानकदुन्दुभिसम्बन्धाशङ्कापयात्येव तथा तादृशवद्धस्य पुत्रसंस्कारे सत्यमप्यकिञ्चित्करं स्यात्तथापि पापमतित्वात् दुर्मन्त्रप्रवीणत्वेनेदमाशङ्किष्यत एवेति भावः । मच्छत्रुरेवासावस्य पुत्रतया जातः किन्त्वस्यैव शिक्षया शरिकायमाणो मां छलयन्नन्दगृहं प्रविष्ट इति ॥ ८–९ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

परं पूर्व्वजन्मवृत्तमवरमेतज्जन्मभाविफलम्; तद्वेदेति मत्पुत्त्रस्य तत्तद्भवता कथनीयमिति भावः । तत्र पूर्व्वजन्मवृत्तजिज्ञासा 'पुण्यं' पुण्यानुबन्धि स्यात् इत्यादिन्यायेन पूर्व्वजन्मनि शुभादस्मिन्नपि शुभं भावीत्याद्यभिप्रायेण, अतएवाग्रे श्रीभगवतः पूर्व्ववृत्तकथनम् । पुमान् यः कश्चित् पुरुष इति तच्छ्लाघ्यस्य सुगमत्वादिगुण उक्तः ॥ ५ ॥ हि यतो ब्रह्मविदां श्रेष्ठो महाभागवतोत्तमत्वादतः संस्कारान् जात्यनुरूपान् नामकरणविद्यादिफलकेष्टादीन् वैष्णवानुरूपांश्च तिलकादीनत एव सुन्दरोर्द्ध्वपुण्ड्रादिकं पद्मपुराणादौ श्रीकृष्णस्य श्रूयते । जन्मना जन्ममात्रेणैव किं पुनर्ज्ञानादिनेत्यर्थः ॥ ६ ॥ सर्व्वतः सर्व्वस्यां पापमतिर्दुष्टबुद्धिर्यदि हन्ता वसुदेवं युष्मान् वा; हन्तेति विविक्ते नामकरणादीच्छया भयमुत्पादयति, वस्तुतस्तु गत्यर्थोद्धन–धातोः प्राप्स्यति आयास्यतीत्यर्थः । अपीत्येव पाठो युक्तस्तथैव तैर्व्याख्यानात् । तत्तदा सद्य एवेत्यर्थः । अनयोऽपराधोऽनर्थो वा । 'नः' इति बहुत्वं श्रीभगवन्नामकरणार्थागमनेनात्मनोऽन्तर्बहुमानात्, स्वज्ञात्याद्यपेक्षया वा । अन्यत्तैर्व्याख्यातम् । यद्वा, तत्तस्मान्मत्संस्काराद्धेतोर्गताशंको निःसंशयः सन्नित्यर्थः ॥ ७–९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ज्योतिषामयनं ज्योतिःशास्त्रं ज्ञायतेऽनेनेति ज्ञानं ज्ञानसाधनम् अतीन्द्रियम् अतीन्द्रियविषयं परावरम् अतीतमागामि च ॥ ५-२० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

त्वया बालयोर्नामक्रिया कार्येति वक्तुं तस्य विज्ञानातिशयमाह—ज्योतिषामयनमिति। यज्ज्ञानमतीन्द्रियज्ञानसाधनं ज्योतिषामयनं तत्प्रतिपादकं ज्योतिःशास्त्रमित्यर्थः। तत्साक्षाद्भवता प्रणीतं येन ज्योतिषामयनेनान्योपि पुमान् परापरमतीतमागामि च वेद ॥ ५ ॥ विवक्षितमाह—त्वमिति। भो ब्रह्मविदां श्रेष्ठ! त्वमनयोर्बालकयोः संस्कारादीन्नामकरणादीन् कर्तुमर्हसि दैवज्ञत्वान्मंत्रवित्त्वाच्च त्वमेव कर्तुमर्हसीति भावः। ननु, नाहं त्वद्गुरुरित्यत्राह, नृणां जन्मना ब्राह्मणो गुरुः नृणामिति सामान्यनिर्देशेन ब्राह्मणानां क्षत्रियादीनां च ब्राह्मणमात्रस्वभावतो गुरुरित्यभिप्रेतम् ॥ ६ ॥ अत्युत्साहिनं नन्दं प्रति गुप्तमेतत् कार्यमित्यभिप्रायेण प्रत्याचक्षाण इवाह—यदूनामिति। यदूनामाचार्यत्वेन भुवि प्रसिद्धोऽहं यदि त्वत्पुत्रं संस्कुर्यां तर्हि मया संस्कृतं त्वत्पुत्रमपि देवकीपुत्रमेव पापमतिः कंसः मन्यते मत्कर्तृकसंस्कारेण लिङ्गेन देवकीसुतमेवाध्यवस्यतीत्यर्थः ॥ ७ ॥ ननु, यदुकुलाचार्येण त्वया संस्कृतं कथञ्चिद्यदुकुमारं जानातु तत्र वसुदेवस्य पुत्रः तत्रापि देवक्यां जात इति कुतो जानीयात्तत्राह—सख्यमिति। नन्दवसुदेवयोः सख्यं प्रसिद्धमेव वर्तते अशरीरवाण्याभिहितो देवक्या अष्टमो गर्भो न स्त्रीभवितुमर्हति किन्तु पुमानेव सः मद्भयात् वसुदेवेन सख्युः नन्दस्य सन्निधावेव निहित इत्येवं देवकीदारिकावचश्चिन्तयन् गताशङ्कः गतसंशयः हन्तापि हन्यात्तर्हि तन्नोऽस्माकं महाननयः अनीतिरनुचितं स्यादित्युक्त्वा गर्गस्तूष्णीं बभूवेत्यर्थः ॥ ८-९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ज्योतिषामयनं ग्रहाणां राशेराश्यन्तरगमनगोचरं ज्योतिः शास्त्रं ज्ञायते अनेनेति ज्ञानम् अतीन्द्रियं त्रिकालविषयं परावरम् अतीतानागतविषयम् ॥ ५ ॥ संस्कारान् गर्भाधानादीन् संस्कारकर्ता मदन्यः किं न स्यादिति तत्राह—नृणामिति ॥ ६ ॥ तत्र नन्दं गर्गो वक्तीत्याह—गर्ग इति। चशब्दो हिशब्दार्थः योऽहं यदूनामाचार्य इति सर्वतो भुवि ख्यातो हि ततः किं कंसेन ज्ञातेऽनर्थो भविष्यतीति स क इत्याह सुतमिति ॥ ७ ॥ "कसि हिंसायाम्" इति धातोः हिंसाशीलः अत एव पापमतिः तर्हि तं कृष्णं हन्ता हनिष्यति तदा नो महाननयोऽन्यायोऽपराधो भविष्यतीति शेषः। कथमयं कंसो मया संस्कृतं ते सुतं देवकीसुतं मन्यते, निमित्तमाह, सख्यमिति तवानकदुन्दुभेश्च सख्यमस्तीति जानाति अतोऽनयोः सुतविनिमयो भविष्यतीति मन्यते निमित्तान्तरमप्यस्तीत्याह, देवक्या इति यश्चितयन्निति हेतोः तव हन्ता क्वचिज्जात इति निश्चाय केन कन्यावचसाऽपि तस्य तद्धननिवृत्तिर्न भवतीत्याशयेनाह श्रुत्वेति गताशङ्को नष्टहननशङ्कः आगताशङ्कोऽपि वा ॥ ८-९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ज्योतिषां ग्रहाणाम् अत्रायनमिति करणे ल्युट् अयतेर्गत्यर्थतया ज्ञानार्थत्वात् करणस्यापि हेतुत्वात् तत्प्रतिपादकमित्येवार्थः। तच्च प्रणीतमित्युक्त्या ज्योतिःशास्त्रमित्येव पर्यवसीयते कीदृशं तज्ज्ञानं तत्साधनम् अतीन्द्रियम् इन्द्रियागोचरज्ञानजनकत्वात्तदतिक्रान्तञ्च तदेव विशेषणद्वयस्य अतीन्द्रियज्ञानसाधनमित्येव निर्गलितोऽर्थः ॥ ५ ॥ जन्मना जात्यैव ॥ ६-८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बालकद्वयनामकरणार्थं प्रार्थनाबीजं सृजन्नाह—ज्योतिषां ग्रहादीनाम् अयनं ज्ञापकं ज्योतिःशास्त्रं यद्यतः अतीन्द्रियं ज्ञानं भवेत्तद्भवता ज्ञायत इति किं वक्तव्यं त्वया प्रणीतं कृतं येनान्योपि पुमान् परमुत्तरकालभावि वस्तु अपरं पूर्वकालभूतं वस्तु वेद जानाति तेन वार्द्धके मम जातस्य पुत्रस्य जन्मलग्नादिकं विचार्य्य हस्तपादादिलक्षणं च दृष्ट्वा भद्राभद्रादिकं कथनीयमिति भावः ॥ ५ ॥ किञ्च एतादृशमहानुभावस्यापि तव मद्गृहागमनं मन्निःश्रेयसायैव तच्च मम निःश्रेयसमैहिकं पारलौकिकञ्च तत्रैहिकं निःश्रेयसमद्य निष्पाद्यमेकं त्वच्चरणेषु निवेदयामि कृपया शृण्वित्याह—त्वमिति। न केवलं ज्योतिर्विदामेव त्वं श्रेष्ठ इति भावः। तेनोभयगुणयुक्तत्वात्त्वमेव दैवज्ञो मन्त्रविच्च कर्त्तुमर्हसीत्यर्थः। नन्वेतद्गुरुणा करणीयमिति चेत्तत्राह नृणामिति ॥ ६ ॥ स्वयं बिभ्यदत्युत्साहिनं नन्दं च कंसाद्भीषयमाणः सुगुप्तमेवैतत् कारयेत्यभिप्रायेण प्रत्याचक्षाण इवाह—यदूनामिति। तव यदुत्वेऽपि क्षत्रियत्वाभावान्न यदुत्वख्यातिः अहन्तु यदुपुरोहितत्वेन ख्यातश्चेति मत्कृत्यमिदं न गुप्तं स्थास्यतीति भावः ॥ ७ ॥ सर्वतः सर्वस्यां मन्यते मंस्यते नन्वेतावत्कोऽनुसन्धास्यते तत्राह कंसः तदपि त्वयि तु ब्रह्मवादिनि सोपि न द्रोहमाचरिष्यतीति चेदत आह पापमतिः मादृशान् जिघांसत्येवेति भावः। किञ्च तत्राप्यवश्यमपकरिष्यत्येवेत्याह—सख्यमिति। वसुदेवद्रोहिणः कंसस्य वसुदेवसखे त्वय्यपि द्रोहसम्भवादिति भावः। तत्रैवं कुयुक्तिं स्रक्ष्यतीत्याह—देवक्या इति। देवकीदारिकावचः

श्रुत्वा अष्टमो गर्भो न स्त्रीभवितुमर्हतीति चिन्तयन् इत्यन्वयः। मच्छत्रुर्विष्णुरेव देवक्या गर्भे जात एव किन्तु वसुदेवशिक्षया तस्य सख्युर्नन्दस्य गृहे प्रविष्ट इति देवकीदारिकावच इति मदिष्टदेवो दुर्गैव देवकीदारिकारूपा भूत्वा यत्र क्वचिज्जात इति पदेन देवक्यामपि जन्मसम्भाव्यविष्णुनिषेधशङ्कयेव मां स्पष्टमनुक्त्वा तमन्विष्य शीघ्रं जहीति मामभिव्यञ्जयामासेति चिन्तयन् तदन्वेषणे प्रवृत्तो मन्नामकरणलिङ्गेन आगता नन्दगृहे वसुदेवसुतोऽस्तीत्याशङ्का यस्य तथाभूतस्सन्नागत्य यदि हन्ता हनिष्यति तर्हि नोऽस्माकं महान् अनयः यदीति अपीति च पाठः ॥ ८–९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

बालयोर्नामकरणादौ तद्योग्यताकथनपूर्वकमृषिं प्रवर्तयति ज्योतिषामिति द्वाभ्याम्। यदतीन्द्रियं ज्ञानं तत् प्रकाशकं ज्योतिषामयनं प्रतिपादकं शास्त्रम्, तत्साक्षाद्भवता प्रणीतम्, येन परं पूर्वजन्मसञ्चितं कर्म अवरं वर्तमानजन्मनि भोग्यं कर्मफलं पुमान् वेद ॥ ५ ॥ ब्रह्मविदां वेदविदां श्रेष्ठः दैवज्ञत्वान्मन्त्रवित्वाच्च संस्कारान् नामकरणादीन् कर्तुमर्हसि ॥ ६ ॥ गुप्तसंस्कारचिकीर्षुः प्राकट्ये दोषमाह—यदूनामिति त्रिभिः। मन्यते मन्येत ॥ ७ ॥ ननु त्वत्कृतं संस्कारमात्रतो निरपराधे मयि विद्वेषजननाय मदीये पुत्रे देवकीपुत्रशङ्कां कुतः करिष्यति? अत्राह—कंस इति। पापे विद्वेषानर्हेष्वपि विद्वेषाचरणे मतिर्यस्य सः तव आनकदुन्दुभेः सख्यं चकारात्तस्यानकदुन्दुभेर्यदर्थं देवैर्वसुदेवजन्मसमये आनकादिनादः कृतः स मम शत्रुर्वसुदेवाज्जातः किमिति च जातः खलु तवान्तकृन् इति देवक्या दारिका वचः श्रुत्वा "देवक्या अष्टमो गर्भः न स्त्रीभवितुमर्हति" इति च सञ्चिन्तयन् अपि यदि आगताशङ्कः स्यात् स मम भगिनीपुत्रो नन्दगृहे वर्तते किमित्येवम् आगताऽशङ्का यस्य स तथाभूतः स्यात्तर्हि महान् अनयो न अस्माकं स्यादिति द्वयोरन्वयः हन्तेत्यव्ययम् ॥ ८–९ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

बालयोर्नामकरणादि त्वया कार्यमिति वक्तुं तस्य ज्ञानातिशयमाह ज्योतिषामिति। ज्योतिषां ग्रहादीनामयनं बोधकं ज्योतिः शास्त्रं यद्युतोतीन्द्रियं ज्ञानं भवेत् तद्भवता प्रणीतं कृतमिति ज्ञानातिशयः येन शास्त्रेणाधीतेनान्योऽपि पुमान् परमुत्तरकालभावि वस्तु अपरं पूर्वकालभूतं वस्तु वेद जानाति तेन बालयोः शुभं भवता कथनीयमिति ॥ ५ ॥ न केवलं ज्योतिर्विदामेव त्वं श्रेष्ठोऽपितु ब्रह्मविदामपीति तेन दैवज्ञो मंत्रविच्च त्वं बालयोर्नामकरणादिसंस्कारान् कर्तुमर्हसीति नन्वेतत् पित्रा कार्यं द्वादशेऽहनि पिता नाम कुर्यात् इति वचनात्तत्राह नृणां जन्मना जात्यैव ब्राह्मणो गुरुः किं पुनर्ज्ञानादिनेत्यर्थः। तदभावे पित्रा नाम कार्यमिति भावः ॥ ६ ॥ स्वयं कंसाद्भीतोऽप्युत्साहिनं नन्दं निगूढमेतत्कार्यमिति भावेन निषेधयन्निवाह यदूनामिति। तव यदुवंशोद्भवत्वेऽपि क्षत्रियत्वविरहान्न यादवत्वख्यातिः अहं तु यदुपुरोहितत्वेन सर्वत्र ख्यातश्चेति मया संस्कृतं ते सुतं देवकीसुतं कंसो मंस्यते ॥ ७ ॥ कंस इति युग्मकं नन्वेतावत् कथमनुसंदध्यात्तत्राह पापमतिरिति। चोरेण छिद्रान्वेषणादिति भावः। तथानुसन्धौ बीजं चास्तीत्याह सख्यन्तवचेति तत्र युक्तिश्चैवं संदध्यतीत्याह देवक्या इति। देवकीदारिकावचः श्रुत्वा तस्या अष्टमो गर्भः स्त्री भवितुं नार्हतीति सञ्चिन्तयन्नित्यन्वयः। तद्दारिकया मद्वधाभावादस्यास्त्वामष्टमो गर्भो हन्तेत्याकाशवाण्यां साधारणोऽपि गर्भशब्दः पुत्राभिधायीतविचारयन् मदिष्टदेवी दुर्गैव तद्दारिकात्मा भूत्वा विष्णुना प्रतिषिद्धापि मद्धितैषिणी तवान्तकृद् यत्र क्वचिज्जात इति सामान्योक्त्या तस्यामेव तस्य जन्म व्यञ्जयामास, तत्र च युवयोः प्रसिद्धात् सख्यान्मन्नामकरणाल्लिङ्गाच्च स हन्ता तत्पुत्रषट्कहननशीलो यदि गताशङ्कः स्यात् तर्हि तन्नामकरणं नोऽस्माकं महाननयः अपि सम्भावनायां यदर्थः गता प्राप्ता नन्दवेश्मनि वसुदेवसुतोऽस्तीत्याशङ्का येन सः ॥ ८–९ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

॥ हरिः ॐ ॥ यतः पापमतिः कंसो देवकीदारकीवचो देवकीकन्यायास्तव पूर्वशत्रुः क्वचिद्वर्तत इति श्रुत्वा देवक्या अष्टमे गर्भे स्त्रीभवितुं नार्हतीति सदा संचितयन्भवति। तवानकदुंदुभेः सख्यं मन्यते च। यतश्चाहं यदूनामाचार्यः पुरोहित इति भुवि सर्वतः सर्वदेशेषु ख्यातोऽतो मया संस्कृतं ते सुतं मन्यते मन्येत। अनंतरं गताशंकः सन् हंता भवेत्तर्हि तत्तेन हननेन नोऽस्माकं महाननर्थो भवेदिति ॥ ७–९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पुत्रस्योत्तरत्र बलाबले कथं कथय वर्ततेतीप्सया तस्य तत्समयप्रणायकर्ता पुरस्कृत्य तं स्तौति ॥ ज्योतिषामिति। येन स्वनिर्मितेन पुमांस्तदधीती परावरं भूतभविष्यद्वेद तज्ज्योतिषां नक्षत्रादीनामयनमाश्रयीभूतमतीन्द्रियमतीन्द्रियार्थं युक्तं साक्षाज्ज्ञानं तत्साधनं शास्त्रं भवता प्रणीतं निर्मितं ॥ ५ ॥ स त्वं ब्रह्मविदां श्रेष्ठोऽनयोर्बालयोः संस्काराञ्जातकर्मादीन्कर्तुमर्हसि। अलं कुत इत्यत आह। हि यतो नृणां ब्राह्मणस्तज्जातिजो गुरुरुपदेष्टाऽतः कुर्विति ॥ ६ ॥ तत्र गर्गो नायमनर्गलमार्गं इति काञ्चिदनुपपत्तिं

सर्वजनीनां प्रदर्श्य तदुदितवर्त्मना तत्रक इव तत्स्वरूपं च न्यरूरुपन्नन्दं प्रतीत्याह कैश्चिच्छ्लोकैः ॥ गर्ग इति । अहं यदूनामाचार्यो नाप्रसिद्ध इति द्योतयति ख्यातश्च सर्वतः सर्वस्यां भुवीति सर्वप्रकारेणेति वा सर्वैरिति वेति । मया संस्कृतं सुतं पापमतिः कंसो मन्यते चेज्ज्ञातवांश्चेद्देवकीसुतमेव मन्यते । कुत इत्यत आह । सख्यं तव चानकदुन्दुभेश्च यतस मन्यते जानाति तत इति । देवकीदारिकायास्तत्कुमारिकाया वचः श्रुत्वा देवक्या गर्भोऽष्टमः स्त्री भवितुं नार्हति पुमानेव भवेदिति सञ्चिन्तयन्गताशङ्को गतसंशयोऽत्रागत्य हन्ता भवेद्यर्हि तर्हि तन्नो महाननयोऽन्यायो भवेत् । बालयोरनयोरित्युक्तत्वेऽपि सुतमित्युक्तिस्तस्याशङ्कास्पदत्वेनेति ज्ञेयम् । इदमदो वेति ज्योतिः समयप्राज्यसाम्राज्यस्य गर्गस्यापि लोकरीतित इति ज्ञेयम् ॥ ८-९ ॥

श्रीसुबोधिनी

एवं ब्रह्मवित्त्वेन परोपकारैककार्यत्वेन च स्तुत्वा सर्वज्ञतामुपपाद्य तत्सार्वज्ञ्यं यथान्येषामब्रह्मविदामपि भवति तथोपायं कृतवानिति स्तौति **ज्योतिषामयन**मिति, अनेनान्यस्यापि तत्तत्पदार्थरहितस्यापि तत्तत्पदार्थकरणसामर्थ्यं द्योतितं ग्रहादिबलरहितस्यापि तद्बलजनकत्वं, ज्योतिषां सूर्यादीनामयनं स्थानमिदमित्थतया यस्मिन् क्षणे यो ग्रहो यत्र वर्तते तस्य ज्ञानं यस्मात् तज् **ज्योतिषामयनं** ज्योतिःशास्त्रं, अलुक्समासः, ज्योतिषां सम्बन्धि वायनं ज्ञानं यस्मात्, तत्रापि सामान्यतो ग्रन्थकर्तारः सुगमाः परोपजीवकाः, त्वं तु ब्रह्मसूर्यवत् साक्षात्कर्ता, तत्रापि **यत् प्रसिद्धं** सर्ववाद्यप्रतिपन्नं तादृशमेव तत् त्वदुक्तं तच्छास्त्रं केवलं ज्ञानमेव ब्रह्मस्वरूपं "यस्मिन् विदिते सर्वमिदं विदितं भवतीति", तच्च ज्ञानरूपं शास्त्रमतीन्द्रियमिन्द्रियागोचरमन्यस्य बुद्धिगम्यमपि न भवति गुरूपदेशव्यतिरेकेणैतादृशं शास्त्रं **भवता प्रणीतं येन** शास्त्रेण कृत्वा **पुमान् परावरं वेद**, भूतभविष्यद् वेद परं, स्वापेक्षया पुरुषोत्तमपर्यन्तं **अवरं** परमाणुपर्यन्तम् ॥ ५ ॥ अतः सर्वज्ञो भवान् ब्राह्मणोत्तमोत्तमः, अतः पुत्रयोः संस्कारान् कर्तुमर्हसीत्याह **त्वं हीति**, ब्रह्मविदेव ब्राह्मणः स हि सर्वज्ञः, त्वं **ब्रह्मविदामपि** श्रेष्ठोऽन्यस्यापि ज्ञानोत्पादने यत्नकरणात्, अतो **बालयोरनयोः संस्कारान् कर्तुमर्हसि** यथैकं नामकरणं तथान्यान्यपि कर्माणि विद्याभाग्यफलकानि संस्कारत्वेनाप्युक्तानि जातेष्ट्यादीन्यैन्द्राबार्हस्पत्यादीनि चान्यानि च प्रसिद्धानि, लोके साम्प्रतं लुप्तानि, उभावप्येतावसंस्कृतौ, ननु गुरुणा पुरोहितेन कर्तव्यं न तु येनकेनचिदिति चेत् तत्राह **जन्मना ब्राह्मणो गुरुरिति**, उत्पत्तिमात्रेण सर्वोपि **ब्राह्मणो गुरुर्भवति**, अतो भवानपि गुरुरित्यवश्यं कर्तव्यम् ॥ ६ ॥ तत्र गर्गो गुप्ततयैतत् कर्तव्यमिति साक्षात् तथोक्ते ग्रामीणत्वान्न संस्यत इति वादके कर्मण्यसुराणां ज्ञानमयुक्तमिति "यद् वेदमुच्चैर्यज्ञेन चराम तन्नोसुराः पाप्मानुविदन्त्युपांशूपसदाचराम तथा नोसुराः पाप्मा नानुवेत्स्यन्ती"ति श्रुतेः, तथापि यावल्लौकिकभयं नोच्येत तावन्न निवर्तत इतिभयमुत्पादयति त्रिभिर्यदूनामिति, सर्वज्ञानां वचनं सर्वतोमुखं भवति सर्वं स्पष्टं वदन्ति च न वदन्ति च, उच्यमानमप्यनुक्तमिव भवति, "द्रव्यसंस्कारविरोधे द्रव्यं बलीय" इतिन्यायेनोच्चैः क्रियमाणे द्रव्यविरोधो भवति, विरोधे कारणं कंसः, तस्यापि **देवकीपुत्रः**, मया कृतः संस्कारो **देवकीपुत्रत्वं** ख्यापयतीत्याहाहं **सर्वेषामेव यदूनां** यदुवंशोद्भवानामाचार्यः संस्कारकर्ता नान्येषां, तत्रापि **भुवि सर्वतः** ख्यातो मदीयाः सर्व एव धर्माः सर्वेषां प्रसिद्धा भवन्ति, अतोत्रागमनमपि प्रसिद्धमेव, ततः किम् ? अत आह **ते सुतं मया संस्कृतं** कंसो **देवकीसुतमेव मन्यते**, निर्धारितोयमर्थः ॥ ७ ॥ यादवान्यस्य मया संस्कारो न क्रियत इति मन्यतां को दोष इति चेत् तत्राह **कंसः पापमतिरिति**, स हि मारकोतो देवकीपुत्रत्वज्ञानमनिष्टजनकं, नन्वत्र देवकीपुत्रस्य कः प्रसङ्गः ? तत्राह **सख्यं तव चानकदुन्दुभेरिति**, अतः सखिगृहेष्टमः पुत्रः स्थापितोयमिति मन्यते, चकारोर्थविशेषख्यापकः, सोपि दुष्टस्तव च सख्यमित्युभयोः सम्बन्धित्वज्ञापनाय षष्ठ्या, ननु देवकीगर्भः स्त्रीरूपस्तेन दृष्ट एव कथं सन्देह इति चेत् तत्राह **देवक्या अष्टमो गर्भः** स्वमारकत्वेन श्रुतः **स्त्री भवितुं नार्हति** ॥ ८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

त्वं हीत्यत्र जातेष्ट्यादीनीति "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात" इत्यनेन विहिता तत्फलं च 'तस्मिन् जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियाव्यायुष्मान् भवती'त्युक्तम्, "ऐन्द्राबार्हस्पत्यं तु "यं कामयेत राजन्यमनयेष्ट्या वृत्रान्घ्नंश्चरे"दिति "तस्मा एतदैन्द्राबार्हस्पत्यं चरुं निर्वपेदि"त्यनेनोक्तं, एवमन्यान्यपि ज्ञातव्यानि ॥ ६ ॥ **यदूनामित्यस्याभासे पाप्मानुविन्दता**त्यादि, **पाप्मे**त्यत्र श्रुतौ जसः स्वादेशो बोध्यः, एवमग्रेपि, श्रुतिस्तु ब्राह्मणप्रथमाष्टके पञ्चमाध्याये नवमानुवाकेस्ति, **न निवर्तत** इत्युत्सवसम्भ्रमाच्छ्रीनन्दो न निवर्तते "वर्तमानसामीप्ये वर्तमानवद् वे"ति, **द्रव्यविरोध** इति पुत्रविरोधः, **तस्यापीति** विरोधस्य **कारणं कंसः** ॥७॥ **कंसः पापमतिरित्यत्र चकारोर्थविशेषख्यापक** इत्यत एव रोहिणीपुत्रोत्पत्तौ तात्पर्यस्य **ख्यापकः** ॥८॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

ज्योतिषामयनमित्यत्र प्रथमपक्षे ज्योतिषामयनं स्थानं यस्मात्, तथा च स्थानविषयकज्ञानं यस्मादिति पर्यवसन्नोर्थः, **द्वितीयपक्षे, ज्योतिर्विषयकमयनं ज्ञानं यस्मादित्यर्थः** ॥ ५ ॥ **यदूनामित्यस्याभासे यद्वेति** पूर्वमसुराणां ज्ञानस्यायुक्ततामात्रमुक्तम्, **अत्र तु श्रुतौ "तत् नः कर्म असुराः पाप्मा च एते अनुविन्दन्ति** प्राप्नुवन्ती"त्युक्तं विद्लृ लाभे इत्यस्य रूपं, तथा चोच्चैः कृतं कर्म **आसुरं भवतीत्यर्थः** ॥ ७ ॥ **देवक्या इत्यत्र कंसो मारयेदिति अपि हन्तेत्यस्यैवार्थतः कथनमिदम्** ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'त्वया बालयोर्नामकरणादि करणीयम्' इति वक्तुं तस्य ज्ञानातिशयमाह—ज्योतिषामिति। यत् यस्मादतीन्द्रियज्ञानं भवति तत् ज्योतिषामयनं ज्योतिःशास्त्रं भवता प्रणीतं रचितम्, येन भगवत्प्रणीतशास्त्रेणान्यपुमान् परावरं वेद। परं कारणं पूर्वजन्मकृतं कर्म, अवरं कार्यमस्मिन् जन्मनि भावि सुखदुःखादि फलं जानातीत्यर्थः। 'अन्ये च शास्त्रगुरूपदेशानुसारेण शास्त्रं प्रणयन्ति, भवता तु तं निरपेक्ष्यैव प्रणीतम्' इत्याह—साक्षादिति ॥ ५ ॥ न केवलं त्वं ज्योतिर्विदामेव श्रेष्ठः, किंतु ब्रह्मविदामपि श्रेष्ठः। एवं तस्य ज्ञानातिशयमुक्त्वा प्रार्थयते—त्वमिति। त्वमनयोर्बालयोर्नामकरणादिसंस्कारान् कर्तुमर्हसि कुरु। ननु 'एतत् त्वत्कुलाचार्येण कर्तव्यम्' इत्याशङ्क्याह—नृणामिति। हि यस्मात् जन्मना उत्पत्तिमात्रेणैव ब्राह्मणो नृणां मनुष्यमात्रस्य गुरुः, किं पुनस्त्वादृशो विद्यातप आदिमानित्यर्थः ॥ ६ ॥ गर्गो यद्यप्येतदर्थमेवागतस्तथापि अत्युत्साहितं नन्दं दृष्ट्वा तथोत्साहे कंसोपद्रवमाशङ्क्य तन्माभूदिति गुप्तमेवैतत् कार्यमित्यभिप्रेत्य नन्दस्योत्साहनिवृत्त्यर्थं प्रथमं तं प्रत्याचक्षाण इवाह—यदूनामिति। यतोऽहं यदूनां यदुकुलोद्भवानामाचार्योऽतस्तव पुत्रस्य नामकरणादि न करिष्ये इति शेषः। अनेन वसुदेवपुत्रतया प्रसिद्धत्वात् रोहिणीपुत्रतया कंसभयाभावाच्च रामस्य तत्करणं सम्मतमिति सूचितम्। 'मत्सुतस्य तत्करणे को दोषः' इत्यपेक्षायामाह—मया संस्कृतं तव सुतं कंसो देवकीसुतं मन्यते मन्येत। 'भवानत्रागत इति, मम पुत्रसंस्कारं च कृतवानिति कंसः कथं ज्ञास्यति' इत्याशङ्क्याह—अहं भुवि सर्वतः ख्यातः प्रसिद्धश्चेति। अतो ममागमनं मत्कृत्यं च गुप्तं न स्थास्यतीति भावः ॥ ७ ॥ ननु 'एवमपि यदुकुमारः कश्चिदिति कथंचिज्जानातु, वसुदेवस्य पुत्रो देवक्यां जात इति कथं जानीयात्?' तत्राह—तवानकदुन्दुभेश्च सख्यं जानाति, अतस्तत्पुत्र इति मंस्यते। 'तथा मन्यताम्, ततः किम्?' तत्राह—पापमतिरिति। पापे 'देवक्या अष्टमपुत्रमारणे'मतिर्यस्य सः। ननु 'देवक्या अष्टमो गर्भः स्त्रीरूपस्तेन दृष्ट एव, अतः कथं तत्पुत्र इति मन्येत?' तत्राह—देवक्या इति। 'किं मया हतया मन्द! जातः खलु तवान्तकृत्' इति देवकीदारिकावचः श्रुत्वा तस्या वचसः आकाशवाणीनारदवाक्याभ्यां संवादित्वाद्देवक्या अष्टमो गर्भः स्त्री भवितुं नार्हतीति सञ्चिन्तयन् मत्संस्कारलिङ्गेन च 'वसुदेवो देवकीपुत्रं तत्र स्थापयित्वा, तत्कन्यामानीय मह्यं दत्तवानिति, वसुदेवस्य देवकीपुत्रो नन्दगृहेऽस्ति' इत्यागता आशङ्का यस्य स कंसः। अपीति सम्भावनायाम्। यदि वसुदेवं देवकीं वा त्वां वा मां वा बालौ वा सर्वान् वसुदेवसम्बन्धिनो हन्ता हनिष्यति, तर्हि तत्तस्य हननस्यास्मत्कृतसंस्कारनिमित्तत्वात् नोऽस्माकं महान् अनयः अन्यायः अयशोरूपः पापरूपश्च स्यादिति तव सुतस्य संस्कारो मया न प्रसिद्धतया कर्तव्यः। 'अयमनर्थस्तवापि तुल्य एव' इति सूचयितुं तत्साहित्यमभिप्रेत्य 'न' इति बहुवचनम् ॥ ८-५ ॥

अन्वितार्थप्रकाशिका

ज्योतिषामिति यत् यस्मादतीन्द्रियवस्तुविषयकं ज्ञानं भवति तत् ज्योतिषां ग्रहादीनामयनं फलद्योतकं ज्योतिःशास्त्रं भवता साक्षात् प्रणीतम् अन्यनिरपेक्षेण रचितं येन शास्त्रेण अन्योऽपि पुमान् परं पूर्वजन्मकृतं कर्म अवरम् एतज्जन्मनि सुखादिकं च वेद जानाति। अतोऽनयोर्बालयोरपि जन्मफलं कथयेत्यर्थः ॥ ५ ॥ किञ्च त्वमिति ॥ त्वं न केवलं ज्योतिर्विदेव किंतु ब्रह्मविदां वेदज्ञानामपि श्रेष्ठः अतस्त्वमनयोर्बालयोर्नामकरणादिसंस्कारान् कर्तुमर्हसि कुरु। नन्वेतद्गुरुः कुर्यादिति चेदाह। हि यस्मात् जन्मना उत्पत्तिमात्रेणैव ब्राह्मणो नृणां मनुष्यमात्रस्य गुरुः किं पुनस्त्वादृशो विद्यादिमान् ॥ ६ ॥ नामकरणं गुप्तं कारयितुं युक्त्या प्रत्याचक्षाण इवाह—यदूनामिति ॥ यतोऽहं यदूनां यदुकुलोद्भवानामाचार्यो भुवि सर्वदा ख्यातश्चास्मि भवतां यदुत्वेऽपि क्षत्रियत्वाभावाच्च यदुत्वख्यातिः। अतः मया संस्कृतं ते तव सुतं लोकः कंसो वा देवकीसुतं मन्यते मंस्यते ॥ ७ ॥ कंस इति द्वयम् ॥ पापमतिः कंसः "किं मया हतया मन्द जातः खलु तवान्तकृत् ॥" इति देवक्या दारिकाया वचः श्रुत्वा देवक्या अष्टमो गर्भोऽपि स्त्री भवितुं नार्हतीति नित्यं चिन्तयन् क्वचिदस्तीति विचार्य तव आनकदुन्दुभेश्च सख्यं चिन्तयन् त्वद्गृहे स्यादिति संभाव्य हन्त खेदे अपि यदि मत्संस्कारलिङ्गेन आगता आशङ्का तव गृहे देवक्यष्टमसुतास्थितिसंभावना यस्य तथाविधः स्यात् तर्हि तत् मत्कृतसंस्कारकरणं नोऽस्माकम् अनयः अनर्थः भवत्। न इति नन्दादीनपि क्रोडीकरोति। यद्वा। आगताशङ्कः अपि यदि हन्ता कृष्णादीन् हनिष्यति तर्हि तत् नोऽनयो भवेदित्यन्वयः ॥ ८-५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सांप्रतं बालयोर्नामकरणाय गर्गस्य ज्ञानाधिक्यं द्योतयन्नाह ज्योतिषामिति। अतीन्द्रियं गुरोः सकाशात् पठनं विना सर्वेषामिन्द्रियाग्राह्यं ज्ञानं पुरुषसुखदुःखानि ज्ञायते अनेनेति ज्ञानं पुरुषप्राप्तिसुखदुःखज्ञानसाधनमित्यर्थः। ज्योतिषां सूर्यादिग्रहाणामयनं गत्यादीनां बोधकं ज्योतिःशास्त्रं यत् तद्भवता साक्षात् प्रणीतं कृतं येन गर्गसिद्धान्तादिना अन्योऽपि पुमान् परावरं परं व्योमस्थं ग्रहनक्षत्रादिगणं अवरं पुरुषभावि सुखदुःखगणं वेद ॥ ५ ॥ स्वेप्सितमाह त्वमिति। नामकरणादीन् संस्कारान् कर्तुमर्हसि ननु-त्वद्गुरुणा करणीयं यत्तदहं कथं करोमीति चेत्तत्राह जन्मनेति ॥ ६ ॥ आचार्यो गुरुः ते सुतं लोको देवकीसुतं मन्यते जानीयात् तर्कयेदित्यर्थः ॥ ७ ॥ ननु त्वया संस्कृतं कुमारं यदुसुतं जानातु तत्र वसुदेवसुतं कथं जानीयात् तत्रापि देवकीसुतज्ञाने त्वत्सकाशा-

भाव इत्याशंकायामाह श्लोकद्वयेन कंस इति च पापमतिः कंसः तव आनकदुन्दुभेश्च उभयोः सख्यमस्तीति जानन् किं मयाहतया संद श्रुत्वा देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हतीति चिंतयन् गर्गेण मया बाले संस्कृते सति त्वद्गेहे देवकीसुतो निक्षिप्तोऽस्तीत्यपगताशंकः अपि यदि हंता बालकं हनिष्यति तर्हि तत् सः नोऽस्माकमनयोऽनर्थो भवेत् ॥ ८–९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त्वया बालयोर्नामक्रिया कार्येति वक्तुं तस्य विज्ञानातिशयमाह । ज्योतिषामिति । यत् अतीन्द्रियं ज्ञानम्, अतीन्द्रियज्ञानसाधनमित्यर्थः । ज्योतिषाम्, अयनं तत्प्रतिपादकं ज्योतिःशास्त्रमित्यर्थः । तत् साक्षात्, भवता, प्रणीतं, येन ज्योतिःशास्त्रेण, अन्योऽपि पुमान्, परावरमतीतमागामि च, वेद । कारणात्मकं पूर्वजन्मकृतं कर्म, कार्यात्मकमस्मिन् जन्मनि भावि फलं च तद्वेदेत्यर्थः । उक्तं च जातके । 'यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः प्राप्तिं व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव' इति ॥ ५ ॥ विवक्षितमाह । त्वं हीति । हे ब्रह्मविदां श्रेष्ठ, त्वं दैवज्ञो ब्रह्मविच्च भवानित्यर्थः । अनयोः बालयोः, संस्कारान्नामकरणादीन्, कर्तुम् अर्हसि हि । नन्वेतद्गुरुणा करणीयं न चाहं त्वद्गुरुरित्यत्राह । नृणां जन्मना, ब्राह्मणः गुरुः । नृणामिति सामान्यनिर्देशेन ब्राह्मणानां क्षत्रियादीनां च ब्राह्मणमात्रः स्वभावतो गुरुरस्तीत्यभिप्रेतम् ॥ ६ ॥ अत्युत्साहिनं नन्दं प्रति गुप्तमेतत् कार्यमित्यभिप्रायेण प्रत्याचक्षाण इवाह । यदूनामिति । कंस इति । इतीति च । हे नन्द, अहं भुवि, यदूनाम् आचार्यः, सर्वदा ख्यातः, यदूनामाचार्यत्वेनाहं जगति प्रसिद्ध इत्यर्थः । यदि त्वत्पुत्रं संस्कुर्यां तर्हीति शेषः । मया, संस्कृतं ते तव, सुतं पुत्रं, पापमतिः कंसः, देवकीसुतं, मन्यते । मत्कर्तृकसंस्कारेण लिङ्गेन देवकीसुतमेवाध्यवस्यतीत्यर्थः । ननु यदुकुलाचार्येण त्वया संस्कृतं सन्तं कथंचिद्यदुकुमारं जानीयात्तर्हि जानातु, तत्र वसुदेवस्य पुत्रः तत्रापि देवक्या जात इति कुतो जानीयात्तत्राह । तव नन्दस्य, आनकदुन्दुभेर्वसुदेवस्य च, सख्यं संचिन्तयन्, 'अस्यास्त्वामष्टमो गर्भो हन्ता' इत्यशरीरवाक्श्रवणादिति शेषः । देवक्याः, अष्टमः गर्भः, स्त्री भवितुं, न अर्हति, किं तु स पुमानेव भवेत्, इति च संचिन्तयन्, 'यत्र क्व वा पूर्वशत्रुर्जातः' ते इति शेषः । देवक्याः दारिकावचः, देवकीबालिकाया वचनमित्यर्थः । श्रुत्वा, संचिन्तयंश्च, आगताशङ्कः, हन्तापि हन्याच्चेत्, त्वत्सुतमिति शेषः । तर्हि, तत् सः, नोऽस्माकम्, अनयोऽनीतिः, अनुचितमिति यावत् । स्यात् । इति उक्त्वा, गर्गः तूष्णीं बभूवेत्यर्थः । इति त्रयाणामेकान्वयः ॥७–९॥

कृष्णप्रिया

भगवन् ? आप ज्योतिष शास्त्र के प्रणेता है जो ज्ञान अतीन्द्रिय है एवं सूर्यादि ग्रहों का साक्षात् प्रदर्शक है जिस ज्ञान से "परस्य" पर पुरुषोत्तम का अथवा भविष्य का एवं "अवरस्य" अपने नीचे परमाणु आदि पदार्थों का अथवा भूत काल का ज्ञान होता है ॥ ५ ॥ भगवन् ! आप ब्रह्मज्ञानियों में सर्वश्रेष्ठ है इसलिये मेरे इन दोनों बालकों का नामकरण आदि संस्कार करने योग्य है । यदि आप कहेंगे तुम्हारे कुलाचार्य तो शाण्डिल्यजी है तो मैं कैसे करूँ तब भगवन् ब्राह्मण तो जन्म से दुनिया भर के गुरु हैं ॥ ६ ॥ श्री गर्गाचार्य जी ने कहा राजन् बात तो ठीक है लेकिन यह तो सदा से इस पृथ्वी पर प्रसिद्ध है कि मैं यदुवंशियों का कुलाचार्य हूँ । यदि हम आप के लालनों का संस्कार करेंगे तब कंस आप के लालनों को देवकी के पुत्र मानेगा ॥ ७ ॥ एक तो कंस की पापमय मति है वह सदा अनर्गल बातें सोचा करता है । दूसरी तुम्हारे और वसुदेव जी का सख्य है, तीसरी बात कि उनका तो मन्तव्य है कि देवकी जी की आठवीं संतान कन्या नहीं हो सकती, "अरे पापी, मुझे मारने से क्या मिलेगा ?" इत्यादि देवकी कन्या योगमाया की बातें सुनकर प्रतिदिन वह यही सोच करता रहता है कि कहीं न कहीं वह अवश्य होगा, संभव है कि वह बालक नन्दजी के ही घर हो सकता है यह मानकर और मेरे संस्कार कराने से शंकित होकर यदि वह बालकों को मार देगा, तब हम लोगों का महान् अनिष्ट होगा ॥ ८–९ ॥

इति संचिन्तयञ्छ्रुत्वा [1]देवकी दारिकावचः । अपि हन्ताऽऽगताशङ्कस्तर्हि तन्नोऽनयो [2]भवेत् ॥ ९ ॥

नन्द उवाच

अलक्षितोऽस्मिन् रहसि मामकैरपि [3]गोव्रजम् । कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकम् ॥१०॥

श्रीशुक उवाच

एवं सम्प्रार्थितो विप्रः स्वचिकीर्षितमेव तत् । चकार नामकरणं गूढो रहसि बालयोः ॥११॥

गर्ग उवाच

[4]अयं हि रोहिणीपुत्रो रमयन् सुहृदो गुणैः । आख्यास्यते राम इति बलाधिक्याद् बलं विदुः ॥१२॥

---

[1] देवक्या–श्रीधर. वंशी विश्व. शुक. ; देवकीदारिका–वीर. विज. । [2] महान्–वीर. विज. । [3] गोव्रजे–श्रीधर. वंशी. वीर विज. विश्व. । [4] अयं वै–वीर. ।

कर्वमक्षमा

अन्वयः—इति संचिन्तयन् आगताशङ्कः अपि हन्ता तर्हि नः महान् अनयः (भवेत्) ॥ ९ ॥ अस्मिन् मामकैः अपि अलक्षितः रहसि गोव्रजं स्वस्तिवाचनपूर्वकम् द्विजातिसंस्कारं कुरु ॥ १० ॥ एवं सम्प्रार्थितः विप्रः गूढः रहसि स्वचिकीर्षितं एव तत् नामकरणं बालयोः चकार ॥ ११ ॥ अयं गुणैः सुहृदः रमयन् हि रोहिणीपुत्रः राम इति आख्यास्यते बलाधिक्याद् बलं विदुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

'किं मया हतया मंद' इत्यादि देवकीकन्यावचः श्रुत्वा 'देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति" इति नित्यं संचितयन्सामान्येन कश्चिदस्तीति ज्ञात्वा युवयोश्च सख्यं संचितयंस्त्वद्गृहे भवेदिति संभाव्य मत्संस्कारलिंगेन चागताशंकः आगता आशंका यस्य सः। अपि यदि हंता हनिष्यति तर्हि तत्तदा नो महाननयः स्यादिति ॥ ९ ॥ द्विजातिसंस्कारं द्विजातीनामवश्यं कर्तव्यं संस्कारमात्रं केवलं स्वस्तिवाचनपूर्वकं कुर्विति ॥ १०–११ ॥ यदूनामपृथग्भावात्कृतश्चिद्धेतोर्विप्रतिपद्यमानानां यदूनामपृथग्भावात् भावो भावनं तस्मात्। अन्योन्यशिक्षया सर्वैकमत्यकरणादित्यर्थः। सम्यक्कर्षत्येकीकरोतीति संकर्षणमप्युशंति इच्छन्ति वक्ष्यंतीत्यर्थः। गर्भसंकर्षणं तु न प्रकाशयति स्म ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अस्मिन् गोव्रजे गोकुले तत्रापि रहसि मामकैर्मदीयसंबंधिभृत्यादिभिरप्यलक्षितोऽज्ञातः ॥ १० ॥ तन्नामकरणं स्वचिकीर्षितमेव निजाभिलषितमेव ॥ ११ ॥ गुणैर्निजसौशील्यवात्सल्यादिभिः। रमयन्नानंदयन्। वस्तुतस्तु–"रमन्ते योगिनोनंते नित्यानंदे चिदात्मनि। इति रामपदेनासौ परं ब्रह्माभिधीयते ॥" इति। यद्वा–राति गृह्णाति जगत्कुक्षौ ददाति वा भक्ताभीष्टमिति राः 'रा–दानग्रहणयोः' अम्यते मुक्तैर्गम्यत इत्यमः। 'अम–गत्यादौ' राश्चासावमश्चेति रामो जगज्जन्मादिकर्ता मुक्तप्राप्यः परमात्मेत्यर्थः। अस्यापि "वृष्णिषु प्राप्य जन्मनी। रामकृष्णौ" इति भगवदवतारत्वात्परब्रह्मतैव। बलमधिकमस्येति मत्वर्थीयोऽच्। "भूमनिंदाप्रशंसासु नित्ययोगेऽतिशायने। संबंधेस्तिविवक्षायां भवंति मतुबादयः ॥" इति भर्तृहरिवाक्यादत्र भूमार्थेऽच्। यद्वा–बलते संवृणोति सर्वेषां धृतिमिति बलः। यद्वा–रमयति लोकान्स्वस्वव्यापारे प्रवर्त्तयतीति रामः। सर्वेषु बलवत्स्वधिकबलवत्त्वाद्वा बलः। "रामेति लोकरमणाद्बलं बलवदुच्छ्रयात्" इति वक्ष्यमाणत्वात् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गोव्रज इति स्थानसंस्कारानपेक्षा च दर्शिता रहसीति दिने गवां सपालानां वने गमनात् द्विजातिसंस्कारं यथा स्वक्षत्रवैश्यानुरूपनामकरणलक्षणं पुण्याहस्वस्तिऋद्धयस्त्रिरुक्त्या स्वस्तिवाचनं स्यात् स्वस्तिवाचनमन्त्राणां पठनं च स्वस्तिवाचनं यद्वा "पुनन्तु मा देवजनाः' पुनन्तु मनसा धिया' पुनन्तु विश्वा भूतानि, जातवेदः पुनीहि माम्" इत्यादिमन्त्राः तच्च सर्वकर्मस्वावश्यकं न बहिर्लोकवेद्यं च अतः केवलं तत्पूर्वकम् ॥ १० ॥ तद्व्रजजनैरप्यलक्षिततया रहसि तादृशसंस्कारमात्रकरणं स्वस्य कर्त्तुमिष्टमेव, ननु, श्रीभगवदैश्वर्याभिज्ञेन तेन कुतस्तत्कृतौ सङ्कोचो न कृतः तत्राह–बालयोरिति। लोकहितार्थं स्वभक्तप्रमोदनार्थं च प्रकटितबाल्यलीलयोस्तयोस्तदनुरूपा लीला तदीयैश्वर्यज्ञानिनामपि मोहिनीति भावः। तत्र रहःस्थाने बालकद्वयानयनतद्दर्शनञ्च गर्गानन्दशुभाशीर्वादादिवर्णनमूह्यम् ॥ ११ ॥ अयं वै इति सार्द्धकम्। अयं हीति कचित्। अदमित्यङ्गुल्या निर्दिश्य करेण स्पृष्ट्वा वा बोधयति। एवमग्रेऽप्यस्येति अत्र प्रकटार्थः रोहिणीपुत्र इत्येतदप्येकं नामेत्यर्थः। सुहृदः श्रीवसुदेवादीन् भवदादींश्च आख्यास्यन् इति नाम्नोऽस्य मत्कर्त्तृत्वं व्याजमात्रमेव किन्तु तादृशतया स्वयमेव ख्यातिर्भविष्यतीत्यर्थः। एवमुत्तरत्रापि विदुरिति वर्त्तमानसामीप्ये वर्त्तमानत्वम् एवमुत्तरत्रापि एनमिति शेषः। यदूनां श्रीवसुदेवादीनां भवदादीनां च अपृथग्भावात् निर्विशेषपितृत्वादिभावात् तेनोभयकुलस्यापि स्वस्मिन्नाकर्षणादित्यर्थः। एषामपि यादवत्वेन तदैक्यं द्वारकातो व्रजमागतस्य रामस्य वचनेन हरिवंशे व्यक्तम्—

प्रत्युवाच ततो रामः सर्वांस्तानभितः स्थितान्। यादवेष्वपि सर्वेषु भवन्तो मम बान्धवाः ॥ इति।

यदूनामहमाचार्य इति तु प्रसिद्धिमात्रमवलंब्य प्रोक्तम् अपि तु शब्दान्नामान्तराण्यपि सूचितानि। उतेति पाठे स एवार्थः अप्रकटार्थं तु शोभनं ह्येषां तान् सात्वतान् आत्मारामादीन् रमयन् रामः विदुर्जानन्तीति तन्नाम्नां सदातनत्वं व्यञ्जयति एवमुत्तरत्रापि किञ्च सङ्कर्षणनाम्नोपि निरुक्त्यन्तरमपिशब्दात् ज्ञेयम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

गवां व्रज इति महिष्यादीनामावासो व्यावर्त्तितोऽयोग्यत्वात्। यद्वा, दिने गवां सपालानां वने गमनान्निर्जनत्वं बोधितम्। द्विजातिसंस्कारं वैश्याऽनुरूपनामकरणमात्रलक्षणम्, दीक्षा–पूर्वांगतिलकादिधारणादेशमात्रञ्च कुरु। पुण्याह–स्वस्ति–

ऋद्धयास्त्रिस्त्रिरुक्ताः स्वस्तिवाचनं स्यात्। स्वस्तिवाचनमन्त्राणां पठनं वा स्वस्तिवाचनम्,—यथा (ऋग्वेदः ९।६७।२७) 'पुनन्तु मां देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि माम्' इत्यादिमन्त्राः। तच्च सर्व्वकर्म्मस्वावश्यकम् ॥ १० ॥ तद्व्रजजनैरप्यलक्षिततया रहसि तादृशसंस्कारकरणं स्वस्य कर्त्तुमिष्टमेव। एवमुक्तप्रकारेण सम्यक् प्रार्थितः सन् तदिति दीक्षा-पूर्व्वांगं वा, तस्य निगूढत्वात् संकेतेनोक्तिः। आदौ तत्करणं मुख्यत्वान्मंगलत्वाच्च। रहसि गूढः सन्नित्यस्यायं भावः,—श्रीनन्दस्यानन्दार्थमवश्यं तत्पुत्रस्य माहात्म्यं कथ्यमेव, तथापि नन्दस्य स्नेहभरेण तस्मिन्नीश्वरज्ञानं न भवितैव। अन्येषाञ्चाधुना तद्वत् स्नेहपरिपाकाभावान्माहात्म्यविशेषश्रवणेनेश्वरज्ञानोत्पत्त्या स्नेहविशेषभंगः स्यादित्यलक्षितं रहस्येव तदुचितमिति। यद्वा, गूढः कंसभिया प्रच्छन्नः, तत्रापि स्नेहह्रासशंकया श्रीव्रजेशं प्रति तदीयपरमैश्वर्य्यं साक्षादनभिव्यज्य लोकोत्तरचमत्कारकर्म्मकोऽप्ययं श्रीबादरायणतुल्यो महापुरुष इति व्यपदेशेनाब्रवीदिति। ननु, श्रीभगवदैश्वर्य्योभिज्ञेन तेन कुतस्तत् कृतम्? तत्राह—बालयोरिति, लोकहितार्थं स्वभक्त-प्रमोदार्थञ्च प्रकटित-बाल्यलीलस्य तस्य तदनुरूपलीला तदीयैरवश्यमनुसर्त्तव्यैवेति भावः ॥ ११ ॥ अयमित्यंगुल्या निर्दिशति, करेण वा स स्पृष्ट्वा वदतीति बोधयति। एवमग्रेऽप्यस्येति च; गुणैर्वात्सल्यार्जवादिभिः। वै प्रसिद्धाविति निजोक्तौ शास्त्रादिद्वारा प्रामाण्यं बोधयति। आख्यास्यते सुहृद्भिर्लोकैर्वा। एवं नाम्नोऽन्वर्थत्वनिरूपणेन निजौद्धत्यं परिहृतम्। एवमग्रेऽपि। बलस्याधिक्यादतिशयात्, किंवा बलेन सर्व्वलोकेभ्य आधिक्यात्; यदूनामिति तैर्व्याख्यातम्; यद्वा, तव पुत्र एवायं पुष्टत्वात्; तच्च 'व्रजेशसुतयोः' इत्यादिना व्यक्तमेव। अतएवोक्तम्—'रोहिण्याः पुत्रः' इति, न च वसुदेवस्येति; तथापि तस्माज्जातत्वेन यदुभिः सहापृथक्त्वात् संकर्षति कुलद्वयमप्याकर्षयतीति संकर्षणमपि वक्ष्यन्तीत्यर्थः ॥ १२ ॥

श्रीमद्वीरराघवाचार्य्यकृता भागवतचन्द्रचन्द्रिका

एवमुक्तवन्तं गर्गं प्रत्याह नन्दः-अलक्षित इति अस्मिन् गोकुले मामकैर्मदीयैरप्यलक्षितः रहसि निर्जने देशे स्वस्तिवाचनपूर्वकं द्विजातिसंस्कारं द्विजातीनामवश्यकर्त्तव्यं संस्कारं तूर्यघोषादिरहितं कुर्वित्यर्थः ॥ १० ॥ इत्थं सम्यक् प्रार्थितो द्विजो गर्गः स्वेन कर्तुमिष्टमेव तदाबालकयोर्नामकरणं रहसि गूढस्सन् चकार ॥ ११ ॥ तदेव दर्शयति-अयमित्यादिना। गुणैः सुहृदो रमयन्निति तस्मिन् रामशब्दस्य प्रवृत्तिनिमित्तप्रदर्शनं बलाधिक्यादिति बलशब्दस्य तथा यदूनामपृथग्भावात्कुतश्चिन्निमित्ताद्विप्रतिपत्स्यमानानां तेषामन्योन्यसामादिघटनेनैकमत्यसम्पादनरूपात्समानानां तेषामन्योन्यस्य कर्षणात्प्रवृत्तिनिमित्तात्संकर्षणशब्दाभिधेयम् उशन्तीच्छन्ति जना इति शेषः। सम्यक्कर्षति वैमुख्यनिवर्त्तनेनैकतां नयतीति सङ्कर्षणमुशन्तीत्यर्थः। गर्भसङ्कर्षणात् सङ्कर्षणः सङ्कर्षणाख्यस्यानन्तस्यांशत्वाद्वा सङ्कर्षण इति व्युत्पत्तिद्वयमप्यभिप्रेतम् ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मामकैरप्यलक्षिते अज्ञाते अस्मिन् व्रजे तत्रापि रहसि ॥ १० ॥ आशीर्वचनपूर्वकं नामकरणप्रकारमाह—चकारेति ॥११॥ यदूनां मध्ये उशन्ति इच्छन्ति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अपीति सम्भावनार्थत्वाद्यदीत्यर्थः। हन्तेति शीले तृन् हिंसाशीलः कंसो यदि प्राप्तशङ्को भवतीत्यर्थः ॥ ९–११ ॥ यदूनां श्रीवसुदेवादीनां भवतां चापृथग्भावात्तु पितृत्वादिसाधारणबुद्धेरित्यर्थः। तदुक्तं श्रीहरिवंशे गोपवर्गं प्रति तेन स्वयमेव "यादवेष्वपि सर्वेषु भवन्तो मम बान्धवाः" इति निर्धारणं हि सजातीयेष्वेव षष्ठीसप्तम्यौ विधत्ते गोषु कृष्णाः सम्यक् क्षीरा इति वत् तदेवं सति सङ्कर्षति अभेदबुद्ध्यैकीकरोति सङ्कर्षण इति विवक्षितम्। अनेन गोपानामेव यदुवंशोद्भवत्वमप्यवगतं तच्च श्रीकृष्णसन्दर्भादौ प्रतिपादितमेव ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भाग्यवशादेव मद्गृहमायातमीदृशमाचार्य्यं कदा पुनरहं लप्स्ये तस्माद्वादित्रायुत्सवाङ्गं दिनान्तरे सविस्तरं करिष्ये साम्प्रतमद्य केवलं शास्त्रीयमावश्यकं कृत्यमेवैतद्वारा कारयामीति मनसि विभाव्याह—अलक्षित इति। मामकैर्भ्रात्रादिभिरपि गोव्रजे इति स्थानसंस्कारोपि नापेक्ष्यः रहसीति दिने सपालानां गवां वने गमनात् द्विजातिसंस्कारं बालयोरनयोः क्षत्रवैश्यानुरूपनामकरणलक्षणं पुण्याहस्वस्तिऋद्धयस्त्रिस्त्रिरुक्त्या स्वस्तिवाचनं भवेत् तस्य सर्वकर्मस्वावश्यकत्वात् तत्पूर्वकम् ॥ १०–११ ॥ यदूनां वसुदेवादीनां भवदादीनां च अपृथग्भावात् निर्विशेषपितृत्वादिभावात् स्वस्मिन्नुभयकुलस्याकर्षणात् तच्च हरिवंशे—

प्रत्युवाच ततो रामः सर्वांस्तानभितःस्थितान्। यादवेष्वपि सर्वेषु भवन्तो मम वल्लभाः ॥ इति।

तद्वचनेनैव व्यक्तं गर्भसङ्कर्षणं तु न प्रकाशयति ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मामकैरप्यलक्षितः किम्पुनः परकीयैः ॥ १०-११ ॥ यदूनामपृथग्भावात् स्वस्य तन्मध्यवर्तित्वात् यदुविरोधिपुरादिसङ्कर्षणात् सङ्कर्षणमुशन्ति मन्यन्ते वक्ष्यन्तीत्यर्थः ॥ १२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कंसाद्बिभेषि चेदेवंकुर्वित्याह—मामकैर्भ्रात्रादिभिरप्यलक्षितस्त्वं गोव्रजे रहसि स्वस्तिवाचनपूर्वकं द्विजातिसंस्कारं कुरु त्वादृशं महर्षिमहं कदा पुनः प्राप्नुयामिति भावः । गोव्रजे इति स्थानसंस्कारानपेक्षा तस्य रहस्त्वं दिवसे सपालानां गवां विपिने गमनात् द्विजात्योः क्षत्रवैश्ययोरनयोः संस्कारं तदनुरूपं नामकरणमात्रं पुण्याहस्वस्त्यृद्धयास्त्रिस्त्रिरुक्ताः स्वस्तिवाचनं भवेत् तस्य सर्वेषु कर्मस्वावश्यकत्वात्तत्पूर्वकमित्युक्तम् इतस्त्वयि गते तु वादित्रनृत्याद्युत्सवाङ्गं करिष्याम इति भावः ॥ १० ॥ सङ्कर्षणनाम निर्वक्ति यदूनामित्यर्द्धकं कंसक्लेशाद्यत्र क्वापि गतानां तेषामपृथग्भावादेकस्थापनरूपात् समाकर्षणादथ च वसुदेवादीनां भवदादीनाञ्चापृथग्भावान्निर्विशेषपितृत्वादिभावैरुभयेषां स्वस्मिन् समाकर्षणात् सङ्कर्षणमुशन्तीच्छन्ति कथयिष्यन्तीत्यर्थः । उभयेषां पितृत्वादिभावैः स्वस्मिन् समाकर्षणन्तु "प्रत्युवाच ततो रामः सर्वांस्तानभितः स्थितान् । यादवेष्वपि सर्वेषु भवन्तो मम वल्लभाः ॥" ११ ॥ इति श्रीहरिवंशे नन्दभ्रातॄन् प्रति तद्वाक्यात् गर्भसङ्कर्षणात्त्वन्तु न प्रकाशितमतिरहस्यत्वात् ॥ १२ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

रोहिणीपुत्रेण निमित्तेन यदूनामपृथग्भावादपृथक्त्वात् । एकविषयमिति मत्त्वेति यावत् । ज्ञानिनो रोहिणीपुत्रम् । उत शब्दश्चार्थे । संकर्षणमुत संकर्षणनामकं चोशन्तीच्छन्तीति । एतेनापृथक्त्वस्य यदुनिष्ठत्वेन संकर्षणनिष्ठत्वाभावाद्यदूनामपृथग्भावात्संकर्षणमुशन्तीति कथनमनुपपन्नमिति दूषणमपास्तम् । यदुनिष्ठपृथक्त्वहेतुं, रोहिणीपुत्रात्संकर्षणवाच्यत्वे निमित्तमित्युच्यत इत्यभ्युपगमात् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उपायमपायापाये नन्दो वदति । अलक्षित इति । मामकैर्गोपैरप्यलक्षितेऽज्ञाते रहस्येकान्तेऽत्रैव गोव्रजे गवाशब्देन व्रजे तत्पदवाच्ये । व्रज इत्यनेनैव व्रजो गोष्ठाध्वेति विश्वाद्युक्तेरतिरिक्तं गोपदमिति निरस्तम् । गवां मार्गे तत्सद्म इति वा । व्रजो गोष्ठाध्ववृन्देष्विति विश्वः । अपि सम्भावनाविषयकगमनवानित्यपि गो व्रज इति वा । अपि मध्यं गृहमध्यगं मतीति स वा सन् । अपि प्रश्नानुनययोः समयेऽन्तिकमध्ययोरिति विश्वः । अपिः पदार्थसम्भावनेत्यादिपाणिनीयस्मृतेः । द्विजातिसंस्कारान्क्षत्रियजातियोग्यान् यथोक्तमाचार्यैः । चक्रे क्षत्रिययोग्यान्संस्कारानिति । द्वितीया जातिर्द्विजातिः क्षत्रिया जातिः । द्विशब्दस्य द्वितीयार्थकत्वं तु त्रिभागशेषामिति माघव्याख्यावसरे सङ्ख्याया वृत्तिविषये पूर्णार्थत्वमिति वार्तिकोक्तेरिति पेद्दभट्टव्याख्यानाज्ज्ञेयं । त्रिदशास्तु विराजते।१०। स्वचिकीर्षितं स्वेनैव कर्तव्यमित्यालोचितमेव तन्नन्दबोधितमिति स विप्रो गूढः स्वयं रहसि बालयोर्नामकरणं नामस्थापनोपयुक्तं कर्म चक्रे ॥ ११ ॥ अन्तर्निकेतं सङ्केतमात्रत इदं नानाम किन्तु समनुक्तार्थमिति निरूप्य विविच्य वक्ति । अयमित्यादिना । गुणैः सुहृदः शोभनमनस्कान्सतो रमयन्नित्ययं रोहिणीपुत्रो राम इत्याख्यास्यते जनैः । योऽयं रमयन्वर्ततेऽस्य राम इत्याख्येति योजना वा । त एव लोका बलाधिक्यादमुं बलं च विदुः । यदूनां मध्येऽमुं सङ्कर्षणमुशन्तीच्छन्ति । वश कान्तौ कान्तिरिच्छा ग्रहिज्योरिति सम्प्रसारणं । सङ्कर्षणशब्दं निर्वक्ति । अपृथग्भावादिति । सङ्कर्षयित्वैकत्र मेलयतीति भावः । इति नामत्रयं । बलस्योक्त्वाऽनन्तनाम्नो वर्णादिवर्णनपूर्वकं नामनिरुक्तिपूर्वकं वक्ति ॥ १२ ॥

श्रीसुबोधिनी

कथमियं ज्ञीति सञ्चिन्तयन् कंसो मारयेदितिसम्बन्धः, शङ्कायां कारणान्तरमप्यस्तीत्याह श्रुत्वा देवकीदारिकावच इति, देवक्या दारिका बालिका तस्याः वचः "किं मया हतया मन्द जातः खलु तवान्तकृ"दिति, अतोस्या आकाशवाण्याश्च कार्यं विचार्यमाणे देवक्याः पुत्रो रात्रावत्रानीय वसुदेवेन स्थापितस्तव च कन्या तत्र नीतेति फलति तदापीतिसम्भावनायामाराताशङ्कः सन् हन्ता हनिष्यति, तथा सति नोस्माकं महाननयः स्यात्, अतस्तव पुत्रस्य संस्कारो मया प्रसिद्धतया न कर्तव्य इति फलितम् ॥९॥ नन्दस्तस्य प्रतीकारमाहालक्षित इति ।

ज्ञापितं च हरेस्तत्त्वं स्नेहाधिक्यान्न बुध्यते । अतो निरोधः कर्तव्यः शास्त्रं तत्राप्रयोजकम् ॥ १ ॥

अस्मिन् गोष्ठे गुप्तस्थाने मामकैरप्यलक्षितोनुमानेनाप्यज्ञातः सन् द्विजातिसंस्कारं कुरु, अनेनेयं वार्ताप्येकान्त एव कृतेति ज्ञायते, गवां व्रजे न कश्चिदभिज्ञो नागरिकवद्, गवां बुद्ध्या तुल्या एव सम्भवन्ति, मामकानां स्वरूपं मया ज्ञायत इति तेषामज्ञानं साधनीयं, एतेनान्ये व्याख्याताः, द्विजातीनां मन्त्रवत्संस्कारो भवति, अन्येषाममन्त्रकम्, अतो मन्त्रप्राधान्येनैव कर्तव्यं

नोत्सवप्राधान्येन तदाह **द्विजातिसंस्कार**मिति, मङ्गलमावश्यकमिति विचार्य मङ्गलमपि वैदिकमेव कर्तव्यमित्याह **स्वस्तिवाचनपूर्वक**मिति, **स्वस्तिवाचनं** पुण्याहवाचनं, पुण्याहमस्त्वस्यद्धि(?) **स्वस्तिवाचनं**. तत् सर्वकर्मस्वावश्यकम् ॥ १० ॥ एवमुक्ते स्वाभिलषितं सिद्धमिति कृतवानित्याहैवं **स प्रार्थित** इति, ज्ञातेपि लोके प्रतीकारं करिष्यामीति तस्याभिप्राय इति ज्ञापयितुं **विप्र** इति शीघ्रं च तस्य कर्तव्यमिति पुरोहितत्वात् **स्वस्य चिकीर्षितमेव तत् नामकरणं कर्म** प्रसिद्धमिति वा सर्वत्र, **गूढः** स्वयमपि गुप्तः सन् वेशान्तरेण यावत् तत्र तिष्ठति, **रहस्ये**कान्ते, **उभयोरपि** नामकरणमुभयोरनुगुणमुहूर्ते, **बालयो**रिति केशाभिप्रायो वा ॥ ११ ॥ ज्येष्ठानुक्रमेण नामकरणं कुर्वन्नादौ ज्येष्ठस्य नामत्रयमाहायमिति सार्धेन, वस्तुतो ब्रह्मण्यव्यवहार्ये स्वरूपतो नामाभावात् सङ्केताभावाद् गुणयोगादेव नामानि भवन्ति, उभावत्र पुत्रौ वसुदेवस्य, तत्रैको मातृनाम्नापरः पितृनाम्ना, प्रथमं गुप्ततया मातृनाम्ना नामाहायं **वै** निश्चयेन **रोहिणीपुत्रो**तो रौहिणेय इत्युक्तो भवति, रोहिण्यामाविर्भूतस्यावेश इति च, **वै** निश्चयेनेति यशोदायाः पुत्रत्वे सन्देह इति ज्ञापितं, यदि भगवान् प्राकृतः केनाप्यंशेन भवेत् तदा याशोदेयो दैवकेय इतिनाम भवेद् यथा रौहिणेय इति, तस्मादयमेव **वै** निश्चयेन रोहिणीपुत्रः, किञ्च योनिकृतसम्बन्धाध्यासोप्यस्य दृढ इत्याह **रमयन् सुहृदो गुणै**रिति, **सुहृदः** सर्वानेव सम्बन्धिनो **गुणैः** स्वसामर्थ्यैः पालनपोषणप्रीणनादिभी **रमयन्** लोके **राम** इत्याख्यास्यते, **गुणैः** सुस्वभावादिभिर्वा, **अयं च बलिष्ठो भविष्यति** तथा ग्रहदर्शनादित्यन्यबुद्धिः, अतो बलाधिक्याद् **बल**रूपमेवैनं **विदुः** ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अयं वै रोहिणीपुत्र इत्यत्र, **वस्तुत** इत्यादि । अप्राकट्यदशायामव्यवहार्ये ब्रह्मणि सत्यन्यपदार्थवल्लोके केवलं स्वरूपत एव भगवन्नामप्राकट्याभावाद्भगवतः प्राकट्यात्मकगुणयोगादेव लोके नामानि प्रकटानि भवन्तीत्यर्थः । यथाश्रुतार्थकथने नामानि रूपवन्नामरूपस्यापि भगवतो रूपाणीत्यारभ्याखण्डान्येवेत्यन्तेनाग्रिमग्रन्थेन विरोधः स्यात् । **यशोदायाः पुत्रत्व** इति । अत्रायं भावः । गर्गः पूर्ववृत्तान्ताभिज्ञोऽत्रागत्याधुना भगवद्भाववत्त्वेन भगवति यशोदापुत्रत्वलक्षणं धर्मं च दृष्ट्वा सन्दिहानस्तत्त्वनिश्चयं जानंस्तद्वाच्यव्ययं वा इत्युक्तवान् । अत एव विपरीतनिश्चयो नोक्त इति भगवन्नामकरणप्रस्तावे सम्यग्भगवद्भावनिश्चयोभूदिति तवात्मजस्ते सुतस्येत्युक्तवान् ॥ १२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अलक्षित इत्यत्रामन्त्रकमिति शूद्राणां नामकरणादिकं मन्त्ररहितं, सामान्ये नपुंसकम् ॥ १० ॥ **एवं स प्रार्थित** इत्यत्र तदिति तच्छब्दस्य पूर्वोक्तपरामर्षित्वं प्रकरणबलादेव सिध्यतीति पक्षान्तरमाहुः **प्रसिद्धं वेति केशाभिप्रायो वेति** 'प्राक् चूडाकरणाद् बाल' इति वाक्याच्च चूडाकरणतः पूर्वकालाभिप्रायं बालपदमित्यर्थः, पाद्मे 'फाल्गुने शुक्लपक्षे च गर्गो नामाकरोत् तयो'रिति मासोप्युक्तः, दिनं चाष्टमीति पूर्वापरसन्दंशादवसीयते, ब्रह्मवैवर्ते तु नामकरणेन सहान्नप्राशनमप्युक्तम् ॥११॥ **अयं वै रोहिणीपुत्र** इत्यत्र नन्वत्र नामकरणप्रस्तावे मूलनामैव कुतो नोक्तं **गुणयोगात्** कुत उच्यत इत्याकाङ्क्षायामाहुर्**वस्तुत** इत्यादि, ब्रह्म हि मनोवागविषयत्वात् स्वेन रूपेण न व्यवहार्यं व्यवहारविषयं न भवत्यतस्तादृशे ब्रह्मणि डित्थकपित्थादिवत् स्वरूपकृतनामाभावादव्यवहार्यत्वादेवा 'स्मात् पदादयमर्थो बोद्धव्य' इत्याकारकपदसङ्केतस्याप्यभावात् स्वरूपतो नाम नोक्तं "प्रकाशवच्चावैयर्थ्या"दितितार्तीयीकद्वितीयपादोक्तन्यायेन **गुणयोगादेव नामानि भवन्ति** तथा "पूर्ववद् वे"तिन्यायेन पश्चाद् वा भवन्त्यतस्तथोच्यत इत्यर्थः, तदेतदभिसन्धाय **टिप्पण्यां वस्तुत** इत्यादिफक्किकां व्याकुर्वन्त्य**प्राकट्ये**त्यादि, **अन्यपदार्थव**दिति व्यतिरेके दृष्टान्तः, ननु **यथाश्रुत** एवार्थः कुतो नोच्यते **नामरूपमेव ब्रह्मे**ति भङ्ग्या किमिति व्याख्यायत इत्यत आहुर्**यथे**त्यादि, **अग्रिमग्रन्थेने**ति **'सुतस्य च'** एतद्व्याख्यानगतविचाररूपग्रन्थेन, **सुबोधिन्यां पितृनाम्ने**ति सर्वत्र प्रसिद्ध इति शेषः, **गुप्ततये**ति कंसभयात् पितृगोपनेन, गोपनस्य किं प्रयोजनमित्यत आहू **रोहिण्या**मित्यादि, **रोहिण्यामाविर्भूतस्य** वासुदेवांशस्यैव देवकीत आकृष्टे गर्भे **आवेश** इति हेतोर्वत्युक्तं, तथा **च रोहिण्यामाविर्भूतो** वासुदेवांशोत्र गुप्त इति तथानिरूपणमित्यर्थः । **वा** इत्यस्य प्रयोजनान्तरमाहुर्**यशोदाया** इत्यादि, तत्तात्पर्यं **टिप्पण्यामुक्तमत्राय**मित्यादि, **अत्रे**ति रोहिणीपुत्रत्वे, **सुबोधिन्यां** सन्देहबीजमाहुर्**यदी**त्यादि, **तस्मा**दिति भगवानजनत्वान्न यशोदाया न वा देवक्याः पुत्रः किन्त्वंशद्वारैव पुत्रस्तस्मात्, **योनिकृत** इत्यत्र योनिशब्देन माता बोद्धव्या, **बलरूप**मित्याधिदैविकबलरूपमित्यर्थः ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एवं सम्प्रार्थिते इत्यत्र **ज्ञातेपी**ति लोकेस्मिन् कर्मणि ज्ञातेपि, इदं कर्म लोके ज्ञातं भवेत् तदापीत्यर्थः, **शीघ्रं चे**ति अनेनापि विप्रपदार्थ एवोक्तः, विप्रा हि पश्चिमबुद्धयः, शीघ्रमेव कार्यं कुर्वन्ति न तु विचार्येत्यर्थः ॥ ११ ॥ **अयं वै** इत्यत्र **तत्रैक** इति भगवति शौरिरित्यादिप्रयोगो न तु दैवकेय इति, बले रौहिणेय इतिप्रयोगो न तु शौरिरिति, क्वचित् तथापि प्रयोगो भगवदावेशे, देवकीसुतपदे तु समासे पदद्वयं भिन्नमतः सर्वथैक्यं न बोधयतीतिभावः, **अयं वै निश्चयेने**ति देवक्यां गर्भमात्रसम्भवेपि पुत्रो रोहिण्या एवातो हेतोः रौहिणेयः **रोहिण्यामाविर्भूतस्य** वासुदेवस्यावेश **इति च** हेतो रौहिणेयः न तु दैवकेय इतिभावः, **नामप्रकरणे** स्वरूपमात्रकथनमप्रयोजनकमतो रौहिणेय इति पर्यवसितं नामोक्तम् ॥ १२ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

अलक्षितोऽस्मिन् रहसीत्यत्र ज्ञापितमिति का ४८३। गर्गेण 'यदूनामहमाचार्य'। इत्यादिना ज्ञापितमपि हरेस्तत्त्वं देवकीसुतत्वादिलक्षणं स्नेहाधिक्यान् नन्देन न बुध्यते अतो निरोधाधिकारित्वान् निरोध एव कर्तव्यः, शास्त्रमिति निरोधाज् ज्ञानस्य दुर्बलत्वाज् ज्ञानमप्रयोजकमित्यर्थः ॥ ४८३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं गर्गेण भाषितो नन्दः "केनापि भाग्योदयेनायं महानुभावो मुनिर्मम गृहमागतः, पुनरस्यागमनं तु दुर्लभमेव। अतो लौकिकमुत्सवं तु कालान्तरेऽपि करिष्ये शास्त्रीयमावश्यकं कृत्यं सुगुप्तमपि यद्येतद्द्वारा स्यात्तदा भद्रमेव" इत्यभिप्रेत्य प्रार्थयते—अलक्षित इति। मामकैर्मन्दतरज्ञैरपि गोपैरलक्षितः अज्ञात एवास्मिन् गोव्रजे गोशालायां रहसि एकान्ते स्थितः सन् स्वस्तिवाचनपूर्वकं द्विजातीनामावश्यकं संस्कारमात्रमेव त्वं कुरु। 'गोव्रजे' इत्यनेन स्थानशुद्धिरपि नापेक्षितेति सूचनेन शीघ्रता व्यज्यते ॥१०॥ एवं नन्देन सम्प्रार्थितो विप्रो गर्गस्तत् गुप्ततया संस्कारकरणं तु स्वस्य चिकीर्षितं कर्तुमिष्टमेव, अतो गूढः सन् रहसि बालयोर्नामकरणं चकारेत्यन्वयः ॥ ११ ॥ श्रीनन्दस्य श्रीबलभद्रे स्वकीयत्वाभिमानात्तस्य श्रीकृष्णापेक्षया ज्येष्ठत्वाच्च प्रथमं तमेव दर्शितवान्, अतः प्रथमं तस्यैव नामानि वर्णयति—अयं हीति। अयं हि रोहिणीपुत्रः सुहृदः सर्वान् स्वसम्बन्धिनः स्वगुणैः स्वसामर्थ्यैः पालनपोषणादिभिः सुस्वभावादिभिश्च रमयन् लोके स्वयमेव 'राम' इति आख्यास्यते विख्यातो भविष्यति, मत्कर्तृकत्वं तु व्याजमात्रम्। एवमग्रेऽपि। अस्य बलाधिक्यात् बलिष्ठत्वादेनं जना बलं विदुः 'बल' इति व्यवहरिष्यन्तीत्यर्थः। "गर्भसङ्कर्षणात्तं वै प्राहुः सङ्कर्षणं भुवि" इति भगवतोक्तम्, तत्त लोके न प्रकाशनीयम्। प्रकारान्तरेण सङ्कर्षणव्युत्पत्तिमाह—यदूनामिति। कुतश्चिद्धेतोर्विप्रतिपद्यमानानां यदूनामपृथग्भावात् परस्परशिक्षया सर्वैकमत्यकरणात् सम्यक् कर्षति एकीकरोतीति सङ्कर्षणमुत अपि उशन्ति मन्यन्ते, वक्ष्यन्तीत्यर्थः ॥ १२ ॥

अन्वितार्थप्रकाशिका

अलक्षित इति ॥ मामकैर्मदन्तरङ्गैरपि गोपैरलक्षितः अज्ञात एवास्मिन् गोव्रजे गोशालायां रहसि एकान्ते स्थितः सन्स्वस्तिवाचनपूर्वकं द्विजातीनामावश्यकं संस्कारमात्रमेव त्वं कुरु। उत्सवादिकं तु कालान्तरे कारयिष्यामीत्याशयः। गोशालात्वेन शुद्धतादिने सपालानां गवां वने गमनादेकान्तता ॥ १० ॥ एवमिति ॥ एवं नन्देन संप्रार्थितो विप्रो गर्गस्तत् गुप्ततया संस्कारकरणं तु स्वस्य चिकीर्षितं कर्तुमिष्टमेवातो गूढः सन् रहसि बालयोर्नामकरणं चकार ॥ ११ ॥ अयं हीति सार्द्धम् ॥ अयं हि रोहिणीपुत्रः सुहृदः सर्वान् स्वसंबन्धिनः स्वगुणैः सुशीलतादिभिः रमयन् लोके स्वयमेव लोकैः राम इति आख्यास्यते विख्यातः करिष्यते। मत्कर्तृकत्वं तु व्याजमात्रम् एवमग्रेऽपि। अस्य बलाधिक्यात् बलिष्ठत्वादेनं जना बलं विदुः बल इति व्यवहरिष्यन्तीत्यर्थः। कुतश्चिद्धेतोः विप्रतिपद्यमानानां यदुनामपृथग्भावात् परस्परशिक्षया सर्वैकमत्यकरणात् सम्यक् कर्षति एकीकरोतीति संकर्षणमुत अपि उशन्ति मन्यन्ते वक्ष्यन्तीत्यर्थः। यद्वा। यदूनां भवदादीनां वसुदेवादीनाम् अपृथग्भावान्निर्विशेषपितृत्वादभावात् स्वस्मिन्नुभयकुलस्याकर्षणात् संकर्षणमुशन्ति। "यादवेष्वपि सर्वेषु भवन्तो मम वल्लभाः।" इति हरिवंशे रामवचनात्। गर्भसंकर्षणं तु न प्रकाशनीयमत इदं नामान्यथोक्तम् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मामकैः मदीयैः अलक्षितः अज्ञातः रहसि एकांते द्विजातिसंस्कारं द्विजातिसंस्कारानुसारेण नामकरणम् ॥ १० ॥ स्वेन चिकीर्षितं कर्तुमिष्टं गूढः गुप्तः ॥ ११ ॥ सुहृदः संबंधिनः गुणैः क्रीडाकौतकादिभिः यदूनामपृथग्भावात् परस्परविरोधं प्राप्तानां यदूनां शिक्षया ऐकमत्यकरणात् भावो भवनं उशंति मन्वते वदंति लोका इत्यर्थः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमुक्तवन्तं गर्गं प्रत्याह नन्दः ॥ अलक्षित इति ॥ अस्मिन् गोव्रजे गोकुले, मामकैर्मदीयैः अपि, अलक्षितः सन्, रहसि निर्जने देशे, स्वस्तिवाचनपूर्वकं द्विजातिसंस्कारं द्विजातीनामवश्यकर्त्तव्यसंस्कारं, कुरु। तूर्यघोषादिरहितं यथा भवति तथा कुर्वित्यर्थः ॥ १० ॥ एवमिति ॥ एवमित्थं, संप्रार्थितः सम्यक् कृतप्रार्थनः, विप्रो गर्गद्विजः, स्वचिकीर्षितं स्वेन कर्त्तुमिष्टमेव, तत् नन्दाभिहितं, बालयोः बालकयोः, नामकरणं, रहसि गूढः सन्, चकार ॥ ११ ॥ तदेव दर्शयति अयमित्यादिना ॥ अयमिति ॥ तत्र पूर्वं वसुदेवाद्रोहिण्यां जातपुत्रस्य नामान्याह। अयं, रोहिणीपुत्रः हि, रोहिण्यास्तनयस्त्वित्यर्थः। गुणैः सुहृदः, रमयन् सन्, रामः इति, आख्यास्यते। गुणकृतसुहृद्रमणमत्र रामशब्दप्रवृत्तिनिमित्तं बोध्यम्। बलाधिक्यात्, बलं विदुः कथयिष्यन्तीत्यर्थः। बलस्य निरवधिकातिशयाधिकतात्र बलशब्दप्रवृत्तिनिमित्तं बोध्यं, यदूनां, अपृथग्भावात्, उत संकर्षणं, उशन्ति वक्ष्यन्ति। जना इति शेषः। कुतश्चिन्निमित्ताद्विप्रतिपत्स्यमानानां तेषां यदूनामन्योन्यसामादिघटनेनैकमत्यसंपादनरूपात्संकर्षणात् संकर्षणशब्दाभिधेय इति भावः। गर्भसंकर्षणात् अनन्तांशत्वाद्वा यत् संकर्षणत्वं तच्चाभिप्रेतमपि गोपितम् ॥ १२ ॥

कृष्णप्रिया

श्रीनन्दरायजी ने कहा—भगवन् ! यदि ऐसी बातें हैं तो हमारी गौओं की खिरक में जहाँ हमारे जन भी न जान सके वैसे एकान्त स्थान में स्वस्तिवाचनपूर्वक द्विजाति के संस्कार कीजिये ॥ १० ॥ श्रीशुकाचार्यजी ने कहा—राजन् ! श्रीनन्दरायजी की इस प्रकार की प्रार्थना से विप्रवर्य श्रीगर्गजी ने गुप्त वेष से एकान्त में जिस प्रकार नामकरण करना उन्हें अभीष्ट ही था उस रीति से (फाल्गुन शुक्ल अष्टमी के दिन) दोनों बालकों के नाम करण एवं अन्न प्राशन संस्कार किये ॥११॥ श्रीगर्गाचार्यजी ने कहा—राजन्, निश्चय रूप से यह श्रीरोहिणी के लालन अपने उत्तम गुणों से सुहृज्जनों को आनन्द प्रदान करेंगे अतः "राम" नाम से विख्यात होंगे और इसमें बल की अधिकता देख लोग इसे "बल" भी कहेंगे ॥ १२ ॥

यदूनामपृथग्भावात् संकर्षणमुशन्त्युत ॥ १३ ॥
आसन् वर्णास्त्रयो [1]ह्यस्य गृह्णतोऽनुयुगं तनूः । शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १४ ॥
प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः । वासुदेव इति श्रीमानभिज्ञाः सम्प्रचक्षते ॥ १५ ॥
बहूनि सन्ति नामानि रूपाणि च सुतस्य ते । [2]गुणकर्मानुरूपाणि तान्यहं वेद नो [3]जनाः ॥ १६ ॥
एष वः श्रेय आधास्यद् गोपगोकुलनन्दनः । अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ ॥ १७ ॥

कर्दमक्षमा

अन्वयः—यदूनां अपृथक् भावात् उत संकर्षणं उशन्ति ॥ १३ ॥ अनुयुगं तनूः गृह्णतः अस्य शुक्लः रक्तः तथा पीतः त्रयः वर्णाः आसन् इदानीं हि कृष्णतां गतः ॥ १४ ॥ अयं तव आत्मजः कचित् प्राग् वसुदेवस्य सञ्जातः इति अभिज्ञाः श्रीमान् वासुदेवः सम्प्रचक्षते ॥ १५ ॥ ते सुतस्य गुणकर्मानुरूपाणि बहूनि नामानि च रूपाणि सन्ति अहं तानि वेद जनाः नो ॥ १६ ॥ एषः गोपगोकुलनन्दनः वः श्रेयः आधास्यत् अनेन यूयम् सर्वदुर्गाणि अञ्जः तरिष्यथ ॥ १७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्य तव पुत्रस्य । अतः कृष्ण इत्येकं नाम भविष्यति ॥ १३ ॥ प्रागयमिति । तवायमात्मजः प्रागिति सामान्योक्त्या ऋषिरयं जन्मांतरगतं नाम कथयतीति नंदो मन्यते स्म अत एनं वासुदेव इति संप्रचक्षत इति ॥ १४ ॥ गुणानुरूपाणि ईश्वरः सर्वज्ञ इत्यादीनि । कर्मानुरूपाणि गोपतिर्गोवर्धनोद्धरण इत्यादीनि तानि सर्वाण्यहमपि नो वेद जना अपि नो विदुरिति ॥ १५ ॥ जातकफलमाह । एष इति । आधास्यदाधास्यति ॥ १६–१७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विप्रतिपद्यमानानां संजातविरोधानामपृथग्भावात् भेदापाकरणात् । इत्यर्थ इति ॥ तात्पर्यं न त्वेकीकरणं बहूनां मर्दनं विनैकीभावासंभवादिति । किं च संकर्षति कालिंदीं हास्तिनपुरं वा गंगायां गगनरां बल्वलदैत्यं जरासंधादिसैन्यं वा प्रलये सर्वाः प्रजा वा हलाग्रेणाकर्षतीति संकर्षणः । तनूः शरीराणि । अनुयुगं युगेयुगे । किञ्च "कलिः शयानो भवति संजिहानस्तु द्वापरः । उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन् ।" इतिश्रुतेर्यो विद्यानिद्रायां शेतेऽतिगूढः स पुमान्कलिस्तदनुग्रहार्थमस्मिन्नीश्वरः कृष्णः कृष्णावताररूपी भवति किञ्चिच्छ्रेयोदर्शी अर्द्धप्रबुद्धो यः स द्वापरस्तं प्रति पीतवर्णः हिरण्यवन्मनोहरो भवति । स किञ्चिद्भक्त्युन्मुखो भवतीत्यर्थः । यस्तु श्रेयोर्थं यतते स त्रेता तदनुग्रहार्थं रक्तोऽनुरक्तो मातृवद्भवति । यस्तु युधिष्ठिरादिवदत्यंतभक्तस्तं प्रति शुक्लः स्वीयं शुद्धमेव रूपं प्रकाशयतीति । यथाश्रुतव्याख्यानं तु सर्वेषु युगेषु सर्वेषां रूपाणां सत्त्वान्न युज्यत इति ॥ १३ ॥ मथुरायां कारागृहं इति गोपित्वोक्तं क्वचिदिति ऋषिरयं गर्गः । जन्मांतरगतमन्यावतारी अयम् । अत एव वसुदेवजातत्वादेव । वासुदेव इति । 'क्रमादमुं नारद इत्यबोधि सः' इतिवन्निपातेनोक्तत्वात्प्रथमा । अभिज्ञा वैयाकरणाः । वस्तुतस्तु–वसति सर्वभूतेष्वंतर्यामितया स्वविभूतिभिर्विश्वं वासयत्याच्छादयति वा वासुः दीव्यति क्रीडते विजिगीषते व्यवहरते द्योतते स्तूयते काम्यते गच्छति देवः वासुश्चासौ देवश्चेति वासुदेवः । "छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः । सर्वभूताधिवासश्च वासुदेवस्ततः स्मृतः ॥ वसनात्सर्वभूतेषु वसुत्वाद्देवयोनितः । वासुदेवस्ततो ज्ञेयो योगिभिस्तत्त्वदर्शिभिः ॥" इत्युद्योगपर्वणि । "सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥" इति विष्णुपुराणे । वसंति देवा अत्रेति वासुः करणग्रामस्तं देवयति द्योतयतीति वा वासुदेवः । "वासुः स्यात्करणग्रामस्तेषु देवनिवासतः । तत्प्रकाशकरो देवो वासुदेव इति स्मृतः ॥" इति पुराणांतरात् "योंऽतः प्रविश्य मम वाचमिमां प्रसुप्तां संबोधयत्यखिलशक्तिधरः परात्मा । अन्यांश्च हस्तचरणश्रवणत्वगादींस्तस्मै नमो भगवते" इति ध्रुवोक्तेश्च ॥ १४ ॥ प्रथमादादिपदात् भक्तवत्सलदीनदयालुरित्यादयो ग्राह्याः । द्वितीयात् मुरारिमधुसूदनेत्यादयश्च ॥ १५ ॥ एष कृष्णः । गोपगोकुले नंदयतीति तथा । यदि यूयममुमचक्ष्यत तर्हि एष वश्श्रेय आधास्यत् "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" इति । आङ्धातेर्लृङ् । सर्वदुर्गाणि निखिलदुःखानि । अञ्जः सम्यक् ॥ १६–१७ ॥

---

१. यस्य–वीर. । २. गुणकर्माणि रूपाणि–विज. । ३. जनः–वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं जन्मक्रमापेक्षयादौ श्रीबलदेवस्य नामानि व्यज्य श्रीकृष्णस्य नामानि प्रकाशयन्नाह—आसन्निति । तत्र प्रकटार्थोयम् अनुयुगं युगे युगे वारम्वारं तनूर्गृह्णतोऽस्य शुक्लादिवर्णास्त्रय आसन् इदानीं त्वत्पुत्रत्वे तु जगन्मोहनश्यामवर्णतामेवायं गतः एतदुक्तं भवति तनूर्गृह्णत इति स्वातन्त्र्योक्त्या योगप्रभाव इवोक्तः । तत्र च शुक्लादिरूपग्रहयोग्न श्रीनारायणस्वभावव्यक्त्या तदुपासनायोग एव पर्यवसायितः पूर्वपूर्वतदंशभूतशुक्लाद्युपासनया तत्तत्साम्यादिप्राप्त्या शुक्लतादिप्राप्तिः सम्प्रति तु कृष्णता प्रसिद्धसाक्षान्नारायणोपासनया तत्साम्यप्राप्त्या कृष्णताप्राप्तिरिति, वक्ष्यते च "नारायणसमो गुणैः" इति इत्थं पूर्ववृत्तमुक्तं परमभागवतः श्रीनन्दश्च तोषितः एवं परमोत्कर्षप्राप्त्यैतत्स्वरूपनिष्ठत्वात् कृष्णेत्येव तावन्मुख्यं नाम ज्ञेयम् अतो नाम्नापि कृष्णतां गत इत्यर्थोपि ज्ञेय इत्यभिप्रायः । अप्रकटवांस्तवार्थश्चायम् अनुयुगं युगेयुगे तनूर्गृह्णतः प्रकटयतस्त्रयो वर्णा आसन् प्रकटा बभूवुः तत्र यो यः शुक्लः प्रादुर्भावः यो यो रक्तः यो यः पीतश्च उपलक्षकाश्च ते वर्णान्तरवर्ता स सर्वोपीदानीमस्याविर्भावसमये कृष्णतामेतद्रूपतामेतस्मिन्नन्तर्भूततामेव गतः सर्वांशमेवादाय स्वयमवतीर्णत्वात् अतः स्वयं कृष्णत्वात् सर्वनिजांशस्य कृष्णीक्लृत्वात् सर्वाकर्षकत्वाच्च मुख्यं तावत् कृष्णेति नाम अतः "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इत्यादिका निरुक्तिरप्यन्तर्भवति सर्वबृहत्तमानन्द एव सर्वान्तर्भावात् अतः स्वाभाविकमेवैतन्महानाम यत्र प्रणवे वेदा इव तान्यन्यान्यपि नामानि रूपे रूपाणीवान्तर्भूतानि युक्तं च विशेष्यरूपस्य तस्यान्यनामगणविशेषणकत्वात् उक्तं च प्रभासपुराणे—"मधुरमधुरमेतन्मङ्गलं मङ्गलानाम्" इत्यादौ "सकलनिगमवल्लीसत्फलम्" इत्यन्ते कृष्णनामेति "नाम्नां मुख्यतरं नाम कृष्णाख्यं मे परन्तप" इति च । यस्यास्य प्रथममप्यक्षरं महामन्त्रत्वेन प्रसिद्धम् ॥ १३ ॥ प्रागिति प्रकटार्थे तवात्मजोऽयं क्वचिदन्यत्र वसुदेवादपि जातः, तत्कथं ? तत्राह—प्राक् अस्य तस्य च पूर्वजन्मनीत्यर्थः । एवं श्रीवसुदेवस्य पूर्वजन्मन्यपि तन्नामासीदिति श्रीनन्देनावगतम् अप्रकटार्थे इहैव जन्मनि पूर्वं कंसकारागृहे वसुदेवाज्जातोपि तवात्मज एवेति पूर्वसिद्धान्तानुसारेण अन्यथा तवात्मज इत्यस्याधिक्यं स्यात् अर्थद्वयेपि श्रीमन् हे परमभाग्यसम्पद्युक्त ! इति तादृशपुत्रप्राप्तेः पाठान्तरे श्रीमान् परमशोभासौभाग्याभ्यां युक्तोऽयं तवात्मजः अभिज्ञा इत्यनेन निरुक्त्यन्तरात्तन्निरुक्तेरेवान्तरङ्गत्वं बोध्यते ॥ १४ ॥ रूपाणीति दृष्टान्तत्वेनोक्तं यथा शुक्लादिरूपाणि तथा नामान्यपि जन्मान्तरसम्बन्धीनि बहूनि सन्तीत्यर्थः । तान्यहं वेद जनास्तु न विदुरित्यर्थः । लोकेष्वसंभाव्यत्वात्तानि बहूनि तु न प्रकाश्यन्त इति भावः । अप्रकटार्थे तु गुणानुरूपाणि रूपाणि श्रीनरनारायणनृसिंहादीनि कर्मानुरूपाणि श्रीमत्स्यादीनि अथ गुणानुरूपाणि नामानि भक्तवत्सल इत्यादीनि कर्मानुरूपाणि जगत्स्रष्टा जगत्पालक इत्यादीनि सन्तीत्यनेन सच्चिदानन्दघनरूपाणामिव नाम्नामपि नित्यता सूचिता सा च गुणकर्मानुरूपाणीति साधिता गुणानां नित्यभगवत्समवेतत्वान्नित्यतासिद्ध्या तथा कर्मणां च श्रीगोवर्धनधरकालियमर्दनाद्युपासनानामनादिसिद्धवेदप्रसिद्धेरत एव तत्तदुपासकपरम्परायाश्च विच्छिन्नतापत्तेः श्रीभगवतो भक्तेच्छामयत्वाच्च तन्नित्यतासिद्धा तदनुरूपनाम्नामपि तथात्वसिद्धिः तच्च सर्वं श्रीभागवतामृते निवृत्तमस्ति एवं गुणकर्मनामाऽनन्त्याद्रूपाणीव नामान्यनन्तानि लौकिकवत्प्रतीयमानान्यपि सच्चिदानन्दत्वेनालौकिकानि तदुपासकहृदयैकवेद्यतत्त्वानि नाहमपि वेद जना अपि न विदुरित्यर्थः । अत उक्तं श्रीविष्णुपुराण "अनाख्येयाभिधानं त्वामनाख्येयप्रयोजनम्" इत्यादि । द्वितीयस्कन्धे —

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः । न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ इति ॥१५॥

गोपान् गोकुलशब्देन तत्रत्यांश्च सर्वानेव नन्दयति हर्षयतीति तथा सः इति तस्य स्वभाव उक्तः शीलार्थे प्रत्ययात् कर्मणापि यो युष्माकं व्रजजनानां सर्वेषामेव श्रेयः ऐहिकामुष्मिकमङ्गलम् आधास्यति तथा अनेन कृष्णेन हेतुना सर्वाणि दुर्गाणि कंसाद्युपद्रवान् अञ्जः अनायासेन तरिष्यथ ॥ १६-१७ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं जन्मक्रमापेक्षया किंवा वक्ष्यमाणश्रीभगवन्माहात्म्यस्य विस्तारापेक्षया सूचीकटाहन्यायेनादौ श्रीबलरामस्य नाम कृत्वाधुना 'कृषिर्भूवाचकः शब्द' इत्यादि श्रीकृष्णनामनिरुक्तिं संगोपयन् सुश्यामवर्णत्वेन परमसौन्दर्यापेक्षया कृष्णेति नाम प्रकाशयन्नाह—आसन्निति । अनुयुगं सत्यादियुगत्रये तनूः श्रीमूर्तीर्गृह्णतः प्रकटयतोऽस्य क्रमेण शुक्लादिवर्णास्त्रय आसन् । हि निश्चये प्रसिद्धौ वा, पूर्ववदिदानीं कलेरारम्भे कृष्णतां गतः कृष्णवर्णेन प्रकटोऽभूदित्यर्थः । सच्चिदानन्दघनत्वेन तत्त्वदृष्ट्या प्रायो रूपरूपवतोरभेदात् कृष्णवर्णस्य नित्यत्वेऽपि संगोपनार्थं तथोक्तम् । अन्यथा नित्यश्यामसुन्दरत्वेन सुप्रसिद्धः साक्षाद्भगवान् श्रीनारायणोऽयमिति ज्ञानसम्भवः । यद्वा, प्रतियुगं वारंवारं तनूर्गृह्णतोऽस्य शुक्लादिवर्णा एव त्रय आसन्; इदानीं त्वत्पुत्रत्वे तु जगन्मनोहर-श्यामवर्णोऽभूदिति श्रीनन्दसन्तोषार्थमुक्तम् । एवं नामरूपयोरभेदात् कृष्णतां गत इति कृष्णनाम्ना प्रकटोऽभूदित्येषोऽप्यर्थो द्रष्टव्यः ॥ १३ ॥ तवात्मज इत्युक्तन्यायादद्भुतपरमेश्वरत्व-वसुदेवपुत्रत्व-शंका-निरासार्थम् । एवमग्रेऽपि तदाढ्यार्थमूह्यम् । श्रीमन् ! हे परमारण्यसम्पद्युक्तेति तादृशपुत्रप्राप्तेः; पाठान्तरे श्रीमान् परमशोभायुक्तोऽयं तवात्मजश्चित्ताधिष्ठातृत्वादिना वासुदेव इति पूर्ववत् संगोपितम् । अभिज्ञा इत्यनेन संशब्देन च वसुदेवाज्जातत्वेनेव वासुदेव इति तत्त्वतो मुख्यनिरुक्तिर-

भिप्रेता ॥ १४ ॥ रूपाणीति दृष्टान्तत्वेनोक्तम् ; यथा शुक्लादिरूपाणि तथा नामान्यपि जन्मान्तरसम्बन्धीनि बहूनि सन्तीत्यर्थः । तत्र गुणानुरूपाणि रूपाणि सत्त्वादि-गुणाधिष्ठातृत्वेन शुक्लादीनि; किंवा चित्ताद्यधिष्ठातृ-चतुर्व्यूहादिमूर्त्तयः, किंवा भक्तवात्सल्यादिगुणानुरूपाणि चतुर्भुजादीनि कर्म्मानुरूपाणि श्रीमत्स्यादीनि प्रलयार्णवादौ परिभ्रमणादि-चेष्टया; अथ गुणानुरूपाणि नामानि 'भक्तवत्सलः' इत्यादीनि कर्म्मानुरूपाणि 'जगत्स्रष्टा' 'पालकः' इत्यादीनि, तान्यहमेव वेद, न तु जना विदुरतोऽनन्तत्वात्तानि वक्तुं न शक्यन्त इत्यर्थः ; वस्तुतस्तु लोकेष्वसम्भाव्यत्वात्तान्यधुना न प्रकाश्यन्त इति भावः । सन्तीत्यनेन सच्चिदानन्दघनरूपाणामिव नाम्नामपि नित्यता सूचिता । सा च गुणकर्म्मानुरूपाणीति साधिता । गुणानां नित्यभगवत्समवेतत्वेन नित्यता सिद्धा; तथा कर्म्मणाञ्च श्रीगोवर्द्धनधर-कालियमर्दनादिश्रीमूर्त्तिषु भक्तजन-चित्तान्तः परिस्फुरत्तादृशरूपेषु च सदानुभूयमानत्वेन तत्सिद्धया तदनुसारिणां नाम्नामपि स्वत एव तत्सिद्धेः । अतएव श्रीविष्णुपुराणे (५।१८।५२)—'अनाख्येयाभिधानं त्वामनाख्येयप्रयोजनं' इत्यादि । तच्च सर्व्वं श्रीभागवतामृतोत्तरखण्डे विवृतमेव । एवं गुणकर्म्मणामानन्त्याद्रूपाणीव नामान्यनन्तानि लौकिकवत् प्रतीयमानान्यपि सच्चिदानन्दत्वेनालौकिकानि तदुपासक-हृदयैकवेद्य-तत्त्वानि नाहमपि वेद, जना अपि न विदुरिति तत्त्वार्थः ॥ १५ ॥ गोपान् गोकुल-शब्देन तत्रत्यांश्च सर्वानेव नन्दयति हर्षयतीति तथा स इति तदवतार-स्वभाव उक्तः; यद्वा, हे गोप ! हे राजन्नित्यादरात् ; किं वा हे पृथ्वीपते ! त्वयैव पृथ्वी रक्षितेति भावः । अतो वो युष्माकं व्रजजनानां सर्वेषामेव श्रेय ऐहिकामुष्मिकमंगलमाधास्यति स्वत एवार्पयिष्यति; यद्वा, सामान्येन वो युष्माकं वैष्णवानाम्, किंवा वो युष्मदीय एव सर्वेषामपि श्रेय आधास्यत्येव । विशेषतश्च गोकुलं सर्वमिदं हर्षयिष्यतीत्यर्थः । अतोऽनेन कृष्णेन हेतुना सर्वाणि दुर्गाणि कंसाद्युपद्रवानञ्जोऽनायासेन स्वयमेव तरिष्यथ ॥ १६-१७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

परमात्मत्वं सूचयन्निव तिरोधापयन्निव नामानि चकारेत्यभिप्रायेणाह—आसन्निति । प्रतियुगं तनूर्विग्रहान् गृह्णत उपाददतः अस्य तव पुत्रस्य शुक्लादयस्त्रयो वर्णा आसन्नधुना तु कृष्णतां प्राप्तः अतः कृष्ण इत्येकं नाम भविष्यति अनुयुगं तनूर्गृह्णत इत्यनेन परमपुरुषत्वं सूचितम्—

"कृषिर्भूवाचकः शब्दो णश्च निवृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥"

इत्यादिव्युत्पत्त्यन्तराणि त्वभिप्रेतानि ॥१३॥ आधुनिकमपि वसुदेवापत्यत्वमाच्छादयन् प्राह—प्रागयमिति । अयं श्रीमान् प्राग्वसुदेवापत्यत्वाद्वासुदेव इत्यभिज्ञाः सम्प्रचक्षते अनया सामान्योक्त्या ऋषिरयं जन्मान्तरगतं नाम कथयतीति नन्दो मन्यते स्म "वसन्ति यत्र भूतानि वसन्त्यत्रेति वै यतः । ततः स वासुदेवेति विद्वद्भिः परिगीयते" इति व्युत्पत्तिस्त्वभिप्रेता श्रीमानित्यनेन श्रियः पतित्वं सूचितम् ॥ १४ ॥ तथा गुणकर्मानुरूपाणि बहून्यस्य नामानि सन्तीत्याह— गुणेति । यानि गुणानुरूपाणि "भगवान्नारायण" इत्यादीनि कर्मानुरूपाणि मधुसूदनः इत्यादीनि बहूनि नामान्यहं मादृशो मुनिरेव वेद न तु त्वादृश इत्यर्थः । अनेनापि परमपुरुषत्वं सूचितं यद्वाऽहमेव न वेद किंपुनस्त्वादृशो न वेदेत्यर्थः ॥ १५ ॥ जातकफलमाह— एष इति । वः युष्माकमेषः श्रेयः ऐहिकमामुष्मिकं चाधास्यति गोपान् गोकुलं च नन्दयतीति नन्दनः अनेन सुतेन हेतुभूतेन यूयं सर्वाणि दुर्गाणि दुःखान्यञ्जः आशु तरिष्यथ अञ्ज इति तत्त्वशीघ्रार्थकमव्ययम् ॥ १६-१७ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तनूः शरीराणि ॥ १३ ॥ क्वचिन्मथुरायां निग्रहगृहे अभिज्ञाः तद्धितप्रत्ययविवेकज्ञाः ॥ १४ ॥ न केवलमस्य वर्णनिमित्तं नामगुणानुगुणानि, नामानि सन्तीत्याह—बहूनीति "कृषिर्भूवाचकः शब्दः" इति वचनात् गुणानुगुणं कृष्णेति नाम मधुहननकर्मानुरूपं मधुसूदनेति ॥ १५ ॥ यदि यूयमभजिष्यंस्तर्हि युष्माकं तु श्रेय आधास्यत् अकरिष्यत् आशास्यतीति वा अञ्जः सम्यक् ॥ १६-१७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आसन्निति प्रकटार्थोऽयं प्रतियुगं तनु गृह्णतो भगवतो वर्णास्त्रयः अस्य बालकस्यासन् तस्य विवरणं शुक्ल इत्यादि इदानीं त्वत्पुत्रत्वावसरे तु कृष्णतां साक्षान्नारायणतां रूपगुणादिभिस्तत्तुल्यतामेव गत इत्यर्थः । उपसंहरिष्यते च "नारायणसमो गुणैः" इति एव तत्तदुपासनाप्रभावरूपं पूर्वदृष्टमुक्तम् अत एव परमोत्कर्षरूपनिष्ठत्वात् कृष्ण इत्येवास्य मुख्यं नाम ज्ञेयमिति भावः ॥ १३ ॥ वास्तवार्थस्तु प्रागिति तवात्मजोऽयं क्वचित् कार्ये निमित्त एव वसुदेवस्य जात इति एवात्मजत्वमेवास्य स्वाभाविक इति भावः । वक्ष्यते च सुतस्य त इति ॥ १४ ॥ बहूनीति । प्रकटार्थे सन्ति वाच्यानीति भावः । वास्तवार्थे तु गुणानुरूपाणि श्रीनृसिंहरूपादीनि कर्म्मानुरूपाणि श्रीकूर्मादीनि ॥ १५-१७ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ वसुदेवेन प्रहितो गर्गः श्रीकृष्णस्य नामकरणं यदकरोत्तदाह–आसन् वर्णास्त्रय इत्यादि सार्द्धेन। अस्य श्रीकृष्णस्यावतारिणस्तदवताररूपाणि अनुयुगं युगे युगे गृह्णतस्त्रयो वर्णा आसन्। के त इत्याह–शुक्ल इत्यादि। सत्ये यमवतारमकरोत्, तस्य शुक्लो वर्ण आसीत्; त्रेतायां रक्तवर्ण आसीत् द्वापरे तथा अपीतः यथा शुक्लो रक्तस्तथा श्यामोऽपि। अपीतशब्देन श्याम उच्यते-शुक्ल, रक्त-कृष्णानां पारिशेष्यात्। वक्ष्यति च (भा. ११।५।७) "द्वापरे भगवान् श्यामः" इत्येकादशे। इदानीं कलौ कृष्णतां गतः। कृष्णतेति भावनिर्देशेन भावस्य च सत्तारूपतया स्वाभाविकनित्यसिद्ध एवायं चिद्वर्णः, न तु पूर्वपूर्वावतारवदौपाधिकः। यद्वा, इदानीमिति कलिकालपरत्वम्। तथैकादशे वक्ष्यति—(भा. ११।५।३१,३२) "कलावपि तथा शृणु" "कृष्णवर्णं त्विषाऽकृष्णम्" इत्यादि। ॥ १३–१८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

आसन् वर्णास्त्रयो ह्यस्येति। अस्य श्रीकृष्णस्यावतारिणस्तनूरवताररूपाणि गृह्णतस्त्रयो वर्णा आसन्, अर्थात्तास्वेव तनुषु एव। वर्णाः के ? इत्याह–'शुक्लो रक्तस्तथा पीतः' अपीत इति वा छेदः, अपीतः श्यामः। (भा. ११।५।२७) "द्वापरे भगवान् श्यामः पीतवासा निजायुधः" इत्याद्यनन्तरं (भा. ११।८।३१,३२) "कलावपि तथा शृणु" "कृष्णवर्णं" इत्यादि सङ्गतेः। अत एव स्वामिभिरुक्तम्—'त्विषा कृष्णम्, कलौ कृष्णवर्णस्य प्राधान्यं सूचितम्।' न तु पूर्वपूर्वयुगावतारवत् वर्णेन शुक्लादिवत् स्वाभाविकीयमस्य त्विट्। एतेनेदानीन्तनस्य वर्णो न विचारणीयः, यतोऽयं कृष्णतां गतः, स्वयं भगवत्तां गतः, नायं पूर्वपूर्वावतारवत् युगावतारः, युगावतारे वर्णकल्पना, अयं स्वाभाविक एव श्याम एव ॥ १४–१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तव पुत्रस्त्वं कोऽपि महापुरुष एवेति श्रीनन्दं बोधयन्नाह, आसन्निति। प्रतियुगं तनूर्गृह्णतोऽस्य शुक्लादयस्त्रयो वर्णा आसन् गृह्णत इति स्वातन्त्र्योक्त्या योगप्रभावो दर्शितः। इदानीं द्वापरान्ते कृष्णतां गत इति सत्याद्यवताराणां चतुर्णां शुक्लादीनामुपासनासिद्धत्वेन तत्तत् सारूप्यप्राप्त्येति भावो नन्दं बोधयितुमीप्सितः वस्तुतस्तु अस्यावतारिणस्तत्तद्वर्णवन्तोऽवतारा अंशा एव इदानीमसमवतारी पूर्णः कृष्णत्वं प्राप्तः यद्वा यः शुक्लः यो रक्तः यः पीतश्च उपलक्षणमेतत् यो योऽन्यो मन्वन्तरावतारलीलावतारपुरुषावतारादिश्च स सर्वोऽपि इदानीमंशिनोऽस्यावतारसमये कृष्णतामेतद्रूपतामस्मिन्नन्तर्भूततां गतः सर्वांशमादायैवावतीर्णत्वात् ननु "कृते शुक्लश्चतुर्बाहुः" इति "त्रेतायां रक्तवर्णोऽसौ" इति "द्वापरे भगवान् श्याम" इति कलौ "कृष्णवर्णं त्विषा कृष्णम्" इत्येकादशोक्तेः "कथ्यन्ते वर्णनामभ्यां शुक्लः सत्ययुगे हरिः। रक्तः श्यामः क्रमात्कृष्णस्त्रेतायां द्वापरे कलौ" इति भागवतामृतोक्तेश्च पीतोऽयं किंयुगीयोऽवतारः न च आसन्निति भूतकालनिर्देशेन क्रमप्राप्त्या पीतोऽपि द्वापरयुगावतार इति वाच्यम्। युगावतारप्रकरणपठितत्वात् न च तत्रस्थश्यामपदस्य पीतार्थत्वमत्रस्थपीतपदस्य वा श्यामार्थत्वं कल्प्यमिति तथा पीत इत्यकारप्रश्लेषेणापीतः श्याम इति वाच्यं सर्वथापि व्याख्याने अनुयुगमिति वीप्साप्रयोगात् तनूरितिबहुवचनाच्च वीप्सया चैकैकस्मिन्नपि युगे वर्णत्रयस्य प्राप्तेर्नाभिमतार्थलाभः न चेदानीमिति पदेन कलियुगस्यादिमोंऽश एव वाचनीय इति वाच्यं कृष्णावतारस्य द्वापरान्तर्भवत्वेन प्रसिद्धेः—

"यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम्। तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः॥ इति।

प्रथमोक्तेश्च कृष्णावतारानन्तरमेव कलियुगप्रवृत्तेः तस्मादेवमत्र व्याख्येयं यत्तदोर्नित्यसम्बन्धात् यथा इदानीं द्वापरान्ते कृष्णतां गतः स्वयमवतारी तथा तेनैव प्रकारेण इदानीं कलियुगादिभागे पीत इति किञ्चित् स्थूलकालमवलम्ब्य इदानीमिति पदार्थ उभयत्राप्यन्वेतीति ननु तर्हि साक्षात् क्रियमाणोऽस्य कृष्णो वर्णः किमिदानीन्तन एव किम्वापूर्वमप्यासीदेव तस्यैव प्राकट्यमधुनेति तत्र न केवलं कृष्णवर्ण एव पूर्वमासीत् अपि त्वन्येऽपि वर्णा आसन्नेवेत्याह आसन्निति। त्रयोऽपि वर्णा यथासम्भवं पूर्वपूर्वयुगे तदानीं दृश्यमानास्तत्तत्पूर्वमपि आसन्नेव नित्यस्थितानामेव तेषां तदानीं प्राकट्यं न तु ते तदानीमेवापूर्वा अभवन्नित्यर्थः। अस्य कथम्भूतस्य अनुयुगं तनूरवतारान् गृह्णतः "अवतारा ह्यसङ्ख्याताः" इति सूतोक्तेः "क्वाहो कथं वा कति वा" इति ब्रह्मोक्तेश्च एवं च वैवस्वतमन्वन्तरगताष्टाविंशचतुर्युगीयद्वापरकलियुगयोः स्वयमवतारी कृष्णः पीतश्च प्रादुर्भवति तद्युगद्वयावतारौ श्यामकृष्णौ तदा तत्रैवान्तर्भूतौ तिष्ठतः तत्र पीतस्य "सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी। संन्यासकृत्समः शान्तो निष्ठाशान्तिपरायणः" इति भारताद्युक्तेऽपि विशिष्य स्पष्टतयाऽन्यत्र क्वाप्यनुक्तिरिति रहस्यत्वात् छन्नः कलौ यद्भवस्त्रियुगोऽथ सत्वमिति सप्तमस्कन्धे श्रीप्रह्लादेनापि छन्नत्वेनैवोक्तत्वात् छन्नत्वं च स्वीयवर्णभावयोरन्यदीयवर्णभावाभ्यामावृतत्वेन तदानीन्तनजनैः प्रायो दुर्लक्ष्यत्वमेवेति स्वस्य दुर्लक्ष्यत्वं चिकीर्षा च तस्य रहस्यवस्तुजातव्यञ्जकताहेतुकमेवेति गौडीयभक्तिसुधीभिरवश्यावगम्यं तत एव तत्प्रमापकवचनस्य—

नानातन्त्रविधानेन कलावपि तथा शृणु। कृष्णवर्णं त्विषा कृष्णं साङ्गोपाङ्गास्त्रपार्षदम्।
यज्ञैः सङ्कीर्तनप्रायैर्यजन्ति हि सुमेधसः॥

इत्यस्य युगावतारप्रकरणमध्यपठितस्य तथैव छन्न एवार्थोऽवसीयतेऽर्थान्तरेण स यथा नानाकलौ सर्वकलियुगे अपि कालात् वैवस्वताष्टाविंशचतुर्युगीयकलावपि तन्त्रविधानेन तन्त्राख्यन्यायविधिना श्वेतो धावतीत्यादिवत् एकप्रयत्नोच्चारेण एकदैवार्थद्वयबोधकेन शब्देनेत्यर्थः । शृण्विति । शृण्वन्तमपि राजानं प्रति पुनः प्रेरणं रहस्यत्वेन तन्त्रेणोच्यमानमर्थं विशिष्यावधापयितुं नानातन्त्रविधानेनेति कलौ तन्त्रस्य प्राधान्यं दर्शितमितित्वर्थान्तरं तन्त्रस्याच्याकञ्छादनार्थं ज्ञेयं कृष्णेति सर्वकलियुगपक्षे कृष्णवर्णं कृष्णवर्णदेहं रूक्षत्वं व्यावर्त्तयति त्विषा कान्त्या अकृष्णम् इन्द्रनीलमणिवदुज्वलमित्यर्थः । एककलियुगपक्षे कृष्णवर्णं किन्तु त्विषा कान्त्या अकृष्णं शुक्लरक्तश्यामानामुक्तत्वात् पारिशेष्येण पीतमन्तः कृष्णं बहिर्गौरमित्यर्थः । यद्वा कृष्णावतारलीलादिवर्णनात् कृष्णवर्णं साङ्गोपाङ्गेत्यादिकमुभयपक्षेपि स्पष्टप्रच्छन्नत्वाभ्यां तुल्य एवार्थः ॥ १३ ॥ प्राक् पूर्वं वसुदेवस्य वसुदेवात्तवात्मजोऽयं क्वचिदेकान्तस्थले जात इति प्राक् पूर्वजन्मनि वसुदेवस्यापि पूर्वजन्मनि वसुदेव इत्येव नामासीदिति नन्दो बुद्ध्यते स्म अभिज्ञा इति न केवलमहमेक एवेति प्रामाण्यं दर्शितम् ॥ १४ ॥ बहूनीति न केवलं कृष्ण इति नाम वासुदेव इति नाम मयैव कृतमिति भावः । रूपाणीति न केवलं मयोक्तानि शुक्लादीन्येवेत्यर्थः । गुणकर्मानुरूपाणीति भक्तवत्सलसर्वज्ञगोवर्द्धनधरादीनि कृष्णशब्दः सत्तार्थोणश्चानन्दात्मकस्ततः कृष्णः भक्ताद्याकर्षणादपि तद्वर्णत्वाच्च मन्त्रमयवपुष इति गोविन्दो गोविचारणादपीति केशवाचार्यादिव्याख्यानादित्यर्थः । तान्यहं दैवज्ञोपि न वेद जना नो विदुरिति किं पुनरित्यर्थः । नन्दस्तु मत्पुत्रस्य महापुरुषत्वाज्ज्ञानाजन्मगतमिदं सर्वज्ञत्वादयं वक्तीति बुद्ध्यते ॥ १५ ॥ आधास्यत् आधास्यति गोपानां गवाञ्च कुलं नन्दयतीति सः तेषां कुलस्य नन्दनः ब्रह्ममोहने पुत्र इति वा हे गोपेति वा अञ्जः सुखेन सर्वदुर्गाणीति यदा यदोपद्रव आयास्यते तदा त्वदिष्टदेवेन श्रीनारायणेनाविष्टोयं त्वपुत्र एष त्वया अयमाश्रयितव्य इतीति भावः ॥ १६–१७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अस्य भवत्पुत्रस्य अनुयुगं तनूः मूर्तीर्भक्तेच्छया गृह्णतः प्रकटयतः शुक्लादयो वर्णा आसन् इदानीं तु स्वासाधारणतां कृष्णतां गतोऽतः कृष्ण इत्येकं नाम भविष्यतीत्यर्थः ॥ १३ ॥ वसति सर्वं यत्र वासयत्याच्छादयति सर्वमिति वा वसुः स चासौ देवश्चेति वसुदेवापत्यतयेदानीं जातत्वाद्वासुदेव इति च गोपयितुं सामान्यतो नामान्तरमाह—प्रागयमिति । अयं तवात्मजः क्वचिद्वसुदेवाज्जातोऽतोऽभिज्ञाः वासुदेव इति सम्प्रचक्षते नित्यं श्रीरस्यास्तीति श्रीमानिति च सम्प्रचक्षते नित्ययोगे मतुप् ॥१४॥ किम्बहुना ते सुतस्य बहून्यनन्तानि गुणानुरूपाणि सर्वज्ञ इत्यादीनि कर्मानुरूपाणि सर्वकारण इत्यादीनि नामानि रूपाणि च सन्ति तान्यहमपि नो वेद जना अपि नो विदुरनन्तत्वात् ॥ १५ ॥ जातकफलमाह—एष इति । एष तव सुतः वो भुक्तिमुक्तिलक्षणं श्रेय आधास्यत् आधास्यति अनेन हेतुभूतेन यूयं सर्वदुर्गाणि अञ्जस्तरिष्यथ ॥ १६–१७ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अथ नन्दसूनोर्नामान्याह आसन्निति अस्य सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् । द्विभुजं मौनमुद्राढ्यं वनमालिनमीश्वरमित्यादि श्रुतेरनादितोऽश्यामवर्णस्य त्वदात्मजस्य शुक्लादयस्त्रयो वर्णा रूपाण्यासन् कीदृशस्य अनुयुगं तत्तद्युगे तनूर्मूर्त्तीर्गृह्णतः प्रकटयतः आविर्भावतिरोभावावस्योक्ते ब्रह्मोचने इति स्मरणात् तत्र सत्ये युगे शुक्लोऽस्य वर्णः त्रेतायां रक्तः कलौ तु पीत इदानीमस्मिन् द्वापरावसाने तु स शुक्लादिवर्णः कृष्णतामेतद्रूपतामत्रान्तर्भूतनाङ्गतः परावरेशो महदंशयुक्त इत्याद्युक्तेः तथा च परिपूर्णः कृष्णनामाचायं कृष्णो वर्णश्च मे यस्मात्तस्मात् कृष्णोऽहमर्जुनेति नारायणीयाच्च पीतो वर्णोस्यासीदिति प्राचीनपीतावतारापेक्षया सोऽपि न कलिसामान्ये तत्र हरिवंशादिषु कृष्णवर्णस्योक्तेः किन्त्वेतद्द्वापरान्तरकलाविति बोध्यम् ॥ १३ ॥ अयं तवात्मजो वसुदेवस्य जातः कथमित्याह प्राक् पूर्वजन्मनि इति तस्य तदापि वसुदेव इत्येव नामासीदित्यर्थः । एतद्विवस्वात् प्राक् क्वचिदेकान्ते स्थाने कंसकारायामयं तवात्मजो वसुदेवस्य देवक्यां जातः स च तेनानीतोऽस्मिन् प्रविष्ट इति तु रहस्यत्वान्न प्रकाशितम् अतो वासुदेवे इत्यभिज्ञाः संप्रचक्षते न त्वहमेवेति भावः ॥ १४ ॥ ननु शुक्लादियुगावताराणामवतारीति भवतोक्तेः पुरुषावताराणां लीलावताराणां मन्वन्तरावताराणाञ्चावतारी क इति चेदयमेव स इत्याह बहूनीति । तानि तानि बहून्यसंख्येयस्यैवेत्यर्थः । सन्तीति तेषां नित्यता व्यज्यते गुणानुरूपाणि सर्वज्ञो भक्तवत्सल इत्यादीनि कर्मानुरूपाणि प्रकृतिप्रवर्तको विश्वस्रष्टा विश्वान्तर्यामीत्यादीनि तानि सर्वाणि दैवज्ञो वेदज्ञश्चाहं सामस्त्येन नो वेद न जानामि जनाः कथं विदुरित्यर्थः । तथा च त्वत्सुतः स्वयं प्रभुरित्युक्तम् ॥ १५ ॥ ईदृशोऽपि त्वदाज्ञावहोऽयं भविष्यतीत्याहैष इति । आधास्यदाधास्यति गोपानां गवाञ्च कुलस्य समूहस्य नन्दनः प्रहर्षणः ब्रह्ममोहने पुत्रो वा सर्वदुर्गाणीति यदा यदोपद्रवा भविष्यन्ति तदा तदायमेव स्वांशैस्तान्निवारयिष्यत्यञ्जः सुखेन ॥ १६–१७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आसन्नित्यादीनि । अनुयुगं युगानुसारेण तनूः शरीराणि गृह्णतः स्वीकुर्वतोऽस्य त्रयोऽस्य वर्णा आसन् ॥ १३ ॥ शुक्लो रक्तस्तथा पीत इति त्रयः । गुणे शुक्लादयः पुंसीत्यमरः । इदानीं कृष्णतां श्यामतां गतोऽर्थात्कृष्णवर्णं इति कृष्णनामेति सूचितमनेनेति

क्षेपम् । अयं वसुदेवसुत इति प्रकाश्योक्तौ दुश्चिन्तो भवेन्नन्द इति किंचिदाच्छाद्य वक्ति ॥ प्रागिति । वसुदेवस्य प्राक् क्वचित्तवात्मजो जातः ॥ १४ ॥ ततो वसुदेवस्यापत्यमिति व्युत्पत्त्या वासुदेव इत्यभिज्ञा वैयाकरणाः सम्प्रचक्षते । अभिज्ञा महामतयस्तु गीताभाष्यादावुदाहृतवाक्यशास्त्राद्यभिहितकारणेन वासुदेव इति सम्प्रचक्षत इत्यान्तरङ्गिकोऽर्थो ज्ञेयः । विस्तृतं स्कन्धान्तरविवरणेऽस्माभिरनुसन्धेयं । तर्हि मम सुतनामानि पञ्चषाणि वद वर्तन्ते चेदित्यत आह ॥ बहूनिति ॥ १५ ॥ गुणकर्मानुरूपाणि तान्यहं वेद जनाः पामरा न विदुः । मध्ये मो इति वदन्स्वस्यापि साकल्यतो वैकल्यं ज्ञानस्य सूचयति । तानि च नामानि गुणानुगुणानि कृष्णादीनि मधुसूदनादीनि क्रियानुगुणानि । इदमपि स्थूलदृग्विवक्षयाऽपि सङ्कीर्णानीति मन्तव्यं । अधारयदकरिष्यद्धारयति वा । भाविभावं कथयति ॥ एष इति । अञ्जः सम्यक् पुरा पृथ्वतारे दस्युपीडिताः साधवोऽराजके तत्पितृमरणानन्तरमरक्ष्यमाणाः समेधिता अभिवृद्धाः सन्तो दस्यूञ्जिग्युः । नरनारायणरूपेणेति वा । यथोक्तमुद्योगपर्वणि । ब्रह्मोवाच । यावेतौ पृथिवीं द्यां च भासतो तपस्विनौ । नरनारायणावेतावित्यारभ्य नारायणस्तथैवात्र भूयः सोऽन्याञ्जघान ह । वासुदेवार्जुनौ वीरौ समवेतौ महारथौ । नरनारायणौ देवौ पूर्वदेवाविति श्रुतिः । अजेयौ मानुषे लोके सेन्द्रैरपि सुरासुरैः । एष नारायणः कृष्ण इत्यन्तेन । एतस्मिन्कृष्णे ये महाभागाः प्रीतिं कुर्वन्त्येतानरयो नाभिभवन्ति । प्रकारान्तरेण निदर्शनमाचक्षाण आह । असुरा विष्णुपक्षान्देवानिवेति ॥१६-१८॥

श्रीसुबोधिनी

भगवदाज्ञया मायाकृतमपि कर्मास्मिँल्लोके प्रसिद्धं भवत्विति "गर्भसङ्कर्षणात् सङ्कर्षण" इतिभगवद्वचनाद् देवगुह्यत्वात् तल्लोके न वक्तव्यमिति प्रकारान्तरेण सङ्कर्षणव्युत्पत्तिमाह यदूनामिति, यदूनां मध्येस्य न पृथग्भावोस्ति सर्वत्रात्मबुद्धिरेव, अत एव भगवता मातृद्वयमस्य सम्पादितं भिन्नमातृसुतेषु वैराभावज्ञापनार्थं, अतो भगवत्कृतं संवदतीति नारयन्तं दोषोपि, यदूनां यस्मिन् पृथग्भावो नास्तीति सम्यक् सर्वेषामाकर्षणमाकारणं यस्मिन्निति सङ्कर्षणमुशन्ति वदन्ति, उतापि, अनेन सङ्कर्षणपदार्थोन्तरं मुख्यमस्तीति ज्ञापितम् ॥ १३ ॥ चतुर्मूर्तेर्भगवतश्चत्वारि नामानि वक्तव्यानि तत्र द्वयमाह द्वयं तु गुप्ततयानेकभेदभिन्नं वक्ष्यति चतुष्टयस्य च द्वये प्रवेशाश्च, तत्रादौ कृष्णोयमिति नाम वक्तव्यं, तत्र भगवन्नाम कथमस्येतिशङ्कां वारयन् वर्णपरत्वेन सत्यं वदन्नाहासन्निति, अयमनुयुगं तनूर्गृह्णाति, अन्यथा युगमेव न स्यात्, भगवान् जगच्चेतिद्वयं युगशब्देनोच्यते, तत्रैकस्याविर्भावे एकमेव स्यान् न तु युगलं, धात्वर्थोपयोगो द्वयोरेव, अतो भगवतावश्यमनुयुगमवतारः कर्तव्यस्तत्र युगधर्मख्यापनार्थं रूपं च तथा कर्तव्यं, अन्यथा लोकानां प्रतीतिर्न स्यात्, तदाह शुक्लो रक्तस्तथा पीत इति त्रयो वर्णा अस्यासन्, अग्रे च कलिर्भविष्यति तत इदानीं कृष्णतां गतः कृष्णवर्णं प्राप्तवानित्यर्थः, एवं कृष्णत्वं न प्राप्तवत् किन्त्वयमेव कृष्णत्वं प्राप्तः सर्वगतत्वात् सर्वसमन्वयाच्च, अनेन परब्रह्मतोक्तैव "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इतिनिर्वचनात्, यद्यपि सदैव कृष्णस्तथापि प्राकृतसत्त्वस्याप्यनाश्रयेषु स्वस्वरूपात्मकसत्त्वप्रकटनात् तादृशेष्वपि स्वरूपानन्ददानादिदानीमेव कृष्णत्वं प्रकटितवानित्यर्थः, एतद्गोपनाय शब्दच्छलेन वर्णक्रममुक्तवान्, तेनायं सङ्कर्षणरूपोप्युक्तः कालानुगुणत्वात्, पुरुषोत्तमरूपोप्युक्तः सर्वसमन्वयात् ॥ १४ ॥ नामान्तरमाह प्रागयमिति, क्वचिद् देशविशेषे प्राक् त्वद्गृहागमनात् पूर्वमेव वसुदेवस्य पुत्रो जातो वसुदेवस्येति तवेति च सामानाधिकरण्यादाधिदैविकस्य वसुदेवस्य तवात्मजो जात इत्युक्तं भवति, अनेन प्रद्युम्नताप्युक्ता, वसुदेवे शुद्धसत्त्व आविर्भावादनिरुद्धता च, वस्तुतस्त्वयं तवात्मजः क्वचिद् वसुदेवस्य जात इति तस्य बुद्धिः, वासुदेवत्वे हेतुः श्रीमानिति, लक्ष्मीपतिरयमित्यर्थः, इमं गूढाभिप्रायमभिज्ञा एतज्ज्ञातारोभितोस्य स्वरूपं ये जानन्ति "यावान् यश्चास्मि यादृश" इति, अत एव सम्यक्त्वेन प्रकर्षेण च चक्षते ॥ १५ ॥ एवं नामद्वयमुक्त्वा गुणयोगादयमनन्तनामेति सर्वसाक्षेषु तानि नामानि स्वत एव ज्ञातव्यानीत्यतिदिशति बहूनीति, बहून्यसङ्ख्यातानि नामानि रूपाणि च, अन्यथा क्रियायां निवृत्तायां तन्नाम न स्यात् पाचकपाठकवत्, रूपं चेत् तादृशं भिन्नं भवति तदा कश्चिद् गुणयोगात् प्रवृत्तरूपे नामावश्यकत्वाद् गवादिवत् सर्वदा भगवति चकारान्नामरूपयोः क्रियायाश्च नित्यत्वं प्रतिपादयति सन्तीति, तेन भगवान् गोवर्धनमुद्धरन् सर्वदा वर्तते इति गोवर्धनोद्धरणधीरः क्रियानामभ्यां सहितो गोवर्द्धनोद्धरणरूपः सर्वदा वर्ततेथापि प्रतिकृत्यनुभवो भक्तानामतोनन्तान्येव रूपाणि नामानि चास्यैव कृष्णस्य भगवतः, तदाह सुतस्य त इति, अन्यथा तस्य भ्रमो भवेत्, वसुदेवस्य विद्यमानत्वान् न वाक्यं बाधितार्थं, स्तुत्यर्थमननुरूपाण्यपि कदाचिद् भवन्तीति तद्व्यावृत्त्यर्थमाह गुणकर्मानुरूपाणीति, गुणानामौदार्यादीनां कर्मणां कालीयदमनादीनां चालौकिकानां, नामान्यप्यलौकिकानि भवन्तीति गुणकर्मानुरूपाणि तानि रूपाणि नामानि चालौकिकत्वेनाहमेव वेद नो जनाः, व्यवहरन्त्युच्चारयन्ति च तथापि विचाराभावान्न, जानन्ति, यतो जना जननादिभावधर्मयुक्ताः क्लिष्टा इत्यर्थः, विचारस्तु क्रियायामनित्यतायां रूपे वा कालादिपरिणामेन प्रतिक्षणमन्यभावे तत्सम्बन्धेन प्राप्तं नामान्यदान्यस्मिन् वा सम्बन्धरहितत्वाद् वाचकमेव न भवेत्, ततो निरर्थकानि नामानि न फलन्ति, नाप्यन्तःकरणं शोधयन्ति, अतः स्वरूपाज्ञानेन केवलमुच्चारितानि सम्बन्धाभावात् स्वतोप्यलौकिकत्वाज्ञानादप्युच्चारणे दाहाभाववद् भगवन्नामोच्चारणेपि न प्रपञ्चनिवृत्तिः, नामानि च वर्णात्मकत्वेनैव ज्ञातानि पुरुषं जगच्च नामयन्त्युच्चारयितुरपि वश्यतया स्थापयन्तीति नामानि रूपवन् नामरूपस्यापि भगवतो रूपाणि, यथा भगवद्रूपं प्राकृततुल्यं प्रतीयते ग्राहकदोषादेवं नामान्यपि लौकिकानां ग्राहकदोषादेव लौकिकधर्मयुक्तानीव प्रतीयन्ते, वस्तुतस्त्व-

खण्डान्येव तथा ज्ञानपूर्वकं शुद्धभावेन वस्तुतत्त्वे ज्ञात एव तद्बुद्ध्योच्चारितानि, न तु लोकसिद्धानुवादकरूपाणि, नामानि सर्वपुरुषार्थानि फलन्ति नान्यथेतिसिद्धान्तोतो लोकन्यायेनोच्चारयितरि फलाभावे दोषसम्बन्धे वा न काप्यनुपपत्तिः, एतस्यैव तारतम्येन चित्तशुद्ध्यतिशयो नाम्ना भवति, अन्यथा त्वावृत्तं स्वाधिदैविकसहितमेवेति कदाचित् फलति यथाधिदैविकोद्बोधपर्यन्तमावर्तेत, काळादीनां तु नाममाहात्म्यज्ञानादुच्चारयितुः परित्यागः, अनुगुणत्वात् सारूप्येण साधकमिति लौकिकस्यापि प्रवर्तनापरत्वेन मोक्षदातृत्वमित्यजामिलोपाख्यानस्यापि न वैयर्थ्यं, अन्यथा तत एव वैकुण्ठे गमनं स्यात्, अत उपायपरत्वमेव लौकिकस्य, तस्मात् सूष्टूक्तं तान्यहं वेद नो जना इति, अनेनानन्तान्येव नामान्युक्तान्युपास्यरूपाणि चान्तःकरणशोधकानि, तदवस्थां भगवद्रूपस्य स्मृत्वा तन्नाम ग्राह्यमिति, अन्यथा नामप्रसङ्गे रूपकथनं व्यर्थं स्यात् ॥ १६ ॥ ज्योतिःशास्त्राभिज्ञत्वाद् रूपनामज्ञानार्थं भगवतो गुणकर्माण्याह चतुर्भिस्तत्रादौ द्वयेन कर्माण्याहैष व इति, एष भगवान् परिदृश्यमानो वो युष्मान् श्रेय आधास्यद् धृतवान् पोषितवान् वा, पूतनासुपयःपानादिकं यद् भगवता कृतं तद् भवतां श्रेयोनिमित्तं, अविद्या हि पञ्चपर्वा सा नाशिता शकटः संसारात्मको भञ्जितोविद्याकार्यरूपो मोहात्मकश्च तृणावर्तो मारितः, एवं त्रिदोषदूरीकरणेन ज्ञानोत्पादनेन चासमन्ताच्छ्रेयोधास्यत्, स्वयं सर्वपुरुषार्थरूपोपि दोषवशाद् ग्रहीतुमन्यैर्न शक्यत इति दोषदूरीकरणद्वारा श्रेयोधारकत्वं, किञ्च न केवलं सकृद् दत्तवान् किन्तु धृत्वैव तिष्ठति, अतोग्रेपि दास्यति यावता च भवद्भिः परमश्रेयो गृहीतो (गृहीतं) भविष्यति तावत् करिष्यतीत्याकारः, भूते लुङ्, तेन सिद्धं भवतां श्रेय इत्युक्तं, अनेन भवद्रक्षार्थं बहूनि कर्माणि करिष्यतीति कर्माण्युक्तानि, एवं दोषाभावार्थं करिष्यमाणानि कृतानि कर्माणि चोक्त्वा परमानन्ददायकान्यपि कर्माणि करिष्यतीत्याह गोपगोकुलनन्दन इति, गोपान् गोकुलं च नन्दयतीति, गोपशब्देन गोप्योपि गृहीताः, गोकुलशब्देन तत्सम्बन्धिनश्च यावन्तस्तदुपजीवकाः, उभयविधानप्यानन्दयिष्यतीतिक्रीडा तत्प्रतिघातवधश्चोक्तः, ननु त्वया कंसो ज्ञात्वा मारयिष्यतीति भयं जनितं तत्र का गतिरिति चेत् तत्राहानेनेति, अनेन भगवता सर्वाण्येव दुर्गाणि सङ्कटस्थानानि कंसोपद्रवरूपाणि सर्वाणि यूयमञ्जसानायासेन सर्व एव तरिष्यथ, अतः कंसादिभयमपि न कर्तव्यं, इदं तु वसुदेवस्यास्माकं चोपद्रवो भविष्यतीत्युक्तं न तु भवतामितिभावः ॥ १७ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

तान्यहं वेदेत्यस्य विवृतौ, सारूप्येण साधकमित्यादि । ननु साङ्केत्यादिना भगवन्नामोच्चारणस्यापि फलसाधकत्वं श्रूयत इत्याशङ्क्य तत्तात्पर्यमुच्यते । सङ्केतिते पुरुषे सदानन्द आदिधर्मवत्त्वेन भगवन्नाम्नस्तत्रावाचकत्वाल्लौकिक एव शब्दस्तत्समानाकारस्तद्वाचकः स इति मन्तव्यम् । तथा च सारूप्येणापि मोचकमिति माहात्म्यज्ञापनपराण्यप्रवर्तमानस्य च प्रवर्तनपराण्युपाख्यानानीत्यर्थः । ज्योतिःशास्त्राभिज्ञत्वं भाविज्ञाने लोकप्रतीतिमनुसृत्य हेतुत्वेनोक्तम् । भगवद्धर्माणां तच्छास्त्रागम्यत्वात् । 'न लभ्यते यद्भ्रमतामुपर्यध' इति वाक्यात् । भाविरूपनामज्ञानहेतुत्वेन वा तदुक्तम् ॥ १६ ॥ **एष वः श्रेय** आधास्यदित्यत्र, **स्वयं पुरुषार्थरूपोपीति** । ननु धार्यधारकयोर्भेदाद् भगवदतिरिक्तस्य श्रेयस्त्वं भक्तिमार्गविरुद्धमित्यत आहुः **स्वयमित्यादि** । एवं सति श्रेयोधारकत्वं नन्दादीनामेव तत्प्रतिबन्धकनिवर्तकत्वेन भगवत्युपचर्यत इत्यर्थः । तथा च नन्दादीनां भक्तत्वेन सर्वपुरुषार्थरूपस्य भगवतस्तत्राविर्भूय विराजमानत्वादन्यस्य श्रेयस्त्वाभावेपि तद्धारकत्वमुक्ताभिप्रायेण भगवति न विरुध्यते । यद्यपि भगवति विद्यमाने दोषाणां प्रतिबन्धकत्वमेव न संभवति, क्व तन्निवर्तकत्वेनोपचारः, तथापि लीलायां निरोधसिद्ध्यर्थमस्मत्प्रभुणा लोकरीतिरेव स्वीकृता । यतस्तदर्थं स्वरूपमपि तथा प्रदर्शितवान् । तदुपपादितं 'बभूव प्राकृतः शिशु'रित्यत्र । लोके च यथा यथा प्रतिबन्धबाहुल्यम्, तन्निवृत्त्या पुनः फलानुभवः, तथा दुरापत्वज्ञानेन फलेप्यासक्तिरधिकतरा भवतीति दृश्यते । अतो नन्दादीनामासक्तिसिद्ध्यर्थं स्वेच्छयैव दोषरूपान् पूतनादीन् प्रतिबन्धकत्वेनोद्भाव्य तन्निराकरणद्वारा स्वयमेव तच्छ्रेयोरूपः फलतीति मनस्यभिसंधाय साधूक्तं **स्वयं तातचरणैः** ॥ १७ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

यदूनामित्यत्र भगवद्वचनादिति भगवद्वचनं विज्ञाय, **प्रकारान्तरेणेति** सम्यक् कर्षणं यस्यासौ सङ्कर्षण इत्यस्मात् प्रकारान्तरं सम्यक् कर्षणं येन रूपेण तेनेत्यर्थः, **अत एवेति** सर्वत्राप्रबुद्धैरेव, ननु तथापि भगवद्वचनविरुद्धव्युत्पत्तिकरणाद् गर्गस्य दोषः कुतो नाभूदित्यत आहुरत इत्यादि, तथापि किञ्चिद् भविष्यतीत्यतस्तृतीयां व्युत्पत्तिमाहुर्यदूनां वेत्यादि, **अनेनेत्य**पिशब्दार्थकोतपदकथनेन, तथा च न भगवदुक्तनिरुक्तिविरोध इत्यर्थः, एवं ज्येष्ठस्य बालस्य **चत्वारि नामान्युक्तानि** ॥ १३ ॥ **आसन् वर्णा** इत्यत्र ननु जन्मप्रकरणे **भगवतश्चतुर्मूर्तेः** प्राकट्याच्चत्वारि नामानि वक्तव्यानीति कथं द्वयमेवोच्यत इत्याशङ्क्य तत्र प्रकारं वदन्तोवतारयन्ति **चतुर्मूर्तेरित्यादि**, **प्रवेशश्चेति** वक्ष्यतीतिशेषः, तथा च नामद्वयकथनेनैव सर्वाणि कथितानि भविष्यन्तीत्यर्थः **तत्रावाविति** नामोक्तिप्रस्तावे, प्रथमं **वक्तव्यमिति** ब्रह्मनामत्वाद् **वक्तव्यं**, **आहेति** गुप्ततया वदति **प्रतीतिरिति** तत्तद्युगत्वेन तत्तत्कालस्य **प्रतीतिः**, **कृष्णवर्णं** प्राप्तवानिति कलिकाले प्रकटीभवंस्तद्देवतारूपप्रतिफलनात् **प्राप्तवानित्यर्थः**, **कृष्णत्वप्राप्तौ हेतुद्वयमाहुः सर्वगतत्वात्** सर्वं सन्त्वयाङ्केति, **अनेनेति** हेतुद्वयेन, तत्र प्रमाणमाहुः **कृषिरित्यादि**, तथा च सद्रूपेण

सर्वगतत्वादानन्दरूपेण समन्वयाच्च तथेत्यर्थः, नन्वेवं चेद् भगवतः सदैव कृष्णत्वं प्राप्यत इतीदानीं कृष्णतां गत इति कथमुक्तमित्यत आहुर्यद्यपीत्यादि, तादृशेष्विति तामसेष्वित्यर्थः, एतद्गोपनायेति तद्गततामसत्वगोपनाय भगवति ब्रह्मत्वस्य च गोपनाय, एतेन ब्रह्मवैवर्ते नामकरणप्रस्तावे याः कृष्णशब्दस्य निरुक्तयो गर्गेणोक्ता "ब्रह्मणो वाचकः कोयमृकारोनन्तवाचकः शिवस्य वाचकः षश्च णकारो धर्मवाचकः अकारो विष्णोर्वचनः श्वेतद्वीपनिवासिनः नरनारायणार्थस्य विसर्गो वाचकः स्मृतः सर्वेषां तेजसां राशिः सर्वमूर्तिस्वरूपकः सर्वाधारः सर्वबीजस्तेन कृष्ण इति स्मृतः कृषिर्निर्वाणवचनो णकारो मोक्षवाचकः अकारो दातृवचनस्तेन कृष्ण इति स्मृतः कृषिर्निश्चेष्टवचनो णकारो भक्तिवाचक अकारो दातृवचनस्तेन कृष्ण इति स्मृतः नाम्नां भगवतोनन्तकोटीनां स्मरणेन तु यत् फलं लभते नूनं कृष्णेतिस्मरणान् नरः यद्धि संस्मरणे पुंसो वचनाच्छ्रवणात् तथा कोटिजन्मांहसो नाशो भवेद् यत्स्मरणादिकाद् विष्णोर्नाम्नां च सर्वेषां सारात् सारं परात् परं कृष्णेति सुन्दरं नाम मङ्गलं भक्तिदायकं ककारोच्चारणाद् भक्तकैवल्यं जन्ममृत्युहं ऋकाराद् दास्यमतुलं षकाराद् भक्तिनिश्चलां णकारात् सहवासं च तत्समं कालमेव च तत्सारूप्यं विसर्गाच्च लभते नात्र संशयः ककारोच्चारणादेव वेपन्ते यमकिङ्कराः ऋकारोक्तेर्विशिष्टानि षकारात् पातकानि च णकारोच्चारणाद् रोगा अकारान् मृत्युरेव च ध्रुवं सर्वे पलायन्ते नामोच्चारणभीरवः" इति फलमुक्तं, अत्र प्रथमनिरुक्तौ ककाराद्यो विसर्गान्ता वर्णा हलश्चाः प्रत्येकमर्थवन्तः प्रातिपदिकानि ततः सुबुत्पत्तौ पश्चात् समाहारे द्वन्द्वस्तात्स्यशकारस्य मूर्धन्यादेशः "पुरि शेत इति पुरुष" इतिवद् बोध्यः, "सर्वेषा"मितिश्लोकेन तस्य तात्पर्यार्थो विवृतो बोध्यः, अग्रे निरुक्तिद्वये च 'कृषि'रितीकारो धात्वर्थमात्रे, तथा च कृष्सहितो णः कृष्णो 'निर्वाण'शब्दोविद्यानाशवचनो नकारान्तान् ङस् , कृष्णः अः दाता कृष्णो हिताहितप्राप्तिपरिहारा क्रिया 'चेष्टा' तस्या निर्गता चेष्टायस्तादृशभक्तेदातेत्यर्थस्तृतीये ज्ञेयः, एवमन्यास्वपि निरुक्तिषु बोध्यं, तथात्राकथने यद् बीजं तदप्युक्तं ज्ञेयं, अत्र ब्रह्मत्वगोपनेन स्नेहप्राधान्येनैव लीलानां करणात् , माहात्म्यस्य सर्वत्र प्राकट्ये स्नेहांशस्य स्वल्पत्वापातात् , ब्रह्मवैवर्ते तु 'कृष्णमाहात्म्यसंयुत'मिति तत्पुराणलक्षणकथनेन तत्र माहात्म्यज्ञापनांशस्यैव भूयस्त्वादिति, प्रसङ्गाच्छ्रीस्वामिनीनामोच्चारणफलमपि तत्रैव गर्गोक्तमुच्यते "रेफो हि कोटिजन्माघं कर्मभोगं शुभाशुभम् आकारो गर्भवासं च मृत्युं च रोगमुत्सृजेत् धकार आयुषो हानिमाकारो भवबन्धनं श्रवणस्मरणोक्तिभ्यः प्रणश्यति न संशयः रेफो हि निश्चलां भक्तिं दास्यं कृष्णपदाम्बुजे सर्वेप्सितं सदानन्दं सर्वसिद्धिदमीश्वरं धकारः सहवासं च तत्तुल्यं कालमेव च ददाति सार्ष्टिं सारूप्यं तत्त्वज्ञानं हरेः सुखम् आकारस्तेजसो राशिं दानं शक्तिं हरौ यथा योगशक्तिं योगमतिं सर्वकालं हरेः स्मृतिं प्रत्युक्तिस्मरणाद् योगान् मोहजालं च किल्बिषं रोगशोकमृत्युभयमावेद्यं नात्र संशयः" इति, अथ प्रकृतमनुसरामः, शब्दच्छलेन कथनस्य फलान्तरमाहुस्तेनेत्यादि समन्वयादित्यन्तं, तेनेति "पापकर्षणो ह वा" इतिश्रौतनिर्वचनेनेत्यर्थः ॥ १४ ॥

प्रणयमित्यत्र श्रीनन्दस्याधिदैविकवसुदेवत्वं यदुक्तं तत् कृष्णोपनिषदि श्रीनन्दस्य 'परमानन्द' त्वश्रवणात् पूर्वमुपपादितं ज्ञेयं, अत्रापि शब्दच्छलेन यत् सिद्धं तद् वदन्ति वस्तुत इत्यारभ्यायमर्थ इत्यन्तं, तस्य बुद्धिरिति नन्दस्य बुद्धिः, वास्तवमर्थं श्रीमत्पदविवरणेनाहुः श्रीमानित्यादि, तेन वसूनां देवी वसुदेवी लक्ष्मीः सास्यास्तीति वसुदेवोर्शादिभ्यच् , स एव स्वार्थेण वासुदेव इति, तथा च श्रीनन्दस्य स्नेहाधिक्यस्थापनं वास्तवार्थकथनं फलमित्यर्थः, एतदेव विशदयन्तीममित्यादि, विष्णुपुराणे षष्ठेंशे पञ्चमाध्याये वासुदेवशब्दोधिकरणव्युत्पत्त्या कर्तृव्युत्पत्त्या चेति द्वेधा निरुक्तः, "सर्वाणि तत्र भूतानि वसन्ति परमात्मनि भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृत" इति तथा चैवं पञ्चधा व्याचक्षत इत्यर्थः ॥ १५ ॥

बहूनीत्यत्रातिविशतीति बहूनां सत्ताकथनेन तेषां ज्ञातव्यत्वमतिदिशति, ननु नाम्नां गुणकर्माणि लक्षीकृत्य प्रवृत्तत्वात् ताभ्यामेव नामसत्तासिद्धेस्तत्कथनप्रस्तावे रूपसत्ताकथनस्य किं प्रयोजनमित्यत आहुरन्यथेत्यादि, नामसत्ता यदि कर्मसत्ताप्रयुक्ता स्यात् तदा क्रियायां निवृत्तायां तत्प्रयुक्तनामाप्याख्यातवन् न स्याद् यदा हि क्रियां करोति तदा पचति पठति गच्छतीत्युच्यते न तु तदभावे तद्वत् , तर्हि रूपसद्भावे कथं तत्सत्तेत्यत आहुः पाचकेत्यादि, सत्यन्यथ वृत्तिः, तादृशमिति क्रियायुक्तं, गुणयोगादित्यत्र गुणपदं क्रियाया अप्युपलक्षकं, तथा च पचनपाठनक्रियानिवृत्तावपि क्वचित् क्रियायोगात् प्रवृत्तं पाचकपाठकेत्यादि नाम सर्वदा प्रयुज्यत एवं गुणयोगादपि 'पुष्पवन्तौ' 'वेगवा'नित्यादि, अतो रूपमेव नामसत्ताप्रयोजकमिति तदा यत् तत्प्रयोजकात् सत्तेत्यर्थः, ननु तर्हि रूपसत्तैव वक्तव्या किं नामसत्ताकथनेनेत्यत आहुः रूप इत्यादि, तथा च यदि नाम न स्यात् तदेदमेतदितिप्रतिनियताकारेण रूपं न प्रतीयेतातस्तज्ज्ञापनार्थं रूपे नामावश्यकत्वाद् गवादिशब्दवत् तदपि सर्वदैव भवतीति समनियमज्ञापनार्थं नामसत्ताकथनमित्यर्थः, चकारप्रयोजनमाहुश्चकारादित्यादि, सिद्धमाहुस्तेनेत्यादि, तेनेति नामरूपयोर्नित्यसम्बन्धसाधनेन, अत्रायमर्थः, जैमिनीये दर्शने शब्दार्थयोर्नित्यः सम्बन्धः साधितः शब्दस्य नित्यत्वं च तदेतद् व्यासैरप्यङ्गीक्रियते, अर्थस्थले तु जैमिनिना कृतिरूपस्यार्थस्य नित्यत्वं तेन च व्यक्तिराक्षिप्यत इत्यङ्गीक्रियते तदेतद् व्यासचरणानां नाभिप्रेतं किन्तु वैदिकानामलौकिकानामर्थानां नित्यत्वात् तैः सहैव तादृशां शब्दानां सम्बन्धो लौकिकानां तु प्रवाहे सहसम्बन्धः, इदं यथा तथा समन्वयतृतीयपादे 'शब्द इति चेदि'त्यादिषु त्रिषु सूत्रेषु निपुणतरमुपपादितं तत् सर्वमभिसन्धायैवं सिद्धमुक्तं ज्ञेयं, अत्र भक्तानुभवमपि प्रमाणयन्त्यथापीत्यादि, विद्यमानत्वादित्याधिदैविकत्वेन श्रीनन्दे विद्यमानत्वात्, अनु

रूपाणीति 'गो अश्वा एव पशव' इतिवत् प्रशंसारूपगौण्या प्रयुक्तानि, **अलौकिकानामिति** गुणानां कर्मणां च, **गुणकर्मानुरूपाणीति** गुणाश्च कर्माणि च **गुणकर्माणि** तान्यनु लक्षीकृत्येत्यत आहुर्व्यवहरन्तीत्यादि, को वा विचारो यदभावान्न जानन्तीत्याकाङ्क्षायां तं स्फुटीकुर्वन्ति विचारास्त्वित्यादिना, **रूप** इति रूपाधिकरणके, **तत्सम्बन्धेने**त्यनित्ययोः क्रियारूपयोः **सम्बन्धेन, अन्यथे**त्यादिशब्दार्थयोरौत्पत्तिकसम्बन्धात् कालान्तरे क्रियाया अभावेन क्षणान्तरे रूपस्याप्यभावेन तथा, **तत** इत्यवाचकत्वात् ननु नाम्नां तादृग्रूपसम्बन्धत्वे रूपस्यापि श्रावणे शब्देन रूपसम्बन्धफलभूता प्रपञ्चनिवृत्तिरपि सर्वेषां स्यात् सा तु न दृश्यत इति पूर्वोक्तं न साधीय इत्यत **आहुर्यत** इत्यादि, तथा च ज्ञानाभावेनोनोच्चरणे लौकिकस्य नाम्नोऽप्राकट्ये सति लौकिकमेव नाम लौकिकेनार्थेन सह वाच्यवाचकभावाख्येनोदासीनेन स्वरूपसम्बन्धेनैव सम्बद्धं सदर्थं नोपस्थापयतीत्यग्निशब्दोच्चारणे दाहाभाववद् भगवन्नामोच्चारणमपि प्रपञ्चनिवृत्त्यादिरूपं फलं न जनयतीत्यतो **न दृश्यतेतो** वस्तुभेदात् फलाभाव इति न दोष इत्यर्थः, ज्ञातसम्बन्धानां नाम्नां कथमेवं सामर्थ्यमित्याकाङ्क्षायां नामपदनिरुक्त्या तत् स्फुटीकुर्वन्ति **नामानी**त्यादि, "स एव जीव" इत्यत्र शब्दब्रह्मणो वर्णात्मकत्वेनैव निरूपणात् तदात्मकत्वेन ज्ञातानि नामानि पुरुषं जगच्च नामयन्ति "नामभिर्दामभिः सित"मितिश्रुत्या 'यथा गावो नसि प्रोतास्तन्त्यां बद्धाश्च दामभिर्वाक्तन्त्यां नामभिर्बद्धा हरन्ति बलिमीशितु'रित्यादिस्मृतिभिस्तथा कुर्वन्ति, तथा च 'दाम'रूपत्वात् तथा सामर्थ्यमिति ज्ञात्वोच्चारणे भगवन्तमपि सन्निधापयन्तीत्यर्थः, अत एव 'मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारदे'त्यादिभगवद्वाक्यमपि सङ्गच्छते, सामर्थ्यमुक्त्वा स्वरूपमाहुर्नामानि **रूपवदि**त्यादि, तथा च यथार्थस्वरूपस्य भगवतो रूपं तथैतानि **नामरूपस्ये**त्यर्थः, अत एव लोकेपि रामशब्दस्य रूपाणि गृहाण भूधातो रूपाणि चेतिव्यवहारः, एवं सामान्यं तेषां स्वरूपमुक्त्वा फलोपधायकं वैशेषिकं रूपमाहुर्यथेत्यादि **सिद्धान्त** इत्यन्तं, **अखण्डानीति** 'पदे वर्णा न विद्यन्ते वर्णेष्ववयवा न चे'तिन्यायेन तादृशालौकिकशब्दात्मकानि, सिद्धमाहुरत इत्यादि, **दोषसम्बन्धे वा न काप्यनुपपत्तिरि**ति दोषानिवृत्तौ वा न भगवन्नामादिसामर्थ्याभावरूपानुपपत्तिरित्यर्थः, एवं दोषं परिहृत्येदानीं नामभिः फलजनने प्रकारमाहुरेतस्यैवेत्यादि नामादिरव स्वरूपज्ञानभक्त्यादेरित्यर्थः, नन्वेवं ज्ञानाभावेपि भगवदीयत्वमात्रज्ञानवतामपि सत् फलं दृश्यते सहस्रनामादीनां फलं चोच्यते तत् कथं युज्यत इत्यत आहुरन्यथेत्यादि, पूर्णचित्तशुद्ध्यभावे तु भगवदीयत्वज्ञानमात्रेणावृत्तं नाम **स्वस्याधिदैविकसहितमि**ति नामाधिदैविकं यदखण्डशब्दरूपं नाम तत्सहितमेवेतिहेतोः **कदाचित् फलति** यदेवं स्यात्, एवम्भावस्तु दैवे सति भगवत्कृपया, अतस्तादृशस्थले यत् **फलति** तदाधिदैविकमाहात्म्यादेव न तूच्चार्यमाणस्वरूपमाहात्म्यात्, यदि तादृशस्थले स्वमहिम्ना फलदावृत्ति विना तदैव फलेत्, तत् तु नास्ति, अत **आधिदैविकमहिम्नैव फलतीति**निश्चयः, ननु तर्हि 'कृते यद् ध्यायतो यज्ञैस्त्रेतायां यजतो द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनादि'ति "सकृदुच्चारयेद् यस्तु नारायणमतन्द्रितः शुद्धान्तःकरणो भूत्वा निर्वाणमधिगच्छति" "कमलनयन वासुदेव विष्णो धरणीधराच्युत शङ्खचक्रपाणे भवशरणमितीरयन्ति ये वै त्यज भट इव तरेण तानपापा"नित्यादिश्रीभागवतपाद्मवैष्णववाक्येषु नामकीर्तनादिमात्रेण कालादिभयनिवृत्तिकथनस्य कथमपि न गन्ध इत्यत आहुः **कालादीनामि**त्यादि, तथा च तत्र **कालादीनां माहात्म्यज्ञानवत्त्वात्** स्वत एव निवृत्तिर्न तु तत्र नाम्नः कश्चिद् व्यापारो यथा राजपुरुषदर्शनेन प्राकृतानां, अतो व्यापाराभावेपि फलनान्न विरोध इति, "साङ्केत्यं पारिहास्यं वे"तिवाक्यविरोध**मजामिलोपाख्यानवैयर्थ्यं च** परिहरन्ति **सारूप्ये**त्यादि, तदेतट्टिप्पण्यामुपपाद्य विवृण्वन्ति **नन्वि**त्यादि "साङ्केत्यं पारिहास्यं वे"तिवाक्यं श्रुत्वा वा साङ्केत्यादिरूपेण नामोच्चारणे फलवत्त्वं श्रूयते तथा च तेनापि नाम्नां फलवत्त्वे किमेतत्प्रयासेनेत्याशङ्क्य साङ्केत्यवाक्यस्य तात्पर्यमुच्यत इत्यर्थः, तात्पर्यमाहुः **सङ्केतित** इत्यादि, **कृष्ण** इतिपदस्य 'सदानन्द'त्वादिधर्मवानिति योऽर्थस्तस्य **सङ्केतितपुरुषभावेन तत्र भगवन्नाम्नो** वाचकत्वात् तत्र सङ्केतितो लौकिकः शब्दः भगवन्नामसमानाकारः सङ्केतितपुरुषवाचक इति मन्तव्यं तथा च **सारूप्येणापि भगवन्नाम** मोचकमित्यादिज्ञापनार्थानि नानापुराणोक्तानि नाममाहात्म्योपाख्यानानीति **नाजामिलोपाख्यानस्य वैयर्थ्यमि**त्यर्थः, तेनात्रेदं **सिद्धं**, यस्य गुरौ भगवदभेदबुद्धिस्तथैव च गुरुभक्तिः सङ्गराहित्यं च तस्य गुर्वनुग्रहेण भगवन्नाम्नां तद्विषयाणां रूपाणां च यथावज्ज्ञानं ततो **भगवद्रूपवन्नामोक्तां रूपावस्थां** स्मृत्वा यदा भगवन्नाम गृह्णाति तदा शीघ्रं तदेव तत् फलति यदा त्वेवं प्रणाड्यभावस्तदा तु तन्नामावृत्तं सद् यदाधिदैविकं नामोद्बोधयति तदविलम्बेन फलति, यदा त्वावृत्त्यमानेपि नाम्नि नाधिदैविकोद्बोधपर्यन्तताऽस्य चान्तरा मृत्यूपस्थितिस्तदा नामव्यापाराभावेपि कालयमदूता स्वत एव निवर्तन्ते ततो भगवदिच्छानुसारेण फलं, यस्तु साङ्केत्यादिवाक्यं श्रुत्वा माहात्म्यं जानन्नुच्चारयति तस्यापि तथैव फलं, यस्तु वाक्यमश्रुत्वा सङ्केतादिरूपेणोच्चारयति तस्यापि बहुकालविलम्बेन पापनिवृत्तिर्भवति तन्निवृत्त्यान्यशेषाणि पापानि निवर्तन्ते 'कांश्चिन्ममानुध्यानेन नाम सङ्कीर्तनाच्च मे' इतिवाक्याद् बोध्यम् ॥ १६ ॥

एष व इत्यत्राभासे ज्योतिःशास्त्राभिज्ञत्वादिति गर्गविशेषणं यदुक्तं तत्तात्पर्यं **टिप्पण्यामाहुर्ज्योतिरि**त्यादि **एवं** कथनेपुष्टार्थत्वमित्यरुच्या पक्षान्तरमाहुर्भावीत्याद्यन्येषां यत् नामरूपज्ञानं भावि तादृशभाविज्ञानहेतुत्वेनेत्यर्थः, विवृतौ **वो युष्मा**नित्यादि **व** इत्यस्य द्वितीयाबहुवचनत्व **आधास्यदि**त्यस्य **धृतवानि**त्यर्थः, षष्ठीबहुवचनत्वे **पोषितवानि**त्यर्थो ज्ञेयः, 'भूते लृङ्' इति 'भूते चे'तिसूत्राद्धेतुमद्भावादिष्वर्थेषु लृङित्यर्थः, **इदमि**ति भयजननम् ॥ १७ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

यदूनामित्यत्र **अनेनेति** **उतेतिकथनेन** गर्भसङ्कर्षणरूपमर्थान्तरं **मुख्यमस्तीति** सूचितमित्यर्थः ॥१३॥ **चतुष्टयस्य चेति** भगवति बले च व्यूहचतुष्टयस्य यथायथं प्रवेश इत्यर्थः, बले वासुदेवसङ्कर्षणयोर्भगवति चतुर्णामिति विभागः, **आसन्नित्यत्र** युगमत्रास्तीति युगमितिव्युत्पत्त्या अर्शआद्यजन्तत्वेन कालवाचकत्वं युगपदस्य, एवं **कृष्णत्वं नेति** तथा सत्येतदवतारो रामोपि कृष्णवर्णः स्यादितिभावः ॥ १४ ॥ **बहूनीत्यत्र** **अन्यथेति** रूपाणां बहुत्वाभावे इत्यर्थः । **क्रियायाश्चेति** बहुत्वमिति शेषः, **गोवर्धनोद्धरणरूप** इति गोवर्धनस्योद्धरणं येन तादृशं तावत्प्रमाणकं रूपं यस्येति, अनेन रूपमुक्तं, **अन्यथेति** 'ते सुतस्ते'ति कथनाभावे रूपबहुत्वमवतारबहुत्वेन जानीयादित्यर्थः, ननु भगवतो व्यापकत्वाद् रूपबहुत्वं बाधितमित्याशङ्क्य समाधानमाहुः **वसुदेवस्येति**, शुद्धसत्त्वं पृथक्कृत्य यत्र तत्र स्वयं तिष्ठतीति घटमठाद्याकाशवद् बहुत्वमित्यर्थः, **अंशावतारेषु** सत्त्वं मत्स्यादिरूपं कृत्वा तद्व्यवहित एव स्वयं तिष्ठति, अत्र त्वास्तरणमिव तिष्ठति न तु तद्व्यवहितो लीलां करोतीति विभेदः, **अलौकिकानामिति** पूर्वोक्तयोर्विशेषणमिदं, एतादृशानां गुणानां कर्मणां च सम्बन्धीनि तद्योगात् प्रवृत्तानि **नामानि** **अपि**शब्दाद् रूपाणि चालौकिकान्येव भवन्तीत्यर्थः, विचारे फलन्तीति नामप्रकरणारम्भे आद्यश्लोकाभासे प्रयोजनद्वयकथनाद् भगवदासक्तिं जनयन्तीत्यर्थः, **अत इति** यतो निरर्थकानि न फलन्त्यतः **स्वरूपाज्ञाने केवलमुच्चारितानि** 'न फलन्ती'तिपूर्वस्यैवानुवृत्तिः, न फलन्तीत्यर्थः, **वर्णात्मकत्वेनैवेति** एवकारव्यावर्त्यं नाममन्त्ररूपमाहुः पुरुषमित्यारभ्याखण्डान्यवेत्यन्तेन, **ग्राहकदोषाविति** इन्द्रियदोषादित्यर्थः, **सर्वपुरुषार्थानीति** सर्वे पुरुषार्था येन तादृशानि नामानीत्यर्थः, **आवृत्तमिति** आवृत्तं सत् प्रमेयबलात् कदाचित् स्वाधिदैविकसहितं भवत्येवेत्यर्थः, **लौकिकस्यापीति** नाम्न इत्यर्थः, **अन्यथेति** स्वातन्त्र्येण मोक्षदातृत्वे इत्यर्थः ॥ १६ ॥ **एष व इत्यत्र** **वो युष्मानिति** तच्छ्रीकयेत्यर्थः, आङुपसर्गस्यार्थमाहुः किञ्चेत्यादिना, श्रेयोरूपस्य स्वरूपस्य धारणं पूर्वमेव प्राकट्यसमये सिद्धमिति तात्पर्येणाहुः भूते लृङिति, 'भूते चे'ति सूत्रादितिभावः, **अनेनेति** आङुपसर्गेणेत्यर्थः, **दोषाभावार्थमिति** श्रेयोग्रहणप्रतिबन्धनिवृत्त्यर्थमित्यर्थः, **इदं तु वसुदेवस्येति** तथा च 'अपि हन्ता गताशङ्क' इत्यत्र वसुदेवमस्मांश्च हन्तेत्यर्थो ज्ञेयः, 'यदूनामहमाचार्य' इत्यस्य व्याख्याने द्रव्यविरोधो भवतीत्यत्रापि द्रव्यस्य विरोधस्तत्कृतेन्येषां हननमित्यर्थो ज्ञेयः ॥ १७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'एवं रामनामकरणानन्तरं श्रीनन्दः श्रीकृष्णं प्रदर्शितवान्' इति तन्नामान्याह आसन्निति । अनुयुगं युगे युगे तन्मूर्तीर्गृह्णतोऽस्य तव पुत्रस्य शुक्लो, रक्तस्तथापीतश्चेति त्रयो वर्णा आसन् । इदानीं तु द्वापरस्यान्ते कृष्णतां गत इत्यन्वयः ॥ अतः 'कृष्ण' इत्येकं नाम भविष्यतीत्याशयः । हिशब्देन 'कृते शुक्लश्चतुर्बाहुः' इत्यादिवक्ष्यमाणप्रसिद्धिं सूचयति ॥ १३ ॥ शास्त्रप्रसिद्धमपि 'वासुदेव' इति भगवतो नाम गोपयितुं प्रकारान्तरेणाह—प्रागिति । अयं श्रीमांस्तवात्मजः प्राक् कदाचिद्वसुदेवस्य सुतो जातः, अतः अभिज्ञा ये अभितो स्वस्वरूपं जानन्ति ते एनं 'वासुदेव' इति सम्प्रचक्षते कथयन्ति । प्रागिति सामान्योक्त्याऽयं मुनिर्जन्मान्तरवृत्तं कथयतीति नन्दो मन्यते स्म ॥ १४ ॥ गुणानुरूपाणि—'सर्वेश्वरः सर्वज्ञः' इत्यादीनि, कर्मानुरूपाणि 'गोवर्धनोद्धरणः, कालीयदमनः' इत्यादीनि च तव सुतस्य बहूनि नामानि सन्ति । तानि च सर्वाणि जना न विदुः, अहमपि नो वेद न जानामि ॥ १५ ॥ जातकफलमाह—एष इति । गोपपदं गोपीनामप्युपलक्षणम् । एष गोपान् गोपीः गोकुलं च नन्दयतीति तथाभूतो भविष्यति । तत्र हेतुमाह—वो युष्माकं सर्वेषां व्रजवासिनामिव श्रेयः ऐहिकं पारलौकिकं च सुखमाधास्यत् आधास्यति । अनेनैव रक्षकेण सर्वाणि दुर्गाणि महतोऽप्युपद्रवान् अञ्जः अनायासेनैव यूयं तरिष्यथ अतिक्रमिष्यथ ॥ १६ ॥ 'तव भाग्यं तु मया किं वक्तव्यम्' ? इत्याशयेन सम्बोधयति—व्रजपते इति । पुरा अराजके यदा ब्राह्मणैर्हुङ्कारेण वेनो नाशितो, यदा च परशुरामेण सर्वे राजानो हतास्तदा दस्युभिश्चोरैर्दुष्टै रावणादिभिश्च पीडिताः साधवः सदाचारनिष्ठा जना अनेन पृथुरामादिरूपेण रक्ष्यमाणाः समेधिताः संवर्धिताश्च सन्तस्तान् दस्यून् जिष्णुः निर्जितवन्तः ॥ १७ ॥

अन्वितार्थप्रकाशिका

आसन्निति ॥ अनुयुगं युगे युगे तत्तन्मूर्तीर्गृह्णतोऽस्य तव पुत्रस्य शुक्लो रक्तस्तथा पीतश्चेति त्रयो वर्णा आसन् । इदानीं तु द्वापरस्यान्ते कृष्णतां गतः अतः कृष्णनाम भविष्यति । यद्यपि पीतवर्णावतारस्य युगप्रकरणेऽन्यत्र च न प्रसिद्धिः कृते शुक्ल इत्यादिष्वनुक्तेः तथापि "सुवर्णवर्णो हेमाङ्गः" इति भारतादौ दर्शनादवताराणामनन्तत्वात्कश्चित्पीतवर्णत्वसंभवः । नन्दस्तु मत्पुत्रस्य जन्मान्तरवृत्तमिति मन्यते स्म ॥ १३ ॥ प्रागिति ॥ अयं श्रीमांस्तवात्मजः क्वचित् प्राक्समये वसुदेवस्य सुतो जातः । अतः अभिज्ञाः ये अभितोऽस्य स्वरूपं जानन्ति त एनं वासुदेव इति संप्रचक्षते कथयन्ति । वासुदेवशब्दस्य वास्तवार्थे भगवतः प्रकटनभयादन्यथा प्रदर्शनम् । प्रागिति सामान्योक्त्या जन्मान्तरवृत्तमेतदिति नन्दो मन्यते स्म ॥ १४ ॥ बहूनीति ॥ गुणानुरूपाणि सर्वेश्वरः सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गोवर्धनोद्धरणः कालियदमन इत्यादीनि तव सुतस्य बहूनि नामानि रूपाणि च सन्ति । तानि च सर्वाणि अहं दैवज्ञोऽपि नो वेद न जानामि । किम्पुनर्जना न विदुरिति । नन्दस्तु मत्पुत्रस्य जन्मान्तरगतमेतदिति

मन्यते स्म ॥ १५ ॥ जातकफलमाह—एष इति ॥ गोपान् गोकुलं च नन्दयति तथाभूतः गोपेति संबुद्धिर्वा । एष वो युष्माकं सर्वेषां श्रेयः सुखम् आधास्यत् करिष्यतीति इलोप आर्षः । अनेनैव रक्षकेण सर्वाणि दुर्गाणि महतोऽप्युपद्रवान् अञ्जः अनायासेनैव यूयं तरिष्यथ अतिक्रमिष्यथ ॥ १६ ॥ पुरेति ॥ हे व्रजपते पुरा अराजके दस्युभिश्चौरैः पीडिताः साधवः अनेन रक्ष्यमाणाः समेधिताः संवर्धिताश्च सन्तस्तान् दस्यून् जिग्युः निर्जितवन्तः । अत्र पुरा जन्मान्तरे साधवो देवाः दस्युभिर्दैत्यैः पीडिताः अराजके इन्द्रपदच्युतौ इति गूढोऽर्थः ॥ १७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अतः कृष्ण इति नाम भविष्यति ॥ १३ ॥ क्वचित्समये वसुदेवस्य गृहे तवात्मजो जातः अतः ॥ १४ ॥ गुणकर्मणोरनुरूपाणि योग्यानि ॥ १५ ॥ जन्मलग्नग्रहफलमाह एष इति । आधास्यत् आधास्यति ईकारलोप आर्षः । सर्वाणि दुर्गाणि विघ्नानि अञ्जः अनायासेन ॥ १६ ॥ अराजके राजहीने काले अनेन रक्ष्यमाणाः दस्यून् चौरान् ॥ १७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ज्येष्ठत्वात्पूर्वं बलनामान्यभिधायाथ श्रीकृष्णस्य परमात्मत्वं सूचयन्निव च नामानि युक्त्याऽऽह । आसन्निति । अनुयुगं प्रतियुगं, तनूर्विग्रहान्, गृह्णत उपाददतः, अस्य तव पुत्रस्य, शुक्लः, रक्तः, तथा पीतः, इत्येते त्रयः वर्णाः, आसन् हि । इदानीं अधुना तु, कृष्णतां गतः प्राप्तः । अतः कृष्ण इत्येकं नाम भविष्यति । अनुयुगं तनूर्गृह्णत इत्यनेन परमपुरुषत्वमस्य सूचितम् । 'परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे' इत्यनुयुगप्रभवत्वं स्वेनैवोक्तमस्ति । 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' इति वचनार्थस्यास्मिन् सत्त्वादयं परमपुरुषः । इयं व्याख्या त्वेकादशस्कन्धाभिहितकरभाजनमुनिवाक्याननुरोधिनी । सर्वव्याख्यातृपण्डितानुगता, सांप्रतं करभाजनवाक्यानुरोधेन व्याख्यायते । अनुयुगं, तनूः गृह्णतः, अस्य त्रयः वर्णाः शुक्लादयः, आसन् । तत्र शुक्लो वर्णः, कृतयुगे इति शेषः । इतो गतः व्यतीत इत्यर्थः । तथा रक्तो वर्णः, त्रेतायुगे इति शेषः । इतः अपि कृष्णो वर्णोऽपीत्यर्थः । द्वापरे इति शेषः । इतः इदानीं कलौ युगेऽपि, कृष्णतां कृष्णवर्णत्वमेवेत्यर्थः । गतः इति ॥ १३ ॥ आधुनिकमपि वसुदेवापत्यत्वमाच्छादयन्निवाह ॥ प्रागयमिति ॥ हे नन्द, अयं तव आत्मजः पुत्रः, प्राक् पूर्वं क्वचित् कदाचित् , वसुदेवस्य जातः । वसुदेवादुत्पन्न इत्यर्थः । अतः, अभिज्ञा एतत्स्वरूपयथार्थज्ञानिनो जनाः, श्रीमान् वासुदेवः, इति संप्रचक्षते कथयन्ति । इतिनाऽभिहिते कर्मणि प्रथमा । श्रीमन्तं वासुदेवं कथयन्तीत्यर्थः । अनया सामान्योक्त्या ऋषिरयमस्य जन्मान्तरगतं नाम कथयति इति नन्दो मन्यते स्म । 'वसन्ति यत्र भूतानि वसत्यत्रेति वै यतः । ततः स वासुदेवेति विद्वद्भिः परिगीयते' । इति व्युत्पत्तिरप्यस्यास्मिन्नभिप्रेता । श्रीमानित्यनेनास्य श्रीपतित्वमपि सूचितम् ॥ १४ ॥ तथा गुणकर्मानुरूपाणि बहून्यस्य नामानि सन्तीत्याह ॥ बहूनीति यानि गुणाश्च कर्माणि च तेषामनुरूपाणि, अस्य ते तव, सुतस्य, बहूनि नामानि, रूपाणि च, सन्ति । तानि, अहं वेद वेद्मि । जनाः नो विदुः । तत्र गुणानुरूपाणि भगवन्नारायणः सर्वज्ञ ईश्वर इत्यादीनि । कर्मानुरूपाणि मधुसूदनः गोपतिर्गोवर्द्धनोद्धारक इत्यादीनि ॥ १५ ॥ जातकफलमाह ॥ एष इति ॥ गोपाश्च गोकुलं च तानि नन्दयतीति तथाभूतः, एषः कृष्णः, वो युष्माकं, श्रेय ऐहिकामुष्मिकं मङ्गलं, आधास्यत् आधास्यतीत्यर्थः । अनेन सुतेन हेतुभूतेन, यूयं, सर्वदुर्गाणि सर्वाणि दुःखानि अञ्जः आशु, तरिष्यथ । अञ्ज इति शीघ्रार्थकमव्ययम् ॥ १६ ॥ पुरेति ॥ हे व्रजपते नन्द, अराजके जगति रक्षकरहिते सतीत्यर्थः । दस्युपीडिताः चौरप्रायदुष्टजनार्दिताः, साधवो धर्मानुवर्त्तिनो जनाः, अनेन त्वत्पुत्रेण, पुरा पूर्वं, पृथ्वाख्यनृपतिजन्मावसरे इत्यर्थः । रक्ष्यमाणाः, समेधिताश्च सन्तः, दस्यून्, जिग्युः जितवन्तः । पूर्ववदधुनाप्ययं साधुपरित्राणार्थमेव जात इति भावः । अस्य पृथ्ववतारत्वं लघुभागवतामृताद्बोध्यम् ॥ १७ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

आसन् वर्णा इति : १०.८.१३

आत्मनाम गुरोर्नाम श्रेयोर्थी गुप्तमावदेत् । युक्तं सोऽकथयन्नाम तादृक् तस्योभयात्मनः ॥ ६ ॥
न नामकरणं भूयाद् विना रूपनिरूपणम् । स्वरूपस्येत्यपृष्टोऽपि तत्पुराऽकथयत् क्षमम् ॥ ७ ॥
महामन्त्रस्य गोप्यस्य कृष्णेति द्व्यक्षरात्मनः । भङ्ग्यन्तरादभिव्यक्त्यै वर्णवर्णनकार्यभूत् ॥ ८ ॥

चिद्रूपिणोऽतीतगुणस्य विष्णोर्गुणास्त्रयोऽप्याश्रयतोऽस्य भान्ति ।
वेदान्तसिद्धान्तमिमं विवक्षुर्वर्णप्रशंसामकरोत् स गर्गः ॥ ९ ॥

अनाम्नः स्वरूपं न चास्याधिगम्यं कलिस्थैः किलेति प्रभूतानुकम्पः ।
स गर्गो जनानुग्रहायैव भूयो हरे वासुदेवेति कृष्णेत्युवाच ॥ १० ॥

नामरूपे जगन्निष्ठे दधता हरिणा स्वयम् । जगत्कल्याणकृत्केलिं करिष्यामीति बोधितम् ॥ ११ ॥

प्रागयमिति : १०.८.१४

य: सत्यवाक् सततमस्य यदि प्रसङ्गात् प्राप्ताऽनृतोक्तिरिह तेन सत्यभाजा ।
वाच्यं तथा न परधीविषयो यथा स्याद् गूढं स्फुटीकृतमपीति तथाऽब्रवीत्सः ॥ १२ ॥

सत्ये सत्यपि यो मोहः सा मायेत्यभवत् स्फुटम् । यदज्ञताऽऽसीन्नृणस्य वासुदेवेति नामनि ॥ १३ ॥

बहूनीति : १०.८.१५.

अमून्यनन्तानि परात्मनोऽस्य नामानि रूपाणि शिवङ्कराणि । पुरातनान्येव न कल्पितानीत्यभूत् स्फुटं तत्कृतनामगीतात् ॥१४॥

कृष्णप्रिया

महाराज, आपके कुमार श्रीनन्दलाल जी तो प्रतियुग अवतार धारण करते हैं । कभी इसका वर्ण श्वेत, कभी लाल तो कभी पीला वर्ण होता है । इस प्रकार पूर्व के प्रत्येक युगमें दिव्यविग्रह धारण करते हुए इसके तीन वर्ण हो चुके हैं अब "श्याम" वर्ण भये अतः इनका नाम "कृष्ण" होगा भगवन् वैसे तो आप के लालन "कृष्ण" नाम से नित्यसिद्ध है ॥ १३ ॥ पहिले आप के यह लालन श्रीवसुदेवजी के अवतीर्ण हुए थे अतः ऐसा जानने वाले "श्रीमान् श्रीपति" और वासुदेव नाम से इनको पुकारेंगे ॥ १४ ॥ नन्दरायजी ? आप के लालन के नाम गुणों के अनुरूप एवं लीलाओं के अनुरूप तो गिनती के परे हैं उनमें से गुण कर्मानुरूप कुछ को मैं जानता हूँ लेकिन सर्वजन नहीं जान पाते ॥ १५ ॥ नन्दबाबा ? यह आपके लालन आप के गोप, गौओं, एवं गोकुल को आनन्दित करेंगे और आप का परम कल्याण करेंगे । इनके द्वारा आप भारी विपत्तियों को विनाश्रम आसानी से शीघ्र तय कर लेंगे ॥ १६ ॥ नन्दरायजी ? पहिले, जब कि लोग चोर-डाकुओं से भयग्रस्त हो गये थे और घोर अराजकता छा रही थी तब आप के लालन ने अवतार लेकर उन्हें दण्ड दे के सज्जनों का संरक्षण किया था और उन साधु लोगों ने इनका सहारा लेकर उपद्रवियों को धरकर दबाया था ॥ १७ ॥

पुरानेन व्रजपते साधवो दस्युपीडिताः । अराजके रक्ष्यमाणा जिग्युर्दस्यून् समेधिताः ॥ १८ ॥
य एतस्मिन् [1]महाभागाः प्रीतिं कुर्वन्ति मानवाः । नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुराः ॥ १९ ॥
तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः । श्रिया कीर्त्यानुभावेन [2]गोपायस्व समाहितः ॥ २० ॥

कर्वमसमा

अन्वयः—व्रजपते अराजके दस्युपीडिताः साधवः अनेन पुरा रक्ष्यमाणाः समेधिताः दस्यून् जिग्युः ॥ १८ ॥ ये महाभागाः मानवाः एतस्मिन् प्रीतिं कुर्वन्ति एतान् विष्णुपक्षान् असुराः इव अरयः न अभिभवन्ति ॥ १९ ॥ तस्मात् अयं ते नन्दात्मजः श्रिया कीर्त्या अनुभावेन गुणैः नारायणसमः समाहितः गोपायस्व ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनेन रक्ष्यमाणाः समेधिताश्च दस्यून् विजिग्युरिति ॥ १७-१८-१९ ॥ इति स्वात्मानं प्रति समादिश्य । आत्मानं कृष्णं वा । गर्गे गते सति आशिषामाशीर्भिः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुरा पृथ्ववतारे । अराजके राष्ट्रे समेधिता वर्द्धिताः दस्यून् नास्तिकान् । वेनेन सर्वे स्वराज्यकाले वेदनिन्दकाः नास्तिकाः कृतास्ते च दस्यवश्चौरा भवंत्येव धर्मचौर्यतः । तेषां चोरत्वमभियुक्तैरुक्तम् । "वेदे कांचनपत्तने परिलसद्वेदांतदुर्गो महामीमांसा परिखा विभाति परितः शाब्दं लसद्गोपुरम् । योगो यामिनिजागरूकनिचयः सांख्यं विवेकात्मको धर्मं चोरयितुं विशंति सुगत नैयायिकाः कुकुराः ॥" इति । पुरा जन्मांतरे । प्रकटार्थं साधवो देवा दस्यवो दैत्याः । अराजके इंद्रस्य पदच्युतौ इति संदर्भ चक्रवर्तितोषिणीकाराः ॥ १७ ॥ एतस्मिन् तव पुत्रे विष्णुपक्षा विष्णुसहायान् । "पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु" इति यादवः । परमपुण्यवति यद्वा—हे महाभागे इति यशोदासंबोधनम् 'सस्त्रीको धर्ममाचरेत्' इति न्यायात् । अरयो बाह्याः प्रतिपक्षजना आंतराः कामाद्याश्चेति तोषिण्याम् ॥ १८ ॥ यस्मादेतस्मिन्प्रीतिमतोऽरयो नाभिभवंति तस्मादेनं गोपायस्व प्रीत्या रक्ष । अयं तवाग्रे स्थितस्तवात्मजो गुणादिभिर्नारायणेन समः । वस्तुतस्तु नारायणस्समो येन स नारायणसमः । साम्य बोधक्या

---

१. महाभागे–इति क्वचित् । २. गोपाय सुसमाहितः–इति क्वचित् ।

नारायणतोस्याधिक्यं सूचितं यथा चंद्रसमं मुखमित्युक्तेर्नहि मुखस्य चंद्रता भवति किंतु चंद्रस्याधिक्यं मुखस्य न्यूनत्वमेव लक्ष्यते। 'तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्' इत्यस्यैव तुल्यत्वलक्षणात्। आह्लादादिजनकत्वेन चंद्रसाम्यता न तु प्रकाशकत्वादिनापि। एवं नारायणस्यापि पालकत्वादिना नंदनंदनसाम्यं न तु सर्वथा तदंशत्वात् "नारायणोंगं नरभूजलायनात्" इति वक्ष्यमाणत्वात्। इह सर्वज्ञसर्वथा सत्यवादिश्रीगर्गेणात्मज इत्युक्तं तेन पूर्वोक्तं नंदगृहे सर्वेश्वरावतार इति न विस्मर्तव्यमित्याह-श्रीशुकदेव इति। आत्मनेपदमार्षम्। यद्वा-गोपानामये शुभावहविधौ स्वेनैव समाहितोयम्। यद्वा-गोपानामाये योगे स्वे क्षेमे च समाहितः नारायणसाम्येन तन्नामान्यस्य नामानि तथा ततो वैशिष्ट्येनान्यपि भविष्यंतीति। अतः श्रीनंदेनैव गोकुले विख्यापितानि मुकुंदादिनामानि च श्रीगोपादयो वदंतीति ज्ञेयम्। नंदेति श्लेषेण यस्मान्नारायणसमस्तस्मात्त्वमधुनानंद आनन्दं कुर्वित्यर्थः॥ १९॥ आत्मानं नंदम्। यद्वा-आत्मशब्दस्य बह्वर्थभ्रमवारणाय कृष्णं वेति। "आत्मा पुंसि स्वभावेऽपि प्रयत्नमनसोरपि। धृतावपि मनीषायां शरीरब्रह्मणोरपि॥" इति मेदिनी॥ २०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पूर्ववृत्तमाह-पुरेति। जन्मान्तरे प्रकटार्थे साधवो देवाः। दस्यवो दैत्याः अराजके इन्द्रस्य पदच्युतौ॥ १७॥ महाभागे परमपुण्यवति! यद्वा हे महाभागे इत्यन्ते यशोदासम्बोधनं "सस्त्रीको धर्ममाचरेत्" इति न्यायात् महाभागा इति कचित्पाठः मानवाः जीवमात्राणि इति नृगतिं विविच्येत्यादिवत् अरयो बाह्याः प्रतिपक्षजनाः आन्तराश्च कामादयः विष्णुपक्षान् देवान् दैत्या इव अप्रकटार्थे भागो भग एव निजाशेषभगवताप्रकटनपरे विष्णुपक्षशब्दो देवतापर्यायो ज्ञेयः समुदायस्यैकदेशोपि दृष्टान्तो भवतीति न चास्मिन्निवशब्दोऽनुपपन्नः॥ १९॥ गुणादिभिर्नारायणेन परमवैकुण्ठनाथेन समः अप्रकटार्थेनारायण एव समो यस्येति नारायणादपि माहात्म्यमधिकं बोधितम् उपमानादुपमेयस्य किञ्चित् सादृश्यमात्रेण न्यूनतापत्तेः तत्र गुणा आत्मनिष्ठा धर्माः करुणादयो रूपादयश्च बहिर्निष्ठानाह, श्रिया सम्पत्या कीर्त्या सत्ख्यात्या अनुभवेन प्रतापेन पक्षत्रयेऽपि यद्यपीदृशस्तथापि वत्सलत्वो जातः स्वप्रभावमन्तर्धाप्य त्वामेवानुगत इति सुसमाहितः परमावहितस्सन् एतं गोपाय बाल्ये अस्मिन्नस्य रक्षायां प्रयत्नं कुर्वित्यर्थः। वस्तुतस्तु स्नेहवर्द्धनार्थमेवेदम् अत्रैव बाल्यादीनामन्वयः सर्वथा सर्वात्मना च रक्षेत्यर्थः। तत्र कीर्त्या स्वस्य केवलस्य सत्पुत्रकस्य च कीर्तिविख्यापनेन लोकरञ्जनयेत्यर्थः। गोपायस्वेति पाठे आत्मनेपदमार्षं यद्वा एनं गोपगुप्तं कुरु न तु सर्वत्र प्रकटय दैवात्प्राप्तमहानिधिमिवेत्यर्थः। इदं च परमदुर्लभतादृशस्नेहविवृद्धये अयसुसमाहितः अनेन शुभावहेन विधिना सुष्ठु सावधानः अथवा गोपानाम आयो लाभस्तस्मिन् सुसमाहितोऽयमिति पाठान्तरम् आयस्वशब्दाभ्यां योगक्षेमे अभिहिते तदेवं प्रकटार्थेऽपि नारायणस्य साम्येन तन्नामान्येवास्य नामानि तथा ततो विशिष्टान्यन्यान्यपि भविष्य तीति भावः। अतः श्रीनन्देनैव गोकुले विख्यापितानि मुकुन्दादिनामानि च श्रीगोप्यादयो वदन्तीति ज्ञेयं नन्देति श्लेषेण अतो ऽधुना नन्दं कुर्वित्यर्थः॥ १९॥ स्वगृहं गत इति तदग्रे संभ्रमादिना तद्विशेषास्फुर्तेः अत एव प्रकर्षेण मुदित इति एतदनन्तरं निजपुरोहितादीनानीय प्रकटमेव स्वयं नामकरणमहोत्सवः कृत इति ज्ञेयम्॥ २०॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वोक्तविश्वासार्थं पूर्ववृत्तमाह—पुरेति जन्मान्तरे, वस्तुतस्तु श्रीपृश्न्याद्यवतारे। हे व्रजपते इत्येतत् पित्रा त्वया व्रजेऽशेषदस्युभ्यः सुखं रक्षितव्य एवेति भावः॥ १७॥ महाभागेति परमपुण्यवतीत्यसम्भावना निरस्ता, वस्तुतस्तु भागो भगमेव निजाशेष-भगवत्ता प्रकटनपर इत्यर्थः। यद्वा, 'हे महाभागे' इत्यन्ते श्रीयशोदा-सम्बोधनम्,–'सपत्नीको धर्ममाचरेत्' इति न्यायात्, तथा भर्त्तुर्भार्य्यया सहाभेदात्, तथा स्नेहभरेण पुत्रस्य गुणशुश्रूषया तत्रैवोपविष्टायास्तस्याः प्रहर्षार्थं सर्व्वत्रान्यत्र च श्रीनन्दप्राधान्यात् सम्बोधनमुक्तमेव। मानवा इति जात्याद्यपेक्षा निरस्ता, वस्तुतस्तु संगोपनार्थमेव विशेषतश्च मर्त्यलोकेऽवतीर्णत्वेन मनुष्याणामेव प्रीतिसम्भवात्। अरयो बाह्योः कंसादयः प्रीतिकर्त्तृप्रतिपक्षा वान्तराश्च कामादयः। विष्णुपक्षान् देवान् दैत्या इव, यद्वा, वैष्णवान् आसुरा असुरप्रकृतय इव नाभिभवितुं शक्नुवन्त्यतः कदाचित् कथञ्चिदपि कंसादिभ्यो युष्माभिर्नभेतव्यमिति भावः॥ १८॥ गुणादिभिर्नारायणेन समः, नारायणोऽत्र महावैकुण्ठेशोऽतएव श्रीयशोदादि-द्वारा तद्वार्त्ता-श्रवणादिना व्रजे श्रीगोप्यादिभिरेकविंशाध्यायादौ श्रीकृष्णस्य मुकुन्दादिनामप्रयोगः, यद्वा, गुणादिभिर्नारायण एव समो यस्येति नारायणादपि माहात्म्यमधिकं बोधितम्—उपमानादुपमेयस्य किञ्चित् सादृश्यमात्रेण न्यूनतापत्तेः, तत्र गुणाः करुणादयः श्रीर्धनादि सम्पत्, शोभा वा, कीर्त्तियशः ख्यातिर्वा, अनुभावो ज्ञानं प्रभावो वा। यद्वा, गुणाः (वि. पु. ६।५।७४)—'ऐश्वर्य्यस्य समग्रस्य' इत्याद्युक्ता भग-शब्दवाच्याः षट्, तेषामेव विवरणम्—श्रियेत्यादि, तत्र वैराग्यस्यात्रानुपयोगाद् धर्म्मज्ञानयोश्चानुभाव एवान्तर्भावात् त्रय एवोक्ताः, यद्वा, गुणादीनां परेणान्वयः। सर्व्वथा सर्व्वात्मना च रक्षेत्यर्थः। वैष्णवाः (श्रीवल्लभाचार्य्याः 'सुबोधिन्याम्' टीकायाम् किञ्चिदाहुः—अक्षरं पुरुषोऽन्तर्यामी चेति त्रिविधो नारायणः, तस्य–(१) जीववर्गपरिग्राहकाः, (२) स्वतुल्यतापादकाः, (३) भक्तिजनकाश्चेति क्रमेण त्रिविधा गुणास्तैस्तत्समः, तथा (१) वैकुण्ठे लक्ष्मीसहिता,

(२) सूर्य्यमण्डले सूर्य्यदेवसहिता, (३) भूमौ यज्ञाधिष्ठाता चेति ब्रह्माण्डमध्ये त्रयो नारायणाः क्रमेण नित्यं तेषु वर्त्तमानैः श्र्यादिभिस्तैश्च सम इति। अतः सुसमाहितस्तदेकनिष्ठचित्तः परमावहितो वा सन् एनं गोपाय, बाल्येऽस्मिन्नस्य रक्षायां प्रयत्नं कुर्व्वित्यर्थः। गोपायस्वेति पाठेऽपि स एवार्थः। यद्वा, एनं गोप गुप्तं कुरु, न तु सर्व्वत्र प्रकटय, दैवात् प्राप्तं महानिधिमिवेत्यर्थः। इदञ्च निजभक्तिविशेषेण तस्य स्नेहविवृद्धये, किंवा दुष्टकंसादिभयादुक्तम्। अयसुसमाहितः—अयेन शुभावहेन विधिना सावधानः, अथवा गोपानामयो लाभस्तस्मिन् सुसमाहितोऽयमिति। पाठान्तरे अय-स्व-शब्दाभ्यां योग-क्षेमे अभिहिते, यद्वा, अयो वैकुण्ठादिगतिः, स्वं प्रेमलक्षणं धनम्, तयोः समाहितोऽतः श्रीनारायणस्य नामान्येवास्य नामानि तथा ततो विशिष्टान्यन्यपि भविष्यन्तीति भावः। हे नन्देति, श्लेषेण नन्देति क्रियापदं वा, अतोऽधुना नन्द कुर्व्विति भावः ॥१९॥ आत्मानं परमात्मत्वेन जगतां गुरुमपि श्रीकृष्णं प्रति, 'च' काराद्बलदेवञ्च सम्यगादिश्य देशिकतया तिलकादिधारणविधिमाज्ञाप्येत्यर्थः। स्वगृहं गत इत्यन्यथा तस्य साक्षात्तादृशमानायोग्यत्वम्। ननु तथापि सर्व्वभागवतवर्गवन्द्यस्य तस्य मानो नोचितः ? सत्यम्, परमहर्षाकुलत्वादित्याह—प्रकर्षेण मुदित इति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे व्रजपते ! अराजके संरक्षकरहिते जगत्यत एव दस्युभिर्दुष्टसत्त्वैः पीडिताः साधवो धर्मानुवर्त्तिनः अनेन त्वत्पुत्रेण पुरा पूर्वजन्मनि समेधिता रक्ष्यमाणाश्च दस्यून् जिग्युर्जितवन्तः अनेन "परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय" इति भगवदुक्तिरभिप्रेताऽधुनाऽपि साधुपरित्राणार्थमेव जात इति च भावः ॥ १७ ॥ हे महाभाग ! अस्मिन् त्वत्पुत्रे पुरा पूर्वजन्मनि समेधिता ये मानवाः प्रीतिं कुर्वन्ति तान् अरयः शत्रवो नाभिभवन्ति यथा विष्णुरेव पक्ष आश्रयो येषां तान् देवानसुरांस्तद्वत् अत्र प्रीतिशब्देन प्रीत्यात्मिका भक्तिरभिप्रेता अरिशब्देन प्रकृतिसम्बन्धप्रयुक्तकामक्रोधादयः ये एतस्मिन् भक्तिं कुर्वन्ति मानवाः ते मुक्ता भवन्तीति भावः। विष्णुपक्षानिवासुरा इति दृष्टान्तेनायं साक्षाद्विष्णुः यूयं तु देवांशप्रभवा कंसादयस्त्वासुरसम्पत्यामभिजाता इत्यभिप्रेतम् ॥ १८ ॥ तस्मादेवं भाविगुणत्वात् हे नन्द ! श्रिया कीर्त्त्या प्रभावेण अन्यैश्च गुणैर्नारायणतुल्योऽयं भविताऽत एनं समाहितः सावधानचित्तस्त्वं गोपाय पालय ॥ १९ ॥ इतीत्थमात्मानं प्रति समादिश्य गर्गे स्वगृहङ्गते सति ततो नन्दः प्रमुदित आशिषा ऽभिमतार्थजातेन पूर्णप्रायमात्मानममन्यत ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पृथ्व्यवतारे अराजके राष्ट्रे अरक्ष्यमाणाः ॥ १७ ॥ विष्णुपक्षान् विष्णुसहायान् "पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु" इति यादवः ॥ १८—१९ ॥ इत्यादि आत्मानं नन्दम् आत्मानं त्वम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नारायणपरमव्योमाधिप एव समो यस्य तादृशोऽपि श्र्यादिभिर्द्वारैः गोपानामये शुभावहे विधौ सुसमाहितं पाठान्तरे स्वेन स्वयमेव समाहित इति वास्तवोऽर्थः। प्रकटार्थं तु यद्यपि नारायणस्य समस्तथापि तवात्मजतां प्राप्त इति तवैव गोपनीय इत्यर्थः ॥ १९ ॥ गत इति तदग्रे सम्भ्रमादिना तद्विशेषास्फूर्त्तेः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तामेव स्वय भगवत्तां प्रतिपादयति तस्मादिति। हे नन्द ! तस्मादयं ते आत्मजो गुणैर्नारायणसम इति लोकभियोक्तम्। तत्तु सरस्वती स्वयमन्यथा व्याख्याति। नारायणोऽपि समः सश्रीको यस्मात् समाना मा श्रीर्यस्य स तथा अथवा गुणैर्नारायणमपि समयति विह्वलयति नाराणसमः मनोहरादिवत्। नात्र कर्मण्यण्, समष्टमवैकल्व्ये चुरादिः। अथवा समयति समः नारायणस्यापि समो नारायणसमः महीधरादिवत्। यद्वा, नारायणोऽपि समो यस्मात् नारायणसमः। मानं मा तत्सहितः प्रमेय इति स त्वप्रमेयः (भा. १०।१४।१४) नारायणोऽङ्गम् इति वक्ष्यमाणविरोधभङ्गादिव्याख्या ॥ (१९-२९) ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः—मा श्रीस्तया सह वर्तते इति समः, गुणैर्नारायणः समः सविभूतिर्यस्मात्, यस्य श्रियां नारायणोऽपि श्रीमान् भवति, स एवायं परात्परः श्रीकृष्ण इत्यर्थः। यद्वा, नारायणादपि समः सश्रीकः ॥ (१९-२९). ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुरा जन्मान्तरे साधवो देवाः दस्यवो दैत्या अराजके इन्द्रस्य पदच्युतौ ॥ १७-१८ ॥ नारायणसम इति त्वदिष्टदेवेन सन्तुष्टेन श्रीनारायणेन स्वसमः पुत्रस्तुभ्यं दत्त इति भावः। अतो मुकुन्दमधुसूदननारायणादिनामभिरप्यभिधीयतां किन्तु "श्रेयांसि बहुविघ्नानि" इति विभाव्य सुसावधानस्सन् गोपाय प्रतिक्षणं पालय रक्षितः पुत्रः अयं ते नारायण इव सर्वोपद्रवेभ्यो

रक्षिष्यतीति भावः। गोपायस्वेति पाठ आत्मनेपदमार्षं वस्तुतस्तु नारायणः समो यस्य तत्रापि गुणादिभिरेव नतु दैत्यमोक्षदत्वभक्तमहाभावप्रदत्वलक्ष्मीदुर्लभरासविहारित्वादिभिर्महागुणादिभिरिति सर्वोत्कर्ष आत्यन्तिकः श्रीनारायणादप्यस्य व्यञ्जितः गोपानाम् आये लाभे अये शुभावहविधौ वा सुसमाहितः ॥ १९ ॥ आत्मानं स्वं प्रति प्राणानाहृत्य मौग्ध्येन दुष्टयोः पूतनानसोः शिष्टवर्गप्रकृष्टस्य गर्गस्यापि मनोऽहरत् ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुरा अराजके रक्षकरहिते काले अनेन रक्ष्यमाणाः समेधिताः दस्यून् जिग्युः जितवन्तः ॥१७–१८–१९॥ इत्येवमात्मानं प्रति समादिश्य गर्गे स्वगृहं गते नन्दः आशिषाम् आशीर्भिः आत्मानं पूर्णं मेने अमन्यत ॥ २०—२१ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

साधुरक्षकताऽस्य स्वभाव एवेत्याह पुरेति। साधवो देवाः दस्युभिरसुरैः पीडिताः अराजके इन्द्रस्य पदच्युतौ अनेन रक्ष्यमाणाः पक्षपातेन वर्द्धितास्तान् जिग्युः ॥ १७ ॥ किञ्च येऽस्मिन् प्रीतिं कुर्वन्ति ते एव महाभागाः तानरयो नाभिभवन्ति विष्णुपक्षान् देवानिवासुराः महाभागे इति केचित् पेठुः हे यशोदे ! राज्ञीतितदर्थः सस्त्रीको धर्ममाचरेदिति वचनात् सापि तत्राभूदित्यर्थः ॥ १८ ॥ नन्वीदृशोऽन्योऽपि कश्चिदस्तीति चेत्तत्राह तस्मादुक्तमहिमप्रचयाद्धेतोस्तेऽयमात्मजो नारायणेनैव परव्योमपतिना समः गुणैरात्मनिष्ठैः कारुण्यादिभिः बहिर्निष्ठैश्च श्र्यादिभिः नारायणोऽतस्तत्समः अस्योपमेयत्वात् कैश्चिद्गुणैरस्यैवोत्कर्षः ते च गुणाः सर्वातिशयिप्रेमपूर्णपार्षदत्वविरिञ्चादितत्त्वविद्विस्मापकस्थिरचरविमोहकः वेणुनादमाधुर्यस्वपर्यन्तसर्वविस्मापकरूपमाधुर्यलक्ष्मीदुर्लभ रासलीलत्वादयो बोध्याः त्वन्तु नारायणमिव षोडशोपचारैरेनं नार्चय किन्तु समाहितः सन् गोपायस्व पुत्रभावानुरूपैरुपचारैः पालय सेवस्वेत्यर्थः। बन्धुभावेनायमतिप्रसन्नो न तु पुत्रभावेन देवादिभावेन शङ्कमानान् गोपान् प्रति "सत्सम्बन्धेन वो गोपा यदि लज्जा न जायते। श्लाघ्योवाहं ततः किम्वोविचारेण प्रयोजनम् 'यदिवोस्ति मयि प्रीतिः श्लाघ्योऽहं भवतां यदि। तदात्मबन्धुसदृशीबुद्धिर्वः क्रियतां मयि ॥ नाहं देवो न गन्धर्वो न यक्षो न च राक्षसः। अहं वो बान्धवो जातो नातश्चिन्त्यमतोऽन्यथा' इति वैष्णवे "मन्यन्ते मां यथा सर्वे भवन्तो भीमविक्रमाः। तथाहं नावगन्तव्यः सजातीयोऽस्मि बान्धवः ॥ इति हरिवंशे चैतद्वाक्यादेव यद्यपि नारायणात् कृष्णो नान्यस्तथापि विशेषनिर्मितादृभेदकार्यादेवं भणितिरिति बोध्यं नारायणस्य कृष्णविलासत्वं तु "गोलोकनाम्नि निजधाम्नि तले च तस्य देवी महेशहरिधामसुतेषु तेषु। ते ते प्रभावनिचयाविहिताश्च येन गोविन्दमादिपुरुषं तमहं भजामीति ब्रह्मसंहितावाक्यात् "अनाद्यन्तं परं ब्रह्म न देवो नर्षयो विदुः। एकोऽयं वेद भगवान् धाता नारायणो हरिः ॥ इति भीष्मस्तुतिवाक्याच्च लिङ्गात् ॥ १९ ॥ इति पूर्वोक्तप्रकारेणात्मानं विभुविज्ञानानन्दमूर्त्तिं पुत्रमादिश्योपदिश्य नन्दः प्रमुदितो गर्गोऽपि मद्भावानुरूपमेवोपादिशदिति प्रहृष्टं सन्नात्मानं स्वमाशिषां वाञ्छितानां पूर्णस्तैः पूर्णोऽस्मीत्यमन्यत ततः स्वपुरोहितैर्भागुर्यादिभिः स्वसूनोर्नामकरणादिकं यथेष्टमकरोदिति बोध्यम् ॥२०॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

निगमयन्नवगमयति ॥ तस्मादिति। नारायणसम इति नारायण एवेत्यर्थः ॥ १९ ॥ गुणैरित्युक्तं विशदयति ॥ श्रियेति। कीर्त्या श्रियाऽनुभावेनेत्यादिगुणैर्नारायणसम इत्यन्वयः। समाहितस्त्व समे सर्वे कंसादयोऽहिता यस्य स तं गोपायस्व। समाहित इति छेदः। स्वैः सह समाहितो रक्षय समाहितेन साकं वर्तत इति स त्वम्। आत्मानं स्वमित्यादिश्याज्ञाप्य गर्गे स्वगृहं स्वाश्रमं गते सति नन्दः प्रमुदितः सन् आत्मानं स्वमाशिषां पूर्णं मेने व्यजानात्। एवं मेने माया इनो मे न स्वस्मिन्स्वगृहं गते सत्यात्मानमाशिषां पूर्णं पूर्णमनोरथं मेन इत्यावृत्त्याऽन्वयो वा ॥ २० ॥

श्रीसुबोधिनी

एवं सर्वदुःखनिवृत्तिपूर्वकसर्वपुरुषार्थसिद्धिरस्माद् भवतामित्युक्तं, अतोऽस्य चिन्ता नास्तीत्युक्तमेव, मोक्षोप्यस्माद् भविष्यतीति वक्तुं तदर्थमिन्द्रियजयमपि वक्तुं पूर्वोक्तेपि प्रमाणमाह पुरानेनेति, हे **व्रजपते, अनेन** भगवता कृत्वा **दस्युपीडिता** अपि **साधवः समेधिताः** सन्तो **दस्यून् जिग्युः** क्षुद्रोपद्रवोपि चोरवत् कंसादिभिः कर्तुं न शक्यो यतोऽस्य स्वभावकृतिरेव तादृशी, **व्रजपत** इति सम्बोधनं सर्वस्यापि **व्रजस्य** यथासुखं विहरणयुक्तस्य सर्वतः कुशलं भविष्यतीति ज्ञापयति, तेन यत्र कापि स्थातव्यं न चिन्तेतिभावः, **पुरेति**वचनात् सदातनोयं न तु त्वद्गृहेधुनावतीर्ण इति ज्ञापितं, **अनेनेति** न तस्यावतारः किन्त्वयमेव, सम्बोधनं तु ज्ञानाभावज्ञापकं, **दस्यवो** रावणादयः 'त्रसदस्यु' पदे तथा निर्वचनस्योक्तत्वात् 'यस्यामिमे षण् नरदेवदस्यव' इति भवाटव्यामिन्द्रियाणि चोक्तानि कंसोपि तृणावर्तादिप्रेषणाद् **दस्युः**, नन्वनेन दस्यवो मारिता इत्यत्र किं प्रमाणम् ? तत्राह **साधव** इति, यद्यन्तःकरणस्थितचोरान् बहिःस्थितांश्च न मारयेत् तदा **साधव** एव न भवेयुः, विशेषाकारेणापि मारयतीत्याह

दस्युपीडिता इति, दस्युभिरुपहृतधनाः, पुनः **समेधितास्तथैव** कृतास्ततोप्यधिकाश्च, ततो **जिग्युः** स्वयमेव ताञ् जितवन्तः, अतो भवन्तोप्यनेन **समेधिताः** स्वयमेव **दस्यून्** जेष्यन्ति, एवं भगवतस्त्रिविधानि कर्माणि निरूपितानि सर्वदोषनाशकानि सर्वसुखजनकानि सर्वसामर्थ्यजनकानीति, ननु कथं साधूनां दुष्टोपद्रवः पूर्वं राज्ञां विद्यमानत्वात् तत्राह **अराजक** इति, न विद्यन्ते राजानो यस्मिन् देशे, परशुरामेण सर्वे हताः कालेन च विवेकादयोत एवारक्ष्यमाणा रक्षकापेक्षामपि न कृतवन्तः, अतः कांतापेक्षां परित्यज्य स्वतन्त्रतया राजवत् स्थातव्यमित्युपदेशोप्युक्तः ॥ १८ ॥ एवं कर्माण्युक्त्वा गुणानाह **य एतस्मिन्निति,** गुणास्त्वनुभावरूपाः क्रिया नापेक्षन्ते, ये **महाभागा एतस्मिन्** भगवति **प्रीतिं** स्नेहं **कुर्वन्ति तानरयो नाभिभवन्ति,** स्वत एव तर्हि सर्व एव कथं प्रीतिं न कुर्वन्तीत्याशङ्क्य भगवत्प्रीतौ स्वरूपयोग्यता सहकारियोग्यता चापेक्ष्यत इत्याह **मानवा मनोजाताः** सद्धर्मरूपा धर्मार्थं एवोत्पन्ना इति स्वरूपयोग्यानां "मन्वन्तराणि सद्धर्म" इति वाक्यात्, **महाभागा** इति "जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत" इति वाक्यात् परमभाग्येनैव **प्रीतिर्जायते, प्रीतिमिति** सर्वदैकविधप्रीतिकरणार्थमेकवचनं पटवद् वृद्ध्यर्थं वा खण्डशःकरणाभावार्थं वा हेतुस्तूक्त एव, **य** इति प्रसिद्धतया तेषां निर्देशः, भवन्तस्त इति प्रतिनिर्देशार्थः, **एतान्** परिदृश्यमानान् गोकुलस्थान्, नन्वन्तर्याभिप्रेरणेनैव ते न बाधन्ते, अवश्यं चैतद् वक्तव्यं, भक्तिस्त्वन्तर्यामिप्रेरणार्था, ततो नानेन प्रकारेण भगवद्गुणा उक्ता भविष्यन्तीत्याशङ्क्याह **विष्णुपक्षानिवासुरा** इति, **विष्णुः पक्षे** पक्षपाते येषां विष्णुरेषां रक्षक इति **येषु** ज्ञानमतः स्वकृतिवैयर्थ्यशङ्कयासुरा न बाधन्ते, अन्तर्यामी तेषां नान्यथाप्रेरक आसुराणामासुरभावेनैव प्रेरणनियमात्, अतो विशेषाकारेणैव पालयिष्यतीति सर्वजनीनत्वात्, अम्बरीषादिचरित्रे तथा प्रसिद्धेः, अस्य प्रीतेरेषोनुभावः, गुणास्त एव ये सानुभावाः परम्परयाप्यनुभावं सम्पादयन्ति, अनेन साक्षाद्गुणा अनन्ता एव वक्तुमशक्या इति सूचितम् ॥ १९ ॥ एवं गुणे प्रदर्शनमात्रमुक्त्वा विशेषाकारेण वदन्नुपसंहारमिषेण रक्षामुपादिशति **तस्मादिति,** यस्मादयं महानुभावः पूर्वोक्तकर्मालौकिकस्तस्मात्, **हे नन्द** सर्वानन्दकारिन्, त्वन्नामसार्थकत्वाय चैनं पालयेतिभावः, **अयं ते कुमारो गुणैः कृत्वा नारायणसमो** नारायणस्य समः, त्रिविधोपि नारायणोक्षरं पुरुषोन्तर्यामी च, **गुणैरेव** कृत्वा तत्समः, कर्माणि त्वधिकानि, **अनुभावश्च,** नराज्जातानीतिपक्षे यावन्तो जीवगणाः सृष्टावुत्पन्नास्ते सर्वे भगवद्गुणख्यापकास्तावद्गुणप्रसिद्ध्यै तावद्रूपो जात इति, द्वितीयपुरुषस्य तु विशेषेण स्वसम्बन्धयोग्यजीवराशिपरिग्रहात् स्वतुल्यतामापादयितुं स्वभावनिवर्तकाः सानुभावा **गुणा** उक्ताः, तृतीयपुरुषे त्वन्तर्यामिणि जीववश्य इव तदधीनत्वेन तस्य सर्वकार्यप्रेरक इति भक्तिजनका असाधारणा **गुणा** उक्ताः, त्रिविधा अपि भगवति कृष्णे सन्तीति **गुणैः** कृत्वा **नारायणसमानः,** धर्मान्तरैरपि **नारायणसमतामाह श्रिया कीर्त्यानुभावेनेति,** ब्रह्माण्डमध्ये **नारायण**त्रयं यो वैकुण्ठे लक्ष्मीसहितो यः सूर्यमण्डले सर्ववेदसहितो यो भूमौ सर्वब्राह्मणेषु यज्ञनारायणस्तत्सदृशोपि, यथा सर्वजगज्जनन्या अक्षरानन्दरूपाया सर्वशोभानिधानरूपाया य एतत्त्रयकर्ता, लक्ष्म्या जगज्जनकत्वं तस्या अपि परमानन्दः सर्वशोभारूपाया अपि शोभा, यथा व्यापिवैकुण्ठस्थो भगवान् लक्ष्म्या एतावत् करोति एवं कृष्णोपि करोति, यथा सवितृमण्डलस्थः कीर्तिं स्थापयति सर्वलोकेषु "न ह्यस्मिन्नुदिते दिनकरे सकलं कमलायते भुवन"मिति वाक्यात् **कीर्तिः** सूर्ये प्रतिष्ठिता यतः सर्वेषां स्वत एव शीताज्ञानादिसर्वदुःखनिवृत्तिः सर्वसुखं च भवत्येवं **कृष्णकीर्तिरपि,** यतः प्रभृत्युदितस्ततः प्रभृति सूर्यवदेव भागवतादिषु प्रकाशते, यथा यज्ञा आधिदैविकाः सर्वेषां सर्वकार्यकर्तारो दूरादेव माहात्म्यज्ञापकास्तथा महानुभावो भगवान्, एवं षड्भिर्नारायणैस्तुल्यो भगवान् कृष्णो **गुणैः** षड्गुणैः, **श्रिया कीर्त्यानुभावेन च** तस्यैव विवरणं, एवं भगवद्गुणानुक्त्वा चकारेण "सत्यं शौच"मित्यादिप्रथमस्कन्धोक्तगुणानपि सङ्गृह्य परमनिधानत्वेनोपपाद्य सावधानान्तःकरणो भूत्वा प्रपञ्चविस्मरणेन गोपायस्वेत्युपदिशति **गोपायस्व समाहित** इति, एतावता सर्वथावेक्षा कर्तव्या न कापि गन्तव्यं न नेय इत्युक्तम् ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

नारायणसमो गुणैरित्यत्र । उपमेये तत्समाना धर्मा ये त उच्यन्ते । एतत्सृष्टिविलक्षणा हि लीलासृष्टिरियम् । यस्यामुत्पादितास्तु जीवगणा दशरससम्बन्धिनो यावन्तो भावा भगवद्विषयकास्तद्वन्त इति तद्भावपोषार्थं भगवतापि तथैव स्वनिष्ठा गुणाः प्रकटीक्रियन्त इति भगवद्गुणख्यापकत्वं तेषाम् । न च मन्तव्यमेतादृशा एव केचन जीवाः सन्ति, येषामेतादृक्सामर्थ्यं सहजमस्तीति, यस्तद्रूपः स्वयमेव प्रकटो जात इति ज्ञापनायाहुः **तावद्गुणप्रसिद्ध्या** इत्यादि । एतेन प्राकृतानां नैतद्रसप्राप्तिरिति ज्ञापितं भवति । **द्वितीयेत्यादि** । अत्रैतादृशो व्रजसुन्दरीपरिग्रह एव । रसाधिक्ये पुंभावेनाग्रिमोक्तधर्माः स्पष्टाः । तृतीये गोपिकाधीनत्वादि स्पष्टम् । 'अहं भक्तपराधीनः' 'एवं मदर्थोज्झिते' त्यादिवाक्येभ्यः । एतदेवोक्तं त्रिविधा अपीत्यादिना । **श्रियाकीर्त्येत्यत्र, एवं** कृष्णोपि **करोतीति** । व्रजसुन्दरीणामिति ज्ञेयम् । अग्रे स्पष्टम् ॥ २० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

य एतस्मिन्नित्यत्र 'जन्मान्तरसहस्रे' ष्वितिवाक्यं पाण्डवगीतास्थं बोध्यं, उक्त इति महाभागमानवपदाभ्यामुक्तः, येषु ज्ञानमिति येष्वसुराणां ज्ञानम् ॥ १९ ॥ **तस्मादित्यत्र नामसार्थकत्वाय** चेति चकारात् पूर्वोक्तफलप्राप्तये च नारायणशब्द-

त्रेधा निरुक्तस्तृतीयस्कन्ध ऊनविंशाध्यायसमाप्तौ **सुबोधिन्यां** तत्राक्षरपक्षे नराज्जातानि तत्त्वानि नारायणीति विदुर्बुधा' तान्ययनं स्थानं यस्येति, पुरुषपक्ष 'आपो नारा' इति, तृतीयपक्षे नराणां समूहो नारं तदयनं यस्येति, **इयं** च निरुक्तिरादिपुराणे 'सर्वजीवाश्रयो वे'त्यनेनोक्ता, तत्राद्ये **पक्षे यावन्तो जीवगणा सृष्टावुत्पन्नास्ते** तथेत्यर्थः, कथं **व्यापका** इत्याकाङ्क्षायां यैः **व्यापकास्तान्** धर्मांष्टिप्पण्यां प्रतिज्ञाय विवृण्वन्त्युपमेय इत्यादि, **एतत्सृष्टिविलक्षणे**त्यक्षरोत्पन्नसाधारणसृष्ट्युत्पन्नानां जीवानां, अत्र हेतुमवतारयन्ति न चेत्यादि, तथा चात्र "तदभिध्यानादे"तिन्यायेन तथा प्राकट्यादक्षरगुणसाम्यं बोध्यं, हेतूक्त्या फलितमाहुरेतेनेत्यादि, **सुबोधिन्यां द्वितीयपुरुषस्य** ब्रह्माण्डविग्रहस्य तु **विशेषेण** स्थूलदेहेन स्वसम्बन्धयोग्यः स्वराट्पुरुष**सम्बन्धयोग्यो जीवराशिस्तस्य परिग्रहात्** स्वधारणया सर्वत उपादानात् तत्क्रतुन्यायेन **स्वतुल्यतामापादयितुं** जीवस्वभावनिवर्तकाः **सानुभावा गणाः** सर्वस्थूललिङ्गशरीरात्मकत्वलौकिकेन्द्रियवत्त्व'सर्वधीवृत्त्यनुभूतसर्व'त्वादय उक्तास्तत्सदृशानुपमेयगुणांष्टिप्पण्यामाहुर्द्वितीयेत्यादि, **अत्रोपमेये** भगवत्येतादृशा उक्तगुणत्रयसदृशो **व्रजसुन्दरीपरिग्रह एव**, तस्मात् परिग्रहणाद् **रसाधिक्ये पुम्भावेनाविर्भावताः स्वतुल्यता**मित्यादिनोक्ता **धर्माः स्पष्टा** इत्यर्थः, **सुबोधिन्यां** तृतीये पक्षे उपमेयधर्ममाहुस्तृतीय इत्यादि, **एतत्त्रयकर्ते**ति वक्ष्यमाणत्रयकर्ता, तदेवाहुर्लक्ष्म्या इत्यादि, **एवं कृष्णोपी**त्येतस्यार्थष्टिप्पण्यामुक्तो **व्रजसुन्दरीणा**मिति, **सुबोधिन्यामाविर्भाविका** इति षोढा विहिता निष्कामा भगवत्तोषकाः, **तथा महानुभाव** इत्याधुनिकानामपि स्वसेवया **दूरादेव माहात्म्यव्यापकाः** षड्गुणैरिति षण्णां च **नारायणानां** गुणैर्वेति, तस्यैवेति समानभावस्य, **अनुभावैश्चे**तिपाठान्तरमङ्गीकृत्य तस्मिन् पक्षे चकारेण **गुणान्तरां**स्तत्रानुक्तान् सङ्गृह्णन्तश्चतुर्थपादमवतारयन्त्येवमित्यादि, यद्यप्यत्र पाठान्तरं कण्ठतो नोक्तं तथापि चकारव्याख्यानात् तथावसीयते ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तस्मादित्यत्र **यस्मादयं** कुमारो गुणैर्नारायणसमत्वान् **महानुभावस्तस्माद्धेतोः नन्देति नामसार्थकत्वाय** च हेतवे **एनं पालये**त्यर्थो **यस्मादित्यारभ्य भाव** इत्यन्तस्य, **नरादिति** नराज् जाता नारा जीवास्ते अप्यते ज्ञाप्यतेनेनेतिव्युत्पत्त्या **अयनानि** ज्ञापकानि यस्येत्यक्षरस्य नारायणत्वं, लौकिकसृष्टिपक्षे जीवानामक्षरात्मकत्वात् तज्ज्ञापकत्वं, **द्वितीयेति** द्वितीयो नारायणः **पुरुष**स्तस्येत्यर्थः, **नरसम्बन्धयोग्या** नारास्तेषामयनं स्थानमिति पुरुषस्य नारायणत्वं, पुंस्त्वमार्षं, **स्वभावेति** उपमाने जीव**स्वभावः** सदोषत्वमित्यर्थः, **तृतीये**ति नारानयते प्रेरयतीत्यन्तर्यामिणो नारायणत्वं, **यथा सर्वेति** यः व्यापिवैकुण्ठस्थो भगवान् **यथा सर्वे**त्यादिधर्मविशिष्टाया लक्ष्म्या **एतत्त्रयकर्ता** स भगवांस्तथा तत्रापि करोतीतिशेषः, तत् त्रयं विवृण्वन्ति **लक्ष्म्या जगज्जनकत्व**मिति, इदमेव सर्वं स्पष्टयितुं पुनराहुः **यथा व्यापिवैकुण्ठस्य** इति, जगदुपादानभूताक्षरात्मकत्वेन लक्ष्म्याः स्वरूपतो जगज्जननीत्वं पूर्वमप्यस्ति तथापि "मम योनिर्महद् ब्रह्मे"तिप्रकारेण निमित्तकारणत्वेन जगज्जननं भगवत्सम्बन्धादेवेतिभावः, तथात्र भगवद्विषयकविचित्रभावजननं पुरुषोत्तमात्मिकानामपि "आनन्दादयः प्रधानस्ये"तिन्यायेन **परमानन्दः स्त्रीरत्नभूता**नामपि **शोभा** भगवत्सम्बन्धादेव, तद्वियोगे तु स्थाणुदृष्टान्तेन तादृशभावपरमानन्दशोभानां तिरोभाव इतिभावः, एतेषां त्रयाणां नारायणत्वं तु तत्र तत्र वाक्यैरेव स्फुटमिति रूढं ज्ञेयं, **सूर्यवदेवे**ति सर्वेषां दुःखनिवृत्तिं सुखदानं च कुर्वन्नित्यर्थः, **यत्रा आधिदैविका** इति विष्णुरूपा इत्यर्थः, **षड्गुणै**रिति ऐश्वर्यवीर्यवैराग्यश्रीकीर्तिज्ञानानीति क्रमो ज्ञेयः, अन्तर्यामिणोऽनशनकथनाद् वैराग्यं, **चकारेणे**ति तथा च मूले 'श्रिया कीर्त्यानुभावैश्चे'तिपाठो ज्ञेयः । **प्रथमस्कन्धे** "सत्यं शौच"मित्यादिनोक्तान् सत्यादीन् **गुणान्**, 'इमे चान्ये चे'ति 'च'कारेणोक्तान् ब्रह्मण्यत्वभक्तवत्सलत्वादींश्च गुणानित्यर्थः, तथा च **चकारेण** सह **"सत्यं शौच"**मित्यादि**प्रथमस्कन्धोक्तगुणान् सङ्गृह्ये**त्यन्वयः, अनुभावपदेनैतेषां गुणानां सङ्ग्रहो ज्ञेयः ॥ २० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

पुरानेनेत्यस्याभासे **मोक्षोऽप्यस्माद् भविष्यतीति वक्तुं तदर्थमिन्द्रियजयमपि वक्तुमिति** "जिग्युर्दस्यू"नित्यत्र दस्युपदेन इन्द्रियाणामुक्तत्वात् "यस्यामिमे षण् नरदेव दस्यव" इति भवाटव्या निरूपणे उक्तत्वात् ॥ १८ ॥ **श्रिया कीर्त्यानुभावेने**त्यस्य विवृतौ **ब्रह्माण्डमध्ये नारायणत्रय**मिति प्रसिद्धमित्यर्थः, एवं सति **यो वैकुण्ठे लक्ष्मीसहित** इत्युक्तिरपि युज्यते, अन्यथा **वैकुण्ठस्य** ब्रह्माण्डातीतत्वाद् ब्रह्माण्डमध्ये इति न वदेयुः, वैकुण्ठपदेनात्र व्यापिवैकुण्ठो ग्राह्यः, "यथा व्यापिवैकुण्ठस्थो भगवान् लक्ष्म्या एतावत् करोती"त्यग्रे वक्ष्यमाणत्वात् , **गोपायस्व समाहित** इत्यस्याभासे **गोपायस्वेत्युपदिशतीति** एतावन्माहात्म्ये बोधितेपि पर्यवसाने एतस्मिन् भगवति स्नेह एव मुख्यतया कार्य इतिवक्तुं **गोपायस्वे**त्यनेन **रक्षामुपदिशती**त्यर्थः, अन्यथा एतादृग्माहात्म्यवतः कृष्णस्य रक्षां न वदेत् , तस्यैव सर्वरक्षकत्वात् , अतो माहात्म्यं ज्ञात्वा स्नेह एव मुख्यतया रक्षणीयः, एवं सति भगवत्सेवायामपि स्नेहोपचारा एव सर्वदा कर्तव्याः, अयं भगवानेतस्य शीतोष्णादिसम्बन्धाभावात् तूलकञ्चुकचन्दनाद्यर्पणं निष्प्रयोजनकमितिबुद्धिर्न कर्तव्येति फलितम् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ये मानवा एतस्मिन् त्वत्पुत्रे प्रीतिं कुर्वन्ति, ते एव महाभागा धर्मादिचतुर्विधपुरुषार्थभागिनो भवन्ति। तानेतान् अरयः शत्रवो मनुष्यादयः, इन्द्रियाणि रागलोभादयश्च नाभिभवन्ति न तिरस्कुर्वन्ति। तेषां पुरुषार्थलाभे विघ्नं कर्तुं न शक्नुवन्तीत्यर्थः ॥ तत्र दृष्टान्तमाह—विष्णुः पक्षे येषां तान्, देवान् यथा असुरा नाभिभविष्यन्ति तथेति ॥ १८ ॥ 'त्वया दुर्लभं प्राप्तम्' इति सूचयन् सम्बोधयति—नन्देति। यस्मादयं तवात्मजो गुणैर्भक्तवात्सल्यादिभिः, श्रिया ऐश्वर्येण, कीर्त्या यशसा, अनुभावेन प्रभावेण च नारायणसमः। त्वं च समाहितः एकाग्रचित्तः सन् एनं गोपायस्व, अस्य सेवां कुर्वित्यर्थः॥१९॥ इत्येवम् आत्मानं नन्दं प्रति समादिश्य सम्यगुपदिश्य गर्गे स्वगृहं गते सति नन्दः प्रमुदितः सन् आत्मानमाशिषामाशीर्भिः अभिमतार्थैः पूर्णं मेने ॥ २० ॥

अन्वितार्थप्रकाशिका

य एतस्मिन्निति ॥ ये महाभागाः मानवाः एतस्मिन् त्वत्पुत्रे प्रीतिं कुर्वन्ति विष्णुः पक्षः येषां तान् देवान् असुरा इव एतान् अरयः शत्रवो न अभिभवन्ति न तिरस्कुर्वन्ति ॥ १८ ॥ तस्मादिति ॥ हे नन्द ! यस्मादेवं तस्मादयं तवात्मजो गुणैर्भक्तवात्सल्यादिभिः श्रिया ऐश्वर्येण कीर्त्या यशसा अनुभावेन प्रभावेण च नारायणस्य समः नारायणेन कृपया स्वतुल्यः पुत्रस्तुभ्यं दत्तः। त्वं च सुष्ठु समाहितः एकाग्रचित्तः सन्नेनं गोपाय रक्ष। गोपायस्वेति पाठे तङार्षः। यद्वा। अयं त्वत्पुत्रः गोपानाम् आये लाभे अये शुभावहे विधौ वा सुसमाहितः पाठान्तरे स्वेनात्मना समाहितो भविता। नारायणसम इति श्रुत्यैव मुकुन्द इत्यादीनि नामानि नन्देन स्थापितानि गोपादिभिर्व्यवह्रियन्ते स्म ॥ १९ ॥ इत्यात्मानमिति ॥ इत्येवम् आत्मानं नन्दं प्रति समादिश्य सम्यगुपदिश्य गर्गे स्वगृहं गते सति नन्दः प्रमुदितः सन्नात्मानमाशिषामाशीर्भिः। शेषे षष्ठी। अभिमतार्थैः पूर्णं मेने। एतदनन्तरं स्वपुरोहितादीनानाय्य प्रकटमेव नामकर्मोत्सवं चकारेति बोध्यते ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एतस्मिन् त्वत्पुत्रे अरयः शत्रवः विष्णुपक्षान् हरिभक्तान् ॥ १८ ॥ हे नंद अनुभावेन महिम्नाश्र्याद्यसंख्यैर्गुणैः नारायणसमः अतः समाहितः सावधानः सन् तं गोपायस्व ॥ १९ ॥ आत्मानं स्वं प्रति समादिश्य निगद्य आशीषाम् आशिर्भिः पूर्णम् आत्मानं स्वम् ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

य इति ॥ एतस्मिंस्त्वत्पुत्रे, ये महाभागाः मानवाः, प्रीतिं कुर्वन्ति, एतान् मानवान्, विष्णुरेव पक्ष आश्रयो येषां तान्, देवान्, असुरा इव, अरयः शत्रवः, न अभिभवन्ति। अत्र प्रीतिशब्देन प्रीत्यात्मिका भक्तिरभिप्रेता। अरिशब्देन प्रकृतिसंबन्धप्रयुक्तकामादयोऽरय एवाभिप्रेताः। ये मानवा एतस्मिन् भक्तिं कुर्वन्ति, ते मुक्ता भवन्तीति भावः। 'विष्णुपक्षानिवासुरा' इत्यनेन दृष्टान्तेनायं साक्षाद्विष्णुरस्ति, यूयं तु देवाद्यंशप्रभवाः, कंसादयस्त्वासुरसंपत्त्याभिजाताः, इत्याद्यभिप्रेतम् ॥ १८ ॥ तस्मादिति ॥ तस्मादेवंभाविगुणत्वात्, हे नन्द, अयं, ते तव, आत्मजः, श्रिया, कीर्त्त्या, अनुभावेन, गुणैरेतदन्यैरपि गुणैः, नारायणसमः नारायणेन तुल्यः, भविता। अतः, एनं त्वं, समाहितः सावधानचित्तः सन्, गोपायस्व सम्यक् पालय ॥ १९ ॥ इतीति ॥ इतीत्थं, आत्मानं प्रति, समादिश्य, गर्गे च, स्वगृहं प्रति गते सति, नन्दः प्रमुदितः सन्, आत्मानम् आशिषामाशीर्भिरित्यर्थः। पूर्णं, मेने ॥ २० ॥

कृष्णप्रिया

नन्दराज जो महाभाग लोग इनको भगवान् समझ कर भक्ति करेंगे उन्हें शत्रु उसी तरह पराजित नहीं करेंगे जिस तरह भगवान् विष्णु के भजनेवालों का असुर पराभव नहीं कर पाते ॥ १८ ॥ यह आप के लालन श्री कीर्ति प्रभाव और गुणों से स्वयं नारायण ही है अतः आप इनका पालन पोषण आदि रक्षा सावधानी से करना ॥ १९ ॥ **श्रीशुकदेवजी ने कहा**—राजन्, श्रीनन्दबाबा को भगवान् कृष्ण के विषय में आदेश दे जब श्रीगर्गाचार्य जी अपने आश्रम को पधार गये, तब अत्यन्त प्रसन्न हुए श्रीनन्दरायजी ने अपने को आशीर्वादों से परिपूर्ण-पूर्णभाग्यशाली समझा ॥ २० ॥

श्रीशुक उवाच[1]

इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते । नन्दः प्रमुदितो मेने आत्मानं पूर्णमाशिषाम् ॥ २१ ॥
कालेन[2] व्रजता तात गोकुले रामकेशवौ । जानुभ्यां सह पाणिभ्यां[3] रिङ्गमाणौ[4] विजह्रतुः ॥ २२ ॥

तावङ्घ्रियुग्ममनुकृष्य सरीसृपन्तौ घोषप्रघोषरुचिरं व्रजकर्दमेषु ।
तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरन्ति मात्रोः ॥ २३ ॥
तन्मातरौ निजसुतौ घृणया[5] स्नुवन्त्यौ पङ्काङ्ग[6]रागरुचिरावुपगुह्य दोर्भ्याम् ।
दत्त्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मिताल्पदशनं ययतुः प्रमोदम् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—आत्मानं समादिश्य च गर्गे स्वगृहं गते प्रमुदितः नन्दः आत्मानम् आशिषां पूर्णं मेने ॥ २१ ॥ तात व्रजता कालेन रामकेशवौ गोकुले जानुभ्यां सह पाणिभ्यां रिङ्गमाणौ विजह्रतुः ॥ २२ ॥ व्रजकर्दमेषु घोषप्रघोषरुचिरम् अङ्घ्रियुग्मम् अनुकृष्य सरीसृपन्तौ तौ तन्नादहृष्टमनसौ लोकम् अनुसृत्य मुग्धप्रमुग्धवत् मात्रोः अन्ति उपेयतुः ॥२३॥ घृणया स्नुवन्त्यौ तन्मातरौ पङ्काङ्गरागरुचिरौ निजसुतौ दोर्भ्याम् उपगृह्य स्तनं दत्त्वा प्रपिबतोः मुग्धस्मिताल्पदशनं मुखं निरीक्ष्य प्रमोदं ययतुः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

बालक्रीडाचमत्कारैः कृष्णो रामेण संयुतः ॥ परमानन्दमाधत्त व्रजे नंदयशोदयोः ॥ १ ॥

पूर्णत्वमेव दर्शयन्नाह । कालेनेति ॥ २१ ॥ अनुकृष्य पुनःपुनराकृष्य । सरीसृपंतावतिशयेन चलंतौ । कथम् । घोषाः कटिपादभूषणकिंकिण्यस्तेषां प्रघोषेण निनादेन रुचिरं यथा तथा तेषां घोषाणां नादेन हृष्टं मनो ययोस्तौ । लोकमितस्ततो गच्छंतं जनमनुसृत्य त्रिचतुराणि पदान्यनुगम्य मुग्धवत्प्रभीतवन्मात्रोरंति समीपे उपेयतुरुपजग्मतुः ॥ २२ ॥ तदा च तन्मातरौ निजसुतौ दोर्भ्यामुपगुह्य प्रमोदं ययतुः । कथंभूते । घृणया कृपया स्नुवंत्यौ पयःपूर्णपयोधरे सत्यौ । पंकेनांगरागेण च रुचिरौ । कथंभूतं मुखं निरीक्ष्य । मुग्धं मंदंस्मितं यस्मिन् अल्पा दशनाश्च यस्मिंस्तच्च तच्च ॥ २३ ॥ यह्यंगनानां दर्शनीया कुमारलीला ययोस्तथाभूतौ जातौ तदांतर्व्रजे व्रजस्य मध्ये तदबला व्रजांगनास्तौ प्रेक्षंत्यः प्रेक्षमाणा विस्मृतगृहकृत्या हसंत्यो जहृषुर्हृष्टा बभूवुः । कथंभूतौ । ताभ्यां प्रगृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणौ ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

चमत्कारैश्चमत्कृतिजनकैः कर्मभिः (१) पूर्णत्वमवतारित्वम् । रिंगमाणौ गच्छंतौ ॥ २१ ॥ तौ कृष्णबलदेवौ । मुग्धवदज्ञवत् । 'मुग्धः सुंदरमूढयोः' इति विश्वः । "आभीरपल्लीकिंकिण्योर्घोषो गोपालशब्दयोः" इति शाश्वतः ॥ २२ ॥ दशना दंताः ॥ २३ ॥ लक्षणया गृहशब्देन गृहकृत्यं बोध्यं तच्च मार्जनपेषणगोदोहनादिरूपम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं तस्य श्रवणकृतं पूर्णत्वमुक्त्वा दर्शनकृतमपि वक्तुमारभते—कालेनेत्यादि । कालेन व्रजतेति शकटभञ्जनान्नामकरणाच्च किञ्चित्काले गते सतीत्यर्थः । तृणावर्त्तवधस्त्वेतदुत्तरकालीन एव एकहायन इत्युक्तत्वात् एकाब्दे हि शिशोः पादव्रज्या दृश्यते बलिष्ठस्य तु तन्मध्येऽपि व्यतिक्रमकथनं तु दुष्टवधाद्भुतलीलात्वसाधारण्येन कचिदावेशेन च गोकुले व्रजमध्ये इति तत्रैव तन्महामधुरलीलया तत्रत्यानां महाभाग्यं बोधयति एवमग्रेऽपि बोध्यम् रामस्तल्लीलया गोकुलरमणात् को ब्रह्मा ईशश्च तावपि वयते लीलामाधुर्येण वशीकरोतीति किम्वा प्रथमरूढप्रशस्तकेशविलासयुत इति, यद्वा—

अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मात् मामाहुर्मुनिसत्तमाः ॥

इति भारतरीत्या ततोपि देदीप्यमानतया विवक्षित इति केशवः तौ इति रिङ्गणलीलया जगन्मनोहरताभिप्रेता केशवस्य पश्चान्निर्देशः अनुजत्वेन हे तातेति कथ्यबाल्यलीलाविशेषस्मरणेन प्रेमवैवश्यात् सलालनं सम्बोधनं यद्वा तातस्य श्रीनन्दस्य गोकुल इति सुखविहारस्वाच्छन्द्यं बोधितम् ॥२१॥ अनुकृष्येति सरीसृपन्तौ कुटिलं गच्छन्ताविति च रिङ्गणलीलायामपि बलिष्ठत्वं

---

१. अन्यत्र "श्रीशुक उवाच" पाठो न दृश्यते । २. व्रजताल्पेन–श्रीधर. वंशी. विज; व्रजता तात–वीर. जीव. । ३. रङ्गमाणौ–वीर. विज.; रममाणौ–च. पु. टी. । ४. विचेरतुः–विज. । ५. स्रवन्त्यौ–विज. । ६. गृह्य–इति कस्यचित् ।

द्योतयति अङ्घ्रियुग्ममित्यादिषु कमलादिरूपकाप्रयोगः स्वस्य तदतिक्रमस्फूर्त्तेः क्वचिच्च तत्प्रयोगस्त्वन्यस्य तद्द्वारापि स्फूर्त्तये इति ज्ञेयं व्रजस्य कर्द्दमेष्विति प्रायो गोमूत्रगोरसादिनिपातेन प्राङ्गणस्य पङ्कमयत्वात् बहुत्वं च स्थानबाहुल्यात् लोकं कञ्चिदागतं मुग्धवत् गृहजनं मत्वैवानुसृत्य पश्चादन्यं ज्ञात्वा प्रभीतवत् मात्रोरन्तिकमुपेयतुः प्रशब्दाद्भीतत्वाधिक्येन बाल्यलीलासौष्ठवं बोधितं वतिप्रत्ययाद्यथान्यो मुग्धादिबालस्तथैव लीलावेशेनेत्यर्थः। अन्यत्तैः यद्वा, घोषो व्रजस्तेन तत्रत्यास्तेषां प्रकृष्टघोषैः अहो रिङ्गणस्य महाश्चर्यत्वमित्याद्युच्चशब्दैरुचिरं यथा स्यात् तस्य घोषस्य तेन वा प्रकृष्टेन नादेन ससमन्यत् ॥ २२ ॥ पङ्को व्रजकर्द्दम एवाङ्गरागस्तेन रुचिरौ रुचिरत्वं च “सुन्दरे किं न सुन्दरम्” इति न्यायेन “सरसिजमनुविद्धं शैवलेनापि रम्यम्” इत्यादिवत् विशेषतस्तु बाल्यलीलायां तदादेरेव शोभनत्वमिति निजौ स्वीयौ सुतौ इति तयोर्द्वौ प्रत्येव स्नेहभर उक्तः निजनिजेत्यनुक्तत्वात् अत एव प्रकर्षेण स्वेच्छया कदाचित् मातृविपर्ययेणापि पिबतोः स्तनं दत्वा तत्तदन्तरामुखं निरीक्ष्य सम्यगवलोक्य च अत एव प्रकृष्टं नेमं विरिञ्चो नायं सुखाप इत्यादिवक्ष्यमाणानुसारेण तत्तदानन्दतोऽप्यधिकतममोदं प्राप्तवत्यौ स्म हर्षविस्मये वा मुखमित्येकत्वं स्वस्वबाल्यमुखापेक्षया अन्यत्तैः यद्वा मुग्धं सुन्दरं स्मितं यत्र प्रमाणतः सङ्ख्यातश्चाल्पा दशना यत्र तच्च तच्च ॥ २३ ॥ अथ किञ्चिद्वयोऽतिरेकेण बलवृद्धिप्राकट्यादितस्ततोऽखिलव्रजमध्ये विहरद्भ्यां सर्वासामपि व्रजस्त्रीणामत्यानन्दो जनित इत्याह—यर्हीति। अङ्गनादर्शनीयेत्यादिकं तत्कौतुके तासामेव प्राधान्यात् वत्सैस्तर्णकैः बहुत्वम् एकवत्सपरित्यागेन मुहुर्वत्सान्तरग्रहणात् एकदैव त्रिचतुःपुच्छग्रहणाद्वा प्रशब्देन कदाचिदपि पुच्छत्यागो निरस्तः अत एव स्थानेस्थाने अनुकृष्यमाणौ अत एव प्रकर्षेणेक्षमाणाः अत एव मुक्तं गृहं तत्र यत्कृत्यं किंवा प्रेक्षणार्थं तत्र तत्र सर्वव्रजे परिभ्रमणेन गृहमेव याभिस्ताः हसन्त्यः अद्भुतत्वात् किंवा अहो बलिष्ठतराविति तौ परिहसन्त्यः तर्णकैरप्याकृष्यमाणत्वात् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

कालेन व्रजतेति, शकटभञ्जनान्नामकरणाच्च, किञ्चित्’ काले गते सतीत्यर्थः। गोकुले व्रजमध्ये इति बहिर्वनादिकं व्यवच्छिन्नम्, यदा तत्रैव तन्महामधुरलीलया तत्रत्यानां महाभाग्यं बोधयति। एवमग्रेऽपि बोद्धव्यम्। रामस्तल्लीलया गोकुलरमणात्। को ब्रह्मा ईशश्च तौ वयते ऐश्वर्य्येण व्याप्नोतीति केशवः परमेश्वरस्तौ इति रिंगण—लीलयाजगन्मनोहरताभिप्रेता, केशवस्य पश्चान्निर्देशोऽनुजत्वेन। हे तातेति कथ्य—बाल्यलीला—विशेष—स्मरणेन प्रेमवैवश्यात् सलालनं सम्बोधनम्। यद्वा, तातस्य श्रीनन्दस्य गोकुल इति सुखविहार—स्वाच्छन्द्यं बोधितम्। एवं द्वयोरप्येकदैव रिंगणलीलया समवयस्कतैव दर्शिता, किञ्चिन्न्युनाधिकत्वेऽपि श्रीकृष्णस्य महाबलिष्ठतयाग्रजेनापि सह युगपद्रिंगणं घटेतैवेति दिक् ॥ २१ ॥ अनुकृष्येति सरीसृपन्तौ कुटिलं गच्छन्ताविति च रिंगणलीलायामपि बलिष्ठत्वं द्योतयति। अङ्घ्रियुग्ममित्यत्राब्जादि—रूपकाप्रयोगस्तद्बाल्यलीला—माधुर्य्येणैव मनस्तृप्तया तदीयतारुण्यादिगुणविशेषानपेक्षणात्। व्रजस्य कर्द्दमेष्विति प्रायो गोमूत्र—गोरसादि—निपातेन प्रांगणस्य पंकमयत्वात्, बहुत्वञ्च बाल्यात् साकल्याद्वा लोकं कञ्चिद् गृहजनं मत्वैवानुसृत्य पश्चादन्यं ज्ञात्वा मात्रोरन्तिकमुपेयतुः। कथम्? मुग्धवदत एव प्रभीतवच्च, तत्र मुग्धवदनुसृत्य प्रभीतवदुपेयतुरिति विवेचनीयम्, प्र—शब्दाद्भीतत्वाधिक्येन बाल्यलीला—सौष्ठवं बोधितम्। अन्यत्तैर्व्याख्यातम्, यद्वा, घोषो व्रजस्तेन तत्रत्यास्तेषां प्रकृष्टैर्घोषैः। अहो! रंगणस्य महाश्चर्य्यमित्याद्युच्चशब्दै रुचिरं यथा स्यात्, तस्य घोषस्य तेन वा प्रकृष्टेन नादेन। सममन्यत् ॥ २२ ॥ पंको व्रजकर्द्दम एवांगरागस्तेन रुचिरौ व्रजकर्द्दमेषु रिंगणैरन्यां रागस्याच्छन्नत्वान्निजौ स्वीयौ सुताविति तयोर्द्वौ प्रत्येव स्नेहभर उक्तः, अतएव प्रकर्षेण पिबतोरत एव प्रकृष्टं ब्रह्मानन्दादप्युत्कृष्टं मोदं प्राप्तवत्यौ। स्म हर्षे; निरीक्ष्यासक्त्या सम्यगवलोक्य, मुखमिति द्वित्वेऽप्येकत्वं जात्यपेक्षया बहुष्वप्येकत्ववत्। अत एव (भा० १०।१०।३८)—‘वाणी गुणानुकथने’ इत्यादौ ‘नः श्रवणौ हस्तौ शिवश्च’ इति, तथा (भा० १०।२९।३४)—‘चित्तं सुखेन’ इत्यादौ ‘करौ पादौ च’ इति, तथा (भा०१०।३१।५)—विरचिताभयम्’ इत्यादौ शिरसि धेहि नः इत्यादि च। अन्यत्तैर्व्याख्यातम्। यद्वा घृणया स्नेहेन मुग्धं सुन्दरमल्पदशनं पञ्चषड्दन्तम् ॥ २३ ॥ अत्यन्तबाल्ये प्रायो मात्रोरेव पार्श्ववर्त्तित्वात्तयोरानन्दभरोऽकारि, पश्चात् किञ्चिद्वयोऽतिरेकेण बल—बुद्धिप्राकट्यादितस्ततोऽखिलव्रजमध्ये वत्साकर्षणलीलया सर्व्वासामपि व्रजस्त्रीणामत्यानन्दो जनित इत्याह—यर्हीति। वत्सैरिति बहुत्वमेक—वत्स—परित्यागेन मुहुर्वत्सा तर—ग्रहणादेकदैव बहुलवत्सपुच्छग्रहणाद्वा, प्र—शब्देन कदाचिदपि पुच्छत्यागो निरस्तः अतएव स्थाने स्थाने अनुकृष्यमाणौ अतएव प्रकर्षेणेक्ष्यमाणाः अतएव त्यक्तं गृहं तत्रत्यकृत्यम् किंवा प्रेक्षणार्थं तत्र तत्र सर्वव्रजे परिभ्रमणेन गृहमेव याभिस्ता हसन्त्योऽद्भुतत्वात् किंवा अहो! बलिष्ठतराविति तौ परिहसन्त्यो वत्सैराकृष्यमाणत्वात् ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

रिङ्गमाणौ चङ्क्रमणं कुर्वन्तौ ॥ २१ ॥ सरीसृपन्तौ घोषप्रघोषरुचिरं घोषस्य प्रघोषेण घोषस्य श्लाघाध्वनिना रुचिरं यथा भवति तथा व्रजकर्द्दमेषु सरीसृपन्तौ इति क्रियाविशेषणं तस्मादहृष्टमनसौ घोषस्य श्लाघाध्वनिहृष्टमनसौ मात्रोरन्ति यशोदारोहिण्योरन्तिकम् ॥२२–२३॥ यर्हि यदा तत्तदा प्रेक्षन्त्यः प्रेक्षमाणाः उज्झितगृहा उन्मर्दितगृहाः जहृषुर्हृष्टा अभवन् ॥२४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ भगवतः काश्चित् बालक्रीडा अनुवर्णयन् विश्वरूपप्रदर्शनादिकमाह—कालेनेति । गच्छताऽतिक्रममाणेन कियता कालेन व्रजे रामकेशवौ सह जानुभ्यां पाणिभ्यां चेत्यर्थः । रिङ्गमाणौ चङ्क्रमणं कुर्वन्तौ सरीसृपन्ताविति यावद्विजह्रतुः क्रीडां चक्रतुः ॥ २१ ॥ विहारमेव वर्णयति—ताविति । तौ रामकेशवौ घोषप्रघोषरुचिरं घोषाः पादभूषणकिङ्किण्यः तेषां घोषेण व्रजगतश्लाघ्यध्वनिना वा रुचिरं यथा तथा व्रजकर्दमेष्वङ्घ्रियुगमनुकृष्य पुरः प्रसारितजान्वनुगतं यथा तथा पश्चाद्गतजानु समाकृष्येत्यर्थः । सरीसृपन्तौ पुनः पुनरतिशयेन वा चरन्तौ तेषां घोषाणां नादेन तस्य घोषस्य व्रजस्य नादेन वा हृष्टं मनो ययोस्तौ लोकमितस्ततः पर्यटन्तं जनमनुसृत्य त्रिचतुराणि पदान्यनुगम्य मुग्धवत्प्रभीतवच्च मात्रोः रोहिणीयशोदयोरन्ति समीपमुपेयतुरुपजग्मतुः ॥ २२ ॥ तदा तयोः रामकेशवयोर्मातरौ घृणया करुणया स्नुवन्त्यौ पयःपूर्णस्तनाभ्यां पयः स्रवन्त्यौ पङ्करूपेणाङ्गरागेण रुचिरौ सुतौ बाहुभ्याम् उपगुह्य उरसि संवेष्ट्य स्तनं दत्त्वा मुखं निधाय प्रपिबतोः सुतयोः मुग्धं सुन्दरं स्मितमल्पा दशनाः सूक्ष्माः दन्ताश्च यस्मिंस्तन्मुखमवलोक्य प्रमोदं प्रापतुः ॥ २३ ॥ यर्हि यदाऽङ्गनानां दर्शनीयाः कुमारलीला ययोस्तौ तथाभूतौ अन्तर्व्रजे व्रजमध्ये व्रजस्था अबलाः प्रेक्षमाणाः विस्मृतगृहकृत्याः हसन्त्यो जहृषुः कथम्भूतौ ताभ्यां प्रगृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणौ जगृहुरिति पाठे ता गृहीतवत्य इत्यर्थः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

व्रजता गच्छता रङ्गमाणौ चेष्टमानौ वा ॥ २१ ॥ सरीसृपन्तौ पुनःपुनः भृशं गच्छन्तौ सर्पन्तौ घोषाणां किङ्किणीनां प्रघोषेण प्रकृष्टेन शब्देन रुचिरः घोषप्रघोषरुचिरः स चासौ व्रजः तस्य कर्दमेषु "आभीरपल्लीकिङ्किण्योर्घोषो गोपालशब्दयोः" इति वचनात् तन्नादेन किङ्किणीस्वरेण हृष्टमनसौ मुग्धप्रभीतवत् लोकं बहिर्जनमनुसृत्य विडम्ब्य मात्रोः यशोदारोहिण्योः अन्ति अन्तिके समीपे उपेयतुः प्राप्तवन्तौ ॥ २२ ॥ घृणया दयया स्तन्यं स्रवन्त्यौ अङ्गरागश्चन्दनं मुग्धं कोमलं स्मितं मन्दहासश्च अल्पदशना अणुतरा दन्ता यस्य तत् मुग्धस्मितं बाल्यदशनाश्चास्मिन्निति वा ॥ २३ ॥ अतिरमणीयाः कुमारलीलाः बालक्रीडाः ययोस्तौ तथा तौ यर्हि यदा अन्तर्व्रजे व्रजमध्ये आगता आगतौ द्वासुपर्णावेतिवत् तदबलाः व्रजयोषितः तदा प्रेक्ष्यन्त्य उत्स्मृतगृहाः विस्मृतगृहव्यापाराः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कालेनेति प्राचीनलीलेयं नामकरणस्य शततमपर्यन्ताहे निर्णयात् तृणावर्त्तवधस्य वार्षिकत्वात् अस्य वर्षाभ्यन्तरे च सम्भवात् ॥ २१-२२ ॥ प्रसङ्गेनावेशेन च व्यतिक्रमः सम्भाव्यः प्रपिबतोः स्तनं दत्त्वा तत्तदन्तरामुखं निरीक्ष्य च ॥ २३-२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कालेन व्रजतेति—

ऐश्वर्यमिश्रां कृष्णस्य प्रोच्य बालस्य माधुरीम् । केवलामेव तां प्राह नित्यभाव्यामुपासकैः ॥ इति ॥ २१ ॥

अङ्घ्रियुग्ममनुकृष्येति जानुभ्यां सस्खलनेन अङ्घ्र्योराकर्षणात् सरीसृपन्तौ कुटिलं गच्छन्तौ व्रजकर्दमेषु गोरस-गोवत्समूत्रादिकर्दमितव्रजाङ्गणेषु घोषाणां गोपगोपीनां प्रघोषः हो हो हो इति मुखकरतालिकोद्घोषः तेन रुचिरं यथा स्यात्तथा यतस्तन्नादेत्यादिघोषाः किङ्किण्य इति स्वामिचरणाः । लोकं व्रजपुरन्ध्रीजनं कञ्चिदागतं मुग्धवत् मातरं मत्वैवानुसृत्य पश्चादन्यं ज्ञात्वा मात्रोरन्तिकमुपेयतुः वतिप्रत्ययाद्यथान्यो मुग्धादिबालस्तथैव लीलावेशेनेत्यर्थः ॥ २२ ॥ तदा च तयोर्मातरौ निजसुतौ दोर्भ्यामुपगुह्य प्रमोदं ययतुः निजनिजेत्यनुक्तत्वात् तौ द्वावपि प्रति तयोर्द्वयोः सुतबुद्धिः ते द्वे प्रत्येव तयोरपि मातृबुद्धिर्बुद्ध्यते घृणया वात्सल्योत्थकृपया स्नुवन्त्यौ दुग्धस्राविस्तने सत्यौ "सुन्दरे किं न सुन्दरम्" इति न्यायेन पङ्क एवाङ्गरागतुल्यस्तेनापि रुचिरौ मुखमित्येकत्वं स्वस्वबाल्यमुखापेक्षया मुग्धं मनोहरं स्मितं यत्र प्रमाणतः सङ्ख्यातश्चाल्पा दशना यत्र तच्च तच्च ॥ २३ ॥ यर्हि किञ्चिद्बलाधिक्यप्रकटने सति अङ्गनानाम् आ सम्यक्प्रकारेण दर्शनीया अतिचित्ताकर्षिणी कुमारसम्बन्धिनी लीला ययोस्तथाभूतावभूतां तत् तदा अबलास्तौ प्रेक्षन्त्यः प्रेक्षमाणा जहृषुः, कीदृशौ ? ताभ्यां गृहीतपुच्छैर्वत्सैरितस्ततश्च आकृष्यमाणाविति शयानानां वत्सानां पुच्छान् जानुचङ्क्रमणेन प्राप्य किमिदमिति साश्चर्यं मौग्ध्येन यदा करतलेन मुष्टीकृत्य गृहीतस्तदा वत्सैरुत्थाय पलाय्यते ततश्च मौग्ध्येन मुष्टिमत्यजन्तौ प्रत्युत भयेन दृढतरीकुर्वन्तौ भूतले घृष्यमाणौ रुदन्तौ विलोक्य ह्यस्तनाद्वत्सादपि दुर्बलौ युवामिति हसन्त्यो यत्नेन पुच्छं त्याजयामासुरिति ज्ञेयम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तौ योगिध्येयपादपद्मौ रामकेशवौ व्रजकर्दमेषु अङ्घ्रियुग्ममनुकृष्य पुनः पुनराकृष्य सरीसृपन्तौ सवेगं धावमानौ कथमित्याकाङ्क्षायामाह—घोषप्रघोषरुचिरमिति । घोषाः कटिकरचरणभूषणकिङ्किण्यस्तदीयेन प्रकृष्टघोषेण नादेन रुचिरं

यथा तथा तन्नादेन किङ्किणीशब्देन तस्य लोकस्य वा नादेन हे राम ! हे केशव ! इत्येवं सन्मुखीकरणार्थं प्रयुक्तेन हृष्टमनसौ लोकं जनं किञ्चिदवलोकनादिना मुग्धवदनुसृत्य भीतवत् मात्रोरन्तिरुपेयतुरुपजग्मुरित्यर्थः ॥ २२ ॥ तदा तयोर्मातरौ घृणया करुणया स्नुवन्त्यौ पयः स्रवन्त्यौ पङ्केनाङ्गरागेण रुचिरौ शोभमानौ निजसुतौ दोर्भ्यां बाहुभ्यामुपगुह्य स्तनं दत्त्वा प्रपिबतोः मुग्धं मन्दं स्मितं यस्मिन् अल्पाः कुन्दकुड्मलवद्दशनाश्च यस्मिन् तच्च तच्च तन्मुखं निरीक्ष्य प्रकृष्टं मोदं ययतुः प्रापतुः ॥ २३ ॥ मात्रोः स्वबालसंसर्गजं परमानन्दमुक्त्वा गोपाङ्गनानां तत् संसर्गजं परमानन्दमाह—यर्हीति । यर्हि यदा अन्तर्व्रजे व्रजमध्ये उभौ रामकेशवौ बालकत्वाद्वर्तेते तदा अङ्गनादर्शनीयकुमारलीलौ भवतः । तत्र बहुधा तासामेव सञ्चारात् अतस्तदबलाः अन्तर्व्रजाबलाः रामकेशवाभ्यां प्रगृहीतपुच्छैः वत्सैरितस्ततोऽनुकृष्यमाणौ प्रेक्ष्यन्त्य अत्यानन्दवशाद्धसन्त्यश्च अत्यानन्दसम्प्लवनिमग्नत्वादुज्झितगृहाः जहृषुः हृष्टा बभूवुः अहो भाग्यमन्तर्व्रजचरीणां तत्रत्यवत्सानां चेति भावः ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एवमैश्वर्यगर्भां बाल्यलीलामभिधाय मुकुरवद्विशुद्धां तामाह कालेनेत्यादिभिः ॥ २१ ॥ तौ व्रजकर्दमेषु गोरसगोमूत्रादिकर्दमितव्रजचत्वरेषु सरीसृपन्तौ कुटिलङ्गच्छन्ताविति सबलत्वं सूच्यते अङ्घ्रियुग्ममनुकृष्येति जानुभ्याञ्चलनेनाङ्घ्र्योराकर्षणात् कथं घोषाः पादादिविभूषणानि तेषां प्रघोषेण झणत्कारध्वनिना रुचिरं योगीन्द्राणां मनोहरं यथा स्यात्तथा तन्नादेन हृष्टं मनो ययोस्तौ लोकं कञ्चिदागतं गृहजनं मत्वा तमनुसृत्य पश्चादन्यं ज्ञात्वा मुग्धेन प्रभीतेन च तुल्यौ मात्रोरन्ति समीपमुपयेयतुः भयसम्भ्रान्तप्रेक्षणाक्षमितिवक्ष्यते इदं मौग्ध्यादिकं हरेर्न कृत्रिमं तथात्वे लीलारसापरिपोषात् मन्त्रेषु मां वा उपहूपयत्वमित्यादौ तन्मौग्ध्येनोद्धवस्य गोप्याददे त्वयि कृतागसीत्यादौ तद्भयेन कुन्त्याश्च तत्त्वविदो मोहानुपपत्तेः किन्तु विज्ञानमूर्त्तेर्न रचिकुराद्यङ्गत्ववद्वैलक्षण्येन विभातः स्वरूपानतिरेकी तद्धर्म एव तत्परिपोषी मन्तव्यः ॥ २२ ॥ तदा तयोर्मातरौ तौ निजसुतौ दोर्भ्यामुपगुह्य प्रमोदं ययतुः कीदृशौ घृणया वात्सल्यो या कृपया स्नुवन्त्यौ दुग्धस्राविस्तने सत्यौ तौ च कीदृशौ पङ्करोगाभ्यां रुचिरौ सुन्दरे किमसुन्दरमिति न्यायात् मुखमित्येकवचनं स्वस्वलाल्यमुखापेक्षं मुग्धं रम्यं स्मितं यत्र प्रमाणेन संख्यया चाल्पादशनायत्र तच्च तच्च तत् ॥ २३ ॥ यर्हि यदा किञ्चिद्बलाधिक्याविर्भावे सति अङ्गनानां दर्शनीया चित्तहारिणी कुमारलीला ययोस्तादृशावभूतां तत्तदान्तर्व्रजे व्रजमध्येऽबलास्ता अङ्गनास्तौ प्रेक्ष्यन्त उज्झितगृहा हसन्त्यो जहृषुः तौ कीदृशौ प्रेक्षमाणा इत्याह ताभ्यां गृहीतपुच्छैर्वत्सैरितस्ततोऽनुकृष्यमाणाविति यदा जानुरिङ्गेनैव शायितानां वत्सानां सन्निधिमासाद्य छित्रांस्तत्पुच्छान् किमिदमिति प्रग्रहीतस्तदो धावद्भिस्तैस्तत् पुच्छात्यागाद्भुवि घृष्यमाणोदरौ रुदन्तौ च प्रेक्ष्याहो महाबलौ युवान्तर्णकैरप्याकृष्यमाणाविति परिहसन्त्योऽति यत्नेन ताः पुच्छान् परित्यज्य वक्षसि तौ निधाय मुमुदिरे ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

व्रजतैवं गच्छताऽल्पेन कालेन रामकेशवौ जानुभ्यां पाणिभ्यां सहेति यथायथमन्वयि रङ्गमाणौ गच्छन्तौ विचेरतुः । रिङ्गमाणौ रङ्गमाणौ रिङ्खमाणावित्यपि पठन्ति । अर्थः सर्वत्र समः ॥ २१ ॥ तौ रामकृष्णावङ्घ्रियुग्मं पादद्वन्द्वमनुकृष्य सरीसृपन्तावतिशयेन पुनः पुनः प्रसर्पन्तौ घोषाणां किङ्किणीनां प्रघोषः शब्दविशेषस्तेन रुचिरो यो व्रजस्तस्य कर्दमाः पङ्कास्तेषु तेषां नादस्तेन हृष्टं तुष्टं मनो ययोस्तौ लोकं जनमनुसृत्य मुग्धौ मनोहरौ मूर्खौ वा प्रभीतावतिभीतौ ताविव प्रभीतवत्ताविव मात्रो रोहिणीयशोदयोरन्ति अन्तिकमुपेयुः । आभीरपल्लीकिङ्किण्योर्घोषो गोपालशब्दयोरिति वचनात् ॥ २२ ॥ तन्मातरौ रोहिणीयशोदा घृणया स्रवन्त्यौ करुणात्मकस्रवणीयरसोपेते श्रोतत्करुणारससमेते इति यावत् । पङ्क एवाङ्गरागो मलयजस्तेन रुचिरौ मनोहरौ निजसुतौ स्वतनयौ । एकैकस्य विवक्षया दोर्भ्यामित्युक्तिः प्रायकद्विभुजस्वाभिप्रायेण वा । स्तनौ दधानाः परिवम्रुरङ्गना इत्यादिवत् । उपगुह्यालिङ्ग्य स्तनं दत्वा तदपि शब्दपूर्वकं चेद्धीतौ तौ जायेतामित्यतः कुचमित्यवचनाद्दत्वा स्तनमित्येकसरण्योदाहरणादस्तनमशब्दं यथा भवति तथेत्यपि योजना ज्ञेयेत्यसूचयदिति ज्ञेयम् । प्रपिबतोः मुग्धस्मितं मनोहरेषद्धसितं यस्य तच्चाल्पा दशनाऽङ्कुरणोपेता इत्यणवो दशना यस्य तच्च तन्मुखं निरीक्ष्य स्म पूर्वकृतं स्मरन्त्यौ च । स्म पादपूरणेऽतीते स्मरणे चेति यादवः । प्रमोदं ययतुः । उपगृह्येति सङ्ग्राह्यः पाठः । उपगुह्येति पाठे पङ्कसङ्कलितकलेवरोपगूहने केवलप्रेमपारवश्यं द्योत्यत इत्यर्थविशेषलाभो ज्ञेयः ॥ २३ ॥ यर्हि यदाऽऽगताः सद्यः प्राप्ता अतिरमणीयाः कुमारलीला बालक्रीडा ययोस्तौ । आगतानां जनानामतिरमणीयाः कुमारलीला ययोरिति वा । व्रजे गोष्ठे तदबला व्रजयोषितः प्रगृहीतं पुच्छं येषां तैर्वत्सैर्गोवत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षन्त्यः प्रेक्षमाणा उत्स्मृतमुद्गतस्मरणं गृहं यासां ता विस्मृतस्वगृहाः सत्यः अन्तर्हसन्त्यश्च जगृहुर्गृहीतवत्यः । कुललनानामन्तर्हासः परमधर्म इति तथा चक्रुः ॥ २४ ॥

श्रीसुबोधिनी

एतावदुक्त्वा गते यज्जातं तदाहेतीति, **आत्मानं** नन्दं भगवन्तं वा सम्यगाविश्योपदिश्य, **गर्गं स्वगृहं** मथुरां **गते** नन्दस्तद्वाक्यात् **प्रमुदितः** तन्नाशिषामाशीर्भिः **पूर्णमात्मानं मेन** इति सम्बन्धः, स्वस्यायोग्यत्वेन महतो ज्ञानान्न भीतो जातो

नाप्ययं पुत्रो न भवतीति ज्ञात्वा दुःखितो जातो येनकेनापि प्रकारेण प्राप्तत्वाद् गर्गोक्तं प्रमाणमिति ज्ञापयितुं **कृष्णो** भगवा**नात्मेति नन्दश्च** कृतार्थ इतित्रयं ज्ञापयितु**मात्मपदं, सम्यगुपदेशो** नास्मिन् शङ्का कर्तव्या नाप्यन्यस्माद् भयं सम्यग् रक्षणीयश्चेत्या**देश** आज्ञा, अन्यथा **गर्गो**पि क्रुध्येदिति, एतावदुपदेशं कृत्वा नामकरणं **च गर्गे** गच्छति यदि कंसो मध्ये व्यसनं कुर्यात् तदापि चित्तस्वास्थ्यं न भवतीति **गर्गे स्वगृहं गत** इत्युक्तं, चकाराद् बालकयोः **स्वस्मिन्नप्यन्येषु** वा तत्र स्थितेष्वत्यन्तरङ्गेषु **स्वगृहं** गतेषु **गोकुले**पि गर्गकर्मणोः प्राकट्याभावार्थं, तदा **नन्दः** सार्थकनामा भविष्यामीति **प्रकर्षेण मुदितः** प्राप्तमहानिधिः, **आशिषां** सर्वकामितपदार्थानामन्येषां च पूरणार्थं **पूर्ण**परमातिशयकाष्ठां प्राप्तं **मेने**, स्वमनस्येव तथा ज्ञातवान् ॥ २१ ॥ एवं नामचरित्रमुपपाद्य रूपचरित्रं वक्तुं भगवद्गतिः कालरूपेति तस्मिन्नेवाधिदैविके गच्छति सति भगवद्गतिरित्याह **कालेनेति**दशभिः, दशधा भगवद्रूपमत्र वक्ष्यतेवान्तरानन्तभेदयुक्तं,

गतौ गतिविशेषे च भूमौ रूपद्वयं हरेः । यशोदायां तथा रूपमुपविष्टं त्रिधा मतम् ॥ १ ॥
अन्याश्रितं स्वतश्चैव कथञ्चित् सर्वथा तथा । उत्थितं तु त्रिधा रूपं युक्तं त्रिविधलीलया ॥ २ ॥
बालकैर्मुग्धलीलाया धाष्ट्र्यधौर्त्यसमन्विते । निर्गुणावस्थरूपे च ज्ञापिते तु ततः परम् ॥ ३ ॥
सात्त्विकादिविभेदेन तत्तद्धृदयगामिनि । तांस्तांस्तु क्रमशो भावान् दूरीकृत्यान्तिमे स्थिरा ॥ ४ ॥
यशोदार्थमियं लीला प्रसङ्गादन्यगामिनी । यदैव ता गृहे व्यग्रास्तदैवं दशधा हरिः ॥ ५ ॥

तत्रादावुपविष्टस्य हरेरल्पचलनात्मिकां गतिलीलामाह **कालेनेति**, स्वतो व्रजता **कालेन** कृत्वाल्पेनैव **गोकुले** तत्रापि यशोदाया अङ्गणे **रामकेशवा**वुभावपि नामकरणेन भगवदावेशाद् भगवन्तौ योगिध्येयौ ब्रह्मादिवन्द्यश्च **रामकेशवौ**, मत्वर्थीयो वप्रत्ययश्चात्र सौन्दर्यार्थं परिगृह्यते, वस्तुतस्तु लौकिक एव **केशव**शब्दस्तद्धितान्तः, न तु भगवद्वाचकः, **केशयोर्वं** सुखं यस्मादित्यर्थे प्रत्ययापेक्षाभावात्, उभयोर्न्यूनाधिकभावेपि वयसि स्थितयोः समानो गतिः, भगवत्सन्निधाने नामद्वारा सम्बन्धानन्तरमेव भगवत्त्वमत उभौ **जानुभ्यां सहपाणिभ्यां रिङ्गमाणौ** जातौ शनैस्तदा योग्यं **विजह्रतुर्**विहारं कृतवन्तौ क्रीडां कृतवन्तावित्यर्थः ।

जानुभ्यां गमनं विष्णोर्दैत्यानां मर्दनाय हि । बलिर्दैत्यपतिर्भूत्वा न निवारयति स्वतः ॥ १ ॥

उपविष्टयोर्नम्रीभूतयोर्गमनं पादाधीनमेवेति **जानुभ्यामेव गमनमुच्यते, पाण्योस्तु सहभावः**, तत्र प्रतिष्ठाभावात्, सम्पूर्णेनापि शरीरेण **रिङ्गमाणा**विति **जानुभ्यां सह रिङ्गमाणा**विति **सहपदप्रयोगः**, अनेन मध्येल्पचलनेपि भूमौ शयानावेव भवतः पुनरुत्थाने च तथा, एवं रूपाणि भगवतः सहस्राणि ध्येयानि हसद्रूपाणि क्षणमुपविष्टानि क्षणं प्रचलितानि च ॥ २२ ॥ इयं प्रथमगतिरुत्तरश्लोकोक्तगतिपर्यन्तमनुसन्धेयोत्तरोत्तरपुष्टा, उत्तरस्यादिना पूर्वावसानस्य न्यायसिद्धत्वात्, द्वितीयमाह **तावङ्घ्रीति**, गतिविलासा अत्र निरूप्यन्ते, प्रथमतोलसवलितगतिः, **तावु**भावपि, एको भगवानिति न **वैलक्षण्यं, जानुभ्यामेव** गच्छन्तौ मध्येमध्ये जानुपीडामिव भावयन्तौ, **अङ्घ्रियुग्ममनुकृष्य** पादाग्रमधोमुखं कृत्वा जानुपर्यन्तं भूमिष्ठं विधाय शनैराकृष्य पश्चाच्छीघ्रं **सरीसृपन्तौ** द्रुतं गच्छन्तौ भवतः, तथा गमने हेतुमाह **घोषप्रघोषरुचिर**मिति, **घोषः** शब्दः प्रकृष्टो **घोष**स्ताभ्यां **रुचिरं** यथा भवति तथा प्रथमं गच्छन्तौ नूपुरक्षुद्रघण्टिकादीनां वादनमाकर्णयन्ताविव शब्दे दत्तकर्णौ शब्दगति विचारयन्ताव**ङ्घ्रियुग्ममनुकृष्य** शनैश्चलितौ, स शब्दः किं स्वाभरणादेव जायतेन्यस्मादिति वेति विचारयितुं गतेः शैघ्र्यं कुरुतः, तदा **प्रघोषो** भवति, तस्यापि विचारार्थं पुनः स्थितौ भवतः, तदा **प्रघोषेण रुचिरं** यथा भवति तथा **सरीसृपन्तौ** भवतः, पुनरेवं **घोषप्रघोषाभ्यां** बहुधा गतितरतमभावं प्राप्तौ **व्रजकर्दमेषु** गतौ भूमिदेहसम्बन्धकृतशब्दवैलक्षण्यग्रहणाय, तत्रापि चेच्छब्द आभरणानामेव नान्यस्येति **तन्नादहृष्टमनसा** जातौ, अस्मद्गत्या तदनुगामी शब्दोपि रुचिरो भवतीत्येवं बहुधावृत्तिर्मनःपरितोषार्था, अनेन भगवान् चरित्रं कृत्वा तत्प्रतिपादकं च वाक्यं विधायोभयोर्योग्यतायां सन्माननं वक्तुः श्रोतुश्च करोतीति लक्ष्यते, एवं तयोरेव परस्परं गतिलीलामुक्त्वान्यानुरोधेनापि गतिलीलामाहा**नुसृत्य लोक**मिति, **यं** कञ्चित् स्त्रियं पुरुषं वा गच्छन्तमनुगच्छन्तौ गन्तव्यमेवेति कथमन्यथायं गच्छेदिति कियद्दूरं गमनानन्तरं तस्मिन् परिवृत्य दृष्टं दूरं गते वा **मुग्धप्रभीतवत् स्वमातुरन्ति** समीप **उपेयतु**रितिसम्बन्धः, गमने ज्ञानद्वयं, अस्मदीयाः केचन गच्छन्तीत्यतोस्माभिरपि गन्तव्यं गन्तव्यमेव वा, तथा सत्येकाकिना न गन्तव्यमिति तस्मिन् दूरं गते पश्चात् पुरस्ताच्चासहायमात्मानं मत्वा भीतौ भवतः, व्याघुट्य प्रदर्शने तु नायं मदीय इति मुख एव परिचयात् धर्मान्तरे तथा बुद्ध्यभावात् **मुग्धवत्** परावृत्तिर्भवति, **मुग्धश्चासौ प्रभीतश्चेति, प्रकर्ष**भये मुग्धभावोपि हेतुः, अन्यथा भये कारणाभावात् "तस्मादेकाकी बिभेती"ति भयमात्रकरणत्वेपि **प्रकर्ष**भये नान्यो हेतुः, गमनागमनलीला शीघ्रं सिद्धैव तथापि मुग्धभीतभावौ गमनागमनयोः क्रमेण सौन्दर्यसूचकौ, उभयत्र वा, तथैकाकिना नात्र स्थातव्यमिति गमनं, बालकयोः परिचयो मातर्येवावशिष्ट इति बदिति, ज्ञात्वापि तथानुकरणेन पुनर्गमनागमने, तत्र हास्यादिना बहवः प्रकारा भावुकानां मनोहरा भवन्ति, **लोक**मित्यालोकवन्तमुज्ज्वलवस्त्रादियुक्तं, **मात्रोरन्ती**त्यनेनैव सामीप्ये सिद्धे पुन**रुपे**तिग्रहणं कदाचिदागत्योपर्येव पततः कदाचिन्मध्ये कदाचिद्दूरविप्रकर्षेणेतिप्रकार-

भेदज्ञापकम् ॥ २३ ॥ एवं नानाविधगमनागमनाभ्यामुपविष्टलीला स्वतन्त्रतया बहुधा वर्णिता, मात्रा सह नानाविधक्रियाभिः सहितस्योपविष्टस्य लीलामाह **तन्मातराविति**, यशोदारोहिण्यौ **निजसुतौ** स्वं स्वं सुतं **घृणयौत्कण्ठ्यस्नेहेन स्नुवन्त्यौ पङ्क एव** योयमङ्गरागस्तेन **रुचिरौ दोर्भ्यामुपगृह्यालिङ्ग्य स्तनं दत्वा पिबतोश्च मुखं** निरीक्ष्य **प्रकर्षेण मोदं** ययुरितिसम्बन्धः, नृत्यन्ताविव समागच्छन्तौ धृत्वा वा नृत्यं कुर्वन्तौ मातृप्रेरणया वान्यप्रार्थनया वा नृत्यन्तं पश्यन्तौ वा, स्तोत्रे पञ्चधा नृत्यं हेतुः, लीलाभावाश्चासङ्ख्याताः, रोषभावाश्च त्रिविधाः स्तोत्रविषयाः, तत्र स्तोत्रं द्वेधा सम्भवति परमार्थतो लोकतश्च, लोकतो **घृणा, घृणयास्नुवन्त्याविति**पदच्छेदे परमार्थतः स्तोत्रं, **घृणयोपलक्षिते वा मातरौ**, भगवद्व्यतिरिक्ते सर्वत्र घृणा सञ्जातेति, 'सघृण' इत्यादौ 'घृणा' स्नेहदयाप्युच्यते, भगवत्कर्तृकोपगूहनदशा भिन्ना ताभ्यामुपगूढयोरन्या, अत्रापि बहवो भेदाः सम्भवन्ति, स्तनपानदशा तु स्वतन्त्रा, आलिङ्गितयोर्वा भयाभावात् स्तनपानं, **निरीक्षण**लीलापि बहुविधा, सर्वत्र **प्रमोदः** फलमुभयोर्मातृत्वमन्यथा शङ्कितं भविष्यतीति बुद्धिदार्ढ्यार्थं निरूपितं, भगवतोपि मातरि वैलक्षण्यभावाजननार्थं **निजसुता**वित्युक्तं, भगवत्सम्बन्धेपि सर्वपुरुषार्थानां भगवद्रूपेण भिन्नतया वा ज्ञानाभावाय **घृणा** निरूपिता, भौमाः सर्व एवावयवास्सुगन्धा भवन्ति, विजातीयैश्चोपहता अन्यथा भवन्त्यलौकिकं तेजश्चेद् भवति तदोत्तमता भवति, तत उच्यन्ते कस्तूरीकुङ्कुमचन्दनादिष्वङ्गरागपदानि, वस्तुतस्तु मृदवयवा एव गन्धतेजोभ्यां सहितास्तथा व्यपदिश्यन्ते, भगवत्सम्बन्धाद् दोषनिवृत्तिपूर्वकगुणाधानमुचितमेव, अतः पङ्कस्याङ्गरागत्वं, **पङ्क**पदप्रयोगाच्चैवं ज्ञायते, अङ्गसम्बन्धानन्तरमेवाङ्गरागत्वमिति, **रुचिरा**विति परमार्थापेक्षयाधिक्यं सूचयति, स्वेनैव **ह्यङ्गरागत्वं** सम्पादितं स्वतेजसानुभावेन वा पुनस्तेनैव रुचिरत्वमङ्गरागस्य माहात्म्यख्यापनाय, ततोप्यधिकतेजस आविर्भावः प्रत्यक्षतः पङ्कदर्शनयुक्तयोरपि **पङ्काङ्गरागरुचिरत्वं** निस्सन्दिग्धं भावितमिति **दोर्भ्यामुपगूहन**मुक्तं, निर्दुष्टभाव एव भगवत्युचित इति न तु दोषत्वमङ्गीकृत्य, अविहितभावख्यापनार्थं **दत्वा स्तन**मित्युक्तं, अन्यथा मुक्तिलीलायां प्रवेशः स्यात्, गमनागमनाभ्यां बालकाः क्षुधिता इति **प्रकर्षेण पानं**, नन्वेवं स्त्रीणां बाललीला कथं भवद्भिरवगता योगे ध्याने वा कैवल्यस्यैव भाव्यत्वाद् गमनं तु नास्त्यवर्णितत्वादित्याशङ्क्याह **स्मेति**, सर्वलोकप्रसिद्धैषा लीला, अतो नालौकिकप्रकारो ज्ञाने वक्तव्यः, **मुख**मित्येकवचनमेकस्यावेशितत्वेन प्रकटमेकमेव मुखमिति ज्ञापयितुं, तदग्रे विस्तरेण वक्ष्यते, ननु मुखस्य भक्तिरूपत्वात् तत्र सम्यङ्**निरीक्षणे** जाते कथं लौकिकभावः सिध्येदित्याशङ्क्याह **मुग्धस्मितालपदशन**मिति, **स्मितस्य** दन्तानां च मायास्नेहरूपत्वान्मोहकत्वं, **मुग्धं** सुन्दरं **स्मितमल्पता** स्वासक्तिजनकता च निरूपिता, मोहकं त्वन्यत्रैवासक्तिं जनयति, **अल्पदशनानि** च, तथा क्षीरकणसहिता दन्तपङ्क्तिरुक्ता, अतो लौकिकालौकिकभावयोर्मिश्रणात् **प्रकृष्टो मोदः** ॥ २४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कालेन व्रजतेत्यत्र आभासोक्तौ, **तस्मिन्नेवाधिदैविके** गच्छतीति । नन्वेवं सति गतेर्गमनमुक्तं भवतीत्यनुपपन्नमिति चेत्, अत्रेदं प्रतिभाति । उत्तरदेशसम्बन्धफलिका हि गतिः, तत्तत्कालविशिष्टा लीला च नित्यत्वेन विद्यमानैव क्रमेणाच्छाद्य क्रमेणाविष्क्रियत इति रिङ्गणादिलीला यस्मिन् काले स कालोधुना प्रकटित इत्ययमेव पूर्वलीलाकालस्योत्तरदेशस्थानीय इत्युक्तन्यायेन तत्सम्बन्धित्वे जाते तदाधेयरिङ्गणलीलामपि प्रकटितवानिति हृदयम् । तथा च लीलानित्यत्वज्ञापनाय कालेन व्रजतेत्युक्तमिति सारम् **उपविष्ट**मित्यादि । उक्तत्रिविधरूपस्यैवानुवादोयम् । **अन्याश्रित**मित्यादि । कथञ्चित् केनाप्यंशेनान्याश्रितं रूपमित्यर्थः । स्वतः स्वातन्त्र्येण क्रियमाणलीलाविशिष्टं रूपमित्यर्थः । **सर्वथा** । सर्वांशेन स्वतः क्रियमाणलीलाविशिष्टं रूपमित्यर्थः । **निर्गुणेति** ताभिश्चरित्रे ज्ञापिते सति तदनन्तरं ताभिः परिदृश्यमानं निर्गुणावस्थवेद्यं रूपमित्यर्थः । अखिलतत्प्रकरणतात्पर्यमाहुः **सात्त्विकादीति** । सात्त्विकादिभेदोपलक्षितास्ते ते ये पुरुषास्तत्तद्धृदयगामिनि रूपे सति सा हृदयस्थितिस्तथा कृत्वान्तिमे रूपे स्थिरा भवति, स्वरूपमात्रनिष्ठा भवतीत्यर्थः ॥ २२ ॥ **गोकुले रामकेशवा**वित्यत्र, रिङ्गणलीलायां केशकृतः शोभातिशयो भवतीति तत्राधिक्यं मन्वानैरुक्तम्—वस्तुतस्त्वित्यारभ्यापेक्षाभावादित्यन्तम् । भगवद्वाचकत्वे योर्थस्तमनूद्य तत्रारुचौ हेतुमाहुः **प्रत्ययेति** । मत्वर्थीयवत्प्रत्ययाभावे तत्सौन्दर्यालाभादिति भावः । उभयोस्तरतमभावेपि गतिसाम्ये हेतुमाहुः **भगवद्गतित्वेनेति** । बलदेवस्याविष्टस्यैव गतिर्निरूप्यते । सा **चैकैवेति** तथेत्यर्थः । वयसोधिकत्वेन बलदेवरिङ्गणं पूर्वं कुतो नोक्तमित्याशङ्क्यात्र भगवद्गतिरेव वाच्या तत्सम्बन्धश्चात्र नामकरणमारभ्येति भगवद्रिङ्गणलीलासमय एव तदुक्तिरपीत्याशयेनाहुः **भगवत्सन्निधान** इत्यादि । पाण्योः सहभावोक्त्या गौणत्वोक्तिपूर्वकं रिङ्गणे जानुनोः प्राधान्येन निरूपणस्य तात्पर्यमाहुः **जानुभ्यामिति** सर्वमूलरूपत्वेनैतयोः सुतलाधिदैविकरूपत्वमुच्यते । 'द्वे जानुनी सुतल'मिति वाक्यात् । तथा च रिङ्गणलीलायां जानुनोरपि घर्षणं संभवतीति तमंशमादायेदमुक्तम् । घर्षणे पीडासंभवात् तस्याश्चात्रायुक्तत्वाल्लोकसाम्येन सर्वकरणात् तज्जनितकिणधारणेनापि सा तदपास्य दैत्यगामिनीति मन्तव्यमिति भावः । न च जानुनोरेव सहभावो वाच्य इति वाच्यम् । अस्या लीलायाः प्रथमगतिरूपत्वेन तस्याश्च पदधर्मत्वेन तयोरेव प्राधान्यस्योचितत्वादिति भावः ॥ २३ ॥ **उज्झितगृहा** इत्यत्र, सूचितमानुषङ्गिकमप्यर्थं

मुक्तवन्तः **एवं कर्मभ्य** इत्यादिना । **प्रेक्षन्त्यो ज्ञानपरा** इत्यादि । उक्तत्रिविधासु तासु मध्ये त्वाद्याः कौतुकं मत्वा वत्सपुच्छालम्बनेन गतिं द्रष्टुमेवोद्यता इति ज्ञानपराः । प्रियदर्शनकटाक्षस्पर्शादिरसाविष्टानामन्यत्र रागाभावः स्पष्टः । तृतीयास्त्वेकाकी प्रियः प्राप्त इति सन्तोषाद्धसन्त्यो जाताः । **विनियोगस्त्विति** । उक्तत्रैविध्यकथनेनेत्यर्थः । **अङ्कं** नयन्तीत्यङ्के वा नयन्तीति तथेति तदुक्त्येति वा ॥ २४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

इतीत्यत्रादेशपदव्यञ्जितमर्थमाहुरन्यथेत्यादि, इयमाज्ञा न केवलं गर्गेण दत्ता किन्तु गर्गद्वारा भगवता, तथा चाग्रे तथा तदकरणे लौकिकालौकिकानुभवाभ्यां गर्गो भगवांश्च तथेत्यर्थः, **यद्वात्मानं पूर्णं मेने नन्द** इति व्यञ्जितमर्थमाहुर्भगवान् **गर्गद्वारा** तत्रत्येभ्यो स्वस्वरूपादिज्ञानं दत्तवांस्तथा च तदग्रहणे तथेत्यर्थः, अत्रात्मानं भगवन्तमित्यप्यर्थो ज्ञेयः, **बालकयो**रिति गृहं प्राप्तयोः सतोरित्यर्थः, एवमग्रेपि ज्ञेयं, ननु गर्गातिरिक्तानां स्थलविशेषे गोकुल एव स्थितत्वात् किं स्वस्वगृहप्राप्तिकथनेनेत्याशङ्क्य तत्तात्पर्यमाहुर्गोकुलेपीति, मध्येमार्गं गमनागमनप्रश्नः कैरपि न कृत इतिभावः, अत एवात्मानं भगवन्तं पूर्णत्वेन ज्ञातवान्, भगवत्स्वरूपज्ञानस्य स्नेहविरोधित्वाभावान् न रक्षणाद्यनुकूलकृत्यादौ बाधकमिति सर्वं सुस्थ, नामकरणं च फाल्गुनशुक्लाष्टम्यां गर्गाचार्येण कृतमिति पद्मपुराण उत्तरखण्ड उक्तमष्टमीमुपक्रम्य 'फाल्गुनामलपक्षे च गर्गो नामाकरोत् तयो'रिति वाक्यात् ॥ २१ ॥ **कालेनेत्यस्याभासे कालरूपेति** 'योयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहु'रितिवाक्यात् तथा, **दशभिरि**ति यद्यप्यत्रैकादश श्लोकास्तथाप्येकस्मिन् रूपं न निरूपितमतो रूपनिरूपकैर्दशभिरित्यर्थः, **आधिदैविककालगमनेन** भगवद्गतिर्योक्ता तत्र टिप्पण्यामाशङ्क्य समादधते नन्वित्यादि, हीति क्रियेतिशेषः, सुबोधिन्यामयमित्यधुना **प्रकटितकाल;** **उक्तन्याये**नेत्याच्छादनप्रकटनन्यायेन, तथा च न **गतेर्गमनं** किन्त्वाच्छादनप्रकटनाभ्यां गतिप्रतीतिर्वस्तुतः कालविपर्यिण्येवेति काल एव **रिङ्गणलीले**ति न गतेर्गतिरित्यर्थः, तदेतन् निगमयन्ति **तथा** चेत्यादि, कारिकायां **गतौ गातविशेषे** चेत्यत्र निमित्तात् सप्तमी, मतमिति क्रियां प्रति **रूपद्वयस्यापि** कर्मत्वादिति, कारिकाविवरणे **यशोदायामुपविष्टरूपे** त्रिःप्रकारकत्वभ्रमवारणाय त्रिधापदतात्पर्यमाहुष्टिप्पण्यामुपविष्टेत्यादि, **उपविष्टं त्रिधा** मतमित्यनेनोक्तं यत् त्रिविधं रूपं तस्यानुवाद इत्यर्थः, तथा च भूमिष्ठाभ्यां रूपाभ्यां सहितमुपविष्टं तृतीयमिति सिध्यति, **अन्याश्रितेति**कारिकोक्तं रूपत्रयं विवृण्वन्ति **कथञ्चिदि**त्यारभ्य **विशिष्टमित्यर्थ** इत्यन्तं, अत्र **कथञ्चि**दित्यनेन तृतीयश्लोकोक्तं रूपं विवृतं, **स्वत** इत्यनेन प्रथमश्लोकोक्तं **सर्वथे**त्यनेन द्वितीयश्लोकोक्तमितिविवेकः, **किञ्चोत्थित**रूपेषु प्रथममन्याश्रितं द्वितीयं **कथञ्चित्** **स्वतो** गतियुक्तं तृतीयं **सर्वथा स्वतो** गतियुक्तमुत्थितरूपमिति ज्ञेयं, **बालक**रितिकारिकायां **मुग्धलीलाये**त्यनेन सात्त्विकी लीला विवृता ज्ञेया, "ततस्तु भगवा"नितिश्लोकोक्तकारिकाशेषं विवृण्वन्ति **ताभिरि**त्यादि, कारिकायोजना तु **बालकैः** सह **मुग्धलीलाया** तथा च तल्लीलाविशिष्टमेकमुत्थितं रूपमित्यर्थः, **ताभिरि**त्यादिना विवृतं **चौर्यचापल्य**चरित्रयुक्तं **रूपद्वयं** ताभिर्वाक्ष्यमाणं **निर्गुणावस्थं** चेति **सात्त्विकलीलातः** परं रूपत्रयं ज्ञेयं, **सात्त्विके**त्यादिकारिकामवतार्य व्याकुर्वन्त्या **बाले**त्यादि, सुबोधिन्यां लीलाप्रयोजनमाहुर्यशोदेतिकारिकया, **यद्वे**त्यादि ता यशोदाप्रभृतयो यद्यपि नाम्ना निरुद्धास्तथापि गृहकार्यस्यावश्यकत्वात् तत्करणे **यद्वत्** यथा **व्यथा** जायन्ते **तद्वत्** तथा स्वरूपं प्रकटयतीत्यर्थः, विवृतावुपविष्टस्येति भूमावुपविष्टस्य, ननूभयोर्नामकरणं श्रीवसुदेवप्रेरणयेति द्वयोस्तत्कथनं युक्तं **रिङ्गणलीला** द्वयोर्योच्यते तत्र किं प्रयोजनमत आहुः **रामे**त्यादि, **भगवदावेशा**दिति पुरुषोत्तमावेशात् , अयं भगवत उभयत्वसाधने हेतुर्न तूभयोर्भगवत्त्वसाधन इति, तदिदं "यर्ह्य"तिश्लोके "स्वत आवेशतश्च क्रीडती"त्यनेन स्फुटीभविष्यति, तथा च यतः श्रुतौ "स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् स हैतावानास"तिरमणेच्छायां स्वस्यैतावत्ताश्रवणादत्रापि स्वयमेव स्वरूपावेशाभ्यां द्विरूपो भूत्वा प्रथमं क्रीडतीतिबोधनमेव **प्रयोजन**मित्यर्थः, ननु विशेषाभाव उभयत्वस्य किं प्रयोजनमित्याकाङ्क्षायां नामभ्यां बोधितं तमाहुर्योगीत्यादि"रमन्ते योगिनो यस्मिन् नित्यानन्दे चिदात्मनि इति रामपदेनासौ परं ब्रह्माभिधीयत" इतिरामतापनीयश्रुतेर्योगिध्येयो रामो वक्ष्यमाणरीत्या ब्रह्मादिवन्द्यश्च केशव इत्यस्ति विशेषातो रामकेशवावित्यर्थः, एवं रूपद्वये विशेषमुपपाद्य प्रकृतोपयोगाय केशवशब्दस्यार्थान्तरमपि सङ्गृह्णन्ति मत्वथाय इत्यादि, नन्वेवं सत्यर्थद्वये को वा ज्यायानित्याकाङ्क्षायामाहुर्वस्तुत इत्यादि, तत्तात्पर्यमाहुष्टिप्पण्यां रिङ्गणेत्यादि भाव इत्यन्तं, तथा च निरोधोपयोगित्वाल्लौकिकोर्थ एव ज्यायानित्यर्थः, ननु रामस्य ज्येष्ठत्वेन कृतमुण्डनतया केशवत्त्वाभावेन कथं निरोधोपयोगितत्याकाङ्क्षायामुभयोरित्यादिना यत् सुबोधिन्यामुक्तं तत्तात्पर्यमाहुरुभयोरित्यादि, तत्सम्बन्ध इति **बलदेवसम्बन्धः**, तथा च गत्यैव निरोधसम्भव इत्यर्थः, सुबोधिन्यां प्राथमिकी क्रीडा स्वस्वरूपेणवेतिश्रौतार्थबोधनायाहुर्नमिद्वारेत्यादि, तद् विवृण्वन्ति टिप्पण्यां पाण्यारित्यादि, सुबोधिन्यां सम्पूर्ण इत्याद्यनेनार्थान्तरं व्याख्यातं ज्ञेयं, सहपदप्रयोग इति मध्य इति शेषः, रिङ्गणलीलानिरूपणप्रयोजनमाहुरेवंरूपाणीत्यादि ॥ २२ ॥ तावङ्घ्रीत्यत्र द्वितीयमाहेति गतिविशेषविशिष्ट रूपमाह, गतिर्विलास इति [illegible]। विहारः शोभा वा, अलसवलितगतिरित्यङ्घ्रियुग्मानुकर्षणेनालसा सरीसृपन्ताविति यङ्लुगन्ततयोक्ता द्रुता गतिर्वालता ता व्याकुर्वन्ति जानुभ्यामित्यादि, मनःपरितोषार्थेत्यलौकिकरतानां स्वीयानां परितोषार्था, तद् व्युत्पादयन्त्यनेनेत्यादि लक्ष्यत

इत्यन्तं, तथा च शकटभङ्गलीलायां यथा 'संसारकालचक्र' इत्यादिना तल्लीलातात्पर्यं बोधितं तथात्र रिङ्गणलीलायामिदं तात्पर्यमजहत्स्वार्थया लक्ष्यत इत्यर्थः, अत्र नादपदस्याव्यक्तशब्दवाचित्वात् तेन परोक्षरूपं वाक्यं लक्ष्यते हृष्टमनस्त्वेन वक्तृश्रोतृसन्माननं चेति ज्ञेयं, अनुसृत्येत्यस्य नानुकरणमर्थः किन्त्वनु पश्चाद्गमनमित्याशयेनाहुर्यं कश्चिदित्यादि, परिवृत्य दृष्टमित्यादि कर्मणि क्तः, पश्यति सतीत्यर्थः, मुग्धप्रभीतभावहेतुं विवृण्वन्ति गमने ज्ञानद्वयमित्यादि ॥ २३ ॥ तन्मातरावित्यत्र रोषभावाश्च त्रिविधा इति मन्दमध्यात्यन्तभेदेन त्रिविधा इत्यर्थः, एते च लौकिकस्तोत्रविषया लीलाभावाश्च परमार्थस्तोत्रविषया इति ज्ञातव्यं, ननु परमार्थस्तोत्रे घृणया स्तुवन्त्याविति न सङ्गच्छत इत्यत आहुरस्तुवन्त्यावित्यादि, "घृणा तु स्याज् जुगुप्सायां करुणाया"मिति हैमकोशात् तस्यार्थद्वयमभिप्रेत्य व्याकुर्वन्ति भगवदित्यादि सघृण इत्यादि च, अत्र भगवद्भावनार्थं तां तां दशामनुभूय व्याकुर्वन्ति भगवत्कर्तृकेत्यादि, तन्मातराविति पदतात्पर्यमाहुरुभयोरित्यादि, उभयोर्यशोदारोहिण्योर्मातृत्वं स्तन्यदानद्वारकं शङ्कितं भविष्यतीति हेतोस्तयोः पुत्रत्वबुद्धिदार्ढ्याय तन्मातृपदं निरूपितमित्यर्थः, घृणापदतात्पर्यमाहुर्भगवत्सम्बन्ध इत्यादि, भगवद्रूपेणेति भावप्रधानो निर्देशः, निरूपितेत्यर्थद्वयेन निरूपिता, लौकिकभाव इति पुत्रभावः, मायास्नेहरूपत्वादिति "हासो जनोन्मादकरी च माया मोहादयः स्नेहकला द्विजानी"तिवाक्यात् तथा, लौकिकभावसिद्धिं व्युत्पादयन्ति मोहकं त्वित्यादि, तथा च स्मितात्पदशनत्वरूपं धर्मद्वयं मोहकं सदन्यत्र लौकिकत्वेन भासमाने पुत्र एवासक्तिं जनयतीति तथेत्यर्थः ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

इत्यात्मानमित्यत्र **गर्गकर्मणोरिति** उपदेशनामकरणयोरित्यर्थः ॥ २१ ॥ **कालेन व्रजतेत्यस्याभासे** **कालरूपेति** **काले** आधिदैविके **रूपं** स्वरूपं यस्या इति टिप्पण्यनुसारेणार्थः, अत्र टिप्पण्यां, **नन्वेवं सतीति** **कालरूपेतिपदस्य** कालस्वरूपेति प्रातीतिकार्थमादाय शङ्क्येयं, **अधुना प्रकटित** इति अस्मिन्नाधिभौतिके काले सम्बद्धो जात इत्यर्थः, **अयमेवेति** अधुनापदेनोक्त आधिभौतिककाल एवेत्यर्थः, **पूर्वेति** पूर्वसिद्धाया रिङ्गणलीलायाः कालस्याधिदैविकस्येत्यर्थः, सुबोधिन्यां, **स्वतो व्रजतेति** लीलाकालस्य भगवदात्मकत्वात् स्वत एव तत्तल्लीलाचिकीर्षां ज्ञात्वा व्रजनं न तु सूर्यगत्येतिभावः, ननु रामस्य ज्येष्ठत्वात् कथं गत्यादिषु भगवत्साम्यमित्यत आहुः **नामकरणेनेति**, इदमेव विवृण्वन्ति **उभयोरिति**, ननु भक्तत्वाद् बलिरेव कुतो दैत्यान् न निवारयतीत्यत आहुः **बलिरिति**, पतित्वेन तत्सम्बन्धेन किञ्चिदासुरावेशान् न **निवारयतीत्यर्थः**, भक्तत्वाद् भगवता मर्दने कृते प्रतीकारमपि न करोतीति **स्वत** इत्युक्तम् ॥ २२ ॥ **तावङ्घ्रीत्यत्र** **मलसेति** **अङ्घ्रियुग्ममनुकृष्येत्यनेनोक्तं**, शनैः कर्षणमलसगतिः, **सरीसृपन्ताविति** यङ्लुगन्तेनोक्तं द्रुतगमनं **वलितगतिः** 'नित्यं कौटिल्ये गता'वित्यनुशासनेन तद्गतौ कौटिल्यसूचनादितिभावः, इदं गतिद्वयं प्रथमतः पूर्वार्धे उक्तमित्यर्थः, **अनेन भगवानिति** **चरित्रं** गतिस्तस्य **प्रतिपादकं वाक्यं** शब्दः, भगवतः शब्दमात्रस्य सार्थकत्वाद् वाक्यत्वं, अत एव निःश्वासस्य वेदत्वं, व्यवधानेप्याभरणशब्देन गतिज्ञानं भवतीति तत्प्रतिपादकत्वं, **उभयोरिति** वक्तृश्रोत्रोरित्यर्थः, **आभरणानां वक्तृत्वं** भगवतः **श्रोतृत्वं**, तेन **हर्षः सम्माननं**, **तस्मिन् परावृत्येति** स्थिते इतिशेषः, परावृत्य स्थिते तस्मिन् भगवता दृष्टे सतीत्यन्वयः, **गन्तव्यमेवेति** पक्षमाहुः **तथा सतीति**, आद्यपक्षमाहुः **व्याघुट्येति**, **उभावुभयत्र वेतिपक्षे** गमने भीतभावं साधयन्ति **तदेति**, **बालकयोर्मातरि विशिष्टः परिचयो** भवति सा त्वत्र नास्त्यत **एकाकिनात्र न स्थातव्यमिति** हेतोर्भयेन **गमनं**, परिचिते स्थलान्तरे इतिशेषः ॥ २३ ॥ **तन्मातरावित्यत्र** नृत्यादिभावैः स्तोत्रं विवृतं, अनुभवद्भिरुक्तत्वान् नातीव शब्दार्थाग्रहोत्र कर्तव्यः, **लोकतो घृणेति** अत्र घृणा कुत्सितत्वेन ज्ञानमित्यर्थः, **भगवत्सम्बन्धेपीति** तथा च भगवदतिरिक्तपुरुषार्थानां स्फुर्तिरेव न जाता, सर्वत्र घृणैव जातेत्यर्थः, **सुगन्धा भवन्तीति** दोषस्य सत्तिरोभावरूपत्वादादितः सुगन्धा एवेत्यर्थः, **विजातीयैश्चेति** तिरोहितसदंशगन्धैर्दुष्टगन्धैरित्यर्थः, **अन्यथेति** तिरोहितसदंशगन्धा दुष्टगन्धा भवन्तीत्यर्थः, मूलेच्छया सत्तिरोभावो विजातीयोपहत्या च तथेति चकारः, **अल्पतेति** दशनानामितिशेषः, अतः स्वत्वभावपूर्विकाया **आसक्तिस्तज्जनकतोक्तेत्यर्थः**, उभयो**र्लौकिकभावसाधकत्वं** विवृण्वन्ति **मोहकं त्विति**, **अल्पेति** तथा स्वत्वरूपोपाधावासक्तिं जनयन्तीत्यर्थः, तथा चोभयोरन्यत्रासक्तिजनकत्वात् लौकिकभावसाधकत्वमितिभावः, **अत इति** विशेष्यस्य **मुखस्य** तादृशविशेषणवत्त्वादित्यर्थः, मुखस्य भक्तिरूपत्वाद**लौकिकभावसाधकत्वं** विशेषणस्योक्तरीत्या **लौकिकभावसाधकत्वं ज्ञेयम्** ॥ २४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

इत्यात्मानं समाविश्येत्यस्य विवृतौ **आवेश आज्ञेति** आदेशशब्दादवश्यं मन्तव्यत्वे हेतुरुक्तः, **अन्यथेति** यदि गर्गोपदिष्टं यथावन् न मन्येत तदा गर्गः क्रुध्येदित्यर्थः ॥ २१ ॥ **कालेन व्रजतेत्यादिदशश्लोकार्थनिरूपणे** कारिका, **गता गतिविशेषं** चेयादि, "कालेन व्रजते"त्यनेन **गतिनिरूपणं**, "तावङ्घ्री"त्यनेन **गतिविशेषः**, **यशोदायां तथारूपमिति** 'तन्मातरौ निजसुतौ' इत्यनेनोक्तं, एवमुपविष्टं **त्रिधा**, **अन्याश्रितमिति** "वत्सैरितस्तत उभावनुकृष्यमाणा" वित्यनेन वत्साश्रितत्वेन अन्याश्रितत्वं,

स्वतश्चैव कथञ्चिदिति कथञ्चित् केनापि प्रकारेण स्वतः क्रीडारतमित्यर्थः, "शृङ्ग्यग्निदंष्ट्र्यसिजलद्विजकण्टकेभ्य" इत्यत्र स्वतः क्रीडाकर्तृरूपकथनात्, **सर्वथा तथेति** सर्वथा क्रीडाकर्त्रित्यर्थः, "कालेनाल्पेन राजर्षे रामः कृष्णश्च गोव्रजे" इत्यत्र तथा निरूपणात्, **एवमुत्थितं स्वरूपं त्रिधा ज्ञेयं बालकैर्मुग्धलीलाद्येति** "ततश्च भगवान् कृष्ण" इति वाक्यात्, **धाष्ट्र्यधौर्त्यसमन्विते इति लीले** इति विशेष्यं, तथा च बालकैः सह मुग्धलीला धाष्ट्र्यधौर्त्यसमन्विते द्वे लीले, एवं लीलात्रयं, लीलात्रये रूपत्रयं भवति, धाष्ट्र्यधौर्त्यसमन्विते रूपे इति वा, एवं च बालकैः सह मुग्धलीलाविशिष्टं धाष्ट्र्यधौर्त्यसमन्वितं चेतिरूपत्रयं ज्ञेयं, एवं उपविष्टं त्रिधा, उत्थितं च त्रिधा, मुग्धलीलाधाष्ट्र्यधौर्त्यलीलासमन्वितं चेति नव रूपाणि, "**कालेन व्रजताल्पेने**"त्यस्य विवृतौ **योगिध्येय इति राम** इत्यर्थः, "रमन्ते योगिनोनन्ते नित्यानन्दे चिदात्मनि" इति रामपदेनासौ परं ब्रह्माभिधीयत" इति श्रुतेः, यद्यपीदं रामतापि यामुक्तत्वाद् दाशरथिमेव वक्तीतिवक्तुमुचितं तथापि परब्रह्मणो यत्रैव राम इति संज्ञा तत्रेयमेव व्युत्पत्तिरिति बोध्यं, प्रकृते बलरामे पुरुषोत्तमावेशात् सर्वे पुरुषोत्तमधर्मा अत्र वक्तुमुचिता इति निरवद्यमखिलं, **ब्रह्मादिवन्द्यश्चेति** मूले केशवपदमुक्तं तस्य च कश्च ईशश्च केशौ तयोर्वं सुखं यस्मादितिव्युत्पत्तेः, **जानुभ्यां रिङ्गणं विष्णोर्दैत्यानां मर्दनाय हीति** इह जानुगमनतात्पर्यमिदं यदुक्तं तच्छुकनारदादीनां माहात्म्यज्ञानयुक्तभक्तानां स्फुरति, तद्दृष्ट्यैवमुक्तं, ते हि विचारयन्ति, प्राकृतबालवज् जानुभ्यां भगवान् गच्छति, तत्र प्राकृतबालस्त्वधिकसामर्थ्याभावाज् जानुभ्यां गच्छति न तथा हरिः, सर्वदा सर्वसामर्थ्ययुक्तत्वात्, न च विद्यमानेपि सामर्थ्ये तथा करणं प्रदर्शनार्थमितिवाच्यं, तथा सत्येतल्लीलाया अस्वाभाविकत्वापत्तेः, एवं सति जानुभ्यां गमनं दैत्यानां मर्दनार्थं करोतीति युक्तः पन्थाः, सेयं आध्यात्मिकपक्षे व्यवस्था ज्ञेया, आध्यात्मिकपक्षस्य ज्ञानप्रधानत्वेन वस्तुविचारस्यावश्यकत्वात्, दैत्यमर्दनं यद्यपि सङ्कर्षणकार्यं तथापि पुरुषोत्तमे सर्वेषां व्यूहानां विद्यमानत्वात् सापि लीला तत्रोच्यते इति न दोषः, एवमेव पुरुषोत्तमे मस्तकादौ सत्यलोकत्वादिरूपताकथनं पुरुषरूपस्य तत्र सत्त्वयेति बोध्यं, पुरुषोत्तमांशपुरुषशिरसः सत्यलोकरूपत्वात्, "सत्यं तु शीर्षाणि सहस्रशीर्ष्ण" इति वाक्यात्, न हि साक्षात्पुरुषोत्तमस्य शिरः सत्यलोकरूपं भवितुमर्हति, केवलमानन्दरूपत्वात्, अतः पुरुषोत्तमांशपुरुषसत्तामादाय तथोच्यते इति सुबोधिन्यां सर्वत्र ज्ञेयं, प्रकृतेपि "द्वे जानुनी सुतलं विश्वमूर्ते"रितिवाक्यात् जानुनोः सुतलरूपत्वात् तत्र च दैत्यानां स्थितेर्जानुसङ्घर्षणेन दैत्यमर्दनमुच्यते तदपि पुरुषरूपस्य भगवति सत्त्वात् युक्तं, न तु साक्षात्पुरुषोत्तमस्य जानुनी सुतलरूपे आनन्दमयत्वादिति दिक्, आधिदैविकपक्षे तु केवलं जानुभ्यां गमनं भगवतो बालरूपत्वात् तादृशरूपलीलयोर्नित्यत्वात् स्वाभाविकत्वेन बाललीलाधिकारिणां परमानन्ददानार्थमेवेत्याकलितव्यं, आधिदैविकपक्षस्य लीलाप्रधानत्वेनानन्दमयत्वात् ॥ २२ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

"**कालेन व्रजते**"त्यत्र **गतौ गतिविशेषे चे**त्यादि का० ४९¼। 'कालेन व्रजते'त्यत्र **गतिलीला**, "तावङ्घ्रियुग्म"मित्यत्र **गतिविशेषः**, एवं **भूमावुपविष्टं हरे रूपद्वयं**, "तन्मातरौ निजसुता"विति श्लोके **यशोदायामुपविष्टं रूपमेकविधं, एवमुपविष्टं रूपं त्रिधा मतं, अन्याश्रितमिति** का० ५०¼। **कथञ्चिदन्याश्रितं रूपं**, स्वतः स्वातन्त्र्येण क्रियमाणलीलाविशिष्टं रूपं, **सर्वथा** सर्वांशेन स्वतः क्रियमाणलीलाविशिष्टमितियोजना टिप्पण्यनुसारिणी, तथा चैवं विवेकः, "यर्ह्यङ्गने"ति श्लोके **कथञ्चिदन्याश्रितं** रूपं ज्ञेयं, यद्यप्याभासे स्वतः स्थितयोर्लीलामाहेत्युक्तं तथापि वत्सपुच्छावलम्बनेन कथञ्चिदन्याश्रितत्वं बोध्यं, अत एव श्लोकव्याख्यासमाप्तौ "गोपुच्छधारणलीलेयं पराधीना निरूपिते"ति (कारिकया) व्याख्यातं, "शृङ्ग्यग्नी"त्यत्र **स्वतः** क्रियमाणलीलाविशिष्टं रूपं, अत्रापि मातृकर्तृकनिषेधान् न सर्वांशेन स्वातन्त्र्यं, "कालेनाल्पेने"त्यत्र **सर्वथा** स्वातन्त्र्यं, एवं त्रिविधलीलया युक्तमुत्थितं त्रिधा रूपं निरूपितमित्यर्थः, सात्त्विकीं राजसीं च लीलां विभज्य तामसीं लीलां विभजन्ते बालकैरिति का० ५१¼। "ततस्तु भगवान् कृष्ण" इत्यत्र बालकैः सह मुग्धलीला, तदग्रे "कृष्णस्य गोप्यो रुचिर"मिति श्लोकोधिकः, "वत्सान् मुञ्चन्नि"ति "हस्ताग्राह्य" इति च श्लोकद्वयोक्तराजसतामसतामसलीलाद्वयप्रसिद्धिबोधकः, अत एवोक्तं "ततस्तु भगवान् कृष्ण" इति श्लोकव्याख्याने राजसतामसीं तामसतामसीं च स्वतो वक्तुमनुचितां मत्वान्यमुखेन निरूपयितुं मध्ये वाक्यान्तरं श्रीशुकेनोक्तं, अत्रेदं ज्ञेयं, अत्र रूपप्रकरणे सात्त्विकसात्त्विकादिभेदेन सगुणलीलाविशिष्टानि नवरूपाण्येकं च निर्गुणलीलाविशिष्टं रूपं, तत्र त्रिभिः श्लोकैः सात्त्विकरूपाणि, त्रिभिः राजसानि, "ततस्तु भगवान् कृष्ण" इत्यत्र तामससात्त्विकलीलाविशिष्टं रूपं, मध्ये "कृष्णस्य गोप्यो रुचिर"मित्यधिकः श्लोको वक्ष्यमाणलीलाद्वयप्रसिद्धिबोधकः, "वत्सान् मुञ्च"न्नित्यत्र क्रियाप्रकारविशेषरूपधाष्ट्र्यसमन्वितं रूपं, "हस्ताग्राह्य" इत्यत्र ज्ञानप्रकारविशेषरूपधौर्त्यसमन्वितं रूपं, तथा च तामसलीलायां प्रसिद्धिबोधकेन श्लोकेन सह चत्वारः श्लोकाः "एवं धाष्ट्र्यान्युशति कुरुते" इति श्लोके सभयनयनश्रीमुखे"त्यनेनोक्तं निर्गुणावस्थवेद्यं रूपं एवं रूपप्रकरणे एकादश श्लोकाः, कारिकायोजना तु बालकैः सह मुग्धलीलाया धाष्ट्र्यधौर्त्यसमन्विते द्वे लीले रूपे वा, निर्गुणावस्थरूपं चेति "वत्सान् मुञ्च"न्नित्यादिना यशोदां प्रति ताभिश्चरित्रे ज्ञापिते सति ततः परं तदनन्तरं ताभिः परिदृश्यमानं "सभयनयनश्रीमुखे"त्यनेनोक्तं रूपं निर्गुणावस्थवेद्यमित्यर्थः, सात्त्विकादीति का० ५२¼। सात्त्विकादिभेदोपलक्षितास्ते ते ये पुरुषास्तत्तद्धृदयगामिनि रूपे सति सा हृदयस्थितिस्तथा कृत्वा तांस्तान् भावान् दूरीकृत्य अन्तिमे

रूपे स्थिरा भवति, स्वरूपमात्रनिष्ठा भवतीत्यर्थः, यशोदार्थमिति का० ५३¾। अत्रैव जानुभ्यामिति का० ५४¾। दैत्यपतित्वात् स्वतो न निवारयतीत्यर्थः ॥ २२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

न केवलं गर्गवाक्यविश्वासेन नन्दस्य पूर्णत्वाभिमानमात्रत्वम्, किन्तु ब्रह्मादिदुर्लभभगवद्बालचरित्रानुभवेन पूर्णमनोरथत्वमस्त्येव" इत्याशयेन भगवद्बालचरित्रमाह—कालेनेति। रमयति स्वचरित्रैः सुखयतीति रामः। को ब्रह्मा, ईशो महादेवः, तयोर्वं सुखं यस्मात् स केशवः। तौ व्रजता गच्छताऽल्पेनैव कालेन जानुभ्यां सह पाणिभ्यां रिङ्गमाणौ व्रजे विजह्रतुः विहारं चक्रतुः ॥ २१ ॥ तौ रामकृष्णौ घोषाः "कटिपादभूषणं किंकिण्यः" तेषां प्रघोषेण प्रकृष्टनादेन रुचिरं यथा स्यात्तथाऽङ्घ्रियुग्ममनुकृष्य व्रजकर्दमेषु गोमयगोमूत्रगोरसादिपतनेन जातकर्दमयुक्तस्थानेषु सरीसृपन्तौ द्रुतं तिर्यग्गच्छन्तौ, तथा गमने हेतुमाह—तेषां घोषाणां नादेन हृष्टं मनो ययोस्तौ लोकं जनमितस्ततो गच्छन्तं स्त्रियं पुरुषं वाऽनुसृत्य त्रीणि चत्वारि वा पदान्यनुगम्य, पश्चात्तेन परावृत्य दृष्टे सति तन्मुखं दृष्ट्वा तं परकीयं ज्ञात्वा, मुग्धप्रभीतवत् मुग्धोऽज्ञः प्राकृतो बालो यथा परकीयं दृष्ट्वा प्रकर्षेण भीतो भवति, तथा सर्वज्ञौ निर्भयावपि तौ मात्रोः रोहिणीयशोदयोरन्ति समीपमुपेयतुः झटित्याजग्मतुरित्यन्वयः ॥ २२ ॥ तदा च तयोर्मातरौ घृणया कृपया स्नुवन्त्यौ स्तनाभ्यां पयः स्रवन्त्यौ निजसुतौ दोर्भ्यां भुजाभ्यामुपगृह्य संवेष्ट्य स्तनं दत्त्वा स्तनं प्रपिबतोस्तयोर्मुखं निरीक्ष्य प्रकृष्टं मोदं ययतुः प्रापतुरित्यन्वयः। तयोर्देहशोभामाह—पङ्केन लिप्तेन कर्दमेन, अङ्गरागेण चन्दनेन च रुचिरौ। मुखशोभामाह—मुग्धं मन्दं स्मितं यस्मिंस्तच्चासावल्पाः सूक्ष्मा दशना यस्मिंस्तच्चेति। निजं निजसुतमित्यनुक्तिस्तौ द्वावपि प्रति तयोर्द्वयोरपि स्वपुत्रबुद्धिस्तथा ते द्वे प्रत्यपि तयोरपि मातृबुद्धिश्च तुल्येति सूचनार्था ॥ २३ ॥ यर्हि अङ्गनानां दर्शनीया दर्शनयोग्याः कुमारलीला ययोस्तथाभूतौ जातौ तदा अन्तर्व्रजे व्रजस्य मध्ये सर्वदर्शनयोग्ये स्थाने ताभ्यामेव गृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणा वुभावपि रामकृष्णौ तदबला व्रजाङ्गनाः प्रेक्षन्त्यो निरीक्ष्यमाणा हसन्त्यो जहृषुः हृष्टा बभूवुरित्यन्वयः। तद्दर्शनानन्देन तासां गृहकार्यमपि सर्वं विस्मृतमित्याह—उज्झितगृहा इति ॥ २४ ॥

अन्वितार्थप्रकाशिका

कालेनेति ॥ रामकेशवौ व्रजता गच्छताऽनेनैव कालेन नामकरणानन्तरमल्पे काले गते तृणावर्तवधात्प्रागेव जानुभ्यां सह पाणिभ्यां रिङ्गमाणौ। शानजार्षः चानश् वा। गोकुले व्रजे विजह्रतुः विहारं चक्रतुः ॥ २१ ॥ ताविति ॥ तौ रामकृष्णौ घोषाः कटिपादभूषणकिङ्किण्यस्तेषां प्रघोषेण प्रकृष्टनादेन यद्वा घोषाणां घोषस्थानां गोपगोपीनां प्रघोष हो हो हो इति मुखेन करतालिकया च शब्दः तेन रुचिरं यथा स्यात्तथाऽङ्घ्रियुग्ममनुकृष्य व्रजकर्दमेषु गोरसादिकर्दमयुक्तव्रजाङ्गणेषु सरीसृपन्तौ द्रुतं कुटिलं गच्छन्तौ। अभ्यस्ताच्छतुर्नुमार्षः। ततश्च तेषां घोषाणां नादेन हृष्टं मनो ययोस्तौ लोकं जनमितस्ततो गच्छन्तमनुसृत्य त्रीणि चत्वारि वा पदान्यनुगम्य पश्चात्तेन परावृत्य दृष्टे सति तन्मुखं दृष्ट्वा तं परकीयं ज्ञात्वा मुग्धप्रभीतवत् मात्रोः रोहिणी-यशोदयोः अन्ति समीपम् उपेयतुः झटिति आजग्मतुः ॥२२॥ तन्मातराविति ॥ तदा च घृणया कृपया स्नुवन्त्यौ स्तनाभ्यां पयः स्रवन्त्यौ। नुमार्षः। तयोर्मातरौ पङ्केन लिप्तेन कर्दमेन अङ्गरागेण चन्दनेन च रुचिरौ। यद्वा। "सुन्दरे किं सुन्दरम्" इति न्यायेन पङ्क एवाङ्गरागस्तेन रुचिरौ निजसुतौ दोर्भ्यां भुजाभ्यामुपगुह्य संवेष्ट्य स्तनं दत्त्वा स्तनं प्रपिबतोस्तयोः मुग्धं मन्दं स्मितं यस्मिंस्तच्चासावल्पाः सूक्ष्मा दशना यस्मिंस्तच्चेति मुखं निरीक्ष्य प्रकृष्टं मोदं ययतुः प्रापतुः ॥ २३ ॥ यर्हीति यर्हि अङ्गनानां दर्शनीया दर्शनयोग्याः कुमारलीला ययोस्तथाभूतौ जातौ। तदा अन्तर्व्रजे व्रजस्य मध्ये सर्वदर्शनयोग्य स्थाने ताभ्यामेव गृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणावुभावपि रामकृष्णौ कर्मभूतौ उज्झितगृहाः त्यक्तगृहकार्याः तदबला व्रजाङ्गना प्रेक्षन्त्यो निरीक्षमाणाः। शतार्षः। सहन्त्यो जहृषुः हृष्टा बभूवुः। शयानानां वत्सानां पुच्छानि जानुचंक्रमणेन प्राप्य गृहीत्वा यदा मुष्टिं दृढं बध्नीतस्तदोत्थाय पलायमानैर्वत्सैराकृष्यमाणौ रुदतः बालभावात्पुच्छानि न त्यजतस्तदा हसन्त्यो गोप्यः पुच्छानि त्याजयामासुरिति पुच्छैरिति बहुत्वम् एकं त्यक्त्वाऽन्यग्रहणादेकदैव बहुपुच्छग्रहणाद्वा ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पूर्वत्वमेव प्रकाशयन्नाह कालेनेति। रिंगमाणौ गछंतौ विजह्रतुः विहारं कृतवन्तौ ॥ २१ ॥ ताविति व्रजपंकेषु अङ्घ्रियुग्मं पादयुग्मं अनुकृष्य भूयोभूयः सरीसृपंतौ अतिशयेन व्रजंतौ पुनः कथंभूतौ घोषाः कटिचरणाभरणकिंकिण्यस्तेषां प्रघोषेण प्रकृष्टशब्देन रुचिरं मनोहरं यथा तथा तेषां घोषाणां नादेन हृष्टमनसौ लोकं इतस्ततो व्रजंतं जनमनुसृत्य चतुष्पं चानि पदानि अनुव्रज्य मुग्ध इव प्रभीत इव मात्रोः यशोदारोहिण्योः अन्ति समीपे उपेयतुर्वजतुः ॥ २२ ॥ तन्मातराविति घृणायापुत्रो परिस्नेहयुक्तदयया स्नुवन्त्यौ स्तनेभ्यः क्षीरं स्नुवन्त्यौ तयोर्मातरौ यशोदारोहिण्यौ पंकस्य कर्दमस्यांऽगरागेण

आलेपेन रुचिरौ मातृरुचिजनकौ निजसुतौ रामकेशवौ कर्मभूतौ दोर्भ्यां कराभ्यामुपगुह्य दयोपरि धृत्वा स्तनं दत्त्वा तं प्रपिबतोः सुतयोः मुग्धं मंदं स्मितं यस्मिन् अल्पादशना दंताश्च यस्मिन् तच्च तच्च मुखं निरीक्ष्य प्रमोदं ययतुः स्मेतिपादपूरणे ॥ २३ ॥ पुनस्तयोरन्यां लीलामाह यर्हीति ॥ प्रगृहीतानि येषां तैः वत्सैर्यर्हि इतस्ततः अनुकृष्यमाणौ तर्हि अंगनानां स्त्रीजातिमात्राणां दर्शनीया कुमारलीला ययोस्तौ उभौ अंतर्व्रजेव्रजमध्ये स्थिताः तदवला व्रजवनिताः प्रेक्षंत्यो विलोकयंत्यः अत एव त्यक्तगृहाः हसंत्यः सत्यः जहृषुः परस्परं वादेन मुदिता बभूवुः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ भगवतः काश्चित् क्रीडा अनुवर्णयन् विश्वरूपप्रदर्शनं वक्तुमाह ॥ कालेनेति ॥ व्रजता गच्छता अतिक्रममाणेनेति यावत् । अल्पेन, कालेन, गोकुले व्रजे, रामकेशवौ, पाणिभ्यां सह जानुभ्यां, पाणिभ्यो जानुभ्यः चेत्यर्थः । रिङ्गमाणौ चङ्क्रमणं कुर्वन्तौ सरीसृपन्तौ सन्ताविति यावत् । विजहतुः विशेषेण बालखेलं चक्रतुः ॥ २१ ॥ विहारमेव वर्णयति ताविति । तौ रामकेशवौ, अङ्घ्रियुग्मं, अनुकृष्य पुनः पुनराकृष्य, घोषाणां कटिपादबाहुकण्ठाभरणकिङ्किणीनादानां प्रघोषः प्रकृष्टो नादस्तेन यथा तथा, यद्वा । घोषाः पादादिभूषणगताः किङ्किण्यस्तेषां प्रघोषः श्लाघ्यध्वनिस्तेन रुचिरं यथा तथा, यद्वा । घोषा गोपजनास्तेषां राम, कृष्ण, इते एहीत्यादिकः प्रघोषोऽतिशयितः शब्दस्तेन रुचिरं यथा तथा, व्रजकर्दमेषु सरीसृपन्तौ पुनः पुनरतिशयेन वा चरन्तौ, तन्नादेनोक्तविधनादश्रवणेन हृष्टं मनो ययोस्तौ तथाभूतौ सन्तौ, लोकमितस्ततः पर्यटन्तं जनं, अनुसृत्य त्रिचतुराणि पदान्यनुगम्य, मुग्धवत्प्रभीतवच्च, मात्रो रोहिणीयशोदयोः, अन्ति समीपं, उपेयतुरुपजग्मतुः ॥ २२ ॥ तन्मातराविति ॥ तदानीं तन्मातरौ रामकेशवजनन्यौ, घृणया करुणया, स्नुवन्त्यौ पयःपूर्णस्तनाभ्यां पयःस्रवन्त्यौ सत्यौ, पङ्केनाङ्गरागेण च रुचिरौ, यद्वा पङ्करूपो योऽङ्गरागस्तेन रुचिरौ, निजसुतौ, दोर्भ्यां बाहुभ्याम्, उपगुह्य उरसि संवेष्ट्य, स्तनं दत्त्वा मुखे निधाय, प्रपिबतोः सुतयोः, मुग्धं सुन्दरं स्मितं यस्मिन् अल्पा दशना दन्ताश्च यस्मिंस्तच्च तच्च, मुखं निरीक्ष्यावलोक्य, प्रमोदं, ययतुः स्म ॥ २३ ॥ यर्हीति ॥ यर्हि यदा, उभौ रामकृष्णौ, अङ्गनादर्शनीया अङ्गनाजनानां संवीक्षणीया कुमारलीला ययोस्तौ तथाभूतौ, जाताविति शेषः । तदा, अन्तर्व्रजे व्रजमध्ये, तदबलाः व्रजस्था अङ्गनाः, प्रगृहीतानि ताभ्यामेवोपात्तानि पुच्छानि येषां तैः, वत्सैः, इतस्ततः, अनुकृष्यमाणौ, तौ प्रेक्षन्त्यस्तावेव प्रेक्षमाणाः, उज्जितगृहा विस्मृतगृहकृत्याः, हसन्त्यः सत्यः, जहृषुः । जगृहुरिति पाठे गृहीतवत्य इत्यर्थः ॥ २४ ॥

श्रीहरिसूरिविचितं श्रीभक्तिरसायनम्

कालेनेतिः १०.८.२१.

यत्पीडिताऽप्य—हरहर्बहु दुर्नरेशैः—नत्वं—क्षमात्वमवने व्यजहास्ततोऽसि ।
धन्यैति रिङ्गणामिषान्निजहस्ततोऽस्याः प्रोत्साहनं व्यकृत भूरि स पृष्ठभागे ॥ १५ ॥
आदावूर्ध्वंशयोगेन ततो बाहुज–योगतः । विहरेयमिति ज्ञप्त्यै स जानुकररिङ्गणः ॥ १६ ॥

तावङ्घ्रियुग्ममितिः १०.८.२२.

यस्मिन्नेव जडानुषङ्गबहुला भूयाद्रजः सुस्थितिः स्यात्तत्रैव मदीयचारुविहृतिर्देशे कृतार्थत्यलम् ।
स्वीयानुग्रहकामितावतरणः सर्वाघसङ्कर्षणः केलिं पङ्किलगोकुले स चकमे कामं स सङ्कर्षणः ॥ १७ ॥
एतद्द्वाराऽशेषपापापकर्षः कर्तव्योऽस्तीत्यच्युतश्चिन्तयानः स्वाङ्घ्रिद्वन्द्वं तत्र वेशं सपङ्कं पूर्णाभ्यासायानुकृष्यानयत्सः ॥१८॥
मन्नादहृष्टमनसः सततं भवन्ति मत्पादभाज इह घोषजुषस्ततोऽहम् ।
तन्नादहृष्टसुमना न कथं भवामी त्यासीत्तथा स्वपदभागुदिताभिमानः ॥ १९ ॥
चेल्लोकमनुसृत्याहं सञ्चरामीह लीलया । तदैव लोको मामेष्यत्यात्त–मद्गुणगौरवः ॥ २० ॥
निर्भयहृदयेनापि हि गोकुलरतिना प्रमातृसविधभुवि । सभयेनावस्थेयं तद्धितसुखमपि भवत्यलं स्वहितम् ॥ २१ ॥
आकृष्टं पदतः सतामघचयं स्वाङ्गानुषक्तं मुहुर्गत्वा तत्सविधं तदीयकरतः संमार्जयाम्यञ्जसा ।
ये स्युर्मद्गुणकीर्तनैकवचसो ये शुद्धसत्त्वामृत प्रश्लिष्यद्धृदया मदर्पितगृहाचारोपचारा नराः ॥ २२ ॥
व्रजकर्दमलिप्तेन गच्छता मातुरन्तिकम् । अबोधि माधवेनेदं यतस्तत्र तथा स्फुटम् ॥ २३ ॥ (युग्मम्)

तन्मातराविति: १०.८.२३.

निवेशितोऽहं हृदये येनानन्यविहारिणा । तद्धार्दसुरसास्वादग्राही स्यामहमप्यलम् ॥ २४ ॥
शुद्धसत्त्वामृतात्तारो गुरवो लघवोऽपि वा । द्विजा एवेति तान् स्वानां मुदे युक्तमदर्शयत् ॥ २५ ॥

यर्ह्यङ्गनेति : १०.८.२४.

योऽन्तर्विलासपरितोषकृदेष कामो मज्जात एव जगतीति कियान् मदभ्रे ।
इत्यच्युतोऽतिशिशुरप्यबला जनेषु चक्रे स वक्रसरलां सुकुमारलीलाम् ॥ २६ ॥
या मां पुच्छगतं विहाररसिकं पश्यन्ति ताभ्योऽप्यहं बुद्धिभ्यो विषयाधिकाधिकपरानन्दं ददाम्यन्वहम् ।
माया मानुषविग्रहः प्रभुरिति प्रख्यापयन् कौतुकान् मन्ये पुच्छमिहावलम्ब्य समभूद् गोपीजनानन्दकृत ॥ २७ ॥
सृष्टेः पूर्वमुतोत्तरं यदथवा मध्ये तथान्तेऽप्यसा- वेकैव श्रुतिचोदिता मम गतिर्यद् ब्रह्मपुच्छस्थितिः ।
तत्सम्प्रत्यपि तां विहाय विहृतिर्नैव चितेति प्रभुः पुच्छालम्बनतश्चकार किमहो स्वक्रीडनारम्भणम् ॥ २८ ॥
अचलं ब्रह्म पुच्छस्थं स्वल्पगोभिरितस्ततः । कृष्यमाणं हठाद् वीक्ष्य युक्तोऽसौ श्रुतिविस्मयः ॥ २९ ॥

कृष्णप्रिया

जब कुछ और काल बीता तब गोकुल में श्रीबलभद्रजी एवं श्रीकृष्णजी दोनों, दोनों कमलों के घुटनों के बल विहार करने लगे ॥ २१ ॥ अब तो जब वे दोनों लालन व्रज के कीचड़ धूल में अपने नेक नेक से चरण कमलों को घसीटकर घुटनों के बल कुछ और तेजी से चलने लगे तब उनकी करधनी और पैजनियाँ बजने लगी। उस ध्वनि को सुन उन दोनों को भी प्रसन्नता होती थी। पुनः किसी व्रजवासी के पीछे दो चार पग चलकर फिर बाल स्वभाववश मुग्ध हुए-जैसे माता के पास दौड़ आते ॥ २२ ॥ कीचड़ धूल के अङ्गराग भरे अतिमनोहर से लगते दोनों बालकों को अपने दोनों हाथों से उठाकर वे बड़े स्नेह से उन्हें छाती से चिपटा दूध पिलाती उस अवसर प्रेम के मारे उनके वक्षःस्थल से दूध चूने लगता था उस समय स्तन पकड़कर पी रहे उनके मुख कमल को देखकर बड़ा ही आनन्द माताओं को मिलता जिसमें कि अभी छोटे छोटे दांत आ रहे थे और कभी कभी मन्द मुस्कुराहट हो जाती थी ॥ २३ ॥ राजन्! कृष्ण बलरामजी के कुछ और बड़े होने पर व्रजाङ्गनाओं के दर्शनीय कुमारलीला वाले जब वे दोनों हुए, तब उस गोकुल के भीतर वे दोनों गौ बछड़ों की पूंछ पकड़ने लगे। उस अवसर बछड़े भाग पड़ते और उनके साथ ये दोनों भी घसीटने लगते। इस मधुर लीला को देखकर व्रज की गोपियाँ स्मित हास्य करती, और गृहकार्य को भी विसर जाती, भूल बैठती, यों उन्हें बड़ा आनन्द मिलता था ॥ २४ ॥

[1]यर्ह्यङ्गनादर्शनीयकुमारलीलावन्तर्व्रजे तदबलाः प्रगृहीतपुच्छैः ।
वत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षन्त्य [2]उज्झितगृहा [3]जगृहुर्हसन्त्यः ॥ २५ ॥
[4]शृङ्ग्यग्निदंष्ट्र्यसिजलद्विजकण्टकेभ्यः क्रीडापरावतिचलौ[5] स्वसुतौ निषेद्धुम् ।
गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोऽनवस्थाम् ॥ २६ ॥
कालेनाल्पेन राजर्षे रामः कृष्णश्च [6]गोव्रजे । [7]अघृष्टजानुभिः [8]पद्भिर्विचक्रमतुरञ्जसा[9] ॥ २७ ॥
ततस्तु भगवान् [10]कृष्णो वयस्यैर्व्रजबालकैः । सहरामो व्रजस्त्रीणां चिक्रीडे जनयन् मुदम् ॥
कृष्णस्य गोप्यो [11]रुचिरं वीक्ष्य कौमारचापलम् । शृण्वत्याः किल तन्मातुरिति होचुः समागताः ॥ २८ ॥

कर्दमक्षमा

अन्वयः—यर्हि अङ्गनादर्शनीयकुमारलीलौ प्रगृहीतपुच्छैः वत्सैः इतः ततः अनुकृष्यमाणौ उभौ प्रेक्षन्त्यः उज्झितगृहाः हसन्त्यः तदबलाः जगृहुः ॥ २५ ॥ तज्जनन्यौ क्रीडापरौ अतिचलौ स्वसुतौ शृङ्गी अग्निदंष्ट्री असिजलद्विजकण्टकेभ्यः निषेद्धुं तज्जनन्यौ गृह्याणि कर्त्तुं अपि यत्र न शेकाते मनसः अलं अनवस्थाम् आपतुः ॥ २६ ॥ राजर्षे अल्पेन कालेन रामः च कृष्णः गोव्रजे अघृष्टजानुभिः पद्भिः अञ्जसा विचक्रमतुः ॥ २७ ॥ ततः तु व्रजबालकैः वयस्यैः सहरामः भगवान् कृष्णः व्रजस्त्रीणां मुदं जनयन् चिक्रीडे कृष्णस्य रुचिरं कौमारचापलं वीक्ष्य समागताः गोप्यः तन् मातुः शृण्वन्त्याः किल इति ह ऊचुः ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतिचलावतिचपलौ तौ शृंग्यादिभ्यो निषेद्धुं गृहोचितानि कर्माणि च कर्तुं यत्र यदा तज्जनन्यौ न शेकाते तदालं मनसोऽनवस्थामापतुरिति गृहसौख्यस्य पराकाष्ठा दर्शिता ॥ २५-२८ ॥

---

१. यर्ह्यागतातिरमणीय-विज. । २. उत्स्मृतगृहा-विज. । ३. जहृषु-श्रीधर. वंशी. सुदर्शन. वीर. विश्व. शुक. ; जगृहु-विज. । ४. दंष्ट्रयहि-वीर. विज. । ५. बलौ-विज. । ६. गोकुले-श्रीधर. वंशी. विज. ; गोव्रजे-वीर. । ७. अकृष्टा-वीर. । ८. विचङ्क्रमतुः-वीर. । ९. ओजसा-विश्व. । १०. न्विष्णुर्वय-विज. । ११. रुचिरा दीनकौमार-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

शृंगिणो गवादयः। दंष्ट्रिणः श्वादयः। असिः खड्गः। द्विजाः पक्षिणः शुकादयः। अनवस्थां बोधैकनिष्ठवदेकाकारतया समाधिवल्लयम्। पराकाष्ठेषु अतः परं गृहिणां न सुखम्। यद्बाललीलादर्शनेन मनस्याह्लाद इति ॥ २५ ॥ न घृष्टानि यानि जानूनि अष्ठीवंति तानि तथा तैः बहुत्वं तूभयापेक्षम्। विचक्रमतुः विचेलतुः। अंजसा शीघ्रम्। २६ ॥ ततः पद्भिश्चलनानंतरम् ॥ २७ ॥ कौमारे चापलं चपलत्वम्। तन्मातुर्यशोदायाः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्चाधिकवयोबलप्रकटनेन क्रीडालोलतया मात्रोरपि मनःप्रेमविह्वलं चक्रतुरित्याह—शृङ्गीति। यतः क्रीडापरौ यतः शृङ्ग्यादीन् धर्त्तुमभिसरन्तौ तेभ्यो निषेद्धुं निवारयितुं यद्वा शृङ्ग्यादिभिः क्रीडापरौ अतस्तेभ्यो निषेद्धुं न शेकतुः "ईदूदेद्द्विवचनं प्रगृह्यम्" (१।१।११) इत्यनेन प्रगृह्यत्वात् पचेले अमू इति वत्सन्ध्यभावेऽपि सन्धिरार्षः कुतः अतिचलौ परमचपलौ तत्र शृङ्गिणो वृषादयः दंष्ट्रिणः कुक्कुरादयः वानरादयो वा असयः खड्गाः पाठान्तरे अहयः सर्पाः खड्गानां सम्वरणादिसम्भवादिदमेव युक्तं द्विजा मयूरादयः स्वशब्देन सदानिषेधेऽन्यस्याशक्यता ताडनादावयोग्यता च तथा शृङ्ग्यादिभ्यो निषेधस्यावश्यकता सा च स्नेहाकुलतया स्वपार्श्वे स्थापनेन च वाङ्मात्रेणेति च बोध्यते तज्ज मना तु तदीयतया जातसक्ते गृहस्य च कृत्यमावश्यकमपि तत एव कर्तुं न शक्यते अत एव मनसः अनवस्थाम् अस्थिरताम् अलमत्यर्थमापतुः एतच्च श्रीभगवत्पराणां व्रजजनानां तेषां तदर्थकर्मणा चित्तास्थैर्य्यमपि चापलाख्यसञ्चारिभावतया स्थायिनं वात्सल्याख्यं भक्त्या दुर्लभं भावं पुष्णन् तत्समाधिनिष्ठातोऽप्युत्कर्षं भजति एवमेव व्याख्यातं गृहसौख्यस्य परा काष्ठा दर्शितेति तदग्रे श्रीब्रह्मस्तुत्यादौ "तावद्रागादयस्तेनाः" इत्यादि, "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" इत्यादिकैमुत्यप्रतिपादकवचनतो "नाविन्दन् भववेदनाम्" इत्याद्यन्यार्थविशानिषेधवचनतो "नेमं विरिञ्चः" इत्यादितद्भावप्रशंसावचनतोपि व्यक्तमेव अतः श्रीरामकृष्णयोरन्योन्यमासक्त्या शोभाभरः श्रीवैशम्पायनेनोक्तः—

तावन्योन्यं गतौ बालौ बाल्यादेवैकतां गतौ। एकमूर्त्तिधरौ कान्तौ बालचन्द्रार्कवर्चसौ ॥
एकनिर्माणनिर्मुक्तावेकशय्यासनाशनौ। एकवेषधरावेकं पुष्यमाणौ शिशुव्रतम् ॥
एककार्यान्तरगतावेकदेहौ द्विधा कृतौ। एकचर्यौ महावीर्यावेकस्य शिशुतां गतौ ॥
एकप्रमाणौ लोकानां देववृत्तौ च मानुषौ। कृत्स्नस्य जगतो गोपौ संवृत्तौ गोपदारकौ ॥
अन्योन्यव्यतिषिक्ताभिः क्रीडाभिरभिशोभितौ। अन्योन्यकिरणग्रस्तौ चन्द्रसूर्याविवाम्बरे॥
विसर्पन्तौ तु सर्वत्र सर्पभोगभुजावुभौ। रेजतुः पङ्कदिग्धाङ्गौ दृप्तौ कलभकाविव ॥
कचिद्भस्मप्रदिग्धाङ्गौ करीषप्रोक्षितौ कचित्। तौ तत्र परिधावेतां कुमाराविव पावकी ॥
कचिज्जानुभिरुद्घृष्टैः सर्पमाणौ विरेजतुः। क्रीडन्तौ वत्सशालासु शकृद्दिग्धाङ्गमूर्द्धजौ ॥
शुशुभाते श्रिया जुष्टावानन्दजननौ पितुः। जनञ्च विप्रकुर्वाणौ प्रहसन्तौ कचित् कचित् ॥
तौ तत्र कौतूहलिनौ मूर्द्धजव्याकुलेक्षणौ। रेजतुश्चन्द्रवदनौ दारकौ सुकुमारकौ ॥

इति ॥ २५ ॥ एवं मुत्कण्ठया युगपदिव वर्णयितुमिच्छुः शीघ्रमेव रिङ्गणपादव्रज्ययोरादिममादिमं भागं वर्णयित्वा पुनस्तत्तल्लीलामाधुरीविशेषस्मरणोल्लासादन्तिममन्तिमं भागमपि वर्णयितुं प्रत्यावर्त्तते कालेनेत्यादिना। अल्पेनेति स्वल्पवयस्यपि बुद्धिबलातिरेकप्रकटनादघृष्टानि भूमिघर्षणमप्रापितानि जानूनि येषु तैः पद्भिः पादैरोजसा गोकुले विचक्रमतुर्बभ्रमतुः अञ्जसेति पाठे अनायासेन बलिष्ठत्वात् गोव्रज इति पाठे गोशब्दस्योक्तिर्धनुर्ज्योतिवत् सा च तस्य मनोहरत्वं पवित्रत्वं च बोधयितुं हे राजसु ऋषे सर्वज्ञेति तल्लीलामाधुरीं मद्विधवत् त्वयाप्यनुभूयत इति भावः ॥ २६ ॥ तदेवं साधारण्येन तयोर्लीलां वर्णयित्वा पुनः श्रीकृष्णसम्बन्धेन रामस्यापि तादृशत्वं व्यञ्जयितुं तस्य विशेषतः सर्वव्रजमनोमोहनलीलावर्णनेन प्राधान्यं वक्तुमाह—ततस्त्विति। तु भिन्नोपक्रमे कृष्णो भगवान् इति स्वयं भगवत्त्वेन स्वतः प्राधान्यं सहराम इति लीलातोऽपि बोधयति अथ च भगवान् निजभगवत्तासारमाधुरीविशेषप्रकटनपरः कृष्णः सर्वजनाकर्षकमाधुर्यः सहरामस्तस्याप्याकर्षकः रामेति तस्य परमरमणसाहाय्यादत्रैव तन्निरुक्तिमर्य्यादापर्य्याप्तिरिति भावः। तत्तादृशस्सन्नित्यर्थः। वयस्यैः सखिभिः सहेति मिथः प्रणयविशेषेण तादृशलीलासौष्ठवं दर्शितं तत्र योगवृत्त्या समवयस्त्वं रूढार्थशक्त्या समानगुणजातिशीलव्यवसायवेषत्वं च ध्वनितं तथैव सखित्वोपपत्तेः तत्र हेतुः व्रजस्य तदात्मीयत्वेन प्रसिद्धस्य तस्य व्रजविशेषस्य बालकैः चिक्रीडे चिक्रीड ॥२७॥ तास्तत्क्रीडोल्लासितचित्ताभङ्ग्या तन्मातुः स्वेषामपि प्रेमविनोदविशेषाय मिथः सम्मन्त्र्य तस्यां चुक्रुशुरित्येवेत्याह—कृष्णस्येति। गोप्यः पुरन्ध्र्यो वृद्धाश्च रुचिरं मनोहरमिति प्रेमकौतुकमेव व्यक्तं शृण्वन्त्याः इति तस्यास्तत्रावहितत्वं सूचितं यद्वा नित्यं शृण्वत्या अपि समागताः समवेत्यागताः ह स्फुटम् ऊचुः चुक्रुशुः किलेत्यनृते वस्तुतो न चुक्रुशुरित्यर्थः। तादृशञ्च चापल्यं तासां मुख्योक्त्यैवातिमनोहरं स्यादिति मुनीन्द्रेणापि तद्द्वारैव वर्णितमिवेति ज्ञेयम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्चाधिक-वयोबलप्रकटनेन क्रीडा-लोलतया मात्रोरपि मनश्चञ्चलं चक्रतुरित्याह—शृंगीति। यतः क्रीडापरौ, अतः शृंग्यादीन् धर्त्तुमभिसरन्तौ, तेभ्यो निषेद्धुं निवारयितुम्, यद्वा, शृंग्यादिभिः क्रीडापरौ, अतस्तेभ्यो निषेद्धुं न शेकतुः। कुतः? अतिचलौ परमचपलौ, तत्र शृंगिणो वृषादयो दंष्ट्रिणो माज्जरिकुक्कुरादयो वानरादयो वा, असयः खड्गाः, पाठान्तरे, अहयः सर्पाः, खड्गानां सम्वरणादि—सम्भवादिदमेव युक्तम्, द्विजा मयूरादयः, स्वशब्देन निषेधेऽन्यस्याशक्यतायोग्यता च, तथा शृंग्यादिभ्यो निषेधस्यावश्यकता। स च स्नेहाकुलतया स्वपार्श्वं स्थापनेन, न च वाङ्मात्रेणेति च बोध्यते। अतएव मनसोऽनवस्थामस्थिरतामलमत्यर्थमापतुः। इत्थं बाल्यचाञ्चल्य-मनोहरपुत्रवत्त्वेन तथावश्यकधनरक्षण-कुटुम्बभरण विविधोपभोगसाधनाद्गृहव्यापारावेक्षणेन च व्याकुलचित्ततया गृहसौख्यस्य पराकाष्ठा दर्शिता, यतोऽपुत्रदरिद्रगृहिणामेव पुत्र-वित्ताद्यर्थचेष्टाराहित्येन यतीनामिव मनः स्थिरं स्यात्, वस्तुतस्तु श्रीभगवत्पराणां व्रजजनानां तेषां तदर्थककर्म्मणां चित्तास्थैर्य्यमपि समाधिनिष्ठातोऽप्युत्कर्षं भजतीत्यग्रे श्रीब्रह्मस्तुत्यादौ (भा. १०।१४।३६) 'तावद्रागादयः स्तेनाः' इत्यादि-वचनतो व्यक्तमेव, तत्र च तयोरन्योऽन्यमासक्त्या शोभाभरः श्रीवैशम्पायनेनोक्तः (हरिवंशे विष्णु-पु.-७।२-११)—॥ २५ ॥

'तावन्योऽन्यं गतौ बालौ बाल्यादेवैकतां गतौ। एकमूर्त्तिधरौ कान्तौ बालचन्द्रार्क-वर्च्चसौ॥
एकनिर्म्माण—निर्मुक्तावेकशस्यासनाशनौ। एकवेशधरावेकं पुष्यमाणौ शिशुव्रतम्॥
एककार्य्यान्तरगतावेकदेहौ द्विधा-कृतौ। एकचर्य्यौ महावीर्य्यावेकस्य शिशुतां गतौ॥
एकप्रमाणौ लोकानां देववृत्तौ च मानुषौ। कृत्स्नस्य जगतो गोपौ सम्वृत्तौ गोपदारकौ॥
अन्योऽन्यव्यतिषक्ताभिः क्रीडाभिरभिशोभितौ। अन्योऽन्यकिरणग्रस्तौ चन्द्रसूर्य्याविवाम्बरे॥
विसर्पन्तौ तु सर्व्वत्र सर्पभोग-भुजावुभौ। रेजतुः पंक-दिग्धांगौ दृप्तौ कलभकाविव॥
क्वचिद्भस्म-प्रदिग्धांगौ करीषप्राक्षितौ क्वचित्। तौ तत्र परिधावेतां कुमाराविव पावकी॥
क्वचिज्जानुभिरुद्घृष्टैः सर्पमाणौ विरेजतुः। क्रीडन्तौ वत्सशालासु शकृद्दिग्धांगमूर्द्धजौ॥
शुशुभाते श्रिया जुष्टावानन्दजननौ पितुः। जनञ्च विप्रकुर्व्वाणौ विहसन्तौ क्वचित् क्वचित्॥
तौ तत्र कौतुहलिनौ मूर्द्धजव्याकुलेक्षणौ। रेजतुश्चन्द्रवदनौ दारकौ सुकुमारकौ॥' इति।

अधुना जानुरिंगणलीलां संवृत्य रिंगणविशेषलीलां भेजतुरित्याह—कालेनेत्यल्पेनेति स्वल्पवयस्यपि बलातिरेकप्रकटनात्। न घृष्टानि भूमिघर्षणमप्राप्तानि यानि जानूनि, तैरिति पूर्व्वमनुक्तत्वादत्रैव रिंगणविशेषलीलोक्ता। ननु, तर्हि रिंगणलीलायामेव वत्सपुच्छग्रहणादिकं दुर्घटं नातिशोभावहञ्च? तत्राह,—पद्भिः पादैश्च, बहुत्वं द्वयोः पादाब्जचतुष्कत्वात्। गोकुले ओजसा बलेन, अतएव विशेषेण चक्रमतुर्बभ्रमतुरिति वत्सपुच्छग्रहण-लीला पदविक्रमण-लीलायामेव ज्ञेयेति भावः। अञ्जसेति पाठे अनायासेन, बलिष्ठत्वात्। कृष्ण इति तल्लीलया चित्ताकर्षणात्, अग्रजेन सहैकदैकपादविक्रमणेन तस्मादपि बलिष्ठता बोधितैव। गोव्रज इति पाठे गवामेव प्राधान्यात्तासामेवावासे। हे राजसु ऋषे! सर्व्वज्ञेति यदर्थं सा लीला, तत्तत्त्वं त्वया ज्ञायत एवेति भावः॥ २६ ॥

तदेवाभिव्यञ्जयन् वयोबल-विशेषप्रकटनेन मधुरक्रीडया तस्यावतार-मुख्यप्रयोजनमाह-ततश्चेत्यादिना। अतएवात्र तस्यैव प्राधान्यादादौ पृथङ्निर्देशः, श्रीरामस्य च गौणत्वात् सहराम इति साहित्यमात्रमुक्तम्। त्वर्थे चकारो भिन्नोपक्रमे। भगवान् निज भगवत्ता सार प्रकटनपरः सन्नित्यर्थः। वयस्यै प्रायः समवयस्कतया सखित्वं प्राप्तैर्यतो व्रजस्य बालकैः सहेति क्रीडादिशोभाविशेष उक्तः। चिक्रीडे चिक्रीड वत्समोचनादिक्रीडा चक्रे। व्रजस्त्रीणामविशेषेण सर्व्वासामेव व्रजवर्त्तिनीनां पुरन्ध्रीणां वृद्धादीनाञ्च॥ २७ ॥

त एतु क्रीडोल्लासितचित्तास्तन्मातुः प्रीतिभरं जनयितुं स्वयञ्च सुखविशेषमनुभवितुमन्योऽन्यं संमन्त्र्य तस्यां चुक्रुशुरित्याह—कृष्णस्येति। गोप्यः पुरन्ध्र्यो वृद्धाश्च रुचिरं मनोहरमिति केवलं प्रेमकौतुकविशेषेणैवेति बोधितम्। शृण्वन्त्या इति तस्यास्तत्रावहितत्वं सूचितम्, यद्वा, तस्य तच्चापलं शृण्वत्या अपि समागताः स्व-स्वगृहात् समवेत्यागताः सत्यः। ह स्फुटमुचुश्चुक्रुशुरित्यर्थः। किल प्रसिद्धौ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

शृङ्गिणो विषाणिनः दंष्ट्रिणः श्वप्रभृतयः असिः खड्गः द्विजाः मयूराद्याः गृह्याणि गृहकार्याणि मनसोऽनवस्थानम्॥ २५ ॥ ईषद् घृष्टजानुभिः पद्भिः विचक्रमतुः कदाचिज्जानुभ्यां कदाचित्पद्भ्यां गमनं चक्रतुरित्यर्थः॥ २६–२८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नितरां क्रीडासक्तावतिचलौ इति पाठे क्रीडापरौ अतएवातिचलौ सर्वतश्चरन्तावतिबलौ इत्यपि पाठः शृङ्ग्यादिभ्यः स्वसुतौ निषेद्धुं वारयितुं गृहाणि गृहोचितानि कर्माणि कर्तुं च यदा तयोर्जनन्यौ न शेकाते नाशक्नुतां निषेधगार्ह्ये युगपत् कर्त्तुमसमर्थेऽभूतामित्यर्थः। शृङ्गिणो हरिणादयः दंष्ट्रिणः शुनकादयः द्विजा मयूरादयः पक्षिणः तदा ते मातरावलं नितरां मनसोऽनवस्थामकुशलतां प्रापतुरिति गृहिणां सौख्यस्य परा काष्ठा प्रदर्शिता ॥ २५ ॥ हे राजर्षे ? आकृष्टजानुभिः पद्भिर्विचक्रमतुः कदाचित् जानुभ्यां क्रमणं कदाचित्पद्भ्यां गमनं चेति मिश्रञ्चक्रतुरित्यर्थः ॥ २६ ॥ ततो वयस्यैस्तुल्यवयस्कैर्व्रजबालकैः सह रामेण सहितः कृष्णो व्रजस्त्रीणां हर्षं जनयन् चिक्रीडे ॥ २७ ॥ रुचिरं सुन्दरं कौमारप्रयुक्तं चापल्यमवलोक्य तस्य कृष्णस्य मातुः यशोदायाः शृण्वन्त्याः सत्याः इति वक्ष्यमाणप्रकारेणोचुः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

शृङ्गिणो गवादयः दंष्ट्रिणः सारमेयप्रभृतयः गृहाणि गृहकर्माणि अनवस्थां व्याकुलताम् ॥ २५ ॥ न घृष्टानि अघृष्टानि तानि च जानूनि येषां ते तथा तैः विचक्रमतुः पादविक्षेपं चक्रतुः ॥२६–२७॥ रुचिरं च तदुदनिम् उदारञ्च तत्कुमारभावोचितं चपलत्वं यासु तास्तथा तन्मातुः शृण्वत्याः ता इति वक्ष्यमाणप्रकारेणोचुः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अनवस्थां वात्सल्यपोषकचापलाख्यसञ्चारिभावं तदीयगृहकर्म्मणोऽपि तत्प्रेममयत्वेन स्थापितत्वात् ॥ २५ ॥ पुनरिङ्गणपादव्रज्या लीलयोरन्तिममन्तिमं भागं वर्णयितुमाह कालेनाल्पेनेति ॥ २६ ॥ साम्येन द्वयोर्लीलामुक्त्वा विशेषतः श्रीकृष्णलीलामाह—ततश्चेत्यादिना ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अतिचलौ तौ शृङ्ग्यादीन् धर्त्तुं चलन्तौ तैः सह क्रीडितुमिच्छन्तौ वा तौ तेभ्यो निषेद्धुं गृहोचितानि कर्माणि च कर्त्तुं यत्र यदा तज्जनन्यौ न शेकतुः तदा मनसोऽनवस्थां चापल्यं वात्सल्यस्थायिपोषकसञ्चारिभावम् आपतुः तत्र शृङ्गिणो वृषादयः दंष्ट्रिणः कुक्कुरादयः द्विजाः पक्षिणः ॥ २५ ॥ अघृष्टानि भूमिघर्षणमप्राप्तानि जानूनि येषु तैः पद्भिर्जानुसङ्घर्षणं विनैवेत्यर्थः। ओजसा अञ्जसेति च पाठः ॥ २६ ॥ सहराम इति गव्यमोषणादिलीलायां कृष्णस्यैव प्राधान्यात् ॥ २७ ॥ रुचिरं सुखदं हन्तैतादृशं सुखमस्मत्प्रियसख्या श्रीयशोदया न प्राप्तं तदस्मचाक्षुषमेतत्तस्याः श्रावणमप्यस्त्विति तत्र गत्वा शृण्वत्याः शृण्वन्त्यै स्वपुत्रचरित्रश्रवणार्थं गृहकार्य्यशतमपि त्यजन्त्यै तन्मात्रे उपालम्भनदानमिषेण परमानन्दमेव दातुमिति भावः ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुनर्मात्रोः भाग्यातिशयं द्योतयन् बाललीलामाह—शृङ्गीति, अतिचलौ अतिचपलौ यतः क्रीडापरौ क्रीडासंसक्तौ शृङ्ग्यादिभ्यः स्वसुतौ निषेद्धुं वारयितुं गृहाणि गृहोचितानि कृत्यानि यत्र यदा तयोर्जनन्यौ न शेकाते नाशक्नुतां तदा अलमत्यर्थं मनसोऽनवस्थामस्वास्थ्यं प्रापतुः आश्चर्यभूता तयोर्भगवत्कृपापात्रतेति भावः ॥ २५ ॥ अन्तःपुराद्बहिर्निर्गत्य तत्रत्यानां प्रमोदं जनयन् सहरामः श्रीकृष्णश्चिक्रीड इत्याह—कालेनेति द्वाभ्याम् ॥ २६–२७ ॥ अथ बालकृष्णक्रीडाकृष्टचित्तानां गोपाङ्गनानां तच्चापल्यनिवेदनव्याजेन तन्मात्रग्रे तदपूर्वप्रेमसूचकं सम्भाषणमाह– कृष्णस्येति सार्द्धैस्त्रिभिः ॥ २८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अतिचलौ तौ शृङ्ग्यादीन् धर्त्तुं चलन्तौ तेभ्यो निषेद्धुं निवारयितुं गृहाणि च कर्त्तुं यदा तज्जनन्यौ न शेकतुस्तदा मनसोऽनवस्थाञ्चापल्यमापतुः कथमनयोः सम्भालनं स्यादिति तत्र शृङ्गिणो गवादयः दंष्ट्रिणो मर्कटादयः द्विजाः कङ्कादयः ॥२५॥ न घृष्टानि जानूनि येषु तैर्जानुघर्षणं विनेत्यर्थः ॥२६॥ ततो मातृप्रमोदविधानानन्तरं बालकान् गोपीश्च प्राचोदयदित्यर्थः ॥२७॥ गोप्यो दधिचौर्यादिरूपं तस्य कौमारचापल्यं वीक्ष्य आनन्दिताः शृण्वन्त्यास्तच्छ्रवणाय गृहकृत्यान्यपि त्यजन्त्यौ तन्मात्रे श्रीयशोदायै उपालम्भमिषेण तदानन्दं दातुं प्रोचुः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शृङ्गिणो गोमहिष्यादयोऽग्निर्दंष्ट्रिणः सारमेयादयोऽहयो द्विजाः पक्षिणो जालकं च कण्टकाश्च तेभ्यः क्रीडापरौ स्वसुतावतिबलौ निषेद्धुं गृहाणि गृहकर्माण्यपि कर्तुं यत्र यदा तज्जनन्यौ न शेकाते तदा मनसोऽनवस्थां चाञ्चल्यमलमवापतुः। धार्यौ कुमारौ वा कार्यं गृहकर्मेति भ्रान्ते इति भावः। शेकात आपतुरित्यत्र मणीवादिकार्यं ज्ञेयम्। अनेन च बालयोरेव प्रगृह्यता।

नात्रेति ध्वनयति । अतिबालाविति पाठेऽपि बलपरिवर्तन इतिस्मरणादतिचलावित्येवार्थः शृङ्गी वत्सासुरोऽग्निर्दावानलो दंष्ट्री केशी अहिः कालियो जलं यामुनमिन्द्रवृष्टं वा । द्विजो बककण्टकाश्च क्षुद्रशत्रवश्च तैरिति भाविनं व्यर्थीभवन्तमनर्थं ग्रन्थकृत्कटाक्षयतीति मन्तव्यम् । कण्टकः क्षुद्रशत्रौ चेति विश्वः ॥ २५ ॥ अघृष्टजानुभिर्न घृष्टानि जानूनि चत्वारि येषां तैः पद्भिरञ्जसा विचक्रमतुः । अघृष्टजानुभिः कैश्चिद्वयस्यैरिति वा ॥ २६ ॥ व्रजस्त्रीणां मुदं जनयंश्चिक्रीडे । चिक्रीड क्वचित्तथैव पाठः । वृतानतिवृतेः स सुन्दरः ॥ २७ ॥ कृष्णस्य गोप्यो रुचिरं वीक्ष्य । कौमारचापलमिति पाङ्क्तः पाठः । रुचिरादीनकौमारचापला इति पाठे रुचिरमदीनकौमारचापलं यासु ता इति ज्ञाततस्कर इति गोपीविशेषणम् । समागता मिलिता इति वक्ष्यमाणप्रकारेण । मातुः शृण्वन्त्याः । जनन्या इत्यनुक्त्वोक्त्वा मातुरिति ज्ञातुः कृष्णस्य शृण्वतः । उपसर्गाणां धातुलीनद्योतकतापक्षे मातुर्निर्मातुरिति वाऽर्थमसूचयदिति मन्तव्यम् ॥ २८ ॥

श्रीसुबोधिनी

एवं लीलात्रयं फलान्तं निरूपितं, स्वतःस्थितयोर्लीला आह **यर्ह्यङ्गने**तित्रिभिः, अत्र सर्वा एव स्त्रियोधिकारिण्यः, अन्यासां सामान्यतो निरोधाभावे तत्सङ्गदोषेण जनन्योर्निरोध उच्यमानो न भवेत्, राजसभावास्तु कोटिशो भवन्ति तान् सर्वानेव सङ्ग्रहीतुं **यर्ह्यङ्गनादर्शनीयकुमारलीला**वित्युक्तं, **अङ्गना**स्तु तरुण्यस्तासां **दर्शनीया कुमारलीला** ययोः, तास्त्रिविधा भवन्ति **कौतुकाविष्टा रसाविष्टाः कामाविष्टा**श्चेति, यदैव तौ तासां **दर्शनीयलीलौ** तदैवातिमुग्धत्वख्यापनार्थं वत्सपुच्छावलम्बनेन स्थितौ भवतः, लौकिकाभिनिवेशभयाच्छुकेन न विशेषत उक्तः, **कुमारो**त्र द्विवार्षिकः, **कुत्सितो मारो** यस्मादिति कन्दर्पकोटिलावण्याधिकसुन्दर उक्तस्तद्गतोत्कृष्टभावा अप्यस्मिन् निरूपिताः, **अङ्गनानां दर्शनीय**भावनार्थं जातानुभावानां वा निर्भयेन दर्शनार्थं **यर्ही**ति, तृणावर्तवधपर्यन्तमन्यदा वा यावदयं भावो न जात इति तावन्निरन्तरदर्शनं न जातमिति ज्ञापितं, दृष्टिस्पर्शसम्बन्धैस्त्रिविधाः सुखदा उक्ताः, एतादृशा**वङ्गनादर्शनीयकुमारलीलौ**, **अन्तर्व्रज** इति, व्रजमध्ये सर्वासामेव दर्शनयोग्यस्थाने, **तदबला** व्रजबाला अन्यत्र गमनयोग्यतारहिताः, **वत्सैरितस्ततोनुकृष्यमाणौ जगृहु**रितिसम्बन्धः, **वत्सा** गोपुत्राः, भगवाँल्लीलार्थं कर्माङ्गदेवताभावं तदवलम्बनं वा करोति, ते तु मूढा इतस्ततः प्राकृते वैकृते च संयोजयन्ति यथा गर्दभपादच्छेदनं कृत्वा "विष्णवे शिपिविष्टाय जुहोती" "त्यतिरिक्तस्य शान्त्या" इतिफलार्थं, एतेपि **वत्सा** भगवता **प्रकर्षेण गृहीतं पुच्छं** येषां द्वयोरेकस्य वा **प्रकर्षेण ग्रहणा**न्न तेषां धावनं, प्रदर्शनार्थमेव यतो मुग्धभावः, अतो न स्खलनमत्र, **उभावि**ति भगवान् स्वत आवेशतश्च क्रीडतीति वक्तुं, **अनुकर्षणं** शनैः शनैः कर्षणं, भगवानपि वत्समाकर्षति वत्सतर्यश्च भगवन्तं, अतो वत्सस्यापि नेष्टगतिः, अत **इतस्तत** आकर्षणं, **वत्सै**रितिबहुवचनं धृतस्य पलायनेपि पुनरन्यग्रहणार्थं, एवं पराधीनभगवद्गतिं दृष्ट्वा **प्रेक्षन्त्य** एव स्थिताः, **अत एव तात्पर्ययुक्ता उपनिषद इव स्थिताः**, नत्वन्याधीनत्वेनान्यथा ज्ञातवत्यः, एवं कर्मभ्यस्त्याजयित्वा स्वार्थं ग्रहणमाश्रमपरित्यागव्यतिरेकेण न सम्भवतीति गृहं विडालादिभिरप्युपद्रुतं परित्यज्य तदवेक्षामकृत्वा **जगृहुः, हसन्त्य** इति, अस्मत्परिग्रहे नैवमितस्तत आकर्षणं भवति न वा स्खलनसम्भावना, **प्रेक्षन्त्यो** ज्ञानपरा **उज्झितगृहा** विरक्ता **हसन्त्यः** फलार्थिन्यस्त्रिविधानां ग्रहणार्थमुक्तं, ग्रहणानन्तरं विनियोगस्तु पूर्वमेव कथितः, सम्भूयग्रहणपक्षे स्वतोपि सर्वतो नयनं सम्भवति, **उज्झितगृहा** इतिवचनादन्यत्रापि नयनं, **हसन्त्य** इत्यपि तथा, किं बहुना सर्वप्रकारेण **जगृहुः**, सर्वासामेव यथा ग्रहणं भवति तथा भगवान्, **गोपुच्छधारणलीलेयं** पराधीना निरूपिता ॥ २५ ॥ स्वतो गतिलीलामनेकविधामाह **शृङ्गी**ति, गोपिकास्तु स्वत्वभावदोषरहिताः, अलौकिकभावेनापि वशीकृताः, विचाराभावाद् रसेनापि तारुण्यात् कौतुकेनाप्यन्यार्थं च निरूपिताः शीघ्रमेव विस्मृतप्रपञ्चा भगवदासक्ता निरूपिताः, यशोदारोहिण्यौ तु तद्विपरीते इति तयोस्तदुभयसम्पादनार्थं षड्गुणैः स्वेन च सप्तधा लीलां कृतवान्,

इष्टस्य दुष्टसम्बन्धे शिष्टः पुष्टिं विमुञ्चति । नान्यथेति हरिः प्रीतः सत्यः क्रूरगतो भवेत् ॥ १ ॥
शृङ्गिणो दंष्ट्रिणश्चैव पक्षिणश्च विघातकाः । चेतनास्त्रिविधा एव ततोन्ये तु चतुर्विधाः ॥ २ ॥
कृत्रिमाः सहजास्तेपि खड्गाग्निजलकण्टकाः ॥ २½ ॥

शृङ्गिणो गावः, **अग्नि**र्धूमार्थं स्वेदार्थं वा कृतः, **दंष्ट्रिणो** मर्कटाः, **असिः** खड्गादिसाधनानि, **जलं** कूपगर्तादिस्थितं, कलशादिस्थितं वा पातनात्, **द्विजाः** पक्षिणः शुकादयः, **कण्टका**नि च्छित्वा स्थापितानि परितो वेष्टनरूपाणि, तेभ्यो निवारणं वचनान्न भवति, आज्ञाकारित्वेपि चाञ्चल्यात्, वस्तुतस्त्वाज्ञां दातुमपि न प्रेरयति उपद्रवज्ञाने निर्बन्धेन निवारणं, तत् तु कर्तुमयुक्तमित्याह **क्रीडापरा**विति, **क्रीडैव परोत्कृष्टा** नियामिका ययोर्बालकयोः, तर्हि क्रीडासाधनानि सम्यक्स्थले कृत्वा देयानीति चेत् तत्राहातिचलाविति, **अत्यन्तं चलौ,** तर्ह्यन्यः कश्चित् तदवेक्षकः स्थाप्य इति चेत् तत्राह **स्वसुता**विति, स्वेनैव सूताविति तदर्थं क्लेशसहनात् स्नेहाधिक्याच्च नान्यविनियोगं कुरुतः, क्रिययैव च **निषेधः** कर्तव्यस्ततस्तत आदाय सम्यक्स्थाने स्थापनीयौ, तथा प्रतिक्षणं क्रियमाणे गृहकार्यं तयोरपि भोजनस्नानादिनिमित्तकार्यं न सिध्येत् तदाह **गृहाणि कर्तुमपी**ति

गृहेवश्यकर्तव्यानि **गृहाणि**, लौकिकनिष्ठता भगवन्निष्ठता च परस्परं विरुद्धा, आसक्तिस्तुल्या मध्यलीलेवेति, पञ्चमलीलां तु वक्ष्यति, तदर्थं सर्वपरित्यागं, उभयोस्तुल्यत्वख्यापनायापिशब्दः यदा **न शेकाते** तदा **मनसोनवस्थामापतुर्वैयग्र्यं** चिन्तां च प्राप्तवत्यौ, तयो**र्जनन्या**विति ताभ्यां सह क्रिया निषिध्यत इति ज्ञापितं, क्षणमपि मनसो नैकत्र स्थैर्यं तयोर्जातमित्यर्थः ॥२६॥ एवं मात्रोर्निरोधार्थं बहुविधां लीलामुक्त्वा स्वतन्त्रतया स्थितस्य भूमेर्मर्दनक्लेशनिवृत्त्यर्थं पद्भ्यां संवाहयन्ताविव गतिविलासं कृतवन्तावित्याह **कालेनाल्पेनेति**, यदर्थं तत् कर्तव्यं तत् प्रयोजनमल्पमित्यल्पे **कालेन गोव्रजे पद्भिर्विचक्रमतुः**, **अञ्जसानायासेनैव** नान्यावलम्बनापेक्षा **कालो** गत्यात्मक इतिक्रीडायामिवात्रापि करणता, **अल्पस्य** कालस्य कोमलत्वात्, कोमलचरणस्पर्शे भूमेः खेदो गच्छतीत्यल्पत्वमुक्तं, **राजर्षे** इत्युभयधर्मत्वेन सम्बोधनमग्रिमचरित्रश्रवणाधिकारबोधकं निरोधानुसन्धानार्थं च **रामः कृष्णश्चे**तिनामग्रहणं रत्युत्पादनसामर्थ्यजननायान्तःस्थितरूपेण बहिःपरमानन्दविषयरूपेण च भूमेः सुखदानार्थं, स्वतन्त्रतयोभयोस्तथात्वाय भिन्नतया निरूपणं चकारस्तूभयसमुच्चयार्थः, विषयस्यान्तर्नयने मनसो बहिरानयने च विनियोगात्, **गवां व्रज** इति खुराघातक्लेशः स्पष्टतया तत्र निरूपितः, **जान्वाघर्षणे**नैव दैत्यवधेग्रिमकार्यं व्यर्थं स्यादिति **पद्भि**रिति, अनेकधा पादस्थापनैर्विशेषेण **चक्रमतुः**, "छन्दसि लुङ्लङ्लिट" इति**स्मृतेः**, भगवत्क्रियाया नातीतत्वं सर्वथा ज्ञातव्यम् ॥ २७ ॥

एवं राजसीं लीलां कृत्वा लीलान्तरं कृतवानित्याह ततस्त्वितित्रिभिः, राजसतामसीं तामसराजसीं च स्वतो वक्तुमनुचितां मत्वान्यमुखेन निरूपयितुं मध्ये वाक्यान्तरं ततश्चतुर्भिर्निरूपितं भवति, एवं भूमिक्लेशनिवृत्त्यनन्तरमक्लिष्टभूमौ स्वांशैर्बालकैः सह महाराजलीलां कृतवानित्याह **ततस्त्विति**, **तु**शब्दः पूर्वलीलाव्यावृत्त्यर्थः, नातः परं परतन्त्रलीला, स्वातन्त्र्ये सामर्थ्यार्थमाह **भगवानिति**, आवेशिनः स्वातन्त्र्ये दौर्बल्यात् **कृष्ण** एवोक्तो **रामस्तु सह**भावेन, एकेन कालेन भगवत्सेवकेन ते गृहीता इति तैः सह क्रीडेति ज्ञापयितुं **वयस्यै**रित्युक्तं, समानं वयो येषां ते **वयस्याः**, देशोप्येक इत्यपि **व्रजबालकै**रिति, क्रीडायां **बाला** मुख्याः, **रामस्तु** स्वान्तर्निविविशतीति **सहराम** इत्युक्तं, अत्र लीलायां साक्षान्निरोधो व्रजस्त्रीणामेव, तासामेव तथात्वात्, ज्ञानद्वारा यशोदायास्तत्र सर्वथागृहीतपरित्याजनार्थं लीलां कुर्वन्नादौ लौकिकप्रकारेण तासामनुरागं जनितवानित्याह **व्रजस्त्रीणां मुदं जनयन्निति**, **व्रजसम्बन्धान्निरोध** आवश्यकः, ययैव क्रीडया यथा कृतया तासां सन्तोषो भवति, न तु स्वसामर्थ्येन, अन्यथा प्रयोजनत्वेन **करणे** तन्निर्देशो न स्यात्, निरोधजनकत्वं स्वस्यैवेति स्वधर्मत्वेन निर्दिष्टं, कार्यसाधनत्वेन **बालकाना**मुपयोगो **रामस्य रक्षकत्वेन**, स्वतः सन्तोषजननं, रासलीलायां च स्वयं राजा मन्त्री रामः सेवका बालका इति यावत्यो गोप्यो यादृग्भावापन्नास्तत्तदनुगुणां लीलामनन्तामेव भगवान् कृतवानित्यर्थः ॥ २८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गृहाणि कर्तुमित्यत्र, पञ्चमलीलायामिति । जन्मप्रकरणयुक्तं फलप्रकरणं पञ्चममिति तत्रोक्ता सा पञ्चमीति ज्ञेयम् । **ततस्त्विति त्रिभिरिति** । ततस्त्वित्यस्मादग्रिमैस्त्रिभिरित्यर्थः । तद्भाववतां निरोधहेतुत्वेन लीलायामपि ते गुणा उपचर्यन्ते॥२५॥ **व्रजस्त्रीणां मुदं जनयन्नित्यत्र, अन्यथेति** । तन्निर्देशो न स्यादित्यनेन सम्बध्यते । अन्यथेत्यस्यैव विवरणं शिष्टेन । तथा चानुषङ्गिकं फलं व्रजस्त्रीणां मुत्करणम्, न तु तदेकप्रयोजनत्वेन लीलाकरणमिति चेत् स्यात्, तदा 'व्रजस्त्रीणां मुदं जनय'न्निति शुको न वदेदित्यर्थः। अनावश्यकत्वादिति भावः। निरोधस्यात्रोद्देश्यत्वेनापि तथा मन्तव्यमिति हृदयम्। तर्हि तद्धर्मप्राधान्यात् ता मुमुदिर इति वदेन्न तु प्रभुप्राधान्येनेति चेत्, तत्राह **निरोधजनकत्वं स्वस्येति** ॥ २६–२७–२८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

यर्ह्यङ्गनेत्यत्राधिकारिण्य इति निरोधाधिकारिण्यः, तासां निरोधप्रयोजनमाहुरन्यासामित्यादि, **राजसभावा** इति रसोद्दीपका भावाः, **जातानुभावानामिति**, अत्र ह्यङ्गना द्विविधा **जातभगवदनुभावास्तद्रहिताश्च**, तथा चैतावत्पर्यन्त**मजातानुभवानां** ननान्द्रादीनां भयेन पूर्वं ताभिरहर्निशं **दर्शनं** कर्तुं **न** शक्तमिदानीं तु तासां ननान्द्रादीनामपि तथात्वेन तदिष्टसिद्धिरप्रत्यूहेतिभावात्, **त्रिविधा** इति भगवल्लीलेत्यर्थः, **अन्यत्र गमनयोग्यतारहिता** इति भगवदेकनिष्ठा इत्यर्थः, वत्सपुच्छावलम्बनतात्पर्यमाहुर्भगवानित्यादि, **भगवांल्लीलार्थं कर्माङ्गवदंशः शिपिविष्टो** "यज्ञो वै विष्णुः पशवः शिपि"रितिश्रुत्यन्तरात् पशुस्वामी कश्चित् **कर्माङ्गदेवता** तद्भावं करोति**तदवलम्बनं कर्माङ्गावलम्बनं वा करोती**ति ते **कर्माङ्गभूता मूढाः** पुरुषास्त्वितस्ततः सार्वविभक्तिकस्तसिर्यत्तत्फलार्थं **प्राकृते वैकृते** च कर्मणि तां देवतां **संयोजयन्ति** तत्रोदाहरणमाहुर्यथेत्यादि, **यथोपाकृतायां** वपायां **गर्भदर्शने** सति **गर्भस्य** दक्षिणं **पूर्वपादं** प्रच्छिद्य "**विष्णुं शिपिविष्टं** यजती'ति कल्पसूत्रात् क्रमेण **गर्भपादच्छेदनं कृत्वा 'विष्णवे शिपिविष्टया जुहोती**"'तिश्रुत्या होमविधान "मपि वा एतस्य यज्ञ ऋध्यते यस्य हविरतिरिच्यते यः पशोर्भूमा या पुष्टिस्तद्विष्णुः शिपिविष्टोतिरिक्त एवातिरिक्तं दधात्यतिरिक्तस्य शान्त्या" इति **फलार्थमुक्तं**, तथा च "फलमत उपपत्ते"रितिन्यायेन फलं ददद् भगवान् **कर्माङ्गदेवताभावं** प्राप्य **कर्माङ्गद्रव्याद्यवलम्बनं वा कृत्वा मूढानां प्राकृतं वैकृतं** च ददाति **न तु स्वरूपेणेति** बोधितं, **एवं कर्मभ्य** इत्यादिना यदुक्तं तत्तात्पर्यं टिप्पण्यामाहुरुज्झितेत्यादि, तथा च मर्यादामार्गानुसरणात्

तदानुषङ्गिकमित्यर्थः, शेषं स्फुटम् ॥ २५ ॥ शृङ्गीत्यत्र ननु "तन्मातरा"वित्यत्र प्रमोदात्मकफलकथनेन मातृचरणनिरोध उक्तस्ततो "यर्हीं"त्यत्र मातृचरणानां निरोधार्थमन्यासामपि प्रासङ्गिको निरोध उक्तस्ततः पुनरपि मातृचरणानां निरोध उच्यते तत्र को विशेष इत्याकाङ्क्षायामाहु**र्गोपिकास्त्वि**त्यादि, **स्वत्वभावे** गृहविषयकस्वत्वभाव इत्यर्थः, **रसवशेनापी**ति **वशीकृता** इति पूर्वेणैव **सम्बन्धः**, **कौतुकेनापी**त्यत्रापि तथा, **अन्यार्थं च निरूपिता** इति साधारण**कार्यार्थं** नियुक्ताः, तथा चैवं षड्भिर्हेतुभि**र्भगवदासक्ता निरूपिता** इत्यर्थः, **तद्विपरीत** इत्युक्तषड्धर्मरहिते, **तदुभयसम्पादनार्थ**मिति दोषाभावालौकिकभावसम्पादनार्थं, ननु यशोदादिनिरोधस्य प्रकारान्तरेणापि सिद्धत्वात् स्वयं दुष्टेषु गत्वा निरोधकरणे को हेतुस्तत्राहुरिष्टस्येत्यादि, अभ्यर्हितत्वेनेच्छाविषयस्य तत्क्लेशोत्पादकस्य **दुष्टस्य** संसर्गे सम्भवति सति **शिष्टः** स्वत्वादिधर्मवान् निरोधाधिकारी **पुष्टिं** गृहादावतिपोषणं तदासक्तिमितियावत् तां **विमुञ्चति** विशेषेण त्यजति **नान्यथा** प्रकारान्तरेण न त्यजतीतिहेतोः **सत्यरूपः प्रीतो हरिः** कूलनिकटे **गतोभवत्**, न चैतावत्करणे किं प्रयोजनमत उक्तं **हरिरि**ति, तथा सति सर्वेषामेव तथा कुतो न करोतीत्यत उक्तं **प्रीत** इति, ननु प्रीतत्वेपि प्रकारान्तरेण निरोधः कर्तव्यो न तु स्वविरोधेनेत्यत उक्तं **सत्य** इति, तथा च स्वभावान्यथाकृत्यभावेन यदा लौकिकप्रकारान्तरेण तत् सिद्धं न दृष्टवांस्तदा ब्रह्मवाक्यसत्यत्वार्थं तथा कृतवानित्यर्थः, **स्वेदार्थ**मिति गोदोहनादिपात्रगन्धनिरासकस्वेदार्थं, कलशीयजलस्य दुष्टत्वे हेतुमाहुः **पातनादि**ति, बालको हि बाल्यात् कलशारोहणं करोति तथा सति विपर्येति चेत् **कलश**स्तदा तथेत्यर्थः, **पञ्चमलीलाया**मित्यस्य तात्पर्यं टिप्पण्यामाहु**र्जन्मे**त्यादि, सुबोधिन्यां **सह क्रिया निषिध्यत** इति पाकादौ धूमतापादिना स्नानादावनौचित्यादिना प्रतिरोधात् तथेत्यर्थः, यद्वा भगवत्क्रिया न केनापि निरोद्धुं शक्या किन्तु भगवानेव यथा जननीत्वं सम्पादितवांस्तथा स्वक्रियानिरोधकत्वमपि सम्पादितवांस्तथा च भगवत्कर्तृकक्रियानिरोधकाले स्वयमेव निरोधं सम्पादितवान्, अस्मिन् पक्षे ताभ्यां बालकाभ्यां **सह क्रिया निषिध्यत** इत्यर्थो ज्ञेयः ॥ २६ ॥ **कालेने**त्यस्याभासेत्रापीत्युत्थानरूपपादकार्येपि, **अधिकारबोधक**मिति राजत्वेन नैपुण्यबोधनात् महाराजलीलारूपचरित्रश्रवणा**धिकारबोधक**मित्यर्थः, **निरोधानुसन्धानार्थ**मिति "भक्तिर्हरा"वित्यनेन स्वयं पृष्टस्य सर्वेषां **निरोधस्यानुसन्धानार्थ**मृषित्वमुक्तमित्यर्थः, तथा च भवत्पृष्टनिरोधमध्ये किञ्चिदंशमुक्त्वा स एव वैशिष्ट्येन प्रतिपाद्यत इति नासङ्गताभिधानशङ्का कर्तव्येत्येतदर्थमित्यर्थः, **जननार्ये**ति प्रकटीकरणाय, रत्युत्पादनसामर्थ्यप्रकटने हेतुमाहु**रन्त**रिति, यतो **रामो** योगिध्येयत्वाद**न्तःस्थितरूपेण रत्युत्पादनसमर्थो** भगवांश्च भक्तानुरोधेन तथैवातस्तद्वाचकयोस्तथात्वं युक्तं, **बहीरूपेण भूमेः सुखदानं** च युक्तमित्यर्थः, **तथात्वाये**ति समर्थत्वाय, भूम्यतिरिक्ते **सुखदान**व्यवस्थामाहु**श्चकार** इत्यादि सम्भूय **सुखदाना**भिप्रायार्थः, तदेव विशदयन्ति **विषयस्ये**ति, रामो हि ध्येयत्वाद् बहिःस्थितं विषयमन्तर्नयति लौकिकं त्याजयित्वालौकिकं सम्पादयति भगवांश्च तद्भोगार्थं मनआकर्षणद्वारा सर्वं **बहिरानयती**ति तथेत्यर्थः, अत एव 'हरेः प्रियचिकीर्षये'त्यपि सङ्गच्छते, मर्दनक्लेशस्वरूपमाहुः **खुराघाते**त्यादि, **पद्भिश्चलने** हेतुमाहु**र्जान्वि**त्यादि ॥ २७ ॥ **तत** इत्यत्राभासे **राजसीं** लीलामिति पादविक्षेपात्मिकां, क्रमु पादविक्षेपे विक्षेपस्य राजसत्वादिति, प्रतीकस्यार्थमाहुष्टिप्पण्यां **तत** इत्यादि, ननु भगवतो गुणातीतत्वेन लीलानामपि तादृशत्वाद् राजसीत्वादिकं कथमुच्यत इत्याशङ्क्याहु**स्तद्भावे**त्यादि, सुबोधिन्याम**न्यमुखेने**ति गोपीमुखेन, **तथात्वादि**ति लीलायोग्य**त्वात्**, **व्रजसम्बन्धादि**ति व्रजस्तामसस्त**त्सम्बन्धात्** तामसभावयुक्तत्वात्, **स्वसामर्थ्येने**त्यनिरोधाजनकेन तेन, उक्ते मानमाहु**रन्यथे**त्यादि, तस्यार्थं टिप्पण्यामाहुरन्यथेत्यादि हृदयमित्यन्तं, **शिष्टेने**ति **प्रयोजनत्व**पदेन, किञ्चिदाशङ्क्य परिहरन्तीत्याशयेनाहुस्तर्हीत्यादि, सुबोधिन्यां **र्निविष्ट**मिति मुत्कारणमितिशेषः, मुज्जनने प्रकारमाहुर्यावत्य इत्यादि, **अनेन** सात्त्विकी लीला सुखजनिका निरूपिता "सत्त्वं सुखं सञ्जयती"तिवाक्यात् ॥ २८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

यर्ह्यङ्गनेत्यस्याभासे **स्वतः स्थितयो**रिति कथञ्चिदन्याश्रितत्वेपि स्थितिः स्वत एव न तूत्सङ्गे इत्यर्थः, व्याख्याने, **राजसभावा** इति उद्दीप्तरसभावा इत्यर्थः, सर्वथाङ्गप्राशस्त्यं तारुण्य एव भवतीत्याशयेनाहुः **अङ्गनास्तु तरुण्य** इति, **प्रेक्षन्त्य उज्झितगृहाः हसन्त्य** इति पदत्रयार्थमाहुः **कौतुकाविष्टा** इति त्रयेण, कुमारपदे पञ्चवर्षत्वभ्रमव्युदासायाहुः **द्विवार्षिक** इति, सार्धत्र्यवार्षिकस्य तु वृन्दावने गमनं वक्ष्यते, अतस्तथेतिभावः, **कन्दर्प**ति कन्दर्पकोटेरिव यत्र लावण्यं तेनाधिकसुन्दर इत्यर्थः, **तद्गते**ति कुत्सितत्वादिकमपि साजात्य एव भवतीति कन्दर्पगता अपि भावा निरूपिताः, परन्तूत्कृष्टाः सौन्दर्यादयो न तु हृद्यत्वादय इत्यर्थः, **अयं भाव** इति उत्थितत्वरूपो भावो **यावन् न जातस्तावत्** यशोदाद्यावृतत्वेन **निरन्तरम्** अन्तरं व्यवधानं **तद्रहितदर्शनं इति** एवं प्रकारेण न जातं यशोदाद्युत्सङ्गे एव दृष्टस्तथा च तद्दर्शनीयलीलात्वमुत्थितलीलायामेव जातमित्यर्थः, **अन्यत्रे**ति वनरहःस्थलादिषु **गमनं** कार्यान्तरव्याजेन सख्यादिमाध्यस्थ्येन वा भवति, एतास्तु गवादिकार्ये एव नियुक्ताः, अतः कार्यान्तराभावादन्तरङ्गसख्याद्यभावाच्च वनरहःस्थलादिषु **गमनयोग्यतारहिता** इत्यर्थः, **वत्सा** इति गोपुत्रा मूढा अतो भगवद्गृहीता न तिष्ठन्तीत्यर्थः, इदं दृष्टान्तपूर्वकं विशदयन्ति **भगवानि**ति, कर्मणो मेषीहोमस्याङ्गं गर्भहोमस्तत्र देवतात्वं स्वस्य करोति सम्पादयतीत्यर्थः, **तदवलम्बनं** तस्य कर्मणोऽवलम्बनं तदङ्गत्वमित्यर्थः, प्रतितन्त्रन्यायेन देवताप्यङ्गमितिभावः,

ते त्विति कर्मजडास्तु **मूढा** भगवान् लीलार्थमेव हीनभावमवलम्बते वस्तुतस्तु सर्वाधिपतिरित्याकारकज्ञानरहिताः **प्राकृते वैकृते** नित्ये काम्ये च कर्मणि भगवन्तं **संयोजयन्ति**, न तु स्वयं तत्सम्बद्धा भवन्ति, साक्षाद्भगवत्सेवां न कुर्वन्तीत्यर्थः, तत् स्पष्टयन्ति **यथेति**, मेष्यालभने कदाचित् तस्यां गर्भसम्भवे तस्य होम एवं क्रियते, अत्र चतुर्थ्याविष्टयोर्देवतात्वं, एवं दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाहुः **एतेपि वत्सा** इति, यथा कुर्वन्तीतिशेषः, भगवान् लीलार्थमेवं करोतीतिज्ञानरहिता भगवन्तं **प्राकृतं** मत्वा तत्सम्बद्धा न तिष्ठन्त्यतोऽनुकर्षणं भवतीत्यर्थः, **एवं कर्मस्य** इति स्वान्तः-**करणमितिशेषः**, **गोप्यः** स्वान्तःकरणं **कर्मभ्यः** सकलेभ्यस्त्याजयित्वेत्यर्थः, **त्रिविधानां ग्रहणार्थमिति** सत्त्वरजस्तमोभेदेन त्रिविधानां ग्रहणार्थं प्रेक्षणगृहत्यागहासभेदेन त्रैविध्यमुक्तमित्यर्थः ।। २५ ।। **शङ्कीत्यत्र स्वत्वभावेति** मातरौ भगवति स्वत्वं जानीतो न तु स्वामित्वमिति सर्वात्मभावविचारेण दोष इत्यर्थः, **अलौकिकभावेनेति** 'सूक्ष्मरूपेण विश्वासमुत्पाद्य प्रतिबन्धके तेनैवापगते **स्वेष्टरूपमाविष्करोति** ही'तिकारिकोक्तेन लोकावेद्येन भावेनेत्यर्थः, पूर्वश्लोके अङ्गनापदस्य कृदन्तत्वेनापि टिप्पण्यामर्थ उक्तः सोत्र **स्वत्वभावेत्य**नेनानूदितः, स्वामित्वभावनावत्यः अतो भगवदर्थमङ्गनयनं कुर्वन्तीति, तद्धितान्तत्वेनाङ्गप्राशस्त्यरूपोर्थः सुबोधिन्यामुक्तः सोत्र **अलौकिकभावे**नेत्यनेनानूदितः, **तरुणीत्वात्** तादृशभावेन **वशीकृता** भवन्तीत्यर्थः, 'उज्झितगृहा' इतिपदेन रसाविष्टा उक्तास्ता अनुवदन्ति **विचाराभावादिति**, उज्झितगृहाणां गृहविचाराभावाद् **रसेनापि** वशीकृता भवन्तीत्यर्थः, 'प्रेक्षन्त्यः' कौतुकाविष्टा उक्तास्ता अनुवदन्ति **तारुण्या**दिति, 'हसन्त्यः' कामाविष्टा उक्तास्ता अनुवदन्ति, **अन्यार्थं चेति** कामाफलार्थमित्यर्थः, एकत्रान्येषामपि समुच्चय इति समुच्चयबोधकं पदं सर्वत्रोक्तं, शृङ्ग्यादिषु सप्तसङ्ख्यातात्पर्यमाहुः **षड्गुणैः स्वेन चेति**, **इष्टस्येति इष्टस्ये**च्छाविषयस्य **दुष्टसम्बन्धे** सति **शिष्टो**वशिष्टः इच्छाश्रयः **पुष्टिं** भोजनादिभिः स्वस्य पोषणं **विमुञ्चति** **अन्यथा** इष्टस्योत्तमसम्बन्धे न मुञ्चति तदा त्वासक्तेस्तुल्यत्वाद् गृहकार्यमेव कुर्यादितिहेतोः **हरिरनुचितदुःखजनककृतिरपि** **सत्यः** सद्रूपत्वेन दुष्टसम्बन्धानर्होपि क्रूरगतः **प्रीतः सन्नभवदि**त्यर्थः, एतेन निरोधार्थं स्वरूपमर्यादामपि न मनुते इत्युक्तं, खड्गजले सहजे, अग्नेः कृत्रिमत्वायाहुः **अग्निरिति**, धूमे कृते गवादिषु मशका नायान्तीति **धूमार्थं** अग्निना पयः स्विन्नं भवतीति पयसः **स्वेदार्थं वे**त्यर्थः, कण्टकानां कृत्रिमत्वायाहुः **कण्टकानीति**, अत उभयोः कृत्रिमत्वमितिभावः, **गृह्याणीत्यत्र सह क्रियेति** शृङ्गादिभिः सह क्रिया जननीत्वात् **ताभ्यां निषिध्यते** इत्यर्थः ।। २६ ।। **कालेनेत्यस्याभासे एवमिति भ्रमेरेतदर्थं** रामकृष्णौ **गतिविलासं पद्भ्यां कृतवन्ताविति**हेतोः **स्वतन्त्रतया** भिन्नतया न त्वन्यावलम्बनेन **स्थितस्य** रामस्य कृष्णस्य च **आह** लीलामितिशेषः, मूले 'रामः कृष्णश्चे'त्युक्तत्वादत्रापि **स्वतन्त्रतया स्थितस्यै**कवचनं, **कालेनाल्पेने**त्यत्र आभासोक्तं अस्या लीलाया भूक्लेशनिवृत्त्यर्थकत्वं व्युत्पादयन्ति **गत्यात्मक** इति गतिरात्मनि यस्येति पूर्ववद् व्याख्यानं, अतो यथा **क्रीडायां** "**विजह्रतु**"रितिपदोक्ते विहारे **करणतो**क्ता तथात्रापि "विचक्रमतु"रितिपदोक्ते गमनेपि करणतेत्यर्थः, **कोमलत्वा**दिति कोमलगत्याधारत्वादित्यर्थः, रिङ्गणादल्पकालानन्तरं या गतिः सा कोमलैः भवतीतिभावः, गतेः कोमलत्वं चरणकोमलत्वेनैवेति तेन चरणयोः कोमलत्वं सूचितमित्याशयेनाहुः **कोमलचरणे**ति, तथा च संवाहनन्यायेन भूक्लेशनिवृत्त्यर्थकत्वमस्या लीलायाः सूचितमितिभावः, **रत्युत्पाद**नेति रमयतीति रामः, तथा स्वनिष्ठस्य **रत्युपावनसामर्थ्यस्य** तासु **जननाय**, अतः परं ता रमयन्तीत्यर्थः, **रामः कृष्णश्च गोव्रजे** इति समभिव्याहारादपि तथेत्याशयेनाहुः **खुराघातेति** ।। २७ ।। **ततस्त्वित्यत्र स्वांशैरिति** स्वसदृशैर्वयस्यैरित्यर्थः, **स्वान्तर्निविशते** इति यूथप्रकारेण लीलायां भगवद्यूथे निविशते इत्यर्थः, **तासामेव तथात्वादिति** बहिरागत्य द्रष्टुं शक्तत्वादित्यर्थः, जनन्यास्तु महत्त्वेन बहिरागमनासम्भव इत्याशयेनाहुः **ज्ञानद्वारेति**, **सर्वथा गृहीतेति** प्रपञ्च**परित्याजनार्थ**मित्यर्थः, **रामस्य रक्षकत्वेनेति** भगवान् बालैः सह भुजबन्धादिलीलां करोति, तदा तासां स्वस्मिन्नपि तथा भावनया तोषो भवति, पश्चाद् रामोपि बालैः सह तथा करोति, तदा पूर्वसिद्ध एव सन्तोषो भूयः स्मरणाद् दृढो भवति, एवं राजस्य मुद्रक्षकत्वं, एवं मुज्जनने उपयोगमुक्त्वा क्रीडायामुपयोगमाहुः **राजलीलायां चेति**, **यास्त्विति प्राकृतो** भगवत्कार्यानुन्मुखः **स्वभावो** यासां ताः 'वत्सान् मुञ्च'न्नितिश्लोकोक्ताः, **लौकिकेति लौकिके** पत्यादिसेवाविधायके **वाक्ये परिनिष्ठिताः** 'हस्ताग्राह्ये' इति श्लोकोक्ताः, अत एव बालकतर्पणे पत्यर्थं मन्दस्नानादौ च प्रवृत्तिः, **यत्रैव ता** इति दधिदुग्धादिकार्ये उभयविधा **अप्यासक्ता** इत्यर्थः, **कृष्णस्येत्यत्र गोपभार्यात्वादिति**, तासां तथा स्वभावादित्यर्थः ।। २८ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

इष्टस्य दुष्टसम्बन्धे इति कारिका, **इष्टस्य** भगवतः **दुष्टसम्बन्धे दुष्टाः** शृङ्ग्यग्निदंष्ट्र्यादयस्तैः सह **सम्बन्धे** निकटस्थित्यादिरूपे जाते **शिष्टः** यशोदारोहिण्यादिः **पुष्टिं** स्वाधीनतां **विमुञ्चति** भगवदधीनो भवति, अन्यदा तु स्वाधीन एव व्यवहरन् भगवन्तं निजाधीनं करोति "कृष्णाधीना तु मर्यादा स्वाधीना पुष्टिरुच्यत" इति निबन्धोक्तलक्षणेन पुष्टिशब्दवाच्यं स्वाधीनत्वमुच्यते इति बोद्धव्यम् ।। २६ ।। **रामः कृष्णश्च गोव्रजे** इत्यस्य विवृतौ **अन्तःस्थितरूपेणेति** रामेणेत्यर्थः, 'रमन्ते योगिनोनन्त' इति श्रुते रामस्य योगिध्येयत्वेन अन्तःस्थितरूपत्वात् , **बहिः परमानन्दविषयरूपेण चेति** कृष्णेनेत्यर्थः, 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचक" इति श्रुतेः कृष्णस्य परमानन्दरूपत्वात्, **विषयस्यान्तर्नयने** इति योगिध्येयत्वेन ध्यान-

विषयस्य अन्तर्हृदि समानयनं रामस्येत्यर्थः, मनसो बहिरानयने चेति कृष्णस्तु परमानन्दरूपत्वात् परमसौन्दर्येण वशीकुर्वन् निजरूपं पश्यतां मनो बहिः स्वस्वरूपे आनयतीति हृदयम् ॥ २७ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

शृङ्ग्यग्नीत्यत्र इष्टस्येति का० ५५३। इष्टस्य इच्छाविषयस्य स्नेहविषयस्य शृङ्ग्यादिदुष्टसम्बन्धे सति शिष्टः इष्टेच्छावतोर्मध्ये अवशिष्ट इच्छाश्रयः पुष्टि भोजनादिभिः स्वस्य पोषणं विमुञ्चति त्यजति, अन्यथा इष्टस्य उत्तमसम्बन्धे न मुञ्चति इति हेतोः हरिः प्रीतः सन् सत्यः सत्यरूपः भक्तनिरोधार्थं शृङ्ग्यादिकूरगतोऽभवदित्यर्थः, शृङ्गिण इति का० ५६३।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तयो रामकृष्णयोर्जनन्यौ यशोदारोहिण्यौ शृङ्ग्यादिभ्यः स्वसुतौ निषेद्धुं तयोर्निषेधं कुर्वन्त्यौ यत्र यदा गृह्याणि गृहोचितानि कार्याणि अपिशब्दात् स्नानभोजनमलमूत्रत्यागादिदेहकार्याणि देवार्चनादिपरलोककार्याणि च कर्तुं न शेकाते, तदा मनसोऽलमतिशयेनानवस्थामस्वास्थ्यमापतुरित्यन्वयः। शृङ्गिणो गवादयः, दंष्ट्रिणो मर्कटादयः, असिः खड्गः, द्विजाः पक्षिणः काकगृध्रादयः। शृङ्ग्यादिग्रहणप्रवृत्तौ हेतुमाह—क्रीडापराविति। 'क्रीडासाधनानि प्रदाय, एकत्र सम्यक् स्थले स्थापयितुमप्यशक्यौ' इति सूचयन्नाह—अतिचलाविति। 'स्वसुतौ, तज्जनन्यौ' इति पदद्वयेन तयोः स्नेहाधिक्यादन्यस्मिन् विश्वासाभावाच्च नान्यः कश्चिदवेक्षकः कृत इति सूचितम्। अत्र भगवद्बाललीलानुभवजनितपरमानन्दो भगवन्निष्ठाया लोकनिष्ठायाश्च परस्परविरोधश्च दर्शितः ॥ २५ ॥ 'लीलान्तरं कथयामि, तत् सावधानतया शृणु' इत्याशयेन सम्बोधयति—राजर्षे इति। अल्पेनैव कालेन गच्छता रामः कृष्णश्च अघृष्टानि भूमिघर्षणमप्राप्तानि जानूनि येषु तैः पद्भिरञ्जसा श्रमं विनैव गोकुले विचक्रमतुः विशेषेण सर्वत्र गमनं चक्रतुः ॥ २६ ॥ ततस्तदनन्तरं तु वयस्यैः समानवयस्कैर्व्रजबालकैः सह तथा सहरामो रामेण च सहितो भगवान् कृष्णो व्रजस्त्रीणां मुदं हर्षं जनयन् चिक्रीडे इत्यन्वयः। तुशब्दः पूर्ववत् पराधीनलीलाव्यावृत्त्यर्थः। 'सहराम' इत्यनेन नवनीतमोषणादिलीलासु रामस्यापि गौणत्वं दर्शितम् ॥ २७ ॥ कृष्णस्य रुचिरं मनोहरं कौमारं चापलं कुमारावस्थायां कृतं चाञ्चल्यं वीक्ष्य स्वगृहं समागता गोप्यस्तस्य कृष्णस्य मातुर्यशोदायाः शृण्वत्याः स्फुटं यथा भवति तथैवेति वक्ष्यमाणमूचुरित्यन्वयः। किलेत्यवधारणे ॥ २८ ॥

अन्वितार्थप्रकाशिका

किंचिदधिकवयसोर्लीलामाह—शृङ्ग्यग्नीति ॥ तयोः रामकृष्णयोः जनन्यौ यशोदारोहिण्यौ यत्र यदा क्रीडापरौ क्रीडासक्तौ अतिचलौ चपलौ स्वसुतौ शृङ्गिणो गवादयः दंष्ट्रिणः कुक्कुरादयः असिः खड्गः द्विजाः पक्षिणः काकगृध्रादयः। स्पष्टं शेषम्। असिस्थाने अहीति वा पाठः। एतेभ्यो निषेद्धुं निवारयितुं गृह्याणि गृहोचितानि कार्याणि अपिशब्दात् स्नानभोजनदेवार्चनादीनि च कर्तुं न शेकाते। प्रकृतिभावाभाव आर्षः। तदा मनसोऽलमतिशयेनानवस्थां चापलाख्यं वात्सल्यपोषकसंचारिभावमापतुः गृहसौख्यस्य पराकाष्ठा दर्शिता ॥ २५ ॥ कालेनेति ॥ हे राजर्षे! अल्पेनैव कालेन गच्छता रामः कृष्णश्च अघृष्टानि भूमिघर्षणमप्राप्तानि जानूनि येषु तैः पद्भिरञ्जसा श्रमं विनैव गोकुले विचक्रमतुः विशेषेण सर्वत्र गमनं चक्रतुः तङभाव आर्षः ॥ २६ ॥ तत इति ॥ ततस्तदनन्तरं तु वयस्यैः समानवयस्कैर्व्रजबालकैः सह तथा सहरामो रामेण च सहितो भगवान् कृष्णो व्रजस्त्रीणां मुदं हर्षं जनयन् चिक्रीडे। कर्मव्यतिहारे तङ् ॥ २७ ॥ कृष्णस्येति ॥ गोप्यः कृष्णस्य रुचिरं कौमारचापलं वीक्ष्य समागताः सत्यः स्वयमनुभूतं लीलानन्दं यशोदामनुभावयितुं तस्य कृष्णस्य मातुर्यशोदायाः शृण्वन्त्याः। नुमार्षः। ह स्फुटं यथा भवति तथैवेति वक्ष्यमाणमूचुः ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शृंगीति क्रीडापरं प्रधानं ययोस्तौ अत एव अतिचपलौ शृंग्यादिभ्यो निषेद्धुं गृह्याणि गृहोचितकृत्यानि च कर्तुं यत्र यस्मिन् काले तयोर्जनन्यौ शेकाते सामर्थ्यवन्त्यौ न बभूवतुस्तदाऽलं परिपूर्णं मनसोऽनवस्थां व्यग्रतामापतुः गृहिणामिदमेव परमं सुखमिति फलिताऽर्थादर्शिनः शृंगीशृंगवान् पशुः दंष्ट्रीदंष्ट्रावान् जंतुविशेषः असिः खड्गादिशस्त्रविशेषः द्विजः काकबकादिपक्षिविशेषः ॥ २५ ॥ विचक्रमतुः पादन्यासं कृतवंतौ ॥ २६ ॥ वयस्यैः समवयोभिः सहितः कृष्णो रामश्च ॥ २७ ॥ कौमारोत्पन्नं चापलं चंचलत्वं तस्य मातुः शृण्वंत्या शृण्वत्यः मातरं श्रवणं कारयंत्यस्ताः यद्वा शृण्वंत्याः शृण्वत्याः मातुः शृण्वंती मातरं इति वक्ष्यमाणं वचनम् ऊचुः प्रथमपक्षे शृण्वत्य इति वाच्येनुमाडागमावार्षौ द्वितीयपक्षेनुमागमोप्यार्षः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शृङ्गीति ॥ क्रीडापरौ नितरां क्रीडासक्तौ, अतिचलावतिचपलौ, स्वसुतौ, शृङ्गिणो गवादयश्च अग्निश्च दंष्ट्रिणः सारमेयप्रभृतयश्च असिः खड्गाश्च जलं च द्विजाः मयूरादयः पक्षिणश्च कण्टकाश्च तेभ्यः, निषेद्धुं वारयितुं प्रसक्ते इति शेषः। तज्जनन्यौ तयोर्मातरौ यशोदारोहिण्यौ, गृह्याणि गृहोचितकर्माणि, कर्त्तुं अपि, यत्र यदा, न शेकाते समर्थे नाभूतां, तदा अलं नितरां, मनसः अनवस्थामाकुलतां, आपतुः। अनेन गृहिणां गृहसौख्यस्य परा काष्ठा दर्शिता ॥ २५ ॥ कालेनेति ॥ हे राजर्षे, अल्पेन कालेन, रामः कृष्णश्च, गोकुले, अघृष्टजानुभिः, पद्भिः, अञ्जसा, अवष्टम्भेन विनापीत्यर्थः। विचक्रमतुर्जग्मतुः। आकृष्टजानुभिः पद्भिरिति पाठे, कदाचिज्जानुभ्यां क्रमणं कदाचित्पद्भ्यां गमनमित्येवं मिश्रभावेनेत्यर्थः ॥ २६ ॥ ततस्त्विति ॥ ततः सम्यक् पादचाराभ्यासभवनानन्तरं तु, सहरामः रामेण सहितः, भगवान् कृष्णः, वयस्यैः स्वसमानवयस्कैः, व्रजबालकैः सह, व्रजस्त्रीणां मुदं जनयन्, चिक्रीडे ॥ २७ ॥ कृष्णस्येति ॥ समागताः कदाचिद्यशोदान्तिके समायाताः, गोप्यः रुचिरं सुन्दरं, कृष्णस्य कौमारचापलं कुमारावस्थाप्रयुक्तचापल्यं, वीक्ष्यावलोक्य, तन्मातुः कृष्णमातुर्यशोदायाः, शृण्वन्त्याः सत्यः, इति वक्ष्यमाणप्रकारेण, ह स्फुटं यथा तथा ऊचुः किल ॥ २८ ॥

श्रीहरिसूरिविचितं श्रीभक्तिरसायनम्

शृङ्ग्यग्नीति : १०.८.२५.

शृङ्गिध्वंसोऽग्निपानं दुरहिविदलनं कंसघातस्तथाहेर्गर्वच्छेदो बकारयग्निदलकृतिरिति द्वेषणानां विनाशः।
कार्योऽस्तीत्यच्युतोऽसौ तदनुगतदृढाचारहेतोः पुरैव चक्रे क्रीडां मनोज्ञां निजमतिनिहितां तादृशीमेव तत्र ॥ ३० ॥
यस्मात्तटस्थतां याते निषेधेषु विधिष्वपि। मातरावापतुर्युक्तं मनसो ह्यनवस्थितिम् ॥ ३१ ॥

कालेनाल्पेनेति : १०.८.२६.

प्रेम्णा पित्रङ्कसंस्पर्शः कन्यादुःखापनोदकः। जानन् प्रभुः पदेनागाद् भूमिसौख्यकृतोद्यमः ॥ ३२ ॥

ततस्त्विति : १०.८.२७.

नासाक्षित्वं न वा पाटच्चरवृत्तिप्रकाशनम्। भवत्विति शिशूनेव स्वीचक्रे चौर्यकर्मणि ॥ ३३ ॥
तत्तत्सुन्दर-मन्दिरस्थित पयो-दध्यादि-चौर्याहृतिस्तत्तन्मन्दिरबालकैर्विरचिता पाटच्चरी या ततः।
वृत्तिर्मां नहि संस्पृशेदिति धिया श्रीनायको लीलया बालानेव सहानयद् व्रजगृहं प्रायः प्रभुस्तत्कृते ॥ ३४ ॥

कृष्णप्रिया

माता यशोदा और रोहिणी अति चञ्चल क्रीडापरायण दोनों लालन को शींग वाले बैल वृषभ आदि पशुओं, अग्नि, मर्कट बन्दर, कुत्तों, तलवार, जल, गीध आदि पक्षियों एवं काँटों से एवं उन्हें बचा रखने में ही माताओं का काल बीत जाता था। वे इतने चपल और खेलवाड़ी थे कि बचाव से अतिरिक्त माताओं को समय ही नहीं मिलता, कि घरकार्य देखें। जब वे दोनों उन्हें ऊपर दिखायें पशु आदि उपद्रवों से बचाने एवं—आवश्यक गृह कार्य सम्पादन में समर्थ न हो सकी तब उनके मनमें वात्सल्य की पराकाष्ठा का आनन्द उमड़ आया फिर भी मन की स्थिरता न प्राप्त कर सकी ॥ २५ ॥ हे राजर्षे ! कुछ काल और बीत जाने पर याने अल्प ही समय में श्रीराम और श्रीकृष्ण दोनों भैया गोकुल में बिना घुटनों के सहारे ही पैरों के बल डेगाडेगी इधर उधर आनन्द से चलने लगे ॥ २७ ॥ अब तो भगवान् श्रीकृष्ण अपने सरीखे व्रजसखाओं के और बलभद्र भैयाजी के साथ आनन्द कर खेल खेलने लगे, जिसे देख गोपियाँ बहुत ही प्रसन्न होती थी ॥ २७ ॥ भगवान् कृष्ण के मनोहारि कौमार चापल को देखकर गोपियाँ वहाँ आ जाती और स्वयं अनुभूत उस लीलानन्द का श्रीनन्दरानीजी को आस्वादन कराने के लिए खूब जोर से सुना-सुना कर माता से कहती ॥ २८ ॥

[1]श्रीगोप्य ऊचुः

वत्सान् मुञ्चन् क्वचिदसमये[2] क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथ दधि पयः कल्पितैः स्तेययोगैः ।
मर्कान् भोक्ष्यन् विभजति स [3]चेन्नात्ति भाण्डं भिनत्ति द्रव्यालाभे स [4]गृहकुपितो [5]यात्यनुक्रोश्य तोकान् ॥२९॥
हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं [6]ह्यन्तर्निहितवयुनः शिक्यभाण्डेषु [7]तद्वित् ।
ध्वान्तागारे धृतमणिगणं स्वाङ्गमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु [8]सुष्ठु व्यग्रचित्ताः ॥३०॥
एवं धार्ष्ट्यान्युशति[9] कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथाऽऽस्ते ।
इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसितमुखी न ह्युपालब्धुमैच्छत् ॥३१॥
[10]एकदा क्रीडमानास्ते रामाद्या गोपदारकाः[11] । कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥३२॥

कर्दमक्षमा

अन्वयः—श्रीगोप्यः ऊचुः कचित् असमये क्रोशसंजातहासः वत्सान् मुञ्चन् अथ कल्पितैः स्तेययोगैः स्वादु स्तेयं दधि पयः अत्ति मर्कान् भोक्ष्यन् विभजति स चेत् न अत्ति भाण्डं भिनत्ति, द्रव्यालाभे स गृहकुपितः तोकान् अनुकृष्य याति ॥ २९ ॥ हस्ताग्राह्ये पीठकोलूखलाद्यैः विधिं रचयति अन्तर्निहितवयुनः तद्विद् शिक्यभाण्डेषु छिद्रं (कुरुते) ध्वान्तागारे धृतमणिगणं स्वाङ्गं अर्थप्रदीपं कुरुते यर्हि काले गृहकृत्येषु गोप्यः सुष्ठु व्यग्रचित्ताः एवं धार्ष्ट्यानि (कुरुते) वास्तौ मेहनादीनि (कुरुते) स्तेयोपायैः विरचितकृतिः यथा सुप्रतीकः आस्ते इत्थं सभयनयनश्रीमुखालोकिनीभिः स्त्रीभिः व्याख्यातार्था प्रहसितमुखी हि उपालब्धुम् न ऐच्छत् एकदा क्रीडमानाः रामाद्याः ते गोपकुमारकाः कृष्णः ॥ ३०-३१ ॥ मृदं भक्षितवान् इति मात्रे न्यवेदयन् ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

"कृष्णचापलचौर्याणि सहैवाखिलसद्मतः ॥ प्रजल्पंत्यः समागत्य गोप्यो गोप्यै मुदं ददुः ॥" असमयेऽदोहकाले । क्रोशे संजातहासः संजातो हासो यस्य सः । स्तेयं चौर्यार्जितं न तु दत्तं तत्रापि स्वादु नेतरत् दधि च पयश्चात्ति । किं च भोक्ष्यन्मर्कान्मर्कटान्प्रति विभज्य ददाति तेषां मध्ये तृप्तत्वेन कोऽपि नात्ति चेत्तर्हि भांडं भिनत्ति । कचिद्द्रव्यस्यालाभे सति स गृहाय धक्ष्यामीति कुपितो याति । यद्वा सगृहा गृहिणस्तेभ्यः कुपितस्तेषां तोकान्बालान्पर्यंकादिषु सुप्तानुपक्रोश्य रोदयित्वा यातीति ॥ २९ ॥ कल्पितैस्तेययोगैरित्युक्तं तत्प्रपंचयति । हस्ताग्राह्य इति । तुंगशिक्यस्थभांडेष्वंतर्निहिते द्रव्यादौ वयुनं ज्ञानं यस्य स छिद्रं रचयति । तद्विच्छिद्ररचनादिवित् । ध्वांतयुक्ते गृहे स्वांगमेवार्थं प्रदीपं रचयति विशेषतो धृतमणिगणम् । यर्हि यस्मिन्काले ॥ ३० ॥ रेरे चोरेत्याक्षिप्तः सन्नुशति जल्पति त्वमेव चोरोऽहं गृहस्वामीत्यादीनि धार्ष्ट्यानि प्रागल्भ्यानि । अथवा उशति हे कमनीये यशोदे । यद्वा उशति वास्तौ स्वर्चिते गृहे मेहनादीनि पुरीषोत्सर्गादीनि कुरुते । एवं स्तेयोपायैर्विरचिता-कृतिः कर्म येन सः त्वत्समीपे सुप्रतीकः साधुरिवास्ते । सभये नयने यस्मिंस्तच्च तच्छ्रीयुक्तं मुखं च तदालोकिनीभिः स्त्रीभिरित्थं व्याख्यातार्था प्रख्यापितजन्मफला तत्तत्कर्मफला वा उपालब्धुमाक्षेप्तुं नैच्छत् ॥ ३१ ॥ कदाचिदपराधांतरे उपालभत तदा तु महदाश्चर्यमभूदिति कथयन्नाह । एकदेति ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अखिलसद्मतः सकलगृहेषु । सप्तम्यर्थं तसिः । 'सद्मागारगृहावस्त्ये' इति कोशात् । गोप्यो-विधुंतुदा रागरंगा विधिमता सुरागिणी कामकंदा सुनंदा नंदिनी नादनंदिनी नेत्रसौभाग्यसुभगा मोदमाला मनस्विनी मनोभवा विरागी हरवूरा रतिप्रदा धानी धनेश्वरी धामा भामा भावप्रमोदिनी मुक्ता मनोहरा माध्वी मालती मलयाश्रया मंदालसा मनोभीष्टा मनोज्ञा

---

[1] अन्यत्र "श्री गोप्य ऊचुः" इति पाठो न दृश्यते । [2] समयान्-विज. । [3] चेन्नास्ति-विज. । [4] सुघृण-विज. । [5] यात्युप-श्रीधर. वंशी. सुदर्शन. वीर. विज. विश्व. शुक. । [6] वयुने-विज. । [7] तद्वत्-विज. । [8] सु-श्रीधर. वंशी. वीर. विज. । [9] द्विशति-विज. ।

[10] "गोप्यः कदाचन पृथक्पृथगूह्य कृष्णमेत्यैकदैव गदितुं प्रसृतास्तवागः ।
दृष्ट्वा तदन्त्यथ तमेव निजानदृष्ट्वा सर्वाश्च ता निववृतुः स्वगृहान्सलज्जाः ॥"
अयमेकोऽधिकः श्लोको मुनिभावप्रकाशिकाकारसंमतः ।

[11] बालकाः-विज. ।

मानसी बला चित्रा वेत्रवती भीमा भावभेदविदा चला चंचला चपला कांता कला कामप्रबोधिनी इत्याद्या बह्वः । गोप्यै यशोदायै । कृष्णस्य चापलयुक्तानि चौर्याणि चोरकर्माणि (१) । स्वयं भक्षतु वयं तं न वारयामः । परन्तु निरर्थकमपि क्षिपतीत्याहु:–किञ्चेति । भोक्ष्यन् भोजयिष्यन् । मर्कान् बालमार्जारवानरान् "मर्को मनसि वायौ च तोके मार्जारकीशयोः" इति यादवः । स कृष्णः । गृहाय सद्मने । इति कुपितो याति इति किं हे गृह त्वां धक्ष्यामि भस्मसात्करिष्यामीति । जडोपरि कोपमनुचितं मन्वानोऽर्थांतरमाह–यद्वेति । गृहेण सह वर्त्तंत इति सगृहाः । तोकान्बालान् 'तोकः पुत्रे सुतायाञ्च' इति मेदिनी ॥ २९ ॥ तुंगशिक्यस्थभांडेषु । उच्चरज्जुनिर्मितलंबमानयंत्रगपात्रेषु । अंतर्निहिते मध्यस्थापिते । "वयुनं गमने ज्ञाने लाभे ब्रह्मणि शाश्वते" इति धरणिः । गृहकृत्येषु पेषणमार्जनादिषु ॥ ३० ॥ उशति 'उश–व्यक्तायां वाचि' तौदादिको धातूनामनंतत्वात् । उशधातोरप्रसिद्धत्वादर्थांतरमाह–अथ वेति । क्रोधावेशे श्लाघ्यसंबोधनासम्भवं मत्वा पुनरर्थांतरम् । यद्वेति । पुरीषोत्सर्गादीनीत्ययमर्थस्तु स्वामिभिरभिप्रायांतरेण कृतः प्रतीयते स चेत्थं प्रतिभाति पुरीषस्य गोः पुरीषस्योत्सर्गमितस्ततः क्षेपणं काष्ठादिना बालांतरेण वा शुष्कश्वबिडालमयूरकपोतादिपुरीषस्य वान्यत आनीयोत्सर्गं वा करोति । आदिपदाच्छुष्कास्थिचर्मादिग्रह इति । न तु स्वयं स्वोदरान्मलमुत्सृजति तथात्वे "जगज्जनमलध्वंसिश्रवणस्मृतिकीर्त्तनाः । मलमूत्रादिरहिताः पुण्यश्लोकाः प्रकीर्त्तिताः ॥" इत्यादिपुराणविरोधः । "त्वक्श्मश्रुकेशरोमनखकेशापिनद्धमंतर्मांसास्थिरक्तकृमिविट्कफवातपित्तम् । जीवच्छवं भजति कांतमतिर्विमूढा या ते पदाब्जमकरंदमजिघ्रती स्त्री ॥" इति रुक्मिणीवाक्यविरोधश्च स्यादिति । यद्वा–बाललीलाविनोदार्थं मृषैव प्रपंचितानीति ज्ञेयम् । तोषिण्या तु मे मम उशति कमनीये वास्तौ ह स्फुटं नादीनि नादयुक्तानि धाष्ट्यानि । लेपादिनोशति सुंदरे मेहनं पूर्णकुंभादिभ्यो जलादिसेचनम् । आदिना धूल्यादिक्षेपः यद्वा–ईहनं चेष्टां मा कुरुते किं तु नेत्रहस्तादिभिः कुरुत एव । यद्वा–कुरुले कुत्सिते रुते शब्दे त्वां ताडयामीत्यादिरूपे उशति कथिते सति मेहनादीनि शिश्नप्रदर्शनादीनि कुरुते मम शिश्नं ताडयत्येवमादीनि वदतीत्यर्थः 'शिश्नं मेहनशेफसी' इत्यमरः । एवं स्तेयोपायैः पूर्वश्लोकोक्तैः पीठकोलूखलाद्यैः । सुष्ठु प्रतीकाऽवयवसंघो वा कर्म यस्य स तथा "प्रतीकः प्रतिकूलेऽथावयववाव्ययविन्तोरपि । विलोमे कर्मणि ज्ञाने क्लीवमन्यत्र पुंसि च ॥" इति वरतंतुः । साधुः यथाशब्द इवार्थे । साधुरिव नायं साधुः । श्रिया युक्तं मुखं श्रीमुखम् । आक्षेप्तुं वाचाऽपि ताडयितुम् । किञ्च धाष्ट्यांनीतिबहुत्वादन्यान्यपि पृष्ठत आगत्य नेत्रनिमीलनं गोपीभिर्गृहीतस्य यशोदापार्श्वे तत्तत्पुत्रपत्यादिरूपधारणं हारादित्रोटनं गोपीमुखे गंडूषादिप्रक्षेपणमित्यादीनि बहूनि ज्ञेयानि ॥ ३१ ॥ अपराधांतरे मृद्शनरूपे । गोपा उपालभंत यशोदायै कृष्णकर्म निवेदयाञ्चक्रुः । गोपदारका गोपबालाः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तद्यथाहुः—वत्सानितिसार्द्धद्वयेन । तत्र पूर्वार्द्धमेकं वाक्यम् अवतारिकाविनोदाय तु पृथगिव व्याख्यायते तत्र प्रथमोपद्रवमाहुः, वत्सान् मुञ्चन् बहुत्वं स्वेषां वैयग्र्यविशेषबोधकं ननु प्रत्युत वत्सपालायमानत्वं खल्विदं कोनु दोषः तत्राहुः असमये अदोहनकाले ननु, बालकेनाज्ञानतः खलु इदं कृतं कथमनुशोचथ प्रतिगृहं विद्यमाना बहवो लोका रुन्धीरन् तत्राहुः क्वचित् कृत्यान्तरव्यग्रतया यदा ते रोद्धुं न शक्नुवन्ति तदैवेत्यर्थः । एवं चेत्तर्हि कथं न भीषयध्वे ? तत्राहुः, क्रोशे सञ्जातहासः अक्रोशनार्थम् इति परममोहनतोक्ता बत किमर्थं वत्सान् मुञ्चन् तत्र हसन्त्यः सानुकरणमाहुः, दधिपयोत्तीति, तदर्थमेव गृहजनानितस्ततो धावयितुं वत्सान् मुञ्चतीत्यर्थः । अहो कठिनास्तर्हि कथं स्वयमेव पूर्वं नदत्थेत्यत्र सस्मितभ्रूविलासेन शनैरिवाहुः स्तेयमेवात्ति ननु दत्तम् अतरुदत्तमपि तादृशं न भुङ्क्त इति भावः । अपि का वो हानिर्यतः ततः पतितभाण्डस्य गोरसमात्रस्यात्यल्पप्रमाणपाने तत्राहुः गृहस्वाम्याद्यर्थं प्रयत्नस्थापितं स्वाद्वेवात्ति तत्रापि अथ कार्त्स्न्येनैवात्ति अहो परमचतुराणां वो गोरसमसावशिक्षितचातुर्य्यश्चोरयेदिति न सम्भावयामः तत्राहुः कल्पितैः पूर्वमदृष्टाश्रुतैरधुना स्वबुद्ध्यैव रचितैः स्तेयोपायैः अये युष्मत्पितृपितामहादीनां पुण्यफलमेवेदं यदयं परमकृपणानामदत्तमपि भुङ्क्ते तर्हि कथमिव पश्चादपि नानुमोदध्वे ? तत्राहुः, मर्कानिति, वरं सखिगणान्वितः स्वयमत्तु अहो भोक्ष्यन् स्वभोजनात् पूर्वमेव मर्कटान् सर्वान् प्रति विभज्य ददाति । किञ्च, तेषां वनात्फलादितृप्तत्वेन यद्येकोपि नात्ति तर्हि स्वयमपि नात्ति भाण्डं च भिनत्तीत्यर्थः । एतत्तु पूर्वं तासां द्वारागतवानरवृन्दाय नवनीतं दातुं निजोपदेशस्याकरणकोपेनेति लक्ष्यते यद्वा, सपरमदुलालः कदाचित्त्वया यत्नेन बहुभोजितस्त्वेतत् स्वयं नात्ति तर्हि भाण्डं भिनत्ति तद्दोषमारोप्येति शेषः । ननु, कथमेवं ज्ञानेपि भाण्डानि न गोपायथ ? तस्माद्यूयमेव तथा क्रीडयन्त्यो मम बालकं चपलीकृतवत्य इत्यत्राहुः । द्रव्येति, स इति परोक्षनिर्देशो दर्शनेप्यदर्शनं सूचयन्ति सम्प्राते सौम्यप्रकृतिदर्शनादन्यत्वं वा सर्वं गृहस्थितजनं प्रत्यपि कुपितः सन् तोकान् तोकानि बालापत्यान्यपि रोदयित्वा याति द्रवति तानि च राधाचन्द्रावल्यादीनि तल्लघुभ्रातादीनि च ज्ञेयानि सगृहशब्देनैव वा गृहस्थितजना उच्यन्ते ॥ २९ ॥ अहो किमिदमपूर्वं कथयथ ? के ते स्तेययोगास्तानपि शृणुमस्तत्राहुः—हस्तेति । विधिं हस्तग्राह्यतोपायम् आद्यशब्देन "पीठे पीठनिषण्णबालकगले" इति श्रीबिल्वमङ्गलाद्युक्तानुसारेण बालस्कन्धारोहणादि हि निश्चितम् अथ ततोपि दूरे रक्षत तत्राहुः शिक्य-

वर्त्तिभाण्डेषु दीर्घसशल्यलगुडादीनां छिद्रं रचयति। ननु करोतु पीठाद्युपायान दूरतश्छिद्रस्य तु निजाभीष्टधारायोस्यता दुर्घटास्फुटेदपि भाण्डं तत्राहुः तद्वित् ननु, बहुषु भाण्डेषु सत्सु निजाभीष्टं कथं प्राप्नुयात्तत्राहुः, अन्तरिति भाण्डलक्षणविशेषेणैवेति भावः। अथ कथमन्तस्तमपि गृहकोष्ठिकायां न रक्षत ? तत्राहुः ध्वान्तेति स्वशब्देन मणिगणसापेक्षत्वमपि खण्डितं ततो मणिगणधरणमप्युत्कण्ठयैव कुत्रचिन्मदङ्गकिरणाभेद्यमपि यदि गाढं तमो भवेदिति अनेनेदमप्युक्तं भवति यदि धृतमणिगणत्वं न स्यात तदा कुत्रचित् कथञ्चित्तमो लेशशेषेण किञ्चिदप्युर्वरितं स्यात् इति चोरस्यास्य मणिपरिधापनेन तथापि तत्र साहाय्यं जनो मन्यते गृहस्वामिभिर्दुर्लभोयं मणिगणोप्याच्छिद्यतेत्तस्माद्द्यप्रभृति नायमलङ्करणीय इति तत्र भावयन्ति अपूर्वं चेदं धृतानर्घ्यमणिगणोपि गोरसचोर इतीति परिहसन्ति चेति अयि यदीदं सत्यं स्यात् तदा निह्नुत्य गृहीत्वैवात्रानीयतां तत्राहुः काल इति। यस्मिन्न सम्भवति तस्मिन् समयविशेष इत्यर्थः। ननु कोसौ तत्राह यर्हीति एवमेवेदं न पौनरुक्त्यं तेष्विति यतिभङ्गेन पृथक् पाठोयम् अथवा तत्तद्भाण्डेषु तत्तद्विशेषं कथं जानाति तत्राह, तद्विन् लक्षणेनैवेति पूर्ववत् ननु भो मिथ्याप्रलापिन्यः ! किमिदं कथयथ ? ममायं बालकोऽद्यापि मुग्ध एव तत्राहुः, अन्तरेव निहितं संवृत्य धृतं वयुनं ज्ञानं सर्वबुद्धिर्येन सः अन्यत्समानं तदेवं निगूढपरद्रव्यस्य समयस्य च ज्ञानं दुर्गारोहणच्छिद्रकरणलक्षणक्रियाद्वैधप्रावीण्यं सञ्जातहास इति मोहनविद्यात्वं चोक्तं तैश्च सम्पूर्णैर्गुणैर्महाचोरतोक्ता ॥३०॥ अथ तस्य भयातिशयं दृष्ट्वा संक्षेपेणैवोपसंहरन्त्यः किमप्य यदपि हास्याय व्यञ्जयन्ति एवमित्यर्द्धेन। एवं स्तेयोपायैर्विरचितकृतिः कृतकृत्यस्सन् पुनर्धाष्ट्यानि आसां सम्बन्धविशेषेण हसन्तीनां वृद्धानामुत्तरीयाकर्षणादीनि स्वगृहिणीसदृशानि देशादीनि च कुरुते किं बहुना आसां वास्तौ मूत्रादीनि च कुरुते एता मार्जयितुं नित्यं न शक्नुवन्ति स्वयमागम्य पश्यत चेति भावः। अहो पश्यत सोऽयमेव नान्यः इति परस्परमाहुः सुप्रतीक इति। तदेवं प्रेमविनोदं वर्णयित्वा श्रीयशोदायाः स्नेहपूरं दर्शयति इत्थमिति। तासां स नर्मप्रेमविशेषमयं क्रोशनफलमाह—सभयेत्यादि। इत्थं व्याख्यातः अर्थः तदर्थनीयं परमप्रागल्भ्यं यस्यां सा अत एव प्रहर्षोदयेन पुत्रचाञ्चल्यादिकौतुकेन तासां कौतुकपरताया वितर्केण च प्रहसितमुखी प्रहसितं हासप्रारम्भसहितं मुखं स्वल्पहसितयुक्तमित्यर्थः। तादृशं मुखं यस्याः सा हि एव उपालब्धुमिच्छामपि नाकरोत् किन्तु वत्स ! ईदृशीष्वीदृशं व्यवहारं कथं करोति ? इति सलालनमुवाचेत्यर्थः। इदमेव निश्चित्य ताभिरप्यागत्य क्रोशनं कृतं यथा मातृशैथिल्यमनुभूयाधिकमस्मद्गृहे चापल्यं विधास्यत्ययमिति अन्यथा तु तस्य सङ्कोचनं नाकरिष्यतैवेति भावः। अत्र—

जगज्जनमलध्वंसिश्रवणस्मृतिकीर्तनाः। मलमूत्रादिरहिताः पुण्यश्लोका इतिस्मृताः॥ इति

पुराणान्तरवचनेन कैमुत्यापातात् "त्वक्श्मश्रुरोमनखकेशपिनद्धम्" इत्यादिश्रीरुक्मिणीदेवीसिद्धान्तानुसाराच्च यद्यपि तत्र सम्भवति तथापि बाल्यलीलाविनोदार्थं मृषैव प्रापञ्चितानि मेहनादीनीति ज्ञेयं रोचमानतार्थप्रधानोत्र यशधातुस्ततः कमनीये इति व्याख्यातम् ॥ ३१ ॥ पुनरेतत्पूर्वां कामपि पूर्ववदद्भुतलीलामनुस्मृत्याह—एकदेत्यादि। ते तथाविधाः रामाद्या इति तेषु ज्येष्ठवर्गं बोधयति अत एव श्लेषेण गोपायन्ति श्रीव्रजेश्वर्याज्ञया सर्वतः श्रीकृष्णं रक्षन्तीति गोपाश्च ते दारकाश्च दारुपुत्तलिकावत् तदाज्ञाकारिणः यद्वा दारानन्दपत्नी तस्याः काः श्रीकृष्णमृद्भक्षणनिवेदनेन तत्सुखरूपाः तस्याः सुखप्रदा इत्यर्थः। कृष्ण इति भुवस्सकाशान्मुदाकर्षकत्वान्मृदमिति कोमलमृत्तिकाम् अत एव भक्षितवान्निवारितोपीत्यर्थः। एवं मात्रे मृद्भक्षणासहनलीलायै न्यवेदयन् अतिशयनिवारणाय विनयेन मृद्भक्षणमपलपन्त इत्यर्थः॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

चौर्य्यादिपरमचाञ्चल्यलीलायाः स्वयं साक्षात् कथनेनात्मनो धाष्ट्र्यमाशंक्य तत्परिहारार्थम्; किंवा तासां मुखोक्तौ वातिमनोहरं स्यादिति तथैवाह—वत्सानिति सार्द्धद्वयेन। क्वचित् कस्मिंश्चित् स्थाने। एवं यथापेक्षमिदं सर्व्वत्रैव योज्यम्; यद्वा, कस्मिंश्चित्समये कृत्यान्तरे व्यग्रतया यदा ते बन्धुं न शक्यन्ते, तदेत्यर्थः; वत्समोचनञ्च वत्सरोधनाद्यर्थम्। व्यग्रायां गृहिण्यां सुखेन गृहान्तर्द्ध्याद्यदनार्थं क्रोशे सम्यग्जातहासोऽक्रोशनार्थं लोकेषु क्रीडाकौतुकबोधनाय चेति परमधूर्त्ततोक्ता। अथ वत्समोचनानन्तरमत्ति बालकैः सहेति ज्ञेयम्। कल्पितैः पूर्व्वमवृत्तैरधुना तेनैव स्वयं रचितैः स्तेययोगैश्चौर्य्योपायैरित्यर्थः। न च केवलं सखिगणान्वितः स्वयमत्ति, किन्तु भोक्ष्यन् सन् मर्कटान् सर्वान् प्रति विभज्य ददाति; तोकान् नवबालकान्। अन्यत्तैर्व्याख्यातम्। यद्वा, स श्रीकृष्णः कदाचिच्चेत् स्वयं नात्ति, तर्हि भाण्डं भिनत्ति, तद्दोषमारोप्येति शेषः॥ २९ ॥ विधिं चौर्य्यस्यादानस्य वा उपायमाद्यशब्दात् 'पीठे पीठनिषण्णबालकगले' इति श्रीबिल्वमङ्गलाद्युक्त्यनुसारेण बालस्कन्धारोहणादि। हि निश्चितम्। पीठाद्यप्राप्येषु च तुंगशिक्यवर्त्तिभाण्डेषु। अन्यत्तैर्व्याख्यातम्। यद्वा, तद्वित् शिक्यभाण्डस्थदध्यादिविशेषवृत्तं सर्व्वं जानातीत्यर्थः। यद्वा, किमर्थं रचयति ? तत्राहुः—तत् शिक्यादिस्थितं दध्यादिद्रव्यं विन्दतीति तथा सः, तत्रत्यदध्याद्युपभोक्तुमित्यर्थः। ननु, भोः ! मिथ्या प्रलापवत्यः ! परमसरलशुद्धबुद्धेर्महाबालकस्यास्य किञ्चिदीदृशं ज्ञानं न लक्ष्यते, तत्राहुः—अन्तरेव निहितं संवृत्य धृतम्, न च बहिर्विस्तृतं वयुनं ज्ञानं सर्व्वबुद्धिर्येन सः। अहो यशोदे ! तर्हि चोरयतु नाम, यदि तत्र

तन्मूल्यं दातुं न शक्नुयादिति परिहासेनाहुः—धृतमणिगणमिति। ननु, गृहस्वामिनीनां साक्षादेवं कथं सम्भवेत् ? तत्राहुः—काल इति। इत्थं महाचोरतोक्ता ॥३०॥ धृष्टतामाह—धाष्ट्र्यानीत्यादिना। एवमित्यस्य परपादेनान्वयः। मेहनं मूत्रणं तदादीनि च कुरुते। आदिशब्देन मलोत्सर्गनिष्ठीवनादीनि। हे उशति ! परमसाध्व्यास्तवेदृशः पुत्रो नैव योग्य इति भावः,—वृद्धानां नर्मपरिपाटीयम्। ननु, 'जगज्जनमलध्वंसिश्रवणस्मृतिकीर्त्तनाः। मलमूत्रादिरहिताः पुण्यश्लोका इति स्मृताः॥' इति पुराणवचनात् पुण्यश्लोकानामपि तावन्मलमूत्रादिकं नास्ति, तत् कथं पुण्यश्लोकशिखामणेस्तद्घटताम् ? तथा हि त्रिचत्वारिंशे (भा० १०।४७।१)—'अथ कृष्णश्च रामश्च कृतशौचौ परन्तप' इत्यत्र 'कृतं शौचं शुद्धत्वं निरपराधत्वं याभ्याम्' इत्येव तैर्व्याख्यातम्; षष्टितमे च (भा० १०।६०।४५)–'त्वक्श्मश्रुरोम नख केशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट्कफवातपित्तम्। जीवच्छवं भजति कान्तमतिर्विमूढाः' इति श्रीरुक्मिणीदेव्यापि तदभाव उक्त इति ? सत्यम्–मेहनादीनि कुरुते वानरादिना कारयतीत्यर्थः। यद्वा, स्वभावतस्तदभावेऽपि बाल्यलीलाचापलदर्शनेन स्वभक्तजनानन्दनाय तदानीमेव तत् कृत्वा दर्शयतीति मेहनादीनामप्यबीभत्सत्वमेव,—रूपनामादीनामिव तस्य लीलानामपि सच्चिदानन्दरूपत्वेनालौकिकत्वादुह्यम्। सभयनयनश्रीमुखालोकिनीभिरिति तदाक्रोशनमुख्यप्रयोजनमुक्तम्। इत्थमुक्तप्रकारेण व्याख्यातो विशेषेण वर्णितोऽर्थः, तदवतारप्रयोजनं निजजन्मफलं वा, किंवा श्रीकृष्ण धूर्त्ततादिचेष्टा यस्यां सा; अतएव प्रहर्षोदयेन पुत्रचाञ्चल्यादि-कौतुकेन वा, किंवा तासां कौतुकपरतामेवाभिप्रेत्य प्रहसितमुखी सुस्मेरानना सती ह्येवोपालब्धुं तमाक्षेप्तुं नैवैच्छदिच्छामपि नैवाकरोदित्यर्थः। अत्रेदं तत्त्वम्,—मातृस्नेहभरेण सुखविशेषार्थं श्रीभगवतस्तस्याः सकाशादुपालम्भनेप्सा चिरं नितरामासीत्, तथापि पुत्रवात्सल्येन सा तस्य न सिद्धेति ॥ ३१ ॥ भक्तकर्त्तृकोपालम्भनानन्देप्सया बाल्यलीलानुक्रमेणैव मृद्भक्षणलीलामाह—एकदेत्यादिना। ते श्रीकृष्णस्य सहचरा हितपरा वा। गोपयन्ति श्रीव्रजेश्वर्य्याज्ञया सर्व्वतः श्रीकृष्णं रक्षन्तीति गोपाश्च ते बालकाश्च; यद्वा, गोपानां बालका इति सहजस्निग्धत्वमुक्तम्। मृदं भक्षितवानिति मृद्भक्षणानुकरणपाटवेन श्रीबलदेवादीनां तथैव प्रतीतेः, किंवा रहसि साक्षाद्भक्षणस्य संलक्षणादन्यथोपालम्भनासिद्धिः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

क्रोशसञ्जातहासः जनानामाक्रोशे जातहासः अत्ति भुङ्क्ते स्तेययोगैः चौर्यरूपैरुपायैः चौर्यस्योपायैर्वा मर्कान् दधिसारस्य नवनीतं प्रचक्षते इत्याह—तं विभजति सखिभ्य इति शेषः। यद्वा मर्कं मर्कटं प्रति विभजति स्वोपभोक्तव्यमधिकं कर्कटादिभ्यो ददातीत्यर्थः। सचेन्नात्ति स मर्कः कृत्स्नोपभोगान्नात्ति चेत् केवलं भाण्डं भिनत्ति कृत्स्नं च क्षयित्वा भाण्डं च भिनत्तीत्यर्थः। यद्वा मर्कटको नात्ति चेत् भुक्तावशिष्टगव्यसहितं भाण्डं भिनत्तीत्यर्थः। द्रव्यालाभे दधिक्षीरादेः कृष्णभयात् प्रच्छन्ननिहिततया तदलाभे सति स्वगृहे कुपितः तस्मिन् गृहे कुपितः तोकान् बालानुपक्रोश्य प्रहारतोदनादिभिः कुपितान् कृत्वेत्यर्थः ॥ २९ ॥ अन्तर्निहितवयुनो अन्तर्निहितनवनीतादिभोग्यद्रव्यज्ञानवान् शिक्यस्थभाण्डे दृषद्भिः छिद्रं रचयतीत्यन्वयः। ध्वान्तागारे अन्धकारावृतागारे धृतमणिगणं स्वाङ्गम् अर्कप्रदीपं प्रकाशं स्वरङ्गं रचयति सन्निधापयति ॥ ३० ॥ यस्मिन् कृष्णः द्वारे देहल्यादिप्रदेशे विरचितकृतिः विरचितचौर्यव्यापारः सुप्रतीको यथास्ते सुप्रतीकाख्यदिग्गज इव अप्रधृष्य आस्ते सभयनयनं भयसूचकनयनसहितं श्रीमुखं कृष्णस्य श्रीमुखमालोकयन्तीभिः व्याख्यातार्था निवेदितशौर्यादिव्यापारान् उपालब्धुं भर्त्स्नादि कर्त्तुम् ॥ ३१–३५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह–वत्सानित्यादिना सार्द्धद्वयेन। असमये कचित् वत्सान् मुञ्चन् क्रोशेन जनानामाक्रोशेन सञ्जातो हासो यस्य तथाभूतो भवति स्तेयं चौर्यार्जितं न तु दत्तं तत्रापि स्वादु नेतरत् दधि पयश्चात्ति खादति कल्पितैः स्तेययोगैः चौर्योपायैः स्वयं भोक्ष्यमाणाः मर्कान् प्रति विभज्य ददाति तेषामपि मध्ये तृप्तः कोपि नात्ति चेत्तर्हि भाण्डं भिनत्तिमर्कं भोक्ष्यन् विभजति सचेन्नास्ति इति पाठे मर्कं नवनीतं "मर्कं तु दधिसारः स्यान्नवनीतं प्रचक्षते" इत्यभिधानाद्विभजति सखिभ्य इति शेषः। यद्वा स मर्कटो नास्ति चेत् स्वभुक्तावशिष्टनवनीतोपेतं भाण्डं भिनत्तीत्यर्थः। कचिन्नवनीतादिद्रव्यालाभे सति प्रच्छन्ननिहिततया तद्लाभे सति स्वगृहकुपितः अस्मद्गृहेभ्यः कुपितः सगृहेति पाठे स कृष्णः यद्वा सगृहा गृहिणस्तेभ्यः कुपितः तेषां तोकान् पर्यङ्कादिषु सुप्तानुपक्रोश्य रोदयित्वा याति ॥ २९ ॥ कल्पितैः स्तेययोगैरित्युक्तं तत् प्रपञ्चयति—हस्ताग्राह्य इति। उच्चस्थे नवनीतादिभाण्डे हस्तेन गृहीतुमशक्ये सति पीठकोलूखलाद्यैर्विधिं तद्ग्रहणसाधनविधानं रचयति शिक्यस्थभाण्डेषु अन्तर्निहितेषु दध्यादौ वयुनं ज्ञानं यस्य तथाभूतः छिद्रं रचयति शिलोत्क्षेपणादिभिः छिद्रं करोति तद्वित् छिद्ररचनादिवित् ध्वान्तागारे अन्धकारावृतगृहे धृतमणिगणं दिव्यमणिविभूषितमत एवार्थप्रदीपं तत्तदर्थप्रकाशकं स्वाङ्गं स्वशरीरं रचयति सन्निधापयति इत्येवं कस्मिन् समये करोति श्रीकृष्णस्तं कालमाह–यस्मिन् काले गोप्यो गृहकर्मसु प्रवणचित्तास्तदैवं करोतीत्यन्वयः ॥ ३० ॥ एवं कुर्वंश्चोरोऽयमित्युक्तः चेद्धाष्टर्यानि प्रागल्भ्यान्युशति जल्पतित्वमेव चौरोऽहमेव गृहस्वामीति वदतीत्यर्थः। वास्तौ स्वचिते

गृहे मेहनादीनि मूत्रोत्सर्जनादीनि कुरुते स्तेयोपायैर्विरचिताकृतिः कर्म येन तथाभूतोपि त्वत्समीपे यथा सुप्रतीकः साधुस्तद्वदास्ते एवमित्थं सभये नयने यस्मिन् तच्च तच्छ्रीयुक्तं मुखं तत्कृष्णमुखमालोकिनीभिः स्त्रीभिर्व्याख्याताः प्रख्यापिता अर्थाच्चौर्यादिव्यापारा यस्यास्तथाभूतापि प्रहसितं मुखं यस्याः सा यशोदा उपालब्धुं पुत्रमाक्षेप्तुं नैच्छत ॥ ३१ ॥ कदाचिदपराधान्तरे सत्युपालभत तदा तु महदाश्चर्य्यमभूदिति कथयन्नाह-एकदेति स्पष्टोर्थः ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

असमयानप्राप्तदोहनवेलान् अस्मदादीनां क्रोशेन सञ्जातो हासो यस्य स तथा अथ कदाचित् स्वेन कल्पितैस्स्तेययोगैः चौर्योपायैः स्तेयं चौर्यापन्नं दधि पयश्च स्वाद्वत्ति पिबति च स कृष्णः मर्कं बालं मार्जारं वा वानरं वा भोक्ष्यन् भोजयिष्यन् विभजति विभागं करोति नास्तिचेन्नवनीतादिभाण्डं भिनत्ति कदाचिदुपायानां भावेऽभावे च द्रव्यालाभे दध्यादिद्रव्याप्राप्तौ कुपितः ताडनादिना बालाननुक्रोश्य रोदयित्वा यातीत्यन्वयः "मर्को मनसि वायौ च तोके मार्जारकीटयोः" इति च ॥ २९ ॥ स्तेययोगं दर्शयति-हस्तेति । ह्रस्वत्वेन हस्ताग्राह्ये सति हस्तेन ग्रहणार्थं पीठकाद्यैर्विधिम् उपायं प्रकारं रचयति शिक्यस्थितभाण्डेषु मध्ये अन्तर्निहितवयुने अन्तर्निक्षिप्तनवनीतभाण्डे तद्वत् यथालब्धुं सुशकं तथा छिद्रं लगुडादिना विवरं करोतीत्यन्वयः गृहान्धकारे क उपाय इति तत्राह—ध्वान्तागार इति । अन्धकारावृतगेहे धृतमणिगणं धृतसूर्यादिप्रकाशाधिकप्रकाशं रत्नगणसम्वीतं स्वाङ्गं स्वदेहम् अर्थप्रदीपं पदार्थप्रकाशकं कृत्वेति शेषः । कस्मिन् समये इत्यत्राह-काल इति ॥ ३० ॥ एवं तदा धाष्ट्र्यान्निर्भयः प्राविशति गृहमिति शेषः । उपविश्य च वास्तौ देहल्यादौ मेहनादीनि पुरीषोत्सर्जनादीनि करोति स्तेयोपायैस्स्तेयव्यापारैः विरचितकृतिः निर्मितचौर्यव्यापारः शोभनानि प्रतीकान्यङ्गानि यस्य स चार्वङ्गः सच्चरित्रः पुरुषो यथा तथाऽऽस्ते इत्यन्वयः । सुप्रतीको मार्जारो वा सभयं नयनं यस्मिंस्तत्सभयनयनं च श्रीमुखं च सभयनयनश्रीमुखं श्रिया युक्तं मुखं श्रीमुखम् आस्यावलोको यासामस्तीति सभयनयनश्रीमुखावलोकिन्यस्ताभिर्व्याख्यातः प्रकाश्य कथितोऽर्थः सुतविषयो व्यापारो यस्याः सा तथा उपालब्धुं निर्भर्त्सयितुम् इत्थंशब्द समाप्तिवचनः ॥ ३१-३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वत्सानित्यादि । वनात् फलादिभिस्तृप्तत्वेन तेषु कोऽपि नात्ति चेत् तर्हि स्वयमपि नात्ति भाण्डञ्च भिनत्तीत्यर्थः ॥ २९-३० ॥ उशति कमनीय इति वशेरत्र रोचमानतार्थप्राधान्यात् नह्युपालब्धुमैच्छदिति तदेतदेवाभिप्रेत्य ताभिरपि क्रोशनं कृतमिति भावः ॥ ३१ ॥ पुनरेतत् पूर्वां कामपि पूर्ववदद्भुतलीलास्मृत्याह—एकदेत्यादि । एवं निगूढेति व्याख्यायां यद्येवम् ॥ ३२-३५ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथान्यद्बाल्यलीलाचापल्यमाह—ध्वान्तागारे धृतेत्यादि । अधृतमणिगणमपि स्वाङ्गमर्थप्रदीपम्, अर्थात् द्रव्याणि प्रदीपयति इति तथा । अथवा हस्ताग्राह्ये रचयति विधिमित्यतो रचयतीति क्रिययैवान्वेतव्यम् । ध्वान्तागारे स्वाङ्गमर्थप्रदीपं रचयतीत्यर्थः । अधृतमणिगणमपीत्यत्रापि शब्दोऽन्वेतव्यः, अन्यथा मणिगणस्यैवौज्ज्वल्यम्, न तदङ्गस्य प्रकृते तदङ्गस्यैव ज्योतिष उत्कर्षः । अथवा धृतमणिगणमपि स्वाङ्गमेवार्थप्रदीपं रचयति मणिगणस्य तथा न प्रकाशः, यथा तदङ्गस्येति भावः । न तु हेतुमद्विशेषणम् । यत्र मणिगणोऽपि न प्रकाशकः, तत्र तदङ्गमेवेत्यर्थः ॥ ३० ॥ न केवलमिदमन्यच्चेत्याह-एवं धाष्ट्र्यानीत्यादि । हे उशति ! कल्याणि ! एवं मेहनादीनि धाष्ट्र्यानि कुरुते कारयत इत्यन्तर्भूत ण्यर्थः । अथवा एवं मे मम उशति कमनीये वास्तौ कुरुते, ह स्फुटम् । कीदृशानि नादयुक्तानि साक्रोशालङ्कारसहितानि । अथवा उशति आलेपनादिना कमनीये वास्तौ मेहनं पूर्णकुम्भान् भित्वा पयोभिः सेचनम् आदिशब्दाद्धूलिपत्रादिभिराविलीकारः, तदादीनि कुरुते । 'मिह सेचने' इति सेक एव मुख्यार्थः । यद्वा एवमीदृग्धाष्ट्र्यैः धृता येषु तानीहनादीनि चेष्टादीनि मा कुरुते, कुरुत एवेति मा शब्दो नञर्थे काक्वर्थः । ईहनमाङ्गिकी चेष्टा । आदिशब्दाद् वाचिकी परुषभाषितादि च वास्ताविति तुल्ये । अन्यथा नराकृतित्वेऽप्यखण्डसच्चिदानन्दघनस्य तस्य यथा-श्रुतोऽर्थोऽश्लील एव ॥ (३२-३४) ।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ध्वान्तागारे धृतमणिगणमित्यादि अधृतमणिगणमपि स्वाङ्गम्, अर्थानां दधिदुग्धादिभाण्डानां प्रदीपम्, दीपयतीति दीपो विशेष्यलिङ्गः, न त्वजहल्लिङ्गः । अथ रचयतीत्यस्यैव कर्म, अन्धकारवत्यामपि गृहे स्वाङ्गमेवास्य अर्थप्रदीपो भवति, 'अपि' शब्दोऽध्याहार्यः ॥ ३० ॥ एवं धार्ष्ट्यान्युशतीत्यादि । कुरुते कारयते इत्यन्तर्भूतण्यर्थः । अथवा, एवं धार्ष्ट्यानि कमनीयमेव वास्तौ कुरुते । ह स्फुटम् । कीदृशानि ? नादीनि नादयुक्तानि–'एवं करिष्यामि, तिष्ठ तिष्ठ इत्याद्युच्चैः शब्द-पुरःसराणि, (२९ श- श्लो.) 'उपक्रुश्य तोकान्' इत्यादि यत् पूर्वमुपक्रोशः कृतः स एवानूदित इत्यर्थः । अथवा, न आदीनि

अनादीनीत्यर्थः, पुनः पुनः संपाद्यमानानि, न केवलमथैव; यद्वा उशति आलेपनादिना कमनीये वास्तौ मेहनादीनि कुरुते, मेहनं पूर्णकुम्भान् भित्त्वा पयोभिः सेचनम्, 'मिह सेचने' इति मुख्य एवार्थः। आदिशब्दात धूलिपत्रादिभिराविलीकरणं तानीत्यर्थः। यद्वा, एवमीदृक् धार्ष्ट्यं येषु तानि ईहनादीनि चेष्टादीनि–चेष्टा आङ्गिकी क्रिया, आदिशब्दाद् वाचिकी च; 'मा कुरुते मा कुरुत एव' इत्यर्थः। अन्यथा अखण्डघनसच्चिदानन्दविग्रहे तत्तत स्फुरणमनुचितम्–(ध्वन्यालोके ३।१४) अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्" इति न्यायात्॥ (३२–३५)

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सखि यशोदे! शृणु स्वपुत्रस्य चौर्य्यचातुर्य्यमित्याहुः—वत्सानिति। एतत्पुरेऽद्य शून्यगृहेषु दधि चोरयामीति मनसि कृत्वा गत्वा गत्वा गृहान् जनशून्यांश्चिकीर्षुः कंचिद्दिवसे असमये अदोहकाले वत्सान् मुञ्चन् भवति ततश्चेतस्ततो धावतो वत्सान् परावर्त्तयितुं तदनुपदं गृहान्निःसृत्य जनेषु धावत्सु शून्यगृहान् प्रविश्य दधि चोरयित्वा पलायत इति भावः। अन्यस्मिन्नहनि अरे दधिचोरः कृष्ण आगतस्ताड्यतां नह्यतामित्यादिक्रोशे आक्रोशकृते सति सञ्जातहासो भवति अथ तदनन्तरमेव महामादकहास्यमधुपानवैवश्येन जडीभूतास्वस्मासु पश्यन्तीष्वपि निषेद्धुमपारयन्तीषु दधि पयोऽस्ति तत्रैवोषित्वा भुङ्क्ते नापि पलायत अस्माकं मोहिनीकृतत्वादिति भावः। नन्वेवं चेद्दधिलम्पटमिमं प्रथममेवोदरपूरं कथं न भोजयध्वे? तत्र त्वयाऽभीक्ष्णं भोजितस्यास्य न बुभुक्षादिकं किन्तु स्तेयं स्तनकमेव स्वादु अतश्चोरितमेव दध्यादिकमस्मै रोचते न तु दत्तमिति भावः। तदेवं परोक्षमपरोक्षं चेति द्विविधं चौर्य्यं वत्समोचनहासाभ्यां ज्ञापितम् एवं कल्पितैः स्वबुद्ध्यैव रचितैः स्तेययोगैश्चौर्य्योपायैरपरैरपि लोष्ट्रक्षेप्त्रादिभिरपरस्मिन् परस्मिन्नपि दिने भोक्ष्यन् स्वभोजनात् पूर्वमेव मर्कान् मर्कटान् प्रति विभजति अयमयं भवतां प्रत्येकं भाग इति विभज्य ददाति बहुत्र भोजितत्वेनातितृप्तत्वात् तेषां मध्ये स एकोपि मर्कटो नास्ति चेत्तदा युष्मान् विना किं मे भोजनेनाहमपि न भुञ्जे इति दुःखेन भाण्डं दधिपूर्णं भिनत्ति कदाचित् शून्यगृहे प्रविश्य दध्याधिद्रव्यालाभे सति सगृहाय गृहसहितजनायैव कुपितः तिष्ठ रे तिष्ठ श्वः प्रातर्ज्वलदङ्गारमेकं गृहीत्वैव चौर्य्यार्थमेष्यामि यत्र दधि न प्राप्स्यामि तद्गृहं सबालकवृद्धमेव धक्ष्यामीत्युक्त्वा तोकान् बालापत्यानि उपक्रुश्य नखाद्याघातेन रोदयित्वा याति कस्मिंश्चिदन्यस्मिन् गृहे प्रविष्टस्सन् हस्तेन गृहीतुमशक्ये दधिभाण्डे विधिमुपायं रचयति उपर्य्युपरि निहितद्वित्रिपीठारोहणेन वा उलूखलारोहणेन वा बालस्कन्धारोहणेन वेत्यर्थः। अतितुङ्गशिक्यवर्त्तिभाण्डेषु अन्तर्निहिते दध्यादौ वयुनं ज्ञानं यस्य सः भाण्डचिक्कण्यदर्शनेनेति भावः। अवरोपयितुमशक्तः सशल्यकलगुडेन छिद्रं रचयति तद्वित् छिद्रं कर्त्तुं छिद्रेण धारां पातयितुं धारया च स्यादत्तं स्वस्य बालानां च मुखं पूरयितुं वेत्तीति सः न चान्धकारेऽपि चौर्य्यासामर्थ्यमित्याहुः, ध्वान्तयुक्ते अगारे स्वाङ्गं स्वीयश्यामाङ्गमप्यर्थप्रदीपं रचयति तत्रापि धृतमणिगणमिति किमप्यावदितं न तिष्ठतीति भावः। कथं सावधाना न तिष्ठत? इति चेत्तत्राहुः, काले इति। यद्यप्यस्य स्मितकलभाषणमधुरचलनगात्रलावण्यादिमय्येव प्रत्यक्षचौर्य्यनिष्पादिनी मोहनीविद्यैवास्ति तदापि बाल्यमौग्ध्यवशात् परोक्षचौर्य्यप्रिय एवासौ बुद्ध्यत इत्यत एव का कुत्र किङ्कुरुत इति बालसहचरप्रेषणादिना प्रतिक्षणमनुसन्धत्ता इति भावः॥ २९–३०॥

न केवलं चौर्य्यमेव कुरुते इत्याहुः—एवमिति। हे उशति हे कमनीये! स्वपुत्रगुणश्रवणेनानन्दिते हे यशस्विनि! वास्तौ देवपूजार्थमामृष्टलिप्तभूमौ मेहनादीनि मूत्रपुरीषोत्सर्गादीनि धाष्ट्यान्युपद्रवान् पुरन्ध्रीजनवेण्युत्तरीयाकर्षणविवाहचिकीर्षया पादप्रहारादीनि किञ्च तवानेन तनयेन महती सम्पत्तिर्भाविनीत्याह—स्तेयरूपैरुपायैर्वित्ताजनैर्विशेषेण रचिता कृतिर्व्यापारो येन सः बाल्ये दधि चौरयति यौवने परवित्तकलत्रादीन्यपि चोरयिष्यतीति भावः। त्वत्समीपे तु सुप्रतीकः साधुरिवास्ते तासां प्रेमविशेषमयफूत्कारफलमाह, सभयनयनं माता मां ताडयिष्यतीति शङ्काव्याकुलं श्रीयुक्तं सचकितविह्वलदृष्टित्वलक्षणशोभाविशिष्टं मुखमालोकितुं शीलं यासां ताभिर्व्याख्यातोऽर्थः श्रीकृष्णधाष्ट्यदर्शनश्रवणश्रावणादिविविधभावशोभिततन्मुखावलोकनोत्थम् आनन्दो यस्यै सा अत एव प्रहसितमुखी तासां स्वस्य चानन्देन प्रफुल्लितमुखी उपालब्धुमाक्षेप्तुं नैच्छदिच्छामपि नाकरोत् मत्सुतधाष्ट्र्येनेमा आनन्देन निमज्जन्तु तत्तत्सूचयन्त्यो मामपि निमज्जयन्त्वित्याकाङ्क्षयेति भावः॥ ३२॥ पुरन्ध्रीणां सूचनं वात्सल्यरसास्वादफलकं समाप्य सहचराणामपि सूचनं विस्मयरसास्वादोदर्कमाह—एकदेति। दध्नः स्तेये अनुपालम्भं प्रोच्य प्राह मृदोऽशने उपालम्भं जनेन्येति द्वये प्रेमैति हेतुताम्॥ ३२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

क्वचित् कदाचित् असमये अदोहकाले वत्सान् मुञ्चन् क्रोशसञ्जातहासः क्रोशेन असमये वत्सविमोचननिमित्तेन आक्रोशेन सञ्जातः हासो यस्य स तथाभूतो भवति स्तेयं चौर्यार्जितं दधि पयश्चात्ति अन्यदपि स्वादु वस्त्वपि क्वचित् भोक्ष्यन् मर्कान् मर्कटान् प्रति विभजति तन्मध्ये कोऽपि नात्ति चेत्तदा भाण्डं भिनत्ति क्वचिच्च द्रव्यालाभे सति सगृहेभ्यो गृहिभ्यः कुपितो याति क्वचिच्च तोकान् बालान् उपक्रोश्य याति॥ २९॥ कल्पितैस्स्तेययोगैरित्युक्तं, तदाह—हस्ताग्राह्ये इति। यर्हि

यस्मिन् काले गोप्यः गृहकृत्येषु सुव्यग्रचित्ताः भवन्ति तदा हस्ताग्राह्ये उच्चस्थे दध्यादिभाण्डे सति पीठकाद्यैर्विधिं रचयति अत्युच्चैः पीठकादिविधानेनापि हस्ताग्राह्येषु भाण्डेषु अन्तर्निहिते दध्यादिवयुनं ज्ञानं यस्य सः यष्ट्यादिना छिद्रं रचयति तद्वित् तां छिद्ररचनां जानातीति स तथा ध्वान्तागारे तु स्वाङ्गं स्वासाधारणं प्रकाशरूपमङ्गमर्थप्रदीपमर्थानां दधिभाण्डादीनां दीपवत् प्रकाशकं रचयति तदपि मणिमयाभरणविद्योतितत्वादतिप्रकाशकं भवतीत्याहुः धृतमणिगणमिति ॥ ३० ॥

एवमन्यान्यपि धाष्टर्यानि कुरुते किञ्चोशति वास्तौ स्वर्चिते गृहे मेहनादीनि मूत्रोत्सर्गादीनि कुरुते को हीत्थमसाधुकारी तं ब्रूतेत्यत आहुः—स्तेयोपायैर्विरचिताकृतिः कर्म येन सः त्वत्समीपे सुप्रतीकः साधुरिवास्ते तासां भाषणं श्रुत्वा माता किञ्चकार तत्राह—सभये उपालम्भशङ्कया भययुक्ते नयने यस्मिन् तत्स्वाभाविक्या श्रिया युक्तं मुखं श्रीमुखं तच्च तच्च तदालोकिनीभिर्व्याख्यातः पुत्रकर्मरूपोऽर्थो यस्याः सा तथाभूतापि प्रहसितमुखी सती पुत्रमुपालब्धुमाक्षेप्तुं नैच्छत् ॥ ३१ ॥ यदा श्रीयशोदा पुत्रवात्सल्यादुपालब्धुं नैच्छत्तदा तूपालम्भशङ्कया भयभीतोऽभूत्स्वस्य भक्तपारवश्यतां सूचितवानित्युक्तम् अथ यदा स्वबालकस्यारोग्यमिच्छती सा मृद्भक्षणे उपालम्भं चकार तदा मदुपालम्भनिमित्ततः पश्चात्तापं करिष्यतीति शान्त्यर्थं स्वस्य सर्वोपद्रववर्जितत्वसर्वाश्रयत्वप्रकाशनेन भक्तवश्यतां दर्शितवानित्याह श्रीशुकः—एकदेत्यादिना ॥ ३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तदाहुः वत्सानिति त्रिभिः । गृहान् जनशून्यान् विधाय दधि चोरयामीति निश्चित्य क्वचित् कदाचिदसमयेऽदोहकाले वत्सान् मुञ्चन् भवति ततो जनशून्येषु गृहेषु प्रविश्य दधि चोरयतीत्यर्थः । कदाचित् दधिचोरो हरिरित्याक्रोशेऽस्माभिः कृते सति सञ्जातहासो भवति पश्यत भो गृहस्वामिनं मामेतादुर्द्धियश्चौरं वदन्तीति ब्रुवन् हसतीत्यर्थः । हासमोहितास्वस्मासु तत्रैवास्मद्गृहे रत्नपीठे निषद्य गृहस्वामीव दधिपयश्चात्ति ननु युष्माभिरेव कथं न दीयते तत्राह स्तेयं स्तेनकर्मैवास्य स्वादुचोरितमेवास्मै रोचते नतु दत्तमिति भावः । कल्पितैः स्तेययोगैस्तदानीय स्वयं भोक्ष्यमाणो मर्कान् कपीन् प्रति तवायं भागस्तवायमिति विभजति यदि तृप्तत्वात् कश्चिन्मर्कटो नात्ति तदा त्वयाविना किं मे भोजनेनेति विमनाः सन् दधिपूर्णं भाण्डं भिनत्ति कदाचिद्दध्यादिद्रव्यालाभे सति स कृष्णः गृहाय धक्ष्यामि त्वामिति कुपितस्तत्र पर्यङ्के सुप्तान् तोकान् शिशूनुपक्रोश्याचोटनेन रोदयित्वा यातीति ॥ २९ ॥ कल्पितान् स्तेययोगान् स्फुटयन्ति हस्तेति । हस्ताग्राह्ये उच्चनिहिते दध्यादिके विधिं तद्ग्राह्यत्वोपायं रचयति पावके-नोलूखलेन विपर्ययस्तेन बालस्कन्धेन वा रूढेत्यर्थः । अत्युच्चशिक्यस्थेषु भाण्डेषु सशल्याग्रलगुडेन छिद्रं रचयति अन्तर्निहितं वयुनं ज्ञानं यस्य सोऽति चतुर इत्यर्थः । छिद्रं कर्तुं धारां पातयितुं तया स्वास्यं स्वमित्राणाञ्च व्यादत्तमास्यं पूरयितुं च वेत्तीति सः वयं प्रच्छन्नो दूरात् तत्कौतुकं पश्याम इति सूच्यते न चान्धकारिणि गृहे अस्यासामर्थ्यमित्याह ध्वान्तयुक्तेऽगारे गृहे साङ्गमेवार्थप्रदीपं रचयति तत्रापि धृतमणिगणमिति अङ्गप्रभया तिमिरविनाशात्तत्रापि समर्थोऽयमिति भावः । यद्यपि सौन्दर्यमधुरभाषणमोहिता न कापि प्रत्यक्षं चौर्यमस्य वर्जयेत्तथापि परोक्षचौर्यप्रियोऽयं विदित इत्याह यर्हीति गोपीनां गृहकार्याभिनिवेशं सहचरैर्विज्ञाय तद्गृहेषु दध्यादि चोरयतीति ॥ ३० ॥ किञ्च दध्यादिचौर्यमात्रं न करोति किन्त्वन्यानप्युपद्रवान् रचयतीत्याहुः एवमिति एवमीदृशान्यन्यान्यपि धाष्टर्यानि एवप्रकारोपमयोरिति विश्वः, तानि कानीत्यत्राहुः, उशति भगवत्पूजार्थं लिप्ते चित्रिते वास्तौ मेहनादीनि जलनिषेकतृणधूलप्रक्षेपलक्षणानिच कुरुते कीदृशः स्तेयोपायैर्विरचिताकृतिर्भोजनव्यापारो येन सः, यद्वा हे उशति कमनीये यशोदे राज्ञि इह नगरे स्तेयोपायैरमासह अमासहार्थान्तिकयोरिति विश्वः तत्पूर्वकाणीत्यर्थः । एवमुक्तलक्षणानि धाष्टर्यानि कुरुते कीदृशानि नादीनि मित्राण्याकृष्टुं कोकिलबर्हिनादवन्तीत्यर्थः । विरचिता प्रकाशिताकृतिश्चौर्यप्रावीण्यक्रिया येन सः अधुना त्वदग्रे सुप्रतीकः शोभनाङ्गः साधुर्यथास्ते तासां भगवच्चौर्यसूचनायाः फलमाहेत्थमिति मातामान्ताडयेदिति सभयनयनं यत् श्रीयुक्तं मुखं तदालोकितुं शीलं ताभिः स्त्रीभिः व्याख्यातश्चौरे तस्मिन् स्वप्रेमरूपोऽर्थो यस्यै सा उपालब्धुं नैच्छत् मदगर्भखनिमाणिक्येऽस्मिन्नेताः सर्वाः प्रेमाणं धारयन्तीति बाल्येऽतिचापल्यधरस्तारुण्येऽति धैर्यं धारयेदिति च विज्ञाय प्रहृष्टो तदिच्छामपि नाकरोदित्यर्थः, किन्तु प्रहसितमुखी इदृशः पुत्रो नन्दराजात् कथमुद्भूत् कोऽस्मै कन्यां दद्यादित्युक्ता स्मितवदना बभूवेत्यर्थः प्रहसितमित्यादिकर्मणि क्तः ननु परेशस्य राजपुत्रस्य च हरेश्चौर्यकर्मेदं लघुत्वादचमत्काराच्चाश्लाघ्यं मैवं भक्तेषु कृपापीयूषवर्षित्वेन महत्वात् चौर्यरीत्यभावेन चमत्काराच्च श्लाघ्यतमं तत् आनन्दमयस्य प्राणाभिप्रेष्ठस्य शश्वदभीष्टदर्शनस्य स्वयमेवातिक्रमासाद्य नानाविनोदविधानेन कृपातिशयः अतिलावण्येन मणिगणभूषणधारणेन बाल्यातिचापल्येन स्वतुल्यबालकुलकपिवृन्दसंसर्गेण चापूर्वेण चमत्काराधानं च ॥३१॥ एवं दधिचौर्यादिचरितेन सूचितेनापि मातुरुपालम्भालाभादपरितुष्टस्य हरेस्तदुपलंभकं चरितमाहैकदेति ॥ ३२ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

तद्वदतिशयेन दध्यादि स्वीकारोपायविलक्षणो यर्हि यस्मिन्काले गोप्यो गृहकृत्येषु सुव्यग्रचित्ता भवंति तस्मिन्काले ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं दध्यादियुक्तभांडलक्षणार्थज्ञानहेतुं कृत्वा दध्यादौ हस्ताग्राह्ये हस्तेन गृहीतुमशक्ये

सति शिक्यभांडेषु शिक्यस्थापितभांडेष्वंतर्निहितानां स्थापितानां दध्यादीनां वयुनार्थम् ज्ञानार्थं । छिद्रमित्यतः परं कृत्वेत्यादीनां शेषः । छिद्रं कृत्वा छिद्रेण शिक्यभांडस्थितदध्यादिकं ज्ञात्वा दध्यादि प्राप्त्यर्थं पीठकोलूखलाद्यैर्विधिमुपायं रचयति करोतीति । एतेन तद्विदिति वक्तव्या । तद्वदिति कथनमनुपपन्नमिति चोद्यं परिहृतम् । तृतीयोऽतिशय इत्यनेनातिशयार्थे तद्विदितीकारस्याकारादेशे तद्विदिति रूपं निष्पन्नमित्यभ्युपेत्य तद्वद्वित्यस्यातिशयेन दध्यादिस्वीकारोपायज्ञानवानित्यर्थ इत्युक्तत्वात् । एतेनैवांतर्निहितज्ञानार्थमित्यर्थलाभार्थमंतर्निहितवयुनार्थमिति वक्तव्यम् । अंतर्निहितवयुन इति सप्तमीप्रयोगोऽनुपपन्न इति चोद्यं पराकृतं । अंतर्निहितवयुन इति सप्तमीतादर्थ्ये इत्यभ्युपगमात् ॥ ३० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

असमये असमयानिति सरलौ पाठौ । असमयान्न विद्यते समयो दोहनभ्रामणादियोग्यो येषां तान् । उक्तैतद्विकलेलवे । वत्सांस्तर्णकान्मुञ्चन् क्वचित्क्रोशादस्माभिः कृतादाक्रोशात्सञ्जातो हासो यस्य सोऽथ क्वचित्कल्पितैः स्तेययोगैश्चौर्योपायैरागतं स्तेयं दधि च पयः स्वादु यथा तथाऽत्ति । स्तैन्यचौर्ये स्तेयं तद्धनमित्यमरः । मर्कं मर्कटं मार्जारं बालकं वा । मर्को मनसि वायौ च तोके मार्जारकीशयोरिति यादवः । भोक्ष्यन्भोजयिष्यन्विभजति विभज्य ददाति । स मर्कटादिर्नास्ति चेद्भाण्डं लोकावलोकनतः स्वतृप्त्यनन्तरं पात्रं भिनत्ति द्रव्यालाभे नवनीताद्यलाभे सुभृशः कुपितः सन् तोकान्बालकाननुक्रोश्य रोदयित्वा याति । नास्ति चेन्नवनीतादीति व्याख्यानद्रव्यानलाभ इति न वक्तव्यमिति स इति मर्कपरामर्शकमति सरलपन्थाः । मर्कमित्येकवचनान्तपाठं स चेदित्यानुकूल्येन चेतोहरः । बहुवचनान्तपाठे स इति जात्येकवचनमिति मन्तव्यम् । हे असम कृष्ण ते त्वयैव कल्पितैरययोगैः शुभावहोऽवधिरयो योग। यज्ञादिस्तदितरोपायास्तस्य सम्बन्धा इति तद्वैचित्र्याद्बहुवचनम् । अथ दधिपयोऽन्यो निरन्नोऽपि बलेन भूयानित्यादेश्च । न विद्यते थमन्नम् । अन्नन्थमिति श्रुतिः । टीका चातिथिं जनानामित्युव्याख्यावसरेऽतिथिं बह्वन्नमिति । अनश्नन्नन्य इति श्रुतेः । न केवलं त्वमेवमपि तु गुहां प्रविष्टो शुभं पिबतीत्यादेरिति सूचयत्याचारार्थककिपेति मन्तव्यम् । निरन्नवदाचरन्तो थं तस्तदधिपयस स चासावधिपश्चेति वा । अयं तदितरो जीवस्ते सकाशादेव स्वाद्वत्ति अस्वाद्वेव स्वादुत्वेनात्ति कर्मफलं पिप्पलं स्वाद्वत्तीत्यनुकृतिः स साररूपो वत्सान्वत्सो वायुस्तेन सहानिति स्वात्मानं प्रतीति स जीवसङ्घः । स एनान्ब्रह्म गमयति सोऽहं वायुं दिशां वत्सं वेदेत्यादेः । तर्हि तेषां स्वतो मतिरस्ति किमित्यत आह ॥ चिज्ज्ञानं केति । यो यान् तं जनं यदाक्रोशेन तत्कालप्रदर्शितेन सञ्जातांस्तत्कल्पनान्हन्तीति स तथा तदा मुञ्चन् । अन्तर्णीतण्यर्थो मुचिः । लिङ्गभङ्गं कारयन् यो भवान्कथं मर्कं मनः स्वमनोनुसारं तज्ज्ञानमनुसृत्य वा भोक्ष्यन्भोजयिष्यन्विभजति । आनन्दादिकं विभजति यस्तु विभजति विभजते । न च स च चेदिति भजनाभजनस्वभावो नित्यसंसारान्तमस्ति भाण्डं सुखमिति ज्ञेयम् । भाण्डं भूषणमात्रेऽपि भाण्डं मूलवणिग्धने । नदीपात्रे तुरङ्गाणां भूषणे भाजनेऽपि चेति विश्वः । यो न विभजति स्वं न सेवते स चेन्नातमोयोग्योधिकार्यस्ति । द्रव्यालाभे तत्समर्पिताप्राप्तौ तस्य भाण्डं विवक्षातो विरजापात्रं दूरे यस्येति नास्ति तदेव यस्येति तं तथैव तं मुञ्चन् अस्ति क्षीरागोरितिवन्नास्ति भाण्डं सुखदुःखभाजनरूपं लिङ्गाङ्गं भिनत्ति । सुभृशकुपितोऽतः स दुर्जनः । अकान्न विद्यते कं सुखमात्रं येषु तान् लोकान् तामिस्रादीनुपक्रोशी रुदन्याति । इति महिमा भवानित्यान्तरङ्गिको भावो भामिनीनां विभावनीयः । एवमुत्तरत्रापि शक्यो वर्णयितुमर्थस्तथाऽपि विस्तरो नो भीषयतीत्युपरतम् । तदसुषु भृशकुपित इति वा । वत्सांस्तर्णकानिव विद्यमानांस्तोकानात्मजान्यांस्तत्कल्पे संहार्यतया ज्ञातान् । क्रोशेनाक्रोशेन सहितश्चासौ सञ्जातो हासश्च यस्य सः । संहारस्य कोपप्रदर्शनं विना दर्शनात्क्रोशोऽदुःखाद्धास इति ज्ञेयम् । सुभृशकुपित इवोपक्रोश्य रोदयित्वाऽत्ति भक्षयति ॥ अत्ता चराचरग्रहणात् । सर्वं वा अत्तीत्यादेः । तन्मध्ये यदथन्नभिन्नवदाचरश्चर्मास्थिपूर्वकं शक्यं भक्षयितुं तथाऽपि न लोके तथेत्याचारक्विपा सूचयति । भाण्डमलङ्कारात्मना मुञ्चन्स्थापयन् । ब्रह्मचर्मशिरः पट्टी दिक्पालोर्व्वाङ्गभूषण इति तात्पर्यान्तरवचनात् । तर्हि सुवर्णाद्यलाभो भगवतः किमित्यत आह । न द्रव्यलाभ इति । उद्गीत एवोद्गीथ इत्यादौ तथकारवदत्र यत्तकारेऽस्ति अस्थीति वा तदानि भाण्डमिति वा । अथदस्तीत्यन्वयः । अथानन्तरमधि पयः पयसि क्षीराब्धाविति यावद्याति । पूर्ववदुर्वरितं । अर्थतो भीतवदाचरन्तस्त्वनुग्रहतस्तदधिप । अरक्षकवद्विद्यमानाधिपेदानीमिति वा । थं भये रक्षणे शुभ इति विश्वः ॥ २९ ॥ स्तेययोगैरित्युक्तं दर्शयति ॥ हस्ताग्राह्य इति । स्वस्य ह्रस्वतया प्रदर्शनाद्धस्ताग्राह्ये विधिं तदुपायं पीठिकोलूखलाद्यैः पीठकं चोलूखलं च । उलूखलं गुग्गुले स्यात्कण्डनार्थेऽप्युलूखल इति विश्वः । तदाद्यै रचयति । शिक्यभाण्डेषु शिक्यानि यष्टिलम्बीनि जालविशेषाः । भारयष्टिस्तदालम्बि शिक्यं काच इत्यमरः । तेषु स्थापितानि भाण्डानि पात्राणि तेषु निहितस्य स्थापितस्य हय्यङ्गवीनादेर्वयुने ज्ञाने जाते तद्वद्यथा तदाप्तिः स्यात्तद्वच्छिद्रं रचयति लकुटादिना । अन्तर्निहितवयुन इति पाठे तन्मतिमानित्यर्थः । सान्धकारागारे हे अङ्गनाः । स्थापयतेत्यतो वदन्ति ॥ ध्वान्तेति । स्वाङ्गमर्धप्रदीपमर्थान्प्रदीपयति प्रकाशयतीति तत्तथा । न च मणिधारणात्तथा भवेदिति भ्रमस्तु स्यादित्याहुः ॥ अधृतमणिगणमिति । सहजकान्तिरेव तादृशीति भावः । धृतमणिगणमित्यनकारप्रश्लेषपदेन कायकान्त्य-

तिशयलाभ इत्युपर्येव ज्ञायते। परस्परालङ्क्रियतेति मिथ्या स भूषणं सर्वविभूषणानामित्यादेः। भास्वरकौस्तुभभासकमित्यादेश्च। कालेऽपहारकाले भवति यर्हि यदाऽन्तर्गृहान्तर्गोप्यो वयं गृहकृत्येषु सुव्यग्रचित्तास्तदाऽयमेव रचयतीति। वयुनं ज्ञानमितीशावास्यभाष्योक्तेः॥ ३० ॥ एवं धाष्टर्यात्प्रागल्भ्याद्विशति गृहं वास्तौ देहल्यां मेहनादीनि पुरीषमूत्रादीनि कुरुते। स्तेयोपायैर्विरचितकृतिः स्तेय उपाया येषां तैर्विरचिताकृतिर्यस्य सः। ये चौर्यसमर्थास्तैरप्यसाध्यचौर्यकर्तेत्यर्थः। यथा सुप्रतीकः सुशोभावन्तः प्रतीका अवयवा यस्य। अङ्गं प्रतीकोऽवयव इत्यमरः। सुप्रतीकः शोभनाङ्गे भवेदीशान्यदिग्गज इति विश्वः। यथा आस्त साधुवादास्त इति तात्पर्यम्। सभयनयनश्रीमुखालोकिनीभिः सभये नयने यस्य तच्छ्रीमयन्मुखं सभयनयनं च तच्छ्रीमुखं तस्य श्रीकृष्णस्य मुखस्यावलोको यासामस्ति ताः सभयनयनश्रीमुखालोकिन्यस्ताभिः। इत्थं व्याख्यातार्थप्रहसितमुखी व्याख्यातोऽर्थस्तेन प्रहसितं मुखं यस्याः सा व्याख्यातार्था। प्रहसितमुखीति पाठेऽप्यर्थादर्थः प्रहासनिमित्तमिति ज्ञेयम्। तमुपालब्धुं वद्धुं नैच्छत् ॥ ३१ ॥ क्रीडमानाः क्रीडन्त इत्येवेतिमात्रे एतावति लघीयसि कार्येऽनिवेदनीये न्यवेदयन्निति वा ॥ ३२ ॥

श्रीसुबोधिनी

यास्तु सर्वथा प्राकृतस्वभावा लौकिकवाक्यपरिनिष्ठिता वा तासां प्रपञ्चविस्मरणं साधारणसात्त्विकलीलया न भवतीति यत्रैव ता आसक्तास्तदेव कार्यं नाशयंस्तन्निरोधं कृतवान्, तच्चेत् सह्यं स्यात् सर्वथा निरोधो न सिध्येदिति तत्कार्यमसह्यमानमिति ज्ञापयंस्तथाविधा गोप्य उपालम्भं कृतवत्य इत्याह **कृष्णस्येति**, स्वतन्त्रकर्तृत्वं भगवत एवेति न बाला नापि राम उक्तः किन्तु **कृष्ण** एवोक्तः, **रुचिरं** मनोहरं भवत्येव, निरोधस्तु सिद्धः, तथापि न स्वतोस्माकं तथामन इति स्वदोषपरिहारार्थं यशोदायै निवेदयन्ति, ननु सर्वतःपूर्णा भगवत्कृपया प्राप्तसम्पदः कथमेवमुपालम्भं कृतवत्य इत्याह **गोप्य** इति, गोपभार्यात्वादेवं, न भगवति दोषदृष्ट्या, तथावचने निरोधो न सिध्येदित्याशङ्क्याह **कौमारचापलमिति**, **कौमारवयस** एव **चापलं** चपलता, वयस एवायं दोषो न तु भगवत इति तासां बुद्धिः, **सम्यगागता** लोकन्यायेन **समागता** न तूपालम्भनार्थमेव, **तन्मातुर्यशोदायाः शृण्वन्त्याः** सत्याः **प्रोचुः**, एतादृशं वचनमयुक्तमपि सर्वलोकप्रसिद्धत्वादुच्यत इति स्वस्य दोषाभावख्यापनायाह **किलेति** ॥२८ अ॥ भगवतो निरोधलीलां तत्तद्दोषदूरीकरणार्थं कृतां तदभिनिवेशेन तावत् कृतस्वदोषरहिता भगवद्गुणान् गणयन्ति **षड्विधान्** जीवस्य दोषरूपान् भगवतो गुणान्, ईश्वरो हि हीनं कर्म न करोति, वत्समोचन"मनीश्वरं कर्मे"ति केचित्, सर्वमोक्षदाता भगवानक्षयनिधिकर्ता यावद्दिनं क्षुधितान् वत्सान् मातृसमागमेपि दुःखिता मा भवन्त्विति मर्यादासमयोल्लङ्घनं कृत्वा **वत्सान् मुञ्चति, क्वचिदिति**, यत्र वत्सविमोक आतृप्तेः पूर्वबन्धनमशक्यं, **आक्रोशे कृते** भगवानमानी मानदस्तासां दुर्बुद्धिं ज्ञात्वा **सञ्जातहासो** भवति, मायोत्तरोत्तरं मोहिका प्रवृद्धा भवति, एवं बहिःस्थितानामान्तरं दुःखं क्षुत्कृतं मोहकृतं च नाशयति, मोहोपि सम्यङ् मोहो जायते भगवद्विषयको येनकेनाप्युपायेन सर्वोपि मनोव्यापारो भगवद्विषयक इतिलक्षणः, एवमुभयविधान् कृतार्थीकृत्य स्वकीयेषु स्वयं भोक्तव्यमिति स्वान्तःस्थितबालकानन्नादिना संवर्धयितुं वीर्यविरुद्धमिव **चौर्येण** भुङ्क्त इत्याहुः **स्तेयमिति**, यस्तु हरति स चोरः, हरिर्हि भगवान् स्मरणेनैव सर्वं हरति, स्तेयेन प्राप्तं **स्तेयं** पक्वान्नाद्योदनव्यञ्जनात्मकं सूपादि पायसान्तं, तत्रापि यत् **स्वादु** भवति रस्यं, गोपिकागृहे स्वयमुपविश्य बालकानुपवेश्य तामन्यत्रैव प्रेषयित्वा यद्यत् स्वादिष्टं खण्डलड्डुकादिकं मोदकादिकं च भुङ्क्ते, **अथ** तृप्त्यनन्तरमन्नसमाप्त्यनन्तरं वा, **दधि पयः** प्रथमं **दधि** पश्चात् **पयः**, पयःपानान्तं शनैर्भोजनं करोतीत्यर्थः, चौर्ये भगवता उपाया बहव एव कल्पिताः, दूरे शिक्ये स्थालीं पूर्णजलां स्थापयित्वाधश्चेच्छेते तदापि नालेन जलं पीत्वा स्थालीमुत्तार्य वंशद्वारा समारुह्य नयति, एवमनेकप्रकारा अपरिज्ञाने, परिज्ञानेपि नवनीतभाण्डे भाण्डमग्रे स्थापयित्वा सावधानस्थितायामपि दुग्धादिना पूर्णमुखस्तदक्ष्णोः फूत्कारं कृत्वाक्षिनिमीलने नयति क्षणाददृष्टश्च भवति, न सोस्त्युपायो येन भगवतः सकाशाद् रक्षितुं शक्यते, इतोपि भगवतोवाङ्मनोगोचरा उपायास्ते सर्वे भगवतैव कल्पिताः, न तु चोरशास्त्रे सिद्धाः, "बालकैः सह भुङ्क्त" इत्येके, वस्तुतस्त्वन्तःस्थितबालकप्रीत्यर्थमेव तथा करोति, स्वयं भोक्ष्यन् बालकेषु तृप्तेषु **मर्कान् विभजति, मर्का** मर्कटाः, मर्केभ्यो **विभजतीत्यर्थः**, ते हि पूर्वं रामावतारभक्तास्तेष्वपि तृप्तेषु स्वयमध्यात्मा स्वीकृतभावो भुङ्क्ते, जगदात्मा सोपि चेन्नात्ति योत्ता "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स" इतिश्रुतेः, **स** प्रसिद्धः, तदेकं भगवद्रूपं भोक्तृ, स त्वत्यन्तमेव शुद्धान् भुङ्क्ते, यत् पुनर्मोक्षसम्बन्धि न भवति दैत्याविष्टत्वात् **स चेन्नात्ति** न भक्षयति तदा **भाण्डं भिनत्ति** दैत्यानां सम्बन्ध्यन्यैर्न भक्षणीयमिति, द्रव्याणामभावे त्वलाभे वान्यत्र स्थापिते **सगृहकुपितो** भवति, **सगृहे** गृहसहिते **गृहस्थे कुपितो** भवति, अयुक्तकरणात्, गृहो हि धर्मार्थमेव भवति, धर्माभावे गृहवैयर्थ्यात्, धर्मश्च द्रव्यैर्भवति, द्रव्यसाधकाश्च पुरुषाः, ईश्वरस्य कोपभयाद् दिनान्तरे समृद्धिं करोत्येव, अथवा गृहस्थं बहिर्मोचयेत् ताडयेद् वा, एवमलौकिकः क्रोधः, लौकिकमाह **यात्यनुक्रोश्य तोकानिति, तोकान्** बालकान् स्तनन्धयान्, त्वदपेक्षयाप्यन्तःस्थिता बालकास्तेषु क्षुधितेषु तदीयेन भवता स्थातुमयुक्तं भवतीत्यनुक्रोश्य रोदनं वा कारयित्वा मयि विमुखे रुद्रः प्रवेक्ष्यतीति ॥ २९ ॥ एवं भगवतः षड् गुणा निरूपिताः, धौर्ये क्रियाप्रकारमुक्त्वा ज्ञानप्रकारमाह **हस्ताग्राह्य** इति, पञ्चविधं

ज्ञानं सप्रकारं निःप्रकारं च काले वस्तुनि निःसाधनमल्पासाध्येत्यन्तासाध्ये चान्धकारस्थापित आलोकापेक्षायां सप्रकारं ज्ञानं, अनेन पूर्णा विद्या निरूपिता भवति, लौकिकबुद्ध्या तु सर्वं ज्ञानं परोपद्रवायेति तदीयांशानां ज्ञाने तज्ज्ञानमपि भवतीति वस्तुतस्तूपकार एव, यत्र भगवतः कुसूलादौ वस्तु **हस्तेनाग्राह्यं** भवति तत्र **पीठ उलूखलमधोमुखं** प्रतिष्ठाप्य तदुपरि बालकं वा निवेश्य गृहवंशान् वा धृत्वा वस्तु गृह्णाति, रिक्तभाण्डेषु तु न प्रयत्नं करोति, तत्र हेतुरन्तर्निहितवयुन इति, **अन्तर्भाण्डे** मध्ये **निहितं वयुनं** ज्ञानं यस्य, **छिद्रयभाण्डेषु** दुग्धादियुक्तेष्वन्तः कुन्तादिना **छिद्रं** करोति, अधस्ताच्च भाण्डान्तरं स्थापयति, दध्यादौ तु न करोति, शर्करादौ तु पातयति, घनीभूते दध्यादौ च, तत् सर्वं वेत्ति **तद्वित्, ध्वान्तागारे तु धृतमणिगणं स्वाङ्गमर्थतः प्रदीपभूतं रचयति** यदिदानीमप्रकाशमानमपि तदानीमन्धकारगृहे सूर्यवत् प्रकाशते मणींश्च प्रकाशयति, **अर्था** एव वा **प्रदीपा** भवन्ति, **स्वाङ्गमेव** वार्थार्थप्रदीपा यस्य न त्वन्यस्मिन्नागते, एतदपि सर्वं काले, यदा **गोप्यो** न जानन्त्येव दूरे वा गता भवन्ति, किञ्च **यर्हि गृहकृत्येषु** पाकादिषु मन्दस्नानादौ बालकतर्पणे वात्यावश्यके **सुष्ठु व्यग्रं चित्तं** यासां मथनादिसमये वा कालविलम्बे वा घृतमेव नोत्पद्येत ॥३०॥ एवं ज्ञानप्रकारमुक्त्वा पर्यवसानमाहुरेवंधाष्ट्र्यानीति, हे **उशति** कमनीये, **धाष्ट्र्यानि** वस्त्रविमोचनादीनि **कुरुते, उशति** कमनीये भाण्डादौ च **मेहनादीनि कुरुते, वास्तौ** यत्र वास्तुदेवता पूजिता भवति, किञ्च **स्तेयोपायैर्भ्रमजनकैर्विरचिता कृतिराकृतिर्यस्य** पतिवत् पुत्रवद् भ्रातृवच्च तिष्ठति तत्र कार्यार्थमेतादृशोपि **सुप्रतीकः** साधुवदा**स्ते**, धाष्ट्र्यादिकरणं पुरीषादिकरणं चौर्यकरणं रूपान्तरकरणं साधुवत् स्थितिश्चेतिपञ्चधारूपसङ्ग्रहः, देहवदिन्द्रियवत् प्राणवदन्तःकरणवदात्मवच्चेतिपञ्चधाज्ञानस्य पञ्चविशेषभूतानि रूपाणि, एवं क्रियारूपान् ज्ञानरूपानाकृतिरूपान् निरूप्योपसंहरतीत्थमिति, एवम्प्रकारेण **स्त्रीभिर्व्याख्यातार्थापि प्रहसितमुखी** सत्युपालब्धुं **नैच्छत्**, उपालम्भे द्वयं कार्यं स्त्रीणां मनोरञ्जनं बालकस्य भयजननं च, तदुभयं प्रथमत एव जातं, भयसहितं नयनं यस्य **सभयनयनो** भगवान् तस्य **श्रीयुक्तं मुखं** तदालोकिनीभिः, एवमुपालम्भनकर्त्र्योपि भगवन्मुखनिरीक्षिका एव, ज्ञानशक्तेरेव भयं न तु क्रियाशक्तेस्तदाह **सभयं नयनं** यस्येति, श्रीसंयुक्तं **मुखं**, आक्रोशवतीनां दृष्टिर्भगवद्विषयिणी मा भवत्विति श्रिया मूर्तिमत्यैव मध्ये व्याप्तं, अतः **सभयनयनं** यथा भवति तथा **श्रीमुखस्यालोकिनीभिः**, एवं **व्याख्यातोर्थः** स्वगृहव्यापाररूपो यस्यां, तथा सति लोकदृष्ट्या भगवतो धौर्त्यं स्मृत्वोभयोर्भय नयने दृष्ट्वा भगवान् स्त्रियश्च भीता भगवान् भक्तः स्त्रियो भगवतो भक्तश्चेत्यनेकरसाभिनिविष्टा **प्रकर्षेण हसितमुखी** भगवन्त**मुपालब्धुं नैच्छत्**, नामलीलया वसुदेवः कृतार्थ एव जातः, इयं तु लौकिकन्यायेन प्राप्तमनोरथा लौकिकभावदार्ढ्यादेव दोषान् न गृहीतवती न तु माहात्म्यज्ञानात् ॥ ३१ ॥ अक्लिष्टकर्मा भगवांश्च यावन्नात्यन्तासक्त्या वैयग्र्यं न प्राप्नोति तावन्न वदति नापि प्रदर्शयति, अनेन च प्रकरणेन तस्याः स्वविषयकोध्यासो निवर्तितः, यतो वाच्यतासहनं जातं, भगवद्विषयकगाढाध्यासेन सोप्युद्गतः स्वसमानविषयकविरोधेनैव निवर्तिष्यत इति तदर्थं प्रकरणान्तरमारभते ज्ञानरूपमन्तःकरणशोधकमेकवेत्येकादशभिर्मनसो ह्येकादश वृत्तयस्तासां निवृत्त्यर्थमेकादशधा ज्ञानं वक्तव्यं,

दोषनिवृत्तये यत्नो वाक्यं वाक्यं च तस्य नुत् । तत्साधिका कृतिर्विष्णोर्ज्ञानं पूर्वनिवारकम् ॥ १ ॥
ज्ञानस्योत्कर्षसिद्ध्यर्थं विषयाणां च वर्णनम् । ततो भयं तन्निवृत्तौ पूर्वपक्षस्य युक्तयः ॥ २ ॥
सिद्धान्तेन प्रतिष्ठानं भीतायाः शरणागतिः ॥ २½ ॥

भगवत्यध्यासस्य दृढत्वाद् भिन्नविषयको दोषो न बाधक इति समानाश्रयविषयकं दोषं बाला अनिरुद्धा आहुरित्याह, **एकदा** यदा भगवत्प्रवणमेव चित्तं स्थितं, **आक्रीडमाना** आ समन्तात् क्रीडां कुर्वाणाः, समानभावेन सर्वेषु क्रीडा रसजनिका भवति, अतो भगवति साम्ये स्फुरिते विवेकिनां स्वस्मिन् दोषदर्शनवद् भगवत्यपि दोषं दृष्टवन्तः, त इति ये स्त्रीणां सुखार्थे नीतास्तेषां स्त्रीसङ्गान्निरोधस्याकृतत्वाद् भगवति दोषदृष्टिर्युक्तेति, तत्तत् कार्यं प्रदर्शयितुं **रामाद्या** इत्युक्तं, स हि रमयति एव सर्वास्त्रियोतो दोषदृष्टिः, **गोपबालका** इति, **गोपा** अनिरुद्धाः, गोभिः सह सङ्गात् तत्तुल्यज्ञानास्तेषां **बालका** इति स्वरूपतोपि दोषसम्भवहेतुः, स्वसम्बन्धिस्तनादिपानेन पुष्टान् स्वचरणसम्बन्धिभक्तिरसालोडितमृत्स्नां बालकेभ्योन्तःस्थितेभ्यो ददद् बहिर्मुखैर्दध्यादिभक्षणवन्मृद्भक्षणमपि कल्पितं ततस्तदनिष्टं मत्वा बालाः प्रोचुः **कृष्णो मृदं भक्षितवानिति**, पञ्चवर्षपर्यन्तं मात्रा शिक्षणीय इति **मात्रे न्यवेदयन्**, सम्भावितं तदिति ॥ ३२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

मर्कान् भोक्ष्यमित्यत्र । सोपीत्यादि, यद्यपि श्रौतं ज्ञानं न सहजमेतासां भगवता लीलार्थं न ज्ञाप्यते च, तथापि भगवद्धर्मनिरूपणे चित्ते तदावेशाद् भगवति सोपि धर्मोस्तीति वस्तुस्वभावात् तस्यापि स्फूर्तिः । तत्रापि भोजनप्रकरणादस्यैव धर्मस्य । अन्यथा पुरःस्थिते प्रियेऽयमित्यनुक्त्वा स इति न वदेयुरिति भावः ॥ २८-२९ ॥ **हस्ताग्राह्य इत्यत्र । पञ्चविध मित्यादि** : प्रकारशब्दोत्र साधनवाची । तथा च पीठादिसाधनयुक्तं तदयुक्तं चेति द्वैविध्यम् । यस्मिन्काले तद्गृहे कोपि न भवति । तत्कालविषयकं ज्ञानं वस्तुविषयकं च तथा । **तदीयांशानामिति** । पूर्वोक्तज्ञानस्यांशाः पीठादयो विषयत्वात् ज्ञानस्य

स्वतो निरंशत्वेन तस्यैव तथात्वात् । तथा च स्वगृहे सदा तज्ज्ञानमिति तत्सम्बन्धिभगवज्ज्ञानमपि सदेत्युपकार एवेत्यर्थः॥३०॥ **न ह्युपालब्धुमैच्छदित्यस्य विवृतौ, यावाभात्यन्तासक्त्येति** । नेत्यत्यन्तपदविशेषणम् । अत्यन्तासक्तौ तु बाह्यानुसंधानमेव न स्यादिति भावः । **सोप्युद्गत** इति । भगवद्विषयकः पुत्रत्वेनाध्यासोपि निवर्तिष्यत इति सम्बन्धः । अत एव प्रणता स्वमतिप्रकारगणनायां 'मेष मे सुत' इत्युक्तवती । निवर्तने हेतुमाहुः **स्वसमानेति** । पुत्रत्वेन स्नेहाद्धि मृद्भक्षणे शिक्षार्थं लोकन्यायेन विरुद्धाचरणमपि संभवतीति तच्चिकीर्षायां स्नेहसमानविषयको विरोधो भवतीति स्वधर्मप्रदर्शनेन सोपि निवर्तिष्यत इत्यर्थः ॥ ३१ ॥ **एकदा क्रीडमाना** इत्यत्र, **ये स्त्रीणां सुखार्थं** इति । पूर्वं वयस्यैर्व्रजबालकैर्व्रजस्त्रीणां मुदं जनयंश्चिक्रीड इत्युक्तम् तथा च तच्छब्दस्य पूर्वपरामर्शित्वेन त एवोच्यन्त इत्याशयेनाहुर्य इत्यादि । **निरोधस्येति** । मृदोनिष्टहेतुत्वेन ज्ञानेन हि तदभावाय निवेदनम् । तच्च स्नेहं विना न संभवतीति कथं तदकरणमुक्तमिति चेत् । उच्यते । क्रीडमाना इत्यात्मनेपदप्रयोगेण न भगवदर्थं नापि भगवत्सङ्गे क्रीडेयम्, किन्तु स्वार्थमेव परस्परमेवेति च ज्ञाप्यते । सर्वभावेन निरोधे तु तथा करणं न सम्भवतीति तथोक्तमाचार्यैः । व्रजस्त्रीमुज्जननस्यैवोद्देश्यत्वेन तदुपयोगिलीलोपयोगित्वेन बालकसहभाव इति हृदि कृत्वा स्त्रीसङ्गादित्युक्तम् । अत एव मुख्यो निरोधो न सम्पन्नः, आनुषङ्गिकस्तु जात इति भावः । **तत्कार्यम्** । निरोधाकरणकार्यमित्यर्थः । यथैव ता भगवत्सङ्गता भवन्ति तथैव सम्पादयतीति स्त्रीरतिकर्तृत्वं रामे । अत एव रसरीत्या ताम्बूलाद्यङ्गीकार एवास्य रोचते, न त्वलौकिक्या अपि मृद इति स्नेहवशादेव दोषदृष्टिस्तत्र । अत एव रामाद्या इत्यत्रातद्गुणसंविज्ञानो बहुव्रीहिः, तेन बालकविजातीयो भावः सूच्यते । रामे गोपबालकत्वाभावात्तथा । गोपानां त्वग्रे निरोधो वक्तव्य इत्यधुना तथा न निरोध इति तथोक्तम् ॥ ३२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

कृष्णस्येत्यत्र ननु चौर्यलीलायाः किं प्रयोजनमित्याकाङ्क्षायामाहु**र्यास्त्वि**त्यादि, **लौकिकवाक्ये**त्यादि लौकिकं यच्छ्वश्र्वादिवाक्यं तत्र निष्ठावत्यः, **ज्ञापयन्नि**त्यस्य **तन्निरोधं कृतवा**निति पूर्वेणैव सम्बन्धः, **तथाविधा** इति **यास्त्वि**त्यादिना व्याख्याताः, **तथा मन** इति तादृशलीलाकरणे **मनः**, **तथावचन** इत्युपालम्भ**वचने** ॥ २८ अ ॥ **वत्सानि**त्यत्राभासे **तदभिनिवेशने**त्यादि भगवत्कृतलीलाभिनिवेशेन, तावद्वस्तुविषयकलोभादिरहितेत्यर्थः, अत्र श्लोकप्रतीकं त्रुटितमिति भाति, के **भगवद्गुणा** इत्यपेक्षायामाहुः **षड्विधा**नित्यादि, तत्र **वत्समोचनस्यै**श्वर्यत्वं व्युत्पादयन्तस्तद्विरोधं परिहरन्ति **सर्वे**त्याद्यशक्यमित्यन्तं, तथा चासमये वत्समोचकत्वेन कल्पादिरूपे काले मूढमोचकत्वरूपैश्वर्यकर्मबोधकं, हासप्रयोजनमाहु**राक्रोश** इत्यादि, **बहिःस्थिताना**मिति वत्सानां गोपिकानां च, ननु हासस्य मोचकत्वेन पूर्वमोहकृतदुःखनाशेपि मोहान्तरस्य जातत्वान् पुन दुःखप्रसङ्गो भवेदतः समुपसर्गं मूलस्थं व्याचक्षते **मोहोपी**त्यादिना, स्तेयादनस्य वीर्यविरोधित्वं परिहरन्तो वीर्यकर्मत्वं व्युत्पादयन्त्ये**वमुभये**त्यादि, **उभयविधा**निति मूढान् निरुद्धांश्च, **कल्पितैः स्तेययोगै**रिति व्याकुर्वन्ति **चौर्ये**त्यादि **दूरे शिक्य** इति तत्र विद्यमाननवनीतादिभाजनोपरीतिशेषः, अत्र **चौरशास्त्रे सिद्धा** इत्यनेन नूतनोपायकल्पनात्मकं **वीर्यं** तेन निरोधश्चालौकिकं तत्कार्यं बोधितं ज्ञेयं, मतान्तरमाहु**र्बालकै**रित्यादि, मूलेनुक्तत्वात् तथेत्यर्थः, उपायकल्पनं **स्वयमेव** भोजनं च यशोविरुद्धमिवेति तन्निरासाय सिद्धान्तमाहु**र्वस्तुत** इत्यादि, तथा चात्यन्तनिरोधजनकत्वेन **बाल**प्रीतिजनकत्वेन च न यशोविरोधः किन्तु तदनुगुणत्वमेवेत्यर्थः, मर्कटसंसर्गस्य तात्पर्यं विवृण्वन्ति **स्वय**मित्यादि, एतस्यार्थमाहुष्टिप्पण्यां **सोपी**त्यादि, श्रीविरोधपरिहारायाहु**स्ते हि पूर्व**मित्यादि, **स्वीकृतभाव** इति **स्वीकृतो**ध्यात्मनो **भावो** येनेत्यर्थः, अत्र **भोक्ष्यन्नि**त्यनेन भाविस्वभोगकथनान् मर्काध्यात्मरूपेण भोग इति बोध्यं, **मर्का**निति बहुवचनात् **स** इत्यनेन ते परामृष्टुं न शक्यन्त इति तत्तात्पर्यमाहुः **सोपी**त्यादि, **स** इत्यध्यात्मा **सुबोधिन्यां स** त्वित्यादि न **भक्षणीय**मित्यन्तं वैराग्यकार्यमाहु**र्न्याणा**मित्यादि, अलाभे हेतुरन्यत्र **स्थापित** इति, कोपे हेतुं विवृण्वन्ति **सगृह** इत्यादि, **गृहवैयर्थ्या**दिति **गृहपरिग्रहवैयर्थ्यात्**, नन्वेवं द्रव्यनाशे धर्मोपि न सिध्येदित्यत आहु**र्वितान्तर** इत्यादि, तथा चैवं सुखेन धर्मसिद्धिरित्यर्थः, **सगृहकुपित** इत्यस्यार्थान्तरमाहु**रथ वे**त्यादि, **वैराग्यस्यैव** कार्यान्तरमाहु**र्लौकिकमाहे**त्यादि, **तोकानुक्रोशबीज**माहु**स्त्वदपेक्षये**त्यादि, **तदीयेने**ति तदाध्यात्मिकेन तत्सेवकेन वा **स्यात्तु सुखने**तिशेषः, **अनुक्रोश**स्यार्थान्तरमाहू **रोदन**मित्यादि, षड्गुणनिरूपणं निगमयन्त्येवमित्यादि पूर्वोक्तप्रकारेण, यद्वा मोक्षदातृत्वेनैश्वर्यं मोहकत्वेन श्रीश्चौर्येण वीर्यमद्भुतत्वान् मर्केभ्यो दानेन सर्वथा भक्तहितकर्तृत्वाद् वैराग्यं भाण्डभेदनाद् यशः स्वत एव सर्वहितकर्तृ हि तत् स्यात् कोपादिना ज्ञानं, अत एव रुद्रः **प्रवेक्ष्यती**त्युक्तम् ॥ २९ ॥ **हस्ताग्राह्य** इत्यत्र यथा पूर्वश्लोके परमार्थतः षड्विधा गुणा उक्ताः क्रियाप्रयोजकास्तथात्र ज्ञानप्रकारबोधनेन **पूर्णा विद्या** निरूप्यत इत्याशयेन ज्ञानप्रकारमाहुः **पञ्चविध**मित्यादि वक्ष्यमाणरीत्या **पञ्चविधं** यज् ज्ञानं तत् **सप्रकारनिष्प्रकार**पूर्णविद्यारूपमित्यर्थः, **प्रकारशब्दार्थ**माहुष्टिप्पण्यां **प्रकारे**त्यादि, अत्र परोक्षवादे, **प्रकारशब्दः साधनवाची**, तथा च **ससाधनं निःसाधनं च ज्ञानं पूर्णविद्यारूप**मित्यर्थः, सुबोधिन्यां प्रकारान् गणयन्ति **काल** इत्यादि तथा च **कालविषयकमाहारादिरूपवस्तुविषयकं** निर्विषयकमल्पासाध्यविषयकं चेत्यर्थः, प्रत्यक्षवादे सप्रकारकज्ञानस्य विषयमाहु**रन्धकार** इत्यादि, तदेतत् परोक्षवादे योजयन्त्यनेनेत्यादि, तथा च महति हार्दान्धकारे

तत्र ज्ञानालोकापेक्षायां **ससाधनं ज्ञानमुपयुज्यते** "ध्वान्तागारे"त्यादिपर्यन्तवाक्येन **पूर्णा विद्या** निरूपितेत्यर्थः, प्रत्यक्षलीलायां साधनादिस्वरूपं **टिप्पण्यां** विवृण्वन्ति **तथा** चेत्यादि, **द्वैविध्य**मिति सप्रकारं निःप्रकारं चेति **द्वैविध्यं**, प्रत्यक्षे कालादिकं विवृण्वन्ति **यस्मिन्नि**त्यादि, **तदीयांशपदं** विवृण्वन्ति **पूर्वोक्ते**त्यादि, उपकारः कथमित्यपेक्षायामाहु**स्तथा** चेत्यादि, सुबोधिन्यां श्लोकोक्तलीलातात्पर्यमुक्त्वा श्लोकं व्याकुर्वन्ति **यत्रे**त्यादि, **भगवत** इत्यस्य **हस्त**पदेन सम्बन्धः, **अर्थत** इति षष्ठीबहुवचनतस्तसिः, **अर्थार्थ**मिति स्वार्थसिद्धिनिमित्तमेवेत्यर्थः, **विलम्बे** वेति **वा** शब्दस्त्वर्थे वाक्यालङ्कारे वा ॥ ३० ॥ **एव**मित्यत्र स्वार्थसिद्धिनिमित्तमेवेत्यर्थः, **पर्यवसानमाहु**रिति परोक्षवादेनोक्तस्य ज्ञानस्य **पर्यवसानं** परोक्षवादेनाहुरित्यर्थः, **इति पञ्चधे**त्युक्तकार्यद्वारा **पञ्चधा**, अस्मिन् श्लोक उक्तं **पञ्चधा** रूपं **स्वेच्छालीलाविशिष्टं**, तत् कथं सत्त्वं शोधयतीत्याकाङ्क्षायां तत्प्रकारमाहु**र्देहव**दित्यादि, तथा च "प्राणन्नेव प्राणो भवती"ति श्रुतौ कार्यद्वारैव रूपान्तरश्रावणादत्र धाष्ट्र्यादि कुर्वन् **देहवद्** भवति मेहनादि कुर्वन्नि**न्द्रियवच्**चौर्येण भुञ्जानः **प्राणवद्** भवति प्राणस्यैव भोक्तृत्वाद् रूपान्तराणि कुर्व**न्नन्तःकरणवद्** भवति तस्यानेकवृत्तिकत्वात् साधुवत् तिष्ठ**न्नात्मवद्** भवतीत्यर्थः, ननु पञ्चधा करणस्य किं प्रयोजनमत आहु**रज्ञानस्ये**त्यादि, अविद्यारूपस्या**ज्ञानस्या**ध्यासविषयत्वाद् देहादीनि **पञ्चरूपाणि** तस्य **शेषभूतानि** तादर्थ्यात्, अतः पञ्चरूपः स्वयं भवन् निरुद्धानां विषयो भूत्वा सत्त्वं शोधयतीत्यतस्तथेत्यर्थः, क्रियारूपानित्यादि धर्मानितिशेषः, **प्रथमत** इत्युपालम्भनं विनैव भगवन्मुखावलोकत्वात्, तदुपपादयन्ति **ज्ञानशक्ते**रित्यादि, **ज्ञानशक्तिर्नयनं क्रिया**शक्तिर्मुखमिति ज्ञातव्यं, उपालम्भदानानिच्छायां हेतुः स्वरूपज्ञानमेव भविष्यतीतिशङ्काभावायाहु**र्नामलीलये**त्यादि ॥ ३१ ॥ **एकदे**त्यत्र ननु यथा भगवानग्रे बालवाक्यदूषणार्थं वाक्यं वक्ष्यति स्वस्य सत्यत्वार्थं स्वरूपं च प्रदर्शयिष्यति तथात्रापि कुतो नोक्तवान् न प्रदर्शितवानित्यत आहु**रक्लिष्टकर्मे**त्यादि, **नात्यन्तासक्ते**स्तात्पर्यार्थमाहुष्टिप्पण्यां **नेत्यत्यन्तपदविशेषण**मिति **नैकधे**त्यादिवत् **न** शब्देन सहात्यन्तपदसमासात् तथा, तथा चात्यन्ता**सक्त्यभावे भगवान् न वदति वैयर्थ्याभावे** च न **प्रदर्शयती**त्यतस्तथेत्यर्थः, कथमेवमित्यत आहु**रत्यन्तासक्ता**विति, **सुबोधिन्यां** धाष्ट्र्यादिलीलातात्पर्यमाहु**रनेने**त्यादि, अग्रिमप्रकरणतात्पर्योक्तौ **सोप्युद्गत** इत्यादि, तत्तात्पर्यं टिप्पण्यामाहु**र्भगवद्विषय** इति, **सुबोधिनास्थविरोध**शब्दगततृतीयायाः सहार्थत्वं विवृण्वन्ति पुत्रत्वेनेत्यादि, तथा च **स्वधर्मप्रदर्शनेन करणेन** विरोधनिवृत्ति समकालं पुत्रत्वाध्यासोपि निवर्तयिष्यत इति भावः, कारिकायां दोष इति बालकाज्ञानेन कृत इत्यर्थः, **पुत्रपूर्वं निवारक**मिति भगवति पुत्रत्वेनाध्यासस्य **निवारकं**, **तन्निवृत्ता**विति भयनिवृत्तिनिमित्तमित्यर्थः, विवृतौ **भिन्नविषयक** इत्यध्यास**विषयकः**, **समानाश्रयविषयक**मित्यध्यासाश्रय**विषयकं**, **टिप्पण्यां ये स्त्रीणां सुखार्थं** इत्यादेरर्थमाहुः **पूर्व**मित्यादि, निरोधाकरणे शङ्कते **मृद** इत्यादि, **तदकरण**मिति निरोधाकरणं, समादधत **उच्यत** इत्यादि, **तथोक्त**मिति निरोधाकरण**मुक्तं**, तर्हि तेषां **स्त्रीसङ्गा**दितिकथनस्य किं प्रयोजनमत आहु**र्व्रजे**त्यादि, **अत एवे**ति निरोधे तेषामुद्देश्यत्वाभावादेव, **तत्रे**ति मृद्भक्षणे, **तथोक्त**मिति **गोपा अनिरुद्धा** इत्युक्तं, **सुबोधिन्यां** मृत्स्नाग्राहणतात्पर्यमाहुः **स्वसम्बन्धी**त्यादि, **पुष्टा**निति कृत्वेति शेषः, **अददा**दिति स्थूलशरीरसिद्ध्यर्थं दानमिति प्रतिभाति, प्रथमस्कन्धे "या वै लसच्छ्रीतुलसी"त्यत्र तथा सिद्धत्वात्, तेषां दान्तत्वार्थं वा, टिप्पण्या **मदान्तात्मन्नि**त्यस्य व्याख्याने तथा सिद्धत्वादिति ॥ ३२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

वत्सानित्यस्याभासे **भगवत** इति एतदर्थे कृतां लीलां **शृण्वन्त्याः सत्याः प्रोचु**रिति पूर्वेणैवान्वयः, **तावत्कृते**ति **तावद्भिर्व**त्सविमोचनादिषड्धर्मैः **कृतः स्वदोषो** भगवत्यनीश्वरत्वादिबुद्धिः हासकृतभगवद**भिनिवेशेन** कृत्वा स्वरूपज्ञानात् तद्रहिता इत्यर्थः, वत्सविमोचनस्तेयभक्षणमर्कविभजनभाण्डभेदनकोपतोकानुक्रोशाः क्रमेण षड्गुणा ज्ञेयाः, ईश्वरो हीति विरुद्धधर्माश्रयत्वादैश्वर्यविरुद्धोपि धर्मोस्ति न तु तावतानीश्वरत्वमिति स्वसिद्धान्तो द्वितीयपक्षे **केचि**दित्यस्वारस्येन सूचितः, तादृशकृतितात्पर्यमाहुः **सर्वमोक्षे**ति, अत्र 'वत्सा'निति वारद्वयं, तत्र **क्षुधितान् वत्सान् सर्वे**त्यादिप्रयोजनार्थं **मुञ्चति समयोल्लङ्घनं कृत्वा च वत्सान् दुःखिता मा भवन्त्विति विमुञ्चती**ति विभज्यान्वयः, **अमानी मानद** इति स्वयं मानरहितोन्यार्थमैश्वर्यविरुद्धस्यापि कार्यस्य कर्ता अन्येषां वत्सानां **मानदो** दुःखनिवारक इति वत्सविमोचनस्योक्तं तात्पर्यमनूदितं, **तासां दुर्बुद्धि**मनीश्वरत्वबुद्धिमित्यर्थः, **बहिःस्थितानामि**ति गृहाद् **बहिर्गोष्ठे स्थितानामि**त्यर्थः, तत्र वत्सानां क्षुत्कृतं मोचनेन **नाशयति** गोपीनां **मोहकृतं** हासेन **नाशयती**ति विभागः, हासस्य मोहकृतदुःखनाशकत्वं व्युत्पादयन्ति **मोहोपी**ति, **उभयविधा**निति क्षुत्कृतमोहकृतदुःखयुक्तानित्यर्थः, स्तेययोगान् विवृण्वन्ति **चौर्य** इति, **नयती**ति **पूर्णजलायां** स्थाल्यां स्थितं नवनीतं नयतीत्यर्थः, **कल्पितै**रित्यस्यार्थमाहुः **इतोपी**ति, **कुपितो भवती**ति अनुभावेनैव तस्य कश्चनोपद्रवो भवतीत्यर्थः, **अथ वेति बहिर्निर्गतं** त्वां कश्चित् दैत्यादि**र्मारयेत्** प्राणवियुक्तं कुर्यात्, **ताडयेद् वेति गृहस्थं** प्रति वदति शापं ददातीत्यर्थः, अयमदृष्टप्रकारकत्वादलौकिकः क्रोधः, **अन्तःस्थिता बालका** इति क्षुधिता इति शेषः, ते **त्वदपेक्षयापि** क्षुधिता इत्यर्थः, **तदीयेने**ति गोपसम्बन्धिना तद्बालेनेत्यर्थः, अन्तरङ्गेषु भगवदीयेषु क्षुधितेषु भक्तसम्बन्धिनः पुरुषस्य भोजनमनुचितमितिभावः ॥ २९ ॥ **हस्ताग्राह्ये** इत्यत्र **अन्तर्निहितवयुन** इत्यनेन रिक्तारिक्तज्ञानमुक्तं, **तद्वि**दित्यनेन तन्निष्ठदध्यादिविशेषज्ञान

मुक्तमितिविभेदः, इदं ज्ञानद्वयमपि वस्तुविषयकमेवेतिज्ञेयं, **अर्थतः प्रदीपभूतमिति** अयमर्थशब्दो वस्तुवाची, तथा च वस्तुत इत्यर्थः, **अर्था एव वेतिपक्षे** अर्थाः प्रदीपा यत्रेति बहुव्रीहिः, **स्वाङ्गमेव वेतिपक्षे अर्थार्थं प्रदीप** इति तत्पुरुषः, तथा च प्रथमपक्षवदन्यत्रापि रचयतीतिशेषो ज्ञेयः, **यस्येत्यनेन** तस्यैवार्थकथनं, **मज्जनस्नानादाविति** अभ्यङ्गस्नानादावित्यर्थः, **पर्यवसानमाहेति** निर्गुणावस्थावेद्यं सुप्रतीकं रूपमाहेत्यर्थः ॥ ३० ॥ **एवं धार्ष्ट्यानीत्यत्र पतिवदिति** वस्तुग्रहणकाले पत्यादिवेशं स्वरूपे सम्पादयतीत्यर्थः, **देहवदिति** देहादीनामिव कार्यं प्रतीयते परं देहादिर्नास्तीत्यर्थः, **एवं क्रियारूपानित्यादिषु** गुणानितिशेषः, **उभयोर्भयनयने** इति भगवन्नयनस्थं भयं प्रथमव्याख्याने, गोपिकानयनस्थं द्वितीये क्रियाविशेषणत्वेन व्याख्याने, उभयोरनुवादोयं, **भगवान् मत्त** इत्यादिकं यशोदाबुद्धयनुवादकं, **मत्त** इति तसिलन्तम् ॥ ३१ ॥ **अग्रिमप्रकरणाभासमाहुः नामलीलयेति,** शुद्धसत्त्वस्य स्थापितत्वात् नन्दोपि वसुदेवः, अतो वसुदेवपदेन नन्दो वसुदेवश्च ज्ञेयः, **इयं त्विति** तुशब्देनान्यव्यावर्तनं, तत्र व्यावर्त्यस्वरूपमनेनोक्तमिति ज्ञेयं, तथा च नन्दस्य गर्गवाक्यात् माहात्म्यज्ञानमस्तीतिभावः, **न वदतीति** "नाहं भक्षितवानम्बे"तिवाक्योक्तमभोक्तृत्वरूपं स्वधर्मं न वदतीत्यर्थः, **नापि प्रदर्शयतीति** स्वान्तःस्थं जगद्रूपं स्वधर्ममितिशेषः, **स्वविषयक** इति स्वपदेन यशोदायाः स्वकीयत्वप्रकारकोध्यासः स्वस्मिन्नेव पर्यवस्यतीतिभावः, **स्वसमानेति** इयं हेतौ तृतीयेति टिप्पण्यनुसारेण ज्ञेयं, **निर्वर्तिष्यते** इति अन्तर्भावितण्यर्थात् कर्मणि लृट् , भगवता निर्वर्तिष्यते इत्यर्थः, **एकदेत्यत्र भिन्नविषयक** इति वत्समोचनादिरूप इत्यर्थः, अनेन भगवत्स्वरूपे दोषो न भवति, मृद्भक्षणेन तु स्वरूपे दोषो भवतीत्याहुः **समानाश्रयविषयकमिति, आक्रीडमाना** इत्याङुपसर्गस्यार्थमाहुः **समानभावेनेति, अत** इति रसजननाद्धेतोः **साम्ये स्फुरिते** स्वात्मनीव भगवत्यपि दोषं दृष्टवन्तः, तत्र दृष्टान्तः, यथा **विवेकिनां स्वस्मिन् दोषदर्शनं** तथैतेषां तावद्विवेकाभावात् सामान्यमात्रेण **भगवत्यपि** दोषदर्शनमित्यर्थः, **रामाद्या इत्युक्तमिति राम** आद्यो येषामित्यतद्गुणसंविज्ञानबहुव्रीहिणा रामविजातीया निरुद्धत्वधर्मवन्त इत्युक्तमित्यर्थः, तर्हि रामस्य कथं दोषदृष्टिरित्यत आहुः **स हीति**, बालानां मुख्यनिरोधाभावादेवम्बुद्धिः, रामस्य तु स्नेहादिति, **पुष्टानिति** ज्ञात्वेति शेषः, **स्वचरणसम्बन्धीति** ददद् भगवान् जातस्तदा बालकैस्तथा कल्पितमित्यर्थः, तथा च **ददद्**ित्यस्याग्रे जातस्तदेतिपदद्वयं **शेषभूतं** ज्ञेयम् ॥ ३२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

हस्ताग्राह्य इत्यस्य व्याख्याने, **पञ्चविधं ज्ञानमिति** चौर्यकालज्ञानं **वस्तुज्ञानं** अल्पासाध्यज्ञानं अत्यन्तासाध्यज्ञानं अन्धकारस्थापितपदार्थग्रहणसाधनज्ञानं चेति **पञ्चविधं**, तत्र "**काले गोप्यो** यर्हि गृहकृत्येषु सुव्यग्रचित्ता" इत्यनेन कालज्ञानं, "अन्तर्निहितवयुन" इत्यनेन वस्तुज्ञानं, "छिद्रं ह्यन्त"रिति अल्पासाध्यज्ञानं, "हस्ताग्राह्य" इत्यनेन अत्यन्तासाध्यज्ञानं ज्ञेयम् ॥ ३० ॥ **व्याख्यातार्था प्रहसितमुखी न ह्युपालब्धुमैच्छ**दित्यस्य विवृतौ **नामलीलया वसुदेवः कृतार्थ एव जात** इति इह **वसुदेवशब्देन** नन्दो ग्राह्यः वसूनां देवो वसुदेव इति व्युत्पत्तेः, 'द्रोणो वसूनां प्रवर" इति वाक्येन द्रोणस्य वसुश्रेष्ठत्वात् द्रोणाभिन्नस्य श्रीनन्दस्य वसुदेवत्वात् ॥ ३१ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एकदा क्रीडमानास्ते इत्यादेकादशश्लोकानां वाक्यार्थानाहुर्बोध इत्यादि का० ५७$\frac{३}{४}$ ५९$\frac{१}{४}$ । "एकदा क्रीडमानास्ते" इति श्लोके भगवति मृद्भक्षणात्मक**दोषदृष्टिः**, "सा गृहीत्वे"त्यत्र दोषनिवृत्त्यर्थं **यत्नः**, "कस्मान् मृद"मिति यशोदाया **वाक्यं**, "नाहं भक्षितवा"निति भगवद्वाक्यं **तस्य** यशोदावाक्यस्य **नुत्** अप्रामाण्यसाधकमित्यर्थः, "यद्येवं तर्हि व्यादेही"त्यत्र **तत्साधिका** स्ववाक्यप्रामाण्यसाधिका मुखव्यादानरूपा **विष्णोः कृतिः**, "सा तत्र ददृशे विश्व"मित्यत्र **ज्ञानं पूर्वनिवर्तकं** पूर्वोत्पन्नस्य भगवति दोषदर्शनस्य निवर्तकं, "ज्योतिश्चक्र"मिति "एतद्विचित्र"मिति च द्वाभ्यां **विषयाणां वर्णनं**, "एतद्विचित्र"मित्यत्रैव **भयमपि**, "किं स्वप्न" इति श्लोकपूर्वार्धे भयनिवृत्त्यर्थं **पूर्वपक्षयुक्तयः**, "अथो अमुष्यै वे"त्युत्तरार्धे **समाधानं** "अथो यथाव"दिति द्वाभ्यां **शरणागतिः** ॥ ५९$\frac{१}{४}$ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदेव दर्शयति—'वत्सान्' इति सार्धद्वाभ्याम् । भो यशोदे ! तवायं पुत्रः अस्माकं वत्सान् मुञ्चन् भवति । "युष्माभिर्मोचनीया वत्सास्तेन मोचिताश्चेत् का हानिः ?" तत्राहुः—असमये इति । अदोहकाले इत्यर्थः । तेन सर्वं दुग्धं वत्सा एव पिबन्ति, ततश्च महती हानिर्भवतीति भावः । ननु 'तर्हि युष्माभिः कुतो न तत्प्रतिरोधः क्रियते ?' तत्राहुः—क्वचिदिति । अनवधानदशायामित्यर्थः । 'वत्सविमोचनेन तस्य किं प्रयोजनम् ?' इत्यपेक्षायामाहुः—अथेति । वत्समोचनानन्तरं वत्सान् परावर्तयितुं गृहान्निःसृत्य जनेषु धावत्सु सत्सु, शून्यान् गृहान् प्रविश्यास्माकं दधि पयः अत्ति । 'तत्त्वयं भीषयितव्य' इति चेत्तत्राहुः—क्रोशसञ्जातहास इति । 'अयं दधिचोरः कृष्ण आगतः, ताड्यताम् नह्यताम्' इति क्रोशे कृते सति सञ्जातहासो

भवति, नतु बिभेतीत्यर्थः। 'एवं चेत्तदा किञ्चिद्दत्त्वा कुतो न समाधीयते ?' तत्राहुः—कल्पितैः रचितैः स्तेययोगैश्चौर्योपायैः स्तेयं चौर्यार्जितमेव स्वादु यथा स्यात्तथा अत्ति, नतु दत्तम्। त्वयाऽभीक्ष्णं प्रेम्णा भोजितस्य बुभुक्षाभावात् केवलं चौर्यं एव तस्याभिनिवेशः, स तु न युक्तः। 'भवत्वेवम्, तथाप्येकस्य तस्य भक्षणे युष्माकं का महती हानिः ?' तत्राहुः—भोक्ष्यन् भोक्ष्यमाणः प्रथमतो मर्कान् मर्कटान् प्रति विभजति विभज्य ददाति, तेषां मध्ये तृप्ततया स कश्चित् मर्कटो नास्ति चेत्तर्हि विमनाः सन् दध्यादिपूर्णं भाण्डं भिनत्तीति। 'एवं चेत्तर्हि त्रिचतुःदिनानि स्वगृहे दध्यादि न स्थापनीयम्, तदलाभे पुनः कदापि युष्माकं गृहं स न गमिष्यति' इति चेत्तत्राहुः—द्रव्यस्य दध्यादेरलाभे सति स 'अहमेतेषां गृहानेव धक्ष्यामि' इति सर्वगृहान् प्रति कुपितः सन् तोकान् प्रसुप्तान् बालानुपक्रोश्य नखाघातादिना रोदयित्वा यातीति। गृहदाहादिभयेन दध्याद्यवश्यं स्थाप्यते इति भावः॥ २९॥ 'कल्पितैः स्तेययोगैः' इति यदुक्तं तत्र के ते स्तेययोगा इत्यपेक्षायामाहुः—हस्ताग्राह्ये इति। दध्यादिपदार्थे उत्तुङ्गशिक्यस्थत्वेन हस्ताग्राह्ये सति पीठकं संस्थाप्य तदुपरिउलूखलमारोप्य, आदिपदेन तदुपरि बालमारोप्य तत्स्कन्धारोहणादिना विधिं तदवतारणोपायं रचयति। यदि च तथाप्यवतारयितुं न शक्नोति, तदा लकुटशलाकादिना शिक्यस्थेषु भाण्डेषु छिद्रं रचयति। आश्चर्यमेव तस्योपायज्ञानमित्याहुः—तद्विदिति। तच्छिद्रं कर्तुं छिद्रेण धारां पातयितुं धारया च स्वस्य बालानां च व्यात्तं मुखं पूरयितुं वेत्तीति तथेत्यर्थः। 'न च किञ्चिदज्ञातमस्ति' इत्याहुः—अन्तर्गृहभाण्डादिषु निहिते दध्यादौ वयुनं ज्ञानं यस्य सः। 'तर्ह्यन्धकारे दध्यादि स्थापनीयम्' इति चेत्तत्राहुः—ध्वान्तेति। ध्वान्तयुक्त आगारे गृहे, धृता मणिगणा यस्मिंस्तत् स्वाङ्गमेव अर्थस्य दध्यादिपदार्थस्य प्रदीपं प्रकाशकं रचयति। 'एवं चेत्तर्हि सावधानतया स्थेयम्, यथैवं न कुर्यात्' इति चेत्तत्राहुः—काले इति। यर्हि यस्मिन् काले गोप्यो गृहकार्येषु सुव्यग्रचित्ता भवन्ति तदैवमुपद्रवं करोति। 'तथा च गृहकार्याणामावश्यकत्वात् कथं सर्वदा सावधानता स्यात्' इति भावः॥ ३०॥ किञ्च उशति देवार्चनपाकाद्यर्थं सुसंस्कृते कमनीये वास्तौ गृहे मेहनादीनि पुरीषोत्सर्गमूत्रादीनि कुरुते। एवंविधानि बहूनि धाष्टर्यानि प्रागल्भ्यानि कुरुते। एवं स्तेयोपायैर्विरचिता कृतिः कर्म येन सः त्वत्समीपे तु सुप्रतीकः साधुर्यथा तथास्ते। एवं गोपीकृतमुपालम्भमुक्त्वा शुक आह—इत्थमिति। सभये नयने यस्मिंस्तच्च तच्छ्रीयुक्तं च यत् श्रीकृष्णस्य मुखं तत् आलोकिनीभिः पश्यन्तीभिः स्त्रीभिः इत्थं व्याख्यातः कथितोऽर्थः स्वगृहे कृतः कृष्णोपद्रवो यस्याः सा यशोदा तं सुतमुपालब्धुं आक्षेप्तुं नैवैच्छत्, किन्त्वाक्षेपस्य भयजननार्थत्वात्तद्विनैव तमति भीतं दृष्ट्वा पुनर्भयजनकवचनस्य तदस्वास्थ्यहेतुत्वेन अनौचित्यं मत्वा प्रत्युत जातभयनिवृत्त्यर्थं प्रहसितमुख्येव जाता। हीत्यवधारणे। कदाचिदपराधान्तरे उपालभत, तदा तु महदाश्चर्यमभूत्' इति कथयन् लीलान्तरमाह—एकदेति। ते प्रसिद्धाः क्रीडमाना रामाद्या गोपदारकाः गोपबालका एकदा आगत्य 'कृष्णो मृदं कोमलां भक्षितवान्' इति मात्रे यशोदायै न्यवेदयन् विज्ञापयामासुरित्यन्वयः॥ ३२॥

अन्वितार्थप्रकाशिका

वत्सानिति। कचित् अस्माकमनवधानदशायाम् असमये अदोहकाले वत्सान्मुञ्चन् भवति। तेन वत्सा एव पिबन्तीति भावः। यद्वा। शून्ये गृहे चौर्यं सुकरमिति गृहजनान्निःसारयितुमसमय एव वत्सान्मुञ्चति। ततो वत्सान् परावर्त्तयितुं गृहजनेषु गतेषु दधि चोरयति ततः पलायते। अन्यस्मिन् दिने अये चौर इति क्रोशे जनैराक्रोशे कृते सञ्जातहासो भवति नतु बिभेतीत्यर्थः। अथ कल्पितैः स्तेययोगैः चौर्योपायैरर्जितं स्वादु दधि पयश्च अत्ति। चोरितमेवास्मै दध्यादि रोचत इत्यर्थः। तथा भोक्ष्यन् भोक्ष्यमाणः। शताऽऽर्षः। प्रथमतो मर्कान् मर्कटान् प्रतिविभजति विभज्य ददाति तेषां मध्ये तृप्ततया स कश्चिन्मर्कटो नास्ति चेत्तर्हि विमनाः सन् दध्यादिपूर्णं भाण्डं भिनत्तीति द्रव्यस्य दध्यादेरलाभे सति सः गृहाय कुपितः गृहान् धक्ष्यामि इति कथयन् याति। यद्वा। गृहाः गृहस्थाः तेभ्यः कुपितः सन् तोकान् प्रसुप्तान् बालानुपक्रोश्य नखाघातादिना रोदयित्वा यातीति॥ २९॥ हस्ताग्राह्य इति। दध्यादिपदार्थे उत्तुङ्गशिक्यस्थत्वेन हस्ताग्राह्ये सति पीठकोलूखलाद्यैः पीठकं संस्थाप्य तदुपर्युलूखलमारोप्य आदिपदेन तदुपरि बालमारोप्य तत्स्कन्धारोहणादिना विधिं तदवतारणोपायं रचयति। यदि च तथाप्यवतारयितुं न शक्नोति तदा अन्तर्गृहभाण्डादिषु निहिते दध्यादौ वयुनं ज्ञानं यस्य सः तद्वित् छिद्रादिकरणकुशलः स शलाकादिना शिक्यस्थेषु भाण्डेषु धारापातनार्थं छिद्रं रचयति। तेनान्यान्पाययति स्वयं च पिबतीति। ध्वान्तयुक्ते अगारे तु धृता मणिगणा यस्मिंस्तत्स्वाङ्गमेवार्थस्य दध्यादिपदार्थस्य प्रदीपं प्रकाशकं रचयति। यर्हि यस्मिन् काले गोप्यो गृहकार्येषु सुव्यग्रचित्ता भवन्ति तदैवमुपद्रवं करोति॥ ३०॥ एवमिति॥ हे उशति कमनीये ! यशोदे एवं रे चौर इत्याक्षिप्तः संस्त्वमेव चौर इत्यादीनि बहूनि धाष्टर्यानि कुरुते। यद्वा। उशति कमनीये सुसंस्कृते वास्तौ गृहे मेहनादीनि मूत्रोत्सर्गादीनि कुरुते। आदिना उत्तरीयाकर्षणपादप्रहारादीनि। एवंविधानि बहूनि धाष्टर्यानि प्रागल्भ्यानि कुरुते। एवं स्तेयोपायैर्विरचिता कृतिः कर्म येन सः त्वत्समीपे तु सुप्रतीकः साधुर्यथा तथाऽऽस्ते। सभये नयने यस्मिंस्तच्च तच्छ्रीयुक्तं च यच्छ्रीकृष्णस्य मुखं तदालोकिनीभिः पश्यन्तीभिः स्त्रीभिः एतेन गोपीभिर्यशोदामानन्दयितुमेव कृष्णचापलं कथितं नतु कोपयितुम्। इत्थं व्याख्यातः

कथितोऽर्थः स्वगृहे कृतः कृष्णोपद्रवो यस्याः सा यशोदा बालप्रागल्भ्यश्रवणात् प्रहसितमुखी सती तं सुतमुपालब्धुम् आक्षेप्तुं नैवैच्छत् इच्छामपि नाकरोत्। किंतु वत्स! एतास्विमं व्यवहारं कथं करोषीति सलालनमुवाचेत्याशयः ॥ ३१ ॥ अपराध उपालम्भे त्वाश्चर्यमभूदित्याह—एकदेति ॥ ते क्रीडमानाः। कर्मव्यतिहारे शानच्। रामाद्या गोपानां दारका बालाः एकदा आगत्य कृष्णो मृदं भक्षितवान् इति मात्रे यशोदायै न्यवेदयन् ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदेव दर्शयति वत्सानिति। असमये दोहनाऽकाले क्रोशे कृते संजातहासः कल्पितैः स्तेययोगैः स्तेयोपायैः स्तेयं चौर्यलब्धं न तु दत्तं दधि पयः क्षीरं च तत्रापि स्वादु चेत्तर्हि अत्ति अथ अन्यथा मर्कान् भोक्ष्यन् भोजनं कारयिष्यन् विभजति विभज्य यच्छति भुक्त्वाते सर्वे तृप्ताः अतस्तेषां मध्ये कोऽपिनात्ति चेत्तर्हि भांडं दधिदुग्धपात्रं सः भिनत्ति कचित् द्रव्यालाभे सति गृहाय कुपितः गृहोपरि क्रुद्धः सन् इदं गेहं दग्धुमर्हमित्युक्त्वा तत्र सुप्तान् तोकान् उपक्रोश्य रोदयित्वा याति ॥२९॥ उक्तान् स्तेययोगान् दर्शयंत्य ऊचुः हस्तेति। हस्ताभ्यामग्राह्येदध्यादिभांडे सति एकैकस्यै परिनिक्षिप्तैः पीठकोलूखलाद्यैः विधिं दध्यादिग्रहणोपायं रचयति ततोऽत्युच्चशिक्यस्थभांडेषु अंतर्निहितानां मध्यनिक्षिप्तानां दध्यादीनां वयुनं ज्ञानं यस्य सः छिद्रं रचयति ननु छिद्ररचनायां भांडनाशश्चेत्तत्राहुः तद्वित् छिद्ररचनादिक्रियायुक्तिज्ञः ननु तर्हि भांडानां तमसि स्थानं कुरुध्वमिति चेत्तत्राहुः ध्वांतागारे अंधकारसंयुक्तगेहे स्थापिते भांडे धृता मणिगणा येन तत् अत एव अर्थप्रदीपकं वस्तुप्रकाशकं स्वांगं स्वशरीरं यद्वा मणिगणा न धृताश्चेत्तर्हि स्वांगमेव अर्थं प्रदीपकंरचयति ननु तर्हि सावधानतया गृहस्थिताः सत्यो रक्षंत्विति चेत्तत्राहुः यर्हि गृहकृत्येषु अतिव्यग्रचित्ताः भवेम तस्मिनकाले एवं करोति ॥३०॥ ननु तर्हि यूयमाक्रोशं कुरुध्वमिति चेत्तत्राहुः एवमिति। उशति हे कमनीये यशोदे एवं रेरे तस्कर इत्यस्माभिरुक्तः सन् धाष्ट्यानित्वमेव तस्करो अहं तु गृहाधिपतिरस्मीत्यादीनि वचनानि कुरुते अथवा उशति वास्तौ समार्जनोपलेपादिना शोभमाने गेहे मेहनादीनि विण्मूत्रोत्सर्जनादीनि करोति कस्मिंश्चित्समये तु स्तेयोपायैः चौर्योद्योगैः विरचिताकृतिर्दध्यादिग्रहणार्थं कर्म येन सः। अधुना सुप्रतीकः त्वत्समीपेऽसौ साधुवदास्ते। सभये नयने नेत्रे यस्मिन् तच्च तत् श्रीः शोभा तयाहि सहितं मुखं च तदालोकिनीभिः स्त्रीभिः इत्थं व्याख्याताः अर्थाः सुतक्रियाकलापाः यस्याः सा यशोदा उपालब्धुं तिरस्कर्तुं नैच्छत् ॥ ३१ ॥ गोपानां दारकाः बालकाः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह वत्सानित्यादिना सार्द्धद्वयेन ॥ वत्सानिति ॥ हे यशोदे, एषः त्वत्सुतः, क्वचित् कदाचित्, असमये अप्राप्तदोहनकाले, वत्सान् मुञ्चन् वत्सान् मुञ्चतीत्यर्थः। तर्ह्याक्रुश्य निवार्यतां तत्राह। क्रोशेन जनानामाक्रोशेन हेतुना, रोषास्वीकारपूर्वं संजातो हासो यस्य सः, तिष्ठ वत्सान्विमुच्य क्व गच्छसीत्याक्रुष्टः प्रत्युत हसतीत्यर्थः। किं च कल्पितैः स्तेययोगैः स्तेयोपायैः, स्तेयं चौर्यार्जितं न तु दत्तं, तत्रापि, स्वादु नेतरत्, इत्थंभूतं, दधि, पयश्च, अथ कार्त्स्न्येन, अत्ति खादति। तर्हि वदमेव भवतीनां वचनमघटमानमयं कृत्स्नामत्तीति चेदयं सुखेनाश्नातु, किं तु मर्कान् विभज्य खादयत्येतदुच्यत इत्याहुः। स्वयमत्त्वा तृप्तः सन्, मर्कान् मर्कटान् तत्तुल्यान् बालान्वा, भोक्ष्यन् भोजयिष्यन् सन्, विभजति तेभ्यो विभागशो ददाति। तेषां मध्ये कोऽपि, स मर्कटः, न अत्ति चेत्, तर्हि अयं त्वत्पुत्रः, भाण्डं दध्याद्याधारभूतममत्रं, भिनत्ति। पाठान्तरे मर्कं नवनीतं, 'मर्कं तु परिसारः स्यान्नवनीतं प्रचक्षते' इत्यभिधानात्। भोक्ष्यन्, विभजति। सखिभ्य इति शेषः। द्रव्यालाभे प्रच्छन्ननिहिततया क्वचिन्नवनीतादिपदार्थाप्राप्तौ सत्यामित्यर्थः। स्वगृहकुपितोऽस्मद्गृहेभ्यः धक्ष्यामीति कुपितः सन्, स गृहकुपित इति पाठे, स कृष्णः, गृहा गृहिणस्तेभ्यः कुपितः, यद्वा गृहाय धक्ष्यामीति कुपितः सन्, तोकान् पर्यङ्कादिषु सुप्तानि अपत्यानि, उपक्रोश्य रोदयित्वा, याति ॥ २९ ॥ कल्पितैः स्तेययोगैरिति यदुक्तं तत् प्रपञ्चयति ॥ हस्ताग्राह्य इति ॥ उच्चस्थे नवनीतादिभाण्डे इति शेषः। हस्ताग्राह्ये हस्तेन ग्रहीतुमशक्ये सति, पीठकोलूखलाद्यैः, विधिं तद्ग्रहणसाधनविधानं, रचयति। पीठकाः पट्टकाः, उलूखला भूम्यखाताः कण्डन्यः, आदिशब्देन पक्केष्टकादेरुपर्युपर्यारोपणं, शिक्यभाण्डेषु तुङ्गशिक्यस्थामत्रेषु, अन्तर्निहिते दध्यादौ वयुनं यस्य तथाभूतः, छिद्रं रचयति, शिलोत्क्षेपणादिभिः रन्ध्रं करोति हि। तद्वित् छिद्ररचनादिविदपि भवति। ध्वान्तागारे अन्धकारावृतगृहे, धृतमणिगणं दिव्यमणिभूषितं, अत एव, अर्थप्रदीपं स्वार्थप्रकाशकं, स्वाङ्गं स्वशरीरं, रचयति संनिधापयति। कस्मिन् कालेऽयं कृष्ण एवं करोतीत्याकाङ्क्षायां तं कालमाह। यर्हि काले, यस्मिन् समये इत्यर्थः। गोप्यः, गृहकृत्येषु गृहकर्मसु, सुव्यग्रचित्ताः गृहकर्मातिप्रवणचित्ताः भवन्ति, तस्मिन्काले एवं करोति इत्यर्थः ॥ ३० ॥ एवमिति ॥ अस्मिन्नेवं कुर्वति सति, चौरोऽयमित्युक्तश्चेत्, धाष्ट्यानि प्रागल्भ्यानि, उशति जल्पति। त्वमेव चौरोऽहमेव गृहस्वामीत्यादीनि प्रगल्भवचनानि वदतीत्यर्थः। वास्तौ स्वर्चिते गृहे, मेहनादीनि मूत्रपुरीषोत्सर्गादीनि, कुरुते। यद्वा हे उशति कमनीये यशोदे इति संबोधनम्। यद्वा, उशतीति वास्तुविशेषणम्। एवं स्तेयोपायैः, विरचिता कृतिः कर्म येन तथाभूतः सन्नपि, त्वत्समीपे, यथा सुप्रतीकः साधुः, तद्वत् आस्ते। इत्थमेवं, सभये नयने यस्मिंस्तच्च तत् श्रीयुक्तं मुखं श्रीकृष्णास्यं तदालो-

किनीभिः स्त्रीभिर्गोपिकाभिः, व्याख्याताः प्रख्यापिताः अर्थाश्चौर्यादिव्यापारा यस्यास्तथाभूता सत्यपि, प्रहसितं मुखं यस्याः सा यशोदा, उपालब्धुं पुत्रमाक्षेप्तुं, न ऐच्छत हि ॥ ३१ ॥ कदाचिदपराधान्तरे सति यदोपालभत तदा महदाश्चर्यमभूदिति कथयन्नाह ॥ एकदेति ॥ एकदा एकस्मिन् समये, क्रीडमानाः रामाद्याः, ते गोपदारकाः, कृष्णः, मृदं भक्षितवान् इत्येवं, मात्रे कृष्णमात्रे यशोदायै, न्यवेदयन् निवेदितवन्तः ॥ ३२ ॥

श्रीहरिसूरिविचितं श्रीभक्तिरसायनम्

वत्सानिति : १०.८.२९.

अक्रीडोऽप्यहमस्मि यद्यपि तथाप्यालम्ब्य सद्गोकुले स्वानन्दाय सतां सदा सहचरैः सख्यादिभिः सङ्गतिम् ।
स्वल्पानेकगवीनिबन्धनतया नानारसास्वादनैः, योगैर्वा विधिभिश्चरेयमिति तत्क्रीडादिनाऽबोधयत् ॥ ३५ ॥
वत्सोन्मोचस्तेययोग तदर्थविधिसत्पदैः । उक्तोऽर्थोऽबोधि विभुना गोप्यानन्दकृतोद्यताम् ॥ ३६ ॥ (युग्मम्)

वृत्तीः प्रतार्य विषयान्तरवर्तमानाः स्वैरं भवे विहरणीयमिहात्मदृग्भिः ।
मन्ये हरिः किमभिधातुमिति प्रतार्य गोपीर्बुभोज नवनीत-पयो-दधीनि ॥ ३७ ॥
परायत्तं भोज्यं न खलु सुखदं भूर्यपि भवेन्निजायत्तं तच्चेदतुलसुखदं स्वल्पमपि हि ।
अगृह्णन्नह्वायार्पितमपि पयस्ताभिरुचितं तदेतद् यत्स्वैरं स्वयमपहृतं तद्धि बुभुजे ॥ ३८ ॥
असाक्षित्वदोषो जगत्साक्षिणो मे न जातु स्पृशत्वेष इत्याशयेन ।
दधि-क्षीर-हैयङ्गवीनानि दत्वा शिशुभ्यो जजक्ष स्वयं वासुदेवः ॥ ३९ ॥
केवलाघः केवलादी भवतीति श्रुतिं स्मरन् । युक्तमेवाघहर्ताऽसौ दत्वाऽन्येभ्यो जघास तत् ॥ ४० ॥
वन्यैरेव फलैः स्वयत्नकलितैराकल्प्य वृत्तिं निजां सेवा मे वनवासिनोऽपि विहिता प्रागेभिरव्याजतः ।
इत्थं तत्प्लवगोपकार-निकरानालोचयन्नच्युतः प्रादाद्वेतनमेव किं दधिपयोव्याजात् स तेभ्यस्तदा ॥ ४१ ॥
दाता भोक्ता भोजयिता गोकुलस्थो यदा तदा । भवतीश इति क्रीडाव्याजाच्छ्रुतिभिरीरितम् ॥ ४२ ॥
आसीद् यस्य पदाम्बु शङ्करशिरोवन्द्यं च वक्षो रमास्पृह्यं रूपमृषीन्द्रसेव्यमवनावाम्नायगम्यश्च यः ।
स श्रीमान् व्रजवल्लवीभिरभितो नीतोऽपमानं यतोमुख्यानादरहेतवे ऽतिसहवासायाऽस्तु तस्मै न नः ॥ ४३ ॥
यशोदयाभिधाऽन्वर्था यया सन्धार्यतेऽनिशम् । अनुपालम्भिनी वृत्तिस्तस्याः सिद्धाऽपदानके ॥ ४४ ॥
क्रीडावृत्तिषु गोकुले विहरता कार्या यथाशं तथा भूयो बुद्धिमता कश्चिन्न भविता क्षुब्धः प्रमाता तथा ।
इत्थं भुव्युपदेष्टुमेव भगवान्नित्यप्रतृप्तोऽपि सन् यद्गोपीष्वकरोदनेकचरितं संरक्ष्य मातुः कृपाम् ॥ ४५ ॥

एकदेति : १०.८.३२.

तत्तादृग्व्रजयोषिदुक्तचरितव्याख्योर्ध्वमृद्भक्षणोल्लेखादेष मुनेर्विभाति च विभोस्तत्कर्तुरप्याशयः ।
साङ्गं कर्म रजःस्वरूपफलकं व्यङ्गं यदि स्यात्तदा धूलीचर्वणवद्भवेद् विफलमित्यूह्या हि कर्मस्थितिः ॥ ४६ ॥
अस्मान् गृहीत्वैव रसोपभुक्तिमेतावदीशो विदधेऽधुना तु । अस्मान् प्रतार्य स्वयमातनोति तद्वक्तुमस्या इति युक्तमूचुः ॥ ४७ ॥
दुर्भारहरणकार्यं कार्यं तद्रूपरागहरणेन । विध्युक्तमीदृगवनेर्नैदृगिति व्यङ्ग्यधीर्जगौ रामः ॥ ४८ ॥
इमामेव भूमिं समालम्ब्य कार्यं विधेयं विधेः स्वेष्टदं स्पष्टमेतत् ।
विधातुं विधातुः पिता भूषितं तद्रजः सद्द्विजाय स्वमुख्याय चादात् ॥ ४९ ॥
स्वगेहगतमृत्तिकादनमसह्यमेषामभून् मया यदि परालयाद्धृतमिमे सहेरन् कथम् ।
इति स्वकृततादृशाचरितगुप्तये श्रीपतिर्व्यधान्मृदशनं पुरः किमु तदीरितोहेक्षणः ॥ ५० ॥
स्निग्धाज्यादिपदार्थभक्षणकृतः कुर्वन्ति तत्स्निग्धताऽशेषोन्मार्जनहेतवे निजकरे मृल्लेपनं सर्वतः ।
आलोच्यैवमशिष्टशिष्टसरणिं श्रीशोऽपि तद्भक्षणव्याजाद्विश्वमुखस्तदेव बहुधा सम्पादयामास किम् ॥ ५१ ॥
पुरा विषमधायि यत्प्रबलपूतनास्तन्यगं विधेयमिह तद्विषं भवति नष्टवीर्यं यथा ।
शिशुश्रियमुपाददे किमु विभुर्मृदंशादनात् विषस्य विषमौषधं भवति यद्भिषग्भाषितम् ॥ ५२ ॥
यत्स्पृह्यं त्रिदशैरलभ्यमसतां ध्येयं च यद्योगिनां प्राप्तं स्यात्किमु तद्रजो व्रजगतं गोगोपिकापादगम् ।
इत्थं भूरि निजोदरस्थजनसद्वाञ्छां चिरं चिन्तयन् मन्ये पूर्णदयार्णवः किमकरोत्तद्भक्षणं तत्कृते ॥ ५३ ॥
नानाविधं बहुरजोगुणकार्यमग्रे कर्तव्यमस्ति मम चेति विचिन्त्य कृष्णः ।
मृत्स्नानुभक्षणमिषात्प्रकृतोपयुक्तं प्रायो रजोगुणसुसंग्रहणं चकार ॥ ५४ ॥
रसेति लसिताऽभिख्या वर्ततेऽस्या भुवस्ततः । जिघृक्षुस्तद्रसास्वादं किमीशोऽधान्मृदोऽदनम् ॥ ५५ ॥

विश्रृङ्खलविहारिणो मदवमानचेष्टाजुषो भवन्ति शिशवोऽखिला अपि तदत्र मत्क्रीडनम् ।
क्ष्मांशविधृतिं विना नहि भवेत्स्वभक्तेष्विति प्रभुः किमु चकार तत्कृतितया क्ष्माधारणम् ॥ ५६ ॥
स्याद्विश्वसृष्टिर्न रजोगुणं विनेत्यालोच्य सम्प्रत्यपि विश्वसर्जनम् ।
कर्तव्यमस्तीत्यखिलेश्वरोऽप्यसौ तत्सङ्ग्रहं तत्कृतितश्चकार किम् ॥ ५७ ॥
मय्येव सर्वार्पितभावना ये मान्या हि ते मे त्विति किं नु वाच्यम् ।
मुख्यं तदीयाङ्घ्रिरजोऽपि मे स्यादित्यच्युतोऽधात्स्फुटमात्तरेणुः ॥ ५८ ॥
या मामनन्यशरणा शरणं प्रयाता यद्भूरिभारहरणाय धृतावतारः ।
तस्यामहं भुवि कथं सदयोपरागी स्यामित्यबोधि विपुलाऽल्पपरागधृत्या ॥ ५९ ॥
यन्निष्कामतया तपो महदिमे कुर्वन्ति तेनारयः कंसाद्या भृशमुन्मदाः समभवन्नेवं विचिन्त्याऽच्युतः ।
सङ्कल्पे रिपुघातसुष्ठुफलके योक्तुं तदा तान् द्विजान् मृत्स्नाभक्षणकैतवादिह रजोयुक्तानकार्षीत् किमु ॥ ६० ॥
भक्तः स्वरूपमिव भक्तजनस्वरूपं वाञ्छामि भूर्यहमपीति जनावगत्यै ।
प्राग्गोकुले त्वधिकरेणुमुखः सहस्ती जातः स्वतोऽप्यधिकरेणुमुखस्तदाऽऽसीत् ॥ ६१ ॥
महीसुरेभ्यो निखिला धरा पुरा मयाऽर्पिता यत्किल रेणुका भुवा ।
समर्पणीया ह्यधुनापि सांशतस्त्विति द्विजेभ्योऽदिशदंशतः स ताम् ॥ ६२ ॥
समदृष्टेर्विशेषोऽस्ति नोत्तमाधमवस्तुनि । व्यञ्जयन्निति स श्रीशो गव्यवन्मृदमाददे ॥ ६३ ॥

कृष्णप्रिया

अजी नन्दरानी आप के लालन् को रोकिए । सुनोरी आप के लालन् असमय में ही बछड़ों को खोल देते हैं, यदि हम पुकारती है कि पकड़ो पकड़ो तब तो माँ लालन हँस देते हैं और उनकी हँसी देखकर हमें हँसी आ जाती है । चोरी करने के जितने कल्पित तरीके हैं उनसे चुराकर दही-दूध खा लेते हैं और खाने के पहले तो बन्दरों को बाँट देते हैं फिर कोई बन्दर खाने वाला नहीं बचा रहता तब मटके फोड़ देते हैं । मैया, यदि किसी के घर कोई चीज़ घर में न मिल सका तो वह घरवालों के प्रति नाराज होकर सोये हुए बालकों को रुलाकर भाग खड़े रहते है और कहते हैं तेरो घर जल जाय आज हमारी बाहिनी को सुगन बिगड़ गयो ॥ २९ ॥ कभी किसी के घर कोई चीज ऊपर छींके पर रक्खी जाती है तो पीढ़े और ऊखल पर चढ़कर पाने के लिए प्रयत्न करते हैं । इतना करने पर जब वह माँट तक नहीं पहुँच पाते तब वह उनमें छेद कर डालते हैं । उनको यह भी ज्ञान है इस मटकी में दही दूध है और इसमें कुछ भी नहीं । जब घर में अन्धेरा घिरा रहता है तब नानाविध मणियों को पहने हुए अपने श्री अङ्ग ही दही दूध आदि पदार्थों के प्रकाशक बन जाते हैं । यदि माँ, आप कहें, तुम्हें नेक निगाह रक्खी रहो तब सुनिये लालन की सब शरारते तब शुरू होती है, जब हम सब गोपियाँ अपने अपने घरेलू कार्यों में उलझी रहती है ॥ ३० ॥ अरी सुंदरी सुनिये, आपके लालन की धृष्टता की क्या कहानी कही जाय, जब वह कभी पकड़ जाते हैं और अरे चोर खड़े रहो ऐसा कुछ कहा जाय तो तब बड़ी प्रगल्भता से सुनाते हैं कि चोर तो तुम सब हो घर के हम मालिक हैं ऐसी कईविध धृष्टता करते हैं कभी डाँट डपट की जाती है, तब हमारे लिपे पुते स्थान में या देहरी में मूत्रादि करके बिगाड़ देते हैं, चोरी करने के जितने तरीके हैं उनसे यह सब कराते हैं । यदि आप के पास कुछ शिकायत की जाती है तब तो ऐसा मुँह बना लेते हैं मानो यह बड़े सयाने है और कुछ जानते ही नहीं । मानो गोपियाँ के उलाहनों को सुनकर लालन डर गये हैं यह कृपासिन्धु श्रीबालकृष्ण की आँखों से स्पष्ट प्रतीत होने लगा यही मुख छटा को देखने के लिए गोपियाँ आयी थी श्यामसुन्दर की इस मुख छटा को देख अघायी नहीं और श्रीयशोदाजी ने भी मानो अपने जीवन का फल पा लिया, माताने कृष्ण को न डराया न धमकाया न उलाहना दिया लेकिन प्यार से लालन के सामने देखा और कहा बेटा ऐसा क्यों करते हो ॥ ३१ ॥ एक बार बलदाऊ आदि ग्वालबाल खेलते खेलते श्रीयशोदाजी के पास पहुँचे और यशोदाजी को कहने लगे कि अम्मा ! लालनने आज तो मिट्टी खा डाली है ॥ ३२ ॥

सा गृहीत्वा करे [1]पुत्रमुपालभ्य हितैषिणी । यशोदा भयसम्भ्रान्तप्रेक्षणाक्षमभाषत ॥ ३३ ॥

यशोदोवाच[2]

[3]कस्मान्मृदमदान्तात्मन् भवान् भक्षितवान् रहः । वदन्ति तावका ह्येते कुमारास्तेऽग्रजोऽप्ययम्॥ ३४ ॥

नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः । यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखम् ॥ ३५ ॥

यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान् हरिः । व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—हितैषिणी सा यशोदा भयसम्भ्रान्तं प्रेक्षणाक्षमं पुत्रं करे गृहीत्वा उपालभ्य अभाषत ॥ ३३ ॥ हे अदान्तात्मन् रहः भवान् कस्मात् मृदं भक्षितवान् तावकाः एते कुमाराः वदन्ति ते अयम् अग्रजः अपि (वदति) ॥ ३४ ॥ अम्ब अहं न भक्षितवान् सर्वे मिथ्याभिशंसिनः यदि सत्यगिरः तर्हि मे मुखं समक्षं पश्य ॥ ३५ ॥ यदि एवं तर्हि व्यादेही इत्युक्तः सः भगवान् हरिः अव्याहतैश्वर्यः क्रीडामनुजबालकः व्यादत्त ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उपालभ्य निर्भर्त्स्य । भयेन संभ्रांतप्रेक्षणे चपलनिरीक्षणे अक्षिणी यस्य तम् ॥ ३३ ॥ अदांतात्मन् चपलगात्र । रह एकांते ॥३४॥ नाहं भक्षितवानिति । न हि बाह्यं किंचिन्मया भक्ष्यते मत्कुक्षावादावेव सर्वमस्तीति भावः । समक्षं प्रत्यक्षम् ॥३५॥ यद्येवं तर्हि व्यादेहि मुखं प्रसारयेति । व्यादत्त प्रसारितवान् ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हितैषिणी मृद्शनेन कश्चिद्रोगो माभूदिति हेतोस्ततो निवारयंतीत्यर्थः ॥ ३३ ॥ अग्रजो बलदेवः ॥ ३४ ॥ इति भाव इति । भक्षणं तु बाह्यस्थवस्तुनो मुखे प्रवेशनरूपं तत्तु मया न कृतमिति तात्पर्यम् । किञ्च हे अंब अहं न भक्षितवान् । मुखेन भक्षितं प्राणरक्षार्थं मुखप्राणयोरेव भक्षकत्वं मम तु 'स चान्यः प्राणदेहयोः' इत्युक्तेः आत्मरूपत्वात्ताभ्यां भिन्नत्वान्न भक्षकत्वम् । आत्मरूपत्वं तु 'अहमात्मा गुडाकेश' इति गीतासूक्तेः । प्रथितमेव यद्येते सत्यगिरस्तर्हि येन मुखेन भक्षितं तत्समक्षं प्रत्यक्षं पश्येति संबंधः । आत्मनस्तु "एष आत्मा विहतपाप्मा विजरो विशोको विमृत्युर्विजिघत्सो विपिपासः" इत्यादिश्रुतेर्न भक्षकत्वम् । यद्वा—यदि यतः । न ह्यति बध्नात्यावरणशक्त्याचिदंशमिति नहा माया तस्या इदं कार्यं नाहम् 'मायाकार्यमिदं जगत्' इत्युक्ते सर्वं विश्वं नाहम् । यद्वा—नह्यते बध्यतेऽज्ञानेन यत्रेति नहः प्रपञ्चस्स एव नाहस्तं प्रलये भक्षितवानस्मि तर्हि ततः सर्वेऽमिथ्याभिशंसिनः सत्यवचनाः । मे मुखं हे अंब सम्यगक्षं ज्ञानं यत्र तत्समक्षं मद्दत्तदिव्यदृष्टिपूर्वकं पश्य । अक्षति व्याप्नोति सर्वत्रेत्यक्षं ज्ञानं वस्तुमात्रस्य ज्ञानव्याप्यत्वादिति । किंभूतस्य सच्च त्यच्च सत्यं पञ्चभूतात्मकं जगत् "सच्च त्यच्चाभवत्" इति श्रुतेः । तद्गिरति भक्षतीति सत्यगीस्तस्य तथा । 'अत्ता चराचरग्रहणात्' इति न्यायात् । यद्वा क्रुद्ध आह—यदि मिथ्याभिशंसिनः सर्वे तव कोऽर्थस्त्वदीया अहं च न तव न त्वदीयस्तर्हि हे अनंब वैरिणि सत्यगिरः सत्यवक्तुर्मम मुखं समक्षं सम्यग्दृष्टियुक्तं न त्वपराधिन इव परावर्त्तितं पश्येति । किंभूतं मुखं भक्षितुं शीलमस्येति भक्षीत्यर्थः । यद्वाहं ना पुरुषः भक्षितवानेते सर्वेऽमिथ्याभिशंसिन एव हे सति यद्येतेऽगिरोभक्षकास्तर्हि ममैव मुखं पश्येति 'सर्वं वाक्यं सावधारणम्' इति न्यायात् । इत्थमन्वयेन सर्वथा श्रीकृष्णस्य सत्यवक्तृत्वमेवान्यथा "न मयोदितपूर्वं वा अनृतं तदिमे विदुः" इति वक्ष्यमाणविरोधः स्यादित्यर्थः ॥ ३५ ॥ यद्येवं सत्यवक्तासि । अव्याहतैश्वर्योऽविनाशिसामर्थ्यवान् ईश्वर इति यावत् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पलायनमाशङ्क्य करे गृहीत्वा हितैषिणीति तत्रोपालम्भनताडनादिकमपि हितमिति तज्जातीयस्य प्रेम्णः परमाश्चर्यत्वं व्यञ्जितं पुत्रमिति । तस्या एव तद्योग्यत्वं मातुः परमदुःखभयप्रदेनात्मापराधेन ताडनमप्याशङ्क्य भयसम्भ्रान्तप्रेक्षणाक्षम् अतः केवलमभाषतैव नतु ताडितवतीत्यर्थः ॥३३॥ उपालम्भनमेव किञ्चिदुद्दिशति–कस्मादिति । अदान्तात्मन् हे असंयतेन्द्रिय ! रह इति श्रीरामादीनां साक्षात् मृद्भक्षणाशक्तेः हि हेतौ निश्चये वा तावका इति मिथ्यापवादादिकं निरस्तम् एते साक्षाद्वर्तमाना इति नात्रापलपितुमपि शक्ष्यसीति भावः ननु, मातर्ममर्णवैते वदन्तीति चेत्तत्राह—तवाग्रजोपि वदतीति । अत्र चायमिति त्वत्साक्षादेवास्योक्तौ न कोपि संशय इत्यर्थः अग्रज इति श्रीवसुदेवनन्दयोर्भ्रातृत्वेन श्रीरोहिणीयशोदयोः परमसख्येन आनन्देन

---

[1] कृष्ण–श्रीधर. वंशी. विज. शुक. ; पुत्र–वीर. जीव. विश्व. । [2] अन्यत्र "यशोदोवाच" पाठो न दृश्यते । [3] मदोन्तात्मन्–विज. ।

पुत्रत्वं वाचयित्वा लाल्यमानत्वेन च तथा व्यवहारात् ॥ ३४ ॥ नाहं भक्षितवानिति श्रीकृष्णवाक्यं बाल्यकेलौ मिथ्योक्तेरप्यदोषत्वात् प्रत्युत वर्णनश्रवणाभ्यां श्रीशुकादिसाधुगणसुखहेतुत्वेन गुणत्वात् हे अम्बेति ताडनशङ्कया स्नेहं विवर्द्धयति सर्व इत्यनेन मदग्रजोऽप्ययमन्यबालवदेव मन्यतां न चात्र विशेष इति भावः। मे मुखं पश्येति समग्रभक्षणतस्तच्चिह्नापगममननात् ॥३५॥ स श्रीकृष्णाख्यः भगवानित्यशेषभगवत्तायुक्तत्वेन मनस्सङ्कोचहेतुरपि हरिः सर्वमनोहरः माधुर्यातिशयस्यैव प्राधान्यप्रकाशनेन धन्यशील इत्यर्थः। अत एव न विशेषेण न च आ सर्वतो हृतन्त्यक्तमैश्वर्य्यमपि येन सः किन्त्वनादृतमपि तत् यस्य निकटे स्थित्वा निजोचितलीलाविशेषावसरं सदा प्रतीक्षते कदाचिल्लभते च तादृश इत्यर्थः। क्रीडामनुजबालकश्च स्वयं क्रीडया लीलया मनुजबालकः तत्सदृश इत्यर्थः। यद्वा, क्रीडामनुजाः तदीयतादृशनित्यलीलासम्बन्धिमनुष्याः नत्वदृष्टवशा मायासम्बन्धिमनुष्याः श्रीनन्दादयः तेषां बालकः आगमानुसारेण नित्यतल्लीलः उभयथा स्वेच्छामयस्वरूपाविर्भावोचितलीलारसाविष्ट इत्यर्थः। अत एव व्यादेहीत्युक्तमात्रो व्यादत्त व्यादात् मातृकोपरविरश्मिलेशवशात् मुखनीलाम्बुजं विकसितं दधारेत्यर्थः। भयसम्भ्रान्तप्रेक्षणाक्षमिति चोक्तं तदेवमसौ सदैव तादृशलीलारसभोगी तादृशतदैश्वर्य्यशक्तिरेव तु स्वयं वा तमेवालिङ्ग्य वा तदभीष्टलीलारससम्पादनाय दुःसमाधानं समादधाति यथाऽधुना मातरि कोपाच्छादकभावान्तरापादनेन तथा सर्वमेवास्यान्तर्विद्यते ततो न किमपि भक्षयतीति तद्वचः सत्यापनेन च तल्लक्षणनिजप्रभुसाहाय्याय विस्मयादिद्वारा मातुस्तत्प्रेमपोषाय च विश्वं दर्शितवती यथा च तृणावर्त्तवधादौ तस्मिन् भारादिकमाविर्भावितवती तदेवमचिन्तितसर्वार्थसिद्धेरैश्वर्य्यमपि महदेव सिद्धमिति ज्ञेयम् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

करे गृहीत्वातिभयभंगार्थम्। हितैषिणीति स्नेहभरेण हितार्थमुपालम्भनयोग्यतोक्ता। मातुः परमदुःखभयप्रदेनात्मापराधेन ताडनमप्याशंक्य तत्परिहाराय भयसम्भ्रान्तप्रेक्षणाक्षमतः केवलमभाषतैव, न तु ताडितवतीत्यर्थः ॥ ३३ ॥ उपालम्भनमेव किञ्चिदुद्दिशति—कस्मादिति। अदान्तात्मन्! हे असंयतचित्त! रह इति श्रीरामादीनां साक्षान्मृद्भक्षणाशक्तेः। हि हेतौ निचये वा। तावका इति मिथ्यात्वमपवादादिकञ्च निरस्तम्। एते साक्षाद्वर्त्तमाना इति परोक्षत्वान्यथात्वादिकञ्च। ननु मातर्नर्म्मणैते वदन्तीति चेत्तत्राह—तवाग्रजोऽपि वदतीत्ययमिति त्वत्साक्षादेवास्योक्तौ न कोऽपि संशय इत्यर्थः ॥ ३४ ॥ नाहं भक्षितवानित्यनुकरणेन तस्य तत्त्वतो मिथ्यात्वात्, किंवा भयेन महासंकटे मिथ्योक्तेरप्यदोषात्, किंवात्र मिथ्योक्तेरेव तद्भक्तविशेषेषु सुखहेतुत्वात्। हे अम्बेति ताडनाशंकया स्नेहं विवर्द्धयति। सर्व इत्यनेन गोपीरपि संगृह्णाति- यथा ताः पूर्वं मिथ्योचुस्तथेमे चेत्यर्थः। यद्वा, एतदनुमानेन ता अपि मिथ्यावादिन्य एवानुमन्तव्याः। मे मुखं पश्येत्यनुकरणपक्षे तत्त्वतोऽपि मिथ्यात्वादेव, पक्षान्तरे, प्रयत्नेन समग्रभक्षणतस्तच्चिह्नापगम मननात्, किंवा तद्द्वारा किञ्चिदद्भुतप्रदर्शनयान्यचित्ततापादनार्थम् ॥ ३५ ॥ स निजाशेषभगवत्ताभिव्यञ्जकोऽतोऽनिर्वचनीयमाहात्म्यामृतमहार्णवो यो भगवान् परमेश्वरोऽत एव हरिः सर्वचित्ताकर्षकः, यद्वा, भगवान् सर्वैश्वर्य्यपरिपूर्णो यो हरिः इत्यवतारित्वमुक्तम्। तत्रापि वैशिष्ट्यमाह—स इति। तत्र (भा० १०।८।१९)—'नारायणसमः' इति बहुव्रीहिणा प्रागुद्दिष्टमेव, अतएवात्याहतं बाल्यलीलायामप्यप्रतिहतमैश्वर्य्यं यस्य स इति वक्ष्यमाणेच्छामात्रेण सहसा मुखद्वारा जठरान्तः कार्यकारणात्मकविश्वप्रदर्शने शक्तिः समर्थिता। यद्यपि क्रीडार्थं मनुजबालक इत्युक्तेऽपि क्रीडाया नित्यत्वान्मनुजबालकस्यापि तत् सिद्धमेव, तथापि क्रीडायुक्तो मनुजबालकः, यद्वा क्रीडामनु तां लक्षीकृत्य जायत इति क्रीडामनुजश्चासौ बालकश्च, यद्वा, क्रीडमनु क्रीडायां जव इतस्ततो धावनादिवेगस्तद्युक्ताः सदालोला अलका यस्येत्यत्यन्तबाल्यक्रीडापरतोक्ता ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

व्यादेहि आस्यं विवृतं कुरु ॥ ३६–३७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सा यशोदा हितमिच्छन्ती कृष्णं करे गृहीत्वोपालभ्य निर्भर्त्स्य भयेन सम्भ्रान्तप्रेक्षणे चपलालोकने अक्षिणी यस्य तं श्रीकृष्णमभाषत ॥ ३३ ॥ भाषणमेवाह—कस्मादिति। हे अदान्तात्मन्! चपलगात्र उद्धतस्वभावेति वा कस्माद्धेतोर्भवान् रहसि मृदं भक्षितवान्? नाहं भक्षितवानित्यत्राह—वदन्तीति। तव सम्बन्धिन एव त्वं भक्षितवानिति वदन्तीत्यर्थः ॥ ३४ ॥ एवमुक्तः कृष्णः प्राह—नाहमिति। हे अम्ब! नाहं भक्षितवान् मत्कुक्षौ सर्वमादावेव अस्तीति भावः। एते वदन्तीत्येतत् प्रक्षिपति—सर्व इति। यद्येते सत्या गिरो वाचो येषां तथाभूताः तर्हि समक्षं प्रत्यक्षं मम मुखं पश्य ॥ ३५ ॥ एवमुक्तया जनन्या तर्हि मुखम् आस्यं व्यादेहि विवृतं कुर्वित्युक्तः भगवान् हरिः व्यादत्त विवृतमकरोत् व्यात्ताननं विश्वरूपदर्शनोपयुक्तेन धर्मेण विशिनष्टि-अव्याहतमवतारदशायामप्यप्रच्युतमैश्वर्यमीश्वरसाधारणं "परास्य शक्तिर्विविधैव श्रूयते' स्वाभाविकी ज्ञानबलक्रिया

च, सत्यकामः सत्यसङ्कल्पः” इत्यादि वेदान्तावगतं सर्वशक्तित्वादिकल्याणगुणजातं यस्य सः तर्ह्येवम्भूतस्य जीववत्कुतो मनुजबालकत्वापत्तिस्तत्राह—क्रीडया निमित्तभूतया मनुजबालकः न तु कर्मणेति भावः ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भयेन संभ्रातानि अनवस्थितानि चञ्चलानि प्रेक्षणानि दर्शनानि यस्य तत्तथा तच्चाक्षि यस्य स तथा तम् ॥ ३३ ॥ तत्र किं प्रमाणमिति तत्राह—वदन्तीति ॥३४॥ मिथ्यावादित्वं प्रत्यक्षतो दर्शयामीत्याशयेनाह यदीति ॥३५॥ यदि असत्यगिरो बालाः, यदि त्वया न मृद्भक्षिता तर्हि मुखं विदारयेत्याह—यद्येवमिति। व्यादत्त विदारितवान् क्रीडार्थं मनुजबालकः प्रशस्तमानुषबालवपुः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

किञ्च स श्रीकृष्णाख्यः भगवान् नित्याशेषभगवत्ता योगेन मनःसङ्कोचहेतुतायोग्योऽपि हरिः माधुर्यातिशयेन प्राधान्येन सर्वमनोहरः अतो न विशेषेण च आ सर्वतो हृतं त्यक्तम् ऐश्वर्यमपि येन सः किन्त्वनादृतमपि तत् यस्य निकटे स्थित्वा निजोचितलीलाविशेषावसरं सदा प्रतीक्षते कदाचित् तादृश इत्यर्थः। क्रीडामनुजास्तदीयतादृशनित्यलीलासम्बन्धिमनुष्याः श्रीनन्दादयः तेषां बालकः नित्यतल्लीलः तत एव व्यादेहीत्युक्तमात्रो व्यादत्तेति विदारिते आस्ये सतीत्यर्थः ॥ ३६–३८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ शिशुभिः सह रामेण कथितमृदभक्षणकुपितया मात्रा भर्त्सितस्त्रासात् स्वयमेव मिथ्या वदन् परान् मिथ्यावदन्तीति दूषयन्नाह—नाहं भक्षितवानित्यादि। तर्हि कथमेते वदन्ति? तत्राह—सर्वे मिथ्याभिशंसिनः। इति भगवद्वचनमलीकतयोपपद्यत इति न मन्तव्यम्, भक्षितस्य दर्शयितुमशक्यत्वात्। भक्षितमेव न भवति, मय्येव सर्वं वर्तते इति नाहं भक्षितवान्। यदि भक्षिता मृण्मयेत्यमी सत्यगिरस्तदा मन्मुखं समक्षं साक्षात् पश्येति सर्वमेव जठरे दर्शयतीति भक्षणाभावात् सत्यवादिना स्वयमेव भवितव्यम् ॥ ३५ ॥ मात्रा च तमेव पक्षमुररीचकारेत्याह—यद्येवं तर्हीत्यादि। भगवान् इत्युक्तः सन् मुखं व्यादत्त। अव्याहतमैश्वर्यं यस्य। ननु कथमेवं बालकस्य तस्य तादृशमैश्वर्यम् तत्राह—क्रीडामनुजबालकः क्रीडया लीलया मनुजबालक इव मनुजबालकः वस्तुतस्त्वखण्डपरमानन्दः। यद्वा क्रीडामनुजवयुक्ताश्चञ्चला अलका यस्य, मुख व्यादाने अलकाश्चञ्चला आसन्नित्यर्थः ॥ ३७–४१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

क्रीडामनुजबालक इति क्रीडामनुजवयुक्ता अलका यस्य ॥ ३७–४१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

करे गृहीत्वेति पलायनाशङ्कया उपालभ्य निर्भर्त्स्यं हितैषिणीत्युपालम्भताडनादावपि प्रेम्णः पोष एव नतु तत्र दोषः पुत्रमिति मातुरियं रीतिरेव नत्वनीतिः भयसम्भ्रान्तेति परमेश्वरस्यापि तादृशत्वं प्रेमवश्यत्वद्योतनया भूषणमेव न तु दूषणमिति भावः ॥ ३३ ॥ हे अदान्तात्मन्! चञ्चलगात्र हे अनवस्थितचित्त! मृदमिति मद्गृहे किं सितादिकं न प्राप्नोषीति भावः! रह इति मत्साक्षात्तदशक्तेः वदन्ति तावका इति नायं मिथ्यापवाद इति भावः मत्ताडनाकाङ्क्षिण एते मद्वैरिण एवेति चेत्तवाग्रजो बलदेवोपीति अयमिति त्वत्साक्षादेवेति नात्र सन्देह इति। भावः ॥ ३४ ॥ कृष्ण उवाच—नाहमिति। बाल्यस्वभावेन ताडनभयान्मिथ्योक्तिर्वात्सल्यरसपोषिका अत एव वात्सल्यादीनां रसानां प्रेमपरिणामत्वात् प्रेमवतां च भक्तत्वात् भगवतश्च भक्तवत्सलत्वात् भक्तवात्सल्यस्य च पृथिव्युक्तसत्यशौचदयादिनित्यचिन्मयसर्वगुणगणचक्रवर्त्तित्वात् भक्तवात्सल्यगुणाङ्गभूता चेत्येवं भूतत्वे मिथ्यादयो भगवति न दोषायन्ते प्रत्युत महागुणचूडामणयो भवन्तीति विवेचनीयम् ॥३५॥ व्यादेहि मुखं प्रसारय ननु, माता ममाद्यापराधं मा पश्यत्वितीच्छयैव ताडनाद्भीतेन भगवता मिथ्योक्तं मुखप्रसारणे तु मृत्तिकाभक्षणलक्षणव्यक्त्या सा तस्येच्छा कथं सफला स्यादित्यत आह—न व्याहतं प्रेममाधुर्य्यवत्वेन निजैश्वर्य्यानुसन्धानाभावेपि न पराहतं किन्तु स्वकृत्यावसरे स्वयमेव सावधानमैश्वर्य्यं यस्य सः सत्यसङ्कल्पताशक्त्या प्रेरिता ऐश्वरी शक्तिः स्वयमेव प्रकटीभूय विश्वं दर्शयित्वा श्रीयशोदां विस्मयरसनिमग्नीकृत्य पुत्रभर्त्सनफलकं कोपं विस्मारयामासेति भावः। नन्वलं भगवतः प्रेममाधुर्य्यास्वादेन यतो यशोदाभर्त्सनताडनादिभ्योपि तस्य भयं स्यादत ईश्वरो ऽहमिति स्वयमेव निजैश्वर्य्यमनुसन्धाय निर्भय एव कथं न तिष्ठत्वित्यत आह, क्रीडेति। क्रीडाप्रधानो मनुजबालक इति शाकपार्थिवादित्वान्मध्यपदलोपः शाक एव प्रधानं यस्य तथाभूतः पार्थिव इत्यत्र पार्थिवो यथानिजास्वाद्येषु खण्डादिवस्तुषु मध्ये शाकमेव प्रधानं मन्यते तथैवायमीश्वरो मनुजबालकक्रीडां तादृशप्रेममयीमेव प्रधानं मन्यते नतु स्वीयसर्वेश्वरत्वादिकमिति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सा यशोदा हि तमारोग्यमिच्छतीति सा तथाभूता कृष्णं सदानन्दं करे गृहीत्वा उपालभ्य निर्भर्त्स्य भयेन पुनरुपालम्भनशङ्कोद्भवेन सम्भ्राते प्रेक्षणे सम्भ्रमयुक्ते निरीक्षणे यस्य तमभाषत ॥ ३३ ॥ तदेवाह—कस्मादिति । हे अदान्तात्मन् ! अनियतबुद्धे रहः एकान्ते ॥ ३४ ॥ एवं मात्रोक्तो हरिराह—नाहमिति । हे अम्ब मातः ! अहं न भक्षितवान् सर्वं मत्कुक्षौ स्वत एव वर्तते इति भावः । यदि एते सत्यगिरः सत्या गिरो वाचो येषां ते तथा तर्हि समक्षं प्रत्यक्षं मे मुखं पश्य ॥ ३५ ॥ माता आह—यद्येवं तर्हि व्यादेहि मुखं विवृतं कुरु मात्रा इत्युक्तो हरिरपि व्यादत्तं मुखं विवृतं चकार कथम्भूतः अव्याहतैश्वर्यः अव्याहतमखण्डितमैश्वर्यं सर्वज्ञत्वसत्यसङ्कल्पत्वसर्वशक्तिमत्त्वसर्वात्मत्वनिःसमानातिशयत्वसर्वेश्वरत्वादिकं यस्य सः पुनः कथम्भूतः क्रीडामनुजबालकः क्रीडाप्रियः पुत्रीभूतपुरुषोत्तमविहारः प्रियो मनुजः क्रीडामनुजः श्रीनन्दस्तस्य बालकः अजहत्स्वाभाविकैश्वर्यो गोपालसूनुरित्यर्थः ॥ ३६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

करे गृहीत्वेति पलायनाशङ्कया उपालभ्य निर्भर्त्स्य यतो हितैषिणीति तदुपालम्भः प्रेममय एवेति भावः । भयेन सम्भ्रान्तप्रेक्षणे चपलनिरीक्षणे अक्षिणी यस्य तं माता मां ताडयेदिति भयोदयः ॥ ३३ ॥ हे अदान्तात्मन् अस्थिरचित्त कस्मादिति सशर्करं नवनीतं हित्वा कुतो हेतो मृदं भक्षितवान् रह इति मे पुरस्तादशक्तेः एतन्न मिथ्या यतस्तावका वदन्ति ननु मद्विरोधिन एते मत्ताडनं वाञ्छन्तीति तत्राह—अयं तवाग्रजोऽपीति ॥ ३४ ॥ ताडनभयादाह नाहमिति सर्व इति अग्रजोऽपि मत्ताडनं वाञ्छतीति भावः । यद्येतेषां गिरं सत्यां मन्यसे तर्हि मे मुखं पश्येति मिथ्याभाषणमिदं वात्सल्यरसपोषि मौग्ध्यादिवत् स्वरूपान्तविधिबोध्यं न च तदुदरे पृथिव्याः सत्वात् सत्यवाक्यत्वं संपाद्यमिति वाच्यं जरासंधछलेन खण्डितानुनयेन च व्यभिचारात् ॥ ३५ ॥ यदि सर्वे एते मिथ्याभिशंसिनस्तर्हि त्वं मुखं व्यादेहि प्रसारयेति मात्रोक्तेः स हरिर्मुखं व्यादत्त प्रसारितवान् कीदृशः क्रीडाप्रधानो मनुजबालको नराकृतिः शाकपार्थिवादिः अव्याहतं विराजदैश्वर्यं यस्य सः, यद्यपि पुत्रभावेन मुग्धो हरिस्तथापि तदैश्वर्यशक्तिस्तत्सेवावसरं प्रतीक्षमाणैवास्तीतिभावः । इदं द्वितीयं विश्वदर्शनं जननी मत्पवित्राकर्तुमिति बोध्यम् ॥ ३६ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

क्रीडामनुजबालक इत्यस्य क्रीडाप्रदर्शनार्थं मनुजानां बालक इत्यर्थः । एतेन क्रीडार्थमिति चापर इत्यादिना परमेश्वरप्रवृत्तिः क्रीडार्थमिति पक्षस्य दूषितत्वात्क्रीडामनुजबालक इत्यनुपपन्नमिति चोद्यं परास्तम् । क्रीडाशब्देन क्रीडाप्रदर्शनं गृहीत्वा क्रीडामनुजबालक इत्यस्य क्रीडाप्रदर्शनार्थं मनुजबालक इत्यर्थ इत्युक्तत्वात् ॥ ३५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उपालभ्य निर्भर्त्स्य गोपीभिः पूर्वमुक्तावनुपलम्भ इदानीं कुतो यशोदाया इत्यत आह । हितैषिणीति । मृद्भक्षणे उदरशूलादिकं स्यादिति सुतहितैषिणी हितं काङ्क्षन्ती । अनेन दध्यादिचौर्य इव मेहनादौ च न पुत्रगात्ररोग इत्युपालम्भोपेक्षणं प्रागिति मन्तव्यम् । भयेन भ्रान्तानि प्रेक्षणानि ययोस्ते अक्षिणी यस्य तमभाषत ॥ ३३ ॥ अदीनात्मन् उदारचित्त भवान् रहो मृदं कस्माद्भक्षितवान् । न नेति वदेति साक्षिण आह । वदन्तीति । एते कुमाराः । ते च नास्मदीया इति न वदेत्याह तावका इति । तत्राप्यनाश्वासः कृतमत्कलहास्त्व इत्यत आह । तेऽग्रजो रामोऽयमपि वदतीति । अव्ययं नाशं गच्छेरिति शेषः । कस्मान्मृदं भक्षितवानसीति वा ॥ ३४ ॥ अम्ब । अम्बार्थेति ह्रस्वः । सर्वेऽग्रजादयो मिथ्याऽभिशंसन्तीति ते तथा । तन्मिथ्यात्वनियोगो यदि तवापेक्षितः सत्यगिर इत्यभिमानो मानिनि तर्हि समक्षं मे मुखं पश्य । न निरुपादाना सृष्टिः सम्भवेति सा तदानीमेतस्यास्ये दर्शनीयेति धिया । किञ्च तद्द्वारावतारायायमवतार इति तया च धरया किञ्चिदुपयोगिन्या भवामीति मतितो मृददनमुचितमच्युतस्य तर्हीश्वरो नानृतात्पातकं परमिति जानन्कथं जननीं प्रति जननीतिशासकः सोऽनृतमवादीदित्यत आन्तरङ्गिको भगवतो विरलच्छलोकस्य ना परमपुरुषोऽहं मृदं भक्षितवान्सर्व एते मिथ्याभिशंसिनः हे सति मातः सर्वे गिरस्तूष्णीका यदि तर्ह्यगिरो मम मुखं समक्षं पश्य । कार्येण कारणमवगतं भवतीति शिष्टं श्लिष्टं । पञ्चीकरणपक्षे सर्वभूतमेलनादेकस्यां मृदि भक्षितायामन्तरिक्षाद्युपादेयप्रदर्शनं नासम्भवीति वर्णयन्ति ॥ ३५ ॥ यदि मृदं न भक्षितवान् बलादिबालाश्च मिथ्याभिशंसिनः पश्य समक्षं मे मुखमिति च वदसि तर्हीत्थं कुर्वितीरयति । यद्येवमिति । तर्हि व्यादेहीति व्यैं तरतो हिर्लघुः सन् व्यादानमप्यल्पमल्पकार्यानुगुणमिति ध्वनयति । अन्यथा सर्वजगद्ग्रासः स्यादिति ज्ञेयं । क्रीडयैव मनुतनुज इति क्रीडामनुजबालको मुखं व्यादेहि । तद्व्यात्तेति मुखतदध्याहारोऽनियतस्थलो ज्ञेयः ॥ ३६ ॥

श्रीसुबोधिनी

तेन देहापकारं ज्ञात्वा दोषनिवृत्त्यर्थं यत्नं कृतवतीत्याह **सा गृहीत्वेति**, एकस्मिन् **करे पुत्रं** गृहीत्वाभाषतेतिसम्बन्धः, **सेति** निरोधमध्यस्थिता. भगवति क्रियाशक्तिरेव लौकिकी तस्या दृढेति **करे गृहीत्वेति** तावानेवांशस्तया **गृहीत** इति, भगवांस्तु पुन्नाम्नो नरकात् त्रायते, येन पापेन मातापितरौ पुरुषशब्दवाच्यमुपलक्षणात् स्त्रीशब्दवाच्यं च शरीरमस्थिपुरीषादिव्याप्तं सर्वरोगादिगृहं तामिस्रादिसर्वनरकेभ्योधिकं प्राप्तवन्तौ स्वयं तत्र सन्ततौ प्रविष्टस्तत् कार्यं स्वयं करिष्यंस्तद्दोषमङ्गीकृत्य तौ तस्माद् देहसम्बन्धात् त्रायत इति **पुत्रो** भवति, तादृश**मुपालभ्योपालम्भनं** कृत्वालभनमिव क्रूरं वाक्यमुक्त्वा स्वस्य परमनिधानरूपः पुत्रः कुशली भवत्विति **हितमेवान्वेषमाणा यशोदा** परमभागवती ज्ञानेप्यधिकारिणी मारणे कृतेन्तःस्थिताः क्लिष्टा भविष्यन्ति ततो महापुरुषद्रोहान्नास्याः कदापि ज्ञानं भविष्यतीति**भयेन सम्भ्रान्तं प्रेक्षणं** यस्याक्षस्य, प्रदर्शयिष्यमाणं ज्ञानमेव स्वाधिकरणस्याग्रे भविष्यमाणस्य विरोधिगुणप्रादुर्भावाद् गमनप्रतिबन्धशङ्कया सम्यग् **भ्रान्तं प्रेक्षणं** गमनरूपं यस्य तथाविधं भवति, भगवत्प्रेरणया गन्तव्यमेव विरोधी च गुणो बलिष्ठो बाधां मा करोत्विति तादृशं भगवन्तं कायिकव्यापारेण योजयित्वा भगवत्प्रेरिता**भाषत** वाक्यमेवोक्तवती, तद्वाक्यं च भगवता परिहर्तव्यं क्रिया चेदशक्या भवेद् भक्तद्रोहात् ॥ ३३ ॥ **यशोदाया** वाक्यमाह **कस्मादिति**, इच्छया भक्षितमिति चेत् सेच्छापकारिणीति तन्निवारणमुचितं तदकरणादुपालभ्य एवेतिसम्बोधने**नाहादान्तात्मन्निति**, न **दान्त आत्मा**न्तःकरणं यस्य, अन्तःस्थितबालापरिज्ञानादाह **भवान् भक्षितवानिति**, **रह** एकान्ते, निष्कास्य बालकान् भक्तिं ग्राहयितुं देहगुह्यत्वादेकान्त एव कृतवान्, तद् बाला बहिःस्थिता अस्मद्वञ्चनार्थमेकान्ते **भक्षितवानित्याहुः**, प्रमाणमाह **वदन्ति तावका** इति, त्वदीयास्त्वनृतं न वदन्तीति, **हि युक्त**श्चायमर्थः, तेपि हितकारिण इति, अन्यथाकल्पने नाद्यापि समर्था इति वयो निर्दिशति **कुमारा** इति, तेषां जीवत्वात् कल्पकत्वाभावेपि भ्रमः सम्भवति यथादृष्टं च वचनमतोपि न परमार्थदृष्टिरिति चेद् तत्राह **तेग्रजोप्ययमिति**, **अग्रे**जातत्वात् काचिद् बुद्धिरुत्कृष्टा, **वदती**त्यत्र प्रमाणमा**हायमिति**, प्रत्यक्षमेव वदतीति नात्रासम्भावना ॥ ३४ ॥

भगवद्व्यतिरिक्तानामन्यधर्मः प्रवर्तते । यदा यत्र हरिः स्वामी नाविष्टः सोन्यथा वदेत् ॥ १ ॥ इति

भगवांस्तु तद्वाक्यं विषयबाधान्न प्रमाणमाप्तानां भ्रान्तत्वादित्याह **नाहमिति**, हे **अम्बे**तिसम्बोधनमप्रतारणाय, अनेन तस्यां महती कृपा प्रदर्शिता, अहं तु **न भक्षितवान्**, बालकैर्भक्षितमितिभावः, एवंसम्बोधनेन स्ववाक्यप्रामाण्यमुक्त्वा विरोधवाक्यमाह **सर्वं** इति, एते बालकाः सरामा गोपाश्च ये केचिन्मया यत्किञ्चिद् भक्षितं यदाकदापीत्याहुस्ते **सर्व** एव **मिथ्याभिशंसिनो** मिथ्यानृतमेवाभिशंसन्ति, "अनश्नन्नन्यो अभिचाकशीती"तिश्रुतिविरोधात्, "यस्य ब्रह्म च क्षत्र" "अत्ता चराचरग्रहणाद्" "भुङ्क्ते विश्वभुगि"त्यादिवाक्यान्याधिदैविकरूपधर्मप्रतिपादकानि, अतः पुराणपुरुषपराणि न भवन्तीति ये केचिद् भगवन्तं भोक्तारं मन्यन्त उपदिशन्ति च ते **सर्वे मिथ्याभिशंसिनः**, नैवेद्यं च तुष्टिदं भवति निवेदनमात्रेण, आरण्यानां भक्षणं त्वन्तःस्थितभक्तानां शुद्धान्नसम्बन्धेन कृतार्थत्वायातः "पत्रं पुष्प"मितिवाक्यं न विरुध्यते, नन्वत्र किं युक्तं किं भगवान् भक्षयति न वेति ? भक्षयतीत्येव बहुवाक्यसंवादात् प्रत्यक्षतो दर्शनाद् "भुङ्क्त" इत्यादिवाक्यानां यथाश्रुतार्थत्वसिद्धे"रनश्नन्न्य" इतिवाक्यं जीवभोगजननार्थं समागतोन्तर्यामी जीवभोग्यं जीवभोग्यप्रकारेण न भुङ्क्त इत्येतावन्मात्रपरं तस्मात् प्रत्यक्षसंवादाद् भक्षणमेव सत्यमिति चेत् तत्राह **यदि सत्यगिर** इति, लोके वाक्यं संवादि प्रमाणं, तदर्थमत्र संवादो नास्तीत्यनूद्य दूषयति, **तर्हि समक्षं** प्रत्यक्षं स्वचक्षुषा वाक्यसंवादार्थं **मुखमध्यं पश्य**, यदि भक्षितं भविष्यति तदंशास्तद्गन्धश्च भविष्यति, सर्वं भक्षितमितिशङ्कायां च कालान्तरभक्षणस्यापि निवारणार्थं च भक्षणप्रयोजनं मुखेस्ति न वेति तदपि द्रष्टव्यमितिभावः ॥३५॥ लौकिका युक्तिपुरःसरं पदार्थं गृह्णन्तीति **यशोदा** तद्वाक्यमङ्गीकृत्य तत्रापेक्षितं प्रार्थयित्वा द्रष्टुमुद्युक्ता ततो भगवान् प्रदर्शितवानित्याह **यद्येवमिति**, यदि प्रत्यक्षसंवादि तद्वाक्यं नान्येषां तदा **व्यादेहि** मुखव्यादानं कर्तव्यं, एव**मुक्तो व्यादत्ते**तिसम्बन्धः, **स** इति, **स** यतो निरोधार्थमेवागतः, अन्यथा लौकिकपरमार्थयोर्भिन्नविषयत्वाल्लौकिके परमार्थप्रदर्शनमयुक्तं स्यात्, निरोधसामर्थ्यो **भगवानिति**, करणावश्यकत्वे हेतुर्हरिरिति, अन्यथा प्राणिनः कृतार्था न भविष्यन्तीति, **विशेषेणावत्तं मुखं** प्रसारितवान्, ननु प्राकृतस्वीकारात् स्वधर्माणां तिरोभावसम्भवात् कथं सर्वसंवादो भविष्यतीत्याशङ्क्या**व्याहतैश्वर्य** इति, न केनापि प्रकारेण व्याहतमैश्वर्यं यस्य, ननु तर्हि कथं प्राकृतस्वीकारः ? तत्राह **क्रीडार्थमेव मनुजबालको** न तु प्रदर्शनार्थमपि, अतः क्रियाशक्तावेव लौकिक्यां तिरोभावः, तदपि विशेषप्रयोजनाभावे, अन्यदा तु क्रियाशक्तेरपि प्राकट्यं, ज्ञानशक्तिस्त्वतिरोहितैव सर्वदा, अतः प्रदर्शितवानित्यर्थः ॥ ३६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पुत्रशब्दविवरणं लोकसम्बन्धीति ज्ञेयम् । तथा च यत्र लौकिक एव स एतादृशस्तत्र भगवानङ्गीकृततथात्वः स्वापराधकरणात् क्रियारूपाद्रक्षतीति युक्तमेवेति भावः । अत एव वचनमेव, न तु क्रिया काचिद्विरुद्धा । **भयसम्भ्रान्तप्रेक्षणाक्षमि**त्यत्र,

प्राकृता बाला हि ताडनभिया मातृसंमुखं द्रष्टुं न पारयन्ति, प्रभुरपि ताननुकरोतीत्यस्यालौकिकत्वेन तत्तात्पर्यमुच्यते **प्रदर्शयिष्यमाणमित्यादि**। मुखारविन्दे प्रदर्शयिष्यमाणं रूपं ब्रह्मधर्मत्वाद् ज्ञानात्मकमेव। तत्साधनत्वादपि तथोच्यते। एतस्य भविष्यमाणमधिकरणं माता। अग्रे ज्ञानजननात्। तत्र च भगवति दोषारोपो विरोधी गुणः। भगवत्प्रेक्षण ज्ञानरूपमिति तच्चे मातर्यागच्छति, तदा तेन ज्ञानमाविर्भवति। तत्रोक्तगुणशङ्कयैतस्तत एव भ्रमणं करोति। न तु संमुखं निरन्तरं यशोदाविषयकं भवतीति तथा। अत एवाग्रे ज्ञानं जननीयमिति मातरमीक्षते। परन्तु प्रकर्षेण नेति ज्ञापनाय प्रशब्दो मूले। विरोधी च गुण इत्यादिनेक्षणप्रेरणायां हेतुत्वेन प्रभुतात्पर्यमुक्तम्। वस्तुतस्तु तत्कालीनमौग्ध्येनैव मोहिता नान्यत्कर्तुमशकत्। तथापि स्नेहभरवशतोस्मिन्नर्थे विज्ञप्तिः कार्यैवेति तां कृतवती ॥ २३ ॥ तत्र सम्बोधनेन कृपालुत्वमुक्तम्। तथाहि न दान्ता अदान्ता असंयतेन्द्रियाः पुरुषा इति यावत्। तेषामप्यात्मा निरुपधिहितकर्तेत्यर्थः। मृद्भक्षणमस्मद्धितं न भवति, मनःखेदहेतुत्वादिति भावः। अत एव हेतुरेव पृष्टः, भगवांस्तु मात्रादिसम्भावितमृदद्नकार्याभावादेव हेतुविचारो न युक्त इत्याशयेनोत्तरितवान्। अन्यथा लोके बालस्वभावमेव प्रसिद्धं हेतुं जानन्ती कस्मादिति न वदेत्। तदानीं ज्ञानदित्सया तादृगीक्षणेन चैतावन्मात्रं ज्ञानमभूदग्रे सम्पूर्णं भविष्यत्येवेति हृदयम्। भगवत्प्रेरणया गन्तव्यमेवेत्यनेन **पितृचरणैर्ज्ञा**पितम् ॥३४॥ **सर्वे मिथ्याभिशंसिन** इत्यत्र, **नैवेद्य**मिति। उपासनामार्गीयैः पूजायां दत्तं नैवेद्यं तथेत्यर्थः। **शुद्धान्नसम्बन्धेने**ति। साक्षाद्भगवद्भक्षितत्वेनोच्छिष्टं यदन्नं तच्छुद्धान्नपदेनोच्यते। भुक्तशिष्टान्नान्मुखारविन्दमध्यस्थं चर्वितं ताम्बूलमिव मुख्यमुच्छिष्टं भवति। न ततोन्यत्फलरूपं शोधकं वास्तीति तत्सम्बन्धेन तथात्वायेत्यर्थः। वन्यत्वं साधारणभगवत्सम्बन्धो वात्र शुद्धिपदार्थ इति न वक्तुं शक्यम्। भगवदन्तःस्थितानां पूर्णपुरुषार्थत्वेन तथाविधेन तेन कृतार्थत्वोक्तेरनुचितत्वात्। यत्त्वेते बालका इत्यारभ्य मिथ्याभिशंसिन इत्यन्तं वाक्यं तन्मर्यादामार्गपरं ज्ञेयम्। 'वशे कुर्वन्ति मां भक्त्ये'ति वाक्याद्यथैव तत्तोषस्तथैव भगवतः कर्तव्यं भवतीति स्वमर्यादामतिक्रम्य भक्तेच्छानियम्यत्वाङ्गीकारात् पुष्टिमार्गीयभक्तिमार्गे भक्षणादिकं सर्वमुपपद्यते। वस्तुतस्त्वियमेव पुरुषोत्तममर्यादा यद्भक्तवश्यत्वम्। अत एवाधुनापि भाग्यवतो भक्तानाज्ञापयति भोग्यविषये ज्ञानमिश्रभक्ते मर्यादाभक्तिमार्गीयभक्तेऽनवतारदशायां चानशनादयो धर्मा भगवता प्रकटीक्रियन्त इति तद्विषयाणि तथाविधवाक्यानीति ज्ञेयम्। यद्यपि यथा सर्वे ब्राह्मणा भोजयितव्या इत्यत्र सर्वपदस्य निमन्त्रिततत्परत्वम्, तथात्रापि रामादिपरत्वमिति नानुपपत्तिः काचित्। तथाप्याचार्यैस्तु बाला इत्येत इति वाऽनुक्त्वा सर्वपदं भगवतोक्तमिति तत्तात्पर्यमुक्तमेते बालका इत्यादिना। तत्तात्पर्यं चोक्तमेव। ज्ञानप्रकरणत्वादपि तथोक्तिरिति न भक्तिमार्गीयविरोधः शङ्कनीयः ॥ ३५ ॥ **यद्येव**मित्यस्याभासे, **अपेक्षित**मिति। मुखव्यादानमित्यर्थः। विशेषेणासमन्ताद्देहीत्यपि ध्वनिः। भक्तिमार्गीयत्वमत्र विशेषः। तस्यापि यावती मर्यादास्ति यावद्रूपं वा तत्तदानमाङोर्थः। अत एव सर्वात्मभावावधि ज्ञानं जातम्। अन्यथा तदतिरिक्तबुद्धीनां भगवद्विषयिणीनामपि कुमतित्वं नोच्येत। **अव्याहतैश्वर्य** इत्यस्याभासे, **कथं सर्वसंवाद** इति। 'यः पृथिव्यां तिष्ठ'न्नित्यादि सर्वश्रुतिसंवाद इत्यर्थः ॥ ३६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

सा गृहीत्वेत्यत्र दोषनिवृत्त्यर्थमिति बालकोक्तदोषनिवृत्त्यर्थं, यत्ने हेतुमाहुर्**निरोधमध्यस्थिते**ति **निरोधस्य** यो मध्यभावस्तत्र **स्थिता**, करणग्रहणे हेतुमाहुर्**भगवती**त्यादि, भगवद्विषयिणी **क्रियाशक्तिः** पुत्रशिक्षाकरणरूपा **लौकिक्येव तस्या वृता** न तु ज्ञानशक्तिरिति तथा **कृतवती**त्यर्थः, ननु कथं तस्या न ज्ञानशक्तिर्निरोधेपीत्यत्राहुस्**तावा**नित्यादि, **तावा**निति कररूपः, तथा च क्रियाशक्तिरेव गृहीता न तु ज्ञानशक्तिरित्यर्थः, तर्हि क्रियान्तरमपि करिष्यतीत्याशङ्क्याहुर्**भगवांस्त्वि**त्यादि **भवती**त्यन्तं, **पुत्र** इत्यत्र पुम्पदं क्रियोऽप्युपलक्षकं, **तत्र सन्तता**विति पुत्ररूपायां **सन्ततौ**, तथा च पुत्रत्वात् तथा कर्तुं न दास्यतीतिभावः, तदेतट्टिप्पण्यां **पुत्रशब्दविवरण**मित्यादिग्रन्थे स्फुटं, **भयसम्भ्रान्ते**तिविशेषणस्य तात्पर्यमाहुर्**मारण** इत्यादि, **भयसम्भ्रान्तप्रेक्षण**मित्यत्र **भयसम्भ्रान्तं प्रेक्षणमक्षिण** यस्येति न समासः **प्रेक्षण**पदेनैवाक्षिलाभात् किन्त्वक्षस्य मातृहस्तस्येन्द्रियत्वं विवक्षितमित्याशयेनोक्तं **यस्याक्षस्ये**ति, पुरःस्फूर्तिकमुक्त्वा पारमार्थिकं तदर्थं वदन्तीत्याशयेन **टिप्पण्या**माहुः **प्राकृता** इत्यादि, 'यद् यज्जनकं तत् तदात्मक'मितिसमन्वयसूत्रे व्याप्तेः सिद्धत्वाद्धेत्वन्तरमाहुस्**तत्साधनत्वा**दित्यादि, **भविष्यमाण**मित्यत्र "लृटः सद् वे"तिसूत्राच् छानच् सोपि "भू व्याप्ता"वितिधातोः, तथा च ज्ञानेनाग्रे व्याप्यमानम**धिकरण**मित्यर्थः, वस्तुतस्तु 'भू सत्ताया'मित्यतस्ताच्छील्ये शानजग्रे भवनशीलमित्यर्थः, **ज्ञानरूप**मिति ज्ञानजनकत्वात् पूर्वोक्तरीत्या तद्रूपं, **तथे**ति सम्भ्रान्तं, **परन्त्वि**ति सम्भ्रान्तत्वात्, **सुबोधिन्यां प्रेक्षणतात्पर्य**माहुः **प्रेक्षणं गमनरूप**मित्यादि, भगवत्कृता **प्रेक्षण**क्रिया श्रीयशोदायां प्रापणरूपा **यस्य** भविष्यज्ज्ञानं **तथाविधं भवति**, तथा च ज्ञानप्रापणाय **प्रेक्षण**मित्यर्थः, ईक्षणप्रेरणतात्पर्यमाहुर्**भगव**दित्यादि, तदिदं टिप्पण्यां विवृण्वन्ति **विरोधी**त्यादि, **तथापी**ति मोहेपि, **सुबोधिन्याम**शक्येत्यपरिहार्या ॥२३॥ **कस्मा**दित्यत्र **तदकरणा**दितीच्छाया निवारणा**करणात्**, सम्बोधनं प्रकारान्तरेण **टिप्पण्यां** व्याकुर्वन्तस्तत्तात्पर्यमाहुर्**न चे**त्यादि, **तथापी**तिपदं **मृद्भक्षणे**त्याद्यग्रिमेण सम्बध्यते, एवम्भावोक्तौ प्रमाणमाहुर्**अत एवे**त्यादि, कृपायाः साधारण्यादेकत्र विशेषे हेतुरेव पृष्ट इति तदेव

पदं प्रमाणमित्यर्थः, ननु तर्हि भगवान् किमिति निह्नुतवांस्तत्राहु**र्भगवांस्त्वि**त्यादि, तुशब्दः पुनरर्थकः, तथा च न कृपायां न्यूनाधिकभाव इत्यर्थः, युक्त्यन्तरमाहु**रन्यथे**त्यादि, ननु यद्येवं मातृचरणानां **हेतुज्ञान**मस्ति तदाचार्यैं "भगवत्प्रेरणये"त्यादिना ज्ञानगमनशङ्का किमित्युक्तेत्यत आहु**स्तदानी**मित्यादि, **सुबोधिन्यां** ननु बलो भगवदाविष्ट इति कथमेवमुक्तवानित्यत्र हेतुमाहु**र्भगवदि**त्यादि, **कारिकया**, तथा च कार्यार्थमावेशात् तदानीं कार्याभावेन तदभावात् तथेत्यर्थः ॥ ३४ ॥ **नाह**मित्यत्र ननु भक्षणवादिनां कथं **मिथ्याभिशंसि**त्वमित्यत आहु**रनश्नन्नि**त्यादि, तर्हि "**यस्य ब्रह्म**"त्यादिवाक्यानां का गतिरित्यत आहु**र्यस्ये**त्यादि, **आधिदैविकरूपधर्मप्रतिपादकानी**ति "यो देवानां नामधा एक एवे"ति 'एकं सद् विप्रा बहुधा वदन्ती'त्यादिश्रुतिभिः **सर्वदेवाधिदैविकत्वं** भगवतः प्रतिपादितं देवाश्च यज्ञभागभुज इति तद्द्वारा 'नाहं तथाभियजमानहविर्विताने श्च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेने"तिवाक्ये साक्षाच्च सर्वदेवाधिदैविकरूपस्य यो **धर्मो**त्तृत्वं तत्प्रतिपादकानि, **अत** इत्याधिदैविकपरत्वात्, नन्वेवं सति "यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः । तत्तन् निवेदयेन् मह्यं तदानन्त्याय कल्पत" इत्यादिवाक्यानां का गतिरित्यत आहु**र्नैवेद्य**मिति, तत्तात्पर्यं टिप्पण्यामाहु**रुपासने**त्यादि, 'आनन्त्याय कल्पत' इतिफलोक्तेस्तथेतिभावः, ननु तथापि "निर्विशन् भगवान् रेमे कन्दमूलफलाशन" इत्यत्र देवाधिदैविकरूपस्योपासनामार्गस्य चाभावात् तस्य कथं सामञ्जस्यमित्यत आहु**रारण्या**नामित्यादि, **शुद्धान्नसम्बन्धेने**त्यादि, एतस्य तात्पर्यं टिप्पण्यामाहुः **साक्षा**दित्यादि, ननु वन्यत्वादिनैवान्नस्य शुद्धत्वमस्त्वित्याशङ्कायामाहु**र्वन्यत्व**मित्यादि, **तथाविधेने**ति **वन्यत्वा**दिरूपेण, **सुबोधिन्यां** नन्वत्र द्विविधेषु वाक्येषु पुराणपुरुषस्य भोक्तृत्वमभोक्तृत्वं चेतिद्वयमपि प्रतिपादितं तथा सति तत्र कथं विरोधपरिहार इत्याशङ्क्न्ते **नन्वत्रे**त्यादि, सिद्धान्तमाहु**र्भक्षयती**त्यादि परमित्यन्तं, ननु यदि भक्तिमार्गे भक्षणं तदा "**सर्वे** मिथ्याभिशंसिन" इति भगवद्वाक्यं तद्व्याख्यानग्रन्थश्च विरुध्येतेत्यत आहु**ष्टिप्पण्यां यस्त्वि**त्यादि **वाक्यानी**ति **ज्ञेय**मित्यन्तं, प्रकारान्तरमाहु**र्यद्यपी**त्यादि, **तत्तात्पर्यं चोक्तमेवे**ति मर्यादामार्गेन्तर्यामिरूपेण च न भुङ्क्त इत्येवाभोजनतात्पर्यं **मिथ्याभिशंसिनस्ता**त्पर्यं **चोक्तमेवे**त्यर्थः, प्रकरणेनापि समादधते **ज्ञाने**त्यादि ॥ ३५ ॥ **यद्येव**मित्यत्रा**पेक्षित**मिति, एतस्यार्थं टिप्पण्यामाहु**र्मुखे**त्या**द्युच्यत** इत्यन्तं, **सुबोधिन्यां** कथं **सर्वसंवाद** इत्येतस्यार्थं टिप्पण्यामाहुर्य इत्यादि, **सुबोधिन्याम**त इत्यादि क्रीडार्थत्वात्, **क्रियाशक्तौ लौकिक्यां** हस्तरूपायां द्वयोर्हस्तयो**स्तिरोभावः**, अन्यथा चतुर्भुजत्वमपि प्रदर्शयेदित्यर्थः, **तदपी**ति तिरोभावनमपि ॥ ३६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

सा गृहीत्वेत्यत्र **लौकिकी**ति करे इत्येकवचनस्यार्थोयं, द्वितीयस्यापि करस्य ग्रहणे अलौकिक्या अपि ग्रहणाद् भगवान् वश्य एव स्यात्, अत एव दामोदरलीलायां तथेतिभावः, **तत् कार्यं स्वयं करिष्यन्नि**ति पिता मरणसमये स्वकार्याणि पुत्रे स्थापयेत् पुत्रश्च **गृह्णीया**दिति तन्मन्त्राश्च कौषितक्युपनिषदि स्फुटाः, **परमभाग्यवती**ति यशो ददातीति व्युत्पत्त्या यशसो दानकथनेन तदग्रिमगुणस्य श्रीशब्दवाच्यपरमभाग्यस्य स्थितिः सूचितेतिभावः, अत एव ततोप्यग्रिमगुणे ज्ञानेप्यधिकार इत्याशयेनाहुः **ज्ञानेपी**ति ॥ ३३ ॥ **कस्मा**दित्यत्र ननु रामस्य भगवदावेशात् कथं तात्पर्याज्ञानमित्यत आहुः **भगवद्व्यतिरिक्ता**नामिति, भगवतः सकाशाद् **व्यतिरिक्ता**नां भिन्नतया स्थितानां **यदान्यो** भक्तिविरुद्धो **धर्मः प्रवर्तते** तदा तत्र **हरिः स्वामी आविष्टो** न भवत्यतः **सोन्यथा वदेत्**, आवेशे सर्वत्रैवमेव व्यवस्था, तथा च रामस्याप्यधुना भिन्नतया स्थितस्य भक्तिविरुद्धस्वतन्त्रक्रीडारूपधर्मप्रवृत्त्या आवेशाभावः, अतस्तात्पर्याज्ञानात् 'कृष्णो मृदं भक्षितवा'निति रामोपि वदतीतिभावः ॥ ३४ ॥ **नाहं भक्षितवा**नित्यत्र **स्ववाक्यप्रामाण्यमपी**ति आद्यचरणार्थस्तु विषयबाधः, इदं तु सम्बोधनेनाप्रतारणसूचनादुक्तं जातमित्यपिशब्दः, आभासोक्तं वाक्यार्थमाहु**र्विरोधी**ति, एतद्धेतुर्विषयबाध आद्यचरणेनोक्तः, समर्थनमुत्तरार्धेनेति ज्ञेयं, अनशनादयो धर्मा विवृतास्तत्रैव ज्ञेयं, भगवत्युभयविधा अपि धर्माः सन्ति परं सापेक्षाः, यथैकस्मिन्नेव पुरुषे मातरमपेक्ष्य पुत्रत्वं बोध्यते भार्यामपेक्ष्य तद्विरुद्धं पतित्वं बोध्यते एवमन्यदपि तथा ज्ञानमार्गीयमपेक्ष्य भगवत्यनशनादयो धर्मा बोध्यन्ते भक्तिमार्गीयमपेक्ष्य च भोक्तृत्वादय इति स्थितिः, अत्र च ज्ञानप्रकरणे "भयसम्भ्रान्तप्रेक्षणाक्ष"मित्यनेन यशोदायां ज्ञानस्थापनस्योक्तत्वात् ज्ञानमार्गीया एव धर्मा भगवता बोधनीया भवन्तीत्याशयेन तथा विवृतमाचार्यैः, अयमेवार्थो **ज्ञानप्रकरणत्वादपि तथेत्यनेन टिप्पण्यामुक्तः**, **आधिदैविके**ति अक्षरं केनचिदंशेन जगद्रूपं जातं, तदेव जगतो लयस्थानं तदा**धिदैविकं** रूपं, तस्य **धर्मा** ब्रह्मक्षत्रभोक्तृत्वादयस्त**त्प्रतिपादकानी**त्यर्थः, **पुराणो** जगद्व्यतिरिक्तः **पुरुषो**क्षररूपस्त**त्पराणी**त्यर्थः, ज्ञानमार्गस्याक्षरपर्यवसायित्वात् **पुरुषोत्तमे**प्यक्षरधर्मा एव बोधनीया इत्याशयेन भगवत्येते धर्मा उच्यन्ते इति ज्ञेयं, भगवता "यदि सत्यगिर" इति विचाररीत्योक्तत्वाद् तद्रीत्यैव तदाभासमाहुः **नन्वत्रे**ति, **भक्षणप्रयोजन**मिति रसनेन्द्रियेण रसानुभवः प्रयोजनं, तथा च मुखे रसेन्द्रियस्यादर्शने तज्जनितरसानुभवरूपप्रयोजनाभावज्ञानं भविष्यतीतिभावः, यद्यपीन्द्रियाणामतीन्द्रियत्वात् तदभावोप्यतीन्द्रियस्तथाप्यग्रे 'वैकारिकाणीन्द्रियाणी'त्यनेनेन्द्रियाणां दर्शनस्य वक्ष्यमाणत्वादिन्द्रियाभावस्यापि दर्शनयोग्यतेति ज्ञेयं, यशोदया "कस्मा"दित्यनेन प्रयोजनं पृष्टमित्युत्तरमपि तथा वक्तव्यमितिभावः ॥ ३५ ॥ **यद्येव**मित्यत्र **अन्यथे**ति निरोधार्थमागमनाभावे इत्यर्थः, **लौकिकं** लोकसाम्येन ज्ञानं तस्य विषयः परिच्छिन्नं भगवत्स्वरूपं **परमार्थज्ञान**स्य विषयोऽ-

परिच्छिन्नं स्वरूपमतो **भिन्नविषयत्वाल्लौकिके** लोके प्रकटे परिच्छिन्नरूपे **परमार्थ**भूतस्यापरिच्छिन्नरूपस्य **प्रदर्शनमयुक्तं स्या**दित्यर्थः, न तु **प्रदर्शनार्थ**मिति, प्रदर्शनं त्वमानुषरूपस्यापि करोति, परं क्रीडाकरणार्थं मानुषत्वमित्यर्थः, **लौकिक्या**मिति लोकसदृशी क्रियाशक्तिः रिङ्गणादिलीला तस्यां कर्तव्यायामलौकिकक्रियाशक्ते**स्तिरोभावो**ऽप्रकटनमित्यर्थः, तथा च मूले **क्रीडार्थं** लौकिमक्रियाशक्त्यर्थं **मनुजबालक**स्तिरोहितालौकिकक्रिय इत्यर्थः ॥ ३६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

सर्वं मिथ्याधिशंसिन इत्यस्य विवृतौ **एते बालकाः सरामा गोप्यश्च ये केचित् मया यत्किञ्चिद् भक्षितं यदा कदापीत्याहुस्ते सर्वे मिथ्याभिशंसिन** इति अत्रेदं ज्ञेयं, इह **सर्व**शब्देन रामाद्या गोपबालका एव गृहीतुं यद्यपि योग्यास्तथापि बालादिपदमनुक्त्वा **सर्व**पदं भगवतोक्तं तस्यायमाशयः श्रीमदाचार्यैर्विवृत इति श्रीमत्प्रभुचरणैष्टिप्पण्यामुक्तं, तत् तथैव, न च भगवता बाललीलया मातुर्भयादसत्यमेवोक्तमिति वाच्यं, "सत्यं देवानामनृतं मनुष्याणा"मिति श्रुतेरसत्यभाषणस्य मनुष्यासाधारणधर्मत्वात्, मनुष्यासाधारणधर्माणां भगवत्यभावात्, "मायामनुष्यस्य वदस्व विद्वन्" "गूढः कपटमानुषः" "मायामनुज ईश्वर" इत्यादिबहुभिर्वचनैर्मनुष्यासाधारणधर्माणां वस्तुतो भगवति निषेधात्, अतो यथार्थमेव भगवान् ब्रूत इति मन्तव्यं, तथा च भगवता भक्षणनिषेधे सर्वपदमुक्तमिति तथा सुबोधिन्यां व्याख्यातं, तत्र परमाग्रहेण भोजनाभावः श्रीमदाचार्यैः स्थाप्यते तस्यायमाशयः, "क्षुत् खलु वै मनुष्यस्य भ्रातृव्य" इति श्रुतेः क्षुधो मनुष्यासाधारणधर्मत्वात् मनुष्यासाधारणधर्माणां "मायामनुष्यस्य वदस्व विद्व"न्नित्यादिवाक्यैर्भगवत्यभावात् क्षुत्पिपासादीनां वक्तुमशक्यत्वात् क्षुत्पिपासाजन्यानां भोजनपानादीनां निषेधो युक्त एव, ननु भगवता चेन्न भुज्यते तर्हि कथं महाप्रसादत्वं तदन्नादेरिति चेत्, सत्यं, न ह्यत्र सुबोधिन्यां भक्षणाभावः प्रतिपाद्यते, किं तु भगवता भक्षितस्य प्रक्षितस्य प्रतिपत्तिर्निरूप्यते, यद् भगवता भुज्यते तदन्तःस्थितबालकानां तृप्त्यर्थं न तु स्वतृप्त्यर्थमिति, अतः क्षुद्वशाद् भगवता न भुज्यते, तथा चेत् स्वार्थं भवेत्, अन्तःस्थितबालानां तृप्त्यर्थं भुक्तमिति परार्थतैव, स्वार्थभोजनं तु क्षुज्जन्यं तत् तु भगवति नास्ति, तत्कारणीभूतायाः क्षुधाया असम्भवात्, पूर्वोक्तश्रुत्या मनुष्यासाधारणधर्मत्वेनोक्तत्वात्, अत एव सुबोधिन्यां **आरण्यानां भक्षणं तु अन्तःस्थितभक्तानां शुद्धान्नसम्बन्धेन कृतार्थत्वाये**त्युक्त्वा भक्षणमङ्गीकृतमेव, किन्तु जीवैर्यथा भक्ष्यते तथा न भुङ्क्ते भगवान्, जीवभोजने क्षुत्कारणशरीरपोषणादिप्रयोजनं, भगवद्भोजने तु भगवदीयजननिरुपधिस्नेहः कारणं, भगवदन्तःस्थितभक्ततृप्तिकृतार्थत्वादिप्रयोजनमिति कारणप्रयोजनभेदात्, एवमेव श्रीगोवर्धनप्रसङ्गे "शैलोऽस्मीति ब्रुवन् भूरि बलिमादद् बृहद्वपु"रित्यस्य व्याख्याने 'यदा दत्तं बलिं बुभुजे' इत्युक्त्वा अग्रे 'एवं भूरि बलिमादत् पक्वान्नादिकं बहु भक्षितवा'नित्युक्त्वा भगवत्कर्तृकं भक्षणमङ्गीकृतं, अग्रे 'पर्वतस्थान् सर्वानेव तर्पितवा'नित्युक्त्या भक्षणप्रयोजनं परतृप्तिर्न तु स्वतृप्तिरिति भोजनप्रतिपत्तिर्निरूपिता, अतोत्र स्फुटमेव भोजनं निरूपितमितिभुक्तशेषस्य भवत्येव महाप्रसादत्वं, एवमेव यज्ञपत्नीप्रसङ्गे "भगवानपि गोविन्दस्तेनैवान्नेन गोपकान् चतुर्विधेनाशयित्वा स्वयं च बुभुजे प्रभु"रित्यस्य सुबोधिन्यां "चतुर्विधेन सम्पूर्णरसात्मकेन गोपानाशयित्वा स्वयं च बुभुजे" इत्युक्त्वा भोजनमङ्गीकृतं, भोजनप्रयोजनं तु एतच्छ्लोकाभासे "तस्यामन्तः समागतायां तां बालकांश्च भोजितवानित्याहे"त्यनेन मुक्तयज्ञपत्न्या अन्तःस्थितबालकानां च तृप्तिरुक्ता, अतः प्रयोजनमेवान्यदुच्यते भोजनं तु स्वीक्रियत एव, एवमेव "दध्योदनमुपानीतं शिलायां सलिलान्तिके सम्भोजनीयैर्बुभुज" इत्यस्य सुबोधिन्यां "सजातीयैर्गोपैः सङ्कर्षणेन चान्वितो बुभुजे" इत्युक्त्वा भोजनं स्वीकृतमेव, अत एव "केवलमायाजनितं स्तन्यं भगवान् न पिबे"दित्यत्रापि पानमुक्तं, अतो भगवता भुज्यत इति निर्विवादं, प्रयोजनं तु अन्तःस्थितबालानां तृप्तिकृतार्थत्वादिरूपं निरूपितं, एतावता भगवान् न भुङ्क्ते इति नाभिप्रेतं, अतो भवत्येव भगवत्प्रसादत्वं भगवदुच्छिष्टस्य, अत एव "उच्छिष्टभोजिनो दासाः तव मायां जयेमहि" इत्यादिवचांसि सङ्गच्छन्ते यत् तु **"यस्य ब्रह्म च क्षत्रं च" "अत्ता चराचरग्रहणात्" "भुङ्क्तेविश्वभु"गित्यादिवाक्यान्याधिदैविकरूपधर्मप्रतिपादकानि, अतः पुराणपुरुषपराणि न भवन्तीति ये केचित् भगवन्तं भोक्तारं मन्यन्ते उपदिशन्ति च ते सर्वे मिथ्याभिशंसिनः नैवेद्यं च तुष्टिदं भवति निवेदनमात्रेणे**त्यन्तेन भक्षणाभावः प्रतिपादितस्तस्य तु प्रकारो भिन्न एव, न तु तुष्टिभक्तौ भोजननिषेधपरः, तथा हि "यस्य ब्रह्म च क्षत्रं च" "अत्ता चराचरग्रहणा"दित्यादौ यो भोगः स तु ब्रह्मक्षत्रयोर्मुक्तिरूपः, "भुङ्क्ते विश्वभुगव्यय" इत्यत्र तु व्यापकरूपेण विद्यमानो भगवान् जीवद्वारा स्वयं भुङ्क्ते इत्युच्यते 'त्रीन् लोकान् व्याप्य भूतात्मे'तिवाक्यात्, अत एवा**धिदैविकरूपधर्मप्रतिपादका**नीत्युक्तं विवृतौ, अत एतेषु श्रुतिपुराणादिवाक्येषु न पुरुषोत्तमभोजनमुच्यते न वा सुबोधिन्यां पुरुषोत्तमभोजनाभावः प्रतिपाद्यते, किन्तु एतेषु वाक्येषु न पुरुषोत्तमभोजनव्यवस्थेत्युच्यते, तथा च अन्यैरेव वाक्यैर्व्यवस्थापनीयमिति हार्दं सुबोधिन्याः, ततोऽग्रे **आरण्यानां भक्षणं तु** इत्युक्त्वा भक्षणं सिद्धान्तितमेव, तत्र मानं तु **"पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मन"** इति भगवद्वाक्यमुपन्यस्तं **अतः "पत्रं पुष्प"मितिवाक्यं च न विरुध्यत** इति फक्किकया, एवं सति "पत्रं पुष्प"मितिवाक्ये "भक्त्या

प्रयच्छती"त्यनेन "तदहं भक्त्युपहृत"मित्यनेन च भक्तेः साधनत्वेनोक्तत्वाद् भक्त्या समर्पितं भगवान् पुरुषोत्तमो "लोकवत्तु लीलाकैवल्य"मितिन्यायाल्लोकरीत्या भुङ्क्ते, प्रयोजनं त्वन्तःस्थितभक्तकृतार्थता न तु स्वतृप्तिः, एवं सति भक्तौ भोजनं सिद्धमेवेति महाप्रसादत्वमपि भगवदुच्छिष्टस्य निर्विवादमेव, अपि च, **नन्वत्र किं युक्तं भगवान् भक्षयति न वेतीति** सन्दिह्य **भक्षयत्येवेत्यारभ्य भक्षणमेव सत्यमिति** चेदित्यन्तेन पूर्वपक्षमुक्त्वा भक्षणाभावः सिद्धान्तीक्रियते तत् तु भगवत्स्वरूपधर्ममर्यादा तादृश्येवेति प्रदर्श्यते, पुष्टिभक्तौ तु स्वरूपमर्यादामप्युल्लङ्घ्य भक्तानां प्रीत्यर्थं भोजनं करोत्येवेति सर्वप्रमाणातीतः पुष्टिभक्तिमहिमेति स्फुटीभवति, यदि सर्वत्र पुरुषोत्तमो भोजनं कुर्यात् तदा पुष्टिभक्तौ को वा विशेषः स्यादतो न कुत्रापि पुरुषोत्तमो भुङ्क्ते किन्तु पुष्टिभक्तावेव भुङ्क्ते इति महद्गौरवं पुष्टिभक्तेः, यथा 'आत्मारामोप्यरीरम'दित्यादिनात्मारामत्वेन सर्वत्र रमणाभावं प्रतिपाद्य "अरीरम"दित्यनेन पुष्टिभक्तानां घोषमृगीदृशामुपरि परमकृपया रमणमुक्तं, ततश्च सिद्धं परमोत्कर्षेण, यदि सर्वत्रैव रमेत तदा व्रजस्त्रीभिः सह रमणे विशेषो न स्यादतस्तथोक्तिः, एवं अत्रापि सर्वत्र भक्षणाभावे पुष्टिभक्तसमर्पितभक्षणे पुष्टिभक्तेः परममाहात्म्यं स्फुटलीत्याचार्याणामार्याणां चैतावानुद्यमः, पुष्टिभक्तौ तु सर्वत्रैव स्वरूपमर्यादामतिक्रम्य भगवान् क्रीडति, अत एव रासक्रीडायां गजदृष्टान्तविवृतौ ब्रह्ममर्यादाभङ्गः सुबोधिन्यां निरूपित इति दिक्, नन्वन्तःस्थितभक्तानां तु कृतार्थतायाः सिद्धत्वेपि पुनर्भगवदुच्छिष्टप्रसादग्रहणे का वा कृतार्थतेति चेत्, मुक्तिरूपपुरुषार्थसिद्धावपि नित्यलीलामध्यपातिभक्तैः सह नित्यलीलानुभवरूपकृतार्थता प्रसादग्रहणाद् भविष्यतीति सुधीभिराकलनीयम् ॥ ३५ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

कस्मान् मृदमित्यत्र भगवद्व्यतिरिक्तानामन्यधर्मः प्रवर्तते । यदा तत्र हरिः स्वामी नाविष्टः सोन्यथा वदेत् ॥ ननु रामस्य भगवदावेशात् कथं मृद्भक्षणतात्पर्याज्ञानमित्यत आहु **र्भगवद्व्यतिरिक्तानामि**ति, भगवतः सकाशाद् **व्यतिरिक्तानां** भिन्नतया स्थितानां **यदान्यो** भक्तिविरुद्धो **धर्मः प्रवर्तते** तदा तत्र **हरिः स्वामी प्राविष्टो** न भवत्यतः **सोन्यथा वदेत्** तथा रामस्याप्यधुना भिन्नतया स्थितस्य भक्तिविरुद्धस्वतंत्रक्रीडारूपधर्मप्रवृत्त्या आवेशाभावः, अतस्तात्पर्याज्ञानात् "कृष्णो मृदं भक्षितवा"निति रामोपि वदतीतिभावः, यद्यपि इतरबालकवद् रामस्य न केवलदोषदृष्टिः किंतु स्नेहादेव दोषदृष्टिस्तथापि स्वातन्त्र्येण क्रीडाहेतुकभगवदावेशाभावात् स्वोदरस्थबालकेभ्यो मृद्दानतात्पर्याज्ञानं, तदुक्तं टीपण्यां इयं क्रीडा न भगवदर्थं नापि भगवत्सङ्गे किन्तु स्वार्थमेवेति ॥ ३४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा सा यशोदा करे हस्ते कृष्णं गृहीत्वा उपालभ्य निर्भर्त्स्य अभाषतेत्यन्वयः। ननु 'पूर्वं तु महानुपद्रवस्तेन कृतः, तदा कुतो नोपालम्भं कृतवती ? इदानीमल्पापराधे कथं तत् कृतवती ? इत्यपेक्षायामाह—हितैषिणीति 'मृद्भक्षणस्य रोगजनकत्वात्तन्माभूत्' इति हितमिच्छन्तीत्यर्थः। पूर्वमस्य दोषस्याभावात् तन्न कृतवती। 'भगवताऽपि लौकिकबालभाव एव प्रकाशित' इत्याह—भयेन सम्भ्रान्तप्रेक्षणे चपलनिरीक्षणे अक्षीणि यस्य तमिति ॥ ३३ ॥ भाषणमेवाह—कस्मादिति। अदान्तः अवशीकृत आत्मा अन्तःकरणं यस्य तत्सम्बोधनम्-'हे अदान्तात्मन् !' इति। रहः एकान्ते भवान् मृदं कस्माद्धेतोर्भक्षितवान् ? किं मम गृहे सितादि मृष्टं भक्ष्यं नास्तीति। भक्षणे प्रमाणमाह—एते कुमारा वदन्तीति। ननु 'तेऽनृतं वदन्ति' इति चेत्तत्राह—तावका इति। तव हितैषिणः। 'कुमारा' इत्यनेन तेषामन्यथा कल्पने सामर्थ्यं नास्तीति सूचितम्। 'ननु तर्हि भ्रमस्य सम्भवाद्भ्रान्त्यैवैते तथा वदन्ति' इत्याशङ्क्याह—हि यस्मात्ते तवाग्रजोऽग्रजत्वात्त्वत्तोऽस्य बुद्धिरुत्कृष्टेव सोप्ययं प्रत्यक्षं तथैव वदतीति नात्र काचिदसम्भावना। श्रीरामेऽपि पुत्रवल्लाल्यमानत्वात् परकीयत्वबुद्ध्यभावाच्च नन्दयशोदयोरप्यग्रजत्वव्यवहारः ॥ ३४ ॥ दयोत्पादनार्थं सम्बोधयति—अम्बेति। अहं मृदं न भक्षितवान्, एते तु सर्वे मिथ्याभिशंसिनः अनृतमेव वदन्ति। यदि 'ते सर्वे सत्यगिरः यथार्थवक्तारः' इति त्वं मन्यसे, तर्हि मे मम मुखं समक्षं प्रत्यक्षं पश्य ॥ ३५ ॥ 'यद्येवं त्वया मृन्न भक्षिता चेत् तर्हि व्यादेहि मुखं प्रसारय' इति तयोक्तः स हरिः व्यादत्त मुखं प्रसारितवान्। ननु 'मृदो भक्षितत्वात् कथं निर्भयतया मुखं प्रसारितवान् ?' तत्राह—अव्याहतैश्वर्य इति। न विशेषेण आहतमैश्वर्यं यस्य सः, ऐश्वर्यादिषड्गुणपूर्णः। तत्र हेतुमाह—भगवानिति। अन्यथा भगवत्त्वमेव भज्येतेत्याशयः। ननु 'तर्हि प्रथमं कथं भयेनानृतमुक्तवान्। इत्याशङ्क्य आह—क्रीडेति। क्रिडार्थमेव मनुजबालकः। अतः क्रिडार्थं भयानुकरणमात्रमेव कृतवान्। न तु वस्तुतस्तस्य भयमस्तीति भावः। न चानृतवदनं शङ्कनीयम्। वस्तुतः सर्वस्यैव पदार्थस्य तदन्तःस्थत्वेन बहिष्ठवस्तुभक्षणासम्भवात्। 'अनश्नन्नन्यो अभिचाकशीति' इति श्रुतेश्च ॥ ३६ ॥

अन्वितार्थप्रकाशिका

सा इति ॥ हितैषिणी सा यशोदा भयेन सम्भ्रान्तप्रेक्षणे चपलनिरीक्षणे अक्षिणी यस्य तं कृष्णं पलायनाशङ्कया करे गृहीत्वा उपालभ्य निर्भर्त्स्य अभाषत ॥ ३३ ॥ कस्मादिति ॥ अदान्तः अवशीकृत आत्मा यस्य हे चपलगात्र चञ्चलचित्त

वा रहः एकान्ते भवान् मृदं कस्माद्धेतोर्भक्षितवान्। हि यतः एते तावकाः तव हितैषिणः कुमारा वदन्ति तथा अयं ते अग्रजो रामोऽपि वदति ॥ ३४ ॥ श्रीकृष्णस्तु न बाह्यं किंचिन्मया भक्ष्यते आदावेव सर्वं मम कुक्षावस्तीति पश्येत्याह स्म—नाहमिति ॥ हे अम्ब मातः! अहं मृदं न भक्षितवान्। एते तु सर्वे मिथ्याभिशंसिनः अनृतमेव वदन्ति। यदि ते सर्वे सत्यगिरः यथार्थवक्तार इति त्वं मन्यसे तर्हि मे मम मुखं समक्षं प्रत्यक्षं पश्य ॥ ३५ ॥ यद्येवमिति ॥ यद्येवं त्वया मृन्न भक्षिता चेत्तर्हि व्यादेहि मुखं प्रसारय। आस्यविहरणत्वान्न तङ्। इति तयोक्तः अव्याहतमप्रतिहतमैश्वर्यं यस्य सः भगवान् ऐश्वर्यादिषड्गुणपूर्णः अपि क्रीडार्थमेव मनुजबालकः स हरिः व्यादत्त मुखं प्रसारितवान् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उपालभ्य तिरस्कृत्य भयेन संभ्रांतप्रेक्षणे चंचलनिरीक्षणे अक्षिणी यस्य तम् ॥ ३३ ॥ अदांतात्मन् हे अवशीकृतशरीर रहो विजनदेशे ॥ ३४ ॥ मिथ्याभिशंसिनः मिथ्याऽभिभाषिणः समक्षं प्रत्यक्षम् ॥ ३५ ॥ व्यादेहि वक्त्रं विकाशय इत्युक्तः। व्यादत्त विकाशितवान् मनुष्यातिधारणेपि अव्याहतानि अप्रतिहतानि सर्वज्ञत्वसत्यसंकल्पत्वसर्वधारकत्वादीनि ऐश्वर्याणि यस्य एवंभूतः सन् क्रीडामनुजबालकः अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन् प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममाययेति गीतोक्तेः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सेति। हितैषिणी स्वसुतहितमिच्छन्ती, सा यशोदा, कृष्णं स्वसुतं, करे गृहीत्वा, उपालभ्य निर्भर्त्स्य, भयेन संभ्रान्तप्रेक्षणे अक्षिणी चपललोचने यस्य तं कृष्णं, अभाषत ॥ ३३ ॥ भाषणमेवाह ॥ कस्मादिति। हे अदान्तात्मंश्चपलगात्र, उद्धत स्वभावेति वा। भवान्, कस्मात्, रहः एकान्ते मृदं भक्षितवान्। नाहं भक्षितवानित्यत्राह। तावकाः त्वया सह क्रीडमानाः, एते कुमाराः, वदन्ति हि। अयं ते तव अग्रजो बलोऽपि, वदति। कथयतीत्यर्थः ॥ ३४ ॥ एवमुक्तः श्रीकृष्णः प्राह ॥ नाहमिति। हे अम्ब मातः, अहं मृदं, न भक्षितवान्। न ह्यम्ब मया किंचिद्भक्ष्यते, यतो हि मत्कुक्षौ सर्वस्य स्थितत्वादिति भावः। अतः सर्वेऽप्येते, मिथ्याभिशंसिनः मिथ्यावादिनः, यदि एते सत्या गिरो येषां तथाभूताः, तर्हि, स त्वं मे मम, मुखं पश्य ॥ ३५ ॥ यदीति ॥ यदि एवं तर्हि, व्यादेहि विवृतं कुरु। इत्येवं उक्तो जनन्या प्रोक्तः, क्रीडामनुजबालकः अत एव, अव्याहतदशायामप्यच्युतमैश्वर्यं यस्य सः, भगवान् स हरिः, व्यादत्त विवृतमकरोत् 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च 'सत्यसंकल्पः' इत्यादिवेदान्तावगतसर्वशक्तित्वादिकल्याणगुणजातः सन्नपि जीववन्मनुजबालकत्वभाक् तु क्रीडया निमित्तभूतया, न तु कारणेनेति भावः ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सा गृहीत्वेति : १०.८.३३

मृद्भुक्तिसाधनकरः कर एवेति जानती। युक्तं तत्करधृत्साऽऽसीत् तद्धितप्रहितेक्षणा ॥ ६४ ॥
भुक्त्वाऽपि मृत्तिकां मातुरग्रे किं वा वदेदयम्। इत्यक्षिरूपौ चन्द्रार्कौ साक्षिणौ भ्रेमतुस्तदा ॥ ६५ ॥

यद्येवमिति : १०.८.३६.

सकलविश्वविलासविलोकनोल्लसितपुण्यमयीयमिहाधुना। अजनि तत्पुरतस्तु ममोचितो मुखविकास इति व्यकरोत्तथा ॥ ६६ ॥
मुखाम्बुजाते क्षिपतापि तद्रजो विपङ्कमादर्शयता निजाननम्। अदर्शि तेनेह निसर्गशुद्धिषु व्रिजेष्वपक्षालनशक्तिरस्ति हि ॥ ६७ ॥
अनशनेऽपि मयीह यथा वृथा जननिरोपितमस्ति मृदोऽशनम्। गणय तादृशमेव पुराऽबलेरितमिति प्रथयन्नमृदाननः ॥ ६८ ॥
आम्नायैर्भुवि भिन्नभिन्नविषयं संप्रापितोऽपि प्रभुर्भूयो गोकुलवृत्तिभिः पुनरसौ सोल्लुण्ठमाभाषितः।
यद्बुद्धिर्न मनागभूत्तदपि संक्षुब्धा न वा प्रस्खलद्भावाऽशेषजगत्स्वरूपकलनं तस्यास्तु तत्साम्प्रतम् ॥ ६९ ॥
भुक्ता मृद्भवतेति गोपशिशवो जल्पन्ति रामादयो नेति त्वं भणसीति तत्र कतमो विश्रम्भणीयो मया।
इत्थं मातृगिरं निशम्य भगवांस्तत्संशयोच्छित्तये स्वास्ये स्पष्टमदर्शयत् किमु तदा मुख्यां सविश्वास्यताम् ॥ ७० ॥
एषां मानय मा वचो ह्यवितथं रामादिकानामिदं मातर्मद्वचनं त्ववेहि न तथा यत्सत्यवक्ताऽस्म्यहम्।
कस्मात्सत्यमदोऽवधार्यमिति चेन्निःशङ्कमेवेक्ष्य तां मन्मुख्यस्थितिरित्यदर्शयदसौ किं विश्वमास्ये प्रभुः ॥ ७१ ॥
मामेव तूद्दिश्य वदन्ति सर्वे मातस्तदत्यन्तमृषैव यस्मात्। भुक्ता मया चेदखिलैरपीति सम्बोधयन् विश्वमदर्शयत्किम् ॥ ७२ ॥
कदशनं कृतमद्य कुतस्त्वया गिरमिति प्रसुवोऽथ निशम्य सः। निजमुखे किमु विश्वनिवासिनि न वसुधाशनभक्ति मदर्शयत्॥७३॥
तत्सावर्ण्यमवाप्य गोपशिशुभिः सक्रीड आसीद्यदा तन्मृत्स्नाशनतश्च बालचरितं व्यक्तीचकाराऽच्युतः।
शंसद्भिः प्रसुवे यदा शिशुजनैः स्वातन्त्र्यमाप्रापितो विश्वात्मा स तदाऽऽत्ममात्रचरितं चक्रे स्फुटं साधु तत् ॥ ७४ ॥

तत्तद्भक्तविभावितानि बहुशो रूपाणि सन्त्येव मे यत्तत्र प्रमुखं तदद्य जननीं संदर्शयाम्यञ्जसा।
मन्येऽसौ मुख एव विश्वविभवं प्रादर्शयत्कौतुकान् नो चेदर्जुनवद् व्यदर्शि न कुतः स्वाङ्गे विराडात्मता ॥ ७५ ॥
यावत्यो देवतास्ता विदधति वसतिं ब्राह्मणे वेदवेदिन्याराद्तीर्थानि कृत्स्नान्यपि किमु बहुना सर्वमेवापि विश्वम्।
इत्थं वेदोपपाद्यं विशदयितुमिह ब्राह्मणानां महत्त्वं स्वास्ये कृष्णेन विश्वं निखिलमपि तदा ब्राह्मणात्मन्यदर्शि॥७६॥
धरेत्यभिधया त्वयेति च पुराऽहमभ्यर्थितस्तथादिश हरे सुखं त्वदनुरूपपुत्रोद्भवम्।
इदं तदिति निश्चितं कलय मुख्यरूपं ममेत्युपस्थितधरांशतोऽवभिहितं जनन्यै किमु ॥ ७७ ॥
मृन्निमित्तेन यद्विश्वमदर्शि विभुनामुखे। तन्मन्ये गां पुरस्कृत्य बोधितं विश्वरक्षणम् ॥ ७८ ॥
यन्न दृष्टं श्रुतं वापि संसारगुरुकानने। श्रीशप्रसादात्साऽपश्यत् सर्वं तद्बालकानने ॥ ७९ ॥
प्राक् सृष्टेरविकारि वेदगदितं यद्रूपमासीत्परं रूपे नामनि कल्पितेऽपि विविधे तत्तादृगेव ध्रुवम्।
व्यक्तीकर्तुमसंशयं निजजनान् प्रागुत्तरं च प्रभू रूपं मुख्यमयं स्वनामकरणात्प्रादर्शयद् गोकुले ॥ ८० ॥
यावत्तत्त्वमतिः सती समुदयत्यन्ते वसन्तं गुरुस्तं तावत्समुपादिशेन्न नियमस्तत्रासकृद्वा सकृत्।
मन्येऽनुग्रहसम्प्रदायगुरुणा कारुण्यदुग्धाब्धिना सञ्चिन्त्यैवमदर्शि विश्वमसकृत् तत्तत्त्वधीकारणात् ॥ ८१ ॥

कृष्णप्रिया

माता यशोदा जी ने लालन के दोनों हाथों को पकड़ लिया और हितैषिणी माँ धमकाने लगी कि कृष्ण! मिट्टी क्यों खाई! (माँ को डर था कि मिट्टी खाने से श्यामलाल को रोग पकड़ न ले) श्याम सुन्दर डर गये और भयसम्भ्रान्तनयन कृष्ण भगवान् माँ की ओर आँखे भी न उठा सके ॥ ३३ ॥ पुनः हाथ पकड़कर माँ ने कहा अरे नटखट अरे असंयमी आपने आज एकान्त में मिट्टी क्यों खाई? सुनो तुम्हारे सारे मित्र ग्वालबाल एवं बलदाऊ भैया भी तो इसी बात की पुष्टि करते हैं ॥ ३४ ॥ भगवान् ने कहा—अम्मा! मैंने मिट्टी बिल्कुल नहीं खाई ये सब मिथ्याभाषी है। यदि वे सत्यवादी है तब सम्मुख मेरा मुँह देखो ॥ ३५ ॥ अम्मा ने कहा—यदि ऐसी शेखाई करते हो मुँह खोलो! तब, लीलाओं को करने के लिये मनुज बालरूपधारी अप्रतिहत सर्वैश्वर्यसम्पन्न भगवान् श्रीकृष्ण ने मुँह खोल दिया ॥ ३६ ॥

सा तत्र ददृशे विश्वं जगत् [1]स्थाष्णु च खं दिशः। साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीन्दुतारकम् ॥ ३७ ॥
ज्योतिश्चक्रं जलं तेजो [2]नभस्वान् वियदेव च। वैकारिकाणीन्द्रियाणि मनो मात्रा गुणास्त्रयः ॥ ३८ ॥
एतद् विचित्रं सह जीवकालस्वभावकर्माशयलिङ्गभेदम्।
सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शङ्काम् ॥ ३९ ॥
किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः[3]।
अथो [4]अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—तत्र सा जगत् स्थाष्णु विश्वं च खं दिशः सवाय्वग्निन्दुतारकं साद्रिद्वीपाब्धिभूगोलम् ॥ ३७ ॥ ज्योतिश्चक्रं जलं तेजः नभस्वान् च वियद् एव वैकारिकाणि इन्द्रियाणि मनः मात्राः त्रयः गुणाः सह जीवकालस्वभावकर्माशयलिङ्गभेदम् एतद् विचित्रं च विदारितास्ये सूनोः तनौ व्रजं सह आत्मानं वीक्ष्य शङ्काम् अवाप ॥ ३८–३९ ॥ किं स्वप्नः! एतद् उत देवमाया? किं वा मदीयः बुद्धिमोहः बत अथ अमुष्य मम अर्भकस्य एव यः कश्चन औत्पत्तिकः आत्मयोगः (प्रतिभाति) ॥४०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

॥ ३६ ॥ तत्र तस्मिन्मुखे विश्वं ददृशे ददर्श। तत्प्रपंचयति। जगज्जंगमं स्थास्नु स्थावरं खमंतरिक्षलोकं साद्रिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रसहितं भूगोलं भूर्लोकं वायुः प्रवहः अग्निर्वैद्युतः इंदुश्च तारकाश्च तत्सहितम् ॥३७॥ ज्योतिश्चक्रं स्वर्लोकं वैकारिकाणि देवाः मन इति वैकारिकशब्देन गृहीतमपि देववैलक्षण्यात्पुनरुक्तम्। इंद्रियाणि च तैजसानि मात्रास्तामसाः शब्दादयः ॥ ३८ ॥एवमेतद्विचित्रं विश्वं सहैकदैव वीक्ष्य विचित्रतामाह। जीवश्च गुणक्षोभकः कालश्च परिणामहेतुः स्वभावश्च जन्महेतुः कर्म च तत्संस्कारभूतः आशयश्च एतैर्लिंगानां चराचरशरीराणां भेदो यस्मिंस्तत्। तत्र व्रजं च सहात्मानं स्वसहितं

---

[1] स्थास्नु–श्रीधर. वंशी. वीर. विज. विश्व. शुक.। [2] नभस्वविवराणि च–वीर.; विवराणि रसातलम्–इति कस्यचित्; नभस्वद्वियदेव च–विज.। [3] भेदः–विज.। [4] अमुष्यापि–विज.।

कश्चिद्वीक्ष्य सूनोस्तनावल्पे विदारिते आस्ये शंकामवाप ॥ ३९ ॥ तामेवाह । किं स्वप्न इति । परितो विलोक्याह । नायं स्वप्नः । तर्हि किं देवस्य हरेर्मायेति । तथा चेदन्ये किं न पश्यंति । तर्हि किं वा मदीय एव कश्चिद्बुद्धिमोहो धीविपर्यासो दर्पणे मुखवत् एवं तर्ह्ययं कृष्णोऽपि कथमंतः प्रतीयते नहि दर्पणे दर्पणप्रतीतिः । अंतर्बहिश्चैकरूपेण च कथं जगत्प्रतीयते । तथा सति बिंबप्रतिबिंबयोरिव परस्परं वैपरीत्येन प्रतीतिः स्यादित्याशंक्यान्यथा वितर्कयति । अथो इति । अथ वा ममैवामुष्यार्भकस्यापि सतो यः कश्चनाचिंत्य आत्मयोगः स्वीयमैश्वर्यम् । औत्पत्तिकः स्वाभाविकः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रवहः येन प्रेरितं ज्योतिश्चक्रं भ्रमति । वैद्युतस्तडिद्रूपोऽग्निः । प्रसिद्धौ वाय्वग्नी त्वग्रे वक्ष्यमाणावेवात एतयोर्ग्रहणम् ॥३७॥ नभस्वान्वायुः । वियदाकाशम् ॥३८॥ एवमुक्तरीत्या एतत् दृश्यमानम् एतैर्जीवादिभिः सह । तत्र विश्वस्मिन्मुखे वा । यद्वा–जीवादिभेदांतानां द्वंद्वं कृत्वा पुनर्मत्वर्थीयोऽच् तत्र लिंगं सूक्ष्मशरीरं भेदस्तत्तद्व्यावर्तकधर्मः ॥ ३९ ॥ तां शंकामभिनयेनाह–किं स्वप्न इति । तथा चेत् माया यदि तां मदन्ये एव तर्हि दर्पणस्थानीयोऽयं कृष्णः कथमन्तः न स्वमुखे हि दर्पणे दर्पणं प्रतीयतेऽपि तु तद्भिन्नं सर्वं किञ्च दर्पणांतर्मुखप्रतिबिंबं दर्पणद्रष्टुरभिमुखं भवेदेतत्तु ततो वैपरीत्येन भातीत्याह–तथा सति एकरूपत्वेन प्रतीतिसद्भावे सति । अन्यथा प्रकारांतरेण । वितर्कयति विमृशति । यद्वात्मनो योगोऽपूर्वार्थप्राप्तिः "योगोऽपूर्वार्थसंप्राप्तौ संगतिध्यानयुक्तिषु । वपुः स्थैर्ये प्रयोगे च विष्कुम्भादिषु भेषजे ॥ विस्रब्धघातके द्रव्योपायसन्नहनेष्वपि । कर्मणोऽपि च" इति मेदिनी ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सेति युग्मकं तत्र तस्मिन् भगवति तज्जठरान्तरित्यर्थः भक्षणापलापोपयोगित्वात् वक्ष्यते च तैः तनूदराश्रितं विश्वमिति चराचरात्मकं विश्वमेव विवृणोति—खमित्यादिना भेदमित्यन्तेन, वैद्युतोऽग्निर्ज्योतिश्चक्रेऽपि ज्ञेयः खमन्तरिक्षं भुवर्लोकमित्यर्थः । वियदेव वियदपि ददर्श स्थूलानां तत्परिच्छेद्यानां तत्कार्य्याणां जलादीनां वा का वार्त्तेत्यर्थः । एवमग्रेऽप्यनुवर्त्त्यं चकाराद्‌हङ्कारादींश्च अत्र निराकाराणामपि वीक्षणं तदधिष्ठातृदेवानामभेदमानेन ज्ञेयम् ॥ ३७–३८ ॥ कदा वीक्ष्य विदारितास्ये सति तस्मिन् व्रजं सहात्मानं आत्मभ्यां स्वाभ्यां श्रीकृष्णयशोदाभ्यां सहितं वक्ष्यते च श्रीब्रह्मणा "यस्य कुक्षाविदं सर्वं सात्मं भाति" इति एवं तस्यैव बालविग्रहस्याचिन्त्यशक्त्या युगपद्विभुत्वमध्यमत्वे तत एवास्यैव जगतोन्तःस्थितत्वबहिःस्थितत्वे दर्शिते शङ्कामवाप विविधाशङ्कामकरोदित्यर्थः । यद्वा, पुत्रं प्रति शङ्कामकरोत् वीक्ष्येति पूर्ववत्सिद्धान्तः ॥ ३९ ॥ एतद्दर्शनम् उतवाद्दृष्टाविशेषस्य माया वा बत खेदे उत्पत्तिक आत्मयोगः जन्मनैव स्वस्मिन्न पूर्वार्थसम्प्राप्तिः वारं वारं विविधाश्चर्य्यदर्शनात् ॥४०॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र तस्मिन् भगवति तज्जठरान्तरित्यर्थः, अत एव तैरपि नवमाध्यायारम्भे लिखितम्–'तनुदराश्रितं विश्वम्' इति । चराचरात्मकं विश्वमेव विवृणोति–खमित्यादिना भेदमित्यन्तेन । वाय्वग्न्योरुक्तयोरपि तेजोनभस्वतोः पुनरुक्तिः प्रवाहाख्यवायोर्वैद्युताग्नेश्च ज्योतिश्चक्रान्तः पृथक्सत्तया भेदात् । स्ववियतोरपि लोकवस्तू यत्वादिना भेदः; यद्वा, जलादिभिस्तत्तदधिष्ठातृमहाभूतानि चत्वारि भूगोलशब्देन तत्तदधिष्ठातृदेवतातदधिष्ठानञ्च गोलरूपमुक्तम् । एव अपि वियदपि, तस्य व्यापकत्वादिनाधस्य त्वदेव शब्दः । एवमयमग्रेऽप्यनुवर्त्त्यः । चकारादहंकारादीन् ॥ ३७–३८ ॥ सूनोस्तनौ जठरमध्ये वीक्ष्य तत्तद्विशेषेण स्वदृग्भ्यामेव साक्षादवलोक्येति श्रीभगवदिच्छया, किंवा प्राग् लिखितसिद्धान्तानुसारेण तस्या एव चक्षुःशक्त्येति ज्ञेयम् । कदा वीक्ष्य ? विदारितास्ये सति, तस्मिन्नास्ये विदारिते सतीत्यर्थः । शंकामवाप, विविधामाशंकामकरोदित्यर्थः ॥ ३९ ॥ एतद्दर्शनमुत वा देवमाया वा बत खेदे । उत्पत्तिक इति वारंवारं विविधाश्चर्य्यप्रदर्शनात् ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

वैकारिकाणि सात्त्विकाहङ्कारकार्याणि इन्द्रियाणि मनश्चेत्यन्वयः मात्रास्तन्मात्राणि पञ्च आशयो वासना लिङ्गं शरीरम् ॥ ३८–३९ ॥ ममार्भकस्य मम सुतस्य औत्पत्तिकः स्वगतोऽणिमाद्यैश्वर्य्ययोगः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सा यशोदा तत्र विवृते आस्ये विश्वं ददर्श, तदेव प्रपञ्चयति—जगज्जङ्गमं स्थास्नु स्थावरं खमन्तरिक्षलोकः पर्वतद्वीपसमुद्रसहितः भूर्लोकः वायुः प्रवहश्चाग्निर्वैद्युतश्चेन्दुश्च तारकाश्च तत्सहितम् ॥३७॥ ज्योतिश्चक्रं जलमावरणजलं तेजः सूर्यादिज्योतिः नभ आकाशः स्वः स्वर्लोकः विवराण्यतलादीनि वैकारिकाणि सात्त्विकाहङ्कारकार्याणि श्रोत्रादीनि दशेन्द्रियाणि मनश्च

मात्रास्तामसानि शब्दादितन्मात्राणि पञ्च, त्रयो गुणाः सत्त्वरजस्तमांसि ॥ ३८ ॥ एवमेतद्विचित्रं विश्वं सहैकदैव वीक्ष्य विचित्रतामेव दर्शयन् विशिनष्टि–जीवाः क्षेत्रज्ञाः सर्वोत्पत्तिनिमित्तगुणक्षोभकश्च कालः परिणामहेतुः स्वभावश्च जन्महेतुः कर्म चाशयो वासना च तैर्लिङ्गानां शरीराणां भेदो यस्मिंस्तं सहात्मानमात्मना यशोदया कृष्णेन च सहितं व्रजं च सूनोस्तनौ तत्रापि विदारिते व्यात्ते आस्ये अवलोक्य शङ्कां संशयमवाप ॥ ३९ ॥ शङ्कामेव दर्शयति–किमिति । एषः शिशोरस्य अल्पवदने विश्वदर्शनरूपः किं स्वप्नः ? जागरावस्थायां न हि स्वप्नः सम्भवति इति विमृश्य वितर्कयति—उत देवमायेति । तथा चेत् घटपटादीनिव सर्वे किं न पश्यन्तीति विमृश्य शङ्कते–किं वेति । बुद्धिमोहो बुद्धिविपर्यासः भ्रम इति यावत् तथा चेत्पुनः पुनः दर्शनेऽपि यथावत्कथं प्रतीतिरतो न बुद्धिमोह इति विमृश्य शङ्कते अथो इति । अथोऽथवा मदीयस्यामुष्यार्भकस्यापि सतः यः कश्चनाचिन्त्यः औत्पत्तिकः उत्पत्तिसिद्धः स्वाभाविक इति यावत् आत्मयोगः आत्मनः परमात्मनः स्वस्य योगः कुक्षिस्थाखिलविश्वत्वादिकल्याणगुणयोगः तन्मूलक इत्यर्थः ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

जगज्जङ्गमं स्थावरं सामान्योक्तं विशिनष्टि—खमित्यादिना । खप्रदेशः भूगोलं भूमण्डलं वाय्वग्नी भौमौ ॥ ३७ ॥ ज्योतिश्चक्रम् अश्विन्यादिनक्षत्रमण्डलं जलतेजसी बाह्याभ्यन्तरगते नभः क्रतुविशेषः अन्तरिक्षं वा स्वः स्वर्गः परलोको वा वियद्बाह्यं सर्वगतं वा वैकारिकाणीन्द्रियाधिष्ठातृदैवतानि ॥ ३८ ॥ स्वभावः सात्त्विकादिः कर्म अदृष्टम् आशयः संस्कारः लिङ्गं लक्षणं सूक्ष्मशरीरं वा बुद्ध्यादिसमूहो वा भेदः तत्तद्वस्तुव्यावर्तकधर्मः ॥ ३९ ॥ शङ्कां प्रकटयति—किमिति । औत्पत्तिकः स्वाभाविकः आत्मयोगः आत्मैश्वर्यातिशयः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सहात्मानम् आत्मभ्यां स्वाभ्यां श्रीकृष्णयशोदाभ्यां सहितमिति ॥ ३९ ॥ तस्यैव बालविग्रहस्याचिन्त्यशक्त्या युगपद्विभुत्वमध्यमत्वे तत एवास्यैव जगतोऽन्तस्थितत्वबहिःस्थितत्वे दर्शिते औत्पत्तिक आत्मयोगः जन्मनैव स्वस्मिन् अपूर्वार्थं सम्प्राप्तिः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्र मुखान्तर्जठरे कृत्स्नस्य चान्तर्जठरे इति ब्रह्मस्तवोक्तेः जगत् जङ्गमं स्थास्नु स्थावरं खं भुवर्लोकं साद्रीति भूगोलमित्यस्य विशेषणं सवाय्विति ज्योतिश्चक्रमित्यस्य वायुप्रवाहः अग्निर्वैद्युतः नभस्वान् नभस्वन्तं वैकारिकाणि देवान् गुणान् सत्त्वादींस्त्रीन् अत्र निराकाराणामपि दर्शनं तदधिष्ठातृदेवतानां मूर्तिमत्वात् ॥ ३७–३८ ॥ पुनश्च प्रपञ्चयति—एतद्विश्वं सहयुगपदेव वीक्ष्य जीवश्च गुणक्षोभकः कालश्च परिणामहेतुः स्वभावश्च जन्महेतुः कर्म च तत्संस्कारः आशयश्च तैर्लिङ्गानां शरीराणां भेदो यस्मिंस्तत् तनौ कुक्षौ विदारिते प्रसारिते आस्ये आस्यद्वारा कुक्षावित्यर्थः । सहात्मानम् आत्मपतिपुत्रादिसहितं व्रजं च यस्य कुक्षाविदं विश्वमिति ब्रह्मोक्तेरस्यैव निश्वस्यान्तःस्थितत्वे बहिः स्थितत्वे अचिन्त्ययोगमायया दर्शिते तत्तश्च कृष्णशरीरस्य जगन्मध्यवर्त्तित्वजगद्व्यापकत्वाभ्यां परिच्छिन्नत्वापरिच्छिन्नत्वे वास्तवे एव व्यञ्जिते ऐश्वर्योपासकानां विश्वस्मिन् भगवद्दर्शनं भगवति विश्वदर्शनं यदुक्तं तदेतदेव माधुर्य्योपासकशिरोधार्यपदाम्बुजया श्रीयशोदयापि दृष्टं दृष्ट्वा च शङ्कां पुत्रं प्रत्यनिष्टाशङ्काम् अवाप ॥ ३९ ॥ तादृशदर्शनस्य कारणं वितर्कयति—किंस्वप्नः एतद्दर्शनं किं स्वप्नहेतुकं ? नहि नहि:; निद्रालस्यनयनकालुष्याद्यभावात् तर्हिं देवमाया ? नहिनहि; मम निकृष्टाया मोहने देवानां प्रयोजनाभावात् , तर्हि किं मदीय एव कश्चिद्बुद्धेर्मोहः विपर्य्यासः ? नहिनहि; स्वास्थ्यसमये सम्प्रति मम बुद्धिमोहकारणाभावात् , अथो अथवा अमुष्य मम बालकस्य "नारायणसमो गुणैः" इति गर्गवर्णितमहाप्रभावत्वात् कश्चनाचिन्त्य आत्मयोगः आत्मीयमैश्वर्यम् ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सा यशोदा तत्र तस्मिन् मुखे विश्वं चेतनाचेतनात्मकं सर्वं कार्यजातं ददृशे तत्प्रपञ्चयति जगत् जङ्गमम् , स्थास्नु स्थावरम् , खमन्तरिक्षलोकम् अद्रिद्वीपाब्धिसहितं भूगोलं भूगोलकम् , पञ्चमभूतस्य भूमेर्भूविवराणामतलादीनां चानेनैव सङ्ग्रहः वायुः प्रवहश्च अग्निर्वैद्युतश्च इन्दुश्च तारकाश्च तत्सहितम् ॥ ३७ ॥ ज्योतिश्चक्रं स्वर्लोकम् , पञ्चमभूतस्य भूमेरुक्तत्वाज्जलादिकं भूतचतुष्कम् । चशब्देन महदहङ्कारौ गृह्येते वैकारिकम् इन्द्रियाणि च तैजसानि मात्राः तामसाः शब्दादयो ये गुणाः सत्त्वादयः तांश्च ददृशे इति पूर्वेणवान्वयः ॥ ३८ ॥ सहैकदैवैतत् विचित्रं विश्वं सहात्मानं स्वसहितं व्रजं च विदारितास्ये सूनोस्तनौ वीक्ष्य शङ्कामवाप विश्वविचित्रतां दर्शयितुं तद्विशिनष्टि, जीवः कर्तृभोक्तृत्वादिधर्मवान् गुणक्षोभकः कालश्च परिणामहेतुः स्वभावश्च जन्महेतुः कर्म च आशयो वासना च तैर्लिङ्गानां चराचरशरीराणां भेदाः यस्मिन् तत् ॥ ३९ ॥ शङ्कामेवाह—किमिति । एतत्किं भवति इति सामान्यतः सन्दिह्य विशेषतो वितर्कयति—किं स्वप्नः सम्भवति हि महास्वप्नोऽपि दैवात् उत देवस्य

विष्णोर्माया सम्भवति हि साऽपि मार्कण्डेयादिभिर्दृष्टत्वात् किम्वा मदीयो बत बुद्धिमोहः बुद्धिमोहेनापि जनाः आश्चर्याणि पश्यन्ति अथ पूतनावधादिकं गर्गवाक्यं च संस्मृत्य श्रीकृष्णकृपया च श्रीकृष्ण एव सर्वरूपः परमेश्वर इति वितर्कयति—अथो इति । अथवा अमुष्य ममार्भकस्यापि सतः कश्चनाद्भुतः औत्पत्तिकः स्वाभाविकः आत्मयोगः आत्मनः परमेश्वरस्य स्वासाधारणयोगः सर्वात्मत्वसत्यसङ्कल्पत्वादिलक्षणः अयं न कस्यापि पुत्रः किन्तु सर्वकारणकारण इति भावः ॥ ४० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

सेति युग्मं मात्राहमथ ताड्यमानो न स्याम इति हरेः सङ्कल्पे सति तदनुगया तदैश्वर्यशक्त्या तत्र मुखे तद्द्वारा तज्जठरे सा तदम्बा विश्वं ददर्श जगज्जङ्गमं स्थास्नु स्थावरं खमन्तरिक्षलोकं साद्रीति भूगोलमित्यस्य विशेषणं सवायु इति ज्योतिश्चक्रमित्यस्य वायुः प्रवहः अग्निर्वैद्युतः नभस्वानिति नभस्वन्तं पवनं वैकारिकाणि देवान् सात्त्विकान् इन्द्रियाणि राजसानि मात्राः शब्दादितन्मात्रास्तामसान् गुणान् सत्त्वादीन् त्रीन् अत्र निराकाराणां दर्शनं तदधिष्ठातृदेवतापेक्षम् । तासामाकारवत्वात्॥३७ ३८॥ एतद्विश्वं सह युगपदेव वीक्ष्य कीदृग् जीवश्च गुणक्षोभकः कालश्च, परिणामहेतुः स्वभावश्च, जन्महेतुः कर्म च, तत्संस्कारः आशयश्च, तैर्लिङ्गानां चराचरशरीराणां भेदो यत्र तत् सूनोस्तनौ कुक्षौ विदारिते प्रसारिते आस्ये मुखद्वारा जठरे इत्यर्थः । महात्मानमात्मपतिपुत्रादिसहितं व्रजं च वीक्ष्य शङ्कामवाप बहिः स्थितं विश्वं तादृशो व्रजश्चैतत् कुक्षिमध्येऽपि कथमस्तीति वितर्कं लेभे इत्यर्थः । शङ्कात्रासे वितर्के चेति विश्वः । अत्र भगवद्विग्रहस्य विश्वान्तर्वर्तित्वतद्बहिःस्थितिभ्यां मितत्वममितत्वञ्च वास्तवं बाध्यते तच्चाचिन्त्यैश्वर्यशक्तिसिद्धं बोध्यम् ॥ ३९ ॥ शङ्कां दर्शयति किमित्यर्द्धकेन एतद्दर्शनं किं स्वप्नहेतुकं भवति नहि नहि निद्रालस्याद्यभावात्, तर्हि किं देवस्य कस्यचिन्मायेदं नहि नहि मन्मोहने तस्य प्रयोजनाभावात्, तर्हि किं मदीयो बुद्धेर्मोहो विपर्यास इव, नहि नहि मद्बुद्धेः पुरेवेदानीञ्च स्वास्थ्यानुभवात् एवं वितर्क्य सिद्धान्तयत्यथो इत्यर्द्धकेन अथोशब्दः कार्त्स्न्यार्थः "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथे"त्यमरः मत्पुत्रस्य स्वयं भगवत्त्वात्तस्यैवायमौत्पत्तिकः स्वभावसिद्ध आत्मयोगोऽचिन्त्यशक्तिलक्षणः स्वधर्मः येन युगपद्बहिरन्तश्च जगतः स तिष्ठति माधुर्यानुबन्धिनो हरेर्गुणा व्रजौकसां सर्वदा प्रत्यक्षा ऐश्वर्यानुबन्धिनस्तु ते तस्मिन् सत्त्वेन ज्ञाता एव कदाचिदेव प्रत्यक्षा भवतीति निर्णयात् ॥ ४० ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

औत्पत्तिक आत्मयोग इत्यस्य स्वाभाविकः परमात्मप्रसादाधीनाणिमादियोग इत्यर्थः । एतेनात्मेत्येतद्व्यर्थमिति दूषणं परिहृतं । अयत्राविद्यमान औत्पत्तिको योगः कृष्णस्य कथमागत इत्याशंकापरिहारार्थमौत्पत्तिकयोगस्य भगवत्प्रसादाधीनत्वमुच्यत इत्यभ्युपगमात् ॥ ४० ॥

इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्र मुखे विश्वं ददृशे । तदेव विशदमाह ॥ जगदिति । जङ्गमं स्थास्नु स्थावरं खं विवरं दिशस्तद्भेदानद्रयः कुलाचला द्वीपाः ससाब्धय एतत्सहितं भूगोलं भूमण्डलं तारकं सवाय्वग्नीन्दुवायुः प्रवहोऽग्निर्विद्युदुद्भूतो वाय्वग्निचन्द्रसहितं तारकं नक्षत्रगणम् । कनीनिकायां नक्षत्रे तारकं तारकाऽपि चेति विश्वः ॥ ३७ ॥ ज्योतिश्चक्रं जलं तेजो विद्युदादिसम्बन्धि स्वः स्वर्गं वियन्महाकाशं नभोऽन्धकारं वैकारिकाणि दैवतानि तैजसानीन्द्रियाण्याहुरित्युक्तेस्तैजसानीन्द्रियाणि । मनसो मुख्यतयेन्द्रियत्वेऽपि पृथगुक्तिः । दैवान्देहान्मनः खानीत्यादेः । गुणास्त्रयस्त्रीन्गुणान् ॥ ३८ ॥ जीवाश्च कालश्च स्वभावः सात्त्विकत्वादिः कर्मादृष्टमाशयः संस्कारो लिङ्गं लक्षणं षोडशकलकलेवरं लिङ्गशरीरं वैतदादिभेदोपेतं सूनोस्तनौ तत्रापि विदारितास्यावयवविशेषे । सहात्मानमिति पदमेकं व्रजविशेषणं । एतद्वैचित्र्यं वीक्ष्य शङ्कां सन्देहमवाप ॥ ३९ ॥ तामेव वितत्य वक्ति ॥ किमिति । एतद्भातं वस्तु स्वप्ने तदवस्थायां किं किं स्वप्नो न कुत इत्यत उतैतत्स्वापावस्थां विना जाग्रद्दशायामपि सत्त्वादित्यप्यन्वयमुशन्ति । उताथवा देवस्य श्रीहरेर्माया संदेशेच्छा सृष्टवती । नायमपि कल्पोऽनल्पः । तथा सति पार्श्वस्थोपालम्भप्रसङ्गः । मदीय एव बुद्धिभेदो बुद्धिभ्रंशो मोह इति पाठोऽपि पाङ्क्तः । न च स च तमथकृत् । कुमारस्यापि ममान्तरुदरं दर्शनात् । देवमायेति प्राक् कल्पितं स्वयमेवेत्थमिति मत्वाऽऽह ॥ अथो इति । अत एवामुष्येत्युक्तिः । ममामुष्यार्भकस्य यः कश्चन यः कोऽप्यात्मयोग आत्मनि सन्योगोऽणिमाद्यैश्वर्यं । कोऽपि न क्षिश्यददक्षश्च कोमलो बालः कथमयं तव विकल्पः कल्प्यत इत्यत आह ॥ औत्पत्तिक आजानः स्वाभाविक इति यावदिति । अमुष्येत्यत्र ओदिति प्रगृह्यसंज्ञायां प्लुतेति प्रकृतिभावः । बत सन्तोषे । अर्भोऽर्भकः कश्चतुर्मुखो यस्येत्यन्तरर्थः ॥ ४० ॥

श्रीसुबोधिनी

सापि भगवता प्रेरिता भगवदिच्छया प्राप्तज्ञानशक्तिस्तन्मध्यस्थितं जगद् दृष्टवतीत्याह सा तत्रेति, सा निरोधमध्यस्थिता तत्र मुखविवरे विश्वं ददृशे, आपाततो दर्शनं व्यावर्तयितुं विशेषाकारेण दृष्टं निर्दिशति जगदितिद्वाभ्यां, विश्वमिति

समुदायेन भगवद्रूपमाधिदैविकं वा, जगदन्यल्लौकिकं विश्वरूपं प्रतिकृतिरूपमित्यौपनिषदा आधिदैविकमिति ब्रह्मविदः कार्य कारणरूपमित्युभयोः समाधानमिति विचारकाः, जगति भेदानाह **स्थाष्णु चरिष्णु** चेति, **स्थावरं जङ्गमं च**, चकारात् तद्धर्मा सर्व एव, साद्रिद्वीपाब्धिभूगोलमित्यधः खण्डः, उपरिखण्डं वक्ष्यत्यग्रिमश्लोके, अयमपि भेदस्तया ज्ञात इति, अद्रयो मेर्वादयो द्वीपा जम्ब्वादयोऽब्धयो लवणादय एतैः सहितं भूगोलं, सवाय्वग्नीन्दुतारकमिति भूगोलस्यैव विशेषणं, वायुस्तत्रोपलभ्यत एव, अग्निश्च, इन्दुः प्रथमाहुतिफलरूपः, "सोमो राजा भवती" तिश्रुतेः, यद्वा यज्ञियं रूपं भूमिष्ठं तत्र वर्तत इति 'यदस्यां यज्ञियमासीत् तदमुष्यामदधा" दितिश्रुतेः, **तारका** अति भूमिष्ठा भोगार्थं तत्र गच्छन्तीति पुनरायान्ति चेति तारका अपि भूमिष्ठा एव श्येना इव ॥ ३७ ॥ उपरितनं दलमाह **ज्योतिश्चक्र**मिति, **जलं** मध्यस्थितं "सलिलं वा इदमन्तरासी"दिति वृष्टिर्वियद्गङ्गा च, **तेज** इति सूर्यादिध्रुवान्तानां किरणाः, विद्युदादयो वा, **नभस्वान्** वायुरुपरितनः, **वियदाकाशो** **वैकारिकाणि** सात्त्विकानि सर्वविकारसाध्यानि वेन्द्रियाधिष्ठातृरूपाणी**न्द्रियाणि** ब्रह्माण्डाद् बहिः स्थितानि, ब्रह्माण्डमपि गृहे घटवत् प्रतीयते, **इन्द्रियाणि** च ततो बहिः पदार्थान्तरवत्, सर्वदर्शनसामर्थ्यं भगवता दत्तमित्युक्तमेव, **इन्द्रियाणि** राजसानि मनश्च सात्त्विकं **मात्रास्तामसा**स्तेषां निधानभूता **गुणाश्च त्रय** इति, अहङ्कारगुणाः प्रकृतिगुणा मायागुणाश्च ॥ ३८ ॥ एवं दृष्टमनूद्य तद्दर्शनेन तस्या अपूर्वत्वाद् भयं जातमित्याहैतदिति, **विचित्र**मिति, युक्तयापि न निर्णेतुं शक्यं, करणान्यपि दृष्टवतीति तान्यनुवदति, **जीवकालस्वभावकर्माशयलिङ्गानां भेदै**स्तत्सहितं जगत्, **जीवा**स्त्रिविधा देवमानुषदानवाः, **कालो**ऽपि तथा भूतभविष्यद्वर्तमानरूपः, **स्वभावः** प्रकृतिधर्मो भगवद्रूप इति निबन्धे विवृतं **कर्म** च, **आशयो** हृदयकोशो यस्मिन्नाशेरते जीवाः, **लिङ्गं** लिङ्गशरीरं स्थूलकोशात्मकं, लिङ्गभेदा वा स्त्रीपुन्नपुंसकाः, एतत् सर्वं स्थानविशेषस्यापरिज्ञानात् **सूनोस्तनौ वीक्ष्ये**त्युक्तं, **विदारितमास्यं** यस्मिन्नन्तर्बहिः सर्वत्रैव जगद्व्याप्तमितिवद**स्तनौ विदारितास्य** इतिपदद्वयं, स्वप्नभ्रमव्युदासार्थं **व्रजमपि** दृष्टवती, मायाव्युदासायात्मानं आत्मना **सहितं व्रज**मितिविशिष्टकथनं सर्वभ्रमव्युदासाय, एवमभ्रमेण सर्वं दृष्ट्वा **शङ्कामवाप** ॥ ३९ ॥ अस्याः शङ्काया व्युदासार्थं लौकिकप्रकारेण पक्षानाशङ्क्य परिहरति **किं स्वप्न** इति, अन्यदा प्रतीतं यत् कदाचित् प्रतीयते तत् त्रिधा भवति स्वप्नेऽपि कदाचिदलौकिकं प्रतीयते तस्य स्थानस्य सन्ध्यत्वाच्छीघ्रगमनात् "कार्त्स्न्येनानभिव्यक्तस्वरूपत्वाच्च" प्रकृते तद्वैलक्षण्यान्नायं **स्वप्नो** भवितुमर्हति पूर्वापरानुसन्धानाच्च, अतः पक्षान्तरमाहोत **देवमाये**ति, **मायामात्रं** नात्यन्तमोहकं **देवानां तु माया** मनुष्यव्यामोहिका भवति मोहवशाच्चातिरिक्तभानमपि सम्भवतीत्याशङ्क्य सा भगवति न सम्भवति भगवत्प्रयत्नानन्तरभावित्वादस्य भगवत्कृतापि माया न भवति तथा सति स्थिरता न स्यात् मम च तत्र दर्शनं न स्यादुभयोश्चादर्शनं, तर्हि दर्शनमेव भ्रान्तमितिपक्षं स्वीकरोति **किं वा मदीयो बत बुद्धिमोह** इति, **बुद्धिमोहो**ऽप्येतादृशः कदापि न जात इति विशेषमाह **मदीय** इति, अन्येन दृश्यत एव, तथा सति ते वदेयुः, न हि दृष्टेनुपपन्नंनामेतिन्यायात्, **मदीय** एवायं **बुद्धिमोहः**, एवं सति स्वस्य महत्त्वाद् **बते**तिहर्षः, यद्येवं स्याद् बालकान्तरे स्थलान्तरेऽप्येवमुपलभ्येत, अस्मिन्नेव बालक उपलभ्यत इति न पूर्वोक्तपक्षाः किन्त्वस्यैव **कश्चनानुभाव** इत्याहाथो इति पूर्वपक्षव्युदासार्थं, **अमुष्ये**त्यर्भोऽपि परिदृश्यते सूक्ष्मस्तस्मिंश्च जगद् विशालं, **ममार्भकस्ये**ति, पूर्वं भावदार्ढ्यं, अन्यथा निरोधो न स्यान्मुक्तिश्च स्यादिति, कोयं तव बालकस्य गुण इति चेत् तत्राह **यः कश्चने**ति, भिन्नतयेदमित्थतया वा ज्ञातुं न शक्यते, इदानीमेव देवतान्तरसम्बधाज्जातं भविष्यतीत्याशङ्क्याहौ**त्पत्तिक** इति, स्वाभाविकोय "मुत्पत्तिशिष्टः" पूर्वमप्यनुभूतत्वात् पूतनादीनां मारणाच्च, केवलं प्रदर्शकत्वे पूतनादीनां वधो न स्यात्, अत **आत्मयोगः**, **आत्मन** एव भगवतो **योग**रूपेयं विभूतिरित्यर्थः ॥ ४० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सा तत्रेत्यत्र, **प्रतिकृतिरूप**मिति । यथा 'क्षुरः क्षुरधान' इत्याद्युपनिषद्भिस्तथा । **सूनोस्तनौ** सूनोर्विदारितं यदास्यं तस्मिंश्च वीक्ष्येति सम्बन्धो ज्ञेय इत्याशयेनाहुः **तस्मिन्नन्तर्बहिः सर्वत्रै**वेति । अन्यथा तनुविशेषणत्वेन स्त्रीलिङ्गत्वापत्तेः । **किं स्वप्न** इत्यत्र । **सन्ध्यत्वा**दिति । 'तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवतः, इदं च परलोकस्थानं च, सन्ध्यं तृतीयं स्वप्नस्थानमिति श्रुतौ स्वप्नस्य सन्ध्यत्वमुक्तम् । एतच्चेह लोकमध्यपात्येवेति तद्वैलक्षण्यम् । **कार्त्स्न्येने**त्यादि । **स्वप्नसृष्टेरसत्यत्वे** व्यासचरणैर्हेतुरुक्तो 'मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वा'दिति । एतदर्थस्तु स्वप्नसृष्टिर्मायामात्रम्, तत्र हेतुरग्रे यस्य यादृशं स्वरूपं देशकालवस्तुसापेक्षं तथाभिव्यक्तिः कार्त्स्न्येनाभिव्यक्तिस्तदभावादिति । **उभयोश्चादर्शन**मिति । द्रष्टृमायिनोर्मायिकैः पदार्थैः सहादर्शननियमः ॥ ४० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

सा तत्रेत्यत्र **द्वाभ्या**मिति पदाभ्यां, नन्वेकस्मिन् जगति प्रदर्शनीये पदद्वयस्य किं प्रयोजनमित्यत आहु**र्विश्व**मित्यादि, नन्वेवंविभागः कुत्र सिद्ध इत्यत आहुः **प्रतिकृती**त्यादि, तदर्थं **टिप्पण्यामाहुर्यथे**त्यादि, "स एष इह प्रविष्ट आनखाग्रेभ्यो यथा क्षुरः क्षुरधाने वहित" इतिश्रुतौ क्षुरधानदृष्टान्तेनात्माधारतया यदुक्तं तत् तथेत्यर्थः, द्वितीयमाहुरा**धिदैविक**

मित्यादि, "तदभिध्यान"सूत्रे तल्लिङ्गतया यत् सिद्धं तदित्यर्थः, श्रुतिस्त्वा"काशाद् वायु"रित्यादिका, इयमेव च टिप्पण्या **मादिपदेन** सङ्गृहीता, द्वयोर्निष्कृष्टं रूपमाहुः **कार्येत्यादि**, उभयोः **समाधानमित्युभयोर्जगतोः सम्यक्** स्थापनं, **विचारका** ब्रह्ममीमांसानुसारेण वाक्यविचारयितारः स्वयमेवाचार्याः, एतस्य भूगोलविशेषणत्व इन्दूक्तिः कथं सङ्गच्छत इत्यत आहुरिन्दुरित्यादि, तथा च पञ्चाग्निविद्यायां तथा सिद्धत्वात् पूर्ववद्रूपेण तत्स्थितिर्न विरुद्धेत्यर्थः, अस्मिन् पक्षे राजत्वदशापन्नेन्दुस्थितिर्विरुध्येतेत्यरुच्या पक्षान्तरमाहुर्यद्वेत्यादि, **तत्र वर्तत** इति चन्द्रमसि कलङ्करूपेण कृष्णं वर्तते, तथा च तत्सम्बन्धादिन्दोर्भूमिष्ठत्वमित्यर्थः, तत्र प्रमाणमाहुर्यदित्यादि, श्रुतिस्तु "द्यावापृथिवी सहास्तां ते वियत्यब्रूतामस्त्वेव नौ सह यज्ञियमिति तदमुष्या यज्ञियमासीत् तदस्यामदधात् तद्रूपा अभवम् **यदस्या यज्ञियमासीत् तदमुष्यामदधात्** तददश्चन्द्रमसि कृष्ण"मिति, तारकाणां भूमिष्ठत्वमुपपादयन्ति **तारका** इत्यादि, तथा च यज्ञियं रूपं भूमिष्ठं यजमानात्मकं ता एव तारका इति तासामपि सङ्ग्रह इत्यर्थः ॥ ३७ ॥ **एतद् विचित्रमित्यत्र**"सूनोःस्तना"वित्यत्र पदसम्बन्धबोधनार्थं **तस्मिन्नित्यादिना** यदुक्तं तट्टिप्पण्यां विवृण्वन्ति **सूनोःस्तनावित्यादिना** ॥ ३८–३९ ॥ **किं स्वप्न** इत्यत्र **त्रिधेति** वक्ष्यमाणप्रकारेण **त्रिधा**, सन्ध्यत्वादेरर्थं टिप्पण्यामाहुस्तस्य **वेत्यादिना**, **वैलक्षण्यं** स्फुटीकुर्वन्त्येतदित्यादि, कार्त्स्न्येनेत्यादेरर्थमाहुः **स्वप्नेत्यादि**, तथा चेह मध्यलोकपाताद् बहुकालस्थानात् कार्त्स्न्येनाभिव्यक्तत्वात् पूर्वापरानुसन्धानाच्च न स्वप्नपक्ष इत्यर्थः, **सुबोधिन्यां** मायामात्रपक्षं निराकुर्वन्ति **नात्यन्तमोहकमिति**, स्वस्य पृथगदर्शनात् तथेत्यर्थः, देवमायापक्षमनूद्य निराकुर्वन्ति **देवानां** त्वित्यादि, भगवत्यसम्भवे हेतुमाहुर्**भगवदित्यादि**, भगवन्मायात्पक्षमनूद्य निराकुर्वन्ति **भगवत्कृतापीत्यादि**, **तथा सतीत्यादि**, "**मम चे**"ति **चकाराद्** भगवतश्च, **उभयोश्चादर्शनमित्यस्यार्थं** टिप्पण्यामाहुर्द्रष्ट्रित्यादि, तथा च स्थिरत्वात् स्वस्य भगवतश्च दर्शनाद् द्रष्ट्रित्याद्युक्तनियमभङ्गाच्च न भगवन्मायापीत्यर्थः, स्वबुद्धिमोहपक्षं निराकुर्वन्ति **यद्येवमित्यादि**, सिद्धान्तपक्षमवतारयन्त्यस्मिन्नित्यादि, इदानीन्तनयोगपक्षं निराकुर्वन्ति **स्वाभाविकेत्यादि** ॥ ४० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

सा तत्रेत्यस्याभासे सापीत्यादि 'पश्य मे मुख'मित्यनेन प्रेरणस्य 'भयसम्भ्रान्ते'त्यनेन ज्ञानशक्तिप्राप्तेश्चोक्तत्वात् सेतिपदेन तदुभयपरामर्श इति भावः ॥ ३७ ॥ **एतद्विचित्रमित्यत्र स्वप्नभ्रमेति** स्वप्नरूपो भ्रमस्तद्व्युदासार्थमित्यर्थः, यत्र स्थीयते तत् स्थलं स्वप्ने न दृश्यत इति भावः ॥ ३८ ॥ **किं स्वप्न** इत्यत्र देवस्य भगवतो मायेतिपक्षमाश्रित्याहुः **भगवत्प्रयत्नेति**, भगवत्कृतत्वेऽयं हेतुः, अतो हेतोरियं **भगवत्कृता** मायोच्येत सापि **न भवती**त्यन्वयः, तत्र दूषणमाहुः **तथा सतीत्यादि** **दर्शनमेवेति** प्रथमपक्षेषु पदार्था असन्त उक्ताः, अस्मिन् पक्षे पदार्थाः सत्या एव, दर्शनमात्रांशे भ्रम इत्येवकारः, यथा सुरभिचन्दनमित्यत्र सौरभ्यांशे स्मरणं न तु चक्षुषा सौरभ्यग्रहः तथापि कस्यचिद् भ्रान्तोनुव्यवसायो भवेत् सौरभ्यमपि पश्यामीति तत्र सत्यस्यैव सौरभ्यस्य दर्शनमात्रांशे भ्रमस्तथातीन्द्रियाणां पदार्थानामिन्द्रियविषयत्वांशे भ्रम इत्यर्थः ॥ ३९ ॥ **अथो अमुष्येत्यत्र अस्मिन्नेव बालके** इति आत्मयोगत्वाद् यं प्रदर्शयति स एव पश्यतीति यशोदयैव दृश्यते नान्यैरितिपक्षोप्युपपन्न इति भावः, **मुक्तिश्चेति** ज्ञानस्य जातत्वात् तन्मार्गीया मुक्तिर्ब्रह्मभावः स्यादित्यर्थः ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सा यशोदा तत्र विवृते मुखे विश्वं ददृशे ददर्श तदेव प्रपञ्चयति जगत् जङ्गमं, स्थास्नु स्थावरं, खं अन्तरिक्षलोकं, दिशः, साद्रिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रसहितं भूर्लोकं वायुः प्रवहः अग्निर्वैद्युतः इन्दुः चन्द्रः तारकाश्च तत्सहितम् ॥ ३७ ॥ ज्योतिश्चक्रं स्वर्लोकं, जलं, तेजोऽग्निः नभस्वान् वायुः, वियत् आकाशः वैकारिकाणि सात्त्विकाहङ्कारकार्यभूता इन्द्रियाभिमानिन्यो देवताः इन्द्रियाणि राजसाहंकारकार्याणि, मन इति वैकारिकेऽप्यन्तर्भूतमपि देवतावैलक्षण्यज्ञापनाय पृथगुक्तम्, मात्राः तामसाहङ्कारकार्यभूताः शब्दस्पर्शरूपरसगन्धाः त्रयो गुणाः सत्त्वरजस्तमांसि । अत्रातीन्द्रियाणामपि दर्शनं भगवद्दत्तसामर्थ्यादेव ज्ञेयम्, 'दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् इत्यादिवाक्येभ्यस्तथा निश्चयात् ॥ ३८ ॥ एवं सूनोर्बालकस्य तनौ शरीरे, तत्रापि विदारिते आस्ये मुखे अल्पे एव एतद्विचित्रं विश्वं वीक्ष्य तत्र च कचिद्देशे सहात्मानमात्मना यशोदया कृष्णेन च सहितं व्रजं च सह एकदैव वीक्ष्य शङ्कामवापेत्यन्वयः । विचित्रतामेवाह—जीवेति । जीवो भोक्ता, कालो गुणक्षोभकः स्वभावश्च परिणामहेतुः, कर्म च जन्महेतुः, आशयश्च कर्मवासनाप्रवृत्तिहेतुः, एतैर्लिङ्गानां चराचरशरीराणां भेदो यस्मिन्तत् ॥ ३९ ॥ शङ्कामेवाह—किमिति । यन्मया दृष्टं तदेतत् किं स्वप्नः ? स्वप्नदृष्टपदार्थानां शीघ्रं विलोपो भवति, प्रकृते च तद्वैलक्षण्यान्नायं स्वप्नः' इति निश्चित्य पक्षान्तरमाह उत देवमायेति 'देवस्य हरेर्मम मोहने प्रयोजनाभावादन्येषामदर्शनाद्वाप्यदर्शनाच्चायमपि पक्षो न युक्त' इति निश्चित्य पक्षान्तरमाह—किञ्चेति । 'बत' इति खेदे । मदीय एव कश्चिद् बुद्धिमोहो विपर्यासः दर्पणे मुखदर्शनवत् । एवं तर्ह्ययं कृष्णोऽपि कथमन्तः प्रतीयते । जगदपि कथमन्तर्बहिश्चैकरूपेण प्रतीयते ? तथा सति बिम्बप्रतिबिम्बयोरिव परस्परं वैपरीत्येनैव प्रतीतिः स्यात्, अतोऽयमपि पक्षो न युक्तः' इति निश्चित्य पक्षान्तरं तर्कयति अथो इति । अथवा अमुष्य ममार्भकस्यैव यः कश्चनौत्पत्तिकः स्वाभाविकः आत्मयोगः स्वीयमैश्वर्यम् ॥ ४० ॥

अन्वितार्थप्रकाशिका

सा तत्रेति । सा यशोदा तत्र विवृते मुखे जगत् जङ्गमं स्थास्नु स्थावरं खम् अन्तरिक्षलोकं दिशः साद्रिद्वीपाब्धि भूगोलं पर्वतद्वीपसमुद्रसहितं भूलोकं वायुः प्रवहः अग्निर्वैद्युतः इन्दुः चन्द्रः तारकाश्च तत्सहितं विश्वं ददृशे । तद्भार्षः ॥ ३७ ॥ ज्योतिरिति ॥ ज्योतिश्चक्रं स्वर्लोकं जलं तेजोऽग्निः नभस्वान् वायुः वियत् आकाशः वैकारिकाणि सात्त्विकाहङ्कारकार्यभूता इन्द्रियाभिमानिन्यो देवताः इन्द्रियाणि राजसाहङ्कारकार्याणि मन इति वैकारिकेष्वन्तर्भूतमपि देवतावैलक्षण्यज्ञापनाय पृथगुक्तम् । मात्राः तामसाहङ्कारकार्यभूताः शब्दस्पर्शरूपरसगन्धाः त्रयो गुणाः एतान्यपि ददर्श । अत्रातीन्द्रियाणामपि दर्शनं भगवद्दत्तसामर्थ्यादेव ज्ञेयम् ॥ ३८ ॥ एतदिति ॥ एवं सूनोर्बालस्य तनौ शरीरे तत्रापि विदारिते आस्ये मुखे अल्प एव जीवो भोक्ता कालो गुणक्षोभकः स्वभावश्च परिणामहेतुः कर्म च जन्महेतुः आशयश्च कर्मवासनाप्रवृत्तिहेतुः एतैर्लिङ्गानां चराचरशरीराणां भेदो यस्मिंस्तत् एतद्विचित्रं विश्वं वीक्ष्य तत्र कस्मिंश्चिद्देशे सहात्मानमात्मना यशोदया कृष्णेन च सहितं व्रजं च सह एकदैव वीक्ष्य शङ्कामवाप ॥ ३९ ॥ शङ्कामेवाह—किमिति ॥ यन्मया दृष्टं तदेतत् किं स्वप्नः परितो विलोक्य नायं स्वप्न इत्याह । उत अथवा देवस्य हरेर्माया । तर्हि कुतोऽन्ये न पश्यन्ति तत्राह । किंवा अथवा बत खेदे मदीय एव कश्चिद्बुद्धिमोहो विपर्यासः दर्पणे मुखमिव पश्यामि । तर्हि कृष्णोऽपि कथमन्तः प्रतीयते तत्राह । अथो अथवा अमुष्य ममार्भकस्यैव "नारायणसमो गुणैः" इति गर्गोक्तिगम्यो यः कश्चनौत्पत्तिकः स्वाभाविकः आत्मयोगः स्वीयमैश्वर्यम् ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र मुखे विश्वं ददृशे ददर्श तदाह जगत् जंगमं स्थाष्णु स्थावरं खं अंतरिक्षलोकं अद्र्यादिभिः सहितं भूगोलं वाय्वादिसहितं ज्योतिश्चक्रमित्युत्तरेण संबंधः । वायुः प्रवहः अग्निर्वैद्युतः ॥ ३७ ॥ नभस्वान् आवहो वायुः अन्ये समीरणाश्च वियद् व्योम वैकारिकाणि सत्त्वकार्याणि देवाः मन इति च इंद्रियाणि च रजःकार्याणि मात्राः तमःकार्यभूताः शब्दादयश्च यद्यपि मनसो वैकारिकशब्देन ग्रहणं जातं तथापि देववैलक्षण्यात्पुनरुक्तं ॥ ३८ ॥ इत्थमेतद्विचित्रं नानाविधं विश्वं सह एकदैव पुत्रस्य तनौ विदारितास्ये प्रसारितमुखे वीक्ष्य शंकामवाप तत् कथंभूतं जीवः क्षेत्रज्ञसमूहश्च कालो विश्वभक्षकश्च स्वभावः परिणामहेतुश्च कर्मजन्महेतुश्च आशयः क्षेत्रज्ञानां वासनाश्च एतेषां लिंगभेदः स्वरूपभेदाः यस्मिंस्तत् तत्र सहात्मानं स्वदेहसहितं व्रजं च वीक्ष्येति संबंधः ॥ ३९ ॥ शंकामाह किमिति एतद् मया दृष्टं स्वप्नमस्ति किं उत वा देवस्य हरेर्माया किं बुद्धिमोहो मतिवैचित्र्यम् । अथो अथवा ममाऽमुष्याऽर्भकस्य पुत्रस्यैव औत्पत्तिकः स्वभावसिद्धो यः कश्चन आत्मयोगः अचिंत्यं स्वसामर्थ्यमस्ति किं वा ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सेति ॥ सा सुतमुखेऽन्तः समीक्षमाणा यशोदा, तत्र स्वसुतस्य विवृते मुखे, विश्वं ददृशे । तदेव प्रपञ्चयति । जगज्जङ्गमं, स्थावरं च, खमन्तरिक्षलोकः, दिशः आशाः, अद्रयः पर्वताश्च द्वीपा जम्ब्वादयोऽन्तरीपाश्च अब्धयः क्षारोदकादयश्च तैः सह वर्त्तमानं साद्रिद्वीपाब्धि, भूगोलं भूर्लोकं, वायुः प्रवहाख्यः पवनश्च अग्निर्वैद्युतो वह्निश्च इन्दुश्चन्द्रश्च तारकाग्रहनक्षत्रादिकास्ताराश्च तत्सहितं सवाय्वग्नीन्दुतारकम् ॥ ३७ ॥ ज्योतिश्चक्रमिति ॥ ज्योतिश्चक्रं ज्योतिर्मण्डलं, जलं बाह्याभ्यन्तरवर्त्ति तोयं च, तेजः बाह्यमाभ्यन्तरं चेति द्विविधम् । नभस्वान् बाह्याभ्यन्तरवर्त्तित्वेन द्विविधो वायुः, वियद्बाह्यं सर्वगतं चेति द्विविधमाकाशं, एवकारोऽनुक्ततत्त्वग्रहणार्थः । विवराणि चेति पाठे विवराण्यतलादीनि च, वैकारिकाणि सात्त्विकाहंकारकार्याणि, इन्द्रियाणि श्रोत्रादीनि दशापीन्द्रियाणि, मनः, मात्रास्तामसाः शब्दादितन्मात्राः पञ्च, त्रयः गुणाः सत्त्वरजस्तमांसि ॥ ३८ ॥ एतदिति ॥ एवं जीवाः क्षेत्रज्ञाश्च कालः सर्वोत्पत्तिनिमित्तगुणक्षोभकोऽनेहाश्च स्वभावः परिणामहेतुश्च कर्म जन्महेतुश्च आशयो वासना च तैर्लिङ्गानां शरीराणां भेदा यस्मिंस्तत्, एतत् विचित्रं विश्वं, सहात्मानं यशोदया श्रीकृष्णेन च सहितं, व्रजं च, सूनोः स्वसुतस्य कृष्णस्य, तनौ देहे, तत्रापि विदारितास्ये व्यात्ते मुखे, सह एकदैव, वीक्ष्य, शङ्कां संशयं, अवाप । इति त्रयाणामेकसंबन्धः ॥ ३९ ॥ शङ्कामेव दर्शयति ॥ किमिति ॥ एतदेषः, अस्य शिशोः वदने विश्वदर्शनरूप इत्यर्थः । स्वप्नः, किं । जागरावस्थायां न हि स्वप्नः संभवति इति विमृश्य वितर्कयति । उताथवा, देवमाया किम् । कस्यचिद्देवादेरित्थंभूता माया चेत् घटपटादीनिव सर्वे किं न पश्यन्ति, इति विमृश्य पुनः शङ्कते । बतेति खेदे । मदीयः एव, बुद्धिमोहो बुद्धेर्विपर्यासो भ्रम इति यावत् । किं वा तथा चेत्पुनः पुनर्दर्शनेऽपि यथावत् कथं प्रतीतिरतो न बुद्धिमोहोऽपीति विमृश्य शङ्कते । अथो अथवा, मम मदीयस्य अमुष्य अर्भकस्य एव, यः कश्चनाचिन्त्यः, औत्पत्तिक उत्पत्तिसिद्धः स्वाभाविक इति यावत् । आत्मयोगः आत्मनः परमात्मनः स्वस्य योगः कुक्षिस्थाखिलविश्वत्वादिकल्याणगुणगणयोगः किम् । मत्सूनुगुणमूलकोऽयं मोहो मम स्यात्किमित्यर्थः ॥ ४० ॥

कृष्णप्रिया

जब लालन के मुख को निहारा तब माता ने उसमें चर-अचर संपूर्ण विश्व का दर्शन किया। अब तो अन्तरिक्ष, दिशायें, द्वीप, मेरु प्रभृति पर्वत, लवण आदि सागर सहित एवं—प्रवाह नामक वायु, विद्युत, चन्द्र, तारा, सहित समग्र भूगोल, सम्पूर्ण स्वर्गलोक, जल, अग्नि, वायु, आकाश, अपने अधिष्ठाओं एवं शब्द आदि विषयों के साथ सर्व इन्द्रियाँ, सत्त्व, रज, तम, इन तीनों एवं मन, जीव, काल, स्वभाव, कर्म, वासना आदि से लिङ्गशरीरों का सारा विचित्र विश्व एक ही समय दीख पड़ा। इतना ही नहीं वरन् माता यशोदाजी ने मुख उभारे अपने लालन के श्रीअङ्ग में सारे व्रज के साथ अपने को भी देखा। ऐसे दर्शन से मातृचरणों को तरह तरह के तर्क वितर्क होने लगे ॥ ३७–३९॥ यह क्या मैं स्वप्न देख रही हूँ, अथवा देवताओं की कोई माया है, किं वा मेरी बुद्धि का ही असाधारण मोह है या इस मेरे लालन का ही कोई जन्मजात अपना प्रभाव है ॥ ४० ॥

अथो [1]यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरञ्जसा।
यदाश्रयं येन यतः [2]प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत्पदम् ॥ ४१ ॥
अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती।
गोप्यश्च गोपाः सहगोधनाश्च मे[3] यन्माययेत्थं कुमतिः स मे गतिः ॥ ४२ ॥

[4]श्रीशुक उवाच

इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः। वैष्णवीं व्यतनोन्मायां [5]प्रजास्नेहमयीं विभुः ॥ ४३ ॥
सद्यो [6]नष्टस्मृतिर्गोपी [7]साऽऽरोप्यारोहमात्मजम्। [8]प्रवृद्धस्नेहकलिलहृदयाऽऽसीद्[9] यथा पुरा ॥ ४४ ॥

कर्वमक्षमा

अन्वयः—अथो चेतोमनःकर्मवचोभिः अञ्जसा यथावत् न वितर्कगोचरं यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं तत् पदं प्रणताऽस्मि ॥ ४१ ॥ अहं असौ मम पतिः एष मे सुतः (अहं) व्रजेश्वरस्य अखिलवित्तपा सती च सहगोधनाः गोप्यः च गोपाः मे इत्थं यन्मायया मे कुमतिः सः मे गतिः ॥ ४२ ॥ इत्थं गोपिकायाः विदिततत्त्वायाः विभुः स ईश्वरः प्रजास्नेहमयीं वैष्णवीं मायां व्यतनोत् ॥ ४३ ॥ सा गोपी सद्यः नष्टस्मृतिः आत्मजम् आरोहम् आरोप्य प्रवृद्धस्नेहकलिलहृदया यथा पुरा आसीत् ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चरमं पक्षमाश्रित्यायमीश्वर इति निश्चित्याह। अथो इति। चेतश्चित्तम्। तदादिभिर्न वितर्कगोचरम्। जगद्यदाश्रयं यदधिष्ठानम्। येन करणाधिष्ठात्रा। यतो बुद्धिवृत्त्यभिव्यक्तात्। नन्विदमवितर्क्यं भवतु तत्पदं कीदृगत आह। सुदुर्विभाव्यमिति। इदमत्यंतमचिंत्यमित्यर्थः ॥ ४१ ॥ एवं प्रपंचप्रतीत्योर्भीतं तत्त्वं पुनर्जीवसंसृतिहेतुमायाश्रयत्वेनोभयंत्याह। अहमिति। यशोदानामाऽहमसौ मम पतिः। अमुष्य व्रजेश्वरस्याखिलवित्तपा अहं सती जाया एष कृष्णो मे सुतः गोप्यादयश्च मदीया इतीत्थं कुमतिर्यन्मायया स एष मे शरणमिति ॥ ४२ ॥ वैष्णवीं स्वीयाम् ॥ ४३ ॥ प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्याः सा पुरेवासीत् ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

चरमं पक्षममुष्यायं स्वाभाविक आत्मयोग इति पक्षम्। वितर्कगोचरं विचारविषयः। करणाधिष्ठात्रा इंद्रियाधिपेन। बुद्धिवृत्तावभिव्यक्त प्रतिबिंबितः। तस्माच्चेतनत इत्यर्थः। अस्तु जगदवितर्क्यमित्याशंकते–नन्विति। पद्यते ज्ञायतेऽनेनेति पदं स्वरूपम्। तस्य जगदधिष्ठातुः पदं तत्पदम्। इत्यर्थ इति। अचिंत्यस्य कथनमशक्यमिति भावः। यद्वा–अदो वस्तु यादृशं तादृशं चेतो ब्रह्मात्मनो रुद्रः कर्म इंद्रो वचो गुरु इति स्मरणादेतैर्ब्रह्मादिभिरंजसा साक्षाद्वितर्कगोचरं चिंतनानुमानविषयं न विरुद्धतर्कविषयं वा। तर्हि देवैरपि यदि न ज्ञायते तर्हि शून्यप्रायमेव तदिति चेत्तत्राह–यदाश्रयं यत्पदमाश्रयो यस्य तज्जगदिति शेषः। प्रलये जगद्यदपाश्रयं भवति स्थितौ येन जीवतीत्यर्थः। सृष्टौ यतः प्रतीयत उत्पद्यते "यतो वा इमानि भूतानि

---

१. यथा तत्र वितर्क–विज.। २. प्रमीयते–विज.। ३. ये–विज.। ४ अन्यत्र "श्रीशुक उवाच" पाठो न दृश्यते। ५. पुत्र–श्रीधर. वंशी. विश्व; प्रजा–सुदर्शन. वीर. विज.। ६. नष्टमति–वीर.। ७ आरोप्या–वीर.। ८. कलित–वीर.। ९. याऽभूद् यथा पुरा–विज.।

जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति" इति श्रुतेः। ननु घटादिवत्किमिति न ज्ञायते इति चेत्तत्राह–सुदुर्विभाव्यं सुखेन दुःखेन च विभाव्यं विभावनीयम् 'सुदुः शोभनदुःखयोः' इति यादवः। "नैषा मतिस्तर्केणापनेया प्रोक्तान्येव सुज्ञानाय प्रेष्ठ" इति श्रुतेः। यद्वा–सगुणोपासकैः सुखेन निर्गुणोपासकैश्च दुःखेन विभाव्यम् "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" इति गीतासूक्तेः। अव्यक्तासक्तचेतसां निर्गुणोपासकानामित्यर्थः। एतेन सगुणोपासकैः सुखेनैव विभाव्यत इति तात्पर्यम्। प्रणतास्मीत्यनेन नम्यनंतृभावः। सगुणोपासन एवेति सूचितम् ॥ ४१ ॥ एवं पूर्वोक्तरीत्या प्रपंचप्रीत्या जगत्प्रसिद्ध्या उन्नीतं ज्ञातं तत्त्वं यथार्थस्वरूपं जीवानां संसृतेर्हेतुभूता या मायातस्याश्रयत्वेनाधिष्ठानत्वेनोन्नयंती जानती। अखिलवित्तपा समग्रधनरक्षिणी इत्थं कुमतिर्भेदमतिः। यन्मायया यस्य भगवतश्शक्त्या स एष भगवान् शरणं रक्षितेति 'शरणं गृहरक्षित्रोः' इति विश्वः। हंतहंत स एव सुतस्य दाता स एव रक्षितापि भवेदेव तत्र मम पुनरज्ञायाः किमहंकारममकाराभ्यामिति तौ जिहासंती विष्णुं प्रपद्यमाना प्राह–अहमखिलवित्तपा निखिलव्रतरक्षणाभिमानवतीत्यर्थः। गोपाश्चेति गोपानां गोपीनां सर्वगोधनानाञ्चाहमेव महाराज्ञीत्यभिमानो यथा कुमतिस्तथैव लोकोत्तरस्यास्य व्रजजनप्राणभूतस्य बालस्याहं माता पालयित्री दानधान्यादिभिर्विप्रदेवाद्याराधनैर्नित्यं विष्णुपूजनैश्च सर्वानिष्टेभ्यो रक्षामहमेव सततं कारयंती भवामि ततोऽस्य स्वस्तीत्याद्यभिमानोपि कुमतिः एतावता गोकुलैश्वर्यस्य श्रीविष्णुनैव दत्तत्वात्तत्र यथा ममाभिमानानौचित्यं तथा तेनैव कृपया दत्ते पूतनाद्याविष्टेभ्यः प्रतिक्षणं पाल्यमाने च परमलोकोत्तरेऽस्मिन्सुते लौकिक्या गोपजातेर्निकृष्टाया अत्ययोग्याया मातृत्वरक्षयित्रीत्वाद्यभिमानोनौचित्यत्कुमतिरेवेति विवेकजिघृक्षैव श्रीयशोदायाः क्षणिकीयं न तु विवेकः। यथा महामोहांधानामपि व्यावहारिकलोकानां कादाचित्पारमार्थिकप्रसंगभवा स्त्रीपुत्राद्यासक्तिजिहासेति ज्ञेयमिति विश्वनाथः ॥ ४२ ॥ स कृष्णः विदितं ज्ञातं तत्त्वं यया तस्याम् ॥ ४३ ॥ सा यशोदा। आरोहं कटिभागं पुरेव निजगृहकार्यासक्ता बभूवेत्यर्थः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ चरमतर्कमपि तत्र क्षुत्पिपासाकौमल्यादिदर्शनेनासम्भाव्य पुनर्बहुविधैर्वितर्कैर्निश्चयमप्राप्नुवती सर्वदुर्वितर्कसम्पादकं श्रीनारायणमेव तत्कारणं निश्चित्य तं च सदुर्ज्ञेयं मत्वा केवलं प्रणमति–अथो इति। कर्मशुभमदृष्टमैहिकं च कायिकव्यापाराश्च न वितर्कगोचरं वितर्कागोचरमित्यर्थः। तादृशमपि यदाश्रयं येन साधनेन यतो हेतोरञ्जसा प्रतीयते साक्षादनुभूयते तस्य पदाब्जम् अत एव सुदुर्विभाव्यम् अचिन्त्यकार्यवृन्दस्य कारणत्वेन परमाचिन्त्यस्वरूपशक्तिकम् ॥ ४१ ॥ अथ बाह्यमनुसन्धाय निजस्वाभाविकावस्थितिमेव शरणं गच्छति—यदिति। इत्थं निजबालके उच्चावचदर्शनहेतुः कुमतिर्यस्य दुर्विभाव्यया मायया स एव मम तद्भक्तिविमुखायाः शरणमिति यद्वा, यदित्यादौ तथापीत्याक्षेपलभ्यं तदेतत्सर्वं लवणाकरन्यायेन विस्मयादिद्वारा तस्याः प्रेमैव पुष्णातीति दर्शितम् ॥४२॥ तदेवं तन्निष्ठामेव दृष्ट्वा सोपि परमतुष्टस्तद्वैयग्र्यप्रदर्शनेन व्यग्रश्च संस्तम्भावमेव तस्याविस्तारयामासेत्याह—इत्थमिति। इत्थम् अहं ममासावित्यादिना विदितं निर्द्धारितं तत्त्वं प्रथमपादत्रयोक्तश्रीकृष्णलीलायाथार्थ्यं यया तस्यां गोपिकायां सदा मातृभावेन श्रीकृष्णपालयित्र्यां स तथा प्रार्थितम् ईश्वरः मायां तद्विषयां दयामेव व्यतनोत् पूर्वतोपि विस्तारयामास यथा तद्विरोधिप्रायमीदृशदर्शनादिकं पुनर्न जातमिति तां विशिनष्टि—पुत्रेति प्राचुर्य्ये मयट् प्राचूर्य्यं चान्यदीयस्नेहापेक्षया तस्याऽप्रकृतिसम्बन्धित्वं प्रत्याचष्टे वैष्णवीं विष्णोः स्वरूपशक्तिम् ॥ ४३ ॥ ततश्च सद्यो नष्टा तिरोहिता स्मृतिस्तदनुसन्धानं यस्यास्तथाभूतासीति आरोहमङ्कम् आत्मजं निजोदरादुत्पन्नमिति तद्भावानुवादः नष्टस्मृतित्वमेव दृढयति यथा पुरेति ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अन्तं पक्षमाश्रित्यायमीश्वर एवेति निश्चित्य पुत्रबुद्धिं विहाय भक्त्या प्रणमन्ती परमादृश्याखिलकार्य्यकारणात्मकप्रपञ्चस्यैकत्रैकदैव सहसा साक्षाद्दर्शने श्रीभगवच्छक्तिमिच्छाञ्च मन्वाना तदैश्वर्य्यमाह, यद्वा, बहुविकल्पैर्निश्चयाभावाद्व्याकुला नारायणं प्रणमति–अथो इति, अतो मन आदिभिरपि यथावद्याथार्थ्येन वितर्कगोचरं न भवति। तत्र कर्म्मादृष्टम्, तपस्यादि–कायिकव्यापारो वा। तदपि यदाश्रयं येन साधनेन यतो हेतोरञ्जसा प्रतीयते, तत्त्वतोऽनुभूयते, तस्य पदं पदाब्जम्। कथम्भूतम्? सुदुर्व्विभाव्यमेकस्यैव युगपत् सगुणनिर्गुणत्व दृश्यादृश्यत्वादिना जगतोऽपि सकाशात् परमदुर्व्वितर्क्यमित्यर्थः ॥ ४१ ॥ एवं तज्ज्ञानं तस्मादेवेत्युक्त्वा मोहोऽपि तन्माययैवेति तदैश्वर्य्यमेव द्रढयन्ती मोहनिवृत्तये तमेव शरणं याति—अहमिति। कुमतिरिति तत्त्वविचारेण सम्बन्धस्यात्यन्तानित्यत्वेऽपि तत्तन्मिथ्याभिमानात्, यद्वा, विचारेण स्वप्नादिविकल्पत्रयं निरस्यन्ती चतुर्थमेव पक्षं निश्चित्य तस्याप्यपनोदनाय जगदीशं शरणं याति—अहमिति। आत्मात्मीयसम्यगवबोधेन वितर्कत्रयं परिहृतम्, तथापि स्वबाले इत्थं विश्वरूपाश्रयतयेश्वर विश्वेशोऽयमिति कुमतिर्मे यन्माययाभूत्, स जगदीशो मे पतिः, कुमतिमेतामपनीय पुत्रबुद्धिमेव दृढीकुर्य्यादित्यर्थः ॥ ४२ ॥ कृष्णस्तु तथैव कृतवानित्याह—इत्थमिति। गोपिकायां गोपालिन्यामिति श्रीबादरायणेः प्रेमविशेषोक्तिः, किंवा गां पृथ्वीं पातीति गोपिका राज्ञी तस्यामित्यादरात्, यद्वा, लालन-

पालनादिना विविधनिजक्रीडासुखरक्षिकायामित्यर्थः । यद्वा, तज्जातिस्वभावेन स्नेहविशेषवितानपात्रतोक्ता, अतएव स श्रीकृष्णो मायां विशेषेण विस्तारयामास । कथम्भूताम् ? वैष्णवीं स्वाधीनां निजेच्छानुवर्तिनीमित्यर्थः । विष्णुशब्देन तस्या अपि सद्यः सर्वान्तः प्रवेशसामर्थ्यं सूचितम्, यद्वा, विष्णुसम्बन्धकारिणीम्, न तु तदावरिकां सच्चिदानन्दशक्तिरूपामित्यर्थः । न च केवलं सम्बन्धमात्रकारिणीम्, किन्तु भक्तविशेषसम्पादिनीमपीत्याह—पुत्त्रे पुत्त्रबुद्ध्या यस्तस्मिन् स्नेहस्तन्मयीम्,—मयट् प्राचुर्य्ये स्वरूपे वा । ननु तत्वज्ञाने सति तादृशी भक्तिर्दुर्घटा ? तत्राह—ईश्वरः सर्व्वं कर्त्तुं समर्थ इति । न च सा (भक्तिः) प्रोक्त-तत्त्वज्ञानवदस्थिरेत्याशयेनाह-विभुर्व्यापक इति । तस्य शक्तेरपि तद्वद्व्यापकत्वात्तादृशस्नेहो निरन्तर एवेत्यर्थः । अतएवोक्तम्-व्यतनोदिति । अतएव तद्विघातकं तत्त्वज्ञानोत्पादकविश्वरूपदर्शनादिकं पुनस्तस्याः कदापि नाभूत् । यद्वा, वैष्णवीं निजासम-परिच्छिन्ननित्यसत्यामित्यर्थः, मायां दयाम्, पुत्त्र ! हे श्रीपरीक्षिदिति स्नेहप्रसंगे स्नेहोदयात् । अन्यत् समानम् ॥ ४३ ॥ नष्टा तिरोहिता स्मृतिस्तज्ज्ञानं तदनुसन्धानं वा यस्यास्तथाभूतासीत् । आत्मजं निजोदरादुत्पन्नमिति नष्टस्मृतिलक्षणस्नेहविवृद्धि-हेतुश्च । यदा पुरेति तस्यास्तस्मिन् स्नेहस्य महापराकाष्ठा सूचिता । यद्वा, यथा पुरेत्यस्यारोप्येत्यनेनान्वयः; ततश्च सदा परां काष्ठां प्राप्तस्यापि तत्स्नेहस्य भक्तिरसस्वभावेन प्रतिक्षणं नवनवस्वादुरसविशेषोदयेन प्रवृद्धिरिति वैष्णवसिद्धान्तानुसारेण ज्ञेयम् । तच्च श्रीभागवतामृतोत्तरखण्डे विवृतमेव । एवं श्रीमुखप्रसारणमात्रेणापि विश्वदर्शनं श्रीभगवदिच्छयैवेति निर्द्धार्य्यम्; अन्यथा भोजनपायनादौ बहुशस्तत्प्रसारणे श्रीयशोदादि तद्दर्शनसम्भवात् । तत्र चाधुनात्रेश्वरज्ञानादिना लोकेषु सूचितमिदम् । विश्वरूपदर्शनस्य तत् स्वभावकत्वाद्भक्तविशेषरूपैरैकान्तिभिस्तत्रैव वर्ण्यते, तथा तद्दर्शनाज्जायमानमपि भक्तिविशेषविघातकमीश्वर-ज्ञानं मदनुग्रहेणान्तर्द्ध्यादेव; विशेषतश्चार्त्तिभरोत्पत्त्या भक्तिर्विवर्द्धत एवेति मातृद्वारा च तत्तद्बोधनं साधुवर्गपूज्यया तयैव तदुपपत्तेः; विशेषतश्च विविधाश्चर्य्यमयता दार्ढ्येन पूर्व्ववत् सर्व्वशंका निरासात्तस्याः स्नेहभर सुस्थिरता सम्पादकमेव तद्वृत्तम् । ततश्च स्मृतिरीश्वरज्ञानं तदैव नष्टम्; विश्वरूपदर्शनस्मृतिश्च पूर्व्ववदनुवर्त्तता नाम, न तत्र क्षतिः, अथवा पुरामातृलालनजसुख-विशेषादिदानींश्च तदार्त्तिप्रदात् स्वापराधजभयान्निजैश्वर्य्यसम्वरणाशक्तेर्नित्योदरस्थं विश्वं तया दृष्टमिति ज्ञेयम्; न तूपादियतया भगवतास्यै दर्शितमिति च । अन्यत् समानम् । एवमेव केचिद्वैष्णवा मन्यन्ते-क्रिया (क्रीडा) शक्तावेव श्रीभगवतो बाल्यलीला, न तु ज्ञानशक्ताविति ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

चेतःषष्ठो बुद्धिपरः मनःकर्मणो व्यापाराः यदाश्रयं यदाधेयं यतः उत्पद्यते येन सर्वं तिष्ठति प्रलीयते यत्रेत्यध्याहारः अतीयत इति पाठे अतीयव्यजत उत्पद्यत इत्यर्थः । दुर्विभाव्यम् अप्रतर्क्यं पदं प्राप्यतत्त्वं प्रणतास्मीत्यर्थः ॥ ४१ ॥ वित्तपास्मी-त्यर्थः । यन्माययेत्थं कुमतिरिति भवामीति शेषः स मे गतिरस्तीत्यर्थः ॥४२॥ प्रजास्नेहमयीम् ॥४३॥ आरोहमङ्कम् ॥४४–४६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

चरमं पक्षमाश्रित्यायमीश्वर इति निश्चित्य तं प्रणमति-अथो इति । चेतसा बुद्ध्या मनःकर्मणा मनोव्यापारेण वचोभिश्चाञ्जसा तत्त्वतः आशु वा यथावद्याथात्म्येनाधो विश्वं न वितर्कगोचरं यदाश्रयं यदाधेयं यत उत् पद्यत इति शेषः । येन जीवति प्रमीयते यस्मिन् लीयते "यतो वा इमानि भूतानि" इति श्रुत्यर्थप्रत्यभिज्ञानसामर्थ्याद्यतो येन प्रमीयते इति परापेक्षितानां जायते जीवति यस्मिन्निति पदानामध्याहारः तत्सुर्द्विभाव्यम् इदमित्थन्तया चेतोमनःकर्मवचोभिः तर्कयितुम-शक्यं पदं पद्यते गम्यते प्राप्यत इति पदं मुमुक्षुप्राप्यं परमात्मस्वरूपं प्रणताऽस्मि न वितर्कगोचरमिति कार्यस्य जगतस्तर्का-गोचरत्वमुक्तं तत्कृत इत्यपेक्षायां कारणस्य तथाविधत्वादित्यभिप्रायेण सुदुर्विभाव्यमित्युक्तं प्रतीयते इति पाठे यतः प्रतीयते व्यज्यते उत्पद्यते इत्यर्थः ॥ ४१ ॥ ममाहम्ममते यत्सङ्कल्पायत्ते स एव मम तन्निवृत्त्युपाय इत्यध्यवस्यति—अहमिति । ममासौ नन्दः पतिः एष मे सुतः सगोपाः सहगोधनाश्च गोप्यो मे मदीयाः अहं सती व्रजेश्वरस्य नन्दस्याखिलवित्तपा समस्तद्रव्यगोप्त्री अस्मीति कुमतिरहं ममताबुद्धिर्यन्मायया यस्य सङ्कल्पेनाभूत् स एव भगवान् मम गतिरहंममतानिवृत्त्युपायः ॥ ४२ ॥ इत्थं गोपिकायां यशोदायां विदितं तत्त्वं बालस्य याथात्म्यं यथा तथाभूतायां सत्यामेव स कृष्णरूप ईश्वरः विभुः विष्णोः स्वस्य सम्बन्धिनीं प्रजास्नेहमयीं पुत्रस्नेहप्राचुर्यावहां मायां व्यतनोत् विस्तारितवान् ॥ ४३ ॥ सद्यस्तदैव नष्टा स्मृतिः पुत्रे परमात्मत्व स्मृतिर्यस्याः सा गोपी पुत्रमारोहमङ्कमारोप्य पूर्ववत्प्रवृद्धेन पुत्रस्नेहेन कलिलं व्याप्तं हृदयं यस्यास्तथाभूता बभूव ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

"ब्रह्मविदाप्नोति परम्" इति उपनिषद्वेद्यं ब्रह्मैव मम पुत्रतां प्राप्तमिति यस्मात्तस्मान्मया बोद्धुमशक्यमिति न दूषणं किन्तु ब्रह्मादिभिः सुष्ठु दुर्विभाव्यमित्याशयेनाह-अद इति । अदो वस्तु यथा यादृशं तत्तादृशमिति चेतोमनःकर्मवचोभिः चेतो ब्रह्मा मनो रुद्रः कर्म पुरुहूतनामा देवः इन्द्रो वा वचो वह्निः बृहस्पतिर्वा उत वा अञ्जसा साक्षादेतैः कृतविविधतर्कगोचरं

विरचितनानानुमानविषयं न भवति विरुद्धतर्कगोचरं न भवतीति किमिति योज्यम्। नन्विदं तर्हि शून्यप्रायमिति तत्राह— यदाश्रयमिति। यत् पदं आश्रयो यस्य तद्यदाश्रयं जगदिति शेषः। प्रलये ब्रह्माश्रयत्वेन तिष्ठतीत्यनेन जगद्ब्रह्मणोर्भेदः सिद्धः स्थितिकाले च येन जीवनं सिध्यति सृष्टिकाले च यतः प्रतीयतेऽभिव्यज्यते उत्पद्यत इत्यर्थः। "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति" इति श्रुतिः। अनेन जन्मादिकारणत्वं स्वलक्षणमित्युक्तं भवति। ननु, घटादिवत् किमिति न ज्ञायत इति तत्राह सुदुर्विभाव्यमिति। सुखेन दुःखेन च विभाव्यं विशिष्टत्वेन विरुद्धत्वे च ज्ञेयम् "सुदुःशोभनदुःखयोः" इति यादवः। "नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठा" इति श्रुतेः। द्वैतवादिभिः सम्यग् अद्वैतवादिभिः असम्यक् ब्रह्म ज्ञेयं तत्र द्वैतवादिनः सम्यग्ज्ञानेन स्वयोग्या मुक्तिः अद्वैतवादिनः प्रमाणविरुद्धज्ञानेन तम इति विवेकः "अन्यमीशस्य महिमानमिति वीतशोकः, तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो जनाः" इत्यादिश्रुतेः। त्वम् भयविधेषु कति तत्राह—प्रणतेति। पद्यत इति पदं स्वरूपं नस्यनेत्भावस्य भेदनिष्ठत्वेन द्वैतनिष्ठैवाहमित्यर्थः ॥ ४१ ॥ नित्यपरतन्त्रं आत्मनि स्वातन्त्र्यबुद्धिरभेदबुद्धिरित्याशयेनाह—अहमिति। व्रजेश्वरस्य नन्दस्याखिलवित्तानि पाति रक्षतीति अखिलवित्तानि पाति रक्षतीति अखिलवित्तपा यस्य हरेर्मायया इच्छया इत्थं कुमतिरात्मनस्स्वातन्त्र्यबुद्धिरहमभूवम् अतः स हरिर्मे गतिः मत्स्वातन्त्र्यबुद्धिमपनुद्य स्वस्वातन्त्र्यज्ञापकत्वेनाश्रयोस्त्वित्यन्वयः ॥ ४२ ॥ प्रजास्नेहमयीं पुत्रस्नेहमयीं पुत्रस्नेहरूपाम् ॥ ४३ ॥ प्रवृद्धस्नेहकलिलहृदयाऽभूदिति शेषः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ चरमतर्कमपि तत्र क्षुत्पिपासाकोमलतादिदर्शनेनासम्भाव्यनिश्चयमप्राप्नुवती परमाचिन्त्यशक्तिं श्रीनारायणमेव तत्कारणं निश्चिन्त्य तच्च सुदुर्ज्ञेयं मत्वा केवलं प्रणमति—अथो इति। तस्य पदं पदाब्जम् अथ बाह्यमनुसन्धाय निजं भावं द्रढयन्त्याह—अहमिति। पादत्रयेण पुनस्तत्सुखान्तःस्थितमनुसन्धायाह ॥ ४१ ॥ यदिति कुमतिः निजबालके विश्वरूपदर्शनरूपा ॥ ४२ ॥ तत्त्वम् अहम्ममेति पादत्रयोक्तलीलायाथार्थ्यं स तया प्रार्थित ईश्वरः मायां तद्विषयां दयां पूर्वतोऽपि विस्तारयामास वैष्णवीं विष्णोः स्वरूपशक्तिं तदेवमहो परमभाग्यवती श्रीयशोदेत्याह ॥ ४३-४४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ स्ववचः सत्यं कर्तुं सचराचरं सर्वमेव जगज्जठरे दर्शयन् 'अहं भक्षको न भवामि, किन्तु सर्वाधार एव' इति स्वविग्रहस्य परिच्छिन्नत्वेऽपि व्यापकत्वं बोधयितुं मातरं विस्मापयति—अहं ममासौ पतिरित्यादि। अहं व्रजेश्वरस्याखिलवित्तपा असपत्नीका सती नित्या। असौ व्रजेश्वरो मम पतिः सन् एष मे सुतः; सविशेष्यलिङ्गतया सच्छब्दस्य लिङ्गव्यत्ययः। एव गोपाश्च गोपाश्च सह गोधना इति गोधनानि च इत्थं समे समानाः सर्वेऽलौकिकत्वात् समः सर्वनाम। मायया मायाकृता इति यत्तत् कुमतिः। कीदृशी? जगतिर्न विद्यते गतिर्यस्याः, नित्यसिद्धेष्वेतेषु यन्मायाकृतमिति बुद्धिः, सा कुबुद्धिरेव, यत एतत् सर्वं यस्य जठरे दृश्यते, तेन सदेवेदम्। अथवा इदं सर्वं य मायया यस्यास्यैव श्रीकृष्णस्य मायया स्वाभाविक्या प्रकाशिकया मायया निजयोगशक्तया प्राकृतसर्गवन्न, तर्हि वैकुण्ठवद्ब्रह्माण्डबहिरेवास्तु कथंपृथिव्यामित्याह—इत्थमनेन प्रकारेणैव कौ पृथिव्यां मतिर्मननं गतिर्वैकुण्ठश्च समे तुल्य इत्यर्थः। यद्वा, यन्मायया यस्य स्वाभाविकयेत्यादि पूर्ववत् स मे गतिः, समे श्रवणञ्च। कीदृशः? इत्थं कुमतिः कौ पृथिवीविषये मतिर्यस्य पृथिवीभारहारित्वात् ॥ ४३-४७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अहं ममासाविति। अहं व्रजेश्वरस्याखिलवित्तपा सती उत्कृष्टा, असौ व्रजेश्वरो मम पतिः अयं मे सुत इत्यादि यस्य माययेत्थमिति कुमतिः, नेयं माया, दयैवेयम्, अतो मे सा कुमतिर्मा भूदित्याक्षेप्यम्। इत्यत्र स मे गतिर्यस्य माययेति कथ्यते, स एव मे श्रवणम्, यथा माययेयमिति कुमतिर्न स्यात्, तथा स प्रसीदत्विति भावः ॥ ४३-५२ ॥

इत्यष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चतुर्थं तर्कमपि तत्र स्वपुत्रे क्षुत्पिपासामौग्ध्यचाञ्चल्यादिदर्शनेनासम्भाव्यस्वबुद्ध्या कमपि निश्चयं कर्तुमशक्नुवती तर्कागोचरस्यापि वस्तुनो वस्तुतः कारणं भगवानेवेति सामान्यतो निश्चिन्वती तत्पदाब्जं सुतस्वस्तिकामा प्रणमति अथो इति। यथावत् याथार्थ्येन नैव वितर्कस्य गोचरं कीदृशमार्षं दृश्यमानमाश्चर्यमिदं यदाश्रयं योऽस्याधिष्ठानं यतः यश्चास्योत्पत्तिहेतुः येन प्रतीयते यश्चास्य प्रतीतिहेतुः तत्पदन्तस्य भगवतः पदं चरणारविन्दं चेतश्चित्तं तदादिभिः प्रणतास्मि सुदुर्विभाव्यं मादृशीनां ध्यातुमशक्यमतः केवलं प्रणमामि स एवास्य मत्सुतस्य सर्वानिष्टं प्रशमयत्विति भावः ॥ ३१ ॥

हन्त हन्त स एव सुतस्यास्य दाता स एव रक्षितापि भवेदेव तत्र मम पुनरज्ञाया: किमहङ्कारममकाराभ्यामिति तौ जिहासती श्रीविष्णुं प्रपद्यमाना प्राह—अहमिति। अखिलवित्तपा निखिलधनरक्षणाभिमानवतीत्यर्थ:। गोप्यश्चेति गोपीनां गोपानां सर्वगोधनानां चाहमेव स्वामिनी महाराज्ञीत्यभिमानो यथा कुमतिस्तथैव लोकोत्तरस्यास्य सर्वव्रजजनप्राणभूतस्य बालकस्याहं माता अहमेव पालयित्री दानध्यानादिभिर्विप्रदेवाद्याराधनैर्नित्यं विष्णुपूजनैश्च सर्वानिष्टेभ्यो रक्षामहमेव सततं कारयन्ती भवामि ततोऽस्य स्वस्तीत्यभिमानोऽपि कुमति: एतावतो गोकुलैश्वर्यस्य श्रीविष्णुनैव दत्तत्वात्तत्र यथाममाभिमानानौचित्यं तथैव तेनैव कृपया दत्ते पूतनाद्यरिष्टेभ्य: प्रतिक्षणं पाल्यमाने च परमलोकोत्तरेऽस्मिन् सुते लौकिक्या गोपजाते निकृष्टाया अत्ययोग्याया मम मातृत्वरक्षयित्रीत्वाद्यभिमानोऽप्यनौचित्यात् कुमतिरेवेति विवेकजिघृक्षैव श्रीयशोदाया: क्षणिकीयं न तु विवेक: यथा महामोहान्धानामपि व्यावहारिकलोकानां कादाचित्कपारमार्थिकप्रसङ्गभवा स्त्रीपुत्राद्यासक्तिजिहासेति ज्ञेयम् ॥ ४२ ॥ इत्थमनेन प्रकारेण विदिततत्त्वं ममत्वजिहासा यथा तस्यां यशोदायां सत्यां तर्हि का मां लालयिष्यती प्रतिक्षणं का पालयिष्यतीत्यत: पुत्रस्नेहमयीं स्वरूपे मयट् पुत्रस्नेहरूपं प्रेमविशेषं व्यतनोदित्यर्थ:। मोहनसाधर्म्यान्मायां तेन च प्रेमा प्रेमान्धाऽज्ञका रेत्यर्थ: ॥ ४३ ॥ नष्टस्मृतिरिति यथा स्वप्नदृष्टोऽर्थ: कश्चित् कश्चिद्विस्मर्यते तथैव सद्य एव सा विश्वदर्शनादिकं विसस्मारेत्यर्थ:। प्रवृद्धेन सङ्कोचकारणाद्यैश्वर्यज्ञानादसङ्कुचितेन प्रत्युत प्रबलीभूतेन स्नेहेन कलिलं व्याप्तं हृदयं यस्या: सा ॥ ४४ ॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

एवं भगवदिच्छयैव भगवन्तं ज्ञात्वा तदिच्छामन्तरेण दुर्ज्ञेयत्वं कैमुतिकन्यायेन प्रतिपादयन् तं प्रणमति—अथो इति। यदाश्रयम् चेत् आदिभि: यथावत् याथात्म्येन वितर्कगोचरं न भवति अथो अत: तत्तु दुर्विभाव्यम् सुतरां दुर्ज्ञेयम्। ननु, दुर्ज्ञेयं भवत्या कुतो ज्ञायते? अत आह—येन यत: प्रतीयते इति येनैव अनुग्राहकेण यत्प्रतीयते यतोऽतोऽसौ साक्षात्स्वगृहे वर्तमानं तत्पदं प्रणतास्मीत्यन्वय: ॥ ४१ ॥ एतावन्तं कालं यदिच्छयैवाहं पुत्रतया तमवेदिषं न परब्रह्मतयेति द्योतयितुं देहे अहन्ता पतिपुत्रादौ ममता यस्य मायया भवति स मे गतिर्भवत्वित्याह—अहमिति। व्रजेश्वरस्य नन्दस्य अखिलवित्तपा सती जायाऽहं मम पति: एष: कृष्णो मे सुत: पोष्य: सहगोधना: गोपाश्च मे मदीया: इतीत्थं कुमतिर्यन्मायया स एव कृष्णो मे गति: शरणं भवतु ॥ ४२ ॥ वैष्णवीं स्वीयां मायां सङ्कल्परूपां व्यतनोत् विस्तारितवान् ॥ ४३ ॥ सद्यो नष्टा स्मृति: सुते पुरुषोत्तमस्मरणं यस्या सा प्रवृद्धस्नेहेन कलिलं व्याप्तं हृदयं यस्या: सा यथा पुरा तथा आसीत् परब्रह्मण्यात्मजभावव्यवसायवती आसीदित्यर्थ: ॥ ४४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

सोऽयं स्वयं भगवान्ममार्भको नारायणाख्य: स्वविलासेनैव तं धर्मं दर्शयतीत्याह अथो यथावदिति। चेतश्चित्तं स्वमाश्रयदर्शनं यथावच्चित्तादिभिर्वितर्कगोचरं न भवति यदाश्रयं यदधिष्ठानकं यतश्चेति योऽस्य प्राकट्ये हेतु: येनेति योऽस्य प्रतीति हेतुस्तत्पदं वस्तु प्रणतास्मि मदर्भकविलासमूर्त्तिं नारायणं तद्धर्मे शङ्कानिरासाय चित्तादिभि: प्रणमामीत्यर्थ:। कीदृशं तत्पदं सुदुर्विभाव्यं ध्यातुमशक्यमित्यर्थ: ॥ ४१ ॥ तदद्भुतदर्शनस्य स्वप्नादिहेतुकत्वं निराकरोत्यहमिति त्रिपाद्या व्रजेश्वरस्य नन्दराजस्याखिलवित्तपा सर्वसम्पद्रक्षिका गृहेश्वरी सती सर्वार्थकोविदा पतिव्रता चाहं यशोदाभिधाना भवामि असौ व्रजेश्वरो मम पति: एष कृष्णो मे सुत आत्मज: गोप्यादयश्च मत्प्रजा इति निश्चितप्रतीतिर्न स्वप्नादेरवकाश इत्यर्थ:। स्वप्नादिकल्पिता तद्बुद्धि: पुनर्माभूदिति पुनर्नारायणमाश्रयति यन्माययेत्येकेन पादेन। इत्थं किं स्वप्न इत्याद्युक्ताशङ्कारूपा कुमतिरशोभना मति: कु: पृथिव्यामशोभते इति हणचन्द्र: यन्मायया यदिच्छयाभूत् आत्ममायातरिच्छास्यादिति शब्दमहोदधि: स मे गतिस्तन्निहरणे समाश्रयोऽस्त्वित्यर्थ:। स्वयं भगवान् कृष्णो मेऽर्भको लालनीय: शिक्षणीयश्च तद्विलासे नारायणस्तु पूज्य इति मे भक्तिपद्धतिर्या गर्गेणाप्युपदिश्यते गोपायचेति ॥ ४२ ॥ उपालम्भाकाङ्क्षया मृदं भक्षयित्वा तद्भक्षणापराधेन सम्भावितं ताडनमप्यद्भुतदर्शनेनापनीतं अथाद्भुतरसनिमग्ना प्रसूर्मम लालने शिथिला भवेत् इति विचिन्त्य तदद्भुतदर्शनं पुनर्विशुद्धेन पुत्रभावेन प्रेम्णा व्यस्मारयदित्याहेत्थमिति उक्तप्रकारेण विदितमनुभूतं तत्त्वं पुत्रस्वरूपं यथा तथाभूतायां गोपिकायां राज्यां स्वजनन्यां सत्यां स ईश्वरस्तदर्भक: पुत्रस्नेहमयीं मायां कृपां व्यतनोत् वैष्णवीं स्वकीयां न च मायां त्रिगुणामिति शक्यं वक्तुं तस्यास्तद्विषयकपुत्रस्नेहमयत्वाभावात् न च पुत्रस्नेहो भ्रान्तिरचितत्वान्यायिक: तथात्वे हरेस्तद्वश्यत्वासम्भवात् ॥ ४३ ॥ तादृशकृपाविस्तारस्य फलमाह सद्य इति। नष्टा स्मृति: शङ्कानिमित्तस्वप्नादिकल्पनानुसन्धिर्यस्या: सा प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्यास्तादृशी पुरेवासीत् ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वपुत्रं नन्दभार्ये कथं न त्वं व्यज्ञासीरित्यतो न त्रिनेत्रादय एनं सम्यग्विदुरहं कियन्मात्रमिति मर्म न प्रकाश्यमित्यपदेशेन तान्यप्यज्ञान्कथयित्वाऽन्तत: किं त्वं करोषीत्यत इयत्त्वेश्येव सीमा सेवाया इति तदावेदयति ॥ अद इति। कञ्जजस्त्वमे-

कपदेनैव निरस्त इति न तदुक्तिरत्र। अदो रूपं यथा तथा चेतो रुद्रः पुष्करश्च वाचो वाणीवन्हिबृहस्पतयो वितर्कगोचरं लिङ्गमशिष्यमित्युक्तेर्गोचरसञ्चरेत्यादिना नित्यपुल्लिङ्गतयोक्तोऽपि गोचरशब्दो नपुंसकः। तर्कस्यानुमितेर्गोचरो विषयो विरुद्धं पृथग्भूतं तर्कगोचरादिति तत्तथेति। गोर्ज्ञानस्य चरश्चरणं यस्य तत्तर्कस्य गोचरं तन्नेति वितर्कगोचरं। एवं चेत्र गोचरतद्धितेति टच्। सप्तवटिकाभोजनत्रिलोकनाथ इत्यादिवद्योग्यतया तर्कपदार्थस्य गोपदार्थेनान्वयः। विस्तरस्तु निर्गतं मनसो वाचो यदि तत्स्यादिति गोचरमित्यनुव्याख्यासुधातोऽनुसन्धेयः। पार्थसारथिरपि शास्त्रदीपिकायामवादीत्। अवगतसाधनमपि कर्मागोचरं सदिति। विशिष्टा अशुष्कास्तर्कास्तेषां गोचरं न साकल्येन वितर्कास्तद्भिन्ना वेदाद्यास्तेषां गोचरं साकल्येनेति च ज्ञेयं। नेन्द्रियाणि नानुमानमित्यादेः। न शून्यसङ्कल्पं तदित्याह॥ यदाश्रयमिति। अद इत्यत्राप्यन्वेति। अदो जगद्यदाश्रयं यदाश्रयो यस्य तद्येन जीवति यतः प्रतीयते उत्पत्तिमत्त्वेन ज्ञायते। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीत्यादेः। यतो येनेति वदन्निमां प्रतीकतया जग्राहेति ज्ञेयं। एतादृशं सुविभाव्यं दयायां दुर्विभाव्यं साकल्येन वा करुणायां वा तत्पद्यत इति पदं मुख्यप्राप्यं ब्रह्म प्रणताऽस्मि। तत् तत्त्वाद्वा चेतो वा धाता वृत्तिभेदाच्चेतोमनःकर्मवचोभिः। अञ्जसा वितर्कगोचरं नेत्यपि बाह्यार्थो ज्ञेयः। अदो यथा प्राक् न तथा चेतोमनःकर्मवचोभिरञ्जसा दुर्विभाव्यमित्यन्वयः। वितर्कगोचरं वेदैकसमधिगम्यपदं प्रणताऽस्मीत्यन्वयने द्वितीयैकवचनं गोचरमितीति न क्लेश इत्यपि वदन्ति॥ ४१ ॥ यन्मायया यस्य हरेरिच्छयैवास्मत्कर्मानुसृत्ये दुर्बुद्ध्याऽहंकर्तृत्वाभिमान आत्मन्यसौ मम पतिर्भर्तैष मे सुतो व्रजेश्वरस्य नन्दस्याखिलानि वित्तानि पाति रक्षतीति सा सती पतिव्रता साध्वी भार्या वा गोप्यः सहगोधना गोपाश्च ये समे सर्वे मदीया इत्थं कुमतिर्ममाभवत्। श्रीहरिरेव मम गतिः। एतन्मतिमतिगमय्य सद्गतिदातेति तात्पर्यं॥ ४२ ॥ इत्थं विदिततत्त्वायां गोपिकायां मातरीश्वरः स प्रजास्नेहमयीं पुत्रस्नेहरूपिणीं वैष्णवीं मायां व्यतनोत्। स्वकीयामित्युक्तौ भागवतीति स्फुटं नावगता भवतीति वैष्णवीमित्युक्तिः। अनेन च विष्णुत्वं स्पष्टयामासेति ध्वनिः॥ ४३ ॥ सद्यो नष्टा स्मृतिः कुमतिः स मे गतिरित्याद्या दर्शनोपयोगस्मृतिः। तत्कथमित्यतः कथयति॥ स्वारोप्येति। प्रवृद्धो यः स्नेहस्तेन कलिलं व्याप्तं हृदयं यस्याः सा। सा पुरा यथा तथाऽभूदिति शेषः॥ ४४ ॥

श्रीसुबोधिनी

एवं भगवद्विभूतिरूपमेतदिति ज्ञात्वा यत् कर्तव्यं तत् कृतवतीत्याहाथो इति, अथो दर्शनानन्तरं यस्माद् भगवतः सकाशादेतत् प्रतीयते यत् सुदुर्विभाव्यं, अतः सोलौकिको भवतीति तत्पदं प्रणतास्मीतिसम्बन्धः, एतद्दर्शनस्यालौकिकत्वं वक्तुं लौकिकबुद्ध्यविषयत्वमाह चेतोमनःकर्मवचोभिः, यथावदवितर्कगोचरं न भवतीति, चित्तं योगादिभावितं, मनःकर्मवचांसि लौकिकानि, अलौकिकबुद्ध्यापि नैतावत् कल्पयितुं शक्यत इदमित्थमिति, अतीन्द्रियाणामपि दृष्टत्वान्मनसो बहिरस्वातन्त्र्याल्लौकिकप्रवणत्वाच्च कायिकमत्राहृष्टं गृहीतमदृष्टवशादप्येतन्निर्णयो वक्तुं न शक्यते लौकिकत्वात्, परस्परव्याघाताच्च न वचसा, आपाततः कल्पनायामपि यथावद् वितर्कगोचरं न भवति, तथैव मायिकमित्यादिपक्षकल्पनायामप्यञ्जसा सामस्त्येन नोपपद्यते, न हि स्वस्यापि तत्र पूर्वापरानुसन्धानसहितस्य प्रतीतिः सम्भवति, तथैव पदार्थानां विचारेपि स्थैर्यं च, अवस्थादेशकालाश्च, किञ्चैतत्, सर्वप्रदर्शकः स्वमाहात्म्यार्थं स्वभिन्ने स्थाने प्रदर्शयति स्वस्मिंश्च पदार्थानां भाररूपत्वान्न स्थापयेत्, स्वावस्थादेशकालानां भ्रमासम्भवात्, येन च चक्षुषा प्रतीयते तच्चक्षुरपि नास्मदीयं, अन्यथा विद्यमानानां ज्योतिश्चक्रस्थपदार्थानामन्यदापि दर्शनं स्यात्, अतः सामर्थ्यं दत्वा स्वत एव स्वस्मिन् विद्यमान जगत् स्वमाहात्म्यज्ञापनार्थं प्रदर्शितवान्, अतो ज्ञातमाहात्म्या तत्पदं प्रणतास्मि "नमो नमः" इत्येतावत् सदुपशिक्षितमितिशास्त्रार्थत्वात्॥ ४१ ॥ प्रणतायाः प्रार्थनामाहाहमिति, सर्वोपि दुर्बुद्धिर्भगवत्प्रणताया गच्छतीति दुर्बुद्धीर्गणयति, आदावहं यशोदेति ममासौ नन्दः पतिरित्येष भगवान् विश्वाधारो मे सुत इयहं पुनर्व्रजेश्वरस्याखिलवित्तपा सती पतिव्रता चेति, नन्दस्य व्रजेश्वरत्वं तत्स्त्रीत्वं च स्वस्य ततस्तस्य धनसम्बन्धस्तद्रक्षकत्वं च स्वस्य तदपि सामस्त्येनोभयत्र, तत्रापि पातिव्रत्यं भगवानपि परपुरुष इति तदभजनं च, अतः "स्त्रीणां पतिरेव विष्णु"रिति च, एता गोप्यो गोपभार्याः स्त्रियोस्मदीयाश्चेति, चकारात् तद्बालकास्तत्सम्बन्धाश्च तथा गोपाः सहगोधनाः स्वपरिकरसहिता गोधनसहिताश्चैते सर्वे मे यन्माययेत्थं कुमतिरहं स मे गतिरस्तु, अहमिति चतुर्विधोध्यासो जातिलिङ्गकुलदेहभेदेन, ममेतिशतप्रकाराः पतिपुत्रधनगोपगोपीगवां षड्विधानामनेकप्रकारत्वात्, इत्थमहं कुबुद्धिर्यन्मायया स आत्मनो जीवरूपस्य ब्रह्मरूपस्य वा कुत्सिता चासौ मतिश्च, तदीया माया हि तेनैव निवर्त्या, बुद्धिप्रकाराः सर्वे मायया एवेति न तैः स्वकार्यसिद्धिः, मायातिरिक्तस्त्वहमेव मायामोहविषयत्वात् पृथक्तया पुनर्मे इतिवचनं मायासम्बन्धव्युदासार्थं सम्बद्धस्यैव गतित्वाभावाय, गतिरत्र प्राप्यस्वरूपं फलं, एवमुपालम्भार्थं प्रवृत्ता शरणं गता जाता॥ ४२ ॥ एवं ज्ञाने जाते भक्तिसुखं न प्राप्स्यतीति भक्त्यानन्दस्य ब्रह्मानन्दापेक्षया महत्त्वाद् भक्तार्थं दैव्या मायया मोहितवानित्याहेत्थमितित्रिभिः, एवं पूर्वोक्तप्रकारेण विदितं तत्त्वं यया तत्त्वज्ञानानन्तरं तस्या मातृत्वाभावाद् गोपिकाया इत्युक्तं, ननु भगवान् ज्ञानं कुतो नाशितवान् तत्राह स इति, स निरोधकर्ता, ननु नाशनीये ज्ञाने किमर्थमुत्पादितवान् वा किमर्थं नाशितवानित्युभयाभिप्रायो ज्ञातव्य इति

चेत् तत्राह **ईश्वर** इति, स हि कर्तुमकर्तुमन्यथाकर्तुं समर्थोन्यथा च करोति, अतो नात्रोपपत्तिरन्वेष्टव्या, **वैष्णवीमाधिदैविकीं** स्नेहसम्बन्धिनी निरोधोपयोगिनी **विशेषेणातनोद्**, विहितस्नेहभावव्युदासार्थमाह **प्रजास्नेहमयीमिति**, यावदात्मीयतया परमस्नेहे रस उत्पद्यते न तावदीश्वरभावेन भयज्ञानस्य स्नेहप्रतिबन्धकत्वादत्र च लौकिकत्वेपि **प्रजा**रूपेण स्नेह उचितो नान्यथेत्यनन्तविधासु **मायासु प्रजास्नेहमयीमेव व्यतनोत**, ननु विरोधिज्ञानस्य जातत्वात् कथं **प्रजाबुद्धिर्भगवति** भविष्यतीत्याशङ्क्याह **विभुरिति**, स हि **सर्वसमर्थः**, एकस्मिन्नेव वस्तुनि कोटिधाबुद्ध्युत्पादनसमर्थः, अन्यथा पूर्वविरुद्धधर्मा उत्तरत्र न भवेयुः ॥ ४३ ॥

प्रक्षिप्ता जालवन् माया तया ज्ञानं विनाशितम् । प्रमाणानां बलं दग्ध्वा मोहयामास गोपिकाम् ॥ १ ॥

मायामोहे ज्ञानं नष्टमित्याह सद्य इति, तदानीमेव **नष्टा स्मृतिर्यस्याः**, अत्र भगवन्मतमनुभवस्मरणयोर्मध्ये न संस्कारोनुभवः स्मृतिमेव जनयति, यथेन्द्रियसंयोग उत्तरोत्तरमनुभवोद्बोधकस्तथा स्मृतिरपि केनचिद् बोध्यते नाश्यते च, निरन्तरनाशोत्पत्ती अप्रामाणिके वेदविरुद्धे, विवेकेन ज्ञानोद्बोधनमाशङ्क्याह **गोपीति**, तत्रापि **सारोहमङ्कस्थानं भगवन्तमारोप्य प्रवृद्धस्नेहकलिलहृदया सती पूर्ववदेवासीत्**, बहिर्व्यापारोपि ज्ञानसाध्य आरोपणात् पूर्ववत् कृतः स्नेहस्त्वान्तरः, ज्ञानानन्तरमान्तरः स्नेहोन्यथा भविष्यतीत्याशङ्क्य **प्रवृद्धस्नेहेन कलिलं हृदयमित्युक्तं**, न हि **विहितस्नेहे हृदये कलिलता भवति, कलिलमत्र** पङ्किलमिव मोहसहितः स्नेहस्तादृशमेव **हृदयं** जातमिति कालान्तरेपि न कलिलनिवृत्तिः, पूर्वावस्थापरित्यागे **मायया** भक्तत्वमेव स्यात् **न तु निरोध** इति **यथा पुरे**त्युक्तम् ॥ ४४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

चेतो मनःकर्मेत्यत्र, **कायिकमत्रे**ति । उत्तमकायहेतुप्रारब्धमित्यर्थः । **परस्परव्याघातादिति** । एकदैवैकस्यैव वस्तुनोन्तर्बहिश्च स्थितिकथने तथात्वादित्यर्थः ॥ ४१ ॥ **विचारेपीति** । मायिकानां भ्रमप्रतीतानां वस्तूनां विचारासहत्वम्, अत्र च तद्वैपरीत्यमित्यर्थः । **मायातिरिक्तस्त्वहमिति** विवरणे पुल्लिङ्गनिर्देशो बुद्धिप्रकाराणां दुष्टत्वेन गणनाच्छुद्धजीवमात्राभिप्रायेण कृतः ॥ ४२ ॥ **सद्योनष्टस्मृतिरित्यत्र, अनुभवस्मरणयोरिति** । न संस्कारनियम इत्यर्थः । अन्यथा अनुभवाव्यवहितोत्तरक्षणे यत्र स्मृतिः सा न स्यात् । न चैवंविधा सा नास्तीति वाच्यम् । बाधकाभावात् । न चोपनीतभानमेव तत्रेति वाच्यम् । स्मृतित्वोच्छेदप्रसङ्गात् । संस्कारोपनीतत्वस्य सर्वत्र वक्तुं शक्यत्वात् । न च ज्ञानातिरिक्तस्योपनायकत्वाभावान्न तथेति वाच्यम् । अप्रयोजकत्वात् । क्लृप्तसानाभावेपि ज्ञानजनकत्वस्योपनायकत्वेन संस्कारेपि तत्सत्त्वात् । नच संस्कारजन्यत्वस्य स्मृतित्वात् नैवमिति वाच्यम् । साक्षात्प्रमाणजन्यज्ञानत्वस्यानुभवत्वेन तदतिरिक्तज्ञानत्वस्य स्मृतित्वात् क्लृप्तद्वारातिरिक्तानन्तरितत्वं साक्षात्त्वं विवक्षितम् । अत एव स्मरामीत्यनुव्यवसायस्तदुत्तरक्षणे तमेव विशेषमवलम्ब्य भवति । यथानुभवत्वसामान्येप्यनुमित्यनन्तरमनुमिनोमीत्येव प्रत्ययो न त्वनुभवामीति तथेति भावः । यद्वा । लौकिकवस्तुतत्त्वनिरूपणे नास्माकं प्रवृत्तिरिति लोके स्मृतिः संस्कारजन्यैवास्ताम् न वा, प्रकृते त्वलौकिकप्रदर्शनप्रस्तावेन तत्सम्बन्ध्यग्रेतनमप्यलौकिकमेवेति ज्ञापनाय तथोक्तिः । एतदेवात्रपदेनोच्यते । स्मृतिनाशोक्तेस्तदुत्पत्तिरवश्यं वाच्या । सा चोत्पत्तिक्षणोत्तरक्षण एव नष्टेति ज्ञापनाय सद्यःपदं मूले । अन्यथा नाशस्यानुक्तिसिद्धत्वेन तन्न वदेत् । एवं सति द्वितीयक्षणाधिकरणकनाशस्याप्राप्तत्वात्तदा तन्नाशं इति ज्ञापनाय सद्यो नष्टस्मृतिरित्युक्तम् । तेनेदमप्येकमलौकिकं चरित्रमिति ज्ञाप्यते, आस्तिकैर्द्वितीयक्षणे लोके तन्नाशानङ्गीकारात् । एतेन भक्तिरसानुभावकत्वेन मोहने विलम्बासहिष्णुत्वं भगवत उक्तं भवति । यथा स्वावतारार्थं गर्भसङ्कर्षणं तद्वदिदमिति भावः । यद्यप्येवं संस्कारजन्यत्वं तदजन्यत्वं वा न सिध्यति, तथाप्यत्र कालान्तरेपि स्मृत्यभावस्य वक्तव्यत्वान्नष्टसंस्कारेत्येव वदेत् । स्मृतिनाशस्य स्वतःसम्भवेन तदुक्तिस्तदर्थं मोहोक्तिश्च न स्यात् । एवं सत्यन्यथानुपपत्त्यैव तेनानुभवेन स्मृतिरेवोत्पन्ना सा चोक्तरीत्या नष्टा, संस्कारस्तु न जनित एव, भगवदिच्छाभावादिति मन्तव्यम् । एतदेवाभिसन्धायोक्तमाचार्यैरत्र भगवन्मतमित्यादि । किञ्च । संस्कारवादिना सर्वोत्पत्तिमन्निमित्तकारणत्वेनादृष्टस्यापि स्मृतिहेतोर्वक्तव्यत्व आवश्यकत्वाल्लाघवाच्च तदेवास्तु, कृतं संस्कारेणेत्याशयेनापि तन्निषेध उक्तः । न चानुभवस्याविहितत्वेन तदजनकत्वात्प्राचीनस्य तस्यानुभवं विनाऽजनकत्वात्तस्य च नष्टत्वेन सहकार्यभावात्स्मृतिरेव न स्याद् अनुभवं विनापि वा स्यादिति वाच्यम् । अनुभवतद्ध्वंसयोरन्यतरस्य सहकारित्वात् । त्वयापि सदृशादेरननुगतस्यैवोद्बोधकत्वाङ्गीकारात् । एतदेवोक्तम् **स्मृतिरपी**त्यादिना । **नाश्यते चेति** । स्वसमानाधिकरणस्वसजातीयप्रागभावासहभूतं क्रियत इत्यर्थः । न च प्रतियोग्यभावयोरेकत्राजनकत्वान्नैवमिति वाच्यम् । व्यक्तिभेदेनादोषात् । न चैकजातीयेपि तथेति वाच्यम्, ज्ञानजातीय उभयोरपि जनकत्वात् । नन्वभावत्वेन कारणत्वेन प्रतियोगिनः प्रतिबन्धकत्वापत्त्या नैवं वक्तुं युक्तम्, ज्ञानं प्रत्यभावस्य विषयत्वेन कारणत्वान्न दोषः, संसर्गाभावत्वेन प्रतिबन्धकाभावस्य हेतुत्वेनात्र तथात्वाभावादिति चेत् । अत्राप्यनुभवध्वंसत्वेन कारणत्वान्न दोष इति तुल्यम् । अन्यथानुभवप्रागभावेत्यन्ताभावे च सति स्मृतिप्रसङ्गः । एतच्चानुभवाव्यवहितोत्तरक्षणेपि स्मृतिमङ्गीकृत्योक्तम् । तदनङ्गीकारे तद्ध्वंसस्यैव

सहकारित्वं वाच्यम्, तच्चोक्तरूपेणेति भगवन्मतानुवादग्रन्थो यथाश्रुत एव साधीयान् भवतीति सर्वं सुस्थम्। न चैवं यागजापूर्वासिद्धिः। श्रुत्या यागस्य हेतुत्वमुक्तमिति तदभावस्य तथा कथनायोगात्। प्रतियोग्यभावयोरेकव्यक्तिजनकत्वादर्शनाच्च। ननु घटतदभावयोः स्वसमूहालम्बिज्ञानजनकत्वं दृष्टमिति चेत्। सत्यम्। प्रतियोगितावच्छेदकधर्मस्यैव यत्कार्यजनकतावच्छेदकत्वं तत्कार्यं तद्ध्वंसेन न जन्यत इति हि नियमः। तत्र यागत्वस्यैवोभयजनकतावच्छेदकत्वान्न तथा वक्तुं शक्यम्। प्रकृतेऽनुभवस्याजनकत्वान्नोक्तदूषणापत्तिः। अत एवानुभूतं स्मर्यत इति व्यवहारो भूतेक्तानुशासनादतीतानुभवविषयत्वमेव तदर्थ इति ध्वंसस्यैव हेतुत्वमवगम्यते, अतीतमनुभवविषयत्वं यत्रेत्यर्थो ज्ञेयः। श्रुतिबलाद्यागेन तथा वक्तुं शक्यमिति आरोपणात्पूर्ववत्कृत इति। अङ्कारोपणनिरूपणात् स तथा कृत इति ज्ञाप्यत इत्यर्थः। **मोहसहित** इति। शुद्धं हि जलादिकमन्ययोगेन मलिनं भवति। प्रकृते च प्रवृद्धोपि स्नेहो न निरुपधिः, किन्तु पुत्रत्वोपाधिक इत्याशयेन **कलिलतोक्ते**त्यर्थः। **यद्वा** पूर्वोक्तज्ञाने सति भगवति भक्षणशयनशीतोष्णादिधर्मास्फूर्तिः सहजा। तथा चोभयोर्विरोध इति स्नेहसम्बन्धी यः कलिः कलहो विरुद्धधर्मोपमर्दनमिति यावत् तं लाति स्वीकरोत्येतादृशं हृदयं यस्याः सा तथेत्यर्थः। तेन हृदि ज्ञानतिरोभावपूर्वकः स्नेहभर उक्तो भवति। ज्ञानं निरूप्य तदन्ते स्नेहस्य प्रकृष्टवृद्धिकथनं तत्फलत्वाभिप्रायेण। अन्यस्य तत्त्वेनानुक्तेः। अन्यथा तु ज्ञानस्य निष्फलत्वापत्तिः। अननुसन्धानेपि वैदिकसंस्कारस्यालौकिकातिशयजनकत्ववज्ज्ञानस्यापि स्नेहवृद्धिहेतुत्वमिति भावः। जातिकुलधर्मपरता मातृत्वं च पूर्वावस्था। स्नेहवर्धिन्या मायायास्ततत्वात्स्नेहेन सततमन्यत्यागपूर्वकं भजनमेव भवेदिति विहितभक्तौ प्रवेशः स्यात्, न तु पुष्टिमार्गीयलीलारसानुभव इत्यर्थः॥ ४४॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अथो यथावदित्यत्र चेतोमनःपौनरुक्त्यपरिहाराय चेतःशब्दार्थमाहु**श्चित्त**मित्यादि, तस्य प्रयोजनमाहु**रलौकिके**त्यादि, मनसः कल्पकत्वं दूषयन्ति **मनस** इत्यादि, कर्मशब्दार्थं विवक्षितमाहुः **कायिक**मित्यादि, तदर्थं **टिप्पण्यामाहुरुत्तमे**त्यादि, तथा च मूले "**कर्म**पदेनोत्तमकायहेतुप्रारब्धरूपमदृष्टं गृहीतमित्यर्थः, तस्य कल्पकत्वं दूषयन्ति **सुबोधिन्यामदृष्टवशा**दित्यादि, वचसा कल्पनपक्षं दूषयन्ति **परस्परे**त्यादि, तदर्थं टिप्पण्यामाहु**रेकदेवे**त्यादि, **सुबोधिन्यामनिर्वचनीयकल्पनपक्ष**मुद्भावयन्त्यापातत इत्यादि, तद् दूषयन्त्य**ञ्जसे**त्यादि, तत्रोपपत्तिमाहुर्न **ही**त्यादि, **तत्रे**ति तादृशेनिर्वचनीयकल्पनपक्षे, युक्त्यन्तरमाहु**स्तथैवे**त्यादि, **विचारेपी**त्यस्यार्थं टिप्पण्यामाहु**र्मायिकाना**मित्यादि, **सुबोधिन्यां कालाश्चे**ति सम्भवन्तीति शेषः, सर्वस्य श्लोकस्य निष्कृष्टमर्थमाहुः **किञ्चे**त्यादि, तथा च यथा "स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमा"नितिवदेकमेव जगत् मुखान्तः प्रतीयमानमेव बहिः प्रदर्शयतीति तथेत्यर्थः॥ ४१॥ **अहम्ममे**त्यत्रानेक**प्रकारत्वा**दित्य**नेके प्रकारा** उत्कृष्टा अपकृष्टा वा धर्मा येषु तत्त्वात्, **मायातिरिक्तस्त्वहमेवे**त्येतस्यार्थं टिप्पण्यामाहु**र्मायातिरिक्त** इत्यादि, तथा च मूलेहम्पदेन शरीरविशिष्टपरमितिभावः, **मायासम्बन्धव्युदासस्य** प्रयोजनमाहुः **सम्बद्धस्ये**त्यादि स्वस्य शुद्धत्वान् **मायासम्बन्धयुक्त**स्वरूपस्य विष्ण्वादेस्तथात्वाभावादित्यर्थः, इयं च लीला पद्मपुराणे माघशुक्लाष्टम्यामुक्ता "तेनैवाष्टदशे मासि माघशुक्लाष्टमीदिने मृत्तिकाभक्षणव्याजात् मात्रे विश्वं प्रदर्शित"मिति, एतावान् विशेषः, जम्भालीला तत्र पश्चाच्छ्रीभागवते तु पूर्वम्॥ ४२॥ **इत्थमित्यत्र तत्रे**ति श्रीयशोदायां, **उचित** इति भागवता तत्र मातृभावस्यैवाङ्गीकारात्॥४३॥ **सद्य इत्यत्रानेने**ति नाशप्रतियोगितया स्मृतिकथनेन, **अन्यथे**त्यस्यैव विवरण**मनुभवे**त्यादि, तथा च यदैव माया प्रसारिता तदैव माया प्रसारिता तदैव प्रसारितेपि मुखे तद्दर्शनं न जातमितिभावः, नन्वनुभवस्थितिक्षणे संस्कारोत्पत्तिरनुभवनाशक्षणे च संस्कारस्थित्या तेन स्मृत्युपपत्तिस्तत उत्तरक्षणे स्थितिस्ततो नाश इत्युचितं न त्वनुभवनाशक्षणे स्मृतिनाशः सङ्गच्छत इत्याकाङ्क्षायां **सद्यःस्मृतिनाशोक्तितात्पर्यमाहुरत्रे**त्यादि, नन्वेवं संस्कारमङ्गीकृत्य स्मृत्यङ्गीकारे बहुकालोत्तरं या स्मृतिः सा न स्यादित्यत आहु**रथे**त्यादि, तथा च प्रतिवादिमते यथानुभवस्य त्रिक्षणावस्थायित्वं तज्जन्यसंस्कारस्यैव चिरकालस्थायित्वं सादृश्याद्युद्बोध्यत्वं चरमस्मृतिनाश्यत्वं च तथात्र भगवन्मतेनुभवस्य चिरकालस्थायित्वमिन्द्रियसंयोगस्य च तदुद्बोधकत्वं तथा स्मृतेरपि चिरकालस्थायित्वं सादृश्याद्युद्बोध्यत्वमदृष्टनाश्यत्वं चरमस्मृत्युत्तरकालिकानुभवादिनाश्यत्वं चेति बहुकालोत्तरमपि स्मृतिर्नानुपपन्नेत्यर्थः, एवं च धारावाहिस्थलेप्येकमेव ज्ञानं, तदुपपादितं तृतीयस्कन्धे "तथाविभ्रंशितज्ञाना" इत्यत्र, नन्वत्र "सद्यः"पदोक्त्या द्वितीयक्षणे तन्नाशाद् भगवन्मतेनुद्भूतस्मृत्युत्पत्तिनाशधारैव कुतो नाङ्गीक्रियत इत्यत आहु**र्निरन्तरे**त्यादि, तथा चात्रैव द्वितीयक्षणे नाशोन्यत्र तु **ज्ञानस्य** चिरकालस्थायित्वमेवेत्यर्थः, इदमेव सर्वं कापिलेयसुबोधिनीविरोधाभावाय प्रभवष्टिप्पण्यां व्याकुर्वते**नुभवे**त्यादि, **न संस्कारनियम** इति "संशयोथ विपर्यास" इत्यस्य सुबोधिन्यां संस्काराङ्गीकारादत्र चानङ्गीकारात् तदनियम इत्यर्थः, नियमाङ्गीकारे दोषमाहु**रन्यथे**त्यादि, **अनुभवाव्यवहितोत्तरक्षणकज्ञानस्योपनीतभानत्वे** बाधकमुपपादयन्ति **न चोपे**त्यादि, तस्य सद्यो नष्टत्वेन तत्र "स्मरामी"त्यनुव्यवसायाभावात् **तथे**त्यर्थः, न चेष्टापत्तिः, मूलस्थस्मृतिपदविरोधप्रसङ्गात्, ननु संस्कारस्यातीन्द्रियत्वेन तदुद्भवस्यापि शक्यवचनत्वान्न स्मृतित्वोच्छेद इत्यत आहुः **संस्कारे**त्यादि, संस्कारस्यानुपनायकत्वमाशङ्क्य परिहरन्ति **न च ज्ञाने**त्यादि, अप्रयोजतकत्वं व्युत्पादयन्ति **क्लृप्तमाने**त्यादि, प्रमाण

चतुष्टस्यापि शब्दात् सन्निकर्षाणां चाभावे ज्ञानजनकत्वमेवोपनायकत्वमितिलक्षणं तदैवानतिव्याप्तं भवति यदा संस्कारस्योपनायकत्वं स्वीकर्त्तव्यं, अतस्तत्रापि लक्षणसत्वाज् ज्ञानस्योपनायकत्वमितिनियमोप्रयोजक इत्यर्थः, अत्र स्मृतिलक्षणविरोधमाशङ्कन्ते **न चे**त्यादि, **नैवमिति** स्मृतिलक्षणविरोधान् न संस्कारस्योपनायकत्वमित्यर्थः, तद्दूषणाय स्मृतेर्लक्षणान्तरमाहुः **साक्षादि**त्यादि, तथा च स्मृतिलक्षणस्यात्मत्वान् न संस्कारस्योपनायकत्वबाधो नापि स्मृतेः स्मृतित्वोच्छेद इत्यर्थः, नन्वनुमितादावनुभवत्वाव्याप्तिरित्यत आहु **क्लृप्तद्वारे**त्यादि, तथा च व्याप्तिस्मरणादेरपि क्लृप्तद्वारान्तःपातित्वात् तज्जन्यानुमित्यादेरपि साक्षात् प्रमाणजन्यतया नानुभवान्तरितत्वाभवत्वाव्याप्तिरनुभवाव्यवहितोत्तरस्मृतौ तु क्लृप्तद्वारातिरिक्तानुभवत्वमिति तद्भिन्नतया स्मृतित्वं नानुपन्नमित्यर्थः, नन्विदमेव स्मृतेर्लक्षणमिति कथं विनिगन्तव्यमित्यत आहु**रत एवे**त्यादि, क्लृप्तद्वारातिरिक्तान्तरितत्वादेव स्मृत्युत्तरक्षण उक्तविशेषमवलम्ब्यैव स्मरामीत्यनुव्यवसायो भवतीत्यनुव्यवसायाकार एव विनिगमक इत्यर्थः, न चानुभवातिरिक्तज्ञानत्वमेवावलम्ब्य तथानुव्यवसाय इत्यत्र किं मानमिति वाच्यं, अनुव्यवसायाकारे स्मृतित्वस्यैव गोचरतयानुभवभिन्नताया एव भानात्, तथा च यदि त्वदुक्तं लक्षणं स्यात् तमालम्ब्यानुव्यवसीयेतातो न तथेत्यर्थः, नन्वेवं संस्कारस्योपनायकत्वे तज्जन्यज्ञानस्याप्युपनीतभानत्वेनानुभवान्तःपातादनुभवामीत्यनुव्यवसायापत्तिरित्यतस्तद् दूषयन्ति **यथे**त्यादि, अनुभवविशेषस्यापि यत्र न तथानुव्यवसायस्तत्रास्य कथमापादयितुं शक्य इति भावः, यथा त्वन्मते ज्ञानस्य द्वारत्वेन तदुपनीतभानस्यानुभवत्वमेवं मन्मते संस्कारस्य द्वारत्वेन तदुपनीतभानस्याप्यनुभवत्वमिति जानामीत्येवानुव्यवसायो न त्वनुभवामि स्मरामीत्यनुव्यवसायो जानाम्यनुभवामीत्यनुव्यवसायविषयातिरिक्तज्ञानस्यैव स्मृतित्वमिति न तदुच्छेदः, किञ्च स्मरामीत्यनुव्यवसायविषयत्वं स्मृतित्वमित्यतोपि न स्मृतित्वोच्छेद इत्यर्थः, तथा च संस्कारजन्यत्वौदासीन्येन स्मरामीत्यनुव्यवसायगम्यस्य स्मृतित्वाङ्गीकारेनुभवाव्यवहितोत्तरं तद्व्यवहितोत्तरं च स्मृतित्वप्राप्तिरिति बाधकाभावादुभयविधापि स्मृतिः सिध्यतीतिभावः, एवं संस्कारानङ्गीकारपक्षं व्याकृत्य तत्त्वोपपादनायासबाहुल्यात् पक्षान्तरमाहु**र्यद्वे**त्यादि, **तथोक्तिरि**ति भगवन्मतोक्तिः, अथ वा ननु कालान्तरभाविन्याः स्मृतेर्व्यापारमन्तरेण त्रिक्षणावस्थायिनोनुभवस्य जनकत्वं न वक्तुं शक्यमित्यत आहु**र्यद्वे**ति, **न वे**ति तु सिद्धान्तग्रन्थाभिप्रायेण, **तथोक्तिरि**ति भगवन्मतोक्तिः, **सेति** स्मृतिः, सिद्धमाहु**रेवं सती**त्यादि, **तदा तन्नाश** इति द्वितीये स्मृतिक्षणेनुभवनाशकाले स्मरणस्य नाशः, ननु "यत् सत् तत् क्षणिक"मित्यत्र किमलौकिकमत आहु**रास्तिकै**रित्यादि, ननु भगवता तु तथैव सम्पादितमिति नास्तिकमतोपोद्बलनं भविष्यतीत्याशङ्क्य भगवत्कृत्यभिप्रायमाहु**रेतेने**त्यादि, **एतेने**त्येकत्रैवं कथनेनेत्यर्थः, सर्वत्र तथाकृत्यभावान् न नास्तिकमतोपोद्बलनमितिभावः, एतदेव श्रीमदाचार्यैर्विवृतं **निरन्तरे**त्यादिना, सिद्धमाहु**र्यद्यपी**त्यादि **मन्तव्यमि**त्यन्तं, भगवन्मतानुवादग्रन्थं यथाश्रुतमेव व्याकरिष्यन्तो बहुकालोत्तरस्मृत्युपपत्तिसाधनं परप्रसिद्धरीत्याहुः **किञ्चे**त्यादि, **तदेवास्त्वदृष्टमेव कारणमस्तु**, अदृष्टपक्षे **दूषणं** विकल्पयन्ति **न चे**त्यादि, कालान्तरीयस्मृत्युपपत्त्यर्थमदृष्टस्य व्यापारत्वं सहकारित्वं कारणत्वं वा वक्तव्यं तत्राद्ये लौकिकानुभवस्याविहितत्वेनादृष्टाजनकत्वाद् व्यापाराभावेन स्मृतिरेव न स्याद् द्वितीये प्राचीनस्य तस्य मुख्यकारणमनुभवं विनाजनकत्वात् स्मृतिरेव न स्यात् तृतीयेनुभवस्य नष्टत्वेन सहकार्यभावात् स्मृतिरेव न स्यात् प्राचीनादृष्टस्यासहायशूरत्वे त्वनुभवं विनापि स्मृतिः स्यादित्यर्थः, परिहरन्त्य**नुभवे**त्यादि, सहकार्यननुगममाशङ्क्य परिहरन्ति **त्वयापी**त्यादि, तथा चोभयोस्तौल्यान् न पर्यनुयोग इत्यर्थः, अयमेवाचार्याशय इत्यत्र मानमाहु**रेतदेवोक्त**मित्यादि, अनुभवतद्ध्वंसान्यतरसहकृतप्राचीनादृष्टजन्यायाः स्मृतेश्चिरकालस्थायित्वाङ्गीकारेण सादृश्याद्युद्बोध्यत्वमेवोक्तमित्यर्थः, ननु स्मृतिनाशस्य स्वत एव जायमानत्वात् किं तन्नाशकथनेनेत्यत आहुः **स्वसमाने**त्यादि, **सजातीयप्रागभाव** इत्यत्र षष्ठीसमासः, **सहभूतमि**ति स्मरणाभिप्रायेण नपुंसकं, तथा च पुनः सजातीयस्मरणानुत्पत्त्यर्थं तन्नाशोक्तिरित्यर्थः, अनुभवतद्ध्वंसयोः सहकारित्वपक्षे दूषणमनूद्य परिहरन्ति **न चे**त्यादि **एकत्राजनकत्वादि**त्येकव्यक्त्यजनकत्वात्, **एकजातीयेपी**ति घटादाविति शेषः, परिहरन्ति **ज्ञाने**त्यादि, उक्तं व्यवस्थापयन्तः पुनर्दूषयन्ति **नन्वि**त्यादि, **अत्र तथात्वाभावादि**त्यनुभवध्वंसत्वेन कारणत्वाभावात्, ननु ध्वंसस्याभावत्वादभावत्वेन रूपेण कारणत्वे प्रतियोगिनोनुभवस्य प्रतिबन्धकत्वापत्त्यानुभवध्वंसस्य कारणत्वं न वक्तुं युक्तं, न च कार्यस्य ज्ञानजातीयत्वात् न दोष इति वाच्यं, ज्ञानं प्रत्यभावस्य विषयत्वेन कारणतया दोषाभावादिह तु विषयत्वेन कारणतयाविवक्षितत्वात् तदतिरिक्तनिमित्तत्वेनैव कारणता वाच्या तत्र निमित्तरूपविचारे च यथा दाहे मण्यभावस्य तत्तद्रूपेण कारणतायां गौरवात् संसर्गाभावत्वेनैव प्रतिबन्धकाभावस्य हेतुताङ्गीक्रियते तथात्रापि ध्वंसस्य संसर्गाभावत्वेनैव रूपेण कारणरूपेण कारणताङ्गीकार्या प्रतिबन्धकाभावस्थले तथा क्लृप्तत्वात्, तथा सति प्रकृतेपि ध्वंसत्वेन कारणत्वस्याभावादनुभवस्य प्रतिबन्धत्वापत्तिर्दुर्वारेत्यर्थः, अत्र समादधते**त्रापी**त्यादि, प्रतिबन्धकाभावस्य संसर्गाभावत्वेन कारणता हि लाघवार्थमङ्गीकृता प्रकृते चानुभवध्वंसत्वेन कारणताङ्गीकारे लाघवान् न गौरवमिति **तुल्यं** तथा **चानुभवस्य** न प्रतिबन्धकत्वमित्यर्थः, ननु क्लृप्तकार्यकारणभावत्यागो न युक्त इत्यत आहु**रन्यथे**त्यादि, तथा च क्लृप्तकार्यकारणभावाङ्गीकारे दोषादनुभवध्वंसत्वेनैव कारणत्वमित्यनुभवतद्ध्वंसयोरदृष्टसहकारित्वेन, निर्वाहात् संस्काराङ्गीकारो न युक्त इत्यर्थः, एवं द्वयोः सहकारित्वे बीजमाहु**रेतच्चे**त्यादि, **उक्तरूपेणे**त्यनुभवध्वंसत्वेन रूपेण

नन्वेवं संस्कारे दूषिते सति यागादपूर्वमपि न सिध्येद् यागध्वंसस्यैव कारणताया वक्तुं शक्यत्वादित्याशङ्क्य परिहरन्ति **न चैवमित्यादि**, ननु मास्तु पृथक् कारणत्वं व्यापारतायां न दोष इत्यत आहुः **प्रतियोगीत्यादि**, तयोरेकव्यक्त्यजनकत्वे पुनः शङ्कते **नन्वित्यादि**, तदङ्गीकृत्य परिहरन्ति **सत्यमित्यादि दूषणापत्तिरित्यन्तं**, **नियम** इति दण्डघटादौ दृष्ट इति शेषः, **तत्रेति** यागस्थले, यागत्वस्यैवापूर्वरूपकार्यजनकतावच्छेदकत्वात् न तद्ध्वंसस्य स्वर्गकारणत्वं वक्तुं शक्यं, अनुभवस्थले त्वनुभवस्य साक्षात्स्मृत्यजनकत्वान् नोक्तदूषणापत्तिरित्यर्थः, समूहालम्बनस्थले च घटाभावत्वस्यापि कार्यजनकतावच्छेदकत्वान् न प्रतियोगितावच्छेदकधर्मस्यैव कार्यजनकतावच्छेदकत्वमिति न दोष इत्यर्थः, अत्र सम्मत्यर्थं युक्त्यन्तरमाहुर**त एवेत्यादि**, **अत एवे**त्यनुभवस्य साक्षात्स्मृत्यजनकत्वादेव, **तदर्थ** इति भूतपदस्यार्थः, **हेतुत्वमिति** सहकारित्वं, ननु यागध्वंसस्य द्वारत्वाङ्गीकारे को दोष इति चेत् तत्राहुः **श्रुतीत्यादि**, अस्मदादिवैधचेष्टाया भगवद्रूपयागाभिव्यञ्जकत्वात् तेनैव फलसिद्धिः श्रुतिसम्मता न तु ध्वंसेनेत्यर्थः, नन्वदृष्टजन्यतावच्छेदकेन स्मृतित्वमिति तस्य मुख्यकारणत्वं न वक्तुं शक्यमिति चेन् न सर्वोत्पत्तिमन्निमित्तकारणत्वेनाङ्गीकृतस्यादृष्टस्य जन्यतावच्छेदकविचार उत्पत्तिमत्त्वं सर्वत्वविशिष्टमुत्पत्तिमत्त्वं वा न तज्जन्यतावच्छेदकं तस्यादृष्टेपि सत्त्वात्, नापि कार्यमात्रवृत्तिजातिरुक्तदोषात्, अतस्तेन तेन प्रति नियतरूपेणैव तज्जन्यतावच्छेदकत्वं वाच्य तथा सति स्मृतित्वस्यापि तज्जन्यतावच्छेदकत्वे को दोषः ? अतोऽदृष्टस्य मुख्यकारणता तु न दुष्टा, किञ्च संस्कारदूषणेऽस्माक प्रवृत्तिर्न त्वदृष्टस्य मुख्यकारणतात्वसाधने तथा सति सहकारित्वमेवास्तु किं नश्छिन्नम् ? एतावत कथनं तु वितण्डयेति न दोष इति दिक्, प्रकृतमनुसरामः, **सुबोधिन्यां तत्रापि सेति** भगवता निरुद्धा, **आरोपणात् पूर्वमित्यादिग्रन्थ**स्तु टिप्पण्यां व्याख्यात इति ततोऽवधेयः ॥ ४४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अथो यथावदित्यत्र **यस्माद् भगवत** इति यस्माद्धेतुभूतादित्यर्थः, तथा च मूले **यत** इति हेतौ पञ्चमी, प्रतीयमानमाहुः **यत सुदुर्विभाव्यमिति**, **यदाश्रय**मित्यस्यार्थमाहुः **किञ्चेति**, **येने**त्यस्यार्थमाहुः **येन चेति** ॥ ४१ ॥ **अहमिति**श्लोकस्यान्ते **सम्बद्धस्यैवेति** मायासम्बद्धजीवनिरूपितं गतित्वं भगवति मा भूयादित्यर्थः ॥ ४२ ॥ अग्रिमप्रकरणार्थमाहुः **मोहितवानित्याहेति**, अयं मोहो भक्त्यर्थ इतिभक्तिप्रकरणत्वमिति भावः, **इत्थमि**त्यत्र **अन्यथेति** विभुत्वाभावे इत्यर्थः, **पूर्व**घटस्य श्यामत्वदशा ततो **विरुद्धा रक्तत्वादिधर्मा उत्तरस्यां** पाकदशायां **न भवेयु**रित्यर्थः ॥ ४३ ॥ एतत्प्रकरणीयश्लोकानां त्रयाणां प्रत्येकवाक्यार्थानाहुः **प्रक्षिप्तेति**, प्रथमचरणेन द्वितीयचरणेनोत्तरार्धेन चेतिज्ञेयं, **मायामोहेति** 'त्रय्या चे'तिश्लोकोक्त**मायामोहे** भगवतश्चिकीर्षिते सति **ज्ञानं नष्ट**मित्यर्थः, **सद्य** इत्यत्र ननु पूर्वं पदार्थानुभव उक्तः, नाशोऽत्र स्मृतेरुच्यत इति पूर्वोत्तरविरोध इत्याशङ्क्याहुः **अनेनेति**, स्मृतिनाशकथनेन स्मृतेरनुभवानन्तरभावित्वादनुभवनाश उक्त इत्यर्थः, एतदेव विवृण्वन्ति **अन्यथेति**, एतस्यैव विवरण**मनुभवे इति**, अनुभवे विद्यमाने स्मरणं न सम्भवतीति तत्प्रतियोगिको नाशोऽपि न सम्भवतीति, **स्मृतिमेवेति** एवकारेण संस्कारो व्यावर्तितः ॥ ४४ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

"इत्थं विदिततत्त्वाया" इत्यत्र **प्रक्षिप्ता जालवन् माया तया ज्ञानं विनाशितम्। प्रमाणानां बलं दृष्ट्वा मोहयामास गोपिकाम्** ॥ अनया कारिकयैतत्प्रकरणीयश्लोकानां त्रयाणां वाक्यार्था उक्ताः, **प्रक्षिप्ता जालवन् माये**तिप्रथमचरणेन "इत्थं विदिततत्त्वाया" इतिश्लोकार्थ उक्तः, **तया ज्ञानं विनाशित**मितिद्वितीयचरणेन **"सद्यो नष्टस्मृतिर्गोपी"**ति श्लोकार्थ उक्तः, कारिकोत्तरार्धेन "त्रय्या चोपनिषद्भिश्चे"ति श्लोकवाक्यार्थ उक्तः ॥ ४३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

चरमपक्षमाश्रित्याह—अथो इति । अथो अचिन्त्यैश्वर्याश्रयत्वेन परमेश्वरत्वात् अतीन्द्रियाणां परस्परविरुद्धानां चैकदैव **एकत्र दर्शनात्** चित्तादिभिर्यथावत् याथातथ्येन अञ्जसा अनायासेन यत्कृपां विनेति यावत् न वितर्कगोचरं तर्कागोचरमिदं **विश्वं यदाश्रयं** यदधिष्ठानं येन करणाधिष्ठात्रायतश्चेतनात् प्रकाशकात् प्रतीयते तत्पदं तस्य चरणारविन्दमहं प्रणतास्मीत्यन्वयः । तच्चरणं विशिनष्टि—सुदुर्विभाव्यमिति । विषयाविष्टचित्तानां भावनायाः ध्यानस्यात्यन्ताविषयमित्यर्थः ॥४१॥ एवं विश्वप्रतीत्या निश्चितं तस्य परमेश्वरत्वं पुनः स्वमोहकारणमायाश्रयत्वेन तन्निश्चिन्वती मायानिवृत्त्यर्थं तमेव शरणं व्रजति—अहमिति । "अहं यशोदा अमुष्य व्रजेश्वरस्य नन्दस्याखिलवित्तपा सकलधनाद्यधिष्ठात्री सती जाया, असौ मम पतिः, एष कृष्णो मे सुतः, सह धनाः धनादिसहिता गोप्यो गोपाश्च मे मदीया" इत्थं यस्य मायया मे मम कुत्सिता मतिरस्ति स एव मे गतिः शरणं मायातो रक्षकोऽस्तु ॥ ४२ ॥ 'एवं महात्मज्ञाने जाते ब्रह्मानन्दसम्भवेऽपि भजनानन्दासम्भवाद्ब्रह्मानन्दापेक्षया भजनानन्दस्याधिक्यात् तत्सिद्ध्यर्थं स्वमायया पुनरत्तां मोहितवान्' इत्याह इत्थमिति । 'ज्ञानान्तरं तस्या मातृभावस्यापगमात्

भगवतोऽपि स्वस्मिन् पुत्रभावनाऽपगता' इति सूचयन्नाह—गोपिकायामपि। यशोदायां इत्थं विदितं तत्त्वं यया तथाभूतायां सत्यां सः श्रीकृष्णो वैष्णवीं स्वशक्तिरूपां मायां व्यतनोत्' तस्याः सम्मोहनार्थं विस्तारितवानित्यन्वयः। ननु 'तस्याः परमप्रेमवत्या मोहनमप्यनुचितमेव' इत्यत आह—पुत्रस्नेहमयीमिति। यथा पुत्रस्नेहेन परमानन्दोऽभिव्यज्यते तथेश्वरज्ञानेन स नोत्पद्यते, तथात्वभावस्यावश्यकत्वात्। ननु ईश्वरज्ञाने जाते सति कथं पुनस्तत्रैव तद्विरुद्धं पुत्रज्ञानं भविष्यति?' इत्याशङ्क्याह—विभुरिति। सर्वकारणसमर्थ इत्यर्थः। तत्र हेतुमाह—ईश्वर इति। भगवन्मायया लोके एकस्मिन्नपि पुरुषादौ कालभेदेन प्राणिभेदेन च शत्रुमित्राद्यनेकबुद्धिभेदस्य प्रसिद्धत्वात्॥ ४३॥ 'अतस्तथैव मोहो जात' इत्याह—सद्य इति। सद्य एव नष्टा स्मृतिः 'पूर्वोक्तं परमेश्वरज्ञानं' यस्याः सा गोपी यशोदा आत्मजमारोहमङ्कमारोप्य यथा पुरा पूर्ववत् प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्यास्तथासीदित्यन्वयः॥ ४४॥

अन्वितार्थप्रकाशिका

चरमं पक्षमाश्रित्यायमीश्वर इति निश्चित्याह—अथो इति॥ अथो अतः कारणात् चेतोमनःकर्मवचोभिः यथावत् याथातथ्येन अञ्जसा अनायासेन यत्कृपां विनेति यावत्। न वितर्कगोचरं तर्कागोचरमिदं विश्वं यदाश्रयं यदधिष्ठानं येन कारणाधिष्ठात्रा यतो बुद्धिवृत्त्यभिव्यक्तात् प्रकाशकात् प्रतीयते। सुदुर्विभाव्यम् अचिन्त्यं तत्पदं वस्तु परमात्मरूपं प्रणतास्मि॥ ४१॥ अहमिति। अहं यशोदा अमुष्य व्रजेश्वरस्य नन्दस्याखिलवित्तपा सकलधनाद्यधिष्ठात्री सती जाया असौ नन्दः मम पतिः एष कृष्णो मे सुतः सहगोधनाः गोधनादिसहिताः गोप्यो गोपाश्च मे मदीया इत्थं यस्य मायया मे मम अभिमानरूपा कुमतिः कुत्सिता मतिरस्ति स एव भगवान् मे गतिः मायातो रक्षकोऽस्तु॥ ४२॥ इत्थमिति॥ गोपिकायां यशोदायाम् इत्थं विदितं तत्त्वं यया तथाभूतायां सत्यां विभुः समर्थः ईश्वरः सः श्रीकृष्णः पुत्रस्नेहमयीं वैष्णवीं स्वशक्तिरूपां मायां व्यतनोत्। तस्याः संमोहनार्थं विस्तारितवान्॥ ४३॥ सद्य इति॥ सद्य एव नष्टा स्मृतिः पूर्वोक्तं परमेश्वरज्ञानं यस्याः सा गोपी यशोदा आत्मजमारोहमङ्कमारोप्य यथा पुरा पूर्ववत् प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्यास्तथा आस आसीत्।४४।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

येन ममेदं दर्शितं तं न मासीत्याह अथो यथेति चेतः चित्तं एतदादिभिः यथावत् वितर्केण गोचरं प्रत्यक्षं नाऽस्ति एवंभूतं विश्वं यदाश्रयं यदाधारतया वर्त्तमानं यत उत्पन्नं सत् येन ईश्वरेण प्रतीयते भाति सुदुर्विभाव्यं अवितर्क्यं तस्यैश्वरस्य यदंघ्रि प्रणतास्मि॥ ४१॥ स्वदोषमाह अहमिति। अहं यशोदा व्रजेश्वरस्य नंदस्य अखिलवित्तया सर्वधनरक्षणकर्त्री अस्मि ममासौ पतिः गोप्यादयो मदीयाः यस्य मायया मे इत्थं कुमतिरस्ति सः हरिर्मे गतिः प्राप्योऽस्ति॥ ४२॥ विदितं तत्वं परमात्मा यया तस्यां तत्त्वं यज्ज्ञानमद्वयं ब्रह्मेति परमात्मेतीत्युक्तेः॥ ४३॥ प्रवृद्धस्नेहेन कलिलं आर्द्रं हृदयं यस्याः॥ ४४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चरमं पक्षमाश्रित्यायमीश्वर इति निश्चित्य तं प्रणमति। अथो इति। अथो अतः, चेतः बुद्धिश्च मनःकर्म मनोव्यापारश्च, वचांसि च तैः, अञ्जसा तत्त्वतः आशु वा। यथावद्याथात्म्येन, नविनतर्कगोचरं नानाविधतर्कागोचरं, अदो विश्वमिति शेषः। यदाश्रयं यदधिष्ठानं, यत उत्पद्यते इति शेषः। येन प्रतीयते जीवेति, यतो यस्मिन्, लीयते इति शेषः। अनेन 'यतो वा इमानि भूतानि' इति श्रुत्यर्थः प्रदर्शितः। सुदुर्विभाव्यं इदमित्थमिति चेतोमनःकर्मवचोभिस्तर्कितुमशक्यमित्यर्थः। तत् पदं पद्यते प्राप्यते इति यावत्। एवंभूतं, व्युत्पत्त्या मुमुक्षुप्राप्यं परमात्मनः स्वरूपमित्यर्थः। प्रणता अस्मि नमस्कृतवती भवामि॥ ४१॥ अहं ममेत्येवंभूताः संकल्पाः यतः स एव मम तन्निवृत्त्युपाय इत्यध्यवस्यति॥ अहमिति॥ मम पतिः, असौ नन्दः, एषः मे मम सुतः, सगोपाः सहगोधनाश्च गोप्यः, मदीया इति शेषः। व्रजेश्वरस्य नन्दस्य, अखिलवित्तपा समस्तद्रव्यगोप्त्री सती, अहं यशोदा अस्मि। इत्थमेवंभूता, कुमतिरहंममताबुद्धिः, यन्मायया यस्य संकल्पेनोद्भूतसूक्ष्मस्थूलदेहकुटुम्बादिषु, ममासाद्य विषयाऽभूत्, स भगवानेव, मे मम गतिरहंममतानिवृत्त्युपायः॥ ४२॥ इत्थमिति॥ इत्थमुक्तप्रकारेण, गोपिकायां यशोदायां, विदितं विज्ञातं तत्त्वं बालस्य याथात्म्यं यया तथाभूतायां सत्यां, स श्रीकृष्णरूपः, ईश्वरः, यतः विभुः, ततः, पुत्रस्नेहमयीं पुत्रस्नेहप्राचुर्यावहां, वैष्णवीं विष्णुसंबन्धिनीं, मायां, व्यतनोदाच्छादितवान्॥ ४३॥ सद्य इति॥ सद्यस्तदैव, नष्टा स्मृतिः पुत्रे परमात्मत्वस्मृतिर्यस्याः सा, गोपी यशोदा, आत्मजं पुत्रं, आरोहमुत्सङ्गं, आरोप्य, पुरा यथा, पूर्ववदेवेत्यर्थः। प्रवृद्धो वृद्धिं प्राप्तो यः स्नेहः पुत्रस्नेहस्तेन कलिलं व्याप्तं हृदयं यस्याः सा तथाभूता, आसीद्बभूव॥ ४४॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अहं ममेतिः १०.८.४२.

सर्वदर्शनचणोऽपि दर्पणः स्वस्वरूपकलने ह्यनीश्वरः। अत्र तद्युतमवेक्ष्य तन्मुखं युक्तमात्ममतिराशु साऽभवत्॥ ८२॥

इत्थं विदितेति: १०.८.४३.

अ यल्पभूमिशकलादनमाविशङ्क्य सम्भ्रान्तधीरियमभूत्पुनरद्य विभ्रम् ।
साक्षादवेक्ष्य भविताऽनवधानशालिन्येतद्धिया विभुरसावतनोत्स्वमायाम् ॥ ८३ ॥

किञ्चित्कार्यवशाददर्शि वदने यद्विश्वरूपं मया तत्स्फूर्तिः समवस्थिता यति सदैवास्यां ततश्चिन्तितः ।
अर्थो नैव भवे मनागपि ममेत्यालोच्य मन्येऽच्युतः, चित्तेऽसावतनोदकुण्ठचरितो मायां महावैष्णवीम् ॥ ८४ ॥

कृष्णप्रिया

अन्त में श्री यशोदाजी ने निश्चय किया कि लालन भगवान है और यह इनकी सर्व लीला है तब गुणगान करने लगी, चित्त, मन, कर्म, वाणी और तर्क की पहुँच से परे इस अखिल ब्रह्माण्ड का जो आश्रय है, और जिस प्रभु के द्वारा बुद्धि में अभिव्यक्त ज्ञान से रस की प्रतीति होती है उस कल्पनातीत अचिन्त्यमहिमा वाले श्रीकृष्ण के श्री चरणों में मैं साष्टांग प्रणति करती हूँ ॥ ४१ ॥ यह मैं नन्दरानी हूँ, यह नन्दराय मेरे स्वामी है, यह मेरे लाडिले लालन है व्रजेश्वर नन्दराय की सर्व सम्पत्ति की मालिक और रक्षण करने वाली सती अर्धाङ्गना हूँ एवं गोधन के साथ ये गोप गोपियाँ मेरा धन है ऐसी जिस कृष्ण की माया से अभिमानमयी कुमति बनी है वही श्रीकृष्ण मेरी शरण है ॥ ४२ ॥ भगवान श्रीकृष्ण ने समझा कि माता यशोदा को तो मेरा परब्रह्म स्वरूप का ज्ञान हो गया है और यह तो स्नेह में बाधक है तब शीघ्रता से सर्वकरणसमर्थ श्रीकृष्ण ने "प्रजास्नेहरूपा" यह मेरे लालन ही है ऐसी वैष्णवी माया फैला दी ॥ ४३ ॥ क्षण में ही गोपी यशोदाजी ब्रह्मज्ञान की सारी बातें विसर गयी। हृदय में पहले जैसा अपार मोह पूर्ण वात्सल्यस्नेह उमड़ आया और अम्मा ने लालन को अपनी गोद में उठा लिया ॥ ४४ ॥

त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः । उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजम् ॥ ४५ ॥

राजोवाच

नन्दः किमकरोद् ब्रह्मन् श्रेय एव महोदयम् । यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ॥ ४६ ॥
पितरौ नान्वविन्देतां [1]कृष्णोदारार्भकेहितम् । [2]गायन्त्यद्यापि कवयो [3]यल्लोकस्य मलापहम् ॥ ४७ ॥

श्रीशुक उवाच

द्रोणो वसूनां प्रवरो धरया [4]भार्यया सह । करिष्यमाण [5]आदेशं ब्रह्मणस्तमुवाच ह ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—सा त्रय्या च उपनिषद्भिः च सांख्ययोगैः च सात्वतैः उपगीयमाहात्म्यं हरिं आत्मजं अमन्यत ॥ ४५ ॥ ब्रह्मन् नन्दः च महाभागा यशोदा महोदय एव किम् श्रेयः अकरोत् यस्याः हरिः स्तनं पपौ ॥ ४६ ॥ अद्यापि कवयः लोकस्य मलापह कृष्णोदारार्भकेहितं यत् अद्य अपि गायन्ति यत् पितरौ न अन्वविन्देताम् ॥४७॥ वसूनां प्रवरः द्रोणः धरया भार्यया सह ब्रह्मणः आदेशं करिष्यमाणः तं उवाच ह ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मायाबलोद्रेकमाह । त्रय्येति । त्रय्या कर्मकांडरूपया इंद्रादिरूपेण । उपनिषद्भिर्ब्रह्मेति । सांख्यैः पुरुष इति । योगैः परमात्मेति । सात्वतैर्भगवानित्युपगीयमानं माहात्म्यं यस्य तम् ॥ ४५ ॥ अतिविस्मयेन पृच्छति । नंद इति । महोदयं महानुदय उद्भवो यस्मात् तत् ॥ ४६ ॥ ययोः प्रसन्नोऽवतीर्णस्तौ पितरावपि यं नान्वविंदेतां न प्राप्नुताम् । कृष्णस्यौदारं महदर्भकेहितं बाललीलाम् । यच्च कवयो गायंति तद्योऽविंदत्स किं श्रेयोऽकरोदिति ॥ ४७ ॥ ब्रह्मण आदेशान्गोपालवादिलक्षणान् ॥४८–४९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उद्रेक आधिक्यम् । यद्वा–सांख्यं तस्य योगश्चिंतनं यत्र ते सांख्ययोगा ब्रह्मसूत्राणि तैः सात्वतैर्नारदादिभिर्वा पंचरात्रादिवैष्णवशास्त्रैः एतैरपि माहात्म्यमेव यस्य गीयते न तु साक्षाज्ज्ञायते तं सा यशोदात्मजममन्यताहोऽस्या भाग्यमिति भावः । अत्र विश्वनाथः । देवक्याः सकाशात्तस्या उत्कर्षमभिव्यंजयितुमैश्वर्यदर्शनादपि स्वीयवात्सल्यप्रेम्णः संकोचाभावमाख्यायैश्वर्य

---

१. कृष्णरामार्भके–विज. । २. गायन्ते–इति पाठः । ३ यल्लोकशमला–श्रीधर, वंशी, वीर, विज. जीव । ४. सह भार्यया–श्रीधर. वंशी वीर. विज. । ५. आदेशान्–श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक. ।

श्रवणादप्याह—त्रय्या यज्ञपुरुषत्वेनोपनिषद्भिर्ब्रह्मत्वेन सांख्यैः पुरुषत्वेन योगैः परमात्मत्वेन सात्वतैः पाञ्चरात्रैर्भगवत्त्वेन इत्येवं कर्मिप्रभृतिगीयमानमाहात्म्यं तस्यास्समक्षमसमक्षं वोपाधिक्येन गीयमानैश्वर्यं हरिं सात्मजममन्यतास्मदभीष्टदैवतेनावयोर्व्रतनियमार्चनादिसंतुष्टेन पर्जन्याभिधमदीयश्वशुरकृतनिरवद्यबहुतपःसंतोषितेन श्रीनारायणेन कृपया दत्तो लोकोत्तरः पुत्रोयं यत्कर्मिप्रभृतिभिस्त्रय्यादिप्रतिपाद्यत्वेन स्तूयते तत्र 'नारायणसमो गुणैः' इति सर्वत्र गर्गेण गीतया नारायणसाम्यप्रथयाऽन्यदुःष्करपूतनादिवधानामेतत्कर्तृकत्वप्रथया चायमेव नारायण इति तेषां विश्वास एव हेतुर्वस्तुतस्त्वयं मत्पुत्र एव मां मातरं क्षणमप्यदृष्ट्वा विकलीभवत्यहं चैनं स्वनिमेषव्यवहितं ज्ञात्वा विह्वली भवामीत्यावयोर्जन्यजनन्योरनुभव एवात्र प्रमाणमिति मनसि सा समाधत्ते। किंच कर्मिप्रभृतयस्त्रय्यादिभिर्यथा हरिं मन्यंते तथैवेयं वात्सल्यप्रेम्णा हरिमात्मजं मन्यते तेभ्यस्तु तत्तदनुरूपं फलं ददानस्तेषामनुग्राहको वशयिता सन्नीष्टेस्यै तु वात्सल्यप्रेम्णोनुरूपं फलं दातुमसमर्थं ऋणी भवन्नस्या अनुग्राह्योऽवश्य ईशितव्यत्वेन तिष्ठ स्वानंदतुष्टोप्यस्याः स्तन्यामृतार्थं रोदितीत्यादिविशेष उत्तराध्याये स्पष्टीभविष्यति। पद्यमिदं कृष्णलीलायां परिभाषासूत्ररूपं ज्ञेयम्। परिभाषा यथा शास्त्रैकदेशस्था सकलं शास्त्रं प्रकाशयति यथा वेश्म प्रदीप इति "इको गुणवृद्धी" इति यत्रयत्र गुणवृद्धी श्रूयेते तत्रतत्रैक्यपरिभाषोपतिष्ठते यथा तथैव कौमारकैशोरमाथुरकुरुक्षेत्रादिगतलीलासु यत्रयत्रैश्वर्यप्रसंगस्तत्रेदमुपतिष्ठते इति ॥ ४५ ॥ नंदभाग्यमभिनंदन्पृच्छति राजा। उदय उद्भवः समुन्नतिरिति यावत्। "उदयस्तु पुमान्पूर्वपर्वते च समुन्नतौ" इति मेदिनी। श्रेयः पुण्यम् "स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः" इत्यमरः। महान् भागो भाग्यं यस्यास्सा तथा 'भागाभाग्यांशतुर्यांशाः' इति यादवः। यस्य स्मरणेनान्यस्यापि स्तनपानं न जायते स स्वयमेव यस्याः स्तनं पपावहो तस्या भाग्यमिति भावः। तोषिण्यां तु—महानुदयः सर्वतः स्नेहोत्कर्षो यस्मात् महाभागेति ततोप्यस्याः श्रेयोऽधिकमभिप्रेत्याह—पपाविति। 'पीतशेषं गदाभृतः' इत्युक्त्या श्रीदेवक्या अपि तथा वत्सहरणलीलायां वत्सगोपरूपेणान्यासां गोगोपीनां स्तनपाने सत्यपि देवक्या यथा कथंचिदसमये सकृदेव गोप्यादिषु रूपांतरेण च तत्रोभयत्र तादृशस्नेहाभावादत्रैव स्तनपानं सम्यगभिप्रेतम् ॥ ४६ ॥ ययोर्देवकीवसुदेवयोः। प्रसन्नो 'युवां मां पुत्रभावेन' इत्यादि तदुक्तेः। पितरावपीत्यपिना नंदयशोदयोरपितृत्वं न ज्ञेयं किन्तु तावपि पितरौ वैकुंठेशस्य तयोर्जातत्वात् परं तु तस्य नंदनंदनाविष्टत्वात्तौ नान्वविंदेताम्। विदंतिरत्र लाभार्थे 'विदेज्ञाने च वेत्तीति विदेर्लाभे च विंदति' इति वचनात्। 'उदारो दातृमहतोः' इत्यमरः। स किं श्रेयोकरोदिति द्वयोरन्वयः। अत्र विश्वनाथरूपगोस्वामिनौ—पितरौ पितृत्वेन प्रसिद्धौ श्रीदेवकीवसुदेवौ श्रीकृष्णस्योदारं 'राजन्पतिर्गुरुः' इत्यादौ "अस्त्वेवमंग भजतां भगवान्मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम्" इत्युक्तदिशा परमोदयस्यापि दातृ यदर्भकेहितं तदनु पश्चादपि नाविंदेतां मथुरायां गतेन बाल्यलीलासंवरणात् किं वाच्यं तस्य साक्षादनुभवमाहात्म्यं यच्च कवयो ब्रह्मादयः पूर्वपरार्द्धादौ श्रीनारदादीन्प्रत्युपदेशमारभ्याद्यापि गायंति अहो सर्वेषामपि तद्भाग्यविशेषहेतुरित्याह यदेवाद्य कलिकाले लोकमात्रस्य शमलापहम् एकत्रापि गीयमानेन संबंधपरंपरया कृतार्थीकरणात् मद्भक्तियुक्तो भुवनं पुनातीति। अत एवोक्तं श्रीसूतेनापि 'कृष्णचरितं कलिकल्मषघ्नम्' इति। यद्वा—कवय आत्मारामशिरोमणयोपि भवद्विधा महाभागवता अनादितः श्रुतिपुराणगीयमानमपि अद्यापि गायंति परमानंदभरेण यत्र तत्राप्युन्मत्ता इव गायंत एव वर्त्तंते न च कथयंति मात्रं यच्च लोकस्यातिदीनस्यापि मद्विधस्य यच्छमलं तदंतरायकं कर्म तस्य हंतृ यच्छ्रवणमात्रेण मद्विधोपि मम परमकृतार्थतां मन्यते इत्यर्थः। तत् यो या चाविन्दत्स सा च किं श्रेयोऽकरोदिति पूर्वेणान्वयः। एवं महाविस्मयो व्यंजितः ॥ ४७ ॥ "आदेशो वर्णविकृतौ नियोगे चातिसर्जने" इति धरणिः। करिष्यमाण इति। यदि मां गवां पालनमपि भवानाज्ञापयिष्यति तदप्यहं सर्वथा करिष्यामीति कथयन् तं ब्रह्माणमुवाच ह वक्ष्यमाणं वाक्यमिति शेषः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवमहो परमभाग्यवती श्रीयशोदेत्याह—त्रय्येति। त्रय्या कर्मोपासनामय्या तत्तदन्तर्यामिपर्य्यवसानया उपनिषद्भिः स्वरूपगुणाभ्यां सर्वबृहत्तमे तस्मिन्नेव पर्य्यवसिताभिः साङ्ख्ययोगैः सेश्वरैः तैश्च श्रीभागवतार्थपर्य्यवसानैः पुराणैरित्यर्थः। सात्त्वतैः तदुपासनामयैः पञ्चरात्रागमैः अनयोरपि वेदाङ्गत्वात्तत्साहित्योक्तिः उपहीने यत्किञ्चित् गीयमानमाहात्म्यं न तु सम्यक् आनन्त्यात् तं हरिम् आत्मजम् अमन्यत किन्तु पुत्रभावेन साक्षात् तथा लालितवतीति काका चमत्कारातिशयो व्यञ्जितः अत्रेदं विचार्य्यं न तावदस्या विश्वदर्शनमुत्कर्षहेतुः—

"यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः।
तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत"।
तं सत्त्वमानन्दनिधिं भजेत नान्यत्र सज्जेयत आत्मपातः॥

इति प्रथमसाधनेपि द्वितीयस्कन्धावज्ञातत्वात् न च विश्वदर्शनेन श्रीकृष्णे परमेश्वरज्ञानमभूत् तुर्य्यानिर्णयेप्यमुष्य ममार्भकस्येत्याद्युक्तत्वात् ईश्वरस्य यत्तच्छब्दाभ्यां परोक्षतयैव निर्देशात् पञ्चमनिर्णये च पत्यादिगणपातित्वेन एष मे सुत इति

यन्माययेति च तथैव दर्शनात् अन्यथा श्रीदेवकीवदसौ तमेवास्तोष्यत् न चेश्वरज्ञानमुत्तमं पुत्रादिभावमयश्रीकृष्णाद्यनुभवस्त्वनुत्तम इति प्रकरणार्थः दर्शितव्याख्यया तस्यार्थस्याप्रवेशात् अन्यथोत्तरग्रन्थे प्रश्नोत्तरे च न सङ्गच्छेते तस्यास्तादृगीश्वरज्ञानं परित्यज्य तदावरणं चाननुशोच्य स्तनपानादिकस्यैव राज्ञास्तोष्यमाणत्वात् श्रीवसुदेवदेवक्योः सत्यपि सर्वज्ञाने तदुदारार्भकोहितानुभवाभवेन शोचिष्यमाणत्वात् कवीनां परमज्ञानवतां श्रीव्यासादीनामपि तद्गानमात्रभाग्यत्वेन वक्ष्यमाणत्वात् श्रीशुकेनापि तत्प्राग्जन्मकथनमारभ्य महिमारोहक्रमतः सर्वज्ञानभक्तिगुरुतमयोर्विरिञ्चिभवयोरहो तादृश्याः श्रियोपि तन्न्यूनपदे स्थापयिष्यमाणत्वात् अन्येषामवशिष्टानामपि ज्ञानादिमतामसुखाय श्रीकृष्णत्वेन साधारणेभ्योपि गोपिका सुततया श्रीकृष्णं भजद्भ्यो न्यूनयिष्यमाणत्वाच्च। अन्यत्र च तादृशः भावस्यैव तत्तस्ततोतिशयः श्रूयते राजन् पतिर्गुरुरलमित्यादौ "इत्थं सतां ब्रह्मसुखानुभूत्या" इत्यादौ च ततः किम्पुनस्तदीयस्यैति दर्शित एवार्थः साधीयान् ॥ ४५ ॥ इत्थं तस्यां तादृशं श्रीभगवतः स्नेहं तस्याश्च तस्मिन् वात्सल्यं श्रुत्वा तद्भाग्यभरेणातिविस्मितः श्रीनन्दस्य तस्याश्च भाग्यं पृच्छति नन्द इति। किङ्कतरत् एवम् ईदृशो महान् उदयः सर्वतः स्नेहोत्कर्षो यस्मात् महाभागेति ततोपि तस्याः श्रेयः अधिकमभिप्रैति, तदेवाह, पपाविति। अतः पीत्वामृतं पयः तस्याः पीतशेषं गदाभृत इत्युक्तरीत्या श्रीदेवक्यास्तथावत्सबालकरूपेणान्यासां गोपीनां स्तनपाने सत्यपि पूर्वत्रैश्वर्यज्ञानमिश्रत्वात् यथाकथञ्चित् तत्राप्यसमये वारैकजातत्वाच्चोत्तरत्रान्यरूपत्वादुभयत्र परस्परैतादृशस्नेहाभावादत्रैव स्तनपानसम्यगभिप्रेतम् ॥ ४६ ॥ किञ्च पितराविति पितृत्वेन सर्वलोकख्यातौ लब्धवरौ चापि श्रीकृष्णस्य उदारं राजन् पतिरित्यादौ "अस्त्वेवमङ्ग भजतां भगवान् मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम्" इत्युक्तदिशापरमादेयस्यापि दातृवत् अर्भकेहितं तत् अनुपश्चात् अपि नाविन्देतां मथुरायां गतेन बाल्यलीलासम्वरणात् किं वाच्यं साक्षादनुभवमाहात्म्यं तस्य भक्ता गुरवोपि यद्गानेनापि कृतार्थं मन्याः परः परार्द्धं कालं गमयन्तीत्याह यच्च कवयः श्रीब्रह्मादयः पूर्वपरार्द्धादौ श्रीनारदादिप्रत्युपदेशमारभ्य अद्यापि गायन्ति अहो सर्वेषामपि तद्भाग्यविशेषे हेतुरित्याह यदेव चाद्य कलिकालेपि लोकमात्राणां सर्वेषामपि शमलापहम् एकत्रापि गीयमानेन सम्बन्धपरम्परया कृतार्थीकरणात् "मद्भक्तियुक्तो भुवनं पुनाति" इति अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिरितिवत् अत उक्तं श्रीसूतेन कृष्णचरितं कलिकल्मषघ्नमिति यद्वा कवय आत्मारामशिरोमणयोपि भवद्विधा महाभागवता अनादितः श्रुतिपुराणगीयमानमपि अद्यापि गायन्ति परमानन्दभरेण यत्र तत्राप्युन्मत्ता इव गायन्त एव वर्तन्ते न च कथयन्ति मात्रं यच्च लोकस्यातिदीनस्यापि मद्विधस्य यच्छमलं तदन्तरायकं कर्म तस्य हन्तृ यच्छ्रवणमात्रेण मद्विधोपि परमकृतार्थतां मन्यत इत्यर्थः। तयोर्याचाविन्दत् स सा च किं श्रेयो ऽकरोदिति पूर्वेणान्वयः एवं महाविस्मयो व्यञ्जितः ॥ ४७ ॥ अथास्याग्रिमाध्याये मुख्यः सिद्धान्तो वक्ष्यते प्रथमं तावत्किमकरोच्छ्रेय इति साधनगतं तत्प्रश्नमनुसृत्य तत्र सिद्धान्ताभासं यावदेतदध्यायं वक्तुम् आदौ तयोरंशेन यत्पूर्ववृत्तं तदभेदेनाह—द्रोण इति त्रिभिः। प्रवरः परमश्रेष्ठः श्रीनन्दांशत्वात् आदेशान् श्रीमथुरामण्डले गोपालनप्रायवासश्रीवसुदेवसख्यादिलक्षणान् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो! परममहाभाग्यवती श्रीयशोदेत्याह—त्रय्येति। त्रय्या वेदमयेन मीमांसा-शास्त्रेणेत्यर्थः; उपनिषद्भिर्वेदान्तशास्त्रेण सात्वतैः पाञ्चरात्रादि-वैष्णवशास्त्रैर्न्यायवैशेषिकयोरनुक्तिः प्रायस्तर्कपरत्वादिना हरिमाहात्म्यानुपगानात्। चकारः सामान्येन सर्व्वेषामप्युपगानपरतायामुक्तायामपि सात्वतानां विशेषो द्रष्टव्यः। अतएव तत्र 'च'-कारप्रयोगः सर्व्वश्रेष्ठत्वापेक्षयान्ते निर्देशश्च। हरिं सर्व्वमनोहरं निजाशेष-भगवत्तामाधुरी-प्रकटनात्। त्रय्यादीनां यथोत्तरं श्रैष्ठ्यम्। अन्यत्तैर्व्याख्यातम्। यद्वा, त्रय्यादिभिरिन्द्रादिभ्योऽपि उप आधिक्येन, उपरिष्टाद्वा, गीयमानं माहात्म्यं यस्य, यतो हरिः ॥ ४५ ॥ इत्थं तस्यां तादृशं श्रीभगवत्स्नेहं तस्मिंश्च तस्या वात्सल्यं श्रुत्वा तद्भाग्यभरेणातिविस्मितः सन् तत्प्रसंगेन श्रीनन्दस्य तस्याश्च भाग्यं पृच्छति—नन्द इति। किं कतरत्, ब्रह्मन्! हे सर्व्ववेदमूर्त्ते! साक्षात् परब्रह्ममूर्त्ते वेति तत्तदशेषं भवता विज्ञायत इति भावः। एवमीदृशं महानुदयः सर्व्वतः स्नेहोत्कर्षो यस्मात्तत्; महाभागेति श्रीनन्दतोऽपि तस्याः श्रेयोऽधिकमभिप्रैति, तदभिव्यञ्जयति। वा-शब्द उक्तसमुच्चये। एवं षष्ठाद्यध्यायत्रयोक्तप्रकारेण, किंवोक्तरिंगणादिलीला-प्रकारेण, किंवोक्तेश्वरज्ञानाच्छादनपूर्व्वकस्नेहप्रवर्द्धनप्रकारेण। 'पपौ' इति श्रीदेवक्यास्तथा वत्सपालरूपधारणे पीतस्तनाभ्योऽपि वैशिष्ट्यं दर्शितम्, तासु तत्तदभावात्। तत्र देवक्याः स्तनपानं (भा० १०।८५।५५)—'पीत्वामृतं पयस्तस्याः पीतशेषं गदाभृतः' इत्यग्रे पञ्चाशीतितमाध्यायोक्तेर्ज्ञेयम्। हरिरिति तादृशबाल्यलीलया वात्सल्यविशेषादिना च मनो हरन्निति भावः ॥ ४६ ॥ महोदयत्वमेवाभिव्यञ्जयन् विहितचतुर्युगव्यापिमहाभक्तिलक्षण-दुष्करतरतपोविशेषाभ्यां जनकजननीभ्यां श्रीवसुदेवदेवकीभ्यामपि महद्भाग्यमाह पितराविति। अनुपश्चादपि नाविन्देतां न साक्षादन्वभवताम्,—मथुरायां गतेन बाल्यलीलासम्वरणात्। कृष्णस्य साक्षादवतारिण उदारं महत्, भुक्ति-मुक्तिभक्त्याद्यशेषार्थप्रदं वा आर्भकेहितं बाल्यचरितम्; किं वक्तव्यम्, तस्य साक्षादनुभवमाहात्म्यम्, तत्कीर्त्तनादिकमपि महाफलमित्याशयेनाह-यच्च कवयः श्रीब्रह्मादयः श्रीव्यासादयो वाद्यकलिकालेऽपि गायन्ति; कुतः? लोकानां सर्व्वेषामपि शमलापहं पापोन्मूलकमन्यथा कलिकालीनपापवर्गनाशासिद्धिः। यद्वा, स्वजन्मारभ्याद्यपि गायन्तीति निरन्तरगानमुक्तम्। तत्

किमर्थम् ? सर्व्वजीवानां शमलं संसारदुःखमपहन्तीति तथा तत् । यद्वा, अद्यापि चिरकालेऽतीतेऽपि कवय आत्मारामा अपि गायन्ति । कुतः ? लोकस्य मुनिजनस्य शमः शान्तिर्लापो वाक् तौ हन्ति प्रेमभराविर्भावेन मनोधैर्य्यं वाक्—प्रवृत्तिञ्च संहरतीति; किंवा शमस्यात्मारामतादि-लक्षणस्य लापं हन्ति तत्कथामात्रमपि नावशेषयतीति तथा तदिति परम-रसमयत्वेन स्वतः पुरुषार्थतोक्ता । तद्द्यो या चाविन्दत, स सा च किं श्रेयोऽकरोदिति पूर्वेणान्वयः ।। ४७ ।। एवं जगति तादृश-श्रेयोऽसम्भवाद्विस्मयेन प्रश्नः । परमभक्तिप्रार्थनेनैव गाढस्नेहैकलभ्यं कृष्णबाल्यचरितामृतं ताभ्यां लब्धमिति तत्रोत्तरं वक्तुमादौ तयोः पूर्ववृत्तमाह—द्रोण इति त्रिभिः । प्रवरः परमश्रेष्ठः, श्रीनन्दावतारत्वात् । आदेशान् श्रीमथुरामण्डले गोपालन लक्षणानेव, बहुत्वं तन्माहात्म्यगौरवात् । ह हर्षे, स्फुटमिति वा । एतत् सर्वत्रैव प्रसिद्धमित्यर्थः ।। ४८ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पितरौ देवकीवसुदेवौ कृष्णरामार्भकेहितं कृष्णरामादेहार्भकौ तयोश्चेष्टितं यल्लोकनं यद्दर्शनं शमलापहं पापापहम् ।।४७।। जातयोर्नौ जाते अवतीर्णौ भवति सतीत्यर्थः ।। ४८-५२ ।।

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृते शुकपक्षीये ऽष्टमोऽध्यायः ।। ८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मायावैभवं प्रकटयितुमाह—त्रय्येति । त्रय्या वेदपूर्वभागेन तद्बोधिततत्तत्कर्माराध्यत्वेन उपनिषद्भिर्वेदोत्तरभागैः सर्वकारणत्वोपास्यत्वप्राप्यत्वादिना साङ्ख्यैर्योगैश्च ज्ञानयोगकर्मयोगानुगृहीतभक्तियोगैकप्राप्यत्वेन सात्त्वतैः पञ्चरात्रसंहिताभिः परव्यूहविभवार्चारूपत्वेनोपगीयमानं माहात्म्यं यस्य तं हरिमाश्रितार्तिहरं सा विदित्वापि तदैव केवलमात्मजममन्यत ।। ४५ ।। श्रुतैवम्विधयशोदानन्दभाग्यातिशयस्तत्कारणं पृच्छति राजानन्द इति द्वाभ्याम् । हे ब्रह्मन् ! एवमेवंविधं महानुदय उत्तरफलं यस्य तच्छ्रेयः यतः कारणादभवत् तत्किमकरोन्नन्दो यशोदा चेति प्रश्नः महाभाग्यमेव सूचयन् यशोदां विशिनष्टि यस्याः स्तनं हरिः पपावपिबत् ।। ४६ ।। कुतश्च कारणात्पितरौ देवकीवसुदेवौ श्रीकृष्णस्योदारं विपुलमर्भकचेष्टितं नान्वविन्देतां न प्राप्नुतां न दृष्टवन्तौ इति प्रश्नान्तरम् ईहितं विशिनष्टि—यत्कृष्णोदारार्भकेहितं लोकस्य शृण्वतो वदतश्च जनस्य दुरितापहन्तृ कवयो नारदादयोऽद्यापि गायन्ति ईदृशकृष्णोदारार्भकेहितादर्शननिमित्तं किमिति प्रश्नार्थः ।। ४७ ।। इत्थमापृष्ट आह शुकः–द्रोण इति । वसूनां प्रवरः श्रेष्ठो द्रोणः धरया धराख्यया भार्यया सह ब्रह्मणश्चतुर्मुखस्यादेशान् गोरक्षणादिरूपान् करिष्यमाणस्तं ब्रह्माणमुवाच भूभारावतरणाय भगवानवतरिष्यति पयःप्रदानेनापि भगवन्तमाराधयितुं गोरूपेण मुनयश्च स्वांशैर्जनिष्यन्ते त्वन्तु गोरक्षणार्थं भार्यया सह गोपेषु जनिष्यसे इत्येवं ब्रह्मणोक्तस्तमाहेत्यर्थः ।। ४८ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रजास्नेहमयीं मायां शृङ्गग्राहिकतयैव दर्शयति-त्रय्येति । त्रय्या "अग्निमीळे" इत्यादिकया, उपनिषद्भिः 'एष पन्थाः' इत्यादिकाभिः सत्त्ववान् हरिः तद्विषयैः सात्वतैः साङ्ख्ययोगैः पञ्चरात्रादिशास्त्रैः यद्वा साङ्ख्ययोगैः यथार्थज्ञानप्रतिपादकैः ब्रह्मतर्कादिभिः सात्त्वतैः पञ्चरात्रादिवैष्णवतन्त्रैः ।। ४५ ।। श्रेयः पुण्यं पूर्वजन्मनीति शेषः "स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः" इत्यमरः । महानुदयः फलं यस्मात्तत्तथा महान् भागो भाग्यं यस्या सा महाभागा "भागो भाग्यांशतुर्यांशा" इति यादवः ।। ४६ ।। कृष्णरामनाम्नोरर्भकयोः बालयोः ईहितं चेष्टितं विन्दतिर्लाभार्थोऽप्यत्र ज्ञानार्थः चेष्टानुकूलज्ञानलाभं नाप्नुवन्ताविति "विद् ज्ञाने तु वेत्तीति विद्लृ लाभे तु विन्दति" इति वचनात् लोकशमलापहं जनपापहरम् ।। ४७ ।। प्रत्यारभ्यते कथान्तरमिति शेषः "प्रत्यारम्भे प्रसिद्धेह" इति यादवः ।। ४८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

त्रय्येति त्रय्या कर्म्मोपासनामय्या सर्वान्तर्यामिपर्यवसानया उपनिषद्भिः स्वरूपगुणाभ्यां सर्वबृहत्तमे ब्रह्मणि तस्मिन्नेव पर्यवसिताभिः साङ्ख्ययोगैः सेश्वरैः ते च श्रीभागवतार्थपर्यवसानानि पुराणानि मन्तव्यानि सात्वतैः तदुपासनामयपञ्चरात्रागमैः उप यत्किञ्चिद्गीयमानं नतु सम्यक् आनन्त्यात् तं हरिम् आत्मजममन्यत पुत्रभावेन साक्षात्तथा लालितवतीति काका चमत्कारातिशयो व्यञ्जितः । अथ विश्वरूपदर्शनमीश्वरभावं चाननुमोद्य पुत्रभावमयस्तनपायनबाल्यलीलाऽनुभवाद्वैवानुमोदते ।। ४५ ।। नन्द इत्यादि नायं सुखापो इत्यन्तोऽध्यायत्रयात्मको ग्रन्थः ।। ४६-५२ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे अष्टमोऽध्यायः ।। ८ ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ (भा, १०।८।४६) "नन्दः किमकरोद्ब्रह्मन्" इत्यादि । कथमेतादृशं भागधेयं द्रोणधरात्वेन श्रूयमाणयोर्नन्दयशोदयोर्यतः खलु वसुदेव देवक्योरप्यतिशयं सुखमासीदित्याशङ्कमानं राजानमाह—द्रोणो वसूनां प्रवर इत्यादि त्रिभिः ।

वसूनां प्रवरः कश्चिद् द्रोणनामा धरानाम्न्या भार्यया सह ब्रह्मण आदेशं करिष्यमाणः कदाचिद् ब्रह्मणा तस्मै य आदेशः कृतस्तं करिष्यमाणः करिष्यामीत्यङ्गीकुर्वन् उवाच—अग्रे मया प्रार्थ्यमानं वरं प्रयच्छ तदा ते आज्ञापालनं करिष्यामीति भुवि भूतले कृतावतारे हरौ विश्वेश्वरे महादेवे देवानामपि देवे नौ आवयोः परमा भक्तिः स्यात्। कीदृशयोः ? लोके जातयोः। भक्तिः कीदृशी ? यया अञ्जो दुस्तरं संसारसागरं तरेत्। इति प्रार्थिते सति ब्रह्माह—अस्तु। इति पुनरुक्तः सन् व्रजे नन्दो जज्ञ इति। एवं ख्यातः, नन्द इत्येव ख्यातः, धरा यशोदा साऽभवत् यशोदायामासः स्थितिर्यस्याः सा तथा। एतेन नित्यभूतयोरेव नन्दयशोदयोर्द्रोणधरे जीवत्वं त्यक्त्वा प्रविष्टे, न तु द्रोणधरे एव नन्दयशोदे, ते तु नित्ये एव। तेन तयोर्भागधेयं प्रति कः सन्देहः ? केवलद्रोणधरयोस्तु तथाविधसौभाग्ये सन्देहावतार इति स्थितम्॥ ४८–५२॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे अष्टमोऽध्यायः॥ ८॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

देवक्या अपि सकाशात्तस्या उत्कर्षमभिव्यञ्जयितुमैश्वर्य्यदर्शनादपि स्वीयवात्सल्यप्रेम्णः सङ्कोचभावमाख्यायैश्वर्य्यश्रवणादप्याह—त्रय्या यज्ञपुरुषत्वेन उपनिषद्भिर्ब्रह्मत्वेन साङ्ख्यैः पुरुषत्वेन योगैः परमात्मत्वेन सात्वतैः पञ्चरात्रैर्भगवत्त्वेन कर्मिप्रभृतिभिरुपगीयमानमाहात्म्यं देशकालानियमात्तस्याः समक्षमसमक्षं वा उप आधिक्येन गीयमानैश्वर्य्यं हरिं सा आत्मजममन्यतेत्यस्मदभीष्टदैवतेनावयोर्व्रतनियमसन्ततपूजनादिभिःसन्तुष्टेन पर्ज्जन्याभिधानमदीयश्वशुरकृतनिरवद्यबहुतपःसन्तोषितेन श्रीनारायणेन कृपया दत्तो लोकोत्तरः पुत्रोऽयं यत् कर्मिप्रभृतिभिस्त्रय्यादिप्रतिपाद्यत्वेन स्तूयते तत्र खलु "नारायणसमो गुणैः" इति सर्वत्र गर्गेण गीयतया नारायणसाम्यप्रथया अन्यदुष्करपूतनादिवधानामेककर्त्तृत्वप्रथया चायमेव नारायण इति तेषां विश्वास एव हेतुर्वस्तुतस्त्वयं मत्पुत्र एव मां मातरं क्षणमप्यदृष्ट्वा विकलीभवत्यहं चैनं स्वनिमेषव्यवहितं ज्ञात्वा विह्वलीभवामीत्यावयोर्जन्यजनन्योरनुभव एवात्र प्रमाणमिति मनसि सा समाधत्ते। किञ्च, कर्मिप्रभृतयस्त्रय्यादिभिर्यथा हरिं यज्ञपुरुषादिकं मन्यन्ते तथैवेयं वात्सल्यप्रेम्णा हरिम् आत्मजं मन्यते तेभ्यस्तत्तदनुरूपं फलं ददानस्तेषामनुग्राहकोवशयितासन्नीष्टे अस्यै तु वात्सल्यप्रेमानुरूपं फलं दातुमसमर्थो ऋणीभवन्नस्याअनुग्राह्योवश्य ईशितव्यत्वेन तिष्ठन् स्वानन्दतुष्टोप्यस्यास्तन्यामृतार्थं रोदितीत्यादिविशेष उत्तराध्याये स्पष्टीभविष्यति पद्यमिदं कृष्णलीलायां परिभाषासूत्ररूपं ज्ञेयं परिभाषाह्येकदेशस्था सकलं शास्त्रमभिप्रकाशयति यथावेश्मप्रदीप इति "इको गुणवृद्धी" (१।१।२) इति यत्र तत्र गुणवृद्धी श्रूयते तत्र तत्र इक्परिभाषोपतिष्ठते यथा तथैव कौमारकैशोरमाथुरकुरुक्षेत्रादिगतलीलासु यत्र यत्र ऐश्वर्य्यप्रसङ्गस्तत्रेदमुपतिष्ठत इति॥ ४५॥ ऐश्वर्य्यदर्शनश्रवणाभ्यामपि तस्याः प्रेमदार्ढ्यमाकर्ण्य कर्मिप्रभृतिभ्यो भक्तेभ्यश्चाभिव्यज्यमानमुत्कर्षं च जानन्निति विस्मयेन पृच्छति–नन्द इति। महान् उदयः फलं यस्य तत् महाभागेति नन्दादपि तस्याः श्रेयोऽधिकमभिप्रैति॥ ४६॥ ननु, "पीतशेषं गदाभृतः" इति वचनाद्देवक्या अपि स्तनं पपावित्यत आह—पितरौ अस्मत्कुले पितृत्वेन ख्यातौ देवकीवसुदेवौ कृष्णस्य उदारमतिसुखप्रदमतिमहच्च अर्भकेहितं बालचरित्रं न अन्वविन्देतां चक्षुरादिभिरास्वादयितुं नालभताम् उदारपदेन राममातृत्वाभिमानिनी रोहिणी वत्साहरणलीलाप्राप्तमातृभावागोप्यश्च व्यावृत्ताः यत् अर्भकेहितम्॥ ४७॥ कृष्णावतारस्य तदीयबाल्यलीलानां च नित्यत्वादेव नन्दयशोदयोर्नित्यसिद्धत्वं स्पष्टमिति नाप्येतादृशः प्रेमासाधनसिद्धो भवितुमर्हतीत्यपि जानतोपि राज्ञोऽस्य प्रश्नोऽयं यथा भक्ताव्युत्पन्नस्येत्यतस्तत्र ममाप्युत्तरं तादृशी भवितुमर्हतीति प्रष्टरि राजन्युदासीनमना एवाह, द्रोण इति। आदेशान् गोपालनादिलक्षणान् तं ब्रह्माणम्॥ ४८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एतदेवाह–त्रय्येति। त्रय्या कर्मनिर्णयपरेण पूर्वमीमांसाशास्त्रेण कर्मणोऽ्याः इन्द्रादयोऽशास्तद्द्वारेण उपनिषद्भिः कर्मणा शुद्धान्तकरणेनाधिकारिणा साक्षादेव सर्वज्ञः सर्वशक्तिः सर्वकारणकारणः सर्ववेदैकवेद्यः ध्यानादिसाधनसम्पत्त्या लभ्यते इति साङ्ख्यैः तत्त्वसङ्कलनया पुरुषो ज्ञेयः इति योगैश्चित्तवृत्तिनिरोधलभ्यत्वेन सात्त्वतैः पञ्चरात्रिकैः वेदार्थविद्भिः व्यूहाङ्गीत्वेनोपगीयमानं माहात्म्यं यस्य तं सा आत्मजममन्यत अहो तस्या भाग्यमिति भावः॥ ४५॥ महानुदयः पुत्रीभूतपरमपुरुषलीलानुभवार्हः उद्भवो यस्मात् तत्॥ ४६॥ पितरौ देवकीवसुदेवावपि यन्नान्वविन्देतां न प्राप्नुवताम् यच्च कवय आत्महितार्थं जगद्धितार्थं च गायन्ति तत्कृष्णस्योदारमनुपममर्भकेहितं बालचेष्टितं तत्स सा च अविन्दत स सा च किं श्रेयोऽकरोदिति योजना॥ ४७॥ त्वं गोपो भव इयं गोपी इत्यादिरूपान् ब्रह्मणः आदेशान् करिष्यमाणस्तं ब्रह्माणम्॥ ४८–४९॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

न च हरेरैश्वर्यदर्शनेन तच्छ्रवणेन च यशोदायास्तस्मिन् पुत्रभावः सङ्कोचमेति प्रत्युत वृद्धिमेवेत्याह एष्येति। ऋग्यजुःसामभिर्यज्ञपुरुषत्वेनोपनिषद्भिस्तच्छिरोभिः परब्रह्मत्वेन च साङ्ख्यैर्योगैश्च परमपुरुषत्वेन सात्वतैः पञ्चरात्रैर्भगवत्त्वेन

चोपगीयमानमाहात्म्यं हरिं सा यशोदा आत्मजमेवामन्यत तस्मिंस्तस्याः पुत्रभावः स्थैर्यमविन्ददित्यर्थः। नहि पुत्रस्य निखिलभूमीश्वरत्वे दृष्टे श्रुते च तन्मातुस्तस्मिन् पुत्रभावो सत्यपितु परिवर्द्धत एव एवं भावान्तरेषु योज्यम् ॥ ४५ ॥ एवमैश्वर्यदर्शनश्रवणाभ्यामशिथिलपुत्रभावां तद्भाववश्यपरेशां यशोदामाकर्ण्य विस्मितः परीक्षित् पृच्छति नन्द इति। महानुदयः फलं यस्य तत् महाभागेति तस्यानन्दादप्यधिकं श्रेयोभिप्रेति ननु कथं विस्मयसे तत्राह पपाविति यस्य नन्दस्यास्तनमाज्ञारूपं शब्दं हरिः पपौ पालितवान् यस्या यशोदायाः स्तनं पपौ पीतवानित्यर्थः ॥ ४६ ॥ परमदुर्लभलाभाद्विस्मयेऽहमित्याह—पितराविति। पितृत्वेन ख्यातौ पितरौ देवकीवसुदेवौ कृष्णस्योदारं परमानन्दप्रदं महच्चार्भकेहितं बालचरितं नान्वविन्देतां साक्षान्नालभेताम् उदारपदेन राममातृत्वाभिमानिनी रोहिणी प्राप्ततन्मातृभावा गोपाश्च व्यावर्त्यन्ते यदर्भकेहितम् ॥४७॥ नन्दयशोदयोस्तत्प्रेम्णा च नित्यसिद्धतां जानन्नपि राजा तत्सौभाग्यसाधनं श्रेयः पृच्छतीति तदंशस्याप्यनयोः सत्त्वात्तथैवोत्तरयिष्यामीति भावेन तावदाह द्रोण इति आदेशान् गोपालनादिरूपान् तं ब्रह्माणम् ॥ ४८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तन्मायावैभवं भृङ्गिग्राहकया दर्शयति ॥ त्रय्येति। वेदेनोपनिषद्भिरग्निमीळेत्यादिना। उपनिषदां वेदत्वेऽपि वेदान्तत्वेन पृथगुक्तिः। एष पन्था इत्यादिकाभिः साङ्ख्यं कापिलं योगैर्योगशास्त्रैः सात्वतैः पञ्चरात्रादिभिः सात्वान्भगवांस्तद्विषयैः सात्वतैः साङ्ख्ययोगैः पञ्चरात्रादिशास्त्रैरित्यपि व्यातन्वते। वृद्धाच्छाभावश्छान्दसः। उपगीयमानं माहात्म्यं यस्य तं हरिं साऽऽत्मजं स्वसुतममन्यतेति ॥ ४५ ॥ श्रुतनन्दतत्सुन्दरीसौभगो राजा चित्ते चित्रं मन्वानो मुनिं तन्निदानं पृच्छतीति वदति ॥ राजेति। ज्ञानपूर्णं एवं महानुदयः फलं येन तच्छ्रेयः सुकृतं। स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृष इत्यमरः। एवंमहोदयमिति समस्तं वा। एवमुक्तरीत्या महानुदयो येन तदिति विग्रहः। महाभागा महान्भागो भाग्यं यस्याः सा। भागो भाग्यंशतुर्यांश इति यादवः। महाभागधेयवतीति वा। भागारूपार्थकः प्रोक्तो भागधेयैकदेशयोरिति विश्वः। किं तत्कार्यं त्वया श्रुतं क्षितिपत इत्यत आह ॥ हरिर्यस्याः स्तनं पपौ पीतवानिति। एवं महोदयं श्रेयो यशोदानन्दश्च किमकरोदिति पृथक् पृथगन्वयः ॥ ४६ ॥ पितरौ साक्षात्प्रसूजनयितारौ देवकीवसुदेवौ कृष्णरामार्भके हितं कृष्णस्य रामाभिः सह क्रियमाणमङ्गरक्षाद्यारभ्येतरतरुण्यङ्कसङ्गादिरूपमर्भकचेष्टां रामा सुन्दरीत्वेनादौ दृष्टा पूतनातदादिविषयेऽर्भके हितमिति वा। नान्वविन्देतां न प्राप्नुवतः। एतौ च प्राप्नुवन्तौ। किं तन्माहात्म्यमित्यत आह ॥ गायन्तीति। अद्यापि कवयो ब्रह्माद्या लोकशमलापहं लोकानां शमलं पापं तदपहन्तीति तत्तथा गायन्ति। लोकानां शं येन तल्लोकशं च तन्मलापहं चेति वाऽनेकार्थविशेषो ज्ञेयः। तत् त्रय्या चेत्यादिना हरिं सामान्येनात्मजमित्यसाधारणधर्मैरेकप्रसक्तेः पूर्वत्रैव पपौ यस्यास्तनं हरिरित्यत्र गायन्त्यद्यापि कवयो यल्लोकशमलापहमित्युक्तेश्च रामग्रहणं मनोरममिति शङ्कासङ्कोचोऽन्वयन एवं ज्ञेयः। यद्वा प्रान्ते सहरामो वसंश्चक्रे इत्युदीरणेन सहभूतमात्रेण योग्यक्रीडादिकर्तृत्वेन छात्रेण सह गुरुः पूजित इत्यादौ यथा तरतमभावस्तथाऽत्रेति कृष्णरामयोरर्भके हितमित्यपि सम्भवतीति ज्ञेयं। याभ्यां तपआदिकं कृत्वा पुत्रत्वेन सम्पादितः कृष्णस्तौ नैतद्दृष्टवन्तावेतौ तु यशोदानन्दौ दृष्टवन्तावितीदं चित्रमिति भावः। अपे क्लेशतमसोरिति योगविभागाद्धन्तेर्डः। अनाशीरर्थे। आशिषि हन इत्युक्ते। सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे विन्दते विन्दति प्राप्ताविस्युक्तेर्लाभार्थो विदधातुरिति ज्ञेयं ॥ ४७ ॥ उत्तरासुतपृष्टो ऋषिश्रेष्ठ उत्तरं वक्तुमारभत इत्यर्थको हशब्दः। प्रत्यारम्भे प्रसिद्धे हेति यादवः। वसूनां प्रवरो नाम्ना द्रोणो धरया तन्नाम्न्या भार्यया सह ब्रह्मण आदेशं करिष्यमाणस्तं ब्रह्माणमुवाच ॥ ४८ ॥

श्रीसुबोधिनी

अतःपरं प्रमाणान्तरेणापि न स्मृत्युद्बोध इत्याह **त्रय्येति**, त्रयी वेदत्रयी, तत्र क्रियाशक्तेः प्रतिपादितत्वाद् भगवन्माहात्म्यप्रतिपादकत्वं, **उपनिषत्स्वपि** ब्रह्मप्रतिपादनाद् भगवज्ज्ञानशक्तिप्रतिपादनं, **साङ्ख्येपि** नित्यानित्यवस्तुविवेको भगवत्सम्बन्धतद्राहित्यभेदेनैव, **योगेपि** निश्चिन्ततया भगवच्चिन्तनं, चकारात् पशुपतिमतेपि भगवन्माहात्म्यनिरूपणमेव, तथा **सात्वतैः** वैष्णवतन्त्रैरपि, वेदस्य द्विरूपत्वात्, षड्दर्शनैरप्युप**गीयमानमाहात्म्यो** भगवांस्तादृशं तावन्ति प्रमाणानि श्रुत्वापि **हरिमात्मजमेव सामन्यत**, अतो भक्तौ प्रतिष्ठिता**विहितायां** पुत्रभावेन ॥ ४५ ॥ एतस्या एतावत्त्वं कथं न त्वन्यासामितिशङ्कां परिहरन् महापुरुषकृपामाह **सप्तभिः**, **नन्दः किमकरो**दितिप्रश्नो द्वयेन कर्मव्युदासस्य वक्तव्यत्वात्, **ब्रह्मन्नि**तिसम्बोधनं ज्ञानार्थं, नामप्रकरणे नन्दस्यैव प्रथमतो निरोधकथनात्, **किं श्रेयो** धर्मरूपं, लोकवेदयोरप्रसिद्धत्वात् प्रश्नः, प्रसिद्धार्थमेवाहै**वम्महोदयमिति**, **एवम्महानुदयो**भ्युदयो भगवान् पुत्र इति यस्य श्रेयसः, भिन्नतया **यशोदाया** अपि निरूपणाद् भिन्नतया प्रश्नो **यशोदा** चेति, **नन्दा**पेक्षयापि निरन्तरसम्बन्धान्महाभागा, किञ्च **यस्याः स्तनं** सर्वदुःखहर्तापि **पपौ**, सा हि जानाति क्षुन्निवृत्त्यर्थं भगवान् पिबतीति, अतो "हरेरपि" सा "हरि"रित्युक्तं भवति, बालकतोषपक्षेपि तदीयस्तन्येनैव तथाकरणादुत्कर्षः ॥ ४६ ॥ **ननु** प्रसिद्धमेव तत्सुकृतं यथा वसुदेवेन कृतमिति चेत् तत्राह **पितराविति**, यद्यपि पितरौ जातौ तथापि तादृश आनन्दो

नानुभूतो यादृश एताभ्यामनुभूतस्तदाह **नान्वविन्देतामिति**, एतदनन्तरमपि **नाविन्देतां,** अग्रेन्यथैव करणात्, अयं महानानन्द इति, ज्ञापयति **कृष्णोदारार्भके हितमिति**, **कृष्णस्यार्भके हितं** बालचेष्टितं, अनधिकारिणोपि सर्वपुरुषार्थदानादुदारं **साधनफलं** हीनं तत्रापि लौकिकं साध्यफलादप्यधिकः परमानन्दः स चेत् साध्यस्वर्गादिसाधनं तदा पशुपुत्रादिजन्यमलौकिकं सुखं लौकिकं च तादृशमेव, तत्र साधनोत्कर्षे साध्योत्कर्षो दृष्टो लोके यथोत्तमैः सूत्रैरुत्तमः पटो यथोत्तमशर्करया भक्ष्यमिति, यत्र परमानन्द एव प्रथमकक्षा तेन साध्यं लौकिकं लौकिकवत्ततो ष्यधिकं ततोप्यलौकिकं दिव्यपुत्रपश्वादिरूपं ततोपि स्वर्गादिस्तदिदमुक्तं **कृष्णः** परमानंदः स चार्भकस्तस्य च लीला साप्युदारेति साक्षाल्लीला परमदुर्लभेति किं वक्तव्यम् ? यतः शब्दतोपि श्रुता परमानन्दं जनयतीत्याह **गायन्त** इति, **अद्यापि** व्यासादतः शब्दरसाभिज्ञा निर्दुष्टशब्दार्थवक्तारो रसवद्वक्तारो वा तेन रसेन मत्ता गायन्ति, अद्यापीपि कालविलम्बेपि तद्रसानुवृत्तिः सूचिता, किञ्च **यच्** चरित्रं **लोकस्य मलं** दूरीकरोति, अतो दोषनिवर्तकं गुणाधायकं च श्रुतमपि भवति तत्र साक्षात्तादृशभोक्तृणां किं भाग्यं वक्तव्यमित्यर्थः ॥ ४७ ॥ अत्र महापुरुषकृपैव कारणमिति वक्तुमुपाख्यानमारभते **द्रोण** इतिपञ्चभिः ॥

प्रार्थना प्रश्नदाने च भक्तिरागमनं हरेः ॥ ३ ॥

पूर्वकल्पेष्टवसुषु **द्रोणो** नाम कश्चिद्, यद्यप्यस्मिन् कल्पे न तस्य **भार्या धरा** तथापि कल्पान्तरे तथेति न विरोधः, तस्मिन् कल्पे वस्वादयो **ब्रह्मण** एव जाता इति सृष्ट्यर्थमाज्ञापितो **भार्यया सह** सृष्टिलक्षणमादेशं **करिष्यमाणस्तं ब्रह्माणमुवाच,** हेत्याश्चर्ये क सृष्टिकर्तृत्वं क भक्तिरिति ॥ ४८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

नन्दः किमकरोदित्यत्र, **पञ्चभिरुत्तरदाने** तात्पर्यमाहुः **कर्मव्युदासस्ये**ति । नेदृशं फलं कर्मणो भवितुमर्हति, किन्तु महदनुग्रहस्यैवेति कर्मव्युदासस्य वक्तव्यत्वात् तस्य चाग्निहोत्रदर्शपौर्णमासचातुर्मास्यपशुसोमात्मकत्वेन पञ्चात्मकत्वात् तावद्भिस्तद्व्युदासोक्तिरित्यर्थः ॥ ४६ ॥ **कृष्णोदारे**त्यत्र, उदारत्वोक्तितात्पर्यमाहुः **साधनफलमित्यादि** । अधिकारः साधनम् । तस्य हीनत्वात् तज्जन्यं फलमपि तथा । अथवा । सुखसाधनरूपं वैदिककर्मणः फलं पश्वादिरूपं तथा । साध्यफलं स्वर्गादि मोक्षान्तम् । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतेस्तथा । स परमानन्द एव चेत्तथा । तदा पश्वादि तज्जन्यं लौकिकमलौकिकं च सुखं तादृशमेव परमानन्दरूपमेवेत्यर्थः । **लौकिकवदिति** । लौकिकवत् परिदृश्यमानं परमित्यर्थः । लोके वेदे च फलात्साधनमपकृष्टं दृष्टम् । यत्र परमकाष्ठापन्नं वस्तु साधनं तत्र तत्साध्यफलस्य का वार्तेति भावः ॥ ४७ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

सुबोधिन्यां त्रय्येत्यत्र **चकाराणामर्थमाहुर्वेदस्ये**त्यादि, **वेदस्य** नित्यकाम्यभेदेन **द्विरूपत्वात् त्रय्या चेति चकार** उपनिषदामपि ज्ञानोपासनाभेदेन द्वैविध्यात् तत्रापि चकारः, **दर्शनानां षट्सङ्ख्याकत्वात् साङ्ख्ययोगैश्चेति चकार** इति तथेत्यर्थः, **एतावत्कथनतात्पर्यमाहुस्तावन्ती**त्यादि ॥ ४५ ॥ **नन्दः किमकरो**दित्यत्र **प्रश्नो द्वयेने**ति तथा च **शेषैः पञ्चभिरुत्तरमित्यर्थः**, तत्तात्पर्यं **टिप्पण्यामाहुः पञ्चभिरि**त्यादि, **साधनं फल**मित्यादि यदुक्तं तत्तात्पर्यं टिप्पण्यामाहु**रुदारे**त्यादि, **साधनशब्देनाधिकारसामान्यपरामर्शे भक्तिमार्गाधिकारस्य** तत्फलस्य च तथात्वभ्रमः स्यादित्यरुच्या पक्षान्तरमाहु**रथ वे**त्यादि, **तथेति साधन**शब्दवाच्यं, **मोक्षान्त**मिति फलशब्दवाच्यमितिशेषः, तत्र मानमाहु**रेतस्यैवे**त्यादि, सिद्धमाहुः **स परमानन्द** इत्यादि, **सुबोधिनीस्थफक्किकायोजनात्वेवमौदार्यं ह्यल्पेपि** महादानेन व्यक्तं भवति तदत्र व्युत्पाद्यते, तथा च तत्र **पित्रोरपिशब्दाच् छ्रीनन्दयशोदयोश्च साधनं फलं हीनं** तत्र हेतुर्लौकिकं वैदिकत्वेपि देवलोकमात्रसाधकत्वात्, तट् **टिप्पण्यां** विवृत**मधिकार** इत्यारभ्य **तथे**त्यन्तं, **साध्यफलं** मोक्षान्तं तस्मादधिकः **परमानन्दः**, तदपि **टिप्पण्यां** श्रुतिविलेखनेन विवृतं, तेन यत् सिद्धं तदपि **स परमानन्द** इत्यारभ्ये**त्यर्थ** इत्यन्तेन विवृतं, सुबोधिन्यामुपपादयन्ति **तत्रे**त्यादिना **भक्ष्यमिती**त्यन्तेन, प्रकृते योजयन्ति **यत्रे**त्यादि, **प्रथमकक्षे**ति साधनरूपा **कक्षा**, **लौकिकमित्यस्यैवार्थो लौकिकवदिति**, तदर्थं **टिप्पण्यामाहुर्लौकिकवदि**त्यादि, **ततोप्यधिकं ततोप्यलौकिकमिति लौकिकवत्** प्रतीयमानाद् **यदधिकं** विशेषरसवत् तदेवालौकिकमत्र न तु पूर्वविजातीयं, प्रथमायां तत् **सिद्धं, दोषनिवर्तकमिति श्रुतमपि दोषनिवर्तक**मित्यन्वयो ज्ञेयः ॥ ४६ ॥ **द्रोण** इत्यत्र **प्रार्थनाप्रश्नदाने** इति **प्रार्थना** द्वितीयश्लोकार्थः **प्रश्नदानं** राजप्रश्नोत्तर**दानं** तृतीयश्लोकार्थः ॥ ४८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

त्रय्येत्यस्याभासे **प्रमाणान्तरेणापी**ति चक्षुरादिभिरनुद्बोधः पूर्वमुक्तोत्रशब्देन तदनुद्बोध उच्यते इत्यर्थः, प्रमाणैर्हि संस्कारमुद्बोध्य स्मृतिरुद्बोध्यते, अत्र तु संस्कार एव न जात इतिभावः, व्याख्याने, **द्विरूपत्वादिति** मन्त्रब्राह्मणभेदेनेत्यर्थः, तथा च मूले उपनिषदतिरिक्तः सर्वोपि भागस्त्रयीपदेनोक्त इति ज्ञेयम् ॥ ४५ ॥ **कृष्णोदारे**त्यत्र लौकिक-

पुरुषार्थेभ्यो भगवदीयपुरुषार्थानामुत्कर्षं साधयन्ति **साधने**त्यादिना, **लोके** धर्मः कर्मरूपः, अर्थः पश्वादिरूपः, कामः स्वर्गरूपः, मोक्षो ब्रह्मभावरूपः, परमानन्दस्तु **ततोऽप्यधिकः**, **सोऽत्र प्रथमकक्षा** धर्मस्थानीयः, अर्थस्थानीयोऽर्भकरूपो भगवान्, कामस्थानीया लीलोपयोगिनः पुत्रपश्वादयः, मोक्षस्थानीयो भजनानन्दानुभवः, **स्वर्गादि**रिति **स्वर्ग आदि**र्यस्येति मोक्ष इत्यर्थः, अलौकिकं लौकिकमित्यत्र व्युत्क्रमेण पाठः क्रमाविवक्षा वा, टिप्पण्यां तथैव व्याख्यानात्, मूले **कृष्णपदेन परमानन्दः** साधनत्वाद् धर्मः, **अर्भकपदेनार्थः**, **लीलापदेन** तदुपयोगिनः पश्वादयः कामरूपाः, तस्या औदार्यकथनेन भजनानन्दो मोक्षरूप उक्तः, तत्रापि सर्वपुरुषार्थदानकथनेनैतेषामुत्कर्षोऽवाङ्मनोगोचर इति सूचितं, **गायन्ती**त्यत्र शब्देति शब्दे दर्शनाद्यपेक्षया महान् रस इति ज्ञानं **कवि**पदेन सूचितं, **निर्दुष्टे**ति 'अदोषौ शब्दार्थौ काव्यं' 'रसवद् वाक्यं वा काव्य'मिति पक्षद्वयमाश्रित्य **कविपदार्थ** उक्तः, **मत्ता** इति गानस्य मत्तकार्यत्वादिति भावः ॥ ४७ ॥ **द्रोण** इत्यत्र **प्रार्थने**त्यादिना सप्तश्लोकानामर्था उक्ताः, **क्रमस्या**विवक्षितत्वात् पूर्वं द्वयेन **प्रश्न** उक्तः, अत एव तत्र 'प्रश्नो द्वयेने'त्युक्तं, 'द्रोण' इति 'जातयो'रिति द्वयेन **प्रार्थना**, **प्रथमे प्रार्थनामुवाचे**त्युक्तं, द्वितीये प्रार्थनेति भेदः, अत एव "जातयो"रित्यस्याभासे **एवकारः**, अग्रे **दानं भक्तिरागमनं** चैकैकेनेतिव्याख्यानानुसारेण श्लोकविभागो ज्ञेयः ॥ ४८ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

द्रोणो वसूनां प्रवर इत्यत्र **प्रार्थने**ति का॰ ५९¾। अत्र "नन्दः **किमकरो**"दित्यादिपूर्वोक्तश्लोकद्वयेन सह सप्तश्लोकानामर्था उक्ताः, मूले प्रार्थनातः पूर्वोक्तोऽपि प्रश्नः कारिकायां क्रमस्याविवक्षितत्वात् पश्चादुक्तः, तत्र "नन्दः किमकरोद् ब्रह्म"न्नित्यादिद्वयेन **प्रश्न** उक्तः, अत एव तत्र 'प्रश्नो द्वयेने'त्युक्तं, "द्रोण" इति "जातयो"रितिद्वयेन **प्रार्थना**, प्रथमे प्रार्थनामुवाचेत्युक्तं द्वितीये प्रार्थनेतिभेदा, अत **एव** "जातयो"रित्यस्याभासे "प्रार्थनामेवाहे"त्येवकारः, अग्रे **वरदानं भक्तिरागमनं** चैकैकेनेतिव्याख्यानानुसारेण श्लोकविभागो ज्ञेयः, "अस्त्वित्युक्त" इति **वरदानं** 'ततो भक्तिर्भगवती'ति **भक्तिः**, 'कृष्णो ब्रह्मण आदेश'मित्यनेन **हरेर्व्रजे आगमन**मित्यर्थः ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मायाबलोद्रेकं यशोदायां भगवत्कृपातिशयं च द्योतयन्नाह—त्रय्येति। त्रय्या वेदपूर्वभागेन कर्मकाण्डेन इन्द्रादिरूपेण, उपनिषद्भिर्वेदोत्तरभागेन ब्रह्मरूपेण, साङ्ख्यैः पुरुषरूपेण, योगैः परमात्मरूपेण, सात्वतैः पञ्चरात्रादिवैष्णवतन्त्रैर्भगवद्रूपेण, चकारात् पशुपतिमते शिवादिरूपेण चोपगीयमानं माहात्म्यं यस्य तं हरिं सा यशोदाऽऽत्मजममन्यत ॥ ४५ ॥ एवं नन्दयशोदयोरुपरि भगवतः कृपातिशयमाकलय्यातिविस्मितो राजा तत्कारणं पृच्छति—नन्द इति। सर्वज्ञत्वं सूचयन् सम्बोधयति—ब्रह्मन्निति। नन्दो यशोदा च एवंविधं श्रेयःसाधनं किमकरोत्? नन्दापेक्षयापि यशोदाया आधिक्यं सूचयन् विशिनष्टि 'महाभागा' इति। तत्र ज्ञापकमाह—यस्या इति। यस्य तृप्तयै यज्ञादयोऽपि न समर्था जाताः स दुराराध्यो हरिर्यस्याः स्नेहातिशयवशात् स्तनं पपौ। एवं—शब्दार्थमेव स्पष्टयति—महोदयमिति। महानुदयः फलं भगवद्बाललीलानुभवरूपं यस्य तदित्यर्थः ॥ ४६ ॥ उक्तमेव स्पष्टयति—पितराविति। ययोः प्रसन्नः सन्नवतीर्णस्तौ पितरौ देवकीवसुदेवावपि कृष्णोदारार्भकेहितं नान्वविन्देतां नानुभूतवन्तौ, तद्योऽनुभूतवान् स नन्दो यशोदा च किं श्रेयोऽकरोदित्यन्वयः। 'तदनुभवे किमाश्चर्यम्' इत्याशङ्क्य 'दुर्लभत्वात्' इत्याशयेनाह—गायन्ति इति। कवयो व्यासादयः सर्वरहस्याभिज्ञाः सर्वेपि कारिणो यच्चरितमद्यापि गायन्ति वर्णयन्ति। तत्प्रयोजनमाह—लोकशमलापहमिति। श्रोतृवक्तृप्राणिनां सर्वदोषविनाशकमित्यर्थः। 'न केवलं दोषनिवर्तकम्, किन्तु सर्वाभीष्टप्रदमपि' इत्युदारपदेन सूचितम् महतां कृपैवात्र कारणमित्याह—द्रोण इति। वसूनां मध्ये प्रवरः परमश्रेष्ठो द्रोणाख्यो वसुः धरया धराख्यया भार्यया सह ब्रह्मणः आदेशान् गोपालनादीन् करिष्यमाणस्तत्प्रसन्नतापन्नं ब्रह्माणमुवाचेत्यन्वयः। तत्स्वार्थकौशल्यस्याश्चर्यं सूचयन्नाह—हेति। 'द्रोणस्याभिमते पत्न्या इति षष्ठोक्तिस्तु कल्पान्तरविषया, अतो न विरोधः ॥ ४८ ॥

अन्वितार्थप्रकाशिका

त्रय्येति ॥ त्रय्या वेदपूर्वभागेन कर्मकाण्डेन इन्द्रादिरूपेण उपनिषद्भिर्वेदोत्तरभागेन ब्रह्मरूपेण सांख्यैः पुरुषरूपेण योगैः परमात्मरूपेण सात्वतैः पञ्चरात्रादिवैष्णवतन्त्रैर्भगवद्रूपेण चकारात् पशुपतिमते शिवादिरूपेण चोपगीयमानं माहात्म्यं यस्य तं हरिं सा यशोदाऽऽत्मजममन्यत ॥ ४५ ॥ नन्द इति ॥ हे ब्रह्मन्! नन्दः तथा यस्याः स्तनं हरिः पपौ सा महाभागा यशोदा च एवं महोदयं महाफलम् एवंविधं श्रेयःसाधनं किम् अकरोत ॥ ४६ ॥ पितराविति ॥ ययोः प्रसन्नः सन्नवतीर्णस्तौ पितरौ देवकीवसुदेवावपि यत् कृष्णस्योदारं महत् अर्भकेहितं बालचरितं न अन्वविन्देतां नानुभूतवन्तौ यत् लोकानां श्रोत्रादीनां शमलापहं पापनाशकं यत् कवयो व्यासादयः अद्यापि गायन्ति तच्चरितं योऽनुभूतवान् या चानुभूतवती सः नन्दो

यशोदा च किं श्रेयोऽकरोत् इत्यनुषङ्गः ॥ ४७ ॥ द्रोण इति ॥ वसूनां मध्ये प्रवरो द्रोणः द्रोणाख्यो वसुः धरया धराख्यया भार्यया सह ब्रह्मणः आदेशान् गोपालनादीन् करिष्यमाणस्तं प्रसन्नतापन्नं ब्रह्माणमुवाच ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सांप्रतं हरेर्माहात्म्यं तस्याः हरौ पुत्रत्वं चाह त्रय्येति । त्रय्या इंद्रादिषु व्यापकरूपेण उपनिषद्भिश्च सर्वकारणसर्वनियामकादिविशेषणैः सांख्यैः सांख्यविद्भिः पुरुषरूपेण च योगविद्भिः परमात्मपरमेश्वरादिविशेषणैश्च सात्वतैः भक्तैः पंचरात्रविद्भिश्च सर्वोपास्यपरमप्राप्यसर्वगुणैश्वर्यादिदिव्यविग्रहसंपन्नादिविशेषणैश्च उपगीयमानं माहात्म्यं यस्य तम् ॥ ४५ ॥ अत्याश्चर्येण राजा पृच्छति नंद इति महोदयं महान् उदयो वृद्धिर्यस्मिंस्तत् श्रेयो मंगलकर्म ॥४६॥ पितरौ देवकीवसुदेवौ कृष्णस्य स्वपुत्रास्यउदारं प्रेमास्पदं यदर्भकेहितं बालचरितं नान्वविंदेतां न लभेतां लोकानां शमलापहं पापनिवर्त्तकं तत् यो नंदो विंदेत सः किंश्रेयः अकरोत् सा च ॥ ४७ ॥ तत् प्रश्नोत्तरं कुर्वञ्छ्री शुक उवाच द्रोण इति । ब्रह्मणो विधेः आदेशान् व्रजे जन्मग्रहणरूपाणि आज्ञावचनानि करिष्यमाणो द्रोणः ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मायावैभवं प्रकटयितुमाह ॥ त्रय्येति ॥ त्रय्या वेदपूर्वभागेन, उपनिषद्भिर्वेदोत्तरभागैः, सांख्यैश्च योगैश्च तैः, सबीजनिर्बीजत्वाभ्यां सांख्ययोगयोर्द्वैविध्याद्बहुवचनम् । सात्त्वतैः पञ्चरात्रसंहिताभिश्च, द्वितीयचकारात् पाशुपतैः, उपगीयमानं माहात्म्यं यस्य तं, हरिं स्वाश्रितार्त्तिहरं भगवन्तं, सा प्राग्विदिततत्त्वापि यशोदा, वैष्णव्या मायया पिहितज्ञानावृत्त्यानन्तरमिति शेषः । आत्मजं च केवलं स्वपुत्रमेव, अमन्यत । त्रय्या तु तद्बोधिततत्कर्माराध्यत्वेमेन्द्रादिरिति, उपनिषद्भिः सर्वकारणत्वसर्वोपास्यत्वप्राप्यत्वादिना परमेश्वर इति, सांख्याभ्यां पुरुष इति, योगाभ्यां परमात्मेति, सात्त्वतैः परव्यूहविभवार्चारूपत्वेनोपास्य इति, पाशुपतैः परमशिव इति, एवं षड्दर्शनसंज्ञैरुपगीयमानमिति, केचित्तु द्वितीयचकारेण पाशुपतैः शिव इति, गाणपत्यैर्गणेश इति, सौरैः सूर्य इति, शाक्तैरिच्छादिशक्तिरूपेणोपगीयमानमाहात्म्यं, हरिं साऽऽत्मजममन्यतेत्याहुः ॥ ४५ ॥ विश्रुतैवंविधनन्दभाग्यातिशयो राजा तस्य तत्त्वे कारणं पृच्छति ॥ नन्द इति ॥ हे ब्रह्मन् , एवमेवंविधं, महानुदय उत्तरफलं यस्य तत् , किं किमात्मकं, श्रेयः, नन्दः अकरोत् । महाभागा महाभाग्यवती, यशोदा च, किं श्रेयः अकरोत् । महाभाग्यमेव सूचयन् यशोदां विशिनष्टि । यस्याः स्तनं, हरिः पपौ । इत्येकः प्रश्नः ॥ ४६ ॥ पितराविति ॥ लोकशमलापहं शृण्वतो वदतश्च जनस्य दुरितापहन्तृ, यत् कृष्णोदारार्भकेहितं कृष्णस्य विपुलमर्भकचेष्टितं, कृष्णस्य बालचरित्रसमीक्षणजानन्दमित्यर्थः । कवयो नारदादयः, अद्यापि गायन्ति हि । तथाभूतं पितरौ, न अन्वविन्देतां कथं न प्राप्नुतां कथं न दृष्टवन्ताविति प्रश्नान्तरम् । ईदृशकृष्णोदारार्भकेहितादर्शननिमित्तं किमिति भावः ॥ ४७ ॥ इत्थमापृष्ट आह शुकः ॥ द्रोण इति ॥ वसूनां षष्ठस्कन्धषष्ठाध्याये उक्तानां धर्मोढदाक्षायण्या वस्वाख्यायाः सुतानामष्टानां, प्रवरः श्रेष्ठः, द्रोणो द्रोणाख्यो वसुः, धरया धराख्यया, भार्ययाऽङ्गनया सह, ब्रह्मणश्चतुर्मुखस्य, आदेशान् गोरक्षणादिरूपनिदेशान्, करिष्यमाणः सन्, तं ब्रह्माणं, ह स्फुटं, उवाच । भूभारावतरणाय भगवानवतरिष्यति, पयःप्रदानेनापि भगवन्तमाराधयितुं गोरूपेण मुनयश्च स्वांशैरवतरिष्यन्ति त्वं तु गोरक्षार्थं भार्यया सह गोपेषु जनयिष्यसे, इत्थं ब्रह्मणोक्तस्तमाहेत्यर्थः ॥ ४८ ॥

श्रीहरिसूरिविचितं श्रीभक्तिरसायनम्

त्रय्या चेति : १०.८.४५.

पितामहोऽपि यत्पुत्रो जगद्धात्र्यपि यत्प्रिया । तमीशमात्मजं मन्यमानाया धन्यताऽऽर्थिकी ॥ ८५ ॥
नाम्नैवामृतमुत्तमं दिशति यो यश्चामृतात्मा स्वयं सेवन्तेऽप्यमृतार्थमेव मुनयो यं ध्यानदानादिभिः ।
स श्रीशो निजमुख्यरूपममलं तन्मूल्यमाकल्पयन् यत्स्तन्यं पिबति स्म भुव्यनुपमा तत्पुण्यसीमास्फुटम् ॥ ८६ ॥

नन्दः किमिति : १०.८.४६.

न पितरावपि यत्सुखमापतुर्मधुरशैशवचेष्टितसम्भवम् । अतुलगोकुलपालनलालसः कथमवाप तदेष स गोपतिः ॥ ८७ ॥

द्रोणो वसूनामिति : १०.८.४८.

भवति यो वसुदेवहितोद्यतः स्वपरभावभिदारहितश्च यः । जनदृशाऽस्तु स कीदृगपि प्रभोः प्रियतमो भवतीति तदुत्तरम् ॥ ८८ ॥
देवसौख्यजनिका यशोदयाऽभिख्यया लसति देवकीधरा । तत्सुखं बहुतयाऽऽप्तमत्र मा संशयाकुलितमन्तरं कुरु ॥ ८९ ॥
गार्हस्थ्यस्पृहणीयमात्मजशिशुक्रीडासुखं साम्प्रतं तद्बोक्ता वसुदेव इत्यतितरामेतेन लब्धं कथम् ।
नन्दोऽसौ वसुदेव एव भवतीत्यावेदयन् भूपतिं तज्जन्मान्तरनामसङ्गतिकथां प्रोवाच नूनं मुनिः ॥ ९० ॥

कृष्णप्रिया

वात्सल्य भाव पूर्णा माता यशोदा ने उस परब्रह्म श्रीहरि को जिसका वेदत्रयी श्रुति भगवती, क्रियाशक्ति का प्रतिपादन के माध्यम से भगवान के माहात्म्य को ही कहकर उपनिषदें ब्रह्म के प्रतिपादन के माध्यम से भगवान का ही माहात्म्य कहकर, सांख्यशास्त्र नित्यानित्य वस्तु विवेक का निरूपण कहकर, योगशास्त्र निश्चिन्त रूप से भगवान के ही चिन्तन को कहकर पाशुपत मत, वैष्णव तंत्र एवं सर्वदर्शनकार भी भगवत् स्वरूप का ही निरूपण कहकर भगवान का ही गान करते हैं वैसे भगवान को निज आत्मज रूप में मान लिया ॥ ४५ ॥ परीक्षित् जी ने कहा—ब्रह्मन् शुकाचार्य ? बड भागिनी श्री यशोदा माता ने एवं श्री नन्द बाबा ने ऐसा कौन सा सर्वश्रेष्ठ अभ्युदय को साधने वाला सुकृत किया था जिससे श्रीकृष्ण उनके पुत्र हुए और अपने श्रीमुख से यशोदा के स्तन का दूध पीया ॥ ४६ ॥ महाराज ! भगवान् श्रीकृष्ण चन्द्रजी बाल लीलाएँ जो ऐश्वर्य धर्म का संगोपन कर बाल सखाओं के साथ करते हैं जो इतनी मङ्गलमयी है कि कविवर ज्ञानी मुनि जन जिन्हें आज भी गाते है और जिनके श्रवण कीर्तनादि से श्रोतृवृन्द के पापताप संताप नष्ट हो जाते हैं। वे ही लीलाएँ उनके जन्मदाता माता पिता श्री देवकी वसुदेवजी को नयनगामिनी न बनी और नन्द नन्दरानी जी रस लूट रहे है ॥ ४७ ॥ श्री शुकाचार्य जी ने कहा—राजन् ! नन्दबाबा पूर्व जन्म में अष्ट वसुओं में श्रेष्ठ द्रोण नाम के वसु थे और उनकी भार्या का नाम धरा था। ब्रह्माजी ने आदेश दिया कि आप दोनों पृथ्वी पर जन्म लेकर गोपालन आदि कार्य करो, तब उन दोनों ने प्रसन्नता पूर्वक ब्रह्माजी से कहा कि आप की आज्ञा शिरसा वन्द्य मानकर पृथ्वी पर जा रहे हैं ॥ ४८ ॥

जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ। भक्तिः स्यात् परमा लोके [1]ययाञ्जो दुर्गतिं तरेत् ॥ ४९ ॥
अस्त्वित्युक्तः स [2]एवेह व्रजे [3]द्रोणो महायशाः। जज्ञे नन्द इति ख्यातो यशोदा सा धराभवत् ॥ ५० ॥
ततो भक्तिर्भगवति [4]पुत्रीभूते जनार्दने। दम्पत्योर्नितरामासीद् गोपगोपीषु भारत ॥ ५१ ॥
कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे [5]विभुः। सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे [6]पूर्वार्धे [7]विश्वरूपदर्शनेऽष्टमोऽध्यायः ॥ ८ ॥

कर्वंमक्षमा

अन्वयः—विश्वेश्वरे महादेवे हरौ भुवि जातयोः नौ परमा भक्तिः स्यात् यया लोके अज्ञः दुर्गतिं तरेत् ॥ ४९ ॥ "अस्तु" इति उक्तः स एव महायशाः द्रोणः इह व्रजे नन्दः इति ख्यातः जज्ञे सा धरा यशोदा अभवत् ॥ ५० ॥ भारत ! ततः पुत्रीभूते जनार्दने भगवति गोपगोपीषु दम्पत्योः नितरां भक्तिः आसीत् ॥ ५१ ॥ विभुः कृष्णः ब्रह्मणः आदेशं सत्यं कर्तुं सहरामः व्रजे वसन् स्वलीलया तेषां प्रीतिं चक्रे ॥ ५२ ॥

इत्यष्टमोऽध्यायः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स एवेह द्रोणो जज्ञे। स च नंद इति जातः। सा च धरा यशोदाऽभवत् ॥ ५० ॥ गोपगोपीनामपि वस्तुस्वभावादस्त्येव भक्तिस्तयोः पुनर्नितरामिति ॥ ५१ ॥ स्वलीलया पुत्रभावानुकारिण्या ॥ ५२ ॥

इति श्रीभा० म० दश० पूर्वार्धटीकायां नामकरणादिविश्वरूपदर्शनं नामाष्टमोऽध्यायः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नौ आवयोः भुवि जातयोर्महादेवे भक्तिः स्यादिति। अनेन भूलोक एव भक्तिस्थानं न ब्रह्मलोकादीति सूचितं शंकरव्यावृत्त्यर्थं विश्वेश्वर इति पुनरपि तत्रैव प्रसक्तं विश्वेश्वरत्वेन हरस्यैव प्रसिद्धेः। तद्व्यावृत्त्यर्थं हराविति। परमात्युत्कृष्टा यया परमभक्त्याञ्जो विनैव प्रयासम्। तयोर्भाविनि जन्मनीति लभ्यते। महान्देवः क्रीडा यस्य तस्मिन् भुवि स्थितो यो विश्वेश्वरस्तस्मिन् विश्वेऽपीश्वरा यत्र तस्मिन् परावरेशो महदंशयुक्त इत्युद्धवोक्तेः पूर्णेऽवतारिणीत्यर्थः। 'हरावावयोर्मनश्चौरे परमेति फलेन फलकारणमनुमीयते' इति न्यायात् स्वहृदयविचारिता पितृत्वोचितवात्सल्यमयीत्यर्थः। ययास्मद्भक्तया भविष्यंत्या

---

[1] ययान्यो—इति कस्यचित्। [2]. स भगवान्—श्रीधर वंशी, ; स एवेह—वीर. ; स एतेन—विज.। [3]. द्रोणः स भगवान्व्रजे—वीर। [4]. पुत्रभूते—वीर. विज.। [5]. भूवि—विज.। [6]. बालक्रीडायामष्ट—इति कस्यचित्। [7]. नवमोऽध्याय—विज.।

तच्छ्रवणकीर्त्तनादिनाऽन्योऽपि सर्वोऽपि लोको दुर्गतिं तरेदिति शुद्धप्रेमभक्तिप्रार्थनया तज्जन्मनि तयोस्तदनुरूपा साधनभक्तिरप्येका शुद्धैवासीदित्यवगम्यते। न तु पृश्निसुतपसोरिव भक्तिस्तपोयोगौ चेति विश्वनाथः॥ ४९॥ स एव येन ब्रह्मा प्रार्थितः। सा च द्रोणभार्या स एव सेत्यनेन नित्यसिद्धयोर्यशोदानंदयोः साधनसिद्धौ धराद्रोणौ प्रविष्टावभूतामिति विश्वनाथः॥ ५०॥ पुत्रीभूते पुत्रभावं प्राप्ते नितरामतिशयेन। तयोर्नंदयशोदयोः भक्तिः स्यात्। परमेति प्रार्थनाद्भगवान्पुत्रतामगान्निजदेहादपि पुत्रदेहे प्रीत्यातिशयदर्शनात्। "कामं दहतु मां नाथ मा मे गर्भो निपात्यताम्" इत्युत्तरोक्तेः। "ससैन्योऽहं गमिष्यामि न रामं नेतुमर्हसि" इति विश्वामित्रं प्रति दशरथोक्तेश्च। वस्तुस्वभावात्। अतिकमनीयतमे सर्वेषां प्रीतिर्भवतीति भावः। जनान् गोपीजनान्प्रेम्णा पीडयति नवनीतचौर्याद्युपद्रवैरुद्वेजयति वा स्तन्यरसयाचमाने वा गोपगोपीषु मध्ये दंपत्योर्यशोदानंदयोर्नितरामासीत्। गोपा गोप्यश्चापि धराद्रोणानुवर्तिनस्तादृशसाधनवंतः पूर्वतन्मत्याऽसन्निति ज्ञापितमिति विश्वनाथः॥ ५१॥ आदेशमाज्ञामस्त्वित्युक्तिरूपाम् 'परमा भक्तिरस्तु' इति वरम्। व्रजे वसन् तेषां गोगोपीनंदयशोदानाम्॥ ५२॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धेऽष्टमोऽध्यायः॥ ८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र यद्यपि श्रीमन्नन्दांशत्वाच्छुद्धभगवन्माधुर्यांशस्फूर्तियोग्यस्तथापि तत्तदेव मुनिसङ्गेन तदैश्वर्यज्ञानमालम्ब्य श्लेषेण स्वाभीष्टमाह—जातयोरिति। भुवि जातयोः सतोर्नौ आवयोः हरौ मनोहरताप्रधाने भगवति अत एव विश्वेषामीश्वरेपि महादेवे परमक्रीडापरे भक्तिः प्रेमलक्षणा स्यात् प्रार्थनायां लिङ् परमेति स्वमनस्यादृतं तद्विशेषं बोधयति। स च पितृत्वोचितवात्सल्याख्य इति फलेनानुमीयते "ये यथा मां प्रपद्यन्ते" इत्यादि श्रवणात् एवं वचनमात्रलभ्यापराशेषार्थपरित्यागमय्या प्रार्थनया पूर्वमपि तयोस्तादृशभक्तेरस्तित्वमवगम्यते अस्तित्वेपि प्रार्थना तादृशप्रेमोत्कण्ठयैव अतृप्तिस्वभावत्वात् प्रेम्णः यथा श्रीध्रुवस्य कुबेरे साक्षात् पुत्रत्वप्रार्थना तु केवलकामनामय्यपि स्यात् तादृशपुत्रेण स्वमहिमावृद्धेः अतः प्रेमस्वभावत्वात्तत्प्राधान्येनैव प्रार्थितं नान्यथा यत्र तादृशत्वेन कृष्णस्याप्यनुगतिः स्वतो जातेति एवं श्रीवसुदेवादितः साधनेप्युत्कर्षो दर्शितः साधनस्य साध्यस्य च शुद्धभक्तित्वात् अतः शुद्धभगवत्प्रेमवासनत्वेन तत्र सर्वेषामपि हितं प्रार्थितं न तु कामिजनवन्मत्सरेणात्मन एव तदाह, यथास्मद्भक्त्या तच्छ्रवणकीर्त्तनादिनान्योऽपि लोकः सर्वो दुर्गतिं तरेत् इति लोके इति सप्तम्यन्तपाठे लोके यथा प्रसिद्धयान्योऽपीति शेषः। एवमुभयोरपि वात्सल्यशुद्धत्वे मातृभावस्वाभाव्यात् श्रीयशोदाया आधिक्यमपि ज्ञेयम्॥ ४९॥ स एवेत्यभेदविवक्षया इह श्रीमथुराप्रदेशे स भगवानिति पाठे परमादरो दर्शितः पूर्वतोऽपि महायशाः सन्॥ ५०॥ ततस्तादृशभक्तेर्हेतोः पुत्रीभूते योऽन्यस्य कस्यचित् पुत्रो नासीत् तस्मिन् पुत्रतां प्राप्ते तयोरेव शुद्धोद्रिक्ततादृशाभावात् अतः पुत्रभूत इति क्वचित् पाठः सङ्गत एव कथम्भूतेऽपि जनैर्ब्रह्मादिभिः भक्तैरर्थ्यते याच्यते मात्रं न तु लभ्यते यः तस्मिन्नपि यतो भगवति स्वयं भगवति श्रीकृष्ण इत्यर्थः। तस्मिन् भक्तिर्नितरां पूर्वतोऽपि वरीयस्यासीत् तथा प्रसिद्धा व्रजजनमुख्यत्वेन स्वाभाविकपरमवात्सल्यवतीषु गोपगोपीष्वपि नितरामासीदित्यर्थः। पुत्रीभूतत्वादेवेति॥ ५१॥ तत्र प्रस्तुतसिद्धान्ताभासदृष्ट्या तावदुपसंहरति—कृष्णः स्वयं भगवत्त्वेन परमस्वतन्त्रोऽपि ब्रह्मणो जगद्गतसर्वनिजभक्तगुरोरादेशं वरं सत्यं कर्त्तुं तेन सामान्यतया दिष्टापि सा तयोः परमविशिष्टतयाऽभीष्टा भक्तिरित्थमेव प्रकटा स्यादिति निदर्शनया जगत्यव्यभिचारित्वेन ख्यातं विधातुं परमस्वगणसहायेन श्रीरामेणापि सह व्रजे वसन् तदानीं प्रकटीकृते तयोस्सम्बन्धिनि व्रजविशेषे स्वयमपि तत्पुत्रतया प्रकटीभूय निवसन् स्वया निजस्वाभाविक्यैव लीलया तेषां तयोस्तत्सङ्गिनां च प्रीतिं तद्विशेषं चक्रे वक्ष्यमाणतात्त्विकसिद्धान्तानुसारेण त्वयमर्थः। ननु, यदि तादृशी भक्तिस्तयोः पूर्वमपि विद्यत एव तर्हि ब्रह्मादेशेन किं कृतं तत्राह कृष्ण इति स्वेषु भक्तेषु या लीला तद्भक्तिवशालीलेत्यर्थः तयैव तेषां प्रीतिं कर्त्तुं व्रजे वसन् कृष्णो ब्रह्मण आदेशं वरं सत्यं चक्रे "विप्रा वेदविदो युक्ताः" इत्यादिवत् कृपया तन्महिमानमप्यदर्शयत् इत्यर्थः। अतस्तदादेशेन तस्यैव हितं कृतमिति भावः। तदादेशं विनाप्यन्येषां गोपादीनां तद्भावकथनात्॥ ५२॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् अष्टमोऽध्यायः॥ ८॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

भुवि जातयोः सतोः नौ आवयोः परमा प्रेमलक्षणा भक्तिः स्यादस्त्वित्यर्थः। एवं पूर्वमपि भक्तिरस्त्येव अधुना च तयोः परमैकान्तिकी प्रगाढवात्सल्यमयीति यावस्था अनन्यसाध्यत्वात् पुत्रतयैव श्रीभगवत्प्राप्तिरिति ज्ञेयम्। कथम्भूते? महादेवे परमक्रीडापर इत्यर्थः,—क्रीडार्थाद्दीव्यतेरित्यवतारत्वम्। विश्वेषां ब्रह्मादीनां सर्वेषामीश्वर इति परमेश्वरत्वेनावतारित्वमित्यवतारोऽवतारी चैको यस्तस्मिन्। यद्वा, भुवीत्यस्य यथास्थितस्यैवान्वयः। भुव्यवतीर्णोऽपि यो विश्वेश्वरः साक्षाज्जगदीशस्तस्मिन्नित्यर्थः, अतएव महान् देवो द्युतिर्यस्य निजाशेषैश्वर्यप्रकटनादत एव हरौ जगन्मनोहरे भगवति यया भक्त्या

लोकः सर्वोऽप्यज्ञोऽनायासेन दुर्गतिं दुस्तरसंसारसागरं तरेत्। एतदानुषंगिकं फलमुक्तम्; तच्चाञ्जः पदेन सूचितमेव, पाकार्थ-प्रज्वलिताग्नेः स्वतः शीतादिहरणवत्। यद्वा, दुरिति दुर्गमामन्यैर्दुरापामपीत्यर्थः, गतिं मोक्षलक्षणाम्, तरेदिति मुमुक्षुभिर्बहुधा स्तुतत्वेनापरिहार्यत्वाद् दुस्तरसमुद्रत्वं ध्वनितम्। एवं मोक्षनिरसनत्वेन भक्तेर्माहात्म्यमुक्तम्। यद्वा, ययाऽस्मद्भक्त्या तच्छ्रवणकीर्त्तनादिना तत्प्रभावेण वान्योऽपि लोकः सर्वो दुर्गतिं तरेत्। अन्यत् समानम् ॥ ४९ ॥ स एव, न त्वंशत इत्यर्थः,—श्रीभगवत इव सम्पूर्णतयावतीर्णत्वात्। इह श्रीमाथुरे देशे। महायशा इति तादृशप्रार्थनात्। यद्वा, पूर्वतोऽप्यत्र वैशिष्ट्यं बोधयति—महायशाः सन्निति, तच्चान्वर्थम्, नन्दसंज्ञया सूचितमेव, यद्वा, नन्दस्य यशोदायाश्च विशेषणम्, अर्थः स एव ॥ ५० ॥ ततस्तस्मात् श्रीब्रह्मवचनादपुत्र पुत्रो भूतः पुत्रीभूतस्तस्मिन्निति श्रीदेवक्यां वसुदेवाज्जातत्वेन श्रीनन्द-यशोदयोः साक्षात्पुत्रत्वाभावेऽपि पुत्रता-प्राप्तेः, यद्वा, पुत्री देवी महामाया पुत्र्या सहितो भूतो जातः पुत्रीभूत इति केचित्, अन्यथा तादृशभक्त्यसम्भवः। पुत्रभूत इति पाठे पुत्रस्वरूप इति नित्यतादृशभक्तियोग्यतोक्ता। जनार्दने स्मरणादिना जन्मलक्षणसंसारनाशके, किंवा जनैः श्रीब्रह्मादिभिर्भक्तैः सर्वलोकैर्वा दर्शनाद्यर्थमर्दनं याचनमात्रं यस्य तस्मिन् परमदुर्लभ इत्यर्थ इति परमेश्वरत्वमुक्तम्; तथापि परममधुर रूप गुण-लीलादि प्रकटनमाह—भगवतीति; इति तयोर्महाभाग्यमुक्तम्। गोपगोपीषु मध्य इति जात्यादिना साम्येऽपि तयोर्नितरां विशेषत आसीदित्यर्थः। यद्वा, वात्सल्यवतीषु गोपगोपीषु तयोर्नितरां साक्षात् पुत्रत्वात्। हे भारतेति भरतवंश्येषु मध्ये श्रीकृष्णभक्तिविशेषेण यथा भवान् मुख्यस्तथा तत्र सभार्य्यो नन्दोऽपीति; यद्वा, द्रोणधरयोर्नित्यप्रिय-श्रीनन्दयशोदांशत्वात् स्वतो भक्तिरस्त्येव अधुना च निजांशविषयप्रवेशेन साक्षात् श्रीनन्दयशोदयोः सतोस्तत्सम्बन्धेन गोपगोपीनाञ्च, षष्ठ्यर्थे सप्तमी, श्रीब्रह्मवचनान्नितरां भक्तिरासीदित्यर्थः। तस्माच्च (ब्रह्मणः) तेषां भक्तिरिति भक्तिविशेषस्वाभाविकात्तृप्तितो ब्रह्मणो वरग्रहणात्; किंवा श्रीकृष्णस्य साम्बपुत्रादि-वरग्रहणेन श्रीशिवसम्माननादिवद् श्रीनन्दस्य भगवदवताराय समुद्यत श्रीब्रह्मसम्माननार्थमिति ज्ञेयम्, अन्यथा (भा० १०।१४।३४) 'तद्भूरिभाग्यमिह जन्म किमपि' इत्यादि-वक्ष्यमाण—श्रीब्रह्मप्रार्थनानुपपत्तिरिति दिक्। एतच्चाशेषं श्रीभागवतामृतोत्तरखण्डे विवृतमेव ॥ ५१ ॥ आदेशं श्रीनन्दं प्रति 'परमा भक्तिरस्तु' इत्येतल्लक्षणमाज्ञामिति तदवश्यसाध्यताभिप्रेता; यद्वा, अस्त्विति सम्यग्वचनम्, रामसहितो व्रजे तदुचितस्थाने वसन् स्वलीलया-साधारणबाल्यचेष्टया तासां श्रीयशोदादीनां प्रीतिमानन्दं चक्रे। विभुर्विचित्र—निजलीलया व्रजं सर्वं व्याप्नुवन्नित्यर्थः। यद्वा, तत् कर्त्तुं समर्थ इति रामसाहित्यञ्च तल्लीलाया एव माधुर्य्यविशेषापेक्षया। यद्यपि स्वस्य स्वीयानाञ्च सुखविशेषार्थं जगद्धितार्थञ्च तत्तत्, तथापि ब्रह्मण आदेशं सत्यं कर्त्तुमिति तदपेक्षया तत्रैव कस्यचिद्वैशिष्ट्यस्याभिप्रायेण, किंवा श्रीवसुदेवदेवक्योरुपेक्षा—दोषपरिहारार्थम्, अन्यथा पश्चाच्छ्रीभगवदैश्वर्यप्रकटे सति निर्योपेक्षया तयोरनुतापः सम्भवेत्। एवं श्रीवसुदेव—देवकीभ्यामपि विशिष्टः श्रीनन्दयशोदयोस्तत् सम्बन्धि-जनेष्वपि श्रीभगवतः प्रसादो दर्शितः। स च युक्त एव, यतस्ताभ्यां पुत्रार्थमेव तपः कृतम्; एताभ्यान्तु परमभक्तिरेव प्रार्थिता। तत्र च स्वदत्तवरादपि निजभक्तप्रदत्तवरस्याधिक्यसम्पादनं भक्तवत्सलस्य तस्य सुप्रसिद्धमेवेति दिक् ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यामष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तमेवाह—जातयोरिति। भुवि लोके जातयोर्नौ आवयोर्भुव्यवतीर्णे विश्वेश्वरे महादेवे ब्रह्मादीनामपि देवे भगवति हरावाश्रितार्त्तिहरे परमा भक्तिः स्याद्यथाभक्तिस्यात्तथाऽनुगृहाणेत्यर्थः। तत्प्रार्थनायां हेतुं वदन् तान् विशिनष्टि—यया भक्त्या दुस्तरम् उपायान्तरेण तरितुमशक्यं संसृतिनिमित्तं पापमञ्ज आशु तरेत् ॥ ४९ ॥ अस्त्विति। तथैवास्त्विति ब्रह्मणोक्तः स एव भगवान् द्रोण एवेह लोके व्रजे नन्द इति विख्यातो जज्ञे तथा सैव धरा यशोदाऽभवद्यशोदारूपेण जज्ञे ॥ ५० ॥ हे भारत! गोपगोपीषु मध्ये दम्पत्योर्यशोदानन्दयोः पुत्रभूते अपुत्रेपि पुत्रतां प्राप्ते जनार्दने भगवति, ततो ब्रह्मवरात् भक्तिरासीत् ॥ ५१ ॥ कुतस्तयोः पुत्रभूतो हरिस्तत्राह—कृष्ण इति। ब्रह्मणश्चतुर्मुखस्यादेशं वरदानात्मकं सत्यं कर्तुं स्वस्य तयोः पुत्रभूतस्य लीलया बालचेष्टया तेषां नन्दादीनां प्रीतिं च कर्तुं रामेण सहितो व्रजे वास वसतिं चकार चतुर्मुखादेश एव नन्दयशोदयोरुक्तश्रेयःप्राप्तौ देवकीवसुदेवयोः कृष्णोदाराभकेहिता लब्धौ च कारणमित्यर्थः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् अष्टमोऽध्यायः ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

महादेव इत्यनेन शङ्करोऽत्रोच्यते इति शङ्काव्यावृत्त्यर्थं विश्वेति, लोके जनमध्ये ॥ ४९-५० ॥ गोपगोपीषु मध्ये नितराम् ॥ ५१-५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् अष्टमोऽध्यायः ॥ ८ ॥

(विजयध्वजतीर्थपाठे नवमः)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जातयोरित्यनेन भाविनि जन्मनीति लभ्यते। महान् देवः क्रीडा यस्य तस्मिन् भुवि स्थितो यो विश्वेश्वरस्तस्मिन् विश्वेपीश्वरा यत्र तस्मिन् "परावरेशो महदंशयुक्ते" इत्युद्धवोक्तेः पूर्णे इत्यर्थः। हरौ आवयोर्मनश्शौरे परमेति फलेन फलकारणमनुमीयत इति न्यायात् स्वहृदयविचारिता पितृत्वोचितवात्सल्यमपीत्यर्थः। ययास्मद्भक्त्या भविष्यन्त्या तच्छ्रवणकीर्त्तनादिना अन्योपि सर्वो लोकः दुर्गतिं तरेदिति शुद्धप्रेमभक्तिप्रार्थनया तज्जन्मनि तयोस्तदनुरूपसाधनभक्तिरप्येका शुद्धैवासीदित्यवगम्यते नतु पृश्निसुतपसोरिव भक्तिस्तपोयोगौ चेति पूर्वं व्याख्यातमेव तत्प्रसङ्गे तत्फलम् ॥ ४९ ॥ स एव द्रोणो व्रजे इह नन्द इति ख्यातः सा धरैवेह यशोदेति नित्यसिद्धयोर्यशोदानन्दयोः साधनसिद्धौ धराद्रोणौ प्रविष्टावभूतामित्यर्थः ॥ ५० ॥ जनार्दनः गोपीजनान् प्रेम्णा पीडयति नवनीतचौर्य्याद्युपद्रवैरुद्वेजयतीति वा स्तन्यरसं याचमाने इति वा गोपगोपीषु मध्ये दम्पत्योर्यशोदानन्दयोर्भक्तिर्नितरामासीदिति गोपाः गोप्यश्चापि द्रोणधरयोरनुवर्त्तिनस्तादृशसाधनवन्तः पूर्वजन्मन्यासन्निति ज्ञापितम् ॥ ५१ ॥ आदेशं परमा भक्तिरस्त्विति वरं प्रीतिं चक्रे प्रेमाणमुत्पादयामास ॥ ५२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। दशमस्याष्टमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स द्रोणः अस्त्वित्युक्तः ब्रह्मणेति शेषः ॥ ५० ॥ गोपगोपीनां भगवद्भक्तिरासीत्तत्तद्भाग्यवशात् तेषु मध्ये दम्पत्योस्तु ततः ब्रह्मवचनात् नितरां भक्तिरासीदित्यन्वयः ॥ ५१ ॥ तेषां नन्दादीनां स्वलीलया पुत्रत्वादिभावानुकारिण्या ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टमाऽध्यायार्थप्रकाशः ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

जातयोरिति परजन्मनीतिलभ्यते महादेवे प्रसस्तक्रीडाशालिनी विश्वे ईश्वरो यत्र तस्मिन् महदंशयुक्त इत्युक्तेः स्वयं भगवतीत्यर्थः। परमा पुत्रभावमयी यया श्रुतयान्योऽपि जनो दुर्गतिमञ्जस्तरेत् ॥ ४८ ॥ ब्रह्मणैवमस्त्वित्युक्तः स एव द्रोणो व्रजे नन्द इति ख्यातो जज्ञे धरा तत्पत्नी यशोदाऽभवत् नित्यसिद्धयोर्यशोदानन्दयोः साधनसिद्धौ धराद्रोणौ प्रविष्टावित्यर्थः ॥५०॥ जनैरर्द्यते याच्यते वाञ्छितान्ययमिति तस्मिन् गोपगोपीसु मध्ये दम्पत्योर्नितरां भक्तिरासीत् तेच ताश्च पूर्वजन्मनि द्रोणधरानुसारिणः साधकायन भूवुरिति बोध्यते ॥ ५१ ॥ आदेशं पुत्रभूते जनार्दने परमाभक्तिः स्यादिति वरं प्रीतिं चक्रे प्रमाणं जनयामास ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्याम् अष्टमोऽध्यायः ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भुवि जातयोर्नौ महादेवे विश्वेश्वरे हरौ यया दुस्तरं संसारसागरं तरेन्नरो लोके परमा सा भक्तिः स्यात्। लोक इति प्रथमान्तः पाठोऽपि दृश्यते। स दृश्यः ॥ ४९ ॥ एतेन ब्रह्मणाऽस्त्वित्युक्तो महायशा द्रोणो नन्द इति ख्यातो व्रजे जज्ञे। सा धरा च यशोदाऽभवदित्यन्वयः ॥ ५० ॥ गोपगोपीषु तन्मध्ये ततश्चतुराननवरतः पुत्रभूते जनार्दने भगवति नितरां भक्तिं दम्पत्योरासीत्। दम्पत्योरिति गतं। जाया च पतिश्च दम्पती इत्यत्र पुरत एव तरुण्याः स्फुरणादुत्तरत्र गोपीगोपेष्विति वक्तव्यमिति चेत्। साक्षादधोक्षजजननियोनित्वाज्जायापुरस्कृतिरितरत्र त्वितरासामप्राधान्यं प्राधान्यं च पुंसामिति द्योतयितुमर्थविशेषं चिद्यत्यस्योक्तिरिति तात्पर्यमवधेयं ॥ ५१ ॥ ब्रह्मण आदेशं भक्तिरस्त्वित्यादिरूपं सत्यं यथार्थं कर्तुं विभुः श्रीकृष्णः सहरामो व्रजे वसंस्तेषां नन्दयशोदागोपानां स्वलीलया प्रीतिं चक्रे। अनया भक्तिरुदेतीति भावः ॥ ५२ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे नवमोऽध्यायः ॥ १०-९ ॥

श्रीसुबोधिनी

प्रार्थनामेवाह **जातयो**रिति, **भुवि जातयोर्नावयोर्हरौ भक्तिः स्यात्**, प्रार्थनायां लिङ्, शास्त्रतः साधनैश्च जायमाना ज्ञानकर्मणोरल्पत्वाज् जीवेषु न परमा भवति, वरप्रसादाल् लौकिकानामुत्कर्ष इव भक्तेरप्युत्कर्षो भविष्यतीति **परमा** प्रार्थ्यते, लोकोपकारं दृष्ट्वा यत्र कश्चिद् भक्तिर्भवति यथा धातरि तन्न पुरुषार्थरूपं, तद्व्यावृत्त्यर्थमाह **महादेव** इति, यतः परमधिको देवो नास्ति यस्तु देवेषु परमां काष्ठां प्राप्तः स **महादेवः**, स्वयं **वसुः**, ब्रह्मा च देवेषु श्रेष्ठस्ततोपि महान् **महादेवो भवन् पुरुषोत्तम एव भवति**, स्वत उत्कर्ष उक्तः, कार्यतोप्युत्कर्षमाह **विश्वेश्वरे** हराविति, सर्वस्यापि सर्वफलदातरि **सर्वस्यापि** सर्वदुःखनिवारके, ततः किं स्यात् ? अत आह **ययाञ्जो दुर्गतिं** तरेदिति, देहसम्बन्धो **दुर्गतिः**, अनायासेन **तरणं भक्तयैव**, अन्यकृतत्वान्नौका-

रुद्रवद् ब्रह्मा पुनः साधनोपदेशयोरसमर्थः ॥ ४९ ॥ ब्रह्मवाक्यं न मृषा भवतीति भगवत्प्रसादा**दस्त्वित्ये**वाह, ततः **स्वे स्वग** एव सृष्टिमुत्पादितवांस्ततोधिकारे समाप्ते प्रलये च जाते ब्रह्मलोके स्थितो भाविभगवदवतारं ज्ञात्वा ब्रह्मणा प्रेरितः **स एव द्रोण** इह व्रजे **नन्द** इत्याख्यातो **जज्ञे**, पूर्वनामाग्रे न प्रकाशनीयमिति भगवानानन्दोयं नन्द इति फलग्रहणार्थं व्याप्ति परित्यज्य शिष्टांशेन प्रसिद्धः, नन्वस्य वरः कथं न क्षीणः सृष्टेरपि गतत्वादित्याशङ्क्याह **महायशा** इति, महद् यशो यस्य, यावद्यशस्तावन्न क्षीयत इति, **यशोदापि सैवाभवत्**, अन्यथा व्यभिचारे धर्मक्षयाद् भक्तिर्न भवेत ॥ ५० ॥ ततो जातयोरेव भक्तिर्जातेत्याह तत इति, **भगवति भक्ति**र्जाता भजनसहितप्रेमात्मिका, **ननु साधनान्यतिरेकेण कथं जाते**त्याशङ्क्य प्रकारमाह **पुत्रीभूत** इति, अपुत्र एव पुत्रत्वं ज्ञापितवानिति **पुत्रीभूतः**, जायत एव पुत्रे स्नेहो भक्तिश्च, ननु भगवान् किमित्यवतीर्णः ? तत्राह **जनार्दन** इति, **जनामुत्पादिकामविद्यामर्दयतीति**, अतो मोक्षदानार्थमागतः, प्रसङ्गादिदमपि कृतवान् न तु प्रासङ्गिकमुत्पादयितुमर्हति सर्वार्थं च तथा जातोतो **दम्पत्योः** स्वधर्मनिष्ठयो**र्नितरां भक्तिरासीत् गोपगोपीषु** सत्सु तन्मध्ये वा **सत्सङ्गव्यतिरेकेणापि**, भारतेतिसम्बोधनं सर्वत्रैव वंशीयेषु सत्सु यथा **भरत** एवालौकिको जात इति ज्ञापयितुम् ॥ ५१ ॥ नन्वेतज्जातं भगवद्वाक्याच्चेत् तदा निरोधो भगवत्क्रियमाणो न भविष्यतीत्याशङ्क्याह **कृष्ण** इति, भगवान् हि सर्वमेव योजयितुं शक्नोति, अतो **ब्रह्मण आदेशं** वरं **सत्यं कर्तुं व्रजे** समागत्य **बलभद्र**सहितो **वसंस्त**त्रत्यानां **तेषां सर्वे**षामेव **स्वलीलया प्रीतिं चक्रे**, स्वस्याधिकारी ब्रह्मेति तद्वाक्यं सत्यं कर्तव्यं, **यद्यन्यत्र साधनवति देशे** तमुत्पादयेद् वरे सन्देहोपि भवेत् तदर्थं **व्रजे** समागतः, नन्वयुक्ते **देशे** कथमागत इति चेत् तत्राह **विभुरिति**, स हि सर्वसमर्थः, सर्वत्रैव स्थित्वा सर्वं कर्तुं शक्नोति, बलभद्रो वेदात्मा, साक्ष्यर्थं **सह** गृहीतः, तेषां **प्रीति**जननेन स्वेच्छास्थित्यधिको व्यापारोत आह **वसंश्चक्र** इति, **ब्रह्मवाक्या**पेक्षयाधिकं च कृतवानित्याह **तेषामिति**, येष्वेतौ स्थितौ तेषामपि **स्वलीलया प्रीतिं कुर्वन्**, **लीलये**ति मनोरञ्जिका क्रियोक्ता ॥ ५२ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणे-
वान्तरप्रमाणप्रकरणे श्रीनिरूपकचतुर्थाध्यायस्य स्कन्धादितोष्टमाध्यायस्य विवरणम् ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अस्त्वित्युक्त इत्यत्र **फलग्रहणार्थ**मित्यादि । अत्रायं भावः । पुरुषोत्तमानन्दाधिष्ठानं ब्रह्मानन्द इति तद्योग्यत्वार्थं ब्रह्मानन्दता महदनुग्रहेण सम्पन्नास्मिन्, तदा हि सर्वत एवानन्दस्फूर्तिर्भवति । एवं सत्येतेनैव पूर्णार्थताज्ञाने पुरुषोत्तमाविर्भावः स्वस्मिन्न भविष्यतीति भक्तिरसानुभवार्थमुक्तं **बाधकमंशं त्यक्त्वा तथा प्रसिद्ध** इति । **अपुत्र** इति निषेकादिहेत्वभावादिति भावः । **मोक्षदानार्थमिति** । भजनानन्दो भक्तिमार्गे मोक्षस्तद्दानार्थमित्यर्थः, न तु प्रासङ्गिकमिति । प्रासङ्गिकं प्रयोजनं प्राकट्यहेतुर्न भवितुं शक्नोतीत्यर्थः । प्रासङ्गिकप्रयोजनान्तरमाहुः **सर्वार्थमिति** । स्वरूपकीर्तिभ्यां सर्वोद्धारार्थमपि प्रकट इत्यर्थः । एतेनाप्युक्तमोक्षपदस्योक्तमोक्ष एवार्थ इति ज्ञेयम् । अन्यथा पुनरुक्तित्वप्रसङ्गात् । नन्दचरणानां यद्विषयकोधिकारो येषां वा सर्वात्मना निरोधो न कृतो भगवता ते गोपगोपीपदेनोच्यन्ते । अन्यथा वयस्यानां व्रजस्त्रीरत्नानां चाग्रे सर्वाधिकनिरोधोक्तिर्विरुध्येत । अत एव सत्सङ्गव्यतिरेकेणापीत्येतत्तात्पर्यमुक्तम् ॥ ५० ॥ **कृष्णो ब्रह्मण** इत्यत्र, **साक्ष्यर्थ**मिति । निःसाधनजीवनिमित्तं प्राकट्यं तदधीनत्वेन लीलाकरणादिकं च ब्रह्मणि श्रुतिविरुद्धमिति शङ्कानिरासं वेदात्मकं तत्संमत्या कर्तुमित्यर्थः। अत एव श्रुतिरप्याह 'नायमात्मा प्रवचनेन लभ्य' इत्युपक्रम्य 'यमेवैष वृणुते तेन लभ्य' इति, 'ते ते धामान्युश्मसी'ति 'विष्णोः कर्माणि पश्यते'त्यादि । एतदर्थस्तु **विद्वन्मण्डनेस्माभिः** प्रपञ्चितः । **तेषां प्रीतिजनन** इत्यादि । स्वेच्छया या स्थितिस्तदपेक्षयाधिको व्यापारो भगवता न क्रियत इति ज्ञापनाय 'वसन्प्रीतिं चक्र' इत्युक्तमित्यर्थः । अन्यथा लीलायाः प्रीतिजननोक्त्यैव वासस्य स्वतःप्राप्त्या तत्कथनमनर्थकं स्यादिति भावः ॥ ५२ ॥

इत्यष्टमोध्यायः ॥ ८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

जातयोरित्यत्र **देहसम्बन्धस्य दुर्गतित्वं** "सा गृहीत्वे"त्यत्र प्रतिपादितं **पुन्नाम्नो नरकादित्यादिना**, **अनायासेन तरणं भवत्येवे**त्यपि "तथा न ते माधव" "स्वयं समुत्तीर्ये"त्यादिना पूर्वमेव प्रतिपादितं ज्ञेयं **अनायासेन तरणे** हेतु**रन्तकृतत्वादिति** **तरणस्य** तथात्वादित्यर्थः ॥ ४९ ॥ **अस्त्वित्युक्त** इत्यत्र **तत** इत्यादि **प्रेरित** इत्यन्तग्रन्थस्तु **स एवे**त्येतत्तात्पर्यकः **फलग्रहणार्थ**मिति तदर्थं **टिप्पण्यामाहुरत्रायं** भाव इत्यादि ॥ ५० ॥ **ततो भक्ति**रित्यत्रापुत्र इति, तदर्थं **टिप्पण्यामाहुर्निषेके**त्यादि, **सुबोधिन्यां जायत एवेति** साधनं विनेतिशेषः, **मोक्षदाने**त्यादेरर्थं **टिप्पण्यामाहुर्भजने**त्यादि **तात्पर्यमुक्त**मित्यन्तम् ॥ ५१ ॥ **कृष्णो ब्रह्मण** इत्यत्र यः कठिनांशः स टिप्पण्यामेव विवृत इति ततो ज्ञेयः, एवं चास्मिन्नध्याय इदं सिध्यति, येषां **भाग्यरूपः पूर्वजन्मीनो महदनुग्रहः सत्त्वशुद्धिबीजं तेषां गुरुतो** यथावत् प्राप्तानि दुःसङ्गवर्जितान्यखण्डशब्दरूपाण्यर्थवन्ति नामानि शीघ्रं

सत्त्वशोधकानि स्वेच्छालीलाविशिष्टान्यानन्दरूपाणि रूपाण्यपि तथा, परेच्छाकृतलीलाविशिष्टानि रूपाणि तु चिरेण सत्त्वशोधकानि, साक्षात्कारस्तु माहात्म्यज्ञानपूर्वकः शीघ्रं तथा, भक्तिरपि माहात्म्यज्ञानपूर्विकैव तथा, माहात्म्यज्ञानाभावे तु ज्ञानभक्ती चिरेण तथा, अवतीर्णस्तु **भगवान् सत्यक्**व्यतिरेकेणापि **स्वरूपबलेन तथा करोतीति** ॥ ५२ ॥

इति श्रीमद्वल्लभचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाशेऽष्टमाध्यायविवरणम् ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

यथाऽञ्जो दुर्गतिं तरेदित्यत्र अन्यकृतत्वादिति 'तेषामहं समुद्धर्ते'तिवाक्येन भगवत्कृतत्वादित्यर्थः ॥ ४९ ॥ **अस्त्वि**त्यस्याभासे **पुनः साधनोपदेशयोरिति** पूर्वं द्रोणे सृष्टिसामर्थ्यं साधितं तदुपदेशश्च कृतः, पुनर्भक्तिः स्थापनीया तदुपदेशश्च कर्तव्यः, एवमुभयकरणेऽसमर्थ इत्यर्थः, **ततः स्वे स्वर्ग एवेति** सृष्टिलक्षण"मादेशं करिष्यमाण" इति पूर्वमुक्तत्वादितिभावः ॥५०॥ **तत इत्यत्र भजनसहितेति** देवत्वेन भजने सेवैव मुख्या पुत्रत्वेन भजने तु स्नेह एव मुख्यः सेवाया अविहितत्वेन गौणत्वादिति भावः ॥ ५१ ॥ **कृष्ण इत्यत्र वासस्य प्रयोजनं** प्रीतिजननं लीलाया **मुख्यं प्रयोजनं स्वरूपानन्दानुभावनम्** ॥ ५२ ॥

इत्यष्टमोऽध्यायः ॥ ८ ॥

(४) श्रीमद्दीक्षितलालूभट्टयोजिता श्रीसुबोधिनीयोजना

जज्ञे नन्द इति ख्यात इत्यस्य विवृतौ **भगवानानन्दः अयं नन्द इति फलग्रहणार्थं व्याप्तिं परित्यज्य शिष्टांशेन प्रसिद्ध** इति "यो नन्दः परमानन्द" इतिकृष्णोपनिषद्भ्यः आनन्दरूप एव श्रीनन्दो भगवद्रूपस्तथा सत्यभेदे बाललीलारसानुभवो न स्यात् तदर्थं "ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः" इतिशब्दशास्त्रात् व्याप्त्यर्थकस्य आङोऽर्थरूपां व्याप्तिं परित्यज्य आङ्शब्दं हित्वा नन्दशब्देन प्रसिद्धो भेदेन पितृभावेन मुक्तितोऽप्यधिकरसरूपा बाललीला अनुभवतीतिभावः, अतो वस्तुतः परमानन्दरूप एव भगवद्रूपः, द्रोणरूपत्वकथनं त्वेतस्य द्रोणांशः, स वसुरूपेणाविर्भूय पुनः स्वांशिनि नन्दे प्रविष्ट इत्याशयेन यथा भगवदंशस्य नारायणस्य भगवति प्रवेशे "ताविमौ वै भगवतो हरेरंशाविहागतौ भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहा"वित्यनेन कृष्णरूपता उच्यते तद्वत्, न हि नारायणरूपः कृष्णः किन्तु नारायणः कृष्णस्यांशो अंशिनि कृष्णे प्रविष्ट इतिकृष्णरूपतोच्यते, एवमत्रापि द्रोणो नन्दस्यांशः अंशिनि नन्दे प्रविष्टोतो लोकाः श्रीनन्दं द्रोणावतारं वदन्ति, वस्तुतस्तु "यो नन्दः परमानन्द" इतिश्रुतेः श्रीनन्दस्य परमानन्दरूपत्वेन साक्षाद्भगवद्रूपत्वं, एवं सति **जज्ञे नन्द इतिख्यात** इतिश्रीभागवतवाक्यस्य श्रुत्येकवाक्यताविचारेण नारायणस्यांशिनि कृष्णे प्रवेशात् कृष्णरूपतावत् द्रोणस्यापि स्वांशिनि नन्दे प्रवेशात् नन्दरूपतेति ज्ञातव्यं, एवमेव श्रीयशोदाया धरा अंशरूपा स्वांशिन्यां श्रीयशोदायां प्रविष्टा ह्यभेदेन व्यवह्रियते, "यशोदा सा धराभव"दिति तु नर्मदायाः सागरप्रवेशे नर्मदा सागरोभवदित्यादिवाक्यानि प्रवृत्तानि, नैतावता नर्मदामात्रंसागरः किन्तु नर्मदाप्रवेशस्थानत्वात् नर्मदारूपोपि, एवं न धरामात्रं यशोदा किन्तु धराप्रवेशस्थानत्वाद् धरारूपापीतिज्ञेयं, स्वरूपं तु 'यशोदा मुक्तिरूपिणी'ति कृष्णोपनिषत्सु निरूपितमेव, एवं सति श्रीनन्दयशोदयोर्नित्यत्वमेवेति नित्यलीलाविचारः सम्यक् सिध्यतीति वैष्णवाः प्रसीदन्तु ॥ ५० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तमेवाह—जातयोरिति । भूमेः साधनस्थानत्वात् तत्र जातयोर्नौ आवयोर्दम्पत्योर्हरौ परमा उत्कृष्टा भक्तिः स्यात् । भक्तेरुत्कृष्टत्वमेव स्पष्टयन् विशिनष्टि—ययेति । लोके संसारे वर्तमानो जनो यथा भक्त्या दुर्गतिं संसारदुःखं तरेत् संसाराद्विमुक्तो भवेदित्यर्थः । 'कथं तद्भक्त्या विमुक्तिः स्यात् ?' इत्यत आह—महादेव इति । यदपेक्षयाऽधिकोऽन्यो देवो नास्ति, तस्मिन्नित्यर्थः । तस्य सर्वोत्तमत्वे हेतुमाह—विश्वेश्वर इति ॥ ४९ ॥ 'एवमस्तु' इति ब्रह्मणा उक्तः स द्रोणो व्रजे जज्ञे । स एव भगवान् ऐश्वर्यादिमान् महायशा 'नन्द' इति ख्यातः प्रसिद्धः । सा च धरा यशोदाऽभवत् ॥ ५० ॥ 'सत्कुलोत्पन्नस्य तवात्र विश्वास एव युक्तः' इति सूचयन् सम्बोधयति—भारतेति । ततो ब्रह्मणः आशीर्वादात्तयोर्दम्पत्योस्तस्मिन् पुत्रीभूते भगवति नितरां निष्कामा अनवच्छिन्ना भक्तिरासीत् । सप्तमी षष्ठ्यर्थे । तथा गोपगोपीनामपि वस्तुस्वभावादेव भक्तिरासीदित्यन्वयः । 'भगवान् किमिति पुत्रो जात' इत्यत आह—जनार्दन इति । स्वस्मिन्नासक्तिं विधाय जनानामविद्यामर्दयति निवर्तयतीति तथा तस्मिन्नित्यर्थः । जनोद्धारणार्थमवतीर्ण इति भावः ॥ ५१ ॥ एवं चेत् तर्हि व्रजवासस्य किं प्रयोजनम्' । इत्याकाङ्क्षायामाह कृष्ण इति । ब्रह्मण आदेशं । संसारदुःखनिवर्तिका भक्तिरावयोरस्त्विति वचनं सत्यं कर्तुं तेषां स्वस्मिन् स्नेहातिशयरूपभक्तिसिद्ध्यर्थं रामेण सह व्रजे वसन् श्रीकृष्णः स्वबाललीलया तेषां नन्दादीनां प्रीतिं चक्रे

इत्यन्वयः। 'ब्रह्मवचनमपि तेन किमिति सम्पादनीयं' तत्राह–विभुरिति। ब्रह्मणोऽपि महान् सर्वसमर्थश्च। स्वेन जगत्स्वामित्वे स्थापितस्य वचनमपिस्वेनैव सत्यं कर्तव्यम्, अन्यथा तन्मर्यादाभङ्गापत्तेः। सा चानिष्टेति भावः ॥ ५२ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालासूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने। अष्टमो विवृतोऽध्यायो बालभावनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

जातयोरिति ॥ भुवि जातयोर्नौ आवयोर्दम्पत्योः महादेवे विश्वेश्वरे हरौ परमा भक्तिः स्यात्। लोके विद्यमानो जनो यया भक्त्या अञ्जः अनायासेन दुर्गतिं तरेत् ॥ ४९ ॥ अस्त्विति ॥ एवमस्त्विति ब्रह्मणा उक्तः सन्स द्रोणो व्रजे जज्ञे। स एव भगवान् ऐश्वर्यादिमान् महायशा नन्द इति ख्यातः प्रसिद्धः अभवत्। सा च धरा यशोदाऽभवत् ॥५०॥ तत इति ॥ हे भारत ! ततो ब्रह्मणो वरात् गोपगोपीषु मध्ये एकशेषाकरणं स्पष्टप्रतिपत्त्यर्थम्। अत एव "नौवाय्य.धर्मविषमूलमूल०" इति सूत्रे मूलस्य नैकशेषः। तयोर्दम्पत्योस्तस्मिन् पुत्रीभूते जनार्दने भगवति नितरां निष्कामा अनवच्छिन्ना भक्तिरासीत्। गोपगोपीनामपि स्वभावाद्भक्तिरासीदेवेति ॥ ५१ ॥ कृष्ण इति ॥ विभुः कृष्ण ब्रह्मण आदेशं युवयोर्भगवति भक्तिरस्तु इति वचनं सत्यं कर्त्तुं रामेण सह व्रजे वसन् स्वस्य बाललीलया बालभावानुकारिण्या तेषां नन्दादीनां प्रीतिं चक्रे ॥ ५२ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्याष्टमे निरमादिमाम् ॥
इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां अष्टमोऽध्यायः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र जातयोः नौ आवयोः जनौ यया भक्त्या अंजः शीघ्रम् ॥ ४९ ॥ तथा स्तु इति उक्तः स एव द्रोणः इह व्रजे जज्ञे धरा च जज्ञे ॥ ५० ॥ गोपगोपीनामपि हरौ भक्तिस्तु–अस्त्येव भक्तिमत्सु गोपादिषु मध्ये तयोः दंपत्योः जनार्दने भक्तिः नितराम् अत्यंतमासीत् ॥ ५१ ॥ स्वलीलया पुत्रत्वानुसृतिरूपया तेषां प्रीतिं प्रसन्नतां चक्रे ॥ ५२ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढाऽर्थप्रकाशके
श्रीमद्भागवतस्थदशमस्कंधव्याख्याने विश्वरूपदर्शननामाष्टमोऽध्यायः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तमेव स्फुटमाह ॥ जातयोरिति ॥ भुवि भूलोके, जातयोरुत्पत्तिं गतयोः, नौ आवयोः, भुव्यवतीर्णे इति शेषः। विश्वेश्वरे सकलविश्वनियन्तरि, महादेवे ब्रह्मादीनामपि देवे, हरौ भगवति, लोके, जन इति शेषः। यया भक्त्या, दुस्तरमुपायान्तरेण तर्त्तुमशक्यं सृतिनिमित्तं पापं, दुर्गतिमिति पाठे, असद्गतिं, अञ्जः आशु, तरेत्। तथाभूता, परमा एकान्तिकभावाश्रया गाढानुरागरूपा, भक्तिः स्यात्। तथाऽनुगृहाणेति शेषः ॥ ४९ ॥ अस्त्विति ॥ अस्तु तथैवास्तु, इत्येवं उक्तो ब्रह्मणा कथितः, महायशाः, स द्रोणः एव, इह लोके, व्रजे नन्दः, इति ख्यातः, जज्ञे। तथा सा धरा, यशोदा, अभवत् ॥ ५० ॥ तत इति ॥ हे भारत, गोपगोपीषु मध्ये, दंपत्योः यशोदानन्दयोः, पुत्रीभूते अपुत्रे सत्यपि पुत्रतां प्राप्ते, जनार्दने भगवति, भक्तिः ततो ब्रह्मवराद्धेतोः, नितरां, आसीत् ॥ ५२ ॥ कुतस्तयोः पुत्रतां गतो हरिस्तत्राह ॥ कृष्ण इति ॥ ब्रह्मणश्चतुर्मुखस्य, आदेशं वरदानात्मकं निदेशं, सत्यं कर्त्तुं, स्वलीलया तयोः पुत्रीभूतस्य स्वस्य बालचेष्टया, तेषां नन्दादीनां, प्रीतिं कर्त्तुं च, विभुः कृष्णः, सरामः रामेण सहितः, व्रजे वासं वसतिं, अकारोच्चकार। 'सहरामो वसंश्चक्रे' इति पाठे, वसुदेवदेवक्योरवतीर्णोऽपीति शेषः। कृष्णः, ब्रह्मणः आदेशमस्त्विति पूर्वोक्तमादेशं सत्यं कर्त्तुं, विभुः सरामः तत्र वसन्, स्वलीलया स्वकीयबालचरित्रैः, तेषां प्रीतिं, चक्रे ॥ ५२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायामष्टमोऽध्यायः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृष्णो ब्रह्मण इतिः १०.८.५२.

कर्तुं विध्युक्तमन्वर्थं यदि तत्सुखदोऽभवः । प्राप्तं श्रीशार्थतोऽस्माकं विध्युक्तानां सुखार्पणम् ॥ ९१ ॥

यं चिन्वन्ति चिरन्तना मुनिवरा बुद्ध्यैकबोध्याध्वनि यज्ज्ञातेऽपि न वेद वेदनिवहोऽप्यद्यापि तत्त्वार्थतः ।

स श्रीमान् जगदादिहेतुरपि सानन्दोऽपि पुत्रात्मना स्वैरं क्रीडति यत्र तद् व्रजजुषां भाग्यं किमाचक्ष्महे ॥ ९२ ॥

श्रीशकल्प० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्ति-सायनेऽष्टमोऽध्यायः ॥ ८ ॥

कृष्णप्रिया

परन्तु यह वरदान दीजिये कि महान् देव जगदीश्वर भगवान् श्रीहरि की पराभक्ति हममें कूट कूट कर भर जाय, जिस भक्ति से लोक में विद्यमान जन अनायास ही दुर्गतियों से पार हो जाय ॥ ४९ ॥ जब ब्रह्माजीने कहा "तथास्तु"—वैसा ही होगा, तब वे दोनों व्रज में अवतीर्ण हुए। उन में "श्रीद्रोणवसु" ऐश्वर्यादि धर्म युक्त महा यशस्वी ख्यातनाम नन्द भये एवं धरा श्रीयशोदाजी के नाम से विख्यात श्रीनन्दबाबा की महारानी हुई ॥ ५० ॥ राजन्! पुनः ये दोनों इस जन्म में माया के चक्कर से मुक्त करनेवाले भगवान् श्रीकृष्ण उनके पुत्र हुए एवं समस्त गोप-गोपियों की अपेक्षा पुत्रीभूत जनार्दन में इन दोनों नन्द और यशोदाजी का उनके प्रति अति अनुराग हुआ ॥ ५१ ॥ सर्व समर्थ विभु भगवान् श्रीकृष्ण ब्रह्मा के वचन को सत्य करने के लिये व्रज में पधार कर श्रीबलदाऊ के साथ बस गये और अपनी बाललीलाओं से उन्हें अपनी ओर आकृष्ट कर सबको प्रसन्न किया ॥ ५२ ॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे अष्टमोऽध्यायः ॥

◆ ◆

अथ नवमोऽध्यायः

श्लोका.	अनु.	मि. उ.	मन्दा.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
२३	१५	७	१	१	८८९	६	४९	९४१	२९।	५

श्रीशुक[1] उवाच

एकदा गृहदासीषु यशोदा नन्दगेहिनी। कर्मान्तरनियुक्तासु निर्ममन्थ स्वयं दधि ॥ १ ॥
यानि यानीह गीतानि तद्बालचरितानि च। दधिनिर्मन्थने काले स्मरन्ती तान्यगायत॥ २ ॥
क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकम्पं च सुभ्रूः।
रज्ज्वाकर्षश्रमभुजचलत्कङ्कणौ कुण्डले च स्विन्नं वक्त्रं कबरविगलन् मालती निर्ममन्थ ॥ ३ ॥
तां स्तन्यकाम आसाद्य मथ्नन्तीं जननीं हरिः। गृहीत्वा दधिमन्थानं न्यषेधत् प्रीतिमावहन् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—एकदा नन्दगेहिनी यशोदा कर्मान्तरनियुक्तासु गृहदासीषु स्वयं दधि निर्ममन्थ ॥ १ ॥ दधिनिर्मन्थने काले इह यानि यानि बालचरितानि (गोपीभिः) गीतानि तानि स्मरन्ती अगायत ॥ २ ॥ सुभ्रूः पृथुकटितटे सूत्रनद्धं क्षौमं वासः, च जातकम्पं पुत्रस्नेहस्नुतकुचयुगं, रज्ज्वाकर्षश्रमभुजचलत् कङ्कणौ, च कुण्डले, स्विन्नं वक्त्रं बिभ्रती कबरविगलत्मालती निर्ममन्थ ॥ ३ ॥ स्तन्यकामः हरिः मथ्नन्तीं जननीम् आसाद्य दधिमन्थानं गृहीत्वा प्रीतिम् आवहन् न्यषेधत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नवमे पयउद्रिक्तौ गत्वा गोप्यथ तत्कृतम् ॥ विलोक्य भांडभंगादि कृष्णं दाम्ना बबंध तम् ॥ १ ॥
तनूदराश्रितं विश्वं दृष्टवा विस्मितचेतसः ॥ बंधनद्व्यंगुलापूर्त्या पूर्णतामन्वदर्शयत् ॥ २ ॥

स्वयं दधि निर्ममंथ ॥ १ ॥ तदा चागायतेति चकारान्वयः ॥ २ ॥ सूत्रनद्धं कांचीबद्धम्। रज्जोराकर्षेण श्रमो ययोस्तयोर्भुजयोश्चलंतौ कंकणौ च। कबरात्केशपाशाद्विगलंत्यो मालत्यो यस्याः सा ॥ ३–४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उत्सिक्ते पात्राद्बहिर्निस्सृते। तत्कृतं कृष्णकृतम्। आदिना नवनीतप्रक्षेपादयो ग्राह्याः। तं येन भांडभंगादिकृतमिति दाम्ना रज्ज्वा (१) ननूदराश्रितमल्पजठरगम्। अद्भुतधियो यशोदायाः बंधने द्व्यंगुलस्यापूर्त्या न्यूनतया पूर्णतां सर्वत्र परिपूर्णः कथं बध्येतेत्यन्वर्थताम् (२)। नंदगेहिनी नंदभार्या। कर्मांतरेषु गृहमार्जनोक्षणादिरूपेषु नियुक्तासु योजितासु। अत्र विश्वनाथः-एकदा दीपमालिकामहोत्सवदिने कार्त्तिकमासोपास्यदामोदरलीलायास्समकालत्वादिति तोषिणीकाराः। गृहदासीषु यावद्गृहकर्माधिकारिणीषु सर्वास्वेव कर्मसु नैमित्तिकेतरकर्मसु नियुक्तासु दधिषु चाखिलेषु निर्मथ्यमानेषु एवं दधि पुत्रश्रेयो निर्बंधेन दासीनामविज्ञत्वं संभाव्य पुत्रोपभोगाय स्वयं ममंथ। अस्याः पद्ममंधिपयसः केवलतृणंचराया दुग्धं नीरोगमनेन मत्पुत्रश्रेयो भविष्यतीति हेतोः। अन्यथा लोकशास्त्रप्रसिद्धाऽसंख्यधेनुमतल्लिकादुग्धानां तयैकया दध्नः मथनस्यासंभवात्। ममंथेत्युपलक्षणं दोहनतापादीनामपि ॥ १ ॥ कविभिर्गीतानि कविभिरिति शेषः। यदा स्वयं दधि निर्ममंथ तदाऽगायतेति द्वयोः संबंधः। चकारोऽत्रानुक्तसमुच्चायकस्तेन यदा तदेति लब्धम् ॥ २ ॥ क्षुमा अतसी तत्संभवं क्षौमं 'अतसीस्यादुमा क्षुमा' इत्यमरः। यद्वा-"क्षुमः कृमिविशेषेऽपि क्षुमी स्यात्तैलसाधने" इति कोशात्कृमितंतुनिर्मितम् "सूत्रं कार्पासजे कांच्यां साधने शास्त्रसूचके" इति धरणिः। "कबरः केशसंघाते वर्णभेदे सुखाधिके" इत्यपि। मालत्यो जातिपुष्पाणि। 'सुमना मालती जातिः' इत्यमरः। "पुष्पे जातिप्रभृतयः स्वलिंगा व्रीहयः फले" इत्यमरोक्तेर्मालती पुष्पेऽपि स्त्रीलिंगातैव कार्त्तिके मालत्या एव प्राधान्यात् कप्रत्ययह्रस्वाभावस्वार्षः। जातः कंपो यत्र तज्जातकंपं द्वितीयांतानां बिभ्रतीपदेनान्वयः यद्वा-जातं कं घृतं यस्मात्सज्जातकं दधि 'कं जलं कं घृतं शिरः' इति कोशात्। सुभ्रूः यशोदाहर्षसूचनायेयमुक्तिः निर्ममंथ। किंभूता पञ्च वस्तूनि बिभ्रती। तान्याह-वासः पृथुकटितटे। पुत्रस्नेहस्नुतकुचयुगम्। रज्ज्वाकर्षश्रमभुजचलत् कंकणौ कुंडले वक्त्रं चेति। अपरं

---

[1] बादरायणिरुवाच-इति कस्यचित्।

पूर्ववत् ॥ ३ ॥ न्यषेधन्निवारितवान् । आसाद्य प्रातरंतगृंहात्प्रबुध्य बहिर्निस्सृत्य क्षुधा रुदन्मुखः सन्नित्यर्थः । मंथानं मथनदंडं गृहीत्वेति मातर्मा मथानेति । स्ववचसमानयिष्यंतीं मातरमभिज्ञायेति भावः । अतस्तच्चातुर्य्यं ज्ञात्वा या मातुः प्रीतिस्तामावहन् इति विश्वनाथः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ तत्र तात्त्विकसिद्धान्तं वक्तुं तत्प्रतिपादनयोग्यां पूर्वापरविलक्षणां लीलामुदाहरन् दधिपयश्चौर्य्यानुक्रमत्यक्रान्तामनुस्मृत्य वर्णयति–एकदेत्यादिना । यशोदेति दामोदरत्वादिना श्रीकृष्णाय प्रेमवश्यतातिशययशोदानात् नन्दस्य रोहिणीत्यद्धाङ्ग वात्तेन तस्यापि माहात्म्यमवगन्तव्यमिति बोध्यते एकस्मिन् दिने गृहदासीषु यावद्गृहकर्माधिकारिणीषु सर्वास्वेव कर्मान्तरे नैमित्तिकस्वरूपे नियुक्तासु सतीषु चाखिलेष्वेव मथ्येषु सत्सु दध्येकं ममन्थ तच्च पुत्रश्रेयोनिबन्धनेज्यानिवेद्याय पुत्रोपभोगाय च ज्ञेयं तया तस्यैव सर्वोपादेयत्वेन गृहीतत्वात् अत एव निः निश्चिततया ममन्थ अन्यथा लोकशास्त्रप्रसिद्धासङ्ख्यधेनुमतल्लिकादुग्धानां तयैकया दधिमथनासम्भवः स्यात् कर्मान्तरं चात्र परमविशिष्टं ज्ञेयं सर्वपरित्यागेन सर्वासामेव नियुक्तत्वात् गोपानामपि तद्दिने यतस्ततो गतत्वेनावगम्यमानत्वात् तच्च नूनमिन्द्रयागरूपं तस्यैव व्रजे तादृशमान्यचरत्वात् कार्त्तिकमासोपास्यदामोदरलीलायाः समकालत्वाच्च तत् यागस्य च कार्त्तिकीयत्वं तदारम्भेनैव प्रवर्त्तितश्रीगोवर्द्धनमखस्य कार्त्तिकशुक्लप्रतिपदि लोकागमयोर्विधीयमानत्वात् तथा च शरद्वर्णनायामाग्रपणसहयोगेन स एव इन्द्रियैश्च महोत्सवैरिति वक्ष्यते अत्र इन्द्रियार्थैरित्यर्थत्वेपि इन्द्रमिन्द्रियकामस्त्विति न्यायेन स एव देवतेति ॥ १ ॥ यानि यानि तस्य बालस्य च चरितानि इह तव सभायां मया गीतानि तानि सर्वाणि स्वयं स्मरन्ती वात्सल्यविलासेन भावयन्ती दध्नो निर्मन्थनं यत्र तस्मिन् काले गानावसरे अगायत चकार उक्तसमुच्चये निर्ममन्थ अगायच्चेति नानाकविजनरचितानि सर्वाणि स्वयं तत्क्षणनिबद्धानि वेति ज्ञेयं गीतरूपेणेति शेषः ॥ २ ॥ इत्थं तदेकस्निग्धायां तन्मातरि निजस्नेहभरोदया तामेव वर्णयन् परमसौन्दर्य्येण परमस्नेहेन च तन्मातृत्वयोग्यतां दर्शयति—क्षौममिति । तत्र सुभ्रूः पृथुकटितट इत्युपलक्षणेन सर्वाङ्गसौन्दर्य्यं व्यञ्जितं वेषसौन्दर्य्यं क्षौममित्यादिना क्षौमम् अतसीतन्तूत्थं वाल्कं “क्षौमास्या दुमाक्षुमा” इति चामरः अतिसूक्ष्मं चेदमवलोक्यते नानारागं चेति अत्र तु सचित्रं पीतं ज्ञेयम् अस्याः क्रमदीपिकाभिप्रायतः श्यामवर्णत्वेन शोभाभरावेक्षया एतस्याः पीतवर्णत्वं तु गौतमीये सूत्रनद्धमिति तत्रापि शोभादर्शिना सूत्रं नीविबन्धं मन्थनार्थं विशेषतो वा तन्नद्धं स्वाभाविकचेष्टासौन्दर्य्यमाह—रज्ज्वेत्यादिना । कुण्डले च चलन्ती कवरः केशबन्धः मालतीत्यत्र कप्रत्ययाभावः समासान्तो विधिरनित्य इति ज्ञापनात् मालतीति तस्या एव कार्त्तिके प्राधान्यात् स्नेहमाह, पुत्रेति । जातेति च पुत्रचरितगानात् सुभ्रूरिति भ्रुवश्चालनव्यञ्जनया हर्षादिभावविलासोपि वर्णितः ॥ ३ ॥ तत् स्नेहविशेषमयबाल्यलीलारूपया क्षुधा स्तन्यकामः तां तादृक् स्नेहरसमयीं यतो जननीमिति श्रीकृष्णान्तःस्थितभावमेवानुवदति—तेन च तस्याः सुखमेवाभूदित्याह—प्रीतिम् आ समन्तात् वहन् प्रापयन् स्तनपाने प्रयत्नात् मन्थनदण्डग्रहणेन निषेधनसामर्थ्याच्चातुर्य्याच्च एव मनोहरणाद्धरिः शय्यातः उत्थायेति ज्ञेयं कार्त्तिके प्रातरेव मन्थनव्यवहारात् बालान्तरैरसम्मिलितत्वाच्च ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं भक्तवात्सल्यरसेनोपालम्भनानन्देऽप्यतृप्तस्य निर्यन्त्रणानन्दविशेषकामनया श्रीभगवतो दामबन्धनांगीकारलीलां वदन् तयैव ‘महाभागा’ इति प्राक् सूचितं श्रीनन्दादपि श्रीयशोदाया भाग्यभरमेव वर्णयति—एकदेत्यादिना । यशोदेति दामोदरत्वादिना श्रीकृष्णस्य भक्तवश्यतादि–यशोदा न दस्य गेहिनीति बहुलदास्यादि सम्पत्तिरुक्ता । तथाप्येकस्मिन् दिने गृहस्थदासीषु कर्म्मकरीषु सर्वास्वन्यकर्म्मान्तरेषु पुत्रार्थ–दधिमथनदुग्धावर्त्तन–व्यतिरिक्तकर्म्मसु नियुक्तासु सतीषु । दधि केवलं पुत्रोपभोग्यं नवनीतार्थकं ज्ञेयम्, अ यथा लोकशास्त्रप्रसिद्धासंख्येयधेनुवरानन्तदुग्धानां तयैकया दधिमथनासम्भवः, अतएव स्वयं निःशेषं ममन्थोत्तमनवनीतार्थम् ॥ १ ॥ यानि यानीति वीप्सया सर्व्वाण्यपि संगृह्णाति, इह लोके गीतानि प्रसिद्धानि, यद्वा, व्रजे गीतरूपेण निबद्धानि तस्या बालस्तस्य चरितानि पूतनावधादीनि, तान्येवागायत, स्नेहभरेण परमाश्चर्य्यत्वेन च तैरेव चित्ताक्रमणाद्विशेषश्च दधिनिर्मन्थने काले स्मरन्ती चिन्तयन्ती, यद्वा, तद्बालचरितानि सदैव स्मरन्तीतित्कालस्य स्वभावेन गीताश्रयत्वात्तदानीं तान्येवागायत । एवं स्नेहविशेषेण पुत्राशेषचरितगानार्थं स्वयमेव दधि निर्म्मन्थितुं तद्दिने दासीनां सर्व्वासां कर्मान्तरनियोजनम्, तच्च श्रीभगवतो दामोदरत्वेच्छयैवेति ज्ञेयम् ॥ २ ॥ इत्थं श्रीभगवन्मातृयोग्यत्वेन तस्या गानादिवैदग्धीं प्रदर्श्य सौन्दर्य्यं चोद्दिशन् तदानीन्तनवेशविशेषं वर्णयति क्षौममिति कौशेयम्, तच्च पीतमिति ज्ञेयम्,—तस्यास्तन्त्रोक्तश्यामवर्णत्वेन शोभाभरापेक्षया । सूत्रनद्धमिति तत्रैव शोभाभरं बोधयति, यद्वा दधि निर्म्मन्थनार्थं विशेषतः काञ्च्या दृढबद्धमित्यर्थः । पुत्रस्नेहेन स्नुतं प्रस्नुतं क्षीरं कुचयुगमिति पुत्रचरितगानान्निरन्तरं वा स्नेहभरस्वभावात्, सुभ्रूरिति तदानीं भ्रुवश्चालनेन शोभातिशयाभिप्रायेण, कुण्डले च चलन्ती, कवरः केशबन्धः, मालतीत्यत्र ‘क’ प्रत्ययाभाव

आर्षः। एवं स्नेहभरोदयः सूचितः ॥ ३ ॥ अतएव स्तन्यकामो मधुरलीलानुरूपया स्वाभाविकक्षुधैव वा। तां तादृक्स्नेहरसमयीम्, यतो जननीमिति तस्यापि तद्गर्भजबुद्धिं बोधयति। दध्नो मन्थानं मन्थनदण्डं गृहीत्वा पाणिभ्यां धृत्वा, अतो न्यषेधत्। दधिमथनात्तां दधिमथनं वा न्यवारयत्। तेन च तस्याः सुखमेवाभूदित्याह—प्रीतिम् आ समन्ताद्वहन् प्रापयन् कुर्वन्निति वा, स्तनपाने प्रयत्नतो मन्थनदण्डग्रहणेन निषेधेन चातुर्याच्च। एवं मनोहरणाद्धरिरेकाकितयागमनञ्च स्वयं श्रीमातृहस्तेन बन्धनानन्दमनुभवितुं तद्विघ्नशंकयाव्रजस्य सहचराणामपि केनापि छलेन दूरे परित्यागादिति ज्ञेयम् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सूत्रनद्धं काञ्चीगुणबद्धं चलद्भुजकङ्कणकुण्डले च स्विन्नं वक्त्रं बिभ्रतीत्यन्वयः "जातकं दधि सम्प्रोक्तम्" इति कोशात् दधि निर्ममन्थ कीदृशी पंच बिभ्रती वासः कुचयुगं कङ्कणौ कुंडले वक्त्रञ्चेति ॥ १–४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं प्रदर्शितविश्वरूपस्य कृष्णस्याथापरिमेयतारूपपूर्णता प्रदर्शनमाह नवमेन—एकदेति। गृहदासीषु कर्मान्तरनियुक्तासु व्यापारान्तरे प्रविष्टासु दासीषु अत एव यशोदा स्वयमेव दधि निर्ममन्थ ॥ १ ॥ तस्य श्रीकृष्णस्य बालचेष्टितानि गद्यपद्यादिरूपेण कविभिर्निबद्धानि तानि सर्वाणि तदा दधिनिर्मंथनकालेऽगायत च ॥ २ ॥ कथम्भूता ममन्थेत्यत्राह—क्षौममिति। वासःप्रभृतीनां द्वितीयान्तानां बिभ्रतीत्यनेनान्वयः। पृथु कटितटे सूत्रनद्धं काञ्चीबद्धं क्षौमं वस्त्रं जातः निर्मथनानुकूलव्यापारजः कम्पो यस्य तत्पुत्रस्नेहेन स्नुतयोः पयःस्राविणोः कुचयोर्युगं च रज्ज्वाकर्षणे श्रमो ययोस्तयोर्भुजयोश्चलन्तौ कङ्कणौ कुण्डले च स्विन्नं प्रस्वेदभरितं वक्त्रं च बिभ्राणा कवराद्विगलन्त्यो मालत्यो यस्याः शोभने भ्रुवौ यस्यास्तथाभूता निर्ममन्थागायत चेत्यर्थः ॥ ३ ॥ तामेवं निर्मन्थतीं जननीमासाद्य समीपमेत्य स्तन्यकामयमानो हरिः श्रीकृष्णस्तस्याः प्रीतिमावहन् दधिमन्थनदण्डं गृहीत्वा न्यषेधत् निवारयामास ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अत्रातीताध्यायसङ्गतिरनुसन्धेया नन्दस्य गेहिनी भार्या ॥ १ ॥ दध्नो निर्मथनं यस्मिन् स तथा तस्मिन् काले ॥२॥ क्षुमनामकृमितन्तुना कृतं क्षौमं सूत्रेण काञ्च्या नद्धं बद्धं पुत्रस्नेहातिशयेन स्नुतयोः क्षरितयोः कुचयोः युगं पुनः कीदृशं जातः आविर्भूतः कम्पश्चलनं यस्य तत्तथा तत् शोभने भ्रुवौ यस्याः सा सुभ्रूः बद्धया रज्ज्वा आकर्षः तेनोत्पन्नः श्रमः आलस्यं तेनोपेतयोर्भुजयोश्चलन्तौ कङ्कणौ खणखणायमानशब्दयुक्तत्वात्तथाविधौ स्विन्नं स्वेदजलोपेतं कबरात् केशबन्धात् विगलती मालती मल्लिका यस्याः सा कबरविगलन्मालती अत्र द्वितीयान्तपदस्य बिभ्रतीत्यनेनान्वयः। पृथु विशालम् ॥ ३ ॥ न्यषेधत् निवारितवान् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एकदेति प्रायोऽयं दीपमालिकामहोत्सवो भवेत् दामोदरलीलोपासनस्य कार्त्तिकेऽभिधानात् ॥ १–५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निषिद्धय मन्थनं पीत्वा स्तनं चातृप्तिमान् क्रुधा। भाण्डं भित्वा द्रुतो मात्रा नवमे बद्ध ईश्वरः ॥
चौर्य्यक्रोधाविमान् मात्रा बद्धस्त्वं कृष्णरोदिषि।

अतिचमत्कारकारकस्यासाधारणस्य श्रीकृष्णविषयकनन्दयशोदाश्रयकमहावात्सल्यप्रेम्णः साधनमप्यसाधारणमपूर्वं श्रेयो भवितुमर्हतीति तदनाकर्णितवतः प्रश्नकर्तुः राज्ञोपि चित्तं नातिप्रसन्नमालक्ष्य तत्र मुख्यं सिद्धान्तमभिव्यञ्जयितुं दिनान्तरगतां दामबन्धनलीलां वक्तुमुपक्रमते–एकदेति। दीपमालिकामहोत्सवदिन इति श्रीवैष्णवतोषणी अत्र श्यामैककर्णतुरङ्गवत् परार्द्धसङ्ख्यास्वपि गोषु मध्ये व्रजस्य याः पद्मगन्धाद्या अतिसुस्वादु सुगन्धिपयसं सुगन्धितृणमात्रचारिण्यः सहस्राष्ट एव गावो वर्त्तंते तासामेव दुग्धध्यादिकं मत्पुत्रस्य रोचकं भविष्यतीति विचारयन्ती श्रीयशोदा निर्ममन्थ स्वयमिति स्वपुत्ररोचनीयनवनीतोत्क्रमणदुग्धावर्त्तनादौ वात्सल्यप्रेमोत्थहठादेव दासीनां विज्ञत्वमसम्भाव्यम् अद्यारभ्य कालकस्य भक्ष्यनवनीतदुग्धादिकं सर्वमहमेव साधु साधयिष्यामि यथा तत्तदेव रोचयन् कृष्णश्चौर्य्यार्थं परगृहं न यास्यतीति भावः। दधीत्यनन्तानां दध्नां मध्ये यदेक सारभूतं पूर्वेद्युः स्वयमेव साधितं तदेवेति भावः। निर्ममन्थेत्युपलक्षणं दुग्धमप्यावर्तयामास ॥ १ ॥ स प्रसिद्धो यो बालः कृष्णस्तस्य चरितानि यानि गीतानि गीतच्छन्दसा कविपुरन्ध्रीभिः स्वयं वा निबद्धानि तानि स्मरन्ती अनुसन्दधती अगायत गृहान्तःशयितकृष्णादर्शनोत्थस्य स्वान्तः क्षोभस्योपशान्तये इति भावः ॥ २ ॥ वात्सल्यप्रेम्णा

रूपगुणाभ्यां च कृष्णस्य यशोदैवानुरूपा मातेति द्योतयन् वात्सल्यरसोपासकानामवश्यकर्तव्यं श्रीकृष्णमातुर्ध्यानमाह—क्षौममतसीतन्तूत्थं पीतचित्रमतिसूक्ष्म भवेत् तेनास्याः श्यामवर्णत्वं क्रमदीपिकोक्तं ध्वनितं सूत्रनद्धं नीव्या निबद्धं पृथुकटितटे सुभ्रूरित्याभ्यां सर्वाङ्गसौन्दर्य्यं च व्यञ्जितं रज्जोराकर्षेण श्रमो ययोस्तयोर्भुजयोश्चलन्तौ कङ्कणौ वक्त्रमित्यन्तानां बिभ्रतीत्यनेन सम्बन्धः। मेघतुल्यात् कबराद्विगलन्ती जलबिन्दुश्रेणीव मालती यस्याः सा कप्रत्ययाभाव आर्षः ॥ ३ ॥ आसाद्य प्रातरन्तर्गृहात् प्रबुद्धय बहिर्निःसृत्य क्षुधा रुदन्मुखः सन्नित्यर्थः। मन्थानं मन्थनदण्डं गृहीत्वेति मातर्मामथानेति स्ववचनं मानयिष्यन्तीं मातरमभिज्ञायेति भावः। अतस्तच्चातुर्य्यं ज्ञात्वा या मातुः प्रीतिस्ताम् आवहन् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अष्टमाध्याये श्रीकृष्णस्यान्तरानन्त्यमुक्तमथ नवमे बहिरानन्त्यं वर्णयितुमाह—एकदेति ॥ १ ॥ दधिनिर्मथने काले च बालचरितानि अगायत ॥ २ ॥ सूत्रेण काञ्च्या नद्धं बद्धं क्षुमायाः विकारः क्षौमं वासः कुचयुगं च रज्ज्वाकर्षेण श्रमो ययोस्तयोर्भुजयोश्चलन्तौ कङ्कणौ च कुण्डले च स्विन्नं प्रस्वेदयुक्तं वक्त्रं च बिभ्रती कबराद्विगलत्यो मालत्यो यस्याः सा दधि निर्ममन्थ ॥ ३–४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

निवार्य दध्नो मथनं निपीतस्तन्याप्यतृप्तेः कुपितः परेशः। विभिन्नभाण्डो नवमे जनन्या द्रुतोऽपराधादुदरे निबद्धः ॥

परीक्षितः प्रश्नानुसारेण प्रतिवाचं दत्वाप्यतिकृपालुः श्रीशुकः स्वकृपापात्रं तं प्रत्यपृष्टोऽपि नन्दयशोदयोर्नितत्सौभाग्यं साधनहेतुकमपित्वनादिसिद्धमेवेति स्वसिद्धान्तं दर्शयति एकदेत्यादिभिः। एकस्मिन् वासरे जातं तच्चरितं निशम्य तयोस्तादृशं सौभाग्यं परिचिन्वितीत्यर्थः। गृहदासीष्विति सकलदधिमथनरसवद्युपकरणविधानादिषु कर्मसु ता नियोज्येत्यर्थः। यशोदा दध्येकं निर्ममन्थ स हि पुत्रभावेन कृष्णमुपास्ते तस्या नैत्यिकं कृत्यमेतत् स्वपुत्रातिप्रियहैयङ्गवं पद्मगन्धादीनां पद्मानां सर्वोत्तमानां गवामिदं दधि बोध्यम्। अन्यथा राज्ञ्यास्तस्यास्तदसम्भवः नन्दगेहिनीति तदर्द्धशरीरत्वात्तस्यापि तत्समसौभाग्यता सूच्यते ॥ १ ॥ यानि यानि तद्बालचरितानि गीतच्छन्दसा निबद्धानि तानि स्मरन्त्यगायत गृहान्तरशायितपुत्रादर्शनोत्थक्षोभशान्तये ॥ २ ॥ दधि मथ्नन्त्या हरिर्मातुर्ध्यानार्थं शोभां वर्णयति क्षौममिति सुभ्रूर्यशोदा जातकं दधिनिर्ममन्थ कीदृशी पृथुकटितटे क्षौमं अतसीस्यादुमाक्षुमेत्यमरोक्तेरतसीतन्तूत्थमतिसूक्ष्मं चित्रमनर्घं वसनं सूत्रनद्धं काञ्च्या निबद्धं पुत्रस्नेहेन स्नुतं कुचयुगं च रज्वोराकर्षेण श्रमो ययोस्तयोर्भुजयोश्चलन्तौ रत्नमयौ कङ्कणौ च कर्णयोरत्नजटिते कुण्डले च हारकेयूरनूपुराणामुपलक्षणं स्विन्नं स्वेदबिन्दुवद्वक्त्रञ्चेति पञ्चवस्तूनि बिभ्रती तैर्विशिष्टासतीत्यर्थः। कवराद्भ्रतुल्याद्विगलन्ती तारातितिरिव मालती यस्याः सेत्यभूतोपमा व्यज्यते कवभाव आर्षः। पृथुकटितटे सुभ्रूरित्याभ्यां पदाभ्यां सर्वावयवसौन्दर्यं सूच्यते विद्युदे गौरीयं मन्त्रपीठावरणे दृष्टा इन्दीवरस्यामेति कश्चित् ॥३॥ आसाद्येति गृहमध्ये प्रबुद्धय बहिर्निगम्य क्षुधा रुदन्मुखः सन्नित्यर्थः। मन्थानं गृहीत्वेति मया निषिद्धापि मन्थनं न त्यजेदिति ज्ञात्वेत्यर्थः। अतस्तद्बुद्धिनैपुण्यविज्ञाया मातुः प्रीतिमावहन् ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ स्वलीलया तेषां प्रीतिं चक्र इत्युक्तं सा च कीदृशीत्यतस्तां दर्शयितुं यशोदा काञ्चित्तदाटीकितघाटीं तदुपयोगिनीमादावाह ॥ एकदेति। स्वयं साक्षादेव नन्दगेहिनी तद्भार्या यशोदा दधि निर्ममन्थ। कुत इत्यत आह। एकदा कदाचिद्गृहदासीषु मथनकर्त्रीषु कर्मान्तरनियुक्तास्वेतत्कर्मतोऽन्यत्कर्मान्तरं तत्र नियुक्तासु सतीष्विति ॥ १ ॥ तात्कालिकं स्त्रीस्वभावमाह। स्मरन्ती यशोदा तानि तान्यगायतागायदिति। ते ते पिब तु जिह्वयेत्यम्भाष्यटीकादिकमुदाहृत्य प्रागुपपादितप्रकारोऽत्रानुसन्धेयः। तद्बालचरितानि स चासौ बालश्च तद्बालस्तस्य यानि यानि पूतनामातादीनि। इदं स्वगोकुल एव। एतेन स्वदृष्टानीति ध्वन्यते। चरितानि येषु तानि गीतानि प्रबन्धात्मना रचितानि दधिनिर्मथने दध्नो निर्मथनं यस्मिंस्तस्मिन्काले इ अद्भुता ईहा। यद्वा प्रकृतिभाव आर्षः। ई इच्छाविषय ईहा चेष्टा येषामिति ते। इष्टदानात्तथेन्द्व इति ऋग्भाष्योक्तेः। इच्छा एतज्ज्ञानविषयिणी येषां तैरीहैर्देवतादिभिर्गातानि तद्बालचरितानि यानि यानि तानि तानीति वा ॥२॥ कवरेति पर्यन्तं बिभ्रतीत्यनेनान्वयः। पृथुकटितटे क्षौमं क्षुमक्रमितन्तुनिर्मितं पीताम्बरं वासश्च तदन्तरेकं। क्षौमपट्टे दुकूले स्यादिति विश्वः। वास इति पृथक् सत्त्वात्क्षौमशब्दः क्षुमतन्तुनिर्मितत्वमात्रवाचक इति वा। प्राग्यत्र वासो वासुदेवस्य तस्मिन्कटितट इत्यन्वयो वा। सूत्रं काञ्ची तन्नद्धं बद्धं। णह बन्धन इति स्मरन्ति। जातकम्पं जातः कम्पो यस्य तत्पुत्रस्नेहेन स्नुतं स्रवत्क्षीरं कुचयोर्युगं रज्वाकर्षश्रमे भुजचलत्कङ्कणौ। कङ्कणं करभूषणमित्यमरः। कङ्कणं शेखरे हस्तसूत्रमण्डनयोरपीति विश्वः। कङ्कणे इति सुपठं। रज्जोराकर्ष आकर्षणं तज्जातः श्रमो ययोस्तौ च तौ भुजौ च चलती कङ्कणे करभूषणे ययोस्तौ रज्वाकर्षश्रमभुजौ च तौ चलत्कङ्कणौ चेति विग्रहे न लिङ्गभङ्ग इति ज्ञेयं। विशेषणस्य परनिपातमात्रं सामयिकमिति न जघन्यं

कुण्डले कर्णभूषणे स्विन्नं वक्त्रं च । **कबर** केशशाकविशेषयोः कबरमिति विश्वः । केशपाशाद्विगलन्त्यो मालत्यो जातीकुसुमानि । मालती जातिभेदे स्यादिति विश्वः । यस्याः सा सुभ्रूर्दधि ममन्थ ॥ ३ ॥ स्तन्यकामो हरिर्मथ्नन्तीं तां जननीमासाद्य दधिमन्थानं गृहीत्वा प्रीतिमावहन्सन् न्यषेधन्निषिषेधे ॥ ४ ॥

श्रीसुबोधिनी

शास्त्रार्थतो यथा भक्तिर्हरौ भवति निश्चला । तदर्थं नवमे प्राह चरित्रं परमाद्भुतम् ॥ १ ॥
स्वरूपं च कृपालुत्वं हरेर्ज्ञातव्यमञ्जसा । अतो दयासुसंमिश्रं ज्ञानमत्र निरूप्यते ॥ २ ॥
निरोधो यदि भक्तानां स्वस्मिन् स्वस्य च तेषु च । तदोभयसुसम्बन्धाद् दृढो भवति नान्यथा ॥ ३ ॥
ज्ञानवैराग्यरूपैर्हि स्वाधीनो भगवान् भवेत् । अतोध्यायत्रये लीला जीवाधीना निरूप्यते ॥ ४ ॥
अतिपौरुषमेतद्धि जीवानामिति निश्चितम् । द्वादशाङ्गमतिक्रम्य षड्भिर्वश्यो भवेद् गुणैः ॥ ५ ॥
पञ्चपर्वामविद्यां हि लोकानामपि नाशयेत् । अतः पञ्चभिरुक्तो हि विचारो भगवद्गतः ॥ ६ ॥

तत्र प्रथमं यशोदाया अतिपौरुषं कार्यं सिद्धमिति वक्तुं क्रियया भगवत्प्राप्तिमाहै**कदे**तिदशभिः' भक्तिर्हि दशविधा गुणातीतया भगवान् प्राप्यते नवविधसहितस्नेहेन वा, ततो द्वाभ्यां वशीकरणे श्रमः काण्डद्वयसमावेशार्थस्ततो वशीकरणं षड्भिः पञ्चभिरविद्याबाधनमिति

निवारितापि संसारे मोहिता सङ्गता पुनः । गुणगाने स कालोभूच् छ्रमो द्वाभ्यां ततोभवत् ॥ १ ॥
अतः कृतो निषेधो हि भक्तिसारं हरिः पपौ । ततो रिक्ता पूर्वबुद्ध्या सङ्गतान्यच् चकार ह ॥ २ ॥
एवं निरुद्धा चेद् भ्रान्ता कोपयुक्तो हरिर्भवेत् । धौर्त्यं दृष्ट्वा लोकदृष्ट्या प्रीता तस्मान्न पश्यति ॥ ३ ॥
जिज्ञासायां ततो दृष्ट्वा प्राप्त्यर्थं यत्नमाचरत् । विरुद्धांस्तान् हरिर्ज्ञात्वा तपसे निर्गतस्ततः ॥ ४ ॥
पूर्णे तपसि तत्प्राप्तिरेवं दशभिरुच्यते । परोक्षवादा ऋषयः परोक्षं च हरिप्रियम् ॥ ५ ॥
आसक्तिं चेत् स्वतः कुर्याज् जीवः कृष्णः पलायते । तदा दृढो निरोधः स्यान् नान्यथेत्येष निर्णयः ॥ ६ ॥

पूर्वाध्याय आधिदैविकमोहस्य प्रतिपादितत्वात् तत्कार्यमाहैकदेति, यदा भगवदिच्छया **सर्वा एव गृहदास्यः** क्षेत्रादिसंस्कारार्थं तत्प्रसङ्गाल्लतादिगृहनिर्माणार्थं वा गतास्तदा **यशोदा स्वयं दधि निर्ममन्थे**तिसम्बन्धः दास्यश्चतुर्विधाः प्रभुभ्यो देया गोष्ठक्षेत्रविचारिकाश्चान्या यशोदासख्यो नन्दभोग्या गृहकार्यकर्त्र्यश्च, तत्र **गृहदासीषु कर्मान्तरनियुक्तासु** सत्सु प्रकरणाद् भगवदभ्युदयार्थमेव कर्मान्तरमिति लक्ष्यते, स्वतःकरणे हेतु**र्नन्दगेहिनीति,** गेहिन्याः कर्मैतदावश्यकम् ॥ १ ॥ एवं संसारव्यापृतिरपि भगवदीयानां भगवद्गुणगानार्थमेव जातेत्याह **यानि यानीति**, उपनिबन्धनं स्वेनैव कर्तुं शक्यते स्त्रीणामद्यापि तथासामर्थ्याद्, **यानि** प्रसिद्धानि भगवच्चरित्राणि पूर्व**मिह गोकुले** वा शास्त्रतो लोकतश्च तन्मध्ये **यानीह** प्रसिद्धानि वीप्सया सर्वाण्येव, अनेन **गान**मेव मुख्यं न तु दधिमन्थनमिति ज्ञापितं, अन्यथा शीघ्रं दधिमन्थने **सर्वाणि गीतानि** गातुं न शक्यानि स्युः, तस्य, **बालचरितानि** स्वदृष्टानि चकाराद् गोपिकादिभिरप्युक्तानि, तस्य भगवतो **बालचरितानि** येषु तानि वा **गीतानि चकारा**दन्यानि च, **दध्नो** नितरां **मथनं** यस्मिन् काले, भगवतो गुणगानस्य स एव कालः, यस्मिन् काले क्रियाशक्तेराधिदैविकस्यापीन्द्रियं मथितं भवति, तदाह **दध्नो नितरां मथनं यस्मिन् काल** इति, ननु कथं तस्यैव कालस्य गाने हेतुत्वमिति चेत् तत्राह **स्मरन्तीति, तानि गीतानि स्मरन्ती,** तस्मिन्नेव **काले** गीतानां स्मरणं भवतीति ॥ २ ॥ एवं गानपरतया मथने क्रियमाणे गानस्यामृतरूपत्वाद् दधिमथनं न भवतीति गानस्य गौणभावं सम्पाद्य भगवद्व्रजनौपयिकं **देह**मपि पीडयित्वा भगवदुपभोग्यं रसमपि निरुध्य तद्देवतामपि निवार्य भौतिकीं क्रियां श्रमजनिकां भक्तिमपि पीडयन्तीं मुक्तानामपि क्षोभजनिकां क्रियां कृतवतीत्याह **क्षौमं वास** इति, **क्षौमं** पट्टवस्त्रं तदतिपिच्छिलं भवतीति तद्दार्ढ्यार्थं **सूत्रेण** दवरकेण **बद्धं** क्रियते, उत्थिता सती मथनं करोति मथनावेशाद् वस्त्रस्याप्यननुसन्धानमिव वक्तुं स्थूले **कटितटे बिभ्रती**त्युक्तं, कटिस्थौल्यान् मध्ये कृशभावेन **बद्धं वासः** परं न पतति, अयुक्तकरणं वा ज्ञापयितुं वस्त्रादिसौन्दर्यं वर्ण्यते, **तट**पदेन चास्या गतिरूपत्वं नद्या इव प्रदर्शितं, अनेनावश्यकशरीरापेक्षापि मथनार्थ परित्यक्तेति सूचितं, पुत्रस्नेहेन सहजधर्मेणाधिक्यात् प्रेरितं दुग्धं बहिरपि निःसरन् न विचारवतीत्याह **पुत्रस्नेहे**ति, दुग्धं यद्यपि स्रवति तथापि **पुत्रस्नेह एव स्नुतो** यत्र तादृशं **कुचयुगं बिभ्रती** स्नेहे वृथा गच्छति सति तदभिमानिनी देवता भीता सती **कुचयुगमपि कम्पयति**, तादृशमपि **बिभ्रती,** अनेनाधिभौतिकाध्यात्मिकाधिदैविकापेक्षामपि त्यक्तवतीत्युक्तं भवति, **चकारा**दन्तर्यामिप्रेरणामपि, नन्वेवमतिक्रमे भगवता रक्षकत्वेन स्थापितौ दण्डधरौ मृत्युयमौ कथं न तां दण्डितवन्तावित्याह **सुभ्रूरिति**, शोभने भ्रुवौ यस्याः, "भ्रुवौ यम" इतिवाक्याद् भाव्यर्थमङ्गीकृत्य पर्यवसानाच् छोभनभ्रूत्वं, **रज्जोर्नेत्रस्याकर्षणं** यः **श्रम**स्तत्सहितं **भुजद्वयं** तावत्पर्यन्तं **चलन्ति कङ्कणानि** ययोरेतादृशौ हस्तौ **बिभ्रती, अनेन**

भक्तिमार्गः कर्ममार्गश्च तद्देवास्तन्नियमाश्च सर्वे क्लिष्टा इत्युक्तं, **कुण्डले** साङ्ख्ययोगं द्वयमपि क्लिष्टं, सर्वत्र **बिभर्तीति**सम्बन्धः, **चकारा**च्छिरश्च **जातकम्पमि**त्यनुवर्तते, एतदर्थमेव पृथङ्निर्देशः, अन्यथा स्रुतसकम्पकुचयुगमित्येव वदेत्, **वक्त्र**मपि **स्विन्नं**, परमक्षोभात् स्वेदयुक्तं, निर्गतसारा भक्तिरप्युच्यते, **कबरे** केशपाशे सिद्धस्थानेषु **विगलन्ती मालती** यस्यां, **कबरात्** केशपाशात् सिद्धस्थानाद् **विगलन्ती मालती** यस्यामिति वा, **मा** लक्ष्मीरलं यस्मिंस्तादृशं जगदतिक्रम्य वर्तत इति **मालती** ब्रह्मविद्या सापि गच्छति, एवं प्रपञ्चासक्ता **निर्ममन्थ,** आकृतिमात्रवर्णनायां वैयर्थ्यं शुकवाक्यविरोधश्च भवेत् ॥ ३ ॥ पूर्ववद् **भगवान्** बालकानामर्थे स्तन्यकामः सन् छद्म वारितवानित्याह **तामिति**, **आसाद्य** निकटे गत्वा नैकट्यदर्शनाभ्यां क्रियाज्ञानाभ्यामुभयविधनिरोधसिद्धिः, **मथ्नन्तीमिति** दध्नो विकृतत्व स्वस्यापि प्रयासः, **जननीमिति** निरोधावश्यकत्वं, तथाबुद्धिस्तेनैव कृतेति, हरिरिति सामान्यतोपि सर्वदुःखहर्ता साम्प्रतं कर्तुरत्यन्तान्याभिनिवेशात् करणप्रतिबन्धमेव कृतवानित्याह **गृहीत्वा दधिमन्थान**मिति, **मन्थानं** दण्डं हस्तेन धृत्वा **प्रीतिमावहन् न्यषेध**न्मथननिषेधं कृतवान्, निषेधेपकारापकरणाय **प्रीतिमावहन्निति**, यथा तस्याः स्वस्मिन् प्रीतिर्भवति तथा कुर्वन्,

सर्वाङ्गं चालयन् हस्तौ पादौ चैव विचालयन्। मुखाब्जं मधुरारावं बिभ्रत् कृष्णः समागतः ॥ १–४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

नवमाध्याये निवारितापीति। ननु मायाकार्याद् भगवत्कार्यं बलिष्ठमिति भगवत्कृते निवारणे सत्यपि कथं गृहकृत्ये प्रवृत्तिरित्याशङ्क्य तत्र हेतुमाहुः **पुनर्मोहितेति**। निषेधेन पूर्वमेहागमेनावश्यकमपि कार्यं त्यक्त्वा भगवत्परापि 'सस्मितमीक्षती मुख'मिति वाक्यात् स्मितेन पुनर्भगवता मोहिता सती तथा जातेत्यर्थः। **नन्व**न्यासक्तिहेतुत्वेन निरोधविरोधि पूर्वं मोहनमित्याशङ्काभावायाहुः **गुणगान** इति। भगवत्कृतत्वान्मोहस्य तत्कालेपि गुणगानार्थमेवाभूदित्यर्थः। मोहेस्मिन्नस्ति रूपद्वयम्। विषयासञ्जकत्वं भगवत्कृतत्वं च। तेन द्वाभ्यामुक्तमिति शेषः। तर्ह्येवंरूपतन्निषेधोनुचित इत्याशङ्क्य तन्निमित्तमाहुः **ततः श्रमोभव**दिति। ततः श्लोकद्वयानन्तरमेकेन श्रमोभवदिति निरूप्यत इत्यर्थः। यत एवमतो भक्तक्लेशासहिष्णुत्वेन स कृत इत्याहुः **व्रत** इति। लोके धनं पुत्रार्थमिति न्यायेन भगवदर्थमिदमिति ज्ञानेन माता प्रवृत्तेति कथं कोप इत्याशङ्क्य तत्र हेतुमाहुः **भ्रान्तेति**। भगवतस्तदपेक्षाभावात् तथाज्ञानं भ्रम इति तथा। एतादृश्येव भक्तिमार्गमर्यादेति ज्ञापनाय **भवे**दित्युक्तम्। **तान्** यष्टिग्रहणादियत्नानित्यर्थः। तपोन्तःकरणदोषापहं दुःखरूपं भगवत्प्रापकं चेत्यनुधावनयत्नेन तपस्त्वमुक्तम्। अत्रापि प्रचुरदोषबुद्धिसत्त्वात्तथा। अत एवाग्रे यष्टित्यागः। सर्वात्मना दोषारोपनिवृत्तेस्तत्प्रापकस्य दुःखस्य भक्तिमध्यपातित्वं नोक्तम्। अत्रायं भावः। पूर्वमेव स्वप्रापणमकृत्वा तावत्क्लेशानन्तरं तथाकरणे कश्चन विशेषो वाच्यः। स च पूर्वं यष्टिग्रहणेन क्लेशानं तरं तत्त्यागेन चान्तःकरणगत एवेति लक्ष्यते। एवं सति 'वीर्यं मे दुश्चरं तप' इति वाक्यात् तद्गतालौकिकविशेषहेतुस्तप एति तथोक्तम्। भक्तित्वानुक्तौ हेतुरुक्त एव। एतदेवाभिसन्धायोक्तं परोक्षेत्यादि। परोक्षवादविषय एवासक्ति चेत्यादिनाप्युक्तः ॥ १ ॥ **दधिनिर्मन्थने काल** इत्यत्र, क्रियाशक्तेरित्यादि। क्रियाशक्तिर्भुजयोः प्रतिष्ठिता। तदाधिदैविकश्चेन्द्रः। 'इन्द्रियं वै दधी'तिश्रुतेस्तस्येन्द्ररूपं तदिति तथा। वस्तुतस्तु परोक्षवादविषय एवार्थोनेनोक्तः। तथाहि। क्रियाशक्तेरिति **पञ्चमी** हेतौ। भगवद्वियोगे हि सर्वेन्द्रियगतस्तादृक् क्षोभो भवत्यतिप्रचुरो, येन तत्तदाधिदैविकस्यापीन्द्रियं क्षुभितं भवति। तदा भावविशेषैर्गुणगानं भवति। यथा व्रजरत्नानाम्। तदेतत्प्रसङ्गादुक्तं **भगवत** इत्यादिना ॥ २ ॥ **क्षौमं वास** इत्यत्र **सुभ्रू**रित्यस्याभासः, **नन्वेवमतिमक्रम** इत्यादि। व्रजजनक्लेशहेतुभूतानां नाशाय दुःखप्रापणाय च मृत्युयमौ तत्राज्ञप्ताविति कुचकम्पस्य क्लेशहेतुत्वेन तत्कर्त्रौ पूर्वोक्तदेवतां तौ कथं न तथा कृतवन्ताविल्यर्थः। सर्वनियमनत्वेन तयोर्यमत्वम्। दिक्पालस्यात्रातथात्वमिति ज्ञापनायेदमुक्तम्। भाव्यर्थः श्रमस्तस्यानङ्गीकारे तद्धेतौ न प्रवर्तेत। तथा च तदङ्गीकृत्य ममन्थेति सम्बन्धः। क्लेशे भ्रूसङ्कोचसम्भवेनात्र च शोभनत्वेन तदभावात् क्लेशाभावो ज्ञाप्यत इत्याशयेनाहुः **पर्यवसानादि**ति। तद्दण्डः पर्यवसानम्। रज्ज्वाकर्षे भुजद्वयस्यापि व्यापृतत्वं भवतीति दक्षिणवामयोर्यथाक्रमं तद्रूपत्वम्। अत्रायं भावः। अस्त्यत्र क्रिया द्विविधा। **भगवत्सम्बन्धिनी** गार्हस्थ्यसम्बन्धिनी चेति। प्रधानत्वाप्रधानत्वाभ्यां तद्रूपत्वमुच्यते। तत्तत्कङ्कणानां भक्तिमार्गीयनियमरूपत्वं कर्ममार्गीयदेवतारूपत्वम्। तदाश्रितत्वात्। सुभ्रूरितिवत्स्वतन्त्रविशेषणत्वं सर्वेषामनुक्त्वाभरणकर्मत्वोक्तेस्तात्पर्यमाहुः **क्लिष्टं सर्वत्रेति**। क्लेशरूपसमानधर्मवत्त्वं सर्वेष्वस्तीति ज्ञापनाय तथेत्यर्थः। विशेषणत्वोक्तौ प्रकारकत्वापत्त्या तदप्राधान्येन तत्क्लेशस्याप्रयोजकत्वात् तद्धेतुभूतमन्थनेनुचितत्वं न ज्ञापितं भवेदिति भावः। शीर्ष्णः सत्यलोकाधिदैविकरूपत्वेन तदुपरि ज्ञानिनां जीवन्मुक्तानामेव स्थानमिति तथोक्तम्। लीलामध्यपातिनां भगवदात्मकत्वमभिसन्धायैवं सर्वत्राचार्यैर्निरूप्यत इति ज्ञेयम्। प्रभौ स्नेहवतां तथैव तत्सम्बन्धिष्वपि स्नेह इति मातुस्तादृक्श्रमदर्शने तदसहिष्णुत्वेन क्षोभात् मुक्तानामपि स्वधर्मविस्मृतिर्भवतीत्याशयेन **मा** लक्ष्मीरित्याद्युक्तम्। किञ्च। सर्वमूलभूतभगवदाविर्भावस्थानत्वेन सर्वमूलभूतत्वान्मातरि तादृशधर्मे सति तत्कार्यपरंपरायां स्वत एव तादृशत्वं भवतीति भावेनापि तथोक्तम्। विपक्षे बाधकमाहुः **आकृतीत्यादि**। मन्थनोक्त्यैव तदनु-

रूपाकृतेरपि प्राप्तेस्तत्कथनं पुनर्मन्थनोक्तेश्च तथा स्यादित्यर्थः। एवं सति विशेषस्यावश्यवाच्यत्वे मन्थनस्यानुचितत्वज्ञापनमेव विशेष इति वक्तुं युक्तमिति लोकतः परमार्थतश्च तथात्वमुक्तम्। किञ्च। पूर्वं दधिनिर्मन्थने काल इति वाक्याद् गुणगानाङ्गत्वेन मन्थनमुक्तम्। तेन मन्थनेन न किमपि क्लिष्टमभूत्। तथैव चेदग्रेपि स्यान्न निवारयेत्प्रभुः। निरोधाविरोधात्। एवं सत्यग्रे निषेधस्य वाच्यत्वात् तद्धेतुभूतं निरोधविरोधिमन्थनमवश्यं वाच्यमित्येकेन तदुक्तम्। एवं सति विवृतिस्तथाविधेति युक्ततरम्। अन्यथा निषेधोक्तिर्विरुद्धा स्यादित्यभिसंधायाहुः **शुकवाक्ये**त्यादि। मन्थनसामयिकाकृतेः साधारणत्वेन विशिष्टलीलारूपत्वं न सम्भवती'त्युत्तमश्लोकलीलया गृहीतचेता' इति लक्षणं शुकवाक्यं तथा स्यादिति वा। उत्करीतेस्तु माहात्म्यज्ञानहेतुत्वेन भक्तिजनकत्वादुत्कर्षः। **पूर्ववदि**ति। निष्क्रमणोत्सववदित्यर्थः॥ ३॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

नवमाध्यायतात्पर्यं **वदन्तो 'भक्तिर्हरा'**वित्यनेन राज्ञा पृष्टस्योत्तरत्वेनाध्यायारम्भ इति नासङ्गताभिधानशङ्केत्याहुः **शास्त्रार्थत** इत्यादि, **शास्त्रार्थत** इति भावप्रधानो निर्देशः पञ्चमी च ल्यब्लोपे, तथा च भगवतः **शास्त्रार्थ**त्वं ज्ञात्वा **यथा हरौ भक्तिर्निश्चला भवति तदर्थं** तथेत्यर्थः, तथात्वं च दामबन्धनस्थले स्पष्टीभविष्यति, ननु शास्त्रार्थत्वेन निरूपणस्य किं प्रयोजनं **कश्च शास्त्रार्थ** इत्यत **आहुः स्वरूपमि**त्यादि, राज्ञा हीशानुकथान्ताः सप्त लीलाः श्रुता, अष्टमी चेयं निरोधलीला, **तत्र चारम्भे** "वीर्याणि तस्याखिलदेहभाजा"मित्यस्मिञ् छ्लोके भगवतो राज्ञा स्वज्ञातं माहात्म्यमप्यनूदितमेवं सति राज्ञो माहात्म्यज्ञानपूर्विका भगवति भक्तिरस्त्येवेति "भक्तिर्हरा"वित्यनेन यद् भक्तिजनकं चरित्रं पृष्टं तत्र द्वयं बीजत्वेन भाति, एवं **लीलाः कुर्वन्** भगवान् सर्वेषु प्रसीदति न वा शीघ्रं च भक्तदुःखं हरति न वेति, तत्र **शास्त्रार्थ**त्वेन ज्ञातो दयालुत्वात् सर्वेषु प्रसीदति दुःखं च हरतीतिज्ञापनार्थं **दयासम्मिश्रं स्वरूपज्ञानमत्र** विषयनिरूपणमुखेन **निरूप्यते** ज्ञानाध्यायत्वादित्यर्थः, यादृशो **भगवान् शास्त्रार्थस्तादृशो** "न चान्तर्न बहिर्यस्ये"त्यादिषु नवसु श्लोकेषु विषयत्वेन स्फुटीभविष्यति, ननु राज्ञः प्रश्नानुरोधेन शुकैस्तथोत्तरितमिति भवतु नाम तादृशचरित्रनिरूपणं तथाप्येतस्या लीलायाः स्कन्धार्थे निरोधे क उपयोगो मातृचरणादिषु प्रधानस्य साङ्गस्य निरोधस्य जातत्वादत आहु**र्निरोध** इति, तथा चेदमपि प्रकृतोपपादकतयोपोद्घातसङ्गत्या निरूप्यत इत्यर्थः, **तच्च समाप्तौ श्लोकद्वये स्फुटीभविष्यति**, ननु भगवन्निरोधो **भक्तैः कथं कर्तव्य** इत्यत आहु**र्ज्ञानमित्यादिसार्धेन, एतद्धी**ति भगवद्वशीकरणं **हि हेतौ**, तथा च यत **एतैस्त्रिभिर्वशीभवती**त्यतः प्रथमं साधनं **ज्ञानरूपमत्र निरूप्यत** इत्यर्थः, ननु यदि ज्ञानादिना वशीभवति तदा ज्ञानिभिरपि वशीक्रियेतेत्याशङ्कामेतदध्यायश्लोकसंख्यातात्पर्यनिरूपणेनापनुदन्ति **द्वादशाङ्ग**मितिसार्धेन, **द्वादशाङ्गः** पुरुषोक्षरं **तदतिक्रम्य** तन्मर्यादामपहाय स्वस्य ये **षड्गुणास्तैर्वश्यो भवति स्वेच्छये**ति तत्समसङ्ख्यैः श्लोकैर्ज्ञाप्यते, ते च भगशब्दवाच्या बोध्याः, **गुणेषु** च क्रमो न विवक्षितः, टिप्पण्यां "कृपये"तिपदस्यैश्वर्यगमकत्वप्रतिपादनात्, "एवं स्वगेह"इत्यत्र वीर्ययशसो "न चान्तरि"तिपद्यैः सर्वव्यवहारातीतत्वादिभिर्वैराग्यज्ञानयोः स्फुटीभावाच्च, अत्र चैश्वर्यस्य वश्यताहेतुत्वं शेषाणां तु तदुपोद्बलकत्वमिति बोध्यं, अवशिष्टतात्पर्यं **पञ्चभिरि**त्यादिनोच्यते, कारिकोक्तमर्थं वैशद्यार्थं पुनरनुवदन्ति **भक्तिरि**त्यादि। **बाधनमिती**त्यन्तं, अत्र "ततो भक्तिर्भगवती" तिपूर्ववाक्यानुरोधेन भक्तिपक्ष उक्तस्तत्रापि भगवद्दर्शनरूपेण फलेन दशम्या गुणातीतत्वं माहात्म्यस्य विस्मृतत्वेन केवलं स्नेहस्य सत्त्वान् मध्ये गुणगानस्मरणयोरुक्तत्वाच्च स्नेहपक्ष उक्तो **द्वाभ्या**मित्यादिनोक्तं तु सङ्ख्याया एव तात्पर्यं काण्डद्वयोक्तकर्मोपासनयोर्भगवद्वशीकरणोद्यम एव पर्यवसानात्, न हि भगवांस्ताभ्यां वशीभवति "यमेवैष वृणुत" इत्यादिश्रुतिभ्यस्तथावसायादिति **प्राथमिकानां भक्तिबोधकानां** दशश्लोकानां प्रत्येकमर्थमाहु**र्निवारितापी**त्यादिभिः, तदर्थं टिप्पण्यामुपपादयन्ति **नन्वि**त्यादि एवमर्धेन प्रथमश्लोकार्थ उपपादितः, योजना तु **निवारितापि** पुनर्मोहिता **संसारे सक्ते**त्येवं बोध्या, द्वितीयस्योपपादयन्ति **नन्वन्यासक्ती**त्यादि, **पूर्वमोहन**मिति स्मितकृतं पूर्वाध्यायोक्तं वा, तृतीयस्योपपादयन्ति **तर्ही**त्यादि, चतुर्थस्याहु**र्यत** इत्यादि, पञ्चमस्य तु **भक्तिसार**मित्यादिना सुबोधिन्यां स्फुटः, तत्रान्यदित्यनेनोत्सृज्य गमनं बोधितं **षष्ठस्यो**पपादयन्ति **लोक** इत्यादि, **तदपेक्षाभावादिति सुश्रृत**दुग्धापेक्षाभावात्, **एतादृशी**ति भगवदनपेक्षितेपेक्षितश्रमे सति भगवान् कुप्यतीत्येवम्रूपा, सप्तमस्य तु **धैर्य**मित्यादिना सुबोधिन्यां स्पष्टः, अष्टमस्य तु **जिज्ञासाया**मित्यर्धे सुबोधिन्या स्फुटः, नवमस्य विवृण्वन्ति **तानि**त्यादि **तथे**त्यनुधावनं, तन्निवर्तकं तप एव, तस्य **दोषनिवर्तक**त्वं स्फुटीकुर्वन्त्यत **एवे**त्यादि दोषबुद्धिनिवर्तकत्वादेव, ननु भक्तिप्रकरण एतस्य तपस्त्वं कुत उक्तमित्याकाङ्क्षायां तत्तात्पर्यमाहु**रत्रायं भाव** इत्यादि, **विशेष** इति मातृचरणगतो यो **विशेषः तद्गते**त्यन्तः करणगतो यो भीतत्वोपनायकज्ञानात्मको विशेषस्तद्धेतुरित्यर्थः, इदं सात्त्विकत्वमभिप्रेत्योक्तं "**सत्त्वं तत्तीर्थ**"मितिवाक्यात्, ननु भक्तिप्रकरणे तपसः कः प्रसङ्ग इत्यत आहु**रेतदेवे**त्यादि, तथा चात्र परोक्षवादेन मातृचरणस्वरूपव्यवस्थाबोधनार्थं तथोक्तं, सा चाग्रे 'स जातकोप' इत्यत्र स्फुटीभविष्यति, दशभिः सिद्धोर्थोप्यग्रे कारिकयोच्यत इत्याशयेनाहुः **परोक्षवादे**त्यादि, कारिकार्थस्तु **जीवश्चेत् स्वतः सत्त्वमभिसन्धाय गृहोपकारणादावासक्तिं कुर्यात् तदा कृष्णः पलायते** विमुखो भवति तदैवं वैमुख्ये सति भगवति निरोधो दृढः स्यान् नान्यथा इत्येष दशश्लोकसिद्धो निर्णय इति ज्ञेयम्॥४॥ **यानी**त्यत्र **भगवत** इत्यादिना गुणगानकालो यो विवृतस्तत्तात्पर्यं टिप्पण्यामाहुः **क्रियाशक्ते**रित्यादि, कारिकासु **परोक्षवादस्या-**

ङ्गीकृतत्वात् तमादायात्र प्रासङ्गिकं वदन्ति भक्तिमार्गमर्यादाज्ञापनार्थमित्याशयेन तात्पर्यान्तरमाहु**र्वस्तुत** इत्यादि ॥ २ ॥ **क्षौमं वास** इत्यत्र **रस**मिति स्तन्यं, **तद्देवता**मिति स्तन्यजनिकां स्नेहाभिमानिनीं **देवतां**, सा च मायाया रूपान्तरमिति प्रतिभाति, **भक्ति**मिति स्नेहरूपां, **मुक्ताना**मित्येतदर्थोनुपदं स्फुटीभविष्यति, **सुबोधिन्यां** वस्त्रादिवर्णनस्य पुरःस्फूर्तिकमर्थमाहु**रयुक्ते**त्यादि, **बह्वीषु** गृहदासीषु सतीषु तासु काञ्चित् कार्यान्तरादनिवार्यानाकार्य स्वयं करणमयुक्तकरणं तत्रेति ज्ञापयितुं तथेत्यर्थः, **गति-रूपत्व**मिति चाञ्चल्यं, **आधिभौतिके**त्याद्याधिभौतिकं दुग्धमाध्यात्मिकः **स्नेहो** देवता**धिदैविकी**, **नन्वेवमतिक्रम्य** इत्यस्यार्थं **टिप्पण्या**माहु**र्व्रज** इत्यादि, **भाव्यर्थे**त्यादेरर्थं **टिप्पण्या**माहु**र्भाव्यर्थं** इत्यादि, तथा चैवं फक्किकार्थः, श्रममङ्गीकृत्य मथनेन **क्लेशाभावतो** 'वक्षःकम्पक' देवताया अदण्डाच् छोभनभ्रूत्वमिति रज्ज्वाकर्षस्य हस्तधर्मत्वान् मूले **रज्ज्वाकर्ष**विशिष्टपदकथनेन तस्य हस्तविशेषणत्वं बोध्यत इत्याशयेन **सुबोधिन्यां रज्जो**रित्याद्युक्तं तत्तात्पर्यं **चानेने**त्यादिनोक्तं तद् विवृण्वन्ति **रज्ज्वाकर्ष** इत्यादि, **क्लिष्ट**मित्यादि यदुक्तं तदर्थं विवृण्वन्ति **सुभ्रू**रितीत्यादि, **क्लेशरूपसमानधर्मवत्त्व**मिति क्लेशरूपो यः **समानो धर्मस्तद्वत्त्व**मित्यर्थः, **भरणकर्मो**क्तितात्पर्यमाहु**र्विशेषणे**त्यादि, **तथोक्त**मिति **चकार**सूचितं शिर उक्तं, ननु मातृचरणस्वरूप एवं ब्रह्माण्डाधिदैविकत्वरूपनिरूपणं कथं युज्यत इत्यत आहु**र्लीले**त्यादि, **मालती**तात्पर्यविवरणप्रयोजनमाहुः **प्रभावि**त्यादि **मालती-शब्दे**तिपरोक्षवृत्तिर्ज्ञेया, 'निघण्टव' इत्यत्र यास्कभाष्ये तथाङ्गीकारात्, एवं शब्दसिद्धिश्च पृषोदरादित्वाज् ज्ञेया, वैदिकी चेयंनिरुक्तिरिति तात्पर्यान्तरमाहुः **किञ्चे**त्यादि, **तत्कार्यपरम्पराया**मिति स्नेहरूपायां **तथोक्त**मिति ब्रह्मविद्यागमनमुक्तं **विपक्ष** इति पुरःस्फूर्तिकार्थग्रहणे **तथा** स्यादिति व्यर्थं स्यात् **इति लोकत** इत्यत्रेतिर्हेतौ, **तथात्व**मित्यनुचितत्वं एतस्यैव तात्पर्यान्तर-माहुः **किञ्चे**त्यादि, हेत्वन्तरतात्पर्यमाहु**रेव**मित्यादि, अस्मिन् पक्षे निषेधोक्तिरेव शुकवाक्यं ज्ञेयं प्रकारान्तरेणाहु**र्मन्थने** इत्यादि ॥ ३ ॥ **पूर्ववदि**त्यस्यार्थमाहु**र्निष्क्रमणे**त्यादि ॥ ४ ॥

(३) श्रीमद्वल्लभमहाराजकृत श्रीसुबोधिनीलेखः

नवमाध्याये **शास्त्रार्थत** इति भगवतः शास्त्रप्रतिपाद्यत्वं ज्ञात्वा भगवतो भजनमित्यर्थः, तथा च शास्त्रार्थज्ञानपूर्विका **भक्तिर्यथा** येन प्रकारेण **निश्चला भवति तदर्थं** तत्प्रकारबोधनार्थं **चरित्रमिदं प्राहे**त्यर्थः, "यच्छृण्वतो हरौ भक्तिर्भवती"ति-शास्त्रार्थज्ञानसहितभक्तेः साधनस्य पृष्टत्वात् तथैवोत्तरं, किं शृण्वत इति पृष्टे भक्तवश्यताबोधकं चरित्रं शृण्वत इत्युत्तरं जातमित्यर्थः, **स्वरूपं चेति** पूर्वं जगद्रूपधर्मस्य दृष्टत्वादतः **परं स्वरूपं** भक्त्यर्थं **कृपालुत्वं च ज्ञातव्यमतो** हेतोः "कृपयासीत् **स्वबन्धन**" इति श्लोकोक्ता या **दया** तत्सहितं **ज्ञानं** "नाहं तेभ्यो मनागपी"ति वाक्योक्तं भक्तमात्रविषयकमत्राध्याये **निरूप्यत** इत्यर्थः, स्वरूपज्ञापनं द्व्यङ्गुलन्यूनतया कृपालुत्वज्ञापनं बन्धनेनेति ज्ञेयं **ज्ञाने**ति **ज्ञानं** पुष्टिमार्गीयभक्तमात्रविषयकं, तेन भगवान् **वशो भवति**, भगवान् भक्तानेव जानात्यतस्तद्वशो भवतीति पर्यवसन्नोर्थः **वैराग्यमन्यत्र** रागाभावो भक्तेष्वेव राग इति तेन भक्तविषयकरागेण वशो भवति, पुरुषोत्तमस्वरूपमेव तादृशं यद् भक्ताधीनमिति स्वरूपेण हेतुना भगवान् वशो भवतीत्यर्थः, **स्वाधीनो** भक्ताधीन इत्यर्थः, **अध्यायत्रये** वश्यतोक्तेस्तात्पर्यमिदं "गोपीभिः स्तोभित" इत्यादिना तृतीयेध्याये वश्यतोक्तेति ज्ञेयं, **द्वादशाङ्ग**मिति दशविधा भक्तिः काण्डद्वयप्रतिपादितं च ज्ञानमेतद्द्वयमर्यादा**मतिक्रम्य स्वगुणैरेव वश्योऽभवदि**त्यर्थः, अत एव भक्तिज्ञानाभावेपि कृपैव हेतुत्वेन वक्ष्यते, **द्वादशाङ्गः** पुरुषः, अस्य पुरुषोत्तमत्वात् तदतिक्रमः **भक्तिर्ही**ति **भगव त्प्राप्तिर्भक्त्या** जायत **इति दशभिः** श्लोकैः प्राप्तिनिरूपणं सात्र **क्रियया** जाते**त्यतिपौरुषं** सिद्धमिति भावः, **काण्डद्वयेपि** द्वादशाङ्गे **समावेशार्थ** इत्यर्थः, **टिप्पण्यां निवारितापो**त्यादिकारिकाव्याख्याने **पूर्वमोहन**मिति, आद्यश्लोकद्वयोक्तं "पूर्वाध्या-योक्तमोहनस्यैव कार्य"मि याद्यश्लोकाभासे कथितत्वादिति भावः, कारिकासु, **तपसे निर्गत** इति तस्यास्तपःसिद्ध्यर्थमित्यर्थः ।

एकदेत्यत्र **गृहदास्य** इति चतुर्विधा अपीतिज्ञेयं, **गृहदासी**ष्विति गृहकार्यकर्त्रीष्वितिज्ञेयं, **गताः** सर्वा अपि, अतो **यशोदैव ममन्थ**, कासुचिदपि सतीषु मुख्याया मथनासम्भवादर्थापत्त्या सर्वासामेव गमनं प्राप्तं, तत्र कर्मान्तरे नियोगो गृहकार्यकर्त्रीणा-मेवेत्यर्थः ॥ १ ॥ **दधिनिर्मथने काले** इत्यस्य **टिप्पण्यां वस्तुत**स्त्वितिपक्षे **क्रियाशक्तेरिति हेतौ पञ्चमी** व्याख्याता, तत्र पक्षे **क्रियायां शक्तिः** सामर्थ्यं तत्सिद्ध्यर्थमिति द्रव्येषु स्थिता ये **तत्तदाधिदैविका**स्तेषामपीन्द्रियमित्यर्थो ज्ञेयः, **आधिदैविकस्ये**ति जात्यपेक्षयैकवचनम् ॥ २ ॥ **क्षौमं वास** इत्यस्याभासे **गानस्ये**ति पूर्वमगायतेत्यनेन गानस्य मुख्यतोक्ता अत्र **निर्ममन्थे**त्यनेन गानस्य गौणत्वं सूचितमितिभावः **क्षौम**मित्यत **गतिरूपत्व**मिति गतिनिरूपकत्वमस्याः कट्या इत्यर्थः, तटयोर्मध्ये सूक्ष्मायाः **कट्याश्चलना**ल्लोकरीत्या **सौन्दर्यकथनेन शरीरापेक्षाया आवश्यक**त्वमिति भावः, **पुत्रस्नेहे**त्यत्र **तदभिमानिनो देवते**ति कुच-**युगाभिमानिनो** तन्नियामिका तदावरिकेत्यर्थः, तत्सन्ध्योः शैथिल्यान् कम्पो जात इत्यर्थः, भीतेति भयं जाड्यं तद्युक्ता आर्द्रे यर्थः, **सुभ्रू**रित्यस्याभासे **तां दण्डितवन्ता**विति देवताया ग्रन्थिः सम्यक्तया कुतो न बद्धा विदीर्णत्वे वा तामुत्तार्यान्या कुतो न परिहितेत्यर्थः, उत्तारणेन तदभावरूपो नाशो ग्रन्थिबन्धनेन दुःखप्रापणं च मृत्युयमयोः कार्यं दण्डपदार्थष्टिप्पण्यामुक्तः, **क्लेशहेतवो** व्रजजनानां भ्रूभङ्गमात्रेणैव नष्टा दुःखिताश्च भवन्तीति भ्रुवोर्मृत्युयमरूपत्वं भ्रूभङ्गपूर्वकं दर्शने देवतायाः पूर्वोक्तं

दण्डं कुर्यादिति "स्वव्यापारे ही"ति न्यायेन भ्रुवोर्दण्डकर्तृत्वं, **एतादृशौ हस्ता**विति कूर्परात् किञ्चिदधोभागोत्र भुजपदेनोच्यते **हस्तपदेन सर्वं** इति विभागः, कर्मधारये सुवर्णकङ्कणयोश्चलनासम्भवात् काचकङ्कणानां च बहुत्वेन द्विवचनानुपपत्तेर्बहुव्रीहिरुक्तः ॥ ३ ॥ **तां स्तन्यकाम** इत्यत्र **नैकट्यदर्शनाभ्या**मिति **आसाद्ये**ति **नैकट्यं** प्रीतिमावह"न्नित्यनेन सूचितं **दर्शनं** ताभ्यां, "अपाययत् स्तन"मित्यनेनोक्तस्य क्रियारूपस्य 'ईक्षती मुख'मित्यनेनोक्तस्य ज्ञानरूपस्य च निरोधस्य सिद्धिरित्यर्थः, **स्वस्यापी**ति मथनस्य वर्तमानत्वाद् भगवतः करणप्रतिबन्धरूपः प्रयासः, अपिना पूर्वार्थसमुच्चयः ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

नवमाध्यायार्थनिरूपणे **अतो दयासुसम्मिश्रं ज्ञान**मिति "कृपयासीत् स्वबन्धने" "एवं सन्दर्शिता ह्यङ्ग हरिणा भक्तवश्यते"तिवाक्ये दयामिश्रं भगवत्स्वरूपज्ञानमुक्तं, **ज्ञानवैराग्यरूपैर्ही**ति प्रसङ्गेन अध्यायत्रयसिद्धार्थमाहुः **ज्ञानवैराग्यरूपैर्ही**ति, **अस्मिन् नवमाध्याये ज्ञानं** दशमाध्याये **वैराग्यं** धर्मो एकादशाध्याये इत्यर्थः, अयमर्थः, "स्वमातुः स्विन्नगात्राया" इति वाक्ये भगवतो यशोदायां स्वमातृत्वेन ज्ञानमुक्तं, तथा च पुष्टिमार्गे भगवान् सम्बन्धं सर्वत्र यथावन् मनुते, सम्बन्धेनैव सर्वेष्टसाधको भवति, अतःपुष्टिमार्गीयं यत् स्वसम्बन्धिज्ञानं तद्वान् मतो भगवान्, अतो भक्तवश्यो भवतीतिज्ञानेन वश्यता नवमाध्याये दामोदरलीलयोक्ता, "नायं सुखापो भगवान् देहिनां गोपिकासुतः। ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिहे"त्यनेन शुकैर्भक्त्येकलभ्यत्वोक्त्या यशोदापुत्रस्य भक्तेतरविषयकं वैराग्यमुक्तं, तद् वैराग्यस्वरूपं नलकूबरोद्धारप्रसङ्गे भगवता प्रतिज्ञया निरूपितं "देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ तत् तथा साधयिष्यामि यद् गीतं तन्महात्मने"त्यनेन, इह भक्तमात्रे रागवत्त्वात् तादृगवस्थया सहित एव स्वभक्तवाक्यसत्यकरणार्थं भगवांस्तन्निकटे गत इति भक्तेतरविषयवैराग्यं नलकूबरमणिग्रीवोद्धारे दशमाध्याये निर्णीतं, अतो वैराग्येण वश्यो भवतीति सिद्धं, "गोपीभिः स्तोभितोऽनृत्यद् भगवान् बालवत् क्वचित् उद्गायति क्वचिन् मुग्धस्तद्वशो दारुयन्त्रवत्" इत्यत्र श्रीबालकृष्णे धर्मो निरूपितस्तस्य च भक्तवश्यत्वं निरूपितं "तद्वशो दारुयन्त्रव"दित्यनेन, अत एव तादृशलीलाविशिष्टं भगवत्स्वरूपमतः स्वरूपेण भक्तवश्यो भवतीति ज्ञेयं, **स्वाधीनो भगवा**निति स्वशब्दोत्रात्मीयवाची, "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने" इत्यमरकोशात्, तथा च भक्ताधीनो भवेदित्यर्थो भवति, **द्वादशाङ्गमतिक्रम्ये**ति अत्र **दशभिः** श्लोकै"र्जवेन विस्रंसितकेशबन्धनच्युतप्रसूनानुगतिः परामृश"दित्यन्तै**र्भगवत्प्राप्ति**रुक्ता, तत्तात्पर्यं अग्रे वक्तव्यं तामसादिभेदैः सगुणया नवविधया गुणातीतत्वेनैकविधया भक्त्या भगवान् प्राप्यत इति दशश्लोकानां सङ्ख्यातात्पर्यं, **ततो द्वाभ्यां** "दाम्नाऽतद्वीर्यकोविदे"त्यन्ताभ्यां **काण्डद्वय**प्रतिपाद्यत्वे सङ्ख्यातात्पर्यमिति, अग्रे वक्ष्यमाणं, इह तु द्वादशश्लोकैर्भगवद्बन्धनोद्यमपर्यन्तं गतिर्न तु बन्धनमिति विचार्य "एकदे"त्यारभ्य "दाम्नाऽतद्वीर्यकोविदे"त्यन्तानां द्वादशश्लोकानां सङ्ख्यातात्पर्यमुक्तं, **द्वादशाङ्गमतिक्रम्ये**त्यनेन "द्वादशो वै पुरुष" इति श्रुतेः पुरुषस्य द्वादशात्मकत्वात् तत्पर्यन्तं गतौ न भगवान् बद्धो भवति, तदतिक्रमस्तु पुष्टिभक्तौ सत्यां भवति, पुष्टिभक्तेः पुरुषोत्तमप्रापकत्वात्, भक्तीतरसाधनानां पुरुषोत्तमांशपुरुषमात्रपर्यवसानादिति द्वादशश्लोकसङ्ख्यासूचितोर्थः, द्वादशभिः श्लोकैर्बन्धनेच्छामात्रनिरूपणेन बन्धाभावसूचनात् **षड्भिर्वश्यो भवेद् गुणै**रिति पुष्टिमार्गीयैरैश्वर्यादिभिः षड्भिर्गुणैर्वश्यो भवेदित्यर्थः, "न चान्तर्न बहिर्यस्ये"त्यारभ्य "कृपयासीत् स्वबन्धन" इत्यन्तानां षण्णां सङ्ख्यातात्पर्यमिदमुक्तं, "कृपयासीत् स्वबन्धन" इत्यत्र कृपापदात् पुष्टिमार्ग एव भगवान् वश्यो भवतीति भणितं श्रीशुकेन, **पञ्चपर्वाऽविद्या हि लोकाना**मेवेति "एवं सन्दर्शिता ह्यङ्ग हरिणा भक्तवश्यते"त्यारभ्य **पञ्चभिः** श्लोकैः साधनान्तरप्राप्यो भगवानित्याकारकाज्ञानरूपा लोकानामविद्या नाशितेत्यर्थः, केवलपुष्टिभक्तिमात्रवश्यतानिरूपणात् अविद्यायाः पञ्चपर्वरूपत्वात् तन्नाशः पञ्चश्लोकसङ्ख्यातात्पर्यलभ्यः, **आसक्ति चेत् स्वतः कुर्याज् जीवः कृष्णे पलायते तदा दृढो निरोधः स्या**दिति मातृचरणानामग्रे भगवत्पलायनस्य तात्पर्यमाहुः **आसक्ति**मित्यादिना, **जीवः स्वतः कृष्णे आसक्ति कुर्यात् कृष्णश्चेत् पलायते तदा निरोधो** नाम प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिर्जीवस्य भवतीत्यर्थः, युक्तं चैतत्, आसक्तिविषयस्य दूरदेशस्थितौ आसक्तिवृद्धेरनुभवसिद्धत्वात्।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

नवमाध्याये शास्त्रार्थत इति का० ॥ ६०¾ ॥ "यच्छृण्वतोपैत्यरतिर्वितृष्णे"ति श्लोके यच्छृण्वतो हरौ भक्तिर्भवतीति शास्त्रार्थज्ञानसहितभक्तेः साधनस्य पृष्टत्वात् तथैवोत्तरं, किं शृण्वत इति पृष्टे भक्तवश्यताबोधकं चरित्रं शृण्वत इत्युत्तरं जातमित्यर्थः, तथा च तादृशमुलूखलबन्धनचरित्रं प्राहेत्यर्थः, **स्वरूपं चे**ति का० ॥६१¾॥ **स्वरूपज्ञापनं** द्व्यङ्गुलन्यूनतया कृपालुत्वज्ञापनं बन्धनेनेति ज्ञेयं, **निरोध** इति का० ॥ ६२¾ ॥ ननु सर्वज्ञस्य भगवतः प्रपञ्चविस्मृत्यसम्भवेन प्रपञ्चविस्मृतिपूर्वकभक्तविषयकासक्तिर्न सम्भवतीति चेन्, मैवं, "मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपी"ति वचनाद् भगवतोपि भक्तेतरविषयकज्ञानाभावस्य प्रमाणसिद्धत्वात्, विरुद्धधर्माश्रयत्वान् न सर्वज्ञत्वविरोधोपि, तथा चास्मिन्नध्याये भक्तवश्यताबोधकबन्धनेन भगवतो भक्तमात्रविषयकं ज्ञानं दयामिश्रितं निरूपितं भवति, **ज्ञानवैराग्ये**ति का० ॥ ६३¾ ॥ ज्ञानं भक्तमात्रविषयकमे-

तदध्यायोक्तं, **वैराग्यं** दशमाध्यायोक्तं भक्तेष्वेव रागोन्यत्र रागाभाव इति, **रूपमेकादशाध्यायोक्तं, स्वयमेव धर्मी भगवान्**, पुरुषोत्तमस्वरूपमेव तादृशं **यद्भक्ता**धीनमिति, **स्वाधीनो** भक्ताधीन इत्यर्थः, अत्राध्याये **जीवाधीना** बन्धनलीला द्वितीयेध्याये "देवर्षिर्मे प्रियतम" इति वाक्याद् भक्तेष्वेव रागोन्यत्र वैराग्यं, तेन भक्ताधीनत्वमेवोक्तं, तृतीयेध्याये "गोपीभिः स्तोभित" इत्यादिना भक्तवश्यतोक्तेति ज्ञेयं, **अतिपौरुष**मित्यादि का० ॥६४ ३/४–६५ ३/४॥ एतत्कारिकाद्वयेनैतदध्यायान्तर्गत "न चान्त"रित्यादि त्रयोविंशतिश्लोकसङ्ख्यातात्पर्याणि त्रिधा विभज्योक्तानि, अत्र हि "अन्वञ्चमाने"ति दशमश्लोके यशोदाया भगवत्प्राप्तिः, ततो द्वाभ्यां वशीकरणोद्यमः, "न चान्तर्न बहिर्यस्ये"त्यादिभिः षड्भिर्वशीकरणं, ततः पञ्चभिरविद्याबाधनं, तत्र द्वादशश्लोकानन्तरं षड्भिः श्लोकैर्वशीकरणोक्तितात्पर्यम**तिपौरुषमेत**द्धीत्यनेनोक्तं, **एतद्** भगवद्वशीकरणं **जीवानां** पौरुषसाध्यं न भवति, तथा **च** **द्वादशाङ्गपुरुषमर्यादामतिक्रम्य** स्वकीयैरैश्वर्यादिभिः **षड्भिर्गुणैरेव** पुरुषोत्तमो **वश्यो भवे**दिति **सङ्ख्यातात्पर्यम्** ॥ ६५ ३/४ ॥ **एकदा गृहदासीष्वि**त्यत्र **निवारितापी**ति का० ॥ ६६ ३/४ ॥ ननु मायाकार्याद् भगवत्कार्यं बलिष्ठमिति भगवत्कृते निवारणे सत्यपि कथं गृहकृत्ये प्रवृत्तिरित्याशङ्क्य तत्र हेतुमाहुः **पुनर्मोहिते**ति, अत्र हि मोहनं द्विविधं "वैष्णवीं व्यतनोन् मायां पुत्रस्नेहमयीं विभु"रिति पूर्वाध्यायोक्तमेकं, अत्राध्याये "तमङ्कमारूढमपाययत् स्तनं स्नेहस्नुतं सस्मितमीक्षती मुख"मिति श्लोकोक्तमायारूपस्मितकृतं च द्वितीयं मोहनं, तत्र "गृहीत्वा दधिमन्थानं न्यषेधत् प्रीतिमावह"न्निति भगवत्कृतनिषेधेन पूर्वमोहापगमेनावश्यकमपि कार्यं त्यक्त्वा भगवत्परापि यशोदा "सस्मितमीक्षती मुख"मितिवाक्यात् स्मितेन **पुनर्भगवता मोहिता** सती गृहकृत्ये प्रवृत्तेरित्यर्थः, नन्वन्यासक्तिहेतुत्वेन निरोधविरोधि पूर्वमोहनमित्याशङ्काभावायाहु**र्गुणगान** इति, भगवत्कृतत्वान् मोहस्य तत्कालेपि गुणगानार्थमेवाभूदित्यर्थः, मोहेस्मिन्निति रूपद्वयं, विषयासक्तिजनकत्वं भगवत्कृतत्वं च, तेन **द्वाभ्यां** श्लोकाभ्यां दधिमथनरूपं संसारकार्यं गुणगानं चोक्तमितिशेषः, ननु मोहस्य भगवत्कृतत्वे "न्यषेधत् प्रीतिमावह"न्निति भगवत्कृतो दधिमथननिषेधोनुपपन्न इत्याशङ्क्य तन्निमित्तमाहुः **ततः श्रमोभव**दिति, ततः श्लोकद्वयानन्तरमेकेन "क्षौमं वास" इत्यनेन श्रमोभवदिति निरूप्यत इत्यर्थः, यत एवमतो भक्तक्लेशासहिष्णुत्वेन निषेधः कृत इत्याहुरत इति का० ॥ ६७ ३/४ ॥ "**तां स्तन्यकाम** आसाद्ये"ति **चतुर्थश्लोकोक्तो दधिमथननिषेधः**, ततो **भक्तेः सारभूतं स्तन्यं** हरिः पपौ, पुत्रादिविषयकस्नेहेन मातरि **स्तन्योत्पत्तेः स्तन्यस्य भक्तिसारत्वं**, एतेन 'तमङ्कमारूढमपाययत् स्तन'मिति पञ्चमश्लोकपूर्वार्धार्थ उक्तः, उत्तरार्धार्थमाहु**स्ततो रिक्ते**ति, भक्त्यात्मकस्तन्ये पीते सति **रिक्ता** भक्तिशून्या सती **पूर्वबुद्ध्या** संसारासक्त्या **सक्ता अन्यत् कार्यं चकार** उत्सिच्यमानपयोरक्षार्थं गमनं चकारेत्यर्थः, **एव**मिति का० ॥ ६८ ३/४ ॥ अनेन "स जातकोप" इति षष्ठश्लोकार्थ उक्तः, **धौर्त्य**मिति का० ॥ ६८ ३/४ ॥ **यथा लोकाः स्वसुतधौर्त्यं दृष्ट्वा प्रीता भवन्ति** तद्वत्, तस्मात् लौकिकदृष्ट्या दर्शनाद् भगवन्तं न पश्यति, **अनेन** "विलोक्य भग्नं स्वसुतस्य कर्म तज् जहास तं चापि न तत्र पश्यती"त्यस्यार्थ उक्तः, "उलूखलाङ्घ्रेरुपरि व्यवस्थित"मिति श्लोकार्थमाहु**र्जिज्ञासाया**मिति का० ॥ ६९ ३/४ ॥ भगवान् कुत्रास्तीति **जिज्ञासायां** सत्यां **ततो** जिज्ञासाबलादेव भगवन्तं **दृष्ट्वा प्राप्त्यर्थं** ग्रहणार्थं **यत्नं** कृतवतीत्यर्थः, तदुक्तं "निरीक्ष्य पश्चात् सुतमागमच्छनै"रिति, "तामात्तयष्टि"मिति श्लोकोक्तार्थमाहु **विरुद्धां**स्तानिति का० ॥ ६९ ३/४ ॥ **तान्** यष्टिग्रहणादियत्नान् **विरुद्धान् ज्ञात्वा हरिस्तपसे** यशोदाया अनुधावनयत्नात्मकतपःसिद्ध्यर्थं निर्गतः, तपोन्तःकरणदोषापहं दुःखरूपं भगवत्प्रापकं चेत्यनुधावनयत्ने तपस्त्वमुक्तं, "अन्वञ्चमाने"ति दशमश्लोकार्थमाहुः **पूर्ण** इति का० ॥ ७० ३/४ ॥ अत्र दशानां श्लोकानां परोक्षार्थोपि विवक्षित इत्याशयेनाहुः **परोक्षे**ति का० ॥ ७० ३/४ ॥ परोक्षार्थमेवाहु**रासक्ति**मिति का० ॥ ७१ ३/४ ॥ **जीवः स्वत आसक्तिं कुर्यात् कृष्णश्चेत् पलायते तदा निरोधो दृढः स्यात्** प्रियपदार्थदूरस्थितेरासक्तिदार्ढ्यजनकत्वप्रसिद्धेरित्यर्थः, प्रकृते च यशोदाया भगवत्पश्चाद्गमने सति भगवतः पलायनेन अयं निर्णयः परोक्षवादात् सिद्धः **कृष्णे पलायिते** इति सप्तम्यन्तपाठे तु पलायितेपि कृष्णे जीवः स्वत आसक्तिं चेत् कुर्यात् तदा निरोधो दृढः स्यादित्यर्थः ॥ ७१ ३/४ ॥ "**तां स्तन्यकाम**" इत्यत्र **सर्वाङ्ग**मिति का० ॥ ७२ ३/४ ॥ "प्रीतिमावह"न्नितिपदसूचितोयमर्थः ॥ ७२ ३/४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

[नवमे भाण्डभङ्गादि कृत्वा भीत्या प्रधावतः । कृष्णस्याप्यथ तन्मात्रा बन्धनं विनिरूप्यते ॥ १ ॥

पुनर्यशोदायां भगवतः कृपातिशयं प्रदर्शयँल्लीलान्तरमाह—एकदेति । एकदा गृहदासीषु कर्मान्तरे नियुक्तासु सतीषु, यशोदा स्वयं दधि निर्ममन्थेत्यन्वयः । स्वयं निर्मन्थने हेतुं सूचयन् विशिनष्टि—नन्दगेहिनीति । गेहिन्या गृहदास्यभावे गृहकार्यस्यावश्यकत्वात्, अन्यथा दध्यादिवैरस्येन महती क्षतिः स्यादित्याशयः ॥ १ ॥ तदा च दधिनिर्मन्थने काले सः प्रसिद्धो बालः तद्बालः, तस्य यानि यानि बालचरितानीह पुराणादिषु गीतानि तानि स्मरन्ती अगायतेत्यन्वयः । अनेन भगवद्भक्तानां लौकिकव्यापारेऽपि भगवत्परता प्रदर्शिता ॥ २ ॥ तत्समये तस्याः शोभातिशयं वर्णयति शोभने भ्रुवौ यस्याः सा सुभ्रूः । कबरात् केशबन्धात् विगलत्यो मालत्यो यस्याः सा यशोदा पृथुकटितटे सूत्रनद्धं काञ्चीबद्धं क्षौमं कौशेयं वासो वस्त्रं बिभ्रती । 'कटितटे' इत्यनेन मन्थनावेशाद्वस्त्रानुसन्धानं सूचितम् । तथा जातकम्पं पुत्रस्नेहेन स्नुतं दुग्धस्रावि कुचयुगं च

बिभ्रती, चकाराज्जातकम्पं शिरश्च बिभ्रती। रज्ज्वोराकर्षेण श्रमो ययोस्तयोर्भुजयोश्चलन्तौ कङ्कणौ बिभ्रती, कर्णयोः कुण्डले च बिभ्रती, स्विन्नं स्वेदयुक्तं वक्त्रं बिभ्रती दधि निर्ममन्थेत्यन्वयः ॥ ३ ॥ तां दधि मथ्नन्तीं जननीं प्रत्यासाद्य आगत्य दधिमन्थानं मन्थनदण्डं गृहीत्वा न्यषेधत् मन्थननिषेधं कृतवान्। निषेधे हेतुमाह—स्तन्यकाम इति। दुग्धपानकाम इत्यर्थः। दधिनिर्मन्थनेऽभिनिविष्टचित्तायास्ततो निवारणे दौर्मनस्यं स्यात्, अतः प्रीतिमावहन् यथा तस्याः प्रीतिः स्यात्तथा चेष्टां कुर्वन्नित्यर्थः। तदुक्तम्—"सर्वांगं चालयन् हस्तौ पादौ चैव विचालयन्। मुखाच्च मधुरारावं बिभ्रत् कृष्णः समागतः" इति ॥४॥

अन्वितार्थप्रकाशिका

नवमे पय उत्सिक्ते भग्ने कृष्णेन भाजने। माता बबन्ध तं दाम्ना तत्र श्लोकास्त्रिबाहवः (२३) ॥
उवाचे (१) त्येकमर्द्धाढ्याः सप्तवेदा (४७) अनुष्टुभः ॥ ९ ॥

एकदेति ॥ एकदा तृतीयवर्षे दीपमालिकामहोत्सवदिने इति तोषणी। गृहदासीषु कर्मान्तरे इन्द्रयागकार्ये नियुक्तासु सतीषु नन्दस्य गेहिनी यशोदा दधि स्वयं निर्ममन्थ। अत्र श्यामैकणवदनन्तासु गोषु याः पद्मगन्धाद्या अतिस्वादुसुगन्धिदुग्धाः सप्ताष्टा एव गावः तासामेव दुग्धदध्यादिकं कृष्णस्य योग्यमिति मत्वा दासीः कर्मान्तरे नियुज्य दधि स्वयं निर्ममन्थ। उपलक्षणत्वाद्दुग्धमप्यावर्त्तयत् ॥ १ ॥ यानीति ॥ तदा च दधिनिर्मन्थने काले गृहान्तः शायितो यः सः प्रसिद्धो बालस्तद्बालस्तस्य यानि यानि बालचरितानि इह व्रजे गीतानि कविभिर्गातेषु निबद्धानि तानि स्मरन्ती गृहान्तःसुप्तकृष्णादर्शनोत्थस्वान्तःक्षोभस्य शान्तये अगायत। तज्जाषः ॥ २ ॥ क्षौममिति ॥ शोभने भ्रुवौ यस्याः सा सुभ्रूः। कबरात्केशबन्धात् विगलन्त्यो मालत्यो यस्याः सा। कबभाव आर्षः। यशोदा पृथुकटितटे सूत्रनद्धं काञ्चीबद्धं क्षौमं कौशेयं वासो वस्त्रं बिभ्रती तथा जातकम्पं पुत्रस्नेहेन स्नुतं दुग्धस्रावि कुचयुगं च बिभ्रती चकाराज्जातकम्पं शिरश्च बिभ्रती रज्ज्वोराकर्षेण श्रमो ययोस्तयोर्भुजयोश्चलन्तौ कङ्कणौ बिभ्रती कर्णयोः कुण्डले च बिभ्रती स्विन्नं स्वेदयुक्तं वक्त्रं बिभ्रती दधि निर्ममन्थ। यशोदायाः श्यामो वर्णः क्रमदीपिकायाम्। सुवर्णतुल्यो गौतमीयतन्त्रे। पञ्च बिभ्रतीति व्याख्या निस्सारा ॥ ३ ॥ तामिति ॥ प्रातरन्तर्गृहात्प्रबुद्ध्य बहिर्निःसृत्य स्तन्यकामः दुग्धपानेच्छुः हरिः तां तद्दधि मथ्नतीं जननीं प्रत्यासाद्य आगत्य दधिमन्थानं मन्थनदण्डं गृहीत्वा प्रीतिमावहन् यथा प्रीतिः स्यात्तथा चेष्टां कुर्वन्नित्यर्थः। न्यषेधत् मन्थननिषेधं कृतवान् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं नवमे चुल्लीस्थदुग्धोत्तारणार्थं स्वमातरि गतायामपूर्णीकृतस्तनपानेन हरिणा कृतोदधिमंथनभांडभंगउलूखलेतद्बंधनं च निरूप्यते—नंदस्य गेहनी पत्नी कर्मांतरेषु दधिमंथनादन्यकृत्येषु यानि युक्तास्तासु ॥१॥ इह ग्रंथे गीतानि निर्मंथनं विलोडनं इत्यादीनि यस्मिंस्तस्मिन्काले ॥ २ ॥ सूत्रेण काञ्च्यानद्धं बद्धं क्षौमं सूक्ष्मं पृथौ विस्तृतकटेः तटेबिभ्रती जातकंपं पुत्रस्नेहस्नुतं कुचयुगं च बिभ्रतीति सर्वत्रयोज्यं रज्वोः आकर्षणेन श्रमः ययोस्तयोः भुजयोश्चलंतौ कंकणौ चंचले च स्विन्नं स्वेदकणिकायुक्तं वक्त्रं च बिभ्रती कबरात्केशपाशात्विगलंत्यो मालत्या यस्याः सा सुभ्रूः दधि निर्ममंथ ॥ ३ ॥ स्तनभवे दुग्धे काम इच्छा यस्य दधिमंथानं दधिमथनदंडं गृहीत्वा ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पयसि गोपिकोत्सिक्ते गत्वाऽथ नवमे कृतिम्। तस्यालोक्यामत्रभङ्गरूपां दाम्ना बबन्ध तम् ॥ १ ॥
तन्वाऽऽस्यस्थ जगद्दृष्ट्वा मात्रे विस्मितचेतसे। स्वबन्धद्व्यङ्गुलापूर्त्या पूर्णतां स्वामदर्शयत् ॥ २ ॥

इत्थं मात्रे प्रदर्शितविश्वरूपस्य श्रीकृष्णस्यापरिमेयरूपतायाः पूर्णतायाश्च प्रदर्शनमाह ॥ एकदेति ॥ एकदा, गृहदासीषु कर्मान्तरनियुक्तासु व्यापारान्तरेष्वाविष्टासु सतीषु, नन्दगेहिनी नन्दस्य पत्नी यशोदा, स्वयमेव, दधि निर्ममन्थ ॥ १ ॥ यानीति ॥ इह लोके, यानि यानि कविभिरिति शेषः। तद्बालचरितानि श्रीकृष्णस्य बालचेष्टितानि, गीतानि गद्यपद्यादिरूपेण निबद्धानि सन्ति, तानि स्मरन्ती स्मृतिपथमानयन्ती सती, दधिनिर्मन्थने काले, अगायत च ॥ २ ॥ कथभूता सत्यगायतेत्यपेक्षायां मथ्नन्ती सतीत्याह ॥ क्षौममिति ॥ वासःप्रभृतीनां द्वितीयान्तानां बिभ्रतीत्यनेनान्वयः। पृथुकटितटे, सूत्रनद्धं काञ्चीनिबद्धं क्षौमं क्षुमासूत्रजं दुकूलमिति यावत्। वासो वस्त्रं बिभ्रती, जातः निर्मन्थनानुकूलव्यापारसभूतः कम्पो यस्य तस्याः स्नेहेन स्नुतयोः पयःस्राविणोः कुचयोर्युगं च, बिभ्रती, रज्ज्वाकर्षेण श्रमो ययोस्तौ च तौ भुजौ च तयोः चलन्तौ च तौ कङ्कणौ च तौ, कुण्डले श्रवणाभरणे च, बिभ्रती, स्विन्नं प्रस्वेदभरितं, वक्त्रमास्यं च, बिभ्रती, कबरात् केशपाशात् विगलन्त्यो मालत्यो यस्याः सा, शोभने भ्रुवौ यस्याः सा तथाभूता सती, दधि निर्ममन्थ। केचित्तु, जातकं पञ्चेत्यत्र जातकं पञ्च, इति छित्त्वा क्षौमं वास इत्यादीनि, पञ्च, बिभ्रती, कबरविगलन्मालती सुभ्रूः, जातकं दधि, ममन्थेति व्याख्यां कुर्वन्ति। 'जातकं दधिकर्मणोः' इति कोशं च पठन्ति। स कोशश्चिन्त्यः, मेदिन्यादिषु तस्यादर्शनात्, यदि तथाविधं कोशान्तरं स्यात्तर्हि तथापि

व्याख्याऽस्तु ॥ ३ ॥ तामिति ॥ मथ्नन्तीमुक्तप्रकारेण दधिमन्थनं कुर्वन्तीं, तां पूर्वोक्तप्रकारां, जननीं स्वमातरं यशोदां, आसाद्य, समीपमेत्य, स्तन्यकामः स्तन्यं कामयमानः, हरिः श्रीकृष्णः, प्रीतिं आवहन् मातुः प्रीतिं स्वस्मिन्नुद्भावयन् सन्नित्यर्थः। दधिमन्थानं दधिमन्थनदण्डं, गृहीत्वा, न्यषेधन्निवारयामास ॥ ४ ॥

श्रीहरिसूरिविचितं श्रीभक्तिरसायनम्

एकदेतिः १०.९.१.

आलम्ब्य नामरूपाणि सक्रीडो भवतीश्वरः। सिद्धैव गोकुले मातृप्रपञ्चव्यापृतिस्तदा ॥ १ ॥

दृष्ट्वापि विश्वमखिलं हि हरौ विशुद्धचित्तोऽपि पूर्वदृढसंस्कृतिवासितात्मा।
तत्तद्गुणाकलनतः पुनरेव कर्मासक्तो भवत्यलमिहाजनि मानमेषा ॥ २ ॥

श्रीशः क्षीरधिवास्यपि प्रतिपलं स्तन्यामृतं याचते यस्या यद्गुणतो बभूव सगुणं रूपं परब्रह्मणः।
साऽऽनन्दस्य गृहं स्फुटैव समभून्नन्दाङ्गना दध्यपि तच्च स्पष्टमभूच्छुभावहमिति व्यक्तं विशेष्यान्वयात् ॥ ३ ॥

श्रीशस्यैव विशेषरञ्जनकृते सा योजयित्वा क्वचिद्दासीस्तद्दधिमन्थनं कुतुकतश्चक्रे विभातीदृशम्।
सर्वासां कथमन्यथा तु युगपत्कार्यान्तरव्यापृतिस्तस्या वाऽच्युतलालनैक मनसस्तत्रावकाशोऽजनि ॥ ४ ॥

तां स्तन्यकाम इति : १०.९.४.

अनीहगीतान्यपि मच्चरित्राण्यारब्धकर्मण्यपि कामितार्थे।
गायेत्स्मरेद्यः सुलभोऽहमस्याप्यस्मीति तामागमनाद् व्यबोधि ॥ ५ ॥

नालङ्कारोऽम्बरं वा विविधविषयसंभोगयोगोऽथवा मत्प्राप्त्यानन्दान्तरङ्गैर्नृभिरिह जगति त्याज्य एवेति किन्तु।
श्रेयः पर्याप्तिभूमेर्मदतिरतिकृतो मच्चरित्रस्य गाने निष्ठा येषां न तेषामहमसुलभ इत्येतदाबोधयत् सः ॥ ६ ॥

तत्तत्संसृतिकार्यजातसमनुष्ठानेऽपि यः श्रीपतेः, लीला–नामगुणानुगानममलं कुर्याद्यदि प्रेमतः।
तद्धार्दामृतमाजिघृक्षुरपरं कृत्यं विहायादरात् तं श्रीशोऽनुसरत्यभूदयमभिप्रायः स्फुटो मन्थने ॥ ७ ॥

पूर्णकामोऽप्यहं भूयो भक्तहार्दरसस्पृहः। अस्मीति प्रस्फुटीकर्तुं स्तन्यकामो बभूव सः ॥ ८ ॥

मयि प्रीते न भीः कर्मण्युज्झितेऽपि कृतान्तजा। यतो दण्डधरोऽस्म्यस्मिन्नहमेवेत्यबोधयत् ॥ ९ ॥

कृत्वा हीनगुणावृतं मतिमयं मन्थं बुधा यत्कृते यत्नेनोपनिषत्सुधाब्धिममला मथ्नन्ति सोऽहं यदि।
भक्त्या यद्वशतां गतोऽमृतमयस्तेनाथ मिथ्याश्रमः कार्यो नैव तुषावघातवदिति प्रायो न्यषेधत् प्रभुः ॥ १० ॥

कृष्णप्रिया

श्रीशुकदेवजी ने कहा—राजन् ! एक दिन की कहानी है कि नन्दबाबा की गृहिणी श्रीयशोदाजी ने घर की सब दासियों को खेत आदि दूसरे भिन्न भिन्न कामों में लगा दिया और स्वयं अपने लालन को नवनीत खिलाने के लिये—दधि मथने लगी ॥ १ ॥ भगवान् श्रीकृष्ण ने इस गोकुल में निर्दोष मधुर बालचरित किए थे और शास्त्र एवं लोक में जो प्रसिद्ध थे, माता यशोदा उन सर्व चरित्रों का प्रसङ्ग प्रसङ्ग पर स्मरण कर गीत बनाकर गाती भी जाती थी ॥ २ ॥ माता यशोदाजी ने अपने विशाल कटि तट में धारण किये रेशमी वस्त्र ऊपर रेशम के सूत की करधनी धारण की थी। माता के वक्षःस्थल से–पुत्रस्नेह की अधिकता के कारण दूध चूता जा रहा था और सुंदर भ्रुकुटि वाली माता यशोदा काँप भी रही थी। मथानी की नेती खींचने के परिश्रम से दोनों हस्त के कंकण एवं कानों के कुण्डल हिल रहे थे मुख कमल पर पसीने के कण झलक रहे थे और माताजी ने वेणी में गूँथे हुए मालती के मनोहर पुष्प गिरते जा रहे थे इस प्रकार मनोहर भौंहोवाली माता दही मथ रही थी ॥ ३ ॥ ऐसे अवसर भगवान् पर श्रीकृष्ण स्तन्य पान की कामना से माता यशोदाजी के पास आ पहुचे। दधि मन्थन कर रही माता के हृदय में प्रेम प्रमोद को बढ़ाते हुए हरिने दही की मथानी प्रकड़ ली और दधि मथने से अम्मा को रोक लिया ॥ ४ ॥

तमङ्कमारूढमपाययत् स्तनं स्नेहस्नुतं[1] सस्मितमीक्षती मुखम्[2] ।
अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते ॥ ५ ॥
[3]स जातकोपः स्फुरितारुणाधरं[4] संदश्य दद्भिर्दधिम[5]ण्डभाजनम् ।
भित्त्वा मृषाश्रुर्दृषदश्मना रहो [6]जघास हैयङ्गवमन्तरं गतः ॥ ६ ॥
उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकम् ।
भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ॥ ७ ॥
उलूखलाङ्घ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचि[7] स्थितम् ।
हैयङ्गवं चौर्यविशङ्कितेक्षणं निरीक्ष्य पश्चात् सुतमागमच्छनैः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—अङ्कं आरूढं सस्मितं मुखं ईक्षती स्नेहस्नुतं स्तनम् अपाययत्, तु अधिश्रिते पयसि उत्सिच्यमाने अतृप्तं तं उत्सृज्य सा जवेन ययौ ॥ ५ ॥ जातकोपः सः स्फुरितारुणाधरं दद्भिः संदश्य दृषदश्मना दधिमण्डभाजनं भित्वा अन्तरं गतः रहः हैयङ्गवं जघास ॥ ६ ॥ गोपी सुश्रुतं पयः उत्तार्य पुनः प्रविश्य दध्यमत्रकम् भग्नं संदृश्य स्वसुतस्य तत् कर्म विलोक्य च तं अपि तत्र न पश्यती जहास ॥ ७ ॥ उलूखलाङ्घ्रेः उपरि व्यवस्थितं मर्काय शिचि स्थितं हैयङ्गवं कामं ददतं चौर्यविशङ्कितेक्षणं सुतं निरीक्ष्य पश्चात् शनैः आगमत् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अधिश्रिते चुल्लिमारोपिते उत्सिच्यमाने अतितापेनोद्रिच्यमाने ॥ ५ ॥ दृषदश्मना शिलापुत्रेण । अंतरं गृहमध्यं गतः रह एकांते नवनीतमभक्षयत् ॥ ६ ॥ सुशृतं सुतप्तम् दधिमंथनस्थानं प्रविश्य भिन्नं संदृश्य दृष्ट्वा ॥ ७ ॥ उलूखलांघ्रेः परिवर्तितस्योलूखलस्योपरि । शिचि शिक्ये । चौर्येण विशंकितं चंचलमीक्षणं यस्य तं सुतम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अधिश्रितेऽधिकपक्के वा पयोवरोपयितुमिति शेषः । अहो लालस्यास्य बुद्धिरित्युक्त्वा मथनादुपरम्योपविष्टा स्वयमंकमारूढं तमुत्सृज्य ययौ । ननु श्रीकृष्णादपि तस्या दुग्धमतिममतास्पदमभूत् यदनुरोधेनातृप्तः कृष्णोऽप्युपेक्षितः । सत्यम् । तत्पयश्च तस्यैव "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्तत्कृते" इत्युक्तेः । बालोऽयं न कामपि स्वसंपत्तिं रक्ष्यां जानातीत्यतो मयैव सा रक्ष्येति तत्त्यागस्तत्स्नेहमयः गोपजातीनां च सर्वतो दुग्धसंपत्तावेवाग्रह इति । यथात्मसंपत्त्यर्थं सह्यमानेप्यात्मदुःखे स्नेहविशेष एवात्मनि गम्यते तद्वदिहापि ज्ञेयम् । पितरौ च पुत्रस्यापामदुःखं सोढ्वाप्युदर्कधनदेहविद्यादिसंपत्त्यर्थकर्माणि सदैवेहेते तच्चौषधपायनस्नपनादौ प्रसिद्धमिति तोषिणी ॥ ५ ॥ 'दधिमंडो भवेन्मस्तु' इति हलायुधः । 'दृषदश्माल्पपाषाणे' इति धरणिः । हैयंगवं नवनवनीतं ह्यो गोदोहोद्भवं घृतम् । हैयंगवीनम् संज्ञायाम्" इति निपाताद्धैयंगवीनं हैयंगवमितित्यार्षम् ॥ ६ ॥ उत्तार्य चुल्ल्या अन्यत्र निधाय । तत् सर्वम् । तं सुतम् । तत्र दधिमंथनस्थाने । विलोक्य वामतर्जन्या नासाग्रं स्पृष्ट्वेति भावः ॥ ७ ॥ पश्चात्पृष्ठतः काकादिभयाद्विवर्त्य स्थापितोलूखलोपरि स्वस्तिकासनेनोपविष्टम् । अंतर्गृहप्रवेशानंतरं यत्किंचिद्भुक्त्वा सत्वरमवशिष्टं हैयंगवीनं सभांडमेव गृहीत्वा मातृवंचनाय पश्चाद्द्वारेण निर्जनं गृहपश्चाद्देशं गत्वेति शेषः । पूर्वं शिक्ये स्थापितं यत्तदेवेति चौर्येणानीतमित्यर्थः । चौर्याद्धेतोर्मातृताडनभयाद्विशंकिते तदागमनानुसंधानपरे ईक्षणे यस्य तं गृहांतर्गतैरतिर्यग्ग्रीवं निरीक्ष्य तद्दृष्टिवंचनार्थं तत्पृष्ठतस्तं जिघृक्षंती । शनैः स्वपादशब्दाभावार्थम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सस्मित पयसः स्वयं स्नुतत्वान्मधुरत्वाच्च स्मितेन गण्डे लक्ष्यमाणेन सहितं मुखं तस्येक्षमाणा अतृप्तमपि त्यक्त्वा । ननु, तं पाययन्त्येवाङ्के कृत्वा कुतो न गता तत्राह—जवेनेति । तथा सति वेगेन गमनासिद्धेः तत्रैव हेतुः उत्सिच्यमान इति उदिञ्चतीत्यर्थः । एवं दृष्टिगोचरे अनतिदूरे पयः पाकस्थानं ज्ञेयं तत्पयोपि मथ्यमानदधिवदेव इति क्षणिकतत्त्यागोऽपि कृतः । अथवा "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" इति कैमुत्यात् तस्यास्तु विशेषतः सर्वं तस्यैव पितरौ च पुत्रस्यापात-

---

१. स्नुतं—श्रीधर. वंशी वीर. विज. जीव. । २. सुतम्—इति कस्यचित् । ३. संजातकोपः—श्रीधर. वंशी वीर. विज. । ४. धरः इति कस्यचित् । ५. मन्थ—श्रीधर. वंशी. विज. । ६. जहार—च. पु. टी. । ७. शुचिस्मितं—वीर ; यथोप्सितं—विज. ।

दुःखं सोढ्वाप्युदर्कदेहधनविद्यादिसम्पत्त्यर्थकर्माणि सदैवे हृते तत्रौषधपायनस्नपनताडनादौ प्रसिद्धम् अन्यत्र च न सम्भवतीत्यन्यभावदुर्बोधो मातापितृस्नेहपरिपाकः खल्वसौ गोपजातीनाञ्च सर्वतो दुग्धसम्पत्तावेवाग्रहः ततोऽयं बालको न काञ्चिदपि स्वसम्पत्तिरक्षां जानातीत्यतो मयैवाधुना सा कर्त्तव्येति धिया तत्परित्यागेन तदर्थगमनमपि तत्स्नेहमयमेव यथात्मसम्पत्त्यर्थं सह्यमानेष्यात्मदुःखे स्नेहविशेष एवात्मनि गम्यते तद्वदिति विवेचनीयम् अत एव तुशब्दः ॥ ५ ॥ जातकोप इत्यादिकमशेषं मातृस्नेहमयबाल्यलीलावेशमाधुर्यं वर्णितं तत्तद्भावानां तन्मनस्यैवोद्भूतत्वात्तत्तच्चेष्टानां च रहस्येव कृतत्वात्तात्त्विकमेवेति दर्शितं प्रौढदृष्ट्या मृषा वृथापि बाल्यस्वाभावेनैव अश्रु यस्य सः "लास्यम्पश्यति यस्तस्याः" इत्यादिभट्टिपद्ये मिथ्यासौ विहितेन्द्रिय इति वत्। यद्वा, कदाचित्कैतवादिना मिथ्यारोदिति अधुना तु अमृषाश्रुः अतृप्तत्वादिति मुनीन्द्रस्य सविनोदसाक्षित्वं दृषदश्मनेति निःशब्दं तत्तले शनैरल्पच्छिद्रार्थम् अन्तरमन्तर्गृहं गतः सन् हैयङ्गवं हैयङ्गवीनं ह्योगोदोहस्य सद्यो नवनीतं तादृशघृतमेव तदित्यमरसम्मतावपि कात्यस्तु नवनीतमित्याहेति क्षीरस्वामिलेखात् तदिदं च प्रथममथितादुद्धृत्य धृतत्वात् ह्योगोदोहोद्भवत्वं न व्यभिचरति ॥ ६ ॥ सुष्ठु श्रृतं पक्वं भग्नं भिन्नं तच्च सुतस्यैव कर्मेति विलोक्य निर्द्धार्य तादृशे कर्मण्यन्यस्याप्रवृत्तेर्भङ्गचातुर्य्यविशेषोपलब्धस्तस्य कोपसम्भावनाच्च तमपि तत्रापश्यन्ती जहास तस्यातिचापल्येन भेदने चातुर्येण भीत्याऽपसरणेन गृहान्तस्तत्किङ्किण्यादितच्चालितभाण्डादिशब्दाश्रवणेन च ॥ ७ ॥ काकादिभयाद्विवर्त्यं स्थापितस्योलूखलस्योपरि स्वस्तिकासनेनोपविष्टम् अन्तर्गृहप्रवेशानन्तरं यत्किञ्चिदेव भुक्त्वा सत्वरमवशिष्टं हैयङ्गवीनं सभाण्डमेव गृहीत्वा मातृवञ्चनाय पश्चात् द्वारेण निर्जनं गृहपश्चाद्देशं गत्वेति शेषः। पूर्वं शिक्ये स्थापितं यत् तदेवेति विशेषचापल्यदर्शनमप्युक्तं पश्चात् सुतस्य पृष्ठतः तद्दृष्टिवञ्चनार्थम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

सस्मितं मुखं तस्येक्षमाणा स्नेहस्नुतत्वादेव क्षुधितत्वादेव वा। तत्पानेऽतृप्तमपि त्यक्त्वा। ननु तं पाययन्त्येवाङ्के कृत्वा कुतो न गता? तत्राह—जवेनेति; तथा सति वेगेन गमनासिद्धेः। तत्रैव हेतुः—उत्सिच्यमान इति। एवं दृष्टिगोचरेऽनतिदूरे पयः पाकस्थानं ज्ञेयम्. तत्पयोऽपि मथ्यमान-दधिवदेवेति तस्यैवोपभोगापेक्षया लवमात्रमन्यत्र गमनदोषोऽपि परिहृतः स्यात्, अत एव तु-शब्दः ॥ ५ ॥ जातकोपस्त्यक्तत्वादतृप्तत्वाच्चेत्यादिकमशेषमातृस्नेहभरेण तत्कालीन-स्वभावेन वा बाल्यलीला-माधुर्य्यमेव ज्ञेयम्। मृषा कारणाभावेऽपि मातृप्रतारणार्थमश्रु यस्य सः, यद्वा, कदाचित् कैतवादिना मिथ्यापि रोदित्यधुना त्वमृषाश्रुरतृप्तत्वात्। दृषदश्मनेति निःशब्दमधोदेशे शनैरल्पच्छिद्रार्थम्, हैयंगव तुंगशिक्यस्थितं जघास, महदुलूखलमेकमानीय परिवर्त्त्य तदङ्घ्रेरुपरिभागमारूढः सन्निति ज्ञेयम्; तच्चातृप्तत्वेन बुभुक्षया किंवा कोपादेव ॥ ६ ॥ सद्य उत्तार्य्य, संदृश्य साक्षाद्दृष्ट्वा दधिमण्डप्रवहणात्। तच्च सुतस्यैव कर्मेति विलोक्य निर्द्धार्य्य,—तादृशे कर्मण्यन्यस्याप्रवृत्तेरशक्तेश्च। तमपि तत्रापश्यन्ती जहास—तस्यापि चापल्येन भेदेन चातुर्य्येण वा भीत्यापसरणेन वा। चकाराच्छनैस्तं मृगयामास च, विशेषेण पादाब्जांगुष्ठद्वयाग्रावष्टम्भनेन ॥ ७ ॥ अवस्थितमवधानेनोर्द्ध्वावस्थितया सन्तम्। मर्कार्थमिति जातावेकत्वम्, मर्कटेभ्य इत्यर्थः। पश्चात् सुतस्य पृष्ठतस्तद्दृष्टिवञ्चनार्थम् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

उत्सिच्यमाने स्थाल्या बहिर्निर्गच्छति ॥ ५ ॥ दृषदश्मना पेषण्यश्मना हैयङ्गवं नवनीतं हैयङ्गवशब्दः तद्धितः ॥ ६ ॥ अनुत्तानप्रदेशमुत्तार्य आश्रयणस्थानादन्यत्र निधाय दध्यमत्रकं दधिभाजनम् ॥ ७ ॥ उलूखलाङ्घ्रेरुपरि अधोमुखविन्यस्तोलूखलस्योपरीत्यर्थः। मर्कटाय मार्जारायेति केचित् मर्कार्थं दधिसारार्थमागताय सखीजनायेति केचित्। अथ पूर्णलक्षणोपहृतं हैयङ्गवं मर्काय मर्कटाय कामं ददतमित्यन्वयः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तं निषेधन्तं कृष्णमङ्कमुत्सङ्गमारूढं स्नेहेन स्नुतं स्तनमपाययत्, कथम्भूता? स्मितेन सहितं सुतस्य मुखमीक्षन्ती तदाधिश्रिते चुल्लीमारोपिते पयसि क्षीरे उत्सिच्यमाने गाढाग्निसम्पर्कात्पात्राद्बहिर्निर्गच्छति अतृप्तं स्तन्यपानादतृप्तं पुत्रमुत्सृज्य सा यशोदा जवेन ययौ जलप्रक्षेपादिना क्षीरतापं शमयितुं जगाम ॥ ५ ॥ स उत्सृष्टः कृष्णः सञ्जातकोपः दद्भिर्दन्तैः स्फुरन्तं चलन्तमरुणमधरमधरोष्ठं सन्दश्य मृषाऽश्रूणि यस्य तथाभूतो दृषदश्मना पेषण्यश्मना दधिमन्थभाण्डं अन्तरं गृहमध्यं गतः हैयङ्गवं नवनीतं जघासैकान्ते नवनीतमभक्षयदित्यर्थः ॥ ६ ॥ तदा गोपी यशोदा सुश्रृतं सुपकं पय उत्तार्य चुल्या अवरोप्य पुनस्तत्र प्रविश्य दध्यमत्रकं दधिमथनभाण्डं भग्नं विलोक्य च तत्सुतस्य कर्म प्रति जहास हसितवती तं सुतं तत्र न पश्यती नापश्यच्च ॥ ७ ॥ तत उलूखलाङ्घ्रेरुपरि अधोमुखविन्यस्तोलूखलभागस्योपरि व्यवस्थितं मर्कटाय मार्जारायेति केचित् नवनीतार्थमागताय सखीजनाय वा हय्यङ्गवं नवनीतं काममिष्टं यथा तथा ददतं प्रयच्छन्तं चौर्येण विशङ्किते चञ्चले ईक्षणे यस्य तं निरीक्ष्य पश्चात्पृष्ठतः शनैराजगाम ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अतृप्तमलम्बुद्धिमप्राप्तम् अधिश्रिते चुल्ल्यां निहिते अधिकं पाकं प्राप्ते वा पयसि उत्सिच्यमाने उद्रिच्यमाने सति पयः अवरोपयितुमिति शेषः ॥ ५ ॥ दद्भिः दन्तैः दधिमण्डभाजनम् दधिमस्तुपूर्णपात्रं "दधिमण्डो भवेन्मस्तु" इति हलायुधः दृषदश्मना शिलापुत्रकेण मृषाश्रुः अविद्यमाननेत्रजलः दुःखोत्पन्नबाष्पो न भवतीत्यर्थः। हैयङ्गवं नवनीतम् अन्तरं बहिर्भावम् अन्तर्धानं वा गृहान्तरं वा

"अन्तरम्परिधानीये बाह्ये स्वीयेऽन्तरात्मनि। क्रतुमध्येऽवकाशे च तादर्थ्येऽवसरेऽवधौ॥
विशेषविवरान्तर्धिष्ववसानविनार्थयोः" इति यादवः ॥ ६ ॥

उत्तार्य चुल्ल्या अन्यत्र निधाय दध्यमत्रकं दधिभाण्डं भग्नं भिन्नं स्वसुतस्य तत्कर्म विलोक्याऽऽलोक्य ॥ ७ ॥ उलूखलाङ्घ्रेः उलूखलबुध्नस्य चौर्येण विशङ्किते किञ्चिदुन्मीलनमीलने कुर्वाणे ईक्षणे यस्य स तथा तं पश्चात्पृष्ठतः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स जातेति अन्तरं गृहाभ्यन्तरगृहं गतः ॥ ६–७ ॥ उलूखलेति पश्चाद्द्वारेण तस्मान्निर्गम्येति शेषः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अहो बालस्याऽस्य बुद्धिरित्युक्ता मन्थनाद्विरम्योपविष्टा स्वयमेवाङ्कमारूढं तम् उत्सृज्येत्यत्र हेतुः जवेनेति तत्रापि हेतुः उत्सिच्यमाने अतितापेनोद्रिच्यमाने सति पयसि उत्तारणार्थमित्यर्थः। अधिश्रिते चुल्लीमारोपिते। ननु, तर्हि कृष्णादपि तस्या दुग्धमतिममतास्पदमभूत् यदनुरोधेनातृप्तः कृष्णोऽप्युपेक्षितः सत्यम्—

"तद्भक्ष्ययेयादिषु काप्यपेक्षता यया पुनः सोपिसमेत्युपेक्ष्यताम्।
प्रेम्णोविचित्रापरिपाट्युदीरिता बोध्या तथा प्रेमवतीभिरेव या" ॥ ५ ॥

मृषा वृथापि बाल्यस्वभावादेवाश्रुर्यस्य सः दृषदश्मना शिलापुत्रेण निःशब्दछिद्रार्थं तत्तले इति ज्ञेयम् अन्तरं गृहाभ्यन्तरं हयंगवं ह्योगोदोहस्य सद्योनवनीतम् ॥ ६ ॥ सुश्रृतं सुपक्वं दधिमन्थनस्थानं प्रविश्य दध्यमत्रकं दधिपात्रम् अतिचिक्कणत्वेनानुकम्पायां कन् भग्नं विलोक्यैति वामतर्जन्या नासाग्रं स्पृष्ट्वेति ज्ञेयम् ॥ ७ ॥ दधिक्लिन्नचरणचिह्नेन किङ्किणीशब्देन च तच्चालितभाण्डादिशब्देन च गृहान्तः स्थितं नवनीतं भुञ्जानमनुमाय हसन्ती किञ्चिद्विलम्ब्य यावत्तत्र यियासति स्म तावदेव पक्षद्वारेण निःसृज्य बहिः प्राङ्गणान्तरे काकादिभयादधोमुखीकृतेलूखलस्योपरि कृष्णे स्वस्तिकासनेनोपविष्टे सति यदभूत्तदाह—उलूखलेति। शिचि शिक्ये स्थितं ततश्चोरयित्वा आनीतमित्यर्थः। चौर्याद्धेतोर्मातृताडनभयाद्विशङ्किते तदागमनानुसन्धानपरे ईक्षणे यस्य तं गृहान्तर्गतैव तिर्यग्ग्रीवं निरीक्ष्य पश्चात् तद्दृष्टिवञ्चनार्थं तत्पृष्ठतस्तं जिघृक्षन्ती शनैरिति स्वचरणशब्दाभावार्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अधिश्रिते अग्निकुण्डस्थपात्रस्थे उत्सिच्यमाने पात्रादुद्गच्छमाने ॥ ५ ॥ दृषदश्मना शिलाखण्डेन अन्तरं गृहमध्यं गतः रहः एकान्ते हैयङ्गवं नवनीतं जघास अभक्षयत् ॥ ६ ॥ दधिमत्रकं दधिमन्थनभाण्डं भग्नं सन्दृश्य दृष्ट्वा तत्सुतस्य कर्म विलोक्य जहास हसितवती तं स्वसुतं न पश्यती नापश्यत् ॥ ७ ॥ ततः किं वृत्तमित्याकाङ्क्षायामाह—उलूखलाङ्घ्रेः अधोमुखस्थोपरि शिचि शिक्ये चौर्येण विशङ्कितं विशङ्का जाता यस्य तदीक्षितमीक्षणं यस्य तम् ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

मथनं हित्वोपविष्टा स्वयमेवाङ्कमारूढं तं स्तनमपाययत् अतृप्तं हरिमुत्सृज्य ननु सा जवेन वेगेन सा ययौ तत्र हेतुः अधिश्रिते चुल्लीमारोपिते तद्भोग्ये पयस्यतितापेनोत्सिच्यमाने पात्रादतिरिच्यमाने सति तदुत्तारणायेतिशेषः। पयसि तस्या ममत्वं पुत्रार्थत्वान्न दूषणमपितु भूषणमेव ॥ ५ ॥ अतृप्तस्य पुत्रस्यौत्सर्जनादवज्ञानात्कोपोऽभूदित्याह स इति। न हरिर्जातकोपः सन् स्फुरितमरुणाधरं दद्भिः संदश्य कोपादमृषाश्रुर्दृषदश्मना सूक्ष्माग्रेण शिलाखण्डेन दधिमण्डभाजनं भित्त्वा तेन तत्तले निःशब्दं सूक्ष्मं रन्ध्रं विधाय क्षुधितत्वादेवान्तरं गृहमध्यंगतो रह एकान्ते हैयङ्गवं ह्योगोदोहस्य सद्यो घृतं रसरूपं मात्रा तदर्थमेव न्यस्तं जघास भक्षितवान्। शिशुभिः सूचितस्वचापलो मातृकोपानुत्थानाय कदाचिन्मृषाश्रुश्च बालस्वभावेन भवेदयत्वमृषाश्रुः कोपादभूदिति तथोक्तं ननु विजिघत्सोऽपिपास इति श्रुतेर्नित्यतृप्तस्यात्मिररोषणोह्यसौ देव इति स्मृतेः रोषशून्यस्य

रोषश्चेह विरुध्यते इति चेदुच्यते मौग्ध्यवत् प्रभीतवच्च मातृवात्सल्यरसपोषी स्वरूपधर्म एवातृप्तिकोपलक्षण: स उक्तयुक्तेर्नतु प्राकृतरसस्याष्टादशमहादोषाविरहितत्वस्मरणात् रहोभवत्त्वाच्चेदं कोपादिकं नानुकृतिरूपमिति तत्त्वविद: ॥ ६ ॥ एतन्मध्ये मात्रा किं किं कृतं तदाहोत्तार्येति सुशृतं सुपक्वं पय उत्तार्य दधिमन्थनस्थाने प्रविश्य तत्र दध्यमत्रकं भिन्नं सन्दृश्य स्वसुतस्यैव कर्म तद्विलोक्य तत्र तञ्चापश्यन्ती जहास तस्यातिकोपाद्भाण्डभेदनपाण्डित्याद्भीत्या अपसरणाच्च जातहासा बभूवेत्यर्थ: ॥ ७ ॥ तत्र किङ्किण्यादितश्चालितभाण्डादिशब्देन तं गृहान्त: प्रविष्टं हैयङ्गवमश्नन्तमनुमाय किञ्चिद्विलम्ब्य मातायाचत्तत्रायाति तावत्तेन यत्कृतं तदाहोलूखलेति पक्षद्वारेण निर्गम्यात्यस्मिन् चत्वरे विपर्यस्तधृतस्योलूखलस्योपरि व्यवस्थितं स्वस्तिकासनेनोपविष्टं शिचि शिक्यै स्थितं हैयङ्गवमानीय मर्काय कामं यथेच्छं ददतं चौर्याद्धेतोर्मातृताडनभयाद्विशङ्किते तदागमानुसन्धिपरे ईक्षणे यस्य तं जालिकारन्ध्यान्निरीक्ष्य पश्चात् पृष्ठतस्तं जिघृक्षन्ती शनैरिति स्वचरणशब्दाभावार्थमागमत् ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सस्मितं सहासं मुखमीक्षतीक्षमाणा स्वयमपि सस्मितमीक्षतीत्यप्यन्वय: । अधिश्रितेऽधिमपाकं प्रासे । श्रा पाक इति स्मृति: । पयसि क्षीरे उत्सिच्यमाने पात्रादुद्रिच्यमाने सत्यतृप्तं क्षीरेण स्वमुत्सृज्यत्यक्त्वा सा जवेन ययौ । अवरोपयितुं वा जलं स्थापयितुं वा यदा ॥ ५ ॥ तदा सञ्जातकोप: सञ्जात: कोपो यस्य स तथा तत्प्रदर्शक: स्फुरितारुणाधरं स्फुरित: कम्पमान: प्रकाशमानोऽरुणोऽधरो दन्तवसनं दद्भि: सन्दश्य मृषाश्रु: । त्रिसर्गो मृषेत्येतत्तात्पर्यं । न चातृप्त: प्रवर्तते किन्तु वृथैव । भित्वा मृषाश्रुरितिवदित्युक्तेरहेतुप्रयोजनान्यश्रूणि यस्य स तथा । दु:खमेव कारणं कुतो नेत्यत आह ॥ दृषदिति । लुप्तोपमेयं । आखणश्मसम इति शोक: सम्भवी नेति भाव: । हरिरपि समयार्हां हानिमस्यै प्रदातुं दृषत्खण्डेनाखण्डयन्मन्थभाण्डमित्याह ॥ अश्मनेति । पाषाणशकलेन दधिमण्डभाजनं मस्तुपूर्णं पात्रं । दधिमण्डो भवेन्मस्त्विति हल: । भित्वा मातरि कार्यान्तरव्याप्टतायामन्तरमवकाशं गत: प्राप्तो रह एकान्ते हैय्यङ्गवं हैय्यङ्गवीनं नवनीतं जघास । लिट्यन्यतरस्यामित्यादेर्वा घस्लादेश: । जघास जक्षतुर्जक्षुरिति रूपाणि । यद्यपि हियङ्गुरादेश: खञ्सन्नियोगशिष्टस्तथाऽप्यञि परतोऽप्यार्षो ज्ञेय: । यथोक्तं महाभाष्ये कैय्यटादिषु । हैय्यङ्गवीनं संज्ञायां हैयङ्गवीनमिति किं निपात्यते ह्योगोदोहस्य हियङ्ग्वादेशसंज्ञायां तस्य विकारो ह्योगोदोहस्य हियङ्ग्वादेशो निपात्यते संज्ञायां विषये तस्य विकार इत्यस्मिन्नर्थे ह्योगोदोहस्य विकारो हय्यङ्गवीनं घृतं । संज्ञायामिति किमर्थं । ह्योगोदोहस्य विकार उदस्विदत्र मा भूदिति किं निपात्यत इति प्रकृतिसन्देहात्प्रश्न: । ह्योगोदोहस्येति । ह्य:शब्दस्य गोदोहशब्दस्य सुप्सुपेति समास: । दुह्यत इति दोह: क्षीरमुच्यते । ह्य:शब्द: कालप्रत्यासत्ति: प्रतिपाद्यते । तेन विकृतरूपगन्धमेव घृतं हय्यङ्गवीनमुच्यत इत्याहुरिति कौमुदीकाशिकावृत्त्योर्नवनीतमित्युक्तेर्नवनीतं । अन्तरङ्गत एकान्ते जघास । अरहो बहिरङ्गे मृषाश्रुरिति वा ॥ ६ ॥ गोपी: सुशृतं पयस्तत्पूर्णं पात्रमिति यावत् उत्तार्य चुल्लीतोऽवतार्य प्रविश्य मथनस्थानं दध्यमत्रं दधिपात्रं तदेव मत्रकं भग्नं सन्दृश्य दृष्ट्वा स्वस्य क्षीरोदधिमथकतया पूर्वं दधिमथनमिति तद्भाण्डखण्डनं ततान देव इति ध्वनि: । स्वसुतस्य कर्म तदिति विलोक्य तं च तत्र तत्स्थं न पश्यतीत्यनवलोकयन्ती जहासाहसत् । सन्दृश्यकर्म च सन्दृश्येत्यन्वये विलोक्यो दर्शनीयो य: स्वसुतस्तस्यैति पदमेकमिति मन्तव्यं । न तत्र हे न तत्र न मज्जनरक्षकेति चेत्पश्यती न तथेति न तत्र पश्यतीत्युक्तिरिति वा ॥ ७ ॥ उलूखलोत्तानतायामङ्घ्रिस्तदधस्तनप्रदेश उपरि भवति तस्योपरि व्यवस्थितं चौर्येण कृतेनार्याविचार्य कां चर्यां कुर्याद्वेति विशङ्कित ईक्षणे यस्य तं ददौ बिडालाय जनन्यदृष्टस्तदा स्वनीतं नवनीतजातं । क्षिणेति नूनं धनलभमाजां धनान्यनर्हत्स्वतिदिश्य देव इति ध्वनयन्नाह । कामं यथात्वेष्टं यथेप्सितं कर्मादीनामीप्सितमनुसृत्य मर्काय बिडालाय तेभ्यो हैय्यङ्गवं ददन्तं सुतं निरीक्ष्य दूरादालक्ष्य पश्चादिति पृष्ठत: शनैर्मन्दमागमत् आ अगमदगच्छदिति । सिचि स्थितमिति पाठे सिचि सिक्यै स्थितं हैय्यङ्गवमित्यन्वय: ॥ ८ ॥

श्रीसुबोधिनी

भगवता प्रीतिर्जनितेति भगवदर्थं प्रपञ्चासक्तिं परित्यज्य स्तनं पायितवतीत्याह **तमङ्कमिति**, **स्वयमेवाङ्कमारूढमीषदुत्थितं स्तनमपाययत्**, यथा सा विमुच्य न गच्छति तदर्थ**मङ्कमारूढो** दैत्यानाक्रमयितुं च, **स्नेहस्नुतमिति** नास्या: **स्तनपान**जनितोपि क्लेश:, यद्यपि मोहिताया: प्रपञ्चासक्तिर्महती गृहे च बहु कार्यं दास्यश्च न सन्ति तथापि मन्दहासयुक्तं **मुखं पश्यन्त्यपाययत्**, इदानीं स्थित्यर्थं मोहनं पूर्वमोहनस्य सङ्कोचश्च, एवं निर्बन्धेन स्थापितापि दोषवशात् त्यक्त्वा निर्गतेत्याह**ातृप्तमुत्सृज्येति**, न तृप्ता यस्मिन् प्रतिबन्धं कुर्वाणमप्युत्सृज्योर्ध्वं त्यक्त्वा जवेनातिवेगेन सा पूर्वोक्ता प्रबलप्रपञ्चा **ययौ**, उद्देश्यपर्यन्तं गतवती, गमने लौकिकमावश्यकं कार्यमाहोत्सिच्यमाने पयसीति, **अधिश्रितेग्नौ** स्थापिते **पयस्युत्सिच्यमाने** विष्यन्दमाने सति विष्यन्दनं द्रव्यनाशकं दोषजनकं च, तुशब्द: प्रक्रमान्तरमाह, भगवदनुरोधेन यथा मन्थानं परित्यज्य भगवदनुरोधं कृतवती मथनाविरोधेनैवं भगवदनुरोधेन दुग्धोत्तारणं न कृतवती किन्तु भगवदनुरोधं परित्यज्यैव कृतवतीति॥५॥ ततो बालकानामतृप्तत्वाद् भगवान् **जातकोपो** जात:, यत: स बालकरक्षक:, बालकरक्षाप्रतिघाते भक्तिमार्गावेशेन वैषम्याद्-

कस्मादेव क्रोधो जातः, स्थित एव निमित्तवशादुद्गतः, ततः कोपो **यशोदां** मारयिष्यतीति लोभं तद्गतं भाण्डं च स्फोटितवानित्याहाधरं **दद्भिस्सन्दश्य दृषदश्मना दधिमण्डभाजनं भित्त्वेति**, **अधरस्य दंशे** हेतुः **स्फुरितारुणेति**, **स्फुरितोरुणवर्णश्च** जात इति लोभाद् भगवत्परित्यागे लोभस्यैवापराधो भवति तदा लोभ आधिदैविको **यशोदां** मारयितुमाध्यात्मिकं वा स्वयं विज्ञापनार्थमागतः, तदा **स्फुरणं** जातं, तत् त्रयं निवारणीयं रजोगुणश्च प्रादुर्भूतो जातस्त्रयमुत्पादयितुं भिन्नं तदुभयमपि निवारयितुमोष्ठदंशः, दन्ताः स्नेहबला **यशोदा**निष्ठाः, तैस्तेषां निवारणं कृतं, अनुकरणं तु स्पष्टमेव, **दधिमण्डस्तक्रं**, तदाधारभूतं भाण्डं नवनीतं तु भिन्नं जातमस्ति, ततो **दृषदश्मना** दृष्टत्सम्बन्धिकुट्टनपाषाणेन **भित्त्वा** दैत्याविष्टेव सा निर्गता तेषां दैत्यानामाधिदैविकानां यज्ञायुधेनैव जनितशब्देन निवारणं कर्तव्यं, तत्र महति शब्दे क्रियमाणे भाण्डमेव भिन्नं, एवमुपकारं कृत्वा **मृषाश्रु**जातः, दधिभाण्डभङ्गेपि दोषसम्भवात्, यद्यपि स्वतः कृतभङ्गे दोषो नास्ति तथापि रुद्रः समागत इति लोके ज्ञापयितुमश्रूण्यवर्तयत्, अन्यथा भाण्डदेवताया भङ्गो न स्यात्, अश्रूणां कार्यं च रजतादि नैमित्तिकं च **तदुभयाभावान् मृषाश्रुत्वं**, **यशोदाया** नाशशङ्कया वा, तथापि रक्षकः स्वयमित्यश्रूणां **मृषात्वमेव**, वस्तुतस्तु भाण्डे दैत्य आविष्टः, तद्वधार्थमेव तत् कृतवान्, ततस्तस्याः श्रमः सार्थको भवत्विति **हैयङ्गवं रह** एकान्ते बालकार्थं **जघास**, **जहारेति** वा, स्वस्यापि भक्षणं प्राप्स्यती**त्यन्तरङ्गतो** भेदं प्राप्तवान्, ततः प्रभृति ते भिन्नाः कृताः, गृहमध्ये गतः, तत्राप्येकान्त आधिदैविकदैत्यानामगम्यस्थाने बालकार्थमेव **जघास** भक्षितवान् ॥ ६ ॥ ततो यज्जातं तदाह **उत्तार्येति**, **पयस्तु सुश्रृतं** सम्यक् पक्वं **तदुत्तार्य** भूमौ स्थापयित्वा पुनः सुश्रृतमिति प्रथममुत्सेक उत्तार्य पुनरधिश्रित्य ततः श्रृते पुनरुत्तारितवतीत्यर्थः, **प्रविश्य** मथनस्थानं, अनेनाङ्गणे पयोधिश्रितमिति ज्ञायते बहिर्गृहे मन्थनं तद्गृहं **प्रविश्य सन्दृश्य च दध्यमत्रकं** भग्नममत्रकं भाण्डं सम्यग् दृष्ट्वा कर्तृकरणकर्मणां याथार्थ्यं, चकारात् नवनीताभावं च दधिमण्डप्रवाहं च, **ततस्तत्कर्म स्वसुतस्येति** च **सन्दृश्य सम्यक्** ज्ञात्वा लौकिकाविष्टचित्ता दैत्यानां निवारणाज् **जहास** हास्यं कृतवती न तु क्रोधं, भगवांश्चेत् तत्रैव तिष्ठेन् न किञ्चित् कुर्यात् तदा स्वस्यैवापराध इत्यतत्परित्यागात् तूष्णीमेव तिष्ठेत् ॥ ७ ॥ भगवांस्तु रूढं तस्या लौकिकज्ञानं दूरीकर्तुं दृढमिति ज्ञापयितुं वा तस्यास्तामसभावोत्पत्त्यर्थं ततो गतः, तत्र च गत्वा पूर्वमपि दैत्यावेशेन यत् सम्पादितं हैयङ्गवादिकं तदपि शिक्ये स्थितं कामं यथेच्छं मर्कटाय प्रयच्छति मर्कटोपि दंष्ट्रित्वात् क्रूरजन्तुर्हैयङ्गवमप्यनुपयुक्तं शिक्यं च निर्ऋतिपाशः स्वयं **चोलूखलाङ्घ्रेरुपरि व्यवस्थितो** भवति, उलूखलं विपरीतं कृत्वा तत्र स्थितः, तेषां दोषनिवृत्त्यर्थं **यज्ञपुरुषो** भूत्वा "सुपर्णचयन" इव स्थितः, अग्नेर्नाभिरूपत्वादुलूखलस्य तदुपरि स्थितः सन् "तिरिक्तमतिरिक्ताय प्रयच्छति रिक्तस्य शान्त्यै", ततो यशोदान्तः प्रविश्य तथाभूतं पुत्रं दृष्टवतीत्याहो**लूखलाङ्घ्रे**रिति, पूर्वं तत्र भगवद्दर्शने मर्कटोपि न दृष्टस्तेन शङ्कापि, अतोन्वेषणमपि कर्तव्यं, **अन्वेषणो** पुनश्चित्तं भगवत्परं जातमिति भगवन्तं दृष्टवती दोषाणामप्रयोजकत्वज्ञापनायोलूखलं विपरीतं कृतं तदा सुपर्ण एव विपरीतः कृतो भवति, अतः सर्वदोषनाशकाग्नेरपि यत्र वैपरीत्यं तत्र दोषाणां किं वक्तव्यमिति ज्ञापितं, **काम**मिति यथेच्छं सन्देहाभावाद् देयमेव तत्, ह्यं गोः सम्बन्धि **हैयङ्गवं** पूर्वकालगोसम्बन्धि नवनीतं, **चौर्ये** जाते **विशङ्किते ईक्षणे** यस्य, भगवता चौर्यं कृतमस्ति तस्याश्चौर्यदोषनिवारणाय सर्वपतिरपि तथाभावोत्पादनाल्लोकानुसारेण नवनीतहरणं **चौर्य**मित्युच्यते, तत्र दोषदृष्टौ तस्या ज्ञानं कालेन नाश्यत इति **विशेषाकारेण** वा **शङ्कितमीक्षणं** यस्य तथा भवति, **चौर्यविशङ्कितायां वेक्षणं** यस्य, उभयथापि तस्या ज्ञाननाशशङ्का, तादृशं स्वयं **निरीक्ष्य सुतं पश्चात्** पृष्ठभागे पृष्ठे च **पश्यन्ती** पापदृष्टिः **शनैरागमत्**, ईषन्मात्रमागतवती, न हि पापदृष्टिः शीघ्रमागन्तुमर्हति ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

तमङ्कमारूढमित्यत्र, **दैत्यानिति** । उक्तन्यायेनाधिदैविकभूरूपत्वादङ्कस्य भूस्थितांस्तांस्तथाकर्तुमित्यर्थः । मात्रा ग्रहण सम्भवेपि स्वयमङ्कारोहणस्येदं तात्पर्यमुक्तम् । **उत्सिच्यमान** इत्यत्र । वैदिकेग्निहोत्रादावलौकिकदोषजनकं यथा, तथा लौकिके तल्लौकिकदोषजनकमित्याशयेनोक्तं **दोषजनकं** चेति ॥ ५ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तमङ्कमित्यत्र सुबोधिनी टिप्पणी च प्रकटार्था ॥ ५ ॥ **स जातकोप** इत्यत्र **भक्तिमार्गेणेति** सहार्थे तृतीया, **अकस्मा**दिति सहसा, **स्थित** इति **प्राणैः समं रोषसमन्वितोपिबदि**त्यत्र यः **स्थितः** स इत्यर्थः, **मारयिष्यतीता**तिशब्दो हेतौ तदभावरूपं हेतुं बोधयति, अधरदंशतात्पर्यमाहु**स्तत् त्रयमि**त्यादि, तस्यार्थं टिप्पण्यामाहु**र्यशोदाया** इत्यादि, **पूर्वोक्तेनेति यशोदां मारयिष्यती**त्यनेना**ग्रिमग्रन्थेने**ति, **अनेने**त्यस्यैव विवरणं **त्रय**मित्यस्यार्थमाहुर्यथेत्यादि, **नैवं सम्भवतीति** न पुत्रत्यागः **सम्भवति**, **दैत्याविष्टेवे**त्यस्यार्थमाहुः **से**त्यादि, **तथेति** दैत्यावेशनिवृत्तिः, **तत्रेति** श्रीयशोदायां, **तथात्व**मिति दैत्याविष्टत्वं, अत्रेदं बोध्यं, कृष्णोपनिषदि 'यशोदा मुक्तिगेहिनी'त्युपक्रम्य 'माया सा त्रिविधा प्रोक्ता सत्त्वराजसतामसी प्रोक्ता सा सात्त्विकी रुद्रे भक्ते ब्रह्मणि राजसी तामसी दैत्यपक्षेषु माया त्रेधा ह्युदाहृते'तिश्रावणान् मुक्तिरूपाया अपि तस्या

एवं मायात्वमभिप्रेतं, तथा सति रुद्रागतौ रजःसंसर्गो दैत्यावेशश्च तमादाय विवृतः श्रुतौ सूक्ष्मरूपेणोक्तत्वाच्च श्रीभागवतस्य श्रुतिरूपत्वादुपबृंहणत्वाच्चेति, **सुबोधिन्यामन्यथेति** रुद्रानागमने, **भङ्गो न स्यादिति** भवगता न कृतः स्यात्, तथा च रुद्रदूरीकरणार्थमेव भाण्डभेदनमितिभावः, **रजतादि नैमित्तिकं** चेति 'यदश्रवसीयत तद् रजतं हिरण्यमभव'दितिश्रुत्युक्तमेकं कार्यं, निमित्तात् क्रोधाद् दण्डो द्वितीयं **नैमित्तकं** कार्यं चेत्यर्थः, **रहःपदेनैवैकान्ते** प्राप्ते पुनर**न्तरङ्गत** इति कथनमनतिप्रयोजनमित्यतस्तद् विवृण्वन्ति **स्वस्यापी**त्यादि, **स्वस्यापि** भक्षणं 'भक्त्युपहृत'मग्रिमलीलासु प्राप्स्यतीत्यतस्तथेत्यर्थः, तथा **चान्तरशब्द**स्यार्थो भेद इति न वैयर्थ्यमित्यर्थः, एतस्यैवार्थान्तरमाहुर्गृहमध्य इत्यादि, **आधिदैविके**त्यादेरर्थमाहुष्टिप्पण्यां **मातृदर्शने**त्यादि ॥ ६ ॥ **उलूखलाङ्घ्रेरि**तिश्लोकं व्याकर्तुमारभन्ते **भगवानि**त्यादि, **अत्र श्लोके द्वितीयः पादःप्रथमस्थानेस्तीति** व्याख्यानवशात् प्रतिभाति, **लौकिकं ज्ञानमिति** गृहाध्यासरूपं **ज्ञानं, पूर्वमपी**त्यादेरर्थं **टिप्पण्यामाहुः पूर्वमपी**त्यादि, **सुबोधिन्यां शिक्यं च निर्ऋतिपाश** इति 'शिक्यमभ्युपदधाति नैर्ऋतो वै पाश' इति श्रुतेरितिभावः, **तेषामिति** मातृचरणहैयङ्गवशिक्यानामित्यर्थः, "अत्र सुपर्णचयन" इत्यादिकं शाखान्तरस्थं प्रमेयकल्पस्थं वेति ज्ञेयं अग्नेरित्या ह्युलूखलमुपदधात्येषा वा अग्नेर्नाभि' रितितैत्तिरीयश्रुतेः, **मर्कटोपि न दृष्ट** इति 'तं चेति' पूर्वश्लोकस्थस्य चकारस्यार्थ उक्तः, परं भगवच्चिह्नवन् मर्कटचिह्नानि दृष्टानीति ज्ञातव्यं, अत एवाह**स्तेन शङ्कापीति** भगवता मर्कटेन वा नाशितमितिशङ्का, यद्वा मर्कटचिह्नानां दर्शने किं भगवान मर्कटभयात पलाय्य गत उत क्रीडार्थमित्युभयथापि तत्सहभावे तस्य दुष्टत्वाद् दूरीकरणमेव कर्तव्यमित्यन्वेषणस्यावश्यकत्वमाहुरत इति. **अपिशब्दा**दन्विारणं, नन्वन्वेषणमात्रेण दोषकृतभगवद्दर्शनप्रतिबन्धः कुतो नेत्याह**दोषाणामि**त्यादि, तथा च यत्र भक्तिमार्गे मर्यादामार्गधर्मवैपरीत्यमपि करोति तत्र दोषदूरीकरणे कः सन्देह इतिभावः. **सन्देहाभावादिति** तस्य हैयङ्गवस्य दुष्टत्व इत्यर्थः, **चौर्यदोषे**त्यादेरर्थं **टिप्पण्यामाहुः पत्रे**त्यादि. **सुबोधिन्यां सर्वपतिरिति** चौरत्वेनात्रागत इतिशेषः, **तत्र** हेतुस्तथेत्यादि, **तस्या ज्ञानमित्य**स्यार्थं **टिप्पण्यामाहुर्विशब्दस्ये**त्यादि, **तथा व्यवहरतीति तथे**ति चौरत्वेन **व्यवहरती**त्यतः कालेन नाश्यत इत्यतः शङ्कितमित्यर्थः, सुबोधिन्यामेतस्यैव पदस्य पुनरर्थद्वयमाहु**र्विशेषे**त्यादि, अत्रापि शङ्कायां तदेव **बीज**मित्याहु**रुभयथे**त्यादि ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृत श्रीसुबोधिनीलेखः

सस्मितमीक्षतीत्यस्य तात्पर्यं **इदानीं स्थित्यर्थ**मिति भगवतेदं **मोहनं** निषेधेन **पूर्वाध्यायोक्तमोहनस्य सङ्कोचश्च इदानीमेतस्याः स्थित्यर्थ**मेव कृतः, परन्तु मोहस्वरूपस्यैव दोषरूपत्वात् तथा न जातमित्याहुः **दोषवशा**दिति, अत एव "निवारितापि संसारे" इति कारिकायामेतस्य मोहस्य गृहकृत्यप्रवृत्तिहेतुत्वमुक्तं, **प्रबलप्रपञ्चे**ति भगवता सम्पादितः स्वस्मिन् मोहेपि यस्याः प्रपञ्च एव पर्यवसन्नस्तादृशीत्यर्थः, **भगवदनुरोध**मिति भगवन्तमनुरोधयति तादृशं स्तनदानमित्यर्थः ॥ ५ ॥ **स जातकोप** इत्यत्र **अकस्मादेवे**ति करणं विनैवेत्यर्थः, स जातकोप इत्येवोक्तं न तु तेन जातकोप इति, अतो गमनस्य निमित्तत्वमात्रं न तु करणतेतिभावः, एतदेव **स्थित एवे**त्यनेन विवृतं, एनेन भगवद्धर्मत्वान् नित्यता सूचिता, **तद्गत**मिति लोभस्यैव विशेषणं यशोदागतमित्यर्थः, नाशनं स्फोटपदार्थ उभयसाधारणो ज्ञेयः, **तदा लोभ** इति भगवन्निष्ठो बालानामर्थं स्तन्यविषयक **आधिदैविकः** यशोदानिष्ठः पयोविषयक **आध्यात्मिक** इतिज्ञेयं, **आध्यात्मिकं चे**ति **मारयितु**मिति पूर्वेणान्वयः, टिप्पण्यां **यशोदाया** इति कर्मणि षष्ठी. मया तत् सम्पादनीयमेव किमर्थं विज्ञाप्यत इति विज्ञापननिवारणं ज्ञेयं **तथान्यां यशोदा**मिति एतादृशदोषरहितां, "सविशेषणे ही"ति न्यायेन दोषाभावमित्यर्थः, सुबोधिन्यां, **अयमुत्पादयितु**मिति रजोगुणो भिन्नं **अयमुत्पादयितुं प्रादुर्भूतो जात** इत्यन्वयः, रजोगुणस्योत्पत्तिहेतुत्वादित्यर्थः, **यशोदानिष्ठा** इति यशोदाविषयिण्य इत्यर्थः, **आधिदैविकाना**मिति "दयाह प्राजापत्या"इत्यत्रोक्तप्रकारेणोत्पत्तिसिद्धानामित्यर्थः, **भङ्क्तेपीति** स्वतो जातेपीत्यर्थः, **रुद्रः समागत** इति "सविशेषणे ही"तिन्यायेन तद्धर्मो रोदनं तत्साधर्म्यात् क्रोधश्च सर्वनाशकः समागत इत्यर्थः **अन्यथे**ति क्रोधाभावे इत्यर्थः, **नैमित्तिकं चे**ति निमित्तस्य नाशनमित्यर्थः **स्वस्यापी**ति गुणगानावस्थासम्पादितनवनीतस्य भोगः स्वस्याप्युचित इतिभावः, अत्र बालकानां भिन्नत्वाद् भगवतोपि **भक्षण**मिति ज्ञेयं, **बालकार्थमेवे**ति बालकेभ्यो दानार्थमेव स्वयमपि **जघासे**त्यर्थः ॥ ६ ॥ **उलूखलाङ्घ्रे**रित्यस्याभासमाहुः **भगवांश्चे**दित्यादिना, **अनुपयुक्त**मिति दैत्याविष्टत्वाद् भगवतोनुपयुक्तमित्यर्थः, **तेषामिति** मर्कटानां क्रूरत्व**दोषनिवृत्त्यर्थ**मित्यर्थः, यज्ञपुरुषदर्शने चित्तशुद्धिर्भवतीतिभावः, **अग्नेर्नाभिरूपत्वा**दिति, ननु क्रूराणां यज्ञपुरुषदर्शने कथमधिकार इत्यत आहुः **दोषाणा**मिति, **ह्यं गो सम्बन्धी**ति अव्ययानामाकृतिगणत्वाद् ह्यमित्यव्ययं **पूर्वकालवाचकं** तत्सम्बन्धिनी **गौः ह्यंगौः** तस्याः सम्बन्धीति तस्येदमित्यण्, चौर्यस्वरूपमाहुः **सर्वपतेरि**ति, इदं चौर्यं पूर्वोक्तप्रयोजनाय कृतमित्यर्थः, **तत्रे**ति दोषनिवारके भगवति **दोषदृष्टावि**त्यर्थः, **कालेन** बाललीलाकालेनेति टिप्पण्यनुसृतोर्थः, बालभावस्वीकारादेव दोषदृष्टिरितिभावः, तथा च चौर्ये जाते सति वेः कालात् शङ्कितमीक्षणं ज्ञानं यस्येति मूलार्थः, विषयता **षष्ठ्यर्थः,** विनश्यदवस्थाशङ्कापदार्थो ज्ञेयः, **ईक्षणस्य** ज्ञानेन्द्रियत्वात् ज्ञानरूपत्वं, यद्यपि ज्ञानेन्द्रियाणि पञ्च तथापि बृहदारण्यके "चक्षुर्वै सत्य"मित्युक्त्वा चक्षुर्हि वै सत्यं तस्माद् यदिदानीं द्वौ विवदमानावेयातामहमद्राक्षमहमश्रौषमिति य एवं ब्रूयादहमद्राक्षमिति

तस्मा एव श्रद्दध्यामे"त्यनेन (बृ० ५, १४, ४) चक्षुषो मुख्यत्वप्रतिपादनात् तस्यैव ज्ञानरूपत्वं सर्वत्रोच्यते इतिज्ञेयं विग्रहे **ईक्षणे** इति द्विवचनान्तमुक्तं परोक्षवादेन तदर्थकथने तु ज्ञानपरत्वादेकवचनमेव युक्तमिति तथोक्तं, **तथा भवतीति** भगवानितिशेषः, **चौर्ये**ति चौर्यशङ्कायुक्तायामित्यर्थः, अस्मिन् पक्षे चौर्यशङ्कामात्रं न तु वस्तुतश्चौर्यं सर्वपतित्वादिति भावः, **उभयथापि** वस्तुतश्चौर्यपक्षे तात्पर्याज्ञानात् ज्ञाननाशः, चौर्यशङ्कापक्षे स्वरूपाज्ञानात् ज्ञाननाशः इत्यर्थः ॥ ८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

उत्तार्य गोपी सुशृतं पय इत्यत्र **जहास तं चापि न तत्र पश्यती**त्यस्य व्याख्याने दैत्यानां निवारणात् **जहास हास्यं कृतवती न तु क्रोध**मिति, दधिभाण्डस्फोटने हि दैत्याविष्टपदार्थनाशोऽभूदतो दैत्यानां निवारणात् भगवदुपरि वात्सल्यरस आविर्भूतः, अतो मत्पुत्र एतावत् कार्यं कर्तुं समर्थोऽभूदित्यानन्देन **हास्यं जातं न तु क्रोध** इति, दैत्यानां निवारणं चेन्न स्यात् तदा तन्नैकट्याद् दैत्यधर्मावेशे भगवदुपरि क्रोधः स्यात्, प्रकृते दैत्यनिवारणं भगवता कृतमित्यसत्शङ्काभावान् न भगवदुपरि क्रोध इतिभावः ॥ ७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा सा यशोदा तस्य सस्मितं मुखमीक्षती सती अङ्कमारूढं तं स्नेहेन स्नुतं स्तनमपाययत्। तदा च अधिश्रिते चुल्लीमारोपिते पयस्युत्सिच्यमाने अतितापेनोद्रिच्यमाने सति 'पयसोऽग्नौ निष्पन्दनस्य हानिकरत्वादमङ्गलत्वाच्च' तमतृप्तमेवोत्सृज्य त्यक्त्वा जवेन वेगेन ययौ, तदुत्तारणार्थं जगामेत्यर्थः ॥ ५ ॥ जातः कोपो यस्य स कृष्णः यत् कोपेन स्फुरितमरुणमधरं तद्दद्भिः सन्दश्य तथा दृषदश्मना दृषत्सम्बन्धिकुट्टनपाषाणेन दधिमण्डः तक्रम् तदाधारभूतं भाजनं 'दधिमन्थभाजनम्' इति पाठान्तरम्, भित्त्वा मृषा दुःखासम्भवात् मिथ्यैवाश्रूणि यस्य तथाभूतोऽन्तरं गृहमध्यं गतश्च सन् हैयङ्गवं नवनीतं जघास अभक्षयदित्यन्वयः। एवं परित्यज्य गमने लोभस्यापि हेतुत्वात्तस्य चाधर एव लोभ इति वचनाद्भगवदधरात्मकत्वात्तत्रैव तेन दंशः कृतः ॥ ६ ॥ ततश्च गोपी यशोदा सुशृतं सुपक्वं पयः उत्तार्य चुल्लीतः अवतार्य पुनर्दधिमन्थनस्थानं प्रविश्य तत्र च दध्यमत्रकं दधिभाजनं भग्नं संदृश्य तच्च स्वसुतस्य कर्म विलोक्य ज्ञात्वा जहास। तत्र च तत्र कृष्णमपश्यती अन्वेषयामासेत्यन्वयः ॥ ७ ॥ उलूखलाङ्घ्रेः परिवर्तितस्योलूखलस्योपरि व्यवस्थितं शिचि शिक्ये स्थितं हैयङ्गवं नवनीतं कामं यथेष्टं मर्काय वानराय ददतम्, चौर्येण विशङ्किते चञ्चले यशोदागमनानुसन्धानपरे ईक्षणे यस्य तं सुतं दूरतो निरीक्ष्य शनैः 'यथा पादाघातजनितशब्दं स न शृणुयात्तथा' पश्चात् पृष्ठतोऽगमत्। अत्र 'गृहमध्ये स्वयं भक्षणं कृत्वा स शिक्यं नवनीतं बहिरानीयोलूखलोपर्युपविष्ट' इति ज्ञेयम्, गृहमध्ये मर्कटप्रवेशासम्भवात् ततः पलायनासम्भवाच्च ॥ ८ ॥

अन्वितार्थप्रकाशिका

तमङ्कमिति ॥ तदा सा यशोदा तस्य सस्मितं मुखमीक्षती। आर्षः शता। अङ्कमारूढं तं स्नेहेन स्नुतं स्तनमपाययत्। तदा च अधिश्रिते चुल्लीमारोपिते पयस्युत्सिच्यमाने अतितापेनोद्रिच्यमाने सति तं कृष्णमतृप्तमेवोत्सृज्य त्यक्त्वा जवेन वेगेन ययौ तदुत्तारणार्थं जगाम। न चैतेन कृष्णादपि दुग्धे प्रीतिराधिकेति शङ्क्यम्। कृष्णार्थमेव तत्पयः आवर्त्तितं तस्याधःपाते कृष्णस्यैव भोजने विलम्बसम्भावनात् प्रेमाधिक्यमेव कृष्णे ॥ ५ ॥ स जातकोप इति ॥ जातः कोपो यस्य सः कृष्णः कोपेन स्फुरितमरुणमधरं दद्भिः संदश्य तथा दृषदश्मना दृषत्संबन्धिकुट्टनपाषाणेन शिलापुत्रेण दधिमण्डः तक्रं तदाधारभूतं भाजनं दधिमन्थभाजनमिति पाठान्तरम्। निःशब्दं छिद्रेण तत्तले भित्त्वा मृषादुःखासंभवात् मिथ्यैवाश्रूणि यस्य तथाभूतोऽन्तरं गृहमध्यं गतश्च सन् रहः एकान्ते हैयंगवं नवनीतं जघास अभक्षयत् ॥ ६ ॥ उत्तार्येति ॥ ततश्च गोपी यशोदा सुशृतं सुपक्वं पयः उत्तार्य चुल्लीतः अवतार्य पुनर्दधिमन्थनस्थानं प्रविश्य तत्र च दध्यमत्रकं दधिभाजनं भग्नं संदृश्य तच्च स्वसुतस्य कर्म विलोक्य ज्ञात्वा जहास। तत्र च तं कृष्णमपश्यती अन्वेषयामास इति शेषः। नुमभाव आर्षः ॥ ७ ॥ अथ किङ्किणीशब्दादिना कृष्णं गृहान्तर्गतमनुमाय यशोदा यावत्तत्र यियासति तावत्पक्षद्वारेण निःसृत्य कृष्णः प्राङ्गणं जगाम। यशोदा चान्तर्गृहात्तं निरीक्ष्य प्राङ्गणं गता तद्वृत्तमाह--उलूखलेति। नवनीतं गृहान्निष्कास्य बहिर्गत्वा उलूखलाङ्घ्रेः परिवर्तितस्योलूखलस्योपरि व्यवस्थितं शिचि शिक्ये स्थितं हैयंगवं नवनीतं कामं यथेष्टं मर्काय वानराय ददतं चौर्येण विशङ्किते चञ्चले यशोदागमनानुसन्धानपरे ईक्षणे यस्य तं सुतं दूरतो निरीक्ष्य शनैर्यथा पादाघातजनितशब्दं स न शृणुयात्तथा पश्चात् पृष्ठत आगमत् ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तमिति। अंकमुत्संगं प्रति आरूढं सुतं स्तनमपाययत्। कथंभूता सती सस्मितं यथा भवति तथेक्षती। अधिश्रिते चुल्लीपरिस्थापितभांडस्थे पयसि उत्सिच्यमाने बहुतापेनोद्रिच्यमाने सति ॥ ५ ॥ मृषाश्रुः सन् संजातकोपेन स्फुरितमरुणा

धरं दद्भिर्दंतैः संदश्य दृषदश्मना पाषाणशकलेन दधिपात्रं भित्वा अंतरं गतः गृहमध्यं प्राप्तः सन् रहो निर्जनस्थाने हैयंगवं नवनीतं जघास भक्षितवान् हैयंगवीनमितिवक्तव्ये हैयंगवमित्युच्चारणमार्षम् ॥ ६ ॥ सुश्रृतं सुतप्तत्वादुत्सिच्यमानं पयः उत्तार्य पुनः दधि विलोडनस्थलं प्रविश्य दधिभांडं भग्नं संदृश्य दृष्ट्वा कृष्णस्य तत्कर्म विलोक्य ॥ ७ ॥ उलूखलाङ्घ्रेः विपरीतस्थापितस्योलूखलस्योपरि स्थितं शिचि स्थितं मर्काय मर्कटवृंदाय कामं तृप्तिपर्यंतं ददतं चौर्येण चौर्यकर्मणा विशंकिते चपले ईक्षणे यस्य तं सुतं निरीक्ष्य ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ अङ्कमुत्सङ्गं, आरूढं, तं दधिमन्थननिषेधकारकं कृष्णं, सा यशोदा सस्मितं स्मितेन सहितं, सुतस्य मुखं, ईक्षती ईक्षमाणा सती, स्नेहस्नुतं स्तनं, अपाययत्। तदा तु, अधिश्रिते चुल्लीमारोपिते, पयसि क्षीरे, उत्सिच्यमाने गाढाग्निसंपर्काद्बहिः पात्रतो निर्गच्छति सति, अतृप्तं स्तन्यपानादतृप्तं पुत्रं उत्सृज्य, जवेन ययौ जलप्रक्षेपादिना क्षीरतापं शमयितुं जगाम ॥ ५ ॥ स इति ॥ स कृष्णः, जातः कोपो यस्य सः, स्फुरितारुणाधरं चलायमानमरुणमधरोष्ठं, दद्भिर्दन्तैः, संदश्य, मृषा अश्रूणि यस्य तथाभूतः सन्, दृषदश्मनाऽल्पाश्मना, दधिमण्डभाजनं, भित्त्वा निर्भिद्य, अन्तरं गृहमध्यप्रदेशं, गतः। तत्रापि रह एकान्तप्रदेशं गतः संश्च, हैयंगवं नवनीतं, जघासाभक्षयत् ॥ ६ ॥ उत्तार्येति ॥ तदा गोपी यशोदा, सुश्रृतं सुतप्तं, पयो दुग्धं, उत्तार्य चुल्ल्या अवरोप्य, पुनः प्रविश्य दधिमन्थनस्थानमाविश्य च, दध्यमत्रकं दधिमण्डभाजनं, भग्नं संदृश्य, तत्पात्रभञ्जनं, स्वसुतस्य कर्म विलोक्य विचार्य, तं पुत्रमपि, तत्र न पश्यती सती, जहास ॥ ७ ॥ उलूखलेति ॥ तमन्वेषयन्ती यशोदेति शेषः। उलूखलाङ्घ्रेः उपरि व्यवस्थितं, अधोमुखविन्यस्तोलूखलस्योपरिभागे सम्यक् स्थितमित्यर्थः। मर्काय मर्कटाय, मर्को मनसि वायौ च तोके मार्जारकीटयोः' इति कोशात्, मार्जारायेति वा। नवनीताशनविधानार्थमागतायेति शेषः। शिचि शिक्ये, स्थितं, हैयंगवं नवनीतं, कामं यथेष्टं, ददतं प्रयच्छन्तं, चौर्येण चौर्यकर्मणा विशङ्किते चञ्चले ईक्षणे नयने यस्य तं सुतं कृष्णं निरीक्ष्य, पश्चात्तस्य पृष्ठतः, शनै आगमञ्जगाम ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तमङ्कमिति : १०.९.५.

मत्स्तन्यपानाय ममाङ्कमध्यारूढस्त्वसौ मत्सुकृतेन बालः।
ज्ञात्वेति सानन्दमनास्तदानीं स्नेहस्नुताऽऽसीत् किमु नन्दपत्नी ॥ ११ ॥
दातुं शक्यं स्तन्यमस्यान्यकाले दुग्धं त्वेतद्रक्षितुं नाण्वपीति।
आलोच्यैवोत्सृज्य तं दुग्धमागात् संसारध्वव्यक्तधीर्युक्तमेतत् ॥ १२ ॥
निरर्थकव्ययो नैव सह्योऽल्पस्यापि वस्तुनः। संसारासक्तचित्तानां दुग्धदृङ्मानमत्र सा ॥ १३ ॥
महतोऽपि सतस्तिरस्कृतिं जनयत्यल्पतरादरा मतिः। स्फुटमेतदभूदसौ यतो व्यजहादच्युतमल्पदुग्धधीः ॥ १४ ॥

उत्सिच्यमाने पयसीति :

यन्नामस्मृतिरप्यलं विधुनुते सन्तापमस्य प्रभोरग्रे तापमुपैमि तद्धिगिति मां मत्वाऽग्नियाने पयः।
उद्युक्तं भवतीत्यवेक्ष्य हरिणा सर्वेश्वरेणैव तत् सत्यानन्दयशोदयेक्षितमिहाकारीति मन्यामहे ॥ १५ ॥
अन्यथा कृष्णवक्त्राब्जदर्शनामृतपानकृत्। तं विहाय कथं गच्छेत् क्षुद्रप्रस्थपयोमतिः ॥ १६ ॥ (युग्मम्)
उन्मार्गवर्तनेन हि पररसभङ्गो मयाऽधुनाऽकारि। धिङ् मामिति किं त्रपया पयस्तदासीदधोमुखं सद्यः ॥ १७ ॥

सञ्जातकोप इति : १०.९.६.

सोऽहंभावतयापि योऽहमृषिभिः प्राप्यो न हार्दास्पदं सोऽहंभावमवेक्ष्य लक्षितगतिर्यस्यास्मि जातः स चेत्।
मामुत्सृज्य रसात्मकं बतरसे क्षुद्रे भवेत्सक्तधीः, तत्क्रुद्धो न कथं भवेयमिति किं प्राबोधि कोपच्छलात् ॥ १८ ॥
यन्मामङ्कगतं पिबन्तमपि च स्तन्यं विहाय प्रसूः, मच्चित्ताऽप्यधुना ययावदयवन्नागो लवोऽस्या इह।
किं त्वत्राधरसङ्गतेः फलमिदं मत्वाद्विजाग्र्यैस्तदा चक्रे शिक्षितमच्युतस्तमधरं शिक्षेरिता यद् द्विजात् ॥ १९ ॥
धराश्रितमिहाधुना यदि करोमि मे रुट्फल गमिष्यति ततो न किं विफलभावमात्मव्रतम्।
धरा क्षितिरियं जनन्यपि तथेति किं वा स तत् सुखार्पणधृतव्रतोऽकृत किलाधरैकाश्रितम् ॥ २० ॥
वदन्ति निगमाः सर्वेऽप्येकं मामण्डभाजनम्। परमेतत्कुतो यातमित्यभाङ्क्षीद्रुषा नु तत् ॥ २१ ॥
परमार्तिचयान्निहन्ति यस्य स्मरणं तस्य कथं ममाग्र एव। कलशः परमार्तिको हि तिष्ठेदिति मुक्तिं गमितो नु भङ्गदम्भात् ॥२२॥
यशोदयाविहीनस्य पुंसः स्यादीदृगेव हि। कृत्यजातमिति व्यक्तं कृष्णेनादर्शि तच्छलात् ॥ २३ ॥

कामी दैन्यमुपैति लोभितमतिर्नैर्घृण्यमप्यात्मजे क्रोधाक्तः सदसद्विवेकविधुरो दुष्कृत्यमालम्बते ।
तस्मादात्महितैषिणा त्रयमिदं संत्याज्यमेवावनाविल्युट्टङ्कितमच्युतेन चरिताद्गीतावदस्मात्त्रिकात् ॥ २४ ॥
स्तन्यदैन्यं हि कामेन लोभात् पुत्रेऽप्यनादरः । भाण्डभङ्गो रुषैवाऽऽसीदिति ज्ञेयं स्फुटं त्रयम् ॥ २५ ॥ (युग्मम्)
विपुलेष्वपि सत्सु रसेष्वन्वेष्टव्यो मनीषिणा सारः । संसारोऽन्वर्थः स्यात्तदेति नवनीतसङ्ग्रहाद् ध्वनितम् ॥ २६ ॥

उत्तार्येति : १०.९.७.

निरर्थकं दुग्धमिदं प्रयातीत्यासं सयत्नाऽहमिवावनेऽस्य । ततोऽधिकोऽभूद् व्यय एष चित्रामालक्ष्य सा दैवगतिं जहास ॥ २७ ॥
लोकेषु पुत्रनिवहो निजमातृवस्तुजातावनेऽनलसधीः प्रतिभात्यहन्तु ।
पुत्रेण चानुभवमीदृश मापितेति साश्चर्यवृत्ति सहसा किमसौ जहास ॥ २८ ॥

उलूखलाङ्घ्रेरिति : १०.९.८.

यथा खलोऽङ्घ्रिस्थिततः प्रयाति तथा न गर्वाद्वशतामिति ज्ञः ।
ऊरीचकारेप्सितधीः स युक्तमुलूखलाङ्घ्रिस्थितिमप्यनन्तः ॥ २९ ॥
न हीयते वदान्यस्य सच्छीलं खलसङ्गतः । उलूखलकृतावासोऽप्यौदार्यान्न च्युतोऽच्युतः ॥ ३० ॥
दानमेव जने यावद्रोषदोषाघमोषकम् । भवतीत्यच्युतो युक्तं तद्दानं तत्कृतेऽकरोत् ॥ ३१ ॥
यद्यप्यलभ्यममृतं स्वस्थितमवनौ तथापि मां भजताम् । सुलभं कुर्यामिति किं कपये नवनीतमुपरिगतमादात् ॥ ३२ ॥

कृष्णप्रिया

पुनः लालन माताजी की गोद में आरूढ हो गये । माता मुस्कराते हुए लालन के मुखकमल को देखती हुई प्रेम से अपना स्तन पिलाने लगीं जिससे दूध चू रहा था किन्तु अभी भगवान् दूध पीकर अघाये न थे और बीच में ही चूल्हे पर रखे दूध में उफान आ गया और पात्र में से गिरने लगा इसलिये माता यशोदाजी शीघ्र ही लालन को गोद से उतार दूध उतारने दौड़ गयी ॥ ५ ॥ माताजी के इस व्यवहार से भगवान् को कोप हो आया उनके रक्तवर्ण होठ कड़कने लगे । उन्हें दाँतों से दबाकर पत्थर के टुकड़े प्रहार कर दहीं की भरही फोड़ डाली और झूठ मूठ रोने लगे । पुनः घर के भीतर घुस एकान्त में मक्खन खाने लगे ॥ ६ ॥ औटे दूध को उतार कर माता यशोदा जब लौट आई तो भरही फूटी पाया । यह सब हाल देख माता मुस्कराई और समझ गयी कि यह सब खुराफात मेरे लालन ही की है और वहाँ लालन को न देख ढूंढने लगी ॥ ७ ॥ लालन को ढूंढती हुई जननी जब भीतर गयी तब उन्होंने देखा कि घर के भीतर से छींके पर रखी गई मटकी से मक्खन निकाल निकाल कर बाहर ओखरी उलटकर उस पर खड़े होकर बन्दरों को बाँट रहा है और अपनी चोरी खुल न जाय इसलिए चौकन्ने होकर चारों ओर ताकते जाते हैं और यह देखकर महारानी यशोदा पीछे से धीरे धीरे उनके पास जा पहुँची ॥ ८ ॥

तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोऽवरुह्यापससार[1] भीतवत् ।
गोप्यन्वधावन्न[2] यमाप योगिनां क्षमं प्रवेष्टुं तपसेरितं मनः ॥ ९ ॥
अन्वञ्चमाना जननी बृहच्चलच्छ्रोणीभराक्रान्तगतिः सुमध्यमा ।
जवेन [3]विस्रंसितकेशबन्धनच्युतप्रसूनानुगतिः परामृशत् ॥ १० ॥
कृतागसं तं प्ररुदन्तमक्षिणी कषन्तमञ्जन्मषिणी स्वपाणिना ।
उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयन्त्यवागुरत् ॥ ११ ॥
त्यक्त्वा यष्टिं सुतं भीतं विज्ञायार्भकवत्सला । इयेष किल तं बद्धुं दाम्नातद्वीर्यकोविदा ॥ १२ ॥

कर्दमक्षमा

अन्वयः—आत्तयष्टिं तां प्रसमीक्ष्य सत्वरः ततः अवरुह्य भीतवत् अपससार तपसा ईरितं प्रवेष्टुं क्षमं योगिनां मन यं न आप गोपी अन्वधावत् ॥ ९ ॥ अन्वञ्चमाना बृहत् चलत् श्रोणी भराक्रान्तगतिः सुमध्यमा जवेन विस्रंसितकेशबन्धन-च्युतप्रसूनानुगतिः जननी परामृशत् ॥ १० ॥ प्ररुदन्तं कृतागसं अञ्जन् मषिणी अक्षिणी स्वपाणिना कषन्तं भयविह्वले क्षणं उद्वीक्षमाणं तं हस्ते गृहीत्वा भिषयन्ती अवागुरत् ॥ ११ ॥ सुतं भीतं विज्ञाय अर्भकवत्सला यष्टिं त्यक्त्वा अतद्वीर्यकोविदा दाम्ना तं बद्धुं किल इयेष ॥ १२ ॥

---

[1] रुह्योभिससार–विज. । [2] नयमास–वीर. विज. । [3] विभ्रंशित–विज. ; विस्रंसित–हृ. लि. टी. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तपसा एकाग्र्येणेरितं तदाकारतां नीतमत एव प्रवेष्टुं क्षमं योग्यं योगिनां मनोऽपि यं नाप तम् । अथ वा अन्वधावत्केवलं न त्वाप । योगिनां मनोऽपि यं प्रवेष्टुं न क्षममिति ॥ ९ ॥ अन्वंचमाना एवं कृष्णमनुगच्छंती । बृहत्योश्चलयोः श्रोण्योर्भरेणाक्रांता स्तब्धा गतिर्यस्याः सा । विस्रंसितात्केशबंधनाच्च्युतैः प्रसूनैरनुगतिरनुगमनं यस्याः सा । यद्वा जवेन कंपितात्केशबंधात्पुरः पतितानि प्रसूनान्यनुभयमुत्पादयन्ती पश्चाद्गतिर्यस्याः सा परामृशद्धृतवती ॥ १० ॥ अंजन्मषिणी अंजंती सर्वतः प्रसरंती मषी ययोस्ते अक्षिणी स्वपाणिना कषंतं संमर्दयंतम् । भिषयंती ह्रस्वश्छांदसः । भीषयंती भयमुत्पादयन्ती अवागुरदभर्त्सयत् ॥ ११ ॥ इयेष ऐच्छत । अतद्वीर्यकोविदा तत्प्रभावानभिज्ञा ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आत्तयष्टिं स्वीकृतयष्टिकाम् । तत उलूखलांघ्रेः । भीतवदिति । न हि तस्य कुतोपि भयमपि तु तस्यैव "भीषास्माद्वातः पवते:" इत्यादिश्रुतेः । सर्वभयहेतुत्वमाह । अपससार धावनं चकार । मनोगोचरस्य हस्तादिना ग्रहणं सर्वथाऽसंभावीत्यत आह—अथवेति । कुतो नापेत्याकांक्षायामाह—यतो हेतोः "नैतन्मनो विशति" इत्यादिवक्ष्यमाणत्वात् । यं प्रवेष्टुं यत्र प्रवेशं कर्तुं विषयीकर्तुम् । "यतो वाचो निवर्त्तंते अप्राप्य मनसा सह" इति श्रुतेः । यद्वा—साहजिकमातृस्नेहभरज्ञानेन तत्त्वतोंतर्भयाभावात् । यद्वा—भीतवदिति । मतुबन्तं भययुक्तं यथा स्यात्तथा दुद्राव 'भयभावनया स्थितस्य' इति कुंत्युक्तेः । गोपी यशोदा । योगः समाधिस्तद्वतां मनस्तपसा ज्ञानेनेरितमपि प्रवेष्टुं ब्रह्मणि लीनीभवितुं क्षममपि यं नाप 'नायं सुखापः' इत्यग्रे वक्ष्यमाणत्वात् ॥ ९ ॥ प्रसूनैस्सहानुगमनं सर्वथाऽयोग्यं प्रसूनानां जडत्वादतोऽर्थांतरमाह—यद्वेति ॥ १० ॥ मषी दीपकज्जलम् "मषी लेखनद्रव्ये दीपकज्जलसुवीरयोः" इति धरणिः । यद्वा–अवागुरत्ताडनार्थं हस्तमुद्धृतवती न केवलं योगिप्रापं धृतवत्येव किं तु ब्रह्मादिभिरनिशं स्तूयमानं तमभर्त्सयदपि । महाकालयमादीनामपि भयहेतुं यष्ट्याताडयच्चेत्याह—कृतागसमिति । यद्वाऽवागुरत् । भो अशांतप्रकृते वानरबंधो मंथनीस्फोटक अद्य नवनीतादिकं कुतः प्राश्नासि तथा बध्नाम्यद्य यथा बालैः खेलितुं नवनीतमपहर्तुं च न प्रभविष्यसि । इदानीं यष्टिताडनात्किंबिभेषि इति तर्जयंती यष्ट्युत्थानेन ताडनोद्यमं चकार न तु तताड 'गुरी—उद्यमे' ॥११॥ मातर्मां मा ताडयेत्युक्ते ताडने यदि विशेषभीस्ते तर्हि किमद्य दधिभाण्डमभांक्षीः । मातरेवमथनैव करिष्ये पातय करायष्टिमिति पुत्रोक्तिकातर्यविक्लवमना हंत कदाचिदयं मन्युना वनं प्रविशेदिति शंकया तन्निरोधार्थमुपायं निश्चिकायेत्याह—त्यक्तेति । तस्य कृष्णस्य वीर्यं तद्वीर्यं तत्र कोविदा ज्ञानवती तद्वीर्यकोविदा तद्भिन्ना तथा । यद्वा—तद्वीर्यकोविदा तत्त्वापल्लभरदुर्वारताद्यभिज्ञा ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रकर्षेण सम्यगीक्षित्वेति स्वताडनार्थं तस्या यष्टिग्रहणासम्भवात् प्राक् कदापि तद्दर्शनाच्च तन्निर्द्धारार्थम् अतः सत्वरः सन् अपससार मातृवञ्चनाय यमलार्जुनाख्यचैत्यवृक्षसन्निहितनानाजनता सदननिजपुरपुरोद्वारं प्रत्येवेति ज्ञेयं भीतवदिति सहजमातृस्नेहभरज्ञानेन तत्वतोऽन्तर्भयाभावात् यद्वा भीतो ऽन्यो यथा तथैवेत्यर्थः । एषा मातरि बाल्यादिलीलामाधुरी माता तु तस्मिन् दिने पुरोद्वारमपि निर्गतजनं ज्ञात्वाऽन्वधावदेवेत्याह योगः समाधिः तद्वतां मनः प्रवेष्टुं ब्रह्मणि श्रीभगवत एवाविर्भावान्तरे वा लीनीभवितुं क्षमं योग्यमपि तपसा ऐकाग्र्येण ईरितं तदुन्मुखत्वाय प्रेरितमपि यं नाप नास्पृशदपीत्यर्थः । नायमित्यादौ स्पष्टीभावित्वात् तम् अन्वधावत् पदे पदे प्राप्यमानमिवाधावत् अहो अस्तु तावदस्याः सन्ततमङ्कशयनादिसमयसौभाग्यं पलायनसमयसौभाग्यमपि परमयोगिनां मनसोऽप्यगोचर इति भावः । साक्षाच्च धारणात्तस्याः सर्वभक्तेभ्योऽप्यधिको भाग्यभरो दर्शितः ॥ ९ ॥ बृहदित्यादिरूपापि जवेन परामृशत् तं पृष्ठतो धृतवती स्नेहमयेनेति शेषः । यतो जननी ॥ १० ॥ कृतम् आगः येन तम् अतस्ताडनमाशङ्क्य तत्परिहारार्थं प्रकर्षेण रुदन्तम् अत एव अञ्जन्मषिणी अश्रुभिः प्रसरत् कज्जले अक्षिणी वाञ्छ्यमानमपि मातृहस्तेनाश्रुमार्जनमपराधादप्राप्य स्वस्यैव पाणिना कषन्तं सम्मर्दयन्तं बहुलाश्रुनिर्गमार्थं किंवा अस्रापसारणार्थं मार्जयन्तं किञ्चित् भयेन विह्वले ईक्षणे नेत्रे यस्य तं किंवा तथा रुदन्तम् उच्चैर्वीक्षमाणा अवलोकयन्त्यापि पुनस्तादृशविकर्माभ्याससङ्कोचनेन सुप्रकृततपोदानार्थं भिषयन्ती भाययन्ती भाययितुम् अवागुरत् अवागुरत 'गुरीउद्यमे' हे अशान्त रोषक्रान्त लुब्धप्रकृते वानरप्रिय गृहलुण्ठाक इतः प्रभृतिनवनीतादिकं किञ्चिन्न दास्ये बद्ध्वा गृहान्तर्द्धास्ये यथा कुत्रापि गत्वा क्रीडितुं न शक्तोषि क्रीडनकानि सहचरबालकादींश्च द्रष्टुमपि न शक्ष्यसीत्यादिवाक्येन तथा यष्ट्युत्थापनप्रायादिना ताडनोद्यममिव कृतवतीत्यर्थः न च ताडयामास उद्वीक्ष्यमाणेति सभयत्वपाठे भयविह्वलेक्षणं यथा स्यात्तथा उच्चैरूर्ध्वमुखतया अवलोक्यमाना इति तस्य कातर्यमुक्तम् अतो ऽवागुरदेव यद्वा भयेन विह्वले कम्पमाने हस्ते गृहीत्वा क्षणमवागुरत अन्यत्समानम् ॥ ११ ॥ यतो ऽर्भकमात्रे वत्सला किमुत स्वार्भके तस्मिन् इत्यर्थः । अतो ऽतद्वीर्यकोविदा तत्प्रभावानुसन्धान-

रहिता स्नेहभराक्रान्तचित्तत्वेनान्यास्फूर्त्तेः यद्वा तद्वीर्यकोविदा तच्चापलभरदुर्वारताद्यभिज्ञा अतस्तं—बद्धुमेवैच्छत् किल प्रसिद्धौ निश्चये वा ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रकर्षेण सम्यगीक्षित्वेति स्व-ताडनार्थं तस्या यष्टिग्रहणासम्भवात्, प्राक् कदापि तददर्शनाच्च । तन्निद्धारार्थमतः सत्वरो वेगवान् सन् तत उलूखलाङ्घ्रेरवरुह्यापससार धावित्वा पलायतेत्यर्थः । भीतवदिति सहजमातृस्नेहभरज्ञानेन तत्त्वतोऽन्तर्भयाभावात्; यद्वा, भीतोऽन्यो यथा तथैवेत्यर्थः । एषा मातरि वात्सल्यादि लीला-माधुरी, योगः समाधिस्तत्कृतां मनः प्रवेष्टुं ब्रह्मणि लीनीभवितुं क्षमं योग्यमपि नाप नास्पृशदपीत्यर्थः, तं गोपी श्रीयशोदान्वधावत् धावन्तं धात्रनेन साक्षात् पश्चाद् ययाविति तस्याः सर्वभक्तेभ्योऽप्यधिको भाग्यभरो दर्शितः ॥ ९ ॥ बृहच्चलच्छ्रोणीभराक्रान्तगतिरपि जवेन धावनवेगेन तं परामृशत् पृष्ठतो धृतवती, यतो जननी । जवेनेति वस्तुतः स्नेहोद्रेकेणैवेत्यर्थः ॥ १० ॥ कृतमागो दधिभाजन भेदन-नवनीत-चौर्य्यादिलक्षणं येन तमतस्ताडनमाशंक्य तत्परिहारार्थं प्रकर्षेण रुदन्तमतएवाञ्जन्मषिण्यश्रुभिः प्रसरत्कज्जले स्वतः स्फुरत् कज्जले वाक्षिणी वाञ्छमानमपि मातृहस्तेनाश्रुमार्ज्जनमपराधादप्राप्य स्वस्यैव पाणिना कषन्तं संमर्दयन्तं बहुलाश्रुनिर्गमार्थम्, किंवा, अश्रापसारणार्थं मार्ज्जयन्तम् । किञ्च, भयेन विह्वले चञ्चले ईक्षणे नेत्रे, किंवा विह्वलमाकुलं निरीक्षणं यस्य तम्; किंवा भयविह्वलेक्षणं यथा स्यात्तथा रुदन्तमुच्चैर्वीक्षमाणावलोकयन्त्यपि पुनस्तादृशविकर्म्मानाचरणार्थं भीषयन्ती—'इतः प्रभृति नवनीतादिकं किञ्चिन्न दास्ये, त्वां बद्ध्वा गृहान्तर्द्धास्ये यथा कुत्रापि गत्वा क्रीडितुं न शक्नोषि, क्रीडनकानि सहचरबालकादींश्च द्रष्टुमपि न शक्ष्यसि' इत्यादिवाक्येन; तथा यष्ट्युत्थापनादिना च तस्य भयमुत्पादन्त्यवागुरत्, 'हे अशान्त ! रोषाकान्त ! लुब्धप्रकृते वानरप्रिय ! लुण्टाक' इत्यादिनिर्भर्त्सनमेव सह वात्सल्यभरेणाकरोत्, न च ताडयामास, यत्वपाठे भयविह्वलेक्षणं यथा स्यात्तथोच्चैरूर्द्धमुखतयावलोक्यमानेति तस्य कातर्य्यमुक्तमतोऽवागुरदेव, यद्वा भयेन कम्पमाने हस्ते गृहीत्वा क्षणमवागुरत् । अ यत् समानम् ॥ ११ ॥ यतोऽर्भकवत्सला, अतोऽतद्वीर्य्यकोविदा तत् प्रभावानुसन्धानरहिता स्नेहभराक्रान्तचित्तत्वेनान्यास्फूर्त्तेः, यद्वा, तद्वीर्य्यकोविदापि बन्धुमियेष, यद्वा, तद्वीर्य्यकोविदा तच्चापलभरदुर्वारिताद्यभिज्ञा, अतस्तं बन्धुमैच्छत् । पक्षद्वयेऽपि हेतुरर्भकवत्सला, यद्वा, तस्य वीर्य्यं बलं तस्मिन् कोविदा 'महाबलिनमेतमहं बन्धुं न शक्नुयाम्' इत्येतद्वितर्कयन्तीत्यर्थः । तथापि बन्धुमियेष, कुतः ? अर्भकवत्सला मातृस्नेहेनात्मनो बालकबुद्ध्या स्नेहेन ततोऽप्यधिकबलवत्ताभिमानात्, किंवा, वात्सल्येन तद्धितार्थं तदतिचापल्यदोषनिरसनव्यग्रतया किञ्चिदन्याननुसन्धानात् । किल प्रसिद्धौ निश्चये वा ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

न यमाप तपसेरितं योगिनां मनः यं प्रवेष्टुं न क्षममासीदित्यर्थः ॥ ९ ॥ अन्वञ्चमाना अनुगच्छन्ति परामृशत् ॥१०॥ पस्पर्श अञ्जन्मषिणी अञ्जितकज्जले अवागुरत् उद्यतहस्ता अभूत् ॥ ११ ॥ अतद्वीर्यकोविदेति पदम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तामागतामात्ता उद्धृता यष्टिर्यया तां प्रसमीक्ष्य त्वरया सहितः तत उलूखलाङ्घ्रेरवरुह्य भीतवदपससार पलायितवान् तदा सा तमपसरन्तं सुतमन्वधावत् "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इत्युक्तरीत्या वाङ्मनसापरिच्छेद्यवैभवं पद्भ्यामन्वधावदित्येतदहो विचित्रमित्यभिप्रायेण विशिनष्टि यं श्रीकृष्णं योगिनां मनोऽपि प्रवेष्टुं न क्षमम् असमर्थमास तमन्वधावत् कथंभूतं मनः तपसा ईरितं प्रवणीकृतम् ॥९॥ अन्वञ्चमानाऽनुधावन्ती बृहत्योः श्रोण्योः भरेणाक्रान्ता स्तब्धा गतिर्यस्याः शोभनो मध्यमः मध्यप्रदेशो यस्याः जवेन हेतुना विस्रंसितात्केशबन्धनाच्च्युतैः प्रसूनैरनुगतिरनुगमनं यस्याः सा जननी परामृशत् पस्पर्श जग्राहेत्यर्थः ॥ १० ॥ तं हस्ते गृहीत्वा भीषयन्ती भयं प्रापयन्ती अवागुरत्ताडयितुमुद्यतहस्ताऽभूत् कथम्भूतं कृतमागोऽपराधो येन तमञ्जन्ती सर्वतः प्रसरन्ती मषिः कज्जलं ययोस्ते अक्षिणी स्वपाणिना कषन्तं मर्दयन्तं भयेन विह्वले चकिते ईक्षणे यस्य तम् ॥ ११ ॥ तं तदा अवगुरन्त्यपि सा सुतं भीतं विज्ञायार्भकवत्सला अत एव यष्टिं त्यक्त्वा तत्प्रभावानभिज्ञा दाम्ना रज्ज्वा तं बद्धुमियेषैच्छत् खलु ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अभिससार गमनं प्रारब्धवानित्यर्थः । गोप्या कृष्णानुधावनं न तत्त्वबुद्ध्या कृतं किन्तु भ्रान्तिबुद्ध्येत्याशयेनाह—तामिति । तपसेरितं प्रेरितं क्षमं समर्थम् ॥ ९ ॥ अन्वञ्चमाना जवं विहाय शनैरनुगच्छती "अञ्चु गतिपूजनयोः" इति धातुः हंसावद्गमनवतीत्यर्थः । शनैर्गमने निमित्तमाह, बृहदिति । बृहत्योः स्थूलयोश्चलत्योः श्रोण्योर्भरेणाक्रान्ता स्तब्धा गतिर्यस्याः

सा तथा विभ्रंशितात् विस्रस्तात् केशबन्धात् च्युतानामपि प्रसूनानाम् अनुगतिर्यस्याः सा तथा परामृशत् पस्पर्श जग्राह वा ॥ १० ॥ अञ्जन्मषिणी अञ्जिता मषिः अञ्जनं ययोस्ते अञ्जन्मषिणी अक्षिणी नेत्रे कषन्तं निष्पीड्य कलुषयन्तं भीषयन्ती अवागुरत् ताडनार्थं हस्तमुद्धृतवती ॥ ११ ॥ दाम्ना वत्सपाशेन अतद्वीर्यकोविदा कृष्णमाहात्म्यमजानती ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तामिति अपसरणं मातृवञ्चनार्थं पुरोद्वारायैव ज्ञेयं प्रवेष्टुं ब्रह्मणि लीनतां प्राप्तुं तपसा प्रेरितमपि यत् यं नाप ॥ ९-१० ॥ भीषयन्ती भाययितुमित्यर्थः । अवागुरत् अवागुरत भर्त्सनादिना ताडनोद्यममिव कृतवती ॥ ११-१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुत्रभीषणार्थमात्तयष्टिं भीतवदिति साहजिकमातृस्नेहभरज्ञानेन तत्त्वतोऽन्तर्भयाभावात् यद्वा भीतवदिति मतुबन्तं भययुक्तं यथा स्यात्तथाऽपससार दुद्रावेत्यर्थः । "भयभावनया स्थितस्य" इति कुन्त्युक्तेः । गोपी यशोदा योगः समाधिस्तद्गतां मनः तपसा ज्ञानेनेरितमपि प्रवेष्टुं ब्रह्मणि लीनीभवितुं क्षममपि यं नाप नायं सुखाप इत्यादौ स्पष्टीभावित्वात् ॥ ९ ॥ न च योगिदुष्प्रापं तमनुधावनेन सा न प्रापेति वाच्यमित्याह—अन्वञ्चेति । विस्रंसितात् केशबन्धात् च्युतैः प्रसूनैरनुगतिरनुगमनं यस्याः सा परा पृष्ठतोऽमृशत् तं धृतवती ॥ १० ॥ योगिदुष्प्रापं तं न केवलं धृतवत्येव किन्तु ब्रह्मरुद्रादिभिरनिशं स्तूयमानं तमभर्त्सयदपि महाकालयमादीनामपि भयहेतुं तं यष्टिमात्रेणाप्यभाययदपीत्याह—कृतागसमिति । अञ्जन्मषिणी अञ्जन्ती सर्वतः प्रसरन्ती मषी ययोस्ते अक्षिणी स्वपाणिना स्ववामपाणिपृष्ठेनैव सम्मर्दयन्तं दक्षिणपाणेर्मातृगृहीतत्वात् भिषयन्ती यष्ट्या भाययन्ती ह्रस्वसुगावार्षौ यद्वा भीषयमाणा तदा ह्रस्वपरस्मैपदे आर्षे अवागुरत भो अशान्तप्रकृते ! वानरबन्धो ! मन्थनीस्फोटक ! अद्य नवनीतादिकं कुतः प्राप्स्यसि तथा बध्नाम्यद्य यथा सहचरबालकैः सह खेलितुं नवनीतमपहर्तुं च न प्रभविष्यसि इदानीं यष्टिताडनात् किं बिभेषीति तर्जयन्ती यष्ट्युत्थानेन ताडनोद्यमं चकार नतु तताड "गुरी उद्यमे" ॥ ११ ॥ मातर्मा मा ताडयेत्युक्ते "ताडने यदि तवातिशया भीस्तत् किमद्य दधिभाण्डमभाङ्क्षीः । मातरेवमथ नैव करिष्ये पातय स्वकरतो बत यष्टिम्" इति पुत्रोक्तिकातर्य्यविक्लवमना हन्त कदाचिदयं मन्युना वनं प्रविशेदिति शङ्कया तन्निरोधार्थमुपायं निश्चिकायेत्याह—त्यक्त्वेति । तद्वीर्य्यस्य सर्वव्यापकत्वलक्षणस्य तदैश्वर्यस्य न कोविदा शुद्धतन्माधुर्य्यैकनिमग्नत्वादिति भावः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आत्ता यष्टिर्यया तां प्रसमीक्ष्य सत्वरः तत उलूखलाङ्घ्रेः अवरुह्य भीतवत् अपससार पलायितवान् गोपी यशोदापि तमपसरन्तमन्वधावत् यं श्रीकृष्णं तपसा शास्त्रीयेणालोचनेन ईरितं तत्प्रवणीकृतमत एव क्षमं योग्यं योगीनां मनः प्रवेष्टुं न क्षमम् ॥ ९ ॥ जनन्यपि अन्वञ्चमाना अनुगच्छन्ती बृहत्योः श्रोण्योर्भरेण भारेणाक्रान्ता मन्थरा गतिर्यस्याः सा जवेन विस्रंसितात् केशबन्धनाच्च्युतैः प्रसूनैरनुगतिरनुगमनं यस्याः सा परामृशत् जग्राह ॥ १० ॥ कृतागसं कृतापराधम् अञ्जन्ती प्रसरन्ती मषी ययोस्ते अञ्जन्मषिणी अक्षिणी स्वपाणिना कषन्तं मर्दयन्तं हस्ते गृहीत्वा भिषयन्ती अवागुरदभर्त्सयत् ॥ ११ ॥ अतद्वीर्यकोविदा उक्तप्रकारया भगवदिच्छयैव तत्प्रभावानभिज्ञा बद्धुमियेष ऐच्छत् ॥ १२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ततः किमभूत्तदाह ताडनार्थमात्तयष्टिं गृहीतातिसूक्ष्मरत्नचित्रलघुलकुटिकां तां मातरं प्रसमीक्ष्य ताडयेदेवायेति विज्ञाय सत्वरस्तत उलूखलाङ्घ्रेरवरुह्यापससार पलायाञ्चक्रे भीतं भयं यत्र विद्यते तद्यथा भवं तथा भयभावनया स्थितस्येति कुन्तीवाक्यात् गोपी राज्ञी तन्माता तमन्वधावत् योगिनां मनो यं नाप कीदृक् तपसा समाधिपर्यन्तेनेरितं परिशोधितं प्रवेष्टुं क्षमं योग्यमपि तत्प्रसादेन तन्मनस्तस्मिन् प्रविशत्वन्तु स्वसामर्थ्येनेतिभावः ॥ ९ ॥ न च सा योगिमनोऽगम्यं तमनुपधावती न प्रापेति वाक्यमित्याह—अन्वञ्चेति । विस्रंसितात् केशबन्धात् च्युतैर्मालती प्रसूनैरनुगतिर्यस्याः सा परा पृष्ठतोऽमृशद्गृह्णादित्यर्थः ॥ १० ॥ न केवलं योगिमनोग्राह्यमपि तमगृह्णादेवापितु विधिहरादिस्तुतस्तमभर्त्सयत् कालस्यापि भयहेतुं तं यष्ट्याप्यभाययच्चेत्याह कृतेति । तं कृष्णं हस्ते दक्षिणे गृहीत्वा भीषयन्ती यष्ट्या भाययन्ती ह्रस्व सु गावार्षौ अवान्तरताडनेऽहमकरोन्मत्वताडयदित्यर्थः । गुरी उद्यमे तं कीदृशं कृतागसं सापराधं अतस्ताडनमाशङ्क्य तत्परिहाराय प्ररुदन्तं अञ्जन्ती सर्वतः प्रसरन्ती मषीकज्जलं ययोस्ते अक्षिणी स्वपाणिना दक्षिणपाणेर्गृहीतत्वाद्वामपाणिपृष्ठेन कषन्तं मर्दयन्तं मातृहस्तेन बाध्यमानमप्यश्रुमार्जनमपराधात् स्वपाणिनैव कुर्वन्तमित्यर्थः । कीदृशी सेत्याह भयविह्वलेक्षणं तमुद्वीक्षमाणेति हे चौर्यपण्डित कोपाक्रान्तकपिकुलमित्र मन्थनीछिद्रकर गृहलुण्ठाक तिष्ठ त्वं तथाहमद्य यतिष्ये यथा कुत्रापि गत्वा क्रीडितुं न शक्नुयाः क्रीडनकानि सखिबालांश्च द्रष्टुमपीशो न भवेरिति व्यञ्जयन्तीरुक्षमुद्रया तं पश्यन्तीत्यर्थः "ताडने यदि तवाति-

शयाभीस्तत्किमद्य दधिभाण्डमभाङ्क्षीः मातरेव मथनैव करिष्ये पातयस्व करतोबलयष्टिमिति यद्वा भयेन विह्वले कम्पमाने हस्ते गृहीत्वा क्षणमवागुरत् अन्यत्समानम् ॥ ११ ॥ अर्भकवत्सला स्वप्राणादप्यति प्रेमाणमर्भके वहन्ती माता भीतं विज्ञाय यष्टिं त्यक्त्वा साधुमार्गेऽयं स्थापनीय इति विचार्य दाम्ना तं बद्धमियेष बबा यतस्तद्वीर्यकोविदा चौर्यादिषु धार्ष्ट्येषु तद्बुद्धिबलं जानतीत्यर्थः । न चादद्वीर्येति छेदः । तद्वीर्यस्य विश्वगर्भत्वादेस्तया ज्ञातत्वात् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सत्वरस्त्वरासहितः कृष्ण आत्ता यष्टिर्यया सा तां प्रसमीक्ष्य तत उलूखलादवरुह्य भीतवत्सर्वभीषकस्य भीतिर्मातुर्नेति सूचयति वतिः । अभिससार दुद्राव । यं योगिनामजादीनां तपसेरितं प्रेरितं तदासक्ततां नीतं मनः प्रवेष्टुं न क्षमं न समर्थमास तमन्वधावत् । अत एव गोपी लोकालोके किमप्यविदुषी वा वीक्ष्यायं पशुपाल इयं पशुपालिकेत्यालपति । गोप एव मूर्खस्तत्पत्नी तु ततोऽपीति वा गोपीति ॥ ९ ॥ अन्वञ्चमानन्वञ्चती अनुव्रजन्ती बृहत्योश्चलत्योः श्रोण्योर्नितम्बयोर्भरेणाक्रान्ता मन्दीभवन्ती गतिर्गमनं यस्याः सा सुमध्यमा जवेन केशानां बन्धनं विस्रंशितं च तत्केशबन्धनं च तस्मात्प्रच्युतानि प्रसूनानि पुष्पाणि धम्मिल्लमुल्लङ्घ्य पुरश्च्युतानि तेषामनुगतिर्यस्याः सा कृष्णचरणयोः कुसुमार्पणेन प्राप्तिः सत्वरं भविष्यतीतीदमपदेशेन सभाजितवत्यजित चरणद्वन्द्वमिति तं परामृशदिति ध्वनिः । न च चमत्कृतैवम्भावाविष्करणं । स्वनिर्माल्यमालानामसमार्पणीयत्वादिति चेत् । कुरुशबरीवरिवस्यां विस्रंशितकेशबन्धनतश्च्युतानि पश्चात्प्रसूनानि यस्याः सा । अनु अनुसृत्य गतिर्यस्याः सा चेति वा । तदनु यत्राऽपि तत्परामर्शहेतुरिति तं परामृशदिति वा । परानुयात्रार्जितपुण्यपात्रेति रुक्मिणीसविजयोक्तेः ॥ १० ॥ जननी कृतागसं कृतापराधं प्ररुदन्तमञ्ज मषीणि अञ्जती सर्वतः प्रसरन्ती मषी कज्जलमनयोरित्यञ्जन्मषीणि । अक्षिणी नयने स्वपाणिना कषन्तं मृजन्तमुद्वीक्षमाणं भयेन विह्वलं चञ्चलमीक्षणमवलोकनं यस्य तं हस्ते गृहीत्वा सक्थिनि कर्णे वा महाभाष्यप्रयोगात्प्रयोगाच्च शृङ्गे कर्णे वा गृहीत्वा गामिव नागम इति तत्त्वनिर्णये । हस्ते गृहीत्वेति सम्भवति । विस्तरस्तु भाष्यदीपिकायुक्तिव्याख्यायामस्मत्कृतायामनुसन्धेयः । भीषयन्ती सङ्कोचनेन भीत्यस्य न सर्वभीषकस्य भीषणं सम्भवतीति सूचयति । अपिमाषमषं नीत्या छन्दश्छेदार्थं लघुभिः पाठ्यः । अवागुरत् गूरी उद्यमने दिवादिः पुषादिभ्यः पूर्वेतनश्चेति नाङ् विकरणव्यत्ययेन शः । उद्यमवत्यवभवत् लङ् ॥ ११ ॥ अतद्वीर्यकोविदा तद्वीर्याज्ञा तं बन्धुम् । बन्ध बन्धने बन्धियुधीत्यनिट्कः बध बन्धन इति सेट्कः । बद्धमिति प्रामादिको व्यवहारः ॥ १२ ॥

श्रीसुबोधिनी

ततस्तां दृष्ट्वायोग्या स्प्रष्टुमिति ततो निर्गतवानित्याह **तामात्तयष्टिमिति**, **यष्टिरत्र** गोवत्सनिवारिका, तस्या भगवत्यपि वत्सबुद्धिर्जाता, **आत्ता** गृहीता **यष्टिर्यया**, दर्शनादेव न पलायितवान् किन्तु तस्या अन्तर्गतं बाह्यं च भावं **प्रकर्षेण सम्यग् दृष्ट्वा** नैकट्यमपि नार्हतीति ज्ञात्वा तद्दोषपरिहारार्थं **त्वरासहितस्ततोवरुह्यापससार** प्रतिमुखतयैव पलायनं कृतवान्, तथा दोषेण स्वस्मिन् स्थितबालकानामपि दोषो भविष्यतीति ज्ञापयितुं दृष्टान्तमाह **भीतवत्**, यथा भीतस्तदपकारं स्वस्मिन् जानाति तथा भगवानपि तद्दोषं स्वस्मिन् विचारितवान्, अनेनैव न भीत इति ज्ञापितं, सापि **गोपी**, अतो**न्वधावत्**, अनुपश्चाद् **धावनं** कृतवती, तस्या अविवेकं प्रकटयितुं शुको भगवन्तं विशिनष्टि **यं** भगवन्तं **योगिनां** सिद्धयोगानां निवृत्तदोषं **मनस्**तत्रापि **तपसेरितं** प्रेरितं धर्मेण संस्कृतमपि **प्रवेष्टुं नाप** न प्राप्तवत्, अत इयमप्यर्थादेव न प्राप्तवतीत्यर्थः ॥९॥ एवं भगवति दोषदर्शने भगवदीयोपि भगवन्तं न प्राप्नोतीत्युक्तं, तादृशेपि भगवान् कृपां करोतीति भगवत्कृपया भगवन्तं स्पृष्टवतीत्याहान्वञ्चमानेति, प्रतिकूलोपि भगवदर्थं श्रमः सार्थकः, **श्रोणी अन्वञ्चमाना** श्रोण्योराकर्षणं कुर्वन्ती रथाकर्षणे बलीवर्दवद् भाराक्रान्तगतिर्जाता **भरेण** भारेणाक्रान्ता **गतिर्यस्या**, दुष्टा **गतिर्भरेण**वाक्रान्ता, ततो बुद्धिरपि दोषादेर्निवृत्ता गमनार्थमेव प्रवृत्ता, तदाह **सुमध्यमेति**, **जननीति**वचनात सदुग्धयोः स्तनयोरपि भारः सूचितः, **जननी**त्वाच्च न वर्णितः, वस्तुतस्त्वजननी, जननी न काचिदप्येवं करोति, **सुमध्यमे**त्यनेन मध्ये भक्ता बहिर्व्यामोहिता, परं दुष्टभावाद् भारेण गत्याक्रमणमुक्त्वा शोभनमध्यभावं वदंस्तस्या दोषाभावं गुणं चोक्तवान्, अभिमानाभावार्थं चाह **जवेनेति**, वेगेन **विशेषेण स्रंसितानि केशबन्धाच्च्युतानि प्रसूनानि** तेषामनु पश्चाद् गतिर्यस्याः, पुष्पाण्यपि सङ्गे चलन्ति, **प्रकृष्टा सूना** येषां तानि **प्रसूनानि**, उत्तारणमात्रेणैव ते नश्यन्तीति देवाद्यर्थं च तेषां **सूना**, तान्यपि बद्ध्वा स्थापितवती, तानि च पुनः केशबन्धाद् विगलितानि, उत्पत्तिप्रलयौ तदधिष्ठात्र्यौ देवते च तत्रैव **सम्बद्धे** तद्रूपाणां च **बन्धनं यत्र** ततस्तु मुक्ता न पुनर्जन्मभाजः, ततो मोक्षश्च भगवदर्थक्रियया, अतः केशानामपि बन्धविमोचकस्तत एव **विस्रंसितः** केशबन्धस्ततश्च्युतानि **प्रसूनानि**, एतस्या दोषाभावो गुणो मुक्तानुगतिश्चेतिधर्मत्रयेण भगवन्तं **परामृशत्** परितो धृतवती, आलिङ्गितवतीत्यर्थः, तस्या दोषभावं दृष्ट्वा भगवान् रोदिति तस्या विवेकभ्रंशलक्षणमपराधं च कृतवान्, यशोदाबुद्ध्या तु भाण्डभेदनमपराधः, अत्यन्तमौढ्यदोषनिवृत्त्यर्थं च ज्ञानशक्तेर्घर्षणमपि करोति, ज्ञानशक्तिस्तु भगवत्कृत्यैव सोज्ज्वला भवति "यथायथात्मा परिमृज्यत" इतिवाक्यात, यशोदाया निरोधः सर्वथा व्यर्थो मा भवत्विति स्वकार्यं तद्भावं च

दृष्ट्वा **भयेन विह्वले ईक्षणे** यस्य, सोपाधिकं निरुपाधिकं च ज्ञानं तस्या गमिष्यत इति विह्वलता ॥ १० ॥ एवं **परमकृपालुं** गृहीत्वा यत् कृतवती तदाह **कृतागसमिति, कृत आगोऽपराधो येन**, कोयमपराध इत्याकाङ्क्षायामाह तमिति व्यामोहकं, **यशोदा बुद्धौ तु भाण्डभेत्तारं**, यद्यपि स्वयमीश्वरो न कोप्यपराधो भवति तथाप्येषा व्यामोहिका लीला, तामत्यन्तं व्यामोहितवान् यथाग्र उत्तरलीलासु प्रतिबन्धिका न भवति, अन्यथात्यन्तमासक्ताग्रिमकार्ये प्रतिबन्धिकैव स्यात् "तच्चासुराणां मोहाय सतामपि च कुत्रचित्" "सा मां विमोहयति भीरपि यद् बिभेती"ति वाक्यात् निदानाज्ञानाच्च मोहः, लोकदृष्ट्या मारयिष्यतीति **प्रकर्षेण रोदनं**, इदमपि द्वितीयं व्यामोहकं, **अक्षिणी कषन्तमिति** बालभावदार्ढ्यकरणं, पूर्वं कृतमोहस्य दार्ढ्यार्थमञ्जनं शोभार्थं तथैव **कृतमञ्जनसाधनीभूतमषीयुक्ते अक्षिणी, स्वपाणिनेति**, पर्यायेणैकेनैव **पाणिना** भगवदीयक्रिययैव भक्तिरूपया नयनमुज्ज्वलं न भवतीति **कषन्तमिति**, तत्रत्या कण्डूरपि नाशिता, तेन रजोगुणोऽपि शामितो मारणसाधनीभूतः, अत एव तिष्ठन्नपि भगवांस्तादृशचेष्टया स्थितस्तां न दृष्टवान्, सैव **पुनस्तमुद्वीक्षमाणोर्ध्वं** विलोकयन्ती न तु पादौ, तथा सति भक्तिर्वा भवेत्, भगवांस्तु परितः स्थिता गोपी पश्यति तासामपि दोषारोपाभावार्थं **भयं**, अन्तःस्थितोऽप्ययं भावो मोहनार्थमेव प्रकटितः, एव त्रिभिर्धर्मैः सा मोहिता नातः परमुत्थास्यति, अत एवाग्रेस्याः कापि स्नेहकला न निरूपिता, "शृण्वन्त्यश्रूण्यवास्राक्षी"दिति तु गुणानां माहात्म्यं "जनन्युपहृतं प्राश्य" "तत्कथाश्रवणोत्सुके"त्यादि तु रोहिणीसहभावात् तस्या अपि भावे स्यां सङ्क्रान्त उक्त, नन्दस्यैव मुख्यत्वात्, एतादृशी भगवतः सर्वाङ्गसम्बन्धं परित्यज्य **हस्ते गृहीत्वा भिषयन्ती** भीषयन्त्यवागुरत्, आगूर्णसङ्कल्पं कृतवती यथा पामरा अनिष्टागूरणानि कुर्वन्ति, अनेन तस्या अनृतवादित्वमपि निरूपितम् ॥ ११ ॥ ततः किं कृतवतीत्याकाङ्क्षायामाह **त्यक्त्वा यष्टिमिति**, अनेन पूर्वं **यष्टि**रानीतेति लक्ष्यते तेन मनोदुष्टा, मनःसङ्कल्पं च त्यक्तवती, तेन मनोदोषस्य गतत्वाच्चिकित्स्यत्रिदोषा जातेति निरूपयति, **यष्टिं त्यक्त्वा सुतं भीतं विज्ञाय** भगवद्धर्मानपि ज्ञात्वा**र्भकवत्सला** जाता, तथापि तस्या न सर्वात्मना दोषनिवृत्तिरित्याह**इयेषे**ति, निरूपकस्यापि दोषो भवतीति शुको भीतः सन्नाह किलेति, प्रसिद्धिरेषा नास्माभिस्तदा दृष्टं नापि भावितं कदाचिदपि, **दाम्ना बद्धुमियेष**त्यन्तःकरणशरीरपरिकरदोषा निरूपिताः, नन्वसाध्ये कथं प्रवृत्ता ? लोकेनिष्टेपि प्रवर्तमाना असाध्ये न प्रवर्तन्त इति तत्राहा**तद्वीर्यकोविदे**ति, तस्य भगवतो वीर्यं न जानातीति, **पूतना** तृणावर्तादयो मारिताः कोस्या मारणे प्रयास इति ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

स जातकोपेत्यत्र, **तत्त्रयं निवारणीय**मिति । यशोदाया अपराधस्तन्निष्ठाध्यात्मिकलोभस्य च नाशनमेतदमारणार्थमाधिदैविकविज्ञापनं चेति त्रयम् । आधिदैविकश्चेदाध्यात्मिकं मारयेत्, सर्वांशेन मारयेत्, तथा सत्यग्रिमकार्यं न भविष्यतीति तत्कृततन्मारणस्य निवारणमत्रोच्यते । भगवांस्त्वेतत्कालीनापराधहेतुभूतलोभमात्रं नाशितवानिति पूर्वोक्तेन लोभं तद्गतं भाण्डं च स्फोटितवानित्यनेनाग्रिमग्रन्थेन न विरोधः । अत्रैवाग्रे त्रयमुत्पादयितुं भिन्नमिति । यथाधिदैविकेन तथा कर्तुमुद्यतम् । तथान्यां यशोदां तद्गतं लोभं च भगवदेकविषयम् । तदुपभोग्य येन भोगविषयान् दुग्धादींश्चान्यानुत्पादयितुं स तथेत्यर्थः । तेन क्रोधातिशयो निरूपितो भवति । **तदुभयमपी**ति । आधिदैविक लोभं रजोगुणं चेत्यर्थः । ननु पुत्रदुग्धयोः समानप्रीतिविषयत्वेपि नैवं संभवतीत्यनुपपन्नमिदमित्याशङ्क्य तत्रोपपत्तिं वदन्तो दृषदश्मना भेदनस्यापि तात्पर्यमाहुः **दैत्याविष्टैवे**ति । सा यशोदानिष्ठा पयोविषयिणी स्नेहकला प्रभुविस्मारकत्वेन दैत्याविष्टैवोद्गतेति तथागमनमभूत् । तन्नाशं चालौकिकप्रकारेण करिष्यन् 'स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानी'ति श्रुतेस्तथेत्यर्थः । तच्छ्रवणे पुत्रानुसन्धानात् तथा । तत्रैव कथनमयुक्तमितीचेत्युक्तम् । वस्तुतस्तु भगवत्कृतो मोह एव तादृगिति तथात्वम् । अत एवास्यापि लीलात्वं तथाप्यनुचितमभूदिति तथोक्तमाचार्यैः । **जघास हैयङ्गवमन्तरङ्गत** इत्यत्र, **आधिदैविकदैत्यानामि**ति । मातृदर्शनयोग्ये स्थाने भक्षणे तस्याः क्रोधो भवेत् । अतो यत्र भक्षणे कृते तदनुत्पादस्तत्र तथाकृतवानिति भावः । **मर्काय काममि**त्यत्र, **पूर्वमपि दैत्यावेशेने**ति । पूर्वमपि यत्सम्पादितं तन्मर्काय यच्छतीति सम्बन्धः । तत्र हैयङ्गवगतं हेतुमाहु**र्दैत्यावेशेने**ति । भक्तीयपदार्थस्य स्वयमनङ्गीकारात् । क्रूरे विनियोगाच्च दुष्टत्वं लक्ष्यते । स चालौकिक एव दोषो वाच्यो, लौकिकस्यादर्शनात् । तदेतदुक्तं दैत्येत्यादिना । शकटदृष्टान्तेनान्यत्राप्येव भूते दृष्टिः कार्येति नासम्भावना काचित् । **चौर्यविशङ्कितेक्षणमि**त्यत्र । **तस्याश्चौर्यदोषनिवारणाये**ति । पुत्रस्नेहस्नुतेति वाक्यात् भगवदेकभोग्यस्तन्यनिरोधश्चौर्यम् । तच्च तदीयवस्तुनो यथेच्छं विनियोगकरणेन सन्तोषान्निवार्यते । विशब्दस्य कालवाचित्वपक्षमादायाहुः **तस्या ज्ञानं कालेने**ति । बालत्वं ज्ञात्वा तथा व्यवहरतीति तथा । 'पृष्ठे कृतो मे यदधर्म' इति वाक्यात्पृष्ठभागदिशि पापस्थानमिति तत्र व्याप्ता दृष्टिस्तद्विषयिणी भवत्येवेति भावेन पापदृष्टिरित्युक्तम् । **विस्रंसितकेशबन्धने**त्यत्र **उत्पत्तिप्रलयावि**त्यादि । कशब्देशशब्दयोरुत्पत्तिलयाधिष्ठातृदेववाचकत्वात्तद्वाच्यत्वात्केशानां तयोस्तत्र सत्त्वं ज्ञायते । तत्सत्त्वेनैव तदधिष्ठेययोरुत्पत्तिलययोरपि । एतादृशान्मुक्तानां युक्तमेवाजननम् । अन्यथा स्वाधिष्ठातृसहितोत्पत्तिलयाधिष्ठानाच्च्युतिर्न स्यादिति **भावः तत इ**ति । तादृशानां बन्धादित्यर्थः ॥ ६–१० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अन्वञ्चमानेत्यत्र 'श्रोण सङ्घात'इतिधातोः श्रोण्यते संहन्यत इति श्रोणिरिन्प्रत्यये कृते भवति ततः 'सर्वतोक्तिन्नर्थादित्येक' इत्यनेन ङीषि कृते श्रोणीति भवति, तत इति भाराक्रान्तगत्या जाततपस्त इत्यर्थः, **वस्तुतस्त्वजननीति** पुरुषोत्तमस्याजन्यत्वात् तथेत्यर्थः, **दुष्टभावादिति** दुष्टत्वाद् बहिर्व्यापारस्येत्यथः, **वदन्निति** दोषाभावादेर्विशेषणं, **उत्पत्तीत्यादेर्थं** टिप्पण्यामाहुः **कशब्देत्यादि, तत एवेत्यस्यार्थमाहुस्तादृशानामित्यादि** ॥ १० ॥ **कृतागसमित्यत्र स्वकार्यमिति** निरोधं, तच्चेति व्यामोहकलीलाकरणं, सतां विमोहे प्रमाणमाहुः 'सा मा'मिति, इदं वाक्यं तु कुन्त्याः प्रथमस्कन्धीयं, **मोह इति कुन्त्या मोहः**, एकपाणिवर्षणतात्पर्यमाहुर्**भगवदीये**त्यादि, **उज्ज्वलं** भगवत्स्वरूपग्रहणसमर्थं, **भयविह्वलेक्षणमि**त्यस्य तात्पर्यान्तरमाहुर्**भगवांस्त्वि**त्यादिना, **त्रिभिर्धर्मै**रित्यादि रोदनाक्षिकर्षणदर्शनाभावैः **मोहिता** मत्पुत्र एवायमिति दृढभाववती, **नोत्थास्यति** न भगवत्त्वादिभाववती भविष्यतीत्यर्थः, यद्वोक्तधर्मैर्मोहिता गृहकार्य आसञ्जिता न पुत्रस्नेहं पूर्ववदत्य तं करिष्यतीत्यर्थः, द्वितीये मानमाहुरत एवेत्यायुक्त इत्यन्तं, कालीयदमनोत्तरं "या परिष्वज्याङ्कमारोप्ये"त्यादिनोक्ता स्नेहकला सापि परीक्षामात्रोपयोगिनीति ज्ञेयं, तत्र हेतुर्**नन्दस्यैव मुख्यत्वादिति** प्रमाणप्रकरणीयलीलायाः पुरुषनिरोधकत्वात् तथेत्यर्थः, अत एव ब्रह्मवैवर्त्ते श्रीनन्दानामेतासामुपरि त्वया **बालकस्यैवमपराधः कृत** इत्युक्तिपर्यन्तः क्रोधोक्तेः गृहीत्वा भगवदालिङ्गनं चोक्तं, प्रथमपक्षे तु **स्नेहकलेती**श्वरत्वभावोपमर्दिका पुत्रत्वस्नेहकलेत्यर्थो ज्ञेयः, **शृण्वन्ती**त्यादि तु तादृक्कृतिमसहमानैरुक्तमन्यथा 'नेमं विरिञ्च्य'इत्यादिग्रन्थस्य कालीयदमनोत्तर'**परिष्वज्याङ्कमारोप्ये**'त्यस्य हस्तादुत्तारितगोवर्धनस्य भगवत आलिङ्गननिरूपकश्लोकव्याख्यानस्य च विरोधः स्यात्, तयोः पक्षयोर्मध्ये यद्दतं तत् त एव विदुरितिदिक्, **अवागुरद्** गुरी उद्यमनेवागुरणं ताडनोद्योगो "यो ब्राह्मणायावगुरेदि"त्यत्र सायणीये तथाव्याख्यानादिति, एवं द्वाभ्यां वशीकरणोद्यमो व्याख्यातः ॥ ११ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तामात्तेत्यत्र **तद्दोषेति** तत्रैव स्थितौ तत्कृतो विरुद्धक्रियारूपो दोषः **स्यात्, ताडनादि कुर्यादित्यर्थः, तस्या दोषेणेति कर्तरि** षष्ठी, तत्कृतेन क्रियारूपदोषेण बालकाः क्लिष्टा भविष्यन्ति, भगवत्स्वरूपे तु न भयमितिभावः ॥ ९ ॥ **अन्वञ्चमानेत्यत्र श्रोणीति** द्वितीया द्विवचनान्तं ज्ञेयं, **वस्तुतस्त्विति** आत्मजत्वस्य वासुदेवपर्यवसायित्वेन पञ्चमाध्याये व्यवस्थापितत्वादितिभावः, एतद्भावस्य पुरुषोत्तमपर्यवसायित्वे "भक्त्या त्वनन्यये"तिवाक्यात् निरुपधिभावः स्यादेवेत्याहुः **जननीति**, अत एव व्रजरत्नानां तथेतिभावः, **भगवदर्थक्रियये**ति क्रियावैपरीत्यं तु प्रतिकूलोपि भगवदर्थं श्रमः सार्थक इत्यनेन पूर्वमेव समाहितं, **अत** इति उत्पत्तिलयाधिष्ठातृदेवानामपि बन्धविमोको भगवदर्थक्रियातो जायते तत एव हेतोरत्रापि केशबन्धः क्रियया **विस्रंसितो** जात इत्यर्थः, "स्वर्गं तपोह"**मिति** वाक्ये उत्पत्तिलयकर्तॄणां बहुत्वमुक्तमत **केशानामपी**ति बहुवचनमुक्तं, ब्रह्मादीनामपि भक्तानामेव मोक्ष इति निबन्धे व्यवस्थापितम् ॥ १० ॥ **सोज्ज्वलेति** उज्ज्वलादिशब्दा गुणवाचका अपि, अत उज्ज्वलवर्णसहितेत्यर्थः, **सोपाधिकमिति** पुत्रत्वेन ज्ञानं रूपप्रकरणोक्तमित्यर्थः, **निरुपाधिकमिति** ज्ञानप्रकरणोक्तमित्यर्थः, व्याख्याने **व्यामोहितवानिति** भगवानितिशेषः, **इदमपीति** रोदनमित्यर्थः, तमित्यनेन परामृष्टं पूर्वोक्तं स्मितं प्रथमं व्यामोहकमितिभावः, **अञ्जन्मषिणी**त्यत्र अञ्जन्ती मषी ययोरितिविग्रहः, अञ्जन्तीत्यत्र करणस्य कर्तृत्वविवक्षया शतृप्रत्ययः, **अत एवेति** अक्ष्णोर्मारणसाधनीभूतरजोगुणयुक्तत्वाद् दर्शने तस्या अन्यथाभावः सम्पद्येतात एव हेतोरित्यर्थः, **भक्तिर्वा भवेदिति** धूलिधूसरितश्रममुकुलितचरणारविन्ददर्शने स्नेहभरेणाङ्कमेवारोहयेदितिभावः, **त्रिभिर्धर्मै**रिति पूर्वोक्तं स्मितमेतच्छ्लोकोक्तं रोदनं भयं चेत्यर्थः, **नातः परमुत्थास्यतीति** पूर्वं ज्ञानप्रकरणे सर्वात्मभावावधिस्नेहो जनितस्ततो मोहिता सर्वात्मभावं न प्राप्स्यति किन्तु रूपप्रकरणसम्पादितस्वविषयकाध्यासरहितपुत्रत्वोपाधिकस्नेहे एव पर्यवसिता भविष्यतीतिभावः, **कापि स्नेहकलेति** निरुपधिस्नेहांशः कोप्यग्रे न निरूपित इत्यर्थः, अग्रिमवाक्येषु निरुपधिभाव उक्त इत्याशङ्क्य समाहितं **अनिष्टेति, अनिष्टानां मारयिष्यामीत्यादिवाक्यानामागूरणानि** कथनानीत्यर्थः ॥ ११ ॥ **त्यक्त्वा यष्टिमित्यत्र अनेनेति** पूर्वमात्तयष्टिकथनेनात्र यष्टित्यागकथनेन चानयनमपि लक्षितमेवेत्यर्थः, **भगवद्धर्मानपीति** भयादीनित्यर्थः, अनुपदोक्तस्यैव विवरणमिदम् ॥ १२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

कृतागसं तं प्ररुदन्तमित्यस्य विवृतौ **तामत्यन्तं व्यामोहितवानिति** भगवानितिशेषः, भगवांस्ताम् आसक्तिन्यूनतासम्पादनेन **व्यामोहितवानित्यर्थः, यथाग्र उत्तरलीलास्विति** श्रीयशोदानयनगोचरदेशतोतिरिक्तदेशसम्बन्धिन्यो या गोचारणादिलीलास्तास्वित्यर्थः, **अन्यथे**त्यादि यदि मोहं कृत्वासक्तिन्यूनता न सम्पादयेत् तदा परमासक्तिवशाद् भगवन्तं स्वनिकट एव स्थापयेत्, तथा सति **भगवान्** व्रजवरसुन्दरीणां मनोरथपूरणसमर्थां लीलां कथं कुर्यात्, अतो भगवान् स्वमातुः स्वस्मिन्नासक्तिन्यूनतां सम्पादितवान्, तदा मातृदूरस्थित्या शृङ्गारलीलासौकर्यमभूदितिभावः, तदेतदुक्तं **अग्रिमकार्यं प्रति**

बन्धिकैव स्यादिति ॥ ११ ॥ **दाम्नातद्वीर्यकोविदेत्यस्य** विवृतौ **पूतनातृणावर्तादयो मारिताः कोस्या मारणे प्रयास इतीति** इदमत्र हार्दं, न ह्यत्र श्रीयशोदाया अपराधवशान् मारणयोग्यता निरूप्यते अपि तु भगवतो वीर्यस्वरूपमुच्यते **पूतनातृणावर्तादयो मारिता** इति, **कोस्या मारणे प्रयास** इति तु वीर्यकोविदानां शुकादीनां ज्ञानं, इह तु "अतद्वीर्यकोविदे" त्युक्त्या एतादृग् ज्ञानं श्रीयशोदाया नाभूदित्युक्तं, वीर्यज्ञाने तु भयं स्यात् पूतनातृणावर्तादयो मारिता मामपि मारयेदिति, तथा सति बाललीलैव न स्यात् भयस्य प्रतिबन्धकत्वात्, अत एव तादृगैश्वर्यख्यापिकां लीलां कृत्वापि माहात्म्यज्ञानं तिरोभावयति "वैष्णवीं व्यतनोन् मायां प्रजास्नेहमयीं विभु"रितिवाक्यात्, प्रकृतेप्यतद्वीर्यकोविदैव प्रभुणा कृता न तु माहात्म्यज्ञानमुत्पादितं, तथा सति बन्धनमेव न कुर्यात्, 'पूतनातृणावर्तादयो मारिताः कोस्या मारणे प्रयास' इति तु भयस्वरूपं विवृतं, यदि महिमज्ञानं स्यात् तदा वीर्यज्ञानेन एतादृशं भयं स्यादिति, अतद्वीर्यकोविदात्वोक्त्या तु भयं नाभूदित्युक्तं, तत् तु भगवतैव बाललीलाचिकीर्षुणा तथा कृतमिति अतद्वीर्यकोविदात्वं भूषणाय न तु दूषणायेतिज्ञेयं, अत्र प्रसङ्गे सुबोधिन्यां 'यथा पामरा अनिष्टागूरणं कुर्वन्ती' त्यादिकथनं 'मनोदुष्टे' त्यादिकथनं 'शुकोपि तां दूषयन्निवे' त्यादिकथनं आध्यात्मिकपक्षेण पुष्टिभक्तानां शिक्षार्थमिति ज्ञेयं, तत्र मूलं तु 'दाम्नातद्वीर्यकोविदे' त्यादिशुकोक्ता निन्दा, यत्र श्रीयशोदायाः भगवत्यन्यथादृष्टौ एतादृशी निन्दा तत्रान्यस्य का वार्तेतिकैमुत्यद्योतनार्थं एतावान् व्याख्याविस्तारः, एतावता भगवति अन्यथादृष्टिर्न कार्या अपि तु महिमज्ञानेन स्नेहपूर्वकं सेवैव कार्येत्युपदेशः फलितः, इदं त्ववधेयं, इह भगवत्स्वरूपमाहात्म्यविचारेण तदजानता मातृचरणानां निन्दा, स्वरूपज्ञानं तु मर्यादायां, श्रीयशोदायास्तु शुद्धपुष्टिमार्गीयत्वात् भगवद्बन्धनं परमोत्कर्षाधायकं, अत एव "कृष्णाधीना तु मर्यादा स्वाधीना पुष्टिरुच्यते" इति तत्त्वदीपे पुष्टिभक्तिलक्षणमुक्तं, "यथा दामोदरलीलायां" इति व्याख्यातं च, वेणुगीताध्याये च "दामोदराधरसुधामपि गोपिकाना" मित्यस्य विवृतौ "भगवतो गोपिकाधीनत्वं सूचित" मित्यनेन च परमोत्कर्ष एव प्रतिपादितः, अत एवाग्रे शुकोपि "नेमं विरिञ्चो न भवो न श्रीरप्यङ्गसंश्रया" इत्यादिना श्रीयशोदायाः परममहिमानं प्रदर्श्य पुष्टिभक्तिमार्गं प्रस्तोष्यति, तथा चाध्यात्मिकपक्षे निन्दामुक्त्वाधिदैविकपक्षे स्तुतिरेवेति शुकस्य तद्वाक्यव्याख्यातुर्भगवतः सुबोधिनीकारस्य निगूढ आशयो विद्वद्भिर्भावनीयः, आध्यात्मिकपक्षे वस्तुविचारो मर्यादया, आधिदैविकपक्षस्तु लीलाप्रधानो वस्त्वनुभवसाधकः पुष्टिमार्गेणेतिविवेकः ॥ १२ ॥

(५) भगवदीयनिर्भयराममिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

कृतागसं तमित्यत्र, तच्चासुराणां मोहाय सतामपि च कुत्रचिदिति का० तद् रोदनादिकमासुराणां **मोहाय क्वचित् सतामपि** मोहाय, तथा च प्रथमस्कन्धे कुन्तीवाक्यं "सा मां विमोहयति भीरपि यद् बिभेती"ति । ॥ ११ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आत्ता भीषणार्थं गृहीता यष्टिर्यया तां जननीमागच्छन्तीं प्रसमीक्ष्य सत्वरः त्वरया शाठ्येण युक्तः कृष्णः ततः उलूखलादवरुह्य भीतवत् अपससार पलायितवान् । वस्तुतो भयाभावं सूचयितुं वतिप्रयोगः कृतः । तमपसरन्तं गोपी यशोदा गृहीतुमन्वधावत् । यशोदायां भगवत्कृपातिशयं सूचयन् भगवन्तं विशिनष्टि—न यमिति । तपसा विशुद्धम्, अत एव प्रवेष्टुं क्षमं योग्यं ईरितं तदेकाकारतां नीतमपि योगिनां मनो यं नाप तमन्वधावदित्यन्वयः ॥ ९ ॥ "भगवति दोषदर्शने तावत्तद्भक्तोऽपि न प्राप्नोति, तादृशोऽपि तस्मिन्नत्यासक्तश्चेत्तर्हि तत्कृपया तं प्राप्नोतीति प्रतिकूलोऽपि भगवदर्थपरिश्रमः सफलो भवति । का पुनरनुकूलस्य वार्ता" इति च सूचयंस्तत्कृपया यशोदा तं धृतवतीत्याह—अन्वञ्चमानेति । श्रीकृष्णमनुगच्छन्ती तं परामृशत् धृतवतीत्यन्वयः । 'भगवत्प्राप्त्यर्थं देहाद्यनुसन्धानं विहाय तदेकाग्रता मनसः कर्तव्या' इति सूचयन् यशोदां वर्णयति–जननी परमप्रेमवती, बृहत्योश्चलत्योः श्रोण्योर्भरेणाक्रान्ता स्तब्धा गतिर्यस्याः सा, शोभनो मध्यमः प्रदेशो यस्याः सा, जवेन वेगेन हेतुना विस्रंसितात् केशबन्धाच्च्युतैः प्रसूनैरनुगतिर्गमनं यस्याः सा ॥ १० ॥ तं हस्ते गृहीत्वा भीषयती 'रे रे चौर ! त्वां तथा यष्ट्या ताडयामि, यथा पुनरेवमुपद्रवं न कदापि करिष्यसि' इत्येवं भर्त्सनेन भयमुत्पादयन्ती अवागुरत् यष्ट्युत्थापनेन ताडनोद्यमं कृतवती, न तु ताडयामास । 'गुरी' उद्यमने धातुः । 'भिषयति' इति ह्रस्वश्छान्दसः । भयोत्पादने हेतुमाह-कृतागसमिति । कृतं आगः अपराधो भाण्डस्फोटनादि येन तमिति । ताडनाभावे हेतून् दर्शयन् विशिनष्टि—प्ररुदन्तमिति । अञ्जन्ती सर्वतः प्रसरन्ती मषी ययोस्ते अक्षिणी स्वपाणिना कषन्तं सम्मर्दयन्तं, भयेन विह्वले ईक्षणे नेत्रे यस्य तं, 'ताडयिष्यति' इति भावनया उद्वीक्षमाणम् ॥ ११ ॥ अथ सुतं ताडनाद्भीतं विज्ञाय यष्टिं त्यक्त्वा तं दाम्ना बद्धमियेष ऐच्छत् । तत्र हेतुमाह—अर्भकवत्सलेति । तस्मिन् बालके प्रेमयुक्ता 'हस्ते यष्टिं दृष्ट्वाऽतिबिभेति, तेन कश्चिद्देहे उपद्रवो माभूत्' इत्याशङ्क्य यष्टिं त्यक्त्वा ताडनापेक्षया बन्धनस्य स्वल्पपीडाकरत्वाद्बद्धुमैच्छत् । 'ननु तद्बन्धनस्याशक्यत्वात् कथं तदैच्छत् ? ' तत्राह—अतद्वीर्यकोविदेति । तत्प्रभावानभिज्ञा । यद्यपि 'मुखे विश्वदर्शनादिना तत्प्रभावं ज्ञातवती, तथापि पुनर्मोहेन तद्विस्मृतवती' इत्याशयः ॥ १२ ॥

अन्वितार्थप्रकाशिका

तमिति । आत्ता भीषणार्थं गृहीता यष्टिर्यया तां जननीमागच्छन्तीं प्रसमीक्ष्य सत्वरः त्वरया शैघ्र्येण युक्तः कृष्णः ततः उलूखलादवरुह्य भीतवत् अपससार पलायितवान् । तपसा विशुद्धमत एव प्रवेष्टुं क्षमं योग्यम् ईरितं तदेकाकारतां नीतमपि योगिनां मनो यं नाप तमपसरन्तं गोपी यशोदा ग्रहीतुमन्वधावत् ॥९॥ अन्वञ्चमानेति । बृहत्योश्चलन्त्योः श्रोण्योर्भरेणाक्रान्ता स्तब्धा गतिर्यस्याः सा शोभनो मध्यमः प्रदेशो यस्याः सा जवेन वेगेन हेतुना विस्रंसितात्केशबन्धनाच्च्युतैः प्रसूनैरनुगतिर्गमनं यस्याः सा अन्वञ्चमाना श्रीकृष्णमनुगच्छन्ती जननी यशोदा तं परा पृष्ठतः अमृशत् धृतवती ॥ १० ॥ कृतागसमिति । कृतम् आगः अपराधो भाण्डस्फोटनादि येन प्ररुदन्तम् अञ्जती सर्वतः प्रसरन्ती मषी कज्जलं ययोस्ते अक्षिणी स्वपाणिना कषन्तं संमर्दयन्तं भयेन विह्वले ईक्षणे नेत्रे यस्य तं भयभावनया उद्वीक्षमाणम् । उद्वीक्षमाण इति च पाठः । तं कृष्णं हस्ते गृहीत्वा भिषयन्ती भयमुत्पादयन्ती । ह्रस्वः शता च आर्षौ । यष्ट्या इत्यध्याहारे तु ह्रस्वषुकावार्षौ । यशोदा अवागुरत् यष्ट्युत्थापनेन ताडनोद्यमं कृतवती नतु ताडयामास ॥ ११ ॥ त्यक्त्वेति । अर्भकवत्सला बालके प्रेमयुक्ता अतद्वीर्यकोविदा तत्प्रभावानभिज्ञा यशोदा सुतं ताडनाद्भीतं विज्ञाय यष्टिं त्यक्त्वा तं दाम्ना बद्धुमियेष ऐच्छत् । बद्धुमित्यनकारः पाठश्चेदार्षः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आत्तयष्टिं गृहीतवेत्रां सत्वरः सवेगः सन् तत उलूखलात् अवरुह्य उत्तीर्य अपससार अधावत् तपसा विषयत्याग लक्षणेन ईरितं प्रेरितम् अत एव प्रवेष्टुं क्षमं योग्यं मनः यम् आपतं गोप्यन्वधावत् पश्चाद्धावती सत्यपि न प्राप अथवान्वधावत् तथापि तं नाप एवं कुतो यतः तपसेरितं योगिनां मनोपि यं प्रवेष्टुं न क्षमं न समर्थम् ॥ ९ ॥ हरेर्भक्तिवशत्वं दर्शयन्नाह अन्वंचमानेति अन्वं च माना एवमनुधावती सती कृष्णं परामृशत् अग्रहीत् तां विशिनष्टि बृहत्योर्महत्योः चलंत्योः श्रोण्योर्भरेण आक्रांतास्थिरागतिर्यस्याः जवेन वेगेन विस्रंसितः कंपितो यः केशबंधः कबरस्तस्माच्च्युतानि अग्रे पतितानि प्रसूनानि पुष्पाणि अनुपश्चाद्गतिर्यस्याः सा अथवा विकीर्णात् केशबंधाच्च्युतैः प्रसूनैः अनुगतिः सह चलनं यस्याः सा ॥ १० ॥ कृतागसं विहितापराधम् अंजंती अभितः प्रसरंती मषीययोस्ते अंजन्मषिणी अक्षिणी नेत्रे स्वपाणिना कषंतं संसहयंतं भिषयंती भीषयंती अत्र ह्रस्व आर्षः भयं प्रापयंती अवागुरत् तिरश्चकार ॥ ११ ॥ अर्भके वत्सला स्नेहयुक्ता यष्टिं वेत्रम् अतद्वीर्यकोविदा तत्पराक्रमानभिज्ञा ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तामिति ॥ आत्तोपात्ता यष्टिर्यया तां, तां स्वं ताडयितुमागच्छन्तीं स्वमातरं, प्रसमीक्ष्य, सत्वरस्त्वरया सहितः, तत उलूखलाङ्घ्रेः, अवरुह्य, भीतवत् अपससार पलायितवान् । तदा गोपी सा यशोदा, यं श्रीकृष्णं, तपसा ईरितं प्रवणीकृतं, अत एव, प्रवेष्टुं क्षमं समर्थं सदपि, योगिनां मनः न आप । तं कृष्णं, अनु पश्चात्, अधावत् । 'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह' इत्युक्तरीत्या वाङ्मनसापरिच्छेद्यवैभवं कृष्णं गोपी पद्भ्यामधावदित्येतदतिचित्रमिति भावः ॥ ९ ॥ अन्विति ॥ अन्वञ्चमाना धावन्तं सुतमनु धावन्ती, बृहत्योः चलन्त्योः श्रोण्योः भरो भारस्तेनाक्रान्ता स्तब्धा गतिर्यस्याः सा, सु शोभनो मध्यमो मध्यप्रदेशो यस्याः सा, जवेन हेतुना, विस्रंसितात् केशबन्धनात् च्युतैः प्रसूनैरनुगतिरनुगमनं यस्याः सा, यद्वा । जवेन विस्रंसितात् कम्पितात् केशबन्धनात् च्युतानां पुरःपतितानां प्रसूनानामनुगतिः पश्चाद्गतिर्यस्याः सा, जननी, परामृशत् पस्पर्श जग्राहेत्यर्थः ॥ १० ॥ कृतागसमिति ॥ कृतमागोऽपराधो येन तं, प्ररुदन्तं प्रकर्षेण रोदनमाचरन्तं, अञ्जन्ती सर्वतः प्रसरन्ती मषी कज्जलं ययोस्ते, अक्षिणी, स्वपाणिना, कषन्तं मर्दयन्तं निष्पीड्य कलुषयन्तमिति यावत् । भयेन विह्वले ईक्षणे यस्य तं, उद्वीक्षमाणं उदूर्ध्वीकृतया दृशा मातृमुखं संपश्यन्तं, तं कृष्णं, हस्ते गृहीत्वा, यशोदा भिषयन्ती भयं प्रापयन्ती सती, अवागुरत्ताडयितुमुद्यतहस्ताऽभूत् ॥ ११ ॥ त्यक्त्वेति ॥ अर्भकवत्सला स्वपुत्रानुरागवती यशोदा, वागुरन्ती सत्यपीति शेषः । सुतं, भीतं विज्ञाय, यष्टिं त्यक्त्वा, अतद्वीर्यकोविदा तत्प्रभावानभिज्ञा सती, तं कृष्णं, दाम्ना रज्ज्वा, बद्धुं इयेष किल ॥ १२ ॥

श्रीहरिसूरिविचितं श्रीभक्तिरसायनम्

तामात्तयष्टिमिति : १०.९.९.

अकृत्यमपि मे सर्वं सह्यमस्य परन्तु न । उलूखलाङ्घ्रिभजनमित्यागात् सा सयष्टिका ॥ ३३ ॥
श्लिष्यद्दोषं मनो यावत् तावदीशः पराङ्मुखः । सूक्ष्मवेत्राश्रितस्यापि भवेदित्यभवत् स्फुटम् ॥ ३४ ॥
तमोगुणांशोऽपि न संस्पृशेद्यथा तथा विधेयं मदवाप्तिकामुकैः ।
स चेद्विदूरोऽहमिति प्रकाशयन् प्रभुः स्वमातुः सरुषोऽन्वपाक्रमत् ॥ ३५ ॥

अन्वञ्चमानेति : १०.९.१०.

च्युतप्रसूनानुगतिर्या भवेत्तस्य वैष्णवम् । स्वरूपमभिमृश्यं स्यादिति तं तादृगस्पृशत् ॥ ३६ ॥

कृतागसमिति : १०.९.११.

आलम्ब्य यष्टिमनयाऽबलयापि सम्प्रत्यङ्गीकृता सबलतेति विचिन्त्य कृष्णः ।
स्वस्मिन्नपि प्रबलतां रुदितच्छलेन व्यक्तीचकार रुदितं हि बलं शिशूनाम् ॥ ३७ ॥
मदन्ववायादिमयोर्हिमाहिमोस्रयोः कलङ्कं मम चाक्षिरूपयोः ।
कथं सहे नन्विति रोदनच्छलात्तदञ्जनं क्षालयति स्म पाणिना ॥ ३८ ॥
कर्मणां नैव केषामप्येष कर्तेति साक्षिणौ । ब्रूतमित्यच्युतो नेत्रस्थितार्कौ द्रू व्यबोधयत् ॥ ३९ ॥
नानासाधनशालिनोऽपि पुरुषस्यौजस्विनः स्वात्मनो मालिन्यापहृताववश्यमपरापेक्षेति युक्तं यतः ।
भास्वच्चन्द्रमसोः सहस्रकरयोरप्यत्र नेत्रात्मनोरासीदञ्जनमार्जनं न भगवद्धस्तावलम्बं विना ॥ ४० ॥
तवाभिधानं षडरिप्रभञ्जकं भुवीति सद्भिर्यदहं प्रकीर्तितः । मयि स्थिते द्वेषिणि रोषसंभवः कथं जनन्यामिति तादृशेक्षणः ॥४१॥

त्यक्त्वा यष्टिमिति : १०.९.१२.

तावज्जडाश्रयो युक्तो न यावच्चेतनागमः । युक्तं श्रीशकरं धृत्वा सा जहौ यष्टिकां जडाम् ॥ ४२ ॥
मदीयं सन्तोषं सुफलदमसम्पाद्य मनुजो यदि क्षुद्रे किञ्चित् फलिनि दिनकर्मण्यभिरतः ।
भवित्री तस्यार्थक्षतिरपि च दूरस्थितिरहं पुनर्मद्गामी चेत् प्रतिपदमहं तस्य सुलभः ॥ ४३ ॥
हित्वा तदा स्वमकृतस्तनपानपूर्तिं यान्त्यां स्वमातरि पयोदृशि मण्डभाण्डम् ।
भङ्क्त्वा पलायनपरो यदभूत् स कृष्णः तद्धस्तगः पुनरपीति विविक्तमत्र ॥ ४४ ॥ (युग्मम्)
बुद्ध्यग्राह्योऽप्यहमिह सुलभस्तस्यास्मि यस्तु मदनुगतः । उज्झितकर्मेत्याशयमबोधयन् मातृहस्तगो हि हरिः ॥ ४५ ॥
गर्गोक्तनामबद्धेऽस्मिन् सुकरं दामबन्धनम् । इत्यैषीत् सा नामदाम पर्यायैकार्थदर्शिनी ॥ ४६ ॥

कृष्णप्रिया

जब लालन ने देखा कि जननी हाथ में दण्डा छड़ी लिये मेरी ही ओर आ रही है तब डरे हुए की तरह कृष्ण ओखली से कूद भाग खड़े हुए। अरे राजन् ! बड़े बड़े योगियों के बड़े बड़े तपःपूत, प्रविष्ट होने योग्य तथा एकाकारता को प्राप्त हुआ भी जो मन जिन भगवान को न प्राप्त कर सका, माता यशोदा उनका पीछा करने लगी ॥ ९ ॥ लालन के पीछे जननी दौड़ीं तो सही किन्तु अपने बड़े बड़े और चल रहे नितम्बों के भार से उनकी गति मन्द हो गई। वेग से दौड़ने के कारण चोटी की गाँठ ढीली पड़ गई माता की वेणी के फूल गिरकर इधर उधर बिखर गये। बड़े परेशानी के बाद सुमध्यमा माँ यशोदा ने ज्यों त्यों करके लालन को पकड़ लिया ॥ १० ॥ प्यारे लालाने अपराध तो किया था इसलिये रुलाई रोकने पर भी न रुकती थी, करकमलों से नेत्र मलने के कारण काजल चारों ओर पसर रह था, भय विह्वल नेत्रों से भगवान् माता के सामने देख रहे थे लेकिन भय के मारे आँखे ऊपर की ओर उठ गयी थी ऐसे भयभीत श्यामसुन्दर को डराती हुई माता उनका करकमल पकड़ उन्हें धमकाने लगी ॥ ११ ॥ पुत्रवत्सला जननी ने जान लिया कि लालन बहुत डर गये हैं तब माता ने छड़ी को फेंक दिया और लालन को सही रास्ते लाने के लिये कृष्ण के परम ऐश्वर्य को न जानने वाली माता ने रस्सी से बांधना चाहा ॥ १२ ॥

न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् । पूर्वापरं बहिश्चान्तर्जगतो यो [1]जगच्च यः ॥ १३ ॥
तं मत्वाऽऽत्मजमव्यक्तं[2] मर्त्यलिङ्गमधोक्षजम् । गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा ॥ १४ ॥
तद् दाम बध्यमानस्य स्वार्भकस्य कृतागसः । द्व्यङ्गुलोनमभूत्तेन संदधेऽन्यच्च गोपिका ॥ १५ ॥
यदाऽऽसीत्तदपि न्यूनं तेनान्यदपि संदधे । तदपि द्व्यङ्गुलं न्यूनं यद् यदादत्त बन्धनम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—यस्य न अन्तः च न बहिः न पूर्वं च अपि न अपरं न पूर्वापरं जगतः यः बहिः यः जगतः अन्तः च यः जगत् ॥ १३ ॥ गोपिका अधोक्षजं मर्त्यलिङ्गम् अजम् अव्यक्तं तम् आत्मजं मत्त्वा प्राकृतं यथा दाम्ना उलूखले बबन्ध ॥ १४ ॥

---

१. यो जगन्मयः। २. ऽर्भकमव्यक्तं–विज.।

कृतागसः बध्यमानस्य स्वार्भकस्य तद् दाम द्व्यङ्गुलोनम् अभूत् तेन गोपिका अन्यद् अपि संदधे ॥ १५ ॥ यदा तदपि न्यूनम् आसीत् तेन अन्यद् अपि संदधे तदपि द्व्यङ्गुलं न्यूनं (आसीत्) यद् यद् बन्धनम् आदत्त (तदपि द्व्यङ्गुलम्) ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अकोविदत्वमाह न चांतरिति पंचभिः । बंधनं हि बहिः परिवृतेन दाम्ना अंतरावृतस्य भवति । तथा च पूर्वापरविभागवतो वस्तुनः पूर्वतो दाम धृत्वा परितः परिवेष्टनेन संभवति न त्वेतदस्तीत्याह । न चांतरिति । किं च व्यापकेन व्याप्यस्य बंधो भवति तच्च विपरीतमित्याह । पूर्वापरमिति । किं च तद्व्यतिरिक्तस्य चाभावान्न बंध इत्याह । जगच्च य इति ॥ १३ ॥ तं मर्त्यलिंगमधोक्षजमात्मजं मत्वा बबंधेति ॥ १४ ॥ द्व्यंगुलोनं द्वाभ्यामंगुलाभ्यामून मपूर्णम् ॥ १५-१६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

को वेत्ति मत्तोऽधिकमित्यात्मानं मन्यमानः कोविद इति । इगुपधत्वात्कः बाहुलकाद्विभक्तेरलुक् 'विद-ज्ञाने' तद्भिन्नत्वमाह । अन्यदाह-किञ्चेति । पुनरन्यदाह । किञ्चेति । तद्व्यतिरिक्तस्य कृष्णभिन्नस्य । जगतां ब्रह्मांडानां चयः समूहो यस्मिन्स जगच्चय इति । यद्वा-यः कृष्ण एव जगत् "सर्वं खल्विदं ब्रह्म" इति श्रुतेः । तद्भिन्नं किञ्चिन्नास्तीति भावः । यो बंधस्स जगतः यः कृष्णश्च सोऽजगत् जगच्च । तस्य जगदीश्वरत्वात् । यद्वा--योजनं योऽजो आर्षत्वात्कुत्वाभावः बंधस्तं गच्छतीति योजगत् । न योजगदयोजगदिति सर्वबंधननिवर्त्तकस्य कुतो बंधनमिति भावः ॥ १३ ॥ मर्त्यलिंगमिति । मर्त्यस्य लिंगमेव न तु मर्त्यं यतोऽधोक्षजमिंद्रियजन्यज्ञानाविषयमत एवाव्यक्तं न केनापि प्रमाणेनौपनिषदं विना व्यज्यत इत्यव्यक्तम् । यथा प्राकृत सामा यनरबालमनेनापि तस्याप्राकृतत्वं सिद्धमिति । यस्य विभुत्वेन सर्वेण जगतापि बंधनं न संभवेत्तस्य जगदेकदेशी भूतेन दाम्ना कथं बंधनं भवेदिति । न च साकारत्वेन तस्य विभुत्वं संभवेदिति वाच्यम् । साकारस्यैव तस्योदरे सर्वजगतो यशोदया दृष्टत्वात् । तर्हि सा कथं बबंध तत्राह-आत्मजं मत्वाऽसाधारणवात्सल्यप्रेमविषयीकृत्येत्यर्थः । तस्य प्रेमाधीनत्वाद्विभुत्वेप्यचिंत्यशक्त्यैव बंधनमिति भावः । अव्यक्तं प्रेमवश्यत्वादेव प्रच्छन्नीभूतमहैश्वर्यं मर्त्यलिंगं मनुष्याकारं तदप्यधोक्षजमतींद्रियं यथा प्राकृतं बध्नाति तथैव चित्पुंजमपि तं बबंधेत्यहो प्रेमबलं यस्या इति भावः ॥ १४ ॥ यावद्द्वैतं न निवर्तते तावन्नाहं वश्यो भवामीत्यंगुलद्वयोनत्वेन द्योतितमिति भावः । यद्वा-नाहं रज्जुभिर्बद्धुं शक्यः किन्तु द्वावेव मे बंधनहेतू भक्तिवैराग्यरूपाविति ॥ १५ ॥ यत्संधितमासीत्तदपि । तेन संधितसंधितेन ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो प्रेमबलं श्रीयशोदाया इत्याह-न चेति युग्मकेन । व्यापकत्वेन बहिर्नास्ति अतस्तत्प्रतियोगितया प्रतीतमन्तरमपि नास्ति एवं पूर्वापरे अपि जगच्च य इति कारणव्यतिरेके कार्यव्यतिरेकात् यदनन्यत् जगदित्यर्थः । ततश्च तच्छक्त्यैव जगच्छक्तेस्तदंशांशभूतया रज्ज्वा कथं तद्बन्धः स्यात् न हि वह्निमर्चिषो दहेयुरिति भावः । सर्वत्रैव नञ् प्रयोगस्तत्तदभावदार्ढ्यार्थम् अत एव समुच्चये चकारावपिशब्दश्च तमेव बबन्ध यत्तदोः सामानाधिकरण्यान्न च स्वरूपान्तरमित्यर्थः ॥ १३ ॥ यथा प्राकृतं बालं तथैव च तर्हि कथं बबन्ध ? तत्राह—मर्त्यलिङ्गं दृश्यमानमनुष्यबालकाकारं तर्हि कथं न चान्तरित्यादि तत्राह-अधोक्षजम् इन्द्रियज्ञानातीतरूपम् अत एव "नित्याव्यक्तोऽपि भगवानीक्ष्यते निजशक्तितः । तामृते परमात्मानं कः पश्येदमितं प्रभुम्" इति नारायणाध्यात्मवचनाद्या न केनापि व्यज्यत इत्यव्यक्तं उभयथाप्यचिन्त्यस्वरूपतद्धर्ममित्यर्थः । श्रुतिश्च "अर्वाग्देवा अस्य विसर्जनेनाथ को वेद यत आबभूव" इत्याद्या तस्मात् "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम्" इत्युद्यमपर्वाद्युपदेशेन "श्रुतेस्तु शब्दमूलत्वात् (२।१।२७) इति न्यायेन अस्थूलोनणुरमध्यमो अव्यापको हरिरित्यादि "अस्थूलश्चानणुश्चैव स्थूलोऽणुश्चैव सर्वतः । अवर्णः सर्वतः प्रोक्तः श्यामो रक्तान्तलोचनः ॥ ऐश्वर्ययोगाद्भगवान् विरुद्धार्थोभिधीयते" इति श्रीमध्वाचार्यदर्शितश्रुतिपुराणप्रामाण्येन तथैव "तुरीयमतुरीयमात्मानमनात्मानमुग्रमनुग्रं वीरमवीरं महान्तममहान्तं विष्णुमविष्णुं ज्वलन्तमज्वलन्तं सर्वतोमुखमसर्वतोमुखम्" इति श्रीनृसिंहतापनीदृष्ट्या "मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्" इति साक्षाच्छ्रीस्वयं भगवदुपदेशेन प्रत्येकाचिन्त्यविरुद्धाविरुद्धानन्तशक्तिमयत्वात् घटत एव युगपत् तत् द्वयमपीत्यर्थः । अतः श्रीमत्या मात्रैव निजाङ्कप्रविष्टस्यापि तस्य मुखान्तर्विश्वं दृष्टं सर्वरज्जुभिरपि द्व्यङ्गुलमात्रं न पूरयितव्यमिति च अतः स्वाभाविकाचिन्त्यशक्तित्वात् मायाकल्पना च परास्ता क्लृप्तपरिग्रहे लघुः क्लृप्तपरिग्रह इति न्यायात् व्यर्थत्वाच्च तर्हि कथं तद्विभुत्वं तस्यां नास्फुरत् ? तत्राह—आत्मजं मत्वा वात्सल्यरसपूर्णमनस्त्वेन तदंशाच्छादनादित्यर्थः । तच्च बन्धनमुदरे ज्ञेयं दामोदरत्वेन प्रसिद्धत्वादत्र नोक्तम् । श्रीहरिवंशे तूक्तं "दाम्ना चैवोदरे बद्ध्वा प्रत्यबन्धदुलूखले" इति । तच्च दुःखाप्राप्त्यर्थमेव वस्तुतो बन्धनं तु भयेन गमनशङ्कयैव कृतम् उलूखलं पुरोद्वाराभ्यन्तरपतितमन्यदेव ज्ञेयं द्वाराग्र्यावस्थानोचितचैत्यतरुयुगलसमीप-

गतत्वात् चौर्यत्वं चाग्रे वक्ष्यते ॥ १४ ॥ स्वशब्देन कृतागस इत्यनेन च बन्धनयोग्यतोक्ता शिक्षायां परबालकवदुपेक्षानौचित्यात् द्व्यङ्गुलोनमिति प्रथमाया रज्ज्वा दैवाद्द्व्यङ्गुलोनत्वात् उत्तरासां च तस्य लाल्ये चितहठवत्तादर्शनेन तत्र दर्शितानुभावया तद्विभुताशक्त्या तथैव रक्षणात् किञ्च स्थितेपि प्रेमणि वैयग्र्यविशेषतज्जाततत्कृपाविशेषाभ्यां द्वाभ्यामूनत्वेन तद्वशीकरणं न स्यात् अत एव "दृष्ट्वा परिश्रमं कृष्णः कृपयाऽऽसीत्स्वबन्धने" इति वक्ष्यते इति दैवी सूचना अन्यदामसन्धानं च मातापुत्रयो र्भर्त्सनरोदने श्रुत्वा आगताभिः प्रतिवेशिगोपीभिः परिहासेन तदर्पणात् ॥ १५ ॥ यदित्यस्य अन्यदित्यनेन पूर्वेणान्वयः। यद्यस्मादिति वा बध्यते अनेनेति बन्धनं दाम यद्यदादत्त बन्धनं तत्सर्वमपि द्व्यङ्गुलन्यूनमिति पूर्वेणैवान्वयः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो ! महाभाग्यं श्रीयशोदाया इत्याह न चेति द्वाभ्याम्। यस्यान्तर्बहिश्च नास्ति, तथा पूर्व्वं पूर्व्वभागोऽप्यपरं पश्चाद्भागश्च नास्ति,—सच्चिदानन्दघनमूर्त्तित्वेनावितर्क्यस्वरूपत्वात्। सर्व्वत्रैव नञः प्रयोगस्तत्तदभावदार्ढ्यार्थमतएव समुच्चये चकारौ अपि-शब्दश्च। पूर्व्वंत्यादिना व्यापकत्वमप्युक्तम्। अन्यत्तैर्व्याख्यातम्। यद्वा, अन्तर्बहिश्च नास्ति व्योमवत् सर्व्वव्यापकत्वादतो बन्धनं न सम्भवतीति भावः। किञ्च, पूर्व्वं कारणमपरं मृदादेर्घटादिवत् कार्य्यञ्च नास्त्यतः सदैकरूपत्वेनात्मनो मननञ्च न घटेतेति भावः। किञ्च, बन्धन-साधनमपि तस्य न किञ्चित् कल्पत इत्याह—पूर्व्वंत्यादि। किञ्चाधोक्षजमिन्द्रियज्ञानागोचरमित्यर्थः। यतोऽव्यक्तं परमसूक्ष्मम्, तथापि मर्त्यलिंगं कृपया मनुष्याकारेण प्रकटीभूतमित्यर्थः। यद्वा, अधोक्षजं शकटाक्षादधः संकटात् पुनरिव जातमतावात्मजमेव मत्वा मम गर्भजोऽयमित्यभिमानं कृत्वा प्राकृतं सामान्यजनमिव, किंवा प्रकृष्टाकारं मधुरमृदुलांगमपि यथावत् दृढतयोलूखले नवनीतचौर्य्यार्थं तेनैवानीते कलभमालाने इव, दाम्ना गोबालादिनिर्मित दधिमथनमृदुरज्ज्वा बबन्धः, यतो गोपिका सहजस्नेहभराक्रान्तचित्तेत्यर्थः, श्लेषेण तद्रक्षणपरेति तद्बन्धनञ्चोदर इति ज्ञेयम्। दामोदरत्वेन प्रसिद्धत्वादत्र तन्नोक्तम्, श्रीहरिवंशे (विष्णु-प० ७।१४) चोक्तम्—'दाम्ना चैवोदरे बद्ध्वा प्रत्यैबन्धदुदूखले' इति। तच्च दुःखाप्राप्त्यर्थमेव ॥ १३–१४ ॥ स्वशब्देन कृतागस इत्यनेन च बन्धनयोग्यतोक्ता, अपराधे हि परबालकवदुपेक्षानौचित्यात्। द्व्यंगुलोनमिति द्विचणकादिवल्लोकोक्तिरीत्या स्वल्पमात्रत्वे तात्पर्य्यम्। यद्वा, त्रिषु भक्तिज्ञानकर्म्मसु मध्ये द्वाभ्यां ज्ञानकर्म्मभ्यां स्वस्यालभ्यत्वात्तथा दर्शितमन्यं दाम सन्धानञ्चातिभीत्या तस्य पलायनमाशंक्यास्मिन् बद्धं त्रयं धृत्वा भ्रामं भ्रामम्, किंवा हस्तेनैकेन तं गृहीत्वा हस्तान्तरेण दामसंग्रहणात्, किंवा दास्यादिभिः काभिश्चत् कौतुकेन तदर्पणात् ॥ १५ ॥ यदित्यस्यान्यदित्यनेन पूर्व्वेणान्वयः, यद्यस्मादिति वा, बध्यतेऽनेनेति बन्धनं दाम यद्यदादत्त तत् सर्व्वमपि द्व्यंगुलं न्यूनमेवासीदिति पूर्व्वेणान्वयः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

न चान्तरिति बन्धनस्य परितो वेष्टनरूपत्वात् तदशक्यत्वायापरिच्छिन्नत्वमुक्तम् ॥ १३–१७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, किं तद्वीर्यं यदनभिज्ञानात् बद्धुमियेष इत्यतस्तद्दर्शयन् तदनभिज्ञा प्राकृतमिव बबन्धेत्याह—नेति द्वाभ्याम्। बन्धो हि बहिरेव सम्वीतेन दाम्नाऽन्तरागृहीतस्य भवति तथा पूर्वापरविभागवतो वस्तुनः पूर्वं दामतो धृत्वा परितः परिवेष्टनेन न त्वेतदस्तीत्याह—न चान्तरिति। किञ्च व्यापकेन व्याप्यस्य बन्धो भवति तच्च विपरीतमित्याह—पूर्वापरमिति। यो जगतः कृत्स्नस्य पूर्वं पूर्वावधिरेव परमुत्तरावधिश्च बहिश्चान्तस्य व्याप्य वर्तते तस्य जगदन्तर्भूतेन व्याप्येन दाम्ना कथं बन्धनं भवेदित्यभिप्रायः। किञ्च सर्वस्य तत्कारणकतया तदात्मकत्वेन तच्छरीरकतया च तत्पृथक्सिद्धवस्त्वन्तराभावात्स्वनिष्ठ-वस्तुसाधनकं बन्धनं न संभवतीत्यभिप्रायेणाह—जगच्च य इति। कार्यकारणशरीरात्मभावनिबन्धनमिदं सामानाधिकरण्यम् ॥१३॥ मर्त्यस्येव लिङ्गं शरीरं यस्य तमुक्तविधमधोक्षजं मत्वा केवलमात्मजं मत्वा गोपी दाम्ना साधनेन उलूखले बबन्ध बन्धनं यमं चकार। प्राकृतं केवलमर्त्यं यथा तद्वत् ॥ १४ ॥ कृतागसोऽत एव बध्यमानस्य सतः तद्बन्धनार्थमुपात्तं दाम द्व्यङ्गुलोनमभूत् द्वाभ्यामङ्गुलिभ्यामपूर्णमभवत् तेन द्व्यङ्गुलोनेन दाम्ना सहान्यद्दामान्तरं स दधे ॥ १५ ॥ यत्संहितं दाम तदपि न्यूनमभवदित्येवं यद्यदादत्त सन्धातुं जग्राह तत्सर्वं न्यूनमेवाभूत ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यशोदाया अज्ञानं प्रकटयितुं तत्स्वरूपं निरूपयति—न चेति। यस्यान्तः स्वतन्त्रम्वस्तु नैवास्ति यस्य बहिश्च वस्तु नास्ति सर्वत्र सत्वेनान्तर्बहिर्विशेषाभावात् यस्मात्पूर्वमपरं नास्त्येव अविनाशित्वेन सिद्धत्वात् यः कृष्णः जगतः पूर्वमपरं बहिरन्तश्च वर्तत इति शेषः। जगतो विनाशित्वात्परिच्छिन्नत्वाच्च यश्च जगन्मयः तत्सत्ताया अपि तदधीनत्वेन तत्त्वव्य-

पदेशः ॥ १३ ॥ तदव्यक्तं ब्रह्मसंज्ञं कृष्णमर्भकमणुतरबालं मत्वा "तदव्यक्तमाह हि" (३।२।२२) इति सूत्रं मर्त्यलिङ्गं मनुष्यलक्षणशरीरं अक्षजमिन्द्रियजं ज्ञानं तदधः कृतं यस्मात्स तथा इन्द्रियागोचरमित्यर्थः। अनेनाव्यक्तपदं विवृतमिति ज्ञातव्यम् ॥ १४–१५ ॥ अनेनापि कृष्णस्य ब्रह्मत्व निश्चयितुं शक्यमित्याशयेनाह—तद्दामेति ! येन बबन्ध तद्दाम द्व्यङ्गुलेनमभूदित्यन्वयः। गोपिका यदा तेन द्व्यङ्गुलोऽनेनान्यद्दाम सन्दधे तदपि न्यूनमासीदिति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

न चान्तरिति किञ्च ॥ १३ ॥ इदन्तूलूखलं पुरोद्वाराभ्यन्तरप्राङ्गणपतितमन्यदेव ज्ञेयं चैत्ययुगलस्य तस्य पुरोद्वाराग्रस्थत्वात् चैत्यत्वञ्च "यौ तावर्ज्जुनवृक्षौ तु व्रजे सत्योपयाचनौ" इति हरिवंशात् ॥ १४ ॥ यदन्यत् स दधे तदपि द्व्यङ्गुलं नूनमासीदित्यन्वयः। यदिति प्रथमाया रज्ज्वा दैवात् द्व्यङ्गुलोनत्वं जातं ततश्च तस्य लाल्योचितहठवत्तां दृष्ट्वा तद्विभुत्वशक्तिस्तत्रात्मानं प्रकाशितवतीति सर्वस्या एव द्व्यङ्गुलोनत्वं जातम् ॥ १६–१७ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ कौतुकेन दधिभाण्डभेद नवनीतापहार चापलजात कोपा व्रजेश्वरी पुनरेवं चापल्यं मा करोत्विति स्वतनयं विनिनीषुर्दाम्ना बबन्धेति तस्य लीलान्तरं दर्शयति न चान्तर्न बहिरित्यादि। यस्य न चान्तः प्राकृतवद्धातुसम्बन्धः न बहिस्त्वगादि सम्बन्धोऽपि यस्यान्तर्बहिरानन्दघनत्वात्। अथवा, अन्तरन्तर्यामित्वं बहिः परिच्छिन्नत्वम्, नान्तरं न बहिरित्यन्तरबहिरेकरूपत्वम्। अथवा अन्तरन्तरङ्गाबहिर्बहिरङ्गाः न यस्य सर्वसमम्, न पूर्वं न प्राक् नापि चापरं न पश्चात् (भा. २।९।३२, ६।४।४७) "अहमेवासमेवाग्रे" इति स्वोक्तेः। अथ च यो जगतः पूर्वश्चापरश्च बहिश्च, अनादित्वात् पूर्वः, अनन्तत्वादपरः पर इत्यर्थः, अप्रावृतत्वाद् बहिर्जगतो यो जगच्च जगदाधारत्वात्। एवम्भूतं तं श्रीकृष्णं विग्रहं कथं बध्नात्विति पूर्वोक्तमतद्वीर्यकोविदत्वं व्रजेश्वर्या वात्सल्येनैव कृतम्, नत्वज्ञानेन ॥ १४ ॥ ततश्चारब्धे बन्धने परिच्छिन्नस्यापि व्यापकत्वमापादयितुं पुरान्तर्वर्तिनीभिः कौतुकात् सर्वतः सर्वगोपिकाभिरानीताभिरसनाभिरपि परस्परग्रथिताभिरपि बन्धनापर्याप्तावुपस्थितायां पुनरन्याभिरपि ग्रथनेऽपि द्व्यङ्गुलमात्रोनता जायत इत्याह—द्व्यङ्गुलोनमित्यादि। प्रथमं यदानीतं दाम तद्द्व्यङ्गुलोनमभूत्, तदनन्तरं यदानीय तत्र ग्रथितम् तदपि द्व्यङ्गुलोनमिति क्रमेण सर्वेषामेव परस्परग्रथितानामपि द्व्यङ्गुलमात्रोनता यदासीत्, तत्रैतद्बीजम्—न चान्तर्बहिरित्याद्युक्तप्रकारो भगवान् बन्धुमशक्य एव, किन्तु द्वाभ्यामेव बद्धो भवति—भक्तपरिश्रमः स्वस्य कृपा चेति। तद्द्वितयं यदा युगपद्भवति, तदैव बद्धो भवतीत्यर्थः। तद्यावन्नाभूत्तावदेव द्व्यङ्गुलन्यूनतेति द्विशब्दोपादानम् ॥ १५-१७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

न चान्तर्न बहिर्यस्येत्यादि। न विद्यते प्राकृतस्येव अन्तरमस्थिमांसरक्तादि बहिर्मलमूत्रादि केवलसच्चिदानन्दात्मकत्वात्। वक्ष्यति च रुक्मिणी व्यतिरेकेण (भा. १०।६०।४५) "त्वक्श्मश्रुरोम" इत्यादि। कथमस्य बन्धनमिति भावः। अतः पूर्वोक्तमतद्वीर्यकोविदत्वं व्रजेश्वर्या दर्शितम्। यद्वा, अन्तरमन्तर्यामित्वं बहिः परिच्छिन्नत्वं जीवस्यैव तथा। यद्वा, नान्तरं न च बहिर्यस्येति अन्तर्बहिरेकरूपमत्युज्ज्वल स्वच्छत्वात्। अथवा, अन्तरमन्तरङ्गा, बहिर्बहिरङ्गा, सर्वसमत्वात्। न पूर्वं न प्राक्, न चापरं न च पश्चात् यस्य, व्यापकत्वात् अथच जगतः पूर्वञ्च परञ्च पश्चात्,—(भा. २।९।३२) "अहमेवासमेवाग्रे" इत्यादेः स्वयमुक्तत्वात्। तस्य बन्धनमशक्यमिति भावः ॥ १३–१४ ॥ द्व्यङ्गुलोनमित्यादि। द्वाभ्यामङ्गुलिभ्यामूनोऽहं कदापि न बद्धो भवामि, एकं भक्तपरिश्रमः, अपरं मदीया कृपेति, यदैतद्द्वयं भवति, तदा बद्धः स्यामिति द्व्यङ्गुलोन—शब्दतात्पर्यार्थः ॥ १५–१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ब्रह्मादिस्तंबपर्यन्तं स्वमायागुणैर्निबध्नन्तमपि सर्वव्यापकमपि महामहेश्वरं तं स्वप्रेमबलादेव पट्टमयदाम्ना बबन्धापीत्याह—न चेति द्वाभ्याम्। बन्धनं हि बहिःपरीतेन दाम्ना आवृतस्य परिच्छिन्नस्य वस्तुनः सम्भवति यस्य तु विभुत्वाद्बहिर्न विद्यते तत्प्रतियोगित्वादन्तश्च न विद्यते तत्र क्व वा दाम्ना स्थातव्यं किं वा तेनावरीतव्यमिति भावः। सर्वदेशव्यापकत्वमुक्त्वा प्रसङ्गात् सर्वकालव्यापकत्वमाह—न पूर्वं नापि चापरमिति। यस्मात् प्राक् पश्चात् कालौ न स्त इत्यर्थः। किञ्च व्यापकेन व्याप्यस्य बन्धो भवति तच्चात्र विपरीतमित्याह—पूर्वापरमिति जगच्च यः इति तच्छक्तिकार्य्यत्वादित्यर्थः। ततश्च सम्पूर्णेन जगतापि तद्बन्धो न सम्भवेत् किं पुनर्जगदंशांशभूतेन दाम्नेत्यर्थः। न च साकारत्वेन तस्य विभुत्वं सम्भवेदिति वाच्यं साकारस्यैव तस्योदरे सर्वजगत इदन्तास्पदस्य यशोदया दृष्टत्वात्, तर्हि सा कथं बबन्ध ? तत्राह—तम् आत्मजं मत्वा असाधारण-

वात्सल्यप्रेमविषयीकृत्वेत्यर्थः। तस्य प्रेमाधीनत्वाद्विभुत्वेप्यचिन्त्यशक्त्यैव बन्धनमिति भावः। अव्यक्तं प्रेमवश्यत्वादेव प्रच्छन्नीभूतमहैश्वर्यं मर्त्यलिङ्गं मनुष्याकारं तदप्यधोक्षजमतीन्द्रियं यथा प्राकृतं बध्नाति तथैव चित्पुञ्जमपि तं बबन्धेत्यहो प्रेमबलं तस्या इति भावः॥ १३-१४॥ प्रेम्णा सम्भविष्यत्यपि तस्य बन्धने प्रथमं तदाकारस्य मातृक्रोडपरिच्छिन्नस्यापि विभुत्वमाह त्रिभिः—तद्दामेति। सहचरैः सह खेलनं परगृहेषु दधिचौर्य्यं चावश्यकं प्रात्यहिकं कृत्यं चिकीर्षोर्मम बन्धनं मा भवत्विति तदिच्छायां जातायां मत्प्रभुं का बध्नीयादिति तदीयसत्यसङ्कल्पताशक्त्या प्रेरिता विभुताशक्तिः सहसैव तद्देहे प्रादुरभूदित्याह, द्व्यङ्गुलोनं द्वाभ्यामङ्गुलीभ्यामपूर्णं ततश्च तेन दाम्ना सह अन्यद्दाम सन्दधे ग्रन्थिं दत्वा जुगुम्फेत्यर्थः॥ १५॥ बद्ध्यतेऽनेनेति बन्धनं दाम॥ १६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हरिः पलायनपरत्वात् स्वबन्धनं नैच्छत् यशोदा तु तं बद्धुमैच्छत् तत्र कस्य जयः? कस्य पराजयः? इत्याकाङ्क्षायां यशोदाजयं दर्शयन् अपरिमितोऽपि भक्तवात्सल्येन परिमित इत्यचिन्त्याद्भुतस्वाभाविकशक्तिमत्त्वं भगवतो दर्शयति—नचान्तरिति षड्भिः। यो जगच्च कार्यकारणयोर्भेदाभेदसम्बन्धात्॥१३॥ उक्तप्रकारेणामर्त्येऽपि मर्त्यलोके जाता सती मर्त्यलिङ्गं मनुष्यस्वभावं भगवदनभिज्ञतालक्षणमाश्रित्य अधोक्षजमुक्तप्रकारेणाधोक्षजेच्छयैवात्मजं मत्वा प्राकृतवदप्राकृतशरीरं बबन्धेत्यन्वयः॥ १४॥ तत् अधोक्षजबन्धनार्थं गृहीतं दाम द्वाभ्यामङ्गुलाभ्यामूनमभूत् तेन दाम्ना सहान्यद्दामान्तरं सन्दधे॥ १५॥ यदा तदपि न्यूनमासीत् तदा तेनान्यत्सन्दधे इत्यन्वयः॥ १६॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

बन्धनेच्छा तस्याः सफलाऽभूदित्याह न चेति द्विकम्। तमात्मजं सा गोपिका राज्ञी दाम्ना पीतपट्टडोरकेण बबन्धेत्यन्वयः। मत्वा सापराधं ज्ञात्वा तं कीदृशमपि तत्राह विभुत्वाद्यस्यान्तर्बहिश्च प्रदेशो नास्ति परिच्छिन्नस्यान्तर्बहिरिति व्यवहारो भवति। न च विभोस्तद्व्यवहारः सम्भवेदित्यर्थः। देशव्यापित्वमुक्त्वा कालव्यापित्वं प्रसङ्गादाह, यस्य पूर्वं नास्त्यनादित्वात् अपरञ्च नास्त्यानन्तत्वात् सर्वकालव्यापिनो यस्मात् प्राक् पश्चाच्च कालौ न स्त इत्यर्थः। उक्तं स्फुटयति पूर्वेति यो जगतः पूर्वं जनकत्वात् परञ्च नाशकत्वादन्तर्बहिश्च विभुत्वात् यश्च जगत् भवति शक्तिद्वारा तत्तथा परिणामात् अव्यक्तं प्रत्यग्भूतं मर्त्यस्येव लिङ्गं चिह्नं यस्येति नराकृतिकमित्यर्थः। अधः कृतमक्षजमैन्द्रियकं सुखं येन तं नित्यसिद्धसुखमित्यर्थः। आकृतं यथेति यथा प्राकृतं काचिद्बध्नाति तथेयं विज्ञानराशिं बबन्धेति अहो पुत्रभावस्य महिमा येन तादृशोपि बद्धोऽभूत् यो विभुः स एव निबद्ध इति तत्र युगपदेव विभुत्वमध्यमत्वे ते चाचिन्त्यशक्तिसिद्धे स्याताम्॥ १३-१४॥ बन्धनप्रकारं दर्शयन्मध्यमस्यापि तस्य विभुत्वमाह—तदिति तेन दाम्ना बध्यमानस्य स्वार्भकस्य स्वोत्सङ्गपरिच्छिन्नस्य तत्प्रथमप्रयुक्तं दाम द्व्यङ्गुलोनं द्वाभ्यामङ्गुलिभ्यामपूर्णमभूत्। ततस्तेन दाम्ना सार्द्धमन्यच्च दाम मातापुत्रयोर्भर्स्तनरोदने श्रुत्वा आगताभिः प्रतिवेशिनीभिर्गोपीभिः परिहासेनार्पितं सन्दधे ग्रन्थिना युयोज॥ १५॥ बध्यतेनेन बन्धनम्॥ १६॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

॥ हरिः ॐ॥ न चांतरित्यस्य भगवतोंऽतः किमपि न चैवास्तीग्यर्थः। सर्वापेक्षया भगवानेवाणुर्भगवदपेक्षयाऽन्योऽणुपदार्थो नास्तीति भावः। एतेन सर्वजगतो भगवतोंऽतर्विद्यमानत्वाद्भगवतोंऽतः किमपि नास्तीति कथनमयुक्तमिति चोद्यं निरस्तम्। भगवदपेक्षया सर्वपदार्थानां स्थूलत्वं नाणुत्वमित्यत्र तात्पर्यमित्यभ्युपगमात्॥ १३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

किं तद्वीर्यं यदज्ञेयं राज्ञीत्यत आह॥ न चेति। यस्यान्तरे को नियामको न चास्ति बहिरपि महीपत्यादिवन्नास्ति यस्मात्पूर्वमादिभूतं वस्तु नास्ति अपरं च नास्ति। सर्वदैतस्य सत्त्वादेतदभावदशाभावादपराभाव इति भावः। यः पूर्वमपरं बहिरन्तश्च वर्तत इति जगन्मयो जगत्प्रधान इति कथं व्यापकः पाशमध्येऽयं भवेत्पाशो वा कथं व्यापकः सन्नेनमन्तरा तनुयात्पूर्वपरभागविकलत्वादिति भावः। मयः प्रधान उद्दिष्ट इति तृतीयतात्पर्योक्तेरयं मयशब्दः॥ १३॥ अव्यक्तं सूक्ष्मतः सूक्ष्मं त्रिविधसांसारिकदुःखस्पृष्टं व्यक्तं तन्नेत्यव्यक्तः। तदव्यक्तमाह हि। अव्यक्तमचलम्। नक्तोषासेत्यग्भाष्यादेः। अधोक्षजमधःकृतेन्द्रियजज्ञानमिन्द्रियागोचरं प्रसादमन्तरेत्यर्थः। मर्त्यानां लिङ्गं लक्षणमिव लक्षणं यस्य तमर्भकं शिशुं मत्वा प्राकृतं बालं यथा तथा दाम्ना उलूखले गोपिका बबन्ध तं बन्धुमारेभ इत्यर्थः। उलूखल इत्यनेन चोरस्येव तत्सहकारिणोऽपि लोके लोकैः शिक्षणमीक्षितमित्यसाध्यभागगमस्त्वादिवस्तुग्रहणानुकूलोलूखलमपि खलं मत्वा गोपी तेन सहैनमपि बबन्धेति प्रेक्षावन्त उत्प्रेक्षयन्ति॥ १४॥ माधव इदमपदेशेन स्वस्याबध्यतां स्फोरयामासेत्याह॥ तद्दामेति। यदा कृतागसो बध्यमानस्य स्वार्भकस्य

स्वबालकस्य स्वस्मिन्नर्भका अतीतकल्पे मुक्ता ब्रह्मादिमबालका यस्य स तस्यापीति वा कृतागसं तं किल नैव माता शशाक बद्धुं मम तु प्रतर्कः। तदीयरम्योदरमध्यसंस्थविमुक्तशक्त्यैव न बन्ध आसीदित्युत्प्रेक्षाक्षितिरेवं चेदासीदिदं यदमिति मन्तव्यम्। तद्दामद्व्यङ्गुलं द्वे अङ्गुली प्रमाणमस्य मात्रचो द्विगोर्नित्यमिति लुक्। द्व्यङ्गुलं च तदूनं तत्पुरुषस्य सङ्ख्याव्ययादेः सङ्ख्याव्ययादेरङ्गुल्यं तस्य तत्पुरुषस्य समासान्तोऽच् स्यादिति कौमुद्युक्तेः समासान्तोऽच्प्रत्ययः। तेनोनमिति वा ऊनं न्यूनमभूत्तदा गोपिका तेन पूर्वदाम्नाऽन्यच्च दाम सन्दधे। द्व्यङ्गुलन्यूनीकरणं तत्स्वबन्धनाशाऽशान्त्यर्थं। बहुन्यूनताप्रदर्शने मत्वा बन्धनमशक्यं माता विरमेदिति रमानाथ एवमचीचरच्चरितमिति ज्ञेयम्॥ १५॥ द्व्यङ्गुलमित्यत्राप्यन्वेति। बन्धनं तत्साधनं दाम बन्धनमुद्दिश्य यद्यदा तत्तद्व्यङ्गुलं न्यूनमभूत्॥ १६॥

श्रीसुबोधिनी

शुकोपि तां दूषयन्निव बन्धाभावे परमार्थतो युक्तिं प्रदर्शयति **न चान्तरिति**, भगवति बन्धाभावो द्वेधापि भवति, भगवत्स्वरूपविचारेण बन्धनसाधनस्वरूपविचारेण च, तत्रादौ स्वरूपं विचारयति, बन्धनं हि कार्यद्वयं सम्पादयति बहिर्निरोधमन्तरस्तापं च, तत् तस्यैव भवति यस्यान्तर्बहिर्भावो भवति, भगवांस्तु पूर्णः सर्वं व्याप्य तिष्ठतीति न कस्मादपि भगवानन्तर्भवति, निरवयवत्वाच्च न कोपि तस्य परिच्छेदकः, चकारादन्तःशब्दव्यवहार्य आकाशोतः सशब्दोपि भगवति न प्रवतत इत्युक्तं, अन्तर्यामिब्राह्मणे सर्वान्तरो भगवानुक्तो न तु भगवतोन्तरं कश्चित्, सर्वान्तरः केनान्तर्भावमापद्येत? आधारत्वे तु नान्तरभावना, रूपादिषु तथोपलब्धेः, न हि फलस्यान्तः **स्वरूपं** तिष्ठति बीजवत्, तथा सत्यदृश्यः स्यात्, अतो न केनाप्यंशेन भगवतोन्तरमस्ति, नापि बहिः, व्यापकत्वात्, बहिःस्थित एवाकाशोन्तस्तिष्ठतीति नाकाशाद् बहिरस्ति किञ्चित्, अनेनान्तःकरणे खेदो बहिरावरणं वा नास्तीत्युक्तं, किञ्च बन्धनं हि वेष्टनात्मकं तद् दिग्विभागे सति भवति, निरवयवस्यानिरूप्यस्य स्वत एव भासमानस्य ज्ञातृज्ञेयभावतिरोधायकस्य केनाप्यंशेन पूर्वभावोपरभावो वा न सम्भवति, अनेनैव दक्षिणोत्तरभावा अपि परिहृताः, सर्वत्र स्थितः पूर्वापरभावमेव मन्यते, अतः स्वरूपकृता वा दिक्कृता वान्तरादिधर्मा भगवति न सन्तीति न बन्धसम्भावना, साधनस्वरूपविचारेणापि न भवतीत्याह **पूर्वापरमिति**, रज्ज्वादीनां **पूर्वभागे परभागे** चायमेव वर्तते, तत्र **यशोदैव प्रमाणं**, भगवति सर्वं दृष्टवती यतः, सर्वस्यापि भगवान् बहिरपि भवति व्यापकत्वात्, अन्तरपि भवति सर्वान्तरत्वात्, चकारात् स्वरूपमपि, किञ्च **जगतो य** एतावान्, यतो जायते गच्छति चेति **जगत्**, यदि भगवानेतावन्न स्यात् कथं जगद् भवेत्? **पूर्वभावाभावे** न भवेत् **परभावाभावे** न गच्छेत्, जगतश्चेत् भगवान् बहिर्न भवेद् जगति गच्छति गच्छेद्, यदि सर्वान्तरो न भवेत् जगदितिविशिष्टं सर्वप्रतीतिसिद्धं न भवेत्, अन्तःस्थितभगवद्धर्मैरेव जगतो विवक्षितधर्मवत्त्वात्, किञ्च **यो जगत्**, न हि स्वात्मना स्वयं बद्धो भवति, तथा सति बन्धकानां वैयर्थ्यापत्तेः, किञ्च **जगन्मयोयं** सर्वमेव जगद् व्याप्य तिष्ठति, एतदाज्ञयैव जगत् कार्यं करोति, ततः कथमयं स्वबन्धने जगत् प्रेरयेत्? अतो न केनापि प्रकारेण भगवतो बन्धनमस्तीति निश्चिन्ता भक्ताः॥ १३॥ तादृशं योन्यथा विचारयति स निष्फलप्रयासो भवतीति तां दूषयन्निव तस्याप्यज्ञानमाह **तमिति**, **तं पुराणपुरुषोत्तममात्मजं** स्वशरीराज्जातं **मत्वा दाम्ना बबन्धे**तिसम्बन्धः, देहस्तु प्राकृतस्तस्या इति तज्जातः सुतरां प्राकृतो भवति, ननु कचिन् महान्तोपि पुत्रा जायन्ते देवादयोपि ततो लोके कारणवैलक्षण्यस्यापि दृष्टत्वात् कथमात्मजत्वे तथा कर्तुं शक्यत इति चेत् तत्राहा**व्यक्तमिति**, न केनाप्यंशेन **व्यक्तं**, ये हि महान्तो भवन्ति ते स्वधर्मान् प्रकटीकुर्वन्ति यथा भरतादयः, भगवांस्तु तथा न करोतीति प्राकृतबुद्धिस्तेषां दृढा, मध्यमावस्थानामेव तथा करणं न तु परमकाष्ठां गतस्य, किञ्च यदि गुप्त एव संस्तूष्णीं तिष्ठेत् तथापि सन्देहः स्यादन्यवाक्येन वा माहात्म्यं जानीयुः प्रत्युत भगवान् विपरीतधर्मान् बोधयत्यतः कथं प्रतीतिरित्याह **मर्त्यलिङ्गमिति**, **मर्त्यस्या**त्यन्तप्राकृतस्य **लिङ्गानि** यस्मिन्निति, तथैव स्वरूपं गुणांश्चेष्टां च प्रदर्शयतीत्यर्थः, ननु तथाप्यत्यन्ताभिज्ञा यथा नटं परिचिन्वन्ति तथा सर्वविलक्षणानन्तगुणवत्त्वादानन्दमयत्वाच्च कथं न ज्ञायत इत्याशङ्क्याहा**धोक्षजमिति**, **अधोक्षजं** ज्ञानं यस्मादिति, न हि भगवान् गुणा वा कस्यचिदपि चक्षुर्गोचरा भवन्ति, इच्छा तु नास्तीत्यवगम्यते विरुद्धप्रदर्शनात्, किञ्चेयं च **यशोदा गोपिका**तिप्राकृतरूपा, अतोनभिज्ञा कथं जानीयात्? उलूखलोपरि पादं दत्वा भगवान् क्रीडति, अग्रेश्च नाभिर्भवति, अतो भगवान् गोकुलस्थित**मुलूखलं** स्वाश्रयावेनज्ञापयितुमत्र बन्धनं कारितवान् **गोपिका**यास्तु बुद्धिर्यथान्यत्र न गच्छतीति, **दाम** पशूनां बन्धकं, ननूलूखलदामहस्ताधिष्ठितदेवानां कथं तूष्णीम्भावः? तत्राह **प्राकृतं यथे**ति, बुद्धिर्भगवता तथा सम्पादितेति॥ १४॥ अयं देहाकारेण भासमान एव भगवान् सच्चिदानन्दरूप इति गुणोपसंहारन्यायेन "न चान्तर्न बहिर्यस्ये"त्यादिधर्मा अस्यैवेति ज्ञापयितुं वदन् भगवान् सम्बद्धो जात इत्याह, भगवता स्वस्मिन् दोषद्वयं प्रदर्शितं तत्पुत्रत्वमपराधश्च, तदा रज्जुरन्तर्बहिःस्थितं भगवन्तं तिरोहितं मत्वा वेष्टनं कृतवती स्वयं बहिःस्थितान्तःस्थितस्य भगवतः, तदाह **तद्दाम बध्यमानस्ये**ति, अन्यथा बहिरपि रज्जुर्न भवेद् वेष्टकमपि न भवेत्, तथापि परितो वेष्टनरूपा न जाता, पूर्वापरयोर्भगवत एव सत्त्वात्, अतो द्व्यङ्गुलं न्यूना जाता, लोकपरिमाणे प्रथमपरिमाणमङ्गुलिः, तत्र प्रथमातिक्रमे कारणाभावादल्पवैलक्षण्ये महतो योजनायामाश्चर्यमपि भवतीति **द्व्यङ्गुलोन**-

मेवाभूत्, रज्ज्वाद्यन्तयोर्यो भगवान् स एवायं क्रोडीकृतः, न तु ततः केनापि धर्मेण भिन्न इति ज्ञापयितुमेवमाह व्यापकत्वस्य दर्शनार्थमेव तिरोभावाद् रज्जुस्थूलतायामपि नोदरस्थौल्यं, प्रतिबिम्बादौ तथोपलब्धेः, अतो वैलक्षण्याज्ञानात **तेनान्यदपि दाम** तावत्प्रमाणकं **सन्दधे** योजितवती, चकाराद् विसदृशमपि ततोपि स्थूलं, नन्वङ्गुलद्वये न्यूने किमित्येतावद् योजितवती ? तत्राह **गोपिकेति**, मौढ्यं तस्या अनुवर्तत इति ॥ १५ ॥ ततः किमभूदित्याशङ्कायामाह **यदासीदिति**, उभयोः सम्बन्धे पुनः सैकैव रज्जुर्जाता, तदाह यदासीदिति, उभयोः सम्बन्धे यदेकमासीदित्यर्थः, **तदपि** पूर्वोक्तन्यायेनैव **न्यूनमासीद् द्व्यङ्गुलं तेनापि** विशिष्टेन **पुनरन्यत् सन्दधे** तृतीयं, **तदपि द्व्यङ्गुलमेव** न्यूनं, "त्रिसत्या हि देवा" इति, भगवतो जगदाद्यन्तःस्थितिवारत्रयं प्रदर्शिता, मानुषभावं ततोपि बहुवारं कृतवतीत्यनुवदति **यद्यददादत्त बन्धन**मिति, यद्यदेव योजनार्थं गृहीतवती तत्तदेव द्व्यङ्गुलोनमभूत् ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

न चान्तर्न बहिरित्यत्र, **किञ्च जगन्मयोयमित्यादि**। **जगच्च य** इत्यत्र चकारार्थकथनमिति ज्ञेयम्। **तद्दाम बध्यमानस्ये**त्यत्र, **भगवता स्वस्मिन्दोषद्वयमि**त्यारभ्य **ज्ञापयितुमेवमाहे**त्यन्तम्। **अत्रेदं** प्रतिभाति। बहिः प्रकट एव प्रभौ पुत्रव्यवहार इति तत्कृतमन्तःस्थितस्याज्ञानम्। दोषारोपे बहिरनुभूयमानोप्यननुभूयमान इव भवति। दोषज्ञानपराभूतत्वाद् दृष्टेः। तदिदमुक्तमन्तर्बहिःस्थितिमित्यादिना। मूलस्थविशेषणद्वयतात्पर्यरूपं लीलापदार्थानां सच्चिदानन्दरूपत्वमभिप्रेत्य दाम्नि ज्ञानकरणे निरूपिते। ननु ज्ञानेन वस्त्वन्यथाभावाभावाद्वेष्टनमसम्भवि, दाम्नस्तथात्वे सुतरां तथेति चेत्। अत्र वयं वदामः। अत्र हि भगवान् भक्तप्राधान्येन लीलां करोति, अतो यथा मर्यादाभक्तिमार्गे भगवद्विषयकापराधे भक्तानां दण्डः कालादिभिस्तदधिकारिभिः क्रियते तथा (पुष्टि) पुष्टिमार्गे भक्तविषयकापराधे यथैव ते चिकीर्षन्ति, तथैव प्रभुरङ्गीकरोतीति वस्तुस्थितिः। अत्र भजनविरोधिभावजननमेवापराधः। एवं सति पुत्रत्वेङ्गीकृते तद्धर्माङ्गीकारोपि जात इति मातृनियम्यत्वस्यापि स्वस्मिन्नङ्गीकारात्तत्स्वामिकदाम्नामपि तादृक् सामर्थ्यं दत्तमस्तीति तथा। इदमेवोक्तमन्यथा **बहिरपी**त्यादिना। एवं सति दामभिर्नियमने दण्डसम्पत्तिर्भवति। अत्र तथाभावेङ्गद्वयं प्रतिबन्धकं निसर्गैश्वर्यत्वनिसर्गदासत्वलक्षणं भगवत्तद्दासगतम्। न हि दासनियम्यः प्रभुर्भवति। यद्यपि मातृनियम्यत्वमङ्गीकृतमिति तेनैव सर्वात्मना नियमनं सम्भवति, तथापि यथा भगवद्धर्मत्वे नाङ्गीकारो बलिष्ठस्तथैश्वर्यस्यापि तथात्वादबाध्यत्वाच्च न तथा सर्वात्मना भवितुमर्हति। उक्ताङ्गीकारात्परं तावद्वेष्टनमभूत्। भक्तेषु प्रभुनियम्यत्वस्यापि नित्यत्वात्। अतस्तथा न्यूनमभूत्। अत एव सर्वोपयोग्यङ्गमानेन न्यूनतोक्ता। अग्रे त्वीश्वरत्वेनान्यथा कर्तुं समर्थत्वात्तदेव स्वनियमने साधकं कृतवानिति वक्ष्यते **कृपयासीत्स्वबन्धन** इति पदेन। कृपाया ईश्वरधर्मत्वेनैश्वर्यमेव करणत्वेनावगम्यते। अन्यथैतत्कार्यं न स्यात्। न हीश्वरादन्यः स्वस्वरूपमर्यादातिक्रमणे जीवस्वरूपमर्यादातिक्रमणे च समर्थो भवति, अस्वतन्त्रत्वात्। यथा जगत्कर्तृत्वादेरीश्वरधर्मत्वेपि नैतादृशत्वं तथा भक्तानामप्येतदतिपौरुषमिति ज्ञाप्यते। यद्वा। बन्धनन्यूनतोक्त्योर्मध्ये विशेषणद्वयकथनेन तयोरुभयत्र हेतुत्वमभिप्रेतमित्यवगम्यते। बन्धने तयोर्हेतुत्वमुक्तम्। तादृशन्यूनतायामपि तयोस्तथात्वमुच्यते। विशेषणाभ्यां हि तज्ज्ञानप्रकार उच्यते। भगवांस्तु निरुधिस्नेहेन दोषारोपाभावयुक्तेन वशो भवति। तथा च पुत्रत्वेन स्नेहः सोपाधिरिति दोषारोपश्चास्तीति वशीकरणे प्रतिबन्धकमेतद्द्वयमिति ज्ञापनाय द्व्यङ्गुलन्यूनतोच्यते। अत एव स्वपदम्। यद्वा। स्वार्भकस्य कृतागसः इति मातृविशेषणम्। अतृप्त्यागावगूरणबन्धनोद्यमैः कृत्वा कृतागस्त्वम्। प्रथमतोर्भकस्तत्रापि स्वस्यैव तादृशे तथा कृतिरत्यनुचितेति ज्ञापितम्। तथा चैतादृश्यास्तद्दाम तथाभूदिति सम्बन्धः। तथा च बाह्याभ्यन्तरापराधवत्सम्बन्धित्वात्तथा न्यूनमभूदिति भावः। दामसामर्थ्ये सत्यपि भगवदिच्छया तथात्वे न्यूनं चकारेत्युक्तं स्यात्। तथा चैवमुक्त्या वस्तुस्वाभाव्यादेव तथात्वमिति बोध्यते। **पूर्वापरयोर्भगवत एव सत्त्वादित्यादिग्रन्थस्यायं भावः**। 'एवं सन्दर्शिते'ति वाक्यात्तत्प्रदर्शनार्थमिमां लीलां कृतवानिति गम्यते। यद्यपि भक्तनिवेदितान्नवस्त्रभूषणाद्यङ्गीकारोपि भक्तेच्छयैवेति सोपि तथा भवति, तथापि तेषामिष्टत्वाल्लोके तदङ्गीकारो न तथा तद्बोधकः। बन्धनं तु दुःखहेतुत्वेनानिष्टं लोक इति तदङ्गीकारस्सुतरां तथेत्यनेन प्रकारेण प्रदर्शितवानित्युच्यते। अत एवानेवंभावे तन्न दर्शितं भवति किन्त्वेवंभावेनैवेत्याशयेन मूल 'एवं संदर्शिते'त्युक्तम्। किञ्च। ईश्वरे दुःखाभावेन तथा भक्तेच्छापूरणे न कोपि विशेषः सिध्यति यद्यपि, तथापि मात्रतिरिक्तभक्तानां श्रवणेपि दुःखहेतुरिदमिति भक्तदुःखहेतुकरणं भक्तिमार्गविरुद्धमिति सर्वथा पुरुषोत्तमस्याकर्तव्यं भवतीति तस्यापि करणेनातिशयेन तथात्वं बोधितं भवति। एवं सत्युदरस्य व्यापकत्वाद्यत्र कुत्रचित्स्थितिवद्दृग्वत्पृष्ठभागे पार्श्वयोश्च दाम्नः स्थितिर्न विरुद्धा। किन्तु दाम्नावच्छेद्यत्वं विरुद्धम्। तच्च तदाद्यन्तयोर्मेलने भवति। यद्यप्युक्तदेशे स्थितिवद्यथात्रापि स्थितिस्तथोक्तदेशे तन्मेलनवदत्रापि तत्सम्भवति, तथाप्यत्र स्वरूपप्राकट्यात् तद्धर्माणामपि व्यापकत्वादीनां प्रकटत्वेन स्वकार्योन्मुखत्वान्न तत् संभवति। स्वस्यैवावच्छेदकत्वे तत्साधनोच्छेदप्रसङ्गः। तथा च दामाद्यन्तयोः सतोदरेणैव न तथा सम्भवतीति न्यूनताया आवश्यकत्वेन प्रथमातिक्रम इति न्यायादल्पेत्यादिनोक्तहेतुना च तथा **न्यूनमभूत्**। अग्रे '**कृष्णः कृपया**-

सीत्स्वबन्धन' इति वाक्यात्स्वयमेव स्वरूपमर्यादामतिक्रम्य तथाभवदित्युक्तम् । 'सर्वतः पाणिपादान्त'मित्यत्र तत्स्वाभाविकधर्मरूपवसनभूषणविशिष्टानामेव देशापरिच्छेद उक्त इति न तैरवच्छेदः शङ्कनीयः । **व्यापकत्वस्येति** । स्वाभाविकव्यापकत्वस्यैवानवच्छेद्यत्वे हेतोः सत्त्वात् कृत्रिमतत्करणमप्रयोजनकमयुक्तं चेति भावः । अल्पपरिमाणत्वेन प्रतीयमानस्यैव तदधिकपरिमाणवत्त्ववच्छेदकाधिक्येपि सर्वत्र समानपरिमाणत्वेन प्रतीयमानत्वं च चन्द्रतत्प्रतिबिम्बयोरस्तीति तद्दृष्टान्तमाहुः **प्रतिबिम्बावाविति** । यथा द्वादशसहस्रयोजनात्मकत्वेपि चन्द्रमण्डलस्यैतो यावत्परिमाणकं तद् दृश्यते तावत्परिमाणकमेवोदध्वने सरस्सरित्प्रभृतिषु च, तथात्रापीत्यर्थः । तथा सति तु पूर्ववैलक्षण्यज्ञानादशक्यताज्ञानेन भूयो योजनासम्भवोपि । **इदमेवोक्तं वैलक्षण्याज्ञानादित्यनेन** । यद्वा । तदैव निकटस्थमणिस्तम्भादिगतभगवत्प्रतिबिम्ब आदिपदात् तच्छायायां च पूर्ववदेवोपादम्भादित्यर्थः ॥ १३–१६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

न चान्तरित्यत्र यस्यान्तर्नास्तीत्यस्यार्थो यस्यान्तर्व्यवहारविषयत्वं नास्तीति, तदुपपादयन्ति **भगवांस्त्वित्यादि**, ननु घट आकाशस्येवान्तर्भावो व्यापकत्वेपि **सम्भवतीत्यत आहुर्निरवयवत्वादित्यादि**, "न वियदश्रुते"रित्यधिकरण आकाशस्यापि सावयवत्वं सिद्धमिति तस्य परिच्छेदको घटादिर्भवति यन्मते निरवयवस्तन्मतेपि घटादेस्तद्भिन्नत्वात् प्रदेशपरिच्छेदकत्वं घटादेः **सम्भवति** न तथा भगवतीति तथेत्यर्थः, तर्हि स्वयमेवान्तःशब्दवाच्योऽस्त्विति कथं तदभाव इत्यत **आहुश्चकारादित्यादि**, नन्वन्तर्यामिब्राह्मणे "यः पृथिव्यां तिष्ठन् यः पृथिवीमन्तर" इत्यादिभिर्भगवतोन्तरत्वमुक्तमिति कथं निषिध्यत इत्यत आहुरन्तरित्यादि, **अन्तरं** भेदः, तथा च यद्यपि तत्र सर्वान्तरत्वकथनेनान्तर्व्यवहारविषयत्वं सिध्यति तथापि भेदस्तु नोक्त इत्यन्तर्वर्तमानोपि तं त'मन्तरयति'तं स्वस्मिन् स्थापयतीति स तादृशः केन हेतुनान्तर्भावमापद्येत न केनापीति **नान्तरित्यर्थः**, ननु तत्र पृथिव्यादीनामाधारत्वमुक्तमित्याधेयस्य भगवतः कथं नान्तःस्थितत्वमित्यत **आहुराधारत्वे त्वित्यादि**, **तुरप्यर्थे**, तथा चान्तरत्वेपि नान्तरत्वेन तत्र भावेनोक्तेति **नान्तरित्यर्थः**, ननु भवतु तथाभावनाभावस्तथापि 'नान्त'रित्यत्र का युक्तिरित्यत आहू **रूपे**त्यादि, तथा च यद्यन्तः **स्याद्** रूपादिवद् बहिर्नोपलभ्येतोपलभ्यते तु सद्रूपेण बहिरपीत्यतो **नान्तरित्यर्थः**, तदेतदुपपादयन्ति **न ही**त्यादि तर्हि बहिष्ट्वमस्त्विति तदपि निषेधति **नापी**त्यादि, तथा च यः सर्वान्तरः सर्वानन्तरयति सर्वत्रानुस्यूतश्च स कथं तथा स्यादित्यर्थः, यद्वा 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानं वैश्वानरमुपास्त' इति जाबालोपनिषत्स्वपि प्रादेशमात्रस्य व्यापकत्वमुक्तमिति विरुद्धधर्माश्रयत्वेन **वैश्वानराधिकरण** उपपादितत्वादपि न विरोध इत्यर्थः, सिद्धमाहु**रनेने**त्यादि, **अनेने**त्यन्तरत्वबहिष्ट्वाभावेन पूर्वापरभावनिराकरणं व्याकुर्वन्ति **किञ्चे**त्यादि, **अत्र निरवयवस्ये**त्यादीनि चत्वार्यपि विशेषणानि प्रत्यक्षस्यत्र भगवतो ज्ञेयानि 'कृत्स्न'स्यैव 'प्रज्ञानघन'त्वात् , स्वेच्छयैव व्यवहार्यत्वेन वागादिनिवृत्त्यवधित्वात् **स्वत एव भासमानस्य** "यदाश्रयं येन यतः प्रतीयत" इत्यत्र सिद्धत्वात्, "तत् केन कं पश्येदि"तिश्रुत्युक्तज्ञातृज्ञेयभावतिरोधायकताया अपि तत एव सिद्धत्वादिति तेन यस्य पूर्वं न भगवत्स्वरूपज्ञानमस्ति पश्चाच्च जातं तत्र तद्भावापेक्षिकं पौर्वापर्यं यद्यप्यस्ति तदपि तदज्ञानाज्ञानकृतं न तु स्वरूपकृतमिति न दोषः, दक्षिणोत्तरादिभावाभावे हेतुमाहुः **सर्वत्र स्थित** इत्यादि, तत्तद्देशेषु यस्तिष्ठति तस्य पूर्वापरभावो **भवति** भगवांस्तु सर्वरूपवान् न कुत्रापि तिष्ठतीति न तथात्वं वक्तुं शक्यमित्यर्थः, यद्वा **पूर्वापरपदार्थ** एवात्रोच्यते सर्वत्र स्वरूपात्मके देशे स्वयमेव स्थितः सन् स्वस्यैव **पूर्वापररूपत्वं** मन्यत इत्यर्थः, तेन सिद्धमाहु**रत** इत्यादि, जगत एतावत्त्वं भगवत्युपपादयन्ति **यदी**त्यादि, सर्वान्तरत्वमुपपादयन्ति **यदि सर्वान्तर** इत्यादि, **जगदिति विशिष्टमित्या**द्युत्पत्तिसमये गमनस्य गमनसमये चोत्पत्तेरभावादेकविशिष्टेपरवैशिष्ट्यं न भासेतेत्यर्थः, **अन्तःस्थितभगवद्धर्मैरेवेति** "पुरुषविधोन्वयात्र चरमोन्नमयादिषु य" इत्यत्र श्रुतिगीते तथोक्तत्वाद् **भगवद्धर्माश्च** नित्यत्वादयो ज्ञेयाः, **जगन्मय** इत्यस्यार्थं टिप्पण्यामाहुर्जगन्मयेत्यादि ॥ १३ ॥ तमित्यत्र **देहस्तु प्राकृत** इति प्रकृतस्य भगवत्स्वरूपस्य सम्बन्धी भगवत्स्वरूपसमान इत्यर्थो ज्ञेयः, **क्षौमं वास** इत्यत्र व्युत्पादितस्यार्थस्यानुरोधान् मायासम्बन्धस्य कृष्णोपनिषदुक्तत्वाद् विरुद्धकृतिदर्शनाच्च मायोपदिग्ध इति पुरःस्फूर्तिको वार्थो ज्ञेयः, **तथा कर्तुमिति** बन्धनं **कर्तुं** तर्हि किं सर्वेषां तथा बुद्धिं सम्पादयतीत्याशङ्क्य व्यवस्थामाहु**र्मध्यमे**त्यादि, निरोधस्याधिकारिभेदेनावस्थात्रयसत्त्वात् तद्वत्सु तथातथेत्यर्थः, **सन्देहः स्या**दितीश्वरत्वे **सन्देहः स्यात्**, इच्छेति माहात्म्यज्ञापनेच्छा, ननूलूखले बन्धनकरणस्य किं प्रयोजनमत आहु**रुलूखले**त्यादि, तिरश्चीनं पतितमुलूखलं पादेन चालयन् **क्रीडति**, इदं चोलूखलं पूर्वस्माद् भिन्नमेव, उलूखलेत्यारभ्य **कारितवानि**त्यन्तः परोक्षवादो भगवदिच्छाज्ञापनार्थः ॥ १४ ॥ **तद्दामे**त्यत्र ननु यस्यैते धर्मा उक्तास्तस्य ॥ बन्धनमसम्भव्यं च तथा जात इति नास्यते धर्मा वक्तुं शक्या इत्याशङ्क्याभासमाहु**रय**मित्यादि, तथा चोपायज्ञापनेन तद्धर्मवानयमित्येव शुकः स्फुटीकरोति, **भगवता स्वस्मिन्नि**त्यादि तत्तात्पर्यं टिप्पण्यामाहु**रत्रे**मित्यादि, **अज्ञानमिति**, तथा **चाज्ञानादन्तस्तिरोभावः पराभूतत्वाद् दृष्टेरिति**, तथा च शङ्खः पीत इत्यादिवद् बहिस्तिरोभाव इत्यर्थः, तथा च मातृचरणानामन्तर्बहिर्भगवत्तिरोभाव इति सिध्यति, तदाहु**स्तदिद**मित्यादि, **मत्वे**त्यादिकं विवृण्वन्ति **लीले**त्यादि, **ज्ञानकरण** इत्यन्तर्बहिस्तिरोहितत्वज्ञानं वेष्टनकरणं चेत्यर्थः, **तथात्व** इति ज्ञानेपि **वेष्टनसम्भव** इत्यर्थः, **इव**

मेवोक्तमिति भक्तनियम्यत्वाङ्गीकरणमेवोक्त, **अन्यथेति** यदि तं नाङ्गीकुर्यात् , तदेवोपपादयन्त्येवं **सती**त्यादि, **तथा भाव इति** नियम्यत्वे, **अङ्गीकार इति** नियम्यत्वाङ्गीकारः, **अत इ**त्युक्तहेतोः, **अत एवे**त्युक्तधर्मस्य सर्वभक्तोपयोगित्वादेव, **नैतादृशत्वमिति** न स्वस्वरूपमर्यादातिक्रामकत्वं, एतदिति प्रभुनियमनं, एवं च निरङ्कुशजगत्कर्तृत्वाद्यपेक्षयापि स्वस्वरूपमर्यादातिक्रमस्यैव परमैश्वर्यत्वं सिध्यति, तेन षष्ठे श्लोक ऐश्वर्यस्यैव वशीकारत्वं सेत्स्यतीति बोध्यं, विशेषणद्वयस्य तात्पर्यान्तरमाहुर्यद्वेत्यादि, **तयोरिति** विशेषणयोः, **उच्यत** इतीदानीं व्युत्पाद्यते, **अत** एवेति स्नेहे सोपाधिकत्वस्य ज्ञाप्यत्वादेव, एवं च विशेषणद्वयं बन्धने द्व्यङ्गुलन्यूनतायां च हेतुत्वेन सिद्धं, **स्वार्भके**त्यादिविशेषणद्वयस्य शेषशेषिभावमङ्गीकृत्य पक्षान्तरमाहुर्यद्वेत्यादि, वदिति मतुप्प्रयोगः, **तथा न्यूनमिति** द्व्यङ्गुलं **न्यूनं**, **वस्तुस्वाभाव्यादिति** स्वापराधिसम्बन्धिवस्तुस्वाभाव्यात्. ननु यद्येवं तदा **पूर्वापरयोरि**त्यादिसुबोधिन्युक्तवेष्टनाभावहेतूक्तिविरोध इत्यत आहुः **पूर्वे**त्यादि, **तथा भवतीति** वशीकारबोधको **भवति**, **अत एवे**त्येवं दर्शनार्थत्वादेव, एतस्य **मूल** इत्यनेन सम्बन्धः, **तथात्वमिति** भक्तवश्यत्वं, **न विरुद्धेति** न व्यापकत्वविरुद्धा, दामस्थित्युपपत्तिं व्याख्याय द्व्यङ्गुलन्यूनतोपपत्तिं व्याकुर्वन्ति तच्चेत्याद्यभूदित्यन्तं, **अत्रापि स्थितिरिति** मेलनदेशे **स्थितिः सम्भवती**तिशेषः, **उक्तदेश** इति यत्रकुत्रचित्, तदिति मेलनं, परिच्छिन्नताप्रत्यायन इव स्वस्यैव स्वावच्छेदकत्व उभयसमाधानमितिशङ्कायामाहुः **स्वस्ये**त्यादि, **तत्साधनोच्छेदप्रसङ्ग** इति भक्तवश्यताज्ञापनसाधनस्योच्छेदप्रसङ्गः, रज्जुन्यूनीकरणाभावे स्वस्वरूपज्ञानाभावेन लोकतुल्यताया एव प्रतीतेरिति, एवं दामानवच्छेद्यत्वमुपपाद्य **रज्ज्वाद्यन्तयोरित्यादे**रर्थं वदन्तः सिद्धमाहुस्तथा **चे**त्यादि, **लोकेङ्गुलेः प्रथमपरिमाणत्वं** पुरुषसूक्ते सिद्ध "मत्यतिष्ठद् दशाङ्गुल' मितिश्रावणात् तत्रोक्तं **प्रथमे**त्यादि, तर्हि तावदेव कुतो नोक्तमित्यतो द्वितीयो हेतुः, सुबोधिन्यां **रज्ज्वाद्यन्तयोरिति** तु द्वित्वसङ्ख्यायां हेतुर्बोध्यः, एवं द्व्यङ्गुलन्यूनत्वं व्याख्यातं, तर्ह्यग्रे **कथमवच्छेद्य**त्वमित्यत आहुरग्र इत्यादि, **स्वरूपमर्यादामिति** किञ्चिदाशङ्क्य परिहरन्ति **सर्वत** इत्यादि, ननु भगवतो योगेश्वरत्वात् तेनैव रज्जुन्यूनता कुतो नाङ्गीक्रियत इत्याकाङ्क्षायां यदाचार्यैरुक्तं **यापकत्वस्ये**त्यादिना तत्तात्पर्यमाहुः **स्वाभाविके**त्यादि, प्रतिबिम्बदृष्टान्तमवतारयन्त्यल्पेत्यादि, तद्दृष्टान्तं, व्याकुर्वन्ति **तथा स्तीति** परिमाणान्तरप्राकट्ये **सति** ॥ १५ ॥ **यदासी**दित्यत्र **"त्रिसत्या हि देवा"** इति तु श्रुतिर्ज्ञेया, **भगवत** इत्याद्यत्र पुष्टिप्रवाहमर्यादाभेदेन त्रिविधेपि जगति स्वप्राकट्यं कुर्वन्नपि न बध्यत इति व्यज्यते ॥ १६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

न चान्तरित्यत्र न कस्म दपीति भगवतोन्तः कस्याप्यभावात् किञ्चिन्निरूपितान्तस्त्वयुक्तो भगवान् नेत्यर्थः, **मूले** अन्तरादिशब्दा भावप्रधाना ज्ञेयाः, ननु यथा गृहस्थितैर्भित्त्यादिभिर्गृहमर्धं परिच्छिद्यते तथा भगवत्स्थितैर्हस्तपादादिभिर्भगवत्परिच्छेदे तन्निरूपितमन्तस्त्वं सिद्धमेवेत्यत आहुः **निरवयवत्वाच्चे**ति, हस्तादिभावापन्नं स्वरूपमेव न त्ववयवावयविभावस्तत्रेत्यर्थः, **आधारत्वे** त्विति तुरप्यर्थे तदाप्यन्तस्त्वं नास्तीत्यर्थः, नन्वाधेयनिरूपितमन्तस्त्वं आधारस्य जायत इत्याशङ्क्य नायं नियम इत्याशयेनाहुः **रूपादिष्विति**, फले बीजनिरूपितान्तस्त्ववद् रूपनिरूपितमन्तस्त्वं नास्ति किन्त्वन्तर्बहिर्व्याप्तं रूपमस्ति, तन्निरूपितान्तस्त्वे बहीरूपाभावात् फलरूपः पदार्थोऽदृश्यः **स्यादि**त्यर्थः, **अनिरूप्यस्ये**ति देशादिभिरितिशेषः, **सर्वत्रे**ति पूर्वापरभावस्यैव विशेषतो व्यवहार्यत्वात् स **एवोक्त** इत्यर्थः, **स्वरूपमपीति** बहिष्ठादिकं भगवानेवेत्यर्थः, जगत्पदेन प्रमाणमप्युक्तमित्याहुः **किञ्चेति**, जायते गच्छति चेति, तथा च जायते **इति** जः बाहुलकादनुपपदेपि कः गच्छतीति गत् क्विबन्तं, जश्चासौ गच्चेतिविग्रहः, **न गच्छेदिति** लीनं न भवेदित्यर्थः, **यदीति** जगतः सत्ता न स्यादित्यर्थः, **विवक्षितधर्मवत्त्वादिति** अस्तिभातीत्यादयो भगवद्धर्मा एव जगति प्रतीयन्त इतिभावः ॥ १३ ॥ **अधोक्षजमित्यत्र अतिप्राकृतेति** विचाररहितेत्यर्थः, **स्वाश्रयत्वेनेति** पादयोराश्रयः अग्निरूपत्वान् मुखस्य चाश्रय इति आद्यन्ताश्रयत्वात् तत्र बन्धनमित्यर्थः ॥ १४ ॥ **तद्दामेत्यत्र पूर्वापरयोरिति** दोषद्वयस्यैव प्रदर्शितत्वादन्तर्बहिर्भाव एव प्रतीतो न तु पूर्वापरभाव इतिभावः, **केनापि धर्मेणेति** मानुषत्वेन धर्मेण व्यापकत्वाद् भिन्नेनेतिज्ञापनाय द्व्यङ्गुलन्यूनतां सम्पाद्य पश्चाद् बन्धनं सम्पादितवान्, **क्रोडीकृतस्य** व्यापकाद् भेदे पूर्वमेव बन्धनं जातं स्यादितिभावः, टिप्पण्यां **यथा जगत्कर्तृत्वादेरिति** ईश्वरस्य धर्मद्वयं जगत्कर्तृत्वादिकं कृपा च पुष्टिभक्तानां धर्मद्वयं भगवन्नियामकत्वं दास्यं च, तथा च यथेश्वरस्य धर्मद्वयमध्ये जगत्कर्तृत्वादेर्न भक्तवश्यतापादकत्वं किन्तु भगवत्पौरुषरूपत्वं तथा भक्तानामपि धर्मद्वयमध्ये एतद् भगवन्नियामकत्वं न भगवन्नियम्यतापादकं किन्त्वतिपौरुषरूपमित्यर्थः ॥ १५ ॥

(४) श्रीमद्दीक्षितलालूभट्टयोजिता श्रीसुबोधिनीयोजना

न चान्तर्न बहिरित्यस्य विवृतौ **चकारादित्यादि** चकारात् स **शब्दोऽपि भगवति न प्रवर्तत** इत्युक्तमित्यन्वयः, **अन्तःशब्दव्यवहार्यं आकाश** इति अन्तस्त्वबहिष्ट्वव्यवहारस्याकाशाधीनत्वादन्तःशब्दव्यवहार्यत्वमाकाशे, **अतः स शब्दोपीति** अन्तःशब्दोपीत्यर्थः, **न चान्तर्न बहिरि**त्यनेनान्तस्त्वनिषेधादन्तःशब्दव्यवहार्यत्वमाकाशे, अतः **स अन्तःशब्दोपि न भगवति**

प्रवर्तत इत्यर्थः, **आधारत्वेत्वित्यादि** "सेतुर्विधरण" इतिश्रुतेः सर्वाधारत्वं यद्यपि भगवतस्तथापि भगवति सर्वमस्तीति वक्तुं युक्तं न तु भगवतः अन्तस्त्वमस्ति, तत्र दृष्टान्तः **रूपादिष्वित्यादि**, घटादीनां रूपाधारत्वेपि न घटान्तर्वर्ति रूपं, तथा सत्यदृश्यः स्यादिति रूपस्य घटान्तर्वर्तित्वे चक्षुरग्राह्यत्वे नीरूपद्रव्यस्य चाक्षुषत्वं न स्यात्, न हि फलान्तर्वर्तीनि बीजानि फलग्रहणे चक्षुर्ग्राह्याणि भवन्ति, एवं घटान्तर्वर्ति रूपमपि चक्षुरग्राह्यं स्यात्, अत आधारत्वेपि अन्तर्वर्तित्वं न वक्तुं शक्यमतो भगवतो जगदाधारत्वेपि न भगवदन्तर्जगदित्यर्थः, **पूर्वापरं बहिश्चान्तरित्यस्य** विवृतौ **पूर्वभावाभावान् न भवेदिति** भगवतः पूर्वभावो यदि जगत् प्रति न स्यात् तदा भगवतः कारणत्वाभावाज् जगन् न भवेदित्यर्थः, **परभावाभाव** इति यदि भगवान् जगतः परो न स्यात् तदा जगत् न गच्छेत्, कुत्र गच्छेदित्यर्थः, एवं सति जायते गच्छतीतिव्युत्पत्त्यभावे जगत्त्वमेव न स्यादिति हार्दम् ॥ १३ ॥ **तद् दाम बध्यमानस्येत्यत्र रज्जुस्थूलतायामपि नोदरस्थौल्यमिति** भगवदुदरस्य तु न स्थौल्यं, नन्वत्र किं प्रमाणं तत्राहुः **प्रतिबिम्बावौ तथोपलब्धेरिति**, श्रीयशोदासदने वर्तमानानि यानि दर्पणमणिस्तम्भादीनि तत्र भगवत्प्रतिबिम्बोपलब्धावपि न भगवदुदरस्थौल्योपलब्धिरित्यर्थः ॥ १५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तथापि 'मातृत्वात्तत्स्नेहवशात् तस्या बन्धनमनोरथमपि भगवान् पूरितवान्' इत्याह—न चेति षड्भिः। यद्यप्यन्तर्बहिरादिराहित्येन तस्य बन्धनयोग्यता नास्ति, तथापि गोपिका यशोदा तमात्मजं मत्वा यथा प्राकृतं बालकं तन्माता बध्नाति, तथा दाम्नोलूखले बबन्धेति द्वयोरन्वयः। "बन्धनं हि बहिः परिवृतेन दाम्नान्तरावृतस्य भवति, तथा पूर्वापरविभागवतो वस्तुनः पूर्वतो दाम धृत्वा परितः परिवेष्टनेन भवति। यस्य चान्तरादि नास्ति तस्य बन्धनं कथं स्यात्" इत्याह—न चेत्यादि। अन्तर्बहिरादिराहित्ये हेतुमाह—पूर्वापरमिति। यश्च जगतोऽन्तर्बहिरादिरूपेण वर्तते, तस्यान्तर्बहिरादि कथं स्यादित्याशयः। ननु 'एवमपि भिन्नस्य जगतो विद्यमानत्वात्तदन्तरस्थितस्य तस्य बन्धनं कुतो न स्यात्' इत्याशङ्क्याह—जगच्च य इति। सर्वोपादानतया सर्वरूपत्वात् स्वेनैव स्वस्य बन्धनासम्भवादित्याशयः॥ १३॥ बन्धनासम्भवे हेत्वन्तरमपि दर्शयन्नाह—अव्यक्तमिति। एतदेव स्पष्टयति—अधोक्षजमिति। अधः अक्षजं इन्द्रियजन्यं ज्ञानं यस्मात्तं, प्रत्यक्षादिसर्वप्रमाणाविषयत्वान्न व्यज्यते इत्यव्यक्तमित्यर्थः। ननु 'यद्येवं सर्वथा बन्धनायोग्यस्तर्हि कथं बबन्ध ?' इत्यपेक्षायामाह—मर्त्यलिङ्गमिति। कृपया स्वीकृतमनुष्यनाट्यमित्यर्थः ॥ १४॥ तद्बन्धनप्रकारमाह—तद्दामेति। कृतमागः भाण्डस्फोटनादिरूपोऽपराधो येन तस्य, 'स्वार्भकस्य स्वभाववैपरीत्यं माभूत्' इति भयादुपेक्षानर्हस्य, अत एव बध्यमानस्य सतस्तत् बन्धनसाधनभूतं दाम द्व्यङ्गुलोनं द्वाभ्यामङ्गुलिभ्यामपूर्णमभूत्। तदा सा गोपिका यशोदा तेन दाम्ना सहान्यदपि दाम सन्दधे ग्रथितवती ॥ १५ ॥ एवमुभयसन्धानेन यदेकं दामासीत्तदपि द्व्यङ्गुलन्यूनं जातम्, तदा तेनापि सहान्यद्दाम सन्दधे। तदा तदपि द्व्यङ्गुलं न्यूनं जातम्। एवं यद्यदादत्त सन्धानं कृत्वा गृहीतवती, तत्तद्बन्धनं द्व्यङ्गुलोनमेवाभूत् ॥ १६ ॥

अन्वितार्थप्रकाशिका

अकोविदत्वमाह-न चेति द्वयम् ॥ यस्य अन्तर्मध्यं न बहिर्न पूर्वं न अपरमपि न यश्च जगतः पूर्वापरम् अन्तर्बहिश्च वर्त्तते यश्च जगद्रूपोऽपि। अयं भावः। बन्धनं हि बहिः परिवृतेन दाम्ना अन्तरावृतस्य भवति तथा पूर्वापरविभागवतो वस्तुनः पूर्वतो दाम धृत्वा परितः परिवेष्टनेन भवति न त्वेतदस्ति इत्युक्तं न चान्तरिति व्याप्यस्य व्यापकेन बन्धो भवति। अत्र तु विपरीतमित्युक्तं पूर्वापरमिति। किञ्च तद्व्यतिरिक्तस्याभावान्न बन्ध इत्युक्तं जगदिति। तमधोक्षजम् अधः अक्षजम् इंद्रियजन्यं ज्ञानं यस्य अत एव अव्यक्तं मर्त्यलिङ्गं मनुष्यमूर्तिं तं श्रीकृष्णमात्मजं मत्वा गोपिका यशोदा यथा प्राकृतं बालकं तन्माता बध्नाति तथा दाम्नोलूखले बबन्ध बद्धुमारभत ॥ १३-१४ ॥ तद्दामेति ॥ कृतागसः कृतापराधस्य तस्य स्वार्भकस्य बद्ध्यमानस्य सतस्तत् बन्धनसाधनभूतं दाम द्व्यङ्गुलोनं द्वाभ्यामङ्गुलाभ्यामपूर्णमभूत्तदा सा गोपिका यशोदा तेन दाम्ना सहान्यदपि दाम संदधे ग्रथितवती ॥ १५ ॥ यदासीदिति ॥ एवमुभयसंधानेन यदेकं दामासीत्तदपि द्व्यङ्गुलन्यूनं जातं तदा तेनापि सहान्यद्दाम संदधे। तदा तदपि द्व्यंगुलं न्यूनं जातमेवं यद्यदादत्त संधानं कृत्वा गृहीतवती तत्तद्बन्धनं द्व्यङ्गुलोनमेवाभूत्। एतेन कृष्णस्य परिच्छिन्नायमानस्यापि विभुत्वं व्यञ्जितम् ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं मात्रावबुभित्सस्य हरेर्निरावरणत्वमाह न चेति। यस्य हरेः श्रीकृष्णस्य नांतः स्वधामनि स्थितत्त्वादाभ्यंतरत्वं न भवति यस्य च बहिर्न केवलं बहिःस्थितत्वं नास्ति। सर्वगततया ब्रह्मांडस्थानां भक्तानां दर्शनदातृत्वात् पूर्वं न अपरश्चापि न पूर्वस्थितत्वं नास्ति पश्चात्स्थितत्वं नास्ति हरेर्व्यापकतया सर्वत्र स्थितानां स्वभक्तानां प्रत्यक्षदर्शनदातृत्वात् तर्हि कीदृशस्तत्राह जगतो विश्वस्य यः पूर्वापरमंतर्बश्चास्ति विश्वस्योत्पत्तेः पूर्वं दिव्यविग्रहेण स्वधामनि स्थितोऽभूत् पश्चात् प्रलयेऽपि

ब्रह्मपुरे तथैवासीत् विश्वस्थितौ सत्यां सर्वब्रह्मांडेभ्यो बहिर्व्यतिरेकभावेन स्वस्थाने दिव्यमूर्त्यावर्त्तमानोऽस्ति स्वधामस्थः सन् विश्वस्यांतः अंतर्यामिशक्तिरूपान्वयेन व्यापकोऽस्ति कथंभूतः जगच्च यः जगतो विश्वस्य च यश्चयनं रचनाविशेषो यस्मात् सः ॥ १३ ॥ अव्यक्तं ज्ञानिभक्तवर्जितानां जनानां परमात्मतयाऽज्ञेयं मर्त्यलिंगं मनुष्यवेषम् अधोक्षजं सुतं मत्वा दाम्ना रज्ज्वा प्राकृतं जनं यथा तथा बबंध अधःकृतमक्षजमैंद्रियकं ज्ञानं येन तं यद्वा अधोक्षाणां जितेंद्रियाणां जायते प्रत्यक्षो भवतीत्यधोक्षजस्तं एवं व्याख्यासुधाऽमरटीका ॥ १४ ॥ कृतागसः अनुष्ठिताऽपराधस्य बध्यमानस्य बद्धुमारब्धस्य तस्य तद्दाम बंधनरज्जुः द्व्यङ्गुलो न द्वाभ्यामंगुलाभ्यामूनमपूर्णमभूत् तेन दाम्ना साकमन्यत्दाम ॥ १५ ॥ यद्बद्धं दाम तदपि न्यूनमासीत् यद्यद्बंधनं दाम आदत्त अग्रहीत्तत्तत द्व्यंगुलोनमभूत् ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु किं तद्वीर्यं यदनभिज्ञा सती प्राकृतमिव तं बबन्ध । किं च । बन्धनं हि बहिः परिवृतेन दाम्ना अन्तरावृतस्य भवति । तथा पूर्वापरविभागवतो वस्तुनः पूर्वतो दाम धृत्वा परितः परिवेष्टनेन भवति, तदेवं विधत्वं कृष्णे नास्तीत्याह ॥ न चान्तरिति ॥ यस्य कृष्णस्य, अन्तः न, बहिः च न, पूर्वं न अपरं चापि न, यतः यः कृष्णः, जगतः कृत्स्नस्य विश्वस्य, पूर्वं चापरं च पूर्वापरं, तत्र पूर्वं पूर्वावधिरेव, अपरमुत्तरावधिरेव, बहिः, अन्तश्च, जगतो बहिरपि वर्त्तमानः अन्तरन्तर्व्याप्यतयापि वर्त्तमानः, भवति । तस्य जगदन्तर्भूतेन व्याप्येन दाम्ना कथं बन्धनं भवेदित्यभिप्रायः । किं च । सर्वस्य जगतः कारणतया तदन्तरात्मत्वेन तच्छरीरकतया च ततः पृथक्सिद्धवस्त्वन्तराभावात् स्वनिष्ठवस्तुसाधनकं बन्धनं न संभवतीत्यभिप्रायेणाह । जगच्च जगदपि, यः, कार्यकारणशरीरशरीरिभावनिबन्धनमिदं सामानाधिकरण्यम् । अयं भावः । जगदीश्वरयोः कार्यकारणभावे स्थूलवत् प्रतीयमानमपि कार्यं, अल्पवत् प्रतीयमानमपि कारणं संबद्धं नार्हमेव । एतदर्थप्रपञ्चोऽत्र सुधासिन्धोः शताधिकदशमतरङ्गाद्बोध्यः । शरीरशरीरिभावे शरीरभूतयोश्चिदचितोः शरीरिणः हरेः सर्वात्मकत्वसिद्धया तद्बन्धनकृद्वस्त्वन्तराभावान्नास्य बन्धः समुचितः । अणोरणीयान् महतो महीयान' इति श्रुत्या हरेरणोरप्यणुभावभाजो महतोऽपि महीयस्त्वभाजो न कथंचिद्बन्धनार्हत्वं तस्य पूर्वापरभावस्याप्यसत्त्वतः पूर्वतो धृत्वा परितः परिवेष्टनाभावाच्च न बन्धसंभवं इति ॥ १३ ॥ तमिति ॥ मर्त्यस्येव लिङ्गं शरीरं यस्य तं, तथापि अव्यक्तं कथंचनापि तत्कृपया विना व्यक्तीकर्त्तुमशक्यं, तमुक्तविधं, अधोक्षजं भगवन्तं, केवलं आत्मजं मत्वा, गोपिका यशोदा, प्राकृतं मर्त्यं, यथा तद्वत्, दाम्ना साधनेन, उलूखले बबन्ध बन्धनोद्यमं चकारेत्यर्थः ॥ १४ ॥ तदिति ॥ कृतागसो दधिमण्डभाजनभञ्जनरूपकतापराधस्य, बद्धयमानस्य बद्धुमारब्धस्य, स्वार्भकस्य स्वसुतस्य, तत् बन्धनार्थमुपात्त, दाम रज्जुः, द्व्यङ्गुलोनं द्व्यङ्गुलं न्यूनं अभूत् । द्व्यङ्गुलमानेनापूर्णमभवदित्यर्थः । तदा तेन द्व्यङ्गुलोनेन दाम्ना सह, गोपिका यशोदा, अन्यच्चान्यदपि दाम, संदधे ॥ १५ ॥ यदासीदिति ॥ यदासीत् यत् द्वितीयं दाम संधितमासीत्, तदपि, न्यूनं द्व्यङ्गुलमात्रोनं, आसीत् । तेन द्वितीयेन दाम्ना सह, अन्यत्तृतीयं दामापि, संदधे । तत्तृतीयं दाम अपि, द्व्यङ्गुलं न्यूनं, आसीत् । एवं यत् यत् बन्धनं बन्धनार्थकं दाम, आदत्त, तत्तद्द्व्यङ्गुलन्यूनमेवाभवदिति भावः ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तं मत्वेतिः १०.९.१४.

परिहातुं खलसङ्गम–मतितर–खलसङ्ग एव हेतुरिति । अतिसन्निकर्षशास्त्राज्जानत्येषा बबन्ध किमु तस्मिन् ॥ ४७ ॥
अयं चोरश्चौर्यकर्मण्येतत्साहाय्यभागभूत् । इति वीक्ष्य द्वयोर्बन्धार्हतां तत्र बबन्ध तम् ॥ ४८ ॥
सा बबन्ध तमित्यास्तां मन्मतं तु बबन्ध सः । गोपिकोलूखले एव तमस्तन्तुगुणात् प्रभुः ॥ ४९ ॥

शक्तिर्योगो लक्षणा गौण्यपीति बोधे हेतुः श्रीपतौ तत्र चोक्तम् ।
तद्बोध्यत्वं गर्गयोगीन्द्र वेदैर्मन्ये गौण्या गोपिका ज्ञातुमैच्छत् ॥ ५० ॥

तद्दामेतिः १०.९.१५.

यथा यथा पूरयितुं विभूदरं तदा यशोदा जगृहे गुणोत्करम् ।
गुणैस्तथेशोऽपि निजैः कृतोद्यमस्तदीय-हार्दस्थिति पूर्तये मुदा ॥ ५१ ॥

यदाऽऽसीत्तदितिः १०.९.१६.

रजःप्रभृतयो गुणा अपि न यं कचित् स्प्रष्टुमप्यलं जगति तादृशे परतरे जगत्साक्षिणि ।
कथं नु खलु संभवेल्लघु गुणाभिसंवेष्टनं तदेतदुचितं विभौ यदभवद् गुणापूरणम् ॥ ५२ ॥

यदिन्द्रियाणामिह बन्धनं स्मृतं न जातुचित् तत्तदधीशितुर्भवेत् ।
इति स्फुटं ज्ञापयितुं न गोपतेः, बभूव गोबन्धक-दामबन्धकम् ॥ ५३ ॥
अध्यस्तस्याश्रावि बन्धो जगत्यां नाधिष्ठानस्यांशतोऽपीति लोके ।
श्रुत्यर्थस्य ख्यातये नोदरेऽभूद् बन्धस्तस्मिन् विश्वविश्वप्रकाशे ॥ ५४ ॥
यस्मिन् कृपानुग्रहवीक्षणं विभोर्भवत्यसौ वेत्ति न बन्धसम्भवम् ।
युक्तं तदा तद्धरिणा तथेक्षितं मुक्तं स्वयं दाम न बन्धभागभूत् ॥ ५५ ॥
उदरे विनिवेशिता गुणा निखिला अप्यलमस्य पूर्तये । न भवेयुरितीव सूचितं विभुनोनोदर दामलीलया ॥ ५६ ॥
नैकेन वीक्षणमभूदिह यस्य तस्मिन्नन्धैः शतेन मिलितैरपि किं फलं स्यात् ।
सर्वाण्यवेहि सदृशानि वृथा प्रयासैः किं वेति दाम किमु सूचयितुं तथाऽऽसीत् ॥ ५७ ॥

द्व्यङ्गुलं न्यूनमिति:

यदाहं प्राप्यः स्यामिह सुमनसां युक्तमनसां तदानीं सम्बन्धः स्फुरति मयि सत्त्वैकगुणतः ।
द्वयोर्नेति प्रायः प्रकटितमिहेशेन स तदा यतो द्वाभ्यामूनात्तदुचितगुणाद् बन्धयुगभूत् ॥ ५८ ॥
यत्र स्यातां नामरूपे सरूपे बन्धस्तस्यैवोचितो नोचितोऽत्र । द्वाभ्यामूने ब्रह्मणोति व्यबोधि दाम्ना तेन द्व्यङ्गुलोऽनेन मन्ये॥५९॥
इमौ तरू सम्प्रति शापबन्धनाद् विमोचनीयाविति सूचयत् प्रभुम् ।
तदीय सङ्ख्याङ्गुलि-युगमतः स्वयमबन्धकं दाम बभूव किं तदा ॥ ६० ॥
द्वैतानुराग्यपि हरेः कृपयाऽपयातबन्धं च गोकुलमसङ्ग्यपि वासुदेवः ।
प्रेम्णैव तस्य समभूत् किल बन्धपात्रमेतद्द्वयं विशदयत् किमु तत्तथाऽऽसीत् ॥ ६१ ॥
दीर्घं दीर्घतर दीर्घतमानि तानि तत्र युयुजे पृथगीशे । सर्वमेव गृहगं गुणजातं साऽथवा युगपदेव युयोज ॥ ६२ ॥
तत्राद्ये भगवत्यनर्घ्यचरिते क्षुद्रोऽथवाऽयं महान् एवं नैव दयानिधौ समदृशि द्वैविध्यमित्यध्वनि ।
नानन्तत्वमनादिता च विभुवत् कुत्रापि चास्मासु तत्त्वेतद्बन्धनवार्तयाऽलमिति वा दाम्नेरितं तादृशा ॥ ६३ ॥
अन्त्येऽनन्तगुणे बभूवुरखिलास्तत्रैव लीना गुणा नद्योऽब्धाविव नामरूपरहिताः प्राग्गोपदारोहिताः ।
अत्रैकोऽहमपांनिधौ च यमुना द्वौ स्वः सरूपाभिधौ नान्योऽस्तीत्यलमन्यदामकलनश्रान्त्यैति तेनाध्वनि ॥ ६४ ॥
उक्तार्थद्वयमप्यगूढमृषिवाक् सन्दोहतो भासते तद्युक्त्यन्वयतस्तु तत्र रुचिरः पूर्वो ममार्थो मतः ।
अन्त्ये वामनवन्नरूपमलघु प्रादर्शि तत्तद्गुणकार्यं वा पृथगित्यथाप्यनुपदं व्याख्यातमीक्ष्यं बुधैः ॥ ६५ ॥
(विशेषकम्)

कृष्णप्रिया

अज, व्यापक होने के कारण जिनका न तो भीतर न आदि है और न अन्त, जिनमें पूर्व पर की कल्पना संभवित नहीं एवं जो जगत् के पहले भी थे पुनः बाद में भी रहेंगे, जो इस जगत् के भीतर तो है ही और बाहरी रूपों में भी है, अधिक क्या कहे जगत् के रूपों में वही स्वयं है—ऐसे अजन्मा, अव्यक्त, इन्द्रियों के विषय से पर जो लीलाओं के लिये नररूप स्वीकार किये हैं, उन्हें गोपिका यशोदा अपना पुत्र मानकर साधारण लड़के की तरह ओखली में बाँधने लगी ॥१३-१४॥ जब माता यशोदा उधमी और अपराधी बालकृष्ण को रस्सी से बाँधने लगी तब वह रस्सी दो अंगुल छोटी ही रही, तब माता ने दूसरी उस रस्सी में जोड़ी, परंतु वह भी रस्सी दोनों जोड़ने पर जो एक हुई वह भी छोटी ही रही तब माता ने उसके साथ और रस्सी जोड़ी पर वह भी दो अंगुल कम ही रही, इस प्रकार माता ने बार बार रस्सियाँ जोड़ी पर दो अंगुल की कमी पुरी न हुई ॥ १५–१६ ॥

एवं स्वगेहदामानि यशोदा संदधत्यपि । गोपीनां [1]सुस्मयन्तीनां स्मयन्ती विस्मिताभवत् ॥ १७ ॥
स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः । दृष्ट्वा परिश्रमं कृष्णः कृपयाऽऽसीत् स्वबन्धने ॥ १८ ॥
एवं प्रदर्शिता[2] ह्यङ्गहरिणा [3]भक्तवश्यता । स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥ १९ ॥
नेमं [4]विरञ्च्यो न भवो न श्रीरप्यङ्गसंश्रया । प्रसादं लेभिरे गोपी [5]यत्तत् प्राप विमुक्तिदात् ॥ २० ॥

---

१. विस्मयन्तीनां—वीर. ; उ स्मयतीनाम्—इति कस्यचित् । २. संदर्शिता—श्रीधर वंशी. वीर. विज. विश्व. । ३. भृत्य—श्रीधर. वंशी. ; भक्त—वीर. विज. जीव. विश्व. शुक. । ४. विरिञ्चो—श्रीधर. वंशी वीर. विज. जीव विश्व. शुकः । ५. गोपी यं त प्राप—वीर. ।

कर्दमक्षमा

अन्वयः – एवं स्वगेहदामानि संदधती गोपिका सुस्मयन्तीनां गोपीनां स्मयन्ती विस्मिता अभवत् ॥ १७ ॥ कृष्णः स्विन्नगात्रायाः विस्रस्तकवरस्रजः स्वमातुः परिश्रमं दृष्ट्वा कृपया स्वबन्धने आसीत् ॥ १८ ॥ अङ्ग यस्य सेश्वरं इदं जगत् वशे (तेन) स्ववशेन अपि कृष्णेन हरिणा एवं भक्तवश्यता प्रदर्शिता ॥ १९ ॥ यत् इयं प्रसादं विरञ्चिः न भवः न अङ्गसंश्रया श्रीः अपि न लेभिरे तत् विमुक्तिदात् गोपी प्राप ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्मितं कुर्वंतीनां मध्ये स्वयमपि हसंती विस्मयमाप ॥ १७-१८ ॥ न चैवं स्वातंत्र्यभंग इत्याह । एवं संदर्शितेति । सेश्वरमिदं विश्वं वशे यदधीनमित्यर्थः ॥ १९ ॥ भगवत्प्रसादमन्येऽपि भक्ता लभंते इदं त्वतिचित्रमिति सरोमांचितमाह । नेममिति । विरिंचः पुत्रोऽपि । भवः स्वात्माऽपि । श्रीर्जायाऽपि ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विस्मयमाप कोऽयं देवो यक्षो दैत्यो वा यतो बंधं नाप्नोतीति विस्मिता बभूव । न तु तस्य स्वाभाविकीं महिमरूपां सिद्धिं वेदेति भावः ॥ १७ ॥ स्वमातुः कृपया स्वबंधने आसीत् स्वयं बद्धोऽभूदित्यर्थः । स्विन्नगात्राया इत्यनेन तस्या वैराग्यं सूचितम् । 'एकसंबंधिज्ञानमपरसंबंधिस्मारकम्' इति न्यायेन ज्ञानमपि तस्या जातमिति ज्ञानवैराग्ययोः सदा साहचर्यनियमात् विस्मयमाह–मुष्टिपरिमितमप्यस्योदरं शतहस्तमितदाम्नाऽपि न वेष्ट्यतेऽहो उदरं तिलमात्रमपि न विपुलीभवति दामाप्यंगुलिमात्रमपि न न्यूनीभवति तदपि वेष्टनं न पूर्य्यत इत्येको विस्मयः । प्रतिवारमेव वेष्टने द्व्यंगुलन्यूनतैव न तु त्र्यंगुलादिन्यूनतेति द्वितीयो विस्मयः । ततश्चाहो मणिमयानतिदीर्घकिंकिणीवेष्टितावलग्नस्य गृहस्थितसर्वदामभिरपि यद्बंधनं न निष्पद्यते तदस्य शुभं यद्बालकस्य ललाटे विधात्रा बंधनं न लिखितमित्यनुमीयते तदतो हे यशोदे विरम्यतामिति पुरंध्रीजनप्रतिबोधितयापि यशोदयाद्य संध्यापर्य्यंतमद्येतद्ग्रामस्थैरपि दामभिर्ग्रथितैरेतदुदरस्यावधिरधिजिगमिषणीय इति प्रौढवादवत्या पुत्राभिमत्या परमेश्वरबंधनोद्यमे परित्यक्ते सति भक्तभगवतोर्मध्ये भक्तहठ एव तिष्ठेदित्यतो मातुः श्रममालक्ष्य मातृवत्सलो भगवानेव स्वहठं तत्याजेत्याह–स्वमातुरिति । कृपयेति । सर्वशक्तिचक्रवर्त्तिनी परमभास्वती कृपाशक्तिरेव भगवच्चित्तं नवनीतमिव विद्रुतीकृत्य सत्यसंकल्पताविभुताशक्ती सहसैवांतर्द्धापया मासेत्यर्थः । परिश्रमं कृपयेत्याभ्यामित्यसूचि । यावद्भक्तनिष्ठा भजनोत्था श्रांतिस्तद्दर्शनोत्था स्वनिष्ठा कृपा चेति द्वाभ्यामेव भगवान्बद्धो भवेत् । ते द्वे यावन्नाभूतां तावद्द्व्यंगुलोनताऽऽसीत्तयोरुद्भूतयोस्तु बद्धोऽभूदिति प्रेम्णा स्वबंधनप्रकारः स्वयमुदाहृतो भगवतेति ॥ १८ ॥ ननु स्वतंत्रो भगवानिति सर्वैर्गीयते बंधने च तस्य स्वतंत्रतानाशेन परतंत्रता स्यादिति चेत्तत्राह–न चैवमिति । एवमुक्तरीत्या । अंग हे नृप । स्वस्यात्मनो वशो वशवर्त्ती तेन न हि तस्यान्यो वशकर्त्ता "सर्वस्य वशी" इत्यादिश्रुतेः । यस्य कृष्णस्येदं विश्वं वशे तदुक्तम् "ससुरासुरगंधर्वसयक्षोरगराक्षसम् । जगद्वशे वर्त्ततेदः कृष्णस्य सचराचरम्" इति । भगवतः परमपारमैश्वर्ये सत्यपि प्रेमवश्यतानिबंधनं बंधनमिदं परमचमत्कारित्वाद्भूषणमिदं न तु दूषणमित्याह–एवं हरिणा स्वस्यात्मारामत्वे बुभुक्षया पूर्णकामत्वेप्यतृप्त्या शुद्धसत्त्वस्वरूपत्वेपि कोपेन स्वाराज्यलक्ष्मीवत्त्वेऽपि चौर्य्येण महाकालयमादिभयदत्वेऽपि भयपलायनाभ्यां मनोग्रयानत्वेऽपि मात्रा बलाद्ग्रहणेन आनंदमयत्वेऽपि दुःखरोदनेन सर्वव्यापकत्वेऽपि बंधनेन भक्तवश्यता स्वाभाविक्येव स्वस्य सम्यग्दर्शिता । अज्ञान्प्रति दर्शनायोपयोगाभावाद्ब्रह्मभवसनत्कुमारादीन्विज्ञानप्यतिचमत्कारं प्रापय्यानुभावितेति नेदमनुकरणमात्रत्वेन व्याख्येयम् "दर्शयंस्तद्विदां लोके आत्मनो भक्तवश्यताम्" इत्यत्र तद्विदामिति प्रयोगादिति भावः । स्ववशेन स्वाधीनेन कुतः स्वाधीनत्वं तत्राह—यस्य चिच्छक्तिसारभूतेन प्रेम्णैतस्यानंदातिशयप्रदर्शनार्थमेव भक्तवशत्वं निष्पद्यते नान्यथेति ज्ञेयम् । इति चक्रवर्ती ॥ १९ ॥ लेभिरे उलूखले यद्यं प्रसादं गोपी यशोदाऽऽप तं विरिंच्यादयो नापुरिति भावः । 'लेभिरं धान्यकुट्टनम्' इति निघंटुः । अत एवोक्तमभियुक्तैः "यशोदायाः परं नास्ति देवता इति मे मतिः । यस्या उलूखले बद्धो मुक्तिदो मुक्तिमिच्छति ॥" इति । यथाश्रुतस्तु स्वामिचरणैर्व्याख्यात एव ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सुष्ठु स्मयन्तीनां स्मयमानानामपि गोपीनाम् अनादरे षष्ठी अतिनिर्बन्धेन सन्धीयमानेपि मुहुर्बन्धने रज्जुपर्यायैरपर्य्यवसिते परमाश्चर्येण यच्च तासां सुस्मितं तदप्यनादृत्येत्यर्थः । स्वगेहे यानि दामानि मन्थननेत्राणि तानि सर्वाण्यपि सन्दधती सती यद्वा सन्दधती बन्धनाभिनिवेशेन सन्धानं कुर्वत्यप्यभवत् सप्तम्यर्थे षष्ठी गोपीषु स्मयन्तीषु सतीषु स्वयमपि स्मयन्ती विस्मिताप्यभवत् अतोऽस्मिन् दिने सपुत्रा श्रीरोहिण्यपि श्रीमदुपनन्दादिगृहे निमन्त्रितैव गतासीदिति गम्यते अन्यथा

सा न्यवारयिष्यदिति ॥ १७ ॥ सः स्वयं भगवान् कृष्णः सर्वचित्ताकर्षकलीलः स्वेति पाठे श्रीकृष्णस्यापि तस्यां स्नेहाधिक्यं बोधयति। अत एव कृपया मातृदुःखदर्शनाक्षमतया स्वबन्धने दुर्घटेप्यासीत मातृशब्देन तद्वात्सल्यमेव मूलं कारणमित्युक्तं लाल्यस्वभावजातां हठवत्तां परित्यज्य धृतायां कृपायां तद्विभुत्वशक्तेरज्जूः प्रति किञ्चिदौदासीन्येन द्वितययैव तया स्वयमेव बद्धो बभूव अन्यास्तूर्वरिता एवेत्यर्थः। परिश्रमश्च कलभस्येव बलवतस्तस्य ग्रहणेन रज्जुसन्धानादिना च ॥ १८ ॥ ननु, पूर्णत्वं परमेश्वरत्वं च साधितं तथा बुभुक्षा तृप्त्यभावः कोपश्चौर्य्यं भयं पलायनं बलाद्ग्रहणं रोदनं बन्धनं च वर्णितं तत्तदप्यन्तरत्वेन रहस्यत्वेन भवतामपि रसहेतुत्वेन तात्विकमेवाधिगम्यते ततः कथमिव तादृशे तत्तदिति उच्यते सत्यं तत्र गुणैः पूर्णत्वमीश्वरत्वं च वर्तते तथाऽपि भक्तानुग्रहस्त्ववश्यं मन्तव्यः यं विना न ते कस्यापि सुखकरा भवन्ति अकोमलहृदयत्वेनारोचमानत्वात् ततस्त्वेषां गुणत्वमपि हीयते जनसुखहेतवो धर्मा हि गुणाः स्वतश्च निर्दयतारूपो दोष एव न च तस्मिन् न सम्भवति साधारणत्वापातेनानैश्वर्यात् "अयमात्माऽपहतपाप्मा एष उ एव वामनीः वासानि वामानि सर्वाण्यभियन्ति" इति श्रुतेः। तस्मात् सर्वेषां गुणत्वसाधको दोषान्तरविरोधी च स एव मुख्यो गुणो मन्तव्यः यथैव षष्ठे पुंसवनव्रतप्रसङ्गे स एवादौ पठितः "यथा त्वं कृपया भूत्या तेजसा महिनौजसा। जुष्ट ईशगुणैः सर्वैस्ततोऽसि भगवान् प्रभुः" इति स च भक्त्यनुरूप एव न्याय्यः न्यूनत्वे दोषस्य तदवस्थत्वात् तत्र यदि सर्वतो भावेन निरुपाधितद्वशतामयी भक्तिः स्यात्तर्हि तस्यापि तद्वशत्वपर्य्यन्तता युक्ता न चैवमैश्वर्यं हीयते अन्यत्र जागरूकत्वात् यथा बद्धस्यापि वक्ष्यमाणयोर्नलकूबरमणिग्रीवयोः किञ्च प्रत्युत तेन गुणेन सर्वाकर्षणाद्विगुणीभूयैवैश्वर्यवृद्धिः स्यात् अतो भक्तवश्यताप्यावश्यकता तथा च श्रीवैकुण्ठदेवेन स्वयमप्युक्तम् "अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज। साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः" इत्यादि अत्र साधुभिरिति तद्ग्रस्तहृदयत्वे हेतुः साधुषु प्रोज्झितकैतवेषु ममापि निष्कैतवताया एव युक्तत्वादित्यर्थः। अतः सा च वशता तदनुकूलतान्तर्बहिरीहामय्येव स्यादिति तद्भावभावितबाल्यादिभावत्वाद्युक्तैव तस्यापि तत्तद्भावितेति अतस्तादृशस्यापि श्रीकृष्णस्य तादृशं भावं तात्विकमेव मत्वा विस्मयानन्दाभ्यां श्रीकुन्तिदेव्यपि मुमोह यथा तद्वाक्यं "गोप्याददे त्वयि कृतागसि दामतावद्या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम्। वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति" इति। तदेतदभिप्रेत्याह, एवमिति। एवमुक्तप्रकारेण दर्शिता तत्रापि सम्यक् अन्यत्र बन्धनपर्यन्तममता विलासास्पदत्वाभावात् अङ्गेति प्रेमसम्बोधने हि निश्चये हरिणेति तथा भक्तानां मनोहरणात् स्ववशेन स्वतन्त्रेणापि यतः कृष्णेन स्वयं भगवतेत्यर्थः। तदेवाभिव्यञ्जयेति—यस्येति ॥ १९ ॥ सम्यक्त्वमेवाभिव्यञ्जयन् यन्निमित्तमेकदा गृहदासीष्वित्यादिकमुदाहर्तुमारब्धं तस्य "नन्दः किमकरोद्ब्रह्मन्" इत्यादिप्रश्नस्य तात्विकं सिद्धान्तमाह–नेममिति द्वाभ्याम्। विरिञ्चो भक्तादिगुरुः भवो वैष्णवानां दृष्टान्तरूपः श्रीर्लक्ष्मीर्नित्यप्रेयसी च सा तु विशेषेणाङ्गसंश्रया तद्वक्षे निवासापि प्रसादं तत्तन्महाभाक्तरूपं लेभिरे एव कीदृशादपि 'मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगम्' इत्युक्तदिशाप्रायो मुक्तिमात्रप्रदातुरपि किन्तु गोपी श्रीयशोदागोपेश्वरी यत्तदनिर्वचनीयं प्रसादशब्देनापि वक्तुं शङ्कनीयं किमपि प्राप तद्रूपमिमं पूर्वोक्तं प्रेमपरीपाकरूपं प्रसादं तथा ऽप्यनन्यविषयत्वात् तच्छब्दवाच्यं न विरिञ्च्यः प्राप न भवः प्राप न श्रीरपि प्रापेत्यर्थः। यद्वा, गोपीयत्तत्प्राप तद्रूपमिमं विरिञ्चादयो न लेभिरे न लेभिरे न लेभिर इत्यर्थः। नञ्त्रयवशेन क्रियावृत्तिः अङ्गसंश्रयेति सर्वतः श्रेयस्या अपि तस्यास्तदङ्गसंश्रयत्वेनात्मविषयकतदीयता मुख्या तस्मिन् ममता तु तदनुगता सा चैश्वर्यज्ञानसम्भ्रान्ता अस्यास्तु स्वप्रधानैव ममता भावान्तरा क्षुभिता च मदेकगतितया मदेककर्तव्यहितता भावना चाधिकेति तत्प्रसादाधिक्यमिति किं वक्तव्यं तदीय एव स इति तस्माद्ब्रह्मणो वरेण तत्प्राप्तिर्न सम्भवति यः स्वयमेवेदं प्रार्थयत एव "तद्भूरिभाग्यमिह जन्म किमप्यटव्याम् यद्गोकुलेपि कतमाङ्घ्रिरजोभिषेकम्" इति भावः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुष्ठु स्मयन्तीनां स्मयमानानामपि गोपीनाम्; अनादरे षष्ठी। अतिनिर्व्वन्धेन प्रयत्नतश्चिकीर्षमाणेऽपि पुत्त्रबन्धने सामर्थ्याभावात् परमाश्चर्य्येण तासां यत् सुस्मयनम्, तदप्यनादृत्येत्यर्थः। स्वगेहे यानि दामानि तानि सर्व्वाण्यपि सन्दधती सती; यद्वा, सन्दधती बन्धनाभिनिवेशेन सन्धानं कुर्व्वत्यपि, सप्तम्यर्थे षष्ठी, गोपीषु स्मयन्तीषु विस्मिताऽभवत्,—सर्व्वैः समुचितैरपि दामभिर्द्व्यंगुलापूर्त्तेः। एवं बाल्यलीलायामेव पारमैश्वर्य्येण भगवत्ता भर प्रकटनमाधुर्यमपि पूर्व्ववदुह्यम्। तथा बालकरूपेण परिच्छिन्नत्वेऽप्यनन्तदामभिर्द्व्यंगुलापूर्त्या तस्यैवापरिच्छिन्नत्वमेव। नन्वेकमेव वस्तु तेनैव परिच्छिन्नम परिच्छिन्नञ्चेति विरुद्धम्; स परिच्छेदः प्रातीतिकः पारमार्थिको वा? यदि तु प्रातीतिकस्तर्हि प्रतीतेर्वास्तवत्वाभावात् परिच्छेदस्य मिथ्यात्वमेव,—यथा बहुयोजन–सहस्रविस्तारस्य रविमण्डलस्य हस्तमात्रतया प्रतीतेः। यदि तु पारमार्थिकस्तर्हि तस्यापरिच्छिन्नत्वं वदन् जन उपहासास्पदमेव स्यात्,—यथा करतलस्थस्य हरिन्मणेः। अत्रोच्यते,—प्राकृते वस्तुन्येवायं नियमः, (ब्र. सू. २।१।११) 'तर्काप्रतिष्ठानात्' इति–न्यायादचिन्त्यैश्वर्य्यत्वाच्च तर्कागोचरे भगवति सर्व्वोऽपि विरोधः समाधीयत एव। तथा चोक्तं स्कन्दपुराणे प्रभासखण्डे—

"अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम् ॥' इति

अत एव कौर्म्मे—

'अस्थूलश्चानणुश्चैव स्थूलोऽणुश्चैव सर्व्वतः ।

अवर्णः सर्व्वतः प्रोक्तः श्यामो रक्तान्तलोचनः । ऐश्वर्य्ययोगाद्भगवान् विरुद्धार्थोऽभिधीयते ॥' इति ।

एवं सर्व्वत्रोन्नेयम् ॥ १७ ॥ स निजाशेष-भगवत्ता सार-प्रकटनपरः कृष्णः सर्व्वचित्ताकर्षकलीलः । स्वेति पाठे श्रीदेवकीतोऽपि स्वीयत्वेन वात्सल्यविशेषपात्रत्वं बोध्यते । अतएव कृपया स्वबन्धने दुर्घटेऽप्यासीत्, द्व्यंगुलपूरणेन बन्धनमंगीचकारेत्यर्थः । यद्वा, स्वस्य परिश्रमं दृष्ट्वा स्विन्नगात्रायाः स्वपरिश्रम दर्शन खेदेन स्विन्नांग्या मातुः कृपया वात्सल्येन स्वबन्धने मातृकर्त्तृकबन्धने आसीद्बद्धोऽभूदित्यर्थः । विशेषेण स्रस्ताः खण्डखण्डशः सर्व्वत्र पतिताः कबरात् स्रजः, किंवा विस्रस्तः सर्व्वतः स्खलितः कबरः स्रजश्च यस्याः सा ॥ १८ ॥ एवमेतदध्यायादारम्भत उक्तप्रकारेण वा, अंगेति प्रेम सम्बोधने; हि निश्चये । हरिणेति तथा भक्तानां मनोहरणात् स्ववशेन स्वतंत्रेणापि, यतः कृष्णेन साक्षात्परमेश्वरेणेत्यर्थः । तदेवाभिव्यञ्जयति—यस्येति । यद्वा, सन्दर्शितेत्यत्र हेतुः—कृष्णेनेत्युक्तार्थमेवैतत् । सम्यग्दर्शितेति सं-शब्देन ब्रह्मादिभ्यः पूर्व्वं पूर्व्वं भक्तेभ्यस्तथा वीरासन दौत्यसारथ्याद्यनुगृहीत—श्रीयुधिष्ठिरादिभ्योऽपि महान् विशेषः सूचितः,—केनापि साक्षात्तथा तद्बन्धनात् ॥ १९ ॥ तदेवाभिव्यञ्जयति—नेममिति । अंगसंश्रयेति नित्य-वक्षःस्थलस्थ-श्रीत्वेनाशक्यमानेदृशी तद्वश्यता निरस्ता,—तथैकस्यैवांगस्य वक्षसो वशीकरणात्, यद्वा अंगसंश्रयत्वेऽपि तदधीनत्वाभावाल्लेभिरे लेभ इत्यर्थः, यद्वा, विरिञ्चो न लेभे, भवो न लेभे, लेभिर अन्ये केचिदपि; यद्वा, 'द्वौ नञौ प्रकृतार्थं गमयतः इति न्याये प्रवृत्ते तृतीयो नञ् निषेधार्थो वृत्तः । विरिञ्चो भवः श्रीर्न लेभिर इत्यर्थः, यद्वा, भवादयः केचित् प्रसादं लेभिरे, गोपी तु यत्तदनिर्व्वचनीयम् । किंवायं तं त्वतिप्रसिद्धञ्च प्रसादं प्राप, इमं न विरिञ्चः प्राप, न भवः प्राप, न श्रीरपि प्रापेत्यर्थः । विमुक्तिदादिति केभ्यश्चिन्मुक्तिं केभ्योऽपि विशिष्टमुक्तिं श्रीवैकुण्ठलोकलब्धिलक्षणां ददातीति तथा तस्मादित्यर्थः । एवं योऽन्येभ्यो विमुक्तिं ददाति, स तया साक्षाद्बद्ध इति परमभक्तिवश्यता द्योतिता ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

स्वबन्धने कृपयाऽऽसीत् अनुगुण आसीदित्यर्थः ॥ १८–१९–२० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं स्वगृहस्थानि सर्वाणि दामानि सन्दधत्यपि सन्दधत्येव न तु तथापि निवृत्तेत्यर्थः । तद्वीक्ष्य विस्मयन्तीनां गोपीनां मध्ये स्वयं विस्मिता बभूव ॥ १७ ॥ तदा स्विन्नं प्रस्वेदभरितं गात्रं यस्याः विस्रस्तं कवरं स्रजश्च यस्याः तस्याः स्वमातुः परिश्रमं दृष्ट्वा तस्यां कृपया स्वबन्धनेऽनुगुण आसीत् ॥ १८ ॥ न चेतावता स्वातन्त्र्यभङ्ग इत्याह-एवमिति । स्ववशेन स्वतन्त्रेणापि स्ववशत्वमेवाह यस्य वशेऽधीनतायां ब्रह्मादीश्वरसहितमिदं जगद्वर्त्तते तेन श्रीकृष्णेन हरिणैवमित्थम् अङ्ग हे राजन् ! भक्तवश्यता सन्दर्शिता सर्वत्र स्वतन्त्रोऽप्यहं भक्तेषु परतन्त्र इति दर्शयितुमबध्यतेत्यर्थः । तथा चाहुः श्रीवत्साङ्कमिश्राः "अनन्याधीनत्वं तव किल जगुर्वैदिकगिरः पराधीनं त्वां तु प्रणतपरतन्त्रं मनुमहे" इति तथा भवतापि अष्टमे स्कन्धे उक्तम् "अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज' इति ॥ १९ ॥ ननु सत्य भक्तपरतन्त्र इति गोपी तु न भक्तेऽति कथं तत्पारतन्त्र्यमीश्वरस्येत्यत्राह—नेति । भक्तिप्रयोजनं हि भगवत्प्रसादस्तं च यादृशं निग्रहानुग्रहादिपर्य्यन्तविधेयत्वरूपं विमुक्तिदाद्भगवतो गोपी लेभे न तादृशं ब्रह्म रुद्रो साक्षात् वक्षःस्थलाश्रया लक्ष्मीरपि लेभिरे प्रेमपूर्वकानुध्यानात्मिकादिभक्तिः सा गोप्यामप्यविशिष्टो भावः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एवं स्वगेहसमस्तदामसञ्चयसमाप्तौ सुतमाहात्म्यं दृष्ट्वा स्मयन्ती मन्दं हसन्ती विस्मिता भवदित्यन्वयः ॥ १७ ॥ अणिमा लघिमा योगशक्तिः स्वाभाविकी हरेरित्यभिप्रेत्याह स्वमातुरिति । मातृविषयकृपया स्वबन्धन आसीत् स्वयमेव बद्धोऽभूदित्यन्वयः ॥ १८–१९ ॥ यत् तत् ये तम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यत्र स्थितेऽपि प्रेमणि भक्तवैयग्र्यविशेषतज्ज्ञानतत्कृपाविशेषाभ्यां द्वाभ्यामूनत्वेन तद्वशं करणं न स्यादित्येषा तु दैवी सूचना वक्ष्यते च "दृष्ट्वा परिश्रमं कृष्णः कृपयासीत् स्वबन्धने" इति, अतः श्रीरोहिण्यादिश्रीमदुपनन्दादिगृहे निमन्त्रितैव

गतासीदिति लभते अन्यथा सा वात्सल्याद्वारयिष्यदिति ॥ १८ ॥ एवमपि एतत्प्रकारेणैव सम्यग्दर्शिता न ऊर्द्ध्वमस्तीति भावः ॥ १९ ॥ नेममित्यादि द्वयम् ॥ २०–२३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे नवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ तद्द्वयस्य समावेशे सति बद्धोऽपि बभूवेति दर्शयति—स्वमातुः स्विन्नगात्राया इत्यादि। मातृरूपस्य भक्तस्य परिश्रमो जातः, स्वस्यापि कृपा च जाता द्वाभ्यां द्व्यङ्गुलन्यूनता च गता बद्धोऽपि बभूवेति रहस्यम् ॥ १९ ॥ इदानीं श्रीव्रजेश्वर्याः सौभाग्यमनुस्मृत्य जातविस्मयः श्रीशुको वदति—नेमं विरिञ्चि इत्यादि। विशिष्टो मुक्तिर्विमुक्तिः प्रेमाकारा वृत्तिस्तां ददातीति तथा। तस्मात् श्रीकृष्णात् यं यं प्रसादं गोपी प्राप, तं प्रसादं के लिभिरे न कोऽपीत्यर्थः। किम्-शब्दोऽध्याहार्यः। न केऽपीत्युक्तेरसम्भाव्यजनप्रतिषेधस्योपस्थितौ पुनः सम्भाव्यमानान् ब्रह्मादीनपि निषेधयति। अपिशब्दः प्रत्येकं योज्यः। न विरिञ्चो ब्रह्मापि, न भवः श्रीरुद्रोऽपि, किं बहुना ? अङ्गे सम्यगविरतः श्रयः श्रयणं यस्याः सा श्रीरपि, प्रत्येकं नकारः प्रत्येकनिषेधस्य प्राधान्यात्। इममनुभूयमानम्। अथवा ब्रह्माऽपि, भवोऽपि श्रीरपि न न लेभिरे। अत्यन्ताप्राप्तौ न नेति वीप्सा। त्रयाणां कर्त्तॄणामेकक्रियायां बहुत्वम्, देवदत्तो यज्ञदत्तो विष्णुमित्रश्च गच्छन्तीतिवत्। द्वौ नञौ प्रकृत्यर्थं गमयत इति नाशङ्कनीयम्, यथा—(भा. १०।६०।२९) "मा मा वैदर्भ्यसूयेथाः" इत्यादि (अभिज्ञानशाकुन्तलम्) 'न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्' इत्यादि च। समग्रप्राप्तिस्तु दूरादास्ताम्, अर्द्धप्राप्तिरपि तेषां नास्तीत्याह नेममपि अर्द्धमपि। नेमशब्दोऽर्धवचनः सर्वनाम, अपिशब्दः सर्वत्रान्वयितव्यः ॥ २० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तथा च 'स्वमातुः स्विन्नगात्रायाः' इति मातृरूपस्य भक्तस्य यदा परिश्रम आसीत्, तदैव 'कृपयासीत् स्वबन्धने' इति स्वकृपापि जाता, बद्धोऽपि बभूव ॥ १८–१९ ॥ नेमं विरिञ्च इत्यादि। विमुक्तिर्मुक्तेः कैवल्यादपि विशिष्टा या दास्यरूपा तां ददातीति तस्मात् श्रीकृष्णात् गोपी यशोदा यत् यं प्रसादं प्राप, 'यत्तदव्ययम्', तत् के लिभिरे ? न केऽपि, इत्यर्थः। किं शब्दोऽध्याहार्यः। भवब्रह्मादयोऽपि न लेभिरे एव, कोऽत्र सन्देह इति प्रत्येकं निषेधप्राधान्यात् नकाराः। इमं तं न ब्रह्मा, न भवः, न श्रीः। यद्वा, नेममिति सर्वनामपदं नेममपि अर्द्धमपि, अपिशब्दः सर्वत्र योज्यः, विरिञ्चोऽपि भवोऽपि श्रीरपि न लेभिरे, अत्यन्ताभावे वीप्सा। त्रयाणां कर्त्तॄणामेकक्रियाया बहुत्वम्, यथा देवदत्तो यज्ञदत्तो विष्णुमित्रश्च गच्छन्ति। 'द्वौ नञौ प्रकृतार्थं गमयतः' इति नाशङ्कनीयम्, यथा न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्' इत्यादि 'मा मा मानद' इत्याद्यभियुक्ताः यद्वा, एते प्रसादं न लेभिरे न लेभिर एव, किन्तु नेमं नैतादृशम्, गोपी यत् प्राप, न तादृशमिति ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गोपीनां गोपीषु प्रतिवेशपुरन्ध्रीषु सुस्मयमानासु सतीषु विस्मितेत्यहो मुष्टिपरिमितमस्योदरं शतहस्तपरिमितेन दाम्नापि न वेष्ट्यते तत्रोदरं तिलमात्रमपि न विपुलीभवति दामाप्यङ्गुलीमात्रमपि न न्यूनीभवति तदपि वेष्टनं न पूर्य्यत इत्येको विस्मयः प्रतिवारमेव वेष्टने द्व्यङ्गुलन्यूनतैव नतु त्र्यङ्गुलचतुरङ्गुलादिन्यूनतेति द्वितीयश्च विस्मयः ॥ १७ ॥ ततश्चाहो मणिमयानतिदीर्घकिङ्किणीवेष्टितावलग्नस्यास्य गृहस्थितसर्वदामभिरपि यद्बन्धनं न निष्पद्यते तदस्य शुभं यो बालकस्य ललाटपत्रे विधात्रा बन्धनं लिखितमित्यनुमीयते तदित उद्यमात् प्रियसखि यशोदे ! विरम्यतामिति पुरन्ध्रीजनप्रबोधितयापि यशोदयाद्य सन्ध्यापर्य्यन्तमप्येतद्ग्रामस्थैरपि दामभिर्ग्रथितैरेतदुदरस्यावधिरधिजिगमिषणीय इति प्रौढवादवत्या पुत्राभिमत्या परमेश्वरबन्धनोद्यमे ह्यपरित्यक्ते सति भक्तभगवतोर्मध्ये भक्तहठ एव तिष्ठेदित्यतो मातुः श्रममालक्ष्य मातृवत्सलो भगवानेव स्वहठं तत्याजेत्याह, स इति। स्वमातुरिति च पाठः कृपयेति सर्वशक्तिचक्रवर्तिनी परमभास्वती कृपाशक्तिरेव भगवच्चित्तं नवनीतमिव विद्रुतीकृत्य तत्र स्वयं प्रादुर्भूय पूर्वोद्भूते सत्यसङ्कल्पताविभुताशक्ती तत्र सहसैवान्तर्द्धापयामासेत्यर्थः। अत्र परिश्रममिति कृपयेत्येताभ्यां द्व्यङ्गुलन्यूनतासमाहिता भक्तनिष्ठाभजनोत्था श्रान्तिस्तद्दर्शनोत्था स्वनिष्ठा कृपा चेति द्वाभ्यामेव भगवान् बद्धो भवेत् ते द्वे यावन्नाभूतां तावदेव द्व्यङ्गुलन्यूनता आसीत् तयोरुद्भूतयोस्तु बद्धोऽभूदिति प्रेम्णा स्वबन्धनप्रकारः स्वमातरि स्वयमुदाहृतो भगवतेति ज्ञेयम् ॥ १८ ॥ भगवतः परमपारमैश्वर्य्ये सत्यपि प्रेमवश्यता निबन्धनं बन्धनमिदं परमचमत्कारित्वाद्भूषणमेव नतु दूषणमित्याह—एवं हरिणा स्वस्य आत्मारामत्वेपि बुभुक्षया पूर्णकामत्वेप्यतृप्त्या शुद्धसत्वस्वरूपत्वेपि कोपेन स्वाराज्यलक्ष्मीवत्वेपि चौर्य्येण महाकालयमादिभयदत्वेपि भयपलायनाभ्यां मनोग्रयानत्वेपि मात्रा बलाद्ग्रहणेन आनन्दमयत्वेपि दुःखरोदनेन सर्वव्यापकत्वेपि बन्धनेन भक्तवश्यता स्वाभाविक्येव स्वस्य सम्यक् दर्शिता अज्ञान् प्रति दर्शनाय उपयोगाभावात् ब्रह्मभवसनत्कुमारादीन् विज्ञानमप्यतिचमत्कारं प्रापय्यानुभावितेति नेदमनुकरणमात्रत्वेन व्याख्येयं "दर्शयं-

स्तद्विदां लोके आत्मनो भक्तवश्यताम्" इत्यत्र तद्विदामिति प्रयोगादिति भावः। स्ववशेन स्वाधीनेनापि, ननु, तर्हि कुतः स्वाधीनत्वं ? तत्राह—यस्येति। चिच्छक्तिसारभूतेन प्रेम्णैव तस्यानन्दातिशयार्थमेव भक्तवश्यत्वं निष्पद्यत इति प्राक् प्रपञ्चितम् ॥१९॥ भक्तवश्यस्य तस्य भक्तेष्वपि मध्ये व्रजेश्वर्य्या आधिक्यमपारवश्यत्वातिशयदर्शनेन सरोमाञ्चमाह—नेममिति। विशिष्टा मुक्तिः विमुक्तिः प्रेमा तत्प्रदादपि कृष्णात् यत् प्रसादं गोपी श्रीयशोदा प्राप तत् तं प्रसादंविरिञ्चो भव श्रीरपि न लेभिरे न लेभिरे न लेभिरे इत्यन्वयः। नतु त्रयेंण लेभिर इत्यस्य त्रिरावृत्त्या प्राप्त्यभावातिशय उक्तः। यद्वा विरिञ्चो भवः श्रीरपि प्रसादं न लेभिरे अपि तु प्रसाद लेभिरे एव किन्तु गोपीयं प्रसादं प्राप इमं न लेभिरे इत्यन्वयः। विरञ्च्यः पुत्रोपि "स आदिदेवो भजतां परो गुरुः" इत्युक्ते भक्तानामादिगुरुरपि भवः स्वात्मापि वैष्णवानां यथा शम्भुरित्युक्तेस्ततोप्युत्कर्षवानपि श्रीर्जायापि अङ्कसंश्रयत्वेन सख्यभक्तिरसवत्वात् दासाभ्यां ताभ्यामुत्कर्षवत्यपि यस्याः सकाशात् प्रेम्णान्यूना एव सा यशोदा साधनसिद्धा पूर्वजन्मनि ब्रह्मदत्तवरा धरा आसीदिति महानेवानयः नहि ब्रह्मणो वरदानलभ्यमेतादृशं प्रेमसौभाग्यं भवितुमर्हति स ब्रह्मापि "तद्भूरिभाग्यमिह जन्मकिमप्यटव्याम्" इति प्रार्थयमानोऽस्या न्यूनातिन्यूनकक्षायामेव गण्यत इत्यतः श्रुतिस्मृत्यागमप्रसिद्धे नित्यसिद्धे एव नन्दयशोदे त्वया ज्ञेये "नन्दः किमकरोद्ब्रह्मन् ! श्रेय एवं महोदयम्" यशोदाचेत्यल्पविमर्शे त्वदीय प्रश्ने मयाप्यस्पष्टप्रायं द्रोणो वसूनां प्रवर इति तदेकांशाश्रयं प्रत्युत्तरं दत्तमिति भावः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं स्वगेहदामानि स्मयन्तीनां गोपीनां च दामानि सन्दधती स्मयन्ती हसन्ती विस्मिता अभवत् ॥ १७ ॥ स्विन्नं प्रस्वेदेन व्याप्तं गात्रं यस्याः विस्रस्ता कबरस्रजो यस्याः तस्या मातुः परिश्रमं दृष्ट्वा स्वबन्धने कृपया आसीत् अनेन पूर्वोक्तमन्तर्बहिरादिव्यवहारराहित्यं यथा कृष्णे भवति तथान्तर्बहिरादिव्यवहारार्हत्वमपि स्वेच्छयास्त्येवाऽचिन्त्यशक्तियोगात् तथा च श्रुतिः "अणोरणीयान् महतो महीयान्" इति ॥ १८ ॥ स्वाधीनस्यापि सेश्वरविश्वनियन्तुः स्वभक्ताधीनतामाह—एवमिति। ईश्वरैर्ब्रह्मशिवादिभिः सहितम् ॥ १९ ॥ श्रीयशोदाकृतायाः श्रीकृष्णभक्तेः फलकथनद्वारेण सर्वोत्तमतामाह—नेममिति। यद्यपि "भक्तियोगेन तन्निष्ठो मद्भावायोपपद्यते" इति श्रीमुखवचनाद्भगवान् भक्त्यैव स्वभावापत्तिलक्षणां मुक्तिं ददाति तस्मान्मुक्तिदात् प्रसादविशेषमपि तद्भक्ताः लेभिरे क्रियापदेन कर्तृपदमाक्षिप्यते। परन्तु यं प्रसादं गोपी यशोदा प्राप तमिमं न विरञ्चिः न भवः न श्रीः प्राप इतरेषां का कथेति भावः। एवंविधायाः भक्तेर्मुक्तितोपि दुर्लभत्वं मुक्तिं ददाति "कर्हिचित्स्म न भक्तियोगम्" इत्यादौ बोध्यम् ॥ २० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एवमिति राजगृहत्वाद्बहूनि यानि दामान्यासंस्तानि सर्वाणीत्यर्थः। गोपीनां गोपीषु शिशुमपि बद्धुं राज्ञीयं न शक्नोतीति सुष्ठु स्मयमानासु स्वयञ्च स्मयमाना विस्मिताभवत् अहो मुष्टिपरिमितमस्योदरं दामशतेनापि योजितेन न वेष्ट्यते न च तद्विपुली भवति, किङ्किण्यस्य न वर्द्धते, प्रतिवेष्टनेपि दाम्ना द्व्यङ्गुलमेव न्यूनमिति विस्मयमभजदित्यर्थः। तद्दिने सपुत्रा रोहिण्युपनन्दपत्न्या निमन्त्र्य नीतेति गम्यते, अन्यथा सा निवारयेदिति बोध्यम्। मयि निबद्धे सति सखिभिरहं परिहस्येतो निबद्धो न स्यामिति तत्सङ्कल्पे सति तदनुगया विभुतयाऽऽविर्भूय तद्बन्धनं प्रतिबद्धमिति भावः ॥ १७ ॥ हे राज्ञि यशोदे सखि ! कृष्णोऽयं सखि-बालकेभ्यस्त्रपया बन्धनं नेच्छति, तदा स्वयं प्रभोरस्य सत्येच्छत्वेन बन्धनं प्रतिबध्यते, तदस्माद्विरमेति गोपिभिराश्चर्यदर्शनोदिततत्पारमैश्वर्याभिः प्रतिबोधितायामपि स्वयं प्रभुमप्येनं मत्पुत्रत्वात् पुरुदामभिरानीतैर्निबध्यैतच्चापमपनयामीति गृहीतहठायां मातरि हरिर्भक्तहठस्यैव रक्षणीयत्वात्स्वहठं त्यक्त्वा मातृहठं रक्षन् बन्धनमङ्गीचकारेत्याह स्वमातुरितिस्फुटार्थं परिश्रमश्च कलभस्येव बलिनस्तस्य ग्रहणेन दामसन्धानादिना च बोध्यः अत्र हरेः कृपाशक्तिः प्रबला यया तदिच्छोद्भूता विभुताप्यन्तर्द्ध्वापिता यदा भक्तस्य भक्तिश्रमस्तद्दीक्षणेन मे कृपा च भवेत्ताभ्यामेव निबद्धो भवामीति बन्धनाय दाम्नो द्व्यङ्गुलन्यूनतेति हरिणा स्वमातरि प्रकाशितं एतदाश्चर्यदर्शनात्कदाचिदुद्भूता स्वयं प्रभुत्वबुद्धिः सार्वदिकीं पुत्रबुद्धिं नोपमर्दयेत् ततोऽतिदुर्बलत्वात् किन्तूक्तं युक्तेः युष्मीयादेवताम् ॥ १८ ॥ नन्वेवं बन्धनमङ्गीकुर्वता स्वयं प्रभुत्वं क्षपितमितिचेत्त्राहैवमिति। यस्य सेश्वरं ब्रह्मरुद्रादिसहितमिदं जगद्वशेऽस्थितेन स्ववशेन स्वतन्त्रेणैव हरिणा एवं भक्तवश्यता सन्दर्शिता अनन्तलक्ष्मीकस्यापि चौर्येण तृप्तस्यापि क्षुधया पूर्णस्याप्यतृप्त्या निर्भयस्यापि कोपेन कालकालस्यापि भयपलायनाभ्यां योगिमनोऽग्राह्यस्यापि मात्रा बलाद्ग्रहणेन आनन्दमयस्यापि दुःखाश्रुणा सर्वव्यापि सर्वबन्धकस्यापि बन्धनेन च ब्रह्मादिविज्ञान् प्रति पारमार्थिक्येवमेव भक्तवश्यतेति सम्यग्दर्शितेत्यनुक्तिरूपेयमिति निरस्तं दर्शयंस्तद्विदालोक आत्मनो भक्तवश्यतामित्यत्र तद्विदामित्युक्तेः। न च स्वयं प्रभोः पारतन्त्र्यमिदं दूषणं तादृशस्य स्वैकान्तिकभक्ततन्त्रताया गुणत्वेन स्तूयमानत्वात् कृपैव सगुणः अन्यथा रुक्षतया दूषणापत्तिः तच्चौर्यादीनां तत्स्वरूपधर्मत्वात् स्वरूपेण काचिद्विक्रतिरित्यसकृदुक्तम् ॥१९॥ श्रीयशोदा सौभाग्येन विस्मितो मुनिः सरोमाञ्चं तदाह नेममिति। 'मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग' मित्युक्तदिशा

प्रायेण मोक्षप्रदात् यदीमं प्रसादं बन्धनाङ्गीकाररूपकृपाविलासं गोपी राज्ञी यशोदा प्राप, तत्तं विरिञ्चो भवश्च स्वावतारोपि स्वभक्त्याग्रेसरोपि न लेभिरे न प्रापुः। लेभिरे इत्यस्य न तु त्रयेण त्रिरावृत्त्या सर्वथा तत्प्राप्तेरभावः। तथा च नन्दः किमकरोदिति स्वप्रश्नस्योत्तरं तत्र तदंशमागन्तुकमादाय गदितं वस्तुतस्त्वनादितस्तैः तत्पितरौ निरुपमतत्सौभाग्यवन्ताविति गृहाण न चैतत् सौभाग्यं ब्रह्मवरहेतूक्तं सम्भाव्यं तद्भूरिभाग्यमिह जन्मकिमप्यटव्यामित्यादि निगदता तेन तत्प्रजापादरजोभिषेकस्य वाञ्छितत्वात् ॥ २० ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

गोप्यो यशोदाविमुक्तिदात्कृष्णाद्यं प्रसादं प्राप्तास्तत्तमिमं प्रसादं विरिंचो ब्रह्मपुत्रोऽपि न लेभिरे न लेभे। भवो रुद्रः पौत्रोऽपि न लेभे। श्रीर्महालक्ष्मीरंगश्रया भार्याऽपि न लेभे इत्यविद्यमानविषयकीर्तिं यशोदायाः कृष्णो दैत्यमोहनार्थं व्यंजयामासेति। एतेन गोप्यो ब्रह्माद्यपेक्षयाऽधिकप्रसादस्य प्राप्तत्वात्। गोपी ब्रह्माद्यपेक्षयाधिकं प्रसादं प्रापेति वचनमनुपपन्नमिति दूषणं परिहृतम्। इत्यविद्यमानविषयकीर्तिमित्यादीनां शेषेण इत्यविद्यमानविषयकीर्तिं यशोदायाः कृष्णो दैत्यमोहनार्थं व्यञ्जयामासेत्यर्थस्योक्तत्वात् ॥ २० ॥

इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ॥ १० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं स्वगेहदामानि निजेत्याद्यजल्पनेन स्वगेहत्वादिजल्पनेन च सु अगेहदामानि परगृहगतानि दामानीत्यपि सूचयामासेत्यवसेयम्। गोपीनां पार्श्वस्थानां स्मयन्तीनां सतीनां हसन्तीनां स्मयमानानां स्वयमपि स्मयन्ती स्मयमाना स्म यन्तीति वा येतीति यन्ती पुनः पुनर्गच्छन्त्यागच्छन्तीति वा विस्मिताऽभवत् ॥ १७ ॥ स्विन्नं गात्रं यस्याः सा तस्या विस्रस्तकबरस्रजः परिश्रमं श्रान्तिं दृष्ट्वा कृपया स्वबन्धने तद्विषये आसीदनुकूलोऽभूदिति भावः ॥ १८ ॥ यस्येदं सेश्वरमीश्वरै रमाब्रह्मादिभिः सहितं सेश्वरं विश्वं वशे वर्तते तेन स्ववशेनापि कृष्णेन हरिणा अङ्ग हे राजन भक्तवश्यतैवं दर्शिता ॥ १९ ॥ गोप्यो यं प्रसादं विमुक्तिदाल्लेभिरे तं प्रसादं तादृशमेवेमं विरिञ्चः पुत्रो नाप भवः पौत्रो नाप। अङ्गसंश्रयाऽङ्गमुरः संश्रय आश्रयो यस्याः साऽपि नाप। तात्पर्यं तु सप्तमनवमोक्तप्रकारेणानुसन्धेयम्। गोपी यत्तदिति पठन्ति। यत्तत् यं तं। यत्तत्प्रापुर्विमुक्तिदादिति पाठे विरिञ्चो नाप भवो नापाङ्गसंश्रया श्रीरपि नापेत्याहृत्येनापुरित्यन्वय इति वदन्ति। केचित्तु लेभिरस्यादुलूखलमित्यभिधानादुलूखले सति नापुरिति च ॥ २० ॥

श्रीसुबोधिनी

सर्वा एव गोप्योङ्गणमध्ये तथा करणाद् द्रष्टुमागताः, अद्यापि तथा न निरुद्धा इति तदा **स्मयन्त्यो** जाता गर्विष्ठाः सन्मुखा वा स्वस्यापि भुजबन्धनादिकं भावयिष्यन्त्यः **सुस्मयन्त्यो** जाताः, गृहस्थसर्वदामव्ययकरणेपि न बन्धनं निवृत्तमित्याहैवमिति पूर्वोक्तन्यायेन सर्वाण्येव **दामानि** योजितवती, यतो **यशोदा यशो ददाति** द्यति वा, **सन्दधत्यपि** द्व्यङ्गुलन्यूनभावाद् **विस्मिताभवदि**तिसम्बन्धः, **यशोदागृह** एव भगवता पुत्रत्वमपराधश्च दर्शित इति तद्गेह**दामान्येवा**न्तर्बहिर्भगवत्तिरोभावात् सम्बद्धानि न तु गेहान्तरस्थितानि, अन्यासां तु तदर्थप्रवृत्तिरेव नास्ति, अन्तर्बहिस्तिरोधानाभावात् , रज्जूनामानयनं **यशोदा**कर्तृकमेव, न हि तादृश्या अन्यः सहायं कर्तुमर्हति, पूर्वं तु वारद्वयं त्रियोजनायां रोषे गते **स्मयन्ती** जाता, ततोपि बहुवारयोजनायां **विस्मिता चाभवत्**, आश्चर्यं प्राप्तवती, ततो रज्जूनामन्वेषणार्थं निर्बन्धेन यत्नं कृतवती ॥ १७ ॥ ततः सामर्थ्याभावे गोपिकानां समक्षं परमलज्जां प्राप्य भग्नमानससङ्कल्पा मृतप्रायासीत् तदा भगवान् परमकृपालुस्तादृशदुष्टेष्वपि सद्बुद्ध्या युक्तमपि कृतवानित्याह **स्वमातु**रिति, ततो भगवान् **कृपया स्वबन्धन आसी**दितिसम्बन्धः, तत्र कारणत्रयमाह **स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रज** इति, मातुर्हि परितोषः कर्तव्यः, "मातृदेवो भव" "एभ्यो माता गरीयसी"तिवाक्यात् , नापि तस्या अपत्यान्तरमस्ति यो ह्युपस्थितं दुःखं निवारयेद् यत इयं **स्वस्यैव** मातातो मातृत्वं ख्यापयित्वा तस्या दुःखमसहमानेन तथा कृतं, किञ्च गोकुलवासिनां खेददूरीकरणार्थमागतो भगवान् स कथं **स्विन्नगात्रायाः** सर्वाङ्गे जातस्वेदाया न **परिश्रमं** दूरीकुर्यात् ? किञ्च गोकुलवासिनां सर्वसौभाग्यदानार्थमागतः स कथं विस्रस्ताः **कबरात्** केशपाशात् स्रजो यस्यास्तादृशीं पश्येत् ? अनेन सर्वाभरणानामेव तिरोभावः सूचितः, एवमेतादृश्याः **परिश्रमं** दृष्ट्वेतस्ततः पर्यटनं खेदः प्रस्वेदो मुखशोषो महती च ग्लानिरित्यादिः **परि**शब्दार्थः, तत्रापि भगवान् **कृष्णः** सदानन्दोननुभूतदुःखदुःखितानामसमक्षः परदुःखमपि न पश्यति तदपूर्वं यशोदादुःखं दृष्ट्वा **कृपया** व्याप्तो मात्रर्थं स्विन्नगात्रार्थं स्रगभावार्थं च **स्वस्यैव** स्वयं बन्धकरूपगुणाङ्गुलत्रयभूतो जातः, द्वाभ्यां पूरितमङ्गुलमात्रं च बन्धनं जातं, तदा **स्वस्यैव** स्वयमेव बन्धने जात **आसीत्** प्रकरणाद् गृहीत इत्यव

क्तव्यत्वान्नोक्तम् ॥ १८ ॥ ननु किमर्थं भगवानेतावत् कृत्वा बन्धनरूपो जात इति चेत् तत्राहैवमिति, **एवमपकारिणि लोके** स्वकीयत्वमात्रभिमानेनाप्येतावतीमभूतपूर्वां कृपां करोतीति स्वस्य **भक्तवश्यता प्रदर्शिता**, प्रदर्शनस्यापि प्रयोजनमाह **हरिणेति**, स हि सर्वदुःखहर्ता तत्त्वसिद्धयर्थमसम्बन्धेन दुःखहर्तृत्वेतिप्रसङ्गात् संसारविलयः स्यादिति **सम्बन्धार्थं** कृपालुतां प्रदर्शयति, **कृपा च सर्वधर्मधर्मिभ्यो बलिष्ठेति** वक्तुं **भक्तवश्यता**शब्देनैवोक्ता, ननु भक्त्या चेद् धर्मधर्मिणामुपमर्दः क्रियते तदा स्वरूपस्य प्रच्युतत्वात् फलाभावात् प्रदर्शनमपि व्यर्थं स्यादित्याशङ्क्याह **स्ववशेनापीति**, स हि **स्ववश** एव न केनाप्युपमर्द्यः, अनेन फलसाधकत्वमुक्तं, फलरूपत्वमाह **कृष्णेनेति**, नन्वेवं कृतेन्यो महान् ब्रह्मादिर्न मंस्यते ततो माहात्म्यस्य न्यूनभावान्न तथा फलत्वमित्याशङ्क्याह **यस्येदं सेश्वरं वशे** इति, तत्तदधिष्ठातृदेवतासहितं सर्वं जगत् **यस्य वशे**, अतो नान्यथाभावनं केनचिदपि कर्तुं शक्यमितिभावः ॥ १९ ॥ नन्वेतादृशो भावः पूर्वमपि सिद्धस्ततः शास्त्रप्रसिद्धत्वात् किं प्रदर्शनेनेत्याशङ्क्याह **नेमं विरञ्च्य** इति, इमं **प्रसादं** न कश्चित् पूर्वं प्राप्तवान् **भक्ता एव हि महान्तः प्राप्नुवन्ति**, तत्र भक्तेषु भक्त्या स्वरूपतश्च महान्तस्त्रयः पुत्रो ब्रह्मा भक्तः प्रवृत्तिमार्गसर्वधर्मप्रवर्तकः सर्वेषां हेतुभूतस्तथा महादेवोपि पौत्रः सर्वनिवृत्तिधर्मप्रवर्तकः प्रलयकर्ता गुणावतारश्च भगवदर्थमेव सर्वपरित्यागेन तपस्तपति ततोपि लक्ष्मीर्भार्या ब्रह्मानन्दभूतस्यापि लब्धपदा जगज्जननी निरन्तरं पादसेवनपरा, एवमेते त्रयोपि **यदीमं प्रसादं** न प्राप्तवन्तस्तदा कोन्यः प्राप्तुमर्हति ? तदाहेमं **प्रसादं न वा विरञ्च्यो न वा भवो न वा श्रीः**, प्रत्येकसमुदायाभ्यां **प्रसादं न लेभिरे**, न च तेषां दोषोस्तीति शङ्कनीयं, यतस्त्रयोप्यङ्गमेव सम्यगाश्रयन्ति, एका **वक्षोन्यो नाभिमन्यः पादाविति**, तेषां त्रयाणामपि गुणावताराणां यद् दुर्लभं तदन्येषां दुर्लभमेव, स कः प्रसाद इत्याशङ्क्य तमनुवदति **गोपी यत् तत् प्रापेति**, जात्या स्वरूपतो हीना, प्रसादस्तत्रैव प्रसिद्धो न तु केनचिन्निरूपितः, न हि सर्वमोचकः कश्चिदात्मानं बध्नाति, खेदस्तु ज्ञानमपि दत्वा विदेहकैवल्यं वा दत्वा मोचयितुं शक्यते किं स्वयं बन्धनेन ? अतः **प्रसिद्धः प्रसादोयमेव नान्य** इत्यर्थः ॥ २० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

एवमित्यत्र ददाति द्यति त्वेति **ददाति** भगवते **द्यति** स्वस्येत्यर्थः ॥ १७ ॥ **स्वमातुरित्यत्र "मातृदेवो भवे"**तिशीक्षोपनिषच्छ्रुतिर्ज्ञेया, तथा च **स्वसेतुं** स्वयमेव पालयितुमेवं कृतवानित्यर्थः, **प्रकरणाद् गृहीत इतीत्यत्रे**तिशब्द इदमर्थो बोध्यः, एवं गुणानां **षट्** श्लोका व्याख्याताः ॥ १८ ॥ अथान्येषामविद्यानिवर्तकान् व्याख्यास्यन्त्येवं **सन्दर्शितेत्यत्र**, **स्वरूपस्येत्यादि** निरङ्कुशत्वरूपस्यैश्वर्य**स्वरूपस्य प्रच्युतत्वात्** तेन **फलाभावात्** भक्तिफलमपि न स्यात् तथा सति **भक्तवश्यताप्रदर्शनमपि व्यर्थं स्यादित्याशङ्क्य** तत्समाधानायाहेत्यर्थः, **स हीत्यादि हि** यतो हेतोः **स स्ववश एवातो न केनापि** भक्तिफलोपमर्द इति न प्रदर्शनवैयर्थ्यमित्यर्थः, **अनेनेत्यु**पमर्दाभावकथनेन ॥ १९ ॥ **नेममित्यत्राभास एतादृशो भावः पूर्वमपि सिद्ध** इति भक्तवश्यत्वरूपो **भावः** कृष्णोपनिषदादिष्वपि **सिद्धः**, **भगवदर्थ**मित्यादीदं चाष्टमस्कन्धे "यं मामपृच्छस्त्वमुपेत्य योगात् समासहस्रान्त उपारतं वा" इतिश्लोके तथा ब्रह्मवैवर्तेगस्त्यसंहितायां च प्रसिद्धं, **त्रयाणामपि गुणावताराणामित्यत्र** श्रियो गुणावतारत्वं मायारूपाया बोध्यं, "तस्याज्ञयैव नियता परमापि रूपं चक्रे द्वितीयमिव यत् प्रवदन्ति माया"मितिपञ्चरात्रवाक्याद् **"यद्वाञ्छया श्रीर्ललने"**त्यत्र सात्त्विकशक्तित्वेन श्रिया निरूपणाच्च, **विमुक्तिदादि**तिशब्दार्थमाहुर्न **हीत्यादि शक्यत** इत्यन्तम् ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

सुबोधिन्यां, **एवमित्यत्र ततो रज्जूनामित्यादिना आसीदित्यन्तेन विस्मितपदार्थो** विवृतः, **विस्मिता** गतगर्वेत्यर्थः ॥ १७ ॥ **स्वमातुरित्यस्याभासे तादृशदुष्टेष्विति** दोषारोपयुक्तेष्वितिज्ञेयं **सद्बुद्ध्ये**ति सतां बुद्ध्या अयुक्तं सोपधिस्नेहवद् वश्यत्वमित्यर्थः । **स्वमातुरित्यत्र कृष्ण**पदार्थकथने धर्मरूपानन्दस्य विद्यमानत्वात् तदभावरूपदुःखाननुभवः आनन्दरूपत्वाच्च **दुःखितानामसमक्षः**, एतस्यैव विवरणं **परदुःखमपीति**, स्वस्यानन्दरूपत्वात् स्वसाक्षात्कारे दुःखमेव गच्छतीति स्वयं दुःखं न **पश्यति** सूर्यस्तम इवेत्यर्थः ॥ १८ ॥ **एवं सन्दर्शिते**त्यत्र **ननु भक्त्या चेदिति भक्तवश्यतेति**पदे अक्षरार्थोयं भक्तत्वे सति वश्यः, भक्तत्वं भक्तिरेवेति भक्त्या वश्यत्वकथनेन तया धर्मधर्मिणामुपमर्द उक्त इतिभावः ॥ १९ ॥ **नेमं विरंच्य** इत्यत्र न तु **केनचिदिति** पूर्वमितिशेषः, **खेदस्त्वि**त्यादि अन्तःकरणधर्मस्य खेदस्य गात्रे कथनेनान्तर्बहिः खेदः पूर्वं निरूपितः, तत्र ज्ञानदानेनान्तःखेदनिवृत्तिः, विदेहकैवल्यदानेन देहाभावाद् बहिःखेदनिवृत्तिरितिद्वयं निरूपितम् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं स्वगेहस्थानि सर्वाणि दामानि सन्दधत्यपि यशोदा द्व्यङ्गुल्यपूर्त्या यदा तं बद्धुं न शशाक, तदा तत्प्रयासस्य निष्फलत्वं दृष्ट्वा सुस्मयन्तीनां स्मितं कुर्वतीनां मध्ये स्वयमपि स्मयन्ती विस्मिताऽभवत् ॥ १७ ॥ तदा च कृष्णः स्विन्नं स्वेदयुक्तं गात्रं देहो यस्यास्तस्याः, विस्रस्ताः कबरात् केशबन्धात स्रजो यस्यास्तस्याः स्वमातुः परिश्रममितस्ततो रज्ज्वन्वेषणतत्परिवेष्टनजन्यं दृष्ट्वा कृपया स्वबन्धने आसीदित्यन्वयः । न च 'एवं तर्हि प्रथममेव कथं न बन्धनं गतः ? तथा सति तस्याः

श्रम एव न स्यात्' इति शङ्कनीयम्। 'अयं मम वश्यः, पुत्रत्वात्' इति, 'अनेन भाण्डस्फोटनादि कृतम्, अतो ममापराधी' इति च बुद्धिदोषद्वयं प्रथमं तस्या आसीत्, ततो दाम्नो द्व्यङ्गुलन्यूनता जाता, भगवत्कृपा च न जाता। 'इदानीं तु सर्वथा तदभिमानस्य नष्टत्वादैन्यमालोक्य कृपया बन्धनं प्राप्त' इति ज्ञेयम्। तत्समये नन्दरोहिण्यादीनामन्यत्र गमनं जातमिति बोध्यम्, अन्यथा तैर्बन्धनं निवारितं स्यात्॥ १८॥ एवं बन्धनाङ्गीकारे तात्पर्यमाह– एवमिति। 'एवंविधलीलाश्रवणे त्वमेवोत्तमोऽधिकारी, परमभक्ततयाऽस्मदादिवत्तत्तात्पर्यनिर्धारे समर्थत्वात्' इत्याशयेन सम्बोधयति—अङ्गेति। हीति निश्चये। एवं मातृकृतबन्धनाङ्गीकारेण कृष्णेनात्मनो भक्तवश्यता सम्यक् दर्शिता। 'तर्हि स्वातन्त्र्यं गतं स्यात्' इत्याशङ्क्याह—स्ववशेनापीति। सेश्वरमीश्वरैर्लोकनाथैर्ब्रह्मादिभिः सहितम् इदं विश्वं यस्य वशे वर्तते तेनापि, स्वतन्त्रेणेत्यर्थः। तत्प्रदर्शनप्रयोजनं सूचयन्नाह– हरिणेति। संसारदुःखहरणत्वाज्जनानां संसारदुःखनिवृत्तिहेतुस्वभजने प्रवृत्तये एवं भक्तवश्यता सन्दर्शिता, "भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत्" इत्यादौ तथोक्तेः। एवं वश्यतायां प्रदर्शितायामपि भजनप्रवृत्तिर्दुर्लभा दृश्यते, तदभावे तु सा नैव स्यात्। तथाच दुःखनिवृत्तिरपि नैव स्यात्। कलावन्यस्य देशकालादेः शोधकस्याभावेन "कीर्तनादेव कृष्णस्य नरो न निरयं" व्रजेत् इति सिद्धान्तितत्वादित्याशयः॥ १९॥ यशोदायां जातस्य भगवत्प्रसादस्य दुर्लभत्वमाह—नेममिति। विरिञ्चो ब्रह्मा पुत्रः सन्मार्गप्रवर्तको जगत्कर्ता। भवो रुद्रः पौत्रः। तयोर्ज्ञानाद्युपदेष्टा स्वयमपि समाधिनिष्ठः। श्रीर्लक्ष्मीः अङ्गसंश्रया उरसि लब्धपदा प्रिया पत्नी। एते त्रय ईश्वरतया शास्त्रप्रसिद्धाः भगवत्प्रसादं न लेभिरे इति न, अपि तु लेभिरे। परंतु विमुक्तिदात् भगवतः सकाशात् यदिमं स्वबन्धनादिपर्यन्तमनेकविधबालचरित्रचमत्कारैर्मनोरथपूर्तिरूपं प्रसादं गोपी जात्याचारादिहीनाऽपि यशोदा प्राप प्राप्तवती, तत् तं तु नैव लेभिरे इत्यन्वयः। यद्वा इमं प्रसादं ब्रह्मादयो 'न लेभिरे न लेभिरे न लेभिरे' इति नञ्त्रयप्रयोगवशात् क्रियापदावृत्तिः प्रसादस्य दौर्लभ्यदार्ढ्यार्थो बोध्या। 'अङ्गसंश्रयाः' इति विसर्गान्तगतिपाठे ब्रह्मादित्रयाणां विशेषणं निर्दोषकत्वसूचकम्। तत्र ब्रह्मा नाभिसंश्रितो, भवो ध्यानेन चरणसंश्रितः, लक्ष्मीर्वक्षःश्रिता॥ २०॥

अन्वितार्थप्रकाशिका

एवमिति॥ एवं स्वगेहस्थानि सर्वाणि दामानि सन्दधत्यपि यशोदा तत्प्रयासं निष्फलं दृष्ट्वा सुस्मयन्तीनां स्मितं कुर्वतीनां गोपीनां मध्ये स्वयमपि स्मयन्ती विस्मिताऽभवत्। शता आर्षः॥ १७॥ स्वमातुरिति॥ तदा च कृष्णः स्विन्नं स्वेदयुक्तं गात्रं देहो यस्यास्तस्याः विस्रस्ताः कबरात्केशबन्धात् स्रजो यस्यास्तस्याः स्वमातुः परिश्रममितस्ततो रज्ज्वन्वेषणतत्परिवेष्टनजन्यं दृष्ट्वा कृपया स्वयमेव स्वबन्धने आसीत्॥ १८॥ न चैवं स्वातन्त्र्यभङ्ग इत्याह—एवमिति॥ अङ्ग हे राजन्! हि निश्चये सेश्वरमीश्वरैर्लोकनाथैर्ब्रह्मादिभिः सहितमिदं विश्वं यस्य वशे वर्तते। तेन स्ववशेन स्वाधीनेनापि कृष्णेन हरिणा आत्मनः भक्तवश्यता सम्यक् दर्शिता॥ १९॥ नेममिति॥ विमुक्तिदात् भगवतः सकाशात् यत् यं प्रसादं स्वबन्धनादिकं गोपी यशोदा प्राप तत् तम् इमं प्रसादं विरिञ्चो ब्रह्मा पुत्रोऽपि न लेभे। भवः पौत्रोऽपि न लेभे। अङ्गसंश्रया उरसि लब्धपदा श्रीः पत्न्यपि न लेभे। एवमेते त्रयोऽपि न लेभिरे। अत्र लेभिरे इति क्रियापदं बहुवचनान्तम्। एकवचनान्तैर्विरिञ्च्यादिभिरन्वयमलभमानं प्रत्येकसहपठितनकारयोगाय स्वावयवभूतलेभेपदेन योगं प्रकल्पयति। ततः समुदितपरामर्शकत्वयाऽध्याहृतैतच्छब्देन नकारत्रयस्थानापन्नैकनकारेण च योगान्न लेभिर इत्यन्वयः। न चैत्रो न मैत्रो न देवदत्तोऽत्रागच्छन्ति इति वत्। भागवत एव प्रागपि "नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वम्। विदुः प्रमाणम्" इत्यादि। "नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः" इत्यादि। "न प्रद्युम्नो नानिरुद्धो न रामो न च केशवः। यस्य शेकुः परित्रातुं" इत्यादि च एतेन "न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः॥ भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे॥" इत्यादिकमपि व्याख्यातम्। अत एव चात्र श्रीस्वामिपादैरपि अन्वययोजनचिन्तापि न कृता। केचित्तु विरिञ्च्यादयो भगवत्प्रसादं न लेभिरे इति न अपितु लेभिरे परंतु गोपी यं प्रसादं प्राप तं तु न लेभिरे। यद्वा। इमं प्रसादं ब्रह्मादयो न लेभिरे न लेभिरे न लेभिरे इति नञ्त्रयप्रयोगवशात् क्रियापदावृत्तिरिति। परे तु विरिञ्च्यादयो भक्तिरूपं प्रसादं लेभिर एव किन्तु यद्गोपी प्राप तत्तु विरिञ्चो न प्राप भवोऽपि न प्राप श्रीरपि न प्रापेत्याहुः। तत्सर्वं नात्यावश्यकम्॥ २०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं सर्वाणि स्वगेहदामानि संदधती उत्स्मयंतीनां हास्यं कुर्वंतीनां मध्ये स्मयंती हसंती सती सा विस्मिता॥ १७॥ स्विन्नं स्वेदयुक्तं गात्रं शरीरं यस्याः तस्याः विस्रस्ताः विशीर्णाः कबरस्रजो यस्यास्तस्याः॥१८॥ सेश्वरमीश्वरैरनेकब्रह्मांडाधिपैः सहितं इदं ब्रह्मांडवृंदं यस्य वशे यदधीनमित्यर्थः॥१९॥ विमुक्तिदात् श्रीकृष्णात्। गोपी माता। यत्। यं भक्तवश्यतारूपं प्रसादं प्राप। तत्तमिमं प्रसादं विरिञ्चिर्ब्रह्मा न लेभे भवो न। श्रीर्न। ततोऽन्ये कुतो लेभिरे॥ २०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ एवममुना प्रकारेण, यशोदा, स्वगेहदामानि यावन्ति गेहदामानि सन्ति, तावन्त्यपि दामानि संदधती सत्यपि, सुस्मयन्तीनां प्रहासं कुर्वाणानां, गोपीनां गोपिकानां मध्ये, स्मयन्ती क्षोभेन सह स्वयमपि हासमाचरन्ती सती, विस्मिताऽत्याश्चर्यवती, अभवत् ॥ १७ ॥ स्वेति ॥ तदा स्विन्नं प्रस्वेदभरितं गात्रं शरीरं यस्यास्तस्याः, विस्रस्तं कबरं केशपाशः स्रजश्च यस्यास्तस्याः, स्वमातुः, परिश्रमं दृष्ट्वा, कृपया, कृष्णः, स्वबन्धने, आसीत् बन्धनानुगुणो बभूव ॥ १८ ॥ न चैतावताऽस्य स्वातन्त्र्यभङ्ग इत्याह ॥ एवमिति ॥ अङ्ग हे राजन्, यस्य कृष्णस्य, वशे वशवर्त्तित्वे आधीन्ये इति यावत्। सेश्वरं ब्रह्मादीश्वरसहितं, इदं जगत्, वर्त्तते। स्ववशेन स्वतन्त्रेणापि, तेन कृष्णेन, हरिणा, एवं भक्तवश्यता, संदर्शिता हि। सर्वत्र स्वतन्त्रोऽप्यहं भक्तेषु परतन्त्र इति प्रदर्शयितुमबद्ध्यतेत्यर्थः। तथा चोक्तमभियुक्तैः। 'अनन्याधीनत्वं तव किल जगुर्वैदिकगिरः पराधीनं त्वां तु प्रणतपरतन्त्रं मनुमहे' इति। तथा भगवता स्वेनापि नवमस्कन्धे उक्तम्। 'अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज' इति। अत्र त्रिकालदर्शिनो भगवतो व्यासस्यापि परस्परपर्यायत्वभाजोर्हरिकृष्णशब्दयोः प्रयोजनमन्तरापि पृथगुपादानेन भाव्यो हरिरपि कृष्ण एवास्तीति द्योतनमेव प्रयोजनं प्रतिभाति ॥ १९ ॥ नेममिति ॥ गोपी यशोदा, विमुक्तिदादन्येषां बन्धननिवृत्तिकरात् स्वपुत्रात् कृष्णात्, यत् यं प्रसादं स्वभक्तकृतनिग्रहादिक्षमत्वपर्यन्तमनुग्रहं, प्राप प्राप्तवती। तत् तं, इमं प्रसादं, विरिञ्चो ब्रह्मा, स्वात्मजः सन्नपि, न प्राप। भवो वैष्णववरः स्वैकान्तिकभक्तः सन्नपि, न प्राप। अङ्गसंश्रया विहितस्वाङ्गनिवासा जाया, श्रीर्लक्ष्मीरपि, न प्राप। तर्हि अन्ये न लेभिरे इत्यत्र किं वक्तव्यम्। भक्तिप्रयोजनं हि भगवत्प्रसादस्तं च यादृशं विमुक्तिदाद्यतो गोपी लेभे, तादृशं प्रसादं ब्रह्मादयो न लेभिरे इत्यर्थः। यद्वा विरिञ्चः न, भवो न, श्रीरपि, न लेभिरे। एकवचनान्तानेककर्त्तृकस्थले बहुवचनान्तक्रियापदस्य वचनविपरिणामेन प्रत्येकं समन्वयस्यापि दर्शनान्न बाधः। तथा च दृश्यतेऽन्यत्रापि। 'न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानाम्' इत्यादिषु। केचित्तु 'लेभिरं स्यादुलूखलम्' इति कोशं प्रकल्प्य गोपी, भगवन्तं लेभिरे बद्ध्वा, यं प्रसादं प्राप, न तं ब्रह्मादयः प्रापुरिति व्याख्यां कुर्वन्ति, सापि न चारुः ॥ २० ॥

श्रीहरिसूरिविचितं श्रीभक्तिरसायनम्

स्वमातुरिति: १०.९.१८.

न द्वैतमस्य हृदयादपैति तत् किं वृथा स्वां प्रकटीकरोषि।
निःसङ्गतामित्यवधार्य तादृग् दामस्थितेरास विभुः सबन्धः ॥ ३६ ॥

लघुमपि मद्भक्तगुणं हार्दस्थितितो नयामि पूर्णपदम्। ध्वनयन्नेवमनन्तो निन्ये पूर्णत्वमेतदल्पमपि ॥ ६७ ॥

षाड्गुण्यं भजतः सहस्रगुण सद्वृत्तेरनन्तात्मनो नित्यानन्तगुणोल्लसत् सुचरितस्यापीह मेऽवस्थितिः।
पूर्णत्वं गुणतः प्रयाति न विना मद्भावभाजां गुणालम्वं जातुचिदित्यबोधयदसौ पूर्णोदरस्तद्गुणात् ॥ ६८ ॥

मत्प्रेम पोषकमपि श्रममात्मभक्तदेहे सहे न भुवि जातु कुतस्तदन्यम्।
किं चास्य खेदमपनेतुमहं सहेयेत्यश्लाध्यमप्यकृत बन्धनतः स्फुटं सः ॥ ६९ ॥

न मां तत्त्वदृष्ट्या गुणकोऽपि लग्नः कश्चिद्भासमानोऽपि चेन्मध्य एव।
इति श्रौतमर्थं तदानीमधीशः सदाम्ना स्वमध्येन मन्ये व्यतानीत् ॥ ७० ॥

गोकुलस्थैरहं बद्धः प्रेम्णेत्यर्थं प्रकाशयन्। तद्गतेन गुणेनेशस्तदाऽगात् किमु बन्धनम् ॥ ७१ ॥

महतामिह सद्गुणो गरीयान् प्रचुराज्ञानविजृम्भितोऽपि भूयः।
अलमीप्सितकार्यपूर्तये स्यादिति तद्बन्धनतोऽभवत्स्फुटार्थम् ॥ ७२ ॥

खलगुणसम्बन्धः खलु यदि दैवादुदरसङ्गतो जातः। सद्यो बन्धाय भवत्यलमिह महतामपीति सुव्यक्तम् ॥ ७३ ॥

ज्ञात्वा कृष्णस्तादृशं मातृचेतो निर्बन्धं यत्स्वीचकाराऽऽत्मबन्धम्।
तेनाबोधि प्रेमतो भक्तभव्याद् गौणं कार्यं स्वीयमेवं जनेऽस्मिन् ॥ ७४ ॥

मच्छापादचिरेण वां यदुपतिर्मोक्तेति वाचाऽऽर्षया तावद् बद्ध इवाहमस्मि सततं मुक्तोऽपि मोक्ताऽपि च।
यावद्वार्क्षपदादिमौ न कृपया सम्मोचिताविरत्यसौ तद्बन्धात् किमबोधयद्भुवि विभुर्भक्तैकवाग्वश्यतात् ॥ ७५ ॥

आकल्पकोट्यघटमानमपीह भक्तसङ्कल्पमल्पतरयत्नत एव यो वै।
सम्पूर्यतद्धृदयधारणजागरूकस्तद्वाच्यमस्य किमु भक्तवशत्वमन्यत् ॥ ७६ ॥

नेमं विरिञ्च इति : १०.९.२०.

येषां बालतया सुखोदयकरस्तेषां न षाड्गुण्यतो येषां तादृशरूपतश्च सुखदस्तेषां न बालत्वतः।
सच्चिद्रूपतया च बालकतया निःसीमसौख्यप्रदस्तेषामेव सुभक्तिमन्त इह येऽत्रोदाहृतिर्गोपिका॥ ७७॥
नियम्य हृदयं धियाऽऽत्मभवबन्धनाशाह्लितोद्यमैरपि बुधैर्न या क्वचिदलक्ष्यलन्तामयम्।
निजात्म भवबन्धनोत्सुक-मनस्यपि श्रीपतिः कृपामकृत मातरीत्युचितमेतदार्षं वचः॥ ७८॥

कृष्णप्रिया

नन्दरानीजी यशोदाजी ने घर भर की सघरी रस्सियाँ जोड़ दी किन्तु रस्सी छोटी ही रही पर भगवान् श्रीकृष्ण बाँधे न जा सके नन्दरानीजी की निष्फलता को देखने वाली ब्रज की ग्वालिन हंस पड़ी खुद यशोदा भी मुस्करा उठी साथ ही आश्चर्यचकित हो गयी॥ १७॥ जब कृपालु कृष्ण ने देखा कि निज जननी तो मारे पसीने के लथपथ हो गयी और जूड़े के फूल तितर बितर बिखर रहे हैं, तब मातृचरणों के श्रम को देखते प्रभु को दया हो आयी, तब कृपावश स्वयं ही अपनी माँ के बन्धन में बंध गये॥ १८॥ राजन् परीक्षित्! भगवान् श्रीकृष्ण सर्वथा स्वतंत्र है ब्रह्मा इन्द्रादि लोकपालों के सहित यह सारा विश्व उनके वश में है फिर भी वह जो बँध गये उससे श्रीहरि ने यह जताया कि मैं अपने अनन्य भक्तों के वश में हूँ॥ १९॥ ब्रह्माजी, भगवान् शंकर, एवं भगवान् के हृदयकमल में वक्षःस्थल में विराजती अर्धांगना श्री लक्ष्मीजी ने भी जो भगवान् की प्रसन्नता को न प्राप्त की वह प्रसाद यशोदारानी ने मात्र दृढ भक्ति के द्वारा भगवान् कृष्ण से पा लिया॥ २०॥

नायं [1]सुखापो भगवान् देहिनां गोपिकासुतः। ज्ञानिनां चात्मपोतानां[2] यथा भक्तिमतामिह॥ २१॥
कृष्णस्तु [3]गृहकृत्येषु व्यग्रायां मातरि प्रभुः। अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ॥ २२॥
पुरा [4]नारदशापेन वृक्षतां प्रापितौ मदात्। नलकूबरमणिग्रीवाविति ख्यातौ श्रियान्वितौ॥ २३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे[5] [6]गोपीप्रसादो नाम नवमोऽध्यायः॥ ९॥

कर्दमक्षमा

अन्वयः—अयं गोपिकासुतः भगवान् भक्तिमताम् इह यथा सुखापः आत्मपोतानां ज्ञानिनां च देहिनां न (तथा सुखापः)॥२१॥ कृष्णः प्रभुः तु गृहकृत्येषु मातरि व्यग्रायां पुरा नारदशापेन पूर्वं श्रियान्वितौ नलकूबरमणिग्रीवौ इति ख्यातौ धनदात्मजौ गुह्यकौ वृक्षतां प्रापितौ अर्जुनौ अद्राक्षीत्॥ २२-२३॥

इति नवमोऽध्यायः॥ ९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

फलितमाह। नायमिति। देहिनां देहाभिमानिनां तापसादीनां ज्ञानिनां निवृत्ताभिमानानामपि॥ २१॥ भक्तैर्बद्धस्याप्यन्यमोचकत्वमाह। कृष्णस्त्विति॥ २२-२३॥

इति श्रीमद्भागवते म० दशमस्कंधे पू० टीकायां गोपीप्रसादोलूखलबन्धनं नाम नवमोऽध्यायः॥ ९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

फलितं लब्धम्॥ आत्मभूतानाम्। 'ज्ञानी त्वात्मैव मे मतः' इत्युक्तेर्भगवद्रूपाणामपि ज्ञानिनामयमिति शृंगग्राहिकया दर्शयति–गोपिकासुतो यशोदासूनुरित्यनेन सगुणविग्रह इत्युक्तम्। ज्ञानिनस्त्वव्यक्तविग्रहोपासका अत एवोक्तम् "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" इति भगवद्गीतासु। 'या निर्वृतिस्तनुभृतां तव पादपद्म'–इत्यादिध्रुवोक्तेश्च सुखेन भक्तिमतामेव लभ्यः 'भक्त्या लभ्यस्त्वनन्यया' इत्युक्तेः। "भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः" इति स्मृतेश्च। "भक्तिरेवैनं दर्शयति" इति श्रुतेश्च। गोपिकासुत इत्यपि भक्त्यैव गोपीसुततामाहेति अत्र श्रीभागवते भगवत्प्रेमैव सर्वपुरुषार्थशिरोमणित्वेन वर्ण्यते तस्य स्थितिर्नित्यसिद्धभक्तेष्वेव तेष्वपि गोकुलवासिन एव श्रेष्ठा इत्याह–नायमिति। देहिनां देहाध्यासवतां भक्तिमतां ज्ञानिनां देहाध्यासरहितानामात्मारामभक्तानां तथाभूतत्वे सत्येव प्राप्तियोग्यतायां निषेधसंभवात्। आत्मभूतानां पूर्वश्लोकोक्तानां विरंचिभवश्रियां तत्र विरिंचिभवयोः स्वावतारत्वाल्लक्ष्म्याः। स्वरूपशक्तित्वेनात्मभूत्वम्। एवं त्रिविधजनानां गोपिका

---

१. सुबोधो–च. पु टी ; सुखाप्यो–विज.। २. भूतानां–श्रीधर. वंशी. जीव. विश्व. शुक. ; पोतानां–वीर विज.। ३. गृह्य–वीर.। ४. शापात्तौ–विज.। ५. अन्यत्र "पूर्वार्धे" पाठो दृश्यते। ६ बालक्रीडायामुलूखलबन्धो ; नाम–इति कस्यचित्।

सुतो भगवान्न सुखापः किं तदिति विकुंठ कौशल्यादिसुत एव दुःखमेवाभिव्यञ्जयति एषामिह श्रीयशोदायामेतदुपलक्षितेषु वात्सल्यसख्यकांतभावाश्रयेषु व्रजलोकेषु या भक्तिः 'श्रिय उरगेंद्रभोगभुज' इत्यादिना 'यथा त्वल्लोकवासिन्यः' इत्यादिना च श्रुत्यादिभिरनुगतिमयी तद्वतां यथा सुखापस्तथा तेषान्नेति। तेन गोपिकाद्यनुगतिमयन्यूनतादुःखांगीकारस्तु विरिंचिभवलक्ष्म्यादिभिरीश्वराभिमानिभिः स्वस्वलोकस्थितैर्दुश्शक एव। अन्येषां तादृशोपदेशस्यालाभादरोचकत्वाद्वा तदनुगत्यभाव एवेति भाव इति चक्रवर्त्ती॥ २१॥ अद्भुतमाह–भक्तैरिति। व्यग्रायां लग्नायाम्। अर्जुनौ ककुभवृक्षौ। पूर्वं गुह्यकौ पूर्वजन्मनि यक्षौ॥ २२॥ शापहेतुमाह–मदादिति। तत्रापि हेतुः श्रियान्वितावविति। "श्रुतिचक्षुर्वाग्विहीनं कुरुते लक्ष्मीजनस्य को दोषः। गरलसहोदरजाता यन्न मारयति तच्चित्रम्" इत्युक्तेः॥ २३॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्धे नवमोऽध्यायः॥ ९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ कथमस्यास्तादृशी तत्प्राप्तिर्जाता परेषां वा कथं स्यात् तत्राह—नायमिति। अयं गोपिकासुतो भगवान् देहित्वेनाभिमानवतां तप आदिभिर्न सुखापः किंतु "एतावानेव यजतामिह निःश्रेयसोदयः। भगवत्यचलो भावो यद्भागवतसङ्गतः" इत्युक्तरीत्या कथञ्चित् कदाचित् तद्भक्तसङ्गो यदि स्यात् तदा क्रमत एव प्राप्यः एवं ज्ञानिनां देहाद्यतिरिक्तात्मज्ञानवताम् आत्मभूतानां तद्विज्ञानवतामपि न सुखापः किन्तु पूर्ववत्तद्भक्तसङ्गादेव आत्मभूतानामिति पाठं केचित्पठन्ति तत्र आत्मैव पोतस्तरणसाधनं येषां ज्ञानिनामित्यर्थः। तर्हि सुखाप इत्यपेक्षायां तन्निदर्शनमाह—यथा इह श्रीगोपिकासुतो भक्तिमतां सुखापः अनेन महानारायणादिभक्तिमन्तोऽपि व्यावृत्ताः युक्तं च तेषामसुखाप इति देहिनां ज्ञानिनां च देहिसामान्यदृष्ट्या भक्तान्तराणां च गोपलीलादृष्ट्या तत्रादरानास्पदत्वात् तद्भक्तानां सुखाप इति च युक्तम्" इत्थं सतां ब्रह्मसुखानुभूत्या" इत्यादिषु तेषां तादृशतल्लीलायाः सर्वोत्तमतया अनुभवादिति ज्ञेयम्। तत्र गोपिकासुत इति निर्विशेषणमेवोपलक्षणं गोपिकाया एव सर्वोपादेयत्वेन विवक्षितत्वात् इहशब्दश्च तद्वाच्येव न जगदादिवाची प्राप्तत्वात् व्यर्थत्वाच्च भक्तिमन्तश्च त्रैकालिकभक्तपरम्परा एव अविशेषेण प्राप्तत्वात् तामुपदिशतां वेदानां तदुपदेशकोपदेश्यपरम्पराणां चानाद्यनन्तकालभावित्वात् तच्च विशेषणं भक्तिसुखप्राप्तिरूपयोः साधनसाध्ययोरुभयोरप्यवस्थयोर्दत्तं तस्मात्ते सार्वकालिकतद्भक्ता गोपिकासुतत्वेनैव साधयन्ति लभन्ते च तमिति स्थिते नित्यैव तस्य तद्रूपेणावस्थितिः सिद्धा तथा गोपिकासुतत्वेनैव साधननिर्णयो गोपिकायाश्च तत्साधनत्वे स्वाश्रयदोषापातान्न साधनावकाश इति सैव निर्द्धार्यते अत एव गोपिकायाः सुखाप इति किं वक्तव्यं गोपिकायास्तु सुत एव स इति व्यञ्जितम् उपलक्षणं चैतत् श्रीनन्दस्य तदीयानामपि तेषां तादृशत्वं च श्रीकृष्णजन्माष्टम्यादिव्रते तदीयनानामन्त्रे चावरणपूजायां द्रष्टव्यं तस्मात्पूर्वं मया तयोरंशाभ्यां द्रोणधरारूपाभ्यां यल्लीलामात्रं तदेवापातप्रबोधमात्रार्थमुक्तमिति भावः॥ २१॥ एवं श्रीगोपिकायां केवलबालत्वेप्यन्यत्राव्याहतज्ञानादिमत्त्वं वक्तुं प्रस्तौति–कृष्णस्त्विति। एवं यशोदा श्रीकृष्णं बबन्ध स चान्यं मोचयामासेति भिन्नोपक्रमे तुशब्दः गृहकृत्येष्विति बहुत्वेन तेषामनुपरतिः सूचिता तं त्यक्त्वा गमनं च तस्य प्राङ्गणसमीपस्थत्वात् वक्ष्यमाणानां बालानां रक्षितत्वात् दृढबन्धनमोचनोलूखलाकर्षणशक्तेरमननेन पुत्रस्यान्यत्र गमनशङ्कापगमात् तथा च श्रीविष्णुपुराणे तस्या वाक्यं "यदि शक्नोषि गच्छत्वमतिचञ्चलचेष्टित" इति पूर्वमद्राक्षीदित्युक्तं तत्र पूर्वपूर्वतद्दर्शनसम्भवेपि सम्प्रति गच्छ तदुक्तिस्तद्विशेषानुसन्धानापेक्षयेति तच्च यद्यपि स्वयोग्यत्वात् तल्लीलाशक्तिकृतमेव तथापि स्वबन्धनानुसन्धानेन तद्बन्धनानुसन्धानस्य योग्यत्वादिवेत्युत्प्रेक्षणीयं दृष्ट्वा विचारितवानित्यर्थः॥ २२॥ अथ तमेव तस्य विचारमाह—पुरेति। मदादभिमानात् मधुमत्ततायाश्च हेतोः यतः श्रिया सम्पदाऽन्वितौ॥ २३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां नवमोऽध्यायः॥ ९॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

लब्धोचितमेवेत्याह—नायमिति, अयं स्वीकृतमहाबन्धनोऽपि गोपिकासुतः राज्ञीपुत्रः श्रीयशोदानन्दनः परमगुणरूपादियुक्तः श्रीकृष्णः, इह गोपिकासुते, यद्वा चित्तारूढत्वाच्छ्रीनन्दव्रज इत्यर्थः। या भक्तिर्भगवद्भजनभादरो वा, तद्वतामपि जनानां यथा सुखापः सुलभस्तथा देहिनां देहातिरिक्तात्मज्ञानवतां ज्ञानिनामात्मतत्त्वानुभविनां जीवन्मुक्तानामित्यर्थः। आत्मभूतानाञ्च सिद्धमुक्तीनां सिद्धानामपीत्यर्थः। किंवात्मीयानां भक्तान्तराणामपि न सुखापः, किन्तु दुःखेन कथञ्चित् केनचिदंशेनैव प्राप्य इत्यर्थः। अथवा श्रीब्रह्मादीनन्यान् भक्तान् प्रति यद्यपि तादृशः प्रसादो मास्तु, तथापि तैर्भक्तैरेवायं लभ्यो न त्वन्यैरिति। यद्वा, तेषामेव सुखं सम्पादयति, न त्वन्येषामिति। प्रसंगाद्भक्तिमाहात्म्यमाह—नायमिति, अयं सुदुर्लभः प्रसादः, भगवान् साक्षात् परमेश्वरो गोपिकासुतो गोकुलजनैकप्रिय इत्यर्थः। पदत्रयेण परमदौर्लभ्यमुक्तमतो देहादीनां न सुखापः, किन्तु भगवद्भक्तिमतामेव, इह यत्र कुत्रापि स्थाने; यद्वा, अस्मिन्नेव लोके वर्त्तमानदेहे वा सुखापः सुखलभ्यः किंवा

सुखं प्रापयतीति तथा सः । 'आत्मपोतानाम्' इति पाठं केचित् पठन्ति;—तत्रात्मैव पोतस्तरणसाधनं येषां ज्ञानिनाम् । अन्यत् समानम् । यथेत्यस्यात्रैव वान्वयः, यथावत्, सुखापो मोक्षस्य दुःखनिवृतिमात्ररूपत्वेन मुक्तानामपि न सुखाप एव ॥ २१ ॥ श्रीयशोदा कृष्णं बबन्ध । स चान्यं मोचयामासेति भिन्नोपक्रमे तुशब्दः । गृहकृत्येष्विति बहुत्वेन तेषामनुपरतिः सूचिता; यद्वा, पुनः पुत्रार्थं नवनीतसाधनकार्य्येषु बहुत्वं गौरवात्, अतएव व्यग्रायामतस्तदर्थमन्यत्र तस्या यानं ज्ञेयम्,—दृढबन्धन-मोचनोलूखलाकर्षणशक्त्यमनेन पुत्रस्यान्यत्र गमनशंकापगमात् । तथा च श्रीविष्णुपुराणे (५।६।१६) तस्या वाक्यम्—'यदि शक्तोऽसि गच्छ त्वमतिचञ्चलचेष्टित' इति । दामबद्धस्यैव गमनम्, गमने स्वातन्त्र्यञ्च बोधितमतएव प्रभुस्तदानीं प्राप्तस्वातन्त्र्यात्, यद्वा, जगदुद्धारे समर्थः, यतः कृष्णः साक्षाद्भगवानतोऽद्राक्षीदनुग्रहीतुमैच्छदित्यर्थः ॥ २२ ॥ मदादभिमानान्मधुमत्तताया वा हेतोः, तत्र हेतुः श्रिया सम्पदान्विताविति, यद्वा, शोभया पुष्पादिसमृद्ध्या वान्विताविन्त्यर्ज्जुनयोर्विशेषणम् ।२३।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां नवमोऽध्यायः ॥ ९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सुखापः सुखेन प्राप्यः ॥ २१–२३ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृते शुकपक्षीये नवमोऽध्यायः ९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तथा च भक्तानामेवायं सुलभो नान्येषामित्याह–नायमिति । अयं भगवान् गोपिकासुतो यथेह भक्तिमतामात्मा स्वयमेव पोतः भवार्णवतारणे प्लवस्थानीयः येषां तेषां ज्ञानिनां यथा सुखापः सुखप्राप्यः न तथेतरेषामित्यर्थः ॥ २१ ॥ अहो अत्याश्चर्यमेतत् यत्संसृतिबन्धब्रह्मशापादिमोचनोपि भगवान् लौकिकेन दाम्ना बद्धः इत्येतदभिप्रायेण यमलार्जुनमुक्तिप्रदत्वरूपं चरित्रान्तरं प्रस्तोतुमाह–कृष्णस्त्विति । मातरि उलूखलबद्धवत्यां यशोदायां गृहकृत्येषु व्यग्रायां प्रवणचित्तायां सत्यां बद्धः कृष्णः प्रभुः विप्रशापादिमोचनसमर्थः पूर्वं धनदस्य कुबेरस्यात्मजौ गुह्यकौ यक्षौ ॥ २२ ॥ नलकूबरमणिग्रीवाख्यौ श्रिया युक्तौ सन्तौ पुरामदाच्छ्रीमदान्निमित्तान्नारदस्य कुपितस्य शापेन वृक्षतां तरुजन्म प्रापितावर्ज्जुनौ अर्जुनाख्यौ वृक्षौ ददर्श ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां नवमोऽध्यायः ॥ ९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

निरन्तरनिरतिशयभक्तिप्रमदैव भगवत्कर्षणनिपुणेत्याशयेनाऽऽह—नायमिति । आत्मैव परमात्मैव पोतो नौर्येषां ते तथा तेषाम् ॥ २० ॥ पूर्वजन्मनि गुह्यकौ अधुना अर्जुननाम्ना ककुभवृक्षौ ॥ २२ ॥ शापनिमित्तमाह–मदादिति । किं नामानाविति तत्राह नलेति । मदकारणमाह श्रियेति ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां नवमोऽध्यायः ।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथैवं भगवत्प्राप्तिर्भक्त्यैव भवति, न ज्ञानादित्याह—नायं सुखाप इत्यादि । अयं गोपिकासुतो भगवान् श्रीकृष्णो देहिनां मध्ये इह श्रीयशोदा–किशोरे भक्तिमतां यथा सुखापः सुलभस्तथात्मभूतानां ब्रह्मभूतानामपि ज्ञानिनां न सुलभः, तेषां तु दुर्लभ एव ॥ २१ ॥

इति श्री दशमे श्रीबृहत्क्रमसन्दर्भे नवमोऽध्यायः ॥ ९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नायमित्यादि । गोपीसुतोऽयं भगवान् अन्यत्र भगवच्छब्दस्य तूपचारः । आत्मभूतानां ज्ञानिनामपि न सुखापः, च कारोऽप्यर्थः, किमुत देहिनाम् । तर्हि केषां सुखापः ? तत्राह—इह श्रीकृष्णो भगवति गोपिकासुते भक्तिमताम् ॥ २२–२३ ॥

इति नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च, श्रीभागवतेऽस्मिन् भगवत्प्रेमैव सर्वपुरुषार्थशिरोमणित्वेनोद्घुष्यते तस्य मूलभूताश्रयाणां भक्तानां मध्ये नित्यसिद्धत्व एव तस्य नित्यस्थितिः सम्भवेत् तेष्वपि मध्ये गोकुलवर्तिनः तन्मात्रादय एव श्रेष्ठाः येषां वात्सल्यादिभावविषयीभूतः

कृष्णस्तदनुगमनभक्तिमद्भिरेव सुलभो नान्यैरित्याह—नायमिति । अयं गोपिकासुतो न सुखापः केषां देहिनां देहाध्यासवतां भक्तिमतां ज्ञानिनां देहाध्यासरहितानामात्मारामभक्तानां तथा तथाभूतत्वे सत्येव प्राप्तियोग्यतायां निषेधसम्भवात् आत्मभूतानां पूर्वश्लोकनिर्दिष्टानां विरिञ्चिभवश्रियां तत्र विरिञ्चिभवयोः स्वावतारत्वेन लक्ष्म्याः स्वरूपशक्तित्वेनात्मभूतत्वम् एवं त्रिविधजनानां गोपिकासुतो भगवान्न सुखापः किं तदिति विकुण्ठाकौसल्यादिसुत एव दुःखमेवाभिव्यञ्जयति यथा इह श्रीयशोदायामेतदुपलक्षितेषु वात्सल्यसख्यकान्तभावाश्रयेषु व्रजलोकेषु या भक्तिः स्त्रियः उरगेन्द्रभोगभुजदण्डेत्यादिना यथात्वल्लोकवासिन्य इत्यादिना च व्यञ्जिता श्रुत्यादिभिरनुगतिमयी तद्वतां यथासुखापस्तथा नेति तेन गोपिकाद्यनुगतमयस्वन्यूनतादुःखाङ्गीकारस्तु विरिञ्चिभवलक्ष्म्यादिभिरीश्वराभिमानिभिः स्वस्वलोकास्थतैर्दुःशक एव अन्येषां तु तादृशोपदेशस्यालाभादरोचकत्वाद्वा तदनुगत्यभाव एवेति भावः । अत्र सुखापदुष्प्रापशब्दाभ्यां प्राप्तप्राप्ती एवोच्यते इति केचिदाहुः भक्तैर्बद्धस्याप्यन्यमोचकत्वं वक्तुमाह कृष्णस्त्विति ॥ २१–२३ ॥

ऋषित्वादेव बद्धोऽहं मात्रा तदनृणीभवन् । किं कुर्वे इति संचिन्त्य मोचयत्तत् पुरद्रुमौ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमे नवमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रसङ्गात् भक्तिसम्बन्धवर्जितानां ज्ञानादीनां भगवत्प्राप्त्यकारणत्वं भक्तेस्तु भगवत्प्राप्तिहेतुत्वमाह—नायमिति । आत्मभूतः अनुभवविषयीकृतो यस्ते आत्मभूतास्तेषां ज्ञानिनामपि किं पुनर्वक्तव्यं कर्मादिनिष्ठानां न सुखाप इति ॥ २१ ॥ स्वानन्यभक्तैर्बद्धोऽपि अन्यान्विमोचयतीति सूचयन् चरित्रान्तरं, वक्तुमाह—कृष्णस्त्विति ॥ २२–२३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे नवमाध्यायार्थप्रकाशः । ९ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एवं नन्दयशोदयोः सौभाग्यमभिधाय तदनुगानां व्रजौकसां तदाह नायमिति । अयं गोपिकासुतो भगवान् कृष्णः देहिनामनिवृत्तदेहाभिमानानां ज्ञानिनामुदितस्वपरात्मज्ञानानां तापसादीनाम् आत्मनि भूतानां स्थितानां विनिवृत्तदेहाभिमानानां सनकादीनाञ्च यद्वा आत्मभूतानां पूर्वोक्तानां विरिञ्चादीनां तथा सुखापो न यथेह व्रजे निवसतां गोपिकासुतभक्तिमतामिति तत्तत्सर्वापेक्षया व्रजौकः सुतस्यातिशयिततनं सुखप्रापणमिति नित्यसिद्धसौभाग्यास्ते एवमेवोक्तं सूत्रकृतापि उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवदिति साधकोत्कर्षः सिद्धे पर्यवस्येदिति तत्र भावः ॥ २१ ॥ एवं मातुर्हठरक्षया तामानन्द्य नारदस्य स्वैकान्तिनो वचनसत्यताविधानेनानन्दाय मनो दधे इत्याह कृष्णस्त्विति । तन्निविष्टचित्तायामेव मातरि तस्मिन् कोपबोधनाय गृहकृत्येषु व्यग्रायां सत्यामर्जुनावद्राक्षीत् मात्रा निबद्धोऽहं तदृणी न तदृणनिर्यातने समर्थः किन्तु तत्पुरद्वारस्थितयोर्वृक्षयोर्मोक्षं करिष्यामीति भावेनेत्याशयः ॥ २२ ॥ पुरेति प्रस्फुटम् ॥ २३ ॥

स्तेयकोपवतो जीवान् गुणैर्बध्वैवरोदयै । तद्वन्मात्रा निबद्धस्तैर्मारुहीत्याहुरर्भकाः ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां नवमोऽध्यायः ॥ ९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भक्तिरेवैनं गमयति भक्तिवशः पुरुष इति श्रुत्यर्थं वदन्नाह ॥ नेति । आत्मपोतानां देहाभिमानिनां भगवान्गोपिकासुतः सुखाप्यो न ॥ २१ ॥ बद्ध इति तु सूचयति । मातरि गृहकृत्येषु व्यग्रायां सत्यां पूर्वं धनदात्मजौ गुह्यकौ । इदानीमर्जुनः ककुभे पार्थ इति विश्वः । ककुभवृक्षौ मत्तीत्यपभ्रष्टभाषा । अद्राक्षीत् ॥ २२ ॥ तौ जातौ वृक्षौ कुत इत्यत आह ॥ पुरेति । नलकूबरमणिग्रीवावित्याख्यातौ श्रियाऽन्वितौ मदात्पुरा नारदशापाद्वृक्षतामर्जुनवृक्षतां प्रापितौ । एकेनाक्षरेणेत्यादेरेकवर्णाधिक्यं न दोषाय ॥ २३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे दशमोऽध्यायः ॥ १०–१० ॥

श्रीसुबोधिनी

ननु ते महान्तो मूढा चेयमिति मूढानुरोधेन कृतोर्थः कथं प्रसादः स्यात् ? तत्राह **नायं सुखाप** इति, न ह्यत्र बन्धनं निरूप्यते किन्तु वश्यता, सा न कस्यापि सिध्यति, यावन्तः कर्मिणो देहाभिमानिनो येपि ज्ञानिनो निरभिमाना मुक्ता उभयेषामप्ययं **भगवान् न सुखापः** सुखेन प्राप्तुं शक्यः, तत्र हेतुर्देहिनामिति, एकत्र देहाभिमानो दोषोन्यत्र नैरपेक्ष्यं, तदाह **ज्ञानिनां चात्मपोतानामिति, आत्मा** स्वरूपं पोतः संसारसमुद्रतरणोपायो येषां, न हि समुद्रतरणमात्रेण पारस्थितो महाराजः प्राप्यते,

भक्तिमतां त्विहैव सुलभः, तत्र हेतु**र्गोपिकासुत** इति, यतो **गोपिकायाःसुतो** जातः, अतः **सर्वे भक्ता भवन्त्वि**त्येवं **भगवता** कृतमितिभावः, इहेत्यस्मिन्नवतारे **भक्तिमताम्**िति भक्तेर्विशेषणत्वमुक्तं न तु भक्तानाम् ॥ २१ ॥ एवं स्वमनोरथे सिद्धे गोपिका बहिर्मुख्यो यथायथं गताः, भगवांस्तु यथा न गतः किन्तु तस्यामेवावस्थायां महत् कार्यं कृतवानित्याह **कृष्णस्त्वि**वति. तुशब्दः पूर्वसम्बन्धं व्यावर्तयति नायं बन्धनव्यग्रः **कृष्णः**, सा चेद् भगवन्तं वशीकृत्य तथैव तिष्ठेन् न किञ्चित् कुर्याद् भगवान् , निरोधस्य सिद्धत्वात् , सा पुन**र्गृहकृत्ये व्यग्रा** जाता, तथा जातायां **यमलार्जुनवृक्षावद्राक्षीत्** तत्पातनेन च तस्याः प्रपञ्च-विस्मरणं करिष्यामीति, ननु कोयमस्याग्रहः ? तत्राह **मातरीति**, तस्यामप्यवस्थायां पातने सामर्थ्यमस्तीति **ज्ञापयति** प्रभुरिति, **अर्जुनौ** जातिविशेषवृक्षौ 'सखि' शब्दवाच्यौ, ननु गोपिकार्थं कथं तयोः पातनमपराधाभावादित्याशङ्क्याह **पूर्वं गुह्यकावि**ति, देवयोनिभूतौ वृक्षौ जातौ, अतस्तयोर्वृक्षत्वमनभिप्रेतं, तथापि प्रयोजनाभावात् सम्बन्धाभावात् किमिति मोचनीयावित्याशङ्क्याह **धनदात्मजावि**ति, धनदः कुबेरो भक्तस्तस्य पुत्रौ ॥ २२ ॥ ननु तौ महान्तौ कथमेवं जातौ ? तत्राह **पुरे**ति, पूर्वं **नारदशापेन वृक्षत्वं प्राप्तौ**, ननु नारदः किमिति शापं दत्तवान् ? तत्राह **मदादि**ति, श्रीमदेन मत्तौ, अतो **मदाद्धेतो-र्नारदशापः शापेन च** वृक्षत्वमिति, ननु तथाभावयोग्यावेव तौ किमिति मुच्येते इत्याशङ्क्याह **नलकूबरमणिग्रीवावि**ति-**ख्यातावि**ति, **नलः कूबरो** यस्य नलोतिसुन्दरः सोपि कुब्जतुल्यो **मणियुक्ता ग्रीवा** यस्यैवन्नाम्ना **ख्यातौ**, तेषां नामख्यातिश्च न शान्तेति तदुद्धारो युक्तः, किञ्च **श्रिया चान्वितौ**, अद्यापि तौ परित्यज्य श्रीर्न गता, अतः कीर्तिश्रियोर्विद्यमानत्वादुद्धारमर्हतः ।२३।

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तरप्रमाणप्रकरणे
ज्ञाननिरूपकपञ्चमाध्यायस्य स्कन्धादितो नवमाध्यायस्य विवरणम् ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कृष्णस्त्वित्यस्याभासे, **एवं स्वमनोरथ** इत्यादि । अधुना त्विलो मातुर्गमनमुच्यते, अग्रे बाला ऊचुरित्यनेन तेषां तत्र स्थितिर्ज्ञाप्यते, नान्येषाम् । एवं सत्यर्थाद्गोपीनां गमनमुक्तं भवतीति तदिदमुक्तम् । एतास्तु तादृशं तं द्रष्टुमक्षमा इति तादृग्गेहेपि संमुखं मुखं न कृतवत्य इति तद्गेहाद् बहिरेव प्रसन्नमुखा जाता इति ज्ञापनाय विशेषणमुक्तम् । **एवं स्वमनोरथे सिद्ध इति** तु मातुर्वैयग्र्ये हेतुरुक्तः । अथवा, अधुनाप्यनाश्लिष्टप्रियास्तदभिलाषिण्यो दाम्ना बन्धनाभावं दृष्ट्वा स्वार्थे सन्दिहाना जाताः । सम्पन्ने तस्मिन्स्वमनोरथोपि सेत्स्यतीति निश्चयेनैतासामेव स सिद्ध इति तथोक्तम् ॥ २२ ॥

इति नवमोऽध्यायः ॥ ९ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

नायमित्यत्र **भक्तेर्विशेषणत्वं न तु भक्तानामि**ति सुखापत्वे **भक्तेरेव विशेषणत्वं न तु भक्तानां** भक्तत्वस्यान्यत्रापि सत्त्वादिति ॥ २१ ॥ **कृष्णस्त्वि**त्यत्राभास **एवं स्वमनोरथ** इत्याद्येतस्यार्थं **टिप्पण्यामाहुरधुना त्वि**त्यादिना ॥ २२ ॥

इति श्रीमद्वल्लभचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाशे नवमाध्यायविवरणम् ॥ ९ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नायं सुखाप इत्यत्र **न तु भक्तानामि**ति कदाचिद् भक्तिं विनापि सेवामात्रेण भक्ता भवन्ति तेषां **न सुखाप** इत्यर्थः ॥ २१ ॥ **कृष्णस्त्वि**त्यत्र **पूर्वसम्बन्धमि**ति पूर्वासां सम्बन्धं गोपिकानां कासाञ्चिदपि गेहे गमनमित्यर्थः ॥ २२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

कृष्णस्तु गृहकृत्येष्वित्यत्र **सखिशब्दवाच्यत्वादि**ति अर्जुनस्य सखित्वात् तद्वाचकार्जुनपदवाच्यौ यमलार्जुनावित्यर्थः, तथा च स्वभक्तसखार्जुननामस्मरणेन तयोरुपरि महती भगवत्कृपा जातेतिभावः ॥ २२ ॥ **नलोतिसुन्दरः सोपि कुब्जतुल्य** इति यस्य नलकूबरस्य परमसुन्दरस्याग्रे **नलोपि** सुन्दरत्वेन प्रसिद्धोपि **कुब्जतुल्य** इत्यर्थः ॥ २३ ॥

इति नवमोध्यायः ॥ ९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

फलितमाह—नायमिति । अयं भगवान् इह संसारे वर्तमानानां देहिनां मध्ये यथा भक्तिमतां सुखापः 'सुखेनाप्यते इति सुखापः' सुलभः, यद्वा सुखमापयतीति सुखापः सुखदस्तथा ज्ञानिनामपि सुखापो न भवतीत्यन्वयः । 'अन्येषां सुखापो न भवतीति तु किं वक्तव्यम् ?' इति सूचयितुमप्यर्थे चकारः । ज्ञानिनां सर्वोत्तमत्वमाह—आत्मभूतानामिति । 'ज्ञानी त्वात्मैव मे मतः' इति भगवद्वचनात् । निवृत्तदेहाद्यात्माभिमानानां प्राप्तब्रह्मात्मैकभावानामपीत्यर्थः । 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्त-

चेतसाम्' इति भगवतैव तेषां क्लेशस्योक्तत्वादितिज्ञेयम्। 'आत्मपोतानाम्' इति पाठान्तरे तु आत्मैव पोतः संसारोत्तरणसाधनं येषामपीत्यर्थः। 'अत्र न कश्चित्सन्देहः, प्रसिद्धत्वात्' इत्याशयेनाह—गोपिकासुत इति। यतो गोपिकाया जात्यादिहीनाया अपि भक्तिवशात् सुतोऽपि जातः, नच ज्ञानिनामित्याशयः॥ २१॥ 'एवं भक्त्या बद्धस्याप्यन्यमोचकत्वात्तस्येश्वरत्वे न क्षतिः' इत्याशयेन यमलार्जुनभञ्जनलीलामाह—कृष्णस्त्विति। तुशब्दो लीलान्तरत्वद्योतकः। यदा सर्वा गोपिका बन्धविमोचनार्थं यशोदां सम्प्रार्थ्य विमोचने निराशाः सत्यो यथायथं गताः, मातरि यशोदायां च गृहकृत्येषु व्यग्रायां सत्यां तदा श्रीकृष्णोऽपि 'यदि अस्यामपि मद्बन्धनावस्थायामियं मां हित्वा गृहकार्येष्वासक्ता तदाऽनयोः पातयित्वाऽस्याः प्रपञ्चविस्मृतिं स्वभिन्नासक्तिं च करिष्यामि' इत्यभिप्रेत्य अर्जुनवृक्षावद्राक्षीत्। ननु 'तयोर्निरपराधिनोः पातनमप्ययुक्तमेव' इत्यत आह—पूर्वमिति। पूर्वजन्मनि गुह्यकौ यक्षौ, धनदात्मजौ कुबेरपुत्रौ, अतस्तयोरुद्धारस्याप्यावश्यकत्वात्तदर्थं तयोः पातनमिति भावः। तदावश्यकत्वे तत्र सामर्थ्यं च हेतुं सूचयन्नाह—प्रभुरिति। सर्वस्वामीत्यर्थः॥ २२॥ 'धनदात्मजौ चेत् कथं वृक्षतां गतौ' तत्राह—पुरेति। पुरा पूर्वजन्मनि यो नारदस्य शापस्तेन वृक्षतां प्रापितौ। शापे हेतुमाह—मदादिति। मदे हेतुमाह—नलकूबरमणिग्रीवाविति ख्यातौ महत्त्वेन प्रसिद्धाविति। तत्र हेतुमाह—श्रियान्विताविति। धनदपुत्रतया महदैश्वर्ययुक्तावित्यर्थः॥ २३॥

इति श्रीवल्लभाचार्यवंश्यगोपालासूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा॥ १॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी॥ २॥
रचिता दशमे तत्र तामसरोधवर्णने। नवमो विवृतोऽध्यायः कृष्णबन्धनिरूपकः॥ ३॥

अन्वितार्थप्रकाशिका

नायमिति॥ अयं गोपिकासुतः भगवान् इह संसारे वर्तमानानां देहिनां मध्ये यथा भक्तिमतां सुखापः सुखेनाप्यत इति सुखापः सुलभः तथा आत्मभूतानाम् "ज्ञानी त्वात्मैव मे मतः" इत्यात्मरूपतयोक्तानां ज्ञानिनामपि सुखापो न भवति। चोऽप्यर्थे। देहिनां देहाभिमानिनां तापसादीनां ज्ञानिनां विवृत्ताभिमानानामपीति स्वामिपादाः। गोपिकासुत इत्यनेन यशोदायास्तु सुल एवेति तया तु प्राप्य एवेति उपलक्षणमेतन्नन्दादेः॥ २१॥ भक्तैर्बद्धस्याप्यन्यमोचकत्वमाह—कृष्ण इति द्वयम्॥ प्रभुः कृष्णस्तु मातरि गृहकृत्येषु व्यग्रायां सत्यां यौ पूर्वं पूर्वजन्मनि गुह्यकौ यक्षौ धनदात्मजौ कुबेरपुत्रौ नलकुबरमणिग्रीवौ इति नामभ्यां ख्यातौ श्रियान्वितौ अभूतां तावेव पुरा मदाद्धेतोर्नारदस्य शापेन वृक्षतां प्रापितौ अतोऽर्जुनौ तन्नामवृक्षौ जातौ तौ अद्राक्षीत्॥ २२–२३॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां नवमोऽध्यायः॥ ९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आत्मभूतानां क्षेत्रज्ञभावं प्राप्तानां ज्ञानिनां हरिस्वरूपस्वभावादिज्ञानवतामयं गोपीकासुतः। यथा सुखापः। सुखप्रापकः भक्तिमतामतिप्रेमवतां च यथा सुखापः तथा देहिनां देहाभिमानिनां न सुखापः॥ २१॥ पूर्वं पूर्वजन्मनि गुह्यकौ यक्षौ धनदात्मजौ कुबेरसुतौ अर्ज्जुनौ अर्ज्जुनवृक्षत्वेनोत्पन्नौ॥ २२॥ मदात् धनमदाद्धेतोः॥ २३॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके
श्रीमद्भागवतस्यदशमस्कंधव्याख्याने गोपीप्रसादो नाम नवमोऽध्यायः॥ ९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तथा च भक्तानामेवायं सुलभो नान्येषामित्याह॥ नायमिति॥ गोपिकासुतः गोपिकासुततां प्राप्तोऽपि, भगवान् षाड्गुण्यपूर्णपरब्रह्मरूप एव, अयं कृष्णः, देहिनां देहाभिमानवतां तापसादीनां, असुखाप एवेति शेषः। आत्मभूतानां निवृत्तदेहाद्यभिमानवतां, यद्वा। स्वयं भगवता स्वात्मत्वेनाभिमतानां, ज्ञानिनां च सुखापः सुखेन प्राप्यः सन्नपि, यथा इह, भक्तिमता सुखापः, तथा सुखापः, न च न भवत्येव। सुबोध इति पाठे सुखेन बोद्धुं शक्य इत्यर्थः॥२१॥ अहो अत्याश्चर्यमेतद्यत संसृतिबन्धब्रह्मशापादित आत्मीयमोचरशक्तोऽपि भगवान् लौकिकेन दाम्ना बद्ध इत्येतदभिप्रायेण यमलार्जुनमुक्तिदत्त्वरूपं चरित्रान्तरं प्रस्तोतुमाह॥ कृष्णस्त्विति॥ पुरेति च॥ मातरि उलूखले बन्धनं कुर्वत्यां यशोदाख्यजनन्यां तु, गृहकृत्येषु, गृहोचितकार्येषु, व्यग्रायां सत्यां, प्रभुः विप्रशापादिविमोचनसमर्थः, कृष्णः तु उलूखलनिबद्धोऽपि श्रीकृष्णः, पूर्वं, धनदात्मजौ कुबेरस्य पुत्रौ, गुह्यकौ गुह्यकजातिजौ, नलकूबरमणिग्रीवौ इत्येवं, ख्यातौ, श्रिया अन्वितौ संपत्तिसंपन्नौ सन्तौ, मदात् श्रीमदान्निमित्ताद्धेतोः, पुरा नारदशापेन, वृक्षतां तरुभावं, प्रापितौ, अर्जुनावर्जुनाख्यौ वृक्षौ, अद्राक्षीत् इति द्वयोरेकान्वयः॥ २२–२३॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे नवमोऽध्यायः॥ ९॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नायं सुखाप इति : १०.९.२१.

योगाद्याखिलसाधनाधिकगुणा सिद्धैव सा यद्यया ज्ञानादप्यतुलोत्सवः प्रभुवशीकारः सुभक्त्याऽधिकः ।
इत्थं सर्वविदग्र्यगर्षिभणिति-प्रामाण्यबद्धादरस्त्यक्त्वा साधनमन्यदच्युतभवद्भक्तिं करोम्यन्वहम् ॥ ७९ ॥

कृष्णस्त्विति : १०.९.२२.

गृहकृत्यात्यासक्तः स एव बद्धोऽहमस्मि यद्बुद्ध्या । तादृग्धियं हि मातरमुदाजहाराऽच्युतः सगृहसक्ताम् ॥ ८० ॥

मुक्तं मामपि बद्धतां नयति योऽदभ्रभ्रमालङ्कृतो नार्हत्वं भजते स मत्कृत—परोद्धारप्रकारे क्षणे ।
आलोच्येत्थमथाऽच्युतस्तरुसमुद्धारं समैच्छत्तदा व्यग्रायां गृहकार्यतोऽन्तरगृहं यान्त्यां क्षमं मातरि ॥ ८१ ॥

सन्निहितायां मातरि भविता नहि गुह्यकामितार्थाप्तिः । इति किं तस्यां तादृशि सत्यां कृष्णस्तदीक्षणं चक्रे ॥ ८२ ॥

अर्जुनाविति :

धवलत्वमधस्थित्याऽधुनास्ते पारिभाषिकम् । वरत्वं त्वस्ति निर्बाधमित्यद्राक्षीत् स तादृशौ ॥ ८३ ॥

पुरा वर्णतो नामतश्चाधुनापि स्मृतावर्जुनेत्याख्यया निर्विवादम् ।
अतो येन केनापि योगेन पूर्वानुषङ्गोऽभ्युपैति स्वरूपेऽपि कस्मिन् ॥ ८४ ॥

गुणावलम्बनं दीनोद्धरणायैव मे मतम् । तद्युक्तं सगुणस्याद्य तादृक्करणमित्यवैत् ॥ ८५ ॥

अर्जुनेत्यभिधाभाजो - रपार्थस्थितिरेतयोः । नोचितेति कृतार्थौ तौ कर्तुमैच्छत्कृपानिधिः ॥ ८६ ॥

अहो दयालुत्वमसीममैश्वरं यद्बन्धनं स्वं ह्यनवेक्ष्य सत्वरम् ।
तन्मुक्त्युपायं तरुजन्मतस्तदा व्यचिन्तयत् साधुसदध्वदर्शकः ॥ ८७ ॥

श्रीशाकल्पतरु० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्ति-रसायने नवमोऽध्यायः ॥ ९ ॥

कृष्णप्रिया

राजन्, यह यशोदोत्सङ्गलालित श्रीकृष्ण भगवान् जितनी सुगमता से इस विश्व में सेवोपयोगी देहधारी भक्तों को मिल जाते हैं उतनी आसानी से देहाभिमानी याजकों को, तपस्वियों को एवं अपने आत्मभूत ज्ञानियों को भी नहीं मिलते ॥ २१ ॥ जब माता यशोदा कृष्ण को बाँध गृहस्थी के कामों में लग गयी तब प्रभु ने उन दोनों अर्जुन वृक्षों पर नजर दौड़ायी जो कि अगले जन्म में गुह्यक यक्षराज कुबेर के दो पुत्र थे ॥ २२ ॥ इन दोनों के नलकूबर और मणिग्रीव नाम थे। दोनों धन यौवन सौन्दर्य के मद से छके हुए थे इस लिये वे दोनों पूर्व में नारदजी के शाप से वृन्दावन में वृक्षरूपता को प्राप्त हो चुके थे ॥ २३ ॥

इति नवमोऽध्यायः समाप्तः ॥ ९ ॥

* * *

अथ दशमोऽध्यायः

श्लोकाः	अनु.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४३	४०	३	८	१४४८	५४	३९	१५४१	४८	५

राजोवाच

कथ्यतां भगवन्नेतत्तयोः शापस्य कारणम् । यत्तद् विगर्हितं कर्म येन[1] वा [2]देवऋषेस्तमः ॥ १ ॥

श्रीशुक उवाच

रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ । कैलासोपवने रम्ये मन्दाकिन्यां मदोत्कटौ ॥ २ ॥
वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ । स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ॥ ३ ॥
अन्तः प्रविश्य गङ्गायामम्भोजवनराजिनि । चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—भगवन् ? तयोः तद् विगर्हितं कर्म येन वा देवऋषेः तमः यत् शापस्य कारणं एतत् कथ्यताम् ॥ १ ॥ सुदृप्तौ रुद्रस्य अनुचरौ वारुणीं मदिरां पीत्वा मदोत्कटौ भूत्वा पदाघूर्णितलोचनौ रम्ये कैलासोपवने पुष्पिते वने मन्दाकिन्यां गङ्गायाम् अम्भोजवनरागिनि अनुगायद्भिः स्त्रीजनैः अन्तः प्रविश्य करेणुभिः गजौ इव युवतिभिः चिक्रीडतुः ॥ २–४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दशमेऽपातयद्विगच्छंतरा यमलार्जुनौ । तत्रत्याभ्यां च देवाभ्यां कृष्णः स्तुत इतीर्यते ॥ १ ॥

यद्विगर्हितं कर्म येन वा देवर्षेर्भागवतोत्तमस्यापि तमः क्रोधस्तदेतत्कथ्यतामिति ॥ १–३ ॥ गंगायामंतर्मध्ये । कथंभूते । अंभोजानां वनानि तेषां राजयस्ता विद्यंते यत्र तस्मिन् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यमलौ युग्मौ च तावर्जुनौ चेति कर्मधारयः द्वितीया त्वंतरायोगात् । अंतरा मध्ये 'रिंगणं स्खलनं समे' इत्यमराद्रिंगन् हस्तपादादिभिश्चलन् तत्रत्याभ्यां यमलार्जुनस्थाभ्यां देवाभ्यां नलकूबराभ्याम् । "अर्जुनः ककुभे पार्थे कार्त्तवीर्यमयूरयोः । मातुरेकसुतेऽपि स्यात्पुल्लिंगो धवलेन्यवत्" इति मेदिनी (१) । भागवतोत्तमस्याप्यसंभावितमसोपि । विगर्हितं निंदितम् । येन कर्मणा । तदेतत्कर्म ॥ १ ॥ सुदृप्तौ गर्वितौ । मंदाकिन्यां गंगायाम् । मदेन धनादिजेनोत्कटाभुच्छृंखलौ ॥ २ ॥ वारुणीं वरुणाज्जातां कदंबादिसंभवाम् 'वारुणी वृक्षकोटरात्' इति वक्ष्यमाणत्वात् । यद्वा—'ततोऽभूद्वारुणी देवी' इति समुद्रमथनाख्यानोक्तेः । वरुणदेवताकं यदन्नं तन्मयी सुरेति स्वामिचरणाः ॥ ३ ॥ अंभोजानां सरोजानाम् । राजयः पंक्तयः । 'करेणुर्भ्यां नेमे स्त्री' इत्यमरः । करेणुभिर्गजीभिः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ तस्य बद्धस्य मातृकोपाद्बद्धस्य चाऽव्याहतसार्वज्ञमयीं विचाररूपामान्तरलीलामपि कौतुकात् पृच्छति—कथ्यतामिति । तमोऽभूदिति शेषः । तदेतच्छापस्य कारणमिति योज्यं येनासीद्देवर्षेस्तम इति पाठान्तरं सुगमम् आर्षत्वाच्छन्दोभङ्गादोषः ॥ १ ॥ श्रीशुकदेवश्च तादृशतद्विचारमनुसृत्य वक्तुमारब्धवान् तत्र रुद्रस्येति युग्मकम् वारुणीं क्षीरोदमथनाज्जातां किं वा वरुणनिर्मितामिति महामादकत्वमुक्तं तां पीत्वा कैलासोपवनमध्ये या मन्दाकिनी तस्यां तत्समीपे पुष्पिते वने प्रथमं चेरतुः ॥ २–३ ॥ गङ्गायां चिक्रीडतुः किं कृत्वा अन्तः प्रविश्य अन्तः कथम्भूते ? अम्भोजवनानां राजिर्यत्रेत्यव्ययविशेषणत्वेन नपुंसकत्वान्नुम् ॥ ४ ॥

---

[1] येनासीद्देव–इति कस्यचित् येन वा देव ऋषिः कुपितः–वीरः ; येन देव ऋषेस्तमः–विज. । [2] देवर्षेस्तमः. श्रीधर. वंशी. विश्व. शुक. ।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीदामोदरस्य परम-मनोहर-लीलाश्रवणेन चित्तारूढस्य तस्य भावविशेषकौतुकेन क्षणं सबन्धनस्य स्थित्यर्थमिव कथान्तरमापातयन् पृच्छति– कथ्यतामिति, तमोऽभूदिति शेषः। 'येनासीद्देवर्षेस्तमः' इति पाठान्तरं सुगमम्, आर्षत्वाच्छन्दोभङ्गादोषः, तच्च सर्वसम्मतं न स्यात्। तदेतत् कथ्यतामधुनैव कथ्यतामित्यर्थः। यद्वा, तदवाच्यमपि महदपराधकथनेऽपि दोषाद्विशेषतो गर्हितमिति यथा मुनिपुत्रशापे गर्हितं मत्कर्म कारणम्, ततोऽपीदमधिकतरं न्यूनं भवेदन्यथा भागवतोत्तमस्य श्रीनारदस्य क्रोधासम्भव इत्यर्थः। भगवन् हे सर्वज्ञेति यथा मद्विगर्हितकर्मणा मुनेः शापोऽपि भवत्संगमादिनाऽनुग्रह एव वृत्तस्तथा तयोरपि किमभूत्, तच्च त्वया ज्ञायत एवेति भावः॥ १॥ रुद्रानुचरत्वादेव सुदृप्तौ महागर्ववन्तौ, यद्वा, सुदृप्तत्वे हेतुः—धनदात्मजाविति। रुद्रस्यानुचरौ भूत्वाऽपि तदधिष्ठितमहापुण्यस्थाने, तत्र च मन्दाकिन्यां मन्दाकिनीतटे, मदिरापानात्तथा गंगायां निषिद्धाया अपि जलक्रीडाया विधानात्, तत्र च विवस्त्राविति वक्ष्यमाणाद्गंगायां नग्नत्वाच्च महापराधा उक्ताः। मदैः श्र्यादि सम्बन्धिभिरुत्कटौ मत्तौ, किञ्च, मदिरां पीत्वा वारुणीं वरुण-निर्मितामिति महामादकत्वमुक्तम्। स्त्रिय एव जनाः, परिचारकरूपा लोका वा, तैः सह, अन्विति तयोरप्यादौ गानं बोधयति, मत्तत्वात्, यद्वा, निरन्तरमित्यर्थः॥ २-३॥ गजाविवेति महामत्ततया जलक्रीडने दृष्टान्तः। अन्यत्तैर्व्याख्यातम्। यद्वा, अम्भोज-वनेन राजितुं शीलमस्य, तस्मिन् जल इति शेषः॥ ४॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तमः कोपहेतुरज्ञानम्॥ १-४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमुक्ते लब्धप्रश्नावसरः पृच्छति राजा—कथ्यतामिति। यद्विगर्हितं कर्म येन वा देवर्षिर्भागवतश्रेष्ठः कुपितः तदेतत्कर्म तयोः शापस्य कारणं हे भगवन्! कथ्यतां देवर्षेर्येन वा तम इति पाठे देवर्षेर्भागवतोत्तमस्यापि तमः क्रोध इत्यन्वयः॥ १॥ तस्योत्तरमाह मुनिः—रुद्रस्येत्यादिश्लोकद्वयं स्पष्टार्थम्॥ २-३॥ गङ्गायामन्तर्मध्ये कथम्भूते अम्बुजानां वनानि तेषां राजयो यस्मिन् तस्मिन् स्त्रीश्चादित्वादिनिः करेणुभिरिभीभिर्गजाविव युवतिभिः सह चिक्रीडतुः क्रीडाङ्कृतवन्तौ॥ ४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हरेरेव संसारान्मोक्ष इति दर्शयितुं नलकूबरमणिग्रीवयोः शापमोक्षप्रकारं निरूपयत्यस्मिन्नध्याये; तत्र राजा शुकं पृच्छति, राजेति। यद्विगर्हितं निन्दितं कर्म तत्कथ्यतां येन कर्मणा देवर्षेस्तमोगुणकार्यक्रोधोऽभूत्॥ १-२॥ वारुणीं वरुणाज्जाताम्॥ ३॥ अम्भोजवनराजिनि जल इति शेषः॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तद्युगलमोक्षणलीलाश्रवणरसपोषार्थं पृच्छति कथ्यतामिति॥१-३॥ अम्भोजवनेन राजितुं शीलं यस्य तस्मिन॥४-६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कुबेरात्मजयोः शापः कथा प्रोक्ता पुरातनी। तद्विमोचयिता कृष्णस्ताभ्यां तु दशमे स्तुतः॥

तयोर्विगर्हितं यत्कर्म येन वा कर्मणा देवर्षेरपि तमः क्रोध एतत्तयोः शापस्य कारणं कथ्यतामित्यन्वयः॥ १-३॥ गङ्गायां चिक्रीडतुः किङ्कृत्वा अन्तर्मध्ये प्रविश्य कीदृशे अम्भोजानां वनराजिर्यत्र तस्मिन्॥ ४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नलकूबरमणिग्रीवयोः प्राग्वृतं वृक्षभूतयोस्तयोः यतनं तत् कृतं श्रीकृष्णस्तोत्रं च दशमेऽध्याये निरूपयति—तयोः शापस्य कारणं यत्तद्विगर्हितं कर्म येन देवर्षेः भागवतोत्तमस्यापि तमः तदेतत्कथ्यताम्॥ १-३॥ अम्भोजानां वनानि तेषां राजयस्ता विद्यन्ते यस्मिन् तस्मिन् गङ्गायामन्तर्मध्ये प्रविश्य चिक्रीडतुः क्रीडां कृतवन्तौ॥ ४॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कुबेरसुतयोः शापवृत्तान्तो दशमे तयोः। मोक्षकृत् परिणुतश्च ताभ्यां हरिरुदीर्यते॥

तयोर्विगर्हितं यत्कर्म येन कर्मणा देवर्षेरपि तमः कोपः॥ १॥ रुद्रस्येति युग्मकम्॥ २॥ इदानीं "गङ्गां पुण्यजलां प्राप्य त्रयोदशविवर्जयेत्। शौचमाचमनञ्चैव निर्माल्यं मलकर्षणम्॥ तैलसम्मर्दनं क्रीडां प्रतिग्रहमथो रतिम्। अन्यतीर्थाभिलाषश्च अन्यतीर्थप्रशंसनम्। वस्त्रत्यागं तथास्वातं संहारञ्चैव वर्जयेत्"। इति पाद्मे गङ्गायां तथाक्रीडानिषेधात्तमपि निषेद्धुमुल्लङ्घितवन्तावित्याह गङ्गायां चिक्रीडतुः किं कृत्वेत्याह अन्तर्मध्ये प्रविश्य कीदृशि अम्भोजवना राजिर्यत्र तस्मिन॥ ३-४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

।। हरिः ॐ ।। किं मदादिमौ चक्रतुः कुपितश्च शापमदान्नारदो येन तदादितो वदेति परीक्षित्पृच्छतीत्याह ।। राजेति । एतत्तयोरिति पदमेकम् । एतौ वृक्षात्मकौ तौ चेत्येतत्तौ । तयोः शापस्य कारणं यद्विगर्हितं कर्म तत्कथ्यतामित्यन्वयः । तत्कमज्ञानेन देवऋषेः । ऋत्यक इति प्रकृतिभावः । तमस्तत्कार्यं कोपोऽभूत् । यद्विगर्हितं न गर्हितं च श्रीकृष्णकृतमोचनकारणं किं च कथ्यतामित्यप्यन्वयः । एतीति यत्तमो येन देवऋषेः प्राप्तं तम इति येन तदित्यन्वयो येनेति वा यदिति वाऽतिरिक्तमिति मन्तव्यम्।।१।। औत्तरेयप्रश्नमुत्तरयति ।। श्रीशुक इति । **अनुचरौ** भृत्यौ पूर्वमसुदृप्तौ अनन्तरं मदोत्कटौ उत्कटमदावित्यर्थः । कैलासोपवने मन्दाकिन्यां वियद्गङ्गायाम् ।। २ ।। वारुणीं वरुणजां मदिरां पीत्वा मदेन स्वाभाविकेनेवास्वाभाविकेनापि घूर्णिते लोचने ययोस्तौ । अनुगायद्भिः स्त्रीजनैः सह पुष्पिते तारकादिः ।। ३ ।। गङ्गायां तत्राप्यन्तः कथं भूनेऽन्तोऽम्भोजवनराजिन्यम्भोजानां वनानि तेषां राजिरस्मिन्निति । अम्भोजानां वनानामुदकानां वा राजिरस्मिन्निति वा । अम्भोजवने राजत इति राजि णिनिः । तस्मिन्निति वा । कथम्भूतायां गङ्गायामम्भोजवनराजि अम्भोजैर्वने राजत इति राट् तस्याम् । नीत्युपसर्गस्य चिक्रीडितुर्निचिक्रीडितुरित्यन्वयः । नियेन मुक्तिहत्ययेन्द्रसानसि रयमित्यादिवत् । करेणुभिर्बल्लीभिर्षजाविव ।। ४ ।।

श्रीसुबोधिनी

एवं तु नवमाध्याये भक्तिरुक्तातिदुर्लभा । कृष्णसेवकसख्यस्य हेतुर्दशम उच्यते ।। १ ।।
वैराग्यं भगवद्धर्मः षड्गुणोत्र निरूप्यते । गुणानां भगवत्त्वाय स एव हि यतोभवत् ।। २ ।।
वैराग्यमनिवर्त्यं तु भगवद्वाक्यतो भवेत् । विशेषतस्तु यद्वाक्यं न निवर्तेत केनचित् ।। ३ ।।
तादृशं शापरूपं स्यात् भक्तानामेव तादृशम् । अतो वैराग्यकथने शापो मोक्षावधिर्मतः ।। ४ ।।
शापोद्यमस्तथा हेतुः शापश्चापि प्रसादभाक् । वाक्यस्यापि फलं शीघ्रं स्तुतिश्चानुग्रहस्तथा ।। ५ ।।
षड्भिर्द्वादशभिश्चैव त्रिभिः षड्भिस्तथैव च । दशभिः पञ्चभिश्चेति षडर्थाः क्रमतो मताः ।। ६ ।।
अपूर्वत्वाच्छ्रोतुमिच्छा तेन प्रश्नः परीक्षितः । स्वस्यापि तादृशत्वेन तद्बन्धमोक्षाशया पुनः ।। ७ ।।

पूर्वाध्यायान्ते शापेन यमलार्जुनौ जाताविति श्रुत्वा **कथं** वा तेषां भगवानुद्धारको जात इति पृच्छति **कथ्यतामिति**, **भगवन्निति**सम्बोधनं कथनेन स्वदुःखदूरीकरणसामर्थ्यार्थं, **एतविति**, हृदये बाधकत्वेन स्थितं, **तयोर्नलकूबरमणिग्रीवयोरेक**रूपस्य **शापस्य कारणं**, चतुष्टयं तु तेनैव वक्तव्यं शापविस्तारो विमोक्षणं स्तुतिर्भगवत्प्रसादश्चेति, अतोधिकं द्वयं पृच्छति **यत् तद् विगर्हितं कर्मेति**, **यत्** प्रसिद्धं तादृशशापहेतुभूतं जातं **तदवश्यं विगर्हितं** निन्दितमेव भवति, देवानां तु पापं न सम्भवतीति प्रश्नः, **किञ्च येन** कृत्वा **देवऋषेर्देव**तानामपि मन्त्रद्रष्टुस्**तमः** क्रोधो भवति, अनेन शापे हेतुः स्पष्टः, **विगर्हितेन** शापोद्यमः, सर्वो हि विगर्हिते कृते शापं दातुमुद्युक्तो भवति, **देवर्षिस्तु** साधारणो न भवतीति विशेषतो हेतुर्वक्तव्यः ।। १ ।। तत्र प्रथमं विगर्हितेन शापोद्यममाह षड्भी **रुद्रस्येति**,

उन्मादश्च प्रमादश्च निन्दिताचरणं तथा । महत्स्वपि तथा धाष्ट्र्यसिद्ध्यर्थं महतां दृशिः ।। १ ।।
धाष्ट्र्यं तयोर्न सङ्गस्य ततश्चोद्यम ईर्यते ।। १½ ।।

प्रथमतो महतस्तथात्वमनुचितमित्याह **रुद्रस्य महादेवस्य रुद्** रोगाणि **द्रावय**तीति तादृशस्य सेवकयो रोगसम्बन्धोनुचितः, **अनुचरपदेन** पश्चादेव चलनस्योचितत्वादणुमात्रविभेदोपि दोषायेति तादृशावपि **भूत्वा सुदृप्तौ** जातौ धनेनातिमत्तौ, तत्र **हेतुर्धनदात्मजाविति**, धनं सर्वेभ्यो ददातीति तदात्मजस्य धनित्वं सिद्धमेव, उभयोश्च सहक्रीडा निन्दिता, उभौ च दुष्टौ जातौ, तत्रापि महादेवस्य गृहरूपो यः पर्वतः **कैलासस्तस्योपवन** आरोपितफलपुष्पप्रधाने **वने**, तत्रापि **रम्ये** सर्वदोषविवर्जिते वने, स्वभावतो विरक्तो महादेवस्तस्य स्थाने विरक्ता एव तिष्ठन्ति, तत्राप्यु**पवने** योगिनां भगवच्चिन्तनस्थाने, तत्रापि **रम्ये** भगवत्प्रसादस्थाने, ततोप्यधिकदोषमाह **मन्दाकिन्यामिति**, **मन्दाकिनी** भागीरथी प्रसिद्धा, मन्दाकिन्यां दोषाभावात्, तत्रापि **मद उत्कटो** ययोः, अयं मदो धनादिकृत एव, सुरादिकृतस्त्वग्रे वक्ष्यते ।। २ ।। **महतः स्वरूपदोषा** उक्ताः, आगन्तुकदोषैः सदुष्टक्रियामाह **वारुणीमिति**, द्वन्द्वजो हि दोषो दुर्निवार इति द्वयोः सम्बन्धः, **वारणी** वरुणोद्भवा, **अमृतसङ्ग** उत्पन्ना दैत्यभावबोधिका, तत्रापि **मदिरा** मादिकासुरभावादप्यधिकदोषजनिका, तां **वारुणीं मदिरां पीत्वा** मदेना**घूर्णिते लोचने** ययोर्विरुद्धज्ञानवन्तौ, तत्राप्यनु पश्चाद् **गायद्भिः स्त्रीभिः** सहितौ, सङ्गदोषो मोहहेतुः सम्बन्धश्च, **पुष्पिते वने** रजोयुक्ते **चेरतुर्भ्रमन्तौ** जातौ, **मन्दाकिन्यामिति** सामीप्यसप्तमी, **कैलासोपवने** सति, मन्दाकिन्यामपि सत्यां, **मदोत्कटाविति** वा, **अतः पुष्पिते वन** इति न दोषवचनेन विरोधः ।। ३ ।। दोषान्तरमाहान्तःप्र**विश्येति**, जले **क्रीडा गङ्गायां** निषिद्धा "गङ्गां पुण्यजलां प्राप्य त्रयोदश विवर्जयेदि"त्यत्र क्रीडाया निषिद्धत्वात्, तत्रापि नोद्धृत्य **किन्त्वन्तःप्रविश्य**, **अम्भोजानां वनराजयो** घनपङ्क्तयो यत्र, अनेन भगवत्सान्निध्यमपि गङ्गाकृतपूजार्थं लक्षितं, **गजाविव करेणुभिरिति** क्रीडायामनवधानतोक्ता ।। ४ ।।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

दशमाध्यायतात्पर्यं वदन्तः पूर्वाध्यायसङ्गतिमाहुरेवमित्यादि, शास्त्रार्थत्वेन ज्ञानपूर्विकातिदुर्लभा भगवति **भक्ती** राजप्रश्नानुसारेण **नवमाध्याय उक्ता** 'तत्पुरुषे च सख्य'मितिप्रश्नानुरोधात् **कृष्णसेवकसख्यस्य हेतुर्वैराग्यं**, एवमवान्तरसङ्गति मुक्त्वा **स्कन्धार्थसङ्गतिमाहुर्वैराग्यमि**त्यादि, यथा पूर्वाध्याये ज्ञानरूपो **भगवद्धर्मो** विद्यानिवर्तनद्वारा भगवद्वशीकारक उक्त एवमत्राध्याये वैराग्यरूपो भगवद्धर्मः **षड्गुणस्तथा निरूप्यते**, षड्गुणत्वेन निरूपणस्य प्रयोजनमाहुर्गुणानामित्यादि, उपलक्षण विधया सर्वेषां गुणानां भगवत्त्वबोधनार्थं तथा **निरूप्यते**, तस्यापि प्रयोजनमाहुः **स एवे**त्यादि, यत एभ्यो गुणेभ्यो हि निश्चयेन **स** प्रस्तुतो निरोध **एवाभवत्**, तथा च स्कन्धार्थहेतुत्वैव **सङ्गति**रित्यर्थः, ननु वैराग्यस्य दुःखेन दुःखिष्वपि जायमानत्वात् साङ्ख्येष्वपि नित्यानित्यवस्तुविवेकेनैहिकामुत्रिकफलवैराग्यसम्भवाच्च कथं तस्य भगवद्धर्मत्वमित्याकाङ्क्षायां तल्लक्षणं तद्धेतुं **चाहुर्वैराग्यमनिवर्त्य**मित्यादि, **तुः** शङ्कानिरासे, उक्तवैराग्ये भगवद्धर्मत्वशङ्का न कार्या तथा चानिवर्त्यं वैराग्य यद् भगवद्वाक्यतो भवेत् स एव भगवद्धर्मः, दुःखिनां तु सुखनिवर्त्यं, साङ्ख्यानामपि वैराग्यं "येन्येरविन्दाक्षे"तिवाक्येन नश्वरत्वावगमाद् विद्याया अपि स्वप्नबोधन्यायेनाविद्यानिवर्त्यत्वात् तन्मूलभूतमायाया अगतत्वेन **निवर्त्यमेव**, अतो**निवर्त्यं** भगवद्वाक्यजन्यं यद् वैराग्यं स एव भगवद्धर्म इत्यर्थः, ननु प्रकृते वैराग्यजनकं भगवद्वाक्यं न स्फुटमित्यतस्तल्लक्षणमाहु**र्विशेषत** इत्यादि, **तुः** शङ्कानिरासे, वक्ष्यमाणे वाक्ये भगवदीयमिदं न भवतीतिशङ्का न कार्या यद् वाक्यं विशेषतः केनचिन् न निवर्तेत तद् भगवद्वाक्यमित्यर्थः, तद् व्यक्तं कुर्वन्ति **तादृश**मित्यादि, **तादृशं** वाक्यं शापरूपं स्यात्, तथा च शापरूपमेव भगवद्वाक्यमित्यर्थः, तर्हि येनकेनचिदपि दत्तः शापो भगवद्वाक्यं स्याद् वैराग्यं च जनयेदत आहु**र्भक्तानामेव तादृश**मिति "दूतानामिव वर्णित"मितिजलभेदोक्तिरत्रानुसन्धेया, तथा चास्य परम्परया भगवद्वाक्यत्वमित्यर्थः, तदेतन् निगमयन्त्य**त** इत्यादि, **वैराग्यकथन** इति निमित्तसप्तमी वैराग्यस्य कथनं विद्यतेस्मिन्नित्यध्यायविशेषणं वा, एवमध्यायतात्पर्यमुक्त्वा वैराग्यविशेषणभूतषड्गुणरूपानेतदध्यायप्रतिपाद्यानर्थानाहुः **शापोधम** इत्यादि, ननु भवत्वेवं तथापि प्रश्नस्य किं प्रयोजनमत आहु**रपूर्व** इत्यादि, यद्यपि पूर्वं पृष्टं वदिष्यति तथापि देवानां पापं नारदस्य मन्युश्चेत्युभय**मपूर्व**मिति तच्छ्रवणेच्छया तथेत्यर्थः, प्रश्नतात्पर्यान्तरमाहुः **स्वस्ये**त्यादि, **तादृशत्वे**नेति महापुरुषशप्तत्वेन । **कथ्यता**मित्यत्र **वक्तव्य**मित्युपक्रान्तत्वात् प्रकृतोपयोगाच्च **वक्तव्यम्** ॥ १ ॥ **रुद्रस्ये**त्यत्र **मन्दाकिन्यां दोषाभावा**दिति तत्र मनुष्यकृताघमार्जनस्याभावेन तथात्वात् ॥ २ ॥ **वारुणी**मित्यत्र **द्वयो**रित्यासुरभावमादकत्व**योः**, ननु पूर्वं वनस्य दोष उच्यत इति विरुद्धमत आहु**रत** इत्यादि, मदोत्कटत्वात् **पुष्पिते वन** इत्यनेन रजोयुक्तदोषो य उक्तस्तेन सह विरोधो न भवति तयोर्दोषस्योत्कटत्वाद् वनधर्मोपि तदुद्बोधक एव भवति न तु शामक "एते मदा" इतिन्यायादितिभावः ॥ ३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

दशमाध्याये पूर्वानुवादे **भक्तिरुक्ते**ति यच्छृण्वतो भक्तिर्भवति तादृशं चरित्रमुक्तमित्यर्थः, **कृष्णे**ति कृष्णसेवका नारदादयो दर्शनमात्रेण मोचका इति तद्वाक्यान् मोचने तेषु स्वकृपाबोधनं तत्सख्ये हेतुरित्यर्थः, **षड्गुण** इति षट् गुणा यस्येत्यर्थः, तत्र हेतुः **गुणाना**मिति, तत्रापि हेतुः **स एव ही**ति, अहिकुण्डलादिन्यायत्रयेपि भगवत एव गुणरूपत्वादित्यर्थः, **वैराग्यमि**ति यत एतयोरविनाशि वैराग्यं शापाज् जातमित्यर्थः, वैराग्यदानेन नारदे वैराग्यसिद्धौ 'सेवकास्तादृशा यदी'ति न्यायेन भगवत्यपि सिद्धमिति भावः, **अपूर्वत्वा**दिति शापेन मोक्षस्याश्रुतपूर्वत्वादित्यर्थः ॥ **वारुणी**मित्यस्याभासे **सदुष्टे**ति दुष्टं दोषः भावे क्तः दोषसहितां क्रियामित्यर्थः, व्याख्याने **सामीप्यसप्तमी**ति प्रक्रियायां सामीपिकमप्याधारमुक्त्वा आधारश्चतुर्धोक्तः, नद्यामास्ते इत्युदाहरणं चोक्तं, तत्पक्षे 'गङ्गायां घोष' इत्यत्रापि न लक्षणेति ज्ञेयम् ॥ २ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

दशमाध्यायार्थनिरूपणकारिकासु **वैराग्यं भगवद्धर्मः षड्गुण** इति अस्मिन्नध्याये वैराग्यं भगवद्धर्मो निरूप्यते सोपि भगवदैश्वर्यादिषड्गुणवानित्यर्थः, तदेतत् स्पष्टयन्ति **गुणानां भगवत्त्वाये**त्यनेन, वैराग्ये कारणद्वयमाहुः **भगवद्वाक्यतो भवे**दित्यारभ्य **न निवर्तेत केनचि**दित्यन्तेन, **भगवद्वाक्यत** इति वरादिरूपादित्यर्थः, **यद्वाक्यं केनचिदपि विशेषतो न निवर्तेत** तद्वाक्याच् च वैराग्यं भवेत् यथा नारदवाक्यात् शापरूपात्, प्रकृते तदेतत् स्फुटयन्ति **तादृशं शापरूप**मित्यनेन । **रुद्रस्यानुचरा**वित्यस्य विवृतौ **पश्चादेव चलनस्योचितत्वा**दिति अनुचरपदतात्पर्यमिदं, अनु पश्चाच् चरतीत्यनुचर इति व्युत्पत्त्या रुद्रचलनानुचलनमुचितं तथा च "वेदः शिवः शिवो वेद" इति श्रुतेः शिवस्य वेदरूपत्वात् तदनुचरैर्वेदानुकूलमेव व्यवहर्तव्यं तथाकरणाभावादनुचितत्वं प्रदर्शितं **योगिनां भगवच्चिन्तनस्थान** इति "नारदाय प्रवोचन्त"मिति वाक्यात् ॥ २ ॥

(५) भगवदीयनिर्भयराममनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

दशमाध्याये एवमिति का० ७३$\frac{३}{४}$ । भक्तिरुक्तेति यच्छृण्वतो भक्तिर्भवति तादृशं चरित्रमुक्तमित्यर्थः, **कृष्णसेवकसख्यस्य हेतुरिति** "यच्छृण्वतः" कृष्णसेवकसख्यं भवति तादृशं यमलार्जुनभञ्जचरित्रमित्यर्थः, नलकूबरमणिग्रीवयोर्भगवद्दर्शने कृष्णसेवकनारदकृपाहेतुकत्वश्रवणात् कृष्णसेवकसख्यं भवेदिति भावः, **वैराग्यमिति** का० ७४$\frac{३}{४}$ । अत्र वैराग्यात्मको **भगवद्धर्मः षड्गुणः** षड्गुणा यस्य तादृशो **निरूप्यते, अत्राध्याये** "शापोद्यमस्तथा हेतु"रिति वक्ष्यमाणकारिकोक्तषडर्थनिरूपणादितिभावः, तत्र **हेतुर्गुणानां भगवत्त्वायेति,** तत्रापि हेतुः **स एव ह्येति,** यतः कारणात् **स** भगवानेव **गुणरूपेणाभवत्** आविर्भूतः, अतो गुणानामपि **भगवत्त्वबोधनाय अत्राध्याये** षड्भिः प्रकरणैः **षड्गुणो** वैराग्यरूपो **भगवद्धर्मो निरूप्यत** इत्यर्थः, **वैराग्यमित्यादि** का० ७५$\frac{३}{४}$, ७६$\frac{३}{४}$ । अत्र नलकूबरमणिग्रीवयोरनिवर्त्यवैराग्यजनकं शापरूपं नारदवाक्यं **भगवद्वाक्यमेव** ज्ञेयं, तथा च भगवतो नारदद्वारा **वैराग्यदातृत्वाद्** भगवत्यपि **वैराग्यगुणः** सिद्ध इति भावः, **यद्वाक्यं केनचिदपि न निवर्तते तादृशं शापरूपं भक्तानामेव** वाक्यं, तद्वाक्यं **भक्तद्वारा भगवद्वाक्यमेव** अतो **मोक्षावधिः शाप** इत्यर्थः, अत्र षट् प्रकरणानि विभजन्ते **शापोद्यम इति,** का० ७७$\frac{३}{४}$, ७८$\frac{३}{४}$ । एवं द्विचत्वारिंशच्छ्लोकैः षट् प्रकरणानि, प्रथमश्लोकेन प्रश्नश्चेति त्रिचत्वारिंशत्, **अपूर्वत्वादिति** का० ७९$\frac{३}{४}$ शापेन मोक्षस्यापूर्वत्वाच्छ्रोतुमिच्छा **तेन** हेतुना "कथ्यतां भगवन्नेतत् तयोः शापस्य कारण"मिति **परीक्षितः प्रश्नः, स्वस्य** परीक्षितोपि **तादृशत्वेन** ब्राह्मणशप्तत्वेन **तद्वन् मोक्षाशयापि** प्रश्न इत्यर्थः ॥ ७९$\frac{३}{४}$ ॥ **रुद्रस्यानुचरौ भूत्वेत्यादीनां** षण्णां श्लोकानां प्रत्येकमर्थानाहु**रुन्मादश्चेत्यादि,** का० ८०$\frac{३}{४}$, ८१$\frac{३}{४}$ । नलकूबरमणिग्रीवयोरुन्मादप्रमादनिन्दिताचरणानि त्रिभिः श्लोकैः क्रमेण निरूपितानि, **महत्स्वपि** नारदादिष्वपि तथाविधधाष्ट्र्यसिद्ध्यर्थमिति पूर्वेणान्वयः, चतुर्थश्लोकार्थमाहु**र्महतां दृशिरिति, महतां दृशिरिति,** महतां नारदानां दृशिदर्शनं, कर्तरि षष्ठी नारदकर्तृकं नलकूबरादिकर्मकं दर्शनमित्यर्थः, तदुक्तं "अपश्यन् नारदो देवा"विति, "तं दृष्ट्वा व्रीडिता देव्य" इति श्लोकार्थमाहु**र्धाष्ट्र्यं तयोर्न सङ्गस्येति** का० ८१$\frac{३}{४}$ । देवाङ्गनानां नारदे धाष्ट्र्यं नेत्यर्थः, **ततश्चोद्यम** इति "तौ दृष्ट्वे"त्यनेन शापोपक्रम इत्यर्थः ॥ ८१$\frac{३}{४}$ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दशमे त्वृषिशापेन वृक्षतां गतयोः पुनः । ताभ्यां स्तुतेन कृष्णेन विमुक्तिर्विनिरूप्यते ॥ १ ॥

'पुरा नारदशापेन वृक्षतां प्रापितौ' इति श्रुत्वा तस्य नारदस्य परमभागवतत्वेनाल्पापराधे क्रोधोसम्भवन (?) शापहेतुक्रोधजनकापराधस्य महत्त्वं सामान्यतो ज्ञात्वाऽपि तद्विशेषं पृच्छति—कथ्यतामिति । सर्वज्ञत्वं सूचयन् सम्बोधयति—हे भगवन्निति । तयोर्नलकूबरमणिग्रीवयोर्यद्विगर्हितं निन्दितं शापस्य कारणं कर्म, येन कर्मणा देवर्षेर्भागवतोत्तमस्यापि तमः क्रोधो जातस्तत् कथ्यतामित्यन्वयः ॥ १ ॥ एवं पृष्टस्तयोरपराधानाह—रुद्रस्येति पञ्चभिः । धनदस्य रुद्रसेवकस्य पुत्रत्वेन तावपि रुद्रस्यानुचरौ सेवायोग्यावेव भूत्वा तां परित्यज्य मदो हर्ष उत्कटो ययोस्तौ । तत्र हेतुमाह—सुदृप्तौ अतिगर्वितौ । तत्रापि हेतुमाह—धनदात्मजाविति । वारुणीं वरुणनिर्मितां बुद्धिभ्रंशकरीं मदिरां पीत्वा, तत्पानादेव मदेन आघूर्णिते लोचने ययोस्तादृशौ भूत्वा ॥ २ ॥ मन्दाकिन्यां गङ्गायां 'सामीप्ये सप्तमी' गङ्गासमीपे, तत्रापि कैलासस्य श्रीमहादेववासस्थानस्योपवने भगवच्चिन्तकयोगिजनस्थाने वने पुष्पिते सति रम्येऽनुगायद्भिः स्त्रीजनैः सह नलकूबरमणिग्रीवौ चेरतुरिति द्वयोरन्वयः ॥ ३ ॥ एवंभूते स्थाने स्त्रीभिः सह क्रीडनमनुचितम् , तत् कृतवन्तावित्युक्तम् । इदानीं "गङ्गां पुण्यजलां प्राप्य त्रयोदश विवर्जयेत् ॥ शौचमाचमनं चैव निर्माल्यं मलकर्षणम् ॥ तैलसम्मर्दनं क्रीडां प्रतिग्रहमथो रतिम् ॥ अन्यतीर्थप्रशंसनम् ॥ अन्यतीर्थाभिलाषं च वस्त्रत्यागं तथा खातं संहारं चैव वर्जयेत्" इतिपाद्मे गङ्गायां तथाक्रीडानिषेधात्तमपि निषेधमुल्लङ्घितवन्तावित्याह—अन्तरिति । अम्भोजानां वनानि तेषां राजयः पङ्क्तयो विद्यन्ते यस्यां तस्यां गङ्गायामन्तर्मध्ये प्रविश्य करेणुभिः सह गजाविव युवतिभिः सह चिक्रीडतुरित्यन्वयः ॥ ४ ॥

अन्वितार्थप्रकाशिका

दशमेऽपातयद्रिङ्गन्नर्जुनौ मध्यगो हरिः ॥ स्तुतस्तज्जातदेवाभ्यां तत्र श्लोकास्त्रिवाद्धयः (४३) ॥
उवाचसप्तकं साङ्घ्रि पञ्चवेदा (४५) अनुष्टुभः ॥ १० ॥

कथ्यतामिति ॥ हे भगवन् ! येन कर्मणा देवर्षेर्भागवतोत्तमस्यापि तमः क्रोधोऽभूत् तादृशं तयोर्नलकूबरमणिग्रीवयोर्यद्विगर्हितं निन्दितं शापस्य कारणं कर्म तत्कथ्यताम् ॥ १ ॥ रुद्रस्येति द्वयम् ॥ रुद्रस्यानुचरौ सेवकौ भूत्वाऽपि सुदृप्तौ अतिगर्वितौ मदो हर्ष उत्कटो ययोस्तौ धनदात्मजौ वारुणीं वरुणनिर्मितामतिमदहेतुं मदिरां पीत्वा तन्मदेन आघूर्णिते लोचने ययोस्तादृशौ भूत्वा रम्ये कैलासस्योपवने प्रवहन्ती या मन्दाकिनी तस्याम् । सामीप्ये सप्तमी । गङ्गासमीपे पुष्पिते वने अनुगायद्भिः स्त्रीजनैः सह चेरतुः ॥ २–३ ॥ अन्तरिति ॥ अम्भोजवनानां राजयो यत्रेति । यद्वा । अम्भोजवनै राजते । ताच्छील्ये णिनिः । तादृशे गङ्गायामन्तर्मध्ये । अव्ययविशेषणत्वात् क्लीबत्वम् । प्रविश्य करेणुभिः सह गजाविव युवतिभिः सह चिक्रीडतुः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं दशमेऽध्याये यमलार्जुनपातन तत्स्थदेवकृतस्तुतिश्च निरूप्यते यद्विगर्हितं निंदितं च येन कर्मणा देवर्षेः शांतस्यापि तमः कोपो जातः तदेतत्कथ्यतामिति ॥ १ ॥ तदुत्तरं कुर्वन् शुक उवाच रुद्रस्येतिचतुर्णां सहान्वयः। धनदात्मजौ कुबेरपुत्रौ रुद्रस्यानुचरौ सेवकौ भूत्वा सुदृप्तौ अभिमानयुक्तौ रम्ये पुष्पिते कैलासोपवने मंदाकिन्यां गंगातटे अनुगायद्भिः स्त्रीजनैः सह चेरतुर्विजह्रतुः कथंभूतौ मदेन उत्कटौ व्याप्तौ ॥ २ ॥ मदेन आघूर्णिते अतिव्याप्ते लोचने ययोस्तौ ॥ ३ ॥ अंभोजानां पद्मानां वनानि तेषां राजयः पंक्तयः संति यस्मिन् एवंभूते गंगायां अंतस्तन्मध्यभागे प्रविश्य करेणुभिर्गजीभिः गजौ यथातथा तौ ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दशमे त्वन्तराविश्यापातयद्यमलार्जुनौ। तत्र सुताभ्यां देवाभ्यां स्तुतः कृष्ण इतीर्यते ॥ १ ॥

एवमुक्ते लब्धावसरः पृच्छति राजा ॥ हे भगवन्, यत् तयोः शापस्य कारणं, एतत्, यत्, विगर्हितं कर्म, तयोरिति शेषः। तत्, यतः देवर्षिर्नारदः, कुपितः, सर्वमेतत्, कथ्यताम्। 'येन वा देवर्षेस्तमः' इति पाठे, येन देवर्षेः तमः क्रोधः, इत्यन्वयः ॥ १ ॥ तस्योत्तरमाह मुनिः ॥ रुद्रस्येति ॥ धनदात्मजौ, रुद्रस्य अनुचरौ भूत्वा, सुदृप्तौ, रम्येऽतिरमणीये, कैलासोपवने, तत्रापि मन्दाकिन्यां गङ्गायास्तीरे इत्यर्थः। मदोत्कटौ मदोत्सिक्तौ ॥ २ ॥ वारुणीमिति ॥ वारुणीं पैष्टीं, मदिरां पीत्वा, मदेन वारुणीपानोद्भूतेन आघूर्णते लोचने ययोस्तौ, अनुगायद्भिः स्त्रीजनैः सह, पुष्पिते प्रचुरपुष्पवति, वने चेरतुः। इति द्वयोरेकसंबन्धः ॥ ३ ॥ अन्तः प्रविश्येति ॥ गङ्गायां, अन्तः मध्ये, अम्भोजानां पद्मानां वनानि तेषां राजयस्ताः सन्ति यस्मिंस्तस्मिन्, जले इति शेषः। प्रविश्य, करेणुभिरिभीभिः, गजौ इव, युवतिभिः स्त्रीभिः सह, चिक्रीडतुः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कथ्यतामिति : १०.१०.१.

गीर्वाणर्षिरशेषविद् गततमाः शान्त्यादिसम्पत्पदं तावप्युत्तमगोत्रवृत्तचरितौ भाव्यं न चैवं ततः।
मद्वा किमिदं भवेदिति नृपप्रभाशयं चिन्तयंस्त्वद्वन्नेति विबोधयन्नकथयत् तत्पूर्वसंस्थां मुनिः ॥ १ ॥

रुद्रस्येति : १०.१०.२.

यत्कृत्यं यत्र शोभावहमतिशुभदं तच्च तत्रैव कुर्यान्नैवार्हेऽनर्हकर्म क्वचिदपि हितदृग् यत्स्फुटं मानमेतौ।
कैलासे पुण्यभूमौ सुरसरिति सदाचारकर्मोचितायां नग्नक्रीडाविहाराद् युवतिभिरभितोऽधः प्रपातं प्रयातौ ॥ २ ॥

वारुणीमिति : १०.१०.३.

यन्नामामात्रकलनेन भुजङ्गवृत्तिं पाश्यात्मजाऽगमदजस्रमधः स्थितिं च।
तत्सेविनोः स्थितिरियं न तयोर्न युक्तेत्याख्यापयन्नकथयत् स हि वारुणीति ॥ ३ ॥

अन्तः प्रविश्येति : १०.१०.४.

तादृग्दुष्कृतशालिनोरपि तयोः शापावसाने क्षणं तस्याभूदथ चेन्दिरापति-पदाम्भोज-द्वयालोकनम्।
केनेदं सुकृतेन जातमिति तच्छङ्कां प्रमृद्नन्मुनिः प्रोवाचाऽघहरं सदिष्टसुखदं गङ्गाजलक्रीडनम् ॥ ४ ॥
यद्वा पुण्यसरिद्वराऽमरसरिज्जाताघकृत् कर्मणः पाकादेव स आगतो रुदुदयोऽप्यस्याथ तादृक्फलः।
शापोन्मोचनमिन्दिराधिपकृपालाभश्च शान्तर्षिवाङ्माहात्म्यादथवर्षि दर्शन महापुण्या दगण्यादभूत् ॥ ५ ॥

कृष्णप्रिया

परीक्षित् जी ने कहा—भगवन् कहिये इन दोनों ने ऐसा कौन सा बड़ा निन्दित कर्म किया था, जिससे इनके शाप का वह कारण बना और नारदजी को भी जिससे क्रोध करना पड़ा ॥ १ ॥ श्रीशुकदेवजी ने कहा—राजन्, एक तो ये दोनों धनाध्यक्ष कुबर के लाड़ले लड़के थे पुनः दोनों जब भगवान् रुद्र के अनुचर गण हो गये तब अति गर्विष्ठ और मदोत्कट बन गये ॥ २ ॥ एक वार दोनों ने वारुणी मदिरा पी ली। नशे में चूर हो जाने से नेत्र घूम रहे थे। बहुत सी स्त्रियाँ उनके पीछे गाती बजाती चल रही थी। दोनों कुबेरकुमार रम्य कैलास गिरि के उपवन के समीप बहती गङ्गा के निकट में उन स्त्रियों के साथ फूलों से लदे वनों में विचरण करने लगे। फिर तो वे गङ्गाजी में प्रविष्ट होकर स्त्रियों के साथ उसी प्रकार से जल विहार करने लगे, जैसे कि हस्ती हस्तिनियाँ साथ जलविहार करते हैं ॥ ३–४ ॥

यदृच्छया च [1]देवर्षिर्भगवांस्तत्र कौरव । अपश्यन्नारदो[2] देवौ क्षीबाणौ समबुध्यत ॥ ५ ॥
तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशङ्किताः । [3]वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ॥ ६ ॥
तौ दृष्ट्वा मदिरामत्तौ श्रीमदान्धौ सुरात्मजौ । तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ॥ ७ ॥

श्रीनारद[4] उवाच

न ह्यन्यो जुषतो [5]जोष्यान् बुद्धिभ्रंशो रजोगुणः । श्रीमदादाभिजात्यादिर्यत्र[6] स्त्री द्यूतमासवः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—कौरव ! तत्र देवर्षिः भगवान् नारदः यदृच्छया देवौ अपश्यत् च क्षीबाणौ समबुध्यत ॥ ५ ॥ विवस्त्राः व्रीडिताः देव्यः शापशङ्किताः शीघ्रं वासांसि पर्यधुः विवस्त्रौ गुह्यकौ न एव ॥ ६ ॥ श्रीमदान्धौ मदिरामत्तौ तौ सुरात्मजौ दृष्ट्वा तयोः अनुग्रहार्थाय शापं दास्यन् इदं जगौ ॥ ७ ॥ जोष्यान् जुषतः श्रीमदाद् अन्यः आभिजात्यादिः न यत्र हि बुद्धिभ्रंशः रजोगुणः स्त्री द्यूतम् आसवः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपश्यत् दृष्ट्वा च क्षीबाणौ मत्तौ समबुद्ध्यत ॥ ५ ॥ कुत इत्यत आह । तं दृष्ट्वेति ॥ ६ ॥ अनुग्रहार्थाय अनुग्रहश्च मदनाशोऽर्थश्च श्रीकृष्णदर्शनं तदर्थं इदं वक्ष्यमाणं न ह्यन्य इत्यादि ॥ ७ ॥ जोष्यान्प्रियान्विषयाञ्जुषतः सेवमानस्य पुंसः श्रीमदादन्य आभिजात्यादिसत्कुलविद्यादिजनितो मदः । अन्यो वा रजोगुणो रजःकार्यहास्यहर्षादिरूपो न हि तथा बुद्धिभ्रंशो बुद्धिं भ्रंशयतीति तथा किं तु श्रीमद एवेति । तदाह यत्रेत्यादिचतुर्भिः । यत्र श्रीमदे ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र गंगातटे । क्षीबाणावश्लीलभाषिणौ वा "अश्लीलभाषी स्यात्क्षीबा मदमत्तोऽथ हिंसकः" इति धरणिः । हे कौरवेति । शुद्धवंशजत्वादेव त्वामिदं गोप्यं वक्ष्यामीति भावः ॥ ५ ॥ पर्यधुर्वेष्टितवत्यः । तत्र हेतुः तं दृष्ट्वेति ॥ ६ ॥ अनुग्रहार्थयोः समाहारद्वंद्वः ॥ ७ ॥ मद इति । शेषकल्पनातो वरं श्लोकांतर्गतपदेनान्वयः । 'ऋजुमार्गेण सिद्ध्यतोऽर्थस्य वक्रेण साधनायोगात्' इति न्यायात् । अत आह—अन्यो वेति । श्रीमद एव सर्वपर इत्याह—किन्त्विति । स्त्रीशब्देन परस्त्रीसंगः स्वस्त्रीसंगस्य शास्त्रीयत्वात् । द्यूतपदेन तत्क्रीडा । आसवपदेन च तत्पानं लक्ष्यते ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्वर्थे चकारो भिन्नोपक्रमे । यद्वा अपश्यत् सम्यगवबुद्ध्यत चेति चकारान्वयः । यदृच्छया स्वैरितया आगत इति शेषः । देवर्षिरिति नियन्तृत्वं भगवानिति दयालुत्वमिति वक्ष्यमाणशापानुग्रहयोर्योग्यतोक्ता कौरवेति तत्र तस्यागमनासम्भवेऽप्यागमनात् कौतुकेन सम्बोधनम् ॥ ५ ॥ गुह्यकाविति तदा सात्त्विकत्वाभावेन देवत्वहानेः केवलयक्षतयोपलक्षितौ एवशब्देन देवीनामाग्रहेणापि न पर्य्यधातामिति बोध्यते ॥ ६ ॥ सुरात्मजावपि मदिरामत्तौ यतः श्रीमदेन अन्धौ सदसद्दृष्टिहीनौ मदिरेत्यादि विशेषणद्वयं शापेसुरेति चानुग्रहे हेतुर्विवेचनीयः तयोरनुग्रहार्थायेति तौ प्रति स्वयोग्यस्यानुग्रहस्य योऽर्थः उपशान्तिभगवद्भक्तिभगवत्साक्षात्कारसंवलनरूपः तस्मै तं प्रापयितुं स्थावरत्वप्रापकं शापं दास्यन् अनुग्रहस्वभावत्वादेषां सोऽयमनुग्रहपरापराधं स्वशापादभिभूय स्वरूपेणैव पर्य्यवसितः स्यात् ततश्च तद्रूपोऽर्थः स्वयमेव व्यक्तीभवतीति भावः । तत्र च सति यत्खलुविशेषेण बृहद्वनान्तर्भाविश्रीमद्व्रजराजद्वार्य्यर्जुनाख्यगोपसखनामवृक्षतया जन्म प्रापतुः यत्र येन येनावतारेणेत्यादिरीत्या परमहितलीला श्रीबालगोपालसाक्षात्कारादिकं लेभाते तत्रेदं सम्भावयामः तदानीं तेन श्रीमद्देवर्षिणा तु "तोकेन जीवहरणं यदुलूकिकायाः" इत्यादिरूपः निरर्गलकारुण्यमयतल्लीलागानं क्रियमाणमासीदिति तत्कारुण्यतादात्म्यापन्ननिजानुग्रहेण तत्पर्य्यन्तोऽप्यर्थो दत्त इति जगौ तत्वतोऽन्तः कोपाभावेन गाथारूपेणोच्चैः स्वयमवोचत ॥ ७ ॥ श्रीमदेनान्धं दृष्ट्वा श्रीभ्रंशरूपं शापं दातुमादौ श्रीमदं निन्दति—न हीति पञ्चभिः । अभिजातिः सत्कुलं तदुद्भवः आभिजात्यो मदः आदिशब्दाद्विद्यादिमदः तथा चोक्तं "विद्यामदो धनमदः तथैवाभिजनो मदः । मदा एतैरलिप्तानां त एव हि सतां दमाः" यत्र श्रीमदे सति स्वत एव सद्यस्तेषां प्राप्तेः तेषां कामक्रोधयोर्महाहेतुत्वात् तयोश्च "काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्" इत्यादिना निन्दितत्वेन श्रीमद्गीतासूक्तत्वात् ॥ ८ ॥

---

[1] देवर्षिर्गतवांस्तत्र—वीर. । [2] अपश्यद्गुह्यकौ दृष्टवा—च पु. टी. । [3] वासांस्युप—इति कस्यचित् । [4] नि. सुबोधिन्यां "श्री नारद उवाच" दृश्यते । [5] जोष्याद्बुद्धि—विज. । [6] जात्यादे—विज. ।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

त्वर्थे चकारो भिन्नोपक्रमे; यद्वा, अपश्यत् सम्यगबुध्यत चेति चकारान्वयः। यदृच्छया तयोः केनापि भाग्योदयेनेत्यर्थः। आगत इति शेषः। देवर्षिरिति निग्रन्तृत्वम्, भगवानिति दयालुत्वम्—इति वक्ष्यमाणशापानुग्रहयोर्योग्यता उक्ता। हे कौरवेति तत्र तस्यागमनासम्भवेऽप्यागमनात् कौतुकेन सम्बोधनम् ॥ ५ ॥ गुह्यकाविति तदा सात्त्विकत्वाभावेन देवत्वहानेः केवलयक्षतयैवोपलक्षितौ। एवशब्देन देवीनामाग्रहेणापि न पर्य्यधत्तामिति बोध्यते ॥ ६ ॥ सुरात्मजावपि मदिरामत्तौ, यतः श्रीमदेनान्धौ सदसद्दृष्टिहीनौ, मदिरेत्यादिविशेषणद्वयं शापे, सुरेति चानुग्रहे हेतुर्विवेचनीयः। जगौ तत्त्वतोऽन्तःकोपाभावेन सदा वीणासक्तपाणितया वीणयाऽगायत्, किंवा गाथारूपेणोच्चैः स्वयमवोचत ॥७॥ श्रीमदेनान्ध्यं दृष्ट्वा श्रीभ्रंशशापं दातुमादौ श्रीमदं निन्दति—न हीति पञ्चभिः। अभिजातिः सत्कुलम्, तदुद्भव आभिजात्यो मदः; आदिशब्दाद्विद्यादिमदः; तथा चोक्तम्—'विद्यामदो धनमदस्तथा चाभिजनो मदः। एते मदा मदान्धानां त एव हि सतां दमाः ॥' इति; यत्र श्रीमदे सति स्त्र्यादयो भवन्ति, यद्वा, यस्मिन् विषये सति श्रीमदे सति स्वत एव सद्यस्तेषां प्राप्तेः। स्त्रिया आदौ निर्देशस्तस्याः सर्व्वानर्थमूलत्वात्; किंवानर्थापादने स्त्र्यादीनां यथोत्तरं श्रैष्ठ्यम्; तत्र द्युते कलहादिदुःखेन वृथा धनव्ययेन च तस्य स्त्रीतः श्रैष्ठ्यम्, तस्माच्च मत्ततया देहरक्षादेरप्यननुसन्धानेन चासवस्य ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

क्षीबाणौ मन्दान्धौ ॥ ५ ॥ पर्यधुः परिहितवत्यः ॥ ६–७ ॥ जोष्यान् सेव्यान् विषयान् आभिजात्यादेः आदिशब्दो धनपरः बुद्धिभ्रंशः भ्रंशकरः रजोगुण इत्युपचारः रजोगुणवर्धकः यत्र श्रीमदे मुख्ये सति स्त्रीद्यूतमधूनि भवन्ति तस्मादन्यो नेत्यन्वयः ॥ ८–९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे कौरव ! भगवान् देवर्षिर्यदृच्छया तत्रागतो देवौ तौ ददर्श क्षीबाणौ मदान्धौ समबुध्यत ज्ञातवांश्च ॥ ५ ॥ कुत इत्यत्राह—तं दृष्ट्वेति। देव्यो विवस्त्रा अत एव तं दृष्ट्वा व्रीडिताः शापाच्छङ्किताः वासांस्यादधुः गुह्यकौ नैव पर्यधातां किन्तु विवस्त्रौ नग्नावेवासाताम् ॥ ६ ॥ सुरस्य कुबेरस्यात्मजौ दृष्ट्वा मदनाशरूपानुग्रहार्थं शापं दास्यंस्तावदिदं वक्ष्यमाणमाह अनुग्रहार्थाय भगवद्भविष्यदर्शनरूपप्रयोजनाय चेति केचिद्व्याचक्षते ॥ ७ ॥ तदेवाह—नेति। जोष्यान्विषयान् जुषतः सेवमानस्य पुंसः श्रीमदात्सम्पत्प्रयुक्तमदादन्यः आभिजात्यादिः आदिशब्देन विद्यादिसङ्ग्रहः आभिजात्यादिजनितो मदः श्रीमदवद्बुद्धिभ्रंशकरः रजोगुणकार्यकामक्रोधादिवर्धको न हि किन्तु श्रीमद एव नितरां बुद्धिभ्रंशकरः रजोगुणश्चेत्यर्थः। तदाह—यत्रेत्यादिना। यत्र यस्मिन् श्रीमदे सति स्त्रीसङ्गद्यूतमधुपानादिरूपदुर्व्यसनानि संभवन्ति ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

क्षीबाणौ मत्तौ अश्लीलवचनौ वा ॥ ५ ॥ पर्यधुः सम्वेष्टितवत्यः ॥ ६–७ ॥ किं तद्रीतमिति तत्राह— नहीति। विषयान् जुषतः सेवमानस्य पुंसः जोष्यात् सेव्यात् विषयात् श्रीमदात् श्रिया धनसम्पदोत्पन्नमदादाभिजात्यादेरभिजननिमित्तमदात् विद्यानिमित्तमदाच्चान्यः बुद्धिभ्रंशः ज्ञाननाशकरो रजोगुणः रजोविकारो नास्ति विषयादिरेव ज्ञाननाशकर इत्यर्थः। तत्कथमत्राह यत्रेति। यत्र विषयाभिजात्यधनमदेषु स्त्रियो द्यूतमासवम् असुतर्पणं मद्यपानं भवति हिशब्दोऽवधारणे "हि हेतावबधारणे" इति यादवः। अन्यो नास्त्येव मद्यपानादयो भवन्त्येवेत्यर्थः। आसव इति पाठे मद्यमित्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तद्विधानामनुग्रहस्य योऽर्थः श्रीकृष्णदर्शनं तस्यै ॥ ७–८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

दृष्ट्वा च क्षीबाणौ मत्तौ सम बुद्धय न मत्तयोरनयोर्मम कृपा न फलवती भविष्यतीति तयोर्मदापनोदनार्थं दध्याविति भावः ॥५–६॥ अनुग्रहस्य अर्थः फलं भगवत्साक्षात्कारस्तदर्थं शापं दास्यन्निति यथा अतिवत्सलः पित्रादिकोऽतिमधुरं क्षीरादिकं भोजयिष्यन् पुत्रादिकमतिनिद्राणामालक्ष्य तन्निद्राभङ्गार्थं नखद्वयाघातं करोति तद्वदित्यर्थः। जगावित्यन्येपि श्रुत्वा स्वहितं जानन्त्विति भावः ॥ ७ ॥ जोष्यान् प्रियविषयान् जुषतः सेवमानस्य पुंसः श्रीमदान्धस्य आभिजात्यादिर्बुद्धिभ्रंशको हि निश्चयेन न भवति यथा श्रीमदोऽवश्यमेव बुद्धिं भ्रंशयतीत्यर्थः। अभिजातिः सत्कुलं तदुद्भवः आदिशब्दाद्विद्यादिमदः रजोगुणोद्भवत्वाद्रजोगुणः श्रीमदे सति यथा पापानि जायन्ते तथा नान्यत्रेत्याह—यत्रेति, चतुर्भिः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तौ क्षीबाणौ समबुद्ध्यत सम्यक् ज्ञातवान् ॥ ५ ॥ तन्मतत्त्वज्ञापकं गङ्गायामन्तः प्रविश्य युवतिभिश्चिक्रीडतुरित्युक्त-मथ द्वितीयं तन्मतत्त्वज्ञापकमाह – तं दृष्ट्वेति । तं दृष्ट्वा देव्यो वासांसि पर्यधुः गुह्यकौ नैव पर्यधत्तामिति ॥ ६ ॥ मदनाशपूर्वक-व्रजावासगोपगोपीश्रीकृष्णदर्शनरूपानुग्रहार्थम् ॥ ७ ॥ जोष्यान् प्रियान् विषयान् जुषतो जनस्य बुद्धिं भ्रंशयतीति बुद्धिभ्रंशः बुद्धिनाशहेतुः रजोगुणः कामक्रोधलोभजनकश्च श्रीमदात् संपज्जनितान्मदात् अ यो मदः आभिजात्यादिः सत्कुलविद्यादि-जनितो न हि किन्तु श्रीमद एव यत्र श्रीमदे स्त्री द्यूतं च आसवश्च उपादीयते स्त्रीद्यूतमिति समाहारद्वन्द्वः ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

दृष्ट्वा **क्षीबाणौ** मद्यमत्तौ समबुध्यते ॥ ५ ॥ **गुह्यकौ** तु **नैव पर्यधाताम्** ॥ ६ ॥ **अनुग्रहस्यार्थः** फलं हरिदर्शनं तदर्थं शापं दास्यन्निति यथातिवत्सलोऽपि पिता सुतस्य व्रणं विदार्य तत्र क्षारं निक्षिपंस्तदारोग्यमिच्छति तद्वदित्यर्थः । जगावित्येतन्निशम्य परेऽपि हितमाचरेयुरिति भावः ॥ ७ ॥ जोष्यान् विषयान् जुषतः सेवमानस्य जनस्य श्रीमदान्य आभिजात्यादिः सत्कुलता विद्यादिजनितो मदोऽ यो वा रजोगुणो रजःकार्यो हासादिर्बुद्धिभ्रंशो ज्ञानविनाशको नास्ति किन्तु श्रीमद एव तादृक्यत्र श्रीमदे स्त्रीप्रसङ्गद्यूतमद्यपानानि भवन्ति तथा नात्रेत्यर्थः ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

क्षीबाणौ मत्तौ । यद्यपि मत्ते शौण्डोत्कटक्षीबा इत्यमरेकारान्तः क्षीबशब्दः श्रूयते क्षीबृ मदे अकर्मकत्वात्कर्तरि क्तः अनुपसर्गात्फुल्लक्षीबकृशोल्लाघा इति निपातितः शब्दः । तथाप्युणादयो बहुलमित्युक्तेः कनिप्रत्यये अट्कुवेति णत्वे क्षीबाणाविति ज्ञेयम् । यद्वाणतोऽभिमुखमगच्छत् इत्याणौ क्षीबौ च ताविति शब्दपर्यन्ताविति वा । समबुद्ध्यत व्यज्ञासीत् ॥ ५ ॥ तं नारदं विवस्त्रा इति शापशङ्किता देव्यो वासांसि स्वानि स्वानि पर्यधुरधारयन् । विवस्त्रौ गुह्यकौ न पर्यधत्तां मत्तत्वात् ॥ ६ ॥ सुरात्मजावित्यनुग्रहार्थाय शापं दास्यन्नारद इदं वक्ष्यमाणं जगौ ॥ ७ ॥ नारदः किं जगावित्यत आह ॥ न हीति । विषयं जुषतः सेवमानस्य जोष्याद्विषयजाताच्छ्रीमदात्तथाऽभिजात्यजातात् । आदिपदेन विद्यादिमदाच्च । अन्यो रजोगुणो रजसो गुणो रागे विकारस्तत्स्पृहारूपो गुण इत्यगुणापरपर्यायो दोष इति यावत् न ह्यस्ति । तत्कार्यमाह ॥ बुद्धिभ्रंश इति । बुद्धेः सन्मतेर्भ्रंशो येन स विषयादिकाङ्क्षणमेव ज्ञानहानिदमिति भावः । बुद्धिभ्रंशेनैतदासक्तिरिति तत्राप्येतयोः स्वदृष्टा यत्कृता नष्टिस्ता-मादितो गृहीत्वाऽऽह ॥ यत्रेति । यत्र बुद्धिभ्रंशे जाते स्त्री एवं तरुणीपरवशता द्यूतासक्तिरासवो मद्यं चेति तदासक्तिरपि भवति । हिरवधारणे । नास्त्येवेति वा । स्त्र्याद्यासक्तिर्भवत्येवेति वाऽन्वयः । आसवमिति पाठेऽसूनामिदमासवं प्राणतर्पकं मद्यपाना-दिकमित्यर्थः । आसवो यज्ञ इत्यप्यान्तरङ्गिकोऽपि भावो देवर्षेः । अन्यथा हन्यन्ते पशव इति तत्पुरस्करणं न स्यादिति वर्णयाञ्चक्रुः ॥ ८ ॥

श्रीसुबोधिनी

विषयं निरूप्य शापहेतोः समागममाह **यदृच्छयेति, देवर्षिरिति** भाव्यर्थपरिज्ञानं देवयोनीनामुपकारकर्तृत्वं च ज्ञापितं, **भगवानिति** सर्वसामर्थ्यं, **कार्यभगवत्त्वानि भगवत्कृपासाध्यानि, तत्रेति** तस्यां गङ्गायां, **कौरवेति**सम्बोधनं महतोपि वंश उत्पन्नः प्रमाद्यतीति स्वदृष्टान्तेन ज्ञानार्थं, आदौ **देवावपश्यत्** ततः **क्षीबाणौ समबुध्यत, क्षीब**शब्दोकारान्तो नकारान्तोपि, **क्षीबा** मतः, देवानां स्वर्षिसम्मानाभावयोगात् ॥ ५ ॥ ततो यज्जातं तदाह **तं दृष्ट्वेति, नारदं दृष्ट्वा देव्योप्सरसो विवस्त्राः** सत्यः स्वस्मिन नारदे चैकैकं धर्मं ज्ञातवत्यः, स्वस्मिन् लज्जा जाता कामोद्बोधेनानिष्टजनकत्वे **शापशङ्का**, वस्त्रपरिधानेनाभयं भवतीति **शीघ्रं** यावदृषेः क्षोभो न भवति ततः पूर्वमेव **पर्यधुः, गुह्यकावपि विवस्त्रौ**, नग्नदर्शनमप्यमङ्गलं निषिद्धं स्त्रीसङ्गात् क्षोभकं च, तत्रापि **गुह्यकौ,** गुह्यं कं ययोः ॥६॥ तथा सति तयोः शापोपक्रममाह **तौ दृष्ट्वेति, सुरात्मजौ** भूत्वा **मदिरामत्ता-**वसुरकार्यं कृतवन्तौ, **श्रीमदेन चान्धौ** मनुष्यदोषं च प्राप्तवन्तौ, अत उभयोः फलं महापुरुषसान्निध्ये भवती "त्यत्यन्तनिन्दितै-र्दोषैर्जन्तुः स्थावरतां व्रजे" दित्येतयोः स्थावरत्वमेव युक्तमिति विचार्य **कर्मणैवैतद्** भविष्यतीति निश्चित्य कृपया परीतस्त**योर-नुग्रहार्थं शापं दास्यन्निदं** वक्ष्यमाणं हेतुभूतं **जगौ,** अन्यापराधे बालकेन कृते पित्रा शिक्षणं कर्मसाध्यमनिष्टमपि फलं नात्यन्तं दुःखदं भवतीति कर्माधिकारिफलभावनातः पूर्वमेव स्वयं **शापं** दत्तवान् , महापुरुषदृष्ट्योद्बुद्धं च जातं, अतो न वने वृक्षौ जातौ, वृक्षाणां मध्येऽर्जुनजातीयानां मुक्तिः प्रसिद्धा "नर्मदातीरसञ्जाताः सरलार्जुनपादपा नर्मदातोयसंस्पर्शाद् यान्ति ते परमां गति" मितिवाक्यात् , तत्रापि गवां छायाजनकौ, महतो नन्दस्याभिज्ञापकौ च भविष्यतः, फलं तूत्कृष्टं भविष्यत्येवातः कर्म-फलाच्छापः समीचीनः ॥ ७ ॥ ननु शापे दत्ते कदाचिदुत्कृष्टकर्मापि सम्भवति ततः पापक्षये मुक्तिरेव कदाचिद् भवेत् सत्सङ्ग

भक्तिर्वा ततः किमिति शापं दत्तवानित्याशङ्क्य तयोः सत्कर्मसत्सङ्गौ दुर्लभाविति तदर्थं तयोर्विद्यमानदोषस्य तदुभयाजनकत्वं निरूपयति द्वादशभिर्न **ह्यन्य** इति, सन्मार्गः सत्सङ्गो वा सद्बुद्ध्या भवति, श्रीमदेन तु सद्बुद्धिः कदापि नोत्पद्यते, तदाहान्यो **जोष्यान् जुषतः** प्राणिनो बुद्धिभ्रंशहेतुर्न भवति, बुद्धिरत्र सात्त्विकी "सत्त्वात् सञ्जायते ज्ञान"मिति, तस्य बाधकं त्रिविधं गुणा विरुद्धा आश्रयनाशकमाश्रयविरोध्यन्तरजनकं च, तदत्र श्रीमदात् त्रयं भवति, यद्यपी "न्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनश्चेतनां हरते बुद्धेः स्तम्भस्तोयमिव ह्रदा"दिति विषयमात्रसेवनमेव **बुद्धिभ्रंश**हेतुस्तत्रापि यथा **श्रीमदाद्** बाह्याभ्यन्तरदोषसंसर्गरूपादन्यः प्रकारान्तरेणोत्पन्नो विषयानुभवः, साधनस्य द्वन्द्वत्वाभावात् परिहार्यो भवति, अयं त्वपरिहार्यः, यतस्तेनान्तर्बहिर्दोषौ जन्येते इत्याहा**भिजात्यादि**रिति, "विद्यामदो धनमदस्तथैवाभिजनो मद एते मदा मदान्धानां त एव हि सतां दमा" इति, तत्र धनमदो मध्यम उभयमदयोः साधको यथा मध्यमं गृहं दग्धं सत् पार्श्वस्थितयोरपि दाहं सम्पादयति, **आभिजात्यस्यादि** श्रीमदस्ततोऽप्यनर्थसम्पादकः, तस्य मदान्तरापेक्षया दुष्टविषयजनकत्वं हेतुत्वेनाह **यत्र स्त्रीद्यूतमासव इति**, अन्यान्यपि दूषणानि वक्ष्यति, ततः प्रथमं दोषत्रयमाह यदपरिहार्यं, प्राणिनः सर्वहेतवः कायवाङ्मनांसि, तत्र **स्त्री** कायनाशिका द्यूतमनृतं वाङ्नाशकं **आसवो** बुद्धिनाशकः,**आसवो** मदिरा, "द्यूतं पानं स्त्रिय" इत्यधर्मपदा अप्येते, तत्रापि प्रथमं **स्त्री**निर्देशस्तेष्वप्याधिक्यख्यापकः, "न तथास्य भवेन् मोहो बन्धश्चान्यप्रसङ्गतो योषित्सङ्गाद् यथा पुंसो यथा तत्सङ्गिसङ्गत" इति, श्रीमदे त्वेते भवन्त्येव धनमदकृतस्त्रियोसत्या एव भवन्ति ॥ ८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

यदृच्छयेत्यत्र ननु नारदस्य भगवत्त्वं कुत इत्यत आहुः **कार्यभगवत्त्वानी**ति "युक्तं भगैः स्वैरितरत्र चाध्रुवै"रितिवाक्याद् भगवद्भिन्नेषु भगवत्त्वं भगवद्दत्तत्वात् **कार्य**मेव, बहुवचनं त्वेकद्वित्रिदानाभिप्रायं, तत्र **विष्णुपुराण** उक्तं "मुत्पत्तिं च निवृत्तिं च भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति", अतो भगवत्कृपातो **भगवत्त्वमित्यर्थः**, दर्शनमात्रेणापि मत्तत्वज्ञापकं रूपमाहु**र्देवानामि**त्यादि ॥ ५ ॥ **तं दृष्ट्वे**त्यत्र **वस्त्रपरिधाने** नेत्यत्र **नकारो** भिन्नः, गुह्यं **कं ययोरिति** वैषयिकं सुखं **ययो**रित्यर्थः ॥ ६ ॥ **तौ दृष्ट्वे**त्यत्र**ात** इत्यस्यैति **विचार्ये**त्यनेन सम्बन्धः, **उभयो**रित्याद्यासुरभावमनुष्यदोषयोः फलं, महापुरुषेषु भगवतः सत्त्वात् सर्वफलदातृत्वं च तेषां **सान्निध्ये** भवतीतिहेतो**र्दयोत्पत्तौ** हेतुमाहु**रन्यापराध** इत्यादि, अपराधस्योत्कटत्वेन बाल्याभावेन च पितुरपि त्यागार्हाविति दयोत्पादकौ जाताविति भावः, ननु स्थावरत्वं तु तच्छीलः दुष्कर्मणैव भविष्यतीति किं शापेनेत्यत आहुः **कर्मसाध्यमि**त्यादि, **कर्माधिकारिफलभावनातः पूर्व**मिति **कर्मण्यधिकरो**ति **कर्माधिकारी** तस्य या **फलभावना** फलोत्पादनात् प्राप्तिरितियावत् **ततः पूर्वं**, तथा च "नरकस्थोपि वै जन्तु"रितिवाक्यात् कर्मफलेपि नारकी निवृत्तिरिति ततः फलशेषो जन्मान्तरेनुवर्तते दत्ते तु शापे दुःखभूयस्त्वेन कर्मणो निःशेषनाश इति तदर्थं शाप इत्यर्थः, हेत्वन्तरमाहु**र्महापुरुषे**त्यादि, कर्मफलाच् छापफलस्योत्कर्षं स्फुटीकुर्वन्त्य**तो ने**त्यादि ॥ ७ ॥ **न ह्यन्य** इत्यस्याभासे पूर्वं **मुक्तिपदं** संसारनिवृत्तिबोधकमपरं तु सायुज्यस्यैति ज्ञातव्यं, द्वितीये **भक्ति**रितिपाठे तु न कश्चित् सन्देहः, श्रीमदादन्य **आभिजात्यादी रजोगुणो बुद्धिभ्रंशो**नेत्यत्र **रजोगुण** इति **रजसो** धर्म इत्यर्थकमाभिजात्यादिविशेषणं तत्र **रजोगुणशब्देन रजोधर्मो**भिप्रेतः, ते च धर्मा एकादशस्कन्धे "काम ईहा मदस्तृष्णा स्तम्भ आशीर्भिदा सुखं मदोत्साहो यशः प्रीतिर्हास्यं वीर्यं बलोद्यम" इत्यनेनोक्ताः, ते सर्वे यथासम्भवमाभिजात्यादिनोत्पाद्यन्त इति तस्य **रजोगुणत्व**मुक्तं, एवं सति तस्य मादकत्वमत्राभिप्रेतं, तदाहु**र्गुणा विरुद्धा** इत्यादि, अन्यद् द्वयमग्रे **स्फुटी**भविष्यति तत्र **स्त्री कायनाशिके**त्यादिना, ननु स्त्रियो दुष्टत्वे सद्भिः किमर्थं विवाहादि क्रियत इत्यत आहु**र्धनमदे**त्यादि, तथा च न धर्मार्थी स्त्रियस्तथाविधा इतिदोषः ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

यदृच्छयेत्यत्र **देवानामिति** स्वर्षेर्नारदस्य सम्माननं नमस्कारादिना, तदभावो देवानां न सम्भवत्यतो मत्ताविति ज्ञातवानित्यर्थः ॥५॥ **तं दृष्ट्वेत्यत्र कामोद्बोधे**नेति अनिष्टजनप्रकारकथनं, धान्येन धनमितिवदभेदे तृतीया ॥६॥ **तौ दृष्ट्वेत्यत्र कर्माधिकारी**ति कर्मभिर्निन्दितैरधिकारिणो जन्तोः फलं स्थावरता तस्य **भावना** उत्पादना कर्मणा फलोत्पत्तेः **पूर्वमेवे**त्यर्थः, ननु विधिसम्बन्धाभावे फलासम्भव इत्याशङ्क्याहुः **महापुरुषेति** महापुरुषदृष्ट्यैव फलमुद्बुद्धं नातो विध्यपेक्षेति भावः ॥ ७ ॥ **न ह्यन्य** इत्यस्याभासे **दोषस्येति** श्रीमदस्येत्यर्थः, एतस्य तदुभयाजनकत्वं द्वादशानामित्यर्थः, तत्र बुद्धिभ्रंशद्वारा तदजनकत्वमेतच्छ्लोकार्थः, दोषान्तरद्वारा तदजनकत्वमग्रिमाणामर्थ इति विभागः, श्रीमदे एतदुभयाजनकत्वं शापहेतुतावच्छेदकमतः शापहेतुर्द्वादशभिरिति पूर्वोक्तेन न विरोधः, **सद्बुद्धिति** बुद्धिपदेनान्तःकरणं बुद्धिः सती ज्ञानजनिका नोत्पद्यते इत्यर्थः, **तदाहेति** सत्याबुद्धेरनुत्पादनं भ्रंशपदेनाहेत्यर्थः, बुद्धेः सतीत्वे चित्ताश्रितज्ञानजननात् तस्याश्चित्तत्वभवनात् ऊर्ध्वभावः, **असतीत्वे** तु तस्या मनोरूपत्वभवनाद् भ्रंशः अधः पात एवेति भावः, **बुद्धिभ्रंशहेतु**रिति तथा च मूले बुद्धिं भ्रंशयतीति बुद्धिभ्रंश इति विग्रहः, कर्मण्युपपदे अण्, सत्याबुद्धेर्ज्ञानजनकत्वे प्रमाणमाहुः **"सत्त्वात् सञ्जायते"** इति, तथा च सत्त्वकार्यस्य ज्ञानस्या-

भावादव्यभिचरितकारणस्य सत्त्वस्याभावोनुमेय इति भावः, **तस्येति** चित्ताश्रितस्य ज्ञानस्य, **त्रिविधं बाधकं** जनने प्रतिबन्धकमतो बुद्धिभ्रंशकमित्यर्थः, गुणा इति ज्ञानस्य गुणा विषयाः, तथा च **विरुद्धा** निषिद्धा विषयाश्चित्ताश्रितज्ञानप्रतिबन्धका इत्यर्थः, **विषयभोगे स्त्री मुख्येति मूले स्त्रीग्रहण, आश्रयस्य** चित्तस्य नाशकं द्यूतं, द्यूतेनान्तःकरणाशुद्ध्या तस्य चित्तत्वं नश्यतीत्यर्थः, **आश्रये चित्ते** यथार्थज्ञानविरोध्यन्यत् ज्ञानं जनयत्यासवः, मदे सत्यन्यदेव भासत इत्यर्थः, तथा च श्रीमदेन त्रिविधबाधकजननाद् बुद्धिः सती ज्ञानजनिका नोत्पद्यते, बुद्धेर्ज्ञानजननरूपसतीत्वं न भवतीति चित्तत्वरूपोर्ध्वभावान् मनस्त्वरूपाधःपातलक्षणो भ्रंशो भवतीत्यर्थः, तथा च बुद्ध्यभावान् न सन्मार्गसत्सङ्गाविति भावः, मनोबुद्धिश्चितमितिक्रमः अहङ्कारस्त्रिष्वप्यनुस्यूतः, एवमन्तःकरणचतुष्टयं ज्ञेय, **दोषसंसर्गरूपादिति** भवति तथान्येन न भवतीतिशेषः, आभिजात्यादेरित्यस्याभासमाहुः **अन्य** इति, **विद्यामद** आन्तरो दोष **आभिजनो मदो** बाह्यदोषः **तेष्वप्याधिक्येति तेषु** त्रिष्वपि मध्ये **आधिक्यव्यापकः, स्त्रीणा**मितिशेषः ॥ ८ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

न ह्यन्यो जुषतो जोष्यानित्यत्र विद्यामद इति का० ८४३ ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'महतो वंशे उत्पन्नोपि प्रमाद्यतीति, स्वदृष्टान्तेन ज्ञेयम्' इति सूचयन् सम्बोधयति—कौरवेति । यदृच्छया अकस्मादेव तत्रागतो नारदस्तौ देवावपश्यत्, दृष्ट्वा च क्षीबाणौ मत्तौ समबुद्ध्यतेत्यन्वयः । 'भाव्यर्थपरिज्ञानं देवयोनीनामुपकारकर्तृत्वं' च सूचयन्नाह—देवर्षिरिति । सर्वकरणसामर्थ्यं सूचयन्नाह—भगवानिति । तथाबधे हेतुमाह तमिति । देव्यः अप्सरसो यतो विवस्त्रा, अतस्तं नारदं दृष्ट्वा व्रीडिताः शापशङ्किताश्च शीघ्रं वासांसि पर्यधुः । विवस्त्रौ तौ गुह्यकौ तु नैव वस्त्रं पर्यधत्तामिति ॥ ५–६ ॥ मदिरया मत्तौ श्रीमदेन चान्धौ विवेकशून्यौ । 'न चैतत्तयोर्युक्तम्' इत्याशयेनाह—सुरात्मजाविति । एवंभूतौ तौ दृष्ट्वा नारदस्तयोरनुग्रहार्थाय शापं दास्यन्निदं वक्ष्यमाणं जगौ । नच 'शापानुग्रहयोः परस्परविरोधाच्छापस्य कथमनुग्रहार्थत्वम्' इति शङ्क्यम्, यदि वक्ष्यमाणप्रकारकं शापं न दद्यात्तदा 'अत्यन्तनिन्दितैर्दोषैर्जन्तुः स्थावरतां व्रजेत्' इति वाक्यात् स्वकर्मवशाद्यत्रकुत्र तयोः स्थावरत्वं स्यादेव, तत्र च श्रीकृष्णदर्शनाद्यभावेन सर्वदोषनिवृत्तिपूर्वकभक्त्यादिपुरुषार्थलाभो न स्यादतः शापस्त्वनुवादमात्रम् । तथैव वक्ष्यति—अतोऽर्हतः स्थावरतामिति । वस्तुतस्त्वनुग्रह एव, अतो न विरोधः कश्चित् । अनुग्रहो मदनाशः, अर्थश्च श्रीकृष्णदर्शनम्, तदर्थम् । यद्वा अनुग्रहस्य योऽर्थः फलं भगवद्दर्शनादि, तदर्थम् । तत्रापि शापे हेतुर्मदिरेत्यादि विशेषणद्वयम्, अनुग्रहे हेतुः सुरात्मजत्वम् 'इति विवेकः' वस्तुतः क्रोधाभावसूचनार्थं । 'जगौ' इत्युक्तम् । तदपि गानं स्वमनस्येव बोध्यम्, तयोः प्रमत्तयोः स्त्रीणां च विवकहीनानामग्रे कथनस्य प्रयोजनाभावात् ॥ ७ ॥ तद्वाक्यान्येवाह—पञ्चदशभिः । तत्र प्रथमं श्रीमदं निन्दति—नहीति द्वयेन । जोष्यान् प्रियान् विषयान् जुषतः सेवमानस्य पुंसो यथा श्रीमदो बुद्धिभ्रंशः बुद्धिं भ्रंशयतीति तथा विवेकनाशको भवति, तथा ततोऽन्यः आभिजात्यादिः अभिजातिः सत्कुलजन्म तदुद्भवः आभिजात्यो मदः आदिशब्दात् 'जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्' इत्यादिपूक्तः विद्यादिजनितो मतः तथाऽन्यो वा रजोगुणः रजःकार्यभूतो हास्यहर्षादिरूपो बुद्धिभ्रंशकरो नहि भवति । 'कुत एवं' तत्राह—यत्रेति । यत्र यस्मिन् श्रीमदे सत्येव धर्मपादचतुष्टयनाशकाधर्मपादचतुष्टयस्त्र्यादिसम्बन्धो भवतीत्यर्थः ॥ ८ ॥

अन्वितार्थप्रकाशिका

यदृच्छयेति ॥ हे कौरव ! यदृच्छयाऽकस्मादेव तत्रागतो भगवान् देवर्षिर्नारदः तौ देवौ देवयोनी गुह्यकौ अपश्यत् । दृष्ट्वा च क्षीबाणौ मतौ समबुध्यत ॥ ५ ॥ तं दृष्ट्वेति ॥ देव्यः अप्सरसो यतो विवस्त्रा अतस्तं नारदं दृष्ट्वा व्रीडिताः शापशङ्किताश्च शीघ्रं वासांसि पर्यधुः । विवस्त्रौ तौ गुह्यकौ तु नैव वस्त्रं पर्यधातामिति एवकारेण देवीभिः प्रेरितावपि न पर्यधाताम् ॥ ६ ॥ ताविति ॥ सुरस्य देवसत्त्वस्य कुवेरस्यात्मजौ अपि श्रीमदेनान्धौ अतः मदिरामत्तौ तौ दृष्ट्वा नारदस्तयोरनुग्रहार्थाय अनुग्रहो मदनाशः अर्थः श्रीकृष्णदर्शनं तस्मै शापं दास्यन्निदं वक्ष्यमाणं जगौ ॥ ७ ॥ न हीति ॥ जोष्यान् तर्पकान् विषयान् जुषतः सेवमानस्य पुंसो यथा श्रीमदो बुद्धिभ्रंशः बुद्धिं भ्रंशयतीति यथा विवेकनाशको भवति तथा श्रीमदादन्यः आभिजात्यादिः अभिजातिः सत्कुलजन्म तदुद्भवः आभिजात्यो मदः आदिशब्दात् ऐश्वर्यविद्याकुलादिजनितो मदः तथान्यो वा रजोगुणः रजःकार्यभूतो हास्यहर्षादिरूपो बुद्धिभ्रंशकरो न हि भवति । किन्तु श्रीमद एवेति तदाह । यत्र यस्मिन् श्रीमदे स्त्री द्यूतम् आसवश्चेत्याद्याः भवन्ति । जोष्यानिति । "जुष परितर्पणे" इति चुरादेर्ज्ञेयम् । अतो न क्यप् शङ्क्यः । जुषत इति शता आर्षः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र मंदाकिन्यां यदृच्छया सहजस्वभावेन देवौ अपश्यत तदनंतरं क्षीवाणौ मदोन्मत्तौ समबुध्यत ज्ञातवान् ॥ ५ ॥ कथं ज्ञातवांस्तत्राह वासांसि वस्त्राणि पर्यधुः धृतवंत्यः विवस्त्रौ नग्नौ नैव पर्यधाताम् ॥ ६ ॥ अनुग्रहार्थाय अनुग्रहो हरिस्वरूप-दर्शनं च अर्थस्तद्भक्तत्वप्राप्तिश्च मदनाशो वा तयोः समाहारस्तदर्थम् ॥ ७ ॥ न हीति जोष्यान् सेव्यान् प्रियविषयान् जुषतः सेवमानस्य नरस्य श्रीमदादन्यः अभिजात्यादिः सत्कुलश्रुतकर्मादिजनितो मदः बुद्धिभ्रंशकः सन्मतिनाशको न ह्यस्ति तथा श्रीमदादन्यो रजोगुणो रजःकार्यो हास्यहर्षादिरूपोपि बुद्धिभ्रंशको न ह्यस्ति किंतु श्रीमदा एव बुद्धिभ्रंशकाः यत्र श्रीमदे आसवो मद्यपानम् ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यदृच्छयेति ॥ हे कौरव परीक्षित्, भगवान् देवर्षिः नारदः, यदृच्छया च दैवेच्छयव, तत्र आगतः सन्, देवौ नलकूबर-मणिग्रीवौ, अपश्यत्। क्षीबाणौ मदान्धौ च, समबुद्ध्यत ज्ञातवान्। 'विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः' इत्यमरे यक्षाणां देवत्वोक्तिः ॥ ५ ॥ कुत एतौ क्षीबाणाविति बुद्धं तत्राह ॥ दृष्ट्वेति ॥ देव्यः अप्सरसः, तं नारदं दृष्ट्वा, यतः विवस्त्राः, अत एव व्रीडिताः लज्जिताः, शापशङ्किताश्च सत्यः, वासांसि, शीघ्रं पर्यधुः परिहित-वत्यः। विवस्त्रौ नग्नावपि, गुह्यकौ कुबेरसुतौ, नैव पर्यधत्तां किं तु नग्नावेवासात् ॥ ६ ॥ ताविति ॥ सुरात्मजौ, भगवद्भक्तस्य कुबेरस्य पुत्रौ सन्तावपीत्यर्थः। तौ नलकूबरमणिग्रीवौ, मदिरामत्तौ च दृष्ट्वा, नारद इति शेष। तयोः, अनुग्रहार्थाय मदनाश-रूपमनुग्रहं विधातुमित्यर्थः। शापं, दास्यन् दातुमित्यर्थः। इदं वक्ष्यमाणं, जगावाह। अनुग्रहो मदनाशः, अथश्च श्रीकृष्ण-दर्शनं, तदर्थमित्यन्ये ॥ ७ ॥ तदेवाह ॥ नेति ॥ जोष्यान् प्रियान् विषयान्, जुषतः सेवमानस्य पुंसः, श्रीमदात् संपत्प्रयुक्त-मदात्, अन्य इतरः, आभिजात्यादिः सत्कुलादिजनितः, आदिशब्देन विद्यादिसंग्रहः। आभिजात्यादेजनितो मद इत्यर्थः। रजोगुणः, रजोगुणकार्यकामक्रोधहास्यहर्षप्रभृतिदोषाश्च, तथा बुद्धिभ्रंशः श्रीमदवन्मतिविनाशकरः, न हि। किं तु श्रीमद एव नितरां बुद्धिभ्रंशकरः। अयं भावः। विद्याधनकुलौन्नत्यजास्त्रयो मदाः सन्ति, ते सर्वेऽप्यनर्थकर्तृत्वे तु तुल्या एव तत्र धनज-मदे बुद्धिभ्रंशकर्तृतारूपो महान्विशेषः। न केवलं श्रीमदे एतावानेव विशेषः, किं तु यत्र श्रीमदे सति, स्त्री पराङ्गनाङ्गसङ्गप्रवृत्तिः, द्यूतं पाशकक्रीडनं, आसवो मधुपानं च, किं बहुना श्रीमदतः सर्वाण्यपि व्यसनानि भवन्तीति ॥ ८ ॥

श्रीहरिसूरिविचितं श्रीभक्तिरसायनम्

यदृच्छयेति : १०.१०.५.

प्रतिकूलेऽनुकूले वा विधौ तदनुसारतः। योगोऽपि सहसैवेति स्फुटं विध्युदितोदयात् ॥ ६ ॥

तं दृष्ट्वेति : १०.१०.६.

यद्योगाद् वयमीदृगात्मनि सुखं प्राप्ताश्च यः सर्वदैवास्मत्कीर्तिलताप्रसारणचणो यो गुह्यकान्तस्थितिः।
तस्यानङ्गमहीपतेर्गृहमिदं गोप्यं न कार्यं कथं तत्पोष्याभिरितीव पर्यधुः वासांसि देव्यो हि ताः ॥ ७ ॥

द्विषल्लक्ष्यं यथा न स्यात्तथा रक्ष्यं प्रभोर्गृहम्। थुक्कमालक्ष्य कामर्षिवैरमासंस्तथाविधाः ॥ ८ ॥

यत्कार्यं विहितं फलाय भवति प्रायस्तदेवाचरेत् प्राज्ञो जातु न वाञ्छितार्थविधुरं लोकेष्वितीदृग् दृशौ।
वस्त्राच्छादितगुह्ययोरपि न नावाच्छाद्यते गुह्यकप्राकट्यं तदनेन किन्त्विति धिया तौ तादृशौ तस्थतुः ॥ ९ ॥
लोके शास्त्रेष्वपि यद्वस्तु निगूह्यं न तत्स्फुटीकार्यम्। दोषो विहिते तु महान् विवस्त्रगुह्यकपदादिदं ध्वनितम् ॥ १० ॥

न ह्यन्य इति : १०.१०.८.

काममोहाऽनृतेष्वेकोऽप्यलमन्यायकर्मणी। स वाच्यः श्रीमदः कैर्वा त्रयो यत्र विराजिताः ॥ ११ ॥

राजस्त्रेवमिदं यदत्र हि धनोन्मादोऽघदः सर्वदा नानानर्थनिदानमक्षिण वितते सूर्यागमेऽप्यान्ध्यकृत्।
तस्माल्लोकसुखार्थिनाऽपि गिरिजानाथेन मन्ये धनं नित्यानर्थकृदित्यवेक्ष्य बहुधा तत्त्याग एवादृतः ॥ १२ ॥

यत्पापर्धिसुरादुरोदरपरस्त्रीहाऽपहाराः सदा संत्याज्या नयकोविदेन विदुषा श्रेयः स्वमाकाङ्क्षता।
इत्येतद्धि निषेधशास्त्रमवनीपाले प्रवृत्तं च यत् तच्छास्त्रस्य निदानमेतदखिलैरुट्टङ्कितं नापरम् ॥ १३ ॥

पापर्धेः फलमाप्तवान् दशरथो मद्यादिमौ भूरुहौ द्यूतात् पूर्वभुवस्तनाप्तगहनाः सुन्दश्च कान्तेहया।
सीताया हरणेन पङ्क्तिमुख इत्येतत्त्वया ज्ञातमप्यर्वाक् सर्वमथापि हन्त कथितं धृत्वोपदेशक्रमम् ॥ १४ ॥

कृष्णप्रिया

कुरु राजा के पुण्य वंशज राजन् ! भगवदिच्छा से वहाँ से देवर्षि भगवान् नारदजी जा निकले। नारदजी ने उन दोनों देवों को देखा तो वे दोनों नशे में चूर थे ॥ ५ ॥ देवर्षि नारदजी को देख वस्त्रविहीन देवाङ्गनाएँ लज्जित हो गयीं और शाप के भय से देवाङ्गनाओं ने तो अपने अपने वस्त्र धारण कर लिये लेकिन वे दोनों इतने मतवाले हो गये थे कि वैसे ही विवस्त्र खड़े रहे ॥ ६ ॥ देव कुबेरजी के उन दोनों आत्मजों को इस प्रकार धनमद से अन्धे और मदिरा पान से मतवाले देख उन पर अनुग्रह करने की दृष्टि से महर्षि शाप देते हुए कहने लगे ॥ ७ ॥ श्रीनारदजी ने कहा—विषयों का प्रीति से सेवन करने वाले पुरुषों का मतिनाश जितना धनमद से होता है उतना कुल यौवन ज्ञान आदि के मद से नहीं और रजोगुण के कार्यभूत उपहास आदि नहीं होता, जब कि धनमद में परस्त्री वारांगना, मदिरा पान जूआ भी रहता है ॥८॥

हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः । मन्यमानैरिदं[1] देहमजरामृत्यु नश्वरम् ॥ ९ ॥
देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितम् । भूतध्रुक्[2] तत्कृते स्वार्थं किं वेद निरयो यतः ॥ १० ॥
देहः किमन्नदातुः स्वं[3] निषेक्तुर्मातुरेव [4]वा । मातुः पितुर्वा [5]बलिनः क्रेतुरग्नेः शुनोऽपि वा ॥ ११ ॥
एवं साधारणं देहमव्यक्तप्रभवाप्ययम् । को विद्वानात्मसात् कृत्वा हन्ति [6]जन्तून्कृतेऽसतः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—निर्दयैः अजितात्मभिः इदं नश्वरं देहं अजरामृत्यु मन्यमानैः यत्र पशवः हन्यन्ते ॥ ९ ॥ देवसंज्ञितं अपि अन्ते कृमिविट्भस्मसंज्ञितं तत् कृते भूतधृक् किं स्वार्थं वेद यतः निरयः ॥ १० ॥ देहः किं अन्नदातुः ! किं स्वं निषेक्तुः वा मातुः एव, वा ? मातुः पितुः ? वा बलिनः क्रेतुः अग्नेः अपि वा शुनः ॥ ११ ॥ एवं अव्यक्तप्रभवाप्ययं साधारणं देहं आत्मसात् कृत्वा कः विद्वान् असतः कृते जन्तून् हन्ति ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इमं नश्वरं देहमजरामृत्यु अजरश्च अमृत्युश्च यथा तथा मन्यमानैः ॥ ९ ॥ नरदेवभूदेवसंज्ञितमपि श्वादिभिर्भक्षितं विट्संज्ञितं दग्धं भस्मसंज्ञितमन्यदा कृमिसंज्ञितं तत्कृते तदर्थं यो भूतध्रुक् भूतद्रोग्धा यतो भूतद्रोहान्निरयो भवति स किं स्वार्थं वेद न वेदैवेत्यर्थः ॥ १० ॥ इदानीं देहेऽहंभावोऽपि न घटत इत्याह । देह इति । निषेक्तुः पितुः मातुः पितुर्वा मातामहस्य पुत्रिकाकरणे । केतुर्मूल्यं दत्त्वा ग्रहीतुः ॥ ११ ॥ अव्यक्तप्रभवाप्ययमव्यक्तात्प्रभवस्तस्मिन्नेवाप्ययो यस्य तमात्मसात्कृत्वा आत्मेति मत्वा । असतो मूढाद्दते ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यत्र येषु स्त्र्यादिषु सत्सु पशवो भूतानि "पशुर्वै स देवानाम्" इति श्रुतेः । पशुशब्दो मनुष्येऽपि वर्तते । हननमपि मारणधनहरणप्रवासनापमानादिभेदाद्बहुविधं ज्ञेयम् । यथाऽतिवत्सलो जनकादिरतिमधुरं क्षीरादिकं भोजयितुं पुत्रादिकं निद्राणमालक्ष्य तन्निद्राभंगार्थं नखद्वयाघातं करोति तद्वत् ॥ ९ ॥ निरयो निर्गतोऽयः सुखं यतः स निरयो नरकः । यद्वा—तत्कृते अंतः कामक्रोधलोभाक्रांतचित्ततया स्वयमज्ञानीभूय विहितत्यागपूर्वकं लोके निजज्ञानितां प्रकट्य लोकान्कर्मतः प्रचाव्याहं ब्रह्मास्मीति मामेवेश्वरं जानीत "तत्त्वमसि" इति श्रावयित्वा च त्वमपीश्वरोऽसीति देहपूजां कारयितुं भूतं नित्यभूतं परमात्मानं स्वस्य तत्तुल्यभावनया गृह्णतीर्ष्यतीति भूतध्रुक् स किं स्वार्थं स्वस्यानीशतां वेद यतो भगवद्द्रोहान्निरयो भवति राजाभिमानितंतुवायस्य राजदंडवधमदंडो भवतीति भावः । 'भूतध्रुक् को लभेत शम्' इति 'तदवध्यायी न कश्चित्सुखमेधते' इति च कंसभार्याभिर्वक्ष्यमाणत्वात । इत्यर्थ इति । स तु सर्वथा स्वार्थापरिज्ञानीति भावः ॥ १० ॥ अन्नदातुर्नित्यं भोजनप्रदस्य निषेक्तुः गर्भाधानकर्तुः पितुरिति स्वामिचरणाः । बलिनो बलात्कारेण ग्रहीतू राज्ञादेः क्रेतुर्द्रव्यं दत्त्वा मौल्येन ग्रहीतुः । अग्नेः अंत्ये तस्य तत्रैवाहुतिनिक्षेपात् । शुन इत्युपलक्षणं गृध्रादेरपि । आहुत्यभावे तैरेव भक्ष्यत इति तेषामपि स्वत्वं तत्र । अपि वेत्युक्तेः मृदि निखनने कृम्यादिभिर्भक्ष्यते तदतस्तेषामपि स्वत्वमिति ज्ञेयम् ॥ ११ ॥ एवमुक्तप्रकारेण । साधारणमनेकस्वत्वास्पदम् । अव्यक्तात्प्रकृतेः "अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव" इति स्मृतेः ॥ १२ ॥

---

१. रिम—श्रीधर. वंशी. । २. छकुरुते—विज. । ३. स्यान्निषेक्तुः—विज. । ४. च—श्रीधर. वंशी. ; वा—वीर. विज. । ५. क्रेतुर्वा बलिनोऽग्नेः शुनोऽपि—गी. पु. टी. । ६. जन्तून्—श्रीधर. वंशी. सुदर्शन. वीर. विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च महापापजनकं परद्रोहलक्षणं सुदुष्टं कर्मात्र घटत इत्याह—हन्यन्त इति। भोजनसुखार्थं पशव इति साक्षात् भक्ष्याभक्ष्यविचारोपि निरस्तः। निदयरसद्भिः यतः अजितेन्द्रियैः अत एव इमं साक्षाज्जरादिधर्मकमपि तत्र च प्रतिक्षणपरिणामित्वेन नाशशीलमपि अजरामृत्युवस्त्विति मन्यमानैः टीकायाम् अजरश्च यो देहविशेषः पश्चान्मृत्युरप्यन्यः तयोः द्वन्द्वैक्यं तद्वन्मन्यमानैरित्यर्थः ॥ ९ ॥ स्वस्य अर्थं हितमित्यर्थः ॥ १० ॥ देहे ममता निर्द्धारणमपि न घटेत बहुविप्रतिपत्तेरित्याह देह इति—स्वं धनं स्वीयमित्यर्थः। बलिनः बलाद्विष्टयाद्यर्थं गृह्णतः एवशब्दस्यापि पूर्वैरप्यन्वयः क्रेतुर्वा बलिनोऽग्नेरिति वा बलिनः क्रेतुरग्नेरिति वा पाठः ॥ ११ ॥ एवं पूर्वोक्तप्रकारेण देहं साधारणमपि विद्वान् जानन् तथा अव्यक्त प्रधानवत्कारणावस्थायामविविक्तं भूतपञ्चकं तत्र प्रभवाप्ययौ यस्येत्यापातमात्रप्रतीतमपि जानन् को नाम तमात्मत्वेनाङ्गीकृत्य जन्तून् हन्ति न कोपि असन्तस्तु जानन्तोऽपि घ्नन्तीत्यर्थः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

परमपि महापापजनकं परद्रोहलक्षणं सुदुष्टं कर्मात्र घटत इत्याह—हन्यन्त इति भोजनसुखार्थं पशव इति भक्ष्याभक्ष्यविचारोऽपि निरस्तः। निर्दयैरसद्भिर्यतोऽजितेन्द्रियैरत एवं साक्षाज्जरा मरण धर्म्मकमपि, तत्र च नश्वरं प्रतिक्षणं रागादिना नाशशीलमप्यजरामृत्यु वस्त्विति मन्यमानैः ॥ ९ ॥ स्वस्थार्थं हितमित्यर्थः ॥ १० ॥ देहे ममतापि न घटेतेत्याशयेनाह—देह इति। स्वं स्वत्वास्पदम्। बलिनो बलाद्विष्ट्याद्यथं गृह्णतः एवार्थे अपिशब्दः, अस्य एव शब्दस्यापि पूर्वैरप्यन्वयः। एवमन्नदात्रादीनां प्रत्येकम्। स्वत्वनिर्द्धाराद्देहस्यात्यन्तानात्मीयतोक्ता ॥ ११ ॥ अव्यक्तं प्रधानम्, तत्प्रभवाप्ययत्वेन मायिकत्वम्, तथाप्यात्मेति मत्वा, यद्वा, अव्यक्तादीश्वरात् प्रभवाप्ययौ यस्येत्यस्वाधीनत्वमुक्तम्, तथाप्यात्मीयमिति मत्वा, विद्वान् तत्तत्त्वं जानन्नित्यर्थः, यद्वा, अविद्वानपि को हन्ति ? हन्यमानस्य साक्षाद्दुःखदर्शनात्। तच्चाग्रे वक्ष्यति। असतः श्रीमद्दुर्बुद्धेर्विना ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अदग्धाऽभक्षितस्य, श्वादिभिर्भक्षितस्य, दग्धस्य, च देहस्य कृमिविड्भस्मावस्थाः भवन्ति भूतध्रुक् भूतद्रोही यतो द्रोहात् ॥ १० ॥ निषेक्तुर्गर्भाऽऽधातुः क्रेतुः द्रव्यप्रदानेन स्वीकर्तुः बलिनः बलात् गृहीतुः ॥ ११ ॥ ऋतेऽसतः असता विना ॥ १२-१३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च यत्र श्रीमदे सतीमं देहं जरादिरहितं मन्यमानैरत एवाजितेन्द्रियैरत एव निर्दयैः पशवो हन्यन्ते ॥ ९ ॥ इममित्यनेनाभिप्रेतं विशदयति—देवेति। देवसंज्ञितमपि नरदेवभूदेवस्वर्देवादिसंज्ञितमपि शरीरमन्ते तदारम्भकप्रारब्धावसाने कृम्यादिसंज्ञितमेव दग्धं चेद्भस्मसंज्ञितं श्वादिभिर्भक्षितं चेद्विट्संज्ञिकमित्यर्थः। तत्कृते एवंविधशरीरसुखार्थं यो भूतानि द्रुह्यतीति तथा यतो भूतद्रोहान्निरयो नरकः स पुमान् किं वेद न किमपि हितमहितञ्च जानातीत्यर्थः ॥ १० ॥ नन्वन्ते यत्किञ्चित्संज्ञिकमस्तु जीवद्दशायां स्वाधीनतया देहसुखार्थं यतितव्यमेवेत्यत्र तद्दशायामपि न नियतं सत्त्वमस्तीत्याह—देह इति। अग्नेः शुनोपि वीते दृष्टान्तार्थं देहो यथास्तेऽग्नेः शुनश्च स्वं तथा जीवद्दशायामपि नियमो नान्नदात्रादीनां स्वं किं न भवतीत्यथः। किमित्यनेन लोके प्रसिद्धिः द्योत्यते तावदन्नपरिणामरूपत्वाद्यस्यान्नेन वर्द्धते तस्य स्वं तथा रेतः प्रभवत्वान्निषेक्तुर्गर्भाधातुः तथा मातुः पितुर्मातामहस्य च पुत्रीकरणकाले तथा सङ्कल्पात् पितृवन्मातृपितर प्रत्यपि पारतन्त्र्यौचित्यादिति भावः। विक्रेतुर्द्रव्यदानेन स्वीकर्तुः बलिनः बलाद्गृहीतुः ॥ ११ ॥ एवं साधारण नत्वेकस्यैव नियतस्वमव्यक्तात् प्रकृतेः प्रभवः उत्पत्तिस्तस्मिन्नेवाप्ययो लयश्च यस्य तमिमं देहमात्मसात्कृत्वा आत्मेति मत्वा असतो मूढानृते विना विद्वान् कः पुमान् जन्तून् हन्ति देहाभिमानिनश्चेत् हन्युर्विद्वांस्तु न हन्यादेवेत्यर्थः। यद्वा एवमिमं देहं साधारणमव्यक्तप्रभवाप्ययं च विद्वान् जानंश्चेदसतः असाधारणदेहात्माभिमानिनः पुरुषान्विना कोपि पुमानात्मसात् कृत्वा आत्मत्वेन मत्वा जन्तून् हन्यात् एव विद्वांस्तु पुनर्देहात्माभिमानेन न हन्यात् साधारणमविद्वांसस्तु देहात्माभिमानेन हन्युरित्यर्थः। अविद्वानिति वा छेदः तदा साधारणमव्यक्तप्रभवाप्ययञ्चाविद्वानजानंश्चेत्कुतस्तज्ज्ञान्विना अन्यः कश्चित् देहात्माभिमानेन हन्यादिति वा अन्वयः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सन्तु स्वधादयः तत किमत्राह—हन्यन्त इति। यत्र स्वधादिषु सत्सु इमं नश्वरं देहमजरामृत्युनश्वरं जरामृत्युरहितं मन्यमानैः पशवो भूतानि हननमत्रबहुविधं देहवियोगकरणं धनापहरणं देशोच्चाटनम् अभिमानभङ्गकरणमित्यादि ॥ ९ ॥ यज्ञे पश्वालम्भनवत् परलोकविषयत्वेन पुण्यसाधनायेदं हिंसनं किं न स्यादित्यत्राह—भूतध्रुगिति। नायं स्वार्थः किंतु

पारलौक्यप्राप्तानन्द इत्यत्राह, किमिति। किंशब्दः आक्षेपार्थः "प्रश्ने क्षेपे विकल्पे किम्" इति यादवः। दैनन्दिनजीवनमन्तरेण किमपि न जानातीत्यन्वयः। किमिति न वेदेति तत्राह, निरय इति। यतो निर्गमनरहितं तमो भवतीत्यर्थः। "अय गतौ" इति धातुः। हिंसामात्रेण तमसोऽभावेपि हिंसाविशेषेण तमः स्यात् तथा हि नित्यभूतत्वात्सत्त्वोद्भूतं ब्रह्म तद्द्रोहः सर्वेशस्य ब्रह्मणोऽनीशेन दुःखिना जीवेन सहैकत्वकथनोपासने प्रथमहिंसा सार्वज्ञ्यादिगुणान् श्रुतानपहाय निर्गुणत्वचिन्तनं द्वितीया तदवताराणां दुःखश्रमाज्ञानादिकल्पनं तृतीया प्रत्यक्षादिप्रमाणसिद्धस्य प्रपञ्चस्य तद्विवर्तत्वकथनं चतुर्थीत्यादिकम् एवंविधस्य तमःप्राप्तिः स्यादिति निरूप्यत इत्यर्थः॥ १०॥ ननूत्तरश्लोके देहस्यानिर्वाच्यत्वमुच्यते देहस्य जगदन्तःपातित्वेन जगद्ब्रह्मविवर्त्तमिति कथयतः कथं तम इत्याशङ्क्यात्र साधारणत्वमेवोच्यते प्राप्तिसद्भावादित्याशयेनाह, देह इति, अन्नदातुः पोषयितुः निषेक्तुः गर्भाधानकर्तुः मातुः पितुः मातामहस्य विक्रेतुः द्रव्यादिप्रदानेन बलिनः बलात्कारेण ग्रहीतुः॥ ११॥ अव्यक्तात्प्रकृतेः प्रभव उत्पत्तिः अव्यक्ते अप्ययः प्रलयो यस्य स तथा तम् आत्मसात् आत्मत्वेन असतः ऋते॥ १२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

हन्यन्त इति अजरश्च यो देहविशेषः पश्चादमृत्युरप्यन्यस्त्वयोर्द्वन्द्वैक्यं तन्मन्यमानैरित्यर्थः॥ ९–१०॥ देह इति स्वं वस्त्विति शेषः॥ ११–२४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जरामृत्युभ्यां दृष्टाभ्यामपि इमं देहं न नश्वरं मन्यमानैः॥ ९॥ नरदेवभूदेवसंज्ञितमपि अन्ते मरणान्तरं श्वादिभिर्भक्षितं पुत्रादिभिरदग्धं चेत्कृमिसंज्ञितं भक्षितं चेत् विट्संज्ञितं दग्धं चेत् भस्मसंज्ञितं भवेत् तस्य देहस्य कृते यो भूतध्रुक् यतो भूतद्रोहात्॥ १०॥ देहे ममतानिर्द्धारणमपि न घटते बहुविप्रतिपत्तेरित्याह, देह इति। निषेक्तुः पितुः स्वं धनं मातुः पितुः मातामहस्य वा पुत्रिकाकरणे सति बलिनो बलाद्विष्ट्यर्थं गृह्णतः॥ ११॥ अव्यक्तात्प्रभवस्तस्मिन्नेवाप्ययो यस्य तम् आत्मसात्कृत्वा आत्मत्वेनाङ्गीकृत्य असतोऽज्ञान् विना॥ १२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किञ्च यत्र श्रीमदे निर्दयैः पशवो हन्यन्ते निर्दयत्वे हेतुमाह—अजितात्मभिः न जितः आत्मा हिंसापूर्वकविषयप्रवणं मनो यैस्तैः ननु प्राणहिंसया नश्वरं देहं ते किं विचार्य्य तर्पयन्त्यत आह—नश्वरमयीमं देहम् अजरामृत्यु अजरश्च अमृत्यश्च यथा भवति तथा मन्यमानैरिति॥ ९॥ किञ्च यत् नरदेवभूदेवादिसंज्ञितमपि अन्ते कृमिविड्भस्मसंज्ञितं भवति श्वादिभिर्भक्षितं विट्संज्ञितं दग्धं भस्मसंज्ञितमन्यदा कृमिसंज्ञितं च भवति तत्कृते एवंविधशरीरकृते यो भूतध्रुक् भूतानि द्रुह्यतीति स तथा यतो भूतद्रोहान्निरयो नरकप्राप्तिः स्यात्स किं स्वार्थं वेद नैव वेद॥ १०॥ अन्नप्रदादिसाधारणे देहे मदीयोयमित्यपि न सम्भवतीत्याह देह इत्यादिना॥ ११॥ अव्यक्तात्प्रकृतेः प्रभवस्तस्मिन्नेवाप्ययो यस्य तत् अव्यक्तप्रभवाप्ययम्॥ १२–१३॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

पशवो हन्यन्ते मृगयादिना नश्वरमिमं देहं अजरामृत्यु मन्यमानैः॥ ९॥ नरदेवादिसञ्ज्ञितमप्यन्ते पुत्रादिभिरदग्धं कृमिसञ्ज्ञितं श्वादिभिर्भक्षितम् विट्सञ्ज्ञितं दग्धं भस्मसञ्ज्ञितं तत्कृते तत्पालनाय यो भूतध्रुक् स किं स्वार्थं वेद यतो भूतद्रोहान्निरयो भवति नरके विपच्यते॥ १०॥ देहे ममत्वनिश्चयो न घटते बहुविप्रतिपत्तेरित्याह देहः किमिति स्वं धनं निषेक्तुः पितुः मातुः पितुर्मातामहस्य वा पुत्रिकाकरणे सति बलिनो वा बलाद्विष्ट्यर्थं गृह्णतः क्रेतुर्मूल्येन गृह्णतः॥ ११॥ अव्यक्तात् प्रकृतेः प्रभवस्तस्मिन्नेवाप्ययो यस्य तं आत्मसात्कृत्वा स्वाधीनं ज्ञात्वा असतो मूढान् विना॥ १२॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

॥ हरिः ॐ॥ भूतध्रुक् स्वार्थं किं कुरुते। किमाक्षेपे। स्वार्थं न कुरुते। भूतध्रुक् स्वार्थं वेद किं न वेद प्रत्युत स्वानर्थं कुरुते। स्वानर्थं न वेद चेति शेषः। तत्र हेतुमाह॥ निरय इति। यतो यस्मात्कारणाद्भूतद्रोहान्निरयो भवति तस्माद्भूतध्रुक् स्वानर्थं कुरुते न वेद चेति। यद्यपि भूतध्रुक् ऐहिकं स्वार्थं कुरुते वेद च तथा चैहिकार्थस्याल्पत्वादविवक्षामाश्रित्य भूतध्रुक् स्वार्थं न कुरुते न वेदेत्युक्तमिति द्रष्टव्यम्॥ १०॥ काकुस्वरविशिष्टं स्यादित्येतत्सर्वत्र संबध्यते। किं शब्द आक्षेपे। देहोऽत्र दातुः स्यात्। अन्नदातुर्न भवतीत्येतत्किं। न। किं त्वन्नदातुर्भवत्येव। देहो निषेक्तुः स्यादिति किं निषेक्तुर्नेति। न किं तु निषेक्तुर्न भवत्येव। वाशब्दोऽप्यर्थे। देहो मातुरपि स्यादेव किं मातुरपि नैवेति किं। मातुरपि स्यादेव। देहो मातुः पितुर्वा मातुः पितुरपि स्यात्किं मातुः पितुरपि नेति। न। किंतु मातुः पितुरपि भवत्येव। देहे बलिनः स्यात्किं बलिनो

नेति। न। किंतु बलिनो भवत्येव। देहः क्रेतुः स्यात्किं क्रेतुर्नेति। न। किंतु क्रेतुर्भवत्येव। देहोऽग्नेः स्यात्किमग्नेर्नेति। न। किं त्वग्नेर्भवत्येव। शुनोऽपि वेति। वाशब्द एवार्थे। देहः शुनोऽपि स्यात्किं शुनोऽपि नैवेति। न किंतु शुनोऽपि। भवत्येव। एवं साधारणमव्यक्तप्रभवाप्ययं देहे को विद्वान'त्मसात्कृत्वाऽऽत्ममात्राधीनं ज्ञात्वाऽसतोऽसज्जनानृते जंतून्हंतीति। एतेन देहस्य साधारण्येनोपपादनार्थं देह आत्मदात्रादीनां न स्यादिति वक्तव्यं देहः किमन्नस्य स्यादित्यादिना। अन्नदातादीनां न भवतीति कथनमनुपपन्नमिति दूषणं निरस्तं। स्याच्छब्दस्य निषेधार्थककाकुस्वरविशिष्टत्वं किं शब्दस्याक्षेपार्थत्वं चांगीकृत्य द्वौ नञौ प्रकृतमर्थं सातिशयं गमयत इति न्यायमाश्रित्य देहोऽन्नदात्रादीनां न भवतीति न किं त्वन्नदात्रादीनां भवेत्येवेत्यर्थस्योक्तत्वात ॥ ११ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यत्र बुद्धावनध्वनीनायामजितात्मभिरजितोऽवशीकृत आत्मा मनो येषां तैर्निर्दयैः पशवो हन्यन्ते। कुत इत्यतो मांसलताया इत्याह ॥ मन्यमानैरिति। इमं नश्वरं देहमजरामृत्युं जरामरणरहितं यथा तथा मन्यमानैरिति केचित्। नश्वरमिति भावप्रधानः। जरामृत्युनश्वरताशून्यं मन्यमानैरिति वा। नश्वरं इमं इह काम्यो विषयादीष्टं तस्य मा निषेधोऽभाव इति यावत्। यस्य तद्देहमजरामृत्युं तद्रहितं मन्यमानैरिति वा। कायो देह क्लीबपुंसोरित्यमरः। अतो न नञर्थभेदानुपपत्तिरिति मन्तव्यम्। इष्टदानात्तथेन्दव इत्युभाष्यटीकादिभ्यो विशेषोऽव्यक्तः। नायमिदंशब्दः किन्त्विमशब्दोकारान्तः ॥ ९ ॥ नश्वरस्यास्यैवं दुःखस्येत्यप्याह ॥ देवेति। आदौ देव नृदेव भूदेवसंज्ञितमन्ते अदाहे श्वश्वापदाद्यदने विट्संज्ञितम्। तथैव यत्र क्वचन पाते कृमिसंज्ञितं दग्धं चेद्भस्मसंज्ञोपेतं याज्ञियपशुवदिदं पशुविशसनं नेति शंसति ॥ भूतध्रुगिति। यः कुरुते तद्धननमिति शेषः। य एवं भूतध्रुग्भूतेभ्यः स्वहिंस्येभ्यो द्रुह्यति स तथा स स्वार्थं वेद किं न वेद वेद चेदेवं न कुर्यात्। किं तेन भवदनिष्टमित्यत आह ॥ निरयो यत इति। यतो भूतघातान्निरयो नरकाद्यनर्थप्राप्तिरिति न स वेदेति भावः। न चाप्रामाणिकोऽयं कार्यकारणभाव इत्यप्यावेदयति ॥ वेद निरय इति। वेद वेदितश्चासौ निरयो नरकादन्यतो यस्माद्वेदो निरयो नितरां वेदैरयो ज्ञापनम्। अयतेर्गत्यर्थत्वाज्ज्ञानार्थताऽन्तर्णीतण्यर्थता चेति ज्ञेयम्। यतोऽस्ति तत इति वा। स केन कथं वृथा भूतघातरूपं कर्म करोतीत्यतोऽप्याह ॥ कुरुत इति। कुत्सिते रूपे नानादुःसमयरूपे शब्दे सति स तदनुरोधेन करोति। निर्गतो गमनमयोऽपि प्रत्यावृत्तिर्यस्मात्स तमोलोको यतो भवति तद्भूतधृक्। एको विष्णुर्महद्भूतमित्यादेरीश्वरोऽहमहं भोगीत्यादेरेवम्भूतभगवद्द्रोही न वेदेत्यपि विवृण्वन्ति ॥ १० ॥ अनिर्णीतैतदादित्वके काये कियानयमहो मोह इति द्वाभ्यामाह ॥ देह इति। देहः किमन्नदातुः स्यात्। किंशब्दो विकल्पार्थः। सर्वापेक्षया विनाऽन्नं सद्यस्तनस्यापि न जीवनमिति तद्दातुरुक्तिरादाविति ज्ञेयम्। पितुर्मातुरित्युक्तौ मातृपूर्वभाषणं माता पूर्वरूपमित्यादेर्माता गरीयसीति कौसल्योक्तेश्च। कर्तव्यं पितुः कुतः प्रागुक्तिरिति शङ्का नोत्तरितान्तरङ्गतः स्यादिति निषेक्तुरित्युक्तिः। एतेन निषेकात्पूर्वं मासत्रितयंवासः प्राथमिकस्तत्रेति प्रथमं तदुक्तिरिति युक्तिः सूचितेति ज्ञेयम्। मातृगरीयस्त्ववाद एकोपाधिकपित्रपेक्षया। यदि विद्याद्यनुबन्धोऽपि तस्मिन्वर्तेत तर्हि स मातुरपि गरीयानित्येवमुक्तिर्वा। उक्तं च मोक्षधर्मे पाराशरगीतायाम्। पिता परं दैवतं मानवानां मातुर्विशिष्टं पितरं वदन्ति। ज्ञानस्य लाभमित्यादि। मातुः पितुर्मातामहस्य। मातामहस्येति शक्य एवं निर्देशेनासङ्गृहीतसङ्ग्राह्यता मातुर्भ्रातुराचार्यस्य पितुः पालकजनकस्य पुत्रिकापुत्रत्वेन स्वीकुर्वतो मातामहस्येत्यपि पराकृतेति ज्ञेयम्। ननु पूर्वं जनन्या इत्यनुक्तेरुक्तेश्च मातुरिति तेनैव विवक्षिताक्षतेर्मातामहस्येति भाषणं भूषणमिति चेत्। प्रौढोऽसि कृतं परिखोड्डीनं परन्तु व्यत्यस्तवितस्तिजातं पालकपितुरलाभात्तत्र तदतन्त्रतापत्तेश्चेत्थमुक्तिरित्यवेहि। विक्रेतुर्वेतनादिवितरणेन विक्रयकर्तुर्बलिनो बलिष्ठस्य निग्रहीतुरग्नेर्दाहेऽदाहे शुनस्तदादेः ॥ ११ ॥ एवमुक्तप्रकारेणान्नदात्रादिस्वातन्त्र्योपेतमिति साधारणं देहमव्यक्तप्रभवाप्ययमव्यक्तात्प्रकृतेः प्रभव उत्पत्तिरप्ययोऽपि तदन्तर्निवेशश्च यस्य स तं। अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत। अव्यक्तनिधनान्येव तत्र का परिवेदनेत्यादेः। यद्वाऽव्यक्तोऽस्पष्टमधश्चेत्यज्ञातौ प्रभवोऽप्ययश्च यस्य स तं को विद्वानात्मसात्कृत्वा स्वाधीनं कृत्वाऽसतो ऋते विना जन्तूननागस्कारिणो जनान्हन्ति घातयति। अन्यारादितरर्त इत्यसत इति पञ्चमी द्वितीयाबहुवचनं वा। ज्ञानसूर्यमृते विना वातं विना वर्षमित्याद्युदाहृत्य प्रोक्तं स्कन्धान्तरेऽनुसन्धेयं। सातिस्तु तदधीनवचन इत्यनेन वा विभाषा सातिकार्त्स्न्ये इत्यनेन वा स्वाधीनं कृत्वाऽऽत्मानं कृत्वेत्यर्थक इति मन्तव्यम् ॥ १२ ॥

श्रीसुबोधिनी

दोषान्तराण्याह **हन्यन्ते पशवो यत्रेति**, **यत्र** श्रीमदेन प्रत्यहं भक्षणार्थं **पशवो हन्यन्ते**, **निर्दयैरिति**, बाला आमा अपि हन्यन्त इति सूचितं कोमलमांसत्वात्, किञ्चाजितात्मभिः सर्वाण्येव पापानि क्रियन्ते, "नूनं प्रमत्तः कुरुते विकर्म यदिन्द्रियप्रीतय आवृणोती"त्यत्र निरूपणात्, तेषां स्वेष्टसाधनताज्ञानवतां कथं स्वानिष्टे प्रवृत्तिरिति चेत् तत्राह **मन्यमानैरिति**, पूर्वोक्तप्रकारेण विषयभोगः स्वभावतः सुखहेतुर्भवति पर्यवसाने परलोके च दुःखहेतुर्भवति, स च परलोकोस्य देहस्य नाशे, ते हि

धनमदेन वस्तुतत्त्वं न जानन्ति, अत **इदं** शरीरं **नश्वरमप्यजरामृत्यु** जानन्ति जरामृत्युरहितम् ॥ ९ ॥ ननु सत्यमेव देवा अजरामरा इति तत्राह **देवसंज्ञितमपी**ति, यथाजाशब्दोजायां न योगेन वर्तते किन्तु ब्रह्म कदाचित् तेन रूपेण सोमाहरणार्थं गतवदिति तथा "अमरा निर्जरा" इत्यपि, यथा मनुष्याणां यावता कालेन जरा मृत्युर्वा भवति तथा न भवतीति यथा न स्वपिति पश्चाच्छायी प्रथमबोधी च तमाहुर्न स्वपितीत्यधिकारिणस्तथात्वाद् वा वस्तुतस्तु देहत्वाद् **देवसंज्ञि**तमप्यन्तवदेव भवति, अतोन्ते **कृमिविड्भस्मसंज्ञितमेव** भवति, देहस्य त्रिधाप्रतिपत्तिर्दह्यते भक्ष्यते विशीर्यते वा, विशीर्णपक्षे कृमयो भवन्ति भक्षणेन ततो विड् भवति दाहे भस्म, पूर्वं **देवसंज्ञा**मपि प्राप्यान्ते कृमिविड्भस्मसंज्ञाः प्राप्नोति, एवं सति यस्तादृशदेह**कृते भूतध्रुक्** स किं **स्वार्थं वेद** ? अपि तु न वेद, **यतो** भूतद्रोहान्नरकपातः, विशेषाकारेण हननमुक्तमिति श्रीमदस्य तदव्यभिचारात् प्रकृतेपि तदस्तीति हिंसा निन्दा, अनेन दृष्टान्तेन स्त्रीसेवका अपि स्वार्थं न विदुरित्युक्तं, अतः स्वार्थापरिज्ञानाद् धर्मसत्सङ्गाभावाच् छाप उचित एवेतिभावः, अनेन देहार्थं प्रयत्नो न कर्तव्य इत्यर्थादुक्तम् ॥ १० ॥ तच् छास्त्रान्तरे विरुध्यति, "आत्मानं सततं रक्षेद् दारैरपि धनैरपी"ति "तस्मादस्य वधो राजन् सर्वार्थवध उच्यत" इत्यादिवाक्यै रक्षाया अवश्यविधानात् , तत्राह **देहः किमन्नदातुः स्वमि**ति, अविचाराद् देहे रक्षार्थं प्रयत्नवचनानि, विचारे तु न रक्षणीयं स्यादिति सन्देहजनकान् पक्षानाह, **देहः** केन सम्बन्धेन सम्बन्धी भवतीति विचारणीयं, तत्रात्मा न भवति, अल्पविवेकेनापि तद्भेददर्शनात् , आत्मीयत्वं तु भवति सा चात्मीयता किन्निबन्धना ? बहूनामेवैकस्मिन् शरीर आत्मीयत्वबुद्धिः, शरीरस्योत्पत्तिर्द्विविधा, आद्या प्रत्यहं च जायमाना, प्रत्यहं चेद् देहो**न्नदातु**र्भवत्यन्नमयत्वाच्च देहस्य, आद्यश्चे**न्निषेक्तः** पितुः, लोकप्रतीत्या चेदुत्पत्तिर्मातुर्भवति, परलोकसाधकत्वे **मातु पितुर्**भवति, पुत्रिकापुत्रपक्षे तथैव शास्त्रार्थत्वात् , एषा स्वरूपस्थितिः, वैषयिकस्थितिमप्याह **क्रेतुर्वा बलिन** इति, यो वा विक्रीणीते यो वा बद्ध्वा गृह्णाति ? अन्त्यविचारश्चेदग्नेः **शुनोथ** वेति ? कृमिपक्षे न स्वत्वं कस्यचित् ॥ ११ ॥ ततः किमत आहैवमिति, **एवं सर्वेषां साधारणं देहमात्मसात्कृत्वा को वा जन्तून् हन्ती**तिसम्बन्धः, तत्रापि **विद्वान्** , यतोयं देहः **साधारणः**, वस्तुतस्त्वयं देहो न पूर्वोक्तानां मध्ये कस्यचिदपि भवितुमर्हति, यतो**व्यक्त**मेव **प्रभव** उत्पत्तिस्थानमप्ययस्थानं च, नन्वेतादृशा घातका अपि बहवो दृश्यन्त इति चेत् तत्राहुरसत इति, ये सच्छब्दवाच्या देवाः, सन्तोपि ते नैवंविधा इत्यर्थः ॥ १२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

हन्यन्त इत्यत्रेदं **देह**मिति देहशब्दस्य नपुंसकत्वं 'कायो देहः क्लीबपुंसो'रिति**कोशा**ज् ज्ञेयम् ॥ ९ ॥ **देवसंज्ञित**मित्यत्र **किन्तु ब्रह्मे**त्यादि यथा **चाजाशब्दः** सारूप्यनिबन्धनया गौण्या प्रवृत्तस्तथा "देवा"दिशब्दा अपि सारूप्यनिबन्धनया प्रशंसानिबन्धनया वा गौण्या प्रवृत्ताः, तत्र हेतु**र्यथा मनुष्ये**त्यादि **यथा न स्वपिती**त्यादि च, पक्षान्तरमाहु**रधिकारिण** इत्यादि, **अधिकारि**देवानां तथात्वात् तस्य समुदायपातित्वाच् 'छत्रिणो यान्ती'तिवत् तथात्वमितिभावः, ननु श्रीमदे निन्द्ये हिंसानिन्दायाः किं प्रयोजनमत आहु**र्विशेषे**त्यादि, **अनेन दृष्टान्तेने**ति देहसेवकदृष्टान्तेनेत्यर्थः ॥ १० ॥ देहः **किमि**त्यत्र ननु देहस्य सर्वथारक्षणीयत्वे पूर्वोक्तवाक्यानां का गतिरित्याशङ्कायामाहु**रविचारा**दित्यादि, तथा च तानि वाक्यानि त्रिवर्गोपयोगाया**विचारा**देव प्रवृत्तानीति न तद्विरोधो दोषायेत्यर्थः, तत्राभेदसम्बन्धं निराकुर्वन्ति **तत्रात्मे**त्यादि, नन्वन्नेन देहस्य कः सम्बन्ध इत्यत आहु**रन्नमयत्वा**दिति "स वा एष पुरुषोन्नरसमय"इतिश्रुतेराद्य इत्याद्यो य उत्पत्तेः सम्बन्धीत्यर्थः, **पुत्रिकापुत्रपक्ष** इति स्वस्य पुत्राभावे **स्वपुत्रिकापुत्रे**णैव पित्रोरुद्धार इतिपक्ष इत्यर्थः, **कृमिपक्ष** इत्यन्**त्यविचार** एवेति ज्ञातव्यम् ॥ ११ ॥ **एवमि**त्यत्रा**त्मसात्कृत्वे**ति देहव्यवस्थाज्ञानेनात्माधीनं **कृत्वा**, **एतादृशा** इति विद्वांसः, **नैवंविधा** इति नावैधहिंसनपराः ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

हन्यन्ते इत्यस्याभासे **दोषान्तराण्याहे**ति अजितात्मपदस्य सर्वपापकर्तृत्वेन व्याचिख्यासितत्वादत्र बहुवचनं, **स्वेष्टसाधन**तेति इदमिष्टमिदमनिष्टमिति **विवेकवतां** न तु मत्तानामित्यर्थः, **अत इद**मिति तथा च वस्तुतो **नश्वर**मपि शरीर**मजरामृत्यु**, एवं प्रकारेण **देहं मन्यमानै**रिति मूलेऽन्वयः ॥ ९ ॥ **देवसंज्ञित**मित्यत्र **प्रकृतेपि तदस्ती**ति अनुक्तमपि हिंसनं श्रीमदस्य हिंसाव्यभिचारादत्राप्यस्तीति ज्ञेयमित्यर्थः, **अनेने**ति यथा देहार्थकत्वाद् भूतद्रोहस्य तत्कर्तुः स्वार्थाज्ञानं तथा स्त्रीसेवाया अपि देहार्थकत्वात् तत्कर्तुरपि स्वार्थाज्ञानमिति इवादिपदाभावेपि बिम्बप्रतिबिम्बभावेन ज्ञापितमित्यर्थ ॥ १० ॥ **देहः किमि**त्यत्र नित्यप्रलयपक्षमाश्रित्याहुः **प्रत्यहं चे**ति, **वैषयिके**ति क्रेता बन्दीकर्ता वा तद्देहं स्वकीयं मत्वा तद्विषयानन्नवस्त्रादींस्तस्मै ददातीत्यर्थः ॥ ११ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यत्र च श्रीमदे सति इमं नश्वरमपि देहमजरामृत्यु अजरः क्षयशून्यश्चासावमृत्युश्च यथा तथा मन्यमानैर्जनैः पशवो भक्षणाद्यर्थं हन्यन्ते । ननु 'अम्बरीषप्रल्हादध्रुवयुधिष्ठिरादिमहात्मनां धनादिसत्त्वेऽपि दोषाश्रवणात् , प्रत्युत सत्कीर्तिसद्भा-

वाच्च कथं धनादेर्दुष्टत्वम् ?' इत्याशङ्क्याह—निर्दयैरजितात्मभिरिति । अम्बरीषादीनां जितेन्द्रियत्वेन श्रीमदाभावाद्दयालुत्वाच्च न धनादिजनितोपद्रवो जातः, किन्तु परोपकार एव । अतो धर्मकीर्त्यादेरेव प्रसिद्धिरित्याशयः ॥ ९ ॥ देहाभिमानेन परद्रोहकर्तुर्दोषमाह—देवसंज्ञितेति त्रिभिः । प्रथमं नरदेवभूदेवसंज्ञितमपि शरीरमन्ते प्रारब्धकर्मावसाने मरणानन्तरं श्वादिभिर्भक्षितं विट्संज्ञितं, पुत्रादिभिर्दग्धं भस्मसंज्ञितम् , अन्यथा त्यक्तं च कृमिसंज्ञितं भवति । तत्कृते तत्रात्माभिमानेन तत्सुखार्थं यो भूतध्रुक् प्राणीद्रोहकर्ता स स्वार्थं स्वहितं किं वेद ? नैव वेद । मूर्ख एव स इत्यर्थः । कुत इत्यत आह–यतो भूतद्रोहान्निरयो नरकयातना भवतीति ॥ १० ॥ 'ननु मरणानन्तरं यत्किञ्चित्संज्ञितमस्तु, जीवदशायां तु स्वाधीनत्वमस्त्येव । अतस्तत्सुखार्थं यतितव्यमेव' इत्याशङ्क्य जीवदशायामपि स्वत्वानिश्चयमाह—देह इति । अयं देहः किं स्वं स्वकीयः ? स्वाधीनत्वेन प्रसिद्धत्वात्, किंवा अन्नदातुः ? तदन्नेन पाल्यमानत्वात् , किंवा निषेक्तुः पितुः ? तद्वीर्योद्भवत्वात्, किंवा मातुरेव ? तदुदरोद्भवत्वात्, किंवा मातुः पितुः 'मातामहस्य ?' तत्कन्यापुत्रत्वात् , उपलक्षणमेतत् पितामहादिसर्वसम्बन्धिनाम् , तेषामपि स्वकीयाभिमानस्य सत्त्वात् । किंवा बलिनः राजादेः ? तेनापि बलाद्विष्टिग्रहणस्य प्रसिद्धत्वात् , किंवा क्रेतुः ? तेनापि द्रव्यदानेन स्वीकरणात् , किंवाऽग्नेः ? अन्ते तेन भस्मीकरणात्, किंवा शुनः ? अन्ते तेन भक्षणात् , अपिशब्दादन्येऽपि काकादयो भक्षका गृहीतव्याः ॥ ११ ॥ 'एतेषु अमुकस्यैवायम्' इति निर्धारयितुमशक्यत्वादेवं साधारणमव्यक्तं प्रधानं तत एव प्रभवस्तस्मिन्नेवाप्ययो लयश्च यस्य तं देहमात्मसात् कृत्वा आत्मेति मत्वा तत्सुखार्थं असतो मूढादृते विना को वा विद्वान् जन्तून् हन्ति ? न कोपीत्यर्थः ॥ १२ ॥

अन्वितार्थप्रकाशिका

हन्यन्त इति । यत्र च श्रीमद सति इमं नश्वरमपि देहमजरामृत्यु अजरं क्षयशून्यं च तदमृत्यु च वस्तु इति मन्यमानैः निर्दयैः अजितात्मभिश्च जनैः भक्षणाद्यर्थं पशवो हन्यन्ते ॥९॥ देवेति । यत् प्रथमं नरदेवभूदेवसंज्ञितमपि शरीरमन्ते श्वादिभिर्भक्षितं विट्संज्ञितं पुत्रादिभिर्दग्धं भस्मसंज्ञितमन्यथा त्यक्तं च कृमिसंज्ञितं भवति । तत्कृते तत्सुखार्थं यो भूतध्रुक् प्राणिद्रोहकर्ता स स्वार्थं स्वहितं किं वेद नैव वेद । मूर्ख एव स इत्यर्थः । यतो भूतद्रोहान्निरयो नरकयातना भवतीति ॥ १० ॥ देहे ममतापि न घटत इत्याह देह इति । अयं देहः किमन्नदातुः स्वं धनम् अस्ति तदन्नेन पाल्यमानत्वात् किंवा निषेक्तुः पितुः तद्वीर्योद्भवत्वात् किंवा मातुरेव तदुदरोद्भवत्वात् किंवा मातुः पितुर्मातामहस्य तत्कन्यापुत्रत्वात् पुत्रिकाकरणाद्वा उपलक्षणमेतत् । पितामहादिसर्वसंबन्धिनां तेषामपि स्वकीयाभिमानस्य सत्त्वात् किंवा बलिनः राजादेः तेनापि बलाद्विष्टिग्रहणस्य प्रसिद्धत्वात् । किंवा क्रेतुः तेनापि द्रव्यदानेन स्वीकरणात् किंवाग्नेः अन्ते तेन भस्मीकरणात् किंवा शुनः अन्ते तेन भक्षणात् । अपिशब्दादन्येऽपि काकादयो भक्षका ग्रहीतव्याः ॥ ११ ॥ एवमिति । एवं निर्धारयितुमशक्यत्वात् अन्नदात्रादिसाधारणमव्यक्तं प्रधानं तत एव प्रभवस्तस्मिन्नेवाप्ययो लयश्च यस्य तं देहमात्मसात्कृत्वा आत्मेति मत्वा तत्सुखार्थमसतो मूढादृते विना को वा विद्वान् जन्तून् हन्ति न कोऽपीत्यर्थः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यत्र श्रीमदे अजितात्मभिः अजितांतःकरणैः इमं नश्वरं जरामृत्युवर्जितं यथातथा मन्यमानैः ॥ ९ ॥ देवसंज्ञितं नरदेवादिसंज्ञासहितमपि अंते मरणानंतरं जंतुभक्षितं चेत् विट्संज्ञितं दग्धं चेत् भस्मसंज्ञितं अदग्धं चेत् कृमिसंज्ञितं स्यात् तत्कृते तत्पोषणार्थं यो भूतध्रुक् प्राणिघातकः सः किं स्वार्थं वेद न वेदेत्यर्थः यतः प्राणिद्रोहात् ॥ १० ॥ निषेक्तुः स्वपितुः अयं देहः किं स्विदस्ति मातुः पितुर्मातामहस्य पुत्रिकापुत्रग्रहणविधौ किं वाऽयं देहोऽस्ति बलिनो बलयुक्तस्य राजादेः किं वायं देहोस्ति क्रेतुर्द्रव्यविनिमयेन ग्रहीतुः किं वा अयं देहोऽस्ति न कस्यापीत्यर्थः ॥ ११ ॥ अव्यक्तप्रभवाप्ययं अव्यक्तौ अस्फुटौ प्रभवाप्ययौ उत्पत्तिनाशसमयौ यस्य तं आत्मसात् कृत्वा स्वस्वरूपं मत्वा असतः असत्पुरुषादृते विना ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हन्यन्त इति ॥ किं च । यत्र श्रीमदे सति, इमं नश्वरं देहं, अजरामृत्यु जरामरणरहितं यथा तथा, मन्यमानैः जनैरिति शेषः । निर्दयैर्दयावर्जितैः, अजितात्मभिरवशीकृतेन्द्रियैः सद्भिः, पशवः हन्यन्ते, केवल रसनातर्पणायैवेति भावः ॥ ९ ॥ इममित्यनेनाभिप्रेतं दर्शयति ॥ देवसंज्ञितमिति ॥ देवसंज्ञितमपि नरदेवभूदेवस्वर्देवादिसंज्ञितमपि शरीरमित्यर्थः । अन्ते तदारम्भकप्रारब्धावसाने, कृमिविड्भस्मसंज्ञितं भवेत, दग्धं चेद्भस्मसंज्ञितं, श्वादिभिर्भक्षितं चेद्विट्संज्ञितं, अन्यदा कृमिसंज्ञितं, न त्रिविधतापोऽन्यद्भवेदिति भावः । तत्कृते एवंविधशरीरसुखार्थं, यः भूतध्रुक् भूतानि यः द्रुह्यतीत्यर्थः । यतो भूतद्रोहात, निरयो नरकेषु पतनं भवति, स पुमान, किं स्वार्थं स्वहितं, वेद, न जानातीत्यर्थः ॥ १० ॥ नन्वन्ते इदं शरीरं यत्किचित्संज्ञमस्तु जीवद्दशायां तु तत्सुखार्थं यतितव्यमिति चेज्जीवद्दशायामपि देहस्य स्वत्वं न नियतमस्ति इत्याह ॥ देह इति ॥ देहः,

अन्नदातुः, स्व स्वताभाक्, किं भवति स्वित् । निषेक्तुः पितुः, स्वं किम् । वा मातुः स्वं किं, चकारोऽथवार्थे । मातुः पितुर्माता-महस्य, स्वं किम् । वा बलिनः कस्यचित् स्वं किम् । क्रेतुर्द्रव्यादिप्रदानेन गृह्णतः, स्वं किम् । अग्नेः, स्वं किम् । वा शुनो भषकस्य, स्वं किम् । न कस्यापि स्वताभागिति भावः । तत्र अग्नेः शुनोऽपि वेति दृष्टान्तार्थम् । देहो यथान्ते शुनोऽग्नेर्वा अनियतत्वेन न स्वं, तथा जीवद्दशायामपि न नियमेनान्नदात्रादीनां स्वं भवतीत्यर्थः । तत्र तावद्देहस्यान्नपरिणामरूपत्वाद्यस्यान्नेन वर्द्धते तस्य तत्र स्वता, तथा स्वरेतःप्रभवत्वान्निषेक्तुस्तत्र स्वता, तथा गर्भभावेन मात्रा स्वोदरे धृतत्वात्तस्यास्तत्र स्वता, तथा मातुः पितुर्मातामहस्य पुत्रिकाधर्मकरणेन एव स्वता, एवं सर्वथैवास्य पारतन्त्र्यौचित्यान्न कस्याप्ययं नियत इति भावः ॥ ११ ॥ एव-मिति ॥ एवं साधारणमेकस्याप्यनियतत्वात् सामान्यं, अव्यक्तात् प्रकृतेः प्रभव उत्पत्तिस्तत्रैवाप्ययो लयश्च यस्य तं इमं देहं आत्मसात्, कृत्वा, आत्मेति मत्वेत्यर्थः । असतः मूढात्, ऋते विना, विद्वांस्तत्र दोषदर्शी, कः पुमान् जन्तून् हन्ति । देहाभिमानिनश्चेद्धन्युर्विद्वांस्तु न हन्यादेवेत्यर्थः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

हन्यन्ते पशवः इति : १०. १०. ९.

पशुहिंसनेऽहमदयो यथा तथा मम हिंसनेऽपि भवितैव कोऽप्यलम् ।
इति मूढवृत्तिरविदन् खराग्रणीः कुरुतेति गर्ह्यमिदमद्भुतं न किम् ॥ १५ ॥

देहः किमिति : १०. १०. ११

यत्र स्वत्वं तु नाऽस्त्येव परस्वत्वेऽप्यनिर्णयः । तद्रतिर्मूढ इत्येतद् देहोदाहरणात् स्फुटम् ॥ १६ ॥

कामर्धिं यश्चिकीर्षुर्भुवि भवति पुमान् यत्नवान् वीर्यवृद्धौ देहाधीना तदृद्धिस्तदनु नियमतो यत्नवान् देहपुष्टौ ।
तत्तादृग्देहपुष्टिर्भवति नहि विना मद्यमांसाशनैः तन्निर्मन्तून् हन्ति जन्तूनदयमतिरिहैवं स सश्रीमदो यः ॥ १७ ॥

दृष्ट्वा तौ स तथाविधौ मुनिवरः स्मृत्वा निरुक्तक्रमं प्रोवाचैवमिति प्रभात्यपरथा कामेक्षणोपस्थितेः ।
निन्द्ये वित्तमदेहि पश्वपहतिः सा देहनिन्दाऽपि च प्रक्रान्तेन्द्रियदेहशोषणकथाऽप्यग्रे कथं तत्स्तवे ॥ १८ ॥
(युग्मम्)

कृष्णप्रिया

धन-ऐश्वर्य पद के नशे में चूर निर्दय एवं असंयमी होते हैं। वे लोग अपने नश्वर शरीर के पोषण के लिए निर्दोष पशुओं की हिंसा करते हैं और अपने क्षणभङ्गुर देहको अजर अमर समझ लेते हैं ॥ ९ ॥ एक बार जिस शरीर की नरदेव, इन्द्रदेव, भूमिदेव देव आदि संज्ञा थी आज उसकी प्राण निकल जाने पर जलकर भस्म संज्ञा हो जायगी, सड़ जाने से कीट बन जायगा गीदड़ आदि के खाने पर विष्ठा बन जायगा, ऐसे नश्वर देह के लिये प्राणियों की हिंसा करने वाले अपना कौन सा हित सिद्ध करते है ! भूतद्रोह करने पर तो अन्त में नारकी गति ही होगी ॥ १० ॥ यह बात विचारने योग्य है कि यह शरीर किसकी ज्यायदाद है। क्या अन्न देकर पोषण करने वाले की है ! अथवा बिजका गर्भाधान करने वाले पिताकी है। या दश मास पर्यन्त उदर में रखने वाली जननी की है ! या, माता के जनक अपने "नाना" की है। अथवा बल पूर्वक कब्जा में लेने वाले की ! या तो धन दान देकर खरीदने वाले की ! या तो अन्त में धधकती चितामें जलाने जाने से अग्नि की अथवा अपुण्यभाक् अग्नि संस्कार को न पाया तब कुत्ते आदि फाड़ खा जायेंगे उनके नतीजा का कोई निश्चय नहीं ऐसी हालत में सर्व साधारण शरीर के लिये इतना अनर्थ क्यों ॥ ११ ॥ यह शरीर अव्यक्त प्रकृति से उत्पन्न होता है और प्रकृति में लीन हो जाता है। इस देह को अपनी आत्मा मान कर उसके लिये प्राणियों की हिंसा मूर्ख के अलावा भला कोई विवेकी जन कैसे कर सकता ? ॥ १२ ॥

[1]असतः श्रीमदान्धस्य दारिद्र्यं [2]परमञ्जनम् । आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ॥ १३ ॥
यथा कण्टकविद्धाङ्गो[3] जन्तोर्नेच्छति तां व्यथाम् । जीवसाम्यं गतो लिङ्गैर्न तथाविद्धकण्टकः ॥ १४ ॥
दरिद्रो निरहंस्तम्भो मुक्तः सर्वमदैरिह । कृच्छ्रं यदृच्छयाऽऽप्नोति तद्धि [4]तस्य परं तपः ॥ १५ ॥
नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकाङ्क्षिणः । इन्द्रियाण्याशु शुष्यन्ति[5] हिंसापि विनिवर्तते ॥ १६ ॥

---

[1] मन्यमानैरिमं देहमजरामृत्युनश्वरम् । देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितम् ॥
इत्ययं पूर्वोक्त एव श्लोकः पुनरत्रापि पठ्यते—विज.

[2] परमाञ्जनम्—वीर. । [3] विद्धाङ्गिर्जन्तो—वीर. । [4] ह्यस्य—वीर. । [5] इन्द्रियाण्यनु—श्रीधर वंशी. वीर. विज. जीव. ।

कर्दमक्षमा

अन्वयः– असतः श्रीमदान्धस्य दारिद्र्यं परं अञ्जनं दरिद्रः परं आत्मौपम्येन भूतानि ईक्षते ॥ १३ ॥ यथा कण्टकविद्धाङ्गः लिङ्गैः जीवसाम्यं गतः जन्तोः तां व्यथां नेच्छति अविद्धकण्टकः न तथा (जीवसाम्ये गतः) ॥ १४ ॥ इह सर्वमदैः मुक्तः निरहस्तंभः दरिद्रः यदृच्छया यत् कृच्छ्रं आप्नोति तद् हि तस्य परं तपः ॥ १५ ॥ क्षुत्क्षामदेहस्य नित्यं अन्नकांक्षिणः आशु इन्द्रियाणि शुष्यन्ति हिंसा अपि विनिवर्तते ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं श्रीमदविचेष्टितमुक्त्वा तत्प्रतीकारं निश्चिनोति । असत इति । दारिद्र्यमेव । परं श्रेष्ठं परं केवलमिति वा । कुत इत्यत आह । आत्मौपम्येनेति । ततो न द्रुह्यतीति भावः ॥ १३ ॥ सदृष्टांतमाह । यथेति । मुखम्लान्यादिलिंगैः सर्वेषां जीवानां सुखदुःखे समे इति ज्ञातवानित्यर्थः ॥ १४ ॥ किं च दारिद्र्यं मोक्षमपि साधयतीत्याह दरिद्र इति श्लोकचतुष्टयेन । निरहंस्तंभो निर्गतोऽहंकाररूपः स्तंभो यस्मात्सः ॥ १५–१६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्प्रतीकारं श्रीमदनाशकं दारिद्र्यस्य श्रैष्ठ्यमसहमानोर्थांतरमाह—केवलमिति । एकमित्यर्थः । तत्र हेतुमाशंकते—कुत इति । आत्मौपम्येन स्वसादृश्ये नेति । इति भाव इति । सुखदुःखे स्ववन्मन्यत इति तात्पर्यम् ॥ १३ ॥ तां कंटकव्यथां मुखम्लान्यादिलिंगैः दुःखसूचकैर्मुखकार्ष्ण्यादिभिः सुखसूचकैर्मुखविकासादिभिश्चिह्नैः । इत्यर्थ इति । न हि दुःखं विना मुखमालिन्यं सुखं विना वा मुखविकाशो भवतीति जानातीति भावः । तथाऽविद्धकंटको नेति । स त्वित्थं वदति किं ते शक्तिप्रहारो जातः किमर्थमल्पकंटकक्षतेन रोदिषीति भावः ॥ १४ ॥ दरिद्रमुद्दिश्यान्यदप्याह—किञ्चेति । स्तंभो गर्वः ‘गर्वरोधनयोस्तंभः’ इति हलायुधः । सर्वमदैः विद्याभिजनादिमदैः सर्वैरनादृतत्वाद्दरिद्रस्य सत्कुलमदादयोऽपि प्रायो नश्यंतीति भावः । यदृच्छया देवेच्छया । तत् कृच्छ्रम् । तस्य दरिद्रस्य । “एतद्वै परं तपो यद्व्यथितस्तप्यते” इति श्रुतेः ॥ १५ ॥ ननु कृच्छ्रानुभवः कथं तप इति चेत्तत्राह—अनुशुष्यंति । देहशोषमनुशोषं गच्छंति । इंद्रियप्राबल्यदौर्बल्ये प्रवृत्तिनिवृत्ती ते चान्नसत्ताऽभावाभ्यां स्तः अन्नाप्राप्त्येंद्रियप्राबल्यानुविधायिहिंसालक्षणा प्रवृत्तिर्नश्यति हिंसानाश एव महत्तप इति । “नातः परं तपो ब्रह्मन्यद्धिंसाविनिवर्त्तनम्” इत्युक्तेः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो बतासाधोरन्यस्यान्यथापि कथञ्चित् हितं स्यात् श्रीमत्तस्य त्वसाधोर्दारिद्र्येणैवेत्याह—असत इत्यादि । परमं जनमिति निदानविपर्ययन्यायेन ॥ १३ ॥ यतो यथेति जन्तोः कस्यचिदपि प्राणिनः तां कण्टकवेधकृतां नेच्छति तस्य सा भवत्विति न वाञ्छतीत्यर्थः । यतो लिङ्गैः मुखम्लान्यादिभिर्जीवस्य तस्य साम्यं निजदुःखानुस्मरणात् कृपोदयेन तुल्यावस्थत्वं गतः प्राप्तो भवति आविद्धकण्टकः कण्टकेनाविद्ध इत्यर्थः । राजदन्तादित्वत्परनिपातः यद्वा अविद्धः अलग्नः कण्टको यत्र सः ॥१४॥ अहङ्कारेण धनित्वादिगर्वेण यस्स्तम्भो नम्रत्वाभावः स निर्गतो यस्मात् अतः सर्वैर्धनादिसंबन्धिभिर्मदैश्चित्तविक्षेपैर्मुक्तो भवति किं च अन्नाद्यभावेन यदृच्छया स्वभावत एव प्राप्नोति यत् तत् तप इति अभिमाननाशकत्वात् तच्च परं श्रेष्ठमिति प्रसिद्धतपोवदभिमानाहेतुत्वात् ॥ १५ ॥ तस्येन्द्रियजयादिकं च तपो साध्यमपि स्वतो भवतीत्याह—नित्यमिति । अन्नकाङ्क्षिणः भक्ष्यमात्रेच्छोः अनुनिरन्तरं शुष्यन्ति विषयरसादुपरमन्तीत्यर्थः । अत एव हिंसाविषयोपभोगार्थपरपीडनादिलक्षणाप्युपरमति एवं श्रीमदादजितात्मता ततश्च हिंसादिकं तद्विपरीते तु दारिद्र्ये हिंसादिनिवर्तकं जितात्मत्वमित्युक्तम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो बतासाधोरन्यस्यान्यथा कथञ्चिद्धितं स्यात् , श्रीमत्तस्य त्वसाधोर्दारिद्र्येणैवेत्याह—असत इति । दारिद्र्यमेव परमाञ्जनमित्यन्धता-निदानस्य श्रीमदस्य वैद्यकोक्तनिदानविपर्ययन्यायेन दारिद्र्येणैव प्रतीकारसिद्धेः । आत्मौपम्येनेति यथा मम सुखं दुःखञ्च स्यात्तथाऽन्यस्यान्यस्यापीति कस्यचिदपि दुःखार्थं न कदापि प्रवर्त्तत इति भावः । एवं निर्दयत्वादिहेतुश्रीमद् वैपरीत्येन दारिद्र्ये समयत्वं बोधितम्, पशुहननादिकञ्च निरस्तम् ॥ १३ ॥ जन्तोः कस्यचिदपि प्राणिनस्तां कण्टकवेधकृतामविद्धकण्टकः कण्टकेनाविद्ध इत्यर्थः, स तथा नेच्छतीति न, अपि त्विच्छेत्येव, दुःखाज्ञानात् । अन्यत्तैर्व्याख्यातम् यद्वा, लिंगैरंगादिभिर्लक्षणैर्जीवेनान्येन साम्यं प्राप्तोऽप्यविद्धकण्टकश्चेत्तर्हि तथाविद्धकण्टकसदृशो न भवति, किन्तु इच्छत्येवेत्यर्थः । एवं दरिद्रो निजदुःखानुमानेनान्यदुःखमवकलयत्येवेति भावः ॥ १४ ॥ निर्गतोऽहंकारेण धनित्वादि गर्वेण यः स्तम्भोऽनम्रता, स यस्मात् यद्वा, निर्गतोऽहंकारस्य स्तम्भ आश्रयो धनैश्वर्य्यादिर्यस्मादतः सर्वैर्धनादि-सम्बन्धिभिर्मदैर्युक्तो

भवति। एवं निरहंस्तम्भत्वादिना दरिद्रस्य श्रीमदोक्तदेहजराद्यमननवैपरीत्यमपि सूचितम् किञ्च, अन्नाद्यभावेन क्षुधादिना कष्टं यदृच्छया स्वभावत एव प्राप्नोति। परं श्रेष्ठमित्यभिमाननाशहेतुत्वात् ॥ १५ ॥ तस्येन्द्रियजयादिकञ्च तपोऽसाध्यमपि स्वतो भवतीत्याह नित्यमिति अन्नकांक्षिणो भक्ष्यमात्रेच्छोरनु निरन्तरं शुष्यन्ति विषयरसादुपरमन्तीत्यर्थः। अत एव हिंसा विषयोपभोगार्थपरपीडादिलक्षणाप्युपरमति एवमजितात्मश्रीमत्त्वविपरीतं स्त्र्यादिनिवर्त्तकं दरिद्रस्य जितात्मत्वमुक्तम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

लिङ्गैर्हेतुभिर्जीवसाम्यं गतः इति जीवानां स्वस्य च तुल्यतां मन्वानः अविद्धकण्टक इति पद कण्टकाविद्धः ॥ १४ ॥ निरहंस्तम्भः अहङ्कारस्तम्भरहितः ॥ १५–१६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं श्रीमदस्थानर्थमूलतां प्रदर्श्याथ तत्प्रतीकारार्थं निश्चिनोति—असत इति। तत्कुतः इत्यत आह आत्मौपम्येनेति; दरिद्रः केवलमात्मदृष्टान्तेन भूतानीक्षते यथा स्वस्याघातादिना दुःखादिकं तथा प्राणिमात्रस्यापीत्यात्मौपम्येन भूतानि पश्यन्न तेभ्यो द्रुह्यतीत्यर्थः ॥ १३ ॥ उक्तमेवार्थं सदृष्टान्तमाह—यथेति। यथा कण्टकविद्धाङ्घ्रिः लिङ्गैरन्तर्गतसुखदुःखादिव्यञ्जकमुखविकासम्लानतादिनिमित्तैर्जीवसाम्यं गतः स्वेतरजीवानां स्वस्य च तौल्यं मन्वानः तां कण्टकवेधजां व्यथां दुःखं कण्टकवधां वा नेच्छति तथैवमविद्धकण्टको नेच्छतीति नेत्यर्थः ॥ १४ ॥ किञ्च दारिद्र्यपरम्परया मुक्तिसाधनमपीत्याह—दरिद्र इति चतुर्भिः। निरहंस्तम्भः निर्गताहङ्काररूपस्तम्भः सर्वैरभिजनवित्तविद्याप्रयुक्तैर्मदैर्मुक्तः यदृच्छया स्वप्रयत्नमन्तरेणैव कृच्छ्रं कायशोषणादिकं प्राप्नोति तत्कृत्यमेवाऽस्य केवलमुत्कृष्टं वा तपः ॥ १५ ॥ तदेवाह—नित्यमिति। क्षुधा क्षामः क्षीणो देहो यस्य तस्य तत्र हेतुरन्नकाङ्क्षिणः तत्रापि हेतुर्दरिद्रस्येन्द्रियाणि विशुष्यन्त्यत एव हिंसा च निवर्त्तते ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रसङ्गात्प्रागुक्तं स्मारयति—मन्यमानैरिति। कीदृशं प्रथमं देवसञ्ज्ञितं मरणे कृम्यादिसंज्ञितं भवति देवोऽयं भट्टारकोऽयं कृमिक्लिन्नः विष्ठाकुलः भस्मित इति ॥ ० ॥ ननु, श्रीमदान्धस्याध्यपरिहाराय किमौषधं ? तर्हीति तत्राह, असत इति। असतः हननादिकर्तुः दारिद्र्यं दरिद्रभावः कथं तदञ्जनं आन्ध्यनाशनमभूदिति, तत्राह, आत्मेति आत्मौपम्येन आत्मसाम्येन भूतानि सुखासुखसंसक्तानि ॥ १३ ॥ अत्र दृष्टान्तमाह—यथेति। तां कण्टकव्यथां जन्तोरात्मव्यतिरिक्तस्य तल्लिङ्गैः सुखदुःखविकासकाष्ठ्यादिसूतकैर्जीवेषु सुखादिमत्तया साम्यं साधर्म्यं गतो ज्ञातवानाविद्धकण्टकस्तथा न ॥ १४ ॥ ननु, दारिद्र्यं परमं सुखमित्युक्तं तस्यापि दुःखानुभावः प्रतीयते तत्कथमिति तत्राह—दरिद्र इति। निरहंस्तम्भः अहंमानवर्जितः विद्यादिसर्वमदैर्मुक्तः दरिद्रः यदृच्छया दैवेच्छया यत्कृच्छ्रमाप्नोति तत्कृच्छ्रमस्य दरिद्रस्य परं तपो भवति "एतद्वै परं तपो यद्व्याधितस्तप्यते" इति श्रुतिर्हिशब्दगृहीता ॥ १५ ॥ ननु, कृच्छ्रानुभवः कथङ्कारं तपोभवतीत्याशङ्क्य तं प्रकारं दर्शयति—नित्यमिति। अनुशुष्यन्ति देहशोषमनुशोषं गच्छन्ति इन्द्रियप्राबल्यदौर्बल्ये प्रवृत्तिनिवृत्ती स्यातां ते चान्नसत्ताभावादिना स्याताम् अन्नाभावादिन्द्रियप्राबल्यसाध्या हिंसालक्षणाप्रवृत्तिर्नश्यतीत्यर्थः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रीमदरोगप्रतीकारं निश्चिनोति—असत इति। परं केवलम् ॥ १३ ॥ लिङ्गैर्मुखम्लान्यादिभिर्दृष्टैर्जीवे परस्मिन् साम्यङ्गतः पूर्वानुभूतस्वव्यथासादृश्यं तत्रानुमिमान इत्यर्थः। अविद्धकण्टकः कण्टकेनाविद्धः राजदन्तादिः ॥ १४ ॥ दारिद्र्ये सति मोक्षसाधनानि स्वत एव भवन्तीत्याह—दरिद्र इति त्रिभिः। अहङ्कारेण धनित्वादिगर्वेण यः स्तम्भः नम्रत्वाभावः। स निर्गतो यस्मात् सः सर्वमदैर्मुक्त इति दरिद्रस्य सर्वैरनादृतत्वात् सत्कुलमदादयोऽपि प्रायो नश्यन्तीति भावः ॥ १५–१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

लिङ्गैस्तद्दुःखचेष्टाभिः ॥ १४ ॥ निर्गतोऽहङ्कारात्मकस्तम्भो यस्मात्स निरहंस्तम्भः ॥ १५–१६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

श्रीमदरोगस्य प्रतीकारं निश्चिन्वन्नाहासत इति। परं केवलं यतो दरिद्रः स्वतौल्येन भूतानीक्षते अतो न द्रुह्यतीत्यर्थः ॥ १३ ॥ तत्र दृष्टान्तमाह— यथेति जन्तोः स्वान्यस्य तां व्यथां नेच्छति लिङ्गैर्मुखम्लान्यादिभिर्दृष्टैरन्यस्मिन् जीवे साम्यं गतः पूर्वानुभूतस्वव्यथा सादृश्यं तत्रानुमिमान इत्यर्थः। न तथेति कण्टकेनाविद्धोऽविद्धकण्टकः राजदन्तादिः ॥ १४ ॥ किञ्च दारिद्र्ये सति मुक्तिसाधनानि स्वतो भवन्तीत्याह, त्रिभिः। अहं धनीति यः स्तम्भः स निर्गतो यस्मात् सः सर्वमदैः सत्कुलतादिहेतुकैर्मुक्तस्तस्य सर्वैरवज्ञातत्वात्तेऽपि प्रायः प्रणश्यन्तीत्यर्थः। स यदृच्छया कृच्छ्रमाप्नोति तदस्य परन्तपः ॥१५॥ हिंसा परपीडा ॥ १६ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

असत उपाधितोऽसतोऽत एव श्रीमदांधस्य भाग्यमदेन ज्ञानरहितस्य दारिद्र्यं परमुत्कृष्टमंजनं ज्ञानसाधनमिति। अयं भावः। यस्यासत्त्वमौपाधिकं तस्य भाग्येन मद आंध्यं च भवति। दारिद्र्यप्राप्तताबांध्यं च गच्छति। यस्यासत्त्वं स्वाभाविकं वौपाधिकं वा नास्ति तस्य भाग्येन मदो बाध्यं वा न भवति। आंध्यं परिहारार्थं दारिद्र्यं च नापेक्षितमिति। एतेन सतां दारिद्र्यप्राप्तावप्यांधनिवृतेरभावादसतो दारिद्र्यं परमांजनमिति कथनमनुपपन्नमिति दूषणं पराकृतं। उपाधित इत्यस्य शेषेण यस्यौपाधिकमसत्त्वं तस्य दारिद्र्य परमांजनमित्यथस्योक्तत्वात्॥ १४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इतःपरं श्रूयमाणो मन्यमानैरिमं देहमित्यादिः श्लोकः पुनर्लेखकप्रमादतो लिखित इति मन्तव्यं। व्याकृतचरश्च॥ १३॥ असतो ऋत इति प्रागभिहितं तदुद्धृतिरपि कथमित्यत आह॥ असत इति। श्रीमदान्धस्यासतो हननकर्तुर्जनस्य परमञ्जनं महौषधं तत्किंरूपमित्यत आह॥ दारिद्र्यमिति। कुतस्तदान्ध्यौषधमित्यतस्तद्रुद्धाविभावमावेदयति॥ आत्मौपम्येनेति। दरिद्रो भूतान्यात्मौपम्येनोपमाया भाव औपम्यमात्मनात्मनो वौपम्यं साम्यं तेन भूतानि परं केवलं समीक्षते तद्धननं न करोतीत्यर्थः। अतो दारिद्र्यं परमञ्जनं। परमाञ्जनमित्यपि निरञ्जनः पाठः॥ १४॥ अत्र दृष्टान्तमाचष्टे॥ यथेति। कण्टकैर्विद्धमङ्गं यस्य स जीवसाम्यं गतः स्वेतरेषामप्येतदादिना न मद्वत्स्वेदो भवेदिति स्वसाम्यज्ञानवान् जन्तोः स्वेतरस्य तल्लिङ्गैर्मुखम्लानादिरूपैस्तां व्यथां कण्टकवेधजनितां यथा नेच्छति न भवत्वस्यापि सा व्यथेतीच्छति। तथाऽविरुद्धकण्टकोऽतद्वेधबोधोऽविद्धः कण्टकेनाविद्धः कण्टकोऽयं स इति वा न नेच्छति॥ १४॥ ननु दरिद्राणामपि गाधेतरखेददर्शनात्कथं दारिद्र्यं परमं सुखमित्युच्यत इत्यत आह॥ दरिद्र इति। अहङ्कारकारणकस्तम्भो न विद्यते यस्य निर्गतस्तस्मादिति वा सर्वमदैः पुरोदीरितधनाभिजनविद्याद्युपजनैर्मुक्तो विमुक्तो यदृच्छया भगवदिच्छया कृच्छ्रं कष्टं कर्तृ व्याध्यादिजं वाऽऽप्नोति तदेतदस्य दरिद्रस्य परं तपस्तद्रूपमेव स्वेदरूपं नेत्यर्थः। हि हीच सर्वमदैर्मुक्तताप्राप्तित्यै कृच्छ्रतपस्त्वप्राप्तिप्राप्तित्यै चेति ज्ञेयम्। एतद्वै परमं तपो यद्व्याधितस्तप्यत इति श्रुतिर्हिशब्दगृहीता। यदृच्छया यो दरिद्रः कष्टमाप्नोति तदस्य परं तप इत्यन्वयो वा॥ १५॥ कथं तत्तपोरूपं भवतीत्यतस्त्रिभिराह॥ नित्यमिति। क्षुधाक्षामः कृशः कायो देहो यस्य स तस्यान्नं काङ्क्षतीत्यन्नकाङ्क्षी तस्य दरिद्रस्यानु क्षमतामन्विन्द्रियाणि शुष्यन्ति असत्सु विषयेषु न प्रसरन्ति तल्लौल्यमूला हिंसाऽपि विनिवर्तते॥ १६॥

श्रीसुबोधिनी

तर्हि किं कर्तव्यमित्याकाङ्क्षायामाहासत इति, **असतो** लक्षणं **श्रीमदान्धस्येति**, **श्रीमदेनान्धस्य**, यथा भगवान् "यस्यानुग्रहमिच्छामि हरिष्ये तद्धनं शनै"रिति तथा नारदोऽप्याह, यथा काचकामलादिनान्धस्याञ्जने दत्ते दृष्टिर्भवति न तु स्वभावत एवान्धस्य, अयं च श्रीमदेनान्धः, श्रिया अभावो येनैव भवति तदेवाञ्जनं भवति, तद् दारिद्र्यमेव, **दारिद्र्यं** नाम दुरदृष्टसहितसम्पत्त्यभावः, सन्त्यञ्जनान्यन्यान्यपि व्याध्यादीनि, परं **दारिद्र्यं परममञ्जनं**, न केवलं दारिद्र्यस्य दोषनिवर्तकत्वं किन्तु गुणजनकत्वमपीत्याहा**त्मौपम्येनेति**, **आत्मोपमानं** यत्र तज् ज्ञानमा**त्मौपम्यं**, यथात्मनि सुखदुःखानुभवस्तथा सर्वस्येत्यनुसन्धानं यथात्मसुखार्थं यतते दुःखनिवृत्त्यर्थं च न तु दुःखार्थं तथा सर्वेषामपि सुखदुःखाभावार्थे यतत इत्यर्थः॥१३॥ आत्मौपम्येन भूतानां दर्शनं दरिद्रस्यैव नान्यस्येत्यर्थे दृष्टान्तमाह **यथेति**, दारिद्र्यं सर्वदुःखनिदानं, दारिद्र्यं गतः सर्वाण्येव दुःखान्यनुभवति, न त्वदरिद्रः प्रतीकारबाहुल्यात्, स्वानुभवेनैव **कण्टकेन विद्धाङ्गः** कण्टकव्यथामन्यस्मै न वाञ्छति जातामपि दूरीकरोति, **लिङ्गैः** स्वानुभवैः परदुःखज्ञापकैः कृत्वा **जीवसाम्यं गतः** सर्वेषु जीवेषु समत्वं प्राप्तः, **न तथाविद्धकण्टकः** समत्वं प्राप्नोति॥ १४॥ ननु तथापि दारिद्र्यस्य दुःखरूपत्वात् फलोत्तमत्वेपि स्वरूपतोनिष्टरूपत्वात् कथं स्तूयत इत्याशङ्क्याह **दरिद्रस्येति**, **दारिद्र्यं** मोक्षसाधकमतः स्वरूपतो दुःखरूपमपि तपोवदाशास्यमेव, तस्य मोक्षसाधकत्वमाह **दरिद्रः** प्रथमतो **निरहंस्तम्भः**, अहंलक्षणः **स्तम्भो निर्गतो** यस्मात्, **मोक्षेहङ्काराभावः करणं**, **अहमित्यस्यात्मपरत्वव्यावृत्त्यर्थं स्तम्भपदं**, **अहङ्कारस्तम्भेनैवाज्ञानगृहं** सुस्थिरं भवति, किञ्च **सर्वमदैरपि** मुक्तो भवति, **यदृच्छयैव** च **कृच्छ्रं** क्लेशाधिक्यं प्राप्नोति, ततः किमत आह **तद्धि तस्य परं तप** इति, यत् कष्टेन तपः कर्तव्यं तत् तस्य स्वभावत एव सम्पद्यते, विहितत्वं त्वप्रयोजकम्॥१५॥ **किञ्च** मोक्ष इन्द्रियजयो **योगशास्त्रसिद्धः** साधनत्वेन यथा साङ्ख्येहङ्काराभावो दारिद्र्यं इन्द्रियजयः स्वभावत एव भवति, तदाह **नित्यमिति**, सर्वदा **क्षुत्क्षामदेहस्यान्नकाङ्क्षिण इन्द्रियाण्याशु शुष्यन्ति**, "विषया विनिवर्तन्ते निराहारस्य देहिन" इतिवाक्याद्, **दरिद्रस्येतिहेतुः**, इन्द्रियप्रागल्भ्याभावादेव **हिंसा निवर्तते** ज्ञानेन्द्रियप्रागल्भ्याभावाच्च तद्धेतुभूता तृष्णापि **विषयाभावाच्च**॥ १६॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

दरिद्र इत्यत्र **यत कष्टेनेति** कष्टेनेन्द्रियनिग्रहपूर्वकं **यत्** कर्तव्यं "देवद्विजगुरुप्राज्ञे"त्यादिना भगवतोक्तं वा भगवच्चिन्तनं **वा तत् स्वभावत एव** प्रयत्नं विनैव भवतीत्यर्थः, ननु स्वभावकृतेस्तथात्वं कुतो विहितत्वेनाक्रियमाणत्वादित्यत आहुर**प्रयाचक**मित्यवैधेपि सत्फलस्य स्तम्भाभावादेर्दर्शनादनुकूलतर्करहितं तथा च "येन केनाप्युपायेन मनः कृष्णे निवेशयेदि"तिन्यायात् पदार्थसिद्धौ तात्पर्यं न विहितत्वादावितिभावः ॥ १५ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

आत्मौपम्येनेत्यत्र आत्मेति इदमर्थकथनं, विग्रहस्तु आत्मनः औपम्यं यत्रेति, तादृशेन ज्ञानेनेक्षत इत्यत्र प्रकारता तृतीयार्थः, घटत्वेन जानातीतिवत्, औपम्यमिति स्वार्थे ष्यञ् ॥ १३ ॥ नित्यमित्यस्याभासमाहुः **किञ्च मोक्षे** इति, पूर्वश्लोके साङ्ख्यप्रकार उक्त इत्याशयेनाहुः **यथा साङ्ख्ये** इति, **अहङ्काराभावः** पूर्वश्लोके उक्त इति शेषः, नित्यमित्यत्र तद्धेतुभूता तृष्णेति भोगहेतुभूता बुभुक्षेत्यर्थः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं श्रीमदादेर्दोषं निरूप्य तत्प्रतीकारं निश्चिनोति—असत इति। असतः अवशीकृतेन्द्रियान्तःकरणस्य, अत एव श्रीमदेनान्धस्य विवेकशून्यस्य कर्तव्यमकर्तव्यं चापश्यतः दारिद्र्यं परं केवलमञ्जनम्। अत्रेदं बोध्यम्—यथा रोगरहितस्य पुरुषस्य बलपुष्ट्यादिगुणकरमपि दुग्धघृतादि वस्तु रोगग्रस्तस्य रोगवृद्धिद्वारा तदेव दुर्बलत्वादिसम्पादकं भवति तन्निरोधं विना औषधान्तरस्या अकिञ्चित्करत्वात्तन्निरोध एव रोगनिवृत्तौ मुख्य उपायः, तथा वशीकृतान्तःकरणस्य महात्मनः धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशान्तीत्युक्तरीत्या धर्मादिद्वारा विवेकहेतुरपि धनादिकमसतो मदद्वारा जडताहेतुरेव भवति तन्निवृत्तिरूपं दारिद्र्यं विनाऽउपदेशाद्युपायस्या अकिञ्चित्करत्वात् दारिद्र्यमेव मुख्य उपाय इति। 'लोके दरिद्रस्यैव विवेकदर्शनात्' इत्याह—आत्मौपम्येनेति। आत्मा उपमा यत्र तज्ज्ञानमात्मौपम्यम्, तेन भूतानि दरिद्रः परं केवलमीक्षते, ततो न द्रुह्यति। प्रत्युत परसुखप्राप्तिदुःखनिवृत्तिसाधने स्वदृष्टान्तेनैव प्रवर्तते इति भावः ॥ १३ ॥ 'साम्यदर्शनं दरिद्रस्यैव घटते, नान्यस्य' इत्यत्र दृष्टान्तमाह—यथेति। कण्टकेन विद्धमङ्गं यस्य स यथा जन्तोर्जीवान्तरस्य तां कण्टकवेधजन्यां व्यथां नेच्छति तन्निवृत्त्यर्थं यतते च, तथा अविद्धकण्टकः न कदापि विद्धः लग्नः कण्टको यस्य स तां व्यथां नेच्छति तदुद्धारप्रयत्नं च करोतीति न, दुःखानुभवाभावात्। कण्टकविद्धाङ्गस्य तदनिच्छायां हेतुमाह—जीवेति। यतो लिङ्गैर्मुखम्लान्यादिभिश्चिन्हैर्जीवसाम्यं गतः 'यथा मम कण्टकवेधजं दुःखं जातं तथास्यापि' इति परस्मिन्नपि जीवे स्वसाम्यं प्राप्त इत्यर्थः ॥ १४ ॥ 'किञ्च दारिद्र्यं मोक्षमपि साधयति' इत्याह—दरिद्र इति चतुर्भिः। इह संसारे दरिद्रो निरहंस्तम्भः निर्गतोऽहङ्काररूपः स्तम्भो मोक्षप्रतिबन्धकरूपो यस्मात् सः। तत्र हेतुमाह—मुक्त इति। सर्वैः 'विद्यामदो धनमदस्तथैवाभिजनो मद' इत्युक्तैर्मदैर्मुक्तः। ननु 'तथापि दारिद्र्यस्य कष्टहेतुत्वात् कथं तत् सूयते' तत्राह—कृच्छ्रमिति। यदृच्छया प्रारब्धवशेन यत्किञ्चित्कृच्छ्रं कष्टं प्राप्नोति तद्धि तत्र तस्य परं तप एव भवति, अप्रतिकारपूर्वककष्टसहनस्यैव तपःपदवाच्यत्वात् फलभोगेन मोक्षप्रतिबन्धकपापनिवर्तकत्वाच्चेत्याशयः ॥ १५ ॥ किञ्च दरिद्रस्य नरकादिदुःखहेतुभूता हिंसापि विनिवर्तते। तत्र हेतुमाह—इन्द्रियाण्यनुक्षणं शुष्यन्तीति। तत्रापि हेतुमाह—नित्यमन्नकाङ्क्षिणः। क्षुधा क्षामः क्षीणो देहो यस्य तस्येति ॥ १६ ॥

अन्वितार्थप्रकाशिका

असत इति ॥ असतः अजितेन्द्रियस्य अत एव श्रीमदेनान्धस्य कर्तव्यमकर्तव्यं चापश्यतः दारिद्र्यं परं केवलमञ्जनं दृष्टिप्रसादकम्। यतः परं केवलं दरिद्र एव भूतानि उपमैव औपम्यम्। स्वार्थे ष्यञ्। आत्मना औपम्यं तेन आत्मौपम्येन स्वसादृश्येन ईक्षते ततश्च न द्रुह्यति प्रत्युत परेषामुपकारे प्रवर्तते ॥ १३ ॥ यथेति ॥ कण्टकेन विद्धमङ्गं यस्य सः यथा लिङ्गैर्मुखम्लान्यादिभिश्चिह्नैर्जीवसाम्यं गतः यथा मम कण्टकवेधजं दुःखं जातं तथान्यस्यापीति परस्मिन्नपि जीवे स्वसाम्यं प्राप्तः तत्रापि व्यथामनुमिमानः जन्तोर्जीवान्तरस्य तां कण्टकवेधजन्यां व्यथां नेच्छति तन्निवृत्त्यर्थं यतते च तथा अविद्धकण्टको न कदापि विद्धः लग्नः कण्टको यस्य स तां व्यथां नेच्छति इति न किन्तु उदासीनो भवति तदुद्धारप्रयत्नं च न करोतीति। कण्टकेनाविद्धः अविद्धकण्टकः इति राजदन्तादिर्वा ॥ १४ ॥ दारिद्र्यं मोक्षमपि साधयतीत्याह—दरिद्र इति ॥ इह संसारे दरिद्र एव सर्वैर्विद्याधनादिजैर्मदैर्मुक्तः दरिद्रस्य सर्वैरनादृतत्वात्। सत्कुलमदादयोऽपि प्रायो नश्यन्तीति भावः। अत एव निरहंस्तम्भः निर्गतोऽहंकाररूपः स्तम्भो यस्मात्सः स च यदृच्छया प्रारब्धवशेन यत्किंचित्कृच्छ्रं कष्टमनशनादि प्राप्नोति तद्धि तत्र तस्य परं तप एव भवति। कष्टसहनसाम्यात् भोगस्य पापनिवर्त्तकत्वाच्च ॥ १५ ॥ नित्यमिति ॥ नित्यं क्षुधा क्षामः क्षीणो देहो यस्य तस्य अन्नकाङ्क्षिणो दरिद्रस्य इन्द्रियाण्याशु प्रतिक्षणं शुष्यन्ति। ततश्च नरकहेतुभूता हिंसाऽपि विनिवर्त्तते ॥१६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दारिद्र्यं दरिद्रत्वं परमांजनं श्रेष्ठौषधं कुतस्तत्राह आत्मौपम्येन स्वसादृश्येन परं श्रेष्ठं यथा तथा ईक्षते सर्वेषां सुखःदुखानि स्वतुल्यः तया पश्यतीत्यर्थः ॥ १३ ॥ तदेव सदृष्टांतं वदति यथेति जंतोः तद्व्यथां तस्य कंटकवेधस्य व्यथां दुःखं लिंगैः वदनसंकोचादिचिह्नैः जीवानां साम्यं गतः सर्वजीवानां सुखदुःखे ज्ञानवानस्तीत्यर्थः ॥ १४ ॥ दरिद्रत्वमेव सुखजनकमित्याह निर्गतोऽहं धनीतिस्त्यंभोगर्वोयस्य यदृच्छया कृच्छ्रं कष्टमाप्नोति तत्कष्टं तपोस्ति हि ॥ १५॥ क्षुधया कृशादेहस्य ॥१६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं श्रीमदस्यानर्थमूलतां प्रदर्श्याथ तत्प्रतीकारार्थं निश्चिनोति ॥ असत इति ॥ असतोऽसत्प्रकृतेः, श्रीमदान्धस्य, दारिद्र्यं, परम् अञ्जनम्। रोगादिनान्ध्यं प्राप्तस्य केनचिद्भिषजाऽञ्जितेनाञ्जनेन यथान्ध्यं निवर्त्तते, एवं श्रीमदान्धस्यान्ध्यं दरिद्रताभिरूपाञ्जनेन निवर्त्तते इति भावः। तत् कुत इत्यत आह। दरिद्रः, परं केवलं, औत्मौपम्येनात्मदृष्टान्तेन, भूतानि ईक्षते। यथा स्वस्याघातादिना दुःखादिकं, तथा प्राणिमात्रस्यापीत्यात्मौपम्येन भूतानि पश्यन्न तेभ्यो द्रुह्यतीत्यर्थः ॥ १३ ॥ उक्तार्थमेव सदृष्टान्तमाह ॥ यथेति ॥ यथा, कण्टकैः विद्धान्यङ्गानि यस्य सः, सामान्येन विशेषोपादानलक्षणया कण्टकविद्धाङ्घ्रिरित्यर्थः। लिङ्गैः अन्तर्गतसुखदुःखादिव्यञ्जकमुखविकारम्लानतादिभिः निमित्तभूतैः, जीवसाम्यं स्वेतरजीनानां स्वस्य च तौल्यं, गतो मन्वानः पुमानित्यर्थः। तां कण्टकवेधनजां, व्यथां दुःखं, कण्टकवेधतां वा, जन्तोः अन्यस्य प्राणिनः, न इच्छति। तथा, अविद्धः पादादौ न लग्नः कण्टको यस्य सः, कण्टकाविद्धपादतलादिः पुमानित्यर्थः। तां व्यथां, न, नानुसंधत्ते इत्यर्थः। कण्टकाविद्धपादवेदनानभिज्ञः कण्टकनिष्कासनकाले व्यथया मुखम्लानिं गच्छन्तं कंचित्प्रति किमेवं मुखम्लानिमुपगच्छसीति वदन्, प्रत्युत तमुपहसतीति भावः ॥ १४ ॥ किं च दारिद्र्यं परंपरया मुक्तिसाधनमपीत्याह। दरिद्र इति चतुर्भिः ॥ दरिद्र इति ॥ निर्निर्गतः अहंस्तम्भोऽहंकाररूपस्थूणभावः यस्य सः, सर्वे अभिजनवित्तविद्यादिप्रयुक्ता ये मदास्तैः, मुक्तो रहितः, दरिद्रः पुमान्, इह लोके, यदृच्छया स्वप्रयत्नमन्तरेणैव, यत् कृच्छ्रं कायशोषणादिकं प्राप्नोति, तद्धि तत् कृच्छ्रमेव तस्य दरिद्रस्य, परं केवलमुत्कृष्टं वा, तपः 'एतद्वै परं तपो यद्व्याधितस्तप्यते' इति श्रुतेः ॥ १५ ॥ ननु कृच्छ्रानुभवः कथंकारं तपो भवतीत्याशङ्क्य तत्प्रकारं दर्शयति ॥ नित्यमिति ॥ नित्यमेव, क्षुधा क्षामः क्षीणो देहो यस्य तस्य, तत्र हेतुः। अन्नकाङ्क्षिणः, तत्रापि हेतुः। दरिद्रस्य, इन्द्रियाणि, अनुशुष्यन्ति। अत एव, हिंसापि विनिवर्त्तते ॥१६॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

असत इति १०.१०.१३.

आत्मवत् सर्वभूतानामालोको येन सिद्ध्यति। तत्सर्वतोऽप्यभ्यधिकं स्फुटं दारिद्र्यमञ्जनम् ॥ १९ ॥
असुदृष्टिरपि प्रायो वीक्षते परमं जनम्। यद्युक्तेऽक्षिण पुमान् युक्ता दारिद्र्येऽञ्जनवाच्यता ॥ २० ॥
यद् द्रावयत्यखिलभीतिद मर्थजातं यच्छङ्ख चक्रधरपादरतिं तनोति।
यद्दुर्मदादि रिपुवर्गमदं धुनोति दारिद्र्यमुत्कटतपोऽधिकमित्यगूढम् ॥ २१ ॥
लोभो निष्फलतां प्रयात्यतितरां नोत्पद्यतेऽहङ्कृतिः क्रोधो न श्रयतेऽपगच्छति मदः कामस्तु निर्वायकः।
मोहो मोहमुपैत्यमत्सरगतिर्यद्योगतो जायते पुंसः सिद्धवदप्रयत्नमिति तद् दारिद्र्यमीड्यं न किम् ॥ २२ ॥
इन्द्रियाणां वशीकारप्रकारो दुष्करो मुनेः। स चेत्सेत्स्यति यद्योगात्स्पृहणीयं न कस्य तत् ॥ २३ ॥
विद्वत्सद्मनिवासिनी च जनताऽनभ्यर्हितं चावनौ दारिद्र्यं सुतपस्विभिः सह तपस्तप्त्वा प्रसाद्येश्वरम्।
यत्र त्वं वससि प्रसादसुमुखस्तत्र स्थितिर्मेऽस्त्विति वव्रे तद्वरमीदृशं यदुभयोर्व्याप्तिर्जने प्रायशः ॥ २४ ॥

कृष्णप्रिया

जो उच्छृंखल धनमद से अन्ध बन चुके हैं उनके लिये तो "दारिद्र्य" ही सर्व श्रेष्ठ नेत्राञ्जन है। दरिद्र होने पर सान ठिकाने आती है कि, जैसे कष्ट मुझे अप्रिय है—वैसे दूसरे के लिए भी अप्रिय होगा ॥ १३ ॥ जिस जीव के शरीर में एक बार काँटा चुभ चुका और उसकी वेदना को महसूस करचुका है वह तो यह नहीं चाहता कि दूसरों को भी काँटा चुभे। क्योंकि उस दर्द और उसके द्वारा होने वाले विकारों को खुद जानता है कि दूसरों को वैसी ही वेदना होती है। लेकिन जिसे कभी काँटा गड़ा ही नहीं वह उसकी पीड़ा की कल्पना कैसे कर सकता है ॥ १४ ॥ दरिद्र में घमंड नहीं होता न हेकड़ी होती, सर्व प्रकार के मद से वह मुक्त रहता है, उस दरिद्र को कोई भी मद नहीं छूता, दैवसंकेत से जो कुछ कष्ट सहने पड़ते हैं वह उसके लिये श्रेष्ठ तपश्चरण बन जाता है ॥ १५ ॥ दरिद्र को अन्न की आकांक्षा रहती है, भूख के मारे अङ्ग शिथिल बन जाते हैं काया दुबली पतली बन जाती है, इन्द्रियाँ इतनी कमजोर पड़ जाती है कि हिंसा द्वेष के भाव तक नहीं उठते ॥१६॥

दरिद्रस्यैव युज्यन्ते साधवः समदर्शिनः । सद्भिः क्षिणोति [1]संतर्षं तत आराद् विशुद्ध्यति[2] ॥ १७ ॥
[3]साधूनां समचित्तानां मुकुन्दचरणैषिणाम् । उपेक्ष्यैः किं धनस्तम्भैरसद्भिरसदाश्रयैः ॥ १८ ॥
तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदान्धयोः । तमोमदं [4]हरिष्यामि स्त्रैणयोरजितात्मनोः ॥ १९ ॥
यदिमौ लोकपालस्य पुत्रौ भूत्वा तमाप्लुतौ । न विवाससमात्मानं विजानीतः सुदुर्मदौ ॥ २० ॥
अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः । स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥ २१ ॥
वासुदेवस्य सांनिध्यं लब्ध्वा दिव्यशरच्छते । वृत्ते [5]स्वर्लोकतां [6]लब्ध्वा [7]लब्धभक्ती [8]भविष्यथः ॥ २२ ॥

श्रीशुक उवाच

[9]स एवमुक्तो देवर्षिर्गतो नारायणाश्रमम् । नलकूबरमणिग्रीवावासतुर्यमलार्जुनौ ॥ २३ ॥
ऋषेर्भगवतस्तस्य[10] सत्यं कर्तुं वचो हरिः । जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ ॥ २४ ॥

कर्दमक्षमा

अन्वयः—समदर्शिनः साधवः दरिद्रस्य एव युज्यन्ते सद्भिः संतर्षं क्षिणोति ततः आराद् विशुध्यति ॥ १७ ॥ मुकुन्दचरणैषिणां समचित्तानां साधूनां असदाश्रयैः उपेक्ष्यैः असद्भिः धनस्तम्भैः किम् ॥ १८ ॥ तद् अहं वारुण्या माध्व्या मत्तयोः स्त्रैणयोः अजितात्मनोः श्रीमदान्धयोः तमोमदं हरिष्यामि ॥ १९ ॥ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ सुदुर्मदौ आत्मानं विवाससं न विजानीतः ॥ २० ॥ अतः स्थावरतां अर्हतः एवं पुनः न यथा स्यात् मत्प्रसादेन तत्र अपि स्मृतिः स्यात् तत्र मदनुग्रहात् दिव्यशरच्छते वृत्ते वासुदेवस्य सान्निध्यं लब्ध्वा स्वर्लोकतां लब्ध्वा लब्धभक्ती भविष्यथः ॥ २१–२२ ॥ एवं उक्तः सः देवर्षिः नारायणाश्रमं गतः नलकूबरमणिग्रीवौ यमलार्जुनौ आसतुः ॥ २३ ॥ भगवतः तस्य ऋषेः वचः सत्यं कर्त्तुं हरिः यत्र यमलार्जुनौ आस्तां तत्र शनकैः जगाम ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

युज्यंते स्वत एव संगच्छंते । तर्षं तृष्णाम् ॥ १७ ॥ ननु साधूनामपि धनिकः प्रियः स्यान्न दरिद्र इति चेत्तत्राह । साधूनामिति । धनेन स्तंभो गर्वो येषां तैः ॥ १८ ॥ तमोमदमज्ञानकृतमदम् ॥ १९ ॥ तमःप्लुतौ तमोव्याप्तौ ॥ २० ॥ शपति । अतोऽर्हत इति । अनुगृह्णाति स्यातां नैवमित्यादिना । मत्प्रसादेन स्मृतिः स्यात् ॥ २१ ॥ स्वर्लोकतां देवत्वं पुनर्लब्ध्वा मदनुग्रहाल्लब्धभक्ती भविष्यत इति ॥ २२–२३ ॥ प्रस्तुतमाह । ऋषेरिति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततस्तृष्णाक्षयात् । आराच्छीघ्रम् । सिध्यति मुक्तो भवतीत्यर्थः । 'आराद्दूरसमीपयोः' इति विश्वः । ननु दरिद्रस्य तृष्णैव सर्वदोषमयीति वाच्यं तस्या अपि प्रतीकारसंभवादित्याह—दरिद्रस्यैवेति । धनित्वदारिद्र्योस्तुल्यदर्शित्वेनोभयेषामपि गृहे विरक्तसंचारस्य संभवेऽपि साधवो दरिद्रस्यैव युज्यंते दरिद्रकर्तृकस्यैव तद्वंदनसंतोषणसंवादादिसंभवात्तस्यैव ते स्वयं संयोगजनितफलदायका भवंति न तु धनिनो मदांधस्य । अत्रानयोः संनिधौ वर्तमानोऽहमेव प्रमाणमिति भावः । ततश्च सद्भिः सत्संयोगमहिम्नैव त तर्षं तृष्णां दरिद्रः स्वयमेव क्षिणोति क्षीणीकरोति तत्कृपालब्धस्य भक्त्यमृतस्य तृष्णाहरस्वभावत्वादिति विश्वनाथः ॥१७॥ साधुसमागमे शंकते—नन्विति । धनिको धनी उपेक्ष्यैस्त्यक्तप्रायैः । तत्र हेतुः असद्भिर्धनमदावज्ञातसज्जनैः । तत्रापि हेतुः असतां विटनटपिशुनवेश्यादिजनानामाश्रयैः । "प्रायेण व्यसनासक्ता धनिनो व्यसनिप्रियाः" इति संग्रहात् ॥१८॥ नन्वस्त्वेतदत्र भवानेतयोर्दंडमुपेक्षां वा करिष्यतीत्यपेक्षायां दंडमेवैतयोर्हितत्वात्करिष्यामीत्याह—तदिति । स्त्रैणयोः स्त्रीवशवर्तिनोः । अजितात्मनोरवशीकृतमनसोः ॥ १९ ॥ लोकपालस्य कुबेरस्य । विवाससं नग्नम् । आत्मानं देहम् । तत्र हेतुः सुदुर्मदौ मदिरामत्तौ ॥ २० ॥ शपति शापं ददाति । यतः सुदुर्मदौ अतः स्थावरतां वृक्षतां प्राप्तमिति शेषः । अनुगृह्णाति—अनुग्रहं करोति । एवं विवाससौ पुनर्न स्यातां भवेताम् । तत्रापि स्थावरत्वेपि ॥ २१ ॥ दिव्यशरच्छते दैविकवर्षशते वृत्तेऽतीते सति ।

---

१. त तर्ष–वंशी. त पु.; तत्तर्षं–वीर. विज. । २. तम आराद्विनश्यति–च पु टी.; आराद्धि सिद्ध्यति–विज. । ३. दर्शनान्तो भवेद्बन्धः पुंसोक्ष्णोस्सवितुर्यथा–इदमर्धमधिकं च. पु. टी । ४. हनिष्यामि–गो. प्रे. टी. । ५. स्वर्लोकतां–वंशी सुदर्शन. वीर. विज.; स्वलोकतां–श्रीधर. । ६ भूयो–श्रीधर. वंशी. वीर. विज. । ७. लब्ध्वा भक्तौ–विज. । ८. भविष्यतः–श्रीधर. वंशी. वीर. विज. । ९. एवमुक्त्वा–श्रीधर. वंशी. वीर. विज. । १०. भागवतमुख्यस्य–श्रीधर वंशी. वीर. विज. ।

वासुदेवस्य सान्निध्यं श्रीकृष्णनैकट्यं यथास्यात्तथा। तावत्कालस्यैव भगवदवतारे शिष्टत्वात् भूयः पुनः स्वर्लोकतां देवत्वं लब्ध्वा मदनुग्रहादिति पूर्वश्लोकगतमिह संबध्यते। तस्मिन्देवत्वे। लब्धा भक्तिर्याभ्यां तौ लब्धभक्ती भविष्यथ इति संबंधः। यद्वा—लब्धभक्ती संतौ स्वर्लोकतां भविष्यथः प्राप्स्यथः। भुवः प्राप्तौ परस्मैपदमार्षं वासुदेवस्य सांनिध्यं लब्ध्वेति योज्यम् ॥ २२ ॥ यमलार्जुनौ सहोत्पन्नककुभौ ॥ २३ ॥ प्रस्तुतं प्रसङ्गम्। ऋषेर्नारदस्य। वचः 'वासुदेवस्य सांनिध्यम्' इत्यादिरूपम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किञ्च सत्सङ्गत्या चायं कृतार्थो भवतीत्याह—दरिद्रस्येवेति, साधवोऽपि दरिद्रस्यैव युज्यन्ते प्रयत्नं विनाऽपि मिलिता भवन्ति, उभयेषामपि विविक्तसञ्चारादिति भावः। एवकारान्नतु धनिनां तेषां जनसङ्घट्टप्राये तद्वासे दुर्घटगमनत्वादिति भावः। न चान्यलोकवत्तैरपि दरिद्रस्यायोगो धनिनो योगश्च यत्नेनापाद्यत इत्याह—समं धनहानिलाभयोस्तुल्यं द्रष्टुं शीलं येषां ते अतः सद्भिर्युज्यमानमात्रैर्हेतुभिस्तमन्नविषयकमपि सर्वं तर्षं स्वयन्दरिद्र एव क्षिणोति आराच्छीघ्रं हि निश्चितम् ॥ १७ ॥ ननु, साधुभिर्मा क्रियतां स्वलाभार्थं धनयोगे यत्नः अनुग्रहार्थं तु क्रियतां तत्राह—साधूनामिति। एते साधवः सदाचारास्ते तु यत्र स्त्रीद्यूतमासव इति दर्शनादसन्तो सदाचाराः एते समचित्ता धनित्वाद्यनित्ययोः समदृष्टयस्ते तु धनगर्वित्वेन तयोर्विषमदृष्टयः एते मुकुन्दचरणैषित्वेन तदेकाश्रयास्ते तु विषयैषित्वेनादसदाश्रयाः इत्येवं प्रकृतिविरोधादनभिरुचेरुपेक्ष्यैस्तादृशयत्नमयानुग्रहायोग्यस्तादृशानुग्रहरूपं प्रयोजनं किं स्यान्नैवेत्यर्थः ॥ १८ ॥ ननु, माध्व्या मत्तता क्षणादपयास्यति तत्राह—श्रीमदान्धयोरिति। श्रीमदान्धतायाः स्थायित्वादसकृन्माध्वीपानेन मत्तताप्यनुवर्त्स्यत्येवेत्यर्थः। अत एव स्त्रैणयोः स्त्रीलम्पटयोः ननूपभोगेन स्त्रैणता शाम्येत् नेत्याह अजितात्मनोः असंयमितमनसोरिति ॥ १९ ॥ पुत्रौ भूत्वापि तमोगुणव्याप्तौ न केवलमज्ञानेन नग्नौ किं तु मदेन मय्यवज्ञयापीत्याशयेनाह—सुदुर्मदाविति। अस्य वटोरग्रे नग्नत्वे को वा दोष इति महादुष्टमदावित्यर्थः ॥२०॥ अत इति युग्मकम्। अतो निजकर्मदोषादेवेत्यर्थः। स्थावरतां वृक्षयोनिमर्हतः तमःप्लुतत्वेन स्थावरतुल्यत्वात् अतः स्थावरत्वेन परमदारिद्र्ये सति एवमीदृशौ पुनर्न स्याताम् ननु, स्थावरत्वं बहूनां वर्त्तते नैतावता शिक्षा स्यात् तत्राह—स्मृतिः पूर्वजन्मवृत्तानुस्मरणम् अत एव सदा परमभगवत्प्रियाणां व्रजजनानां सेवा च ताभ्यां कृता तथा च श्रीहरिवंशे "यौ तावर्जुनवृक्षौ तु व्रजे सत्योपयाचनौ" इति ॥ २१ ॥ वासुदेवस्य मयि योऽनुग्रहस्तस्मात्तस्यैव सान्निध्यं लब्ध्वा दिव्यशरच्छत इति तावत्काल एव श्रीभगवदवतारात् लब्धभक्ती भविष्यथ इति भक्तिरसिकानां भक्तिव्यतिरिक्ताशीरस्फूर्तेः लब्ध्वेति भक्तेः स्थिरतां बोधयति ॥ २२ ॥ पूर्वोक्तं तत्रागमनस्य यादृच्छिकत्वं दर्शयति—गत इति। यमलौ सहजातौ अर्जुनौ आसतुः बभूवतुः श्रीकृष्णस्यार्जुननामगोपसखत्वात् तन्नाऽम्नाप्येतौ किल सोऽनुगृहिष्यतीति तत्कृपयैवेति भावः ॥ २३ ॥ तदेवमितिहासं प्रदर्श्य तस्य सम्प्रति यद्भगवदनुस्मृतत्वं दर्शितं तदेव दर्शयति—ऋषेरिति। तद्वचः सत्यता योग्या सा च तेनैव प्रवर्तनीयेति भावः। तत्रापि भगवतः भक्त्याख्यपरमविद्याज्ञानात्परमपूज्यस्य भागवतमुख्यस्येति च क्वचित्पाठः॥ हरिरिति तच्छापादुद्धरणाभिप्रायेण शनकैरिति शब्दसमुत्थानेन मात्राद्यागमनशङ्कया किंवा बाल्यलीलया ततश्चोलूखलस्य शनैराकर्षणेन यतनमपि न जातमिति ज्ञापितम् एवं बलेन तदाऽऽकर्षणार्थं रिङ्गणेनैव गमनम् उक्तं च द्वितीये "यद्रिङ्गतान्तरगतेन" इति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

किञ्च, सत्संगत्या चायं कृतार्थो भवतीत्याह—दरिद्रस्येति। दरिद्रमीश्वरञ्च समं तत्त्वविचारेण तुल्यं द्रष्टुं शीलमेषामिति तथाभूता अपि दरिद्रस्यैव, न तु धनादिमत्तानाम्, युज्यन्ते स्वयमेव मिलन्ति, तेषां वैभवेनान्तिके गमनस्याप्यसम्भवात्। यद्वा, दीनवात्सल्याद्दरिद्रहितार्थमेव युक्ता भवन्तीत्यर्थः। अथवा, मा लक्ष्मीस्तया सह वर्त्तत इति समो भगवान्, तद्दर्शिनः सदा चित्तान्तस्तदनुभविनो महान्तो दरिद्रस्यैव युज्यन्ते, प्रायोऽकिञ्चनैर्भगवद्भक्तैः सह दरिद्रस्य विषयाभावेन समतया सख्यात्, तथा दीनेषु तेषां कृपाधिक्याच्चातः सद्भिर्हेतुभिस्तमन्नविषयकं तर्षं लोभमक्षय्यं वा विषयरागं स्वयं दरिद्र एव क्षिणोति, ततस्तर्षक्षयात्। आरात् शीघ्रम्; हि निश्चितम् ॥१७॥ नन्वाढ्यानामपि कदाचिद्धनद्वारेण सत्संगो नाम घटेत? तत्राह-साधूनामिति सदाचाराणां समचित्तानामात्मतत्त्ववेदिनामित्यर्थः। मुक्तिरपि कुत्सिता यस्माद्भजनानन्दात्तं ददातीति मुकुन्दो भगवान्, तच्चरणेप्साशीलानाञ्चैषां त्रिविधानामुत्तरोत्तरमुपेक्षायां श्रेष्ठ्यमुह्यम्, यद्वा, मुकुन्दचरणैषिणामित्यस्यैव विशेषणत्वे यथोत्तरं हेतुहेतुमत्त्वम्, स्वयमसद्भिः पुनश्चासतामाश्रयैः ॥ १८ ॥ ननु, माध्व्या मत्तता क्षणादपयास्यति? तत्राह—श्रीमदान्धयोरिति, श्रीमदान्धतायाः स्थायित्वादसकृन्माध्वीकपानेन मत्तताप्यनुवर्त्स्यत्येवेति भावः। अतएव स्त्रैणयोः स्त्रीलम्पटयोः। ननूपभोगेन स्त्रैणता शाम्येत? नेत्याह—अजितात्मनोरसंयमितमनसोरिति; यद्वा, विशेषणानामेषां यथेष्टं हेतुहेतुमत्ता द्रष्टव्या ॥ १९ ॥ पुत्रौ भूत्वापि तमोगुणव्याप्तौ; न केवलमज्ञानेन नग्नौ, किन्तु श्रीमदेन मय्यवज्ञयापीत्या-

शयेनाह—सुदुर्म्मदाविति । अस्य वटोरग्रे नग्नत्वे को वा दोष इति महादुष्टमदावित्यर्थः ॥ २० ॥ अत इति निजकर्म्मदोषादेवेत्यर्थः । स्थावरतां वृक्षयोनिमर्हतः, तमःप्लुतत्वेन स्थावरतुल्यत्वात् । स्मृतिर्ज्ञानं पूर्वजन्मवृत्तस्मरणं वा, तेन पुनस्तादृशपापकर्म्मण्यप्रवृत्तेः, साधुसेवायाश्च प्रवृत्तेरतएव सुच्छायादिना सदा व्रजजनानां सेवा ताभ्यां कृता । तथा च श्रीहरिवंशे (विष्णु॰प॰ ७।२२)—'यौ तावर्ज्जुनवृक्षौ तु व्रजे सत्योपयाचनौ' इति । मम प्रसादेनेत्यन्यथा तादृशशापकर्मिणोस्तदसम्भव इति तत्त्वतः क्रोधाभावः, शापश्च केवलं कृपयवेति बोधयति ॥ २१ ॥ वासुदेवस्य मयि योऽनुग्रहस्तस्मात्तस्यैव सान्निध्यं लब्ध्वा श्रीमथुरायां बृहद्वने श्रीनन्दावासनिकटे सर्वोपकारकसुच्छाय महार्ज्जुन वृक्षजन्म प्राप्त्येति ज्ञेयम् । 'दिव्यशरच्छते' इति शापकालमारभ्य तावत्काल एव श्रीभगवदवतारात् । 'लब्धभक्ती भविष्यतः' इति भक्तिं विना निःशेष दोष दुःखानपगमात् । यद्वा, भक्तिरसिकानां भक्तिव्यतिरिक्ताशीरस्फूर्त्तेः, लब्ध्वेति भक्तेः स्थिरतां बोधयति ॥२२॥ नारायणस्याश्रमं श्रीवैकुण्ठलोकम्, तदैव प्रियश्रीरुद्रानुचरशापेन महापराधं मत्वा तं क्षमयितुम्; किंवा स्वोक्तसिद्धिं प्रार्थयितुम्; यद्वा, बदरिकाश्रमम्,—साक्षाच्छ्रीभगवति लज्जादिना तत्प्रार्थनस्यायोग्यत्वात्तदवतारे निजगुरौ तत्प्रार्थनार्थम्, यद्वा, भक्त्या तद्दर्शनार्थम्, तत एव तत्र गच्छन् वर्त्मन्यापतितं कृत्यं समाधाय निजाचरितं तदशेषं गुरौ निवेदयितुं गतः । यमलौ सहजातौ श्रीकृष्णस्यार्ज्जुनसखत्वात्तन्नाम्नाप्येतौ किल सोऽनुग्रहीष्यतीति श्रीनारदानुग्रहेणैव तत्संज्ञकौ वृक्षौ बभूवतुः ॥ २३ ॥ ऋषेरिति तद्वचः सत्यता भगवतो महाभागवतोत्तमत्वेन भगवत्तुल्यस्येति परमभक्तिश्चोक्ता, अतएव सत्यं कर्त्तुम् । हरिरिति तच्छापादुद्धरणाभिप्रायेण । शनकैरिति शीघ्रगत्योलूखलाकर्षणशब्दोत्थानेन तत्र श्रीयशोदाद्यागमनस्य शंकया; किंवा बाल्यलीलया महोलूखलाकर्षणेन शीघ्रगमनाप्रकटनात् । एवं बलेन तदाकर्षणार्थं रिंगणेनैव गमनं ज्ञेयम् । तथा चोक्तं द्वितीये (भा॰ २।७।२७)—'यद्रिंगतान्तरगतेन' इति ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

युज्यन्ते सम्भाषणादियोग्याः तर्षं तृष्णाम् आरात्समीपे आसन्नमपि तमो विशुद्ध्यति निरस्यतीत्यर्थः ॥ १७ ॥ उपेक्ष्यैः किं धनस्तम्भैः स्तम्भहेतुभिर्धनैः किम् ? ॥ १८-२० ॥ स्थावरतामर्हतः "विवासस्त्वं स्थावरस्य हि युज्यते इत्यभिप्रायः ॥ २१ ॥ वृत्तं अतीते स्वर्लोकतां स्वर्देवलोकयोग्यताम् ॥ २२-२४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवंविधस्य दरिद्रस्यैव समदर्शिनः साधवो युज्यन्ते सङ्गता भवन्ति, ननु, परिशुष्केन्द्रियस्यापि विषयतृष्णानपायात् श्रीमदान्धात्कोऽस्य विशेष इत्यत्राह—सङ्गतैः सद्भिः हेतुभिस्तत्तर्षं विषयतृष्णां क्षिणोति क्षपयति । यद्वा, तत्तर्षं कर्तृ क्लीबत्वमार्थं क्षिणोति नश्यति ततस्तत्तर्षक्षयादारात्समनन्तरमेव विशुद्ध्यति प्रकृतिसम्बन्धरूपाशुचिरहितो भवति विसिद्ध्यतीति पाठे मुक्तो भवतीत्यर्थः ॥ १७ ॥ ननु, धनमेव स्वापेक्षितमत आह—साधूनामिति । मुकुन्दचरणमेव निरतिशयपुरुषार्थरूपं मन्वानानां समचित्तानां स्वतुल्यभूतान्तरदर्शिनां साधूनामत एवोपेक्ष्यैर्द्धनस्तम्भैः स्तम्भहेतुभिर्द्धनैरसद्भिरनर्थमूलमदहेतुत्वेन दुष्टैरत एवासतामाश्रयैस्ते आश्रयो येषां तैरिति वा एवंविधैर्द्धनस्तम्भैः किं ? न किञ्चिदपि प्रयोजनमित्यर्थः । यद्वा, साधूनामपि धनिकमेव प्रियः स्यादित्यत्राह—साधूनामिति । धनेन स्तम्भो येषां तैरसदाश्रयैः सदाश्रय रहितैस्तत्समागम रहितैरित्यर्थः । अत एवोपेक्ष्यैरसद्भिः किमिति ॥ १८ ॥ तत्तस्माच्छ्रीमदनिवृत्तेरेव पुरुषार्थपर्यवसायित्वाद्वारुण्या माध्व्या सुरया मत्तयोः श्रीमदेनान्धयोरजितेन्द्रिययोः स्त्रीवश्ययोर्युवयोः तमोमदमज्ञानकृतं मदं हरिष्याम्यपनेष्यामि ॥ १९ ॥ यद्यस्माल्लोकपालस्य पुत्रौ भूत्वापि इमौ भवन्तौ तमसा व्याप्तौ विवाससं नग्नमात्मानं न विजानाते ॥ २० ॥ अतः स्थावरतामर्हतः विवाससमात्मानमजानतोर्वस्त्राच्छादनरहिततरुजन्मयुक्तमिति भावः । इत्थं शप्त्वाऽनुगृह्णाति—स्यातामित्यादिना । एवमेव सर्वदा स्थावराकृती यथा न स्यातां तथार्हतः यद्वा किमर्थमेव निरपराधयोः शापं प्रयच्छसीत्यत्राह—पुरा तरुजन्मनः प्राग्यथा स्यातां यादृशौ श्रीमदान्धौ स्यातामेवं तरुजन्मनः पश्चान्माभूतामित्येवमनुग्रहार्थं शाप इत्यर्थः । प्रकारान्तरेणाप्यनुगृह्णाति तत्रापि स्थावरत्वेऽपि मत्प्रसादेन हेतुना स्मृतिः पूर्वजन्मस्मृतिः स्यात् ॥ २१ ॥ तथा मदनुग्रहाद्धेतोर्दिव्यवर्षशतान्ते वासुदेवस्य वसुदेवसूनोर्भगवतः सान्निध्यं लब्ध्वा वृत्ते तरुत्वेऽतीते सति पुनः स्वर्लोकतां देवत्वं लब्ध्वा वासुदेवे लब्ध्वा भक्तिर्याभ्यां तथाभूतौ भविष्यतः ॥ २२ ॥ स देवर्षिरित्थमुक्त्वा बदर्याश्रमं गतः नलकूबरमणिग्रीवौ तु सहजातावर्जुनौ वृक्षावासतुः ॥ २३ ॥ भागवतमुख्यस्य नारदस्य तद्वचः सत्यं कर्तुं हरिः श्रीकृष्णः शनैरुलूखलमाकर्षन् यत्र यमलार्जुनौ स्थितौ तत्र जगाम ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ततः किमत आह–दरिद्रस्येति । युज्यन्ते सङ्गम्यन्ते सत्सङ्गतिर्भवतीत्यर्थः । तत्फलमाह—सद्भिरिति । रसोऽप्यस्य परं दृष्ट्वा निवर्तत इति स्मृतेः । विषयतृष्णा निवर्तत इत्यर्थः । ततः विषयः तृष्णा निवृत्तेरारात् क्षिप्रं सिध्यति मुक्तो भवतीति

“आराद्दूर समीपयोः” इति च ॥ १७ ॥ सच्छिक्षया विद्यादिमदान्धानामपि दरिद्रस्यैव श्रेयः किं न स्यात् ? इत्याशङ्क्य सतामुपेक्षणीयत्वेन सत्सङ्गत्या श्रेयः सिद्धिर्दवीयसीत्याशयेनाह—साधूनामिति । महतां दर्शने धनेन स्तम्भः प्राविण्यगुणरहितैः असतामाश्रयभूतैः ॥ १८ ॥ नन्वस्तु प्रकृते भवतैतयोः किं क्रियते दण्ड उत उपेक्षा वा ? इत्याशङ्क्य दण्ड एव क्रियत इत्याह–तदहमिति । माध्व्या मधुकृतया ॥ १९ ॥ तमः प्लुतौ अज्ञानाऽऽवृतौ विवाससं वस्त्रहीनम् आत्मानं न विजानीत इति यतोऽतः ॥ २० ॥ स्थावरतां प्राप्तुमर्हथः तत्र स्थावरत्वेऽपि ॥ २१ ॥ स्मृतेः फलमाह—वासुदेवस्येति ॥ २२ ॥ यमलार्जुनौ सहोत्पन्नार्जुनौ ॥ २३-२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नच दरिद्रस्यैका तृष्णैव सर्वदोषमयीति वाच्यं तस्या अपि प्रतीकारसम्भवादित्याह—दरिद्रस्यैकेति । धनित्वदारिद्र्योस्तुल्यदर्शित्वेनोभयगृहान् कृपया गच्छन्तोपि साधवो दरिद्रस्यैव युज्यन्ते दरिद्रेणैव तद्वन्दनसम्भाषणसम्वादादिसम्भवात् तस्यैव ते स्वयं योगजनितफलदायका भवन्तीत्यर्थः । नतु धनिनो मदान्धस्य अनयोः सन्निधौ वर्तमानोऽहमेव प्रमाणमिति भावः । ततश्च सद्भिः सत्सङ्गमहिम्नैव तं तर्षं तृष्णां दरिद्रः स्वयमेव क्षिणोति क्षीणीकरोति तत्कृपालब्धस्य भक्त्यमृतस्य तृष्णाहरस्वभावत्वात् अत एव पूर्वमुक्तं कृच्छ्रं यदृच्छयाप्नोतीति कृच्छ्रस्य यादृच्छिकत्वं नतु कर्मजनितत्वं भक्तस्य कर्मानङ्गीकारात् ॥ १७ ॥ न च साधूनां धनोपाधिको धनिकसंयोगः सम्भवतीत्याह—साधूनामिति । धने स्तम्भो गर्वो येषां तैः असद्भिरवैष्णवैः असदाश्रयैरवैष्णवसेविभिः तेन गर्वरहिता अदरिद्रा वैष्णवसेविनो धनिनोपि साधुभिः संयुज्यन्त एवेति भावः ॥ १८ ॥ तदनयोर्गर्वरोगस्य कां चिकित्सां करोमीति मनसि विचार्य्य निश्चिनोति–तदहमिति चतुर्भिः । माध्व्या मधुमय्या तमोऽज्ञानम् ॥ १९-२० ॥ स्थावरतामिति निरावरणयोः स्तब्धयोरब्रुवाणयोरनयोः स्थावरत्वमेवोचितमिति भावः । स्थावरत्वेऽपि मत्प्रसादेन स्मृतिरस्तु स्मृतौ सत्यामपि मदनुग्रहादित्यादिदेवमानेन शरच्छते वर्षशते वृत्ते सति वासुदेवस्य सान्निध्यं लब्ध्वा लब्धभक्ती सन्तौ स्वर्लोकतां भविष्यतः प्राप्स्यतः भूप्राप्तौ परस्मैपदमार्षम् ॥ २१-२३ ॥ प्रस्तुतमाह ऋषेरिति ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

संसारहेतुभूतं तर्षं तृष्णाम् ॥ १७ ॥ साधवो जनस्य शुद्ध्यर्थं तत्समीपे सङ्गच्छन्ति न धनार्थं सा च शुद्धिर्धनेन स्तम्भो गर्भो येषां तेषां न घटतेऽत उपेक्ष्यैस्तैः सङ्गतैरसङ्गतैर्वा साधूनां किं ? न किमपीत्यर्थः ॥ १८ ॥ तमोमदं तमो धनजाड्यं तत्कृतं मदम् ॥ १९ ॥ तमःप्लुतौ धनजाड्यव्याप्तौ विवाससमात्मानं देहमपि न विजानीतः आत्मानं तु सुतरां न विजानीत इत्यर्थः ॥ २० ॥ एवं विचिन्त्य तत्कल्याणार्थमेव शपति—अत इति । अतः अनर्थकारिणः उपदेवभावात् स्थावरतां स्थावरभावम् अर्हतः शापस्यैवानुग्रहरूपत्वं दर्शयति यथा येन स्थावरभावेन एवं दुर्वृत्तौ पुनर्न स्यातां माऽभूतामित्यर्थः । पुनरनुगृह्णाति स्मृतिः स्यादिति तत्रापि स्थावरत्त्वेपि मत्प्रसादेन स्मृतिः स्यात मदनुग्रहादिति पदमुत्तरश्लोकान्वयि ॥ २१ ॥ अत्यन्ततोऽनुगृह्णाति—वासुदेवस्येति । मदनुग्रहात दिव्यशरच्छते वृत्ते सति वासुदेवस्य सान्निध्यं लब्ध्वा स्वर्लोकतां देवभावं भूयः पुनर्लब्ध्वा लब्धभक्ती भविष्यथः ॥ २२ ॥ यमलौ सहजातौ च तावर्जुनौ वृक्षविशेषौ च यमलार्जुनौ आसतुः ॥ २३ ॥ प्रकृतमाह–ऋषेरिति—

स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् । वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते ॥
वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यथः ॥

इति ऋषेर्वचः सत्यं कर्तुं तत्र हरिस्तु यः क्लेशहरः जगाम ऋषेर्वचसः सत्यत्वकरणे हेतुं दर्शयितुं विशेषणं भागवतमुख्यस्येति ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

न च दरिद्रस्य भोगतृष्णा निखिलदोषत्वनिरस्तीति वाच्यं तत्तृष्णानिवृत्तिसंभवादित्याह—साधवः समदर्शित्वात् सम्पन्नदरिद्रयोरुभयोर्गृहेषु गच्छन्तोऽपि दरिद्रस्यैव युज्यन्ते निर्गर्वेण तेन तद्वंदनादिसम्भवात् न तु सम्पन्नस्य मदान्धस्य तत्राहमेव प्रमाणमिति भावः । ततः सद्भिः सारासारमुपदिशन्नेभिर्हेतुभिस्तं तर्षं भोगतृष्णां स दरिद्रः क्षिणोति नाशयति तत्सङ्गावाप्तस्य तत्त्वज्ञानामृतस्य तन्निवर्तकत्वात् तत आरात्तदानीमेव विशुध्यति मुक्तिमार्गाधिकारी भवतीत्यर्थः ॥ १७ ॥ न च धर्मार्थं सम्पन्नगृहे साधूनां गमनमित्याह—साधूनां समचित्तानामपि मुकुन्दचरणाविच्छतां धनस्तम्भैः सम्पत्तिगर्वितैरसद्भिरवैष्णवैः असदाश्रयैरवैष्णवभक्तैः किं न किञ्चित्प्रयोजनमित्यर्थः । तथा च तादृशानां गृहेषु साधवो न गच्छन्तीति तेन सम्पन्ना निर्गर्वाः सत्सेविनः साधुभियुज्यन्ते इत्युक्तम् ॥ १८ ॥ गर्वरोगनाशिनीयमेव चिकित्सेति निश्चिनोति तदिति माधव्या मधुमय्या तमोऽज्ञानम् ॥ १९ ॥ विवाससं नग्नम् ॥ २० ॥ विवाससं नग्नम् शपति अतोऽर्हत इति । विवास-

सोरनयोरवदतोश्च स्थावरतैवोचितेति भावः। स्थावरत्वेऽपि मत्प्रसादेन स्मृतिः स्यादस्तु तत्रापि स्मृतिसत्वेऽपि मदनुग्रहादित्यादि ॥ २१ ॥ दिव्ये शरच्छते वर्षशते वृत्ते गते सति वासुदेवस्य सान्निध्यं लब्ध्वा लब्धभक्ती सन्तौ स्वर्लोकतां देवत्वं भविष्यतः प्राप्स्यतः भू प्राप्तौ ॥ २२-२३ ॥ प्रस्तुतमाह—ऋषेरिति ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

समदर्शिनो निर्दोषब्रह्मदर्शिनः। निर्दोषं हि समं ब्रह्मेत्यादेः। सर्वत्र भगवानस्तीति समदर्शिनः साधवो युज्यन्ते तत्सहवासो भवति तस्येति भावः। समदर्शिन इत्येतत् षष्ठ्यन्तं सद्दरिद्रविशेषणं वा। सद्भिः सङ्गतैस्तर्षं विषयकामं क्षिणोति नाशयति ततस्तर्षापकर्षादाराक्षिप्रं सिध्यति संसिद्धः भवति। आराद्दूरसमीपयोरित्यमरः ॥ १७ ॥ साधवोऽपि धनिका एव प्रायेण प्रीयन्त इति तत्राह ॥ साधूनामिति। मुकुन्दचरणैषिणां मुकुन्दचरणाविच्छन्ति अपेक्षन्त इति ते तथा तेषामिषेच्छा येषामस्ति तेषामिति वा तेषामुपेक्ष्यः। कृत्यानां कर्तरि वेति स्मरणात् षष्ठी। असदाश्रयैरसन्त एवाश्रयो येषां ते तैः स्वतोऽसद्भिरमङ्गलैरसन्तोऽसमर्था आश्रयो येषां त इति वा। समर्थं सदिति प्रोक्तमसमर्थसन्मतमित्येकादशतात्पर्योक्तेः। धनस्तम्भैस्तदादीनां मदैस्तज्जातमदैरिति यावत् किं न किमपि स्यादतस्ते त्याज्या इति भावः ॥ १८ ॥ यदर्थमत्यर्थमुपन्यसनं तत्पर्यसाययति ॥ तदिति। वारुण्या वरुणोत्पन्नया माध्व्या मद्येन मत्तयोः श्रीमदेन चान्धयोस्तत्प्राययोरजितात्मनोस्तत एव स्त्रैणयोः कामिनीकामुकयोः। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादिति स्मरणात्। ञित्वादादिवृद्धौ णत्वे स्त्रैण इति भवति। तमोमदमज्ञाननिदानिकामहन्तामहं हरिष्यामीति मतिं तेने मुनिरिति भावः ॥ १९ ॥ पथिकस्येयती व्यथा कुतो भवतो भवतान्तौ किं वेत्यतो वक्ति ॥ यदिति। यद्यस्मादिमौ लोकपालस्य कुबेरस्य पुत्रौ भूत्वाऽपीदानीं तमःप्लुतावज्ञाननिमग्नौ विवाससं विगतं वासो यस्मात्स तमात्मानं स्वं वा स्वदेहं वा सुदुर्मदौ मद्येनापि न विजानीतो न ज्ञातवन्तावत इत्युत्तरेणान्वयः ॥ २० ॥ स्थावरतां वृक्षतामर्हथ नैवं मदान्धौ स्यातां तथा तत्रापि स्थावरकलेवरतायामपि मत्प्रसादेन स्मृतिः स्यात् ॥ २१ ॥ वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते शरदां समानां शतं दिव्यं देवतासम्बन्धि तच्च तस्मिन्वृते गते सति स्वर्लोकतां स्वर्लोक ओको येषां ते स्वर्लोका देवाः तेषां भावस्तत्ता तां देवत्वं भूयो लब्ध्वा। वासुदेवस्येत्यत्राप्यन्वेति। भक्तौ मदनुग्रहाद्भविष्यत इत्यन्वयः ॥ २२ ॥ स देवर्षिरेवमेतौ प्रत्युक्त्वा नारायणाश्रमं बदरिकाश्रमं गतः। नलकूबरमणिग्रीवौ चैवं शप्तौ यमलार्जुनौ यमलौ च तौ सहोत्पन्नावर्जुनौ च तावासतुः। भूरुहमात्रगात्रताशापेऽपि स्मृतिर्भवत्वित्युक्तत्वादर्जुनः प्रीतिपात्रं वासुदेवस्येति श्रुततत्कथौतन्नामकानौकहीभवने भगवान्प्रीतो नौ मोचयेदथवा तमद्वितीयार्जुनं विधातुं वेति मतिमन्तौ तावर्जुननगतां गताविति तात्पर्यमवधेयम् ॥ २३ ॥ भागवतस्य मुख्यर्षेर्वचः सत्यं कर्तुं हरिः शनकैर्मन्दं यत्रास्तां तत्र तत्स्थलं जगाम। शुकोक्तिरियम् ॥ २४ ॥

श्रीसुबोधिनी

मनोरथरूपा तृष्णा त्ववशिष्यते, तस्या अपि निवृत्तिमाह **दरिद्रस्यैवेति**, साधुसङ्गात् तृष्णापगमः; ते हि भगवत्प्रेरिताः परिभ्रमन्ति लोकानामुद्धारार्थं, तेनावृतत्वाद् दरिद्रस्यैव गृहे गच्छन्ति, तेषां काण्डद्वयनिष्णातत्वमाह **साधवः समदर्शिन** इति, तत्रापि विश्वासार्थं सदाचार एव मुख्यः, तदाह **सद्भिः क्षिणोति सन्तर्ष**मिति, **सन्तर्षस्तृष्णा** समीचीनापि, धर्मार्थमपि वा धनाकाङ्क्षां, **ततः** शीघ्रमेव सिध्यति ॥ १७ ॥ ननु सन्तोपि भक्ष्यादिरहिते दरिद्रगृहे कथं गच्छेयुः ? तत्राह **साधूना**मिति, सतां धनिनां च परस्परविरुद्धा धर्माः, ते हि **साधवः** सदाचाराः, ते ह्यसन्तोसदाचाराः, साधवस्तु **समचित्ताः**, ते तूपेक्ष्या एव विषमचित्ताः, **समचित्तानां** विषमचित्ता उपेक्ष्या एव भवन्ति, साधवस्तु **मुकुन्दचरणैषिणो** मोक्षदातुश्चरणान्वेषणपराः, अन्ये त्वसदाश्रयाः, असत्स्वेव हि धनं तिष्ठति, तदर्थं तच्चरणान्वेषिणो यतस्तमेवाश्रित्य तिष्ठन्ति, अतो **धनस्तम्भैर्धनेन** स्तम्भप्राया जाता गृहभारवाहकास्तैर्न किञ्चित् कृत्यमित्यर्थः ॥ १८ ॥ एकोप्यंशो नोभयोस्तुल्यः, अतः श्रीमदनिवृत्तिः कर्तव्या, दारिद्र्यं च सम्पादनीयं, निन्दितकर्मणा च स्थावरत्वं, मददूरीकरणं तु सतामावश्यकं, सतां दृष्टिर्हि ब्रह्मज्ञानवत् सर्वदोषनिवर्तिका, अन्यथा त्रिदोषयुक्ता नाशमेव यास्यन्तीति तयोर्दोषान् गणयति **माध्व्या मत्तयोः**, **माध्वी**पदेन रस्यत्वादनिवृत्तिः, फलं तु नाशकमेव, **वारुणी** दैत्यत्वसम्पादिका, **श्रीमदेन** चान्धौ स्त्रैणौ च, अतो दोषत्रयं दूरीकरिष्यामि तमोज्ञानं मदोजितेन्द्रियत्वं च ॥ १९ ॥ एवं हेतुं निरूप्य शापमाह प्रसादान्तं **त्रिभिर्य**दिति,

दोषानुवादः शापश्च प्रसादश्चेत्यनुक्रमात् ॥ ३ ॥

अनुवादमाह **यद्** यस्मात् कारणादिमौ **लोकपालस्य** कुबेरस्य रक्षायां प्रतिष्ठितस्य **पुत्रौ भूत्वा** तत्पदाभिषेकयोग्यौ तमसा **प्लुतौ**, किञ्च **विवाससं** नग्नमात्मानं च **न विजानीतः**, किञ्च **सुदुर्मदौ** ॥ २० ॥ **अतो** दोषत्रयेण **स्थावरतां** शुद्धतामसत्वा**मर्हतः**, कर्मण एव तथाफलं भवतीति, ततः किमत आह **यथा पुनरेव मैवं स्याताम्**।

ज्ञाननाशः क्रियानाशो भोगनाशस्तथैव च। दुःखं शीघ्रं चानिवृत्तिर्वृक्षत्वे हि भवन्ति वै ॥ १ ॥

ननु **कर्मणैवैतद्** भविष्यति तव कः प्रसाद इति चेत् तत्राह **स्मृतिः स्यान् मत्प्रसादेनेति**, पूर्वजन्मवृत्तान्तरस्मरणं शापेन वृक्षभावस्मरणं च यद्यपि वृक्षयोनौ न भवति सत्त्वांशाभावात् तथाप्यहं भगवत्कृपया सर्वभावं प्राप्त इति मदंशो गुप्त एव तत्रापि वर्ततेग्निवदत्राहं **चेत् प्रसन्न** उद्रिक्तसत्त्वगुणस्तदा मदंशस्तत्रापि प्रकटो भविष्यतीति **स्मृतिः स्यात्, तत्रापि** तस्मिन्नपि जन्मनीदानीमपि, किञ्चाधिको**नुग्रहो**पि क्रियते, प्रसादस्तु स्वधर्माविर्भावः, **अनुग्रह**स्तु परदोषाणां स्वीकारः, अतस्तदीयदोषोस्माभिगृहीत इति कर्मफलस्यापि भोगात् ॥ २१ ॥ **वासुदेवस्य सान्निध्यं** प्राप्स्यथः, पुरुषापराध इति पुरुषायुःपर्यन्तं भोगः, देवत्वाद् **दिव्यं दिव्यशरच्छते** वृत्तेतीते **वासुदेवस्य सान्निध्यं लब्ध्वा** ततः **स्वलोकतां च लब्ध्वा** नलकूबरत्वं च प्राप्य पूर्वावस्थातौ विशिष्टौ **लब्धभक्ती भविष्यथो** भक्तिस्तत्र प्राप्तव्या, अनेनाप्राप्तभक्तेरेव स्वसाधनरूपा भक्तिर्भवति गच्छति चानयोस्तु नैसर्गिकी रतिर्भविष्यतीति भावः ॥ २२ ॥ एवमुक्त्वा ब्रह्मवाक्यमन्यथा न भविष्यतीति तादृशवाक्यमुच्चार्य ततो गत इत्याह **स एवमिति**, स नारदो **देवगुह्यकौ**, **एवमुक्तः** कर्त्तरि क्तः, पश्चा**न्नारायणाश्रमं गतस्त**द्दोषपरिहारार्थं, तज्ज्ञानार्थं **देवर्षि**रिति, मिलितानां मध्ये नारदस्य गमनमुक्त्वा नलकूबरयोराह **नलकूबरमणिग्रीवा**विति, **यमलावेकत्रोत्पन्नौ** मूले मिलितौ, अर्जुनो जातिविशेषः ॥ २३ ॥ एवं शापदातुः प्रायश्चित्तं शापग्रहीतुः शापफलप्राप्तिश्चेति **निरूप्य** स्मृतिरपि तत एव भविष्यतीति तामनुक्त्वानुग्रहफलं भगवत्सान्निध्यं तयोर्जातमित्याह**र्षे**रिति, स हि भाव्यर्थं जानात्येव तज् ज्ञात्वैव तथोक्तवानिति, किञ्च भगवतापि स्वकृपया तस्मिन् भगवत्त्वं सम्पादितं, तदाह **भगवत** इति, **तस्यर्षि**त्वं भगवत्त्वं वाक्यसत्यत्वं च **कर्तुं**, स्वयं च सर्वदुःखहर्ता, **यत्र यमलार्जुनावास्तां तत्र शनैर्जगामा**दावेव, आरादेव पुनः स्त्रीणामनुसरणं भविष्यतीति भगवानेवम्प्रकारेण तत्र गतस्तौ ज्ञापयितुं यत्र स्त्रियो मामेवं कुर्वन्ति तत्र युवां कथं न करिष्यन्त्यतः स्त्रीसङ्गो न कर्तव्य इति तदानीमपि स्त्रीदर्शनाभावाय शनैर्गतः, तयोरागमनं न सम्भावितमिति यत्र तावेवास्तां तत्र स्वयंगतः ॥ २४ ॥

(२.) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

दरिद्रस्यैवेत्यत्र नन्वनावृतगृहत्वमन्यत्रापि सम्भवतीति कथं तादृशामेव गृहे साधूनां गमनमित्यत आहु**स्तत्रापी**त्यादि, दरिद्रेष्वपि सद्विश्वासार्थं सदाचार एव मुख्यो गमक इति तं दृष्ट्वा तत्रैव साधवो गच्छन्तीत्यर्थः, **समीचीनेति समुप**सर्गार्थः शेषस्त**र्ष**पदार्थो ज्ञेयः ॥ १७ ॥ **तवहमि**त्यस्याभास **एकोप्यंश** इत्यादि ॥ १९ ॥ **यदिमावि**त्यत्र त्रयाणां श्लोकानामर्थमाहु**र्दोषे**त्यादि ॥ २० ॥ **अत** इत्यत्र **मूलस्थस्यातः**शब्दस्य तात्पर्यमाहु**र्ज्ञाननाश** इतिकारिकया, **स्मृति**रिति पूर्वोक्ता भगवत्स्मरणरूपा च, **तत्रापी**त्यपिशब्दार्थमाहु**रिदानीमपी**ति शप्स्यमानावस्थायामपि, **गृहीत** इति शापदानेन **गृहीतः**, **तत्र प्राप्तव्ये**ति तस्मिन् रूपे **प्राप्तव्या**, सिद्धमाहु**रनेने**त्याद्यनेनोपाख्यानकथनेन, अप्राप्तभक्तेरेव पुरुषस्य स्वसाधनरूपा जीवसंस्काररूपा भक्तिर्नश्वरा भवत्यनयोस्तु तद्विलक्षणा भविष्यतीतिभावः सूचित इत्यर्थः ॥ २१ ॥ **स एवमि**त्यत्र पश्चादिति स्वार्थिकम् ॥ २३ ॥ **ऋषे**रित्यत्राभासे **तत एवे**त्यृषिप्रसादादेव, तयोर्ज्ञाप्यं विषयमाहु**र्यत्रे**त्यादि, एतल्लीलाश्रवणफल भगवद्भक्तसख्यमिति स्फुटीकुर्वन्त्ये**वं भगव**दित्यादि, एतेनैव वैराग्यस्य भगवद्वशीकारकतापि स्फुटीकृता भविष्यत्यग्रिमश्लोके च ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

साधूनामित्यत्र मूले विषमचित्तपदाभावेप्यु**पेक्ष्यै**रितिपदेन तत्प्राप्तिरिति व्युत्पादयन्ति **समचित्ताना**मिति समचित्तोपेक्ष्यत्वकथनेन विषमचित्तत्वमुक्तमित्यर्थः, **धनस्तम्भै**रितिपदमेतत्त्रयकार्यत्वेनोक्तमित्याहुः **अत** इति ॥ १८ ॥ **तवहं मत्तयो**रितिश्लोकस्यार्थमाहुः **अतः श्रीमदेति, अतो दोषत्रय**मिति स्त्रैणत्वमजितात्मत्वे हेतुः मत्तत्वं श्रीमदान्धत्वं च तमसि मदे च हेतुः, अतो दोषत्रयमेव पर्यवसन्नमितिभावः ॥ १९ ॥ **यदिमावि**त्यत्र **ज्ञाननाश** इति "अत्यन्तनिन्दितै" रित्यत्र बहुवचनस्य त्रित्वे पर्यवसानादत्र तमो मदः अजितेन्द्रियत्वं चेति दोषत्रयमुक्तं, तेषां भोगः क्रमेणोक्तः, इदं च कर्मफलं **दुःखं शीघ्रमनिवृत्तिश्च शापफलं** दुःखाभावे सावशेषे कर्मणि वा तादृशजन्मनिवृत्तौ कर्मणां प्ररोहस्वभावत्वाज् जन्मान्तरमेव **भवेन्** न तु मोक्ष इत्यनुग्रहार्थं शापद्वयमुक्तवानितिभावः, इदं पञ्चकमपि वृक्षत्वे भवति इति तदुक्तमितिभावः, कर्मणा स्थावरत्वमात्रमुक्तमिति वने मालत्यादिवृक्षत्वमेव स्यादतः शापेन व्रजवृक्षत्वं सम्पाद्य गवां छायाजननेन दुःखसहनं नन्दाभिज्ञापकत्वेन चिरस्थायित्वं च सम्पादितवांस्तेन भोगावशिष्टदोषांशग्रहणरूपोनुग्रहस्तेन वासुदेवसान्निध्यमितिभावः, **वृक्षत्वे** इति महावृक्षत्व इत्यर्थः, ननु **कर्मणै**वेति महावृक्षोपि स्थावर एवेति कर्मणापीदं सम्भवतीति कर्मणवेदमपि साधनीय प्रसादेन किं, प्रसादो हि कर्मासाध्यसाधको वाच्य इत्यर्थः, **स्वधर्मेति** उद्रिक्तसत्त्वस्य मदंशस्य **धर्मः** स्मृतिस्त**दाविर्भाव** इत्यर्थः, **परेति** एतेषां स्वीकारोवगणनेत्यर्थः, तथा च दोषाननुलक्षीकृत्य तानवगणय्य ग्रहणमिति यौगिकार्थः सम्पन्न इतिभावः, **तदीयदोष** इति कर्मणां प्ररोहस्वभावत्वाद्भोगे जातेपि यावानंशोवशिष्टस्तावानस्माभिगृहीतोऽवगणित इत्यर्थः ॥ २० ॥ **स एवमुक्त** इत्यत्र **तद्दोषेति** हितार्थं शापदानेपि मनसि क्रोधो जातस्तत्परिहारार्थमित्यर्थः, नारायणे क्रोधजयस्य "कामं दहन्ती" त्यनेन द्वितीयस्कन्धे ब्रह्मणा व्युत्पादितत्वादितिभावः ॥ २३ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

स एव मुक्त इत्यस्य विवृत्तौ **शापदातु**: **प्रायश्चित्त**मिति **शापदातुः** नारदस्य **प्रायश्चित्तं** नारायणाश्रमगमनमित्यर्थः ॥ २३ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

"यदिमौ लोकपालस्ये" त्यादीनां त्रयाणां श्लोकानां प्रत्येकं वाक्यार्थानाहुरर्धेन **दोषानुवाद** इति का० ८५३ । **अतोऽर्हतः स्थावरता**मित्यत्र **ज्ञाननाश** इति का० ८६३ । "तदहं मत्तयोर्माध्व्ये" तिश्लोके तमो मदः अजितेन्द्रियत्वं चेतिदोषत्रयमुक्तं, तत्र तमः कार्यं **ज्ञाननाशः** मदकार्यं **क्रियानाशः** अजितेन्द्रियत्वफलं भोगाभावः, एतत् त्रयं कर्मफलं, **दुःखं शीघ्र** दुखानिवृत्तिश्चेति द्वयं शापफलं "वातवर्षातपहिमा" दिसहनेन दुःखं महावृक्षत्वाद् **बहुकालस्थित्या शीघ्रमनिवृत्तिश्चेति वृक्षत्वे पञ्च दोषा भवन्तीत्यर्थः** ॥ ८६३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'एवं कष्टसहनेऽपि तृष्णाया विद्यमानत्वात् कथं तस्य मोक्षः ?' तत्राह—दरिद्रस्यैवेति । समदर्शिनः समं 'भगवन्तमेव सर्वत्र' पश्यन्तः साधवः स्वपराकार्यसाधका भगवद्भक्ता दरिद्रस्यैव युज्यन्ते, निरहङ्कारित्वेन श्रद्धाप्रणिपातप्रश्नादिना चोपदेशाधिकारित्वात् स्वयमेव सङ्गता भवन्ति । तदा सद्भिर्निमिभूतैर्भगवत्तत्त्वसाक्षात्कारेण तं विषयसुखविषयकं तर्षं तृष्णां सदरिद्रः स्वयमेव क्षिणोति । तदुक्तं गीतासु—'विषया विनिवर्तन्ते निराहारस्य देहिनः । रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इति ॥ ततः सर्वतृष्णानिवृत्तेः आरात् आशु विशुध्यति जीवन्मुक्तो भवति । तथाच श्रुतिः—"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति ॥ १७ ॥ ननु 'धनिभ्यो धनलाभस्य सम्भवात् साधूनामपि धनिन एव प्रियाः स्युः, अतः साधवोऽपि तत्रैव गच्छेयुः' इत्याशङ्क्य 'समानशीलव्यसनेषु सख्यं भवति, साधूनां धनिनां च परस्परविरुद्धस्वभावत्वात् नैवम्' इत्याह—साधूनामिति । साधूनामुपेक्ष्यैरुपेक्षायोग्यैः किं प्रयोजनम् ? उपेक्षायोग्यत्वहेतुत्वेन विरुद्धस्वभावत्वमेव स्पष्टयति—असद्भिरित्यादिभिः । साधूनां जितेन्द्रियाणामसद्भिरजितेन्द्रियैः किम् ? समं शत्रुमित्रादिभावरहितं चित्तं येषां ते धनेन स्तंभो गर्वो येषां तैर्विषमदृष्टिभिः किम् ? मुकुन्दचरणैषिणां मुकुन्दचरणैषित्वेन मुकुन्दचरणाश्रयाणां असन्तो विषयाविष्टचित्ता आश्रयो येषां तैरसदाश्रयैः किं प्रयोजनमिति ॥ १८ ॥ एवं सामान्यतः सिद्धान्तमुक्त्वा प्रकृते यत्तयोः कर्तव्यं तन्निश्चिनोति—तदिति । तत् तस्मात् असतो मदनाशस्यैव पुरुषार्थहेतुत्वात् श्रीमदेनान्धयोर्विवेकचक्षुःशून्ययोरनयोस्तमोमदमज्ञानकृतं श्रीमदं हरिष्यामि दूरीकरिष्यामि । मदज्ञापकमेव विशेषणद्वयमाह—वारुण्या माध्व्या सुरया मत्तयोरिति, स्त्रैणयोः स्त्रीवश्ययोरिति । 'न केवलं मदनिवृत्तिमात्रं कर्तव्यम्, छिन्त्वज्ञाननिवृत्त्या जितेन्द्रियत्वं भक्त्यादिकं च सम्पादनीयम्' इत्याशयेनाह—अजितात्मनोरिति ॥ १९ ॥ एवं निश्चित्य शापहेत्वपराधनिरूपणपूर्वकं शपति—यदिति सपादेन । यत् यस्मात् इमौ नलकूबरमणिग्रीवौ लोकपालस्य कुबेरस्य महतः अत्यन्तदुष्टो मदो ययोस्तथाभूतौ च सन्तौ विवाससं वस्त्ररहितमात्मानं न विजानीतः ॥ २० ॥ अतस्तस्मात् स्थावरतामर्हतः । एवंभूतापराधस्य योग्यमिदमेव फलम्, 'अत्यन्तनिन्दितैर्दोषैर्जन्तुः स्थावरतां व्रजेत्' इति वाक्यात् । अनुगृह्णाति—स्यातां नैवमित्यादिना । मत्प्रसादेन यथा पुनरेवं मदान्धौ न स्याताम् । ननु 'स्थावरत्वे कथं न अन्धत्वम् ? तमोऽधिकत्वात्' इत्याशङ्क्याह—तत्रेति । तत्र स्थावरत्वेऽपि मदनुग्रहात् स्मृतिः स्वापराधस्मरणपूर्वकं विवेकः स्यात् ॥ २१ ॥ ततश्च दिव्यशरच्छते वृत्ते देवानां संवत्सरशते अतीते सति वासुदेवस्य वसुदेवनन्दनस्य श्रीकृष्णस्य सान्निध्यं लब्ध्वा, ततश्च पुनः स्वर्लोकतां देवत्वं नलकूबरमणिग्रीवस्वरूपं च लब्ध्वा तस्मिन् भगवति लब्धा भक्तिर्याभ्यां तथाभूतौ भविष्यतः ॥ २२ ॥ स देवर्षिरेवमुक्त्वा भगवतो नारायणस्याश्रमं गतः । नलकूबरमणिग्रीवौ तु यमलावेकत्र सहोत्पन्नौ अर्जुनवृक्षौ व्रजे आसतुः ॥ २३ ॥ एवं राज्ञा पृष्टं शापकारणमुक्त्वा प्रस्तुतमाह—ऋषेरिति । ऋषेर्नारदस्य वचः सत्यं कर्तुं हरिः उलूखले निबद्धः कृष्णो, यत्र यमलार्जुनावास्तां तत्र शनैर्जगामेत्यन्वयः । तद्वचसः सत्यकरणे हेतुमाह—भागवतमुख्यस्येति । अत्राक्षराधिक्यमार्षम् ॥ २४ ॥

अन्वितार्थप्रकाशिका

या च दरिद्रस्य सर्वानर्थमूलं तृष्णा भवति तस्या अपि प्रतीकारसंभवमाह—दरिद्रस्येति । समदर्शिनः साधवः दरिद्रेणैव । तृतीयार्थे षष्ठी । युज्यन्ते यत्नं विनैव संगच्छन्ते नतु मदान्धेन धनिना इति ततश्च सद्भिः सङ्गतः स दरिद्रः तं तर्षमन्नादितृष्णां क्षिणोति त्यजति । ततश्च आरात् शीघ्रं विशुद्ध्यति मोक्षयोग्यो भवति ॥ १७ ॥ ननु साधुभिरपि योगक्षेमार्थं धनिनः सेव्या एवेत्यत आह—साधूनामिति ॥ समचित्तानां मुकुन्दचरणैषिणां साधूनाम् उपेक्ष्यैः उपेक्षायोग्यैः धनेन स्तम्भो

गर्वो येषां तैः असतो विषयानाश्रयन्ति तैर्विषयासक्तैः असद्भिः असाधुभिः किं प्रयोजनं न किमपि ॥ १८ ॥ तदहमिति ॥ तत्तस्मात् असतो मदनाशस्यैव पुरुषार्थहेतुत्वात् श्रीमदेनान्धयोर्विवेकचक्षुःशून्ययोः माध्व्या मधुमय्या "ऋरव्यवास्तव्यवास्त्वमाध्वी" इति छान्दसो निपातः। वारुण्या सुरया मत्तयोः स्त्रैणयोः अजितात्मनोः अनयोस्तमोमदमज्ञानकृतं मदं हरिष्यामि ॥१९॥ यदिमाविति द्वयम् ॥ यत् यस्मात् इमौ नलकूबरमणिग्रीवौ लोकपालस्य कुबेरस्य महः पुत्रौ भूत्वा तमःप्लुतौ अज्ञानव्याप्तौ अतएव सुष्ठु दुष्टः अत्यन्तदुष्टो मदो ययोस्तथाभूतौ च सन्तौ आत्मानं विवाससं वस्त्ररहितं न विजानीतः। शपति। अत इति। अतस्तस्मात् स्थावरतां वृक्षतामर्हतः। निरावरणयोः स्तब्धयोरब्रुवाणयोर्वृक्षतैव योग्येति भावः। अनुगृह्णाति मत्प्रसादेन यथा पुनरेवं मदान्धौ न स्यातां तथा तत्र स्थावरत्वेऽपि मदनुग्रहात् स्मृतिः स्वापराधस्मरणपूर्वकं विवेकः स्यात् ॥ २०–२१ ॥ वासुदेवस्येति। ततश्च दिव्यशरच्छते वृत्ते देवानां संवत्सरशते अतीते सति वासुदेवस्य श्रीकृष्णस्य सान्निध्यं लब्ध्वा ततश्च भूयः पुनः स्वर्लोकतां देवत्वं नलकूबरमणिग्रीवस्वरूपं च लब्ध्वा तस्मिन्भगवति लब्धा भक्तिर्याभ्यां तथाभूतौ भविष्यतः। केचित्तु लब्धभक्ती सन्तौ स्वर्लोकतां भविष्यतः प्राप्स्यतः "भू प्राप्तौ" परस्मैपदमार्षमित्याहुः ॥ २२ ॥ एवमिति ॥ स देवर्षिरेवमुक्त्वा भगवतो नारायणस्याश्रमं गतः। नलकूबरमणिग्रीवौ तु यमलावेकत्र सहोत्पन्नौ अर्जुनवृक्षौ व्रजे आसतुः दिदीपाते ॥२३॥ ऋषेरिति ॥ भागवतेषु मुख्यस्य ऋषेर्नारदस्य। अक्षराधिक्यं सोढव्यम्। वचः सत्यं कर्तुं हरिः उलूखले निबद्धः कृष्णो यत्र यमलार्जुनावास्तां तत्र शनकैर्जगाम। शनकैरिति मातुरागमनशङ्कया तत उलूखलपतनाभावश्च ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दरिद्रस्य दरिद्रिणा कर्त्रा एव समदर्शिनः समं शत्रुमित्रधनिदरिद्रिषु तुल्यं पश्यंति तथाभूताः साधवः युज्यंते स्वयमेव प्राप्यंते सद्भिः तं तर्षं साधुसमागमैस्तां तृष्णां क्षिणोति नाशयति सदरिद्रिस्ततस्तदनंतरं आरात् शीघ्रं ॥ १७ ॥ ननु साधूनां धनाढ्यो रुचिजनक इति चेत्तत्राह धनेन स्तंभो गर्वो येषां तैः अत उपेक्ष्यैः अस्पृहणीयैः असदाश्रयैः स असतामसत्पुरुषाणाम सदाचरणानामाश्रय आधारो येषां तैः सह साधूनां किं प्रयोजनम् ॥ १८ ॥ वारुण्या मदिरया मत्तयोः तमोमदं अज्ञानजनितं मदम् ॥१९॥ यद्यस्मात् लोकपालस्य कूबेरस्य पुत्रौ भूत्वा तमसाऽज्ञानेन प्लुतौ व्याप्तौ विवाससं वस्त्ररहितमात्मानं देह (?) ॥२०॥ अनुग्रहरूपं ददातीत्याह अत इति द्वाभ्यां अतः कारणात्तौ स्थावरतां वृक्षत्वमर्हतः प्राप्तुं योग्यौ भवतः यथा मदोन्नतौ स्तः एवं पुनः नैव स्यातां तत्रापि स्थावरत्वेपि मत्प्रसादेन स्मृतिः नारदेन मह्यं शापो दत्त इति स्मरणं स्यात् ॥ २१ ॥ दिव्यशरच्छते वृत्ते देवानां शतवर्षे गते सति मदनुग्रहात् हरेः सान्निध्यं सामीप्यं लब्ध्वा पुनः स्वर्लोकतां देवत्वं प्राप्य भूयो लब्धा भक्तिर्याभ्यां तौ युवां भविष्यथः ॥ २२ ॥ यमलाज्र्जुनौ युगलौ अज्र्जुनवृक्षौ आसतुरभवताम् ॥ २३–२४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ततः किमित्यत्राह ॥ दरिद्रस्येति ॥ दरिद्रस्य उक्तविधदरिद्रजनस्यैव, समदर्शिनः साधवः, युज्यन्ते संगता भवन्ति हि। ननु परिशुष्केन्द्रियस्यापि विषयतृष्णानपायात् श्रीमदान्धात् को विशेषः इत्यत्राह। सद्भिः संगतैः साधुभिर्हेतुभिः, सः तं तर्षं तां विषयतृष्णामित्यर्थः। क्षिणोति क्षपयति। तत्तर्षमिति पाठे, सद्भिर्हेतुभिः, तत्तर्षं कर्त्त्, क्षिणोति नश्यति। ततस्तर्षक्षयात्, आरात् समनन्तरमेव, विशुद्ध्यति ॥ १७ ॥ ननु साधूनामपि धनिकः प्रियः स्यान्न दरिद्र इत्यत्राह ॥ साधूनामिति ॥ धनेन स्तम्भो येषां तैः, असदाश्रयैः सदाश्रयरहितैः, साधुसमागरहितैरित्यर्थः। अत एव, उपेक्ष्यैरुपेक्षणार्हैः असद्भिः धनमानात् केवलासद्भाववद्भिर्धनिकजनैरित्यर्थः। समचित्तानां, मुकुन्दचरणैषिणां, साधूनां किं, किं प्रयोजनमित्यर्थः ॥ १८ ॥ तदिति ॥ तत्तस्मात्, श्रीमदनिवृत्तेरेव पुरुषार्थपर्यवसायित्वादित्यर्थः। माध्व्या मधुकृतया, वारुण्या सुरया, मत्तयोः, श्रीमदान्धयोः, अजितात्मनोरजितेन्द्रिययोः, स्त्रैणयोः स्त्रीवश्ययोः, अनयोः, तमोमदमज्ञानकृतं मदं, अहं हरिष्यामि सम्यगपनयामीत्यर्थः॥१९॥ यदिति ॥ यद्यस्मात्, इमौ, लोकपालस्य कुबेरस्य पुत्रौ भूत्वा, तमःप्लुतौ तमसा व्याप्तौ, सुदुर्मदौ सन्तौ, विवाससं नग्नं, आत्मानं स्वदेहं, न विजानीतः ॥ २० ॥ अत इति ॥ अतः स्थावरतां अर्हतः। विवाससमात्मानमजानतोर्वस्त्राच्छादनरहितं तरुजन्म युक्तमिति भावः। इत्थं शप्त्वाऽनुगृह्णाति, स्यातामित्यादिना। एवं, यथा पुनः न स्याताम्। एवमेवैतौ सर्वदा स्थावराकृती यथा पुनः न स्यातां, तथा स्थावरतामर्हत इत्यर्थः। प्रकारान्तरेणाप्यनुगृह्णाति। तत्रापि स्थावरत्वेऽपि, मत्प्रसादेन हेतुना, स्मृतिः पूर्वजन्मस्मृतिः, स्यात् ॥ २१ ॥ वासुदेवस्येति ॥ तथा मदनुग्रहाद्धेतोः, दिव्यशरच्छते वृत्ते, देवानां शतवर्षान्ते इत्यर्थः। वासुदेवस्य वसुदेवसूनोर्भगवतः श्रीकृष्णस्य, सांनिध्यं संनिधिभावं लब्ध्वा, भूयः पुनः स्वर्लोकतां देवत्वं च लब्ध्वा, लब्धा वासुदेवे प्राप्ता भक्तिर्याभ्यां तौ तथाभूतौ, भविष्यथः। इति द्वयोरेकान्वयः ॥ २२ ॥ एवमिति ॥ देवर्षिः स नारदः, एवं उक्त्वा, अनुग्रहयुक्तं शापं दत्त्वेत्यर्थः। नारायणाश्रमं विशालां, गतः। नलकूबरमणिग्रीवौ, यमलार्जुनौ सहजातावर्जुनवृक्षौ, आसतुः बभूवतुः ॥ २३ ॥ ऋषेरिति ॥ भागवतमुख्यस्य भगवद्भक्तेषु मुख्यस्य, ऋषेर्नारदस्य वचः, सत्यं कर्त्तुं, हरिः श्रीकृष्णः, शनकैः, उलूखलं कर्षन्निति शेषः। यत्र यमलार्जुनौ युगलतया जातावर्जुनद्रुमौ, आस्तां स्थितौ भवतः, तत्र जगाम ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

साधूनामिति : १०. १०. १८.

युक्तैव हि धनोपेक्षा मुकुन्दपदसेविनाम् । निधौ लब्धे निरवधौ कः सुधीरल्पदृग्भवेत् ॥ २५ ॥

तदहमिति : १०. १०. १९.

सम्पत्काममदावलम्बनमिदं कं वा न विभ्रंशयेदुत्कृष्टान्वयशालिनं निजपदात्सद्योऽनवद्यादपि ।
एकस्तत्र विशेष एष सुमती रुष्टोऽपि तुष्टोऽपि तत् कर्मावेक्ष्य तदीयमेव कुशलं शापाद्वराद्वेच्छति ॥ २६ ॥

यदिमाविति : १०. १०. २०.

निवारणमात्मानं वीक्षते नापरोक्षकम् । तत्किन्नराविमौ मूर्खौ स्थावरावेव मन्महे ॥ २७ ॥

वासुदेवस्येति : १०. १०. २२.

उपास्यरूपात्मकता यदा च्युता तदैव लभ्या पुनरात्मनः स्थितिः ।
युक्तं मुनिर्वाचमुवाच तादृशास्थितिं तयोः स्थाणुपदैकसेविनोः ॥ २८ ॥

पुत्राविमौ धनपतेरिति नित्यसम्पच्छोभाऽनयोः समुचिता न मदस्ततोऽसौ ।
हर्तव्य इत्यति विविक्तमतिर्मुनीन्द्रो युक्तं निनाय तरुजन्म सुपत्रशोभम् ॥ २९ ॥

यत्तपोभिरपि दुष्करैरिहाऽलभ्यमभ्युदित-सद्वरैरपि । शापलभ्यमिह तत्कथं भवेत् स्थाणुतामिति न तौ निनाय सः ॥ ३० ॥

शापो नाभिनवो दत्तो रुष्टेन मुनिना तयोः । यत्सदा शापता जागर्त्यलमुन्मादकारिणी ॥ ३१ ॥

एवमुक्त्वेति : १०. १०. २३.

कोपोऽथवा तदुदिताघफलाश्रितोऽन्यः कार्यो न जातुचिदिति स्फुट आर्षमार्गः ।
क्वापि च्युतो यदि तदा तदघापनुत्यै नारायणेक्षणमिति क्षममेनमागात् ॥ ३२ ॥

उक्तं मया यदिदमस्य पुरो यथार्थभावो न तादृशतपोविधिमन्तरा स्यात् ।
आलोच्य विच्युत-विकल्पन-मच्युतांश नारायणाश्रममसौ यदगात् तदीड्यम् ॥ ३३ ॥

आलक्ष्य सञ्चित-वसुव्ययमत्र लोकस्तत्सङ्ग्रहाय यतते पुनराप्तसङ्गात् ।
तच्छापतो निजतपोविलयं विभाव्य युक्तं पुनः स तदुपार्जनधीस्तमागात् ॥ ३४ ॥

प्राग्वासना दृढतरा भवतीह यादृक् स्यादन्यजन्मनि तथा फलभागवश्यम् ।
प्रागङ्गनाश्रितमती यदिमौ तरू तौ भूयोऽङ्गनाश्रितगती च तदापि जातौ ॥ ३५ ॥

कृष्णप्रिया

दरिद्रजन को समदर्शी साधुजनों की सङ्गति अपने आप मिल जाती है, सत्पुरुषों के समागम से विषयतृष्णा नष्ट हो जाती है, फलतः अन्तःकरण अविलम्ब निर्मल बन जाता है ॥ १७ ॥ जो सदाचारी हैं, सबके हितकारी है, सबके लिये समान मनवाले हैं, जो मुकुन्द भगवान के चरणारविन्दों की सेवा की अभिलाषा का सेवन करने वाले हैं उन्हें धनके मदसे मतवाले, दुर्गुणी और दुराचारियों को आश्रय देने वाले दुर्जनों से क्या मतलब है, वे तो सदा उपेक्षा करने योग्य हैं ॥ १८ ॥ जब ये दोनों, धन मद से अन्धे एवं मधुमयी मदिरा के पान से मतवाले बने हुए स्त्रीलम्पट और असंयमी इन दोनों के मोहजनित मद को मैं चूर-चूर कर दूँ ॥ १९ ॥ कितनी असभ्यता ? ये दोनों लोकपाल भक्तराज कुबेर के आत्मज होकर भी मोह तमस् अज्ञान में इतने डूबे हुए है कि इन दुर्मदों को अपनी नंग धड़ङ्ग अवस्था की भी सुध नहीं है ॥ २० ॥ इसलिये अब ये दोनों स्थावर पेड़ योनि में जाने के योग्य है ताकि ऐसा पुनः प्रमाद न करने पावे, वृक्षयोनि प्राप्त करने पर भी मेरी कृपा से इन बातों का स्वस्वरूप का एवं भगवान का स्मरण बना रहेगा—और मेरे अनुग्रह से देवताओं के सो शारद वर्ष बीत जानेपर श्री वासुदेव भगवान का दर्शन स्पर्श आदि सान्निध्य से पुनः देवलोक में देवविग्रह की प्राप्ति होगी और भगवान् के अनन्य भक्त बन जायेंगे ॥२१–२२॥ **श्री शुकाचार्यजी ने कहा** – राजन् ! इस प्रकार शाप देकर देवर्षि नारदजी श्रीनर-नारायण भगवान के तपोवन बदरिकाश्रम चले गये इधर नलकूबर और मणिग्रीव ये दोनों एक साथ उत्पन्न अर्जुन वृक्ष बन गये ॥ २३ ॥ भगवान के अनन्य भक्त परम भागवत देवर्षि श्रीनारदजी के वचनों को सत्य करने के लिये भगवान् बालकृष्ण धीरे धीरे वहाँ जा पहुँचे जहाँ वे दो यमलार्जुन वृक्ष थे ॥ २४ ॥

देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ । तत्तथा साधयिष्यामि यद् गीतं तन्महात्मना ॥ २५ ॥
इत्यन्तरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ । आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलम् ॥ २६ ॥
बालेन निष्कर्षयतान्वगुलूखलं[1] तद् दामोदरेण [2]तरसोत्कलिताङ्घ्रिबन्धौ ।
निष्पेततुः [3]परमविक्रमितातिवेप[4]स्कन्धप्रवालविटपौ[5] कृतचण्डशब्दौ ॥ २७ ॥
तत्र श्रिया परमया ककुभः स्फुरन्तौ सिद्धावुपेत्य कुजयोरिव [6]जातवेदाः ।
कृष्णं प्रणम्य शिरसाखिललोकनाथं बद्धाञ्जली विरजसाविदमूचतुः स्म ॥ २८ ॥

कर्दमक्षमा

अन्वयः—देवर्षिः मे प्रियतमः यद् इमौ धनदात्मजौ तत् तन्महात्मना यद् गीतं तथा तत् साधयिष्यामि ॥ २५ ॥ कृष्णः तु इति यमयोः अर्जुनयोः अन्तरेण ययौ आत्मनिर्वेशमात्रेण उलूखलम् तिर्यग् गतम् ॥ २६ ॥ बालेन दामोदरेण तरसा तद् उलूखलं अन्वक् निष्कर्षयता उत्कलिताङ्घ्रिबन्धौ परमविक्रमितातिवेपस्कन्धप्रवालविटपौ कृतचण्डशब्दौ निष्पेततुः ॥२७॥ तत्र कुजयोः जातवेदाः इव सिद्धौ उपेत्य परमया श्रिया ककुभः स्फुरन्तौ अखिललोकनाथं कृष्णं शिरसा प्रणम्य विरजसौ बद्धाञ्जली इदं ऊचतुः स्म ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किमिति सत्यं कर्तव्यं तत्राह । देवर्षिरिति । यद्यतः तत्ततः ॥ २५ ॥ यमयोर्यमलयोः सहजातयोः । आत्मनः कृष्णस्य तन्मध्ये प्रवेशमात्रेण ॥२६॥ अनु अंचतीत्यन्वक् । तत्र हेतुः । दामोदरेणेति । उत्कलित उत्पाटितोंघ्रिबंधो मूलबंधो ययोस्तौ । परमस्य श्रीकृष्णस्य विक्रमितं विक्रमस्तेनातिवेपः कंपो येषु ते स्कंधप्रवालविटपा ययोस्तौ ॥ २७ ॥ ककुभः प्रति सर्वतः स्फुरंताविस्यर्थः । यद्वा दिशः प्रकाशयंताविति । तत्र कुजयोर्वृक्षयोः स्थितोऽग्निर्यथा मूर्तिमानुपैति तथोपेत्य । विरजसौ निर्गतमदौ निरहंकारिणौ नष्टगर्वाविति यावत् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वचःसत्यकरणे हेतुमाशंकते—किमितीति । महात्मना नारदेन यद्यथा गीतं तत्तथा साधयिष्यामीति ॥ २५ ॥ अंतरेण मध्ये । सप्तम्यर्थे एनच् । तिर्य्यक् तिरश्चीनं गतं जातम् ॥ २६ ॥ तत्स्वस्मिन्बद्धमुलूखलम् । निष्कर्षताऽऽकृष्टवता । बालेन यमलार्जुनौ निष्पेततुः । अनुरत्र वीप्सितोऽस्ति पश्चादर्थे अन्वक् पृष्ठगामि । तत्र पृष्ठगामित्वे न हि बद्धोदरपाशबद्धवस्त्वग्रतश्चलत्यसंभवादिति भावः । परमस्य ब्रह्मादिध्येयस्य हरेः । स्कंधप्रवालविटपाः स्कंधो महाशाखाश्रयः । प्रवालानि पत्राणि । विटपोऽल्पशाखाश्रयस्तर्ववयवः । चंडशब्दो भयंकरशब्दः ॥ २७ ॥ तत्र तदा पतनानंतरमिति यावत् । ककुभः सर्वा दिशः । 'प्रतिर्द्वितीयया' इति प्रतिशब्द उपतिष्ठते तृतीयया सहशब्दवत् । स्फुरंतौ देदीप्यमानौ गच्छन्तौ वा इत्यर्थ इति । इहाध्याहृतप्रतियोगे कर्मप्रवचनीयत्वेन द्वितीया । अध्याहारे श्रमं विमृश्यार्थांतरमाह–यद्वेति । निर्मदौ शापक्षयादुगतरजस्त्वेन सात्त्विकौ । इदं वक्ष्यमाणम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यत् यस्मात् देवर्षिमे प्रियतमस्तत्तस्मात् तेन महात्मना महानुभावेन यद्यथा गीतं तथा तेन प्रकारेणेमौ धनदात्मजौ साधयिष्यामि स्थावरयोनेरुद्धृत्य पुनः स्वर्गं दत्त्वा परमभक्तिमन्तौ करिष्यामीत्यर्थः ॥ २५ ॥ इति अस्माद्धेतोः कृतमहदपराधयोर्मद्बाल्यलीलाक्रीडनकताप्राप्त्यैव तादृशत्वं स्यादिति विचार्येत्यर्थः । तिर्यग्गतं श्रीभगवदभिप्रायानुसारेण तिर्यक्त्वं प्राप्तमित्यर्थः "तिर्यक् वक्रे तिरोर्थे च" इति विश्वः । अत्र मात्रपदेन यत्नं विनेति ध्वन्यते गतमिति तस्यैव कर्त्तृत्वं इति तस्य सचेतनत्वमिव सूचितं तच्च लीलाशक्तेः स्वयं सर्वसम्पादकत्वेन यथा हरिवंशे "तद्दाम तस्य बालस्य प्रभावादभवद्दृढम्" इति पाद्मे "नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने" इति ॥ २६ ॥ तत्तिर्यग्गत्या तयोर्लग्नं निःशेषेण कर्षता आकर्षता दामोदरेण कत्रीत् उत्कलिताङ्घ्रिबन्धौ सन्तौ तरसा वेगेन निश्शेषं पेततुः कथं तदाह—परमेत्यादि । विटपा अत्र शाखाः "विटपः पल्लवे षिङ्गे विस्तारे गुल्मशाखयोः" इति विश्वः । अन्यत्तैः यद्वा, परमिति छेदः दामोदरेणैव यत् अविक्रमितं विक्रमसदृशीकृतं तेनातिवेप

---

[1] ता उदूखलं–गो. प्रे. टी. ; निष्कृष्टमुलूखलं–विज. । [2] बलिनौ–गो. प्रे. टी. । [3] पवनविक्रमिता–विज. । [4] तिवेल–विज. । [5] विटपैः–विज. । [6] जातवेदौ–विज. ।

इत्यादि: परं केवलं स्वयमेव निपेततु: न तु पूतनावत् किञ्चिदपातयतामित्यर्थ:, बालेनेति। बलाप्रकटानादिना बाल्यलीलाया अव्यभिचार: दामोदरेणेति तस्मादेव माधुर्य्यं उत्कलितेत्यादिना चैश्वर्यं सूचितम् एवं पूर्ववन्मधुरं भगवत्ताप्रकटनमूह्यम् अत्र च नामकरणं हरिवंशे "स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात्। गोष्ठे दामोदर इति गोपीभि: परिगीयते" इति ॥ २७ ॥ तत्र तयोर्वृक्षयो: स्थितौ सिद्धौ देवावित्यर्थ:। अत: सर्वा दिश: स्फुरन्तौ द्वितीयया प्रतिशब्दो लभ्यते तृतीयया सह शब्दवत् पक्षे अन्तर्भूतण्यन्तमिदं शोभयन्तावित्यर्थ:। यद्वा कुजयो: ककुभ: दिग्भागात्तदन्तिके उपेत्य मिथो ज्योतिर्मिलनादेकजातवेदा इव स्फुरन्तौ शिरसैव प्रकर्षेण नत्वेति दण्डप्रणामे शीघ्रं श्रीमुखादिसन्दर्शनासिद्धे: कृष्णमिति तदानीमप्युलूखलाकर्षणाभिप्रायेण ननु, दामोदरत्वेनात्यन्तबाल्यलीला परं बालकं कथं प्रणतवन्तौ तत्राह—अखिलेति। तदैश्वर्यस्वभावात् तत्र च श्रीनारदानुग्रहेण तद्विज्ञानोत्पत्तेरिति भाव:। यद्वा, ननु तादृशकृतापराधौ श्रीनारदप्रसादेन स्मृततद्वृत्तौ च कथं लज्जादिकं विहाय श्रीभगवत्पार्श्वोपगमनादिकमकुर्वतां तत्राह—अखिलेति। अनन्यगतित्वादित्यर्थ:। विरजसौ विगतापराधौ सन्तावित्यर्थ:। स्म विस्मये महापराधिनोरपि सद्यस्तादृशत्वसिद्धे: ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

यद्यथा गीतं तेन महात्मना महानात्मा स्वभावो मद्भक्तिविस्तारेण-लक्षणो यस्य तेन। अयं प्रियतमत्वे हेतु: तथेमौ साधयिष्यामि सम्पादयिष्यामि, स्थावरयोनेरूर्द्ध्वं परमभक्तिमन्तौ करिष्यामीत्यर्थ:, लब्धभक्ती भविष्यत इति तद्दानात् ॥ २५ ॥ इत्यस्माद्धेतो: कृतमहापराधयोरेतयोर्मदे तदद्भुतबाल्यलीलासम्पर्केणैव तत्पापक्षयो भक्तिलब्धि: स्यान्न चान्यथेति विचार्य्येत्यर्थ:। तिर्य्यग्गतं श्रीभगवदभिप्रायानुसारेण तिर्य्यक्त्वं प्राप्तमित्यर्थ:। यद्वा, तिर्य्यक् यथा स्यात्तथा चलितम्—'तिर्यग्वक्रेऽतिरोऽर्थे च' इति विश्व:। भूतमिति क्वचित् पाठ इति तस्य सचेतनत्वमिव सूचितम्; तच्च श्रीभगवत्सम्बन्धेन, किंवा तत्क्रोडोपकरणानामपि सच्चिदानन्दरूपत्वेन, एवं दाम्नोऽप्यूह्यम्, अन्यथा सच्चिदानन्दघनेन श्रीभगवता सह तयोस्तादृशसंयोगासम्भवात्। अत एव पाद्मे श्रीदामोदराष्टके—'नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने' इति; श्रीहरिवंशेऽपि (विष्णु: प० ७।१९) तद्दाम तस्य बालस्य प्रभावादभवद्दृढम्' इति। इत्थमुलूखलभंगदामत्रोटनादिशंका च स्वत एव परिहृता स्यात् ॥ २६ ॥ तत्तिर्यग्गत्या तयोर्लग्नं नि:शेषेण कर्षयताकर्षता दामोरेण कत्रीत कलिताङ्घ्रिबन्धौ तरसा वेगेन नि:शेषं पेततु:। कथम्? तदाह—परमेत्यादि। अन्यत्तैर्व्याख्यातम्। यद्वा, दामोदरेण हेतुना भूमिनिर्गताङ्घ्रिबन्धौ, अतो दामोदरस्याविक्रमितेन विक्रमाप्रकटनेनापि। किंवा तेनाविक्रमितौ विक्रममप्रापितावपि; किंवा न विद्यते विक्रमितं विक्रमो ययोर्विषये तथाभूतापि महाकम्पयुक्त स्कन्ध प्रवाल विटपौ कृतचण्डशब्दौ च सन्तौ परं केवलं स्वयमेव निष्पेततुर्न तु पूतनावदन्यं कञ्चित् पातयामासतुरित्यर्थ:। बालेनेति बलाप्रकटनादिना बाल्यलीलाया अव्यभिचार:, दामोदरेणेति तस्यामेव माधुर्य्यमुत्कलितेत्यादिना चैश्वर्य्यम्; एवं पूर्ववद्भगवत्ता विशेषप्रकटनमुह्यम् ॥ २७ ॥ तत्र तयोर्वृक्षयो: स्थितौ सिद्धौ देवावित्यर्थ:। किंवा शापान्मुक्तौ सफलजन्मानौ वा सन्तौ, अत: सर्वा दिश: स्फुरन्तौ, अन्तर्भूतण्यन्तमिदम्, शोभयन्तावित्यर्थ:। यद्वा, कुजयो: ककुभो दिग्भागात्तदन्तिके उपेत्य मिथो ज्योतिर्मिलनादेकजातवेदा इव स्फुरन्तौ। शिरसैव प्रकर्षेण नत्वेति दण्डप्रणामे श्रीमुखादिसन्दर्शनासिद्धे: कृष्णमिति तदानीमप्युलूखलाकर्षणमभिप्रायेण। ननु दामोदरत्वेनात्यन्तबाल्यलीलापरं बालकं तौ कथं प्रणतवन्तौ? तत्राह—अखिललोकानां नाथमीश्वरम्, तदैश्वर्य्यप्रभावात्तत्र च श्रीनारदानुग्रहेण तद्विज्ञानोत्पत्तेरिति भाव:। ननु कृततादृशापराधौ श्रीनारदप्रसादेन स्मृततद्वृत्तौ च कथं लज्जादिकं विहाय श्रीभगवत्पार्श्वोपगमनादिकमकुर्वाताम्? तत्राह—अखिलेत्यनन्यगतित्वादित्यर्थ:। विरजसाविति प्राक् तम:प्लुतावप्यधुना श्रीभगवत्स्पर्शादिना श्रीनारदानुग्रहेणैव वा विगत श्रीमदहेतुरजोगुणावेव सन्तावित्यर्थ:। स्म विस्मये, महापराधिनोरपि सद्यस्तादृशत्वसिद्धे: ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

इमौ धनदात्मजौ प्रति यत् तन्महर्षिणा गीतं तत्तथेत्यन्वय: ॥ २५ ॥ अन्तरे मध्यभागे उलूखलं तिर्यग्गतं यथा भवति तथा ययौ ॥ २६ ॥ उलूखलं निष्कर्षयता आकर्षयता दामोदरेण उत्कलिताङ्घ्रिबन्धौ उन्मूलितमूलभागौ पवनविक्रमितातिवेपादिति पवनतुल्यपराक्रमवशात् जातकम्पा: स्कन्धा: प्रवालानि ययोस्तौ तादृशस्कन्धान्मर्दयन्तावित्यर्थ: ॥ २७ ॥ स्फुरन्तौ स्फोरयन्तौ कुजयो: वृक्षयो: ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तद्वच: सत्यं कर्तुमित्येतदेव प्रपञ्चयति—देवर्षिरिति द्वाभ्याम्। यत् यतो देवर्षि: नारद: मम प्रियतम: तस्मात्तेन महात्मना धनदात्मजावुद्दिश्य यद्गीतं तत्तथैव साधयिष्यामि करिष्यामि ॥ २५ ॥ इत्यभिप्रायेण यमयोरर्जुनयोरन्तरेण मध्ये ययौ तदा आत्मन: स्वस्य कृष्णस्य प्रवेशमात्रेण उलूखलं तिर्य्यक् पतितमभूत् ॥ २६ ॥ अन्वञ्चतीत्यन्वक् अनुसरत्तमुलूखलं

निष्कर्षयता आकर्षता दामोदरेण हेतुना तरसा बलादुत्कलितावुत्पाटितावङ्घ्रिबन्धौ मूलभागौ ययोः परमस्य श्रीकृष्णस्य विक्रमितेनातिवेपः कम्पो येषु ते स्कान्धादयो ययोः कृतश्चण्डः शब्दो याभ्यां तथाभूतौ निष्पेततुः ।।२७।। तत्र तदा तयोर्वृक्षयोर्वा परमया श्रिया शोभया ककुभो दिशः स्फुरन्तौ प्रकाशयन्तौ कुजयोर्वृक्षयोः स्थितोऽग्निर्यथा मूर्तिमान् बहिरुद्गच्छति तद्वदुत्थितौ सिद्धौ भूत्वा उपेत्य श्रीकृष्णसमीपमेत्य कुजयोर्जातवेदा इव सिद्धावुपेत्य उत्थायेति वा अखिललोकानां नाथमीश्वरं श्रीकृष्णं शिरसा प्रणम्य बद्धोऽञ्जलिर्याभ्यां विगतं रजः रजोगुणकार्यं ययोस्तौ सात्त्विकावित्यर्थः। निर्मलाविति व तौ नलकूबरमणिग्रीवाविदं वक्ष्यमाणमूचतुः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अन्तरेण मध्ये आत्मनिर्वेशमात्रेण आत्मनः सान्निध्यमात्रेण वा तिर्यग्गतं तिरश्चीनम् ॥ २६ ॥ यदा बालेन दामोदरेण तदुलूखलं निष्कृष्टमाकृष्टं तदा तावर्जुनौ निष्पेततुः कीदृशौ उत्कलिताङ्घ्रिबन्धौ उन्मूलितमूलौ पवनस्य तदानीमुद्भूतवायोर्विक्रमितेन पराक्रमेणातिवेलैः वेलां सीमानमतिक्रान्तैः स्कन्धैः प्रवालैर्विटपैः "अति स्यादधिकार्थोक्तौ प्रशंसायामतिक्रमे" इति ॥ २७ ॥ तत्र तस्यामवस्थायां कुजयोर्वृक्षयोः जातवेदौ अग्नी इव उपेत्य अभिव्यज्य विरजसौ शापमोक्षेण सत्त्वस्वभावमाप्तौ बद्धाञ्जली सिद्धौ यक्षौ शिरसाऽखिललोकनाथं कृष्णं प्रणम्य इदं वक्ष्यमाणमूचतुः स्म गुणस्मरणपूर्वकमुक्तवन्तावित्यन्वयः । स्मृतौ वृत्तनिषेधे स्मेति च ककुभो दिशः स्फुरन्तौ प्रकाशयन्तौ ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यत् देवर्षिर्मे प्रियतमः तत्तस्मादिमौ धनदात्मजौ तथा साधयिष्यामि यत् यथा तेन महात्मना गीतमित्यन्वयः ।।२५।। आत्मनिर्वेशमात्रेण अयत्नेनापीत्यर्थः । तेन चोलूखलस्य तिर्यग्गत्या लीलाशक्तेः प्रभूता दर्शिता एवमन्यत्रापि ज्ञेयम् ॥ २६ ॥ परमविक्रममिति पततोस्तयोरेव महामर्दस्तेनेत्यादि ॥ २७ ॥ कुजयोः ककुभः सकाशात् उपेत्य स्फुरन्तौ सम्भ्रमेण कम्पमानौद्वयोस्त्विषा परस्परमिलितत्वात् एकीभूयाग्निरिवोपेत्य त्वत्प्रेक्षणं तन्महिमपरिपाटीमारभते ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यद्यस्माद्देवर्षिर्मे प्रियतमस्तस्मादिमौ तथा साधयिष्यामि यद्यथा तेन महात्मना गीतमित्यन्वयः ॥ २५ ॥ इति विचार्य्य यमयोः सहजातयोर्द्वयोरन्तरेण मध्ये ययौ ततश्च आत्मनः प्रवेशमात्रेण उलूखलं तिर्य्यग्गतं तिरश्चीनमभूत् ॥ २६ ॥ तत्तिरश्चीनमेवोलूखलम् अन्वक् स्वानुकूलं यथा स्यात्तथा निःशेषेण कर्षता बालेन उत्कलित उत्पाटितोऽङ्घ्रिबन्धो ययोस्तौ परमविक्रमितेन अतिबलेनाकर्षणेनातिवेपा अतिकंपमानाः स्कन्धादयो ययोस्तौ दामोदरेणेति "स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात् । गोष्ठे दामोदर इति गोपीभिः परिगीयते" इति हरिवंशोक्ता प्रसिद्धिः स्मारिता ॥ २७ ॥ ककुभो व्याप्य स्फुरन्तौ कुजयोर्वृक्षयोः जातवेदा अग्निः मिथो ज्योतिर्मिलनादेक एव जातवेदा इव स्फुरन्तावित्यर्थः ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदेव श्रीमुखोक्त्या प्रपञ्चयति—देवर्षिरिति । यत यतो देवर्षिर्मे प्रियतमस्तत् ततः इमौ उद्दिश्य यन्महात्मना गीतं तत्तथा साधयिष्यामीत्यन्वयः ॥ २५ ॥ इति एवं विचार्य यमयोः युगलयोरन्तरेण मध्ये ययौ तदा आत्मनः परमात्मनो निर्वेशमात्रेण प्रवेशमात्रेण उलूखलं तिर्यग्गतं प्राप्तमभूत् ॥ २६ ॥ तत्तदा अन्वञ्चति अन्वनुगच्छतीत्यन्वक् उलूखलं निष्कर्षयता दामोदरेण बालेन हेतुना उत्कलित उत्पाटितोऽङ्घ्रिबन्धो मूलबन्धो ययोस्तौ परमस्य श्रीकृष्णस्य विक्रमितेन विक्रमेण अतिवेपः अतिकम्पो येषु ते स्कन्धप्रवालविटपा ययोस्तौ कृतश्चण्डशब्दो याभ्यां तौ निष्पेततुः ॥ २७ ॥ तत्र तस्मिन् समये जातवेदाः अग्निरिव ककुभो दिशः स्फुरन्तौ द्योतयन्तौ कुजयोः स्वशरीरभूतयोरर्जुनयोः निर्गम्य विरजौ विगतमदौ उपेत्य श्रीकृष्णसमीपमेत्य कृष्णं प्रणम्येदं वक्ष्यमाणं "स्मृतिः स्यान्मत्प्रसादेन" इति श्रीनारदप्रसादेन स्मृतिं प्राप्योचतुः स्म ॥ २८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

किमिति सत्यं कर्त्तव्यं तत्राह-देवर्षिरिति यस्माद्देवर्षिर्मत्प्रियतमो भवति तस्मादिमौ तथा साधयिष्यामि यद्यथा तेन महात्मना गीतम् ॥ २५ ॥ इति विचाय कृष्णः यमयोः सहजातयोस्तयोरन्तरेण मध्ये पतत आत्मनस्तस्य निर्वेशमात्रेणोलूखलं तिर्यग्गतं तिरश्चीनमभूत् ॥ २६ ॥ तत्तिर्यग्गतमेवोलूखलम् अन्वक् स्वानुकूलं यथा स्यात्तथा निःशेषेण कर्षता बालेन दामोदरेण मात्रोदरे दाम्ना निबद्धेन तावर्जुनौ उत्कलित उत्पाटितोङ्घ्रिबन्धो ययोस्तादृशौ सन्तौ निष्पेततुः परमस्य तस्य विक्रमितेन बलेनातिवेपाः प्रकम्पिताः स्कन्धादयो ययोस्तौ ॥ २७ ॥ ककुभो दिशो व्याप्य स्फुरन्तौ ताः प्रकाशयन्तौ कुजयोर्वृक्षयोः स्थितौ सिद्धौ देवौ कृष्णमुपेत्य शिरसा प्रणम्येदमूचतुः विरजसौ गर्वशून्यौ जातवेदा वह्निरिव मिथो ज्योतिः सम्पर्कादेको वह्निरिति प्रतीतौ ॥ २८ ॥

श्रीपांधरीनारायणाचार्यकृतो विरोधोद्धारः

॥ हरिः ॐ ॥ तद्दामेति । अत्र द्व्यंगुलस्यैवोनत्वे किं निमित्तमित्यस्यापरिहारदर्शनाद्वक्तुरभिप्रायो व्यक्तीक्रियते । भगवद्बंधनांगीकारविषयकृपोत्पादने साधनत्रयमपेक्षितं । भक्तिर्ज्ञानं वैराग्यं चेति । तत्र यशोदाया यदि ज्ञानं स्यात्तर्हि न चांतर्न बहिर्यस्येत्यादिनोक्तस्य बंधने कथं प्रवृत्तिः स्यात् । तथा वैराग्यं यदि स्यात्तर्हि दधिभांडविध्वंसेन तद्बंधने कथं प्रवृत्तिरत उभयाभावः । भक्तिस्तु । जातयोर्नो महादेवे भुवि विश्वेश्वरे हरौ । भक्तिः स्यात्परमा लोके ययांऽजो दुस्तरं त्यजेत् । अस्त्वित्युक्त इत्यारभ्य ततो भक्तिर्भगवति पुत्रीभूते जनार्दने दंपत्योर्नितरामासीदित्युक्तेः । सिद्धा । अत्र द्व्यंगुलिशब्दो न केवलोन्मानार्थकः किंतु वस्तुद्वयशंसने द्व्यंगुलप्रसारणवत्संकेतेन संख्यार्थकश्च । अत एकभक्तिसद्भावेऽपि उभयोर्ज्ञानवैराग्ययोर्न्यूनतां द्योतयितुं द्व्यंगुलोनताया एव प्रदर्शनं । अत एव चतुरध्याय्यां साधनाध्याये चतुष्पादानां पृथक् पृथक् प्रमेयत्वेऽपि सद्भिर्वैराग्यभक्तिश्च श्रुतिमतिनियतध्यानजज्ञानयोगाद्रम्यमित्युक्त्या तृतीयपादोक्तोपासनाया ज्ञानकारणत्वं प्रदर्श्य वैराग्यभक्तिज्ञानानामेव त्रयाणां भगवद्रतिसाधनत्वं टीकाचार्यैः प्रतिपादितं । यद्यप्यत्र कृपाऽपरपर्यायप्रसादोत्पादकज्ञानस्य वैराग्यभक्त्युपासनहेतुकत्वमुक्तम् । तथापि कलौ मानुषलोके प्रायः स्त्रीणां वेदार्थश्रवणमननध्यानकर्मण्यधिकाराभावादुपासां विनैवात्र साधनत्रयमंगीकृतमिति बोध्यम् ॥ १५ ॥ नेममिति । विरिंचादयस्त्रयो मिलित्वा कर्तृत्वेन योजिताश्चेत्त्रयाणां नकाराणामनन्वयः । तदर्थं पृथक् पृथगन्वये क्रियाबहुवचनायोगः । अतोऽर्थांतरस्य वक्तव्यतायां केचित् लेभिर इत्यस्य लेभिरं स्यादूलूखलमिति कोशबलेनोलूखलार्थकतां कल्पयित्वा लक्षणया बंधनाधिकरणतां वदंति । तच्चिंत्यं । तत्कोशस्यैवानुपलब्धेः । अत इत्थं योजना । तत्रैवं पदच्छेदः । ना इमं विरिंचः अनभवः नश्रीः अपि अंगसंश्रया प्रसादं लेभिरे गोपी यत् तत् प्राप विमुक्तिदात् इति ॥ गोपी । यशोदा ॥ यत् । यस्मात्कारणात् ॥ इमं । स्वसंबंधानानुकूल्यरूपं ॥ प्रसादं ॥ विमुक्तिदात् । यथायोग्यविशेषसहितमुक्तिदातुर्भगवतः सकाशात् ॥ प्राप ॥ तत् । तस्मात्कारणात् ॥ इमं । उक्तार्थं प्रसादं । हरिप्रीतिसाधनत्वाभावात् ॥ अपि । गर्हितं । अपि गर्हासमुच्चये इत्यभिधानात् । ना । सर्वप्रवर्तको मुख्यप्राणः ॥ विरिंचः । ब्रह्मा ॥ अनभवः । अन चेष्टायामिति धातोः । मारुत्यैव यतश्चेष्टेत्युक्तेश्च । अनः प्राणः तत्पुत्रः रुद्रः । आभासकोऽस्य पवनः पवनस्य रुद्र इत्युक्तेः ॥ श्रीः । भारती लक्ष्मीर्वा । अंगसंश्रयेति विशेषणं । लिंगविपरिणामेन सर्वकर्तृषु योज्यं । उद्यद्रविप्रकरसंन्निभमच्युतांके स्वासीनमित्यादेः । ध्यायेन्निषण्णमजमच्युतांके भिपद्मे इत्युक्तेः । सर्वात्मनोंऽतःकरणगिरित्र इत्युक्तेः । स्वभर्तुरंकस्थितामित्युक्त्या आश्रयते स्वभर्त्रंकमिति व्युत्पत्त्या च परंपरया भगवदाश्रितत्वात् । सरस्वती प्रादुरभूत्किलास्यत इत्युक्तेर्वा । श्रियो निवासो यस्योर इत्युक्तेश्च । एतेन लेभिरे बंधनानुकूलीकरणेच्छाभावात् । न तु यशोदायाः सकाशात् । गुणहीनत्वात् । तेषामादिसृष्टौ प्रथमोत्पन्नत्वात् । यत उक्तम् । आदिसृष्टौ पूर्वजाये तेऽधिकाः सर्वदा गुणैः । अनाद्यनंतकालेषु मुक्तावपि यथा क्रममिति निर्बंधे कृपानिमित्तायाः प्रीतिर्नीचभक्तेषु साधिका । आंतरैव तु या प्रीतिः सा तूच्चेषु यथाक्रमं । यथा कश्चित्स्वात्मानं प्रियापुत्रसथाऽपि वा । अतिहाय कृपायुक्तो भिक्षवेऽन्नं ददात्यऽपि । कदाचिदेव न पुनः स्वात्मादेः सार्वकालिकं योगक्षेमवहुत्वं च नित्यं स्वात्मादिषु स्फुटं । एवमेव परेशस्य भक्तेषु श्रीयजादिषु । इति प्रियविवेके च । अत एव भक्त्या भगवता स्वबंधनाय कृतमप्यानुकूल्यं प्रियकारित्वाभावात्कृष्णवियोगजन्यदुःखकारणं जातमिति भावः ॥ २० ॥

इति श्रीभागवते दशमोऽध्यायः ॥ १० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भगवांस्तूचितैवमालोचनस्तत्र जगामेत्याह ॥ देवर्षिरिति । मे प्रियतमः इमौ धनदस्यात्मजौ च यन्नारदेन महात्मना गीतमुक्तं तथा यथार्थं साधयिष्यामीति ॥ २५ ॥ यमलयोरर्जुनयोरन्तरेण मध्येन ययौ । आत्मनः स्वस्य निर्वेशोऽत्र प्रवेशस्तन्मात्रेण केवलं तेनोलूखलं तिर्यग्गतं तिरश्चीनमभूत् ॥ २६ ॥ यदा दामोदरेण बालेन तदुलूखलं । निष्कृष्टमाकृष्टं । उत्कलिताङ्घ्रिबन्धाविति द्वन्द्वा वयि । उत्कलित उन्मूलितोऽङ्घ्रिबन्धो बेरं ययोस्तौ पवनस्य तदोदितस्य वायोर्विक्रमितेन पराक्रमेणातिवेलमतिक्रान्तमर्यादं स्कन्धप्रबालविटपाः स्कन्धाः शाखाः प्रवालाः किसलयास्तेषां विटपो विस्तारो ययोस्तौ । विटपैरित्यपि पाठः । विटपे पल्लवे रिङ्गे विस्तारे स्तम्बशाखयोरिति विश्वः । कृतश्चण्डः प्रचण्डः शब्दो याभ्यां तौ । परमविक्रमितेति पाठः परमः । परमस्य परमात्मनो विक्रमितं चरणक्षेपस्तेन । अतिवेप इति पाठे वेपः कम्पो येषां ते स्कन्धादयश्च ययोस्ताविल्यर्थः । निष्पेततुरिति सरसः पाठः ॥ २७ ॥ तत्र तदवस्थायां तद्वृक्षक्षितौ वा परमया श्रियाऽङ्गकान्त्या ककुभो दिशः स्फुरन्तौ स्फोरयन्तौ स्वयं ककुभवृक्षत्वेन ककुभस्फोरणं रचितुमुचितमिति ध्वन्यते । कुजयोः कौ जायत इति कुजौ भूरुहौ तयोः सकाशाज्जातवेदाविव जातवेदसावग्नी इव । आकारान्तः सान्तत्वावच्छेदेनेति मतेनादन्तः । जातवेदा इति पठित्वा कुजयोर्वृक्षयोः स्थितो जातवेदा अग्निर्मूर्तिमानुपैति तथोपेत्येति व्याकरणे कुजयोरिति न वक्तव्यं स्यात्स्याच्च कुजस्येति तथा स्फुरन्तौ सिद्धावित्यनानु

रूप्यमुपर्यैव ज्ञायत इति न सरस पाठः । प्राग्विस्तृतं सान्तादन्तत्वविषयेऽनुसन्धेयं । अखिललोकनाथं कृष्णं शिरसा प्रणम्य विरजौ विगतशापोपयुक्तपापौ बद्धाञ्जली स्म । नारदोक्तस्मृतिमन्तौ । इदं वक्ष्यमाणमूचतुः । स्मृतौ वृतनिषेधे स्मेति यादवः॥२८॥

श्रीसुबोधिनी

एवं भगवत्सेवकेषु भगवत्कृपा, अतो भगवत्सेवकानुवृत्तिः कर्तव्येति गत्वा भगवान् यमलार्जुनयोर्भङ्गं करिष्यतीति तत् कुतः सान्निध्यं तु वरप्राप्तं तथैव च भक्तिरपि भविष्यति सानिध्यादेवेदं शरीरं परित्यज्य नलकूबरत्वमेव प्राप्स्यतोतो भङ्गोनुचित इत्याशङ्क्य भगवतोभिप्रायमाह **देवर्षिरिति**, एकमत्र सन्दिग्धं, स्मृतिर्जाता न वेति, तदपि प्रकटीकर्तव्यममर्यादरूपं च **देवर्षि**राह **यत्** सत्त्वगुणोद्रेकेपि दुर्लभं तदतितामसे भवत्विति, ननु तन् मिथ्यैव भवत्वविचारितवचनादित्याशङ्क्याह **मे देवर्षिः प्रियतम** इति, आर्षज्ञानमर्यादा भज्येत, नारदश्च मदीयः, यन् मत्सेवकैः कृतं तन् मयैव कृतमिति, तत्राप्यत्यन्तं **प्रियः** प्रीतिविषयः, **अतः** स्नेहात् सर्वमेव कर्तव्यं, अन्यथा स्नेहमर्यादापि न स्यात्, **यद्** यस्मादिमौ च **धनदात्मजौ**, कुवेरोतिभक्तः, अतो मूलभावश्च शुद्धः, अतस्तावन्तमर्थं त्याजयित्वा धनदांशे भक्त्युपयोग्यंशं योजयित्वा तत्रैव स्वयं प्रविश्य शुष्कौ कृत्वा स्वाधिदैविकभावेन तद् विदीर्णं विधाय तत उद्धृत दृढभक्ती कर्तव्यौ तदा नारदवाक्यं सत्यं भवति, तथैवाह **साधयिष्यामि यत्** तेन **गीतं तत्** तथा, ननु किं परार्थ एतावानुद्यमः ? तत्राह **महात्मनेति**, **महानेव** तस्यात्मा, महत्त्वं भगवत्प्रवेशात् ॥ २५ ॥ इति विचार्य भगवानुभयोरन्तः प्रविष्ट इत्याहेत्यन्तरेणेति, **यमयोरर्जुनयोरन्तरा कृष्णो ययौ**, केवलं बहिरेव ययाविति पक्षं दूषयितुं तुशब्दः, सदानन्दरूपत्वाद् दोषो दुःखं च तयोस्तदानीमेव निवृत्त, भगवत्सम्पृक्तं तूलूखलं दारुमयं भवतीति स्वसजातीयोद्धारार्थमात्मनो भगवतो वृक्षयोर्निर्वशमात्रेणोलूखलं तिर्यग्भूतं जातं, ऋजुत्वे तु तदपि मध्ये निर्गच्छेत् तदा तु पुनर्भगवत्सम्बद्धं यदि सजातीयं न मोचयेत् तदा स्वस्याधिदैविकत्वं जातं व्यर्थं स्यात् ॥ २६ ॥ एवमुलूखले तिर्यक्प्रकारेण पातते भगवान् यत् कृतवांस्तदाह **बालेनेति**, **उलूखल निष्कर्षता बालेन तरसोत्कलिताङ्घ्रिबन्धौ निष्पेततुः**, भूमेर्भगवत्सम्बन्धादार्द्रता सात्त्विकभावात्, अतः शिथिलसर्वभागावाकर्षणोत्कलिताङ्घ्रिबन्धौ जातौ, **अन्वगनुकूलतयाकृष्टं** यथा भवति तथोलूखलं नितरां **कर्षतेति**, उलूखलाकर्षणेन तावप्याकृष्टौ, **अन्वगीषदिति** वा, **दामोदरे**त्यन्वर्थनाम, बालस्योदरेणाकर्षणमल्पमेव भवति तत्राप्यूलूखलस्य स्थूलस्य, रज्जुरपि सूक्ष्मात्याकर्षेण नश्येत्, अनेनापि साक्षाद्भगवानित्युक्तं, रज्जूलूखलयोरभङ्गेप्यर्जुनयोर्भङ्गात्, उपपत्तिस्तु रज्जुर्भगवद्रूपेति पूर्वमुक्तं, उलूखलं त्वाधिदैविकं रूपं प्राप्तवत्, अतो युक्तमेव मूलतः पतनं, क्रियाशक्तेरल्पीयस्या अप्युद्गताया महत् कार्यं जातमित्याह **परमविक्रमितातिवेपस्कन्धप्रवालविटपाविति**, परमं विक्रमं प्रापितौ **परमविक्रमितौ** यथा भीमेन हनुमता वा बलाच्चाल्येत **परमविक्रमितयोरिव** योऽयम**तिवेपः स्कन्धप्रवालविटपानां** ययोः, **स्कन्धस्य** चलनमतिकठिनं ततोप्यल्प**प्रवालानां** पृथक्तया चलनमत्याश्चर्यं ताभ्यां युक्तानां **विटपानां** चलनमिति, **किञ्च कृतश्चण्डः शब्दो** याभ्यां, पाते महान् छब्दः, आसुरभावस्य वा नाशदशायां तदभिमानिनः शब्दः, एवमसुरनाशिकाया भगवत्क्रियाशक्तेर्माहात्म्यमुक्तम् ॥ २७ ॥ एवं तयोर्दोषपरिहारमुक्त्वा गुणमाह **तत्रेति**, **परमया श्रिया** दश दिशः स्फुरन्त्यो जातास्तावपि **स्फुरन्तौ सन्तावुपेत्येति**सम्बन्धः, अस्यैव स्फुरच्छब्दस्य विभक्तिलिङ्गविपरिणामेन **दिक्**शब्देनापि सम्बन्धः, प्रकाशमानया तत्सम्बन्धिन्या वा कृत्वा तत्र देशे तयोर्वृक्षयोर्वा **स्फुरन्तौ** निर्गच्छन्तौ **श्रिया** विराजमानौ ततो निर्गतौ, **ककुभः** सम्बन्धि तेजो विद्युति दृष्टं, अत एव परमशोभात्वेन निर्दिष्टं, यथा दामोदरेण मोचनमेवं नग्नेनापि पीताम्बरतुल्यतेजः सम्पादनमित्यद्भुतचरित्रमुक्तं, निर्गमनात् पूर्वमेव यावदभीष्टं तावद् रूपं सम्पन्नमिति सिद्धौ, **कुजयोर्वृक्षयोः** सकाशादागत्य भगवन्निकटे, पूर्ववृत्तान्तज्ञानवतामपि भ्रममिवोत्पादयन्तौ ताविति दृष्टान्तेनाह **जातवेदा इवेति**, दृष्टान्तेपि द्वित्वमत्यन्तदुर्लभं, **कुजयोररणिद्वयरूपयोः सकाशाद्** यथा श्रौतोग्निर्भवति, **जातो वेदो** यस्मात्, क्रियाकाण्डनिमित्तजन्मा वह्निरिवेत्यर्थः, ततो भगवन्तं **प्रणम्य** पूर्वज्ञानस्य दार्ढ्याच् **छिरसेति**, साष्टाङ्गनमस्कारं भूमौ कृत्वा देवानामितरनमस्कारशङ्कां भूमिसम्बन्धशङ्कां च व्युदस्य **बद्धाञ्जली** भूत्वा भगवन्तं वक्ष्यमाणप्रकारेणो**चतुः स्मेति**सम्बन्धः, शापविमोक्षे जातेति भगवन्तमपृष्ट्वास्तुत्वा च न गन्तव्यं यतो **भगवानखिललोकनाथः** सर्वलोकाधिपतिः स्वयमेकलोकाधिपतेः पुत्रौ तदाज्ञाव्यतिरेकेण गते तस्मिल्लोके स्थितिरपि न स्याद् भक्तिस्तु दूरे **अञ्जलिबन्धो** विज्ञापनार्थः, तादृशयोः कथं भगवत्स्तोत्रेधिकार इत्याशङ्क्याह **विरजसाविति**, अत्रासम्भावनाव्युदासाय **स्मेति**प्रसिद्धिरुक्ता ॥ २८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

देवर्षिरित्यत्राभासे **तथैवेति** तदुक्तप्रकारेणैवेत्यर्थः, **स्मृतिरिति** भगवत्स्मृतिः, **दुर्लभमिति** भगवत्स्मरणमितिशेषः, फलितमाहुरत **इति**, यद्यपि **नारदेनोक्तं** सान्निध्यात् सर्वं भविष्यतीति तथापि भगवत्कृत्यविषयत्वे तावन्मात्रस्य कार्यसाधकत्वाभावादित्यर्थः, **तावन्तमर्थमिति** भगवद्भावाभावरूपमित्यर्थः, **भक्त्युपयोग्यंशमिति** भगवच्चरणरूपं, अग्रे तत्पदत्रयं वृक्षपरमिति, तथा च **यो** नारदवाक्यसत्यत्वकरणार्थमनुक्तमपि भङ्गं सम्पादितवान् स तदुक्तं स्मरणं कथं न सम्पादये-

दितिभाव: ॥ २५ ॥ **इत्यन्तरेणे**त्यत्राभास **इति विचार्ये**ति मत्कृतिं विना तदुक्तिर्मृषा भवतीति**विचार्ये**त्यर्थ:, अन्त:प्रवेशकार्यमाहु: **सदे**त्यादिना, **पाद्मोत्तरखण्डे** तु दामबन्धनादेर्दिनमप्युक्तं "मष्टाविंशतिमे मासि सह:शुक्लाद्यवासरे मात्रा चोलूखले बद्धो बभञ्ज यमलार्जुना"विति वाक्यात्, 'सहो'मासश्च मार्गशीर्ष: ॥ २६ ॥ **तत्र श्रिये**त्यत्र **ककुभ** इत्यस्य प्रथमाबहुवचनान्ताभिप्रायेणाहु**र्विभक्ती**त्यादि, **ककुभ** इति षष्ठ्यन्तमभिप्रेत्य प्रयोजनान्तरमाहु: **प्रकाशे**त्यादि, द्वितीयपक्षतात्पर्यमाहु: **ककुभ: सम्बन्धी**त्यादि, **तच्च** तत्र भगवत्स्वरूपावच्छेदेन या ककुप् तस्या: सम्बन्धिनी **श्री:** शोभा तद्रूपं ज्ञेयं, तत्र गमकमाहु**रत एवे**त्यादि, तथा च तया विद्युत्तुल्यया **परमया श्रिया स्फुरन्ता**वित्यर्थ:, **जातो वेदो यस्मा**दिति, **वेदो** ज्ञानं, **स्तुतितात्पर्योक्तौ प्राणभृच्छ्लोकै**रिति **प्राणान्** बिभ्रतीति **प्राणभृत:**, कर्तरि क्विप्, तथा चेदानीन्तनप्राणानां भगवद्भक्त्या पोष्यत्वार्थं दशत्वसङ्ख्यया स्तुतिकृतिरित्यर्थ:, सङ्ख्यातात्पर्यमुक्त्वा स्तुतितात्पर्यमाहु**र्ज्ञाने**त्यादिना, तथा च पूर्वेषामस्य चाध्यायस्य **सङ्गत्यर्थमत्र** तयोर्निर्णय इत्यर्थ:, निर्णयस्वरूपं वक्तुं प्रतिश्लोकप्रतिपाद्यानर्थानाहु**र्मूले**त्यादि, **ज्ञानरूपो निरूपित** इति यद्यपि मूलरूपजगद्रूपमध्यरूपनिरूपणेन सद्रूप एव त्रेधा निरूपितस्तथापि **ते ब्रह्मण** इति विशेषणाज् ज्ञानमेकं प्राचीनैरिति**न्यायात्** सद्रूपनिरूपणेनैव चिद्रूपो निरूपित इत्यर्थ:, एवं चाद्यश्लोके नित्यसच्चिदानन्दो भगवानित्युक्तं, द्वयोस्तु स्पष्ट:, एवं श्लोकत्रयार्थ उक्त:, तन्निर्णयं वदन्तश्चतुर्थस्याहु**र्माहात्म्ये**त्यादि, एवमर्थ उत्तरार्धार्थ उक्त:, पूर्वार्धार्थमाहु: **सर्वरूप** इत्यादि, **"विदूरकाष्ठाय मुहु: कुयोगिना"**मितिवाक्याद् योगिग्रहणाभावाय, तेन सिद्धमाहु**राध्यात्मिक** इत्यादि, तर्हि कथं ग्राह्य इत्यपेक्षायां भक्त्या ग्रहणायाहु**र्देविकत्वेने**त्यादि, "चक्षुषश्चक्षु: श्रोत्रस्य श्रोत्रं मनसो मन" इतिश्रुते"स्तदभिध्यानादेव तु तल्लिङ्गात् स" इति**न्यायाच्च** तथेत्यर्थ:, समभिव्याहारसिद्धं क्रमसिद्धं चार्थं मनसिकृत्य पञ्चमस्याहु**स्तस्मा**दित्यादि, **तस्मात्** पूर्वोक्तरूपाद् भगवत: सकाशाद् यथा सर्वं जायते तथा ज्ञानं भक्तिश्चेतिद्वयमपि जायते चोप्यर्थे यतो भगवत एव सर्वत्वसर्वकर्तृत्वे निरूपिते तेन भगवत: सकाशादेव ज्ञानभक्ती जीवानां फलिते भविष्यतोत: क्रमेण ते **निरूपिते** इत्यर्थ:, अत्रायमर्थ:, सप्तमे जृम्भालीलायामष्टमे मृत्स्नाभक्षणलीलायां भगवता स्वस्य सर्वात्मकत्वं प्रदर्शितं, ततस्तादृशत्वज्ञानं तदैव तिरोधापितं ततो नवमे दामबन्धनप्रस्तावे **'न चान्त'**रित्यादिना यत् स्वरूपमुक्तं तज्ज्ञानमपि न केषाञ्चिद् वृत्तं किन्तु दामन्यूनतया तत्कार्यं साम्र कथञ्चित् सर्वेषां ज्ञातमभूत् तावता चाश्चर्यद्वारा व्रजभक्तानां निरोध एव कथञ्चिद् वृत्तो न तु विषयस्वरूपयाथात्म्यज्ञानेन ज्ञानस्वरूपं निर्णीतं तस्मादत्र तन् निर्णीयते, निर्नयास्तु भगवान् सर्वरूपोप्याध्यात्मिकाधिभौतिकोपदिग्धो न प्रकाशते, आध्यात्मिकाधिभौतिकानि रूपाणि तु यद्यपि सद्रूपाणि तथापि ज्ञानरूपावरकाणि भगवांश्च कालरूपेणेश्वररूपेण वा प्रकृतिरूपेण वा **कर्ता**, अक्षररूपेण च सर्वरूप:, ज्ञानं भक्तिश्चेतिद्वयं तस्माज् जायते, ज्ञानं चात्र सङ्क्रामितं विद्यमानमेव निरोधं जनयति, नन्वेवं सत्यस्या: स्तुतेरध्यायार्थे कथं सङ्गतिरित्यत आहु**रनेनै**वेत्यादि, **तु** पुन:, **अनेनै**वोत्तमभक्तिनिरूपणेन भगवतो गुणच्छन्नमहिमत्वस्योक्तत्वाद् गुणानां चावरकत्वस्योक्तत्वाद् भगवद्द्योत्यत्वकथनेन च गुणा भगवद्द्योत्या: स्वतश्च जडा इति तत्कार्यं सर्वमेव तथेति गुणपर्यन्तेषु सर्वेष्वनेन प्रकारेण वैराग्यं निरूपितमित्यर्थ:, तर्हि तन्निर्णय: कुत्रेत्यत आहु**र्ज्ञाने**त्यादि, यदि वैराग्यस्य **ज्ञानाजनकता** तदा सर्वं परित्याज्यमन्यथा यदि ज्ञानाजनकता न किन्तु ज्ञानजनकता तदा सर्वत्यागे विनाशनं स्याद् भक्तिमार्गोच्छीयेत तथा चैतयोर्भक्त्या ज्ञानजननान् न गृहत्याग इत्यदोष इत्यर्थ:, तर्हि शेषाणां किं प्रयोजनमित्याकाङ्क्षायां प्रथमत: षष्ठस्यार्थमाहु**र्भक्ती**त्यादि, उत्तम**भक्तिसिद्ध्यर्थं यज् ज्ञानं** साधनं वैराग्यजनकं तत् षष्ठे श्लोके विनिरूप्यते, ननु षष्ठे श्लोके भगवति भक्तिसिद्ध्यर्थं वीर्यलिङ्गकानुमानं साधनत्वेनोक्तं वीर्यं च सति न बन्धनं भगवांस्तूलूखले बद्ध इत्यन्यथाभावशङ्कया भक्तिस्तत्र न भवेदित्याशङ्क्य सप्तमस्यार्थमाहु**रन्यथे**त्यादि, उक्ताशङ्काया निवृत्त्यर्थं तत्र भगवान् पर इत्युच्यतेतो न दोष इत्यर्थ:, तन्निगमनार्थमष्टमनवमयोरर्थमाहु**र्भगवन्त**मित्यादि, अत्र नमस्करणमष्टमार्थ: प्रार्थना नवमार्थ:, तथा च पूर्वोक्तरीत्या भगवद्विषयके सर्वत्वसर्वकर्तृत्वज्ञाने जातेपि प्राप्ति: सोपानरूपेष्ववतारेषु यावद्भिर्न भवति तावत् फलं दूर इति तदवतारज्ञानार्थं षष्ठ उपाय उक्त:, सप्तमे च भगवतोवतारत्वव्यावृत्त्यर्थं परत्वं निरूपितं तेन सोपानप्राप्यत्वं बोधितं, अष्टमे नमनं, नवमे च तद्दर्शनसाधनमुक्तमिति **चत्वार** एते श्लोका ज्ञाननिर्णयशेषभूता इत्यर्थ:, ननु तयोर्भक्तत्वे ज्ञानस्वरूपं भगवन्तं परित्यज्य गमनमनुचितमिति कथं प्रार्थनेत्याशङ्क्य तत्र दशमस्यार्थमाहु**स्तदयुक्त**मित्यादि, **तदयुक्तं भवितमता**मितिशङ्का तु **षड्गुणा भवितर्भक्तै: सहैव कार्ये**त्याद्यर्थकथनेनैव निरसनीयेत्येतदर्थं दशमश्लोकषड्गुणत्वं **भक्तै: सह** करणमित्यादिकं विवरणे स्फुटीभविष्यति, तथा च मुख्यभजनाधिकारस्यासिद्धत्वात् तथा प्रार्थना, ननु परोक्षे कथं सिद्धिरित्यत आहु**र्गुप्त** इत्यादि, यदा भक्तै: सह तथा क्रियते तदा गुप्तरसरूपो भगवानुद्बुद्ध: सन् रसतां यातीत्येतदर्थंगमनप्रार्थनेत्यर्थ:, ननु भक्ता अत्रापि सन्तीति तै: सह करणे गुप्तरसोद्बोध: स्यादेवेति किं पारोक्ष्येणेति तथाभूतं त्यक्त्वा गमनमनुचितमित्यत आहु**र्गुणे**त्यादि, एकस्यां लीलायां भगवतो गुणप्रधानभावत्वं **हि** यतो हेतोर्विरुध्यते, अत्र हि भगवता भक्तगुणभावेन लीला: क्रियन्ते यदि प्राधान्येन तादृशं रसमुत्पादयेत् तदा स भावो विरुध्यते, अत्र भगवान् स्वयं लीलां कर्तुं समुद्यतस्तत् किमर्थमिति न निर्णेतुं शक्यते**तस्ताभ्यां** तदशक्यमिति तथा त्यक्त्वा गमनं नानुचितमित्यर्थ:, न च भवत्वेवं तथाप्यस्मिञ् श्लोके भक्तिमात्रस्य प्रार्थनेन

ज्ञानवैराग्यशेषत्वाभावादध्याये कथं सङ्गतिरिति शङ्क्यं, अत्र वाण्यादीनां भगवदेकपरत्वप्रार्थनयेतरवैराग्ये बोधिते तस्य भक्तिफलकताया अत्र निर्णीतत्वात् सुखेनाध्यायसङ्गतिरितिदिक्, अथ यदत्र सिद्धं तत् प्रसङ्गादुच्यते, भगवतोद्धर्तुं विचारितस्यैव भगवदीयसङ्गः, भगवदीया भगवद्विचारितमेव कुर्वन्ति, तत्र स्वदोषेणान्यथाभानेपि पर्यवसानतः परमफलसाधकत्वं, तत्र च भगवदीयानुग्रह एव व्यापारभूतं कारणं, तेनैव च स्वरूपसहकारियोग्यता सम्भवति, ततो भगवदीयदास्यद्वारा तदनुमितया भगवद्भजनं तेनाग्रे भगवद्भजनाधिकारवतो भगवद्विचारितभक्तिफलयोः सिद्धिरिति, पुष्टिमर्यादायामेवैव व्यवस्थितिरिति, इदं च गुणोपसंहारे 'कार्याख्याना'धिकरणस्थात् 'सम्बन्धादेवमन्यत्रापी'तिसूत्रात् सिध्यति, तत्र 'ह्ययोगे लके वह्निरिव भक्तजीवे भगवत आवेशोस्ति स च भगवत्त्वेन व्यपदिश्यत इति हेतुद्वयात् तत्फलदानार्थं तद्रूपो भगवांस्तत्राविशती'ति प्रतिपादनात् "तं यथायथोपासते तथैव भवति तद्भूतान् भूत्वावती"ति "यस्य देवे परा भक्तिर्यथा देवे तथा गुरावि"तिश्रुते 'र्गुर्वादौ जीवत्वबुद्धिनिषेधाच्च तत एव तस्य फलसिद्धि'रिति प्रतिपादितं तस्मान्न कोपि शङ्कालेशः ॥ २८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

देवर्षिमे इत्यत्र भङ्गानन्तरस्तुत्या स्मृतिर्ज्ञापिता भविष्यति अभङ्गे तु जन्मान्तरन्यायेन नलकूबरत्वं स्यात् न तु स्तुतिस्तदा स्मृतिर्ज्ञापिता न भवेदिति भावः, **अतस्तावन्त**मिति दोषांशमित्यर्थः, **धनदांश** इति धनदत्वाद् धनमदोपि सम्भवति तदंशे इत्यर्थः, **तत्रैवे**ति दोषांशं विहाय भक्त्यंश एवेत्यर्थः, **शुष्का**विति स्वप्रवेशेन दोषनिवर्तनात् तपसेव शुष्कतां कृत्वेत्यर्थः, **स्वाधिदैविके**ति दार्वाधिदैविकस्योलूखलस्य भावस्तिर्यग्भवनं तेनेत्यर्थः, **तद्विदीर्ण**मिति मूलं विदीर्णं विधायेत्यर्थः, तत इति मूलादित्यर्थः ॥ २५ ॥ **इत्यन्तरेणे**त्यत्र केवलमिति कृष्णत्वेनानन्दमयत्वाद् विज्ञानमयादप्यन्तरपि ययावित्यर्थः, **सदानन्दे**ति सत्त्वाद् दोषस्य आनन्दत्वाच्च च दुःखस्य निवृत्तिरित्यर्थः ॥२६॥ **बालेने**त्यत्र **परमे**ति एतादृशं तिवेपो ययोः स्कन्धादीनां वर्तते इत्यर्थकथन, विग्रहस्तु परमविक्रमितयोरिवातिवेपो येषां तादृशाः स्कन्धप्रवालविटपा ययोरिति ॥ २७ ॥ **तत्र श्रिये**त्यत्र पूर्वं **स्फुर**च्छब्दस्यावृत्तिरुक्ता ततः पक्षान्तरमाहुः **प्रकाशमानये**ति, तादृश्या ककुप्सम्बन्धिन्या श्रिया स्फुरन्तौ तावित्यर्थः, अस्मिन् पक्षे **ककुभ** इति षष्ठ्यन्तं ज्ञेयं, **भ्रममिवे**ति पूर्वं नलकूबरत्वेप्यग्निसदृशं तेजो न स्थितमतो भ्रम इत्यर्थः । स्तुतौ **दशभि**रित्यादि वृक्षाणां निरिन्द्रियत्वमते शापेन वृक्षत्वेन प्राणा इन्द्रियाणि नष्टा इति पुनः प्राणसम्पादनमिति सङ्ख्यातात्पर्यं प्राणान् बिभ्रति धारयन्तीति प्राणभृतस्तादृशैः श्लोकैरित्यर्थः, **आध्यात्मिक** इति आध्यात्मिकत्वे भौतिकत्वे वा सर्वस्मिन् गृह्यमाणे गृह्येत, गङ्गास्नाने भौतिकाध्यात्मिकस्पर्शवत्, आधिदैविकग्रहणं तु भक्त्यधीनमतो **नाध्यात्मिको न वा भौतिकः** किन्त्वाधिदैविकत्वेन **सर्वरूप**'स्त्वमेकः सर्वभूताना'मिति श्लोकेनोक्तः, तेन ब्रह्मत्वेन सर्वत्र ज्ञानं फलिष्यति "त्वं महा"निति "गृह्यमाणै"रिति श्लोकद्वयेनाध्यात्मिकाधिभौतिककर्तृत्वमुक्तं तेन मुक्तिः फलिष्यतीत्यर्थः, इदं फलद्वयं "तस्मै तुभ्य"मिति "यस्यावतारा" इति च श्लोकद्वयेनोक्तमितिज्ञेयं, **वैराग्यनिर्णयमाहुरनेनैवे**ति, इदमेव सर्वत्वं ज्ञानं चेन् न जनयेत् तदा वैराग्यं कर्तव्यं ब्रह्मत्वेन ज्ञानाभावे सर्वं त्यक्तव्यमित्यर्थः, एतदेव विवृण्वन्ति तदेत्यनेन, ननु षष्ठे श्लोके तु "ज्ञायन्त" इत्यनेन ज्ञानमेव निरूप्यतेतो भक्तिमाहुरिति **कथमुक्तमित्याशङ्क्याहुर्भक्तिसिद्ध्यै** इति, **तु पुनः षष्ठे श्लोके यत् ज्ञानं** निरूपितं तत् **भक्तिसिद्ध्यै** इत्यर्थः, सप्तमार्थमाहु**रन्यथे**ति, अन्यथाभावो मानुषत्वं तच्छङ्काव्यावृत्त्यर्थमित्यर्थः, **तदयुक्त**मित्यारभ्य **नान्यथे**त्यन्तेन दशमश्लोकार्थं उक्तः, **भक्तिमता**मित्यन्तेनाशङ्का, अग्रे समाधानमाहुः **भक्तिस्त्वि**ति, तथा च **इती**त्यस्यानन्तरं **चे**दितिशेषो ज्ञेयः, अयं निर्णयो "वाणी गुणानुकथने" इति श्लोकेन सम्पन्न इत्यर्थः, प्रसङ्गादेकादशस्याप्यर्थमाहुः **गुणे**ति, प्रधानशब्दो भावल्युडन्तत्वपक्षे धर्मवाचकः, तथा च गुणरूपः प्रधानरूपश्च भावो गौणत्वं प्रधानत्वं तद् यस्य तत्त्वमित्यर्थः, **तत्रैकत्र विरुध्यत** इति गौणत्वं स्वीकृत्य लीलां कृतवानितिभावः, इदं "दाम्ना चोलूखले बद्ध" इत्यस्य विवरणे स्फुटम् ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र गमने भगवतोऽभिप्रायमाह—देवर्षिरिति । यत् यस्मात् देवर्षिर्मम प्रियतमो यस्मादिमौ च धनदात्मजौ देवत्वेन स्थावरत्वायोग्यौ, तत् तस्मात् यत् यथा महात्मना मद्भक्तेन नारदेन गीतं 'निजस्वरूपं लब्ध्वा लब्धभक्ती भविष्यत' इत्युक्तं तत् तथा साधयिष्यामीत्यन्वयः ॥ २५ ॥ इत्येवमभिप्रेत्य श्रीकृष्णो यमयोर्यमलयोः सहजातयोरर्जुनवृक्षयोरन्तरेण मध्ये ययौ । तदा तु आत्मनः कृष्णस्य मध्ये निर्वेशमात्रेणोलूखलं तिर्यक् गतम् ॥ २६ ॥ अनु अञ्चति पश्चाद्गच्छति इत्यन्वक् । तथाभूतमुलूखलं दाम बन्धनरज्जुरुदरे यस्य तेन दामोदरेण बालेन कृष्णेन तरसा वेगेन निष्कर्षयता उत्कलितः उत्पाटितः अङ्घ्रिबन्धो मूलबन्धो ययोस्तौ, परमस्य परमेश्वरस्य कृष्णस्य विक्रमितो विक्रमस्तेन अतिवेपः कम्पो येषु ते स्कन्धप्रवालविटपा ययोस्तौ, अत एव कृतश्चण्डो महान् शब्दो याभ्यां तौ द्वावर्जुनवृक्षौ निपेततुरित्यन्वयः । उदरे दामबन्धनादेव 'दामोदर' इति नाम । तदुक्तं हरिवंशे—'स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात् । गोष्ठे दामोदर इति गोपीभिः परिगीयते" इति ॥ २७ ॥ परमया

श्रिया कान्त्या ककुभो दिशः स्फुरन्तौ प्रकाशयन्तौ सिद्धौ प्राप्तपूर्वस्वरूपौ नलकूबरमणिग्रीवौ कृष्णमुपेत्य शिरसा प्रणम्य च बद्धाञ्जलीसन्ताविदं वक्ष्यमाणमूचतुरित्यन्वयः। दिशःप्रकाशकत्वे दृष्टान्तमाह––तत्र कुजयोर्वृक्षयोः स्थितः जातवेदाः अग्निर्मूर्तिमान् सन् यथा प्रकाशयन्नागच्छेत् तथेत्यर्थः। कृष्णप्रणामे हेतुमाह–अखिललोकनाथमिति। 'नारदप्रसादात्तयोः श्रीमदोऽपिगत एव' इत्याह––विरजसाविति। 'अत्र असम्भावना न कर्तव्या' इत्याह—स्मेति ॥ २८ ॥

अन्वितार्थप्रकाशिका

देवर्षिरिति ॥ यद्यस्माद्देवर्षिर्मे प्रियतमः तत्तस्मात्तेन महात्मना यद्गीतं तदेव तत्तथा तेन प्रकारेण इमौ धनदात्मजौ साधयिष्यामि करिष्यामि ॥ २५ ॥ इतीति ॥ इत्येवमभिप्रेत्य श्रीकृष्णो यमयोर्यमलयोः सहजातयोरर्जुनवृक्षयोरन्तरेण मध्ये ययौ तदा तु आत्मनः कृष्णस्य मध्ये निर्वेशमात्रेणोलूखलं तिर्यग्गतमभूत्। मात्रपदेन यत्नाभावः ॥ २६ ॥ बालेनेति ॥ अनु अञ्चति पश्चाद्गच्छति इत्यन्वक् तथाभूतमुलूखलं निष्कर्षयता दाम बन्धनरज्जुरुदरे यस्य तेन दामोदरेण बालेन कृष्णेन तरसा वेगेन उत्कलितः उत्पाटितः अङ्घ्रिबन्धो मूलबन्धो ययोस्तौ परमस्य परमेश्वरस्य कृष्णस्य विक्रमितं विक्रमस्तेन अतिवेपः कम्पो येषु ते स्कन्धप्रवालविटपा ययोस्तौ अत एव कृतश्चण्डो महान् शब्दो याभ्यां तौ द्वावर्जुनवृक्षौ निःशेषेण पेततु। उदरे दामबन्धनादेव दामोदर इति नाम ॥ २७ ॥ तत्रेति ॥ तत्र कुजयोर्वृक्षयोः स्थितो जातवेदाः मिथो ज्योतिर्मेलनादेक एव अग्निर्मूर्तिमान् सन् यथा प्रकाशयन्नागच्छेत् तथा परमया श्रिया कान्त्या ककुभो दिशो व्याप्य स्फुरन्तौ। यद्वा अन्तर्भावितण्यर्थतया दिशः प्रकाशयन्तौ विरजसौ गतमदौ सिद्धौ प्राप्तपूर्वस्वरूपौ नलकूबरमणिग्रीवौ अखिललोकानां नाथं कृष्णमुपेत्य शिरसा प्रणम्य च बद्धाञ्जली सन्ताविदं वक्ष्यमाणमूचतुः स्मेति प्रसिद्धौ ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यद्यस्मात्कारणात् तत्तस्मात्कारणात् महात्मना नारदेन ॥ २५ ॥ यमयोः युगलत्वेन सह जातयोः अर्ज्जुनयोरंतरेण मध्ये आत्मनः स्वस्यानिर्वेशमात्रेण तन्मध्यप्रवेशमात्रेण उलूखलं तिर्यग्गतं वक्रतां प्राप्तम् ॥ २६ ॥ अनुअंचतीत्यन्वक् अनुगच्छत् तदुलूखलं निष्कर्षयता आकर्षणं कुर्वता दामोदरेण दाम्ना हस्तयोर्बंधाद्धस्ते मध्यागतमुदरं बद्धं ज्ञेयं अतो दाम्नाबद्धमुदरं यस्य तेन तरसा शीघ्रं उत्कलित उत्पाटितः अंघ्रिबंधो मूलबंधो ययोस्तौ परमस्य हरेर्विक्रमितं सामर्थ्यं तेन अतिवेपश्चलनं येषु एवंभूताः स्कंधप्रवालविटपा ययोस्तौ स्कंधः स्थूलशाखाविटपः अल्पशाखा प्रवालो नवांकुरः कृतः चंडो भयंकरः शब्दो याभ्यां तौ ॥ २७ ॥ तत्र कुजयोर्वृक्षयोः स्थितौ ककुभो दिशः स्फुरंतौ प्रकाशवंतौ जातवेदा मूर्त्तिमदग्निरिव सिद्धौ कृष्णमुपेत्य विरजसौ धनकुलादिमदविर्जितौ संतौ ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तद्वचः सत्यं कर्त्तुमित्येतदेव प्रपञ्चयति द्वाभ्याम्। देवर्षिरिति। यद्यतो हेतोः, देवर्षिर्नारदः, मे मम प्रियतमः। इमौ द्वौ, धनदात्मजौ मद्भक्तस्य कुबेरस्य तनयौ, तत्तस्मात्, महात्मना यद्गीतं, तत्तथैव, साधयिष्यामि करिष्यामि ॥२५॥ इतीति। इतीत्थंभूतेनाभिप्रायेण, कृष्णस्तु, यमयोः द्वयोः अर्जुनयोः, अन्तरेण मध्ये, ययौ। आत्मनः स्वस्य श्रीकृष्णस्य निर्वेश एव निर्वेशमात्रं तेन, उलूखलं, तिर्यक् गतं तिर्यक् निपतितं, अभूत् ॥ २६ ॥ बालेनेति। अनु अञ्चति अनुसरतीति अन्वक्, तत् उलूखलं, बालेन दामोदरेण, तरसा बलेन, निष्कर्षयता कर्षता सता, उत्कलितावुत्पाटितौ अङ्घ्रिबन्धौ मूलभागौ ययोस्तौ, परमस्य श्रीकृष्णस्य यद्विक्रमितं तेन अत्यतिशयितः वेपः कम्पो येषु तथाविधाः स्कन्धप्रवालविटपाः ययोस्तौ, कृतश्चण्डः शब्दो याभ्यां तथाभूतौ सन्तौ, तावर्जुनौ, निष्पेततुः ॥ २७ ॥ तत्रेति। तत्र तदा, परमया श्रिया शोभया, ककुभः दिशः, स्फुरन्तौ प्रकाशयन्तौ, कुजयोर्वृक्षयोः, स्थितः जातवेदाः अग्निः इव, मूर्त्तिमान् वह्निर्यथेत्यर्थः। स्थितौ सिद्धौ, उपेत्य श्रीकृष्णसमीपमागत्य, अखिललोकनाथं कृष्णं, शिरसा प्रणम्य, बद्धोऽञ्जलिर्याभ्यां तौ, विगतं रजो रजःकार्यं ययोस्तौ, सात्त्विकौ निर्मलौ वा सन्तावित्यर्थः। इदं वक्ष्यमाणम्, ऊचतुः स्मेति प्रसिद्धौ ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

देवर्षिरिति : १०.१०.२५.

कृपादृगीक्षणादेव मोक्तुं तौ शक्तिमानपि। यत्तत्सान्निध्यधीरीशस्तत्र हेतुर्मुनीन्द्रगीः ॥ ३६ ॥

एकः प्रियो धनदजावपरौ द्वयोरप्यावश्यकं यदपि सद्धितचिन्तनं मे।
तत्राप्यकृत्रिम-यशस्करमाद्य मन्यत्, नेत्यच्युतः स किल तद्गिरि दत्तचित्तः ॥ ३७ ॥

इत्यन्तरेणेति : १०.१०.२६.

यदाऽहमन्तरोल्लासी क्लेशहानिस्तदैव हि । निदर्शनाय लोकानां द्रुमयोरन्तरे स्थितः ॥ ३८ ॥
विनान्तरगतिं न स्यादुद्धारो युगपद् द्वयोः । तुल्यस्थित्योरिति श्रीशस्तादृशस्थितिभागभूत् ॥ ३९ ॥
विहितो गुणावलम्बो यदि विनियोज्यः परोपकृतयेऽसौ । निखिलैरेतद्धरिणा तद्गुणभाजा दयाब्धिना ध्वनितम् ॥ ४० ॥
चैतन्य व्याप्तिर्वै दैरात्मनिर्वेशनोत्तरम् । या प्रोक्ता तामभिव्यक्तामाधात् तत्कृतितः प्रभुः ॥ ४१ ॥
खलपदभाग्यः स च न त्वद्गुणवानपि जहाति निजभावम् । तादृगुलूखलमभवत् तिर्यग्गतमेव गोपते यस्मात् ॥ ४२ ॥

बालेनेति १०.१०.२७.

पुंसस्तद्गुणभाजस्तिर्यग्गतिरपि परोपकृतये स्यात् । अकृतोलूखलमिह यत् तादृशमपि तौ कुजन्मिनावनघौ ॥ ४३ ॥
सति प्रसङ्गे परमोपकारः कार्यः स जातौ गुणिनाविशेषात् । लसद्गुणोलूखलमाप्तवृक्षे तदोपकारं यदधात् क्षमं तत् ॥ ४४ ॥

इतरेषु युगेषु योग्यभावं समुदीक्ष्यैव समुद्धृतिं करोमि ।
कृपयेह युगे कुजन्मभाजामपि पातेति तरूद्धृतेरबोधि ॥ ४५ ॥

स्वानुगविहितं कर्म हि यथायशोदं तथा न निजविहितम् ज्ञात्वेत्यकरोदीश स्तदुद्धृतिं तामुलूखलद्वारा ॥ ४६ ॥

भगवति समदृष्टावप्यदृष्टप्रधानः प्रभवति फलभागी तारतम्येन लोकः ।
स्फुटमिह पलसङ्गेनागमौ तौ कृतार्थावनुगतमपि तत्रोलूखलं प्राग्वदासीत् ॥ ४७ ॥

मुख्यो हेतुर्भवति भुवने स्वोद्धृतौ भावनैव बद्धोऽबद्धः प्रभवतु गुरुस्तत्र हेतुर्न चैषः ।
बद्धेऽपीशे यदिह भगवद्भावनातः स्वरूपं प्राप्तौ मुक्तेऽप्यपरतरवो नैव यत्तद्विहीनाः ॥ ४८ ॥

न तेन स्याद् वृद्धो भवति पलितं यस्य हि शिरो युवा वा बालो वा सकलगुणवान् यः स हि गुरुः ।
त्वया श्रुत्यर्थोऽयं धनदतनुजाऽनुग्रहकृतौ कृतो व्यक्तस्तत् किं वदसि शिशुरस्मीति वितथम् ॥ ४९ ॥

उत्कलिताङ्घ्रिबन्धाविति :

नेत्रात्मनः कुलीनस्य लोकादृश्यविहारिणः । बन्धो न युक्तः इत्याधात् तदङ्घ्रिश्लथबन्धनम् ॥ ५० ॥
अतोऽर्हतः स्थावरतामिति श्लोकाङ्घ्रिणर्षिणा । कृतो बन्धः सशैथिल्यं नीतः श्रीशेन तन्मिषात् ॥ ५१ ॥

प्रारब्धसौख्यमवशेषतयाऽस्ति भोग्यं तस्मादिमौ परममुक्तिपदे न योग्यौ ।
सर्वांशतः प्रभुरितीव विचिन्त्य मुक्तौ तौ तन्मिषेण विदधे किल पादबन्धात्॥ ५२ ॥

कृतचण्डशब्दाविति :

बालोऽहमेतौ च प्रवालयुक्तौ विटोऽहमेतौ विटपाश्रितौ स्तः ।
अन्योन्यसम्बन्धमिमं समीक्ष्य यथोचितं कुर्वति तौ सशब्दौ ॥ ५३ ॥

कुजस्य मङ्गलार्थत्वं येनाकारीश तस्य ते । नान्यथाकरणं युक्तमधुनेतीरितं रवात् ॥ ५४ ॥

तत्र श्रियेति : १०.१०.२८.

दण्डवत्पतनं कार्यं जडैरनधिकारिभिः । नमः सद्भिरिति स्पष्टं तरुतज्जकृतावभूत् ॥ ५५ ॥
सर्वेष्वपि तरुष्वास्ते वह्निरित्यखिलप्रथा । औपम्यात् स्पष्टमत्रोक्ता धनञ्जयपदेऽर्जुने ॥ ५६ ॥
वृक्षभेदेऽपि तज्जात वह्निभेदो न रूपतः । तथैकमासीत् तद्रूपमित्येकवचनात् स्फुटम् ॥ ५७ ॥

जगदिव नश्वरवृत्तिर्महागमोऽस्मादुदञ्चितं वस्तु । सत्यमिति व्यक्तमभूद् भमद्रूदितमहापुरुषयोगात् ॥ ५८ ॥

सत्सङ्गादभवदधोगतिः खलाङ्घ्रेः स्पर्शाच्चाच्युतपददर्शनानुभूतिः ।
तन्मन्ये न तदुभयं निदानमस्मिन् किन्तु श्रीमदतद्भावयोः फलं तत्॥ ५९ ॥

कृष्णप्रिया

प्यारे श्रीकृष्ण ने विचार किया कि देवर्षिः नारद तो मेरे अत्यंत लाडले भक्त हैं और ये यक्ष श्री कुबेर के कुमार हैं अतः महामना श्रीनारदजी ने जो कुछ कहा है उसे मैं ठीक उसी रूप में पूर्ण करूँगा ॥ २५ ॥ ऐसा निर्णय कर भगवान् कृष्ण यमलार्जुन वृक्षों के बीच से निकलने लगे उस समय केवल भगवान के बीच में चले जाने मात्र से ओखली टेढ़ी हो गयी ॥२६॥

कटिमें कसके रस्सी बांधे दामोदर श्री बालकृष्णजी ने अपने पीछे लुढ़कती ओखली को ज्यों ही जरा सा जोरकर खींची त्यों ही दोनों वृक्षों की जड़ें वेग से उखड़ गयी, भगवान के परम विक्रम को प्राप्त हुए दोनों वृक्षों की शाखा प्रशाखाएँ और एक एक पत्ता काँप उठा पुन: एक धड़ाके की बड़ी कड़ी आवाज हुई और दोनों वृक्ष तड़तड़ाते हुए जमीन दोस्त हो गये ॥ २७ ॥ वहाँ पर परम उत्कृष्ट कान्ति से दिशाओं प्रकाशमान करते हुए अग्नि नारायण के समान तेजस्वी, वृक्षों से प्रकटे हुए दोनों सिद्ध नल-कूबर मणिग्रीव सर्वथा रजोगुण जन्य अभिमान से मुक्त हुए अखिल लोकनाथ भगवान् श्रीकृष्णजी के श्री चरणों में प्रणाम करते हुए अञ्जलिबद्ध विशुद्ध मनसे भगवान की स्तुति करने लगे ॥ २८ ॥

[1]नलकुवरमणिग्रीवावुचतुः

कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः । व्यक्ताव्यक्तमिदं विश्वं रूपं ते [2]ब्रह्मणो विदुः ॥ २९ ॥
त्वमेकः सर्वभूतानां [3]देहास्वात्मेन्द्रियेश्वरः । त्वमेव कालो [4]भगवान् विष्णुरव्यय ईश्वरः ॥ ३० ॥
त्वं महान् प्रकृतिः [5]सूक्ष्मा रजःसत्त्वतमोमयी । त्वमेव [6]पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ॥ ३१ ॥
गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः । को न्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः[7] ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—कृष्ण कृष्ण महायोगिन् त्वम् आद्यः परः पुरुषः व्यक्ताव्यक्तम् इदं विश्वं ते रूपं ब्रह्मणः विदुः ॥ २९ ॥ त्वम् एकः सर्वभूतानां देह असु आत्मा इन्द्रिय ईश्वरः त्वं एव भगवान् कालः विष्णुः अव्ययः ईश्वरः ॥ ३० ॥ त्वं महान् सूक्ष्मा रजःसत्वतमोमयी प्रकृतिः त्वं एव पुरुषः क्षेत्रज्ञः सर्वक्षेत्रविकारवित् ॥ ३१ ॥ गृह्यमाणैः प्राकृतैः गुणैः विकारैः त्वम् अग्राह्यः गुणसंवृतः कः इह नु प्राक् सिद्धं विज्ञातुं अर्हति ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गोपालं मां युवां देवौ किमिति प्रणताविति चेत्तत्राहतुः । हे कृष्ण कृष्ण महायोगिन्नचिंत्यप्रभावस्त्वं न गोपालः किं तु परः पुरुषः । यतः आद्यः कारणभूतः । तत्रापि न निमित्तमात्रं किं तूपादानमपि त्वमेवेत्याशयेन तुष्टुवतुः । व्यक्ताव्यक्तमिति । स्थूलसूक्ष्ममिदं रूपं ते तव ब्राह्मणा ब्रह्मविदो विदुरिति ॥ २९ ॥ नियंतापि त्वमेवेत्यूचतुः । त्वमेक इति । देहः असवः प्राणाः आत्माऽहंकारः इंद्रियाणि च तेषामीश्वरः । नन्वस्य कालो निमित्तं प्रकृतिरुपादानं प्रकृतेर्जातो महान्विश्वात्मतया परिणमते पुरुषः कर्ता नियंता च किमत्राहमत आहतुः त्वमेव काल इत्यादिना सार्धेन । यतो भगवानीश्वरो विष्णुस्त्वत्तः कालो नाम तव लीला ॥ ३० ॥ प्रकृतिः शक्तिः । पुरुषोंशः महान्कार्यं अतस्त्वमेव सर्वमित्यर्थः ॥ ३१ ॥ नन्वहमेव चेत्सर्वं तर्हि घटादिज्ञाने मज्ज्ञानं किं न भवतीति चेत्सर्वोऽपि ब्रह्मवित्स्यादतआहतुः । गृह्यमाणैरिति । दृश्यत्वेन वर्तमानैर्बुद्ध्यहंकारेंद्रियादिभिर्द्रष्टा त्वं न गृह्यस इति भावः । ननु तर्हि जीवो जानातु नैवेत्याहतुः । को न्विहेति । जीवाद्युत्पत्तेः प्रागेव स्वप्रकाशतया सिद्धं त्वां को वा विजानाति यतो गुणसंवृतो देहाद्यावृतः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्तुतिं कुर्वाणौ दृष्ट्वा निजवैभवं गोपयितुमाह—गोपालमिति । सर्वतो निकृष्टं पशुपालनं कुर्वंतमिति भावः । देवौ सर्वोत्तमौ । तत्र तस्यामाशंकायाम् । आदरे वीप्सा कृष्ण कृष्णेति । कृषंति निजापदं नाशयंतीति कृष्णा देवास्तेषामपि कृष्ण हे देवदेवेत्यर्थः । अचिंत्यप्रभावः वक्तुमशक्यैश्वर्यो महायोगिन्नित्यस्यायमर्थः । यतो यस्मात् । तत्रापि कारणत्वेपि । न केवलं निमित्तमात्रं किंत्विति ब्राह्मणा वेदतात्पर्यविदो व्यासाद्याः ॥ २९ ॥ नियंता प्रेरकः । स्वविषयशक्तिप्रदः । एतादृशस्तु कालो भवतीति चेत्तत्राहतुः—त्वमेवेति । विष्णुर्व्यापनशीलः । व्यापकस्याप्याकाशस्योत्पतिविनाशवत्त्वादहं न तादृशस्तत्राहतुः—अव्यय इति । तत्कुतस्तत्राहतुः—ईश्वरोंतर्यामी ॥ ३० ॥ किं चान्येषामेव निमित्तोपादानादिरूपताप्रसिद्धास्तानाह—नन्विति । अत्र निमित्तोपादानादौ अहं किम् । इत्यर्थ इति । शक्तिशक्तिमतोरभेदोग्न्यादौ दृष्टः । लीलापि शक्तिकार्यत्वाच्छक्तिरेव । अंशांशिनोरप्यभेद एव वह्निस्फुलिंगस्य वह्निरूपत्वदृष्टेरिति भावः । सर्वक्षेत्राणां विकाराणि जन्मादिषट् वेति साक्षितया पश्यतीति तथा ॥ ३१ ॥ स्वस्य सर्वरूपत्वे शंकांतरमुद्घाटयति—नन्वहमिति । प्राकृतैः प्रकृतिकार्यभूतैः गुणैर्लिंगैः ।

---

[1] अन्यप्रत्यां "नलकुबरमणिग्रीवावूचतुः" पाठो न दृश्यते ; गुह्यकावूचतुः-इति च पु. टी. । [2] ब्राह्मणा—श्रीधर. वंशी. ब्रह्मणः श्रीधर. टी. ; ब्रह्मणो—वीर. । [3]. देहिस्वा—च पु. टी. ; देह आत्मेन्द्रिये विज. ; [4]. भगवन्—वीर. । [5]. साक्षात्—श्रीधर. टी. ; [6] पु.षोऽव्यक्त—जीव. । [7]. गुणसंस्थितेः—विज. ।

इति भाव इति। दृश्यस्य द्रष्टृता द्रष्टुर्दृश्यत्वं च न भवतीति तात्पर्यम्। एते जडत्वान्न जानंतु जीवः कथं न जानाति चेतनत्वादिति शंकते न कोपीत्यर्थः। "को अद्धा वेद कः प्रावोचत्कुत आयाता इयं विसृष्टिः" इत्यादिश्रुतेः। "क इह नु वेदवतावरजन्म लयो" इत्यग्रे वक्ष्यमाणत्वाच्च। अज्ञाने हेतुः—गुणसंवृतो देहाद्याविष्टमनस्त्वादवकाश एव विचारस्य नेति भावः। "विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः। वारुणीदिग्गतं वस्तु कथमैन्द्रीं व्रजँल्लभेत्॥" इति मैत्रेयोक्तेः॥ ३२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यद्यप्यावां महापराधिनौ तथापि त्वया नितरामनुगृहीतौ तच्च तवोचितमेवेति निवेदयितुमुपक्रमेते-कृष्णेति। हे नराकृति परब्रह्मन् वीप्सापरमानन्देन प्रेमसम्भ्रमेण वा किं वा जिह्वाकर्षककृष्णनामस्वभावेन वा। यद्वा, उलूखलकर्षणादिबाल्यलीलारतस्य महाचञ्चलस्य क्षणं स्थैर्यापादनेनाभिमुखीकरणाय कृष्णत्वमेव प्रपञ्चयतः-महायोगिन्! अचिन्त्यानन्तैश्वर्येत्यर्थः। यतः प्रकृतिद्रष्टा तावत्पुरुषस्त्वं तु परः पुरुषस्तस्याप्यंशी अंशित्वेपि महानारायणादिभेदेन बहुविधाविर्भावः स्यादिति तत्रापि त्वमाद्यः स्वयं भगवान् इत्यर्थः। तथा च दर्शितं "ईश्वरः परमः कृष्णः" इत्यादि ब्रह्म संहितापद्याभ्याम् अतः सर्वतो गुणाधिकस्य तव ईदृशी कृपाऽपि युक्तैवेति भावः। किञ्च ईशस्यापि तव ब्रह्मणः परमबृहतो रूपमधिष्ठानं कार्यं वा विदुरिति ब्राह्मणा इति कचित्पाठः। एवमावयोरपि नित्यत्वदीयत्वेनाऽनुग्रहो घटतैवेति भावः॥ २९॥ किञ्च त्वमिति एतच्चार्द्धकम्, इत्थं तवैव सर्वप्रवर्तकत्वेन तत्त्वतो ऽस्मदपराधाभावात् किं वा स्वत एव बहिरन्तस्त्वदेकनाथत्वादनुग्राह्यौ भवाव एवेति भावः। ननु, सर्वप्रवर्तकः कालः जगत्कारणानां च महदादीनामेव रूपं विश्वं तत्राहतुः-त्वमेवेति सार्द्धेन। कालादित्वे हेतुतया भगवान् इत्यादिविशेषणचतुष्कं भगवान् सर्वसामर्थ्ययुक्त विष्णुर्व्यापकः न व्येति क्षीयत इत्यव्ययः ईश्वरः सर्वनियन्ता कालस्य त्वदंशत्वेनैव तत्तद्धर्मत्वात् त्वमेव मुख्यः कालः इत्यर्थः। तथा महत्तत्त्वस्य व्यापकत्वेनैव महत्त्वात्तदादिव्यापकस्त्वमेव मुख्यो महानित्यर्थः। तथा "भगवानेक आसेदमग्र आत्मात्मनां विभुः" इत्यादितृतीयस्कन्धादितो भगवांस्त्वमेव सर्वकारणत्वेनाव्ययत्वात् मुख्या प्रकृतिरित्यर्थः। तथा पुरुषस्य त्वदंशत्वेनैव देहेन्द्रियादिसत्त्वात् त्वमेव मुख्यः पुरुष इत्यर्थः। सूक्ष्मेति "भूमिरापोऽनलो वायुः" इत्यादिगीतोक्ताष्टावयवकार्यात्मकप्रकृतेः कारणावस्थोक्ता रजःसत्त्वेति विश्वस्य वैचित्र्यापेक्षया सच्चिदानन्दशक्तेर्व्यवच्छेदार्थं च सा च तव प्रकृतित्वानुगतैव प्रकृतिः। "प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधात्" (१।४।२३) इति न्यायात् मूलप्रकृतिस्तु त्वमेवेत्यर्थः। यद्वा, सूक्ष्मा दुर्ज्ञेया तर्हि कथं ममापि रजआदिमयत्वं? नेत्याहुः—अरजः सत्त्वतमोमयीति अव्यक्तः सूक्ष्मचैतन्यरूपत्वात् अध्यक्ष इति पाठे देहाद्यधिष्ठातेत्यर्थः। तमेव लक्षयति-सर्वक्षेत्रस्य देहस्य विकारा बाल्याद्यवस्थास्तदनुसन्धानकर्ता तथा चैकादशे "नात्मा जजान न मरिष्यति नैधते ऽसौ न क्षीयते सवनविद्व्यभिचारिणां हि" इति। यद्वा, पुरुषः प्रकृत्यधिष्ठाता सृष्टिहेतुः अव्यक्तः सर्वागोचरः पाठान्तरे सर्वसाक्षी अत एव सर्वेति॥ ३०-३१॥ विज्ञातुं साक्षात्कर्तुम् अन्यत्तैः तत्र विकारैः प्राकृतैरित्यस्य व्याख्या बुद्धिविकारैरिति गुणैरित्यस्य चेन्द्रियादिभिरिति। अथ च श्लेषेण एवं परमानुग्रहकृदपि साक्षात् दृश्यमानोऽपि त्वमस्मादृशैर्वशीकर्त्तुं तत्त्वतो ज्ञातुं वा न शक्यत इत्याहतुः-गृह्येति, गृह्यमाणैः साक्षादनुभूयमानैः अविकारैः सदैव विक्रियाशून्यैः प्राकृतैः स्वाभाविकैर्गुणैः कारुण्यादिभिर्विशिष्टोऽपि त्वम् अग्राह्यः वशीकर्तुमशक्य इत्यर्थः। परमस्वतन्त्रत्वात् अवतारिकायाः पक्षान्तरे तत्त्वतो ज्ञातुमशक्यः एकस्यैव युगपद्विभुत्वमध्यमत्वादिना परमदुर्वितर्कत्वात् तत्र च इह श्रीनन्दगोकुले प्राक् प्रथमत एव सिद्धं नित्यं प्रकटतया वर्तमानमपि त्वां गुणान् भक्तिलक्षणान् सम्यक् श्रितः आश्रितोऽपि कः विशेषेण ज्ञातुम् अर्हति योग्यो भवति शक्तोऽपि वा अपितु न कोऽपि लौकिकालौकिकताप्रकटनेन परमदुर्बोधलीलत्वात्। यद्वा, गुणैर्दामभिरग्राह्योऽपि त्वं तान् गुणान् संश्रितः तैर्बद्ध इत्यर्थः। तथानुक्तिस्त्वादरेण अतः कोन्वित्यादिबन्धनदर्शनेन परममोहोपादनादिति भावः। सम्वृत इति पाठेऽपि सम्यक् वृतत्वेन स एवार्थः॥ ३२॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

यद्यप्यावां महापराधिनौ, तथापि त्वया नितरामनुगृहीतौ; तच्च तवोचितमेवेत्याशयेनोचतुः—कृष्णेति हे नराकृतिपरब्रह्मन्! वीप्सा—परमानन्देन प्रेमसम्भ्रमेण वा, किं वा जिह्वाकर्षककृष्णनामस्वभावेन; यद्वा, उलूखलकर्षणादिबाल्यलीलारतस्य महाचञ्चलस्य क्षणं स्थैर्य्यापादनेनाभिमुखीकरणाय कृष्णत्वमेव प्रपञ्चयता। महायोगिन् हे अचिन्त्यानन्तैश्वर्य्यैर्य्येत्यर्थः, यतस्त्वमाद्यः सर्वदेवश्रेष्ठः परः पुरुषश्च परमात्मा परमेश्वरो वा, अत ईदृशी कृपा युक्तैवेति भावः, किञ्च, इदं सर्वमेव कार्य्यकारणात्मकं जगद् ब्रह्मणः सर्वव्यापकस्य तव, किंवा त्वद्विभूतिरूपस्य ब्रह्मणो रूपं विवर्त्तं विदुर्वेदान्तिनः। एवमावयोरपि नित्यत्वदीयत्वेनोनुग्रहो घटतैवेति भावः॥ २९॥ किञ्च, त्वमिति, इत्थं तवैव सर्वप्रवर्तकत्वेन तत्त्वतोऽस्मदपराधाभावात्, किंवा स्वत एव बहिरन्तस्त्वदेकनाथत्वादनुग्राह्यौ भवाव एवेति भावः। ननु सर्वप्रवर्त्तकः कालो जगत्कारणानाञ्च महदादीनामेव रूपम्? तत्राहतुः—त्वमेवेति सार्द्धेन कालत्वे हेतुतया भगवानित्यादि विशेषणचतुष्कम्, भगवान् सर्वसामर्थ्ययुक्तो विष्णुर्व्यापकः न व्येति क्षीयत इत्यव्ययः, ईश्वर, सर्वनियन्ता, कालस्यापि तदंशत्वेन तादृशत्वात् सूक्ष्मेति कारणावस्थोक्ता, रजः सत्त्वेति

विश्वस्य वैचित्र्यपेक्षया सच्चिदानन्दशक्तेर्व्यवच्छेदार्थश्च। यद्वा, रज आदिगुणाश्च त्वमेवेत्यभिप्रायेण पुरुषो जीवोऽव्यक्तः केवलचैतन्यरूपत्वेन परमसूक्ष्मत्वात्। अध्यक्ष इति पाठे देहाद्यधिष्ठातेत्यर्थः। तमेव लक्षयति—सर्वे क्षेत्रस्य देहस्य विकारा बाल्याद्यवस्थास्तदनुसन्धानकर्त्ता, तथा चैकादशे (भा० ११।३।३८) 'नात्मा जजान न मरिष्यति नैधतेऽसौ, न क्षीयते सवनविद्व्यभिचारिणां हि' इति। यद्वा, पुरुषः प्रकृत्यधिष्ठाता सृष्टिहेतुरध्यक्षः साक्षी अत एव सर्वेति कालादीनां चतुर्णां यथोत्तरं सृष्टिहेतुत्वे श्रैष्ठ्यातत् क्रमेण निर्देशः ॥ ३०-३१ ॥ इह संसारे वर्त्तमानः, यतो गुण संवृतोऽतः को नु विशेषेण तत्त्वतो ज्ञातुमर्हति शक्नोति ? विशब्देनेश्वरोऽस्तीति सामान्येन ज्ञानसत्ता सूचिता। अन्यत्तैर्व्याख्यातम् तत्र विकारैः प्राकृतैरित्यस्य व्याख्या-बुद्धिविकारैरिति गुणैरित्यस्य चेन्द्रियादिभिरिति, अथवैवं परमानुग्रहकृदपि साक्षाद्दृश्यमानोऽपि त्वमस्मादृशैर्वशीकर्त्तुं तत्त्वतो ज्ञातुं वा न शक्य इत्याहतुः—गृह्येति, गृह्यमाणैः साक्षादनुभूयमानैर्विकारैः सदैव विक्रिया शूर्यैः प्राकृतैः स्वाभाविकैर्गुणैः कारुण्यादिभिर्विशिष्टोऽपि त्वमग्राह्यो वशीकर्त्तुमशक्य इत्यर्थः, परमस्वतन्त्रत्वात्। यद्वा, तत्त्वतो ज्ञातुमशक्यः, एकस्यैव युगपत् स गुणत्वनिर्गुणत्वादिना परम दुर्वितर्क्यत्वात्। तत्र चेह श्रीनन्दगोकुले प्राक् प्रथमत एव सिद्धं नित्यं प्रकटतया वर्त्तमानमपि त्वाम्, किं वा प्राक् प्राचीनानपि गुणान् भक्तिलक्षणान् सम्यगाश्रित आश्रितोऽपि को विशेषेण ज्ञातुमर्हति योग्यो भवति शक्नोति वा ? अपि तु न कोऽपि। यद्वा, को ब्रह्माऽप्यर्हति किम् ?—काका, नैवेत्यर्थः-विचित्रापूर्वदर्शितनिजाशेषभगवत्ता प्रकटनेन परम दुर्बोधलीलत्वात्। यद्वा, यतो गुणैर्दामभिर्गुणान् वा संश्रितस्त्वमुक्तस्वरूपस्य तव कथमपि दामबन्धनासम्भवेऽपि तत्स्वीकारेण परममोहोत्पादनादिति भावः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

रूपं शरीरम् ॥ २९ ॥ देहीदेहान्तर्गतोऽस्मद्धृदयकमलस्थः परमात्मा त्वं जीवशरीरकोऽस्मदिन्द्रियेश्वरः इत्यन्वयः ॥ ३०-३१ ॥ गुणैर्गुणमयैः कार्यैः गृह्यमाण एतत्कारणमित्यवगम्यमानइन्द्रियैरग्राह्यम् प्राक्सिद्धं कारणभूतम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गोपबालं मां युवां देवौ किमिति प्रणतावित्यत्राहतुः-हे कृष्ण कृष्ण ! महायोगिन् ! अचिन्त्यप्रभाव ! न केवलं गोपबालस्त्वमपितु परमपुरुषः, कोसौ ? य आद्यो जगत्कारणभूतः ननु, कार्यकारणयोः प्रायश सालक्षण्यदर्शनात्कथं चिदचिदात्मकस्य जगतस्तद्विलक्षणोऽहं कारणमित्यत्राहतुः—व्यक्तं नामरूपाभ्यामव्यक्तं चेदं विश्वं ब्रह्मणः सर्वशक्तित्वादिकल्याणगुणैर्बृहतस्तव रूपं शरीरं विदुर्वेदान्ता आमनन्तीत्यर्थः। वेदान्ताश्च "यस्य पृथिवी शरीरं यस्यात्मा शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरम्" इत्याद्याः सूक्ष्मचिदचिच्छरीरकत्वेन कारणभूतः स्थूलचिदचिच्छरीरकत्वेन कार्य्यावस्थश्च त्वमेवेति भावः ॥२९॥ न केवलमुपादानकारणमेवापि तु निमित्तकारणमपीत्यभिप्रायेण तदुपयुक्तगुणवत्तामाहतुः-त्वमेक इति। एकशब्देन अधिष्ठात्रन्तरव्यावृत्तिः सर्वभूतानां यानि देहादीनि तेषामीश्वरः नियन्ता तत्रासवः प्राणाः आत्मा मनः भवन्ति देवमनुष्यादिरूपेण जायन्त इति भूतानि क्षेत्रज्ञास्तेषां देहादिसम्बन्धोपादानोपयुक्तसार्वज्ञ्यादिगुणयोगेनान्तःप्रविश्य नियन्तेत्यर्थः। एवं निखिलजगत्कारणत्वं तच्छरीरकत्वञ्चोक्तम् ॥ अथ तदुभयनिबन्धनं जगदन्तर्भूत कालादिसामानाधिकरण्यमाहतुः-त्वमेव काल इति। यद्वा त्वमेक इति स्थितिकालत्वमुक्तं त्वमेव काल इति लयकारणत्वं कालो मृत्युः त्वं महानित्यादिना सामानाधिकरण्यमुच्यते इति विवेकः हे भगवन् ! अव्यय इत्यनेन कारणत्वप्रयुक्तदोषपरिहारः भगवन्नित्यनेनावतारदशायामपि षाड्गुण्य पूर्तिरुक्ता, विष्णुरित्यनेन देवताविशेषत्वञ्च ॥३०॥ त्वं महान् महत्कारणत्वात्तच्छरीरकत्वाच्च तत्समानाधिकरणः एवमुत्तरत्रापि द्रष्टव्यं न केवलं महानेवापि तु तत्तत्कारणभूता रज आदिगुणत्रयात्मिका सूक्ष्मा नामरूपविभागानर्हा प्रकृतिरपि त्वमेव तथा पुरुषो जीवस्त्वमेव, कथम्भूतः ? अध्यक्षः देहप्रभृतिजीवपर्य्यन्तानामधिष्ठाता क्षेत्राणि शरीराणि बुद्धिपर्य्यन्तेन्द्रियसहितानि तानि वेत्तीति तथा युगपत् क्षेत्रेन्द्रियवृत्तिविदित्यर्थः ॥ ३१ ॥ रूपं ते ब्रह्मणो विदुरित्यनेनैवंविधं त्वां केवलं वेदान्ता एव विदुर्न त्विन्द्रियाणीत्यभिप्रेतं तदेव विशदयन्तौ उपपादयतः गृह्यमाणैरिति। प्राकृतैर्गुणविकारैर्गुणपरिणामरूपैरिन्द्रियैस्त्वमग्राह्यः गृहीतुं विषयीकर्तुमशक्यः, तत्र हेतुं वदन्तौ गुणान्विशिष्टः गृह्यमाणैरिति। यथा श्रोत्रादिभिर्गृह्यमाणाः शब्दादयो न श्रोत्रादीन् गृह्णन्ति तथा त्वया गृह्यमाणा विकारास्त्वां न गृह्णन्तीति भावः। नन्वग्राह्यस्य मम कारणत्वसमव्याप्तोपास्यत्वानुपपत्तिस्ततश्च कारणत्वानुपपत्तिरित्यत्राहतुः-कोन्विति। गुणैर्गुणकार्यैरिन्द्रियैः संवृतः आवृतः सहित इति यावत् कोनु पुमान् प्राक् सिद्धं गुणेभ्यः प्रागेव तत्कारणतया तत्प्रकाशतया च सिद्धं त्वाम् इह ज्ञातुं विषयीकर्तुमर्हन्ति गुणसंवृतः को वाऽर्हतीत्यनेन विशुद्धमनास्तु ज्ञातुमर्हतीति सूचितम् अनेनानुपास्यत्वं परिहृतम् यद्वा ननु तर्हि जीवो जानात्वित्यत आहतुः कोन्विति ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

व्यक्ताव्यक्तं कार्यकारणात्मकं रूप्यत्वात्प्रतिमात्वेन सन्निधियोग्यत्वाद्रूपमुच्यते न तु साक्षाद्रूपम् "रूप्यत्वात्तु जगद्रूपं विष्णोः साक्षात्सुखात्मकम्" इत्यादिस्मृतेः। ब्राह्मणाः वैदिकाः ॥ २९ ॥ सन्निधियोग्यं दर्शयति—त्वमिति। सर्वभूतानां देहे

आत्मनो मनस इन्द्रियाणामीश्वरः स्वविषयशक्तिप्रदः न केवलमन्तरेव प्रवर्तकः बहिरपि सर्वशक्तिमत्त्वात्तच्छक्तिप्रबोधक इति भावेनाह, त्वमिति। तदुक्तं "विष्णुः सर्वगुणोद्रेकात्काल इत्यभिधीयते" इति "कल कामधेनौ" (१) इति धातुः। विष्णुः व्यापनशीलः व्याप्तस्याकाशवदुत्पत्तिविनाशौ स्यातामिति नेत्याह, अव्यय इति "जातस्य हि ध्रुवो मृत्युः" इति स्मृतेः अन्तर्यामीति वा आत्माऽन्तर्यामीति ॥ ३० ॥ प्रकृत्यादेरचेतनत्वेन स्वतः प्रवृत्त्यनुपपत्तेः तत्सत्ताया अपि तदधीनत्वेन तत्त्वव्यपदेशो युक्त इति भावेन स्तौति—त्वमिति। महान् महत्त्वं पूर्णगुणत्वेन पुरुषशब्दवाच्योऽपि त्वमेवेत्याह, त्वमिति। अध्यक्षः साक्षी साक्षित्वं व्यनक्ति सर्वेति, सर्वक्षेत्राणां कारणभूतानि प्राणाश्चार्थः खम्त्रायुरित्यादीनि विकारशब्दवाच्यानि वेत्ति जानाति तत्त्वेन पश्यतीति सर्वक्षेत्रविकारवित् ॥ ३१ ॥ नन्वव्यक्तो हरिरिति पुरस्तादुदीरितं तत्कथं "दृश्यते त्वग्र्यया बुद्धया" इतीन्द्रियविषयत्वोक्तेरत्राह, गृह्यमाण इति। स्वयमेव स्वात्मानं गृह्णाति न त्वन्य इत्यर्थः। तदुक्तं "स्वात्मना गृह्यमाणः" इति किमेवं विवेकः क्रियते ? इति तत्राह, अग्राह्य इति। विकारैः प्राकृतैः महदहङ्काराद्यभिमानिभिः ब्रह्मादिभिरग्राह्यः। ननु, नित्यसमीपस्थाभिर्दुर्गादिभिर्ग्राह्य एवेत्यत्राह, गुणैरिति। सत्त्वादिभिर्गुणाभिमानिनीभिरपि, ननु "वेदाहमेतं पुरुषं महान्तम्" इति श्रुतेः। ब्रह्माद्यवेद्यः कथमुच्यते ? इति तत्राह, क इति। अत्र संस्थितिशब्देन उत्पत्तिर्लक्ष्यते स्थितेरुत्पत्त्यपेक्षत्वात् इह जीवराशौ कः पुमान् गुणभूतस्य हरेः क्रीडायामन्तरङ्गस्य जगतः स्थितेरुत्पत्तेः प्राक् सिद्धम् "आनीदवातं स्वधया तदेकम्" इति श्रुतिसिद्धं ब्रह्म विज्ञातुमर्हति शक्नोति अर्हति त्वादिति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कृष्ण कृष्णेति परमस्वरूपत्वात् परमनामत्वाच्च प्राङ्निर्देशो वीप्सा च परः पुरुषो भवान् तत्त्वेऽपि आद्यः स्वयं भगवानित्यर्थः ॥ २९-३२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ यमलार्जुनभङ्गे नलकूवरमणिग्रीवयोः स्तुतिमाह—कृष्ण कृष्णेत्यादि। हे कृष्ण कृष्णेति हर्षादुद्भूतयोर्वीप्सा। महायोगोऽचिन्त्यपरमैश्वर्यम् तदस्यास्तीति नित्ययोगे इन्। त्वमाद्यः, यतः परः पुरुषः पुरुषोत्तमः। तवेदं श्रीयशोदा तनयाख्यं रूपं व्यक्ताव्यक्तम्, भक्तेषु व्यक्तं प्रकटम्, अभक्तेष्वप्रकटम्। विदुस्तत्त्वविद इति। कीदृशस्य ब्रह्मणः ? ब्रह्मस्वरूपस्य, त्वमेव पूर्णं ब्रह्म, त्वदतिरिक्तं न तदन्यत्। अथवा, ब्रह्मण इत्यनादरे षष्ठी। निर्विशेषं प्रति यदन्यं मन्यन्ते, तदनादृत्य विदुरित्यन्वयः। कीदृशं विश्वम् ? विशति सर्वेषां हृदयमिति सर्वमनोज्ञत्वात्, विशेर्व उणादिकः। अथवा इदं विश्वम् एतत् प्रकारकं विश्वमखिलं विलसितं पूतनावधादि यत्र ॥ ३०-३३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कृष्ण कृष्ण महायोगिन्नित्यादि। ते तव यशोदानन्दनस्य रूपं व्यक्ताव्यक्तं विदुः, भक्तेषु व्यक्तं यथार्थतयाप्रकटम्, अभक्तेष्वव्यक्तमयथार्थत्वेन स्फुरत् ते तव तत्त्वं न जानन्तीति भावः। किम्भूतस्य ? ब्रह्मणो बृहतः अथवा, ब्रह्मण इत्यनादरे षष्ठी, ब्रह्म चानादृत्य विदुरित्यर्थः। रूपं कीदृशम् ? इदं विश्वमिदमेव विश्वं ज्ञाति-प्राणधनादिकमिति प्रतीतिर्यत्र ॥३०-३३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उलूखले बद्धं गोपालबालं मां युवां देवौ किमिति प्रणतावित्यत आहतुः—कृष्णकृष्णेति। द्वित्वं द्वयोरेव युगपदुक्तेः त्वं परः पुरुषो भगवान् तत्राप्याद्यः स्वयं भगवान् अतस्त्वं गोपालबाल भवस्येवेति भावः। हे महायोगिन्नचिन्त्यप्रभाव अस्मन्मोचकस्य तवैतद्बन्धनकारणमतवर्थमिति भावः। सर्वस्वरूपस्य तव केन बन्धनं सम्भवेदित्याहतुः—व्यक्ताव्यक्तं कार्य्यकारणात्मकम् ॥ २९ ॥ नच त्वदन्यो बन्धकः कोपीश्वरोस्तीत्याहतुः—त्वमिति। असवः प्राणाः आत्माऽहङ्कारः सर्वात्मकत्वात्त्वमेवैक ईश्वर इत्याहतुः—त्वमिति। कालो नाम तव चेष्टा महान् कार्य्यं प्रकृतिः शक्तिः पुरुषोंऽशः कीदृशः अध्यक्षोऽन्तर्य्यामी सर्वेषु क्षेत्रेषु विकारान् मन आदीन् वेत्ति अतो विष्णुरीश्वर एको भगवांस्त्वमेव ॥ ३०-३१ ॥ त्वत्कृपयैव त्वं दृश्यसे वस्तुतस्त्वमदृश्य एवेत्याहतुः—गृह्यमाणैस्त्वया दृश्यमानैर्विकारैर्बुद्धीन्द्रियादिभिर्द्रष्टा त्वं न गृह्यसे कीदृशैः प्राकृतैर्गुणकार्य्यैः तेनाप्राकृतैरगुणकार्यैर्बुद्धीन्द्रियादिभिस्तु त्वं दृश्यस एवेति भावः। नन्वप्राकृतत्वाज्जीवो जानातु नैवेत्याहतुः कोन्विहेति। प्राक् सिद्धमिति त्वदीयतटस्थशक्तिविलासत्वाज्जीवस्यापि त्वं कारणमित्यर्थः। गुणसम्वृत इति गुणातीतस्तु स त्वद्भक्त्या कथञ्चित्त्वां जानातीति भावः ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे कृष्ण कृष्ण ! महायोगीन् ! यः देवर्षिणोक्तः वासुदेवस्य सान्निध्यं लब्ध्वा लब्धभक्ती भविष्यथ इति स त्वम् आद्यः पुरुषो विश्वहेतुः निःसमानातिशयः विश्वभिन्नाभिन्नत्वं भगवत आहतुः व्यक्ताव्यक्तं चिदचिदात्मकं विश्वं ब्राह्मणाः

सनकनारदादयस्ते रूपमाहुः स्वरूपतो भिन्नमपि तज्जत्वादिहेतुभिस्त्वत्तोऽभिन्नमाहुरित्यर्थः। "सर्वं खल्विदं ब्रह्म तज्जलानिति" इति श्रुतेः ॥२९॥ भगवतः सर्वनियन्तृत्वमाहतुः— त्वमेक इति। सर्वभूतानां ब्रह्मादिपिपीलिकापर्यंतानाम् देहादीनामीश्वरः एको मुख्यस्त्वमेवासि एवं सार्द्धेन विश्वहेतोर्भगवतो विश्वभिन्नाभिन्नत्वं तद्वत्सर्वभूतदेहादिनियन्तृत्वं चोक्तमथ पृथक् पृथक् अचेतनानां कालादीनां भगवच्छक्तित्वेन चेतनानां भगवदंशत्वेन च भिन्नत्वेपि भगवदभिन्नत्वमाहतुः—काल इति सार्द्धेन ॥३०॥ पुरुषो जीवः जातावेकवचनम् ॥ ३१ ॥ ननु, सर्वरूपोऽहं चेत्तर्हि सर्वे ब्रह्मविदो भवन्त्वित्यत्राहतुः गृह्यमाणैरिति। प्राकृतैः कार्यभूतैः गुणैरिन्द्रियैः ग्राह्याः ये प्राकृताकार्यभूताः विषयाः तैः कारणभूतस्त्वमग्राह्योसि यद्यपि कार्यकारणरूपस्त्वमेवासि कार्यभूतैरिन्द्रियैः कार्यरूपो ग्राह्योपि "कारणं तु ध्येयम्" इति श्रुतेः मुक्तिप्रदेन कारणरूपेणाग्राह्योसीत्यर्थः। अतः गुणसंवृतः गुणैः प्राकृतैस्त्रिभिः पराभूतः प्राक् सिद्धं विश्वकारणं त्वां विज्ञातुं कोनु इह संसारे अर्हति न कोपीत्यर्थः। अतः सर्वे ब्रह्मविदो न भवन्ति किन्तु कश्चिद्गुणातीतस्त्वदनुग्रहेण त्वां जानातीति भावः ॥ ३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

उलूखलनिबद्धं मां गोपालं देवौ युवां किमिति प्रणमथस्तत्राहतुः– कृष्ण कृष्णेति। द्वयोर्युगपदुक्तेर्द्वित्वं हे महायोगिन्! अविचिन्त्यप्रभाव आवयोर्मोचकस्य तवेदं बन्धनं कारणं दुर्बोधमिति भावः। गोपबाल एव त्वं परः पुरुषः परेशः तत्राप्याद्यः स्वयम्प्रभुः स्वशक्त्या सर्वरूपस्य ते बन्धनं केन स्यादित्याहतुः व्यक्ताव्यक्तं कार्यकारणभूतम् ॥ २९ ॥ न च त्वत्तोऽन्यो नियन्ता कोप्यस्तीत्याहतुः—त्वमिति युग्मम्। देहश्च असवः प्राणाश्च आत्माहङ्कारश्च इन्द्रियाणि च तेषामीश्वरो नियन्ता नन्वस्य विश्वस्य कालो निमित्तप्रकृतिरुपादानं ततो जातो महानहङ्कारादिद्वारा विश्वात्मना परिणते कर्ता नियन्ता च पुरुः कारणोदशयः किमत्राहमिति चेत्तत्राहतुः। त्वमेवेति सार्द्धकेन यत ईश्वरो भगवान् विष्णुर्व्यापकोऽतः कालादित्वमेव सर्वं समाप्नोषि ततोऽसि सर्व इति वचनात् कालाद्यध्यक्षः पुरुषस्तु त्वत स्वांशो भवेदतः सोऽपि त्वमिति व्यापकाद्वैतमुक्तम्। चिज्जड़योर्मुख्याद्वैतस्य बाधितत्वात् सर्वेषु क्षेत्रेषु शरीरेषु विकारान् मनःप्रभृतीन् वेत्तीति सर्वज्ञ इत्यर्थः ॥ ३०-३१ ॥ ननु युष्मत्प्रत्यक्षस्य मात्रोलूखले निबद्धस्य मेऽतिस्तुतिः किमिति क्रियते तत्राहतुः—गृह्यमाणैरिति। त्वया गृह्यमाणैर्दृश्यमाणैर्विकारैर्गुणैश्चक्षुरादिभिरिन्द्रियैर्द्रष्टा त्वं न गृह्यसे विकारत्वं तेषां कुतस्तत्राह प्राकृतैरिति मायाकार्यैरित्यर्थः। न तु जीवो विज्ञानमयत्वाज्जानीयात्तत्राहतुः। तादृशोपि जीवो गुणसंवृतस्त्वं मायया विलुप्तप्रज्ञानः कस्त्वां विज्ञातुमर्हति न कोऽपीत्यर्थः। त्वां कीदृशमित्याह प्राक् सिद्धं तद्देहेन्द्रियादि प्रवर्त्तकतया पूर्वमेव सिद्धमित्यर्थः। प्राकृतैर्गुणसंवृत इत्याभ्यामतीतमायः पराख्यत्वच्छक्तिसिद्धेन्द्रियस्तु भक्तस्त्वां पश्येदेवेति सूच्यते ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कृष्ण कृष्ण महायोगिन्निति श्लोके लोकेशस्य ब्राह्मणा इदं व्यक्ताव्यक्तं विश्वं ते स्वरूपं विदुरिति जगदैक्यमुच्यत इत्यन्यथाप्रतीत्यापदपनुत्तये प्रमाणेन रूपादिपदार्थनिरूपणपरेण तत्तात्पर्यमाह ॥ रूप्यत्वादिति। रूप्यत्वान्निरूप्यत्वादुत्पाद्यत्वादिति यावत्। रूप प्रतिष्ठायामिति स्मरणात्प्रतिष्ठाप्यत्वादिति वा। जगद्रूप्यत्वाद्विष्णो रूपमित्युच्यते। गौणोऽत्र रूपपदार्थश्चेत्कासौ मुख्यार्थ इत्यत आह ॥ सुखात्मकमिति। नित्यपूर्णसुखात्मकं परमात्मनः स्वरूपं साक्षान्मुख्यं समुद्दिष्टमिति वामनोक्ते रूपं निरूप्यमित्यर्थः। ननु बहुस्थले जगदैक्यपराकृतये पराक्रान्तं प्रागाचार्यैस्तत्प्रणाड्यार्थो ज्ञातुं प्राज्ञैः शक्यत इति पुनः पुनः कुतः प्रमाणोपन्यसनं क्रियत इति चेत्। प्रथमं द्वितीयस्कन्ध एवैवमनुयोज्यं किङ्करनियोज्यभवता भवतु किं जातं वदामः। एकस्मिन्नर्थे मानानि नानाप्रणाड्या व्यवस्थापकानि सन्ति तानि चेकत्रैवोदाहृतानि चेन्मन्दविन्दबिन्दुसंन्दोहरूढाणि भवेयुः। ते ते प्रकाराश्च बोध्या बोध्यान्प्रतीति कृपणकरुणावरुणशरणमाचार्या उदाजह्रुरुदाहरिष्यन्ति चेति चेतः पर वा चेतः परं कुरु ॥ ततश्चायं श्लोकार्थः ॥ यतः कर्षसि देवेश नियम्य सकलं जगदित्यादेर्जगत्कर्षकत्वाद्धे कृष्ण प्रस्तुतमुलूखलकर्षकतया चेति पुनर्हे कृष्णेत्युक्तिः। महायोगिन्महोपाय महाणिमादियोग त्वमाद्यः परः सर्वोत्कृष्टः पुरुषो व्यक्ताव्यक्तं कार्यकारणात्मकमिदं विश्वं समस्तं विश्वं जगते तव रूप्यत्वाद्रूपमिति ब्राह्मणा अपरोक्षज्ञानिनो ब्रह्माणतीति ब्राह्मणोऽपरोक्षज्ञानीति गीताभाष्योक्तेः। वर्णविपर्ययो निरुक्तत्वादित्युक्तत्वात्तट्टीकायां। आद्यत्वपरत्वपुरुषत्वमहायोगित्वादियुतं त्वमन्यद्रूपं विदुरित्यपि मानानुयानयोजना ज्ञेया। त्वत्वावन्यपर्यायौ ऋचां त्वः पोषमास्त इत्यादेस्त्वशब्दोऽन्यार्थकः ॥ २९ ॥ त्वमेकः सर्वभूतानां देह आत्मेति श्लोके देह इति प्रथमान्तेन जडदेहैक्यतोच्यत इत्यन्यथाप्रतीतिनिरासाय स्वयं पदं विवक्षितं दर्शयति ॥ देहे शरीर इति। तत्रैव त्वमेव काल इति क्षणलवाद्यात्मजडकालात्मकता विष्णोस्तथैवोत्तरस्मिन्महदादिरूपतोच्यत इत्यापत्प्रच्युत्यै प्रमाणे आह ॥ विष्णुरिति। सर्वगुणोद्रेकादुद्रिक्तत्वाद्विष्णुः काल इत्यभिधीयते न तु कालात्मकत्वादित्यर्थः। कल छेदने कल बन्धने कल ज्ञाने कल कामधेनुरिति च पठन्ति। यथा कामधेनुः सर्वार्थान्ददाति तथाऽयमपि धातुः सर्वार्थवाचीत्यर्थ इति गीताभाष्यप्रमेयदीपिकाभ्यामुक्तेः सकलगुणोद्रिक्तता कालशब्दार्थ इत्यर्थः। प्रथमान्तः कामधेनुरिति पाठे

ललितार्थं इतरस्तु टीकाकृदटीकत इत्युपेक्ष्यः। क्लिष्टार्थताऽपि स्पष्टमाभातीति वामन इति शेषः ॥ ततश्चायं श्लोकार्थः ॥ सर्वभूतानां देहे आततत्वादात्मा इन्द्रियाणां चेश्वरः स्वविषयशक्तिप्रदस्त्वमेव कालः सर्वगुणोदीर्णं ईश्वर ईशेभ्यो वरोऽव्ययो नाशशून्यो भगवन्विष्णुस्त्वमेकोऽन्तर्भेदहीनस्तत्तदन्तर्गतरूपः ॥ ३० ॥ प्रकृत्यादेस्तद्वशत्वात्तदधीनत्वाद्विष्ण्वधीपत्वात्स्वाधीनप्रकृत्यादिकत्वाद्विष्णुः प्रकृत्यादिरित्युदीर्यते। तत्र दृष्टान्तमाचष्टे ॥ यथेति। भृत्यकृताद्भृत्यप्राप्तफलात्स्वयं राजा कर्ता जयादिकर्ता तत्फलवानितीर्यते। यथा देहं स्वतन्त्रत्वात्स्वाधीनत्वात्स्वयमित्याहुः। अञ्जसेत्यत्रेव प्रागप्यन्वेति। स्वातन्त्र्यं तद्गतत्वं च शब्दवृत्तेर्हि कारणं। स्वातन्त्र्यं तत्र मुख्यं स्यात्कुतो राज्ञि जयोऽन्यथेत्युक्त्यनुरोधतो यथा राजेत्येकं यथा देहमित्यपरं निदर्शनमिति ज्ञेयं ॥ ततश्चायं श्लोकार्थः ॥ मूले महान्प्रकृतिरित्युक्तिर्माने च प्रकृत्यादेरिति च कथमिति चेत्। केचिन्महानित्यप्युदीर्यत इति योजनमुशन्ति। प्रकृतिग्रहणेनैव महतः प्राकृतस्य ग्रहणं भवत्येवेति तात्पर्यें तदग्रहो मूले तु व्यक्तमव्यक्तमित्युक्त्यनुरोधेन महतः पूर्वं प्रकृतेश्चानन्तरमुक्तिरिति समादधुः। वस्तुतस्तु प्रकृतिरादिर्यस्य तस्य महतस्तथैव प्रकृत्यादिर्महानित्यन्वयने सोऽपि महानुक्तो भवतीति समाधिरवधेयः। त्वं महान्महत्तत्वं रजःसत्त्वतमोमयी सूक्ष्मा प्रकृतिस्त्वं तत्तत्स्वामिकत्वान्महान्प्रकृतिश्चेत्युदीर्यते अध्यक्षः पुरुषो जीवस्त्वमध्यक्षः साक्षितया पुरुषः पूर्णगुणतया शरीरशायित्वेन वा। साक्षिता साक्षितैनस्मिंस्त्वयीत्याह ॥ सर्वक्षेत्रविकारविदिति। सर्वेषां क्षेत्राणां ये विकारा आरम्भकाः पृथिव्यप्तेजोवाय्वाद्याः खं वायुः पृथ्वीत्यादेस्तान्वेत्तीति स तथा ॥३१॥ गृह्यमाणस्त्वमग्राह्य इति श्लोक एकेन गृह्यमाणत्वागृह्यमाणत्वे भगवत इति प्रतीयते तच्च विरुद्धमित्यतः प्रमाणानुसारेणाध्याहारेण स्वयं व्याकृत्य तथोत्तरश्लोके छन्नमहिमत्वमुक्त्वा ते नम इत्युक्तिरप्ययुक्तेत्यतो व्यवस्थापकं तन्मानमुदाहरति ॥ स्वात्मनेति। स्वात्मना गृह्यमाणः स्वैः स्वकीयैः कृपापदैरात्मना च गृह्यमाण इत्यर्थः। अगृह्यमाणः स्वस्वेतरैरपि। अनन्तमिति वेतीशस्त्वनन्तत्वं तथा। अनन्तस्य तु सङ्ख्याने न तु सर्वज्ञता भवेदित्येकादशतात्पर्योक्तेः। ज्ञेय एतैः सदा युक्तैर्भक्तिमद्भिः सुनिष्ठितैः। ज्ञानगम्यमित्यादेश्च। आचार्यचरणोऽपि स्वेनात्मनेत्येतावता पूर्तौ यत्स्वात्मनेत्यूचे तेनासूचयदमुमर्थमिति ज्ञेयं। अन्येषां स्वाननुगृहीतानामनुगृहीतानामपि साकल्येन छन्नः स्वस्य न तु छन्न इत्यन्वयः ॥ ततश्चायं श्लोकद्विकार्थः ॥ व्यक्ताव्यक्तत्वे एव भगवत इत्यवगमयति ॥ गृह्यमाण इति। स्वैरात्मना च गृह्यमाणः स्वैः साकल्येन तथाऽऽत्मना चेतरैः सर्वथाऽग्राह्यः। ते च क इत्यत आह। प्राकृतैर्विकारैर्महदाद्यभिमानिभिर्ब्रह्मादिभिर्गुणैः सत्त्वाद्यभिमानिनीभिरग्राह्य उक्तरीत्या। गुणसंस्थितेर्गुणानां कार्योन्मुखीभवनादुत्पत्तेरिति यावत् प्रागेव सिद्धं त्वां विज्ञातुमिहाधिकारिवर्गे कोऽर्हति न कोऽपि। मूले विज्ञातुमित्यत्र विपदार्थः साकल्यादिरूप इति ज्ञेयं। इह जीवराशौ कोऽपि पुमानर्हति चेत्स इयदामननादित्यादेः कश्चतुर्मुख एवेत्यावृत्त्याऽन्वयः। कश्छन्दसां योगमावेद धीरः। वेदाहमेतं पुरुषं महान्तं। ब्रह्मैनं पश्यति स्फुटमित्यादेः। वासुदेवाय वेधसे ज्ञानस्वरूपाय तस्मै दयोदयाभावदशायां परोक्षाय तुभ्यं दयोदयेऽपरोक्षभूताय तस्मै शापापनोदकतया नारदेरिताय तुभ्यमिदानीमस्मादृशां दृशां विषयायेति वा। आत्मद्योतैरात्मना द्योतः प्रकाशः कार्योन्मुखता येषां तैर्गुणैः सत्त्वादिभिः प्रकत्येति यावत्। छन्नमहिमा माहात्म्यं यस्य तत्तस्मै ब्रह्मणे गुणपूर्णाय। तुच्छेनाभ्वपिहितं यदासीत्तपसस्तन्महिना जायतैकमिति श्रुतेः। पिहितत्वमपीतरापेक्षयेति प्राग्विवृतरीत्या ज्ञेयं। नमोऽस्त्विति शेषः ॥ ३२-३३ ॥

श्रीसुबोधिनी

दशभिः प्राणभृच्छ्लोकैश्चक्रतुः स्तोत्रमुत्तमम्। ज्ञानवैराग्ययोरत्र निर्णयः समुदीरितः ॥ १ ॥
मूलरूपो भवान् पूर्वं जगद्रूपस्तथैव च। मध्यरूप इति त्रेधा ज्ञानरूपो निरूपितः ॥ २ ॥
माहात्म्यज्ञापनार्थाय दुर्ज्ञेयत्वं च वर्णितम्। सर्वरूपोपि सर्वस्मिन् गृह्यमाणेर्न गृह्यते ॥ ३ ॥
आध्यात्मिकस्ततो नायं भौतिकोपि ततो नहि। दैविकत्वेन सर्वः स्यात द्वयं तस्माच्च जायते ॥ ४ ॥
अतः सर्वत्वकर्तृत्वे ज्ञानभक्ती फलिष्यतः। अतो ज्ञानं निरूप्यादौ भक्तिमाहतुरुत्तमाम् ॥ ५ ॥
अनेनैव च वैराग्यं ज्ञानाजनकता यदि। तदा सर्वं परित्याज्यमन्यथा स्याद् विनाशनम् ॥ ६ ॥
भक्तिसिद्ध्यै तु यज् ज्ञानं श्लोके षष्ठे निरूप्यते। अन्यथाभावशङ्काया व्यावृत्त्यर्थं भवान् परः ॥ ७ ॥
भगवन्तं नमस्कृत्य गमनप्रार्थना कृता। तदयुक्तं भक्तिमतामिति भक्तिस्तु षड्गुणा ॥ ८ ॥
भक्तैः सहैव सा कार्या परोक्षेणैव सिध्यति। गुप्तो रसस्तदोद्बुद्धो रसतां याति नान्यथा ॥ ९ ॥
गुणप्रधानभावत्वमेकत्र हि विरुध्यते। अतोत्र भगवाँल्लीलां स्वयं कर्तुं समुद्यतः ॥१०॥
स्वस्यैव रसभोगार्थं परार्थं वेत्यनिर्णयः। ताभ्यां विमोचनं नैव शक्यं पक्षद्वयेपि हि ॥११॥

पूर्वस्मृतिः सन्दिग्धेति तन्निर्णयार्थं भगवानागत इत्युक्तं, सा स्मृतिः सर्वलोकप्रसिद्धा भवत्विति कृष्णस्वरूपं ज्ञातं निरूपयतः, "ज्ञानी प्रियतमोतो मे" इतिवाक्यात्, अन्यथा सर्वैव स्तुतिर्विरुध्यते; तत्र प्रथमं पुरुषोत्तमो भवानित्याहतुः कृष्णकृष्णेति, आदरे वीप्सा, कृष्णः सदानन्दः, स एव कृष्णनामा च, उभयविधाज्ञाननिवृत्त्यर्थं वा तथोक्तं, आकृत्या चेष्टया च

नावयोर्भ्रम इत्याहतुर्महायोगिन्निति, लौकिका अपि नानायोगचर्यायां प्रवृत्ता हीनभावं न प्राप्नुवन्ति कुतः पुनर्निर्दोषपूर्णगुणविग्रहः ? अतो नामरूपे वर्णनीयेर्थे न बाधके, **आद्य** इति, मूलभूतत्वमेव महत्त्वं सर्वेर्हि स्वापेक्षया महत्त्वं ज्ञातव्यं, **आद्यस्तु** तथा, आद्यत्वं मतान्तरे चेतनस्यापि सम्भवतीति तद्व्यावृत्त्यर्थमाह **पुरुष** इति साङ्ख्यतुल्यतामाशङ्क्याहतुः **पर** इति, पुरुषोत्तम इत्यर्थः, निराकारपक्षनिवृत्त्यर्थं **पुरुषपदं**, तस्मिन् पक्षेयं विकृतो भवेदेव, **परः** कालादीनामपि नियन्ता, एवं भगवतो मूलरूपत्वं निरूप्यकार्यरूपाभावे मूलरूपत्वं नोपपद्यत इति कार्यस्य चान्यथात्वे तस्य गौणत्वमविकृतत्वमसङ्गित्वं च विरुध्यत इति कार्यरूपमपि त्वमेवेत्याहतु**र्व्यक्ताव्यक्त**मिदमिति, इदं सर्वमेव जगद् द्विरूपमेव भवति कालेनापरिगृहीतम**व्यक्तं** भवति परिगृहीतं **व्यक्तं** भवति, आकाशपरमाण्वादीनामपि **व्यक्त**तेति केचित्, तदा सर्वमेव जगत् कालादितृणस्तम्बान्तं **व्यक्तमव्यक्तं** च भवति, अवयुत्यानुवादो वा, उभयथापीदं जगत् तवैव रूपं, अत्र प्रमाणमाहतु**र्ब्रह्मणो विदु**रिति, **ब्रह्मणो** वेदात्, **ब्राह्मणा** इति वा, **ते ब्रह्मण** इति वा, तदा सर्वा एव श्रुतयः प्रमाणमित्युक्तं भवति, रूपमिति स्वरूपं निरूपकं वा ॥ २९ ॥ एवं सर्वरूपत्वं भगवतो निरूप्याधिदैविकप्रकारेणापि सर्वरूपत्वमाहतु**स्त्वमेक** इति, तत्तदाधिदैविकानां भेदो भविष्यतीत्याशङ्क्याहतुरेक इति, देवादीनामुत्तमत्वात् तदाधिदैविकत्वमस्तु कृमिकीटाधिदैविकत्वं तु न भविष्यतीत्याशङ्क्याहतुः **सर्वभूतानामिति**, आब्रह्मतृणस्तम्बान्तजातिभेदानां **देहा असवः** प्राणा **आत्मान्तःकरणमिन्द्रियाणीश्वरो** जीवः, स्वात्मा जीवो वा, **इन्द्रियपदेन** प्राणाः, **इन्द्रियाण्यन्तःकरणं** च, **ईश्वरोन्तर्यामी**, आधिभौतिकादीनामीश्वरो वा, देहद्वयसहितजीवस्य वा, नियामकत्वपक्षे भिन्नतया **कालादीनामपि** तथा त्वमिति कालादिरूपतामाहतु**स्त्वमेव काल** इति, **कालो** भगवच्चेष्टेति केचिद्, वस्तुतस्तु **त्वमेव कालः**, तत्र हेतुमाहतु**र्भगवा**निति, ऐश्वर्यं सर्वस्यापि कालकृतमेवेति काल एवेश्वरः, तथा बलमपि, तारुण्य एव बलं, तपोयोगादिभिरपि कालपुष्टैरेव बलं सिध्यति, यशोपि काल एव, न हि सर्वदा कस्यचिद् यशो भवति, एवमन्येपि गुणाः कालान्वयव्यतिरेकात् काल एव षड्गुणहेतुरिति गम्यते, ननु **कालस्तु** विष्ण्वात्मकः, यो हि व्यापको भवति स कलयति न हि योयं व्याप्तुं न शक्नोति स कलयति, अतो विष्णुरेव कालो नान्य इत्याशङ्क्याहतु**र्विष्णु**रिति, त्वमेव **विष्णु**राधिदैविकः कालो यज्ञरूपो वा पालको वा सत्त्वात्मकः, तस्य भिन्नत्वे भगवतस्तदधीनत्वं स्यात्, **अव्ययोक्षर**मपि त्वमेव, अन्यथा भगवतः समवायित्वं न स्यात्, अक्षरमेव हि समवायिकारणं प्रकृतिपुरुषोपादानत्वात्, "सर्वं समाप्नोषि ततोसि सर्व" इति सर्वत्वमन्यथाप्युपपद्यते, वस्तुनः परिच्छेदकत्वं न सर्ववादिसम्प्रतिपन्नं, अतोक्षरो भगवानेवेश्वररूपमप्यन्तर्यामिरूपं भिन्नरूपं वाधिकारित्वेन निर्दिष्टं यस्यासाधारणो धर्म ऐश्वर्यं भवति ॥ ३० ॥ एवमाधिदैविककालादिरूपत्वं निरूप्याध्यात्मिकत्वमाधिभौतिकत्वं च निरूपयितुं मध्यमभावं निरूपयति त्वं **महा**निति, सर्वस्यापि जगतोङ्कुरभूतो **महान्**, तस्यापि क्षेत्ररूपं **प्रकृतिः**, तस्या अपि कार्योत्पत्तिसाधारणरूपं योनिवद् या **प्रकृतिः** सा **सूक्ष्मा**, तस्या अपि मूलभूता गुणाः, **तन्मय्याधिदैविकी प्रकृति**र्गुणाश्च त्वमेव, एवं पञ्चरूपत्वमुक्तम् एवं योनिरूपत्वमुक्त्वा बीजरूपत्वमाहतु**स्त्वमेव पुरुष** इति, तस्याः प्रकृतेः **पुरुष**स्तस्यास्तावत्त्वसम्पादकः, **अध्यक्षः** साक्षी, साक्षिरूपं भिन्नमितिसिद्धान्तः, क्षेत्रज्ञश्च तथा क्षेत्राभिमानी जीवः सोपि क्षेत्रज्ञो भवति, क्षेत्रं जानातीतिव्युत्पत्त्या यः क्षेत्रज्ञः स मुख्यो भवान्, एतावता यत्रैव प्रमाणप्रवृत्तिः केनापि प्रकारेण तदेव भवानित्युक्तं भवति ॥३१॥ तत् प्रमाणं श्रुतिरेव न तु प्रत्यक्षमित्यलौकिकत्वसम्पादनार्थं भगवतः प्रत्यक्षग्राह्यत्वं निराकरोति **गृह्यमाणै**रिति, गृह्यमाणैर्घटपटादिभिः कृत्वा त्वमग्राह्यः, तद्रूपोपि तैर्गृहीतैर्न गृहीतो भवसि, न वा तैः सह, तेषां धर्माणां त्वदाश्रयाणां धर्म्याश्रयसहभाननियमात्, तत्र हेतु**र्विकारै**रिति, विकारे हि प्रकृतिर्न प्रतीयते यथा सन्निपाते, तत्र प्राकृतस्तिरोभवति, स्वप्रकाशमेव हि जडैः सह भासते यथा ज्ञानं विषयैः, तथा भगवानपि विषयान् प्रकाशयन् विषयैः सह कुतो न भासत इति चेत् तत्राहतुः **प्राकृतै**रिति, प्रकृतिर्हि जडा पुरुषाच्छादिका, प्रकृतौ प्रविष्टं पुरुषं न प्रकाशयति तथा **प्राकृतै**रपि तत्र स्थितो भगवानाच्छाद्यत इति न भगवान् गृह्यते, ज्ञानं त्वयनिष्टं, ननु पुरुषो भगवान् प्रकृतिं स्त्रियमुपमर्द्य कथं न प्रकाशत इत्याशङ्क्याहतु**र्गुणै**रिति, गुणा हि बन्धका रञ्जकाश्च, अतः प्रकृतौ प्रविष्टस्तद्गुणानुरक्तस्तद्गुणैर्वशीक्रियत इति तैः सह न प्रकाशते, ननु गुणाः साम्प्रतमेव जाता भगवांस्तु मूलभूत इति गुणक्षोभात् पूर्वमेव ज्ञात्वोत्तरत्रापि तदनुवृत्तिः कथं न क्रियत इत्याशङ्क्य तत् परिहरन्तौ भगवांस्तथैव करोतीत्यत्र हेतुं वदन्तौ तादृशस्य भक्तिमार्गप्रवर्तकत्वमाहतुः **कोन्विहार्हती**ति, **इहा**स्मिन् संसारे न्विति वितर्के, पश्चादुद्भूतः **को वा प्राक् सिद्धं** गुणक्षोभात् पूर्वस्थितं **विज्ञातुमिद**मित्थंतया द्रष्टुमर्हति ? अपि तु न कोपि, नन्वयमप्यात्मत्वान्नेदानीं सिद्धः कुतो नार्हतीति चेत् तत्राहतु**र्गुणसंवृत** इति, गुणैर्वेष्टितः, गुणा हि पूर्वबुद्धिं दूरीकृत्य स्वरूपमप्यावृतवन्तः, अतो ज्ञातृज्ञेययोरावरणान्न ज्ञानं सम्भवति ॥ ३२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

दशमेध्याये त्वमेव काल इत्यत्र, **वस्तुनः परिच्छेदकत्व**मित्यादि । ननु समवेतस्य वस्तुनो घटादेः परिच्छिन्नत्वेन तत्समवायिनो भगवतोपि परिच्छेदापात इत्यत आह **वस्तुन** इत्यादि । सर्वं ब्रह्मेति वादी सर्ववादी । तथा च तन्मते स्वस्यैव सर्वभवनसामर्थ्येन वस्तुरूपेणाप्याविर्भाव इति न तत्कृतपरिच्छेदशङ्का भगवतीत्यर्थः । अथवा समवेतस्य परिच्छिन्नत्वेपि न समवायिनस्तथात्वं सर्वेषां वादिनां सम्मतं, शब्दस्य तथात्वेप्याकाशस्यातथात्वादित्यर्थः । **गृह्यमाणैरित्यत्र तेषां धर्माणा-**

मित्यादि। भगवद्ग्रहणहेतौ सत्यप्यग्रह इति वक्तुं तद्धेतुमाहुः **तेषामित्यादि**। तेषां घटादीनां त्वदाश्रयत्वादाश्रयस्य च सहभाननियमात्तथा भवितुं युक्तमित्याद्यपक्षे धर्माणां घटादिधर्माणामपि तथात्वाद्धर्मिसहभाननियमात्तथेत्यर्थः। यद्यप्येवं धर्मिपदमनर्थकं तथापि प्रत्येकं भिन्नहेतुकथनार्थमिति ज्ञेयम्। एवं सत्यप्यग्रहे हेतुमाहेत्याहुः **तत्र हेतुरिति** ॥ ३०–३२ ॥

इति दशमोऽध्यायः ॥ १० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

कृष्ण कृष्णेत्यत्राभासे **पूर्वमिति**, **देवर्षिर्मे प्रियतम** इत्यात्रान्य**थे**त्यादि, ज्ञानाभावे सर्वैव स्तुतिरपराधकारिणी स्याद् "योऽन्यथा सन्तमात्मान" मितिवाक्यादित्यर्थः, **उभयविधाज्ञाननिवृत्त्यर्थ**मित्युक्तरूपनामविषयकसदानन्दत्वज्ञानाभाव**निवृत्त्यर्थं**, **महत्त्वमिति** महायोगिपदैकदेशोक्तं, **तथेति** सर्वापेक्षया महान्, **निराकारे**त्यादि, एवं च **पुरुष**पदस्थप्रयोजनद्वयं ज्ञापितं, **तस्मिन् पक्ष** इति निराकारपक्षे, **अन्यथात्व** इति मिथ्यात्वे विकृतत्वे भिन्नत्वे च, **तस्ये**ति समवायिनः **गौणत्वमिति** सगुणत्वं कालपरिगृहीतेऽव्यक्तत्वं व्यभिचरतीत्यत **आहुराकाशे**त्यादि, नन्वेवं सति मतान्तरस्य न सङ्ग्रह इत्यत **आहुरवयुत्ये**त्यादि, सर्वं जगदनूद्य तत्र व्यक्ताव्यक्तत्वं विधीयत इति मतान्तरस्यापि न सङ्ग्रह इत्यर्थः, **उभयथेति** मतद्वयप्रकारेण, **निरूपकमिति ज्ञापकम्** ॥२९॥ **त्वमेक** इत्यत्र **देहस्वात्मेन्द्रियेश्वर** इतिपाठेऽर्थान्तरमाहुः **स्वात्मे**त्यादि, **ईश्वरपद**व्याख्यान्तरं त्वग्रिमेश्वरपदपुनरुक्तिभिया, **तथात्वमिती**श्वरत्वं, **वस्तुतस्त्वि**ति तु चेष्टात्वेपि भेदाभावप्रतिपादनाय, अन्यथा '**भगवत्कृतिः कालरूपे**'त्यादिसत्त्वशोधकाध्यायीयः पूर्वग्रन्थो विरुध्येत, **तस्ये**ति पूर्वोक्तरूपत्रयस्य, **अन्यथापी**त्युक्तवाक्याद् व्याप्त्यापीत्यर्थः, **वस्तुन** इत्यादेरर्थं **टिप्पण्यामाहुर्नन्वित्यादिनेत्यर्थ** इत्यन्तेन, नन्वक्षरत्वेन निरूपिते सर्वरूपसङ्ग्रहात् पुन**रीश्वर**पदस्य किं प्रयोजनमत आहु**रीश्वररूप**मित्यादि, त"च्चेश्वरः सर्वभूताना"मिति **गीतायां** निरूपितम् ॥ ३० ॥ त्वं **महानि**त्यत्रा**ध्यात्मिकत्व**मित्यादि पदार्थानां तथात्वं निरूपयितुं **भिन्नमिति** प्रतिशरीरस्थान्तर्यामिरूपाद् **भिन्न**मित्यर्थः, तत् किं साक्षिरूपमत **आहुः क्षेत्रज्ञ** इत्यादि, **स मुख्य** इति "क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारते"तिवाक्योक्तः, मूलस्थमग्रिमं विशेषणमेतेनैव व्याख्यातमिति न पुनर्निर्दिष्टं, तथाप्यत्र **विकारवित्**पदेन **विकाराणामाध्यात्मिकत्व**मुक्तं वृत्तिरूपाणां पदार्थानां तथात्वादिति ज्ञेयं, अग्रिमे **भौतिकत्वं** स्फुटमेव, **एतावते**ति तत्तद्रूपस्य भगवत्त्वनिरूपणेनेत्यर्थः ॥ ३१ ॥ **गृह्यमाणै**रित्यत्र **तेषां धर्माणा**मित्यादि **तेषां** घटादीनां समवायेन स्वद्धर्माणां संयोगेन त्वदाश्रयाणां तथा नियमादित्यर्थः, तदेतद् **टिप्पण्यामाहुर्भगवद्ग्रहणे**त्यादि. **तद्धेतुमिति** ग्रहणहेतुं, **तथात्वादि**त्याश्रितत्वात्, **तथे**ति भानमुक्तं **भानहेतुकथनार्थ**मिति समवायेन संयोगेन च **भानहेतुकथनार्थं सुबोधिन्यां तत्र हेतु**रित्यग्रहणे हेतुः, **सन्निपात** इति सन्निपाताख्ये रोगे, **प्राकृत** इति स्वभावः, तथा च तिरोभावान्न भासत इत्यर्थः, **न गृह्यत** इत्यस्मदादिभिर्न ज्ञायते, तर्हि ज्ञानिभिः कथं ज्ञायत इत्यत्राहु**र्ज्ञानं त्वन्यनिष्ठमिति** तथा च संयोगसमवाययोरभावेन तन्नाच्छाद्यत इति ज्ञानिभिर्ज्ञायत इत्यर्थः, ननु स कुतो न प्रकाशत इत्याकाङ्क्षायां तं पक्षमुपपाद्य दूषयन्ति **नन्वि**त्यादि **न प्रकाशत** इत्यन्तं, **कथं न क्रियत** इति जीवैरितिशेषः। **तत् परिहरन्निति गुणक्षोभात् पूर्वमपि** ज्ञानाभावकथनेन स्वतोनुवृत्तिं **परिहरन्**, **तथैव करोतीति** प्रकृतिं स्वाच्छादिकां भगवान् **करोति**, **तादृशस्ये**त्यादि स्वतन्त्रस्य **भक्तिमार्गप्रवर्तकत्वं** हेतुत्वेनाहेत्यर्थः, तथा च स्वस्य भक्त्येकलभ्यत्वं भवत्वित्येतदर्थं तथा कृतिरितिभावः ॥ ३२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

कृष्ण कृष्ण इत्याभासे **अन्यथे**ति स्वरूपज्ञानाभावे इत्यर्थः, व्याख्याने, वीप्सातः पक्षान्तरमाहुः **कृष्ण** इत्यारभ्य **तथोक्त**मित्यन्तेन **नामरूपे** इति मानुषत्वेन प्रदर्शितं रूपं तद्बुद्ध्या व्यवहार्यमाणं नाम चेत्यर्थः, **तस्मिन् पक्षे** इति पुरुषत्वमात्रपक्षविकृतो भवेदतः परत्वमुक्तमित्यर्थः, **कार्यस्ये**ति अन्यथात्वे अन्यनिमित्तकत्वे समवायिमात्रस्य मृदादेरिव निमित्तापेक्षया गौणत्वं स्यादितिशेषः, मूलस्थरूपपदस्याग्रे निरूपकत्वार्थोपि व्याख्येयस्तमादायेदमुक्तं, निरूपकं निमित्तत्वेन ज्ञापकमित्यर्थः, **अवयुत्ये**ति सर्वमेव कदाचिद् व्यक्तं कदाचिदव्यक्तमिति प्रथमः पक्षः, किञ्चिद् व्यक्तं किञ्चिदव्यक्तमित्यवयुत्यानुवादः, अवयुत्यामिश्रीकृत्यानुवाद इत्यर्थः ॥ २९ ॥ **त्वमेक** इत्यत्र **स्वात्म**पदेन जीवकथने देहा इति प्रथमाबहुवचनान्तं ज्ञेयं, **देहस्वात्मे**तिपाठेऽर्थमाहुः **आधिभौतिकादीना**मिति, **देहद्वये**ति देहपदेन स्थूलशरीरं इन्द्रियपदेन सूक्ष्मशरीरं तयोः स्वात्मनश्चेश्वर इत्यर्थः, साहित्यमार्थिकं ज्ञेयं, **अव्यय**पदव्याख्याने **अक्षरत्वेन** हेतुना समवायित्वं साधितं, यद्यपि सर्वत्वेनापि हेतुना सम्भवति तथापि वाक्येन सर्वव्याप्त्यापि सर्वत्वसम्भवात् सर्वत्वं न समवायित्वव्याप्यमतोक्षरत्वमेव हेतुः, **वस्तुन** इति समवेतस्य वस्तुनः स्वपरिच्छिन्नत्वधर्मेण समवायिपरिच्छेदबोधकत्वं नास्तीत्यर्थः, **परिच्छेकत्वं** परिच्छेदबोधकत्वमित्यर्थः, अत इति भगवतः समवायित्वे दोषाभावादित्यर्थः, टिप्पण्यां, **परिच्छेदापात** इति परिच्छेदशङ्केत्यर्थः, घटादेः समवायिनो मृदादेरपि परिच्छिन्नत्वादितिभावः, **सर्वभवने**ति स्वस्यैव सामर्थ्येन तथाविर्भावो न तु निमित्तान्तरापेक्षा, अतस्तादृशसामर्थ्यवति न सा शङ्केत्यर्थः, **तत्कृते**ति समवेतपरिच्छिन्नत्वकृतेत्यर्थः, सुबोधिन्यां **निर्दिष्टमिति** आधिभौतिकादीनामीश्वरत्वेन पूर्वोक्तमित्यर्थः ३० **गृह्यमाणै**रित्यत्र **तद्रूपोपी**ति ते घटादयो रूपाणि धर्मा यस्य घटादिधर्मक इत्यर्थः, **धर्माणा**मिति धर्मत्वाद् धर्मिसहभानं

त्वदाश्रयत्वात् त्वद्रूपाश्रयसहभानमित्यर्थः, **प्रकृतिरिति** स्वरूपमित्यर्थः, यथा निर्मले जले तलभूमिः सम्यक् प्रतीयते न तु समले तथेति ज्ञेयं, **तत्र प्राकृत** इति विकारे सति प्रकृतिसिद्धः पदार्थस्तिरोभवतीत्यर्थः, **एवमाश्रयसहभाननियमे**पि तद्ग्रहणेन गृहीतो न भवतीत्यत्र हेतुरुक्तः, धर्मिसहभाननियमेपि तैः सहभानं नेतिपक्षे तु कथनार्थं **प्राकृतैरि**तिपदमित्याशयेन तदाभासमाहुः **स्वप्रकाशमेव** **ही**ति, ज्ञानस्य धर्मा विषयाः, यथा जडैर्विषयैः **सह स्वेषां** विषयाणां **प्रकाशो** येन तादृशं ज्ञानं भासते, विषयविषयकज्ञानवानहमिति प्रतीतिर्जायत एवेत्यर्थः, ननु यथा सूर्यादीनां घटादिप्रकाशकत्वान् न तैः सहभानं तथा भगवतोपि न भानमित्याशङ्क्य दृष्टान्ते स्वप्रकाशमेवेत्युक्तं, सूर्यादयस्तु सर्वमेव प्रकाशयन्ति न तु तमेव विषयमित्यर्थः, **भगवानपी**त्यपि शब्दस्य प्रकाशयन्नित्यनेनान्वयः, **प्रकृतिर्ही**ति यथा प्रकृतिः पुरुषाच्छादिका तथा प्राकृता भगवदाच्छादका इत्यर्थः, ननु तदा तैर्ज्ञानं कुतो नाच्छाद्यते इत्यत आहुः **ज्ञानं** त्विति पुरुषनिष्ठमतो धर्मेभ्यः पृथक् स्थितत्वान् न तैस्तदाच्छादनमित्यर्थः, **हेतु वदन्नि**ति भक्तिप्रवर्तनं हेतुर्ज्ञेयः, **भक्तिमार्गप्रवर्तकत्वमाहे**ति स्वरूपस्य ज्ञानायोग्यकरणेन भगवता भक्तिमार्ग एव प्रवर्तित इति भावः ॥ ३२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

स्तुतिश्लोकार्थनिरूपणे **द्वयं तस्मा**दिति यतः अयं भगवानाधिदैविकः अतः **तस्मात्** आधिदैविकात् **द्वयं** भौतिकाध्यात्मिकरूपं द्वयं जायत उत्पद्यते इत्यर्थः, **ज्ञानभक्ती फलिष्यत** इति ब्रह्मत्वेन सर्वत्र **ज्ञानं** फलिष्यति माहात्म्यज्ञानेन **भक्तिः** फलिष्यतीत्यर्थः ॥ २९ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

स्तुतौ '**कृष्ण कृष्ण महायोगि**'न्नित्यादिदशश्लोकार्थान् विचारयन्ति दशभिरिति, का० ८७¾ । **प्राण**शब्द इन्द्रियवाची वृक्षाणां निरिन्द्रियत्वमते शापेन वृक्षत्वेन प्राणा नष्टा इति पुनः प्राणसम्पादनार्थमिति सङ्ख्यातात्पर्यं, प्राणान् बिभ्रति धारयन्तीति प्राणभृतस्तादृशैः श्लोकैरित्यर्थः, ज्ञानेति का० ८७¾ । अत्र स्तुतौ द्वयोरपि निर्णय उक्तः, ज्ञाननिर्णयेनैव वैराग्यनिर्णय इत्यग्रिमकारिकायां वक्ष्यन्ति "अनेनैव तु वैराग्य"मित्यादिना, **मूलरूप** इति का० ८८¾ । मूलादिरूपाणि क्रमेण श्लोकत्रयप्रतिपाद्यानि, "कृष्ण कृष्णे"त्याद्यश्लोके **मूलरूपः**, **जगद्रूपो** देहेन्द्रियादिरूपः, **मध्यरूपो** महत्तत्त्वप्रकृत्यादिरूपः, "गृह्यमाणैस्त्वमग्राह्य" इति चतुर्थश्लोकार्थमाहु**र्माहात्म्ये**ति का० ८९¾ । **आध्यात्मिक** इति का० ९०¾ । यस्मात् कारणात् **सर्वस्मिन् गृह्यमाणे**पि पुरुषोत्तमो **न गृह्यते** ततो हेतोरयं पुरुषोत्तमः आध्यात्मिकरूपः आधिभौतिकरूपश्च न भवति, किन्तु **दैविकत्वेन सर्वरूपः स्यात्, तस्मात्** पुरुषोत्तमात् द्वयमाध्यात्मिकमाधिभौतिकं **च जायते** इत्यर्थः, "त्वमेकः सर्वभूताना"मिति द्वितीयश्लोके आधिदैविकत्वेन सर्वरूपत्वमुक्तं, "त्वं महा"निति "गृह्यमाणै"रिति श्लोकद्वयेन आध्यात्मिकाधिभौतिककर्तृत्वमुक्तं, **अत** इति का० ९१¾ । "त्वमेक" इति श्लोकोक्तं सर्वरूपत्वं जीवानां ज्ञानं फलिष्यति, श्लोकद्वयोक्तमाध्यात्मिकाधिभौतिककर्तृत्वं च भक्तिं फलिष्यतीत्यर्थः, **अत** इति का० ९१¾ । **अतः** ज्ञानभक्तिफलनादेव "तस्मै तुभ्य"मिति पञ्चमश्लोके **ज्ञानं**, "यस्यावतारा" इति षष्ठश्लोके च **भक्तिमाहतु**रित्यर्थः, अध्यायार्थसङ्गतिं दर्शयन्तो वैराग्यनिर्णयमाहु**रनेनैवे**ति का० ९२¾ । **अनेन** ज्ञाननिरूपणेनैव **वैराग्यं निरूपितं** भवतीत्यर्थः, तत्र प्रकारमाहु**र्ज्ञानाजनकता** यदीति, ब्रह्मत्वेन ज्ञानाभावे **सर्वं त्याज्यं, अन्यथा** त्यागाभावे **विनाशः स्या**दित्यर्थः, **भक्तिसिद्ध्यै** इति **भक्तिसिद्ध्यै तु यज् ज्ञानं तत् षष्ठे विनिरूपितं** का० ९३¼ । "यस्यावतारा" इति श्लोके इत्यर्थः, "स भवान् सर्वलोकस्ये"ति सप्तमश्लोकार्थमाहुरन्यथेति का० ९३¾ । "नमः परमकल्याणे"त्यष्टमश्लोकार्थमाहु**र्भगवन्तं नमस्कृत्ये**ति, "अनुजानीही"ति नवमश्लोकार्थमाहु**र्गमनप्रार्थना कृते**ति, ननु तयोर्भक्तत्वेन भगवन्तं परित्यज्य गमनाय प्रार्थनं कथमित्याशङ्कापूर्वकं तत्परिहारमाहु**स्तदयुक्तं भक्तिमता**मित्यादिना, का० ९४¾, ९५¾ । **तदयुक्तं भक्तिमता**मित्याशङ्का, अग्रे भक्तिस्तु षड्गुणेत्यादिसमाधानं, तथा च **तदयुक्तं भक्तिम**तामितीत्यस्यानन्तरं चेदिति शेषग्रन्थो ज्ञेयः, एतेन "वाणी गुणानुकथने" इति दशम श्लोकार्थ उक्तः, भक्तेः षडङ्गान्येतच्छ्लोकोक्तानि कीर्तनश्रवणादीनि, तथा च तादृशभक्तिकरणाय गमनमितिभावः, ननु व्रजेपि भक्तैः सह भक्तिसम्भवे किं परोक्षभजनेनेत्याशङ्क्याहुर्गुणप्रधानेत्यादि, का० ९६¾, ९७¾ । भगवान् गोकुले भक्तप्राधान्येन स्वगौणभावेन च लीलां करोति, इमौ तु तादृशलीलायामनधिकारिणौ, एकस्यामेव गोकुललीलायां व्रजस्थैः **सह गुणभाव एताभ्यां सह प्रधानभावश्च विरुध्यते, अतः** कारणाद् गमनप्रार्थना कृतेति पूर्वेणान्वयः, ननु बन्धमोचनं ताभ्यां कुतो न कृतमित्याशङ्क्याहुरत्र **भगवान्** लीलामिति अत्र गोकुले भगवान् स्वस्यैव रसभोगार्थं गौणभावेन **स्वयं लीलां कर्तुं समुद्यतस्तेषु** वा रसाधिक्यसिद्ध्यर्थं तदधीनो जात इति निर्णयो नलकूबरमणिग्रीवयोर्नासीत्, **किञ्च** **पक्षद्वय** स्वार्थलीलापक्षे परार्थपक्षे च ताभ्यां भगवत उलूखलबन्धन**विमोचनं नैव शक्य**मिति तादृशलीलायां स्वानधिकारं मत्वा भक्तैः सह परोक्षभजनसिद्ध्यर्थं गताविति भावः, इदं दाम्ना चोलूखले बद्ध"इत्यस्य विवरणे स्फुटम् ॥ ९७¾ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'लब्धभक्ती भविष्यत' इति नारदवाक्यं स्मरन्तौ ततो भक्तिं प्रार्थयितुं स्तुवन्तौ प्रथमं गोपबालकप्रणामस्यानौचित्यमाशङ्क्य तत्परिहारं तावाहतुः—कृष्णेति। हे कृष्ण हे कृष्ण, सदानन्दमूर्ते! हे महायोगिन् अचिन्त्यप्रभाव! न त्वं गोपबालः, किन्तु परः पुरुषः पुरुषोत्तमः। तत्र हेतुमाहतुः—आद्य इति। सर्वजगत्कारणभूतः। 'तदपि न निमित्तमात्रम्, किंतु उपादानमपि त्वमेव' इत्याशयेनाहतुः—व्यक्ताव्यक्तं स्थूलसूक्ष्ममिदं सर्वं विश्वं ते तव रूपमिति ब्राह्मणा 'ब्रह्म जानातीति ब्राह्मण' इति वाक्यात् वेदतात्पर्यज्ञा विदुर्जानन्ति॥ २९॥ एवं सामान्यत उक्तमेव सर्वकारणत्वं सर्वरूपत्वं च विशेषतः प्रपञ्चयतः—'त्वमेक' इति द्वयेन। सर्वेषां भूतानां प्राणिनां ये देहाः, असवः प्राणाः, आत्मा अहङ्कारः, इन्द्रियाणि च तेषामीश्वरः रक्षकस्त्वमेक एव। 'ननु रक्षकत्वेन विष्णुरेव प्रसिद्ध' इत्याशङ्क्याहतुः—विष्णुस्त्वमेवेति। रजःसत्त्वतमआत्मिका सूक्ष्मा प्रकृतिस्त्वमेव तव शक्तिरेव, तत्क्षोभकः कालोऽपि त्वमेव, तव चेष्टारूपः। प्रकृतिकार्यो महानपि त्वमेव। प्रकृतिप्रवर्त्तकः पुरुषोऽपि त्वदंशत्वात्त्वमेव। अध्यक्षः सर्वसाक्षी। एतदेव स्पष्टयतः—सर्वक्षेत्रेऽपि सर्वेषां यानि सर्वक्षेत्राणि देहेन्द्रियान्तःकरणानि, तेषां ये विकारा रोगरागादयस्तान् वेत्तीति तथा ईश्वरः सर्वनियन्ता। एवं सति विकारित्वमाशङ्क्याहतुः—अव्यय इति। अपक्षयादिविकारशून्य इत्यर्थः। 'सर्वरूपत्वं विकारशून्यत्वं च परस्परं विरुद्धमेव, तत्कथं सम्भवति' तत्राहतुः—भगवानिति। अचिन्त्यानन्तैश्वर्यादिमानित्यर्थः॥ ३०-३१॥ ननु "अहमेव चेत् सर्वं तर्हि तत्तत्पदार्थज्ञाने जातेऽपि मम ज्ञानं किं न भवति? भवति चेत् तदा सर्वोऽपि ब्रह्मवित् स्यात्, मुच्येतापि। तथा सति तत्र तत्र साधनोपदेशादेर्व्यर्थता च स्यात्" इत्याशङ्क्याहतुः—गृह्यमाणैरिति। विकारैः बुद्ध्यहङ्कारेन्द्रियादिभिः कार्यैस्त्वं द्रष्टा ग्राह्यो न भवति न गृह्यसे। तत्र हेतुमाहतुः—गृह्यमाणैरिति। नहि गृह्यमाणैर्दृश्यैर्ग्राहको द्रष्टा गृह्यते इत्याशयः। दृश्यत्वे हेतुमाहतुः—प्राकृतैर्गुणैरिति। प्रकृतिगुणकार्यैरित्यर्थः। ननु "तर्हि जीवस्याप्राकृतत्वात् स जानातु" तत्राहतुः-को न्विति। जीवस्याप्राकृतत्वेऽपि प्राकृतगुणैर्देहादिभिः संवृतत्वात् स्वोत्पत्तेः प्रागेव स्वप्रकाशतया सिद्धं वर्तमानं त्वामिह संसारे को नु जीवो विज्ञातुमर्हति?॥ ३२॥

अन्वितार्थप्रकाशिका

कृष्णेति। हे कृष्ण हे कृष्ण हे महायोगिन्! त्वं न गोपालः किं तु आद्यः सर्वजगद्धेतुः परः पुरुषः असि। व्यक्ताव्यक्तं स्थूलसूक्ष्ममिदं सर्वं विश्वं ते तव रूपमिति ब्राह्मणाः वेदतत्त्वज्ञाः विदुर्जानन्ति॥ २९॥ त्वमेक इति। सर्वेषां भूतानां प्राणिनां ये देहा असवः प्राणाः आत्मा अहंकारः इन्द्रियाणि च तेषामीश्वर एकस्त्वमेव। कालो भगवान् विष्णुः अव्ययः अपक्षयशून्यः ईश्वरः नियन्ता त्वमेव॥ ३०॥ त्वमिति। रजःसत्त्वतमोमयी तदात्मिका सूक्ष्मा प्रकृतिस्त्वमेव तव शक्तिरेव तत्क्षोभकः कालोऽपि त्वमेव। तव चेष्टारूप एवेति पूर्वत्रोक्तम् प्रकृतिकार्यं महानपि त्वमेव प्रकृतिप्रवर्त्तकः पुरुषोऽपि त्वदंशत्वात्त्वमेव अध्यक्षः सर्वसाक्षी सर्वेषां यानि क्षेत्राणि देहेन्द्रियान्तःकरणानि तेषां ये विकारा रोगरागादयस्तान् वेत्तीति तथा त्वमेव॥३१॥ नःवहमेव चेत्सर्वं तर्हि तत्तत्पदार्थज्ञाने जातेऽपि मम ज्ञानं किं न भवतीत्याशङ्क्याहतुः—गृह्यमाणैरिति॥ गृह्यमाणैर्दृश्यैः प्राकृतैर्गुणैः प्रकृतिगुणकार्यैर्विकारैः बुद्ध्यहङ्कारेन्द्रियादिभिः कार्यैस्त्वं द्रष्टा अग्राह्यो न गृह्यसे। नहि दृश्यैर्ग्राहको द्रष्टा गृह्यते जीवस्याप्राकृतत्वेऽपि प्राकृतगुणैर्देहादिभिः संवृतत्वात्स्वोत्पत्तेः प्रागेव स्वप्रकाशतया सिद्धं वर्तमानं त्वामिह संसारे को नु जीवो विज्ञातुमर्हति॥ ३२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आद्यः कालप्रकृतिपुरुषाणामादिभूतः परः अक्षरभावं प्राप्तेभ्यो मुक्तपुरुषेभ्य उत्तमः अक्षरादपि चोत्तम इत्युक्तेः पुरुषः अनादिनित्यसिद्धदिव्यपुरुषाकारविग्रहः आत्मैवेदमग्र आसीत्पुरुषविध इतिश्रुतेः व्यक्ताव्यक्तं व्यक्तम् उत्पत्तिस्थितिकाले स्फुटतया दृश्यमानं अव्यक्तं प्रलये सूक्ष्मभावेन स्थितं चेतनाचेतनात्मकं विश्वं ते सर्वव्यापकस्य तव व्याप्याद्धेतोः रूपं शरीरभूतं यथा व्यापकस्य देहिनो व्याप्यं शरीरं तद्रूपं तद्वत्॥ २९॥ सर्वभूतानां देहि विशिष्टसमग्रक्षेत्रज्ञानां ये देहादयस्तेषामीश्वरो नियंता असुः प्राणः॥ ३०॥ सर्वे पदार्थाः परमात्मनः शरीरभूता इत्युक्तं तत्प्रतिपादयंतावाहतुः सूक्ष्मा प्रकृतिः अध्यक्षः प्रकृत्यधिष्ठाता सर्वेषां क्षेत्राणां विकाराणां च वेत्ता पुरुषोऽक्षरपुरुषः एतदादि सर्वं त्वं तव शरीरं भवति यस्याक्षरं शरीरमिति यस्य प्रकृतिः शरीरमिति यस्य सर्वाणि भूतानि शरीरमिति सर्वं समाप्नोषि ततोऽसि सर्वमिति श्रुतिस्मृत्युक्तेः यतो देवदत्तकृष्णदत्तरामदत्तादिदेहवाचकाः शब्दा आत्मन्येव पर्यवस्यंति अतस्ते देहवाचकाः शब्दा आत्मवाचका ज्ञातव्यास्तथा प्रकृतिपुरुषब्रह्मेंद्रपृथिव्यादिचेतनाचेतनवाचकाः शब्दाः परमात्मन्येव पर्यवस्यंति अतस्ते चेतनाचेतनवाचकाः शब्दाः परमात्मवाचका इति बोध्यम्॥ ३१॥ एवं प्रकृतिपुरुषदेवमनुष्यादिसर्ववस्तुषु व्यापकत्वेपि तेषां ग्रहणे न तव ग्रहणं न स्यादित्याहतुः गृह्यमाण इति सर्वव्यापकस्त्वं जनवृंदेन गृह्यमाणैर्व्याप्यभूतैः प्राकृतैः प्रकृत्युत्पन्नैः गुणैः सत्त्वादिभिः महदाद्यष्टप्रकृतिभिश्च विकारैः

षोडशभिश्च तत्परिणामभूतैः क्षेत्रज्ञविशिष्टदेवमनुष्यादिदेहैश्च सह अंतर्यामितया प्रत्यक्षतया च वर्त्तमानोऽप्यग्राह्यः तेषां ग्रहणे न तव ग्रहणं न स्यादित्यर्थः। एवंभूतं प्राक्सिद्धं सृष्टेः पूर्वं दिव्यविग्रहेण वर्त्तमानं त्वां गुणसंवृतः प्रकृतिगुणैरावृतः कः पुमान इह संसारे विज्ञातुमर्हति नु वितर्के ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गोपालबालं मां युवां कौचिद्देवाविव स्थितौ किमिति प्रणतौ तत्राहतुः ॥ कृष्णेति ॥ हे कृष्ण, हे कृष्ण, संभ्रमे वीप्सा। हे महायोगिन् सर्वथाऽचिन्त्यप्रभाव, त्वं परः पुरुषः, गोपालबालकवत् प्रतीयमानोऽपि त्वं परमपुरुष एवासीरित्यर्थः। कुतः। आद्यः सर्वजगत्कारणभूतः, ननु कार्यकारणयोः प्रायशः सालक्षण्यदर्शनात् कथं चिदचिदात्मकाज्जगतस्तद्विलक्षणोऽहं कारणमित्यत्राहतुः। व्यक्तं नामरूपाभ्यां व्यक्तं च अव्यक्तं नामरूपयोरनभिव्यक्त्याऽव्यक्तं चेति व्यक्ताव्यक्तं, इदं विश्वं, ब्रह्मणः सर्वशक्तित्वादिकल्याणगुणगणैर्बृहत इत्यर्थः। ते तव, रूपं शरीरं, विदुः। वेदान्ता आमनन्तीत्यर्थः। वेदान्ताश्च 'यस्य पृथिवी शरीरं, यस्यात्मा शरीरं, यस्याव्यक्तं शरीरं, यस्याक्षरं शरीरम्' इत्यादयः। सूक्ष्मचिदचिच्छरीरकत्वेन कारणावस्थः स्थूलचिदचिच्छरीरकत्वेन कार्यावस्थश्च त्वमेवासीरिति भावः॥२९॥ न केवलं त्वमुपादानकारणमेवासीरपि तु निमित्तकारणमपि त्वमेवासीरित्यभिप्रायेण तदुपयुक्तगुणवत्तामाहतुः ॥ त्वमेक इति ॥ सर्वभूतानां भवन्ति देवमनुष्यादिरूपेण जायन्ते इति भूतानि सर्वाणि च तानि भूतानि क्षेत्रज्ञास्तेषां, देहाश्च असवः प्राणाश्च आत्मानो मनांसि च इन्द्रियाणि च तेषामीश्वरो नियन्ता, अन्तः प्रविश्य नियामक इत्यर्थः। त्वं एकः। एकशब्देनाधिष्ठात्रन्तरव्यावृत्तिः। एवं निखिलजगत्कारणत्वं चोक्तम्। अथ तदुभयनिबन्धनं जगदन्तर्भूतकालादिसामानाधिकरण्यमाहतुः। त्वमेव काल इति। हे भगवन्, त्वमेव, अव्ययः सर्वकारणत्वेऽपि तत्प्रयुक्तदोषरहितः, भगवान् अवतारदशायामपि षाड्गुण्यपूर्णः, विष्णुः सर्वान्तःस्थितः, ईश्वरः बहिरन्तश्च स्थित्वा सर्वनियामकः, कालः कालशरीरकोऽपि, भवसि ॥ ३० ॥ त्वमिति ॥ महान् महत्तत्त्वं, त्वं, महतोऽपि त्वच्छरीरकत्वात् सामानाधिकरण्यम्। रजःसत्त्वतमोमयी रजआदिगुणत्रयात्मिका, सूक्ष्मा नामरूपविभागानर्हा, प्रकृतिरपि, त्वमेव। 'यस्य प्रकृतिः शरीरं' इति श्रुतेः शरीरात्मभावनिबन्धनं सामानाधिकरण्यं, सर्वक्षेत्रविकारवित् युगपत्क्षेत्रेन्द्रियादिवृत्त्यभिज्ञ इत्यर्थः। अध्यक्षः देहप्रभृतिजीवपर्यन्तानामधिष्ठाता पुरुषोऽपि, त्वमेव। 'यस्यात्मा शरीरम्' इति श्रुतेः ॥ ३१ ॥ 'रूपं ते ब्रह्मणो विदुः' इत्यनेनैवंविधं त्वां केवलं वेदान्ता एव विदुर्न त्विन्द्रियाणीत्यभिप्रेतं तदेव विशदयन्तौ उपपादयतः ॥ गृह्यमाणैरिति ॥ गृह्यमाणैर्दृश्यमानैः, गुणैर्गुणकार्यैः, प्राकृतैः प्रकृतेः कार्यभूतैः, विकारैरिन्द्रियादिभिः, त्वं अग्राह्यः। यथा श्रोत्रादिभिर्गृह्यमाणाः शब्दादयो न श्रोत्रादीन् गृह्णन्ति, तथा त्वया गृह्यमाणा विकारास्त्वां न गृह्णन्तीति भावः। ननु तर्हि जीवो जानातु इत्यत आहतुः। को न्विति। गुणसंवृतः गुणकार्यैरिन्द्रियैरावृतः सहित इति यावत्। को नु पुमान्, प्राक् सिद्धं गुणेभ्यः प्रागेव तत्कारणतया तत्प्रकाशतया च सिद्धमित्यर्थः। त्वां विज्ञातुं, इह लोके, अर्हति। गुणसंवृतः को नु अर्हतीत्यनेन योगविशुद्धमनास्तु ज्ञातुमर्हतीति सूचितम् ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृष्ण कृष्णेति : १०.१०.२९.

आवाभ्यां यदकारि दुर्विलसितं नास्मत्कृतं तत्प्रभो यत्तद्वक्त्रविनिर्गतं च वचनं तच्चापि नैतत्कृतम्।
यत्सर्वान्तरवृत्तिवर्तकतया त्वं सर्वदा राजसे तत्ते तादृशमीदृशोपकृतये मन्यावहे आशयम् ॥ ६० ॥

गृह्यमाणैरिति : १०.१०.३२.

गुणसंवृतानगुण एव विभो त्वं खलु वीक्षसे न विगुणः सगुणं त्वाम्।
तव लीलयैव भगवन् सगुणं त्वामगुणावपि स्फुटमिहानुभवावः ॥ ६१ ॥

कृष्णप्रिया

हे कृष्ण हे नाथ कृष्ण ! हे महायोगिन् ! आप ही आद्य पुरुष हैं प्रकृति से पर पुरुषोत्तम हैं। ब्रह्मविद् यह जानते हैं कि यह दृश्यमान व्यक्त एवं अव्यक्त समस्त विश्व आप का ही स्वरूप है ॥ २९ ॥ आप एक अद्वैत हैं, आप ही समस्त प्राणियों के शरीर प्राण अन्तःकरण आत्मा और इन्द्रियों के नियन्ता स्वामी हैं, एवं आप ही भगवान् काल हैं, आप ही विष्णु 'सर्वत्र व्यापक' अविनाशी, ईश्वर हैं ॥ ३० ॥ आप ही महत्तत्व बुद्धि तत्त्व हैं और सत्त्व रज तम इन तीन गुणों वाली सूक्ष्म प्रकृति हैं, आप अन्तर्यामी पुरुष हैं आप साक्षी हैं, आप ही सर्वत्र प्रत्येक देह के मन आदि विकारों के जानकार हैं ॥३१॥ इन्द्रियादि वृत्तियों से ग्रहण किये जानेवाले प्रकृति के गुणों और विकारों के द्वारा द्रष्टारूप आप नहीं जाने जाते। प्राकृत गुणों से थककर कौन प्राणी जीवोत्पत्ति के पूर्व स्वप्रकाशरूप सिद्ध आप को जान सकता है ॥ ३२ ॥

तस्मै तुभ्यं भगवते वासुदेवाय वेधसे । [1]आत्मद्योतैर्गुणैश्छन्नमहिम्ने ब्रह्मणे नमः ॥ ३३ ॥
यस्यावतारा ज्ञायन्ते [2]शरीरेष्वशरीरिणः । [3]तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ॥ ३४ ॥
स भवान् सर्वलोकस्य भवाय विभवाय च । अवतीर्णोऽशभागेन साम्प्रतं पतिराशिषाम् ॥ ३५ ॥
नमः परमकल्याण [4]नमस्ते विश्वमङ्गल । वासुदेवाय शान्ताय यदूनां पतये नमः ॥ ३६ ॥

कर्वमक्षमा

अन्वयः—आत्मद्योतैः गुणैः छन्नमहिम्ने ब्रह्मणे वेधसे भगवते वासुदेवाय तस्मै नमः ॥ ३३ ॥ तैः तैः देहिषु असंगतैः अतुल्यातिशयैः वीर्यैः अशरीरिणः शरीरेषु यस्य अवताराः ज्ञायन्ते ॥ ३४ ॥ सर्वलोकस्य भवाय च विभवाय स भवान् आशिषां पतिः साम्प्रतं अंशभागेन अवतीर्णः ॥३५॥ परमकल्याण नमः विश्वमङ्गल ते नमः शान्ताय यदूनां पतये वासुदेवाय नमः ॥३६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतो दुर्ज्ञेयत्वात्केवलं प्रणमतः । तस्मै तुभ्यमिति । आत्मनः स्वस्मात् द्योतः प्रकाशो येषां तैर्गुणैश्छन्नो महिमा यस्य अभ्रैरिव रवेस्तस्मै ॥ ३३ ॥ अहो अहमीश्वर इति कुतो ज्ञातं तत्राहतुः । यस्येति ॥ ३४ ॥ भवायाभ्युदयायोद्भवाय वा । विभवाय विगतो भवो यस्मिंस्तस्मै । कैवल्यायेत्यर्थः ॥ ३५-३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतो ज्ञानाविषयोतो हेतोः । महिमा महत्त्वम् ॥ ३३ ॥ अहो आश्चर्यम् अशरीरिणः प्राकृतशरीररहितस्यानाशिनो वा । "अशरीरं वा वसंतम्" इत्यादिश्रुतेः । अशरीर एवानपेक्षितास्मत्समवाय इति वृत्रोपाख्यानोक्तेश्च । 'देहीवाभाति मायया' इति । 'न हन्यते हन्यमाने शरीरे' इत्याद्युक्तेश्च । शरीरेषु तिर्यगादिदेहेषु । तैस्तैः प्रसिद्धैस्तच्छब्दावृत्तिर्बहुत्वापेक्षया । अतुल्यातिशयैः साम्याधिक्यवर्जितैरसाधारणैर्देहिषु शरीरिषु असंगतैः सभावितैः भूम्युद्धरणमंदरगोवर्द्धनधारणदावानलपानादिरूपैः । वीर्यैः पराक्रमैः ॥ ३४ ॥ यस्यावतारा ज्ञायंते स भवानीति संबंधः । भवो जन्म । इत्यर्थ इति । जन्मनिवृत्तिरेव कैवल्यपदार्थ इति तात्पर्यम् । सर्वलोकस्येति केचिद्दृष्ट्वा केचि स्पृष्ट्वा केचित्स्मृत्वा केचिज्ज्ञात्वा केचिन्मम कर्माण्येव श्रुत्वा स्मृत्वा च संसारान्मुच्यंत इत्याह— अंशभागेनेति व्याख्यातचरम् । आशिषामभीप्सितानाम् । पतिर्दाता । गीतोक्तार्त्तादिचतुर्विधभक्ताभीष्टद इति भावः । स भवानवतारी खल्वेव भवति हस्तिसहस्रेणापि दुरुत्पाटनयोरावयोरर्जुनयोरर्जुनसमौजसोर्बाल्यलीलोदितबललवेनाप्यु पाटनात् । रज्जूलूखलयोरपि तादृशशक्त्यर्पणादिति भावः । अंशांशेन ब्रह्मरुद्रादिना आशिषां सर्वकामानां पतिर्दाता यः स एव भवानित्यर्थः ॥ ३५ ॥ इदमेव रूपं परतमं मत्वा नमंतः नम इति परमं कल्याणं यस्मात्तत्तथा मोक्षप्रदेत्यर्थः । परममंगल ऐहिकामुष्मिकप्रत्यूहवारकः । तदेवाहतुः—शांताय इति । मोक्षप्रदत्वमाह—वासुदेवाय यदूनां पतये इति । परममंगलत्वमाह "मंगलाय च लोकानाम् । आस्ते यदुकुलांभोधावाद्योनंतसखः पुमान्" इत्याद्युक्तेः । परमस्य महादेवस्यापि मंगलम् "यच्छौचनिस्सृतसरित्प्रवरोदकेन शिवः शिवोऽभूत्" इत्युक्तेः । वासुदेवाय नंदनंदनाय । शूरसेननंदनाय वा । यदूनां क्षत्रियाणां गोपानां वा पतये ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तस्मै कृष्णस्तु भगवान् स्वयमित्यादौ प्रसिद्धाय तुभ्यं नमः पुनर्भगवते महावैकुण्ठनाथाय नारायणाख्याय च पुनस्तच्चतुर्व्यूहप्रथमाय वासुदेवाय च पुनर्वेधसे सृष्टिकर्त्रे सङ्कर्षणादिरूपाय पुरुषाय च पुरुषायैव स ते आत्मद्योतेत्यादिरूपिणे च ब्रह्मणे कचिदधिकारिणि निर्विशेषाकारेण स्फुरते च तस्मात्तत्तत्सर्वात्मकत्वात् परमबृहत्तमायेत्युपसंहारो वा लीलानुरूपेण चायमर्थः । तस्मै श्रीनन्दगोकुले प्रागपि सिद्धाय तुभ्यं श्रीनन्दात्मजाय भगवते नमः कचिद्वसुदेवापत्याय च वेधसे अद्भुतलीला सम्पादयित्रे अत एवात्मद्योतैः स्वरूपप्रकाशविशेषैरेव गुणैर्बाल्यलीलेत्यादिभिराच्छन्नैश्वर्याय यद्वा आत्मना त्वया त्वत्प्रभया द्योतन्ते त्वद्वदाभान्ति ये गुणा दामानि तैर्बद्धत्वेनाच्छन्नविभुत्वाय सर्वमपि त्वयि सम्भवतीत्याहतुः ब्रह्मण इति ॥ ३३ ॥ विवक्षितमाहतुः-यस्येति युग्मकेन । शरीरिषु मत्स्यादिजातिषु मध्ये अशरीरिणः प्राकृतशरीररहितस्य तव किं वा शरीरिषु वर्तमाना अप्यशरीरिणः तद्धर्मरहिताः शरीरेष्विति पाठे स एवार्थः । अतस्तैस्तैरनिर्वचनीयैः अत एवातुल्यातिशयैर्वीर्यैः प्रभावैरद्भुतचरितैर्वा देहिषु जीवेषु असङ्गतैरघटमानैरित्यर्थः । अवतारा अपि ज्ञायन्ते किं पुनस्त्वमवतारीत्यर्थः । अन्यत्तैः यद्वा एवं

---

[1] तगुणै-श्रीधर. वंशी ; तैर्गुणै-वीर. विज. । [2] शरीरिषु-सुदर्शन. जीव. । [3] तिर्यग्योनिष्वसङ्गतैः-विज. । [4] नमः परम श्रीधर वंशी. ; नमस्ते विश्वमङ्गल-वीर. विज. जीव. ।

स्वप्रेमविवृद्धये विचित्रलीलयाऽऽत्मानमाच्छादयन्नपि त्वं नितरां प्राकट्यमेव यासीरित्याहतुः–यस्येति। अर्थः स एव ॥ ३४ ॥ अहो भाग्यमित्याहतुः–स इति। भवाय विभवाय चेति ऐहिकामुष्मिकाशेषसम्पत्त्यर्थमित्यर्थः। साम्प्रतमवतीर्णः यतः आशिषां भक्तकामितानां सर्वेषामेव पतिः पालकः परिपूरक इत्यर्थः। साम्प्रतमित्यस्य यथा स्थितमत्रैव वा ऽन्वयः गोकुलक्रीडासमये अस्मिन्नित्यर्थः ॥ ३५ ॥ एवमवतारप्रयोजनेन स्वमङ्गलकारितौचितीमुपपाद्य तादृशं च तद्गुणं तादृशतन्नामकीर्त्तनद्वारैवानुमोदमानौ तदुचितसेवायामप्यक्षमं मन्यौ केवलं भक्त्या मुहुः प्रणमतः–नम इति। हे स्वतःपरमकल्याणस्वरूप ! किञ्च विश्वस्य मङ्गलं ऐहिकामुष्मिकसुखं यस्मादिति सकामनिष्कामभेदेन सम्बोधनद्वयं परममङ्गलेति क्वचित्पाठे परमाणां श्रीशिवादीनामपि मङ्गलेति व्याख्येयं "यच्छौचनिःसृतसरित्प्रवरोदकेन" इत्यादौ "शिवः शिवोऽभूत्" इत्युक्तेः तत् कुतः वासुदेवाय सर्वहितार्थमेव वसुदेवद्वारा प्रकटाय अतः शान्ताय निर्दोषाय सुखस्वरूपाय वा नित्यमेव तु यदूनां क्षत्रियाणां गोपानां च तेषां पतये कुलपतिरूपाय श्रीगोपानां च यादवत्वं स्कान्दमथुरामाहात्म्ये व्यक्तं "रक्षिता यादवाः सर्वे इन्द्रवृष्टिनिवारणात्" इति तथा यत्राभिषिक्तो भगवान् मघोना यदुवैरिणा" इत्यादिना ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवते परमेश्वराय चित्ताधिष्ठात्रे, अतो वेधसे जगत्स्रष्ट्रे, ब्रह्मणे जगद्व्यापकाय; यद्वा, भगवते षड्गुणैश्वर्य्ययुक्ताय, तत्रापि वासुदेवाय भगवत्त्वप्रकटनार्थं वसुदेवाज्जाताय, अतो वेधसे सर्व्वजीवहितकर्त्रे, अतएव ब्रह्मणे सर्व्वतो बृहत्त्वं गतायेत्यनाच्छाद्यमहित्वमुक्तम्; तथापि छन्नमहिम्ने। तत्र गुणानां शक्तिं सम्भावयत्यात्मद्योतैरिति, वस्तुतस्तु तेषां मिथात्वेनाच्छन्नत्वमेवोक्तम्। अन्यत्तैर्व्याख्यातम्। यद्वा, तस्मै परमदुर्वितर्क्याय वसुदेवनन्दनाय तुभ्यं नमः। परमदुर्वितर्क्यत्वे हेतुः—भगवतेऽशेषैश्वर्य्ययुक्ताय, अतएव वेधसे विधात्रे अपूर्व्वदर्शितानन्ताश्चर्य्यलीलाकारिणे भगवत्त्वं वेधस्त्यञ्चाभिव्यञ्जयतः, महिमाअणिम प्रतियोगी अपरिच्छिन्नतेत्यर्थः, गुणैर्दामभिश्छन्नस्तद्बन्धनांगीकारेण संवृतोऽसौ महिमा येन, तथापि ब्रह्मणे व्यापकाय। एवं दामबन्धनेन परिच्छिन्नत्वेऽप्यपरिछिन्नत्वमुक्तम्। ननु सच्चिदानन्दघनोदरे प्राकृतैर्दामभिर्बन्धनमपि कथं घटताम्? तत्र हेतुः—आत्मद्योतैः स्व प्रकाशैस्तान्यपि सच्चिदानन्दरूपाणीत्यर्थः ॥ ३३ ॥ शरीरिषु मत्स्यादिषु देहिषु मध्ये वाऽशरीरिणः प्राकृतशरीररहितस्य तव, किंवा शरीरिषु वर्त्तमाना अप्यशरीरिणस्तद्धर्म्मैरहिताः। अतस्तैस्तैरनिर्व्वचनीयैर्यतोऽतुल्यातिशयैर्वीर्य्यैः प्रभावैरद्भुतचरितैर्वा देहिषु जीवेष्वसंगतैरघटमानैरित्यर्थः। अवतारा अपि ज्ञायन्ते, किं पुनस्त्वमवतारीत्यर्थः। सर्व्वत्र सर्व्वथा जाज्वल्यमानात् कथमप्यनाच्छाद्यान्माहात्म्यविशेषादिति भावः। अन्यतैर्व्याख्यातम्। यद्वा, एवमवतारित्वं परम-दुर्ज्ञेयमेव, कथञ्चित्तवावतारा वा ज्ञातुं शक्यन्त इति। एवं स्वप्रेमविवृद्धये विचित्रलीलयात्मानमाच्छादयन्नपि त्वं नितरां प्राकट्यमेव यासीरित्याहतुः—यस्येति। अर्थः स एवोभयत्र ॥ ३४ ॥ नन्ववतारी चेत्तर्हि श्रीवैकुण्ठलोकं विहाय किमर्थमत्रागतोऽसि? तत्राहतुः—स इति। भवाय विभवाय चेत्यैहिकामुष्मिकाशेषसम्पत्त्यर्थमंशभागेन परिपूर्वतयेत्यर्थः यद्वा, अंशानां जीवानां भाग्येन हेतुना। साम्प्रतमवतीर्णः। किञ्चाशिषां भक्तकामितानां सर्वेषामेव पतिः पालकः परिपूरक इत्यर्थः। साम्प्रतमित्यस्य यथास्थितमत्रैव वान्वयो गोकुलक्रीड़ासमयेऽस्मिन्नित्यर्थः ॥ ३५ ॥ एवमवतारप्रयोजनं निर्दिश्योपसंहरंस्तदेवाशेषमाहात्म्यामृतमयनामद्वारा कीर्त्तयन् भक्त्या मुहुः प्रणमतः नम इति। हे स्वतः परमकल्याणस्वरूप। यद्वा, परमं प्रेमलक्षणं यस्मात्। किञ्च, विश्वस्य मंगलमैहिकामुष्मिकसुखं यस्मादिति निष्काम-सकामभक्तभेदेन सम्बोधनद्वयम्। तत् कुतः? वासुदेवाय श्रीवसुदेवनन्दनाय, अतः शान्ताय निर्विकाराय सुखस्वरूपाय वा, विशेषतो यदूनां यादवानां स्कान्दे मथुराषण्डानुसारेण यदु-शब्देन गोपोक्तेः श्रीनन्दादीनां वा पालकाय, तथा च तत्र—'रक्षिता यादवाः सर्व्वे इन्द्रवृष्टिनिवारणात्' इति, 'यत्राभिषिक्तो भगवान् मघोना यदुवैरिणा' इत्यादि, यद्वा, श्रीवासुदेवायेति जन्मलीला, शान्तायेति युद्धाद्यारम्भेऽपि क्रोधाद्यभावेन, तथा तादृशयज्ञपत्नीप्रार्थनेऽपि धर्मादिप्रदर्शनेन शान्तिमत्त्वात्। यदूनां पतय इति श्रीमथुरागमनानन्तरं यादवपालनद्वारा द्वारकाक्रीड़ा चेति संक्षेपेण सर्वावतारप्रेयाजनं परमकल्याणत्वं विश्वमंगलत्वयोर्हेतुत्वेनोद्दिष्टम् ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आत्मद्योतगुणैः स्वस्य प्रकाशमानैर्गुणैः सञ्छन्नमहिम्ने जीवानां दुरवबोधमहिम्ने आत्मज्योतिर्गुणच्छन्नमहिम्न इति पाठे आत्मज्योतिस्स्वप्रकाशश्च गुणच्छन्नमहिमा चेत्यर्थः। श्रीभगवज्ज्योतिषः सूक्ष्मत्वात् सौशील्यादिगुणच्छन्नपरत्वाच्च दुरवबोधत्वं चोक्तं भवति ॥३३॥ शरीरिषु शरीरिणां मध्ये अशरीरिणः प्राकृतशरीररहितस्य कृतावतारा असङ्गतैः असम्भावितैः ॥३४॥ विभवः सम्भवः आशिषः अभ्युदयानि ॥ ३५ ॥ शान्ताय ऊर्मिषट्करहिताय ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमुक्तविधस्य भगवतः सर्वज्ञत्वं जीवैर्दुर्ज्ञेयत्वं चानुसन्दधतौ नमस्कुरुतः–तस्मा इति। तस्मै कृष्ण कृष्णेत्यादिनोक्तविशिष्टाय भगवते षाड्गुण्यपूर्णाय साधुपरित्राणाय वसुदेवात्मजत्वेनावतीर्णाय सर्वकर्त्रे आत्मद्योतैर्गुणैः स्वस्य प्रकाशमानैः

गुणैश्छन्नमहिम्ने जीवानां दुरवबोधमहिम्ने आत्मज्योतिर्गुणच्छन्नमहिम्ने इति पाठे आत्मज्योतिः स्वयंप्रकाशश्च गुणच्छन्नमहिमाचेत्यर्थः। स्वरूपेण गुणैश्च निरतिशयबृहते तुभ्यं नमः ॥ ३३ ॥ वासुदेवायेत्यनेनाभिप्रेतं विवक्षुस्तावत्सर्वावतारयाथात्म्यमाहतुः-यस्येति। शरीरेषु मत्त्यादिशरीरिणां मध्ये अशरीरिणः कर्मकृतशरीररहितस्य यस्य तवावताराः सर्वे निस्समाभ्यधिकैः कर्मकृतदेहिष्वसङ्गतैरसम्भावितैस्तैस्तैस्तदवतारप्रतिनियतैर्वीर्यैर्ज्ञायन्ते कर्मकृतदेहिभ्यो विलक्षणत्वेन ज्ञायन्त इत्यर्थः ॥ ३४ ॥ स भवानिति सर्वस्य साधुलोकस्याशिषां समाहितस्वर्गापवर्गादिपुरुषार्थानां भवायोत्पादनाय विभवाय उत्तराभिवृद्धये च पतिस्तासां पालकश्च भवितुमित्यर्थः। अंशभागेन बलरामेण सह यद्वा सङ्कल्परूपज्ञानेन न तु करणेनेति भावः। सांप्रतमधुनाऽवतीर्णः यद्वा सांप्रतमिति युज्यते इत्येतदर्थको निपातः यतो भवानाशिषां पतिः प्रभुर्दाता अतो भवार्थं विभवार्थश्चांशेनावतीर्ण इति युक्तमेवेत्यर्थः ॥ ३५ ॥ प्रकृतावतारासाधारणगुणाननुसन्दधतौ नमस्कुरुतः विश्वमङ्गलावहत्वममङ्गलतरुजन्मविमोचनेनापरोक्षमेव प्रदर्शितमिति तथा सम्बोधनाभिप्रायः स्वयममङ्गलस्यान्येषां मङ्गलावहत्वमनुपपन्नमिति तदपि सिद्धमेवेत्यभिप्रायेण परमकल्याणेति सम्बोधनं शान्तायोर्मिषट्करहिताय अशनायापिपासाशोकमोहजरामृत्यवः षडूर्म्मयः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ननु तद्विषयज्ञानाभावे तदुपासनाभावेन मोक्षाशाऽयचेत् क एव ब्रह्म जानाति "स्त्रियः सतीस्ताम् उभे पुंस आहुः" इत्यादि श्रुतिः। इदमपि दर्शनं तत्प्रसादेनेत्यङ्गीकर्तव्यं "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेः। यद्वा उत्पत्तेः प्राक् सिद्धं निरञ्जनत्वेन स्थितं कोनु विज्ञातुमर्हति लिङ्गाभावात् कथं गुणानां ज्ञापकानां लिङ्गानां संस्थितेः विनाशनात् जगतो नष्टेर्थेत्या शङ्क्य नम इत्येव कार्यं तस्यापि तत्प्रीतिजनकत्वप्रतीतेरिति भावेनाह तस्मा इति किं निमित्तमेतद्विज्ञापनमिति तत्राह आत्मेति आत्मना स्वया द्योतन्ते कार्ये शक्तिमत्तया प्रकाशन्त इत्यात्मद्योताः तैर्गुणैः सत्त्वादिभिः छन्नो गूहितः महिमा यस्य स तथा तस्मै "तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिना जायतैकम्" इति श्रुतेः। पिहितत्वमितरापेक्षया न स्वस्य अपरिच्छिन्नत्वे नानाच्छाद्यत्वादिति भावेनाह, ब्रह्मण इति तदुक्तं "छन्नोऽन्येषां न तु स्वस्य भगवान् पुरुषोत्तमः" इति वेधसे कर्त्रे ॥ ३३ ॥ इदानीं कृष्णो नाम साक्षान्नारायणावतार एव न देवदत्तवत्कश्चिच्छरीरीति ज्ञापयितुं हरेर्द्विविधावतारा देहस्था अदेहस्था इति तत्र देहस्था अन्तर्याम्यादयो मत्स्याद्याः अदेहस्था इति भावेनाह, यस्येति, यस्य हरेरवताराः शरीरेष्वन्तर्यामित्वेन ज्ञायन्ते अशरीरेषु शरीरव्यतिरिक्तबाह्यस्थलेषु अशरीरिणः मत्स्यादिरूपत्वेन ज्ञायन्ते कैः साधनैरित्यत्राह—तैस्तैरिति। ये ये मनसो नियमादयः शास्त्रविहिताः तैस्तैरतुल्यैः अन्यातिशयैरधिकैर्मनोनियमादिभिः अतुल्यातिशयत्वं कथमत्राह तिर्यग्योनिष्विति तिर्यग्योनिषु वराहादिसम्बन्धिनीषु असङ्गतैः असम्भाव्यैः तदुक्तं "यस्यावतारा देहस्था इति द्विधा" इत्यादि यद्वा तैस्तैरतुल्यातिशयैः माहात्म्यविशेषैः भूम्युद्धरणमन्दरधारणगोवर्द्धनोद्धारणलक्षणैरिति ॥ ३४ ॥ सत्वादृशो भवान् जनस्य भवाय पुण्यलक्षणभद्राय प्रभवाय महत्त्ववर्धनाय साम्प्रतं यदुकुलेऽवतीर्णोसीत्यन्वयः। आशिषां शुभानां पतिः पालयिता दाता च भागेनांशेन ॥ ३५ ॥ इदमेव रूपं मूलरूपादन्यूनमहिमेति भावेनाह—नम इति ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विश्वं सर्वम् एवं प्राकृतसर्वात्मकत्वमुक्त्वा तदतीततदात्मकत्वमप्याहतुः—तस्मै स्वयं भगवते महानारायणाय वासुदेवाय तच्चतुर्व्यूहप्रथमाय वेधसे प्राकृतसृष्टिकर्त्रे सङ्कर्षणादिरूपाय कीदृशाय पुरुषाय आत्मेति अत एव तत्तत्सर्वात्मकत्वात् ब्रह्मणे परमबृहते ॥ ३३ ॥ तदेवं महिमानं निरूप्य तथाभूतस्य तस्यावतारेष्वपि महिमातिशयममर्यादं दर्शयित्वा तत्र तस्य कैमुत्यमापादयन्तौ साक्षात्तदवतारे सर्वलोकभागधेयान्तःपतितस्वभागधेयं श्लाघेते—यस्येति द्वाभ्याम्। भगवति देहदेहित्वयोर्भेदाभावात् जीववदसौ शरीरी न भवतीत्यशरीरिणः ॥ ३४-३५ ॥ तदेवानूद्य नमस्कुरुतः—नम इति। परमाणां शिवादीनामपि मङ्गलरूपवासुदेवाय वसुदेवद्वारा प्रकटाय शान्ताय सर्वस्य परमसुखरूपाय यदूनां क्षत्रियविशेषाणां गोपविशेषाणाञ्च ॥ ३६-३७ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ननु कथमहमाद्यः पुरुषः यथान्येऽवतारास्तथाहमप्येक एवेत्याह—तवावतारा इत्यादि। शरीरिषु मध्ये तवावतारा ज्ञायन्ते। तवैव सर्वेऽवताराः। अवतारो रूपान्तरेण प्राकट्यम् अतस्त्वमवतारो न,—स्वस्वरूपेणाविर्भूतत्वात्। रूपान्तरं तु शरीरिसदृशं यथा मत्स्यादिशरीरिसदृशम्। त्वं तु नराकृति परब्रह्मत्वात् स्वरूपमेवेतदित्याह—अशरीरिणः शरीरिविलक्षणस्य। कुत इत्याह—तैस्तैः प्रसिद्धैस्तैरवाङ्मनसगोचरैः, न विद्यते तुल्यमतिशयश्च येषां तैः। देहिषु ब्रह्मादिष्वपि प्रसङ्गतैर्वीर्यैर्विशिष्टश्चेत्। विशेषणे तृतीया ॥३४॥ ननु एवं चेदहं तदा कथमहं सर्वगोचरः स्यामित्यत आह—स भवानित्यादि। स भवान् स उक्तप्रकाराचिन्त्यमहैश्वर्यो भवान् श्रीकृष्णः सर्वलोकस्य भवाय क्षेमाय विभवाय विशिष्टक्षेमाय भक्तियोगायावतीर्णोऽसीति ॥३५॥

इति श्री दशमे श्रीबृहत्क्रमसन्दर्भे दशमोऽध्यायः ॥ १० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

यस्यावतारा इत्यादि । यस्यावताराः शरीरेषु, मत्स्यादिशरीरेषु, यस्य कीदृशस्य ? अशरीरिणः, त्वन्तु मत्स्यादिवत् शरीरी न भवसि, सच्चिदानन्द-विग्रह एव त्वम् सर्वेषां परम मनोहरत्व सुखदत्व परमानन्दप्रदत्वाच्च कारुण्यादिगुणत्वाच्च, न तु विग्रहवान् । तैस्तैरित्यादि-तैरनिर्वाच्यैस्तैः प्रसिद्धैर्न विद्यते तुल्यमतिशयश्च येषां तैर्गुणैर्विशिष्टत्वात्, देहिषु ब्रह्मादिष्वसङ्गतैः केवलं त्वय्येव सङ्गतैः ।। ३४ ।। अवतीर्णोऽशभागेनेत्यादि । हे अंशभागेन ! अंशानां भागो भाग्यं तस्य इव प्रभो । अथवा, अंशाश्च भागाश्च तेषामिव, अथवा अंशानां भागेन भाग्येनेति तृतीयान्तम् वा वा पदम् ।। ३५-४३ ।।

इति दशमोऽध्यायः ।। १० ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अतो दुर्ज्ञेयत्वात् केवलं प्रणमतः—तस्मा इति । वेधसे विश्वकर्त्रे दुर्ज्ञेयत्वस्य कारणं गुणसंवृत इति संवृतत्वमुक्तमेव पुनरपि स्पष्टयतः आत्मना त्वयैव द्योतन्ते इति त्वत्प्रकाशैर्गुणैश्छन्नो महिमा मेघैरिव रवेर्यस्य तस्मै ।। ३३ ।। सत्यं परमेश्वर एवंभूतो भवत्येव युवां तु मामेव परमेश्वरं केन लक्षणेन ब्रुवाथे तत्राहतुः यस्य अवतारा मत्स्यादयः शरीरिषु मत्स्यादिजातिषु मध्ये ज्ञायन्ते अनुमीयन्ते अशरीरिणः प्राकृतशरीररहितस्य तव कैः देहिषु जीवेष्वसङ्गतैरघटमानैर्वीर्यैः प्रभावैः स भगवानवतारी खल्वेव भवसि हस्तिसहस्रेणापि दुरुत्पाटनयोरावयोरर्जुनयोरर्जुनसमौजसो बाल्यलीलोदितबललवेनाप्युत्पाटनात् रज्जूलूखलयोरपि तादृशशक्त्यार्पणादिति भावः । भवायभूत्यै विगतो भवो यस्मात्तस्मै मोक्षाय अंशभागेन अंशांशेन ब्रह्मरुद्रादिना आशिषां सर्वकामनानां पतिर्दाता यः स एवेत्यर्थः ।। ३४-३५ ।। परमकल्याणं यस्मात्तस्मै हे स्वयं च परममङ्गलस्वरूप ।। ३६ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अतस्तस्मै उक्तप्रकाराय तुभ्यं नमः, कथंभूताय ? भगवते स्वाभाविकषाड्गुण्यनिधये वासुदेवाय वासयतीति वासुः सर्वाधारः स एव दीव्यति बालरूपेण क्रीडतीति देवस्तस्मै तत्रापि वेधसे स्वशरणहिताभिधानकृते आत्मनि जीवे द्योतः प्राकट्यं येषां तैर्जीवज्ञानाच्छादकैर्गुणैर्यथा चक्षुःपिधानेन सर्वगमपि तेजश्छन्नो भवति तद्वच्छन्नो जीवानां दुरवबोधो महिमा यस्य तस्मै ब्रह्मणे बृहत्स्वरूपगुणाय ।। ३३ ।। नन्वहं भवद्भ्यां कुतो ज्ञातस्तत्राहतुः—यस्येति द्वाभ्याम् । देहिषु असङ्गतैर्वीर्यैः अशरीरिणः प्राकृतशरीरीजीवस्तद्विलक्षणस्य परमात्मनः यस्यावतारिणस्तव शरीरिषु देवतीर्यगादिषु अवताराः अविज्ञायन्ते स भवान् अवतीर्णः सुतरां ज्ञायते इति द्वयोरन्वयः ।। ३४ ।। अंशाः जीवास्तेषां भागः बुभुक्षूणां भोगरूपः मुमुक्षूणां मोक्षरूपः यस्मात्तेन रूपेण एतदेवाहतुः भवाय भोगाय विगतो भवो यस्मिन् तस्मै विभवाय मोक्षाय अवतीर्णः साम्प्रतं ज्ञायते इति शेषः ।। ३५ ।। वासुदेवाय वसुदेवापत्याय ।। ३६ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अतो दुर्बोधत्वात् केवलं प्रणमतस्तस्मै इति वेधसे जगत्कर्त्रे दुर्बोधत्वहेतुं गुणसंवृतत्वं पुनः स्फुटयतः आत्मना त्वयैव द्योत्यैः प्रकाश्यैर्गुणैश्छन्नो महिमा घनैरिव रवेर्यस्य तस्मै ।। ३३ ।। ननु मे परेशत्वं केन चिह्नेन कथयथस्तत्राह यस्येति युग्मम् । अशरीरिणः प्राकृतभिन्नदेहशून्यस्य यस्य शरीरिषु मत्स्यादिजातिष्ववतारा मत्स्यादयो ज्ञायन्ते अनुमीयन्ते कैश्चिह्नैरित्याह देहिषु जीवेष्वसङ्गतैरघटमानैर्वीर्यैः पराक्रमैः स भवानवतारी त्वमेव साम्प्रतमवतीर्णोऽसि गजेन्द्रसहस्रेणापि दुरुत्पाटयोरावयोर्बाल्यलीलाप्रकाशितेन बललेशेनाप्युत्पादिताद्रज्जूलूखलयोरपि बलार्पणाच्चेति भावः । भवाय सम्पदे विभवाय विगतो भवो यस्मात्तस्मै मोक्षाय चेत्यर्थः । कीदृशः ? आशिषां कामानामंशभागेनांशांशेन पतिर्दातेत्यर्थः ।। ३४-३५ ।। परमं कल्याणं यस्मात् हे स्वयं परममङ्गल ।। ३६ ।।

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

स्वात्मना गृह्यमाणस्त्वं विकारैर्महदादिविकाराभिमानिभिर्ब्रह्मादिभिः प्राकृतैः गुणैः प्रकृतिकार्यसत्त्वरजस्तमोभिमानिश्रीभूदुर्गाभिरग्राह्यः । तदेवोपपादयति ।। क इति । गुणसंस्थितेर्गुणानां गुणाभिमानिश्रीभूदुर्गाणां । उपलक्षणमेतत् । विकाराणां च विकाराभिमानिब्रह्मादीनां च संस्थितेरुत्पत्तेः । प्राक् सिद्धं त्वामिह जगति कोऽनु सम्यक् । साकल्येनेति यावत् । किं ज्ञातुं कोऽर्हति । न कोऽपीति । किंचित्ज्ञानं लक्ष्म्यादीनामस्तीति भावः । गुणानां प्रकृतिजन्यत्वेन विकारित्वेऽपि पृथग्ग्रहणं महदाद्यपेक्षयाऽल्पविकारित्वज्ञापनार्थं । तदुक्तं मधुश्छंदसशाखायां । कार्याकार्या गुणास्तिस्रोऽतः स्वल्पोद्भवो जनाविति । तिस्र इति लिंगव्यत्ययः छांदसः ।। ३३-३६ ।।

इति श्रीभागवतटिप्पण्यामेकादशोऽध्यायः ।। १०-११ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यस्यावतारा इति श्लोके वस्तुतो येषां नैराकार्यं व्यवहारस्तस्मात्कार्यमतुल्यातिशयैरधिकारिभिस्ते चावतारा ज्ञायन्त इत्यन्यथाप्रतीतिनिरासाय छन्न इत्यादित उदितमहाकौर्मप्रमाणशेषेण तात्पर्यमाह ॥ यः पुरुषोत्तमस्तस्यावतारा इति । देहस्थाऽदेहस्थेति द्विधाऽव्ययात्तृतीयाया लुक् । वैशिष्ट्यं तदर्थः प्रकारद्वयविशिष्टा इत्यर्थ इति न सामानाधिकरण्यं विरुणद्धीति ज्ञेयं । अवतारपदं स्वयमेव व्याकरोति ॥ अन्तर्याम्यादिरूपाणि देहस्थानीति । विदो ज्ञानिनो विदुरिति मत्स्यकूर्मादिरूपाणि देहस्थानि जीवदेहस्थानि न हृत्पतेर्विव्यधिकस्य । यथोक्तं बृहद्भाष्ये । हरणाद्यज्ञभागादेर्ज्ञानादेर्दानतस्तथा । यानादव्यवधानेन परस्य ब्रह्मणस्तथा । ब्रह्मा हृदय इत्युक्तस्तस्यैव विदपि ध्रुवमिति । यद्यपि हरणाद्यज्ञभागादेर्हृदित्यंश एव प्रकृतसङ्गतस्तथाऽप्युत्तरत्रोपयोक्ष्यत इत्यधिकांशोदाहरणं । तनोति ब्रह्माणं यं कर्तुं कामयते तमिति रमा च । हृतोः पतिरिति हृत्पतिस्तस्य । अन्यतुल्यैरतिशयैरिति व्याख्याति ॥ मनसा नियमादिभिरिति । करणैर्भक्तैः कर्तृभिः सर्वशोऽन्तरनन्तर्विद्यमानानि सर्वाणि नित्यपूर्णान्येव ज्ञायन्ते । अन्यैस्तुल्या नेति वा । न तुल्या अतुल्या अन्यैऽतुल्या येषामिति वा तैः । शरीरेषु देहेषु केचन यस्यावतारा अन्तर्यामका अशरीरिणो न विद्यते शरीरमधिष्ठानतयैषामिति तेऽशरीरिणो मत्स्याद्याः । अन्यातुल्यैरतिशयैरदृश्यमनो नियमादिभिरसङ्गतैः अं त्वामेव सङ्गतास्तैरधिकारिभिस्तिर्यगादियोनिष्वपि ज्ञायते । तिर्यग्योनिष्वप्यसङ्गतैरन्यत्रासम्बद्धवेदहर्तृहयग्रीवसंहरणधरिण्युद्धरणादिभिः । समभितरत । तज्जात्यवच्छिन्नेषु कर्मपारवश्येनासम्भावितैरित्यसङ्गतैर्वा तैस्तैरतुल्यातिशयैः समाधिकविकलैस्तिर्यग्योनिषु तिर्यगादियोनिष्वप्याविर्भूतेरप्यसङ्गतैस्तत्तज्जातिप्रापककर्मसम्बन्धविधुरैः शरीरैरशरीरिण इत्यशरीरिण इति रणविषया मत्स्याद्या इत्यपि योजना ॥ ३४ ॥ स उक्तगुणयुक्तः सर्वलोकस्य समस्तज्ञानिजनस्य भवाय मङ्गलाय विभवायैश्वर्याय मुक्तये वा । प्रभवेति पाठपक्षे प्रभवाय पराक्रमाय । प्रभवो जलमूले स्याज्जन्मभूमौ पराक्रम इति विश्वः । भवानाशिषां पतिः पशुपतिर्दाता वा साम्प्रतं भागेनांशानामंशेन पद्मनाभकृष्णकेशरूपेणावतीर्णोऽसि गतम् । अं तद्वान्भवांस्त्वमसीति वा । अंशभागेनेति पाठेऽशांशेनेत्यर्थः । तदाऽस्तीति शेषः ॥ ३५ ॥ विश्वमङ्गल जगन्मङ्गल स्वयं परमकल्याण मङ्गलाङ्गशान्ताय सुखावबोधयशान्तमूर्तये वा यदूनां पतये । पदमेकं द्वयोरुक्तिरित्युक्तिर्नमः सम्पुटिकेति मन्तव्यम् ॥३६॥

श्रीसुबोधिनी

तर्हि कथं निस्तार इति चेत् तत्राहतुस्तस्मै तुभ्यमिति, केवलं तस्मै सर्वदुर्ज्ञेयाय **तुभ्यं** नानाविनोदयुक्ताय नमः, "ननु तमेव विदित्वातिमृत्युमेती"तिश्रुतेः कथं भगवदज्ञाने निस्तार इति चेत् तत्राहतु**र्भगवत** इति, भगवज्ज्ञानगुणेन भगवज्ज्ञानं, अज्ञातोपि प्रमेयबलेन निस्तारयतीति "भक्तिस्तत्र प्रयोजिका" "यस्यामतं तस्य मतं मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञातमविजानता"मितिश्रुत्याज्ञात एव ज्ञातो भवति, अतो भगवानीश्वरः केन ज्ञातुं शक्यः ? किञ्च प्रमाणबलेनाज्ञातोपि स्वतो ज्ञातुं शक्यः, यतोयं **वासुदेवः**, वसुदेवे शुद्धे सत्त्व आविर्भवतीति, आविर्भूतस्तु सर्वैरेव ज्ञातुं शक्यः, नन्वेतदेव सर्वं कुतो भवेत् साधनपरता साधनोत्पत्तिः सत्वशुद्धेराविर्भाव इति ? तत्राहतु**र्वेधस** इति, स हि सर्वं विदधाति, अन्यथा तेन कृतस्तन्मार्गो व्यर्थः स्यात्, नमो धीमहीति वा, हृदये प्रत्यक्षे भगवति तत्पादयोः शिरः स्थापयित्वा मनसा यन्नमनं तत् सोपस्करं धीमहीत्यर्थः, अतोन्तःकरणप्रत्यक्ष एव भगवान् न बहिःप्रत्यक्षविषयः, तर्हि बहिर्नास्तीत्येव मन्तव्यं, तत्राहतुरात्म**द्योतैर्गुणैश्छन्नमहिम्न** इति, आत्मना स्वेनैव द्योतो येषां, गुणा अपि भगवतैव प्रकाश्यन्ते यथा सूर्येण मेघाः, त एव तस्यावरका भवन्ति, न हि गाढान्धकारे निशायां मेघा दृश्यन्ते, एवं सर्वैरेव विषयैरात्मनैव प्रकाशितैश्छन्नो महिमा यस्य, अतो न प्रकाशते, वस्तुतस्तु वर्तत एव सर्वत्र, अन्तर्बहिःस्थितौ हेतुमाहतु**र्ब्रह्मण** इति, "बृहत्त्वाद् बृंहणत्वाद् ब्रह्म", अतः सर्वत्रैव वर्तसे परमन्तरेव प्रकाशसे न बहिरिति ॥ ३३ ॥ तर्हि कथमवताराद् बहिः प्रकाशरूपो भगवान् भवतीति ? तत्राहतु**र्यस्यावतारा** इति, मत्स्यादिषु शरीरेषु कश्चिदेव मत्स्यविशेषेलौकिकभावो दृश्यते स च न जीवधर्मो भवतीत्य**शरीरिण**स्तव **तेऽवतारा इति ज्ञायन्ते, अशरीरिण** इति वचनाच्छरीराकृतिरेव तत्र प्रकाशते न तु तच्छरीरं, अन्यथा वृद्धिर्नोपपद्यते, सामर्थ्यं परमधिकं भवेत्, तस्माच्छरीराकारेण भासमानं भगवद्रूपमेवेति न तुल्यमतिशयो वा यस्य यस्मादन्यत्र **तदतुल्यातिशयं**, कालापेक्षया नान्यस्य वीर्यमस्ति कालमर्यादां चेदुल्लङ्घति तदा भगवद्वीयम**तुल्यातिशय**मिति ज्ञायते, सोपि नैकविधः पराक्रमः, क्षणेन विश्वरूपो भवति, क्षणेन वामनो दृश्यश्चादृश्यश्च बहिरन्तः परिच्छेदो व्यापकश्च, अतो ज्ञायते सर्वेष्वेव **देहिष्वसङ्गैः** कदाप्यसम्बद्धैर्भगवानेवायमिति न तु प्रत्यक्षतया भगवानिति निश्चेतुं शक्यत इत्यर्थः, तत्रापि कदाचिच्चेदलौकिकं भवति कल्प्येतापि कथञ्चिज्ज्ञातमिति, सर्वदा चेदवाङ्मनोगोचरा अनुभावास्तदा कथं न ज्ञायेत ? तदाहतुस्तैस्तैरिति, एवमवतारेषु भगवज्ज्ञानमानुमानिकं न प्रत्यक्षमित्युक्तम् ॥ ३४ ॥ प्रकृते तु शब्दादेव नारदकृपया वा भगवानेतदर्थमागत इति ज्ञायत इत्याहतुः **स भवा**निति, यः पूर्वोक्तः सर्वप्रमाणवेद्यो लौकिकैरवेद्योन्तःकरणप्रत्यक्षोवतारी चतूरूपो **भवान्**, अत एव **सर्वस्यैव लोकस्य भवायो**द्भवायैश्वर्याय च, **अंशेन भागेन च साम्प्रतमवतीर्णः**, यतो **भवानाशिषां पतिः**, स्वरूपतो भवांश्चतूरूपो विवृतः प्रकारेण,

ततोप्यधिकास्त्वत्र गुणाः, **सर्वं एव लोका** उत्पादनीयाः, ततस्तेभ्यः स्वसमानैश्वर्यादिकं च देयं भगवत्यंशतः समागते सर्वे भगवदीयाः शुद्धसत्त्वांशेनैवाविर्भवन्ति भगवत्सेवौपयिकदासरूपांशेन वा सर्वे लोकाः स्वदासभावेनाविर्भवन्त्वितीच्छया भगवानेकादेशभावं प्रकाशितवान्, समुदाये ग्रहणभजनाद्यनुपपत्तेः, न हि प्रलयाग्निः सेवितुं शक्यते, किञ्च **भागाः कला,** कलयावतीर्णः, सर्वेषां सर्वकलाकौशलाय सर्वाः, कलास्तदैव प्रादुर्भवन्ति यदि मूलभूतः **कलारूपेणाविर्भवति** तदैव च सर्वाः कलाः पूर्णा भवन्ति, इदं स्वोपयोगायोक्तं, स्वस्यापि वैष्णवरूपेणोद्धवो भक्तिकलाश्च पूर्णा भविष्यन्तीति, एता **एवाशिषः,** अग्रे प्रार्थ्यमानत्वात्, मानुषभावेन नानाविधाः क्रीडा भक्तानुत्पाद्य तेषु भक्तिस्थापनार्था इत्यर्थः ॥ ३५ ॥ किञ्चित् प्रार्थयितुं नमस्कारं कुरुतो **नम** इति,

आदिमध्यावसानेषु नमनं मन आदिभिः ॥ ९८३ ॥

आदौ कायिकं नमनं, तत्र फलं **परमकल्याणेति, कल्याणानां** निधानरूपो भगवान्, **कल्याणानि** शुभफलानि पुत्रजन्मादीनि लोके प्रसिद्धानि, परमानन्दः **परमकल्याणः,** कायेन नमस्कृतः शरीरोपभोगाय **परमकल्याणः** प्रादुर्भवति, **नमस्त** इति वाचनिकं ते तुभ्यमितिकीर्तनात्, तस्य फलं **विश्वमङ्गल** इति, वेदादिनिर्माणाद् **विश्वस्मै** तत्साध्यफलरूपो **मङ्गलं** भवति, **अन्ते नम** मानसं, तदर्थं मनस्याविर्भावाय **वासुदेवायेति, शान्तायेति** ज्ञानरूपाय, केवलमाविर्भूते **नारदवदज्ञाते** तथापुरुषार्थो न भवतीति **शान्तं लयविक्षेपशून्यं** रूपमाविर्भावो ज्ञानं चोक्तं, फलमाह **यदूनां पतय** इति, भगवान् स्वामी फलं यथा **यदूनाम्**॥३६॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तस्मा इत्यत्र **साधनोत्पत्तिरिति साधननिष्पत्तिः।** **पाठान्तरे** योजनामाहुर्**नमो धीमहीतीति वासुदेवाय** नमस्तद् ध्यायेम, तदेतद् विवृण्वन्ति **हृदय** इत्यादि, **निशायामपि** चन्द्रादिसद्भावे **मेघदर्शनमिति गाढान्धकार** इति ॥ ३३ ॥ **यस्यावतारा** इत्यत्र **तर्हीति** यदि भगवान् बहिरप्रकाशः, **अतुल्यातिशयपदे** समासवृत्तौ तुल्यं चातिशयश्च तुल्यातिशयौ न तुल्यातिशयौ यस्येत्य**तुल्यातिशयं,** अत्र नञ्पदद्वयेपि सम्बध्यमानो यमर्थं ब्रूते तं स्फुटीकुर्वन्ति **न** तुल्यमित्यादि, तथा च यस्यान्यत् तुल्यं नास्ति यस्मादतिशयोन्यत्र नास्ति तत् तथेत्यर्थः, सिद्धमाहुरेवमित्यादि, तथा चावतारा वीर्यानुमेया न प्रत्यक्षा इति भगवतोन्तःप्रकाशत्वं न विरुध्यत इत्यर्थः ॥ ३४ ॥ **स भवानित्यत्र शब्दादिति "वासुदेवस्य सान्निध्यं लब्ध्वे"**तिरूपान् नारदवाक्यात्, **एतदर्थमिति** सान्निध्यार्थं, **ततोप्यधिकास्त्वत्र गुणा** इत्यवतारान्तरादप्यधिका अस्मिन् स्वरूपे **गुणाः,** पूर्वश्लोके **"यस्ये"**तिपदेन योवतारी परामृष्टः स एव **"स भवानि"**त्यनेन गृह्यते, तथा **सत्यंशभागेनावतीर्ण** इतिकथनं कथं सङ्गच्छत इत्याकाङ्क्षायां तदुपपादनाय तृतीयायाः सहार्थत्वमभिप्रेत्याहु**र्भगवतीत्यादि,** नन्वेवं भङ्ग्या कथनस्य किं प्रयोजनमत **आहुरिदमित्यादि,** अंशभागाभ्यामवतरणमित्यर्थः ॥ ३५ ॥ **नम** इत्यत्राग्रिमे **तदर्थमिति** ॥ ३६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तस्मै तुभ्यमित्यत्र केवलमिति नम इत्यनेनान्वेति, तत्पदस्य परोक्षवाचकत्वात् **तस्मै** इत्यनेन दुर्ज्ञेयत्वमुक्तं, **युष्मच्छब्दस्य** प्रत्यक्षवाचकत्वात् **तुभ्यमित्यनेन** नानाविनोदयुक्तत्वमुक्तं, विनोदार्थमेवेच्छया व्यवहार्यो जात इतिभावः ॥ ३३ ॥ **यस्यावतारा** इत्यत्र **तेष्ववतारा** इति **तेषु** मत्स्याद्याकारेषु सत्त्वेषु पुरुषोत्तमस्यावतरणानीत्यर्थः, तथा च सत्त्वस्यैव प्रत्यक्षं, **आविष्टपुरुषोत्तमज्ञानं** त्वानुमानिकमेवेत्यर्थः ॥ ३४ ॥ **स भवानित्यत्र एकदेशभावमिति** तथा च "तत्रांशेनावतीर्णस्ये"त्यत्रोक्तः **अंशपदस्यार्थो** ज्ञेयः ॥ ३५ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

यदूनां पतये नम इत्यस्य विवृतौ **भगवान् स्वामी फलमिति** यदा भगवान् भक्तिमार्गरीत्या **स्वामी** भवति तदा **फलरूपो** भवतीत्यर्थः, तत्र दृष्टान्तः **यथेति,** "यदूनां निजनाथानां योगमायां समादिश"दितिवाक्यात् ॥ ३६ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

नमः परमकल्याणेतिश्लोके वारत्रयनमः शब्दार्थमाहुः **आदौति** का० ९८३ । **कायवाङ्मनोभिरिति** स्फुटं विवरणे ॥ ९८३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

"तथाच सर्वात्मकत्वेऽपि न प्रपञ्चज्ञानं मुक्तिहेतुः, किंतु नमस्कारादिभक्त्या तत्परमार्थतत्त्वज्ञानम्" इति सूचयन्तौ तं प्रणमतः—तस्मा इति । भगवते ऐश्वर्यादिषड्गुणपूर्णाय वासुदेवाय वसुदेवनन्दनाय, यद्वा 'सत्त्वं विशुद्धं वसुदेवशब्दितम्' इत्युक्तानुसारात् चित्ताधिष्ठात्रे वेधसे जगज्जन्मादिविधात्रे । तथाप्यप्रकाशे हेतुमाहतुः—आत्मनः स्वस्मात् द्योतः प्रकाशो येषां तैर्गुणैः सत्त्वादिभिश्छन्नो महिमा तत्त्वं यस्या 'अभ्रैरिव खे' तस्मै । एवं परिछिन्नत्वमाशङ्क्याहतुः—ब्रह्मणे इति ।

परिपूर्णाय तस्मै सर्वशास्त्रतात्पर्यगोचराय तुभ्यं नमः ॥ ३३ ॥ 'अहमेवंविध ईश्वर इति कुतो ज्ञातम् ?' इत्यपेक्षायामाहतुः—यस्येति । नास्ति तुल्यमतिशय आधिक्यं च येभ्यस्तैरतुल्यातिशयैः, अतएव देहिषु प्राकृतेषु असङ्गतैः अनुपपन्नैस्तैस्तैर्वीर्यैः पराक्रमैर्लिङ्गैः शरीरिषु प्राकृतेषु अशरीरिणः प्राकृतशरीररहितस्य ते तवावतारा ज्ञायन्त इत्यन्वयः ॥३४॥ अवतारप्रयोजनमाहतुः—स इति । सकलशास्त्रतात्पर्यगोचरो भवान् सर्वस्य लोकस्य तत्तदधिकारिजनस्य तत्तदधिकारानुरूपं भवाय उद्भवाय धर्मादित्रिवर्गसिद्धये, विभवाय विगतो भवः संसारो यस्मिंस्तस्मै मोक्षाय च अंशभागेन अंशानामंशावताराणां भागो विभागः प्रादुर्भावो यस्मात् तेन, अंशा अंशावतारा अपि भागा भजनीया यस्य तेनेति वा, परिपूर्णेन रूपेण साम्प्रतमिदानीमवतीर्णोऽस्ति । एवं धर्मादिपुरुषार्थचतुष्टयसम्पादने तत्र सामर्थ्ये च हेतुमाहतुः—आशिषां धर्मादिचतुर्विधपुरुषार्थानां पतिः स्वामी ॥ ३५ ॥ भक्त्युद्रेकेण पुनः प्रणमतः—परमं कल्याणं सुखं यस्मात्तस्य सम्बोधनं हे परमकल्याण ! तत्र हेतुत्वेन पुनः सम्बोधयतः—हे परममङ्गल परमानन्दमूर्ते ! तुभ्यं वासुदेवाय वसुदेवनन्दनाय नमोनमः । 'तव तु न किमपि स्वप्रयोजनम्, निजानन्दपूर्णनैव शान्तत्वात्' इत्याशयेनाहतुः—शान्तायेति । यादवेष्वेवावतारप्रयोजनमाहतुः– यदूनां पतये पालकाय नमः । नमःशब्दावृत्तिरादरार्था ॥ ३६ ॥

अन्वितार्थप्रकाशिका

तस्मा इति ॥ भगवते वासुदेवाय वसुदेवाख्यचित्ताधिष्ठात्रे वेधसे जगज्जन्मादिविधात्रे आत्मनः स्वस्मात् द्योतः प्रकाशो येषां तैर्गुणैः सत्त्वादिभिश्छन्नो महिमा तत्त्वं यस्याभ्रैरिव रवेः तस्मै ब्रह्मणे परमात्मने तुभ्यं नमः ॥ ३३ ॥ यस्येति ॥ नास्ति तुल्यमतिशय आधिक्यं च येभ्यस्तैरतुल्यातिशयैः अत एव देहिषु प्राकृतेषु असङ्गतैः अनुपपन्नैस्तैस्तैर्वीर्यैः पराक्रमैर्लिङ्गैः शरीरिषु प्राकृतेषु अशरीरिणः यस्य तवावतारा ज्ञायन्ते ॥ ३४ ॥ स भवानिति ॥ स शास्त्रप्रसिद्धः आशिषां धर्मादिपुरुषार्थानां पतिः भवान् साम्प्रतमिदानीं सर्वलोकस्य यथाधिकारं भवाय उद्भवाय विभवाय विगतो भवः संसारो यस्मिंस्तस्मै मोक्षाय च अंशभागेन अंशावताराणां भागः प्रादुर्भावो यस्मात्तेन परिपूर्णेन रूपेण अवतीर्णः असि ॥ ३५ ॥ नम इति ॥ हे परमकल्याण ! तुभ्यं नमः । हे परममङ्गल ! तुभ्यं नमः । वासुदेवाय शान्ताय यदूनां पतये नमः । "षष्ठीयुक्तश्छन्दसि वा" इति पत्युर्घिसंज्ञा छान्दसी ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वेधसे सर्वस्रष्ट्रे आत्मनः त्वत्तो द्योतः प्रकाशो येषां तैः गुणैर्देवमनुष्यमत्स्यकूर्मादिस्वभावैः छन्नैरदृश्यमानैः महिमा यस्य तस्मै ॥ ३३ ॥ तथापि भक्तास्त्वां जानंतीत्याहतुर्यस्येति अशरीरिणः प्राकृतशरीरहीनस्य दिव्यमूर्तेस्तव शरीरिषु देवमनुष्यादिषु येऽवतारास्ते देहिष्वन्यक्षेत्रज्ञेषु असंगतैः अप्राप्तैः अतुल्यातिशयैः नास्ति तुल्यत्वमतिशयत्वं च येभ्यस्तैः तैस्तैः विश्वरूपब्रह्मपुरदर्शनस्वमोचनादिरूपैर्वीर्यैर्ज्ञायंते भक्तैरिति शेषः ॥ ३४ ॥ भवाय उद्भवाय विभवाय विगतो भवो यस्मिंस्तस्मै मोक्षायेत्यर्थः ॥ ३५ ॥ परमं कल्याणमक्षरधाम गमनरूपं श्रेयो यस्मात् सः तत्संबुद्धौ ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमुक्तविधस्य भगवतः सर्वज्ञत्वं जीवैर्दुर्ज्ञेयत्वं चानुसंदधतौ नमस्कुरुतः ॥ तस्मा इति ॥ तस्मै कृष्ण कृष्णेत्यादिनोक्तगुणविशिष्टाय, भगवते षाड्गुण्यपूर्णाय, वासुदेवाय साधुपरित्राणार्थं वसुदेवात्मजत्वेनावतीर्णाय, ननु मम वसुदेवात्मजत्वेऽसुरव्यापादनादौ प्रवृत्त्या सत्परित्राणं सम्यक् न भवितेति चेत्तत्राहतुः । विदधाति सत्परित्राणार्थमन्यद्धरिकृष्णसंज्ञं जन्म देवनाम्ना प्रसिद्धधर्मात् प्रेमवत्याख्यपत्न्यां धारयतीति वेधास्तस्मै वेधसे, विपूर्वात् 'धाञो वेध च' इति वेधादेशोऽसिप्रत्ययान्तो वेधःशब्दः । एतदपि स्वयं भगवतैव वक्ष्यते 'अन्योऽपि धर्मरक्षायै देहः संभ्रियते मया' इति । आत्मद्योताः स्वस्य प्रकाशमाना ये गुणास्तैः छन्नो महिमा यस्य तस्मै, जीवानां दुरवबोधमहिम्ने इत्यर्थः । ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते, तुभ्यं नमः ॥ ३३ ॥ वासुदेवायेत्यनेनाभिप्रेत विवक्षू तावत् सर्वावतारयाथात्म्यमाहतुः ॥ यस्येति ॥ शरीरिषु मत्स्यादिशरीरिणां मध्ये, अशरीरिणः कर्मकृतशरीररहितस्य, यस्य तव, अवताराः अतुल्यातिशयैः समाभ्यधिकतावर्जितैः, देहिषु कर्मकृतदेहवत्सु शरीरिषु, असंगतैरसंभावितैः, तैस्तैस्तत्तदवतारं प्रति नियतैः वीर्यैः, ज्ञायन्ते । कर्मकृतदेहिभ्यो विलक्षणत्वेन ज्ञायन्त इत्यर्थः ॥ ३४ ॥ स भवानिति ॥ सर्वलोकस्य सकलसाधुजनस्य, आशिषां समीहितस्वर्गापवर्गादिपुरुषार्थानां, भवायोत्पादनाय, विभवायोत्तरोत्तराभिवृद्धये च, पतिस्तासां पालकश्च, भवितुमिति शेषः । स उक्तविधः, भवान् , अंशभागेन बलरामेण सह, यद्वा । अंशभागेन संकल्परूपज्ञानेन, न तु कर्मणेति भावः । सांप्रतमधुना, अवतीर्णः प्रादुर्भूतः, भवति । यद्वा । सांप्रतमिति युज्यत इत्येतदर्थको निपातः । तत्पक्षे, यतो भवान् , आशिषां पतिः प्रभुर्दाता भवत्यतः सज्जनानां भवार्थं विभवार्थं चांशेनैवावतीर्ण इति सांप्रतं युक्तमेवेत्यर्थः ॥ ३५ ॥ प्रकृतावतारासाधारणगुणाननुसंदधानौ नमस्कुरुतः ॥ नम

इति ॥ हे परमकल्याण, नमः । हे परममङ्गल, नमः । वासुदेवाय, शान्तायोर्मिषट्करहिताय, अशनायापिपासाशोकमोहजरामृत्यवः षडूर्मयः । यदूनां पतये, नमः । अनेन न त्वं गोपसूनुः, किं तु वसुदेवात्मजो यादवविशेष इति भावः ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तस्मै इति : १०.१०.३३.

स्वप्रकाश्यगुणच्छन्नमहिमाऽस्मीति केवलम् । न गिरैवोक्तमद्येश कृपया दर्शितं हि नौ ॥ ६२ ॥

यस्यावतारा इति : १०.१०.३४.

यल्लोके न कदापि देहिकृतितः संभाव्यते दुर्घटं तत्कृत्यं भुवि लीलयैव कुरुते यः सोऽवतारी पुमान् ।
लक्ष्मैतत्स्फुटमेव जातमधुना बद्धोऽपि यद्बन्धनादावां मोचितवान् सलीलमिति किं नाद्यापि ॥ ६३ ॥
निजभक्तोद्धतये त्वं भूत्वा सगुणः करोषि निजविहृतिम् । अज्ञा बद्ध इति त्वां वदन्ति सत्यं तदेतदिति भगवन् ॥ ६४ ॥

स भवानिति : १०.१०.३५.

यन्नारायणनाम चेदवशतो वक्त्रात् सकृन्निर्गतं यस्यासौ दुरितं विधूय भवति श्लाघ्यस्त्रिलोकेष्वपि ।
स त्वं योगविदप्रमेयचरितोऽप्यद्धाऽद्य दृष्टोऽसि यत् तत्पुण्यानि कृतार्थता च भगवन्नावां किमाचक्ष्महे ॥ ६५ ॥
श्रुतिमात्रतोऽपि सगुणं तव रूपं भुवि यैरवेदि ननु तेऽपि विमुक्ताः ।
भगवन् भवन्ति पुनरद्य तु तादृक् परिपश्यतो स्फुटमनन्तसुखाप्तिः ॥ ६६ ॥

कृष्णप्रिया

समग्र विश्व के विधाता आप वासुदेव भगवान को नमस्कार है। मेघों से आच्छन्न सूर्य की भाँति आप आपके द्वारा प्रकाशित होने वाले गुणों से आच्छन्न परब्रह्म परमेश्वर आपको नमस्कार है ॥ ३३ ॥ यदि आप की तुलना में कोई नहीं तो फिर आप से अधिकतर की संभावना ही कैसे। अत एव प्राकृत प्राणियों में सर्वथा न रहने वाले आप के प्रसिद्ध पराक्रमों से ही अजन्मा आपके अवतारों का शरीरियों में पता चलता है। रहस्य यह है कि आप जब कभी अवतार धारण करते हैं तो आपके अवतार विग्रह का पहचान आपके अद्भुत पराक्रमों से चलता है ॥ ३४ ॥ वही पूर्ण ब्रह्म आप समस्त लोकों के उद्भव एवं ऐश्वर्य के लिये इस समय गोकुल में अपने परिपूर्ण रूप से अवतीर्ण हुए हैं, प्रभो आप सकल अभिलाषाओं के परिपूरक हैं ॥ ३५ ॥ हे परम कल्याण आप को नमस्कार, हे परम मङ्गल आपको नमस्कार है, यादवों के स्वामी परम शान्त भगवान् वासुदेव, आपको नमस्कार ॥ ३६ ॥

अनुजानीहि नौ भूमंस्तवानुचरकिंकरौ । दर्शनं नौ भगवत ऋषेरासीदनुग्रहात् ॥ ३७ ॥
वाणी गुणानुकथने [1]श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव [2]निवासजगत्प्रणामे दृष्टिः सतां दर्शने[3]ऽस्तु भवत्तनूनाम् ॥ ३८ ॥

श्रीशुक उवाच

इत्थं संकीर्तितस्ताभ्यां भगवान् गोकुलेश्वरः । दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ॥ ३९ ॥

श्रीभगवानुवाच

[4]ज्ञातं [5]मम पुरैवैतदृषिणा करुणात्मना । [6]यच्छ्रीमदान्धयोर्वाग्भिर्विभ्रंशोऽनुग्रहः कृतः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—भूमन् तव अनुचरकिंकरौ नौ अनुजानीहि भगवतः ऋषेः अनुग्रहात् नौ दर्शनं आसीत् ॥ ३७ ॥ नः वाणी गुणानुकथने नः श्रवणौ कथायां च हस्तौ कर्मसु नः मनः तव पादयोः स्मृत्यां निवासजगत् ! तव प्रणामे शिरः भवत् तनूनां सतां दर्शने दृष्टिः अस्तु ॥ ३८ ॥ इत्थं ताभ्यां संकीर्तितः च दाम्ना उलूखले बद्धः भगवान् गोकुलेश्वरः प्रहसन् गुह्यकौ आह ॥ ३९ ॥ करुणात्मना ऋषिणा श्रीमदान्धयोः वाग्भिः यत् विभ्रंशः अनुग्रहः कृतः एतत् मम पुरा एव ज्ञातम् ॥ ४० ॥

---

१. श्रवणं—वीर. । २. तव सुरप्रवर प्रणामे—विज. । ३. ने भगवन्ममास्तु—गो. प्रे. टी. । ४. श्रुतं—गो. प्रे. टी. । ५. मया—विज. ।
६. वाग्भिः शापः सानुग्रहः—विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

नौ आवाम् । अनुचरः कुबेरो नारदो वा तस्य किंकरौ । भगवतस्तव दर्शनम् ॥ ३७ ॥ तत्र गतयोरावयोः पूर्वस्वभावो माऽभूत्किं तु वाणी गुणानुकथन इत्यादि । नः "अस्मदो द्वयोश्च" इति द्विवचनस्थाने बहुवचनम् । अस्मत्संगिनां सर्वेषामपीति वा बहुवचनम् । तव निवासभूतं यज्जगत्तस्य प्रणामे । त्वन्निवासभूतमिति बहुमानेन जगतः प्रणामे शिरोस्त्वित्यर्थः । भवत्तनूनां भवतो मूर्तिनाम् । संकीर्तितः संस्तुतः ॥ ३९ ॥ वाग्भिर्न ह्यन्यो जुषतो जोष्यानित्यादिभिः श्रीविभ्रंशरूपोऽनुग्रहः कृत इति ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कुबेरस्य महादेवानुचरत्वं विमृश्याह—नारदो वेति । ऋषेर्नारदस्य ॥ ३७ ॥ तत्रालकायाम् । पूर्वस्वभावो विषयप्रवणता इत्यादि भवतु । न इति बहुवचनम् । "अस्मदो द्वयोश्च" इति सूत्रेण । यद्वा—क्लिष्टकल्पनातोर्थांतरमेव वरं तदाह—अस्मदित्यादि । इत्यर्थ इति सर्वत्रास्माकं भगवद्दृष्टिर्भवत्विति तात्पर्यम् । तव पादयोः स्मृत्यां मन इति संबंधः । सतां यथाशास्त्रं वर्तमानानाम् । निवासो वहति स्थानं जगद्यस्य तस्य संबोधनम् । यद्वा—त्वन्निवासभूतानां जगतां जंगमानां नारदादिभक्तानां प्रणामे शिरोस्त्विति । यद्वा—त्वन्निवासोऽयं यो व्रजस्तत्रस्थस्य जगतः सर्वस्य प्रणाम इति संदर्भविश्वनाथौ ॥ ३८ ॥ गोकुलेश्वर इति । दाम्ना चोलूखले बद्ध इति च भक्तिवशवर्त्तित्वमाह—भक्त्यधीनो गोपालत्वं दामबंधनं चापि स्वीकृतवानिति ॥ ३९ ॥ अनुग्रहः कृतः श्रीभ्रंशे भवत्स्मृत्यादिसंभवादिति भावः । "यस्याहमनुगृह्णामि हरिष्यते तद्धनं शनैः" इति वक्ष्यमाणत्वात् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं स्तुत्वा देवत्वेनानवसरे तत्रावस्थितिमयुक्तां मत्वा तादृशं स्थावरत्वमेवानुशोचन्तावाहतुः—अनुजानीहीति । गन्तुमेवेति भावः । भूमन् ! हे परमेश्वर ! अन्यत्तैः । यद्वा, अनुजानीहि आवां प्रति किञ्चिदाज्ञां विधेहीत्यर्थः । भूमन् हे सर्वतः परिपूर्णेति यद्यपि काप्यपेक्षा नास्ति तथापीति भावः । तत्र भक्तवात्सल्यादेवेत्याहतुः अनुचरस्य भक्तस्य श्रीशङ्करस्य किङ्करौ रुद्रस्यानुचरावित्युक्तेः । यद्वा श्रीनारदकिङ्करौ तत्प्रसादेनैवैतादृशफलप्राप्तेस्तदनुगतिस्मरणस्यैव प्रस्तुतत्वात् युक्तत्वाच्च । यद्वा, अनुचराणां किङ्कराविति निरन्तरम् अनुजानीहि यद्वा, तवानुचराणां गोपबालकानां किङ्करौ अनुजानीहि एषां किङ्करौ कृत्वा अत्रैव रक्षेत्यर्थः । नन्वतिदुर्लभमिदं तत्राहतुः - अनुग्रहादिति। नौ आवाभ्यां तव दर्शनं भगवतः परमदयालोः अचिन्त्यप्रभावस्य वा प्रभोः ऋषेः श्रीनारदस्य महापराधिनोरप्यलभ्यलाभसिद्धेरेतदप्याशास्महे इति भावः ॥ ३७ ॥ श्रीनारदानुग्रहेण मद्भक्तावेव युवां वृत्तौ ततस्तत्रैव गच्छतमिति चेत्तर्हि सर्वभक्तिप्रकारं देहीति भक्तिस्वभावेनैव प्रार्थयेते वाणीति । तव पादयोर्गुणानां भक्तवात्सल्यादीनां सौन्दर्यादीनां च अनु निरन्तरं कथनं एव न तु योगयागादिनिरूपणे नः अस्माकं वाणी वागिन्द्रियमस्तु पादयोरिति भक्त्या न तु तन्मात्रविवक्षया श्रवणाविति द्विवचनेन श्रवणेन्द्रियस्य साकल्येन प्रवृत्तिरभिप्रेता एवमग्रेऽपि कथायां कथामात्रे ब्रह्मत्वसृष्ट्यादिहेतुत्वकथनेपीत्यर्थः । श्रवणे स्वातन्त्र्याभावात् स्वयं कथने तु भगवन्माधुर्य्यस्यैव रस्यत्वात गुणानुकथायामित्यत्रापि गुणकथायामित्येव पूर्वस्वारस्यात् ज्ञेयं कर्मसु पूजापरिचर्य्यालक्षणेषु चशब्दः सर्वैरेवान्वेति शिर इति तत्र प्राधान्यादवशिष्टत्वाच्च तत्तु तव निवासो वसतिस्थानं जगद्यस्य तस्य संबोधनं तवेति पुनरुक्तिः जगन्निवासतया जगत्प्रणामेन त्वत्प्रणामे सिद्धेऽपि तदेकदृष्ट्यपेक्षया तव निवासभूता ये जगतो जङ्गमरूपाः श्रीवैष्णवरूपास्तेषां प्रणामे शिरश्च तस्योभयलिङ्गमानमेतत् इत्युक्तेः यद्वा तव निवासोऽयं यो व्रजस्तत्रस्थस्य जगतः सर्वस्य दूरतोऽपि प्रणामे दृष्टिः चक्षुरिन्द्रियं भवत्तनूनिर्विशेषाणां सतां श्रीनारदादीनां यद्वा सतां श्रीवैष्णवानां भक्ततनूनाञ्च अर्चारूपाणाञ्च दर्शने साक्षात्त्वद्दर्शनेऽस्त्विति तु गृहेष्वसम्भवं भयादिना न प्रार्थितम् एवं स्पर्शादिकमुपलक्ष्यम् ॥ ३८ ॥ गोकुलेश्वरः प्रहसन् गुह्यकावाह—गुह्यकाविति । तयोस्तादृशपूर्वावस्थत्वं सूचयित्वा भाग्यातिशयं दर्शयति । प्रहासे हेतुः स्वरं भगवान् ताभ्यामपीत्थं भगवत्त्वेनैव कीर्तितः "दाम्ना चोलूखले बद्धः" इति प्रथमतस्तावद्बद्धस्तत्रापि दाम्ना तत्राप्युलूखल इत्यर्थः । अतो भयेनैवैतौ न हसत इत्यभिप्रेत्य स्वयमेव हसति स्मेति भावः । गोकुलेश्वरो भगवानिति गोकुलेशानशीलत्वाद्गोकुलेश्वरनामायमस्माकं भगवानेवं प्रियजननप्रेमवश्यतया गोकुले नित्यकौतुकशील इति गोकुलं चेदं परमविलक्षणं जानीहीति च व्यञ्जयति ॥ ३९ ॥ एतन्मम ज्ञातमेवेति अन्यथा महदपराधिषु ममेदृशकृपानुपयोगात् । यद्वा, ऋषेरासीदनुग्रहादिति तयोरुक्त्या प्रीतः सन् तामेव दृढयन् तयोः प्रहर्षार्थमन्वमोदतेति करुणात्मना दयाशीलेन करुणात्मतामेवाह श्रीमदान्धयोरप्यनुग्रहः कृत इति अन्यत्तैः यद्वा, स्यातां नैवं यथा पुनरित्यादिबहुलवरप्रदानमयीभिर्वाग्भिः कथम्भूतः विगतो भ्रंशोऽधःपातो महापराधकृतो महानरकादिरूपो यस्मात् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं स्तुत्वानवसरे श्रीभगवन्निकटे तत्रावस्थितिमयुक्तां मन्वानौ निजस्थानं गन्तुमाज्ञां गृह्णीतः—अनुजानीहीति प्रस्थापय, भूमन् ! हे परमेश्वर ! अयं भावः—स्थावरत्वेन त्वत्संगे भ्रमणाद्यशक्त्यात्र वृक्षतयावस्थितिं नैवेच्छावो देवत्वेन च त्वत्क्रीड़ाविशेषस्थानेऽस्मिन् स्थातुं नार्हाव एव, अतस्त्वद्भजनार्थं निजगृहमेव किल गच्छाव इति। अन्यत्तैर्व्याख्यातम्। यद्वा, स्तुत्या काञ्चिदाज्ञां प्रार्थयते—अनुजानीहीति, आवां प्रति काञ्चिदाज्ञां विधेहीत्यर्थः। भूमन् ! हे सर्वतः परिपूर्णेति यद्यपि तव काप्यपेक्षा नास्ति, तथाप्यनुजानीहीति भावः; तच्च भक्तवात्सल्यादेवेत्याहतुः,–अनुचरस्य भक्तस्य सख्युर्वा श्रीशंकरस्य किंकरौ रुद्रस्यानुचरावित्युक्तः। यद्वा, श्रुत्वा भक्तिविशेषेण दासानुदासतां प्रार्थयेते अनुचराणां किंकराविति निरन्तरं जानीहि। यद्वा, परमाभीष्टं प्रार्थयेते—अनुजानीहीति, तवानुचराणां गोपबालानां किंकरौ अनु अनुजानीहि, एषां किंकरौ कृत्वाऽत्रैव रक्षेत्यर्थः। नन्वतिदुर्लभमिदम्; तत्राहतुः—अनुग्रहादिति। नौ आवां प्रति तव दर्शनं भगवतः परमदयालोरचिन्त्यप्रभावस्य वा। ऋषेः श्रीनारदस्य महापराधिनोरपि महदनुग्रहेणालभ्यलाभसिद्धेरत्रावस्थितेरनुज्ञापि सुलभेति भावः॥ ३७॥ श्रीनारदानुग्रहेण मद्भक्तावेव युवां वृतौ, ततस्तत्रैव गच्छतमिति चेत्तर्हि सर्व्वभक्तिप्रकारं देहीति। यद्वा, वासुदेवस्य सान्निध्यं लब्ध्वेति तदनुग्रहमेकमधिकं त्वं सम्पादय, एवं लब्धभक्ती भविष्यथ इत्यन्यच्च सम्पादयेत्याहतुः–वाणीति। तव पादयोर्गुणानां भक्तवात्सल्यादीनां कोमलत्वादीनाञ्च अनु निरन्तरं कथने एव, न च यागयोगादिनिरूपणे, नोऽस्माकम्, सम्बन्ध्यपेक्षया बहुत्वम्, वाणी वागीन्द्रियमस्तु, पादयोरिति भक्त्या दास्येच्छया, अतः केवलशुष्कतत्त्वविचारादिकं निरस्तम्। श्रवणाविति द्विवचनेन श्रवणेन्द्रियस्य साकल्येन प्रवृत्तिरभिप्रेता। एवमग्रेऽपि। कथायां कथामात्रे, श्रवणे स्वातन्त्र्याभावात्, स्वयं कथने च भगवन्माहात्म्यवर्णनस्यैव योग्यत्वाद्गुणानुकथन इति तत्रोक्तम्। तव कर्म्मसु पूजापरिचर्य्यालक्षणम्; च शब्दोऽवधारणे, तदन्यव्यवच्छेदकः सर्व्वैरेवान्वेति। शिर इति शिरसोऽङ्गेषुतमतयाष्टांगप्रणामापेक्ष्याणि पादाद्यंगानि सर्व्वाणि गृहीतान्येव; यद्वा, एकदैव कीर्त्तनाद्यशेषापेक्षया हस्ताद्यंगानां परिचर्य्यादौ प्रवृत्त्या शिरोमात्रेणैव प्रणामसम्भवात्। निवासो वसतिस्थानं जगद्यस्य तस्य सम्बोधनम्। तवेति पुनरुक्तेरयं भावः—जगन्निवासतया जगत्प्रणामेन त्वत्प्रणामे सिद्धेऽप्यैकान्तित्वसिद्धयै तवैव प्रणामेऽस्त्विति। दृष्टिचक्षुरिन्द्रियम्, कथम्भूतानाम्? सतां भवतस्तनूनामधिष्ठानानामित्यर्थस्तेषु सदा तव स्फूर्त्तेः, यद्वा, भवतस्तनवः श्रीशालग्रामादिमूर्त्तयः पूज्यत्वेन वर्त्तन्ते येषु, वैष्णवधर्म्मपराणामित्यर्थः, यद्वा, सतां श्रीवैष्णवानां भवत्तनूनाञ्च श्रीमूर्त्तीनां दर्शने, साक्षात्त्वद्दर्शनेऽस्त्विति च गृहेऽसम्भवत्वाद्भयादिना न प्रार्थितमित्युह्यम्। एवं कीर्त्तन श्रवण पूजा–परिचर्य्या स्मरण-वन्दनात्मिका षड्विधा भक्तिः प्रार्थिता। सख्यात्मनिवेदनयोः प्रायः फले पर्य्यवसानात् साधनवर्गमध्येऽप्रार्थनम्, यद्वा, कीर्त्तनादि-सिद्ध्या ते स्वत एव फलिष्यत इति, किंवा तयोर्भावविशेषात्मकत्वात् स्मरण एवान्तर्भावः। कर्म्मार्पणरूपस्य च दास्यस्य कीर्त्तनादिष्वेवान्तर्भावो ज्ञेयः, तत्र कीर्त्तनस्य प्रार्थनम्,—सर्व्वेन्द्रियक्षोभकारिण्या वाचो भगवत्कीर्त्तने प्रवृत्त्या नियमनादिन्द्रियाणां स्वस्वकर्म्मसु सुखप्रवृत्तेः, यद्वा, 'नाहं वसामि वैकुण्ठे' इत्यादि वचनानुसारेण भगवतः कीर्त्तनप्रियतया कीर्त्तनस्य भक्तिप्रकारेषु मुख्यत्वात्, किंवा कीर्तने रसविशेषात्, वैष्णवानां श्रीमूर्त्तीनां तद्दर्शनस्य भगवद्दर्शनेन साम्यात्तस्य च साक्षात्काररूपस्य सर्व्वभक्तिप्रकार-फलत्वादन्ते प्रार्थनम्, मध्ये चान्येषां निजरसानुसारेण च तत्तत्क्रमादित्यलमतिविस्तरेण॥ ३८॥ गोकुलेश्वर इति दाम्नोलूखले बद्धश्चेति परमभक्तवात्सल्यं बोधितमतएव तावाह, यद्वा, च अपि गोकुलक्रीडापरोऽपि, किंवा गोकुलैकानुग्रहरतोऽप्यतो दाम्ना बद्धोऽपि गुह्यकावाह, यतो भगवान् सर्व्वलोकहितार्थं स्वयमवतीर्ण इत्यर्थः, यद्वा, गोकुलेश्वर इति तयोरपि तत्र जन्मादिना सम्भाषणं युक्तमेवेति भावः। यतोऽसौ गोकुलजनैकवश्य इत्याह—दाम्नेति। च एव, बद्ध एव, न तु तस्मात् स्वयं मुक्तः सन्, यद्वा, च अपि, दाम्ना बद्धोऽपि। प्रकर्षेण हसन् स्मयमान इत्यर्थः, यतो गोकुलेश्वरो गोकुलक्रीडाकौतुकीत्यर्थः, किञ्च, भगवान् निजाशेषैश्वर्य्य-सार-सर्व्वस्वाभिव्यञ्जक इत्यर्थः। एवं श्रीनारदानुग्रहप्रभावेण तयोः परमधन्यतोक्ता। प्रहासस्तु स्वभावत एव, किंवा तयोः पूर्व्ववृन्तान्ते अद्भुतश्रीनारदकारुण्याद्वा, स्तुत्यादिना प्रहर्षाद्वा, निजदामबन्धन-दर्शनकौतुकाद्वेति तत्र वञ्चना निरस्ता। श्लेषेण गोकुलस्येन्द्रियवर्गस्येश्वर इति तत्प्रभावेणैव तद्भक्तौ सर्व्वेन्द्रिय-प्रवृत्तेस्तयोस्तत्पथि प्रार्थितसिद्धिरभिप्रेता॥ ३९॥ एतन्मम ज्ञातमेवेत्यन्यथा महदपराधिषु ममेदृशकृपानुपयोगात्, किंवा मद्भक्तप्रवरत्वेन मदिच्छयैव कृतत्वादिति भावः। यद्वा, (३७ श० श्लोक) 'ऋषेरासीदनुग्रहात्' इति तयोरुक्त्या प्रीतः सन् तामेव द्रढयन् तयोः प्रहर्षार्थमन्वमोदत इति दिक्। करुणात्मना दयाशीलेन, करुणात्मतामाह—श्रीमदान्धयोरप्यनुग्रह कृत इति। अन्यत्तैर्व्याख्यातम्। यद्वा, (२१ श-श्लो०) 'स्याताम् नैवं यथा पुनः' इत्यादि बहुलवर-प्रदानमयीभिर्वाग्भिः। कथम्भूतः? विगतो भ्रंशोऽधःपातो महापराधकृतो यस्मात्, यद्वा, भ्रंशश्च्युतिस्तद्रहितः परमस्थिर इत्यर्थः,—गोकुले ममेदृशलीलायां सान्निध्यप्रापणात्, परमभक्तिप्रापणाच्च॥ ४०॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तवाऽनुचरकिङ्करौ अनुचरौ वैश्रवणस्तस्य किङ्करौ ॥ ३७ ॥ निवासस्तव धाम । यद्वा, निवासभूतं व्याप्यं जगद्यस्य स निवासजगत ॥ ॥ ३८–४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं संस्तुत्यात्मनोः कृतार्थत्वाय तद्दासपर्यन्तदास्यं प्रार्थयमानौ विज्ञापयतः—अनुजानीहीति । हे भूमन् ! निरवधिकानन्दशालिन् ! तवानुचरकिङ्करौ यथा भवावस्तथाऽनुशाधीत्यर्थः । किमिदं प्रार्थयेथे इत्यत्रोचतुः ऋषेस्तवानुचरस्यानुग्रहादेव भगवतः षाड्गुण्यपूर्णस्य पुरुषार्थनिधेस्तव दर्शनं नौ आवयोरासीत् महाफलत्वात्त्वद्दासदास्यमेवानुग्रहाणेति भावः ॥ ३७ ॥ किञ्चावयोर्वाण्यादयः त्वद्गुणानुकथनादिप्रवणाः यथा स्युस्तथानुगृहाणेत्यूचतुः—वाणीति । तव गुणानुवादे श्रवणे श्रोत्रे कर्मसु पूजारूपेषु हस्तौ तव पादयोः स्मृत्यां स्मरणे मनोस्तु निवासो जगद्यस्य तस्य सम्बुद्धिः जगतो निवासेति वा आर्षः परनिपातः तव प्रणामे शिरः भवत्तनूनां त्वन्मूर्तीनां सतां च दर्शने दृष्टिरस्तु यद्वा तव सतां तावकानां सतां च प्रणामे शिरोऽस्तु भवत्तनूनां दर्शने दृष्टिरस्तु ॥ ३८ ॥ इत्थमित्यादिश्लोकः स्पष्टार्थः ॥ ३९ ॥ तदेवाह - ज्ञातमिति । वाग्भिः "न ह्यन्यो जुषतो जोष्यान्" इत्यादिभिः श्रीमदान्धयोर्युवयोः श्रीविभ्रंशरूपोऽनुग्रहः कृत इति यदेतत् पुरैव मम मया ज्ञातम् ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भूमन् ! अनवच्छिन्नज्ञानानन्दस्वभाव ! सदानुचरावनुगतावुक्तकारिणौ च तौ अनुजानीहि अनुज्ञां कुरु यदृच्छया प्राप्तमहत्सङ्गमो भवद्दर्शनसाधनमभूत् किंपुनर्बुद्धिपूर्वकमिति भावेनाह दर्शनमिति ॥ ३७ ॥ इतः परं श्रीमदादिकमावयोर्न भवितव्यं यत इन्द्रियाणां विषयव्यापारः स्यात् स न स्यात् किन्तु तव गुणादावेव वाण्यादीन्द्रियव्यापारः स्यादिति प्रार्थयते वाणीति ॥ ३८–३९ ॥ सानुग्रहः शापः मोक्षलक्षणानुग्रहसहितः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तव निवासोऽयं यो व्रजस्तत्रस्थस्य जगतः सर्वस्य दूरतोऽपि प्रणामे ॥ ३८ ॥ इत्थमिति दाम्नेत्यादि प्रहासे कारणं गोकुलेश्वर इति शीलार्थप्रत्ययेन तन्नाम्ना च नित्यतादृशलीलात्वं दर्शयति ॥ ३९ ॥ विगतो भ्रंशो यस्मात् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अनुचरस्य नारदस्य किङ्करौ ॥ ३७ ॥ त्वदनुचरकिङ्करत्वादेवावयोस्त्वद्वात्सल्यातिशयमालक्ष्यान्यैर्दुर्लभमपीदं प्रार्थयितुमुत्सहावहे इत्यभिव्यञ्जतावाहतुः वाणीति । अत्रैक एव चकार एवार्थकः प्रतिसप्तम्यन्तं योज्यः तेन तव गुणानुकथन एव वाणी भवतु नत्वन्यकथायामित्येवं सर्वत्र व्याख्येयं नः आवयोर्मनस्त्वदीयपादयोः स्मृत्यां निवासभूतानां जङ्गमानां नारदादिभक्तानां प्रणामे शिरोऽस्तु हे निवासजगदिति सम्बोधनपदं वा भवत्तनूनां त्वन्मूर्तिरूपाणाम् ॥३८॥ सङ्कीर्तितः संस्तुतः दाम्ना चकारात् प्रेम्णा च बद्धः प्रहसन्निति प्रहासोयमेते उपदेवादयो मन्मायया बद्धाः स्वमोचनार्थं यं मां स्तुवन्ति सोहं यशोदादिगोपीभिर्दाम्ना प्रेम्णा च बद्धोऽभीक्ष्णं भर्त्सितश्चेह गोकुले तिष्ठामि अत्रत्यानां तासां भर्त्सनेनाहं यथा प्रीये न तथाऽनयोः स्तुत्येति व्यञ्जयति ॥ ३९ ॥ वाग्भिः "नह्यन्यो जुषतो जोष्यान्" इत्यादिभिः श्रीविभ्रंशरूपः अनुग्रहः एव कृत इति ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यतो नौ आवयोः भगवतः दर्शनम् ऋषेरनुग्रहादासीत् अतः नौ आवां तवानुचरस्य हंससनत्कुमारद्वारा तव शिष्यस्य देवर्षेः अनुचरौ वासुदेवस्य सान्निध्यं लब्ध्वेति भवन्नाममन्त्रगर्भवाक्योपदेशतः शिष्यौ सनकादीनां हंसरूपिणो भगवतः शिष्यत्वमिहैवैकादशे स्कन्धे प्रसिद्धं सनकादिशिष्यत्वं देवर्षेः छान्दोग्यद्रष्टव्यम् एव भवदीयौ एवावाम् अनुजानीहि आज्ञापय इहैव परिचर्यायामित्यभिप्रायः ॥ ३७ ॥ यद्यन्यत्र प्रेषितव्यौ तत्रापि नः अस्माकं परिजनाभिप्रायं बहुवचनम् वाणी तव गुणानुकथने अस्तु तव पादयोः स्मृत्यां मनोस्तु भवत्तनूनां भवतो मूर्तिभूतानां सतां साधूनां दर्शने दृष्टिरस्तु किंबहुना तव निवासभूतं यज्जगत्तस्य प्रणामे नः शिरोऽस्तु ॥ ३८–३९ ॥ करुणः कारुणिकः आत्मा मनो यस्य तेन "न ह्यन्यो जुषतो जोष्यान्" इत्यादिभिर्वाग्भिर्यत् श्रीमदान्धयोर्युवयोः श्रीविभ्रंशरूपोऽनुग्रहः कृत इत्येतत् मम पुरैव ज्ञातम् ॥ ४० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

लब्धदेवदेहौ स्वगेहगमनायानुज्ञां याचेते इत्याह अन्विति । अनुचरस्य शङ्करस्य नारदस्य वा किङ्करौ । नन्वग्राह्यश्चेदहं तर्हि युष्मच्चक्षुर्ग्राह्यत्वं मे कथं ? तत्राह दर्शनं नाविति । त्वत्प्रसादहेतोर्नारदानुग्रहात्तदिति ॥ ३७ ॥ वासुदेवस्य सान्निध्यं लब्ध्वा

लब्धभक्ती युवामिति श्रीनारदोक्तिं संस्मृत्य भक्तिं तस्मिन् प्रार्थयेते, वाणीति । न इति बहुत्वं स्वगणापेक्षम् । मनस्तव पादयोः स्मृत्यामस्तु, निवासभूतं जगद्यस्य हे तादृश ! तव प्रणामे शिरोऽस्तु भवत्तनूनां सतां दर्शने दृष्टिरस्तु ॥ ३८ ॥ सङ्कीर्तितः संस्तुतः दाम्ना च शब्दात् प्रेम्णा च बद्धः । प्रहसन्निति यथा गोपीनां भर्त्सनं बन्धनञ्च मे प्रीतिकरं तथा देवानां स्तुतिवचनं नेति व्यज्यते ॥ ३९ ॥ वाग्भि "र्नह्यन्यो जुषतो जोष्या" नित्यादिभिः । श्रीविभ्रंशोऽनुग्रह एव कृतः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे भूमन्गुणपूर्ण । अनुचरकिङ्करौ दासदासौ । नोदस्वित्पूर्तिरामायणमितिवदस्मदासत्तेत्याहतुः सदेति । भगवतो भवतो दर्शनमृषेर्नारदस्यानुग्रहान्नावासीदतो नावनुजानीह्याज्ञापय । भगवत इति ऋषिपदेनाप्यन्वेति । नावित्यपि नमः पदव- द्विवारमुक्तमुक्तकृत्यं ज्ञेयम् ॥ ३७ ॥ इत उत्तरं न मदान्धता भवतु भवतु चेन्द्रियविनियोगो योगीशैवमावयोरिति प्रार्थयते ॥ वाणीति । हे सुरप्रवरामरस्वामिन् तव गुणानुकथने तद्वर्णने वाण्यस्त्विति सर्वत्र यथातथं विपरिणतमन्वेति । कथायां तदाकर्णने श्रवणौ श्रवणे कर्णौ । श्रवणं श्रव इत्यमरः । ल्युडन्तो वा । कर्मसु हस्तौ नौ मनः पादयोः स्मृत्यां स्मरणे । न इति पाठेऽस्मदो द्वयोश्चेति द्विवचनस्थाने बहुवचनम् । आद्यर्थे वा । शिरः प्रणामे भवत्तनूनां भवतस्तनवोऽन्तर्येषां स तं दर्शने दृष्टिर्दृक् भवत्त- नूनां सतां वा । अयमेवार्थः सन्ततमस्मदभिमतो नान्य इति तत्तव भवत्पदैर्व्वनयतः ॥ ३८ ॥ वासुदेवः किमवादीत्तौ प्रति शुक- वदेति तदनुयोगस्यावसरमददानः शुकः करुणापरवशः परीक्षितं प्रति वक्तीति वक्ति श्री शुक इति । ताभ्यामित्थं सङ्कीर्तितो भगवान्गोकुलेश्वरः सर्वेश्वरोऽपि यथा बदरिकानाथो द्वारकानाथ इत्यप्यर्वाङ्नाथः पराङ्नाथ इति तद्वदिहोच्यते । सर्वनाथोऽपि भगवान्सन्निधानविशेषत इति छान्दोग्यभाष्योक्तेर्गोकुलेश्वरत्वं सर्वेश्वरस्य नानुपपन्नम् । दाम्नोलूखले बद्धो मात्रा गुह्यकौ प्रतिह- सन्नाह न जनसमाज इत्याह ॥ गुह्यकाविति । गुह्या च सा कुञ्च गुह्यकुस्तस्यामेकान्तभूमावित्यर्थः । मन्दाः स्वयमनवतीर्णनयेन स्वयं बद्ध इतर बन्धध्वंसं कथं कुर्यादिति वदेयुरिति हासो देवस्येति वा । युष्मन्मदेनेयत्यवस्थेति वा ज्ञेयम् ॥ ३९ ॥ करुणात्मना ऋषिणा श्रीमदान्धयोर्वाग्भिः शापः कृतः सोऽनुग्रहः कृत इति यदेतन्मया पुरैव ज्ञातं सानुग्रहोऽनुग्रहो मोचनविषयिणी करुणा तेन सहित इति शापविशेषणमिति तत्पाठपक्षे ज्ञेयम् ॥ ४० ॥

श्रीसुबोधिनी

एवं नमस्कृत्य गमनार्थं प्रार्थयेते **अनुजानीहीति, नावावामनुजानीहि**, अनुज्ञां प्रयच्छ, **भूमन्निति**सम्बोधनं स्वस्य तत्र स्थातुमयोग्यतार्थं, तदेवाहतुः **स्वानुचरकिङ्कराविति, तवानुचरस्य नारदस्य किङ्करौ** दासौ, सेवकसेवकत्वमेवोचितं न तु त्वत्सेवकत्वमावयोः, यतस्त्वं **भूमा** महान्, न ह्यल्पेन महतः सेवां कर्तुं शक्यते, ननु दर्शनयोग्यता यदा तदा सेवायोग्यता सिद्धैव ततः कथमयोग्याविति चेत् तत्राहतुर्दर्शनं **नौ भगवत ऋषेरासीदनुग्रहा**दिति, महाराजसेवकः स्वभृत्यं कदाचिन् महाराजस्थानं नयति नैतावता तस्य महाराजसेवायोग्यता भवति, अतो दर्शनान्यथानुपपत्त्या न सेवायोग्यता, **भगवतो दर्शनमृषेरनुग्रहा दिति, ऋषेर्भगवत** इति गुरुदेवतयोरैक्यार्थं सहनिर्देशः ॥ ३७ ॥ एवं गमनं प्रार्थयित्वा तत्र गतयोर्भक्तिं प्रार्थयेते **वाणीति**, षडङ्गानि पुरुषे प्रधानानि,

> वाक् श्रोत्रे च करौ चित्तं शिरश्चक्षुस्तथैव च । षडेते भगवत्कार्ये यदि सक्ताः कृतार्थता ॥ १ ॥
> कीर्तने श्रवणे चैव गुणानां रूपदास्यके । स्वरूपस्मरणे नत्यामवतीर्णस्य दर्शने ॥ २ ॥

गुणानामुत्कर्षाधायकधर्माणां कीर्तने वाण्यस्तु, तत्रैव सा विनियुक्ता भवतु, यथा वराय दत्ता कन्या नान्यगामिनी भवति नाप्यन्यः प्रार्थयते नापि पतिभयात् सान्यसम्बन्धिनी कथञ्चिदपि भवति तथा **वाणी** भवतु, एवमेव **श्रवणौ कथायां हस्तावु**भावपि भगवतः **सर्वकर्मस्वा**ष्टयामिकेषु, **चकारात् पादावपि मन्दिरगमनादिषु**, तद्व्यतिरेकेण हस्तसेवा नोपपद्यत इत्युभयमेकरूपं **तव पादयोः स्मृत्यां नो मनोस्तु** स्मरणे सर्वानेव भक्तानेकीकृत्याहतुः, **पादयोरिति**द्विवचनं रूपान्तरे तथाभावाय, शिरस्तु प्रणामे, चतुरङ्गया भक्त्याः भगवतः सर्वस्थितिः सर्वान्तरत्वं च स्फुरिष्यति, अतः सम्बोधनं, यतो **हे निवासजग**दिति **निवासभूतं जगद्** यस्येति, **दृष्टिस्तु सतां दर्शनेस्तु**, भगवद्दर्शनं तु धाष्ट्र्यान्न प्रार्थितं, ननु तेषां दर्शने किं स्यात् ? तत्राहतु **र्भगवत्तनूना**मिति, **भगवतस्तनू**रूपास्ते, तत्र भवान् वर्तत इति तथा, अयोगोलके वह्निर्यथा वा गङ्गायां जलम् ॥ ३८ ॥ एवं गमनभक्त्योः प्रार्थनायां कृतायां सर्वथा भक्तौ शीघ्रमेव लयो भविष्यतीति किञ्चिन् मोहयित्वा किञ्चिद् दत्तवानित्याहेत्थ मिति, एवङ्कारेण सम्यक् **कीर्तित**स्तोषपर्यन्तं स्तुतः **प्रहसन् गुह्यकावाह**, सर्वकारणदानयोः समर्थ इति ज्ञापयति **भगवानिति**, शीघ्रं तयोर्मुक्तौ **गोकुले** स्वस्य क्रीडायामन्यप्रवेशो भविष्यतीति ज्ञापयति **गोकुलेश्वर** इति, गोकुलवासिनामेव साम्प्रतं तद् युक्तं न त्वन्येषां, अतो गोकुलक्रीडासमाप्तिपर्यन्तं तथामोहनमुचितमेव, किञ्च **दाम्नोलूखले च बद्धः**, यस्तु **गोकुलरसभोगार्थं** तत्र गौणभावं प्राप्तस्तेषु वा रसाधिक्यसिद्ध्यर्थं तदधीनो जातः, देवयोर्गोकुले स्थितयोः पूजा कापि न जातेतिशङ्कापि न कर्तव्या

यतो **गोकुलेश्वरो दाम्ना** बद्धः, वस्तुतस्त्वी**श्वर** एव लोकदृष्ट्यापि नन्दस्यायमेव पुत्र इती**श्वर** एव स चेद् **दाम्ना** यन्त्रितस्तदा कस्य **गोकुले** सन्मानं स्यात् ? उचितं चैतद्, देवयोरत्र वृक्षत्वं, एवं **गोकुल**वासिनां वृत्तान्तं स्मृत्वा **प्रहसन्** वक्ष्यमाणमब्रवीत् यद् युवाभ्यां प्रार्थ्यते तत् किमपि नावशिष्टं, मदधिकारिणैव तत्सम्पादनात्, द्वयं हि पुरुषार्थो मुक्तिर्मयि प्रेम च, निरोधस्योभयरूपत्वात् ।। ३९ ।। प्रपञ्चविस्मृतिर्मुक्तिः सा पूर्वमेव जातेत्याह ज्ञातमिति, ममैतत् पूर्वमेव **ज्ञात**मासीद् यद् ऋषिणा **करुणात्मना श्रीमदान्धयोर्विभ्रंशः कृतः**, सेवकाः कदाचित् स्वेच्छयापि कुर्वन्तीति तदव्यावृत्त्यर्थं ज्ञानमुच्यते, न केवलं ज्ञातं किन्त्वभिमतमित्यृषिप्रशंसा, ततो मयैतावत् कृतमित्यर्थोऽज् ज्ञापितं, अतो न प्रार्थनीयं किञ्चिदवशिष्यत इतिभावः, शापो ह्यपकारे भवति स शापदातुः समानाधिकरणो भवति, परदुःखमपि दृष्ट्वा कारुणिको दुःखितो भवति, तदाह **करुणात्मने**ति, **करुणा**युक्त आत्मान्तःकरणं यस्यैति, भाव्यर्थावश्यम्भावज्ञानाद् ऋषित्वं **युवयो**स्त्वतिक्लिष्टत्वमाह **श्रीमदान्धयो**रिति, अन्धतमस उद्धारोवश्यं कर्तव्यः, वाग्भिरितिवचनमात्रं तेनोक्तं, ज्ञापनार्थं कृतिस्तु मयैव कृता, अत एव वाग्भिर्यो **विभ्रं**शोज्ञानरूपः स **त्वनुग्रह** एव ।। ४० ।।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अनुजानीहीत्यत्र **तत्रे**ति निकटे, तर्हि दर्शनमेव कथमत्राहु**र्भगवत** इत्यादि ।। ३७ ।। **वाणी**त्यत्र तत्तदासक्तिविषयान् क्रमेणाहुः **कीर्तन** इत्यादिना, द्वयोः **स्वस्मिन् न** इति**ब**हुवचनप्रयोगो न सङ्गत इति तत्तात्पर्यमाहुः **स्मरण** इत्यादि, सर्वेषां भक्तानां स्मरणावश्यकतायाः सर्वजनीनत्वादिति, **चतुरङ्गया भक्त्ये**ति श्रवणकीर्तनस्मरणपादसेवनसहितया प्रणमनरूपया भक्त्या, **धार्ष्ट्या**दिति ल्यब्लोपे पञ्चमी, तथाप्रार्थने धार्ष्ट्यं भविष्यतीत्यनुसन्धायेत्यर्थः, **गङ्गायां जल**मिति प्रवाहरूपायां चरणसम्बन्धि **जलम्** ।। ३८ ।। **इत्थ**मित्यत्रा**न्यप्रवेश** इति विवक्षितलीलाव्यतिरिक्तलीला**प्रवेशः, क्रीडासमाप्तिपर्यन्त**मिति लोके क्रीडायाः प्रदर्शन**समाप्तिपर्यन्त**मित्यर्थः, नन्वस्याः क्रीडायाः सार्वदिकत्वाद् यदाकदाचित् तथात्वे तद्दोषतादवस्थ्यमितीदानीं मोहनं व्यर्थमित्याशङ्क्य तत्र हेत्वन्तरभूतं विशेषणं व्याकुर्वन्ति **किञ्चे**त्यादि, तथा च तदधीनत्वात् त एव चेदङ्गीकुर्वन्ति तदैव किञ्चिद् भवतीति स्वस्याशक्यत्वात् तदंशे स्वयं हास्यमेव कृतवानितिभावः, एतेन **पुरुषोत्तमे** सायुज्यमपि भक्तकृपयैव भवतीति सूचितं, यद्वा किञ्चेत्यादेः पुरःस्फूर्तिक एवार्थो ग्राह्यः 'अहन्यापृत'मितिवाक्येन गोकुलस्य स्वतस्तामसत्वेपि भगवत्कृपयैवोत्कृष्टत्वात्, अत एवात्रा"ङ्गीकृतजनजनितापराधकूटक्षमाविनोदोस्य अङ्गीकृतिश्च नित्या वदन्तु कोन्योस्य साम्यमिया"दिति प्रभुचरणोक्तमनुसन्धेयं, **उचितं चै**तदिति गोकुले भगवत्कृपया सर्वाधिकत्वादितिभावः ।।३९।। **ज्ञात**मित्यत्र **स** इत्यादि **सोपकारः**, शापदाने प्रयोजको भवतीत्यपेक्षितप्रार्थनं कथं नावशिष्टमित्यत आहुः **परदुःखे**ति, तथा च नायमपकारतः शापः किन्तु करुणयातो नात्र प्रार्थनीयमवशिष्टमित्यर्थः, एतेन **'येन देवर्षेस्तम'** इतिराजप्रश्नस्योत्तरं जातं ज्ञेयम् ।। ४० ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

वाणी गुणानुकथन इत्यत्र **अवतीर्णस्ये**ति भक्तेष्वाविष्टस्येत्यर्थः ।। ३८ ।। **ज्ञातं ममे**त्यत्र **स शापदातु**रिति दुःखरूपः शापदातुरपकारः शापसमानाधिकरणो भवतीत्यर्थः, **ज्ञानरूप** इति तन्निरूपक इत्यर्थः ।। ४० ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

अनुजानीहीत्यस्य विवृतौ **भूमन्निति**सम्बोधनं **स्वस्य** तत्र **स्थातुमयोग्यार्थ**मिति "यो वै भूमा तत्सुख"मित्यादिभूमविद्यासिद्धस्वरूपनिर्देशेन सर्वत आधिक्यसूचनात् परमकाष्ठापन्नस्य परब्रह्मणोन्तरङ्गलीलास्थाने स्थातुमयोग्यत्वमित्यर्थः, **अयोग्यार्थ**मिति भावप्रधानो निर्देशः, अयोग्यत्वार्थमिति फलति ।। ३७ ।। **ज्ञातं मम पुरैव**तदित्यत्र **शापो ह्यपकारे भव**तीति न हि भवद्भ्यां मुनिना शापो दत्तः किन्त्वनुग्रहः कृतः, तत्र हेतुः, **शापो ह्यपकारे भव**तीति, यद्यपकारः स्यात् तदा शापत्वेन गण्येत, इह तूपकारः कृत इति न शापत्वमितिभावः, **स शापदातुः समानाधिकरण** इति **शापदातुः** शापदातृसम्बन्धी शापदात्रा कृत इतियावत्, शापदात्रा कृतोपकारः **शापसमानाधिकरणो भवति** यत्र शापस्तत्रैवापकारो भवतीत्यर्थः, प्रकृते तु शापाधिकरणयोर्यमलार्जुनयोरपकारादर्शनात् प्रत्युत भगवत्सम्बन्धलक्षणोपकारदर्शनान् न शापत्वमपि त्वनुग्रह एवेति हार्दम् ।। ४० ।।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

वाणी गुणानुकथन इत्यत्र वागिति का० ९९¾ । वागादिकार्याण्याहुः **कीर्तने** इति का० १००¼ । गुणानां स्मरणे रूपस्य दास्ये इत्यर्थः, **अवतीर्णस्ये**ति भक्तेष्वाविष्टस्येत्यर्थः, 'दृष्टिः सतां दर्शने'स्त्विति मूलानुरोधात् **अवतीर्णस्ये**तिपदेन सतामप्यवतारतुल्यत्वं बोधितम् ।। १००¾ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

"व्यापकस्व सर्वसाक्षिणस्तव किं न विदितम् ? तथापि सेवकविज्ञापनं प्रार्थनं च शृणु" इत्याशयेन सम्बोधयतः- **भूमन्निति** । तवानुचरस्य रुद्रस्य; कुबेरस्य वा, नारदस्य वा **किङ्करौ नौ** आवां **अनुजानीहि** बुद्ध्यस्व । नौ आवयोर्भगवतस्तव

दर्शनमृषेर्नारदस्यानुग्रहादासीत् ॥ ३७ ॥ एवं स्तुत्वात्मविज्ञापनं च कृत्वा भक्तिं प्रार्थयतः—वाणीति । चकार एवकारार्थः, तस्य सर्वत्र च सम्बन्धः । 'न' इति 'आवयोरस्मत्सबन्धिनां च' इत्यभिप्रायेण बहुवचनम् । अस्माकं वाणी तव गुणानुकथने एवास्तु । श्रवणौ तव कथायामेवास्ताम् । हस्तौ तव कर्मसु मन्दिरमार्जनादिसेवास्वेवास्ताम् । मनस्तव पादयोः स्मृत्यामेवास्तु । शिरःस्तव निवासभूतं यज्जगत् तस्य प्रणामे एवास्तु । दृष्टिर्भवतस्तनूनां मूर्तीनां सतां भक्तानां च दर्शने एवास्तु ॥ ३८ ॥ इत्थं ताभ्यां नलकूबरमणिग्रीवाभ्यां सङ्कीर्तितः संस्तुतो दाम्ना चकारात् स्वकृपया यशोदाप्रेम्णा चोलूखले बद्धो भगवान् गुह्यकौ प्राप्तगुह्यकरूपौ प्रति प्रहसन्नाह—"गोकुले उत्पन्नयोस्तयोः सन्माननं गोकुलस्वामिनाऽवश्यं कर्तव्यम्" इत्याशयेनाह–गोकुलेश्वर इति ॥ ३९ ॥ तदुक्तिमेव दर्शयति—ज्ञातमिति त्रिभिः । श्रीमदान्धयोर्युवयोः करुणात्मना कृपालुना ऋषिणा नारदेन यत् वाग्भिर्विभ्रंशः श्रीमद्भ्रंशः मद्दर्शनभक्तिलाभरूपोऽनुग्रहश्च कृतस्तदेतत् पुरा त्वद्विज्ञापनात् पूर्वमेव मम ज्ञातमित्यन्वयः ॥४०॥

अन्वितार्थप्रकाशिका

अन्विति ॥ हे भूमन् ! तवानुचरः शिवः । रुद्रस्यानुचरौ इत्युक्ते कुबेरो नारदो वा तस्य किंकरौ नौ आवाम् अनुजानीहि स्वस्थानं गन्तुमनुमन्यस्व । नौ आवयोर्भगवतस्तव दर्शनमृषेर्नारदस्यानुग्रहादासीत् ॥ ३७ ॥ वाणीति ॥ चकार एवकारार्थः । तस्य सर्वत्र संबन्धः । न इति । स्वगृहं गतयोरपि आवयोरस्मत्संबन्धिनां चेत्यभिप्रायेण बहुवचनम् । अस्माकं वाणी तव गुणानुकथने एवास्तु । श्रवणौ तव कथायामेवास्ताम् । हस्तौ तव कर्मसु मन्दिरमार्जनादिसेवास्वेव स्ताम् । मनस्तव पादयोः स्मृत्यामेवास्तु । शिरस्तव निवासभूतं यज्जगत्तस्य प्रणामे एवास्तु । दृष्टिर्भवतस्तनूनां मूर्तीनां सतां भक्तानां च दर्शने एवास्तु । भवत्तनूनामिति सतां विशेषणं वा ॥ ३८ ॥ इत्थमिति ॥ इत्थं ताभ्यां नलकूबरमणिग्रीवाभ्यां संकीर्तितः संस्तुतो दाम्ना उलूखले बद्धः गोकुलेश्वरो भगवान् गुह्यकौ प्राप्तगुह्यकरूपौ तौ प्रति प्रहसन्नाह स्म ॥ ३९ ॥ ज्ञातमिति ॥ श्रीमदान्धयोः युवयोः करुणात्मना कृपालुना ऋषिणा नारदेन यत् स्यातान्नैवं यथा पुनरित्यादिवाग्भिर्विभ्रंशः श्रीमदभ्रंशरूपोऽनुग्रहः विभ्रंशः मद्दर्शनभक्तिलाभरूपोऽनुग्रहश्चेति वा कृतस्तदेतत्पुरा युवयोर्विज्ञापनात्पुरा पूर्वमेव मम ज्ञानम् ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नौ आवां अनुचरस्य देवर्षेः किंकरौ दासौ नौ आवयोर्भगवतस्तव दर्शनं ऋषेर्नारदस्यानुग्रहादासीत् ॥ ३७ ॥ आवयोस्तव भक्तिराहित्यं न स्यादिति प्रार्थयंतावाहतुः वाणीति नः इति आस्मदो द्वयोश्चेति द्विवचनस्थाने बहुवचनं न आवयोः वाणी तव गुणाऽनुकथने अस्तु मनस्तव पादयोः स्मृत्यामस्तु अंतर्यामिशक्त्या तव निवासभूतं यत् जगत्तस्य प्रणामे नमने नः शिरः अस्तु आवाभ्यां यस्य कस्यापि द्रोहो मास्त्वित्यर्थः भवत्तनूनां तव मूर्त्तानां सतां साधूनां च दर्शने नौ दृष्टिरस्तु ॥ ३८ ॥ संकीर्त्तितः संप्रार्थितः ॥ ३९ ॥ तदेतन्मम मया पुरैव ज्ञातं करुणात्मना कृपामयमूर्त्तिना श्रीमदेन अंधयोर्युवयोर्वाग्भिर्विभ्रंशो देवलोकात्पातनरूपः यद्यः अनुग्रहः कृतः तज्ज्ञातमिति संबंधः ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थं संस्तुत्यात्मनोः कृतार्थत्वाय तद्दास्यं प्रार्थयमानौ विज्ञापयतः ॥ अनुजानीति ॥ हे भूमन् निरवधिकानन्दकारिन् , तव अनुचरकिंकरौ त्वद्दासः कुबेरस्तस्यापि दासौ, नौ आवां, अनुजानीहि । तव दासदासौ यथा भवावस्तथाऽनुशाधीत्यर्थः । भगवदनुचरानुचरत्वतो जातं फलं तन्माहात्म्यं च दर्शयन्तावूचतुः । ऋषेस्तवानुचरस्य नारदमुनेः, अनुग्रहात् एव, नावावयोः, भगवतः परमेश्वरस्य तव, दर्शनं आसीत् । एवं त्वद्दासदासत्वे महाफलत्वात्त्वद्दासदास्यमेवानुगृहाणेति भावः ॥ ३७ ॥ किं चावयोर्वाण्यादयस्त्वद्गुणानुकथनादिप्रवणा यथा स्युस्तथाऽनुगृहाणेत्यूचतुः ॥ वाणीति ॥ हे कृष्ण, नोऽस्माकं, वाणी, तव गुणानुकथने त्वद्गुणगायने, अस्तु भवतात् । नः इति बहुवचनं स्वसंबन्धिनामप्युपलक्षणार्थम् । श्रवणौ कर्णौ, तव कथायां त्वत्त्वदीयचरित्रवर्णनयुक्तप्रबन्धादिश्रवणे इत्यर्थः । स्ताम् । हस्तौ च कर्मसु त्वत्संबन्धिपूजादिसत्क्रियास्वित्यर्थः । स्ताम् । मनः; तव पादयोः स्मृत्यां, अस्तु । गच्छन्ति सर्वजनहितार्थमतिशयेन यतस्ततो भ्रमन्तीति जगन्तः, तव निवासो येषु तव निवासाश्च ते ये जगन्तो भगवद्भक्तजनास्तेषां प्रणामस्तस्मिन् , नः शिरः अस्तु । भवत्तनूनां त्वन्मूर्त्तिरूपाणां, सतां साधूनां, दर्शने नः, दृष्टिः अस्तु । यद्वा । निवासो निवासभूतं जगद्यस्य तत्सम्बुद्धौ हे निवासजगद्भगवन् , तव सतां प्रणामे शिरः, अस्तु । भवत्तनूनां स्थावरजङ्गमात्मकत्वम्मूर्त्तानां, दर्शने नः दृष्टिः अस्तु ॥ ३८ ॥ इत्थमिति ॥ इत्थमुक्तप्रकारेण, ताभ्यां यक्षाभ्यां, संकीर्त्तितः संस्तुतः, दाम्ना उलूखले बद्धः च, गोकुलेश्वरः, भगवान् प्रहसन् सन्, गुह्यकौ आह ॥ ३९ ॥ ज्ञातमिति ॥ हे गुह्यकौ, करुणात्मना दयालुना, ऋषिणा, वाग्भिः 'न ह्यन्यो जुषतो जोष्यान्' इत्यादिभिर्वचोभिः, विभ्रंशः श्रीभ्रंशरूपः, अनुग्रहः कृतः यत् , एतदेषोऽनुग्रह इत्यर्थः । पुरा एव, मम मया, ज्ञातं अस्ति ॥४०॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अनुजानीहि इति : १०.१०.३७.

यदामयच्छेदि सुखैककारणं तदौषधं कट्विति को नु वर्णयेत्।
तथा रमानाथ तव प्रसादको न चैष शापोऽयमनुग्रहो महान्॥ ६७ ॥

वाणी गुणान्विति : १०.१०.३८.

यशोदयाऽनुसंयतो गुणोऽजनीह कारणं निजोद्धृताविति स्म तौ विचिन्त्य चेतसा चिरम्।
गुणानुवर्णनार्थनां यदादितो हि चक्रतुः क्षमं यतो जनोऽखिलो निजेष्टकृत्स्तुतीक्षणः॥ ६८ ॥
श्रीमदेष्वन्धता नित्यमस्त्येवेति विभाव्य तौ। चक्राते प्रार्थनां युक्तः दृष्टिरस्तु सदीक्षणे॥ ६९ ॥
ईदृग्जघन्यरूपस्थितिकारणमेकमेव सद्वीक्षा। जानन्ताविति युक्तं तद्दर्शनदृगवधानमवृणीताम्॥ ७० ॥
यद्यदर्थितमेतेषु वितर त्वं यथारुचि। परमानन्दकन्दं तु साधुसङ्गदिशानिशम्॥ ७१ ॥
यत्तातो राजराजो धनमपि निधयो यक्षकन्या रमण्यो रूपं कामाभिरूपं वपुरपि तरुणं पुष्पकं यानमस्ति।
पूरेषा चालकाऽपि प्रभुवर भवतो दर्शनादस्ति मोक्षस्तन्ना यत्प्रार्थनीयं किमपि दिश तवाविस्मृतिं कृष्णनाम्नः॥ ७२ ॥

प्रहसन्नाहेति : १९.१०.३९.

मुक्तोऽहमस्मि यदमुक्तजनस्तुताङ्घ्रियुक्तं तदेतदधुना तु तदन्यथैव।
इत्यात्मचित्रचरितोल्लसितान्तरङ्गतोषः स एष भगवानुचितं जहास॥ ७३ ॥
सद्यः फलत्यघदं कर्म कृतं तु पुण्यं तादृङ् न किन्तु समयान्तरदर्शितेष्टम्।
यत्तत्क्षणं मुनिगिरा तरुतामवाप्तौ लब्धाच्युतेक्षणतया च न मुक्तिभाजौ॥ ७४ ॥
पुण्यापुण्ये कर्मणी द्वे अपीह लोके स्यातामाश्ववश्यं फलाढ्ये।
तत्राप्याद्यं नान्त्यवद्यत्स चौर्यात्सद्यो बन्धं प्राप मुक्तिं न पुण्यात्॥ ७५ ॥

कृष्णप्रिया

हे अनन्त। हे भूमन्! हम आप के अनन्य सेवक श्रीनारदजी के हम दास हैं। देवर्षि भगवान् श्रीनारदजी के केवल अपार अनुग्रह से हमसे विषय लम्पटों को आप के दर्शन हुए अब हमे जाने की अनुज्ञा दीजियें॥ ३७॥ हे नाथ हमारी वाणी आप के रसमय गुणों के संकीर्तन में, हमारे कान आप को रस सभर लीला कथाओं के श्रवण में, हमारे दोनों हस्त आप के श्री चरणों के सेवन में और हमारा मन आप के चरण कमलों के स्मरण में लगा रहे और हे सर्व जगत् के निवास स्थान भगवन् कृष्ण! आप के प्रणाम में हमारा मस्तक रहे, अथवा हमारा मस्तक सिर आप के निवास स्थान व्रजमण्डलके प्रणाम में रहे। एवं हे नाथ संतजन आप के ही श्रीविग्रह स्वरूप उनके दर्शन में हमारी आँखें लगी रहे॥ ३८॥ **श्रीशुकाचार्यजी ने कहा**—राजन्! उन दोनों के इस प्रकार स्तुति करने पर ओखली में रस्सी से बँधे हुए गोकुलेश्वर भगवान् श्रीकृष्ण ने मन्दस्मित करते हुए उन गुह्यकों से कहा॥ ३९॥ **भगवान ने कहा** - हे नलकूबर मणिग्रीव इस प्रसङ्ग को तो मैं पहले से ही जानता हूँ कि परम कारुणिक महर्षि नारदजी ने धन मदान्ध तुम्हारे कल्याण के लिये शाप देकर अनुग्रह किया है॥ ४०॥

साधूनां समचित्तानां सुतरां मत्कृतात्मनाम्। [1]दर्शनान्नो भवेद् बन्धः पुंसोऽक्ष्णोः सवितुर्यथा॥ ४१॥
तद् गच्छतं [2]महाभागौ [3]नलकूबर सादनम्। सञ्जातो मयि भावो वामीप्सितः [4]परमोऽभवः॥ ४२॥

श्रीशुक उवाच

इत्युक्तौ [5]तं परिक्रम्य प्रणम्य च पुनः पुनः। बद्धोलूखलमामन्त्र्य जग्मतुर्दिशमुत्तराम्॥ ४३॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे[6] दशमोऽध्यायः॥ ६॥

---

१. दर्शनान्तो—वीर.। २. मत्परमौ—श्रीधर. वंशी. वीर. विज. जीव.। ३. नरवाहनिकेतनं—विज.। ४. परमोत्सवः—वीर.। ५. तौ—श्रीधर. वंशी.; तं—वीर. विज.। ६. यमलार्जुनभञ्जनं नाम—गो. प्रे.; पूर्वार्धे नारदशापो नाम—श्रीधरादयः।

कर्दमक्षमा

अन्वयः—समचित्तानां सुतरां मत्कृतात्मनां साधुनां अक्ष्णोः सवितुः यथा दर्शनात् पुंस बन्धः नो भवेत् ॥ ४१ ॥ नलकूबर ! महाभागौ तत् सादनं गच्छत वां ईप्सितः अभवः परमः परमः भावः मयि सञ्जातः ॥ ४२ ॥ बद्धोलूखलं तं परिक्रम्य पुनः पुनः प्रणम्य च आमंत्र्य इत्युक्तौ उत्तरां दिशं जग्मतुः ॥ ४३ ॥

इति दशमोऽध्यायः समाप्तः ॥ १० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

युक्तमेवैतदित्याह। साधूनां स्वधर्मवर्तिनां समचित्तानामात्मविदां सुतरां मत्कृतात्मनां मय्यर्पितचित्तानां तेषां कृपातिरेकात्सुतरामित्युक्तम्। सवितुर्दर्शनादक्ष्णोर्यथा बंधो न भवेत्तद्वत् ॥ ४१ ॥ प्राधान्यादेकस्य संबोधनम्। हे नलकूबर युवां तत्तस्मात्सादनं स्वनिकेतं मत्परमौ संतौ गच्छतम्। वां युवयोरीप्सितोऽपेक्षितो मयि प्रेमा जात एव। अभवः न भवो यस्मिन्सः ॥ ४२ ॥ बद्धोलूखलं बद्धमुलूखलं यस्मिंस्तम् ॥ ४३ ॥

इति श्रीमद्भागवते म० दशमस्कंधे पू० टीकायां यमलार्जुनमुक्तिनिरूपणं नाम दशमोऽध्यायः ॥ १० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतदनुग्रहकरणम्। कृपातिरेकाद्दयाधिक्यात्। तद्वत्साधूनां दर्शनादपि बंधो न किं तु बंधनिवृत्तिरेव तत्कृपया मत्स्मरणदर्शनादिनेति भावः। दर्शनांत इति पाठे दर्शनपर्यंत एव। यद्वा—दर्शनेनांतो नाशो यस्य सः। इह सवितुर्दर्शनान्यंधानां तमो यथा न नश्यति यथा नानापराधमलिनचेतसामसुराणां श्रीनारदादिदर्शनादपि न बंधक्षय इत्यप्यसूचि ॥ ४१ ॥ प्राधान्याद्वा लिंगसमवायेन यस्मात्साधुदर्शनं बंधहेतुर्न तस्माद्धेतोः। भवः संसारः ॥ ४२ ॥ उलूखले बद्धो बद्धोलूखलः। आहिताग्न्यादित्वात्साधुः। उलूखलस्यापि तच्छक्त्यावेशात्तस्मा अपि प्रणामादि कृतम्। तदुक्तं पाद्मे 'नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने'। इत्यादिना उत्तरां दिशं तत्रत्यामलकाम् ॥ ४३ ॥ "यत्र मंथां मां विबध्नते रश्मीन् यमितवा इव उलूखलसुतानामवेद्विंद्रजल्गुलः ताता अद्यवनस्पती ऋष्वा वृष्वेभिः सोतृभिः इंद्राय मधुमत्सुतम्" इति श्रुतिर्यमलार्जुनपातमाह। अर्थः—यत्र उलूखले मंथां मंथानमिव मंथानं लोकक्लेशकरं मां विबध्नते विशेषेण बध्नंति मातरः रश्मीनादाय रश्मिभिरित्यर्थः। यमितवा इव विनिग्रहीतुमिव न तु वस्तुतो निग्रहीतुं मातृत्वेन मयि स्निग्धत्वात् तेनोलूखलेन सुतानां पीडितानाम्। कर्मणि षष्ठी। उलूखलपीडितानस्मान् हे इंद्रमोचनसमर्थ। अव रक्ष। पादादित्वादाद्युदात्तमाख्यातम्। इदु एवमेव त्वं जल्गुलासि एनं मुंचामीति जल्पितुं मां च गोपितुं त्रातुं लातुं आदातुं स्वाधीनं कर्तुं च समर्थोसि यतोऽतोऽवमामित्यर्थः। एवं यदा सर्वान्प्रार्थयन्नपि न मोचनं लभते तदा वनस्पत्योरंतरो गत्वा बंधनदाम त्रोटितुं यावद्बलं करोति तावद्वनस्पती एवोन्मूलितौ। दृष्ट्वा वदति ताता इति। तातौ नोस्माकं व्रजवासिनां वनस्पतिप्रसिद्धौ यमलावर्जुनजातीयौ भो वनस्पती अद्येंद्रायेंद्रं प्रति गंतुं सुतं तदुन्मूलनेनात्मानं पीडयतं तदेव मधुमत अमृतयुक्तमतिसम्यगित्यर्थः। यत्र ऋष्टौ गतिमंतौ युवां स्थावरत्वान्मुक्तौ स्थ इत्यर्थः। ऋष्वेभिर्गतिमद्भिर्जंगमैर्जनैः सोतृभिरस्मद्बंधनकरैरुपलक्षिताविति ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्धे दशमोऽध्यायः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

साधूनामिति तैर्व्याख्यातमेव तत्र पूर्वयोर्यथायथं यत्किञ्चित् बन्धनहारित्वं सुतरामित्यनेन व्यञ्जितं यद्वा साधूनामिति कृपालुतायां समचित्तानामित्यपराधाग्रहणे मत्कृतात्मनामित्यस्य स्वाभाविकगुणव्यञ्जकं विशेषणत्रयं तेषां दर्शनादपि पुंसो जीवमात्रस्य सुतरां संसारबन्धो न भवेत् किं पुनस्तादृशबहुलबालकप्रयोगानुग्रहात् भवतोरवज्ञातृत्वादेव तदपेक्षा जातेति भावः। सुतरामिति श्रवणकीर्तनादिनाऽपि न भवेत् दर्शनात्तु सुतरामिति ज्ञापकम् अक्ष्णोर्बन्धस्तमःकृतः अत्र च दर्शनादिति सुतरामित्यपेक्षया तत्पूर्वतोऽपि तन्नाशात् ॥ ४१ ॥ मत्परमौ मदेकान्तिनौ सन्तौ यतः सञ्जात इति अन्यत्तैः यद्वा युवयोर्मयि भावः प्रेमा नारदानुग्रहात् सम्यग्जात एव सतः परमो भवः अभ्युदयः मदेकभक्तिलक्षणः "वाणी गुणानुकथने" इत्यादिना युवाभ्यामीप्सितः एवं श्रीनारदानुग्रहसम्बन्धेन निजसन्तोषातिशयव्यञ्जनात् तदतिशयोऽपि स्यादिति व्यञ्जितं सहजविनयादिगुणामृतपयोनिधित्वात् साक्षात्तु नोक्तमिति ज्ञेयम् ॥ ४२ ॥ पुनर्बद्धोलूखलमिति श्रीशुकदेवस्य कौतुकोक्तिः यस्तया बद्धस्सन् देवा अपि स्तुवन्ति वदन्त इति तथा तादृशभक्तवश्यतामयमधुरलीलादिदृक्षया मुहुः परिक्रमादिहेतुश्च अत्र बहुव्रीहिणा निर्देश उलूखलस्य तदनुगतिविवक्षया सा च बन्धनीयबन्धनाश्रयवैपरीत्यमयतल्लीला कौतुकव्यञ्जिकेति उलूखलमात्रविशेषणं न तूपलक्षणं ततस्तस्मा अपि प्रणामादिकं कृतमिति ज्ञेयं तथोक्तं पाद्मे "नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने" इति आमन्त्र्य च भक्त्येति ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां दशमोऽध्यायः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

सन्दर्शनादपि पुंमात्रस्यापि संसारबन्धो न भवेत्, किं पुनस्तादृश बहुलवाक् प्रयोगानुग्रहाद्भवतोः श्रीरुद्रसेवकयोरित्यर्थः। पुंस इति प्रायस्तस्यैव साधुदर्शनयोग्यत्वात्। अक्ष्णोर्बन्धो दृष्ट्योः प्रसरणम्। यद्यपि सूर्य्यदर्शनात् प्रागपि तमोनाशेनाक्ष्णोर्बन्धो न तिष्ठेत्तथापि सम्यक्तापेक्षया मत्कृतात्मनामित्यत्र दृष्टान्तत्वेन दर्शनादित्युक्तम् ॥ ४१ ॥ मत्परमौ मदेकान्तिनौ सन्तौ, यतः सञ्जात इति। अन्यत्तैर्व्याख्यातम्। यद्वा, हे मत्परमौ युवयोर्मयि भावः। प्रेमा सम्यग् जात एव, यतः परमो भवोऽभ्युदयो मदेकभक्तिलक्षणो (३८ श-श्लो०) वाणी गुणानुकथने' इत्यादिना युवाभ्यामीप्सितः। एवं युवयोः सौशील्येनैव स्वतो मद्भावो वृत्तः। तत् किं मया स देय इति सहजविनयादिसमस्तकल्याणगुणामृतोदधिना साक्षात्तथास्त्वित्यनुक्तोऽपि वाक्चातुर्य्या वरो वाञ्छतीतोऽपि नितरां दत्त एव ॥ ४२ ॥ पुनः पुनः परिक्रमादौ हेतुः—बद्धमुलूखलं यस्मिन्नित्युदरे उलूखल बन्धनेन परम मोहन रूप-लीलादिदृष्ट्या भक्त्युद्रेकेण परित्यागाशक्तेः, यद्वा, उलूखलसहितस्यैव तस्य परिक्रमादिनोलूखलादेरपि परिक्रमादिकं बोधितम्। आमन्त्र्यानुज्ञामादायेत्यर्थः। उत्तरां दिशमिति प्रायस्तस्याः साधुवर्गसेवितत्वेन तद्दिग्गमनेच्छया तद्दिग्वर्ति-निजगृहं गतौ, न तु गृहापेक्षयेति भावः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां दशमोऽध्यायः ॥ १० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सन्दर्शनमक्ष्णोः नः कैवल्यनिरसनेनाऽनुग्राहकम् एवं साधूनां दर्शनमज्ञानापहमित्यर्थः ॥४१॥ सादनं सदनम् ॥४३॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृते शुकपक्षीये दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

युक्तमेवैतदित्याह–साधूनामिति। मत्कृतात्मनां मय्यर्पितचित्तानां साधूनां दर्शनमन्तो यस्य सः दर्शनावधिकः पुंसो बन्धो भवेत् यथा सवितुः दर्शनान्तोऽक्ष्णोर्बन्धः तमोरूपस्तद्वत् ॥ ४१ ॥ हे नलकूबर ! युवां तत्तस्मात्सादनं सदनं सन्निकेतनं स्वनिकेतं प्रति गच्छतं, कथम्भूतौ ? अहमेव परो मा यस्मात्स ययोस्तौ न विद्यते भवः संसारो यस्मात्सोऽभवः मयि भावोभिप्रायविशेषः प्रीत्यात्मकः वां युवयोः सञ्जात एव ॥ ४२ ॥ इत्थमुक्तौ तौ बद्धमुलूखलं यस्मिंस्तं कृष्णं परिक्रम्य पुनः पुनः प्रणम्य चामन्त्र्य पृष्ट्वा उत्तरां दिशं जग्मतुः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मत्कृतात्मनां मय्येव सन्निहितमनसाम् ॥ ४१ ॥ नरवाहो वैश्रवणः तस्य निकेतनं गृहम् ॥ ४२ ॥ बद्धोलूखलम् उलूखलबद्धं श्रीकृष्णम् ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां दशमोऽध्यायः ॥ १० ॥

(विजयध्वजतीर्थपाठे एकादशः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

समचित्तानामिति अपराधाग्रहणे साधूनामित्यनुग्रहे विशेषणम् ॥ ४१–४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

ननु, तं दृष्ट्वाप्यसंमानयतोरावयोस्तदनुग्रहः कथं सम्भवेत्तत्राह–साधूनामिति। समचित्तानां स्वमानापमानाभ्यामक्षुभ्यतां सुतरामतिशयेन मय्येव कृत आत्मा मनो यैस्तेषां दर्शनान्तःदर्शनपर्य्यन्त एव। यद्वा, दर्शनेनान्तो नाशो यस्य स सवितुर्दर्शनादक्ष्णोर्बन्धस्तमः कृतो यथा नाश्यति तथेति तेनान्धानां सवितुर्दर्शनादपि यथा तमो न नश्यति तथैव नानापराधमलीमसमानसानामसुराणां श्रीनारदादिदर्शनादपि न बन्धक्षय इति ज्ञापितम् ॥ ४१ ॥ प्राधान्यादेकं सम्बोध्याह-हे नलकूबर ! अहमेव परमः सेव्यो ययोस्तथाभूतौ सन्तौ सादनं सदनं न भवः संसारो यतः सः ॥ ४२ ॥ उलूखले बद्धं बद्धोलूखलम् आहिताग्न्यादि ॥ ४३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। दशमे दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीनारदप्रसादाल्लब्धभक्ती तौ दृष्ट्वा स्वयं हरिः साधुदर्शनमाहात्म्यमाह–साधूनामिति। सुतरां मत्कृतात्मनां साधूनां दर्शनात् बन्धो न भवेत् किं पुनस्तेषामुपासनादिभ्य इत्यर्थः। सवितुर्दर्शनादक्ष्णोर्बन्धो यथा न भवति तद्वत् ॥४१॥ प्राधान्यादेकं सम्बोधयन् आज्ञापयति–तदिति। हे नलकूबर यः ईक्षितोन्येषां वाञ्छितः केवल न तु प्राप्तः सः अभवः नास्ति भवो स अभवः वां युवयोः सञ्जातः तत्तस्मात् युवां मत्परमौ सन्तौ सादनं स्वस्थानं गच्छतम् ॥ ४२ ॥ इत्येवं भगवतोक्तौ बद्धोलूखलं बद्धमुलूखलं यस्मिन् तं भगवन्त पुनः पुनः परिक्रम्य प्रणम्य च आमन्त्र्य पृष्ट्वा उत्तरां दिशं जग्मतुः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे दशमाध्यायार्थप्रकाशः ॥ १० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु तं वीक्ष्याप्यादरमकुर्वतोरावयोः कथं तदनुग्रहस्तत्राह साधूनामिति। समचित्तानां स्वादरानादराभ्यामक्षुभ्यतां मय्येव कृतोऽर्पित आत्मा मनो यैस्तेषां दर्शनाद्बन्धो न भवेत् सवितुर्दर्शनादक्ष्णोस्तिमिररूपो बन्धो यथा न स्यात् ॥ ४१ ॥ हे नलकूबरेति प्राधान्यादेकस्य सम्बोधनं तत्तस्माद् युवा सादनं स्वगृहं गच्छतं मत्परमौ सन्तौ वां भावो मयि सञ्जातः नास्ति भवः संसारो येन सोऽभवः अधिकारान्ते मोक्षो भविष्यतीति भावः ॥ ४२ ॥ उलूखले बद्धं बद्धोलूखलं आहिताग्न्यादिः आमन्त्र्यानुज्ञाप्य ॥ ४३ ॥

मम मात्रा निबद्धस्य मोचकस्यापि मोचनम्। नान्यस्तातं विना कुर्यादिति कृष्णो व्यजिज्ञपत् ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां दशमोऽध्यायः ॥ १० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सतां माहात्म्यं स्वमाहात्म्यमहत्त्वदात्रिति तौ प्रति तदाह। साधूनामिति। समचित्तानां मित्रामित्रमनोरहितानां तत्रापि सुतरां मत्कृतो मयि कृतः समर्पित आत्मा मनो येषां नारदादीनां दर्शनाद्बन्धो नो भवेत्। कृतात्मनां शिक्षितमतीनां मत्तः सुतरां बन्धो न भवेदिति किं वक्तव्यमित्यन्वयो वा। एवमन्वये सुतरामिति सुतरां लग्नमिति मन्तव्यम्। सवितुः सूर्यस्य दर्शनाद्दर्शनमप्राप्य पुंसोऽवलोकयितुर्जनस्य यथा बन्धो यक्ष्माच्छादनरूपो भवेन्न तथेति व्यतिरेकदृष्टान्तः। सूर्यावलोकयितृलोचनाच्छादनं तत्तो यतो भवतीत्यामरपामरं विदितमिति। सवितुर्दर्शने कर्तव्यतयोपस्थिते यथा बन्धो न भवेत्तथेत्यन्वयदृष्टान्तो वा। बन्धोऽन्धकारं वा ॥ ४१ ॥ परम उत्सवो येन स ईप्सितो वाञ्छितो वा मयि भावो भक्तिः सञ्जात इति मत्परमौ। अहं परम उत्तमो ययोस्तौ मयैव परा मा ज्ञानं पुनर्मदानर्पिका ययोस्ताविति वा। नरवाहनिकेतनं नरवाहः कुबेरः पिता तस्य निकेतनमलकां तद्गच्छतम्। नलकूबरसादनमिति पाङ्क्तः पाठो मञ्जुलश्च। प्राधान्यादेकस्य सम्बोधनं हे नलकूबर तत्तस्मात्सादनं सदनमिति विवरणकृद्बादरायणकालिक इति स्वं मन्यत इति तदुपेक्ष्यम्। नरवाहनी कुबेरस्तस्य केतनं निकेतनमिति वा ॥ ४२ ॥ बद्धोलूखलं बद्धमुलूखलं यस्मिन्स तम्। ननु स्वयं तेन मोचिताविर्त्युचितम्। तदुलूखलबन्धमोचनमतयोरित्यनयोर्गमनं तथेवेति चेत्। न। एतदवतारेऽर्जुनमोचकोऽयमेवास्मत्तो मोचनेऽर्जुनमोचितः कृष्ण इत्यपप्रथा स्यात्स्वावचप्रत्यवायिनावावामिति मतिमन्तौ विना मोचनं जग्मतुरिति तात्पर्यमनेन सूचितं ज्ञेयम्। आमन्त्र्य गच्छाव इत्युक्त्योत्तरां दिशं स्वतातपालितां जग्मुः ॥ ४३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे एकादशोऽध्यायः ॥ १०–११ ॥

श्रीसुबोधिनी

नन्ववश्यम्भावि चेत् तथात्वं किमिति **नारदेनोक्तं**? वचनात् तूष्णीम्भाव एवोचित इति चेत् तत्राह **साधूनामिति**, ये हि साधवस्तेषां दर्शने पुनर्बन्धो न भवति, ते हि ज्ञानव्याप्ता वह्निनायःपिण्ड इव, यथा तत्सम्बन्धेऽग्नेरप्यधिको दाहो भवत्येवमेव ब्रह्मज्ञानापेक्षयापि सद्दर्शने बन्धनिवृत्तिर्भवति, साधवः सदाचाराः **समचित्ता** ज्ञानिनः, अतो ज्ञानकर्मणोः सद्भावादेते मुक्ता एते मुक्ता इति वैलक्षण्यज्ञानं न समदर्शित्वबाधकं, नापि तैस्तथा सम्पाद्यते, किन्तु तेषां **दर्शनमेव** मुक्तिसाधकं, किञ्च **नितराम्मत्कृतात्मनामिति**, मयि **कृत आत्मा** यैः समर्पितात्मानः, **मत्कृते** वात्मा येषां, **कर्मज्ञानभक्तीनां** तेषु सिद्धत्वाद् **बन्धः** सर्वथा न भवति, तमो निवर्तितं कर्मणा रजो ज्ञानेन सत्त्वं भक्त्येत्यतो न केनाप्यंशेनावशिष्यते, अत एव पूर्णकर्माणो वस्वादिभावं प्राप्नुवन्ति ततोपि ज्ञानिनो ब्रह्मविदः **सनकादय** इव भवन्ति, ततोपि भक्ता **मद्भावं** प्राप्नुवन्तीति तदाह **दर्शनान्नो भवेद् बन्ध** इति, **पुंस** इति, मर्यादाधिकारिणस्तु ततो बन्धो निवर्तते, **अहं त्वनधिकारिणोपि निवर्तक** इति विशेषः, तथाप्यप्रार्थितं कथं दत्तवन्त इत्याशङ्क्य दृष्टान्तेन निराकरोत्य**क्ष्णोः सवितुर्यथेति**, **अक्ष्णोर्बन्धनमन्धकारः**, स **सवितृदर्शने** निवर्तत एव ॥४१॥ न हि वस्तुशक्तिः प्रार्थनादिकमपेक्षते तस्मान्मोक्षस्तु पूर्वमेव सिद्धो भक्तिरपि सिद्धेऽपि वदन् प्रार्थितमाह **तद् गच्छतमिति**, भक्तेः

कारणमाह **महाभागाविति**, अनन्तकोटिजन्मपुण्यपापयोरुपार्जितयोर्मध्ये दिव्यशतवर्षपर्यन्तं मत्प्रतीक्षाभावात् सर्वमेव पापं नष्टं, पुण्यं त्ववशिष्यते, तदुक्तं **महाभागाविति**, **नलकूबरे**त्येकस्यैव प्रसादः, **सादनं** गृहं, यत्रावसादं प्राप्तौ, अनेन तत्रासक्तिर्न भविष्यतीति सूचितं, **मयि** तु मद्विषयको **भावः** प्रेमलक्षणकः **सञ्जात** एव, तेनैव श्रवणादिकं स्वत एव भविष्यति, अप्रार्थितत्वादनभिमतमित्याशङ्क्याहे**प्सित** इति, तत्र हेतुः **परमोभव** इति, **भाव** एवान्तिमजन्मरूपो न तस्मादप्यन्यज् जन्म भवतीति **परम**त्वं, अतो जन्मभिः क्लिष्टानां सर्वेषामेव **मयि भावः** प्रार्थनीयो भवति, अतो वां युवयोरपी**प्सित**त्वात् सम्यग् जातः ॥ ४२ ॥ एवमुक्तौ तत्रोचितं कृत्वा गतवन्तावित्याहे**त्युक्तौ**, **तमि**ति बालकव्युदासः, बहुवारं प्रदक्षिणां कृत्वा प्रतिप्रदक्षिणं **नमस्कृत्य च**कारात् स्वदीनतां चाविष्कृत्य लीलाभावादिभिरप्यमोहितौ सन्तौ **बद्धमुलूखलं** यस्मिन्निति, **आमन्त्र्य** 'गच्छाव' इत्युक्त्वो**त्तरां दिशं** स्वस्थानं **जग्मतुः**, एवं गोकुलवासिनोर्वृक्षयोरपि निरोध उक्तः ॥ ४३ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तरप्रमाणप्रकरणे
वैराग्यनिरूपकषष्ठाध्यायस्य स्कन्धादितो दशमाध्यायस्य विवरणम् ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

साधूनामित्यत्र **सद्भावा**दिति सत्त्वभवनात्, ननु समचित्तत्वे कथं मुक्तोमुक्त इतिभेददर्शनमुपपद्यत इत्याशङ्क्याहु**रेत** इत्यादि, यथार्थवस्तुग्रहणात् प्रत्युत साधकमितिभावः, ननु फलतो वैषम्याभावेपि स्वरूपतस्तु नापैतीत्यत आहु**र्नापी**त्यादि, तथा च **सान्निध्यमात्रेण भवनान्** न स्वरूपतस्तथेत्यर्थः, **अवशिष्यत** इति बन्ध इतिशेषः, दोषनिवृत्तिमुक्त्वा फलप्राप्तिरपि ततो भवतीत्यत **आहुरत एवे**ति दर्शनादेव, **दत्तवन्त** इति साधव इतिशेषः ॥ ४१ ॥ **तद् गच्छत**मित्यत्र ननु नलकूबरेत्यत्रैकशेषः कथं सङ्गच्छत इत्यत आहु**स्तत** इत्यादि, तथा च स्थूलदेहापेक्षया सूक्ष्मस्योत्कृष्टत्वात् तस्य च मनोरूपस्योभयोः समानत्वात् स्वरूपैकशेष इत्यर्थः, **अप्रार्थितत्वादनभिमत**मिति "**वाणी**"तिश्लोके भावस्या**प्रार्थितत्वात्** तदान**मनभिमतं**, **सम्यग् जात** इति तथा च तदानमप्यभिमतमेवेत्यर्थः ॥ ४२ ॥ **इत्युक्ता**वित्यत्र **लीलाभावादिभि**र्मोहने हेतुरुक्तो **बद्ध**मित्यादिस्तथाप्यमोहे हेतुः पूर्वमुक्तः, **एव**मित्यादिना कैमुतिकः प्रदर्शितः, तथा च यो गोकुले वृक्षयोरपि निरोधं करोति स मातुः कथं न कुर्यादिति **कृष्णस्तु गृहकृत्ये-ष्वि**त्यत्रीया शङ्का निरस्ता, एतेनैवैतदध्यायलीला न गोकुलविनियुक्तेत्यपि निरस्तम् ॥ ४३ ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाशे दशमाध्यायविवरणम् ॥ १० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

साधूनामित्यत्र **अत एवे**ति कर्मणा तमसो निवर्तितत्वादेवेत्यर्थः, **वस्वादीनां** सृष्टिकर्तृत्वात् तद्भा**वो** राजस इतिभावः, **सनकादय इवे**ति ज्ञानेन रजसो नाशनात् सात्त्विका भवन्तीत्यर्थः, "सत्त्वात् सञ्जायते ज्ञानं" इतिवाक्यात् सनकादीनां सात्त्विकत्वं, **मद्भाव**मिति भक्त्या सत्त्वस्यापि नाशनात् निर्गुणभावं प्राप्नुवन्तीत्यर्थः ॥ ४१ ॥ **इत्युक्तौ त**मित्यत्र **लीला भावादिभि**रिति बद्धोलूखलस्यैव नमनादिति भावः, **लीला** दाम्ना बन्धनं, **भावो** मानुषभावः, **आदिपदेन** तत्कालोचितसभयत्वादिकं तथा चेष्टया स्थितिश्च, कैरप्यमोहिताविर्त्यथः ॥ ४३ ॥

इति दशमोऽध्यायः ॥ १० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'युक्तमेव, एतन्नाश्चर्यम्' इत्याह—साधूनां स्वधर्मवर्तिनां समचित्तानामात्मविदां दर्शनात् पुंसः संसारबन्धो न भवेत्, निवर्तते इत्यर्थः। मत्कृतात्मनां मय्यर्पितचित्तानां दर्शनात्तु सुतरां बन्धो न भवेत्, तेषां कृपातिरेकात्। तत्र दृष्टान्तमाह—सवितुः सूर्यस्य दर्शनाद्यथाऽक्ष्णोर्बन्धोऽन्धकारो निवर्तते, तथा पुंसोऽज्ञानं निवर्तते इत्यर्थः ॥ ४१ ॥ प्राधान्यादेकमेव सम्बोधयति–हे **नलकूबरे**ति। तस्मान्मद्भक्तनारदानुग्रहेणैव कृतार्थत्वात् मत्परमौ अहमेव परमः इष्टदेवतया चिन्तनीयो ययोस्तथाभूतौ सन्तौ सादनं स्वनिकेतनं गच्छतम्। कृतार्थत्वमेव स्पष्टयति—सञ्जात इति। न भवः संसारो यस्मात् स अभवो यो मयि भावः प्रेमातिशयो वां युवयोरीप्सितोऽपेक्षितः स तु सम्यग्जात एव ॥ ४२ ॥ इत्येवं भगवता उक्तौ तौ नलकूबरमणिग्रीवौ बद्धमुलूखलं यस्मिंस्तं कृष्णं पुनःपुनः परिक्रम्य प्रणम्य आमन्त्र्य पृष्ट्वा च उत्तरां दिशं जग्मतुरित्यन्वयः ॥ ४३ ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने। दशमो विवृतोऽध्यायः कृष्णबन्धनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

साधूनामिति ॥ साधूनां स्वधर्मवर्तिनां समचित्तानामात्मविदां सुतरामतिशयेन मत्कृतात्मनां मय्यर्पितचित्तानां दर्शनमात्रात् सवितुः सूर्यस्य दर्शनाद्यथाऽक्ष्णोर्बन्धोऽन्धकारो निवर्तते तथा पुंसः संसारबन्धो न भवेत्। निवर्त्तत इत्यर्थः ॥ ४१ ॥ तदिति ॥ हे नलकूबर! प्राधान्यादेकस्य संबोधनम्। तस्मात् मद्भक्तनारदानुग्रहेणैव कृतार्थत्वात् मत्परमौ अहमेव परमः सेव्यो ययोस्तथाभूतौ सन्तौ। सदनमेव सादनम् अण्। स्वनिकेतनं गच्छतं यतः न भवः संसारो यस्मात्सः अभवो यो मयि परमो भावः प्रेमातिशयो वां युवयोरीक्षितोऽपेक्षितः स तु सम्यग्जात एव ॥ ४२ ॥ इत्युक्ताविति ॥ इत्येवं भगवता उक्तौ तौ नलकूबरमणिग्रीवौ बद्धमुलूखलं यस्मिंस्तं कृष्णम्। यद्वा उलूखले बद्धम् इति बद्धोलूखलमाहिताग्न्यादित्वात् पुनः पुनः परिक्रम्य प्रणम्य आमन्त्र्य पृष्ट्वा च उत्तरां दिशं जग्मतुः ॥ ४३ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्याध्याये दशमे व्यधात् ॥
इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां दशमोऽध्यायः ॥ १० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तथाहि शत्रुमित्रयोः समचित्तानां सुतरां मत्कृतात्मनां मयि कृतमनसां सतां दर्शनात् पुंसो नरस्य बंधो न भवेत् यथा सवितुः सूर्यस्य दर्शनात् अक्ष्णोर्बंधो न भवेत्तथा ॥४१॥ द्वयोर्मध्ये एकस्य मुख्यत्वादेकसंबुद्धिः हे नल कूबर युवां मत्परमौ अहमेव परमः श्रेष्ठो ययोस्तौ संतौ तत्स्वर्गरूपं सादनं स्वगृहं गछतं वा युवयोरीप्सितः श्रेष्ठो मयि भावः स्नेहः संजातः यतः परमः श्रेष्ठोऽभवो मोक्षो भवेत् नास्ति भवो यस्मात् सः अभवः ॥ ४२ ॥ परिक्रम्य प्रदक्षिणीकृत्य उलूखले बंधः बंधोलूखलस्तं आमंत्र्य गुप्तवचनेनोक्त्वा राजदंतादित्वात्पूर्वप्रयोगार्हस्य परप्रयोगः ॥ ४३ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढाऽर्थप्रकाशके
श्रीमद्भागवतस्यदशमस्कंधव्याख्याने यमलार्ज्जुनभंगो नाम दशमोऽध्यायः ॥ १० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

युक्तमेवैतदित्याह ॥ साधूनामिति ॥ सुतरां मत्कृतात्मनां मय्यर्पितचित्तानां, साधूनां, दर्शनमन्तो यस्य सः, सद्दर्शनावधिक इत्यर्थः। पुंसः बन्धः, भवेत्। यथा सवितुः, दर्शनान्तः अक्ष्णोः बन्धस्तमोरूपस्तद्वत्, 'दर्शनान्नो भवेद्बन्धः' इति पाठे, साधूनां स्वधर्मवर्त्तिनां, समचित्तानामात्मविदां, सुतरां मयि कृतोऽर्पित आत्मा यैस्तेषां सतामिति शेषः। दर्शनात्, पुंसः बन्धः, नो भवेत्। सवितुः दर्शनात अक्ष्णोः यथा बन्धः न भवेत्, तद्वत् ॥ ४१ ॥ तदिति ॥ हे नलकूबर, तत्तस्मात्, प्राधान्यादेकस्य संबोधनम्। युवां, अहमेव परमो ययोस्तथाभूतौ सन्तौ, सादनं सदनं स्वनिकेतं प्रतीत्यर्थः। गच्छतम्। न विद्यते भवः संसारो यस्मात् सोऽभवः, परमः ईप्सितः, मयि भावः सम्यक् प्रीत्यात्मकोऽभिप्रायविशेषः, वां युवयोः, संजातः एव ॥ ४२ ॥ इतीति ॥ इतीत्थं, उक्तौ भगवता कथितौ, तौ नलकूबरमणिग्रीवौ, बद्धमुलूखलं यस्मिन् उलूखले बद्धो बद्धोलूखल इति वा। तं कृष्णं, परिक्रम्य च, आमन्त्र्यानुज्ञाप्य पृष्ट्वेति यावत्। उत्तरांदिशं, जग्मतुः ॥ ४३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिताया-
मन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे दशमोऽध्यायः ॥ १० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

साधूनामिति : १०.१०.४१.

य: परं बोधयेद् बद्धोऽप्यद्धा प्रारब्धकर्मणा। तच्छ्रेयसैव तन्मुक्तिः स्यादितीशगिरेरितम् ॥ ७६ ॥

तद् गच्छतमिति : १०.१०.४२.

मयि निष्ठा दृढा येषां तेषां शिष्टोऽपि भोगतः। भवोऽपि विभवायैवेत्यबोधि हरिणाऽऽशयः ॥ ७७ ॥

यो मुक्तः स्वयमन्यमोचक इति श्रुत्येरितः श्रीपतेस्तस्याऽस्यां भुवि बन्धनं लघुगुणैर्मात्राकृतं दृश्यते।
आगस्त्वेकमिदं परं यदधुनाऽमुक्तस्य मोक्तुः परानन्यो मोचक इत्यसाध्विति तथैवामन्त्र्य तौ जग्मतुः ॥ ७८ ॥

यावदेष सगुणोऽस्ति सौख्यदस्तावदेव सुलभश्च चक्षुषा।
निर्गुणस्तु नहि चेतसाऽप्यलं द्रष्टुमित्यनुगतौ तथैव तौ ॥ ७९ ॥

स्वस्त्यस्तूलूखलास्मिंस्त्वदुपकृतमिदं केन वा विस्मराव:
संप्राप्तस्वात्मरूपावतुलहरिकृपाऽलङ्कृतौ येन जातौ ।
तत्पृष्ट्वा त्वां व्रजावो निजसदनसुखं भोक्तमेतज्जपुण्यात्
स्वस्थस्त्वं चात्र भूया यदुपतिगुणशाल्वमामन्त्रिताभ्याम् ॥ ८० ॥

तेनाकारि तदुद्धतिस्तदुचितं साजात्यभाजा पुन-
स्ताभ्यां तादृगुलूखलं न कृतमित्याप्रोपकृत्या त्वियम् ।
शङ्का सानश्वतस्तदस्ति सगुणब्रह्मावलम्बादलं
मुक्तादप्यतिसौख्यभागिति तथैवाऽऽमन्त्र्य तत्तौ गतौ ॥ ८१ ॥

बद्धोलूखलमामन्त्र्येत्यत्र ह्यामन्त्रणं द्वयो: । श्रीशोलूखयोर्भातीत्युक्तमुक्तक्रमाद् द्वयम् ॥ ८२ ॥

याभ्यां साकं तव समभवच्छ्रीपते वाग्विहारो वृत्तिः शिष्टा तदपि च तयोरुत्तराशावलम्बे ।
येषां प्रश्नप्रथितवचसां नापरोक्षं तवास्ति तेषां न स्यात् कथमिह मनश्चोत्तराशाऽवलम्बि ॥ ८३ ॥

जडजातमध्यभाजा निपात्य खलमच्युतेन गुणबद्धम् । सागमकृष्टिर्विहिता सत्या मत्स्यावतारवदिहापि ॥८४॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने दशमोऽध्याय: ॥ १० ॥

कृष्णप्रिया

भगवान् सूर्यनारायणजी के उदय से जैसे अन्धकार नष्ट हो जाता है नेत्रों की अन्धता निवृत्त हो जाती है वैसे ही समदर्शी एवं मुझमें मन लगाने वाले महत्पुरुषों के दर्शन से संसार के सारे बन्धन छिन्न भिन्न हो जाते हैं ॥४१॥ हे नलकूवर, अब तुम दोनों अपने स्थान को मुझे याद करते हुए जाओ । मुझमें अपेक्षित परम भक्ति तो तुम्हारी हो ही गयी है । अब तुम्हारा जन्म मरण रूप संसार छूट जायेगा ॥ ४२ ॥ **श्रीशुकाचार्यजी ने कहा**—राजन् ! जब भगवान् श्रीकृष्ण ने इस प्रकार कहा तब नल कूबर मणिग्रीव ने उखलबद्ध भगवान की परिक्रमा की और पुनः पुनः प्रणाम करके दामोदर कृष्ण की अनुमति सम्पादन करके उत्तरदिशा की ओर प्रस्थान किया ॥ ४३ ॥

इति दशमोऽध्याय: समाप्त: ॥ १० ॥

❖ ❖

अथैकादशोऽध्यायः

श्लोकाः	अनु.	इ. वं.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४९	४५	१	३	१	१६३२	६	६४	१७०२	५३	६

[1]श्रीशुक उवाच

गोपा नन्दादयः श्रुत्वा द्रुमयोः पततो रवम् । तत्राजग्मुः कुरुश्रेष्ठ [2]निर्घातभयशङ्किताः ॥ १ ॥
भूम्यां निपतितौ तत्र ददृशुर्यमलार्जुनौ । बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणम् ॥ २ ॥
उलूखलं विकर्षन्तं दाम्ना बद्धं च बालकम् । कस्येदं [3]कर्म आश्चर्यमुत्पात इति कातराः ॥ ३ ॥
बाला [4]प्रोचुरनेनेति [5]तिर्यग्गतमुलूखलम् । विकर्षता मध्यगेन [6]पुरुषावप्यचक्ष्महि[7] ॥ ४ ॥

कर्दमक्षमा

अन्वयः—कुरुश्रेष्ठ पततोः द्रुमयोः रवं श्रुत्वा निर्घातभयशङ्किताः नन्दादयः गोपाः तत्र आजग्मुः ॥ १ ॥ तत्र भूम्यां निपतितौ यमलार्जुनौ ददृशुः पतनकारणं तत् लक्ष्यं अविज्ञाय बभ्रमुः ॥ २ ॥ दाम्ना बद्धं च उलूखलं विकर्षन्तं (ददृशुः) इदं कस्य कर्म ! आश्चर्यं ? उत्पातः इति कातराः (संवृत्ताः) ॥ ३ ॥ मध्यगेन अनेन बालेन तिर्यग् गतं उलूखलं विकर्षता इति (जातं) पुरुषौ अपि अचक्ष्महि इति बालाः प्रोचुः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एकादशे समागत्य वृंदावनमथार्भकैः । वत्सान्पालयतानेन हतौ वत्सबकासुरौ ॥ १ ॥

निर्घातो वज्रपातः स्यादिति भयेन शंकिताः ॥ १ ॥ तल्लक्ष्यं प्रत्यक्षतो दृश्यं पुरतो दृष्ट्वापीत्यर्थः । पतनकारणमविज्ञाय बभ्रमुः ॥ २ ॥ लक्ष्यं कारणं दर्शयति उलूखलमिति । भ्रमप्रकारमाह । कस्येदं राक्षसादेरिदं कर्म कुतो वा कारणादाश्चर्यमुत्पातोऽयमिति कातरा भीताः संतो बभ्रमुरित्यर्थः ॥ ३ ॥ मध्यगेन वृक्षयोर्मध्यगतेन । न केवलमेतावत् । वृक्षाभ्यां निर्गतौ दिव्यौ पुरुषावप्यचक्ष्महि । दृष्टवंतो वयमिति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अर्भकैः सुबलस्तोककृष्णादिभिः । अनेन श्रीकृष्णेन (१) । शंकिता जातशंकाः ॥ १ ॥ श्रीनंदादित्रासावेशेन ततो रक्षितमिव संबोधनं हे कुरुश्रेष्ठेति । यद्वा—अनुचराणां गोपानां किंकरावनुजानीहि । एषां किंकरं कृत्वात्रैव रक्षेत्यर्थः । पतनकारणं तच्छ्रीकृष्णरूपं लक्ष्यं साक्षान्नेत्रगोचरमपि बभ्रमुः । अहो भूमिकंपातिबलवायुचलनादि विना कथमेतौ पेततुरिति भ्रांतिं जग्मुः ॥ २ ॥ इत्यर्थ इति । पूर्वेण संबंधोत्र क्रियापदेन कार्य इत्यर्थः ॥ ३ ॥ विकर्षताऽनेन हेतुना कर्त्रा वा निष्कासिताविति शेषः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्राजग्मुरिति । तत्र गमनाय द्रुतं प्रतस्थुरित्यर्थः । निर्घातो निरभ्रगर्जितमुत्पातविशेषः भयं दैत्यादिभ्यः ताभ्यां सन्दिग्धाः यतो मूर्च्छितत्वादेव निकटस्थानां व्रजैश्वर्यादीनां प्रथमतमागमनं न जातमिति ज्ञेयं हे कुरुश्रेष्ठेति श्रीनन्दादित्रासावेशेन सम्बोधनं ततो रक्षणार्थमिव ॥ १ ॥ भूम्यामित्यर्द्धकम् । नितराम् उन्मूलनादिना पतितौ ददृशुर्दूरादिति शेषः । बभ्रमुरिति सार्द्धकम् । उलूखलमित्यादिलक्षणं पतनकारणं लक्ष्यं लक्षयितुं शक्यमपि तद्विज्ञाय दूरस्थत्वात् सम्भ्रान्तत्वाद् पतितवृक्षशाखादिव्यवहितत्वाच्च तत्र स्थितमननुभूय बभ्रमुः सन्दिदिहुः तदनुभवे सति प्रथमं तदनिष्टशङ्कयाऽविष्टाः स्युः न तु तदुत्पातहेतुजिज्ञासयेति तथा तस्य तद्धेतुत्वे ज्ञाते सति जिज्ञासापरा न स्युरिति च भावः ॥ २ ॥ पुनश्च निकटे समागत्यापि

---

१. बादरायणिरुवाच—गो. प्रे. टी. । २. रवशङ्किताः—विज. । ३. कुत—श्रीधर. वंशी. वीर. विज. । ४. ऊचुर—श्रीधर. वंशी. वीर. विज. विश्व. । ५. तिरश्चीनमुलू—गो प्रे. टी. । ६. निहतौ यमलार्जुनौ—इति कस्यचित् । ७ वृक्षाभ्यां निर्गतौ दिव्यौ पुरुषावप्यचक्ष्महि—इति पाठान्तरम् ।

शाखाव्यवहितं तमदृष्ट्वा कस्येदमित्याद्युक्त्वा कातरा बभूवुः इदमाश्चर्यं कस्य केन कृतमित्यर्थः। तथा च विवृतं तद्वाक्यं श्रीहरिवंशे "केनेमौ पातितौ वृक्षौ घोषस्यायतनोपमौ॥ विना वातं विना वर्षं विद्युतप्रपतनं विना। विना हस्तिकृतं दोषं केनेमौ पातितौ द्रुमौ" इति॥ ३॥ ततश्च व्यवहितं तं दर्शयित्वा बालाः स्वयमूचुः, किमूचुः? तत्राहुः। अनेनेति। सम्भ्रान्तत्वेन पूर्णवचनाशक्तेरुत्पाटितमिति तु नोचुः। कीदृशेन सतोत्पाटितमित्यपेक्षायामूचुः। तिर्यग्गतमुलूखलमित्यादि एषाममोहस्तु श्रीदामोदरमाधुर्यवशेनेति गम्यते॥ ४॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

पततोर्द्रुमयोः सम्बन्धिनम्; यद्वा, पततोः सतोः रवं निर्घाततुल्यं महाशब्दं दूराच्छ्रुत्वा तत्स्थाने आगता आवासाद्बहिःप्रदेशे तयोर्वृत्तेस्तत्र श्रीयशोदादिगोपीनां शीघ्रगत्यसम्भवात्, किंवा पुंसां मुख्यत्वात्तेषामेवादौ गमनमुक्तम्, पश्चात् ता अभ्यागता इति ज्ञेयम्। निर्घातो निरभ्रगर्जितमुत्पातविशेषः। हे कुरुश्रेष्ठेति कुरुवंशरक्षाहेतोः परमभागवतस्य तव क्षेमाय सदा परमव्यग्रास्त्वत्पितामहा यथा स्नेहभरेण विविधशंकाकुला भवन्ति, तद्वदिति भावः॥ १॥ नितरामुन्मूलनादिना पतितौ। अन्यत्तैर्व्याख्यातम्; यद्वा, तत्तत्र लक्ष्यं पतनकारणत्वेन लक्षयितुं योग्यमप्यविज्ञायानालक्ष्य बभ्रमुस्तत्कारणं निर्द्धारयितुं न शेकुरित्यर्थः। तथा च श्रीहरिवंशे (विष्णु० प० ७।२८-२९)—'केनेमौ पातितौ वृक्षौ घोषस्यापतनोपमौ। विना वातं विना वर्षं विद्युत्प्रपतनं विना। विना हस्तिकृतं दोषं केनेमौ पातितौ द्रुमौ॥' इति॥ २॥ लक्ष्यत्वप्रकारमाह—उलूखलमिति। बालकश्च तत्र ददृशुरिति पूर्व्वेणैवान्वयः। विकर्षन्तं बलादाकृष्य नयन्तम्। एतच्चाबलवत्त्वबोधनेन स्वस्यैश्वर्य्याच्छादनार्थमुलूखलविकर्षणेनोलूखलस्य च तस्मिन्नेव दाम्ना बन्धनेन। चकाराद्द्वयोर्मध्यतस्तन्निःसरणचिह्नदर्शनेन चेत्यादिलक्षणैरित्यर्थः। तथाप्यविज्ञाने हेतुर्बालकमित्यल्पार्थे कः,— अतिशिशोस्तादृशकर्म्मासम्भवात्। तच्चाग्रे व्यक्तं भावि। इदमाश्चर्य्यमकस्मान्महावृक्षद्वयनिपातनलक्षणं कस्य केन कृतमित्यर्थः। ननु देवेन दैत्येन वा केनचिदिति चेत्तर्हि कुतः कस्माद्धेतोस्तमनालोकयन्त आहुः-उत्पातोऽयमित्यस्मादुत्पातज्ञानात् कातरास्तद्बालकं प्रत्यनिष्टशंकया विह्वला बभूवुरित्यर्थः॥३॥ अनेनैतत्कृतमित्यूचुः॥४॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

निर्घातो मेघध्वनिः॥ १॥ लक्ष्यं निरूपकैर्ज्ञातुं योग्यम्॥ २॥ कस्येति कस्य चेष्टितमिदमाश्चर्यमित्यर्थः। कस्येति कर्तृसन्देहः कुत इति निमित्तसन्देहः उत्पातः अनिश्चयः॥ ३-५॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गोपा इति पततोर्द्रुमयोरर्जुनयोः रवं ध्वनिं श्रुत्वा हे कुरुश्रेष्ठ! किं वज्रपातोऽभवदित्येवं भयेन वितर्कयन्तो नन्दादयो गोपाः तत्राजग्मुः॥ १॥ तल्लक्ष्यं प्रत्यक्षतः पुरतो दृश्यमपि पतनकारणमविज्ञाय बभ्रमुः भ्रान्ता बभूवुः॥ २॥ किं तल्लक्ष्यं पतनकारणं यदज्ञानाद्बभ्रमुः तत्राह—'उलूखलमिति। एवंविधं बालकमेव पतनकारणं लक्ष्यमविज्ञाय बभ्रमुरित्यन्वयः। भ्रममेव दर्शयति—कस्येति। इदं तरुनिपातनरूपं कर्म कस्य सम्बन्धि इदं कुतः कारणादहो आश्चर्यं नः उत्पाता इति एवं भयेन कातरा भीताः सन्तो बभ्रमुरित्यर्थः। कस्येति कर्तृसन्देहः कुत इति निमित्तसंदेहः उत्पात इति निश्चयः॥३॥ एवं बंभ्रम्यमाणान् प्रति तत्रत्या बाला ऊचुः, किमिति? तिरश्चीनमुलूखलं विकर्षता वृक्षयोर्मध्यगतेनानेन बालेनेदं कर्म कृतम् न केवलमेतावदन्यदपि किञ्चिद्दृष्टमित्याहुः, वृक्षाभ्यां निर्गतौ दिव्यपुरुषावप्यचक्ष्महि दृष्टवन्तो वयमित्यर्थः॥ ४॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हरेर्बालक्रीडाचरितचारुतरनिरवद्यमहिमश्रवणमननोपासनानि मुक्तिसाधनानि ज्ञानसाधनत्वेन भवन्तीति भावेन तन्माहात्म्यमस्मिन्नध्याये निरूप्यते, तत्रादौ पूर्वाध्यायोक्तयमलार्जुनभङ्गलक्षणं महिमाशेषं वक्ति—गोपा इत्यादिना। निर्घातरवशङ्किताः मेघनिर्घोषशङ्किताः॥ १॥ कस्यागामिफलसूचकं कुत आश्चर्यं सहसा दृश्यमानं यदद्भूतं भविष्यदनिष्टसूचकम् अदृष्टमात्रप्रयुक्तम् उत्पातस्तन्निमित्तभयेन कातराः व्याकुलचित्ताः उत्पात इति कातराः केचित् पठन्ति॥ २-३॥ द्वौ पुरुषौ अचक्ष्महि दृष्टवन्तः॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ऊचुरित्यादिलक्षणं पतनकारणं लक्ष्यं लक्षयितुं शक्यमपि तदविज्ञाय दूरस्थत्वात् सम्भ्रान्तत्वात् पतितवृक्षशाखाव्यवहितत्वाच्च तत्र स्थितमननुभूय बभ्रमुः सन्दिदिहुः॥ २॥ पुनश्च निकटे समागत्यापि शाखादिव्यवहितं तमदृष्ट्वा कस्येदमित्याद्युक्त्वा कातरा बभूवुः इदमाश्चर्यं कस्य केन कृतमित्यर्थः॥ ३॥ ततश्च व्यवहितं तं दर्शयित्वा बालाः स्वयमूचुः? किमूचुः? तत्राहुः—अनेनेति। सम्भ्रान्तत्वेन पूर्णवचनाशक्तेरुत्पाटितमिति तु नोचुः॥ ४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एकादशे हरेर्मोक्षः फलक्रेयकथादिकम् । वृन्दावनागमोत्साहं वनं वत्सबकार्दनम् ॥

तत् तयोः पतनकारणं बालकं लक्ष्यं लक्षयितुं शक्यमपि अविज्ञाय प्रेम्णा तादृशायोग्यताकत्वेनासम्भाव्या बभ्रमुः, भ्रममेवाह कस्येदं कर्म कुतो हेतोस्तस्मादाश्चर्य्यमेतदुत्पात इति निश्चित्य कातरा भाग्येन विधात्रा बालः कृष्णो रक्षित इति व्याकुला बभूवुः ॥ १–३ ॥ अनेन कृष्णेन वृक्षयोर्मध्यगतेन तिर्य्यग्गतमुलूखलं विकर्षतेत्येतन्मात्रं बाला ऊचुः सम्भ्रान्तत्वेन पूर्णवचनाशक्तेरेतावुत्पाटिताविति तु नोचुः अविश्वसतस्तान् पुनरूचुः वृक्षाभ्यां निर्गतौ द्वौ पुरुषावप्यचक्ष्महि दृष्टवन्तो वयमिति ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथैकादशेऽध्याये बृहद्वनाद्बहूत्पातदर्शनेनोत्थाय नन्दादीनां प्रचलनं श्रीवृन्दावने वासः श्रीकृष्णवत्सपत्वं वत्सबकयोर्वधश्च निरूप्यते—एवं ध्वनिं श्रुत्वा निर्घातभयशङ्कितः निर्घाते वज्रपाते यत्प्रसिद्धं भयं तेन जातशङ्काः गृहे किं विनष्टं किंनेति जातसंशया इत्यर्थः ॥ १ ॥ तल्लक्ष्यमपि प्रत्यक्षतया दृश्यमपि पतनकारणम् अविज्ञायाबुध्वा बभ्रमुः भ्रमं प्रापुः ॥ २ ॥ उलूखलमिति । तत्र लक्ष्यं प्रपञ्चयति "उलूखलं विकर्षन्तं दाम्ना बद्धं च बालकम्" इति भ्रमं प्रपञ्चयति "कस्येदं कुत आश्चर्यम्" इति कस्य राक्षसादेरिदं कर्म कुतः कारणाद्वा अत आश्चर्यमिदम् अथ तेषां निश्चयं दर्शयति—उत्पात इति । सर्वथा उत्पात एवायमिति विनिश्चित्य कातरा आसन् ॥ ३ ॥ अनेन वृक्षौ पातितौ इति वृक्षाभ्यां विनिर्गतौ पुरुषावपि अचक्ष्महि दृष्टवन्तो वयमिति च बाला ऊचुः ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एकादशे नन्दसूनोर्मोक्षो वृन्दावने गमः । सुप्रीतिर्वत्सरक्षा च तथा वत्सबकक्षयः ॥

निर्घातः विद्युत्पातः ॥ १ ॥ भूम्यामित्यर्धकं ददृशुर्दूरादेव बभ्रमुरिति सार्धकं उलूखलमित्यादि लक्षणं तयोः पतनकारणं लक्ष्यं लक्षयितुं शक्यमपि तद्विज्ञाय दूरस्थत्वात् पतितवृक्षशाखादिव्यवधानाच्च तत्र स्थितमननुभूय बभ्रमुः सन्दिदिहुः अथान्तिके समागत्य शाखापत्रव्यवहितं तमवीक्ष्य कस्येदमित्युक्त्वा कातरा बभूवुः । इदमाश्चर्यं कर्म कस्य केन कृतमित्यर्थः । एवमुक्तं श्री हरिवंशे—

केनेमौ पातितौ वृक्षौ घोषस्यायतनोपमौ । विना वर्षं विना वातं विद्युत्प्रपतनं विना ॥
विना हस्तिकृतं दोषं केनेमौ पातितौ द्रुमाविति ॥ २–३ ॥

वृक्षयोर्मध्यगेन तिर्यग्गतमुलूखलं कर्षता अनेन कृष्णेनेत्येतावन्मात्रं बालान् ऊचुर्न त्वनेनोत्पाटिताविति च बालत्वेनापूर्णवाक्यत्वात् किञ्चाभ्यां निर्गतौ पुरुषावपि वयमचक्ष्महीति चोचुः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ हरिचरितं दुरितहरणपुरःसरं संविन्निदानं सत्साधनं तद्धामाप्तय इति निरूप्यतेऽस्मिन्नध्याये । तत्रादौ यमलार्जुनभञ्जनतो नन्दाद्याश्चर्यं स्वजातरज्जुविसर्जनं कथयति ॥ गोपा इति । पततोर्द्रुमयो रवं शब्दं श्रुत्वा निर्घातस्याशनेरवस्तत्पातज इति शङ्किताः सन्देहयुतास्तत्र तत्स्थल आजग्मुः । भयशङ्किता इति पाठः स्फुटार्थः ॥ १ ॥ पतनकारणं लक्ष्यं प्रक्षविषयमविज्ञाय बभ्रमुर्भ्रान्ता अभवन् तत्तर्कणप्रकारस्तु विना वर्षं विना वातं विद्युत्प्रपतनं विना । विना हस्तिकृतं दोषं केनेमौ पतितौ द्रुमाविति हरिवंशशंसितोऽवसेयः ॥ २ ॥ दाम्ना बद्धमुलूखलं विकर्षन्तं बालकं च स्वस्तिमन्तं दृष्ट्वा । इदमेतत्पादपपातनं कस्य कर्मेदं कुतः किं कारणमाश्चर्यम् । उत्पातौ दैविकारिष्टं तस्माद्यद्भयं तेन कातरा इत्यालोचयामासुः ॥ ३ ॥ एवं संदिहानान्नन्दादींस्तत्रत्या बाला अवोचन्नित्याह ॥ बाला इति । मध्यगेन वृक्षयोर्मध्यगेनोलूखलं तिरश्चीनं विकर्षताऽनेन पातनं तत्रापि पुरुषौ द्वावप्यचक्ष्महि दृष्टवन्त इति बाला ऊचुः ॥ ४ ॥

श्रीसुबोधिनी

निरोधः सर्वभावेन वर्णनीयो हि गोकुले । स्त्रीणां स चोक्तः पुंसां च नन्दप्राधान्यभावतः ॥ १ ॥
एकादशे ततोऽध्याये पूर्वावस्थामशेषतः । त्याजयित्वा तु नन्दस्य कृष्णभावो निरूप्यते ॥ २ ॥
मोचनं मुग्धलीला च स्थानान्तरपरिग्रहः । तत्र लीला वत्सबकौ ज्ञानं चेति निरूप्यते ॥ ३ ॥
षड्भिस्त्रिभिः षोडशभिश्चतुर्भिः षड्भिरेव च । नवभिः पञ्चभिश्चेति सप्तार्थाः सगुणो हरिः ॥ ४ ॥

स्वार्थं तु भगवान् कार्यस्तथात्वं ज्ञाप्यते पुनः । सर्वस्वं हरिरेवेति तदर्थं त्याग ईर्यते ॥ ५ ॥
वृन्दावने स्थितौ हेतुर्भगवत्तोषतः परम् । नास्तीतिज्ञापनायोक्ता प्रीतिर्लीलोपयोगिषु ॥ ६ ॥
वत्सचारणदोषस्य निवृत्तिर्वत्समारणम् । गोपालदोषव्यावृत्त्यै बकस्यापि विनाशनम् ॥ ७ ॥
स्थानत्यागे हरीच्छैव कारणं न तु दुष्टता । तज् ज्ञापयितुमत्रापि बकवत्सौ विनाशितौ ॥ ८ ॥
अतो विमर्शो गोपानामानन्दश्च निरूपितः । तदर्थमेव च हरेर्बालभावो न चान्यथा ॥ ९ ॥
सम्पन्ने तु ततस्तस्य परित्यागोपि वर्ण्यते ॥ ९½ ॥

तत्र प्रथमं प्रपञ्चविस्मरणपूर्वकं भगवदासक्ति वक्तुं भयविमोकावाह **गोपा नन्दादय** इति षड्भिर्नन्दार्थमेवैतदिति ज्ञापयितुं **नन्दादय** इति, **गोपा** इति स्वतःसामर्थ्याभावः, भगवतोऽद्भुतलीलामाह **श्रुत्वा द्रुमयोः पततो रव**मिति, **पततो**द्रु**मयो**रिदानीं **रवः** श्रुतो यदा तौ स्तुत्वा निर्गतौ, इदं नान्यशक्यं, **ततस्तत्राजग्मुः, कुरुश्रेष्ठे**तिविश्वासार्थं, सर्वेषां तत्रागमने हेतु**र्निर्घातभयशङ्किता** इति, **निर्घातो** निरभ्रविद्युत्पातस्तत्कृतं **भयं** कस्यचिदुपद्रवो भाव्यनिष्टसूचनम् ॥ १ ॥ आगतानां ज्ञानमाह **भूम्या**मिति, भूमौ **निपतितावर्जुनौ** दृष्टवन्तः, ततोन्यत्र तौ चेत् पतितौ भवतस्तदा कालान्तरत्वं न दोषायेति तद्व्यावृत्त्यर्थमाह **तत्रे**ति, यत्रैव स्थितौ **तत्रैव पतितौ**, आर्द्रता च तेषां दृष्टिगम्या न भवति, बहिर्मुखत्वात् , जातायामपि तत्राप्याकर्षणस्यापेक्षितत्वात् तस्य पतनस्य कारण**मविज्ञाय बभ्रमुः**, ननु प्रत्यक्षस्याभावेप्यनुमानेन कथं न कल्प्यते ? तत्राह **लक्ष्य**मिति, लक्ष्य**मप्यविज्ञाय**, ते ह्यतिनैयायिका युक्तिबाधितं प्रमाणं न किमपि मन्यन्ते, अतो व्याप्तस्याभावान्नानुमानेन **पतनकारणज्ञानम्** ॥ २ ॥ ननु भगवानस्त्येव प्रत्यक्षसिद्धः कोत्र सन्देह इति चेत् तत्राहो**लूखल**मिति, **उलूखलाकर्षणं कुर्वन्तं** तदानीमपि ततोप्यग्रे गच्छन्तं वृक्षयोर्मध्ये स्थितं, अन्यत्र गमनाभावे हेतु**र्दाम्ना बद्ध**मिति, **च**कारादुलूखलेन सह वृक्षयोः पातं **बालकं** चेति वा बालकत्वादेव न स्वतो मोचनं, भगवन्तं हेतुत्वेन प्रत्यक्षसिद्धमप्यन्यथासिद्धं कृतवन्त इत्याह **कस्येद**मिति, **इदं** बन्धनलक्षणं **कस्य कर्म** ? **कर्मे**तिवचनं, व्याकुलत्वज्ञापकं, किञ्च **कुतो** वा हेतोरेतद् बन्धनमिति, **आश्चर्य**मिति, बालकस्य बन्धनं तेन पातनं त्वसम्भवितमेवात **आश्चर्य**मेवैतदुभयमपि, पातनमेव वा, नन्वकारणकार्योत्पत्तिः कथम् ? तत्राह **उत्पात** इति, अय**मुत्पातो** देवदैत्यादिकृतो भाव्यनिष्टसूचको न तु सर्वथा युक्तिबाधितो भगवता कृत इति कार्यकारणभावे प्रत्यक्षसिद्धेपि न तथात्वमङ्गीकर्तुं शक्यते, अत एव भ्रान्तो नैयायिकस्तर्कविरुद्धं न मन्यते, "अलौकिकास्तु ये भावा न तांस्तर्केण योजयेदि"तिवाक्याच्च, तर्हि किं जातं तादृशज्ञानस्य फलमित्याकाङ्क्षायामाहोत्पात इति **कातराः, पातस्तूत्पातरूपः**, अग्रे च भयं भविष्यती**ति कातरा** भयव्याकुला जाता इत्यर्थः ॥ ३ ॥ अत एव बालकैरुच्यमानमपि वाक्यं नाङ्गीकृतवन्त इत्याह **बालाः प्रोचु**रितिद्वाभ्यां, सर्वं एव **बाला** यथादृष्टार्थवादिनः कल्पनासमर्थाः कारणं **प्रोचुः**, तेषां वाक्य**माहानेनेति,** अनेन वृक्षौ पातितौ, प्रकाराकाङ्क्षायामाहु**स्तिरश्चीनमुलूखलं विकर्षते**ति, **तिर्यक्**पतित**मुलूखलं** तं **वि**शेषेण **कर्षता,** कर्षणेपि प्रयोजनमाहु**र्मध्यगेने**ति, मध्ये स्थितः किं कुर्यात् ? नचैतज् ज्ञानं भ्रान्तमित्याशङ्कायामाहुः **पुरुषावप्यचक्ष्महि**ति, वृक्षाद् द्वौ पुरुषौ निर्गतौ तावप्यस्माभिर्दृष्टाविति, अतः स्वदृष्टं लौकिकमलौकिकं चोक्तवन्तः ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

एकादशेऽध्याये प्रकरणतात्पर्यनिरूपणे । वत्सचारणदोषस्य निवृत्तिर्वत्समारणमिति तन्निवृत्तिरूपं तदित्यर्थः । अनीश्वरस्यैव कर्म वत्सचारणमितीश्वरस्य तत्करणमनुचितमिति दोषबुद्धिस्तन्मारणकथया निवार्यते । न ह्यनीश्वर एवंभूतं ज्ञातुमेवं हन्तुं वा शक्तो भवत्यतस्तन्निवृत्तिः । किञ्च । तस्यासुरत्वेपि वत्ससारूप्यतद्यूथगतत्वाभ्यां तत्सम्बन्धित्वं लक्ष्यत इति पशुत्वेन कण्टकशर्कराक्षेत्रप्रवेशहेतुभूतभाव एव निवर्तित इति ज्ञाप्यते । तथा सत्यपराधः स्यादिति । एवं सति वत्सास्तच्चारणं च । तयोः सम्बन्धिदोषस्येत्यर्थः सम्पद्यते । भगवदीयेषु प्रवेशस्य फलं करकमलसम्बन्धः । दोषबुद्धेः फलं स्वरूपनाशः । तेन निर्दोषबुद्ध्या भक्तसङ्गः कार्यो, न त्वन्यथेति ज्ञापितं भवति । मूले भक्तानिष्टनिवर्तने लोकवेदयोरगणना च । **गोपालदोषे**ति । दम्भस्यैव लोभानृताभ्यां कृत्वान्तःकरणे भगवत्तिरोधायकत्वमिति सेवकानां सोनुचित इति तद्रूपं बकं मारितवानित्यर्थः

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

एकादशाध्यायतात्पर्यं निरूपयन्तोवान्तरप्रश्नोत्तराणां जातत्वात् स्कन्धारम्भे 'व्रजे वसन् किमकरो'दितिसामान्यप्रश्नाद् व्रजस्यैव लीला वक्तव्यायं च निरोधस्कन्ध इति प्रथमं च तत्र गोकुलस्यैव निरोध उपक्रान्त इति स च फलपर्यन्तो वक्तव्य इति तदर्थं यत् पूर्वं वृत्तं तत् सङ्गत्यर्थमनुवदन्तः प्रस्तुताध्यायार्थमाहु**र्निरोध** इत्यादि द्वाभ्यां **हि** यतो हेतोः **सर्वभावेन सर्व**प्रकारेण **गोकुले निरोधः** प्रकरणानुरोधाद् **वर्णनीयः स** निरोधः **स्त्रीणामतश्च**कारात् वृक्षयोः **श्रीनन्दप्राधान्येन पुंसां** चोक्तश्चोप्यर्थं **ततो** हेतोरे**कादशेऽध्यायेशेषतः पूर्वावस्थां त्याजयित्वा निरूप्यते,** पूर्वश्लोकोक्तं **स** इति पदमत्रापि सम्बध्यते, **तु** पुनः पूर्वकथाशेषत्वाच् छ्रीनन्दस्य **कृष्णभावो निरूप्यते** पूर्वमित्यर्थात् , तथा चात्र कथाशेषांशेत्रसरोध्यायार्थं तु विशेषगर्भप्रसङ्गः सामान्य-

विशेषभावो वा सङ्गतिरित्यर्थः, एतदध्यायप्रतिपाद्यानर्थान् श्लोकसङ्ख्यानिरूपणपूर्वकं द्वाभ्यामाहु**र्मोचनमि**त्यादि एवमध्यायप्रतिपाद्यानर्थानुक्त्वा तत्प्रयोजनं वदन्तोऽस्य रूपाध्यायत्वात् पूर्वेषु गुणैरिवात्र रूपेण निरोद्धव्या निरोधस्य दृढत्वाय तेषां स्वस्मिन्निव स्वस्यापि तेषु निरोधो वक्तव्य इति स्वस्यापि तदधीनताबोधनं कार्यं तदत्र प्रथमं न स्फुटीभवति पूर्वशेषकथायां श्रीनन्दाद्यागमनगोपबालकसंवादादेरेव तत्र दर्शनादित्याशङ्कायामाहुः **स्वार्थमि**त्यादि, तुः शङ्कानिरासे, उक्ता शङ्का न कर्तव्या **भक्तैः स्वार्थं** स्वमनोभिलषितसेवाकरणार्थं भगवान् वशीकार्य इत्येतन् **मोचन**लीलया बोध्यते, भगवतो वश्यत्वं मुग्धलीलाभिर्ज्ञाप्यते, तेन च पूर्वोक्तरीत्या सुदृढो निरोधः सिद्धो भवति, तथा चैवं भक्तवश्यताप्रदर्शनेन्येऽपि तथा फलेच्छया सेवां करिष्यन्ति सर्वथेति तदर्थं तत्प्रदर्शनमित्यर्थः, नन्वेतद् दामोदरलीलयैव सिद्धमिति पुनस्तत्प्रदर्शनं किमर्थमत्राहुः **पुनरि**ति, यद्यप्युक्तं तथापि **"नेमं विरञ्च्य"** इत्यादिनान्येषां तत्प्रसादप्राप्त्यभावकथनात् न सन्देहो निवर्तत इति तथेत्यर्थः, यद्वा यथा भगवान् दामोदरो जातस्तथान्येषां न वशं भविष्यतीतिशङ्कानिरासाय तथेत्यर्थः, तृतीयस्याहुः **सर्वस्वमि**त्यादि, चतुर्थस्याहु**र्वृन्दावने**त्यादि, पञ्चमषष्ठयोराहु**र्वत्से**त्यादि, तत्तात्पर्यं टिप्पण्यां स्पष्टमिति नानूच्यते, नन्वत्र वत्सबकवधनिरूपणस्य किं प्रयोजनमित्यत आहुः **स्थाने**त्यादि, **दुष्टते**ति स्थानस्येतिशेषः, सप्तमस्य तात्पर्यमाहुरत इत्यादि, स्थानदुष्टताज्ञानभगवदिच्छाकारणत्वज्ञानतस्तथा, **तदर्थमि**ति आनन्दार्थम् । **गोपा** इत्यत्र **स्वतः सामर्थ्याभाव** इति गोरक्षणमात्रनियुक्तत्वाद् ग्रामस्थपदार्थनिर्णयं कर्तुमसमर्था इति नन्दसहभाव इत्यर्थः, तेषामत्र निरोधः कर्तव्य इति नन्देन सह गमनम् ॥१॥ **भूम्यामि**त्यत्र **कालान्तरत्वमि**ति **कालान्तरीयपातत्वेन** प्रतीयमानत्वमित्यर्थः, **बहिर्मुखत्वादि**ति भगवत्प्रवणचित्तत्वाभावात् ॥ २ ॥ **उलूखलमि**त्यत्रा**ग्रिमेन्यथासिद्ध**मित्युलूखलाकर्षणे गृहीतकारणताकं शङ्क्येतेत्यतः काकुः कार्या **तर्क**विरुद्धत्वादिति भावः ॥ ३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एकादशेऽध्याये **सर्वभावेने**ति सर्वेषां करणानां भगवद्विषयकत्वजनको **निरोध** इत्यर्थः, निबन्धे यथा लक्षणात्, **पुंसां चेति उक्त** इतिपूर्वेणान्वयः, **कृष्णभाव** इति भगवता कृत इतिशेषः, तेन **त्याजयित्वे**त्यस्य समानकर्तृत्वं, तथा च हि यतो **निरोधः सर्वभावेन वर्णनीय**स्ततो हेतोः सामान्यत **उक्तोऽप्यशेषतः पूर्वावस्थां** प्रपञ्चनिष्ठां **त्याजयित्वा** भगवता कृतो **नन्दस्य कृष्णे भाव** आसक्तिरूपो **विशेषत एकादशे** निरूप्यत इति श्लोकद्वयस्यैकान्वयः, **सगुण** इति गुणसहितो धर्मी निरूप्यत इत्यत इत्याध्यायार्थ उक्तः, **स्वार्थं** त्विति परार्थाः पञ्च निरोधाः पूर्वमुक्ताः, "यच्छृण्वतोऽपैत्यरतिरि"तिवाक्याच्छ्रोतॄणामरत्यादिनिवृत्त्यर्थमेव ते निरोधा इति परार्थत्वं, **स्वार्थं कार्यो** यो निरोधो लीलारूपः स **भगवानेवा**तः सप्तधा उक्त इतिशेषः, **तथात्वमि**ति कार्यस्य लीलारूपस्य भगवत्त्वं व्यावस्थापितमपि पुनः सङ्ख्यातात्पर्येण ज्ञाप्यते इत्यर्थः, **सर्वस्वमि**ति यथा मार्गान्तरे आत्मनः सर्वस्वत्वात् तदर्थ**मन्यत्याग उक्तः** "आत्मार्थे सकलं त्यजे"दिति तथात्र भगवतः सर्वस्वत्वात् तदर्थं स्थानत्याग इत्यर्थः, **वत्से**ति दोषस्य वत्समात्रसम्बन्धित्वात् तदाकृतित्वं, स च तावद्रूप एव न तु बक इव दैत्योऽपि कश्चिदतस्तन्मारणमेव तन्निवृत्तिरूपमित्यर्थः, तथा न दम्भस्य गोपालमात्रदोषत्वं, तथा सति तदाकृतित्वं स्यात्, किन्तु सामान्यतो दोषरूपत्वमतः प्रसिद्धिबलाद् बकाकृतिः, स च यमुनाजलपानेनैतेभ्यो निर्गतः आकृतिसाम्याद् बके दैत्यो निविष्टोऽतस्तन्निवारणेन गोपालदोषो व्यावर्त्यत इति विभेदः, **अत** इति हरीच्छात इत्यर्थः, **तदर्थमेवे**ति सर्वभावेन निरोधार्थमेवेत्यर्थः ।

भूम्यामित्यत्र **पतनस्य कारण**मिति निमित्तकारणं प्रयोजककर्तारमन्यमप्रत्यक्षीकृत्येत्यर्थः, **लक्ष्यमि**ति **लक्ष्यं** पातनं, केनचित् पातिताविव्यनुमानानन्तरं तत्कर्त्रनुमित्सा भवति, एते त्वेवमपि न ज्ञातवन्तः किन्तु स्वत एव पतिताविति ज्ञातवन्त इत्यर्थः, तत्र हेतुमाहुः **ते ही**ति, एतादृशयोर्महतोः केनचित् पातनं न सम्भवत्यतः **स्वत** एव पात इत्यर्थः, **अत** इति पातनाज्ञानेन प्रयोजककर्त्रनुमित्साभावाद् व्याप्तिविशिष्टस्य हेतोरभावः अनिश्चयः इत्यर्थः ॥ २ ॥ **नन्वि**ति उलूखलमाकर्षतो भगवतः प्रत्यक्षसिद्धत्वात् तत्र कर्तृत्वं प्रत्यक्षेणैव गृह्यतां, सन्देहः को येनान्यगवेषणेत्यर्थः, **तत्राहे**ति तस्यापि कर्तृत्वेनाज्ञानमाहेत्यर्थः, **उलूखलमि**त्यत्र **अविज्ञाये**ति पूर्वस्यैवानुवृत्तिः, एतादृशं बालकं च कर्तृत्वेन **अविज्ञाय बभ्रमु**रित्यन्वयः, **उलूखलेन सहे**ति दाम्ना बद्धमिति पूर्वेणान्वयः, प्रत्यक्षसिद्धस्यापि तथा अस्वीकारे हेतुरुत्तरार्धेनोक्त इत्याशयेन तदाभासमाहुः **भगवन्तमि**ति, उत्पातत्वेन दैत्यादिकृतत्वकथनाद् भगवतोऽन्यथासिद्धत्वकरणं, **नन्वकारणके**ति दृष्टकारणरहितेत्यर्थः, **अयमि**ति पातः इत्यर्थः, **कार्ये**ति काकुस्वरेण योज्यं, **अत एवे**ति यतस्तर्कविरुद्धं न मन्यतेऽत एवाग्रिमवाक्याच्च भ्रान्तो ज्ञेय इत्यन्वयः, **तादृशज्ञानस्ये**ति भ्रमात्मकस्येत्यर्थः ॥ ३ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एकादशाध्यायविवरणारम्भे कारिके **मोचनं मुग्धलीला** चेत्यारभ्य **सगुणो हरि**रित्यन्तं "गोपा नन्दादय" इत्यारभ्य "विमुमोच ह"त्यन्तं **षड्भिर्मोचनं**, "गोपीभिः स्तोभित" इत्यारभ्य "बालचेष्टितै"रित्यन्तं **त्रिभिर्मुग्धलीला**, "गोपवृद्धा' इत्यारभ्य "राममाधवयोर्नृपे"त्यन्तं **षोडशभिः स्थानान्तरपरिग्रहः**, "एवं व्रजौकसा"मित्यारभ्य "चेरतुः प्राकृतौ यथे"त्यन्तं **चतुर्भिः**

तत्र लीला वृन्दावने लीला, "कदाचिद् यमुनातीर" इत्यारभ्य "चारयन्तौ विचेरतु"रित्यन्तं **षड्भिर्वत्सवधलीला**, इह सार्धपञ्च श्लोका एव अन्यत्र उपलभ्यन्ते तथापि "वत्सासुरं हतं श्रुत्वा व्रजे गोप्यश्च विस्मिता" इत्यर्धश्लोकेन षट् श्लोका भवन्ति, "स्वं स्वं वत्सकुल"मित्यारभ्य "ऐक्षन्त तृषितेक्षणा" इत्यन्तं **नवभिर्बकवधलीला**, "अहो बतास्य बालस्ये"त्यारभ्य "**मर्कटोत्प्लवनादिभि**"रित्यन्तं **पञ्चभिर्ज्ञानलीला**, **एवं सप्त पदार्था** अस्मिन्नध्याये निरूपिता इति ऐश्वर्यादिषड्गुणयुक्तो धर्म्यत्राध्यायार्थ इति सङ्ख्यातात्पर्यं, **सर्वस्वं हरिरेवेतीति** गोकुलस्थानां सर्वस्वं हरिरेवास्ति यतोतः भगवदर्थं चिरकालस्थिति**स्थानबृहद्वनत्यागो** निरूप्यत इत्यर्थः, **वृन्दावने स्थितावित्यादि** वृन्दावनगमने **भगवत्तोष** एव प्रयोजनं न तु प्रयोजनान्तरं गोकुलस्थानामस्तीति-ज्ञापनाय "वृन्दावनं गोवर्धनं यमुनापुलिनानि च वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृपे"**त्यनेन लीलोपयोगिपदार्थेषु** भगवत्**प्रीति**रुक्तेत्यर्थः, **स्थानत्यागे हरीच्छैवेति** बृहद्वनस्य **त्यागे** हरेर्वृन्दावनाधिकरणकरमणेच्छैव **कारणमित्यर्थः**, **न तु दुष्टतेति** बृहद्वनस्य पूतनादिसमागमनजन्य**दुष्टता** बृहद्वनत्यागे न कारणमित्यर्थः, तत्र हेतुः **अत्रापि बकवत्सौ विनाशिताविति**, वृन्दावनेपि बकवत्सयोर्नाशनादिदं सूचितं, दैत्यागमनं तूभयत्र दैत्यानां नाशोत्युभयत्र, अतो न बृहद्वनं दुष्टं न वा वृन्दावनं दुष्टमिति, तर्हि बृहद्वनत्यागे को हेतुरिति चेत् **हरीच्छैवेति**पूर्वमुक्तमेव ।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एकादशाध्याये **निरोधः सर्वभावेनेत्यादि** का० १०१¼, १०२¼ । पूर्वं सामान्यतः कारिकार्थः । उक्तोपि नन्दस्य निरोधोऽस्मिन्नध्याये **पूर्वावस्थां** प्रपञ्चासक्तिं त्याज**यित्वा** विशेषतो निरूप्यत इत्यर्थः, एतदध्यायप्रतिपाद्यानर्थान् श्लोकसङ्ख्यानिरूपण-पूर्वकमाहुर्मोचनमित्यादि का० १०३¼, १०४¼ । "गोपा नन्दादय" इत्यारभ्य "विमुमोच हे"त्यन्तैः षड्भिर्मोचनं, "गोपीभिः स्तोभित"इत्यारभ्य"बालचेष्टितै" रित्यन्तैस्त्रिभिर्मुग्धलीला, "गोपवृद्धा" इत्यारभ्य "राममाधवयोर्नृपे"त्यन्तैः **षोडशभिः स्थानान्तरपरिग्रहः**, "एवं व्रजौकसा"मित्यारभ्य "चेरतुः प्राकृतौ यथे"त्यन्तैश्च**तुर्भिस्तत्र** वृन्दावने **लीले**त्यर्थः, "कदाचिद्यमुनातीर" इत्यारभ्य "चारयन्तौ विचेरतु"रित्यन्तैः **षड्भिर्वत्सबकलीला**, इह लीलायां सार्धपञ्चश्लोका एव, अन्यत्र पुस्तकेषूपलभ्यन्ते तथापि "वत्सासुरं हतं श्रुत्वा व्रजे गोपाः सुविस्मिता" इत्येवंश्लोकार्धं श्रीभागवतपीयूषसमुद्रमथनक्षमैर्व्यासहार्दज्ञैः श्रीमदाचार्यवर्यैः पूरितमिति षट् श्लोका भवन्त्येव, "स्वं स्वं वत्सकुल"मित्यारभ्य"ऐक्षन्त तृषितेक्षणा" **इत्यन्तैर्नवभिर्बक**वधलीला, "अहो बतास्य बालस्ये"त्यारभ्य "मर्कटोत्प्लवनादिभि"रित्यन्तैः **पञ्चभिर्ज्ञानलीला**, यद्यपि नन्दादीनां भगवद्ज्ञानं त्रिभिः श्लोकैरेवोक्तं, तथापि द्वाभ्यामुपसंहार इति पञ्च, एवं सप्तपदार्था **अस्मिन्नध्याये** निरूपिता इति ऐश्वर्यादिषड्गुणयुक्तो हरिर्धर्मी अध्यायार्थ इति सङ्ख्यातात्पर्यं, **स्वार्थं** त्विति का० १०४¼ । परार्थाः पञ्च निरोधाः पूर्वमुक्ताः "यच्छृण्वतोपैत्यरति"रिति वाक्याच्छ्रोतॄणामरत्यादिनिवृत्त्यर्थमेव ते निरोधा इति परार्थत्वं, **स्वार्थं कार्यो** यो निरोधो लीलारूपः **स भगवानेवा**तः सप्तधा उक्त इतिशेषः, **तथात्वमिति** कार्यस्य लीलारूपस्य भगवत्त्वं व्यवस्थापितमपि पुनः सङ्ख्यातात्पर्येण **ज्ञाप्यत** इत्यर्थः, स्थानत्यागे हेतुमाहुः **सर्वस्वमिति** का० १०५¼ । **वन्दावन** इत्यादि का० १०६¼ । "वृन्दावनं गोवर्धनं यमुनापुलिनानि च वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृपे"त्यादिना **लीलोपयोगिपदार्थेषु** या **प्रीतिरुक्ता** सा पूर्वोक्त**ज्ञापनाये**त्यर्थः, **वत्सचारणे**त्यादि का० १०७¼ । **वत्सचारणदोषस्य निवृत्तिरूपं वत्सासुरमारण**मित्यर्थः, अनीश्वरस्यैव कार्यं वत्सचारणमितीश्वरस्य तत्करणमनुचितमितिदोष-बुद्धिस्तन्मारणकथया निवार्यते, न ह्यनीश्वर एवम्भूतं ज्ञातुमेवं हन्तुं वा शक्तो भवत्यतस्तन्निवृत्तिः, **किञ्च वत्साश्च तच्चारणं च** तयोः सम्बन्धिदोषस्येत्यप्यर्थः, वत्सानां पशुत्वेन कण्टकशर्कराक्षेत्रप्रवेशहेतुभूतभाव एव दोषः, **कण्टकादौ** चारणजनितोऽपराधश्चारणदोषः, स दोषस्तदाधिदैविकवत्सासुरमारणेन निवारित इति टिप्पण्यनुसारेणार्थः, दैत्यानां सामान्यतो दोषरूपत्वे प्रमाणं तु "लोभक्रोधादयो दैत्या" इति कृष्णोपनिषद्वाक्यं, तत्तद्दैत्यानां तत्तद्दोषविशेषरूपत्वं तु कार्यसाम्याद् बोध्यं, यथात्रैव, **गोपालेति** का० १०७¼ । बकस्य दम्भात्मकत्वं कार्यसाम्यादवगन्तव्यं **स्थानत्याग** इत्यादि का० १०८¼ । गोकुले पूतनाद्युत्पातागमदर्शनेन तत्त्यागे स्थान**दुष्टता न** कारणं किन्तु हरीच्छैवेति ज्ञापयितुमत्रापि वृन्दावनेपि **बकवत्सौ विनाशिता**वित्यर्थः, **अत** इत्यादि का० १०९¼, १०९¼ । **अतो** हरीच्छातः "अहो बतास्य बालस्ये"त्यादि श्लोकोक्तो **गोपानां विमर्शः**, "रममाणाश्च नाविन्दन् भववेदना"मित्यत्रोक्त **आनन्दश्च निरूपित** इत्यर्थः, **तदर्थमेव** नन्दादिनिरोधार्थमेव **हरेर्बालभावः**, **सम्पन्ने** त्विति नन्दादीनां निरोधरूपे फले सम्पन्ने सति **ततस्तस्य** बालभावस्य "कौमारं जहतुर्व्रजे"इत्यादिना **परित्यागो वर्ण्यत** इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

बृहद्वनात् समागत्य वृन्दारण्यमेकादशे । चारयन् वत्सकान् कृष्णोऽहनद्वत्सबकासुरौ ॥ १ ॥

'यावत्तौ गुह्यकौ स्तुतिं कुर्वन्तौ स्थितौ तावत्तच्छब्दो न केनापि श्रुत' इत्यपि भगवच्चरितमाश्चर्यमेव, 'तत्त्वया विश्वसनीयम् । महतां तत्र विश्वास एव युक्त' इत्याशयेन सम्बोधयति—हे कुरुश्रेष्ठ इति । नन्दादयो गोपाः पततोः द्रुमयोः रवं शब्दं श्रुत्वा निर्घातो वज्रपातस्तद्भयेन शङ्कितचित्तास्तत्र तयोः पतनस्थाने आजग्मुरित्यन्वयः ॥ १ ॥ आगताश्च तत्र भूम्यां निपतितौ

यमलार्जुनौ ददृशुः। दृष्ट्वा च तत्पतनस्य कारणं लक्ष्यं प्रत्यक्षतः सिद्धमप्यविज्ञाय "कस्य राक्षसादेरिदं वृक्षपातनं कर्म ? कुतो वा कारणादिदं वृक्षपतनरूपमाश्चर्यं जातम्" इति वदन्तो 'अयं देवदैत्यादिकृतो भाव्यानिष्टसूचकः कश्चिदुत्पात' इति भयेन कातरा व्याकुलाः। सन्तो बभ्रमुः, निश्चयं न जग्मुरिति द्वयोरन्वयः। 'किं तत्कारणम्' इत्यपेक्षायामाह– उलूखलं विकर्षन्तं बालकमिति। उलूखलविकर्षणे हेतुमाह दाम्ना बद्धमिति ॥ २–३ ॥ 'तिरश्चीनं तिर्यक्पतितमुलूखलं विकर्षता वृक्षयोर्मध्यगतेनानेन कृष्णेन वृक्षौ पातिताविति वयमचक्ष्महि दृष्टवन्तः। न केवलमेतावत्, किंतु वृक्षाभ्यां निर्गतौ दिव्यौ पुरुषावपि दृष्टवन्त इति नन्दादीन् प्रति बाला ऊचुः' इत्यन्वयः ॥ ४ ॥

अन्वितार्थप्रकाशिका

एकादशे प्राप्य वृन्दावनं वत्सांश्च पालयन्। बकवत्सावहृन्कृष्णः श्लोकाः सार्द्धा गजेषवः (५८॥) ॥
द्वे (२) उवाचेत्येकषष्टिरनुष्टुभ (६१) उदाहृताः ॥ ११ ॥

गोपा इति ॥ हे कुरुश्रेष्ठ ! नन्दादयो गोपाः पततोर्द्रुमयोः रवं शब्दं श्रुत्वा निर्घातो निरभ्रगर्जितरूपोत्पातस्तद्भयेन शङ्कितचित्ताः सन्तस्तत्र तयोः पतनस्थाने आजग्मुः ॥ १ ॥ भूम्यामित्यर्द्धम् ॥ आगताश्च तत्र भूम्यां निपतितौ यमलार्जुनौ ददृशुः ॥ २ ॥ बभ्रमुरिति सार्द्धम् ॥ दृष्ट्वा च तत्पतनस्य कारणं दाम्ना बद्धम् उलूखलं विकर्षन्तं बालकं लक्ष्यं लक्षयितुं शक्यं प्रत्यक्षतः सिद्धमप्यविज्ञाय कस्य राक्षसादेरिदं वृक्षपातनं कर्म कुतो वा कारणादिदमाश्चर्यं जातमिति वदन्तः अयं दैत्यादिकृतः कश्चिदुत्पात इति भयेन कातरा व्याकुलाः सन्तो बभ्रमुः निश्चयं न जग्मुः ॥ ३ ॥ बाला इति ॥ तिरश्चीनं तिर्यक्पतितं तिर्यग्गतमिति वा पाठः। उलूखलं विकर्षता वृक्षयोर्मध्यगेनानेन कृष्णेन वृक्षौ पातिताविति वयमचक्ष्महि दृष्टवन्तः। तथा वृक्षाभ्यां निर्गतौ दिव्यौ पुरुषावपि दृष्टवन्त इति नन्दादीन् प्रति बाला ऊचुः। यद्वा। अत्र विकर्षता मध्यगेनेत्यन्तमेव वाक्यं बाला ऊचुः। सम्भ्रान्तत्वेन पूर्णवचनाशक्तेरेतावुत्पाटितौ इति नोचुः। अविश्वसतस्तान् पुनरूचुः पुरुषावप्यचक्ष्महीति ॥४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीमेकादशेऽध्याय उलूखलबंधमोचनं क्रीडासक्तयोः श्रीकृष्णबलरामयोः मातृकृतसंबोधनं च वृंदावननिवसनं च वत्सासुरहननं चोच्यते पततोः पतमानयोः द्रुमयोर्वृक्षयोः रवं शब्दं निर्घातो मनुष्यघातस्तद्भयेन शंकिताः यद्वा निर्घातो विद्युत्पातो जात इति भयेन शंकिताः तत्रावृक्षपतनस्थाने ॥ १ ॥ लक्ष्ममितस्ततो दृश्यमपि शोधितमपीत्यर्थः। तत्पतनकारणं अविज्ञाय अबुद्धा बभ्रमुः ॥ २ ॥ तदविज्ञानं दर्शयन्नाह उलूखलमिति विकर्षं तं बालकं दृष्ट्वा कस्य राक्षसभूतप्रेतादेः इदं कर्म वा कुत इदं आश्चर्यं जातं इति परस्परमुक्त्वातत्कारणमविज्ञाय उत्पातभयेन कातराः ग्लानिं प्राप्ताः ॥ ३ ॥ वृक्षयोर्मध्यगेन तिर्यग्गतं वक्रतां प्राप्तमुलूखलं विकर्षता अनेन बालकेन इदं कर्म कृतं तदनंतरं द्रुमाभ्यां निर्यातौ दिव्यौ पुरुषावपि वयम् अचक्ष्म हि दृष्टवंत इति गोपान् बालाः ऊचुः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वृन्दावनमुपेत्यैकादशेऽयो बालकैः समम्। हतौ वत्सबकौ वत्सांस्त्रायताऽनेन चासुरौ ॥ १ ॥

गोपा इति ॥ हे कुरुश्रेष्ठ, नन्द आदिर्येषां ते नन्दादयः गोपाः, पततोः पत्यमानयोः, द्रुमयोरर्जुनयोः, रवं कडडेति पतनकालीनं ध्वनिं, श्रुत्वा, निर्घातो वज्रपातस्तस्माद्यद्भयं तस्य शङ्का संजाता येषां तथाभूताः, किमयं वज्रपातोऽभवदित्येवं तर्कयन्तः सन्त इत्यर्थः। तत्र पतितार्जुनस्थाने, आजग्मुः ॥ १ ॥ भूम्यामिति ॥ तत्र आगत्य, यमलार्जुनौ, भूम्यां निपतितौ, ददृशुः। नन्दादय इति शेषः। तत लक्ष्यं प्रत्यक्षतः पुरतो दृश्यमपि, पतनकारणम् अविज्ञाय, बभ्रमुः ॥ २ ॥ लक्ष्यं पतनकारणं दर्शयति ॥ उलूखलमिति ॥ उलूखलं विकर्षन्तं, दाम्ना बद्धं बालकं च, प्रत्यक्षं पतनहेतुं दृष्ट्वापीति शेषः। इदं कस्य राक्षसादेः कर्म स्यात्। इति कर्त्तृसंदेहः, कुतो वा कारणात्, इति निमित्तसंदेहः, आश्चर्यं जातमिदं, इत्युक्त्वा कातराः दीनाः सन्तः, उत्पातः इति निश्चित्य, बभ्रमुरिति शेषः ॥ ३ ॥ एवं बंभ्रम्यमाणांस्तान् प्रति तत्रत्या बाला ऊचुरित्याह ॥ बाला इति ॥ अहो किमिति यूयं भ्रमं कुरुध्वं इति शेषः। तिर्यग्गतं उलूखलं, विकर्षता मध्यगेन, अनेन कृष्णेन, एतौ पातिताविति शेषः। इत्येवं, बालाः, ऊचुः। न केवलमनयोरनेन पातनमेव कृतमित्यस्माभिर्दृष्टमपि तु, वृक्षाभ्यां निर्गतौ पुरुषावपि. अचक्ष्महि दृष्टवन्तो वयमित्यप्यूचुः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गोपा इति : १०. ११. १.

आगमभङ्गश्रुतिरिह सिद्धाभीरसकरा सुखस्थितिहृत्। युक्तं भग्नागमभवरवभीविवशान्तरास्तदाऽऽसंस्ते ॥ १ ॥

निर्नाम निर्गुणमभाणि यदीयरूपं याभ्यां सदैव बहुसभ्यजनाश्रिताभ्याम्।
दृष्टे सनामनि गुणिन्यपि तत्स्वरूपे सिद्धोऽर्थऽतो ननु तदागमभूरिभङ्गः ॥ २ ॥

भूम्यामिति : १०. ११. २.

यदागमस्थं सल्लक्ष्यं चक्षुषा ये दिदृक्षवः । सिद्ध एव भ्रमस्तेषां तद्विज्ञानपूर्वकः ॥ ३ ॥
सदङ्गनानारतनेत्रसक्तौ खलप्रसङ्गे च निपातहेतौ । लक्ष्येऽपि तेषामभवद्भ्रमो यः सकण्ठचामीकरवत्प्रसिद्धः ॥ ४ ॥

बाला ऊचुरिति : १०. ११. ४.

मधुरं पीयूषादपि प्रमाणमाम्नायतोऽपि बालवचः । श्राव्यं श्रुतिसुखकरमिति शिष्टोक्तावेतदेव मानमभूत् ॥ ५ ॥
खलगणमुलूकगणमिव हरिरिव हरिरिह गुणैरसंख्यातैः । दिग्भ्रमकलितं कुर्यादित्याम्रेडितवचोऽर्थ एष मुनेः ॥ ६ ॥

कृष्णप्रिया

श्रीशुकाचार्यजीने कहा—कुरुवर्य परीक्षित्, नन्दबाबा प्रभृति गोपजनोंने जब गिरते हुए वृक्षों की कड़कड़ाहट सुनी, तो उन्हें बिजली गिरने का अथवा वज्रपातका सन्देह हुआ और वे सर्व भयभीत होकर वहाँ आ धमके ॥ १ ॥ गोपजनोंने वहाँ यमलार्जुन को गिरा देखा, लेकिन वृक्षों के गिरने का कोई कारण न जान कर वे तर्क वितर्क करने लगे ॥ २ ॥ यद्यपि गोपजनोंने ओखली में बँधे और उसे लुढ़काते हुए बालक कृष्णजी को तो नजरों से अवश्य देखें, फिर भी चकाचौंध होते हुए दुविधा में पड़ भयभीत हो, सोचने लगे कि यह किसका काम है और ऐसा क्यों हुआ ! क्या कोई उत्पात तो नहीं होने वाला है ॥ ३ ॥ वहाँ खेलते हुए बालकों ने कहा कि श्रीनन्दलाल ने टेढ़ी ओखली के धक्केसे बीचमें जाकर दोनों वृक्षों को गिराया है । वृक्षों के मूल से दो पुरुष निकले और उन दोनों ने कृष्ण से कुछ वार्तालाप भी किया ॥ ४ ॥

न ते तदुक्तं जगृहुर्न [1]घटेतेति तस्य तत् । बालस्योत्पाटनं तर्वोः केचित् संदिग्धचेतसः ॥ ५ ॥
उलूखलं विकर्षन्तं दाम्ना बद्धं स्वमात्मजम् । विलोक्य नन्दः [2]प्रहसद्वदनो विमुमोच ह ॥ ६ ॥
गोपीभिः स्तोभितोऽनृत्यद् भगवान् [3]बालकः क्वचित् । उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयन्त्रवत् ॥ ७ ॥
बिभर्ति क्वचिदाज्ञप्तः [4]पीठकोन्मानपादुकम् । बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ॥ ८ ॥
दर्शयंस्तद्विदां लोक आत्मनो भृत्यवश्यताम् । व्रजस्योवाह वै हर्षं भगवान् बालचेष्टितैः ॥ ९ ॥

कर्दमक्षमा

अन्वयः—केचित् संदिग्धचेतसः तस्य बालस्य तत् तर्वोः उत्पादनं न घटेत इति ते तदुक्तं न जगृहुः ॥ ५ ॥ दाम्ना बद्धं उलूखलं विकर्षन्तं स्वं आत्मजं विलोक्य प्रहसद्वदनः नन्दः ह विमुमोच ॥ ६ ॥ गोपीभिः स्तोभितः तद्वशः मुग्धः दारुयन्त्रवत् बालकः भगवान् कचित् अनृत्यत् कचित् उद्गायति ॥७॥ कचित् आज्ञप्तः स्वानां प्रीतिं आवहन् कचित् पीठकोन्मानपादुकम् बिभर्ति कचित् च बाहुक्षेपं कुरुते ॥ ८ ॥ तद्विदां लोके आत्मनः भृत्यवश्यतां दर्शयन् भगवान् बालचेष्टितैः वै व्रजस्य हर्षम् उवाह ॥ ९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

केवलं तार्किकास्ते न जगृहुरेव अन्ये तु संदेहयुक्तचित्ता बभूवुरिति ॥ ५ ॥ भगवन्मायाविमोहितस्य नंदस्य तत्राचरितमाह । उलूखलमिति ॥ ६ ॥ ज्ञास्यंते मामिति शंकमानोऽतीव बाल्यमनुकरोति स्म तदाह । गोपीभिरिति । स्तोभितः करतालादिना प्रोत्साहितः ॥ ७ ॥ इदमानयेत्याज्ञप्त आनेतुमसमर्थ इव बिभर्ति केवलं पीठादि । बाहुक्षेपं करचालनं च । तद्विदां चेति चकारान्वयः ॥ ८ ॥ तदैश्वर्यं विदंति ये तेषाम् । एवं व्रजस्य हर्षमुवाहेति ॥ ९-२० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ते गोपाः । तदुक्तं बालोक्तमिति न जगृहुरिति किं तस्यातिबालस्य तत्प्रत्यक्षं तर्वोर्वृक्षयोरुत्पाटनं समूलयोर्भूमेर्निष्कासनं न घटेत संगच्छेत । तार्किकास्तर्कप्रधानाः । अन्ये तु तार्किकेतरे तु पूर्वकृतपूतनामारणशकटोच्चाटनादिना तस्मिन्ससंदेहा जाता अनेनैवैतत्कृतमुत्पाततो वा जातमिति द्विचित्ता बभूवुरिति भावः ॥ ५ ॥ मायाविमोहितत्वाच्छोकं न चक्रे किं तु प्रहसन्मुखस्तमुलूखलात्पृथक् चकार । अहो किमर्थं बाल उलूखले बद्ध इत्येवं वदन्निति भावः "प्रहसद्वदनम्" इति पाठोपि विष्णुपुराणोक्तरीत्या श्रेयान् "नवोद्गताल्पादंतांशुमितहासं च बालकम्" इति तस्य प्रकटहासश्च पितृतोपि शंकमानस्य तत्प्रसाद-

---

१. घटेदिति–गो. प्रे. टी. । २. प्रहसन्बन्धनाद्वि–इति कस्यचित् । ३. बालवत्–श्रीधर. वंशी. । ४. दारुकान्–इति कस्यचित् ।

दर्शनेन स पुनः पितृसंतोषार्थं निजदुःखाभावबोधनाय जात इति तोषिणीकारः ॥ ६ ॥ ज्ञास्यंते मा अयं महत्पुरुषः साक्षादक्लिष्टकारित्वादिति गोपादयो बोधिष्यंते एतन्माभूदिति शंकमानस्तेषां प्रीत्यर्थमतीव बाल्यं बालभावम् । तद्बालभावम् । बालवदित्युक्तेन तु स बालः किं तु सर्वकर्त्ता । मुग्धः सुंदरः । तद्वशो गोपीवशः । तद्वशत्वमेवाह ॥ ७ ॥ पीठकं काष्ठपीठम् ; उन्मानं प्रस्थम् । पादुकं पादपीठं पादरक्षणं वा ॥ ८ ॥ ऐश्वर्यम् ईश्वरभावम् । यद्वा—साक्षात्स्वयं भगवानेवैषावतीर्ण इति जानतां नारदादीनाम् । उवाह प्राप ॥९॥ अतः परं प्रक्षिप्तः पाठोऽस्ति गोपवृद्धा महोत्पाता नित्यतोर्वाक् अतो न व्याख्यायते ॥१०-२०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न जगृहुः श्रीनन्दादयः ममताद्रचित्तत्वात् । केचित्पूतनादिनाशाल्लब्धव्याप्तिना तर्केण किञ्चित् कर्कशायमानचित्ता विप्रा अपि स्वाभाविकममताद्रत्वेन सन्दिग्धचेतस एव बभूवुः । ततश्चागन्तुकेनाश्चर्यकरेण तत्प्रभावज्ञानेन तेषामपि स्वाभाविकस्नेहवृद्धिरेव जाता लवणाकरस्य रसान्तरेणापि लवणरसवृद्धिवदिति भावः । तद्वृत्तं च स्नेहभरेणातिबालत्वस्यैव मननात् सन्देहनिरासार्थं साक्षात्तमेव ते किल न पप्रच्छुरिति बोद्धव्यं किं वा स्नेहभराकुलतया प्रश्नेऽप्यशक्तेः ॥ ५ ॥ श्रीनन्दस्य वात्सल्यप्राबल्यमाह—उलूखलमिति । उलूखलमित्यादेः पुनरुक्तिर्विशेषतः श्रीनन्दस्य तादृशलीलादर्शनाय तथोलूखलाकर्षणेन पुत्रस्वास्थ्यतद्बलाधिक्याद्यनुमानात् प्रहर्षबोधनार्थं तथापि विलोक्येति साङ्गप्रत्यङ्गविशेषेण दृष्ट्वेत्यर्थः । बद्धस्य भीतस्य बालस्योल्लासनार्थं प्रहसद्वदनः सन् पुत्रस्य बन्धनदृष्ट्या महावृक्षपातादनिष्टशङ्कया च श्रीयशोदां प्रत्यन्तः क्रोधाद्वदनेत्युक्तिः प्रहसद्वदनमिति द्वितीयान्तपाठो वा तथा च श्रीविष्णुपुराणे "नवोद्गताल्पदन्तांशुसितहासं च बालकम्" इति तस्य प्रकटहासश्च पितृतोपि शङ्कमानस्य तत्प्रसाददर्शनेन स पुनः पितृसन्तोषार्थनिजभयदुःखाभावबोधनाय च जातः विशेषता उलूखलाद्दाम्नश्च मुमोच द्वितीयबन्धनस्योलूखलगतस्य प्रथममोचनीयत्वात् ह हर्षे एवं श्रीयशोदाया बन्धनक्षमतावन्मोचनक्षमतया श्रीनन्दस्यापि तादृशत्वं दर्शितम् । अत्र च बन्धनदाम्नां बाहुल्यं तैः प्रेमावेशेनैव न सम्भालितमिति ज्ञेयम् ॥ ६ ॥ न केवलमसौ परमस्निग्धाया मातुः पितुश्चैव प्रेमवशतामापन्नः अपि त्वन्यासां गोपीनाम् अपीति दर्शयन्नतिप्राक्तनबाल्यचरितमाह—गोपीभिरिति द्वाभ्याम् । प्रायो जरतीभिः भगवान् अखिलैश्वर्यसम्पूर्णोपि बालवत् अन्यो बालो यथा तद्वदिति तत्प्रेमरसवशबाल्यलीलाभिनिवेशेन निजैश्वर्य्यविस्मृतिः सूचिता बालक इति पाठे बाल्यलीलानुरूपमेव तदिति भावः । कचिदित्यस्य मुग्ध इत्यनेनाप्यन्वयः अतिबालत्वेन नृत्यादिकं किञ्चिदजानन् कचिन्मुग्धभावमपि दर्शयतीत्यर्थः । यद्वा, नृत्यादौ सर्वत्र सर्वथा मनोरम इत्यर्थः । तथा नृत्यादौ हेतुः दारुयन्त्रं सूत्रसञ्चारादिशिल्पतो नृत्यादिपरा पुत्रिका तद्वत्तासां वशः अधीन इति ॥ ७ ॥ बाहुक्षेपं भुजौ मुहुरुत्थाप्य पराक्रमदर्शनं न केवलं तत्र तासामेव सुखं जातम् अपि तु गोपमात्राणामित्याह—स्वानां ज्ञातीनाम् अविशेषेण तासां गोपजातीनामित्यर्थः । स्वानां च प्रीतिमावहन्निति पाठस्तेषां सम्मतः तद्विदां चेति चकारस्यान्वयः इति व्याख्यानात् ॥८॥ आनुषङ्गिकं प्रयोजनमाह—दर्शयन्निति । तदैश्वर्यमेव विदन्ति न तु भृत्यवश्यतां ये तान् साक्षात् बोधयन्नित्यर्थः । अत्र भृत्यशब्दस्तदैश्वर्यमात्रदर्शिनां भवानुवादेन स्वानामिति तु श्रीभगवतः अन्याभिरपीदृशीभिर्बाल्यलीलाभिर्व्रजजनानां सर्वेषामप्यानन्दं सदाऽकरोत् इत्याह व्रजस्यैति वै प्रसिद्धम् ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

न जगृहुः श्रीनन्दादयः, स्नेहभराक्रान्तचित्तत्वात् । केचित् पुरोहितादयः, कदाचित् कथञ्चित्तेषु तदैश्वर्य्यस्यापि परिस्फुर्त्तेस्तथापि न तेषां प्रेमभरो हीयते, प्रत्युत तयासौ वर्द्धतैवेति ज्ञेयम्, यथा खाण्डवाग्नेः परिवृद्धस्य सतो मेघवृष्टिरपि न निर्व्वापणे शक्तः केवलं घृतासारवद्वृद्धिहेतुतामेव प्राप्नोति, यद्वा, तस्मिन् सदा तेषां महाबलिष्ठविविधाश्चर्य्यमयतया बुद्धेरिति दिक् । तत्वृत्तश्च स्नेहभरेणातिबालत्वस्यैव मननात् सन्देहनिरासार्थं साक्षात्त्वमेवेति किल न पप्रच्छुरिति बोद्धव्यम्, किंवा स्नेहभराकुलतया प्रश्नेऽप्यशक्तेः, किंवा बाल्येन तस्योक्तावप्यविश्वासादिति दिक् ॥ ५ ॥ उलूखलमित्यादेः पुनरुक्तिर्विशेषतः श्रीनन्दस्य तादृशलीला-दर्शनात्, तथोलूखलाकर्षणेन पुत्रस्वास्थ्य-तद्बलाधिक्याद्यनुमानाच्च । प्रहासहेतुप्रहर्षबोधनार्थं स्वं स्वीयमात्मजमौरसं पुत्रम्, यद्वा, स्वं निजधनरूपमात्मजमिति स्नेहभरविषयत्वमुक्तम् । विशेषेण तत्सर्व्वांगनिरीक्षणपूर्व्वकं लोकयित्वा बाल्यलीला-विशेषदर्शनाच्च प्रहसद्वदनः सन् पुत्रस्य बन्धनदृष्ट्या महावृक्षपातादनिष्टशंकया च श्रीयशोदां प्रत्यन्तःक्रोधाद्वदनेत्युक्तिः । 'प्रहसद्वदनम्' इति द्वितीयान्तपाठो वा, तथा च श्रीविष्णुपुराणे (५।६।२०)—'नवोद्गताल्पदन्तांशुसितहासञ्च बालकम्', इति । तस्य प्रकटहासश्च श्रीनन्दसन्तोषार्थं निजभयदुःखाभाव बोधनाय । विशेषत उलूखलाद्दाम्नश्च मुमोच । ह हर्षे ॥ ६ ॥ एवं भक्तवश्यतां प्रदर्शयन् परम-स्निग्धाया मातुः पितुश्च सुखविशेषं विस्तार्य्य श्रीगोपीनां परमानन्दं व्यतनोदित्याह—गोपीभिरिति द्वाभ्याम् । प्रायो जरतीभिर्भगवानखिलैश्वर्य्यसम्पूर्णोऽपि बालवदन्यो बालो यथा तद्वदित्यत्यन्तबाल्यलीलाभिनिवेशेन निजैश्वर्य्य-विस्मृतिः सूचिता । बालक इति पाठे बाल्यलीलानुरूपमेव तदिति भावः । ततश्च भगवानिति नृत्यादौ नैपुण्यविशेषस्तेन चैश्वर्य्यविशेष एव सूचितः, यद्वा, बालानां कं सुखं यस्मात् स इति वयस्यानामपि सन्तोषार्थमिति

भावः । क्वचिदित्यस्य मुग्ध इत्यनेनाप्यन्वयः,—नृत्यादिकं किञ्चिदजानन्निव कदाचिन्मुग्धभावमपि दर्शयतीत्यर्थः, यद्वा, नृत्यादौ सर्व्वत्र सर्व्वथा सुन्दरो मनोरम इत्यर्थः । तथा नृत्यादौ हेतुः—दारुयन्त्रं तासामेव क्रीडोपकरणं तद्विद्योपजीविनां वा दारुनिर्म्मिता सूत्रसञ्चारादिशिल्पतो नृत्यादिपरा पुत्तलिका तद्वत्तासां वशोऽधीन इति ॥ ७ ॥ तत्प्रयोजनमाह—स्वानां श्रीगोपीनां किंवा ताभिर्नर्त्तनादि-बाल्यलीलया निजभक्तानां सर्व्वेषामेव प्रीतिमानन्दं प्रेमाणं वा सम्यगुच्चैः प्रापयन्निति, स्वानाञ्चेति पाठस्तेषां सम्मतस्तद्विदाञ्चेति चकारस्यान्वय इति व्याख्यानादत्र काश्चिद्बालाः काश्चिच्च वृद्धा इति गोपीत्वेन सर्व्वा अप्येकत्रोक्ताः ॥ ८ ॥ प्रयोजनान्तरमाह-दर्शयन्निति । तद्विदां तं भगवन्तं विदन्तीति भक्तानामेवाहं वश्यो नान्येषामिति ज्ञानपरान् प्रति साक्षादबोधयन्नित्यर्थः । अयमपि प्रीत्युद्वहने हेतुविशेषो द्रष्टव्यः । एवं भक्तिमाहात्म्यप्रदर्शन एव तात्पर्य्यमुह्यम् । अन्याभिरपीदृशीभिर्बाल्यलीलाभिर्व्रजजनानां सर्व्वेषामेवानन्दं सदाऽकरोदित्याह व्रजस्येति । वै प्रसिद्धमेवेति । तानि किं विस्तार्य्य कथयितव्यानीति भावः । एवं विविधबहुलाद्भुतबाल्यचेष्टितान्यन्यान्यपि सन्तीति सूचितम् । तत्साकल्याकथने सिद्धान्तः प्रागुक्त एव ॥ ९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

विमुमोच दामबन्धादमोचयत् ॥ ६ ॥ स्तोभित उपच्छन्देन उद्योगं प्रापितः दारुयन्त्रवत् तद्वश इत्यन्वयः ॥ ७ ॥ उन्मानं प्रस्थादि ॥ ८ ॥ उवाह आवहत् ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमुक्तानां तेषां मध्ये केचित् केवलतार्किका इदं न घटेत इति वदन्तः तद्बालकैर्भाषितं न जगृहुर्न विश्वसितवन्तः अन्ये तु बालस्य बालकर्तृके तर्वोरुत्पाटने सन्दिग्धं संशययुक्तं चेतो येषां तथा बभूवुः ॥ ५ ॥ अथ भगवन्मायामोहितस्य नन्दस्याचरितमाह—उलूखलमिति । प्रहसद्वदनं यस्य स नन्दो विलोक्य तं दामबन्धादमोचयत् ॥ ६ ॥ अथ भगवतः काश्चिद्बाल्यानुकारप्रकारान् दर्शयति—गोपीभिरिति । कचित् स्तोभितः उपच्छन्दनेनोद्योगं प्रापितः करतलादिना प्रोत्साहितो वा उद्गायति सति गोपीजनः इति शेषः । दारुयन्त्रवद्दारुनिर्मितपाञ्चालिकावत्तद्वशगः गोपीवश्यः मुग्ध इवानृत्यत् नृत्यन्निति पाठे तद्वशः गोपीजनवशगस्सन् नृत्यन्नुद्गायति ॥ ७ ॥ कचिदाज्ञप्त आनयेति नियुक्तः पीठकादिकमानेतुमसमर्थ इव बिभर्त्ति उवाह पीठकं विष्टरम् उन्मानं प्रस्थादि, पीठभाजनपादुकमिति पाठे भाजनं कांस्यादिपात्रं तथा बाहुक्षेपं भुजचलनं कुरुते, किङ्कुर्वन् ? गोपीनां प्रीतिमावहन् ॥ ८ ॥ तद्विदां भगवद्वैभववेदिनां भक्तवश्यतां च दर्शयन्नेवं बालचेष्टितैः व्रजस्य व्रजस्थजनस्य हर्षमुवाहावहत् ॥ ९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तदुक्तं बालोक्तम् ॥ ५-७ ॥ उन्मानं प्रस्थं पादुकं पादपीठं पादरक्षणं वा ॥ ८ ॥ तद्विदां भगवानेवायमवतीर्ण इति जानतां नारदादीनाम् ॥ ९-१० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तेषु परमवात्सल्यस्वभावा न जगृहुः ॥ ५ ॥ श्रीव्रजेश्वरस्य परमवात्सल्यचेष्टामाह—उलूखलमिति । विलोक्येति साङ्गप्रत्यङ्गविशेषेण दृष्ट्वेत्यर्थः । प्रहसद्वदन इति बालस्य भीतस्य भयहानार्थं प्रहसद्वदनमेव यस्य सः अन्तस्तु स्वयमप्युद्विग्न इत्यर्थः । द्वितीयान्तः पाठो वा तस्य तेजस्वित्वस्वभावादेव ॥ ६ ॥ अन्यासामपि गोपीनां तस्मिन् प्रेमवश्यतां दर्शयन् प्राचीनबाल्यलीलामाह—गोपीभिरिति द्वाभ्याम् ॥७॥ बाहुक्षेपं भुजौ मुहुरुत्थाप्य पराक्रमदर्शनं तत्र सर्वेषां गोपानामप्यानन्दमुदाहरति स्वानां ज्ञातीनां गोपजातीनामित्यर्थः । अतएव ये केचिद्वृद्धभृत्या आसन् तेषामपि वश्यत्येत्यर्थः ॥८॥ आनुषङ्गिकं प्रयोजनमाह–दर्शयन्निति । केवलं गोपजातीनामेव प्रीतिमुदावहदित्याह व्रजस्येति तद्वासिनः सर्वस्यैव ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

(१-५) अथ एवम्बिधं द्रुमपातनमालोक्य व्रजराजो विस्मितः सन् यदकरोत्तदाह–उलूखलं विकर्षन्तमित्यादि । प्रहसद्वदन इत्यस्यायं भावः । अहो यशोदाया असमीक्ष्यकारिता, यदल्पीयस्यपराधेऽपि ईदृशस्यापि दुर्ललितस्य ईदृशं बन्धनम् । अथवा, अस्यैवेदं कर्म, सत्यमेवाहुर्बालकाः । यदस्य प्रभावो गर्गेण वर्णितोऽस्ति, तदयं महापुरुष एवेति प्रहसद्वदनत्वम् ॥ ६-५८ ॥

इति श्री दशमे श्रीबृहत्क्रमसन्दर्भे एकादशोऽध्यायः ॥ ११ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

(१-५) उलूखलं विकर्षन्तमित्यादि । प्रहसद्वदन इत्यस्यायं भावः–अहो यशोदाया असमीक्ष्यकारिता, अस्यापीदृशं बन्धनमल्पीयस्यपराधे यया कृतम् ! अथवा, अस्यैवेदं कार्यम् , न मृषा वदन्ति शिशवः, यदयं परमप्रभावः, गर्गेणोक्तत्वात् ॥ ६ ॥ तद्वशो दारुयन्त्रवदिति । एहि गच्छ पतोत्तिष्ठ वद मौनं समाचरेतिवत् भक्तवशतैव तस्यैश्वर्यम् ॥ ७-५८ ॥

इत्येकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ते नन्दादयः तस्मिन्ममतार्द्रचित्तत्वात् तत्प्रभावानुसन्धानात् तदुक्तं बालोक्तं न जगृहुः केचिदन्ये तु नारायणसमो गुणैरिति गर्गोक्तिस्मृत्या स्वाभाविकप्रेमोदयेन च सन्दिग्धचेतस एव बभूवुः ॥ ५ ॥ विलोक्य विशेषेणाङ्गप्रत्यङ्गनिर्बाधं दृष्ट्वा प्रहसद्वदन इति मत्क्रोडादपि यस्याः क्रोडं त्वमतिप्रियं मन्यसे सा त्वज्जननी त्वामल्पापराधेनैव बध्नाति स्म तत्त्वामहं कथं मोचयामीत्युपालम्भनद्योतकः प्रहासः त्वं माययैव जीवानां बन्धमोक्षौ यथा व्यधाः तथा त्वत्पितरौ तौ ते प्रभो प्रेम्णैव चक्रतुः ॥ ६ ॥ पित्रोस्तयोः सौभाग्यमहिमा केन वक्तुं शक्यस्तदीयव्रजवासिमात्रस्याप्यतिमात्रवश्यो ब्रह्मादिवशीकर्त्तापि कृष्ण इत्याह—सार्द्धत्रयोदशभिः । स्तोभितः यदि नृत्यसि तदा तुभ्यं खण्डलड्डुकं दास्यामीति प्रोत्साहितः बालवत् यथान्यः प्राकृतो बालस्तद्वदेवेत्यर्थः । मुग्धस्तासां प्रेम्णैव निजैश्वर्याननुसंधानात् दारुयन्त्रं सूत्रप्रोतपुत्तलिका ॥ ७ ॥ पीठकेति कियदस्य बलमभूदिति जिज्ञासुभिः प्रथमं हे कृष्ण ! पादुकामानयेति ततस्ततोऽधिकभारमुन्मानमानयेति ततस्ततोऽप्यधिकभावं पीठकमानयेत्याज्ञप्त आदिष्टस्तत्तदानयन् बिभर्त्ति स्वमृदुलजठरोपरीत्यर्थः । बाहुक्षेपं तत्र तत्र कर्मणि भुजौ मुहुरुत्थाप्य स्वपराक्रमदर्शिनां स्वानां ज्ञातीनाम् ॥८॥ न केवलं ज्ञातीनामेव अपि तु सर्वेषामेव व्रजवासिनां प्रीतिप्रदो वश्यत्वादित्याह–दर्शयन्निति । तद्विदां तदैश्वर्य्यविज्ञान् ब्रह्मादीनिति नैतदनुकरणत्वेन व्याख्येयम् ॥ ९-१० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदुक्तं बालैरुक्तं न जगृहुः केचित्तु सन्दिग्धचेतसः शकटपरिवर्तनेऽपि बालैरयमेव हेतुरुक्तोऽतोऽस्यैवेदं कर्म न वेत्यादिसंशययुक्तं सन्दिग्धं चेतो येषां ते आसन् ॥ ५ ॥ श्रीनन्दस्तु "अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ" इत्यादि गर्गवाक्यं संस्मृत्य प्रहसद्वदनः स्वबालकं विमुमोच ह दामबन्धादमोचयत् ॥ ६ ॥ स्तोभितः प्रोत्साहितः ॥ ७ ॥ कचिदिदमानयेत्याज्ञप्तः पीठकादिकं बिभर्त्ति केवलं न तु आनेतुं शक्नोति तत्र पीठकं विष्टरम् उन्मानं धान्यादिपरिमाणनिश्चायकं प्रस्थादि बाहुपेक्षेपं करचेष्टाविशेषं चकाराच्चरणमुखादिरुचिरचेष्टाविशेषांश्च कुरुते ॥ ८ ॥ इत्थं बालचेष्टितैः व्रजस्य व्रजस्थजनसमूहस्य हर्षमुवाह अवहत् किंकुर्वन् भक्तिवशः पुरुष इति वेदे आत्मनो भक्तवश्यता विदां लोकेऽपि तामात्मनो भृत्यवश्यतां दर्शयन् ॥ ९-१९ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ते नन्दादयस्तेषां बालानामुक्तं न जगृहुः तस्य बालस्य तत्तर्वोरुत्पाटनं न घटेतेति तद्वात्सल्यभावेन तदैश्वर्यज्ञानस्यावृतत्वात् , केचित्तु पूतनादि विनाशाल्लब्धव्याप्तिनानुमानेनास्यैवेदं कर्म भवेदिति सन्दिग्धचेतसो बभूवुः तेन तन्प्रदिमज्ञानेनाप्युक्तयुक्त्या वात्सल्यभावस्य वृद्धिरेवाभूदिति बोध्यम् ॥ ५ ॥ विलोक्य तदङ्गानि निर्बाधान्यालोक्येत्यर्थः । बद्धस्य भीतस्य सूनोरुल्लासाय प्रहसद्वदनः सन् । यद्वा मदुत्सङ्गादपि यस्या उत्सङ्गं श्रेष्ठं मन्यसे सा त्वन्माता अल्पेनैवापराधेन त्वामबध्नात्तदहं कथं त्वां मोचयामीत्युपालम्भाय तादृशः सन्नित्यर्थः ॥ ६ ॥ एवं त्वन्मातापित्रोर्व्रजेशयोः सौभाग्यभरमुक्त्वा तत्प्रजानां व्रजौकसामाह गोपीभिरिति । सार्धत्रयोदशभिः, ताभिर्वृद्धाभिः स्तोभितो नृत्यसि चेत् सशर्करं नवनीतं दास्याम इति प्रोत्साहितः भगवान् पूर्णषडैश्वर्योऽपि विधिरुद्रादिवशी कर्त्तापि दारुयन्त्रवत् सूत्रप्रोतदारुपुत्तलिकावत्तद्वशः कचिदनृत्यत् , बालवत् यथान्यः प्राकृतो बालस्तत्तुल्यः कचिदुदगायति स्म । मुग्धः सर्वत्र नृत्यादौ मनोज्ञः "मुग्धः सुन्दरमूढयो"रिति विश्वः ॥ ७ ॥ कियदस्य बलमभूदिति जिज्ञासुभिराज्ञप्तः प्रथमं पादुकामानय ततोऽधिकभावमुन्मानं ततोऽधिकभावं पीठकं चेत्यादिष्टस्तत्तदानयन् बिभर्त्ति स्वमृदूरोपरि धारयतीत्यर्थः । बाहुक्षेपं भुजौ मुहुरुत्थाप्य स्वबलदर्शनं च कुरुते तेन स्वानां ज्ञातीनां च प्रीतिमावहन् ॥ ८ ॥ न केवलं ज्ञातीनामेवापि निखिलानां व्रजौकसामित्याह दर्शयन्निति । वै प्रसिद्धौ तेन किं कुर्वन्नित्याह त्वद्विदां तत्पारमैश्वर्यज्ञानां विधिहरादितामात्मनो भक्तवश्यतां दर्शयन्निति नेदमनुकरणमिति भावः ॥ ९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तर्वोर्बालस्योत्पाटनं तस्य तत्र घटत इति केचित्तदुक्तं न जगृहुः । असम्भावितमनृतगिर एत इति न स्वीचक्रुः । केचित्पूतनादिघातस्मृतिमन्तो दृष्ट्वैतन्निषेद्धुकाः सन्दिग्धं चेतो येषां ते तथाऽभवन् ॥ ५ ॥ प्रहसद्वदनं यस्य सः किमिदं

सुवती व्यदादिति नन्दो मन्दं हसन्नन्दनं विमुमोचामोचयत्। हेत्यनेन जगद्बन्धकस्येव मोचकस्य बन्धं तथा मोचनं चोपजहास व्यास इति ज्ञेयम् ॥ ६ ॥ स्तोभितो वञ्चित इव नर्तनं कुरु कर्तरित्युक्तावनृत्यन्ननर्त। नृत्यन्निति शत्रन्तपाठे तथा सन्नुद्गायतीत्यन्वयः। तद्वशो गोपीवशो दारुयन्त्रवत्काष्ठमयनियम्यपुत्तलिकादिवन्मुग्धः किञ्चिदजानान इव ॥७॥ पीठकं चोपवेष्टव्यफलकमुन्मानं मापकवैणवं प्रस्थादिकम्। पादुका दारुमयोपानत्। अथ पादुका पादूरुपानत्स्त्रीत्यमरः। पादुकं सर्वो द्वन्द्व इत्येकवद्भावः। जातिरप्राणिनामिति पीठकादीनां समाहारो वा। स्वानां ज्ञात्यादियोषिताम् ॥ ८ ॥ तद्विदां स्वस्वरूपज्ञानिनां नारदादीनां लोके स्वस्य भक्तवश्यतां दर्शयन् बालचेष्टितैर्व्रजस्य तद्गतजनव्रजस्य हर्षमुद्वाहयन्प्रवहन्तं तन्वन्बाहुक्षेपं च कुरुत इत्यतीतेनान्वयः ॥ ९ ॥

श्रीसुबोधिनी

तदुभयमपि तैर्नाङ्गीकृतमित्याह **न ते तदुक्तं जगृहुरिति**, ते गोपा **बालकोक्तं** न सत्यमिति गृहीतवन्तस्तत्र हेतुर्न **घटेतेति, तस्य बालकस्य तर्वोरुत्पाटनं** सर्वथा युक्तिबाधितं, **केचन** पुनरार्द्रनैयायिकाः **सन्दिग्धचेतसो** जाताः, शकटतृणावर्तयोर्भङ्गदर्शनात्, न तु तेषामपि कश्चन निर्धारः ॥ ५ ॥ नन्दस्तु सन्दिग्धोपि तं विचारं दूरीकृत्य मोचितवानित्याहोलूखलमिति, तदानीमपि **विकर्षन्तमिति** शीघ्रमोचने हेतुः, **दाम्नाबद्धमिति** मोचने निमित्तं, **स्वमात्मजमिति** स्वस्यैवावश्यकत्वं, **स्वमिति** व्याकुलतापरिज्ञानार्थं, स्वपदप्रयोगात् भगवद्भावं प्राप्त इतियुक्तिरपि, तेषामज्ञानं न तेषां बुद्धिदोषेण किन्तु भगवतैव कार्यत इति, **प्रहसद्वदन** इति धौर्त्यस्मरणात्, तस्यापि ज्ञानाभावस्त्वनेनोक्तः, विशेषेण मोचनं सर्वासामेव रज्जूनां पृथक्करणं, हेत्याश्चर्यं, स्वबन्धनं तेन मोचितमिति भगवल्लक्षणो बन्धो भगवतैव मोचयितुं शक्यते नान्येनेत्यत इदमाश्चर्यमेव ॥ ६ ॥

गोपीनां वशभावं प्राप्तस्य भगवतो लीलामाह **गोपीभिरिति**त्रिभिः।

विद्योपजीविनां सेवां येनैव च सुखं भवेत्। राजसीं तामसीं लीलां सात्त्विकीं च चकार ह ॥ १ ॥

तत्र प्रथमं राजसीं लीलामाह, गोपिकाः प्रत्येकं स्वस्वगृहं नीत्वा 'नृत्यं कुरु भगवँल्लड्डुकानि दास्यामी'त्युक्तो नृत्यति, तत्रापि **स्तोभितः** 'कृष्ण एव सम्यङ् नृत्यं जानाति कर्तुं न राम'इत्युक्तः, **स्तोभा** शून्यप्रशंसा यथा स्तोभाक्षराणि भभभेति, तथा **गोपीभिर्यथाकथञ्चित् स्तुतो** नृत्यन् नृत्यं करोति, लडर्थे लङ्, तत्रापि नृत्ये न प्राकृतवन् नृत्यति किन्तु यथा तण्डुर्यथा वा पार्वती, ततोपि **सहस्रगुणमत्यन्तं** नृत्यति, तदनुचितं, किं पामराणां स्थाने तथानृत्येनेति ? तदाह **भगवानिति**, षड्गुणैश्वर्यसम्पन्नो न ह्यन्यथा नृत्यं कर्तुमर्हति, तर्हि तासामप्यग्रे नार्हत्येवेति चेत् तत्राह **बालकः क्वचिदिति**, क्वचिद् वा गोकुले स्वस्य **बालभावं** प्रदर्शितवानिति, **बालवदिति** पाठे क्वचिद् भगवान् शास्त्रानुसारेण नृत्यति क्वचिद् **बालवत्** केवलं देहपादचालनमात्रं करोति मुग्धभावख्यापनाय, ततोपि कयाचित्'कृष्ण गाये'त्युक्त **उद्गायति**, उच्चैस्तूष्णीं गानं करोति यथा सर्वासां हास्यं भवति, अथवा कश्चिदूर्ध्वं गायति यथाशास्त्रं **क्वचिन्मुग्धो** शास्त्रमपि **बालवत्**, किञ्च नृत्यगानयोर'प्येवमुत्थायैवमुपविष्ट एवं सुप्तो गानं कुर्वि'त्युक्तस्तथैव गायतीत्याह **तद्वशो दारुयन्त्रवदिति**, गोपिकावशो भूत्वा **दारुपुत्रिकावन्** नृत्यति गायति च ॥ ७ ॥ लीलान्तरमाह **बिभर्तीति**, सर्वत्र **क्वचिदिति**पदेन कश्चित् करोति कश्चिन्न करोतीति ज्ञातव्यं, अन्यथा तथास्वभावं आश्चर्यं न स्याद् बहुधा प्रार्थनं च, क्वचिदाज्ञप्तः 'पीठमानयोन्मानं तण्डुलादिमानपात्रमानय **पादुके** दारुमये आनये'त्युक्तः केवलं **बिभर्ति** न तूत्थापयितुं शक्नोति, अशक्तिभावनां च करोति यथा प्राकृता बालाः कुर्वन्ति, एकवद्भावः स्थूले सूक्ष्मे प्रशस्ते निन्दिते तुल्यत्वज्ञापनार्थः किञ्च **बाहुक्षेपं च कुरुते**, 'मया सह मल्लयुद्धं कुर्वि'त्युक्तो बाहुविस्फोटनं करोति, चकारादुपर्यपि पतति, बलाविर्भावेन तं चालयतीव, ननु किमित्येवं करोति ? तत्राह **स्वानामिति**, येन कारणेन तेषु **स्वत्वं** सम्पादितं तेनैव **प्रीतिमुद्वहन्** यावतैव तेषां प्रीतिर्भवति, न त्वधिकं करोतीत्यर्थः ॥ ८ ॥ लीलाद्वयं विशेषतो निर्दिश्य सामान्यतः सर्वामेव लीलां सङ्क्षेपेणाह **दर्शयन्निति, बालचेष्टितैर्भगवान् व्रजं** हर्षयामास, व्रजे यावद्विधा प्राणिनस्तेषामपि यथायथा हर्षो भवति, स च हर्षस्तेष्वेव तिष्ठति सोपि स्थितः पुष्टो भाररूपो भवति तदा तेषां वहनाशक्तौ तेषां **हर्षं भगवानुवाह**, तदपि न विषयत्वेन किन्तु करणत्वेनेत्याह **बालचेष्टितैरिति**, ननु बालचेष्टाः फलपर्यवसायिन्यो न भवन्ति स्वरूपत एव परं मोहे सुखजनिकास्तत् कथं तादृशे हर्षे करणता ? तत्राह **भगवानिति**, यावतानुपपत्तिः परिहृता भवति तावान् धर्मो **भगवच्छब्दाद्** ग्राह्यः, ननु किमेवं प्राकृतानामत्र स्थितानां वैकुण्ठमनीत्वा स्वयमागत्य विपरीतभावेन तथाकरणे प्रयोजनमित्याशङ्क्याह **तद्विदां** भगवत्स्वरूपविदामात्मनो **भृत्यवश्यतां दर्शयन्निति**, यतस्ते **भृत्या** भरणीयाः स्वेनैव न केवलं प्रदर्शनमात्रपरत्वं, तथा सति कापट्येनापि स्यादित्याह **वै** निश्चयेनेति, **आत्मन** इत्यनेन **वश्यतादोषः** परिहृतः, ये त्वज्ञास्ते व्यामोहिता एव ये जानन्ति तेषां ज्ञानस्य भक्त्युपयोगः, तत्तदनुसारिणोपि तत्त्वेनैव ग्राह्या इति न किञ्चिदनुपपन्नम् ॥ ९ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

दर्शयंस्तद्विदामित्यत्र, व्रजे यावद्विधा इत्यारभ्य **भगवानुवाहे**त्यन्तम्। इदमत्राकूतम्। प्रभुपुत्रत्वेन सर्वेषां यथेच्छं भगवति व्यवहर्तुमशक्यत्वे सति यदि भगवांस्तत्तद्भावानुरूपं तेषु स्वयं न व्यवहरेत्तदा रूपचेष्टादिभिर्भगवदाश्लेषादिविषयक

उत्कट उत्पन्नो भावः स्वविषयमप्राप्य को वेद किं कुर्यादतस्तथाकरणमावश्यकम्। इमे एवं वहनाशक्तिवहने उक्ते। भगवता यत्रकुत्रचित्तथाकरणे तेषां च सर्वसमक्षं यथेच्छं करणे बालत्वेनैव लोकाविगानमपि। इदमेव बालचेष्टितैरित्यनेनोक्तम्। किञ्च। परम्पराहर्षजनन एवेयं व्यवस्था यत्र, तत्र साक्षात्स्वरूपेण येषु तज्जननं तेषां रीतिः कथं वक्तुं शक्यतेत्याशयेन बालचेष्टितैरित्यस्याभासमाहुः **तदपी**त्यादि। करणस्य व्यापारत्वेन बालचेष्टितानामेवात्र तथात्वम्। यत्र स्वरूपमेवासक्तिहेतुस्तत्र साक्षात्तज्जननमिति ज्ञेयम्॥ ९॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

प्रहसद्वदन इत्यत्र **ज्ञानाभाव** इति यशोदापराधभगवत्स्वरूपज्ञानयोरभावः, किमाश्चर्यमित्यत आहुः **स्वबन्धनमिति**, **स्व**पदस्यात्मजपदविशेषणत्वे भगवांस्तदभावे **नन्दश्चा**र्थः, तत्र **नन्दपक्षे भगवल्लक्षणो बन्ध** इति **भगवतो लक्षणा**नि चिह्नानि यस्मिंस्तादृशो मायारूपो **बन्धो** "मामेवे"त्यादि वाक्यात् स तु **भगवतैव मोचयितुं शक्यते** न तु स्वयमित्याश्चर्यमित्यर्थः, भगवत्पक्षे भगवल्लक्षणो बन्ध इति भगवद्रूप इत्यर्थः, अतस्तद्रूपं तिरोधाय तन्मोचनरूपेणाविर्भूतवानितिभावः। **स्वस्य स्वमोचने** हेतुमप्याहुः **स्वपदे**त्यादि, 'स्वमपीतो भवती'त्यादिश्रुतौ 'स्व'शब्दस्य **भगवद्वाचक**त्वेन सिद्धतयात्र तत्प्रयोगात् तथेति, तथा चास्मिन् पक्षे प्राप्त इत्यस्याध्याहारो बोध्यः, स च 'यो नन्दः परमानन्द' इति श्रुत्युक्ताधिदैविकरूपप्राप्त्या युज्यते, तदेतन् मनसिकृत्य **गोपीभिरि**त्यादेरवतारणमाहुस्तेषामित्यादि, तथा च यदि तद् भगवत्कार्यं न स्यात् तदा लीलासक्तचित्तः शुको न वदेदतो लीलास्थेषु तादृशाज्ञानतत्कार्यादिदर्शनेन लोकसाधारणबुद्धिर्न कार्येति भावः, एतावता मूलाविद्यानिवृत्तिः सूचिता॥६॥ **गोपीभि**रित्यत्र **विद्योपजीविनां सेवा**मिति तत्तद्विद्योपजीविनां सम्बन्धिनी या **सेवा** नृत्यगीतादिरूपा तामेव लीलां लीलात्वेन चकारेतिरूपकं, तथाकरणे हेतु**र्येने**ति, भक्तानामितिशेषः, **तण्डु**रिति ताण्डवनृत्यप्रवर्तयिता, **अन्यथे**त्यशास्त्रीयम्॥ ७॥ **बिभर्ती**त्यत्र बलेत्यादि, महान्तमपि तं तथावक्तारं स्वबाल्यानुरूपबलाविर्भावेन हस्तद्वयेन धृत्वा चालयतीवेत्यर्थः॥ ८॥ **दर्शयन्नि**त्यत्र व्रजे **यावद्विधा** इत्यादेरर्थं टिप्पण्यामाहु**स्तथात्वमिति** करणत्वं, **तज्जननमिति** हर्ष**जननं**, **सुबोधिन्यां विपरीतभावेने**तीश्वरभावत्यागेन, समाधिं व्याकुर्वते **यत** इत्यादि, तथा च 'भर्ता सन् भ्रियमाणो बिभर्ती'तिश्रुतेर्भरणमेव प्रयोजनं, एतावदकरणे सम्यगत्र तदनिष्पत्तेरित्यर्थः, नन्वीश्वरस्यान्यवश्यता 'सर्वस्य वशी सर्वस्येशान' इति श्रुतिं विरुणद्धीत्यत आहु**रात्मन** इत्यादि, तथा च वश्यत्वेपि साहजिकस्वातन्त्र्यानपायात् 'यो लोकत्रयमाविश्ये'ति वाक्याच्च स दोषः परिहृत इति न श्रुतिविरोध इत्यर्थः, ननु लोकानां तथा न भासत इति कथं परिहृत इत्युच्यते तत्राहुर्ये **स्वज्ञा** इत्यादि, **अज्ञा** इत्यासुराः, **ज्ञानस्थे**ति भक्तिवश्यता**ज्ञानस्य**, आधुनिकानां सतामसतां च सङ्ग्रहायाहु**स्तत्त**दित्यादि, तथा च ये यन्मार्गानुसरणं करिष्यन्ति तथैव तेनुग्राह्यास्त्याज्याश्चेत्यर्थः, **किञ्चिदि**ति भक्तीयं शास्त्रीयं लौकिकं च दर्शनं, अग्रिमप्रकरणतात्पर्योक्तावेतत्तात्पर्यं टिप्पण्यामाहु**राधिदैविक** इत्यादि॥ ९॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

उलूखलमित्यत्र **भगवल्लक्षण** इति भावे ल्युट् ज्ञेयः, भगवतो **लक्षणं** पूर्णत्वेन ज्ञानं येनेतिविग्रहः, भक्तवश्यत्वासाधारणधर्मज्ञापको भगवत्कर्मक इत्यर्थः, "मामेव ये प्रपद्यन्त" इत्यत्र एवकारादन्यकर्मको भगवत्कर्तृकोपि मायाकरणको बन्धो नान्येन मोच्यः किमुत भगवत्कर्मक इत्यवधारणार्थमेवकारः॥६॥ **गोपीभिः स्तोभित** इत्यत्र **विद्योपजीविना**मिति भगवदीयनृत्यगानविद्यां उपजीवन्ति तदाशया तद्भावनया वा जीवन्ति ते विद्योपजीविनस्तेषां **सेवा येन** चरित्रेण **भवेत्** सिध्येत् तच् चकार, **स्वस्वगृहं नीत्वे**तिकथनात् तेषां तादृश एव समये सेवावसरात्, अतस्त**च्च**रित्रं प्रथमश्लोकार्थ इत्यर्थात्, **येन सुखं भवेत्** तच् चकार, अतस्तच् चरित्रं द्वितीयश्लोकार्थः, चकारादयमेव तृतीयस्याप्यर्थः, **स्तोभाक्षराणी**ति निरर्थकाक्षराणीत्यर्थः, यद्यपि छान्दोग्ये हाऊकारादयस्त्रयोदश स्तोभा उक्तास्तत्र लोकादिदृष्टिरुक्ता तथापि तद्दृष्ट्योपासनमात्रं न तु स शब्दार्थ इतिज्ञेयं, अलौकिकलङ्प्रयोगेण नृत्येप्यलौकिकत्वं ज्ञाप्यते इत्याशयेनाहुः **तत्रापी**ति, **तदनुचित**मिति अलौकिकनृत्यस्य फलं स्वरूपानन्दः यथा रासे तावदधिकाररहितानां स्थाने तेन नृत्येन किं फलं सिध्यत्यतोनुचितमित्यर्थः, **षड्गुणैश्वर्ये**ति गुणपुरस्कारेण लीलां चिकीर्षति तदा तादृशः, **अन्यथा** लौकिकप्रकारेण **नृत्यं कर्तुं नार्ह**त्यतो गुणस्वभावादेव तथेत्यर्थः, **तर्ही**ति गुणपुरस्कारे तु विचार्यैव कार्यं करोतीति सुतरामनधिकारिस्थाने तन् नार्हतीत्यर्थः, **बालभाव**मिति बालो ह्यविचार्य करोति, तद्भावस्यापि स्वीकारात् तावदंशे तथेतिभावः॥ ७॥ **दर्शयन्नि**त्यत्र मूले **हर्षमुवाह** सम्पादयामासेत्यर्थ इत्याशयेनाहुः **हर्षयामासे**ति, हर्षं सम्पादयामासेत्यर्थः, इदमेव विवृण्वन्ति **व्रज** इत्यार**भ्योवाहे**त्यन्तेन, **हर्षो भवती**ति आश्लेषादिविषयको भावो हर्षस्तत्रासक्तिरितियावत्, भवति, तथा इष्टरूपं चेष्टाश्च कटाक्षादिरूपाः करोतीतिशेषः, **वहनाशक्ता**विति विषयसम्पादनाशक्त्या तादृशहर्षसम्पादनाशक्तावित्यर्थः, **हर्ष**मिति तं **हर्षमुवाह** सम्पादयामास विषयसम्पादनेनेतिशेषः, आश्लेषादिना तत्प्रकारयुक्तस्वरूपविषयिणीमासक्तिं सम्पादितवानित्यर्थः, **तदपी**ति आसक्तिसम्पादनमपि **स्वरूपस्य** विषयत्वसम्पादनेन न,

किन्तु बालचेष्टितरूपव्यापारपुरस्कारात् करणत्वसम्पादनेनेत्यर्थः, **बालचेष्टितैरि**ति व्यापारे तृतीयेतिज्ञेयं, चेष्टितानां व्यापारत्वात् यत्र चेष्टितानपेक्षा तत्र स्वरूपस्य हेतुत्वमात्रं न तु करणत्वं व्यापारवत्त्वाभावादितिभावः, **फलपर्यवसायिन्य** इति शृङ्गाररसानुभाविका इत्यर्थः, **तत् कथमि**ति **तत्** तस्मात् फलपर्यवसानाभावे तज्जन्यजनकत्वाभावेन बालचेष्टितानां व्यापारत्वाभावात् तद्वत्त्वेन स्वरूपस्योक्ता तादृशहर्षे करणता **कथं** सम्भवतीत्यर्थः, **यावते**ति भगवत्त्वाद् बालचेष्टितानामपि फलपर्यवसायित्वमित्यर्थः, **प्राकृतानामि**ति अनिवृत्ताध्यात्मिकाविद्यानामित्यर्थः, **अत्रे**ति सर्वसमक्ष इत्यर्थः, **वैकुण्ठमि**ति अन्तरङ्गलीलायोग्यं रहःस्थलमित्यर्थः, वश्यताबोधनं प्रयोजनं ज्ञेयं, तद्वशस्तावत्प्रतीक्षया स्थातुमशक्त इतिभावः, कारिकासु **निवारणमि**ति अथेतिपदेन सुमुहूर्तापेक्षाभावज्ञापनेन कालापेक्षाया निवारणं नवमश्लोकार्थ इत्यर्थः, **रतिस्तत्रे**ति सर्वेषामितिशेषः, **हरेः परा रति**रन्तिमश्लोकार्थः ॥ ९ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

प्रहसद्वदनो विमुमोच हेत्यस्य विवृतौ **हेत्याश्चर्यं** स्वबन्धनं तेन मोचितमिति "कृपयासीत् स्वबन्धन" इति शुकवाक्ये स्वपदाद् भगवान् स्वस्वरूपात्मकेन बन्धनेन बद्ध इतिनिरूपितं, ततश्च स्वरूपात्मात्मकबन्धनान् मोचनं आश्चर्यजनकमेवातो हेत्युक्तमित्यर्थः, तदेवाहु**र्भगवल्लक्षण**ः इत्यारभ्य **इदमाश्चर्यमेवे**त्यन्तेन, **स्वपदप्रयोगा**दिति "दाम्ना बद्धं स्वमात्मज"मिति **स्वपदप्रयोगात्** स्वशब्दस्यात्मात्मीयोभयवाचकत्वेन प्रकृते उभयोरप्यर्थयोरुपयोगात् स्वस्वरूपमात्मजमित्यर्थे सिद्धे नन्दस्य भगवदभेदसिद्धौ भगवता भगवतो मोचनं युक्तमेवेत्यर्थः, तदेवाहुः **भगवद्भावं प्राप्त इतियुक्तिरपी**ति, नन्वात्मजपदं शुकेन कथं भगवत्युक्तं आत्मजपदस्य पुत्रवाचकत्वे देहजन्यत्वस्य प्रवृत्तिनिमित्तत्वात् प्रकृते तदभावादित्याशङ्क्याहुः **तेषामज्ञानं न तेषां बुद्धिदोषे**णेत्यादि, **तेषां** नन्दादीनां हरौ यदात्मजत्वज्ञानजन्यं पुरुषोत्तमत्वाज्ञानं तत् तु **न तेषां बुद्धिदोषेण** किन्तु लीलार्थं **भगवतैव कार्यत** इति भगवल्लीलारूपत्वात् तेषां व्रजवासिनां बुद्धिमादायात्मजपदं शुकेनोक्तमतो न दोष इति भावः ॥ ६ ॥ **गोपीभिः स्तोभित** इत्यत्र **विद्योपजीविना**मित्यादि परोक्षवादेन ये केचन व्रजभक्ता भगवन्नृत्यगीतादिरूप**विद्योपजीविन**स्तत्रासक्ता **इति**यावत्, ते विद्योपजीविनस्तेषां **सेवा** तत्कर्तृका सेवेत्यर्थः, सा सेवा **येनोपायेन भवेत्** तादृगुपायरूपां राजस्यादिलीलां **चकारे**त्यर्थः ॥ ७ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

गोपीभिः स्तोभितो नृत्यन्नित्यत्र **विद्योपजीविना**मित्यादि का० ११०३। भगवदीयनृत्यगानविद्यामुपजीवन्ति तदाशया तद्भावनया वा जीवन्ति ते **विद्योपजीविन**स्तेषां **सेवा येन** चरित्रेण **भवेत् तत्** चरित्रं चकारेति प्रथमश्लोकार्थः, **येन सुखं भवेत्** तच् चकारेतिद्वितीयश्लोकार्थः, चकारादयमेव तृतीयश्लोकार्थः, **राजसी**मिति श्लोकत्रयोक्तानां लीलानां क्रमेण राजसतामससात्त्विकत्वं विवक्षाभेदेन बोध्यं, गानं राजसं पीठकादिधारणं तामसं अन्यत् सात्त्विकम् ॥ ११०३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र ये गोपाः केवलं तर्कनिष्ठास्ते 'तस्य बालस्यैदृशोस्तर्वोरुत्पाटनं न घटेत' इति तर्केण तदुक्तं तैर्बालैर्यदुक्तं तन्न जगृहुः नाङ्गीकृतवन्तः। केचित्तु पूतनातृणावर्तादीनां भङ्गस्य दृष्टत्वात् 'इदमपि तस्यैव कर्म भवेद्वा न वा' इति सन्दिग्धं चेतो येषां तथाभूता बभूवुः ॥ ५ ॥ तत्र भगवत्कृपापात्रस्य स्नेहातिशययुक्तस्य नन्दस्य चरितमाह—उलूखलमिति। दाम्नोलूखले बद्धम्, अत एव उलूखलं विकर्षन्तं स्वं स्वकीयमात्मजं पुत्रं विलोक्य प्रहसद्वदनो नन्दस्तं विशेषेण स्नेहपरवशः शीघ्रं मुमोचेत्यन्वयः। नच "तस्मिन् भयसमये कथं प्रहासः सम्भवति ?" इति शङ्क्यम्। तद्धौर्त्यस्मरणेन, कुशलीदर्शनेन वा, यदाकदाचिन्नन्दो भगवन्तं स्वसमीपमाह्वयति तदा यशोदायां स्नेहाधिक्यात् तां त्यक्त्वा नायाति, अधुना तु तया बद्ध इति 'यस्यां त्वं बहुस्नेहं करोति तयैव त्वं बद्धोऽसि, अहमेव त्वां विमोचयामि' इत्युपालम्भाभिप्रायेण वा, भीतं मत्वा भयनिवृत्त्यभिप्रायेण वा, प्रहाससम्भवात्। 'ह' इत्याश्चर्यम्। जगतो बन्धविमोचकस्यापि बन्धनं नन्देन विमोचितमित्याश्चर्यमेव ॥ ६ ॥ यमलार्जुनभङ्गं दृष्ट्वा उत्पातशङ्कया व्याकुलचित्तानां तद्विस्मृत्यर्थमतीव बाल्यमनुकरोति स्म तदाह—गोपीभिरिति। स्तोभितः 'अयमेव सम्यक् नृत्यं जानाति, नान्य' इत्येवं तत्समक्षं परस्परमुक्त्वा 'हे' कृष्ण ! त्वं नृत्यं कुरु, तुभ्यं लड्डुकनवनीतादिकं दास्याम' इत्येवं वचनेन हस्ततालादिना च प्रोत्साहितो भगवान् ऐश्वर्यादिगुणपूर्णोऽपि तद्वशस्तासां प्रेमवशः सन् प्राकृतबालवत् कचिदनृत्यत्। तथैव गानार्थं गोपीभिः स्तोभितः कचित् मुग्धवत् अज्ञवत् उद्गायति उच्चैः 'यथा तासां हास्यहर्षादिकं स्यात्तथा' गायति स्म। तद्वशवर्तित्वे दृष्टान्तमाह—दारुयन्त्रवदिति। काष्ठनिर्मितपुत्तलिकावदित्यर्थः ॥ ७ ॥ लीलान्तरमाह–बिभर्तीति कचिद्बलपरीक्षार्थं गोपीभिः 'पीठकमानय' इत्याज्ञप्तस्तदानेतुमसमर्थ इव केवलं बिभर्ति हस्ताभ्यां गृह्णाति, न तूत्थापयति। गुरुत्वादेतदानेतुमशक्तश्चेत्तदा, ततो लघु 'उन्मानं तण्डुलादिमानपात्रमानय' इत्याज्ञप्तस्तदपि केवलं बिभर्ति। तदा ततोऽपि लघु 'पादुकमानय'

इत्याज्ञप्तस्तदपि केवलं बिभर्ति । इत्येवमत्यन्तमसामर्थ्यं प्रकटयति । किंच 'मया सह युद्धं कुरु' इत्युक्तो बाहुक्षेपं बाहुविस्फोटनादिकं च कुरुते । एवं लीलायाः प्रयोजनमाह—स्वानामिति । स्वानां व्रजभक्तानाम्, चकारादन्येषामपि द्रष्टृश्रोतृवक्तृणां प्रीतिमावहन् सम्पादयितुमित्यर्थः ॥ ८ ॥ एवं तत्प्रीतिसम्पादनप्रयोजनमाह—दर्शयन्निति । लोके ये तद्विदः फलसाराभिज्ञास्तेषां वै निश्चयार्थमात्मनो भृत्यवश्यतां दर्शयन् भगवान् बालचेष्टितैर्व्रजस्य व्रजस्थजनस्य हर्षमुवाह अकरोत् ॥ ९ ॥

अन्वितार्थप्रकाशिका

न ते इति ॥ तत्र ये केचित्तर्कनिष्ठा गोपास्ते तस्य बालस्येदृशोस्तर्वोरुत्पाटनं न घटेतेति तर्केण तदुक्तं तैर्बालैर्यदुक्तं तन्न जगृहुर्नाङ्गीकृतवन्तः । केचित्तु पूतनातृणावर्त्तादिनाशं श्रीकृष्णकृतं संस्मृत्य "नारायणसमो गुणैः" इति गर्गोक्तिं वा संस्मृत्य इदमपि कृष्णस्यैव कर्म भवेद्वा इति संदिग्धचेतसो बभूवुः ॥ ५ ॥ उलूखलमिति ॥ दाम्नोलूखले बद्धमत एव उलूखलं विकर्षन्तं स्वं स्वकीयमात्मजं पुत्रं विलोक्य प्रहसद्वदनो नन्दस्तं विशेषेण स्नेहपरवशः शीघ्रं मुमोच । नन्दस्य प्रहासस्तु तादृग्भयेऽपि कृष्णं निर्भयं प्रहसन्तं च दृष्ट्वा ॥ ६ ॥ गोपीभिरिति ॥ यदि त्वं नृत्येस्तर्हि लड्डुकानि दास्याम इत्यादिवचनेन हस्ततालादिना च गोपीभिः स्तोभितः प्रोत्साहितो भगवान् तद्वशस्तासां प्रेम्णा वशः सन् प्राकृतबालवत् कचिदनृत्यत् । तथैव गानार्थं गोपीभिः स्तोभितः कचिन्मुग्धः मुग्ध इव सुन्दरो वा । भगवान् दारुयन्त्रवत् काष्ठनिर्मितपुत्तलिकावत् तद्वशो गोपीवशः सन् उद्गायति उच्चैः यथा तासां हास्यहर्षादिकं स्यात्तथा गायति स्म ॥ ७ ॥ बिभर्त्तीति ॥ कचिद्गोपीभिरिदमानयेत्याज्ञप्तः पीठकादि आनेतुमसमर्थ इव केवलं बिभर्ति तत्रापि आदौ पीठकं तदसक्तौ उन्मानं मानपात्रं प्रस्थादि तदशक्तौ पादुकां काष्ठमयीम् इति ज्ञेयम् । समाहारद्वन्द्वोऽयम् । स्वानां व्रजभक्तानां चकारादन्येषामपि द्रष्टृश्रोतृवक्तृणां प्रीतिमावहन् सम्पादयितुम् । हेतौ शता । युद्धारम्भाभिनयं कुर्वन् बाहुक्षेपं भुजास्फोटनादि कुरुते स्म ॥ ८ ॥ दर्शयन्निति ॥ लोके ये तद्विदः तदैश्वर्याभिज्ञास्तेषां वै निश्चयार्थमात्मनो भृत्यवश्यतां दर्शयन् भगवान् बालचेष्टितैर्व्रजस्थजनस्य हर्षमुवाह अकरोत् ॥ ९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नेति ते गोपाः तदुक्तं तैर्बालैरुक्तं वचनं न जगृहुः कुतस्तस्य बालस्य तर्वोर्द्रुमयोर्यदुत्पाटनं तन्न घटेत इति हेतोः तेषां मध्ये केचित्संदिग्धचेतसः संदिग्धं संदेहयुक्तं चेतोंतःकरणं येषां तथाभूताऽभवन् ॥ ५ ॥ प्रहसद्वदनं यस्य ॥ ६ ॥ गोपीभिः स्तोभितः त्रुटिकरतालादिभिः प्रोत्सादितः मुग्धः अपटुः सन् ॥ ७ ॥ आज्ञप्तः आनयेत्युक्तः उन्मानं प्रस्थान्नादिमानकर्तृकाष्ठपात्रम् ॥ ९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न त इति ॥ एवं बालैरुक्तानां तेषां मध्ये ये केचित् केवलतार्किकाः, ते तु तस्यास्य बालस्य, तर्वोः उत्पाटनं, न घटेत वै । इत्युक्त्वा, तदुक्तं बालैर्यदुक्तं तदित्यर्थः । न जगृहुः । बालवाक्यं न विश्वसितवन्त इत्यर्थः । केचिदन्ये तु, बालवाक्यं संदिग्धं संशययुक्तं चेतो मनो येषां तथाभूताः, बभूवुः ॥ ५ ॥ अथ भगवन्मायामोहितस्य नन्दस्याचरितमाह ॥ उलूखलमिति ॥ नन्दः, उलूखलं विकर्षन्तं, दाम्ना बद्धं, स्वमात्मीयं आत्मजं, बालं विलोक्य, प्रहसद्वदनं यस्य तथाभूतः, सन्, इ स्फुटं यथा तथा, विमुमोच दामबन्धादमोचयत् ॥ ६ ॥ अथ भगवतः कांश्चिद्बाल्यानुकारप्रकारान् दर्शयति ॥ गोपीभिरिति ॥ कचित् कदाचित्, भगवान् कृष्णः, गोपीभिः, स्तोभितः उपच्छन्दनेनोद्योगं प्रापितः, करतालादिना प्रोत्साहितः सन् वा, बालवत् अनृत्यत् । कचित्, गोपीजने इति शेषः । उद्गायत्युच्चस्वरेण गानं कुर्वति सति, तद्वशो गोपीजनवश्यः सन्, मुग्धः संश्च, दारुयन्त्रवत् काष्ठनिर्मितपाञ्चालिकावत्, अनृत्यत् ॥ ७ ॥ बिभर्त्तीति ॥ कचित् कृष्णः, आज्ञप्तः इदमानयेति गोपीभिर्नियुक्तः सन्, पीठकं विष्टरं च उन्मानं प्रस्थाद्युन्मानपात्रं च पादुका च तत्समाहारं, बिभर्त्ति आनेतुमसमर्थ इवोवाहेत्यर्थः । कचित्, बाहुक्षेपं भुजचालनं निषेधसूचकमूर्द्धीकृतहस्तधूननमित्यर्थः । स्वानां प्रीतिं, आवहन् सन्, कुरुते । चकारद्वयमेवं कृत्वा निजैश्वर्यच्छन्नतावबोधकम् ॥ ८ ॥ दर्शयन्निति ॥ लोके तद्विदां भगवद्वैभववेदिनां, आत्मनः भृत्यवश्यतां स्वभक्तानां वशंगतत्वं, दर्शयन्, भगवान् बालचेष्टितैः, व्रजस्य व्रजवासिजनस्य, हर्षमानन्दं, उवाहाप्रापयत् वै ॥ ९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विलोक्य नन्द इतिः १०.११.६.

सदागमस्थो देवेशो दृश्यस्तस्याप्रयत्नतः । यस्तद्गुणेक्षणो भूयात्तत्र नन्दो निदर्शनम् ॥ ७ ॥
मातेव बन्धनोद्युक्तो नाहमस्मीति बोधयन् । सनन्दस्तद्द्वयोच्छित्त्यै प्रहसद्वदनोऽभवत् ॥ ८ ॥

सर्वेषामविशेषतोऽसि भगवन् त्वं बन्धनोन्मोचकस्तत्राऽहं तु पिता तवेति न मनागत्रार्थनापेक्षणम् ।
आस्तामेतदथापि सम्प्रति मया त्वं तादृशोऽपि प्रभो बन्धान्मोचित इत्यसूचयदसौ किं वा सहासाननः ॥ ९ ॥

सदानन्दस्वभावो यत् परबन्धविमोचनम् । नात्र चित्रं तदा नन्दः स्वात्मजाते तथाऽकरोत् ॥ १० ॥
मात्राकृतादात्मबन्धान्मोचयेद् यः कृपानिधिः । स चाचार्यः पितैवास्मिन्निति नान्यैरकारि तत् ॥ ११ ॥
अन्य एव मम बन्धको भवत्यन्य एव मम मोचकोऽपि च । न स्वतोऽस्ति मम बन्धनं न वा मुक्तिरित्यकृत स स्फुटार्थकम् ॥१२॥

गोपिभिरिति : १०.११.७.

बद्धः सन्नेव जीवोऽस्मिन् क्रीडत्येवमहं पुनः । मुक्तः सन्निति वैचित्र्यं स्वं तदूर्ध्वमदर्शयत् ॥ १३ ॥
तावत् स्वकर्मकलितोऽप्यवभाति बन्धो यावन्न चैक्षि गुरुणा करुणाक्षिणाऽस्मिन् ।
दृष्टे तु तत्क्षणमपस्मृतबन्धभावः स्वैरं व्रजे विहरतीत्यकृत स्फुटं सः ॥ १४ ॥

दर्शयन्निति : १०.११.९.

सौख्यं भक्तिभृतां भविष्यति यया तामेव बाल्यच्छलाल्लीलामाकलये न तत्र गणये मानापमानौ क्वचित् ।
इत्थं स्वस्य सदा स्वभक्तवशतां सार्वांशिकीं बोधयन् मन्ये गोप्यनुशासनेन विदधे क्रीडामसौ तन्मुदे ॥ १५ ॥
आधायात्मनि तत्त्वदृष्टिमचलां संत्यज्य चाहङ्कृतिं स्वैरं वृत्त्यनुरोधतो विहरणं यत्संसृतौ निर्भयम् ।
जीवन्मुक्तदशाऽपि सैव गदितेत्यारात् परान् बोधयन् मन्ये गोप्यनुकूल एव भगवांस्तादृक्तदाऽऽसीद् व्रजे ॥ १६ ॥

कृष्णप्रिया

यह सुनकर उन गोप लोगों को बालकों की बात पर विश्वास न जमा। वे आपस में कहने लगे कि एक नन्हा सा बालक इतने बड़े पेड़ गिरा दे यह कभी शक्य नहीं। किसी-किसी ग्वालबाल को चित्त में नन्दलाल के पूतना वध, बक नाश आदि प्रसङ्गों के स्मरण से बालकों की बातों पर विश्वास भी आ रहा है ॥ ५ ॥ नन्द बाबा ने जब देखा कि प्राणप्यारे लालन् रस्सी से बँधे हुए ओखली घसीटते जा रहे हैं तब हंसते मुखवाले बाबा ने शीघ्र समीप पहुँच कर रस्सी को खोल दिया ॥६॥ कभी-कभी फुसलाती ग्वालिनें कहती लालन् आप तो बहुत अच्छा नृत्य करते हो तब भगवान् उनके ताली बजाने पर साधारण बालक के समान नृत्य करने लगते। कभी किसी गोपीने कहा कि बाबा आप तो अच्छा गाते हो बस उनके वशीभूत बनकर कठपुतली की तरह भगवान् मुग्ध अनजान बालक की तरह उच्च स्वर से गान करने लगते थे। मान लीजिये कि परमेश्वर भगवान् हाथ की पूतली जैसे परवश हो गये थे ॥ ७ ॥ कभी कोई कहे कि लालन् पीढा, पसेरी, खडाऊँ ले आयिए, तो तुरन्त उसे ले आते परंतु उस तरीके उठाते मानो उनके लाने उठाने में भारी श्रम होता हो। कभी कोई कहे आइये और मेरे साथ मल्लयुद्ध कीजिये तब पहलवानों की तरह ताल ठोकने लगते और प्रियजनों को आनन्द प्रदान करते ॥ ८ ॥ इस प्रकार पूर्णपुरुषोत्तम भगवान् अपनी निर्दोष लीलाओं से व्रजजनों को प्रमुदित करते और जो ज्ञानी जन भगवान की महिमा को जानते हैं उनको भगवान् अपनी भक्तवश्यता दिखलाते हैं ॥ ९ ॥

([1]क्रीणीहि भोः फलानीति श्रुत्वा सत्वरमच्युतः । फलार्थी धान्यमादाय ययौ सर्वफलप्रदः[2] ॥ १० ॥
फलविक्रयिणी तस्य च्युतधान्यं करद्वयम् । फलैरपूरयद् रत्नैः फलभाण्डमपूरि च ॥ ११ ॥
[3]सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत् । रामं च रोहिणी देवी [4]क्रीडन्तं बालकैर्भृशम् ॥ १२ ॥
नोपेयातां यदाऽऽहूतौ क्रीडासङ्गेन पुत्रकौ । यशोदां प्रेषयामास रोहिणी पुत्रवत्सलाम् ॥ १३ ॥
क्रीडन्तं सा[5] सुतं बालैरतिवेलं सहाग्रजम् । यशोदाजोहवीत्[6] [7]कृष्णं पुत्रस्नेहस्नुतस्तनी ॥ १४ ॥

---

१. "क्रीणीहि" श्लोकादारभ्य "नीत्वा स्ववाटं" श्लोकपर्यन्ताः एकादशश्लोकाः सुबोधिन्यां न सन्ति ।

२. फलवत्वे हि धान्यानि मया नीतानि भूरिशः । गृह्णीष्व तव मानेन मानयत्वं फलानि मे ॥
फलविक्रयिणी तस्य वचश्श्रुत्वा महात्मनः । आयान्तमरविन्दाक्षं करिपोतमिवागतम् ॥
प्रेक्षमाणा मुहुः फुल्लैः नयनैरच्युतं तदा ।—अर्धपञ्चकमिदं क्वचिदधिकं दृश्यते ।

३. फलानीमानि सर्वाणि गोपीभ्योऽभ्यवदात्प्रभुः । वयस्यैर्व्रजवीथ्यां स क्रीडन्सर्वफलप्रदः ॥
उत्तिष्ठन्तौ प्रस्खलन्तौ चरन्तौ रामकेशवौ । पद्भ्यां गन्तुं शक्नुवन्तौ कथञ्चित्तद् व्रजाङ्गणे ॥
इदं सार्धचतुष्टयं क्वचिदधिकं दृश्यते ।

४. क्रीडन्तौ-विज. । ५. स्वसुतं-विज. । ६. चाह्वयत्-वीर. । ७. द्वीक्ष्य-विज. ।

कृष्ण कृष्णारविन्दाक्ष तात एहि स्तनं पिब । अलं विहारैः क्षुत्क्षान्तः[1] [2]क्रीडाश्रान्तोऽसि पुत्रक ॥ १५ ॥
हे रामागच्छ ताताशु सानुजः कुलनन्दन । प्रातरेव कृताहारस्तद् भवान् भोक्तुमर्हति ॥ १६ ॥
प्रतीक्षते त्वां [3]दाशार्ह भोक्ष्यमाणो व्रजाधिपः । एह्यावयोः प्रियं धेहि स्वगृहान् यात बालकाः ॥ १७ ॥
धूलिधूसरिताङ्गस्त्वं पुत्र मज्जनमावह । [4]जन्मर्क्षमद्य [5]भवतो विप्रेभ्यो देहि गाः शुचिः ॥ १८ ॥
पश्य पश्य वयस्यांस्ते [6]मातृमृष्टान् स्वलंकृतान् । त्वं च स्नातः कृताहारो विहरस्व स्वलंकृतः ॥ १९ ॥

इत्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहनिबद्धधीर्नृप ।
हस्ते गृहीत्वा सहराममच्युतं नीत्वा स्ववाटं कृतवत्यथोदयम् ॥ २० ॥)

कर्दमक्षमा

अन्वयः—भोः फलानि क्रीणीहि ! इति श्रुत्वा सर्वफलप्रदः अच्युतः फलार्थी धान्यम् आदाय सत्वरं ययौ ॥ १० ॥ फलविक्रयिणी तस्य च्युतधान्यं करद्वयं फलैः अपूरयत् फलभाण्डं च रत्नैः अपूरि ॥ ११ ॥ रोहिणी देवी सरित्तीरगतं भग्नार्जुनं बालकैः भृशं क्रीडन्तं कृष्णं च रामम् अथ आह्वयत् ॥ १२ ॥ आहुतौ पुत्रकौ क्रीडासंगेन यदा न उपेयातां रोहिणी पुत्रवत्सलां यशोदां प्रेषयामास ॥ १३ ॥ पुत्रस्नेहस्नुतस्तनी सा यशोदा अतिवेलं बालैः सहाग्रजं क्रीडन्तं सुतं कृष्णं अजोहवीत् ॥ १४ ॥ हे कृष्ण हे कृष्ण हे अरविन्दाक्ष हे तात एहि स्तनं पिब विहारैः अलं क्षुत्क्षान्तः असि हे पुत्रक क्रीडाश्रान्तः असि ॥ १५ ॥ हे राम ! हे तात ! हे कुलनन्दन ! सानुजः आशु आगच्छ भवान् प्रातः एव कृताहारः तत् भोक्तुं अर्हति ॥ १६ ॥ हे दाशार्ह भोक्ष्यमाणः व्रजाधिपः त्वां प्रतीक्षते एहि आवयोः प्रियं धेहि बालकाः ! स्वगृहान् यात ॥ १७ ॥ पुत्र ! धूलिधूसरिताङ्गः त्वं मज्जनं आवह अद्य भवतः जन्मर्क्षं शुचिः विप्रेभ्यः गाः देहि ॥ १८ ॥ मातृमृष्टान् स्वलंकृतान् ते वयस्यान् पश्य पश्य त्वं च स्नातः कृताहारः स्वलंकृतः विहरस्व ॥ १९ ॥ नृप ! स्नेहनिबद्धधीः यशोदा अशेषशेखरं तं सुतं मत्वा सहरामम् अच्युतं हस्ते गृहीत्वा स्ववाटं नीत्वा अथ उदयं कृतवती ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुनरौत्सुक्यातिशयेन तासां किञ्चिदाह—क्रीणीहीति सार्द्धदशभिः । यद्यप्येते श्लोकास्तैर्नादृतास्तथाऽपि पुस्तकेषु दृश्यमानत्वाच्छिच्छुखेन तु किञ्चिद्व्याख्यातत्वात्तस्ववादिभिश्च धृतत्वात् रसमयत्वाच्च व्याख्यास्यन्ते, अत्र बहुत्र नानापाठत्वे नानाक्रमत्वे सत्यपि गौडादिदेशीयत्सम्प्रदायदृष्ट्या क्रमपाठविशेषौ ध्रियेते तत्र स्वानां प्रीतिदातृत्वं किं वर्णनीयम् ? अहो तद्दूरवाससम्बन्धेन पुलिन्दजातीनामपीत्याह द्वाभ्याम्—“क्रीणीहि भोः ! फलानीति श्रुत्वा सत्वरमच्युतः । फलार्थी धान्यमादाय ययौ सर्वफलप्रदः ॥ अच्युतः परिपूर्णसर्वार्थोऽपि फलमात्रार्थी सर्वफलप्रदः सर्वपुरुषार्थानां च प्रकृष्टदाताऽपि धान्यमादाय धान्यमेवादाय तत्रापि ययावेव न तु स्वल्पहस्तधृतं स्वल्पमेवेदमिति विचारितवान् इति बाल्यलीलावेशो दर्शितः तत्र धान्यादानं पुरतस्तन्मात्रप्राप्तेः इति त्वरातिशयो दर्शितः । ततः किं वृत्तमिति सकौतुकं राजानं प्रत्याह—“फलविक्रयिणी तस्य च्युतधान्यं करद्वयम् । फलैरपूरयद्रत्नैः फलभाण्डमपूरि च ॥ सत्वरयाऽनेन पथ्येव च्युतानि धान्यान्यपि यस्मात् तादृशमपि तत्करद्वयं फलविक्रयिण्यपि उद्भुतमहास्नेहा फलैः रत्नाकारैर्पाल्वादिभिरपूरयत् तत्र च सर्वैरित्यपि ज्ञेयं तस्य तत्र जातलोभत्वेन वैभवशक्तेः साहाय्यात् च्युतधान्यकरत्वेऽपि तदीयस्वाभाविकसर्वफलप्रदत्वशक्त्या तत्सम्पत्तिरपि कृतेत्याह रत्नैरिति । स्वयमाविर्भूतत्वात् तैरेव कर्तृभिः ततश्च तन्माधुर्यावेशविवशेन्द्रियतया तदज्ञातवती यावत्तद्गृहप्रवेशं स्थित्वा लाभालाभादिकं विस्मृत्य गृहमेव जगामेति ज्ञेयं सर्वफलप्रदं इत्यनेनोत्तरकालेपि तदा वेशलक्षणा परमफलप्राप्तिरपि तस्याः सूचिता (क) (ख) अथ श्रीयशोदायाः श्रीरोहिणीतोऽपि श्रीरामेपि वशीकारि वात्सल्यातिशयं दर्शयितुं श्रीयशोदया परमवात्सल्येन नित्यं क्रियमाणं पुत्रलालनादिकमुद्दिश्यन् दामोदरलीलायाः क्रमप्राप्तं दिनैककृत्यमाह—सरिदित्यादिना उदयमित्यन्तेन । “सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत्” सरित्तीरगतमिति भग्नौ अर्जुनौ येन तमाह्वयदिति वात्सल्येन तदनुसन्धानादनिष्टा शङ्का दर्शिता कृष्णं क्रीडाविष्टचित्तम् अथेति कार्त्स्न्यें सर्वैरेव नामभिरित्यर्थः । रोहिणी तद्भोजनसाधनात्या-

---

[1] क्षुद्भ्रान्तः–वीर. । [2] क्रीडाश्रान्तोसि पुत्रक–वीर. विज. । [3] वां दाशार्हौ–वीर. ; त्वां दाशार्हौ–विज. ।

[4] **तिन्त्रिणीफलसंयुक्तं स्नानीयं तैलसंयुतम् । कल्पयित्वा प्रतीक्षेहं चिरचञ्चलचेष्टितः ॥**

श्लोकोऽयमन्यत्राधिकः ।

[5] तेऽद्य भवति–त. पु. ; वाद्यभवतो–वीर. ; तेऽद्य भविता–विज. । [6] मृष्टानलङ्कृतान्–वीर. ।

सक्तया श्रीयशोदयैव प्रेषितेति ज्ञेयं तथा च श्रीकृष्णाह्वानेन रामाह्वानमप्यूह्यम् उत्तरानुरोधेन (ग) ततश्च "नोपेयातां यदाहूतौ क्रीडासङ्गेन पुत्रकौ। यशोदां प्रेषयामास रोहिणी पुत्रवत्सला॥ एवमाहूतावपि यशोदां प्रेषयामासेति उभयत्रापि तस्या एव वात्सल्याधिक्यानुभवेन शीघ्रतदाकर्षणसामर्थ्यनिर्णयात्, किमर्थं ? तत्राह, पुत्रयोर्वत्सला सरित्तीरे नानोपद्रवशङ्कया तयोः स्नपनभोजनेच्छया चेति भावः (घ) ततश्च "क्रीडन्तं सा सुतं बालैरतिवेलं सहाग्रजम्। यशोदाऽजोहवीत् कृष्णं पुत्रस्नेहस्नुतस्तनी॥ अजोहवीत् पुनः पुनराजुहाव निकटगमने पलायनशङ्कया (ङ) कृष्णकृष्णारविन्दाक्ष तात एहि स्तनं पिब। अलं विहारैः क्षुत्श्रान्तस्तद्भवान् भोक्तुमर्हति॥ कृष्ण कृष्णेति वीप्सा दूरतः श्रवणाय निजाग्रहव्यक्तये च हे अरविन्दाक्ष! हे तातेति सलालनं सम्बोधनं शीघ्रागमनाय असन्धिः प्लुतप्रकृतिस्थत्वात् असंहिततया पाठात् भयेऽपि कारणे सति यत् क्षुत् श्रान्त इत्येवोक्तं तत्तस्यामङ्गलत्वेन वक्तुमनिष्टत्वात् (च) तथाऽप्यनायान्तमग्रजो मद्वाक्यप्रतिपालको बलादानेष्यतीत्याशयेन श्रीराममाह्वयति—हे रामागच्छ ताताशु सानुजः कुलनन्दन। प्रातरेव कृताहारः क्रीडाश्रान्तोऽसि पुत्रक॥ यतः कुलनन्दनस्त्वमित्यादिना कृष्णस्य शीघ्रागमनार्थमीर्ष्यां जनयति सम्बोधनपाठेऽपि स एवार्थः। हे पुत्रकेति तस्मिन्नपि पुत्रवत् स्नेहात् अनुकम्पायां कन् (छ) किञ्च, "प्रतीक्षते त्वां दाशार्ह भोक्ष्यमाणो व्रजाधिपः। एह्यावयोः प्रियं धेहि स्वगृहान् यात बालकाः" हे दाशार्हेति मित्रपुत्रत्वेन परमापेक्ष्यं त्वां विना तस्य भोजनमेव न स्यादिति भावः। आवयोः सख्योर्दम्पत्योर्वा क्रीडासक्तस्य श्रीकृष्णस्य प्रेमासक्त्या तमपि क्रीडाभिनिविष्टं वीक्ष्य क्रीडनात् बालकान्निवारयति—स्वस्वेति वीप्साया अभावः त्वरावाक्यत्वात् (ज) श्रीकृष्णस्य प्रीत्या बालकानपि विहारादनुपरमतो वीक्ष्य मृषैव प्रयोजनविशेषं च दर्शयन्ती श्रीकृष्णमाह्वयति—

धूलीधूसरिताङ्गस्त्वं तात मज्जनमावह। जन्मर्क्षं तेऽद्य भवति विप्रेभ्यो देहि गा शुचिः॥

मज्जनं स्नानमावह विधिवत् कुर्वित्यर्थः। विप्रेभ्य इति उत्पत्त्यै तत्सम्प्रदानकदानोत्साहवन्तं तमुल्लासयति यतस्तव जन्मर्क्षमद्य भवति भवत इति पाठे सदा वर्द्धमानस्येत्यर्थः (झ) तथाऽप्यनागच्छतस्तस्य तदैवागतानन्यान् बालान् दर्शयित्वा मात्सर्यं जनयति—

पश्य पश्य वयस्यांस्ते मातृमृष्टस्वलङ्कृतान्। त्वं च स्नातः कृताहारो विहरस्व स्वलंकृतः॥

वीप्सा प्रेम्णा तर्ज्जनेन कोपेन खेदेन वा मातृभिर्मृष्टाः स्नपनादिना निर्मलीकृताश्च ते पश्चात् सुतु अलंकृताश्चेति तथा तान्॥ ञ॥ उपसंहरति—

इत्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहनिबद्धधीर्नृप। हस्ते गृहीत्वासहराममच्युतन्नीत्वा स्ववाटं कृतवत्यथोदयम्॥

इत्थं सलालनोक्तिपूर्वकशनैर्गमनप्रकारेण अशेषस्य चूडामणिमिव शिरोधार्यमपि सुतं मत्वा मत्सुतोयमित्यनुभूय अत एव स्नेहेन नितरां बद्धा वशीकृता धीर्यस्याः सा अत एव क्रीडन्तमपि हस्ते गृहीत्वा अच्युतमिति अपलायनाद्यभिप्रायेण स्ववाटं निजगृहस्थानम् उदयं स्नपनभोजनालङ्कारादिमङ्गलं स्वप्रतिज्ञाततया तदाग्रहाज्जन्मर्क्षयोग्याभ्युदयमेव वा अथानन्तरं सद्य एवेत्यर्थः। कात्स्न्र्येन वा हे नृपेति तत्र तस्य स्नेहोदयदर्शनात्त्वमेव ननु पालयसीति सलालनसम्बोधनम् (ट)

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

पुनरौत्सुक्यातिशयेन तेषां किञ्चिदाह—क्रीणीहीति सार्द्धदशभिः। यद्यपि श्रीस्वामिपादानामेते सम्मता न लक्ष्यन्ते, तैरेषां किञ्चिदस्पर्शनात्तथापि बहुलपुस्तकेषु दृश्यमानत्वात्तथा (श्लोकानां) केषाञ्चित् श्रीचित्सुखेन (यतिवरेण) व्याख्यातत्वात्तत्त्ववादिभिश्च धृतत्वात् रसमयत्वाच्च व्याख्यायन्ते—सर्वाणि फलानि साध्यानि प्रकर्षेण ददातीति तथा। सोऽपि पीलुफलार्थी सन्। सत्वरयानेनैव च्युतानि धान्यानि यस्मात् करद्वयात्तत्। फलैः पीलुफलैः। अत्रैवमुन्नेयम्—फलविक्रयमात्रोपजीव्यया तया बहुलामूल्यरत्नानि लब्ध्वा भयादिना संगोप्य स्वगृहं नीतानि। यद्वा, विचित्रवर्ण—पीलुफलसादृश्येन तानि पीलुफलानि मत्वा श्रीभगवद्दर्शनेन परितृप्ता तान्यविक्रीयैव गृहे गत्वा परिचित्य निह्नुत्य रक्षितानीति तद्वार्त्ता व्रजे प्रसिद्धिमप्राप्ता केनापि नोद्भावितेति। एवं विक्रयणादिना व्रजसम्बन्धेनान्यत्रत्यानामपि प्रहर्षणमुक्तम्॥ १०-११॥ अथ श्रीयशोदया परमवात्सल्येन नित्यं क्रियमाणं पुत्रलालनादिकमुद्दिशन् दामोदरलीलायाः क्रमप्राप्तं दिनैककृत्यमाह—सरिदित्यादिना उदयमित्यन्तेन। अत्र पाठस्तत्क्रमश्च विविधः, तत्र गौड़-सत्सम्प्रदायेपुस्तकानुसारेण व्याख्यायते—सरितः श्रीयमुनायास्तीरे गतम्, कुतः? भग्नावर्ज्जुनौ येन तम्, तयोस्तत्तीरवर्त्तित्वात् यद्वा, तद्भञ्जनानन्तर्यमात्रापेक्षया तथोक्तम्, यद्वा, तादृशक्रीडान्तरशंकया किंवा तत्क्रीड़ाश्रमेण क्षुधासम्भावनया कृष्णं क्रीड़ाकृष्टचित्तं भगवन्तमाह्वयत्। रोहिणी तद्भोगसाधनात्यासक्तया श्रीयशोदयैव प्रेषितेति ज्ञेयम्। तथा कृष्णाह्वानेन रामाह्वानमप्युह्यमन्योन्यस्नेहेन द्वयोरैक्यात्॥ १२॥ एवमाहूतादपि पुत्रौ कृष्णरामौ यदा क्रीड़ायामासंगेनासक्त्या न समीपमागतौ, तदा यशोदां प्रेषयामासेति परमसुस्निग्धतया हस्तग्रहणादिना तयोरानयने तस्या एव सामर्थ्यात्। किमर्थम्? तदाह—पुत्रयोर्वत्सला, तयोः स्नानभोजनाद्यर्थमिति

भावः ॥ १३ ॥ सा अनिर्व्वचनीय-पुत्रस्नेहाक्रान्तचित्ता बालैः सहातिवेलं भृशम्, किंवा वेलामतिक्रान्तं क्रीडन्तं सुतं श्रीकृष्णमग्रजञ्च रामम्, यद्वा, सहाग्रजं साग्रजं वीक्ष्याजोहवीदाजुहाव ॥ १४ ॥ कृष्ण कृष्णेति वीप्सा दूरतः श्रवणाय, हे अरविन्दाक्ष ! हे तातेति स-लालन-सम्बोधनं शीघ्रागमनाय। असन्धिः प्लुतप्रकृतिस्थत्वात् ॥ १५ ॥ तथाप्यनायान्तमग्रजो मद्वाक्यप्रतिपालको बलादानेष्यतीत्याशयेन श्रीबलदेवमाह्वयति—हे रामेति, यतः कुलनन्दनस्त्वमिति स्वपुत्रस्य शीघ्रागमनार्थमीर्षां जनयति, अविसर्गपाठेऽपि सम्बोधनेन स एवार्थः। हे पुत्रकेति तस्मिन्नपि पुत्रवत् स्नेहादनुकम्पायां कन्, श्लेषेण पुत्रस्य श्रीकृष्णस्य कं सुखं यस्मादिति शीघ्रागमनार्थं प्रोत्साहनम् ॥ १६ ॥ व्रजाधिपः श्रीवल्लवेन्द्रः, हे दाशार्हेति मित्र श्रीवसुदेव-पुत्रत्वेन परमापेक्ष्यं त्वां विना तस्याभोजनादिति भावः। आवयोः श्रीयशोदारोहिण्योः श्रीनन्दयशोदयोर्वा। क्रीडासक्तस्य श्रीकृष्णस्य प्रियचिकीर्षया तमप्यनायान्तं वीक्ष्य क्रीडनाद्बालकान् निवारयति—स्वेति ॥ १७ ॥ श्रीकृष्णप्रीत्या बालकानपि विहारादनुपरमतो वीक्ष्य प्रयोजन-विशेषं दर्शयन्ती श्रीकृष्णमाह्वयति–धूलीति। मज्जनं स्नानमावह, सम्यक् प्रापय, विप्रादि-द्वारा मंत्रजलादिना कुर्वित्यर्थः, यतस्तव जन्मर्क्षं रोहिणी-नक्षत्रमद्य भवति, पाठान्तरे भवतः सदा वर्द्धमानस्येत्यर्थः। तत्र प्रयोगमप्याह—विप्रेभ्य इति, स्नानादिना शुचिः सन् ॥ १८ ॥ तथाप्यनागच्छतस्तस्य मात्सर्यं जनयति—पश्यति, वीप्सा प्रेम्णा कोपेन खेदेन वा। मातृभिर्मृष्टाः स्नपनादिना निर्मलीकृताश्चैते सुष्ठ्वलंकृताश्चेति तथा तान् ॥ १९ ॥ अशेषस्य जगतः शेखरं चूडामणिमिव शिरोधार्य्यमपि सुतं मत्वा मत्सुतोऽयमित्यभिमानं कृत्वा, अतएव स्नेहेन नितरां बद्धा वशीकृता धीर्यस्याः सा, अतएव क्रीडन्तमपि हस्ते गृहीत्वाच्युतमित्यभंगाद्याभिप्रायेण। सहरामं किंवा राममच्युतञ्च सहैकदैव गृहीत्वा स्ववाटं निजस्थानम्, उदयं स्नपनभोजनालंकारणादिमंगलम्। अथानन्तरं सद्य एवेत्यर्थः। हे नृपते नरश्रेष्ठत्वादेव त्वयि श्रीयशोदा-स्नेहभर-लालनादि-वृत्तं कथ्यत इति भावः, यद्वा, तस्य परमाश्चर्य्यत्वात्तत्कथनेन प्रेमभरोदयाद्वा सादर-सम्बोधनम् ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

(क–झ) मातृमृष्टान् “मृजूष् शुद्धौ” मातृभिः स्नापितान् (ञ) उदयमभ्युदयं मङ्गलमकरोदित्यर्थः (ट)

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अत्र कचित्पुस्तकेषु—

क्रीणीहि भोः फलानीति पृष्ट्वा मातरमच्युतः। फलार्थी धान्यमादाय ययौ सर्वफलप्रदः ॥
फलविक्रयिणी तस्य च्युतधान्यं करद्वयम्। फलैरपूरयद्रत्नैः फलभाण्डमपूरि च ॥

इत्यादिश्लोका अधिका दृश्यन्ते तत्र भोः कृष्ण फलानि विक्रीणीहीति बन्धं मोचितवता नादेनोक्तोऽच्युतः स्वयं स्वर्गापवर्गफलदोपि केवलं प्राकृतबाल इव फलार्थी सन् मातरं पृष्ट्वा धान्यमञ्जलिनाऽऽदाय ययौ (क) तथा फलविक्रयिणी स्त्री तस्याच्युतस्य च्युतं धान्यं यस्मात् तत्करयोर्द्वयं फलैरपूरयत् फलविक्रयिण्याः यत्फलभाण्डं तत् रत्नैरपूरि पूरितमभूत् तत्करद्वयाच्च्युतेन धान्येन रत्नात्मकतामापन्नेन फलभाण्डं पूरितमभूदित्यर्थः (ख) अथ तन्मायामोहितयोर्यशोदारोहिण्योः काञ्चिदाचरितान्याह—सरिदित्यादिना। भग्नावर्जुनौ येन तं सरितो यमुनायास्तीरगतं कृष्णमाह्वयत् एहीत्याहूतवती (ग) यदा आहूतावपि क्रीडासङ्गेन नागच्छेतां तदा पुत्रवत्सला रोहिणी यशोदां प्रेषयामास (घ) सा रोहिण्या प्रेषिता यशोदा अतिवेलं वेलां भोजनादिवेलामतिक्रान्तं बालकैस्सह क्रीडन्तं सरामं सुतं श्रीकृष्णमवलोक्य स्नेहेन स्नुतौ स्तनौ यस्यास्तथाभूता आजुहाव (ङ) आह्वानप्रकारमेव दर्शयति—कृष्णेति सार्द्धैश्चतुर्भिः (च–छ) हे दाशार्ह व्रजाधिपो नन्दो भोक्ष्यमाणो वां भवन्तौ प्रतीक्षते युवयोरागमनं प्रतीक्षमाण आस्ते आवयोः रोहिण्याः स्वस्याश्च प्रियं देहि हे बालकाः रामकृष्णानुचराः स्वगृहान् प्रति गच्छत (ज) अहो मज्जनं स्नानमावह कुरु अद्यास्मिन्नहनि भवतो जन्मनक्षत्रम् अतः शुचिः स्नातो विप्रेभ्यो गाः देहि (झ) मातृभिः स्नापितान् स्वलङ्कृतांश्च वयस्यान् त्वत्समानवयस्कान् पश्य त्वमपि स्नातः स्वलङ्कृतः कृत आहारो येन तथाभूतः विहरस्व (ञ) इत्थम् अशेषाणां बालानां शेखरं श्रेष्ठं ब्रह्मादिभ्योपि श्रेष्ठमिति वा तथाभूतमपि तं केवलं सुतं मत्वा स्नेहेन निबद्धा धीर्यस्यास्तथाभूता हे नृप सराममच्युतं हस्ते गृहीत्वा स्ववाटं स्वगृहं नीत्वा अथ उदयं माङ्गलिकं कर्म कृतवती चकार (ट)

श्रीविजयध्वजतीर्थकृता पदरत्नावली

(क–ग) नोपेयातां समीपं नागतौ (घ) अजोहवीत् आह्वयामास (ङ)–छ) व्रजाधिपः नन्दगोपः धेहि देहि बालकाः (ज) धूलिधूसरिताङ्गः धूलिधूसरितसर्वशरीरः (झ–ञ) स्ववाटं स्वव्रजम् (ट)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अत्र क्रीणीहीत्यादयः श्लोका बहुविधा वर्त्तन्ते व्याख्याताश्च चित्सुखेन (क-ट)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तेष्वतिनीचानां पुलिन्दजातीनामपि प्रीतिप्रद इत्याह–क्रीणीहीति। अच्युतः परिपूर्णोऽपि फलमात्रार्थी सर्वफलप्रदोपि त्वरया पुरतः स्थितधान्यमात्रप्रातेर्धान्याञ्जलिमादाय ययौ (क) नच तावन्मात्रमपि धान्यं तया प्राप्तमित्याह–च्युतेति। अभ्यन्तरात्त्वरया बहिर्निगमे वर्त्मन्येव सर्वधान्यानि पतितानि ततश्च द्वित्रिमात्रधान्ययुक्ते केवलञ्जलावेव नीयतामित्युक्त्वा फलपात्रे न्यस्ते फलविक्रयिण्यप्युद्भूतस्नेहफलैः पील्वादिभिस्सर्वैरेवापूरयत् फलेषु तस्य जातलोभत्वेन स्तोकेपि तत्करतलद्वये तदीयवैभवशक्तेः साहाय्यात् ततश्च रत्नैरिति तदीयसर्वफलप्रदत्वशक्त्या तत्प्रेमपर्य्यन्ता सर्वैव सम्पत्तिरभूदिति ज्ञेयम् (ख) रोहिण्याः सकाशादपि श्रीयशोदायामतिवात्सल्यवत्त्यां रामकृष्णावतिस्नेहवशाविति दर्शयन् यमलार्जुनभङ्गादिना एव लीलान्तरमाह–सरित्तीरे खेलनार्थं गतं कृष्णं रामं च उत्तरवाच्यानुरोधात् तद्भोजनसाधनासक्तया श्रीयशोदया प्रेषिता रोहिणीति कर्त्तृपदं ज्ञेयम् (ग) यशोदां प्रेषयामासेति तस्या एवाधिकवात्सल्यवत्यास्तद्द्वयाकर्षणसामर्थ्यनिर्णयात् (घ) अजोहवीत् पुनः पुनराजुहाव निकटगमने पलायनशङ्कयेति दूरत एवेति भावः (ङ) कृष्णकृष्णेति वीप्सा दूरतः श्रवणाय (च-छ) भोक्ष्यमाण इति युवां विना भोक्तुमशक्नुवन्तं तं स्वपितरं किं क्षुधया पीडयसीति भावः। स्वगृहान् यातेति युष्मन्मातापितरोपि वयमिव क्लिश्यन्ति तान् सुखयतीति भावः। वस्तुतस्तु क्रीडाविच्छेद एव तात्पर्य्यम् (ज) तदप्यनायान्तं क्रीडोत्साहविरमयितुं दानोत्साहमुत्पादयति विप्रेभ्य इति (झ) तदैवागतान् यान् बालान् दर्शयित्वा मात्सर्यं जनयति पश्येति (ञ) तम् अशेषस्य शेखरं चूडामणिं सुतं मत्वा न त्वशेषशेखरं मत्वेत्यर्थः। सत्वशेषशेखरः सुतश्च भवतीत्यर्थः। यद्वा, तं सुतं अशेषस्य स्वकुलस्य शेखरं मत्वा स्ववाटं निजस्थानं उदयं स्नपनभोजनालङ्कारादिमङ्गलम् (ट)

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

स्वपुरवासिनां हर्षावहत्वमुक्त्वा पुराद्बहिर्निवसन्तीनां पुलिन्दीनामपि हर्षावहत्वमाह–क्रीणीहीति। सार्वज्ञ्यादच्युतो नन्दसूनुरमृतस्वादूनि सरूपानि फलानि मदर्थमेतया नीतानीति विद्वान् सर्वफलप्रदोऽपि फलार्थी सत्वरश्चत्वरस्थितधान्यराशेर्धान्याञ्जलिमादाय तदन्तिकं ययौ ॥ १० ॥ सा फलविक्रयिणी तद्दर्शनलब्धमनोरथाभ्यन्तरात्त्वरया गमनेन पथि च्युतधान्यं तस्य करद्वयमवशिष्टानि पञ्चषाणि धान्यानि फलपात्रे निक्षिप्य देहीति प्रसारितं, फलैरपूरयत् फलभाण्डञ्च रत्नैरपूरीत्याश्चर्यस्तस्य महिमा एतदादीनां कन्याश्च कृष्णे परमानुरागधवाः "केमाः स्त्रियो वनचरी"रित्यादिवाक्यैरुद्धवेन श्लाघिष्यन्ते ॥११॥ चरितान्तरमाह सरित्तीरमित्यर्द्धकम्। कृष्णमाह्वयत् रामञ्च उत्तरवाक्यानुरोधात् तद्भोजनसम्पादनासक्तया यशोदया प्रेषिता रोहिणीति कर्त्तृपदं बोध्यम्। तस्या प्रेषणं तद्दासीभिराह्वानेनागच्छेतामिति भावः॥१२॥ तयाहूतावपि पुत्रकौ क्रीडासङ्गेन हेतुना यदा नोपेयातां तदा सा रोहिणी यशोदां प्रेषयामासेति तस्याः सकाशादस्यां तद्वात्सल्यातिशयो येन तौ तद्वश्याविति सूच्यते नन्वेतयो राजपत्न्योर्भवनान्निर्गत्य सरित्तीरपर्यन्तगमनं कथमिति चेत् तत् प्रदेशस्य निर्जनस्य भवनकक्षान्तरतुल्यत्वात् पक्षद्वारेण तद्गमनं सुघटमिति गृहाण यत्र रमणपुलिनं तत्क्रीडास्थलं प्रसिद्धं धूलीधूसरिताङ्गस्त्वमिति वक्ष्यते ॥ १३ ॥ अतिवेलं वेलामतिक्रम्य क्रीडन्तं अजोऽवीत् पुनराह्वयत् अन्तिकगमने पलायेतेति शङ्कया दूरादेवेति भावः ॥ १४ ॥ कृष्ण कृष्णेति वीप्सा दूरतः श्रवणाय ॥ १५ ॥ यद्वाक्यं प्रतिपालको राम एनं बलादानेष्यतीति भावेन तमाह्वयति हे रामेति अनुकम्प्ये तातशब्दः "तातोऽनुकम्प्ये जनके" इति मेदिनी ॥ १६ ॥ भोक्ष्यमाण इति युवां विना स न भोक्ष्यते इति पितरं क्षुधा किं पीडयथ इति भावः। आवयोर्मात्रोः दम्पत्योर्वा हे बालकाः स्वगृहान् यूयं यात युष्मन्मातरोऽपि वयमिव क्लिश्यन्ति ताः सुखयत क्रीडाविच्छेदार्थमेतत् ॥ १६ ॥ क्रीडोत्साहत्यागाय दातुस्तस्य दानोत्साहं जनयन्त्याह जन्मर्क्षं तेऽद्येति ॥ १८ ॥ तदैव तत्रागतान् बालान् प्रदर्श्य मात्सर्यमुत्पादयन्त्याह पश्येति। विहरस्वेति विहारो न वर्ज्यते इत्यर्थः ॥ १९ ॥ इत्थं सलालनोक्तिपूर्वकशनैर्गमनेन प्रकारेण तं कृष्णमशेषशेखरं स्वयं सुतं सत्वानुभूय तादृशस्यैव सुतत्वात् यद्वा तं सुतमशेषस्य शेखरं शिरोऽवतंसं मत्वा स्ववाटं स्वस्थानं स्वमन्दिरं नीत्वा "वाटो मार्गवृतिस्थाने" इति मेदिनी। उदयं स्नपनभोजनालङ्कारार्पणादिमङ्गलं भोजनमिदं स्वसरूपमित्युपरि वक्ष्यामः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

बालकैर्भृशं क्रीडतः क्रीडां कुर्वतो भग्नार्जुनं सरित्तीरगतं कृष्णमथ रामं चेत्येतौ रोहिणी देव्याह्वयदाजुहावेत्यर्थः ॥ यदा क्रीडासङ्गेन तदासक्त्याऽऽहूतावपि नोपेयातां समीपं नापतुस्तदा पुत्रवत्सला रोहिणी यशोदां प्रेषयामास त्वं वा कारयेति ॥ बालमतिवेलं भृशं सहाग्रजं सहरामं क्रीडन्तं स्वसुतं पुत्रस्नेहेन स्नुतौ स्तनौ यस्याः सा। स्वाङ्गादिङीष्। यशोदाऽजोहवीत्।

ह्वेञ् स्पर्धायां शब्दे चेत्यस्माद्यङ्लुगन्ताल्लङि अभ्यस्तस्येति सम्प्रसारणे कुहोश्चुरिति चुत्वेन जकारे गुणो यङोरिति गुणे यङो वेतीडागमे सार्वधातुकगुणे जडागमे च रूपम्। शब्दमात्रार्थकत्वेऽपि पुनः पुनः स्तुतिपूर्वकाकरणार्थत्वं प्राकरणिकं ज्ञेयम्। यथोक्तं प्रथमाष्टकाष्टमाध्यायदशमवर्गीयाजोह्वीन्नासत्याकरवामित्यादिव्याख्यायां माधवेन। वध्रिमती नाम रुच्यचिराजर्षेः पुत्री नपुंसकभर्तृका। सा पुत्रलाभार्थं नासत्यौ करा अभिमतकर्तारौ अजोह्वीत्। पुनः पुनः स्तुत्या पुत्रलाभार्थमाहूतवती। ह्वयतेर्यङ्लुगन्ताल्लङ्यङो वेति तिप ईडागम इति॥ तात त्वमेहि क्वासि न दृश्यस इति न वदेदिति वदति॥ तेऽरविन्दाक्षतेति। यतोऽरविन्दाक्षता तेऽतः पश्य एहीति। कमलपत्रलोचन सूर्यचन्द्रवल्लोचनेति वा नानवलोकनं युक्तमिति भावः। विहारैः क्रीडाभिरलं। कुत इत्यत आह। क्षुत्क्षान्त इति। बहुलवत ऊहनं मोहनाङ्ग्या इति ज्ञेयं। यद्वक्ष्यति च प्रातरेव कृताहार इति॥ दाशार्हो व्रजाधिपो नन्दोऽधिपो मां व्रजेत्युक्त्वा त्वां प्रतीक्षते सहाशितव्यमित्यासीनो मार्गं निरीक्षते एह्यावयोः प्रियं धेहि पिबेहि बालकाः स्वगृहान्यान्तु। यातेति पाठे हे बालका यात गच्छतेत्यर्थः। बालान्स्वबालाभ्यां सहानाजुहाव यशोदा भुक्त्यर्थम्। न दारिद्र्यान्न वा लोभादपि स्वपुत्रेण सहादनसाधनसुकृतस्याद्याप्यनुदितत्वादिति मन्तव्यम्॥ धूलिधूसरितान्यङ्गान्यवयवा यस्य स मज्जनं स्नानं चावह नन्दादिमं त्वमन्यं नावह परकीयोऽयमिति नोऽनुसन्दध्याः किन्तु मज्जनं मम जनो हि मज्जनस्तमावह। अत इत आगते स्वकीयता स्फुटीभविष्यतीति भावः। हे मज्ज मतो जायत इति स तथा। तातमिति शेषः। आब सम्यमक्ष च। हेत्येतदुभयकार्यकारितेतरत्र दुःसाधनेति द्योत्यते। हे अज्ज आश्चर्यकरजन्म। उर्वरिते पूर्ववत्। हे मज्जनमतो जनो जननं यस्य तत्सम्बुद्धिः। मा मामत्रेति वा॥ मातृसृष्टान्स्वमातृकृताभ्यङ्गशोधिताङ्गान्स्वमात्रलङ्कृतान्विहरस्व क्रीड। ञित्वात्स्वरितञित इत्यात्मगामिनि क्रियाफल आत्मनेपदता॥ इत्थं यशोदाऽशेषशेखरमशेषाणां शेखरमशेषः शेषविरोधी गरुडः स शेखरे यस्य स गरुडध्वजस्तमिति वा मा पीडारूपस्तम्। शिखास्वापीडशेखरावित्यमरः। शिरोधार्यमालावाच्यस्त्वयं शिरोमान्यता निमित्तीकृत्योत्तमार्थक इति ज्ञेयम्। शिखि गतौ। बाहुलकादरः। आगमशासनानित्यतया नुम्पुगन्तगुणे रूपम्। स्ववाटं व्रजं स्वमार्गं वा। उदयं मज्जनाद्युत्सवं कृतवती॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अत्र 'क्रीणीहि' इत्यत आरभ्य 'गोपवृद्धा' इत्यतः प्राक्तना एकादश श्लोकाः कैश्चिद्व्याख्याकृद्भिर्व्याख्याताः, कैश्चित्तु न व्याख्याताः। परंतु पुस्तकेषूपलभ्यमानत्वात् प्रकरणविरोधाभावाच्चास्माभिरपि व्याख्यायन्ते। 'भो लोक! फलानि क्रीणीहि' इति फलविक्रयिण्या वचनं श्रुत्वा अच्युतः ऐश्वर्यादिसर्वफलपरिपूर्णोऽपि भगवान् फलार्थी सन् धान्यमादाय सत्वरं शीघ्रं ययौ। एवं परिपूर्णस्यापि गमने प्रयोजनं सूचयन्नाह—सर्वफलप्रद इति। धर्मादिचतुर्विधसर्वफलप्रदत्वात्तस्या अपि किञ्चित् फलं प्रदातुं गत इति भावः॥ १०॥ तस्य त्वरया बहिर्निर्गच्छतोऽच्युतस्य च्युतानि 'मार्गे एव पतितानि' धान्यानि यस्मात्तथाभूतमपि करद्वयं तत्सौन्दर्यादिविमोहिता फलविक्रयिणी फलैरपूरयत्। तदाऽच्युतेनापि करस्थेनावशिष्टेन तद्भाण्डे प्रक्षिप्तेन धान्येन तस्याः फलभाण्डं रत्नैर्माणिक्यादिभिरपूरि पूरितम्॥ ११॥ अथेति लीलान्तरे। भग्नावर्जुनौ येन तं कृष्णं रामं च सरितो यमुनायास्तीरं गतं बालैः सह भृशं क्रीडन्तं रोहिणी आह्वयत् आजुहाव। तस्याः सौभाग्यातिशयं सूचयन्नाह—देवीति॥ १२॥ एवमाहूतावपि पुत्रकौ क्रीडायामासङ्गेन आसक्त्या यदा नोपेयातां स्वसमीपं नागच्छतां तदा तावानेतुं रोहिणी यशोदां प्रेषयामास। 'तत्प्रेषणेऽपि किं स्यात्' इत्याशङ्क्याह—पुत्रवत्सलामिति। रोहिण्याः सकाशादपि तयोर्यशोदायाः स्नेहाधिक्यात्तयोरपि तस्यां मानाधिक्यात्तयाहूतावागमिष्यत इत्याशयः॥ १३॥ सा यशोदा सहाग्रजं बलभद्रसहितं स्वसुतं कृष्णमजोह्वीत् आजुहावेत्यन्वयः। तस्याः स्नेहातिशयं दर्शयन्नाह—पुत्रस्नेहेन स्नुतौ स्तनौ यस्या सा। आह्वाने हेतुमाह—अतिवेलमिति। भोजनादिवेलाऽतिक्रान्ता येन तमित्यर्थः। वेलातिक्रमे हेतुमाह—बालैः सह क्रीडन्तमिति॥ १४॥ तदाह्वानप्रकारमाह—कृष्णकृष्णेति। वीप्सा दूराच्छ्रवणार्था। 'त्वद्दर्शनेनैव मम सन्तापहानिः परमानन्दश्च' इति सूचयन्ती सम्बोधयति—अरविन्दाक्षेति। स्नेहाधिक्येनाह—हे पुत्रकेति। तत्रापि शीघ्रागमनार्थमाह—हे तातेति। एहि आगच्छ, स्तनं पिब। यतः क्षुधा क्षान्तोऽसि। विहारैरलं पूर्णम्, यतः क्रीडया श्रान्तोऽसि॥ १५॥ एवमाह्वानेऽपि कृष्णमनागच्छन्तं विलोक्य राममाह्वयति—हे रामेति। 'तव दर्शनेनैवास्माकमानन्दो भवति' इत्याशयेन सम्बोधयति—कुलनन्दनेति। तत्र स्नेहातिशयं सूचयन्त्याह—तातेति। सानुजः कृष्णेन सहितः तमपि गृहीत्वाऽऽशु आगच्छ। तत्र हेतुमाह—यस्माद्भवान् प्रातःकाल एव कृताहारस्तस्माद्भोक्तुमर्हतीति॥ १६॥ शीघ्रमागमने हेत्वन्तरमप्याह—प्रतीक्षत इति। हे दाशार्हकुलोत्पन्न! व्रजाधिपो नन्दो भोक्ष्यमाणो वां युवां प्रतीक्षते युवयोरागमनं प्रतीक्षते। अत एहि। आवयोः प्रियं धेहि सुखं सम्पादय। युवयोरागमनाद्बाललीलाविरमाद्बालका अपि स्वगृहं यान्तु॥ १७॥ एवमुक्तेऽपि अनागच्छतस्तस्य क्रीडोत्साहं विरमयितुं स्नानदानाद्युत्साहमुत्पादयति—धूलीति। हे तात! यतस्त्वं धूलिधूसरिताङ्गः, अतो मज्जनं यथावत् स्नानमावह कुरु। अद्यदिने भवतो जन्मर्क्षं जन्मनक्षत्रमस्तीति शुचिः सन् विप्रेभ्यो गा देहि॥ १८॥ तदैव स्नानादि कृत्वाऽऽगतान् बालान् दर्शयित्वा मात्सर्यं जनयन्त्याह—पश्य पश्येति। मातृभिर्मृष्टाः स्नापनादिना निर्मलीकृताश्च ते सुष्ठु अलङ्कृताश्च तान् ते तव वयस्यान् सखीन् पश्य पश्य, अतस्त्वमपि स्नातः

कृताहारः स्वलङ्कृतश्च सन् विहरस्वेत्यन्वयः ॥१९॥ 'नेमं विरिञ्चो न भव' इत्यादावुक्तमेव यशोदाया ब्रह्मादिदुर्लभभगवत्कृपापात्रत्वं पुनः सूचयन्नाह—इत्थमिति । इत्थं वदन्ती यशोदा शनैरुपसङ्गम्य तमशेषाणां सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां शेखरं चूडामणिं पूज्यमप्यच्युतं श्रीकृष्णं सुतं मत्वा हस्ते गृहीत्वा सहरामं रामेण सहितं स्ववाटं स्वगृहं नीत्वा, अथानन्तरं उदयं स्नपनभोजनालङ्कारादि मङ्गलं कृतवती । तथाभूतस्यापि सुतत्वेनाभिमाने हेतुमाह—स्नेहनिबद्धधीरिति । पुत्रस्नेहेन तस्मिन्निबद्धा धीर्यस्याः सा, अतस्तथैव तस्यास्तत्राभिमानः । भगवानपि तथैवानुकरोति, 'ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम्' इति वचनात् । अशेषशेखरत्वे हेतुरच्युतपदेनैव सूचितः, यत एवं क्रीडन्नपि स्वरूपतो गुणतश्चाच्युत एव । विश्वासार्थं नृपेति सम्बोधनम् ॥ २० ॥

अन्वितार्थप्रकाशिका

क्रीणीहीत्यादिश्लोकद्वयम् । बहुष्वदृष्टमपि क्वचिदुपलभ्यते । भो लोक फलानि क्रीणीहीति फलविक्रयिण्या वचनं श्रुत्वा सर्वेषां फलप्रदोऽच्युतः फलार्थी सन् धान्यमादाय सत्वरं शीघ्रं ययौ ॥ १० ॥ फलविक्रयिणीति । तस्य त्वरया बहिर्निर्गच्छतोऽच्युतस्य च्युतानि मार्गे एव पतितानि धान्यानि यस्मात्तथाभूतमपि करद्वयं तत्सौन्दर्यादिविमोहिता फलविक्रयिणी फलैरपूरयत् । तदाच्युतेनापि करस्थेनावशिष्टेन तद्भाण्डे प्रक्षिप्तेन धान्येन तस्याः फलभाण्डं रत्नैर्माणिक्यादिभिरपूरि पूरितम् ॥ ११ ॥ सरिदिति । यमलार्जुनभङ्गदिनभवलीला विशेषप्रतिपादिका सरिदित्याद्यष्टश्लोकी कैश्चिदनादृतापि सर्वत्रोपलभ्यमानत्वाद्व्याख्यायते । अथेति । लीलान्तरे भग्नावर्जुनौ येन तं कृष्णं सरितो यमुनायास्तीरं गतं बालैः सह भृशं क्रीडन्तम् इति शेषः । आह्वयत् आजुहाव । यशोदाप्रेरिता रोहिणीति शेषः । अद्य भवतो जन्मर्क्षम् अतः शुचिः सन् विप्रेभ्यो गाः देहि । अत्र रामाह्वानमपि ज्ञेयम् ॥ १२ ॥ नोपेयातामिति । एवमाहूतावपि पुत्रकौ क्रीडायामासङ्गेन आसक्त्या यदा नोपेयातां स्वसमीपं नागच्छतां तदा तावानेतुं रोहिणी कर्त्री पुत्रयोर्वत्सलां यशोदां प्रेषयामास ॥ १३ ॥ क्रीडन्तमिति । पुत्रस्नेहेन स्नुतौ स्तनौ यस्याः सा यशोदा बालैः सह क्रीडन्तम् अतिवेलं भोजनादिवेलामतिक्रान्तं सहाग्रजं बलभद्रसहितं स्वसुतं कृष्णमाजोहवीत् मुहुर्मुहुराह्वयत् । आङ्पूर्वात् ह्वेञः यङ्लुगन्ताल्लङ् । "अभ्यस्तस्य च" इति संप्रसारणम् ॥ १४ ॥ कृष्ण कृष्णेति । हे कृष्ण कृष्ण ! हे अरविन्दाक्ष ! हे पुत्रक ! अनुकम्पायां कन् । हे तात ! एहि आगच्छस्तनं पिब यतः क्षुधा क्षामोऽसि विहारैरलं पूर्णं यतः क्रीडया श्रान्तोऽसि ॥ १५ ॥ हे राम ! हे कुलनन्दन ! हे तात ! सानुजः कृष्णेन सहितः तमपि गृहीत्वाशु आगच्छ । तत्र हेतुमाह । यस्माद्भवान् प्रातःकाल एव कृताहारस्तस्माद्भोक्तुमर्हतीति ॥ १६ ॥ प्रतीक्षत इति । हे दाशार्ह दाशार्हकुलोत्पन्न ! व्रजाधिपो नन्दो भोक्ष्यमाणो वां युवां प्रतीक्षते युवयोरागमनं प्रतीक्षते । त्वामित्यपि पाठः । अत एहि आवयोः प्रियं धेहि सुखं संपादय । हे बालकाः ! यूयमपि स्वस्वगृहान् यात ॥ १७ ॥ पश्य पश्येति ॥ मातृभिर्मृष्टाः स्नापनादिना निर्मलीकृताश्च ते सुष्ठ्वलंकृताश्च तान् ते तव वयस्यान् सखीन् पश्य पश्य । अतस्त्वमपि स्नातः कृताहारः स्वलंकृतश्च सन् विहरस्व ॥ १८ ॥ इत्थमिति ॥ हे नृप ! पुत्रस्नेहेन तस्मिन्निबद्धा धीर्यस्याः सा इत्थं वदन्ती यशोदा शनैरुपसंगम्य तमशेषाणां सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां शेखरं चूडामणिं पूज्यमप्यच्युतं श्रीकृष्णं सुतं मत्वा हस्ते गृहीत्वा सहरामं रामेण सहितं स्ववाटं स्वगृहं नीत्वा अथान्तरम् उदयं "जन्मर्क्षमद्य भवतः" इति सूचितम् । स्नपनगोदानभोजनालङ्कारादि मङ्गलं कृतवती ॥ १९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वयस्यान् समवर्षान् मातृमृष्टान् मातृभिः स्नापितान् ॥११॥ क्रीडासंगेन रमणासक्त्या नोपेयातां नागच्छताम् ॥१२॥ अजोहवीत् संबोधयामास ॥ १३ ॥ क्षुत्क्षांतः क्षुधा पीडितः क्रीडया श्रांतः श्रमयुक्तः जातः ॥ १४-१५ ॥ हे दाशार्ह दाशार्हकुलोत्पन्न प्रियं धेहि कुरु बालकाः यूयं स्वगृहान् यात ॥ १६ ॥ अशेषाणां बद्धमुक्तानां शेखरं मुकुटमणिं अधिपमित्यर्थः स्ववाटं स्वस्थानं उदयं जन्मनक्षत्रोत्सवाय स्नाद्यलंकारान् कृतवती ॥ १७ ॥ बृहद्वने गोकुले अनुभूय ज्ञात्वा समामत्य मिलित्वा व्रजकार्यं समूहस्य हितकृत्यम् ॥ १८ ॥ देशादीनां तत्त्वज्ञो याथार्थ्यज्ञः अर्थः स्वकर्त्तव्यप्रयोजनम् ॥ १९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत आरभ्य दश श्लोकाः पुस्तकान्तरेष्वदर्शनात्, क्षेपकप्राया अपि श्रोतृप्रीतिकारकेक्षया व्याख्यायन्ते ॥ गृहाणेति ॥ भोः कृष्ण, फलानि इमानि महापीलुजम्बूपक्वबदरीप्रभृतीनि फलानि, गृहाण । इत्येवंविधं, फलविक्रयिण्या वच इति शेषः । श्रुत्वा, सत्वरं सर्वफलप्रदः सन्नपि, अच्युतः, फलार्थी भूत्वा, धान्यं स्वाञ्जलिमितव्रीह्यादिकं आदाय, ययौ फलाहरणायागच्छत् ॥ १० ॥ फलेति ॥ फलविक्रयिणी, तस्य भगवतः, च्युतं धान्यं यस्मात्तथाभूतं यत् करद्वयं तत्, फलैः, अपूरयत् । कृष्णेनापीति शेषः । फलभाण्डं फलभाजनं, फलविक्रयिण्या इति शेषः । रत्नैः, अपूरि च । भगवत्करद्वयच्युतेन धान्येन रत्नात्मकतामापन्नेन तत्फलभाण्डमपि पूरितमभूदित्यर्थः ॥ ११ ॥ अथ तन्मायामोहितयोर्यशोदारोहिण्योः कानिचिदाचरितानि

प्राह ॥ सरिदिति ॥ भग्नावर्जुनौ येन तं, सरित्तीरगतं यमुनायास्तीरं गतं कृष्णं, रोहिणी, आह्वयत् । हे कृष्ण, अद्यास्मिन् दिने, भवतस्तव, जन्मर्क्षं जन्मनक्षत्रं, भवति । अतः, अथ मङ्गलार्थं, शुचिः आमलकस्नानादिना शुद्धः सन्, विप्रेभ्यः, गाः धेनूः, देहि ॥ १२ ॥ पश्येति ॥ हे कृष्ण, ते तव, वयस्यान् सवयसः, मातृमृष्टांस्तत्तन्मातृभिः संस्नापितान्, वस्त्रालंकारधारणेन सुतरामलंकृतान् , पश्य पश्य । आदरे वीप्सा । त्वं च स्नातः, स्वलंकृतः, कृताहारश्च सन् , विहरस्व एतैः सह क्रीडां कुरु ॥ १३॥ नोपेयातामिति ॥ यदा पुत्रकौ रामकृष्णौ, आहूतौ सन्तावपि, क्रीडासङ्गेन खेलनात्यासक्त्या, न उपेयातां, तदा पुत्रवत्सला रोहिणी, यशोदां, प्रेषयामास ॥ १४ ॥ क्रीडन्तमिति ॥ सा रोहिणीप्रेषिता यशोदा, अतिवेलं भोजनादिवेलामतिक्रान्तं, बालैः सह क्रीडन्तं, सहाग्रजं रामसहितं, सुतं कृष्णं, पुत्रस्नेहस्नुतस्तनी, अजोहवीत् आजुहाव ॥ १५ ॥ आह्वानप्रकारं दर्शयति सार्द्धैश्चतुर्भिः ॥ कृष्णेति ॥ हे अरविन्दाक्ष, तातानुकम्प्य, हे कृष्ण, हे कृष्ण, एहि । स्तनं पिब । हे पुत्रक, विहारैः अलम् । क्षुत्क्षान्तः क्रीडाश्रान्तश्च, असि जातः भवसि ॥ १६ ॥ हे रामेति ॥ हे कुलनन्दन, हे राम, हे तात, सानुजः कृष्णेन सहितः, आशु आगच्छ । कथमेवं त्वरसे तत्राह । प्रातः एव कृताहारः, त्वं असि । तत्तस्मात्, भवान् भोक्तुं अर्हसि ॥ १७ ॥ प्रतीक्षत इति ॥ हे दाशार्ह क्षत्रकुलोत्पन्न, भोक्ष्यमाणः भोजनं करिष्यमाणः, व्रजाधिपो नन्दः, त्वां प्रतीक्षते तव प्रतीक्षां करोति । अतः एहि । आवयोः रोहिण्या मम चेत्यर्थः । प्रियं धेहि कुरु । हे बालकाः, स्वगृहान्, यात स्वस्वगृहं प्रति गच्छन्तु ॥ १८ ॥ इत्थमिति ॥ इत्थं यशोदा, अशेषशेखरं ब्रह्मादिभ्योऽपि श्रेष्ठं, तं कृष्णं, हे नृप, स्नेहेन निबद्धा धीर्यस्यास्तथाभूता सती, सुतं मत्वा, सहरामं अच्युतं कृष्णं, हस्ते एकैकस्मिन् पाणौ गृहीत्वा, स्ववाटं स्वगृहं नीत्वा, अथ उदयं माङ्गलिकं कर्म, कृतवती चकारेत्यर्थः ॥ १९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सरित्तीरगतमितिः १०.११.१२.

भामर्जुनसखं भग्नार्जुनेत्याकारयत्यसौ । कथमित्यच्युतो रोषान्नागतोऽप्याययौ तदा ॥ १७ ॥
जन्मर्क्षं रोहिणीयं च रोहिणीत्यैकनामतः । स्वार्थमाकारयत्येषा तन्मे किमिति नागमत् ॥ १८ ॥

नोपेयातामितिः १०.११.१४.

रामस्याप्युपचारचारु-कुतुकक्रीडा-यशोदागृहेष्वेवासीन्न तु रोहिणीगृहभुवीत्येतच्चरित्रात् स्फुटम् ।
तद्युक्तं स यशोदया गृहमुपानीतः स रामोऽच्युतो युक्तं सा सुतवत्सलेति च तदाह्वानाय तां प्राहिणोत् ॥ १९ ॥
न रोहिणीगृहे क्रीडाप्रचारो हरिणा कृतः । तद्धितप्रत्ययो मा भूद् व्यक्तोऽत्रेत्याशयाद् ध्रुवम् ॥ २० ॥
यदि व्रजाम्येक एव हित्वा कृष्णमहं पुरः । तन्मे शेषगतिर्न स्यात् सिद्धाऽतः सोऽपि नाव्रजत् ॥ २१ ॥

कृष्णेतिः १०.११.१५.

यद्भग्नार्जुननामतः प्रभुरसावाकारितो नाऽऽययौ प्रागाच्च स्फुटमादरेण सविधं कृष्णाच्युतेत्याह्वयात् ।
सत्येष्वप्यखिलेषु नामसु परेष्वेतानि नामानि मां भक्तायत्ततया नयन्ति वशतामित्यात्मकृत्यैरितम् ॥ २२ ॥

प्रतीक्षते त्वामितिः १०.११.१७

साध्वी सा व्रजपानुशासनचणा संभोक्ष्यमाणं व्रजाधीशं यत्पुरतो विधाय सुखिनी जाताऽच्युतप्रीतितः ।
एवं या भुवि भोक्तृजीवमनघा कृत्वाऽग्रतः प्रार्थयेच्छ्रीशं वृत्तिरसावपि प्रभवति सानन्दवृत्तिस्तथा ॥ २३ ॥

तदेवान्वर्थकं नाम यदर्थालङ्कृतः पुमान् । प्रसाद्येशमभूत्स्पष्टं यशोदा सा यशस्विनी ॥ २४ ॥

आहूतोऽहमनागतोऽप्यनुदितोपेक्षं मुहुर्यन्मतिर्मा मेवैति यशोदया हितदृशा मत्प्राप्तिबद्धस्पृहा ।
भूत्वा तत्सुलभस्ततश्च सहितस्तेनामृताभ्यर्हितं भोक्ष्ये भोज्यमिति व्यबोधि हरिणा भोक्त्रा पितृभ्यां सह ॥ २५ ॥

कृष्णप्रिया

किसी एक दिन का प्रसङ्ग है कोई एक बेचने वाली आई और पुकारने लगी, फल लीजिए भाई फल, मीठे मीठे फल, यह सुनते ही समस्त यज्ञ-याग-व्रत जप तप आदि के फल देने वाले भगवान् अच्युत फल खरीदने की इच्छा से अञ्जलि में अन्न लेकर दौड़ आये ॥ १० ॥ भगवान के करकमलों से अनाज का कुछ हिस्सा तो रास्ते में ही बिखर गया परंतु फल बेचने वाली ने उस पर ध्यान न दिया किन्तु अन्न ले कृष्णजी की अञ्जलि फलों से भर दी। इधर भगवान् श्रीकृष्ण चन्द्रने भी देखते-देखते फल की टोकरी रत्नों से भर दी ॥ ११ ॥ पुनः एक दिन यमलार्जुन वृक्षको भूतल पर गिरानेवाले श्रीकृष्ण एवं दाऊजी भैया बाल सखों के सङ्ग खेलते खेलते श्रीयमुना तीर चल पड़े और खूब खेल रहे थे। खेलते

खूब देरी हो गई तब श्रीरोहिणी माँ ने पुकारा हे कृष्ण हे बलराम जल्दी घर आओ ॥ १२ ॥ परन्तु दोनों भैया क्रीडन में इतने लग गये थे कि श्रीरोहिणी अम्मा की बुलाहट पर नहीं आये तब देवी रोहिणीजीने पुत्रवात्सल्यपूर्णा श्रीयशोदाजी अम्मा को भेजा कि दोनों कुमारों को आप ले आयिए ॥ १३ ॥ बलभद्रजी एवं लालन को बालसखाओं के सङ्ग खेलने में अतिकाल हो गया था। माता यशोदा दोनों के नाम लेकर प्रेम से पुकारती थी तब माताजी के वक्षस्थल में से दूध चू रहा था ॥ १४ ॥ अम्मा यशोदा जोर जोर से पुकारने लगी प्यारे लालन्! प्यारे कृष्ण! ओ कृष्ण! बेटा कमलनयन! अरे बेटा जलदी आओ आकर अम्माँ का दूध पी लो बेटा! अब खेलना बस करो, बेटा कब तक खेलोगे! भैया देखो तो सही भूख से कितने दुबले हो गये हो, देखो देखो खेलते खेलते तुम्हें थकावट लगी है ॥ १५ ॥ बेटा बलराम! सचमुच तुम कुलको आनन्द देनेवाले सयाने सुत हो छोटे भैया को घर ले आओ, तो देखो दोनों भैयाने आज जलदी सबेरे के ही कलेऊ किया था अब तो दोनों भैयाओं को कुछ खाना चाहिए ॥ १६ ॥ देखो तो सही दाशार्ह! बेटा बलदाऊ तुम्हारे पिताजी व्रजराज भोजन की थाली पर बैठ रहे हैं वे तुम्हें छोड़कर भोजन नहीं करते देखो देखो तुम्हारी प्रतीक्षा कर रहे हैं, अरे भैया आओ आओ जल्दी आओ और बाबा को एवं मैया को आनन्दित करो, अरे लड़के लोग भैया आप भी अपने अपने घर पहुँचो ॥ १७ ॥ देखो तो सही बाबा तुम्हारे सारे के सारे अङ्ग धूलसे धूसर बन चुके हैं, आ जाओ जलदी नहा धो लो आज तुम्हारा जन्म नक्षत्र है अतः स्नान से पवित्र होकर ब्राह्मणों को गोदान करो ॥ १८ ॥ बेटा! देखो! देखो जरा देखो तुम्हारे सखाओं को अपनी अपनी माताओं ने सबको नहला धुलाकर मींज-पोंछकर भूषणों से विभूषित कर दिया है भैया तुम भी नहा धोकर—खा-पीकर सज-धजकर फिर खूब खेलना ॥ १९ ॥ राजन् परीक्षित!, माता यशोदाजी की बुद्धि स्नेह से भगवान् में ही लगी थी, और अखिल विश्व के शिरोमुकुट भगवान को अपना पुत्र समझती थी वह जननी आज इस प्रकार दोनों लालनों को कहती हुई दायें बायें करकमलों में लेकर घर लायीं और बालकों के स्नानादि मङ्गल कार्य माताजीने किये ॥ २० ॥

[1]

गोपवृद्धा महोत्पाताननुभूय बृहद्वने। नन्दादयः समागम्य व्रजकार्यममन्त्रयन्[2] ॥ १० ॥
तत्रोपनन्दनामाऽऽह गोपो ज्ञानवयोऽधिकः। देशकालार्थतत्त्वज्ञः प्रियकृद् रामकृष्णयोः ॥ ११ ॥
उत्थातव्यमितोऽस्माभिर्गोकुलस्य हितैषिभिः। आयान्त्यत्र महोत्पाता [3]प्रजानां नाशहेतवः ॥ १२ ॥
मुक्तः कथञ्चिद् राक्षस्या बालघ्न्या बालको [4]ह्यसौ। हरेरनुग्रहान्नूनमनश्चोपरि नापतत् ॥ १३ ॥
चक्रवातेन नीतोऽयं दैत्येन [5]विपदं वियत्। शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः ॥ १४ ॥
यन्न म्रियेत द्रुमयोरन्तरं प्राप्य बालकः। असावन्यतमो वापि [6]तच्चाप्यच्युतरक्षणम् ॥ १५ ॥
यावदौत्पातिकोऽरिष्टो व्रजं नाभिभवेदितः। तावद् बालानुपादाय यास्यामोऽन्यत्र सानुगाः ॥ १६ ॥

कर्वमक्षमा

अन्वयः—नन्दादयः गोपवृद्धाः समागम्य बृहद्वने महोत्पातान् अनुभूय व्रजकार्यम् अमंत्रयन् ॥ १० ॥ तत्र रामकृष्णयोः प्रियकृत् देशकालार्थतत्त्वज्ञः ज्ञानवयोऽधिकः उपनन्दनामा गोपः आह ॥ ११ ॥ प्रजानां नाशहेतवः महोत्पाताः अत्र आयान्ति (अतः) गोकुलहितैषिभिः अस्माभिः इतः उत्थातव्यम् ॥ १२ ॥ असौ बालकः हि बालघ्न्या राक्षस्या कथंचित् मुक्तः च हरेः अनुग्रहात् उपरि अनः न अपतत् ॥ १३ ॥ चक्रवातेन दैत्येन अयं विपदं वियद् नीतः तत्र शिलायां पतितः सुरेश्वरैः परित्रातः ॥ १४ ॥ द्रुमयोः अन्तरं प्राप्य असौ बालकः अन्यतमः वा अपि यत् न म्रियेत् तत च अपि अच्युतरक्षणम् ॥ १५ ॥ औत्पातिकः अरिष्टः यावत् व्रजं न अभिभवेत इवः तावत् बालान् उपादाय अन्यत्र सानुगाः यास्यामः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रंतुं वृंदावनं गंतुमंतः कृष्णेन यंत्रिताः ॥ स्वतंत्रा इव नंदाद्या मंत्रमेतममंत्रयन् ॥ १ ॥

व्रजकार्यं गोकुलस्य हितकृत्यम् ॥ २१-२४ ॥ विपदं वीनां पक्षिणां पदं विहारस्थानं विगतप्रतिष्ठं वा। वियन्नभः ॥२५॥ अन्यतमो वा कश्चिद्बालः। अच्युतेनैव रक्षणमासीत् ॥ २६ ॥ अरिष्टोऽनर्थः। इतः स्थानात् ॥ २७ ॥

---

१. श्रीशुक उवाच–वंशी. । २. मचिन्तयन्–विज. । ३. महोत्पाता बालानां-श्रीधर. वंशी. जीव., प्रजानां–वीर. विज. । ४. प्यसौ–वीर. विज. । ५. वियद्दूह्यतां–विज. । ६. तदप्य–श्रीधर. वंशी., तत्राप्यच्युत–वीर. जीव., तच्चाप्यच्युत–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अंतश्चेतसि। यंत्रिताः प्रेरिताः। एतं वक्ष्यमाणम् (१) ॥ २१ ॥ तत्र तेषु नंदादिषु ॥ २२ ॥ इतो बृहद्वनात्। गोकुलस्य। गोयूथस्य अत्र बृहद्वने ॥ २३ ॥ अनः शकटम् ॥ २४ ॥ पक्षिणां विहारो न केवलमाकाशे किं तु–भूमावपीत्यरुच्या विगता प्रतिष्ठावमानं यस्य तद्विगतप्रतिष्ठमनंतपदवाच्यत्वाद्वियतः तत्र तदा ॥ २५ ॥ असौ कृष्णो बालकः। अन्यतमः कृष्णाद्भिन्नः। यन्न म्रियेत तदच्युतरक्षणमिति योजना ॥ २६ ॥ औत्पातिकः उत्पातप्रभवोऽरिष्टोऽशुभसूचकः "अरिष्टमशुभे तक्रे सूतिकागार आसवे। शुभे मरणचिह्ने च" इति मेदिनी। अन्यत्र स्थानांतरे ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

"स्वाभाविकेन तत्प्रेम्णा प्रेरिता गोपपुङ्गवाः। हर्य्यंकमङ्गलाहार्यं व्रजकार्यममन्त्रयन्" ॥

यमलार्जुनभङ्गेन्द्रयागसमापनानन्तरम् समागम्य आस्थान्यां मिलित्वा व्रजकार्यं व्रजप्राणस्य श्रीकृष्णस्य हितानुसन्धानात् ॥ १० ॥ तत्र तेषु अर्थः प्रयोजनं देशादीनां त्रयाणामेकैकेषां मिलितानां च यत्तत्त्वमुत्तममध्यमादित्वं तज्ज्ञः इति ज्ञानाधिक्यं विशेषितं वय आधिक्यान्नामसाम्याच्च श्रीनन्दराजस्यासौ मन्त्री ज्येष्ठभ्राता चेति गम्यते। एवं तादृशोक्तौ योग्यतोक्ता किञ्च श्रीरामकृष्णयोः प्रियकृत् प्रकृत्यैव प्रेम्णा हितकर्त्ता अतो महोत्पातानुभवेन तयोरनिष्टशङ्कयैवाहेत्यर्थः। अत्र ज्येष्ठकनिष्ठतया नामवैपरीत्यसम्भवेऽपि स्वरसत एव पूर्वं ज्येष्ठस्योपनन्देति नाम कृतम् उप समीपे नन्दयतीति पश्चात्तद्युग्मकत्वेन कनिष्ठस्य नन्देति कृतं तत्पितृचरणैः तच्च तत्तारतम्यसंवादित्वाद्दैवघटितमेव तथा सर्वलक्षणसम्पन्नत्वादेव तस्मै कनिष्ठायापि परमप्राज्ञेन तेन ज्येष्ठेनैव स्वेच्छया गोकुलराज्यं समर्पितमिति विवेचनीयम् ॥ ११ ॥ उत्थातव्यमन्यत्र गन्तव्यमित्यर्थः। कुतः ? गोकुलस्य तत्रत्यानां सर्वेषां हितैषिभिरिति बालानामिति च सामान्योक्तिः श्रीनन्दस्यासङ्कोचार्थं प्रजानामिति पाठेपि स एवार्थः। व्रजानामिति च पाठः क्वचित् वस्तुतस्तु तद्धितादिनैव सर्वहितादिसिद्धेः तत्तदुक्तिः ॥ १२ ॥ अतस्तानधिकृत्यैव महोत्पातानुतापं सूचयन् कौतुकेन स्वयमेव तत्रागतं श्रीकृष्णमङ्के कृत्वा सस्नेहं दृष्टान्तयति—मुक्त इति त्रिभिः। राक्षस्यादिशब्देन स्वगणेनाप्रतिकार्यत्वं दर्शितं बालक इत्यनेन तेन तु सुतराम् अतः कथञ्चिदिति साक्षात्कारणादर्शनात् केनाप्यनिर्वचनीयेनैव कारणेनेत्यर्थः। हि प्रसिद्धौ सर्वेषामेवानुभवात् कथञ्चित्तेनोक्तमेव निर्द्धारयति—हरेरिति। नूनं निश्चये ॥ १३ ॥ दैत्येन नीतः तत्र च वियदाकाशं नीतः तत्रापि विपदम् अन्यत्तः तत्र विगतप्रतिष्ठमिति अत्यूदूर्ध्वमित्यर्थः। सुरेश्वरैः अच्युतप्रेरितैः तत्पार्षदरूपैरेवेत्यर्थः। तदप्यच्युतरक्षणमित्यपिशब्दात् ॥ १४ ॥ सास्रगद्गदमाह—यन्न म्रियेतेति। दुःखैरेवाश्लीलमपि प्रयुक्तमिदमिति तत्रापीति तदपीति वा पाठः ॥ १५ ॥ एवमसकृत्परमेश्वरेण रक्षा कृता तादृशं च कुतोऽस्माकं भजनं येन सदा तेन सा कार्या तस्मात्तदादिष्टनीतिशास्त्रानुसाराच्चोत्पातस्थानमेतदाशु परित्यक्तमेव युज्यत इत्याह—यावदिति। औत्पातिकः उत्पातजः व्रजमित्यादिकं पूर्ववच्छ्रीकृष्णाभिप्रायेणैव ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

समागम्यास्थान्यां मिलित्वा व्रजकार्य्यं व्रजप्राणस्य श्रीकृष्णस्य हितानुसन्धानात् ॥ २१ ॥ तत्र तेषु तस्मिन् वा मन्त्रणे। गोप इति श्लेषेण वाक्पतिरित्यर्थः। किञ्च, ज्ञानेन वयसा चाधिको महानतो यस्मिन् देशे काले च कर्त्तव्यो योऽर्थः प्रयोजनम्, तस्य तत्त्वज्ञोऽतः श्रीनन्दराजस्यासौ मन्त्री ज्येष्ठभ्राता च ज्ञेयः। एवं तादृशोक्तौ योग्यतोक्ता। किञ्च, रामकृष्णयोः प्रियकृत् तयोः श्रीवृन्दावनं जिगमिषामभिप्रेत्य तत्र गमनमंत्रप्रदानेन प्रीतिं सम्पादयन्नित्यर्थः। यद्वा, नित्यं प्रकृत्यैव प्रियकृत् प्रेम्णा हितकर्त्ता, अतो महोत्पातानुभवेन तयोरनिष्टशंकयैवाहेत्यर्थः ॥ २२ ॥ उत्थातव्यमन्यत्र गन्तव्यमित्यर्थः। कुतः ? गोकुलस्य तत्रत्यानां सर्व्वेषां हितैषिभिरिति श्रीकृष्णहितेनैव तद्धितसिद्धेः। यद्यपि श्रीनन्दनन्दनमधिकृत्यैव वक्ष्यमाणा महोत्पातास्तथापि बालानामिति बहुत्वम्, सर्व्वेषामपि गोपानां भयोत्पादनेन शीघ्रगमनात्, यद्वा, बालकवर्गशिरोमणौ तस्मिन्महोत्पातैः सर्व्वबालकेष्वपि महोत्पातापत्तेः। प्रजानामिति पाठेऽपि स एवार्थः। व्रजानामिति पाठे तु सर्व्वव्रजजीवने तस्मिन् कृतास्ते सर्वेषामपि व्रजजनानां नाशहेतव एव ॥ २३ ॥ महोत्पातानेव दर्शयन् तेषां स्वतोऽप्रतिकार्य्यताञ्च बोधयति–मुक्त इति त्रिभिः। बालक इति स्वयं मोचनाशक्तिरुक्ता, अतः कथञ्चिदिति साक्षात्कारणादर्शनात् केनाप्यस्मद्भाग्यैनैवेत्यर्थः। हि अनुभवे, असौ सर्व्वेषामस्माकं जीवनभूतः, परोक्षनिर्देशो 'गोपवृद्धाः' इत्युक्त्या सभायां मंत्रणे वृद्धानामेव योग्यत्वेन बालकस्य तस्य तत्र साक्षादविद्यमानत्वात्, यद्वा, असावयं साक्षाद्दर्शनेन तस्मिन् उपनन्देन तस्यापि तत्रैव नीतत्वात्, किंवा कौतुकेन स्वयमेव तेन तत्र गतत्वात्। नूनं निश्चये। अमुष्योपरि सर्व्वोत्पातादिदुःखं हरतीति हरिस्तस्येति वैष्णवानामस्माकं गृहे विशेषतो रक्षा मन्त्रविदां श्रीयशोदादीनां सान्निध्ये राक्षस्याः किञ्चित्करणाशक्तेस्तस्याः सकाशादमुष्य मुक्तिरस्मद्भाग्येनापि सम्भवात्। दूरे रहस्याशरणे शकटाधः शायितस्योपरि स्वयं पततोऽपि शकटस्यापतनञ्च परमदुर्घटं केवलं तदनुग्रहादेव भवतीति भावः ॥ २४ ॥ अयमिति प्रस्तुततया कालनैकट्यापेक्षया वा, पक्षान्तरे स्नेहभर-जननार्थमंगुल्या दर्शयति—दैत्येन

नीतस्तत्र च वियदाकाशं नीतस्तत्रापि विपदम्, तैर्व्याख्यातमेव, तत्राप्यूर्द्ध्वमित्यर्थः, यद्वा, आपद्रूपं ततः पातादिना महानर्थसम्भवात्। यद्यपीदृशं श्रीभगवति प्रयोक्तुं न योग्यम्, तथापि विभीषिकार्थम्, किंवा 'अनिष्टाशंकीनि बन्धुहृदयानि भवन्ति' इत्यादिन्यायेन स्नेहभराकुलत्वादुघटत एव। अग्रे 'न म्रियेत' इत्येवमन्यत्राप्युह्यम्। पश्चात् पतितोऽपि तत्र शिलायामित्येवमुपर्य्यधोऽपि विपद्वर्गतः सुरश्रेष्ठैस्तत्तल्लोकपालैरेव परित्रातः। यद्वा, ततस्ततः सर्व्वतो रक्षया हरेरेव शक्त्यतिशयं मत्वा, गौरवेण सुरेश्वरैरिति बहुत्वम्, सुरेश्वरेणेत्यर्थः ॥ २५ ॥ म्रियेतेत्ययुक्तमप्यमंगलस्मारणं तेषां स्नेहवर्द्धनार्थम्। अच्युतेन सर्व्वव्यापकेन भगवतैव रक्षणमभूत्, अन्यथेतस्ततः स्थितानां बालकादीनामप्याकाशस्पर्शिमहावृक्षद्वयनिपातादन्येन तत्र तत्र रक्षणासम्भवात् ॥ २६ ॥ एवमसकृत् परमेश्वरेण रक्षा कृता। तादृशञ्च कुतोऽस्माकं भाग्यं येन सदा तेन सा कार्य्या, तस्मात्तदादिष्टनीतिशास्त्रानुसरणाच्चोत्पातस्थानमेतदाशु परित्यक्तुमेव युज्यत इत्याह यावदिति। औत्पातिक उत्पादजः, व्रजं सर्व्वमेव गोकुलम्, यद्वा, निजप्राणाधिकश्रीनन्दबालकाभिभवेन सर्व्वस्यापि व्रजस्याभिभवापत्तेस्तदपेक्षयैव व्रजमित्युक्तम्। बालानिति बालानामिति पूर्व्ववत्, यद्वा, गौरवेण बहुत्वम्,-श्रीकृष्णमित्यर्थः। सानुगाः पुत्रकलत्रमित्रभृत्यपुरोहितादिसहिताः ॥ २७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पक्षिणां पदं स्थानं विपद्रूपं वियदिति वा ॥ १०-१४ ॥ अयुंक्त प्रस्थानयोग्यान् कुरुत ॥ ११-१८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं स्थिते कदाचिद्गोपवृद्धाः पूतनाशकटादिकृतान् महोत्पातानुभूय समागम्य समेत्य व्रजकार्यं गोकुलस्य हितकृत्यममन्त्रयन्नालोचितवन्तः वृन्दावनं गन्तुमिच्छता श्रीकृष्णेन अन्तरात्मना प्रेरिताः अमन्त्रयन्निति भावः ॥ १० ॥ तत्रोपनन्दनामा कश्चिद्गोपः स च गोपानां मध्ये ज्ञानेन वयसा चाधिकः देशकालानुगुणकर्त्तव्यप्रयोजनाभिज्ञः रामकृष्णयोः प्रियकृत्तावन्नन्दादीनाह ॥ ११ ॥ उक्तमेवाह—उत्थातव्यमित्यादिना तच्छृत्वेत्यतः प्राक्तनेन। गोकुलस्य हितमिच्छद्भिरस्माभिरितो व्रजादुत्थातव्यं निर्गन्तव्यं प्रजानामत्रत्यानां नः नाशहेतवो बहवः उत्पाता आयान्त्यायास्यन्ति ॥ १२ ॥ अतीतास्त्वपरोक्षदृष्टा एवेत्याह—मुक्त इति। कथञ्चिद्दैववशान्मुक्तः तथा भगवदनुग्रहादनः शकटमपि बालस्योपरि नापतत् ॥ १३ ॥ तथा चक्रवातेन वीनां पक्षिणां पदं विहारस्थानं वियदाकाशं प्रत्ययं बालो दैत्येन नीतः वियदाकाशं ततो विपदमापदञ्च नीत इति वा सुरेश्वरैरस्मादिष्टदैवतैः परित्रातः ॥ १४ ॥ कुतः यद्यस्मादुभयोरर्जुनयोः पततोरन्तरं मध्यं प्राप्यासौ बालकोऽन्यतमो वापि कश्चिन्न मृतः तदप्यच्युतेनास्मादिष्टदैवतेनैव रक्षणमासीत् ॥ १५ ॥ यावदुत्पातप्रयुक्तोऽरिष्टोऽनर्थो व्रजं नाभिभवेत् न पीडयेत् तावदेव बालानादायान्यत्र यास्यामः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तत्र नन्दादिषु ॥ ११ ॥ इत उत्थातव्यम् ॥ १२ ॥ अनश्च शकटञ्च ॥ १३-१४ ॥ असौ कृष्णो बालकः कृष्णादन्यतमो बालको न म्रियेतेति यत् तदप्यच्युतरक्षणम् अन्यबालकस्य मरणाभावः ॥ १५ ॥ औत्पातिकः उत्पातसम्बन्धी अनर्थकरः इतो बृहद्वनात् तावत्ततः पूर्वमेव ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स्वाभाविकेन तत्प्रेम्णा प्रेरिता गोपपुङ्गवाः। हर्य्येकमङ्गलाहार्यं व्रजकार्यममन्त्रयन् ॥

इत्याह—गोपेति। व्रजकार्यं व्रजप्राणस्य श्रीकृष्णस्य हितानुसंन्धानात् प्रियकृदिति शीले क्विप् ॥ १०-११ ॥ बालानां व्रजानामिति पाठद्वयेऽपि समूहनिर्देशो व्रजेश्वरसङ्कोचतं एवाग्रे श्रीकृष्णैकनिष्ठत्वेनातीतभयोद्देशात् कथञ्चित्तेन निर्दिष्टं निर्द्धारयति हरेरिति ॥ १२-१३ ॥ सुरेश्वरैरच्युतप्रेरितैस्तत्पार्षदैस्तत्राप्यच्युतरक्षणमित्यपिशब्दात् ॥ १४-१५ ॥ व्रजं बालानिति पूर्ववत् श्रीकृष्णाभिप्रायेण ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

महावने विहृत्यैवं विजिहीर्षा यदाऽजनि। वृन्दावने हरेस्तर्ह्यौपनन्दी रराज गीः ॥

उपनन्दो नन्दराजस्य ज्येष्ठो मन्त्रीति प्राञ्चः ॥ ११ ॥ गोकुलस्य गोकुलवासिमात्रस्य ॥ १२-१३ ॥ चक्रवातेन तृणावर्त्तेन वियदाकाशं विपत्प्रापकत्वाद्विपदं सुरेश्वरैः सुरेश्वरेण विष्णुना बहुत्वं गौरवेण तत्रापीत्युत्तरवाक्येऽप्यधिकारात् ॥ १४ ॥ असौ कृष्णः ॥ १५ ॥ पूर्वमस्मिन्नगरे विष्णुकथाकीर्त्तनदर्शनपरिचर्यादिकं बहुतरमासीत् यावन्नन्दस्य बालको अयमभूत्ताव-

दास्थान्यादिषु सर्वत्रास्यैव कथाकीर्त्तनदर्शनादिकं प्रतिक्षणं भवत्यतस्तादृशं च कुतोऽस्माकं सम्प्रति तद्व्रजनं येन सदा विष्णुनैव रक्षा स्यादतस्तदादिष्टनीतिशास्त्रमेवानुसरणीयमित्याह—यावदिति ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

व्रजकार्यं व्रजस्थजनस्य हितकृत्यम् ॥ १० ॥ स रामकृष्णयोः प्रियकृत् अतस्ताभ्यामेव प्रेरित इति गम्यते ॥११-१२॥ विपदं विगतप्रतिष्ठं वीनां गृध्रादीनां पदं सञ्चारस्थानं वा वियदाकाशं नीतः ॥ १३ ॥ असौ कृष्णः अन्यतमो वा बालः न मृतस्तदप्यच्युतेन परमेश्वरेणैव रक्षणमासीत् ॥ १५ ॥ अरिष्टोऽनर्थो व्रजं नाभिभवेन्न पीडयेत्तावदितः बृहद्वनात् अन्यत्र यास्यामः ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एवं बृहद्वने क्रीडित्वा तदलञ्चकार अथ तृणावर्त्तवधावसरदृष्टशोभे वृन्दावने चिक्रीडिषुस्तदगमनहेतूपद्रवानुदस्थापयदित्याह गोपवृद्धा इति । महोत्पातान् वृकान् वत्सबालक्लेशकरानिति श्री हरिवंशाद्बोध्यम् ॥ २१ ॥ वृन्दावनगमनबुद्धिदानायोपनन्दं प्रैरयदित्याह तत्रोपनन्देति । व्रजराजस्य पर्जन्यस्योपनन्दाभिनन्द नन्द सन्नन्दनन्दनाभिधाना पञ्चपुत्रा बभूवुस्तेषूपनन्दः पित्रा स्वस्मै दीयमानं राज्यतिलकं मध्यमायापि नन्दाय महागुणाय सर्वैकमत्येन प्रादात्, स्वयञ्च तदमात्योऽस्थादिति ख्यातम् । देशादीनां त्रयाणामेकैकेषां मिलितानां वा यत्तत्त्वं स्वरूपमुत्तमत्वमध्यमत्वादि तज्ज्ञः ॥ २२ ॥ गोकुलस्य तद्वासिमात्रस्य ॥ २३ ॥ बालानधिकृत्यैव महोत्पातानुतापं सूचयन् कौतुकात्तत्रागतं कृष्णमङ्के कृत्वा सस्नेहं दृष्टान्तयति मुक्त इति त्रिभिः । कथञ्चिदिति केनाप्यप्रत्यक्षेणैव कारणेनेत्यर्थः । तत् स्फुटयति हरेरिति । अनः शकटम् ॥ २४ ॥ चक्रवातेन तृणावर्त्तेन वियदाकाशं वियत् प्रापकत्वाद् विपदं सुरेश्वरैः हरिणा बहुत्वं गौरवात् ॥ २५ ॥ सास्रं सगद्गदञ्चाह यन्न म्रियेतेति दुःखभवादश्लीलमपि प्रयुक्तं तच्च झटित्युत्थानायेति बोध्यम् । असौ कृष्णः यद्यपोषां नित्यपार्षदत्वात् कृष्णैश्वर्यबुद्धिर्विसतन्तुवदन्तरस्त्येव तथापि वात्सल्यप्रेम्णा तदन्तर्द्धानादनिष्टाशङ्का बलभद्रादीनामिव ज्ञाततदैश्वर्याणामप्यभ्युदेतीति बोध्यम् ॥ २६ ॥ तथैवाह यावदिति उत्पातिक उत्पातजः अरिष्टः अशुभवान् क्लेशः “अरिष्टे तु शुभाशुभे” इत्यमरः ॥ २७ ॥

श्रीसत्याभिनवयतिकृता दुर्घटभावदीपिका

॥ हरिः ॐ ॥ शकटान्युङ्ध्वमाचिरमित्यस्याचिरं शीघ्रं शकटानायुङ्ध्वमित्यर्थः । एतेन शीघ्रं शकटान्युङ्ध्वमिति वक्तव्यम् । अचिरं शकटान्युङ्ध्वमिति कथनमयुक्तमिति दूषणं परिहृतम् । युङ्ध्व आ अचिरमिति पदच्छेदमंगीकृत्य आ इत्यस्य युङ्ध्व इत्यनेनान्वयमंगीकृत्याचिरं शीघ्रं शकटानायुङ्ध्वमित्यर्थस्योक्तत्वात् ॥ १८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

समागम्य मिलित्वा व्रजकार्यं भविष्यत् ॥१०॥ ज्ञानं च वयश्च ताभ्यामधिकः । तज्ज्ञानमेव विवेचयति । देशकालार्थतत्त्वज्ञ इति । रामकृष्णयोः प्रियकृत् । एतेन श्रीकृष्ण एव स्थानान्तरं गन्तुं तानप्रेरयदिति ध्वन्यते ॥११॥ उत्थाने निमित्तमाह । प्रजानां नाशहेतवो महोत्पातास्ते चोत्पाता वृकाद्याः । यथोक्तं हरिवंशे । सन्त्रासयावो भद्रं ते किञ्चिदुत्पाद्य कारणमित्यारभ्य घोरांश्चिन्तयतस्तस्य स्वतनूरुहजास्तथा । विनिष्पेतुर्भयकराः सर्वशः शतशो वृकाः । ते वृकाः पञ्चबद्धाश्च दशबद्धास्तथापरे । निश्चेरुस्तस्य गात्रेभ्यः श्रीवत्सकृतलक्षणा इति गर्भीकृत्य व्रजो निष्पन्दचेष्टः स्म एकस्थानचरः कृत इत्यन्तेन । ते च स्थलान्तरगमनगमनसा श्रीकृष्णेन बहिराविर्भावितास्तदात्मका इति ज्ञेयम् । श्रीवत्सकृतलक्षणा इति तदसाधारणलक्षणोक्तेः । अत्रायान्तीत्यपरिचितस्थलं चेज्झटिति न घटेत तदनिष्टमिति भावः ॥ १२ ॥ अपिना बालकतां गर्हयामास । अनुग्रहात्त्रोपर्यनुग्रहं प्राप्य कथञ्चिदस्मदूहानास्पदतया कथञ्चित्केनाप्युपायेन बालघ्न्या राक्षस्या मुक्तोऽनः शकटश्च हरेरस्योपरि नापतन्नूनं निश्चयो बाह्यार्थस्तु लोकानुवृत्त्या ॥ १३ ॥ विपदाकाशे प्रत्युह्यद्धता । वचिस्वपीति सम्प्रसारणम् । लटः शता यत्प्रत्ययः कर्तरि छान्दसः । वियन्नीतः शिलायां पातितस्तत्रापि सुरेश्वरैर्देवस्त्रातो रक्षित इति बहिः सुरा हरेर्गुणाः प्रोक्ता इत्येकादशतात्पर्योक्तेस्तेषामीश्वरैः । भावः प्रधानः । सामर्थ्यविशेषैस्ते च त ईश्वराः स्वभेदेन तैरयमस्मच्छुभदैवं च निमित्तीकृत्येति शेषः । परित्रातः स्वगुणैरेव रक्षित इत्यन्तरर्थः ॥ १४ ॥ द्रुमयोरन्तरं मध्यं प्राप्यापि बालको यः कोऽपि चेन्म्रियेत न मृतः सुरेश्वरैर्हेतोरन्यतमोऽपि बालको न म्रियेतेति यत्तत्राप्यच्युतस्य रक्षणं कृतं तेनेत्यैतद्रक्षणमित्यर्थः ॥ १५ ॥ औत्पत्तिक उत्पातोत्पन्नोऽरिष्टोऽनर्थः । तत्रारिष्टं शुभाशुभे इति विश्वः । लिङ्गमाशिष्यतयाऽरिष्ट इत्युक्तम् । अरिष्टमस्यास्तीत्यरिष्टः । औत्पत्तिकः कश्चनानर्थ इति शेष इति वा । यावद्वनं नाभिभवेन्न तत्स्थं जनं पराभावयेत्तावन्मध्ये बालानुपादायेतोऽस्माद्देशाद्यास्यामः । आलस्येन न भाव्यं न स्थेयं चैकेनाप्यसमदीयेनेत्याह ॥ अद्यैव सानुगा इति । तत्स्थलं सम्यग्वासम्यग्वाऽऽलायो मिलत वैको गत्वा विचार्यायायात्वत उत्तरं याम इति नेति स्वस्थितिमाहुः । वयं सानुगाः स्वान्वित्युपलक्षणम् । सानुगिरिदर्योदिवासिनां न गृहादिकृत्यमत इदानीमेव यास्याम इति भावः ॥ १६ ॥

श्रीसुबोधिनी

एवं बृहद्वनक्रीडामुक्त्वा सर्वदेवाधिष्ठितवृन्दावने क्रीडां वक्तुं भगवत्प्रेरितानां तेषां निर्गमनार्थं मन्त्रमाह,

उद्यमो मुख्यसम्पत्तिर्मन्त्रो हेतुस्त्रिभिस्ततः । निर्धारितपरित्यागः स्थानान्तरगुणास्ततः ॥ १ ॥
कृष्णाज्ञयेति कालस्य नापेक्षातोनिवारणम् । पञ्चभिर्गमनं चैव रतिस्तत्र हरेः परा ॥ २ ॥
एवं कलाभिर्भगवान् पूर्णो वृन्दावने बभौ ॥ २½ ॥

प्रथमं मन्त्रार्थमुद्यममाह **गोपवृद्धा** इति, गोपेषु ये वृद्धाः पूर्वापरानुसन्धानसहिताः, **बृहद्वनमन्वर्थनाम**, पूर्वं कदाचिदपि तत्रोत्पत्त्यभाव उत्पातानामिदानीं तु **महोत्पाताः** पूतनामरणादयः, **नन्दोपि** वृद्धप्रायः प्रधानव्यतिरेकेण विचारो न निर्वहतीति **समागम्य सम्यगेकत्रोपविश्य**, **व्रजसम्बन्ध्यवश्यकर्तव्यममन्त्रयन्** ॥ १० ॥ सर्वेषां वक्तृत्वं न सम्भवतीति प्रधानं व्यपदिशति **तत्रेति**, **उपनन्दनामा** नन्दसम्बन्धी **गोप** इति धर्मप्रधानः, **ज्ञानवयोभ्यां** च परिणतः, **देशकालार्थानामपि** कस्मिन् देशे कस्मिन् काले कोर्थः कर्तव्य इति तत्त्वज्ञः, तादृशोप्यभक्तश्चेत् सर्वं व्यर्थं स्यादिति **रामकृष्णयोः प्रियकृदाहेति** सम्बन्धः, **नाम्ना** नन्दस्य स एव मन्त्रद इति ज्ञापितं, **गोप** इति तन्मध्यपाती तुल्येष्टानिष्टः, तादृश एव मन्त्रार्हः, **ज्ञानं** तु वयसा प्रतिष्ठितं भवतीत्युभयाधिक्यं, इदं मन्त्रे मुख्यमङ्गं, लोकानभिज्ञो न शास्त्रार्थज्ञानमात्रान् मन्त्री भवतीति देशादिज्ञानमुक्तं, इदं गमनं स्वार्थं चेन् निरोधेन विरुध्यत इति भगवत्प्रीतिरुक्ता प्राधान्यप्रतिपत्त्यर्थं, द्वयोर्निर्देशः साधारणनिरोधत्वात्, असाधारणनिरोधो भगवतैव क्रियते साधारणस्तूभाभ्यामिति ॥ ११ ॥ मन्त्रमाह **उत्थातव्यमिति**, इदं स्थानं परित्यक्तव्यं, परितो यद्यपि व्रजाः सन्ति ते तिष्ठन्तु मा वा, अस्माभिस्तूत्थातव्यं, ननु कर्माधीनत्वाज् जगतः सर्वत्रैव यद् भाव्यं तद् भविष्यतीति किं गमनेनेति चेत् तत्राह **गोकुलस्य हितैषिभिरिति**, **गोकुलस्य** ये **हितं** वाञ्छन्ति कालकर्मपक्षौ परित्यज्य लौकिकन्यायेन ये हितचिन्तकास्तैरवश्यमेतत् कर्तव्यं, यत् साधनानि भगवता दत्तानि ज्ञानकरणादीनि तान्यथा व्यर्थानि स्युः, अतो विरोध एव तयोर्भिन्नं प्रामाण्यं, यावन्न विरोधस्तावत् करणानामेव मुख्यं प्रामाण्यं, उत्थाने हेतुमाह **आयान्त्यत्र महोत्पाता** इति ।

अलौकिकोनिष्टहेतुरुत्पातः सर्वनाशकः । महोत्पातो बुधैर्ज्ञेयो यत्र तत्त्यागमर्हति ॥ १ ॥

महोत्पाताः पूतनादयः, तेषां सोढव्यतां निराकरोति **प्रजानां नाशहेतव** इति, हेतौ कार्यमावश्यकं, महतां देवाद्युपासकानामनिष्टाभावेपि प्रजोपद्रवोपि वारणीयस्तैः, "प्रक्षालनाद्धि पङ्कस्ये"तिन्यायेन प्रतीकारापेक्षया त्यागः श्रेष्ठः ॥ १२ ॥ उत्पातानेव गणयन्ति तामसराजससात्त्विकान्, उत्पाताः प्रतीकारसहिता उच्यन्ते, अन्यथा तन्निवृत्तिरेव न स्यादुत्पातत्वं वा, अत एव **राक्षस्या पूतनयासावेव बालको मुक्तः**, दृष्टहेतुपरिज्ञानाभावात् **कथञ्चिदि**त्यदृष्टं साधनं कल्पितं, कार्यस्य कारणावश्यकत्वात्, **राक्षस्या बालघ्न्येति** जातिक्रियादोषौ, **मुक्तत्वं** निःसन्दिग्धमित्य**सावि**ति प्रदर्शितः, अलौकिकमुपायमाह **हरेरनुग्रहादिति**, एतदेव हेतुद्वयं शकटभङ्गेप्याकर्षत्यनश्चोपरि **नापतदिति** चकारेण, **नूनमिति** स्वदर्शनात् ॥ १३ ॥ तृणावर्तं लौकिकानि बहूनि साधनान्याह **चक्रवातेनेति**, **चक्रवातः** प्रसिद्धस्तृणावर्तः कंसभृत्य इति, अतो **दैत्य** इत्युक्तं, **वियदाकाशं नीतः**, तदपि नाल्पदूरं किन्तु **विपदं**, यावद्दूरे श्येनादयः परिभ्रमन्ति, वयः पक्षिणस्तेषां **पद**मिति, यद् **वियत्** नीतवांस्तद् **विपदमेव** नीतवानिति वा, सरस्वती तु तस्यायमेव **विपद्रूपः**, **विपद्** व्ययं प्राप्नुवद् यथा भवति तथा प्रतिक्षणं क्षीयमाणेन नीतः, तत्रोभयोर्गतयोर्मध्य एकः **शिलायां पतितस्तत्रैव** प्रदेशे पर उपर्येव **सुरेश्वरैः परित्रातः**, न देवमात्रकृत्यं तादृशं, रुद्रास्तु घातुकाः, तदुपमर्दस्तु सुरेश्वरैरेव कर्तुं शक्यः, रुद्राधिपतिः पुनस्तेषामनुकूल इति बहवोत्र पुनस्तादृशा रक्षका उक्ता "बहूनामनुग्रहो न्याय्य" इति, **परित्राणं** न केनाप्यंशेन बाधाभावार्थम् ॥ १४ ॥ प्रस्तुतमाह **यन्नेति**, **अनयोर्द्रुमयोरन्तरं प्राप्य** बहवो **बाला** अत्र स्थिताः कोपि नोपद्रुतः, **असौ भगवानच्युतः**, **अन्यो** वा कश्चिद् भगवान् देवैः सर्वदा रक्षत इत्यन्यस्य नामग्रहणं, तमप्प्रत्ययेन हीनोपि कश्चिन्नोपद्रुत इत्यमङ्गलशब्दोच्चारणं स्नेहात्, प्राकृतानां सहजं प्राकृतत्वमन्यथा न परिज्ञायेत, येषां वाङ्मनसोरव्यवस्था तेत्यन्तंप्राकृता येषां मनसोपि नाव्यवस्था तेत्यन्तं सन्तः, अत्राच्युतो भगवानेव रक्षकः, स हि सर्वत्र च्युतिरहितोन्तर्यामी ततो बालकानुत्पातस्थानादन्यत्र नीतवान् ॥ १५ ॥ अतो भगवतो वारत्रयं देवानां च रक्षणं जातमित्यतः परं य उत्पातः समायास्यति तस्य न प्रतीकार इति ततः पूर्वमेव गमनमुचितमित्याह **यावदिति**, **उत्पातेन** जातो**रिष्टो** मरणादिरूप इति **यावद् व्रजं नाभिभवेत् तावदितो बालानादाय सानुगाः** सपरिकरा **अन्यत्रैव यास्यामः**, निर्धारितमेतद् वचनं, **बालानां** कर्मता, **उत्पातास्तत्सम्बन्धिन एव दृष्टा इति**, स्थलान्तरमन्विष्यास्य परित्याग उचित इति ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गोपवृद्धा इत्यस्याभासे, **सर्वदेवाधिष्ठितेति** । आधिदैविका इन्द्रादयोन्तरङ्गसेवका भूत्वा तत्तल्लीलोपयोगिस्थानं सज्जीकृत्य प्रभुं प्रतीक्षन्त इति तथात्वम् ॥११॥ **मुक्तः कथञ्चिदि**त्यस्याभासे, **उत्पातत्वं चेति** । न स्यादिति शेषः । प्रतिकारवत एवोत्पातशब्दवाच्यत्वादिति भावः ॥ १३ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

गोपवृद्धा इत्यत्र सुबोधिन्यां **निर्धारितपरित्याग** इति निर्धारितश्चासौ परित्यागश्चेतिकर्मधारयः, नपुंसकलिङ्गपाठे तु वाक्यमितिशेषः सप्तम्यर्थे बहुव्रीहिश्च, **कृष्णाज्ञये**त्याद्यन्तर्यामिप्रेरणरूपया **कृष्णाज्ञया**, इत्येतत् सर्वमतः **कालस्य** मुहूर्तादिरूपस्य **नापेक्षा अनिवारणं** मन्त्रमध्यस्थैः कैरपि तस्य मन्त्रस्य न **निवारणं**, यद्वा यत इदमुक्तहेतोरतोपेक्षातोसौकर्याद्यपेक्ष्य **कालस्यानिवारणं**, कालं नातिक्रान्तवन्त इत्यर्थः ॥ १० ॥ **तत्रे**त्यत्र **प्राधान्यप्रतिपत्त्यर्थ**मिति, गोपानां निरोधे **रामस्यापि** प्राधान्यज्ञापनार्थं, तत्र हेतुः **साधारणनिरोधत्वा**दिति गोपानां यो निरोधस्तस्य **साधारणनिरोधत्वा**दित्यर्थः, तस्य लक्षणमाहुः **साधारणस्त्विति** ॥ ११ ॥ **उत्थातव्य**मित्यत्र कालकर्मपक्षपरित्यागे हेतुमाहुर्**यदि**त्यादि, तर्हि पक्षद्वये कथं व्यवस्थेत्यत आहुर्**त** इत्यादि, **तयोर्यद्** भविष्यपक्षप्रतिकरणपक्षयोर्विरोध एवाधिकारिभेदकालभेदभिन्नं प्रामाण्यं विरोधाभावे तूक्तैव व्यवस्थेत्यर्थः, **तत्त्यागमर्हतीति तत्** स्थानं **त्याज्य**मित्यर्थः, **तैरि**ति महद्भिः ॥ १२ ॥ **मुक्त** इत्यत्राभासे प्रतीकारसहितोत्पातकथनप्रयोजनमाहुरन्यथेत्यादि, यदि प्रतीकारो न स्यात् तदा तन्निवृत्तिरेव न स्यात्, **उत्पातत्वं** चेति तट्टिप्पण्यां व्याकुर्वन्ति न **स्यादितिशेष** इत्यनेन तथा च तस्य नियतत्वे प्रलयत्वमेव स्यान् **नोत्पातत्व**मित्यर्थः ॥ १३ ॥ **चक्रवातेने**त्यत्रा**यमेव विपद्रूप** इत्यत्र अमित्यनुस्वारो व्याख्यातस्तिष्ठति स च अं परं ब्रह्मेत्येकाक्षरकोशादकारोकारमकारलुप्तमकारबिन्दुनादेतिषोढाप्रणवमात्राविभागे बिन्द्वर्थोक्तत्वाच्च परब्रह्मवाचको ज्ञेयः, **सुरेश्वरपदतात्पर्य**माहुर्**न देवे**त्यादि, तथा च **सुरेश्वरपदेन** भगवद्भक्तास्ते बोध्या, **अनुकूल** इति नीललोहितत्वेन भक्तत्वात् ॥ १४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गोपवृद्धा इत्यत्र **पूर्व**मिति बृहद् ब्रह्मरूपं वनमतस्तत्र नोत्पात इत्यर्थः ॥ १० ॥ **तत्रे**त्यत्र **असाधारणनिरोध** इति नन्दगोपसुतमात्रविषयकः सर्वात्मभाववतीष्वन्तरङ्गलीलाजनित इत्यर्थः, **साधारण** इति सर्वभक्तसाधारण इत्यर्थः ॥ ११ ॥ **उत्थातव्य**मित्यत्र **विरोधे** एवेति प्रामाण्यमादरणीयमित्यर्थः ॥ १२ ॥ **मुक्तः कथञ्चि**दित्यत्र **अत** एवेति उत्पातत्वेन प्रतीकारसहितत्वादेवेत्यर्थः ॥ १३ ॥ **चक्रवातेने**त्यत्र **सरस्वती**तिपक्षे **विपद**मित्यत्र व्यत्ययेन प्रथमार्थे द्वितीया, **विप**दित्यत्र तृतीयाया लुक् ॥ १४ ॥ **यन्** नेत्यत्र **प्राकृताना**मिति मूढानामित्यर्थः ॥ १५ ॥ **भगवत** इति एकवारमच्युतस्य **भगवतो वारत्रयं देवानामेवं** वारचतुष्टयमित्यर्थः ॥ १६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गोपवृद्धा इत्यारभ्य "राममाधवयोर्नृपे" त्यन्तं षोडशश्लोकानां सङ्ख्यातात्पर्यमाहुः **एवं कलाभिर्भगवान्** पूर्णो **वृन्दावने बभावि**त्यनेन, षोडशकलायुक्तो **भगवान् पूर्णः श्रीवृन्दावने** बभौ, श्रीवृन्दावनचन्द्रनामा सर्वोत्कर्षेण शोभते इतिफलितम् ॥ १० ॥ **प्रियकृद्रामकृष्णयो**रित्यस्य विवृतौ **प्राधान्यप्रतिपत्त्यर्थ**मित्यादि मन्त्रोपदेष्टुरुपनन्दस्य **प्राधान्यप्रतिपत्त्यर्थं** मुख्यत्वसिद्ध्यर्थमित्यर्थः, **द्वयो**रिति रामकृष्णयोरित्यर्थः, यद्यपि श्रीकृष्ण एव नन्दपुत्रस्तथापि वृद्धाः स्वसम्बन्धिनं स्वसुहृत्सम्बन्धिनं च तुल्यतया गणयन्तीति वसुदेवपुत्रो रामो नन्दपुत्रः श्रीकृष्णश्च साम्येन व्यवह्रियत इति रामकृष्णयोः प्रियकृदित्युक्तं, तथा च उपनन्दे प्राधान्यं वृद्धत्वं सिद्धमित्यर्थः ॥ ११ ॥ **गोकुलस्य हितैषिभि**रित्यत्र **अतो विरोध एव तयो**रिति यत्र साधने कृतेपि विरुद्धं फलमुत्पद्यते तत्रैव **तयोः** कालकर्मणोर्भिन्नं **प्रामाण्यं** कालेनान्यथाकृतं कर्मणान्यथाकृतमित्युद्घोषदर्शनात्, अत्र तु साधनानामेव मुख्यत्वमिति **गोकुलस्य हितैषिभिः** कालकर्मविचारमकृत्वा लौकिकन्यायेनैवोपायकरणे बृहद्वनादुत्थातव्यमिति मन्त्रदातुर्हार्दम् ॥ १२ ॥ **यावदौत्पातिकोरिष्ट** इत्यत्र **बालानां कर्मते**ति "तावद् बालानुपादाये"त्युपादान**कर्मता बालाना**मित्यर्थः, यद्यपि सर्वपदार्थानामुपादानकर्मता तथापि बालानां मुख्यत्वमिति तथा ॥ १६ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

गोपवृद्धा इत्यादीनां षोडशश्लोकानां क्रमेण वाक्यार्थानाहु**रुद्यम** इत्यादि का० १११$\frac{३}{४}$ । आद्येन गमनोद्यमः, "तत्रोपनन्दनामाहे"त्यत्र मुख्यमन्त्राङ्ग**सम्पत्तिः**, मन्त्रस्य मुख्यमङ्गं मन्त्री स चोपनन्दः, "उत्थातव्यमितोस्माभि"रित्यनेन **मन्त्रः ततस्त्रिभिर्हेतुः**, "यावदौत्पातिकोरिष्ट" इत्यनेन निर्धारितश्चासौ परित्यागश्चेति **निर्धातिपरित्यागः**, "वनं वृन्दावनं नाम पशव्य"मित्यनेन **स्थानान्तरगुणाः**, "तत् तत्राद्यैव यास्याम" इति नवमश्लोकार्थमाहुः **कृष्णाज्ञये**त्यादि का० ११२$\frac{३}{४}$ । कृष्णाज्ञयैव वृन्दावनगमनमित्यद्येतिपदेन सुमुहूर्ताद्यपेक्षाभावज्ञापकेन कालापेक्षाया निवारणमित्यर्थः, **पञ्चभि**रिति "तच्छ्रुत्वैकधिय" इत्यादिभिः **पञ्चभिर्गमनं**, ततः "वृन्दावनं सम्प्रविश्ये"त्येकेन तत्र वासः, स च गमनं चैवेति चकारेण सूचित इति प्रतिभाति, "वृन्दावनं गोवर्धन"मिति षोडशश्लोकेन तत्र वृन्दावने हरेः परा रतिः, एवमिति का० ११३$\frac{१}{४}$ । एवं षोडशकलाभिः पूर्णो **भगवान् वृन्दावने बभाविति** सङ्ख्यातात्पर्यम् । **आयान्त्यत्र महोत्पाता** इत्यत्र महोत्पातलक्षणमाहु**रलौकिक** इति का० ११४$\frac{१}{४}$ । **यत्र** यस्मिन् महोत्पाते सति **तन्** महोत्पाताधिकरणीभूतं स्थानं त्यागयोग्यं भवतीत्यर्थः ॥ ११४$\frac{३}{४}$ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं बृहद्वने विहृत्येतोऽग्रे विहारार्थं वृन्दावनं गन्तुमिच्छताऽन्तर्यामिणा कृष्णेन प्रेरितानां गोपानां सम्मन्त्रणमाह—गोपवृद्धा इति। नन्दादयो गोपवृद्धा बृहद्वने महोत्पातान् पूतनागमनादीननुभूय समागम्य एकत्र मिलित्वा व्रजकार्यं व्रजस्य हितममन्त्रयन् विचारितवन्तः ॥२१॥ तत्र तेषु मिलितगोपेषु मध्ये उपनन्दनामा गोप आह—तत्र "बहूनां परिभाषणे कोलाहलेन तत्त्वनिर्धारो न स्यात्, अत एकेन मुख्येन वक्तव्यम्" इति तस्य मुख्यतां सूचयन् गुणानाह—उपनन्देति। 'नाम्ना नन्दस्य प्रेमास्पदं मुख्यो मन्त्री' इति ज्ञापितम्। 'गोप' इत्यनेन तन्मध्यपातित्वेन तुल्येष्टानिष्टश्च ज्ञानेन वयसा चाधिकः। तत्र ज्ञानाधिक्यं स्पष्टयति—देशेति। यस्मिन् देशे यस्मिन् काले योऽर्थः प्रयोजनं यथा सिद्ध्यति तस्य तत्त्वं निदानं जानातीति तथा। 'एवंभूतोऽपि यदि भगवति भक्तिमान्न स्यात् तदा सर्वं व्यर्थम्' अत आह—प्रियकृद्रामकृष्णयोरिति ॥ २२ ॥ तद्वाक्यान्येवाह–उत्थातव्यमित्यादिसप्तभिः। इतस्थानात्तु अस्माभिरुत्थातव्यम्, अन्यत्र गन्तव्यमित्यर्थः। तत्र हेतुमाह—आयान्तीति। बालानाम् 'प्रजानाम्' इति पाठान्तरम्, नाशहेतवो महोत्पाता यतोऽत्रायान्ति। 'अस्माकमेतदुपेक्षा च न युक्ता' इत्याशयेनाह—गोकुलस्य हितैषिभिरिति ॥२३॥ उत्पातानेव दर्शयति—मुक्त इति। राक्षस्या पूतनयाऽसौ बालकः कृष्णः कथंचित् साक्षात्कारणस्यादर्शनात् केनाप्यनिर्वचनीयेनैव कारणेन मुक्तः। 'असौ' इत्यनेन स्वयं तत्रागतमङ्के स्थितं प्रदर्शयति। राक्षस्यादिपदत्रयेण गोपैस्तस्या अप्रतीकारत्वं सूचयति। सर्वानुभवसिद्धत्वं सूचयति—हीति। नूनमिति निश्चयेन हरेरनुग्रहादेवास्योपरि अनः शकटश्च नापतत् ॥ २४ ॥ चक्रवातस्वरूपेण दैत्येन तृणावर्तेन वीनां पक्षिणां पदं विहारस्थानं विगतप्रतिष्ठं वेति विपदं वियत् आकाशं प्रति नीतोऽसौ बालकः शिलायां पतितः, तत्रापि सुरेश्वरैरस्मत्संराधितैर्देवैरेव परित्रातः संरक्षितः ॥ २५ ॥ द्रुमयोरन्तरं प्राप्यासौ कृष्णोऽन्यतमो वापि कश्चिद्बालको यन्न म्रियेत न मृतस्तदप्यच्युतेनैव रक्षणमासीत् ॥ २६ ॥ एवमुत्पातबहुत्वस्य जातत्वादग्रेऽपि सम्भवाच्च यावदौत्पातिकः उत्पातजनितः अरिष्टः बालविनाशाद्यनर्थः व्रजं नाभिभवेन्न स्पृशेत् तावत् ततः पूर्वमेव बालानुपादाय गृहीत्वा सानुगा गोधनभृत्यादिसहिता वयमितः स्थानादन्यत्र यास्याम इत्यन्वयः ॥ २७ ॥

अन्वितार्थप्रकाशिका

गोपवृद्धा इति ॥ नन्दादयो गोपवृद्धाः बृहद्वने महोत्पातान् पूतनागमनादीननुभूय समागम्य एकत्र मिलित्वा व्रजकार्यं व्रजस्य हितममन्त्रयन् विचारितवन्तः ॥ २० ॥ तत्रेति ॥ तत्र तेषु मिलितेषु मध्ये ज्ञानेन वयसा चाधिकः। देशेति। यस्मिन्देशे यस्मिन् काले च योऽर्थः प्रयोजनं यथा सिद्ध्यति तस्य तत्त्वं निदानं जानातीति तथा रामकृष्णयोश्च प्रियकृत् उपनन्दनामा गोप आह स्म। अयं च नन्दस्य ज्येष्ठो भ्राता मुख्यो मन्त्री च। अनेनैव कनिष्ठायापि नन्दाय राज्यं दत्तमिति प्राहुः ॥ २१ ॥ उत्थातव्यमिति ॥ गोकुलस्य हितैषिभिरस्माभिः इतः स्थानात् उत्थातव्यम् अन्यत्र गन्तव्यम्। यतोऽत्र बालानां नाशहेतवः महोत्पाताः आयान्ति ॥ २२ ॥ मुक्त इति ॥ बालघ्न्या राक्षस्या पूतनायाः असौ बालकः कृष्णः कथञ्चित्साक्षात्कारणस्यादर्शनात्केनाप्यनिर्वचनीयेनैव कारणेन मुक्तः। नूनं हि निश्चयेन हरेरनुग्रहादेवास्योपरि अनः शकटं च नापतत् ॥ २३ ॥ चक्रवातेनेति ॥ चक्रवातस्वरूपेण दैत्येन तृणावर्तेन वीनां पक्षिणां पदं विहारस्थानं विगतप्रतिष्ठं वेति विपदं वियत् आकाशं प्रति नीतोऽसौ बालकः शिलायां पतितस्तत्रापि सुरेश्वरैरस्मत्संराधितैर्देवैरेव परित्रातः संरक्षितः ॥ २४ ॥ यन्नेति ॥ द्रुमयोरन्तरं प्राप्याप्यसौ कृष्णोऽन्यतमो वापि कश्चिद्बालको यन्न म्रियेत न मृतस्तदप्यच्युतेनैव रक्षणमासीत् ॥ २५ ॥ यावदिति ॥ यावत् औत्पातिकः उत्पातजनितः अरिष्टः अरिष्टकारी बालविनाशाद्यनर्थः व्रजं नाभिभवेन्न स्पृशेत् तावत् ततः पूर्वमेव बालानुपादाय गृहीत्वा सानुगा गोधनभृत्यादिसहिता वयमितः स्थानादन्यत्र यास्यामः ॥ २६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इतोन्यत्र गंतुमुत्थातव्यम् ॥ २० ॥ अन्यः शकटं च ॥ २१ ॥ वीनां पतत्त्रिणां पदं रमणस्थानं वियत् गगनं प्रति चक्रवातेन तृणावर्त्तेन ॥ २२ ॥ असौ कृष्णः वा अन्यतमोऽन्यो बालकः यन्न म्रियेत तदप्यच्युतेन रक्षणं कृतम् ॥ २३ ॥ औत्पातिकः उत्पातरूपोऽरिष्टः अनर्थः दुःखमिति यावत् तावदितः स्थलात् ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गोपवृद्धा इति ॥ एवं स्थिते कदाचिदिति शेषः। नन्दादयः गोपवृद्धाः, बृहद्वने महति वने, महोत्पातान् पूतनाशकटादिकृतान्महत उत्पातान्, अनुभूय, समागम्य समेत्य, व्रजकार्यं गोकुलस्य हितकृत्यं, अमन्त्रयन्नालोचितवन्तः। वृन्दावनं गन्तुमिच्छता श्रीकृष्णेनान्तरात्मना प्रेरिताः सन्तोऽमन्त्रयन्निति भावः ॥ २० ॥ तत्रेति ॥ तत्र उपनन्दनामा गोपः कश्चिद्गोपालः, ज्ञानं च वयश्च ताभ्यामधिकः श्रेष्ठः, देशकालार्थतत्त्वज्ञः, रामकृष्णयोः प्रियकृत् सन्, आह नन्दादीन् प्रति कथयामास ॥ २१ ॥ तदुक्तिमेवाह उत्थातव्यमित्यादिना तच्छ्रुत्वेत्यतः प्राक्तनेन ग्रन्थेन ॥ उत्थातव्यमिति ॥ गोकुलस्य हितैषिभिरारोग्यमिच्छद्भिः,

अस्माभिः, इतो व्रजात्, उत्थातव्यं निर्गन्तव्यम्। प्रजानां अत्रत्यानां जनानां नः, नाशहेतवः, महोत्पाता बह्वोऽतिशयिता उत्पाताः, अत्र आयान्ति॥ २२॥ तत्रातीतास्त्वपरोक्षमेव दृष्टा इत्याह॥ मुक्त इति॥ असौ बालकः, बालघ्न्याः राक्षस्याः सकाशात्, कथंचिद्दैववशात्, मुक्तः हि। तथा, हरेर्भगवतः, अनुग्रहात्, अनः शकटमपि, चोऽप्यर्थे। उपरि, न अपतत् नूनम्॥ २३॥ चक्रवातेनेति॥ अयं बालकः चक्रवातेन चक्राकारसंवातमारुतरूपधरेण दैत्येन, वीनां पक्षिणां पदं विहारस्थानं; वियदाकाशं प्रति नीतः। वियदाकाशं विपदमापदं च नीत इति वा शिलायां पतितः। तत्र सुरेश्वरैरस्मदिष्टदैवतैः, परित्रातः॥२४॥ यदिति॥ द्रुमयोरर्जुनतर्वोः, अन्तरं प्राप्य, असौ बालकः, न म्रियेत। अन्यतमो वा बालकोऽपि न म्रियेत, यत् तदपि, अच्युतरक्षणमच्युताख्यास्मद्दैवतेनैव रक्षणमासीत्॥ २५॥ यावदिति॥ यावत्, औत्पातिक उत्पातप्रयुक्तः, अरिष्टोऽनर्थः, व्रजं न अभिभवेत्। तावत् बालान् उपादाय, इतोऽस्मात् स्थानात्, अन्यत्र सानुगाः यास्यामः॥ २६॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गोपवृद्धा इति : १०.११.२१.

बृहद्वने सन्ति नोत्पाताः कति भीतिदाः। रक्षिताः तत्र तत्रास्ति श्रीश इत्यभवत् स्फुटम्॥ २६॥
गोकुलसङ्गादर्जुनपतनमभूत् तत्र का परस्य कथा। तस्मादस्य न सङ्गः समुचित इति युक्तमवददुपनन्दः॥ २७॥

कर्ता जीवस्तस्य तत्कर्मसाक्षी द्वावप्येतौ गोकुलाधिष्ठितौ स्तः।
युक्तं तादृङ् नन्दमूचे तदाऽसौ यत्तस्याग्रे रोचते चेदियं गीः॥ २८॥

कृष्णप्रिया

जब महावन गोकुलमें नन्दादि बड़े-बड़े गोपों ने कोई न कोई उपद्रव होते देखा तब इकट्ठे होकर आपस में मंत्रणा करने लगे कि व्रजवासियों और गौओं का हित हो इस लिये क्या करना चाहिये॥ १०॥ उन गोपों में से एक बुजुर्ग श्री उपनन्दजी नाम के गोप थे जो सब में अवस्था में बड़े थे ही एवं ज्ञान में भी बड़े थे वे अच्छी तरह जानते थे किस समय किस स्थान पर किस वस्तु से कैसे काम किया जाय, और नन्दलाल दाऊ दयाल कुशल रहें उन पर कोई विपत्ति न आने पावे यह भी चाहते थे वे कहने लगे॥ ११॥ श्री उपनन्दजी ने कहा—देखो भाईयो! यदि हम गोकुल का और गौओं का हित चाहते हैं तो हमें यहां से अपना डेरा डंडा उठाकर दूसरी जगह चलना चाहिये। यहाँ तो बच्चों पर सङ्कट डालने वाले एक से एक बढ़कर उत्पात हो रहे हैं॥ १२॥ सुनो भैया, यह नन्द बाबा के लालन सबसे प्रथम तो बाल हत्यारी राक्षसी पूतना से किसी प्रकार बच पाया इतने में तो गाड़ी के नीचे दबने की नौबत बजी परंतु बच गया, सच पूछो तो बिना सन्देह यह भगवान की ही कृपा थी कि गाड़ी लालन के उपर न गिर पड़ी॥ १३॥ सुनो भैया, बवंडर के रूप में तृणावर्त दैत्य तो अपने लालन को आकाश में पक्षियों के विहार देश में ले भागा और भारी विपत्ति में डाल दिया, किन्तु वहाँ से जब लालन चट्टान पर गिरे तब हमारे दयालु देवों ने ही बालक का रक्षण किया॥ १४॥ सुनो री भैया! यमलार्जुन वृक्षों के गिरने पर दोनों के बीच में आने पर भी यह बालक अथवा तो और कोई दूसरा भी बालक बचा रह गया वह भी अच्युत भगवान की ही रक्षा थी इसके सिवाय और कौन बचा सकता है॥ १५॥ इसलिये और किसी प्रकार के उत्पात से व्रज का और कोई अनिष्ट न होने पावे उसके पहले ही बच्चों को लेकर साथियों समेत यहाँ से चल देना चाहिये॥ १६॥

वनं वृन्दावनं नाम पशव्यं नवकाननम्। गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधम्॥ १७॥
तत्तत्राद्यैव[1] यास्यामः शकटान् [2]युङ्क्त मा चिरम्। गोधनान्यग्रतो यान्तु भवतां यदि रोचते॥ १८॥
[3]तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः। [4]व्रजान् स्वान् स्वान् समायुज्य ययू रूढपरिच्छदाः॥ १९॥
वृद्धान् बालान् स्त्रियो राजन् सर्वोपकरणानि च। अनस्स्वारोप्य गोपाला यत्ता आत्तशरासनाः॥ २०॥
गोधनानि पुरस्कृत्य शृङ्गाण्यापूर्य सर्वतः। तूर्यघोषेण महता ययुः [5]सहपुरोहिताः॥ २१॥
गोप्यो रूढरथा [6]नूत्नकुचकुङ्कुमकान्तयः। [7]कृष्णलीलां जगुः प्रीता [8]निष्ककण्ठ्यः सुवाससः॥ २२॥
तथा यशोदारोहिण्यावेकं शकटमास्थिते। रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके[9]॥ २३॥
वृन्दावनं सम्प्रविश्य सर्वकालसुखावहम्। तत्र चक्रुर्व्रजावासं शकटैरर्धचन्द्रवत्॥ २४॥

---

१. द्यैव–विज.। २. न्युङ्ध्व–विज.। ३. श्री शुकः–च. पु. टी.। ४. स्थान् स्वान्–विज.। ५. सह परिच्छदाः–वीर.। ६. नृत्यत्कुच–विज.। ७. कृष्णलीला–श्रीधर. वंशी.; कृष्णलीलां–वीर. विज.। ८. स्निग्धकण्ठयः–विज.। ९. श्रवणोत्सवे–वीर.।

कर्दमक्षमा

अन्वयः—पशव्यं नवकाननं वृन्दावनं नाम वनं पुण्याद्रितृणवीरुधं गोपगोपीगवां सेव्यं तत् भवतां यदि रोचते तत् तत्र अद्यैव यास्यामः शकटान् युङ्क्त मा चिरं, अग्रतः गोधनानि यान्तु ॥१७–१८॥ तत् श्रुत्वा साधु साधु इति वादिनः एकधियः गोपाः स्वान् स्वान् व्रजान् समायुज्य रूढपरिच्छदाः ययुः ॥ १९ ॥ राजन्! आत्तशरासनाः यत्ताः गोपालाः वृद्धान् बालान् स्त्रियः च सर्वोपकरणानि अनस्सु आरोप्य गोधनानि पुरस्कृत्य सर्वतः शृङ्गाणि आपूर्य सहपुरोहिताः महता तूर्यघोषेण ययुः ॥ १९ ॥ नूत्नकुचकुङ्कुमकान्तयः निष्ककण्ठ्यः सुवाससः प्रीताः रूढस्थाः गोप्यः कृष्णलीलां जगुः ॥ २०–२१ ॥ तथा तत् कथाश्रवणोत्सुके यशोदारोहिण्यौ कृष्णरामाभ्यां एकं शकटं आस्थिते रेजतुः ॥२२–२३॥ सर्वकालसुखावहं वृन्दावनं प्रविश्य तत्र शकटैः अर्धचन्द्रवत् व्रजावासं चक्रुः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पशव्यं पशुभ्यो हितम्। यतः नवानि काननान्यवांतराणि विद्यंते यस्मिंस्तत् ॥ २८–२९ ॥ एकधियो विप्रतिपत्तिरहिताः। व्रजाञ्छकटयूथान्। रूढाः शकटादिष्वारोपिताः परिच्छदा यैस्ते ॥ ३० ॥ यत्ताः कृतप्रयत्नाः ॥३१–३२॥ नूत्नैर्नवीनैः कुचगतैः कुंकुमैः कांतिर्यासां ताः। नूत्नेषु कुचेषु यत्कुंकुमं तेन कांतिर्यासामिति वा ॥ ३३–३४ ॥ व्रजावासं गोकुलस्य वसतिस्थानम् ॥ ३५–३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अवांतराणि निधुवनबिल्वादीनि। यद्वा–कः ककार आनने मुखे आदौ येषां ते काननाः कदंबकपित्थकेशरकालस्कंधादयो वृक्षा नव। नित्यनूतनाः कानना यत्र तत्तथा। यद्वा—नवसंख्याकाः काननाः कदंबकर्णिकारकमलकेसरकांचनारकालस्कंधकपित्थकुंजराशनकेतकरूपा यत्र तत्तथा। भाविलीलाभिप्रायेणाह—यद्वा—न बकस्यासुरस्याननं मुखं यत्र तत्तथा। बकमुखस्यात्रैवोत्पाटनात्। अत्र पक्षे नञर्थेन नशब्देन समासवबयोस्सावर्ण्यं चानुध्येयम्। यद्वा—पुण्याद्रयः गोवर्द्धनबृहत्सान्वादयः। पुण्यतृणानि कुशकाशोशीरादीनि। पुण्यवीरुधो विष्णुक्रांतामाधव्याद्याः। यद्वाद्रिपदेन द्रुमा ग्राह्याः "अद्रयो द्रुमशैलार्काः" इत्यमरः। तथा च पुण्यद्रुमाः कदम्बतमालादयः। पुण्या अद्रितृणवीरुधो यत्र तत्तथा "समासांतोच् ॥ २८ ॥ यतस्तद्वनमेतादृशं ततस्तत्र वने युंक्त योजयत यूयम्। नूयते स्तूयते इति नवं स्तुतं कं जलं यस्याः सा नवका कालिंदी "न जलं यमुनावारि साक्षाद्ब्रह्मैव केवलम्" इत्युक्तेः। नवकाऽऽननेऽग्रे यस्य तत्तथेति "मुखाग्रचेष्टाकृष्णास्येष्वाननं चलनेऽपि च" इति यादवः। नवानां हर्यादियोगेश्वराणां कं सुखं यया सा नवका भक्तिस्तस्या आननं चेष्टनं यत्रेति वा। नवानां जंबूद्वीपस्थखंडानां कं शिरः कर्मभूमित्वेन मुख्यत्वान्नवकं भारतखंडं तस्याननं मुखमिव श्रेष्ठम्। "भारते व्रजभूः श्रेष्ठा तत्र वृंदावनं परम्" इति वा नौतीति नवं कस्याननं काननं नवं स्तुवत्काननं यत्र इति वा नवकाननम्। यद्वा—नवसु खंडेषु कीयते गीयते मत्स्यादिरूपैरिति नवको हरिस्तस्याननं चेष्टाऽत्रेति नवकाननम्। नवानां नंदानां कं सुखं येन स नवकस्तस्याननं चेष्टनं नवकाननं तद्विद्यते नित्यमत्रेति तथा मत्वर्थीयोच्। न च नंदीश्वरोऽस्मत्प्राचीनराजधानीं गंतुं शक्यः यद्भयान्नंदीश्वरात्पलाय्यात्र महावने वसामस्तस्याविष्टस्य संप्रत्यपि तत्रैव स्थितेर्न च व्रजभूमेरन्यत्र यियासा संभवत्यरोचकत्वादेव तस्मान्नंदीश्वरमहावनयोर्मध्यवर्त्तिस्थानमेव वासार्थं युज्यते इति विचार्याहवनमिति। "नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्" इति नीत्या च वृंदायाः पाद्मोर्जमाहात्म्योक्तरीत्या भगवत्प्रेयसीत्वं प्राप्ताया वनं नवकाननमित्युक्तेर्बृहद्वनस्य जीर्णत्वं प्राप्तं किं च कारस्करादीनामपुण्यवृक्षादीनामपि तत्र जातत्वात्पुण्यत्वमेवेति। तत्र विशेषस्तु हरिवंशीयकृष्णवाक्यतोऽवसेयः। तथाहि "श्रूयते हि वनं रम्यं पर्याप्ततृणसंभवम्। नाम्ना वृंदावनं नाम स्वादुवृक्षफलोदकम्। अमीनिकंटकवनं सर्वैर्गुणगणैर्युतम्। कदंबपादपप्रायं यमुनातीरसंस्तुतम्। स्निग्धशीतानिलवनं सर्वर्त्तुनिलयैर्युतम्। गोपीनां सुखसंचारं चारुचित्रवनांतरम्। तत्र गोवर्द्धनो नाम नातिदूरे गिरिर्महान्। राजते दीर्घशिखरो नंदनस्येव मंदरः। मध्ये चास्य महाशाखो न्यग्रोधो योजनोच्छ्रितः। भांडीरो नाम शुशुभे नीलमेघ इवांबरे। तत्र गोवर्द्धनं चैव भांडीरं च वनस्पतिम्। कालिंदीं च नदीं रम्यां द्रक्ष्यावश्च यतः सुखम्" इति। अत्र नातिदूर इति नातिप्रांते न च मध्ये किं तु पार्श्वदेश एवेत्यर्थः। "अहो वृंदावनं रम्यं यत्र गोवर्द्धनो गिरिः" इति स्कांदात्। यत्तु भांडीरमध्यस्थितत्वमुक्तं तदित्थं प्रतिपद्यते। स खलु वृंदावनसीमस्थात्क्रीडनकुट्टिमादुत्तरस्य योजनद्वयांते यमुनातीरे दक्षिणे संप्रति च भांडीरतया प्रसिद्धो देशो योजनप्रमाणोस्ति एवं योजनत्रये लब्धे तत्परस्य योजनद्वयस्य मिश्रणया वृंदावनस्य पंचयोजनप्रमाणत्वं सिध्यति तदुक्तं गौतमीये—वृंदावनमुद्दिश्य भगवता "पंचयोजनमेवास्ति वनं मे देहरूपकम् ॥" इति चक्रवर्त्तितोषिणीकारौ ॥ २९ ॥ विप्रतिपत्तिरहिता विरुद्धोक्तिवर्जिताः। "गृहे वस्त्रे संविधायां तिरस्कारे परिच्छदे" इति कोशः। परिच्छदा दोहपात्रमंथन्यादयः ॥ ३० ॥ अनस्सु शकटेषु। सर्वोपकरणानि भोजनपात्रशय्यापेषणकित्तनयंत्रादिरूपाणि ॥ ३१ ॥

शृंगाणि शृंगाराणि वाद्यानि मृगशृंगाणि वा। यद्वा—"शृंगं तु गवलं हेमनिबद्धाग्रिमपश्चिमम्। रत्नजालस्फुरन्मध्यं मंत्रघोषाभिधं स्मृतम् ॥" इति भक्तिरसामृतोक्तलक्षणं शृंगमत्र ज्ञेयम्। 'गवलं माहि शृंगम्।' इत्यमरः। केचित्तु गोरिदं गवलमिहालप्रत्ययो बाहुलकात् स पुरोहिताः शांडिल्यसहिताः "शांडिल्यः सर्वधर्मज्ञो नंदादीनां पुरोहितः" इति स्कांदोक्तेः ॥ ३२ ॥ आद्यसमासे कुचपदे लक्षणाकरणात्समासांतरमाह—नूत्नेष्विति। निष्कं पदकसंज्ञं हेमभूषणम् ॥ ३३ ॥ तत्कथा कृष्णरामकथा तल्लीलेति यावत् ॥ ३४ ॥ अर्द्धचंद्रवदर्द्धचंद्राकारम्। अर्द्धचंद्रवदिति पश्चाद्भागे प्रतिस्वद्रव्यस्थापनार्थमग्रभागे विस्तीर्णगवादिसुखनिर्गमार्थं शकटीवाटपर्यंतश्चंद्रार्द्धाकारसंस्थित इति विष्णुपुराणे एवं तद्दिने शकटैरेव चक्रुः दिनांतरे तु यथा श्रीहरिवंशे "कंटकीभिः प्रवृद्धाभिस्तथाकंटकिभिर्द्रुमैः। निखातोच्छ्रितशाखाभिरभिगुप्तं समंततः ॥" इति। कालियह्रदाद्दाक्षिणप्रायदिशि चतुःक्रोशीविस्तीर्णाष्टक्रोशीदीर्घो व्रजावासगोवर्द्धनमग्रे विधायैव इति ज्ञेयम् ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, "नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्" इति नीतिः। तत्राह वनमिति। अस्तीति शेषः। वृन्दायाः पाद्मकार्तिकमाहात्म्योक्तरीत्या श्रीभगवत्प्रेयसीत्वं प्राप्ताया वनमिति सर्वोपद्रवराहित्यं सकलसद्गुणमयत्वं सूचितम्, तदेवाभिव्यञ्जयति—पशव्यमित्यादिना। आरोग्यादिप्रदजलतृणादित्वात् पशुभ्यो हितं नवकाननमिति बृहद्वनस्य जीर्णकाननत्वं च सूचयति तच्च चिरकालं गवादिसम्मर्दच्छिद्यमाननवाङ्कुरादित्वात् तथा वृन्दावनस्य पूर्वव्रजवासत्वं सूचयति द्वयोरनादिकालत्वेऽपि तस्मिन्नवत्वनिर्देशेन तदुच्छिन्नचरत्वावगमात् गोपादीनां सेव्यमिति तत्र दुष्टजन्त्वाद्यभयं दर्शितं पुण्या एवाद्रयस्तृणानि वीरुधश्च यत्र अदन्तत्वमार्षं हलन्ताद्वेति टापावीरुधाशब्द एव वा सर्वमपि यत्र पुण्यमित्यर्थः। पुण्यत्वेन प्रसिद्धानामेव तत्र स्थिते कारस्कराद्यपुण्यद्रुमादीनां क्वचित् स्थिते वा तज्जन्मत्वेन पुण्यत्वसिद्धेः अत्र विशेषः श्रीहरिवंशे, श्रीरामं प्रति श्रीकृष्णवाक्यम्।

"श्रूयते हि वनं रम्यं पर्याप्ततृणसंस्तरम्। नाम्ना वृन्दावनं नाम स्वादुवृक्षफलोदकम् ॥
अझिल्लिकण्टकवनं सर्वैर्गुणगणैर्युतम्। कदंबपादपप्रायं यमुनातीरसंस्थितम् ॥
स्निग्धशीतानिलवनं सर्वर्तुनिलयं शुभम्। गोपीनां सुखसञ्चारं चारुचित्रवनान्तरम् ॥
तत्र गोवर्द्धनो नाम नातिदूरे गिरिर्महान्। भ्राजते दीर्घशिखरो नन्दनस्येव मन्दरः ॥
मध्ये चास्य महाशाखो न्यग्रोधो योजनोच्छ्रितः। भाण्डीरो नाम शुशुभे नीलमेघ इवाम्बरे॥
तत्र गोवर्द्धनं चैव भाण्डीरं च वनस्पतिम्। कालिन्दीं च नदीं रम्यां द्रक्ष्यावश्च यतः सुखम्॥" इति ॥ १७ ॥

अत्र नातिदूर इति नातिप्रान्ते न च मध्ये किं तु पार्श्वदेश एवेत्यर्थः "अहो वृन्दावनं रम्यं यत्र गोवर्द्धनो गिरिः" इति स्कान्दात्। अत्रैव तत्रेति द्विरुक्तत्वात् पुरतस्तस्यैव योजनीयत्वाच्च यत्तु भाण्डीरस्य मध्यस्थितत्वमुक्तं तत्रेदं प्रतिपद्यते स खलु वृन्दावनसीमस्थाद्व्रक्तक्रीडनकुट्टिमादुत्तरस्यां योजनद्वयान्ते यमुनादक्षिणतीरे सम्प्रति च भाण्डीरतया लोकप्रसिद्धो देशः स्वयमपि शास्त्रेण प्रसाधयिष्यमाणस्तथा योजनविस्तारतया प्रमापयिष्यमाणश्च प्रसिद्ध्यतीति योजनत्रये लब्धे तत्परस्य योजनद्वयस्य मिश्रणतया वृन्दावनस्य पञ्चयोजनप्रमितत्वमेव सिद्ध्यति तथाचोक्तं वृन्दावनमुद्दिश्य बृहद्गौतमीये स्वयं भगवता—

"पञ्चयोजनमेवास्ति वनं मे देहरूपकम्। कालिन्दीयं सुषुम्णाख्या परमामृतवाहिनी ॥" इति

अत्र यत्खलु सुषुम्णारूपकेण यमुनाया वृन्दावनमध्यवाहित्वं दर्शितं तच्छ्रीहरिवंशे चान्यत्र व्यज्यते सीमान्तमिव कुर्वन्तीति तस्याविशेषणेन तदेवं स्थिते भाण्डीरस्य विस्तारे चोच्छ्राये च योजनप्रमितत्वेन यमुनातीरस्थत्वेन च यमुनोत्तरतीरेऽपि दीर्घाभिः शाखाभिर्व्याप्तिर्लभ्यते ततः परतोऽपि वृन्दावनस्यैति यत्तु पुण्याद्रितृणवीरुधमिति "नद्योऽद्रयः खगमृगाः सदयावलोकैरिति च योजनपञ्चकादप्याधिक्यं लभ्यते तत्खलु गङ्गातीरस्य गङ्गात्ववत् तद्बहिः स्थितकतिपयगोचारणभूमेरपि तदन्तःपातविवक्षयागम्यं यत एव पूर्वरीत्या गोवर्द्धनदिश्यपि यमुनामारभ्य वृन्दावनस्य सार्द्धद्वययोजनमात्र व्याप्त्या गोवर्द्धनस्य तत्पार्श्वस्थिततायामपि यन्नन्दनन्दनस्येव मन्दरः इति प्रोक्तं तदपि सङ्गच्छते यद्वा आदिवाराहादौ कालियह्रदादिकतिपयतीर्थानां वृन्दा वनकरणोपादेयतया वर्णितत्वात् संक्षिप्तमिव तत्प्रतीयते तत्खलु तदधिदैवत श्रीगोविन्ददेवाधिष्ठानत्वेन मुख्यत्वविवक्षया श्रीकेशवाधिष्ठानत्वेन मथुरापुर्या इवेति तदेतन्मत एव खदिरकाम्यकवनादीनां पृथक्त्वं स्यात् न तु प्राक्मते इति ज्ञेयं तत्तस्मादद्यैव यास्यामः यामेत्यर्थः। स्थानस्यास्य सोपद्रवत्वात् कालस्यास्य च शोभनत्वादिति भावः। व्यतिरेकेण द्रढयति माचिरम् अविलम्बमित्यर्थः। यदि भवतां भवद्भ्यो रोचत इति विनयेन ॥ १८ ॥ एकस्मिन् श्रीकृष्ण एव धीर्येषां अत एव विप्रतिपत्तिरहितधीत्वात् साध्वित्यादि इतस्ततः स्थितानेकव्रजवर्त्तिगवादीनेवात्र मेलयित्वा रूढा शाकटान्यारूढाः परिच्छदा एषान्ते ॥ १९ ॥ रूढपरिच्छदत्वमेव विवृण्वन् यानप्रकारमाह–वृद्धानिति युग्मकेन। हे राजन्निति तेषां श्रीकृष्णप्रेमातिं निगम-

यति ॥ २०–२१ ॥ अत्रैव विशेषमाह—गोप्य इति द्वाभ्याम् । रूढा आरूढाः रथाः तत्प्रायाः शकटभेदा याभिस्ताः निष्काणां स्त्रीभूषणेषु मुख्यत्वात्तैरन्यान्यपि ज्ञेयानि नूत्नेत्यत्र तेषां प्रथमार्थस्तु समीचीनः सर्वैरेव व्रजजनैस्तद्गुणगानस्य प्रसिद्धत्वात् कृष्णरामाभ्यां सह तयोर्जनकर्तृकायाः कथायाः श्रवणोत्सुके तयोरेव कर्त्तृभूतयोर्वा ॥ २२–२३ ॥ समिति सम्यक् सुखेन "मार्गं ददौ सिन्धुरिव श्रियःपतेः" इति वत् किं वा मिथो बद्धप्लवीकृतमहाशकटवृन्दैर्यमुनोत्तरणादिपूर्वकं प्रविश्य उत्तरणस्थानं तु योजनपरिमितत्वात्कालियह्रदादुत्तरतो ज्ञेयं दक्षिणतो मथुरा नैकट्येन सङ्कटत्वापातात् अथवा कालियह्रददक्षिणस्यां दिशि वक्ष्यमाणाद्व्रजवासान्मथुरावृन्दावनं सन्धिर्वत्सक्रीडनभक्तक्रीडनयोर्मध्यप्रदेश एव तत्स्यात् महाकाननत्वेन निर्जनत्वात् अर्द्धचन्द्रवदिति पश्चाद्भागे द्रव्यादिस्थानापेक्षया पुरतश्च गवादीनां सुखनिर्गमाय विस्तीर्णद्वारापेक्षया सदा सर्वत्र तथैवावाससन्निवेशोपपत्तेः तथा श्रीविष्णुपुराणे—

"स समावासितः सर्वो व्रजो वृन्दावने ततः । शकटीवाटपर्य्यन्तश्चन्द्रार्द्धाकारसंस्थितिः" ॥ इति

श्रीहरिवंशे—

'निवेशं विपुलं चक्रे गवां चैव हिताय च । शकटावर्तपर्यन्तश्चन्द्रार्द्धाकारसंस्थितम्" ॥ इति

एवं तद्दिने शकटैरेव चक्रुः दिनान्तरे च यथा श्रीहरिवंशे—

"कण्टकीभिः प्रवृद्धाभिस्तथा कण्टकिभिर्द्रुमैः । निखातैश्छिन्नशाखाभिरभिगुप्तं समन्ततः" ॥ इति

अत्र कण्टकीभिः कण्टयुक्ताभिर्वल्लीभिरित्यर्थः । आसां द्रुमाणां च जीवितमेव रोपणं ज्ञेयं शाखानां तु छिन्नानां तथाऽन्यो विशेषस्तत्रैव "मध्ये योजनविस्तारं तावद्द्विगुणमायतम्" इति तथा कालियह्रदवर्णने "व्रजस्योत्तरतस्तस्य क्रोशमात्रे निरामये" इत्यादि उत्तरशब्दोत्र प्राय ईशानकोणवाची तस्य दक्षिणस्यान्दिशि महापुर्य्यामथुराया निवेशात् ईशानकोणस्य चोत्तरानुगतत्वात् अत एवादिवाराहेऽपि तत्स्थानमाहात्म्यम्—

"उत्तरे हरिदेवस्य दक्षिणे कालियस्य तु । अनयोर्देवयोर्मध्ये मृतास्ते चापुनर्भवाः" ॥ इति

अत्र हरिदेवो गोवर्द्धनाधिष्ठाता कालियः कालियदमन इति ज्ञेयं मथुराया नातिदूरत्वेपीदं स्थानं निर्जनमेव पुर्य्याः पश्चाद्दिग्गतत्वात् महाघनवनत्वाच्च एवं कालियह्रदस्य नैरृतकोणे क्रोशान्तरे सट्टीकराख्यं प्रदेशमन्तर्भाव्यदैर्घ्ये योजनद्वयं व्रजः स्यात् किं तु गोवर्द्धनमग्रे निधायेति ज्ञेयम् अन्यत्र हि द्वारायोग्यत्वं दक्षिणस्यां मथुराख्यमहानगरवासेन आग्नेय्यान्तेन यमुना च पूर्वस्यां यमुनायाम् ऐशान्यां कालियह्रदेन गवादिप्रचारस्य सङ्कीर्णत्वात् उत्तरस्यां वायव्यां पश्चिमस्यां च शीतवाताद्यागमेन दुःखहेतुत्वात् अद्यापि मथुरादिदेशे ऐशान्यादिदिक् चतुष्टयादन्यत्रैव गोष्ठद्वारनिर्माणदर्शनाच्च अतः—

"न नः पुरोजनपदा न ग्रामा न गृहा वयम् । वनौकसस्तात नित्यं वनशैलनिवासिनः" ॥

इत्युक्त्वा पुरोद्वाराग्रदेशस्थत्वात् श्रीगोवर्द्धनस्यैव पूजाविधानं वक्ष्यते तदेवं श्रीनन्दराजस्य मुख्यावासो नन्दीश्वरगिरिमभितो यः प्रसिद्धः स तु कालान्तरे जात इति ज्ञेयम् अत एव इतस्ततो व्रजतीति व्रजो निरुच्यते अत एव गोठनन्दनिलयो वा गोरै इति लोकविख्यात्यागोष्ठनन्दनिलयगोकुलाख्यानि स्थानान्तराणि चात्रैव वृन्दावने दृश्यन्त इति दिक् । तच्च वृन्दावनं भेदत्रयात्मकमेव श्रीकृष्णस्यापि परममनोहरमित्याह–वृन्देति । वृन्दावनमिति केवलवनस्य सौष्ठवं गोवर्द्धनमित्यादिना तत्रत्यविशेषाणाम् उत्तमेति वैकुण्ठाद्यपेक्षया "अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी" इति प्राप्ततादृशमाहात्म्यमधुवनमहावनाद्यपेक्षया च अत एव माधवशब्दप्रयोगः सर्वलोकरमणहेतोरपि रामस्येत्येव किं वक्तव्यं तस्याप्यालम्बनरूपस्य सर्वसम्पत्तिदेव्याः पत्युरपीत्यर्थः । एवमाश्चर्येण प्रहर्षेण चाह हे नृपेति ॥ २४–२५ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु 'मा समीक्ष्य परं स्थानं पूर्व्वमायतनं त्यजेत्' इति नीतिः, तत्राह–वनमिति, अस्त्येवेति शेषः । परमपतिव्रतायाः श्रीभगवदनुगृहीतायाः श्रीवृन्दाया वनमिति सर्व्वोपद्रव-राहित्यं सर्व्वसद्गुणमयत्वञ्च सूचितम् । तदेवाभिव्यञ्जयति–पशव्यमित्यादिना, पुष्ट्यादिकारित्वाद्रोगाद्यविषयत्वाच्च पशुभ्यो हितमित्यादिना बृहद्वनाद्वैशिष्ट्यं बोधयति । नवानि सम्प्रति तत्र कृष्णक्रीडार्थं स्वयमुत्पन्नानि, किंवा नव नवसंख्यकानि तालवनादीनि षट् मुञ्जान्धकारविरहवनानि त्रीणीत्येवम् । किञ्च, पुण्याः पुण्यजनकत्वादिना परमोत्तमा अद्रयः श्रीगोवर्द्धनादयस्तृणानि दर्भदूर्व्वादीनि, वीरुधश्च विष्णुपर्ण्याद्या यस्मिन् , यद्वा, पुण्या एवाद्र्यादयः सर्व्वेऽपि यस्येत्यन्यत्रापुण्यानामपि तत्र पुण्यत्वात् पुण्याद्रिषु स्वत एव पुण्यवृक्षाणामप्यन्तर्गतत्वात् पृथगनुक्तिः, यद्वा, नवानि सदा पत्रपल्लवादिसम्पत्त्या नित्यनूतनानि काननानि कदम्बादि-वृक्षवनिका यस्मिन् , यद्वा, वृन्दाया वनमित्युपवनतया फलपुष्पप्रधानवृक्षाणां स्वतः सत्ता सूचितैव । किञ्च, पुण्येत्येवमसाधारणत्वमुक्तम् । तथा च श्रीहरिवंशे (विष्णु-प. ८।२२–२६,२८)—

'श्रूयते हि वनं रम्यं पर्य्याप्ततृणसंस्तरम् । नाम्ना वृन्दावनं नाम स्वादुवृक्षफलोदकम् ॥
अझिल्लिकण्टकवनं सर्व्वैर्वनगुणैर्युतम् । कदम्बपादपप्रायं यमुना–तीर–संश्रितम् ॥
स्निग्धशीतानिलवनं सर्व्वर्त्तु निलयं शुभम् । गोपीनां सुखसञ्चारं चारु चित्रवनान्तरम् ॥
तत्र गोवर्द्धनो नाम नातिदूरे गिरिर्महान् । भ्राजते दीर्घशिखरो नन्दनस्येव मन्दरः ॥
मध्ये चास्य महाशाखो न्यग्रोधो योजनोच्छ्रितः । भाण्डीरो नाम शुशुभे नीलमेघ इवाम्बरे ॥
तत्र गोवर्द्धनञ्चैव भाण्डीरञ्च वनस्पतिम् । कालिन्दीञ्च नदीं रम्यां द्रक्ष्यावश्च यतः सुखम् ॥' इति ।

अतएव गोपादीनां सेव्यं सेवितुं योग्यम् , सेव्यमिति भक्त्यपेक्षया, किंवा, आसक्त्या नित्योपभोगविवक्षया, अनेन तत्र दुष्टजन्त्वभावो हिंस्राणाञ्च हिंसाराहित्यम् , शाश्वतिकवैराणामपि मिथः सौहार्दं सूचितम् । तथा चाग्रे तत्रैव (भा० १०।१७।६०)—'यत्र नैसर्गदुर्व्वैराः सहासन्नृमृगादयः' इत्यादि । पशव्यमित्युक्तेऽपि पुनर्गवां सेव्यमित्युक्तिर्विशेषतो गो वृद्ध्याधिकारि श्रीगोवर्द्धनवर्त्तिसुलभसुतृणजलाद्यभिप्रायेण, यद्वा, पशुषु गवां मुख्यत्वेन तासां हितविशेषापेक्षया ॥ २८ ॥ तत्तस्मादद्यैव यास्यामो यामेत्यथ इत्यदूरवर्त्तित्वञ्चोक्तम् । मा चिरमविलम्बमित्यर्थः, अन्यथौत्पातिकारिष्टसम्भवात् । तत्त्वतस्तु पूर्व्वस्थाने ममत्वेन क्षणान्तरे वैमत्यशंकया तथोक्तम् । यदि भवतां भवद्भ्यो रोचत इति विनयेन सर्व्वान् वशीकरोति ॥ २९ ॥ एकस्मिन् श्रीकृष्ण एव धीर्येषामतएव विप्रतिपत्तिरहितधीत्वात् साध्वित्यादि । व्रजानिति तैर्व्याख्यातम् , यद्वा, इतस्ततः स्थितानन्त-व्रज-वर्त्तिगवादीन्, सम्यक् आ सर्व्वतो योजयित्वैकत्र मेलयित्वा ॥ ३० ॥ रूढ़-परिच्छदत्वमेव विवृण्वन् यानप्रकारमाह-वृद्धानिति द्वाभ्याम् । आत्तशरासनाः पथि दुष्टकंसादिभयात् । सपुरोहिताः पुरोहित–सहिताः, यद्वा, पुरोहिताश्च ययुः, सह एकदैव परमपुण्यस्थानापेक्षया, निजगृहाद्यनपेक्षणात् । हे राजन्निति भवादृशेनापि सद्यस्तथा गन्तुं न शक्यत इति भावः ॥ ३१–३२ ॥ तत्रैव विशेषमाह–गोप्य इति द्वाभ्याम् । रूढ़ा आरूढ़ा रथाः शकटभेदाः, किंवोच्चैर्गानार्थं शोभा-भरार्थञ्च शकटतोऽप्युत्तमा विस्तीर्णोच्चतरा यानविशेषा याभिस्ताः नूत्नेति तैर्व्याख्यातम्, यद्वा, नूत्नकुचेषु कुंकुमादप्यधिका कान्तिर्यासाम् , नूत्नेति वृद्धानां व्यावर्त्तनार्थम् , किंवा सदा सर्व्वासामपि रथरूढानां तासां प्रायो नित्यनवयौवनत्वात् । कृष्णस्य चित्ताकर्षकस्य लीलाम् । निष्काणां स्त्रीभूषणेषु मुख्यत्वात्तैरन्यान्यपि ज्ञेयानि ॥ ३३ ॥ तथेति वाक्यालंकारे, पूर्व्वोक्तसमुच्चये वा, ततश्च तयोरपि निष्ककण्ठित्वादिकं द्रष्टव्यम् । कृष्णरामाभ्यां सहैकमेव शकटमास्थिते आरूढ़े । तत्र हेतुः–तयोः कृष्णरामयोः सकाशात् कथाश्रवणोत्सुके, स्नेहेन तयोरन्योन्यमत्यागात् , यद्वा, द्वयोरपि पुत्रयोः कथाश्रवणेऽभेदेन द्वयोरपि मात्रोरौत्सुक्यात् , यद्वा, तयोरन्योन्यं या वार्त्ता तच्छ्रवणोत्सुके, कृष्णस्यादौ निर्देशो यथासंख्यन्यायात् , किंवा माधुरीभरेण तस्यैव कथा-श्रवणे औत्सुक्य-विशेषात्तेन शोभाविशेषाच्च ॥ ३४ ॥ सम्यक् सुखेन यमुनोत्तरणादिपूर्व्वकं प्रविश्य, तच्च ग्रीष्मारम्भे ज्ञेयम् । पूर्णस्तु घर्मसमयस्तयोस्तत्र वने सुखमित्यादिना श्रीहरिवंशादौ वृन्दावनक्रीडायाः प्रागेव ग्रीष्मर्त्तु वर्णनात् , यमुनोत्तरणञ्च तदानीं तेषामतिसुकरत्वात् स्पष्टं नोक्तम् । तच्च कालियह्रदादुपरि स्थाने प्रसिद्धम् । सर्व्वस्मिन् काले सुखम् आ सम्यक् वहति प्रापयतीति तथा तत् , अतस्तत्र शीतोष्णादिबाधा गृहाद्यपेक्षा च नास्तीति भावः । व्रजो गवामावासः स एव तेषामप्यावासस्तम् , यद्वा, व्रजस्य व्रजवर्त्तिनां सर्व्वेषामेवावासं वसतिस्थानम् । अर्द्धचन्द्रवदिति तस्मिन् दिने यमुनातीरे विश्रामात्तस्य च ऋजुत्वात्तत्र शकटवर्गवेष्टनेनार्द्धचन्द्राकारतयैवावास-सन्निवेशसिद्धेः, यद्वा, यमुनायास्तत्रार्द्धचन्द्राकृतित्वेन सन्निवेशात्तथोक्तम् , यद्वा, पश्चाद्भागे द्रव्यादिस्थानापेक्षयाग्रे च गवादीनां सुखनिर्गमाय विस्तीर्णद्वारापेक्षया सदा सर्व्वत्र तथैवावाससन्निवेशोपपत्तेः । तथा च श्रीविष्णुपुराणे (५।६।३१)-

'स समावासितः सर्व्वो व्रजो वृन्दावने ततः । शकटीवाटपर्य्यन्तश्चन्द्रार्द्धाकार–संस्थितिः ॥' इति ।

श्रीहरिवंशेऽपि, (विष्णु–प० ९।२०)—

'निवेशं विपुलं चक्रे गवाञ्चैव हिताय च । शकटावर्त्तपर्य्यन्तं चन्द्रार्द्धाकारसंस्थितिम् ॥' इति ।

एवं तद्दिने शकटैरेव चक्रुर्दिनान्तरे च यथारुचि सकण्टकशाखादिपरिवेष्टनेन लतादिसंवेष्टनेन च गवामात्मनश्चावासं रचयामासुरिति बोद्धव्यम् , तथा च श्रीहरिवंशे (विष्णु–प० ९।२२)—'कण्टकीभिः प्रवृद्धाभिस्तथा कण्टकितैर्द्रुमैः । निखातोच्छ्रित-शाखाभिरभिगुप्तं समन्ततः ॥ इति । अन्येऽपि विशेषास्तत्रैव (विष्णु प० ९।२१)—'मध्ये योजनविस्तारं तावद्द्विगुणमायतम्' इति । तथा कालियह्रदवर्णने (हरिवंशे विष्णु-प० ११।४८) 'व्रजस्योत्तरतस्तस्य क्रोशमात्रे निरामये' इत्यादि । एवं कालियह्रदस्य दक्षिणे क्रोशान्तरे दैर्घ्यं योजनद्वयं व्याप्य व्रजः । यत्र च श्रीनन्दराजस्य मुख्यवासः प्रायो नन्दीश्वरगिरि पार्श्वे, श्रीयमुना च ततो दूरवर्त्तिन्यपि तदानीन्तनानामाशुगम्या निकटेव भाति, तच्चाग्रे व्यक्तं भावि । गवामावासस्तु कदाचिन्नन्दीश्वरे, कदाचिच्च सुतृणापेक्षया प्रायस्तत्पूर्व्वतः कुत्र कुत्रापि यदा च तत्र तत्रैव गोपा गोप्यश्च दुग्धाद्यर्थं यान्तीति युक्त्या लोकप्रसिद्ध्या व्यवहार-दृष्ट्या च ज्ञेयम् , अतएवेतस्ततः काले काले व्रजतीति व्रज उच्यत इति दिक् ॥ ३५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

परिच्छदः क्रीडोपकरणम् ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

क यास्यायामः ? इत्यत्राह—वनमिति । यत् वृन्दावनाख्यं वनं तत्राद्यैव यास्यामः, कथम्भूतम् ? पशव्यं पशुभ्यो हितं नवानि काननानि पर्य्यन्तवनानि यस्मिन् गोपादीनां सेव्यं वासयोग्यं पुण्याः रमणीया अद्र्यादयो यस्मिन् ॥ १७ ॥ शकटान् युक्तप्रस्थानयोग्यान् कुरुत गोधनानि चाग्रतो यान्तु यदि मदुक्तं भवतां रोचते तर्हि त्थातव्यमिति शेषः ॥ १८ ॥ तर्हि गोधनानि यान्त्विति तावदुपनन्दवचः श्रुत्वा गोपाः एकधियः विप्रतिपत्तिरहिताः व्रजान् शकटव्यूहान् समानीय रूढाः शकटेष्वारोपिताः परिच्छदाः उपकरणानि यैस्ते ययुः जग्मुः ॥ १९ ॥ तदेव प्रपञ्चयति—वृद्धानिति । हे राजन् ! वृद्धादीन् अनस्सु शकटेषु आरोप्य सन्नद्धाः अत्तानि गृहीतानि शरासनानि धनूंषि यैस्तथाभूताः गोपाः गृहीतधनुष्काः शृङ्गाणि विषाणान्यापूर्य्य मुखमारुतैर्ध्वनयित्वा महता तूर्यघोषेण सह ययुः सहपुरोहिताः सगुरवः जग्मुरित्यर्थः ॥ २०–२१ ॥ रूढा आरूढाः रथा याभिर्नूत्नैः कुचगतैः कुङ्कुमैः कान्तिर्यासां नूत्नेषु कुचेषु कुङ्कुमं तेन कान्तिर्यासां वा निष्काः पतकाख्याः कण्ठेषु यासां स्निग्धकण्ठ्य इति पाठे मधुरस्वनाः प्रीताः कृष्णस्य लीला जगुः ॥ २२ ॥ एकं शकटमास्थिते आरुह्य स्थिते रामकृष्णाभ्यां सह रेजतुः ताभ्यां सहैकं शकटमास्थिते रेजतुरिति वान्वयः । कथंभूते तस्य श्रीकृष्णस्य कथायाः श्रवणे उत्सवः औत्सुक्यं ययोस्ते ॥ २३ ॥ अर्द्धचन्द्रवदर्द्धचन्द्रतुल्यसन्निवेशं व्रजावासं गोकुलस्थानं चक्रुः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पशव्यं पशुभ्यो हितं पुण्याद्रयः पुण्यवृक्षाः तृणानि वीरुधगुल्मानि यत्र तत्तथा तद्वीरुधशब्दोऽकारान्तोऽप्यस्ति "पर्वताद्रीनगावगौ" इति च ॥ १७ ॥ युङ्ध्वं योगं कुरुध्वम् ॥ १८ ॥ तदुपनन्दस्य वचनं एकधियः एकस्मिन्नर्थे नतबुद्धयः । रूढपरिच्छदाः शकटाधिष्ठितभाण्डादिसाधनाः ॥ १९ ॥ अनस्सु शकटेषु ॥ २०–२१ ॥ नृत्यत्सु कुचेषु कुङ्कुमादिकान्तिर्यासां तास्तथा स्निग्धकण्ठ्यः कण्ठगुणोपेताः ॥ २२–२३ ॥ अर्द्धचन्द्रवत् अर्धचन्द्राकारवत् ॥ २४–२६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पुण्याद्रीति वृन्दावनस्य महाविस्तीर्णत्वं बोधयति ॥१७-२३ ॥ तत्रेति श्रीहरिवंशरीत्या कालियह्रदाद्दक्षिणप्रायायां दिशि अष्टक्रोशी दीर्घः चतुष्क्रोशी विस्तीर्णो व्रजावास इति ज्ञेयम् ॥ २४–२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

न चास्मत्प्राचीनराजधानीं नन्दीश्वरो गन्तुं शक्यः यद्भयान्नन्दीश्वरात्पलाय्यात्र महावने वयमवसाम तस्यारिष्टस्य सम्प्रत्यपि तत्रैव स्थितेः नच व्रजभूमेरन्यत्र इयासा सम्भवेदरोचकत्वादेव तस्मान्नन्दीश्वरमहावनयोर्मध्यवर्तिस्थानमेवावासार्थं युज्यत इति विचार्य्याह—वनमिति । पशव्यं पशुभ्यो हितं नवानि काननान्यवान्तराणि यत्र तत् ॥ १७ ॥ तत्तस्मात्तत्र वृन्दावने भवतां भवद्भ्यः शस्ताः ॥ १८ ॥ व्रजान् व्रजवर्तिगवादीन् एकत्र मेलयित्वा रूढाः शकटान्यारूढाः परिच्छदा येषां ते ॥ १९ ॥ यत्ताः प्रयत्नवन्तः ॥ २०–२२ ॥ एकं शकटमिति द्वयोरेव पुत्रद्वयविरहसहनाशक्तेः ॥ २३ ॥ अर्द्धचन्द्रवदिति पश्चाद्भागं प्रति स्वद्रव्यस्थापनार्थम् अग्रभागे विस्तीर्णे गवादीनां सुखनिर्गमार्थं च "शकटीवाटपर्य्यन्तश्चन्द्रार्द्धाकारसंस्थितः" इति श्रीविष्णुपुराणे च एवं तद्दिने शकटैरेव चक्रुः दिनान्तरे तु यथा श्रीहरिवंशे—

"कण्टकीभिः प्रवृद्धाभिस्तथा कण्टभिद्रुमैः । निर्वातोच्छ्रितशाखाभिरभिगुप्तं समन्ततः" ॥

इति ॥ २४–२५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्थानमपि रामकृष्णयोः गोपादीनां च प्रियमाह—वनमिति । पशव्यं पशुभ्यो हितम् नवानि वृक्षतृणादियुक्तानि काननानि अवान्तरवनानि विद्यन्ते यस्मिन तत् ॥ १७ ॥ शकटान् युङ्क्त गमनार्हान् कुरुत ॥ १८ ॥ व्रजान् शकटव्यूहान् रूढाः शकटारोपिताः परिच्छदा यैस्ते ॥ १९–२१ ॥ तदा गोप्यः रूढा आरूढा रथा याभिस्ताः नूत्नैः कुचगतैः कुङ्कुमैः कान्तिर्यासां ताः कृष्णलीलां जगुः अनेन तासां श्रीकृष्णे स्नेहातिशयं सूचितः ॥ २२–२३ ॥ व्रजावासं गोकुलवसतिं स्थानं चक्रुः ॥ २४–२५ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु क यास्याम इति चेत्तत्राह वनमिति। यदेकदेशेऽस्मत्प्राचीनराजधानी नन्दीश्वरोऽभूत्तद्वृन्दावनं नाम वनं यास्यामः व्रजादन्यत्र तु नेति भावः। वृन्दया देव्या अवनं रक्षणं यस्येति तत्प्रभावात्तस्मिन्नोपद्रवलेशः, सर्वगुणशालिता चेत्याह–पशव्यं पशुभ्यो हितमारोग्यकरतृणादित्वात् गोपादीनां सेव्यं कण्टकदुष्टसत्त्वाभावात् नवान्यवान्तरकाननानि यत्र तत् ॥ २८ ॥ तत्र गमनाय त्वरयति तत्त्रैवेति भवतां भवद्भ्यः ॥ २९ ॥ एकस्मिन् श्रीकृष्ण एव धीर्येषां ते अत एव विप्रतिपत्तिविरहात् साधु साध्विति। व्रजान् व्रजस्थान् गवादीन् समायुज्य एकत्र मेलयित्वा ययुः, शकटान्यारूढाः परिच्छदा येषां ते ॥३०॥ वृद्धानिति युग्मकम्। अनःसु शकटेषु यन्ता यत्नवन्तः दुष्टाः केचित् कंसभृत्याश्चेदागच्छेयुस्तान् हरिष्याम इत्यात्तशरासनाः गृहीतधनुर्बाणा इत्यर्थः। आपूर्य वादयित्वा तूर्यघोषेण दुन्दुभिनादेन राजपरिच्छदे निर्ययुः महता कंसकर्णयोः प्रविशतेति निर्भयत्वं व्यज्यते पुरोहितैर्भागुर्यादिभिः सहिताः ॥ ३१-३२ ॥ गोप्यो गोपप्रवराणां पत्न्यः, रूढाः आरूढाः रथाः स्यन्दना याभिस्ताः, नूत्नैः कूचगतैः कुङ्कुमैः कान्तिर्यासां ता निष्कानि पदकानि कण्ठेषु यासां ता भूषणान्तराणामुपलक्षणम्। सुवाससः सूक्ष्मचित्रवसनाः ॥ ३३ ॥ एकं महान्तं शकटं स्यन्दनं सपुत्रयोः सकिङ्करीकयोर्द्वयोः समावेशार्हं स्वयोः पुत्रयोश्च विरहसहनाशक्तेः "अनः शताङ्गः शकटः स्यन्दनः कथ्यते रथः" इत्युक्तं हलायुधेन। कृष्णरामाभ्यां सह रेजतुः तयोर्जनकर्त्तृकायाः कथायास्तत्कर्त्तृकाया वा तस्याः श्रवणे उत्सुके ॥ ३४ ॥ सम्प्रविश्य "मार्गं ददौ सिन्धुरिव श्रियःपते" रितिवत् कालिन्द्यां गुल्फदघ्नजलायां सत्यां तां सुखेनोत्तीर्येत्यर्थः। तत्र वृन्दावने आकालियह्रदमागोवर्द्धनकटकं व्रजावासं चक्रुः। शकटैरर्द्धचन्द्रवदिति पश्चाद्भागे द्रव्यस्थापनार्थं पुरोभागे विस्तीर्णे गवादीनां सुखनिर्गमार्थञ्चेति भावः। श्रीविष्णुपुराणेऽप्येवमुक्तं—शकटीवाटपर्यन्तश्चन्द्रार्द्धाकारसंस्थिति"रिति प्रथमदिवसे निवासरचनमिदं दिवसान्तरे तु तदरचनं श्रीहरिवंशाद्बोध्यम्—"कण्टकीभिः प्रवृद्धाभिस्तथा कण्टकिभिर्द्रुमैः। निखातोच्छ्रितशाखाभिरभिगुप्तं समन्ततः" इति कण्टकीभिर्वल्लीभिरिति ज्ञेयम्। मथुरानतिदूरे गोपानां निवासः कंसाभयगन्धोऽपि नास्तीति सूचयति। महाबलाः खलु ते च भवन्तो भीमविक्रमा" इति श्रीहरिवंशे तेषां विशेषणात् एतद्भयात् केशिनि पलायिते नन्दीश्वरे निवासो बोध्यः। इह पूतनावधशकटभङ्ग नामकरणजानुरिङ्गणवत्सपुच्छग्रहणतृणावर्त्तनाशनमुखान्तर्विश्वदर्शनगोपीस्तोभितनृत्यादिफलविक्रयणमृद्भक्षणपुनर्विश्वदर्शनदध्यादिस्तेयदामबन्धनसरित्तरिगताह्वानादि श्रीवृन्दावनागमनादावृह्रद्वनलीलाक्रमोऽवद्य योग्यतादेः ख्यापेक्षानुसन्धेयः ॥ ३५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यदस्मदवश्यापेक्षितं तदत्र वर्तत इति नाम निदर्शयोपनन्द उपदिशति। वनमिति। वृन्दावनं नाम प्रसिद्धं वनं पशव्यं पशुभ्यो हितं नवानि नूतनानि काननान्यवान्तराण्युपवनानि यस्मिंस्तत्। नवा एव नवका नूतनागता इतो वयं तेषामेवानजं चेष्टा गमनमिति यावत् यस्मिंस्तत्। एतावत्पर्यन्तं कैरप्यनवलोकितमिति यावदिति वा। गोपगोपीगवाम्। कृत्यानां कर्तरि वेति षष्ठी। सेव्यं सेवनीयम्। पुण्येत्यद्रयादिवीरुधां विशेषणम्। पुण्याद्रयः पुण्यानि तृणानि पुण्या वीरुधा गुल्माश्च यस्मिंस्तत्। टापं चेति टाबन्तो वीरुधाशब्दः। पुण्यद्रव इति कचित्पाठः। द्रुद्रुमागमा इत्यमराद्द्रवो द्रुमा इत्यर्थः ॥ १७ ॥ ततस्तत्राद्यैव यास्यामः शकटाननांसि यूयं युङ्ध्व युङ्ध्वं चिरं माऽस्त्वित्यर्थः। ध्वमो मलोपश्छान्दसः। यद्वा युङ्ध्वं आचिरमिति छेदः। आ सम्यगिति अचिरं शीघ्रमतिशीघ्रम्। अभिविधिरेवात्र सम्यक्त्वेन विवक्षित इति कत्वान्न प्रकृतिभावः। युङ्ध्वं भवतामग्रतो गोधनानि यान्तु। अग्रत इत्यावर्तते। सार्वविभक्तिकश्च तसिः। अग्रेभ्यो प्रधानेभ्यो यदि रोचते तर्हि शकटान्युङ्ध्वं यास्याम इत्यन्वयः। अग्रमालम्बने वाते परिणामे परस्य च। प्रान्ते पुरस्तादधिके प्रधाने प्रथमोर्ध्वयोरिति विश्वः। एवं च रुच्यर्थानामित्यस्योपपत्तिर्जातेति ज्ञेयम्। युङ्क्ष्व माचिरमिति पाठस्तु कल्पितः। एतदर्थापनानिपुणैर्बहुवचनक्रमाननुगुण इत्युपेक्ष्यः ॥ १८ ॥ नन्दपुरोगमा नन्दादयः उपनन्दवचः श्रुत्वा केचनानुमेनिरे नानुमेनिरे च केचनेति नेतीरयति। सर्व एकधिय इति। एकस्मिन्वृन्दावनगमनविषये धीर्येषां ते गोपास्तत्प्रतिनन्द्य गृहान्स्वान्स्वान्ययुः ॥ १९ ॥ श्वोऽत एतत्स्थलायत्ताः सन्नद्धाः। श्वो याम इति लकारव्यत्ययः। यद्वा श्वोऽपि माचिरमित्यन्वयः ॥ २० ॥ रूढा आरोपिताः परिच्छदा आस्तरणानि साधनानि यैस्ते ॥ २१ ॥ सर्वोपस्कराणि घरट्टक्षुब्धादीनि गतमुपरिस्करेति। आत्तं शरासनं धनुर्यैस्ते ॥ २२ ॥ शृङ्गाणि विषाणरचितगोपोचितवाद्यान्यापूर्य पूरयित्वा महता तूर्याणां घोषेण च। तूर्येति गतं। सहपुरोहिता गर्गो वा स्वासत्तादशायां तेन स्थापितो वा यः कश्चित्पुरोहितस्तेन सहिताः ॥ २३ ॥ नृत्यन्तो विशङ्कटशकटनटनेन नटन्तश्च ते कुचाश्च तेषु कुङ्कुमानां कान्तिद्युतिर्यासां ताः स्निग्धा मनोहराः कण्ठा यासां ताः ॥२४॥ कृष्णरामाभ्याम् सहोपविष्टाभ्यां ॥ २५ ॥ सर्वेषु कालेषु सर्वर्तुषु यत्सुखं तदावहतीति तदर्धचन्द्रवदर्धचन्द्रानुकारं व्रजावासं चक्रुः ॥ २६ ॥

श्रीसुबोधिनी

स्थलान्तरं सगुणं निर्दिशति **वनं वृन्दावनमिति, वृन्दा मधोः** पुत्री, तन्नाम्ना नूतनं वनं **वृन्दावनं**, स्त्रीप्राधान्यात् तत्र न दैत्यसम्बन्धः, भगवता पुनर्जालन्धरवधार्थं सा परिगृहीता, अतो देवताधिष्ठानाद् देवदैत्यानामनुरोध्यं तत् स्थानं, अतस्तत्रोत्पात

शङ्काभावः, तदाह **वृन्दावनं, नामे**ति प्रसिद्धं तथा तत् **नवकानन**मिति, न शीर्णवृक्षास्तत्र सन्ति नापि शृगालसर्पादीनां तत्र स्थितिः, अतः सर्वे गुणाः सर्वदोषाभावाश्चोक्ताः, किञ्चालौकिकोपि तत्रत्यो गुणः समीचीन इति ज्ञायते यत् **पशव्यो** भवति पशूनां हितः, ते ह्यरण्योपजीविनोरण्यपात्रास्तेषां यद्धितमलौकिकप्रकारेणापि समीचीनमिति, किञ्च तस्मिन् **वने** त्रिविधा भूमिरस्ति, अतिगुप्तातिप्रकटा तृणादिगह्वरा च, तदाह **गोपीनां गोपानां** गवां च **सेव्य**मिति, अन्येषामपि नन्दपुरोहितप्रामाणिकानां तत् सेव्यमित्याह **पुण्याद्रितृणवीरुध**मिति **पुण्याद्रि**र्गोवर्धनः, **तृणा**नि बर्हिः, **वीरुधः** सोमः करीराणि वा, अतस्तामसानां राजसानां सात्त्विकानां च हितकारि तत् स्थानमित्युक्तम् ॥ १७ ॥ एवं स्थानप्रशंसायां सर्वे गोपाला आहुस्तत्तत्राद्यैव **यास्याम** इति, तस्मात् कारणाद् यदि वृन्दावनं तादृशं ततोद्यैव **तत्र यास्यामः**, एवं सर्वेषां सङ्कल्पे प्रधानभूता उपनन्दादय आहुः **शकटान् युङ्क्त मा चिर**मिति, **शकटानां** बलीवर्दैः सह योजनं साधनं, विलम्बनिषेध उत्पातभयशङ्कया ॥ १८ ॥ एवं भयसाधनयोर्निर्देशे यत् कृतवन्तस्तदाह **श्रुत्वे**ति, मध्ये तेषां न वैमत्यं यतो गोपास्तुल्याः, तादृशोर्थः स्वस्यात्यन्तमभीष्ट इति मन्त्रवाक्यप्रशंसा, गच्छन्त एव वदन्तीति**वादिनः**, ते सर्वेवान्तरभिन्नभिन्नव्रजाधिपतयः स्वस्य यत्र यत्र भिन्नतया गावः स्थितास्तान् समुदायेनैव वत्सगोविभागमकृत्वा सम्यगायुज्य योजयित्वाग्रे प्रस्थाय शकटेष्वारोपितोपकरणाः सर्वे एव ततो ययुः ॥ १९ ॥ गताश्चतुर्विधा इति ज्ञापयितुं तमोरजःसत्त्वनिर्गुणरूपान् पृथक् पृथक् चतुर्भिः श्लोकैराह, तत्र प्रथममाह **वृद्धान् बालान् स्त्रिय** इति, अत्यन्तं प्राकृता वृद्धा बालाः स्त्रियश्च, **राज**न्निति सम्बोधनं कदाचित् तीर्थयात्राद्यर्थं सकुटुम्बस्य प्रस्थाने त्वदीयानामपि तथाप्रस्थितिस्तवानुभवसिद्धेतिज्ञापनाय, देशान्तरनिवासार्थमाज्ञप्तानां त्वदीयानां यथा तथेति वा **सर्वोपकरणानि च** शकटेष्वारोप्य गोपाः सर्वे पदातय **आयत्ता** बद्धकवचा **आत्तशरासना** गृहीतधनुषस्तामसत्वाद् राजसेष्वेव सम्बन्धः ॥ २० ॥ **गोधनानी**ति, **गोधनानि** गावः **पुरस्कृत्याग्रे** नीत्वा निर्भया **शृङ्गाण्यापूर्य**, ते तु शृङ्गवादित्रा एव, **सर्वत** इति सकृदेव महान् घोषः, प्रभूणां निर्गमनमाह **तूर्यघोषे**णेति, **पुरोहिता** ब्राह्मणा वैश्ययाजकाः ॥ २१ ॥ गोपिकास्तु भगवद्भोग्याः सात्त्विकयो भिन्नतयैव निर्गता **गोप्य** इति, रथास्तूत्तमा अश्वयोजिता वृषभयोजिता वा, नूतनाः **कुचकुङ्कुमकान्तयो** यासां, वयःसाधनशोभाभोग्या उक्ता भगवत एवेति ज्ञापयितुं तद्गुणानेव गायन्त्यो निर्गता इत्याह **कृष्णलीला**मिति, एकवचनेन स्वोपयोगिन्येव लीला निरूपिता, **कृष्ण**पदेन च न केवलं निरोधपरा किन्त्वानन्दमयीति, **प्रीता** इति मनस्तोषः, **निष्ककण्ठ्य** इति साभरणाः, **सुवाससश्चे**ति देहपरिष्कार उक्तः, गुणगानादेव वाक्परिष्करोपि, एतासामेव रथो भगवांस्तु तास्वेव प्रतिष्ठितो गच्छति ॥ २२ ॥ **यशोदारोहिण्यो**र्भगवत्सम्बन्धाद् गुणातीतयोः पृथग्गमनमाह **तथे**ति, **शकटो** मध्यस्थितः, अनो निकृष्टं रथस्तूत्तमः, तथेति, सौन्दर्यं गुणगानं च, निर्दिष्टं स्थानं यशोदायाः, भगवांश्च प्रधानभूत इति **सार्धद्वयवार्षिको भगवान्**, अतो यशोदाक्रोडे स्थितस्तथा **रामो**पि, **कृष्णरामाभ्यां** सहिते ताभ्यां कृत्वा वा **रेजतुः**, गोपिकानां निकटे तयोर्गमनमाह **तत्कथाश्रवणोत्सुके** इति नामलीलानुरक्तिस्तयोः सूचिता ॥ २३ ॥ न केवलं तत्र गताः किन्तु तत्र प्रतिष्ठिता इत्याह **वृन्दावन**मिति, **वृन्दावनभूमिस्तस्मिन् कल्पे यमुनोत्तरभागे गोवर्धनश्चाकूरस्थाने तदुत्तरणमल्पप्रवाहा च यमुना ह्रदाः परं तत्रागाधा नन्दस्थानं** च **तत्रैव** अस्मिन् कल्पे तु प्रदेशास्तत्तदधिष्ठातृदेवताधिष्ठिता विशकलिततया पतिता इति न काप्यनुपपत्तिः, उत्तरणपक्षेप्यल्पप्रवाहेति नोत्तरणं निरूपितं, वर्षाकाल एव यमुनाया महत्त्वमिति, एते बृहद्वनं परित्यज्य **वृन्दावनं सम्यक् प्रविश्य शकटैरर्धचन्द्रवद् व्रजावासं चक्रुः**, वेष्टनस्थानीया गृहाः, मध्ये गवां स्थानं, प्रथममेवैतत् पश्चाद् यथासुखमेव स्थितिः अर्धचन्द्राकारे बहिर्द्वारं सर्वग्राह्यं भवति, गृहाणां निर्माणं तत्र नापेक्ष्यते, यतो वनमेव **सर्वकालं सुखमावहति**, **शकटै**रिति, रथानां क्रीडार्थं स्थापनं, अनांसि काष्ठाद्यानयनार्थानि, **महादेवो** हि **पशु**पतिस्तच्चिह्नमर्धचन्द्रः, अतः प्रतिष्ठितो भवतीति ॥ २४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

वृद्धान्बालानित्यादिषु । तदा केवलं स्वोपकरणमात्रपरत्वे तामसत्वं, प्रभुत्वेन कर्ममार्गीयद्विजसहितत्वेन च राजसत्वम् । प्रमाणप्रकरणे यशोदानन्दनिरोधो मुख्य इत्येतत्प्रकरणार्थभूतनिरोधतारतम्यज्ञापनाय सात्त्विकत्वकथनम् ॥ २० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

वनमित्यत्रारण्यपात्रा इति 'पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषम् अरण्यपात्रे चाधुक्ष्य'न्निति **चतुर्थस्कन्ध**वाक्यात् ते तथेत्यर्थः ॥ १७ ॥ **वृद्धान् बालानित्यत्राभासे** ये चतुर्विधा उक्तास्तत्स्वरूपं **टिप्पण्यामाहुर्वृद्धानित्यादि कथन**मित्यन्तं, तथा च कालभेदेन भावभेदात् सर्वेषां चातुर्विध्यं यथा सर्गलीलायां चतुर्मुखस्येति बोध्यम् ॥ २० ॥ **गोप्य इत्यस्याभासे** पूर्वं स्त्रीनिर्देशेप्यत्र न पुनर्निर्देश इति तत्तात्पर्यमाहु**र्गोपिकास्त्वि**त्यादि, **अस्मिन्नर्थे** विनिगमकमाहु**र्गोप्य इ**तीति, एतत्पदवाच्यत्वमेतासामेवेति तु "गोप्यः कृष्णे वनं याते" इत्यत्र **युगलगीते** विवृतमाचार्यैः ॥ २२ ॥ **तथेत्यत्रातिदिष्ट**मिति **तथेतिपदेनातिदिष्टं**, **अनिर्दिष्ट**मितिपाठे त्वतिदिश्यत इतिशेषः, सौन्दर्यगुणगानयोरतिदेशे हेतुमाहुः **स्थान**मित्यादि, तथा च यत्र यशोदात्री तिष्ठति तत्र सौन्दर्यं यशश्च भवत्येव यत्र भगवांस्तिष्ठति तत्रापि तथेत्यर्थः, इदं चाग्रे 'श्रवणोत्सुक' पदाज्

ज्ञानाभावं 'शकट' पदात् सौन्दर्याभावं चाशङ्क्य तन्निवृत्तय उक्तं 'तथा' पदसार्थक्याय चेति ज्ञेयं, सार्द्धद्वयवार्षिक इ'त्यष्टाविंशतिमे मासि' यमलार्जुनभङ्गलीलाया पाद्म उक्तत्वात् तथेत्यर्थः ॥ २३ ॥ **वृन्दावनं सम्प्रविश्येत्यत्र** मध्येमार्गं **यमुनोत्तरणस्या**नुक्तत्वात् **वृन्दावनस्य** च मथुरानिकटस्थत्वादुत्तरणं विना तत्र कथं गमनमित्याकाङ्क्षायां कल्पभेदेन व्यवस्थामाहु**र्वृन्दाव**नेत्यादि, **यद्यपीदानीं गोवर्धनः पश्चिमे वृन्दावनं च वायव्ये तथापि तस्मिन् कल्पे श्रीयमुनाप्रवाहस्यात्र पूर्वगामित्वाद् वृन्दावनश्रीगोवर्धनगोकुलानामुत्तरतटस्थत्वान्** नोत्तरणोक्तिरित्यर्थः, पक्षान्तरमाहु**रक्रू**रेत्यादि, **तत्रैवेति** ह्रदनिकट एवोत्तरणस्थाननिकटे वा, एतत्कल्पीयव्यवस्थामाहु**रस्मिन्नि**त्यादि, **यथासुखमेव स्थितिरिति** नूतनगृहादिकरणेन **स्थितिः**, तदेतद् **ब्रह्मवैवर्ते स्फुटं, पाद्मोत्तरखण्डे** तु गमनदिनमप्युक्तं 'मार्गशीर्षस्य पञ्चम्यामुत्पातभयशङ्किताः गोपा गोकुलमानिन्युः सर्वं **वृन्दावनं** शुभं **नन्दग्रामं** ततो गोपा ह्रदमेव वदन्ति ही'तिवाक्यात्, यद्यप्यत्र पञ्चम्यां शुक्लकृष्णविभागो नोक्तस्तथापि पूर्वोक्तमुग्धलीलानां तत्र तत्र करणानुरोधाच् शुक्ल इति प्रतिभाति तथा सति सा लीला चतुर्दशदिनावधि भवत्यन्यथा चतुर्दिनमात्रैवेति, अत एव वृक्षभङ्गदिन एव न ततो निष्क्रमणमिति बोध्यं, अर्धचन्द्राकारकरणतात्पर्यमाहु**रर्धे**त्यादि, **सर्वग्राह्यमिति सर्वे ग्राह्या** यस्मिन् प्रवेशनिर्गमयोरित्यर्थः, यद्वा गृहमध्ये यत्र कुत्रचित् स्थितानामपि दृष्टिगोचरं यद् भवति तत् तथेत्यर्थः, **नापेक्ष्यत** इति शीघ्रं **नापेक्ष्यते,** तत्करणस्यैव तात्पर्यमाहु**र्महादेव** इत्यादि, **प्रतिष्ठित** इति पशुपालनाय **प्रतिष्ठित** इत्यर्थः, **वृन्दावनगोवर्धन**मिति षोडशः श्लोकः, एतावत्पर्यन्तैः स्थानान्तरपरिग्रह उक्तः ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

वनं वृन्दावनमित्यत्र **स्त्रीप्राधान्यादिति** दैत्यानां स्त्रीरक्षाया मुख्यत्वात् तत्स्थाने ते नायान्तीत्यर्थः, तर्हि शत्रुस्त्रीस्थानत्वाद् देवा एव उपद्रवं कुर्युरित्याशङ्क्य देवानामप्यनुरोधमाहुः **भगवतेति**, **यतः पशव्य** इति देश इत्यर्थः, **अरण्यपात्रा** इति पृथुसम्पादितदोहे पशूनामरण्यं पात्रमुक्तं, **गोपीगोपे**त्यस्याभासे **अतिगुप्ते**ति अन्तरङ्गलीलाज्ञानाभावेपि स्त्रीणां निःसङ्कोचेन यथासुखं स्थितिरतिगुप्त एव सम्भवतीत्येवमुक्तं, मन्त्रे स्त्रीरक्षाया मुख्यत्वेन गोपीनामभ्यर्हितत्वात् पूर्वनिपातः, अत इति पशव्यत्वात् **तामसानां** गोप्यादिसेव्यत्वाद् **राजसानां** पुण्याद्रथादियुक्तत्वात् **सात्त्विकानां हितकारी**त्यर्थः ॥ १७ ॥ **गोप्य** इत्यत्र **वयःसाधने**ति भगवद्भोग्या वय आदय उक्ता इत्यर्थः, गोपीपदेन पुंयोगयोग्यत्वात् तारुण्यं निरूपितं, तस्यान्यभोग्यत्वमाशङ्क्याहु**र्भगवत एवेति**, **केवलं निरोधपरे**ति पूतनामारणादिलीलेत्यर्थः, **एतासामेवे**ति यशोदारोहिण्योस्तु शकटो वक्ष्यते इत्येवकारः, एतासां तथाधिक्ये हेतुमाहु**र्भगवांस्त्वि**ति, एतासामेव हृदयेषु प्रतिष्ठितः स्थिरः सन् गच्छति, यशोदाक्रोडादिषु गच्छत्यागच्छति च न तु स्थिर इति **तु** शब्दः, अत एतासामेव रथ उक्त इति भावः ॥ २२ ॥ **वृन्दावन**मित्यत्र **नन्दस्थानं चेति** नन्दग्रामोपि गोवर्धनसमीप एवेत्यर्थः, तदा वरसान्वादयोपि तत्रैवेतिज्ञेयं, **तत्तदधिष्ठातृदेवते**ति व्यापि वैकुण्ठरूपस्वस्वाधिदैविकस्थानसहिता इत्यर्थः, **वेष्टने**ति शकटा एव गृहरूपा इत्यर्थः, **गृहाणा**मिति अन्तरङ्गलीलार्थं तादृशनिकुञ्जेषु शीतादिनिवारकमन्दिरनिर्माणमित्यर्थः ॥ २४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

वनं वृन्दावनं नामेत्यत्र **अरण्यपात्रा** इति चतुर्थस्कन्धे पृथुकर्तृकपृथ्वीदोहप्रसङ्गे पशूनामरण्यपात्रता निरूपिता, **त्रिविधा भूमिरि**त्यादि तत्रा**तिगुप्ता** निकुञ्जादिरूपा **गोपीनां** सेव्या भगवता सह लीलानामभिलषितत्वात् **अतिप्रकटा गोपानां तृणादिगह्वरा गवां सेव्ये**ति सर्वेषां व्रजस्थानां हितं वृन्दावनमित्यर्थः ॥ १७ ॥ **गोप्यो रूढरथा** इत्यस्याभासे **भिन्नतयैव निर्गता** इति शृङ्गाररसोपयोगिसम्पत्त्या **निर्गता** इत्यर्थः, अत एव न शकटारोहणं किन्तु रथारोहणं, **वयःसाधनशोभाभोग्या उक्ता** इति वयःसाधनशोभा भगवदेकभोग्या उक्ता इति ज्ञेयं, इह **कुचकुङ्कुमकान्तय** इति पदत्रयेण क्रमेण **वयःसाधनशोभा भगवदेकभोग्या उक्ता** इति ज्ञेयं, **कृष्णपदेने**ति "स्त्रीभावो गूढः पुष्टिमार्गे तत्त्वमिति कृष्णपदार्थ" इत्यग्रे वक्ष्यमाणत्वात् स्त्रीभावयुक्तो भगवान् कृष्णपदवाच्यः, स च रसाधिक्यवत्त्वादानन्दमय इति एतल्लीलाया अप्यानन्दमयत्वमितिभावः, निरोधपरायां लीलायां तु माहात्म्यांशोप्यस्तीति तदपेक्षयेयं लीलोत्कृष्टेत्यर्थः, **भगवांस्तु तास्वेवे**ति वयःसाधनशोभानां कुचकुङ्कुमकान्तय इति पदेनोक्तत्वात् तत्सार्थक्याय भगवान् तासां निकटे एव तिष्ठतीतिज्ञेयं, अन्यथा वय आदीनामुक्तिर्व्यर्था स्यात्, बाल्यभावे हि सर्वेषां निर्दोषबुद्धिरिति न किञ्चिद् बाधकम् ॥ २२ ॥ **तथा यशोदारोहिण्यावि**त्यस्य विवृतौ **यशोदाक्रोडे स्थित** इति बालकृष्णो हि बालस्वभावात् कदाचिद् यशोदाक्रोडे कदाचिद् गोपिकानिकटे तद्रथेषु तिष्ठति तत्रापि गोपिकानिकटेधिकं तिष्ठतीति बोध्यम् ॥ २३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं चेत्तर्हि स्थलान्तरं विचार्यताम्, इत्यत्राह–वनमिति। वृन्दावानाख्यं वनम् 'अस्ति'इति शेषः। तद्विशिनष्टि–गोपगोपीगवां सेव्यमिति। तत्र हेतुमाह–पशव्यमिति। पशुभ्यो हितम्। तत्र हेतुमाह–नवानि काननान्यवान्तरवनानि यस्मि-

स्तत्, तथा पुण्याः पवित्रा दर्शनस्पर्शादिना पुण्यजनका अद्र्यादयो यस्मिंस्तत् ॥ २८ ॥ यस्मात् सर्वसुखावहं तत्तस्मात्तत्राद्यैव यास्यामः। शकटान् युङ्क्त बलीवर्दयुक्तान् कुरुत, मा चिरं विलम्बो न कर्तव्यः। गोधनान्यग्रतो यान्तु। एवमुक्त्वाऽपि 'प्रारब्धवशात् कदाचित्तत्रापि कश्चिदुत्पातः स्यात्' इत्याशङ्क्याह–भवतां यदि तत्र गमनं रोचते, 'तर्हि गन्तव्यम्' इति शेषः ॥ २९ ॥ तदुपनन्दवचः श्रुत्वा एकधियः विप्रतिपत्तिरहिताः गोपा नन्दादयः स्वान् स्वान् व्रजान् शकटान् समायुज्य रूढाः शकटे आरोपिताः परिच्छदा उपकरणानि यैस्ते ययुः ॥ ३० ॥ एतदेव स्पष्टयति–वृद्धानिति। 'राजगमनमिव तेषामपि गमनमभूत्, इत्याशयेन सम्बोधयति–हे राजन्! यत्ताः कृतप्रयत्नाः आत्तानि गृहीतानि शरासनानि यैः ते गोपाला वृद्धादीन् अनस्स्वारोप्य ॥ ३१ ॥ गोधनानि पुरस्कृत्य अग्रतः कृत्वा सर्वतः शृङ्गाण्यापूर्य निर्गमनज्ञापनार्थं महान्तं शृङ्गशब्दं कृत्वा महता तूर्यघोषेण सह महान्तं तूर्यशब्दं कुर्वतः पुरोहितैर्ब्राह्मणैः सह ततो निर्ययुरित्यन्वयः ॥ ३२ ॥ रूढरथाः रथोपर्यारूढाः। नूतनैः कुचगतैः कुङ्कुमैः कान्तिर्यासां ताः, यद्वा नूत्नेषु कुचेषु यत् कुङ्कुमं तेन कान्तिर्यासां ताः। 'निष्ककण्ठ्य' इत्युपलक्षणम्, सर्वाभरणभूषिता इत्यर्थः। सुष्टु वासांसि यासां ताः। एवंभूता गच्छन्त्यो गोप्यः कृष्णलीलां जगुः ॥ ३३ ॥ तथा तयोः कृष्णरामयोः कथानां श्रवणे उत्सुकमुत्साहो ययोस्ते यशोदारोहिण्यौ कृष्णरामाभ्यां सहैकं शकटमास्थिते आरुह्य स्थिते रेजतुरित्यन्वयः ॥ ३४ ॥ एवं शकटैर्वृन्दावनं सम्प्रविश्य समागत्य गोपास्तत्र अर्धचन्द्रवत् अर्धचन्द्राकारं व्रजावासं गोकुलवसतिस्थानं चक्रुरित्यन्वयः। वृन्दावनस्य सर्वोत्तमत्वमाह–सर्वेति। सर्वेषु ग्रीष्मादिष्वपि कालेषु सुखमेवावहति प्रापयतीति तथा तत् ॥ ३५ ॥

अन्वितार्थप्रकाशिका

वनमिति ॥ पशव्यं पशुभ्यो हितं नवानि काननान्यवान्तरवनानि यस्मिंस्तत् गोपगोपीगवाम्। एकशेषाभाव आर्षः। स्पष्टार्थो वा। प्रागुक्तरीत्या सेव्यं पुण्याः पवित्रा दर्शनस्पर्शादिना पुण्यजनका अद्र्यादयो यस्मिंस्तत् वृन्दायाः पाद्मकार्तिकमाहात्म्योक्ताया वनं वृन्दावनाख्यं सर्वक्षेमकरं वनमस्ति। वीरुधशब्दाट्टाप् ततः समासः ॥ २७ ॥ तत्तत्रेति ॥ यस्मात्सर्वसुखावहं तत्तस्मात् यदि भवतां भवद्भ्यः। शेषे षष्ठी। तत्र गमनं रोचते तर्हि तत्राद्यैव यास्यामः शकटान् युङ्क्त बलीवर्दयुक्तान् कुरुत। युंक्ष्वेति एकवचनपाठे नन्दं प्रत्युक्तिः। मा चिरं विलम्बो न कर्तव्यः। गोधनान्यग्रतो यान्तु ॥२८॥ तच्छ्रुत्वेति। तदुपनन्दवचः श्रुत्वा एकधियः विप्रतिपत्तिरहिताः साधु साधु इति वादिनः गोपा नन्दादयः स्वान् स्वान् व्रजान् शकटादियूथान् समायुज्य रूढाः शकटे आरोपिताः परिच्छदा उपकरणानि यैस्ते ययुः ॥ २९ ॥ वृद्धानिति द्वयम् ॥ हे राजन्! यत्ताः कृतप्रयत्नाः आत्तानि गृहीतानि शरासनानि यैः ते गोपालाः वृद्धान् बालान् स्त्रियः सर्वाण्युपकरणानि च अनःसु शकटेष्वारोप्य गोधनानि पुरस्कृत्य अग्रतः कृत्वा सर्वतः शृङ्गाण्यापूर्य निर्गमनज्ञापनार्थं महान्तं शृङ्गशब्दं कृत्वा महता तूर्यघोषेण सह महान्तं तूर्यशब्दं कुर्वन्तः पुरोहितैर्ब्राह्मणैः सह ततो निर्ययुः ॥ ३०–३१ ॥ गोप्य इति ॥ रूढा रोहणकर्मीकृताः रथा यैः रथान् आरूढा इति। नूत्नैः कुचगतैः कुङ्कुमैः कान्तिर्यासां ताः प्रीताः निष्ककण्ठ्यः उपलक्षणतया सर्वाभरणभूषिताः सुष्ठु वासांसि यासां ताः एवंभूताः गच्छन्त्यो गोप्यः कृष्णलीलाः जगुः ॥ ३२ ॥ तथेति ॥ तथा तयोः कृष्णरामयोः कथानां श्रवणे उत्सुके उत्कण्ठिते यशोदारोहिण्यौ कृष्णरामाभ्यां सहैकं शकटमास्थिते आरुह्य स्थिते रेजतुः ॥ ३३ ॥ वृन्दावनमिति ॥ एवं सर्वेषु कालेषु ग्रीष्मादिष्वपि सुखमेवावहति प्रापयति तत् वृन्दावनं संप्रविश्य गोपास्तत्र शकटैः प्रथमदिने शकटैरेव अर्द्धचन्द्रवत् धनुराकारं व्रजावासं गोकुलस्य वसतिस्थानं चक्रुः। दिनान्तरे तु "कण्टकीभिः प्रवृद्धाभिस्तथा कण्टकिभिर्द्रुमैः ॥ निपातोच्छ्रितशाखाभिरभिगुप्तं समंततः ॥" इति हरिवंशरीत्या चक्रुः। धनुराकारता च पश्चाद्भागे स्वद्रव्यस्थापनार्थमग्रभागे विस्तीर्णे गवादीनां सुखनिर्गमार्थं च ॥ ३४ ॥ वृन्दावनमिति ॥ हे नृप! वृन्दावनं गोवर्द्धनं गिरिं यमुनायाः पुलिनानि जलोत्थिततटानि च वीक्ष्य राममाधवयोः उत्तमा प्रीतिः आसीत्। प्रथमं पूतनानाशस्ततः शकटभञ्जनं नाम कर्माघृष्टजानुरिङ्गणं च ततो वधः तृणावर्तस्याथ विश्वदर्शनं प्रथमं ततः गोपीभिस्तोभितेत्यादि वत्सपुच्छग्रहस्ततः मृत्तिकाभक्षणं तत्र द्वितीयं विश्वदर्शनं दधिक्षीरादि चौर्यं चोलूखले बन्धनं ततः सरित्तीरेत्यादि वृन्दावने रम्ये प्रवेशनं बृहद्वनस्थलीलानां क्रमोऽयं तोषणीमतः ॥ ३५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पशुभ्यो हितं सुजनकं पशव्यं नवानि काननानि अवांतरवनानि विद्यंते यस्मिन् पुण्यः पवित्र अद्रिर्गोवर्द्धनश्च तृणानि च वीरुधो लताश्च यस्मिंस्तथाभूतं वृंदावनमस्ति ॥ २५ ॥ तत्तस्मात् तत्र वृंदावने शकटान् युंक्त तेषामनडुद्भिः सह संयोजनं कुरुध्वं मा चिरं विलंबं मा कुरुत ॥ २६ ॥ रूढाः शकटनिक्षिप्ताः परिच्छदाः गृहसामाग्र्यो यैस्ते व्रजान् शकटसमूहान् समायुज्य बलीवर्दैः संयोज्य ॥ २७ ॥ यत्ताः विहितोद्यमाः आत्तानि गृहीतानि शरासनानि धनूंषि यैस्ते ययुरिति पूर्वेण संबंधः ॥ २८ ॥ आपूर्य वादयित्वा ॥२९॥ रथेषु रूढा आसीनाः रूढरथाः राजदंतादित्वात्पूर्वप्रयोगार्हस्य परनिपातः नूत्नैर्नवीनैः

स्तनगतैः कुंकुमैः कांतिः शोभा यासां ताः निष्ककंठ्यः कंठाभरणयुक्ताः ॥ ३० ॥ स्यंदनं रथं शकटमिति पाठांतरं आस्थिते निषण्णे ॥ ३१ ॥ व्रजस्य गोसमूहस्य आवासं निवासस्थानम् ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

क यास्यामेत्यत्राह ॥ वनमिति ॥ पशव्यं पशुभ्यो हितं, नवानि काननानि पर्यन्तवनानि यस्मिंस्तत्, गोपाश्च गोप्यश्च गावश्च तासां, सेव्यं संवासयोग्यं पुण्या रमणीयाः अद्रिश्च तृणानि च वीरुधश्च यस्मिंस्तत्, वृन्दावनं नाम, वृन्दावनाख्यया प्रसिद्धं, वनं, भवति ॥ २७ ॥ तदिति ॥ तत्तस्मात्, तत्र, अद्य एव यास्यामः । शकटान् युङ्क्त । प्रस्थानोचितान् कुरुतेत्यर्थः । चिरं मा, विलम्बो न कार्य इत्यर्थः । गोधनानि गवां समूहाश्च, गोरूपाणि धनानि वा । अग्रतः यान्तु । भवतां सर्वेषां, यदि रोचते । सर्वरुचिमन्तरेण गमनस्यानर्हत्वादिति भावः । 'क्लीबेऽनः शकटोऽस्त्री स्यात्' इत्यमरः । इति द्वयोः संबन्धः ॥ २८ ॥ तदिति ॥ तदुपनन्दवचः श्रुत्वा, एकधियो विप्रतिपत्तिरहिताः, साधु साधु इत्येवंवादिनः, गोपाः, स्वान् स्वान्, व्रजान् शकटव्यूहान्, समायुज्य समानीय, रूढाः शकटानारोपिताः परिच्छदा उपकरणानि यैस्तथाभूताः सन्तः, ययुः ॥ २९ ॥ तदेव प्रपञ्चयति ॥ वृद्धानिति ॥ हे राजन्, वृद्धान्, बालान्, स्त्रियः, सर्वोपकरणानि च, अनःसु शकटेषु, आरोप्य, यत्ताः संनद्धाः, आत्तानि शरासनानि यैस्तथाभूताः, गोपालाः ॥ ३० ॥ गोधनानीति ॥ गोधनानि पुरस्कृत्य, सर्वतः सर्वेऽपि, शृङ्गाणि, आपूर्य मुखमारुतेन ध्वनयित्वा, महता तूर्यघोषेण सह, सहपुरोहिताः सगुरवः, ययुर्जग्मुः । इति द्वयोरेक संबन्धः ॥ ३१ ॥ गोप्य इति ॥ रूढा आरूढा रथा याभिस्ताः, नूत्नैर्नवीनैः कुचकुङ्कुमैः कुचगतकुङ्कुमैः कान्तिर्यासां ताः, निष्काः पदकाख्याभरणानि कण्ठेषु यासां ताः, स्निग्धकण्ठ्य इति पाठे मधुरस्वनाः, प्रीताः प्रसन्नतोपेताः, सुवाससः परिहितशोभनवसनाः, गोप्यः, कृष्णलीलाः, जगुः ॥ ३२ ॥ तथेति ॥ तथा एकं श्रेष्ठं, 'एकं संख्यान्तरे श्रेष्ठे' इति मेदिनी । शकटं भारवहनसमर्थतयाऽन्वर्थसंज्ञं अनः, आस्थिते आरुह्य स्थिते, यशोदारोहिण्यौ, तस्य श्रीकृष्णस्य कथायाः श्रवणे औत्सुक्यं ययोस्ते तथाभूते सत्यौ, कृष्णरामाभ्यां सह, रेजतुः ॥ ३३ ॥ वृन्दावनमिति ॥ सर्वकालसुखावहं, वृन्दावनं संप्रविश्य, तत्र वृन्दावने, शकटैः, अर्द्धचन्द्रवदर्द्धचन्द्रतुल्यसंनिवेशं, व्रजावासं गोकुलवसतिस्थानं, चक्रुः ॥ ३४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वनं वृन्दावनमिति : १०.११.२८.

स्याच्चेदीशकृपा तदा न भविता बाधा कुतः कर्हिचित् प्रत्यूहप्रचयस्तु गोकुलजुषां प्रादुर्भवत्यन्वहम् ।
तस्मात्सोऽपि भवेन्न यावदमले तावद् विविक्ते वने स्थेयं बुद्धिमतेत्यचोदुचितं वृन्दावनस्थायिताम् ॥ २९ ॥

न योगशिक्षा न च मन्त्रदीक्षा तपःसमीक्षाऽपि न विघ्नहन्त्री । कलावलं गोकुलवासिनां तु सदैकवृन्दावनदृष्टिरेव ॥ ३० ॥

उत्पाद्य स्वयमेव विघ्ननिचयं दुर्भीतिमात्रप्रदं चेतः प्रेयसि गोकुलेऽप्यतलमनासक्ति समुत्पाद्य च ।
सद् वृन्दावनपुण्यशालिनमहं कर्ताऽवनौ भक्तमित्यद्धाऽबोधयदच्युतो व्रजजनं वृन्दावने योजयन् ॥ ३१ ॥

तच्छ्रुत्वेति : १०.११.३०.

यत्रकमत्यं किं तत्र दुस्त्यजं दुर्लभं च वा । यद् गोपैर्गोकुलं त्यक्तं लब्धो वृन्दावनक्रमः ॥ ३२ ॥

गोधनानि पुरस्कृत्येति : १०.११.३२.

साधुवृन्दावने दिव्याः साधनानि गिरः सताम् । इत्यध्वन्यध्वनि तदा गोपुरस्करणेन तैः ॥ ३३ ॥
पुरोहितं ये पश्यन्तः प्रणवोत्सवशालिनः । वृन्दावने क्षणोल्लासा युक्तास्ते श्रितगोधनाः ॥ ३४ ॥

वृन्दावनमिति : १०.११.३५.

क्षेत्राणि तीर्थान्यपि साधनानि बहूनि किञ्चित्सुखदानि सन्तु । नित्यानवद्यस्वसुखप्रदा तु तत्साधुवृन्दावनवृत्तिरेव ॥ ३५ ॥

कृष्णप्रिया

श्रीवृन्दावन नाम का एक उत्तम वन है वह नित्य नित्य नया सा ही है वहाँ नये-नये हरे-भरे तरुवर है वहाँ के तरुवर शीर्ण होते नहीं, शृगाल सर्पादि का भय नहीं अतः पशुओं के लिये हितावह वन है, पुनः पुण्य श्रीगोवर्धन महाद्रि है, भारी प्रमाण में घास है, और हरी-हरी लता और वनस्पतियाँ है मेरे समझ में तो गोप गोपीजन और अपने गोधन के लिये यह वन कल्याण कारी है ॥ १७ ॥ श्रीनन्दजीने कहा कि यदि आप सबको यह बात जँचती हो-सबको पसन्द हो तो वहाँ जाने के लिए आज ही प्रस्थान कर देना चाहिए विलंब न करें । सब गोप गाड़ी-छकड़े जोतें और गौओं ही अपना

धन है उनको आगे कर मङ्गल प्रस्थान करें ॥ १८ ॥ वयोवृद्ध श्री उपनन्दजी की बात सुनकर एक ही आवाज से सबने बहुत अच्छा बहुत अच्छा यों कहते हुए एक मत से बात मानली और गोपोंने अपनी अपनी गौओं के वृन्द को इकट्ठा कर पुनः छकड़ों को जोत कर घर का सामान छकड़ों पे लादकर उनपर पर्दा डाल एक साथ सबने मङ्गल यात्रा आरंभ की ॥१९॥ राजन् परीक्षित् ! वृद्ध गोप लोगोंने, बच्चे, और स्त्रीजन एवं घर की सामग्री को गाड़ी पर चढ़ा दिया और स्वयं धनुष बाण तानकर सावधान होकर सब चलने लगे ॥ २० ॥ गोओं को आगे कर प्रस्थान के अवसर जोर जोर से सींगा फूँककर तुरही को जोर से बजाते हुए अपने पुरोहितजी को लिये हुये चले ॥२१॥ वक्षःस्थल पर केसर कुंकुम के लेप लगाने से गोपियों की कान्ति और बढ़ गयी थी उन्होंने अपने कंठ में सुवर्ण के हंसुली हार धारण किये थे, उत्तम प्रकार की साड़ी पहन ली थी रथों पर सवार थी और बड़े आनन्द से प्यारे नन्द दुलारे श्रीकृष्ण की लीलाओं के गीत गाती जाती थी ॥ २२ ॥ यशोदा महारानीजी और रोहिणी देवी बलभद्र और कृष्ण को लिये एक रथ में बैठी खूब शोभती थी। गोपियों से उन दोनों लालन की लीला बड़े चाव से सुन रही थी ॥ २३ ॥ श्रीवृन्दावन सर्वकाल सर्व ऋतुओं में सुख से ही भरा है। गोप लोग वहाँ पहुँचे और सर्व प्रथम तो उन्होंने गाड़ियों को अर्धचन्द्राकार मण्डल में खड़ाकर ही गौओं के रहने का स्थान बना लिया ॥ २४ ॥

वृन्दावनं गोवर्धनं यमुनापुलिनानि च । वीक्ष्ययासीदुत्तमा प्रीती राममाधवयोर्नृप ॥ २५ ॥
एवं व्रजौकसां प्रीतिं यच्छन्तौ बालचेष्टितौ[1] । कलवाक्यौ[2] स्वकालेन वत्सपालौ बभूवतुः ॥ २६ ॥
[3]अविदूरे व्रजभुवः सह गोपालदारकैः । चारयामासतुर्वत्सान् नानाक्रीडापरिच्छदौ ॥ २७ ॥
क्वचिद् वादयतो वेणुन्[4] क्षेपणैः क्षिपतः क्वचित् । क्वचित् पादैः किङ्किणीभिः क्वचित् कृत्रिमगोवृषैः ॥ २८ ॥
[5]वृषायमाणौ नर्दन्तौ युयुधाते परस्परम् । [6]अनुकृत्य रुतैर्जन्तूंश्चेरतुः प्राकृतौ यथा ॥ २९ ॥
कदाचिद् यमुनातीरे वत्सांश्चारयतोः स्वकैः । वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ॥ ३० ॥
तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः । दर्शयन् बलदेवाय शनैर्मुग्ध इवासदत् ॥ ३१ ॥
गृहीत्वापरपादाभ्यां सहलाङ्गूलमच्युतः । भ्रामयित्वा कपित्थाग्रे प्राहिणोद् गतजीवितम् ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—नृप ! राममाधवयोः वृन्दावनं गोवर्धनं च यमुनापुलिनानि वीक्ष्य उत्तमा प्रीतिः आसीत् ॥ २५ ॥ एवं बालचेष्टितौ कलवाक्यौ व्रजौकसां प्रीतिं यच्छन्तौ स्वकालेन वत्सपालौ बभूवतुः ॥ २६ ॥ नानाक्रीडापरिच्छदौ गोपालदारकैः सह व्रजभुवः अविदूरे वत्सान् चारयामासतुः ॥ २७ ॥ कचित् वेणून वादयतः कचित् क्षेपणैः क्षिपतः कचित् किङ्किणीभिः पादैः कचित् कृत्रिमगोवृषैः वृषायमाणौ नर्दन्तौ परस्परं युयुधाते रुतैः जन्तून् अनुकृत्य प्राकृतौ यथा चेरतुः ॥ २८–२९ ॥ कदाचित् यमुनातीरे स्वकैः वयस्यैः वत्सान् चारयतोः कृष्णबलयोः जिघांसुः दैत्यः आगमत् ॥ ३० ॥ हरिः वत्सयूथगतं वत्सरूपिणं तं वीक्ष्य शनैः बलदेवाय दर्शयन् शनैः मुग्ध इव आसदत् ॥ ३१ ॥ अच्युतः सहलाङ्गूलं अपरपादाभ्यां गृहीत्वा भ्रामयित्वा गतजीवितं कपित्थाग्रे प्राहिणोत् ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वकालेन वत्सपालनयोग्यकालेन ॥ ३७ ॥ कौमारलीलां निरूपयति अविदूर इत्यादिना ॥ ३८ ॥ क्षेपणैर्बिल्वामलकादि क्षिपतो दूरे चालयतः । किंकिणीयुक्तैः पादैः क्षिपतस्ताडयतः ॥ वृक्षादीनिति शेषः । वत्सपाला एव छित्राः कंबलादिपिहिता वृषरूपमनुकुर्वंति तैः सह स्वयमपि तथैव ॥ ३९ ॥ वृषायमाणौ नर्दंतौ तदनुकारिशब्दान्कुर्वंतौ युयुधाते इत्यर्थः । रुतैः शब्दैः। जंतून् हंसमयूरादीन् ॥ ४०–४१ ॥ मुग्ध इवाजानन्निवाऽऽसदत्समीपमागमत ॥ ४२ ॥ सहलांगूलं यथा भवति तथा अपरपादाभ्यां गृहीत्वा ॥ ४३–४४ ॥

---

[1] चेष्टितैः-श्रीधर. वंशी । [2] वाक्यैः-श्रीधरः वंशी. । [3] अतिदूरे-वंशी. । [4] वेणु.-श्रीधर. वंशी. । [5] गोपैर्वृषानुचरितौ-ष. पु. टी. ।

[6] चकोरक्रौञ्चचक्राङ्गभारद्वाजान्सबर्हिणः । अनुरोदिति सत्त्वान्वे भीतवद्व्याघ्रसिंहयोः ॥

अर्धद्वयमिदं क्वचिदधिकं दृश्यते ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

राममाधवयोः बलकृष्णयोः। उत्तमाऽत्यंता हे नृपेति संबोधनं तु प्रहर्षाधिक्यादेव उत्तमा वैकुंठाद्यपेक्षाया "अहो मधुपुरी धन्या वैकुंठाच्च गरीयसी" इति प्राप्ततादृशमाहात्म्या मधुवनमहावनापेक्षया चेति ज्ञेयम् ॥ ३६ ॥ कलवाक्यैर्मधुरास्फुटै र्वचनैः "ध्वनौ तु मधुरास्फुटे। कले" इत्यमरः। तद्योग्यकालेन वत्सपालनार्हसमयेन ॥ ३७ ॥ कौमारलीलां कुमारावस्थलीलाम्। अविदूरे समीपे। चारयामासतुः तृणानि भक्षयांचक्रतुः ॥ ३८ ॥ क्षेपणै रश्मयंत्रैर्वा कृत्रिमगोवृषैर्मृदादिनिर्मितगोवृषैर्वा ॥ ३९ ॥ इत्यर्थ इति। नहि केवलं शब्दं युद्धं विना वृषाः कुर्वंतीति भावः। अनुकृत्य विडंब्य ॥ ४० ॥ जिघांसुः हननेप्सुः ॥ ४१ ॥ तं दैत्यं मुग्ध इवाज्ञात इव ॥ ४२ ॥ अपरपादाभ्यां पश्चिमपादाभ्याम्। कपित्थाग्रे दधिफलसंज्ञवृक्षोपरि प्राहिणोत्क्षिक्षेप। कपित्थाग्रे प्रक्षेपणं तु तदानींतनक्रीडोपयोगिफलपातनार्थमेवेति तोषिणीकारः। स दैत्यः। अन्यैः कपित्थैः। कपित्थशाखायुक्तफलैर्वा॥४३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत्र श्रीबृहद्वनलीलायां प्रसिद्ध्या वयोयोग्यतादिना च क्रमोयं लक्ष्यते पूतनावधः शकटभञ्जनं नामकरणं रिङ्गणम् अघृष्टजानुरिङ्गणं तृणावर्तवधः प्रथमविश्वदर्शनं गोपीभिः स्तोभित इत्यादि क्रीणीहि भो इत्यादिवत्सपुच्छग्रहणं मृत्तिकाभक्षणं द्वितीयविश्वदर्शनं दधिपयश्चौर्यम् उलूखलबन्धः सरित्तीरगतमित्यादिवृन्दावनप्रवेश इति। अथ श्रीवृन्दावनलीलामुपक्रमते; एवं पूर्वोक्तप्रकारेण कलवाक्यैर्मनोहरभाषितैश्च प्रीतिमानन्दं यच्छतौ कलवाक्याविति पाठे स एवार्थः। स्वकालेनेति। कौमारमध्य एवेत्यर्थः। "कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले। अघृष्टजानुभिः पद्भिः विचक्रमतुरोजसा" इत्युक्त्वाचतुर्थस्यापि वर्षस्यापि वर्षस्यान्ते ऽवश्यं कौमारपरित्यागो लभ्यते पञ्चमस्य तु साधारण्यापत्तेः वृन्दावने च कौमारलीलावत्सहरणसम्बन्धिवर्षस्यान्तर्भावात् प्रायः सार्द्धमेकवर्षं भवेत् "एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे" इति तदनन्तरमुक्त्वा ततश्च पौगण्डवयःश्रितौ व्रज इति हि वक्ष्यते तस्मादत्रैवमूह्यं बृहद्वने मासत्रयाधिकवर्षद्वयं स्थित्वा तृतीये वृन्दावनमागत्य बाल्यलीलया मासान् कतिचिन्नीत्वा तदनन्तरं वत्सपालौ बभूवतुरिति अतो यत्तु श्रीहरिवंशे बृहद्वनक्रीडायामेवोक्तम्—

एवं तौ बाल्यमुत्तीर्णौ कृष्णसङ्कर्षणावुभौ। तस्मिन्नेव व्रजस्थाने सप्तवर्षौ बभूवतुः ॥ इति

तच्च प्रौढत्वापेक्षया सप्तवर्षाविवेति मन्तव्यं विरोधान्तरवत्कल्पभेदाविवक्षयेति केचित् ॥२६॥ अविदूर इति नातिदूरे बाल्यात् न चातिनिकटे सतृणाभावात् सुखविहारासिद्धेश्च किं तु व्रजस्थानादाह्वानप्राप्यप्रदेश इत्यर्थः। नानाविधावेणुवेत्रशृङ्गवीणाकन्दुकादयः क्रीडायाः परिच्छदाः साधनानि ययोस्तौ ॥ २७ ॥ तानेव दर्शयन् बाल्यक्रीडामाह द्वाभ्याम्। तत्र क्वचिदिति सार्द्धकं कस्मिंश्चित्काले देशे वा तत्तद्योग्ये वेणुवादनञ्च वयोदेशयोर्वैशिष्ट्यात् तत्प्रभृत्येव प्रवृत्तमिति ज्ञेयं क्षेपणैयन्त्रादिभिः बिल्वामलकादिकं दूरे प्राक्षिपतः किङ्किणीयुक्तः पादैः नृत्यतः इति शेषः। स्वस्वयूथत्वे नापादितैः कृत्रिमगोवृषैः सह ॥ २८ ॥ अन्वित्यर्द्धकम्। प्राकृतौ लौकिकबालकौ यथा तथैवेति निर्द्धारणावेशेन बाल्यलीलानिष्ठोक्ता एवं वेणुवादनादिक्रीडया परिभ्रमणमेव मुख्यं प्रयोजनं वत्सचारणं तु तदुपकरणत्वेनेति बोधयति—तत्र वेषविलासविशेषाश्चोक्ताः श्रीविष्णुपुराणे—

बर्हिपत्रकृतापीडौ वन्यपुष्पावतंसकौ। गोपवेणुकृतातोद्यौ पत्रवाद्यकृतस्वनौ ॥
काकपक्षधरौ बालौ कुमाराविव पावकी। हसन्तौ च रमन्तौ च चेरतुस्तन्महद्वनम् ॥
क्वचिद्धसन्तावन्योन्यं क्रीडमानौ तथा परैः। गोपबालैः समं वत्सांश्चारयन्तौ विचेरतुः ॥ इति

श्रीहरिवंशे च—

पर्णवाद्यं श्रुतिसुखं वादयन्तौ वराननौ। शुशुभाते वनगतौ त्रिशीर्षाविव पन्नगौ ॥
मयूराङ्गजकर्णौ तौ पल्लवापीडधारिणौ। वनमालाकुलोरस्कौ द्रुमपोताविवोद्गतौ ॥
अरविन्दकृतापीडौ रज्जुयज्ञोपवीतिनौ। सशिक्यतुम्बकरकौ गोपवेणुप्रवादकौ ॥
क्वचिद्धसन्तावन्योन्यं क्रीडमानौ क्वचित् क्वचित्। पर्णशय्यासु संसुप्तौ क्वचिन्निद्रान्तरैषिणौ ॥
एवं वत्सान् पालयन्तौ शोभमानौ महावनम्। चञ्चूर्य्यन्तौ रमन्तौ स्म किशोराविव चञ्चलौ ॥ इति

अत्र त्रिशीर्षाविवेति वेणीत्रययुतशिरस्कत्वात् एवं वत्सपालने प्रथमेऽहनि बालक्रीडा दृष्टा अन्यस्मिन्नपि प्रायस्तादृश्येवोह्या तत्रैव कदाचिद्विशेषमाह—कदाचिदित्यादिना यमुनातीर इति प्रायो वत्सक्रीडनकभक्तक्रीडनकयोः समीपे स्वकैर्ममतास्पदैः प्रियतमैरित्यर्थः। तैः सहेति तादृशलीलासुखविघातकत्वेनातिद्वेष्यत्वं व्यञ्जितम् ॥ २९-३० ॥ वत्समध्ये वत्सरूपेण गमनं च भयं बलात् कंसप्रहितत्वं च बोधयति पूतनादिहननात् हरिः दुष्टानां प्राणहरणात् शिष्टानां च मनोहरणात् मुक्तिप्रदानेन तस्यापि सर्वदुःखहरणात् बलदेवाय दर्शयन् सङ्केतेन ज्ञापयन् इति कौतुकार्थम् ॥ ३१ ॥ गृहीत्वेति तैर्व्याख्यातं तत्र सहलाङ्गूलं यथा स्यात् तथा गृहीत्वा केन द्वारभूतेनेत्यपेक्षायामाह—अपरेति योज्यम्। यद्वा, अपराभ्यां पादाभ्यां सहित

लाङ्गूलं तस्य गृहीत्वा भ्रामयित्वा तमिति पूर्वेणान्वयः । तदानीन्तनक्षेपणक्रीडनोपयोगिकपित्थफलपातनार्थं कपित्थाग्रे चिक्षेप अच्युत इति तं महाकायं भ्रामयतोऽपि निजस्थानाच्च्यवनात् स इति सार्द्धकं स दैत्यः महाकाय इति मरणे मायापगमान्निज-महावत्सदैत्यरूपाभिव्यक्तेः षड्विंशाध्याये कपित्थानि च लीलयेति वक्ष्यमाणत्वात् कपित्थफलैः सह ह विस्मये तादृशमहाकायस्यापि बालरूपतयैव महाकपित्थाग्रे प्रक्षेपात् विस्मितास्तस्य महाकायत्वादिना हेलया वधेन च साध्विति सहसा दुर्वितर्कज्ञानात् दुर्द्धर्षमारणाच्च तत्र विस्मयाद्धर्षाच्च वीप्सा तद्वधेनामराणां च परमहितमभूदित्याह—देवाश्चेति ॥ ३२-३३ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्रापि स्थानत्रयमतिमनोहरमित्याह—वृन्देति । पूर्वोक्त्या गोवर्द्धन-यमुना-पुलिनानां तदन्तर्गतत्वेऽपि पृथगुक्तिस्तत्र तत्र तत्तत्प्रसिद्धेस्तत्तत्सौन्दर्य्यादिभेदस्य चापेक्षयोत्तमेत्यन्यत्रापि प्रीतिर्जातैवेषु चाधिकेत्यर्थः । यद्वा, वैकुण्ठापेक्षयोत्तमा, अतएव माधवशब्दप्रयोगः । एवमाश्चर्येण प्रहर्षेण वा हे नृपेति । कृष्णस्य प्रीत्यां तत्रैव रामस्य प्रीतिरिति द्वयोः साम्येन निर्देशः ॥ ३६ ॥ एवमुक्त-श्रीवृन्दावनागमनादिप्रकारकैः, किंवोक्तसदृशैरद्भुतैः स्वाभाविकैश्चान्यैरपि मनोहरैश्चेष्टितैः कलवाक्यैश्च व्रजौकसां सर्वेषामेव प्रीतिमानन्दं कुर्वन्तौ सन्तौ, यच्छन्ताविति कलवाक्याविति पाठेऽपि स एवार्थः, यद्यपि पूर्वमेव मृद्भक्षणलीलायां वाक्याभिव्यक्तिरुक्तास्ते, तथाप्यत्र कलवाक्याविति मधुरविचित्रवार्त्ताविशेषाभिप्रायेण । स्वकालेनेति चतुर्वर्ष-वयःप्राकट्य इत्यर्थः । अत्रैवमूह्यम्—बृहद्वने वर्षत्रयं स्थितौ, चतुर्थे वृन्दावनमागत्य बाल्यलीलया दिनानि कतिचित्क्रीत्वानन्तरं वत्सपालौ बभूवतुरिति । यच्च श्रीहरिवंशे बृहद्वनक्रीडायामेवोक्तम्, (विष्णु-पं० ८।१)—'एवं तौ बाल्यमुत्तीर्णौ कृष्णसंकर्षणावुभौ । तस्मिन्नेव व्रजस्थाने सप्तवर्षौ बभूवतुः ॥' इति, तच्च कल्पभेद-व्यवस्थयान्योऽन्यबहुलविरुद्धवत् परिहार्यम् ॥ ३७ ॥ अविदूर इति नातिदूरे बाल्यान्न चातिनिकटे सुतृणाभावात् सुखविहारासिद्धेश्च, किन्तु व्रजस्थानादाह्वानप्राप्य प्रदेश इत्यर्थः । नानाविधा वेणु-शृंग वेत्र तुम्बी वीणा कन्दुकादयः क्रीडायाः परिच्छदाः साधनानि ययोस्तौ ॥ ३८ ॥ तानेव दर्शयन् बाल्यक्रीडामाह—क्वचिदिति द्वाभ्याम् । कस्मिंश्चित् काले प्रदेशे वा तत्तद्योग्ये वेणुवादनं देशकालादिकं प्राप्य, अतः प्रभृत्येव प्रवृत्तमिति ज्ञेयम् । क्षेपणैः क्वचित् पादैश्च क्षिपतस्ताडयतः, परस्परमिति परेणान्वयः, यद्वा, अन्यं किञ्चिदिति शेषः, यद्वा, क्षेपणैर्यन्त्रादिभिः पादैश्च वेणुमेव किञ्चिदन्यद्वा दूरे प्रक्षिपतः ॥ ३९ ॥ यथा प्राकृतौ लौकिकबालाविवेति बाल्यलीलानिष्ठोक्ता, यद्वा, प्रकृष्टमाकृतमाकृतिर्ययोर्वन्यवेशादिना परमसुन्दरौ सन्ताविर्त्यर्थः । यथा यथावच्चेरतुरितस्ततो बभ्रमतुरिति वेणुवादनादिक्रीडायाः परिभ्रमणमेव मुख्यं प्रयोजनम्, वत्सचारणञ्च गौणं केवलं तदुपकरणत्वेनेति बोधयति । तत्र वेश विलास-विशेष- श्लोकः श्रीविष्णुपुराणे (५।६।३२ ३५)—

'बर्हिपत्रकृतापीडौ वन्यपुष्पावतंसकौ । गोपवेणुकृतातोद्यौ पत्रवाद्यकृतस्वनौ ॥
काकपक्षधरौ बालौ कुमाराविव पावकी । हसन्तौ च रमन्तौ च चेरतुस्तन्महद्वनम् ॥
क्वचिद्धसन्तावन्योऽन्यं क्रीडमानौ तथापरैः । गोपबालैः समं वत्सांश्चारयन्तौ विचेरतुः ॥ इति ।

श्रीहरिवंशे च (विष्णु-प० ८।३-७)—

'पर्णवाद्यं श्रुतिसुखं वादयन्तौ वराननौ । शुशुभाते वनगतौ त्रिशीर्षाविव पन्नगौ ॥
मयूरांगजकर्णौ तौ पल्लवापीडधारिणौ । वनमालाकुलोरस्कौ द्रुमपोताविवोद्गतौ ॥
अरविन्दकृतापीडौ रज्जुयज्ञोपवीतिनौ । सशिक्यतुम्बकरकौ गोपवेणुप्रवादकौ ॥
क्वचिद्धसन्तावन्योऽन्यं क्रीडमानौ क्वचित् क्वचित् । पर्णशय्यासु संसुप्तौ क्वचिन्निद्रान्तरैषिणौ ॥
एवं वत्सान् पालयन्तौ शोभमानौ महावनम् । चञ्चूर्यन्तौ रमन्तौ स्म किशोराविव चञ्चलौ ॥' इति ।

अत्र त्रिशीर्षविवेति वेणीत्रययुतशिरस्कत्वात् । एवं वत्सपालनेन प्रथमेऽहनि बाल्यक्रीडोद्दिष्टा, अन्यस्मिन्नपि प्रायस्तादृश्येवोह्या ॥ ४० ॥ तत्रैव कदाचिद्विशेषमाह—कदाचिदित्यादिना । स्वकैरात्मीयैः, यद्वा, स्वयोः कं सुखं येभ्यस्तैः स्वकैः सुखरूपैर्वेति सर्वथा प्रियतमैरित्यर्थः । वयस्यैरिति प्रायः समवयस्कता च द्योतिता, तैः सहेति तेषां सन्तोषार्थमवश्यं जिघांसु-दुष्ट-वधः कार्य इति भावः ॥ ४१ ॥ हरिर्दुष्टानां प्राणहरणाच्छिष्टानाञ्च मनोहरणात्, यद्वा, मुक्तिप्रदानेन तस्यापि सर्वदुःखहर्त्तेति भावः । बलदेवाय दर्शयन् संकेतेन तं ज्ञापयन्निति दैत्यत्वेन तद्वत्सस्यापि वधार्थम्, यद्वा, मुख्यतया दुष्टान्तिकयाने तत्तत्त्वाज्ञानशंकया भाविपरमस्निग्धाग्रजचिन्तानिरासार्थम् ॥ ४२ ॥ अपराभ्यां पश्चिमाभ्यां सहितं लांगुलं तस्य गृहीत्वा, तमिति पूर्वेणान्वयः । भ्रामणेनैव गतजीवितं कपित्थफलपातनार्थं कपित्थाग्रे चिक्षेपः अच्युत इति भ्रमणादिनापि निजस्थानान्न च्युतो भवतीति शक्तिविशेषो दर्शितः ॥ ४३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

॥ २०–२७ ॥ क्षेपणैः ताडनसाधनैः ॥ २८–३८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे नृप ! वीक्ष्य सञ्चरतोरस्थितयोर्वेति शेषः ॥ २५ ॥ कलान्यव्यक्तमधुराणि वाक्यानि ययोस्तौ रामकृष्णौ बालचेष्टितैर्व्रजौकसां प्रीतिमावहन्तौ स्वकालेन कौमारप्राप्तयोग्यकालेन वत्सपालौ बभूवतुः ॥ २६ ॥ अथ कौमारलीलां वर्णयति—अविदूर इत्यादिना यावत्समाप्ति । व्रजभुवः वृन्दावनस्थव्रजभूमेरविदूरे समीपे नानाविधाः क्रीडापरिच्छदाः क्रीडोपकरणानि ययोस्तौ वत्सान् चारयामासतुः ॥ २७ ॥ तदेव प्रपञ्चयति—वादयतः क्षिपतः इति चलटोर्द्विवचनम् क्षेपणैः बिल्वामलकादिभिः ताडनसाधनैर्गोपबालकान् क्षिपतः ताडयतः कचिच्च किङ्किणीयुक्तैः पदैश्च क्षिपतः क्वचित्कृत्रिमगोवृषैः जानुभ्यां हस्ताभ्यां च भुवि सञ्चरद्भिः कृष्णकम्बलादिना पिहिताङ्गैर्वृषानुकारिभिस्तथैव नदद्भिर्गोपैः सह स्वयमपि वृषायमाणौ तदनुकारिशब्दान् कुर्वाणौ मिथो युयुधाते युद्धं कुर्वाते इत्यर्थः । तथा रुतैः शब्दैर्जन्तून् हंसमयूरादीननुकृत्य यथा प्राकृतौ बालौ तद्वच्चेरतुः ॥ २८–२९ ॥ अथ वत्सासुरवधात्मकं चेष्टितमनुवर्णयति—कदाचिदित्यादिना । स्वकैर्वयस्यैः सह कृष्णबलयोः वत्सान् चारयतोस्सतोस्तौ हन्तुमिच्छुर्दैत्य आजगाम ॥ ३० ॥ तं दैत्यं वत्सरूपधरं वत्ससमूहान्तः प्रविष्टं वीक्ष्य ज्ञात्वा बलदेवाय दर्शयन् स्वयं शनैर्मुग्ध इव अनभिज्ञवत्तत्समीपे जगाम ॥ ३१ ॥ अपरपादाभ्यां सह लाङ्गूलं पुच्छं गृहीत्वा तत एव गतं जीवितं जीवनं यस्य तं कपित्थस्य वृक्षस्याग्रे प्राहिणोदुदक्षिपत् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अविदूरे समीपे ॥ २७ ॥ क्षेपणैः अश्मयन्त्रैः पदैः पादैः कृत्रिमगोवृषैः मृद्दारुकृतगोवृषः ॥ २८ ॥ वृषायमाणौ वृषवद्वर्धमानौ नर्दन्तौ वृषभशब्दं कुर्वन्तौ अनुकृत्य विडम्ब्य ॥२९–३१॥ अपरपादाभ्यां प्राहिणोत् कपित्थैः कपित्थशाखायुक्तफलैः ।३२।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कलवाक्यैर्मनोहरभाषितैश्च ॥ २६–२७ ॥ क्षेपणैर्यन्त्रविशेषैः लोष्ट्रादिकं क्षिपतः किङ्किणीयुक्तैः पादैः नृत्यत इति शेषः । कृत्रिमगोवृषैः स्वस्वयुथीकृतैः ॥ २८–३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वकालेन स्वोचितसमयेन ॥ २६–२७ ॥ क्षेपणैर्डोरीयन्त्रैर्बिल्वामलकादिकं क्षिपतः दूरे चालयतः किङ्किणीयुक्तैः पादैः क्षिपतस्ताडयन्तः कृत्रिमगोवृषैः कम्बलादिपिहितबालकैर्वृषाकारैः सह स्वयमपि तथैव वृषायमाणौ नर्दन्तौ तदनुकारिशब्दान् कुर्वाणौ युयुधाते जन्तून् हंसमयूरादीन् ॥ २८–२९ ॥ कृष्णबलयोरिति षष्ठी आर्षी ॥ ३० ॥ दर्शयन् भ्रूसंज्ञया बलदेवं ज्ञापयन् मुग्ध इव अजानन्निव आसदत् निकटं प्राप ॥ ३१ ॥ अपराभ्यां पादाभ्यां सहितं लाङ्गूलं तस्य गृहीत्वा अच्युतः संसारसिन्धौ च्युतिस्तस्य दूरीकुर्वन् कपित्थाग्रे इति तद्देहेनैव क्रीडोपयोगिकपित्थफलपातनार्थमिति भावः । गतं जीवितं यतस्तद्यथास्यात्तथा प्राहिणोत् स वत्सासुरः ॥ ३२–३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वकालेन कुमारलीलाकालेन ॥ २६ ॥ कौमारलीलामाह—अविदूर इत्यादिना । नानाविधाः क्रीडायाः परिच्छेदाः उपकरणानि ययोस्तौ ॥ २७ ॥ कचित् राममाधवौ वेणुं वादयतः कचित् क्षेपणैर्बिल्वादिभिः क्षिपतः ताडयतः वयस्यानिति शेषः । कचित् किङ्किणीभिरुपलक्षणैः पादैः क्षिपतः कचित् कृत्रिमगोवृषैः वृषानुकारिभिर्वयस्यैः सह ॥२८॥ वृषायमाणौ नर्दन्तौ वृषवत् शब्दान् कुर्वन्तौ युयुधाते युध्यतः रुतैः शब्दैः जन्तून् हंसमयूरादीन् अनुकृत्य चेरतुः ॥ २९–३० ॥ आसदत् तत्समीपमागमत् ॥ ३१ ॥ अच्युतः स्वरूपतस्तु वत्सासुरोपि अच्युत एवातो नित्यशरीर इत्यर्थः । अपरपादाभ्यां सह लाङ्गूलं पुच्छं गृहीत्वा तदनन्तरं भ्रामयित्वा भ्रमणादेव गतं जीवितं जीवनं यस्य तं कपित्थाग्रे प्राहिणोत् उदक्षिपदित्यर्थः । तदा मरणानन्तरं कपटाभावात् महाकायः सन् महता भारेण पात्यमानैः कपित्थैः सह पपात ॥ ३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

वृन्दावनं वीक्ष्य परब्रह्मत्वादनन्तानन्दरूपयोरपि राममाधवयोरुत्तमा प्रीतिः स्वरूपोल्लासलक्षणो महानानन्दो बभूवेत्याह वृन्दावनमिति । गोवर्द्धनं तन्मध्यगतं गिरिराजं रत्नधातुमयं तद्गतानि च यमुनायाः पुलिनानीति भगवद्वपुर्भूतत्वं वनस्य एवमुक्तं बृहद्गौतमीये,—

पञ्चयोजनमेवास्ति वनं मे देहरूपकम् । कालिन्दीयसुषुम्नाख्या परमामृतवाहिनी"ति ॥ ३६ ॥

स्वकालेन स्वोचितसमयेन कौमारमध्ये एवेत्यर्थः । अविदूरे इति नातिदूरे न चातिनिकटे स तृणाभावत्वात् स्वच्छन्दविहारासिद्धेश्च, किन्त्वाह्वानप्राप्ये देशे इत्यर्थः ॥ ३७ ॥ नानाविधा वेणुवेत्रशृङ्गवीणाकन्दुकादयः क्रीडायाः परिच्छदाः साधनानि ययोस्तौ ॥ ३८ ॥ तानेव दर्शयन् क्रीडामाह क्वचिदिति द्वाभ्याम् । क्वचित्प्रदेशे तद्योग्ये क्षेपणैर्डोरिकायन्त्रैर्बिल्वादिफलानि क्षिपतो दूरे चालयतः किङ्किणीयुक्तैः पादैः क्षिपतस्ताडयतः कृत्रिमगोवृषैः कम्बलादिरचिततद्देशैः सह ॥ ३९ ॥ स्वयमपि तथैव वृषायमाणौ नर्दन्तौ तदनुकारिशब्दान् कुर्वाणावित्यर्थः । जन्तून् हंस-मयूर कोकिलादीनिति स्वयं प्रभुत्वादेव लीलावेशः ॥ ४० ॥ स च तत्तेजसा पीड्यमानो वत्सरूपं धृत्वा गत इत्याह दर्शयन् संज्ञया सूचयन् मुग्ध इवाजातन्निवासदन्तिकं प्राप अन्यथा पलायेतेति भावः ॥ ४१ ॥ गृहीत्वेति सार्द्धकम् । अपराभ्यां पादाभ्यां सहितं लाङ्गूलं तस्य गृहीत्वेति यथा तं न चालयेदिति भावः । अच्युतस्तन्मोक्षदानाद्विच्युतिशून्यः । कपित्थाग्रे इति तद्देहेनैव क्रीडोपकरणकपित्थपातनायेति भावः । गतं जीवितं यतस्तद्यथा स्यात्तथा । स वत्सदैत्यः महाकाय इति मरणे मायापगमेन निजरूपाभिव्यक्तेः ॥ ४२-४३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वृंदावनं गोवर्धनं पर्वतं यमुनायाः पुलिनानि च प्रीती रामेति गतं ॥२५॥ कालेन वत्सपालौ तर्णरक्षकौ बभूवतुः ॥२६॥ अविदूरे समीपे नानाप्रकारक्रीडासाधनोपेतौ ॥ २७ ॥ क्षेपणैरश्मयन्त्रैः कवणीत्यपभ्रष्टभाषया । किङ्किणीभिः क्षुद्रघण्टाभिः कृत्रिमगोवृषैर्मृद्रूपदारुगवकादिभिः ॥२८॥ वृषायमाणौ वृषवदाचरन्तौ नर्दन्तौ कूजन्तौ जन्तून् रुतैस्तत्तच्छब्दैरनुकृत्य कृत्वाऽनुकरणं चेरतुः ॥ २९ ॥ जिघांसुर्हन्तुमिच्छुः ॥ ३० ॥ वत्सयूथगतं स्वगोवत्ससमूहनिविष्टं मुग्ध इवाज्ञवच्छनैर्मन्दं शनैः शनैश्चरग्रहवत्स यथा प्रायेणायमशुभग्रह इति पञ्चमोक्तेर्दुःस्थानस्थितोऽनर्थदस्तथासददित्यावृत्त्याऽप्यन्वयः ॥ ३१ ॥ अपरपादाभ्यां पाश्चात्यचरणाभ्यां सह लाङ्गूलं पुच्छं गृहीत्वा तथैव भ्रामयित्वा कपित्थाग्रे तत्तर्वग्रे गतजीवितं प्राहिणोच्चिक्षेप । भ्रामणक्षण एव गतप्राणं वृक्षोपरि प्राक्षिपदिति । अथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः । तस्मिन्दधिफलं पुष्पफलं दन्तशठावपीत्यमरः ॥३२॥

श्रीसुबोधिनी

तत्र भगवतश्चरित्रमाह सामान्यतो **वृन्दावन**मिति, **वृन्दावनं** राजसं **गोवर्धनः** सात्त्विको **यमुनापुलिनानि च दृष्ट्वोत्तमा प्रीतिरासीत्**, अतः प्रीतः पूर्वोक्तप्रकारेण लीलां कृतवानित्युक्तं भवति, नृपेतिसम्बोधनं दर्शनेन प्रीती राजलीलेति ज्ञापयितुम् ॥ २५ ॥ एवं सामान्यलीलामुक्त्वा स्त्रीनैरपेक्ष्येण विशेषतो बाललीलां वक्तुं वत्सचारणलीलामुपक्रमत **एव**मिति यावदध्यायसमाप्ति, पूर्वप्रकारेण **व्रजौकसां** व्रजमध्यस्थितानां **प्रीतिं यच्छन्तावेव स्वकाले**नाधिदैविकेन सेवार्थमागतेन कृत्वा **वत्सपाल**योग्यौ वर्षत्रयाधिकौ जातौ, देशकालाद्युपद्रवाभावाय **बालचेष्टितौ कलवाक्या**विति पदद्वयं, मनसा तु **प्रीतिं** भावयत्येव कायेन वाचा च भावयतीति **बालयोरिव चेष्टितानि** ययोः, **कल**मव्यक्तमधुरं **वाक्यं** ययोः, **व्रजौकसां प्रीते**रनुवृत्तिः पूर्वकृतनिरोधनिवृत्त्यभावाय भगवति योग्यताफलयोः पृथङ् निरूपणाभावाद् **वत्सपालकावेव सञ्जाता**वित्युक्तम् ॥ २६ ॥ तयोर्वत्सपालने क्रीडामाह **त्रिभिरविदूर** इति, अत्रापि क्रीडा त्रिरूपा, तत्र प्रथमं **व्रजभुवोविदूरे** यत्र स्थितैर्व्रजो दृश्यते व्रजस्थाश्च पश्यन्ति, व्रजभूम्यपेक्षया सा तृणयुक्ता विलक्षणेति ज्ञापयितुं **व्रजभुव** इत्युक्तं, **गोपालानां दारकाः** समानवयसस्तान् कृतार्थीकर्तुं **बहुभिः सह** क्रीडोत्तमा भवतीति **क्रीडा**साधनसहितावेव **वत्सांश्चारयामासतुः**, **भ्रमर**चक्रसूक्ष्मदण्डकाष्ठखण्डकृत्रिमरथवादित्राकर्षणादीनि **क्रीडापरिच्छदवानि**, तानि गृहीत्वैवायान्ति गच्छन्ति च, अनेन सामान्यतः क्रीडा निरूपिता, वत्सपालनं तु मुख्यं सूक्ष्मगोपालानां **सह**भावश्च ॥ २७ ॥ **उभयो**रत्र निरोधो वक्तव्यः, नन्दसहचरितानां निरोधनिरूपणाय, साधनैश्च क्रीडां प्रथमत आह प्रथमं क्वचिद् वेणून् **वादयतोर्वेणुर्बहु**च्छिद्रवंशस्तेषामवान्तरभेदा बहव इति **बहु**वचनं, शिरोव्यापारा अनेनोपलक्षिताः, **क्षेपणा** रज्ज्वादिनिर्मिता मध्ये लोष्टादि स्थापयित्वा भ्रामयित्वा लोष्टादिकं दूरे **क्षिप**न्ति तज्जातीया अपि बहुविधाः, एवमुभावपि **क्षिपतो** लोष्टादीनि दूरे प्रक्षिपतो मत्प्रक्षिप्तमेतावद्दूरे गच्छतीति ज्ञापनार्थं, **क्वचिदिति यत्रान्योपद्रवशङ्का न भवति**, हस्तयोः क्रीडा निरूपिता, **क्वचित् पादैः किङ्किणीभिः** सहितैर्नृत्यतः क्षिपतो वा लोष्टादीनि, कदाचिन् मृदादिनिर्मिता ये **गोवृषा** उभयतश्चक्रयुक्ता तानारुह्य व्रजतः, गोपाला वा कृत्रिमवृषा भवन्ति, तैः सह युद्धादिकं वा कुरुतः, तैर्वान्यान् क्षिपन्ति तमारोपयित्वा क्वचित् पातयन्ति ॥ २८ ॥ एवं शिरोबाहुपादयुद्धस्थानैश्चतुर्विधा लीला निरूपिता, सम्पूर्णेन लीलामाह **वृषायमाणा**विति, स्वयमेव **वृषरूपौ** भवतः कृत्रिमप्रकारेण, तथैव च **नर्दन्तौ** शब्दं कुरुतः, **परस्परम**न्योन्यं च **युयुधाते**, कायवाङ्मनोलीलाः प्रदर्शिताः, युद्धं कायिकमपि मनोधर्मप्राधान्यान् मानसं, एवं स्वतो लीलां निरूप्यानुकारेणापि स्वतो लीलामाहा**नुकृत्ये**ति, **जन्तून्** मण्डूकादीन् मयूरादींश्चा**नुकृत्य** तत्सरूपौ भूत्वा तैस्तैः सहानुकारेण तेषामपि भ्रममुत्पाद्य सर्वा एव लीलाः कृतवन्तौ, तत्र स्वैश्वर्यभावनया तथा कर्तवन्तावितिशङ्कां वारयति **प्राकृतौ यथे**ति, **यथा प्राकृतौ** लौकिकसाधनैरेव तत्तदनुकरणं कुरुतस्तथा भगवान् सर्वविधबालकानां मनोरञ्जनार्थं तेषां दोषदूरीकरणार्थं निरोधार्थं च तथालीलां कृतवान्, जीवास्तु

द्विविधा इत्युभयोस्तथाकरणम् ॥ २९ ॥ एवं भगवतो लीलामुक्त्वा पाल्यानां वत्सानां दोषरूपं वत्सासुरं मारितवानित्युपाख्यानमारभते **कदाचिदि**तिषड्भिः, यदा वत्सानां निरोधो भगवता विचारितः स एव कालः, **यमुनातीरे वत्सांश्चारयतोस्तयोः** सतोर्दैत्य **आगमदि**तिसम्बन्धः, प्राकृता एव हि सदोषांश्चारयन्ति निरोधार्थं प्रवृत्तस्तु निर्दोषानेव पालयतीतिज्ञापनार्थं तेषां वत्सानां मिलितानां योयमासुरो भावः स एकीभूतो वत्सासुर इति तद्वधो निरूप्यते, **यमुनातीरे** इति, तेषां शुद्धत्वे जलं हेतुः, दैत्यागमने तु यमभगिनीत्वं हेतुरिति, **स्वकैर्वयस्यैः** सहेति, येन्तःस्थिता बालास्ते निष्कासिता अत एव भगवद्भावमापन्नास्ते हि सर्वथा समानवयसो भवन्ति, अतो भक्तकालक्रोडीकृताः सख्ययोग्या भवन्तीति **कृष्णबलयोश्चारयतोः** सतोरितिपूर्वमिव सम्बन्धः, **जिघांसु**र्घातकः क्रूरो **दैत्यः** पाल्यमानदोषरूपत्वाद्नामा, **आगमत्** क्रीडास्थाने समागतः ॥ ३० ॥ तस्य ग्रहणमाह **तं वत्सरूपिण**मिति, स प्रसिद्धो दोषात्मा वत्सस्यैव रूपमस्यास्तीति **वत्सरूपी** तादृशोपि यदि **पृथक्** तिष्ठेत् तदा केनचिज्ज्ञायेतापि परं **वत्सयूथगते** वत्ससमूहे वत्ससमानाकृतिरूपो भूत्वा प्रविष्टः, मारणं तु तेषामुद्धारार्थं यतोयं सर्वदुःखहर्ता, **बलभद्रादेरप्यन्यधर्मसम्बन्धाद्** वाच्यतानिराकरणाय **बलदेवाय** प्रदर्शितवानयमसुरो वत्स इति प्रदर्शितत्वादेव दैत्यस्वरूपमाविश्चकार, नो चेद्वाच्यतां वा सम्पादयेत् , तथाभावे बलभद्रेणाङ्गीकृते शनैर्यथा भगवत्कृत्या दैत्यत्वोद्‌बोधो न भवति तथा **मुग्ध इवा**जानन्निव वत्सान्तरं गृह्णन् क्रीडार्थमयमपि गृहीतः, तदाह **मुग्ध इवासद**दिति, अवसादं प्रापितवानित्यर्थः, ग्रहणमात्रेणैव निष्पीडित एवावसन्नो जातो विशीर्णो वा गतिसाम्याद् धृतो वा, सम्यग्ग्रहणपर्यन्तमज्ञानाय **मुग्ध**भावः ॥ ३१ ॥ ततो गृहीत्वा मारितवानित्याह **गृहीत्वे**ति, महाबलत्वेन पुच्छभ्रामणादिनापराधकरणाभावाय **लाङ्गूलेन सहापरपादाभ्या**मपरपादौ गृहीत्वा, स्वस्य मारणादिशङ्का तु नास्त्येव, यतोयम**च्युतः**, **कपित्थाग्रे भ्रामयित्वा** कपित्थफलपातनार्थं **प्राहिणोत्**, एका क्रिया भगवतोनेकक्रियां सम्पादयतीति कपित्थपातनार्थं वृक्षोपरि पातनममुक्त्यर्थं च न प्राणापगमो भगवद्धस्तसम्बन्धे नापि भूमौ नापि वृक्षेन्तरिक्ष एव प्राणापगमः, अत, एव **गतजीवित**मन्तरिक्ष एव गतप्राणं **प्राहिणोत्** ॥ ३२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अनुकृत्य रुतैर्जन्तूनित्यत्र, **तेषां दोषदूरीकरणार्थ**मिति । लीलाविरोधिभावप्रकटनं दोषः । अलौकिकत्वज्ञानं च तथा । प्राकृताननुकरणं च तद्धेतुः । तथा च तदजननार्थं तदनुकरणमित्यर्थः ॥ २९ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

एवं व्रजौकसामित्यत्रेत आरभ्य पूर्वं चतुर्भिः श्लोकैर्वृन्दावनलीला वक्तव्या, **पूर्वप्रकारेणे**ति 'गोपीभिः स्तोभित' इति वाक्यात् तदधीनतयेत्यर्थः, **मध्यस्थित**पदेन पुष्टिभक्ता उच्यन्ते सर्व एव वा **देशकालाद्युपद्रवे**त्यादि भक्तानां स्वाभिलषित**देशकालयो**र्भगवत्प्राप्तिप्रतिबन्धसद्भाव **उपद्रव**स्तत्र बालचेष्टया सर्वसमक्षमपि तथाकरणे लोकविगानाभावेन तत्रागमनाद् देशप्रतिबन्धाभावश्च, एतदेव **बालयो**रिवेत्यादिरूपे व्याख्याने स्फुटीभविष्यति, ननु वत्सपालनयोग्यतामात्रनिरूपणेपि **न** वत्सपालनं निरूपितं भवतीत्यत आहु**र्भगवतो**त्यादि, **योग्यता** वत्सपालनयोग्यता **फलं** वत्सपालनं तयोस्तथात्वात् सामर्थ्यनैवोभयप्राप्तेस्तथेत्यर्थः ॥ २६ ॥ **अविदूर** इत्यत्रात्रापीत्यादि वृन्दावनेपि, **त्रिरूपे**ति साधारणासाधारणनिरोधदैत्यनाशनैरित्यर्थः ॥ २७ ॥ **क्वचिद् वादयत** इत्यत्रो**भयो**रिति वत्सगोपालयोरित्यर्थः ॥ २८ ॥ **वृषायमाणा**वित्यत्रानुकृत्येत्यत्र **तेषां दोषदूरीकरणार्थ**मिति सूक्ष्मगोपालानां तेषां को दोष इति शङ्कायां तं टिप्पण्यामाहु**र्लीले**त्यादि, **सुबोधिन्यां द्विविधा** इति साधारणा असाधारणाश्च, **उभयोरि**ति भगवतो बलस्य च ॥ २९ ॥ **कदाचि**दित्यत्र **स्वकै**रित्यस्य तात्पर्यमाहु**र्यन्त**रित्यादि, अन्यथा **वयस्यै**रितिपदेन चारितार्थ्यात् **स्वकै**रितिविशेषणस्य वैयर्थ्यापत्तेः, एतेषां च लीलायामेव प्राकट्यं तत्तिरोधाने तु भगवदन्तरेव स्थितिरन्तर्गृहगतानामिवेति प्रतिभाति यद्यपि 'जघास हैयङ्गवमन्तरङ्गत' इत्यत्रैषां पृथक्करणमुक्तं तथापि तत्रार्थान्तरस्यापि शक्यवचनत्वात् सन्दिग्धमित्यतः पुनरत्रोक्तम् ॥ ३० ॥ **तं वत्सरूपिण**मित्यत्रा**न्यधर्मसम्बन्धा**दित्यादि प्राकृतधर्म**सम्बन्धान्** निन्द्यतानिराकरणाय, **आविश्चकारे**त्यन्तर्भावितण्यर्थं तथा **चाविर्भूतं** कारितवानित्यर्थः, **नो** चेदिति प्रदर्शितत्वाभावे, **अवाच्यतां** वेत्याद्यन्यत् किञ्चित् कर्तुमसामर्थ्येपि तावन्मात्रं तु सम्पादयेदेवेत्यर्थः, शक्लृधातोर्णिजन्यर्थानत्र स्फुटीकुर्वन्ति **ग्रहणमात्रेणे**त्यादि, द्वितीयमर्थमाहु**र्गतिसाम्याद् धृतो वे**ति, यावद्धावनेनान्ये धृतास्तावद्धावनेनैवायमपि **धृत** इत्यर्थः ॥ ३१ ॥ **गृहीत्वे**त्यत्र **गतजीवित**मिति क्रियाविशेषणं, एतस्य पश्चात्कथनेन कपित्थाग्रात् पातदशायां मध्येन्तरिक्षे **तस्य** प्राणा गता इति ज्ञातव्यं, पाद्मोत्तरखण्डे तु भगवतो वत्सासुरहनने त्रिवार्षिकत्वं 'कृष्णस्त्रिवार्षिको वत्सपालो विव्याध वत्सक'मित्युक्तं दिनं तु नोक्तम् ॥ ३२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अविदूर इत्यत्र **अत्रापीति** बृहद्वनेपि "गोपीभिः स्तोभित" इत्यादिना त्रिविधा क्रीडोक्तेत्य**पिशब्दः**, **सूक्ष्मगोपालाना**मिति बालकानामित्यर्थः ॥ २७ ॥ **उभयोरि**ति वत्सगोपालयोरित्यर्थः, अतस्तयोरेव दोषनिवृत्तिरुक्तेतिभावः ॥ २८ ॥ **अनुकृत्ये**-

त्यत्र **जीवास्त्विति** प्रमाणनिष्ठाः स्वरूपमात्रनिष्ठाश्चेतिद्वैविध्यम् ॥ २९ ॥ **तं वत्सरूपिणमि**त्यत्र **प्रदर्शितत्वादेवे**ति भगवद्भावनायाः सतीत्वात् **सोपि** स्वस्य दैत्यत्वं भावयामास, **प्राविशच्चकारे**ति मनस्येवेति ज्ञेयं, **प्रवाच्यता**मिति अदृश्यत्वमित्यर्थः, **भगवत्कृत्ये**ति भावनया मनस्येव दैत्यत्वं भावितवान्, कृत्या तु बहिरपि दैत्यत्वं प्रकटयेदित्यर्थः ॥ ३१ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

दर्शयन् बलदेवायेत्यस्य विवृतौ **वाच्यतानिराकरणाये**ति बलदेवाय वत्सासुरनिष्ठमासुरत्वं प्रदर्शितमित्यासुरत्वज्ञानान् न निन्दा भवेदिति हार्दं, बलदेवाय प्रदर्शनं तु बलदेवस्य वेदरूपत्वात् तत्सम्मतिग्रहणार्थं, वत्सासुरस्य वत्सदोषरूपत्वं यदुक्त तत्त तु कृष्णोपनिषत्सु "लोभक्रोधादयो दैत्या" इत्यत्र श्रुतौ आदिपदोपादानान् भगवद्वध्यानां दैत्यानां दोषरूपत्वं यथासम्भवं ग्राह्यमिति वत्सदोषरूपता निरूपिता वत्सासुरस्य ॥ ३१ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'वृन्दावनस्योत्तमत्वं सावधानतया बोधव्यम्' इत्याशयेन सम्बोधयति—नृपेति। योगिजनादिमनोरमत्वात् रामः, लक्ष्मीपतित्वात् माधवः कृष्णः, तयोरपि वृन्दावनादीनि वीक्ष्योत्तमा प्रीतिरासीत्। अन्यस्य तु का वार्ता? इति इदमेव मुख्यं विहारस्थानमित्याशयः ॥ ३६ ॥ वर्णितां बाललीलामुपसंहरति—एवमिति। एवमुक्तप्रकारेण **बालचेष्टितैः कलवाक्यैर्मधुर-भाषितैश्च व्रजौकसां प्रीतिं यच्छन्तौ कुर्वन्तौ** रामकृष्णशक्तिरूपत्वात् स्वाधीनेन गच्छता कालेन **वत्सपालौ च** सञ्चारणयोग्य-वयस्कौ **बभूवतुः** ॥ ३७ ॥ कौमारलीलां निरूपयति—अविदूरे इत्यादिना। **व्रजभुवः अविदूरे** नातिदूरे बाल्यात्, न चातिनिकटे तृणाभावात्, मध्ये मध्ये जनागमनेन स्थानसङ्कोचेन च यथासुखं विहारासिद्धेश्च अतो व्रजजनाह्वानश्रवणयोग्ये विस्तृतप्रदेशे गोपालानां दारकैर्बालकैः सह नानाविधा वेणुवेत्रश्रृङ्गकन्दुकादयः क्रीडापरिच्छदाः क्रीडासाधनानि ययोस्तौ, तानि गृहीत्वा क्रीडन्तौ वत्सांश्चारयामासतुरित्यन्वयः ॥ ३८ ॥ क्वचिद्वेणून् वादयतः इत्यादि। लटो द्विवचनम्। वेणुर्बहुच्छिद्रवंशविशेषः, तस्यावान्तरभेदा बहवः, इति बहुवचनम्। क्षेपणा रज्ज्वादिभिर्निर्मिता यन्त्रविशेषास्तैः तन्मध्ये लोष्टादि निधाय भ्रामयित्वा मत्प्रक्षिप्तमेतावद्दूरं गच्छतीति ज्ञापनाय क्वचित् क्षिपतः। क्वचित् किङ्किणीयुक्तैः 'पादैः नृत्यतः' इति शेषः। क्वचित् कृत्रिम-गोवृषैः कम्बलादिभिः पिहितैर्बालकैरेव स्वीकृतवृषाकारैः सह ॥३९॥ स्वयमपि तथैव वृषायमाणौ नर्दन्तौ वृषजात्यनुकारिशब्दान् कुर्वाणौ परस्परं युयुधाते इत्यन्वयः। रुतैः तत्तज्जातिशब्दैर्जन्तून् हंसमयूरादीन् अनुकृत्य यथा प्राकृतौ बालकौ तथा चेरतुः विजह्रतुः ॥४०॥ षष्ठीद्वयं द्वितीयार्थे। कदाचिद्यमुनातीरे स्वकैः सखिभिः सह वत्सांश्चारयन्तौ कृष्णबलौ जिघांसुः हन्तुमिच्छुर्दैत्य आगमत् ॥ ४१ ॥ तं वत्सयूथगतं वत्सरूपिणं दैत्यं वीक्ष्य बलदेवाय दर्शयन् भ्रूसंज्ञया ज्ञापयन् मुग्ध इव अजानन्निव हरिः शनैरासदत् तत्समीपमागमदित्यर्थः ॥ ४२ ॥ अपरपादाभ्यां सह तस्य लाङ्गूलं गृहीत्वा भ्रामयित्वा च भ्रामणेनैव गतजीवितं निर्गतप्राणं तं कपित्थाग्रे कपित्थवृक्षस्य उपरि प्राहिणोत् चिक्षेप। तत्र सामर्थ्यं द्योतयन्नाह—अच्युत इति। कलादिपूर्ण इत्यर्थः ॥ ४३ ॥

अन्वितार्थप्रकाशिका

बृन्दावनलीलामुपक्रमते—एवमिति ॥ एवमुक्तप्रकारेण बालचेष्टितैः कलवाक्यैर्मधुरभाषितैश्च व्रजौकसां प्रीतिं यच्छन्तौ कुर्वन्तौ रामकृष्णौ स्वकालेन वत्सपालनयोग्यकालेन कौमारे वयसीत्यर्थः। अपवर्गे तृतीया। वत्सपालौ वत्ससंचारणयोग्यवयस्कौ बभूवतुः ॥ ३६ ॥ अविदूर इति ॥ व्रजभुवः अविदूरे नातिदूरे गोपालानां दारकैर्बालैः सह नानाविधाः वेणुवेत्रश्रृङ्गकन्दुकादयः क्रीडापरिच्छदाः क्रीडासाधनानि ययोस्तौ तानि गृहीत्वा क्रीडन्तौ वत्सांश्चारयामासतुः ॥ ३७ ॥ क्वचिदिति सार्द्धम् ॥ क्वचिद्देशे काले वा वेणून् वादयतः। सामीप्ये भूते लट्। अत एव वेणुवादनारम्भः। क्वचित् क्षेपणैः रज्जुनिर्मितैः क्षेपणसाधनैः बिल्वा-मलकादीनि क्षिपतः क्वचित् किङ्किणीयुक्तैः पादैर्नृत्यत इति शेषः। यद्वा। क्षिपत इत्यस्यैवानुषङ्गः वक्षादींस्ताडयत इत्यर्थः। क्वचित्कृत्रिमगोवृषैः कम्बलादिभिः पिहितैर्बालकैरेव स्वीकृतवृषाकारैः सह स्वयमपि तथैव वृषायमाणौ नर्दन्तौ वृषजात्यनु-कारिशब्दान् कुर्वाणौ परस्परं युयुधाते ॥ ३८ ॥ अनुकृत्येत्यर्द्धम् ॥ रुतैः तत्तज्जातिशब्दैर्जंतून् हंसमयूरादीन् अनुकृत्य यथा प्राकृतौ बालकौ तथा चेरतुः विजह्रतुः ॥ ३९ ॥ कदाचिदिति ॥ कदाचिद्यमुनातीरे स्वकैः वयस्यैः स्वप्रीतियुक्तैः सखिभिः सह वत्सांश्चारयतोः कृष्णबलयोः। शेषे षष्ठ्यौ। जिघांसुः हन्तुमिच्छुः दैत्य आगमत् ॥ ४० ॥ तमिति ॥ तं वत्सयूथगतं वत्सरूपिणं दैत्यं वीक्ष्य बलदेवाय दर्शयन् भ्रूसंज्ञया ज्ञापयन् मुग्ध इव अजानन्निव हरिः शनैरासदत् तत्समीपमागमत्। अत्र वत्सरूपेण वत्सेषु गमनं पूतनादिवधेन भयात् आगमनं च कंसाग्रहात् ॥ ४१ ॥ गृहीत्वेति ॥ अच्युतः अपरपादाभ्यां सह तस्य लाङ्गूलं गृहीत्वा च। मित्त्वेऽपि ह्रस्वाभाव आर्षः। भ्रमणेनैव गतजीवितं निर्गतप्राणं तं कपित्थाग्रे कपित्थवृक्षस्य उपरि प्राहिणोत् चिक्षेप। स्वक्रीडोपयोगिकपित्थफलपातनार्थमिति भावः ॥ ४२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यमुनायाः पुलिनानि तटानि कूल्याऽभिप्रायेण बहुवचनम् ॥ ३३ ॥ यच्छंतौ ददतौ स्वकालेन वत्सपालनोचितसमयेन ॥ ३४ ॥ इत्थं हरेर्बाल्यावस्थाचरित्रमुक्त्वा इदानीं कौमारचेष्टितं वर्णयन्नाह अविदूर इत्यादिभिः व्रजभुवः गोव्रज निवासभूमेः अविदूरे समीपे ॥ ३५ ॥ क्वचित् वेणून् उभौ वादयंतः वादयंतौ संतै रेमतुः क्षिप्यंत इति क्षेपणानि आमलकादिफलानि तैः क्षिपतः गोपान् ताडयंतौ संतौ क्वचित् रेमतुः किंकिणीसहितैः पादैः भुवं क्षिपतः कृत्रिमाः मृत्तिकापर्णादिना कृताः गावो वृषाश्च तैः क्वचित् रेमतुः ॥ ३६ ॥ वृषाविवाऽऽचरत इति वृषायेते तौ वृषायमाणौ नदंतौ बलीवर्दवन्नादं कुर्वंतौ जंतून् रुतैरनुकृत्य नदतः कोकिलादिजंतून् स्वशब्दैरनुसृत्य तच्छब्दसदृशान् शब्दान् कृत्वेत्यर्थः । प्राकृतौ मनुष्यबालकौ यथा तथा चेरतुः ॥ ३७ ॥ जिघांसुः हंतुमिच्छुः ॥ ३८ ॥ मुग्ध इव अज्ञ इव शनैः आंसदत् समीपमाययौ ॥ ३९ ॥ अच्युतः श्रीकृष्णः अपरपादाभ्यां पश्चिमांघ्रिभ्यां सहितं लांगूलं पुच्छं कपित्थाग्रे कपित्थवृक्षोपरि पात्यमानैः सह दैत्यः पपात ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वृन्दावनमिति ॥ हे नृप, वृन्दावनं, गोवर्द्धनं, यमुनापुलिनानि जलादचिरनिर्गतस्थानानि च, 'तोयोत्थितं तत्पुलिनम्' इत्यमरः । त्रिकाण्डशेषे तु 'पुलिनं द्वीपमुच्यते' इत्यभिहितमस्ति । वीक्ष्य, संचरतोरवस्थितयोर्वेति शेषः । राममाधवयोर्बलकृष्णयोः, उत्तमाऽतिशयिता, प्रीतिः, आसीत् ॥ ३५ ॥ एवमिति ॥ एवं बालचेष्टितैः, कलवाक्यैश्च, व्रजौकसां सकलव्रजवासिनां, प्रीतिं यच्छन्तौ व्रजवासिनां स्वस्मिन् प्रीतिमुत्पादयन्ताविन्ताविन्यर्थः । तौ स्वकालेन स्वस्य वत्सपालनयोग्यवयः प्राप्तिकालेन, वत्सपालौ बभूवतुः । क्वचित्तु कलवाक्यावित्यपि पाठस्तत्पक्षे कलवाक्यौ ताविन्यर्थः ॥ ३६ ॥ विशेषतः भगवतः कौमारलीलामनुवर्णयति अविदूर इत्यादिना यावदध्यायसमाप्ति ॥ अविदूर इति ॥ व्रजभुवो वृन्दावनभूमेः, अविदूरे समीपप्रदेशे, नानाविधाः क्रीडापरिच्छदाः क्रीडोपकरणानि ययोस्तौ, तौ गोपालदारकैर्गोपबालकैः सह, वत्सान् , चारयामासतुः ॥ ३७ ॥ क्रीडापरिच्छदानेव प्रपञ्चयति ॥ क्वचिदिति ॥ क्वचित् वेणुं वंशीं, वादयतः, क्वचित् क्षेपणैर्बिल्वामलकादिभिस्ताडनसाधनैः, क्षिपतः, गोपबालकान् ताडयतः, वादयतः क्षिपत इति च लटो द्विवचनम् । क्वचिच्च, किङ्किणीभिः किङ्किणीयुक्तैः, पादैः क्षिपतः ताडयतः, क्वचित् कृत्रिमगोवृषैः जानुभ्यां हस्ताभ्यां च भुवि संचरद्भिः कृष्णकम्बलादिना पिहिताङ्गैः वृषानुकारिभिः, तथैव नदद्भिर्गोपैः सहेत्यर्थः ॥३८॥ वृषायमाणाविति ॥ स्वयमपि वृषायमाणौ, नर्दन्तौ सन्तौ, परस्परं मिथः, युयुधाते युद्ध्येते । तथा रुतैः शब्दैः, जन्तून् हंसमयूरादीन् , अनुकृत्य, यथा प्राकृतौ बालौ, तद्वत् चेरतुः । इति द्वयोरेकसंबन्धः । अथ भगवतो वत्सासुरवधात्मकं चेष्टितमनुवर्णयति ॥ कदाचिदिति ॥ कदाचित्, स्वकैरात्मीयैः, वयस्यैः स्वसमानवयोभिर्गोपालबालकैः सह, यमुनातीरे, वत्सान् , चारयतो कृष्णबलयोः, जिघांसुस्तौ हन्तुमिच्छुः, दैत्यः आगमत् ॥ ४० ॥ तमिति ॥ हरिः स्वयं श्रीकृष्णः, वत्सरूपिणं वत्सरूपधरं, वत्सयूथगतं वत्ससमूहान्तःप्रविष्टं, तं दैत्यं वीक्ष्य, बलदेवाय दर्शयन् सन् , शनैः मुग्धः इव, तदनभिज्ञवदित्यर्थः । आसदत् । तत्ससीपमाजगामेत्यर्थः ॥ ४१ ॥ गृहीत्वेति ॥ अच्युतः, तं अपरपादाभ्यां सह, लाङ्गूलं पुच्छं गृहीत्वा, भ्रामयित्वा, गतं जीवितं यस्य तं दैत्यं, कपित्थाग्रे दन्तशठतरोरग्रप्रदेशे प्राहिणोदुदक्षिपत् ॥ ४२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वृन्दावनमिति : १०.११.३५.

क्षेत्राणि तीर्थान्यपि साधनानि बहूनि किञ्चित्सुखदानि सन्तु । नित्यानवद्यस्वसुखप्रदा तु तत्साधुवृन्दावनवृत्तिरेव ॥ ३५ ॥

उत्तमा प्रीतिरिति : १०.११.३६

यदभीष्टमप्रयत्नाल्लब्धं तच्चेत् सुखाय युक्तमतः । गोवर्धनसक्तमतेरासीद् गोवर्धनेक्षणात् प्रीतिः ॥ ३६ ॥

वत्सपालाविति : १०.११.३७.

गवावनविहारोऽयं विना गोजातपालनम् । रम्यो न स्यादिति श्रीशः प्रागधाद्वत्सपालनम् ॥ ३७ ॥
कामोऽसौ भृगुपादचिह्नमपि च श्रीवत्ससंज्ञाङ्कितौ तत्राद्यस्तु सतां परोऽपि यदभून्मे लाञ्छनायाश्रयात् ।
आलोच्यैवमिहाच्युतः समभवद् गोवत्सपालोऽधुना सत्कीर्तिप्रदपुत्रलालनरतिः सिद्धा हि पित्रात्मनि ॥ ३८ ॥

श्रीवत्समेवानिशमन्तरङ्गे संलालयन्तं प्रसमीक्ष्य मां गौः ।
सापत्न्यखिन्ना न भवत्वितीशो नाना तदीयानवति स्म वत्सान् ॥ ३९ ॥

क्वचिदिति : १०.११.३९.

श्रीकृष्णकरुणा पूर्णा यदि तत् किं नु दुःशकम् । साधु वृन्दावनक्रीडा बालैरप्युररीकृता ॥ ४० ॥

यमुनातीर इति : १०.११.४१.

सूर्यात्मभूतिसविधस्थितिरेव पुंसो गोजातवृत्ति सदसत्फुटनिर्णयेऽस्मिन् ।
हेतुर्भवत्यलमिति प्रभुरह्नि तस्मिन् गोवत्सचारणमधाद् यमुनातटे सः ॥ ४१ ॥

दैत्य इति :

यस्याग्रे स्थितमात्रमुत्तमतमश्रीकं प्रसह्याहृतं येनासौ क्षुभितेन्द्रियो भवति तं हन्तुं प्रकृष्टोद्यमः ।
एतत्सर्वजनप्रसिद्धमिति यत्तद्युक्तमेवाच्युतं वत्सोऽसौ तृणनाशनोत्तरमगाद्रोषेण पूर्णोऽसुरः ॥ ४२ ॥

न नूलाभ्यासिनो दृष्टिस्तादृक् पाकमुपैत्यतः । श्रीशवक्त्रनधीरागात् तद्रूपेण तदाऽसुरः ॥ ४३ ॥

मयि वत्से वत्सपोऽयं नान्यथाभावमेष्यति । इत्यन्तराहितमतिस्तद्रूपेण किमागमत् ॥ ४४ ॥

पातालवत्सासुरमग्रज त्वं वीक्षस्व वत्सौघमितीन्दिरेशः । तन्निश्चयायैव बलाय दर्शयन् वत्सासुरक्षोभितमानसोऽभूत् ॥ ४५ ॥

गृहीत्वेति : १०.११.४३.

यथा दुष्टहतिः साम्ना न क्रौर्येण तथेति किम् । जघान धृत्वा तत्पादौ वत्सासुरमपीश्वरः ॥ ४६ ॥

कंसोऽर्धभारो ह्ययमर्धभारो भूमेस्तदेतद्धननात्करोमि । भूमिं भरार्धापनयात्सुखाढ्यां क्रान्तद्विपादेन किमग्रबोधि ॥ ४७ ॥

रक्षोहतौ मम पुरा बहुसाह्यभाजो गोलाङ्गुलाः समभवन्निति स स्मृतार्थः ।
तद्वत्समानसहितं खलहानये गोलाङ्गूलमात्मकरतो जगृहे किमीशः ॥ ४८ ॥

कपित्थाग्रेति :

असुरहितकाङ्क्षयाऽत्र प्राप्तो वत्सासुरोऽयमिति । असुरहितोऽकारि मया भवत कपित्था हि साक्षिणो यूयम् ॥ ४९ ॥

स कपित्थैरिति :

श्रीशेन स्वदृशेक्षितोऽप्यनुगृहीतोऽप्युद्धृतोऽपि स्ततो दुष्टात्मा निजदुष्टतां त्यजति नेत्येतद्यथार्थं यतः ।
मन्ये नित्यसमुन्नतान् सुमहतस्तादृक् स वत्सासुरः स्वीयार्धक्षणसङ्गतोऽनयदधःपातं कपित्थानहो ॥ ५० ॥

यथा कण्टकः कण्टकेनापसार्यस्तथा दुर्जनो दुर्जनेनेति जानन् ।
स दुर्ग्राहिणस्तान् कुजातानधःस्थान् कुजातेन तेनाकरोद्युक्तमेतत् ॥ ५१ ॥

समदृष्टिः परेशस्तु सर्वोद्धृतिधृतव्रतः । तत्र पापादधो याति पापी वत्सासुरो यथा ॥ ५२ ॥

गोजातेषु परेशगामिषु परं गोजातमागन्तुकं दुर्बोधं तदसाधु कारकपदं वादिप्रविष्टं यदि ।
तेभ्यः शेष मतं विभाव्य मतिमान् निष्कास्य धृत्वा पदे तत्कुर्यादचिराद्व्यसुप्रकृतिकं तद्योगतो भ्वाश्रितम् ॥ ५३ ॥

धृत्वा पदे वत्सगतासुरन्तं निष्कास्य तेभ्योऽग्रजमाविलोक्य ।
व्यसुं च भूस्थं हरिणात्र कुर्वता तद्रूपकेणेदमबोधि सर्वम् ॥ ५४ ॥

मत्पाल्यमानमनुजेषु हि तज्जिघांसुः प्राप्तः खलो विधृतकृत्रिमतद्वपुश्चेत् ।
हत्वा तदैव तमहं सुखयामि नैजान् वत्सासुरासुहतितः प्रभुणेत्यबोधि ॥ ५५ ॥

कृष्णप्रिया

राजन् ! भगवान् माधव और श्रीबलभद्रजीने श्रीवृन्दावन, श्रीगोवर्धनाचल, एवं श्रीयमुनाजी के पावन पुलिन देखें तब दोनों के चित्त में उत्तम प्रीति का आविर्भाव हुआ ॥ २५ ॥ इस प्रकार श्रीकृष्ण और बलदाऊजी व्रजवासियों को अपनी हृदयंगम बाललीलाओं से और मनोरम तोतरी बातों से वृन्दावन को भी प्रसन्न करते हुए चंद दिनों में योग्य समय आने पर भैया के साथ बछरे चराने लगे ॥ २६ ॥ राम और श्रीकृष्ण दोनों व्रजग्वालबालों के साथ खेल किये तरह तरह के खेलने के साधन लेकर नन्दनिवास से निकल पड़ते और व्रज के पास गोष्ठ नेसडे के समीप बछड़े चराने लगे ॥ २७ ॥ दोनों भैया कभी तो वंशी बजाते, कभी ढेला फेंकवा-गुलेला से ढेले फेंकते। कभी घुंघरु बाँधे पैरों से नाच पड़ते, तब कभी औठणी डाला कृत्रिम गो-बैल बन जाते, गरजते और परस्पर में युद्ध लीला करते तो कभी ग्वाल बालों के साथ कृत्रिम साँड़ बन कर हँकड़ते हुए आपस में लड़ रहे हैं। तब कभी और बैल-मृग मयूर-कोकिल बंदर-आदि पशु पक्षियों की बोली की नकल उतार-उतार दोनों भाई सामान्य ग्वालबालों के समान विहार करते थे ॥ २८-२९ ॥ राजन्, एक दिन की कथा है एक दैत्य यमुना तट पर जहाँ कि कृष्ण और बलराम अपने साथियों के साथ बछड़े चराते थे वहाँ उन्हें मारने की इच्छा से

आया ॥ ३० ॥ जब श्याम सुन्दर ने देखा बछड़े का बनावटी रूप लेकर बछड़ों में मिल गया है तब बलभद्र भैयाजू को दिखलाया कि भैया ! यह बछड़ा नहीं दैत्य है ऐसा कहकर श्रीहरि बाद में—अनजान ग्वालबाल की तरह धीरे से उस दैत्य के समीप आये ॥ ३१ ॥ आकर श्रीकृष्णजीने पूँछ सहित उसके पिछले पैरों को पकड़कर खूब घूमाया और आखिर में कैथ की जड़पर दे मारा । प्राण तो दैत्य के घुमाने के समय निकल चुके थे इधर कैथ के फल तड़ा तड़ा नीचे गिर पड़े और मृत्यु के अवसर दैत्य अपना स्वरूप न छिपा सका राक्षस स्वरूप प्रकट हो गया ॥ ३२ ॥

स कपित्थैर्महाकायः पात्यमानैः पपात ह । [1]तं वीक्ष्य विस्मिता बालाः शशंसुः साधु साध्विति ॥ ३३ ॥
देवाश्च परिसन्तुष्टा बभूवुः [2]पुष्पवर्षिणः । [3]वत्सासुरं हतं श्रुत्वा व्रजे गोप्यश्च विस्मिताः ॥ ३४ ॥
तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ । सप्रातराशौ गोवत्सांश्चारयन्तौ विचेरतुः ॥ ३५ ॥
स्वं स्वं वत्सकुलं सर्वे पाययिष्यन्त एकदा । गत्वा जलाशयाभ्यासं[4] पाययित्वा पपुर्जलम् ॥ ३६ ॥
ते तत्र ददृशुर्बाला महासत्त्वमवस्थितम् । तत्रसुर्वज्रनिर्भिन्नं गिरेः शृङ्गमिव च्युतम् ॥ ३७ ॥
स वै बको नाम महानसुरो बकरूपधृत्[5] । आगत्य तरसा[6] कृष्णं तीक्ष्णतुण्डोऽग्रसद् बली ॥ ३८ ॥
कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः । बभूवुरिन्द्रियाणीव विना प्राणं विचेतसः ॥ ३९ ॥

तं तालुमूलं प्रदहन्तमग्निवद् गोपालसूनुं पितरं जगद्गुरोः[7] ।
चच्छर्द सद्योऽतिरुषाक्षतं बकस्तुण्डेन हन्तुं पुनरभ्यपद्यत ॥ ४० ॥

कर्दमक्षमा

अन्वयः—सः महाकायः पात्यमानैः कपित्थैः पपात ह तं वीक्ष्य विस्मिताः बालाः साधु साधु इति शशंसुः ॥ ३३ ॥ वत्सासुरं हतं श्रुत्वा व्रजे गोप्यः विस्मिताः च देवाः परि सन्तुष्टाः च पुष्पवर्षिणः बभूवुः ॥ ३४ ॥ सर्वलोकपालकौ तौ वत्सपालकौ भूत्वा संप्रातराशौ गोवत्सान् चारयन्तौ विचेरतुः ॥ ३५ ॥ एकदा सर्वे स्वं स्वं वत्सकुलं पाययिष्यन्तः जलाशयाभ्यासं गत्वा जलं पाययित्वा पपुः ॥ ३६ ॥ ते बालाः वज्रनिर्भिन्नं च्युतं गिरेः शृङ्गं इव अवस्थितं महासत्वं तत्र ददृशुः तत्रसुः ॥ ३७ ॥ सः बकरूपधृत् तीक्ष्णतुण्डः बली बकः नाम महान् असुरः तरसा आगत्य कृष्णं वै अग्रसत् ॥ ३८ ॥ रामादयः अर्भकाः महाबकग्रस्तं कृष्णं दृष्ट्वा प्राणं विना इन्द्रियाणि इव विचेतसः बभूवुः ॥ ३९ ॥ बकः अग्निवत् तालुमूलं प्रदहन्तं जगद्गुरोः पितरं गोपालसूनुं चच्छर्द पुनः अतिरुषा अक्षतं तं तुण्डेन हन्तुं अभ्यपद्यत ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सर्वेषां लोकानामेकौ मुख्यौ पालकौ । प्रातराशः प्रातर्भोज्यमन्नं तत्सहितौ ॥ ४५ ॥ अभ्याशं समीपम् ॥ ४६-४८ ॥ राम आदिर्येषां ते न तु रामः ॥ ४९ ॥ तुंडयोश्चञ्च्वोः । वीरणवद्ग्रंथितृणविशेषवत् ॥ ५१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं पतितं दैत्यम् ॥४४॥ तौ कृष्णबलौ । 'एके मुख्यान्यकेवलाः' इत्यमरः । सर्वलोकैकपालकावपि भक्तवात्सल्याद्वत्सपालकौ । सप्रातराशौ प्रातर्भोजनसहितौ । प्रातःशब्दोऽत्र पूर्वाह्णपरः । "सायं प्रातर्मनुष्याणामशनं देवनिर्मितम्" इति स्मृतौ तथा व्याख्यातत्वादन्यथा आद्ययामे न भुंजीत' इति विरोधः स्यात् । मध्याह्नकर्त्तव्यभोजनसहिताविति तात्पर्यम् । बालत्वाद्यथाश्रुतमेवास्तु वा ॥४५॥ जलं पाययिष्यंतः पानं कारयिष्यंतः । जलस्याशयः स्थानं महासरः तच्च नंदीश्वरगृहेः पूर्वतः प्रसिद्धं बकस्थलम् । तदभ्याशम् 'स्थानेऽभिप्राय आशयः' इति यादवः ॥ ४६ ॥ ते गोपाः । तत्र जलाशयाभ्याशे । महत् सत्त्वं पराक्रमो व्यवसायो वा यस्य तमसुरम् । "सत्त्वोऽस्त्री जंतुषु क्लीबे व्यवसाये पराक्रमे । आत्मभावे पिशाचे च रदे द्रव्यस्वभावयोः ॥" इति यादवः । दृष्ट्वा च तत्रसुस्त्रेसुः । उद्विग्ना बभूवुरिति यावत् ॥ ४७ ॥ स महासत्त्वो नाम्नापि बको रूपमपि बकस्यैव दध्रे इति भावः । सहसा शीघ्रम् ॥ ४८ ॥ राम आदिर्येषामित्यतद्गुणसंविज्ञानो बहुव्रीहिरत आह—न तु राम इति विचेतसो ज्ञानहीनाः पाषाणतुल्याः । यद्वा—रामस्यापि तादृशत्वे भ्रातृस्नेह एव हेतुः रुक्मिणीहरणे तदुक्तम् । 'श्रुत्वैतद्भगवान्रामः' इत्यारभ्य 'भ्रातृ-

---

[1]. स कपित्थैर्महाकायः पात्यमानैः पपात ह—इदमधिकमन्यत्र दृश्यते । [2]. पुष्पवृष्टिभिः—गो. प्रे. टी. । [3]. अन्यप्रत्यां वत्सासुरं''' विस्मिताः पंक्तिर्न दृश्यते । [4]. भ्याशं—श्रीधर. वंशी. वीर. विज. । [5]. धृक्—श्रीधर. वंशी.; धृत्—वीर. विज. । [6]. सहसा श्रीधर. वंशी. वीर.; तरसा—विज. । [7]. गुरुम्—गो. प्रे. टी. ।

स्नेहपरिप्लुतः' इति। तदपि तद्योगमाययैवेति ध्येयम् ॥ ४९ ॥ जगद्गुरोर्ब्रह्मणः। तुण्डेन चञ्चुना ॥ ५० ॥ 'वीरणं श्वीतृणं विदुः' इति कोशात्। कटोपादानभूतमिति प्रसिद्धम्। यस्य मूलमुशीरं तद्वीरणमिति तोषणी ॥ ५१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सर्वलोकानां मुख्यपालकावपि वत्सपालकौ भूत्वेति भक्तवात्सल्यादिविशेष उक्तः। यद्वा, वत्सपालकौ भूत्वा सर्वलोकैकपालकौ सन्तौ वत्सासुरादिवधेन देवलोकादिपालनात् सप्रातराशौ अशनमाशः प्रातर्भोजनकारिणौ सन्तावित्यर्थः। विशेषेण पूर्वतः किञ्चित् वयोबलाधिक्यप्रकटनेन किञ्चिद्दूरप्रदेशप्रयाणादिना समग्रदिनमेव चेरतुः यतः गवां वत्सान् चारयन्तौ सायं व्रजे समागतानामेव तासां वत्सापेक्षणात् ॥ ३४ ॥ बकासुरवधं वक्ष्यन् सर्वेषां बालानां युगपद्बकदर्शनाश्चर्यमाह स्वमिति। सर्वे श्रीकृष्णादयः जलाशयो महासरः नन्दीश्वरगिरेः पूर्वतो बकस्थलमिति प्रसिद्धं तस्यान्तिकं महासत्त्वम् अतिस्थूलप्राणिविशेषम् अवस्थितं बकवदवधानेनैकत्र स्थिरतया वर्तमानम् अतस्तस्माद्गिरेश्च्युतं शृङ्गमिव तस्य श्वेतशिलत्वात् बृहदाकारस्यापि तत्र दूरे च्युतत्वे हेतुः वज्रेति वै प्रसिद्धौ महान् दुष्टतमत्वादिना वपुषा च बकरूपधृक् नित्यमेव किं वा तद्दुष्टचेष्टार्थं तीक्ष्णतुण्डोपि बलवानपि अग्रसदेव नत्वन्यात्किञ्चिदनिष्टं कर्तुमशक्नोदित्यर्थः। ग्रसनमपि केवलं श्रीभगवदिच्छयैवेत्याह—कृष्णं दुर्वितर्कविचित्रलीलामहार्णवत्वेन प्रसिद्धमित्यर्थः ॥ ३५–३७ ॥ विचेतसो बभूवुः मुमुहुः श्रीभगवन्माहात्म्यवेदिनोपि दुष्टं बकं सद्यो हन्तुं शक्ता अपि श्रीबलदेवादयः परमस्नेहाकुलतया सद्यः सर्वज्ञानक्रियाशक्तिरहिता बभूवुरित्यर्थः। अत्र दृष्टान्तः प्राणं विना इन्द्रियाणीवेति श्रीबलदेवस्यापि तादृशत्वं श्रीरुक्मिणीहरणाय गते श्रीकृष्णे दृश्यते "श्रुत्वैतद्भगवान् रामो विपक्षीयनृपोद्यमम्" इत्यादौ ॥ ३८ ॥ तालुमूलमग्निवत्प्रदहन्तं युद्धवैचित्रीकौतुकेन मुखान्तः प्रविष्टस्य गले नेतुमशक्यस्य तालुमूल एव लग्नत्वात् गोपालसूनुमपि केनचिदंशेन जगद्गुरोर्ब्रह्मणः पितरमिति महाकौतुकित्वात्तस्य बकेन ग्रसनं महानुभावत्वाच्च सम्यग्ग्रसनाशकत्वं सम्भवेदेवेति भावः। अतिरुषा तं हन्तुम् अभ्यपद्यत उद्यतोऽभूत् यतः अक्षतं क्षतरहितम्। यद्वा, स्वबलेन किञ्चित् सक्षतीकर्तुमशक्तमपि अभ्यपद्यत तत्र हेतुः अतीति महाक्रोधेन विचारापगमादित्यर्थः ॥ ३९ ॥ निगृह्य ग्रहणेन पीडयित्वा कंससखमिति महादुष्टत्वबलिष्ठत्वादिकं सूचितम्। सतां गतिरिति तेन तद्वधो युक्त इति भावः। एवं पदद्वयेन दुष्टनिग्रहशिष्टानुग्रहलक्षणं दारणप्रयोजनमुक्तं यद्वा कंससखमिति तद्दारणेन कंसोपि दारित इवेति सतां गतिरिति च श्रीरामादीनां प्राणा रक्षिता इत्यर्थः। अतस्ते तदेकजीवनस्वभावत्वात्तन्निर्गमे स्वत एव मोहतो व्युत्थिता इति ज्ञेयम् उशीरं यस्य मूलं तद्वीरणं तस्यैषीकामिवेत्यर्थः। एवमत्रेदं तत्त्वं मुग्धवन्मयोपेत्य गृहीतो वत्सासुरोऽनवहितत्वादेव किञ्चित् कर्तुमशक्तोऽप्रयासेन सहत इति न मन्तव्यं किं तु जानताऽवहितेनापि निजाशेषशक्तिं दर्शयताऽपि न किञ्चिन्मम केनापि कर्तुं शक्यत इति बोधयित्वा सुहृद्वर्गान् प्रहर्षयितुं भगवानेव तद्गले प्रविष्ट इति तद्वधेन देवानामपि हितमकरोदित्याह—दिवौकसां सर्वेषामेव मुदावह इति एवं बकासुरस्य महादुरन्त्वादिकमपि ध्वनितम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

स दैत्यो महाकाय इति मरणे मायापगमान्निजदैत्यरूपाभिव्यक्तेः, अतस्तेनैव पात्यमानैः कपित्थवृक्षैः सह, यद्वा, षड्विंशाध्याये (९ म० श्लो०) 'कपित्थानि च लीलया' इति वक्ष्यमाणत्वात् स्वयमेव पातयितुमिष्यमाणैः कपित्थफलैः सह। ह विस्मये, विस्मितास्तस्य महाकायत्वादिना हेलया वधेन च शशंसुः, श्रीकृष्णं तुष्टुवुः। वीप्सा महादुष्टवधेन। तत्र च भगवद्दास्यविशेषेण प्रहर्षभरात्, तद्वधेनामराणाञ्च परमहितमभूदित्याह—देवाश्चेति। तद्वत्सवधञ्च विविधाश्चर्यानुभवेनानद्भुतत्वाद्बाला व्रजे नोचुः, किंवा, क्रीडासहस्रासक्ततया तदानीं विस्मृत्य पश्चाद्बकवधे वृत्ते प्रसंगादनुस्मृत्य तद्द्वतमेकदैव कथयामासुरिति ज्ञेयम् ॥ ४४ ॥ सर्वलोकानां मुख्यपालकावपि वत्सपालकौ भूत्वेति भक्तवात्सल्यादि-विशेष उक्तः। यद्वा, वत्सपालकौ भूत्वा सर्वलोकैकपालकौ सन्तौ वत्सपालनद्वारा तत्तन्मधुरविहारविस्तारेण स्वत एव तत्कीर्त्तनादिना जगतः परमरक्षासिद्धेः। तत्र पालकत्वे द्वयोरपि साम्येन निर्देशः, श्रीबलदेवस्य तदवतारत्वेन परमभक्तत्वेन च श्रीभगवता सहाभेदमननात् एवमन्यत्राप्यूह्यम्। सप्रातराशौ अश्यत इत्याशं गृहीत प्रातर्भोज्यावित्यर्थः, यद्वा, अशनमाशः कृत प्रातर्भोजनावित्यर्थः। विशेषेण पूर्वतः किञ्चिद्वयोबलाधिक्यप्रकटनेन किञ्चिद्दूरप्रदेशप्रयाणादिना समग्रदिनमेव चेरतुर्यतो गवां वनान्तश्चरन्तीनां धेनूनां वत्सान् चारयन्तौ सायं व्रजे समागतानामेव तासां वत्सापेक्षणात्, एवं विकाले गोदोहनावसरे गवां व्रजागमनात् प्राक् तयोर्गृहागमनं ज्ञेयम् ॥ ४५ ॥ बकासुरवधं वक्ष्यन् सर्वेषां बालानां युगपद्बकदर्शनार्थं सहैवागमनमाह—स्वमिति। सर्वे श्रीकृष्णादयः, जलाशयो महासरो नन्दीश्वरगिरेः पूर्वतो बकस्थलमिति प्रसिद्धम्, तस्यान्तिकम् ॥ ४६ ॥ महासत्त्वमतिस्थूलप्राणिविशेषमेव स्थितं बकरूपत्वाद्बकवदवधानेनैकत्रैव स्थिरतया वर्त्तमानमतो गिरश्च्युतं शृंगमिव। च्युतत्वे हेतुः-वज्रेति, एतेन कठिनतरांगत्वादिकमपि ध्वनितम्। तस्य च तत्र सदैव बक-रूपेणावस्थितिः, किंवा तदानीमेव तत्र दुर्बुद्ध्यागमनं बोद्धव्यम्। तत्रसुश्च, सतां भाव्यनर्थस्य प्रागेव मनस्युदयात यद्वा, परमस्निग्धस्वभावेन महादुष्टदर्शनाच्छ्रीभगवत्यनिष्ट-

शंकोत्पत्तेः, यतस्ते बालाः श्रीकृष्णैकप्राणास्तद्वयस्या इत्यर्थः, यद्वा, ते सर्वे श्रीकृष्णादयः 'भीतवद्व्याघ्रसिंहयोः' इति पञ्चदशाध्याय-(१२ श० श्लो०) वक्ष्यमाणवत् सोऽप्यत्रस्यत् । अन्येऽपि सर्वे तल्लीलानुसारेणात्रस्यन्नित्यर्थः ॥ ४७ ॥ वै प्रसिद्धौ । महान् दुष्टतरत्वादिना वपुषा च; बकरूपधृक् नित्यमेव, किंवा तदानीमेव दुश्चेष्टार्थं तीक्ष्णतुण्डोऽपि बलवानप्यग्रसदेव, न त्वन्यत् किञ्चिदनिष्टं कर्त्तुमशक्तोदित्यर्थः । ग्रसनमपि केवलं श्रीभगवदिच्छयैवेत्याह–कृष्णं दुर्वितर्क्य विचित्रलीलामहार्णवमित्यर्थः ॥ ४८ ॥ विचेतसो बभूवुर्मुमुहुः–श्रीभगवन्माहात्म्यवेदिनोऽपि दुष्टं बकं सद्यो हन्तुं शक्ता अपि श्रीबलदेवादयःपरमस्नेहाकुलाः सद्यः सर्वज्ञानक्रियाशक्तिरहिता बभूवुरित्यत्र दृष्टान्तः–प्राणं विनेन्द्रियाणीवेति ज्ञानक्रियाशक्तियुक्तान्यपीन्द्रियाणि कथञ्चित् प्राणे मुख्ये लीने सति सपदि किञ्चिदपि कर्त्तुमसमर्थानि यथा नश्यन्तीव तद्वदित्यर्थः ॥ ४९ ॥ तालुमूलमग्निवत् प्रदहन्तं कौतुकेन केनापि हेतुना वा मुखान्तःप्रविष्टस्य गले नेतुमशक्यस्य तालुमूल एव लग्नत्वात्; प्रशब्देनाग्नितोऽपि दाहविशेषो बोधितः । जगद्गुरोर्ब्रह्मणः पितरमपि गोपालस्य वन्यजनस्य सूनुं बालकमिति विरोधेऽप्यविरोधवत्तस्य दुर्वितर्क्या परमाश्चर्यलीलेयं घटेतैवेति, यद्वा, गोपालसूनुमपि जगद्गुरोः पितरमिति महा कौतुकित्वात्तस्य बकेन ग्रसनं परमेश्वरत्वाच्च सम्यग् ग्रसनाशक्यत्वं सम्भवेदेवेति भावः । एवं बाल्यक्रीडाविशेषस्य तत्रैव निजैश्वर्यविशेषस्य सम्प्रदर्शनेन भगवता विशेषः पूर्ववज्ज्ञेयः । अतिरुषा तं हन्तुमभ्यपद्यत उद्यतोऽभूत्, यतोऽक्षतं क्षतरहितम्; यद्वा, स्वबलेन किञ्चित् सक्षतीकर्त्तुमशक्तमपि हन्तुमभ्यपद्यत । तत्र हेतुः-अतीति; महाक्रोधेन विचारापगमादिति भावः; यद्वा, क्षतं यथा स्यात्तथा हन्तुं प्रहर्त्तुम् ॥ ५० ॥ निगृह्य नितरां गृहीत्वा ग्रहणेन पीडयित्वा वा । कंससखमिति महादुष्टत्वं बलिष्ठत्वादिकं सूचितम् । सतां गतिरिति तेषां रक्षार्थमवश्यं तद्वधो युक्त इति भावः । एवं पदद्वयेन दुष्टनिग्रहशिष्टानुग्रहलक्षणं दारणप्रयोजनमुक्तम्; यद्वा, कंससखमिति तद्दारणेन कंसोऽपि दारित इवेति सतां गतिरिति च श्रीरामादीनां प्राणा रक्षिता इत्यर्थः । अतस्ते मोहतो व्युत्थापिता इति ज्ञेयम् अत एव इतस्ततो भगवन्तं वा पश्यत्सु तेषां सन्तोषार्थं लीलयानायासेन भंगीविशेषेण वा वीरणवद्विदारितवान् एवमत्रेदं तत्त्वम्–मुग्धवन्मयोपेत्य गृहीतो वत्सासुरोऽनवहितत्वादेव किञ्चित् कर्त्तुमशक्तोऽप्रयासेन हत इति न मन्तव्यम्; किन्तु जानताऽवहितेनापि निजाशेषशक्तिं दर्शयतापि न किञ्चिन्मम केनापि कर्त्तुं शक्यत इति बोधयित्वा सुहृद्वर्गान् प्रहर्षयितुं श्रीभगवानेव तद्गले प्रविष्ट इत्यन्यथा कथञ्चिदपि बकेन तद्ग्रसनं न सम्भवेदिति दिक् । तद्वधेन देवानामपि हितमकरोदित्याह–दिवौकसां सर्वेषामेव स्वर्गवासिनां मुदावह इत्येवं बकासुरस्य महाभयंकरत्वादिकमपि ध्वनितम् ॥ ५१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

जगद्गुरोः चतुर्मुखस्य अक्षतमिति पदम् ॥ ३९-४१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

महाकायत्वेन दुर्भरत्वाद्वोढुमशक्तैः पात्यमानैः कपित्थाग्रैः करणैः सह तौ भुवि पातितं पतितमवलोक्य साधुसाध्विति शशंसुः ॥ ३३ ॥ अथ बकासुरवधात्मकं चरित्रमाह—तावित्यादिना । सर्वलोकैकपालकावपि वत्सपालौ भूत्वा एकदा प्रातर्भोक्तव्यपर्युषितान्नसहितौ गवां वत्सांश्चारयन्तौ विचेरतुः ॥ ३४ ॥ सर्वे रामकृष्णप्रधाना गोपालाः स्वं स्वं वत्ससमूहं पालयिष्यन्तस्तावज्जलाशयस्याभ्याशं समीपं गत्वा वत्सान् जलं पाययित्वा स्वयमपि पपुरपिबन् ॥ ३५ ॥ तत्रावस्थितं सत्वं जन्तुं ददृशुस्तत्रसुः अभिभयुश्च, कथम्भूतम्? वज्रेण निर्भिन्नमत एव च्युतं गिरेः शृङ्गमिव स्थितम् ॥ ३६ ॥ स वै सत्वः बकाख्यः महानसुरो बकरूपधरः सहसेत्य आकस्मिकाविमर्शयोर्द्योतकमव्ययम् तीक्ष्णतुण्डो निशितचञ्चुः बली श्रीकृष्णमग्रसत् ॥ ३७ ॥ प्राणं विनेन्द्रियाणीच कृष्णं विना विचेतसः अचेतनप्राया बभूवुः रामादय इत्यतद्गुणसम्विज्ञानो बहुव्रीहिः न तु राम इत्यर्थः ॥ ३८ ॥ जगद्गुरोर्ब्रह्मणः पितरमपि लीलया गोपालसूनुमग्निवत् तालुमूलं प्रदहन्तं श्रीकृष्णं सद्य एव चछर्द्द उदगिरत् तमक्षतं कृष्णं तुण्डेन हन्तुं रुषा पुनरभ्यपद्यताभिमुखमापद्यत ॥ ३९ ॥ स कृष्णस्तमापतन्तं कंससखं कंसहितकरं बकं निगृह्य हुङ्कारेण निवार्य बालेषु पश्यत्सु सत्सु दोर्भ्यां लीलया तुण्डयोः चञ्च्वोर्ददार विदारितवान् चञ्च्वोर्नितरां गृहीत्वा ददारेति वान्वयः । कथं वीरणवद्ग्रन्थिरहिततृणविशेषवत् कथम्भूतः सतां भक्तानां गतिः स्वप्राप्त्युपायः दिवौकसां मुदमावहतीति तथा तद्वधेन देवान् मुदमुत्पादयामासेत्यर्थः ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कृष्णोपरि ॥ ३३ ॥ सप्रातराशौ प्रातर्भोजनसहितौ ॥ ३४ ॥ जलाशयाभ्याशं जलस्थानं महासर इत्यर्थः "स्थानेऽभिप्राय आशये" इति ॥ ३५ ॥ महासत्त्वं महान् सत्त्वः पराक्रमो व्यवसायो वा यस्य स तथा तं—

सत्वोऽस्त्री जन्तुषु क्लीबे व्यवसाये पराक्रमे । आत्मभावे पिशाचे च द्रव्ये सत्तास्वभावयोः ॥ इति यादवः ॥३६॥

स महासत्वो महासुरो वै एव "स्युरेवं तु पुनर्वं वेत्यवधारणवाचकाः" इत्यमरः ॥ ३७ ॥ विचेतसः ज्ञानहीनाः पाषाणकल्पाः ॥ ३८ ॥ जगद्गुरोर्हिरण्यगर्भस्य पितरम् अक्षतं पुनः अतिरुषा तुण्डद्वयेन कृष्णं हन्तुम् अभ्यपद्यत ॥ ३९ ॥ कटस्योपादानं तृणं वीरणं शीतृणं विदुरिति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

रामादय इति तद्गुणसम्विज्ञानतापि घटते तच्च षष्ठसन्दर्भस्य शततमवाक्यत्वात् पूर्वत्र द्रष्टव्यम् ॥ ३८-४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

एकपालकौ मुख्यपालकौ प्रातराशः प्रातर्भोजनम् ॥ ३४-३५ ॥ वज्रेण निर्भिन्नं गिरिशृङ्गमिव ॥ ३६-३७ ॥ रामादय इति रामस्य सर्वज्ञस्यापि तद्वधसमर्थस्यापि मोहे भ्रातृस्नेह एव हेतुर्द्रष्टव्यः रुक्मिणीहरणेपि "श्रुत्वैतद्भगवान् रामो विपक्षीयनृपोद्यमम्" इत्यादौ तस्य तादृशत्वस्य द्रक्ष्यमाणत्वात् ॥ ३८ ॥ तं कृष्णं प्रदहन्तमिति तस्य नीलोत्पलसुकुमारशीतलस्यापि स्पर्शो वह्नेरिव वज्रस्येव तत्तनुदोषादेव जातो जिह्वादोषात् सितताया अपि तिक्तत्वमिवेति ज्ञेयम् । अक्षतं क्षतरहितमिति तत्र श्रीकृष्णगात्रस्य वज्रायितत्वं ध्वनितम् ॥ ३९ ॥ तुण्डयोश्चञ्च्वोर्निगृह्य नितरां गृहीत्वा मुदावहः आनन्दप्रापकः उशीरं यस्य मूलं तद्वीरणं तद्वत् ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तौ राममाधवौ सर्वेषां लोकानामेकौ मुख्यौ पालकावपि वत्सपालकौ भूत्वा प्रातराशः प्रातर्भोज्यमन्नं तत्सहितौ स्वयमकृतभोजनावपि गोवत्सान् चारयन्तौ चेरतुः अहो गोवत्सानां भाग्यमिति भावः ॥ ३३ ॥ जलाशयस्य अभ्याशं निकटम् ॥ ३४-३७ ॥ राम आदिर्येषामित्यतद्गुणसम्विज्ञानो बहुव्रीहिः दृष्टसागरमानयेति वत ॥३८॥ जगद्गुरोर्ब्रह्मणः ॥३९॥ स श्रीकृष्णः तुण्डयोश्चञ्च्वोर्दोर्भ्यां निगृह्य नितरां गृहीत्वा ददार विददार वीरणवत् अग्रन्थितृणविशेषवत् ॥ ४० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

विस्मिता इति तस्य महाकायत्वेन हेलया वधेन च ॥ ४४ ॥ एकपालकौ मुख्यरक्षकौ प्रातराशेन प्रभातभोजनेन सहितौ ॥ ४५ ॥ जलाशयो महासरः नदीश्वरगिरेः पूर्वतो बकस्थलमिति ख्यातं तस्याभ्यासमन्तिकं गत्वा ॥ ४६ ॥ वज्रेन निर्भिन्नं गिरेर्नंदीश्वरस्य शृङ्गं शिखरमिव तस्य श्वेतशिलत्वात् ॥ ४७ ॥ रामादय इति सर्वज्ञस्यापि तन्मारणसमर्थस्यापि रामस्य मोहो भ्रातृवात्सल्यनिमित्तको बोध्यः "अनिष्टाशङ्कीनि बन्धुहृदयानि भवन्ती"ति न्यायात् वक्ष्यति चैवं रुक्मिणीहरणे ॥ ४९ ॥ तं कृष्णं बकश्चञ्च्छर्दं अक्षतं तं पुनरपि तुण्डेन चञ्चुना हन्तुमभ्यपद्यत तालुमूलमग्निवत् प्रदहन्तम् इन्दीवरमृदुरशीतलस्यापि कृष्णस्याग्नेरिव वज्रस्येव स्पर्शस्तत्तालुदोषादेव रसनादोषात् सितताया इव तिक्तत्वमित्येके। वस्तुतस्तु क्रूरया शक्त्या स सिद्धः जगद्गुरोर्विरिञ्चस्य पितरमपि गोपालस्य नन्दराजस्य सूनुम् ॥ ५० ॥ तुण्डयोश्चञ्च्वोर्निगृह्य वीरणवत् यन्मूलमुशीरं तद्वीरणं तृणं तद्वत् । दिवौकसां मुदावहो हर्षप्रापकः ॥ ५१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स पात्यमानैः कपित्थानां फलानि कपित्थानि तैः फलैः सह पपात । तन्महादेहसंस्पर्श एव फलपतनहेतुरिति भावः । तं वत्सं फलपातं च विस्मिता बालाः साधु साध्विति शशंसुः । अनायासेन यातानि नः फलानि निहितश्चायं दैतेय इति विस्मय इति भावः ॥ ३३ ॥ देवाः च ऊपरीति छेदः । उत्कृष्टस्वादुनामासाविति छान्दोग्यभाष्योक्तेः ओः उत्कृष्टस्य कृष्णस्योपरि तदुपरीतिवद्देवाः पुष्पसन्ततिं ववृषुः । सर्वलोकैकपालकौ सर्वलोकैकपौ तावलकावलकौ शुक्लकृष्णकेशात्मकाविति वा भूत्वा वत्सपालकौ सन्तौ तौ ॥ ३४ ॥ सप्रातराशौ आशोऽशनं प्रातराशेन प्रातर्भोजनेन सहितौ कृतप्रातरशनौ गोवत्सांश्चारयन्तौ विचेरतुरित्यन्वयः । सर्वे बालाः । जलाशयस्य महासरसोऽभ्याशं समीपं पाययित्वा ताञ्जलं पपुः स्वयं च महत्सत्त्वमद्भुतजन्तुं ॥ ४५ ॥ वज्रसम्भिन्नश्चासौ गिरिश्च तस्य सकाशाच्च्युतं शृङ्गमिव ददृशुः । अनन्तरं तत्र सुरिदमित्थनिर्णयादिति भावः । सत्त्वोऽस्त्री जन्तुष्विति यादवः । स बको नाम नाम्ना प्रागपीति वैकारः सूचयति । इदानीं बकरूपधृक् बकस्य कङ्कस्य । बकःकङ्क इत्यमरः । रूपं धृष्णाति धरतीति स तथा ॥ ३४ ॥ तीक्ष्णतुण्डो बली बकस्तरसाऽऽगत्य कृष्णमग्रसज्जग्रास । इन्द्रियाणि प्राणैर्विना यथा विचेतसो विमनस्का बभूवुः ॥ ३५-३६ ॥ अग्निवदग्निमिव तालुमूलं द्रंष्ट्रामूलं । तालुकाकुदमित्यमरः । प्रदहन्तं जगद्गुरोश्चतुराननस्य पितरं तातं । अनेन गोपालसूनुतामुपजहास मूलकृदिति मन्तव्यं । सद्यश्चछर्दं निरष्ठीवदक्षतं मत्वाऽतिरुषा तुण्डेन चञ्चुपटेन हन्तुं पुनरभ्यपद्यत ॥ ३७ ॥

श्रीसुबोधिनी

बालकैस्तु भ्रामणे प्रहरणे च तच्छरीरं न दृष्टमेव, पश्चात् सफलं दृष्टमित्याह **स कपित्थैरि**ति, **कपित्थैः** फलैः सह तेनैव **पात्यमानैः** स **महाकायः पपात** ह बालैर्ज्ञातं स्थूलं कपित्थफलं शाखा वा पततीति तस्य पातः स्थूलता चात्याश्चर्यमिति हेत्याह, पतितं तं वीक्ष्य **बालाश्च विस्मिता** जाताः कुतोयं दैत्यः कथं पतित इति, भगवत्पातितं ज्ञात्वा **साधुसाध्विति शशंसुः**, ज्ञानं धारणं प्रक्षेपो मारणं चेति प्रत्येकं **प्रशंसे**ति ज्ञापयितुं वीप्साश्चर्यभावज्ञापकं वा, अनेन लोकेवाच्यता परिहृता ॥ ३३ ॥ लोकान्तरेप्यवाच्यपरिहाराय देवानामभिनन्दनमाह **देवाश्चे**ति, देवाश्च **साधुसाध्विति शशंसुः परिसन्तुष्टाः** परितः **सन्तुष्टाश्च** जाताः दैत्यवधाद्, वत्सेषु देवानां दैत्यानां च भोगः, इदानीं देवानामेवेति **परिस्तोषः**, **पुष्पवर्षिणश्च बभूवुः**, तेषां वाङ्मनःकायव्यापारा निरूपिताः अर्थमत्र पतितं, **वत्सासुरं हतं श्रुत्वा व्रजे गोप्यश्च विस्मिता** इत्येवमर्थम् ॥ ३४ ॥ एवं वत्सासुरे हते पुनर्वत्सान्तरशङ्कया वत्सचारणं बाला भगवान् वा न कृतवन्त इत्याशङ्कापरिहारार्थमाह **वत्सपालकौ भूत्वे**ति, **सर्वलोकैकपालकावपि वत्सपालकौ भूत्वा विचेरतु**रिति सम्बन्धः, कदाचिन्न वत्सचारणं किन्तु तद्वृत्तिमानिव निरन्तरं चालयति, अतो वत्सपालका इत्येव लोके प्रसिद्धिः, **सर्वलोकैकपालकावि**ति च, एकपदमप्राधान्यपालकव्यावृत्त्यर्थं, भूत्वेतिमध्ये निवेश उभयप्रसिद्धिख्यापकः, वेदाल्लोकप्रसिद्धिर्दुर्बलेति, वत्सपालकत्वं नोक्तं भविष्यतीत्याशङ्क्य प्रथमं निर्दिष्टं, सन्ध्यापर्यन्तं वत्सचारणं कर्तव्यं, अतो वत्सानां स्तनपानसमय एव प्रातरशनं कृत्वा **सप्रातराशौ** गवां **वत्सान्** धर्मोपयोगिन**श्चारयन्तौ** स्वयमपि **विचेरतुः** ॥ ३५ ॥ एवं वत्सानां दोषं परिहृत्य पालानामपि दोषं परिहर्तुं दम्भात्मकं बकं मारितवानित्युपाख्यानमारमते **स्वं स्व**मिति नवभिः,

यमुनाजलपानेन दोषः सर्वो विनिर्गतः । एकीभूतो बकः प्रोक्तो जलपानात् स दृश्यते ॥ १ ॥
अतः पानं दर्शनं च तेनोपद्रव एव च । ततः सर्वापराधश्च तद्वधोपाय एव च ॥ २ ॥
तद्वधश्च स्तुतिर्देवैर्गोपानां तोष एव च । तथैव गोकुलस्थानां नव प्राणा हि शोधिताः ॥ ३ ॥

प्रथमं बकदर्शनार्थं यमुनायां चारितान् वत्साञ् जलं **पाययित्वा स्वयमपि** जलं पीतवन्त इत्याह **स्वं स्वमि**ति, **वत्सकुलं** वत्ससमूहं **सर्वेषामेव** बहवो वत्सा इति सर्वेषां गमनं, अन्यथा सर्वेषां दर्शनं न स्यात्, तुल्योयं **बकः** सर्वेषामिति सर्वेषां समानक्रिया, **एकदे**ति यदा बालका दोषान् मोचनीया इति भगवदिच्छा तदा, **जलसमीपं गत्वा वत्सकुलं जलं पाययित्वा** स्वयं **जलं पपुः** ॥ ३६ ॥ ततो दोषात्मकं बकं दृष्टवन्त इत्याह **ते तत्रे**ति ते सर्व एव **तत्र** जलनिकटे **बाला** भीरवो **महासत्त्वं** भयानक**मवस्थितं** निकटे मारकत्वेन **स्थितं** प्रथमतो **ददृशुः** पश्चात् **तत्रसुः**, तथापि भगवत्कृपया ते तं हतमेव ज्ञातवन्तः, अन्यथा महाभयेन प्राणवियोगो भवेत्, तदाह **वज्रेण निर्भिन्नस्य गिरेः शृङ्गं च्युतमिव तं ददृशुः**, कंसो हि जगदुपद्रवकर्ता भगवता वज्रेण हत एव, तस्यायं शृङ्गस्थानीयः, सोप्यत्र च्युतः, नास्य व्याधुट्यगमनशङ्केत्यतः क्रीडार्थमेव विनियोगो न तु पीडार्थं, केवलं बालानां दर्शनमात्रेणैव भयमिति ॥ ३७ ॥ ते सर्वे बाला भगवता निष्प्रपञ्चीकृता इति तेषां दोषोयं भगवन्तमपकृतवानित्याह **स वै बक** इति, **नाम**प्रसिद्ध्यैव तस्य दोषः स्पष्टः, **महानसुर** इति वत्सापेक्षयापि **महान्**, भगवदीयानां दोषत्वात्, **बकरूपमेव** च बिभर्ति तस्योपास्या देवता सैवेति स्वरूपतः प्रसिद्धा च, देवानुग्रहाच्च **महान्**, अत एव **तरसा** शीघ्र**मागत्य कृष्णं** सदानन्दं लोभानृतरूपौ **तुण्डौ** यस्य तादृशो **बली** क्रियाशक्तिप्रधानो ग्रासं कृतवान्, आनन्दो हि लोभेन सच् चानृतेन ग्रस्यत एव, 'तं यथायथोपासत' इति श्रुतेः, भगवतैव भगवान् वशीकृतः, गोपानां भगवत्प्रेमज्ञापनार्थमेव तथा कृत इति ॥ ३८ ॥ ततस्तेषां प्रेमाणमाह **कृष्णमि**ति, **महाबक** उपास्यस्तेन कवलीकृतं **दृष्ट्वा रामादयो विचेतसो** जाताः; तत्प्राणत्वात्, तेषां क्रियायां ज्ञाने वा सर्वथा सामर्थ्यं गतमितिज्ञापनार्थं दृष्टान्तमाह **विना प्राणैरिन्द्रियाणी**वेति, एकस्तु न लोके दृष्टान्त इति ज्ञापयितुं **प्राणै**रितिबहुवचनम् ॥ ३९ ॥ लोभानृताभ्यामेव सदानन्दतिरोभाव इति तुण्डदेशादधोगतः सरस्वतीस्थाने वेदानां प्रामाण्यार्थं **तालुमूलं** ज्वालितवान्, तीक्ष्णद्रव्याणामपि मरिचादीनां दाहकत्वमस्तीति तद्व्यावृत्त्यर्थ**मग्निवज्** ज्वालनमुक्तं, तथा दहन्तं त्यक्तवानित्याह तमिति, **तालुमूलं** कण्ठस्थानं, **प्रकर्षो** गिलनासामर्थ्यसम्पादकः, नन्वपहतपाप्मा कथं तालुमूलसम्बद्धो जात इत्याह **गोपालसूनुमि**ति, तथाभावं सम्पादयन्नेतदपि कृतवानित्यर्थः, ननूभयमपि किमिति प्रदर्शितवानित्याशङ्क्याह **पितरं जगद्गुरो**रिति, **ब्रह्मणो**पि पिता, स हि सर्वानुपदिशति 'तत्त्वमसी'ति, तत्रासम्भावनया न कोपि तथात्वं मन्यते तस्यैतन्निदर्शनार्थं भगवता कृतं, अनेनैव महत्त्वमपि सूचितं, कथं मारयिष्यतीतिशङ्का च परिहृता, किञ्च साधारणोपि ब्राह्मणो गरुडेन भक्ष्यमाणो गरुडस्यापि तालु ददाह किं पुनर्ब्रह्मणोपि पिता परब्रह्म ? अत**श्चच्छर्द** बहिर्निष्कासितवान्, अन्यथा ज्वलित एव स्यात्, यदि तावदेव कृत्वा गच्छेत् तदा जीवेद् वा, **पुन**रिति **रुषा** केनाप्यंशेनाक्षतं भगवन्तं **तुण्डेन** सम्पुटितेन पीडयितु**मभ्यपद्यत**, **अ**तिरोषाद् देवता तिरोहिता ॥ ४० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पितरं जगद्गुरोरित्यत्र । **तस्यैतन्निदर्शनार्थ**मिति । यथा गोपालसूनुरपि तत्पितृत्वेन **परब्रह्मरूप** एव, तथा प्राकृतसंघातेषु प्रतीयमानोपि जीवोक्षररूप इति ज्ञापनार्थमित्यर्थः ॥ ४० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तावित्यस्याभासे **वत्सान्तरशङ्कये**ति **वत्से**ष्वसुरान्तरशङ्कया ॥ ३५ ॥ **स्वं स्व**मित्यत्राग्रिमप्रकरणतात्पर्योक्तौ **दोषः सर्वो विनिर्गत** इति **दोषो** दम्भरूपो **विनिर्गत**स्तेभ्यः **पृथग्** जात इत्यर्थः । स च बहिःष्ठानामेव न तु ये स्वतो निष्कासितास्तेषामिति ज्ञातव्यं, **नव प्राणा** इति दशमः स्वयमेवेति न तत्र किञ्चिदपेक्ष्यत इतिभावः, **यमुनाया**मिति सामीप्यसप्तमी ॥ ३६ ॥ **ते तत्रे**त्यत्र **वक्त्रे**णेत्याकाशवाणीरूपवाग्**वक्त्रे**ण ॥ ३७ ॥ **कृष्ण** इत्यस्याभासे **गोपाना**मित्यादि, रूपान्तरेण मूलरूपाभिभवोपि न युक्त इति शङ्कानेन परिहृता ज्ञेया, **एक** इति मुख्यः प्राणः प्रसिद्ध्यभावादितिभावः ॥ ३९ ॥ **तं तालुमूल** इत्यत्र कण्ठे गमनस्य प्रयोजनमाहु**र्वेदानां प्रामाण्यार्थ**मिति परापश्यन्तीमध्यमावैखरीतिचातुर्विध्यपक्षे शब्दस्य मध्यमाख्यावस्थायास्तत् स्थानमाधिदैविकश्चार्थः शब्देन सह वर्तते पुरुषश्च पुरं दहति तद् वेदैरुच्यत इति तत्**प्रामाण्यार्थं** तत् तथेत्यर्थः, **उभय**मित्यपहतपाप्मत्वं **तालुमूलसम्बन्धं** च **तस्यैतन्निदर्शनार्थ**मिति तत्तात्पर्यं **टिप्पण्यामाहुर्यथे**त्यादि, ज्ञापनप्रयोजनं तु 'ये च प्रलम्बबकदर्दुरे'तिद्वितीयस्कन्धवाक्योक्तमुक्तियोग्यतेति प्रतिभाति, दर्शनस्य हेत्वन्तरमाहुः **किञ्चे**त्यादि ॥ ४० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

देवाश्चेत्यत्र **वत्से**ष्विति "द्वया ह प्राजापत्या" इतिन्यायेनोभयविधत्वं स्थितमिदानीमासुरभावस्य निर्वर्तितत्वात् केवलदेवत्वं सम्पन्नमित्यर्थः ॥ ३४ ॥ **स वै बक** इत्यत्र **संवे**तीति असुरोपास्यो मायारूपो भगवाननेन बकाकृतिरुपास्यत इत्यर्थः, 'लोभो दुःखधर्मद्वेषोद्भेदरूप' इतिनिबन्धे विवृतं, दुःखं चानन्दाभावः, अतो लोभरूपाभावसामग्र्या बलिष्ठायाः प्रतियोगितिरोधायकत्वं युक्तमितिभावेनाहुः **आनन्दो ही**ति ॥ ३८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तं तालुमूलं प्रदहन्तमित्यस्याभासे **सरस्वतीस्थान** इति कण्ठदेश इत्यर्थः, कण्ठदेशस्य सरस्वतीस्थानत्वात् **वेदानां प्रामाण्यार्थ**मिति **पितरं जगद्गुरो**रित्यस्य विवृतौ **तत्रासम्भावनये**ति "तत्त्वमसी"त्यत्र जीवस्य भगवदभेदः प्रतिपादितः, स च सर्वज्ञेन सहाल्पज्ञस्य न सम्भवतीत्यसम्भावनया लोको न मन्यते, तस्या असम्भावनायाः निवृत्त्यर्थं विरुद्धधर्माश्रयत्वं भगवता लोके प्रदर्शितं गोपालसूनुत्वजगद्गुरुपितृत्वप्रदर्शनेन, तदेतदाहुः **तस्ये**ति, "तत्त्वमसी"त्यत्र सर्वज्ञाल्पज्ञयोरभेदो निरूपितस्तस्याभेदस्येत्यर्थः, **तदेतन्निदर्शनार्थं भगवता कृत**मिति निदर्शनार्थं भगवता एतत् कृतमित्यन्वयः, विरुद्धधर्माश्रयत्वबोधनार्थं गोपालसूनुत्वजगद्गुरुपितृत्वरूपधर्मनिदर्शनं कृतमित्यर्थः, एवं सति सर्वज्ञाज्ञयोरभेदे गोपालसूनुत्वजगद्गुरुपितृत्वरूपधर्मस्य निदर्शनत्वमितिबोध्यं, यथा गोपालसूनुत्वेपि जगद्गुरुपितृत्वं तथा जीवत्वेपि ब्रह्मत्वमिति निदर्शनं ज्ञेयम् ॥ ४० ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

स्वं स्वं वत्सकुलं सर्वं इत्यत्र नवानां श्लोकानां वाक्यार्थानाहु**र्यमुना जले**त्यादि का० ११५$\frac{१}{४}$ । प्रथमश्लोके जलपानं द्वितीये दैत्यदर्शनं, तदेवाहु**रत** इति का० ११६$\frac{३}{४}$, ११७$\frac{०}{४}$ । भगवता सह स्थितानां गोपानां तोषो "मुक्तं बकास्या"दितिश्लोकार्थः, गोकुलस्थानां तोषः "श्रुत्वा तद्विस्मिता गोपा" इति नवमश्लोकार्थः, तोष इतिपदमुभयत्र सम्बध्यते, नवश्लोकसङ्ख्यातात्पर्यं **नव प्राणा हि शोधिता** इति, **गोकुलस्थाना**मिति च पदमुभयत्रान्वेति ॥ ११७$\frac{१}{४}$ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पात्यमानैः कपित्थैः कपित्थफलैः सह स दैत्योऽपि पपात । 'मरणसमये मायाया अपगमात् प्रकटितनिजरूपो बभूव इत्याशयेनाह—महाकाय इति । अयमेव कपित्थपातने हेतुर्ज्ञेयः । 'ह' इत्याश्चर्यं । एतादृशस्याप्येवं भ्रामणेन बालेन मारणमत्याश्चर्यमित्यर्थः । अत एव तं पतितं वीक्ष्य सर्वे बाला विस्मिताः सन्तः 'साधु कृतं साधु कृतम्' इत्येवं कृष्णं शशंसुः ॥ ४४ ॥ देवानामपि भयङ्करत्वात्तद्वधे देवाश्च परिसन्तुष्टाः कृष्णस्योपरि पुष्पवर्षिणो बभूवुः ॥ ४५ ॥ सर्वेषां लोकानामेकौ मुख्यौ पालकावपि तौ रामकृष्णौ वत्सपालकौ भूत्वा प्रातराशः प्रातर्भोज्यमन्नं तत्सहितौ तद्गृहीत्वा वत्सांश्चारयन्तौ वने विरेजतुः ॥ ४६ ॥ ते सर्वे रामकृष्णादयो गोपबाला एकदा स्वं स्वं वत्सकुलं वत्ससमूहं पाययिष्यन्तस्तावज्जलाशयस्याभ्याशं समीपं गत्वा वत्सान् जलं पाययित्वा स्वयमपि पपुः ॥ ४७ ॥ तेच बालास्तत्र जलाशयतीरे अवस्थितं महासत्त्वं स्थूलबकविशेषं

ददृशुः, दृष्ट्वा च तत्रसुः त्रासं जग्मुः। त्रासहेतुत्वेनोक्तमहत्त्वे दृष्टान्तमाह—वज्रेति। इन्द्रवज्रेण निर्भिन्नम्, अत एव च्युतं भूमौ पतितं गिरेः शृङ्गमिवेत्यर्थः ॥ ४८ ॥ स वै बकरूपधृक् बको नाम महान् असुरः सहसा आशु चागत्य कृष्णमग्रसत्। तत्र सामर्थ्यमाह—तीक्ष्णतुण्डो बलीति ॥ ४९ ॥ तं कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः विचेतसो मूर्च्छिता बभूवुरित्यन्वयः। तत्र दृष्टान्तमाह—इन्द्रियाणीवेति। यथा प्राणैर्विना इन्द्रियाणां ज्ञानकर्मात्मकानां ज्ञाने कर्मणि च न सामर्थ्यम् स्थितिरपि दुर्लभा, तथा तेषामपि तदा ज्ञानादिसामर्थ्यं गतं मूर्च्छा च जातेत्यर्थः ॥ ५० ॥ तं गोपालसूनुं कृष्णं सद्य एव बकश्चच्छर्द। तत्र हेतुमाह—अग्निवत्तालुमूलं प्रदहन्तमिति। दाहे सामर्थ्यं सूचयन् विशिनष्टि—जगद्गुरोर्ब्रह्मणोऽपि पितरमिति। तदा यदि तच्छरणमागच्छेत्तदा शरणागतवत्सलो भगवांस्तं न हन्यात्। स तु तदुपायानभिज्ञोऽतस्तमक्षतं व्रणरहितं दृष्ट्वाऽतिरुषा महता क्रोधेन पुनस्तं तुण्डेन चञ्चुना हन्तुमभ्यपद्यत सम्मुखमाजगाम ॥ ५१ ॥

अन्वितार्थप्रकाशिका

स इति सार्द्धम् ॥ पात्यमानैः कपित्थैः कपित्थफलैः सह महाकायः स दैत्योऽपि पपात। मरणसमये मायापगमेन प्रकटितनिजरूपत्वात्। हेत्याश्चर्ये। तं पतितं वीक्ष्य सर्वे बाला विस्मिताः सन्तः साधु कृतं साधु कृतमित्येवं कृष्णं शशंसुः। देवाश्च परिसंतुष्टाः कृष्णस्योपरि पुष्पवर्षिणो बभूवुः ॥ ४३ ॥ ताविति ॥ सर्वेषां लोकानामेकौ मुख्यौ पालकावपि तौ रामकृष्णौ वत्सपालकौ भूत्वा प्रातराशः प्रातर्भोज्यमन्नं तत्सहितौ तद्गृहीत्वा वत्सांश्चारयन्तौ वने विचेरतुः ॥ ४४ ॥ स्वं स्वमिति ॥ ते सर्वे रामकृष्णादयो गोपबाला एकदा स्वं स्वं वत्सकुलं वत्ससमूहं पाययिष्यन्तस्तावज्जलाशयस्याभ्याशं समीपं गत्वा वत्सान् जलं पाययित्वा स्वयमपि पपुः ॥ ४५ ॥ ते तत्रेति ॥ ते च बालास्तत्र जलाशयतीरे अवस्थितम् इन्द्रवज्रेण निर्भिन्नम् अत एव च्युतं भूमौ पतितं गिरेः शृङ्गमिव महासत्त्वं स्थूलबकविशेषं ददृशुः। दृष्ट्वा च तत्रसुः त्रासं जग्मुः ॥ ४६ ॥ स वै इति ॥ बकरूपं धर्जति गच्छति बकरूपधृक्। गत्यर्थात् धृजेः क्विप्। तीक्ष्णतुण्डः बली च बको नाम महान् असुरः सहसा आशु चागत्य कृष्णमग्रसत्। तत्रभाव आर्षः ॥ ४७ ॥ कृष्णमिति ॥ कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः प्राणं विना इन्द्रियाणि इव विचेतसः ज्ञानरहिता मूर्च्छिता बभूवुः। रामः आदिर्येषामित्यतद्गुणसंविज्ञानः। तेन रामो विचेता नाभूदिति स्वामिपादाः। भ्रातृस्नेहादिति परे ॥ ४८ ॥ तमिति ॥ जगद्गुरोः ब्रह्मणः अपि पितरं गोपालस्य सूनुम् अग्निवत् तालुमूलं प्रदहन्तं तं कृष्णं बकः सद्यः एव चच्छर्द। बाहुलकात् णिजभावः। तं च अक्षतं व्रणरहितं दृष्ट्वातिरुषा महता क्रोधेन पुनस्तुण्डेन चञ्च्वा हन्तुमभ्यपद्यत संमुखमाजगाम ॥ ४९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुष्पवर्षिणः पुष्पाणां वर्षणं अस्ति एषां ते ॥ ४१ ॥ सर्वेषां लोकानां एकावाद्यौ पालकौ सप्रातरासौ प्रातराशः प्रातर्भोज्यं अन्नं तेन सहितौ विचेरतुः ॥ ४२ ॥ वत्सकुलं वत्सनिकरं जलानामाशयो ह्रदस्तस्य अभ्याशं निकटम् ॥ ४३ ॥ महासत्वं महापक्षिणं वज्रेण इंद्रहेतिना भिन्नं पर्वताद् च्युतं पतितं शिखरमिव तत्र ददृशुः ॥ ४४ ॥ समीपं आगत्य ॥ ४५ ॥ अर्भकाः बालाः विचेतसः स्मृतिः भ्रष्टः ॥ ४६ ॥ अग्निवत् तालुमूलं प्रदहंतं। जगद्गुरोर्विधेः पितरं तं श्रीकृष्णं अतिरुषा अतिक्रोधेन सद्यः चच्छर्द मुखाद्बहिर्निष्कासितवान् अक्षतं क्षतरहितं श्रीकृष्णं पुनः तुंडेन चञ्च्वा हंतुं ॥ ४७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति ॥ महान् कायो देहो यस्य सः, मरणवेलायां प्रकाशितस्वमहाशरीर इत्यर्थः। स दैत्यः, पात्यमानैः दुर्भरतच्छरीरताडितत्वादामैः सद्भिरपि पतद्भिः, कपित्थैः सह, भुवीति शेषः। पपात। तं वीक्ष्य संपतितं तमवलोक्य, ह स्फुटं यथा तथा, बालाः विस्मिताः सन्तः, साधु साध्विति, शशंसुः प्रशंसां चक्रुः ॥ ४३ ॥ अथ बकासुरवधात्मकं तच्चरित्रमाह ॥ ताविति ॥ सर्वे च ते लोकाश्च तेषामेकपालकौ मुख्यरक्षकौ सन्तावपि, तौ रामकृष्णौ, वत्सपालकौ, भूत्वा, एकदा सप्रातराशौ प्रातर्भोक्तव्यपर्युषितान्नसहितौ एव, गवां वत्सांश्चारयन्तौ सन्तौ, विचेरतुः ॥ ४४ ॥ स्वं स्वमिति ॥ सर्वे रामकृष्णप्रधानाः सर्वेऽपि गोपबालकाः, स्वं स्वमात्मीयं, वत्सकुलं वत्ससमूहं, पाययिष्यन्तः सन्तः, तावत् जलाशयाभ्याशं जलाशयस्य समीपं गत्वा, पाययित्वा वत्सान् जलपानं कारयित्वा, पपुः स्वयमपि जलपानं चक्रुः। इति द्वयोरेकान्वयः ॥ ४५ ॥ त इति ॥ ते बालाः, तत्र अवस्थितं, महासत्त्वं महान्तं जन्तुं, ददृशुः। तं च वज्रनिर्भिन्नं शक्रवज्रेण भेदं प्राप्तं, अत एव च्युतं, गिरेः शृङ्गं शिखरं इव, दृष्ट्वेति शेषः। तत्रासुस्त्रासं जग्मुः ॥ ४६ ॥ को वैवंविधो जन्तुस्तत्राह ॥ स वा इति ॥ बकरूपधृदपि महान्, सः बकः नाम असुरः, वै तीक्ष्णतुण्डः निशितचञ्चूः, बली बलवान्, अत एव, सहसाऽकस्मादेव सहसेत्याकस्मिकाविमर्षयोरर्थयोर्द्योतकमव्ययम्। आगत्य, कृष्णं अग्रसीत् ॥ ४७ ॥ कृष्णमिति ॥ राम आदिर्येषामित्यतद्गुणो बहुव्रीहिः। रामस्य तन्महिमाभिज्ञत्वात्तं विनाऽन्ये इत्यर्थः। अर्भका बालाः, कृष्णं, महाबकग्रस्तं महता बकेन गिलितं दृष्ट्वा, प्राणं विना, इन्द्रियाणि इव, विचेतसोऽचेतन-

प्राया:, बभूवु: ॥ ४८ ॥ तमिति ॥ जगद्गुरोर्ब्रह्मण:, पितरमपि, गोपालसूनुं लीलया नन्दार्भकतां नाटयन्तं, अग्निवत् तालुमूलं प्रदहन्तं, तं श्रीकृष्णं, बक:, सद्यस्तत्क्षणमेव, चच्छर्द उदगिरत्। अक्षतं लेशमात्रमपि क्षतिमप्राप्तं कृष्णं, तुण्डेन चञ्च्वा, हन्तुं अतिरुषा, पुन: अभ्यपद्यताभिमुखमागच्छत् ॥ ४९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ते वीक्ष्येति : १०.११.४४.

दैत्यध्वंसं यत्ततोऽहं करिष्याम्येवंपूर्वं यत्प्रतिज्ञातमासीत्। तस्यारम्भो दर्शितोऽद्याच्युतेनेत्यानन्दात्ते साधु पुष्पाण्यमुञ्चन् ॥५६॥

ते तत्रेति : १०.११.४७.

स्यात् सत्त्वमप्यसाधौ चेद्भवेत त्रासकृदेव यत्। जडाशये महासत्त्वस्थितिस्तत्रासदाऽभवत् ॥ ५७ ॥
अतिशुद्धाकृतेरन्तर्मालिन्यं प्रायश: स्थितम्। दीपस्येवेति तं भीता ददृशुर्दूरतोऽर्भका: ॥ ५८ ॥
शुद्धाकृतिं समीक्ष्यैव सहसा तत्समागम:। नैव कार्य इति व्यक्तं बकबालनिदर्शनम् ॥ ५९ ॥

बकरूपधृगिति : १०.११.४८.

सजातीयवेषेण गोजातगोऽपि पुरा स स्वकार्याय नालम्बभूव।
विजातीयवेषेण गोजातरोधस्थित: स्यामतोऽसौ तदूर्ध्वं तथाऽगात् ॥ ६० ॥

वत्सासुरहतिरभवद् वत्सत्वादेव यत्ततोऽहमिह। नहि न बक: स्यामिति किं बकरूपोऽगात्तदूर्ध्वमेषकुधी: ॥ ६१ ॥
कियत् कृष्णबलं नाम सत्त्वराशेर्ममाग्रत:। इति मत्वा बक: कृष्णं जग्रसे भ्रान्तमानस: ॥ ६२ ॥
जडजाततटस्थतां श्रयन् जलजातेषु च सत्त्वशोधक:। भविता य इहास्य मानसे वसतिर्मे श्रुतिगेत्यबोधयत् ॥ ६३ ॥
बहि: सवं शतो रम्य: स्याच्चित्तेऽपि तथैव किम्। अवेक्षणाय लक्ष्मीशस्तदन्तरमवीविशत् ॥ ६४ ॥
नाम्नाऽऽकृत्या च कान्तोऽसौ वृथानेन बको हत:। इत्यज्ञवाङ्निरासाय किमीशोऽन्तर्गतोऽभवत् ॥ ६५ ॥

कृष्णमिति : १०.११.४९.

वियोगाद् दु:खित: कृष्णो वयं चात्र कथं शुभम्। इति स्थूलदृश: प्रापुर्भ्रमं राममुखाऽर्भका: ॥ ६६ ॥

तं तालुमूलमिति : १०.११.५०.

श्रीकृष्णस्य यदा निजोदरदरी-यानाय तुण्डे निजे येनानल्पमकल्पि वर्त्म रिपुणा तत्कृष्णवर्त्माश्रित:।
तत्कण्ठ: प्रबभूव तेन दहनं कण्ठस्य तस्यार्थत: प्राप्तं तत्र न शङ्कितव्यमभवत्कृष्ण: स उष्ण: कथम् ॥ ६७ ॥

चच्छर्देति :

वृन्दावने मम प्रीतिर्विहर्तुं नवकानने। इति किं सकलाधीशो निश्चक्राम बकाननात् ॥ ६८ ॥
शुद्धाकृतिर्बहिर्भूरि योऽन्त: संभृतकिल्बिष:। न तस्य भगवत्प्राप्ति: कचिज्जातापि जीर्यति ॥ ६९ ॥

ददारेति : १०.११.५१.

ये पूतनाद्या: खलु तेऽखिला अपि तदन्नभुक्त्वेन तदीयसेवका:।
सत्यस्त्वयं तस्य सखा बकोऽस्ति यत् पक्षीति सक्रोधमदारयत् तदा ॥ ७० ॥

पीतं यत्स्तन्यमसौ तद्भ्राता मातुलो ममेति किमु। मत्वा जनितक्रोधावेश: शकलीचकार बकमीश: ॥ ७१ ॥
कंसादिनिखिलखलजन वंशविखण्डनमहं तथा कुर्वे। निहतो बको यथेत्थं निदर्शनायैव वंशवद् दलित: ॥ ७२ ॥
कृष्णनाम मुखे स्थाप्यं न कृष्णप्रतिमा कचित्। अन्यथाचरणात् स्पष्टोदाहृतिर्बकदुर्दशा ॥ ७३ ॥
सद्द्वेषं दधते ये तु दुर्हृदो हिंस्रवृत्तय:। विदारयामि सद्यस्तानित्यसौ तमदारयत् ॥ ७४ ॥

कृष्णप्रिया

यह सारी घटना देखकर सारे ग्वालबालों को आश्चर्य की अवधि न रही और लड़के वाह वाह कर उठे और देवगण सन्तुष्ट हो पुष्प वृष्टि करने लगे ॥ ३३ ॥ इस प्रकार श्रीबलभद्रजी और श्रीकृष्ण सारे विश्व के एक ही पालक हैं वे ही अब वत्सपाल बने हैं नित्य प्रात: काल उठकर कलेवे की सामग्री साथ लेकर बछड़ों को चराते हुए एक वन से दूसरे वन में घूमते थे ॥ ३४ ॥ एक दिन ग्वालबाल अपने अपने बछड़ों की टोली को जल पिलाने के लिए जलाशय के पास ले गये। पहले उन्होंने बछड़ों को जल पिलाया पुन: स्वयं पानी पीने लगे ॥ ३५ ॥ इतने में गोपबालकों को एक बहुत बड़ा प्राणी

बैठा दीख पड़ा, देखने से ऐसा लगता था कि मानो इन्द्र के वज्र से टूटा हुआ कोई पर्वत का शिखर ही हो। उसको देख कर सब डर गये ॥ ३६ ॥ वास्तव में तो वह तीक्ष्ण चोंच वाला महान् बलशाली "बक" नाम का एक भयानक असुर था जो बगुले का रूप धारण कर बैठा था। वह बकासुर श्रीकृष्ण की ओर एक व एक झपटा और श्रीकृष्ण को निगल लिया ॥३७॥ बलभद्रजी एवं गोपबालक श्रीकृष्ण को महाबगुले से निगले देख ठीक वैसे ही अचेत हो गये जैसे विना प्राण के इन्द्रियाँ अचेत बन जाय ॥ ३८ ॥ लोकपितामह श्रीब्रह्मा के भी पिता और नन्द बाबा के पुत्र श्रीकृष्ण प्रभु उसके तालु के नीचे पहुँचे तब वे अग्नि के समान उसके तालू को जलाने लगे। उसे सहन न हो सका वह घबड़ा कर मारे क्रोध से तुरन्त ही श्रीकृष्ण को उगल दिया पुनः दुबारा चोंच चलाना चाहा ॥ ३९-४० ॥

तमापतन्तं स निगृह्य तुण्डयोर्दोर्भ्यां बकं कंससखं सतां [1]गतिः ।
पश्यत्सु बालेषु ददार लीलया मुदावहो वीरणवद् दिवौकसाम् ॥ ४१ ॥
तदा बकारिं सुरलोकवासिनः समाकिरन् नन्दनमल्लिकादिभिः ।
समीडिरे चानकशङ्खसंस्तवैस्तद् वीक्ष्य गोपालसुता विसिस्मिरे ॥ ४२ ॥
मुक्तं बकास्यादुपलभ्य बालका[2] रामादयः प्राणमिवैन्द्रियो गणः ।
[3]प्रत्यागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान् व्रजमेत्य तज्जगुः ॥ ४३ ॥
श्रुत्वा तद् विस्मिता गोपा गोप्यश्चातिप्रियादृताः । प्रेत्यागतमिवौत्सुक्यादैक्षन्त तृषितेक्षणाः ॥ ४४ ॥

कर्वमक्षमा

अन्वयः—सतां गतिः सः आपतन्तं कंससखं तं बकं दोर्भ्यां तुण्डयोः निगृह्य बालेषु पश्यत्सु दिवौकसां मुदावहः लीलया वीरणवत् ददार ॥ ४१ ॥ सुरलोकवासिनः तदा नन्दनमल्लिकादिभिः समाकिरन् च आनकशङ्खसंस्तवैः समीडिरे गोपालसुताः तद् वीक्ष्य विसिस्मिरे ॥ ४२ ॥ रामादयः बालकाः बकास्यात् मुक्तं ऐन्द्रियः गणः प्राणं इव उपलभ्य प्रत्यागतं तं परिरभ्य निर्वृताः वत्सान् प्रणीय व्रजं एत्य तत् जगुः ॥ ४३ ॥ तत् श्रुत्वा गोपाः विस्मिताः च गोप्यः अतिप्रियादृताः तृषितेक्षणाः प्रेत्यागतम् इव औत्सुक्याद् ऐक्षन्त ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

समीडिरे तुष्टुवुः । आनकैः शंखैरन्यैश्च संस्तवैः सह ॥ ५२ ॥ स्वस्थानमागतं प्राणमिव कृष्णम् । प्रणीय एकीकृत्य ॥ ५३ ॥ अतिप्रियेणातिप्रीत्या आदृताः सादराः । प्रेत्यागतमिव लोकांतरादागतमिव । तृषितान्यतृप्तान्यमृतं पिबं तीवेक्षणानि येषां ते ॥ ५४ ॥ अहो बतेत्यादिश्लोकत्रयस्य इति नंदादय इत्यनेनान्वयः । अपि एवमपि तेषामेवानिष्टमासीत् यतस्तैः पूर्वमन्येषां भयं कृतम् ॥ ५५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बकारिं कृष्णम् । तत् बकहिंसनरूपं वा तत् । तन्मरणोत्तरं पुष्पवृष्ट्यादि ॥ ॥ ५२ ॥ परिरभ्य आलिंग्य । तत् बकहिंसनम् ॥ ५३ ॥ तत् बकमारणम् । दर्शनेऽलंबुद्धिरहिता इति तृषितेक्षणार्थः ॥ ५४ ॥ अहो आश्चर्ये । बत खेदे । मृत्यवो मृत्युहेतवः । एवमपि बहुविधमृत्युहेतौ सत्यपि । तेषां मृत्युहेतूनाम् । यतः कारणात् । तैर्मृत्युहेतुभिः पूतनादिभिः । पूर्वमन्यजन्मनि । अन्येषां लोकानाम् । भयं दुःखम् । 'भुंक्ते जनो यः । परदुःखदस्तत' इत्युक्तेः । "यो हि यस्य विषमं विचिंतयेत्प्राप्नुयात्सकुमतिर्हि तत्फलम्" इति हरिविलासोक्तेश्च । यद्वाऽनेन श्रीकृष्णेन पूर्वमभयं भयनिवर्त्तकं कर्म कृतम् ॥ ५५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मुदावहने लक्षणमेवाह–तदेति । सम्यक् अवाकिरन् तैर्व्याप्तं चक्रुः नन्दनस्य मल्लिकादिभिः पुष्पैरिति तेषां परमप्रियैरित्यर्थः । आनकशङ्खवाद्यसहितैः संस्तवैरुत्तमस्तोत्रैः सम्यक् ईडिरे तुष्टुवुः बकवधकर्मणा प्रशशंसुः संस्तवैः पुरुषसूक्तादिभिरित्यर्थः । विसिस्मिरे मित्राभ्युदयजपरमानन्दमयं विस्मयं प्रापुरित्यर्थः । यतो गोपालानां तेषां यत्किञ्चित्तदेकाभ्युदयैकजीवनानां तत्स्नेहविशेषावृतैश्वर्यज्ञानानां सुताः ॥ ४१ ॥ स्नेहविशेषमेव दर्शयति–तं बकारिं स्वस्थानमागतं सन्तम् उपलभ्य समीपे प्राप्य पश्चात् परिरभ्य निर्वृताः सन्तः बकास्यान्मुक्तमितिस्नेहोद्रेकेण निर्भरालिङ्गनं तेन च परमनिर्वृतिभरं सूचयति । तेषामादौ

---

१. पतिः—श्रीधर. वंशी. ; गतिः—वीर. विज. । २. दारकाः—वीर. । ३. स्थाना—श्रीधर. वंशी. वीर. विज. जीव. विश्व. ।

श्रीभगवन्निकटे स्वयमागमनं तदानीमपि सम्यक् स्वास्थ्याऽनुदयेनाशक्तेरिति ज्ञेयं तच्च प्राणादिदृष्टान्तेनैव व्यञ्जितं स्थानगतमिति प्राणेऽप्यन्वितं वत्सान् प्रणीय दिनान्तरवत् कालमनपेक्ष्य सर्वान् परावर्त्त्य यद्वा, पालकानां दुर्दशां दृष्ट्वा दुःखेनेतस्ततो गतान् मेलयित्वा तद्बकवधादिकं जगुः सम्भ्रममिश्रेण प्रहर्षेण गीतवदुच्चैः सुस्वरेण कथयामासुः एवं वत्सवधश्चानद्भुततमत्वेनासुरत्वाप्रतीतिशङ्कया च तद्दिनेनुक्त्वा संप्रत्यैव कथित इति ज्ञेयं षड्विंशाध्याये श्रीगोपैः तस्याप्यनुवादात् श्रीशुकस्य प्रेमजविस्मृतिर्वा ॥ ४२ ॥ गोपा गोप्यश्च विस्मिता अहो बतेत्यादिवक्ष्यमाणरीत्या जातविस्मयाः अतोऽतिशयेन प्रियं प्रेमयुक्तं यथा स्यात्तथा आद्दृताः तद्रक्षणादिषु जातात्यन्तमनःप्रयत्नाः अत एवौत्सुक्यात् आसक्त्या ऐक्षन्त तं चिरं तद्दर्शनान्न निवृत्ता बभूवुरित्यर्थः । यतस्तृषितेक्षणाः अतृप्तनेत्राः परमप्रीत्यौत्सुक्यादीक्षणे हेतुः प्रेत्येति इव उत्प्रेक्षायां स्नेहभरेण तेषां तथा मननात् । यद्वा, प्रेत्यागतं कञ्चित् कश्चिद्बन्धुरिव यद्वा दिवा तद्विरहेण स्वतस्तद्दर्शनतृष्णायुक्तेक्षणा एव विशेषतो बकवधादिश्रवणेनौत्सुक्यादैक्षन्त अन्यत् समानम् ॥ ४३ ॥ अहो इति चतुष्कम् इतीति चतुर्थेनान्वयात् व्याख्या तु पृथक् क्रियते तत्र गोपालानामन्योन्यं यथा युक्तं विस्मयोक्तिमाह—अहो इति त्रिभिः । अहो आश्चर्ये बत खेदे अस्यैव मृत्यवः तद्धेतवः बालस्येति स्नेहभरेण अन्यत्तैः । यद्वा, यतः पूर्वं प्रथममागत्य तस्य भयं कृतम् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

मुदविहन् लक्षणमेवाह—तदेति । सम्यगवाकिरन् व्यापयामासुर्नन्दनस्य मल्लिकादिभिः पुष्पैरिति तेषां परमोत्तमता सूचिता । आनकशङ्खवाद्यसहितैः संस्तवैरुत्तमस्तोत्रैः सम्यगीडिरे तुष्टुवुस्तल्लीलया बकविदारणं सुरलोकवासि-कृतञ्च महोत्सवं वीक्ष्य साक्षादनुभूय विसिस्मिरे विस्मिता बभूवुः, यतो गोपपुत्राः श्रीकृष्णस्नेहाकुलचित्ततयान्यानुसन्धानाशक्ता इत्यर्थः, किंवा स्वर्गवासिनामपि महोत्सवेन बकस्य महादुष्टताद्यनुमानाद् विसिस्मिरे, यतो गोपालसुता देवेषु सादरा इति भावः, यद्वा, विशेषेण स्थितं चक्रुर्नन्दनस्य मल्लिकादिपुष्पाणां श्रीवृन्दावनजेभ्यस्तेभ्योऽतिन्यूनत्वेन, तथानकादिवाद्यस्य वेणुदलादि-वाद्यतोऽतिन्यूनत्वेन, तथा देव-संस्तावानां गोकुलवासि-स्तोत्रेभ्योऽतिन्यूनत्वेन पुष्पवर्षाद्युत्कर्षासिद्धया महोत्सवलक्षणासम्पत्तेः, यतो गोपालसुताः श्रीकृष्णप्रियसखाः परमविदग्धा इत्यर्थः ॥ ५२ ॥ तं बकारिं स्वस्थानमागतं सन्तमुपलभ्य समीपे प्राप्य पश्चात् परिरभ्य निर्वृताः सन्तः । बकास्यान्मुक्तमिति स्नेहोद्रेकेण निर्भरालिंगनम् , तेन च निर्वृतिभरं सूचयति तेषामादौ श्रीभगवन्निकटे स्वयमनागमनं हर्षभराकुलत्वेन, किंवा तदानीमपि सम्यक् स्वास्थ्यानुदयेनाशक्तेरिति ज्ञेयम् , यद्वा, स्थानागतमिति प्राणस्यैव विशेषणम् , दृष्टान्तस्तु सद्यः स्वस्थतायां तदेकहेतु-निर्वृतायाञ्च, यद्वा, उपलभ्य ज्ञात्वा स्वस्थाने आगतमपि धावित्वाग्रेऽभिगम्य परिरभ्य । अन्यत् समानम् । वत्सान् प्राणीय दिनान्तरवत् कालमनवेक्ष्य सर्वान् परावृत्य, यद्वा, पालकानां दुर्दशां दृष्ट्वा दुःखेनेतस्ततो गतान् मेलयित्वा, यद्वा, प्रकर्षेणानीय मृतप्रायांस्तान् भगवदमृतदृष्ट्या जीवयित्वेत्यर्थः । तद्बकवधादिकं जगुः, प्रहर्षेण गीतवदुच्चैः सुस्वरेण कथयामासुः, यद्वा, तदानीमेव तद्गीतं निबध्य तद्द्वारा-कथयन्नित्यर्थः ॥ ५३ ॥ गोपा गोप्यश्च विस्मिताः सत्यः, अतोऽत्यन्तप्रीत्याद्दता व्याप्ता, अतएवौत्सुक्यादासक्त्या ऐक्षन्तु तं चिरं तद्दर्शनान्न निवृत्ता बभूवुरित्यर्थः, यतस्तृषितेक्षणा अतृप्तनेत्राः परमप्रीत्यौत्सुक्यादीक्षणे हेतुः—प्रेत्येति इव उत्प्रेक्षायां स्नेहभरेण तेषां तथा मननात, यद्वा, प्रेत्यागतं कञ्चित् कश्चिद्बन्धुरिव, अथवा गोप्यो विस्मिता बभूवुः । त्वर्थे चकारः । प्रेमभरेण तासां गोपेभ्यो विशेषात् तमेवाभिव्यञ्जयति—अतिप्रियेण प्राणाधिकेन श्रीकृष्णेनादृताः प्रेमदृष्ट्यादिना सम्मानिताः, अतस्तृषितेक्षणाः सत्य औत्सुक्यादैक्षन्त, यद्वा, दिवा तद्विरहेण स्वतस्तद्दर्शनतृष्णायुक्तेक्षणा एव विशेषतो बकवधादिश्रवणेनौत्सुक्यादैक्षन्त । अन्यत् समानम् ॥ ५४ ॥ तत्र गोपानामन्योन्यं विस्मयोक्तिमाह—अहो इति त्रिभिः । अहो आश्चर्ये, बत खेदे, किंवा, अहो बतेत्येकमेव पदमत्यन्तखेदे, अस्यैव मृत्यवस्तद्धेतवः । बालस्येति स्नेहभरेण तेषां तस्मिन् सदा बालबुद्धेः । अन्यत्तैर्व्याख्यातम् । यद्वा, तत्र हेतुं तर्कयन्ति, अपि किं तेषां बकादीनां विप्रियमनिष्टमनेन पूर्वं कृतमासीत् , यतो यस्मादनिष्टकरणाद् येभ्यो वा भयमस्यास्माकं वा भवति ॥ ५५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

इन्द्रियो गणः इन्द्रियाणां गणः ॥ ४२–४३ ॥ कृतं पूर्वं पूर्वजन्मनि किं कृतम् इदानीं भयमुत्पद्यते ॥ ४४–४५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा नन्दनवनजाभिर्मल्लिकाभिर्बकारिं श्रीकृष्णं समाकिरन् भेरीशङ्खरवसहितैः स्तोत्रैस्तुष्टुवुश्च गोपालसुतास्तु तद्बकवधं वीक्ष्य नितरां विस्मिता बभूवुः ॥ ४१ ॥ स्वस्थानं प्रत्यागतं प्राणमिन्द्रियाणां गण इव बकस्य मुखान्मुक्तं श्रीकृष्णं प्राप्यालिङ्ग्य च सुखिता वत्सान् प्रणीयैकीकृत्य व्रजमागत्य तद्बकासुरवधात्मकं कर्म्म गोपेभ्यः जगदुः ॥ ४२ तद्गोपालगदितं श्रुत्वा विस्मिता अतिप्रियेणादरयुक्ता आगत्य प्रेत्यागतमिव लोकान्तरादागतमिव तृषितान्यतृप्तान्यमृतं पिबन्तीवेक्षणानि येषां तथा-

भूताः **औत्सुक्यादैक्षन्त अपश्यन्** ॥४३॥ अहो इत्यादि श्लोकत्रयस्य इति नन्दादय इत्युत्तरत्रान्वयः। अहो इत्याश्चर्यं बतेति खेदे तत्र खेदहेतुं विशदयन्ति अस्य बालस्य मृत्युहेतवो बहवोऽभवन् अपि तथापि तेषामेव विप्रियं दुःखमासीत् युक्तमेवैतदित्याहुः पूर्वजन्मान्तरे यतो येभ्यः भयं कृतं तेभ्य एव तेषां भयमुत्थितमित्यर्थः ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विसिस्मिरे विस्मिताः ॥ ४१ ॥ पूर्वस्थितमाश्रमस्थानं प्रणीय नीत्वा तद्बकासुरहिंसनलक्षणं कृष्णचरितम् ॥ ४२ ॥ **कृष्णे अतिशयेन प्रियेण आदरेण** युताः तृषितेक्षणाः अलंबुद्धिरहितनेत्राः ॥ ४३ ॥ बत खेदे यतः येभ्यो भयं तेषां विप्रियं कृतमासीदपिस्वित् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

समीडिरे प्रशशंसुः आनकशङ्खसहितैः संस्तवैर्वैदिकतान्त्रिकैश्च समीडिरे तुष्टुवुः ॥ ४१-४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

समाकिरन् सम्यगाकीर्णं व्याप्तं चक्रुरित्यर्थः। संस्तवैः प्राचीनैः ॥ ४१ ॥ स्वस्थानमागतं प्राणमिव कृष्णं प्रकर्षेणेतस्ततः सकाशादानीय तद्वत्सबकवधचरित्रं जगुरुच्चैस्स्वरेणोचुः। यद्वा, स्वरतालादिना गीतं जग्रन्थुर्दिनान्तरेऽपि गानार्थमिति भावः ॥ ४२ ॥ अतिप्रियेण श्रीकृष्णेन स्वदर्शनदानेनैवादृताः तृषितान्यमृतं पिबन्तीवेक्षणानि येषां ते ऐक्षन्त **क्षतादिशङ्कया सर्वाङ्गेषु न्यभालयन्तः** ॥ ४३ ॥ तत्र गोपानामन्योन्यं विस्मयोक्तिमाह—त्रिभिः। मृत्यवः मृत्युहेतवः भयं कृतं निरपराधानामस्माकं बालकस्यास्य च यस्मादपकारः प्रथमं कृतस्तस्मात् ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदा बकारिं बकासुरघ्नं श्रीकृष्णम् नन्दनोद्यानजमल्लिकादिभिः समाकिरन् आनकशङ्खसहितैः स्तोत्रैः समीडिरे तुष्टुवुः विसिस्मिरे विस्मिता आसन् ॥ ४१ ॥ प्रणीय एकीकृत्य व्रजमेत्य तद्बकवधं जगुः ॥ ४२ ॥ तद्बकवधं श्रुत्वा विस्मिता बभूवुः तदानीमतिप्रियेण श्रीकृष्णेन यथायथमादृताः अङ्कप्रवेशकराद्यालम्भनरुचिरवचनादिभिः सत्कृताः प्रेत्यागतमिव पुनर्जातमिव उदैक्षन्त अपश्यन् तत्रापि तृषितेक्षणा एव बभूवुः ॥ ४३ ॥ अहो बतेत्यादि श्लोकानामिति नन्दादय इत्यनेनान्वयः मृत्यवो मृत्युहेतवः तेषामेवाप्रियमीहितमासीत् नत्वस्माकम् यतः पूर्वमस्माभिरन्येषामभयं कृतम् ॥ ४४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

समाकिरन् सम्यगाकीर्णं चक्रुः आनकशङ्खादिवाद्यैः सह संस्तवैः समीडिरे ॥ ५२ ॥ मूर्च्छाभिभूतं पुनः स्वस्थानागतं प्राणमिन्द्रियगण इव बकास्यात् मुक्तं स्थानागतं सन्निहितं कृष्णमुपलभ्य परिरभ्य च निर्वृताः सन्तो वत्सानितस्ततः प्राणीय व्रजमेत्य तद्बकवधचरितमुच्चैर्जगुः ॥ ५३ ॥ अतिप्रियेण कृष्णेन स्ववीक्षणदानेनावृताः तृषितानि तद्वीक्षणपीयूषतृष्णानीक्षणानि येषां यासां च ऐक्षत सर्वाङ्गान्यपश्यन् क्षतिशङ्कयेति भावः ॥ ५४ ॥ मृत्यवो मृत्युहेतवः यतः पूर्वं प्रथमं तैर्भयमपराधः कृतस्तस्मात्तेषां विप्रियं मरणमासीत् ॥ ५५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स कृष्णः कंसस्य सखा कंससखो राजाहःसखिभ्यष्टजिति टच्। तं वीरणवत्तृणविशेषवत्। वीरणं श्रीतृणं विदुरिति यादवः। दिवौकसां मुदावहो बालेषु पश्यत्सु सत्सु तुण्डयोर्दोर्भ्यां निगृह्य ददारादारयत्। नायास आसेत्याह ॥ लीलयेति ॥४१॥ तद्बककवलनं तत्संहरणं पुष्पवर्षणं देवस्तवनादिकं च वीक्ष्य विसिस्मिरे विस्मिताः ॥ ४२ ॥ ऐन्द्रिय इन्द्रियाणामयमैन्द्रियो गणः स्थानं स्वावस्थितस्थलं प्रति वत्सान्प्रणीय नीत्वा तत्कृष्णकृतं कर्म जगुः ॥ ४३ ॥ अतिप्रियमित्यादृताः प्राप्तादरास्तृषिते तद्विलोकनलोलुपे ईक्षणे यासां ताः ॥ ४४ ॥

श्रीसुबोधिनी

स्वसामर्थ्येन चेन् मारयितुं प्रवृत्तस्तदा दूरादेव भगवान् मारितवानित्याह **समापतन्तमिति, तं बकमासमन्तात् पतन्तं स कृष्णो** दुःखदूरीकर्ता **निगृह्य** धृत्वा निग्रहं कृत्वा **तुण्डद्वयं** पृथग् धृत्वा **ददार** विपाटितवान्, ननु मारणे को हेतुः ? तत्राह **कंससख**मिति, अन्यथा कंसो न मारितः स्यादिति, कंसोपि किमिति मारणीय इति चेत् तत्राह **सतां गतिरि**ति, **सतां स** एव रक्षकः, अन्यथा सद्रक्षा न स्यादिति, बालानामेव दोष इति **पश्यत्सु बालेषु ददार, केचित्** पुनर्बकहन्ता बकादनिर्गतो न भवतीति **महादेवादिवरसत्यकरणार्थं** तुण्डं प्रविष्ट इत्याहुः, तत् सत्यं चेत् **कल्पान्तराभिप्रायं**, तस्य विदारणे हस्तयोः प्रयासमाशङ्क्याह **लीलयेति**, ननूपासकवध उपास्यदेवानां दुःखं स्यादित्याशङ्क्याह **दिवौकसां मुदावह** इति,

देवानां तेन सन्तोष एवात एव **समागतानां** दिवौकसां स्वर्गेत्युत्तमे स्थितियुक्तानां तच्छकलद्वयमधोमुखतया स्थापितमतिकोमलमासनमिव जातमित्याह **वीरणव**दिति, **वीरणं** तृणविशेषस्तेनासनं निर्मीयते, अतस्तद्वधे देवानां हितमेव, **लोभानृताभ्यां** सह दम्भे गते भूमौ देवा हविर्भाजो भवन्तीति ॥ ४१ ॥ एवं तदधिष्ठातृदेवानां सन्तोषमुक्त्वा स्वर्गवासिनां सर्वेषामेव तद्वधे सन्तोषमाह **तदेति**, **बकारिं** बकहन्तारं सर्ववेदब्राह्मणपक्षपातिनं **सुरलोकवासिनः** सर्व एव **नन्दनवनोद्भवमल्लिकादिपुष्पैः समाकिरन्** पुष्पवृष्टिं कृतवन्तः, गोपानां महत्त्वज्ञापनार्थमेतद् वर्ण्यते, केवलपुष्पवृष्टिर्बालानां ज्ञापिका न भवतीति स्तोत्रवादित्राणि चाह **समीडिर** इति, **आनकशङ्खाभ्यां** सहितैः **संस्तवैः सम्यगीडिरे** सम्यक् स्तुतवन्तः, **वाद्यद्वयं** राजसतामसयोरपि स्तोत्राशक्तयोः सङ्ग्रहार्थं, **एतत् सर्वं दृष्ट्वा गोपालसुता** अतिमुग्धाः कृष्णं स्वसमानं ज्ञातवन्तो **विसिस्मिरे** परमं विस्मयं प्राप्तवन्तः ॥ ४२ ॥ पूर्वं महत्त्वमात्रं ज्ञातमधुना त्वाश्चर्यं जातं ततो भगवता सह व्रजमागत्य तन्माहात्म्यमुक्तवन्त इत्याह **मुक्तमिति**, वचनं हि हृदये प्ररूढं भवति भगवत्प्राप्तिरत्यभीप्सितेति ज्ञापयितुं दुर्निमित्तापगमे तथा भवतीति **बकास्यान् मुक्तमुपलभ्ये**त्युक्तं, स्नेह एव तेषां स्फुरितो न तु माहात्म्याद् भयमिति ज्ञापयितुमाह **बालका** इति, **रामस्यापि तदा गौण**भावाद् बालकतुल्यतेत्याह **रामादय** इति, भगवदागमनात् पूर्वं न ते रामादयः किन्तु नामान्तरमेव प्राप्ताः, **यथा प्राणं विनैन्द्रियो गणो** गोलकमात्रपर्यवसितः, **प्रत्यागतं** पुनरागतं **तं** भगवन्तं **परिरभ्य निर्वृताः** सुखिनो जाताः, **बकमारणानन्तरमपि** न बालका भगवत्समीपं गता मूर्छिता इवातिखेदेन पतिताः पुनरुद्गताः, भगवानेव परं **प्रत्यागतः** स चेद् सदानन्द आलिङ्गितः सर्वतःसम्बन्धोभूत तदा **निर्वृताः**, तदा **वत्सान् प्रणीये**तस्ततो गतान् समानीय **व्रजमेत्य तद् बक**वधादिकं **जगुरु**क्तवन्तः ॥४३॥ ततो यज् जातं तदाह **श्रुत्वे**ति, तद्बकवधं **श्रुत्वा गोपा गोप्यश्च विस्मिताः**, गोपीनां विशेषमाह **अतिप्रियादृता** इति, **अतिप्रियेण** भगवता**दृताः** प्राप्तादराश्च जाताः, ततः परमानन्देन दृष्टवत्य इत्याह **औत्सुक्यात्** प्रेमाधिक्यादवितृप्तेक्षणा अतृप्तनयना **ऐक्षन्ते**ति, पामराणां बुद्धिमनुसृत्याश्लीलमप्याह शुकः, सा हि प्रीतौ परमा काष्ठा, **औत्सुक्यं** प्रेमातिभरतयामर्यादं भवति, तेन सर्वपरित्यागेन भर्त्रादिशङ्कामपि परित्यज्य दृष्टवत्यः, इयं बुद्धिस्तेषां नारोपिता किन्तु सहजेति ज्ञापयितुं नेत्रयोरतृप्तिमाह ॥ ४४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तदेत्यत्र सुरलोकवासिनां सन्तोषहेतुभूतबकारिपदतात्पर्यमाहुः **सर्ववेदे**त्यादि, दाहकत्वेन तथेति तन्मारकत्वेनेति वा ज्ञेयम् ॥ ४२ ॥ **मुक्तमि**त्यत्र ननु भगवदागमनात् पूर्वं तेषां रामादित्वमेव न स्थितमिति कथं विस्मयो जात इति चेन् निरोधार्थं तावच्चैतन्यस्य भगवता स्थापितत्वादिति बुध्यस्व, अन्यथा 'पश्यत्सु बालेष्वि'त्यादिपूर्वग्रन्थोपि विरुध्येत, **पाद्मोत्तर**खण्डे तु बकवधस्य दिनमुक्तं 'पञ्चाब्दकल्पो भगवान् कृष्णाषाढाष्टमी दिने । बकं चिच्छेद चिच्छक्तिः पश्यतां सुहृदां सता'मिति ॥ ४३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तमापतन्तमित्यत्र **दुःखदूरीकर्तेति** दुःखधर्मस्य द्वेषस्योद्भेदाल् लोभेन ग्रासेपि स्वयं **तन्मूल**स्य दुःखस्यैव दूरीकर्तृत्वेन ततोपि समर्थः, प्रतियोगिनोऽभावाद् बलिष्ठत्वादित्यर्थः, **ननु मारणे** इति दम्भो निवर्तनीयः, यत्राकृतिसाम्याद् दम्भो निविष्टस्तस्य दैत्यस्यापि निवारणे इत्यर्थः, **केचिदिति** वरस्यैव विवरणं **बकहन्तेति,** पूर्वं विधेयं पश्चादुद्देश्यमुक्तं, तत्पक्षे उदरपर्यन्तं प्रवेशः स्यात्, अत्र तु तालुपर्यन्तमेव प्रवेश उक्तः, अतो न भागवतकल्पीयं तदित्यर्थः ॥ ४१ ॥ **मुक्तमि**त्यत्र **दुर्निमित्तापगम** इति दुष्टं प्रतिबन्धनिमित्तं प्रतिबन्धकं तदपगमे इत्यर्थः, प्रतिबन्धं निवर्त्य स्वयमेव मुक्तत्वकथनेन साधनासाध्यत्वं प्रतिबन्धकाभावमात्रसाध्यत्वं च सूचितं, तादृशे दुर्लभत्वज्ञानेनात्यभीप्सितत्वमनुभवसिद्धं, **न ते रामादय** इति तथा च तादृशमुपलभ्य **रामादयो** जाताः पूर्वं तु यथा प्राणं विनैन्द्रियो गणस्तादृशास्ते इत्यन्वयः ॥ ४३ ॥ श्रुत्वेत्यत्र इयं बुद्धिरिति अमर्यादबुद्धिरित्यर्थः, तस्या आरोपितत्वे तन्निवृत्तौ नेत्रयोस्तृप्तिः स्यादित्यर्थः ॥ ४४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

पश्यत्सु बालेषु ददारेत्यस्य विवृतौ **बालानामेव दोष** इति "लोभक्रोधादयो दैत्या" इतिकृष्णोपनिषद्भ्यो ये ये कृष्णावतारे दैत्या हतास्ते सर्वे लोभक्रोधादिरूपास्तत्र बकासुरो बालानां दम्भात्मकदोषरूप इतिज्ञेयम् ॥ ४१ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तमापतन्तं वेगेनागच्छन्तं बकं स भगवान् कृष्णो दोर्भ्यां भुजाभ्यां तुण्डयोर्निगृह्य बालेषु पश्यत्सु सत्सु लीलया अनायासेनैव ददार । तत्र दृष्टान्तमाह—वीरणवदिति । वीरणमग्रन्थितृणविशेषः । स यथा अनायासेनैव विदार्यते तथेत्यर्थः 'बकस्य विदारणकर्मत्वं युक्तम्' इति सूचयंस्तं विशिनष्टि—कंससखमिति । भगवतोऽपि तद्धननप्रयोजनं सूचयंस्तं विशिनष्टि—दिवौकसां

देवानां मुदमावहति प्रापयतीति तथा। तत्रापि हेतुमाह–सतां पतिरिति। साधूनां रक्षक इत्यर्थः। दुष्टनिग्रहं विना देवादिसाधूनां रक्षणहर्षयोरसम्भवादित्याशयः ॥ ५२ ॥ तदा सुरलोकवासिनो देवादयो नन्दनवनोद्भूतैर्मल्लिकादिभिः पुष्पैर्बकारिं श्रीकृष्णं समाकिरन् आच्छादितवन्तः। तथा आनकैः शङ्खैश्च वाद्यैः सहितैः संस्तवैः सम्यक् स्तुतिभिः समीडिरे तुष्टुवुः। तत् देवैः कृतं भगवत्पूजनं वीक्ष्य गोपालसुता विसिस्मिरे आश्चर्यं प्राप्तवन्तः ॥ ५३ ॥ श्रीकृष्णवियोगेन निश्चेष्टा रामादयो गोपदारका बकस्यास्यात् मुखात् मुक्तमुपलभ्य ततः स्वस्थानमागतं तं परिरभ्य समाश्लिष्य निर्वृताः स्वस्थाः सुखिनश्च जाताः। तत्र दृष्टान्तमाह—प्राणमिवेति। यथा प्राणं विना ज्ञानक्रियात्मक इन्द्रियगणः स्वव्यापारे असमर्थो मूर्च्छितश्च सन् पुनः प्राणं स्वस्थानमागतं परिरभ्य स्वस्थः सव्यापारश्च भवति, तथेत्यर्थः। ततश्च सायङ्काले वत्सान् प्रणीय एकीकृत्य व्रजमेत्य आगत्य तत् बकवधादिकं जगुः कथितवन्तः ॥ ५४ ॥ तत् गोपबालवर्णितं श्रुत्वा गोपा गोप्यश्च विस्मिता आश्चर्याक्रान्ताः अतिप्रियेण प्रीत्या आदृताः सादराः तृषितानि अतृप्तानि अमृतं पिबन्तीवेक्षणानि नेत्राणि येषां ते प्रेत्य परलोकं प्राप्य पुनरागतमिवौत्सुक्यादैक्षत अपश्यन् ॥ ५५ ॥

अन्वितार्थप्रकाशिका

तमिति ॥ सतां गतिः साधूनां रक्षकः दिवौकसां मुदावहः आनन्दप्रापकः सः कृष्ण आपतन्तं वेगेनागच्छतं कंससखं तं बकं दोर्भ्यां भुजाभ्यां तुण्डयोर्निगृह्य बालेषु पश्यत्सु सत्सु लीलया अनायासेनैव वीरणवत् तृणविशेषवत् ददार ॥ ५० ॥ तदेति ॥ तदा सुरलोकवासिनो देवादयो नन्दनवनोद्भूतैर्मल्लिकादिभिः पुष्पैर्बकारिं श्रीकृष्णं समाकिरन् आच्छादितवन्तः तथा आनकैः शङ्खैश्च वाद्यैः सहितैः संस्तवैः सम्यक्स्तुतिभिः समीडिरे तुष्टुवुः। आमभाव आर्षः। तत् देवैः कृतं भगवत्पूजनं वीक्ष्य गोपालसुता विसिस्मिरे आश्चर्यं प्राप्तवन्तः। इरे च इलोप आर्षः ॥ ५१ ॥ मुक्तमिति। पूर्वं विचेतसो रामादयः दारकाः बालकाः बकस्यास्यान्मुखान्मुक्तं कृष्णमुपलभ्य ततः स्वस्थानमागतं तं परिरभ्य समाश्लिष्य प्राणं प्राप्य ऐन्द्रियः इन्द्रियसंबन्धी गणः इव निर्वृताः स्वस्थाः स्वव्यापारयोग्याश्च बभूवुः। ततश्च सायंकाले वत्सान् प्रणीय एकीकृत्य व्रजमेत्य आगत्य तत् बकवधादिकं जगुः उच्चैः कथितवन्तः ॥ ५२ ॥ श्रुत्वेति ॥ तत् गोपबालवर्णितं श्रुत्वा गोपा गोप्यश्च विस्मिता आश्चर्याक्रान्ताः अतिप्रियेण प्रीत्या आदृताः सादराः तृषितानि अतृप्तानि अमृतं पिबन्तीवेक्षणानि नेत्राणि येषां ते प्रेत्य परलोकं प्राप्य पुनरागतमिवौत्सुक्यादैक्षन्त अपश्यन् ॥ ५३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आपतंतं तं बकं तुंडयोः उभयोः चंच्वोः दोर्भ्यां कराभ्यां निगृह्य दिवौकसां देवानां मुदावहः हर्षप्रापकः स हरिः वीरणवत् अग्रंथि तृणविशेषवत् ददार द्वे दले चकार ॥ ४८ ॥ नंदनस्य इंद्रवनस्य मल्लिकादिभिः मल्लिकादिपुष्पैः बकारिं बकघ्नं समाकिरन् आछादयामासुः संस्तवैः स्तोत्रैः गीतिभिश्च समीडिरे तुष्टुवुः विसिष्मिरे विस्मयं प्राप्ताः इरयोरे इत्यनेन इरे इत्यस्य रे आदेशः छंदसि ॥४९॥ बकस्य आस्यान्मुखात् मुक्तं हरिं प्राप्य प्राणं प्राप्य इंद्रियाणामयं गणो यथा स्थानं प्रत्यागतं परिरभ्य मिलित्वा वसान् प्रणीय समूहीकृत्य व्रजमेत्य आगत्य तच्चरित्रं गोपान् प्रतिबाला जगुः ॥५०॥ अतिप्रिये कृष्णे आदृताः सादराः प्रेत्यागतमिव परलोकं गत्वा पुनरागतमिव तृषितानि अतृप्तानि पीयुषं पिबंतीव ईक्षणानि नेत्राणि येषां एवंभूताः संतः औसुक्यात् अत्यानन्दात् ऐक्षन्त ॥ ५१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ सतां साधुजनानां, गतिः शरणप्रदः, दिवौकसां देवानां, मुदावह आनन्दकरः, सः श्रीकृष्णः, आपतन्तं वेगादागच्छन्तं, कंससखं कंसस्यानन्यमित्रभूतं, बकं बकरूपधरं, तमसुरं, दोर्भ्यां स्वपाणिभ्यां, तुण्डयोः निगृह्योपादाय, बालेषु पश्यत्सु, लीलया, वीरणवत् , ददार। यद्वा। तमसुरं निगृह्य, हुंकारेण निवार्य, बालेषु पश्यत्सु सत्सु, लीलया तुण्डयोश्चञ्च्वोः, ददार। कथमिव। वीरणवत् निर्ग्रन्थितृणविशेषवत् ॥ ५० ॥ तदेति ॥ तदा, सुरलोकवासिनः स्वर्गलोकनिवासिनः सर्वे देवा इत्यर्थः। बकारिं बकासुरविनाशकरं श्रीकृष्णं, नन्दनमल्लिकादिभिर्नन्दनवनजमल्लिकाकुसुमादिभिः, समाकिरन्। आनकशङ्खसंस्तवैः भेरीशङ्खरवसहितैः स्तोत्रैः, समीडिरे तुष्टुवुश्च। गोपालसुताः गोपबालकास्तु, तद्बकवधरूपं श्रीकृष्णचरित्रं वीक्ष्य, विसिस्मिरे ॥ ५१ ॥ मुक्तमिति ॥ ऐन्द्रियः गणः इन्द्रियाणां गण इत्यर्थः। स्थानागतं स्वस्थानं प्राप्तं, प्राणं मुख्यासुं इव, रामादयः बालकाः, बकास्यात् मुक्तं स्थानागतं तं श्रीकृष्णं, उपलभ्य संप्राप्य, परिरभ्यालिङ्ग्य च, निर्वृताः सुखिताः सन्तः, वत्सान् प्रणीय एकीकृत्य, व्रजं एत्य, तद्वत्सबकासुरयोर्वधात्मकं कृष्णचरितं, जगुर्गोपादीनां पुरतः कथयामासुरित्यर्थः ॥ ५२ ॥ श्रुत्वेति ॥ अतिप्रियादृता अतिप्रेमास्पदे कृष्णेऽत्यादरयुक्ताः, गोपाः गोप्यश्च, तद्गोपबालकगदितं श्रुत्वा, विस्मिताः सन्तः, प्रेत्यागतं लोकान्तरात् पुनरागतं इव, औत्सुक्यात् तृषितानि अमृतं पिबन्तीव तृप्तिरहितानीक्षणानि नयनानि येषां तथाभूताः सन्तः, ऐक्षन्तापश्यन् ॥ ५३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मुक्तं बकास्यादिति : १०.११.५३.

हंसोऽपि यं कलयितुं नहि मानसे यच्छक्नोति तस्य कलने भुवि रंक एषः ।
शक्तो बकः कथमहो भवितेति कृष्णं वीक्ष्याऽऽगतं जगदुराप्तमुदोऽर्भकास्ते ॥ ७५ ॥
सत्त्वैकपूर्णरचिताऽऽकृतिरुज्झिताशोऽप्यजिघांसुरनिशं मदनिष्ठनिष्ठः ।
तं हन्मि दुष्टमभयाय सतामिति स्वां सन्धां स्फुटामिह चकार बकासुहत्या ॥ ७६ ॥

कृष्णप्रिया

वह बकासुर राजा कंस का सखा था। उसे उस तरह झपटते देख साधुओं के रक्षक तथा देवों के आनन्ददायक भगवान् श्रीकृष्णने उनकी दोनों चोंच को पकड़ कर ग्वाल बालकों के देखते-देखते महीन घास व तृण की तरह चीर डाला।॥४१॥ राजन्! जब प्रभु ने बकासुर का नाश कर दिया तब बकसूदन भगवान् श्रीकृष्ण पर सुरलोक निवासी सुरसमुदाय नन्दनवन के चमेली आदि वेली के कुसुमों की वृष्टि करने लगे एवं नगारे शंख आदि वाजित्र बजाकर प्यारे नन्दलालजी का यशोगान गाने लगे तब यह सब देखकर सारे के सारे गोपालबालक आश्चर्यचकित हो गये॥ ४२ ॥ राजन्! जैसे इन्द्रियाँ प्राणों के पुनरागमन से सचेत हो जाती है उसी तरह श्रीबलभद्र भैया आदि और गोपालबालक बगुले के मुँह से बाहर निकलकर पधार रहे श्रीनन्दलालन् को देख सचेत हो गये और सब अलग अलग आलिङ्गन करने लगे। इसके बाद दोपहर में ही अपने अपने बछड़ों को इकट्ठा कर व्रज की ओर लौट पड़े, घर आकर बकासुर वध कथा को बढ़ा चढ़ाकर सबको सुनाने लगे।॥४३॥ सारी घटना को सुनकर गोप गोपियाँ विस्मित हुई। सब को ऐसा जान पड़ा, जैसे श्रीनन्दनन्दन मृत्यु के मुँह से ही निकल आये। सारा व्रज बड़ी उत्सुकता और प्रीति से प्यासी आँखों से प्यारे को निहारने लगे॥ ४४ ॥

अहो बतास्य बालस्य बहवो मृत्यवोऽभवन् । अप्यासीद् विप्रियं येषां [1]कृतपूर्वं यतो भयम् ॥ ४५ ॥
अथाप्यभिभवन्त्येनं नैव[2] ते घोरदर्शनाः । जिघांसयैनमासाद्य नश्यन्त्यग्नौ पतङ्गवत् ॥ ४६ ॥
अहो ब्रह्मविदां वाचो नासत्याः सन्ति कर्हिचित् । गर्गो यदाह भगवानन्वभावि तथैव तत् ॥ ४७ ॥
इति नन्दादयो गोपाः कृष्णरामकथां मुदा । कुर्वन्तो रममाणाश्च नाविन्दन् भववेदनाम् ॥ ४८ ॥
एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे । [3]निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे वत्सबकवधो नामैकादशोऽध्यायः ॥ ११ ॥

समाप्तमवान्तरं तामसप्रमाणप्रकरणम्

कर्दमक्षमा

अहो अस्य बालस्य बहवः मृत्यवः अभवन् अपि येषां कृतपूर्वं भयं यतः विप्रियं आसीत् ॥ ४५ ॥ अथ अपि ते घोरदर्शनाः एनं न एव अभि भवन्ति ते जिघांसया एनं आसाद्य अग्नौ पतङ्गवत् नश्यन्ति ॥ ४६ ॥ भगवान् गर्गः यद् आह तथा एव तत् अन्वभावि अहो ब्रह्मविदां वाचः कर्हिचित् असत्याः न सन्ति ॥ ४७ ॥ इति नन्दादयः गोपाः मुदा कृष्णरामकथां कुर्वन्तः च रममाणाः भववेदनां न अविन्दन् ॥ ४८ ॥ एवं निलायनैः सेतुबन्धैः मर्कटोत्प्लवनादिभिः कौमारैः विहारैः व्रजे कौमारं जहतुः ॥ ४९ ॥

इत्येकादशोऽध्यायः ॥ ११ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अथ ते घोरदर्शना अपि नाभिभवन्ति न धर्षयन्त्येव ॥ ५६ ॥ गर्गो यदाह "तस्मान्नंदाऽऽत्मजोऽयं ते नारायणसमो गुणैः" इत्यादि ॥ ५७–५९ ॥

वत्सयूथगतं हत्वा वत्सदंभासुरं हरिः ॥ मुनियूथगतं चाहन्नग्रण्यं दंभिनां बकम् ॥ १ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायां वत्सबकवधो नामैकादशोऽध्यायः ॥ ११ ॥

---

[1] कृतं–श्रीधर. वंशी. वीर. विज. विश्व. शुक. । [2] नैवं ते–इति कस्यचित् ; नैवैं ते–वंशी. वीर. । [3] नीलायनैः–च. पु. टी. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यद्यपि घोरदर्शना। अथापि तथापि। एनं श्रीकृष्णम्। धर्षयंति तिरस्कुर्वंति। जिघांसया हननेच्छया। पतंगवच्छलभवत्। "पतंगः शलभे शालिप्रभेदे पक्षिसूर्ययोः" इति मेदिनी। "असद्ब्रह्मेति चेद्वेद: स्वयमेव भवेदसत्" इति श्रुतिरिवेति भावः॥ ५६॥ अहो ब्राह्मणानां प्रभाव इत्यभिप्रेत्याह—गर्ग इति॥ ५७॥ इति पूर्वोक्तरीत्या। रममाणास्साह्लादाः। भववेदनां संसारदुःखम्॥ ५८॥ कौमारैर्बालावस्थाभवैः विहारैः क्रीडाविशेषैः। कश्चित्स्तंभादिमूले निलीय तिष्ठति तमपरोन्विष्य गृह्णातीति या क्रीडा तन्निलायनं स्वशरीरेण मृदादिभिर्जलरोधनं सेतुबंधः। यथा वृक्षाद्वृक्षांतरमुत्प्लवते तथोत्तुंगमृत्तिकानिर्मितशिशुमाराकारोपरि शिरसि पदं निधाय पतनमुत्प्लवनम्। पांशुभित्तौ मणिं निधाय तदुपरि हस्तं निदधाति कश्चित्कश्चित्तमन्विष्य गृह्णातीतीयमपि काचित्क्रीडास्ति साऽत्रादिपदाज्ज्ञेया। अन्या वाऽऽधुनिकबालप्रसिद्धा वीटाक्षेपकंदुकक्षेपादिरूपा इति॥ ५९॥ वत्सस्य दंभः छद्म यस्य स वत्सदंभस्स चासावसुरश्चेति तथा। अग्रण्यं मुख्यम्। यत्र बकस्स्थितस्तत्रर्पयोष्यतिष्ठंस्तपः कुर्वाणा इति ज्ञेयम् (१)॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्धे एकादशोऽध्यायः॥ ११॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तेषामेव विप्रियत्वं विवृणोति—अथापीति। अथ पूर्वहेतोरेव घोरदर्शना अपीत्यन्वयः। अथवा तत्र हेतुन्तर्कयन्ति तेषां बकादीनां "पुरानेन व्रजपते! साधवो दस्युपीडिताः" इत्यादिगर्गोक्तरीत्या विप्रियमनिष्टमनेन पूर्वं कृतमासीत् यतः येभ्यो भयमस्य भवति अथापि यद्यपि पूर्वविप्रियाचरणाद्धन्तुमायान्ति तथापीत्यर्थः। घोरं दर्शनमपि किमुत कर्म येषां तेपि एते बकादयः इति तेषां पापिष्ठत्वमुक्तं नैवं ते घोरदर्शना इति क्वचित्पाठः नाभिभवन्ति धर्षयितुं न शक्नुवन्तीत्यर्थः। एवेति कदाचित् कथञ्चिदपीत्यर्थः। न केवलमेतावदेव किन्तु स्वयं सद्य एव म्रियन्ते अपीत्याहुः जिघांसयेति कुतोऽप्यागतानां बहूनामप्येकस्मादेव स्वयं सद्यो मरणे दृष्टान्तः अग्नौ पतङ्गवदिति अनेनास्य पुण्यप्रभावत्वमप्युक्तम् अतो हिंस्रः स्वपापेनेत्यादिवदेवोत्प्रेक्षितम्॥ ४५॥ तत्र प्रमाणं दर्शयन्तोऽपि वात्सल्यस्वभावेन साश्चर्यमाहुः अहो इति। ब्रह्मविदां वेदार्थतत्त्वज्ञानां भक्तिनिष्ठानामित्यर्थः। असत्या न सन्ति न सम्भवन्ति अन्वभावि अनुभूतम् इति श्रीवल्लवेन्द्रस्य सरलस्वभावत्वाद्बन्धुवात्सल्याच्च रहस्यपि गर्गेणोक्तं तन्माहात्म्यं तेषु किञ्चिदभिव्यक्तमभूदिति गम्यते इति अनेन प्रकारेण गता आगमिष्यमाणाश्च कृष्णरामकथाः कथामिति क्वचित्पाठः कुर्वन्तः कथयन्तः न केवलमेतावदेव अपि तु रममाणाः श्रीभगवता सह क्रीडन्तश्च भववेदनां भवे संसारे सांसारिकाणां यद्दुःखं तेष्ववतीर्णा अपि नाविदन् न ज्ञातवन्तोऽपि अतः क्षुधार्ता इदमब्रुवन्नित्यादौ यत्तेषां क्षुधादिकं दृश्यते तत्तु न भवसम्बन्धि किं तु लीलोपोद्बलकत्वाल्लीलामयमेवेति भावः। अत्रैवं विहारैरित्यादिपद्यमपि पठन्ति अत्र पुरतः पुनः कौमारलीलावर्णनं स्मृतिविशेषचमत्काराभिनयेन अतोऽग्रेऽपि तस्य पुनरुक्तिरिति ज्ञेयं सम्बन्धोक्तावुभयत्र व्याख्यातत्वात्॥ ४६-४८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यामेकादशोऽध्यायः॥ ११॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथापि यद्यपि पूर्वं विप्रियाचरणाद्धन्तुमायान्ति, तथापीत्यर्थः। घोरं दर्शनमपि, किमुत कर्म येषां तेऽप्येते बकादयः। त इति क्वचित् पाठः। नाभिभवन्ति धर्षयितुं न शक्नुवन्तीत्यर्थः। एव निर्द्धारे। लौकिकवदुक्तिरप्येषां तेषां स्नेहभराक्रान्तचित्तत्वान्न किल दोषाय कल्पत इति सर्वत्रैवोह्यम्। न केवलमेतावदेव, किन्तु स्वयं सदा एव म्रियन्तेऽपीत्याहुः—जिघांसयेति, कुतोऽप्यागतानां बहुनामप्येकस्मादेव स्वयं सद्यो मरणे दृष्टान्तः अग्नौ पतंग वदिति॥ ५६॥ एवं श्रीभगवन्माहात्म्यानुभवेनापि ते स्नेहभरेण तमीश्वरोऽयमिति न विदुः, किन्तु कोऽपि महापुरुषोऽयमिति निश्चित्य गर्गवाक्येन तदेव द्रढयन्ति, 'अहो' इति आश्चर्य्ये। ब्रह्मविदां वेदार्थतत्त्वज्ञानां, भक्तिनिष्ठानामित्यर्थः, असत्या न सन्ति न भवन्ति। अन्वभावि, अनुभूतमिति श्रीवल्लवेन्द्रस्य भागवतत्वाद्बन्धुवात्सल्याच्च रहस्यपि गर्गेणोक्तं श्रीभगवन्माहात्म्यं तेषु किञ्चिदभिव्यक्तमभूदिति गम्यते, तच्च सहजस्नेहवतां तेषां स्नेह विवृद्धय एवाकल्पतेति॥ ५७॥ इत्यनेन प्रकारेण। रामस्यैतादृशप्रसंगाभावेऽपि निर्देशस्तयोरन्योऽन्यं स्नेहभरेणैक्यात्। तत्र च श्रीकृष्णस्य प्राधान्यादादौ पूर्ववन्निर्देशः, यद्वा, रमयन्ति सुखयन्तीति रामा याः कथास्ताः। कथामिति क्वचित् पाठः। कुर्वन्तः कथयन्तः, यद्वा, गाथादिरूपेण निबध्नन्तोऽत एव रममाणाः सुखमनुभवन्तः, किंवान्योऽन्यं श्रीभगवता सह वा क्रीडन्तो भववेदनां सांसारिकदुःखं नाविदन्न ज्ञातवन्तोऽपि, किमुत प्रापुरित्यर्थः। एतच्चानुषंगिकम्॥ ५८-५९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातनगोस्वामिपादकृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यामेकादशोऽध्यायः॥ ११॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अन्वाभावि अनुभूयते स्म ॥ ४६-४८ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृते शुकपक्षीये एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एते घोरदर्शना अप्येनं बालं कृष्णं नाभिभवन्ति किन्तु हन्तुमिच्छयैनं बालमासाद्य स्वयमेव नश्यन्ति यथाऽग्नौ पतङ्गाः शलभास्तद्वत् ॥ ४५ ॥ अहो ब्रह्मविदां वाचः कदाचिदप्यसत्या न सन्ति न भवन्ति तथा हि भगवान् गर्गो यदाह "नारायणसमो गुणैः" इति तत्तथैवास्माभिरन्वभावि अन्वभूयत ॥ ४६ ॥ भववेदनां सांसारिकक्लेशं नाविन्दन्न प्रापुः ॥ ४७ ॥ एवंविधैः कौमारैः कौमारचेष्टितैः तान्येव कानिचिद्दर्शयति निलायनैः निलयकरणानुकारिभिः एवमुत्तरत्रापि व्रजे कौमारं कौमारावस्थां जहतुरनुक्रान्तवन्तौ ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायामेकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अथापि तथापि एते एनं नाभिभवन्ति प्रत्युत जिघांसया हननेच्छया एनमासाद्याग्नौ पतङ्ग इव शलभ इव नश्यन्ति ॥ ४५ ॥ पुरुषेण ब्रह्मज्ञानमेवाप्यमिति भावेनाह—अहो इति । असत्या नाभूवन्निति कुतो ज्ञायत इति तत्राह गर्ग इति ॥ ३६ ॥ भववेदनां संसारदुःखम् ॥ ४७ ॥ कौमारैः कुमारावस्थासम्बन्धिभिः विहारैः क्रीडाविशेषैः कौमारं जहौ कृष्णः तत्रापञ्चमाब्दाद्बाल्यम् आनववर्षात्पौगण्डम् आषोडशवर्षात्कैशोरं कश्चित्स्तम्भमूले निलीय तिष्ठति अन्यस्तु अन्विष्यन्तं दृष्ट्वा गृह्णातीति या क्रीडा तन्निलायनं हस्तेन स्वशरीरेण वा मृत्तिकया वा जलनिवारणं सेतुबन्धः यथा मर्कटो वानरो विटपाद्विटपान्तरम् उत्प्लवति उत्पतति तथाऽऽकाशे उत्तुङ्गमृत्तिकान्तं शिशुमाराकारोपरि शिरसि पदं निधाय पतनमुत्प्लवनं पांशुभित्तौ मणिं निधाय तदुपरि हस्तं निदधाति एकः एकस्त्वन्विष्य गृह्णातीत्यादि शब्दगृहीतम् ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यामेकादशोऽध्यायः ॥ ११ ॥

(विजयध्वजतीर्थपाठे द्वादशः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नन्वनेन बालकेन पूर्वजन्मनि तेषां विप्रियं प्रथमं कतमत एवास्मिन् जन्मनि हन्तुमेनम् एते एवायान्तीति कथं न सम्भाव्यते ? तत्राहुः— अथापि । यद्येवमपि स्यात्तर्हि तैरयमभिभूयेतैवेत्यर्थः । किन्तु ते न अभिभवन्ति अभिभवितुं न शक्नुवन्ति प्रत्युत जिघांसयेत्यादि ॥ ४५ ॥ तत्र हेतुरस्य नारायणसमत्वमेवेत्याहुः—अहो इति । गर्गो यदाह "नारायणसमो गुणैः" इत्यादि ॥ ४६ ॥ कथां कुर्वन्तः आस्थान्यामुपविश्य बाल्यचापल्यकथां वत्सबकादिवधकथां च पुनः पुनः संलपन्तः गीतपद्यादिभिरुपनिबध्नन्तो वा भवस्य संसारस्य वेदनां ज्ञापनं भो व्रजराज ! वयं तावद्भवतामर्द्धं व्यतीतमेव अधुनापि कथं पुत्रकलत्रकुटुम्बादिकथासु निमज्जथ घोरः संसारोऽयं वर्तते अस्मादुद्धारार्थं ज्ञानवैराग्यतपोनारायणस्मरणादिषु कथं न यतध्वे ? इति देशान्तरागतवृद्धगोपालादिभिर्ज्ञापितं नाविदन् नैवावदधुः व्याख्यान्तरं त्याज्यं "न पुनः कल्पते राजन् ! संसारोऽज्ञानसम्भवः" इति पूर्वोक्तेस्तेषां संसारस्यैव निषेधात् कुतस्तदीयपीडाशङ्केति इति अनेन प्रकारेण गता आगमिष्यमाणा किन्तु लीलोपोद्बलकत्वाल्लीलामयमेवेति भावश्च कृष्णरामकथामिति क्वचित्पाठः कुर्वन्तः कथयन्त न केवलमेतावदेव अपितु रममाणा श्रीभगवता सह क्रीडन्तश्च भववेदनां भवे संसारे सांसारिकाणां यद्दुःखं तत्तेष्ववतीर्णा अपि नाविन्दन् न ज्ञातवन्तोपि अतः क्षुधार्ता इदमत्र वन्नित्यादौ यत्तेषां क्षुधादिकं दृश्यते तत्तु न भवसम्बन्धि ॥ ४७-४८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । एकादशोऽयं दशमे सङ्गतः सङ्गतः सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथोशब्दो हेतुवाचकः यतो वयं भूताभयदाः अतो हेतोः घोरदर्शना अपि एनं बहिश्चरमस्माकं प्राणं श्रीकृष्णं नैवाभिभवन्ति धर्षयन्ति ॥ ४५-४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकादशाध्यायार्थप्रकाशः ॥ ११ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कथमेतत् सम्भवति तत्राह अहो इति। अस्य सर्वेश्वरत्वात्तत्र गर्गवाक्यं प्रमाणमिति नन्दराजस्य सारल्याद्बन्धुसौहार्दाच्च रहस्यपि गर्गोक्तस्य किञ्चित् प्रकाशनं बोध्यम् ॥ ५६ ॥ कृष्णरामकथां बाल्यचापल्यादिविषयां पूतनावधादिविषयां च कुर्वतो मिथः संलपन्तः भववेदनां नाविदन् तदानीं कृष्णवीक्षार्थमागतस्य भवस्य श्रीशिवस्यापि वेदनां तद्विषयं ज्ञानं नालभन्त रममाणाः कृष्णेन सार्द्धं क्रीडतस्तदावेशाच्छिवागमनमपि नावदध्युः "वेदना ज्ञानपीडयो"रिति मेदिनी तत् समानन्तु श्री यशोदाद्या व्यधुरिति बोध्यम्। भववेदनां संसारपीडामिति तु भ्रान्तमेव "न पुनः कल्पते राज" न्नित्यादिना तेषां संसारप्रतिषेधादेव ॥ ५७ ॥ एवमिति जहतुरन्तर्द्धापयामासतु ॥ ५८-५९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यामेकादशोऽध्यायः ॥ ११ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मृत्यवस्तत्कारणानि यतो येभ्यो भयं प्रसक्तं तेषां तैः कृतं तदैव विप्रियमप्यासीत्। अपिना नाकृतकार्याणां स्वदेशकदेशगमनं किन्तु मरणमासीदिति द्योतयति। तेषामपि तादृशानामपि विप्रियं कृतमासीदिति वा योजना। यतो भयमन्येषां पूर्वमासीत्तेषामिति वा। श्लोकद्विकस्यैकान्वयः ॥ ४५-४६ ॥ ब्रह्मविदां परब्रह्मज्ञानां वाचोऽसत्याः कर्हिचिदपि न सन्ति न भवन्ति। अहो ब्रह्मज्ञानमाहात्म्यं भगवान्पूज्यो गर्गोऽथाऽपि व्रजमाव्रजन्तोऽपि घोरदर्शनास्ते तवैनं सुतं नाभिभवन्ति न पराभावयन्ति। यतोऽयं नारायणसमस्ते नैतत्पराभावकाः पराभावकाश्च नायं तेषामिति समः समाधिरित्यतोऽभिधत्ते जिघांसया हननेच्छयैतमासाद्य प्राप्य नश्यन्तीति। तवैतदनायासं च निदर्शनेन दर्शयति ॥ अग्नौ पतङ्गा इव शलभवदिति। इति यदाह तत्तथैवान्वभावि अनुभूतं। पृथगन्वयने तु विप्रियं तेषां कृतमासीत्यनन्तरं पान्त्यादेरवक्तव्यत्वेनासङ्गत्यापत्तेः। यदि पृथगन्वय इष्टस्तर्ह्येवं योजना। यतो येभ्यः पूतनादिभ्यो भयमितरेषां प्राक् तेषां सकाशात्किञ्चिद्विप्रियं कृतमासीत्। अथाऽपि घोरदर्शना एनं नाभिभावि। इतरथ्यथापूर्वं। पुरोहिताभिहितं स्मारं स्मारं सामान्यतो ब्रह्मविदां तन्निदर्शनेन मनसि माननं तन्वते ॥ अहो इति। रामकृष्णकथां तत्सङ्कथनं भववेदनां संसारदुःखं नाविन्दन्नापुः ॥ ४६ ॥ कुमाराणामिमे कौमारास्तैर्विहारैः क्रीडाभिः कौमारं वयो जहतुः। निलायनैरेकेनैकस्य निलीनस्य मार्गणरूपैः सेतुबन्धैः सिकतादिभिर्मर्कटोत्प्लवनादिभिः कपिवदुड्डीवनादिभिः। आदिशब्देन मयूरादिक्रीडा ग्राह्याः। अनेन नारायणकपिलदाशरथिभावं स्वस्य ध्वनयामास कृष्णः। एवं छत्रिन्यायेन बल एतदेकलकोऽपि गृहीत इति ज्ञेयम् ॥ ४७ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे द्वादशोऽध्यायः ॥ १०-१२ ॥

श्रीसुबोधनी

तच्छ्रुत्वा विमर्शकाणां नन्दादीनां यज्जातं तदग्रे वक्तुं तेषां विचारमाह त्रिभिरहो इति, तामसा आहुरहो इति, **अहो** इत्याश्चर्ये, एकस्यैव बहव उपद्रवा इति **बतेति**खेदे, स्वस्य तादृशं दुरदृष्टमिति, **अस्यैव बालस्य,** किमपि तत्र हेतुं **कल्पयन्ति कृतपूर्वं यतो भयमिति** 'यो हन्ति स हन्यत' इतिन्यायाद् **भयं तु कृतपूर्वं** भवति, स्वयं चेदन्यस्मै करोति तदा प्राप्नोति भगवांस्तु न करोति ते तु कुर्वन्तीति तेषामेव भयमुचितम् ॥ ४५ ॥ राजसास्तु तेषामपकारो न तत्कर्मणा केवलेन किन्तु भगवन्माहात्म्यादित्याहु**रथापीति,** यद्यपि **कृतपूर्वं भयं** भवति, तथाप्ययुक्ते कृते प्रयत्ना नश्यन्ति, अन्यथा पूर्वमेव ते कथं न नष्टा भवेयुः ? तस्मादप्येनं भगवन्तं **नैवाभिभवन्ति,** अभिभवार्थमप्यागता नाभिभवं कर्तुं शक्नुवन्ति, न चाप्रयोजकाः, यतस्ते पूतनादयः, प्रसिद्धाः, अस्तु तेषां बलं दूरे, **घोरमेव दर्शनं** येषां, दृष्टा एव भयजनका भवन्तीत्यर्थः, तत्र दृष्टान्तमाह **जिघांसयैनमासाद्य स्वयमेव नश्यन्ति,** अभिप्रायप्रयत्नविरुद्धं फलं प्राप्नुवन्ति, तदसम्भावितं मत्वा दृष्टान्त उच्यते **पतङ्गवदिति,** ते हि पक्षवन्तः सूक्ष्माः कीटा आत्मानं महान्तं **मन्यमाना** नरा मूढा अग्निं तेजस्विनं मत्वा किमित्युपासते वयं **त्वग्निं** दूरीकरिष्याम इति महतोवमाननां कृत्वा निर्वाणार्थं प्रवृत्ताः स्वयमेव नश्यन्ति, दग्धा भवन्ति, नत्वग्नेः काचित्क्षतिः, एवमयं भगवानतितेजस्वी तान् मारयतीति युक्तम् ॥ ४६ ॥ **अन्ये** पुनर्नन्दादय प्रमाणबलसिद्धमिममर्थं मन्यमाना नात्यद्भुतमिति प्रमाणमेव स्तुतवन्त इत्याहाहो इति, **अहो** इत्याश्चर्ये, कथं वा **ब्रह्मविदो**ऽग्रिमवृत्तान्तं जानन्तीति, तत्रोपपत्ति**र्ब्रह्मविदामिति,** 'यस्मिन् विदिते सर्वमिदं विदितं भवती'ति, अत एव तेषां वाचः कदाचिदप्यसत्या न भवन्ति, तादृशी वाङ् नोत्पद्यत एवेति वक्तुं **सन्तीत्युक्तं,** ननु का ब्रह्मविदां वाच इत्याकाङ्क्षायामाह **गर्गो यदाहेति,** तत्र हेतु**र्भगवानिति,** ब्रह्मविदो हि ब्रह्मैव भवन्तीत्यतस्तेषां वाक्यप्रामाण्यात् **तथैव तदन्वभावि, वेदवादिनो हि शब्दस्य नानुवादकत्वं मन्यन्ते** किन्तु विधायकत्वमत ईश्वरो वेद एव तद्वाक्यादेव **फलसिद्धिर्न** तु **फलसाधकत्वेनेश्वरापेक्षेति,** "अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथे"ति "नारायणसमो गुणै"रिति, अतस्तद्वाक्यादस्य **बालस्य** तादृग्गुणा जायन्त इतिभावः ॥ ४७ ॥ **एवं** नन्दादीनां त्रिविधं ज्ञानं निरूप्य फलितं वदन् भगवत्कृत

नन्दनिरोधमनूद्योपसंहरतीति, **इतिभावेन नन्दादयो** गोपाः **कृष्णरामकथां** स्वतन्त्रतया फलत्वेन **कुर्वन्तस्तयैव** कथया जातया परमनिर्वृत्या **रममाणाः**, चकाराद् विस्मृतदेहा जातब्रह्मात्मानुभवा वा **भववेदनां** संसारतापं **नाविन्दन्** न ज्ञातवन्तः, प्रपञ्चविस्मृतिः सर्वा तदासक्तिश्च निरोध इति भगवत्कृतं कार्यं **नन्दादिषु** फलितम् ॥४८॥ एवं बाल्यभावेन कृते नन्दनिरोधे प्रतिष्ठिते सति येन भक्तेन कालेन क्रोडीकृतास्ते निरुद्धास्तं कालमपि सिद्धे प्रयोजने त्यक्तवानित्याहैवं**विहारै**रिति, **एवं** पूर्वोक्तप्रकारैः कालस्य **हारैर्लीलारूपैः करणैः सह वा कौमारं जहतुः**, ननु विजातीयानां कथं कौमारनिवर्तकत्वं ? तत्राह **कौमारै**रिति, कुमारावस्थोद्भवैररणेरुत्पन्नेनैव वह्निनारणिः शाम्यतीति, तानि चरितानि त्रिविधानीति गणयति **निलायनै**रिति, सर्वैरेव **विहारैर्व्रज एव कौमारं जहतुः**, अतो व्रज एव कुमारो जातः कुमारी च, अतोग्रे वक्तव्याः 'कुमार्यः कृष्णचेतस' इति करिष्यन्ति च लीलां लतागृहादिषु लीला भगवद्वशीकरणप्रयत्ना गृहस्वमर्यादोल्लङ्घनकर्त्र्यश्च, भगवान् कुमारावस्थायां **निलायनक्रीडां** करोति, **स हि परमानन्दो भूत्वा स्वाज्ञानार्थं मायया ज्ञानशक्तिं रुणद्धि**, तथात्रापि गोपादीनां चक्षूंषि पिधत्ते पश्चान्निलीय तिष्ठति तथान्ये गोपालाः, किञ्च जले प्रवहति **सेतुबन्धान्** कुर्वन्ति, रामावतारे ह्येक एव बन्धः कृतः, एकैव सीतेति, अत्र यमुनादिषु बहूनेव बन्धान् करोति यतः पुलिनादिषु गत्वा रमणं सिध्यति, किञ्च **मर्कटोत्प्लवनादिकमपि** करोति, वृक्षाद् वृक्षान्तरे गच्छति सर्वशाखाफलभोगार्थं, एकस्यामप्यारूढः सर्वफलं भुङ्क्ते न तु तस्य भिन्नः प्रक्रमोपेक्ष्यते, **आदिशब्देन** मण्डूकप्लुत्यादिकमपि, ब्राह्मणोपि भवति क्षत्रियोपि भवति सर्वमेव रसमेकत्र स्थित एव गृह्णाति, न तु तस्य मर्यादा प्रतिबन्धिकेति, एवं यावद्भिर्भावैर्यावन्तो गोकुलवासिनो ग्रहीतुं शक्यास्तान् सर्वानेव **विहारान्** कृतवान्, मूलरूपलीला जगद्रूपलीला वेदरूपलीलेति लीलात्रयं परिचायकत्वेनोक्तं, **अतः परं कौमारकार्यं** नास्तीति ताभिर्लीलाभिः सह **कौमारावस्थां जहतुः** ॥ ४९ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तरप्रमाणप्रकरणे धर्मिनिरूपकसप्तमाध्यायस्य स्कन्धादितो एकादशाध्यायस्य विवरणम् ॥

॥ समाप्तमवान्तरं तामसप्रमाणप्रकरणम् ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

निलायनैरित्यत्र. ब्राह्मणोपीति ।

सूक्ष्मरूपेण विश्वासमुत्पाद्य प्रतिबन्धके । तेनैवापगते स्वेष्टरूपमाविष्करोति हि ॥ १ ॥
भक्तार्तिहृतिरिष्टाप्तिः फलं तदितरेष्वपि । निरोध्येषु प्रभौ दोषारोपाभावः फलं त्विह ॥ २ ॥
कदाचिन्निजभक्तानां पित्रादीनामनुज्ञया । तत्संगतस्तत्र लीलाः कुर्वन् कृष्णो विराजते ॥ ३ ॥
क्वचित्परस्परं गुप्तानुरागवशतो वने । कथञ्चिद् भक्तसंगे सत्यनिशं रमते प्रभुः ॥ ४ ॥
कदाचिद्भक्तपित्रादिनिषेधेपि निजाग्रहात् । नयति स्वेष्टदेशांस्तं चातुर्येण प्रतापवान् ॥ ५ ॥
कदाचित् कौतुकावेशं ज्ञापयन् स्वस्य नृष्वसौ । अन्यसंगनिवृत्त्यर्थं वानरैः सहितः प्रभुः ॥ ६ ॥
पुलिनस्थितभक्ताप्त्यै बहुधोपायकार्यभूत् । तत्स्थितप्रतिबन्धं च नाशयत्येव सर्वतः ॥ ७ ॥
अन्यश्चेदभिमानेन भक्तनैकट्यमाप्नुयात् । बालभावाग्रहेणैव तमपास्य तदा स्वयम् ॥ ८ ॥
स्थित्वानेकविधा लीलाः करोति व्रजवल्लभः । स्थापयित्वान्यगमनप्रतिबन्धकमात्मनः ॥ ९ ॥
केवलस्य गतौ तत्र साधनं विदधाति च । भक्ता हि विविधैर्भावैर्युक्ता हरिरपि क्वचित् ॥ १० ॥
एकत्रैवाखिलान् भावान् क्रमेणोत्पाद्य तान् रसान् । भुङ्क्ते कदाचित् प्रत्येकं तत्र तत्र स्थितस्तथा ॥११॥
अथवैकत्र पुलिने वेणुवादनलीलया । संगतेष्वखिलान् भावरसान् भुङ्क्तेत्युदारधीः ॥१२॥
एतदेव ब्राह्मणोपीत्यादिनोक्तं सुगोपितम् । एतदग्रे मूलरूपलीलेत्यादि निरूपितम् ॥१३॥
तद्भावः प्रोच्यते सम्यक् तदनुग्रहतः स्फुटः । प्रमाणाख्यप्रकरणोपसंहारेपि शुद्धता ॥१४॥
ब्रह्मता नोच्यते चेत् तत्सिद्धं नो भवति द्वयम् । अत एव त्रयं प्रोक्तं ब्रह्मतापरिचायकम् ॥१५॥
सर्वाज्ञातस्वरूपं हि ब्रह्म पूर्वं रिरंसया । ततोऽखिलजगद्रूपं भूत्वा तत्रातिदुस्तराः ॥१६॥
मर्यादाः कुरुते लीलासिद्ध्यै यद्वा प्रपञ्चत । अतीतस्याश्रये भक्तिमार्गानप्यकरोद् दृढान् ॥१७॥
अशेषवेदशाखोक्तफलभोगाय वेदताम् । आत्मनः प्रकटीकृत्य क्रीडतीत्यपि सूच्यते ॥१८॥
भक्ताः सर्वं परित्यज्य प्रभुप्राप्त्यै यथा रहः । स्थितास्तथा चेत् कुरुते स्वयमेव तदा परः ॥१९॥
यतो नान्यप्रतिज्ञेयं 'यथे'त्यादिनोदिता । साक्षात्स्वरूपदानेन परा लीलेयमित्यपि ॥२०॥
लीलासम्बन्धि वस्त्वत्र सर्वं भगवदात्मकम् । प्रवर्तकत्वतो वेणुनादो वेदात्मकोत्र हि ॥२१॥
एतत्सर्वं ज्ञापयितुमेतल्लीलात्रयं शुकैः । उक्तमित्युक्तमाचार्यैर्गोप्यत्वं चापि सूचितम् ॥२२॥

अग्रेऽध्यायत्रयं प्रक्षिप्तमित्युक्तम्। तत्र 'कौमारं जहतुः' 'ततश्च पौगण्डवयःश्रिता'विति युक्तः **सन्दर्भ** इति। मध्येन्यकथा 'त्वेवं विहारै'रित्यस्य 'ततश्च पौगण्डवय' इत्यस्य च वक्त्रा नोक्तेति ज्ञायते। अन्यथैतदध्यायत्रयानन्तरमेव कौमारत्यागं वदेत्। किञ्च, 'पौगण्डे परिकीर्तित'मिति वाक्यात् पूर्वाध्याय एव तत्प्राप्ते'स्ततश्च पौगण्डवयः श्रिता'विति वाक्यं विरुद्धं स्यात्, तदनर्थकं च। तृतीयाध्यायान्तेप्येवं विहारै'रिति श्लोकोधुना कैश्चित्पुस्तकेषु लिख्यते, तदप्रामाणिकमितीतोपि तथात्वं तेषां ज्ञेयम्। भगवत्प्रियाकृतलीलानुकृतिष्वेतदनुकृत्यभावात्। तृतीयस्कन्धे श्रीमदुद्धवैर्द्वादशे स्कन्धे सूतेन चैतत्कथाया अकथनाच्च। 'न भारती मेङ्ग मृषोपलक्ष्यते', 'न वै क्वचिन्मे मनसो मृषा गतिः', 'न मे हृषीकाणि पतन्त्यसत्पथ' इति ब्रह्मवाक्यविरोधश्च। ईश्वरे तत्त्वेन ज्ञानवतस्तत्परीक्षाकृतेर्महानर्थरूपत्वाद्, 'भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचि'दिति भगवद्वाक्यविरोधश्च। तोकेन जीवहरणमित्यादिनिरूपकस्य सदेश्वरत्वेन ज्ञानवतस्तादृग्धाष्टर्यस्यासम्भवाच्च। **आचार्यैः प्रसिद्धिमात्रेण** विवृतमित्य**स्माभिरुपेक्षितम्** ॥ ४९ ॥

इति श्रीटिप्पण्यामेकादशोऽध्यायः ॥ ११ ॥

इति श्रीप्रमाणप्रकरणम्।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अहो ब्रह्मविदामित्यत्र **वेदवादिन** इति मीमांसकाः, तथा चेदं श्रीनन्दादिभिस्तन्मतानुसारेणोक्तं ज्ञेयमित्यर्थः ॥४७॥ **एवं विहारै**रित्यत्र **क्रोडीकृता** इति वयस्या इत्यर्थः, हारैरिति हारकैः, **व्रजे** कौमारत्यागे हेतुमाहु**र्यत** इत्यादि, **श्वेताश्वतरे** 'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी'तिश्रावणाद् रुद्रदैवत्ये व्रजे कुमारः कुमारी च जात इति तत्रैव **कौमारं जहतुः**, ननु कुमारलीलास्तूक्ताः कुमारीलीलास्तु नोक्ता इत्यतस्तद्गमकं हेतुमाहुरतोग्र इत्यादि, **गृहस्थमर्यादोल्लङ्घनकर्त्र्य** इत्यनेन 'त्वं स्त्री'तिश्रुत्यर्थः सङ्गृहीतः, नन्वेवं स्फुटतया न प्रतीयत इत्याशङ्क्य तन्निवृत्त्यर्थं **निलायनक्रीडा**तात्पर्यमाहु**र्भगवा**नित्यादि, अग्रे लीलाद्वयतात्पर्यं स्फुटं, तृतीयलीलायाः शेषभूताः श्लोका विज्ञप्तौ दृश्यन्ते 'स्वारोहणाक्षमां शाखां किञ्चिदास्वाद्य लीलया। आरुरोह यथेच्छं तामन्यां स्वारोहणक्षमां कदाचिन् निकटस्थामप्युल्लङ्घ्य स्वमनोगतां शाखामारुह्य तत्रत्यं फलं भुङ्क्ते मनोगतं कदाचित् सकलाः शाखाः स्पृष्ट्वा स्पृष्ट्वा यथारुचि गच्छन् शाखाविशेषस्य फलभोगार्थमेव हि यस्या जातेर्यथा धर्मस्तथालीलाकृतिर्यतः अतस्तज्जातिनामापि प्रभौ सम्यग् विराजते तद्वदत्रापि यज्जातिधर्मसाम्येन या कृतिस्तेनास्या अपि तत्साम्यमिति सर्वं सुनिश्चित'मित्याचार्याणां, **आदि**पदसङ्गृहीतमाहु**र्ब्राह्मणोपी**त्यादि, तत्तात्पर्यं **टिप्पण्यां कारिकाभि**राहुः **सूक्ष्मरूपेणे**त्यादि।

एतस्याः **सप्ताध्याय्याः** प्रमाणप्रकरणत्वं **निबन्धे** व्युत्पादितं 'भगवच्चरिते यस्मात् प्रमाणमिह मृग्यते अज्ञानमन्यथाज्ञानं प्रमाणं भक्तिहेतुक'मिति तथा'मेये मेयबुद्धिर्हि प्रमाणमिति केचन' प्रमातारोपि तत्रैव बाधिताः 'प्रथमो वसुदेवो हि द्वितीयो नन्द उच्यते बालाः स्त्रियस्तृतीया हि चतुर्थो गर्ग उच्यते यशोदा पञ्चमी प्रोक्ता षष्ठरूपाविहार्जुनौ उपनन्दस्तु निर्दिष्टः सप्तमो धर्मिबोधक' इति, अत्रैवं बोध्यं, प्रथमे श्रीवसुदेवो नन्दस्य स्वागमनाज्ञानं भगवति स्वात्मजत्वेनान्यथाज्ञानं च भक्तिजन्य'महो ते देवकीपुत्रा' इत्यादिभिः श्रीनन्दवाक्यैर्विचारितवानतस्तदेव प्रमेयमत्रान्विष्यते, एवं द्वितीये **श्रीनन्दः** पूतनादेहदर्शनेन श्रीवसुदेवभक्त्या तस्मिन्नृषित्वं योगेशत्वं च विचारितवान् विस्मयहेतुभूतं तन्निधनादिकारणाज्ञानं च विचारितवान्तस्तदेव प्रमेयमत्रान्विष्यते, तृतीये बालकाः प्रमातारो भक्तिजन्यं स्वप्रत्यक्षेण गोपानां स्ववाक्याश्रद्धारूपमन्यथाज्ञानं बालकबलाज्ञानं च प्रमितवन्तस्तदेव चरित्रद्वयं प्रमेयमत्रान्विष्यते, एवं तृणावर्तवधे च स्त्रियः प्रमात्र्यो भक्तिहेतुकेन स्वप्रत्यक्षेण प्रमाणेना'हो बतात्यद्भुत'मितिश्लोकोक्तं बालागमनकारणाज्ञानरूपं चरित्रं विचारितवत्यस्तदेव प्रमेयमत्रान्विष्यते, चतुर्थे गर्गः प्रमाता भक्तिजन्ये'नालक्षितोस्मिन्नि'त्यादिना श्रीनन्दवाक्येन श्रीनन्दस्य भगवति स्वपुत्रत्वेन यदन्यथाज्ञानं वसुदेवपुत्रत्वाज्ञानं च विचारितवानिति तदेव प्रमेयमत्रान्विष्यते, पञ्चमे श्रीयशोदा प्रमात्री भक्तिजन्येन दामद्व्यङ्गुलन्यूनतादर्शनेन विस्मयजनकं तद्धेत्वज्ञानं स्वस्मिन् प्रमितवती तदेव प्रमेयमत्रान्विष्यते, अर्जुनौ षष्ठस्य प्रमातुर्निरूपकौ गोपाः प्रमातारो भक्तिजन्येन पतितार्जुनदर्शनेन प्रमाणेन पतनकारणाज्ञानं कारणसंशयं च प्रमितवन्तस्तदेव प्रमेयमत्रान्विष्यते, सप्तम उपनन्दः प्रमाता भक्तिजन्येनोत्पातानुभवेन प्रमाणेन तत्कारणाज्ञानं कारणविषयकान्यथाज्ञानं च विचारितवान् प्रीतिकर्तृत्वेन धर्मिणं च बोधितवानिति तदेव प्रमेयमत्रान्विष्यत इति, किञ्च तत्रैव 'प्रपञ्चविस्मृतिः सर्वा तदासक्तिः स्फुटैव हि प्रमाणबलमासाद्य सर्वेषां गोकुले ह्यभूदित्यनेन प्रमाणबलादेवासक्तिदार्ढ्यमुक्तमित्यतोपि प्रकरणस्य तथात्वं, किञ्च 'प्रमेये बालरूपे हि प्रमाणादखिलं स्थित'मिति प्रमाणादेव बालरूपे सर्वं निर्णीतमित्यतः प्रमाणप्रकरणत्वं त्रिधा ज्ञेयम् ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाश एकादशाध्यायविवरणम् ॥११॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अहो इत्यत्र **कृतपूर्व**मिति पूर्वं कृतं कृतपूर्वमिति समासः ॥ ४५ ॥ **अथापी**त्यत्र **अन्यथे**ति यत्र कुत्रचिदपि भयाकर्तरि प्रयत्नकरणेन नाशे इत्यर्थः, **तस्मादि**ति यद्यपि न शक्नुवन्ति तथापि प्रयत्नमात्रान् नश्यन्तीतिपूर्वानुसन्धानेनान्वयः, **अभिभवार्थमपी**ति उत्तरार्धार्थं विचार्यतावद् व्याख्यानं, **तत्रे**ति साधारणधर्मसहितो दृष्टान्तो द्वितीयार्धार्थः **अभिप्राये**ति हननमभिप्रायविषयः, आसादनं **प्रयत्नस्तद्विरुद्धं फल** स्वनाश इत्यर्थः, दृष्टान्ताभिप्रायं विवृण्वन्ति **ते हीति** ॥ ४६ ॥ **अहो** इत्यत्र **असत्या न भवन्ती**ति फलाजनिका न भवन्तीत्यर्थः, **तत्र हेतुरि**ति विधायकवाक्यत्वे हेतुरंगवत्त्वमित्यर्थः । **यत् तदि**ति पञ्चम्यन्तमव्ययत्वेन व्याख्यातं, तत्र **हेतुर्वेदवादिन** इति, जैमिनीया इत्यर्थः, व्यासस्य तु "फलमत उपपत्ते"रित्यत्रोक्त एव सिद्धान्त इति ज्ञेयं, नन्दस्य प्रामाणिकत्वात् सात्त्विकज्ञानस्य वाक्यार्थत्वात प्रकरणस्य प्रमाणत्वाच् च प्रमाणरीत्यैव व्याख्यानं, प्रमेयमार्गे भगवानेव सर्वसाधक इति ज्ञेयम् ॥ ४७ ॥ **इती**त्यस्याभासे **उपसंहरती**ति इति शब्देनोपसंहारोऽप्युक्त इति ज्ञेयं, व्याख्याने, **जातब्रह्मात्मानुभवा** इति "ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधन"मितिप्रकारो जात इति भावः, **तदासक्तिश्चे**ति मूले **रममाणा** इत्यस्य रतियुक्ता इत्यर्थमप्रेत्येदमुक्तम् ॥ ४८ ॥ एवमित्यस्याभासे **क्रोडीकृता** इति भगवत्सङ्गताः कृता इत्यर्थः, तादृशं कौमारं वयो दृष्ट्वा कौतुकेन तत्र सङ्गता इति भावः, **प्रयोजने** इति कौमारकर्तव्ये **निरोधे** इत्यर्थः, एवमित्यत्र **विजातीयाना**मिति कालमात्रसम्बन्धिलीलाकथने कौमारविजातीयानां पौगण्डादिलीलानामित्यर्थः, **अरणे**रिति कार्यस्य कारणनिवर्तकत्वं कथमित्याशङ्क्य दृष्टान्तेन बोधनार्थमिदमुक्तं, **कौमारं जहतुरि**ति व्रजे कौमारवयःस्थापनकथनेन भगवतः पौगण्डादिभावेपि तासां तादृग्वयस्कत्वमिव सूक्ष्ममेव रूपं सर्वजनीनं, "परिधाय स्ववासांसी"ति वक्ष्यमाणप्रकारकरसाकरत्वानन्तरमपीति ज्ञेयं **मूलरूपलीला** विवृण्वन्ति **भगवानि**ति, **परमानन्दो भूत्वे**ति सृष्ट्यारम्भे सच्चिदंशौ पृथक्कृत्येत्यर्थः, **वृक्षादि**त्यादि स्थितिदेशो वृक्षः शाखास्ताः फलं तत्स्थो रसः, प्रतिवृक्षं गत्वा तत्तच्छाखाफलं भुङ्क्ते, एकस्मिन् वृक्षे एकस्यामेव शाखायां स्थित्वा शाखान्तरावयवरसमपि भुङ्क्ते, इदं द्वयं **मर्कटोत्प्लवनं**, एकस्यां शाखायां स्थित्वा तन्निष्ठमेव फलं तत्तदवयवभेदेन बहुविधं भुङ्क्ते तन् मण्डूकप्लवनं ज्ञेयं, एकस्मिन्नेव वृक्षे स्थित्वा तत्रत्यासु सर्वशाखासूत्प्लुत्योत्प्लुत्य तत् तत् फलं भुङ्क्ते इति वा, मण्डूको **हि** दूरोत्प्लवनासमर्थ एकस्मिन्नेव देशे तत्तदंशभेदेनोत्प्लवति ॥ ४९ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एवंविहारैः कौमारैरित्यस्याभासे **येन भक्तेन कालेने**ति कौमारलीलासाधकेन आधिदैविककालेनेत्यर्थः, **क्रोडीकृता** इति कौमारलीलामात्रासक्ता इत्यर्थः, **तं कालमि**ति आधिदैविकं कौमारलीलाकालमित्यर्थः, **सिद्धे प्रयोजने** इति निरोधात्मकप्रयोजने सिद्धे इत्यर्थः, अत एव कृष्णरामकथां कुर्वाणानां भववेदनाज्ञानाभावः पूर्वश्लोके निरूपितः, **त्यक्तवानि**ति स्थापितवानित्यर्थः, "स्वसैन्यं स बहिस्त्यक्त्वा जगाम गहनं वन"मित्यादौ बहिःस्थापनस्य त्यागपदार्थत्वात्, तथा च कौमारलीलातत्परिकरसहितं कालं स्थापितवानितिफलितं, कौमारस्य लीलायाः तत्परिकरस्य तदधिकरणस्य कालस्य च नित्यत्वात्, उपलब्ध्यनुपलब्धी तु आविर्भावतिरोभावसाध्ये इति बोद्धव्यं, **कौमारै**रित्यस्याभासे **ननु विजातीयानां कथं कौमारनिवर्तकत्व** इति नन्वियं शङ्कैव नोदेति सर्वत्र पार्थिवानां काष्ठपटादीनां तेजोरूपेणाग्निना नाशदर्शनात् विजातीयेषु नाशकत्वस्य दृष्टत्वात्, सत्यं, अन्यत्र विजातीयानां नाशकत्वेपि पलनिमेषघटिकादिरूपे काले तत्परिच्छेद्ये वयसि च विजातीयस्य नाशकस्य अदृष्टत्वात् शङ्काया अवकाश इतिध्येयं, **निलायनै**रित्यस्य व्याख्याने, **सर्वैरेव विहारैर्व्रज एव कौमारं जहतुरि**ति इह प्रभोर्व्रजस्थितत्वेन व्रजपदोपादानं विना व्रजस्य कौमारत्यागाधिकरणत्वे सिद्धेपि व्रजपदोपादानेन व्रज एव कौमारत्यागो न त्वन्यत्र इति ज्ञाप्यते, त्यागस्त्वत्र स्थापनं न तु स्वसत्तानिवृत्तिः, "स्वसैन्यं स बहिर्हित्वा जगाम गहनं वन"मित्यादौ हित्वेत्यनेन स्थापनमेवोच्यते, अतोत्रापि स्थापनं ग्राह्यं "कौमारं जहतु"रित्यनेन, तथा च व्रजे कौमारं स्थापितमिति फलति, कौमारशब्देन कुमारस्य भावः कुमार्याश्च भावो ग्राह्यः, तद्धितप्रत्ययेन उभयथापि कौमारशब्दसिद्धेः, एवं पुम्भावस्त्रीभावविशिष्टं उभयमपि कौमारं व्रजे स्थापितमित्याशयेनाचार्यचरणा आहुः **अतो व्रज एव कुमारो जातः कुमारी चे**ति, भगवान् **व्रज एव कुमारो जातः कुमारी च जाता** इत्यन्वयः, कुमाररूपेण कुमारीरूपेण च व्रजे प्रकट इत्यर्थः, "स आत्मानं द्वेधाऽपातयत् ततः पतिश्च पत्नी चाभवता"मितिश्रुतेः भगवत एवोभयभावेनाविर्भावात् प्रभोः कुमारीरूपत्वमप्यविरुद्धं, तथा चाधिदैविककुमारीरूपो भगवान् जात इति यावत्यो व्रजे कुमार्यस्ता सर्वा अपि कुमारीरूपस्य भगवत एव स्वरूपभूता इत्याहुः **अतोग्रे वक्तव्याः कुमार्यः कृष्णचेतसः इती**ति, "एवं मासव्रतं चेरुः कुमार्यः कृष्णचेतसः" इत्येकोनविंशाध्याये वक्तव्याः, कुमार्योप्याधिदैविककुमारीरूपस्य भगवतः स्वरूपभूता इत्यर्थः, एवं सति कौमारशब्दस्य कुमारीभाववाचकत्वपक्षः 'निलायनैः सेतुबन्धैः मर्कटोत्प्लवनादिभि'रित्यनेन (**कौमारै**रित्यस्याभासे ननु **विजातीयानां कथं कौमारनिवर्तकत्व**मिति नन्वियं शङ्कैव नोदेति सर्वत्र पार्थिवानां काष्ठवस्त्रादीनां तेजोरूपेण वह्निना नाशदर्शनादिति चेत् न, अन्यत्र विजातीयानां नाशकत्वेपि बाल्यकौमाराद्यवस्थानां स्वसजातीयावस्थान्त-

रैकनाशत्वेन शङ्कायाः सम्भवात् पदकुमारीभाववाचकत्वपक्षे 'निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभि'रित्यनेन) उक्तानां निलायनादिक्रीडानां कुमारीरूपेपि अवश्यवाच्यत्वेन तासां क्रीडानां तत्र योजने प्रकारमाहुः **करिष्यन्ति च लीलां लतागृहादिषु लीना** इत्यादिना, अयमर्थः, ताः कुमार्यः भगवता सह रमणे रसविशेषोत्पत्त्यर्थं वियोगे च तदात्मकतया कुञ्जेषु निलीय क्रीडां करिष्यन्ति, अतो **निलायनं** तास्वपि सिद्धं, **भगवद्वशीकरणप्रयत्ना** इति रसमर्यादया भगवद्वशीकरणार्थं भगवदनुकूलभूषणवसनचेष्टादिकं ता रचयन्तीदमेव **सेतुबन्धनं** ज्ञेयं, **गृहस्थमर्यादोल्लङ्घनकर्त्र्यश्चेति**, **मर्कटोत्प्लवनमेतत्** **मर्कटवदुत्प्लवनं** लोकवेदोल्लङ्घनं, तदपि प्रभुकृते ताभिः कृतमिति लीलात्रयं तास्वपि सिध्यति, एवं निलायनादिविहारैः सह व्रजे उभयविधकुमारस्थापनोक्तेस्तादृग्विहारविशिष्टकुमाररूपेण स्वभोग्यकुमारीरूपेण च भगवान् व्रजे सर्वदा विजयतेतो नित्यत्वं लीलातत्परिकरविशिष्टस्वरूपस्यैतिमञ्जुलमखिलं, निलायनक्रीडाया आशयं निरूपयन्ति **स हि परमानन्द** इत्यादिना, अनवतीर्णं मूलरूपं ब्रह्म मायाजवनिकया यथा छन्नं भूत्वा अन्यस्य स्वविषयकं ज्ञानं रुणद्धि "न चक्षुषा गृह्यत" इतिश्रुतेः तथा अवतीर्णं मूलरूपं श्रीकृष्णाख्यं ब्रह्मापि निलीय तिष्ठतीति चक्षुरग्राह्यं भवति, **सर्वशाखाफलभोगार्थं एकस्यामध्यारूढः सर्वफलं भुङ्क्ते** इति, अयं च **मर्कटोत्प्लवनादिकं** यदुक्तं तस्याभिप्रायः, **आदिशब्देन** शाखान्तरस्थितिसामयिकशाखान्तरफलभोग उक्तः, मर्कटो यथा शाखायामेकस्यामारूढः अन्यासां बह्वीनां शाखानां फलं बलात्कारेण गृहीत्वा भुङ्क्ते तथा भगवानपीत्यर्थः, इह परोक्षवादेन शाखाशब्देन व्रजवरनितम्बिन्य उक्ताः, तथा च एकस्या घोषसीमन्तिन्या गृहादिषु स्थित्वा बह्वीभिर्व्रजमृगदृग्भिः सह रमते इति सूचितं, **आदिशब्देन मण्डूकप्लुत्यादिकमपीति**, अत्रापि परोक्षवादः, तथा च मण्डूको यथा मध्ये द्विपत्प्रदेशं त्यक्त्वा कुत्रचिदुत्प्लवनं करोत्येवं प्रभुरपि कस्याश्चिद्गृहे रमणं विधाय काश्चिन् मध्ये त्यक्त्वा कस्याश्चिद्गृहे रमते इति सूचितं, तथा सति मध्ये यां त्यक्त्वा गतः सा अन्यस्मिन् दिवसे खण्डिताभावं प्राप्नोतीति रसे चमत्कारविशेषः सिध्यति, एतावता शृङ्गाररससम्बन्धिनीरनेकविधा लीलाः प्रभुः कुर्वन् शुद्धपुष्टिभक्तानां लोचनयुगलं शिशिरयतीति निरूपितं, तामसानां प्रमाणप्रकरणस्य समाप्तौ "रसो वै स" इति श्रुतिप्रमाणसिद्धं रसात्मकं ब्रह्म श्रीशुकेन गूढतया वर्णितं, तदेव शुकहार्दविदा भगवता सुबोधिनीकारेण परोक्षवादरीत्या प्रदर्शितमिति रसिकवैष्णवा विदां कुर्वन्तु (**आदिशब्देन मण्डूकप्लुत्यादिकमपीति**, मण्डूको यथा कुत्रचित् स्थितः कञ्चित् प्रदेशं त्यक्त्वा कुत्रचित् प्रदेशे प्लवति, एवं कृष्णोपि कस्याश्चिद् गृहे स्थितः काश्चिद् वञ्चयित्वा कयाचिद् रमते, तथा च यस्या वर्जनं सा प्रातः खण्डिता भवतीति मण्डूकप्लुतिः, एवं बहुधा रमणं शुकेन गुप्तरीत्या प्रदर्शितमिति रसिकवैष्णवा विदांकुर्वन्तु), **ब्राह्मणोपि भवति क्षत्रियोपि भवतीति** **ब्राह्मण**शब्दो वामनावतारपरः "जटिलं वामनं विप्रं मायामाणवकं हरि"मित्यादिषु विप्रत्वोक्तेः स वामनो यथा स्वरूपनिलायनं कृत्वा सूक्ष्मरूपं प्रदर्शयित्वा स्वकार्यं बलिराजात् साधयित्वा पश्चात् बृहद्रूपं प्रकटीचकार एवमिहापि गूढदुर्लभव्रजवधूप्राप्त्यर्थं स्वस्वरूपनिलायनं विधाय रमणाभिलाषं साधयित्वा पुनः पूर्वभावं सम्पादयतीति **ब्राह्मणोपि भवती**त्यनेन 'निलायनै'रित्यस्य हार्दं स्फुटीकृतं, **क्षत्रियशब्देन** श्रीरामचन्द्रः, स यथा सेतुबन्धेनोपायेन जानकी प्राप्तवान्, तथेहापि रसशास्त्रोक्तचातुर्यरूपसेतुबन्धेन व्रजसुन्दरीः प्राप्नोतीति 'सेतुबन्धै'रित्यस्याशयः, किञ्च सेतुबन्धशब्देन नानाप्रकारयुक्ता राजनीतिरुच्यते, श्रीरामो यथा राजनीत्यानेकराज्यसम्बन्धिफलानि बुभुजे तथा भगवानपि रसशास्त्रोक्तचातुर्यरूपनीत्या विविधगोपवधूटीविलासफलानि भुङ्क्ते इति 'सेतुबन्धै'रित्यस्य तात्पर्यं, इह **ब्राह्मणोपि भवति क्षत्रियोपि भवती**त्यस्य आधिदैविकपक्षसिद्धा रसिकभगवदीयमनोहरा निगूढा अर्थास्तु सुबोधिनीहार्दविदा भगवता श्रीविट्ठलेश्वरेण टिप्पण्यां स्फुटीकृता इति भाग्यवद्भिस्तत एवावधार्याः ॥ ४९ ॥

"जानीत परमं तत्त्व"मिति श्लोकेन वर्णितः । परब्रह्मस्वरूपः श्रीबालकृष्णो मुदेस्तु मे ॥ १ ॥

इत्येकादशोऽध्यायः ॥ ११ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र गोपानां परस्पराश्चर्योक्तिमाह— अहो बतेति । 'अहो बत' इत्यादिश्लोकत्रयस्य 'इति नन्दादयो' इति चतुर्थेनान्वयः । अहो इत्याश्चर्ये । बतेति खेदे । अस्य बालस्य कृष्णस्य बहवो मृत्यवो मृत्युहेतवोऽभवन्, अपि तथापि तेषामेव विप्रियमनिष्टमासीत् । यतस्तैः पूर्वमन्येषां भयं कृतम् ॥ ५६ ॥ ननु 'अनेनैव बालकेन पूर्वं कदाचित्तेषामसुराणां किञ्चिद्विप्रियं कृतम्, अत एवेदानीं ते एव तं हन्तुमायान्तीति कुतो न सम्भाव्यते ?' तत्राहुः—अथापीति । यद्यपि तयारदर्शनाः भयङ्करस्वरूपा दर्शनमात्रेणापि प्राणहारकास्तथाप्येनं बालमपि नाभिभवन्ति किञ्चिन्मात्रमप्यस्य पराभवं कर्तुं न शक्नुवन्ति, प्रत्युत जिघांसया हन्तुमिच्छया एनमासाद्य प्राप्य स्वयमेव नश्यन्तीत्यन्वयः । तत्र दृष्टान्तमाहुः—अग्नौ पतङ्गवदिति । यथाऽग्निं नाशयितुं तत्र पतिताः पतङ्गाः शलभाः स्वयमेव नश्यन्ति तथेत्यर्थः । तथा च नानेन तेषां किञ्चिद्विप्रियं कृतम्, यदि किञ्चिद्विप्रियं कृतं स्यात्तदा त एवैनमभिभवेयुः । स्वयं न नश्येयुरिति भावः ॥ ४७ ॥ भगवदुपासनाप्रभावस्याश्चर्यं द्योतयन्त आहुः— अहो इति । ब्रह्मविदां वेदोक्तपरमार्थज्ञानां भगवदुपासकानां वाचः कर्हिचिदपि असत्या न सन्ति न भवन्ति । 'कथमेवं निश्चय'

इत्यत आह—गर्ग इति । भगवान् भगवदुपासकत्वेनाविर्भूतसर्वज्ञत्वादिगुणो गर्गः "तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः" इत्यादि यदाह उक्तवांस्तत्तथैवान्वभावि अनुभूतम्, दृष्टमित्यर्थः ॥ ५८ ॥ इत्येवं नन्दादयो गोपाः कृष्णरामकथां कुर्वन्तस्ताभ्यां सह रममाणाश्च मुदा तज्जनितपरमानन्देन निमित्तेन भववेदनां दैहिकदैविकभौतिकसंसारतापं नाविन्दन् तदनुसन्धानं न कृतवन्तः ॥ ५९ ॥ एवमुक्तप्रकारकैरन्यैश्च निलायनादिभिः कौमारैः कुमारावस्थायां योग्यैर्विहारैः कृत्वा कौमारं कुमारावस्थां रामकृष्णौ व्रजे जहतुः त्यक्तवन्तौ । निलायनं निलीयस्थितिः । सेतुबन्धः नद्यादिषु सेतुबन्धनम् । मर्कटवदुत्प्लवनं शाखातः शाखान्तरगमनम् । आदिपदेनानेकविधलीलान्तरग्रहणम् ॥ ६० ॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने । एकादशो गतो वृत्तिं वत्सादिवधबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

अहो बतेति ॥ अहो आश्चर्यं बतेति खेदे । अस्य बालस्य कृष्णस्य बहवो मृत्यवो मृत्युहेतवोऽभवन् अपि तथापि तेषामेव विप्रियमनिष्टमासीत् । यतस्तैः पूर्वमन्येषां भयं कृतम् ॥ ५४ ॥ अथेति ॥ यद्यपि एते घोरदर्शनाः भयङ्करस्वरूपदर्शनमात्रेणापि प्राणहारका अथापि तथाप्येनं बालमपि नैवाभिभवन्ति किञ्चिन्मात्रमप्यस्य पराभवं कर्तुं न शक्नुवन्ति । नैवं ते इत्यपि पाठः । प्रत्युत जिघांसया हन्तुमिच्छया एनमासाद्य प्राप्य स्वयमेव अग्नौ पतङ्गवत् नश्यन्ति ॥ ५५ ॥ अहो इति ॥ अहो ब्रह्मविदां वेदोक्तपरमार्थज्ञानां वाचः कर्हिचिदप्यसत्या न सन्ति । भगवान् गर्गः "तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः ।" इत्यादि यदाह उक्तवांस्तत्तथैवान्वभावि अनुभूतं दृष्टमित्यर्थः ॥ ५६ ॥ इतीति ॥ अहो बतेत्यादिवचोभिः नन्दादयो गोपाः कृष्णरामकथां कुर्वन्तस्ताभ्यां सह रममाणाश्च मुदा तज्जनितपरमानन्देन निमित्तेन भववेदनां दैहिकदैविकभौतिकसंसारतापं नाविन्दन् तदनुसन्धानं न कृतवन्तः क्षुधार्त्ता इदमब्रुवन्निति क्षुधादिकथनं तु तल्लीलाङ्गत्वान्न दोषाय ॥ ५७ ॥ एवमिति ॥ अयं श्लोको न सार्वत्रिकः कचिदग्रेपि पठ्यते । संबन्धोक्तिटीकायामुभयत्र व्याख्यातः । एवमुक्तप्रकारकः निलायनैः निलीयस्थितिभिः । निपूर्वाल्लीधातोर्णिजन्ताल्ल्युट् । सेतुबन्धैः मर्कटवदुत्प्लवनं शाखातः शाखान्तरगमनम् इत्यादिभिः कौमारैः कुमारावस्थायां योग्यैर्विहारैः कृत्वा कौमारं कुमारावस्थां रामकृष्णौ व्रजे जहतुः त्यक्तवन्तौ ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धेऽन्वितार्थप्रकाशिकायामेकादशोऽध्यायः ॥ ११ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मृत्यवो मृत्युकर्त्तारः तेषामेव विप्रियं आसीत् यतो हेतोः तैः पूर्वमन्येषां भयं कृतं अहो बत इत्यारभ्य इति नंदादय इत्यंतेन संबंधः ॥ ५२ ॥ श्रीसहजानंदस्वामिमहाराज सत्पक्षे ॥ नाभि भवन्ति न परा भवन्ति ॥ ५३–५५ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके
श्रीमद्भागवतस्यदशमस्कंधव्याख्यानेवत्सबकवधोनामैकादशोऽध्यायः ॥ ११ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अहो इत्यादिश्लोकत्रयस्य 'इति नन्दादयः' इत्युत्तरगतेनान्वयः ॥ अहो इति ॥ अहो इत्याश्चर्ये । बतेति खेदे । तत्र खेदहेतुं विशदयन्ति । अस्य बालस्य, मृत्यवो मृत्युहेतवः, बहवः, अभवन् । अप्यथापि, तेषामेतद्विप्रियकर्तृणामेव, विप्रियं दुःखं, आसीत् । युक्तमेवैतदित्याहुः । यतः, पूर्वं जन्मान्तरे, भयं कृतं, यतस्तैरन्येषां पूर्वं भयमुत्पादितमतस्तेषामेव भयमुत्पतितमित्यर्थः ॥ ५४ ॥ अथापीति ॥ अथ एवं घोरदर्शनाः भयंकरदर्शनाः, तेऽसुराः अपि, एनं, न अभिभवन्ति न घर्षयन्ति एव । किं तु । जिघांसया हन्तुमिच्छया, एनं आसाद्य, अग्नौ पतङ्गवत्, नश्यन्ति ॥ ५५ ॥ अहो इति ॥ अहो ब्रह्मविदां वाचः, कर्हिचित् कदाचिदपि, असत्याः न सन्ति न भवन्ति । भगवान् गर्गो गर्गाचार्यः, यत् आह 'नारायणसमो गुणैः' इति यत् कथयामास, तत् तथैव, अन्वभावि अनुभूतम् ॥५६॥ इतीति ॥ इत्येवं, नन्दादयः गोपाः, कृष्णरामकथां, मुदा कुर्वन्तः, रममाणा आनन्दमानाश्च सन्तः, भववेदनां न अविन्दन् । सांसारिकक्लेशान्न प्रापुरित्यर्थः ॥ ५७ ॥ एवमिति ॥ एवमेवंविधैः, कौमारैः कौमारावस्थासंबन्धिभिः, निलायनैः, सेतुबन्धैः, मर्कटवदुत्प्लवनमादियेषां तैः, विहारैः चेष्टितैः, व्रजे, कौमारं वयः, जहतुः रामकृष्णाविति शेषः । अत्रायं विवेकः । आपञ्चमाब्दात् कौमारं, आदशमवर्षात्पौगण्डं, आपञ्चदशवर्षात् कैशोरमिति । कश्चित् स्तम्भमूले निलीय तिष्ठति, अन्यस्तु अन्विष्य तं दृष्ट्वा गृह्णातीति या क्रीडा तन्निलायनम्, हस्तेन स्वशरीरेण वा मृत्तिकया वा जलनिवारणं सेतुबन्धः, यथा मर्कटो विटपाद्विटपान्तरमुत्प्लवति तथोत्प्लवनम् ॥ ५८ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे एकादशोऽध्यायः ॥ ११ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अहो इति : १०.११.५५.

विज्ञायापि प्रतापोज्ज्वलमिममसुरास्तत्र यत्संपतन्ति नैतच्चित्रं यदेते स्फुटमलघुतमः साहसा सर्वदैव।
चित्रं त्वेतत् पुनर्यत् प्रबलतरमहादैत्यहन्ताऽयमेवं ज्ञात्वाऽप्यस्मिन्नकुर्वन् व्यवहृतिमखिला बालशब्देन गोपाः ॥ ७७ ॥

इति नन्दादय इति : १०.११.५८.

ताद्दग्नमेशाचरितं श्रुतिमात्रवेद्यं यस्यास्ति सोऽपि भवदुःखलवं न वेत्ति।
चित्रं किमत्र स च तच्चरितं च येषामध्यक्षमास न विदुर्भववेदनां ते ॥ ७८ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने एकादशोऽध्यायः ॥ ११ ॥

कृष्णप्रिया

नन्दादि गोपवृन्द परस्पर कहने लगा कि अजी, अरे सुनो ? यह कितने आश्चर्य की बात है कि इस लालन की मौत कई बार आकर टल गयी। जिन्होंने लालन संहार करना चाहा स्वयं उनका ही संहार हो गया, जिनके हेतु किसी भी जन्म में विविध प्रकार के दुःख झेलने पड़े थे ॥ ४५ ॥ यह बात कहनी होगी कि बड़े बड़े भयानक जो देखने भी बड़े घोर थे ऐसे असुर अपने लालन को मारने आये थे परन्तु आग में पड़े पतङ्ग की तरह वे स्वय ही मर गये लेकिन कुछ न बिगाड़ सके। अरे बाबा बालमुकुन्द का एक बाल भी बांका न कर सके ॥ ४६ ॥ सचमुच ब्रह्मवित् पुरुषों की वाणी कभी असत्य नहीं होती। भगवान् श्रीगर्गाचार्यजीने जितनी बातें कही थी सब की सब वैसे ही ठीक ठीक घटना होती जा रही है ॥ ४७ ॥ श्रीनन्दरायजी और गोप गण इस तरह परस्पर श्रीबलदाऊ भैयाजू और लालन की बाते करते न अघाते थे और दोनों के साथ परमानन्द से रहते हुए संसार की सारी यातनाओं को प्यारे के सान्निध्य के परमानन्द से विसर गये ॥ ४८ ॥ इस तरह लालन और श्रीदाऊजी ग्वालबालों के साथ आँख मिचौनी, तो कभी कभी पुल बनाना, बन्दरों के समान उछलना-कूदना वगैरह बालकों के योग्य विविध मनोहर खेल, खेल अपनी कुमारावस्था व्रज में बिता दी ॥ ४९ ॥

एकादश अध्याय समाप्त ॥ ११ ॥

* * *

[अकारादिक्रमेण]

श्रीमद्भागवतदशमस्कन्धीय प्रथमत एकादशाध्यायश्लोकानुक्रमणिका

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
	अ–३६			
१	अग्नेर्यथादारुवियोगयोगयो	१	५१	१३९
२	अजुष्टग्राम्यविषया	३	३९	५८०
३	अतोऽर्हतः स्थावरतां	१०	२१	११७०
४	अथ काल उपावृत्ते	१	५६	१४७
५	अथ सर्वगुणोपेतः	३	१	४०७
६	अथान्यदपि कृष्णस्य	७	३	९०८
७	अथाप्यभिभवन्त्येवं	११	४६	१२८३
८	अथाहमंशभागेन	२	९	२२६
९	अथैनमस्तौदवधार्य पूरुषं	३	१२	४४६
१०	अथैनमात्मजं वीक्ष्य	३	२३	५२८
११	अथो यथावन्न वितर्क	८	४१	१०६१
१२	अदृष्ट्वाऽन्यतमं लोके	३	४१	५८८
१३	अधः शयानस्य शिशो	७	७	९१७
१४	अन्तः प्रविश्य गंगायाम्	१०	४	११४६
१५	अन्धकूपगभीराक्षं	६	१६	८५४
१६	अन्यैश्चासुरभूपालै	२	२	२१२
१७	अन्वञ्चमाना जननी	९	१०	११०९
१८	अनुजानीहि नौ भूमं-	१०	३७	१२०६
१९	अयं त्वसभ्यस्तव जन्म	३	२२	५२८
२०	अयं हि तद्वधोपायो	४	४४	७१७
२१	अयं हि रोहिणीपुत्रो	८	१२	९८२
२२	अर्चिष्यन्ति मनुष्यास्त्वां	२	१०	२२६
२३	अलक्षितोऽस्मिन् रहसि	८	१०	९८२
२४	अव्यादजोऽङ्घ्रिमणिमांस-	६	२२	८७०
२५	अवतीर्य यदोर्वंशे	१	३	३४
२६	अवाद्यन्त विचित्राणि	५	१३	७८०
२७	अविदूरे व्रजभुवः	११	२७	१२६१
२८	अस्त्वित्युक्तः स एवेह	८	५०	१०८१
२९	अस्यतस्ते शरव्रातै-	४	३३	७०५
३०	असतः श्रीमदान्धस्य	१०	१३	११६४
३१	अहो ते देवकीपुत्राः	५	२९	८०९
३२	अहो बतास्य बालस्य	११	४५	११४५
३३	अहो ब्रह्मविदां वाचो	११	४७	१२८३
३४	अहो बतात्यद्भुतमेष	७	३३	९५७
३५	अहो भगिन्यहो भाम	४	१५	६६२
३६	अहं ममासौ पतिरेष मे	८	४२	१०६१
	आ–७			
३७	आकर्ण्य भर्तृगदितं	४	३०	७०१
३८	आत्मानमिह सञ्जातं	१	६८	१६२
३९	आदाय मात्र प्रतिहृत्य	७	३०	९५३
४०	आयुः श्रियं यशो धर्मं	४	४७	७१७
४१	आविरासीद् यथा प्राच्यां	३	९	४२५
४२	आसन् वर्णास्त्रयो ह्यस्य	८	१४	९८८
४३	आसीनः संविशंस्तिष्ठन्	२	२४	२५४
	इ–१९			
४४	इत्थं यशोदातमशेषशेखरं	११	२०	१२३६
४५	इत्थं विदिततत्त्वाया	८	४३	१०६१
४६	इत्थं संकीर्तितस्ताभ्यां	१०	३९	१२०६
४७	इत्यन्तरेणार्जुनयोः	१०	२६	११७९
४८	इत्यभिष्टूय पुरुषं	२	४२	४००
४९	इत्यादिश्यामरगणान्	१	२६	९९
५०	इत्यात्मानं समादिश्य	८	२१	१००६
५१	इत्युक्तः स खलः पापो	१	३५	११२
५२	इत्युक्त्वाऽऽसीद्धरिर-	३	४६	५९७
५३	इत्युक्तौ तं परिक्रम्य	१०	४३	१२१३
५४	इन्द्रियाणि हृषीकेशः	६	२४	८७०
५५	इति खरपवनचक्रपांशु	७	२४	९४४
५६	इति घोरतमाद् भावात्	२	२३	२५४
५७	इति नन्दादयो गोपाः	५	३२	८०९
५८	इति नन्दादयो गोपाः	११	४८	१२८३
५९	इति प्रणवबद्धाभि-	६	३०	८८५
६०	इति प्रभाष्य तं देवी	४	१३	६६२
६१	इति बालकमानीय	७	१४	९३१
६२	इति संचिन्तञ्छ्रुत्वा	८	९	९८२
	ई–१			
६३	ईषामात्रोग्रदंष्ट्रास्यं	६	१५	८५४

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
	उ-९			
६४	उग्रसेनसुतः कंसः	१	३०	१०८
६५	उग्रसेनं च पितरं	१	६९	१६२
६६	उत्तार्य गोपी सुश्रृतं पयः	९	७	११०१
६७	उत्पातव्यमितोऽस्माभि	११	१२	१०४३
६८	उपगुह्यात्मजामेवं	४	७	६५०
६९	उपसंहर विश्वात्मन्	३	३०	५६५
७०	उलूखलाङ्घ्रेरुपरिव्यवस्थितं	९	८	११०१
७१	उलूखलं विकर्षन्तं	११	६	१२२७
७२	उलूखलं विकर्षन्तं	११	३	१२२०
	ऊ-१			
७३	ऊचुरव्यवसितमतीन्	७	९	९२६
	ऋ-२			
७४	ऋषेर्भगवतस्तस्य	१०	२४	११ ०
७५	ऋषेर्विनिगमे कंसो	१	६५	१६२
	ए-२६			
७६	एकदा क्रीडमानास्ते	८	३२	१०२७
७७	एकदा गृहदासीषु	९	१	१०८९
७८	एकदार्भकमादाय	७	३६	९६३
७९	एकदाऽऽरोहमारूढं	७	१८	९३६
८०	एकायनोऽसौ द्विफलस्त्रिमूल	२	२७	२९६
८१	एके तमनुरुन्धाना	२	४	२१२
८२	एतत् कंसाय भगवान्	१	६४	१५७
८३	एतदन्यच्च सर्वं मे	१	१२	५९
८४	एतद्वां दर्शितं रूपं	३	४४	५८८
८५	एतद्विचित्रं सहजीवकाल	८	३९	१०५४
८६	एतं निशम्य भृगुनन्दन	१	१४	६४
८७	एवमेतन्महाराज	४	२६	६९२
८८	एवं चेतद्धि भोजेन्द्र	४	३१	७०१
८९	एवं धार्ष्ट्यान्युशति कुरुते	८	३१	१०२७
९०	एवं प्रदर्शिता ह्यङ्ग	९	१९	११२९
९१	एवं भवान् बुद्ध्यनुमेय	३	१७	४९८
९२	एवं वां तप्यतोर्भद्रे	३	३६	५७५
९३	एवं विमृश्य तं पापं	१	५२	१३९
९४	एवं विहारैः कौमारैः	११	४९	१२८३
९५	एवं व्रजौकसां प्रीति	११	२६	१२६१
९६	एवं सम्प्रार्थितो विप्रः	८	११	९८२
९७	एवं स सामभिर्भेदै	१	४६	१३४
९८	एवं स्वगेहदामानि	९	१७	११२९
९९	एवं साधारणं देह–	१०	१२	११५८
१००	एष व श्रेय आधास्यद्	८	१७	९८८
१०१	एषा तवानुजा बाला	१	४५	१३४

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
	औ-१			
१०२	औत्थानिकौत्सुक्यमना	७	६	९१७
	क-३९			
१०३	कच्चित् पशव्यं विरुजं	५	२६	७९५
१०४	कटधूमस्य सौरभ्य	६	४१	९०१
१०५	कथ्यतां भगवन्नेतत्	१०	१	११४६
१०६	कथितो वंशविस्तारो	१	१	१
१०७	कदाचिदौत्थानिकको	७	४	९०८
१०८	कदाचिद् यमुनातीरे	११	३०	१२६१
१०९	करो वै वार्षिको दत्तो	५	३१	८०९
११०	कलेवरं परशुभिश्-	६	३३	८९०
१११	क्वचिद् वादयतो वेणून्	११	२८	१२६१
११२	कस्मान्मुकुन्दो भगवान्	१	९	५९
११३	कस्मान्मृदमदान्तात्मन्	८	३४	१०४४
११४	कालेन व्रजता तात	८	२२	१००६
११५	कालेन स्नानशौचाभ्यां	५	४	७४३
११६	कालेनाल्पेन राजर्षे	८	२७	१०१७
११७	किमद्य तस्मिन् करणीय	२	२१	२५४
११८	किमिन्द्रेणाल्पवीर्येण	४	३७	७११
११९	किमुद्यमैः करिष्यन्ति	४	३२	७०१
१२०	किं दुःसहं तु साधूनां	१	५८	१५१
१२१	किं नस्तूयश्चीर्णमधोक्ष-	७	३४	९५७
१२२	किं पुनः श्रद्धया भक्त्या	६	३६	८९०
१२३	किं मया हतया मन्द	४	१२	६५६
१२४	किं स्वप्न एतदुत देवमाया	८	४०	१०५४
१२५	किं क्षेमशूरैर्विबुधै	४	३६	७०५
१२६	क्रीडन्तं सा सुतं बालै	११	१४	१२३५
१२७	क्रीणीहि भोः फलानीति	११	१०	१२३५
१२८	कीर्तिमन्तं प्रथमजं	१	५७	१११
१२९	कुमुदा चण्डिका कृष्णा	२	१२	२२६
१३०	कृतागसं तं प्ररुदन्तमक्षिणी	९	११	११०९
१३१	कृष्ण कृष्ण महायोगिंस्	१०	२९	११८८
१३२	कृष्ण कृष्णारविन्दाक्ष	११	१५	१२३६
१३३	कृष्णस्तु गृहकृत्येषु	९	२२	११३९
१३४	कृष्णस्य गोप्यो रुचिरं	८	२८	१०१७
१३५	कृष्णो ब्रह्मण आदेशं	८	५२	१०८१
१३६	कृष्णं महाबकग्रस्तं	११	३९	११३९
१३७	केचित् प्राञ्जलयो भीता	४	३४	७०५
१३८	कोटरा रेवती ज्येष्ठा	६	२८	८८०
१३९	कंस एवं प्रसन्नाभ्यां	४	२८	६९२
१४०	कंसः पापमतिः सख्यं	८	८	९७६
१४१	कंसेन प्रेरिता घोरा	६	२	८१९

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
	ख–१			
१४२	खं रोदसी ज्योतिरनीक	७	३८	९६३
	ग–२५			
१४३	गच्छ देवि व्रजं भद्रे	२	७	२१८
१४४	गते मयि युवां लब्ध्वा	३	४०	५८०
१४५	गर्गः पुरोहितो राजन्	८	१	९७०
१४६	गर्भसंकर्षणात् तं वै	२	१३	२३३
१४७	गर्भे प्रणीते देवक्या	२	१५	२३३
१४८	गलग्रहणनिश्चेष्टो	७	२८	९४८
१४९	गावः सर्वगुणोपेता	७	१६	९३१
१५०	गावो वृषाश्च वत्साश्च	५	६	७६७
१५१	गिरं समाधौ गगने समीरितां	१	२१	८७
१५२	गृह्यमाणैस्त्वमग्राह्यो	१०	३२	११८८
१५३	गृहित्वापरपादाभ्यां	११	३२	१२६१
१५४	गोकुलं सर्वमावृण्वन्	७	२१	९४४
१५५	गोधनानि पुरस्कृत्य	११	२१	१२५०
१५६	गोप्यश्चाकर्ण्य मुदिता	५	९	७६७
१५७	गोप्यो रूढरथा नूत्न	११	२२	१२५०
१५८	गोप्यः सुमृष्टमणिकुण्डल	५	११	७६७
१५९	गोप्यः संस्पृष्ट सलिला	६	२१	८७०
१६०	गोप्यश्च गोपाः किल	७	३१	९५३
१६१	गोपवृद्धा महोत्पातान्	११	१०	१२४३
१६२	गोपान् गोकुलरक्षायां	५	१९	७८०
१६३	गोपा नन्दादयः श्रुत्वा	११	१	१२२०
१६४	गोपाः परस्परं हृष्टा	५	१४	७८०
१६५	गोपीभिः स्तोभितोऽनृत्यद्	११	७	१२२७
१६६	गोमूत्रेण स्नापयित्वा	६	२०	८६२
१६७	गौर्भूत्वाश्रुमुखी खिन्ना	१	१८	७४
	च–३			
१६८	चक्रवातेन नीतोऽयं	११	१४	१२४३
१६९	चक्रचप्रतः सहगदो	६	२३	८७०
१७०	चतुःशतं पारिबर्हं	१	३१	१०८
	ज–७			
१७१	ज्योतिर्यथैवोदकपार्थिवे·	१	४३	१२५
१७२	ज्योतिश्चक्रं जलं तेजो	८	३८	१०५४
१७३	ज्योतिषामयनं साक्षात्	८	५	९७६
१७४	जन्म ते मय्यसौ पापो	३	२९	५६५
१७५	जगुः किन्नरगन्धर्वाः·	३	६	४२५
१७६	जातयोर्नौ महादेवे	८	४९	१०८१
	ड–१			
१७७	डाकिन्यो यातुधान्यश्च	६	२७	८८०

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
	त–७६			
१७८	तच्छ्रुत्वैकधियो गोपाः	११	१९	१२५०
१७९	तत आरभ्य नन्दस्य	५	१८	७८०
१८०	ततस्तन्मूलखनने	४	३८	७११
१८१	ततस्तु भगवान् कृष्णो	८	२८	१०१७
१८२	ततश्च शौरिर्भगवज्	३	४७	५९७
१८३	तत्तत्राद्यैव यास्यामः	११	१८	१२५०
१८४	तत्र गत्वा जगन्नाथं	१	२०	७४
१८५	तत्र श्रिया परमया	१०	२८	११७९
१८६	तत्रोपनन्दनामाऽऽह	११	११	१२४३
१८७	ततो जगन्मङ्गलमच्युतांशं	२	१८	२४३
१८८	ततो भक्तिर्भगवति	८	५१	१०८१
१८९	तथेति सुतमादाय	१	६१	१५७
१९०	तथा न ते माधव तावकाः	२	३३	३५०
१९१	तथा यशोदा रोहिण्या·	११	२३	१२५०
१९२	तद् दाम बध्यमानस्य	९	१५	१११८
१९३	तद् गच्छतं मह्याभागौ	१०	४२	१२१३
१९४	तदहं मत्तयोर्माध्व्या	१०	१९	११७०
१९५	तदा बकारिं सुरलोकवासिनः	११	४२	१२७८
१९६	तदा वां परितुष्टोऽहं·	३	३७	५८०
१९७	तन्मातरौ निजसुतौ	८	२४	१००६
१९८	तमङ्कमारूढमपाययत्	९	५	११०१
१९९	तमन्तरिक्षात् पतितं	७	२९	९५३
२००	तमश्मानं मन्यमान	७	२७	९४८
२०१	तमापतन्तं स निगृह्य	११	४१	१२७८
२०२	तमाह भ्रातरं देवी	४	४	६४१
२०३	तमुद्भुतं बालकमम्बुजेक्षणं	३	९	४४६
२०४	त्यक्त्वा यष्टिं सुतं भीतं	९	१२	११ ९
२०५	तयाकथितमाकर्ण्य	४	१४	६६२
२०६	तया हृतप्रत्ययसर्ववृत्तिषु	३	४८	५९७
२०७	तयोर्वां पुनरेवाह	३	४२	५८८
२०८	त्रय्या चोपनिषद्भिश्च	८	४५	१०७२
२०९	त्वमस्य लोकस्य विभो	३	२१	५२८
२१०	त्वत्तोऽस्य जन्मस्थिति-	३	१९	४९८
२११	त्वमेक एवास्य सतः	२	२८	२९६
२१२	त्वमेकः सर्वभूतानां	१०	३०	११८८
२१३	त्वमेव पूर्वसर्गेऽभूः	३	३२	५६५
२१४	त्वय्यम्बुजाक्षाखिल	२	३०	३३०
२१५	तं तालुमूलं प्रदहन्त-	११	४०	१२७०
२१६	तं दृष्ट्वा व्रीडिता देव्यौ	१०	६	११५२
२१७	तं दृष्ट्वा सहसोत्थाय	५	२१	७९५
२१८	त्वं महान् प्रकृतिः सूक्ष्मा	१०	३१	११८८

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्कः	पृष्ठाङ्कः
२१९	त्वं हि ब्रह्मविदां श्रेष्ठः	८	६	९७६
२२०	तस्मात् सर्वात्मना राजन्	४	४१	७१७
२२१	तस्माद् भद्रे स्वतनयान्	४	२१	६८०
२२२	तस्मान्न कस्यचिद्	१	४४	१२५
२२३	तस्मान्नन्दात्मजोऽयं ते	८	२०	९९९
२२४	तस्मै तुभ्यं भगवते	१०	३३	११९९
२२५	तस्मै स्तनं दुर्जरवीर्यमुल्बणं	६	१०	८४२
२२६	तस्याः स्वेवातिगभीररंहसा	६	१२	८४२
२२७	तस्यां तु कर्हिचित्	१	२९	१०८
२२८	तस्यां रात्र्यां व्यतीतायां	४	२९	७०१
२२९	ता आशिषः प्रयुञ्जानाश्	५	१२	७६७
२३०	तामात्तयष्टिं प्रसमीक्ष्य	९	९	११०९
२३१	तावङ्घ्रियुग्ममनुकृष्य	८	२३	१००६
२३२	तावन्नन्दादयो गोपा	६	३१	८८५
२३३	तासामविरतं कृष्णे	६	४०	८९६
२३४	तृणावर्तः शान्तरयो	७	२६	९४८
२३५	तृतीयेऽस्मिन् भवेऽहं वै	३	४३	५८८
२३६	ते तत्र ददृशुर्बाला	११	३७	१२७०
२३७	ते तत्र वर्णितं गोपैः	६	४२	९०१
२३८	ते तु तूर्णमुपव्रज्य	४	२	६४१
२३९	ते वै रजःप्रकृतयस्तमसा	४	४६	७१७
२४०	तैस्तैः कामैरदीनात्मा	५	१६	७८०
२४१	ते पीडिता निविविशुः	२	३	२१२
२४२	तौ दृष्ट्वा मदिरामत्तौ	१०	७	११५२
२४३	तौ वत्सपालकौ भूत्वा	११	३५	१२७०
२४४	तं जुगुप्सितकर्माणं	१	३६	११२
२४५	तं दृष्ट्वा परमप्रीतः	८	२	९७०
२४६	तं मत्वाऽऽत्मजमव्यक्तं	९	१४	१११८
२४७	तं वत्सरूपिणं वीक्ष्य	११	३१	१२६१
२४८	तां केशबन्धव्यतिषक्त	६	५	८३१
२४९	तां गृहीत्वा चरणयो-	४	८	६५०
२५०	तां तीक्ष्णचित्तामतिवाम-	६	९	८४२
२५१	तां वीक्ष्य कंसप्रभया-	२	२०	२४३
२५२	तां स्तन्यकाम आसाद्य	९	४	१०८९
२५३	ताः कृष्णवाहे वसुदेव	४	४९	५९७

द–२७

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्कः	पृष्ठाङ्कः
२५४	दरिद्रस्यैव युज्यन्ते	१०	१७	११७०
२५५	दरिद्रो निरहंस्तम्भो	१०	१५	११६४
२५६	दर्शयंस्तद्विदां लोक	११	९	१२२७
२५७	दह्यमानस्य देहस्य	६	३४	८९०
२५८	दासीनां सुकुमारीणां	१	३२	१०८
२५९	दिव्यस्रगम्बरालेप	४	१०	६५६

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
२६०	दिशः प्रसेदुर्गगनं	३	२	४०७
२६१	दिष्ट्या भ्रातः प्रवयस	५	२३	७९५
२६२	दिष्ट्याम्ब ते कुक्षिगतः	२	४१	४००
२६३	दिष्ट्या संसारचक्रेऽस्मिन्	५	२४	७९५
२६४	दिष्ट्या हरेऽस्या भवतः	२	३८	३७६
२६५	दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रियः	७	८	९१७
२६६	दृष्ट्वा समत्वं तच्छौरेः	१	५९	१५१
२६७	दृष्ट्वाद्भुतानि बहुशो	७	३५	९५७
२६८	देवकीं वसुदेवं च	१	६६	१६२
२६९	देवक्या जठरे गर्भं	२	८	२१८
२७०	देवक्या शयने न्यस्य	३	५२	६२०
२७१	देवसंज्ञितमप्यन्ते	१०	१०	११५८
२७२	देवर्षिर्मे प्रियतमो	१०	२५	११७९
२७३	देहः किमन्नदातुः स्वं	१०	११	११५८
२७४	देहे पञ्चत्वमापन्ने	१	३९	११८
२७५	देहं मानुषमाश्रित्य	१	११	५९
२७६	देवाश्च परिसन्तुष्टा	११	३४	१२७०
२७७	दैत्यो नाम्ना तृणावर्तः	७	२०	९३६
२७८	दैवमप्यनृतं वक्ति	४	१७	६६८
२७९	द्रोणो वसूनां प्रवरो	८	४८	१०७२
२८०	द्रौण्यस्त्रविप्लुष्टमिदं	१	६	४६

ध–२

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
२८१	धेनूनां नियुते प्रादाद्	५	३	७४३
२८२	धूलिधूसरिताङ्गस्त्वं	११	१८	१२३६

न–३७

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
२८३	न चान्तर्नबहिर्यस्य	९	१३	१११८
२८४	न चास्यास्ते भयं सौम्य	१	५४	१४७
२८५	न ते तदुक्तं जगृहु-	११	५	१२२७
२८६	न ते श्रद्दधिरे गोपा	७	१०	९२६
२८७	न त्वं विस्मृतशस्त्रास्त्रान्	४	३५	७०५
२८८	न ते भवस्येश भवस्य कारणं	२	३९	३७६
२८९	नद्यः प्रसन्नसलिला	३	३	४०७
२९०	नन्दः किमकरोद् ब्रह्मन्	८	४६	१०७२
२९१	नन्दः पथि वचः शौरे	६	१	८१९
२९२	नन्दः स्वपुत्रमादाय	६	४३	९०१
२९३	नन्दव्रजं शौरिरुपेत्य	३	५१	६२०
२९४	नन्दस्त्वात्मज उत्पन्ने	५	१	७४३
२९५	नन्दस्य पत्नी कृतमज्जना	७	५	९१७
२९६	नन्दाद्या ये व्रजे गोपा	१	६२	१५७
२९७	नन्दो महामनास्तेभ्यो	५	१५	७८०
२९८	नन्वहं ते ह्यवरजा	४	६	६५०

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
२९९	न नामरूपे गुणकर्मजन्मभि-	२	३६	३५०
३००	नमः परम कल्याण	१०	३६	११९९
३०१	न यत्र श्रवणादीनि	६	३	८१९
३०२	नवकुङ्कुमकिञ्जल्क-	५	१०	७६७
३०३	नष्टे लोके द्विपरार्धावसाने	३	२५	५४७
३०४	न ह्यन्यो जुषतो जोष्यान्	१०	८	११५२
३०५	नापश्यत् कश्चनात्मानं	७	२३	९४४
३०६	नामधेयानि कुर्वन्ति	२	११	२२६
३०७	नायं सुखापो भगवान्	९	२१	११३९
३०८	नाहं भक्षितवानम्ब	८	३५	१०४४
३०९	निशाचरीत्थं व्यथितस्तना	६	१३	८४४
३१०	नित्यं क्षुत्क्षामदेहस्य	१०	१६	११६४
३११	निर्बन्धं तस्य तं ज्ञात्वा	१	४७	१३४
३१२	निवृत्ततर्षैरुपगीयमानाद्	१	४	३४
३१३	निशीथे तम उद्भूते	३	७	४२५
३१४	नूनं बतर्षिः सञ्जातो	६	३२	८८५
३१५	नूनं ह्यदृष्टनिष्ठोऽय	५	३०	८०९
३१६	नेमं विरञ्च्यो न भवो	९	२०	११२९
३१७	नैकत्र प्रियसंवासः	५	२५	७९५
३१८	नैषातिदुःसहा क्षुन्मा	१	१३	६४
३१९	नोपेयातां यदाऽऽहूतौ	११	१३	१२३५

प–२३

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
३२०	पतमानोऽपि तद्देहस्	६	१४	८५४
३२१	पथि प्रग्रहिणं कंस-	१	३४	११२
३२२	पद्भ्यां भक्तहृदिस्थाभ्यां	६	३७	८९६
३२३	पयांसि यासामपिबत्	६	३९	८९६
३२४	पश्य पश्य वयस्यांस्ते	११	१९	१२३६
३२५	प्रत्यर्प्य मृत्यवे पुत्रान्	१	४९	१३९
३२६	प्रलम्बबकचाणूर-	२	१	२१२
३२७	प्रसार्य वदनाम्भोजं	१	५३	१४७
३२८	प्रतियातु कुमारोऽयं	१	६०	१५१
३२९	प्रतीक्षते त्वां दाशार्ह	११	१७	१२३६
३३०	प्रागयं वसुदेवस्य	८	१५	८१५
३३१	प्रादुरासं वरदराड्	३	३८	५८०
३३२	पितरौ नान्वविन्देतां	८	४७	१०७२
३३३	पितामह्या मे समरेऽ	१	५	४६
३३४	प्रीतप्रायस्य जननी	७	३७	९६३
३३५	पुरा नारदशापेन	९	२३	११३९
३३६	पुरानेन व्रजपते	८	१८	९९९
३३७	पुरैव पुसावधृतो धराज्वरो	१	२२	८७
३३८	पुंसस्त्रिवर्गो विहितः	५	२८	७९५
३३९	पूजितः सुखमासीनः	५	२२	७९५

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
३४०	पूतना लोकबालघ्नी	६	३५	८९०
३४१	पूर्ववत्स्थापितं गोपै-	७	१२	९२६
३४२	पृश्निगर्भस्तु ते बुद्धि-	६	२५	८८०

फ–१

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
३४३	फलविक्रयिणी तस्य	११	११	१२३५

ब–११

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
३४४	बहवो हिंसिता भ्रातः	४	५	६५०
३४५	ब्रह्मा तदुपधार्याथ	१	१९	७४
३४६	ब्रह्मा भवश्च तत्रैत्य	२	२५	२९६
३४७	बहिरन्तः पुरद्वारः	४	१	६४१
३४८	बहूनि सन्ति नामानि	८	१६	९८८
३४९	बालग्रहस्तत्र विचिन्वती	६	७	८३१
३५०	बालाः प्रोचुरनेनेति	११	४	१२२०
३५१	बालेन निष्कर्षयतान्व	१०	२७	११७९
३५२	बालं च तस्या उरसि	६	१८	८६२
३५३	बिभर्ति क्वचिदाज्ञप्तः	११	८	१२२७
३५४	बिभर्षि रूपाण्यवबोध	२	२९	३३०

भ–८

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
३५५	भगवानपि विश्वात्मा	२	६	२१८
३५६	भ्रातर्मम सुतः कच्चि०	५	२७	७९५
३५७	भगवानपि विश्वात्मा	२	१६	२३३
३५८	भ्रातुः समनुतप्तस्य	४	२५	६९२
३५९	भुवि भौमानि भूतानि	४	१९	६६८
३६०	भूमिर्दृप्तनृपव्याज	१	१७	७४
३६१	भूमौ निधाय तं गोपी	७	१९	९३६
३६२	भूम्यां निपतितौ तत्र	११	२	१२२०

म–१७

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
३६३	मघोनि वर्षत्यसकृद्	३	५०	६२०
३६४	मत्स्याश्वकच्छपनृसिंह	२	४०	३७६
३६५	मनांस्यासन् प्रसन्नानि	३	५	४२५
३६६	मर्त्यो मृत्युव्यालभीतः	३	२७	५४७
३६७	महद्विचलनं नृणां	८	४	९७०
३६८	महार्हवस्त्राभरण	५	८	७६७
३६९	महार्हवैडूर्यकिरीटकुण्डल	३	१०	४४६
३७०	मातरं पितरं भ्रातॄन्	१	६७	१६२
३७१	मा शोचतं महाभागा-	४	१८	६६८
३७२	मुक्तः कथंचिद् राक्षस्या	११	१३	१२४३
३७३	मुक्तं बकास्यादुपलभ्य	११	४३	१२७८
३७४	मुमुचुर्मुनयो देवाः	३	७	४२५
३७५	मुहूर्तमभवद् गोष्ठं	७	२२	९४४
३७६	मूलं विष्णुर्हि देवानां	४	४०	७११

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
३७७	मृत्युर्जन्मवतां वीर	१	३८	११८
३७८	मृत्युबुंद्धिमतापोह्यो	१	४८	१३४
३७९	मोचयामास निगडान्	४	२४	६८०

य-३१

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
३८०	य आत्मनो दृश्यगुणेषु	३	१८	४९८
३८१	य एतत्पूतनामोक्षं	६	४४	९०१
३८२	य एतस्मिन् महाभागा	८	१९	९९९
३८३	यच्छृण्वतोऽपैत्य	७	२	९०८
३८४	यतो यतो धावति	१	४२	१२५
३८५	यथा कण्टकविद्धाङ्गो	१०	१४	११६४
३८६	यथा नेवंविदो भेदो	४	२०	६६८
३८७	यथाऽऽमयोऽङ्गे समुपेक्षितो	४	३९	७११
३८८	यथेमे विकृता भावास्	३	१५	४७६
३८९	यत्राऽऽसीत्तदपि न्यूनं	९	१६	१११८
३९०	यदिमौ लोकपालस्य	१०	२०	११७०
३९१	यदूनाम्पृथग्भावात्	८	१३	९८८
३९२	यदूनामहमाचार्यः	८	७	९७६
३९३	यदृच्छया च देवर्षि-	१०	५	११५२
३९४	यद्येवं तर्हि व्यादेही-	८	३६	१०४४
३९५	यदोश्च धर्मशीलस्य	१	२	१
३९६	यत्र म्रियेत द्रुमयो-	११	१५	१२४३
३९७	यस्यावतारा ज्ञायन्ते	१०	३४	११९९
३९८	यावदौत्पातिकोऽरिष्टो	११	१६	१२४३
३९९	यशोदा नन्दपत्नी च	३	५३	६२०
४००	यशोदारोहिणीभ्यां ताः	६	१९	८६२
४०१	यह्यंङ्गनादर्शनीयकुमार-	८	२५	१०१७
४०२	यातुधान्यपि सा स्वर्ग-	६	३८	८९६
४०३	यानि यानीह गीतानि	९	२	१०८९
४०४	यावद्धतोऽस्मि हन्तास्मी	४	२२	६८०
४०५	युवां वां पुत्रभावेन	३	४५	५९७
४०६	युवां वै ब्रह्मणाऽऽदिष्टौ	३	३३	५७५
४०७	येन येनावतारेण	७	१	९०८
४०८	येऽन्येऽरविन्दाक्षविमुक्त	२	३२	३३०
४०९	येऽसूयानृतदम्भेर्ष्या	७	१३	९३१
४१०	योऽयं कालस्तस्य ते	३	२६	५४७

र-८

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
४११	राजधानी ततः साभूत्	१	२८	९९
४१२	रुद्रस्यानुचरो भूत्वा	१०	२	११४६
४१३	रुदन्तसुतमादाय	७	११	९२६
४१४	रुदितमनुनिशम्य तत्र गोप्यो	७	२५	९४८
४१५	रूपं यत् तत् प्राहु	३	२४	५२८
४१६	रोहिणी च महाभागा	५	१७	७८०
४१७	रोहिण्यास्तनयः प्रोक्तो	१	८	४६

व-३०

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
४१८	वत्सान् मुञ्चन् क्वचिदसमये	८	२९	१०२७
४१९	वनं वृन्दावनं नाम	११	१७	१२५०
४२०	वल्गुस्मितापाङ्गविसर्ग	६	६	८३१
४२१	ववौ वायुः सुखस्पर्शः	३	४	४०७
४२२	वसुदेव उपश्रुत्य	५	२०	७८०
४२३	वसुदेवगृहे साक्षाद्	१	२३	८७
४२४	वर्षवातातपहिम	३	३४	५७५
४२५	व्रजः सम्मृष्टसंसिक्त	५	६	७६७
४२६	व्रजन्तमव्याद् वैकुण्ठ	६	२६	८८०
४२७	व्रजस्तिष्ठन् पदैकेन	१	४०	११८
४२८	व्रजे वसन् किमकरोन्	१	१०	५९
४२९	वाचयित्वा स्वस्त्ययनं	५	२	७४३
४३०	वाचयित्वा स्वस्त्ययनं	७	१५	९३१
४३१	वाणीगुणानुकथने	१०	३८	१२०६
४३२	विप्रा मन्त्रविदो युक्तास्	७	१७	९३६
४३३	वारुणीं मदीरां पीत्वा	१०	३	११४६
४३४	वासुदेवकथाप्रश्नः	१	१६	६४
४३५	वासुदेवकलानन्तः	१	२४	८७
४३६	वासुदेवस्य सान्निध्य	१०	२२	११७०
४३७	विदितोऽसि भवान् साक्षात्	३	१३	४७६
४३८	विपर्ययो वा किं न स्यात्	१	५०	१३९
४३९	विप्रा गावश्च वेदाश्च	४	४२	९१७
४४०	विबुध्य तां बालकमारिका-	६	८	८३१
४४१	विश्वं यदेतत् स्वतनौ	३	३१	५६५
४४२	विष्णोर्माया भगवती	१	२५	९९
४४३	वीर्याणि तस्याखिलदेह	१	७	४६
४४४	वृद्धान् बालान् स्त्रियो राजन्	११	२०	१२५०
४४५	वृन्दावनं गोवर्धनं	११	२५	१२६१
४४६	वृन्दावनं सम्प्रविश्य	११	२४	१२५०
४४७	वृषायमाणौ नर्दन्तौ	११	२९	१२६१

श-८

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
४४८	शङ्खतूर्य मृदङ्गानि	१	३३	११२
४४९	शीर्णपर्णानिलाहारा	३	३५	५७५
४५०	श्रुत्वा तद्विस्मिता गोपा	११	४४	१२७८
४५१	शूरसेनो यदुपति	१	२७	९९
४५२	शृङ्ग्यग्निदंष्ट्र्यसिजल	८	२६	१०१७
४५३	शृण्वन् गृणन् संस्मरयंश्च	२	३७	३७६
४५४	श्लाघनीयगुणः शूरै	१	३७	११८
४५५	शोकहर्षभयद्वेष	४	२७	६९२

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
	स -४५			
४५६	स एव जीवन् खलु सम्परेतो	२	२२	२५४
४५७	स एव मुक्तो देवर्षि-	१०	२३	११७०
४५८	स एव स्वप्रकृत्येदं	३	१४	४७६
४५९	स कपित्थैर्महाकाय:	११	३३	१२७०
४६०	स जातकोप: स्फुरितारुणा-	९	६	११०१
४६१	स तल्पात् तूर्णमुत्थाय	४	३	६४१
४६२	सत्त्वं घोरादुग्रसेनात्म	३	२८	५४७
४६३	सत्यव्रतं सत्यपरं त्रिसत्यं	२	२६	२९६
४६४	स त्वं त्रिलोकस्थितये	३	२०	४९८
४६५	सत्त्वं न चेद्धातरिदं निजं	२	३५	३५०
४६६	सत्त्वं विशुद्धं श्रयते भवान्	२	३४	३५०
४६७	स त्वहं त्यक्तकारुण्यस-	४	१६	६६२
४६८	सद्यो नष्टस्मृतिगोपी	८	४४	१०६१
४६९	सन्दिष्टैवं भगवता	२	१४	२३३
४७०	सन्निपत्य समुद्पाद्य	३	१६	४७६
४७१	सप्तमो वैष्णवं धाम	२	५	२१८
४७२	स बिभ्रत् पौरुषं धाम	२	१७	२४३
४७३	स भवान् सर्वलोकस्य	१०	३५	११९९
४७४	सम्यग्व्यवसिता बुद्धि	१	१५	६४
४७५	समेत्य चैकत्र कृताशिषाऽमला	७	३२	९५३
४७६	सरित्तीरगतं कृष्णं	११	१२	१२३५
४७७	स विस्मयोत्फुल्लविलोचनो	३	११	४४६
४७८	सर्वे वै देवताप्राया	१	६३	१५७
४७९	स वै बको नाम महा-	११	३८	१२७०
४८०	स्वप्नदृष्टा महोत्पाता	६	२९	८८५
४८१	स्वप्ने यथा पश्यति	१	४१	१२५
४८२	स्वमातुः स्विन्नगात्राया	९	१८	११२९

क्रमाङ्कः	श्लोकः	अध्यायः	श्लोकाङ्काः	पृष्ठाङ्काः
४८३	स्वं स्वं वत्सकुलं सर्वे	११	३६	१२७०
४८४	स्वयं समुत्तीर्य सुदुस्तरं	२	३१	३३०
४८५	स हि सर्वसुराध्यक्षो	४	४३	७१७
४८६	सा खेचर्येकदोपेत्य	६	४	८१९
४८७	सा गृहित्वा करे पुत्र-	८	३३	१०४४
४८८	सा तत्र ददृशे विश्वं	८	३७	१०५४
४८९	सा तद्धस्तात् समुत्पत्य	४	९	६५६
४९०	सा देवकी सर्वजगन्निवास	२	१९	२४३
४९१	सिद्धचारणगन्धर्वै	४	११	६५६
४९२	साधूनां समचित्तानां	१०	१८	११७०
४९३	साधूनां समचित्तानां	१०	४१	१२१३
४९४	सा मुञ्च मुञ्चालमिति	६	११	८४२
४९५	सा वीक्ष्य विश्वं सहसा	७	३९	९६३
४९६	सुहृद्वधान्निवृते	१	५५	१४७
४९७	सूपविष्टं कृतातिथ्यं	८	३	९७०
४९८	सौमङ्गल्यगिरो विप्राः	५	५	७६७
४९९	संतत्रसुः स्म तद् वीक्ष्य	६	१७	८६२
५००	संदिश्य साधुलोकस्य	४	४५	७१७
	ह ३			
५०१	हन्यन्ते पशवो यत्र	१०	९	११५८
५०२	हस्ताग्राह्यो रचयति विधि	८	३०	१०२७
५०३	हे रामागच्छ ताताशु	११	१६	१२३६
	क्ष-२			
५०४	क्षमध्वं मम दौरात्म्यं	४	२३	६८०
५०५	क्षौमं वासः पृथुकटितटे	९	३	१०८९
	ज्ञ-१			
५०६	ज्ञातं मम पुरैवैतद्	१०	४०	१२०६

श्रीकृष्णः शरणं मम

श्रीमद्वल्लभाचार्यचरणा विजयन्तेतमाम्

श्रीकृष्णद्वैपायन-वेदव्यास-महर्षिप्रणीतमनेकव्याख्यासमलङ्कृतं

श्रीमद्भागवतमहापुराणम्

सात्वतसंहिता

दशमस्कन्ध -पूर्वार्द्धः

36004

निरोधलीलायां द्वादशाध्यायतोऽष्टाविंशत्यध्यायपर्यन्तं तामसप्रकरणस्य

कल्पान्तरकथाऽध्यायत्रय प्रमेयसाधनप्रकरणद्वय समेतं

द्वादशं फलम्

आचार्यवर्याणां-प्राचेतसाञ्च विविधाष्टीकाः

* * *

कर्दमक्षमा (अन्वयः), श्रीधरस्वामिविरचिता—भावार्थदीपिका, श्रीवंशीधरकृतः—भावार्थदीपिकाप्रकाशः, श्रीमज्जीवगोस्वामिकृता—वैष्णवतोषिणी, श्रीमज्जीवगोस्वामिकृता—बृहद्वैष्णवतोषिणी, श्रीसुदर्शनसूरिकृतशुकपक्षीयम्, श्रीमद्वीरराघवाचार्यकृता—भागवतचन्द्रचन्द्रिका, श्रीमद्विजयध्वजतीर्थकृता—पदरत्नावली, श्रीमज्जीवगोस्वामिकृतः—क्रमसन्दर्भः, श्रीमज्जीवगोस्वामिकृतः—बृहत्क्रमसन्दर्भः, श्रीनाथचक्रवर्तिपादविरचिता—चैतन्यमतमञ्जूषा, श्रीमद्विश्वनाथचक्रवर्तिकृता—सारार्थदर्शिनी, श्रीमच्छुकदेवकृतः—सिद्धान्तप्रदीपः, श्रीबलदेवविद्याभूषणकृता—वैष्णवानन्दिनी, श्रीसत्यधर्मकृता—श्रीभागवतटिप्पणी, श्रीमद्वल्लभाचार्यचरणविरचिता—श्रीसुबोधिनी, (१) श्रीप्रभुचरणविरचिता—श्रीटिप्पणी, (२) श्रीपुरुषोत्तमचरणप्रणीतः—श्रीसुबोधिनीटिप्पण्योः प्रकाशः, (३) श्रीमद्वल्लभमहाराजकृतः—श्रीसुबोधिनीलेखः, (४) श्रीमद्दीक्षितलालुभट्टयोजिता—श्रीसुबोधिनीयोजना, (५) भगवदीयनिर्भयरामभट्टनिर्मिता,—श्रीसुबोधिनीकारिकाव्याख्या, गोस्वामिश्रीगिरिधरलालकृता—बालप्रबोधिनी, श्रीगङ्गासहायप्रणीता–अन्वितार्थप्रकाशिका, श्रीगोपालानन्दमुनिविरचित—निगूढार्थप्रकाशव्याख्यानम्, श्रीभगवत्प्रसादाचार्यविरचिता—भक्तमनोरञ्जनी, श्रीहरिसूरिविरचितम्—श्रीभक्तिरसायनम, इत्येताभिर्व्याख्याभिः, कृष्णशङ्करशास्त्रिनिवर्तित–कृष्णप्रियाभाषानुवादेन—च समलङ्कृतम् ।

संकलनकर्त्ता—	प्रकाशकः	सम्पादकः परिवेषकश्च
कर्दमऋषितनुजो भागवतः ऋषिः	"श्रीकृष्ण-जन्मस्थान-सेवासंस्थान"	कृष्णशङ्कर शास्त्री
विक्रम संवत्सरः २०४७	मथुरा–२८१००१,	शालिवाहनः १९१२

भारत सरकार के मानव संशोधन विकास मंत्रालय के आर्थिक सहयोग से प्रकाशित

दशमस्कन्धः पूर्वार्द्धः

अध्यायसूची

अध्याय	विषयाः	पृष्ठाङ्क
१२.	अघासुरवधः	१
१३.	सबालवत्सवृन्दे ब्रह्मणापहृते श्रीकृष्णस्य तत्तद्रूपेणाब्दं यथापूर्वं विहरणं ब्रह्मणो मोहभङ्गश्च	५५
१४.	ब्रह्मणा कृता भगवतः स्तुतिर्वत्सवत्सपालानयनं च	१३३
१५.	गोचारणं धेनुकासुरवधः कालियविषदूषिताम्बुपानान्मृतानां गवां गोपानां च पुनरुज्जीवनम्	३००
१६	कालियदमनम्—नागपत्नीकृतं नागकर्तृकं च भगवतः स्तवनं नागद्वारा ह्रदपरित्यागश्च	३८३
१७.	कालियस्य यमुनाह्रदे निवासस्य कारणवर्णनं ह्रदान्निर्गतेन श्रीकृष्णेन व्रजौकसां दावानलाद्रक्षणम्	४९९
१८.	प्रलम्बासुरवधः	५३०
१९.	मुञ्जाटव्यां गवां गोपानां च दावानलाद्रक्षणम्	५७१
२०.	प्रावृड्वर्णनं शरद्वर्णनं च	५९५
२१.	वेणुगीतम्—भगवतो मधुरं वेणुनादमाकर्ण्य गोपीभिस्तद्गुणगानम्	६७४
२२.	चीरहरणलीला	७६८
२३	अन्नयाच्ञामिषेण यज्ञपत्नीष्वनुग्रहः	८४७
२४.	इन्द्रमखभङ्गः	९३०
२५.	कोपान्मुसलधारावर्षं वर्षतीन्द्रे व्रजौकसां रक्षणार्थं भगवतो गोवर्धनधारणम्	९८६
२६.	श्रीकृष्णस्यालौकिकं प्रभावं दृष्ट्वा चकितान् गोपान् प्रति नन्दस्य गर्गोक्तिकथनम्	१०३५
२७	विगतमदस्येन्द्रस्य श्रीकृष्णसन्निधौ क्षमाप्रार्थनं कामधेन्विन्द्राभ्यां श्रीकृष्णस्याभिषेकश्च	१०६२
२८.	विकालेऽवगाहनाद् वरुणदूतेन वरुणालयं नीतस्य नन्दस्य भगवता पुनरानयनम्	११११

* * *

श्री हरिः

❀ श्री गणेशाय नमः ❀

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः पूर्वार्धः

(अथ अध्यायत्रयात्मिका कौतुकलीला पद्मपुराणप्रसिद्धा)

[1]अथ द्वादशोऽध्यायः

श्लोकाः	अनु.	इ. वं.	इ. व.	वंश.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४४	२१	३	२	१	१७	४	१७५४	२१	५४	१८२९	५७	५

श्रीशुक उवाच

क्वचिद् वनाशाय मनो दधद् व्रजात् प्रातः समुत्थाय वयस्यवत्सपान् ।
प्रबोधयञ्छृङ्गरवेण चारुणा विनिर्गतो वत्सपुरो हरिः ॥ १ ॥
तेनैव सार्धं[2] पृथुकाः सहस्रशः [3]स्निग्धाः सुशिग्वेत्रविषाणवेणवः ।
[4]स्वान् स्वान् सहस्रोपरिसंख्ययान्वितान् वत्सान् पुरस्कृत्य विनिर्ययुर्मुदा ॥ २ ॥
[5]कृष्णवत्सैरसंख्यातैर्यूथीकृत्य [6]स्ववत्सकान् । [7]चारयन्तोऽर्भलीलाभिर्विजह्रुस्तत्र तत्र ह ॥ ३ ॥
फलप्रवालस्तबकसुमनःपिच्छधातुभिः । [8]काचगुञ्जामणिस्वर्णभूषिता अप्यभूषयन् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—कवचित् वनाशाय मनः दधत् हरिः प्रातः समुत्थाय चारुणा शृङ्गरवेण वयस्यवत्सपान् प्रबोधयन् वत्सपुरः व्रजात् विनिर्गतः ॥ १ ॥ स्निग्धाः सुशिग्-वेत्र-विषाण-वेणवः सहस्रशः पृथुकाः सहस्रोपरि संख्ययान्वितान् स्वान् स्वान् वत्सान् पुरस्कृत्य तेन एव सार्धं मुदा ययुः ॥ २ ॥ असंख्यातैः कृष्णवत्सैः स्ववत्सान् यूथीकृत्य अर्भलीलाभिः चारयन्तः तत्र तत्र ह विजह्रुः ॥ ३ ॥ काचगुञ्जामणिस्वर्णभूषिताः अपि फल-प्रवाल-स्तबक-सुमनः-पिच्छधातुभिः अभूषयन् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

द्वादशे तु महासर्पवपुर्धरमघासुरम् । वत्सपालगिलं क्रुद्धो गलेऽहन्निति वर्ण्यते ॥ १ ॥
महाबकगलक्रीडा केवलस्य न कौतुकम् ॥ इतीवाघासुरमुखे ससखः प्राविशद्धरिः ॥ २ ॥

क्वचित्कदाचिद्वनाशाय वने एव प्रथमं भोजनं कर्तुम् ॥ १ ॥ तेनैव शृङ्गरवेण श्रीकृष्णेन वा सह पृथुकाः बालाः । स्निग्धाः स्नेहयुक्ताः । रम्याः शिग्वेत्रादयो येषां ते शिक् शिक्यम् । सहस्राधिकसंख्यया युक्तान्वत्सान् ॥ २–३ ॥ काचादिभिः पूर्वं मातृभिर्भूषिता अपि पुनः स्वयं फलप्रवालादिभिरात्मानमभूषयन्नित्यर्थः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वत्सान्पालांश्च गिलति निगिरतीति तथा तं गले प्रविश्याहन्निति (१) । न कौतुकं न कुतूहलम् । इति हेतोः (२) । शृंगरवेण प्रबोधयन् । वत्साः पुरस्सरा यस्य सः ॥ १ ॥ शृंगरवेण साहित्यासंभवादर्थांतरमाह–श्रीकृष्णेनेति । रामस्तु जन्मर्क्षकशांतिस्नानार्थं मात्रा गृह एव रक्षित इति विश्वनाथः । 'पृथुकौ बालचिपिटौ' इति कोशः । श्रंसतेश्शिरादेशः कुडागमः प्रत्ययलोपश्चार्षः ॥ २ ॥ तत्र तत्र यमुनातटगोवर्द्धनादिषु सहस्रस्योपरि संख्याऽयुतादिस्तयाऽन्वितान् । एवं वत्सानां बालानाञ्चासंख्येयत्व-

---

१. इत आरभ्य त्रयोदशोऽध्यायाः–विज. पाठे न सन्ति । २. साकं–श्रीधर. वंशी. वीर. विज. शुक. । ३. स्निग्धान्न–च. पु. टी. । ४. स्वकान्–श्रीधर. टी. । ५. रसङ्ख्येयैः–वीर. । ६. स्वकान् स्वकान्–इति कस्यचित् । ७. गुञ्जामणिस्वर्णभूमि–च पु. टी. । ८. मुक्तामणि–रिति कस्यचित् ।

मुक्तम् । इत्थं वने बालैः पाल्यमानानामपि वत्सानां यदियत्ता नाऽभूत्तर्हि व्रजे रुद्धानां तर्णकानां तथा गोसंगतानां तथा तत्तन्मातृणामन्यासां च गवां तथा वत्सतरीणां वत्सतराणां वृषाणां च श्रीगोपालदेवप्रभावेण नित्यं विवर्द्धमानानामियत्ता कथमस्तु । महिष्यादयः पशवश्च केन वा गण्यास्तदनुसारेण गोप्यो गोपादयश्चानंता ज्ञेयास्तथा चागमे रासध्यानम् 'प्रमदाशतकोटिभिराकलितः' इति तत्तत्समावेशादिकं त्वचिंत्यैश्वर्यादेव । कृष्णस्य तु वत्सैरसंख्यातैरसंख्यसंख्यातैरित्यर्थः । असंख्यसंज्ञसंख्या क्षीरस्वामिदृष्ट्या ज्ञेया । यथा "एकं दशशतसहस्राण्ययुतं प्रयुताख्यलक्षमथ नियुतम् । अर्बुदकोटिर्न्यर्बुदपद्मे खर्वः निखर्वमिति दशभिः ॥ गणनान्महाब्जशंखसमुद्रमध्यांतं परार्द्धञ्च । स्वहतं परार्द्धसमितं तत्स्वहतं भूर्य्यतोऽसंख्यम् ॥ " इति प्रयुतसंज्ञं लक्षम् । अर्बुदसंज्ञा कोटिरित्यर्थः । परार्द्धपर्यंताष्टादशसंख्या दशदशगुणिता ज्ञेयाः । तत्र च द्वंद्वैक्यं महाब्जादिकं संख्यापंचकं ज्ञेयम् । स्वहतं स्वेन गुणितमित्यर्थः । परार्द्धेन गुणितं परार्द्धं भूरिसंज्ञं भूरिणा गुणितं भूरि चासंख्यसंज्ञमिति सिद्धम् । ततश्च कृष्णवत्सैर्महायूथैः सह स्वकान्स्वकान् परार्द्धादिसंख्यान्वत्सान्पृथक्पृथग्यूथीकृत्येत्यर्थः । न च षोडशक्रोशीमात्रस्य वृंदावनस्य प्रदेशे तावंतो वत्सा नैव मांतीति वाच्यं भगवद्विग्रहस्येव धाम्नश्चास्य तथापरिमितत्वेऽप्यचिंत्यशक्त्या विभुत्वात् । तत्प्रदेशैकदेशेऽपि पंचाशत्कोटिपरिमाणब्रह्मांडार्बुदानां भगवतैव ब्रह्मणे एतदुत्तराध्याये दर्शयिष्यमाणत्वात् । अत एवोक्तं भागवतामृते—"एवं प्रभोः प्रियाणाञ्च धाम्नश्च समयस्य च । अविचिंत्यप्रभावत्वादत्र किंचिन्न दुर्घटम् ॥" इति तोषिणीचक्रवर्त्तिकारौ ॥ ३ ॥ काचो मृद्विकारविशेषः । गुंजा कृष्णाग्राखिलरक्तबीज औषधिविशेषः । मणयो विद्रुमादयः । इत्यर्थ इति । बालत्वादेव पूर्वभूषणान्याच्छादयामासुरिति तात्पर्यम् । स्वस्वगृहसमृद्ध्यपेक्षया काचादयो ज्ञेयाः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषणी

भाति रूपगुणक्रीडानामभिर्नित्यनूतनः । आश्चर्य्यैश्च सदाश्चर्य्यादिः प्रभुः सः प्रसीदतु ॥

पुनर्यथाक्रममध्यायत्रयेण कौमारीमेव लीलां वदन् तत्रादावेकेनाघासुरवधमाह—क्वचिदित्यादिना । यदेतच्चाध्यायत्रयं पूतना लोकबालघ्नीत्यादिश्लोकषट्कं य एतत्पूतनामोक्षमित्यादिश्लोकं च कश्चिन्न मन्यते तत्र कारणं न पश्यामः सर्वत्रापि देशेष्विति ह्यप्राप्तत्वात् वासनाभाष्यसम्बन्धोक्तिविद्वत्कामधेनुशुकमनोहरापरमहंसप्रियादिषु प्राचीनाधुनिकटीकासु व्याख्यातत्वात् तदीयस्वसम्प्रदायानङ्गीकारप्रामाण्येन तस्याप्रामाण्यं चेत् अन्यसम्प्रदायाङ्गीकारप्रामाण्येन विपरीतं कथं न स्यात् ? न च मुरभिदादिनामवदघभिदादिनाम्नां तत्र प्रयोगो न दृश्यतेति वाच्यं "यन्न व्रजन्त्यघभिदोरचनानुवादांच्छृण्वन्ति येऽन्यविषयाः कुकथामतिघ्नी" इति तृतीयात् पापभिदादिनाम्नां तत्र प्रयोगात् न च तत्र तत्र लीलानुवादे सा लीला नास्ति स्वामिपादैस्तत्र तत्र तस्या अपि दर्शितत्वात् अत एव द्वात्रिंशत् त्रिशतञ्च यस्य विलसच्छाखा इति तदीयपद्ये खण्डितमध्यायत्रयं यत्तदिदमेवेति न तन्मतं न च तत्र यमन्यत्र कुत्रापि खण्डयितव्यं सर्वत्राध्यायसङ्ख्याश्लोकसहितटीकासद्भावात् ततो द्वात्रिंशच्च त्रयश्च शतानि' चेति द्वन्द्वैक्यमेव तद्विवक्षितम् अनिर्णीतबहुत्वस्यानवस्थाभिया त्रित्व एव पर्यवसानात् कपिञ्जलालभनन्यायेन अन्यथा त्रिशतीत्येव स्यात् न चासुरमुक्तेः सिद्धान्तविरुद्धत्वान्नतदार्षं श्रीकृष्णमारितेषु सर्वेषु तेषु दृष्टत्वात्—

"आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम्" ॥

इत्यादिष्वपि मां श्रीकृष्णलक्षणमप्राप्यैव न तु प्राप्येत्याद्यङ्गीकारात् तथा चोक्तं "ये च प्रलम्बखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः । अन्ये च साल्वकपिवल्वलदन्तवक्त्रसप्तोक्षशम्बरविदूरथरुक्मिमुख्याः ॥ ये वा मृधे समितिशालिन आत्तचापाः काम्बोजमत्स्यकुरुकैकयसृञ्जयाद्याः । यास्यन्त्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयम्' इति न च पुराणान्तराप्रसिद्धत्वेन सा लीला न सम्भावनीया पाद्मोत्तरब्रह्माण्डपुराणयोः स्पष्टत्वात् श्रीवृन्दावने तल्लीलास्थानानि च प्रसिद्धानि न च भक्तगतिसादृश्येन तेषां तत्प्राप्तिरसमञ्जसा शुद्धभक्तैस्तादृशगतेरनुपादेयत्वात् "नात्यन्तिकं विगणयन्त्यपि ते प्रसादम्" इत्यादिवचनशतेभ्यः न च पूतनाया जननीसाम्यं जननीमाहात्म्यविद्भिर्द्वेष्यं सद्वेषादिव पूतनापीति वाक्येन जननीवेषमात्रतः तत्प्राप्त्या तस्या एव महिमाधिक्यव्यञ्जनात् तत्र तत्र तेनापि द्विजीवतासिद्धान्तेन दोषः परिह्रियते किं त्वत्रापि "तत्संसर्गी च पञ्चमः" इति न्यायेन दोषस्तदवस्थ एव तस्मान्न कश्चिद्विरोधः प्रत्युत भगवत्तद्भक्ततद्भक्तीनां परममाहात्म्यमेवात्र सेत्स्यति अतस्तदनुभवः श्रीभगवदनुग्रहविशेषेणैव सम्पद्यत इति तत्सुगोप्यमेवेत्येवं तस्य तादृशं वचनमप्युपपद्यते, अलमतिविस्तरेण । प्रकृतं व्याख्यास्यामः, मनो दधत् दृढेच्छां कुर्वन् इति ह्यकृतसम्मन्त्रणैर्वयस्यैः गृहे प्रातर्भोज्यानां वन एव नयनं बोधयति तन्नयनेच्छा चेयं प्राथमिकेव लभ्यते सप्रातराशावित्युक्त्वा क्वचिद्वनाशायेत्युक्तत्वात् सम्यक् रात्रिवस्त्रपरित्यागश्रीमुखादिप्रक्षालनचारुवस्त्रभूषणधारणादिपूर्वकं त्वरयोत्थाय निष्क्रम्य प्रबोधयन्निति सखिभिः सह सुखजिगमिषया व्रजाच्छनैर्निर्गमनं बोधयति अत एव वयस्येति विशेषणं चारुणेति स्वरूपनिर्देशो निद्रितानां सुखेनैव निद्राभङ्गं बोधयति वत्साः पुरस्सराः यस्य सः तेन तेनैव तेषां चित्ताहरणाद्धरिः स एव स्वयं व्रजात् विशेषेण निर्गतः न त्वन्यदिनवत् श्रीरामेण सहितः तत्र कारणं तच्छृङ्गरवेण चलितुमुद्यतस्य श्रीकृष्णेनापि कृतचलननिर्णयस्य नूनं जनन्या दैवज्ञाद्युपदेशेनारब्धशान्तिकादिकर्मत्वमेव मुख्यं भवेत् तत्रैव लीलाशक्ति-

घटिततदगोचरताहेतुकवक्ष्यमाणलीलासम्पादनार्थत्वं तु गौणं क्वचिद्वनाशाय मनोदधदित्यनेन वनभोजनस्यैवोद्देश्यत्वात् अघासुरवधादीनां त्वागन्तुकत्वात् अत्र प्रतिपदं प्रतिवाक्यं प्रतिश्लोकं प्रतिप्रकरणं च पूर्वपूर्वस्मादुत्तरोत्तरस्मात् पूर्वपूर्वमाश्चर्यमूह्यं तच्च भक्तजनहृदयैकवेद्यमतिविस्तरभिया न विव्रियते ॥ १ ॥ तेनैव साकमिति महावेगेन धावनात् यतः स्निग्धाः अतः सर्वेषामेव युगपन्निर्गमोऽपि सूचितः सहस्रस्य उपरिसङ्ख्या—

"एकं दशशतं चैव सहस्रमयुतं तथा। लक्षं च नियुतं चैव कोटिन्यर्बुदमेव च" ॥

इत्यादिवचनादयुतादिस्तयान्वितान् एवं वत्सानां बालानां चासङ्ख्येयत्वमुक्तम् इत्थं वने बालैः पाल्यमानानामपि वत्सानां यदीयत्ता नाभूत् तर्हि व्रजरुद्धानां तर्णकानां तथा गोसङ्गतानां भुक्तस्तन्यानां वत्सानां तथा तन्मातॄणामन्यासां च गवां तथा वत्सतरीणां वत्सतराणां वृषाणां च श्रीगोपालदेवप्रभावेण नित्यमेव विवर्द्धमानानामियत्ता कथमस्तु महिष्यादयश्च केन वा गण्याः पशवस्तदनुसारेण गोपगोप्यादयश्चानन्ता ज्ञेयाः तथा चाऽऽगमे रासध्यानं प्रमदाशतकोटिभिराकुलित इति तत्तत्समावेशादिकं चाचिन्त्यैश्वर्यादिवेति मुदेति स्वयं श्रीकृष्णेन प्रबोधनात् अत एव विशेषेण अन्यदिनतोऽसाधारणतया निर्ययुः श्रीकृष्णस्य तु वत्सैरपि तावदसङ्ख्यातैः असङ्ख्यसंज्ञसख्यैरित्यर्थः। तत्संज्ञा च दर्शिता क्षीरस्वामिना "एकं दशशतसहस्राण्ययुतं प्रयुताख्यलक्षमथ नियुतम्। अर्बुदकोटिन्यर्बुदपद्मे खर्वं निखर्वमिति दशभिः। गणनान् महाब्ज-शङ्खसमुद्र-मध्यान्तमथ परार्द्धं च। स्वहृतं परार्द्धममितं तत्स्वहृतं भूर्यतासङ्ख्यमिति ॥ प्रयुतसंज्ञं लक्षम् अर्बुदसंज्ञा कोटिरित्यर्थः। परार्द्धपर्य्यन्ताद्वादशसङ्ख्यादशगुणिता ज्ञेयाः तत्र च द्वन्द्वैक्यान्महाब्जादिकं सङ्ख्यापञ्चकं ज्ञेयं स्वहृतमिति स्वेन गुणितमित्यर्थ इति ज्ञेयं स्वकान् स्वकान् स्वस्ववत्सानित्यर्थः। स्ववत्सकानिति पाठः स्पष्टः तत्र तत्र वत्सप्रचारदेशे हृ हर्षे ॥ २–३ ॥ अर्भलीलामेवाह—फलेति सप्तभिः। स्तबकाः पुष्पगुच्छाः सुमनसः पुष्पाणि काचा महारत्नेभ्यो विवेक्तुमशक्यरूपत्वात् कौतुकविशेषकारिणः गुञ्जा अपि वृन्दावनीयत्वेन तथाभूतत्वात् बलैरेव कौतुकेनाहृत्य मातृभिः साग्रहं हारादौ ग्रथिताः मुक्तेति पाठः क्वचित् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

भाति रूपगुणक्रीडानामभिर्नित्यनूतनः। आश्चर्यश्च सदाश्चर्यादियः प्रभुः स प्रसीदतु ॥

अथ यथाक्रममध्यायत्रयेण कौमारलीलामेव वदन् तत्रादावेकेनाघासुरवधमाह—क्वचिदित्यादिना। एतच्चाध्यायत्रयं केचित्तत्त्ववादिनो वैष्णवा मुक्तेरेव परमपुरुषार्थतां मन्यमाना ऋजुबुद्धयोऽत्रासुरमुक्तिगोपीस्तन्यपानादिकञ्चासहमानाः पूतनासद्गतिप्रतिपादकं (भा० १०।६।३५) 'पूतना लोकबालघ्नी' इत्यादि श्लोकषट्कमिव (भा० १०।६।४४) 'य एतत् पूतनामोक्षम्' इति श्लोकमिव च विगीतमित्याहुः, तच्चासंगतम्—बहुपुस्तकेषु दृश्यमानत्वात् तथा प्राक्तनैराधुनिकैश्च सत्साम्प्रदायिकैः श्रीधरस्वामिपाद-प्रभृतिभिर्महद्भिराहृतत्वात्, तथा श्रीवृन्दावने अघासुरवध-शाद्वलजेमन-ब्रह्मस्तुत्यादिस्थानप्रसिद्धेश्च; किञ्च, पद्मपुराणादौ तदाख्यानं व्यक्तं वर्तत एव, तथा वैष्णवप्रवरगण-सिद्धान्तेनापि न विरुध्यत एव,—भक्तिनिष्ठानां मुक्तेरनुपादेयत्वात्। तच्च श्रीभागवतेऽस्मिन् सर्वत्रैव सुव्यक्तम्। पीतस्तन्याश्च गोप्यः प्रायः श्रीयशोदातुल्या मान्या एव; तत्प्रियतमास्तु परा नवतरुण्यः सहस्रशः सन्ति। तच्चाग्रेऽभिव्यक्तं भावि। अतः कोऽपि विरोधो न स्यादेव। विशेषतश्चाध्यायत्रयेऽस्मिन् भक्तेर्भक्तानां श्रीभगवतश्च सर्वतोऽसाधारणं माहात्म्यमतत्तदनुभवः श्रीभगवदनुग्रहविशेषेणैव सम्पद्यत इति तत् सुगोप्यमेवेत्येवं तेषां वचनमभ्युपपद्यत इत्यलं विस्तरेण। क्वचित् कदाचित् पञ्चमाब्दागमे शरदि कस्मिंश्चिद्दिन इत्यर्थः। मनो दधत् दृढेच्छां कुर्वन्निति तस्य वयस्यैर्गृहे प्रातर्भोज्यानामपि सर्वभोगसामग्रीणां वन एव नयनं बोधयति। मन इति सच्चिदानन्दघनस्वरूपस्य श्रीविग्रहस्य श्रीमुखाद्यवयववद्भगवतो मन-आद्यन्तःकरणस्यापि वस्तुतो भेदाभावेऽपि भेदसिद्धेः। एतच्च यथास्थानमग्रे विस्तार्य्यम्। सम्यग् रात्रिवस्त्रपरित्याग-श्रीमुखादिप्रक्षालन-शुद्धवस्त्र-भूषणपरिधानादि-पूर्वकं स्वयमेव शयनगृहादुत्थाय निष्क्रम्य, प्रबोधयन्निति सखिभिः सह सुख-जिगमिषया शनैर्विनिर्गमं बोधयति; अत एव वयस्येति विशेषणम्। चारुणेति निद्रितानां सुखेन निद्रा—भंगार्थम्; यद्वा, पूर्वदिने वन्यभोजनार्थ-गमनाय शृंगरवस्य संकेतितत्वात्तेषां मनोरमेण स्वरूपमात्रनिर्देशो वा, तस्य सदैव चारुत्वात्। वत्साः पुरःसरा यस्य सः, तन तेनैव तेषां चित्ताकर्षणाद्धरिः, व्रजाद्विशेषेणैकाकितया निर्गतो न त्वन्यदिनवत् श्रीरामेण सहितः। तत्कारणमग्रे व्यक्तं भावि। अत्राद्यमाश्चर्य्यं वने प्रातर्भोजनार्थं मनोधारणम्; ततोऽपि मातृप्रेरणादिकं विनैव स्वयमतिबाल्ये समुत्थानम्; ततोऽपि स्वयमेवानन्त-वत्सपवर्ग-प्रबोधनम्; तत्र च चारुशृङ्गरवेण, ततोऽप्यग्रजं विना विनिर्गमस्तत्रापि वत्सपुरःसरत्वमित्येवं प्रतिपदं प्रतिवाक्यं प्रतिश्लोकं प्रतिप्रकरणञ्च पूर्वपूर्वस्मादुत्तरोत्तरमाश्चर्य्यमुह्यम्, तच्च भक्तजनहृदयैक-वेद्यमतिविस्तरभयान्न विव्रियत इति ॥ १ ॥ तेनैव सार्द्धमिति महावेगेन धावनात्; यतः स्निग्धाः, अतः सर्वेषामेव युगपन्निर्गमोऽपि सूचितः सहस्रस्योपरि संख्या 'एकं दश शतञ्चैव सहस्रमयुतं तथा। लक्षञ्च नियुतञ्चैव कोटिरर्बुदमेव च ॥' इत्यादि-वचनादयुतादिस्तयान्वितान्। एवं वत्सानां बालानाञ्चानन्त्यमुक्तम्। इत्थं वने बालैः पाल्यमानानामपि वत्सानां यदीयत्ता नाभूत्, तर्हि व्रजे रुद्धानामभिनवानामतृण-चराणाम्, तथा गो-संगे गतानाञ्च मुक्तस्तन्यानां वत्सानाम्, तथा तत्तन्मातॄणामन्यासाञ्च गवाम्, तथा वत्सतरीणां

वृषाणाञ्च श्रीगोपालदेव-प्रभावेण नित्यं विवर्द्धमानानामियत्ता कथमास्ताम् ? महिष्यादयश्च केन वा गण्या इत्येवमसंख्येयाः पशवस्तदनुसारेण गोप-गोप्यादयश्चानन्ता ज्ञेयाः। मुदेति निद्राभंगादिदुःखं निरस्तम्; यद्वा, स्वयं श्रीकृष्णेन प्रबोधनात्; किं वाद्यं प्रातरारभ्य तेन सह क्रीडिष्याम इति विचारः। अत एव विशेषेणान्यदिनतोऽसाधारणतया निर्ययुः, स्व-स्व-गृहाद्-व्रजादेव वा; वि-शब्दार्थः सुशिगित्यादिना व्यञ्जित एव ॥ २ ॥ कृष्णस्य परमाकर्षकस्य भगवतो वत्सैः सह युथीकृत्य संगमय्येति स्वस्व-वत्सानामपि कृष्णवत्स-संग-सुखैकापेक्षया स्वकान् स्वकान् स्वस्ववत्सानित्यर्थः स्ववत्सकानिति पाठः स्पष्टः। अर्भलीलाभिरिति तेषां बाल्यलीलानैपुण्यं बोधयति। तत्र तत्र स्थाने स्थाने। हृ हर्षे ॥ ३ ॥ अर्भलीला एवाह—फलेति सप्तभिः। स्तबकाः पुष्पगुच्छाः, सुमनसः केवलपुष्पाणि, गुञ्जानां वन्यत्वेऽपि काचादि-गृहभूषणान्तरुक्तिः—सौन्दर्य्येण स्थास्नुत्वेन च मातृभिर्गृहे ताभिर्भूषितत्वात्। मुक्तेति क्वचित् पाठः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

श्रीरामानुजपादाब्जकृपासमनुरञ्जितैः। पूर्वैः प्रक्षिप्तमध्यायत्रयमन्वर्थमुच्यते ॥

वनाशाय वने प्रातर्भोजनाय ॥ १ ॥ शिक् भोज्यवस्त्वाधारभूतं शिक्यं वेत्रं गोवेषयितृविषाणवेणुवाद्ये ॥ २ ॥ तत्र तत्र वृन्दावनप्रदेशेषु ॥ ३ ॥ काचानां हाराः गुञ्जानां च मणिस्वर्णादीनामाभरणैर्भूषिता अपि पिच्छं मायूरं फलादिभिरभूषयन् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत आरभ्य अध्यायत्रयं प्रक्षिप्तमिति व्यासाचार्यैरुपेक्षितम्, अथापि प्रायशो व्यवह्रियमाणत्वात् कैश्चिद्व्याख्यातत्वाच्च व्याख्यायते अत्राद्येनाघासुरवधात्मकं चरित्रमनुवर्ण्यते—क्वचिदित्यादिना। कदाचिद्भगवान् प्रातरुत्थाय समानवयस्कान् वत्सपान् प्रबोधयन् वन एव प्रथमभोजनाय मनः कुर्वन् वत्साः पुरस्सराः यस्मात् तथाभूतः चारुणा विषाणानां रवेण व्रजान्निर्जगाम ॥ १ ॥ तथा शिक् शिक्यं भोजनाः शिक्यादयो येषां ते स्निग्धाः परस्परानुरागयुक्ताः पृथुकाः बालकाः सहस्रशस्तेनैव कृष्णेनैव सह सहस्रादुपरिसंख्यया अन्वितान् परिच्छन्नान् स्वस्ववत्सान् पुरस्कृत्य मुदा विनिर्युः ॥ २ ॥ ततः स्वस्ववत्सानसङ्ख्यातैः कृष्णस्य वत्सैः सह सङ्घीकृत्य चारयन्तः तत्रतत्रार्भकलीलाभिर्विहृतवन्तः ॥ ३ ॥ तदेव प्रपञ्चयति—फलेति सप्तभिः। पूर्वं मातृभिः काचादिभिर्भूषणैर्भूषिता अपि फलादिभिरात्मानमभूषयन् तत्र प्रवालाः पल्लवास्तेषां स्तबकैः पुष्पस्तबकैश्च युक्तैर्दामभिः मालाभिः ॥४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

(अत्राध्यायत्रयं न दृश्यते)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अध्यायत्रयमिदं केनचिदसम्मतमपि वासनाभाष्यादिप्राचीनटीकाकारैर्बहुभिः सम्मतत्वात् सर्वदेशपुस्तकप्रसिद्धत्वाच्च लिख्यते [१–७]

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

द्वादशे सखिभिः केलिस्तन्मध्येऽघस्य वर्णनम्। वक्त्रेऽविशंस्ते कृष्णो नु प्रविश्यार्हस्तमेधितः ॥

क्वचिद्दिवसे वनाशाय वन एव प्रातर्भोजनं कर्तुं हरिरिति बलदेवस्तु मात्रा जन्मर्क्षशान्तिकस्नानाद्यर्थं गृह एव बलाद्रक्षित इति ज्ञेयम् ॥ १ ॥ पृथुका बालाः शिक् शिक्यं सहस्रस्योपरिसंङ्ख्या अयुतादिस्तयाऽन्वितान् ॥ २ ॥ कृष्णस्य तु वत्सैरसङ्ख्यातैः असङ्ख्यसंज्ञसंख्यैरित्यर्थः। असंख्यसंज्ञा च क्षीरस्वामिदृष्ट्या ज्ञेया यथा "एकं दशशतसहस्राण्ययुतं प्रायुताख्यलक्षमथ नियुतम्। अर्बुदकोटिन्यर्बुदपद्मे खर्वं निखर्वमिति दशभिः। गणनान्महाब्जशङ्खसमुद्रमध्यान्तमथ परपरार्द्धम्। स्वहतं परार्द्धममितं तत्स्वहतं भूय्यतोऽसङ्ख्यम् इति" प्रयुतसंज्ञं लक्षम् अर्बुदसंज्ञा कोटिरित्यर्थः। परार्द्धपर्यताष्टादशसङ्ख्यादशशतगुणिता ज्ञेयाः ततश्च द्वन्द्वैक्यान्महाब्जादिकं सङ्ख्यापञ्चकं ज्ञेयं स्वहतमिति स्वेन गुणितमित्यर्थ इति ज्ञेयम्। ततश्च कृष्णवत्सैर्महायूथैः सह स्वकान् स्वकान् परार्द्धादिसङ्ख्यान् वत्सान् पृथक् पृथक् यूथीकृत्येत्यर्थः। न च षोडशक्रोशीमात्रस्य वृन्दावनस्य प्रदेशे तावन्तो वत्साः नैव भान्तीति वाच्यं भगवद्विग्रहस्यैव धाम्नश्चास्य तथापरिमितत्वेप्यचिन्त्यशक्त्या विभुत्वात् तत्प्रदेशैकदेशेपि पञ्चाशत्कोटियोजनप्रमाणब्रह्माण्डार्बुदानां भगवतैव ब्रह्मणे एतदुत्तराध्याये दर्शयिष्यमाणत्वादत एवोक्तं भागवतामृते "एवं प्रभोः प्रियाणां च धाम्नश्च समयस्य च। अविचिन्त्यप्रभावत्वादत्र किञ्चिन्न दुर्घटम्" इति ॥ ३ ॥ काचादिभिः पूर्वं मातृभिर्भूषिता अपि फलादिभिरात्मानमभूषयन्नित्यर्थः। तत्र काचगुञ्जे बालानामाग्रहात् मणिस्वर्णे मातॄणामाग्रहाद्भूषणे ज्ञेये ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

द्वादशेऽध्याये व्रजौकसां भाग्यातिशयम् अघासुरमोक्षञ्च वर्णयति—क्वचिदिति। क्वचिद्धरिः स्वभक्तक्लेशहरः वनाशाय वने एव प्रथमं भोजनं कर्तुं मनो दधत् वयस्याः समानवयस्का ये वत्सपास्तान् ॥ १ ॥ तेनैव शृङ्गरवेण सत्यसङ्कल्पवता कृतेन साकं

प्रबुद्धा इति शेषः । सहस्रशः स्निग्धाः स्नेहयुक्ताः शोभनाः शिग्वेत्रादयो येषां ते शिक् शिक्ये पृथुकाः बालकाः सहस्राधिकसङ्ख्यायुतान् स्वकान् वत्सान् पुरस्कृत्य मुदा विनिर्ययुः ॥२–३॥ पूर्वं काचादिभिर्भूषिता अपि फलादिभिरभूषयन् आत्मानमिति शेषः ॥४॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

द्वादशे शिशुभिः केलिरघास्ये विशतो नुतान् । प्रविश्यानन्दयत् कृष्णो हत्वाघं तममोचयत् ।

एवमिति पद्येन कौमारीं लीलां समाप्यापि श्रीसुरभीद्दामपूर्वां तामनुस्मृत्य पुनरध्यायत्रयेण वक्तुं प्रवर्तते क्वचिदित्यादिना । क्वचिद्वासरे वनाशाय वन एव प्रातर्भोक्तुं मनो दधत् हरिरिति बलदेवस्तु न गतस्तन्मात्रा तज्जन्मर्क्षस्नानदानार्थं गृहे एव रक्षितत्वात् ॥ १ ॥ पृथुकाः शिशवः, शिक् भोज्यधारकं शिक्यं, सहस्रोपरिसंख्यया ऽयुतामिकया ॥ २ ॥ असङ्ख्यातैः संख्यातो निर्गतैः, कृष्णवत्सैर्महायूथैः सार्द्धं स्वकान् वत्सानेकीकृत्य मेलयित्वा चारयन्तः, ननु परिमिते वृन्दावने अपरिमितानां वत्सानां समावेशः कथमिति चेद्भगवद्विग्रहस्येव तस्याचिन्त्यशक्त्या विभुत्वेन तत्सम्भवादित्युक्तम् ॥ ३ ॥ मातृभिः काचादिभिर्भूषिता अपि ते बालाः फलादिभिरात्मानमभूषयन्; तत्र काचगुञ्जयोर्धारणं बालानामाग्रहात् मणिस्वर्णयोस्तु तन्मातॄणामिति बोध्यम् ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ क्वचिद्विनाशायेत्यारभ्यैतत्सुहृद्भिश्चरितं मुरारेत्यन्तो ग्रन्थः प्रक्षिप्त इति प्रेक्षावन्तोऽतो न व्याख्यातोऽस्माभिः ।

श्रीसुबोधिनी

कथामात्रं हरेर्वाच्यं सर्वत्रेत्यत्र केचन । कथां वक्तुं भागवतीं क्वचित् सिद्धामलौकिकीम् ॥ १ ॥
योजयित्वा त्वाधुनिका अध्यायत्रितयं जगुः । शब्दार्थसङ्गतीनां हि स्पष्टा तत्र विरुद्धता ॥ २ ॥
लोकप्रसिद्धेस्तच्चापि कथञ्चिद् रूप्यते स्फुटम् ॥ २–½ ॥

पूर्वाध्यायान्ते “कौमारं जहतुर्व्रज” इत्युक्तं, “ततश्च पौगण्डवयःश्रितौ व्रजे बभूवतुस्तौ पशुपालसम्मतौ” वित्येव **सन्दर्भ**स्तथापि भगवच्चरितमिव वत्साहरणं पद्मपुराणे प्रसिद्धमिति तां कथामाश्रित्याघासुरवधं ब्रह्मस्तुतिं च पूर्वापरयोर्निवेश्य कौतुकलीला भगवतः प्रदर्शिता, लोका हि लौकिके कौतुकिनो भवन्ति,

तत्र तु प्रथमेऽध्याये लीलामाह सुविस्तराम् । अघासुरस्य च वधं मुक्तिश्चापि स्वयुक्तितः ॥ १ ॥

प्रथमं भगवतो दशभिः श्लोकैर्लीलामाह, **क्वचित्** कदाचित्, **वनाशायाशनमाशो** वनेशनं कर्तुं **मनो दधद्** बिभ्रत् **प्रातः**काले **व्रजादुत्थाय विनिर्गत** इतिसम्बन्धः, **वयस्याश्च** ते **वत्सपाश्च,** शृङ्गरवेणैव तेषामुत्थापनं, कृष्णस्यैवायं रव इतिज्ञापनार्थं **चारुणे**ति, दोहानन्तरं **वत्सान्** गृहीत्वा **निर्गतः** ॥ १ ॥ तदा सर्वेपि निर्गता इत्याह **तेनै**वेति, **तेनैव** भगवता **सार्धं पृथुका** बालाः **सहस्रशो** निर्गताः **स्निग्धाः** प्रेमला भगवति, शोभनं शिक् शिक्यमोदनसहितं **वेत्रं** वत्सचारणार्थं **विषाणं** वादनार्थं वेणुश्च ते येषां सन्ति **स्व**कीयान् **वत्सान् पुरस्कृत्य** तेपि **मुदा** गृहेभ्यो **ययुः**, एकैकस्य **सहस्र**सङ्ख्यात **उपरि** सङ्ख्याऽयुतमित्यादितया **सङ्ख्ययान्वितान्** ॥ २ ॥ तान् सर्वानेव **स्ववत्सकान्** कृष्णवत्सेषु योजितवन्त इत्याह **कृष्णवत्सै**रिति, भगवद्वत्सैः सह **स्ववत्सान् यूथीकृत्य,** अन्यथा स्वच्छन्दलीला न भवति, ततोपि पृथग्भूतान् कदाचिन्निर्गच्छन्तो**र्भलीलाभि**रेव तांश्चा**रयन्तो विजह्रुस्तत्रतत्र** क्रीडितवन्तः ॥ ३ ॥ फलादिभिश्च स्वशरीरं भूषितवन्त इत्याह **फले**ति, पूर्वं **काचा**दिभि**र्भूषिता** अपि पुनर्व**न्यैरभूषयन्, स्तब**काः पुष्पगुच्छानि, **सुमनसः** केवलपुष्पाणि, **पिच्छा**नि मयूरपिच्छानि, गैरिकादि**धातवः**, **गुञ्जा**फलानि वन्यान्यपि नित्यं तिष्ठन्तीति **काचादिषु गणितानि** ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अग्रेऽध्यायत्रयं प्रक्षिप्तमित्युक्तम् । तत्र ‘कौमारं जहतुः’ ‘ततश्च पौगण्डवयःश्रितौ’विति युक्तः सन्दर्भ इति । मध्येन्यकथा ‘त्वेवं विहारै’रित्यस्य ‘ततश्च पौगण्डवय’ इत्यस्य च वक्त्रा नोक्तेति ज्ञायते । अन्यथैतदध्यायत्रयानन्तरमेव कौमारत्यागं वदेत् । किञ्च, ‘पौगण्डे परिकीर्तित’मिति वाक्यात् पूर्वाध्याय एव तत्प्राते‘स्ततश्च पौगण्डवयःश्रितौ’विति वाक्यं विरुद्धं स्यात्, तदनर्थकं च । तृतीयाध्यायान्तेप्येवं विहारै’रिति श्लोकोधुना कैश्चित्पुस्तकेषु लिख्यते, तदप्रामाणिकमितीतोपि तथात्वं तेषां ज्ञेयम् । भगवत्प्रियाकृतलीलानुकृतिष्वेतदनुकृत्यभावात् । तृतीयस्कन्धे श्रीमदुद्धवैर्द्वादशे स्कन्धे सूतेन चैतत्कथाया अकथनाच्च । ‘न भारती मेङ्ग मृषोपलक्ष्यते’, ‘न वै क्वचिन्मे मनसो मृषा गतिः’, ‘न मे हृषीकाणि पतन्त्यसत्पथ’ इति ब्रह्मवाक्यविरोधश्च । ईश्वरे तत्त्वेन ज्ञानवतस्तत्परीक्षाकृतेर्महानर्थरूपत्वाद्, ‘भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचि’दिति भगवद्वाक्यविरोधश्च । तोकेन जोवहरणमित्यादिनिरूपकस्य सदेश्वरत्वेन ज्ञानवतस्तादृग्धार्ष्ट्यस्यासम्भवाच्च । **आचार्यैः** प्रसिद्धिमात्रेण विवृतमित्य**स्माभि**रुपेक्षितम् ।

इति श्रीप्रमाणप्रकरणम् ।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

प्रक्षिप्ताध्यायाः १–३।

श्रीगोवर्धनधारी करोतु कुशलानि। अतः परमग्रेघासुरवधवत्सहरणब्रह्मस्तुतिनिरूपकास्त्रयोध्यायाः केनचित् प्रक्षिप्ता सन्ति न तु वेदव्यासविरचिताः, अतः श्रीभागवतबहिर्भूता इति सुबोधिन्यां साधितं, अध्यायत्रयस्य प्रक्षिप्तत्वे प्रमाणानि बहून्येव टिप्पण्यामुपन्यस्तानि, तानि पुनर्न लिख्यन्ते किन्त्वेतेध्यायाः प्रक्षिप्ता इतिश्रीधरस्वामिभिरप्युक्तं तदुपपाद्यते, तथा हि "द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखा" इति गणना श्रीधरैः कृता, ततश्च द्वात्रिंशदधिकत्रिशतमध्यायाः श्रीभागवतस्येत्येतदध्यायत्रयस्य प्रक्षिप्तत्वमेवाभिप्रेतं स्वामिनामपि, त्रयाणां शतानां समाहारास्त्रिशतं, पात्राद्यन्तस्य नेतिनिषेधात् न स्त्रीत्वं पात्रादिराकृतिगण इतितत्त्वबोधिन्यामुक्तं, द्वात्रिंशच्च त्रिशतं च द्वात्रिंशत्त्रिशतं सङ्ख्याया अल्पीयस्या इत्यनुशासनेन द्वात्रिंशत्शब्दस्य पूर्वनिपातः, केचित् तु द्वात्रिंशश्च त्रयश्च शतानि चेतिविगृह्य शतानि चेतिबहुवचनेन शतत्रयमेव ग्राह्यं प्रसिद्धत्वादित्याहुः, तन्न, प्रसिद्धिवशाच्छतत्रयलाभे तु प्रसिद्धेरेव पञ्चत्रिंशल्लाभसिद्धौ सङ्ख्याकरणस्यैव वैयर्थ्यापातात्, सङ्ख्या करणं हि शिष्यबोधाय, तत्र शिष्याणां शतत्रयसङ्ख्याज्ञाने प्रसिद्धिपरतन्त्रत्वं चेत् तदा गणना मुधैव स्यात्, द्वात्रिंशश्च त्रयश्च शतानि चेतिविग्रहे सङ्ख्याया अल्पीयस्या इतिवाक्यात् त्रिद्वात्रिंशत्शतमितिरूपं स्यात्, अपरं च गणनाकृतिर्हि बोधसौकर्याय, तत् तु द्वात्रिंशश्च त्रिशतं चेति विग्रहे भवति, द्वात्रिंशश्च त्रयश्च शतानि चेतिविग्रहे त्वत्यन्तं दौर्लभ्यं बोधस्येत्येतादृशी क्लिष्टगणना श्रीधरैः कथं क्रियेत, तस्मात् द्वात्रिंशत् त्रिशतं चेत्येव विग्रहः, ततश्चैतेध्यायाः श्रीधरमतेपि प्रक्षिप्ता। इतिदिक्, माध्वैस्त्वेतेध्यायाः श्रीभागवतपुस्तकेपि प्रायो न लिख्यन्त इत्यलं विस्तरेण।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

प्रक्षिप्ताध्यायेषु प्रथमाध्याये प्रक्षिप्तत्वं समर्थयितुं मतान्तरमाहुः **कथामात्र**मित्यादि का० ११८४–३। **क्वचित्** पद्मपुराणादौ प्रसिद्धां, एवं मतान्तरमनूद्य दूषयन्ति **शब्दार्थे**ति ११९४। सङ्गतिविरोधस्तु सुबोधिन्यां टिप्पण्यां विशेषतः श्री**गोपेश्वरै**श्च उपपादितः, विजयध्वजनाम्ना माध्वेनापि स्वीकृतः श्रीभागवतविवरण एतदध्यायत्रयं न व्याख्यातं, एवं प्रक्षिप्तत्वे सत्यप्येतद्व्याख्याने प्रयोजनमाहुः **लोकेति** का० ११९३। तत्र प्रथमाध्यायार्थमाहुः **तत्रे**ति का० १२०३। **स्वयक्तित** इति "पीनाहिभोगोत्थित"मितिश्लोकोक्ताघासुरस्य मुक्ति"र्नतद्विचित्र"मित्यादि श्लोकद्वयेन युक्त्या समर्थितेत्यर्थः। द्वितीयाध्याये **द्वितीय** इति का० १२१३। बालैः सह वत्सहरणम्।

तृतीयेध्याये **स्तुति**रिति का० १२२४। **स्नेहोपपत्ति**रिति "ब्रह्मन् परोद्भवे कृष्ण इयान् प्रेमा कथं भवे"दित्यादिना राजप्रश्ने "सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभ" इत्युत्तरेण भगवति व्रजस्थानां स्नेहोपपत्तिरित्यर्थः, "एतत् सुहृद्भिश्चरितं मुरारे"रित्यनेन श्रवणस्य फलं च। **नौमीड्य ते** इत्यत्र **लौकिके** इति का० १२३१। ननु "गुञ्जावतंसपरिपिच्छलसन्मुखाये' त्याद्युक्तप्रकारेण लौकिकव्यवहारविषय एव भगवान् किमर्थं प्रार्थ्यते श्रुतिसिद्धमेव रूपं कुतो न प्रार्थ्यत इत्याशङ्क्याहुर्लौकिके इति, **लौकिके** लोकप्रसिद्धे **प्राकृते** गुञ्जावतंसेत्याद्युक्तप्रकारेण प्राकृतसदृशे **भावे यस्य भावः स** एव **भक्तिमान्**, तं प्राकृतं **भावं हीनं विदित्वा योन्यथा वेद स अधमं** इत्यर्थः, किञ्च **यद् गृह्णातीति** का० १२४३। अयं भगवान् लोके **यत्** यादृशं रूपं **गृह्णाति यथैव** बोधयति येन प्रकारेणानुभावयति **तदेवास्माकं प्रमाणं**, इहेति भक्तिमार्ग इत्यर्थः, **नान्य**दिति जगत्कर्तृत्वव्यापकत्वादिविशिष्टं वेदप्रसिद्धं रूपं नास्माकं फलत्वेन प्रार्थनीयमित्यर्थः, तत्र हेतु**र्भिन्नाधिकारत** इति, भक्तभिन्नाधिकारत्वादित्यर्थः, तादृशे वेदप्रसिद्धे रूपे ज्ञानमार्गीयाणामेवाधिकारो न तु भक्तानामित्यर्थः, एतदेवोक्तमेतद्व्याख्याने सुबोधिन्यां "नास्माकं फलं शब्दविषयं ब्रह्म किन्त्वेतदेव प्रत्यक्षतो दृश्यं, तदपि प्राकृतचक्षुषैव, तत्रापि सर्वाभरणभूषितं, तत्रापि प्राकृतालङ्कारसहितं, तत्राप्येतदवस्थापन्न"मिति। इति प्रक्षिप्ताध्यायाः ॥ १–३ ॥

इति तामसप्रकरणे प्रमाणप्रकरणम्।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अत्र यद्यपि श्रीमदाचार्याः 'क्वचिद्वनाशाय मनो दधत्' इत्यारभ्याध्यायत्रयं प्रक्षिप्तमित्याहुः, तथात्रान्येषामपि केषां विप्रतिपत्तिः, केषां च सम्मतिरस्ति तथापि व्याख्यातत्वाद्यथामति व्याख्यायन्ते ॥

द्वादशे वनक्रीडायामहेर्वत्सादिमोचनम् ॥ अहेः संसारमोक्षश्च कृष्णेन विनिरूप्यते ॥ १ ॥

क्वचित् कदाचिद्वनाशाय वन एव प्रथमं भोजनं कर्तुं मनो दधत्। प्रातः समुत्थाय चारुणा मनोहरेण शृङ्गरवेण वयस्यांश्च तान् वत्सपांश्च तान् स्वसखीन् प्रबोधयन् "अहं वनं गच्छामि, यूयं सर्वे आगच्छत" इति ज्ञापयन् वत्साः पुरःसरा यस्य स हरिर्व्रजाद्विनिर्गत इत्यन्वयः ॥ १ ॥ तदा तेन श्रीकृष्णेन साकमेव सहस्रशः पृथुकाः गोपबालाः सहस्रसङ्ख्याताः उपरि या

सङ्ख्या तयाऽन्विताः स्वकान् स्वकान् वत्सान् पुरस्कृत्य अग्रतः कृत्वा मुदा हर्षेण विनिर्ययुर्विनिःसृताः। तत्र हेतुमाह—कृष्णे स्निग्धा इति। 'भगवत इव तेषामपि वनभोजनमनोरथ' इत्याह—सुशिगिति। सुष्ठु रम्याः शिग्वेत्रादयो येषां ते। शिक् शिक्यं दध्यादिपूर्णं भोजनार्थम्, वेत्रं गोचारणार्थम्, विषाणवेणू वादनार्थौ ॥ २ ॥ 'पृथक्त्वे स्वच्छन्दलीला न स्यात्' इत्यसङ्ख्यातैः कृष्णवत्सैः सह स्ववत्सकान् यूथीकृत्य एकीकृत्य चारयन्तोऽर्भलीलाभिस्तत्र तत्र वने हर्षेण विजह्रुरित्यन्वयः ॥ ३ ॥ मातृभिः पूर्वं काचादिभिर्भूषिता अपि अत्यौत्सुक्येन पुनः फलादिभिरात्मानमभूषयन्नित्यन्वयः। प्रवालानि पत्राणि, स्तबकाः पुष्पगुच्छानि, सुमनसः केवलपुष्पाणि, पिच्छानि मयूरस्य, धातवो गैरिकादयस्तैः ॥ ४ ॥

अन्वितार्थप्रकाशिका

द्वादशेऽघं महासर्पं वत्सपालगिलं गले। प्रविश्याहन्हरिस्तत्र श्लोका वेदपयोधयः (४४) ॥
चत्वार्युवाचेत्यङ्घ्रयूनाः (४) पञ्चबाणा (५४॥।) अनुष्टुभः ॥ १२ ॥

केचित् द्वादशादिकमध्यायत्रयं प्रक्षिप्तमाहुस्तत्खण्डनं टीकाशेषभागे ज्ञेयम्। क्वचिदिति ॥ क्वचित्कदाचित् वनाशाय वन एव प्रथमं भोजनं कर्तुं मनः दधत् दृढेच्छां कुर्वन् प्रातः समुत्थाय चारुणा मनोहरेण शृङ्गरवेण सुखेन निद्राभङ्गसाधनेन वयस्याश्च ते वत्सपाश्च तान् स्वसखीन् प्रबोधयन् अहं वनं गच्छामि यूयं सर्वे आगच्छतेति ज्ञापयन् वत्साः पुरःसरा यस्य स हरिर्व्रजाद्विनिर्गतः। बलदेवस्तु मात्रा जन्मर्क्षशान्तिकस्नानार्थं गृह एव रक्षित इति ज्ञेयम् ॥ १ ॥ तेनैवेति ॥ तदा तेन श्रीकृष्णेन साकमेव स्निग्धाः श्रीकृष्णे प्रेमयुक्ताः सुष्ठु रम्याः शिक्शिक्यं दध्यादिपूर्णं भोजनार्थं वेत्रं गोचारणार्थं विषाणवेणू वादनार्थौ येषां ते सहस्रशः पृथुकाः गोपबालाः सहस्रसंख्याताः उपरि या संख्या लक्षकोट्यादिः तयान्वितान् स्वकान् स्वकान् वत्सान् पुरस्कृत्य अग्रतः कृत्वा मुदा हर्षेण विनिर्ययुर्विनिःसृताः ॥ २ ॥ कृष्णवत्सैरिति ॥ असंख्यातैः कृष्णवत्सैः सह स्ववत्सकान् यूथीकृत्य एकीकृत्य चारयन्तोऽर्भलीलाभिस्तत्र तत्र वने ह हर्षेण विजह्रुः। अत्र तोषिण्याम् असंख्यातैः असंख्यसंज्ञसंख्यैरित्यर्थः। असंख्यसंज्ञा च क्षीरस्वामिना परार्धपर्यन्ताष्टादशसंख्या दशगुणोत्तरा उक्त्वा दर्शिता। स्वहतं परार्धममितं तत्स्वहतं भूर्यतोऽसंख्यमिति स्वहतं स्वेन गुणितमित्यर्थः। अत्र बालैः पाल्यमानानां वत्सानामसंख्यत्वं किं पुनर्व्रजस्थतर्णका गोसङ्गतवत्सा वत्सतर्यो वत्सतरा वृषाश्च गोपालदेवदृशा वर्धमाना असंख्येया इति महिष्यादयश्च पशवः केन गण्याः। एवं गोपा गोप्यश्चानन्ता इत्युक्तम्। अत्रैव तेषां व्रजमण्डलेऽपि मातुमशक्यत्वं किं पुनर्वृन्दावनादिसीमामात्रमध्ये इति तु न शङ्क्यम्। भगवच्छक्त्यैव मातुं शक्यत्वात्। एवमग्रे यादवादीनां विषयेऽपि बोध्यम् ॥ ३ ॥ फलेति ॥ पूर्वं मातृभिः काचगुञ्जामणिस्वर्णैर्भूषिता अपि फलैः प्रवालैर्नवपल्लवैः स्तबकैः पुष्पादिगुच्छैः सुमनोभिः पुष्पैः पिच्छैर्बर्हैः धातुभिर्गैरिकाद्यैः पुनरपि आत्मानमभूषयन्। तत्र काचगुञ्जे बालानामाग्रहात् मणिस्वर्णे मातृणामाग्रहात् भूषणे ज्ञेये। यद्वा। काचगुञ्जासदृशैर्मणिस्वर्णैः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथेदानीं द्वादशे कौमारक्रीडनमघासुरहननं च निरूपयति तत्रादौ कौमारलीलां निरूपयन्नाह क्वचिदिति। कदाचिद्वनेऽशनं कर्तुं मनो दधत् सन् वयसा समानाः वयस्यास्ते च ते वत्सपाश्च तान् वत्साः पुरःसराः अग्रगा यस्य ॥ १ ॥ तेन श्रीकृष्णेन शृङ्गशब्देन वा साकं तच्छ्रवणसमकालमेवेत्यर्थः। स्निग्धाः स्नेहयुक्ताः सुशोभमानाः शिक् शिक्यं च वेत्रं यष्टिश्च विषाणः शृगं च वेणुंच संति येषां ते पृथुकाः बालाः सहस्राधिकगणनायुक्तान् स्वकीयान् ॥ २ ॥ असंख्यातैः सह यूथीकृत एकीकृत्वा ॥ ३ ॥ काचादिभिर्भूषिता अपि स्वमातृभिः पूर्वमलंकृता अपि फलादिभिः आत्मानमभूषयन् स्तबकः पुष्पः गुच्छः मयूराणां पिच्छानि धातवो गैरिकादयः ॥४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अघासुरं महासर्पवपुर्धरमहन् गले। द्वादशे वर्ण्यते क्रुद्धो वत्सपालगिलं हरिः ॥ १ ॥

इत आरभ्याध्यायत्रयं कैश्चिद्भागवतटीकाकारैः प्रक्षिप्तमिति मत्वोपेक्षितमस्त्यथापि प्रायशो व्यवह्रियमाणत्वात् कैश्चिद्व्याख्यातत्वाच्च व्याख्यायते। तत्राद्येनानेनाध्यायेनासुरवधात्मकं श्रीहरिचरित्रमनुवर्ण्यते ॥ क्वचिदिति ॥ क्वचित् कदाचित्, हरिः श्रीकृष्णः, प्रातः समुत्थाय, वयस्याः समानवयस्काश्च ते वत्सपा वत्सपालाश्च तान्, चारुणाऽतिसुन्दरेण, शृङ्गरवेण, प्रबोधयन्, वनाशाय वन एव प्रथमभोजनाय, वन एव प्रथमं भोजनं कर्तुमित्यर्थः। मनः, दधत्, वत्साः पुरः सराः यस्य सः एवंभूतः सन्, व्रजात् विनिर्गतः ॥ १ ॥ तेनेति ॥ सु शोभनाः शिञ्चि शिक्यानि च वेत्राणि यष्टयश्च विषाणानि शृङ्गाणि च वेणवो वंश्यश्च येषां ते स्निग्धाः परस्परानुरागभुक्ताः, सहस्रशः, पृथुका बालाः, सहस्रोपरि सहस्रादुपरि या संख्या तया, अन्वितान् स्वान्स्वान् वत्सान् स्वकीयान् स्वकीयान् वत्सानित्यर्थः। पुरस्कृत्य, तेन कृष्णेन, साकं सहैव, मुदा विनिर्ययुः व्रजादिति शेषः ॥ २ ॥ कृष्णवत्सैरिति ॥ ततः स्ववत्सकान् स्वस्ववत्सकानित्यर्थः। असंख्यातैः संख्याविहीनैः, कृष्णवत्सैः सह, यूथीकृत्य संघीकृत्य, चारयन्तः सन्तः, तत्र तत्र तेषु तेषु रमणीयस्थानेषु इत्यर्थः। ह स्फुटाभिः बाललीलाभिः, विजह्रुः विहृतवन्तः ॥ ३ ॥ तत्तद्विहरणमेव प्रपञ्चयति सप्तभिः ॥

फलेति ॥ पूर्वं मातृभिरिति शेषः। काचाः काचशकलाश्च गुञ्जा रक्तिकाश्च मणयश्च स्वर्णानि स्वर्णालंकाराश्च तैर्भूषिता अलंकृताः सन्तः अपि, बालाः, फलानि च प्रवालाश्च स्तबकाश्च सुमनांसि च पिच्छानि च धातवश्च तैः, स्वस्वदेहमिति शेषः। अभूषयन्। तत्र फलानि शोभोपयोगिसस्यानि, प्रवालाः पल्लवाः, स्तबकाः पुष्पगुच्छाः, सुमनांसि पुष्पाणि, पिच्छानि मयूरबर्हादीनि धातवो गैरिकादयः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं विहारैरिति चेह पद्यद्विवारपाठादिदमत्र भाति। त्र्यध्याय्युपात्तं चरितं विभिन्नं तद्बोधितोऽर्थोऽप्यतिगूढतत्त्वः ॥ १ ॥
सृष्ट्यारम्भविधिस्ततः सदसतां प्रोद्बुद्धता प्राणिनां तद्योग्याचरणं ततो भववने तेषामभग्रस्तता।
नाशोऽघस्य ततोऽच्युतेन विहितं तस्मिन् विहारादिकं जीवन्मुक्तवदित्यबोधि प्रथमाध्यायेऽग्रतः कथ्यते॥ २ ॥

क्वचिदिति। १०.१२.१.

यत्कल्पे सुमनोज्ञसंसृतिवनानन्तोपभोगेहया सम्बन्धं मनसो दधद्विभुरनुद्भूतेन नादेन सः।
सुप्तं जीवचयं सहैव युगपत् सम्बोधयंस्तद्वनं श्रुत्युद्बोधितपद्धतिः प्रविशतीत्येषाऽद्यपद्यार्थिता ॥ ३ ॥
मूलस्य प्रतिपद्योक्तसदसज्जीववर्तनम्। पद्यद्वयेनात्र सुज्ञैः क्रमाद्विज्ञेयमार्थिकात् ॥ ४ ॥

तेनैवेति : १०.१२.२

चिद्रूपेण सहैव तेन विभुना जीवास्ततः कोटिशो भिन्नास्वादमनन्तसद्रुचिकरं प्रादाय भोग्यं निजम्।
प्रारब्धप्रकटप्रचोदितगतीन् कृत्वाऽग्रतो गोगणान् निर्गच्छन्ति ततः प्रपञ्चविपिने प्रारब्धभोग्याश्रिताः ॥ ५ ॥

कृष्णवत्सैरिति : १०.१२.३.

केचिच्चिदेकश्रुतिषु प्रकामं नियोज्य बुद्ध्याऽक्षिगणं स्वकीयम्।
साकं चिताऽस्मिन् विपिने चरन्ति सुखेन बाला इव साधुजीवाः ॥ ६ ॥
केचित्तु सद्भेदगणेन चैकीकृत्य स्वकीयान् विधिकाण्डवादान्।
बाल्याद्यवस्थाभिरितस्ततस्ते चरन्ति च स्वाभिमतेन जीवाः ॥ ७ ॥

फलप्रवालेति : १०.१२.४.

एके गुणत्रयातीताः समलोष्टाश्मकाञ्चनाः। अप्यात्मानमलङ्कुर्वन्त्यलं तूष्णीं फलादिभिः ॥ ८ ॥
रजस्तमःसत्त्वगुणाश्रिता अपि भवन्ति तत्तत्सुफलाभिसन्धिभिः।
श्रिताः पुनस्ते रुचिरां निजात्मनां कृतार्थतां च भूरि मन्वते ॥ ९ ॥

कृष्णप्रिया

श्रीशुकदेवजी ने कहा—राजन् परीक्षित्! किसी एक दिन नन्दकुमार श्रीहरि ने मनोरथ किया कि आज चलो वन में ही कलेवा करेंगे। अतः बड़े सबेरे तड़के उठ गये और सिंगा बजा कर उसकी मनोहर ध्वनि से अपने साथियों को मन की बात जनाते हुए उन्हें जगाया और बछड़ों को भी जगा दिया पुनः बछड़ों को आगे कर वन की ओर व्रज से चल दिये ॥ १ ॥ श्याम सुन्दर से स्नेह रखने वाले हजारों ग्वाल बाल, छींके, वेंत, सींग, और वंशी लेकर और अपने हजारों से ज्यादातर संख्यावाले अपने अपने बछड़ों को आगे कर बड़े आनन्द के साथ निकले ॥ २ ॥ वहाँ जाकर ग्वालबाल भगवान् कृष्ण के असंख्य बछड़ों में अपने-अपने बछड़े मिलाकर उन्हें चराने लगे और इधर-उधर भिन्न भिन्न प्रकार के बालोचित खेल खेलने लगे ॥ ३ ॥ ग्वालबालों की माताओं ने यद्यपि बालकों को काँच, गुञ्जा, विद्रुम, मणि-सुवर्ण आदि अनेक आभूषणों से सजा दिया था, फिर भी उन्होंने फल-पल्लव पुष्प के गुच्छे एवं मयूर पंख से अपने को खूब अलंकृत किये ॥ ४ ॥

मुष्णन्तोऽन्योन्यशिक्यादीन् ज्ञातानाराच्च चिक्षिपुः । तत्रत्याश्च [1]ततो दूराद्धसन्तश्च पुनर्ददुः ॥ ५ ॥
यदि दूरं गतः कृष्णो वनशोभेक्षणाय तम् । अहं पूर्वमहं पूर्वमिति संस्पृश्य रेमिरे ॥ ६ ॥
केचिद् वेणून् [3]वादयन्तो ध्मान्तः शृङ्गाणि केन च । केचिद् भृङ्गैः प्रगायन्तः कूजन्तः कोकिलैः परे ॥७॥
विच्छायाभिः प्रधावन्तो गच्छन्तः साधु हंसकैः । बकैरुपविशन्तश्च[4] नृत्यन्तश्च कलापिभिः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—अन्योऽन्यशिक्यादीन् मुष्णन्तः च ज्ञातान् आरात् चिक्षिपुः च तत्रत्याः हसन्तः च पुनः दूरात् ददुः ॥ ५ ॥ यदि कृष्णः वनशोभेक्षणाय दूरं गतः तं अहं पूर्वं अहं पूर्वं इति संस्पृश्य रेमिरे ॥ ६ ॥ केचित् वेणून् वादयन्तः, केचन शृङ्गाणि ध्मान्तः केचित् भृङ्गैः प्रगायन्तः परे कोकिलैः कूजन्तः ॥ ७ ॥ विच्छायाभिः प्रधावन्तः हंसैः साधु गच्छन्तः च बकैः उपविशन्तः च कलापिभिः नृत्यन्तः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मुष्णंतश्चोरयंतः ॥ ५ ॥ यदि दूरं गतः कृष्णो भवति तर्हि ॥ ६ ॥ ध्मांतो वादयंतः । भृंगैः सह ॥ ७ ॥ विच्छायाभिः पक्षिच्छायाभिः । कलापिभिर्मयूरैः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आरात् दूरम् । तत्रत्या दूरस्थाः शिक्यादीनिति । शिक्येभ्य उत्तार्य प्रथममेवान्नादिपात्राणि मुद्रितमुखत्वात्पिपीलिकादिदुःप्रवेशानि क्वचित्तरुतले कंटकादिभिरावृत्य स्थापितानीति ज्ञेयम् । तानेव ज्ञातान्सतः आराद्दूरे चिक्षिपुः । तत्रैव विद्रुत्य न तु प्रापिते सति तत्रत्या बालास्ततोपि दूरं चिक्षिपुरेवमनवस्थया स्वस्वद्रव्यमप्राप्नुवतो बालान्रुदन्मुखानालोक्य त एव हसंतो ददुः ॥ ५ ॥ पूर्वमहं कृष्णं स्पृशामि त्वत्तोऽपि पूर्वमहं स्पृशामीत्युक्त्वा तं संस्पृश्य ॥ ६ ॥ वेणून् त्रिविधान् । तदुक्तम् "एष त्रिधा भवेद्वेणुर्मुरलीवंशिकेति च । पावकाख्यो भवेद्वेणुर्द्वादशांगुलदैर्घ्यभाक् ॥ स्थौल्येंगुष्ठमितः षड्भिरेष रंध्रैः समन्वितः" पावकं पावकवदुद्दीपकम् । कामबीजमाख्याति वक्तीति पावकाख्यः । अत एवोक्तम् । "वे ब्रह्मसुखमित्युक्तं णुः कामसुखवाचकः । त उभे यत्र सततं वेणुः स इह कथ्यते ॥" इति । "सप्तच्छिद्रा स्वरैर्युक्ता मुरली चारुनादिनी । शरचंद्रांगुला दैर्घ्ये स्थौल्ये वेणुसमा स्मृता ॥ ततांगुलेंतरे यत्र मुखरंध्रं तथांगुलम् । शिरो वेदांगुलं पुच्छं त्र्यंगुलं सा तु वंशिका ॥ नवरंध्रा स्मृता सप्तदशांगुलमिता बुधैः" इति भक्तिरसामृतात् । कूजंतः शब्दं कुर्वंतः ॥ ७ ॥ कलापो बर्हं ति येषां ते कलापिनः "कलापः संहते बर्हे वाण्यां भूषणतूणयोः ॥" इति मेदिनी ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

शिक्यान्यादिर्येषां यष्ट्यादीनां तान् न तु शिक्यानि तेषाम् अन्नाधारत्वेनान्ननाशे सति हसन्त इत्यादेरयुक्तत्वात् ज्ञातान् सतः केषु चातिमुग्धेषु रुदत्सु सत्सु हसन्त इत्यादि ॥ ५ ॥ ईदृशबाल्यक्रीडास्वपि तदेकपरतां प्रणयविशेषं च दर्शयति—यदीति पञ्चकेन । कृष्णोऽपि तान् विहाय दूरं न यात्येव यदि कदाचित् द्वित्रैः सखिभिर्दूरं गतो भवतीत्यर्थः । किमर्थं वनशोभाया ईक्षणाय अनेन श्रीवृन्दावनस्य परममनोहरत्वं सूचितम् । सम्यक् परिरम्भणादिना स्पृष्ट्वा रेमिरे सुखं प्रापुः ॥ ६ ॥ कदेत्यपेक्षायामाह—केचिदिति चतुर्भिः । वेणून् वादयंतः वेणुवादनस्य मध्ये मध्ये इत्यर्थः । वेणुमिति क्वचित् पाठः एवं ध्मान्त इत्यादि तदावेशात् तत्सङ्गमनासिद्धेर्झटिति पुनरनुसन्धानाच्चेति भावः । यद्वा, संस्पर्शानन्तरं परमानन्देन तदानन्दनेच्छया च पृथक् पृथक् क्रीडां चक्रुरित्यर्थः । तामेवाह—केचिदित्यादिभिः ॥ ७ ॥ वीनां जात्येकवचनविवक्षया छायायाः क्लीबत्वाभावः साध्विति क्रियाविशेषणं पूर्वत्र परत्र च सर्वत्र योज्यं ततस्ततोप्युत्तमं यथा स्यात् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

आदिशब्देन पूर्वोक्तवेत्रादीन् ज्ञातान् सतस्तत्रत्या यत्र चिक्षिपुस्तत्र वर्त्तमाना बालाः ॥ ५ ॥ ईदृशबाल्यक्रीडास्वपि तेषां श्रीभगवदेकपरतामाह–यदीति । कृष्णोऽपि तान् विहाय न यात्येव; यदि कदाचिद्दूरं गतो भवतीत्यर्थः । किमर्थम् ? वनशोभाया ईक्षणाय, अनेन श्रीवृन्दावनस्य परम-मनोहरत्वं सूचितम् । सम्यक्परिरम्भणादिना स्पृष्ट्वा रेमिरे स्पर्शनरूपां क्रीडां चक्रुरित्यर्थः, यद्वा, तत्तक्रीडां कुर्वन्तोऽपि तं संस्पृश्यैव रेमिरे, सुखिनो बभूवुरित्यग्रेऽपि सर्वत्रापि शब्दमवतार्य्य व्याख्येयम्, यद्वा,

---

१. पुनर्दूरा–श्रीधर. वंशी. वीर. विज. शुक. ; ततो दूरा–विश्व. । २. द्धसन्तः पुनराददुः–वीर. । ३. न्नादयन्तो–वीर. । ४. विशन्तोऽन्ये–वीर. ।

संस्पृश्य पश्चाद्रेमिरे क्रीडां चक्रुः ॥ ६ ॥ तामेवाह—केचिदिति चतुर्भिः। कदा दूरं गत इत्यपेक्षायां तेषां वर्गशः पृथक् क्रीडामाह–केचिदिति चतुर्भिः। वादयन्तो भवन्ति, एवमग्रेऽपि सर्वत्र रेमिर इत्यनेनैवान्वयः। ततश्च सर्वत्र शतृङ्प्रत्ययैस्ततत्क्रीडान्तरेव संस्पशनं बोध्यते। साध्विति क्रियाविशेषणं पूर्वैः परैश्च सर्वैरपि योज्यम्। ततो वादनादावुत्तमत्वं यथायथमूह्यम्। तेन च भृंगादिभ्योऽपि गानादौ साधुत्वमुक्तम् ॥ ७–८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आराद् दूरे चिक्षिपुः ॥ ५–७ ॥ वीनां पक्षिणां छायाभिः यत्र पक्षिण उड्डीय गच्छन्ति तत्तच्छायाभिः स्वयमपि धावन्त इत्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अन्योऽन्येषां शिक्यादीन् आदिशब्देन वेत्रविषाणवेणूनां संग्रहः मुष्णन्तः चोरयन्तः ज्ञातान् शिक्यादीनाराद्दूरे चिक्षिपुः तत्रत्यान् तान् पुनः तत आरात् क्षिपन्तः हसन्तः सन्तः पुनराददुः ॥ ५ ॥ वनशोभादर्शनार्थं यर्हि कृष्णो दूरं गतो भवति तदा तं श्रीकृष्णमहमेव पूर्वं स्पृशामीत्येवं वदन्तः तं संस्पृश्य रेमिरे ॥ ६ ॥ केचिच्छृङ्गाणि ध्मान्तः मुखवायुभिः पूरयन्तः भृङ्गैः सह प्रगायन्तः कोकिलैः सह कूजन्तः ॥ ७ ॥ विच्छायाभिः सह प्रधावन्तः कलापिभिर्बर्हिभिः सह नृत्यन्तः साधु यथा तथा गच्छन्तः ॥८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मुष्णन्तः चोरयन्तः शिक्यादीनिति शिक्येभ्य उत्तार्य्य प्रथममेवान्नादिपात्राणि मुद्रितमुखत्वात् पिपीलिकादिदुष्प्रवेशानि क्वचित्तरुतले कण्टकादिभिरावृत्य स्थापितानीति ज्ञेयं तानेव ज्ञातान् सतः आराद्दूरे चिक्षुपुः तत्रैव विद्रुत्य नेतुं प्रस्थिते सति तत्रत्या बालास्ततोपि दूराच्चिक्षिपुः एवमनवस्थया स्वस्वद्रव्यमप्राप्नुवतो बालान् रुदन्मुखानवलोक्य ते एव हसन्तो ददुः ॥ ५ ॥ तं कृष्णं संस्पृश्येति अयमहमितिविद्रुत्य प्रथमं कृष्णमस्पृशं न त्वं न त्वमिति कोलाहलं कुर्वन्तः ॥ ६ ॥ ध्मान्तः वादयन्तः ॥ ७ ॥ वीनां पक्षिणां छायाभिः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शिक्यादीन् शिक्यवेणुविषाणादीन् मुष्णन्तश्चोरयन्तः तान् शिक्यादीन् आरात् दूरे चिक्षिपुस्तत्रत्या दूरस्थाः पुनश्चिक्षिपुः पुनस्तत्रत्या हसन्तः दूराद्ददुः ॥ ५ ॥ वनशोभेक्षणाय वृन्दावनसौन्दर्यदर्शनार्थं दूरङ्गतो भवति तदा तं कृष्णम् ॥ ६ ॥ ध्मान्तः वादयन्तः भृङ्गैः सह प्रगायन्तः ॥ ७ ॥ विच्छायाभिः पक्षिछायाभिः सह प्रधावन्तः कलापिभिर्मयूरैः सह नृत्यन्तः ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

विहारमाह—अन्योऽन्यं शिक्यादीनर्थान्मुञ्चन्तस्तान् क्वचिल्लताभिरावृत्य स्थापितान् ज्ञातान् सत आराद्दूरे चिक्षिपुर्दध्रुः, धावित्वा ततो नेतुं प्रवृत्तेषु तत्रत्या बालास्ततोऽपि दूराच्चिक्षिपुः ततस्तान् विमनस्कान् वीक्ष्य त एव हसन्तः पुनर्ददुः ॥५॥ कृष्णो यदि दूरं गतो भवति तदा तमहमेव पूर्वमस्पृशं नतु त्वमिति कोलाहलिनः संस्पृश्य रेमिरे ॥ ६ ॥ रमणमाह केचिदिति चतुर्भिः। ध्मान्तो वादयन्तः मृगैः कोकिलैश्च सह ॥ ७ ॥ वीणां पक्षिणां छायाभिः कलापिभिर्मयूरैः ॥ ८ ॥

श्रीसुबोधिनी

बालकानामन्योन्यं क्रीडामाह **मुष्णन्त** इति, **अन्योन्यस्य शिक्यादीन् मु**ष्णन्ति, ततोनेन मदीयं नीतमिति **ज्ञात आराद** दूरादेव **चिक्षिपुः** प्रक्षिप्तवन्तः, ततोपि येषु ते शिक्यादयः पतितास्तेपि तान् छिक्यानन्यांश्च **दूरा**च्चिक्षिपुः, **ततो हसन्तश्च पुनर्ददु**स्तेभ्य एव ॥ ५ ॥ **यदि दूरं गतः कृष्णो** भवति तदा तस्मिन् दूरं गते **वनशोभा**या दर्शनार्थ**महं पूर्वं** स्प्रक्ष्यामीत्यहमिकया भगवन्तं **संस्पृश्य रेमिरे** ॥ ६ ॥ तत्र **केचिद्** बाला **वेणून् वादयन्तो** जाताः **केचन शृङ्गाणि ध्मान्तो** वादयन्तो जाताः, **केचित पुनर्भृङ्गैः** सह तथैव **गायन्त**स्तथैव **कोकिलैः** सह **कूजन्तः** ॥ ७ ॥ केचित् पुनरुपरि गच्छतां वयसां **छायाभि**र्मण्डलाकृतिभिः **प्रकर्षेण धावन्तो** जाता **हंसैः** सह **साधु गच्छन्तश्च बकैः** सह तथैवो**पविशन्तः कलापिभिर्मयूरैः** सह **नृत्यन्त**श्च जाताः ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्योन्यस्य शिक्यादीन् मुष्णन्तश्चोरयन्तः। ततः 'अनेन मदीयमपहृतम्' इति स्वामिना ज्ञातान् आराद्दूरादेव चिक्षिपुः प्रक्षिप्तवन्तः, तत्रत्या येषु शिक्यादयः पतितास्ते पुनस्तान् ततोऽपि दूराच्चिक्षिपुः। एवमनवस्थया स्ववस्त्वनुप्राप्नुवतो बालान् रुदन्मुखानवलोक्य हसन्तः पुनर्ददुः ॥ ५ ॥ यदि वनशोभादर्शनार्थं कृष्णो दूरंगतो भवति, तर्हि ते बाला 'अहं पूर्वं स्प्रक्ष्यामि अहं पूर्वं स्प्रक्ष्यामि' इति वदन्तोऽनुद्रुत्पत्य तं संस्पृश्य आश्लिष्य रेमिरे ॥६॥ केचित् 'विजह्रुः' इति पञ्चमेनान्वयः। शृङ्गाणि ध्मान्तः मुखवायुपूरणेन वादयन्तः, भृङ्गैर्भ्रमरैः सह प्रगायन्तः ॥ ७ ॥ उपरि गच्छतां वीनां पक्षिणां छायाभिः सह प्रधावन्तः, हंसैः सह साधु यथा स्यात्तथा गच्छन्तः, बकैः सह तद्वज्जलतीरे उपविशन्तश्च, कलापिभिर्मयूरैः सह नृत्यन्तः ॥ ८ ॥

अन्वितार्थप्रकाशिका

मुष्णन्त इति ॥ अन्योन्यस्य शिक्यादीन् मुष्णन्तश्चोरयन्तः ततोऽनेन मदीयमपहृतमिति स्वामिना ज्ञातान् आराद्दूरादेव चिक्षिपुः प्रक्षिप्तवन्तः । ततः शिक्यादि स्वामिनि तत्रैव विद्रुत्य नेतुं प्रस्थिते तत्रत्या बाला येषु शिक्यादयः पतितास्ते पुनस्तांस्ततोऽपि दूराच्चिक्षिपुः । एवमनवस्थया स्ववस्त्वप्राप्नुवतो बालान् रुदन् मुखानवलोक्य हसन्तः पुनर्ददुः ॥ ५ ॥ यदीति ॥ यदि वनशोभाया ईक्षणाय कृष्णो दूरं गतो भवति तर्हि ते बाला अहं पूर्वं स्प्रक्ष्याम्यहं पूर्वं स्प्रक्ष्यामीति वदन्तोऽनुद्रुत्य तं संस्पृश्य आश्लिष्य रेमिरे ॥ ६ ॥ केचिदिति ॥ केचिद्वेणून् वादयन्तो रेमिरे इति चतुःश्लोक्यामनुषङ्गः । केचन शृङ्गाणि ध्मान्तः मुखवायुपूरणेन वादयन्तः । धमाभाव आर्षः । केचिद्भृङ्गैः सह प्रगायन्तोऽपरेऽन्ये कोकिलैः सह कूजन्तो रेमिरे ॥ ७ ॥ विच्छायाभिरिति ॥ उपरि गच्छतां वीनां पक्षिणां छायाभिः सह प्रधावन्तो रेमिरे । "छायाबाहुल्ये" इति क्लीबत्वाभाव आर्षः । वेरिति जात्येकवचनान्तेन समासो वा । हंसकैः ह्रस्वहंसैः सह साधु यथा स्यात्तथा गच्छन्तः रेमिरे । बकैः सह तद्वज्जलतीरे उपविशन्तश्च रेमिरे । कलापिभिर्मयूरैः सह नृत्यन्तश्च रेमिरे ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शिक्यादीन् मुष्णंतश्चोरयंतः तत्रत्या बालाः तान् ज्ञातान् शिक्यादीन् आरात् समीपे पुनः चिक्षिपुर्न्यस्तवंन्तः न ज्ञातान् शिक्यादीनपि दूरे स्थित्वा युष्माकं शिक्यादयः कुत्र गता इति हसंतश्च पुनर्ददुः ॥ ५ ॥ यदीति वनशोभायाः ईक्षणाय दर्शनार्थेदूरं गतोऽस्ति यदि तर्हि ते गोपाः धावनेन तं संस्पृश्य स्पृष्ट्वा पूर्वमहं स्पृष्टः पूर्वमहं स्पृष्ट इति विवदंतो रेमिरे ॥६॥ ध्मांतः शब्दयंतः भृंगैः समं भृंगगानेन सममित्यर्थः ॥ ७ ॥ विछायाभिर्वीनां गगने उड्डीयमानानां पक्षिणां छायाभिः सहहंसकैः हंसगमनेन तुल्यं साधु यथा तथा बकैः सहतडागादि समीपे उपविश्यंतस्तिष्ठंतः रेमिरे इति प्रतिवाक्यं संबंधः कलापिभिर्मयूरैः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मुष्णन्त इति ॥ अन्योन्येषां ये शिक्यादयस्तान्, आदिशब्देन वेत्रविषाणवेणूनां संग्रहः । मुष्णन्तश्चोरयन्तः सन्तोऽपि, ज्ञातान् शिक्यादीन्, आराद्दूरे, चिक्षिपुः । तत्रत्याश्च पुनः, तान् शिक्यादीन्, चोरयन्तः, ततः दूरात् क्षिपन्तः हसन्तः च सन्तः, पुनः दद्दुः ॥ ५ ॥ यदीति ॥ वनशोभेक्षणाय वनशोभादर्शनार्थं, यदि यर्हि, कृष्णः दूरं गतः भवति, तदा तं श्रीकृष्णं, अहमेव पूर्वं स्पृशामीत्युक्त्वा, अधावत् । ततः, तं कृष्णं, संस्पृश्य, अहं पूर्वं, अस्पृशं, न त्वं, अन्यः, अहं पूर्वमस्पृशं इत्युक्तवन्तः, रेमिरे ॥ ६ ॥ केचिदिति ॥ केचित्, वेणून् वादयन्तः, केचन शृङ्गाणि, ध्मान्तः मुखवायुभिः पूरयन्तः, केचित् भृङ्गैर्भ्रमरैः सह, प्रगायन्तः, परेऽन्ये, कोकिलैः कूजन्तश्च सन्तः, रेमिरे इति पूर्वगतेनान्वयः ॥ ७ ॥ विच्छायाभिरिति ॥ केचित् विच्छायाभिरुड्डीयमानपक्षिच्छायाभिः सह, प्रधावन्तः, केचित्, साधु यथा तथा, हंसकैः हंसैः सह, गच्छन्तः, केचित् च बकैः सह, उपविशन्तः बकवत् ध्यानमुद्रयोपवेशं कुर्वन्तः, केचित् च कलापिभिर्मयूरैः सह, नृत्यन्तः सन्तः रेमिरे ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मुष्णन्त इति : १०.१२.५.

एकेऽन्योन्यं भोज्यजातं हरन्तो दर्शनादिभिः । ज्ञानवत्तां तु संपाद्य कौतुकार्थं पुनर्ददुः ॥ १० ॥
अन्योन्यभोग्यजातेभ्यः स्पृहयन्तः परस्परम् । अलब्धतद्रसास्वादा अप्यमन्यन्त धन्यताम् ॥ ११ ॥

यदि दूरमिति : १०.१२.६.

ज्ञानन्तोऽपि वसन्तमान्तरगृहे नित्योल्लसन्तं परं कान्तारे विहरन्तमात्मकुतुकात् कान्तं नितान्तं श्रियः ।
बुद्ध्या भक्तिरसाश्रये परभिदां स्वीकृत्य सज्जीविताः सेवन्ते भगवन्तमन्तिकगतं नानाविहारैर्मुदा ॥ १२ ॥
एवं सत्त्वरजस्तमोगुणरुचो भोग्यैकबद्धस्पृहाः रज्यन्ते विवशाः प्रपञ्चविपिने विस्मृत्य सर्वेश्वरम् ।
तेषां दूरतरश्चिरेण भवति श्रीजानिरेतद् ध्रुवं युक्तं तत्र तमाप्तुमेव कतिचिद् धावन्त्यहंमानतः ॥ १३ ॥

केचिदिति : १०.१२.७.

एके प्राप्तानन्दा अपि किल कुतुकाज्जनानुकृतिहेतोः । नानाभिधानकरणै रमयन्तीशं रमन्ते च ॥ १४ ॥
भृङ्गाः केऽपि बकाः पिकाः कति परे भेकास्तथा केकिनो हंसाः केऽपि चकोरकाः कति शुकाः कामात्तथा दिष्टतः ।
भूत्वा संसृतिकानने स्वचरितैर्नन्दन्त्यमन्दं तथा गोविन्दं रमयन्ति चैवमखिलोन्नेयो भयात्मस्थितिः ॥ १५ ॥
तेऽहं पूर्वतया ततश्च सकला जीवा वनान्तर्गता मत्वा दूरतरं हृदि स्थितमपि श्रीशं वचोऽगोचरम् ।
प्रारब्धोदितवासनानुगतितः प्राप्तप्रयत्नास्ततस्तां तां योनिमवाप्य तत्र विहृतिं कुर्वन्त्यथानन्दतः ॥ १६ ॥

कृष्णप्रिया

तदनन्तर एक दूसरे का छींका चुरा लेते तो कोई किसी की बेत या तो किसी की बाँसुरी ले जाते, छीके वाले का जान जाने पर कि मेरा छींका इसके पास है तब उस लड़के ने उस छींके को दूसरे के पास फेंक दिया। फिर जब छींका वाला ग्वालबाल वहाँ पहुँचा तब उसने और दूर बढ़ा दिया बाद में हँसकर उसने छींका लौटा दिया ॥ ५ ॥ भगवान् श्रीकृष्ण वन सौन्दर्य देखने के लिये दूर निकल जाते, तब ग्वाल सखा मैं पहले पकड़ लूँ–मैं पहले इस प्रकार आपस में होड़ लगाते और कृष्ण की ओर दौड़ जाते और श्रीकृष्ण को पकड़ लेते और आनन्द से खेलते थे ॥ ६ ॥ कुछ बालक बाँसुरी बजाते, कुछ सिंगा फूँकते, कुछ बालक तो भौंरों के साथ गुनगुनाते और कुछ ग्वालबाल तो कोयल के "कूहू-कूहू" कूजन की नकल करते खेलते हैं ॥ ७ ॥ कितनेक ग्वालबाल आकाश में उड़ते हुए पक्षियों की छाया के साथ साथ दौड़ते, कुछ तो हंसों की चाल से चलने से हंसो की साथ हंस सी गति से चलते थे, कुछ बगुले की नांई आँख मुदकर बगुले के पास बैठते, तब कितनेक बालक मयूरों के साथ मयूरों के समान नृत्य करते विहार करने लगे ॥ ८ ॥

विकर्षन्तः कीशबालानारोहन्तश्च तैर्द्रुमान् । विकुर्वन्तश्च तैः साकं [1]प्लवन्तश्च पलाशिषु ॥ ९ ॥
साकं भेकैर्विलङ्घन्तः सरित्प्रस्रवसम्प्लुताः । विहसन्तः प्रतिच्छायाः शपन्तश्च प्रतिस्वनान् ॥ १० ॥

इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन ।
मायाश्रितानां [3]नरबालकेन [4]सार्धं विजह्रुः कृतपुण्यपुञ्जाः ॥ ११ ॥
यत्पादपांसुर्बहुजन्मकृच्छ्रतो[5] धृतात्मभिर्योगिभिरप्यलभ्यः[6] ।
स[7] एव यद्दृग्विषयः[8] स्वयं स्थितः किं वर्ण्यते दिष्टमतो[9] व्रजौकसाम् ॥ १२ ॥

कर्दमक्षमा

अन्वयः—कीशबालान् विकर्षन्तः तैः द्रुमान् आरोहन्तः च तैः साकं विकुर्वन्तः च पलाशिषु प्लवन्तः ॥ ९ ॥ भेकैः साकं विलङ्घन्तः सरित्प्रस्रवसम्प्लुताः प्रतिच्छायाः विहसन्तः च प्रतिस्वनान् स्वपन्तः रेमिरे ॥ १० ॥ इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन मायाश्रितानां नरदारकेण सार्धं कृतपुण्यपुञ्जाः विजह्रुः ॥ ११ ॥ धृतात्मभिः योगिभिः बहुजन्मकृच्छ्रतः अपि यत्पादपांसुः अलभ्यः स एव स्वयं यद् दृग्विषयः अतः व्रजौकसां कि दिष्टं वर्ण्यते ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कीशबालान् वृक्षशाखासु लंबमानानि वानरलांगूलान्याकर्षतो लांगूलमुंचंतस्तैः सह द्रुमानारोहंतः । तैः सह विकुर्वंतो दंतदर्शनभूविजृंभादिभिस्तैः सह विकारान्कुर्वंतः । पलाशिषु वृक्षेषु प्लवंतः शाखायाः शाखांतरमुद्गच्छंतः ॥ ९ ॥ प्रतिच्छायाः प्रतिबिंबानि ॥ १० ॥ताननतिविस्मयेन श्लोकद्वयेनाभिनंदति । इत्थमिति । सतां विदुषां ब्रह्म च तत्सुखं चानुभूतिश्च तया । स्वप्रकाशपरमसुखेनेत्यर्थः । भक्तानां परदैवतेनात्मप्रदेन नाथेन मायाश्रितानां तु नरदारकतया प्रतीयमानेन सह विजह्रुः, कृतानां पुण्यानां पुंजा राशयो येषां ते । ब्रह्मविदां तदनुभव एव भक्तानामतिगौरवेणैव भजनम् एते तु तेन सह सख्येन विजह्रुः । अहो भाग्यमिति भावः ॥ ११ ॥ बहुजन्मभिः कृच्छ्रेण धृत आत्मा मनो यैस्तैरपि ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कीशो वानरः । 'मर्कटो वानरः कीशः' इत्यमरः ॥ ९ ॥ भेकैर्मंडूकैः । विलंघंतः प्लवंतः । शपंतः गालीप्रदानादिपूर्वकमाक्रोशंतः ॥ १० ॥ तान् गोपान् । श्रीशुकोऽभिनंदति श्लाघते इत्यर्थ इति । ज्ञानिभिर्यत्स्वप्रकाशसुखरूपं मन्यते तेनेति भावः । मायाश्रितानां साधारणपुंसाम् । इति भाव इति । ज्ञानिभक्तान्यपुरुषेभ्यो गोपा एव महद्भाग्या भगवतस्तदनुवर्त्तित्वादिति तात्पर्यम् । एवं तेषां क्रीडां निर्वर्ण्य व्रजौकसामित्युत्तरश्लोकोक्त्या तदादिव्रजवासिमात्राणां सर्वेभ्योऽधिकं सौभाग्यं स्तौति–इत्थमिति । अत्र जगति प्रायस्त्रिविधा जना गण्यंते ज्ञानिनो भक्ताः कर्मिणश्च । तत्र सतां भक्तिमत्त्वेन सच्छब्देनोच्यमानानां ज्ञानिनां ब्रह्म च तत्सुखं चानुभूतिश्च तया सह कृष्णशरीरस्यैव ब्रह्मसुखानुभूतित्वं तेनैव सह तेषां विहारात् । तस्मात्तदाकारस्य प्राकृतत्वमाचक्षाणा ज्ञानि-

---

[1] वल्गन्तश्च—वीर. । [2] सरित्तोयपरिप्लुताः—वीर. । [3] नरदारकेण—श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक. ; नरबालकेन—सुदर्शन. । [4] साकं—श्रीधर. वंशी. ; सार्धं—वीर. विज. जीव. शुक. । [5] कृच्छ्रधौतात्मनि—वीर. । [6] प्यगम्यः—त. पु. श्रीधर. वंशी. विज. ; प्यलभ्यः—वीर. जीव. शुक. । [7] स एषः—इति कस्यचित् । [8] विषये—वीर. । [9] महो—वीर. ।

मानिनोऽन्ये सच्छब्देनैवोच्यंते इति ज्ञेयम्। दास्यं गतानां केवलभक्तिमतां सतां परदैवतेनेष्टदेवेनेति तदानींतना व्रजस्थजनभिन्नाः प्रायो दासभक्ता एवेति त एव निर्दिष्टाः मायां वैषयिकं सुखमाश्रितानां कर्मिणां नरदारकेण प्राकृतमनुष्यबालतया प्रतीयमानेन कृष्णेन सह विजह्रु रिति ज्ञानिनां तदनुभव एव न तु तेन सह विहारस्संभवेत् भक्तानां गौरवेण तद्भजनमेव न तु विहारयोग्यता कर्मिणां तु न तदनुभवः प्रीत्यभावान्न तत्तद्भजनमपि कुतस्तेन विहार इत्येते तु विजह्रुः विहारैस्तमानंदपरिपूर्णमपि प्रेमविलासमयमानंदविशेषं प्रापय्यैव स्वयमपि सर्वतो विलक्षणमाननंदुरित्यर्थः। अतः सर्वेभ्यः सकाशादेत एव कृतपुण्या इति किं वक्तव्यं कृतपुण्यपुंजा एवेति लोकप्रतीत्येवोक्तिर्न तु नित्यसिद्धानां तेषां निखिलेभ्यो ज्ञानिभ्यो भक्तेभ्यश्चोत्कृष्टानां न तत्र प्राचीनपुण्यवत्त्वं वस्तुतो हेतुरिति ज्ञेयम्। पुण्यशब्देन भगवत्प्रियाचरणं वा लक्षणीयं तद्वशीकारातिशयरूपप्रयोजनलाभाय ॥ ११ ॥ तेन सार्द्धं विहारवार्त्ता दूरे तावदास्तां तत्संबंधिवस्तुमात्रमपि दुर्लभमित्याह—यस्य पादपांसुरेकोऽपि धूलिकणः। यद्वा—यस्य पादपानां विहारास्पदवृंदावनीयवृक्षाणामंशुरेकः किरणोऽपि। यद्वा—यत्पादौ पिबंति सप्रेम निरीक्षंते ये भक्तविशेषास्ते मंशुर्दूरतः किरणच्छटापि धृतात्मभिरेकाग्रीकृतचित्तैर्लब्धुमनर्हः। 'नायं सुखापो भगवान्' इतिपूर्वोक्तेः। स्वयं स्थित इति। स्वदर्शनसाधनमनपेक्ष्येत्यर्थः। दिष्टं भाग्यम्। यद्वा—दिष्टमहः दिष्टस्य तेज उत्सवो वेति विश्वनाथः। संमुखस्थितमिवावलोक्याह–स एष इति। येषां नेत्रगोचरः। स्वयं कृष्णः। अहो इत्यानंदे। दिष्टं दैवम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तैः कीशैः अन्यत्तैः यद्वा कीशबालान् वानरशिशून् वृक्षशाखालम्बमानलाङ्गूलग्रहणेनाकर्षन्तः सममन्यत् ॥ ९ ॥ स्रवेण गिर्य्यादिनिर्झरेण सम्प्लुताः पूरिताः इति तासां क्षुद्रत्वमुक्तं विहसन्तः उपहसन्तः प्रातस्तासु महादैर्ध्यदर्शनात् किंवा विशेषेण हसन्तः भुजाद्युत्क्षेपणादिना विविक्त्वप्राप्तेः। यद्वा, प्रतिबिम्बानि मुखवैकृत्यादिपूर्वकम् अनुकुर्वन्तः ॥ १० ॥ सतां परमस्वरूपसत्ताविर्भाववतां यद्वा ब्रह्मपदसान्निध्यात् सद्विशेषाणाम् उभयथा ज्ञानिनामित्येव अनुभूतिः जडप्रतियोगिस्वप्रकाशवस्तु सैव सुखम् आत्मत्वेन पर्य्यवसिततया निरुपाधिपरमप्रेमास्पदत्वात् सैव बृहत्तमपर्यायब्रह्माख्या सर्वेषां परमस्वरूपत्वात् तेषां केवलतद्रूपेण स्फुरता दास्यं गतानां दास्यभक्तिमताम् ऐश्वर्यादिपूर्णतया ततोऽपि परेण दैवतेन सर्वाराध्येन रूपेण स्फुरता महिमदर्शनार्थं तत्स्फूर्तिद्वयस्य विरलतामाह, मायाधिकारपतितानां तु यत्किञ्चित् नरदारकरूपेण ज्ञानभक्त्योरभावान्न तु तत्तद्रूपेणापि तेन सार्द्धं विजह्रुः सहार्थतृतीयया स्वप्रेम्णा वशीकृत्याऽऽत्मसाङ्गतामापादितेन तेन विहारमपि कृतवन्त इत्यर्थः। अतस्तेभ्यः सर्वेभ्यः कृतपुण्यपुञ्जा इति लोकोक्तिः वस्तुतस्तु कृतानां चरितानां भगवतः परमप्रसादहेतुत्वेन पुण्याश्चारवः पुञ्जा येषां त इत्यर्थः "पुण्यं तु चार्वपि" इत्यमरः। अत्र श्रीमन्मुनीन्द्रचरणानामिदं विवक्षितं भगवांस्तावदसाधारणस्वरूपैश्वर्यमाधुर्यस्तत्त्वविशेषः तत्र स्वरूपं परमानन्दः ऐश्वर्यमसमोर्द्ध्वानन्तस्वाभाविकप्रभुता माधुर्य्यमसमोर्द्ध्वतया सर्वमनोहरं स्वाभाविकरूपगुणलीलादिसौष्ठवं तत्तदनुभवसाधनं च क्रमेण ज्ञानं ज्ञेयं भक्त्याख्यगौरवमिश्रा प्रीतिः शुद्धप्रीतिश्च एतत्त्रिविधसाध्यसाधनाभावेन मायाश्रितानां स्फूर्त्याभास एव केनाप्यंशेन वस्तुस्पर्शात् "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति न्यायेन "तं ब्रह्म परमं साक्षात् भगवन्तमधोक्षजम्। मनुष्यदृष्ट्या दुष्प्रज्ञा मर्त्यात्माना न मेनिरे" इत्यादिवत् अत्र ब्रह्मादित्रयक्रमश्च पूर्ववदेव तत्र भक्त्येश्वरतया स्फूर्तिस्तु तत्पूर्वतः पूर्णा "यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः" इति "भक्त्या मामभिजानाति" इत्यन्तर्भूतसर्वज्ञानवृत्तित्वात् शुद्धप्रीतिस्तु ततोऽपि श्लाघिष्यते "अहो भाग्यमहो भाग्यम्" इत्यादिना ततश्च निर्विशेषज्ञानेन स्वरूपानुभवः गौरवमयज्ञानेन ऐश्वर्यानुभवः प्रीतिमयज्ञानेन माधुर्यानुभव इति शुद्धपरममधुरतास्फूर्तिस्तु निर्विशेषः ज्ञानिषु न विद्यत एव दासेष्वपि गौरवेण सङ्कुचितचित्ततया यथेष्टग्रहणाशक्तेर्नातीचोत्पद्यते वस्तुविचारं तु सैव सर्वतः स्वाद्वी "आत्मारामश्च मनुजः" इत्यादिपरिनिष्ठितोऽपि नैर्गुण्य इत्यादिभ्यः तथा "ब्रह्मा भवोऽहमपि यस्य कलाः कलया" इत्याद्यैश्वर्यज्ञानवारिधेरपि श्रीसङ्कर्षणस्य भ्रातृस्नेहपरिप्लुत इत्यादि "वृषायमाणौ नर्दन्तौ युयुधाते परस्परम्" इत्यादिभावेभ्यः तदेवं स्थिते सखिचेतसो गौरवासङ्कुचिततया तत्प्रीतेश्च तदसङ्कीर्णत्वेन पूर्णतया स्वभावविशेषेण च प्रतिक्षणमपि विकासितया तेन तच्चेतसापि पुनस्तादृशतया श्रीकृष्णचेत आदैरपि तद्वदेव तथाविधतया सखीनामेव रूपगुणसमुद्भूतलीलामाधुर्यानामसाधारणीस्फूर्तिरित्येव किं वक्तव्यं वारिधाविव तत्र निर्मथ्यमाधुर्य्यामृतसमुद्भवकर्तृत्वं च स्वप्रीतिमाधुर्यकृततद्वशीभावत्वं च दृश्यते तत्तच्च न तत्र तत्र दृश्यत इति सर्वेभ्यः कृतपुण्यपुञ्जत्वमस्मांश्चमत्कारयतीति, अन्यत्तैः। यद्वा, पूर्वार्धं पूर्ववद्व्याख्याय तदानीं तदवतारे मायाश्रितानां प्रापञ्चिकानामपि कृपयाश्रितानां मधुरनराकारेण स्फुरता स्वयं भगवतेत्यादिव्याख्येयं यद्वा मायाश्रितानां तत्कृपाविशेषमवलम्बमानानामिति परममधुरतया स्फुरता तु सार्द्धं विजह्रुरित्यादि योज्यम् ॥ ११ ॥ अहो दूरे तावदास्तामेषां तेन सह निरन्तरविचित्रविहारसौभाग्यमहिमाव्रजवासिमात्राणामपि तद्दर्शनमात्रसौभाग्यमपि परममहद्भिरप्यन्यैरलभ्यमित्याह—यदिति। यस्य पादसम्बन्धी कुत्रापि पतितः पांसुरेकोऽपि साक्षात् स एव किं वा पादपांसुरिति कथञ्चित् कश्चिदपि सम्बन्धोऽपीत्यर्थः। किं वा यस्य पादपः श्रीवृन्दावनकदम्बादिवृक्षः यद्वा यस्य पादौ पिबन्ति सप्रेम निरीक्ष्यन्त इति भक्तविशेषास्तेषां अंशुः दूरतः किरणच्छटापि बहुभिर्जन्मभिस्तत्र यमनियमप्रत्याहारादिक्लेशैर्धृतः स्थिरीकृत आत्मा मनो यैः अतो योगिभिः समाधियुक्तैरपि अलभ्यः लब्धुमशक्यः स एव स्वयं भगवान् श्रीकृष्णः येषां दृशोर्विषयः चक्षुर्भ्यां

साक्षात् दृश्यः स्वयं स्वभावतः स्वरूपतो वा स्थितः स्थिरतया नित्यमस्ति "यच्च किञ्चिज्जगत्सर्वं व्याप्य नारायणः स्थितः" इतिवद् अहो आश्चर्य्ये तेषां दिष्टं भाग्यं यद्वा दिष्टस्य महः प्रभाव इत्यर्थः। यद्वा, दिष्टेन महः विचित्रोत्सवः किं वर्ण्यते वर्णयिष्यते अपि तु वर्णयितुं न शक्यते इत्यर्थः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत एव क्वचित् प्र–शब्दश्च। तैः कीशैः। अन्यत्तैर्व्याख्यातम्, यद्वा, कीशबालान् वानरशिशून् वृक्षशाखालम्बमानलांगूलग्रहणेनाकर्षन्तः; सममन्यत्। स्रवेण पर्वतादिनिर्गत-निर्झरेण संप्लुताः पूरिता इति सरितां तासां क्षुद्रत्वं ज्ञेयम्। विहसन्त उपहसन्तः प्रातः स्वदेहच्छायास्वंगानां महास्थौल्यदैर्घ्यादिदर्शनात्; किंवा विशेषेण हसन्तो बाह्वाद्यंगोत्क्षेपणादिना विविक्तत्वप्राप्तेः, यद्वा, तेनैव विविधाः सतीर्विशेषेण हसन्तोऽनुकुर्वन्तः प्रतिच्छायाकर्त्तृकोऽप्यनुकारस्तेषूपचरितः ॥ ९–१० ॥ सतां सत्तामात्रेण वर्त्तमानानां मुक्तानामित्यर्थः, ब्रह्म आत्मतत्त्वम्, तस्य सुखेनानायासेनानुभूतिः साक्षात् परिस्फूर्त्तिस्तथा तद्रूपेणेत्यर्थः, तेषां सैव परम-पुरुषार्थरूपेति मननेन श्रीभगवत्येव तथा बुद्धेर्भक्तानां परमभजनीयेन प्रेमभक्तिसुखस्वरूपेणेत्यर्थः मायाश्रितानामज्ञानां नरदारकेण नरत्वविदारकेण जीवत्वनाशकेन मुक्तिप्रदेनेत्यर्थः। यद्वा, मायां दुर्गामपि आ सम्यक् (भा० १०।२२।४) 'कात्यायनि महामाये' इति मन्त्रजपादिना श्रीकृष्णप्राप्तये परमश्रद्धया श्रितानां सेवितवतीनां श्रीगोपीनां भगवत्–प्रियतमानां भाविनोऽपि तद्व्रतस्य श्रीशुक परीक्षित् संवादात् प्राक्तन तयात्रोक्तिरविरुद्धा, नरदारको लौकिकसुन्दरकुमारस्तत्तया प्रतीयमानेनेत्यर्थः, प्रेमभरस्वभावेन तासु तथैव तत्परिस्फूर्त्तेः। यद्वा, नराणां दाराः कलत्राणि. तेषां केन सुखस्वरूपेण। एवं सदादीनां यथोत्तरं श्रेष्ठ्यसिद्ध्या वाचोयुक्तिक्रमोऽपि संगच्छेत। पुण्यान्यत्र (भा० ११।१९।२७) 'धर्म्मो मद्भक्तिकृत् प्रोक्तः' इति श्रीभगवद्भक्त्या प्रेमलक्षणाया भक्तेः साधनानि श्रवणादीनि, कृतास्तेषां पुञ्जा यैस्ते, यद्वा, कृते सत्ययुगे यदेकं श्रीभगवद्ध्यानलक्षणं पुण्यम्, तस्य पुञ्जा येषु तद्रूपा वा, यद्वा, साधितानुरागपुञ्जाः श्रीगोपीनां प्रायोदिवाविरहो रात्रावपि स्वच्छन्दं रतिर्न सिध्येत्, एते त्वित्थं पूर्वोक्तस्वाच्छन्द्यादिप्रकारेण श्रीवादरायणेर्वनान्तर्विहारलोभात्तासामेव (भा० १०।२१।७) 'अक्षण्वतां फलम्' इत्याद्युक्तिवत् ॥ ११ ॥ अहो दूरे तावदास्तामेषां तेन सह निरन्तरविचित्रविहारसौभाग्यमहिमा, तत्सन्दर्शनमात्र भाग्यमाहात्म्यमपि केन निर्वक्तुं शक्यते ? यद्वा, आस्तां सहचराणां तेन सह तथा तथा विहरतां सौभाग्यमाहात्म्यम्, व्रजवासिनामपि सर्वेषां तत् केन वर्ण्यमित्याह यदिति। यस्य पादसम्बन्धी कुत्रापि पतितः पांशुरेकोऽपि साक्षात् स एव, किंवा कथञ्चित् कश्चिदपि सम्बन्ध इत्यर्थः। यद्वा, यस्य पादपः श्रीवृन्दावनकदम्बादिवृक्षस्तस्यांशुर्दूरतः किरणच्छटापि, बहुभिर्जन्मभिस्तत्र च यम-नियम-प्रत्याहारादि-क्लेशैर्धृतः स्थिरीकृत आत्मा मनो यैः, यतो योगिभिः समाधियुक्तैरप्यलभ्यो लब्धुमशक्यः, स एव स्वयमवतारी श्रीकृष्णो येषां दृशोर्विषयश्चक्षुर्भ्यां साक्षाद्दृश्यः, स्थितः स्थिरतया नित्यं बभूव, यद्वा, स एव दृगिन्द्रियस्य विषयः, स्वयं स्वभावतः स्थितो भक्तिविशेषेण चित्तान्तःसंलग्नत्वात् सर्वत्र श्यामसुन्दरः श्रीवल्लवेन्द्रनन्दनो यैः सदा दृश्यत इत्यर्थः। एवं सत्यपि यत्तेषां कदाचिदन्यदर्शनम्, तत् केवलं क्रीडार्थं श्रीभगवत्सुखपरिपोषायेति ज्ञेयम्। अहो आश्चर्य्ये, तेषां दिष्टं भाग्यम्, यद्वा दिष्टस्य महः प्रभाव इत्यर्थः, यद्वा, दिष्टेन महो विचित्रोत्सवः किं वर्ण्यते वर्णयिष्यते, अपि तु वर्णयितुं न शक्यत इत्यर्थः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कीशा वानराः तेषां बालान् तोकान् तद्विकर्षणेन तैर्युद्धादिकौतुकं सम्पादयन्तः बालान् पुच्छान्वा विकुर्वन्तः नेत्रभृकुट्याद्यारोपणेन युद्ध्यन्तः ॥ ९ ॥ भेकैर्मण्डूकैः प्रतिच्छायाः प्रतिबिम्बान् प्रतिस्वनान् शून्यमहादिनिष्ठध्वनीन् ॥ १० ॥ दास्यङ्गतानां सतां प्रपन्नानां ब्रह्मसुखानुभूत्या करणभूतया परदैवतेन भासमानेन अन्येषां मायाश्रितानां दुर्गादेव्याद्याश्रितानां नरबालकत्वेन प्रतीयमानेन सह विजह्रुः ॥ ११ ॥ श्रीकृष्णे योगिध्यानविषये श्रीनारायणस्वरूपेण दृग्विषयत्वेन प्रत्यक्त्वं वदतां निरासोऽनेन विधीयते यत्पादपांसुरिति वशीकृतमनस्कैः यत्पादपांसुरपि अप्राप्यः योगिभिः नित्यात्मज्ञानपूर्वकमसङ्गकर्मफलभूतस्थितप्रज्ञतालक्षणयोगनिष्ठैः स एव भक्तियोगविरूपैः शुभाश्रयविग्रहो नारायणः न त्वन्यः न त्विन्द्रजालवन्मायाधृतरूपः स्वयं श्रीमन्नारायणः परब्रह्म परमात्मादिशब्दवाच्यः अहो महदिदमाश्चर्य्यं व्रजौकसाम् इति स्वीयदेशवासित्वमात्रं दर्शनहेतुरित्युच्यते दिष्टं दैवं श्रीभगवदानुकूल्यम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कीशबालान् वृक्षशाखास्वधो लम्बमानानि वानराणां लाङ्गूलानि आकर्षन्तः तैर्वानरैः सह पुनर्द्रुमानारोहद्भिरोहन्तः तैर्वानरैः सह दन्तवदनभ्रूविजृम्भादिभिर्विकारान् कुर्वन्तः पलाशिषु वृक्षेषु वल्गन्तः प्लवन्तः शाखायाः शाखान्तरं गच्छन्त इति यावत् ॥ ९ ॥ भेकैर्मण्डूकैः सह विलङ्घन्तः लङ्घमानाः सरितो यमुनायाः तोयेन परिप्लुताः आर्द्रास्सन्तो अन्योन्यप्रतिबिम्बानि हसन्तः प्रतिस्वनान् शपन्तः दूषयन्तश्च ॥ १० ॥ तद्विहारमभिनन्दन्नाह–इत्थमिति द्वयेन। ब्रह्मानन्दानुभवेन तद्दास्यं गतानां ब्रह्मानन्दानुभवसम्भूतप्रीतिकारितदास्यं गतानामित्यर्थः। सतां साधूनां परदैवतेनापि मायाश्रितानां प्रकृतिबद्धानां मनुजबालभूतेन

श्रीकृष्णेन सहेत्थं विजह्रुर्विहृतवन्तः तत्र हेतुं वदन् गोपान् विशिनष्टि—कृताः पुण्यानां पुञ्जा राशयो यैस्तथाभूताः पूर्वजन्मनीति शेषः ॥ ११ ॥ कृतपुण्यपुञ्जत्वमेव प्रपञ्चयन् विस्मयते—यत्पादेति। बहुषु जन्मसु कृच्छ्रं कायशोषणात्मकं येषां धौतः विशुद्धः आत्मा मनो येषां तैश्च योगिभिरपि यस्य पादपांसुरप्यलभ्यः स एव भगवान् स्वयमेव येषां व्रजौकसां दृग्विषये स्थितः दृग्विषयतां प्राप्तस्तेषां दिष्टमदृष्टं किं कियदिति वर्ण्यते अहो आश्चर्य्यमेतत् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कीशबालान् तच्छिशून् ॥ ९ ॥ स्रवा निर्झराः प्रतिच्छायाः प्रतिबिम्बानि मुखवैकृत्यादिपूर्वकमनुकुर्वन्तः ॥१०॥ इत्थमिति द्वयम् ॥ ११—२६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ महावनलीलासमाप्तौ वृन्दावनलीलामाह—विकर्षन्तः कीशबालानित्यादि। बहुभिः कीशबालान् कीशशिशून् तन्मातृभिः क्रोडे कृत्वा नीयमानान् विकर्षन्तः। तेषां विकर्षणमालोक्य वृक्षानारोहन्तीभिस्ताभिः समं वृक्षांश्चारुरुहुः। एवमेतत् सर्वं सुगमं स्वमतञ्च ॥ ९–१० ॥ एवं भगवता सह क्रीडतो व्रजबालान् प्रशंसन्नाह—इत्थं सतामित्यादि। मायाश्रितानां मायया कैतवेनाश्रितानां निष्कैतवानां सतामुत्तमानां दास्यं गतानां भक्तानां मध्ये कृतपुण्यपुञ्जाः कृतं कारितं पुण्यपुञ्जं यैः, अर्थविद्द्रष्टॄणां श्रोतॄणाञ्च, ते गोपबाला नरदारकेण नरदारकाकारेण तेन कृष्णेन सममित्थं विजह्रुः। कीदृशेन ? ब्रह्मसुखानुभूत्या ब्रह्मसुखानुस्वरूपेण, अथवा, एकदेशस्त्रीत्वात् स्वमत्यै पुरुषायेतिवत् पुंलिङ्गेऽपि स्त्रीवद्रूपम्, नरदारकाकृतिना ब्रह्मानन्दज्ञानेन (भा. ७।१०।४८, ७।१५।७५) गूढं परं ब्रह्म मनुष्यलिङ्गम्" इत्याद्युक्तेः। पुनः कीदृशेन पर-दैवतेन देवतानां परोपदेवताधिदेवेन, अथवा परदैवतेन सार्द्धं विजह्रुः। ब्रह्मसुखानुभूत्येति करणे तृतीया। तत्र विहारे तेषां य आनन्द आसीत्, सैव ब्रह्मसुखानुभूतिस्तया। विशेषणे वा तृतीया। कीदृशेन नरदारकेण ? 'नॄ विक्षेपे', नरो विक्षेपः, तस्य दारकेण खण्डकेन। अथवा, सतां ज्ञानिनां ब्रह्मसुखानुभूत्या, तेऽपि तदतिरिक्तमन्यद्ब्रह्मेति न जानन्तीत्यर्थः। दास्यं गतानां परदैवतेन परमेश्वरेण, पूर्ववन्मायाश्रितानां रागिणां नरदारकेण विक्षेपखण्डकेन परमनिर्वृत्तिकारिणां नरबालकपक्षेऽनुत्कर्षादचमत्कारः ॥ ११ ॥ इदानीं वयस्यबालकानां सौभाग्यं तावदतिदुर्लभमेव; तदास्तां दूरे व्रजवासिमात्रस्यैव सौभाग्यं वर्णनीयं न भवतीत्याह—यत्पादपांशुरित्यादि। बहुजन्मकृच्छ्रतो बहुजन्मकृततपस्यातो हेतोर्बहुजन्मकृच्छ्रेण वा, धृतो निगृहीत आत्मा मनो यैस्तथाभूतैरपि योगिभिर्यत्पादपांशुरप्यलभ्यः, स एष येषां दृग् विषयः सन् स्थितः, वर्त्तमाने क्तः, स वर्त्तमानो नित्यप्रवृत्तः। एतेन व्रजस्थत्वस्य नित्यत्वम्, अन्यथा दृग्विषय इत्यनेनैव सिद्धेः, स्थित इत्यधिकपदं स्यात्। तत्र कारणान्तरं नानुसन्धेयमित्याह—स्वयं स्वेच्छयैव, अथवा, स्वयं स्वरूपेणैव। अहो विस्मये, व्रजौकसां दिष्टं भागधेयं किं वर्ण्यते ? वर्णनीयं न भवतीति शेषः ॥ १२–३८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

विकर्षन्तः कीशबालानित्यादि। कीशबालान् क्रोड़े कृत्वा तन्मातृभिर्नीयमानान् बालान् विकर्षयन्तस्तेषां विकर्षणमालोक्य द्रुमानारोहद्भिस्तैः कीशैः सह द्रुमानारुरुहुः। कीशबालान् कीशलाङ्गूलानीति वा ॥ ९–१० ॥ इत्थं सतामित्यादि। इत्थमनेन प्रकारेण ते तेन सह विजह्रुरित्युभयत्र विशेष्यपदाकरणं हर्षोत्कर्ष–प्रतिपादकम्, ततो न्यूनपदमत्र गुणः। ब्रह्मसुखानुभूत्या ब्रह्मसुखानुभवस्य 'ह्रस्वश्चङ् भवति' इत्यनेन वैकल्पिकं नदीत्वम्, तेन ङस आस 'अनादरे षष्ठी' ब्रह्मसुखानुभूतिमनादृत्य सतां वर्त्तमानानाम्, अतो दास्यं गतानामेकान्तभक्तानां परदैवतेनाभीष्टदेवेन मायायाश्रितानां माययाऽस्पृष्टानाम्। अथवा, एवम्भूतानां मध्ये कृतपुण्यपुञ्जाः। तेन कीदृशेन ? नरदारकेण नरदारा नरस्त्रियः, (भा. ११।१०।३) "प्रत्याकृष्टुं नयनमबलाः" इत्यादि वक्ष्यमाणत्वात् तासां कं सुखं यस्मात्, कः कामो वा। यद्वा, ब्रह्मसुखादप्यनुगता या भूतिः सम्पत् तया दास्यं गतानां गोपीनां गोपानां वा परदैवतेन, मायाश्रितानां मायाया आश्रितानामसुराणां नरदारकेण मनुष्यबालकवत् प्रतीयमानेन। यद्वा, मायाया आश्रितं मायाश्रयो येषु ते परम-मायिनो भवादयस्तेषां नरो नयः, 'नॄनये' इत्यतोऽनि सिद्धेः, तस्यापि दारकः खण्डकः, मायिनामपि परम–मोहनेन, 'नॄ विक्षेपे' नरो विक्षेपो वा तस्य दारको मायाश्रितानां विक्षेप-खण्डनेन ॥ ११ ॥ यत्पादपांशुरित्यादि। यस्य पादरजो बहुजन्मभिर्यत् कृच्छ्रं तपस्ततो हेतोर्धृतो वशीकृतो आत्मा यैस्तैरात्मारामैरप्यलभ्यम्, स एव न तु रूपान्तरेण; अतः श्रीनन्दकिशोर-रूपमनादीति ज्ञेयम्। तर्हि कथं नन्दगृहे ? तत्राह—स्वयं स्थितो व्रजे स्वस्वरूपेणैव स्थितः, स एव स्वयं दृग्विषय इत्यनेनैव सिद्धे स्थित इति करणं व्रजलीलाया नित्यत्व-सूचनार्थम् ॥ १२–३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कीदृशान् बालान् ? वृक्षशाखासु लम्बमानानि बानरलाङ्गूलानि तैरमुच्यमानैश्च लाङ्गूलैर्दृढं धृतैर्द्रुमानारोहन्तः विकुर्वन्तः भ्रूविजृम्भादिमुखविकारान् कुर्वन्तः तथा तैस्सह पलाशिषु वृक्षेषु प्लवन्तः शाखायाः शाखान्तरं गच्छन्तः ॥ ९ ॥ स्रवेण

नद्यादितटेभ्यः परिस्रुतजलेन सम्प्लुताः पूरिताः सन्ति सरित् क्षुद्रधाराः प्रतिच्छायाः स्वप्रतिबिम्बान् भुजोत्क्षेपादिभिर्विहसन्तः प्रतिस्वनान् प्रतिध्वनीन् शपन्तः रे रे कस्त्वं ब्रूषे इति स्वप्रतिध्वनिं श्रुत्वा कुपिताः किमरे मामेव रेरेकारेणाक्षिपसि तत्त्वमद्यैव शीघ्रं म्रियस्वेति पुनः पुनरनवस्थया आक्रोशन्तः ॥ १० ॥ एवं तेषां क्रीडां निर्वर्ण्य व्रजौकसामित्युत्तरश्लोकोक्त्या तदादिव्रजवासिमात्राणामेव सौभाग्यं सर्वेभ्यः एव सकाशादधिकत्वेन स्तौति—इत्थमिति । अत्र जगति प्रायस्त्रिविधा एव जना गण्यन्ते; ज्ञानिनो भक्ताः कर्मिणश्च, तत्र सतां भक्तिमत्त्वेन सच्छब्देनोच्यमानानां ज्ञानिनां ब्रह्म च तत् सुखं च अणुभूतिश्च तया सहेति कृष्णशरीरस्यैव ब्रह्मसुखानुभूतित्वं तेनैव सह तेषां विहारात् तस्मात्तदाकारस्य प्राकृतत्वेमाचक्षाणाः ज्ञानिमानिनोऽन्ये सच्छब्देन नैवोच्यन्ते इति ज्ञेयं दास्यङ्गतानां केवलभक्तिमतां सतां परदैवतेनेष्टदेवेनेति तदानींतना व्रजस्थजनभिन्नाः प्रायो दासभक्ता एवेति त एव निर्दिष्टा मायां वैषयिकं सुखमाश्रितानां कर्मिणां नरदारकेण प्राकृतमनुष्यबालतया प्रतीयमानेन कृष्णेन सहैते विजह्रुरिति ज्ञानिनां तदनुभव एव नतु तेन सह विहारः सम्भवेत् भक्तानां गौरवेण तद्भजनमेव नतु विहारयोग्यता कर्मिणां तु न तदनुभवः प्रीत्यभावान्न तद्भजनमपि कुतस्तेन सह विहार इत्येते तु विजह्रुः विहारैस्तं स्वानन्दपरिपूर्णमपि प्रेमविलासमयमानन्दविशेषं प्रापय्यैव स्वयमपि सर्वतो विलक्षणमानन्नदुरित्यर्थः अतः सर्वेभ्यः सकाशादेते एव कृतपुण्या इति किं वक्तव्यं कृतपुण्यपुञ्जा एवेति लोकप्रतीत्यैवोक्तिर्न तु नित्यसिद्धानां तेषां निखिलेभ्यो ज्ञानिभ्यो भक्तेभ्यश्चोत्कृष्टतमानां तत्र न प्राचीनपुण्यवत्त्वं वस्तुतो हेतुरिति ज्ञेयं पुण्यशब्देन भगवत्प्रियाचरणं वा लक्षणीयं तद्वशीकारातिशयरूपप्रयोजनलाभाय ॥ ११ ॥ तेन सार्द्धं विहारवार्त्ता दूरे तावदास्तां तत्सम्बन्धिवस्तुमात्रमपि दुर्लभमित्याह यदिति । पांसुरेकोपि धूलिकणः यद्वा यस्य पादपानां विहारास्पदं वृन्दावनीयवृक्षाणाम् अंमुरेकः किरणोपि धृतात्मभिरेकाग्रीकृतचित्तैर्लब्धुमनर्हः "नायं सुखापो भगवान्" इति पूर्वोक्तेः स्वयं स्थित इति स्वदर्शनसाधनमनपेक्ष्यैवेत्यर्थः । दिष्टं भाग्यं यद्वा दिष्टमहः दिष्टस्य तेज उत्सवो वा ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कीशबालान् वृक्षस्थवानरलाङ्गूलानि निकर्षन्तः तैः गृहीतलाङ्गूलैः सह द्रुमानारोहन्तः तैरेव साकं विकुर्वन्तः तद्धर्षणार्थं वाग्वदनादिविकारान् कुर्वन्तः पलाशिषु वृक्षेषु प्लवन्तः वानरवत् शाखायाः शाखान्तरमुद्गच्छन्तः ॥ ९ ॥ भेकैर्मण्डूकैः प्रतिच्छायाः प्रतिबिम्बानि प्रतिस्वनान् गम्भीरवनप्रदेशाद्युद्भवानि तद्वचनानां प्रतिवचनानि ॥ १० ॥ तानभिनन्दति । इत्थमिति द्वाभ्याम् । सतां परभक्तिसाधनभूतज्ञानेच्छूनां ब्रह्मसुखानुभूत्या ब्रह्म बृहत्स्वरूपगुणशक्तिवस्तु च तत्सुखं च अनुभूतिर्ज्ञानस्वरूपं च तथा ज्ञेयेनेत्यर्थः । दास्यं गतानां ज्ञानभक्तिसंपन्नानां भगवत्प्राप्त्यर्थं यतमानानां परदैवतेन भजनीयेनेत्यर्थः । माययाश्रितानां मायामोहितानां नरदारकेण सार्द्धं सह कृतः पुण्यपुञ्जो यैस्ते विजह्रुः विहृतवन्तः अत्याश्चर्यरूपं तेषां भगवत्कृपापात्रत्वमिति भावः ॥ ११ ॥ बहुजन्मभिः कृच्छ्रेण धृत आत्मा मनो यैस्तैर्योगिभिः भगवद्भाववर्जितकर्मादिपरैर्यत्पादपांसुरलभ्यः ज्ञानभक्तिसिद्धये कर्मादिपरैस्तु स लभ्य एवेत्यपिशब्दाद्बोध्यम्—

"जन्मान्तरसहस्रेषु तपोदानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥

इति वचनात् ॥ १२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कीशानां कपीनां बालान् वृक्षशाखासु लम्बितानि तेषां लाङ्गूलान्यकर्षन्तः दृढं धृतैस्तैर्लाङ्गूलैर्द्रुमानारोहन्त विकुर्वन्तस्तैः सह भ्रूविजृम्भादिमुखविकारान् कुर्वन्तः पलाशिषु तरुषु प्लवन्तः शाखायाः शाखान्तरमुद्गच्छन्तः ॥ ९ ॥ स्रवेण गिरिनिर्झरेण सम्प्लुताः पूरिताः सरितः क्षुद्रप्रवाहाः भेकैः साकं विलङ्घ्यन्तः प्रतिच्छायाः स्वप्रतिबिम्बान् हसन्तः प्रतिस्ववान् स्वप्रतिध्वनीन् शपन्तः कस्त्वं रे मामनुकुरुषे म्रियस्वेत्याक्रोशन्तः ॥ १० ॥ एवं तेषां विहारं निर्वर्ण्य तान् सरोमाञ्चमभिनन्दति इत्थमिति । ते बाला हरिणा सार्द्धमित्थं विजह्रुः । कीदृशेनेत्याह—सतां ज्ञानिनां ब्रह्मसुखानुभूत्या सुखानुभूतिरूपेण ब्रह्मणा दास्यं गतानां दास्यभक्तिमतां विरिञ्चाद्यधिकृतां परदैवतेन पूर्णैश्वर्येण प्रभुणा मायाश्रितानां वैषयिकानन्दसेविनां कर्मिणान्तु नरदारकेन मायिकमनुष्यबालकतया प्रतीतेनेत्यर्थः । सतां निस्तरङ्गार्णववद्विज्ञानानन्दवृहद्वस्तुतया समाधौ विज्ञानं दास्यभाजान्तु गौरवेणैव भजनं ज्ञानभक्त्यास्तु निर्निमेषवीक्षणकटाक्षवीक्षणवदन्तरं मन्यन्ते, मायाश्रितानान्तु समाधिदास्यभक्त्योरभावान्न तद्द्वयं तेनातिदुर्लभेन परमपुमर्थेन सर्वेश्वरेण सह तेषां विहारोऽपि सख्यमयोऽभूदिति तत् सौभाग्यं कः शक्नुयाद्वक्तुमित्यर्थः । सहार्थतृतीयया स्व प्रेम्णा वशीकृतेन तेन विहारे तेषां प्राधान्यं बोध्यते कीदृशास्ते कृताः सम्पादिताः पुण्यानां तदनुवृत्तिलक्षणानां चारूणामर्थानां पुञ्जाः यैस्ते "पुण्यन्तु चार्वपी"त्यमरः ॥ ११ ॥ तेषां तत्सखानां सौभाग्यवार्त्ता तावद्दूरे तिष्ठतु व्रजवासि-मात्राणामपि तदशक्यं वक्तुमित्याह—यदिति । यस्य कृष्णस्य पादपांशुरेकमप्यंघ्रिरजः यद्वामतरूणामंशुः किरणोऽप्येकः धृतात्मभिरेकाग्रचित्तैर्योगिभिरप्यलभ्यो लब्धुमशक्यः "नायं सुखापो भगवा"नित्यादि पूर्वोक्तेः स एव स्वयं स्थित इति स्वदर्शनोपायमनपेक्ष्यैवेत्यर्थः । अहो परीक्षिन्नृपते ! तेषां व्रजौकसां दिष्टं भाग्यं किं वर्ण्यते इति तन्नित्यपरिकरास्ते इति भावः । तथा च "नन्दः किमकरो"दिति प्रश्नजन्यस्यौष्ण्यस्यात्र निर्गमो दर्शितः ॥ १२ ॥

श्रीसुबोधिनी

कीशा लम्बपुच्छा वानरास्तेषां **बालान्** पुच्छानि **विशेषेण** **कर्षन्तो बालानेव च** धृत्वा तैः सह **द्रुमानारोहन्तो** मुखविकारांश्च **कुर्वन्तो** मर्कटवदेव **पलाशिषु** वृक्षेषु **प्लवन्तः** उत्प्लुत्य गच्छन्तो भूमौ **च** ॥९॥ **भेकै**र्मण्डूकैः सह, **सरितो** नद्यः, **प्रस्रवा** झरणाः, **सम्प्लुता**स्तैरेव, गर्ता वा, स्त्रीलिङ्गपाठश्चिन्त्यः, **प्रतिच्छाया** दर्पणादिप्रतिबिम्बानि **प्रतिस्वनां**स्तटादिषु निर्गताञ् छब्दान् स्वशब्दानुरूपाञ् **छपन्त**श्च भवन्ति ॥ १० ॥ तेषां भाग्यमभिनन्दतीत्थमितिद्वाभ्यां, लोका त्रिविधा ज्ञानिनो भक्ताः प्राकृताश्च, तत्र भगवान् सर्वेषां तत्तद्बुद्ध्यनुसारेण स्फुरति "तं यथायथोपासते तथैव भवती"तिश्रुतेः, तत्र **सतां** ज्ञानिनां ब्रह्मरूपः सद्रूपः सुखरूप आनन्दरूपोनुभुतिरूपो ज्ञानरूपस्तादृशेन सह ते **विजह्रु**रिति बालकानां भाग्यं **दास्यं गतानां** भक्तानां **परो** नियन्ता स्वामी **दैवत**माराध्यो **मायाश्रितानां** प्राकृतानां केवलं **नरबालकः**, एवं सर्वैः सर्वप्रकारेणापि विभाव्येन **सार्धं कृतः पुण्यपुञ्जो** यैस्ते **विजह्रुः** ॥ ११ ॥ महच्च तेषां भाग्यं यत् तेषां दृष्ट्यग्रे भगवांस्तिष्ठतीत्याह **यत्पादपांसु**रिति **बहुजन्म**तपसा जितेन्द्रियै**र्योगिभि**रपि शरीरेन्द्रियान्तःकरणशुद्धियुक्तैरपि **यत्पादपांसुरलभ्यः स** एवैष कृष्णो येषां बालकानां सर्वेषामेव व्रजस्थितानां वा **स्वयमेव स्थितो** न तु तैः प्रार्थितोपि, अतो **व्रजौकसां** भाग्यमवाङ्मनोगोचरं **किं वर्ण्यते** ? ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कीशानां वानराणां बालान् 'शाखासु लम्बमानानि लाङ्गूलानि' आकर्षयन्तः लाङ्गूलममुञ्चन्त एव तैः सह द्रुमान् आरोहन्तश्च तैर्वानरैः सह विकुर्वन्तो दन्तप्रदर्शनभ्रूविजृम्भादिविकारान् कुर्वन्तः, पलाशिषु वृक्षेषु प्लवन्तः, शाखायाः शाखान्तरमुद्गच्छन्तः ॥ ९ ॥ सरित्प्रस्रवे नदीतटात् परिस्रुतजले सम्प्लुता निमग्नाः सन्तो भेकैः मण्डूकैः साकं विलङ्घन्तः, प्रतिच्छायाः प्रतिबिम्बानि हसन्तः, प्रतिस्वनान् सरोवरकूपादितरेषु स्वकृतशब्दसदृशान् शब्दान् शपन्तश्च ॥ १० ॥ अतिविस्मितः संस्तेषां भाग्यमभिनन्दति—इत्थमिति द्वाभ्याम् । सतां तत्त्वज्ञानां ब्रह्म तद्रूपेण व्यापकं तत्सुखमानन्दश्च अनुभूतिः चिच्चतया सच्चिदानन्दरूपेण प्रकाशमानेन । एवं तेषानुभवमात्रमेव, न त्वेवं विहार इति सूचितम् ! तथा दास्यं गतानां केवलं मर्यादाभक्तिमतां परदैवतेन इष्टदेवतया प्रकाशमानेन इति तेषामपि गौरवेणैव तद्भजनम्, नत्वेवं विहारः । मायाश्रितानां भगवन्मायामोहितानां विषयसुखमिच्छतां कर्मनिष्ठानां तु नरदारकेण प्राकृतमनुष्यबालवत् प्रतीयमानेन इति तेषां तु तत्सम्बन्धलेश एव नास्ति, कुतस्तेन सह व्यवहारः ? । एवंभूतेन भगवता साकं ये विजह्रुस्ते कृतानां स्वस्वनुष्ठितानां पुण्यानां सत्कर्मोपासनादीनां पुञ्जाः समूहाः येषां तथाभूता एव ॥ ११ ॥ 'तर्हि तैः कृताः पुण्यपुञ्जा वक्तव्या' इत्यपेक्षायामाह—यत्पादेति । यस्य भगवतः पादपांसुः पादसम्बन्धिरजो बहुजन्मस्वनुष्ठितेन कृच्छ्रतस्तपःसमाध्यादिकष्टेन धृतो वशीकृत आत्मा इन्द्रियान्तःकरणसङ्घातो यैस्तैर्योगिभिरप्यलभ्यः । स एष येषां व्रजवासिनां स्वयं साक्षादेव दृग्विषयः सर्वेन्द्रियविषयः सन् स्थितस्तेषां दिष्टमहः पुरा महत्त्वं किं वर्ण्यते ? तत्तु वाङ्मनसोरगोचरमित्यर्थः ॥ १२ ॥

अन्वितार्थप्रकाशिका

विकर्षन्त इति ॥ कीशानां वानराणां बालान् शाखासु लम्बमानानि लाङ्गूलानि । यद्वा । वानरबालकान् कर्षन्तः लाङ्गूलममुञ्चन्त एव तैः सह द्रुमान् आरोहन्तश्च तैर्वानरैः साकं विकुर्वन्तो दन्तप्रदर्शनभ्रविजृम्भादिविकारान् कुर्वन्तः । शता आर्षः । पलाशिषु वृक्षेषु प्लवन्तः शाखायाः शाखान्तरमुद्गच्छन्तश्च । शता आर्षः । रेमिरे ॥ ९ ॥ साकमिति ॥ सरित्प्रसवे नदीतटात् परिस्रुतजले संप्लुताः निमग्नाः सन्तो भेकैः मण्डूकैः साकं विलङ्घन्तः । आर्षः शता । सरितः स्रवेति पाठे स्रवेण नद्यादिघट्टेभ्यः परिस्रुतजलेन संप्लुताः पूरिताः सरितः सरित्क्षुद्रधारा विलङ्घन्तः प्रतिच्छायाः प्रतिबिम्बानि हसन्तः प्रतिस्वनान् सरोवरकूपादिषु स्वकृतशब्दसदृशान् शब्दाञ्छपन्तश्च रेमिरे । रे कस्त्वं ब्रूषे इति स्वेनोक्ते तत्प्रतिध्वनिं तथैव श्रुत्वा किमरे रेकारेणाक्षिपसि इति अनवस्थया शपन्तो रेमिरे ॥ १० ॥ इत्थमिति ॥ सतां तत्त्वज्ञानां ब्रह्मसुखानुभूत्या ब्रह्म च तत्सुखं च सानुभूतिश्चेति कर्मधारयः सदानन्दचिद्रूपेण स्फुरतेत्यर्थः । दास्यं गतानां तु परदैवतरूपेण स्फुरता मायाश्रितानां विषयिणां तु नरदारकरूपेण स्फुरता भगवता साकं कृतः पुण्यानां पुञ्जो यैस्ते गोपबालाः विजह्रुः । अयं भावः । ज्ञानिनां सच्चिदानन्दत्वेनानुभवमात्रं नत्वेवं विहारः भक्तिमतां देवतारूपेण भजनमात्रं विषयिणां तत्संबन्ध एव नास्ति कुतो विहारः अतो भगवता सहैवं विहारे ज्ञानिप्रभृत्यपेक्षयाऽधिकपुण्यपुञ्जवतां प्रेमवतामेव पुण्येत्यपि लोकदृष्ट्या पुण्यशब्देन वा भगवत्प्रीतिकरमाचरणं लक्षणीयम् ॥ ११ ॥ यदिति ॥ यस्य भगवतः पादपांशुः पादसंबन्धि रजः । यद्वा । यस्य पादपानां विहारास्पदवृन्दावनवृक्षाणामेकः अंशुः शोभाकणः पत्रादिः बहुजन्मस्वनुष्ठितेन कृच्छ्रतस्तपःसमाध्यादिकष्टेन धृतो वशीकृत आत्मा मनो यैस्तैर्योगिभिरप्यलभ्यः । अगम्य इत्यपि पाठः । अहो आश्चर्ये । अत इति च पाठः । स एव येषां व्रजवासिनां स्वयं साक्षादेव दृग्विषयः सन् स्थितस्तेषां दिष्टं भाग्यं किं वर्ण्यते । तत्तु वाङ्मनसयोरगोचर इति भावः । दिष्टस्य भाग्यस्य महस्तेजो महत्त्वम् इति वा ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कीशबालान् द्रुमस्कंधेषु लंबमानानि वानरपुच्छानि बिकर्षंतः पुच्छमत्यजंतस्तैर्वानरैः सह द्रुमान् आरोहंतः तैः सह विकुर्वंतोदंतदर्शनादिविकारान् कुर्वंतः पलाशिषु तरुषु प्लवंतः स्कंधात् स्कंधांतरं उत्पतंतः ॥ ९ ॥ भेकैः दर्दुरैर्विलंघंत उत्प्लवंतः सरितो नद्याः प्रस्रवेषु प्रवाहेषु संप्लुताः स्नाताः प्रतिछायाः जले प्रतिबिंबानि गुहाकुपादिषु प्रतिस्वनान् शपंतः स्वशब्दैः प्रतिशब्दान् तिरस्कुर्वंतो रेमिरे ॥ १० ॥ एवं चरित्रवर्णनेन प्राताश्चर्यः सन् तन्माहात्म्यसूचकश्लोकद्वयमाह इत्थमिति सतां ब्रह्मसुखस्य अनुभूतिरनुभवो यस्मात् तेन परमेश्वरेण स्त्रीत्वमार्षं दासानां परदैवतेन सर्वोत्कृष्टेन नरदारकेण नरबालकेन एवं तेषां यथायोग्यं प्रतीतेन श्रीकृष्णेन साकं इत्थं ये विजह्रुस्ते कृताः पुण्यानां पुंजाः समूहाः यैस्ते भवंति ॥ ११ ॥ बहुजन्मभिः कृतेन कृच्छ्रेण तपसा धृतोवशीकृत आत्मा मनो यैः यद्वा धृतो ध्यात आत्मा आत्मस्वरूपं यैस्तैरपि यत्पादपांसुः कृष्णपादरजः अलभ्यः येषां दृग्विषयोदृष्टिगोचरः। दिष्टं भाग्यम् ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विकर्षन्त इति ॥ केचित् कीशबालान् वृक्षशाखास्वधोलम्बमानान् वानराणां लाङ्गूलबालान्, विकर्षन्तः समाकर्षन्तः, तैर्वानरैः सह, चैव द्रुमान् तरून्, आरोहन्तः। केचित्तु तैर्गृहीतवानरपुच्छैर्द्रुमानारोहन्त इत्यपि आहुः। तैर्वानरैः, साकं च सहैव, विकुर्वन्तः दन्तवदनभ्रूविजृम्भादिभिर्विकारान् कुर्वन्तः, पलाशिषु वृक्षेषु प्लवन्तश्च शाखायाः शाखान्तरं गच्छन्तः, एवंभूताः सन्तः, रेमिरे ॥ ९ ॥ साकमिति ॥ सरित्प्रस्रवसंप्लुता यमुनातोयेनार्द्राः सन्तोऽपि, भेकैर्मण्डूकैः साकं, विलङ्घन्तस्तद्वत् प्लवनमाचरन्तः, प्रतिच्छायाः स्वस्वप्रतिबिम्बानि, विहसन्तः, प्रतिस्वनान् शपन्तः सन्तश्च, रेमिरे ॥ १० ॥ तद्विहारमभिनन्दन्नाहेत्थमित्यादिश्लोकद्वयेन ॥ इत्थमिति ॥ इत्थं ब्रह्मसुखानुभूत्या ब्रह्मानन्दानुभवेन, दास्यं तद्दासभावं, गतानां ब्रह्मानन्दानुभवसंभूतप्रीतिकारिततद्दास्यं गतानामित्यर्थः। सतां तदेकान्तिकसाधूनां, परदैवतेनापि, मायाश्रितानां प्रकृतिबद्धानां, नरदारकेण मनुजबालतया प्रतीयमानेन श्रीकृष्णेन साकं, कृता जन्मान्तरे विहिताः पुण्यपुञ्जाः सुकृतानां राशयो यैस्ते तथाभूताः गोपा इति शेषः। विजह्रुर्नानाविधक्रीडाप्रकारैर्विहृतवन्तः ॥ ११ ॥ तत्कृतपुण्यपुञ्जत्वमेव प्रपञ्चयन् विस्मयते ॥ यत्पादेति ॥ बहूनि यानि जन्मानि तेषु कृच्छ्राणि कायशोषणात्मकानि कृच्छ्रव्रताचरणानि तैः धौत आत्मा मनो येषां तैः, पाठान्तरे बहुजन्मभिः कृच्छ्रेण धृतो वशीकृत आत्मा मनो यैस्तैः, योगिभिः अपि, यत्पादपांशुः यदीयचरणकमलरेणुरपि, अलभ्यः दुष्प्रापः। स एव भगवान्, स्वयमेव यद्दृग्विषयः येषां व्रजौकसां नयनगोचरः, स्थितः। अहो इत्याश्चर्ये। तेषां व्रजौकसां, दिष्टं सर्वोत्तममदृष्टं, किं वर्ण्यते। वर्णयितुं न शक्नुम इत्यर्थः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

साकं भेकैरिति : १०.१२.१०.

परे त्वनाकाङ्क्षितकामकृत्या विधिं निषेधं च परित्यजन्तः।
यथाकथञ्चिद् व्यवहार्यमस्मिन्निति प्लवङ्गा इव सञ्चरन्ति ॥ १७ ॥

नहि विम्बादतिरिक्तं प्रतिबिम्बं वस्तु किमपि वास्तविकम्। ज्ञात्वैवं प्रतिबिम्बं हसन्ति दृष्ट्वा विभिन्नमिव सन्तः ॥ १८ ॥

केचित् प्राक्चरितैर्नृदेहजनुषः कीशा इवाहर्निशं मर्यादागमलङ्घिनोऽल्पमतयश्चाञ्चल्यसीमाभुवः।
अन्ये च प्रतिबिम्बमुग्धहृदया भ्राम्यन्त्यसद्वस्तुनीत्येतत्सृष्ट्युपलक्षणं स्फुटमभूत् तद्बाललीलाच्छलात् ॥ १९ ॥

इत्थं सतामिति : १०.१२.११.

यत्सृष्टेः क्रमसूचनं भववने यज्जीववृत्तिस्फुटीकारोऽकारि बकारिणाऽतिकुतुकाद् देवेन वृन्दावने।
यानालम्ब्य विचित्रचेष्टितपुषस्तेषामशेषेण सद्भाग्यं घोषजुषां प्रवक्तुमपटुः शेषोऽपि के मानुषाः ॥ २० ॥

निर्द्वन्द्वो गतविक्रियः परतरो निर्नामरूपोऽक्रियः पूर्णानन्दघनोऽगुणः श्रुतिगणाऽज्ञेयस्वरूपस्थितिः।
येषामिन्द्रियगोचरो व्रजभुवां सोऽपीन्दिरेशोऽभवत् क्रीडायामिति भाग्यवर्णनविधौ शक्तो न तेषां विधिः ॥ २१ ॥

विद्वज्ज्ञप्त्यत्यर्थमेवायमर्थोऽदर्शि समासतः। इतः पूर्वक्रमेणैव विज्ञेयाऽध्यायसङ्गतिः ॥ २२ ॥

क्वचिदिति : १०.१२.१.

सदोद्धर्तुं सतः क्लेशादवनाशावलम्बनम्। तदन्यत्त्वघनाशायेत्युक्तं क्वचित्पदात् ॥ २३ ॥

गुर्वन्नं सपयोदधि प्रतिदिनं साज्यं मया भुज्यते मन्मित्रैरखिलैः सहाद्य तु वने भक्ताघनाशे मम।
प्रीतिर्भूर्युतितेत्यसूचयदसावग्रेऽघनाशं हरिः कर्तव्यं निखिलानपि व्रजजनान् वन्याशनव्याजतः ॥ २४ ॥

प्राचीनपापक्षपणाय पुंसां धृतावतारो भगवान् सदैव। मुदा वनाशोऽनवनाशनाय मनो दधे तत् किल साधु मन्ये॥ २५ ॥
सुप्तानां जीवजानामक्रिये च मयि स्थिते। नाघनाशो भवेदीशस्तद्दिने किं तथाऽकरोत् ॥ २६ ॥

विजह्रुरिति : १०.१२.३.

यदाऽघनाशं सर्वेषां सतां श्रीशः समीहते। तदा स्वयं विहरति विहारयति तानपि ॥ २७ ॥

कृष्णप्रिया

कुछ बालक बन्दरों की पूँछ खींचत और उनके साथ पेड़ पर चढ़ते और पेड़ से दूसरे पेड़ पर जाते थे, जब वे दाँत दिखलाते, किल्किलाते तो बालक भी उसका अनुकरण करते जब बानर एक डाल से दूसरी डाल पर जाते तब वे भी वैसा ही करते हुए खेलने लगे ॥ ९ ॥ कितने ग्वालबाल श्रीयमुनाजी के झरना में छपका खेल रहे हैं और उसमें फुदकते हुए मेढकों के साथ फुदकते थे। कोई तो जल में अपनी परछाइं देख हंसते कोई प्रतिध्वनि सुन के उसे गाली देते हुए आनन्द से खेलने लगे ॥ १० ॥ **श्री शुकाचार्यजी ने कहा** –राजन्, इस प्रकार ज्ञानी संतो को स्वयं प्रकाश मूर्तिमान् परब्रह्मस्वरूप, दास्यभाव से युक्त परम भागवतों को परम आराध्य इष्टदेव स्वरूप, प्राकृत मनुष्यों को जो मनुष्य बालक रूप से प्रतीयमान है, उन्हीं भगवान् श्रीकृष्ण के साथ बड़े पुण्यशाली ग्वालबाल मित्र भाव से विहार कर रहे हैं सचमुच उनके पुण्य पुञ्ज की कोई सीमा न थी ॥ ११ ॥ जिस परब्रह्म श्रीकृष्णचन्द्र के चरणकमलो की रज हजारों वर्ष पर्यन्त भूरिपरिश्रम और कठिन तपश्चर्या करने पर भी इन्द्रियमन-अन्तःकरण पर विजय पाने वाली योगी गण के लिये भी सुलभ नहीं वही कृपासिन्धु कृष्ण जिन व्रजवासी ग्वाल बालकों के सामने स्वयं स्थित रहे और खेल खेले, भला उन व्रजबालकों के भाग्य का क्या वर्णन किया जाय ॥ १२ ॥

अथाघनामाभ्यपतन्महासुरस्तेषां सुखक्रीडनवीक्षणाक्षमः ।
नित्यं [1]यदन्तर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते ॥ १३ ॥
दृष्ट्वार्भकान् कृष्णमुखानघासुरः कंसानुशिष्टः स बकीबकानुजः ।
अयं [2]तु मे सोदरनाशकृत्तयोर्द्वयोरथैनं[3] सबलं हनिष्ये ॥ १४ ॥
एते यदा मत्सुहृदोस्तिलापः कृतास्तदा नष्टसमा व्रजौकसः ।
प्राणे गते वर्ष्मसु का नु चिन्ता प्रजासवः प्राणभृतो हि ये ते[4] ॥ १५ ॥
इति व्यवस्याजगरं बृहद् वपुः स योजनायाममहाद्रिपीवरम् ।
[5]धृत्वाद्भुतं व्यात्तगुहाननं तदा पथि व्यशेत ग्रसनाशयः[6] खलः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—पीतामृतैः अपि निजजीवितेप्सुभिः अमरैः यद् अन्तः नित्यं प्रतीक्ष्यते (सः) तेषां सुखक्रीडनवीक्षणाक्षमः अघनामा महासुरः अथ अभ्यपतन् ॥ १३ ॥ कंसानुशिष्टः बकीबकानुजः सः अघासुरः कृष्णमुखान् अर्भकान्। दृष्ट्वा अयं तु मे तयोः द्वयोः सोदरनाशकृत् अथ एनं सबलं हनिष्ये ॥ १४ ॥ एते मत्सुहृदोस्तिलापः यदा कृताः तदा व्रजौकसः नष्टसमाः प्राणे गते नु वर्ष्मसु का चिन्ता ? हि ये प्राणभृतः ते प्रजासवः भवन्ति ॥ १५ ॥ इति व्यवस्य योजनायाममहाद्रिपीवरं व्यस्तगुहाननं अद्भुतं आजगरं बृहद् वपुः धृत्वा ग्रसनाशयः॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सुखक्रीडनवीक्षणे नास्ति क्षमा यस्य सः। कथंभूतः। यस्यांतरं छिद्रं पीतामृतैरपि ततो मृत्युभीतैरमरैः प्रतीक्ष्यते कथं मरिष्यति कदा वेति। यद्वा कथंभूतं सुखक्रीडनम्। यदंतर्हृदये अमरैः प्रतीक्ष्यते विचिंत्यते पीतामृतैरपि पुनर्निजजीवितेप्सुभिः। अयं भावः। नामृतपानमात्रेण जीवनं सफलं भवति किं तु भगवल्लीलानुस्मरणेनेति तदेव नित्यमंतश्चिंत्यत इति ॥ १३ ॥ कृष्णप्रमुखानर्भकान् दृष्ट्वा स इति व्यवस्य निश्चित्याऽऽजगरं वपुर्धृत्वा तेषां ग्रसनाशया पथि व्यशेतेति तृतीयेनान्वयः। कंसेनानु शिष्टः प्रहितः बकी पूतना। कथं व्यवस्य तदाह अयं त्विति सार्धेन। मम तयोर्द्वयोः सोदरयोः स्थाने एनं कृष्णं सबलं ससैन्यं वत्सतत्पालसहितं हनिष्यामि ॥ १४ ॥ ननु तथापि व्रजस्थास्त्ववशिष्येरन्नित्याह। एत इति। तिलापःकृतास्तिलोदकतया कल्पिताः। वर्ष्मसु

---

[1]. यदन्तो निजजीवितेच्छुभिः–वीर. । [2]. अयं तु सोदर्यविनाश–वीर. । [3]. मर्मैनं–श्रीधर. वशी. सुदर्शन. वीर. विज. जीव. ।
[4]. लोके–वीर. । [5]. कृत्वा–वीर. । [6]. नाशया–श्रीधर. वशी. वीर. विज. शुक. ।

देहेषु। प्रजा एवासयो येषां ते तथा ॥ १५ ॥ सहयोजनायामं योजनप्रमाणेन दैर्घ्येण युक्तं च तन्महाद्रिवत्पीवरं च। व्यात्तं प्रसारितं गुहातुल्यमाननं यस्मिस्तत् ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पीतामृतानां यदि मृतिभयं तदाऽमृतस्यामृतत्वव्याघातः स्यादतोऽर्थांतरमाह—यद्वेति। अयं भाव इति। 'निजं स्वीये च नित्ये च' इति कोशान्निजं नित्यमर्थात्सफलं यज्जीवितं तदिच्छुभिरिति। न ह्यमृतपानेन नित्यजीवनमपि तु मादकत्वात्तस्य भगवद्वैमुख्यापादकत्वेनानित्यजीवनं भवति। किन्तु हरेरंतश्चितनमेव नित्यजीवनमिति तात्पर्यम् ॥ १३ ॥ अयं कृष्णः। तयोर्बकीबकयोः। पिण्डदानार्थमिति शेषः। उत्तरश्लोकदृष्ट्या कल्प्याः। बलशब्देनात्र बलदेवो न ग्राह्यस्तस्य वत्सपालावगूहनलीलायामनगतत्वात्। अत एव स वक्ष्यति 'केयं वा कुत आयाता दैवी वा' इत्यादिना ॥ १४ ॥ एतेषां हनने तत्पितरोऽन्यानेतादृशानुत्पदयिष्यंतीति चेत्तेषां तत्र सामर्थ्यमेव नंक्ष्यत्येतच्छोकाकुलत्वादित्याह—नन्विति। तथापि एतेषां हननेपि। 'वर्ष्म संहननं वपुः' इति कोशात् ॥ १५ ॥ आजगरमजगरसंबंधि। तदा तेषां क्रीडाकाले ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषणी

अथेति भिन्नोपक्रमे प्रस्तुतरसोपघातकत्वात् अभ्यपतत्सहसाभिमुखमाजगाम ततश्च तेषां सुखक्रीडनवीक्षणाक्षमोऽभूदिति शेषः। अन्यत्तैः यद्वा पीतं सुखेनात्मसात्कृतम् अमृतं मोक्षो यैः मुक्तैरपीत्यर्थः। कथम्भूतैः श्रीभगवल्लीलादर्शनार्थं निजजीवितेप्सुभिश्चिरं जिजीविषुभिः अत एवाऽमरैः स्थूलसूक्ष्मदेहद्वयनाशरहितैः लीलाविग्रहतया मृत्युशून्यैरिति वा मुक्ता अपि लीलया विग्रहं कृत्वा भजन्ते प्रतीक्ष्यते अन्यत्समानम् ॥ १३ ॥ दृष्ट्वेति त्रिकम्। अथास्मत्सोदरनाशाद्धेतोः अत्र ममेति पाठः सर्वसम्मतः चिच्छुखसम्मतश्च तेषां वाक्यभेदाद् पौनरुक्त्यम् ॥ १४ ॥ यद्वा तयोर्द्वयोर्निमित्तयोः तद्वैरग्रहणार्थमित्यर्थः। नष्टसमाः मृतप्रायाः ॥ १५ ॥ हि यतः व्यवस्य व्यवसायविशेषेण अस्पन्दत्वादिना व्यशेत यतः खलः वञ्चनापूर्वकहिंसकः तादृशबालानां ग्रसने प्रवृत्तः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथेति भिन्नोपक्रमे, प्रस्तुतमहारसोपघातकत्वात्। अभ्यपतत् सहसाभिमुखमाजगाम। अन्यत्तैर्व्याख्यातम्। यद्वा, पीतं मुखेनात्मसात् कृतममृतं मोक्षो यैर्मुक्तैरपीत्यर्थः। कथम्भूतैः? श्रीभगवल्लीलादर्शनार्थ निजजीवितेप्सुभिश्चिरं जिजीविषुभिरतएवामरैः स्थूलसूक्ष्मदेहद्वयनाशरहितैश्चिद्रूपदेहतया मृत्युशून्यैरिति वा प्रतीक्ष्यते अपेक्ष्यते। अन्यत् समानम् ॥ १४ ॥ कृष्णमुखान् कृष्णप्रधानानान् योऽभ्यपतत् सः, किवा महादुष्टत्वादिना प्रसिद्धः। अथास्मात् सोदरनाशनाद्धेतोः। अत्र ममेति पाठः सर्वसम्मतः। वाच्यभेदादपौनरुक्त्यम्। अन्यत्तैर्व्याख्यातम् यद्वा, तयोर्द्वयोर्निमित्तयोस्तद्वैरग्रहणार्थमित्यर्थः ॥ १४ ॥ नष्टसमा मृतप्रायाः ॥ १५ ॥ व्यवस्य व्यवसायविशेषेणास्पन्दत्वादिनाऽशेत। तदा तस्मिन्नेव क्षणे; आजगरत्वादिकं सर्वेषामेव तेषां युगपद्ग्रसनार्थम्, यतः खलो धूर्तोऽप्रयासेन सर्वेषामेकदैव ग्रसनोपायसाधनात्; यद्वा, खलोऽधमः क्रूरो वा, तादृशबालानां ग्रसने प्रवृत्तः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तेषां गोपानां भगवता सह सुखेन क्रीडनस्य वीक्षणेऽक्षमः क्षमारहितः यदन्तं यस्याघासुरस्यान्तः मरणं अन्तःकरणेन ॥१३॥ मम तयोर्द्वयोर्बकीबकयाः अर्थे इति शेषः। सबलं वत्सबालसहित बलदेवस्य तद्दिने वनमध्ये अगमनात् ॥ १४–१६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं विहरत्सु अघाख्यो महानसुरस्तेषां सुखेन यत् क्रीडनं तस्य वीक्षणेन विद्यते क्षमा यस्य तथाभूतोऽभ्यपतत् अभिमुखमाजगामः, तदेव प्रपञ्चयन्नघासुरस्य देवानामपि मृत्युशङ्कावहत्वमभिसन्धिविशेषञ्चाह—नित्यमिति सार्द्धद्वयेन। पीतममृतं यैस्तैर्मरणभयरहितैरपीति भावः। अमरैर्निजजीवितेच्छुभिः मृत्युभयरहितानप्यस्मान् हन्तुं समर्थमघासुरं हत्वा अस्मज्जीवितं कदा सुप्रतिष्ठितं कुर्यादित्येवं स्वजीवितमिच्छद्भिर्नित्यं यदन्तः यस्याघासुरस्यान्तो नाशः कदा वा स्यादिति प्रतीक्ष्यते ॥ १३ ॥ स बकीबकयोरनुजोऽघासुरः कंसेन अनुशिष्टः आदिष्टः कृष्णो मुखं प्रधानो येषां तानर्भकान् दृष्ट्वेति व्यवस्य निश्चित्य आजगरं बृहद्वपुर्धृत्वा तेषां ग्रसनाय पथि व्यशेत इति तृतीयेनान्वयः कथं व्यवस्य? इत्यत आह—अयन्त्विति सार्द्धेन। द्वयोस्तयोः रामकृष्णयोर्मध्येऽयं कृष्णस्तु मम सोदरयोः पूतनाबकयोर्नाशं कृतवानिति तथाऽत एनं बलरामेण सहितं हनिष्यामि बलशब्दोत्रेतरगोपबालानामप्युपलक्षणार्थः। एते इत्युत्तरानुगुण्यात् ॥ १४ ॥ यदैते कृष्णादयः मत्सुहृदोर्मत्सोदरयोस्तिलापः कृताः तिलोदकवत्तृप्तिहेतुत्वेन एतेषां हननमेव मत्सुहृदोस्तिलाप इति भावः। तदा सर्वे व्रजौकसो नष्टप्रायाः तथा हि प्राणे गते निर्गते सति वर्ष्मसु शरीरेषु का वानुचिन्ता न हि प्राणे गते शरीरं क्षणमपि स्थातुं शक्नोति किन्तु नश्यत्येव प्राणभृतः प्रजाः पुत्रा एवासवः प्राणा

येषां तथाभूता हि प्राणस्थानीयेषु पुत्रेषु मया हतषु व्रजौकसः सर्वे स्वयमेव नक्ष्यन्तीति तदर्थं न मया यत्नः कार्य इति भावः ॥१५॥ इतीत्थं निश्चित्य स दुरात्मा अघासुरः रामकृष्णादीन् ग्रसितुमिच्छया आजगरं वपुर्धृत्वा पथि व्यशेत शयितवान् वपुः कथम्भूतम् ? बृहद्विपुलम्, तदेवाह–योजनप्रमाणेन दैर्घ्येण युक्तं च तन्महाद्रिवत्स्थूलं च व्यात्तं प्रसारितं गुहातुल्यमाननं यस्मिन् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवं तद्विहारस्य प्रतिक्षणपरमानन्दवर्द्धकत्वात् स्वतः समाप्त्यसम्भवमाकलय्य समाप्तिञ्च विना भोजनपानादिकं न सिद्ध्येदिति प्रात्यहिकभोजनसमयात्ययं चावधार्य लीलाशक्त्यैव तद्विच्छेदार्थं दुष्टसंहारस्याप्यवश्यकर्त्तव्यतया तदानीमेवान्तर्यामि प्रेरणवशात् कश्चिदघासुरो नाम तेषामभिमुखमानिन्य इत्याह अथेति। सुखक्रीडनस्य वीक्ष्यणमपि न क्षमत इति **सर्वसुखदमपि** तेषां क्रीडनं तस्य दुःखदमभूदिति भावः। यदन्तः यस्याघासुरस्यान्तरं मरणसाधकच्छिद्रं पीतामृतैरपि ततो मृत्युभीतैरमरैः कथ मरिष्यतीति प्रतीक्ष्यते। यद्वा, यत्सुखक्रीडनम् अन्तर्हृदये प्रतीक्ष्यते प्रतिक्षणमीक्ष्यते चिन्त्यते इत्यर्थः। पीतामृतैरपि कृष्णलीलामृतपानं विना जीवितं वस्तुतो जीवितं न भवति यतस्तस्मान्निजजीवितेप्सुभिरित्यर्थः ॥ १३ ॥ कृष्णमुखान् कृष्णादीन् दृष्ट्वा सः अघासुरः इति व्यवस्य निश्चित्य तेषां ग्रसनाशया पथि व्यशेतेति तृतीयेनान्वयः। बकीपूतना व्यवसायमाह–अयन्त्विति सार्द्धेन। अयं कृष्णः मम सोदरयोर्नाशकृत् अथ अत एव तयोर्द्वयोः पिण्डदानार्थमिति शेषः। उत्तरश्लोकार्थदृष्ट्या कल्प्यः सबलं ससैन्यं हनिष्यामि ॥ १४ ॥ एते कृष्णादयो बाला मत्सुहृदोर्वकीबकयोर्यदि तिलापः प्रेततर्पणार्थकतिलोदकरूपाः तदा व्रजौकसो दन्दादयः वर्ष्मसु देहेषु अनष्टेष्वपि का चिन्ता न कापीत्यर्थः। ये प्राणिनस्ते प्रजा अपत्यान्येव असवः प्राणा येषां ते अतः स्वत एव मरिष्यन्तीत्यर्थः ॥ १५ ॥ योजनायामं योजनप्रमाणेन दैर्घ्येण युक्तं महाद्रिवत् पीवरं व्यात्तं प्रसारितं गुहातुल्यमाननं यस्मिन् तत् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ पीतामृतैरपि निजजीवितेप्सुभिर्निजजीवितसाफल्येप्सुभिः अमरैः यदन्तर्हृदि नित्यं प्रतीक्षते तस्य तेषां सुखक्रीडनस्य वीक्षणे नास्ति क्षमा यस्य सः अघनामा असुरः अभ्यपतत् अभिमुखमपतत् ॥ १३ ॥ तस्य तत्सुखक्रीडनवीक्षणाक्षमत्वे हेतुमभिमुखपतने प्रयोजनं चाह–दृष्ट्वेति त्रिभिः। अथानन्तरं स अघासुरो बालान् दृष्ट्वा अयं मे सोदरनाशकृदेनं हनिष्ये इत्यादि व्यवस्य बृहद्वपुः धृत्वा पथि व्यशेतेति त्रयाणामान्वयः। कंसानुशिष्टः कंसेन प्रवर्तितः बकीबकयोः पूतनाबकयोः अनुजः अयं कृष्णः मे सोदरनाशकृत् अतो द्वयोस्तयोः सोदरयोः स्थाने एनं हनिष्ये नन्ववशिष्टेभ्यो रामादिभ्यो भयं भविष्यतीत्यत आह, स बलं ससैन्यमिति ॥ १४ ॥ ननु तथापि व्रजौकसोऽवशिष्येरन्नेत्याह–एते इति। यदा एते कृष्णप्रभृतयो बाला मत्सुहृदोस्तिलापः कृतास्तदा व्रजौकसां नन्दाद्याः नष्टसमाः मृततुल्याः अथवा नष्टा समा संवत्सरा येषां ते मृता एव भविष्यन्तीत्यर्थः। प्राणे गते वर्ष्मसु नष्टत्वे कानु चिन्ता हि यतो प्राणभृतस्ते प्रजासवः प्रजा एव असवो येषां ते तथाभूताः अतः तेपि मत्सुहृदोर्मम भगिनीभ्रात्रोस्तिलापः कृताः तिलोदकत्वेन कल्पिताः ॥ १५ ॥ स अघासुरः इति व्यवस्य निश्चित्य योजनायामं योजनप्रमाणेन दैर्घ्येण युक्तं च तन्महाद्रिरिव पीवरं स्थूलं च व्यात्तं प्रसारितं गुहावदाननं यस्मिन् तत् बृहद्विपुलं वपुः धृत्वा सबलकृष्णग्रहणाशया पथि व्यशेत शयितवान् ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

चरितान्तरमाह अथेति भिन्नक्रमे, अघनामा महासुरस्तेषामभिमुखमापतत् अभिपत्य तेषां सुखक्रीडनस्य वीक्षणे अक्षेमो बभूव यस्याघस्यान्तर्मरणसाधनं छिद्रमपरैः कथमयं मरिष्यतीति प्रतीक्ष्यते कीदृशैः ? पीतामृतैरपि निजजीवितेच्छुभिर्यतो मृत्युभीतैरित्यर्थः। यद्वा यत् सुखक्रीड़नकम् अमरैः प्रतीक्ष्यते प्रतिक्षणं ध्यायत इत्यर्थः। पीतामृतैरिति तत् क्रीड़नामृतपानं विनामृतेन जीवनमतस्तस्मान्निजजीवितेप्सुभिरित्यर्थः ॥ १३ ॥ सोऽघासुरः कृष्णमुखानर्भकान् दृष्ट्वा इति व्यवस्य तेषां ग्रसनाशया पथि व्यशेतेति तृतीयश्लोकस्थेनान्वयः। बकी पूतना। व्यवसायमाह अयन्त्विति सार्द्धकेन, अयं कृष्णः मे सोदरयोर्बकीबकयोर्नाशकृत् अथ अतस्तयोर्द्वयोस्तिलोदकार्थमेनं अवलं ससैन्यं हनिष्ये ॥ १४ ॥ ननु व्रजौकःसु नन्दादिषु जीवत्सु किमेषां मारणेन तत्राहैत इति। यदैति मत्सुहृदो वकीवकयोस्तिलापः प्रेततर्पणार्थास्तिलोदकरूपाः कृतास्तदेति स्फुटार्थं, प्राणे गते नष्टे सति वर्ष्मसु देहेषु स्थितेष्वपि का चिन्ता न कापीत्यर्थः। कथमेतद्युपपद्यते, तत्राह ये प्राणभृतः प्राणिनस्ते प्रजासवः पुत्रप्राणा हि यतो भवन्तीति ॥ १५ ॥ इति व्यवस्य निश्चित्य आजगरं बृहद्वपुर्धृत्वा, कीदृशं वपुः योजनायामेन सहितं महाद्रिवत् पीवरं स्थूलं व्याप्तं प्रसारितं गुहातुल्यमाननं यत्र तत् ॥ १६ ॥

श्रीसुबोधिनी

एवं क्रीडायां मध्येघासुरः समागत इत्याहाथेत्येकविंशतिभिस्तस्य मुक्त्यन्ता कथा निरूप्यते, **अघोन्वर्थनामा तेषां** बालकानां **मुखक्रोडनस्य वोक्षणेप्यक्षमा** यस्य, **नित्यं** सर्वदा **यदन्त**रघासुरनाशो**मरैः प्रतीक्ष्यते,** तत्र हेतु**र्निजजोवितेप्सुभि**रिति यद्यपि ते **पीतामृताः**, अतोयमत्यन्तं दुष्टोमृतादीनामपि वस्तुसामर्थ्यनाशकः ॥ १३ ॥ **अर्भकान्** बालकान् **कृष्ण** एव **प्रमुखो** येषां

कंसेन प्रेषितः **स** प्रसिद्धो **बकी** पूतना **बकश्च** तयोर**नुजः**, तस्य सङ्कल्पमाह**अयं त्विति**, **त्विति** पक्षान्तराणि व्यावर्तयति, **अयं तु** भगवान् मे **सोदरयोर्भ्रात्रोर्नाश**कर्ता न कर्मकालादि, अत**स्तयोर्द्वयोर**र्थं उपद्रवं करिष्यामीति ॥ १४ ॥ ततो बालकानामप्युपद्रवो भविष्यतीत्याहैत इति, **मत्सुहृदोर्मद्भ्रात्रोस्तिलापः कृता**स्तिलोकप्राया मृतानां तृप्तिहेतवः, **तदा व्रजौकसो गावः**स्त्रीपुरुषाश्च **नष्टसमा** नष्टप्रायाः, यथा **प्राणे गते वर्ष्मसु** देहेषु **गमनार्थं का चिन्ता ?** बालकाश्च व्रजवासिनां प्राणरूपाः, यतः **प्राणभृतः प्रजासवः** प्रजैवासवः प्राणा येषाम् ॥१५॥ **इत्यध्यवसायं कृत्वाजगरम**जगरवत् स्थूलं **वपुर्धृत्वा पथि व्यशेत योजन**मात्र**मायामो** विस्तारो यस्य **वपुषः**, **महाद्रिवत्** पर्वतवत् स्थूलं भ्रमार्थमत्यद्भु**तं व्यात्तं गुहावदानन** यत्र, **ग्रसनार्थ**मेव **शयनं** कृतवान्, दया तु नास्ति यतः **खलः** ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं क्रीडायां मध्ये अघासुर आगतः, तस्य मुक्त्यन्तां कथामाह–अथेति एकविंशतीभिः । अथेत्यर्थान्तरे । वृन्दावनलीलायां लीलान्तरं शृण्वित्यर्थः । अघनामा महासुरोऽभ्यपतत् अकस्मादेवाजगाम । 'किमथ' इत्याकाङ्क्षायां 'तेषां जिघांसया' इति सूचयन्नाह—तेषामिति । तेषां रामकृष्णादीनां यत् सुखेन क्रीडनं तस्य वीक्षणे नास्ति क्षमा सहनं यस्य सः । तस्य दुष्टत्वं सूचयंश्चरितं विशिनष्टि—नित्यमिति । यत्तेषां क्रीडन पीतामृतैरपि निजजीवितेच्छुभिः 'न अमृतपानमात्रेण जीवनं सफलं भवति, किन्तु भगवल्लीलानुस्मरणेन इति कृत्वा स्वजीवसफलत्वेच्छुभिरमरैरन्तर्मनसि नित्यं प्रतीक्ष्यते चिन्त्यते तद्दृष्ट्वाऽसहमान इत्यर्थः । यद्वा तस्य तुच्छत्वमाशङ्क्य प्रबलत्वमाह —नित्यमिति । यस्याघासुरस्यान्तः नाशः 'कथ कदावाऽयं दुरात्मा मरिष्यति' इति पीतामृतैर्देवैरपि निजजीवितेच्छुभिस्ततः स्वमरणमाशङ्क्य तत्प्रतिहारार्थं प्रतीक्ष्यते चिन्त्यते इत्यर्थः ॥१३॥ तेन रचितं तद्धननोपायं दर्शयति–दृष्ट्वेति त्रिभिः । सः अघासुरस्तदा कृष्णो मुखं प्रधानो येषां तानर्भकान् दृष्ट्वा इत्येव व्यवस्य निश्चित्याजगरं वपुर्धृत्वा तेषां ग्रसनाशया पथि व्यशेतेति तृतीयश्लोकेनान्वयः । तेषां क्रीडादर्शनासहने कंसवैरं हेतुमाह—कंसानुशिष्ट इति । कंसेन कृष्णादिहननार्थं प्रेषित इत्यर्थः । तत्रैव स्ववैरमपि हेत्वन्तरमाह—बकीबकानुज इति । बकी पूतना । वैरमेव स्पष्टयंस्तद्व्यवसायमाह—अयं त्विति सार्धेन तुशब्द एवकारार्थः, तेन कालकर्मादिव्यावृत्तिः । अयं कृष्ण एव मे सोदरयोर्भ्रातृभगिन्योर्नाशकृत्, अतो मम तयोर्द्वयोः सन्तोषार्थं सबलं ससैन्यं वत्सपालसहितमेनं हनिष्यामि ॥ १४ ॥ ननु 'एतेषां मारणेऽपि व्रजस्थास्तु तावत् अवशिष्येरन्' इत्याशङ्क्याह—एते इति । एते बालवत्सा यदा मम सुहृदोः भ्रातृभगिन्योस्तिलापः कृता मृतयोस्तिलोदकवत्तृप्तिहेतवः कृतास्तदा व्रजौकसो नन्दादयः सर्वे नष्टसमा मृतप्राया एव । तत्र दृष्टान्तमाह—प्राणे इति । यथा प्राणे निर्गते वर्ष्मसु देहेषु चिन्ता नास्ति, देहा विनष्टप्राया एव, तद्विनाशार्थमुपायान्तरं न चिन्त्यते, तद्वदेतेषां विनाशोपायो न चिन्त्य इत्यर्थः । तत्र हेतुमाह–हि यस्मात् ये प्राणभृतस्ते सर्वेऽपि प्रजा अपत्यानि असवः प्राणा प्राणतुल्या येषां तथाभूता इति ॥ १५ ॥ तद्वपुरेव विशिनष्टि–बृहदिति । एतदेव स्पष्टयति–स योजनायामेति । योजनप्रमाणेन आयामेन दैर्घ्येण युक्तं च तन्महाद्रिवत् पीवरं च तदित्यर्थः । व्यात्तं प्रसारितं गुहातुल्यमाननं यस्मिस्तत् । ननु "परमसुकुमारं बालं क्रीडन्तं दृष्ट्वाऽप्येनं कृष्णमुद्दिश्य कथं तन्मारणे सङ्कल्पं कृतवान् ?" तत्राह–खल इति । तस्यासुरत्वेन क्रूरस्वभाववत्त्वाद्दयाभावेनैवं सङ्कल्पितवानित्यर्थः ॥ १६ ॥

अन्वितार्थप्रकाशिका

अथेति ॥ अथ तेषां रामकृष्णादीनां यत्सुखेन क्रीडनं तस्य वीक्षणे नास्ति क्षमा सहनं यस्य सः अघनामा महासुरोऽभ्यपतत् अकस्मादेवाजगाम । यद्वा । अघनामा महासुरोऽभ्यपतत् तेषां । स सुखक्रीडनवीक्षणाक्षमश्च आसीत् इत्यन्वयः । यत्तेषां क्रीडनं पीतामृतैरपि निजजीवितेप्सुभिः भगवल्लीलास्मरणेन स्वजीवनमसफलत्वेच्छुभिरमरैरन्तर्मनसि नित्यं प्रतीक्ष्यते चिन्त्यते न ह्यमृतपानेन जीवनसाफल्यमपि तु भगवत्स्मरणेनेत्याशयः । यद्वा । यस्याघासुरस्यान्तः छिद्रं मरणोपायः पीतामृतैर्देवैरपि निजजीवितेप्सुभिः नित्यं प्रतीक्ष्यते कथं कदा वा स मरिष्यतीति ॥ १३ ॥ दृष्ट्वेति ॥ कंसेन कृष्णादिहननार्थमनुशिष्टः प्रेरितः बकी पूतना बकश्च तयोरनुजः । एकशेषाभाव आर्षः । स्पष्टार्थो वा । खलो दुष्टः सः अघासुरः तदा कृष्णे मुखं प्रधानं येषां तानर्भकान् दृष्ट्वा अचिन्तयत् । अयं तु अयं कृष्ण एव मे सोदरयोर्भ्रातृभगिन्योर्नाशकृत् अतः मम तयोर्द्वयोः स्थाने तद्वैरनिमित्तं वा तत्पिण्डदानार्थं वा सबलं ससैन्यं वत्सपालसहितमेनं हनिष्ये हनिष्यामि । तदार्षः ममेति वाक्याभेदान्न पौनरुक्त्यदोषः । अथैनमित्यपि पाठः ॥१४॥ एते इति ॥ एते बालवत्साः यदा मम सुहृदोः भ्रातृभगिन्योस्तिलापः कृताः मृतयोस्तिलोदकवत्तृप्तिहेतवः कृता हता इत्यर्थः । तदा व्रजौकसः एतेभ्योऽतिरिक्ता व्रजगता अपि नन्दादयः सर्वे नष्टसमाः मृतप्राया एव । यतः प्राणे निर्गते सति वर्ष्मषु देहेषु का नु चिन्ताऽस्ति स्वत एव ते हस्यन्तीत्यर्थः यस्मात् ये प्राणभृतस्ते सर्वेऽपि प्रजा अपत्यानि । असवः प्राणतुल्या येषां तथाभूताः भवन्ति॥१५॥ इतीति ॥ स खलः अघासुरः इत्येवं व्यवस्य निश्चित्य । व्यवसायेति वाच्य आलोप आर्षः । तदा योजनप्रमाणेन आयामेन दैर्घ्येण युक्तं च तन्महाद्रिरिव पीवरं च तदित्यर्थः व्यात्तं प्रसारितं गुहातुल्यमाननं यस्मिस्तत् बृहत् अद्भुतम् आजगरं वपुर्धृत्वा तेषां बालानां ग्रसनाशया पथि व्यशेत शयान इवातिष्ठत् ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सुखेन यत्क्रीडनं तस्य वीक्षणे अक्षमः क्षमाविधुरः पीतामृतैरपि निजजीवितेप्सुभिः अघासुरात् मरणभीतैर्देवैः यदंतः यस्य
अघस्य अंतः नाशः नित्यं प्रतीक्ष्यते कदा भविष्यतीति चित्यते ॥ १३ ॥ कृष्णमुखानर्भकान् दृष्ट्वा सोऽघः इति व्यवस्य निश्चित्या-
जगरं वपुर्धृत्वा तेषां ग्रसनाशया पथिव्यशेतेति तृतीयश्लोकेनान्वयः स कथंभूतः कंसेन अनुशिष्टः प्रेषितः बकी पूतना तस्य व्यव-
सायमाह सार्द्धेन अयं श्रीकृष्णः मे सोदरयोर्बकीबकयोः भ्रात्रोः नाशकृदस्ति अतस्तयोर्द्वयोः स्थाने सबलं सानीकं वत्सतत्पाल-
सहितमिति यावत् एनं कृष्णं हनिष्यामि ॥ १४ ॥ ननु एवं कृते सत्यपि व्रजस्था अवशिष्टा इत्याशंक्याह एत इति एते गोपबालाः
यदा मत्सुहृदः मम मित्रस्य बकस्य तिलापः कृताः तिलोदकांजलितया कल्पिताः तदा अन्येनष्टसमाःसंति प्राणेगते सति वर्ष्मसु देहेषु-
कानुचितास्ति किमपि नास्ति तथा हि एते व्रजस्था गोपाः प्रजा एव असवः प्राणा येषां ते ॥ १५ ॥ तद्वपुर्विशिनष्टि योजनायामेन
चतुःक्रोशपर्यंतदैर्घ्येण सहितंच तन्महापर्वतवत् पीवरं स्थूलं च व्यात्तं उद्घाटितं गुहातुल्यं मुखं यस्मिंस्तत् एवंभूतं आजगरं शरीरं
धृत्वा खलः ग्रसनाशया पथि व्यशेत ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथेति ॥ गोपबालानामित्थं विहरतां सतामिति शेषः। अथानन्तरं, तेषां सकृष्णानां गोपबालकानां, सुखेन यत् क्रीडनं
तस्य वीक्षणेन विद्यते क्षमा यस्य सः, पीतममृतं यैस्तैः मरणभयरहितैरपीति भावः। निजजीवितेप्सुभिः मृत्युभयरहितानप्यस्मान्
हन्तुं समर्थमेनमघासुरं हत्वाऽस्मज्जीवितं कदा सुप्रतिष्ठितं कुर्यादित्येवं स्वजीवितमिच्छद्भिरित्यर्थः। अमरैर्देवैः, नित्यं यदन्तो
यस्याघासुरस्य विनाशः, प्रतीक्ष्यते, कदा भविष्यतीति प्रतीक्षां क्रियते, एवंभूतः अघनामा अघेतिसंज्ञया विख्यातः, महासुरः
अतिमहान् दैत्यः, अभ्यपतत् अभिमुखमाजगाम ॥ १३ ॥ दृष्ट्वेति ॥ कंसानुशिष्टः कंसेनादिष्टः, बकी पूतना च बको बकासुरश्च
तयोरनुजः बन्धुः, सः पूर्वोक्तप्रकारः, अघासुरः, कृष्णमुखान् श्रीकृष्णप्रभृतीन्, अर्भकान् दृष्ट्वा, इति व्यवस्याजगरं बृहद्वपुर्धृत्वा तेषां
ग्रसनाशया, पथि व्यशेत, इति तृतीयश्लोकगतेनान्वयः। कथं व्यवस्य तदाहायमिति सार्द्धेन। द्वयोः तयोः रामकृष्णयोर्मध्ये, अयं
कृष्णः तु अयं श्रीकृष्ण एव, मे मम, सोदरनाशकृत् मत्सोदरयोः पूतनाबकयोर्विनाशं कृतवान्। अथातो हेतोः, सबलं बलेन सहितं,
एनं कृष्णं, हनिष्ये। बलशब्दोऽत्रेतरगोपबालानामप्युपलक्षणार्थः। उत्तरश्लोकगत—एते इति बहुवचनानुगुण्यात् ॥१४॥ एते इति ॥
यदा, एते श्रीकृष्णादयः, मत्सुहृदोर्मत्सोदरयोः, तिलापः कृताः, तिलोदकवत्तृप्तिहेतुत्वेन कृता इत्यर्थः। एतेषां हननमेव मत्सुहृदो-
स्तिलापाञ्जलय इति भावः। तदा व्रजौकसः सर्वे व्रजवासिनो जनाः, नष्टसमाः नष्टप्रायाः, ननु तेषां सासुत्वे कथं नष्टसमत्वं तत्राह।
प्राणे गते, वर्ष्मसु शरीरेषु, का नु का वा चिन्ता। हि यतः, ये प्राणभृतः, ते प्रजा एवासवो येषां तथाभूताः, भवन्ति। अयं भावः।
प्राणे गते शरीरं क्षणमपि स्थातुं न शक्नोति, किं तु नश्यत्येव, प्राणभृतां प्रजासुत्वात् प्राणसमेषु तत्पुत्रेषु मया हतेषु, सर्वेऽपि
व्रजौकसः स्वयमेव नङ्क्ष्यन्तीति तदर्थं न मया यत्नः कार्यं इति ॥ १५ ॥ इतीति ॥ इतीत्थं, व्यवस्य निश्चित्य, खलः दुरात्मा,
सोऽघासुरः, तदा ग्रसनाशया श्रीरामकृष्णादीन् ग्रसितुमिच्छया, योजनं योजनप्रमाणो य आयामो दैर्घ्यं तेन युक्तं च तन्महाद्रिव-
त्पीवरं स्थूलं च तत्, व्यात्तं गुहातुल्यमाननं यस्मिंस्तत्, अद्भुतं प्रेक्षकाश्चर्यकरं, आजगरमजगरसम्बन्धि, बृहत् विपुलं, वपुः शरीरं
धृत्वा, पथि मार्गे, व्यशेत शयितवान् ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अथाघनामेति : १०.१२.१३.

प्राचीनपुण्यपरिपाकफलानुरूपं तेषां विहारजसुखं हरिणा सहाभूत्।
तत्रावमानजनिताऽप्यतिसन्निकर्षादासीदघावगतिरित्यतिभाति युक्तम् ॥ २८ ॥
गोजातेन सहान्तरङ्गकलितं श्रीशं यदैषीदघः कर्तुं तत्र हि तन्मिषेण चकमे प्रायोऽस्य हार्दोदयम्।
योऽन्ते ब्रह्मणि चित्सुखे गतिमगात् सज्योतिरेवं मुनिः पश्यन् दीर्घदृशा यतः स तमघं नाम्नाऽघ इत्यब्रवीत् ॥ २९ ॥
साधुवृन्दावनक्रीडा सतामेव सुखावहा। असदंशो ह्यघो युक्तमासीत् तद्वीक्षणाक्षमः ॥ ३० ॥
साधुवृन्दावनक्रीडा सतामेव सुखावहा। असदंशो ह्यघो युक्तमासीत् तद्वीक्षणाक्षमः ॥ ३० ॥
वत्सार्भकाणामकृतागसामप्यसौ यदासीत् सुखकेल्यसोढा। चित्रं न चाद्यस्य भुजङ्गवृत्तेः स्वभाव एवान्यसुखासहिष्णुः ॥ ३१ ॥
वत्सार्भकाणामकृतागसामप्यसौ यदासीत् सुखकेल्यसोढा। चित्रं न चाद्यस्य भुजङ्गवृत्तेः स्वभाव एवान्यसुखासहिष्णुः ॥ ३१ ॥
प्रपञ्चदुर्गे नियमादघोदयो ह्यमृष्यमाणो विषयोपभोगम्। सतोऽसतो वा ग्रसितुं धृतव्रतः प्रतीक्षते काण्डमितीह युक्तम् ॥ ३२ ॥
सुखस्थितैरप्यमृतान्तरङ्गैरघप्रणाशो यदिह प्रतीक्ष्यते। निर्णीतमस्मादघसत्वमस्मिन् स्वस्मिन् परस्मिन्नपि वाऽतिगर्ह्यम्॥३३॥
न पापभीतिर्मनुजेषु केवला प्रपातनादस्त्यमृतान्धसामपि। समञ्जसं तद्यदघासुरात्तदा सुधाभुजोऽप्यापुरतीव साध्वसम् ॥ ३४ ॥
सन्नाशचिन्तनतथाचरणप्रवृत्तिर्वृत्तिःस्वभावकलिता भुवि याऽघवृत्तेः।
स्वस्य स्वभावफलमेव हि सा प्रसूते नान्यस्य तत्स्फुटमभूदघचिन्तितार्थात् ॥ ३५ ॥

सोदरनाशकृदिति ः १०.१२.१४.

आर्यं स्वसारं च हरन्तमच्युतं सञ्चिन्त्य वेगाद् यदगादघासुरः तद्युक्तमेवात्र जनः सहेतकः प्राणप्रियेष्टार्थवियोगमार्तिदम् ॥ ३६ ॥

श्रुतिग्राह्यस्तु भगवाञ्छ्रुतयस्त्वास्यगा विधेः। इत्यघस्तज्जिघृक्षुः किं काननान्तर्गतोऽभवत् ॥ ३७ ॥

सवनाशारब्धयत्न-कंसाद्यसुरपथ्यदृक्। युक्तमासीदघस्तत्र सवनाशः स्ववृत्तये ॥ ३८ ॥

इति व्यवस्येति ः १०.१२.१६.

यन्मूलभूतपुरुषाक्रम-सिद्धशक्तेः के नाम ते मम पुरो भुवि बाहुजाताः।
तत्राबलो लघुरलं त्वयमित्यघोऽसावासीत् स्मयाद्भुजगवेषधरो दुरात्मा ॥ ३९ ॥

श्रुत्यङ्गहीनत्वमहेरघस्याप्यस्मिन् जने तुल्यमतोऽभियुक्तम्। स तद्वपुर्भागभवत् पृथिव्यां तादृक् भवतीत्यगूढम् ॥ ४० ॥

इतरेष्वरिता च मित्रता भवतीशस्य तथा तथा स्वकृत्यात्। दुरि तं तु निसर्गशत्रुरित्यभवत् स्पष्टमघोऽहिरूपभाजि ॥ ४१ ॥

यो द्वेष्टि साधूनथ साधुनाथं निर्मन्तुवृत्तीन् सदयाद्यभूमिम्। सद्यौऽघरूपोऽहितमोमयात्मा भूत्वा विपद्भावमिहैति युक्तम् ॥ ४२ ॥

अजो गले मे भविता यथा तथा वपुर्मयाऽङ्गीकरणीयमित्यघः। स चिन्तयन्नेव निजेष्टयोजनोत्सुको बभूवाजगरः पुरैव किम् ॥४३॥

तत्प्राणपवनपानं चिकीर्षुरासीत् तदाहिरूपोऽघः। युक्तं परन्तु मूर्खो न वेद तं श्रीधरं स शेषेड्यम् ॥ ४४ ॥

मदग्रजनुषावुभौ वरतमश्रियावप्यलं गतौ लघुगरत्वतो भृशमनेन नाशं लघु।
विचिन्त्य स बृहद्गला मजगरस्थितिं तामघो दधारं किमु यत्पुरा विकसितास्य एवाभवत् ॥ ४५ ॥

यो यो भवेऽस्मिन् जनिमान् हि जन्तुस्तमत्तुमिच्छत्यघकालसर्पः।
अजस्रमेवं मतिमान् विभाव्य कुर्यादभीत्यै यदुनाथसख्यम् ॥ ४६ ॥

कृष्णप्रिया

राजन् परीक्षित् बड़े आनन्द से जब कि ग्वालबाल खेल में संलग्न हैं उसी समय अघासुर नाम का महान् असुर वहाँ आ धमका। वह खल श्री बलभद्र, श्रीकृष्ण आदि बालकौं की हंसी-खुशी को देख न सकता था केवल ईर्ष्या से जल रहा था। वह इतना खतर नाक दुष्ट रहा कि अमृत पान करके अगर हुए देवता गण भी, जो अमृत पान करने पर भी भगवान् श्री कृष्ण की बाल लीला का पान करने के अपने जीवन की चाह कर रहे हैं वे उस से घबड़ाते थे और चाहते थे कि इस दुष्ट की मृत्यु हो ॥ १३ ॥ राजन्! वह अघासुर पूतना और बक का छोटा भाई था और कंस से भेजा गया था। उसने उन बालकों को, जिनमें श्रीकृष्ण ही मुख्य थे, देखकर निश्चय किया कि यह कृष्ण ही मेरे सगे भाई बहिन को मारने वाला है अतः आज दल बल सहित इसे मार डालूँगा ॥ १४ ॥ जब ये बालक और बछड़े मार दिये जायँगे तब मेरे भाई बहिन तृप्ति और तिलाञ्जलि बन जायँगे तब ये सारे व्रजवासी अपने आप मरे जैसे ही हो जायँगे। जब प्राण चला जाता है तब देह की क्या चिन्ता? माता-पिता के सन्तान ही प्राण होते हैं, जब ये "ही" न रह जायँगे तो बूढे ग्वाले स्वयं मर मिटेंगे ॥ १५ ॥ ऐसा निश्चय कर वह खल अघासुर चार कोस का लम्बा-चौडा दीर्घकाय अद्भुत अजगर बन कर सब को खा जाने की लालसा से मार्ग में लेट गया, वह पर्वत-सा बड़ा मालूम पड़ता था, उसका खुला मुँह गुफा जैसा जान पड़ता था ॥ १६ ॥

धराधरोष्ठो जलदोत्तरोष्ठो दर्याननान्तो गिरिशृङ्गदंष्ट्रः।
ध्वान्तान्तरास्यो वितताध्वजिह्वः परुषानिलश्वासदवेक्षणोष्णः ॥ १७ ॥
तं दृष्ट्वा[1] तादृशं सर्वे मत्वा वृन्दावनश्रियम्। व्यात्ताजगरतुण्डेन ह्युत्प्रेक्षन्ते स्म लीलया ॥ १८ ॥
[2]अहो मित्राणि गदत सत्त्वकूटं पुरः स्थितम्। अस्मत्संग्रसनव्यात्तव्यालतुण्डायते न वा ॥ १९ ॥
सत्यमर्ककरारक्तमुत्तराहनुवद् घनम्। अधराहनुवद् रोधस्तत्प्रतिच्छाययारुणम् ॥ २० ॥
प्रतिस्पर्धेते [3]सृक्किभ्यां सव्यासव्ये[4] नगोदरे। तुङ्गशृङ्गालयोऽप्ये[5] तास्तद्दंष्ट्राभिश्च पश्यत ॥ २१ ॥
आस्तृतायाममार्गोऽयं रसनां प्रतिगर्जति। एषामन्तर्गतं[6] ध्वान्तमेतदप्यन्तराननम् ॥ २२ ॥
दावोष्णखरवातोऽयं श्वासवद् भाति पश्यत। तद्दग्धसत्त्वदुर्गन्धोऽप्यन्तरामिषगन्धवत् ॥ २३ ॥
[7]अस्मान् किमत्र ग्रसिता निविष्टानयं तथा चेद् बकवद् विनङ्क्ष्यति।
क्षणादनेनेति बकायुशन्मुखं वीक्ष्योद्धसन्तः करताडनैर्ययुः ॥ २४ ॥

---

१. दृष्ट्वा तं–श्रीधर. वंशी.। २. अहो विचित्रं मित्राणि सत्त्व–वीर.। ३. सृक्वभ्यां–वीर। ४. सव्यौ नगोदरौ–वीर.। ५. ह्येता–वीर.। ६. गंतध्वान्तं–वीर.। ७. विशन्तु सर्वे ग्रसिता किमस्मानयं तथा–वीर.।

कर्दमक्षमा

अन्वयः—धराधरोष्ठः जलदोत्तरोष्ठः दर्याननान्तः गिरिशृङ्गदंष्ट्रः ध्वान्तान्तरास्यविततध्वजिह्वः परुषानिलश्वासदवेक्षणोष्णः सः खलः तदा पथि व्यशेत ॥ १६–१७ ॥ सर्वे तादृशं तं दृष्ट्वा वृन्दावनश्रियं मत्वा व्यात्ताजगरतुण्डेन लीलया हि उत्प्रेक्षन्ते स्म ॥ १८ ॥ अहो मित्राणि गदत ! पुरःस्थितं सत्वकूटं अस्मत् संग्रसनव्यात्तव्यालतुण्डायते न वा ? ॥ १९ ॥ सत्यं अर्ककरारक्तं उत्तराहनुवद् घनम् तत्प्रतिच्छायया अरुणं अधराहनुवत् रोधः ॥ २० ॥ सव्यासव्ये नगोदरे सृक्किभ्यां प्रतिस्पर्धेते च एताः तुङ्गशृङ्गालयः तद् दंष्ट्राभिः (प्रतिस्पर्धन्ते) पश्यत ॥ २१ ॥ अयं आस्तृतायाममार्गः रसनां प्रति गर्जति एषाम् अन्तर्गतं ध्वान्तं अपि एतद् अन्तराननं (भाति) अयं दावोष्णखरवातः श्वासवद् भाति तद्दग्धसत्वदुर्गन्धः अपि अन्तरा आमिषगन्धवत् भाति पश्यत ॥ २२–२३ ॥ अत्र निविष्टान् अस्मान् अयं किम् ग्रसिता ? चेत् अनेन क्षणात् तथा बकवत् विनङ्क्ष्यति इति बकार्युशन्मुखं वीक्ष्यः हसन्तः करताडनैः ययुः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अद्भुतमिति यदुक्तं तद्दर्शयितुं विशिनष्टि । धराधरोष्ठ इति । धरायामधरोष्ठो यस्य सः । जलदेषूत्तरोष्ठो यस्य सः । दर्याविवाननस्यांतौ सृक्किणी यस्य सः । गिरेः शृङ्गाणीव दंष्ट्रा यस्य सः । ध्वांतवदंतरास्यं यस्य सः । विततध्ववज्जिह्वा यस्य सः । परुषानिलवच्छ्वासो यस्य सः । दववदीक्षणयोरुष्णः दाववद्दृष्टिरित्यर्थः । परुषानिलश्वासश्चासौ दवेक्षणोष्णश्च तथा ॥१७॥ वस्तुतोऽजगरमेव व्यात्ततुंडं दृष्ट्वा वृंदावनस्य श्रीः संपदेवैषेति भ्रांत्या मत्वा विपरीतं व्यात्ताजगरास्यसादृश्येनोत्प्रेक्षितवंतः ॥ १८ ॥ उत्प्रेक्षामेव प्रश्नोत्तराभ्याञ्चाहुः । अहो इति । सत्त्वकूटं सत्त्वाभासमिदं वा न वा तत्राप्यस्मत्संग्रसनाय व्यात्तं यद्व्यालतुण्डं तद्वदाचरति न वा ॥१९॥ निश्चितं तथैवेत्याहुः । सत्यमिति । अर्ककरैरारक्तं घनमुत्तरोष्ठवत्पश्यत । तस्य घनस्य प्रतिच्छाययारुणं रोधः स्थलमधरोष्ठवत्पश्यत । पश्यतेति सर्वत्रान्वेति ॥ २० ॥ सृक्किभ्यामोष्ठप्रांताभ्यां प्रतिस्पर्द्धेते तत्तुल्यतया वर्तेते । नगोदरे गिरिदर्यौ । एतास्तुंगशृङ्गालयस्तस्य दंष्ट्राभिः स्पर्धमानाः ॥ २१ ॥ आस्तृतायाममार्गे विस्तृतो दैर्घ्यवान्मार्गः । प्रतिगर्जति प्रतिस्पर्धते । एषां शृङ्गाणामंतर्गतं मध्यगतं ध्वांतमन्धकारमेतदंतराननमाननस्य मध्यं प्रतिगर्जति ॥ २२ ॥ दावेनोष्णः खरो वातोऽयम् । तेन दावेनाग्निदग्धानां सत्त्वानां यो दुर्गन्धः । स एव सर्पांतर्गतामिषगंधवद्भाति ॥ २३ ॥ एवं सत्यमप्यजगरमन्यथोत्प्रेक्ष्य निर्भया ययुः । किं ग्रसिता ग्रसिष्यति । अनेन श्रीकृष्णेन हंत्रा । बकारेरुशत्कमनीयं मुखम् ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

धरायां भूमौ । दर्यौ गुहे । 'प्रांतावोष्ठस्य सृक्किणी' इत्यमरः । ध्वांतवत्तमोयुक्तम् । अंतरास्यं मुखमध्यम् । विततध्ववद्विस्तृतमार्गवत् । परुषानिलवत्कठोरवातवत् । 'निष्ठुरे परुषम्' इत्यमरः । दववत् वनाग्निवत् । 'दवदावौ वनानलौ' इत्यमरः । इत्यर्थ इति । दाववद्दावाग्निवदिति तात्पर्यम् ॥ १७ ॥ तम् अघम् । तादृशं पूर्वोक्तविशेषणविशिष्टम् । तमघासुरं दृष्ट्वा महासर्पबुद्ध्या कांश्चित्पलायमानान्दृष्ट्वाऽन्ये तानाहुः रे मूढा एतावत्प्रमाणः सर्पो न संभवतीत्यतो वृंदावनशोभातिशयाधायको जंतुविशेषो विधात्रैव रचितः । किन्तु महासर्पप्रसारिततुंडाकार इति निश्चिताः उत्प्रेक्षितवंत उत्प्रेक्षां कुर्वंतः ॥ १८ ॥ कांश्चिन्मुख्यसखीन्सम्बोध्य स्वनिश्चयस्य प्रामाण्यार्थं पृच्छंति—अहो इति । 'उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नवं विना' इति चन्द्रालोकोक्तेः । सत्त्वकूटं निश्चलः प्राणिविशेषः कूटशब्दस्य पूर्वनिपाताभावस्त्वार्षः । यद्वा—सत्त्वं कूटमिवेति समासः । अत्र कूटपदं गिरिशृङ्गवाचकं ज्ञेयम् । "कूटोऽस्त्री निश्चले राशौ लोहमुद्गरदंभयोः । मायाद्रिशृङ्गयोस्तुच्छे सीरावयवयंत्रयोः ॥ अनृते च" इति मेदिनी । अस्मत्संग्रसनायास्माकं भक्षणाय । व्यात्तं प्रसृतम् । 'व्यालो दुष्टगजे सर्पे' इति मेदिनी । संशयोत्प्रेक्षयोरत्र संसृष्टिः । मित्राणीति क्लीबत्वम् 'मित्रं सुहृदि न द्वयोः' इत्युक्तेः ॥ १९ ॥ तथैव उक्तानुसारेण यथा यूयं मन्यध्वे तथैवेति । 'सत्यं निश्चितसत्ययोः' इति यादवः । उत्तरोष्ठवदुपरितनोष्ठवत् । प्रतिच्छायया प्रतिबिंबेन अरुणं रक्तम् । अधरोष्ठवदधस्तनोष्ठवत् ॥ २० ॥ तुंगशृङ्गालय उच्चशृङ्गपंक्तयः ॥२१॥ 'अंधकारोऽस्त्रियां ध्वांतम्' इत्यमरः ॥ २२ ॥ खरस्तीक्ष्णः 'तिग्मं तीक्ष्णं खरं तद्वत्' इत्यमरः । सत्त्वानां जीवानाम् । आमिषं मांसम् ॥ २३ ॥ एवमुक्तप्रकारेण । संतं सत्यम् । अन्यथाऽसत्यम् । अयमजगरवत्प्रतीयमानो जीवविशेषः । तथा चेत् ग्रसने कृते सति दूरस्थस्य मुखं दृष्ट्वाऽस्मद्दृष्टिगोचर एव कृष्ण आस्ते का चिंतेति । लब्धविश्वासाः एतद्बिलमध्ये किमप्यस्ति भोः सखायस्तदवश्यं पश्याम इति बाल्यचापलकौतुकोल्लासात्करताडनैर्निजनिर्भयत्वद्योतनाय करताडनं हास्यांगं सति सर्पे तत्पलायनं वाभिप्रेतम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पर्षेति पुरुषेति वा पाठः परुषानिलवत् श्वसाभ्यां दववदीक्षणाभ्यां च तेषु वा उष्णः ॥ १७ ॥ हि निश्चितं लीलयैवेति तथोत्प्रेक्षणमपि तेषामेका क्रीडैवेत्यर्थः ॥ १८ ॥ गदितव्यमेवाहुः—सत्त्वेत्यादिना । अस्मादित्यादौ यदग्रभाग इति शेषः ॥ १९ ॥

गदतेति केषाञ्चित्प्रश्नं केचिदनुमोदमाना आहुः—सत्यमिति युग्मकेन । यथार्थं वदथेत्यर्थः । तदेवाहुः–अर्केत्यादिना गन्धवदित्यन्तेन । अर्ककरा रक्तमिति एषां पश्चिमाभिमुखा गतिस्तस्य पूर्वाभिमुखा स्थितिरिति गम्यते प्रातस्त्यत्वात् उत्तरेत्यत्र पुंवद्भाव आर्षः ।। २० ।। एताः साक्षाद्वर्त्तमानाः एवमग्रेऽपि तस्य व्यालतुण्डस्य दंष्ट्राभिस्तु स्पर्द्धन्ते इति लेख्ये टीकायां स्पर्द्धमान इति लेखकभ्रमात् ।। २१ ।। आयामयुक्तो मार्गः आयाममार्गः स चास्तृत इति ध्वान्तं छायात्मकं ध्वान्ताननमध्ययोः कालवर्णत्वात् साम्यम् ।। २२ ।। भातीति पश्यत इति मध्ये मध्ये विस्मयाय ।। २३ ।। इति एतद्वदन्तः उद्धसन्तः तस्य खलत्वारोपणेन किं वा स्वयं हसत एव विशेषतश्च श्रीकृष्णमुखं निरीक्ष्योच्चैर्हसन्त इत्यर्थः । किं वा भवतात्रावहितेन भाव्यमिति नर्मणा विज्ञापनार्थमिव करताडनैरिति करतालीः कृत्वेत्यर्थः । तच्च लोकरीत्या सर्पापसारणार्थमिव निर्भयत्वेन निजवीरदर्पप्रकटनार्थमिव च ययुः अग्रतोऽधावन्नित्यर्थः ।। २४ ।।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

दवाविव ईक्षणे यस्य सः । अतस्तयोस्ताभ्यां वा उष्णश्चात एव चक्षुषी दावौ मत्वा तत एवोष्णः खरवातोऽयमित्यग्रे वक्ष्यति ।। १७ ।। हि निश्चितम् लीलयेति तथोत्प्रेक्षणमपि तेषामेका क्रीडैवेत्यर्थः, तथैव सम्यक् सर्वसंगत्यापादनात् ।। १८ ।। गदितव्यमेवाहुः सत्त्वेत्यादिना । अस्मदित्यादौ यदग्रभाग इति शेषः ।।१९।। गदतेति केषाञ्चित् प्रश्नं केचिदनुमोदमाना आहुः–सत्यमिति; यथार्थं वदथेत्यर्थः । तदेवाहुः— अर्केत्यादिना गन्धवदित्यन्तेन ।। २० ।। एताः साक्षादवर्त्तमानाः । एवमग्रेऽपि । च तु तस्य व्यालतुण्डस्य दंष्ट्राभिस्तु, 'स्पर्द्धन्ते' इति लेख्य स्पर्द्धमाना इति लेखक-भ्रमात् ।। २१ ।। आस्तृतायाम-मार्ग इति श्रीवृन्दावनेऽनन्त-पशुवर्गचरणात् सर्वत्र स्वत एव महावर्त्मवृत्तेः ।। २२ ।। भातीति पश्यत; एवमस्य पूर्वाभ्यां वाक्याभ्यां परेण वान्वयः ।। २३ ।। इत्येतद्वदन्त उद्धसन्तस्तस्य खलत्वानुसन्धानेन; किंवा ज्ञात्वापि तथोत्प्रेक्षणेन स्वयं हसन्त एव, विशेषतश्च श्रीकृष्णस्य सुन्दरं मुखं निरीक्ष्योच्चैर्हसन्त इत्यर्थः । यद्वा, तन्मुखं वीक्ष्येति तदनुमत्यर्थमिव, किंवा भवतात्रावहितेन भाव्यमिति विज्ञापनार्थमिव । किंवा, परमप्रियत्वेन स्वभावत एव करताडनैरिति करतालीः (दत्त्वा) कृत्वेत्यर्थः । तच्च लोकरीत्या सर्पपसारणार्थमिव, वस्तुतस्तु निर्भयत्वेन निज-वीरदर्पप्रकटनात्, वाल्यक्रीडा-स्वभावादेव वा ययुरग्रतोऽधावन्नित्यर्थः ।। २४ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

रुषा क्रोधेन अनिल इव श्वासः दवौ इव ईक्षणौ चोष्णे यस्य सः ।। १७ ।। वृन्दावनशोभां तद्विशिष्टं कुञ्जं मत्वा इत्यपह्नुतिः व्यात्ता जगरतुण्डेन दृष्टान्तेन उत्प्रेक्षन्ते उत्प्रेक्षीकुर्वन्ति लीलया कौतुकेनेत्यर्थः ।। १८ ।। सत्त्वकूटम् अस्मत्सङ्ग्रसनाय व्यात्तं प्रसारितं यद्व्यालतुण्डं तद्वदाचरति नचेति गदत कथयत उपमासंशयश्च ।। १९ ।। अर्ककरैः आरक्तं घनं मेघं उत्तराहनुवत् उत्तरोष्ठवत् तत्प्रतिच्छायया उत्तरोष्ठायमानघनप्रतिबिम्बेनारुणं रोधः अधराहनुवत् अधरोष्ठवत् वर्त्तते तद्द्वयं सत्यं वा नवेति गदत इत्यन्वयः । हनुशब्दस्य स्त्रीत्वमार्षम् उपमा हेतुसंसृष्टिः ।। २० ।। वामदक्षिणे पर्वतमध्ये सृक्किभ्याम् ओष्ठप्रान्ताभ्यां प्रतिस्पर्द्धेते इति पश्यत तुङ्गा उच्चा शृङ्गपङ्क्तयः तद्दंष्ट्राभिः सर्पदंष्ट्राभिः प्रतिस्पर्द्धन्त इति पश्यत ।। २१ ।। मार्गोऽयं रसनां प्रतिगर्जति रसनां व्यपदिशति अन्तर्गतध्वान्तम् एषामिति मुखरसनादीनाम् एतत्पुरोवर्त्ति अपह्नुत्युपमे ।। २२ ।। दावोष्णेति अत्रोपमैवापह्नुत्युत्तरा स्पष्टम् अहो मित्राणि इत्यादि पञ्चसु अपह्नुतिप्राणिते उत्प्रेक्षोपमे ज्ञेये सत्यं किम् एवमादिभिः ।।२३।। वकारैः श्रीकृष्णस्य उशत् कमनीयम् ।। २४–२५ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अद्भुतत्वमेव दर्शयितुमसुरं विशिनष्टि–धरायामधरोष्ठो यस्य जलदेषूत्तरोष्ठो यस्य दर्यौ गिरिकन्दराविव आननस्यान्तौ सृक्किणी यस्य गिरेः शृङ्गाणीव दंष्ट्रा यस्य ध्वान्तोऽन्धकारो यस्मिन् अस्तीति ध्वान्तवत्तदन्तरास्यं यस्य दीर्घीभूतमहाध्ववज्जिह्वा यस्य परुषानिलविच्छ्वासो यस्य सः दावाग्निरिवेक्षणयोरुष्णः दाहकदृष्टिरित्यर्थः । परुषानिलश्वासशब्दोत्तरस्य सोरुत्वे "हशि च" इति यत्व तस्य "लोपः शाकल्यस्य" इति लोपः दवेक्षणोष्णपदे कर्मधारयो वा ।। १७ ।। वस्तुतोऽजगरमेव व्यात्ततुण्डं वृन्दावनस्य श्रीः सम्पत् एषेति भ्रान्त्या मत्वा विपरीतं व्यात्ताजगरतुण्डसादृश्येन उत्प्रेक्षितवन्तः ।। १८ ।। तेषामुत्प्रेक्षामेव प्रश्नोत्तराभ्यामाह–अहो इति पञ्चभिः । अहो मित्राणि सुहृदः पुरः स्थितमिदं वस्तु सत्त्वकूटं सत्त्ववद्भासमानं न वा तत्राप्यस्मान् संग्रसितुं व्यात्तव्यालतुण्डवदाचरति न वा ।। १९ ।। एवमुक्ताः केचित्तथैवेत्याहुः–सत्यमिति । अर्ककरैरारक्तं घनं मेघमन्तरोष्ठवत्पश्यत, तस्य घनस्य प्रतिच्छायया अरुणं रोधः कूलमधरोष्ठवत्पश्यतेति सर्वत्रान्वेति ।। २० ।। सव्यासव्यनगयोर्वामदक्षि गिर्योरुदरे दर्य्यौ सृक्किभ्यामोष्ठप्रान्ताभ्यां प्रतिस्पर्द्धेते तुल्यतया वर्त्तेते सव्यासव्यगिर्योस्तुङ्गशृङ्गाणामालयः पंक्तयस्तस्य दंष्ट्राभिः स्पर्द्धन्ते इति वचनविपरिणामे वान्वयः ।। २१ ।। आस्तृतो विस्तृतश्चासावायाममार्गदैर्घ्यवान्मार्गः स तस्य रसानां जिह्वां प्रतिगर्जति प्रतिस्पर्द्धते एषां शृङ्गाणामन्तर्गतमेव ध्वान्तमप्यन्तराननमास्यमध्यं प्रतिगर्जति ।। २२ ।। दावाग्निनोष्णः खरः कठिनश्च वातः श्वासवत्

भाति तेन दावाग्निना दग्धानां सत्त्वानां जन्तूनां दुर्गन्धः सत्त्वान्तर्गतामिषगन्धवत् भाति ॥ २३ ॥ एवं सत्यमेवाजगरसत्वमेवोत्प्रेक्ष्य निर्भया ययुरित्याह मुनिः विशन्त्विति । सर्वे वत्सा वत्सपाश्चात्र विशन्त्वस्मान् ग्रसिता किं ग्रसिष्यति किम् ? तथा चेद्ग्रसिष्यति बकवत् बकासुरवदयमप्यनेन श्रीकृष्णेन क्षणाद्विनङ्क्ष्यति नाशं गमिष्यति इतीत्थं बकारेरुशत्कमनीयं मुखं विलोक्य उच्चैर्हसन्तः करताडनैरुपलक्षिता ययुः करताडनानि कुर्वन्तो ययुरित्यर्थः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

धरायामधरोष्ठो यस्य सः जलदे उत्तरोष्ठो यस्य सः दर्य्यौ कन्दराविवाननस्यान्तौ सृक्किणी यस्य सः ध्वान्तमन्तरास्ये मुखमध्ये यस्य सः विस्तृतः पन्था इव जिह्वा यस्य सः परुषानिलवत् श्वासो यस्य सः दवाग्निवदीक्षणयोरुष्णो यस्य स च स च सः ॥ १७ ॥ तमघासुरं दृष्ट्वा महासर्पबुद्ध्या कांश्चित् पलायमानानाश्वासयन्तः सर्वेऽन्ये मत्वेति । ननु, रे मूढाः ! एतावत्प्रमाणः सर्पो न सम्भवतीत्यतो वृन्दावनशोभाविशेषाधायको जन्तुविशेषो विधात्रैव रचितः किन्तु महासर्पप्रसारिततुण्डाकार इति निश्चित्य व्यात्तं प्रसृतं यदाजगरतुण्डं तेन सह उत्प्रेक्षन्ते उपमिमते लीलयेति भयाभावः सूचितः ॥ १८ ॥ कांश्चिन्मुख्यान् सखीन् सम्बोध्य स्वनिश्चयस्य प्रामाण्यार्थं पृच्छन्ति–अहो इति । सत्त्वकूटं निश्चलः प्राणिविशेषः "कूटोऽस्त्रीनिश्चले राशौ" इति । मेदिनी पूर्वनिपाताभाव आर्षः । यद्वा गिरिशृङ्गवाचककूटशब्देनोपमितं व्याघ्रादिभिरित्यनेन समासः अस्माकं संग्रसनार्थमिव व्यात्तसर्पतुण्डवदाचरति न वा ॥ १९ ॥ सत्यमिति यथा यूयं मन्यध्वे तथैवेति ते प्रत्याहुः–अर्ककरैरारक्तं घनमेतस्योत्तरोष्ठवत्पश्यत तस्य घनस्य प्रतिच्छायया अरुणं रोधःस्थलमधरोष्ठवत् पश्यत हन्वोरुत्तराधरत्वासम्भवत्वादत्र हनुशब्देनोष्ठद्वयं लक्ष्यते ॥ २० ॥ सृक्किभ्यामस्य ओष्ठप्रान्ताभ्यां प्रतिस्पर्द्धेते तुल्यतया वर्तेते नगोदरे गिरिदर्य्यौ एता इति तर्जन्या दर्शयन्ति तस्य सर्पतुण्डस्य दंष्ट्राभिः स्पर्द्धन्ते ॥ २१ ॥ आस्तृतायामः विस्तृतदैर्घ्यः मार्गः पन्थाः रसनां जिह्वां प्रतिरसनया सह गर्जति स्पर्द्धते एषां शृङ्गाणां मध्यगतमन्धकारं कर्तृ एतदपि अन्तराननं एतस्य आननमध्यं प्रतिगर्जति स्पर्द्धते ॥ २२ ॥ तेन दावाग्निना दग्धानां सत्त्वानां यो दुर्गन्धः स एव सर्पान्तर्गतं दुर्गन्धवद्भाति ॥ २३ ॥ मिलिताः सर्वे किञ्चित्सभयमाहुः–अस्मानिति । अयं यदि सत्य एव सर्पः स्यादिति भावः । तन्मध्य एव केचिदाश्वासयन्त आहुः तथा चेत् क्षणमात्रादेव अनेन कृष्णेन हन्त्रा बक इव नाशं प्राप्स्यति इत्युक्त्वा बकारेदूरस्थितस्य कृष्णस्य मुखं वीक्ष्येति अस्मद्दृष्टिगोचर एव कृष्ण आस्ते का चिन्तेति लब्धविश्वासाः उद्धसन्त इति एतद्बिलध्ये किमप्यस्ति भोः सखायः ! तदवश्यं पश्याम इति बाल्यचापल्यतः कौतुकोल्लासात् करताडनैरिति निजनिर्भयत्ववीरत्वद्योतनाय सर्पापसारणार्थं वा ययुरधावन् वत्सा अपि पुच्छानुद्यम्य तानन्वधावन्निति ज्ञेयम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अद्भुतत्वं दर्शयितुं विशिनष्टि–धरेति । धरायामधरोष्ठो यस्य सः जलदेषूत्तरोष्ठो यस्य सः दर्य्याविद्रिकन्दरे इवाननान्तौ सृक्किणी यस्य सः गिरिशृङ्गाणीव दंष्ट्रा यस्य सः ध्वान्तयुक्तमन्तरास्यं यस्य सः विततोऽध्ववज्जिह्वा यस्य सः परुषानिलवत् श्वासो यस्य सः दववदीक्षणयोरुष्णः दाहकदृष्टिरित्यर्थः । परुषानिलश्वासेन सह कर्मधारयः ॥ १७ ॥ तादृशं गिरिसदृशाजगररूपिणं तमघासुरं दृष्ट्वापि वृन्दावनस्य श्रियं गिर्य्यात्मिकां सम्पदं मत्वा विपरीतमजगरतुण्डेन महाव्यालास्यसादृश्येनोत्प्रेक्ष्यन्ते स्म उत्प्रेक्षन्तः लीलया अन्योऽन्यभयाभावसूचिन्या चेष्टया ॥ १८ ॥ तेषामुत्प्रेक्षां तत्प्रश्नोत्तराभ्यामाह–अहो इति पञ्चभिः । तत्र केचिदाहुः अहो इत्याश्चर्ये हे मित्राणि ! पुरःस्थितं सत्त्वकूटम् असत्त्वमपि सत्त्वमिव न वा इति गदत ब्रूत तदपि अस्मत्सङ्ग्रसनाय व्यात्तं प्रसारितं यद्व्यालतुण्डं दुष्टसर्पास्यं तद्वदाचरति न वा ॥ १९ ॥ अन्ये आहुः–सत्यमिति । अर्ककरैः सूर्य्यरश्मिभिः आरक्तं घनमुत्तराहनुवत् अधराहनुवच्च तस्य घनस्य प्रतिच्छाययाऽरुणं रोधः भूसंलग्नं गिरिस्थलं पश्यतेति उत्तरेणान्वयः ॥ २० ॥ सव्यासव्ये नगोदरे गिरिदर्य्यौ सृक्किभ्यामोष्ठप्रान्ताभ्यां प्रतिस्पर्द्धेते तत्सादृश्यं प्रपद्येते तुङ्गशृङ्गाण्युच्चशृङ्गाणामालयः पङ्क्तयस्तद्दंष्ट्राभिश्च प्रतिस्पर्द्धन्ते इति च पश्यत ॥ २१ ॥ आस्तृता विस्तृतश्चासौ आयाममार्गो दैर्घ्यवान्मार्गः रसनां जिह्वां प्रतिगर्जति प्रतिस्पर्द्धते एषामुच्चशृङ्गाणामन्तर्गतं मध्यगतं ध्वान्तमन्धकारम् अन्तराननमाननस्य मध्ये प्रतिगर्जति ॥ २२ ॥ दावेन वनाग्निना उष्णश्चासौ खरवातो दुःसहपवनः तद्दग्धसत्त्वदुर्गन्धः वनाग्निना दग्धप्राणिदुर्गन्धः अन्तरामिषगन्धवत् अजगरान्तर्गतामिषगन्धवत् भाति ॥२३॥ अत्र गिरेरजगरास्यवदाभासमाने मुखे निविष्टान् अयमजगराकारो गिरिः किं ग्रसिता ग्रसिष्यति तथा चेत् अनेन बकारिणा क्षणाद्बकवद्विनङ्क्ष्यति इत्येवं बकारेः उशदतिकमनीयं मुखं वीक्ष्य उद्धसन्तः परस्परं प्रोत्साहनार्थं करताडनैर्ययुः ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

धरायामधरोष्ठो यस्य जलदे उत्तरोष्ठो यस्य दर्यौ कन्दराविवाननस्यान्तौ सृक्कणी यस्य, ध्वान्तमन्तरास्ये मुखमध्ये यस्य विततोऽध्व जिह्वा यस्य परुषानिलवत् श्वासो यस्य दववदीक्षणयोरुष्णः दावाग्नितुल्यदृष्टिरित्यर्थः । पश्चात् कर्मधारयः ॥१७॥ तं तादृशमघं सर्वे दृष्ट्वा महासर्पधिया विद्रुतात् कांश्चिदाश्वासयन्तो अन्ये वृन्दावनश्रियं मत्वा भो मुग्धाः ! नेदृशः सर्पः सम्भवेदत

एतद्वनशोभार्थः कश्चित् पदार्थः परेशेन निर्मितोऽस्तीति मन्वानास्तं व्यात्तेनाजगरतुण्डेन सहोत्प्रेक्षन्ते लीलयेति भयाभावः ॥ १८ ॥ तत्र केचित् स्वमतप्रामाण्यायान्यान् पृच्छन्ति अहो इति हे मित्राणि ! सखायः यूयं गदत अस्मत्पुरःस्थितं सत्वकूटं निश्चलः प्राणि-विशेषः "कूटोऽस्त्री निश्चलं राशा"विति मेदिनी। पूर्वनिपाताभाव आर्षः। अस्मत्संग्रसनार्थमिव व्यात्तसर्पतुण्डवदाचरति न वा ॥ १९ ॥ तन्मतं स्वीकृत्याहुः सत्यमिति हन्वोरुत्तराधरभावासम्भवादत्र हनुशब्देनोष्ठद्वयं लक्ष्य अर्ककैरारक्तं घनमेव अस्योत्त-रोष्ठवत् पश्यत तस्य घनस्य प्रतिछायया अरुणं रोधोऽपरोष्ठवत् पश्यत ॥ २० ॥ सव्यासव्ये वामदक्षिणे नगोदरे गिरिदर्याविस्य सृक्कभ्यां मुखप्रान्ताभ्यां प्रतिस्पर्द्धेते सदृशतया वर्त्तेते, तुङ्गाः शृङ्गालयो नगशिखराणि, तस्याजगरस्य दंष्ट्राभिः स्पर्द्धमानाः पश्यत ॥ २१ ॥ आस्तृतायाममार्गो विस्तृतदैर्घ्यः पन्थाः अस्य रसनां जिह्वां प्रतिगर्जति त्वत्समोऽहमिति वदतीत्यर्थः। एषां शृङ्गाणामन्तर्गतं ध्वान्तं कर्त्तृ एतदप्यन्तराननमध्यं प्रतिगर्जति ॥ २२ ॥ अयं दावोष्णखरवातोऽस्य श्वासवद्भाति, तेन दावाग्निना दग्धानां सत्वानां यो दुर्गन्धः स एव सर्पान्तर्गतामिषदुर्गन्धवद्भाति ॥ २३ ॥ मिलिताः सर्वे किञ्चिद्भीता आहुरस्मा-निति। वस्तुतश्चेदयं सर्प एव स्यादिति भावः। तत्रैव केचिदाहुः तथा चेदनेन कृष्णेन क्षणादेव बकवद्विनक्ष्यतीति गदित्वा दूरस्थस्य वकारेरुशन्मनोज्ञं मुखं वीक्ष्येति तद्दृष्टिविषयेन का चिन्तेति भावः। एतद्बिलमध्ये किमस्ति तत् किं न द्रष्टव्यमित्युद्धसन्तः, कर-ताडनैरिति निर्भयत्वं वीरत्वञ्च द्योतयन्तस्तदययुस्तानानु वत्साश्चोत्पुच्छादधावन् ॥ २४ ॥

श्रीसुबोधिनी

तस्य रूपमनुवर्णयति **धरेति**, **धरायां** भूमावधरो**ष्ठं** यस्य, **जलदेषु** मेघेषूत्तरोष्ठं यस्य, दरीवत् कन्दरव**दाननान्तो** मुखमध्यं यस्य, गिरेः **शृङ्गवद् दंष्ट्रा** यस्य ध्वान्तयुक्तम**न्तरास्यं**, वितताध्ववन् मार्गवज् **जिह्वा** यस्य, **परुषः** स्पर्शदुःसहो **योनिल**स्तद्वच् **छ्वासः**, दववद् दवानलव**दीक्षणरुष्णः** स्पर्शो यस्य, **श्वासे**न सहित **ईक्षण** उष्णो वा, तादृशमपि दृष्ट्वा बालका न भीताः किन्तु स्वेष्टत्वेनैव कल्पितवन्तः ॥ १७ ॥ अत एव तेषां न भयं जातमसद्भावाभावादित्याशयेनाह **तं दृष्ट्वेति, तं तादृशं दृष्ट्वा वृन्दावनश्री**रेवैषेति **मत्वा** क्षणं ध्यात्वा भवति न वेत्य**जगरतुण्ड**तुल्यत्वेन श्रियमेवोत्प्रेक्षितवन्तः, श्रीरेषा परमजगर-तुण्डवद् दृश्यत इति, **स्मे**तिप्रसिद्धिः, स्वस्य भयाभावाल्लीलया यत्किञ्चित् कल्पयन्ति स्म ॥ १८ ॥ कल्पनामेवाह पञ्चभिः, **अहो** इत्याश्चर्यं, **मित्राणि** सर्वाणि **गदत** इति सम्बोधनं वा, **सत्त्वकूटं** कपटसत्त्वं **पुरःस्थित**मग्रे वर्तमानमस्म**त्सङ्ग्रसनार्थ**मेव **व्यात्तं** प्रसारितं **व्यालतुण्ड**मिवाचरति **न वे**ति निर्णयो वक्तव्य इत्यर्थः ॥ १९ ॥ तत्र नवापक्षं दूरीकृत्योत्प्रेक्षार्थं व्यालतुण्डत्वमेव सम्पाद-यन्ति सत्यमिति, **अर्ककरैरारक्तमुत्तराहनुवद् घनं पश्यत, अधराहनुवद् रोध**श्च तस्यैवारक्तमेघस्य **प्रतिच्छायया**रु**ण**वर्णम् ॥२०॥ सृक्किणीभ्यां कृत्वा **सव्यासव्ये** पर्वतकन्दरे **प्रतिस्पर्धते,** वस्तुतः कन्दरैव सृक्किणीव दृश्यते, **तुङ्गा**नां **शृङ्गाणामालयः** पङ्क्तयोपि **तद्दंष्ट्राभिः प्रतिस्पर्ध**न्ते, नात्र सन्देहः, **पश्यत** ॥ २१ ॥ **आस्तृत** आसमन्तादायाममार्गो योजनपरिमितो **रसनां प्रति गर्जति** रसनावद् भासते, गर्जनादिकं तुल्यत्वाय, येषां शृङ्गाणां दंष्ट्राणामन्तर्गतमपि **ध्वान्तमन्तराननं प्रति गर्जति** ॥ २२ ॥ दाववद् दावानलवदुष्णः खरश्च **वातोयं, दावान**लेन वोष्णः, **श्वासवद् भाति पश्यत** विचारयत, तत्र दावानले दग्धानां **सत्त्वानां दुर्गन्धोन्तरोदरे यदामिष**मपक्वमांसं यत् तेन भक्षितं तस्य **गन्धवद् भाति** ॥ २३ ॥ तर्ह्येवं सति किं कर्तव्यमित्याशङ्क्य गन्तव्यमेवेति निर्धार्य बाधकं दूरीकुर्वन्त्यस्मानिति, **अत्र** प्रविष्टानस्मान् **किमयं ग्रसिष्य**ति ? **तथा चेद् वकवदेव क्षणा**देव नाशं यास्यत्यनेनैव कृष्णेनैवैषोघ **इति** निश्चित्य **बकारेर्भगवत उशत्** कमनीयं **मुखं वीक्ष्योध्वं हसन्तः करताडनैः** सहिताः प्रवष्टुं **ययुः** ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अद्भुतमिति यदुक्तं तत्तदेव दर्शयन्नसुरं विशिनष्टि—धरायामधरोष्ठो यस्य सः। जलदेषु उत्तरोष्ठो यस्य सः। दर्याविवाननस्यान्तौ सृक्किणी यस्य सः। गिरेः शृङ्गाणीव दंष्ट्रा यस्य सः। ध्वान्तोऽन्धकारः, तद्युक्तमन्तरास्यं मुखमध्यं यस्य सः। वितताध्ववत् विस्तृतमार्गवत् जिह्वा यस्य सः। परुषानिलवच्छ्वासो यस्य सः। दववदीक्षणयोरुष्णः, दाहकदृष्टिरित्यर्थः। परुषा-निलश्वासश्वासौ दवेक्षणोष्णश्च स तथा ॥ १७ ॥ तं वस्तुतोऽसुरं तादृशं धृताजगरशरीरमेव ते सर्वे गोपा दृष्ट्वाऽपि भ्रान्त्या 'वृन्दावनस्य श्रीः सम्पदेव एषा' इति मत्वा व्यात्ताजगरतुण्डेन प्रसारितसर्पमुखसादृश्येन विशेषत उत्प्रेक्षितवन्तः। तत्र हेतुमाह—लीलयेति। लीलाविष्टचित्तत्वेनेत्याशयः ॥ १८ ॥ उत्प्रेक्षामेव प्रश्नोत्तराभ्यामाहुः—अहो इति। सम्मत्यर्थं सम्बोधयन्ति—मित्राणीति। अहो आश्चर्यं पुरःस्थितमिदं सत्त्वकूटं प्राण्याभासमिवास्ति, न वा तत्राप्यस्मत्सङ्ग्रसनाय व्यात्तं विदारितं यद्व्यालतुण्डं सर्पमुखं तद्वदाचरति न वा तद्गदत ॥ १९ ॥ एवं पृष्टाः केचिदाहुः—सत्यमिति। निश्चितं तथैवेत्यर्थः। एवमग्रेऽप्युत्तरं बोध्यम्। अर्ककरैः सूर्यकिरणैः आरक्तं घनमुत्तराहनुवदुपरितनोष्ठवत् पश्यत। तस्य रक्तघनस्य च्छायया अरुणं रोधो नदीकूलमधरोष्ठवत् पश्यत। 'पश्यत' इति क्रियापदमपि सर्वत्रान्वेति ॥ २० ॥ सव्यासव्ये वामदक्षिणयोर्मध्ये वर्तमाने नगोदरे गिरिदर्यौ सृक्किभ्या-मोष्ठप्रान्ताभ्यां प्रतिस्पर्द्धेते तुल्यतया वर्तेते इति पश्यत। एतास्तुङ्गाः शृङ्गाल्योऽपि तस्याजगरस्य दंष्ट्राभिः स्पर्धमानाः

पश्यत ।। २१ ।। अयमास्तृतायाममार्गः विस्तृतो दैर्घ्यवान् मार्गस्तस्य रसनां प्रति गर्जति स्पर्धते । एषां शृङ्गाणामन्तर्गतमेतद्ध्वान्तमन्धकारमपि अन्तराननमाननमध्यं प्रति गर्जति पश्यत ।। २२ ।। दावाग्निनोष्णः खरोऽयं वातः श्वासवद्भाति पश्यत । तेन दावाग्निना दग्धानां सत्त्वानां योन्तर्गन्धः सोऽपि सर्पस्यान्तर्गतामिषगन्धवद्भाति पश्यत ।। २३ ।। एवमुक्तास्तेषु एव केचिद्विश्वस्ता आहुः—सत्यमयं सर्पस्तथापि किमत्र निविष्टानस्मान् ग्रसिता ग्रसिष्यति चेत्तदा तेन श्रीकृष्णेन हन्त्रा 'अयमपि बकवत् क्षणादेव विनङ्क्ष्यति' इति परस्परमुक्त्वा बकारेः श्रीकृष्णस्य उशत् अतिकमनीयं मुखं वीक्ष्योच्चैर्हसन्तः करताडनैः सह निजनिर्भयत्ववीरत्वादिप्रकाशनाय बाहुस्फोटं कुर्वन्तः तत्रत्याश्चर्यं द्रष्टुं ययुरित्यन्वयः । तान् धावतो वत्सा अपि पुच्छानुद्यम्यानुययुरित्यर्थः ज्ञातव्यम् ।। २४ ।।

अन्वितार्थप्रकाशिका

अद्भुतत्वमाह—धरेति । स च धरायामधरोष्ठो यस्य सः जलदेषु उत्तरोष्ठो यस्य सः दर्याविवाननस्यान्तौ सृक्किणी यस्य सः गिरेः शृङ्गाणीव दंष्ट्रा यस्य सः ध्वान्तोऽन्धकारस्तद्युक्तमन्तरास्यं मुखमध्यं यस्य सः वितताध्ववत् विस्तृतमार्गवत् जिह्वा यस्य सः परुषानिलवच्छ्वासो यस्य सः दववदीक्षणयोरुष्णः दावतुल्यदृष्टिरित्यर्थः । परुषानिलश्वासश्चासौ दवेक्षणोष्णः स तथा अभूत् ।। १७ ।। दृष्ट्वेति । तादृशं तमसुरं ते सर्वे गोपाः दृष्ट्वाऽपि भ्रान्त्या वृन्दावनस्य श्रीः सम्पदेवैषा नतु महासर्पः इति मत्त्वा व्यात्ताजगरतुण्डेन प्रसारिताजगरमुखसादृश्येन लीलया विशेषत उत्प्रेक्षन्ते स्म उत्प्रेक्षितवन्तः ।।१८।। तत्र केचित्स्वोत्प्रेक्षां स्वसखान् पृच्छन्ति–अहो इति । अहो आश्चर्यं हे मित्राणि ! पुरः स्थितमिदं सत्त्वकूटं प्राण्याभासमिवास्ति न वा यद्वा सत्त्वकूटं निश्चलः प्राणिविशेषः "कूटोऽस्त्री निश्चले राशौ" इति मेदिनी । यद्वा । सत्त्वं कूटं गिरिशृङ्गमिवेति समासः । तत्राप्यस्मत्संग्रसनाय व्यात्तं विदारितं यद् व्यालतुण्डं सर्पमुखं तद्वदाचरति न वा तद्गदत ।। १९ ।। तान्सखायः प्रत्याहुः स्म—सत्यमिति ।। सत्यं निश्चितमर्ककरैः सूर्यकिरणैः आरक्तं घनमुत्तराहनुवत् लक्षणया उपरितनोष्ठवत् पश्यत । पुंवद्भावाभाव आर्षः । एतेन तस्य पूर्वमुखस्थितिः सूच्यते । तस्य रक्तघनस्य प्रतिच्छायया अरुणं रोधो नदीकूलमधराहनुवदधरोष्ठवत् पश्यत ।। २० ।। प्रतिस्पर्द्धेते इति । सव्यासव्ये वामदक्षिणयोर्मध्ये वर्तमाने नगोदरे गिरिदर्यौ सृक्किभ्यामोष्ठप्रान्ताभ्यां प्रतिस्पर्द्धेते तुल्यतया वर्तेते इति पश्यत । एतास्तुङ्गाः शृङ्गाणामालयः पङ्क्तयोऽपि तस्याजगरस्य दंष्ट्राभिः स्पर्द्धमानाः पश्यत ।। २१ ।। आस्तृतेति । अयमास्तृतायाममार्ग विस्तृतो दैर्घ्यवान् मार्गस्तस्य रसनां प्रतिगर्जति स्पर्धते । एषां शृङ्गाणामन्तर्गतमेतद्ध्वान्तमन्धकारमपि कर्तृ अन्तराननमाननमध्यं प्रतिगर्जति पश्यत नीलत्वसाम्यात् ।। २२ ।। दावोष्णेति । दावाग्निनोष्णः खरोऽयं वातः श्वासवद् भाति पश्यत । तेन दावाग्निना दग्धानां सत्त्वानां यो दुर्गन्धः सोऽपि सर्पस्यान्तर्गतामिषगन्धवद् भाति पश्यत । इदं दृश्यमानं महासर्पवत्प्रतीयते नतु महासर्प इति प्रकरणार्थः ।। २३ ।। मिलिताः सर्वे किञ्चित्सभयमाहुः—अस्मानिति । यदि वा सत्यमयं सर्पोऽस्तु तथापि किमत्र निविष्टानस्मान् ग्रसिता ग्रसिष्यते तथा चेद् ग्रसिष्यते चेत्तदा तेन श्रीकृष्णेन हन्त्रा हेतुनाऽयमपि बकवत् क्षणादेव विनङ्क्ष्यति । इति परस्परमुक्त्वा बकारेः श्रीकृष्णस्य उशत् अतिकमनीयं मुखं वीक्ष्य अस्मद्दृग्गोचर एव कृष्ण आस्ते काऽत्र चिन्ता इति लब्धविश्वासा उच्चैर्हसन्तः करताडनैः सह वीरत्वादिप्रकाशकैर्बाहुस्फोटादिभिः सर्पापसारणाय वा कृतैः सह ययुः । वत्सा अपि अनुययुरित्यपि ज्ञेयम् ।। २४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अद्भुतत्वं दर्शयन्नजगरविशेषणान्याह धरेति—धरायां भूम्यां संलग्नः अधरोष्ठो यस्य जलदेषु मेघेषु संलग्न उत्तरोष्ठो यस्य दरीगुहातद्वदाननस्य अंतौ सृक्किणी यस्य गिरेः शृंगाणि शिखराणीव दंष्ट्रा यस्य ध्वांतेन तमसा युक्तं अंतरास्यं अंतराननं यस्य वितता प्रसृता अध्वतुल्या जिह्वा यस्य परुषानिलः कठिनवायुस्तद्वत्श्वासो यस्य दव इव ईक्षणयोर्नेत्रयोरुष्णः दावानलतुल्यदृष्टिरित्यर्थः । परुषानिलश्वासश्चासौ दवेक्षणोष्णश्च ।। १७ ।। तं तादृशं दृष्ट्वा भ्रांत्या तं वृंदावनस्य श्रियं शोभां मत्वा तां व्यात्तेन अजगरमुखेन सह लीलया क्रीडया उत्प्रेक्षंतेस्म तत्सदृशत्वेन निरूपयंति स्मेत्यर्थः ।।१८।। उत्प्रेक्षां प्रपंचयति अहो इति हे मित्राणि पुरःस्थितं अग्रे वर्त्तमानं सत्वकूटं सत्वेन महाजगररूपेण दृष्टं कूटं शृंगवान् पर्वतोस्ति न वा गदत ब्रूत अस्मत्संग्रसनाय व्यात्तं प्रसारितं च तद्व्यालतुंडं सर्पमुखं च तदिव आचरति न वा ।। १९ ।। स्वनिश्चितमाहुः सत्यमिति अर्ककरैः सूर्यकिरणैः आरक्तं सत्यं घनं मेघं व्यालस्योत्तराहनुवत् उत्तरोष्ठवत् पश्यत तस्य रक्तघनस्य प्रतिच्छायया प्रतिबिंबेन अरुणं रक्तं रोधः अधः स्थलं अधरोष्ठवत् पश्यतेति प्रतिवाक्यं योज्य ।। २० ।। सव्यासव्ये वामदक्षिणे नगोदरे गिरिगुहे सृक्किभ्यामोष्ठप्रांताभ्यां सह प्रतिस्पर्द्धेते सादृश्येन भातः एताः तुंगशृंगालयोऽपि उच्चशिखरपंक्तीरपि तस्य अघासुरस्य दंष्ट्राभिः समं पश्यत ।।२१।। आस्तृतो विस्तृतः आयामो दीर्घो मार्गः सोयं रसनां प्रतिगर्ज्जति जिह्वां स्पर्द्धते एषां शिखराणामंतर्गतं मध्यप्रांतं ध्वांतमस्ति एतदपि अंतराननं मुखस्य मध्यभागं प्रतिगर्जति ।। २२ ।। दावेति दावेन वनाग्निना उष्णः खरः परुषस्पर्शो यो वातः सोयं श्वासवद्भातितं युयं पश्यत तेन दावाऽनलेन दग्धानि यानि सत्वानि जंतुवृंदानि तेषां दुर्गंधोऽपि अंतरामिषगंधवत् अजगरोदरवर्त्तिमांसगंधतुल्यो भातितमपि पश्यत ।। २३ ।। एवमजगरमन्यथोत्प्रेक्ष्य अभया जग्मुरित्याह अस्मानिति । अयं पर्वतोऽजगरश्चेत्तर्हि अत्र निविष्टान् प्रविष्टान् अस्मान् ग्रसिता सः

ग्रसिष्यति र्तार्हि किं भविष्यति तथा चेत् यर्हि ग्रसिता चेत् र्तार्हि अनेन श्रीकृष्णेन कृत्वा सः क्षणात् बकवद्विनंक्ष्चति क्षयिष्यति बकारेः उशत्सुंदरं मुखं वीक्ष्य उद्धसंतः अत्यंतहास्यं कुर्वंतोऽन्योऽन्यं करताडनैः सह ययुः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अद्भुतत्वमेव दर्शयितुमसुरं विशिनष्टि ॥ धरेति ॥ धरायां पृथिव्यामधरोष्ठो यस्य सः, जलदेषु मेघेषूत्तरोष्ठो यस्य सः, दर्यौ गिरिकन्दराविवाननस्यान्तौ सृक्किणी यस्य सः, गिरेः पर्वतस्य शृङ्गाणि शिखराणीव दंष्ट्रा यस्य सः, ध्वान्तोऽन्धकारोऽस्मिन्नस्तीति ध्वान्तवत् अन्तरास्यमन्तर्गतास्यं यस्य सः, आर्षो मतुपो लुक्। वितता दीर्घीभूता अध्ववन्महामार्गसदृशी जिह्वा रसना यस्य सः, परुषस्तीक्ष्णश्चासावनिलश्च तद्वच्छ्वासो यस्य स चासौ, दवः दावाग्निरिवेक्षणयोरुष्णः उष्णगुणो यस्य सः, दाहकदृष्टिरित्यर्थः। परुषानिलश्वासशब्दस्य दवेक्षणोष्णपदेन कर्मधारयः ॥ १७ ॥ वस्तुतोऽजगरमेव व्यात्ततुण्डत्वादियुनमपि वृन्दावनश्रियं भ्रान्त्या मत्वोत्प्रेक्षन्त इत्याह ॥ दृष्ट्वेति ॥ सर्वे गोपालबालाः, तादृशं तं दृष्ट्वा, वृन्दावनश्रियं मत्वा, लीलया, व्यात्ताजगरतुण्डेन, उत्प्रेक्षन्ते स्म हि। अयं भावः। वास्तविकाजगरमेव व्यात्ततुण्डं दृष्ट्वा वृन्दावनश्रीरेषेति भ्रान्त्या मत्वा विपरीतं यथा तथा, लीलया व्यात्ताजगरतुण्डसादृश्येनोत्प्रेक्षितवन्त इति ॥ १८ ॥ तेषामुत्प्रेक्षामेव प्रश्नोत्तराभ्यामाह पञ्चभिः ॥ अहो इति ॥ अहो मित्राणि, हे सुहृद इत्यर्थः। पुरःस्थितं, इदं वस्तु इति शेषः। सत्त्वकूटं सत्त्ववद्भासमानं, जायते न वा। तत्रापि, अस्मत्संग्रसनव्यात्तव्यालतुण्डायते न वा अस्मान् संग्रसितुं व्यात्तव्यालतुण्डवदाचरति न वा, एतत् यूयं, गदत ब्रूत ॥ १९ ॥ कैश्चिदेवमुक्ताः केचित्तथैवेत्याहुः ॥ सत्यमिति ॥ सत्यं भवदुक्तमृतमेव, यतः अर्ककराः सूर्यकिरणास्तैरारक्त उपरञ्जिस्तं, घनं मेघं, उत्तराहनुवदुत्तरोष्ठवत्, पश्यतेत्युत्तरश्लोकीयं सर्वात्रान्वेतव्यम्। तस्य घनस्य या प्रतिच्छाया तया, अरुणं रोधः कूलं अधराहनुवदधरोष्ठवत्, पश्यत ॥२० ॥ प्रतीति ॥ सव्यासव्ये वामदक्षिणे, नगोदरे गिरिदर्यौ, सृक्किभ्यामोष्ठप्रान्ताभ्यां, प्रतिस्पर्द्धते तुल्यतया वर्त्तेते। सव्यापसव्यगिर्योः, एताः तुङ्गशृङ्गाणामालयः पङ्क्तयः अपि, उन्नतशिखरपङ्क्तीरपि इत्यर्थः। तद्दंष्ट्राभिः च तस्य दाढाभिः स्पर्द्धमाना अपि, पश्यत ॥ २१ ॥ आस्तृतेति ॥ अयं आस्तृतो विस्तृतश्चासावायाममार्गो दैर्घ्यवान् मार्गः, तस्य रसनां जिह्वां, प्रतिगर्जति प्रतिस्पर्द्धते, एषां शृङ्गाणां, अन्तर्गतं, यत् ध्वान्तं एतदपि अन्तराननमाननस्य मध्यं, प्रतिगर्जति ॥ २२ ॥ दावेति ॥ अयं दावेनोष्णः खरः कठिनश्च वातः दावोष्णखरवातः, श्वासवत् भाति। तेन दवाग्निना दग्धा ये सत्त्वा जन्तवस्तेषां दुर्गन्धः अपि, अन्तरामिषगन्धवत् सत्त्वान्तर्गतामिषगन्धवत् भाति। पश्यत। वाक्यार्थः कर्म ॥ २३ ॥ एवं सत्यमेवाजगरं सत्त्वतत्रेनोत्प्रेक्ष्य निर्भया ययुरित्याह मुनिः। अस्मानिति ॥ अयं व्यालाभासः, अत्रास्मिन्, निविष्टान्, प्रविष्टान्, असमान्, ग्रसिता किं ग्रसिष्यति किम्। इति केचनाहुः। तथा चेत्, ग्रसिष्यति चेत् क्षणात् अनेन श्रीकृष्णेन हन्त्रा, बकवत् विनङ्क्ष्यति विनाशं यास्यति। इति निश्चित्य, बकारेः श्रीकृष्णस्य उषत् कमनीयं मुखं वीक्ष्य, करताडनैर्हस्ततालिभिः उपलक्षिताः, उदुच्चैः हसन्तः सन्तश्च, ययुः तदास्यान्तरे प्रविविशुरित्यर्थः ॥२४॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दृष्ट्वा तमिति : १०.१२.१८.

विक्रीडद्गोपबालैरघभुजगमुखं प्रेक्षणोत्प्रेक्षितं यत् तन्मन्ये व्यासपादैर्भवभुजगमुखं वर्णितं तन्निमषेण।
यस्मात्तत्रैवमेव भ्रमितमतिजनाः संविशन्ति प्रयत्नात् श्रीशस्तस्मात् कृतान्तान् निजभजकजनान् मोचयत्यस्ततन्द्रः ॥ ४७ ॥

यदघेत्यभिधाभाजोऽप्यस्यासीद्रूपमीदृशं भयदम्।
किं पुनरद्धाऽघस्येत्यालोच्याच्युतमुपाश्रयेत पुमान् ॥ ४८ ॥
नादर्शि नाश्रावि च यत्कदापि तच्चेत्क्वचिद् दृग्विषयेऽभ्युपेतम्।
दृष्ट्वा न तज्ज्ञातुमलं हि युक्तं नाघं विदुस्ते ह्यनुभूतपुण्याः ॥ ४९ ॥

उद्धसन्त इति : १०.१२.२४.

अघोऽस्माकं पुरस्तिष्ठत्यघभिद्धरिचेतसाम्। उद्धृष्टताऽद्भुतैवास्येत्युद्धसन्तो मिथस्तदा ॥ ५० ॥
अघभिदि सति सन्निधौ कथं रे त्वनुदित इत्यघमेतमुद्धसन्तः।
अघाभिदि सति सन्निधावपीश त्वयि कथमेतदितीन्दिराधिपं वा ॥ ५१ ॥
यदाऽघोदयः स्यात्तदा दूरमीशो यदैवेशलाभस्तदा नाघवार्ता।
प्रसङ्गोऽधुनास्ति द्वयोरत्र विघ्नश्चमत्कारमित्याददुर्हस्ततालम् ॥ ५२ ॥
दुरन्तात्कृतान्तादपि श्रीशपादजुषां नैव भीतिर्न तेऽपि त्रसन्ति।
इति स्पष्टमाबोधि गोपालबालैरशङ्कं विशद्भिस्तदाऽघाहिवक्त्रम् ॥ ५३ ॥
अहो विचित्रा जगतः प्रवृत्तिर्यत्साहसं नाम तदस्य धर्मः।
न रक्षिता चेद्भगवान् प्रतिक्षणं न वेद्मि किं वा कथमस्य वा भवेत् ॥ ५४ ॥

कृष्णप्रिया

उसका नीचला ओष्ठ पृथ्वी से और ऊपर का ओष्ठ मेघ में लगा हुआ था, उसके जड़वे गिरि कन्दरा के समान थे और दाठे-दाँत पर्वत शिखर-से दीखते थे । मुख के अन्तर भाग में तिमिर छा गया था, फैली हुई अघासुर की जीभ बड़ी गेरु सड़क-सी मालूम पड़ती थी, आंधी सरीखी साँसे और दावानल जैंसी आँखे दहक रही थी ।। १७ ।। बालकों ने देखकर अघासुर के स्वरूप को वृन्दावन की शोभा बढ़ाने वाली कोई निरुपम वस्तु माना, और कौतूहल वश खेल ही खेल में उत्प्रेक्षा करने लगे कि यह मुँह फैलाये कोई अजगर मालुम हो रहा है ।। १८ ।। आपस मे कहने लगे कि मित्रो कहो न, यह सन्मुख स्थित पर्वत-शिखर सा जो प्राणी दिख पड़ता है न ! वह हम लोगों को निगल जाने के लिये मुँह बाये बैठा हुआ कोई अजगर के मुँह जैसा तो नहीं है ! ।। १९ ।। देखो न, इस बात में तनिक भी शंका नहीं कि सूर्य की किरणों से लाल मेघ इसके ऊपर के ओठ से एवं इसकी छाया पड़ने से लाल बनी पृथ्वी इसके नीचे के ओठ से मालुम पड़ते है ।। २० ।। तब किसी ग्वाल बालक बोला हाँ देखों न, दायें-बायें दोनों के बीच में वर्तमान दो-गुफा यें इसके दोनों जबड़ों से अपनी तुलना कर रही है, और देखो तो सही पर्वत की ऊचीं चोटियाँ इसकी दाँतों से स्पर्धा कर रही है ।। २१ ।। लम्बा चौड़ा दूर पर्यन्त फैला हुआ मार्ग देखिये इस की जिह्वा की स्पर्धा करता मालुम पड़ता है और भी देखो न, इन गिरिवरों के भीतर रहने वाले अन्धकार इस के मुख के अन्दर के भाग की स्पर्धा कर रहा है ।। २२ ।। देखा भैया; वन के भीतर आग जल जाने से ताती-ताती जो हवा आ रही है वही इसके श्वासोच्छ्वास से मालुम पड़ते है, और भी देखो दावानल के अग्नि से जले हुये बनैले प्राणियों की दुर्वास भीतर के मांस की दुर्गन्ध की प्रतीति करा रही है ।। २३ ।। तब और बालकों ने कहा देखो भाई ! है तो यह अजगर ही किन्तु इस की क्या परवाह ! यदि हमें वो निगल गया तो क्षण में यह बगुले की नाई प्यारे श्रीकृष्ण के हाथों से विना विलम्ब स्वयं ही मारा जायगा, इस प्रकार की परस्पर वार्ता करते हुए सारे ग्वाल बालक बकसूदन भगवान् श्रीकृष्ण के कमनीय मुखसरोज देखते और ताली बजाते, हँसते-हँसते अधासुर के मुँह में घुस गये ।। २४ ।।

इत्थं मिथोऽतथ्यमतज्ज्ञभाषितं श्रुत्वा विचिन्त्येत्यमृषा [1]मृषायते ।
रक्षो विदित्वाखिलभूतहृत्स्थितः स्वानां [2]निषेद्धुं भगवान् मनो दधे ।। २५ ।।
तावत् प्रविष्टास्त्वसुरोदरान्तरं[3] परं न [4]जीर्णाः शिशवः [5]सवत्साः ।
प्रतीक्षमाणेन बकारिवेशनं हतस्वकान्तस्मरणेन रक्षसा ।। २६ ।।
तान् वीक्ष्य कृष्णः सकलाभयप्रदो ह्यनन्यनाथान् स्वकरादवच्युतान् ।
दीनांश्च मृत्योर्जठराग्निघासान् घृणार्दितो दिष्टकृतेन विस्मितः ।। २७ ।।
कृत्यं किमत्रास्य खलस्य [6]जीवितं न वा अमीषां च सतां [7]विनाशनम् ।
द्वयं कथं स्यादिति संविचिन्त्य तज्ज्ञात्वाविशत्तुण्डमशेषदृग्घरिः ।। २८ ।।
तदा घनच्छदा देवा भयाद्धाहेति चुक्रुशुः । जहृषुर्ये च कंसाद्याः कौणपास्त्वघबान्धवाः ।। २९ ।।
तच्छ्रुत्वा भगवान् कृष्णस्त्वव्ययः सार्भवत्सकम् । चूर्णीचिकीर्षोरात्मानं तरसा ववृधे गले ।। ३० ।।
ततोऽतिकायस्य निरुद्धमार्गिणो ह्युद्गीर्णदृष्टेर्भ्रमतस्त्वितस्ततः ।
पूर्णोऽन्तरङ्गे पवनो निरुद्धो मूर्धन् [8]विनिष्पाट्य विनिर्गतो [9]बहिः ।। ३१ ।।
तेनैव सर्वेषु बहिर्गतेषु प्राणेषु वत्सान् सुहृदः परेतान् ।
दृष्ट्या स्वयोत्थाप्य तदन्वितः पुनर्वक्त्रान्मुकुन्दो भगवान् विनिर्ययौ ।। ३२ ।।

कर्दमक्षमा

अन्वयः--इत्थं स्वानां मिथः अतथ्यम् अतज्ज्ञभाषितं श्रुत्वा अमृषा रक्षः मृषायते इति विदित्वा अखिलभूतहृतस्थितः भगवान् (स्वानां) निषेद्धुं मनः दधे तावत् सवत्साः शिशवः असुरोदरान्तं प्रविष्टाः परं हृतस्वकान्तस्मरणेन प्रतीक्षमाणेन रक्षसा न जीर्णाः ।। २५–२६ ।। सकलाभयप्रदः घृणार्दितः कृष्णः हि अनन्यनाथान् स्वकरात् अवच्युतान् मृत्योः जठराग्निवासान् च दीनान्

---

[1] मृषायितं–वीर. । [2] निरोद्धुं–श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक. । [3] स्त्वसुरान्तरोदरं–वीर. । [4] गीर्णा–श्रीधर. वंशी. विज. जीव. विश्व. शुक. ; जीर्णा.–वीर. । [5] सवत्सपः–वीर. । [6] जीवनं–श्रीधर. वंशी. वीर. विज. विश्व. शुक. । [7] विहिंसनम्–श्रीधर. वंशी. विज. विश्व. शुक. ; विनाशनम्–वीर. । [8] विनिर्भिद्य वीर. विश्व. । [9] विनिर्गतोऽहिः–इति कस्यचित् ।

तान् वीक्ष्य दिष्टकृतेन विस्मितः ॥ २७ ॥ अशेषदृग् हरिः अस्य खलस्य जीवितं न वा अमीषां सतां च विनाशनं न स्यात् इति द्वयं किम् ? कृत्यं स्यात् इति संविचिन्त्य तत् ज्ञात्वा तुण्डम् आविशत् ॥ २८ ॥ तदा घनच्छदा देवाः भयात् हा. हा. इति चुक्रुशुः च ये अघबान्धवाः कंसाद्याः कुणपाः जहृषुः ॥२९॥ अव्ययः भगवान् कृष्णः तत् श्रुत्वा सार्भवत्सकम् आत्मानं चूर्णीचिकीर्षोः गले तरसा ववृधे ॥ ३० ॥ ततः निरुद्धमार्गिणः अतिकायस्य उद्गीर्णदृष्टेः इतः ततः भ्रमतः अन्तरङ्गे पूर्णः निरुद्धः पवनः मूर्धन् विनिष्पाट्य ततः बहिः विनिर्गतः ॥ ३१ ॥ भगवान् मुकुन्दः सर्वेषु प्राणेषु तेन एव बहिर्गतेषु स्वया दृष्ट्या परेतान् सुहृदः वत्सान् उत्थाप्य पुनः तदन्वितः वक्त्रात् विनिर्ययौ ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अमृषा वस्तुतः सर्पवपुरसुर एव मृषायते स्वानां सर्पसादृश्यगोचरत्वेन प्रतीयते इति तान्निरोद्धुं वारयितुं यावन्मनो दधे तावत्प्रविष्टा इत्युत्तरेणान्वयः ॥ २५ ॥ तावत्प्रविष्टा एव केवलं न तु तेन गीर्णा गिलिताः । जीर्णा इति पाठेऽपि स एवार्थः । कथंभूतेन । हतयोः स्वकयोरंतं स्मरत्यनुध्यायतीति तथा तेन । अत एव बकारेः श्रीकृष्णस्य प्रवेशं प्रतीक्षमाणेन ॥ २६ ॥ स्वकरादवच्युतान्विनिःसृतान् । विस्मितः सन्कृत्यं किमत्रेत्यादि विचिंत्य तत्रोपायं ज्ञात्वा स्वयमप्यविशदित्युरेणान्वयः ॥ २७ ॥ कथं विचिंत्य । अस्य जीवनममीषां च विहिंसनमिति द्वयं वै निश्चितं कथं न स्यादिति ॥ २८ ॥ घनच्छदा मेघांतरिताः । कौणपाः कुणपाशिनो राक्षसाः । कोणपो निरृतिः तदीया इति वा ॥ ॥ चूर्णीकर्तुमिच्छोस्तस्य गले आदावेव तरसा ववृधे अवर्धत ॥३०॥ निरुद्धो मुखादीनां मार्गभूतः कंठो यस्यास्ति तस्योद्गीर्णदृष्टेर्बहिर्निर्गतलोचनस्यांतरंगे देहमध्ये । पूर्णः परिभृतः । मूर्धन् मूर्धनि ब्रह्मरंध्रं निर्भिद्य बहिर्विनिर्गतः ॥ ३१ ॥ प्राणेष्विद्रियेषु । स्वयाऽमृतवर्षिण्या दृष्ट्यैव ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अतथ्यम् असत्यम् । न तं जानंतीत्यतज्ज्ञास्तेषां भाषितम् ॥२५॥ स्वकयोः बकीबकयोः । प्रतीक्षमाणेन कदा प्रवेक्ष्यतीति विचार्यमाणेन । न चात्र भगवतः सत्यसंकल्पता व्यभिचरतीति शंकनीयम् । अस्मान्किमत्र ग्रसिता निविष्टानयं तथा चेद्बकवद्विनंक्ष्यति इति तद्भक्तसंकल्पस्याप्यत्र वर्तमानत्वात् । मत्संकल्पमद्भक्तसंकल्पयोर्मध्ये मद्भक्तसंकल्पस्यैव गरीयस्त्वमिति भक्तवश्येन भगवतैव प्राक्कृताया मर्यादायास्तथा लीलाशक्तेश्च सर्वोपमर्दिन्याः । सर्वदा जागरूकत्वात् ॥ २६ ॥ घृणार्दितो दयायुक्तः । 'घृणा जुगुप्साकृपयोः' इति मेदिनी । दिष्टकृतेन लीलाशक्त्यनुकूलकालकृतेन तत्प्रदेशकर्मणा विस्मितः । 'कालो दिष्टोप्यनेहापि' इत्यमरः । अहो न तावदेषां प्रारब्धकर्म सम्भवति । न च तद्विनाप्यत्र कर्मणि अंतर्यामी प्रवर्त्तये तस्य मत्स्वरूपत्वेन मत्प्रातिकूल्यानर्हत्वाच्च । तस्मान्मत्सहचारानप्येतादृशीर्दुरवस्था दर्शयंत्या मत्प्रातिकूल्येप्यशंकमानायाः प्रेमपूर्णं मां करुणरसनिमग्नीकर्त्तुकामाया मदीयलीलाशक्तेरेवेदं कर्म मयि पुरुषोत्तमे रसमयमूर्त्तौ तस्या एवैतावत्प्रभविष्णुत्वमिति बंधुविच्छेदशोकार्तत्वेपि विस्मयेनैषत् विस्मितोभूदिति ॥ २७ ॥ अस्याघस्य । अमीषां गोपानाम् । तत् द्वयम् । अशेषदृक् सर्ववित् ॥ २८ ॥ कुणपाशिनः शवभक्षका येघबांधवास्तेषां भक्ष्यप्राप्तेर्हर्षं उचित एव तत्कर्मनिरीक्षणाय कंसप्रेषिता अन्ये दैत्याः कंसायापि तत्कर्म शशंसुरिति कंसादीनामपि हर्षः । कंसाघयोर्भयान्मेघांतरिता देवा भगवत्यनिष्टशंकया हाहेति चुक्रुशुः । देवानामैश्वर्यज्ञानेपि भक्तत्वाद्भक्तेश्च प्रीत्यात्मकत्वात्प्रीतेश्च विवेकहरस्वभावत्वान्न देवसार्वज्ञहानिः । यद्यपि 'नैरृतो यातुरक्षसी, इत्यमरोक्तेर्नैरृतीया अपि राक्षसा एव यथापि तदीयानामघबांधवेभ्यो भेदविवक्षया स्वामिचरणैर्विकल्पः कृत इति प्रतीयते ॥ २९ ॥ ननु शकटतृणावर्तवधदामबंधनादिलीलायां स्तोकेनैव बालवपुषा किञ्चिदप्यवर्द्धमानेन तत्तद्व्याप्ति च चोः स्वयं भगवतो विभोरस्य किमघासुरकंठव्याप्तिरशक्या यतो ववृध इत्युच्यते सत्यं तत्रतत्र नरबाललीलत्वलक्षणमाधुर्यस्य भक्तजनलोचनास्वाद्यत्वावलौकिकं तादृशत्वमेवोचितम् । अत्र तु तादृशमाधुर्यग्राहकदृष्टृजनाभावात्स्वयं भगवतापि तेन लौकिक्येव रीतिराललंब इति तत्त्वम् । तद्देवाक्रंदमसुराह्लादम् । तरसा वेगेन । सार्भवत्वकमात्मानमिति संबंधः ॥ ३० ॥ अतिकायस्य योजनविस्तृतदेहस्य ॥ ३१ ॥ परेतान् स्वविरहात्जाठरानलज्वालया मूर्च्छितान् न तु मृतान् चिच्छक्त्यालिंगितत्वात् । तदन्वितः । वत्सगोपयुतः मुकुंद इति तन्मोक्षसूचनार्थम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्थमुक्तप्रकारं स्वानां स्वीयानामपि मिथो अतज्ज्ञानामिव भाषितम् अत एवातथ्यम् अयथार्थं श्रुत्वा यतः अमृषा सत्यं व्यात्ताजगरतुण्डमपि मृषायते वृन्दावनश्रीत्वेन भासते अहो आश्चर्यमिति किं च नत्वयं केवलमजगरोपि किं तु अघनामराक्षस इति विदित्वा कुतः अखिलभूतहृदि स्थितः परमात्मत्वात् एवं सर्वप्रवर्त्तकोऽपि भगवान् सर्वैश्वर्ययुक्तोऽपि तान् निरोद्धुं मनो दधे इच्छामकरोत् ॥ २५ ॥ यावन्मनो दधे तावत् सवत्साः शिशवः प्रविष्टा इत्यादिकं तस्य बाह्यलीलावदवान्तरलीला सा च प्रियजनप्रेमरसावेशमयीति पूर्ववत् सिद्धान्तपद्धतिः अन्यथा सत्यसङ्कल्पस्य ज्ञानघनमूर्त्तेस्तस्य तत्तदसम्भवात् वत्सानां प्रवेशश्चात्र पश्चात् स्थितानां बालानां करताडनेन धावनेन च विद्रवणात् अत एव तत्प्रसङ्गेन बालानां तद्भयानकतमो दावाग्निमयत्वेन अत्यन्तप्रवेशमनिच्छतामपि तदुदरमध्यपर्यन्तगमनं तेषामसङ्ख्यानां तत्र समावेशस्तु लीलाशक्तिप्रभावादेव ज्ञेयः न गीर्णा मुखसङ्कोच-

नादिना न निरुद्धा इत्यर्थः । न जीर्णा इति पाठे मारयितुं नेष्टा इत्यर्थः । अन्यत्तैः तत्र स एवार्थ इति मुखसङ्कोचनाङ्गमोटनादेर्जरणेच्छामयत्वात् ।। २६ ।। स्वत एव विश्वस्याभयप्रदाता विशेषतश्च तान् अनन्यनाथान् स्वकरादवच्युतान् निजाभयहस्ततो दूरगतान् अत एव दीनान् मरणेन निजविच्छेदशङ्कयाऽऽर्त्तान् किञ्च मृत्युतुल्यस्याघासुरस्य जठराग्नेर्घासान् बाह्याग्नेस्तृणवदत्यन्तदाह्यतामिव गतान् वीक्ष्य दिष्टस्य प्रारब्धस्य कृतेन फलेनेत्यर्थः । एतच्च लोकवल्लीलारसमयश्रीभगवद्भावनानुसारेणैव वस्तुतस्तु दिष्टः स्वावतारे नियतलीलावसरशक्तिः, यद्वा । दिष्टं तैस्स्वयमुद्दिष्टम् अस्माकमित्यादिलक्षणं तदेव कृतं जातं यद्वा दिष्टं प्रमाणानुगामतिः "अस्ति नास्ति दिष्टं मतिः (४।४।६०) इति पाणिनिसूत्रे तथा व्याख्यातत्वात् तच्चस्मिन् किमत्र ग्रसितेत्यादिलक्षणमेव तेन यत्कृतं तेन विस्मितः अहो बत मदग्रे मदीयानां निरुध्यमानानामेषामप्येवं फलतीति विस्मयं प्राप्तः अथवा "सदा स्मेरमुखाब्जोऽपि दुःखेन विगतस्मितः" विषण्णमुखो बभूवेत्यर्थः । ननु, तत्र सति कथं तेषां दिष्टवशत्वं तत्राह, घृणार्दित इति । स्नेहपरवशतया विचारान्तर्द्धानादित्यर्थः । यतः कृष्णः कृपाकृष्टस्वभाव इत्यर्थः । अथवा तत्त्वतोऽतथाभूतानपि घृणार्दितत्वेन स्वकरात् दूरे निपतितान् दुःखितान् मृतप्रायांश्च वीक्ष्य मत्वा अनन्यनाथानिति घृणार्दितत्वे हेतुः अन्यत्समानम् ।। २७ ।। तुण्डं खलस्यैव तस्य अशेषं खलमरणसद्रक्षणयोस्तथा तन्मुक्तेर्निजविहारादेश्च प्रकारं पश्यतीति तथा सः यद्वा अशेषान् वत्सबालकान् पश्यन् सन् तेषां तादृगवस्थया स्नेहाकुलत्वादविशदित्यर्थः । एवं तेषां दुःखहरणात् मनोहरणाच्च हरिः ।। २८ ।। घनच्छदाः कंसादघाच्च भयात् चकारादन्ये च दुष्टाः कंसस्य दैत्यत्वेपि कौणपत्वम् अतिदुष्टत्वेनाभेदविवक्षया यद्वा ये कंसादयो दैत्यास्ते च तेषां सर्वेषां हर्षः भगवद्द्वेषिस्वभावेनैव दुर्मानसोल्लासोत्पत्तेः किं वा तत्रैव तेषामागमनात् कंसस्य च सद्य एव चरमुखेन श्रवणादिति ज्ञेयम् ।। २९ ।। तत् हा हेत्याक्रोशनं चूर्णीचिकीर्षोर्मुखसंवरणगात्रमोटनादिनेति शेषः । ववृधे तस्य मुखासम्वरणाय वधोपायाय च गलविवरमावृण्वन् कीलतया महास्थूलो बभूवेत्यर्थः । यतो भगवान् सर्वैश्वर्यपूर्णः अतः कथमपि न व्येति हीयत इति अनिष्टशङ्कापि सर्वा निरस्ता । यद्वा, किमर्थं ववृधे ? तत्राह, न व्ययः कोप्यपचयो भक्तानां यस्मात् बालकादीनां रक्षार्थमित्यर्थः । तत्र हेतुः कृष्णः भक्ताकृष्टचित्त इत्यर्थः ।। ३० ।। हि एव ततस्तस्माद्वर्द्धनादेव तु च इतस्ततो भ्रमतश्च भ्रमरिकावत् वर्त्तमानस्य किं वा कुत्र स्थास्यामि यास्यामि वेति व्यग्रं विचारयतश्चेत्यर्थः । पूर्णत्वे हेतुः निरुद्ध इति । पवनः प्राण वायुः अतिकायस्येति पवनस्य बृहत्तरत्वं तेन मूर्द्धभेदस्यापि तदभिप्रेतत्वम् अत एव विशब्दद्वयं मूर्द्धन् मूर्द्धनि स्थितं ब्रह्मरन्ध्रमित्यर्थः ।।३१।। तेन पवनेनैव सह ब्रह्मरन्ध्रद्वारेण वा भगवन्नरलीलानुकरणेन परेतानिव क्षणं तदद्दृष्ट्या मृततुल्यान् वा निजमधुरस्निग्धदृष्ट्या उत्थाप्य चेष्टयित्वा मुकुन्दः अघासुरस्य संसारात् मुक्तिं सुहृदाञ्चाघान्मुक्तिं ददादित्यर्थः । यतो भगवान् जगद्धितार्थं स्वयमवतीर्णः परमेश्वरः तदनुताननु तत्पश्चादितो वक्त्रात् विनोदेन निर्ययौ ।। ३२ ।।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्थमुक्तप्रकारं स्वानां स्वकीयानामपि मिथोऽतज्ज्ञस्येव भाषितमत एवातथ्यमयथार्थं श्रुत्वा, यतोऽमृषा सत्यं व्यात्ताजगरतुण्डमपि मृषायते वृन्दावनश्रीत्वेन भासते—अहो कौतुकमिति । यद्वा, अतथ्यं मिथ्याभूतमपि वृन्दावनश्रीत्वममृषा सत्यमेवामृषायते । एषां भाषित-परिपाट्या सत्यवद्भासते—अहो एषां महाकविवद्बुद्धिवैभवमिति विचिन्त्य, किञ्च, न त्वयमजगरोऽपि किन्त्वघनामा राक्षस इति विदित्वातोऽखिलभूतहृदि स्थितः परमात्मत्वात् । यद्वा, सर्वप्रवर्त्तकोऽपि तान् निरोद्धं मनो दधे, इच्छामकरोत्, यतो भगवान् भक्तवत्सलः ।। २५ ।। यावन्मनो दधे तावत् सवत्साः शिशवः प्रविष्टा इत्यादिकं तस्य बाह्यलीलावदान्तरलीला तदीयान्तरवृत्तदर्शिभक्तविनोदार्था; अन्यथा सत्यसंकल्पस्य ज्ञानघनमूर्त्तेस्तस्य तत्तदसम्भवः । न च वक्तव्यम्—लोकहितार्था तस्य बाह्यचेष्टा कथञ्चिद्विज्ञेया स्यात्, समुद्रकोटिगम्भीराशयस्यान्तर-चेष्टा केन ज्ञातुं शक्येति; यतः प्रियजनेषु तस्य किञ्चिदगुह्यं नास्ति, तथा चोक्तं श्रीवैष्णवप्रवरेण–उल्लङ्घित–त्रिविधसीम समातिशायि, सम्भावनं तव परिव्रीढम् स्वभावम् मायाबलेन भवतापि निगुह्यमानं, पश्यन्ति केचिदनिशं त्वदनन्यभावाः ।' इति, अन्यथा श्रीबादरायणेर्विचिन्त्येत्याद्युक्त्यनुपपत्तिः । यद्वा, यावन्मघनो दधे तावदिति तदिच्छाप्रवृत्तेः प्रागेवेत्यर्थः । यद्वा, रक्ष एव निरोद्धुं संहर्त्तुं स्वानामित्यस्य पूर्वार्द्धेनैवान्वयः । एवमत्र किञ्चित् समाधानं स्यादन्यत्र तु तथैव बोद्धव्यम् । न गीर्णा मुखसम्बरणादिना न गिलिता इत्यर्थः । तत्र हेतुः—प्रतीक्षमाणेनेति ।। २६ ।। स्वत एव विश्वस्याभयप्रदाता विशेषतश्चताननन्यनाथानेकान्तिनः स्वकरादपच्युतान् निजाभयहस्ततो दूरगतानत एव दीनान् मरणेन निजविच्छेद–शंकयार्त्तान्, किञ्च, मृत्युतुल्याघासुरस्य जठराग्नेर्घासान् बाह्याग्नेस्तृणवदत्यन्तदाह्यतामिव गतान् वीक्ष्य दिष्टस्य प्रारब्धस्य कृतेन फलेनेत्यर्थः । एतच्च श्रीभगवद्भावनानुसारेण विस्मितोऽहो बत मदग्रे मदीयानामेषामप्येवं फलतीति विस्मयं प्राप्तः, यद्वा, सदा स्मेरमुखाब्जोऽपि दुःखेन विगतस्मितो विषण्णमुखो बभूवेत्यर्थः । ननु स एव फलदः, तेऽपि कर्म्मवश्या न भवन्ति, तत् कथं तेन तस्य विस्मयः ? तत्राह—घृणार्दित इति स्नेहपरवशतया विचारान्तर्द्धानादित्यर्थः, यतः कृष्णः कृपाकृष्टस्वभाव इत्यर्थः, यद्वा, तत्त्वतोऽतथाभूतामपि घृणार्दितत्वेनैव स्वकराद्दूरे निपतितान् मृतप्रायांश्च वीक्ष्य, अनन्यनाथानिति घृणार्दितत्वे हेतुः । अन्यत् समानम् ।। २७ ।। विचिन्त्येति पूर्वोक्त-न्यायेन घृणार्दितत्वनैव वा तुण्डं खलस्यैव तस्याशेषं खलमरण-सद्रक्षणयोस्तथा तन्मुक्तेर्निजविहारादेश्च प्रकारं पश्यतीति तथा सः, यद्वा, अशेषान् वत्सबालकान् पश्यन् सन् तेषां

तादृगवस्थया स्नेहाकुलत्वादविशदित्यर्थः । एवं दुःखहरणान्मनोहरणाच्च हरिः । अहेरशेषदृगिति क्वचित् पाठः, ततश्च विशेष्यः पूर्वोक्तः कृष्ण एव ॥ २८ ॥ घनच्छदाः कंसस्याघस्य च भयात्; च कारादन्ये च दुष्टाः । कंसस्य दैत्यत्वेऽपि कौणपत्वं प्रायो दैत्यराक्षसयोरभेदात्, यद्वा, ये कंसादयो दैत्यास्ते च । तेषां सर्वेषां हर्षो भगवद्द्वेषस्वभावेन स्वत एव, तदा दुर्मानसोल्लासोत्पत्तेः, किंवा तत्रैव सर्वेषामद्यबान्धवानामागमनेन साक्षाद्भगवत्प्रवेशदर्शनात्, कंसस्य च सद्य एव चर-मुखेन श्रवणादिति ज्ञेयम्, यद्वा, कंस आद्यः श्रेष्ठो येषां ते कंसानुवर्तिन इत्यर्थः । अयं हर्षे हेतुः । एवमग्रे पदद्वयमपि ॥ २९ ॥ तत् हाहेत्याक्रोशनम् । ववृधे तस्य मुखासम्वरणाय वधोपायाय च गलविवरमावृण्वन् कीलतया महास्थूलो बभूवेत्यर्थः, यतो भगवान् सर्वैश्वर्य्यपूर्णः । अथ कथमपि न व्येति हीयत इत्यनिष्टाशंकापि सर्वा निरस्ता, यद्वा, किमर्थं ववृधे ? तत्राह– न व्ययः कोऽप्यपचयो भक्तानां यस्मात्, बालकादीनां रक्षार्थमित्यर्थः ॥ ३० ॥ हि एव, ततस्तस्मादवर्द्धनादेव । तु च, भ्रमतश्च भ्रमरिकावदावर्त्तमानस्य । पूर्णत्वे हेतुः—निरुद्ध इति, पुनरुक्तिर्निरुद्धमार्गिण इत्युक्तत्वादत्यन्तपूर्णता विवक्षया पवनः प्राणवायुः । अतिकायस्येति पवनस्य बृहत्तरत्वम्, तेन मूर्द्धभेदस्यापि तदभिप्रेतमतएव वि-शब्दद्वयम् ॥ ३१ ॥ तेन पवनेनैव सह ब्रह्मरन्ध्रेण वा परेतान् परेतानिव तदुदरान्तःप्रवेशेन, किंवा, परमविस्मयेन स्तब्धतया क्षणं तद्दृष्ट्या वा, मृततुल्यान् निजमधुरस्निग्धदृष्ट्योत्थाप्य चेष्टयित्वा । यद्वा, पलायितान् स्वपरित्यागेनाग्रतो जवेन गमनात्, स्वया सस्मितभ्रूक्षेपादिसंकेतपूर्विकया मनोहरया दृष्ट्या ब्रह्मरन्ध्रेण निर्गमाय तत्रोत्थाप्य । मुकुन्दोऽघासुरस्य मुक्ति सुहृदाञ्च परमानन्दं ददादित्यर्थः, यतो भगवान् जगद्धितार्थं स्वयमवतीर्णः परमेश्वरस्तदनु तत्पश्चादितो वक्त्राद्विनोदेन निर्ययौ ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

श्रीकृष्णप्रवेशं प्रतीक्षमाणेन तत्र हेतुः हतानां स्वकानां पूतनादीनाम् अन्तः अन्तःकरणे स्मरणं यस्येति ॥ २६ ॥ दिष्टं दैवं वत्सबालाद्यानां परस्परं मार्यमारकत्वप्रयोजकेन स्वसङ्कल्परूपेण देवेन तत्कर्मणा यत्कृतं तेन विस्मितम् अनेन पूर्वकर्मानुगुणजातभगवत्सङ्कल्पानां साम्प्रतिकतत्तत्कर्मानुगुणसङ्कल्पानाञ्च श्रीभगवदेकत्वमुक्तम् ॥ २७–२८ ॥ कंस आदिर्येषां ते अतद्गुणसंविज्ञानः । नतु कंस इति कौणपा दैत्याः ॥ २९ ॥ गले ववृधे इत्यनेन पापमारणार्थं श्रीकृष्णवृद्ध्या स्वमूर्तिभूतश्रीप्रणवादिनाममन्त्रोच्चारणेनाघमरणं व्यज्यते ॥ ३०–३१ ॥ स्वकृपाकटाक्षेण स्वभक्तानां जीवयितृत्वं श्रीभगवतो गुणमाह—तेनैवेति । अत्राघस्यापि मुक्तिदानेन मुकुन्दः अतो विचित्रैश्वर्यवानिति भगवत्पदव्यङ्ग्यम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मिथोऽन्योन्यमतज्ज्ञानां यथार्थाजिगरमजानतां भाषितमतथ्यमसत्यं श्रुत्वा भगवानमृषापि सत्यमप्येतैर्मृषापि तमयथार्थीकृतमित्येवं विचिन्त्याखिलभूतहृत्स्थितः हेतुगर्भमिदं तत्त्वाद्रक्षो विदित्वा राक्षस इति ज्ञात्वा स्वानां स्वान् वत्सान् वत्सपांश्च निरोद्धुं निवारयितुं यावन्मनो दधे चकार ॥ २५ ॥ तावत्ततः पूर्वमेव शिशवो वत्सपा वत्सैः सहिता असुरस्यान्तरोदरमुदरमध्यं प्रविष्टा एव केवलं न तु रक्षसा जीर्णा जीर्णतां प्रापिताः, तत्र हेतुं वदन् रक्षो विशिनष्टि –यावत्स्वस्य कान्तः सुहृत् भ्राता तस्य स्मरणेन हेतुना बकारेः श्रीकृष्णस्य वेशनं प्रवेशं प्रतीक्षमाणेन ॥ २६ ॥ सर्वेषामभयप्रदो भगवान् श्रीकृष्णस्तान् प्रविष्टानवलोक्य विस्मितः करुणयार्दितो व्याप्तश्चास्य खलस्य विनाशनम् अमीषां सतां साधूनां जीवनं चेत्येतद्द्वयं युगपत् कथं स्यात् ॥ २७ ॥ अत्रोभयनिमित्ते कृत्यं किमिति विचिन्त्याशेषदृक् हेतुगर्भमिदं तत्त्वात्तत्कृत्यं ज्ञात्वा हरिराश्रितार्तिहरः स्वयमप्यस्य तुण्डमविशदित्यन्वयः । कथम्भूतांस्तान्न विद्यते स्वव्यतिरिक्तो नाथो रक्षिता येषां स्वकरात्स्वभुजाश्रयाद्धृष्टान् दिष्टबलेन प्रारब्धबलेन हेतुना मृत्योर्जठराग्नेर्घासस्थानीयान् ॥ २८ ॥ तदा मेघच्छन्ना देवा भयाद्धा हेति चुक्रुशुः अघासुरस्य बान्धवाः कंसादयः कौणपाः कुणपं शरीरं तदशिनो राक्षसास्तु हृष्टवन्तः ॥ २९ ॥ तद्देवानां हाहेत्याक्रोशनं श्रुत्वा भगवान् श्रीकृष्णः स्वयमव्ययोऽक्षत एव सन्नात्मानं चूर्णीकर्तुमिच्छोरसुरस्य गले तरसा आशु ववृधे एधाम्बभूव ॥ ३० ॥ ततस्तस्याघासुरस्यान्तरङ्गे देहाभ्यन्तरे पूरितो निरुद्धः पवनः प्राणवायुरत एव पूर्णोऽत एव मूर्द्धनि ब्रह्मरन्ध्रं भित्वा बहिर्निगतः, कथम्भूतस्य ? विपुलकायस्य निरुद्धौ मार्गौ नासारन्ध्रावस्यस्त इति यथाभूतस्यात एव उद्गते दृष्टी लोचने यस्य इतस्ततो भ्रमतश्च ॥ ३१ ॥ तेन बहिर्गतेन पवनेन सहैव सर्वेषु प्राणेषु बहिर्गतेषु सत्सु परेषां परलोकगतप्रायान् वत्सान् सुहृदो वस्यपांश्च स्वयाऽमृतवर्षिण्या दृष्ट्योत्थाप्य तैरन्वितो भगवान् मुकुन्दः तस्य वक्त्रात्पुनर्विनिर्गतोऽभूत् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

दिष्टमिति मानुषलीलानुसारोक्तिः ॥ २७–३१ ॥ परेतानिति नरलीलानुसारेण वस्तुतस्तु श्रीकृष्णवियोगदुःखेनेव मूर्च्छितान् चिच्छक्त्यालिङ्गितत्वात् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मिथः परस्परम् अतज्ज्ञानां भाषितं तथ्यमयथार्थं श्रुत्वा अमृषा सत्यमेव सर्पतुण्डं हन्त हन्तैषां मृषायते नेदं सर्पतुण्डं किन्तु वृन्दावनश्रीरिति प्रतीतिर्भवतीति विचिन्त्य किञ्च न केवलं सर्पोपि किन्त्वघनामकं रक्ष इति विदित्वा कृतः अखिलभूतहृदि स्थितः

परमात्मत्वेन सर्वज्ञत्वात् स्वानां स्वांस्तान् निरोद्धुं वारयितुं मनो दधे ॥ २५ ॥ यावन्मनो दधे तावत् असुरस्योदरमध्यं प्रविष्टाः किन्तु न गीर्णा रक्षसा न गिलिता जीर्णा इति पाठोऽपि स एवार्थ इति स्वामिचरणाः कीदृशेन हतौ स्वकौ बकीबकौ अन्तरन्तःकरणेन स्मरतीति तथा तेन अत एव बकारेः कृष्णस्य प्रवेशं प्रतीक्षिमाणेन न चात्र भगवतः सत्यसङ्कल्पता व्यभिचरति स्मेत्याशङ्कनीयम् अस्मान् किमत्र ग्रसिता निर्विघ्नानयं तथा चेद्बकवद्विनङ्क्ष्यति इति भक्तसङ्कल्पस्याप्यत्र वर्तमानत्वात् मत्सङ्कल्पमद्भक्तसङ्कल्पयोर्मध्ये मद्भक्तसङ्कल्पस्यैव गरीयस्त्वमिति भक्तवश्येन भगवतैव प्राक् कृताया मर्य्यादायास्तथा लीलाशक्तेश्च सर्वोपमर्दिन्याः सर्वदा जागरूकत्वात् ॥ २६ ॥ स्वकरादिव महामणीनिव अपच्युतान् मृत्योरघासुरस्य जठराग्नौ घासान् तृणवत्पतनोन्मुखान् वीक्ष्य घृणया कृपया अर्दितः पीडितः दिष्टकृतेन लीलाशक्त्यनुकूलकालकृतेन तत्प्रवेशकर्मणा विस्मितः "कालादिष्टोप्यनेहापि" इत्यमरः । अहो न तावदेषां प्रारब्धकर्म न सम्भवति न च तद्विनाप्यत्र कर्मण्यन्तर्य्यामी प्रवर्तयेत् तस्य मत्स्वरूपत्वेन मत्प्रातिकूल्यानर्हत्वाच्च तस्मात् मत्सहचरानप्येतादृशीं दुरवस्थां दर्शयन्त्या मत्प्रातिकूल्येऽप्यशङ्कमानायाः प्रेमपूर्णं मां करुणरसनिमग्नीकर्तुकामाया मदीयलीलाशक्तेरेवेदं कर्ममयी लीला पुरुषोत्तमे रसमयमूर्तौ तस्या एवैतावत्प्रभुष्णुत्वमिति बन्धुविच्छेदशोकार्तत्वेपि विस्मयेनेषत् स्तिमितोऽभूदित्यर्थः ॥ २७ ॥ अत्र सङ्कटे किं कृत्यम् ? अस्य खलस्य जीवनं न स्यात् वै निश्चितम् अमीषां विहिंसनं च न स्यात् इति द्वयं कथं स्यादिति विचिन्त्य तत्र सहसैवोपायं ज्ञात्वा तुण्डमविशत् यतोऽशेषदृक् एवं कृते सत्येवं भविष्यतीनि भावि सर्वं पश्यतीति सः स्वभक्तविपदः खलजीवनसंसारयोश्च हरणाद्धरिः ॥ २८ ॥ घनच्छदा मेघान्तरिताः कंसस्याघस्य च भयात् हाहेति भगवत्यनिष्टाशङ्कया देवानामैश्वर्य्यज्ञानेऽपि भक्तत्वात् भक्तेश्च प्रीत्यात्मकत्वात् प्रीतेश्च विवेकहरस्वभावत्वात् कंसाद्या जहृषुरिति चरद्वारा सद्य एव वार्ताज्ञानात् कौणपाः राक्षसाः अघासुरभ्रातुः पुत्रादयः ॥ २९ ॥ तत् साधूनां शोकजल्पनमसाधूनां हर्षजल्पनं च च श्रुत्वा अर्भैर्वत्सैश्च सहितमात्मानं श्यामसुन्दरस्वरूपम् ऊदरस्थीकृत्य चूर्णीचिकीर्षोरस्य गले ववृधे तावेव शोकहर्षौ वैपरीत्येन श्रोतुरिति भावः । ननु, शकटतृणावर्तवधदामबन्धनादिलीलायां स्तोकेनैव बालवपुषा किञ्चिदप्यवर्द्धमानेन तत्तद्दुर्घातिचर्श्चो स्वयं भगवतो विभोरस्य किमघासुरकण्ठरन्ध्रव्याप्तिरशक्त्या यतो ववृधे इत्युच्यते सत्यं तत्र तत्र नरबाललीलत्वलक्षणमाधुर्यस्य विस्मयरसाधायकस्य भक्तजनलोचतास्वाद्यत्वादलौकिकं तादृशत्वमेव समुचितम् अत्रतु तादृशमाधुर्यग्राहकद्रष्टृजनाभावात् स्वयं भगवतापि तेन लौकिक्ये रीतिरालम्बे इति जानीमः ॥ ३० ॥ निरुद्धा मुखादानां मार्गभूतः कण्ठे यस्यास्ति तस्य उद्गीर्णदृष्टेर्बहिर्निर्गतलोचनस्य अन्तरङ्गे देहमध्ये निरुद्धः पवनः प्राणवायुः निर्गमनाभावात् पूर्णः मूर्द्धन् मूर्द्धिन स्थितं ब्रह्मरन्ध्रं निर्भिद्य वहिर्गतः ॥३१॥ परेतान् स्वविरहतज्जाठरानलयोर्ज्वालया मूर्च्छितान् दृष्ट्वा अमृतवर्षिण्या ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अतथ्यमसत्यं श्रुत्वा अतथ्यत्वे कारणमित्थं मिथोऽतज्ज्ञानां भावितमिति अतज्ज्ञत्वे कारणे च अमृषा सर्परूप्यपि मृषायते सर्पाभाववदाचरतीति विचिन्त्य तत्रापि रक्षो विदित्वा तान् निरोद्धुं वारयितुं यावन्मनो दधे ॥ २६ ॥ तावदसुरोदरस्यान्तरं मध्यं प्रविष्टा एव परं केवलं न तु असुरेण गीर्णा गिलिताः तत्र हेतुगर्भमसुरविशेषणं बकारिवेशनं प्रतीक्ष्यमाणेन तत्प्रवेशप्रतीक्षायां हेतुं बकारिशब्देनोक्तं विवृत्य दर्शयति हतयाः स्वकयाबकीबकयारन्तः स्मरतीति तथा तेन ॥ २६ ॥ दिष्टकृतेन स्वसमीपेऽपि प्रवृतेन तत्कर्मफलहेतुना विस्मितः तान् दीनांश्च वीक्ष्य घृणार्दितोऽभूदित्यन्वयः । ननु, "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्" इति शास्त्रादावश्यके कर्मफले प्राप्ते तत्र घृणा न युक्तेत्यत आह, अनन्यनाथानिति ॥ २७ ॥ अस्य खलस्य जीवनममीषां सतां च विहिंसनमिति द्वयं वै निश्चितं कथं न स्यादत्र कृत्य किमिति सम्विचिन्त्य तत् कृत्यं ज्ञात्वा तुण्डमघासुरास्यमविशदित्यन्वयः ॥ २८ ॥ तदा श्रीकृष्णे अघमुखे प्रविष्टे घनच्छदाः मेघान्तरिताः भयादज्ञानजात् अथवा अदितेर्गर्भे प्रविश्येन्द्रो यथा तत्पुत्रोऽभूदेवमस्य पुत्रो भूत्वा वधं न करिष्यतीति भयात् कौणपाः कुणपाशिनः ॥ २९ ॥ चूर्णीकर्तुमिच्छार्गले ततः प्रागेव ववृधे अवर्धत भगवानित्यनेन बहिः स्थितोपि कार्यद्वयं कर्तुं तं च दृष्टमात्रापि संसाराद्विमोचयितुं शक्त इति अव्यय इत्येनन तन्मुखे प्रविष्टस्यापि भयाभावाल्लीलाविशेषार्थं तन्मुखे प्रविष्ट इति च गम्यते ॥ ३० ॥ ततः मुखे प्रवृद्धात् श्रीकृष्णात् हेतुभूतात् निरुद्धमार्गिणः निरुद्धो मार्गः पवनमार्गः कण्ठो यस्यास्ति तस्य अतिकायस्य अजगररूपिणः पवनः प्राणवायुर्निरुद्धः अतः एवान्तरङ्गे शरीरमध्ये पूर्णः परिभृतः अत एव मूर्द्धन् मूर्द्धानं ब्रह्मरन्ध्रं विनिष्पाट्य बहिर्गतोऽभूत् ॥ ३१ ॥ तन पवनेन सह प्राणेषु इन्द्रियेषु बहिर्गतेषु परेतान् मृतान् यतः भगवान् अतः दृष्ट्यैवोत्थाप्य तद्वक्त्रात् विनिर्ययौ विनिर्गतोऽभूत् । ननु, पूतना बलात् गृहे प्रविश्य कालकूटं स्तनं दत्वा मातृगातिं गता तस्य दूरस्थस्य मुखे प्रविश्य तस्मै किं दत्तवानित्यत आह-मुकुन्द इति । मोक्षं दत्तवानित्यर्थः ॥ ३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

मिथ इत्थमतज्ज्ञानां बालानां भाषितमतथ्यमयथार्थं श्रुत्वा भगवान् अमृषा सत्यं सर्पवपुरेषां मृषायते नेदं सर्पवपुः किन्तु वृन्दावनश्रीरिति वस्त्वन्तरतया प्रतीयते इति विचिन्त्य न त्वेतावदेव रक्षो राक्षसोऽयमिति विदित्वा यतोऽखिलेति सर्वज्ञ इत्यर्थः । स्वानामिति कर्मणि षष्ठी स्वान् बालान् निरोद्धुं निवारयितुं यावन्मनो दधे तावत् प्रविष्टा इत्युत्तरेणान्वयः ॥ २५ ॥ प्रविष्टा एव

किन्तु रक्षसा तेन न गीर्णा न गिलिताः कीदृशेन ? बकारेः कृष्णस्य प्रवेशनं प्रतीक्षमाणेन तत्प्रतीक्षां कुतस्तत्राह तेन हतौ स्वकौ बकीबकावन्तः स्मरतीति तेन यद्यप्येते शिशवोऽपि तत्पार्षदत्वात् सर्वज्ञा एव तथापि लीलासिद्धये तल्लीलाशक्तिरेव तत्सार्वज्ञ्यमावृणोतीत्युक्तमेव अत्र "अस्मान् किमत्र ग्रसिता निविष्टा" नित्यादिविदितेन भक्तसङ्कल्पेन स्वानां निरोद्धुं भगवान् मनोदधे इति भगवत्सङ्कल्पः स्तभ्यते तस्यैव बलीयस्त्वात् ।। २६ ।। स कृष्णस्तान् शिशून् स्वकरान्महामणीनिवापच्युतात् मृत्योरघस्य जठराग्नौ घासान् तृणमुष्टीनिव पतनाभिमुखान् वीक्ष्य घृणया कृपयार्दितः पीडितः दिष्टकृतेन तत्प्रवेशकर्मणा विस्मितः "कालो दिष्टोऽप्यनेहापी"त्यमरोक्तेः दिष्टा लीलानुरूपः कालस्तद्रचितेनेत्यर्थः । अहो मे लीलाशक्तेर्महिमा या रसमूर्तिं मां करुणरसमनुभावयन्ती मत्सखानपि सर्पोदरे नयन्ती मत्सङ्कल्पमप्यन्यथायतीति जातविस्मयोऽभवदित्यर्थः । न च तेषां तदुदरे प्रविष्टानां क्लेशः बकार्युशन्मुखं वीक्ष्येति तद्वीक्षणानन्दवत्त्वात् दीनांश्चेति तु प्रातीतिकम् ।। २७ ।। अत्र सङ्कटे किं कृत्यम् अस्य खलस्य जीवनं न स्यात् अमीषां सतां मत्सखानां विहिंसनं न स्यादिति द्वयं कथं स्यादिति विचिन्त्य तत्रोपायं ज्ञात्वा तत्तुण्डं स्वयमविशत् यतोऽशेषदृक् एवं कृते सत्येवं स्यादिति भावि सर्वं पश्यतीति सः स्वभक्तविपत्तेः खलजीवनाविषयाश्च हरणाद्धरिः सर्वज्ञस्यापि हरेरुपायविचिन्तनं लोकवल्लीलत्वादसुरविमोहनपर्यवसायि ।। २८ ।। तदा देवास्तदैश्वर्यज्ञा अपि हरौ लब्धप्रीतयः प्रीतिस्वभावोद्भूतानिष्टशङ्कया हा हेति चुक्रुशुः कीदृशास्ते घनच्छदाः कंसाद्यभयादभ्रान्तरिता इत्यर्थः । ये कंसाद्या ये चाघबान्धवाः कौणपाः राक्षसास्ते जहृषुश्चारेण वार्तोपलम्भात् ।। २९ ।। तद्देवानां शोकजल्पनं कंसादीनां हर्षजल्पनञ्च श्रुत्वा अर्भैर्वत्सैश्च सहितमात्मानं स्वं नन्दसुतं चूर्णीचिकीर्षोरघस्य गले तरसा वेगेन ववृधे तज्जल्पनद्वयवैपरीत्येन श्रातुमिति भावः, तद्गले हरिमूर्तेर्वर्द्धनं तन्माधुर्यचेष्टाद्रष्टुस्तस्मिन्नभावादिति बोध्यम् ।। ३० ।। निरुद्धा मुखादिमार्गभूतः कण्ठो यस्यास्ति तस्याद्गीर्णदृष्टेः बहिर्निर्गतनेत्रस्यान्तरङ्गे कायमध्ये पवनः प्राणवायुर्निरुद्धो निर्गमाभावात् पूर्णः मूर्द्धानं विनिष्पाट्य निर्भिद्य बहिर्गतः ।। ३१ ।। तेनैव पवनेन सह प्राणेषु तदिन्द्रियेषु बहिर्गतेषु सत्सु तदुदरगतान् वत्सान् सुहृदः सखींश्च परेतान् तद्विरहतज्जठरानलज्वालया मूर्च्छितप्रायान् स्वया पीयूषवर्षिण्या दृष्ट्या स्वस्थानुत्थाप्य अन्यद्व्यक्तार्थम् ।। ३२ ।।

श्रीसुबोधिनी

भगवान् पुनर्मा प्रविशन्तु सर्पोयं भक्षणार्थं स्थित इति यावद् वदति तदर्थं च यावन् मनसि विचारयति तावदेव प्रविष्टा इति श्लोक**द्वयसम्बन्धः, इत्थं** पूर्वोक्तप्रकारेण **मिथो** बालकस्तथ्यमे**वातथ्यवद् भाषितं** तेषां वाक्यं **श्रुत्वा विचिन्त्य** सत्यमयमजगर एवेति निश्चित्यामृषैव राक्षसो **मृषायते** जगरवत् तिष्ठति श्रीरिव वा बुद्धिमुत्पादयति, अतोयं राक्षस एवेति **विदित्वा स्वानां** निषेधार्थं स्वान् **निषेद्धुं** सर्वज्ञो **भगवान् मनो दधे** विचारितवांस्**तावदेव** बालका **असुरोदरान्तरं प्रविष्टाः सवत्सा** गतप्राणा अपि तदुदराग्निना **न जीर्णाः**, जरणे तेषामुपमर्दोपेक्ष्यते, स तु न जात इत्याह, **बकारि**प्रवेशं **प्रतीक्षमाणेन** हतयोर्बकीबकयो**रन्तस्मरणं** मृत्युस्मरणं यस्य तेन **रक्षसा** दृढवैरानुबन्धेन जातिदुष्टेनापि भगवत्प्रतीक्षया न जीर्णाः ।। २५-२६ ।। भगवतो **तान्** वीक्ष्येति, **कृष्णः** सर्वेषामभयदाता तेषां गोकुलवासिनां च, सर्व **एवानन्यनाथाः, न** विद्यतेन्यो **नाथो** येषां, इदानीं च **स्वकरादवच्युता** अकस्मात् तन्मुखे पतिताः, नाप्युपेक्षणीया **दीनाः, मृत्योरघस्यैव जठराग्नेर्घासाः** कवलरूपाः, **दिष्टकृतेन** तथाभूतास्तान् दृष्ट्वा भगवान् **विस्मितो** जातः ।। २७ ।। विचारयति **कृत्यं किमत्रेति**, यद्ययं मार्यते बालका अपि गमिष्यन्ति, अन्यान् कृत्वा गृहनयने कृतेप्येति नष्टा एव, अतो बालका रक्षणीया अयं च मारणीयः, एतदुभयं मत्प्रवेशनेनैव भवतीति **तुण्डमविशत्,** यतोयमशेषदृग्घारिश्च सर्वदुःखहर्ता, **अस्य खलस्य जीवितं** यथा **न** स्याद**मीषां वा सतां विनाशनं** यथा न स्यादेतद् **द्वयं कथं स्यादिति** फलद्वयमेकं साधनं च **सञ्चिन्त्य** तादृशमुपायं ज्ञात्वा प्रविष्टः ।। २८ ।। **तदा देवाः** कंसादयश्चाकाशमार्गेण द्रष्टुमागताः, तत्र **देवा घनच्छदा** मेघान्तरिताः पश्यन्ति ते **हाहेति चुक्रुशुः कंसाद्या जहृषुर्हर्षं** प्राप्तवन्तः कंसाद्याः सर्व एव **ये** केचनाघस्य **बान्धवाः कौणपा** राक्षसाः ।। २९ ।। उभयेषां हर्षविषादौ **श्रुत्वा भगवान् कृष्णोऽव्ययः** स्वतो भयरहितः **सार्भवत्सकं** बालकवत्ससहितमात्मानं **चूर्णीचिकीर्षोरस्य गले ववृधे** स्थूलो जातः ।। ३० ।। **ततोतिकायस्य** स्थूलस्य सर्पस्य **निरुद्धमुखमार्ग**वत **उद्गीर्णे** निर्गते **दृष्टो** चक्षुषो यस्य, **इतस्ततश्च भ्रमतो** देहं विक्षिपता**न्तरङ्गे** शरीरमध्ये **पूर्णः पवनो निरुद्धः** सन् **मूर्धानं विनिष्पाट्य बहिर्निर्गतो** मुख्यप्राणो ब्रह्मरन्ध्रेण **विनिर्गतः** ।। ३१ ।। **तेनैव** च मार्गेण **सर्व** एव **प्राणा** इन्द्रियाण्यात्मा च बहिर्निर्गतास्तदा **परेतान्** वत्सान् **सुहृदो** बालकान् **स्वयामृतदृष्ट्योत्थाप्य** सजीवान् कृत्वा तैः सह **मुकुन्दो भगवान् वक्त्राद् विनिर्ययौ** मुखमार्गेणैव निर्गतः, प्राणगमनानन्तरं सूक्ष्मो भूत्वा तथा कृतवान् ।। ३२ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अतज्ज्ञानाम् 'अजगररूपराक्षसोऽयम्' इति अजानतां बालानामित्थमतथ्यमसत्यं मिथो भाषितं श्रुत्वा यतोऽखिलभूतहृत्स्थितः सर्वप्राणिनां हृदये स्थितः साक्षी, अतस्तद्रक्षो विदित्वा अमृषा वस्तुतोऽजगररूपधृगसुर एवैषां मृषायते 'अजगरसदृशवृन्दावनश्रीयया प्रतीयते' इति विचिन्त्य भगवान् यावत् स्वानां स्वकीयांस्तान् निरोद्धुं निवारयितुं मनो दधे ॥ २५ ॥ तावत्ते सवत्साः

शिशवः असुरोदरस्य अन्तरे मध्ये परं केवलं प्रविष्टा, नतु तेन रक्षसा गीर्णाः मुखसङ्कोचेन न गिलिता न निरुद्धा इति द्वयोरन्वयः। 'जीर्णा' इति पाठेऽपि स एवार्थः। अगिलने हेतुगर्भविशेषणमाह–प्रतीक्षमाणेनेति। बकारेः श्रीकृष्णस्य वेशनं प्रवेशनं प्रतीक्षमाणेन। तत्प्रवेप्रतीक्षायामपि हेतुं सूचयन् विशेषणान्तरमाह–हतेति। हतयोः स्वकीययोर्बकीबकयोरन्तं स्मरतीति तथा तेन ॥२६॥ श्रीकृष्णस्तान् वत्सान् बालकांश्च दिष्टकृतेन प्रारब्धकृतेन अघासुरमुखप्रवेशेन दीनान् दुःखितान् वीक्ष्य विस्मितः 'मया निरुद्ध्यमानानामपि प्रारब्धवशेनैवं प्रवेश' इत्याश्चर्ययुक्तः सन् 'अस्य खलस्य दुष्टस्याघस्य जीवनममीषां सतां तद्भक्तानां विहिंसनं मरणं च' इति द्वयं वै निश्चितं कथं न स्यात् मया चात्र किं कृत्यं किं कर्तव्यमिति संविचिन्त्य तत् तदुपायं ज्ञात्वा तस्य तुण्डं मुखमविशदिति द्वयोरन्वयः। एवं प्रवेशे हेतुमाह–घृणार्दित इति। कृपया पीडित इत्यर्थः। कृपापात्रत्वेन तान् विशिनष्टि—अनन्यनाथानिति। नान्यः स्वव्यतिरिक्तो नाथो रक्षको येषां तान्। स्वकरात् अवच्युतान् विनिःसृतान्। तत्र हेतुः—मृत्योरघस्य जठराग्नेर्घासान् तृणतुल्यान्। तेषु कृपायां कैमुत्यन्यायमाह –हीति। हि यस्मात् सकलस्य सदाचारनिष्ठस्याभयप्रदः, अतो निजभक्तकृपायां किं वक्तव्यम् ?। तत्र हेतुमाह—हरिरिति। आश्रितार्तिहरणशील इत्यर्थः। उपायज्ञाने हेतुमाह – अशेषदृगिति। सर्वज्ञ इत्यर्थः। यदि बहिस्स्थित एवाघासुरं हन्यात्तदा बाला अपि तेन सह मृताः स्युः तथा च ब्रजे महद्दुःखमापतेत्। बालान्तरनिर्माणं कृत्वा व्रजे नयने कृतेऽपि पूर्वे तु मृता एव, अतस्तद्रक्षार्थं तन्मुखमेव प्राविशदिति भावः॥ २७-२८ ॥ तदा भगवतोऽघमुखप्रवेशकाले तद्भयात् घनच्छदा मेघान्तरिता देवास्तस्यापि मुखप्रवेशं दृष्ट्वा मोहेन विस्मृततत्प्रभावास्तस्यापि ततो मरणमाशङ्क्य, अघस्य मरणे निराशाः सन्तो हाहेति चुक्रुशुः। कंस आदिर्मुख्यो नियन्ता येषां ते कौणपाः कुणपाशिना राक्षसास्तु जहृषुरित्यन्वयः। हर्षे हेत्वन्तरमपि सूचयन्नाह –अघबान्धवा इति। चारैः सद्य एव गत्वा कथनात् कंसादीनामपि तज्ज्ञानमिति ज्ञेयम्॥ २९ ॥ तत् 'हाहा' इत्याक्रोशं श्रुत्वा तु श्रीकृष्णः सार्भकवत्सकं बालवत्ससहितं आत्मानां मुखसंवरणमात्रपरिवर्तनादिना चूर्णीचिकीर्षोस्तस्य गले आदावेव तरसा वेगेन झटिति ववृधे इत्यन्वयः। 'तस्य तु मरणभयं नास्त्येव' इत्याह–अव्यय इति। अपक्षयशून्य इत्यर्थः। तत्र हेतुमाह–भगवानिति। ऐश्वर्यादिषड्गुणपूर्ण इत्यर्थः। तस्य स्वरूपतो गुणतो वा क्षये भगवत्त्वमेव न स्यादिति भावः॥ ३० ॥ ततो हि तस्माद्वर्धनादेव निरुद्धमार्गिणो निरुद्धैः प्राणमार्गः कण्ठो यस्यास्ति तस्य अत एव उद्गीर्णदृष्टेर्बहिर्निर्गतलोचनस्य। तस्य व्याकुलतां सूचयन्नाह – इतस्ततो भ्रमतो देहं चालयतः। तत्प्राणस्य महत्त्वं सूचयन्नाह – अतिकायस्येति। स्थूलशरीरस्याघस्यान्तरङ्गे देहमध्ये निरुद्धः, अतएव पूर्णः पवनः प्राणवायुर्मूर्धन् मूर्धनि स्थितं ब्रह्मरन्ध्रं विनिष्पाट्य विनिर्भिद्य बहिर्विनिर्गतः। तुशब्दः सन्देहनिरासार्थः॥ ३१ ॥ तेनैव मार्गेण सर्वेषु प्राणेषु इन्द्रियेषु बहिर्गतेषु सत्सु परेतान् स्ववियोगात् तज्जाठराग्निज्वालातश्च मूर्च्छितान् वत्सान् सुहृदो बालांश्च त्वयाऽमृतवर्षिण्या दृष्ट्या चेतनान् कृत्वोत्थाप्य तदन्वितस्तैः सहितो मुकुन्दो वत्सादीनामघात्, तस्य च संसारात् मोचको भगवान् पुनस्तस्य वक्त्राद्विनिर्ययौ॥ ३२ ॥

अन्वितार्थप्रकाशिका

इत्थमिति॥ इत्थम् अतज्ज्ञानामजगररूपा राक्षसाऽयमित्यजानतां बालानामित्थमतथ्यमसत्यं मिथो भाषितं श्रुत्वा अमृषा वस्तुतोऽजगररूपाघासुर एवैषां मृषायते अजगरसदृशवृन्दावनश्रीयया प्रतीयते इति विचिन्त्य यतो भगवान् अखिलभूतहृत्स्थितः सर्वप्राणिनां हृदये स्थितः साक्षी अतस्तत् न सर्पमात्रं किन्तु अघनामकं रक्ष इति विदित्वा स्वानां स्वीयान्। शेषे षष्ठी। निरोद्धुं निवारयितुं मनो दध्रे॥ २५ ॥ तावदिति॥ यावद्भगवान् बालान्निवारयितुमियेष तावत् ते सवत्साः शिशवः असुरोदरस्य अन्तरे मध्ये परं केवलं प्रविष्टाः बकारेः श्रीकृष्णस्य वेशनं प्रवेशनं प्रतीक्षमाणेन हतयोः स्वकीययोः पूतनाबकयोरन्तं स्मरतीति तथा तेन रक्षसा न तु गीर्णाः मुखसङ्कोचनेन न गिलिताः। जीर्णा इति पाठेऽप्ययमेवार्थः॥ २६ ॥ तानिति॥ सकललोकस्याभयप्रदः घृणया दयया अर्दितः कृष्णः अनन्यनाथान् नान्यः स्वव्यतिरिक्तो नाथो रक्षको येषां तान् स्वकरात् महामणीनिवावच्युतान् मृत्योरघस्य जठराग्नेर्घासान् ग्रासभूतान् तृणतुल्यान् वा तत्र पतनोन्मुखान् दीनान् तान् वत्सान् बालकांश्च वीक्ष्य दिष्टकृतेन प्रारब्धकृतेन अघासुरमुखप्रवेशेन विस्मित इवाभूत्॥ २७॥ कृत्यमिति॥ अत्र विषये किं कृत्यं किं करणीयं यतः अस्य खलस्य दुष्टस्याघस्य जीवनं न स्यात् तथाऽमीषां सतां मद्भक्तानां विहिंसनं मरणं च न स्यात् इति द्वयं वै निश्चितं कथं स्यात् इति संविचिन्त्य तत् तदुपायं ज्ञात्वा अशेषदृक् सर्वज्ञः हरिः तस्य तुण्डं मुखमविशत्॥ २८ ॥ तदेति॥ तदा भगवतो मुखप्रवेशकाले कंसस्याघासुरस्य च भयात् घनच्छदा मेघान्तरिताः देवाः भगवतोऽपि मरणमाशङ्क्य भयात् हा हा इति चुक्रुशुः। ये च चारचक्षुः कंस आद्यो मुख्यो नियन्ता येषां ते अघस्य बान्धवाः तद्भ्रातुः पुत्रादयः कौणपा राक्षसास्ते तु जहृषुः॥ २९॥ तच्छ्रुत्वेति॥ तत् हा हेत्याक्रोशं श्रुत्वा अव्ययो भगवान् कृष्णः सार्भकवत्सकं बालवत्ससहितम् आत्मानं मुखसंवरणमात्रपरिवर्तनादिना चूर्णीचिकीर्षोस्तस्य गले आदावेव तरसा वेगेन झटिति ववृधे॥ ३० ॥ तत इति॥ ततः तस्माद्वर्द्धनादेव निरुद्धमार्गिणो निरुद्धः प्राणमार्गः कण्ठो यस्यास्ति तस्य अत एव उद्गीर्णदृष्टेर्बहिर्निर्गतलोचनस्य इतस्ततो भ्रमतो देहं चालयतः अतिकायस्य स्थूलशरीरस्याघस्यान्तरङ्गे देहमध्ये निरुद्धः अत एव पूर्णः पवनः प्राणवायुः मूर्धन् मूर्द्धनि स्थितं ब्रह्मरन्ध्रं विनिष्पाट्य विनिर्भिद्य बहिर्निर्गतः। मूर्द्धन्निति ङिलुक्

छान्दसः ॥ ३१ ॥ तेनैवेति तेनैव मार्गेण सर्वेषु प्राणेषु इन्द्रियेषु बहिर्गतेषु सत्सु परेतान् रक्षोजठराग्नेर्मूर्च्छितान् वत्सान् सुहृदो बालांश्च स्वयाऽमृतवर्षिण्या दृष्ट्या चेतनान् कृत्वोत्थाप्य तदन्वितस्तैः सहितो मुकुन्दो भगवान् पुनस्तस्य वक्त्राद्विनिर्ययौ ॥३२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इत्थंमिति अतथ्यम् असत्यं मिथः परस्परं अतज्ज्ञानां ग्रसनायावस्थितं सर्पमविदां भाषितमित्थं श्रुत्वा अमृषासत्योऽजगरः बालानां मृषायत मिथ्यावदाचरतीति श्रीकृष्णा विचित्य अखिलभूतहृत्स्थितत्वात् सः भगवान् रक्षः ग्रसनार्थमागतं राक्षसं विदित्वा यावत्स्वानां स्वकीयान् निरोद्धुं मनो दधे ॥ २५ ॥ तावदसुरादरांतरं दैत्योदरमध्ये प्रविष्टाः बकारेः श्रीकृष्णस्य वेशनं प्रवेशं प्रतीक्ष्यमाणेन स्पृहयता रक्षसा सवत्साः शिशव पर केवलं न गीर्णाः मुखपिधानेन न गिलिलाः किंतु हतयोः स्वकयोर्बकीबकयोर्यौतो नाशस्तस्य स्मरणं यस्य तेन रक्षसा कृष्णप्रतीक्षया तथैव स्थितमिति संबंधः ॥ २६ ॥ स्वकरादवच्युतान् स्वविधेयनिषेधायोग्या-नित्यर्थः । मृत्यारघासुरस्य योजवराऽग्निस्तस्य घासान् कवलरूपान् तान् वीक्ष्य घृणयादययार्दितः पीडितः सन् दिष्टकृतेन दैवकृतेन विस्मितः अभवत् ॥ २७ ॥ अत्र किं कृत्यं करणीयमस्ति अस्य जीवनं न स्यात् सतां च विनाशो न स्यात् तत्कार्यद्वयसाधनं ज्ञात्वा अशेषदृक् सर्वद्रष्टृत्वात् तुंडं आसुरमुखमाविशत् ॥२८॥ घनच्छदाः जीमूतांतरिताः कौणपाः कुणपभक्षकाः असुराः कुणपो देहः ॥२९॥ अर्भकैः वत्सैः सहितम् आत्मानं स्वं चूर्णीकर्त्तुमिच्छोः तस्य गले ॥३०॥ निरुधश्वासो मार्गः श्वासनिर्गमनवर्त्म च सोऽस्ति अस्य तस्य महादेहस्य उद्गीर्णदृष्टेः बहिर्नियात नेत्रस्य इतस्ततो भ्रमतस्तस्य अंतरंगे शरीरमध्ये निरुद्धः अतएव पूर्णः पवनः मूर्धन्मस्तकं विनिष्पाट्य भित्त्वा बहिर्निर्गतः ॥३१॥ तेन असुरप्राणेन सहैव गोपवत्सानां सर्वेषु प्राणेषु बहिर्गतेषु सत्सु परेतान् मृतान् स्वया सुधा रूपया दृष्ट्या उत्थाप्य तदन्वितः वत्सबालयुक्तः वक्त्रात् विनिर्ययौ ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमिति ॥ इत्थं मिथः अन्योन्यं, अतथ्यमसत्यमेव, अतज्ज्ञभाषितं यथार्थतयाऽजगरमजानतां भाषितं, श्रुत्वा, भगवान् अमृषाणि सत्यमपि, एतैः मृषायितमयथार्थीकृतं, इत्येवं विचिन्त्य, अखिलभूतहृत्स्थितः, हेतुगर्भमिदम्। तत्त्वात् रक्षः विदित्वा अयं राक्षसोऽस्तीति ज्ञात्वा, स्वानां स्वान् वत्सान् वत्सपांश्चेत्यर्थः। निरोद्धुं निवारयितुं, यावत् मनः दधे चकार ॥ २५ ॥ तावदिति ॥ तावत्ततः पूर्वमेवेत्यर्थः। शिशवो वत्सपाः, सवत्सा वत्सैः सहिता इत्यर्थः। असुरोदरान्तरमसुरस्योदरमध्यं, प्रविष्टाः तु एव। परं केवलं, हतः श्रीकृष्णेन मारितो यः स्वस्य कान्तः प्रियः सुहृत्तस्य स्मरणं तेन हेतुना, यद्वा। हतौ श्रीकृष्णेन विनाशितौ स्वकावात्मीयौ स्वकावात्मीयौ पूतनाबकौ तयोरन्तं मरणं स्मरतीति तेन, बकारि श्रीकृष्णस्तस्य वेशनं प्रवेशं, प्रतीक्षमाणेन, रक्षसा, न जीर्णाः जीर्णतां न प्रापिताः। पाठान्तरे न गिलिताः। इति द्वयोरेकसम्बन्धः ॥ २६ ॥ तानिति ॥ सकलाभयप्रदः सर्वेषामभयप्रदाता, कृष्णः भगवान्, न विद्यते अन्यः स्वव्यतिरिक्तो नाथो येषां तान्, स्वकरात् स्वभुजाश्रयात्, अवच्युतान् भ्रष्टान्, पाठान्तरेऽप्ययमेवार्थः। दिष्टकृतेन दैवकर्त्तव्येन, मृत्योर्मृत्युरूपस्यासुरस्य, जठराग्निघासान् जठराग्नेस्तृणभावं प्राप्तान्, अत एव दीनान्, तान् सवत्सबालान्, वीक्ष्य प्रविष्टानालक्ष्य, विस्मितः, घृणार्दितश्च करुणया व्याप्तः सन् ॥ २७ ॥ कृत्यमिति ॥ अस्य खलस्य, जीवनं न स्यात्, सतां साधूनां, अमीषां विनाशनं च, न स्यात्, इत्येतत् द्वयं, युगपत् कथं स्यात्। अत्रोभयनिमित्ते, कृत्यं कर्त्तुं योग्यं, किम्। इत्येवं, संविचिन्त्य, अशेषदृक् हेतुगर्भमिदम्। तत्कृत्यं ज्ञात्वा अशेषदृक्त्वात् कर्त्तव्यार्थं विबुध्येत्यर्थः। हरि-राश्रितार्त्तिहरः, स्वयमपि, तुण्डं तदास्यं, अविशत् वै। इति द्वयोरेकसम्बन्धः ॥ २८ ॥ तदेति ॥ तदा घनच्छदा मेघमण्डलं प्रविश्यावस्थिताः, देवाः, भयात् हाहा इति, चुक्रुशुः। ये च अघबान्धवा अघासुरस्य बन्धुभावभाजः, कंसाद्याः, कौणपा राक्षसास्तु, जहृषुर्हृष्टवन्तः। अनृमांसाशा दैत्याः, नृमांसाशाः कौणपा इत्येतावाननयोर्भेदः ॥ २९ ॥ तदिति ॥ तद्देवानां हाहेत्याक्रोशनं, श्रुत्वा तु, आकर्ण्येवेत्यर्थः। अव्ययोऽविनाशी, भगवान् षाड्गुण्यपूर्णः, कृष्णः, सार्भवत्सकं वत्सतत्पालकसहितं, आत्मानं स्वं, चूर्णीचिकीर्षोश्चूर्णीकर्त्तुमिच्छोरसुरस्य, गले तरसा आशु, ववृधे एधांबभूव ॥ ३० ॥ तत इति ॥ ततः, अतिकायस्य विपुलदेहस्य, निरुद्धौ मार्गौ नासारन्ध्रे अस्य स्त इति निरुद्धमार्गो तस्य, अत एव, उद्गीर्णे उद्गते दृष्टी लोचने यस्य तस्य, इतस्ततः, भ्रमतोऽ-घासुरस्य तु, अन्तरङ्गे देहाभ्यन्तरे, निरुद्धः परितो निरोधं प्राप्तः, पवनः प्राणवायुः, पूर्णः सन् मूर्द्धन् मूर्ध्नि वर्तमानं ब्रह्मरन्ध्रं, विनिष्पाट्य निर्भिद्य, बहिः विनिर्गतः हि ॥ ३१ ॥ तेनेति ॥ तेन ब्रह्मरन्ध्रं विपाट्य निर्गतवायुकृतमार्गेण एव, सर्वेषु प्राणेषु तदीयसर्वेन्द्रियेष्वित्यर्थः। विनिर्गतेषु बहिर्गतेषु सत्सु, परेतान् परलोकगतप्रायान्, वत्सान् सुहृदो वत्सपांश्च, स्वया अमृतवर्षिण्या, दृष्ट्या उत्थाप्य, मुकुन्दो मुक्तिप्रदः भगवान्, पुनस्त्वर्थे। वक्त्रादघासुरमुखात्, तदन्वितो वत्सपालैः सहितः, विनिर्ययौ विनिर्गतोऽभूत् ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अतज्ज्ञेति : १०. १२. २५.

या दुर्धर्षभवोरगेऽनुरगधीर्यो रम्यभावग्रहो यत्तस्यै पुनः सलीलमुरगात्प्रेक्षाभिरालोकनम्।
यत्तस्मिंश्च ततोऽवगाहनमतिस्तूर्णप्रवेशोऽपि चेत्येतत् सर्वमतज्ज्ञकल्पितमिति स्पष्टं बभाषे हरिः ॥ ५५ ॥

दिष्टकृतेनेति : १०. १२. २७.

किशोरसङ्घोऽयमशेषदर्शनः सुरक्ष्यमाणोऽपि मया प्रतिक्षणम् ।
अघावृतोऽभूद्विधिनेत्यघापहस्तदास युक्तं खलु दैवविस्मितः ॥ ५६ ॥

यदाऽहिनाऽघरूपेण ग्रस्ता एव न भक्षिताः । तदैव घृणया ग्रस्तोऽस्मीति दिष्टेन विस्मितः ॥ ५७ ॥

अशेषदृगिति: ०. १२. २८.

भगवान् सजातिरयमिति हन्तव्यः कीदृशोऽपि नहि भवता । इति शेषोक्त्यश्रुतये तदास किमशेषदृष्टिरघहर्ता ॥ ५८ ॥

शेषावतारिणि बले सति कृत्रिमैतत् सर्पाकृतिर्न भविता भ्रमदा शिशूनाम् ।
तस्मान्न तद्ग्रसनमोचनकं चरित्रं स्यादित्यगाद्बिबल एव तदह्नि कृष्णः ॥ ५९ ॥
अशेषानसौ वत्ससङ्घानघाहेर्मुखान्तर्गतानाविभाव्यघारिः ।
भुजङ्गप्रयातस्यितिज्ञोऽपि तूष्णीं बभूवास्यबीजं विशेषानुचिन्ता ॥ ६० ॥

यन्नामाखिलदुःखहारि नितरां यो दुष्टविध्वंसकः शक्तिः कर्तुमकर्तुमन्यथयितुं जागर्ति यस्मिन् सदा ।
स श्रीशोऽघमुखप्रविष्टपृथुकत्राणैकचिन्ताकुलो यज्जातस्तदवैमि तेन निजसद्वात्सल्यमाविष्कृतम् ॥ ६१ ॥

सर्वत्र सर्वदा भक्तान् रक्षत्येव दयानिधिः । तत्रापि चेदघग्रस्तास्तांस्तु धावत्यतित्वरम् ॥ ६२ ॥

भवगह्वरे विहारं करोति यो लालयन् स्वगोजातम् । अघसंस्पर्शस्तस्यावश्यमिति व्यक्तमभवदघगिलनात् ॥ ६३ ॥

लोकेऽजस्रमतन्द्रितेन मनसा मां ध्यायतो हृत्स्थितो न द्राक् पूर्वमहं भवामि यदि सञ्जातोऽपि विद्युत्समः ।
संधत्ते हृदि यस्तु मामकजनांस्तत्राघजरूपेऽप्यरं स्थाता स्यां ननु मूर्तिमानिति विभुश्चख्यौ तदाऽघं विशन् ॥ ६४ ॥

तदा घनच्छदा इति : १०. १२. २९.

यत्सृष्ट्यणुकोऽमघस्तमचलमग्रसत नैकजगदुदरम् दृष्ट्वादिवौकसामपि कथं न भीर्विस्मयोऽपि वा भविता ॥ ६५ ॥

यत्सङ्गीत्यैवाहिचित्तस्य मोहो निर्वीर्यत्वं तद्वशीकारिता च ।
जानन्नेवं तत्कृते देवसङ्घो हाहाशब्दाद् गायकाह्वानमाधात् ॥ ६६ ॥

जहृषुरिति :

आभासरूपेऽपि कदाचिदैशवीर्यापकर्षे प्रतिभासमाने ।
सौख्यावभासो द्विषतां तदा तु युक्तं प्रमोदोऽघसुहृज्जनानाम् ॥ ६७ ॥
भगवतः क्रियते ह्यहिनाऽशनं भगवता क्रियते ह्यहिनाशनम् ।
प्रथमवाचमवोचदवाश्रितः सुरचयश्चरमां गिरमूचिवान् ॥ ६८ ॥

ते स्युः पापाश्रिता ये तु वर्तमानैकदृष्टयः । भवन्तीति स्फुटमभूत्तदा त्वेक्षा प्रमोदतः ॥ ६९ ॥

ववृधे गल इति : १०. १२. ३०.

यदंशतो यस्य मनस्युदीतो दुरात्मनोऽस्मिन् भुवनेऽभिमानः ।
तमंशमामूलमहं छिनद्मीत्यासीत् स वृद्धोऽघबृहद्गरे किम् ॥ ७० ॥

यो मां द्वेष्टि च मामकानपि जनांस्तस्याहमद्धाऽखिलं कुर्यां प्राणनिरोधमाशु न भवेन्नामापि शिष्टं यथा ।
एवं बोधयितुं निजावनचणश्चक्रेऽघकण्ठाध्वनो रोधं नाम स शब्दशास्त्रनिपुणः सर्वेश्वरः श्रीधीरः ॥ ७१ ॥

तेनैवेति : १०. १२. ३२.

अस्मद्द्वारमनेनेदं यत्संरुद्धमतो वयम् । यामस्तन्निर्मितद्वारेत्याशयात्ते ततो ययुः ॥ ७२ ॥
किमस्माभिस्तवाकारि किमस्मद्रोधनं प्रभो । अघस्थितिश्चेत्त्यक्ता तत्प्राणैरुक्तः स निर्ययौ ॥ ७३ ॥

यस्यामलेशहृदयस्य निरुद्धवायोः प्राणाः प्रयान्ति सहसैव शिरोऽध्वनाऽस्मिन् ।
अत्रैव सोऽमृतमयो भवति प्रमातेत्यर्थः श्रुतेः स्फुटरोऽजनि तच्चरित्र ॥ ७४ ॥
सुधारसमुचा दृष्ट्या सुधाकरनिवासया । बालान् सञ्जीवयामास तानिति क्षममच्युतः ॥ ७५ ॥
अन्वर्थयञ्जने वां सद्वृन्दावनविहारिताम् । अमोचयदघाद्बालान् सवत्सान् युगपत्प्रभुः ॥ ७६ ॥
अन्वर्थकान्येव ममाखिलानि नामानि भूमाविति बोधयन्सः ।
मुक्तिं वितीर्याशु निजेष्वघे च मुकुन्दनाम प्रकटीचकार ॥ ७७ ॥
मन्मात्राश्रयिणो न जातुचिदघग्रस्ता भवेयुः क्वचिज्जाताश्चेत् स्वयमुद्धराम्यहमसावज्ञातदुःखं क्षणात् ।
इत्थं स्वीयजनावनानलसतां सार्वांशिकीं दर्शयन् श्रीमानुद्धृतवानघोदरगतान् बालान् सवत्सान् प्रभुः ॥ ७८ ॥
असाध्यं तं ज्ञात्वा सुभगबकवृत्त्या प्रभुमसावघोराः सद्योऽघस्तदजगरवृत्त्याऽऽश्रिततनुः ।
तथाप्यासीद् यत्नो बकवदफलोऽस्यापि तदिदं स्फुटं यत्सत्येन स्फुरति स न वै कृत्रिमतया ॥ ७९ ॥
ध्वान्तारावुदिते ध्वान्तं नाशमायात्ययत्नतः । हरेस्तथाऽखिलाधारे-रुदयादघनाशनम् ॥ ८० ॥

कृष्णप्रिया

राजन् ! इन निष्कपट-निष्पाप बालकों की परस्पर में हो रही भ्रान्त-गलत बातें सुनकर अखिल प्राणियों के हृदय में विराजमान करुणासिंधु भगवान् श्रीकृष्ण यह सोच रहे थे कि ये निर्दोष बालक, "अघासुर को ही अजगर समान पर्वत मान रहे हैं" यह ठीक नहीं है इन भोले-भाले बालकों को उसके भीतर जाने से मना करने जा ही रहे थे इतने में तो वे भीतर चले गये ॥ २५ ॥ राजन् ! अघासुर अजगर के उदर में यद्यपि ग्वाल बाल वत्सों सहित पैठ तो गये लेकिन अघासुर ने उन सब बालकों को निगला नहीं था, क्योंकि, अघासुर अपने भाई बकासुर और बहिन पूतना के वध का स्मरण करके इस बात की प्रतीक्षा कर रहा था कि अपने सोदर को मारने वाले कृष्ण उदर में आ जाय पुनः इन सबको एक ही साथ निगल जाऊँ ॥ २६ ॥ सकल विश्व को अभय दान देने वाले भगवान् श्रीकृष्ण ने देखा कि बछड़ें सहित सारे ग्वाल बाल जो मेरे अनन्य और जिनका मैं ही शरण्य हूँ वैसे बछड़े और बालक देखते ही मेरे हाथों से सरक गय और मृत्यु के पेट में जा पहुँचे तब देव की इस विचित्र घटना पर भगवान् को बड़ा आश्चर्य हुआ हृदय में भारी दया उमड़ आयी ॥ २७ ॥ अब भगवान् विचार करने लगे कि ऐसे अवसर पर मुझे कौन सा कार्य करना चाहिये, कि जिस उपाय से इस खल अघासुर जीवित न रहे और संत हृदय ये सब भक्त बालक सुरक्षित रहे इनकी हत्या न हो, ये दोनों विरुद्ध कार्य एक ही साथ कैसे हो सकते है यों विचार कर सर्वविध सर्वज्ञ और दयानिधान भगवान् श्रीहरि निज कर्तव्य का निश्चय कर विरुद्ध धर्म समाश्रयी अघासुर के मुँह में प्रविष्ट हुए ॥ २८ ॥ इस अवसर पर देवता मेघ में छिपकर सारी घटना को देख रहे थे वे भगवान् श्रीकृष्ण को अघासुर के मुँह में प्रविष्ट देखकर हाहाकार कर उठे तब अघासुर बन्धु कंस आदि राक्षसो की खुशी की कोई सीमा न रही ॥ २९ ॥ यहाँ पर अघासुर बछड़ों एवं बालकों के साथ भगवान् श्रीकृष्ण को अपनी डाढों से चबाकर चूर्ण कर डालना चाहता था । तब इधर देवताओं का भगवान् ने हाहाकार शब्द सुना तब अविनाशी प्रभु ने अपने श्री अङ्ग को बड़े वेग से बढ़ा दिया ॥ ३० ॥ जब भगवान् ने श्री विग्रह बढाया जब विशाल काय अघासुर का गला रुंध गया, आँखें बहार निकल आयीं वह इधर उधर छपटाने लगा । इसके बाद उसकी देह के भीतर रुकी हुई प्राण वायु निकलने का मार्ग न पा उसके ब्रह्म रन्ध्र को फाड़कर बहार निकल गयी ॥ ३१ ॥ जिस मार्ग से अघासुर की साँस बहार निकली उसी मार्ग से अघासुर के प्राणों के साथ सारी इन्द्रियाँ भी देह से बाहर हो गयी, इस अवसर पर भगवान् मुकुन्द ने अपनी अमृतवर्षिणी दृष्टि से, मूर्च्छित बछड़ों को और ग्वालबालकों को जिला दिया पुनः सब बछड़ों और बालकों को लेकर प्रभु बाहर पधारे ॥ ३२ ॥

पीनाहिभोगोत्थित[1] मद्भुतं[2] महज्ज्योतिः[3] स्वधाम्नो ज्वलयद् दिशो दश ।
प्रतीक्ष्य खेऽवस्थितमीश निर्गमं विवेश तस्मिन् मिषतां दिवौकसाम् ॥ ३३ ॥
ततोऽतिहृष्टाः स्वकृतोऽकृतार्हणं पुष्पैः सुरा अप्सरसश्च नर्तनैः ।
गीतैः सुगा[4] वाद्यघनाश्च वाद्यकैः स्तवैस्तु[5] विप्रा जयनिःस्वनैर्गणाः ॥ ३४ ॥
तदद्भुतस्तोत्रसुवाद्यगीतक[6]जयादिनैकोत्सवमङ्गलस्वनान् ।
श्रुत्वा स्वधाम्नोऽन्त्यज आगतोऽचिराद् दृष्ट्वा[7] महेशस्य जगाम विस्मयम् ॥ ३५ ॥
राजन्नाजगरं चर्म शुष्कं वृन्दावनेऽद्भुतम् । व्रजौकसां बहुतिथं बभूवाक्रीडगह्वरम् ॥ ३६ ॥
[8]एतत् कौमारजं कर्म [9]हरेरात्माहिमोक्षणम् । मृत्योः पौगण्डके बाला दृष्ट्वोचुर्विस्मिता व्रजे ॥ ३७ ॥
नैतद् विचित्रं मनुजार्भमायिनः परावराणां परमस्य वेधसः ।
अघोऽपि यत्स्पर्शनधूतपातकः[10] प्रापात्मसाम्यं त्वसतां सुदुर्लभम् ॥ ३८ ॥
सकृद् यदङ्गप्रतिमान्तराहिता मनोमयीं भागवतीं ददौ गतिम् ।
स एव नित्यात्मसुखानुभूत्या[11] व्युदस्तमायः परमोऽङ्ग किं पुनः[12] ॥ ३९ ॥

सूत उवाच

[13]इत्थं द्विजा यादवदेवदत्तः श्रुत्वा [14]स्वरातुश्चरितं विचित्रम् ।
पप्रच्छ भूयोऽपि तदेव पुण्यं वैयासकिं यन्निगृहीतचेताः ॥ ४० ॥

कर्दमक्षमा

अन्वयः–पीनाहिभोगोत्थितं ईश निर्गमं प्रतीक्ष्य खे अवस्थितं स्वधाम्नः दश दिशः ज्वलयत् अद्भुतं महः ज्योतिः दिवौकसां मिषतां तस्मिन् विवेश ॥ ३३ ॥ ततः अतिहृष्टाः सुराः स्वकृतः अकृतार्हणं पुष्पैः सुराः च अप्सरसः नर्तनैः सुगाः गीतैः वाद्यघनाः वाद्यकैः च विप्राः तु स्तवैः गणाः जयनिःस्वनैः स्वकृतः अर्हणं अकृत ॥ ३४ ॥ अजः महेशस्य तद् अद्भुतस्तोत्रसुवाद्यगीतकजयादिनैकोत्सवमङ्गलस्वनान् स्वधाम्नः अन्ति श्रुत्वा अचिरात् आगतः दृष्ट्वा विस्मयं जगाम ॥ ३५ ॥ राजन्! आजगरं शुष्कं चर्म वृन्दावने व्रजौकसां बहुतिथं अद्भुतं आक्रीडगह्वरं बभूव ॥ ३६ ॥ हरेः एतत् कौमारजं मृत्योः आत्माहिमोक्षणं कर्म दृष्ट्वा विस्मिताः बालाः व्रजे पौगण्डके ऊचुः ॥ ३७ ॥ यत् स्पर्शनधूतपातकः अघः अपि असतां तु सुदुर्लभं आत्मसाम्यं प्राप एतत् मनुजार्भमायिनः परावराणां परमस्य वेधसः एतत् विचित्रं न ॥ ३८ ॥ अङ्ग मनोमयी यदङ्ग प्रतिमा सकृत् अन्तः आहिता भागवतीं गतिं ददौ तदा नित्यात्मसुखानुभूत्या व्युदस्तमायः स एव परमः (अन्तराहितः) किं पुनः! ॥ ३९ ॥ द्विजाः इत्थं स्वरातुः विचित्रं चरित्रं श्रुत्वा यन्निगृहीतचेताः भूयः अपि वैयासकिं तदेव पुण्यं चरितं पप्रच्छ ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अहिदेहोत्थितं शुद्धसत्त्वमयं ज्योतिर्निर्गत्य खेऽवस्थितं तस्मिन्नीशे विवेश ॥ ३३ ॥ स्वकृतः स्वकार्यकृतः श्रीकृष्णस्यार्हणमकृताकुर्वत पूजामकुर्वन् । सुगाः सुष्ठु गायंतीति सुगाः गंधर्वादयः ॥ ३४ ॥ किं च तेषां यान्यद्भुतस्तोत्रादीनि तेषां नैकोत्सवा ये मंगलस्वनास्तान्स्वधाम्नोऽति समीपे श्रुत्वाऽजो ब्रह्माऽचिरादागत ईशस्य श्रीकृष्णस्य महि महिमानं दृष्ट्वा विस्मयं प्रापेति ॥ ३५ ॥ बहुतिथं बहुकालम् । आक्रीडगह्वरं क्रीडार्थं महाबिलम् ॥ ३६ ॥ अन्यच्चातिचित्रं वृत्तमित्याह । एतदिति । "कौमारं पंचमाब्दांतं पौगंडं दशमावधि ॥ कैशोरमापंचदशाद्यावनं तु ततः परम् ॥" हरेः कौमारजं पंचमाब्दकृतं कर्म तदैव

---

[1] भोगस्थित–इति कस्यचित् । [2] महज्ज्योतिः–श्रीधर. वंशी. वीर. विज. शुक. । [3] धाम्ना–श्रीधर. वंशी. वीर. विज. शुक. । [4] वाद्यधराश्च–श्रीधर. वंशी. वीर. विज. जीव. विश्व.; वारिधराश्च–इति कस्यचित् । [5] स्तवैश्च–श्रीधर. वंशी. वीर. विज. शुक. । [6] गीतिका–श्रीधर वंशी. वीर. विज. विश्व. । [7] मही–श्रीधर. वंशी सुदर्शन. वीर. विज. जीव. शुक. । [8] अयं श्लोकः श्लोकद्वयादन्तरं वर्तते–वीर. । [9] चास्याहेरात्ममोक्षणं–इति कस्यचित् । [10] धौत–श्रीधर. वंशी. वीर. विज.; धूत–सुदर्शन. जीव. विश्व. । [11] भूत्यभिव्युदस्तमायोऽन्तर्गतो–श्रीधर वंशी. विज.; भूतिर्व्युदस्तमायः परमोऽङ्ग किं पुनः–वीर । [12] अत्र द्वादशोऽध्यायः–वीर. । [13] द्विजाग्र्याद्य–इति कस्यचित् । [14] स्वभर्तु–इति कस्यचित् ।

दृष्ट्वा पौगंडके षष्ठेऽब्दे बाला अद्यैवैतद्वृत्तमित्यूचुः । किं तत्कर्म । मृत्योः सकाशादात्मनामहेश्च मोक्षणम् । तत्रात्मनां प्रसिद्धान्मृत्योरहेस्तु संसारलक्षणात् । अघासुरज्योतिषः श्रीकृष्णे प्रवेशमपि तदा दृष्टं कथितवंत इत्यर्थः ।। ३७ ।। नैतद्विचित्रमिति । किं तदित्यपेक्षायामाह । अघोऽपीति । आत्मसात्म्यं स्वसमानरूपताम् ।। ३८ ।। यस्यांगं मूर्तिस्तस्य प्रतिमा प्रतिकृतिस्तत्रापि केवलं मनोमयी साऽपि बलादंतराहिता सती भागवतीं गतिं ददौ प्रह्लादादिभ्यः स एव साक्षात्स्वयमंतर्गतः किं पुनः नित्या चासावात्मसुखानुभूतिश्च तयाऽभितो व्युदस्ता माया येन सः ।। ३९ ।। येन श्रवणेन निगृहीतं वशीकृतं चेतो यस्य सः ।। ४० ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वतेजसा दश दिशो ज्वलयत् ईशनिर्गमं प्रतीक्ष्य कंचित्कालं दृष्ट्वा । जीवस्य निराकारत्वेपि तत्कालप्राप्तभगवच्छक्त्यालिंगितत्त्वात्तथा । दृश्यत्वमिति तोषिण्याम् । परब्रह्मणो व्यापकमहाज्योतिःस्वरूपमिव जीवस्यापि ज्योतिःस्वरूपं मायिकलोचनागम्यमपि तदानीं भगवता स्वेच्छयैव स्वस्यासुरमुक्तिप्रदगुणस्य सर्वलोकप्रत्यक्षीकरणार्थं प्रदर्शनम् इत्यर्थः । भागवतीं गतिमित्युपरिष्टादुक्तेरघासुरः सारूप्यमुक्तिं प्राप्य न तु सायुज्यं भगवति प्रवेशस्तु शिशुपालादिवज्ज्ञेय इति ।। ३३ ।। ततो भगवद्देहे तत्प्रवेशानंतरम् । अर्हणं पूजाम् ।। ३४ ।। अन्यदप्याह–किं च इति तेषां सुरादीनाम् । स्वधाम्नः सत्यलोकस्य ।। ३५ ।। अन्यदद्भुतमाह—राजन्निति कथाश्रुतौ देदीप्यमानमित्यर्थः । आक्रीडगह्वरत्वमपि वत्सरांतरवज्ज्ञेयम् ।। ३६ ।। इतोप्यद्भुततरमाह—अन्यच्चेत्यादिना । वृत्तं जातम् । दशमावधि दशमवर्षपर्यन्तम् । आपंचदशात्पंचदशवर्षपर्यंतम् । ततः पंचदशवर्षात् । आत्मनां सगोपवत्सानाम् । इत्यर्थ इति । अहो अद्यास्माभिर्महदाश्चर्यं दैत्यदेहनिर्गतं तेजः कृष्णे प्रविष्टं दृष्टमिति भावः ।। ३७ ।। मनुजार्भस्य मायाछलमस्यास्तीति मनुजार्भमायी तस्य ब्रह्मादिमनुष्यांतानां स्रष्टुः परमस्यात्मसाम्यम् । यस्य कृष्णस्य स्पर्शनेन धौतं निवृत्तं पातकमसुरतापादकं प्राक् कृतं कर्म यस्य सः । असतां पापिनाम् ।। ३८ ।। प्रतिकृतिः प्रतिनिधिविग्रहः । तत्रापि प्रतिकृतित्वे । अन्तराहिता ध्याता । स एव यस्य प्रतिकृतिर्मोक्षं ददाति । आत्मसुखानुभूतिरात्मानंदानुभवः । व्युदस्तापाकृता । माया कारणाज्ञानम् । किं पुनर्वक्तव्यमिति शेषः । यस्य प्रतिकृतिर्जगन्नाथमदनगोपालगोविंदादिरूपा मनसैव ध्याता तत्रापि सकृदेव खट्वांगादिभ्यो भागवतीं गतिं ददौ । ननु खट्वांगादीनां तत्प्राप्तौ भक्तिरेव कारणमघासुरादीनां प्रातिकूल्याद्भक्त्यभाव एव तत्प्राप्तिप्रतिबन्धी भक्त्याहमेकया ग्राह्य इति भगवत्कृतनियमात् । सत्यम् । स च नियमोऽन्यस्मिन्नेव समये । कृष्णावतारसमये तु पूर्णायाः कृपाशक्तेरुदयोद्रेकात्तत्सम्बन्धमात्रेणैव तत्प्राप्तिः । तद्वक्ष्यते–"कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा । नित्यं हरौ विदधतो यांति तन्मयतां हि ते ।। न चैवं विस्मयः कार्यो भवता भगवत्यजे । योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ।।" इति कृष्णस्य पूर्णत्वे लक्षणमिदमसाधारणं यद्वैरिभ्योपि मोक्षं ददातीति विश्वनाथः ।। ३९ ।। यादवदेवेन श्रीकृष्णेन दत्तः परीक्षित् । स्वरातुः कृष्णस्य तदेव श्रीकृष्णचरितमेव । हे द्विजा इति । हरिलीलामृतपानमेव द्विजातिधर्म इति संबुद्ध्यभिप्रायः ।। ४० ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पीनाहिभोगोत्थितमिति तु पाठो मूलेषु दृश्यते भोगस्थितमिति तु टीकायामेव अद्भुतमनिर्वचनीयं महत्प्रकाशबाहुल्यात् दिवौकसामित्यनादरे षष्ठी । यद्वा, परमाश्चर्येण तेषु पश्यत्सु सत्सु इत्यर्थः । तादृशदुष्टस्यापि मुक्तेः अतीन्द्रियाया मुक्तिप्राप्तेर्दर्शनाच्च तथा तद्दर्शनं च ब्रह्मादीनामसन्देहाय स च विस्मयार्थं तच्च ज्योतिस्तत्कालप्राप्तभगवच्छक्तिमयमेव ज्ञेयं जीवस्य निराकारत्वात् ।। ३३ ।। ततः सपरिकरेशनिर्गमात् वाद्यधराः विद्याधरादयः वारिधरा इति वा पाठः । विप्राः श्रीनारदादयः गणाः श्रीगरुडादयः ।। ३४ ।। अद्भुतश्रोत्रादीन् श्रुत्वा स्वधाम्नः सकाशादन्ति कृष्णस्य समीपे अचिरात् शीघ्रमागतोऽज ईशस्य महि माहात्म्यं तन्मुक्तिप्रदानलक्षणं कुत्राप्यन्यत्र तादृशस्यादृष्टं दृष्ट्वेत्यादियोज्यम् ।। ३५ ।। श्रीभगवत्स्पर्शप्रभावेण स कृतार्थोऽभूदिति किं वक्तव्यं तस्य पाञ्चभौतिकमृतदेहोऽपि पूतनावत्सौरभ्यादिप्राप्त्या सर्वमनोरमतां प्रापेत्याह— राजन्निति । परमाश्चर्येण ।। ३६ ।। अस्य हरेः पौगण्डे तस्यारम्भमात्रत्वेनाल्पत्वात् कन् प्रत्ययः च शब्दात् देवादिकृतमहोत्सवश्च, अन्यत्तैः । यद्वा, प्रश्नबीजत्वाय प्रहेलिकावदाह–कौमारजं कर्म पौगण्डके च दृष्ट्वोचुरिति किं तत् ? अहेर्मृत्योर्हेतोः आत्मनामहेः सकाशान्मोक्षणं सर्वे मिथो दर्शयन्त इत्यादावैश्वर्यज्ञानास्पर्शात् अद्यानेनेत्यादिमात्रतद्वक्ष्यमाणात् ।। ३७ ।। महादुष्टस्यापि तादृश्या मुक्त्या केषाञ्चिदद्भुतबुद्धिं दृष्ट्वा श्रीभगवत्प्रभावमाह–नेति द्वाभ्याम् । परावराणां सर्वेषामंशिनामंशानां च परमस्य श्रेष्ठस्य यतस्तेषां वेधसः प्रादुर्भावकर्तुश्च इति परमस्वातन्त्र्यमुक्तं तत्र च मनुजार्भः श्रीनन्दकुमारश्चासौ मायी च दयावान् अमर्यादलीलत्वेन तादृशदयालुत्वेन च यः प्रसिद्धस्तस्य परमविलक्षणस्वभावस्येत्यर्थः । अतो विचित्रम् अद्भुतं न भवति सात्म्यं साम्यमिति पाठद्वयेऽपि समानस्वरूपत्वमेवार्थः । अतद्रूपस्य समानस्वरूपस्य तत्र प्रवेशासंभवात् असतां दुष्टानां परमदुर्लभमपि प्राप । ननु, श्रीगोकुलबालकादिषु महत्सु महापराधिनस्तस्यासुरस्य तदपि कथं संभवेत् ? तत्राह–यदिति, यस्य तत्पर्यन्तदुर्गतजीवेषु तमःकृतदुर्गतिमात्रसमवधानमात्रजातया सदसद्विचारशून्यत्वेन स्वतन्त्रया कृपयाऽवतीर्णस्य सर्वविलक्षणस्य स्पर्शविशेषप्रभावेणैव सोयमघमयोपि धूतपातकः खण्डिताघमयभाव इत्यर्थः । आत्मा नासुरः किन्तूपाधिरेव स च नाशित एव निर्दोषो निजांशस्त्वनुगृहीत इति नात्र दोषश्च प्रत्युत तस्यासुरभावापगमनं परमकृपा

सूचकत्वादुपादेयमेवेति भावः ॥ ३८ ॥ नित्यात्मेति तैर्व्याख्यातम् । यद्वा, नित्यम् आत्मनां सर्वजीवानां सुखानुभूतिर्यस्मात् यतोऽभितो विशेषेणोदस्तमायः तथा च वक्ष्यति श्रीब्रह्मा 'अत्रैव मायाधमनावतारे' इति, स चासौ स च यतः परमः सर्वतः श्रेष्ठः निजाशेषभगवत्ताप्रकटनात् यत् यस्य अङ्गेति सन्न्यायहर्षसम्बोधने ॥ ३९ ॥ अत्राकस्मात् सूत उवाचेति तत्प्रसङ्गे परमानन्दस्य वैशिष्ट्यात् सोपि तत्र तौ तुष्टावेत्यर्थः । येन चरितेन निगृहीतं तद्वियोगमयप्रेमाविर्भावेन पीडितं चेतो यस्य सः तथापि प्रश्ने हेतुः पुण्यं शुभावहमिति तत्पीडायास्तदेकौषधत्वादिति भावः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अद्भुतमनिर्वचनीयम्; महत् प्रकाशबाहुल्यात् दिवौकसामित्यनादरे षष्ठी, यद्वा, परमाश्चर्य्येण तेषु पश्यत्सु सत्स्वित्यर्थः, तादृश-दुष्टस्यापि मुक्तेस्तथात्मतत्त्वानुभव-लक्षणाया अतीन्द्रियायास्तत्प्रकारासम्भवाच्च । तेन प्रकारेण मुक्तिस्तस्यामसन्देहाय । स च श्रीब्रह्मादीनां विस्मयार्थम् । कृष्णप्रवेशदर्शनन्तु प्रतीतिमात्रमेव, वस्तुतस्तु ब्रह्मण्येव लयोऽतस्तत्त्वविचारेणाभाव एव पर्य्यवसन्ती मुक्तिरियं परमपुरुषार्थतायां न प्रविशति, विशेषतश्च भक्तिरस-विरोधितया भक्तानां वर्ज्ज्यैव, अतो दैत्यानां सोचितैवेत्येष वैष्णवसिद्धान्तः श्रीभागवतामृतोत्तरखण्डे विवृतोऽस्त्येव ॥ ३३ ॥ ततो महादुष्टस्य वधात्तत्राप्यपुनरावृत्ति-मोक्षाद्वाद्यधराः, विद्याधरा इति वा पाठः विप्राः श्रीनारदादयः, आद्य चकारद्वय-स्थाने सुशब्दद्वयपाठः क्वचित्, अतिहृष्टत्वेन तत्तच्छोभनत्वात्, सुशोभनं रान्ति ददतीति सुरा इति पुष्पाणामपि शोभनत्वमायातमेव । सुगा इति गीतानां शोभनत्वं सिद्धम् । स्तवानां स्वत एव शोभनत्वमन्यथा स्तुतित्वासिद्धिः । गणाः श्रीभगवत्पार्षदाः सर्व्वे वा भगवदीया गोपबालका वा, अतो जयशब्दानामपि शोभनत्वमूह्यम् ॥ ३४ ॥ अत एवाग्रे सर्वेषां विशेषणतयाद्भुतेति तु-शब्दश्च । आदि-शब्देनाप्सरो-नुपुरशब्द-करतालिकादयश्च, मंगलस्वनाश्च नमो नमस्त इत्यादयः । महि माहात्म्यं तन्मुक्ति प्रदानविचित्रवृन्दावन-विहार-वेशादि-सौन्दर्य्यम् । अन्यत्तैर्व्याख्यातम् । यद्वा, ते च ते अद्भुतस्तोत्रादि-रूपाश्चाद्भुतस्तोत्रादिना वा; नैकोत्सवा नैकः अनेक उत्सवो येभ्यस्तद्रूपा वा मंगलस्वनास्तान्, कर्म्मणि षष्ठी । महीशं पृथिव्यामवतीर्णं निजाशेषभगवता-विस्तारणेन पृथ्वीपालनपरं दृष्ट्वेत्यर्थः ॥ ३५ ॥ श्रीभगवत्स्पर्शप्रभावेण तस्यात्मा कृतार्थोऽभूदिति किं वक्तव्यम्, पाञ्चभौतिक-मृतदेहोऽपि परमकृतार्थतां प्रापेत्याह—राजन्निति, परमाश्चर्य्येण हर्षभरेण वा सम्बोधनम् । शुष्कं सदिति वाद्यादिना क्रीडायोग्यत्वमुक्तम्, चिरस्थायित्वञ्चाभिप्रेतम् । आ सम्यक् क्रीड्यतेऽस्मिन्नित्याक्रीडञ्च तद्गह्वरं गुप्तस्थानञ्च ॥ ३६ ॥ कौमारे जायत इति तथा तत्, अस्य हरेः पौगण्डे तस्यारम्भमात्रत्वेनाल्पत्वात् कप्रत्ययः । हरेरिति मृत्युहरणात् । चशब्दाद्—देवादिकृतमहोत्सवञ्च दृष्ट्वा विस्मिताः सन्तः ॥ ३७ ॥ महादुष्टस्यापि तादृश्या मुक्त्या केषाञ्चिदद्भुतबुद्धि दृष्ट्वा श्रीभगवत्प्रभावमाह—नेति द्वाभ्याम् । परावराणां कारण-कार्याणामुत्तमनीचानां वा पूर्वापराणां वा सर्वेषां परमस्य वेधसः श्रेष्ठविधातुर्ब्रह्मणोऽपि जनकत्वात् सृष्ट्यादिकारणत्वाच्च । यद्वा, परावराणां परमस्य श्रेष्ठस्य, यतस्तेषां वेधसः स्रष्टुरिति परमेश्वरत्वेन परम-स्वातन्त्र्यमुक्तम् । तत्र च मनुजार्भः श्रीनन्दकुमारश्चासावत एव मायी च दयावान् । यद्वा, मा लक्ष्मीः शोभा सम्पद्वा, तामेतुं प्राप्तुं शीलमस्येति, तथा तस्य निजाशेषभगवत्ता सम्पत्ति प्रकटनपरस्येत्यर्थः । यद्वा, मनुजार्भेषु गोपबालकेषु मायिनो दयावत इति बालगोपालरूपेण भगवत्त्वप्रकटनमेवाभिप्रेतम् अतो विचित्रमद्भुतं न भवति । आत्मा व्यापकं ब्रह्म, तस्य सात्म्यं स्वरूपतां निर्वाणमित्यर्थः । साम्यमिति पाठे अविद्यानिवृत्त्या स्व० स्वरूपेणावस्थानमित्यर्थः, तथा चोक्तं मुक्तिलक्षणं द्वितीये (भा० २।१०।६)—'मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः' इति । असतां दुष्टानां परमदुर्ल्लभमपि प्राप । ननु श्रीगोकुलबालकादिमहत्सु महापराधिनस्तस्य तदपि कथं सम्भवेत् ? तत्राह—यदिति । महदपराधलक्षणमपि पातकं श्रीभगवत्स्पर्शविशेषप्रभावेणैव क्षीणमित्यर्थः ॥ ३८ ॥ मनोमयीति मनसः सहजास्थैर्य्येण सदा सर्वसौन्दर्य्याद्यपरिस्फूर्त्त्या शैल्यादि-प्रतिमाभ्यो मनोमय्याः प्रतिमाया न्यूनताभिप्रेता । नित्यमात्मनां सर्वजीवानां सुखानुभूतिर्यस्मात्, यतोऽभितो विशेषेणोदस्तमायस्तथा च वक्ष्यति श्रीब्रह्मा (भा० १०।१४।१६) 'अत्रैव मायाधमनावतारे' इति स चासौ स च, यतः परमः सर्वतः श्रेष्ठः, निजाशेषभगवत्ताप्रकटनात् । अंगेति सन्न्यायहर्ष-सम्बोधने ॥ ३९ ॥ इत्थं स्वयमेव श्रीबादरायणिना कथयितुमारभ्यमाणाया अपि कथाया मध्ये परमौत्सुक्येन महाराजोऽपृच्छदित्याह—इत्थमिति । यादव-देवेन श्रीभगवता दत्तो ब्रह्मास्त्रतो रक्षित्वा पाण्डवेभ्योऽर्पितः । यादव-देवेति पाण्डवैः सह सम्बन्धञ्च सूचयति । इत्यादयो भूयः प्रश्ने हेतवः । विचित्रं परमाद्भुतं वैयासकि श्रीव्यास-नन्दनमिति सर्व-वेदार्थतत्त्वाभिज्ञतोक्ता । यदिति तैर्व्याख्यातम् । तत्र येन श्रवणेनेति श्रुत्वेत्यस्य परामर्शादिति, यद्वा, येन चरितेन नितरां गृहीतं प्रेमविशेषाविर्भावेन परमोत्कण्ठया पीडितं चेतो यस्य सः । तथापि प्रश्ने हेतुः—पुण्यं शुभावहमिति तत्पीडायास्तदेकौषधत्वादिति भावः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अत्र देवसाक्षिको ऽघस्य तस्मिन् प्रवेश उक्तः अनेन न तत्सेविनाम् अघप्राप्तिशङ्केति व्यज्यते तथापि न निश्शङ्कैः भगवद्भक्तैर्भाव्यम् ॥ ३३ ॥ स्वहितमिति शेषः । स्वहितकृत इत्यर्थः । अकृत अकुर्वत इत्यन्वयः ॥ ३४ ॥ स्वधाम्नः अन्ति निकटे

ईशस्य महि माहात्म्यम् अजो ब्रह्मा ॥ ३५ ॥ शुष्कं सम्वत्सरानन्तरम् आक्रीडगह्वरं बभूव अक्षिनिमीलनान्तर्धानाख्यक्रीडागह्वरं दर्शयंश्चर्माजगरम् इति सम्वत्सरानन्तरं स्ववचनात् ॥ ३६ ॥ मृत्योः प्राणा वियोगात् संसाराच्च आत्मनां अहेरघस्य मोक्षणम् अस्य हरेः कर्म कौमारजम् एतद्दृष्ट्वा ते च गोपाः विस्मिताः सन्तो ऽस्य पौगण्डके सम्वत्सरानन्तरम् ऊचुः इत्यन्वयः ॥ ३७ ॥ परावराणां बद्धमुक्तजीवानां परमस्य वेधसः असहायस्य स्रष्टुः "बन्धको भवपाशेन भवपाशाच्च मोचकः" इत्यादिवाक्यात् मनुजार्भमायिनः मनुष्यबालकत्वेच्छावतः यत्स्पर्शनेन धूतपातकः आत्मसात्म्यं सायुज्यम् आत्मना परमात्मना समानात्मतत्त्वम् एतद्विगतचित्रं न किन्त्वाश्चर्यमेवेति ॥ ३८ ॥ तदेवाह—अङ्ग ! प्रतिमाऽर्चामूर्त्तिः "मनामयी तां ध्यायेत्" इत्यादि प्रामाण्यात् भागवतीं गतिं ददातीत्यर्थः। स एव यस्य मूर्तिः स कृष्ण एव साक्षाद्यद्यन्तः प्रविशेर्त्तार्हि किं पुनर्वक्तव्यम् इति तात्पर्यम् सरोमाञ्चमुक्तम् ॥ ३९ ॥ यादवदेवदत्तः श्रीकृष्णेन दत्तजीवितः विष्गुरातः इति सम्बन्धः येनैव गृहीतं निष्ठं कृतं "यमेवैष वृणुते" इत्यादेः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततोसुरो मुक्तः श्रीकृष्णमेव विवेशेत्याह—पीनेति। पीनात्सर्पदेहादुत्थितमद्भुतं महद्धर्मभूतज्ञानेन बृहज्ज्योतिः स्वयं प्रकाशं जीवस्वरूपं स्वधाम्ना दश दिशा ज्वलयित्वा तावत् खे अन्तरिक्षे अवस्थितं सद्दाशस्य श्रीकृष्णस्य भगवतो निर्गमं प्रतीक्ष्य तदा आश्चर्यं देवानां पश्यतां सतां ततस्तस्मिन्निर्गते कृष्णे प्रविवेश ॥ ३३ ॥ ततोऽतीव हृष्टाः देवाः स्वकृतः स्वकार्यकर्तुः श्रीकृष्णस्यार्हणं पूजां पुष्पैरकृताकुर्वन् व्यत्ययेनैकवचनं सुष्ठु गायन्तीति सुगाः गन्धर्वादयः गीतैः पूजयामासुः विप्रास्तु स्तवैः स्तोत्रैर्गणाः भृत्यगणा जयशब्दैः ॥ ३४ ॥ किञ्च अजो ब्रह्मा स्वधाम्नः स्वस्थानस्यान्ति समीपे तेषां गन्धर्वादीनामद्भुतानि स्तोत्राणि सुवाद्यानि वाद्यादीन् गीतिकाः गीतानि च जयशब्दा आदिर्येषां ताननेकानुत्सवान् मङ्गलाशासनध्वनींश्च श्रुत्वा अचिरादागतः ईशस्य कृष्णस्य महिम महिमानं दृष्ट्वा विस्मयं जगाम ॥ ३५ ॥ हे राजन् ! आजगरं चर्म शुष्कं सत् बहुकालं वृन्दावने स्थितानां व्रजौकसां क्रीडास्थानां बभूव क्रीडार्थं महाबिलमासीदित्यर्थः ॥ ३६ ॥ अन्यदप्यतिचित्रं वृत्तमित्याह—एतदिति।

कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि। कैशोरमापञ्चदशाद्यौवनं तु ततः परम् ॥

इति तदभिज्ञवचनं हरेरेतत्कौमारजं पञ्चमाब्दकृतं कर्म तदेव दृष्ट्वा बालाः पौगण्डके षष्ठेऽब्दे व्रजे ऊचुरद्यैव तद्वृतमित्यूचुरित्यर्थः। अयमहो भगवन्महिमातिशयः यदन्यकालिककर्मणस्तादात्विकानुसन्धानं गोपानामिति भावः ॥३७॥ अन्यदप्यतिचित्रं वृतमित्याह—नेति। एतदेव न चित्रम् अपितु परे देवऋष्यादयाऽपरे अपकृष्टाः येषां ब्रह्मरुद्रादीनां तेषामपि परमस्य वेधसः सर्वस्रष्टुरपि लीलया कपटमनुजबालकस्य स्पर्शनमात्रेण विधूतं पातकं यस्य तथाभूतः अघासुरोप्यसतां दुष्प्रापमात्मसाम्यं भगवत्साम्यं प्राप लेभे इति यत् तदेवातिचित्रमित्यर्थः ॥ ३८ ॥ एतदेव किं पुनर्न्यायेन दृढयति—सकृदिति। यस्य भगवतः अङ्गप्रतिमा अङ्गप्रतिकृतिरर्चा मूर्तिर्मनामयी मनःप्रचुरा तत् प्राचुर्यं चात्र तन्निधापितभगवच्छक्तिकत्वम् अन्तराहिताध्यानेनान्तर्हृदये निधापिता सती भागवतीं गतिं मुक्तिं ददौ अङ्ग हे राजन् ! नित्यनिरतिशयानन्दज्ञानरूपः प्राकृतगुणरहितो निस्समाभ्यधिकः स एव भगवान् साक्षादन्तराहितो भागवतीं गतिं मुक्तिं ददातीति किं पुनर्वक्तव्यमित्यर्थः ॥ ३९ ॥ कौमारकं कर्म पौगण्डके प्रोचुरित्युक्तं तत्र कारणबुभुत्सया ऽपृच्छद्राजेत्याह सूतः—इत्थमिति। हे द्विजाः ! यादवदेवः श्रीकृष्णस्तेन दत्तः परीक्षिदित्थं विचित्रं स्वभर्तुश्चरित्रं श्रुत्वा पुनः पुण्यावहं तदेव पौगण्डके कौमारजं प्राचुरित्येतदेव वैयासकिं शुकं पप्रच्छ, प्रश्नहेतुं वदन् राजानं विशिनष्टि, येन भगवता नितरां गृहीतं चेतो यस्य तथाभूतः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ज्योतीरूपं तथा दर्शनञ्च स्वमहिमव्यक्त्यर्थम् ॥ ३३–३५ ॥ पूतनावद्देहस्यापि सौगन्ध्यादिमयपुण्यरूपत्वप्राप्तिमाह राजन्निति। आक्रीडगह्वरत्वं वत्सरान्तरे ज्ञेयम् ॥ ३६–३७ ॥ अद्यानेन इत्यादि वक्ष्यमाणात् अत एव तावत्कालं मायावृतत्वात् ॥ परावराणामंशिनामंशानाञ्च सर्वेषां परमस्य स्वयं भगवतः वेधसस्तत्तदाविर्भावकर्त्तुर्मनुजार्भस्य मनुष्यलीलस्य श्रीनन्दस्यार्भस्तल्लीलश्च स मायी परमदयालुश्च सः तस्येति परमशक्तित्वं सर्वकारणत्वं स्वतन्त्रलीलत्वं तादृशपतितोद्धारित्वञ्च दर्शितम् आत्मसात्म्यं आत्मसाम्यमित्यनेन प्रवेशवचनेन च तत्सायुज्यमुक्तम् ॥ ३८–४० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथाघासुरस्य भगवति लयेन विस्मयमानं राजानं प्रति श्रीशुकदेवोक्तिः—सकृद्यदङ्गेत्यादि। यस्याङ्गप्रतिमा अवयवप्रतिकृतिरन्तर्मनस्याहितापिता सती मनोमयी भूत्वा भागवतीं गतिं ददौ ददाति, हे अङ्ग ! स पुनः परमः श्रीकृष्णोऽन्तर्गतः सन् भागवतीं गतिं यद्दास्यति तत् किं पुनः ? यद्वा मनोमयी अङ्गप्रतिमा सकृदेकवारमपि अन्तराहिता सतीति (भा० ११।२७।१२) "मनोमयी मणिमयी" इत्यादौ प्रतिमाया अष्टविधत्वं वक्ष्यति। मनोमयी प्रतिमेति सिद्धेरङ्गशब्दोपादानं मनोमय्या मूर्त्तेरेकमप्यङ्गमित्यर्थः। इति स्वयमयं यदन्तर्गतस्तस्याघासुरस्य तथात्वे किं वैचित्र्यमिति शेषः ॥ ३९–४४ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे द्वादशोऽध्यायः ॥ १२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

सकृद् यदङ्गप्रतिमेत्यादि। अङ्गस्य प्रतिमा शैलीप्रभृतिः, सापि सकृत् एकवारमप्यन्तर्मनस्याहिता अर्पिता सती भागवतीं गतिं ददौ दधाति, मनोमयी वा यदङ्गप्रतिमा; (भा० ११।२७।१२) "मनोमयी" इत्यादीनां वक्ष्यमाणत्वात्। अङ्गस्य प्रतिमेति यस्य कस्यचिदेवाङ्गस्य, अस्तु दूरे सर्वाङ्गप्रतिमा। तत्र मनोमयी बोद्धव्या; मनसि कदाचिदेव किञ्चिदङ्गं स्फुरति, सर्वाङ्गस्फूर्तिस्तु परमभाग्यभाजामेव भवति, अथवा, (भा० २।२।१३) "पादादि यावद्धसितं गदाभृतः" इति ध्यानक्रमस्योक्तत्वात्, अङ्ग ति सम्बोधनं वा ॥ ३९–४४ ॥

इति द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ज्योतिरहिदेहे स्थितं शुद्धसत्त्वमयमिति श्रीस्वामिचरणाः तादृशदुष्टस्यापि तस्य मुक्तेः सर्वलोकप्रत्यायनार्थं जीवस्य निराकारत्वेऽपि तत्कालप्राप्तभगवच्छक्त्यालिङ्गितत्वात्तथा दृश्यत्वमिति वैष्णवतोषिण्यादयः परब्रह्मणो व्यापकमहाज्योतिः स्वरूपमिव जीवस्यापि ज्योतिस्वरूपं मायिकलोचनागम्यमपि तदानीं भगवता स्वेच्छयैव स्वस्वरूपमिव स्वस्यासुरमुक्तिप्रदायकत्वलक्षणगुणस्य सर्वलोकप्रत्यक्षीकरणार्थं दर्शितमित्येके प्रत्यात्मसाम्यमिति भागवतीं गतिमित्युपरिष्टादुक्तेरघासुरः सारूप्यमुक्तिं प्राप। ननु सायुज्यमित्यतस्तत्क्षणप्राप्ततदीयचिन्मयदेहज्योतिरेव तत् देहस्तु ज्योतिर्भूयस्त्वात् द्रष्टुं शक्यो नाभूत् भगवति प्रवेशस्तु सायुज्यप्रथावतोः शिशुपालदन्तवक्रयोरिव ज्ञेय इत्यपरे मिषतां मिषत्सु सत्स्वपि अनादरे वा षष्ठी ॥ ३३ ॥ स्वकृतः स्वस्रष्टुः श्रीकृष्णस्य अर्हणं पूजाम् अकृत अकुर्वत सुष्ठु गायन्तीति सुगाः गन्धर्वादयः वाद्यधरा विद्याधरादयः विप्रा वसिष्ठादयः गणाः गरुडादयः ॥ ३४ ॥ अद्भुतस्तोत्राणि च सुवाद्यानि च गीतिकाः सुकुमारा गीतयश्च जयशब्दादयश्च नैकोत्सवा अनेकोत्सवा मङ्गलस्वनाश्च तान् स्वधाम्नः सत्यलोकस्य अन्ति निकट एव श्रुत्वेति महर्जनस्तपोलोकस्था अपि परम्परयैव श्रुत्वा गीतादिकं चक्रुरिति ज्ञेयं श्रुत्वा अजो ब्रह्मैव अचिरात् सद्य एव अघासुरस्य ज्योतिर्वैकुण्ठं प्रति गच्छदेव ईशस्य महि महिमानं दृष्ट्वा आगतोऽन्यैरलक्ष्यमाणो वृन्दावनमेव तत्र च ईशस्य महिमानं दृष्ट्वा विस्मयं प्राप ॥ ३५ ॥ बहुतिथं बहुकालं आ सम्यक् क्रीडार्थकगह्वरं बभूव ॥ ३६ ॥ अन्यदप्याश्चर्यमेकं शृण्वित्याह—एतत् हरेः कौमारजं पञ्चमाब्दकृतं कर्म दृष्ट्वा अस्य हरेः पौगण्डके वयसि षष्ठेऽब्दे बाला अद्यैतद्वृत्तमित्यूचुः किं तत्, आत्मनाम् अहेः सकाशान्मोक्षणं कुतः मृत्योः अहिमरणाद्धेतोरित्यर्थः ॥ ३७ ॥ मनुजार्भ एव माया तदीयस्वरूपं तद्वत् श्रुतिप्रसिद्धान्मायाशब्दस्य स्वरूपवाचकत्वात् परावराणां सर्वेषामंशानामंशिनामपि परमस्य वेधसः स्वेच्छाभिमतमेव कर्तुः एतत् विचित्रं न, किं तदित्यत आह—अघापीति। धूतपातक इति पातकमित्युपलक्षणं शरीरदौर्गन्ध्यादेरप्यपगम इति किं वक्तव्यं पूतनादृष्ट्या शरीरसौगन्ध्यमेव व्याख्येयं सप्रियसखस्य कृष्णस्य क्रीडास्पदीभावित्वात् आत्मसाम्यं स्वसमानरूपत्वम् असतामसुराणां सायुज्यं दुर्लभं सारूप्यं तु भक्तसम्प्रदानीयत्वात्सुदुर्लभम् ॥ ३८ ॥ तत्प्राप्तौ कारणमाह—यस्य अङ्गं मूर्तिस्तस्य च प्रतिमा प्रतिकृतिर्जगन्नाथमदनगोपालगोविन्दादिरूपा सापि मनोमयी मनसैव ध्याता तत्रापि सकृदेव अन्तराहिता सती भागवतीं गतिं ददौ खट्वाङ्गादिभ्यः स एव साक्षात् नित्यात्मा नित्यशरीरश्चासौ सुखानुभूतिरूपश्च अभिव्युदस्तमायश्चेति सः परमः स्वयमवतारी स्वयमेवान्तर्गतः किं पुनः दद्यादेवेत्यर्थः। ननु, खट्वाङ्गादीनां तत्प्राप्तौ भक्तिरेव कारणम् अघादीनां तु प्रातिकूल्यात् भक्त्यभाव एव तत्प्राप्तिप्रतिबन्धी "भक्त्याहमेकया ग्राह्यः" इति भगवत्कृतनियमात् सत्यं स च नियमोऽन्यस्मिन्नेव समये कृष्णस्यावतारसमये तु पूर्णाया एव कृपाशक्तेरुदयोद्रेकात् तत्सम्बन्धमात्रेणैव तत्प्राप्तिर्यद्वक्ष्यते –

> "कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा। नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥
> न चैवं विस्मयः कार्य्यो भवता भगवत्यजे। योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते" ॥

इति कृष्णस्य पूर्णत्वे लक्षणमिदमसाधारणं यद्वैरिभ्योऽपि मोक्षं ददातीति तेषामपि मध्ये "व्रजौकसां बहुतिथं बभूवाक्रीडगह्वरम्" इत्युक्तेरघासुरदेहस्य स्वक्रीडासुखप्रदीभावित्वात् तात्कालिकतत्प्रातिकूल्यस्यानुकूल्यमयभक्तित्वमननात् तस्मै सारूप्यमोक्षं वैकुण्ठे एव ददौ न तु स्वधाम्नि वृन्दावने तद्भक्तेस्तादृशवैशिष्ट्याभावात् इति ज्ञेयम् ॥ ३९ ॥ हे द्विजाः! यादवदेवेन उत्तरायै युधिष्ठिराय वा दत्तः परीक्षित् स्वस्य राता गृहीता यः श्रीकृष्णस्तस्य येन श्रवणेन नितरां गृहीतं वशीकृतं चेतो यस्य सः ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदेवाह पीनाहिभोगोत्थितमिति। पीनादहिभोगादजगरदेहादुत्थितम् अद्भुतमाश्चर्यरूपं महद्बृहज्ज्ञानगुणं ज्योतिः ज्ञानरूपं जीवतत्त्वं स्वधाम्ना दश दिशो ज्वलयत् ईशस्य श्रीकृष्णस्य निर्गमं प्रतीक्ष्य खे अवस्थितं तत्तस्मिन् निर्गते ईशे दिवौकसां कर्मफलाशक्तानां देवानां मिषतामनादरे षष्ठी कर्मफलभोगस्थानं तदाशक्तांश्चानादृत्य विवेश ॥ ३३ ॥ ततस्तदनन्तरं सुराः देवाः स्वकृतः यत्र तत्रापि तं स्वकर्मवशगं जीवं केनापि भक्तिलेशेन स्वं स्वकीयं करोतीति स्वकृतस्य भक्तपक्षपातिनो भगवतः पुष्पैः

अर्हणमकृत पूजामकुर्वन् सुष्ठु गायन्तीति सुगाः गणाः उक्ता अनुक्ताश्च सर्वे जयनिस्वनैः ॥ ३४ ॥ किं बहुना अजो ब्रह्मापि स्वधाम्नोऽन्ति समीपे तेषां यान्यद्भुतानि स्तोत्रादीनि नैकोत्सवा अनेकोत्सवा ये मङ्गलस्वनास्तान् श्रुत्वा अचिरादागतः ईशस्य श्रीकृष्णस्य महि महिमानं दृष्ट्वा विस्मयं जगाम ॥ ३५ ॥ बहुतिथं बहुकालम् आक्रीडगह्वरं क्रीडार्थं गभीरं स्थानम् ॥ ३६ ॥ हरेः कौमार्यजम् पञ्चमाब्दकृतम् आत्मनां बालादीनां अहेश्च मृत्योर्मोक्षणं तत्र बालादीनां प्रसिद्धात् अहेश्च हरेः संसाररूपान्मृत्योर्मोक्षणम् एतत्कर्म तदानीमेव दृष्ट्वा पौगण्डके षष्ठेऽब्दे बाला अद्यैतद्वृत्तमित्यूचुः—

कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । कैशोरमापञ्चदशाद्यौवनं च ततः परम् ॥ इति ॥ ३७ ॥

मनुजार्भे मनुष्यतया वर्तमानस्य वसुदेवस्य वा पुत्रभावे मायासङ्कल्पोऽस्यास्तीति स तथा तस्य अघोपि यदात्मसाम्यं स्वसमानरूपतां प्राप तन्न विचित्रम् ॥ ३८ ॥ अङ्ग हे राजन् ! यत् यस्य मनोमयीप्रतिमा अन्तर्हृत्पद्मे सकृदपि ध्यानेनाहिता भागवतीं गतिं मुक्तिं ददौ तदा स स्वयं व्युदस्तमायः निरस्तकपटः परमः अन्तर्गतः आत्मसाम्यं ददौ इति किं पुनर्वक्तव्यम् ॥ ३९ ॥ यत् येन श्रवणेन ॥ ४० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अघस्य मुक्तिरभूदित्याह—पीनादहेर्भोगाद्देहादुत्थितं महत्ज्योतिः ईशस्य नन्दसूनोर्निर्गमं प्रतीक्ष्य खेऽवस्थितं निर्गते तस्मिन्नीशे विवेश तत् सारूप्यमुपलभ्य तत्सन्निधावतिष्ठत् "प्रापात्मसाम्य"मित्यादिवक्ष्यमाणात् तस्य तदुपलम्भे हेतुस्तु तदुदरं प्रविश्य कृष्णेन निहतत्वं बोध्यम् । ज्योतिषश्चिद्घनविग्रहस्य तस्य दर्शनन्तु हतारिगतिदायकत्वलक्षणस्य निर्गुणस्य लोके विख्यातये तच्छ्रीविग्रहस्येव तदिच्छयैव जातमन्यथा तस्यापि दर्शनं न स्यात् मिषतां पश्यतां षष्ठीयमनादरे ॥ ३३ ॥ ततः सुरा देवा अतिहृष्टा सन्तः स्वकृतः स्वस्रष्टुर्नन्दसूनोरर्हणमकृत अकुर्वत । सुगा गन्धर्वादयः वाद्यधरा विद्याधरादयः विप्राः सप्तर्षयः गणा गरुडादयः ॥३४॥ अद्भुतस्तोत्राणि च सुवाद्यानि च गीतिकाः सुकोमलगीतयश्च जयादयश्चानेकोत्सवा मङ्गलस्वनाश्च तान् स्वधाम्नः सत्यलोकस्यान्ति सन्निधौ श्रुत्वेति महरादयश्च लोकास्तत् स्तोत्रादिशब्दैः पूरिता इति सूच्यते अतो विरञ्चिरघस्यापि स्वसारूप्यदानलक्षणमीशस्य महि महिमानं दृष्ट्वा विज्ञाय वृन्दाटवीमचिराच्छीघ्रमागतः विस्मयं जगाम ॥ ३५ ॥ बहुतिथं चिरकालं आ सम्यक् क्रीडागह्वरं बभूवेति भगवदङ्गस्पर्शेन तस्य रजतगिरिभूतत्वादिति भावः ॥ ३६ ॥ अन्यच्चाश्चर्यं शृण्वित्याह एतद्धरेः कौमारजं पञ्चमाब्दकृतं कर्मास्य पौगण्डे षष्ठेऽब्देव तदभूदिति बाला व्रजे ऊचुः एतत् किं ? आत्मनामहेः सकाशान्मोक्षणं कुतः मृत्योः अहेर्मरणाद्धेतोः —

कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । आषोडशाच्च कैशोरं यौवनं स्यात्ततः परमिति ॥ ३७ ॥

मनुजार्भो नराकृतिबालकश्चासौ मायी च कृपावान् तस्य कृष्णस्यैतद्विचित्रं न परावराणां परमस्य स्वयं प्रभोः वेधसः स्वेच्छाभिमतकर्त्तुः किमेतत्तत्राह अघोऽपीति । यत्संस्पर्शेन धूतं पातकं लिङ्गपर्यन्तं यस्य सः आत्मसात्म्यं समानरूपतां असतामसुराणां सुदुर्लभं तेषां तु लिङ्गभङ्गलक्षणो मोक्षो भवेदित्यर्थः ॥ ३८ ॥ सारूप्यप्राप्तौ हेतुमाह—यस्य कृष्णस्याङ्गं श्रीमूर्तिस्तस्य प्रतिमा प्रतिकृतिः श्रीरङ्गजगन्नाथादिरूपा सापि मनोमयी मनसा भाविता तत्रापि सकृदेकवारमेवान्तराहिता सती भागवतीं गतिं ददौ निरपराधेभ्यः खट्वाङ्गादिभ्यः स एव नित्यात्मा नित्यमूर्तिश्चासौ सुखानुभूतिश्चाभिव्युदस्तमायश्चेति परमः स्वयं प्रभुः स्वयमेव तदन्तः प्रविष्टः किं पुनः दद्यादेवेत्यर्थः । धात्रीवेशमात्रेण पूतनाया धात्रीपदमिवोदरप्रवेशमात्रेणाघस्यापि सारूप्यं स्वयं प्रभुत्वे लिङ्गं बोध्यम् ॥ ३९ ॥ हे द्विजाः ! यादवदेवेन कृष्णेनोत्तरायै दत्तः परीक्षित् स्वरातुरात्मपदस्य तस्य विचित्रं चरितं श्रुत्वा तदेव भूयोऽपि पप्रच्छुः यच्छ्रवणेन निगृहीतं वशीकृतं चेतो यस्य सः ॥ ४० ॥

श्रीसुबोधिनी

भगवति बहिर्निर्गतेघस्य सायुज्यमाह, **पीनो** यायमहिः सर्पस्तस्य **भोगाच्** छरीरादु**त्थितमद्भुतं मह**स्तेजोरूपं **ज्योतिः** प्रकाशमानं **स्वधाम्ना** स्वतेजसा **दश दिश उज्वलयद्** बहिः स्थितं सद् **भगवन्** निर्गमनं **प्रतीक्ष्य** निर्गते **तस्मिन्** विवेश पश्यतां **दिवोकसां** सतां, तेजोरूपं लिङ्गशरीरं प्रविष्टमिति मायावादिनः ॥ ३३ ॥ ततो देवानां सुखं जातमित्याह **ततोतिहृष्टा** इति, स्वार्थं देवार्थमेव करोतीति **स्वकृत्** तस्य भगवतो**र्हणं** पूजाम**कृत** कृतवन्तः **पुष्पैः**, **अप्सरश्च नर्तनैः**, पूजामकृतेति सर्वत्रसम्बन्धः, सुष्ठु गायन्तीति **सुगास्ते गीतैर्वाद्यं घनो** येषां ते **वाद्यघना विप्रास्तु** स्तवैर्वैष्णवगणा **जयनिःस्वनैरर्हणमकृत** ॥ ३४ ॥ तदा ब्रह्मणोप्याश्चर्यं जातमित्याह **तदद्भुतेति** तेषाम**द्भुतस्तोत्रा**दिकं **श्रुत्वा स्वधाम्नोन्ति** स्वगृहसमीपेजो ब्रह्मा तत **आगतोचिराच्छी**घ्रमेव **दृष्टवा** भगवन्तं **महेशस्य** भगवतः सामर्थ्यं च **दृष्ट्वा विस्मयं जगाम स्तोत्रं सुवाद्यं गीतं जय**शब्दाश्च तैर्योय**मनेकोत्सव**स्तत्सहितान् **मङ्गलस्वनान्**, ते शब्दा ब्रह्मलोकपर्यन्तं गताः, **तच् छ्रुत्वा** ब्रह्मा समा**गतो विस्मय**माप ॥ ३५॥ मुक्तस्य देहो भगवद्भक्तानां क्रीडार्थं जात इत्याह **राजन्निति**, **वृन्दावने शुष्कं** गन्धरहितं **व्रजोकसां** बहुकालमा**क्रीडार्थं गहवरं** गुप्तस्थानं **बभूव** ॥ ३६ ॥ आश्चर्यान्तरमाहैतदिति, **भगवतः कौमारा**वस्थायां जातमेतत् **कर्मा**त्मनोहेः सकाशान् **मोक्षण**रूपं **मृत्योरेव**

मोक्षणरूपं हरेः पौगण्डावस्थायां जातस्य शरीरं शुष्कं **दृष्ट्वा विस्मिताः** सन्तो **व्रजे समागत्योचुः**, "**अद्यानेन महाव्याल**" इति वक्ष्यति ॥ ३७ ॥ अघासुरस्य मुक्तिं युक्त्या समर्थयति **नैतद् विचित्र**मितिद्वाभ्यां, **मनुजार्भो** मनुष्यबालः स **एव माया** तद्वतो भगवत **एतद्** बालमोक्षणमघासुरमोक्षो वा **न विचित्रं**, वस्तुतोयं **परावराणां परमो** ब्रह्मादीनामस्मदादीनां च नियन्ता कर्ता च, **अघोपि** पापरूपो **यत्स्पर्शपातकः** प्रक्षालितपाप **आत्मसाम्यं** भगवत्समतामसतां दुष्टानां **सुदुर्लभं प्रापेति** यत् तत्र हेतुः ॥ ३८ ॥ **सकृद् यस्य** भगवतो**ङ्गप्रतिमा** शरीरसमाना मानसी मूर्ति**रन्तर्राहिता** हृदये स्थापितापि **भागवतीं गतिं ददौ** ददाति तत्र **स एव नित्यात्मसुखानुभूतिः** सच्चिदानन्दरूप आत्मा **व्युदस्तमायः** पूर्णज्ञानेनैव गतमायः **परमकाष्ठां** प्राप्तोन्तराहितः सन् मुक्तिं ददातीति **किं पुनर्वक्तव्यम्** ॥ ३९ ॥ एतावदुक्त्वा शुकः परमनिर्वृतः तूष्णीमास तदा राजा पृच्छतीत्याह **सूतः**, हे **द्विजाः** शौनकादयः, **यादवदेवेन** कृष्णेन **दत्तो** विष्णुरातः **स्वरातुः** स्वरक्षितु**श्चरितं श्रुत्वा भूयोपि तदेव पप्रच्छ** यतो **विचित्रं पुण्यं** च, **वैयासकिं शुकं, येन चरित्रेण निगृहीतं चेतो** यस्य ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा च पीनः स्थूलो योऽहेर्भोगो देहस्तस्मादुत्थितं निःसृतं महत् प्रकाशबहुलं ज्योतिः स्वधाम्ना स्वप्रकाशेन दश दिशः ज्वलयत् प्रकाशयत् खेऽवस्थितं सत् ईशस्य श्रीकृष्णस्य ततो निर्गमं प्रतीक्ष्य निर्गते तस्मिन् विवेश । 'अद्भुतं ज्योतिर्दिवौकसां पश्यताम्' इति पदैर्लोके तन्मुक्तिप्रसिद्ध्यर्थं भगवदिच्छया तद्दर्शनं जातमिति ज्ञेयम्, अन्यथा जीवस्यादृश्यत्वात् ॥ ३३ ॥ ततोऽघासुरवधादतिहृष्टाः सुरादयः स्वकृतः 'तत्कार्यं कृतवतः' श्रीकृष्णस्यार्हणं सत्कारमकृत अकुर्वन् । तत्र सुरा देवाः पुष्पैरर्हणम् 'अकृत' इति सर्वत्रान्वयः । अप्सरसश्च नर्तनैः । सुष्ठु गायन्तीति सुगाः गन्धर्वादयो गीतैः । वाद्यधरा विद्याधरादयो वाद्यकैः । विप्रा वसिष्ठादयो ऋषयः स्तवैः । गणाः पार्षदाः भक्तजनाश्च जयशब्दैः ॥ ३४ ॥ किञ्च येषां देवादीनामद्भुतस्तोत्राणि च सुवाद्यानि च गीतिकाः सुकुमारा गीतयश्च जयो जयशब्द आदिर्येषां ते, तान् येनैकोत्सवान् नृत्याद्यनेकोत्सवेन जातान् मङ्गलस्वनान् हस्तकिङ्किण्यादिशब्दान् स्वधाम्नः सत्यलोकस्यान्ति समीपे श्रुत्वा अजो ब्रह्मा अलक्षित एवाचिरात् शीघ्रमागतः सन् ईश्वरस्य श्रीकृष्णस्य महिमानमघासुरस्यापि मोक्षप्रदानं, मुखप्रवेशेन ततो बालादीनां विमोचनं च दृष्ट्वा विस्मयं जगामेत्यन्वयः । नच ब्रह्मलोकपर्यन्तशब्दगमनासम्भवो आशङ्कनीयः, स्वमाहात्म्यप्रदर्शनार्थं भगवदिच्छया तत्सम्भवात् ॥ ३५ ॥ 'आश्चर्यान्तरं शृणु' इत्याशयेन सम्बोधयति—राजन्निति । तदद्भुतमाजगरं चर्म वृन्दावने शुष्कं सत् व्रजौकसां बहुतिथं बहुकालमाक्रीडगह्वरं क्रीडार्थे महाबिलं बभूवेत्यन्वयः ॥ ३६ ॥ अग्रिमकथाप्रश्नमुत्थापयन् अन्यदप्याश्चर्यमाह—एतदिति । "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । कैशोरमापञ्चदशाद्यौवनं तु ततः परम्' इति वचनात् एतत् मृत्योरात्माहिमोक्षणं तत्रात्मनां बालादीनां प्रसिद्धात् मृत्योर्मोक्षणमहेरघासुरस्य ज्योतिषः कृष्णे प्रवेशस्य दृष्टत्वात् संसारलक्षणात् मृत्योर्मोक्षणं हरेः कौमारजं पञ्चमाब्दकृतं कर्म तदैव दृष्ट्वा पौगण्डके षष्ठेऽब्देऽद्यैव तत् वृत्तम् इति विस्मिताः सन्तो बाला व्रजे ऊचुः ॥ ३७ ॥ 'अहो ! दुष्टस्याप्येवं मुक्तिः' इत्याश्चर्यं कुर्वन्त प्रत्याह—नैतद्विचित्रमिति द्वाभ्याम् । मनुजार्भमायिनः स्वेच्छया स्वीकृतमनुष्यबालभावस्य, वस्तुतस्तु परमस्य परमेश्वरस्य । तत्र हेतुमाह—परे ब्रह्मादयः, अवरे स्थावरादयः । तेषां वेधसः स्रष्टुर्भगवतः स्पर्शनेन धौतपातको निवृत्तकर्मबन्धनः सन् अघोऽप्यसतां विषयाविष्टचित्तानां भगवद्विमुखानां सुदुर्लभमपि आत्मसात्म्यं भगवत्समानरूपतां यत् प्राप तदेतच्चित्रमाश्चर्यं न भवति । अनेन प्रथमं लोके मुक्तिख्यापनाय भगवदिच्छया सायुज्यं प्राप्तस्यापि शिशुपालादिवत् पुनः सारूप्यप्राप्तिर्बोध्या ॥३८॥ एतदेव कैमुत्यन्यायेन द्रढयति—सकृदिति । 'अङ्ग' इति सम्बोधनं स्नेहसूचकम् । यस्याङ्गं मूर्तिस्तस्य प्रतिकृतिः साऽपि मनोमयी मनसा चिन्तिता, तत्रापि बलादन्तर्हिता हृदये स्थापिता सती प्रह्लादादिभक्तेभ्यो भागवतीं गतिं मुक्तिं ददौ, स एव परमो भगवान् स्वयं साक्षादेव यस्यान्तर्गतस्तस्य मुक्तौ किं पुनः ? किमाश्चर्यमित्यर्थः । तस्य परमेश्वरत्वमेव स्पष्टयति—नित्या चासावात्मसुखानुभूतिश्च तया, नित्यस्वानन्दानुभवेनाभिव्युदस्ता दूरतोऽपसारिता माया येन इति ॥ ३९ ॥ हे द्विजाः यादवदेवेन श्रीकृष्णेन दत्तः 'रातो वोऽनुग्रहार्थाय' इति प्रथमोक्तेः गर्भे रक्षां कृत्वा युधिष्ठिरादिभ्यो दत्तः परीक्षित् स्वरातुः स्वदातुः स्वरक्षकस्य विचित्रमघमोक्षादिचरितमित्थं श्रुत्वा भूयः पुनरपि तदेव श्रीकृष्णचरितं वैयासकिं शुकं प्रति पप्रच्छेत्यन्वयः । प्रश्ने हेतुमाह—यदिति । येन श्रीकृष्णचरितेन नितरां गृहीतं वशीकृतं चेतो यस्य सः । वशीकारेऽपि हेतुमाह—पुण्यमिति । परमपुण्यजनकं सर्वदुरितनिवर्तकम् ॥ ४० ॥

अन्वितार्थप्रकाशिका

पीनेति ॥ तदा च पीनः स्थूलो योऽहेर्भोगो देहस्तस्मादुत्थितं निःसृतम् । पीनाहिभोगे स्थितमिति स्वामिसम्मतः पाठः । अद्भुतं महत्प्रकाशबहुलं शुद्धसत्त्वमयं ज्योतिः स्वधाम्ना स्वप्रकाशेन दश दिशः ज्वलयत् प्रकाशयत् खेऽवस्थितं सत् ईशस्य श्रीकृष्णस्य ततो निर्गमं प्रतीक्ष्य निर्गते तस्मिन् भगवति दिवौकसां मिषतां पश्यतामेव विवेश ॥ ३३ ॥ तत इति ॥ ततोऽघासुरवधादतिहृष्टाः सुरादयः स्वकृतः स्वस्य देवसमूहस्य तत्कार्यं कृतवतः स्वस्रष्टुर्वा । श्रीकृष्णस्यार्हणं सत्कारमकृत अकुर्वन् । एकत्वमार्षम् । तत्र सुरा देवाः पुष्पैरर्हणमकृतेति सर्वत्रान्वयः । अप्सरसश्च नर्तनैः सुष्ठु गायन्तीति सुगाः गन्धर्वादयो गीतैः वाद्यधरा

विद्याधरादयो वाद्यकैः विप्रा वसिष्ठादय ऋषयः स्तवैः गणाः पार्षदाः भक्तजनाश्च जयेति निस्वनैः शब्दैरर्हणमकृत ।। ३४ ।। तदद्भुतेति ।। तेषां देवादीनामद्भुतस्तोत्राणि च सुवाद्यानि च गीतिकाः सुकुमारा गीतयश्च जयो जयशब्द आदिर्येषां ते तान् नैकोत्सवान् नृत्याद्यनेकोत्सवेन जातान्मङ्गलस्वनान् हस्तकिङ्किण्यादिशब्दान् स्वधाम्नः सत्यलोकस्यान्ति समीपे भगवदिच्छाबलात् दूरतोऽपि श्रुत्वा अजो ब्रह्मा अलक्षित एवाचिरात् शीघ्रमागतः सन् ईश्वरस्य महि महिमानमघासुरस्यापि मोक्षप्रदानं मुखप्रवेशेन ततो बालादीनां विमोचनं च दृष्ट्वा विस्मयं जगाम ।। ३५ ।। राजन्निति ।। हे राजन् ! तदद्भुतमाजगरं चर्म वृन्दावने शुष्कं सत् व्रजौकसां बहुतिथं बहुकालमाक्रीडगह्वरं क्रीडार्थे महाबिलं बभूव ।। ३६ ।। एतदिति ।। "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।। कैशोरमापञ्चदशाद्यौवनं तु ततः परम् ।।" इति वचनात् एतन्मृत्योरात्मनाम् अहेश्च मोक्षणं तत्रात्मनां बालादीनां प्रसिद्धान्मृत्योर्मोक्षणम् अहेरघासुरस्य ज्योतिषः कृष्णे प्रवेशस्य दृष्टत्वात्संसारलक्षणान्मृत्योर्मोक्षणम् । यद्वा । मृत्योः अहिमरणाद्धेतोः आत्मनाम् अहेः सकाशात् मोक्षणं हरेः कौमारजं पञ्चमाब्दकृतं कर्म तदेव दृष्ट्वा पौगण्डके षष्ठेऽब्देऽद्यैव तत् वृत्तमिति विस्मिताः सन्तो बाला व्रजे ऊचुः । अन्ये तु श्रीकृष्णे कालेनाल्पेनोक्तदिशा पञ्चमाब्दारम्भे पौगण्डप्रवेशः तथा च चतुर्थाब्दकृतं पञ्चमेऽब्दे कृतं प्रोचुरित्याहुः ।। ३७ ।। नैतदिति ।। मनुजार्भमायिनः धृतमनुष्यबालभावस्य वस्तुतस्तु परमस्य परमेश्वरस्य परे ब्रह्मादयः अवरे स्थावरादयस्तेषां वेधसः स्रष्टुर्भगवतः स्पर्शनेन धौतपातको निवृत्तकर्मबन्धनः सन्नघोऽप्यसतां विषयाविष्टचित्तानां भगवद्विमुखानां सुदुर्लभमपि आत्मसाम्यं भगवत्समानरूपतां यत्प्राप तदेतच्चित्रमाश्चर्यं न भवति ।।३८।। सकृदिति । अङ्ग हे राजन् ! यस्याङ्गं मूर्तिस्तस्या अपि प्रतिमा प्रतिकृतिः सापि मनोमयी मनसा चिन्तिता तत्रापि बलादन्तर्हिता हृदये स्थापिता सती खट्वाङ्गादिभ्यो भागवतीं गतिं मुक्तिं ददौ । स एव नित्या चासावात्मसुखानुभूतिश्च तया नित्यस्वानन्दानुभवेनाभिव्युदस्ता दूरतोऽपसारिता माया येन स परमो भगवान् स्वयं साक्षादेव यस्यान्तर्गतः सः तस्मै किं पुनर्न दद्यात् सर्वमपि श्रेयो दद्यादेव ।। ३९ ।। इत्थमिति ।। हे द्विजाः ! यादवदेवेन श्रीकृष्णेन युधिष्ठिरादिभ्यो दत्तः परीक्षित् राजा स्वरातुः स्वदातुः स्वरक्षकस्य विचित्रमघमोक्षादिचरितमित्थं श्रुत्वा येन श्रीकृष्णचरितेन नितरां गृहीतं वशीकृतं चेतो यस्य सः परीक्षित् भूयः पुनरपि तदेव पुण्यं पवित्रं श्रीकृष्णचरितं वैयासकिं शुकं प्रति पप्रच्छ ।। ४० ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पीनात् स्थूलात् अहिभोगात् सर्पदेहात् उत्थितं निःसृतं स्वधाम्ना स्वप्रकाशेन दशदिशः ज्वलयत् प्रकाशयत् ईशस्य निर्गमं बहिर्निर्गमनं प्रतीक्ष्य खे गगनेऽवस्थितं देवानां मिषतां सतां तस्मिन् हरौ विवेश ।। ३३ ।। तत इति ततस्तदनंतरमतिहृष्टाः सुराः स्वकृतः स्वस्य सहायकृतो हरेः पुष्पैरर्हणमकृत अकृषत सुगाः गंधर्वादिसुष्टु गायकाः गीतैः पूजामकृत वारिधरा मेघाः वाद्यकैर्गर्जनैः वाद्यधरा इति पाठवाद्यकैर्वादित्रैः स्तवैः स्तोत्रैः गणाः सिद्धचारणगणाः जयशब्दैरर्हणम् ।। ३४ ।। तेषां यानि अद्भुतानि स्तोत्रसुवाद्यादीनि ये च नैकोत्सवाः ये च मंगलस्वनाः तान् श्रुत्वा स्वधाम्नः स्वस्थानात् अजोविधिः अंति श्रीकृष्णसमीपे अचिरादागतः सन् ईशस्य स्वनियामकस्य महि महिमानं दृष्ट्वा ।।३५।। आजगरं अजगरस्य इदं वृंदावने स्थितं आक्रीडगह्वरं महादरीसदृशं बहुतिथं बहुदिनं बभूव ।। ३६ ।। तत्राप्यन्यदाश्चर्यमाह एतदिति कौमारं पंचमाब्दांतं पौगंडं दशमावधि कैशोरमापञ्चदशाद्यौवनं तु ततः परमित्युक्तलक्षणं हरेरेतत्कौमारजं पंचमवत्सरकृतं कर्मबालाः तस्मिन्नेव काले दृष्ट्वा पौगंडके षष्ठे वर्षे अद्यैवैतत्कृतमिति व्रजे ऊचुः किं तत् कर्म मृत्योः सकाशात् आत्मा हि मोक्षणं आत्मनां स्वकीयानां प्रसिद्धमरणात् मोक्षणं अहेः अघासुरस्य च संसाररूपान्मृत्योर्मोक्षणम् ।।३७।। इदानीं भगवन्माहात्म्यं निरूपयन्नाह द्वाभ्यां नैतदिति मनुजस्य अर्भकत्वरूपामायाकपटं विद्यतेऽस्य तस्य मनुजार्भमायिनः पराणां अक्षरपुरुषाणां अवराणां क्षरभावासक्तानां बद्धजीवानां च परमस्य सर्वोत्कृष्टत्वेन माननीयस्य वेधसः सर्वकर्तुः एतन्न चित्रं आत्मसाम्यं शुद्धजीवात्मसमानरूपत्वं प्राप ।। ३८ ।। पुनः किंच सकृदिति श्रीकृष्णस्य यदंगं अवतारस्तस्य प्रतिमा अर्च्चाऽप्यास्ति साऽपि मनोमयी मनःसंकल्परूपा सकृदेककृत्वः अंतराहिता अंतःकरणे धृता सती भागवतीं गतिं ददौ स एव स्वय यस्यांऽतर्गतस्तस्य पुनः किं वक्तव्यं स किंलक्षणः नित्या या आत्मसुखाऽनुभूतिः स्वानंदानुभवस्तथा अभितो व्युदस्ता हता माया जीवा विद्या येन सः परमः सर्वश्रेष्ठः ।। ३९ ।। इत्थमिति हे द्विजाः यादवदेवेन श्रीकृष्णेन दत्तः द्रौण्यस्त्राद्रक्षितः स्वरातुः स्वदातुर्हरेश्चरितं श्रुत्वा स कथंभूतः येन चरित्रश्रवणेन नितरां गृहीतं स्वाधीनीकृतं चेतो यस्य सः ।। ४० ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ततोऽसुरोऽमुं श्रीकृष्णमेव विवेशेत्याह ।। पीनाहीति ।। तद्गलाद्भगवद्विनिर्गमात्पूर्वमेवेति शेषः । पीनः पुष्टश्चासावहिरजगराकृतिघासुरस्तस्य भोगो देहस्तस्मादुत्थितं अद्भुतमाश्चर्यकारि, महत् धर्मभूतज्ञानविकासाप्त्या बृहद्भावं प्राप्तं, ज्योतिः स्वयंप्रकाशं ज्ञानात्मकजीवस्वरूपं, स्वधाम्ना स्वकीयदीप्त्या, दश दिशः, ज्वलयत् संप्रकाशयत् सत्, ईशनिर्गमं भगवतो बहिर्निर्गमनं, प्रतीक्ष्य, खेऽन्तरिक्षे, अवस्थितं अभूत् । तच्च भगवति बहिर्याति सतीति शेषः । दिवौकसां देवानां, मिषतां पश्यतां सतां तस्मिन् श्रीकृष्णे, विवेश ।। ३३ ।। तत इति ।। ततः अतिहृष्टा अतीवानन्दं प्राप्ताः, सुरा देवाः, स्वकृतः स्वकार्यकर्तुः श्रीकृष्णस्य, अर्हणं

पूजनं, पुष्पैः नन्दनानीतकुसुमैः, अकृताकुर्वन् । व्यत्ययेनैकवचनम् । सुष्ठु गायन्तीति सुगा गन्धर्वादयश्च गीतैर्गीतगायनैः, अप्सरसः स्वःस्त्रियश्च, नर्त्तनैर्नित्यविधानैः, वाद्यधराः चतुर्विधवाद्यवादकाश्च, वाद्यकैर्नानाविधवाद्यवादनैः, विप्रा ब्राह्मणाः, स्तवैः स्तोत्रोच्चारणैः, गणाः भृत्यगणाः, जयनिस्वनैर्जयशब्दोच्चारणैः, अर्हणं अकृत ॥ ३४ ॥ तदिति ॥ किं च अजो ब्रह्मा, स्वधाम्नः स्वस्थानस्य, अन्ति समीपे, तेषां गन्धर्वादीनां, यान्यद्भुतस्तोत्राणि आश्चर्यकारिणः स्तवाः सुवाद्यगीतिकाः, सवाद्यगीतानि च जया जयशब्दा आद्या येषां ते ये अनेकोत्सवा अनेकोत्सवसंयुता मङ्गलस्वनास्तान्, श्रुत्वा, अचिरात् सद्यः, आगतः समागतः सन्, ईशस्य श्रीकृष्णस्य, महि महिमानं दृष्ट्वा, विस्मयं जगाम । राजन्निति । हे राजन्, वृन्दावने, आजगरमजगरसंबन्धि, चर्म शुष्कं सत्, बहुतिथं बहुकालं, व्रजौकसां व्रजवास्यर्भकाणां, अद्भुतं आक्रीडगह्वरं क्रीडार्थकं महाबिलं, बभूवासीत् ॥३६॥ अन्यदप्यतिचित्रं वृत्तमित्याह ॥ नेति ॥ परे देवमनुष्यादयः अवरेऽपकृष्टा येषां ब्रह्मरुद्रादीनां तेषां अपि, परमस्य, वेधसः सर्वस्रष्टुरपि, मनुजार्भमायिनः कपटस्वीकृतमनुजबालकत्वस्य भगवतः, एतदलौकिकचरित्रविधानं एव, विचित्रं न । किं तु यत् यस्य भगवतः स्पर्शनं स्पर्शमात्रं तेन धूतं पातकं यस्य स तथाभूतः, अघोऽघासुरोऽपि, असतां सुदुर्लभं सुतरां दुष्प्रापं, आत्मसाम्यं भगवत्समानरूपतां, प्रापालभत । इत्येतदेवाप्यतिचित्रमित्यर्थः ॥ ३७ ॥ एतदेव किं पुनर्न्यायेन द्रढयति ॥ यस्य भगवतोऽङ्गं तस्य प्रतिमा अर्चा मूर्त्तिः, सा च मनोमयी मनसा भगवत्त्वेन मानिता सापि, सकृदेकवारमपि, अन्तराहिता अन्तर्हृदये ध्यानेन निधापिता सती, भागवतीं गतिं ददौ । प्रह्लादादिभ्य इति शेषः । अङ्ग हे राजन्, नित्यमात्मनि साहजिकं यदात्मसुखं निरतिशयानन्दरूपं तस्यानुभूतिः सर्वकालमनुभवनं तया, व्युदस्ता माया यस्य सः प्राकृतगुणरहितः, परमः असमाभ्यधिकश्रेत्यर्थः । एवंभूतः स एव भगवान्, साक्षादन्तः प्रविष्टः सन्निति शेषः । किं पुनः भागवतीं गतिं ददाविति किं पुनर्वक्तव्यमित्यर्थः ॥ ३८ ॥ अन्यदप्यतिचित्रं वृत्तमित्याह ॥ एतदिति ॥ हरेः एतत् कौमारजं पञ्चमाब्दकृतं, मृत्योः आत्माहिमोक्षणं, आत्मनां स्वेषां प्रसिद्धमृत्योः अहेः संसाररूपान्मृत्योश्च विमोक्षणरूपमित्यर्थः । कर्म, तदेव दृष्ट्वा, बालाः विस्मिताः, व्रजे, पौगण्डके हरेः षष्ठेऽब्दे, ऊचुः । अद्यैतद्वृत्तमिति कथयांचक्रुरित्यर्थः । अयमहो भगवन्महिमातिशयो यदन्यकालिकस्याद्यत्वानुसंधानं गोपानामिति भावः ॥ ३९ ॥

इति श्रीधर्मधुरधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थवबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्धे द्वादशोऽध्यायः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

महज्ज्योतिरिति : १०.१२.३३.

प्रभुणाऽघात्मा निरघः कृतस्तदन्तः प्रविश्य योग्यमतः । तेजोमयः स समभूदनामरूपः सुरेशविस्मयभुः ॥ ८१ ॥

खेऽवस्थितमिति :

दुष्टानामपि मुक्तिदो निजजन-त्राणव्रत-श्राघ्ययं सत्योऽहं शपथं करोमि न मनाङ् मन्यध्वमत्रानृतम् ।
सम्बोध्यैवमघासुरोऽखिलजनाञ् ज्योतिः स्वरूपेण तत् स्पृष्ट्वा विष्णुपदं विवेश भगवत्यानन्दरूपे हरौ ॥ ८२ ॥

बकः शुद्धसत्त्वोऽपि नाऽऽप स्वरूपं तमोभूरहं ज्योतिरात्माऽप्यभूवम् ।
ततो मे जघन्यं तमोऽप्यत्र धन्यं विचिन्त्यैव लीनो घनश्यामलेऽभूत् ॥ ८३ ॥

प्रभौ मेघस्वरूपेऽस्मिन् सङ्गता मेऽघरूपता । ताद्रूप्यमाप्नुयादस्मात् कृष्ण एव विवेश सः ॥ ८४ ॥

कथमपि हृदये यश्चिन्तयत्यब्जनाभप्रतिकृतिमिह तस्योच्चैर्गतिर्जायते यत् ।
हृदयमविशदीशो यस्य साक्षादघस्य तदिह किमु विचित्रं तस्य जातं तथेति ॥ ८५ ॥

क्षणमपि सज्जनसङ्गश्चिन्तनमीशस्य सौति फलममलम् । योगाधिकमिति यदसावघो गतिं प्राप योगिदुरवापाम् ॥ ८६ ॥

ततोऽतिहृष्टा इति : १०.१२.३४.

सर्वेषामविशेषतोऽभिलषिते श्रीशेन सम्पादिते तत्तोषे नहि हेतुरत्र निखिलारब्धैकरूपा स्तुतिः ।
किं त्वेतस्य समर्हणं मुहुरहो स्वस्वाधिकारोचितमेवेति स्फुटमास भूर्यघहृतौ भिन्नार्हणोल्लेखनात् ॥ ८७ ॥

तदद्भुतेति : १०.१२.३५.

सानन्दमद्भुतश्रीश-प्रसाद-फलभोगिनाम् । श्रुत्वोदन्तं सतां कस्य न स्याच्चेतसि विस्मयः ॥ ८८ ॥

कृतान्तस्य कृतान्तोऽहममृतानां तथाऽमृतम् । अघहत्याऽर्भकोद्धृत्या द्वयमेतत् स्फुटीकृतम् ॥ ८९ ॥

भवाह्यन्तः सन्तो विषयविषसंपर्करहिता ध्रुवं जीवन्मुक्ता रचितकुतुकास्तत्र नितराम् ।
भवेयुस्ते यैस्तु प्रतिपदमचिन्त्याच्युतपदं यदस्मिन् स्पष्टोदाहृतिरहिगता गोपशिशवः ॥ ९० ॥

राजन्नाजगरमिति : १०.१२.३६.

संपाद्याश्वनघत्वमच्युतपदाध्यक्षो भवेद् यो भुवि जीवन्मुक्तिमुपागतोऽस्य हि भवः शिष्टोऽपि नार्तिप्रदः ।
किं चास्मिन् रचिताऽपि केलिरफला दग्धाङ्कुरन्यायतः स्यादेवेति विविक्तमार्षवचनं तच्चर्मकेल्युक्तितः ॥ ९१ ॥

यो जीवन्नपि मुक्ततामुपगतः सोऽघेन पुण्येन वा नो लिप्तो भवतीह लोकवदलं कर्माहृतोऽपि स्वयम् ।
श्रुत्यर्थोऽयमभूत् स्फुटो जगति यद् वृन्दावने क्रीडनं बालानामघभोगयोगि च तथा श्रीनायकप्रीतिदम् ॥ ९२ ॥
यत्प्रातः शिशुबोधनादिमिषतः कल्पादिसृष्टिक्रमो यत्तत्क्रीडनकैतवेन सदसज्जीवप्रवृत्तिस्तथा ।
यच्चाघ-ग्रसनाघनिर्दलन-तत्सम्मोचनव्याजतः पापध्वंसनमृत्युहिंसनमथो तच्चर्मकेलिच्छलात् ॥ ९३ ॥
जीवन्मुक्तिदशेति चेत्यविकलं मायार्भकक्रीडया श्रीनाथेन दयारसार्द्रमनसा व्यक्तीकृतं स्वाशयम् ।
ज्ञात्वा विस्मितमानसः शुकमुखाच्छंसन् स्विकां धन्यतां युक्तं तत्पुनरप्यपृच्छदभयां योगस्थितिं तत्क्रमात् ॥ ९४ ॥
(युग्मम्)

ये जाताः श्रीशकृपया सानन्दा निरघावने । तेषां तदुत्तरं योगक्षेमार्थविधिरुच्यताम् ॥ ९५ ॥

कृष्णप्रिया

अघासुर के मरने के बाद उसके स्थूल अजगर शरीर से एक सत्त्वगुण सम्पन्न अद्भुत महान् तेज निकला जिस तेज से सारी दिशाएँ जगमगा उठीं । वह दिव्य तेज अन्तरिक्ष में जाकर भगवान् की प्रतीक्षा कर रहा था । भगवान् ज्यों ही अघासुर के मुख से बाहर निकल आये त्यों ही वह तेज देवताओं के देखते देखते श्रीकृष्ण में प्रविष्ट हो गया ॥ ३३ ॥ अघासुर का नाशकर भगवान् श्रीकृष्ण ने सर्वका सर्वश्रेष्ठ कार्य किया, तब देववरों ने कुसुम वर्षा कर, अप्सराओं ने नृत्य कर, गन्धर्वों ने गान कर, विद्याधरों ने वाजित्र नाद कर, विप्रवरों ने स्तोत्र पढ़कर, भगवान् के पार्षदों ने जय-जय ध्वनि करके भगवान् श्रीकृष्ण चन्द्रजी का उत्तम अर्चन किया ॥ ३४ ॥ भगवान् श्रीकृष्ण जी की विविध प्रकार की स्तुति, वाजित्र, ध्वनि, गीत नाद, जय जयकार ध्वनि और विविध उत्सव मुक्त मङ्गल सूचक ध्वनियों को सुनकर ब्रह्माजी त्वरित गति से गोकुल आ पहुँचे, वहाँ भगवान् श्रीकृष्ण की महिमा देखकर उन्हें अत्यन्त ही आश्चर्य हुआ । राजन् परीक्षित् ! जब अघासुर का वह चाम सुख गया तब व्रज-निवासियों के लिये ॥ ३५ ॥ वृन्दावन में लिये बहुत दिन पर्यन्त खेलने की एव लोकोत्तर गुफा-सी बना रहा ॥ ३६ ॥ राजन् ! अघासुर के मुँह से ग्वाल बालकों की रक्षा और अघासुर का मोक्ष की लीला श्रीकृष्ण भगवान् ने अपनी पांच वर्ष की कुमारावस्था में ही की थी, और ग्वाल-बालों ने उसे उसी समय देखा भी था किन्तु छठे वर्ष की पौगण्डावस्था में ही अतिशय आश्चर्यान्वित होकर व्रज में उसका वर्णन किया ॥ ३७ ॥ भगवान् श्रीकृष्ण, जो कि माया से मानव बालक बने हुए है और जो ब्रह्मादि देवों का और हमारे नियन्ता और निर्माता परमेश्वर है इसके लिये यह बात अद्भुत नहीं है । तभी तो महापातकी अघासुर केवल भगवत्स्पर्श से ही सर्वपातक मुक्त हो गया और सायुज्य मुक्ति पायीं जिस मुक्ति को कभी नहीं पा सकता था ॥३८॥ राजन् ! जिस भगवान् के श्री अङ्ग की मानसी केवल प्रतिमा बलात् एक बार अन्तः करण में स्थित हो जाय तो वह सालोक्य सामीप्य आदि गति का दान करती है तो भला जो नित्य आत्म सुखानुभूति से अपनी माया नष्ट कर देने वाले साक्षात् स्वयं भगवान् ही जिसके भीतर प्रविष्ट हो चुके है उसके विषय में क्या आश्चर्य करना है ॥ ३९ ॥ श्रीसूत जी ने कहा, हे महर्षियों ! यदुवंश नाथ भगवान् श्रीकृष्ण ने ही श्री परीक्षित जी को जीवन दान दिया था ऐसे अपने रक्षक भगवान् का यह अद्भुत चरित्र सुना तब राजा परीक्षित ने पुनः श्री शुकाचार्य महाराज से भगवान् की पवित्र लीला के सम्बन्ध में प्रश्न किया कारण कि भगवान् की अमृतमयी लीलाओं में परीक्षित राजा का चित्त लीन हो चुका था ॥ ४० ॥

राजोवाच

ब्रह्मन् कालान्तरकृतं तत्कालीनं कथं भवेत् । यत् कौमारे हरिकृतं [1]विदुः पौगण्डकेऽर्भकाः ॥ ४१ ॥
तद् ब्रूहि मे महायोगिन् परं कौतूहलं गुरो । नूनमेतद्धरेरेव माया भवति नान्यथा ॥ ४२ ॥
वयं धन्यतमा लोके गुरोऽपि क्षत्रबन्धवः । यत् पिबामो मुहुस्त्वत्तः पुण्यं कृष्णकथामृतम् ॥ ४३ ॥

सूत उवाच

इत्थं स्म पृष्टः स तु बादरायणिः[2] संस्मारितानन्तहृताखिलेन्द्रियः ।
कृच्छ्रात् पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तं भागवतोत्तमोत्तमम् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

प्रक्षिप्तेषु कौतुकलीलायाम्प्रथमोऽध्यायः

---

[1] जगुः—श्रीधर. वंशी. विज. शुक. ; विदुः—वीर. । [2] बादरायणिस्तत्स्मारिता—श्रीधर. श्रीधर. वंशी. विज. जीव. ; बादरायणिः संमारिता—वीर. ।

कर्दमक्षमा

अन्वयः—ब्रह्मन् ! कालान्तरकृतं तत् कालीनं भवेत् यत् कौमारे हरिकृतं (तद्) अर्भकाः पौगण्डके विदुः ॥ ४१ ॥ गुरो ! वयं क्षत्रबन्धवः अपि लोके धन्यतमाः यत् त्वत्तः पुण्यं कृष्णकथामृतं मुहुः पिबामः ॥ ४३ ॥ इत्थं सः बादरायणिः पृष्टः संस्मारितानन्तहृताखिलेन्द्रियः कृच्छ्रात् शनैः पुनः लब्धबहिर्दृशिः भागवतोत्तमोत्तमम् तं प्रत्याह ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कालांतरे कौमारे कृतं पौगंडके कथं ज्ञात्वोचुरित्यर्थः ॥ ४१–४३ ॥ तेन यः स्मारितोऽनंतस्तेन हृतान्यखिलेंद्रियाणि यस्य सः तथाभूतोऽपि कथंचिल्लब्धबहिर्दृष्टिः । हे भागवतोत्तमोत्तम हे शौनक ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे टीकायां द्वादशोऽध्यायः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति । पूर्वकालिकस्य परकालिकत्वसंभवादिति भावः । ब्रह्मन्निति सर्वज्ञतामाह ॥ ४१ ॥ "अनागतमतीतं च सम्यक्पश्यंति योगिनः" इत्युक्तेः । सर्वं वर्णयितुं भवान् समर्थोस्तीत्याह—हे महायोगिन्निति । तत्तस्माद्ब्रूहि यतः परं कौतूहलमाश्चर्यम् । एतत् पूर्वकालिकस्य परकालिकत्वम् । अन्यथा मायां दुर्घटघटनाशक्तिं विना ॥ ४२ ॥ क्षत्रबंधवोपीति संबंधः । यत् यतः । श्रवणार्थमत्यौत्सुक्येन गुरुं प्रोत्साहयति—वयमिति । बहुत्वं बंधुवर्गापेक्षया क्षत्रबंधवः क्षत्रियाधमा अपि एतच्चात्यंतविनयात् तत्र गुणविशेषं दर्शयति—त्वत्त इति । हे गुरो त्वच्छिष्यत्वेनैव धन्याः कृतार्थाः विशेषतश्च त्वत्तः कृष्णकथामृतपानेन धन्यतराः मुहुः पानेन च धन्यतमा इत्यर्थः । विश्वनाथस्तु हे गुरो इति मम त्वच्छिष्यत्वात् "ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत" इति विधेरवश्यवक्तव्यत्वं व्यंजितं पिबाम इति स्वशक्तिव्यंजनया स्वस्य स्निग्धत्वञ्च ॥ ४३ ॥ हृतान्यंतर्मुखीकृतानि । तथाभूतोपि हरिस्मृत्यंतर्मुखेंद्रियोपि । कथंचिन्महता यत्नेन कृच्छ्रादुच्चैः करतालशंखभेरीदुदुंभिनिशानादिवाद्ययुक्तकीर्त्तनोद्घोषैर्बहुलप्रयासेन लब्धबहिर्दृशिर्जातेंद्रियबहिर्वृत्तिरित्यर्थः । पुनरित्यनेन पूर्वमपि वारंवारमीदृशो जातोस्ति इति बोध्यते । तत्र तत्रैव तातेति वारंवारं संबोधनमित्यभिज्ञा आहुः । तदर्थे श्रीपरीक्षिता महाव्यग्रेण सता निजांतिके तत्तद्वाक्यादिश्रीकृष्णकीर्त्तनसामग्रीश्रीजनमेजयतो रक्षितास्तीति आख्यायिका प्रसिद्धा । शनैरिति । तदानीमनुवर्त्तमानेन प्रेमभरेणाक्रांतत्वात् हे भागवतोत्तमोत्तमेति । परमगुह्यमपि श्रोतुमर्हतीति भावः । भागवताः साधारण्येन हरिभक्तास्तदुत्तमास्तच्चरिताकर्णनपरास्तदुत्तमाः पौनःपुन्येन तद्विषयकानुयोगेन श्रवणेऽलंबुद्धिशून्याः । "सामान्येन हरौ भक्तः प्रोक्तो भागवतो बुधैः । तदीहा श्रुतिसंयुक्ता विप्रा भागवतोत्तमाः । मुहुर्मुहुः पृच्छति यो मुरारेर्लीलां समस्ताघहरी प्रसक्तः । सदा ह्यलं धीरहितोऽत्र वाच्यः स ब्राह्मणो भागवतोत्तमोत्तमः ।' इति ब्रह्मसंहितोक्तेः ॥ ४४ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कालान्तरकृतं पूर्वकालीनं कर्म तत्कालीनं सद्यः कालदृष्टं कथं सम्भवेत् ? तदेवाह—यदिति । यत्कौमारके हरिणा कृतं तत्पौगण्डकृतमिति कथमूचुः ? टीकायां च पौगण्डके कृतमिति कथं ज्ञात्वोचुरित्यन्वयः ॥ ४१ ॥ तदिति कथं सम्भवेत् तत्प्रकारमित्यर्थः । कौतूहलं कौतुकजनकम् इत्यर्थः । महायोगिन् ! परमभक्तियुक्तेति श्रीभगवद्वृत्तं तया ज्ञातं न किञ्चिदस्तीति भावः । ननु, परमगुह्यमेतत्तत्राह—हे गुरो ! उपदेष्टुः किञ्चिद्गोप्यं शिष्ये नास्तीति भावः स्वयमेव सिद्धान्तं तर्कयति एतत्तेषां तादृशं दर्शनभानं मायादुर्घटघटनी शक्तिः हरेरिति मायया सर्वविचारहरणाभिप्रायेण एवेत्यन्यमाया निरस्ता, तदेव द्रढयति—नान्यथा तन्मायां विना न सम्भवेदित्यर्थः । गोपकुमाराणां तेषामन्यतो भ्रमाद्यसम्भवात् ॥ ४२ ॥ श्रवणार्थमत्यौत्सुक्येन गुरुं प्रोत्साहयति—वयमिति बहुत्वं बन्धुवर्गापेक्षया अपि किं वा तच्छिष्यादिनात्मनो बहुत्वमानात् क्षत्रबन्धवः क्षत्रियाधमा अपि एतच्चात्यन्तविनयात् पुण्यं मनोज्ञं तत्र गुणविशेषं बोधयति—त्वत्त इति । हे गुरो ! त्वच्छिष्यत्वेनैव धन्याः कृतार्थाः विशेषतश्च त्वत्तः श्रीकृष्णकथामृतपानेन धन्यतराः मुहुः पानेन च धन्यतमा इत्यर्थः ॥ ४३ ॥ बादरायणिरिति पितृनाम्नोल्लेखात् तस्यापि नन्दनत्वेन माहात्म्यविशेषः सूचितः । अत एव तेन तदीयप्रश्नविशेषेण स्मारितस्तत्तद्विशेषेण हृदयं प्रापितोऽनन्तः शाद्वलजेमनादिब्रह्मस्तूयमानतापर्यन्तानन्तैश्वर्यमाधुरीकः कृष्णः तेन हृताखिलेन्द्रियः प्रेमभरेण तदेकपरिस्फूर्त्या लीनसर्वेन्द्रियवृत्तिरित्यर्थः । अयं प्रमोदमोहानुभावः प्रलयाख्यः कम्पपुलकादिवत् प्रेमविकारविशेषो ज्ञेयः संस्मारित इति क्वचित्पाठः तथापि स एवार्थः स च स्वाम्यसम्मतः चित्सुखस्य तु सम्मतः कृच्छ्रात् उच्चैः करतालशङ्खभेरीदुन्दुभिनिःशाणादिवाद्ययुक्तकीर्तनोद्घोषणैर्बहुलप्रयासेन लब्धबहिर्दृशिः जातेन्द्रियबहिर्वृत्तिरित्यर्थः । पुनरित्यनेन पूर्वमपि वारम्वारमीदृशो जातो ऽस्तीति बोध्यते तत्र तत्रैव तातेति वारं वारं सम्बोधनमित्यभिज्ञाः आहुः तदर्थं श्रीपरीक्षिता महाव्यग्रेण सता निजान्तिके तत्तद्वाद्यादि श्रीकृष्णकीर्तनसामग्री श्रीजनमेजयतो रक्षिता ऽस्तीत्याख्यायिका प्रसिद्धा

शनैरिति तदानीमप्यनुवर्त्तमानेन प्रेमभरेणाक्रान्तत्वात् हे भागवतोत्तमोत्तमेति तत्परमगुह्यमपि श्रोतुमर्हसीति भावः। क्वचित्स्वाम्यसम्मतो द्वितीयान्तपाठश्चित्सुखसमन्तः ततश्च प्रतिवचने हेतुर्ज्ञेयः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

कालान्तरकृतं पूर्वकालीनं सद्यस्तनं कथं सम्भवेत् ? तदेवाह,—यदिति। एतच्च दुर्घटमिति भवतावगम्यत एवेति सम्बोधयति—ब्रह्मन् साक्षाद्वेदरूपेति ॥ ४१ ॥ कथं सम्भवेत् ? तत्–तत्प्रकारमित्यर्थः। यतः परमं कौतुहलमात्रास्माकं श्रवणौत्सुक्यं सन्देहो वा, यद्वा, तत्कौतुहलमाश्चर्य्यं ब्रूहि व्युत्पादयेत्यर्थः। महायोगिन्। परमभक्तियुक्तेति श्रीभगवद्वृत्तं तवाज्ञातं न किञ्चिदस्तीति भावः। ननु, परमगुह्यमेतत् ? तत्राह—हे गुरो ! उपदेष्टुः किञ्चिद्गोप्यं शिष्ये नास्तीति भावः। नूनं वितर्के निश्चये वा। एतत् कौतुहलं तेषां तादृशवचनं वा। मायेत्यभेदोक्तिरत्यन्तमायिकत्व-विवक्षया। हरेरिति मायया सर्व्वविचार-हरणाभिप्रायेणैवेत्यन्यमाया निरस्ता। तदेव द्रढयति—नान्यथेति, तन्मायां विना न सम्भवेदित्यर्थः, गोपकुमाराणां तेषां भ्रमाद्यसम्भवात् ॥ ४२ ॥ श्रवणार्थमत्यौत्सुक्येन गुरुं प्रोत्साहयति—वयमिति, बहुत्वं बन्धुवर्गापेक्षया, किंवा तच्छिष्यत्वादिनात्मनो बहुमानादपि क्षत्रबन्धवः क्षत्रियाधमा अप्येतच्चात्यन्तविनयात् पुण्यं मनोज्ञं तत्र गुणविशेषं बोधयति। त्वत्त इति हे गुरो ! त्वच्छिष्यत्वेनैव धन्याः कृतार्था विशेषतश्च त्वत्तः कृष्णकथामृतपानेन धन्यतराः, मुहुर्मुहुः पानेन च धन्यतमा इत्यर्थः ॥ ४३ ॥ बादरायणिः बदरिकाश्रमे महातपसा श्रीव्यासाज्जात इति माहात्म्यविशेषः सूचितः, अतएव तेन श्रीकृष्णकथारसिकेन श्रीपरीक्षिता तदीयप्रश्नविशेषेण वा स्मारितो विशेषतो हृदयं प्रापितोऽनन्तोऽपरिच्छिन्नसुखरूपः कृष्णः, यद्वा, वक्ष्यमाणवत्सबालादिरूपधारणादिनानन्तः, यद्वा, स शाद्वलजेमनाद्यनिर्वचनीयलीलारससिन्धुश्चासौ स्मारितश्च योऽनन्तोऽपरिच्छिन्नमाहात्म्यः श्रीकृष्णस्तेन हृताखिलेन्द्रियः प्रेमभरेण तदेकपरिस्फूर्त्या लीनः सर्वेन्द्रियबहिर्वृत्तिरित्यर्थः। अयं प्रलयाख्यः कम्पपुलकादिवत् प्रेमविकारविशेषो ज्ञेयः। संस्मारित इति क्वचित् पाठस्तत्रापि स एवार्थः। कृच्छ्रादुच्चैः करतालशङ्खभेरीदुन्दुभिनिशानादिवाद्ययुक्तकीर्त्तनोद्घोषणैर्बहुप्रयासेन लब्धबहिर्दृशिजातेन्द्रियबहिर्वृत्तिरित्यर्थः। पुनरित्यनेन पूर्वमपि बारम्बारमीदृशो जातोऽस्तीति बोध्यते। तत्र तत्रैव तातेति तथा बारम्बारश्च सम्बोधनमित्यभिज्ञा आहुस्तदर्थञ्च श्रीपरीक्षिता महाव्यग्रेण सता निजान्तिके तत्तद्वाद्यादिश्रीकृष्णकीर्त्तनसामग्रीश्रीजनमेजयतो रक्षितास्तीत्याख्यायिका प्रसिद्धा। शनैरिति तदानीमप्यनुवर्त्तमानेन प्रेमभरेणाक्रान्तत्वात्। हे भागवतोत्तमोत्तमेति तत् परमगुह्यं श्रोतुमर्हसीति भावः। क्वचिद् द्वितीयान्तपाठस्ततश्च प्रतिवचने हेतुर्ज्ञेयः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रील सनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्यात् श्रीदशमटिप्पण्यां द्वादशोऽध्यायः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कौमारे हरिकृतं कालान्तरकृतं कथं तत्कालीनं भवेत्तच्च अर्भकाः पौगण्डके तत्कालीनमिव कथं जगुरित्यन्वयः ॥ ४१ ॥ श्रीहरेः माया सङ्कल्परूपं ज्ञानं क्रीडेच्छेति यावत् अन्यथा नेति मम भासते इति प्रश्नः ॥ ४२ ॥ पिबामः सादरं शृणुमः ॥ ४३ ॥ तत्स्मारितः परीक्षित्प्रश्नेन स्मारितो योऽनन्तगुणविशिष्टोऽनन्तः कृष्णः तेन हृतमखिलेन्द्रियं मनो यस्य सः ततः मनसो लये सति पुनः कृच्छ्राल्लब्धबहिर्ज्ञानः सन् शनैः तं प्रणम्याह—भागवताः कीर्त्तनादिनिष्ठाः तेषूत्तमाः श्रवणनिष्ठत्वात् श्रवणे ऽज्ञतया प्रश्नादिकरणेऽहन्तानिवृत्तिः श्रीभगवच्छ्रवणस्यैव ममता विषयतया आत्मीये ममतानिवृत्तिः एवं विरोधिनिवृत्तौ सति अनन्तराङ्गानाम् अपि श्रवणे एवान्तर्भावः सुधीभिरनुभाव्यः स्मृतिसन्ततेरेव भाष्यकारैर्भक्तिरूपत्वप्रख्यापनात् इतिभावः ॥ ४४ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये द्वादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

प्रश्नप्रकारमेवाह—ब्रह्मन्निति। हे ब्रह्मन् ! कालान्तरे कौमारकाले कृतं कर्म तत्कालीनं पौगण्डकालीनं कथं भवेत्पौगण्डे कथं ज्ञात्वोचुरित्यर्थः। तदाह–यदिति। यद्वा, तत्कालीनं पौगण्डकाले वाच्यं कथं भवेत् यत्कालावच्छेदेन कृतं तत्तत्काले विस्मृतं सत् कालान्तरे च स्मृतं सद्वाच्यं स्यादेवेत्यत्राह—यदिति। यद्यस्मात्कारणात्कौमारकृतं पौगण्डके विदुः सन्निकृष्टकाले स्मरणाभावः कालान्तरे स्मरणं च न विना कारणेन भवतीति तत्कारणं वदेति प्रश्नार्थः ॥ ४१ ॥ तदेतत्कारणं ब्रूहि हे महायोगिन् ! मे ममैतत्कारणं श्रोतुं परमधिकं कौतूहलं वर्त्तते मम त्वेवं प्रतिभातीत्यभिप्रायेणाह—एतत्कारणं हरेर्माया आश्चर्यशक्तिरेव नूनं ध्रुवम् अन्यथा त्वेवं न घटते ॥ ४२ ॥ आत्मनः कृतार्थतामाविष्कुर्वन् भगवत्कथां स्तौति—वयमिति। हे गुरो ! क्षत्रबन्धवोऽपि वयं लोके धन्यतमाः कृतार्था एव कुतः ? यतः श्रीकृष्णस्य कथामृतं मुहुर्मुहुस्त्वत्तः पिबामः अधन्यानां नैवं घटेतेति भावः ॥ ४३ ॥ इत्थमापृष्टो भगवान् बादरायणिस्तदाहेत्याह सूतः—इतीति। स तु बादरायणिरित्थं पृष्टोऽस्त एव तावत् संस्मारितेनापरिच्छिन्नवैभवेन भगवता

हृतान्यखिलानीन्द्रियाणि यस्य तथाभूतोऽपि पुनः शनैः कृच्छ्रात्कथञ्चिल्लब्धा बहिर्दृशिर्येन तथाभूतस्तं भागवतोत्तमोत्तमं राजानं प्रत्याह—भागवतोत्तमोत्तमेतिपाठे हे शौनक ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कालान्तरकृतं कौमारकृतं पौगण्डकाले कथं स्यात् ? तत्र हेतुः यत्कर्म कौमारे हरिणा कृतमपि पौगण्डे कृतमित्यूचुरित्यर्थः ॥ ४१ ॥ हरेरेव माया दुर्घटघटना शक्तिः नान्यस्य तत्र तदशक्तेः अनन्तः शाद्वलजेमानादिकमारभ्य ब्रह्मणस्तुयमानतात्पर्य्यं प्रकाशिते अनन्तैश्वर्य्यमाधुरीकः ॥ ४२–४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कालान्तरकृतं पूर्वकालनिष्पादितं कर्म तत्कालीनं सद्यः कालदृष्टं कथं भवेत् ? तदेवाह—यदिति । पौगण्डके अद्यैव हरिकृतमिदं कर्मेति कथमूचुरित्यर्थः ॥ ४१ ॥ माया दुर्घटघटनापटीयसी शक्तिः हरेरित्यन्यमायानिरस्ता योगमायेत्यर्थः । तयैव भगवन्नित्यपरिजनानां मोहनसम्भवात् ॥ ४२ ॥ हे गुरो इति मम त्वच्छिष्यत्वात् "ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत" इति विधेरवश्यवक्तव्यत्वं व्यञ्जितं पिबाम इति स्वासक्तिव्यञ्जनया स्वस्य स्निग्धत्वं च ॥ ४३ ॥ कृच्छ्रात् उच्चैर्भगवन्नामकीर्तनोद्घोषैः तत्रत्यनारदव्यासादिमुनिकृतैरतियत्नभरादित्यर्थः । हे भागवतोत्तमोत्तम ! शौनक ॥ ४४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमे द्वादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कालान्तरकृतं कौमारे कृतम् तत्कालीनं पौगण्डकालिकं कथं केन कारणेन भवेत् ? यस्मात्कारणात् अर्भकाः हरिणा कौमारे कृतं पौगण्डके जगुः ॥ ४१ ॥ माया विचित्रा शक्तिः ॥ ४२–४३ ॥ तेन राज्ञा यः स्मारितोऽनन्तो हरिस्तेन हृतान्यखिलानीन्द्रियाणि यस्य सः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्वादशाध्यायार्थप्रकाशः ॥ १२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कालान्तरे पूर्वकृतं कर्म तत्कालीनं सद्यः कालदृष्टं कथं भवेत् तदेवाह यदिति ॥ ४१ ॥ एतद्धरेर्माया परांशरूपा योगो शक्तिर्भवति तयैव तत्पार्षदानां मोहसम्भवात् ॥ ४२ ॥ हे गुरो ! क्षत्रबन्धवोऽपि वयं धन्यतमाः ॥ ४३ ॥ तेन तत्प्रश्नेन स्मारितः स्मृतिपथं प्रापितो अनन्तः शाद्बलजेमनादिब्रह्मस्तूयमानतात्पर्यन्तानन्वमाधुर्यैश्वर्यः कृष्णस्नेहेन हृताखिलेन्द्रियः प्रेम्णा तदेकस्फूर्त्या विलीनसर्वेन्द्रियवृत्तिरिरिति ज्ञानरूपः प्रेममोहोऽभूदिति बोध्यम् । कृच्छ्रादुच्चैर्भगवन्नाम-कीर्तन-शङ्ख-दुन्दुभिनादरूपात् प्रयत्नादित्यर्थः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां द्वादशोऽध्यायः ॥ १२ ॥

श्रीसुबोधिनी

प्रश्नमेवाह त्रिभिर्ब्रह्मन्निति सम्बोधनं ज्ञानार्थं, यदुक्तं "कौमारे हरिकृतं पौगण्डे कीर्तित"मिति तत्र शङ्का **कालान्तरकृतं तत्कालीनं कथं भवे**दिति, तदेवाह **यत कोमारे हरि**कृतं बालकाः **पौगण्डके विदु**रिति ॥ ४१ ॥ यद्यपि भविष्यति किञ्चित् कारणं तथापि **तन् मे** मह्यं **ब्रूहि,** अज्ञानं तु तव नास्तीत्याह हे **महायोगि**न्निति, किञ्चैतत् **परं कौतूहलं,** एतावज् ज्ञायते **नूनमेतद्धरेरेव माया भवति, अन्यथा** तेषां भ्रमो **न** स्यात्, अतो भगवच्चरित्रमिति वक्तव्यम् ॥४२॥ कथनार्थं स्वश्लाघां करोति **वयं धन्यतमा** इति, क्षत्रियाधमा अपि **वयं धन्यतमा** यतो भवान् **गुरुः**, किञ्च **त्वत्तः कृष्णकथामृतं** यतो **मुहुः पिबामः** ॥ ४३ ॥ एवं पृष्टो जातसमाधिरपि **शुकः** पुनराहेत्याह **सूतः, इत्थं पृष्टो बादरायणिः** सम्यक् **स्मारितो** योय**मनन्त**स्तेन **हृतान्यखलेन्द्रियाणि** यस्य, तादृशोपि **कृच्छ्रात् पुनर्लब्धब**हिर्दृष्टिः **शनैः प्रत्याह समाधे**र्विरतस्यौच्चैर्भाषणं न सम्भवतीति, **भागवतोत्तमानां मध्य उत्तमं प्रती**तिकथने हेतुः ॥ ४४ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे प्रक्षिप्ताध्यायत्रये प्रथमाध्यायविवरणम् ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

शास्त्ररहस्यज्ञत्वं सूचयन् सम्बोधयति–ब्रह्मन्निति । 'यत् आत्माहिमोक्षलक्षणं कर्म कौमारावस्थायां हरिणा कृतं, तत् अर्भका बालाः पौगण्डावस्थायां व्रजे जगुः' इति यद्भवतोक्तं तत् कालान्तरे कौमारे कृतं तत्कालीनं पौगण्डकालीनं कथं भवेत् ॥४१॥ 'उत्तरदाने त्वं योग्योऽसि' इति सूचयन् सम्बोधयति—गुरो इति । तत्र सर्वज्ञत्वहेतुं सूचयन् पुनः सम्बोधयति—महायोगिन्निति । नूनं निश्चितमेवं वैपरीत्यकथनस्य कारणं हरेर्मायैव भवति, अन्यथा प्रकारान्तरेण तु न घटते, इति यद्यपि सामान्यतो जानामि, तथापि विशेषतस्तत्कारणं ब्रूहीत्यन्वयः । एतच्छ्रोतुं मम परं कौतूहलं महानुत्साहो वर्तते इति ॥ ४२ ॥ महतां कृपापात्रत्वेन भगवत्कथामृतपानेन च आत्मनः कृतार्थतामाविष्करोति—वयमिति । महत्त्वं सूचयन् सम्बोधयति—हे गुरो इति । 'राज्ञां कुलं ब्रह्मणा पादशौचादरात्

विसृष्टम्' इति यत् हीनत्वमुक्तं तदेव पुनः सूचयन् आह –क्षत्रबन्धवोऽपि वयं लोके धन्यतमाः कृतार्थाः, यद्यस्मात् पुण्यं मोक्षप्रतिबन्धकदुरितनिवर्तकं श्रीकृष्णस्य सदानन्दस्वरूपस्य कथारूपममृतं जन्ममरणादिनिवर्तकं त्वत्तः परमकृपालोर्मुहुः वारं वारं पिबामः ॥ ४३ ॥ 'स्म' इत्यवधारणे। इत्थमेवं पृष्टः, अतस्तेन प्रश्नेन स्मारितो योऽनन्तः कृष्णस्तेन हृतान्यखिलानि इन्द्रियाणि यस्य सः तदेकाकारचित्तत्वेन निवृत्तसर्वेन्द्रियवृत्ति कृच्छ्रात् करतालदुन्दुभिशङ्खादिवाद्ययुतस्तोत्रादिप्रयासात् पुनः शनैर्लब्धा बहिर्दृशिः दृष्टिः येन स तु बादरायणिः शुकः हे भागवतोत्तमोत्तम शौनक ! तं राजानं प्रति भगवच्चरितमाह। द्वितीयान्तपाठे तु तं भागवतानां मध्ये ये उत्तमास्तेष्वप्युत्तमं राजानं प्रत्याह ॥ ४४ ॥

इति श्रीवल्लभाचार्य—वंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने ॥ विवृतो द्वादशोऽध्यायो ह्यघमोक्षनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

ब्रह्मन्निति ॥ हे ब्रह्मन् ! यत् आत्माहिमोक्षलक्षणं कर्म कौमारावस्थायां हरिणा कृतं तत् अर्भका बालाः पौगण्डावस्थायां व्रजे जगुरिति यद् भवतोक्तं तत्कालान्तरे कौमारे कृतं तत्कालीनं पौगण्डकालीनं कथं भवेत् ॥ ४१ ॥ तद्ब्रूहीति ॥ हे महायोगिन् गुरो ! नूनं निश्चितमेवं वैपरीत्यकथनस्य कारणं हरेर्माययैव भवति। अन्यथा प्रकारान्तरेण तु न घटत इति तथापि विशेषतस्तद्धेतुं ब्रूहि। तच्छ्रोतुं मम परं कौतूहलं महानुत्साहो वर्तत इति ॥ ४२ ॥ वयमिति ॥ हे गुरो ! क्षत्रबन्धवोऽपि वयं लोके धन्यतमाः कृतार्थाः स्मः। यद्यस्मात्पुण्यं श्रीकृष्णस्य कथारूपममृतं त्वत्तः मुहुः पिबामः ॥ ४३ ॥ इत्थमिति ॥ हे भागवतोत्तमोत्तम शौनक ! स्मेत्यवधारणे। स बादरायणिः शुकः इत्थमेव पृष्टः अतस्तेन प्रश्नेन स्मारितो योऽनन्तः कृष्णस्तेन हृतान्यखिलानि इन्द्रियाणि यस्य सः तदेकाकारचित्तत्वेन निवृत्तसर्वेन्द्रियवृत्तिः अयं प्रलयाख्यसात्त्विकभावः कृच्छ्रात् व्यासादिकृतात् शङ्खादिवाद्ययुतस्तोत्रादिप्रयासात् पुनः शनैः लब्धा बहिर्दृशिः जगदनुसन्धानं येन सः शुकः तं राजानं प्रति भगवच्चरितमाह स्म ॥ ४४ ॥

इति श्रीमद्भागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायां द्वादशोऽध्यायः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुनः राजा पृच्छति ब्रह्मन्निति। हे ब्रह्मन् कालांतरे कुमारावस्थायां कृतं अघार्दनं तत्कालीनं तत्कालिकं तस्मिन् काले पौगंडावस्थायां भवं कथं भवेत् तथाहि यदिति ॥ ४१ ॥ तत्परं कौतूहलं परमाश्चर्यं मे ब्रूहि ॥४२॥ क्षत्रबंधवः क्षत्रिया अपि ॥४३॥ इत्थमिति बादरायणो व्यासस्तस्यापत्यं बादरायणिः शुकः। तेन राज्ञास्मारितेऽनंते हरौ हृतानि प्रतिलोमतया संलग्नानि अखिलेंद्रियाणि यस्य सः जातसमाधिरित्यर्थः। कृच्छ्रात् परमानंदस्वरूपनिमग्नत्ववियोगात् कष्टात् पुनः शनैः लब्धा बहिर्दृशिः दृष्टिर्येन तथाभूतः शुकः उत्तमं तं परीक्षितं प्रत्याह भागवतोत्तमेति शौनकसंबोधनम् ॥ ४४ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेंद्र श्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थ-दशमस्कंधव्याख्याने अघासुरवधो नाम द्वादशोऽध्यायः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

इत्थं स्मेति : १०.१२.४४.

तत्प्रश्नस्मारितप्राप्त-योगयुक् शुकबोध्यया। सूतोक्त्यापि स्फुटं भाति स प्रश्नो योगगोचरः ॥ ९६ ॥

श्रीशकल्पतरु० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने द्वादशोऽध्यायः ॥ १२ ॥

कृष्णप्रिया

परीक्षित राजा ने कहा– महाराज ! आपने अभी कहा कि श्रीकृष्ण भगवान ने जो लीला पाँचवें वर्ष में की थी उस लीला को बालकों ने व्रज में छठे वर्ष में अपने घर जाकर कही, तो महाराज यह बात समझाईए कि पाँचवें वर्ष का प्रसङ्ग छठे वर्ष के कालान्तर में कैसे कहा जा सकता है ॥४१॥ हे महायोगिन् ! हे गुरो ! मुझे तो इस विषय में भारी कुतूहल है, आप कृपया इसका समाधान कीजिए। मुझे तो निश्चित रूप से यह भगवान की माया ही प्रतीत हो रही है ॥ ४२ ॥ हे गुरो ! क्षात्र कर्म विप्र सेवा से विमुख होने के कारण हम अपराधी नाम मात्र के क्षत्रिय हैं फिर भी हमारा महद् भाग्य है कि आप के श्रीमुख से निकले पुण्यमय मधुर श्रीकृष्णलीलामृत का पुनः पुनः पान कर रहे हैं ॥ ४३ ॥ श्री सूतजी ने कहा—हे मुनि वरो ! महाराज परीक्षित् ने जब ऐसा प्रश्न किया तब श्रीशुकाचार्य महाराजजी को भगवान के दिव्य गुणों का स्मरण हो आया और समाधिस्थ हो गये, उनका मन और इन्द्रियाँ रसराज नित्य लीला में लीन हो गयी। मुश्किल से फिर धीरे-धीरे अपने को बाह्याचरण में ला सके और परमभागवत परीक्षित राजा को कहने लगे ॥ ४४ ॥

बारहवाँ अध्याय समाप्त ॥ १२ ॥

⁂

अथ त्रयोदशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	इ. वं.	वंश.	व.	मन्दा.	शार्दूल.	शिखरिणी	उ.	श्लो. अ.	उ. अ.
६४	४८	८	१	१	२	१	२	१	२	२४०२	१३

अ. अ.	सं. श्लो.	सं. श्लो. अ.	अक्ष.
५०	२४६५	७७	१

श्रीशुक उवाच

साधु पृष्टं महाभाग त्वया [1]भागवतोत्तम । यन्नूतनयसीशस्य शृण्वन्नपि कथां मुहुः ॥ १ ॥
सतामयं [2]सारभृतां निसर्गो यदर्थवाणीश्रुतिचेतसामपि ।
प्रतिक्षणं नव्यवदच्युतस्य [3]यत् स्त्रिया विटानामिव साधु वार्ता ॥ २ ॥
शृणुष्वावहितो राजन्नपि गुह्यं वदामि ते । ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ३ ॥
[4]तथाघवदनान्मृत्यो रक्षित्वा वत्सपालकान् । [5]सरित्पुलिनमानीय भगवानिदमब्रवीत् ॥ ४ ॥

कर्दमक्षमा

अन्वयः– महाभाग ? भागवतोत्तम ? त्वया साधु पृष्टं यत् ईशस्य कथां मुहुः शृण्वन् अपि नूतनयसि ॥ १ ॥ अपि यदर्थवाणीश्रुतिचेतसां सारभृतां सतां अयं निसर्गः यत् विटानां स्त्रियाः अच्युतस्य साधुवार्ता प्रतिक्षणं नव्यवत् (भाति) ॥ २ ॥ राजन् अवहितः शृणुष्व गुह्यम् अपि ते वदामि स्निग्धस्य शिष्यस्य गुरव उत गुह्यम् अपि ब्रूयुः ॥ ३ ॥ भगवान् वत्सपालकान् अघवदनात् मृत्योः रक्षित्वा तथा सरित्पुलिनम् आदाय इदम् अब्रवीत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्रयोदशेऽहरद्ब्रह्मा वत्सान्पालांश्च मायया । तदा तत्सर्वरूपोऽब्दं कृष्णः पूर्ववदाचरत् ॥ १ ॥

नूतनयसि नव्यवत्करोषि ॥ १ ॥ तथाहि सारभृतां सारग्रहिणामयं निसर्गः स्वभावः । कोऽसौ । अच्युतस्य वार्ता श्रुता सती प्रतिक्षणं साधु नव्यवद्भवतीति यत्सः । विटानां स्त्रैणानां स्त्रियाः कामिन्या वार्तेव । कथंभूतानामपि सताम् । या अच्युतवार्ता सैवार्थो येषां तानि वाणीश्रुतिचेतांसि येषां तथाभूतानामपि ॥ २–४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पालान् गोपान् । तदा हरणोत्तरकाले । तेषां सर्वेषां गोपवत्सानां रूपमिव रूपं यस्य सः । अब्दमिति । "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया । यावद्वर्षमित्यर्थः । पूर्ववत् यथापूर्वं लीलां करोति तद्वदित्यर्थः (१) । महाभाग्यं विना हरिकथायाः प्रश्नो न संभवतीति भावः । अस्यैव विवरणरूपं भागवतोत्तमेति कथं मे भागवतोत्तमत्वं तत्राह—यदिति । यत् यतः । नूतनं करोषि नूतनयसि तत्करोतीति णिजन्ताच्छतरि ॥ १ ॥ "विटोऽद्रौ लवणे खिगे मूषिके खदिरेऽपि च" इति मेदिनी । स्त्रिया इति । परमघृणास्पदस्यापि स्त्रीपदार्थम् । नवनवमधुरतास्फूर्त्तावनुराग एव कारणं चेन्नित्यनूतनायमानस्य परमानंदैकरसस्य श्रीभगवतः किमुतेति भावः ॥ २ ॥ राजन्निति । हे बुद्ध्यादिना प्रकाशमान । एजत्कथानकं वक्ष्यमाणं बोद्धुं त्वमर्हसीति भावः ॥ ३ ॥ तथा पूर्वोक्तप्रकारेण भो वयस्या मम सखीनां भवतामेव भोजनयोग्यमेतदिति भावः । पुलिनं तोयात्सद्यो निर्गतं तटम् "तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्" इत्यमरः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हे महाभागेति गर्भेऽपि तेन श्रीभगवतो दर्शनात् हे भागवतोत्तमेति तत्कथैकरसिकत्वात् तथा द्विः सम्बोधनं च श्रीकृष्णाविष्टचित्तत्वात् प्रेम्णैव यद्यस्मात् ईशस्य स्वप्रभोः ॥ १ ॥ अश्रुतं च नूतनयसीति किं वक्तव्यं यतो मुहुर्मुहुः श्रुतमपि नूतनय-

---

१. मोत्तम–श्रीधर. वंशी. वीर. विज. जीव विश्व. । २. सारदृशां–वीर. । ३. तत्–गो. प्रे. पु. ; यत्–श्रीधर. वंशी. वीर. विज.जीव. । ४. यथा–वीर. । ५. सरः पुलिन–वीर. ।

सीत्येतदप्युचितमेवेत्याह—सतामिति । कदाचित् कथञ्चित् कस्माऽच्चिदपि च रसान्न च्यवत इति अच्युतः तस्येति तद्वार्त्तया अपि तादृशत्वमभिप्रेतम् अत एव साधु यथा स्यात्तथा प्रतिक्षणं नव्यवद्भवति स्वादुवैशिष्ट्येनापूर्ववज्जायते तदेकलाम्पट्यांशं दृष्टान्तः स्त्रिया इति तदेवं परमघृणास्पदस्यापि स्त्रीपदार्थस्य नवनवमधुरतास्फूर्तौ अनुराग एव कारणं चेन्नित्यनूतनायमानपरमानन्दैकरसस्य श्रीभगवतः किमुतेति भावः ॥ २ ॥ अवहितः सन्निति वक्ष्यमाणस्य परमदुरवगाहत्वात् राजन् हे बुद्ध्यादिना प्रकाशमानेत्यर्थः । उतेति वितर्के वयमिदं विचारयाम इत्यर्थः । अत्र श्रीभगवति ब्रह्मणि च यदसम्भवं बहुविधमेवाश्चर्यमायास्यति तत् खलु न सर्वेषां सुबोधमिति गुह्यमित्युक्तम् ॥ ३ ॥ तथा तेन प्रकारेण अघासुरवदनरूपान् मृत्योर्वत्सान् पालकांश्च भगवानपि ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे महाभागेति गर्भेऽपि तेन भगवतो दर्शनात्, जन्मानन्तरञ्च सर्वत्र तत्परीक्षणादिना । हे भागवतोत्तमेति तत्कथैकरसिकत्वात्, वस्तुतस्तु श्रीकृष्णाविष्टत्वात् प्रेम्णा तथा द्विःसम्बोधनम्; यद्यस्मात्, ईशस्य स्व-प्रभोः ॥ १ ॥ अश्रुतञ्च नूतनयसीति किं वक्तव्यम् ? यतो मुहुर्मुहुः श्रुतमपि नूतनयसीत्येतदुचितमेवेत्याह,—सतामिति । कदाचित् कथञ्चिदपि रसान्न च्यवत इत्यच्युतस्तस्येति तद्वार्त्ताया अपि तादृशत्वमभिप्रेतम्; अतएव साधु यथा स्यात्तथा नव्यवद्भवति; यद्यपि नव्यैव भवति, तथापि पूर्व्वसेवितत्वाद् वतिप्रत्ययः । तदेक-लाम्पट्यमात्रापेक्षया दृष्टान्तः—स्त्रिया इति ॥ २ ॥ अवहितः सन्निति वक्ष्यमाणस्य परम-दुरवगाहत्वात् राजन् हे बुद्ध्यादिना प्रकाशमानेत्यर्थः । उतेति प्रसिद्धौ हतौ वा ॥ ३ ॥ तथा तेनोक्तप्रकारेणाघासुर-वदनरूपान्मृत्योः वत्सान् पालकांश्च । भगवानिति निजैश्वर्य्यविशेषप्रकटनार्थमिति भावः; तच्चाग्रे व्यक्तं भावि ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

हे भागवतोत्तम ! ईशस्य कथानूतनतां मत्वा पृच्छतीत्यर्थः ॥ १ ॥ इयन्तु पुरातननित्यसिद्ध्यैव क्षणे यन्नवतां याति तद्वस्तु सुन्दरमिति कविवचनात् सारभृतां सारं श्रीभगवत्पादारविन्दध्यानं ये बिभ्रति तेषां सताम् अच्युतस्य साधुवार्त्ता शोभनवार्त्ता नव्यवत् भासेत अयं निसर्गः स्वभावः विटानां विषयिणां स्त्रिया असाधुवार्तेव इति ॥ २ ॥ गुह्यत्वम् अन्यमुनीनाम् अस्यार्थस्याज्ञानात् ब्रूयुस्त्रियादि ॥ ३–४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

प्रश्नस्योत्तरं विवक्षुस्तावत्प्रश्नमभिनन्दति—साध्विति । त्वया साधु यथा तथा पृष्टं कुतो यत् यस्मात् कथामृतं शृण्वन्नपि नूतनयसि नवीनं करोषि ॥ १ ॥ युक्तमेवैतदित्याह - सतामिति । सारग्राहिणां साधूनामयं निसर्गः स्वभाव एव, कोसौ ? अच्युतस्य वार्त्ता प्रतिक्षणं साधु नव्यवद्भवतीति यदेषः कथं स्त्रैणानां स्त्रियाः कामिन्याः वार्त्तेव कथम्भूतानामपि सतां यः अच्युत एवार्थो विषयो येषां तानि वाणीश्रुतिचेतांसि येषां तथाभूतानामपि ॥ २ ॥ शृणुष्वेत्यभिमुखीकरणम् अवहित इति श्रवणोपयुक्तचित्तसमाधानगुह्यं गोप्यमपीति ॥ ३ ॥ विवक्षितं वृत्तेन सङ्गमयति—अथेति । मृत्युतुल्यादघासुरस्य मुखाद्वत्सांस्तत्पालकांश्च रक्षित्वा इदं वक्ष्यमाणमुवाच ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सतामित्यत्र नव्यवदिति प्रत्ययेनानुरागतुल्यत्वमेव दर्शितं साक्षादनुरागे तु नव्यमेव भातीत्यर्थः । तथापि तस्याङ्घ्रियुगं नवनवमितिवदिति भावः उत वितर्के इदं विचारयाम इत्यर्थः ॥ २–७ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ भगवत्कथायाः सततश्रवणश्रद्धालुतया राजानमभिनन्दन्नाह—सतामयमित्यादि सारभूतां सारग्राहिणां सतां साधूनामयमेव विसर्गः स्वभावः । कोऽसावित्याह—अच्युतस्य प्रतिक्षणं नव्यवद् या साधुवार्ता । प्रतिक्षणनव्यत्वे दृष्टान्तः । स्त्रिया विटानामिव विटानां स्त्रैणानां स्त्रिया वार्ता यथा नव्या भवति, तथेत्यर्थः, अत्यन्तसरागत्वे दृष्टान्तः । कीदृशानां सतां विटानां वा ? यदर्थानि यत्प्रयोजनानि वाणी-श्रुतिचेतांसि येषाम् तथाभूतानामपि निरन्तर-गुणकथन-श्रवण-चिन्तन-तत्पराणामपि प्रतिक्षणं नव्यवदित्यति चित्रम् । एतेन दृष्टान्तेन भगवद्विषयरागाधिक्यं हि सारभृतां सतां साहजिकम् ॥ १–२ ॥ इत्यभिनन्द्य सच्छिष्यं प्रति वात्सल्याधिक्यादतिरहस्यमपि कथयति—शृणुष्वावहित इत्यादि । हे राजन् ! शृणुष्व किं तदित्याह—अपि गुह्यं गुह्यमपि यद्वदामि । अपि गुह्यमित्यस्यायं भावः । इदं क्वापि पुराणादौ नास्ति, पित्रापि न कथितम् भगवदनुग्रहान्मयैवेदं ज्ञायत इति वदामीत्युत्तमपुरुषप्रयोगः । ननु तर्हि कथमतिगुह्यं प्रकाशयसीत्याह—"ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत" इत्यध्यायद्वये (१३ श–१४ श) ब्रह्ममोहनरूपलीला श्रीशुकदेवस्यैवानुभूता ॥ ४–७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

स्त्रिया विटानामिव साधुवार्त्तेत्यादि। अच्युतवार्त्तेत्यायाते तच्चरिते साध्विति व्रजविहारपरम्, साध्वी असाधारणाद्भूता प्रतिक्षणं नव्यवद् येषां तेषां सतामयमेव निसर्गः स्वभावः। तत्र दृष्टान्तः—स्त्रिया विटानिव स्त्रिया वार्त्ता यथा विटानाम्, विटानाम् वा यथा स्त्रियाः। अतः श्रीकृष्णे तथैवासक्तिः कार्या, सा गोपीनामेव ॥ १–२ ॥ शृणुष्वेत्यादि। अपि गुह्यम्, अयमर्थः इदमतिगुह्यम्, कुत्रापि पुराणादौ नास्ति, वदामीति न च मे पित्राप्युक्तम्, यतोऽनुक्रमणिकाध्यायेऽपि न लिखितम्, मयैवेदं ज्ञायते, तेन ते वदामि। अतिगुह्यं चेत्तदा कथं वदसि ? तत्राह—ब्रूयुरित्यादि ॥ ४–७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जेमनं वत्सतत्पालहरणं ब्रह्ममोहनम्। स्वभूतवत्सविष्णवादिप्रादुर्भावस्त्रयोदशे ॥

विश्वस्य सृष्ट्यादिविमोहनाद्यैश्वर्यं यदंशांशभवं स कृष्णः। विश्वादिसृष्टिं बलदेवमोहं स्वैश्वर्य्यमत्रैक्षयतात्मयोनिम् ॥

हे भागवतेषूत्तम ! कथं मे भागवतोत्तमत्वम् ? तत्राह—यदिति। नूतनयसि नूतनीकरोषि श्रुतां मुहुरास्वादितामपि कथामश्रुतचरीमिव करोषीति कथायामनुरागो व्यञ्जितः ॥ १ ॥ सारभृतां सारग्राहिणामयं निसर्गः यद्यतः अच्युतस्य वार्त्ता प्रतिक्षणं क्षणे क्षणे साधु यथास्यात्तथा नव्यवद्भवति तृष्णाधिक्यादपूर्ववज्जायते यदर्थानि अच्युतवार्ताप्रयोजनानि वाणीश्रुतिचेतांसि येषां तथा भूतानामपि तदेकलांपटांशे दृष्टान्तः विटानां कामुकानां स्त्रिया वार्त्तेव कामिनीकथेव ॥ २–४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

त्रयोदशेऽस्मिन्नध्याये यस्मात्कारणात्कौमारे हरिकृतं पौगण्डकेऽर्भका व्रजे जगुस्तत्कारणं बालवत्सहरणादिकं वक्तुं राजप्रश्नमभिनन्दति—साध्विति। यद्यतः ईशस्य भगवतः कथां मुहुः शृण्वन्नपि नूतनयसि नव्यवत्करोषि अतः साधुपृष्टम् ॥ १ ॥ भवद्विधानामेवंविधः स्वभाव एवेत्याह—सतामिति। सारभृतां सारग्राहिणाम् यत् यः अच्युतः एवार्थो विषयो येषां तानि वाणिश्रुतिचेतांसि येषां तेषां सताम् अयमेव निसर्गः स्वभावः, कः ? अच्युतस्य वार्ता अपि निश्चयं प्रतिक्षणं साधु नव्यवद्भवतीति यस्य सः विटानां स्त्रैणानां स्त्रियाः वार्तेव ॥ २ ॥ प्रस्तुतमाह—शृणुष्वेत्यादिना ॥ ३ ॥ तथोक्तप्रकारेण ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

स जग्धिर्वत्सतत्पाल हृतिर्ब्रह्मविमोहनम्। स्वभूताद्भुतवत्सादि प्राकट्यश्च त्रयोदशे ॥

भागवतोत्तमत्वे हेतुर्यदिति असकृच्छ्रुतामपि नूतनां मन्यस इत्यर्थः ॥ १ ॥ सारग्राहिणां सतामयं निसर्गः स्वभावः यद्यस्मादच्युतस्य वार्ता प्रतिक्षणं नव्यवद्भवति। साररूपायां तस्यां तृष्णातिशयादपूर्ववज्जायते यदर्थानि यद्वार्त्ता फलकानि वाणीश्रुतिचेतांसि वाक्कर्णमनांसि येषां तादृशानामपि तदेकलाम्पट्यांशे दृष्टान्तः विटानां कामिनां स्त्रियास्तरुण्या वार्त्तेव ॥ २–४ ॥

श्रीसुबोधिनी

द्वितीये वत्सहरणं बालैर्ब्रह्मभ्रमस्ततः। स्तोत्रस्योपक्रमश्चैव भोजनादि निरूप्यते ॥ १ ॥

अभिनन्दति **द्वाभ्यां साधु पृष्टमिति**, भगवच्चरित्र एव स्थिरा बुद्धिरिति **महाभाग**त्वं, **भागवतोत्तमे**ति सहजोत्तमता, **सर्वदैवेशकथां शृण्वन्नपि यन् नूतनमिव** करोषीति ॥ १ ॥ किञ्चोचितमेव तव यतः **सतां सारभृतां** भक्तिमतां **निसर्गः** स्वभावोयं, तमेव स्वभावमाहा**र्थवाणीश्रुतिचेतसामपि** यस्मादयं स्वभावः, **अर्थो** धनं **वाणी** वाक् **श्रुतिः** श्रोत्रं **चेतो**न्तःकरणं, एतान्यपि स्वभावत एव भगवत्प्रवणानि, तदाह **प्रतिक्षणं नव्यवन्** नूतनवद**च्युतस्य** वार्तेति **यद्** रस आविष्टे स्वभाव एव तथा भवतीति, दृष्टान्तमाह **यथा स्त्रिया** वार्ता **विटानां** श्रुता कीर्तिता भाविता वा सुखदा परमसाधुवार्ता सा भवति, इयं तु **साधुवार्ते**तिविशेषः ॥ २ ॥ महदद्भुतमस्ति सावधानतया श्रोतव्यमित्याह **शृणुष्वे**ति, **अवहितः** सावधानः, **गुह्यम**प्येतत् तुभ्यं **वदामि** यतः **स्निग्धस्य** प्रेमवतः **शिष्यस्य गुरवो गुह्यमपि** वदन्ति ॥ ३ ॥ वत्सापाहरणार्थमघमुखान् मोचितानां बालकानामुत्तरवृत्तान्तमाह तथेत्येकादशभिः, **अघस्य वदनान् मृत्योरेव रक्षित्वा वत्सपालकान् सरित्पुलिनं** यमुनातीर**मानीय भगवानिदं** वक्ष्यमाण**मब्रवीत्** ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्रयोदशे सरित्तीरे भोजनादि हरेस्तथा। वत्सादिहरणं ब्रह्ममोहनादि निरूप्यते ॥ १ ॥

राज्ञो भगवत्कथाश्रवणादरातिशयं दृष्ट्वा तस्य भाग्यादिकमभिनन्दति—साध्विति द्वाभ्याम्। हे महाभाग ! हे भागवतोत्तम ! त्वया साधु पृष्टम्। तत्र महाभागवत्त्वे ज्ञापकं भागवतोत्तमत्वम्। अनेकजन्मसञ्चितपुण्यं विना भक्तेरसम्भवात् भक्तेर्ज्ञापकः

साधुप्रश्नः, भक्तिविना तदनुपपत्तेः । प्रश्नस्य साधुत्वे हेतुमाह––यदिति । यत् यस्मात् त्वमीशस्य कथां मुहुः शृण्वन्नपि नूतनयसि प्रश्नेन नव्यामिव करोषि ।। १ ।। 'न वै तच्चित्रम्, भागवतानां स्वभावसिद्धत्वात्' इत्याह––सतामिति । अपिशब्दोऽत्रधारणे । सतामयमेव निसर्गः स्वतःसिद्धस्वभावः । 'कोऽसौ' इत्यपेक्षायामाह––तेषां समाजे अच्युतस्य अप्रच्युतैश्वर्यादिगुणस्य भगवतो वार्ता प्रतिक्षणं साधु सम्यक् नव्यवद्भवतीति यत् सः । 'कुतस्तेषां भगवत्कथानूतनकर्तृत्वम् ?' इत्यपेक्षायां 'तदेकपरत्वात्' इत्यभिप्रेत्य विशिनष्टि––यदर्थेति । या अच्युतवार्तैव अर्थो विषयो येषां तानि वाणी वाक्, श्रुती श्रोत्रे, चेतोऽन्तःकरणमेतानि येषां तथाभूतानामित्यर्थः । 'के ते सन्त' इत्यपेक्षायामाह––सारभृतामिति । सारग्राहिणाम् । भगवदासक्त्या तत्कथाप्रवर्तकत्वे दृष्टान्तमाह––स्त्रिया इति । विटानां कामुकानां समाजे यथा स्त्रियाः कामिन्या वार्ता नव्यवद्भवति तथेत्यर्थः ।। २ ।। एवं प्रश्नादिकं प्रतिनन्द्य तं श्रवणे सावधानीकुर्वन् कथनं प्रतिजानीते––शृणुष्वेति । हे राजन् ! अवहितः सावधानः सन् त्वं शृणुष्व, गुह्यमतिरहस्यमपि ते त्वदर्थं वदामि । तत्कथने तस्य भक्त्यादिहेतुं सूचयन् शिष्टाचारमाह––ब्रूयुरिति । 'उत' इति एवकारार्थः । स्निग्धस्य स्वस्मिन् भगवति च स्नेहवतः शिष्यस्य गुरवो गुह्यमपि ब्रूयुर्वदन्ति ॥ ३ ।। तथोक्तप्रकारेणाघवदनरूपात् मृत्योः सकाशात् भगवान् वत्सान् बालकांश्च रक्षित्वा सरित्पुलिनं यमुनातीरमानीयाब्रवीदित्यन्वयः ।। ४ ।।

अन्वितार्थप्रकाशिका

त्रयोदशेऽहरद्ब्रह्मा वत्सादीनथ तद्वपुः ।। भूत्वाऽब्दं चिक्रीड हरिः श्लोकास्तत्राब्धिषण्मिताः (६४) ।

उवाचेत्येकं (१) सपादा पञ्चशैला (७५।) अनुष्टुभः ।। १३ ।।

साध्विति ।। हे महाभाग ! हे भागवतोत्तम ! त्वया साधु पृष्टं यद्यस्मात् त्वमीशस्य कथां मुहुः शृण्वन्नपि नूतनयसि श्रुतामप्यश्रुतचरीमिव प्रश्नेन नव्यामिव करोषि । नूतनशब्दात् "तत्करोति०" इति णिच् ।। १ ।। सतामिति ।। विटानां कामुकानां समाजे यथा स्त्रियाः कामिन्या वार्ता नव्यवद् भवति तृष्णाधिक्यादपूर्ववज्ज्ञायते इति तदेकलाम्पट्ये दृष्टान्तः । तथा या अच्युतवार्तैव अर्थो विषयो येषां तानि वाणी वाक् श्रुती श्रोत्रे चेतोन्तःकरणमेतानि येषां तथाभूतानामपि सारभृतां सारग्राहिणां सतां समाजे यत् अच्युतस्य वार्ता साधु सम्यक् प्रतिक्षणं नव्यवद् भवति सोऽयं तेषां सतां निसर्गः स्वभाव एव ।। २ ।। शृणुष्वेति । हे राजन् ! अवहितः सावधानः संस्त्वं शृणुष्व । तङार्षः । गुह्यमतिरहस्यमपि ते त्वदर्थं वदामि । उत यस्मात् स्निग्धस्य स्वस्मिन्भगवति च स्नेहवतः शिष्यस्य गुरवो गुह्यमपि ब्रूयुर्वदन्ति ।। ३ ।। तथेति ।। तथोक्तप्रकारेणाघवदनरूपान्मृत्योः सकाशात् भगवान् वत्सान् बालकांश्च रक्षित्वा सरित्पुलिनं यमुनान्तस्तटमानीयाब्रवीत् ॥ ४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अधुना त्रयोदशेऽध्यायेविधिकृतवत्सवत्सपहरणं आब्दं कृष्णेन तावत्तादृशवत्सपादिरूपधारणं चोच्यते यद्यस्मात् नूतनयसि प्रश्नेन नवीनामिवकरोषि ॥ १ ।। तथाहि सतामिति यदर्थं कृष्णार्थं वाण्यादि येषां तेषां सारग्राहिणां सतां अयमेव निसर्गः स्वभावोऽस्ति तं स्वभावमाह अच्युतस्य साधुवार्त्ता क्षणं क्षणं प्रतिनव्यवत् नवीना भवति अत्र दृष्टांतः विटानांकामिनिप्रसक्तानां स्त्रियाः वार्त्तायथा तद्वत् ।। २ ॥ अवहितः सावधानः सन् स्निग्धस्य गुरौ स्नेहयुक्तस्य ।। ३ ॥ मृत्युरूपात् अघमुखात् सरित्पुलिनं यमुनातटम् ।। ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त्रयोदशेऽहरब्रह्मा वत्सान् पालान् यदा हरिः । मायया सर्वरूपोऽब्दं तदा पूर्ववदाचरत् ॥ १ ॥

हरेः कौमारजं कर्म बालास्तत्पौगण्डके व्रजे प्रोचुरिति यदुक्तं तत्र कारणबुभुत्सया भूयोऽपि राजा तदेवापृच्छदित्याह सूतः । इत्थमिति । हे द्विजाः, यादवदेवः श्रीकृष्णस्तेन दत्तः परीक्षित्, इत्थं विचित्रं, स्वरातुः स्वपरित्रातुः कृष्णस्य, स्वभर्तुरिति पाठे स्वप्राणधारकस्येत्यर्थः । चरितं श्रुत्वा, येन श्रवणेन नितरां गृहीतं वशीकृतं चेतो यस्य तथाभूतः सन्, भूयः पुनः अपि, पुण्यं पुण्यावहं, तदेव कौमारजं पौगण्डके प्रोचुरित्येतदेव, वैयासकिं व्यासात्मजं शुकं, पप्रच्छ ॥ १ ॥ प्रश्नप्रकारमेवाह । ब्रह्मन्निति । हे ब्रह्मन्, कालान्तरे कृतं कौमारावस्थायां विहितं कर्म, तत्कालीनं पौगण्डकालीनं, कथं भवेत् । पौगण्डे ज्ञात्वा कथमूचुरित्यर्थः । एवं सामान्यतयोक्त्वा किं तदित्याकाङ्क्षायां विशेषतः स्पष्टमाह । कौमारे, हरिकृतं यच्चरित्रं, तत् अर्भकाः, पौगण्डके जगुः, एतत् इति संबन्धः । तत्कारणं वदेति प्रश्नार्थः ॥ २ ।। तदिति ॥ हे गुरो, हे महायोगिन्, तत्तत्कारणं, मे मम, मह्यमित्यर्थः, ब्रूहि । कुतः, एतच्छ्रोतुं परं कौतूहलं मम महानुत्साहो भवतीत्यर्थः । अत्र मम त्वेवं प्रतिभातीत्यभिप्रायेणाह । एतत् कारणं, हरेः माया आश्चर्यशक्तिः एव, नूनं भवति । अन्यथा न, प्रकारान्तरेण न घटते इत्यर्थः ॥ ३ ॥ आत्मनः कृतार्थतामाविष्कुर्वन् भगवत्कथां स्तौति । वयमिति । हे गुरो, क्षत्रबन्धवः अपि, वयं लोके, धन्यतमाः कृतार्थाः एव । कुतः यद्यतः, पुण्यं पवित्रतायाः सुकृतस्य वाऽऽपादकं, कृष्णकथामृतं,मुहुः त्वत्तः, पिबामः । अधन्यानां नैवं घटेतेति भावः ।। ४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पूर्वं सृष्टिक्रमोल्लेखाज्जीवन्मुक्तिर्निरूपिता । अध्यायेऽस्मिन् योगविधिरुक्तः सोंऽशेन दर्श्यते ॥ १ ॥

सतामयमिति : १०.१३.२.

परस्य पुंसश्चरितं परस्याः संसर्गतो यत्प्रकृतेरुपात्तम् । अतोऽत्र युक्तो मुनिना प्रदिष्टा स्त्रिया विटानामिति योपमा सा ॥ २॥

शृणुष्वेति : १०.१३.३.

यद्यप्यस्ति निगूढदुर्घटपथो योगप्रकारस्तथाप्याख्येयो मतिमद्भिरत्र सततं शिष्याय जिज्ञासवे ।
शास्त्रार्थं यदुवाच भूपतिमृषिः प्रोत्साहनापूर्वकं तत्रापि प्रतिभाति यो नृपकृतः प्रश्नः स योगार्थकः ॥ ३ ॥

नैवं चेद्राजसाधारणकृतविविधप्रश्नकुक्षिस्थितैकप्रश्नोऽसावप्यलं तच्छ्रवणसमसमाधिः कुतोऽभूच्छुकस्य ।
गुह्यत्वं चात्र किं वाऽद्भुततरभगवच्चेष्टितान्तर्गतेऽस्मिन्नेवर्षिर्यत्तथोक्त्याऽवददिति सुधियः साधु पश्यन्त्वनीर्ष्यम् ॥ ४ ॥
(युग्मम्)

आदौ योगविधिस्ततोऽद्भुतकृतिः सिद्धिस्ततस्तद्बलात् कार्यं गोकुलरञ्जनं बहुविधान्यादाय रूपाण्यलम् ।
स्वार्थं तत्र च योगसूत्रमननं कर्तव्यमेवं सति प्राप्तेशाद्यपदः श्रुतीडितगतिः साक्षी स एकस्ततः ॥ ५ ॥

ईदृगर्थक्रमोऽध्याये द्वितीये भाति दृश्यताम् । अविस्तरं तदुद्बोधि किञ्चिन् किञ्चित् प्रकाश्यते ॥ ६ ॥
(युग्मम्)

लब्ध्वा श्रीशप्रसादं निरुपमसुखदं भर्त्सयित्वाऽन्तकाहिं बाह्यान्तर्ध्वंसिताघा भवभुवि विहरन्त्येव ये पुण्यपूर्णाः ।
तेषां श्रीशेन साकं विहरणमुचितं भोग्यभोगोऽपि सौख्यादेतद् व्याख्यातमत्र व्रजजनशिशुभिः साच्युतारब्धभोज्यैः ॥ ७ ॥

अन्तकाहिहतिताक्ष्यसदृशैर्योगवद्भिरमृतादनकामैः । हृत्सरः पुलिनमाश्रयणीयं शुद्धसत्त्वलसितं मृदुनादम् ॥ ८ ॥

गोजातानि प्राणसञ्ज्ञीनि कृत्वा कामं रुद्ध्वा शाद्वले सुप्रदेशे ।
ग्रन्थिं मुक्त्वा यत्ततो योगिभोग्यं भोक्तव्यं तद्भाविताात्मेशरूपैः ॥ ९ ॥

तत्रोत्फुल्ल-हृदब्जकोश-विलसज्ज्योतिर्विलोक्याचिराल्लब्धस्वच्छनिजात्मदृग्भिरमलै—रानन्दमग्नैरिह ।
स्वैरं योगिभिराप्तकामितफलैः स्वस्वाधिकारानुगं तत्तादात्म्यधियैव तद्रससमास्वादो विधेयो मुदा ॥ १० ॥

तदीयहृदयोल्लसज्जलजमध्यवर्ती परो रमापतिरसावपि प्रकटितात्मलीलाविधिः ।
सहैव गतपातकै-र्निजसमानतामागतैर्भुनक्त्यमृतमादरा–दमलयोगविद्धृत्प्रियः ॥ ११ ॥

चिरतर-समाधिमग्ना भवन्ति ये ह्येवमत्र गोजातम् । तेषामन्तर्वनसुखलुब्धं भवतीति योगयुङ्मार्गः ॥ १२ ॥

अन्तर्दुश्चरगह्वरे किल परा या धीगुहा तत्परास्तस्मिन्नेच्छिकपद्धतिप्रचलिता गोजा महावृत्तयः ।
जाताश्चेत् तदवश्यमेव भवति ज्योतिः सदा गोचरस्तत्रैवेत्यखिलेश्वरोऽपि भगवांस्तत्कर्तुमुत्कण्ठते ॥ १३ ॥

अन्तर्वने बुद्धिगुहाश्रिताया या विस्मृताश्चाखिलपूर्वभावम् । ब्रह्मानुसंधानमितीह युक्तं तासां गवां चानुसमाधिभाजाम् ॥ १४ ॥

ग्रन्थेनैतावता प्रोक्तः समाधिः सविकल्पकः । अम्भोजन्मेति ग्रन्थेन निर्विकल्पोऽल्पमीर्यते ॥ १५ ॥

उत्फुल्लामलहृत्सरोज समनुप्राप्तोदयस्तद्गतो गोजानामवतां च ताः सुखभृतां ब्रह्मानुसंधानकृत् ।
यस्तस्मादमलस्थितेर्विगलिता दृग्दृश्यधीरर्थतः सिद्धं वेति समञ्जसा तदुभयान्तर्धानतः स्वस्थितिः ॥ १६ ॥

दृग्दृश्यत्वधियं विहाय सहसा यो ब्रह्मसंस्थाश्रयो मार्गोऽसौ विधिपूर्वको निगदितः सोऽनुष्ठितो येन सः ।
सर्वात्माऽखिलगोकुलामलक-सद्रूपप्रपञ्चोऽनिशं सर्वैश्वर्ययुतोऽखिलर्धियुगपीत्येतत् स्फुटार्थं तदा ॥ १७ ॥

नान्दनमवगत्य विधिं नान्दनवासं तथा चिदाकाशे । युक्तं युक्त इवेशो दधार सर्वात्मकं रूपम् ॥ १८ ॥

पूर्वं ब्रह्मानुसन्धान-लीनवृत्तिर्यदा तदा । भवत्युपासको-पास्यो-पासनाना-मभिन्नता ॥ १९ ॥
लोके द्रष्टा च दृश्यं चाप्येक एव विभुः सदा । उभयायितमात्मानं कृत्वा व्यक्तीकृता श्रुतिः ॥ २० ॥

सिद्धे योगविधौ भवन्ति सुलभास्ताश्चाखिलाः सिद्धयस्तद्योगान्नहि दुर्घटं किमपि यत्सङ्कल्पमात्रार्थदाः ।
स्वं साक्षित्वमलोपि गोकुलरतौ सत्यामपीति प्रभुर्नानारूपधरश्च गोकुलरतिर्भूत्वा चकार स्फुटम् ॥ २१ ॥

स्वसिद्धिबलनिर्मितं विविधकार्यजातं मयेत्यहर्निशमसङ्गितां हृदि निधाय चालोकयेत् ।
कदाचिदुदितो भ्रमस्तदुपनुत्तये चिन्तयेत् पतञ्जलिमतं त्विदं वलनिरीक्षणादध्वनि ॥ २२ ॥

लसत्सिद्ध्युत्कर्षोऽप्यखिलजनवद्गोकुलरतोऽप्यसङ्गः सन्नेव व्यवहरति योऽद्धा स हि विभुः ।
स विष्णुः स ब्रह्माद्यनुलसित-मास्तम्बमखिलं विभूतिस्तस्यैवेत्यल-मभवदेतत् स्फुटमिह ॥ २३ ॥

एवं नाट्यं नाटयन् योगदृष्ट्याऽप्यन्तर्दृष्ट्यालोकिते त्वेक एव ।
नित्यानन्दी नित्यतृप्तः परात्मेत्येतत् स्पष्टं ब्रह्मदृष्ट्या बभूव ॥ २४ ॥

अध्यस्ताखिलसृष्टिचिन्तनबलात् सत्तत्त्वमस्यादिभिर्वाक्यैश्चोपनिषद्गतै-रविकला-ऽद्वैतस्थिति-र्लभ्यते ।
योगे यद्यपि सैव किन्विह ततः सिद्धिप्रभावोऽधिकस्तत्तेऽख्याय्यखिलं सुगूढमपि यत्पृष्टं त्वया सादरम् ॥ २५ ॥

कालान्तरकृतं कर्म तत्कालिकमिति स्थितिः । योग एवेति विज्ञेयः प्रश्नोत्तरसमन्वयः ॥ २६ ॥
एवं योगोऽत्र बोद्धव्यो दिक्प्रदर्शनदर्शितः । प्राप्तक्रमानुरोधेन बीजव्यक्तिर्विभाव्यताम् ॥ २७ ॥

तथाऽघवदनादिति : १०.१३.४.

योऽघोन्मुक्ततनुः प्रलब्धविमलावस्थः स्वभोग्यं ततस्तेनात्राभ्यवहार्यमुज्ज्वलरसं श्रीशोक्तिसच्चेतसा ।
तीर्थे एव सदागमे श्रुतिसुख-प्रोद्यद्द्विजाल्या रवे स्यात्सौख्यं तु ततोऽस्य यौगिकमिति प्रोचेऽच्युतस्तत्स्थलम् ॥ २८ ॥

कृष्णप्रिया

श्रीशुकाचार्य जी ने कहा—राजन् परीक्षित् ! आपने अत्युत्तम प्रश्न किया । सचमुच राजन् आप परमभागवत पुरुष हो । राजन्, बड़भागी हो क्योंकि आपने बार-बार हरिकथा-लीलामृत का पान किया फिर भी भगवल्लीला विषयक प्रश्न पूछकर भगवल्लीला को नूतन बना रहे हैं ॥ १ ॥ भैया परीक्षित् ! जिन भगवदीयों के श्रवण-मनन-वाणी का व्यसन केवल भगवान् अच्युत की वार्ता ही रहती है ऐसे रसग्राही सज्जन स्वभाव से सदा ही श्री अच्युत प्रभु की गुणगाथा गाते रहते हैं तो भी भगवदीयों को प्रतिक्षण अच्युत कथा नयी सी ही मालुम पड़ती है, जब जब सुने तब उनका ठीक वैसा ही अनुराग खूब बढ़ता जाता है जैसे किसी लम्पट व्यक्ति को बार-बार सुनने और चर्चा करने पर स्त्रियों की चर्चा में नया-नया स्वाद मिलता है ॥ २ ॥ राजन् ! आप सावधानता से श्रवण करे । प्रभु श्रीकृष्ण की यह गुह्य गाथा है आप तो परम भागवत है आप को यह लीला सुनाता हूँ सुपात्र शिष्य को कृपालु गुरुजन गोपनीय बात भी कह देते हैं ॥ ३ ॥ राजन् ! अब सुनिये, भगवान् श्रीकृष्ण ने अघासुर के मुँहरूप मृत्यु से ग्वालबालकों को बचा लिया, पुनः सब बालकों को यमुना तट पर ले आये और कृष्ण कहने लगे ॥ ४ ॥

श्रीभगबानुवाच[1]

अहोऽतिरम्यं पुलिनं वयस्याः स्वकेलिसम्पन्मृदुलाच्छवालुकम्[2] ।
स्फुटत्सरोगन्धहृतालिपत्रिकध्वनिप्रतिध्वानलसद् द्रुमाकुलम् ॥ ५ ॥

अत्र भोक्तव्यमस्माभिर्दिवा रूढं क्षुधार्दिताः[3] । वत्साः समीपेऽपः पीत्वा चरन्तु शनकैस्तृणम् ॥ ६ ॥
तथेति पाययित्वार्भा वत्सानारुध्य शाद्वले । मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा ॥ ७ ॥

कृष्णस्य विष्वक् पुरुराजिमण्डलैरभ्याननाः फुल्लदृशो व्रजार्भकाः ।
सहोपविष्टा विपिने विरेजुश्छदा [4]यथाम्भोरुहकर्णिकायाः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—अहो वयस्याः स्वकेलिसम्पत् मृदुल-अच्छ-वालुकं स्फुटत्-सरोगन्धहृतालिपत्रिक-ध्वनिप्रतिध्वान-लसत् द्रुमाकुलं पुलिनं अतिरम्यम् ॥ ५ ॥ दिवा रूढं क्षुधा अर्दिताः अस्माभिः अत्र एव भोक्तव्यं वत्साः अपः पीत्वा समीपे शनकैः तृणम् चरन्तु ॥ ६ ॥ अर्भाः "तथा इति" वत्सान् पाययित्वा शाद्वले आरुध्य शिक्यानि मुक्त्वा भगवता समं मुदा बुभुजुः ॥७॥ रम्याननाः फुल्लदृशः व्रजार्भकाः कृष्णस्य विष्वक् पुरुराजिमण्डलैः सह उपविष्टाः अम्भोरुहकर्णिकायाः छदाः यथा विरेजुः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भोजनविधानाय पुलिनं स्तोति । अहो इति । स्वीयानां केलीनां संपदो विद्यंते यस्मिस्तत् । मृदुला अच्छा वालुका यस्मिस्तत् । किं च स्फुटद्विकसत्सरः । सरोजबाहुल्येनोपचारतः सर एव विकसदित्युक्तम् । तस्य गंधस्तेन हृता आकृष्टा अलयः

---

[1] अन्यप्रत्यां "श्री भगवानुवाच" पाठो न दृश्यते । [2] बालु—इति कस्यचित् । [3] क्षुधार्दितैः—वंशी. । [4] इवां—वीर. ।

पत्रिणश्च ये तेषां के उदके ध्वनयस्तेषां प्रतिध्वानास्तैर्लसंतो द्रुमास्तैराकुलं व्याप्तम् ।।५।। दिवारूढं वेलातीतेत्यर्थः ।। ६ ।। आरुद्ध्य संरुद्ध्य । शाद्वले हरिततृणे देशे ।। ७ ।। तदा ते विरेजुः । कृष्णस्य विष्वक् परितः पुरुराजिमंडलैर्बहुभिः पंक्तिमंडलैः सह नैरंतर्येणोपविष्टाः । श्रीकृष्णाभिमुखान्याननानि येषां ते । फुल्लदृशो विकसितनयनाः । कमलकर्णिकायाः परितः पत्राणि यथा तथेति ।। ८ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विधानं करणम् । संपदोऽत्र तृणकंटकशर्करारहित्यरूपा ज्ञेयाः । केलीनां क्रीडानाम् । अन्यदाह—पत्रिणः पक्षिणः । 'कं शिरोम्बुनोः' इति विश्वः ॥ ५ ॥ अत्र पुलिने । दिवाऽव्ययं दिवसे । तेन समासः । दिनमारूढम् । एतदर्थंस्वामिचरणैः स्फुटितार्थांतरोक्त्या । हे क्षुधार्दिताः चरंतु भक्षयंतु तृणमित्येकत्वं सामान्याभिप्रायेण ॥ ६ ॥ यच्छ्रीमतोक्तं तत्तथास्त्वित्युक्त्वा अर्भा बालाः ॥ ७ ॥ यदा बुभुजुस्तदेत्यर्थः । परितः सर्वतः । अभ्याननाः प्रेम्णा सर्वसांमुख्यस्पृहावतो भगवतः सत्यसंकल्पता शक्त्यैवोद्गारितेनाचित्यवैभवेन निष्पादितानां मुखाद्यंगानां प्रतिदिक्षु प्रकाशात्कृष्णस्याभिमुखे सन्निहितपंक्तौ वयमेव वर्त्तामहेऽन्ये तु व्यवहितपंक्तिषु पार्श्वतः पृष्ठतश्चोपविष्टा इति सर्व एवाभिमानवंत इत्यर्थः । तेन च "सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखम्" इति श्रुत्यर्थो दर्शितः । छदाः पत्राणि । यथा कंजकर्णिकायाः परितो मिलितीभूय तिष्ठंति तथेत्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हे वयस्या इति मम सखीनां भवतामेव भोजनयोग्यमेतदिति भावः । तदेव दर्शयति स्वेषां केलेः पङ्क्तिभोजननियुद्धादिक्रीडायाः सम्पत् सम्पत्तिर्याभ्यस्तथाभूता मृदुलाच्छवालुका यस्मिन्निति उपवेशसुखं स्फुटत्सरोजगन्धेति भोजनापेक्ष्यं धूपवत्सौगंध्यम् एतेन शरत्कालो लक्ष्यते तथा गीतमिव भ्रमरादिध्वनिविलासः भोजनपात्रं च पद्मपत्रादिकं सुवासितशीतलाच्छजलं च शरत्तापनिवारणार्थघनवृक्षच्छाया चेति सुखभोजनसामग्री दर्शिता तत्र प्रतिध्वानेति पर्यन्तः सप्तम्यन्यपदार्थो बहुव्रीहिः लसद्द्रुमाकुलमिति तत्पुरुषः तयोः कर्मधारयो ज्ञेयः ॥ ५ ॥ हे क्षुधार्दिताः यद्वा यतः क्षुधार्दिता वयं तत्र हेतुः दिवारूढं अघतुण्डान्तःप्रवेशादिना विलम्बापत्तेः यद्वा क्षुधेतिवत्सानां विशेषणम् अतो न निजभोजनसुखार्थमत्र निरुध्य रक्ष्याः किं तु चरन्त्वित्यर्थः । शनकैरिति जलपानेनाप्यायितत्वात् यद्वा अस्मत्सुखभोजनसिद्ध्यर्थमधुना समीपे शनकैश्चरन्तु पश्चाद्यथेष्टं चरिष्यन्त्येव अतोऽत्रैवान्तिके निरुध्यन्तामिति भावः ॥ ६ ।। तथा एवमेवेति तदुक्तं संश्लाध्य इत्यर्थः । शाद्वल इत्यग्रेप्यनुवर्त्तनीयं शाद्वलजेमनं चेति वक्ष्यमाणात्वात् शाड्वलं चात्र सूक्ष्मदूर्वामयत्वमेव ज्ञेयं शिक्यानि स्वस्वगृहात् प्रातरानीतानि मुक्त्वेति अघोदरोन्तःप्रवेशतः पुरस्तादेव तानि क्रीडासौकर्याय वृक्षाग्रे धृतानीति ज्ञेयं किम्वा अघोदरान्तः प्रवेशेऽपि श्रीभगवत्प्रभावेण बालकानामिव तेषामवैकल्यं ज्ञेयम् ।। ७ ।। अभ्याननाः अभि श्रीकृष्णस्य संमुख आननं येषां ते अत एव फुल्लदृशः तच्च तत्प्रीत्यर्थमचिन्त्यशक्त्यैव विपिने श्रीवृन्दावने इति विशेषशोभा योग्यतोक्ता ।। ८ ।।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे वयस्या इति शीघ्रभोजनार्थं स्नेहं जनयति यद्वा, मम सखीनां भवतामेव भोजनयोग्यमेतदिति भावः तदेव दर्शयति—स्वेषां केलेः पङ्क्तिभोजन-नृत्य-नियुद्धादि-क्रीडायाः सम्पत् सम्पत्तिर्याभ्यस्तथाभूता मृदुलाच्छवालुका यस्मिन्नित्युपवेशसुखं स्फुटत्सरोगन्धेति भोजनेऽपेक्षं धूपवत् सौगन्ध्यम्; एतेन शरत्कालो लक्ष्यते । तथा गीतमिव भ्रमरादिध्वनिविलासो भोजनपात्रञ्च पद्मपत्रादिकम् । शरत्तापनिवारणार्थं घनवृक्षच्छाया चेति सुखभोजनसामग्री दर्शिता ।। ५ ॥ हे क्षुधार्द्दिताः ! यद्वा, यतः क्षुधार्द्दिता वयम्; तत्र हेतुः—दिवारूढमघतुण्डान्तःप्रवेशादिना विलम्बापत्तेः । यद्वा, वत्सानां विशेषणम्, अतो न निजभोजनसुखार्थमत्र निरुध्यरक्ष्याः, किन्तु चरन्त्वित्यर्थः । शनकैरिति जलपानेनाप्यायितत्वात् । यद्वा, अस्मत्सुखभोजनसिद्ध्यर्थमधुना समीपे शनकैश्चरन्तु, पश्चाद्यथेष्टं चरिष्यन्त्येव, अतोऽत्रैवान्तिके निरुध्यन्तामिति भावः ।। ६ ॥ तथा एवमेवेति तदुक्तं संश्लाघ्येत्यर्थः । शाद्वले—शरत्कालीन-श्रीवृन्दावन-स्वभाव-सम्पत्तेर्हरिते तृण-प्रदेशे, आरुध्य सम्यक् रुद्धा । शाद्वल इत्यग्रेऽप्यनुवर्त्तनीयम्, (भा० १०।१४।६०) 'शाद्वलजेमनञ्च' इति वक्ष्यमाणत्वात्, यद्वा, शाद्वलान्तिके जेमनं शाद्वलजेमनमिति मध्यपदलोपः । प्रायो बालुकामयप्रदेश एव वक्ष्यमाणतद्भोजनपात्रापेक्षणात् । एवं सति शाद्वल इत्यस्य पूर्व्वनैवान्वयः । शिक्यानि स्वस्वगृहात् प्रातरानीतानि । मुक्त्वेत्यघोदरान्तःप्रवेशेऽपि श्रीभगवत्प्रभावेण बालकादीनामिव तेषामप्यवैकल्यात्; यद्वा, शिक्यानि वृक्षादौ न्यस्य स्वयमेव तदुदरे ययुः, (भा० १०।१२।२४) 'करताडनैर्ययुः इत्युक्तत्वात् ।।७।। अभ्यानना श्रीकृष्णाभिमुखा अतएव फुल्लदृश इति सर्व्वेषामेव श्रीभगवन्मुखावलोकनं तथा तेषां प्रीत्यर्थं सर्व्वाभिमुखत्वेन श्रीभगवतोऽपि निजैश्वर्यविशेषप्रकटनं ज्ञेयम् । विपिनेऽपि विशेषतो रेजुरशोभन्तः, यद्वा, विपिने श्रीवृन्दावन इति विशेषशोभा योग्यतोक्ता ।। ८ ।।

श्रीसुदर्शनसूरिकृतशकपक्षीयम्

स्वसङ्कल्पैः सम्पद्यस्येति पृथक् पदम् एकपद्येति स्वकेलिसम्पत्त्यर्थं मृदुला अच्छा वालुका यस्य तत्स्फुटन्ति यानि सरांसि कमलानि तेषां गन्धेन हृता येऽलयः पत्रिकाः तेषां ध्वनिना लसन्तो ये द्रुमाः तैर्व्याप्तं द्रुमाकुलम् इति पृथक् पदं पुलिनविशेषणं द्वयं

ज्ञेयम् ।। ५ ।। दिवा इत्यव्ययम् दिनमारूढमित्यर्थः ।। ६ ।। आरुध्यैकीकृत्य ।। ७ ।। कृष्णस्य विष्वक् सर्वतः पुरुराजीनि मण्डलानि तैः सह उपविष्टाः व्रजार्भकाः विपिने विरेजुः छदाः पात्राणि वेति ।। ८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पुलिन एवाशिशिषामुत्पादयितुं तत्स्तौति–अहो इति । हे वयस्याः ! स्वीयानां केलीनां सम्पदो यस्मिन् मृदुला अच्छा वालुका यस्मिन् स्वकेलिसमृद्ध्यर्थं मृदुला वालुका यस्मिन्निति वा स्फुटद्विकसत्सरः सरोरुहबाहुल्यादुपचारात्सर एव विकसदित्युक्तं तस्य गन्धेन हृता आकृष्टा अलयः पत्रिणश्च तेषां के उदके ध्वनयः तेषां प्रतिध्वानास्तैर्लसन्तो द्रुमास्तैराकुलं व्याप्तम् ॥ ५ ॥ अत्र अत्रैव दिवा दिनं रूढं प्रवृद्धं भोजनवेलातीतेत्यर्थः । क्षुधार्दिता वत्सा अपः पीत्वा अत्र समीप एव शनकैस्तृणं चरन्तु अदन्तु ॥ ६ ॥ तथैवास्त्वित्युक्त्वा अर्भा बालाः वत्सानपः पाययित्वा शाद्वले तृणहरितदेशे वत्सान् संरुध्य भगवता सह शिक्यानि पर्य्युषितान्नग्रन्थीन् मुक्त्वा बुभुजुः ।। ७ ।। तदा ते रेजुः, कथम्भूताः ? कृष्णस्य विष्वक् परितः बहुभिः पङ्क्तिमण्डलैः सह नैरन्तर्य्येण उपविष्टाः कृष्णाभिमुखान्याननानि येषां ते फुल्लदृशो विकसितनयना यथा कमलकर्णिकायाः परितः स्थितानि दलानि तद्वत् ।। ८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अभ्याननाः श्रीकृष्णसम्मुखमुखा इत्यर्थः । अन्यथा फुल्लदृक्त्वं न स्यात् अचिन्त्या शक्तिश्चेयम् ।। ८ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ ब्रह्ममोहनलीला-कथनोपक्रमप्राप्तभगवद्वन्यभोजनलीलां दर्शयति—कृष्णस्य विष्वगित्यादि। विष्वक् सर्वतः कृष्णस्याभ्यानना अभिमुखमाननं येषां तथाभूताः सन्तः पुरुराजिमण्डलैः पुरवो बह्व्यो या राजयः श्रेणयस्तासां मण्डलैर्मण्डलाकारनानापङ्क्तिभिरुपविश्य व्रजार्भका रेजुरित्यन्वयः । अन्तर्मण्डलमेकम्, तद्बहिरन्यत्तद्बहिरन्यदिति क्रमेण बहूनि राजिमण्डलानीति मन्तव्यम् । फुल्लदृशः – ममैवायं सन्मुख इति मन्यमानाः सर्व एव हर्षोत्कर्षेण प्रफुल्लनयनाः, एतेन भगवतः श्रीकृष्णस्य वस्तुस्वभावादव्यवहितत्वमनावृतत्वं सर्वाभिमुखत्वञ्च, व्यापकत्वात् सहोपविष्टा इति च सर्वेषां निकट एवोपविष्टत्वात्तथात्वम् ॥८–१०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कृष्णस्येत्यादि । अभ्यानना अभिमुखमाननं येषाम्, वस्तुमहिम्ना श्रीकृष्ण एवाभिमुखः सर्वेषाम्, ते तु तथा न जानन्ति, तेषां मते ममैवायमभिमुख एष इति । वस्तुमहिमा तु (गी० १३–१४) "सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्" इति प्रत्यङ्गस्यैव व्यापकत्वरूपः ।। ८–१० ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भोजनार्थं तदुचितं स्थलं स्तौति – अहो इति । स्वकेलीनां बहुपंक्तिमद्भोजनक्रीडानां सम्पदो यत्र तदिति स्थानविस्तीर्णत्वं मृदुला अच्छा वालुका यत्र तदित्युपवेशसुखं प्रफुल्लबहुलसरोजवत्वात् स्फुटतः सरसः एव गन्धेन हृता आकृष्टा अलयः पत्रिणश्च येषां के उदके ध्वनयस्तेषां प्रतिध्वनास्तैर्लसन्तो द्रुमास्तैराकुलं व्याप्तमिति भोजनापेक्षणीयधूपादिसौरभ्यवीणादिवाद्यसुवासितशीतलजलस्निग्धच्छायादिसामग्री दर्शिता ।। ५ ।। दिवारूढं दिवाकर ऊर्द्ध्वाकाशमारूढ इत्यर्थः ॥ ६ ।। शाद्वले हरिततृणबहुलदेशे आरुद्ध्येति तेषां तत्तृणलोभादेवान्यत्र गमनासाध्र्यमननात् ।।७।। तेषां भोजनोपवेशपरिपाटीमाह–कृष्णस्य विष्वक् परितः पुरुराजमण्डलैः "सुपां सुप" इति तृतीया बहुषु पङ्क्तिमण्डलेष्वित्यर्थः । अभ्याननाः प्रेम्णा सर्वसाम्मुख्यस्पृहावतो भगवतः सत्यसङ्कल्पता शक्त्यैवोद्भावितेन अचिन्त्यवैभवेन निष्पादिता मुखाद्यङ्गानां सर्वदिक्षु प्रकाशात् कृष्णस्याभिमुखे सन्निहितपङ्क्तौ वयमेव वर्त्तामहे अन्ये तु व्यवहितपङ्क्तिषु पार्श्वतः पृष्ठतश्चोपविष्टा इति सर्व एवाभिमानवन्त इत्यर्थः । तेन च "सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्" इत्यर्थो दर्शितः सह नैरन्तर्य्येणोपविष्टाः छदाः पत्राणि यथा कमलकर्णिकायाः परितो मिलतीभूय बहुपङ्क्तिषु तिष्ठन्ति तथेत्यर्थः ।। ८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ससखः भोजनं कर्त्तुं पुलिनं स्तौति–अहो इति । भो वयस्याः ! स्वीयानां बालयोग्यानां केलीनां सम्पदो विद्यन्ते यस्मिन् तत् मृदुला अच्छा वालुका यस्मिन् तत् स्फुटत् स्वगतसरोरुहद्वारा विकसत् यत् सरस्तद्गन्धेन हृतानामलीनां भ्रमराणां पत्रिणां पक्षिणां च के उदके ध्वनयस्तेषां प्रतिध्वानस्तैर्लसन्तो ये द्रुमास्तैराकुलम् व्याप्तम् ॥५॥ भोजनवेलातिक्रममालक्ष्याह–दिवारूढमिति । अहो दिवारूढं वेलातीताऽतस्तस्मादस्माभिरत्रोक्तगुणयुक्ते पुलिने भोक्तव्यम् वत्सा अपि क्षुधार्दिताः इति योज्यम् ॥ ६ ॥ अर्भाः बालाः तथेति श्रीकृष्णाज्ञां स्वीकृत्य शाद्वले हरिततृणदेशे आरुध्य संरुध्य भगवता समं सह बुभुजुः ॥ ७ ॥ तदा विपिने वने मातृ-

पित्रादिनिरपेक्षस्वेच्छकबालविहारस्थाने कृष्णस्य विष्वक् परितः पुरुराजिमण्डलैः पङ्क्तिमण्डलैः सह नैरन्तर्येणोपविष्टाः अभ्याननाः श्रीकृष्णाभिमुखाः फुल्लदृशः विकसितनेत्राः विरेजुः यथाम्भोरुहकर्णिकायाः परितश्छदाः दलानि तद्वत् ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

सजग्धियोग्यं स्थलं स्तौति अहो इति। स्वकेलीनां बहुपङ्क्तिकभोजनक्रीडानां सम्पदो यत्र तदिति स्थलस्य विस्तीर्णत्वमुक्तं, मृदुलेत्युपवेशसौख्यं विकचबहुपद्मशालित्वात् स्फुटतो विकशतः सरसो गन्धेनाहृता आकृष्टा अलिनः पत्रिणश्च तेषां के जले ध्वनयस्तेषां प्रतिध्वानास्तैर्लसन्तो द्रुमास्तैराकूलमिति सजग्ध्यवेक्ष्य धूपादिसौरभ्यवीणादिवादित्रशीतलछायादिसम्पत्तिर्दर्शिता ॥ ५ ॥ दिवारूढमिति मध्याह्नमभूदित्यर्थः । ६ ॥ शाद्वले हरिततृणप्रचुरे देशे आरुध्येति तत्तृणलोभेन ततोऽन्यत्र गमनामननात् ॥ ७ ॥ तेषां सजग्ध्युपवेशपरिपाटीमाह– कृष्णस्य विष्वक् परितः पुरुराजिमण्डलैर्बहुषु पङ्क्तिमण्डलेषु व्यत्ययाबहुलमिति तृतीया। तस्याभ्याननाः व्रजार्भकाः सह नैरस्तर्येणोपविष्टा विरेजुः, अभ्यानना इति तत्प्रेमवश्यतया सर्वसाम्मुख्यमिच्छति कृष्णे तदिच्छानुगतया सत्यसङ्कल्पतया तन्मुखाद्यङ्गानां सर्वदिक्षु प्रकाशात् तेन च—

"सर्वतः पाणिपादस्तत् सर्वतोक्षिशिरोमुखम्। सर्वतः शक्तिमल्लोके सर्वमावृत्य तिष्ठती"ति ॥

श्रुत्यर्थः प्रत्यक्षोऽभूत्, तत्र दृष्टान्तः यथाम्भोरुहकर्णिकायाश्छदाः पत्राणि परितो मिलितानि भूत्वा तदाभिमुख्येन बहुषु पङ्क्तिमण्डलेषु तिष्ठन्ति तद्वत् ॥ ८ ॥

श्रीसुबोधिनी

अहोतिरम्यमिदं पुलिनमतोत्रास्माभिर्भोक्तव्यमिति, **वयस्या** इति स्नेहेन सम्बोधनं, **स्वस्य केलेः** क्रीडा तत्र या **सम्पन् मृदुलाच्छवालुका**रूपता सा वर्तते यत्र तस्मादत्र क्रीडापि कर्तुं शक्यते भोक्तुं च, अन्येप्यस्मिन् पुलिने गुणाः सन्तीत्याह **स्फुट**न्ति यानि **सरोरुहा**ण्यत्यन्तं निबिडतया स्थितानि **सरः**शब्देनैवोच्यन्ते, अतः **स्फुटद्** यत् **सर**स्तस्य **गन्धेन हृता** वशीकृता **अलयो** भ्रमराः **पत्रिणः** पक्षिणश्च तेषां **ध्वनि**स्तस्य यत् **प्रतिध्वानं** प्रतिशब्दस्तेन **लसन्तो** ये **द्रुमा**स्तै**राकुलं** व्याप्तं, तत्रत्यानि पुष्पाणि फलानि **च** पुलिने पतन्तीति ॥ ५ ॥ **अत्रैव भोजने** हेतु**र्दिवारूढ**मिति, महद् दिनं जातं **क्षुधा च** सर्वे पीडिताः, अत एव **वत्साः समीपेपः पीत्वा शनकैस्तृणं चरन्तु** ।।६।। एवं भगवतोक्ता बालास्तथैव कृतवन्त इत्याह **तथेति, अर्भा वत्सान् पाययित्वा शाड्वल** उत्तमतृणवति देश **आरुह्या**रोहं कारयित्वा स्वयं **शिक्यानि मुक्त्वा भगवता समं बुभुजुः** ॥ ७ ॥ तेषां भोजनार्थमुपविष्टानां प्रकारमाह **कृष्णस्येति, विष्वक** परित आवरणवत् स्थिताः **पुरूणि** पङ्क्ति**मण्डला**नि मण्डलत्वाकारेण पौर्वापर्येणोपविष्टाः सर्व एव भगवत्सम्मुखा अत एव **फुल्लदृशो व्रजबालकाः सहैकदैवोपविष्टा विपिने**रण्ये तत्रान्यो लौकिको न पश्यतीति **वि**शेषेण **रेजुर्यथा छदाः** पत्राण्य**म्भोरुहकर्णिकायाः** परितो राजन्ते ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भोजनविधानार्थं तद्योग्यस्थलं स्तौति—अहो इति। तेषामपि सम्मतिं सूचयन् सम्बोधयति—वयस्या इति। इदं पुलिनमतिरम्यमतिमनोहरम्, तत्रापि अहो आश्चर्यजनकम्। मनोहरत्वे हेतूनाह—स्वेत्यादि। स्वीयानां केलीनां बहुपङ्क्तिमद्भोजननियुद्धादिक्रीडानां सम्पदो विद्यन्ते यत्र तत्। मृदुला अच्छाः स्वच्छा वालुका यस्मिन् तत्। स्फुटत् विकसत् सरः सरोजबाहुल्येनोपचारतः सर एव विकसदित्युक्तम्, तस्य गन्धेन हृता आकृष्टा ये अलयः पत्रिणः पक्षिणश्च तेषां के उदके ध्वनयस्तेषां प्रतिध्वानास्तैर्लसन्तो ये द्रुमाः तैराकुलं व्याप्तम् ।।५।। क्षुधाऽर्दितैः पीडितैरस्माभिरत्रैव भोक्तव्यम्। क्षुधापीडायां हेतुमाह—दिवारूढमिति। भोजनवेलातीतेत्यर्थः। वत्साः अपः जलं पीत्वा समीपे शनकैस्तृणं चरन्तु ॥ ६ ॥ 'तथास्तु' इत्युक्त्वा अर्भा गोपबालाः वत्सान् जलं पाययित्वा शाद्वले हरिततृणप्रदेशे आरुध्य संरुध्य शिक्यानि मुक्त्वा मुदा हर्षेण भगवता समं सह बुभुजुरित्यन्वयः ॥ ७ ॥ कृष्णस्य विष्वक् परितः पुरुराजिमण्डलैः बहुपङ्क्तिमण्डलैः सह नैरन्तर्येण विपिने उपविष्टा व्रजार्भका रेजुरित्यन्वयः। अभ्यानना भगवतोऽभिमुखान्याननानि येषां ते 'सर्वतःपाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्' इति श्रुत्यनुसारेण भगवतैव तेषां कृपया सर्वतोमुखं प्रदर्शितमिति ज्ञेयम्। अत एव भगवन्मुखदर्शनेन फुल्लदृशः विकसितनयनाः। 'बालान्तरपृष्ठत उपविष्टानां भगवत्सम्मुखता न स्यात्' इत्याशङ्क्य तदुपवेशनप्रकारं सदृष्टान्तमाह यथाऽम्भोरुहकर्णिकायाः सर्वतश्छदाः पत्राणि तिष्ठन्तीति तथेति ॥ ८ ॥

अन्वितार्थप्रकाशिका

अहो इति ॥ हे वयस्याः! अहो इदं पुलिनमतिरम्यमतिमनोहरं सन्धिरार्षः। यतः स्वीयानां केलीनां बहुपङ्क्तिमद्भोजनानि युद्धादिक्रीडानां सम्पदो विद्यन्ते यत्र तत् इति स्थानविस्तीर्णत्वं मृदुला अच्छाः स्वच्छा वालुका यस्मिन् तत् इत्युपवेशनसुखम्। स्फुटत् विकसत्सरः सरोजबाहुल्येनोपचारतः सर एव विकसदित्युक्तम्। तस्य गन्धेन हृता आकृष्टाः ये अलयः पत्रिणः

पक्षिणश्च तेषां के उदके ध्वनयस्तेषां प्रतिध्वानास्तैर्लसन्तो ये द्रुमाः तैराकुलं व्याप्तम् इति भोजनसमयापेक्षणीयविषयसम्पत्तिः ॥५॥ अत्रेति ॥ क्षुधार्दितैः पीडितैरस्माभिरत्रैव भोक्तव्यम् । यतः दिवा दिनमपि आरूढम् अधिकं व्यतीतं भोजनवेलातीतेत्यर्थः । क्षुधार्दिता इति पाठे यतो वयं क्षुधार्दिताः दिवा चारूढम् अतोऽस्माभिरत्रैव भोक्तव्यम् । वत्साः अपः जलं पीत्वा समीपे शनकैस्तृणं चरन्तु ॥६॥ तथेति ॥ तथाऽस्त्वित्युक्त्वा अर्भा गोपबालाः वत्सान् जलं पाययित्वा शाद्वले हरिततृणप्रदेशे आरुध्य संरुध्य शिक्यानि मुक्त्वा मुदा हर्षेण भगवता समं सह बुभुजुः बुभुजिरे । तङ्भाव आर्षः । शिक्यानि अत्रोदरे प्रवेशात्पूर्वमेव वृक्षेषु स्थापितानि क्रीडासौकर्यार्थमिति ज्ञेयम् ॥ ७ ॥ कृष्णस्येति ॥ कृष्णस्य विष्वक् परितः पुरुराजिमण्डलैर्बहुपङ्क्तिमण्डलैः सह नैरन्तर्येण विपिने उपविष्टाः अभ्यानना भगवतोऽभिमुखान्याननानि येषां ते भगवतैव सर्वतोमुखप्रदर्शनं ज्ञेयम् । तत्प्रभावादेव बालाः स्वं स्वमात्मानं श्रीकृष्णनिकटस्थं मेनिरे । अतश्च "सर्वतः पाणिपादं तत्" इति श्रुत्यर्थो दर्शितः । अत एव फुल्लदृशः विकसितनयना व्रजार्भकाः यथाऽम्भोरुहकर्णिकायाः सर्वतश्च्छदाः पत्राणि तिष्ठन्ति तथा रेजुः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भोक्तुकामः पुलिनं प्रशंसन्नाह अहो इति अहो हे वयस्याः इदं पुलिनम् अतिरमणीयं वर्त्तते कथंभूतं तत् स्वकीया अस्मदीयायाः केलयस्तासाम् उपयोग्याः संपदो यस्मिंस्तत् मृदुला अछा स्वच्छा वालुका यस्मिंस्तत् स्फुटत्प्रफुल्लैः पद्मैर्विकसितं सरस्तडागनिकरस्तस्य गंधेन हृता आकृष्टा अलयो भ्रमराः पत्त्रिणः पक्षिणश्च तेषां के जले ये ध्वनयः शब्दास्तेषां प्रतिध्वनैः प्रतिशब्दैर्लसंतो ये द्रुमास्तैराकुलं व्याप्तम् ॥ ५ ॥ अतः अत्र पुलिने दिवारूढं वेलागता अस्माकं भोजनसमयोगत इत्यर्थः अपो जलानि ॥ ६ ॥ अर्भाः बालाः शाद्वले हरिततृणवति स्थले आरुध्य सम्यक्रुद्ध्वा ॥ ७ ॥ हरेर्भोजनसमयशोभां वर्णयति कृष्णस्य विष्वक् सर्वतः पुरूणि बहूनि राजीनां पक्तीनां यानि मंडलानि तैः कृत्वा सहोपविष्टाः एकत्रासीनाः हरेरभिमुखानि आननानि मुखानि येषां फुल्लद्दृशः विकसितनेत्राः यथा पद्मकर्णिकायाः परितः छदाः पत्राणि तथा विपिने वने विरेजुः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमापृष्टो भगवान् बादरायणिस्तं प्रत्याहेत्याह सूतः ॥ इत्थमिति ॥ सः बादरायणिः तु, इत्थं पृष्टः, राज्ञेति शेषः । अत एव, तेन राज्ञा संस्मारितश्चासावनन्तोऽपरिच्छिन्नवैभवो भगवांस्तेन हृतान्यखिलानीन्द्रियाणि यस्य सः, तथाभूतोऽपि, पुनः शनैः, कृच्छ्रात् कथंचित्, लब्धा बहिर्दृशिर्बाह्यदृष्टिर्येन तथाभूतः सन्, भागवतोत्तमोत्तमं, तं राजानं प्रति, आह स्म । पाठान्तरे हे शौनक ॥ ५ ॥ प्रश्नोत्तरं विवक्षुस्तावत् प्रश्नमभिनन्दति ॥ साध्विति ॥ हे भागवतोत्तम, हे महाभाग, त्वया साधु यथा तथा, पृष्टं. कुतः । यद्यस्मात्, ईशस्य कथां, मुहुः शृण्वन्नपि, नूतनयसि नवीनां करोषि ॥ ६ ॥ युक्तमेवैतदित्याह ॥ सतामिति ॥ योऽच्युत एवार्थो विषयो येषां तानि वाणीश्रुतिचेतांसि येषां तथाभूतानामपि, सारभृतां सारग्राहिणां, सतां साधूनां, अयं निसर्गः स्वभाव एव । कोऽसावित्यत आह । विटानां स्त्रैणानां, स्त्रियाः कामिन्या वार्त्ता इव, प्रतिक्षणम् अच्युतस्य वार्त्ता, साधु यथा तथा, नव्यवत् नवीनेव सर्वदा भवतीति यत्, एष निसर्गः ॥ ७ ॥ शृणुष्वेति ॥ हे राजन्, गुह्यम् अपि, यद्यपीदं गोप्यमस्ति तथापीत्यर्थः । ते तुभ्यं वदामि, तत् अवहितः सन्, शृणुष्व शृणुष्वेत्यभिमुखीकरणम् । स्निग्धस्य स्वस्मिन्नतिशयितप्रीतिमतः, शिष्यस्य गुरवः, गुह्यम् अपि, ब्रूयुः उत, कथयेयुरेवेत्यर्थः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अत्र भोक्तव्यमिति : १०.१३.६.

नित्यतृप्तोऽप्यहं कुर्वे भक्तानां तृप्तिहेतवे । सदाचारोपमाचारमितीशः क्षुद्वचोऽब्रवीत् ॥ २९ ॥

तथेतीति : १०.१३.७.

कृत्वैव सर्वगोजाना-मन्नोदकसुखासिकाम् । ततः स्वयमहं भोक्ष्ये भोज्यमेतदधात्स्फुटम् ॥ ३० ॥

कृष्णस्येति : १०.१३.८.

ध्यात्वा स्वाभिमुखं रमेशमनिशं पूर्वं ततश्चार्पितं कृत्वान्नं सखिभिर्भुनक्ति बहुभिर्योऽस्मिन् स्तुतो बुद्धिमान् ।
भुक्तिः सैव परागमाश्रितपदा नित्याद्यनुक्तोऽप्यसावेवान्यस्त्वघ एव केवलमुगित्याबोधि भुक्तिक्रमात् ॥ ३१ ॥

कृष्णप्रिया

नन्दनन्दन कहने लगे ! अरे प्यारे मित्रो ! देखिये श्रीयमुना जी का यह पुलिन परम रमणीय है। देखो देखो बाबा। यहाँ की बालू कितनी स्वच्छ और मृदु है। हमारे खेलने की तो यहाँ सारी सामग्री सुलभ है। यहाँ खिले हुए कमलों के सौरभ से मतवाले बने भ्रमर गुञ्जन कर रहे हैं और यहाँ मनोहर पक्षियों के मधुर कलरव से सारे तरुवर प्रतिध्वनित हो उठे हैं इन

शोभा भरे वृक्षों से यह तट-यह वन शोभायमान बन गया है ॥ ५ ॥ देखो भैया दोपहर हो रहा है, अब हम लोगों को यहाँ भोजन कर लेना चाहिये क्योंकि हम सब लोग क्षुधार्त हो गये है । बछड़े जल-पी पीकर समीप ही धीरे-धीरे कोमल तृण चरते रहे ॥ ६ ॥ बालकों ने भगवान् का प्रस्ताव स्वीकार कर लिया, बछड़ों को जल पिला घास चरने के लिये गोचर भूमि में कर दिया और अपने-अपने छींके खोल भगवान् के साथ सानन्द भोजन करने लगे ॥ ७ ॥ भगवान् श्रीकृष्ण ने मध्य में आसन लिया। सब ग्वाल बाल कृष्ण के बायें दाहिने हाथ से वर्तुलाकार में बहुत सी पंक्तियाँ बना ली और एक-से-एक सटकर सब बैठ गये। ग्वाल इस प्रकार भगवान को घेरा लगाकर इस प्रकार बैठे जिससे सबके मुँह कृष्ण के सन्मुख रहे, सब व्रज बालकों के नयन खिल उठे थे। वन भोजन के अवसर पर भगवान् कृष्ण के साथ बैठे ग्वालबाल ऐसे सुशोभित हो रहे थे मानों कमल की कर्णिका के चारों ओर उसके दल लगे हो ॥ ८ ॥

केचित् पुष्पैर्दलैः केचित् पल्लवैरङ्कुरैः फलैः । शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः ॥ ९ ॥
सर्वे मिथो दर्शयन्तः [1]स्वस्वभोज्यरुचिं पृथक् । हसन्तो हासयन्तश्चाभ्यवजह्रुः सहेश्वराः ॥ १० ॥
बिभ्रद् वेणुं जठरपटयोः शृङ्गवेत्रे च कक्षे वामे पाणौ मसृणकवलं तत्फलान्यङ्गुलीषु ।
तिष्ठन् मध्ये स्वपरिसुहृदो हासयन् नर्मभिः स्वैः स्वर्गे लोके मिषति बुभुजे यज्ञभुग् बालकेलिः ॥ ११ ॥
भारतैवं वत्सपेषु भुञ्जानेष्वच्युतात्मसु । वत्सास्त्वन्तर्वने दूरं विविशुस्तृणलोभिताः ॥ १२ ॥
[2]तान् दृष्ट्वा भयसंत्रस्तानूचे कृष्णोऽस्य भीभयम् । मित्राण्याशान्मा विरमतेहानेष्ये वत्सकानहम्॥ १३ ॥
इत्युक्त्वाद्रिदरीकुञ्जगह्वरेष्वात्मवत्सकान् । विचिन्वन् भगवान् कृष्णः सपाणिकवलो ययौ ॥ १४ ॥
अम्भोजन्मजनिस्तदन्तरगतो मायार्भकस्येशितुर्द्रष्टुं मञ्जु महित्वमन्यदपि तद्वत्सानितो वत्सपान्।
नीत्वान्यत्र कुरूद्वहान्तरदधात् खेऽवस्थितो यः पुरा दृष्ट्वाघासुरमोक्षणं प्रभवतः प्राप्तः परं विस्मयम्॥१५॥
ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान् । उभावपि वने कृष्णो विचिकाय समन्ततः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—केचित् पुष्पैः, केचित् दलैः, केचित् पल्लवैः फलैः अङ्कुरैः शिग्भिः त्वग्भिः च दृषद्भिः कृतभाजनाः बुभुजुः ॥९॥ सर्वे मिथः पृथक् स्वस्वभोज्यरुचिं दर्शयन्तः हसन्तः च हासयन्तः सहेश्वराः अभ्यवजह्रुः ॥ १० ॥ यज्ञभुक् बालकेलिः जठरपटयोः वेणुं च कक्षे शृङ्गवेत्रे, वामे पाणौ मसृणकवलं अङ्गुलीषु तत्फलानि बिभ्रत् स्वपरिसुहृदः मध्ये तिष्ठन् नर्मभिः हासयन् स्वर्गे लोके मिषति स्वैः बुभुजे ॥११॥ भारत अच्युतात्मसु वत्सपेषु एवं भुञ्जानेषु तृणलोभिताः वत्साः अन्तर्वने अन्तः दूरं विविशुः ॥१२॥ भयसंत्रस्तान् तान् दृष्ट्वा भीभयं अस्य कृष्णः ऊचे मित्राणि ! आशात् मा विरमत अहं वत्सकान् इह आनेष्ये ॥ १३ ॥ भगवान् कृष्णः इति उक्त्वा अद्रिदरीकुञ्जगह्वरेषु आत्मवत्सकान् विचिन्वन् सपाणिकवलः ययौ ॥ १४ ॥ हे कुरूद्वह ? यः पुरा खे अवस्थितः प्रभवतः अघासुरमोक्षणं दृष्ट्वा अम्भोजन्मजनिः परं विस्मयं प्राप्तः मायार्भकस्य ईशितुः मञ्जु अन्यत् अपि महित्वं द्रष्टुं तदन्तरगतः तद्वत्सान् इतः च वत्सपान् अन्यत्र नीत्वा अन्तरदधात् ॥ १५ ॥ कृष्णः वत्सान् अदृष्ट्वा ततः एत्य च पुलिने अपि वत्सपान् अदृष्ट्वा समन्ततः वने उभौ अपि विचिकाय ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुष्पैस्तद्दलैः अन्यैश्च पत्रैः कृतानि भाजनानि यैस्ते ॥ ९ ॥ रुचिं स्वादविशेषम् । अभ्यवजह्रुर्बुभुजिरे । सहेश्वराः श्रीकृष्णसहिताः ॥ १० ॥ यज्ञभुगपि तेषु बुभुजे । बालानामिव केलिर्यस्य सः । तदाह । उदरवस्त्रयोर्मध्ये वेणुं बिभ्रद्दधदिति सर्वत्र संबध्यते वाम इति कक्षपाण्योर्विशेषणम् । मसृणं स्निग्धं दध्योदनकवलम् । तदुचितानि बिल्वामलकादिफलान्यंगुलिसंधिषु । कर्णिकेव सर्वाभिमुखो मध्ये तिष्ठन् स्वस्य परित उपविष्टान् सुहृदः स्वैर्नर्मभिः परिहासवाक्यैः । स्वर्गे स्वर्गनिवासिनि जनेमिषत्याश्चर्येण पश्यति सति लोके जनमध्ये बुभुजे ॥ ११–१२ ॥ भीभयं भयहेतुभ्यो भयमस्यापास्य । यद्वा अस्य विश्वस्य भियोऽपि भयं यः श्रीकृष्णः । आशाद्भोजनात् । अस्मिन्पादे अक्षराधिक्यमार्षम् ॥ १३ ॥ अद्रिषु तेषां दरीषु । कुंजेषु लतादिपिहितोदरविवरेषु । गह्वरेषु च ॥ १४ ॥ अंभो जन्मनः पद्माज्जनिर्यस्य स ब्रह्मा तदंतरे तस्मिन्नवसरे गत आगतस्तच्छिद्रं प्राप्तो वा । मंजु मनोहरमन्यदपि महित्वं महिमानं द्रष्टुं तस्य वत्सानितः स्थानात्पुलिनाद्वत्सपांश्चान्यत्र नीत्वा स्वयं तिरोबभूव । प्रभवतः श्रीकृष्णस्य।१५। उभावपि वत्सान्वत्सपांश्चेत्यर्थः । विचिकायान्वीक्षितवान् ॥ १६ ॥

---

[1] स्वां स्वां–इति कस्यचित् । [2] तानदृष्ट्वा भयत्रस्ता–वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अंकुरैर्दूर्वादिभिः । फलैः कारीरादिभिः पत्रादिभिर्भाजननिर्माणं बालानां प्रत्येकापूर्वरचना कौतुकेच्छयेवेति ज्ञेयम् ॥९॥ सहेश्वराः सकृष्णा एव सर्वे स्वस्वभोज्यस्य स्वस्वगृहानीतान्नव्यंजनादेः स्वादं दर्शयंतः स्वीयवटिकशाकरसालादिकं स्वयं किंचिद्भुक्त्वा स्वादनमनुभूय भो सखे कृष्ण भोः श्रीदामन् भोः सुबल पश्यत मदीयवटिकादिकं कीदृशं स्वाद्विति स्वभक्ष्यपात्रादुद्धृत्य कृष्णादीनां हस्तेषु ददानास्तांस्तदास्वादमनुभावयंत इत्यर्थः । हसंतो हासयंत इति जातीमालत्यादिपुष्पाणि वटिकांतरे लक्षितान्यपर्ययित्वा भो सखाय एता अतिस्वादुत्तमा वटिका आस्वादयतेत्युक्तिविश्वासात्सस्पृहं गृहीत्वा तान्भुंजानान्कटूकृतमुखान् दृष्ट्वा हसंतो हासयंतः चकारात्तैः सहर्षकौतुकं ताड्यमानाश्च ॥ १० ॥ अहो गोपभाग्यं यतो यज्ञेऽतिपवित्रतासंपादितान्नं यो भुंक्ते स तेषु बुभुजे इति भावः । ‘चिक्कणं मसृणं स्निग्धम्’ इत्यमरः । तदुचितानि गोपयोग्यानि । अंगुलिबंधनार्हाण्यल्पानीत्यर्थः । विश्वनाथस्तु वामे पाणौ बृहद्दध्योदनग्रासं बिभ्रत् तत्फलानि तत्प्रयोजनीभूतान् क्षुद्रग्रासान्दक्षिणपाण्यंगुलिषु बिभ्रत् मुखप्रवेशयोग्यान्बहून् ग्रासांस्ततः पृथक्कृत्य ग्रहीतुमेव वामे पाणौ बृहत्कवलग्रहणमिति भो भंगाः किं मन्मुखाभिमुखं धावथ सुकुमारं मधु मंगलं पिबत भो वयस्य ब्राह्मणबाल मां किं भृंगैः खादयसि मन्ये ब्रह्महत्यायामपि ते न भयमिति । भो एतद्वनस्थवानरा युष्मासु बुभुक्षुषु जाग्रत्स्वपि मत्प्रियसखानिर्विघ्नं भुंजतेऽतोऽलक्षितमागच्छतेति । तस्य नर्म सत्यसंकल्पताशक्तिलीलाशक्तिभ्यामपि–भोः । स्वामिन्कौतुकार्थं यदि भोजनविघ्नमीहसे तर्ह्यावाभ्यां ब्रह्मा संप्रत्येवानीयत इत्यलक्षितमनुमोदितमिति ज्ञेयम् । बालैः केलिर्मिथोभुक्त्यन्नादानप्रदानभोजनश्लाघनानंदनमयी यस्य स तथा ॥ ११ ॥ कृष्णलीला रूपभायां कांत्यां रतोऽसि यतस्तत एव तुभ्यमिदं गुह्यं वच्मीति ‘वाच्यं श्रद्धालवे तत्त्वम्’ इत्यभिप्रायेणाह–हे भारतेति । अच्युतात्मस्वित्युक्तेर्न तेषां चेतोवत्सविनिवर्तनादिष्वस्तीति ध्वनिः । अंतर्वने वनमध्ये ॥ १२ ॥ भयहेतुभ्यो व्याघ्रादिभ्यः । समास एव ल्यब्विधेरत्र ल्यबनौचित्यं मन्वानोऽर्थांतरमाह—यद्वेति ॥ १३ ॥ पाणौ कवलं पाणिकवलं तेन सह वर्तत इति सपाणिकवलो हस्तगृहीतग्रासः । विचिन्वन् अन्विष्यन् ॥ १४ ॥ अंभोजन्मजनिरिति जडवंश्यत्वात्सचेतनोऽपि जड एव यद्भगवत्यपि स्वमायां ततानेति । ततः पूर्वमेव ब्रह्मण आगतत्वाद्गतशब्दप्रसिद्धार्थत्यागानौचित्याद्वार्थांतरमाह—प्राप्तो वेति । ‘अंतरोऽवसरे छिद्रे’ इति हलायुधः । श्रीकृष्णस्य सकाशात् ॥ १५ ॥ ततस्तत्र वनादिष्वित्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

केचिदिति पुनरुक्त्या पुष्पैरित्यादिभिः प्रत्येकमन्वयं बोधयति अन्यथा समुच्चयोऽपि बुध्येत पुष्पादिभोजनपात्राणां वैचित्रीबालकानां प्रत्येकापूर्वरचनाकौतुकेच्छया स्वस्वरोटिकोदनादियोगवैचित्र्यापेक्षया वा ॥ ९ ॥ पृथक् भोज्यभेदेन रसगन्धादिभेदेन च नानाप्रकारिकां स्वस्वभोज्यस्य रुचिं स्वादुताविशेषं दर्शयन्तः मुखभङ्ग्यादिना साक्षात् कारयन्त इव अतः स्वयं हसन्तः अन्यांश्च हासयन्तः यद्यपि स्वस्वगृहादानीतानि भोज्यादि परीक्षार्थं सर्वेषां सर्वेष्वेव परिवेषितानि तथाऽपि स्वस्वगृहानीतभोज्यानामेव स्वाद्वतिरिक्तं पृथक् पृथक् ज्ञापयामासुर्यदर्थमेव पूर्वदिने मिलित्वा वन्यभोजनाय सङ्क्लृप्तवन्त इति भावः । रुचिदर्शनं च प्रायः श्रीभगवत्स्वीकारार्थमेव अत एव सहेश्वरा इति श्रीभगवानपि तैरेवमिष्टमिष्टं परीक्ष्य किञ्चित् किञ्चित् क्रमशो युगपद्वा समर्प्यमाणं बुभुज इत्यर्थः ॥ १० ॥ अथ बालकैः सह श्रीभगवतो भोजनक्रीडामुक्त्वा तेभ्यो विशेषेण तस्य तामाह—बिभ्रदिति । तत्फलानि मसृणकबलोचितोपकरणानि निम्बुसन्धितलवलीकरीरफलप्रभृतीनि स्वैः असाधारणैः स्वर्गे लोके सर्वेषु स्वर्लोकवासिषु यज्ञभुक् उद्देशमात्रेण समर्पितस्य हविषः कथञ्चित् स्वीकारमात्रेण तद्भुक्तेनोपचर्यमाणोऽपि लौकिकबालवत्केलिर्यस्येति परमाश्चर्येण मिषति पश्यति सति यद्वा अयज्ञभुक् विविधप्रयत्नतो यज्ञभागमपि यो न भुङ्क्ते स बालेषु केलिभोजनमध्ये एव तैरेकैकशः सहसैव वा परीक्ष्यमाणस्य भोज्यस्य स नर्मग्रहणश्लाघननिन्दनभोजनमुखभङ्गीहासनादिक्रीडा यस्य स एवं भोजने सर्वाभिमुखतैश्वर्यविशेषेण तथा वेण्वादिधारणपरिपाटीसहितोर्द्ध्वावस्थानानि बाल्यलीलाविशेषेण च भगवता विशेषप्रकटनं पूर्ववदूह्यम् ॥ ११ ॥ एवमुक्तप्रकारेण अच्युते भगवति आत्मा मनो येषां तेषु तृणैर्लोभिताः । यद्वा, ब्रह्मणा तृणैर्लोभिताः सन्तः श्रीभगवत्साक्षान्नयनाशक्तेः हे भारतेति दुःखेन सम्बोधनम् ॥ १२ ॥ तान् वत्सपान् भयेन वत्सादर्शनजया शङ्कया सन्त्रस्तानुद्विग्नान् अस्य विश्वस्यापि या भीस्तस्या अपि भयं स्वभावत एव सर्वाभयप्रद इत्यर्थः । अतस्तद्वाक्येनैव तेषां भयमपगतमिति भावः । अहमेवैकाकी वत्सान् सर्वानिवेहैवानेष्ये हे मित्राणीति स्नेहं व्यञ्जयन्नाश्वासयति, तस्माद्युष्माकं भोजनादुपरत्या मम महादुःखं स्यादिति बोधयति । अत एव वत्सानां निकटस्थितिभावनाच्च न कोपि तत्सङ्गे गत इति ज्ञेयम् ॥ १३ ॥ आत्मनो वत्सकानिति गोपराजकुमारत्वेन स्नेहविशेषेण चान्यवत्सानामपि तदीयत्वात् विचिन्वन् अन्वेष्टुमित्यर्थः । यद्वा अद्र्यादिषु विचिन्वन् सन् ययौ तत्र तत्र बभ्रामेत्यर्थः । तत्रापि सपाणिकवल एव स्वयं कथम्भूतोपि भगवान् कृष्णः स्वयं भगवानपीत्यर्थः । अहो पश्यत निजजनदयालुतामिति भावः ॥ १४ ॥ प्रभवत इति कर्त्तरि षष्ठी प्रभुणेत्यर्थः । अम्भोजन्मजनिः महापुरुषनाभिकमलाज्जातत्वेन स्वतः सर्वज्ञोपि प्रभुणा तादृशानन्तशक्तियुक्तेन कर्त्रा अघासुरस्यापि मोक्षणं दृष्ट्वा यः परं विस्मयं प्राप्तः सोपि ईशितुस्तच्छब्दप्रथमव्यप-

देशास्पदस्यापि अन्यदपि तत् तादृशं मञ्जु महित्वं द्रष्टुम् अन्विष्टतच्छिद्रः सन्नितः स्थानाद्वत्सान् वत्सपांश्चान्यत्र नीत्वा श्रीभगवदन्वेषणपर्यन्तश्रीवृन्दावनप्रदेशान्तरे स्थापयित्वा स्वयमन्तरधात् चोर इव वत्सान् पुलिनमानिन्ये यथा पूर्वसखं स्वकमिति मायाशये शयाना मे इत्यादिवक्ष्यमाणेभ्यस्तु पुनस्तत्र तत्रैवानीय रक्षितवानिति ज्ञेयं तेषां श्रीकृष्णतुल्यगुणानामपि ब्रह्ममायापरिभवप्रायत्वं भगवद्वन्नरलीलात्वेनैव सम्भवतीति ज्ञेयम् अन्यथा नरलीलत्वासिद्धेः। ननु, यद्येवं प्रकटमाहात्म्यो भगवान् ब्रह्मा च सर्वज्ञः तर्हि कथं विस्मयं प्राप्तः कथं वा पुनः कदर्थनप्रायां परीक्षामिव कृतवान् तत्राह मायामोहनता तद्युक्तस्यार्भकस्य सर्वमोहनार्भकलीलस्येत्यर्थः। तन्मोहनतया मुहुरैश्वर्यज्ञानाच्छादनादिति भावः। प्राक्तनतत्तद्बाल्यलीलामोहनतावदधुनापि वन्यभोजनलीलामोहनतयैव विगतसाध्वसीकृत्य विस्मितीकृत्य च तादृशतदैश्वर्यान्तरान्वेषणाय तथा प्रवर्तितोऽसाविति विवक्षितं कुरूद्वहेति पश्यैतादृशी तद्बाल्यलीलामोहनताया परमज्ञानदृढचित्तं ब्रह्माणमपीत्थं मोहयतीति व्यज्यते ॥ १५ ॥ ततस्तत्पश्चात् चकाराच्छिक्यादीनि च उभावपीति क्वचित् मम विलम्बेनातिदुःखिताः सन्तो मदन्वेषणार्थमेव सखायस्ते भोजनसामग्रीसहिताः कुत्रापि गता इति वत्सपान् अन्यत्रैव गता इति वत्सकानपि अदर्शनमात्रेणैव स्नेहभराक्रान्त्या पूर्णज्ञानात्मनोऽपि विचारतिरोधानादेवमुक्तम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

केचिदिति सर्वैरप्यन्वेति। अत एव पुनरुक्तम् पुष्पादि-भोजनपात्राणां वैचित्री बालकानां कौतुक-स्वभावेन स्व-स्व-रोढिकौदनादि-भोज्य-वैचित्र्यपेक्षया वा ॥ ९ ॥ पृथक् भोज्यभेदेन रसगन्धादिभेदेन च नानाप्रकारकां स्व-स्व-भोज्यस्य रुचिं स्वादुताविशेषं तस्मिन् प्रीतिं वा दर्शयन्तो मुखभंग्यादिना साक्षात्कारयन्त इव, अतः स्वयं हसन्तोऽन्यांश्च हासयन्तः रुचिदर्शनञ्च प्रायः श्रीभगवत् स्वीकारार्थमेव। अत एव सहेश्वरा इति श्रीभगवानपि तैरेव मिष्टमिष्टं परीक्ष्य किञ्चित् क्रमशो युगपद्वा समर्प्यमाणं तथैव बुभुज इत्यर्थः ॥ १० ॥ अथ बालकैः सह श्रीभगवतो (भोजनक्रीडामुक्त्वा विशेषेण तस्य तामाह—बिभ्रदिति। तत्फलानि मसृणानि लवलीशुष्ठिशाकविद्वादीनि। स्वस्य परितो वर्त्तमानानिति सर्वेषामभिमुखतामेव सुसाधयति। स्वैरसाधारणैरिति भोजनविधिविशेषः सर्वः श्रीब्रह्मणः कौतुकाय निजबाल्यकेलिमाधुरीस्वभावादेव वा। स्वर्गे लोके सर्वेषु स्वर्गलोकवासिषु। यज्ञभुगपि लौकिकबालवत् केलिर्यस्येति, परमाश्चर्य्येण मिषति पश्यति सति, यद्वा, अयज्ञभुक् विविधप्रयत्नतो यज्ञभागमपि यो न भुङ्क्ते सः। बालेषु केलिर्भोजनमध्य एष तैरेकैकशः सहैव वा परीक्ष्य समर्प्यमाणस्य भोज्यस्य सनर्म्मग्रहणश्लाघननिन्दनभोजनमुखभंगी हासनादिक्रीडा यस्य सः। एवं भोजने सर्वाभिमुखतैश्वर्य्यविशेषेण तथा वेण्वादिधारणपरिपाट्यूर्द्धावस्थादि बाल्यलीलाविशेषेण च भगवत्ता विशेषप्रकटनं पूर्ववदूह्यम् ॥ ११ ॥ एवमुक्तप्रकारेणाच्युतो भोजनादस्खलितः, यद्वा, अच्युते भगवत्यात्मा मनो येषां तथाभूतेषु भुञ्जानेषु तृणैरग्रेऽग्रे ये वर्त्तमानैर्मृदुलमधुरैर्लोभिताः, यद्वा, यत्र शाद्वले संरुद्धा वत्सानामानन्त्यात्तद्रक्षणे जातेऽपि वत्सपेषु भोजनादनिवर्त्तमानेषु सत्सु क्षुधया तृणैर्लोभिताः, यद्वा, ब्रह्मणा तृणैर्लोभिताः सन्तः—श्रीभगवत् साक्षान्नयनाशक्तेः। हे भारतेति महानन्दसमये महाशोकापाताद्दुःखेन सम्बोधनम्, यथा भरतवंश्यानां तत्पितामहानां श्रीयुधिष्ठिरादीनां तादृशराजसूयोत्सवराज्यभोगादिसुखे वनवासादिदुःखमापतितं तथा। इति श्रीकृष्णैकरसिकेषु रसविशेषाविर्भावाय तदिच्छया प्रायस्तथैव भवतीति भावः ॥ १२ ॥ तान् वत्सपान्, भयेन वत्सादर्शनजेन, यद्वा, वत्साभावेन पित्रादिभ्यो भयेन संत्रस्तान् कम्पमानान् इत्यर्थः, यद्वा, अकारप्रश्लेषेणाभयान् स्वभावतो भय-रहितानपि तदानीं सम्यक्त्रस्तान् दृष्ट्वा, यद्वा, हे अभयेति तेषां भयाभावं सूचयन् श्रीपरीक्षितमाश्वासयति। अस्य विश्वस्यापि या भीस्तस्या अपि भयम्, स्वत एव सर्वाभयप्रद इत्यर्थः। अतस्तद्वाक्येनैव सद्यस्तेषां भयमपगतमिति भावः। अहमेवैकाकी वत्सकान् सर्वानिवानेष्ये। हे मित्राणीति स्नेहं व्यञ्जयन्नाश्वासयति, तथा युष्माकं भोजनादुपरत्या मम महादुःखं स्यादिति बोधयति, अत एव न कोऽपि तत्संगे गत इति ज्ञेयम् ॥ १३ ॥ आत्मनो वत्सकानिति गोपराजकुमारत्वेन स्नेहविशेषेण चान्यवत्सानामपि तदीयत्वाद् विचिन्वन् हेतौ शतृङ्, अन्वेष्टुमित्यर्थः। यद्वा, अद्र्यादिषु विचिन्वन् सन् ययौ—तत्र तत्र बभ्रामेत्यर्थः। ननु कथमेवमेकाकित्वेन गमनादिकं सम्भवेत्? तत्राह—भगवान् परमदयालुः, किञ्च, कृष्णः सर्वचित्ताकर्षकमधुरलील इति सपाणिकवलत्वं कर्त्तव्यं श्रीब्रह्ममोदविशेषार्थं वयस्यवर्गसन्तोषार्थं वा ज्ञेयम् ॥ १४ ॥ अम्भोजन्मजनिरिति नाभिकमलजत्वात् परमाणुग्राह्यत्वं सूचयति। ईशितुर्जगदीशस्य, यद्वा, पितृत्वगुरुत्वादिना निजेश्वरस्य, तथा माया कौतुककापट्यम्, तद्युक्ताभंकस्य, यद्वा, मायया कृपयार्भकस्य सतः, यद्वा, अकारप्रश्लेषेण न विद्यते माया भक्तेषु यस्य, किं वा न तिष्ठति माया तेषु यस्मात् स चासावर्भकश्च, यद्वा, अमायं विशुद्धमर्भाणां तेषां कं सुखं यस्मात्, यद्वा, मायात्र चिच्छक्तिः, अत एवेशितुर्निजैश्वर्य्यं प्रकटन परस्येत्यर्थः। अन्यदघासुर मोक्षणादुक्तभोजनाद्वा परमपि द्रष्टुमिति परीक्षणादि निरस्तम्, भक्तावेव च पर्य्यवसायितुम्। तस्य वत्सानित एकस्थानादत्र स्थितान् वा, अन्यत्र अन्यतः, अन्यत्र स्थितान् वा, एतच्च श्रीभगवतः परोक्षाय। तच्च मोहं प्राप्स्यतः श्रीब्रह्मणो बहिर्द्रष्ट्यैवेत्यूह्यम्। नीत्वेव नीत्वा मायया मोहयित्वान्तर्द्धाप्य चेत्यर्थः। (भा० १०।१३।४१) मायाशये शयाना मे इति, (भा० १०।१३।४२) 'मन्माया मोहितेतरे' इति, स्तुतौ च (भा० १०।१४।९) मायां वितत्य इत्यादि श्रीब्रह्मोक्तेस्तथा (भा० १०।१३।४४) 'स्वयैव माययाजोऽपि' इत्यादि श्रीशुकोक्तेश्च। यद्यपि तन्मायाशक्त्या श्रीभगवत्प्रियतमानां तेषां

मोहनमाच्छादनञ्च न घटते, तथापि श्रीब्रह्ममुदे तन्माया श्रीभगवतानुमोदिता सती सर्वं कर्त्तु शक्ताभूदित्युह्यम्, अत एव श्रीबलदेवेनापि। एतच्चाग्रे सम्यगभिव्यक्तं भावि कुरुद्वह हे सद्राजकुलोद्भव! इति सत्तमस्य ब्रह्मणोऽपराधोऽभवदिति विचारेण न मन्तव्यमिति भावः। अन्तरदधात् कुत्राप्याच्छन्नो भूत्वा स्थितः, किंवा सुनिभृतमात्मलोकं गतो भयादिना श्रीभगवद्दर्शनाशक्तेः, कौतुकेन चोरवल्लीनतोपपत्तेर्वा, प्रभवतो नित्याभिनवतया प्रभावं वितन्वतः श्रीकृष्णस्य, तेन कृतमित्यर्थः यद्वा, पञ्चमीयम्, श्रीकृष्णादघासुरमोक्षणम्, यद्वा, प्रभवो जन्म तस्मादारभ्याघासुरस्य पापस्वरूपस्य दैत्यस्य मोक्षणमपुनरावृत्तिलक्षणां मुक्तिमित्यर्थः। अत एव परमं विस्मयं प्राप्तः ॥ १५ ॥ ततो रक्षणानयनाद्धेतोस्तत्पश्चादिति वा पुलिने एत्य आगत्य वत्सपानप्यदृष्ट्वा च काराच्छिक्यादीनि चोभावपीति कदाचिन्मम विलम्बेनातिदुःखिताः सन्तो मदन्वेषणार्थमेव सखायस्ते भोजनसामग्रीसहिताः कुत्रापि गता इति वत्सपान् वत्सकानपि समन्ततः सर्वत्र सम्यक्तया विचिकाय मृगयाञ्चक्रेऽदर्शनमात्रेणैव स्नेहभराक्रान्त्या ज्ञानघनमूर्त्तेरपि विचारतिरोधानात्, यतः कृष्णो व्रजजन स्नेह विशेषाकुल इत्यर्थः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पुष्पैः फलैरङ्कुरैरिति भक्षणपात्रत्वमसम्भावितमपि श्रीभगवल्लीलानुकूल्येन सर्वं सम्भाव्यत एवेति ॥९॥ अभ्यवजह्रुरभुञ्जन् ॥ १० ॥ मसृणं स्निग्धं स्वस्य परितो वर्त्तमानान् सुहृदः नर्मभिः परिहासवाक्यैः स्वर्गे लोके इति स्वर्गस्य देवेषु लक्षणा देवेषु पश्यत्स्विति ॥ ११–१२ ॥ अस्य विश्वस्य या भीः संसारभयं तस्या अपि भयं कृष्ण इति भीसम्बन्धि भयं वत्सानां सिंहादिसम्बन्धि भयं अस्य अपास्येति वा ॥ १३–१४ ॥ अम्भोजन्मजनिः अम्भः जलं तज्जं पद्मं तज्ज इत्यनेन प्रकृतिसम्बन्धस्य शबल्यमुक्तं कमलजः ब्रह्मा मायार्भकस्य स्वैच्छिकगोपालवेषस्य मञ्जु सुन्दरसहित्वम् अन्यदपि अघमोक्षं दृष्ट्वा परं विस्मयं प्राप्तः तस्मादन्यदप्यैश्वर्यं द्रष्टुं चौर्यमारब्धवान् तद्वत्सान् हरिततृणं चरानन्यतः इतः पुलिनस्थवत्सपान् अन्यत्र नीत्वा अन्तरदधात् अन्तर्धान प्राप्तानकरोत् तत्रैवान्तर्धानकरणेऽस्य कृष्णस्य भ्रमो न स्यादिति भावः इदं तस्य कर्मजाड्यपर्यवसायीति कमलभूपदव्यङ्ग्यम् ॥१५॥ अदृष्ट्वा एत्य उभावपि वने समन्ततः विचिकाय अन्तर्विपिने क्वापि अदृष्ट्वा इत्येभिः पदैः बहुकालसाध्यं क्रियाणामानन्तर्यं लीलानुकरणं बोध्यम् अन्यथा विभोरपि सर्वज्ञस्यापि कृष्णस्याकर्षकस्याविवित्रितयमपीदं न सम्भवेदेव ॥ १६–१७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पुष्पैर्दलैः पुष्पदलादिभिः कृतानि भाजनानि पात्राणि यैस्तथाभूताः बुभुजुः यद्वा पुष्पैः सङ्घटितपुष्पदलैः पत्रैः पद्मिनीदलैः अन्यैर्वा पत्रैः पल्लवैः प्रवृद्धारुणकोमलपत्रैरङ्कुरैस्ततोपि पूर्वावस्थाविशिष्टैरुभयत्रापि भूमौ नीरन्ध्रमास्तीर्णैः फलैरपि तथाभूतैस्त्वग्भिभूर्जादित्वग्भिः ॥ ९ ॥ मिथ इति। सहेश्वराः श्रीकृष्णसहिताः अभ्यवजह्रुः बुभुजुः ॥ १० ॥ यज्ञभुगपि भगवान् लीलया बालस्येव केलिर्यस्य सः स्वर्गे स्वर्गस्थे लोके देवजने मिषति पश्यति सति बुभुजे, कथम्भूतः? उदरवस्त्रयोर्मध्ये वेणुं बिभ्राणः इदमुत्तरत्राप्यन्वेति वाम इति काकाक्षिन्यायात्कक्षपाण्योर्विशेषणम् वामे कक्षे शृङ्गवेत्रे बिभ्रत् पाणौ मसृणकवलं स्निग्धदध्यन्नकवलं तदुचितानि बिल्वाम्रादि फलान्यङ्गुलिसन्धिषु बिभ्रत् बालानां मध्ये तिष्ठत् स्वस्य परित उपविष्टान् सुहृदो मित्राणि नर्मभिः परिहासवाक्यैः हासयन् ॥ ११ ॥ हे भारत! अच्युते श्रीकृष्णे एवात्मा चित्तं येषां तेषु भुञ्जानेषु सत्सु वत्सास्तृणलोभिताः दूरमन्तर्वने वनमन्ये प्रविविशुः ॥ १२ ॥ तान् वत्सानदृष्ट्वा अत एव भयत्रस्तानि मित्राणि सखीन् हे मित्राणि इति संबोधनं वा भो भयं भयहेतुभ्यो भयमस्य निरस्य ऊचे तदेवाह आशात् भोजनान्मा विरमत विरामं न कुरुत हि यस्मादहं वत्सकानानेष्ये ॥१३॥ इत्थमुक्त्वा पाणौ कवलेन युक्तः अद्रिषु तद्दरीषु कुञ्जेषु च गह्वरेषु सङ्कटस्थानेषु वत्सान्विचिन्वन् ययौ ॥ १४ ॥ ततोऽम्भोजन्मनः पद्माज्जनिर्जननं यस्य सः चतुर्मुखस्तस्मिन्नन्तरे अवसरे आगतः तदेव छिद्रं प्राप्तो वा यो ब्रह्मा पुरा भगवतोऽघासुरस्य मोक्षणरूपं कर्म्म खेऽवस्थितो दृष्ट्वा विस्मयं प्राप्तः सोऽस्येशितुरन्यदपि रमणीयं महित्वं महत्त्वं द्रष्टुं तद्वत्सान् वत्सपांश्च इतोऽन्यत्र नीत्वा अन्तरधात्तिरोहितो बभूव ॥ १५ ॥ ततो वत्सानदृष्ट्वा अगतः पुलिने वत्सपांश्चादृष्ट्वा पुनरुभावपि वत्सवत्सपसमुदायो विचिकाय अन्वेषितवान् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

केचिद्द्वयं सर्वत्र पृथगन्वयार्थम् ॥ ९–१० ॥ तत्र तदुचितानि फलानि सन्धितलवलीधात्रीप्रभृतीनि स्वर्गे लोक इति समस्ततत्स्थजनापेक्षया अन्यत्र यज्ञभुक् दृष्टया तदनुमोदिता अत्र तु बालकेलिः सन् बुभुजे इति महान् विशेषः ॥ ११–१२ ॥ भयसन्त्रस्तान् भयेनोद्विग्नान् अत्र तदाग्रहेणैव न कोऽपि तत्सङ्गे गत इति ज्ञेयम् ॥ १३ ॥ आत्मवत्सकानिति सर्वत्र स्वीयताबुद्ध्या भगवानपि तथा ययौ ॥ १४ ॥ मायामोहवता तद्युक्तार्भकस्य सर्वमोहनार्भकलीलस्येत्यर्थः। पुनः पुनः ब्रह्मणोऽपि मोहे सिद्धान्तोऽयम् ॥ १५–१६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ वन्यभोजनलीलायामस्यां तस्य यथा वेश आसीत्तं प्रपञ्चयन्नाह—बिभ्रद्वेगुमित्यादि। मसृणकवलं दधिमसृणग्रासम्, तत्फलानि मसृणकवलसम्बन्धीनि सन्धितकरीरफलादीनि अङ्गुलिषु अङ्गुलिविवरेषु स्वैर्नर्मभिः स्वयंकृतैः परिहासभाषितैः सुहृदा ह्रासयन्। स्वैरिति लोकेऽप्रसिद्धैरित्यर्थः। यज्ञभुक् सुयज्ञपुरुषप्रायेषु बालकेषु तैः सह वा केलिर्यस्य ॥ १२–१८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तत्फलान्यङ्गुलीष्वित्यादि। कृतसंन्धानोपदंशरूपफलानि ॥ १२–१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

केचिदिति पुष्पादिभिः स्वस्वभाजननिर्माणं बालकानां प्रत्येकापूर्वरचनाकौतुकेच्छयैवेति ज्ञेयम् ॥९॥ सहेश्वराः सकृष्णा एव सर्वे स्वस्वभोज्यस्य स्वस्वगृहानीतस्य भक्ष्यस्यान्नव्यञ्जनादेः रुचिं रोचकतां दर्शयन्तः स्वीयवटकशाकरसालादिकं स्वयं किञ्चिद्भुक्त्वा आस्वादविशेषमनुभूय भो सखे, भो कृष्ण, भो श्रीदामन्, भो सुबल! पश्यत पश्यत मदीयवटकादिकं कीदृशं स्वाद्विति स्वभक्ष्यपात्रात्तद्गृहीत्वा कृष्णादीनां हस्तेषु ददानास्तांस्तदास्वादमनुभावयन्त इत्यर्थः। हसन्तो हासयन्त इति जातीमालत्यादिपुष्पाणि वटकान्तरे वा अलक्षितमर्पयित्वा भोः सखायः! एतानतिस्वादुतमान् वटकानास्वादयतेत्युक्तिविश्वासात् सस्पृहं गृहीत्वा तान् भुञ्जानान् कटुकृतमुखान् दृष्ट्वा हसन्तो हासयन्तश्चकारात्तैः सहर्षकौतुकं ताड्यमानाः पलायमानाश्च ॥ १० ॥ तेष्वपि मध्ये कृष्णस्य भोजनलीलां सर्वविलक्षणमाह—बिभ्रदिति। जठरपटयोरुदरवस्त्रयोर्मध्ये वेणुं बिभ्रत् दधत् दक्षिणकुक्षादेवेति शोभौचित्यादिति ज्ञेयं वामकक्षे शृङ्गवेत्रे बिभ्रत् वामे पाणौ मसृणं स्निग्धं बृहत् दध्योदनकवलं बिभ्रत्तत्फलानि तदुचितानि सन्धितकरीरलवल्यादीनि अङ्गुलीषु वामपाण्यङ्गुलिसन्धिषु पार्णेविस्तारार्थमिति भावः। यद्वा, तत्फलानि तत्प्रयोजनीभूतान् क्षुद्रग्रासान् दक्षिणपाण्यङ्गुलीषु बिभ्रत् मुखप्रवेशयोग्यान् बहुतरग्रासान् ततः पृथक्कृत्य गृहीतुमेव वामे पाणौ बृहत् कवलग्रहणं ज्ञेयम् ॥ ११ ॥ कर्णिकेव सर्वाभिमुखो मध्ये तिष्ठन् स्वैर्न्नर्मभिरिति भो भृङ्गाः! किं मन्मुखाभिमुखं धावत सुकुमारं मधुमङ्गलम् पुरः स्थितं पिबत भो वयस्य! ब्राह्मणकुमारं मां किं भृङ्गैः खादयसि मन्ये ब्रह्महत्यायामपि तेन भयमिति भो एतद्वनस्था वानरा! युष्मासु बुभुक्षुषु जाग्रत्स्वपि मत्प्रियसखाः निर्विघ्नं भुञ्जते तदलक्षितमागच्छतेति तस्य नर्म सत्यसङ्कल्पताशक्तिलीलाशक्तिभ्यामपि स्वामिन्, प्रभो! कौतुकार्थं यदि भोजने विघ्नमीहसे तर्ह्यावाभ्यां तदर्थं ब्रह्मा सम्प्रत्येवानीयत इत्यलक्षितमनुमोदितमिति ज्ञेयं स्वर्गे लोके तद्वासिजनवृन्दे मिषति आश्चर्येण पश्यति सति यज्ञभुक् यज्ञेषूद्देशमात्रेण समर्पितमनुपहृतं मन्त्रपूतमेव हविःस्वीकारमात्रेणैव भुञ्जानोऽपि बालैः सह केलिर्मिथो भुक्तान्नादानप्रदानभोजनश्लाघननिन्दनादिमयी यस्य सः ॥ १२ ॥ अस्य विश्वस्य या भीस्तस्या अपि भयं भयप्रद इत्यर्थः। हे मित्राणीति स्नेहं सूचयति—आशात् भोजनात् श्लोकोऽयं नवाक्षरैकपादोऽनुष्टुब्भेद इति प्राञ्चः ॥१३॥ सपाणिकवल इति वत्सान्वेषणसमयेऽपि किञ्चिद्भोक्तुमिति भावः ॥ १४ ॥ अम्भोजन्मनः कमलाज्जनिर्यस्येति जडवंशत्वात् स चेतनोपि ब्रह्मा जड एव यदयं भगवन्तं परीक्षितुं महामायाविन्यपि तस्मिन्मायां वितताने्त्याक्षेपो ध्वनितः अत्र वत्सान् पुलिनमानिन्ये यथापूर्वसखं स्वकमित्युत्तरग्रन्थविरोधात् नित्यविज्ञानानन्दस्वरूपस्य भगवतस्तत्प्रियसखानां बालकानां च चतुर्मुखमायया मोहनमनौचित्यान्न व्याख्येयं यत्तु पूतनादीनामपि मायया भगवन्मात्रादीनामपि मोहनं तत्खलु विस्मयरसाधायकतत्तल्लीलासिद्ध्यर्थ लीलाशक्त्याऽनुमोदनादेव नतु स्वतः अत्र तु ब्रह्ममायया कृष्णसखानां केवलस्वापनेन का लीलासिद्धिरत एषां योगमाययैव मोहनं कृष्णमायाहतात्मनामित्यग्रिमवाक्याच्च ज्ञेयं नच कृष्णमायामोहितानामेव तेषां ब्रह्मकर्तृकमन्यत्र नयनं व्याख्येयम् उपरिष्टादित एतेऽत्र कुत्रत्या मन्मायामोहितेतरे इति ब्रह्मवाक्यानन्तरं सत्याः के कतरेनेति ज्ञातुं नेष्टे कथञ्चनेति श्रीशुकोक्तेः नहि कृष्णसखानामसत्यत्वं तेन वक्तुमुचितमतो मायिकानामेव बालवत्सानां हरणं ब्रह्मणा कृतमित्येवमत्र व्याख्येयं ब्रह्मा तदन्तरे तस्मिन्नवसरे गत आगतस्सन् अन्यदपि महित्वं महिमानं द्रष्टुम् अर्भकस्य ईशितुः श्रीकृष्णस्य वत्सान् इतः पुलिनात् वत्सपांश्च अन्यत्र नीत्वा अन्तरधात् तिरोबभूव यत् तन्मायाभगवन्मायाकारणकमेव तत्सर्वं मायया मोहत एव ब्रह्मा महित्वं दृष्टुं मायाकल्पितानेव वत्सान् वत्सपानन्यत्रानयदित्यर्थः। अद्य मया मायया मोहयित्वा चोरितेषु वत्सवत्सपेषु किमयमैश्वर्य्यं किमप्यद्भुतं करोति ज्ञात्वा किं स्वयं तानेवानेष्यति मह्यं प्रार्थयिष्यते वा न किमपि ज्ञास्यतीति वेति विचारो मायया मोहनं विना तस्य न सम्भवेत् अतस्तस्मिन् चोरयितुमुद्यते सति योगमायैव सत्यान् वत्सपालकान् आच्छाद्य बहिरङ्गमायाद्वारा सद्यः कल्पितानेव तांस्तमदर्शयदिति ज्ञेयं प्रभवतः प्रभोः कृष्णात् अघासुरस्य मोक्षणं दृष्ट्वा यो विस्मयं प्राप्तः ॥१५॥ अदृष्ट्वेत्य नतु अप्राप्येत्युक्तम् अतस्तत्र स्थितान् ज्ञातानपि अदृष्ट्वा अदर्शनमभिनीयेत्यर्थः। मन्मायया मोहित एवायमिति ब्रह्माणं मिथ्याभिमानं ग्राहयितुमिति भावः। ततश्चोभावपि वत्सान् बालांश्च विचिकाय विस्मयविषादाद्यभिनयपूर्वकं नटवत्तदन्वेषणमभिनिनायेत्यर्थः। "तत्रोद्वहत् पशुपवंशशिशुत्वनाट्यम्" इत्यग्नेतनोक्तेः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुष्पादिभिः कृतानि भाजनानि यैस्ते बुभुजुः त्वग्भिर्भूर्जकदल्यादिवल्कलैः ॥ ९ ॥ सहेश्वराः श्रीकृष्णसहिताः भोज्यरुचिं दध्योदनादि स्वादुविशेषं मिथोऽन्योन्यं दर्शयन्तोऽभ्यवजह्रुः बुभुजिरे ॥ १० ॥ यज्ञभुगपि बालेषु केलिर्यस्य स हरिः तेषां छदस्थानीयानां मध्ये कर्णिकास्थानीयः सर्वाभिमुखस्तिष्ठन् स्वपरि स्वस्य परितः स्थितान् सुहृदो मित्राणि नर्मभिः परिहासवाक्यैः हासयन् स्वर्गे लोके स्वर्गवासिनि जने मिषति बुभुजे कथम्भूतः ? जठरपटयोः उदरवस्त्रयोर्मध्ये वेणुं मुरलिकां वामे कक्षे शृङ्गवेत्रे च वामे पाणौ मसृणं स्निग्धं दध्योदनकवलं च अङ्गुलीषु तत्फलानि मसृणकवलोचितानि फलमयानि व्यञ्जनानि च बिभ्रत् दधन् ॥११॥ अच्युते श्रीकृष्णे आत्मा चित्तं येषां तेषु सत्सु ॥ १२ ॥ तदा अस्य विश्वस्य भियो भयहेतोरपि भयं भयहेतुः कृष्णः "ज्ञः कालकालः" इति श्रुतेः । आशात् भोजनात् अक्षराधिक्यमार्षम् ॥ १३ ॥ वत्सकान् इहानेष्ये इत्युक्त्वा अद्रिषु तद्दरीषु कुञ्जेषु लतादिपिहितोदरविवरेषु दुर्गमस्थानेषु वत्सान्विचिन्वत् कृष्णः सपाणिकवल एव ययौ ॥ १४ ॥ यः पुरा खेऽवस्थितो ऽघासुरमोक्षणं दृष्ट्वा विस्मितोऽभूत् स ब्रह्मा अम्भोजन्मनः पद्माज्जनिरुत्पत्तिर्यस्य सः तदन्तर्गतस्तच्छिद्रं प्राप्तः प्रभवतः श्रीकृष्णस्य मायार्भकस्य स्वसङ्कल्पतोऽर्भकस्य अन्यदपि मञ्जु रमणीयं महित्वं महिमानं द्रष्टुं तत्तस्य वत्सानितः स्थानाद्वत्सपांश्चान्यत्र नीत्वा अन्तर्दधात् तिरोबभूव ।१५। ततस्तदनन्तरं कृष्णो वत्सान् अदृष्ट्वा एत्य पुलिने वत्सपानपि अदृष्ट्वा पुनरुभावपि वत्सान् वत्सपांश्च वने समन्ततः विचिकाय अन्वीक्षितवान् ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

पुष्पादिभिः कृतभाजना इति प्रत्येकापूर्वभाजनरचना चातुर्यातिशयात् ॥ ९ ॥ सख्यातिशयात् सर्वेषामेकभावतामाह सर्वे इति सहेश्वराः सकृष्णा एव सर्वे स्वस्वभोज्यानां रुचिं रोचकतां दर्शयन्तः स्वयं किञ्चिद्भुक्त्वाति स्वादुतामनुभूय तत्तत् कृष्णादिभ्यः प्रदायतामनुभावयन्त इत्यर्थः । हसन्तो हासयन्तश्चेति वटकाकारान् पुष्पकन्दुकानलक्षितं ददाना हासयन्तः पश्चात् सहर्षकौतुकं तैस्ताभ्यमानाश्चेत्यर्थः । अत्रेश्वरस्य हरेर्भोज्यानि तन्मात्राप्रेषितानि चित्रविहङ्गिकाभिर्निबद्धपदशिक्याभिरनुगेरानीतानि भूरीणीति बोध्यमौचित्यात् । तस्य तत्परिकराणाञ्च तानि भोज्यानि रसरूपाण्येव "गन्धरूपं स्वादुरूपं द्रव्यं पुष्पादिकञ्च यत् । हेयांशानाममानाच्च रसरूपं भवेच्च त"दिति हयशीर्षपञ्चरात्रात् । "चिदानन्दं ज्योति परमपि तदा खाद्यमपि चे"ति ब्रह्मसंहितोक्तेश्च तथा च पराख्यशक्तिसिद्धानि तानि रूपादिवद्भोज्यानीत्यसारांशशङ्काव्युदासः ॥ १० ॥ तेषु सर्वविलक्षणां नन्दसूनोर्भोजनरीतिमाह बिभ्रदिति । कर्णिकावत् सर्वाभिमुखो मध्ये तिष्ठन् कृष्णो बुभुजे, कीदृशः सन् ? चौर्यशङ्कया जठरपटयोर्मध्ये वेणुं बिभ्रत् शोभातिशयादक्षिणकुक्षाववेति बोध्यं, वामे कक्षे शृङ्गवेत्रे बिभ्रत्, वामे पाणौ मसृणं स्निग्धं दध्योदनकवलं बिभ्रत्, स्वकीयान् परमहंसान् पाणिपात्रतां शिक्षयन्निवेति भावः, तदुचितानि फलानि करीरामलक्यादीनि सन्धितानि वामपाण्यङ्गुलीषु तत्सन्धिषु बिभ्रदिति तुल्ययोगितालङ्कारः, स्वपरि स्वस्य परितः स्थितान् भुञ्जानान् सुहृदः सखीन् स्वैर्नर्मभिर्हासयन् स्वर्गे लोके भुवने मिषति सति स्वर्गवासिषु शक्रादिषु साश्चर्यं पश्यत्सु सत्सु कथं यो यज्ञभुक् यज्ञे वृद्धे शमात्रेणार्पितमनुपहृतं मन्त्रपूतं हरिः स्वीकारमात्रेणैव भुङ्क्ते स बालकेलिर्बालैः सह केलिर्मिथो भुक्तान्नादानप्रदानश्लाघन निन्दन् लक्षणा यस्य सः ॥ ११–१२ ॥ अस्य विश्वस्य या भीस्तस्या भयं बिभेत्यस्मादिति व्युत्पत्तेर्भयदं "यः कालकाल" इति मन्त्रवर्णात्, हे मित्राणि सखायः ! आशाद्भोजनात् पङ्क्तिभङ्गो मा भूदिति स्वयमेवोप्लुत्य गत इत्यर्थः ॥ १३ ॥ विचिन्वन् अन्वेष्टुं सपाणीति वत्सान्वेषणेऽपि किञ्जिद्भोक्तुमित्यर्थः ॥ १४ ॥ एवं सजग्धिसभां विहाय वत्सानन्वेष्टुं भगवति गतः विरिञ्चः क्षीरधिनाथोक्ततत्प्रभावोऽपि स्तुततन्मातृगर्भोऽपि दृष्टाघमोक्षणतन्मञ्जुमहिमापि पुनर्मोहयन्नस्यैश्वर्यं परीक्षिष्ये इति हृदि निधाय स्वामिनि तस्मिन्मायां व्यतानीत् तद्वितानलक्षणेनापराधेन हेतुना स्वामिमाया तं व्यमोहयदित्याह—अम्भोजन्मेति अम्भोजन्मनः पद्माज्जनिर्यस्य स पद्मभूर्जडजातत्वादेव स्वामिपरीक्षणलक्षणधीजाड्यभागिति भावः । तदन्तरेऽघमोक्षणावसरे वृन्दाटवीं गतः अर्भकस्य नन्दबालस्येशितुः सर्वेश्वरस्याघमोक्षणमञ्जुमहिम्नोऽन्यदपि मञ्जुमहित्वं द्रष्टुं तस्य वत्सानितः पुलिनाद्वत्सपांश्च अन्यत्र नीत्वा चौरवदन्तरदधादिति यत्तु तस्यैव माया प्रकृतान् वत्सतत्पालान् चोरयितुमिच्छति तस्मिन् योगमाया तांस्तत्र तत्रैवाच्छाद्य स्वामासभूतया त्रिगुणया तत्तुल्यान् अन्यान् सृष्ट्वा तमदर्शयत् । तया विमोहितः स तानन्यत्रानयदित्यर्थः । मद्विमुष्टवत्सादिकोऽयं किं कुर्यात् किमैश्वर्यं प्रकाशयेद्विज्ञाय वा तानेवानयेन्मामेव वा प्रार्थयेतेति विमर्शो मायाविमोहेन विना न सम्भवेत्, न च हरिसखानां पद्मभूमायया विमोहः शक्यो वक्तुं हरितुल्येषु तेषु तन्मायायाः असामर्थ्यात् "कृष्णमायाहतात्मना" मित्यग्रिमवाक्याच्च प्रकृतास्ते तत्र तत्रैवाच्छन्नास्तस्थुः "वत्सान् पुलिनमानिन्ये यथापूर्वसखं स्वक"मित्युत्तराध्यायवाक्यात्, कीदृशः स इत्याह—यः पुरा प्रभवतो नन्दार्भकादघासुरमोक्षणं दृष्ट्वा परं विस्मयं प्राप्तः ॥ १५ ॥ वत्सान् स्थितानेवादृष्ट्वा अप्राप्येत्यनुक्तेस्तेषामदर्शनमभिनीयेत्यर्थः । ततः शाद्वलादेत्य पुलिनेऽपि वत्सपानदृष्ट्वा उभावपि वत्सान् वत्सपांश्च समन्ततो वने विचिकाय पद्मभुवो मिथ्याभूतमोहकृताभिमानग्रहणाय विषदाभिनये नटवत्तदन्वेषणमभ्यनैषीत् "तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यमिति वक्ष्यमाणात् ॥ १६ ॥

श्रीसुबोधिनी

तेषां भोजनपात्राण्याह **केचि**दिति, पुष्पादीनि प्रसार्य तैरेव **कृतभाजनाः** सन्तस्तदुपर्योदनं स्थापयित्वा **बुभुजुः** ॥ ९ ॥ बालकानां लौकिकत्वाद् भोजने प्रकारमाह **सर्व** इति, **स्वस्वभोज्य**स्यौदनादे **रुचिमन्यस्मै दर्शयन्तः**, **पृथ**गिति **भोज्य**प्रकारविशेषाणां लड्डुकादीनां, ततः स्तोत्रनिन्दाभ्यां **हसन्तो हासयन्तश्चेश्वर**सहिता **अभ्यवजह्रु**र्भोजनं कृतवन्तः, एवमानन्दभोजन ईश्वरसाहित्यमेव हेतुः, सर्वैरानीतान्यन्नान्येकीकृत्याग्रभागं भगवतो दत्वा भगवत्कृपयाक्षय्यान्ना **बुभुजुः** ॥१०॥ भगवानपि भुक्तवानिति वदन् ध्यानार्थं तादृशं रूपमनुवर्णयति **बिभ्रद वेणु**मिति, मल्लवत् कटितटे पीताम्बरमस्ति तत्र हस्ते स्थितानां वेण्वादीनां मध्ये **वेणुं जठरपटयोर्म**ध्ये स्थापितवान् शृङ्गं **वेत्रं च कक्ष**योः, **वामे पाणौ मसृणं** चिक्कणं घृतदध्यादिवेष्टितं **कवल**मोदनं, सर्वत्र **बिभ्र**दितिसम्बन्धः, तत्र दध्योदन उचितानि **फलानि** जम्बीरकादीन्य**ङ्गुलीषु** सन्धिषु वा बालकानां **मध्ये तिष्ठन् स्वस्य परि**तो वर्तमानान् **सुहृदो** बालकान् **स्वै**रसाधारणै**र्नर्मभिः स्वर्गे लोके** तत्र स्थितदेवेषु **मिष**त्सु सत्सु सर्व**यज्ञ**भोक्ता **बुभुजे**, **बालस्येव केलि**विनोदो यस्य ॥११॥ एवं सर्वेषां भोजने जायमाने किञ्चिदद्भुतमिव जातं तदाह **भार**तेति, **वत्सपेषु भुञ्जानेष्वच्युतात्म**सु विस्मृतदेहेषु सत्सु **वत्साः** स्वयमेवा**न्तर्वने** वनमध्ये **तृणेन लोभिता** दूरं गताः ॥ १२ ॥ ततो बालका **भयसन्त्रस्ता** जातास्**तां**स्तथाविधान् **दृष्ट्वा कृष्णो** भगवा**नूचे** यतोयं निर्भयः, तत्र हेतु**रस्य भीभय**मिति, **अस्य** जगतो या **भीर्मृ**त्युस्तस्यापि **भय**रूपो "भीषास्माद् वातः पवत" इतिश्रुतेः, भगवतो वाक्यमाह **मित्राणी**ति, हे **मित्राण्याशाद्** भोजनान् **मा विरमताहमिहैव वत्सकानानेष्ये** ॥ १३ ॥ **इत्युक्त्वा भगवां**स्ततो गत आदौ स्व**वत्सकान् विचिन्वन् स पाणिकवल**सहित एवा**द्रिदरीकुञ्जगह्वरेषु ययौ**, आदौ कियद् दूरे गतस्तत्र वत्सानदृष्ट्वाद्रेः पर्वतस्य गोवर्धनादे**र्दरीषु** कन्दरासु **कुञ्जेषु** द्रोणीषु **गह्वरेषु** भयानकस्थानेषु सर्वत्रैव गतः ॥ १४ ॥ ननु निकट एव वत्साः सम्भवन्ति कथं दूरे गत इत्याशङ्क्य मध्ये **ब्रह्मणा** वत्सा हृता इत्याहा**म्भोजन्मजनि**रिति, **अम्भोजन्म** कमलं तत्र **जनि**र्जन्म यस्य, नाभिकमल एवोत्पन्नस्त**दन्त**स्तन्मध्य **एवागतः** सन् **मायार्भकस्य** मायाबालक**स्येशितु**र्भगवतो **मञ्जुमहित्वं दृष्ट्वा**घसायुज्यलक्षण**मन्यदपि द्रष्टुमरण्याद् वत्सान्** पुलिनाद् **वत्सपांश्च नीत्वान्यत्र** स्थापयित्वा, हे **कुरूद्वहे**तिविश्वासार्थं, स्वय**मन्तर्धा**नं कृतवान्, **नीत्वे**त्युभयत्र सम्बन्धः, ननु किमित्येवं कृतवानित्याशङ्क्याह **यः पुरा** ख आकाशे**वस्थितः** सन्न**घासुरमोक्षणं दृष्ट्वा परं विस्मयं प्राप्तः**, ननु किमाश्चर्यं भगवतः सकाशान् मुच्यत एवेति तत्राह **प्रभवत** इति, **प्रकर्षेण भव**त्यस्माज् जगदिति **प्रभवो** भगवान्, ततस्तस्मादुत्पत्तिरेवोचिता स्व**दृष्टान्तेन न तु** मुक्तिरिति**विस्मयः**, अन्यथा स्वस्यापि मुक्तिः स्यात् ॥ १५ ॥ ततो भगवान् **वनाददृष्ट्वैवैत्य पुलिनेपि वत्सपानदृष्ट्वा** प्रायेणैते वत्सपाः स्वयमपि **वत्सा**नन्वेष्टुं गता इत्यु**भाव**प्युभयविधानपि **वने** भगवान् **समन्ततो विचिकाय** ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तद्भोजनभाजनानि निरूपयति—'केचित्' इत्यस्य सर्वत्र तृतीयान्तेन सह प्रत्येकं सम्बन्धः । पुष्पादिभिः कृतानि भाजनानि पात्राणि यैस्ते बुभुजुः । दलैस्तुलसीदलादिभिः, पल्लवैः आम्रादिपत्रैः, यवाद्यङ्कुरैः, त्वग्भिर्भूर्जादिभिः, दृषद्भिः पाषाणैः ॥ ९ ॥ सहेश्वराः श्रीकृष्णसहिताः सर्वे स्वस्वगृहादानीतस्यान्नव्यञ्जनादे रुचिं स्वादुविशेषं पृथक् दर्शयन्तः 'त्वद्गृहे त्वन्मात्रादयो मूर्खाः, व्यञ्जनादि सम्यक् कर्तुं न जानन्ति' इत्याद्यनेकविधैर्नर्मवाक्यैर्हसन्तो हासयन्तश्चाभ्यवजह्रुः बुभुजिरे ॥१०॥ ध्यानार्थं तत्कालिकं भगवद्रूपं विशेषतो वर्णयति—बिभ्रद्वेणुमिति । जठरपटयोः उदरवस्त्रयोर्मध्ये वेणुं बिभ्रत् दधत्, वामे कक्षे शृङ्गवेत्रे च बिभ्रत्, वामे पाणौ मसृणं स्निग्धं दध्योदनकवलं बिभ्रत्, अङ्गुलीषु अङ्गुलिसन्धिषु तत्फलानि भोजनयोग्यानि फलानि बिभ्रत्, अम्भोरुहकर्णिकेव सर्वाभिमुखो मध्ये तिष्ठन् स्वपरित उपविष्टान् सुहृदो वयस्यान् बालान् स्वैर्नर्मभिः परिहासवाक्यैर्हासयन्, स्वर्गे लोके स्वर्गवासिनि जने मिषति आश्चर्येण पश्यति सति बालानामिव केलिर्लीलामात्रं यस्य सः, वस्तुतस्तु यज्ञभुक् यज्ञैराराध्यो भगवान् बुभुजे ॥११॥ हे भारत ! एवं अच्युते श्रीकृष्ण एवात्मा मनो येषां तेषु वत्सपेषु भुञ्जानेषु सत्सु तृणेन लोभिता वत्सास्त्वन्तरवने वनमध्ये दूरं विविशुः ॥ १२ ॥ वत्सादर्शनजेन भयेन सन्त्रस्तान् तान् बालान् दृष्ट्वा भीभयमस्य 'भयहेतुभ्योऽपि भयं त्यक्त्वा' यद्वाऽस्य विश्वस्य या भीः मृत्युस्तस्यापि भयरूपः 'भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः । वर्षतीन्द्रो दहत्यग्निर्मृत्युर्धावति पञ्चम' इति श्रुतेः । कृष्णः 'हे मित्राणि ! आशाद्भोजनात् मा विरमत भोजनविरामं मा कुरुत, तानहं वत्सकानिहानेष्ये' इत्यूचे उक्तवान् । अत्र तृतीये पादेऽक्षराधिक्यमार्षम् ॥ १३ ॥ इत्युक्त्वा अद्रिषु तद्दरीषु कुञ्जेषु लतापिहितोदरविवरेषु गह्वरेषु सङ्कटस्थानेषु आत्मनो वत्सकान् विचिन्वन् अन्वेषितुं सपाणिकवलः पाणौ स्थापितकवलसहित एव भगवान् विष्णुर्ययौ । आत्मपदेन तस्य गोपराजकुमारनाट्येन अन्यवत्सेष्वप्यात्मीयत्वाभिमाननाट्यमपि सूचयति । 'सपाणिकवल' इत्यनेन शैघ्र्यं स्नेहादिकं च सूचितम् ॥ १४ ॥ अम्भसो जन्म यस्य तदम्भोजन्म पद्मम्, तस्माज्जनिर्यस्य स ब्रह्मा, तदन्तरगतः तदा अन्तरं तान् हर्तुं छिद्रं अवसरं प्राप्तः सन् तस्य भगवतो वत्सान् वत्सपांश्चेतः स्थानादन्यत्र नीत्वा स्वयमन्तरदधात् तिरोबभूव । 'हे कुरूद्वह !' इति सम्बोधयन् यथा 'त्वं मोहेन ब्राह्मणपरीक्षायां प्रवृत्तस्तथा सोऽपि' इति सूचयति । ननु 'किमर्थमेवं कृतवान् ?' तत्राह—मायार्भ-

कस्येति । स्वेच्छया स्वीकृतबालनाट्यस्य, वस्तुतस्तु ईशितुरन्यदपि मञ्जुमहित्वं भक्तजनाह्लादकमहिमानं द्रष्टुमित्यर्थः ॥ 'अन्यदपि' इत्युक्तसूचितं पूर्ववृत्तमाह—य इति । यो ब्रह्मा पुरा प्रथमं खे आकाशेऽवस्थितः सन् प्रभवतः श्रीकृष्णात् अघासुरस्यात्यधमस्यापि मोक्षणं दृष्ट्वा परं विस्मयं प्राप्तः ॥ १५ ॥ ततोऽद्रिकुञ्जादिषु वत्सानदृष्ट्वा पुलिनमेत्य आगत्य तत्र च वत्सपानप्यदृष्ट्वा पुनः श्रीकृष्णः समन्ततः सर्वतो विपिने उभौ वत्सान् वत्सपालांश्च विचिकाय अन्वीक्षितवान् ॥ १६ ॥

अन्वितार्थप्रकाशिका

केचिदिति ॥ केचित्पुष्पैः कृतभाजना बुभुजुरित्याद्यन्वयः । केचिद्दलैः पत्रैः पल्लवैः नवपत्रैः अङ्कुरैः फलैः शिग्भिः शिक्यैः वृक्षाणां त्वग्भिः दृषद्भिः पाषाणैश्च कृतभाजनाः सन्तो बुभुजुः । तङभाव आर्षः ॥ ९ ॥ सर्वं इति ॥ सहेश्वराः श्रीकृष्णसहिताः सर्वे स्वस्वभोज्यस्य व्यञ्जनादेः रुचिं स्वादुविशेषं पृथक् दर्शयन्तः मम शाकं स्वादु नतु त्वदीयमिति वाक्यैर्हसन्तो हासयन्तश्चाभ्यवजह्रुः बुभुजिरे ॥ १० ॥ ध्यानार्थं तत्कालिकं भगवद्रूपं विशेषतो वर्णयति —बिभ्रद्वेणुमिति ॥ जठरपटयोः उदरवस्त्रयोर्मध्ये वेणुं बिभ्रत् दधत् एतच्च दक्षिणकुक्षावेवेति वामे कक्षे शृङ्गवेत्रे च बिभ्रत् वामे पाणौ मसृणं स्निग्धं दध्योदनकवलं बिभ्रत् अङ्गुलीषु अङ्गुलीसन्धिषु तत्फलानि संधानीकृतकरीरलवलीप्रभृतिफलानि बिभ्रत् अम्भोरुहकर्णिकेव सर्वाभिमुखो मध्ये तिष्ठन् स्वपरित उपविष्टान् सुहृदो वयस्यान्बालान्स्वैर्नर्मभिः परिहासवाक्यैर्हासयन् स्वर्गे लोके स्वर्गवासिनि जने मिषति आश्चर्येण पश्यति सति बालानामिव केलिः लीलामात्रं यस्य सः वस्तुतस्तु यज्ञभुक् यज्ञैराराध्यो भगवान् बुभुजे ॥११॥ भारतेति ॥ हे भारत ! एवम् अच्युते श्रीकृष्ण एवात्मा मनो येषां तेषु वत्सपेषु भुञ्जानेषु सत्सु ब्रह्मणा नेतुं तृणेन लोभिता वत्सास्त्वन्तर्वने वनमध्ये दूरं विविशुः ॥ १२ ॥ तानिति ॥ अस्य विश्वस्य या भीः मृत्युस्तस्यापि भयरूपः कृष्णः यद्वा भीभयं भयहेतुभ्यो भयम् अस्य अपास्य । ल्यबार्षः । वत्सादर्शनजेन भयेन संत्रस्तान् बालान् दृष्ट्वा ऊचे उक्तवान् । हे मित्राणि ! आशाद् भोजनान्मा विरमत भोजनविरामं मा कुरुत । तान् वत्सकान् अहम् इहानेष्ये । भक्तास्त्वाहुः । वस्तुतो वत्सकान् योगमायाद्वारा ब्रह्मद्वारा वा अहमेव नेष्ये इति । इ संबुद्धौ हा खेदे इति । श्लोकोऽयं नवाक्षरैकपादोऽनुष्टुब्भेद इति प्राञ्चः ॥ १३ ॥ इत्युक्त्वेति ॥ इत्युक्त्वा अद्रिषु तद्दरीषु कुञ्जेषु लतापिहितोदरविवरेषु गह्वरेषु संकटस्थानेषु आत्मनो वत्सकान् विचिन्वन् अन्वेषितुं सपाणिकवलः पाणौ स्थापितकवल एव भगवान् कृष्णः ययौ । आत्मपदेन सर्वेषां वत्सेषु आत्मीयत्वं द्योतयति ॥ १४ ॥ अम्भोजन्मेति ॥ हे कुरूद्वह ! यो ब्रह्मा पुरा प्रथमं खे आकाशेऽवस्थितः सन् प्रभवतः श्रीकृष्णात् अघासुरस्यात्यधमस्यापि मोक्षणं दृष्ट्वा परं विस्मयं प्राप्तः । स अम्भोजन्म पद्मं तस्माज्जनिर्यस्य स ब्रह्मा जडवंशभवत्वादिव भगवन्मोहनरूपं जाड्यं कर्त्तुमुद्यत इत्यर्थः । तदन्तरे तस्मिन् अवसरे गतः आगतः संस्तस्य मायाऽर्भकस्य स्वेच्छया स्वीकृतबालनाट्यस्य वस्तुतस्तु ईशितुः भगवतः अन्यदपि मञ्जु महित्वं भक्तजनाह्लादकमहिमानं द्रष्टुं वत्सान् वत्सपांश्चेतः स्थानादन्यत्र नीत्वा स्वयमन्तरदधात् तिरोबभूव । अत्र भक्ताः । नित्यज्ञानानन्दस्य भगवतः सखीनां ब्रह्ममायामोहनमसमञ्जसमतो यावद्ब्रह्मा बालान् वत्सांश्च चोरयितुमुद्यतस्तावदेव भगवान् स्वयोगमायया सत्यान् बालान् वत्सांश्च योगमाययाऽऽच्छाद्य बहिरङ्गमायया बालादीन् सद्यः कल्पयित्वा ब्रह्माणमदर्शयत् । तानेव ब्रह्मा नीतवानिति प्राहुः ॥ १५ ॥ तत इति ॥ ततोऽद्रिकुञ्जादिषु वत्सानदृष्ट्वा ब्रह्ममोहार्थम् अदर्शनमभिनीय पुलिनमेत्य आगत्य तत्र च वत्सपानप्यदृष्ट्वा तद्वददर्शनमभिनीय पुनः श्रीकृष्णः समन्ततः सर्वतोऽपि वने उभौ वत्सान् वत्सपालांश्च विचिकाय अन्वेषणमभिनीतवान् ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुष्पादिभिः पृथक्पृथक्कृतानि भाजनानि भोजनपात्राणि यैस्ते वृक्षाणां त्वग्भिः दृषद्भिः पाषाणशकलैः ॥९॥ पृथक्पृथक स्वकीय स्वकीय भोज्यस्यान्नस्य रुचिं स्वादं परस्परं दर्शयंतः अभ्यवजह्रुः बुभुजुः ॥१०॥ बिभ्रदिति जठरमुदरं च पटः कटिबंधनवस्त्रं च तयोर्मध्ये वेणुं बिभ्रत् वामे कक्षे यष्टि विषाणे बिभ्रत् वामे पाणौ हस्तेमसृणकवलं घृतदधिशर्करामिश्रोदनकवलं च अंगुलीषु अंगुलिसंधिषु तत्फलानि तदुपयोग्यानि आम्रादीनां फलानि बिभ्रत् मध्ये पत्रसदृशानां वत्सपानां मध्यभागे कर्णिकातुल्यतया तिष्ठन् स्वपरिसुहृदः स्वस्य परित आसीनान् सुहृदो मित्राणि स्वैः स्वकीयैर्नर्मभिः परिहासवचनैः हासयन् सन् बालसदृशविहारः यज्ञभुग्हरिः स्वर्गे लोके स्वर्गनिवासिजनसमूहे मिषति पश्यति बुभुजे ॥ ११ ॥ अच्युते आत्मा मनो येषां तेषु ॥ १२ ॥ वत्सानदृष्ट्वा भीतानां भयं निवर्त्तयन्नाह भयेन संत्रस्तान् भीतान् अस्य जगतो भीभयं भियः कालस्य भयंकालः कृष्णः ऊचे हे मित्राणि आशात् अशनात् मा विरमत विराममा प्राप्नुत वत्सानिह आनेष्ये ॥ १३ ॥ अद्रिषु तद्गुहासु कुंजेषु लताग्रहेषु गह्वरेषु अगम्यस्थानेषु पाणौ कवलेन सहितो विचिन्वन् मृगयन् ॥ १४ ॥ अंभोजेति पुरापूर्वं यः खेऽवस्थितः अघासुरमोक्षणं दृष्ट्वा परं त्रिस्मयं प्राप्तः सः अंभोजन्मनः कमलाज्जनिर्यस्य सः विधिः तदंतरगतः तस्मिन्नंतरे समये गतः आयातः यद्वातदंतरं छिद्रं प्राप्तः सन् माययाजीवोपरि परमदयया स्वेच्छया वा अर्भकस्य गोपबालस्य ईशितुः अन्यदपि मंजुं सुदरं महित्वं महिमानं द्रष्टुं प्रभवतः श्रीकृष्णस्य वत्सान् ईतः स्थलात् वत्सपांश्चान्यत्र नीत्वा प्रापय्य हे कुरूद्वह कुरुकुलधर्मपरं परावाहक अंतरदधात् तिरोबभूव ॥१५॥ ततः पुलिने तटे एत्य वत्सपानपि अदृष्ट्वा अविलोक्य उभावपि वत्सान् वत्सपांश्चापि वने सः समंततो विचिकाय मृगयामास ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वृत्तेन संगमयति । अथेति । अथ भगवान् श्रीकृष्णः, मृत्योः मृत्युतुल्यात्, अघवदनादघासुरस्य मुखात्, वत्सपालकान् वत्सान् पालांश्चेत्यर्थः । रक्षित्वा, सरित्पुलिनं यमुनायास्तोयोज्झितस्थानं, आनीय, इदं वक्ष्यमाणं अब्रवीत् उवाच ॥ ९ ॥ पुलिन एवाशिशिषां संपादयितुं तत् प्रस्तौति । अहो इति । अहो हे वयस्याः, स्वानां स्वीयानां केलीनां संपदो यस्मिस्तत्, मृदुलाः अच्छाः बालुकाः यस्मिस्तत्, स्वकेलिसंपदर्थं मृदुला वालुका यस्मिन्निति वा । स्फुरत् विकसत् यत् सरः—स्फुरत्सरोरुहमिति वक्तव्ये सरोरुहबाहुल्यात् तेषां विकसनं उपचारात्सरस्येवोक्तम्—तस्य गन्धेन हृता आकृष्टाः ये अलयो भ्रमराः पत्रिणः पतत्रिणश्च तेषां के उदके ये ध्वनयस्तेषां ये प्रतिध्वानाः प्रतिस्वनास्तैर्लसन्तश्च ते द्रुमाश्च तैराकुलं व्याप्तं, क्वचित्स्फुटत्सरोगन्ध इत्यपि पाठः । इत्थंभूतं, एतत् पुलिनं अतिरम्यं, भवति ॥ १० ॥ अत्रेति । हे वयस्याः, दिवा दिनं, रूढं प्रवृद्धं, अस्माकं भोजनवेला अतीतेत्यर्थः । क्षुधार्दिताः वयं क्षुत्पीडाभाजोऽपि भवाम एव । अतः, अस्माभिः, अत्र भोक्तव्यम् । वत्साः अपि, अपः पीत्वा, समीपे शनकैः, तृणं तृणानीत्यर्थः । चरन्तु भक्षयन्तु ॥ ११ ॥ तथेति । तथेति तथास्त्विति उक्त्वा, अर्भाः अर्भकाः, वत्सान् पाययित्वा, अप इति शेषः । शाद्वले हरिततृणप्रदेशे, आरुद्ध्य, शिक्यानि मुक्त्वा, मुदा भगवता समं, बुभुजुः । केचित्तु शिक्यान् पर्युषितान्नग्रन्थीनित्याहुः । तत्पक्षे शिक्यांश्चेति पाठः ॥ १२ ॥ कृष्णस्येति ॥ कृष्णस्य श्रीकृष्णभगवतः, विष्वक् परितः, पुरूणि च तानि राजिमण्डलानि च तैः, बहुभिः पङ्क्तिमण्डलैरित्यर्थः । सहोपविष्टाः नैरन्तर्येणोपविष्टा इत्यर्थः । अभ्याननाः श्रीकृष्णस्याभिमुखमुखाः, फुल्लदृशः विकसितनयनाः, व्रजौकसो व्रजवासिजनकुमाराः, विशेषेण पियन्ति गच्छन्ति जलान्यत्रेति विपिनं पुलिनं तस्मिन्, 'पि गतौ' बाहुलकात् नक् । अम्भोरुहकर्णिकायाः कमलबीजकोशस्य, छदाः परितः स्थितानि दलानि इव, तदा विरेजुः ॥ १३ ॥ केचिदिति ॥ केचित् पुष्पैः, केचित् दलैः पत्रैः, केचित् पल्लवैः, अङ्कुरैः, केचित् फलैः, केचित् शिग्भिः, केचित् त्वग्भिः, केचित् दृषद्भिश्च । कृतभाजनाः सन्तः, बुभुजुः ॥ १४ ॥ मिथ इति ॥ सर्वे, मिथः परस्परं, स्वस्वभोज्यरुचिं स्वकीवस्वकीयान्नस्वादविशेषं पृथक् दर्शयन्तः, हसन्तः, हासयन्तः सन्तश्च, सहेश्वरा परमेश्वरेण सहिताः, एव, अभ्यवजह्रु बुभुजिरे ॥ १५ ॥ तदानींतनां भगवतः शोभां वर्णयन्नाह ॥ बिभ्रदिति ॥ जठरपटयोः उदरपरिहितवस्त्रयोः, मध्ये वेणुं वंशीं, बिभ्रत् दधत्, इदमुत्तरत्राप्यन्वेति । वामे कक्षे बाहुमूले, शृङ्गवेत्रे, वामे पाणौ, मसृणकवलं स्निग्धदध्यन्नग्रासं तत्फलानि तदुचितानि बिल्वफलारनालादीनि, अङ्गुलीषु च बिभ्रत्, मध्ये बालानां मध्यप्रदेशे, तिष्ठन्, स्वपरि स्वस्य परित उपविष्टान्, सुहृदो मित्राणि, स्वैरात्मीयै, नर्मभिः परिहासवाक्यैः, हासयन् हासं कारयन्, यज्ञभुक् स्वयं यज्ञभोक्ता सन्नपि, बालस्येव केलिः क्रीडा यस्य तथाभूतो भगवान्, स्वर्गे स्वर्गस्थे, लोके देवजने, मिषति पश्यति सति, बुभुजे ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

केचित् पुष्पैरिति ः १०.१३.९.

यं कश्चिदत्रागमजातमंशं पुमान् गृहीत्वैव सुपुण्यभूमौ । भुञ्जीत भोग्यानि सुखेन नानाविधान्यपीत्यध्वनि भुक्तिकेल्या ॥३२॥

बिभ्रद्वेणुमिति ः १०.१३.११.

सवेणुसुरसादरो न मम न प्रधानग्रहो न शासनदशाग्र्यधीरपि तदा यदा मत्प्रियाः ।
मदर्पितनिजोज्ज्वलाखिलरसा भवन्त्यादराद् भवामि भुवि किं च तद्रसभुगित्यबोधि स्थितेः ॥ ३३ ॥

हविर्भागादपि प्रीत्यै स्वल्पमप्यन्नमादराद् । भक्तैरर्पितमित्यासीद् यज्ञभुग्बालकेलिधीः ॥ ३४ ॥

भारतैवमिति ः १०.१३.१२.

ये मद्भक्तिरसैकलुब्धमनसस्तेषां कदाचित् सतामक्षाणि भ्रमतो दुरन्तविषये मग्नानि जातानि चेत् ।
त्यक्त्वा भोज्यमहं स्वमप्यतिजवात्संशोधयामि स्वतः तद्भीतिं च निवारयन्निति तथा कृत्वाऽच्युतो दर्शयत् ॥ ३५ ॥

सपाणिकवल इति ः १०.१३.१४.

यस्याङ्गुल्योऽखिलाभीष्ट–फलभाजस्तथाशयः । भक्ताधिकबलः सोऽहं तद्वशोऽस्मीत्यबोधयत् ॥ ३६ ॥

अस्मत्सुतावनमयं कुरुते सदैवेत्यालोच्य गोभिरमृतं स्वमदायि याभिः ।
स्याच्चेदहं तदवनालसधीरिदानीं कः स्यात्कृतघ्न इह मत्पर इत्यगात् किम् ॥ ३७ ॥

रसनैकतर्पणपरा ये स्युस्तदखिलगवां विषयतृष्णा । भ्रमणमपि युक्तमैशी परोक्षता चेत्यभूत्स्फुटं तत्र ॥ ३८ ॥

भक्त्याशयेन सद्भक्तभावार्पणमकारि यैः । कथं न तेषां गोरक्षादीक्षितः स्यामतो ययौ ॥ ३९ ॥

मयि परोक्षपदे विधिवैभवं स्फुरति दर्शितशक्ति न चान्यथा । सततमत्र यतध्वमतो जना मदपरोक्षकृताविति वेरितम् ॥ ४० ॥

गोजातरक्षणोपेक्षो यदि स्यामवनौ स्थिरम्। गोकुलत्राणकारीति स्याद्यशः कथमित्यगात् ॥ ४१ ॥

धीरः स एव भुवि शस्यतरः सदैव गोजातरक्षणचणो विषयेषु यः स्यात्।
आलोचयन्निति स धीरवरार्चिताङ्घ्रिरद्धा ययौ विशदयन् हितमार्गमीशः ॥ ४२ ॥

आस्वाद्यापि मदेकभोग्यममृतं दत्तं मया ये पुनर्गोजाताकलिताल्पमुग्धविषया जाता यदि प्राणिनः।
तेभ्यो दूरतरो भवाम्यहमिति प्राबोधि गन्त्रा ततस्तद्वत्सानयनच्छलाद्भगवता सत्कौतुकं तन्वता ॥ ४३ ॥

योग्यत्वं स्वमलक्षयन्नगणयंस्तत्क्लेशमेते मम दासा इत्यविभावयन्नपि तिरस्कुर्वन् स्वभोज्यं जवात्।
उक्त्वा यद्गतवानुपारमत मा यूयं स्वभोज्यादिहानेष्ये तानिति सत्सुखच्युतिरसह्या मे इति व्यञ्जितम् ॥ ४४ ॥

विषयासक्तगोजातवशीकरणहेतवे। किमागादच्युतो धृत्वा करे कवलमुत्तमम् ॥ ४५ ॥

कथमेकः प्रयातीति तच्छङ्कानुदयाय सः। सदाशयाधिकवलः सन्नेव किमगात्प्रभुः ॥ ४६ ॥

सर्वं त्यजामि समये बहुना किं प्रियामपि। सदाशयगतं भक्तं न कदापीत्यगात्तथा ॥ ४७ ॥

अम्भोजन्मजनिरिति : १०.१३.१५.

दुष्टोऽयं बहुपातकी सुररिपुर्नीचस्तमोमात्रभूरग्रे जन्मनि दुर्भवो निरयभाग् यस्तं ततो मोचितम्।
दृष्ट्वा क्रुद्धमनाः सनातनगुरौ तद्गोपवत्साहृतिं चक्रे तद्वितथीकृतां निजलिपिं मन्येऽसहिष्णुर्विधिः ॥ ४८ ॥

त्वया गोगोपानामवनमिह कार्यं यदुपते मया तद्वत्सानामिति समुचितोऽध्वाऽखिलमतः।
इति स्वाभिप्रायं विशदयितुमेवेश भवते ध्रुवं वत्सानामाहृतिमकृत वेधास्तव सुतः ॥ ४९ ॥

येनाभवत् सपदि मुक्तिरघस्य तस्य तच्चिन्तितं नु किमु तेन तदा निजान्तः।
सम्प्रष्टुमाहरदसावति-मुग्धबुद्धीन् बालांस्तदन्तरकृतावसतीन् विरञ्चिः ॥ ५० ॥

मन्मुख्यगोजातपरिग्रहस्ते कार्यो विधे यच्चतुराननोऽसि। इतीशवेदार्पणवाचमन्तः स्मरन् स युक्तं तदपाजहार ॥ ५१ ॥

कृष्णप्रिया

भोजन के अवसर कुछ बालकों ने कुसुमों के, कुछ ने पत्तों के, कुछ ने पल्लवों के, तब कोई ने अंकुरों के, कुछ ने फलों के, कुछ ने छींके के, कुछ ने वृक्षों की छाल के, कुछ ने पत्थरों के पात्र बना-बनाकर उसमें भोजन रखकर खाने लगे ॥९॥ भोजन करते करते सर्व बालक एवं भगवान् बालकृष्ण अपने अपने भोजन के पदार्थों का स्वाद रुचि का परस्पर वर्णन करते इस तरह स्वयं हसते औरों को हंसाते लोट-पोट बन जाते सब आनन्द से एक साथ भोजन करने लगे ॥ १० ॥ दर्शनीय श्याम मनोहर ने भोजन के समय अपने वेणु को कमर की फेंट में खोस ली थी। छड़ी जौर सींग तो बगल में दबा लिये थे। बायें कर कमल में हथेली में दधि मिश्रित घृतस्निग्ध भातका कौर और अंगूलियों में नींबू-टेंटी-आदि के फल के अचार व्यंजन दबा लिये थे, स्वयं मध्यमणि न्याय से विराजमान थे। इधर सारे सुहृद कृष्ण को मालाकार से वेष्टित, बन बैठे थे, तब प्यारे लालन् अपनी चुटीली एवं रसीली बातों से सब मित्रों के मन बहलाते भोजन कर रहे थे कि जो भगवान् एक यज्ञों के भोक्ता है उन भगवान की बाल सुलभ लीलाओं को देख के स्वर्गवासी देव लोग चक्कर में आ गये कि क्या यह परब्रह्म है या केवल गोपाल बाल है ॥ ११ ॥ अये भरत कुल दीपक परीक्षित् ? इस प्रकार आनन्द-प्रमोद से भोजन कर रहे वत्सपालक बालक तो अच्युत भगवन्मय हो चुके थे फिर बछड़े का ख्याल कैसे रहे तब उधर बछड़े हरी-हरी घास के लालच से वन के भीतर दूर दूर जंगल में जा घुसे ॥ १२ ॥ जब वत्स पालक बालकों का ध्यान बछड़ों की ओर गया और उन्हें न देखे तब वे सब घबडा गये तब भयग्रस्त सखाओं को भगवान् ने कहा–मित्रो ! घबड़ाना मत भोजन भी मत छोड़ों मैं अभी ही सारे बछड़ों को हाँक लाता हूँ ॥ १३ ॥ मित्रों को इस प्रकार आश्वासन देकर भगवान् श्रीकृष्ण कर कमल में कौर लिये हुए अपने और सखाओं के बछड़ों को खोजने के लिये पर्वतो, गुफाओं, जंगलों, झाड़ियों में चल पड़े ॥ १४ ॥ कुरुकुलोत्पन्न राजन् ! ब्रह्माजी जो प्रथम अन्तरिक्ष में रहे हुए अघासुर मोक्ष की लीला देखकर अत्यंत आश्चर्य चकित हो उठे थे। उन्होंने मनोरथ किया कि लीला से मनुष्य विग्रह ग्रहण किये हुए भगवान् श्रीकृष्णजी की और भी मनोहर महिमा भरी कोई लीला की झांकी करे। ऐसा मन में विचार कर पहले बछड़ों को पुनः बछड़ों को खोजने के लिये भगवान् के पधारने पर बालकों को भी अन्यत्र ले जाकर रख दिया और स्वयं अन्तर्हित हो गये। ब्रह्माजी ने ऐसा क्यों किया ? ऐसा आश्चर्य न करना, कारण कि जल से जड से उत्पन्न जड कमल से उत्पन्न ब्रह्मा आखिर तो उस जड़ प्रकृति में ही चले गये ॥ १५ ॥ इधर भगवान् श्रीकृष्ण ने बछड़ों को न देखा तब प्रभु श्री यमुना पुलिन पर पधारे परन्तु वहाँ पर बालकों को न पाया तब वन से दूर दूर घूम-घूम कर चारों और उन दोनों को खोजा ॥ १६ ॥

क्वाप्यदृष्ट्वान्तर्विपिने वत्सान् पालांश्च [1]विश्ववित् । सर्वं विधिकृतं [2]कृष्णः सहसावजगाम ह ।। १७ ।।
ततः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च । उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ॥ १८ ॥
यावद्वत्स[3]कवत्स [4]पाल्वकवपुर्यावत् कराङ्घ्र्यादिकं यावद् यष्टिविषाणवेणुदलशिग् यावद् विभूषाम्बरम् ।
यावच्छीलगुणाभिधाकृतिवयो यावद् विहारादिकं सर्वं विष्णुमयं गिरोऽङ्गवदजः सर्वस्वरूपो बभौ ।१९।
स्वयमात्माऽऽत्मगोवत्सान् [5]परिवार्यात्मवत्सपैः । क्रीडन्नात्मविहारैश्च सर्वात्मा प्राविशद् व्रजम् ॥२०॥
तत्तद्वत्सान् पृथङ् नीत्वा तत्तद्गोष्ठे निवेश्य सः । तत्तदात्माभवद् राजंस्तत्तत्सद्म प्रविष्टवान् ॥२१॥

तन्मातरो वेणुरवत्वरोत्थिता उत्थाप्य दोर्भिः परिरभ्य [6]निर्वृताः ।
[7]स्नेहस्नुतस्तन्यपयः सुधासवं मत्वा [8]परं ब्रह्म सुतानपाययन् ॥ २२ ॥
ततो नृपोन्मर्दनमज्ज[9]लेपनालङ्काररक्षातिलकाशनादिभिः[10] ।
संलालितः स्वाचरितैः प्रहर्षयन् सायं गतो यामयमेन माधवः ॥ २३ ॥
गावस्ततो गोष्ठमुपेत्य सत्वरं हुङ्कारघोषैः परिहूतसङ्गतान् ।
स्वकान् स्वकान् वत्सतरानपाययन् मुहुर्लिहन्त्यः स्रवदौधसं पयः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—विश्वजित् कृष्णः विपिने अन्तः क्व अपि वत्सान् च पालान् अदृष्ट्वा सर्वं विधिकृतं ह सहसा अवजगाम ॥१७॥ विश्वकृत् ईश्वरः कृष्णः ततः तन्मातॄणां च, च कस्य मुदं कर्तुं आत्मानं उभयायितं चक्रे ॥ १८ ॥ सर्वं विष्णुमयं गिरः अङ्गवत् (अजः) यावद् वत्सकल्पकवपुः यावत् कराङ्घ्र्यादिकं यावद् यष्टिविषाणवेणुदलशिक् यावत् विभूषाम्बरं यावत् शीलगुणाभिधाकृतिवयः यावत् विहारादिकं सर्वस्वरूपः अजः कृष्णः बभौ ॥ १९ ॥ सर्वात्मा आत्मा स्वयं आत्मवत्सपैः आत्मगोवत्सान् परिवार्य आत्मविहारैः क्रीडन् व्रजं प्राविशत् ॥ २० ॥ राजन् तत् तत् वत्सान् पृथक् नीत्वा तत् तत् गोष्ठे निवेश्य तत् तत् आत्माभवत् तत् तत् सद्म प्रविष्टवान् ॥ २१ ॥ वेणुरवत्वरोत्थिताः तन्मातरः दोर्भिः उत्थाप्य परिरभ्य निर्वृताः सुधासवं स्नेहस्नुतस्तन्यपयः परं ब्रह्म सुतान् मत्वा अपाययत् ॥ २२ ॥ ततः नृपोन्मर्दनमज्जलेपनालङ्काररक्षातिलकाशनादिभिः संलालितः स्वाचरितैः प्रहर्षयन् माधवः यामयमेन सायं गतः ॥ २३ ॥ ततः गावः सत्वरं गोष्ठं उपेत्य हुंकारघोषैः परिहूतसङ्गतान् स्वकान् स्वकान् वत्सतरान् मुहुः लिहन्त्यः स्रवदौधसं पयः अपाययन् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विधिकृतं ब्रह्मणा कृतम् ॥ १७ ॥ उभयायितं वत्सतत्पालरूपेण वर्तमानमित्यर्थः । तस्य ब्रह्मणः । अयं भावः । यदि तूष्णीमासे तर्हि तन्मातॄणां विषादः स्याद्यदि च तानेवानयिष्यामि तर्हि ब्रह्मणो मोहो न स्यादिति तदुभयप्रीतये परमदयालुस्तथा चक्रे इति ॥ १८ ॥ तदेव दर्शयति । यावदिति । वत्सपानां वत्सकानां चाल्पकं वपुः यत्प्रमाणकं प्रमाणमनतिक्रम्येत्यर्थः । एवमुपर्यपि योज्यम् । तत्र दलं पर्णरूपो वाद्यविशेषः । यद्वात्र वेणुदलं वेणुखण्डम् । शिक् शिक्यम् । यद्वा यावद्वत्सपादिवपुस्तावन्मात्रमपि सर्वस्वरूपोऽजः कृष्णो बभावित्यर्थः । उत्तरत्राप्येवम् । कथम् । 'सर्वं विष्णुमयं जगत्' इत्यत्र प्रसिद्धा या गीस्तस्या अंगवत्सा गीरेवार्थस्वरूपेण प्रत्यक्षा यथा तथा बभूवेत्यर्थः ॥ १९ ॥ एवं सर्वात्मा सन्व्रजं प्राविशत् । कथं स्वयमात्मैव प्रयोजकः । आत्मरूपान् गोवत्सानिति कर्मापि स्वयमेवेत्युक्तम् । आत्मरूपैर्वत्सपैः प्रतिवार्य प्रयोज्यकर्ताऽपि स्वयमेव आत्मविहारैः क्रीडन्निति क्रियाऽपि कारकाण्यपि स्वयमेवेत्यर्थः ॥ २० ॥ तत्तदात्मा तत्तद्गोपबालरूपोऽभवत् । ततस्तत्तत्सद्म प्रविष्टः ॥ २१ ॥ गोपिकामोहनमाह । तन्मातर इति । तदा तन्मातरो वेणुरवेण त्वरयोत्थिताः सत्यः सुतान्मत्वा परं ब्रह्मैव दोर्भिरुत्थाप्योदुह्य पयःसुधासवं पय एव सुधावत्स्वादु आसववन्मादकं स्नेहस्नुतं स्तन्यं पयः पाययामासुरित्यर्थः ॥ २२ ॥ एवं यामयमेन तत्तत्कालक्रीडानियमेन सायं गतः प्राप्तः स्वाचरितैः स्वस्याचरितैः शोभनैराचरितैर्वा ॥ मातॄः प्रहर्षयंस्ततस्ताभिरुन्मर्दनादिभिरुपलालित इति ॥ २३ ॥ गवां मोहनमाह । गाव इति । परिहूता आहूताश्च ते संगताश्च प्राप्तास्तान् ॥ २४ ॥

---

[1] विश्वदृक्–वीर. । [2] ज्ञात्वा–इति कस्यचित् । [3] वत्सप–श्रीधर. वंशी. वीर. विज. । [4] वत्सका–श्रीधर. वंशी वीर. विज. । [5] प्रतिवार्यात्म–श्रीधर. वंशी. विज. जीव. विश्व. शुक. प्रतिपाल्यात्म–वीर । [6] निर्भरम्–श्रीधर. वंशी. वीर. विज. विश्व. शुक. । [7] स्नुत–श्रीधर. वंशी. वीर. विज. विश्व. शुक. । [8] सुतं ब्रह्मसुता–वीर. । [9] गन्ध–च पु. टी. । [10] काञ्चनादिभिः–वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विश्ववित्सर्वज्ञः ।। १७ ।। ततो विधिकृतकर्मज्ञानानंतरम् । उभय इवाचरतीति उभयायते ततोऽकर्मकत्वात्कर्तरि क्तः । उभयायितमिति । इत्यर्थ इति निष्कर्षः । किमर्थमुभयायितमिति चेत्तत्राह—अयं भाव इति । तूष्णीं स्थितौ तत्तन्मातॄणां तत्तद्वियोगजः क्लेशस्तेषामानयने विधिमोहश्च न भावीत्येतदर्थं तथा चक्र इति तात्पर्यम् । विश्वकृदिति तत्र परिश्रमाभावमाह ।। १८ ।। अल्पमेवाल्पकं तच्च वपुरल्पकवपुः वत्सपवत्सकानामल्पकवपुर्वत्सपवत्सकाल्पकवपुः । यावत् प्रमाणमनतिक्रम्य वत्सपवत्सकाल्पकवपुर्यावद्वत्सपवत्सकाल्पकवपुः "यावदवधारणे" इत्यव्ययीभावः । समासे श्रमदर्शनात्प्रकारांतरमाह—यद्वेति । यावत्तावतोर्नित्यसंबंधात् । उपर्युत्तरत्रशब्दावग्रपरौ ज्ञेयौ । सर्वं विष्णुमयमेतदग्र इति शब्दं प्रक्षिप्यान्वयो विधेयः । 'मुख्यार्थप्रतिपत्तये पदांतराध्याहारः' इति न्यायात् । अंगवत् शरीरवत् । इत्यर्थ इति । सर्वं विष्णुमयमिति वाक् साक्षाच्छरीरिणीवार्थतः प्रत्यक्षा जातेति तात्पर्यम् । यद्वा—तस्या वाचोंगवदेकदेशवत् । नहि सर्वं जगद्विष्णुमयं तदा जातं किन्तु नंदव्रजस्यैव वत्सपवत्साश्चेति कृत्वैकदेशवदित्युक्तम् । यद्वा—सर्वस्वरूपोऽजो बभौ । कथं सर्वं विष्णुमयमिति गिरोंगवत् यथाऽज ओंकारोंगवत् अंगावयवसकलवर्णस्वरूपेण भातीत्यर्थः । तद्यथा शकुनैः सर्वाणि पर्णानि संतृणानि एवमोंकारेण सर्वा वाक्संधिता "ओंकार एवेदं सर्वम्" इति श्रुतेः । अथ वा सर्वं विष्णुमयं मत्वेति शेषः । अजः कृष्णः । सर्वस्वरूपो बभौ । कथं गिरोंगवत् यथा सकलशब्दजातं मात्रात्रयेण व्याप्योंकारो भाति तदुच्चारणादृते वेदाध्ययनादेरसंभवाच्च तस्य गिरोंगवत्त्वं वर्णसमूहरूपत्वाद्वा 'ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषिताम्' इत्यग्रे वक्ष्यमाणत्वात् ।।१९।। एवमुक्तरीत्या । प्रयोजकः प्रेरकः । इत्यर्थ इति । क्रियाकारकरूपेण स एव तदासीदिति भावः ।।२०।। तत्तदात्मा श्रीदामसुदामसुबलमंगलमधुमंगलादिस्वरूपः गोष्ठे गोबंधनादिस्थले । स कृष्णः ।। २१ ।। तदा गोपीनामतिस्नेहः प्रादुरासीदित्याह—तन्मातर इति । इत्यर्थ इति । पयस्यपि तदा वैलक्षण्यमभूदिति भावः । निर्भरमतिशयेन स्नेहस्नुतत्वेन स्नेहमयम् । तत्प्रेमास्वादमहारसिकः कृष्णः सुधामिव स्वादु आसवमिव मादकं पिबन् पिबन्ननुबभूव तल्लोभेन तस्यापि तत्पुत्री भाववासना प्रागासीत्सापि ब्रह्ममोहनप्रसंगे एव सिद्धेति । अत एव स्वसखीनपि वर्षपर्यंतं मोहयामासेति ज्ञेयम् । अत एव स्तन्यामृतं 'पीतम्' इति ब्रह्मोक्तिश्च संगंस्यते ।। २२ ।। स्वस्याऽऽचरितैः नित्यं क्रियमाणैः स्वविहारैरिति । नित्यविहाराणां हर्षजनकत्वासंभवं मत्वाऽर्थांतरमाह—शोभनैरिति । शोभना एव हर्षजनका भवंति नित्यविहारापेक्षया विलक्षणत्वादिति भावः । ततः पयःपायनानंतरम् । ताभिर्गोपीभिः ।। २३ ।। तथैव गवामपि स्नेहाधिक्यमाह—गाव इति । परिहूतेनाह्वानेन संगतान्प्राप्तान् । मुहुर्लिहंत्य इति स्नेहाधिक्यमाह । ऊधः स्तनाधिकरणं गवामवयवस्तत्र भवमौधसम् ।। २४ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अन्तर्विपिने वनमध्य एवेति मध्याह्ने तेषामात्मानं विना व्रजगमनाऽसम्भवात् सर्वबालकादीनां मोहनान्तर्द्धापने तदन्तर्द्धानं निजमञ्जुमहिमदर्शनाभिलाषादिकं चाशेषं सद्य एव ज्ञातवान् ह स्फुटं यतो विश्ववित् सर्वज्ञः तत्कुतः यतः कृष्णः स्वयं भगवान् एतावन्तं कालं तस्य बहिरन्वेषणलीलाद्यभिनिवेशं दृष्ट्वैव ज्ञानशक्तिस्तटस्थाऽऽसीत् सम्प्रति तु मनस्येव तदनुसन्धित्सायान्तु जातायां स्वस्यैवावसरे समुपस्थितेति भावः । ईशितुरिच्छाशक्तिपराधीनत्वात् सर्वशक्तेः ।।१७।। तन्मातॄणां सर्वदा स्वं पुत्रीयन्तीनां मुदं कर्त्तुं चकारात् विना स्वसङ्गं क्षणमपि स्थातुमपारयतां मित्राणामप्यजगरोदरप्रवेशवदात्मनो लीलावेशादन्योत्पातशङ्कया तान् कतिचिद्दिनान्येकान्ते रक्षितुञ्च द्वारकायां यादवानिवेति ज्ञेयम् । एवं तेषां मायाशये शयानत्वात् न तद्विरहदुःखं भगवतश्च तद्दर्शनेन तैः सहातिविच्छेद इति नासमञ्जसं च, आनुषङ्गिकं प्रयोजनमाह—कस्य चेति । तस्याष्टादशाक्षरतदीयमहामन्त्रोपासकत्वात् एवं कृष्णेच्छयैव तेषां मोहो न ब्रह्ममायासामर्थ्येनेति लभ्यते तत्तच्चात्मलीला च साधारणदृष्ट्या न सिद्ध्यतीति आत्मानमेवोभयायितम् उभयं वत्सा बालाश्चेत्येवं किं वा स्वयं भगवान् वत्सवत्सपाश्चेत्येवं द्वयं तद्वदाचरन्तं चक्रे नातीव भेदादुभयमिव चक्र इत्यर्थः । शीघ्रतत्तदवतारसामर्थ्यं द्योतयति—विश्वकृतां महापुरुषादीनामपीश्वरः स्वयमवतारीति ।। १८ ।। तदेव प्रपञ्चयति—यावदिति । यावच्छब्देनात्र यथा स्थानसङ्ख्याप्रमाणादिकं वाचनीयं ततश्च यावत्संख्यानि वत्सपानां वत्सकानां च तथा तेष्वल्पकानां वत्सपानुचरबालानां वत्सकानुचरक्रीडनमेषां वपूंषि तावदित्यर्थः । एवं यावन्ति यत्प्रमाणानि कराङ्घ्र्यादीनि तावदित्यर्थः । यावद्यष्टीत्यत्र यत्प्रकाराणीति ज्ञेयम् यावच्छीलगुणेत्यत्र यावन्ति यादृशानीत्यर्थः । तत्र शीलं सुस्वभावः गुणास्तूत्कर्षहेतवः शिक्षाविशेषा अभिधा वाणी तत्तन्नामाभिनिवेशो वा आकृतिराकारः द्वितीयादिशब्दात् पितृमात्रादिषु व्यवहरणं पूर्वाचरितस्मरणादिकं च तावत्तत्तत्सर्वम् अज एव बभौ यतः सर्वं तच्चान्यच्च प्राकृताप्राकृतं वस्तु स्वरूपं एवात्मकं यस्य सः तत्तु सर्वं कीदृशं विष्णुमयं श्रीभगवदात्मकं न तु जीवात्मकम् "आत्मा ज्ञानमयः शुद्धः" इत्यत्र स्वरूपेऽपि मयट्दर्शनात् व्यापकत्वापेक्षया विष्णुशब्दः अतो "यद्गतं भवच्च भविष्यच्च" इत्यादिश्रुतेश्चानन्तेत्याख्यानाच्च सर्वं तत्र प्रवर्तत एव व्यक्त्यपेक्षयैव तत्तज्जन्मादिव्यपदेश इति भावः । तदेवाह—अज इति । एवमेकस्यैव वत्सवत्सपादिरूपत्वेन ततः पृथक्त्वेन चाचिन्त्यशक्त्याऽभिन्नत्वमप्युक्तं तत्रोपयुक्तो दृष्टान्तः गिरो वाक्यस्य तिङ्सुबन्तचयलक्षणस्य अङ्गं कर्तृकर्मादिपदं यथा तद्वदिति तिङ्सुबन्तचयस्य तदभिन्नत्वे श्रीभगवतस्तु

तद्भिन्नत्वेनापि स्थितत्वे दृष्टान्तो ऽयमुपचारात् ॥ १९ ॥ गोवत्सानिति स्वभावतोऽतिवत्सलानां गवां वत्सेषु परमापेक्षत्वं सूचितम् अत एव प्रतिवार्यं बलान्निवर्त्य सर्वत्रात्मशब्दप्रयोगेन पूर्ववत्सादिभ्यो भेदो दर्शितः तेन च भगवत्स्नेहपात्रत्वे तेभ्यो न्युनमेषामभिप्रेतं तच्च "नाहमात्मानमाशासे" इत्यादि भगवद्वचनं व्यक्तमेव ॥ २० ॥ तत्तदात्मा तत्तत्स्वरूपः प्रविष्टवानभवत्प्रविश्यासीदित्यर्थः यद्वा, अर्थात्तत्तद्रूपेण स्वस्वगेहं प्रविष्टवान् सन् तत्तदात्मा तत्तत्प्रयत्नवानभवत् वत्सद्वारनिरोधगोपाह्वानसङ्केतितवेणुवादनादिकं च कृतवान् इत्यर्थः । "आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म" इत्यमरः ॥ २१ ॥ तन्मातॄणां चमत्कारं प्रपञ्चयन् पूर्वतः स्नेहविशेषं वक्तुं तल्लक्षणं दर्शयति—तन्मातर इति । उत्थाप्य अङ्के गृहीत्वेत्यर्थः । यद्वा प्रणतानुत्थाप्य उदूह्येति क्वचित्पाठः । किं त्वत्र उदूह्य उत्थाप्येति टीकावैपरीत्यं ज्ञेयम् अत्रैव टीकायाः साफल्यं स्यादिति च परं ब्रह्मेति श्रीशुकस्तत्पारमैश्वर्यस्फूर्त्या तासां भाग्यं श्लाघते अहो भाग्यमित्यादिवत् त्वरेति निर्भरमिति । सुधासवमित्यादिकं च पूर्वतो विशेषद्योतनाय ॥२२॥ तत्तद्बालकरूपोऽसौ तत्तद्गृहेषु सर्वेष्वेव सुखमवसदित्याह—तत इति । यामो दिनान्त्यप्रहरः तस्मिन् यमः गृहागमननियमः सर्वदा वर्षर्त्तुवत्तृणसम्पत्त्या तृप्तानां गवां तदानीमागमनतः पूर्वमेव वत्सानामागमावश्यकत्वात् तेन गृहं गतः सायं दिनान्त्यदण्डषट्कं व्याप्य उन्मर्दनादिभिः सम्यक् लालितो मातृभिः हे नृपेति पूर्वपूर्ववत् सर्वत्र ज्ञेयम् उन्मर्दनं तैलादिना मज्जः स्नपनं लेपनं चन्दनादिना आदिशब्दाद्वन्यवार्ता शयनादीनि माधवः श्रीकान्तः इति तद्गृहसम्पत्तिवृद्धिरपि सूचिता ॥ २३ ॥ गवां च तथैव स्नेहविशेषमाह—गाव इति । स्वकान् स्वकानिति स्वेषामेव निकटप्राप्तत्वात् ममतासम्बन्धेनातिशयाच्च वत्सतरान् वृद्धिं गतानपि वत्सान् औधसमाऽऽपीनभरमिति तदीयसर्वपयः श्रवणारम्भाभिप्रायेण तत्रापि सत्वरमिति मुहुरिति स्रवदित्यादिकं पूर्वतो विशेषज्ञापकम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अन्तर्व्विपिने वनमध्ये एवेति मध्याह्ने तेषामात्मानं विना व्रजगमनासम्भवात् सर्वं मायया बालकानां मोहनमन्तर्द्धापनञ्च तथा तस्यान्तर्द्धानं निजमञ्जुमहिम-दर्शनाभिलाषादिकञ्चाशेषं सहसा सद्य एव ज्ञातवान् । ह स्फुटम् । यतो बिश्ववित् सर्वज्ञः, अतः कृष्णः साक्षाद्भगवान् ॥ १७ ॥ वत्स-वत्सपाश्चेत्येवं द्वयं तत्स्वरूपं चक्रे, यतः कृष्णो भक्तवात्सल्याकृष्ट-चित्त इत्यर्थः, अनेन सच्चिदानन्दघनरूपता तेषां सूचिता । ननु मायातीता दृष्टिः कथं सम्भवेत्तत्राह–विश्वकृतां ब्रह्मादीनामपीश्वरः सर्वशक्तिप्रदः प्रभुर्न तस्याशक्यं किञ्चिदस्तीति भावः । अन्यथा मायिकसृष्ट्या ब्रह्मादिभिः सह साम्यापत्तिः ॥ १८ ॥ तदेव प्रपञ्चयति–यावदिति यादृगित्यर्थः । अल्पकेति क-प्रत्ययो बाल्येनात्यल्पप्रमाणापेक्षया, यद्वा, सच्चिदानन्दरूपत्वेन परममहत्त्वेऽपि लौकिकत्वापेक्षया, यद्वा, अल्पमाहात्म्येन न्यूनः को ब्रह्मापि यस्मात्तादृशं वपुरिति चिद्रूपसच्चिदानन्दघन-श्रीब्रह्म-विग्रहादपि तेषां वपुषो विशेषोऽभिप्रेतः, पूर्वमपि स्वत एव तेषां तादृशत्वात् । आदि-शब्देन मस्तकाद्यंगानि रोम नख गन्ध स्वर वर्णादीनि च शरीरं तद्भूषणादिपरिच्छदं चोक्त्वान्तर बाह्य करणादिकञ्च तत्तच्चेष्टादिद्वाराह—यावच्छीलेत्यादिना, शीलं स्वभावः शान्तत्ववाग्मित्व दक्षत्वादि, गुणः करुणादिः, अभिधा नाम वाक्यं वा, कृतिः कर्म्म । द्वितीयादिशब्दात् पितृमात्रादिषु व्यवहरणं पूर्वाचरितस्मरणादिकञ्चात्मनश्च स्वत एव तस्यांशत्वेन पुराप्यभेदात्; यद्वा, नित्यप्रियत्वात् सच्चिदानन्दविग्रहत्वेन प्रायः पृथक्त्वासम्भवादनुक्तिः, यद्वा, आदिशब्देन सोऽपि गृहीतः, यद्वा, स्वयमात्मेति वक्ष्यमाणेन स एवोक्तः । तावत्तत्तत् सर्वं विष्णुमयं श्रीभगवदात्मकं बभूव, स्वरूपे मयट् । व्यापकत्वापेक्षया विष्णु-शब्दः । एवमेकस्यैव वत्सपादिरूपत्वेन ततः पृथक्त्वेन चाभिन्नत्वं भिन्नत्वमप्युक्तम् । तत्रोपयुक्तो दृष्टान्तः–गिरो वाक्यस्य तिङ्सुबन्तचयलक्षणस्यांगं कर्त्तृ कर्म्मादि पदं यथा तद्वदिति भेदाख्यो वैष्णवसिद्धान्तो दर्शितः । ततश्च न जायते योगादिना कथमपि चेतस्यपि नाविर्भवतीत्यजः, सोऽप्येवं तत्तत्स्वरूपः सन् बभावशोभत, भक्तवर्गैरिव वेष्टित्वात्, यद्वा, बभावित्येक एव निज-शक्ति-विशेषतस्तत्तद्रूपेण प्रकाशते, न तु पृथक् तत्तद्रूपधारणेत्यर्थः । अत एवोभयायितमित्यादिप्रत्ययात्तदुभयवदाचरितमित्यर्थस्तत्त्वत उभयत्वाभावादेव इह सद्वैष्णवसिद्धान्तविशेषः श्रीभागवतामृतोत्तरखण्डे विवृतोऽस्ति । अत्रापि स एव दृष्टान्तो द्रष्टव्यः । कर्णमय्या गिरो वाण्या एकस्या अंगं वर्णो यथा शब्दादिरूपत्वेन नानाविधो भाति तद्वदिति । इत्थं श्रीभगवद्रूपत्वेन च सिद्धे सच्चिदानन्दघनमूर्त्तित्वेऽपि स्वमुखाद्यगभेदवदिन्द्रियादि-भेदोऽपि सिद्धः, एवमविशेषेऽपि बहुविशेषो वैष्णवसिद्धान्तस्य परमानुकूल एवाद्वैतप्रातिकूल्यापत्तेः । श्री वैष्णवैस्तु विग्रहविग्रहिभावो भगवतो मन्यते ॥ १९ ॥ गोवत्सानिति स्वभावतोऽतिवत्सलानां गवां वत्सेषु परमापेक्ष्यत्वं सूचितम् । अत एव प्रतिवार्य्य वनान्निवर्त्य सर्वात्मशब्दप्रयोगेण पूर्ववत्सादिभ्यो भेदो दर्शितः, तेन च भगवत्स्नेहपात्रत्वे तेभ्यो न्यूनत्वमेषामभिप्रेतम् । तच्च (भा० ९।४।६४)–'नाहमात्मानमाशासे' इत्यादि भगवद्वचनतो व्यक्तमेव, तथापि तेषां वने परित्यागो मायामोहितत्वात्तेषां किञ्चिद्दुःखादर्शनात् । एतदग्रेऽभिव्यक्तं भावि । ननु मा भवतु मोहेन तेषां दुःखम्, श्रीकृष्णस्य तु प्रियजनवियोगदुःखमाशंक्यते ? तत्राह – सर्वात्मा तान् सर्वानपि निजशक्तिविशेषेण सदा व्याप्य वर्त्तत एवेत्यर्थः । दिवादर्शनं स्वतो भवत्येव, अन्येदापि न विच्छेद इति भावः, यद्वा, सर्वात्मा सर्ववयस्यादि रूपत्वेनैव जानन्, न तु स्व-स्वरूपेणेत्यर्थः ॥ २० ॥ तत्तदात्मा तत्तद्वत्सपरूपः प्रविष्टवानभवत् प्रविश्यासीदित्यर्थः, यद्वा, वत्सरूपत्वमर्थादर्थानुगतं तं तमेव स्व-स्व-गेहं प्रविष्टवान् सन् तत्तदात्मा तत्तत्स्वभावोऽभवत् स्तन्यपानार्थं नीचेहेम्बाराव हरितादिकं वेणुवादनवत्साह्वानादिकञ्च स्वभावं प्राप्त इत्यर्थः । हे राजन्नित्याश्चर्य्येण सम्बोधनम्; यद्वा, हे भक्त्या राजमानेति

भवतैवैतद्बोद्धुं शक्यत इति भावः, यद्वा, राजन्मातृस्नेहविशेषार्थं राजमानः सन् ॥ २१ ॥ तन्मातॄणाञ्च मुत्प्रकारं प्रपञ्चयन् पूर्वतः स्नेहविशेषं वक्तुं तल्लक्षणं दर्शयति—तन्मातर इति। उत्थाप्यांकेषु गृहीत्वेत्यर्थः, यद्वा, प्रणामाय भूमौ पतितान् तत उत्थाप्य परं ब्रह्म श्रीकृष्णम्, तथोक्तिः परमैश्वर्य्यप्रकटनात्। त्वरेति निर्भरमिति सुधासवमित्यादिकञ्च पूर्वतो विशेषस्तत्तत्सम्बन्धादेव ज्ञेयः ॥ २२ ॥ तत्तद्बालकरूपोऽसौ तत्तदगृहेषु सर्वेष्वेव सुखमवसदित्याह—तत इति। यामो दिनान्त्यप्रहरस्तस्मिन् यमो गृहागमननियमः सदा वर्षाकालवत्तृणसम्पत्त्या तृप्तानां गवां व्रजे तदानीमागमनतः पूर्वमेव वत्सानामागमनावश्यकत्वात्तेन गृहं गतः सायमुन्मर्द्दनादिभिः सम्यग्लालितो मातृभिः। हे नृपेति यथा भवादृशो महाराजस्य पुत्राणां मातृभिरुन्मर्द्दनादिकं क्रियते, तद्वदिति भावः, यद्वा, नृपस्येवोन्मर्द्दनादिभिरुन्मर्द्दनं तैलादिना, मज्जः (मज्जनं) स्नपनं, लेपनं चन्दनादिना। आदि-शब्दाद्वन्यवार्ताप्रश्नशायनादीनि माधवः श्रीकान्त इति लक्ष्मीरूपाणां श्रीराधादीनामपि सन्तोषणं स्वेन रूपेणाभिप्रैति, यद्वा, मा विद्या विच्छक्तिरिति यावत्, तस्याः पतिः। तथा च श्रीहरिवंशे (भविष्य प० ८८।४९)-'मा विद्या च यतः प्रोक्ता तस्या ईशो यतो भवान्। तस्मान्माधवनामासि धवः स्वामीति शब्दितः।' इति, तत्तद्रूपेण तत्र वर्त्तमानत्वात् ॥ २३ ॥ गवाञ्च तथैव स्नेहविशेषमाह—गाव इति। स्वकान् स्वकानिति गवां वात्सल्यातिशयेन स्वभावतः स्वपुत्रस्यैव पायनात् वत्सतरान् वृद्धिं गतानपि वत्सानौधसमापीनसम्बन्धि, सत्वरमिति मुहुरिति स्रवदित्यादिकञ्चात्रापि पूर्वतो विशेषो ज्ञेयः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आत्मानं सङ्कल्पं उभयायितम् उभयोर्वत्सबालयोः तत्तत्सात्विकाङ्गिकयैषयिकादिषु सन्निवेशेषु यायः गमनं सज्जातं यस्य तथा चक्रे यतः ईश्वरः सः विश्वकृत् स्वासाधारणलक्षणावशिष्टः तथा च स्वस्व विभुस्वरूपं ब्रह्मतिरोहितवत्सबाल जीवस्य सात्त्विकाङ्गिक वैषिक सन्निवेशविशिष्टस्वसङ्कल्पविशिष्टं चक्रे इति भावः। कृष्णरूपाण्यसङ्ख्यानीत्युक्तेः "सत्यज्ञानानन्तानन्दमात्रैकरसमूर्त्तयः" इति प्रदर्श्यमानत्वात् स्वसङ्कल्पविलास एवायमिति भावः ॥ १८ ॥ वत्सबालसूक्ष्मवपुः यावत्सङ्ख्याकं वपुषः जात्येकत्वं सङ्ख्येत्युपलक्षणं परिमाणादिवैचित्र्यं यत्कराङ्घ्र्यादिकं यावत् ज्ञानकर्मेन्द्रियोपलक्षणं यष्टिविषाणवेणुदलशिक् यावत् इति तत्तत्पुरादेरुपलक्षणं विभूषाम्बरं यावत् तन्निवेशादीनामुपलक्षणं शीलगुणाभिधाकृति यावदिति एतद्वैचित्र्योपलक्षकं विहारादिकं वयश्च यावत् आदिपदेन स्वरबलादिवैचित्र्यं सर्वं विष्णुमयं जगत् इति गिर अङ्गवत् मूर्त्तिवत् अज अपरिणत एव स्वरूपेण श्रीकृष्णः स्वसङ्कल्पेन सर्वस्वरूपः स्वावतारवद्बभौ ॥ १९ ॥ स्वयमात्मा बालकरूप आत्मरूपान् गोवत्सान् आत्मरूपैर्वत्सपैरात्मरूपैर्विहारैश्च क्रीडन् एवं सर्वात्मा स्वसङ्कल्पेन सर्वरूपः व्रजं प्रविवेश ॥ २० ॥ तत्तदात्मा तेषां तेषां सर्वपदार्थानां रज्ज्वादिपर्यन्तानामपि आत्मा सङ्कल्पेन सर्वस्य सर्वसामग्रीसम्पादक इति यावत् ॥ २१ ॥ गोपीनां विमोहनसङ्कल्पकार्यमाह – द्वाभ्यां तन्मातर इति। परं ब्रह्म श्रीमन्नारायणं श्रीकृष्णं जगदुपकृतिपरतया श्रीकृष्णरूपेणाविर्भूतं सुतरूपं मत्वा स्नेहस्नुतं यत्स्तन्यं पयः तदेव सुधातुल्यम् आसवतुल्यं च ताभिः स्नेहार्पितत्वात् अपाययन् इति ॥ २२ ॥ यामयमेन प्रहरे प्रहरे या याः क्रीडाः तासां नियमेन वर्त्तमानैः स्वाचरितैः गोपगोपीः प्रीणयन् सायं प्रातरागतो गतश्चेति वर्षं क्रीडां चकारेति अनेन गोपीनां रोहिणीयशोदावत् सर्वविधकैङ्कर्यकरणभावना प्रत्यनुसारिणी श्रीभगवत्क्रीडा सञ्जातेति व्यङ्ग्यं रहस्यम् "इच्छागृहीताभिमतोरुदेह" इति वाक्यात् ॥ २३ ॥ वैकल्यं चाह—वत्सवत्योऽप्यपाययन् इति। वक्ष्यमाणत्वात् स्वकान् पूर्वं स्वीयानित्यनेन एष्वेव स्नेहो व्यञ्जितः न त्वद्यतनेषु इति तेषां परब्रह्मरूपत्वञ्च व्यज्यते ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अन्तर्विपिने वनमध्ये क्वाप्यदृष्ट्वा विश्वदृक् हेतुगर्भमिदं तत्त्वात् सर्वं वत्सवत्सपाहरणरूपं कर्म चतुर्मुखकृतमाशु अवगतवान् ॥ १७ ॥ तेषां वत्सानां वत्सपानां च मातॄणां कस्य च ब्रह्मणश्च प्रीतिं कर्तुं विश्वदृगीश्वरश्चेति हेतुगर्भमिदं विश्वदृक्त्वाद्यथेष्टपरिणामोपयुक्तसार्वज्ञादिगुणयुक्तत्वादीश्वरत्वात्प्रभुत्वात् सर्वशक्तित्वाच्च आत्मानमेव उभयायितं वत्सवत्सपायितं तदुभयवदाचरन्तं चक्रे ॥ १८ ॥ तदेव प्रपञ्चयति – यावदिति। यावच्छब्दः साकल्यार्थः अजः श्रीकृष्णः यावद्वत्सानां वत्सपानां चाल्पवपुरादिकं तावत्स्वरूपो बभौ कथम् "सर्वं विष्णुमयं जगत्" इति या प्रसिद्धा वाणी तस्या अङ्गवत्तदर्थमूर्तिवत् सा गीरेवार्थस्वरूपेण प्रत्यक्षा यथा भवति तथा बभावित्यर्थः। दलानि भूषार्थं शिरस्सु निहितानि किसलयदलानि शिक् शिक्यानि शीलानि स्वभावाः अभिधा नामानि आकृतिरवयवसंस्थानं गिरोऽर्थवदिति पाठे प्रत्यक्षस्तदर्थं इवेत्यर्थः ॥ १९ ॥ एवं स्वयमेव सर्वात्मा सन्नात्माभिन्नैर्वत्सपैरात्माभिन्नान् गवां वत्सान् स्वयमात्मैव प्रयोजकः परिपाल्यात्मविहारैः क्रीडन् व्रजं प्राविशत् ॥२०॥ पृथङ्नीत्वा पृथक्कृत्य तत्तद्गोष्ठे प्रवेश्य तत्तदात्मा तत्ताद्बलप्रतिरूपो भूत्वा तत्तद्बालगृहं प्रविष्टवान् ॥ २१ ॥ अथ गोपिकामोहनप्रकारमाह—तन्मातर इति। वेणुरवेण वेणुलिङ्गेन त्वरयोत्थितास्तत्तद्वत्सपमातरः सुतान् मत्वा परं ब्रह्मैव दोर्भ्यां निर्भयं पूर्णानन्दं यथा तथोत्थाप्य उपगुह्य स्नेहस्नुतः स्नेहेन स्नुतपयोधराः। यद्वा स्नेहेन स्नुतं स्तन्यं पय एव सुधावत्स्वादु आसववन्मादकं पाययामासुः ॥ २२ ॥ एवं माधवः यामयमेन तत्तत्कालनियमेन सायं गतः प्रातः ततः शोभनैराचरितैश्चेष्टितैः प्रहर्षयन् हे नृप! उन्मर्दनादिभिः संस्कारितो

बभूव ॥ २३ ॥ अथ गवां मोहनप्रकारमाह—गाव इति । हुङ्कारघोषैः परिहूतांश्च सङ्गतांश्च तान् वत्सान्मुहुर्लिहन्त्यः स्रवदौधसमापीनोद्भवं पयः क्षीरमपाययन् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

लीलावेशं दर्शयति—क्वापीत्यनेन । ज्ञानाद्याः शक्तयः स्वानवसरे समयमिव तटस्थास्तिष्ठन्ति स्वावसरे स्वसेवार्थं तमुपतिष्ठन्तीति ज्ञापितम् ॥ १७–२० ॥ स्वं पुत्रीयन्तीनां तन्मातॄणां चकारात् विना स्वसङ्गमतिष्ठतां तेषां स्वीयेन लीलावेशेनाघोदरप्रवेशवदुत्पातान्तरशङ्कया कतिचिद्दिनानि च एकान्ते तान् रक्षितञ्च द्वारकायां यदूनिवेति ज्ञेयं तत्तदात्मेति बहुव्रीहिणा तत्तद्यत्नवान् भवेदित्यर्थः । "आत्मायत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च" इत्यमरनानार्थवर्गात् । प्रासङ्गिकं प्रयोजनमाह—कस्य चेति । एकस्वरूपत्वादुभयायितमेव न तूभयं विश्वकृतां पुरुषाद्यवताराणामीश्वरोऽवतारी विष्णुमयमित्यौपचारिकविकारार्थे मयट् ॥ २१–२४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवमारब्धे भोजने ब्रह्मणापहृतान् वत्सान् स्वयं विचिन्त्य पुनस्तत्रैवागत्य तथैव तेनापहृतान् बालकांश्च वीक्ष्य यदकार्षीत्तदाह—यावद् वत्सपेत्यादि । सर्वः स्वरूपः सन् स बभौ । तद्रूपया ऐच्छिक्या प्रकाशिकया मायया सर्वेषां वत्सपानां वत्सकानाञ्च तत्तद्वपुर्वयःस्वभावानाञ्च वेणु विषाणभूषाम्बराणाञ्च स्वरूप इत्यर्थः । यावच्छब्दः साकल्यार्थः प्रमाणार्थश्च । यावदादि सर्वं पदं क्रियाविशेषणम् । 'सर्वं विष्णुमयं जगत्' इति वचसोऽङ्गवच्छरीरवत् पूर्वं तद्वचो वचस्त्वेनैव स्थितम्, सम्प्रति तद्वचः शरीरीव जातमित्यर्थः । तत्र विष्णुत्वेनारोपः, एतत् सर्वं विष्णुरेवेति अङ्गवच्छब्द–तात्पर्यम् चेतनाचेतनयोरेव चिदानन्दरूपत्वमिति वेणुविषाणदलशिक्यादीनामुपपादनम् । एवममूर्त्तानां गुणशीलाभिधादीनाञ्च ॥ २०–३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुनः किं कृत्वा विचिकायेत्यत आह—क्वेति । विश्वविदपि क्वापि शाद्वलादन्यत्रापि वत्सान् पुलिनादन्यत्रापि पालान् अदृष्ट्वा विचिकायेति पूर्वेणैवान्वयः । ननु, कृष्णः किं वत्सादिचौर्य्यक्षण एव विवेद तत्क्षणानन्तरं वा किञ्चिदन्विष्य वा विवेदेत्यत आह, सर्वमिति । सहसा चौर्य्यक्षण एव ब्रह्मणा अतर्कितमेवेत्यर्थः "अतर्किते तु सहसा" इत्यमरः ॥ १७ ॥ ततश्च भगवन्मायया मोहिते ब्रह्मणि मोहकम्मन्ये स्वभवनं गते सति स्वस्य ब्रह्ममायामोहनाभावमात्रव्यञ्जकः पूर्ववत्स्वीयैर्वत्सबालकैः सह भोजनादिलीलाभिर्विहारो नातिचित्रमित्यतो मायातीतान् बलदेवपर्य्यन्तानपि स्वपरीवारान् मोहयित्वा लोके स्वमायाबलं दर्शयितुं परमवत्सलानां गोगोपीनां स्वस्मिन्पुत्रभावमभिलषन्तीनां मनोरथं पूरयितुं ब्रह्माणं मोहयित्वापि पुनर्महाविस्मयसमुद्रे प्रक्षेप्तुम् एकस्मिन्नेव स्वाभीष्टदेवे श्रीभागवतोपदेष्टरि वासुदेवे भक्तिमन्तं खलु तं च परःसहस्रान् वासुदेवान् दर्शयितुं स्वयमेव वत्सबालकाद्याकारो बभूवेत्याह, तत इति । कस्य ब्रह्मणः आत्मानं स्वयमेव उभयायितं उभयं वत्सत्वं बालकत्वं च अयितं प्राप्तं वत्सबालरूपिणमित्यर्थः । विश्वकृतां महत् स्रष्टादीनामपीश्वर इति तत्र सामर्थ्यं द्योतितम् ॥ १८ ॥ तदेव प्रपञ्चयति—यावत् यत्परिमाणकं वत्सपानां वत्सकानां च अल्पकं वपुः जात्यपेक्षया एकवचनम् अत्यल्पानि कोमलानि वपूंषीत्यर्थः । एवमुत्तरत्रापि विहारादिकमित्यत्रादिशब्दात् पितृमात्रादिषु व्यवहरणं पूर्वाचरितन्मरणादिकं च अजः अजन्यतयैव भीत एव कृष्णः सर्वस्वरूपः तावद्वपुरादिरूपः सन् बभौ सर्वं विष्णुमयं जगदिति प्रसिद्धा या गीस्तस्या अङ्गवत् सा गीरेव मूर्त्ता प्रत्यक्षा यथा बभूवेत्यर्थः ॥ १९ ॥ ततश्च मध्याह्नापराह्णयोः पूर्ववदेव क्रीडितवतस्तस्य सायं गोष्ठप्रवेशमाह—स्वयमिति पञ्चभिः । एवं सर्वात्मा सन् व्रजं प्राविशत् कथं स्वयमात्मैव प्रयोजक आत्मरूपान् गोवत्सानिति कर्मापि स्वयमेव आत्मरूपैर्वत्सपैः प्रतिवार्य्येति प्रयोज्यकर्त्तापि स्वयमेव आत्मविहारैः आत्मभिरात्मभूतैर्बालकैः सह ये विहारा वेणुवादनादयस्तैः क्रीडन्निति क्रियाकारकाण्यपि स्वयमेव इत्यर्थः, अत्र पुलिने वत्सपाला उपविश्य भुञ्जत एव शाद्वलेषु वत्सास्तृणं चरन्त्येव तानन्वेष्टुं कृष्णो विपिने पर्य्यटत्येव क्षणमात्रायमाणं वर्षं व्याप्येत्येतत्त्रिकं सर्वैरदृष्टं तत्तत्स्थलेषु प्रतिदिनं भ्रमद्भिरन्यैर्लीलापरिकरैः कृष्णस्वरूपवत्सबालैर्बलदेवेनापि वर्षवातातिपाद्यैरप्यस्पृष्टमेवाचिन्त्यशक्त्या योगमायया व्यराजीदेव यस्यैक एव कृष्णो ब्रह्मणा कवलवेत्रादिलक्ष्मलक्षितो मोहान्ते ददृशे तुष्टुवे चेति ज्ञेयम् ॥ २० ॥ तत्तदात्मा श्रीदामसुदामसुबलादिबालकस्वरूपः कृष्णस्तत्तत्सद्मप्रविष्टवानित्यन्वयः ॥ २१ ॥ हन्त हन्त यशोदाया इवास्माकमपि कृष्णः किं पुत्रो भवेत् इति गोपीनां मनोरथस्य सिद्धिं बहिरलक्षितां वदन्नेव तासां मोहनमाह—तन्मातरस्तत्तन्मातरः सुतान्मत्वा परं ब्रह्मैव दोर्भिरुत्थाप्य अङ्के कृत्वा स्तन्यं पयोऽपाययन् उद्गृह्येति क्वाचित्कः पाठश्च निर्भरं परिरभ्येति निर्भरं स्नुतेति पूर्वतः स्नेहाधिक्यसूचकं परं ब्रह्मापि सुधासवं मत्वा तासां स्तन्यं पयोऽपिबदित्याह—सुधासवमिति । स्नेहस्नुतत्वेन स्नेहमयं तत् प्रेमास्वादमहारसिकः कृष्णः सुधामिव स्वादु आसवमिव मादकं पिबन् पिबन्ननुबभूवेति तल्लोभादेव तस्यापि तत्तत्पुत्रीभाववासनाप्रागासीत्साऽपि ब्रह्ममोहनप्रसङ्गे एव सिद्धेत्यत एव स्वस्य सखीनपि वर्षपर्य्यन्तं योगमायया मोहयामासेति ज्ञेयम् "स्तन्यामृतं पीतमतीव ते मुदा"

इति ब्रह्मणापि वक्ष्यमाणत्वात् ॥ २२ ॥ यामानां यमेन उपरमेण "यमु उपरमे" तस्मिन् सतीत्यर्थः माधवः कृष्णस्तत्स्वरूपभूतबालकगणश्च गतः स्वस्वगृहमिति शेषः ततश्च उन्मर्दनं सुगन्धतैलाभ्यञ्जनं तदनन्तरं मज्जः स्नपनं मातृभिः सायं संलालितः ॥२३॥ गोपीनामिव ततो गवामपि मोहनमाह– गाव इति । परिहूता आदावाहूतास्ततः सङ्गताश्च तान् अत्रापि सत्वरमिति मुहुर्लिहन्त्य इति मुहुः स्रवदिति स्नेहाधिक्यसूचकम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वं वत्सवत्सपहरणं विधिकृतं ब्रह्मणा कृतं सहसा आशु ह स्फुटमवजगाम अवगतवान् यतो विश्ववित् सर्ववित् ॥ १७ ॥ तन्मातॄणां मुदं कर्तुं पुत्ररूपेणापूर्वमानन्दं दातुं कस्य च मञ्जु महित्वप्रकाशनेन मुदं कर्तुं चकारात्तं विमोहितं कर्तुम् आत्मानभुभयायितं वत्सवत्सपरूपेण वर्त्तमानं चक्रे न तु तानानीतवान् यतो विश्वकृत् ईश्वरः ॥ १८ ॥ तत्प्रपञ्चयति—यावदिति । अजः श्रीकृष्णः यावत् वत्सपानां वत्सकानां चाल्पकवपुरादिकं तावत्सर्वस्वरूपो बभौ सर्वं विष्णुमयं जगदिति या गीस्तस्या अङ्गवत् अर्थवत् यथा अस्याः अर्थः प्रतीयते तथा बभौ इत्यर्थः ॥ १९ ॥ स्वयमात्मा प्रयोजकः आत्मरूपान् गोवत्सान् कर्मभूतान् आत्मरूपैः वत्सपैः प्रयोज्यकर्तृभिः प्रतिवार्य इत्थं सर्वात्मा सर्वरूपः आत्मविहारैः क्रीडन्निति सर्वक्रियारूपश्च व्रजं प्राविशदित्यन्वयः ॥ २० ॥ स श्रीकृष्णः तत्तदात्मा तत्तत्प्रतिरूपो व्रजं प्राप्तोऽभूत् तत्र च तत्तद्वत्सान् पृथक् नीत्वा तत्तद्गोष्ठे निवेश्य तत्तत्सद्म प्रविष्टवानित्यन्वयः ॥ २१ ॥ गोपिकानां पुत्ररूपेण प्राप्तात्परमपुरुषात्सुखमाह—तन्मातर इति, द्वाभ्याम् । वेगुरवैस्त्वरयोत्थिताः सत्यः सुतान्मत्वा निर्भरं स्वानन्दपूर्णं परं ब्रह्म दोर्भिरुत्थाप्य उद्गृह्य परिरभ्य आलिङ्ग्य परमानन्दमूर्तिस्पर्शसुखं प्राप्य सुधासवं सुधावत्स्वादु आसववन्मादकं स्नेहस्नुतस्तन्यपयः अपाययन् पाययामासुः ॥ २२ ॥ हे नृप ! इत्थं माधवः श्रीपतिः यामयमेन तत्तत् प्रहरबालचरितनियमेन बाललीलानामतिरुचिरत्वात्प्रहरनिर्वर्त्यत्वमुक्तं सायं गतः प्रातः स्वाचरितैः स्वस्यासाधारणैरन्येषां दुरनुष्ठेयराचरितैरित्यर्थः । मातॄः प्रहर्षयन् परमानन्दं प्रापयन् ततो मातृभिरुन्मर्द्दनादिभिर्लालितोऽभूदित्यर्थः ॥ २३ ॥ गवां वत्सरूपिभगवतः सकाशात्सुखमाह–गाव इति । हुङ्कारघोषैः परिहूताः आहूताश्च ते सङ्गताश्च तान् ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

पुनः कथं विचिकायेत्यत्राह क्वापि शाद्वलादन्यत्रापि वत्सान् पुलिनादन्यत्रापि पालान् अदृष्ट्वेति प्राग्वत् विचिकायेति पूर्वेणैवानुषङ्गः । ननु चौर्यक्षण एवावजगाय तदनन्तरं किञ्चिदन्विष्य वेति चेत्तत्राह विश्वविदिति सर्वज्ञोऽसौ सर्वमिदं विधिकृतं तद्धेतुकमिति सहसा चौर्यक्षण एव पद्मभुवार्तकितमेवावजगाय "अतर्किते तु सहसे" त्यमरः ॥ १७ ॥ अथ विरिञ्चस्य मोहकरं परमैश्वर्यं भगवता प्रकाशितमित्याह–तत इति । मोहकम्मन्ये विरिञ्चे स्वलोकं गते सति ईश्वरो नन्दार्भक आत्मानं स्वमुभयायितं चक्रे उभयं वत्सत्वं वत्सपालकत्वञ्चायितं प्राप्तं वत्सं तत्पालकरूपिणं व्यञ्जयदित्यर्थः । किमर्थमित्यत्राह स्वस्मिन् पुत्रभावं वाञ्छन्तीनां सखिमातॄणां तत्तत्पुत्रतया मुदं कर्त्तुं कस्य च विरिञ्चस्य विज्ञस्याप्यज्ञतया स्वामिपरीक्षायां प्रवृत्तस्यापि पुत्रत्वाद्भृत्यत्वाच्चानुग्राह्यस्य परः सहस्रवासुदेवरूपदर्शनेन महाविस्मयरसानुभावनलक्षणां मुदं कर्त्तुमित्यर्थः । यतो विश्वकृतः तत्तद्व्यञ्जने समर्थ इत्यर्थः ॥ १८ ॥ तदेव प्रपञ्चयति यावदिति । वत्सपानां वत्सकानां चाल्पकं वपुर्यावत् यत्परिमाणकं तदनतिक्रम्येत्यर्थः । जात्यपेक्षयैकवचनं अल्पानि कोमलानि वपुंषीत्यर्थः । एवमुत्तरत्रापि योज्यम् यावद्विहारादिकमित्यत्रादिशब्दात् पित्रादिव्यवहारो ग्राह्यः । अजोऽपूर्वदेहयोगाशून्यः कृष्णः पूर्वोक्तं सर्वविष्णुमयं स्वात्मकं प्रकाश्य तत्सर्वस्वरूपो बभौ "अजायमानो बहुधा विजायते" इति वेदवाचोऽङ्गवत् सा गीरेव मूर्त्ता यथा प्रत्यक्षाभूदित्यर्थः । गिरः प्रणवलक्षणस्य महावाक्यस्याङ्गवत् सा यथा ऋगाद्यङ्गतया बहुरूपा तद्वदित्येके ॥ १९ ॥ ततश्च मध्याह्नापराह्णयोः पूर्ववदेव कृतविहारस्य तस्य सायं व्रजे प्रवेशमाह स्वयमिति पञ्चभिः । एवं सर्वात्मा सन् व्रजं प्राविशत् कथं स्वयमात्मैव प्रयोजकः आत्मभूतान् गोवत्सान् इति कर्मापि स्वयमेव आत्मभुतैर्वत्सपैः प्रतिवार्येति प्रयोज्यकर्त्तापि स्वयमेव आत्मविहारैरात्मभूतैर्बालकैर्ये विहारा वेगुवादनादयस्तैः क्रीडन्निति क्रियाकारकाद्यपि स्वयमेवेत्यर्थः ॥ २० ॥ तत्तदात्मा श्रीदामसुदाम सुवलादिवालस्वरूपः ॥ २१ ॥ वाञ्छिततत्पुत्रभावानां गोपीनां वाञ्छां पूरितवानिति ब्रुवंस्तासां मोहनमाह–तदिति । तत्तन्मातरः सुतान् मत्वा परं ब्रह्मैव दोर्भिरुत्थाप्योत्सङ्गे कृत्वा स्नेहेन स्नुतं स्तन्यपयोऽपाययन् निर्भरमिति पूर्वतः स्नेहाधिक्यं सूच्यते, कीदृशं तत्पयः सुधामिव स्वादु आसवमिव मादकमित्यर्थः । परब्रह्मापि तादृशं विज्ञाय तदपिवदिति भावः "स्तन्यामृतं पीतमतीव ते मुदे" ति ब्रह्मोक्तेः "ये यथा मा" मिति तद्वाक्यात्तत्तद्भावानुसारेण तत्तत् पुत्रभावाय हरेः स्पृहाऽभूदेव यदर्थं स्वसखानां वत्सरमेकं योगमाया मोहनम् ॥ २२ ॥ यामो वासरान्त्यः प्रहरस्तस्य यमेन उपरमेण हेतुना माधवस्तत्तद्बालकवपुस्तत्तत् स्वगृहं गतस्तन्मातृगणैरुन्मर्द्दनादिभिः सायं संलालितोऽभूदिति शेषः । उन्मर्दनं सुगन्धितैलाभ्यङ्गनं ततो मज्जः स्नपनं शोभनैराचरितैर्मातॄः प्रहर्षयन् ॥ २३ ॥ अथ गवां मोहनमाह परिहूता आहूतास्ततः सङ्गताश्च तान् इहापि सत्वरमिति मुहुर्लिहन्त्यः स्रवदिति पूर्वतः स्नेहाधिक्यं सूच्यते ॥ २४ ॥

श्रीसुबोधिनी

ततो**न्तर्विपिने क्वापि वत्सान्** वत्सपांश्चा**दृष्ट्वा** विचारे क्रियमाणे **विश्ववित्** सर्वज्ञो **विधिकृतं सर्व**मिति **सहसा** शीघ्रमेवा**वजगाम** ज्ञातवान् हेत्याश्चर्यम् ॥ १७ ॥ **ततो** भगवान् ब्रह्मणो **मुदं कर्तुं** बालकान् नानीतवान्, तथा सति तस्य स्वप्रयासवैयर्थ्यात् खेद एव भवेत्, तूष्णीं गृहगमने तु **तन्मातॄणां** खेदो भवेत्, अत उभयेषां **मुदं कर्तुमात्मानमुभयायितं चक्रे** यतोयं **विश्वकृत्**, कोयं प्रयासः ? ननु तज्जनकानां कालकर्मस्वभावानामभावात् कथं कृतवानित्याशङ्क्याहेश्वर इति ॥ १८ ॥ इयं सृष्टिरात्मसृष्टिरेव जातेत्याह **यावदिति**, **यावन्तो वत्सा वत्सपाश्च** सङ्ख्यया तावान् भगवानेव जातो**ल्पकानि वपूंषि** जातः, **यावदिति** पदार्थानतिवृत्तौ, **वत्सकवत्सपालपकवपुर्यावत्** तावद्रूपो जात इत्यवधारणे वा, **कराङ्घ्र्यादिकं यावत्** तावदपि जातो **यष्टिविषाणवेणुदलशिग् यावद् विभूषाम्बरं च यावत्** तावदपि जातः, **शीलगुणाभिधाकृतिवयो यावद् विहारादिकं** च **यावत्** तावद्रूपः सन् **बभा**वितिसम्बन्धः, ननु कथमेवं जात इत्याशङ्क्याह **सर्वस्वरूप** इति, नन्वेकस्य कथं सर्वभावस्तत्राह "सर्वं विष्णुमयं जग"दित्यत्रवाक्ये "सर्वं विष्णुमय"मितिप्रतीकग्रहणं, "सर्वं विष्णुमय"मित्येवम्रूपा या गीस्तस्या**अङ्गव**दर्थवत् 'सर्वं विष्णुमयं जग'दिति वाक्यार्थो यथाश्रुतो यथोपपद्यत आत्मसृष्ट्याधिदैविकसृष्ट्या वा यथैवोपपद्यते तथैवैदपि जातमिति ज्ञातव्यम् ॥ १९ ॥ एवं सर्वरूपो भूत्वा रूपाणां विनियोगमाह **स्वयमिति**, **स्वयमेव** भगवानात्मना स्वेनैवात्मरूपान् **गोवत्सान् परिवार्यात्म**रूपैरेव **वत्सपैस्तत्तद्वत्सान् परिवार्य** सह **वात्म**रूपैरेव **विहारैः क्रीडन् स्वयमेव** धर्मिधर्मभावं प्राप्तः **सर्वात्मा व्रजं प्राविशत्** ॥ २० ॥ ततस्**तत्तद्वत्सान्** पूर्ववदेव यावता मार्गेण यत्र गम्यते तावद् दूर एव ततस्ततः **पृथङ् नीत्वा तत्तद्गोष्ठे निवेश्य** स्थापयित्वा **स** एव भगवान् **तत्तदात्माभवत्** तत्र स्थित्यर्थं तत्तद्भावं प्राप्तवान् बन्धनादिभावं ततो वत्सरूपेण **तत्तत् सद्म** गृहं तेन तेन प्रकारेण **प्रविष्टवान्** ।।२१।। एवं तेषां कार्यमुक्त्वा **गोपिकानां** पूर्ववदेव तेषु वृत्तिमाह **तन्मातर** इति द्वाभ्यां, **वेणुरवे** श्रुते **त्वरोत्थिता** जाताः, उपविष्टानपि बालकान् **दोर्भिरुत्थाप्य परिरभ्य निर्वृता** जाता देहस्वभावोपि तदधिष्ठातृकृतस्तथैव जात इत्यत्यन्तस्नेहेन स्नुतं तनूद्भवं यत् **पयस्तदेव सुधारूपमासवं** मादकं च जातं तादृशं **पयः परं ब्रह्म** सुतान् मत्वा **पाययन्**, वस्तुतस्त्वेते मुक्तस्तना भवन्ति ॥ २२ ॥ **ततो** बहिरपि सेवां कृतवत्य इत्याह हे **नृप**, **प्रथममुन्मर्दनं** तैलपिष्टेनोद्वर्तनं, ततो **मज्जो** मज्जनं, स्नानमितियावत्, ततो **लेपनं गन्धादिना**, ततो**लङ्काराः**, ततो **रक्षा**, तत**स्तिलकादि**, ततोशनं भोजनं, ततो वार्तासुखशयनादि, तैः सर्वैरेव **संलालितः** सन् **स्वाचरितैर्यथापूर्वं** बालका आचरन्ति तादृशचरित्रैः **प्रकर्षेण हर्षयन्** जातः, नन्वेतावता भूयान् कालो लगति तत् संसारव्यापृतानां प्रत्यहं कथं सम्भवतीत्याशङ्क्याह **सायं गत** इति, **साय**ङ्कालेति **गत**स्तावद्भावं प्राप्नोति, तत्र हेतु**र्यामयमेने**ति, **यामस्य** कालस्य प्रहरात्मकस्य **यमेन** नियमेन, यावतैतावान् कालो भवति तावत् सूर्यगतिः कुण्ठिता भवतीत्यर्थः, कथमेवमत आह **माधव** इति, लक्ष्मीपतिरयमतः सर्वसम्पत्तिः, कालस्य च नियन्तातो न कालकृतानुपपत्तिरिति ।२३। एवं मातॄणां बालेषु वृत्तिमुक्त्वा गवां वत्सेषु वृत्तिमाह **गाव** इति, **ततो** वत्सप्रीत्यनन्तरं **गावोपि गोष्ठमुपेत्य सत्वरं** त्वरया **हुङ्कारघोषैः** स्वकृतैर्हुङ्कारशब्दैः **परिहूता** आहूताश्च ते **सङ्गताश्च**, ततस्तादृशान् **स्वकान् स्वकान् वत्सतरान्** स्थूलवत्सानप्य**पाययन्** स्नेहान् **मुहुर्लिहन्त्यः**, न चाग्रे दोहः कथं भविष्यतीत्याशङ्कनीयं, यतः **स्रवदेवौधस**मोधः सम्बन्धि **पयो** न त्वन्तःस्थितम् ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्तर्विपिने वनमध्ये क्वापि वत्सान् वत्सपालांश्चादृष्ट्वा सहसा झटिति सर्वं वत्सादिहरणं विधिकृतं ब्रह्मणा कृतमवजगाम ज्ञातवान् । ज्ञाने हेतुगर्भविशेषणमाह—विश्वविदिति । 'ह' इत्याश्चर्ये । 'सर्वज्ञोऽपि कथं पूर्वमज्ञवद्विचिकाय' इत्याश्चर्यम् ।। १७ ।। यदि तानेव वत्सबालान् स्वशक्त्या आनयेत्तदा हरणप्रयासवैय्यर्थ्यात् कस्य ब्रह्मणो दुर्मनस्कता स्यात्, यदि तु तूष्णीमेवासीत्तदा तन्मातॄणामत्यन्तक्लेशः स्यात्, तत उभयेषां मुदं कर्तुं कृष्णः आत्मानमुभयायितं वत्सरूपेण वत्सपरूपेण च वर्तमानं चक्रे । 'कथमेवं कर्तुं शक्तः ?' तत्राह – विश्वकृदिति । नहि विश्वकर्तुरेतदनुपपन्नमित्याशयः । तत्र सामर्थ्यमाह– ईश्वर इति ।।१८।। तदेव दर्शयति–यावदिति । जात्यभिप्रायमेकवचनम् । यावत्सङ्ख्याकानि वत्सपानां वत्सानां च अल्पकानि अल्पप्रमाणानि कोमलानि वपूंषि, यावत्प्रमाणानि तेषां कराङ्घ्र्यादीनि देहावयवाः, यावन्ति यत्प्रकारकाणि यष्ट्यादीनि, यावन्ति यत्प्रकारकाणि शीलादीनि, तावत्सर्वस्वरूपः सन् अजः श्रीकृष्ण एव बभावित्यन्वयः । 'कथम् ?' इत्यपेक्षायामाह – 'सर्वं विष्णुमयम्' इति श्रुतिप्रतीकग्रहणम् । 'सर्वं विष्णुमयं जगत्' इति या गीः श्रुतिवाक्यं तस्या अङ्गवत्, सा गीरेवार्थस्वरूपेण प्रत्यक्षा यथा भवति तथा बभावित्यर्थः । दलानि पुष्पपत्राणि शोभार्थं शिरआदिषु धृतानि, विभूषा भूषणानि, अम्बराणि वस्त्राणि, शीलानि स्वतःसिद्धस्वभावाः, गुणाः शिक्षिताः विनयादयः, अभिधा वाणी तत्तन्नामाभिनिवेशो वा, आकृतिराकारः, विहारादिकमित्यादिपदेन मात्रादिषु व्यवहरणं पूर्वाचरितस्मरणादिकं च १९ ।। एवं सर्वात्मा सन् व्रजं प्राविशत् । प्रवेशप्रकारमाह—स्वयमेवात्मा प्रयोजकः । आत्मरूपान् गोवत्सानिति कर्म कारकमपि स्वयमेवेत्युक्तम् । आत्मस्वरूपैर्वयस्यैर्वत्सपैः प्रतिवार्येति प्रयोज्यकर्ताऽपि स्वयमेवेत्युक्तम् । आत्मविहारैः

क्रीडन्निति क्रीडनरूपा क्रिया तत्साधनानि च स्वयमेवेत्यर्थः ॥ २० ॥ हे राजन् ! यत्र यत्र यस्य यस्य गोपबालस्य गृहमार्गौ भिन्नस्तत्र तत्र तेन तेन गोपरूपेण तस्य तस्य वत्सान् पृथक् नीत्वा कृत्वा तेषां तेषां गोष्ठे निवेश्य स्वयमपि तेषां तेषां सद्म गृहं प्रविष्टवान् । श्रीकृष्णस्तत्तदात्माऽभवत् ॥ २१ ॥ गोपीनां मोहमाह—तन्मातर इति । तेषां बालानां मातरो वेणुरवेण वेणुशब्दश्रवणेन त्वरया उत्थिताः सत्यः परं ब्रह्म श्रीकृष्णमेव स्वीकृततत्तद्बालकरूपं स्वसुतात्मकत्वाद्दोर्भिर्भुजैरुत्थाप्य निर्भरं स्नेहातिशयं यथा भवति तथा परिरभ्य आलिङ्ग्य स्नेहेन स्नुतं स्तन्यं पयः अपाययन् । तासां भाग्यातिशयं द्योतयन् भगवत्पीतं पयो विशिनष्टि—सुधावत् स्वादु, आसवस्तालादिरसस्तद्वत् मादकं च । वत्सचारणार्थं मुक्तस्तना एव बाला गच्छन्ति, स्तनन्धयानां तदर्थं वनगमनासम्भवात् 'मुक्तस्तनेष्वपेतेषु' इति वक्ष्यमाणत्वाच्च तथाच मुक्तस्तनेष्वपि बालेषु मातृणामेवं स्नेहाधिक्यं भगवत्स्वरूपत्वादेव" इति ज्ञेयम् ॥ २२ ॥ ततो मातृभिः कृतां भगवत्सेवां दर्शयति—तत इति । 'भगवत्येवं भक्तिः, तस्यैव कृपा चाति दुर्लभा एव' इति सूचयन् सम्बोधयति—नृपेति । यामानां दिवसप्रहाराणां यमेन तत्तत्क्रीडया उपरमेण सायंकाले स्वाचरितैः स्वस्याचरितैर्वेणुवादनादिभिर्मातॄः प्रहर्षयन् माधवः स्वीकृततत्तद्बालरूपः श्रीकृष्णः स्वगृहं गतः, ततश्च ताभिरुन्मर्दनादिभिरुपलालितः सत्कृतो बभूवेत्यर्थः । तत्र प्रथममुन्मर्दनं तैलपिष्टादिनोद्वर्तनम्, ततो मज्जः स्नपनम्, ततश्चन्दनादिना लेपनम्, अलङ्कारः भूषणवस्त्रादिना, रक्षा गोपुच्छभ्रामणादिना, तिलकं गोरोचनादिना, अशनं भोजनम्, आदिपदेन शयनम् ॥ २३ ॥ गवां मोहमाह—गाव इति । या गावश्चारणार्थं वनं गतास्तास्ततः सत्वरं गोष्ठमुपेत्य आगत्य हुङ्कारघोषैः परिहूतान् आहूतान् सङ्गतांश्च स्वकान् स्वकान् वत्सतरान् नवप्रसूतानां स्तनन्धयानां चारणार्थं वनगमनासम्भवात् 'वत्सवत्योऽप्यपाययन्' इति वक्ष्यमाणत्वाच्च मुक्तस्तनानपि वत्सान् मुहुर्लिहन्त्यः स्रवदौधसं पयोऽपाययन् इत्यन्वयः ॥ २४ ॥

अन्वितार्थप्रकाशिका

क्वापीति ॥ विश्ववित् सर्वज्ञः कृष्णः । हेत्याश्चर्ये । अन्तर्विपिने वनमध्ये क्वापि वत्सान् वत्सपालांश्चादृष्ट्वा इव स्थितः नतु अदृष्ट्वा । यतः सहसा चोरणसमय एव ब्रह्मणाऽप्यतर्कितं यथा स्यात्तथा सर्वं वत्सादिहरणं विधिकृतं ब्रह्मणा कृतमवजगाम ज्ञातवान् । अतः वत्साद्यदर्शनमभिनय एव । "अतर्किते तु सहसा" इत्यमरः ॥ १७ ॥ तत इति ॥ ततो विश्वकृदीश्वरः कृष्णः तन्मातॄणां वत्सवत्सपमातॄणां कस्य ब्रह्मणश्च मुदं कर्तुम् आत्मानम् उभयायितं बालरूपेण वत्सरूपेण च वर्तमानम् । उभयशब्दादाचारे क्यङ् ततः क्तः । चक्रे । यद्वा उभयं वत्सत्वं बालकत्वं च अयितं प्राप्तम् । अयं भावः । तूष्णींभावे बालवत्समातॄणां विषादः स्यात् । ब्रह्महृतानामानयने ब्रह्मणो मोहो न स्यादित्युभयप्रीतये तथा कृतवान् ॥ १८ ॥ यावदिति ॥ यावत्संख्याकानि वत्सपानां वत्सानामल्पकानि अल्पप्रमाणानि कोमलानि वपूंषि इति सर्वत्र "यावदवधारणे" इति समासः । यावत्प्रमाणानि तेषां कराङ्घ्र्यादीनि देहावयवाः यावन्ति यत्प्रकारकाणि यष्टयः विषाणानि वेणवः दलानि पुष्पत्राणि शोभार्थं शिर आदिषु धृतानि । स्वामिनस्तु दलं पर्णरूपो वाद्यविशेषो वेणुखण्डं वेत्याहुः । शिचः शिक्यानि च यावन्ति यत्प्रकारकाणि विभूषाः भूषणानि अम्बराणि च यावन्ति यत्प्रकाराणि शीलानि स्वतःसिद्धस्वभावाः गुणाः शिक्षिताः विनयादयः अभिधा वाणी तत्तन्नामाभिनिवेशो वा आकृतिराकारः वयोऽवस्था च यावन्ति विहारादीनि आदिना मात्रादिषु व्यवहरणं पूर्वाचरितस्मरणादिकं च तावत्सर्वस्वरूपः सन्नजः श्रीकृष्ण एव । "सर्वं विष्णुमयं जगत्" इति या गीः श्रुतिवाक्यं तस्या अङ्गवत् सा गीरेवार्थस्वरूपेण प्रत्यक्षा यथा भवति तथा बभावित्यर्थः । यद्वा । यावद्वत्सकेत्यादिकं तावत्सर्वं सर्वस्वरूपभूतः अजो भगवानेव बभौ । यतः सर्वं जगत् गिरः अङ्गवत् विष्णुमयमेवास्ति । यथा पदरूपाया वाक्यरूपाया वा गिरः अङ्गं वर्णपदरूपं पदात् वाक्याद्वा न भिद्यते तथा जगद्विष्णुतो न भिन्नम् । तथा च शाब्दिकाः—"पदेन वर्णा विद्यन्ते वर्णेष्ववयवा न च ॥ वाक्यात्पदानामत्यन्तं प्रविभागो न कश्चन ॥ अखण्डं वाचकं वाक्यं विभज्य पदकल्पना ।" इत्यादि ॥ १९ ॥ स्वयमिति ॥ एवं स्वयमेवात्मा प्रयोजकः कर्ता आत्मरूपान् गोवत्सान् कर्माणि आत्मस्वरूपैर्वयस्यैर्वत्सपैः प्रयोज्य कर्तृभिः प्रतिवार्य वनान्निवर्त्य आत्मरूपैर्विहारैः क्रीडनक्रियातत्साधनैः क्रीडन् एवं सर्वात्मा सन् व्रजं प्राविशत् । अत्र भगवतः प्रयोजकप्रयोज्योभयकर्तृकर्मकारकक्रियारूपता दर्शिता ॥ २० ॥ तत्तदिति ॥ हे राजन् ! स भगवान् येषां येषां गोपानां ये ये वत्साः यद्यद् गोष्ठं यद्यच्च सद्म तेषां तेषां गोपानां रूपेण तेषां तेषां वत्सान् पृथक् नीत्वा कृत्वा तेषां तेपां गोष्ठे निवेश्य स्वयमपि तेषां तेषां सद्म गृहं प्रविष्टवान् । एवं श्रीकृष्णस्तत्तदात्माऽभवत् ॥ २१ ॥ गोपिकामोहमाह—तन्मातर इति ॥ तेषां बालानां मातरो वेणुरवेण वेणुशब्दश्रवणेन त्वरया उत्थिताः सत्यः परं ब्रह्म श्रीकृष्णमेव स्वीकृततत्तद्बालकरूपं स्वसुतान्मत्वा दोर्भिभुजैरुत्थाप्य । उद्धृह्येति क्वाचित्कः । पाठः । निर्भरं स्नेहातिशयं यथा भवति तथा परिरभ्य आलिङ्ग्य सुधावत्स्वादु आसवस्तालादिरसस्तद्वत् मादकं च स्नेहेन स्नुतं स्तन्यं पयः अपाययन् । मुक्तस्तना एवैते भगवद्रूपभूता बालास्तेभ्य एव स्तनपानम् ॥ २२ ॥ तत इति ॥ हे नृप ! यामानां दिवसप्रहराणां यमेन तत्तत्क्रीडया उपरमेण तत्क्रीडानियमेन वा यामोऽन्त्यप्रहरस्तत्र यो गृहागमननियमस्तेन वा सायं काले स्वाचरितैर्वेणुवादनादिभिर्मातॄः प्रहर्षयन् माधवः स्वीकृततत्तद्बालरूपः श्रीकृष्णः स्वगृहं गतस्ततश्च ताभिरुन्मर्दनादिभिरुपलालितः सत्कृतो बभूवेत्यर्थः । तत्र प्रथममुन्मर्दनं तैलपिष्टादिनोद्वर्त्तनं ततो मज्जः स्नपनं ततश्चन्दनादिलेपनम् अलङ्कारः भूषणवस्त्रादिना रक्षा गोपुच्छभ्रमणादिना तिलकं गोरोचनादि अशनं भोजनं आदिपदेन शयनम् ॥ २३ ॥

गवां मोहमाह–गाव इति ॥ या गावश्चरणार्थं वनं गतास्तास्ततः सत्वरं गोष्ठमुपेत्य आगत्य हुंकारघोषैः परिहूतान् सङ्गतांश्च स्वकान्स्वकान्वत्सतरान् मुक्तस्तनान् त्रिवर्षवत्सान् मुहुर्लिहन्त्यः । नुमार्षः । स्रवत् औधसम् ऊधसो जातं पयः अपाययन् ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विश्ववित्सर्वज्ञः अवजगामज्ञातवान् ॥ १७ ॥ कस्य ब्रह्मणः उभाभ्यां वत्सवत्सपाभ्यामाचरितं उभयायितं वत्सवत्सपरूपेण जातमित्यर्थः आत्मानं चक्रे ॥ १८ ॥ तदेवाह यावदिति यावंति यत्परिमाणानि वत्सपानां वत्सकानां च अल्पकानि स्थूलसूक्ष्माणि वपूंषीति यावद्वत्सपवत्सकाल्यकवपुः तावंति तत्परिमाणानि सर्वाणि स्वरूपाणि यस्य तथाभूतोऽजः श्रीकृष्णो बभाविति सर्वत्र योजनीयं सर्वं विष्णुमयं जगदिति वेदेतिहासपुराणानां या गिरो वाण्यः संति ता अपि एतद्वत्सपादिष्वेव अंगवत् मूर्त्तिमत्यः सत्याः बभूवुः अतोन्यत्र तु ताः जनानामीर्ष्यामान हिंसानिवृत्त्यर्थं प्रोक्ता न तु वस्तुतः सत्या इति भावः ॥१९॥ स्वयमात्मा श्रीकृष्णः आत्मवत्सपैः स्वस्वरूपैर्वत्सपैः आत्मगोवत्सान् स्वस्वरूपभूतान् गोवत्सान् प्रतिवार्यवनान्निवर्त्त्य आत्मविहारैः स्वरमणैः क्रीडन् सर्वे वत्सपादयः आत्मभूता यस्य सः हरिव्रजं प्राविशत् ॥ २० ॥ तत्तदात्मा तत्तद्गोपगोपीबालरूपोऽभवत् सः तत्तद्वत्सान् तत्तद्गोवत्सान् पृथक्नीत्वा तत्तद्गोष्टे तत्तद्गोस्थाने निवेश्य वत्सपरूपः स्वयं तत्तत्सद्म तत्तद्गोपगोपीगृहं प्रविष्टवान् ॥२१॥ गोपीकानां परब्रह्मणि स्वाभाविकं प्रेमाह तन्मातर इति वेणुरवश्रवणोत्पन्नया त्वरयोत्थिताः परंब्रह्मैव सुतान्मत्वा दोर्भिः करैः उत्थाप्य निर्भरं अत्यंतप्रेम्णा आलिंग्य सुधावत्स्वादु आसववन्मादकम् ॥ २२ ॥ हे नृप एवं यामयमेन सार्द्धत्रिप्रहरनियमेन सायंगतः सायंकाले आगतः तत उन्मर्द्दनादिभिः कृत्वा मातृभिः संलालितः स्वाचरितैः स्वचरित्रैः सुष्टुचरित्रैर्वा स्वस्वमातॄः प्रहर्षयन्नास्ते उन्मर्द्दनं सुगंधितैलाभ्यंगः मज्जः स्नपनं रक्षाहनुमन्मंत्रेण रक्षणम् ॥२३॥ गवां वत्सीभूते हरौ प्रेमातिशयं प्रदर्शयति गाव इति ततो वनात् हुंकारघोषैः परिहूताः स बोधिताश्च ते संगता मिलिताश्च तान् ऊधस्सूत्पन्नं स्रवत्पयः अपाययत् ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भारतेति ॥ हे भारत परीक्षित्, अच्युते श्रीकृष्णे एवात्मा चित्तं येषां तेषु, वत्सपेषु, एवं भुञ्जानेषु सत्सु, वत्साः तु, तृणलोभिताः सन्तः, दूरं अन्तर्वने वनमध्ये, विविशुः ॥ १७ ॥ तानिति ॥ अस्य विश्वस्य, भीभयं भियोऽपि भयरूपः, कृष्णः, तान् वत्सान्, अदृष्ट्वा भयत्रस्तान् भयोद्विग्नान् सखीन्, ऊचे । हे मित्राणि, आशाद्भोजनात्, मा विरमत विरामं न कुरुत । वत्सकान्, इह अहं आनेष्ये । तान् दृष्ट्वा, भयसंत्रस्तानिति पाठे, तदा वत्सादर्शनात् इति शेषः । भयसंत्रस्तान् तान् वत्सपान्, दृष्ट्वा, तेषां भीर्भयं भयहेतुसिंहादिभ्यः यद्भयं तदित्यर्थः । अस्य अपास्य, वत्सभयचिन्ता भवद्भिर्न कार्या, मम सर्वरक्षकत्वादित्युक्त्या तदपनोद्येति भावः । ऊचे । हे मित्राणीत्यादि पूर्ववदेव ॥ १८ ॥ इतीति ॥ इतीत्थं उक्त्वा, भगवान् षाड्गुण्यपूर्णः, कृष्णः स्वाश्रितजनचित्तानां स्वस्मिन्नेवाकर्षणकृच्छ्रीहरिः, सपाणिकवलः सपाणिस्थमसृणकवलेन संयुक्तः सन्नेव, अद्रेर्गोवर्द्धनाद्रिसंबन्धीनि यानि दरीकुञ्जगह्वराणि तेषु, तत्र दर्यो गुहाः, कुञ्जा लतापिहितप्रदेशा, गह्वराणि संकटस्थानानि, आत्मवत्सकान् आत्मीयवत्सान्, विचिन्वन्, ययौ । 'यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः' इति श्रुत्युक्तमहिम्नः सर्वकालं सर्ववित्त्वेऽपि ब्रह्मादिसंमोहकमिदं नृनाट्यानुकरणमात्रमेवेति भावः ॥ १९ ॥ अम्भ इति ॥ तदा, अम्भोजन्मनो जलजाज्जनिः प्रादुर्भावो यस्य स ब्रह्मा, तदन्तरगतः तस्मिन्नवसरे आगतः, वत्सवत्सपहरणविधानाय तदेव छिद्रं प्राप्तो वा, यश्च, पुरा प्रभवतो भगवतः, अघासुरमोक्षणमघासुरमोक्षविधानरूपं कर्म, खे आकाशे, अवस्थितः सन्, दृष्ट्वा परं परमं विस्मयं प्राप्तः, सः ईशितुः सर्वशास्तुरपि, मायार्भकस्य मायया पुत्रभावं प्राप्तस्य भगवतः, मञ्जु रमणीयं, अन्यत् इतरदपि, महित्वं महिमानं, द्रष्टुं तत्तस्येत्यर्थः । वत्सान्, वत्सपान् वत्सपालांश्च, इतोऽस्मात् स्थानात्, अन्यत्र यत्र भोक्तुमुपविष्टास्ततोऽन्यस्मिंस्थाने इत्यर्थः । नीत्वा, हे कुरूद्वह, अन्तरदधात् तिरोबभूव ॥ २० ॥ तत इति ॥ ततः, कृष्णः, वत्सान् अदृष्ट्वा, तच्चरणस्थाने वत्साननवलोक्य, एत्य प्रत्यागत्येत्यर्थः । पुलिने यत्र ते प्राग्भोक्तुमुपविष्टास्तस्मिन् पुलिने, वत्सपांश्चापि वत्सपालानपि अदृष्ट्वा, उभावपि, वत्सान् वत्सपालांश्चापीत्यर्थः । वने भूयोऽपीति शेषः । समन्ततः सर्वतः, विचिकायाऽन्विष्टवान् ॥ २१ ॥ क्वापीति ॥ अन्तर्विपिने वनमध्ये, वत्सान् पालांस्तत्पालकगोपबालांश्च, क्वापि कुत्रचिदपि, अदृष्ट्वा, विश्वविद्विश्वदृक्, हेतुगर्भमिदम् । विश्ववित्त्वादित्यर्थः । कृष्णः, सहसा तत्क्षणमेव, सर्वं वत्सवत्सपापहरणरूपं सर्वं कर्म, विधिकृतं चतुर्मुखकृतं, ह स्फुटं यथा तथैव, अवजगामावगतवान् ॥२२॥ तत इति ॥ ततः, तन्मातॄणां तेषां वत्सानां वत्सपानां च मातॄणां, कस्य ब्रह्मणश्च, मुदं प्रीतिं, कर्त्तुं संपादयितुं, विश्वदृक् ईश्वरश्च, हेतुगर्भे इमे विशेषणे । विश्वदृक्त्वात् यथेष्टपरिणामोपयुक्तसार्वज्ञादिगुणयुक्तत्वात्, ईश्वरत्वात् प्रभुत्वात् सर्वशक्तित्वाच्चेत्यर्थः । कृष्णः आत्मानमेव, उभयायितं वत्सवत्सपायितं, तदुभयवदाचरन्तमित्यर्थः । चक्रे । अयं भावः । यदि तूष्णीमासे तर्हि तन्मातॄणां विषादः स्यात्, यदि च तानेवानयिष्यामि, तर्हि ब्रह्मणो मोहो न स्यादिति तदुभयप्रीतये तथा चक्रे इति ॥ २३ ॥ एतदेव प्रपञ्चयति ॥ यावदिति ॥ अजः श्रीकृष्णः, यावद्वत्सपवत्सकाल्पकवपुः । यावत् वत्सपानां वत्सानां च अल्पकं वपुः प्रमाणमस्ति तदनतिक्रम्येत्यर्थः । यावत्कराङ्घ्र्यादि येषां यथाविधं कराङ्घ्र्यादिकं, तत्तदप्यनतिक्रम्य, यावद्यष्टिविषाणवेणुदलशिक् येषां यथाविधा यष्टिः विषाणं वेणुः दलं शिक् तत्तदप्यनतिक्रम्य, तत्र यष्टिर्वेत्रं, विषाणं शृङ्गं,

वेणुर्वंशी, दलं पत्त्रं, शिक् शिक्यं, यावद्विभूषाम्बरं यत्प्रमाणानि यथाविधानि येषां विभूषणान्यम्बराणि तानि तान्यप्यनतिक्रम्य, यावच्छीलगुणाभिधाकृतिवयः, येषां यथाविधशीलगुणाभिधाकृतिवयांसि तान्यप्यनतिक्रम्य, तत्र शीलं स्वभावः, गुणाः सौमनस्यौदार्यादयः, अभिधा अर्जुनयोधबीजलादीनि नामानि, आकृतिः रूपं, वयःकौमारादिकं, यावद्विहारादिकं येषां यथाविधक्रीडनचलननिरीक्षणादिकं तत्तदप्यनतिक्रम्य, 'सर्वं विष्णुमयं जगत्' इति या गीः जगत्प्रसिद्धा वाक् तस्याः, अङ्गवत् तदर्थमूर्त्तिरिव, अस्या वाचोऽन्वर्थतामापादयितुमिवेत्यर्थः । सर्वस्वरूपः सन्, बभौ । अर्थवदिति पाठे प्रत्यक्षस्तदर्थ इवेत्यर्थः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विधिकृतमिति : १०.१३.१७.

विधिरयमिति यः पुरा मयोक्तस्तमिह निषेधपदं कथं नयामि । यदुपतिरिति तत्र धातृकृत्यविदपि ततो विदधे न तन्निषेधम् ॥ ५२ ॥

जाता अमी येऽनघवृत्तयस्ते साधाः पुनः स्युर्विधिलङ्घनेन । एवं न वै भाव्यमतो दयालुर्मन्येऽन्वगाद्वत्सविधिं रिरक्षुः ॥ ५३ ॥

प्रभोरकारि पारोक्ष्यं येनैकः स विधिर्बली । भाविकृत्येऽखिले तत्र निमित्तं पद्मभूरभूत् ॥ ५४ ॥

चिन्वन्ति यं सुमनसः सुमनोभिरन्तः सोऽहं चिनोमि विपिने प्रकृतेऽल्पवत्सान् ।
इत्यद्भुताकुलमनाः स सनातनस्तद्युक्तं तदा विधिकृतं सममित्यवेदीत् ॥ ५५ ॥

यः पाटच्चरवत् प्रसार्य सहसा मायां त्वदीयानपि यद्वत्सानहरद्रमेश तदिदं गर्ह्यं सुहृत्संसदि ।
त्वं तद्वक्षि विचक्षणो विधिकृतं तत्किं वदामीऽपरं प्रोक्तो यो महता विधिः स हि विधिर्योऽन्यो निषेधश्च सः ॥ ५६ ॥

ततः कृष्ण इति : १०.१३.१८.

तन्मातृपद्मभवचित्तविमोहनं स्याद् येनाधुना कुतुकिना तु तथा विधेयम् ।
रूपं मयेति समयोचितधीर्विवेकादेकोऽप्यभूदुभयरूपधरः परात्मा ॥ ५७ ॥

अत्रत्यानां स्वपित्रर्जितसुकृतमिवाक्षुण्णमस्त्येव पुण्यं भाव्यं पुत्रात्मनैषामपि सुकृतपरीपाकिनां तन्मयाऽत्र ।
इत्यालोच्यैव जातः सकलसुतमयः श्रीश इत्येव मन्ये नैवं चेद् धातृनीतानयनमपि कृतं स्वीयशक्त्या न कस्मात् ॥ ५८ ॥

कर्तव्यो व्रजबालिकाभिरखिलाभिश्चारु रासः पुरो मा भूत्तत्र जघन्यमन्यवनितासम्भोगरूपं क्वचित् ।
सञ्चिन्त्यैवमचिन्त्यशक्तिरभवन् मन्येऽब्धिकन्याप्रियस्तत्तन्मन्दिरमुग्धतत्तदबलासङ्केतभर्त्रात्मकः ॥ ५९ ॥

लक्ष्मीकान्तः शेषशाय्यब्धिवासी कस्मादस्मान्संस्मरेद् दीनदीनान् । नैवं वाच्यं कैरपीति प्रकामं रूपं चक्रे गोपवत्सानुरूपम् ॥ ६० ॥

यावद्वत्सपेति । १०.१३.१९.

अनेत्रोऽपवित्रोऽपि गात्रेण हीनोऽप्यलं योऽनुरक्तो मदीयाङ्घ्रिभक्तौ । स मद्रूप एवेति लोकावगत्यै ध्रुवं तत्तदाकाररूपोऽभवत् सः ॥६१॥

नहि विश्वमेव केवलमीशे मयि वर्ततेऽपि तु प्रकटम् । सर्वात्माऽप्यस्मीति प्राबोधीशेन तत्तथा कृतितः ॥ ६२ ॥

चिज्जडरूपोऽप्यहमिह लोकेष्वेको न वस्तु परमस्ति । आतृणरूपाकलितान्मन्ये विभुना व्यबोधि निजरूपात् ॥ ६३ ॥

तत्तदात्मेति : १०.१३.२१.

आत्मैक एव सुकृतस्य हि तारतम्यान्नानाशरीरमनुविश्य कृताभिमानः ।
पार्थक्यमेत्य लघुलोकदृशेत्यनेन तत्तद्गृहाभिमतवृत्तितयाऽन्वबोधि ॥ ६४ ॥

तन्मातर इति : १०.१३.२२.

एतत्पुण्यफलं प्रदातुमधुना यः पुत्रभावो मयाऽऽलम्ब्येषोऽपरिपूर्ण एव भविता तत्स्तन्यपानं विना।
आलोच्याखिलविश्वकृत्प्रभुरसावुत्पादयामास ततस्तन्यं नूत्नमिहाऽन्यथा नहि पयोभूतिप्रसक्तिस्तदा ॥ ६५ ॥

योऽत्रामृतं दिशति योगिमुनीश्वरेभ्यो यः सद्रसो रसमयः सुरसालमान्यः ।
तं चात्मवत्समयमीशमपाययन् यास्तत्साधुभाग्यगरिमा भुवने हि तासाम् ॥ ६६ ॥

सायं गत इति : १०.१३.२३.

सर्वोऽप्ययं कुतुकनिर्मितमद्विलासो मायाकृतोऽस्ति यदतः सुषमाकृदेषः ।
मायाविमोहितधियां भविता न तत्वज्ञामिति प्रभुरगान्नियमेन रात्रौ ॥ ६७ ॥

तादृग्रूपेशमुद्दिश्य यावत्कृत्यकृतो जनान् । अन्वगच्छच्छ्रीश इव यत्करोषीति तत्स्मृतिः ॥ ६८ ॥

कृष्णप्रिया

उस जंगल के भीतर कहीं भी बछड़ों और बालकों को खोजने पर नहीं पाया, तब भगवान ने क्षण में ही जान लिया कि यह सव ब्रह्मा की ही करतूत है, विश्ववित् सर्वज्ञ भगवान के लिये क्या अज्ञेय है ॥ १७ ॥ ब्रह्माजी की करतूत जानकर विश्व के निर्माता, सर्वसमर्थ, भगवान् श्रीकृष्ण ने, ब्रह्माजी को बछड़ों की माताओं को और बालकों की माताओं को भी आनन्द देने के लिये अपने को बालक और बछड़ों के रूप में विभक्त कर लिया ॥ १८ ॥ राजन् ! भगवान की यह आत्मसृष्टि थी—बछड़े और बालक जितने छोटे-बड़े थे, संख्या में जितने थे उनके अङ्ग प्रत्यङ्ग हस्तपाद अङ्गुली आदि जैसे–जितने थे उनकी यष्टि, सींग, वेणु, छींके अलङ्कार, वस्त्र, वगैरह जैसे और जितने थे, बछड़ों और बालकों का जैसा स्वभाव, शील, गुण, संज्ञा, आकार, अवस्था और आहार, विहार ठीक जैसा था वैसा ही अजन्मा भगवान् श्रीकृष्ण ने बना लिया यों सर्वस्वरूप होकर भगवान ने "सर्वं विष्णुमय जगत्"–"सर्वं खल्विदं ब्रह्म" इस भगवती श्रुति वचन को सार्थक कर दिया ॥१९॥ उस अवसर पर ऐसा प्रतीत हुआ कि भगवान् स्वयं कर्म-क्रिया-कारक-कर्त्ता और प्रयोज्यकर्ता बन गये। खूद ही बछड़े बने, बालक बने और उनकी सर्वप्रकार की चेष्टाएँ बन गये थे। अपने आत्मस्वरूप बछड़ों को अपने आत्मस्वरूप बालकों से घेरकर अपने ही साथ विविध क्रीडाएँ करते हुए सर्वात्मा श्रीकृष्ण ने व्रज में प्रवेश किया ॥ २० ॥ राजन् परीक्षित् ! जिस जिस बालक के जो जो बछड़े थे उन्हें उसी बालक के स्वरूप से भिन्न भिन्न ले जाकर उसकी बाखल–गमान में प्रवेश कराया और बालकों के स्वरूप से उनके घरों में प्रवेश किया ।२१। राजन् ! उन बालकों की माताओं ने वंशी की तान सुनी तो त्वरित दौड़ आयी, पुनः पूर्णानन्द परब्रह्म श्रीकृष्ण को निज सुत समझकर अपने दोनों हस्तों से उठाकर हृदय से आलिङ्गन किया। राजन्, उस अवसर माताओं के स्तनों में वात्सल्यातिशय से दूध टपक रहा था, जो सुधा अमृत से अधिक मधुर एवं आसव से विशेष मोदकर या उस दूध को भगवान को पिलाने लगी ॥२२॥ परीक्षित् राजन् ! इस प्रकार प्रतिदिन भगवान् श्रीकृष्ण विविध प्रकार के खेल खेलकरके बालकोंके स्वरूप में घर लौटते और माताओं को बाल लीलाओं से आनन्द देते थे। उनकी माताएँ उन्हें उबटन लगातीं, नहलातीं, चन्दन लगातीं, आभूषण पहनाती, रक्षा सूत्र बांधती अथवा बालक को डीठ से बचाने के कारण भ्रूकुटि के मध्य डिठौना काजल लगातीं तिलक लगाती खिलाती–पिलाती वार्ता सुनाती और श्यामसुन्दर को सोलाती इस तरह लाड से लालन करती थी ॥२३॥ राजन्, जैसा आनन्द माताओं ने पाया वैसा गौओं ने पाया। सायंकाल गौए जब चरकर घर आ जाती तब हुँकार हुँकार मचा अपने अपने बछड़ों को बुलाती और हुँकार सुनकर जल्दी से दौड़ आये अपने अपने बछड़ों को चाटती और दूध पिलाती अपने बछड़ों को देखते ही स्नेह बढ़ जाने से गौओं के थन से दूध चूने लगता था ॥ २४ ॥

गोगोपीनां मातृतास्मिन् [1]सर्वाः स्नेहर्द्धिकां विना। [2]पुरोवदास्वपि हरेस्तोकता मायया विना ॥ २५ ॥
व्रजौकसां स्वतोकेषु [3]स्नेहवल्ल्याब्दमन्वहम्। शनैर्निःसीम ववृधे यथा कृष्णे [4]त्वपूर्ववत् ॥ २६ ॥
इत्थमात्माऽऽत्मनाऽऽत्मानं वत्सपालमिषेण सः। पालयन् वत्सपो वर्षं चिक्रीडे वनगोष्ठयोः ॥ २७ ॥
एकदा चारयन् वत्सान् सरामो वनमाविशत्। [5]पञ्चषासु त्रियामासु हायनापूरणीष्वजः ॥ २८ ॥
ततो विदूराच्चरतो गावो वत्सानुपव्रजम्। गोवर्धनाद्रिशिरसि चरन्त्यो ददृशुस्तृणम् ॥ २९ ॥
दृष्ट्वाथ तत्स्नेहवशोऽस्मृतात्मा स गोव्रजोऽत्यात्मपदुर्गमार्गः।
द्विपात् ककुद्ग्रीव उदास्यपुच्छोऽगाद्धुङ्कृतैरास्रुपया जवेन ॥ ३० ॥
समेत्य गावोऽधो वत्सान् वत्सवत्योऽप्यपाययन्। गिलन्त्य इव चाङ्गानि लिहन्त्यः स्वौधसं पयः ॥३१॥
गोपास्तद्रोधनायासमौढ्य[6]लज्जोरुमन्युना। दुर्गाध्व कृच्छ्तोऽभ्येत्य गोवत्सैर्ददृशुः सुतान् ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—अस्मिन् गोगोपीनां मातृता स्नेहर्द्धिकां विना मातृता पुरोवद् हरेः आसु स्तोकता अपि मायया विना ॥२५॥ व्रजौकसां स्वतोकेषु अब्दं अन्वहं स्नेहवल्ली शनैः निःसीम अपूर्ववत् ववृधे कृष्णे तु यथापूर्वं ववृद्धे ॥ २६ ॥ इत्थं आत्मा (कृष्णः) वत्सपः सः वत्सपालमिषेण आत्मानं आत्मना पालयन् वनगोष्ठयोः वर्षं चिक्रीडे ॥ २७ ॥ हायनापूरणीषु त्रियामासु पञ्चषासु एकदा अजः (कृष्णः) वत्सान् चारयन् सरामः व्रजं आविशत् ॥ २८ ॥ गोवर्धनाद्रिषु तृणं चरन्त्यः गावः ततः विदूरात् उपव्रजं

---

[1] सर्वा–श्रीधर. वंशी. वीर. विज. विश्व. । [2] पुरा–वीर. । [3] वल्लया–श्रीधर. वंशी. वीर. विज. । [4] कृष्णे तु पूर्ववत्–विज. ।
[5] पञ्चषट्सु–वीर. । [6] मौध्य–श्रीधर. वंशी. वीर. विज. विश्व. शुक. ।

चरतः वत्सान् ददृशुः ॥ २९ ॥ अथ दृष्ट्वा तत्स्नेहवशः अस्मृतात्मा अति आत्मपदुर्गमार्गः द्विपात् ककुद्ग्रीवः उदास्यपुच्छः आस्रुपयाः सः गोव्रजः हुंकृतैः जवेन अगात् ॥ ३० ॥ वत्सवत्यः अपि गावः वत्सान् दृष्ट्वा अधः समेत्य अङ्गानि गिलन्त्यः च लिहन्त्यः इव स्यौधसं पयः अपाययन् ॥ ३१ ॥ तद्रोधनायासमौढ्यलज्जोरुमन्युना गोपाः दुर्गाध्वकृच्छ्तः अभ्येत्य गोवत्सैः सुतान् ददृशुः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतावत्तु वैषम्यं कृष्णस्यापि दुर्निवारमासीदित्याह । गोगोपीनामिति । गवां गोपीनां चास्मिन्वत्सपालरूपे कृष्णे मातृता उपलालनादिरूपा पुरोवदेवासीत्किं तु स्नेहर्द्धिकां विना । स्नेहाधिक्यं त्विदानीं विशेष इत्यर्थः । आसु गोगोपीयु हरेस्तोकता च बालभावनादि पूर्ववदेवासीत्किं तु मायया विना । ममेयं माताऽहमस्याः पुत्र इति पूर्वं मोह आसीत्तं विनेत्यर्थः ॥ २५ ॥ स्नेहर्धिकमेव दर्शयति । व्रजौकसामिति । यथा कृष्णे यशोदानंदने स्वपुत्रेभ्योऽपि स्नेहाधिक्यं यथा पूर्वमासीत् तथेदानीं स्वतोकेष्वपि तथैवावर्धतेत्यर्थः । आ अब्दं यावत्संवत्सरम् । निःसीम यथा भवति ॥ २६ ॥ एवमात्मा श्रीकृष्णो वत्सपो भूत्वा तत्रापि वत्सानां पालानां च मिषेणात्मानमात्मना पालयन् क्रीडितवानित्यर्थः ॥ २७ ॥ एतावत्पर्यंतं रामस्यापि मोह एवासीत्संवत्सरांते तु स कथंचिज्ज्ञातवानिति दर्शयन्नाह । एकदेति । पंचषासु पंचसु वा षट्सु वा रात्रिषु हायनस्यापूरणीषु पूरकतयाऽवशिष्टास्वित्यर्थः ॥२८॥ ततो दूरत एव गोवर्धनशिखरे चरंत्यो गावो व्रजसमीपे तृणं चरतो वत्सान्ददृशुः ॥ २९ ॥ तदैव स गोव्रजो गवां कलापस्तत्स्नेहवशस्तेषां वत्सानां स्नेहेनाकृष्टोऽत एव न स्मृत आत्मा देहो येन स जवेनोपव्रजमगात् । कथंभूतः । अत्यात्मपदुर्गमार्गः अतिक्रांत आत्मपान् गोपालान्यः सोऽत्यात्मपः तथा दुर्गो दुर्गमो मार्गो यस्य सः स च स च । तथा परस्परयुक्ताभ्यां पद्भ्यां धावन् द्विपादिव प्रतीयमानः । ककुद्याकुंचिता ग्रीवा यस्य सः । उदास्यपुच्छः उन्नमितान्यास्यानि पुच्छानि च येन सः । आस्रुपयाः सर्वतः स्रवंति पयांसि यस्य सः । आस्नुपयाः इत्यपि पाठे स एवार्थः । गोव्रज इत्यनेन वृषभादयोऽप्यगुरित्युक्तम् ॥ ३० ॥ तत्र विशेषतो धेनूनां चेष्टितमाह । समेत्येति । गोवर्धनस्याधः । वत्सवत्यः पुनः प्रसूता अपि ॥ ३१ ॥ रामेण दृष्टं वत्सेषु गवां स्नेहातिशयमुक्त्वा गोपानामपि दर्शयितुमाह । गोपा इति । तासां गवां रोधने य आयासस्तस्य मौघ्येन मोघत्वेन लज्जया सहोरुमन्युना दुर्गमार्गजनितक्लेशेन चाभ्येत्य गोवत्सैः सह सुतान् ददृशुः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतावद्वक्ष्यमाणम् । वैषम्यमाह—किञ्चेति । इत्यर्थ इति । स्नेहाधिक्यमेव वैषम्यमिति भावः । इत्यर्थ इति । मायायाः स्वाश्रयमोहकत्वाभावादिति भावः । ननु श्रीदामादिषु तन्मातॄणां यावान्स्नेहस्तावानेव पुत्रीभूते श्रीकृष्णेऽपि भवितुमर्हति । 'यावच्छीलगुणाभिधाकृतिवयः' इत्याद्युक्तेः । अत्रोच्यते—कृष्णो महामहेश्वरत्वात्स्वाधीनीकृतब्रह्मादिपर्यंतोऽपि प्रेम्णः खल्वधीन एव । प्रेमा तु न तस्याधीन इति प्रेम्णि तस्य प्रभुत्वाभावात्तेन प्रेमा संकुचितीकर्त्तुमशक्यमत एव स्वामिचरणैरप्युक्तम् । एतावत्तु वैषम्यं कृष्णस्यापि दुर्निवारमिति । स च प्रेमा वात्सल्यादिरूपस्तन्मातृषु विराजत एव इति कृष्णः स्वमात्रादिसमीपे स्वैश्वर्यमनुसंदधानोऽधीनीभूत एव सदा तिष्ठति यथा चक्रवर्त्तिनः पार्श्वे मंडलेश्वरः । न च तस्यैवं पारतंत्र्यं दूषणमिति वाच्यम् प्रत्युत भूषणमेव । यथा जीवस्य मायापारतंत्र्यं दुःखार्थकं तथैवेश्वरस्यानंदरसमयस्यापि प्रेमपारतंत्र्यं प्रतिक्षणवर्द्धमाननिरतिशयानंदार्थकमेवेति महानुभावैरनुभूतम् । श्रीयशोदायां तु श्रीकृष्णोहमिति प्रतिपादनेऽप्यासु श्रीदामाहमित्यादिच्छद्मप्रतिपादनान्मायाधिक्यमेवेति ज्ञेयम् ॥ २५ ॥ इत्यर्थ इति । स्वतोकत्वेन प्रतीयमानस्यापि यशोदानंदनत्वादिति तात्पर्यम् । निर्गता सीमा मर्यादा यत्र कर्मणि तत्तथेति ॥ २६ ॥ इत्थं पूर्वोक्तरीत्या । तत्रापि वत्सपत्वेपि । मिषेण छद्मना । इत्यर्थ इति । क्रीडां चक्र इत्येवार्थः ॥ २७ ॥ एतावत्पर्यंतं किञ्चिन्न्यूनाब्दपर्यंतम् । कथंचित् भगवत्सूचनेन । अजः कृष्णः । हायनस्य वर्षस्य । 'हायनोऽस्त्री शरत्समाः' इत्यमरः । इत्यर्थ इति । अब्दपूर्त्तेः पञ्चषारात्रिभ्यः प्रागिति तात्पर्यम् ॥ २८ ॥ ततस्तदा उपव्रजमिति । गोवर्द्धनेशानकोणकोटिस्थारिष्टमर्दनकुंडसमीपप्रायप्रदेशे । तदंतिके व्रजस्य व्याप्तेः सट्टीकराख्यप्रदेशादृजुमार्गेण चतुःक्रोशमयत्वात् । "अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः" इति वक्ष्यमाणाच्च ॥ २९ ॥ स गोवर्द्धनमूर्द्धगः । उपव्रजमिति पूर्वानुषंगः । ककुदि किञ्चिदुन्नतवृषस्कंधावयवे "ककुद स्त्री ककुदश्च वृषांगे राड्ध्वजेवरे" इति मेदिनी । वृष उपलक्षणं गोरपि । आकुंचिता संकोचिता । उन्नमितान्यूर्ध्वं कृतानि । प्रथमे पाठे 'स्रु—गतौ' द्वितीये 'ष्णु—प्रस्रवणे' ॥ ३० ॥ तत्र गोव्रजे लिहंत्य आस्वादयंत्यः ॥ ३१ ॥ रामाय गोस्नेहतोऽपि गोपस्नेहाधिक्यं सूचयन्नाह—गोपा इति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं पूर्वेभ्यो वत्सपालेभ्यस्तदंशानां वैलक्षण्यं दर्शयंस्तत्तद्भाग्येन श्लाघ्यमानाभ्योऽपि तत्तद्रूपमातृभ्योऽपि तन्निजरूपमातुर्वैलक्षण्यमाह—गोगोपीनामिति । पुरोवदित्युभत्राप्यन्वयः । पूर्वत्र प्राक्तनबालकेष्विव अस्मिन् बालवत्सरूपं श्रीकृष्णे मातृतामातृभाव आसीत् किं तु स्नेहर्द्धिकां विना पूर्वेषु स्नेह एव अस्मिस्तु तत्समृद्धिवृद्धिरित्यर्थः । आच्छन्नेऽपि रूपे वस्तुस्वभाव-

स्थानाच्छाद्यत्वात् अग्निवत् उत्तरत्र पुरोवत् श्रीयशोदायामिवास्वपि शुद्धमातृभावासु हरेस्तोकता बालभाव एवासीन्नान्यभाव इत्यर्थः किं तु मायया विना तस्यां श्रीकृष्णोऽहमिति सत्यप्रतिपादनं तदुचितसाक्षात्कृष्णरूपप्रकाशनं च आसु तु स श्रीदामाहं सुदामाहमिति छद्मप्रतिपादनं तदुचितरूपान्तरप्रकाशनं चेत्यर्थः। वक्ष्यते च वत्सपालमिषेण स इति। सर्वविलक्षणस्य प्राप्तेऽपि साम्ये सर्वविलक्षणताहेतुस्वभावविशेषप्राप्त्यसम्भवात् ईश्वरवत् अत्रोभयत्रापि समान एव विना शब्दः ततश्चार्थोऽपि समान एव युज्यते मायाशब्दस्य च स्वार्थ एव स्थितिः स्यात् "माया दम्भे कृपायां च" इति विश्वप्रकाशात् मोहवाचित्वं तु लक्षणयैवेति आस्वपीति तत्राप्यपिशब्देन समानकोटिनिविष्टायाः श्रीयशोदायाः प्राप्तिः समञ्जसा स्यात् अन्यथा हरेरपीत्यवक्ष्यदिति विवेचनीयम्॥ २५॥ तद्वच्छ्रीयशोदानन्दनेऽपि वैलक्ष्यण्यमाह—व्रजौकसामिति। स्वशब्देन स्वापत्यत्वेनैव ज्ञातेष्वपि न तु श्रीकृष्णत्वेनेत्यर्थः। स्नेह एव वल्ली शनैर्वर्द्धमानत्वादिना शनैरिति संलालनक्रमापेक्षया तदंशत्वात्तेषां कृष्ण इत्युभयत्राप्यन्वेति यथा कृष्णे तथा तेषु ववृधे कृष्णे तु अपूर्ववत् पूर्वं यथा नासीत् तथा ववृध इत्यर्थः। यद्वा यथा यथावत् तेषु कृष्णस्य तत्तदंशेषु बालादिशिक्यपर्यन्तेषु तत्तद्योग्यं ववृधे कृष्णे त्वपूर्ववदाश्चर्ययुक्तं ववृध इत्यर्थः। पूर्वमपि "यावच्छीलगुणाभिधाकृतिवयः" इत्यनेन सहजश्रीदामादिवदेव शीलाद्याविर्भावस्तेषूक्तः, न तु श्रीकृष्णवदपि ततः स्वरूपाधिक्यमेव तत्र प्रेमाधिक्ये कारणं जातं न तु शीलाद्याधिक्यमपीत्युत्तरेण श्रीकृष्णे प्रेमाधिक्यं तु दुर्निवारमिति भावः॥ २६॥ स वत्सवत्सपरूपधरः वनगोष्ठयोरिति तत्र कुत्रापि केनचिदपि तद्दूहितं नाभूदिति भावः, अन्यत्तैः। यद्वा स श्रीकृष्ण आत्मा द्वितीय एव चिक्रीडे॥ २७॥ पञ्चषास्वित्यनिश्चितोक्तिः प्रेममोहेन रमयति–श्रीकृष्णादीनिति रामः अतः प्रायो यद्यपि तेन सहैव प्रवेशस्तथाप्येकदा स राम इति वृत्तान्तविशेषोद्देशाय निर्देशः तच्च तं प्रति तल्लीला तत्त्वबोधनं स्नेहविशेषेण अन्यथा अब्दान्ते श्रीब्रह्मगमने सति तत्तत्सम्वत्सरेण तस्य तत्कौतुकानुभवसिद्धेः अतः पूर्वमबोधने कारणं तु वक्ष्यते– अज इति, यो विनाऽपि जन्म तत्तत्पुत्रतां प्राप्तः स इत्यर्थः। तत्त्वधुना व्यक्तीभविष्यतीति भावः॥ २८॥ ततस्तदनंतरम् उपव्रजमिति गोवर्द्धनेशानकोणकोटिस्थारिष्टमर्द्दनकुण्डसमीपप्रायप्रदेशे तदन्तिके व्रजस्य व्याप्तेः सटीकराख्यप्रदेशादृजुमार्गेण चतुःक्रोशमयत्वात् अथ "तर्ह्यागतो गोष्ठमरिष्टो वृषभासुर" इति वक्ष्यमाणाच्च तृणमिति तत्प्राशस्त्यविवक्षया तदावेशेऽपि सतीत्यर्थः। अधुना श्रीकृष्णेन वत्सतराणां चारणं किञ्चिद्वयोवृद्धयायोग्यत्वादिति ज्ञेयम्॥ २९॥ तदेवाभिव्यञ्जयति–दृष्ट्वेति द्वाभ्याम्। त्वर्थे चकारः पूर्वतो विशेषाय स चाकाण्डे प्रियसन्दर्शनस्वभावतः अथेति पाठेऽपि स एवार्थः। स्नेहविशेषत्वमेव दर्शयति–अस्मृतात्मेत्यादिभिः। आत्मपान् दुर्गमार्गं चातिक्रान्तो अत्यात्मपदुर्गमार्गः अस्त्वित्यादिपाठद्वयमपि क्विबन्तं तुगभाव आर्षः॥ ३०॥ स्वीयं माधुर्यादिभिरसाधारणं सुशोभनं वा ओधसम् ऊधोभ्यः स्रवदित्यर्थः॥ ३१॥ अभ्येत्य अभिमुखमेत्य अन्वेत्य इति क्वचित्पाठः॥ ३२॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्तत्कारणं तासां स्नेहविशेषम्। तत्कारणञ्च तासु श्रीभगवत्स्नेहविशेषमाह—**गो–गोपीनामिति**। स्नेहस्य ऋद्धिकां वृद्धिम्। अन्यत्तैर्व्यञ्जितम्। तत्र च तोकता। पूर्वबालकवद्बालभावो विचित्र भोज्यभूषणाक्रीडनकप्रार्थनादिरूपो मायया तासु ममता विशेषात्मिकया विना पूर्वं तस्य पुत्रत्वाभावेन तासु ममताविशेषो नासीत्। इदानीञ्च पुत्रत्वापत्या स जात इत्यर्थः। एवं श्रीभगवति तासां स्नेहवृद्धिस्तासु च तस्य पुत्रत्वेन ममताविशेषो भगवतोऽपि दुर्निवार इति तात्पर्य्येण श्रीभगवतो माहात्म्यविशेष एव सम्पद्येतेति, अथवा कापट्यं विना पूर्वं तासु किञ्चिद्वञ्चनमासीदधुना च श्रीयशोदायामिव निजाशेषरहस्य प्रकाशनात्तत्रासीदित्यर्थः; यद्वा, माया दया, तया विनेत्यधुना तत्तद्वलरूपस्य श्रीभगवतस्तासु स्नेहो विशेषतो जात इत्यर्थः, यद्वा, अकार प्रश्लेषेणामाया कापट्याभावस्तया विनेति पूर्वपुत्राणां तासु कापट्यं नासीदिदानीञ्च रसिकशिरोमणेस्तस्य विचित्रधूर्त्तता स्वभावेन तासां सुद्मार्थमिव तदभूदित्यर्थः॥ २५॥ अत एव सर्वेषां पितृमात्रादीनां बालरूपे तस्मिन्नेकाब्दं नित्यमुत्तरोत्तरमधिकं स्नेहभरो व्यवर्द्धतेत्याह–व्रजौकसामिति। स्नेह एव वल्ली लता, शनैर्नित्यवर्द्धमानत्वादिना, स्वशब्देन नित्य तादृशस्नेहपरम्पराविवृद्धिवैलक्षण्येनापि तेषु तेषां भगवद्बुद्धिर्नाभूदिति दृढीक्रियते। शनैरिति स्नेहसंलालन क्रमापेक्षया; यद्वा, आच्छादनार्थमन्यथा परमवैलक्षण्येन वितर्क्यत्वादपूर्ववदित्यस्यान्वहमित्यनेनान्वयः, वतिप्रत्ययस्य लौकिकोक्तिरीत्यानधिकार्थता नित्यनूतनतयेत्यर्थः, किंवानुपमेत्यर्थः, यद्वा, अपूर्वमाश्चर्य्यं तद्वत् वतिप्रत्ययस्तत्त्वतः श्रीकृष्णे तस्याः स्वाभाविकत्वेनाश्चर्य्यत्वाभावान्निःसीम यथा स्यात्तथा ववृधे इत्यपरिच्छिन्नता, अन्वहमिति नित्यवृद्धिरप्युक्ता। एवमपरिच्छिन्नस्यापि नित्यनूतनत्वेन वृद्ध्या प्रेमानन्दस्य ब्रह्मानन्दतोऽप्युत्कर्षः सूचितः। एष वैष्णवसिद्धान्तः श्रीभागवतामृतोत्तरखण्डे विवृतोऽस्ति॥ २६॥ स वत्सवत्सपरूपधरो वनगोष्ठयोः श्रीवृन्दावने व्रजे चेति तत्र तत्र कुत्रापि केनचिदपि तद्दहितं नाभूदिति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, स कृष्ण आत्मा स्वयमेवैकाकी चिक्रीडे स्वस्यैव तत्तद्रूपत्वेनान्याभावात्॥ २७॥ रमयति श्रीकृष्णादीनिति रामः, अतो यद्यपि तेन सह प्रायो नित्यं वने प्रवेशस्तथाप्येकदा स राम इति स्नेहविशेषेण तं प्रति तदा तत्तद्रूपधारणं तत्त्वबोधनापेक्षयान्यथा अब्दान्ते श्रीब्रह्मागमने सति तत्तत्सञ्चरणेन तस्य तत्कौतुकानुभवासिद्धिः। यद्वा, संगोपनार्थं तदब्दे प्रायो वने तस्यानयनात्। वनमाविशत् श्रीगोवर्द्धनान्तिक घनवनं प्रविवेशेत्यर्थः, वने स्वप्रभावस्य स्वत एव विशेषतः प्राकट्येन तत्रैव तेन तद्युक्तत्वात्। लौकिकगर्भवन्न जायते,

किन्तु स्वयमेवाविर्भवतीत्यजः, अतो गर्भादनुत्पन्नत्वेऽपि तस्य पुत्रता सम्भवेदिति भावः। यद्वा, न जायते, न प्रकटो भवतीत्यज इति तल्लीलाच्छादनाभिप्रायेण ॥ २८ ॥ उपव्रजमिति श्रीराधादेवीकुण्डान्तिके व्रजस्य व्याप्तेस्ततस्तदा, किंवा तेभ्यो वत्सेभ्यो विदुरादतिदूरे। यद्वा, गोवर्द्धनाद्रेर्विदुरादुपव्रजं चरतो वत्सान् तृणं चरन्त्योऽपि ददृशुरिति स्नेहाधिक्यं बोधितम् ॥ २९ ॥ तदेवाभिव्यञ्जयति—दृष्ट्वेति द्वाभ्याम्। त्वर्थे चकार पूर्वतो विशेषाय। स चाकस्मादकाण्डे प्रियसन्दर्शनस्वभावतः, किंवा तद्दिनेऽग्रजं प्रति तल्लीला बोधनाय अथेति पाठेऽपि स एवार्थः। स्नेहवशत्वमेव दर्शयति अस्मृतात्मेत्यादि विशेषणैः। आत्मपान् दुर्गमार्गञ्चातिक्रान्तोऽत्यात्मपदुर्गमार्गः ॥ ३० ॥ स्वकीयं महामधुरत्वादिनासाधारणं सुशोभनं वा, औधसमुधौम्यः स्रवदित्यर्थः॥३१॥ अन्वत्य पश्चादागत्य पाठान्तरेऽभिमुखमेत्य ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

श्रीकृष्णे स्नेहर्द्धिकाम् अल्पामपि स्नेहर्द्धि विनैवासीत् अनेन स्नेह एवासीत् पूर्वं नत्वल्पापि स्नेहवृद्धिरिति, पूर्वमासुगोगोपीष्वस्य हरेस्तोकता मायया सङ्कल्पं विनैवासीत् तासु मातृता मननं भगवतः तासां वा स्वपुत्रत्वभावना कृष्णे एतद्द्वयं श्रीभगवत्सङ्कल्पकृतमेव ततः कृष्णो मुदं कर्त्तुं तन्मातॄणां चेति प्रक्रमात् ॥ २५ ॥ एतदेवाह—आ अब्दम् अन्वहं दिने स्नेहवल्ली शनैरलक्षिता निःसीम यथा भवति तथा अपूर्ववत् ववृधे वत्प्रत्ययेन वृद्धावेवापूर्वत्वं तत्सङ्कल्पकृतम् ॥ २६ ॥ आत्मा श्रीकृष्णः आत्मना स्वसङ्कल्पेन आत्मानं विभुरूपमात्मानं स्वरूपं वत्सपालमिषेण इत्युपलक्षणं सर्वेषाम् ॥ २७ ॥ पञ्चषासु हायनापूरणीषु त्रियामासु अवशिष्टासु स रामोऽजः कृष्णः व्रजमाविशत् ॥ २८ ॥ उपव्रजं व्रजसमीपं चरतः वत्सान् ददृशुरित्यन्वयः ॥ २९ ॥ गोव्रजः समूहः उदास्यपुच्छः ऊर्द्ध्वमुखः ऊर्द्ध्वपुच्छः आस्रुपयाः आस्रवत्पयो यस्य सः ॥ ३० ॥ गावः वत्सान्समेत्याधः पतदिति शेषः। स्वौधसं पयः अपाययन् ॥ ३१ ॥ गोपास्तद्रोधनायासे मौघ्यं वैफल्यन्तेन लज्जा उरुर्मन्युश्च ताभ्यामुपलक्षिता गोवत्सैः सहितान्सुतान् ददृशुः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एतावत्तु वैषम्यं कृष्णस्याऽपि दुर्निवार्यमासीदित्याह—गोगोपीनामिति। गवां गोपीनां च तस्मिन्वत्सवत्सपात्मकतामापन्ने श्रीकृष्णे स्नेहर्द्धिकां स्नेहसमृद्धि स्नेहाधिक्यं विनेति यावत् मातृता उपलालनादिरूपा सर्वा पूर्ववदेवासीत् तथा आसु गोपीषु हरेस्तोकता बालभावः पूर्ववदेवासीत् किन्तु मायया विना ममेयं माता अहमस्याः पुत्र इति मोहं विनेत्यर्थः ॥ २५ ॥ स्नेहर्द्धिकामेव दर्शयति—व्रजौकसामिति। व्रजौकसां श्रीकृष्णे यशोदानन्दने स्वपुत्रेभ्योऽपि स्नेहवल्ली स्नेहसन्ततिः पूर्ववदेव ववृधे इदानीं स्वतोकेषु स्वापत्येष्वप्याऽऽब्दं सम्वत्सरपर्यन्तमन्वहं निःसीम निरवधिकं यथा तथैवावर्द्धतेत्यर्थः ॥ २६ ॥ इत्थं वत्सतत्पालव्याजेनात्मनैवात्मानं पालयन्वनगोष्ठयोर्वर्षं संवत्सरं चिक्रीडे विहृतवान् ॥ २७ ॥ तावत्पर्यन्तं रामस्यापि मोह एवासीत् सम्वत्सरान्ते तु कथंचिज् ज्ञातवानिति दर्शयन् आह—एकदेति। पञ्चसु षट्सु वा त्रियामासु रात्रिषु हायनापूरणीषु सम्वत्सरपूरकतयाऽवशिष्टास्वित्यर्थः। वत्सांश्चारयन् स रामो वनमाविशत् ॥ २८ ॥ तदा गोवर्द्धनाद्रेः शिखरे विदूरमेव तृणं चरन्त्यो गावोऽनुव्रजं व्रजस्योपान्ते चरतो वत्सान् ददृशुः ॥ २९ ॥ स दृष्टवान् गवां व्रजः सङ्घस्तेषां वत्सानां स्नेहेनाकृष्टः अत एव विस्मृत आत्मा येन स व्रजसमीपमगात् कथम्भूतः अतिक्रान्ता आत्मपा गोपा येन तथा दुर्गो मार्गो यस्य स च तथा द्विपादत्यन्तधावनेन पाश्चात्यपादयोः पूर्वपादाभ्यां सङ्घट्टनात्तथा प्रतीयमान इत्यर्थः। ककुदि ग्रीवा यस्य स उदञ्चितग्रीव इत्यर्थः। उन्नमितान्यास्यानि पुच्छानि च येन स आस्र सर्वतः स्रवत्पयो यस्य स हुङ्कृतैरुपलक्षितः गोव्रज इत्यनेन वृषभादयोऽप्यगुरिति सूचितम् ॥३०॥ तत्र विशेषतो धेनूनां चेष्टितमाह—समेत्येति। वत्सवत्योऽपि पुनः प्रसूता अपि गावः पूर्ववत्सान् स्वौधसं स्वापीनोद्भवं पयोऽपाययन् कथम्भूताः? वत्सानामङ्गानि गिलन्त्य इव लिहन्त्यः ॥ ३१ ॥ एवं रामेण दृष्टं वत्सेषु गवां स्नेहातिशयमुक्त्वाऽथ गोपानामपि दर्शयितुमाह—गोपा इति। तासां गवां रोधनेन यश्चायासस्तस्य गौघ्येन वैयर्थ्येन या लज्जा तत्सहितेनोरुणा मन्युना दुर्गमार्गजनितक्लेशेन चाभ्येत्यागत्य गोवत्सैः सहितान् सुतान् ददृशुः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवं पूर्वेभ्यो वत्सबालेभ्यस्तदंशानां वैलक्षण्यं दर्शयन् तत्तद्भाग्येन श्लाघ्यमानाभ्योऽपि तत्तद्रूपमातृभ्यः स्वरूपमातुवैंलक्षण्यमाह—गोगोपीनामिति। पुरोवदित्युभयत्राप्यन्वेति पूर्वत्र पूर्वबालकेष्वपि उत्तरत्र श्रीयशोदायामिवेत्यर्थः। तस्यामिवास्वपि शुद्धमातुभावाभावासु हरेस्तोकता तोकभाव एवासीत् नान्यभावः इत्यर्थः। किन्तु मायया विना तस्यां श्रीकृष्ण एवाहम् इति सत्यप्रतिपादने तदुचितसाक्षात्कृष्णरूपप्रकाशनञ्च आसु तु स श्रीदामाहं सुदामाहमिति छद्मप्रतिपादनं तदुचितरूपान्तरप्रकाशनश्चेत्यर्थः। वक्ष्यते च वत्सपालमिषेण स इति ॥ २५ ॥ तद्वत् श्रीयशोदानन्दनेऽपि वैलक्षण्यमाह—व्रजौकसामिति कृष्णे इत्युभयत्राप्यन्वेति यथा कृष्णे तथा तेषु ववृधे कृष्ण तु अपूर्ववत् पूर्वं यथा नासीत्तथा इत्यर्थः। यद्वा यथा यथावत् तेषु कृष्णस्य तत्तदंशेषु बालादिशिक्यपर्यन्तेषु तत्तद्योग्यं ववृधे कृष्णे त्वपूर्ववदाश्चर्ययुक्तं ववृध इत्यर्थः ॥ २६—३१ ॥ मन्युर्गाः प्रत्येव क्षेयं न तु बालान् प्रति गवामिव तेषां सबालेषु दर्शनसम्भवाददर्शनेऽपि वत्सचारिणां तेषां माधुर्यस्फूर्त्तेश्च कोपासम्भवात् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च गवां गोपीनां अस्मिन् श्रीयशोदानन्दने कृष्णे मातृता सर्वा उपलालनादिमयः सर्व एव मातृभाव इत्यर्थः। पुरोवत् पूर्ववदेवासीत् किन्तु स्नेहर्द्धिकां स्नेहाधिक्यं विना पूर्वं श्रीदामसुदामादिभ्यः स्वपुत्रेभ्योऽपि सकाशात् यशोदापुत्रे श्रीकृष्णे स्नेहर्द्धिरासीत् तस्यैव स्वपुत्रीभूतत्वे जाते सति तदा स्वपुत्रेष्वपि तथैव स्नेहर्द्धिरिति यशोदापुत्रे स्वपुत्रे च तुल्य एव स्नेहोऽभूदित्यर्थः। आसु गोगोपीषु हरेरपि तोकता बालभावः पूर्ववदेवासीत् किन्तु मायया उपचारेणैव पुत्रतुल्यत्वात् पुत्रत्वमासीत् ब्रह्ममोहनदिनमारभ्य तु कृष्णे एव श्रीदामसुदामादिरूपस्तासां पुत्रोऽभूदिति कृष्णस्य पुत्रभावो यथार्थ एवेत्यर्थः। ननु श्रीदामादिषु तन्मातॄणां यावान् स्नेहस्तावानेव पुत्रीभूते कृष्णेऽपि भवितुमर्हति "यावच्छीलगुणाभिधाकृतिवयोयावद्विहारादिकम्" इति पूर्वोक्तेः उच्यते कृष्णो हि महामहेश्वरत्वात् स्वाधीनीकृतब्रह्मादिस्वांशपर्य्यन्तोऽपि प्रेम्णः खल्वधीन एव प्रेमा तु न तस्याधीनः इति प्रेम्णि तस्य प्रभुत्वाभावात् तेन प्रेमा संकुचितीकर्तुमशक्यः अत एव स्वामिचरणैरप्युक्तं एतावत्तु वैषम्यं कृष्णेनापि दुर्निवारमिति स च प्रेमा वात्सल्यादिरूपस्तन्मात्रादिषु विराजते इति कृष्णः स्वमात्रादिसमीपे स्वैश्वर्य्यमननुसन्धानोऽधीनीभूत एव सदा तिष्ठति यथा महाराजचक्रवर्त्तिनः समीपे मण्डलेश्वर इति न च महामहेश्वरस्य तस्यैवं पारतन्त्र्यं दूषणमिति वाच्यं प्रत्युत भूषणमेव यथा जीवस्य मायापारतन्त्र्यं दुःखार्थकं तथैवेश्वरस्यानन्दरसमयस्यापि प्रेमपारतन्त्र्यं प्रतिक्षणवर्द्धमाननिरतिशयानन्दार्थकमेवेति महानुभावैरनुभूतम् ॥ २५ ॥ तदेवं यशोदानन्दनकृष्णपुत्रीभूतकृष्णयोः स्वरूपत ऐकरूप्यात् स्नेहाधिक्यं तुल्यमुक्तमपि पुनः स्पष्टीकुर्वन् यशोदानन्दनकृष्णे तु गुणोत्कर्षहेतुकं स्नेहाधिक्यमाह–व्रजौकसामिति। आब्दं वर्षं व्याप्य अन्वहं स्नेहवल्लीति वल्ली यथा प्रतिदिनमेव वर्द्धते तथैवेत्यर्थः। यथा कृष्णे यशोदानन्दने पूर्वं स्वपुत्रेभ्योऽपि वर्द्धमाना सा आसीत् इदानीं स्वतोकेष्वपि तथैव ववृधे इति स्वतोकानामपि कृष्णत्वात् स्नेहर्द्धिरुभयत्र तुल्यैवेत्यर्थः। किं च तु शब्दबलात् कृष्णं इत्यस्यावृत्त्या स्नेहर्द्धेस्तुल्यत्वेऽपि कृष्णे यशोदानन्दने तु तथापि अपूर्ववत् नित्यनवायमानैव तस्य सर्वशक्तिसौन्दर्य्यवैदग्ध्यादिगुणवत्त्वादंशित्वाच्च तासां पुत्रीभूतकृष्णस्वरूपाणां तु श्रीदामाद्युचितसौन्दर्यादिमत्त्वादंशत्वाच्चेति भावः। यद्वा, यथेति यथावदेव स्नेहवल्ली ववृधे कृष्णे तु अपूर्ववदेव ववृधे इत्यावृत्त्या विनैव व्याख्येयम् ॥ २६ ॥ एवमात्मा कृष्णो वत्सपो भूत्वा वत्सानां पालानां च मिषेण आत्मानमात्मना पालयन् क्रीडितवानित्यर्थः ॥ २७ ॥ ब्रह्ममोहनप्रसङ्ग एव बलदेवमोहनमपि व्यक्तीकर्तुं कथामाह—एकदेति। पञ्चसु षट्सु वा रात्रिषु हायनस्य वर्षस्य अपूरणीषु पूरकतया अवशिष्टास्वित्यर्थः ॥२८॥ गोवर्द्धनशृङ्गे तृणं चरन्त्यो गावः तस्मादविदूरात् व्रजस्य निकटे चरतो वत्सान् ददृशुः ॥ २९ ॥ अस्मृतात्मा आत्मानमपि विस्मृत्य स गोसमूहः अगात् अतिक्रान्ता आत्मपा गोपा दुर्गा मार्गाश्च येन सः, परस्परं युक्ताभ्यां पद्भ्यां धावन् द्विपादिव प्रतीयमानः उन्मुखत्वात् ककुदि ग्रीवा यस्य स उद्गतान्यास्यानि पुच्छानि च यस्य स आ सम्यगेव क्षरन्ति अस्रूणि पयांसि च यस्य सः ॥ ३० ॥ गोवर्द्धनस्याधः समेत्य द्व्याहिकत्र्याहिकादिवत्सवत्योऽपि औधसं ऊधोभ्यः स्वयमेव स्रवत् पयः अपाययन् गिलन्त्य इवेति गवां लेहनाधिक्यं स्नेहाधिक्यसूचकम् ॥ ३१ ॥ तासां गवां रोधने य आयासो लकुटोत्क्षेपादिभिस्तस्य मौघ्येन वैयर्थ्येन हेतुना लज्जा च मन्युश्च तल्लज्जामन्यु तेन दुर्गमार्गजनितक्लेशेन चाभ्येत्य गोवत्सैः सह ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अस्मिन् श्रीकृष्णे गवां गोपीनां च मातृता मातृभावः पुरोवदेवासीत् किन्तु स्नेहर्द्धिकां स्नेहाधिक्यं विना परमानन्दस्वरूपत्वात् आसु गोषु गोपीषु च हरेस्तोकता बालभावोऽपि पुरोवदेवासीत्, किन्तु मायाया प्राक्तनवत्सादिदेहोपादानरूपया प्रकृत्या विना अप्राकृतशरीरित्वात् ॥ २५ ॥ आअब्दं यावत्संवत्सरम् अन्वहमनुदिनम् स्वतोकेषु निःसीमं निरवधिकं यथा भवति तथा व्रजौकसां स्नेहवल्लीप्रेमलता ववृधे यथा पूर्वं कृष्णे तद्वत् देहलीदीपन्यायेन कृष्णे इत्युभयान्वयिपदम्। ननु, श्रीकृष्णे तदानीं स्वतोकेषु यथा तथैव स्नेहवल्ली आसीदधिकावेत्यत्राह–कृष्णे त्वपूर्ववदिति। कृष्णे तु श्रीयशोदानन्दने तु तदानीमप्यपूर्ववत् स्वतोकेभ्यः अधिकैवेत्यर्थः। तत्तोकानामंशत्वाद्यशोदानन्दनस्यांशित्वादिति भावः ॥२६॥ आत्मा 'एष ते आत्मान्तर्य्यामी' "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" इत्यादि श्रुतिप्रसिद्धः सर्ववेदैकवेद्यो वत्सपो भूत्वा तत्रापि इत्थमुक्तप्रकारेण वत्सपालमिषेण आत्मानं वत्समिषेण सन्तम् आत्मना वत्सपमिषेण सता पालयन् वने गोष्ठे च चिक्रीडे क्रीडितवान् ॥ २७ ॥ अन्यस्य तु का कथैतावत्पर्य्यन्तं वत्सवत्सपालमिषेण श्रीकृष्ण एव विहरतीति रामेणाऽपि न ज्ञातं संवत्सरान्ते तु कथञ्चित् ज्ञातमिति दर्शयन्नाह—एकदेति। अजः "अजायमानो बहुधा व्यजायते" इति श्रुतिप्रसिद्धः परमावतारी भक्तेच्छयाविर्भूतः श्रीकृष्णः एकदा पञ्चषासु पञ्चसु षट्सु वा रात्रिषु हायनापूरणीषु हायनस्य सम्वत्सरस्यापूरकतयाऽवशिष्टासु सरामो वनमाविशत् ॥२८॥ तदा गोवर्द्धनाद्रेः शिरसि शिखरे चरन्त्यो गावः तत एव विदूरात् उपव्रजं व्रजसमीपे चरतो वत्सान् ददृशुः ॥२९॥ अविदूरतो वत्सं दृष्ट्वा गौर्धावत्येव तदा तु विदूरात् दृष्ट्वा तत्राऽपि स गोवर्द्धनशिखरस्थो गोव्रजः धेनुवृषस्तवत्सतरादिगवां कलापः तत्स्नेहवशः वत्सस्नेहवशः अत एव अस्मृतात्मा न स्मृत आत्मा येन सः अत्यात्मपदुर्गमार्गः अतिक्रान्तः आत्मपान् अत्यात्मपः दुर्गो मार्गो यस्य स दुर्गमार्गः स चासौ

सच द्वौ पादौ यस्य स द्विपात् द्वौ पादौ संयोज्य धावमानो द्विपादिव प्रतीयते इत्यर्थः। ककुदि आकुञ्चिता ग्रीवा यस्य स तथा उन्नमितान्यास्यानि पुच्छानि च येन स तथा आस्रुपयाः आसर्वतः स्रवन्ति पयांसि यस्य स तथा हुंकृतैरुपलक्षितो जवेनोपव्रजमगात् ॥ ३० ॥ तत्र धेनूनां श्रीकृष्णरूपेषु वत्सेषु रामेण दृष्टं प्रीत्यतिशयं दर्शयति – समेत्येति। वत्सवत्योऽपि पुनः प्रसूता अपि वत्सान् श्रीकृष्णरूपान् गिलन्त्य इव लिहन्त्यः स्वौधसं पयः अपाययन् ॥३१॥ अथ गोपानां कृष्णरूपेषु वत्सपेषु रामेण दृष्टं प्रीत्यतिशयं दर्शयति—गोपा इति त्रिभिः। तस्य गोव्रजस्य रोधने य आयासस्तस्य मौघ्येन वैयर्थ्येन यो लज्जोरुमन्युः लज्जया सह बहुक्रोधस्तेन दुर्गाध्वकृच्छ्रतो दुर्गममार्गक्लेशेन च अभ्येत्य गोवत्सैः सह सुतान् ददृशुः ॥ ३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

पूर्ववृत्ताद् गोपीनां मातृभावात् हरेः पुत्रभावाच्चाधुनिकस्य तस्य तस्य च विशेषमाह गोगोपीनामिति, गवां गोपीनां चास्मिन् यशोदासुते हरौ सर्वा मातृता उपपालनादिमयो निखिलो मातृभावः पुरोवत् पूर्ववदेवासीत् किन्तु स्नेहर्द्धिकां विनेति पूर्वं श्रीदामसुवलादिषु स्वसुतेषु स्नेह एव यशोदासुते हरौ तु स्नेहर्द्धिरिदानीन्तु तस्यैव श्रीदामादित्वेनैकवस्तुतत्त्वादुभयत्र प्रेमर्द्धिरित्यर्थः। आसु गोपीष्वपि हरेस्तोकता बालभावः पूर्ववदेवासीत् किन्तु मायया विनेति "माया स्याच्छान्वरी बुद्ध्यो"रिति मेदिनी। पूर्वमासां च सुतोऽहमिति बुद्धिरचित एव तद्भावो नतु साक्षादिदानीन्तु यशोदासुतस्यैव श्रीदामादिरूपत्वात् साक्षाच्च स इत्यर्थः॥२५॥ उभयत्र समानामेव स्नेहर्द्धिमुक्तां स्फुटयन्ननाच्छन्नरूपे यशोदासुते विशेषमाह व्रजौकसामिति। आब्दं वर्षं व्याप्यान्वहं प्रतिदिनं स्वतोकेषु कृष्णाविर्भावेषु श्रीदामादिषु स्नेहवल्ली ववृधे यथा कृष्णे यशोदासुते शनैरुपलालनादिक्रमेण तु शब्दादावृत्या व्याख्यायते कृष्णेत्वपूर्ववन्नित्यनवायमानैव ववृधे तस्यांशित्वादनाच्छन्नरूपगुणत्वाच्च परे त्वाहुस्त्वावृत्तिः यथा यथावदेव स्नेहवल्ली ववृधे कृष्णे त्वपूर्ववदिति ॥ २६ ॥ इत्थमेव स वत्सप आत्मा विभुर्विज्ञानानन्दमूर्त्तिः कृष्णः वत्सानां पालानाञ्च मिषेनात्मानं पालयन् चिक्रीड़े इति केनचिद्गृहितो नाभूदित्यर्थः ॥ २७ ॥ विरिञ्चविमोहनप्रसङ्गे बलभद्रस्यापि मोहनं वक्तुं कथामाह—एकदेति पञ्चसु षट्सु वा त्रियामासु रात्रिषु हायनस्य संवत्सरस्यापूरणीषु पूरकतयावशिष्टास्वित्यर्थः ॥ २८ ॥ गोवर्द्धनस्याद्रेः शिरसि शिखरे तृणं चरन्त्यो गावस्ततोहरिद्दूराद्व्रजस्यान्तिके चरतो वत्सान् ददृशुः ॥ २९ ॥ स गो व्रजो वत्सान् दृष्ट्वा अगात्तानगमत्, कीदृशः ? अमृतात्मा स्वमपि विस्मृत्येत्यर्थः। अतिक्रान्तो आत्मपाः स्वरक्षका गोपा दुर्गा मार्गाश्च येन सः, मिथो युक्ताभ्यां पद्भ्यां धावन् द्विपादिव प्रतीयमानः ककुदि आकुञ्चिता ग्रीवा यस्य सः उन्नतान्यास्यानि पुच्छानि च यस्य सः, आ सम्यक् स्रवन्ति पयांसि नेत्रजलानि दुग्धानि च यस्य सः ॥ ३० ॥ गावो गोवर्द्धनाद्रेरधः समेत्य औधसमूधोभ्यः स्रवत् पयो वत्सानपाययन् वत्सवत्यः पुनः प्रसूता आपे लिहन्त्य इति गवां लेहनाधिक्यं स्नेहाधिक्यं द्योतयति ॥ ३१ ॥ तासां गवां रोधने य आयासो यष्टिक्षेपादिस्तस्य मौघ्येन वैफल्येन हेतुना जातो यो लज्जायुक्तो मन्युस्तेन दुर्गाध्वजनितेन कृच्छ्रेण चाभ्येत्य गोवत्सैः सह सुतान् ददृशुः ॥ ३२ ॥

श्रीसुबोधिनी

एवमुभयविधानां पूर्ववत् स्थितिमुक्त्वा विशेषमाह **गोगोपीना**मिति, गवां **गोपीनां** च **मातृता** मातृभावः सेवादिरूपः **सर्वोप्यस्मिन्** नूतनपुत्रेपि पूर्ववदेवासीत्, परं स्नेहर्द्धिकां विना स्नेहर्द्धिस्त्वधिका जाता, **आस्वपि गोगोपीषु हरेस्तोकता** पूर्ववदेवासीत्, स्तोकेषु यादृशो भावः सा **स्तोकता** मातृविषयिणी स्तोकनिष्ठा हरेरप्यासीद् यथापूर्वं, स्तोकानां परमिदानीं भगवति स धर्मो मायया जातः, अतो **मायया विना** मायां परित्यज्य स्वरूपतः पूर्ववदेवासीदित्यर्थः ॥ २५ ॥ एवमारम्भ एव स्नेहाधिक्यमुक्त्वा तस्य वृद्धिमाह **व्रजौकसा**मिति, **स्वतोकेषु** स्वस्वबालकेषु **स्नेहवल्ली** शीघ्रमेव वर्धमानान्**वहं ववृधे, शनै**रिति वैलक्षण्याज्ञानार्थं, ततो **निःसीम ववृधे, यथा कृष्णे** तु पूर्ववत्, **कृष्णे त्वपूर्ववदेव, कृष्ण**शब्दः सप्तम्यन्तो वारद्वयमावर्तते ॥ २६ ॥ एवं भगवच्चरित्रं नूतनमुक्त्वोपसंहरतीत्थमिति, **आत्मा** कृष्ण **आत्मना** वत्सरूपेणा**त्मानं** वत्सरूपं वस्तुतः स्वयमेव **वत्सः पाल** इति **मिष**मात्रं व्याजमात्रं, तेन **स** एव **वत्सपो** भूत्वात्मानं **पालयन् वनगोष्ठयोर्व**ने गोष्ठे च **चिक्रीडे** क्रीडां कृतवान् ॥ २७ ॥ इदानीं **गोकुलवासिनां** सर्वेषां मध्ये बलभद्रस्य भगवत **एवं** लीलया ज्ञानं ज्ञातमिति वक्तुमुपाख्यानमारभत **एकदेति,** यदा भगवत इच्छा, **वत्सान्** पालयन् **बलभद्र**सहितो **वनमाविशत्,** यत्र गह्वरे वने गावश्चरन्ति तत्र गतः **पञ्चषासु** रात्रिषु **हायनापूरणीषु** सत्सु वत्सापहरणे वर्षमात्रं जातं पञ्च वा षड् वा रात्रयो न्यूनाः, **त्रियामा** इत्यल्पत्वं, **अज** इति वत्सपालरूपेण तन्मातृभ्यो **न** जातः केवलं स्वयमेव तथा वर्तत इति ज्ञापनार्थमुक्तम् ॥ २८ ॥ ततो यदासीत् तदाह **विशेषेण दूराद् दूरे चरतो वत्सानुपव्रजं** व्रजसमीप एव स्थितान् व्रजसमीपारण्ये स्थितानित्यर्थः, **गोवर्धनाद्रिशिरसि चरन्त्यो गावो ददृशुः** ॥ २९ ॥ यद्यपि गवां तृणमत्यभीष्टं तथापि तत् परित्यज्य वत्सस्नेहाद् वत्ससमीपमागता इत्याह **दृष्ट्वे**ति, पूर्वमपि पश्यन्ति कदाचित् तद्व्यावृत्त्यर्थं भिन्नप्रक्रममाहाथेति, तत्स्नेहेन वत्सस्नेहेन वशीकृतस्त**त्स्नेहवशोत** एवा**स्मृत आत्मा** देहो येन **स** प्रसिद्धोपि **गोव्रजः** सर्वा एव गावो**त्यात्मपदुर्गमार्गो** जातः, **अतिक्रान्ता आत्मपा गोपाला दुर्गश्च मार्गो** येन, रक्षकानतिक्रम्य कण्टकादिभूयिष्ठमपि प्रदेशं मार्गव्यतिरेकेणैवातिक्रम्यागत इत्यर्थः, किञ्च **द्विपाज्** जातो योजितपादद्वयेनैवोत्प्लवनेनैव धावति, **ककुदि ग्रीवा** यस्य, **उदर्ध्वंमास्ये पुच्छं**

यस्यैतादृशः **सन्नगाद्** वत्ससमीपे समागतो **हुङ्कृतैः** सह, **आसमन्तात् स्रवतीत्यास्रु**, आस्रु पयो यस्य स **आस्रुपया जवेना**गतः ॥ ३० ॥ ततः **समेत्य वत्सवत्योप्यधोवत्सांस्त्यक्त**वत्सान**प्यपाययन्**, तत्राप्य**ङ्गानि** गिलन्त्य **इव लिहन्त्यः** स्नेहमुद्गिरन्त्यस्तथा कुर्वन्ति, नात्र तासां कश्चन दोषो यतः **स्वौधसं** स्वस्यैवौधसि स्थितं **पयः** ॥ ३१ ॥ एवं गवां स्नेहाधिक्यमुक्त्वा गोपानां स्नेहाधिक्यमाह **गोपा** इति त्रिभिः, प्रथमत तस्य गोव्रजस्य **रोधनार्थं** योयमा**यास**स्तस्मिन् विफले जाते यत् **मौढ्य**मितिकर्तव्यताज्ञानाभावो जातस्तस्मिञ् जाते पश्चाल्लज्जा जाता, एवं दोषत्रयेणो**रुमन्यु**र्जातः, तेन मन्युनाविचारितक्लेशा एव **दुर्गाध्वनि** यः **कृच्छ्रः** क्लेशस्ततोपि समेत्य क्लेशं प्राप्यापि मिलित्वा **गोवत्सैः** सह मिलितान् **सुतान् ददृशुः** ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'एतावत्तु वैषम्यं श्रीकृष्णस्यापि दुर्वारमासीत्' इत्याह—**गोगोपीनामिति**। **गवां गोपीनां** चास्मिन् पुत्रीभूते **कृष्णे मातृता** उपलालनादिरूपा **पूरावत्** पूर्वपुत्रेष्विवैवासीत्, किन्तु **स्नेहर्द्धिकां विना**। स्नेहाधिक्यं त्विदानीमस्मिन् विशेषमित्यर्थः। तथा **आसु** गोगोपीषु **हरेस्तोकता** बालभावनाऽपि **पूर्ववदेवासीत्, किन्तु मायया विना**। 'ममेयं माता, अहमस्याः पुत्र' इति मोहं विनेत्यर्थः ॥ २५ ॥ स्नेहाधिक्यमेव दर्शयति—**व्रजौकसामिति**। **व्रजौकसां कृष्णे** यशोदानन्दने **स्वपुत्रेभ्योऽपि** स्नेहाधिक्यं पूर्वमासीत्तथेदानीं **स्वतोकेषु** स्वपुत्रेष्वपि **अपूर्ववत्** पूर्वतो विलक्षणं निःसीमं निरवधिकं **यथा** भवति तथा **स्नेहवल्ली** स्नेहसन्ततिः **अन्वहं** प्रतिदिनं **शनैः आब्दं** संवत्सरपर्यन्तं **ववृधे**। **'वल्ली यथा शनैरनुदिनं वर्धते तथा'** इति सूचयितुं वल्लीपदम् ॥ २६ ॥ **इत्थमेवमात्मा** सर्वात्मा स श्रीकृष्ण एव **वत्सानां पालानां च मिषेण** व्याजमात्रेण **वत्सपो** भूत्वा **आत्मना** बालरूपेण **आत्मानं** वत्सरूपिणं **पालयन् वर्षं** संवत्सरपर्यन्तं **वनगोष्ठयोश्चिक्रीडे** ॥ २७ ॥ एतावत्पर्यन्तं रामस्यापि मोह एवासीत्, संवत्सरान्ते तु कथञ्चिज्ज्ञातवान्। तद्दर्शयति—**एकदेति**। **एकदा सरामो** रामेण सहितो**ऽजः** श्रीकृष्णः **वत्सान् चारयन् वनमाविशत्**। अजपदेनैवं सर्वस्वरूपत्वेऽपि तस्याविकारित्वं सूचयति। **एकदेति**। 'कदा' इत्यपेक्षायामाह—**पञ्चषासु** पञ्चसु वा षट्सु वा **त्रियामासु** रात्रिषु **हायनापूरणीषु** हायनस्य संवत्सरस्यापूरकतयाऽवशिष्टासु **सतीष्वित्यर्थः** ॥ २८ ॥ तत्र रामेण दृष्टमाश्चर्यमाह— **तत इति** सप्तभिः। **गोवर्धनपर्वतस्य शिखरे चरन्त्यो गावस्ततो** विदूरादेव **उपव्रजं** व्रजसमीपे **तृणं चरतो वत्सान् ददृशुरित्यन्वयः** ॥ २९ ॥ **दृष्ट्वा च** अथानन्तरमेव **स गोव्रजो** गवां समूहस्तत्स्नेहवशस्तेषां वत्सानां **स्नेहेनाकृष्टः**, अत **एवास्मृतः** विस्मृतः आत्मा देहो येन सः, अत एव **अत्यात्मपदुर्गमार्गः** अतिक्रान्ता अगणिताः **आत्मपाः** गोपा **दुर्गमार्गः** कण्टकादिभ्योऽगम्यप्रदेशश्च येन सः, तथा **मुक्ताभ्यां** पद्भ्यां **धावन् द्विपवत्** प्रतीयमानः, **ककुदि** आकुञ्चिता **ग्रीवा** यस्य, **उदास्यपुच्छः** उन्नमितानि आस्यानि मुखानि पुच्छानि च येन सः, **आस्नुपयाः** आ सर्वतः स्नुवंति पयांसि यस्य सः, **'आस्रुपया'** इति पाठेऽप्ययमेवार्थः। **हुंकृतैः** हुङ्कारशब्दान् कुर्वन् **जवेन** वेगेनागात् वत्ससमीपं जगामेति ॥ ३० ॥ गोवर्धनस्याधोदेशे चरतो वत्सान् **समेत्य** तेषाम**ङ्गानि गिलन्त्य इव लिहन्त्यो वत्सवत्यः** पुनःप्रसूता अपि **गावः स्वौधसं पयः अपाययन्** ॥ ३१ ॥ एवं रामेण दृष्टं वत्सेषु **गवां** स्नेहातिशयमुक्त्वा, तेनैव दृष्टं **गोपानामप्यमीषु** स्नेहातिशयमाह–**गोपा इति**। तासां गवां **रोधने** य **आयासः** श्रमस्तस्य **मौघ्यं** निष्फलत्वं तेन जातया **लज्जया** सह य **उरुर्मन्युस्तेन दुर्गमार्गजनितक्लेशेन च युक्ता गोपा अभ्येत्य** आगत्य **गोवत्सैः सह सुतान् ददृशुः** ॥ ३२ ॥

अन्वितार्थप्रकाशिका

एतावत्तु वैषम्यं श्रीकृष्णस्यापि दुर्वारमासीदित्याह–गोगोपीनामिति ॥ **गवां गोपीनां** चास्मिन्पुत्रीभूते **कृष्णे मातृता** उपलालनादिरूपा सर्वापि **पुरोवत्** पूर्वपुत्रेष्विवैवासीत्। पुरावदिति च पाठः। **किंतु स्नेहर्धिकां विना** स्नेहाधिक्यं त्विदानीमस्मिन्विशेष इत्यर्थः। **तथा आसु** गोगोपीषु **हरेस्तोकता** बालभावनाऽपि **पूर्ववदेवासीत् किंतु मायया विना** ममेयं माता अहमस्याः पुत्र इति मोहं विनेत्यर्थः। **अत्रोत्तरार्द्धे तोषणी**। पुरोवत् पूर्वंमातरि यशोदायामिव आस्वपि तोकता बालभाव एवासीत् किंतु मायया यशोदायां कृष्णोऽहमिति सत्योक्तिः। तद्रूपतया प्रकाशनं चेति न माया। आसु तु श्रीदामाहमिति छद्मोक्तिस्तद्वत्प्रकाशनं मायेत्वेतावद्वैलक्षण्यमित्यर्थः। यद्वा। मायया विना पूर्वं मायया उपचारेणैव पुत्रतुल्यत्वात् पुत्रत्वमासीत्। इदानीं तु कृष्ण एव सुदामादिरूपस्तासां पुत्रोऽभूत् इति ॥ २५ ॥ **व्रजौकसामिति** ॥ **व्रजौकसां कृष्णे** यशोदानन्दने **स्वपुत्रेभ्योऽपि** यथा स्नेहाधिक्यं पूर्वमासीत्तथेदानीं **स्वतोकेषु** स्वपुत्रेष्वप्यपूर्ववत् पूर्वतो विलक्षणं निःसीम निरवधिकं **यथा** भवति तथा **स्नेहवल्ली** स्नेहसंततिः **अन्वहं** प्रतिदिनं **शनैः आब्दं** संवत्सरपर्यन्तं **ववृधे**। यद्वा। स्वापत्यतया ज्ञातेष्वपि तोकेषु अब्दपर्यन्तं स्नेहवल्ली शनैः लालनक्रमेण **यथा कृष्णे** तथैव तेषु ववृधे। कृष्णे तु अपूर्ववत् पूर्वविलक्षणानिःसीम ववृधे ॥२६॥ **इत्थमिति** ॥ इत्थमेवात्मा सर्वात्मा स श्रीकृष्ण एव **वत्सानां पालानां च मिषेण वत्सपो भूत्वा आत्मना बालरूपेण आत्मानं** वत्सरूपिणं पालयन् वर्षं संवत्सरपर्यन्तं वनगोष्ठयोश्चिक्रीडे। **कर्मव्यतिहारे तङ्** ॥ २७ ॥ एकदेति ॥ **एकदा पञ्चषासु** पञ्चसु वा षट्सु वा **त्रियामासु** रात्रिषु **हायनापूरणीषु** हायनस्य संवत्सरस्यापूरकतयाऽवशिष्टासु सतीष्वित्यर्थः। **सरामो** रामेण सहितो**ऽजः** श्रीकृष्णः **वत्सान्** चारयन् वनमाविशत् ॥ २८ ॥ तत इति ॥ **गोवर्द्धनपर्वतस्य शिखरे चरन्त्यो गावस्ततः** विदूरावेव **उपव्रजं** व्रजसमीपे गोवर्द्धनेशानकोणस्थारिष्टासुरमर्दनकुण्डसमीपे तृणं

चरतो वत्सान्ददृशुः ॥ २९ ॥ दृष्ट्वेति ॥ दृष्ट्वा चाथानन्तरमेव स गोव्रजो गवां समूहस्तत्स्नेहवशस्तेषां वत्सानां स्नेहेनाकृष्ट अत एवाऽस्मृतः विस्मृतः आत्मा देहो येन सः अत एवात्यात्मपदुर्गमार्गः अतिक्रान्ता अगणिताः आत्मपाः गोपा दुर्गमार्गः कण्टकादिभ्योऽगम्यप्रदेशश्च येन सः तथा युक्ताभ्यां पद्भ्यां धावन् द्विपादिवत् प्रतीयमानः ककुदि आकुञ्चिता ग्रीवा यस्य उदास्यपुच्छः उन्नमितानि आस्यानि मुखानि पुच्छानि च येन सः आस्नुपयाः आसर्वतः स्नुवन्ति पयांसि यस्य सः आस्नुपया इति पाठेऽप्ययमेवार्थः। उभयत्र धातोः क्विपि तुगभाव आर्षः। आसमन्तात् स्नौ पर्वतसानौ पतत् पयो यस्येति वा। अत्र आसमंतात् क्षरन्ति स्नेहाश्रूणि पयांसि च यस्येति चक्रवर्ती तालव्यशकारमप्यभिप्रैति। हुंकारशब्दान् कुर्वन् जवेन वेगेनागात् वत्ससमीपं जगामेति। गोव्रज इत्यनेन वृषादयोऽप्यगुरित्युक्तम् ।। ३० ॥ समेत्येति ॥ गोवर्द्धनस्याधोदेशे चरतो वत्सान्समेत्य तेषामङ्गानि गिलन्त्य इव लिहन्त्यो नुमार्षः। वत्सवत्यः पुनः प्रसूता अपि गावः स्वौधसं पयः अपाययन् ॥३१॥ गोपा इति ।। तासां गवां रोधने य आयासः श्रमस्तस्य मौघ्यं निष्फलत्वं तेन जातया लज्जया सह य उरुर्मन्युस्तेन दुर्गाविभ्वकृच्छ्रतः दुर्गमार्गजनितक्लेशेन च युक्ता गोपा अभ्येत्य आगत्य गोवत्सैः सह सुतान्ददृशुः ।। ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गवां गोपीनां च अस्मिन् प्रत्येकं पुत्रीभूते श्रीकृष्णे स्नेहर्द्धिकां प्रेमाधिक्यं विना सर्वालालनपोषणरक्षणादिरूपा समग्रा मातृता मातृभावः पुरोवत्पूर्ववदभूत् स्नेहाधिक्यं तु इदानीमेवातितरामाभूदित्यर्थः। हरेः पुत्रीभूतस्य कृष्णस्य आसु गोपीष्वपि तोकता पुत्रभावः मायाविनाऽभूत् अहमस्याः सुतः इयं च मदीया जननीति मोहं विनेत्यर्थः ॥२५॥ स्नेहवल्ली प्रेमलता आब्दं संवत्सरपर्यंतं निःसीम अत्यंतं यथा तथा ववृधे कृष्णे यशोदानंदने स्वसुतेभ्योपि अधिकं प्रेम यथाभूत् तथा कृष्णरूपेषु स्वपुत्रेषु अपूर्ववत् पूर्वपुत्रे पुनर्भवतीत्यपूर्वः स इव अधिकोऽधिकोऽभूदित्यर्थः ॥ २६ ॥ आत्मा सर्वात्मा सः श्रीकृष्णः वत्सपो भूत्वा वत्सपमिषेण आत्मना स्वेन कृत्वा आत्मानं वत्सापितं स्वं पालयन् सन् वनगोष्ठयोः वर्षं चिक्रीडे ।। २७ ॥ एतच्चरितं रामस्यापि संमोहजनकमित्याह एकदेत्यादिदशभिः पंच वा षड्वेति पंचषास्तासु पंचमासु बहुव्रीहौ संख्येय इति डच्प्रत्ययः पंचसु वा षट्सु वा त्रियामासु रात्रियामासु रात्रिषु हायनस्य एकवर्षस्य आपूरणीषु अपूर्णतया स्थितासु सतीषु ॥ २८ ।। ततो वत्सस्थानात् दूरे अद्रिशिखरे तृणं चरंत्यो गावः उपव्रजं व्रजनिकटे चरतो वत्सान् ददृशुः ।। २९ ।। दृष्ट्वेति तान्दृष्ट्वा तेषु वत्सेषु स्नेहेन वशस्तदधीनः अतएव न स्मृत आत्मा देहो येन सः आस्नुपयाः स्रवद्दुग्धः सः शिखरस्थो गोव्रजः धेनुसमूहः जवेन वेगेन वत्ससमीपे हुंकृतैः गोजातीयशब्दैः सहागात् गोकलापे वेगचिह्नन्याह अत्यात्मपाः अतिक्रांता आत्मपागोपायेन सः दुर्गः दुर्गमो मार्गो यस्य स चासौ स च धावन्सन् द्विपादिव दृश्यमानः ककुदि आकृष्टाग्नी वा यस्य सः उदास्यपुच्छः उच्चैः कृतानि आस्यानि मुखानि पुच्छानि च येन सः ॥ ३० ॥ अधः स्थितान् वत्सान् स्वौधसं स्वोधसि भवं क्षीरं अपाययन् ॥ ३१ ।। गवां गोपीनां च वत्सपेषु स्नेहाधिक्यमुक्त्वा इदानीं गोपानां स्नेहाधिक्यमाह गोपा इति तासां गवां रोधनेन आवरणेन यः आयासः श्रमस्तस्य मौघ्येन मिथ्यात्वेन उत्पन्ना या लज्जा तया सह उरुमन्युना दुर्गाध्वनः दुर्गममार्गात् उत्पन्नेन कृच्छ्रेण कष्टेन चाभ्येत्य प्राप्य गोवत्सैः सह सुतान् ददृशुः ।। ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वयमिति ।। एवं सर्वात्मा स्वयमेव कृष्णः, आत्मा प्रयोजकः सन्, आत्मवत्सपैरात्माभिन्नैर्वत्सपैः, प्रयोज्यैः आत्मगोवत्सान् आत्माभिन्नान् गवां वत्सान्, इति कर्म, प्रतिवार्य, आत्मविहारैः आत्मरूपैरेव क्रीडनैः, क्रीडन् क्रीडामाचरन् सन्, इति क्रियापि व्रजं प्राविशत्। एवं सर्वकारकाण्यपि स्वयमेवेत्यर्थः ॥ २५ ॥ तत्तदिति ॥ तत्तद्वत्सान् तेषां तेषां वत्सपानां वत्सान्, पृथक् नीत्वा पृथक्कृत्येत्यर्थः। सः श्रीकृष्णः, तत्तद्गोष्ठे, तेषां तेषां गोष्ठे, निवेश्य प्रवेश्य, हे राजन्, तत्तदात्मा तत्तद्बालप्रतिरूपः अभवत्। तत्तत्सद्म तत्तद्बालगृहं च प्रविष्टवान् ॥२६॥ अथ गोपिकामोहनप्रकारमाह ।। तन्मातर इति ॥ वेणुरवेण तत्तद्वेणुनादरूपेण लिङ्गेन त्वरयोत्थिताः तन्मातरस्तत्तद्वत्सपजनन्यः, यत् परं ब्रह्म, तदेव, सुतान् मत्वा, सुतात्मकं तत्परं ब्रह्मैव, दोर्भिः स्वस्वबाहुद्वयेनेत्यर्थः। उदूह्य उत्थाप्य, निर्भरं पूर्णानन्दं यथा तथा, परिरभ्य गाढमालिङ्ग्य, सुधासवं सुधावत् स्वादु आसववत् मादकं च, स्नेहस्नुतस्तन्यपयः प्रीत्यतिशयप्रसूतपयोधरभवं दुग्धं, अपाययन् ।। २७ ॥ तत इति ॥ हे नृप, माधवः कृष्णः, एवं यामयमेन तत्तत्कालनियमेन, सायं सायंसमये, गतः गृहं प्राप्तः। ततः, स्वाचरितैः शोभनैः स्वचेष्टितैः, प्रहर्षयन् स्वमात्रादीनानन्दयन्, स कृष्णः, मात्रादिभिः उन्मर्दनं च मज्जो मज्जनं च लेपनं च अलंकारश्च रक्षा च तिलकं च अञ्जनं च तान्यादयो येषां तैः, संकारितः बभूव। तत्रोन्मर्दनं स्क तैलेनामर्द्दनं, मज्ज उष्णोदकेन संस्नापनं, लेपनं चन्दनादिनाङ्गरागः, अलंकार आभूषणधारणं, रक्षा बीजन्यासकवचधारणादिना रक्षाविधानं, तिलकं ललाटादावूर्ध्वपुण्ड्रधारणं, अञ्जनं कज्जलेन नयनयोर्मृक्षणं, संलालित इति पाठेऽपि एक एवार्थः ॥ २८ ॥ अथ गवां मोहनप्रकारमाह ॥ गाव इति ।। गावो धेनवः, ततः स्वचरणवनात्, गोष्ठं उपेत्य, सत्वरं हुंकारघोषैः हुंकारात्मकनिजजातिशब्दैः परिहूताश्च ते संगताश्च तान्, स्वकान्, स्वकान्, वत्सतरान्, मुहुः लिहन्त्यः सत्यः, स्रवदौधसं प्रस्रवदापीनोद्भवं, पयो दुग्धं अपाययन् ।। २९ ।। एतावत्त वैषम्यं श्रीकृष्णस्यापि दुर्निवार्यमासीदित्याह ॥ गोगोपीनामिति ॥ गोगोपीनां गवां गोपीनां चेत्यर्थः।

अस्मिन् वत्सवत्सपात्मकतामापन्ने श्रीकृष्णे, स्नेहर्द्धिकां स्नेहसमृद्धिं, स्नेहाधिक्यमिति यावत्। विना तामृते इत्यर्थः मातृता उपलालनादिरूपो मातृभावः, सर्वा, पुरोवत् पूर्ववदेव, आसीत् । तासां स्नेहाधिक्यं तु सर्वथेदानीमेव विशेषत आसीदित्यर्थः । तथा, आसु गोगोपीषु अपि, हरेः तोकता बालभावः, पूर्ववदेव, आसीत् । किं तु । मायया विना, ममेयं माताऽहमस्याः पुत्र इति मोहं विनेत्यर्थः । अयं भावः । स्वयं भगवति सर्वपुत्रभावं प्राप्ते सति गोपीनां स्वसुतोपलालनादिरूपो मातृभावः पूर्ववदेवासीत्परं तु तासां स्वसुतेषु स्नेहाधिक्यं त्विदानीमपूर्वमेव संजातं, हरेरपि तासु बालभावप्रदर्शनमपि पूर्ववदेवासीत्तथापि पूर्वसुतानां बालभावो मायाकृतमोहयुतो हरेस्तु मायाकृतमोहभाववर्जित एवेति महान्विशेष इति ॥ ३० ॥ स्नेहर्द्धिकतामेव दर्शयति ॥ व्रजौकसामिति व्रजौकसां व्रजवासिनां, स्वतोकेषु भगवद्रूपस्वबालकेषु अपि, स्नेहवल्ली स्नेहसंततिः, आब्दं संवत्सरपर्यन्तं, अन्वहं प्रतिदिनं कृष्णे नन्दनन्दने, यथा तथा, अपूर्ववत् शनैः निःसीम यया तथा, ववृधे। अयं भावः। पूर्वं तु व्रजवासिजनानां यशोदानन्दने श्रीकृष्णे एवानिशं निरवधिकातिशयं प्रेमावर्त्तत, सांप्रतं तु स एव स्वतोकताभाक् जातस्ततः स एवायमिति ज्ञानाभावेऽपि वस्तुस्वभावादेव स्वापत्यतापन्ने तत्र तदवर्द्धतेति ॥ ३१ ॥ इत्थमिति ॥ इत्थं आत्मा परमात्मा, सः श्रीकृष्णः, वत्सपः भूत्वा वत्सपालमिषेण, आत्मनैव, आत्मानं पालयन् सन्, वनगोष्ठयोः, वर्षं संवत्सरपर्यन्तं, चिक्रीडे विहृतवान् ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वर्षमिति ः १०.१३.२७

यावत्क्रीडासुखं ग्राह्यं मया गोकुलवासिना। इति सङ्कल्पसिद्धार्थश्चिक्रीडाब्दमसौ मुदा ॥ ६९ ॥

स राम इति ः १०.१३.२८.

विना योगं न तादृक् स्याद् ब्रह्माज्ञाननिराकृति। संयोगः शिशुवत्सानामपीत्यासीत् स रामयुक् ॥ ७० ॥

तत इति ः १०.१३.२९.

यत्रेशमय्यो गोजातवृत्तयस्तत्र तद्गवाम्। आसक्तिरर्थतः सिद्धेत्यासीद् गोद्वारतः स्फुटम् ॥ ७१ ॥

गोपा इति ः १०.१३.३२.

निःसीमप्रेमभूरात्मा तत्प्रीत्या त्वपरं प्रियम्। दुर्गमुलङ्घ्य यास्यद्भिर्गोगोपैरिति दर्शितम् ॥ ७२ ॥

कृष्णप्रिया

गौओं और गोपियों का मातृभाव तो पहले जैसा ही था लेकिन पुत्रस्वरूप लेकर भगवान् के पधारने पर स्नेह की समृद्धि बढ़ गयी थी जब भगवान् उनके पहले संतानों के समान पुत्र भाव दिखलाते थे लेकिन उसमें माया न थी ॥ २५ ॥ अब तो सब व्रजवासियों का श्रीयशोदोत्संग लालित श्रीकृष्ण में अधिक बढ़ा-चढ़ा अनुराग-प्रेम था वैसे ही इस समय भी अपने पुत्रों में पूर्व वात्सल्य से कोई विलक्षण निःसीम स्नेह हो गया और उन लोगों की स्नेहवल्ली उत्तरोत्तर प्रतिक्षण धीरे-धीरे एक वर्ष पर्यन्त बढ़ती ही रही ॥ २६ ॥ राजन् ! इस प्रकार सर्वात्मा श्रीकृष्ण वत्स और पालक बालकों के बहाने स्वयं वत्सपाल बनकर अपने बालक रूप से एक वर्ष पर्यन्त वत्सरूप का पालन करते हुए वन से बाखल और बाखल से बन तक खेलते रहे ॥ २७ ॥ वर्ष पूर्ण होने में अब पाँच-छ रात ही शेष रही तब एक दिन श्रीबलभद्रजी के साथ भगवान् श्रीकृष्ण बछड़ों को चराते हुए वन में पधारें ॥ २८ ॥ उस समय श्री गोवर्धन गिरि के चोटी प्रदेश में घास चरती हुई गौओं की दृष्टि, अत्यंत दूर व्रज के समीप हरे-हरे घास चरते हुए बछड़ों पर जा पड़ी ॥ २८ ॥ बछड़ों को देखते ही गौओं का वात्सल्य स्नेह उमड़ आया, गौओं अपना स्वरूप भान विसर गई, ग्वालों के भरसक रोकने के उपाय करने पर भी उनके घेरे से निकल भागी और कण्टकादि से जहाँ जाना कठिन था ऐसे क्लिष्ट मार्ग से हुंकार करती हुई इतने जोर से दौड़ी कि देखने पर दो पैर वाली सी प्रतीत हो रही थी। ककुद की ओर उनकी गरदने घुम गई थी, पूँछ और मुँह उपर कर डकार मारती हुई गौएं बछड़ों के पास चली आई, उस समय उनके थन से दूध चू रहा था ॥ ३० ॥ श्री गोवर्धन जी के नीचे चर रहे बछड़ों के समीप जाकर गौंए बड़े बछडों को दूध पिलाने लगी यद्यपि छोटे बछड़े भी वहाँ खड़े थे उनका वात्सल्य उनमें ही उमड़ आया था, वे उनके अङ्ग प्रत्यङ्गों को ऐसे प्यार से चाट रही थी यों मानों कि मारे पेट में रख लेती थी ॥ ३१ ॥ गोप लोग उन्हे रोकने में विफलता पाने पर किंकर्तव्य मूढ बन गये उन्हें लज्जा और भारी क्रोध आया। वे कंटकादि से क्लिष्ट मार्ग को पार कर वहाँ जा पहुँचे तो अपने बालकों को गौओं और बछड़ों के साथ देखा ॥ ३२ ॥

[1]तद्वीक्षणोत्प्रेमरसाप्लुताशया जातानुरागा गतमन्यवोऽर्भकान् ।
उदुह्य दोर्भिः परिरभ्य [2]मूर्ध्नि घ्राणैरवापुः परमां मुदं ते ॥ ३३ ॥
[3]ततः प्रवयसो गोपास्तोकाश्लेषसुनिर्वृताः । कृच्छ्राच्छनैरपगतास्तदनुस्मृत्युदश्रवः ॥ ३४ ॥
व्रजस्य रामः [4]प्रेमर्द्धेर्वीक्ष्यौत्कण्ठ्यमनुक्षणम् । [5]मुक्तस्तनेष्वपत्येष्वप्यहेतुविदचिन्तयत् ॥ ३५ ॥
किमेतदद्भुतमिव वासुदेवेऽखिलात्मनि । व्रजस्य सात्मनस्तोकेष्वपूर्वं प्रेम वर्धते ॥ ३६ ॥
केयं वा कुत आयाता दैवी वा नार्युतासुरी । प्रायो [6]मायास्तु मे भर्तुर्[7]नान्या मेऽपि विमोहिनी ॥ ३७ ॥
इति सञ्चिन्त्य दाशार्हो वत्सान् सवयसानपि । सर्वानचष्ट वैकुण्ठं चक्षुषा वयुनेन सः ॥ ३८ ॥
नैते सुरेशा[8] ऋषयो न [9]वैते त्वमेव भासीश भिदाश्रयेऽपि ।
सर्वं पृथक्त्वं निगमात् कथं वदेत्युक्तेन वृत्तं प्रभुणा बलोऽवैत् ॥ ३९ ॥
[10]तावदेत्यात्मभूरात्ममानेन त्रुट्यनेहसा । [11]पुरोवदब्दं क्रीडन्तं ददृशे [12]सकलं हरिम् ॥ ४० ॥

कर्दमक्षमा

अन्वयः—तद्वीक्षणोत्प्रेमरसाप्लुताशयाः जातानुरागाः गतमन्यवः ते अर्भकान् दोर्भिः उदुह्य परिरभ्य मूर्ध्नि घ्राणैः परमां मुदं अवापुः ॥ ३३ ॥ तोकाश्लेषसुनिर्वृताः प्रवयसः गोपाः तदनुस्मृत्युदश्रवः शनैः कृच्छ्रात् अपगताः ॥ ३४ ॥ रामः मुक्तस्तनेषु अपि अपत्येषु व्रजस्य प्रेमर्द्धेः अनुक्षणं औत्कौण्ठ्यं वीक्ष्य अहेतुविद् अचिन्तयत् ॥ ३५ ॥ अखिलात्मनि वासुदेवे सात्मनः स्तोकेषु व्रजस्य अपूर्वं प्रेम वर्धते एतत् अद्भुतं किम् इव ॥ ३६ ॥ मे अपि विमोहिनी दैवी ? वा नारी वा उत आसुरी इयं माया का कुतः आयाता ? प्रायः मे भर्तुः अस्तु अन्या न ॥ ३७ ॥ इति सञ्चिन्त्य सः दाशार्हः वयुनेन चक्षुषा स वयसान् वत्सान् सर्वान् अपि वैकुण्ठं अचष्ट ॥ ३८ ॥ ईश ? न एते ऋषयः वा एते सुरेशाः न भिदाश्रये अपि त्वम् एव भासि पृथक् सर्वं त्वं कथं निगमात् वद ? इति उक्तेन प्रभुणा बलः अवैत् ॥ ३९ ॥ आत्मभूः आत्ममानेन त्रुट्यनेहसा तावत् एत्य पुरोवत् अब्दं क्रीडन्तं सकलं हरिं ददृशे ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततश्च तेषामीक्षणेनोद्गतो यः प्रेमरसस्तस्मिन्नाप्लुता निमग्ना आशया येषां ते । लज्जामन्युकृच्छ्रैस्तानपि ताडयितुमागताः संतोऽपि गतमन्यवः प्रत्युत जातोऽनुरागो येषां ते मूर्धनि घ्राणैरवघ्राणैः परमां मुदमवापुः ॥ ३३ ॥ कृच्छ्रात्ततोऽपगता निवृत्ताः । तेषां सुतानामनुस्मृत्योद्गच्छंत्यश्रूणि येषां ते ॥ ३४ ॥ प्रेमर्द्धेरौत्कण्ठ्यमतिशयम् । मुक्तस्तनेष्वपत्येषु वीक्ष्य हेतुमजानन्नचिंतयत् ॥ ३५ ॥ चिंतामेवाह किमेतदिति द्वाभ्याम् । वासुदेवे यथा पुरा प्रेम तथा स्वतोकेष्वपि व्रजस्यापूर्वं प्रेम वर्द्धते किमेतदद्भुतमिति । किं च सात्मनो मत्सहितस्य व्रजस्य ममाप्येतेषु प्रेमातिशयस्तत्र कारणं किमिति भावः ॥ ३६ ॥ केयं माया देवानां वा नराणां वा असुराणां वा कुतो वा कस्मात्प्रयुक्ता । तत्रान्यमाया न संभवति यतो ममापि मोहो वर्ततेऽतः प्रायशो मत्स्वामिनः श्रीकृष्णस्यैव मायेयमस्त्विति संभावयति ॥ ३७ ॥ सवयसान्सखीनपि वयुनेन ज्ञानमयेन चक्षुषा वैकुंठं श्रीकृष्णमेवापश्यत् ॥ ३८ ॥ एवं कृष्णरूपान्सामान्यतो ज्ञात्वा कृष्णं पृष्ट्वा कृष्णोपदेशेन विशेषतो ज्ञातवानित्याह । नैत इति । अयमर्थः । पाल्यमानास्तावद्वत्सा ऋषीणामंशाः पालाश्च देवानामंशा इति तावदहं वेद्मि । इदानीं तु न तथा किं त्वस्मिन् भिदाश्रयेऽपि त्वमेवाद्वितीयो भासि अतस्त्वं सर्वं कथं वृत्तं तत् पृथक् वद विविच्य ब्रूहीत्युक्तेन प्रभुणा वक्रान्निगमात्संक्षेपत एवोक्तं वृत्तं बलोऽवैद्विदितवानित्यर्थः ॥३९॥ ततः किं वृत्तमित्यपेक्षायामाह । तावदिति । वर्षे जातेऽपि आत्मनो मानेन त्रुट्यनेहसा त्रुटिमात्रेण कालेन । सकलं कलाभिः सहितं सानुचरं हरिं ददर्श ॥ ४० ॥

---

१. दीक्ष–श्रीधर. वंशी. वीर. विज. जीव. विश्व. । २. मूर्धनि–श्रीधर. वंशी. वीर. विज. । ३. ततस्सपशवो–वीर. । ४. प्रेमद्धि–वीर. । ५. मुक्तस्तन्येष्वप–वीर. । ६. र्मायातु–वीर. । ७. ना–श्रीधर. वंशी. वीर. विज. शुक. । ८. मदंशा–च. पु. टी. । ९. चैते–श्रीधर वंशी. वीर. विज. शुक. ।

१०. **ब्रह्मापि स्वासनस्थेन चतुरास्येन शौरिणा । मोहितैर्द्वारपालैश्च परिभूतो न्यवर्तत ॥**

अयं श्लोकोधिकः वीर. ।

ब्रह्मापि यातः स्वस्थानं तत्र स्थेन हि शौरिणा । मोहितैर्द्वारपालैश्च परिभूतो न्यवर्तत ॥

वंशी. पाठे अयं श्लोकोधिकः ।

११. वदाब्दं–वीर. । १२. सबलं–वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः सुतदर्शनानंतरम् । गतमन्यवो विगतक्रोधाः ।। ३३ ।। ततस्तेभ्यः प्रवयसो वृद्धाः ।। ३४ ।। अनुक्षणं प्रतिक्षणम् । अतिशयमाधिक्यम् ।। ३५ ।। अत्यद्भुतमाह-किञ्चेति । इति भाव इति । शुद्धसत्त्वस्वरूपे मयि मोहः कथं जात इत्यहं न जाने इति तात्पर्यम् ।। ३६ ।। संभावयति—कल्पयति । यद्यपि श्रीबलदेवस्य कारणार्णवशायित्वेन परमांशित्वेन तात्कालिकज्येष्ठत्वेन वञ्चनानौचित्यं तथापि यावदब्दं श्रीदामादिप्रियसुखविच्छेददुःखदानमनुचितं मत्वा पञ्चषरात्रशेषे एव तत्तस्मै प्राबोधयत् । तदैव मायापि शनैरंशांशेनोपरराम । प्रथमांशोपरमे किमेतदित्यचिंतयत्सः द्वितीयांशोपरमे मायेयं पुनराह—दैवीति । देवा ब्रह्माद्या ऐश्वर्यपरीक्षणार्थं किं वत्सपाला भूत्वाऽस्माकं चित्तं स्वेषु स्नेहयंति नैते श्रीदामाद्याः नरा ऋष्यादयः किमस्मज्ज्ञानपरीक्षणार्थं वत्साद्या अभूवन् । किं वा सुराः कंसाद्या एव बलेनापारयंतः छलेनास्माकं हिंसनार्थमेतेऽभूवन् । ततस्तृतीयमायांशोपरमे सति प्राय इत्याद्याह । श्रीकृष्णस्यैवेयं योगमायास्त्विति चतुर्थांशस्याप्युपरमे सति कृष्णरूपानेव तानपश्यदित्याह । वयुनेन समाहितज्ञानेनेति विश्वनाथः । यद्वा—प्रायो दैवी नार्यासुरी वान्या वा मायास्तु भर्तुः सर्वपालकस्य मे केयं विमोहिनी अपि तु नेति योज्यम् ।। ३७ ।। स रामः ।। ३८ ।। ज्ञात्वापि सिद्धांतं कर्तुं श्रीकृष्णं प्रत्याह—नैते इति । अयमर्थ इति । अस्यायं भाव इत्यर्थः । "वत्साः सर्वे गोकुलेऽत्र ऋषे ऋषय एव हि । गोपाः सर्वे देवरूपा जाता ब्रह्माज्ञया ध्रुवम् ॥" इत्यादिपुराणात् । तावत्सकलम् 'यावत्तावच्च साकल्ये' इत्युक्तेः । इह त्वन्यथैव भातीत्याह-किंत्विति । भिदाश्रये गोपवत्सदेहे । यतस्त्वमेव भासि अतो हेतोः । कथं वृत्तमेतत्कथं जातमिति इत्युक्ते बलदेवेनेत्थमुक्तेन । प्रभुणा कृष्णेन । इत्यर्थ इति । वेत्तेर्बह्वर्थत्वादत्र ज्ञानार्थता ज्ञेयेति भावः । यद्वा—निगमाद्वेदात् । "सर्वं खल्विदं ब्रह्म" इत्येवंरूपात् विविच्य विचार्य सर्वं दृश्यादृश्यं पृथक् कथमिति त्वं वदेत्युक्तेनेत्थमुक्तवता सता प्रभुणा बलो वृत्तं तात्कालिकं ब्रह्मणे निजवैभवदर्शनरूपमवेदिति । ततश्च कृष्णस्यैवं वत्सबालकीभावे किं कारणं प्रयोजनञ्च ते वत्सपाला वा क्व गता इति बहुतरसमाधिनापि यत्स्वयं ज्ञातुं नेष्टे तत्र माया न कारणं किं तु स्वयं भगवतः कृष्णस्य खल्वैश्वर्यमसाधारणमित्थंस्वरूपमेव सर्वत्र सर्वज्ञा अपि नारायणादयः परमेश्वराः स्वांशा अपि यद्विषयकमल्पज्ञत्वमेव बिभ्रति न तु सर्वज्ञत्वं स्वत इत्यत्र प्रमाणं द्वारकावासिब्राह्मणबालहर्त्ता भूमा महापुरुषोऽप्यग्रे आख्यास्यते तस्माच्छ्रीबलदेवः कृष्णं दृष्ट्वैव सर्वं तत्त्वमवगतवानित्याह—नैत इति । सुरेशा ब्रह्माद्या एव मायया वत्सबालाकारा एते न संभवंति नापि ऋषयः चात्राप्यसुराः किन्तु भिदाश्रयेऽपि विविधभेदास्पदेपि वत्सबालादिसमूहत्वमेवैका भास्ति एकस्यापि तव पृथक्त्वं वत्सपालादिरूपत्वं कथं तन्निगमात्संक्षेपतो वदेत्युक्तेन पृष्टेन प्रभुणा श्रीकृष्णेन हेतुना बलोऽवैद्ब्रह्ममोहनादिवृत्तं ज्ञातवान् ॥ ३९ ॥ पुनरुत्सुकः पृच्छति—तत इति । ततो बलबोधनानंतरम् । वर्षे संवत्सरे । आत्मनो ब्रह्मणः । मानेन प्रमाणेन । त्रुट्नेहसा "त्रसरेणुत्रयं भुंक्ते यः कालः स त्रुटिः स्मृतः" इत्युक्तलक्षणकालेन । आत्मभूर्ब्रह्मा । पुरोवत्पूर्ववत् । अब्दं यावद्वर्षम् । सानुचरं गोपगोवत्ससहितं हरिं श्रीकृष्णमेव । अत्रापि बलदेवो मात्रा जन्मर्क्षशांत्यर्थं रक्षित इति पूर्ववज्ज्ञेयम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यद्यपि आयासादयः प्रेमरसोदयान्तराया उक्ताः तथा गवां वत्सैः सहितानिति वत्ससङ्गे स्थितैरपि स्वस्वसुतैः परमवत्सलानां तासां दृष्टिपथे वत्सानामानयनादनपसारणाच्च तेषामपराधः सूचितः । तथाऽपि तेषां सुतानामीक्षणेन य उत्कृष्टः प्रेमरसस्तस्मिन् आप्लुताशया उद्गृह्य उच्चैरङ्के गृहीत्वा उद्गूह्येति पाठे दीर्घत्वमार्षम् । अर्थः स एव प्रेमरसानुरागयोः सुखातिशयतृष्णातिशयाभ्यां विशेषणाभ्यां भेदः कल्प्यः । यदि च गवामिव तेषामपि दूरतोऽपि स्वसुतदर्शनसम्भवात् कथञ्चिद्दर्शनाभावे ऽपि वत्ससङ्गिनां स्वसुतानां स्फुरणात् तेषु क्रोधोत्पत्तिर्न सम्भवतीति शङ्क्यते, तत्तदास्वानतिक्रामन्तीर्गाः प्रत्येव तेषां मन्युर्मन्तव्यः स्वसुतानामतिसन्निहिततया सुष्ठु माधुर्यानुभवेषु तच्छान्तिपूर्वकप्रेमोदयश्चेति ॥३३॥ प्रवयसो वृद्धाः इति तेषां प्रायो विवेकित्वादिना तादृगल्पवियोगेन मोहो न सम्भवति तथापीत्यर्थः । एवं पूर्वं वृद्धा एव गोपाला आसन्निति बोधयति तच्च गोपजातेस्तत्स्वधर्मत्वात् श्रीव्रजेशस्य च बालपुत्रत्वेन स्वप्रतिनिधेरभावेन स्वयमेव गाः पालयतः सङ्गौचित्यात् अनुस्मृतिः निरन्तरस्मरणम् ॥ ३४ ॥ प्रेमर्द्धेर्हेतोरौत्कण्ठ्यमुत्कण्ठेत्युपचारात् तत्रातिशय एव पर्यवस्यति टीकायामौत्कठ्यमिति क्वचित्पाठः ।। ३५ ॥ अद्भुतं युक्त्यतीतम् अखिलस्य आत्मनि परमात्मनि अतो वासुदेवे सर्वाश्रये किं वा तत्रापि श्रीवसुदेवापत्ये पूर्णभगवत्तया प्रकट इत्यर्थः । एवं सर्वथा तस्मिन्नेव तदुचिततादृशप्रेमवृद्धेर्योग्यतोक्ता तथापि तस्मिन्निव व्रजस्य गोगोपात्मकस्य तोकेषु स्वापत्येषु ॥ ३६ ॥ अथात्र कापि कस्यापि मायैव हेतुर्भवेदिति तर्कयति—केयमिति । इयं तेषु प्रेमवर्द्धिनी माया दुर्घटघटनी शक्तिः का किंलक्षणा वाशब्दः समुच्चये कुत आयाता कस्मात् समुद्भूता केन च कृतेत्यर्थः । कुत इत्येव विचारयति वाशब्दो वितर्के तत्तत्पित्राद्युपासितैर्देवैः कैरपि महाप्रभावैः कृता किं ? तेभ्यो ऽपि मुनीनां प्रभावं पर्यालोच्य तथैव पक्षान्तरं कल्पयति—नारीति । अत्रापि वा शब्दो योज्यः । नन्वेवं श्रीकृष्णवन्निजपुत्रादिषु व्रजजनानां प्रेमवर्द्धनस्पर्द्धा च न सम्भवति इत्याशङ्क्य पुनर्विकल्पयति । उत पक्षान्तरे आसुरी स्वस्वापत्येष्वपि श्रीकृष्णसदृशस्नेहविवर्द्धनेन व्रजस्य श्रीकृष्णविषयकभावविशेषहान्या तन्माहात्म्यसङ्कोचाद्यर्थं कंसादिभिः कृता

किं ? पूतनादीनां तन्मोहनता दर्शनात्। यद्वा, मायेयं देवानां मुनीनां च तल्लीलालोभेन प्राचीनानन्तर्धाप्य स्वयमाविर्भावमयी सा तु तेषां साधूनां न सम्भवतीति तर्कान्तरे असुराणां तु पूतनावत्सासुरादिवद्दुष्टभावमयीति ज्ञेयम्। तया तु श्रीकृष्ण इव तेषु मम स्नेहवृद्धिर्न सम्भवतीत्याह–प्राय इति। तस्य स्वविषयकवञ्चनासम्भावनाया हेत्वनालोचनया तादृशप्रेम्णस्तत्स्वरूपैकानुवध्यतालोचनया च प्राय इत्युक्तम्। अस्तु स्यात् अनिर्द्धारणे सम्भावना। यद्वा, अस्तु अवत्विति प्रार्थना अन्यथा मायया मन्मोहनेन मल्लज्जाद्युत्पत्तेः विमोहिनी निरनुसन्धानप्रेमवर्द्धिनी विशब्दो दीर्घकालत्वाद्यपेक्षया इति लक्षणमप्यस्याः दर्शितम् ॥ ३७॥ सवयसानिति समासान्त आर्षः। वैकुण्ठं स्वार्थेऽण् सर्वथा कुण्ठता रहितमिति तद्रूपत्वे लिङ्गं वयुनेनानुसन्धानात्मकज्ञानमयेन तस्य वयुनस्य प्रेमविशेषमयत्वेन सामर्थ्यविशेषं द्योतयति, दाशार्हः श्रीयदुकुलोद्भवः भ्रातृत्वं गत इत्यर्थः ॥ ३८॥ सुरेशा देवश्रेष्ठाः श्रीगरुडादयः ऋषयः श्रीनारदाद्याः भिदाश्रयेऽपि बालवत्सादिसमूहोऽयं यद्यपि विविधभेदस्याश्रयस्तथापि तस्मिन्नित्यर्थः। त्वमेवमासीति स्वरूपानन्दादिनैक्यानुभवात् अन्यत्तैः। यद्वा, दैवी वा नार्य्युतासुरीतिवद्वितर्क्यं परिहरति–नैत इति। एते वत्सादयो न सुरेशा न च ऋषयः ते तत्तत्क्रीडालोभेन तानन्तर्धाप्य वत्सादिरूपाः सन्तीति नेत्यर्थः। तेषामीदृशप्रेमास्पदत्वाभावात् "इत्थं सतां ब्रह्मसुखानुभूत्या" इत्यादिरीत्या तादृक् कृतपुण्यपुञ्जत्वाभावाच्च आसुरीत्यस्योत्तरपक्षे तदुल्लेखस्तु सङ्कोचान्न कृतः अत एकोऽपित्वं पृथग्विविधभेदेन वर्त्तमानं सर्वमिदं वत्सादिरूपं कुतोऽभूरिति निगमाद्वद इति स्नेहेन वाक्श्रमोनिरस्तः प्रभुणा मादृशान्तस्यैव चेश्वरेण हेतुना वृत्तं तदज्ञासीत् यतो बलः सर्वसामर्थ्याधिक्यवान् बलाधिक्याद्बलं विदुरित्युक्तेः। एवं श्रीकृष्णस्यानुग्रहेणैव तद्विज्ञानम् बोधितं अन्यत्समानम् एतावन्तं कालं तस्य तत्तत्वाज्ञानं तल्लीलानिर्वाहाय श्रीभगवदिच्छयैव, सा च दयालुसरलस्वभावस्य मदग्रजस्य तेषां तादृशावस्थासहनं न स्यादित्या शङ्क्यैव ॥ ३९॥ अथ ब्रह्मापि तत्तत्त्वं श्रीभगवत्कृपयैव ज्ञातवान् इति तत्प्रसङ्ग आरभ्यते–तावदित्यादिना। तावदिति गतेऽपि वर्षे इत्यर्थः। अतिशीघ्रागमनं महाभयादितिज्ञेयम् यत आत्मनो हरेरेव भवतीति तथा सः आब्दमेकाब्दपर्यन्तं सकलमिति कलाः बाला वत्साश्च न तु श्रीबलदेवः तद्दिनक्रीडानिर्वाहाय रहस्यं कथयित्वा वनेतदनयनात् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

यद्यप्यायासाद्यः प्रमरसोदयान्तराया उक्तास्तथा गवां वत्सैः सहितानिति वत्ससंगे स्थितैरपि स्व स्व पुत्रैः परमवत्सालानां तासां दृष्टिपथे वत्सानामानयनादनपसारणाच्च तेषामपराधः सूचितः, तथापि तेषां सुतानामीक्षणेन य उत् उच्च उत्कृष्टो वा प्रेमरसस्तस्मिन्नप्लुताशया उद्गृह्योच्चैरंके गृहीत्वा; उदुह्येति–पाठे दीर्घमार्षम्, अर्थः स एव। प्रेमरसानुरागयोः सहजत्वसोपधित्वादिना ह्लासरहितत्व·रञ्जनत्वादिना वा भेदः कल्प्यः, यद्वा, पूर्वमेव जातानुरागा अधुना च तदीक्षणेनेति, यद्वा, उद्ग्रहणादिना जातोऽनुराग आसक्तिर्येषां तथाभूताः सन्तो मुदं प्राप्ताः, परमामिति मुदः पराकाष्ठोक्ता ॥ ३३॥ प्रवयसो वृद्धा इति तेषां प्रायो विवेकित्वादिना स्नेहरसहानिः सूचिता, तथापीति पूर्वं वृद्धा अपि कदाचिद्गोपाला आसन्निति बोधयति, अत एवोक्तं प्रवयस इति वयोबाहुल्येन वृद्धा न तु जराद्यभिभूता इत्यर्थः, यद्वा, प्रकृष्टं वयो येषां नित्यनवयुवान इत्यर्थः। अनुस्मृतिर्निरन्तरस्मरणम् ॥ ३४॥ प्रेमर्द्धेर्हेतोरनुक्षणमौत्कण्ठ्यमासक्तिम्, औत्कट्यमिति वा पाठः, प्रेमर्द्धे राधिक्यम् ॥ ३५ ॥ अद्भुतं युक्त्यतीतमखिलस्य जगत आत्मनि परमात्मनि यतो वासुदेवे चित्ताधिष्ठातरि चतुर्व्यूहश्रेष्ठे, यद्वा, खिलो न्यून आत्मापि प्रियतया यस्मात्तोऽप्यधिकतरः प्रिय इत्यर्थः। किञ्च, वासुदेवे निजाशेषैश्वर्य्यप्रकटनार्थं श्रीवसुदेवपुत्रतां प्राप्ते, एवं सर्वथा तस्मिन्नेव प्रेमवृद्धेर्योग्यतोक्ता, तथापि तस्मिन्निव तोकेषु बालकेषु। यद्यपि गवां तादृश एव स्नेहो वत्सेषूक्तः, तथापि तोकेष्वितिमनुष्याणामेव विचित्रप्रेमवैभवलक्षणानां साक्षादनुभवात्, यद्वा, तोकशब्देनापत्यशब्देन च वत्सा अप्युक्ताः, अत एवोक्तं व्रजस्य व्रजवासिनां सर्वेषामेवेत्यर्थः ॥ ३९ ॥ देवी देवैर्जगत्पूज्यैः श्रीगरुडादिभिर्बालकानां तत्तदवतारत्वेन तेषु स्नेहविशेषापेक्षया कृता श्रीकृष्णैकपराणां तेषां सा न सम्भवतीति पक्षान्तरं कल्पयति –नारीति, श्रीवसुदेवादिभिः श्रीनन्दादिभिर्वा कृता, अन्यथा सर्वेषां बालानां श्रीकृष्णविषयकेर्ष्योत्पत्तिः, बालानां स्वाभाविक-श्रीकृष्णविषयक-स्नेहभरमालोच्येर्ष्यासम्भवात्। पक्षान्तरं कल्पयति–उत वा, आसुरी वा, स्व-स्वापत्येष्वपि श्रीकृष्णसदृशस्नेहविवर्द्धनेन व्रजस्य श्रीकृष्णविषयकभावविशेषहान्या तन्माहात्म्यसंकोचाद्यर्थं कंसादिभिः कृतेति तया तु श्रीकृष्ण इव तेषु मम स्नेहवृद्धिर्न सम्भवतीत्याह –प्राय इति, तस्य स्व-विषयकवञ्चनासम्भावनाया हेत्वनालोचनया वा। अस्तु स्यादनिर्द्धारेण सम्भावना, यद्वा, अस्तु भवत्वन्यथा मायया मन्मोहनेन मल्लज्जाद्युत्पत्तिः। विशब्देन दीर्घकालत्वाद्यपेक्षया ॥ ३७ ॥ वैंकुण्ठं सर्वथा कुण्ठता रहितमिति तत्तद्रूपसम्यक्ताभिप्रेता। वयुनेन चक्षषान्तर्दृष्ट्येत्यर्थः। तथाप्यसम्भवमाशंक्य परिहरति। दाशार्हः श्रीयदुकुलोद्भवो भ्रातृत्वं गत इत्यर्थः ॥ ३८ ॥ सुरेशा देवश्रेष्ठाः श्रीगरुडादयः, ऋषयः श्रीवशिष्ठाद्याः। विचित्रश्रीमत्स्यादि रूपेऽवतारत्वेनाभेदविषये त्वं भास्येवभिदाश्रये वत्सबालकादिरूपविविधभेदस्याश्रयेऽपि वस्तुनीत्यपि शब्दार्थः। एवकारेण तदेकरूपतया सुरेशत्वादिकं निरस्तम्। अन्यत्तैर्व्याख्यातम्, यद्वा, एते वत्सादयो न सुरेशास्तत्तत्क्रीडालोभेन श्रीब्रह्मादयो वत्सादिरूपाः सन्तीति नेत्यर्थः। स्वत एव तेषां तत्रासामर्थ्येन पक्षान्तरमाह– न वै एते ऋषय इति श्रीनारदाद्याः, किन्तु त्वमेव वत्सादिरूपेण भासि, अत एकोऽपि त्वं पृथग् विविधभेदेन वर्त्तमानं सर्वमिदं वत्सादिरूपं कुतोऽभूरिति निगमाद्वदेति

स्नेहेन वाक्श्रमो निरस्तः । यद्वा, निगमात् पृथक् वेदातीतमित्यर्थः । सर्वेषामपि सच्चिदानन्दघनरूपत्वात्तत्र च विविधभेदेऽप्यभेदात् प्रभुणा मादृशाम्, तस्यैव वेश्वरेण हेतुना वृत्तं तदज्ञासीत्, यतो बलः सर्वसामर्थ्याधिक्यवान् (भा० १०।८।१२)–'बलाधिक्याद्बलं विदुः' इत्युक्तेः । एवं श्रीकृष्णानुग्रहेणैव तद्विज्ञानं बोधितम् । अन्यत् समानम् । एतावन्तं कालं तस्य तत्त्वज्ञानं तल्लीलानिर्वाहाय श्रीभगवदिच्छयैव, अन्यथा दयालुसरलस्वभावस्य तस्य प्रियतमानां तादृशावस्थासहनाशक्तिः, किं वा सहजभक्त्या नवीनेषु तेषु श्रीकृष्ण इव व्यवहारेण सर्वेषां तत्तत्त्ववितर्क्यत्वापत्तिरिति दिक् ॥ ३९ ॥ अथ श्रीब्रह्मापि तत्तत्त्वं श्रीभगवत्कृपयैव ज्ञातवानिति तत्प्रसंगमारभते, तावदित्यादिना । तावदित्यबिलम्बं बोधयति । तदेवाह – क्रट्यनेहसेत्यतिशीघ्रं गमनं महाभयादिति ज्ञेयम्, यत आत्मनो हरेरेव भवतीति तथा स तत्पुत्र इत्यर्थः । पुरोवत् मायया स्वयं वत्सादिहरणात् पूर्ववदाब्दमेकाब्दपर्य्यन्तम् । अब्दमिति वा पाठः । हरिमिति वक्ष्यमाणश्रीब्रह्मचित्तहरणाद्यभिप्रायेण, सकला बाला वत्साश्च, न तु श्रीबलदेवः, तद्दिनेऽपि पूर्ववत् क्रीड़ानिर्वाहाय वने तदनानयनात् ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

परमानन्दस्वरूपरूपस्य दर्शनालिङ्गनादेः परममोदावहत्वमुच्यते, तदीक्षणेति ॥ ३३ ॥ प्रवयसो वृद्धास्तोकानां श्रीकृष्णस्वरूपरूपाणामेवाश्लेषेण सुतरां निर्वृताः अनन्तरं कृच्छ्रात् शनैरुपक्रम्य गता इत्यनेन श्रीभगवत्संयोगवियोगैकसुखदुःखित्वं तेषां गोपानामुक्तम् ॥ ३४ ॥ औत्कण्ठ्यमुत्कर्षम् ॥ ३५ ॥ वासुदेवे परवासुदेवे श्रीमन्नारायणे श्रीकृष्णेऽअखिलात्मान सर्वचिदचिन्नियन्तरि मत्सहितस्य व्रजस्य गोगोपात्मकस्य तोकेष्विति उपलक्षणं वत्सबालकपरिकरपरिच्छदादेः अपूर्वं पूर्वमननुभूतं प्रेम स्नेहो वर्द्धते इति किमेतत् ॥ ३६ ॥ त्रिविधा मायेयमिति वितर्कः तन्निरासायाह—मे भर्तुः मत्स्वामिनः श्रीमन्नारायणस्य स्वस्य शेषत्वात् श्रीरामस्य इदानीं श्रीकृष्णस्यैवेति अन्या मे मोहिनी न स्यात् इति स्वस्य पूर्वतनलक्ष्मणत्वं शेषत्वं वाऽभिप्रैति तस्य च परवासुदेवत्वं चेति भावः ॥३७॥ वैकुण्ठं श्रीमन्तं पूर्णपुरुषोत्तमं वैकुण्ठं वयुनेन ज्ञानेन "माया वयुनं ज्ञानम्" इति निघण्टुपाठात् सवयसान् सखीन् ॥ ३८ ॥ हे ईश ! तव भिदाश्रये चिदचिद्भेदाश्रये स्वरूपेपि निरवयवेऽखण्डे सर्वं बालवत्सपरिच्छदादिरूपात् पृथक्त्वं कथम् इति वदेत्युक्तेन प्रभुणा पूर्वोक्तभावेन श्रीकृष्णेन निगमात् वृत्तमित्युक्तः बलदेवोऽवैत् । अत्रायमभिप्रायः स्वरूपभेदः कथमिति पृष्टः निगमात् वेदप्रमाणकात् मत्सङ्कल्पाज्जात इत्युक्तो बलोऽज्ञासीत् तथा च श्रुतिः "विज्ञानं चाविज्ञानं च सत्यञ्चानृतञ्च सत्यमभवत्" इति तत्र चात्र चेयान् भेदः तत्र चिदचितोः स्वरूपसतोः साङ्कल्पिकः प्रवेशः अत्र तु विभुस्वरूपे स्वस्मिन् स्वसङ्कल्पेनावतारविग्रहवत् सर्वस्वरूपभवनं "अजायमानो बहुधा विजायते" इति श्रुतेः कृष्णरूपाण्यसङ्ख्यानीत्युक्तेश्च ॥ ३९ ॥ त्रुट्यनेहसा त्रुटिकालरूपेणात्मप्रमाणेन एत्य त्रसरेणुत्रिकपरिमिता त्रुटिरित्यर्थः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततश्च तेषामीक्षणेन उद्गतो यः प्रेमरसस्तस्मिन्नाप्लुतो निमग्न आशयो येषां ते लज्जामन्युकृच्छ्रैस्तानपि ताडयितुमागताः सन्तः ततो गतमन्यवः प्रत्युत जातोऽनुरागो येषां ते गोपाः दोर्भिरुद्दूह्य परिरभ्य च मूर्द्ध्नर्धवघ्राणैः परमामदृष्टपूर्वां मुदं प्रापुः ॥ ३३ ॥ एवं पशुभिः गोभिः सहिताः गोपास्तोकानामपत्यानामालिङ्गनेन सुखितास्तेषां तोकानामनुस्मृत्या उद्गच्छन्त्यश्रूणि येषां तथाभूताः सन्तः कृच्छ्रात्कथंचिच्छनैस्ततोऽपगता विश्लिष्य वनं प्रति गता इत्यर्थः ॥ ३४ ॥ रामः व्रजस्य गोपसमूहस्य प्रेमर्द्धेः प्रेमाधिक्यस्य औत्कठ्यमतिशयं मुक्तं स्तन्यं यैस्तेष्वपत्येष्वनुक्षणं दृष्ट्वा तथाविधस्यादृष्टपूर्वस्य स्नेहस्य कारणं चिन्तितवान् ॥ ३५ ॥ चिन्तामेवाह, द्वाभ्याम् किमेतदिति । वासुदेवे यथा पुरा प्रेम तथा व्रजस्य स्तोतोकेष्वप्यपूर्वं प्रेम वर्द्धत इत्येतदद्भुतम् इवशब्दोऽनतिरिक्तार्थकः किं ? किमत्र कारणमित्यर्थः । किञ्च, सात्मन आत्मसहितस्य व्रजस्य मम तेषु प्रेमकारणं किमिति भावः ॥ वासुदेवे तु युक्तमेवेत्यभिप्रायेण तं विशिनष्टि –अखिलात्मनि, आत्मा हि निरतिशयप्रीतिविषयः तत्त्वात्तद्युक्तमिति भावः ॥ ३६ ॥ केयं माया ? दैवी देवप्रयुक्ता अथवा नारी नरप्रयुक्ता । यद्वा, आसुरी मम त्वेवं भातीत्याह—प्रायशो मद्भर्तुः श्रीकृष्णस्यैव तु माया अन्या तु सकलजनविमोहिनी न स्यादिति मायाशब्दोऽत्राश्चर्यशक्तिपरः ॥ ३७ ॥ एवं सञ्चिन्त्य दाशार्हो रामः वयुनेव दिव्यज्ञानमयेन चक्षुषा सर्वान्वत्सान्वत्सपांश्च वैकुण्ठं ददर्श कृष्णमेवापश्यदित्यर्थः ॥ ३८ ॥ एवं श्रीकृष्णरूपेण सामान्यतो ज्ञात्वा कृष्णं दृष्ट्वा तदुपदेशेन विशेषतो ज्ञातवान् इत्याह–नैतदिति वदेत्यन्तं रामस्य प्रश्नप्रकारपरम्, अयमर्थः पाल्यमाना वत्सा ऋषीणामंशा वत्सपाश्च देवानामंशा इति तावदहं वेद्मीदानीं तु न तथा किन्त्वस्मिन्भिदाश्रये वत्सवत्सपादिभेदविषयके ज्ञानेऽपि त्वमेव विषयतयाऽवभासि अतस्त्वं सर्वं पृथग्विविच्य कथं वृत्तमिति वदेत्युक्तेन प्रभुणा श्रीकृष्णेन वक्त्रा निगमात्सङ्क्षेपतः एवोक्तं बलो रामोऽवैत् विदितवान् ॥ ३९ ॥ ततः किं ? वृत्तमित्यपेक्षायामाह—ब्रह्मापीति । वत्सान् वत्सपांश्च तिरोधापयित्वा ब्रह्मापि स्वस्थानं गतः तत्र स्वस्यासने स्थितेन चतुर्मुखरूपेण शौरिणा मोहितैर्द्वारपालैः परिभूतः परमेष्ठी स्वासनमधितिष्ठत्येव कस्त्वमागतोऽसीत्येवं परिभवं प्रापितस्ततो न्यवर्त्तत तावत् वर्षे जाते सतीत्यर्थः । आत्मभूर्ब्रह्मा स्वमानेन त्रुटचनेहसा त्रुटिकालेनागत्य पूर्ववदब्दपर्यन्तं क्रीडन्तं सरामं कृष्णं ददर्श ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदीक्षणेति प्रेमानुरागयोरुल्लासातिशयतृष्णातिशयाभ्यां विशेषणाभ्यां भेदः ॥ ३३ ॥ प्रवयसो विवेकिनोऽपि ॥३४॥ व्रजस्य गोव्रजस्य अपत्येषु वत्सेषु तदुपलक्षणत्वेन गोपानां बालकेष्वपि ज्ञेयम् । एषु मुक्तस्तन्यत्वविशेषणानुपयोगात् प्रेमर्द्धे र्हेतोरौत्कण्ठ्यम् ॥ ३५ ॥ अखिलस्यात्मनि परमात्मनि अतो वासुदेवे सर्वाश्रय इति तत्रै व तादृशप्रे मयोग्यतोक्ता ॥३६॥ केयमिति अस्त्विति सम्भावना प्राय इति तादृशप्रेम्णस्तत्स्वरूपैकानुबन्ध्यत्वात्तन्मायाया अप्यसम्भावना ॥ ३७ ॥ सवयसानिति समासान्त आर्षः दैवीत्यादिवत् स्वयं सम्भाव्य निरस्यति ॥ ३८ ॥ नैत इति इत्थं सतामित्यादिरीत्या तेषां तादृशकृतपुण्यपुञ्जत्वाभावात् भिदाश्रयेऽपि यद्यपि भिदाश्रयेऽयं वत्सादिसमूहस्तथापीत्यर्थः ॥ ३९ ॥ सकलं कलाभिर्वत्सादिभिः सहितम् ॥ ४०–४१ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं तस्य सर्वमयत्वे वत्सपवत्सकानां मात्रादेः स्वस्वतनयं प्रति तत्समाना प्रीतिरेवाभूत् न तु तद्धेतु ज्ञानम्। श्री बलदेवस्य तु चिरेणैवाभूदिति तदुक्तिमाह—"प्रायो मायास्तु ये भर्त्तुः" इत्यादि। मे मम भर्त्तु रीश्वरस्येयं माया। प्रायः शब्दोऽनुमिति परम् । तत्राह मेऽपि ममापि विमोहिनी। अतो नान्या नान्यस्य माया ययाहमेवमेतावन्तं कालं मोहित एवासम्। तस्मान्मद्भर्त्तु रेवेति स्वस्यांशत्वं स्वयमेव प्रकटितम् ॥ ३८–४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गतमन्यव इति अरे अनभिज्ञाः ! अत्र परमवत्सलगवां गणदृष्टिपथे कथं वत्सा आनीताः ? इति तांस्ताडयितुमनसोऽपि तेषां बालानामीक्षणोद्भूतेन प्रेमरसेन आप्लुताशयास्ततश्च जातानुरागाः प्रेम्णामेव पञ्चमीं कक्षामनुरागाभ्यां तृष्णातिशयमयीं प्राप्ताः गतमन्यवः विस्मृतक्रोधाः ॥ ३३ ॥ प्रवयसो वृद्धाः कृच्छ्रादेव शनैरेव गोचारणानुरोधादेव अपगता तस्मादाश्लेषाद्वियुज्य गतास्ततश्च विच्छेदोत्थया तेषामनुस्मृत्या उद्गताश्रवः ॥ ३४ ॥ प्रेमर्द्धे र्हेतोरौत्कण्ठ्यं मुक्तस्तनोष्वपि वत्सेषु नवप्रसूतवत्सतरीणामपि गवाम् अहेतुवित् हेतुमजानन् अचिन्तयदिति एतावत् कालेषु प्रतिदिनमेव गोदोहनादिसमयेषु नवप्रसूतानपि वत्सान् विहाय प्राचीनानेव वत्सान् स्तनं पाययन्तीः सर्वा एव गाः पश्यतोऽपि तस्य तस्मिन्नेव दिने यच्चिन्ता प्रादुरभूत् तस्मिन्नपि दिने यदन्येषां प्रवयसां विवेकिनामपि गोपानां तथा चिन्तनं नाभूत् तत्रकारणं योगमायैव ब्रह्मामोहनादिनमारभ्यैव गोगोपीगोपानां बलदेवसहितानां सर्वेषामेव भगवता स्वयोगमायया मोहितत्वात् प्रतिदिनविरोधदर्शनेऽपि विरोधानुसन्धानं न कस्याप्यभूत् किं तु सर्वजगत्कारणस्य कारणार्णवशायिनोऽपि परमांशित्वेन स्वाग्रजत्वेन स्वप्रियसखत्वेन च वञ्चनानौचित्यादेतल्लीलाजिज्ञापयिषा श्रीबलदेवे समुचितापि पूर्वं नाभूत् वर्षपर्य्यन्तं तत्तच्छ्रीदामादिप्रियसखविच्छेददुःखस्य तस्मै दातुमनौचित्यात् स्वस्य तु तद्दुःखं नास्त्येव वत्सकुलान्वेषकेणैकप्रकाशेन तन्निकट एव स्थितत्वात् अतो वर्षावसान एव भगवतः सा तत्र यदाभूत् तदा मायापि शनैः शनैरंशेनांशेनैव तस्मादुपरराम न तु युगपत्सामस्त्येन भगवदैश्वर्य्यसिद्धौ तमपि भक्ताभिमानास्पदीकृत्य निमज्जयितुमित्यवसीयते ॥३५॥ प्रथमं मायांशोपरमे सति विरोधदर्शनोत्थं तस्य चिन्तनमाह–किमेतदिति । वासुदेव इवेति वासुदेवे यथा पुरा प्रेम तथा स्वतोकेष्वपि व्रजस्य प्रेम वर्द्ध ते किमेतदद्भूतं किं च सात्मनः मत्सहितस्य ममापि तेषु कृष्णवत् प्रे म किमित्यर्थः ॥ ३६ ॥ भवतु सर्वज्ञतयैव कारणमस्य ज्ञास्यामीति क्षणं परामृश्य द्वितीयमायांशोपरमे सति मायेयमिति निश्चित्य सा कीदृशी कुतस्त्या किं सम्बन्धिनीति पुनर्वितर्कयति केयं माया कुतो हेतोः कुतो देशाद्वा दैवीति देवा ब्रह्माद्या एव किमैश्वर्य्यपरीक्षणार्थं वत्सबालका भूत्वा अस्माकं चित्तं स्वेषु स्नेहयन्ति नैते श्रीदामाद्याः नारीति नरा ऋष्यादय एव किं ज्ञानपरीक्षार्थमेते वत्साद्या अभूवन् आसुरीति असुरा कंसादय एव किं बलेनापारयन्तश्छलेनास्माकं हिंसार्थमेतेऽभूवन्निति बहुधा विकल्प्य तृतीयमायांशोपरमे सति पुनः सम्भावयति, प्राय इति । मे भर्त्तुः श्रीकृष्णस्यैव माया इयं महायोगमायाख्या शक्तिरसाधारणी यस्याः खलु मायानियन्तृत्वस्मासु विशुद्धघनचित्स्वप्यधिकारः अस्त्विति सम्भावनायां लोट् नान्येति का नाम सा माया ममापि मोहिनी यतो मदंशस्य महत्स्रष्टुः पुरुषस्यापि मायया ब्रह्मादिकं सर्वजगन्मोहितमिति भावः ॥ ३७ ॥ भवतु समाधाय ज्ञानदृष्ट्या पुनरप्येतान् निभालयामीति विचारे सति चतुर्थमायांशस्यापि श्रीकृष्णस्येच्छयैवोपरमे सति तान् यथार्थान् कृष्णस्वरूपानेतान् अपश्यदित्याह–सवयसानिति समासान्त आर्षः वयुनेन समाहितज्ञानमयेन चक्षुषा वैकुण्ठं श्रीकृष्णमेवाऽपश्यत् ॥ ३८ ॥ ततश्च कृष्णस्यैवं वत्सबालकीभावे किं कारणं ? किं वा प्रयोजनं ? ते वत्सबालका वा क्व स्थापिता इति बहुतरसमाधिनापि यत् स्वयं ज्ञातुं नेष्टे तत्र माया न कारणं किं तु स्वयं भगवतः कृष्णस्य खल्वैश्वर्यमसाधारणमित्थं स्वरूपमेव सर्वत्र सर्वज्ञा अपि नारायणादयः परमेश्वराः स्वांशा अपि यद्विषयकमल्पज्ञत्वमेव बिभ्रति न तु सर्वज्ञत्वं स्वत इत्यत्र प्रमाणं द्वारकावासिविप्रबालकहर्त्ता भूमा महापुरुषोऽप्यग्रत आख्यास्यते तस्मात् श्रीबलदेवः कृष्णं दृष्ट्वै व सर्वं तत्त्वमवगतवानित्याह, नैते इति । सुरेशा ब्रह्माद्या एव मायया वत्सबालकाकारा एते न भवन्ति नापि ऋषय चकारान्नाप्यसुराः किं तु भिदाश्रयेऽपि विविधभेदास्पदेपि वत्सबालादिसमूहे त्वमेवैको भासि एकस्यापि तव पृथक्त्वं वत्सपालादिरूपत्वं सर्वं

कथं तत् निगमात् सङ्क्षेपात् वदेत्युक्तेन पृष्टेन प्रभुणा श्रीकृष्णेन हेतुना बलः अवैत् ब्रह्ममोहनादिवृत्तं ज्ञातवान् ॥ ३९ ॥ ब्रह्ममोहनप्रसङ्ग एव गोप्यादीनां मोहनादिकं विवृत्य पुनर्ब्रह्मणोऽपि विशेषतो मोहनादिकं विवरीतुमारभते–तावदिति वर्षे यातेऽपि आत्मनो मानेन त्रुट्यनेहसा त्रुटिमात्रकालेन अति शीघ्रागमनं महाभयेनैव यत आत्मनो हरेः सकाशादेव भवतीति सः आब्दमेकाब्दपर्य्यन्तं सकलं वत्सबालादिकं हरिं कृष्णं च वस्तुतस्तु कलास्तत्स्वरूपभूता वत्सबालाद्यास्तत्सहितं ददृशे ददर्श बलदेवस्तु पूर्ववर्षवत्तस्मिन्नेव तन्मर्क्षदिने शान्तिकस्नानाद्यर्थं मात्रा रक्षित इति पूर्ववज् ज्ञेयम् ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदीक्षणेनोद्गतप्रेमरसे आप्लुताशयः मग्नान्तःकरणाः अत एव गतमन्यवः जातः अनुरागो येषां ते दोर्भिरुद्दुह्य अङ्केषु आरोप्य परिरभ्य मूर्द्ध्नि घ्राणैः अवघ्राणैः परमां मुदं मुमुक्षवस्तत्प्राप्तौ यां प्राप्नुवन्ति तामवापुः ॥३३॥ तोकानामाश्लेषेण निर्वृताः सुखिताः कृच्छ्रात्ततोऽपगताः निर्वृताः तदनुस्मृत्या तोकानुस्मरणेन उद्गच्छन्त्यश्रूणि येषां ते तथाभूता बभूवुः ॥ ३४ ॥ व्रजस्य गोपादिसमूहस्य प्रेमर्द्धेरौत्कण्ठ्यं मुक्तानि मातॄणां पुनः प्रसूतत्वात्स्तनानि यैस्तेषु अपत्येष्वपि वीक्ष्य अहेतुवित् तत्र हेतूमजानन् अचिन्तयत् ॥ ३५ ॥ चिन्तामेव प्रपञ्चयति–किमेतदिति द्वाभ्याम् । सात्मनो मत्सहितस्य व्रजस्य अखिलस्य विश्वस्य आत्मनि मूले वासुदेवे इव तोकेष्वपि अपूर्वं प्रेम वर्द्धते किमेतदद्भुतम् अहेतुविदित्यनेन भगवदवताराणां सर्वत्र सर्वज्ञत्वं भगवद्विषये तु भगवदिच्छानुसारेणैवेति गम्यते ॥ ३६ ॥ एतदेवाह—केयमिति । केयं माया नराणां वासुराणां वोत देवानां कुत आयाता ? प्रायो मे भर्तुः श्रीकृष्णस्येयं मायासङ्कल्परूपा यतो मे ममापि विमोहिनी अतो नान्येत्यन्वयः ॥३७॥ सवयसान् ससखीन् वयुनेन ज्ञानरूपेण चक्षुषा वैकुण्ठं श्रीकृष्णमेवाचष्टापश्यत् ॥ ३८ ॥ इत्थं स्वयं तोकेषु स्नेहवृद्धिकारणं बुद्ध्वापि निःसन्दिग्धं तु श्रीकृष्णाज्ज्ञातवानित्याह—हे ईश, कृष्ण ! ये सुरेशाः वत्सपाः भवत्प्रियार्थं व्रजे आसन् ते एते न ये ऋषयो वत्साः आसन् ते चैते न किन्तु अस्मिन् भिदाश्रये किञ्चित्प्रयोजनार्थं वत्सतत्पालभेदविषयेऽपि त्वमेव भासि तत्सर्वं कथं वृत्तमिति पृथक् विविच्य त्वं वदेत्युक्तेन प्रभुणा श्रीकृष्णेन निगमात्संक्षेपादेव वर्णितं बलोऽवैत् विदितवान् ॥ ३९ ॥ अथ स्वाधिकारेण द्वितीयस्कन्धोक्तेन भगवद्दत्तेन वरेण निर्मोहस्यापि चतुराननस्य भगवल्लीलाविषये तु भगवदिच्छां विना कस्यापि निर्मोहत्वासंभवान्मोहप्रकारमाह—तावदित्यादिना । इह वर्षे समाप्तेऽपि आत्मनो मानेन तु त्रुट्यनेहसा त्रुटिमात्रेणैव कालेन आगत्य सकलं वत्सवत्सपसमूहसहितं हरिं ददर्श ॥ ४० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तेषां वीक्षणेनादितो यः प्रेमरसस्तेनाप्लुताशयास्ततो जातानुरागाः प्रेम्णः परावस्थामनुरागं लब्ध्वा गतमन्यवो विस्मृतक्रोधाः सन्तः ॥ ३३ ॥ प्रवयसो बह्वपत्या अपि ते गोपास्तोकानां तेषामाश्लेषेण सुनिर्वृताः कृच्छ्रादेव शनैरेव गोचारणानुरोधेनापगतास्तदाश्लेषाद्वियुज्य गाः प्रतिगतास्तेषामनुस्मृत्या उद्गताश्रवोऽभूवन् ॥ ३४ ॥ एवं गवां गोपानां स्वतोकेषु च चेष्टां वीक्ष्य बलभद्रस्य विमर्शमाह व्रजस्येति । गोपीनां गवां गोपानाञ्च मुक्तस्तनेष्वप्यपत्येषु प्रेमर्द्धेर्हेतोरौत्कण्ठ्यं वीक्ष्याहेतुवित्तत्कारणमजानन्निदमचिन्तयत्, यद्यपि विरञ्चिमोहनदिनमारभ्यैवंविरोधो बलभद्रेण दृश्यत एव तथापि तद्दिने तदनुसन्धानं तस्मिन् तल्लीलाविजिज्ञापयिषायास्तदैव जातत्वेन स्वयोगमायायाः शनैरपसारणादुक्ताभिमानिनस्तस्य स्वैश्वर्यसिद्धावकस्मादेव निमज्जनीयत्वादिति बोध्यम् ॥ ३५ ॥ योगमायायाः प्रथमांशापसरणे सति विरोधदर्शनजं तस्य चिन्तनमाह व्रजस्य सात्मनो मत्सहितस्यापि यथा वासुदेवे कृष्णे प्रेमासीत्तथा तोकेष्वपि तद्वर्द्धते एतदद्भुतमाश्चर्यं किं मम तोकेषु प्रेमा कृष्णे तु तदतिशयो योग्य इति भावः ॥ ३६ ॥ अस्तु सार्वज्ञ्येनैतत्कारणं ज्ञास्यामीति क्षणं विमृश्य द्वितीयांशापसरणे सति मायेयमिति निर्द्धार्य सा च किं लक्षणा कुतस्त्यो किं सम्बन्धिनीति पुनर्वितर्कयति केयं माया कुतो हेतोरायाता दैवी देवानां वेयं विरिञ्चादयोऽस्मदैश्वर्यपरीक्षायै वत्स वत्सपा भूत्वा स्वेष्वस्मच्चित्तं स्नेहयन्तीत्यर्थः । नारी नराणां वेयं ऋषयो वास्मज्ज्ञानपरीक्षायै वत्सपा अभूवन्नित्यर्थः । उतासुरी असुराणां वेयं कंसादय एव बलेनास्मान् जेतुमसमर्थाश्छलेन हिंसितुं तथा भवन्निति बहुधा विकल्प्य तृतीयांशापसरणे सति पुनः सम्भावयति प्राय इति, मे भर्तुः स्वामिनः कृष्णस्यैवेयं योगाख्या माया भवति अन्या त्रिगुणा माया कृष्णवैमुख्यादेव हेतोरायाता सा ममापि विमोहिनी नः भवति । मदंशस्य कारणोदशयस्य महत्स्रष्टुर्मायया विरिञ्चादिप्रमुखं जगद्विमोहितमस्तीति दैवी नार्यासुरी च माया मद्विमोहने कुतः प्रभवेत् तस्मान्मद्भर्त्तुरेव साऽस्त्विति सम्भावनायां लोट् ॥ ३७ ॥ अस्त्येवं पुनरपि समाधिता यथावन्निभालयामीति विमर्शे सति चतुर्थांशस्यापसरणे स्वभर्तुस्वरूपानेव तान् वत्सान् वत्सपांश्चापश्यदित्याह – इति सञ्चिन्त्येति । वयुनेन चक्षुषा समाहितज्ञानमयेन नेत्रेण सर्वान् वैकुण्ठं कृष्णमाचष्ट दृष्टवान् सवयसानित्यार्षः समासान्तः बलभद्रस्येश्वरस्यापि कृष्णस्वांशत्वात्तदिच्छाज्ञानादीनां तदंशिकृष्णनियम्यत्वादिदं सर्वं सङ्गतमिति तत्त्वविदः ॥ ३८ ॥ एवं प्रत्यक्षीकृत्यापि स्वामिनस्तस्य वत्सतत्पालकरूपतायां कारणं प्रयोजनञ्च तमेवापृच्छदित्याह—नैते इति । सुरेशा विरिञ्चादयो मायया वत्सतत्पाला न भवन्ति नाप्यृषयः चादसुराश्च न किन्तु भिदाश्रयेऽपि विविधभेदकार्यवत्यस्मिन् वत्सतत्पालवृन्दे त्वमेवैका भासि एकस्यैव तव पृथक्त्वं भेदकार्यभाक् त्वं सर्वमिदं कथं किङ्कारणकं किं फलकमिति निगमात् संक्षेपेण वदेत्युक्तेन पृष्ठेन प्रभुणा स्वामिना हेतुना बलोऽवैत्

ब्रह्ममोहनादिवृत्तं ज्ञातवानित्यर्थः ।। ३९ ।। ततः किमभूदित्यत्राह—तावदिति । वर्षे जाते आत्मभूर्हरिपुत्रो विरिञ्च आत्मनो मानेन त्रुट्यनेहसा त्रुटिमात्रेण कालेन एत्यागत्य आब्दं वर्षमेकं व्याप्य पूर्ववत् क्रीडन्तं हरिं ददर्श सकलं कला वत्सतत्पालास्तत्सहितं, तस्मिन् दिवसे जन्मर्क्षयोगाद्बलभद्रस्तन्मात्रा गृह एव शान्तिस्नानाद्यर्थं रक्षित इति बोध्यम् ।। ४० ।।

श्रीसुबोधिनी

क्लेशः कोपो लज्जा मौढ्यमायासश्चेतिपञ्चदोषयुता अपि वस्तुनाशमपि दृष्ट्वा पश्चात् पुत्रदर्शने सर्वं विस्मृतवन्त इत्याह **तद्वीक्षणेति**, तेषां पुत्राणां **वीक्षणेन** यत् **प्रेम** जातं तस्य **रसेनाप्लुताशया** व्याप्तान्तःकरणाः प्रथमतोपि **जातानुरागा** अतो **गतमन्यवो** जाताः, ततो**र्भकान्** बालकानुदूह्योर्ध्वमुत्थाप्य **दोर्भिः परिरभ्य,** बहुवचनं समुदायाभिप्रायं, **मूर्ध्नि घ्राणै**राघ्राणनैः कृत्वा **ते परमां मुदमवापुः** ।। ३३ ।। ततो निर्गमनेप्यशक्ता जाता इत्याह **तत** इति, **प्रवयसो** वृद्धा अपि **गोपास्तोकानां** बालानामाश्लेषेण सुष्ठु **निर्वृता** जाता **कृच्छ्रादेव शनैस्ततोपगतास्तेषां** बालकाना**मनुस्मृत्योदश्रवोपि** जाताः ।। ३४ ।। एवं दृष्ट्वा रामस्य शङ्का जातेत्याह **व्रजस्येति, व्रजस्य प्रेमर्द्धि** दृष्ट्वा **मुक्तस्तनेष्वप्यपत्येष्वौत्कठ्यमनुक्षणं** लालसतां **दृष्टवा हेतुवित्** सन् हेतुमज्ञात्वा**चिन्तयत्** ।। ३५ ।। चिन्तामाह **किमेतदिति, एतद्** गवां गोपानां च **स्वतोकेषु** भावलक्षणं **किमेतद्** यल्लोकयुक्तिप्रमाणैर्विरुध्यते ? अत एवाद्भुतं भवितुमर्हहि, तदपि न भवति, **वासुदेवेखिलात्मनि** सति किं भगवत्सान्निध्यादेवाहोस्वित् निमित्तान्तरमस्तीतिसन्देहः, **व्रजस्य सात्मन** इति, स्वसहितस्य सर्वस्यैव **व्रजस्य स्तोकेषु बालकेष्वपूर्व**मभूतपूर्वं **प्रेम वर्धत** इति **यदेतदद्भुत**मिवेतिसम्बन्धः ।। ३६ ।। तर्हि काचिन् माया भविष्यतीत्याशङ्क्याह **केयं वे**ति, **इयं** वेति, इयं **का** वा माया ? **कुतो वायाता** ? तत्र स्वरूपे सम्बन्धिभेदेन भेदान् निर्दिशति, **दैवी** देवसम्बन्धिनी **नारी** नरसम्बन्धिन्यासुर्यसुरसम्बधिनी वा ? एते पूर्वपक्षाः, **प्रायेण** मम **भर्तु**रेव मायास्तु, सिद्धान्तोयं भविष्यति, तत्र हेतुर्यतो **मे** ममापि **विमोहिनी,** अतो **नान्या** ।। ३७ ।। एवं **सञ्चिन्त्य दाशार्हो** बलभद्रो निदिध्यासनेन **वत्सान्** वयस्यसहितान् **सर्वानपि** स्वव्यतिरिक्तान् **वैकुण्ठमचष्ट,** अयं सर्वोपि **गणः** केवलं भगवानिति, तत्र प्रमाणं **वयुनेन चक्षुषा** ।। ३८ ।। एवं दृष्ट्वा सन्दिहानो भगवन्तं पृच्छति **नैते सुरेशा** इति, हे **भगवन् पूर्वम**स्माभिर्ज्ञायत **एते** वत्सपाः **सुरेशा** इन्द्रादय एते च वत्सा **ऋषयः** इति वेदार्थद्रष्टारः स्तन्यपातारः, इदानीं तु पुनर्नैते **सुरेशा न वैत ऋषयः** किन्तु **त्वमेव** तत्तद्रूपेण **भासि,** ननु सत्यमेव ब्रह्मवादस्तथैवेतिचेत् तत्राह **भिदाश्रयेपी**ति, अभेदाश्रये सर्वं भगवानेव नात्र सन्देहः, भेदाश्रयेपि स एवेत्याश्चर्यं, अतोत्र वेदानामभावात् **सर्वं पृथक्त्वं कथं** ? तन् **निगमाद् वद** वेदवाक्याद् बोधय भेदपक्षे श्रुतिः कथं सर्वब्रह्मतां वदतीति, तदा भगवतोक्तोर्थात् पूर्व**वृत्तान्तं बलो** बलभद्रोवैत् ।। ३९ ।। एवं बलभद्रं ज्ञापयित्वा ब्रह्माणमपि ज्ञापितवानिति च ब्रह्मणः समागमनमाह **तावदेत्येति, आत्मभूरयं** ब्रह्मा, अन्यथा सापराधो नष्टो भवेदेव **तावदेव** शीघ्रमेवैत्यागत्य **पुरोवदेवाब्द**यब्दपर्यन्तं **क्रीडन्तं सकलं** पालकत्वत्ससहितं **हरिं ददृशे, ननु** ब्रह्मा कथमेतावद्विलम्बं कृतवान् ? तत्राहा**त्ममानेन त्रुट्यनेहसे**ति, **अनेहा** काल **आत्मनो** ब्रह्मणो **मानेन, त्रुटि**रत्राङ्गुलिस्फोटमात्रं विवक्षितं न तु तृतीयस्कन्धगणितत्रुटिकालः, अतः शीघ्रमेवागतोपि स्वकालवशाद् वर्षानन्तरमागतः ।। ४० ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च तेषामीक्षणेनोद्भूतो यः प्रेमरसस्तस्मिन्नाप्लुता निमग्नाः आशयाः अन्तःकरणानि येषां ते यद्यपि लज्जामन्युकृच्छ्रैस्तान् बालकान् 'कुतो वत्सान् गवां समक्षमानयन्ति ? येन ता एवमुपद्रवं कुर्वन्ति' इत्यभिप्रायेण ताडयितुमागतास्तथापि गतमन्यवः, प्रत्युत जातोऽनुरागो येषां तथाभूताः सन्तस्तानर्भकान् दोर्भिरुदुह्य उत्थाप्य परिरभ्य आश्लिष्य तेषां मूर्ध्नि घ्राणैरवघ्राणैः परमां मुदमवापुरित्यन्वयः ।। ३३ ।। ततश्च ते गोपाः कृच्छ्रात् मनोनिरोधकष्टात् ततः शनैरपगताः । कष्टे हेतुमाह—तोकानां बालानामाश्लेषेण सुनिर्वृता इति । तत्र चिह्नमाह – तेषां सुतानामनुस्मृत्या उद्गच्छन्ति अश्रूणि येषां ते इति । 'यद्यपि वृद्धानां विवेकित्वेन एवमत्यन्तमोहो न सम्भवति, तथापि भगवद्रूपत्वाद्वस्तुमहिम्ना तेषामपि स जात' इत्याशयेनाह—प्रवयस इति ।। ३४ ।। मुक्तस्तनेषु अपि अपत्येषु बालवत्सेषु व्रजस्य गोपीगवादेरनुक्षणं प्रेमर्द्धेः औत्कण्ठ्यं वीक्ष्य अहेतुवित् तत्र हेतुमजानन् रामोऽचिन्तयत् ।। ३५ ।। चिन्तामेवाह—किमेतदिति द्वाभ्याम् । वासुदेवे श्रीकृष्णे यथा सर्वस्य प्रेमासीत्तथा सात्मनो मत्सहितस्य व्रजस्य गोपीगवादेस्तोकेषु स्वापत्येषु अपूर्वं पूर्वमविद्यमानं प्रेम वर्द्धते, तदेतदद्भुतमाश्चर्यं किमित्यन्वयः । भगवतः सर्वप्रेमविषयत्वे सर्वात्मत्वे हेतुमाह—अखिलात्मनीति ।। ३६ ।। इयं माया का कुतो वा आयाता ? । किंशब्दार्थमेव स्पष्टयन् विकल्पयति—किं दैवी देवप्रयुक्ता ? अथवा नारी नरैः प्रयुक्ता ? उत अथवा आसुरी असुरैः प्रयुक्ता ? प्रायशः इयं माया मम भर्तुः स्वामिनः श्रीकृष्णस्यैवास्तु । एवमेव सम्भवति । सम्भावनायां लोट् । अन्या माया न सम्भवति, यतो मे ममापि विमोहिनी ।। ३७ ।। स दाशार्हो बलभद्र इति सञ्चिन्त्य वयुनेन ज्ञानमयेन चक्षुषा सर्वान् वत्सान् सवयसानपि समानवयस्कान् गोपांश्च वैकुण्ठं श्रीकृष्णमेवाचष्ट अपश्यत् ।। ३८ ।। 'एवं सर्वान् श्रीकृष्णरूपान् दृष्ट्वा तत्कारणं जिज्ञासुः श्रीकृष्णमेव पृष्ट्वा तदुपदेशेन सर्वं ज्ञातवान्' इत्याह—नैते इति । वत्सपाः देवांशास्तत्पाल्यमाना वत्साश्च ऋषीणामंशा इत्यहं जानामि । तत्रैवं भिदाश्रयेऽपि भेदविषयेऽपि इदानीमेते सुरेशा

ऋषयश्च न भवन्ति, किन्तु त्वमेव सर्वमसि । 'तत्र तव सामर्थ्ये तु न सन्देहः' इत्याशयेन सम्बोधयति—ईशेति । 'परन्तु कथमेतद्वृत्तं तत् पृथक् विविच्य त्वं वद' इत्युक्तेन बलभद्रपृष्टेन प्रभुणा श्रीकृष्णेन निगमात् सङ्क्षेपात् उक्तं वृत्तं ब्रह्ममोहनाद्युक्तं सर्वमुपधारणं बलः अवैत् ज्ञातवान् इत्यर्थः ॥ ३९ ॥ इदानीं ब्रह्मणो मोहप्रकारमाह—तावदिति । तावत् वर्षे जातेऽप्यात्मनः स्वस्य मानेन त्रुट्यनेहसा त्रुटिमात्रकालेन शीघ्रमेत्य आगत्य स्वयम्भूर्ब्रह्मा सकलं वत्सपालादिसर्वरूपं हरिं पुरोवत् हरणात् प्राग्वत् प्रथमवत् अब्दपर्यन्तं क्रीडन्तं ददृशे ॥ ४० ॥

अन्वितार्थप्रकाशिका

तदीक्षणेति ॥ ततश्च तेषामीक्षणेनोद्भूतो यः प्रेमरसस्तस्मिन्नाप्लुताः निमग्नाः आशयाः अन्तःकरणानि येषां ते अरे अनभिज्ञाः अत्र परमवत्सलगवीगणदृष्टिपथे वत्साः किमित्यानीता इति तानपि ताडयितुमागतास्तथापि गतमन्यवः प्रत्युत जातोऽनुरागो येषां तथाभूताः सन्तस्तानर्भकान्दोर्भिरुदुह्य उत्थाप्य । दीर्घपाठ आर्षः । परिरभ्य आश्लिष्य तेषां मूर्घ्नि घ्राणैरवघ्राणैः परमां मुदमवापुः ॥ ३३ ॥ तत इति ॥ ततश्च तोकानां बालानामाश्लेषेण सुनिर्वृताः तेषां सुतानां अनुस्मृत्या उद्गच्छन्ति अश्रूणि येषां ते प्रवयसः वृद्धाः गोपाः कृच्छ्रात् मनोनिरोधकष्टात् ततः शनैरपगताः ॥ ३४ ॥ व्रजस्येति ॥ मुक्तस्तनेष्वप्यपत्येषु बालवत्सेषु व्रजस्य गोपीगवादेरनुक्षणं प्रेमर्द्धेः औत्कण्ठ्यमाधिक्यम् औत्कण्ठ्यमिति पाठे प्रेमर्द्धेः हेतोः औत्कण्ठ्यं वीक्ष्य अहेतुवित् तत्र हेतुमजानन् रामोऽचिन्तयत् । एतावत्पर्यन्तं रामस्यापि मोह एवाभवदिति भावः । अन्येऽपि तत्रत्या विवेकिनोऽपि मुक्तस्तनेष्वपत्येष्वपि विपुलतमस्नेहं दृष्ट्वाऽपि नातर्कयन्निति भगवदिच्छैव हेतुः ॥ ३५ ॥ किमेतदिति ॥ अखिलस्यात्मनि वासुदेवे श्रीकृष्णे यथा सर्वस्य प्रेमासीत्तथा सात्मनो मत्सहितस्य व्रजस्य गोपीगवादेस्तोकेषु स्वापत्येष्वपूर्वं पूर्वमविद्यमानं प्रेम वर्द्धते तदद्भुतमाश्चर्यं किम् । तत्रापि मम तेषु कृष्णवत् प्रेमकारणं किम् इति भावः ॥ ३६ ॥ केयमिति ॥ इयं माया का कुतो वा आयाता किं दैवी अस्मत्परीक्षार्थं देवैः प्रयुक्ता अथवा नारी नरैः ऋष्यादिभिः प्रयुक्ता उत अथवा आसुरी असुरैः कंसाद्यैः प्रयुक्ता प्रायशः इयं माया मम भर्तुः स्वामिनः श्रीकृष्णस्यैवास्तु एवमेव संभवति । संभावनायां लोट् । अन्या माया न संभवति । यतो मे ममापि विमोहिनी ॥ ३७ ॥ इति संचिन्त्येति ॥ स दाशार्हो बलभद्र इति संचिन्त्य वयुनेन ज्ञानमयेन चक्षुषा सर्वान् वत्सान् सवयसानपि समानवयस्कान् । अदन्तत्वमार्षम् । गोपांश्च वैकुण्ठं श्रीकृष्णमेवाचष्ट अपश्यत् ॥ ३८ ॥ नैत इति ॥ हे ईश ! वत्सपाः देवांशास्तत्पाल्यमाना वत्साश्च ऋषीणामंशा इत्यहं जानामि तत्रैवं भिदाश्रयेऽपि भेदविषयेऽपि इदानीमेते सुरेशा ऋषयश्च न भवन्ति । किंतु त्वमेव सर्वं भासि परन्तु कथमेतद्वृत्तं तत् पृथक् विविच्य त्वं वदेत्युक्तेन बलभद्रपृष्टेन प्रभुणा श्रीकृष्णेन निगमात्संक्षेपात् उक्तं वृत्तं ब्रह्ममोहनाद्युक्तसर्वरूपधारणान्तं बलः अवैत् ज्ञातवान् । अवपूर्वादिणो लङ् ॥ ३९ ॥ तावदिति ॥ तावत् वर्षे गतेऽप्यात्मनः स्वस्य ब्रह्मणः मानेन त्रुट्यनेहसा त्रुटिमात्रकालेन शीघ्रमेत्य आगत्य आत्मभूः ब्रह्मा सकलं वत्सपालादिसर्वरूपं हरिं पुरोवत् हरणात्प्राग्वत् प्रथमवत् अब्दपर्यन्तं क्रीडन्तं ददृशे ददर्श । तङ् आर्षः । रामस्तु तत्र दिने भगवदाज्ञया गृह एवाभूदिति ज्ञेयम् ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

लज्जया मन्युनाऽध्वकृच्छ्रेण च सुतान् ताडयितुमागता अपि तद्दर्शनप्राप्तप्रेमाधिक्यात्किमपि नोचरित्याह तद्वीक्षणेति तेषां वीक्षणेन दर्शनेनोत्पन्नो यः प्रेमरसस्तस्मिन्नाप्लुताआनंदिता आशयाः अंतःकरणानि येषां ते अतः गतो नष्टो मन्युस्ताडनेच्छारूपः क्रोधो येषां ते गोपाः जातानुरागाः संतः अर्भकान् दोर्भिः उदुह्य करैरुत्थाप्य परिरभ्य आलिंग्य मूर्द्ध्नि शिरसि घ्राणैः मुदमवापुः ॥ ३३ ॥ प्रवयसो वृद्धाः स्तोकानां बालानामाश्लेषेण आलिंगनेन सुतरां निर्वृताः तेषां पुत्राणामनुस्मृत्या उत्स्रवंति अश्रूणि प्रेमबिंदवो येषां ते गोपाः ततः सुतप्राप्तिस्थानात् शनैः कृच्छ्रादपगताः स्थानांतरं गच्छंति स्म ॥ ३४ ॥ मुक्तस्तनेषु त्यक्तस्तनक्षीरेषु अपत्येष्वपि व्रजस्य गोगोपगोपीकलापस्य प्रेमर्द्धेः स्नेहवृद्धेः औत्कंठ्यं अत्याधिक्यं वीक्ष्य अहेतुवित् तस्य कारणमजानन् चिंतयामास ॥ ३५ ॥ तदेव चिंतनमाह किमिति वासुदेवे इव यथापूर्वं स्नेहः अभूत् तथा सात्मनः आत्मना मया सहितस्य व्रजस्य गोपादिवृंदस्य स्तोकेषु वत्सपेषु अपूर्वं निःसीम प्रेम वर्द्धते एतत्किमद्भुतमस्ति ॥ ३६ ॥ इयं का माया वा कुत्र आगता देवानां इयं वानराणां इयं उत वा आसुराणां इयमस्तीति संदेहं कृत्वा निश्चयं प्राप तथाहि प्रियो मे भर्त्तुः स्वामिनः श्रीकृष्णस्यैवेयं मायाऽस्तु अन्येषां मास्तु यतः अन्या अन्यदीया माया मे विमोहिनी न इयं तु ममापि मोहजनिकाभवत्यतः श्रीकृष्णस्यैव सेति वितर्कते ॥३७॥ सवयसान् वत्सपान् वयुनेन ज्ञानरूपेण वैकुंठं श्रीकृष्णमाचष्ट ऐक्षत ॥ ३८ ॥ इत्थं सामान्यतो ज्ञात्वा विशेषं तु श्रीकृष्णाज्ज्ञातवानित्याह नैत इति हे ईश भिदाश्रये वत्सवत्सपरूपभेदेऽपि तद्रूपेण त्वं मे भासि अत इदं सर्वं वत्सवत्सपादिरूपेण तव पृथक्त्वं कथं वृत्तं जातं त्वं वद इत्युक्तेन प्रभुणावक्त्रानिगमात्संक्षेपाद्गदितं विधिकृत्यं बलोवैत् ज्ञातवान् ॥ ३९ ॥ आत्मभूर्ब्रह्मा स्वमानेन त्रुट्यनेहसा त्रुटिप्रमाणकालेन एत्य पूर्ववदब्दपर्यंतं सकलं वत्सपादिसमग्रम् ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तावत्पर्यन्तं रामस्यापि मोह एवासीत् संवत्सरान्ते तु कथंचित् ज्ञातवानिति दर्शयन्नाह ॥ एकदेति ॥ एकदा कदाचित्, पञ्च च षट् च पञ्चषास्तासु, पञ्चसु षट्सु वेत्यर्थः । त्रियामासु रात्रिषु, हायनापूरणीषु संवत्सरपूरकतयावशिष्टासु सतीष्वित्यर्थः । सरामः बलभद्रसहितः, अजः श्रीकृष्णः, वत्सान् चारयन्, वनं आविशत् ॥ ३३ ॥ तत इति ॥ ततस्तदा, गोवर्द्धनाद्रिशिरसि गोवर्द्धनाचलस्य शिखरे, तृणं तृणानीत्यर्थः । चरन्त्यः, गावः, उपव्रजं व्रजस्य समीपप्रदेशे, चरतः वत्सान् विदूरात्, ददृशुः ॥ ३४ ॥ दृष्ट्वेति ॥ दृष्ट्वा स्ववत्सान् विदूरतो विलोक्य, स प्रसिद्धः, गोव्रजो गवां समूहः तु, तत्स्नेहवशस्तेषां वत्सानां स्नेहेनाकृष्टः, अत एव अस्मृतः विस्मृत आत्मा येन सः । अत्यतिक्रान्ताः आत्मपाः स्वरक्षका गोपालाः दुर्गमार्गो दुर्गमोऽध्वा च येन सः, द्वौ पादौ यस्य सः द्विपाद् अत्यन्तधावनेन पाश्चात्यपादयोः पूर्वपादाभ्यां संघट्टनात् द्विपादिव प्रतीयमान इत्यर्थः । ककुदि ग्रीवा यस्य सः, उदञ्चितग्रीव इत्यर्थः उदुन्नमितान्यास्यानि पुच्छानि च येन सः, आस्रु सर्वतः प्रस्रवत् पयो यस्य सः, हुंकृतैः उपलक्षितः एवंभूतः सन्, जवेन वेगेन, अगात् स्ववत्ससमीपप्रदेशमाययौ । गोव्रज इत्यनेन वृषभादयोऽप्यगुरिति सूचितम् ॥ ३५ ॥ तत्र विशेषतो धेनूनां चेष्टितमाह ॥ समेत्येति ॥ अघः वत्सान् समेत्य, गावः, वत्सवत्यश्च पुनः प्रसूता अपि, अङ्गानि स्ववत्सानां शरीराणि, गिलन्त्यः इव, लिहन्त्यः सत्यः, स्वौधसं पयः, अपाययन् ॥ ३६ ॥ एवं रामेण दृष्टं वत्सेषु गवां स्नेहातिशयमुक्त्वाथ गोपानामपि दर्शयितुमाह ॥ गोपा इति ॥ गोपाः, तासां गवां रोधेन यश्चायासस्तस्य मौघ्येन वैयर्थ्येन या लज्जा तत्सहितो य उरुर्मन्युस्तेन, दुर्गाध्वकृच्छ्रतः दुर्मार्गजनितक्लेशेन च, अभ्येत्यागत्य, गोवत्सैः सहितान् सुतान्, ददृशुः ॥ ३७ ॥ तदिति ॥ ततश्च, तेषां सुतानां वोक्षणेन य उदधिकः प्रेमरसस्तेन आप्लुतो निमग्न आशयो येषां ते, गतो निवृत्तः मन्युर्येषां ते, लज्जामब्युकृच्छ्रैः सुतांस्ताडयितुमागताः सन्तोऽपि, तदीक्षामात्रविनिवृत्तमन्यव इत्यर्थः । जातोऽनुरागो येषां तथाभूताः, न केवलं गतमन्युत्वमात्रं प्रत्युत संजातस्नेहा इत्यर्थः ते गोपाः, अर्भकान् स्वस्वसुतान्, दोर्भिः उदूह्य, परिरभ्य च, मूर्द्धनि, घ्राणैः, परमामदृष्टपूर्वां, मुदं, अवापुः ॥ ३८ ॥ तत इति ॥ पशुभिः सहिता इति शेषः । प्रवयसः वृद्धाः, गोपाः, तोकानामपत्यानामाश्लेष आलिङ्गनं तेन सुनिर्वृताः सुतरां सुखिताः, तेषां तोकानामनुस्मृत्या उद्गच्छन्त्यश्रूणि येषां तथाभूताः सन्तः, कृच्छ्रात् कथंचित्, शनैः ततः अपगताः विश्लिप्य वनं प्रति गता इत्यर्थः ॥ ३९ ॥ व्रजस्येति ॥ रामः, व्रजस्य गोगोपसमूहस्य, 'व्रजो गोष्ठाध्ववृन्देषु' इति मेदिनी । प्रेमर्द्धेः प्रेमाधिक्यस्य, औत्कण्ठ्यमतिशयं, मुक्तस्तनेषु, अपत्येषु, अनुक्षणं, प्रतिक्षणं वीक्ष्यालोक्य अपि, अहेतुवितत्कारणमजानन्, अचिन्तयत् । एवं विधादृष्टपूर्वस्य स्नेहकारणं किमिति विचारयामासेत्यर्थः ॥ ४० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

केयमिति ः १०.१३.३७,

मायाऽपाकरणे न योगविभवो नो वा तपः कारणं किं त्वेकं तव पादपद्मशरणीभावं वदामो वयम् ।
यत्तादृक् स्थितिमानपि स्फुटमसौ रामः स्वमोहं तदा चिच्छेदाशु भवन्तमेव शरणं प्राप्य प्रभो तद्वने ॥ ७३ ॥
कर्ता गोकुलमद्य वत्सरमितं मायां विवृण्वन् स्विकामेतत्तत्त्वविकासि वत्सरहितं ज्ञात्वेत्यजस्याशयम् ।
तत्प्रीत्यै भगवंस्तदा त्वमकरोस्तत्तादृगेवेति यन्माया तस्य तथैव वत्सरहितैवासीदिदं साध्विति ॥ ७४ ॥

तावदिति ः १०.१३,४०

बहुतरसमये गतेऽपि कालो लव इति भाति हि योगनिद्रयोश्च ।
तरतमभवनं द्वयोरिहाद्ये विभुपददर्शनमन्तिमे तु तत्र ॥ ७५ ॥

कृष्णप्रिया

क्लेश-कोप-लज्जा-मौठ्य-आयास इन पांच दोषों से युक्त और दूध की हानि होने पर भी अपने बालकों को देखते ही क्रोधित गोपों का हृदय वात्सल्य रस से सरावोर हो गया । बालकों के प्रति स्नेह की बाढ़ आयी, न मालुम जाने कोप कहाँ हवा हो गया । गोपों ने अपने-अपने बालकों को उठा लिया, हृदय से लगा लिया और बालकों के मस्तक सूँघकर अतिशय आनन्द का अनुभव करने लगे ।। ३३ ॥ पुनः अपने बालकों के आलिङ्गन से परम सुख को प्रात हुए वृद्ध गोपजन महान् श्रम से धीरे-धीरे अपने पुत्रों से अलग हो सके । अलग होने से बालकों की स्मृति आ गयी और गोपों की आँखे छलछला आयीं ।। ३४ ॥ बलभद्र भैया ने जब दूध छोड़े हुए बालकों में भी उत्तरोत्तर गोप गौएँ एवं गोपीजनों को उत्कण्ठा और स्नेहातिशय को बढ़ते देखा तब तो वे विचारमग्न हो गये क्योंकि बलभद्रजी को ब्रह्माजी की करतूत का ख्याल नहीं था ।। ३५ ॥ श्री बलभद्रजी विचार करने लगे कि यह कौन सी कल्पनातीत घटना है कि सबकी आत्मा वासुदेव श्रीकृष्ण में जैसी सबकी प्रीति थी वैसी ही सारे व्रजजनों की अपूर्व प्रीति बालकों पर एवं बछड़ों पर बढ़ती जा रही है साथ मेरा भी प्रेम इनकी ओर प्रगाढ होता जा रहा है ॥ ३६ ॥

यह कोन सी माया है !, देवों की है, मानुषी माया है, या असुरों की है, या मेरे स्वामी भगवान् श्रीकृष्ण की माया है ? लेश भी संशय नहीं यह माया अवश्य श्रीकृष्ण प्रभु की है दूसरे की नहीं इसलिये तो मुझे भी मुग्ध कर रही है ॥ ३७ ॥ ऐसा विवेकपूर्ण निर्णय कर ज्ञाननयन से निरीक्षण किया तो दाऊजी को ऐसा प्रतीत हुआ इन सर्व बछड़ों के स्वरूप में और ग्वालबालकों के स्वरूप में केवल श्रीकृष्ण-ही-श्रीकृष्ण प्रतीयमान हो रहे हैं क्या बात है ॥ ३८ ॥ ऐसे दर्शन के बाद बलभद्रजी ने कहा – प्यारे कृष्ण ! यह तो मैं जानता हूँ कि ये ग्वाल बालक इन्द्रादि देव हैं और बछड़े ऋषि लोग हैं लेकिन आज न तो ये बालक इन्द्रादि देव हैं न बछड़े ऋषि हैं किन्तु आप ही हैं यह कठिन समस्या है । यदि कहा जाय कि ब्रह्मवाद के सिद्धान्त से आप ही सर्व स्वरूप है तो ठीक है यह मान लिया जाय लेकिन अभेदाश्रय से यह कहना उचित है यहाँ तो भिन्न-भिन्न रूपों का आश्रय लेने पर भी आप अकेले ही इन स्वरूपों में प्रकाशित हो रहे हैं यह बात जचती नहीं तो कृपया निगम वचनों के आधार पर यह स्पष्ट करके बतला दीजिये कि आप ग्वालबाल बछड़े वस्त्राभूषण आदि के आकार में भिन्न भिन्न क्यों प्रतीत हो रहे हैं ? तब भगवान् श्रीकृष्ण ने ब्रह्माजी की सम्पूर्ण करतूत सुनाई और श्रीदाऊजी ने सारी घटना जान ली ।। ३९ ॥ राजन् ! ब्रह्माजी ब्रह्मलोक से अपना काम निपटाकर शीघ्र व्रज में लौट आये तब ब्रह्माजी के कालमान से तो केवल एक त्रुटि काल ही पसार हुआ था । ब्रह्माजी ने व्रज में आकर देखा तो भगवान् श्रीकृष्ण गोपबालक और बछड़ों के साथ एक वर्ष से यथापूर्व ही खेल रहे हैं ।। ४० ॥

[1]यावन्तो गोकुले बालाः सवत्साः सर्वे एव हि । मायामये[2] शयाना मे नाद्यापि पुनरुत्थिताः ॥ ४१ ॥
इत एतेऽत्र कुत्रत्या मन्मायामोहितेतरे । तावन्त एव तत्राब्दं क्रीडन्तो विष्णुना समम् ॥ ४२ ॥
एवमेतेषु [3]सुचिरं ध्यात्वा [4]सर्वात्मनाऽऽत्मभूः । [5]सत्याः के कतरे नेति ज्ञातुं नेष्टे कथञ्चन ॥ ४३ ॥
एवं सम्मोहयन् विष्णुं विमोहं विश्वमोहनम् । स्वयैव माययाजोऽपि स्वयमेव विमोहितः ॥ ४४ ॥
तम्यां तमोवन्नैहारं खद्योतार्चिरिवाहनि । महतीतरमायैश्यं निहन्त्यात्मनि युञ्जतः ॥ ४५ ॥
तावत् सर्वे वत्सपालाः पश्यतोऽजस्य तत्क्षणात् । व्यदृश्यन्त घनश्यामाः पीतकौशेयवाससः ॥ ४६ ॥
चतुर्भुजाः शङ्खचक्रगदाराजीवपाणयः । किरीटिनः कुण्डलिनो हारिणो वनमालिनः ॥ ४७ ॥
श्रीवत्साङ्गददोरत्नकम्बुकङ्कणपाणयः । [6]नूपुरैः कटकैर्भाताः कटिसूत्राङ्गुलीयकैः ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—गोकुले सवत्साः यावन्तः बालाः सर्वे एव सवत्साः हि मायामये शयानाः मे अद्य अपि न पुनः उत्थिताः ।४१। मनमायामोहितेतरे तावन्तः एव तत्र विष्णुना समं अब्दं क्रीडन्तः एते अत्र इतः कुत्रत्याः ? ॥ ४२ ॥ आत्मभूः एवं एतेषु सुचिरं सर्वात्मना ध्यात्वा सत्याः के कतरे न इति ज्ञातुं न इष्टे ।। ४३ ।। विश्वमोहनं विमोहं विष्णुं एवं सम्मोहयन् अजः अपि स्वया एव मायया स्वयं एव विमोहितः ।। ४४ ॥ तम्यां नैहारं तमोवत् अहनि खद्योतार्चिः इव महति आत्मनि इतरमाया गुञ्जतः ऐश्यं निहन्ति ॥ ४५ ॥ अजस्य पश्यतः तत् क्षणात् (सर्वे वत्सपालाः) घनश्यामाः पीतकौशेयवाससः चतुर्भुजाः शंखचक्रगदाराजीवपाणयः किरीटिनः कुण्डलिनः हारिणः वनमालिनः ॥ ४७ ॥ श्रीवत्साङ्गददोरत्नकम्बुकङ्कणपाणयः नपुरैः कटकैः कटिसूत्राङ्गलीयकैः भाताः ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दृष्ट्वा च व्यतर्कयदित्याह । यावंत इति द्वाभ्याम् । मे मायाशये मन्मायातल्पे ॥ ४१ ॥ मन्मायामोहितेभ्य इतरे कुत्रत्याः ॥४२॥ इति वितर्कयन्नमुह्यदित्याह एवमिति द्वाभ्याम् । एवमेतेषु भेदेषु चिरं ध्यात्वा । स आत्मभूरिति पाठः ॥४३–४४॥ ननु मायाश्रयस्य तस्य कुतो मोह इत्यत आह । तम्यामिति । महामायाविनि भगवत्यन्यमायाया आवरणविक्षेपकत्वाभावे दृष्टांतद्वयमितम् । तम्यां तमिस्रायां रात्र्यां नैहारं हिमकणप्रभवं तम इव । तद्धितार्थोपसर्जनस्यापि तमसो नैहारमिति विशेषणं छांदसम् । तत्तमो यथा पृथगावरणं न करोति किं तु तत्रैव लीयते यथा च खद्योतार्चिरहनि पृथक् प्रकाशं न करोति एवं महति पुरुषे युंजतः पुंस इतरा नीचा माया तत्र न किंचित्करोति किंत्वात्मनि स्वस्मिन्नेव ऐश्यं सामर्थ्यं निहंतीति ॥ ४५ ॥ अन्यदप्याश्चर्यमाह । तावदिति । वत्सपालाः वत्साः पालाश्च सर्वे यष्टिविषाणादयश्च ॥ ४६–४७ ॥ श्रीवत्सप्रभायुक्तान्यंगदादीनि दोष्षु यषां ते रत्नमयानि कंबुवत्त्रिधाराणि कंकणानि पाणिषु येषां ते ते च ते च ।। ४८ ॥

---

१. ब्रह्मा—च. पु. टी. । २. शये–श्रीधर. वंशी. वीर. विज. विश्व. शुक. । ३. भेदेषु चिरं–श्रीधर. वंशी. वीर. विज. विश्व. शुक. । ४. स आत्मभूः–श्रीधर. वंशी. बीर. विज. । ५. सदाश्रया एत इति–वीर. । ६. "श्रीवत्साङ्कितवक्षस्काः कौस्तुभामुक्तकन्धराः"–वीर. पाठे इदमर्धमधिकम् ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

व्यतर्कयद्विचारितवान् । यावन्तो यत्प्रमाणकाः श्रीकृष्णसहागताः गोकुले चारणार्था नीतवत्ससमूहे । अद्यापि इदानीमपि वर्तमानदिनार्थकत्वेद्याव्ययस्य त्रुट्यनेहसेत्युक्त्याविरोधः स्यादिति ॥४१॥ इत इह । सप्तम्यर्थे तसिः । एते दृश्यमानाः । अत्रेत्युक्तिस्तु संभ्रमान्न तेषां पौनरुक्त्यं शंक्यम् । कुत्रत्याः कुतः समागता इत्यर्थः । तावंतस्तत्प्रमाणका एव । यतो मया हृतास्तत्रेत्यर्थः ॥ ४२ ॥ इति इत्थम् । वितर्कयन्विमृशन् । भेदेषु भिन्नत्वेन प्रतीयमानेषु गोपवत्सेषु । आत्मनि चेतसि । ध्यानशब्देन चेतोर्थकात्मपदलाभात्पुनरुक्तिसंभावनया पाठांतरं चक्लृपे—आत्मभूरिति । भेदेष्विति । किमेते इह प्रकृतास्तत्राह –कृष्णसृष्टाः किंवा एत एव कृष्णसृष्टास्तत्र ते प्रकृताः कि वा उभय एव कृष्णसृष्टाः प्रकृतास्तु कृष्णेनैव क्वापि ब्रह्माडांतरे चालिताः कि वा कृष्णेन वत्सपालानां प्रकाशद्वयीकरणात् उभय एव प्रकृताः कि वा मयि तत्र गत्वा तत्र पश्यति सति एत एव कृष्णेन तत्र नीयंते पुनरत्रागच्छति मयि त एवात्रनीयंते भवतु तर्हि युगपदेवोभयत्र दृष्टिं निक्षिपामीति तथा कृत्वापि तानुभयत्र दृष्ट्वा चिरं ध्यात्वापि एतेषु मध्ये भगवत्स्वरूपभूताः सत्या बहिरंगमायासृष्टाः सत्या नेतीमं भेदं तु कथंचन ज्ञातुं न शशाक ॥ ४३ ॥ विमोहं मोहानधिकरणम् । विश्वमोहनं सर्वमोहकरम् । अजोऽपीत्यपिना ब्रह्मणोपि यदा मोहस्तदा कान्येषां कथेति ध्वनितम् । स्वया स्वकृतया स्वस्य हरेर्वा 'आत्मात्मीययोः स्वः' इति कोशांतरात् । मोहितस्यापि ब्रह्मण एव विह्वलीकरणे भगवति मायाप्रयोगरूपापराध एव हेतुरिति भावः ॥४४॥ मायायाः स्वाश्रय्यामोहकत्वस्येंद्रजालीयमायादृष्टांतेन प्रसिद्धत्वाद्ब्रह्मणोऽपि मायाश्रत्वान्मोहो न घटत इत्याशंकते—नन्वित्यादिना 'रजनी यामिनी तमी' इति कोशात्साधारणरात्रिपरोऽपि तमीशब्द इहार्थस्वारस्यात्तमिस्रापरो ज्ञेयः । तथा च तम्यां तमोयुक्तायां रात्रौ । महामायाविनीति । 'मायिनामपि मायिनी' इत्युक्तेः । अन्यमायाया भगवदितरमायायाः । आवरणविक्षेपशक्तिद्वयविशिष्टा भगवत एव माया नान्यस्येति भावः तमसा तुल्यं तमोवदिति तुल्यार्थे वतिस्तद्धितः । 'विशेष्यं तु प्रधानं स्यात्' इत्युक्तेः । प्राधान्यमत्र तद्धितार्थस्यैव न तु तमसः । तथा च कथमत्र तमसो विशेष्यत्वं तदभावे नैहारमिति विशेषणं कथम् । तत्राह—छांदसमिति । यद्वा–वदव्ययमिवार्थेस्ति । तत्र महति ॥ ४५ ॥ अतोप्यद्भुतमाह—तावत्तदा सकला वा सर्वशब्दस्य यष्ट्यादिपरत्वेन व्याख्यानात् व्यदृश्यंत ब्रह्मणेति शेषः । विश्वनाथस्तु –यावदेवं ब्रह्मा मीमांसमानो व्यामुह्यति स्म तावदित्यर्थः । वत्सा पालाश्च पश्यतोऽजस्य पश्यंतमप्यजमनादृत्येति । भोः सत्यलोकवासिन् अज सत्यं त्वमज एवासि ईदृश्यैव बुद्ध्या विश्वं सृजसि अस्मान्मायया मोहितुमिच्छसि कथंचिज्ज्ञातुमपि तावन्न शक्नोषि पश्येति व्यदृश्यंत वयं वृंदावनीयास्तृणं चरंतो वत्सा अपि वत्सांश्चारयंतो गोपबाला अप्येवं भवाम इति ज्ञापयंत इव तद्दृष्टिगोचराः स्वय मेवाभूवन् स्वप्रकाशत्वादिति भावः ॥ ४६ ॥ राजीवं कमलम् 'बिसप्रसूनराजीव–'इत्यमरः ॥ ४७ ॥ अंगदानि केयूराणि । "अंगदं बाहुभूषायामंगदो वालिजेऽपि च" इति धरणिः । 'कटको वलयोऽस्त्रियाम्' इत्युक्तेः करभूषणमपि कटकोऽत्र नूपुरसाहचर्यात्पादभूषणपरः । कटिसूत्राणि क्षुद्रघंटिकायुक्तानि सूत्रप्रोतकटिभूषणानि ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गोकुले यावन्तो बाला वत्सपालरूपा आसन् तावन्तः सर्व एव वत्ससहिताः सन्तो मायेत्यादियोज्यम् ॥ ४१ ॥ इतो हेतोः यद्वा एते मायाशये शयाना इतो वर्त्तन्ते मन्मायामोहितेतरे चात्र कुत्रत्या इति योज्यं विष्णुनेत्यब्दं व्याप्य तथैव क्रीडनाभिप्रायेण ॥ ४२ ॥ एवमुक्तप्रकारेण भेदेषु मोहितानुसन्धानं अमोहितानुसन्धानं तयोर्विपर्ययस्तेषु एतेषु मध्ये के सत्याः अनारोपितपूर्ववत्सबालभावाः कतरे च न सत्याः किं नाम मन्मोहितान् भगवता नीत्वा तत्परिवर्त्तेनान्ये तादृशा मायया निर्मायात्राप्यमी स्थापिताः किं वा भगवता सह क्रीडन्त एते मायानिर्मिताः किं वा मया भ्रान्त्यैव ते दृश्यन्त एते वेति चिरं ध्यात्वाऽपि निजविचारादिप्रयासेन निश्चे तुं नेष्टे न शक्त इत्यर्थः । स मायाविस्तारकोऽपि आत्मभूः स्वतः सिद्धज्ञानोऽपि भगवन्माययैव ज्ञातुं नेष्टे इत्यर्थः ॥ ४३ ॥ सम्मोहयन् स्वमायया वत्साद्याच्छादनात् सम्मोहतुमिच्छन्नित्यर्थः । एवं तदभिप्रायानुसारेणैव संशब्दः विष्णुमिति सर्वव्यापकत्वान्मायया तस्य दृष्ट्याच्छादनं न घटेतेति भावः । अतो विमोहं मोहयितुमशक्यमपीत्यर्थः । किं च विश्वमोहनमपि अजः स्वयम्भूरिति पूर्ववत् एवशब्दाभ्यां न तु भगवन्मायया न तु भगवान्वेति बोध्यते ॥ ४४ ॥ तच्चोचितमेवेत्याह—तम्यामिति । यदत्र टीकायामावरणविक्षेपक्रमः सम्मतः तदनुसृत्य व्याख्यायते तम्यां नैहारं तमो यथा तमीं नावृणोति किञ्च तच्च स्वयमेव लीनंसत् तमी तमः सान्द्रीकृत्य नीहारमेवावृणोति यथा चाहन्यहः स्थितस्य पूर्णस्य चन्द्रस्यार्चिरपि सूर्यार्चिः स्वतया प्रत्याययति तथा खद्योतार्चिकर्तृ सुर्यार्चिरपि स्वतया प्रत्याययितुं न शक्नोति किं तु खद्योतमेव प्रतिहतप्रभावत्वेन ज्ञापयति । तद्वन् महति मायां प्रयुञ्जानस्येतरस्य मायामहच्छक्तिमावरीतुं भावान्तरं च विक्षेप्तुमसमर्था सती स्वाश्रयतयात्मत्वेन व्यपदिश्य तस्मिन् इतरत्र यदैश्यन्तदेव निहन्तीत्यर्थः । अव्ययमपि वच्छब्दोऽस्ति "यद्वा यथा तथैवैवं साम्य" इत्यमरः ॥ ४५ ॥ एवं मोहेन दीनतां गते ब्रह्मणि श्रीभगवानप्यचिरात् द्रष्टुं मञ्जुमहित्वमन्यदपि यदिति तदभिप्रायानुसारेणैव कृपां व्यतनोदित्याह—तावदित्यादिनवकेन । अङ्कास्तु पृथक् पृथक् क्रियन्ते पश्यन्तमजमनादृत्य तद्दृष्टिशक्तिमनपेक्ष्य अदृश्यन्त स्वयमेव तद्दृष्टौ व्यक्तीभूताः स्वशक्ति-

मात्रेणाभिव्यक्तः कर्मकर्तृत्वम् ॥ ४६ ॥ चतुर्भुजा इति अत्र चतुर्भुजत्वादिना विष्णुत्वमवगम्यते मायाद्यधिष्ठातृत्वेन तु प्रथमद्वितीयपुरुषत्वमवगंस्यते तस्मात् —

"सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्" ॥

इति ब्रह्मवाक्यात् ब्रह्माणं प्रति च तत्तत्कार्याय सर्वशक्तिव्यञ्जकतया प्रायो विष्णोरेवाविर्भावश्रवणात् त्रयाणामभेदज्ञापनार्थमेव व्यामिश्रत्वेनाविर्भावोऽयं ज्ञेयः ॥ ४७ ॥ श्रीवत्सो नाम दक्षिणस्तनोद्र्ध्वे सूक्ष्मरोम्णां दक्षिणावर्त्तः श्रीभगवतोऽसाधारणलक्षणम् । यद्वा, श्रीयुक्तं वत्सं वक्षः तत्प्रभायुक्तमित्यादि । यद्वा श्रीयुक्तं वत्सं वक्षो येषाम् इत्यादि योज्यम् "उरो वत्सं च वक्षश्च" इत्यमरः कटकैः पादवलयैः पारिशेष्यात् अन्यत्तैः तत्र कम्बोर्मुखाग्रभागे त्रिधारत्वात्तथोक्तम् । यद्वा कम्बवो बलयाः कङ्कणानि मणिबन्धबन्धनानि हस्तसूत्राणि "कम्बुः स्याद्वलये शङ्खे" इत्यमरस्य नानार्थात् "कङ्कणं करभूषणम्" इति नृवर्गात् तत्र तत्र क्षीरस्वामिना तथा तथा व्याख्यानात् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

गोकुले यावन्तो बाला वत्सपालरूपा आसन्, तावन्तः सर्व एव वत्ससहिताश्च सन्तो मायेत्यादियोज्यम् ॥ ४१ ॥ इत इत्यस्य पूर्वश्लोकेनान्वयः, इतो मायाशयात्, यद्वा, एते मायाशये शयाना इतो वर्त्तन्ते । 'मन्मायामोहितेतरे' चात्र कुत्रत्या इति योज्यम् । 'एते तु' इति पाठो वा विष्णुनेति पदं व्यापकतयैव क्रीडानाभिप्रायेण ॥ ४२ ॥ एवमुक्तप्रकारेण भेदेषु मोहितामोहितरूपेष्वेतेषु भयेषु बहुत्वं बालकादीनां बाहुल्यात्, यद्वा, भेदेन द्विधा वर्त्तमानेष्वित्यर्थः । अभेदेष्विति पाठः क्वचित्, भेदरहितेष्वित्यर्थः । एतेषु मध्ये के सत्याः, कतरे च न सत्याः ? किं नाम मन्मोहितान् भगवन्नीत्वा तत्परिवर्त्तनान्ये तादृशमायया निर्म्मायात्रामी स्थापिताः, किंवा भगवता सह क्रीडन्त एते मायानिर्म्मिताः सन्तीति, किंवा माया भ्रान्त्यैव ते दृश्यन्ते एते वेति चिरं ध्यात्वापि निजविचारादिप्रयासेन निश्चेतुं न शक्त इत्यर्थः । स माया विस्तारकोऽप्यात्मभूः स्वतःसिद्धज्ञानोऽपीत्यर्थः ॥४३॥ सम्मोहयन् स्वमायया वत्साद्याच्छदनात्, यद्वा, सम्मोहयितुमिच्छन्नित्यर्थः । एवं तदभिप्रायानुसारेणैव संशब्दः । विष्णुमिति सर्वव्यापकम्—मायया तस्य दृष्ट्याच्छादनं न घटेतेति भावः । अतो विमोहं मोहयितुमशक्यमपीत्यर्थः । किञ्च, विश्वमोहनमप्यजः स्वयम्भूरिति पूर्ववत् एव शब्दाभ्याम्, न तु भगवन्मायया, न तु भगवान् वेति बोध्यते ॥ ४४ ॥ तच्चोचितमेवेत्याह—तम्यामिति । नैहारतमसः कदा द्राघ्यान्धकार नैविड्यापादनेन किञ्चित् प्रयोजनसिद्ध्या दृष्टान्तान्तरमाह— खद्योतेति । सूर्य्यांशुप्रभावेण खद्योतस्य खेदस्तदर्च्चिषश्च नाश एव यथा, तद्वदित्यर्थः । इतरा इतरस्य वा माया, तां युञ्जतो मायां प्रयुञ्जतः ॥४५॥ एवं मोहेन दीनतां गते श्रीब्रह्मणि श्रीभगवानचिरात् कृपां व्यतनोदित्याह—तावदित्यादिना । कर्त्तरि षष्ठी, पश्यता पुनरपि विचारयतेत्यर्थः, किंवा, दैन्येन भयेन च श्रीभगवन्तं निरीक्षमाणेन, यद्वा, तानेव पश्यतापि सता, इत्याश्चर्य्यविशेष उक्तो भ्रमादिकञ्च निरस्तम् । विशेषतोऽदृश्यन्त दृष्टाः, यद्वा, अजे पश्यति सति व्यदृश्यन्त दृष्टिविषया जाताः ॥ ४६ ॥ चतुर्भुजत्वादिकं श्रीवैकुण्ठनाथत्वबोधनार्थम् तत्सेवकस्य श्रीब्रह्मणस्तथैव तन्माहात्म्यप्रतीतेः, यद्वा, ब्रह्मादिभिः श्रीकृष्णस्य प्रायश्चतुर्भुजादिरूपेणैव दर्शनात् ॥ ४७ ॥ श्रीवत्सो नाम दक्षिणस्तनोर्द्धे सूक्ष्मरोम्णां दक्षिणावर्त्तः श्रीभगवतोऽसाधारणलक्षणम् तेन च सारूप्यप्राप्तपार्षदसादृश्यं निरस्तम् । कटकैः पादवलयैः ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

माया विचित्रकार्यकरमच्छक्तिरूपतया शयनं मायाशय इत्यर्थः । यया तेषां त्रुटिकालज्ञानमेव जात इत्याशयः ॥४१–४२॥ तेषु वत्सबालभेदेषु सत्याः के कतरे न सत्याः इति ज्ञातुं नेष्टे न समर्थः ॥४३॥ स्वमायया स्वमोहः कथमित्यत्र विष्णुं सम्मोहयन्निति हेतुर्ज्ञेयः ॥ ४४ ॥ वत् इवार्थे नैहारं तम इव ऐश्यं सामर्थ्यं इतरमाया अनीशस्यं माया महत्यात्मनि उत्कृष्टपुरुषे ॥ ४५ ॥ पश्यत इत्यनादरे षष्ठी ॥ ४६–४७ ॥ श्रीयुक्तानि वत्सानि वक्षांसि येषां अङ्गदयुक्तो दोषो येषां रत्नशब्देन कौस्तुभयुक्ता कम्बुत्रिरेखा ग्रीवा येषां कङ्कणयुक्ता पाणयश्च येषां ते च ते च कटकैः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दृष्ट्वा च व्यतर्कयदित्याह -द्वाभ्याम् यावन्त इति । गोकुले यावन्तो वत्सा वत्सपाश्च ते सर्वे मम मायाशये मायातल्पे शयानाः सन्तोऽद्यापि नोत्थिता एव ॥ ४१ ॥ एते तु मन्मायामोहितेभ्य इतरेऽत्र दृश्यमानाः कुत्रत्याः तावन्तः मयापहृता यावन्तस्तावन्तस्तदा एव यावदद्याब्दमतीताब्दादारभ्याद्यप्रविष्टाब्दपर्यन्तं कृष्णेन समं सह क्रीडन्तो दृश्यन्ते ॥ ४२ ॥ इत्येवं वितर्कयन्मुमोहेत्याह —द्वाभ्यां एवमिति । एवमेतेषु वत्सवत्सपादिरूपभेदेषूभयेषु चिरं ध्यात्वा किं त एवैते उत भिन्नास्तथा चेत्कुत्रत्याः कुतः समागताः इत्येवं ध्यात्वाप्यात्मभूर्ब्रह्मा सदाश्रयाः सच्छब्दवाच्यपरब्रह्मभूतकृष्णात्मका इति ज्ञातुं कथञ्चन नेशे न प्रबभूव मायाश्रया एत इति पाठे भगवतः आश्चर्यशक्त्याविर्भाविता इति ज्ञातुं न प्रबभूवेत्यर्थः ॥ ४३ ॥ किं त्वेवं विष्णुं विमोहयन् विमोहयितुमुद्युक्तश्चतुर्मुखः स्वमायया स्वयमेव विमोहितः न तु कृष्णः तत्र हेतुं वदन्विशिनष्टि—विमोहं विगतमोहं विश्वं मोहयतीति तथा तं

स्वयैव माययेत्यनेन स्वशरीरकपरमात्ममाययेति विवक्षितम् ॥ ४४ ॥ विश्वमोहने भगवति मायान्तरस्याकिञ्चित्करत्वे दृष्टान्तद्वयमाह – तम्यामिति । तम्यां तमिस्रायां रात्रौ नैहारं नीहारकणप्रभवे तम इव तद्यथा न पृथगाकारकं किं तु तत्रैव लीयते यथा च खद्योतार्चिरहनि न पृथक् प्रकाशं करोति एवं महति पुरुषे युञ्जतः मायां कर्तुमुपयुञ्जानस्य पुंसः इतरा नीचा माया तत्र न किञ्चित्करोति किं त्वात्मनि स्वस्मिन्नेव ऐश्यमैश्वर्यं सामर्थ्यं निहन्ति ॥ ४५ ॥ अन्यदत्याश्चर्यमाह—तावदिति । अजस्य ब्रह्मणः पश्यतः सतः तावत्सर्वे वत्सा वत्सपाश्च तत्क्षण एव व्यदृश्यन्त कथम्भूता नीलघन इव श्यामाः ॥ ४६ ॥ चत्वारो भुजा येषां शङ्खादयः पाणिषु येषां राजीवं किरीटान्येषां सन्तीति तथा ॥ ४७ ॥ श्रीवत्सप्रभायुक्तान्यङ्गदानि दोष्षु भुजेषु येषां रत्नमयानि कम्बुवच्छङ्खवद्वर्तुलानि कङ्कणानि पाणिषु येषां ते च ते तथोक्ताश्च श्रीवत्सैरङ्कितानि वक्षांसि येषां कौस्तुभैरामुक्ताः संयुक्ताः कन्धरा ग्रीवा येषां ते बहुजन्मार्जितपुण्यवद्भिरपि तैर्नूपुरादिभिरापादमस्तकं सर्वगात्रेष्वापूर्णाः ॥ ४८–४९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

इतो हेतोः न केवलमत्रैव स्थाने किं तर्हि अब्दं व्याप्य तत्र गोकुलेऽपि क्रीडन्तः ॥ ४२–४३ ॥ मोहितानुसन्धानं अमोहितानुसन्धानं तयोर्विपर्यय एवं प्रकारेष्वेतेषु भेदेषु अनारोपितपूर्ववत्सबालभावाः मायाहृतानां वा कथं मद्वञ्चनाय भगवन्मायाकल्पितत्वमिति भावयित्वा इति भावः ॥४४॥ इतरस्य क्षुद्रस्य माया स्वप्रभावदर्शना तां युञ्जतः पुंसः आत्मनि ऐश्यं हन्ति ॥४५–४७॥ कटकैः पादवलयैः ॥ ४८–४९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ दुर्घटघटनपटीयसी शक्तिर्माया । सा च द्विविधा,–मायया बहुरूपया इत्युक्तत्वात् । तत्र प्रथमं द्वेधा–च । प्रकाशिका, आवरिका च । आद्या च द्वेधा—स्वाभाविकी ऐच्छिकी च । उभे एवानन्दशक्तित्वात् प्रकाशिके । द्वितीया तु—स्वभावसङ्कोचिनी कुहकश्चेति । उभयोरावरणधर्मत्वादावरिकात्वम् । तत्र प्रकाशिकावरियोर्माययोरक्रमेण दृष्टान्तमाह—तम्यां तमोवदित्यादि । तम्यामित्यावरिकायां दृष्टान्तः, अहनीति प्रकाशिकायाम् । महामायिकचक्रचूड़ामणौ तत्र क्वापरेषां माया, यत्र ब्रह्मणोऽपि मायैवमासीदित्याशयः । नैहारं नीहारसमूहः । कीदृशः ! घनश्यामाः पीतकौशेयवाससः ॥ ४४–५३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दृष्ट्वा चैवं व्यतर्कयदित्याह—द्वाभ्याम् । मायाशये मन्मायातल्पे ॥ ४१ ॥ मन्मायामोहितास्त एव कृष्णेनात्रनीता वेति विभाव्य मायिकानां नातिनिकटे गत्वा तर्जन्या साभिनयमाह–इतः प्रदेशादत्र किञ्चिद्दूरे एते वत्सबाला वर्त्तन्त इव तत्र विष्णुना समं क्रीडन्तः कुत्रत्यास्ते कीदृशा मन्मायामोहितेभ्य एभ्य इतरे ॥ ४२ ॥ एतेषु भेदेष्विति किमेत इह प्रकृतास्तत्राह –कृष्णसृष्टाः किं वा एत एव कृष्णसृष्टास्तत्र ते प्रकृताः किम्बा उभये एव कृष्णसृष्टाः प्रकृतास्तु कृष्णेनैव क्वापि ब्रह्माण्डान्तरे चालिताः किं वा कृष्णेन वत्सबालानां प्रकाशद्वयीकरणात् उभये एव किं वा मयि तत्र गत्वा पश्यति सति एत एव कृष्णेन तत्र नीयन्ते पुनरत्रागच्छति मयि त एवात्र नीयन्ते भवतु तर्हि युगपदेवोभयत्र दृष्टीर्निक्षिपामीति तथा कृत्वापि तानुभयत्र दृष्ट्वा चिरं ध्यात्वेति भवतु स्वीयसर्वज्ञतयैवाहमवश्यं ज्ञास्यामीति बहुसमाधिनापि ज्ञातुं नैवाशकदित्याह - सत्या इति । एतेषु भेदेषु मध्ये सत्या भगवत्स्वरूपभूता न सत्या बहिरङ्गमायासृष्टा इतीमे भेदं तु कथञ्चन ज्ञातुं संशयज्ञानविषयीकर्तुमपि नेष्टे न शशाक ॥ ४३ ॥ ततश्च ब्रह्मा मोहसमुद्रावर्त्ते निपपातेत्याह–एवमिति संमोहयन् वत्सबालस्ते येन मोहयितुमुपक्रममाणः अजो ब्रह्मापि स्वयैव मायया स्वयमेव विष्णौ प्रयुक्तया हेतुना विमोहितः भगवन्मायया विशेषेणैव मोहितः मोहितस्यापि ब्रह्मण एवं विह्वलीकरणरूपे विमोहने भगवति मायापयोगरूपोऽपराध एव कारणमित्यर्थः । न तु स्वमाययैव ब्रह्मा विमोहित इति व्याख्येयं मायायाः स्वाश्रयव्यामोहकत्वासम्भवात् उत्तरश्लोके दृष्टान्तविरोधाच्च ॥ ४४ ॥ महामायाविनि भगवत्यन्यमाया आवरणविक्षेपौ कर्तुमशक्नुवती स्वाश्रयमेव तिरस्करोतीति दृष्टान्ताभ्यामाह – तम्यान्तामस्यां रात्रौ नैहारं तमोवत् नीहारसम्बन्धि तम इव इवार्थेऽत्र वच्छब्दः "इव वद्वा च सादृश्ये" इत्यभिधानात् नैहारं तमो यथा तमीमावरीतुमसमर्थं तमी तमः सान्द्रीकृत्य तेन स्वमेवावृणोति नीहारं च तिरस्करोति तथैव ब्रह्ममाया भगवन्तं मोहयितुमसमर्था भगवदैश्वर्यमेव विपुलीकृत्य स्वमावृतवती ब्रह्माणमेव तिरश्चकारेतिदृष्टान्तेऽस्मिन्नंशेन ब्रह्ममायाया अपि हेतुत्वमस्तीत्यपरितुष्यन् दृष्टान्तान्तरमाह – स्वद्योतेति । रात्रौ यथा प्रद्योतते तथा दिवसेऽपि मत्प्रभा प्रद्योततामिति खद्योतेन प्रयुक्तापि प्रभा दिवसे उद्भवितुमेव न शक्नोति प्रत्युत तमेव भ्रष्टतेजसं सर्वान् ज्ञापयति तथैवान्यत्रैश्वर्य्यवानपि ब्रह्मा भगवत्यपि मायया निजैश्वर्य्यं प्रकटयितुकामो भ्रष्टतेजा एवाभूदित्यतः महति पुरुषे इतरमायाकर्त्री आत्मनि आत्मानं युञ्जतः स्वं प्रयुञ्जानस्य पुंसः ऐश्यमैश्वर्य्यं निहन्ति ॥ ४५ ॥ तावदिति यावदेवं ब्रह्मा मीमांसमाना व्यामुह्यति स्मेत्यर्थः । वत्साः पालाश्च पश्यतोऽजस्य पश्यन्तमप्यजमना दृत्येति भोः सत्यलोकवासिन् ! अज ! सत्यं त्वमज एवासि ईदृशैव बुद्ध्या विश्वं सृजसि अस्मान् मायया मोहयितुमिच्छसि कथञ्चिज्ज्ञातुमपि तावन्न शक्नोषि पश्येति व्यदृश्यन्त वयम् वृन्दावनीयास्तृणं चरन्तो वत्सा अपि

वत्सांश्चारयन्तो गोपबाला अपि एवं भवामेति ज्ञापयन्त इव तद्दृष्टिगोचराः स्वयमेवाऽभूवन् स्वप्रकाशत्वादिति भावः ॥ ४६–४७ ॥ श्रीर्लक्ष्मीरेषा तद्युक्तानि वत्सानि वक्षांसि येषां ते च अङ्गदयुक्ता दोषो बाहवो येषां ते च रत्नं कौस्तुभस्तद्युक्ताः कम्बवः अतिशयोक्त्या त्रिरेखाङ्किताः कण्ठाः येषां ते च कङ्कणयुक्ताः पाणयो येषां ते च ते कटकैः पादवलयैः ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वत्सवत्सपसहितं हरिं दृष्ट्वा शङ्कां कृतवानित्याह—यावन्त इति द्वाभ्याम् । मे मायाशये मदीययोगवैभवनिर्मितशयनस्थाने इत्यर्थः ॥ ४१ ॥ इतो वृन्दावनात् तत्र तस्मिन्मायाशयेऽब्दं सम्वत्सरं यावन्तः स्थापिता इति शेषः । तावन्त एव अत्र वृन्दावने मन्मायामोहितेभ्य इतरे अब्दं वर्षपर्यन्तं विष्णुना समं सह क्रीडन्तः एते कुत्रत्या इत्यन्वयः ॥ ४२ ॥ एवं शङ्कितो मुह्यदित्याह–एवमिति द्वाभ्याम् । एतेषु मायाशये शयानेषु वृन्दावने क्रीडमानेषु च भेदेषु परस्परं भिन्नेषु के सत्याः लौकिकाः कतरे नेति चिरं ध्यात्वापि कथञ्चनापि ज्ञातुं नेष्ट इत्यन्वयः ॥ ४३ ॥ स्वमायया स्वकीयया श्रीकृष्णं मोहयितुं प्रवर्तितया वञ्चनात्मिकया चेष्टया ॥ ४४ ॥ भगवन्तं मोहयन् स्वयं मोहितोऽभूदत्र किं चित्रं महात्मानं जनमपि मोहयन्मोहितो जनो भवतीत्याह—तम्यामिति । तम्यां तमिस्रायां रात्र्यां नैहारं हिमकणभवं तमो वत्तम इव यथा तत्तस्यामकिञ्चित्करं भवति प्रत्युत तत्रैव विलीयते तमोवदित्यार्षं पदम् "पदार्थः पदार्थेनाऽन्वेति नतु पदार्थैकदेशेन तद्धितार्थोपसर्ज्जनेन तमसाऽन्वयासम्भवात् खद्योतार्चिः अहनीव अहनि खद्योतार्चिर्यथा अकिञ्चित्करं भवति प्रत्युत तत्रैव विलीयते, तथा महति आत्मनि महात्मनि इतरा तदितरकृता माया अकिञ्चित्करो भवति प्रत्युत युजतः एवैश्यं बहुज्ञतां हन्ति तमेव विमोहयतीत्यर्थः ॥ ४५ ॥ अन्यदप्याश्चर्यमाह–तावदिति नवभिः । तावदेव अजस्य चतुराननस्य पश्यतः वत्साः पालाश्च सर्वे यष्टिविषाणादयश्च घनश्यामाः व्यदृश्यन्त ॥ ४६–४७ ॥ श्रीवत्सकान्तियुक्तान्यङ्गदानि दोःषु येषां रत्नमयानि कम्बुवत्त्रिधाराणि कङ्कणानि पाणिषु येषां ते च तथा ॥ ४८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

दृष्ट्वा चैवं व्यतर्कयदित्याह यावन्त इति द्वाभ्याम् । मे मायाशये मन्मायाशय्यायाम् ॥४१॥ त एव हरिणा किमिहानीता इति विभाव्य किञ्चिद् दूरात्तान् आलोच्याह इतः प्रदेशादत्र किञ्चिद्दूरे मन्मायामोहिता एते सन्त्येव तेभ्य इतरे तावन्त एते विष्णुना समं क्रीड़न्तः कुत्रत्याः ॥ ४२ ॥ अथ विरिञ्चस्य विशिष्टं मोहमाह—एवमिति । किमिहैता प्रकृतास्तत्र ते कृष्णेन निर्मिताः किन्वैत एव ते न निर्मितास्तत्र ते प्रकृताः किं वोभयेपि तेन रचिताः मन्नीताः प्रकृतास्तु तेनान्यत्र क्वापि चालिता इत्येवमेतेषु भेदेषु विशेषेषु "भेदा द्वैधे विशेषे स्या" दिति मेदिनी । चिरं ध्यात्वा दत्तदृष्टिः सन्निभाल्य सत्याः प्रकृताः के ? कतरे च नेति तेन कुहकिनैव रचिताः के वेत्यर्थः । इति कथञ्चन केनापि प्रकारेण संशयज्ञानेनापि ज्ञातुं नेष्टे न शशाक किन्तु विमोहितोऽभूदित्यर्थः ॥ ४३ ॥ स्फुटयति एवं वत्सतत्पालचौर्येण विष्णुं नन्दार्भकं मोहयन् अजो विरिञ्चोऽपि स्वयैव मायया तस्मिन् प्रयुक्तया हेतुना तत्प्रयोगापराधेन कारणेन विष्णोस्तस्य मायया विशेषेणैव मोहितः न च स्वमाययैव स्वयं विमोहित इति व्याख्येयं, मायायाः स्वाश्रयाव्यामोहकत्वात् परपद्योक्तदृष्टान्तविरोधाच्च । कीदृशमित्याह विमोहं विगतो मोहो यस्मात्तं मायानिवर्त्तकं ज्ञानपदं विश्वेषां स्वेतरेषां सर्वेषां विमोहनं योगया त्रिगुणया च यथायथं मोहकरमित्यर्थः ॥ ४४ ॥ महामायिनि हरौ तदन्यमाया न प्रभवति किन्तु स्वाश्रयमेव तिरस्करोति इति दृष्टान्ताभ्यामाह तम्यां तमिस्रायां निशि नैहारं तमोवत् इवार्थेऽत्र वच्छब्दः "इव वद्वा च सादृश्ये" इत्युक्तेः । हिमकणप्रभवं तमो यथा तमीमावरीतुमसमर्थं तत्तमो निविड़यन्निहारमेव तिरस्करोति तथा विरिञ्च–माया हरिं मोहयितुमसमर्था तस्यैश्वर्यमेव वर्द्धयन्ती विरिञ्चमेव तिरस्करोतीत्यस्मिन् दृष्टान्ते तन्मायाया हेतुत्वमस्तीत्यसतोषाद्दृष्टान्तान्तरमाह—खद्योतप्रयुक्तार्चिर्यथा अह्नि पृथक् प्रकाशं न करोतीति किन्तु तत्रैव विलीयते खद्योतस्तु भ्रष्टतेजाः प्रतीयते तथा महति पुरुषे युञ्जतः पुंस इतरा तुच्छा माया आत्मनि स्थितमैश्यं निहन्तीति विरिञ्चस्य माया विनष्टा स च भ्रष्टतेजा अभूदिति भावः ॥ ४५ ॥ सापराधेऽपि विरिञ्चभृत्यत्वात् कृपैव नन्दार्भकस्यासीदित्याह तावदिति यावदेवं विचारयन् विमुह्यति स्मेत्यर्थः । वत्सास्तत्पालाश्च सर्वे घनश्यामादिलक्षणा व्यदृश्यन्त कर्मकर्त्तरि प्रयोगः, स्वप्रकाशत्वात् स्वयमेव दृष्टिगोचरा अभूवन् । पश्यतोऽजस्येत्यनादरे षष्ठी, भो सत्यलोकनिवासिन् अज ! त्वमनयैव बुद्ध्या विश्वं सृजसि स्वामिन्यपि नन्दार्भके मायां तनोषि तदंशानप्यस्मान् वृन्दाटवी निवासिनः कथञ्चिदपि ज्ञातुं नेष्टे ! पश्यास्माकं महैश्वर्याण्यस्माभिरेव दर्शितानीति ॥ ४६–४७ ॥ श्रीः लक्ष्मीरेखा तद्वन्ति वत्सानि वक्षांसि येषां अङ्गदवन्तो दोषो भुजा येषां रत्नं कौस्तुभस्तद्वन्तः कम्बवस्तत्तुल्याः कण्ठा येषां कङ्कणानि हस्त सूत्राणि च तद्वन्तः पाणयो येषां "कम्बुः स्याद् वलये शङ्खे" इति नानार्थवर्गात् "कङ्कणं करभूषण"मिति नृवर्गात् । कटकैः पादवलयैः ॥ ४८ ॥

श्रीसुबोधिनी

आगतस्य दृष्टवतो विचारमाह **यावन्त** इतिद्वाभ्यां, **गोकुले यावन्तो बाला व**त्साश्च ते सर्व इतो मया नीता **मायामये लोके** मया **स्थापिताः शयाना** एव तिष्ठन्त्य**द्यापि पुनर्नो**त्थिताः ॥४१॥ एते चात्र पुनर्दृश्यन्त इत एवैते उत्पन्ना उद्भूता वा भवितुमर्हन्ति न तु तत आगन्तुं, अन्यथात्र **कुत्रत्याः** ? वैलक्षण्यं च दृश्यत इत्याह **मन्मायामोहि**तेभ्य **इतर एते** आश्चर्यं च **तावन्त एव**

तत्रैव स्थाने तद्रूपा एव, **विष्णुना सममब्दं क्रीडन्त एते कुत्रत्या** इतिसम्बन्धः ॥ ४२ ॥ अत्र ब्रह्मण उभयथाबुद्धिः किं भगवन्मायया तदानीमेव निर्मिता बाला मयानीता आहोस्वित् सत्या एवेत्येते वा सत्या निर्मिता वेतियुक्तिभिरनुचिन्तने क्रियमाणे निर्धारो न जात इत्याहैवमिति, **एतेषु** बालेषूभयविधेषु **चिरं ध्यात्वा**प्यात्मभूरपि **के सत्याः कतरे नेति ज्ञातुं नेष्टे** न समर्थो जातः **कथञ्चन** युक्त्यापि ॥४३॥ तर्हि किं जातमित्याकाङ्क्षायामाहैवमिति, विष्णुं **विमोहयन्** विष्णुविमोहार्थं प्रवृत्तः **स्वयमेव विमोहितो** जातः, तत्र हेतु**र्विमोहं विश्वमोहन**मिति, भगवान् स्वयं मोहरहितोन्यांश्च विमोहयति, अतो भगवता मोहितोपि **स्वयैव मायया जोपि** सन् **स्वयमेव विमोहितः** ॥ ४४ ॥ तद् युक्तमेवेत्याह **तम्या**मिति, तमिस्रा रात्रिस्तमी तस्यां **नैहारतमोवत्** लोकस्य व्यामोहार्थं नीहारादप्यन्धकारो जायते स चेद् रात्रौ भवेत् सोपि न दृश्येत, लोकानामदर्शनं त्वन्यथैव सिद्धमतो महामायायुक्ते भगवत्यन्या माया स्वपदमेव न प्राप्नोति किं पुनः कार्यं प्राप्स्यति ? एवं मोहकसाधर्म्येण ब्रह्ममायाया अप्रयोजकत्वमुक्त्वा भगवदग्रे ब्रह्मणोप्यप्रयोजकत्वमाह **खद्योतार्चिरिवाह्**नीति, **अहनि खद्योतार्चिः** स्वयमपि न प्रकाशते कुतो घटादीन् प्रकाशयिष्यति ? दूरे सूर्यप्रकाशनाशा अत्र एव **महतीतरस्य माया वैश्य**मीशत्वं वा **युञ्जतः** पुरुषस्य महतो **मायैश्यं प्रयञ्जतो** मायामैश्यं च **निहन्तीत्यर्थः** ॥ ४५ ॥ एवं चिन्ताकुलिते ब्रह्मणि भगवान् स्वरूपं प्रदर्शितवानित्याह **तावदि**ति, यावदयं विचारयति **तावत् पश्यत** एवा**जस्य** सतस्तत्क्षणादेव **सर्वे वत्सा पालाश्च धनश्यामा व्यदृश्यन्त** नीलमेघश्यामा भाता ब्रह्मणा वा दृष्टा सर्वे च **पीत**पट्टाम्बरधारिणः ॥ ४६ ॥ **चतुर्भुजाः** यस्य यस्य धर्मस्य प्राकट्यार्थं यादृशो वैकुण्ठमूर्तिस्तादृशा एत इति भुजादयो निरूप्यन्ते, चत्वारो **भुजाः** प्रत्येकं येषां, **शङ्खचक्रगदाराजीवा**नि प्रत्येकं **पाणिषु** येषां, **राजीवं** कमलं, सर्वे **किरीटिनः** किरीटाभरणयुक्ताः **कुण्डला**भरणयुक्ता मुक्ताहारयुक्ता **वनमाला**युक्ताश्च ॥ ४७ ॥ **सारूप्यं गतानामप्येतद्** भवतीत्यसाधारणाञ् छ्रीवत्सादिधर्मानाह, **श्रीवत्सो** दक्षिणावर्तरोमरेखा, **अङ्गदं** बाहुवलयं, **दोरत्नानि** दोषां बाहूनां रत्नानि बाहव एव वा **रत्नानि, कम्बु**सदृशानि **कङ्कणा**नि, एतत्सहिताः प्रत्येकं **पाणयो** येषां, **नुपूरैश्च**रणाभरणैः **कटकैर्**हस्ताभरणैश्च **भाताः कटिसूत्रे**णाङ्गुलीयकैश्च **भाताः** ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दृष्ट्वा च तर्कितवांस्तदाह—यावन्त इति । गोकुले यावन्तो बालास्ते सर्वे एव सवत्सा 'अतः स्थानान्मयाऽन्यत्र नीता' इति शेषः । हि निश्चितम् अत्र सन्देहो नास्ति । ते मे मायापाशे शयाना मन्मायामोहिताः अद्यापि पुनर्नोत्थिताः न सावधाना जाताः ॥ ४१ ॥ अतो मन्मायामोहितेभ्यः इतरे तावन्त एव, तत्रापि आब्दं वर्षपर्यन्तं विष्णुना समं कृष्णेन सह क्रीडन्तोऽत्र एते कुत्रत्याः कुत आगता इत्यन्वयः ॥ ४२ ॥ 'एवं वितर्कयन् स्वयमेव मोहं प्राप्त' इत्याह—एवमिति द्वयेन । एतेषु बालवत्सादिषु भेदेषु उभयविधेषु एवं चिरं ध्यात्वाऽपि स सकलजगत्स्रष्टृत्वेन प्रसिद्धोऽपि आत्मभूः आत्मनो भगवतो भवतीति तथा तत्पुत्रोऽपि ब्रह्मा "सत्याः पूर्वसिद्धाः के ? मया नीतास्ते चात्रत्या वा । कतरे न ? इदानीं सृष्टाः के ये मया नीतास्ते वा अत्रत्या वा" इति ज्ञातुं निश्चेतुं कथञ्चनापि नेष्टे न शशाक ॥ ४३ ॥ एवं विष्णुं सम्मोहयन् सम्मोहितुं प्रवृत्तोऽजो ब्रह्माऽपि स्वयैव मायया स्वयमेव विमोहितः । तत्र हेतुद्वयमाह—विमोहमिति । सर्वदा मोहरहितमित्यर्थः । विश्वमोहनं चेति ॥४४॥ ननु 'ब्रह्मणो माया स्वाश्रयस्य तस्यैव कथं व्यामोहिका जाता ?' इत्याशङ्क्य 'युक्तं चैतत्' इति सदृष्टान्तमाह—तम्यामिति । तमिस्रा रात्रिस्तमी, तस्यां नैहारं नीहारकणप्रभवं तमोवत् तद्यथा दिवसे प्रभवति चेत्तदा लोकव्यामोहं करोति; रात्रौ तु रात्रितमसा सह घनीभूय स्वाश्रयनीहारमेवाच्छादयति, लोकावरणं तु रात्रितमसैव सिद्धम् । अतो न तत्र किञ्चिदपि कर्तुं शक्नोति । यथा वा खद्योतस्यार्चिः प्रभा रात्रौ प्रकाशं कुर्वन्त्यपि दिवसे तु पृथगुद्भवितुमेव न शक्नोति, किन्तु सौर्यां प्रभायां लीना सती प्रत्युत स्वाश्रयं खद्योतमेव भ्रष्टतेजस्कं ज्ञापयति । एवं महति पुरुषे स्वमायां युञ्जतो निकृष्टस्य पुंसः इतरा नीचा माया तत्र न किञ्चित् कर्तुं शक्नोति, प्रत्युतात्मनि मायाविन्येव ऐश्यं विद्यमानं सामर्थ्यं निहन्ति । प्रह्लादाम्बरीषादौ मायाप्रयोक्तुर्हिरण्यकशिपुदुर्वासःप्रभृतेस्तथैव दर्शनात् ॥ तथाच मायाविनामपि मायिनि श्रीकृष्णे प्रयुक्ता ब्रह्ममाया तत्र किं कुर्यात् ? कथं वा ब्रह्मणस्तिरस्कारं न कुर्यादिति भावः ॥४५॥ 'एवं चिन्ताकुलिते ब्रह्मणि भगवान् स्वरूपं प्रदर्शितवान्' इत्याह—तावदिति । यावदयं विचारयति, तावदेवास्य ब्रह्मणः पश्यत एव सतस्तत्क्षणमविलम्बेनैव वत्साः पालाश्च सर्वे यष्टिवेण्वादयश्च भगवद्रूपा व्यदृश्यन्त, तद्वर्णयति—घनवच्छ्यामाः, । पीते कौशेये वाससी येषां ते ॥ ४६ ॥ 'व्यदृश्यन्त' इत्यस्यैव क्रियापदस्याष्टस्वपि श्लोकेषु सम्बन्धः । प्रत्येकं चत्वारो भुजा येषां ते । शङ्खादीनि प्रत्येकं पाणिषु येषां ते, तत्र राजीवं कमलम् । ते सर्वे किरीटिनः किरीटाभरणयुक्ताः । एवमग्रेऽपि ॥ ४७ ॥ श्रीवत्सो वक्षसि दक्षिणावर्तरोमरेखाविशेषः, तत्प्रभायुक्तान्यङ्गदानि दोःषु येषां ते । रत्नमयानि कम्बुवत्त्रिधाराणि कङ्कणानि पाणिषु येषां ते च ते च । तथा नूपुरादिभिराभाताः शोभमानाः ॥ ४८ ॥

अन्वितार्थप्रकाशिका

यावन्त इति ॥ गोकुले यावन्तो बालास्ते सर्वे एव सवत्साः अतः स्थानान्मयाऽन्यत्र नीता इति शेषः । हि निश्चितम् अत्र सन्देहो नास्ति । ते मे मायारूपे शये शय्यायां शयाना मन्मायामोहिताः अद्यापि पुनर्नोत्थिताः न सावधाना जाताः ॥ ४१ ॥ अत इति ॥ अतो मन्मायामोहितेभ्यः इतरे तावन्त एव तत्रापि आब्दं वर्षपर्यन्तं विष्णुना समं कृष्णेन सह क्रीडन्तोऽत्र एते कुत्रत्याः

कुत आगताः ॥ ४२ ॥ एवमिति ।। एतेषु बालवत्सादिषु भेदेषु एवं चिरं ध्यात्वाऽपि स आत्मभूर्ब्रह्मा सत्याः पूर्वसिद्धाः के मया नीतास्ते वाऽत्रत्या वा कतरे इदानीं सृष्टाः के ये मया नीतास्ते वा अत्रत्या वा इति ज्ञातुं निश्चेतुं कथंचनापि नेष्टे न शशाक॥४३॥ एवमिति ॥ एवं विमोहं सर्वदा मोहरहितं विश्वमोहनं च विष्णुं संमोहयन् संमोहयितुं प्रवृत्तोऽजो ब्रह्मापि स्वयैव मायया स्वयमेव विष्णौ प्रयुक्तया हेतुना स्वयमेव विमोहितः ।। ४४ ।। ब्रह्मणो माया स्वाश्रयं ब्रह्माणमेव कथं मोहितवतीत्यत्र आह-तम्यामिति ॥ महामायाविनि भगवत्यन्यमायाया आवरणविक्षेपकत्वाभावे स्वाश्रयतिरस्कारे च दृष्टान्तद्वयमिदम् । तम्यां तमिस्रायां रात्रौ नैहारं हिमप्रभवं तमोवत् तद्यथा तमीं नावृणोति किंतु तत्र लीनं सत् उत्तमः सान्द्रीकृत्य तेन स्वयमेव वृतं भवति यथा च खद्योतार्चिः अहनि इव अहः स्थितं सूर्यविषयं तस्य सूर्यस्यार्चिः प्रकाशयितुं न शक्तं किंतु तेनैव प्रतिहतप्रभं सञ्जायते तद्वन्महति मायां युञ्जतः पुंसः स्वा इतरा नीचा माया तत्र न किंचित् करोति । किंतु आत्मनि स्वाश्रये यदैश्यं तदेव निहन्ति । तद्धितोपसर्जनस्य तमसो नैहारमिति विशेषणं छान्दसम् इति स्वामिपादाः । परे तु अव्ययमपि वच्छब्दोऽस्ति । "इववद्वा च सादृश्ये" इति कोशात् । तेन तम इवेत्यर्थः । एतेन प्रातिपदिकेषु तद्धितस्य वतेः पाठो नोचित इत्यादि मनोरमोक्तं प्रत्युक्तमिति प्राहुः ॥ ४५ ।। तावदिति ॥ यावदयं विचारयति तावदेवाजस्य ब्रह्मणः पश्यत **एव** सतस्तत्क्षणान् अविलम्बेनैव वत्साः पालाश्च सर्वे घना इव श्यामाः पीते कौशेये वाससी येषां ते तथा भगवद्रूपा ब्रह्मणा व्यदृश्यन्त इति सर्वत्रान्वेति ॥ ४६ ॥ चतुरिति ॥ प्रत्येकं चत्वारो भुजा येषां ते शङ्खादीनि प्रत्येकं पाणिषु येषां ते तत्र राजीवं कमलं ते सर्वे किरीटिनः कुण्डलिनः हारिण. वनमालिनश्चेति ॥ ४७ ॥ श्रीति ॥ श्रीवत्सो दक्षिणस्तनोर्ध्वं रोम्णामावर्तो लक्ष्मविशेषः तत्प्रभायुक्तान्यङ्गदानि दोःषु येषाम् । यद्वा । श्रीयुक्तं वत्सं वक्षो येषाम् "उरो वत्सं च वक्षश्च" इत्यमरः । अङ्गदानि दोःषु येषां रत्नमयानि कम्बुवत्त्रिधाराणि कङ्कणानि पाणिषु येषां ते च ते च तथा नूपुरैः कटकैः पादवलयैः पारिशेष्यात् कटिसूत्रैः अङ्गुलीयकैश्च भाताः शोभिताः ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मायाशये मन्मायारूपशय्यायाम् ॥ ४१ ॥ इत एभ्यो मन्मायामोहितेभ्य इतरे तत्र व्रजे ॥ ४२ ॥ ज्ञातुं न ईष्टे न समर्थोऽस्ति ॥ ४३ ॥ विमोहं मोहवर्ज्जितम् ॥ ४४ ॥ मायाविनः सृष्टिकर्त्तुस्तस्य कथं मोह इत्याशंक्याह तम्यामिति महति आत्मनि महापुरुष पुरुषे प्रेरिता ईतरसाया इतरस्य कनीयसोनरस्य माया ऐश्वर्यकलाकौशल्यं युंजतः मायाप्रेरकनरस्य ऐश्यं सामर्थं हंति तत्र दृष्टांतौ यथा अहनि सूर्यप्रकाशरूपे दिवसे प्रकाशिता खद्योतस्य अर्चिः दीप्तिः लीना सती खद्योतसामर्थ्यं हंति लीना भवतीत्यर्थः. यथा तस्यां गाढतमोमय्यां रात्रो नैहारं हिमकणिकोद्भवं तमः स्वसामर्थ्यं त्यजति लीनतया अवतिष्ठते । इत्यर्थः गौणस्यापि तमसो नैहारमिति विशेषणमार्षं तद्वत् महामायिनि श्रीकृष्णे अल्पमायावतो विधेः माया स्वसामर्थ्यं पराभवजनकत्वे न स्वस्यैव मोहिनीत्यभिप्रायः ॥ ४५ ॥ सांप्रतमन्यदप्यद्भुतत्वमाह नवभिः तावदिति वत्साः पालाः वत्सपाश्च अजस्य विधेः ॥ ४६ ।। राजीवं पद्मं वनमालिनः वनपुष्पमालायुक्ताः ।। ४७ ॥ श्रीवत्सप्रभायुक्तानि अंगदानि बाह्वाभरणानि दोःषु करेषु येषां रत्नमयानि कंबुः शंखस्तद्वत् वर्त्तुलानिकं कणानि पाणिषु मणिबंधेषु येषां ते च ते च कटकैः पादकटकैः भाताः शोभमानाः ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चिन्तामेवाह द्वाभ्याम् ॥ किमेतदिति ।। यथा पुरेति शेषः । अखिलात्मनि, वासुदेवे श्रीकृष्णे, व्रजस्य प्रेम, अपूर्वं आसीत् । तथैव, तोकेष्वेतेषु व्रजवासिबालकेषु, सात्मनो मत्सहितस्य व्रजस्य, प्रेम वर्द्धते । एतत् अद्‍भुतं इव, अस्ति । अत्र किं किं कारणम् ॥ ४१ ॥ यद्युच्यते मायया मोह उत्पद्यते तर्हि सा लोके त्रिविधा भवति तत्रेयं का स्यादित्याह ॥ केयमिति ॥ इयं माया का किंस्वरूपा स्यात् । दैवी देवप्रयुक्ता स्यात् । वाऽथवा, नारी नरप्रयुक्ता स्यात् । वा यद्वा । आसुरी असुरप्रयुक्ता स्यात् । कुतः कस्मात् स्थानात्, आयाता भवेत् । तिसृणामप्यासामत्रासंभवान्मम त्वेवं भातीत्याह । मे भर्तुः उत मन्नाथस्य श्रीकृष्णस्यैव, प्रायः प्रायशः, इयं माया । नु निश्चितमेव । अस्तु इति पाठे मद्‍भ्रातुरेवास्त्वित्यर्थः । अन्या चेत्, मे ममापि, विमोहिनी न स्यात् । अन्या मायाऽन्येषां विमोहकर्त्री सत्यपि मन्मोहकर्त्री न स्यादित्यर्थः । मायाशब्दोऽत्राश्चर्यशक्तिपरः ।। ४२ ।। इतीति ॥ इत्येवं, संचिन्त्य, दाशार्हः स रामः, वयुनेन दिव्यज्ञानरूपेण चक्षुषा, सर्वान् वत्सान्, सवयसान् वत्सपांश्चापि, वैकुण्ठं, आचष्ट । श्रीकृष्णमेवापश्यदित्यर्थः ॥ ४३ ॥ एवं श्रीकृष्णरूपेण सामान्यतो ज्ञात्वा श्रीकृष्णं पृष्ट्वा तदुपदेशेन विशेषतो ज्ञातवानित्याह ।। नैत इति ।। एते सुरेशा देवाः न, एते ऋषयो न वा, ऋषयोऽपि नैव भवन्तीत्यर्थः । भिदाश्रये अपि, वत्सवत्सपादिभेदे सत्यपि, हे ईश, त्वं एव भासि । अतः, त्वं सर्वं पृथक् विविच्य, कथं वृत्तम् । पृथक् विवेचनां प्राप्य सर्वरूपेण त्वयैव कथं वर्त्यते स्मेत्यर्थः । वद, इति उक्तेन बलभद्रपृष्टेन, प्रभुणा श्रीकृष्णेन वक्त्रा, निगमात् संक्षेपतः एव, उक्तं, बलो बलभद्रः, अवैत् विदितवान् । अयमर्थः । पाल्यमाना वत्सास्तावदृषीणामंशाः, वत्सपाश्च देवानामंशा इति तावदहं वेद्मीदानीं तु न तथा, किं त्वस्मिन् भेदे सत्यपि मम तु त्वमेव प्रतीयसेऽतः पृच्छाम्येकेन त्वयैवमनेकविधता कथमुपात्तेति बलेनोक्ते तद्वृत्तं कृष्णेन संक्षेपत उक्तं तदा स तत्कारणमवैदिति ॥४४॥ ततः किं वृत्तं तत्राह ॥ तावदिति ॥ तावत्तावता कालेन मानुषमानेन वर्षे गते सतीत्यर्थः । आत्मभूर्ब्रह्मा, आत्ममानेन त्रुट्यनेहसा स्वमानेन त्रुटिमात्रेण कालेन, एत्य आगत्य, पुरोवत् पूर्ववत्, आब्दमब्दपर्यन्तं, क्रीडन्तं सकलं सानुचरं, हरिं श्रीकृष्णं,

ददृशे। क्वचित्तु 'सरामं ददृशे हरिम्' इत्यपि पाठोऽस्ति ॥ ४५ ॥ दृष्ट्वा च व्यतर्कयदित्याह द्वाभ्याम् ॥ यावन्त इति ॥ गोकुले, यावन्तः सवत्साः बालाः, गोकुले यावत्संख्याका वत्सा वत्सपाश्चासन्नित्यर्थः। सर्वे एव ते सर्वेऽपीत्यर्थः। मे मम, मायाशये मायामये तल्पे, शयानाः सन्तः, अद्यापि, पुनः न उत्थिताः हि ॥ ४६ ॥ इत इति ॥ अतः, मम या माया तया ये मोहितास्तेभ्य इतरेऽन्ये, इतः व्रजन्तः एते तावन्तः एव, अत्र विष्णुना समं, आब्दं वर्षपर्यन्तं, क्रीडन्तः, दृश्यन्ते। अतः तत्र मया यत्र स्थापितास्तस्मिन्स्थाने, कुत्रत्याः स्युः ॥ ४७ ॥ इति वितर्कयन् मुमोहेत्याह द्वाभ्याम् ॥ एवमिति ॥ एवमित्थं, एतेषु भेदेषु वत्सवत्सपादिरूपभेदेषु, दृष्टिं प्रसारयन्निति शेषः। स संप्राप्तमोहः, आत्मभूर्ब्रह्मा, चिरं ध्यात्वा, सत्याः, के, कतरे न सत्याः, इत्येवं ज्ञातुं, कथंचन केनापि प्रकारेण, न ईष्टे। उभयेषु मध्ये सत्यासत्यविवेकं न प्रापेत्यर्थः ॥ ४८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सत्याः के इति १०.१३.४३.

इमे वेमे सत्याः स पशुपशुपा इत्ययमभूद् भ्रमो धातुः पूर्वं तदनु किमिमे वाऽथ किमहम्।
विलोक्याजोपास्यान् पृथगिह रमेशानिति मतिः ततोऽयं को वेत्याकलितमवनावेकमखिलम् ॥ ७६ ॥
एवमेव प्रपञ्चोऽपि विचाराचिन्तितो यदि। तदा सदाऽद्वैतरूपापरोक्षमिति लक्ष्यताम् ॥ ७७ ॥ (युग्मम्)
पूर्वं वत्सप वत्सरूपधृदथो साजाश्चतुर्बाहवः सर्वेऽपीत्यलमेक इत्यनुपदं त्रेधाऽऽत्मसंदर्शनात्।
आत्माऽसङ्गचकलस्त्र्यवस्थितिजगत्साक्षीति विज्ञापितो मन्ये तत्त्वविचारदृष्टिविधिरप्यस्मै च लोकाय च ॥ ७८ ॥

कृष्णप्रिया

यहाँ देखकर ब्रह्माजी चिन्तित हुए कि गोकुल के सम्पूर्ण गोपबालक और बछड़े तो मेरी मायामयी शय्या में निद्राधीन है वे अब तक फिर उठे नहीं तो ये सब कैसे ॥ ४१ ॥ मैने माया शैय्या में मोहित किये हुए बालक और बछड़ों के अतिरिक्त कृष्ण के साथ खेलने वाले ये गोपबाल और बछड़े कहाँ से आ टपके जो ठीक उतने ही हैं और उसी स्थल में श्रीकृष्ण के साथ एक वर्ष से खेल रहे हैं ! ॥ ४२ ॥ ब्रह्माजी यही विचार रहें है कि क्या भगवान् की माया ने उसी समय बनाये हुवे बालकों और वत्सोंको मैं ले गया या तो मूल सत्य थे उनको ले गया अथवा क्या ये ही सत्य है या तो जो व्रज में खेलतें है वे ? ऐसी युक्तियों से चिन्तन करने पर भी कौन असली और कौन नकली यह निर्णय कर नहीं पाये ॥४३॥ सर्वदा मोह से पर, विश्व के मोहक, भगवान् श्री कृष्ण को संमोहित करने के लिये सक्रिय बने हुए खूद ब्रह्माजी जो अजन्मा है तो अपनी माया के प्रभाव से भगवान् को तो मोहित न कर सके किन्तु स्वयं मोहित हो गये ॥ ४४ ॥ सचमुच जैसे अपने सामर्थ्य को बताने की चेष्टा करने वाला कुहरा रात्री के घोर अन्धकार में स्वयं ही लीन हो जाता है और दिन के प्रकाश में प्रकाश बढाने की चेष्टा करने वाला तारागण अथवा तो जुगनू स्वयं दीन श्रीहत बन जाता है वैसे ही महत्पुरुष पर माया-और सामर्थ्य का प्रयोग करने वाले को तुच्छ माया कुछ नहीं कर पाती बल्कि अपने आश्रय में रहने वाली ईशता को ही नष्ट कर देती है ॥ ४५ ॥ ब्रह्माजी तो उधड़ बुन में पड़े हुए थे कि इतने में खूद के देखते देखते क्षण में ही सारे वत्सपाल-बालक और बछड़े जलधर श्याम पीताम्बर पहने दीखने लगे ॥ ४६ ॥ उनकी चार भुजाएँ थी सब के सब चतुर्भुज, चारों हस्तों में शंख-चक्र-गदा-पद्म-धारण किये हुए, मस्तक पर मुकुट, कर्णों में कर्णफूल वक्षः स्थल में मनोहर हार, पादलम्बिनी वनमाला धारण किये हुए थे ॥ ४७ ॥ वक्षःस्थल में श्रीवत्स चिह्न सुनहरी वर्तुला रोमरेखा, बाहुओं में बाजूबन्ध-अङ्गद बिजायत, बाहुओं में रत्न अथवा बाहुओं ही रत्न, कलाइयों में त्रिरेख शङ्ख जैसे कङ्कण, चरणों में नूपुर करों में कड़े, कमर में करधनी, अङ्गुलीओं में अँगूठियाँ जगमगा रही थी ॥ ४८ ॥

आङ्घ्रिमस्तकमापूर्णास्तुलसीनवदामभिः। कोमलैः सर्वगात्रेषु भूरिपुण्यवदर्पितैः ॥ ४९ ॥
चन्द्रिकाविशदस्मेरैः सारुणापाङ्गवीक्षितैः। स्वकार्थानामिव रजःसत्त्वाभ्यां स्रष्टृपालकाः ॥ ५० ॥
आत्मादिस्तम्बपर्यन्तैर्मूर्तिमद्भिश्चराचरैः। नृत्यगीताद्यनेकार्हैः पृथक् पृथगुपासिताः ॥ ५१ ॥
अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः। चतुर्विंशतिभिस्तत्त्वैः परीता महदादिभिः ॥ ५२ ॥
कालस्वभावसंस्कारकामकर्मगुणादिभिः। स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपासिताः ॥ ५३ ॥
सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तयः। अस्पृष्टभूरिमाहात्म्या अपि ह्युपनिषद्दृशाम् ॥ ५४ ॥
एवं सकृद् ददर्शाजः परब्रह्मात्म[1]नोऽखिलान्। यस्य भासा सर्वमिदं विभाति सचराचरम् ॥ ५५ ॥
ततोऽतिकुतुकोद्वृत्य[2]स्तिमितैकादशेन्द्रियः। तद्धाम्नाभूदजस्तूष्णीं पूर्देव्यन्तीव पुत्रिका ॥ ५६ ॥

---

१. ब्रह्मात्मना–विज. त. पु.। २. वृत्त–गो. प्रे. पु. ; वृत्य–श्रीधर. वंशी. वीर. विज. विश्व. शुक.।

कर्दमक्षमा

अन्वयः—सर्वगात्रेषु भूरि पुण्यवदर्पितैः कोमलैः तुलसीवनदामभिः आङ्घ्रिमस्तकं आपूर्णाः, चन्द्रिकाविशदस्मेरैः सारुणापाङ्गवीक्षितैः रजःसत्वाभ्यां इव स्वकार्थानां स्रष्टृपालकाः आत्मादिस्तम्बपर्यन्तैः चराचरैः मूर्तिमद्भिः नृत्यगीतादि अनेकार्हैः पृथक् पृथक् उपासिताः ॥ ४९–५१ ॥ अणिमाद्यैः महिमभिः अजादिभिः विभूतिभिः महदादिभिः चतुर्विंशतिभिः तत्त्वैः परीता ॥ ५२ ॥ मूर्तिमद्भिः स्वमहि ध्वस्त महिभिः कालस्वभावसंस्कारकामकर्मगुणादिभिः उपासिताः ॥ ५३ ॥ उपनिषद्दृशां अपि हि अस्पृष्टभूरिमाहात्म्याः सर्वे वत्सपालाः व्यदृश्यन्त ॥ ५४ ॥ अजः अखिलान् आत्मनः यस्य भासा इदं सर्वं सचराचरं विभाति तत् परब्रह्म एवं सकृद् ददर्श ॥ ५५ ॥ ततः अतिकुतुकोद्वृत्यस्तिमितैकादशेन्द्रियः अजः तद्धाम्ना पूर्देव्यन्ती पुत्रिका इव तूष्णीं अभूत् ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तथा भूरिपुण्यं भूरि बहुजन्मार्जितं पुण्यं तद्युक्तैर्जनैरर्पितैः ॥ ४९ ॥ चंद्रिकाविशदस्मितयुक्तैः सहारुणगुणेन च वर्तमाना येऽपांगास्तैर्वीक्षितैः । स्वकार्थानां स्वभक्तमनोरथानां रजःसत्वाभ्यां स्रष्टृपालका इव व्यदृश्यंत । सत्त्ववद्विशदस्मितेन पालका इव । रजोवदरुणगुणेन च स्रष्टार इव । तादृक्कटाक्षैर्द्योतमाना इत्यर्थः ॥ ५० ॥ आत्मा ब्रह्मा तदादिस्तंबपर्यंतैः । अनेकार्हैरनेकार्हणैः ॥ ५१ ॥ अजाद्याभिर्मायाविद्यादिभिर्विभूतिभिः शक्तिभिः । महदादिभिरिति । महत्सूत्रयोः पृथक्त्वविवक्षया चतुर्विंशतितत्त्वैर्जगत्कारणैः ॥ ५२ ॥ कालादिभिश्च तत्सहकारिभिः । तत्र कालः क्षोभकः । स्वभावः परिणामहेतुः । संस्कारो वासनाया उद्बोधकः । स्वमहिध्वस्तमहिभिर्भगवन्महिम्ना तिरस्कृतस्वातंत्र्यैरुक्तैः सर्वैरणिमाद्यैः ॥ ५३ ॥ सर्वेषां मूर्तिमत्त्वेऽपि विशेषमाह । सत्यज्ञानेति । सत्याश्च ज्ञानरूपाश्चानन्ताश्चनंदरूपाश्च तत्रापि तदेकमात्रा विजातीयसंभेदरहितास्तत्रापि चैकरसाः सदैकरूपा मूर्तयो येषां ते । यद्वा सत्यज्ञानादिमात्रैकरसं यद्ब्रह्म तदेव मूर्तयो येषां ते इति । अत एवोपनिषदात्मज्ञानं सैव दृक् चक्षुर्येषां तेषामपि हि निश्चितमस्पृष्टभूरिमाहात्म्या न स्पृष्टं स्पर्शयोग्यं भूरि माहात्म्यं येषां ते तथाभूताः संतो व्यदृश्यंतेति ॥ ५४ ॥ एवं सकृदेकदैव ददर्श । परब्रह्मणो विशेषणं यस्येति ॥ ५५ ॥ अतिकुतुकेनाश्चर्येणोद्वृत्य दृष्टीः परावृत्य हंसपृष्ठे निपत्येति वा । कुतुकशब्दे तृतीयायाश्छांदसो लुक् । यद्वा उद्वृत्यः इति छेदः । अतिकुतुकेन उद्वृत्यो विचाल्यो विलोड्यो विपर्यस्तः स्वस्मिन्निति यावत् । पाठांतरे त्वतिकुतुकेनोद्वृत्तः क्षुभितः तेषां धाम्ना तेजसा स्तब्धसर्वेंद्रियो ब्रह्मा तूष्णीमभवन्निश्चलोऽभवत् । अत्र दृष्टांतः । पूर्देवी व्रजाधिष्ठात्री काचिद्देवता तस्या अंति समीपे पुत्तिका चतुर्मुखी कृतकप्रतिमेव ॥ ५६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भूरिपुण्यानि नारायणकीर्तनादीनि, तद्वद्भिर्भक्तसहस्रेणार्पितैः । तुलसीनवदामभिर्वनमालाभिरित्यर्थः । तुलस्या उपलक्षणत्वात्, "तुलसीकुंदमंदारकरवीरसरोरुहैः । पंचभी रचिता माला वनमाला प्रकीर्तिता ॥" इति लक्षणात् । अंघ्री च मस्तकं चांघ्रिमस्तकम् । तदभिव्याप्येत्यर्थः । आङ्योगे द्वितीया । अनेन "पत्रपुष्पमयी माला या स्यादामस्तकात्पुनः । आपादं लंबमाना सा वनमाला प्रकीर्तिता ॥" इति द्वितीयलक्षणमपि वनमालाया अत्र संपन्नम् ॥ ४९ ॥ चंद्रिकाविशदस्मितयुक्तैः कौमुदीधवलेषद्धासयुतैः । अपांगाः कटाक्षाः "अपांगो ह्यंगहीने स्यात्कटाक्षे विष्गुरक्षिते" इति यादवः । इत्यर्थ इति–द्योतमाना इति पदशेषेणायमर्थः शोभनो भवतीति भावः ॥ ५० ॥ स्तंबः स्कंधहीनवृक्षस्तृणसमूहो वा "स्तंबोऽप्रकांडद्रुगुच्छतृणकीचकगह्वरे" इति धरणिः । एकैकस्याग्रे भिन्नभिन्नब्रह्मरुद्रादयो देवास्सर्वे स्थावरजंगमाश्च स्वस्वमूर्तिभेदैः स्तुवंतीति भावः ॥ ५१ ॥ आदिपदात् श्रीकीर्तिपुष्टिकांतिगिरादयो ज्ञेयाः । महिमभिः सिद्धिभिः । अणिमाद्यैरत्राप्यादिपदान्महिमगरिमादयो ज्ञेयाः ॥ ५२ ॥ कामो वासना । कर्म अदृष्टम् । गुणाः सत्त्वादयः ॥ ५३ ॥ विशेषं ब्रह्मादिभ्यो भेदम् । तत्रापि सत्यादिरूपत्वेपि । विजातीयभेदो घटात्पटस्य तद्वन्न किन्त्वेकजातीया एवेति । तत्राप्येकजातीयत्वेपि । किञ्च सति ज्ञाने स्वरूपावाप्त्या जीवा अपि सत्यज्ञानानंतादिरूपा जायंतेऽतस्तेषु जीवविशेषशंकामपानुदन्नर्थान्तरमाह—यद्वेति । व्यदृश्यंतेति पूर्वेणान्वयः । न चैतत्सर्वं भगवता मायया दर्शितमिति मंतव्यमित्याह "सत्यं विज्ञानमानंदं ब्रह्म" इति, "सत्यं ज्ञानमनंतं ब्रह्म" इति, "आनंदं ब्रह्मणो रूपम्" इत्यादिश्रुत्युक्तं सत्यादिरूपं यद्ब्रह्म तदेव मूर्तयो येषां ते तथा । उपनिषदः पश्यंति भक्त्यभावान्न तु तदर्थं जानंतीत्युपनिषद्दृशो दार्शनिकास्तैर्न स्पृष्टं भूरि माहात्म्यं येषां ते । 'भक्त्याहमेकया ग्राह्यः' इति, "भक्त्या मामभिजानाति" इति "न चक्षुषा पश्यति रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति, "आदित्यवर्णं तमसः परस्तात्" इति, "आनंदमात्रमजरं पुराणमेकं संतं बहुधा दृश्यमानम्" इति, "बहुमूर्त्येकमूर्तिकम् इति, "सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः । हानोपादानरहिता नैव प्रकृतिजाः क्वचित् ॥ परमानंदसंदोहा ज्ञानमात्राश्च सर्वतः ।" इत्यादिश्रुतिस्मृतिगम्यं ब्रह्मणोप्यप्राकृतरूपगुणादिमत्त्वं तदिच्छया भक्तिमच्चक्षुर्गम्यमस्तीति ज्ञेयम् । अन्यथा मार्कण्डेयपुराणीयसप्तशतीस्तवोक्तवाराहनृसिंहविष्णुशरीरप्रादुर्भूतवाराह्यादिशक्तिकृतरक्तबीजादियुद्धमप्यसंगतं स्यात् । अतः सर्वदैव सर्वे भगवदवतारादिविग्रहाः संतीति निश्चेयम् ॥ ५४ ॥ यस्य ब्रह्मणः "यस्य भासा सर्वमिदं

विभाति" इति श्रुतेः ॥ ५५ ॥ उपसर्गयोगेन धातोरनेकार्थताद्योतनाय—निपत्येति वेति। छांदसाश्रयणस्यागतिकगतिकत्वात्प्रकारांतरमाह—विलोड्यो विलोडितुं योग्यः। तृतीयातत्पुरुषः। 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इति विसर्गलोपः। पाठांतरे तु 'अतिकुतुकोद्वृत्तः' इति पाठे तु। तेषां सत्यादिरूपाणां वत्सपालानां तेजसा। ध्वस्तसर्वेंद्रियश्चकितेंद्रियः। अत्र निश्चलस्तूष्णीम्भावे। "पुत्तिका भूमिदंशे स्यात्तथा कृत्रिममूर्तिके" इति सात्वतः। 'पुत्रिका' इति पाठे पूर्देवी बहुलोकैः पूज्यमाना ग्रामदेवता तस्या अंति निकटे। पुत्रिका बालकैः खेल्यमानाऽपूजिता क्षुद्रा मृन्मयी पंचालिकेवेति विश्वनाथः ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भूरिपुण्यवद्भिः साधकैस्तत्तत्प्रतिमादिषु मनसा कर्मणा चार्पितैरिति प्रीत्या तेषां धारणं बहुकरणं च सूचितम् ॥ ४९ ॥ स्मेरैः अन्तः स्मितबाहुल्येन स्वयमेव चन्द्रिकानिभविशदीभूतैश्च तैरित्यर्थः। टीकायां तु स्मित एव विशदताविशेषणं तात्पर्यवशाद्दत्तमिति ज्ञेयम्। यद्वा, चन्द्रिकावद्विशदं यथा स्यात्तथा स्मेरैः स्मयमानैः मृदुपाचक इति वत् क्रियाविशेषणेन समासः स्वकार्थीनां सृष्टृपालका इति तादृक्कटाक्षैरेव तदेकसाध्यवतां स्वकशब्दोक्तानामेकान्तिभक्तानां तादृशाभीष्टसिद्धेः तत्रारुणकटाक्षैः स्रष्टार इति तत्रस्थस्यारुणगुणस्य स्वकचित्तमादकत्वात्तेनैव तद्विषयकविचित्रकामानामुत्पादनात् स्मितयुक्तकटाक्षैः पालका इति निजायोग्यत्वादिविचारेण क्षीयमाणानामपि तेषां तेनैव रक्षणात् पोषणाच्च इवेत्युत्प्रेक्षायाम् अरुणविशदगुणस्थानीयाभ्यां रजःसत्त्वाभ्यामिवेति ॥ ५० ॥ चराचरैः तत्तल्लक्षणयुक्तैः तत्तदधिष्ठातृभिः नृत्यगीतादयो येनैकार्हाः अनेकार्हणोपकरणानि तैः पृथक् पृथगिति स्वस्वाऽधिकारानुसारेणोपासनासामग्रीभेदात् इत्थं बालकादीनां तेषां प्रत्येकमेकैकब्रह्माण्डेश्वरत्वमुक्तं तथाचाग्रे श्रीब्रह्मस्तुतौ "तावन्त्येव जगन्त्यभूः" इति ॥ ५१ ॥ महिमभिरैश्वर्यरूपैः न जायत इत्यजा नित्यसिद्धा भगवती लक्ष्मी योगमायाख्या शक्तिर्वा आद्यशब्देन मायाविद्याविद्यादयः ॥ ५२ ॥ गुणाः सत्त्वादयः आदिशब्देन जातिनामादयः स्वमहिम्ना ध्वस्तोऽन्येषां महिमायैस्तैरणिमाद्यादिभिः अणिमादीनां तत्रासमोद्ध्र्वत्वात् अन्याणिमादिकरणत्वाच्च तत्त्वादीनां च जगत्कारणत्वात् ॥५३॥ एवं मूर्त्तत्वेऽपि विविधत्वेऽपि परब्रह्मैकरूपत्वेन वैशिष्ट्यमेकत्वमप्याह–सत्येति। तत्र सत्या एकरसाश्च कालस्यापि कारणत्वेनाश्रयत्वेन चाऽकल्पत्वात् तदुक्तं कालस्वभावेत्यादि "सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि" इति श्रुतेः। विशेषेण विविधं वा द्योतते दीप्तिं करोतीति विद्युत् निमेषास्तन्निमेषोन्मेषप्रभवाः कालावयवा इत्यर्थः। "यो यं कालस्तस्य तेऽव्यक्तबन्धो! चेष्टामाहुः" इत्याद्युक्तत्वात् ज्ञानरूपाः स्वप्रकाशत्वेनाजडत्वात् तदुक्तं "पश्यतो ऽजस्य तत्क्षणाद्व्यदृश्यन्त" इति न चक्षुषा पश्यति रूपमस्य" यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्, आदित्यवर्णं तमसः परस्तात्" इत्यादि श्रुतेः। नित्याव्यक्तोपि भगवानीक्षते निजशक्तित इति नारायणाध्यात्म्याच्च अनन्ताः परिच्छिन्नप्रायत्वेऽप्यचिन्त्यशक्त्याविभुत्वात् "यस्त्वेतमेवमादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते" इति श्रुतेः। "न चान्तर्न बहिर्यस्य" इत्युक्तत्वाच्च आनन्दमात्राः निरुपधिपरमप्रेमास्पदसर्वांशत्वात् तदुक्तं "किमेतदद्भुतमिव वासुदेवे खिलात्मनि" इत्यादि "आनन्दं ब्रह्मणो रूपम्" इति श्रुतेः। विदितोऽसि भवान् साक्षादित्याद्युक्तत्वाच्च बहुत्वं चैकस्यैवाविर्भावाभेदविवक्षया "आनन्दमात्रमजरं पुराणमेकं सन्तं बहुधा दृश्यमानम्" इति श्रुतेः। युगपदनन्तगुणरूपस्यैव सतस्तस्येच्छानुसारेण विशेषदर्शनात् अतो बालवत्सादिरूपं च तत्र नागन्तुकं तदुक्तं "मणिर्यथा विभागेन" इत्यादि अत एवैकत्वविवक्षया टीकायामाह, यद्वेति वक्ष्यते च श्रीमताऽक्रूरेण "बहुमूर्त्त्येकमूर्त्तिकम्" इति एवं श्रुतिप्रमाणकत्वादस्य च सत्येत्यादिवाक्यस्य पञ्चमवेदत्वात् "सर्ववेदान्तसारं हि" इति "सर्ववेदेतिहासानां सारं सारं समुद्धृतम्" इति न्यायेन तत्साररूपत्वाच्च तैरप्युपनिषच्छब्देन वेदान्तो न व्याख्यातः वक्ष्यते च "अतन्निरसनमुखब्रह्मकमितौ" इति सदेर्गत्यर्थत्वाज्ज्ञानार्थकत्वं तच्चेश्वरज्ञानादवरमात्मज्ञानमेवेति "यतो वाचो निवर्त्तन्ते" इत्यादिरीत्या वा तथोक्तम् आनन्त्यानादित्वात् भूरिमाहात्म्यशब्देन निर्विशेषत्वप्रतिपादनं च निरस्तं मात्रपदेन च ज्योतिरादिधर्माणां शुक्लादिगुणानामिव तद्धर्माणां तत्स्वरूपान्तःपातित्वं विवक्षितं प्राकृतागन्तुकत्वं च निषिद्धं यथा –

"न तस्य कार्य्यं करणं च विद्यते, न तत्समश्चाभ्यधिकश्चदृश्यते। परा स्यशक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च" ॥

इति श्रुतेः। अत एव प्रकृतिक्षोभात् पूर्वं स ऐक्षत स आसीदित्यादि ॥ ५४ ॥ सकृद्युगपदित्यर्थः। परं ब्रह्म सत्यज्ञानादिरूपं तदेकरूपात् तर्हि कथं दृष्टिविषयत्वं ? तत्राह–यस्येति। अतः स्वयंप्रकाश्यत्वात् सर्व प्रकाशकत्वाच्च तदिन्द्रियाणि स्वशक्त्या प्रकाश्य स्वयमिति प्रकाशते इति भावः। अत एव व्यदृश्यन्त इति कर्त्तारं विनैवोक्तमिति दिक् किं त्वनेन प्रकारेण पूर्ववत्सबालकानां महिमैव दृश्यते स्म मम लीलेयमेतादृशैरेव सिद्ध्यति अन्यथा मायिकसृष्टिरेवाकरिष्यत इति ज्ञापनायेति गम्यते ॥ ५५ ॥ अथ तस्य मोहमाह–तत इति। तद्धाम्ना तेषां प्रभावेण अन्ति तेषामन्तिके स्तिमितैकादशेन्द्रियो निश्चेष्टः सन् तूष्णीमभूत् किञ्चिद्वक्तुमपि न शक्तवानित्यर्थः। तत्र किरीटादिशोभस्य स्तब्धस्य च तस्योपमा पूर्देवी नानापरिच्छदैः पुरजनाराध्या प्रतिमेवेति अन्यत्तैः तत्र दृष्टीः परावर्त्य तद्दृष्टीनां चतुर्दिक्षु स्थितत्वात्ताभिः पर्यायेण दृष्ट्वेत्यर्थः। तस्मिन्निति हंसपृष्ठ इत्यर्थः। खर्परत्वाद्विसर्गलोपः ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

भूरिपुण्यवद्भिरर्पितैरिति प्रीत्या तेषां धारणं सूचितम्, यद्वा, भूरिपुण्यं भक्तिस्तद्वदित्युत्प्रेक्षया तेषां तन्मयताभिप्रेतातः सर्वगात्रेष्वपि तैर्धृतैरत एवाङ्घ्रितो मस्तकपर्य्यन्तमापूर्णाः ॥४९॥ स्वकार्थानां स्रष्ट्रपालका इति तादृक्कटाक्षैरेव तदेकसाध्यवतां भक्तानां सर्वाभीष्ट सिद्धेस्तत्र कटाक्षैः स्रष्टाव इति तैरेव तद्विषयकविचित्रकामानामुत्पादनात् स्मितैः, पालका इति निजायोग्यत्वादिविचारेण क्षीयमाणानामपि तेषां तैरेव रक्षणात् पोषणाच्च। इवेति लोकोक्तौ; यद्वा, रजःसत्त्वाभ्यामिवेति तत्रारुण्यवैशद्याभ्यां रजःसत्त्वसाम्येन तेषां तादृशत्वमुक्तम्, तथा कटाक्षाणां कादचित्कत्वेन स्रष्टृत्वं स्मितानाञ्च सदातनत्वेन पालकत्वमिति, अन्यथान्योऽन्यं तेषां तत्तत् सम्भवेदिति दिक् ॥ ५० ॥ चराचरैस्तत्तल्लक्षणयुक्तैस्तत्तदधिष्ठातृभिस्तत्रचराः पवनादयः, अचरा हिमालयादयः। नृत्यगीतादयो ये नैकार्हा अनेकार्हणोपकरणानि तैः। पृथक् पृथगिति स्वस्वाधिकारानुसारेणोपासनसामग्रीभेदात्। इत्थं बालकादीनां तेषां प्रत्येकमेकैकब्रह्माण्डेश्वरत्वमुक्तम्। तथा चाग्रे श्रीब्रह्मस्तुतौ (भा० १०।१४।१८) 'तावन्त्येव जगन्त्यभूः' इति, यद्वा, नृत्यादिनोपासिताः। कथम्भूतैश्चराचरैः एकार्हैरेकस्य श्रीभगवतो योग्यैस्तत्तन्मुखैर्वैकुण्ठलोकवर्त्तिभिर्भगवद्विभूत्याख्यैरित्यर्थः। सर्वेषां तेषां तादृगुपासनायोग्यत्वात्तथापि जगन्त्यभूरिति सिद्ध्येदेव तत्तन्मदुपासनात् ॥ ५१ ॥ महिमभिरैश्वर्य्यरूपैः। न जायत इत्यजा नित्यसिद्धा सच्चिदानन्दविग्रहा भगवती लक्ष्मीर्योगमायाख्या शक्तिर्वा। आदिशब्देन मायाविद्याऽविद्यादयस्ताभिर्विभूतिभिः शक्तिरूपाभिः ॥ ५२ ॥ गुणाः सत्त्वादयः। आदिशब्देन जातिनामादयः। स्व० महिम्ना ध्वस्तो महिमान्येषां यैरणिमाद्यैरणिमादीनां महासिद्धिरूपत्वात्तत्त्वादीनाञ्च जगत्कारणत्वात् ॥ ५३ ॥ एवं देहेन्द्रियादितत्तच्चेष्टादिना विविधभेदेन भिन्नानामप्यभेदमाह–सत्येति। इत्थं श्री वैष्णवसम्मतो भेदाभेदन्यायः सिद्धः। नन्वेकमेव वस्तु भिन्नञ्च मायाव्यतिरेकेण कथं सम्भवेत्? सत्यम्; परमदुरूहमेवैतदित्याशयेनाह —अस्पृष्टेति। उपनिषद्दृशामात्मतत्त्वज्ञानाम्, यद्वा, ब्रह्मादीनां सारज्ञानहेतवो या उपनिषदः सत्यलोकादौ मूर्त्तिमत्यस्तासां दृशोऽक्षीणि ताभिरप्यस्पृश्य भूरिमाहात्म्या इत्यर्थः। श्रीभगवत्प्रसादविशेषेण तत्प्रियजनानुग्रहेणैव शास्त्रसारसिद्धान्तरूपं तत्तत्त्वं विज्ञेयं स्यात्, न तु शास्त्रादिपाठज्ञानेनेति भावः। अत एव वक्ष्यति (भा० १०।१३।५७) 'अतर्क्ये निजमहिमनि' इति ॥ ५४ ॥ सकृत् युगपदित्यर्थः। परब्रह्म श्रीकृष्णस्तदात्मकान्। नन्वधिकारवता श्रीपरमेष्ठिना कथमेवं द्रष्टुं शक्तम्? तत्राह–यस्येति। परब्रह्मणा श्रीभगवता कृपया तस्मिन् प्रकाशितमिति भावः। यद्वा, यस्याजस्य भास्तेजः स्वभाव इत्यर्थः, तेनेदं जगत् सर्वं विशेषेण भाति कर्म्म-ज्ञान-भक्त्यादिसम्पत्त्या द्योतत इति श्रीभगवत्प्रसादेन तस्य स्रष्टृत्वात् योगेश्वराणां सनकादीनां तथा (भा० २।९।५) 'जगतां परो गुरुः' इत्युक्तेर्भगवद्भक्तानां श्रीनारदादीनामपि गुरुत्वात् स्वत एव तद्योग्यतास्त्येवेति भाव इति भ्रमादिना दर्शनमपि निरस्तम् ॥ ५५ ॥ ततः परमविस्मयेन स्तम्भितः स्तुतिप्रणामादिकमपि कर्त्तुं नाशक्नोदित्याह–तत इति। तूष्णीमभूत् निश्चेष्टो वृत्त इत्यर्थः। तत्र दृष्टान्तः–पूर्देवी पौरैः पूज्यमाना देवी, तस्या अन्तिके वर्त्तमाना या पुत्रिका शोभार्था चित्रादिमयी पुत्तलिका, सा यथा पूजाद्यभावेन निश्चेष्टा दृश्यते, तथेत्यर्थः ॥ ५६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

दामभिः मालाभिः भूरिपुण्यं भगवदानुकूल्यप्रयोजिततत्सन्तोषरूपं तद्युक्तैरित्यर्थः ॥ ४९ ॥ स्वकानां भक्तानां येऽर्थाः सांसारिकपदार्थभिन्नाः तन्नित्यकैङ्कर्याद्यभिलाषरूपाः ॥ ५० ॥ आत्मा ब्रह्मा मूर्त्तिमद्भिश्चराचरैरिति चिदचितोरज्जुभुजङ्गवदध्यस्तत्वनिरासः अणिमाद्यष्टैश्वर्यैर्जातैर्महिमभिर्माहात्म्यैः परीताः अजाद्याभिर्नवशक्तिभिः श्रिया पुष्ट्येत्यादिभिः द्वादशभिर्वा चतुर्विंशतितत्त्वैश्च परीताः ॥ ५१–५२ ॥ कालादिभिः षड्भिः जीवधर्मज्ञानावरकैः मूर्त्तिमद्भिरित्यनेन नामप्रपञ्चनिरासः ॥ ५३ ॥ सत्यत्वज्ञानत्वानन्तत्वानन्दत्वानि मात्राः परिकरः सामग्री यासां अत एव एकरसाः विकारादिरहिताः मूर्त्तयो येषां ते तथाभूताः ॥ ५४ ॥ यस्य भासा सङ्कल्परूपेण ज्ञानेन इदं सचराचरं चेतनचेतनात्मकं जगद्विभाति तादृक् परब्रह्मात्मनः परब्रह्मसङ्कल्पसिद्धान्सर्वान् सकृद्ददर्श ॥ ५५ ॥ अतिकातुकेन प्रथमोद्वृत्तानि प्रसृतानि दर्शनश्रवणादिप्रवृत्तानि पश्चात् स्तिमितानि अविषयत्वेन निश्चलानीन्द्रियाणि यस्य सः पूर्देव्यन्ती पूर्देवीत्वमाचरन्ती पुत्रिका इव चतुर्मुखी ब्रह्ममूर्तिः तूष्णीं स्थिता अभूदिति ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

चन्द्रिकावद्विशदस्मितयुक्तैरारुण्यसहितापाङ्गवीक्षितैः स्वकार्थानां स्वभक्तमनोरथानां स्रष्टारः पालकाश्चेति रजःसत्त्वाभ्यां स्रष्टृपालकाः सत्त्ववद्विशदस्मितेन पालका इव रजोवदरुणगुणेन स्रष्टार इव तादृक्कटाक्षैर्द्योतमाना इत्यर्थः ॥ ५० ॥ आत्मा चतुर्मुखस्तत् प्रभृतिभिस्स्तम्बपर्यन्तैर्मूर्त्तिमद्भिश्चराचरैः कर्तृभिर्नृत्याद्यनेकार्हणैः साधनैरुपासिताः अत्राचराणामपि तदुपासनोचितमूर्त्तिमत्त्वं तत्तदभिमानिदेवताद्वारेणेति बोध्यम् ॥ ५१ ॥ अजाद्याभिर्विभूतिभिः कार्योपयोगिनीभिः शक्तिभिर्महदादिभिश्चतुर्विंशतिभिस्तत्त्वैरजाद्याभिरिति प्रकृतेः पृथगुक्तेस्तत्त्वादीनां जीवात्मना सह चतुर्विंशतित्वम् ॥ ५२ ॥ कालो निमेषादिवत्सरान्तः गुणक्षोभहेतुः स्वभावः परिणामहेतुः संस्कारश्चोद्बोधहेतुः कामः कर्महेतुः कर्म च तद्देहोपलब्धिहेतुः गुणाः सत्त्वादयो ज्ञानविक्षेपमोहहेतवः

एतैरुपासिताः कथम्भूतैः स्वस्य भगवतो महिम्ना ध्वस्तमहिभिस्तिरस्कृतस्वातन्त्र्यैर्मूर्त्तिमद्भिश्च ॥ ५३ ॥ सत्येति । नित्यनिर्विकारज्ञानानन्दापरिच्छिन्नमात्रस्य परब्रह्मण एकमूर्त्तय असाधारणमूर्त्तयः मात्रशब्देन विकारजाड्यदुःखपरिच्छेदानां व्यावृत्तिः उपनिषदां दृशां मनोवृत्तीनामप्यस्पृष्टमविषयभूतमियत्तापरिच्छेतुमशक्यमनवधिकं माहात्म्यं येषाम् ॥ ५४ ॥ अखिलान्वत्सान्वत्सपांश्च परब्रह्माभिन्नानेवमजश्चतुर्मुखः सकृद्ददर्श । ब्रह्म विशिनष्टि, सचराचरमिदं जगद्यस्य भासा भाति तत्परब्रह्मात्मन इत्यन्वयः तद्धाम्ना तूष्णीमभूदित्युत्तरेण वा ॥ ५५ ॥ अतिकौतुकेनात्याश्चर्येणोद्वृत्त्य दृष्टिं परावृत्त्य हंसपृष्ठे निपत्य कौतुकशब्दोत्तरतृतीयायाश्छान्दसो लुक् अतिकौतुकाद्रिक्तस्तिमितेति पाठे अतिकौतुकेन उद्रिक्तान्युत्कटान्यत एव स्तिमितानि दीनप्रायाणि पारवश्यं प्राप्तानीति यावत्तान्येकादशेन्द्रियाणि यस्य स इत्यर्थः । तेषां धाम्नाऽभिभूत इति शेषः । अजो ब्रह्मा तूष्णीं बभूव निश्चलोऽभवत् यथा पूर्देवी व्रजाधिष्ठात्री काचिद्देवता तस्या अन्ति समीपे पुत्रिका चतुर्मुखी कनकप्रतिमा तद्वदित्यर्थः ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अरुणविशदस्थानीयाभ्यां रजःसत्त्वाभ्यामिवेत्युत्प्रेक्षा ॥ ५० ॥ चराचरैस्तत्तदधिष्ठातृदैवतैः ॥ ५१–५३ ॥ सत्येति । किञ्च, सत्याः सर्वकारणत्वेन ज्ञानरूपाः स्वप्रकाशत्वेन अनन्ता विभुत्वेन आनन्दा निरुपाधिपरमास्पदत्वेन एकरसाः कालकारणत्वेन अत एवैकत्वं पृथक्प्रकाशत्वेन च पृथक्त्वमपीति ज्ञेयम् ॥ ५४ ॥ एवं चेत् कथं ददर्श ? तत्राह—यस्येति । तस्य सर्वप्रकाशकत्वात् स्वप्रकाशकत्वाच्चेत्यर्थः ॥ ५५ ॥ तेषां धाम्ना प्रभावेण अन्ति तेषामेव समीपे काचित् पूर्देवी पुरजनाराध्यमाना यथा सशोभा निश्चेष्टा च सैव ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु कथमियं प्रकाशिका माया ? एषापि कुहकत्वेनावरिकैव भवतु, तन्नेत्याह - सत्यज्ञानानन्तानन्दमात्रैकरसमूर्त्तयः । सत्यज्ञानानन्तानन्दमात्रैकरसो ब्रह्म तद्रूपा मूर्त्तिर्येषामिति, नहि ब्रह्मणि कुहकांशकाः । ननु कथमेतत् सत्यज्ञानानन्तानन्दमात्रैकरसस्य नानात्वम् ? श्रुत्यप्रतिपादितत्वादित्याशङ्क्याह—अस्पृष्टभूमिमाहात्म्या अपि ह्युपनिषद्दृशाम्, श्रुत्यगोचरत्वात् कथं नाम तदप्रतिपादितत्वादि ॥ ५४–५६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

चैतन्यता अपरिच्छिन्नता व्यापकता च पर्याप्ता, किं पुनस्तस्येति भावः । यद्वा, सत्यज्ञानानन्तानन्दमात्रैकरसो ब्रह्म तदेव मूर्त्तिर्येषां ते तथा, तेन विभूतिभूतस्य विग्रह व्यूहस्य ब्रह्मत्वे विभोः श्रीकृष्णस्य विभूतिर्ब्रह्मेति यत् सात्वतैरुच्यते, तत्र का प्रतिपत्तिरिति, तर्हि कथमेवं श्रुतिसिद्धं स्यात् ? तत्राह—अस्पृष्टभूरिमाहात्म्या इत्यादि । उपनिषद एव दृशश्चक्षूंषि ताभिरप्यस्पृष्टं भूरिमाहात्म्यं येषाम् । येषाम् माहात्म्यं श्रुतिरूपचक्षुषामपि ग्राह्यं न भवतीति श्रुति-सिद्धत्वे कोऽवसरः ? ॥ ५५–५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भूरिपुण्यानि श्रवणकीर्त्तिनादिभजनानि तद्वता भक्तसहस्रेणार्पितैः ॥ ४९ ॥ चन्द्रिकावत् विशदं यथा स्यात्तथा स्मेरयन्त इति चन्द्रिकाविशदस्मेराणि मृदुपाचक इतिवत्समासः अरुणापाङ्गेन सह वर्त्तमानानि यानि सम्मुखवीक्षितानि तैः स्वकार्थानाम् अनुकम्पनीयस्वभक्तमनोरथानां रजःसत्त्वाभ्यां स्रष्टृपालका इव व्यदृश्यन्त । रजसेवारुणगुणेन स्रष्टार इव सत्त्वे व विशदस्मितेन पालका इव ॥ ५० ॥ आत्मात्र ब्रह्मा नैकार्हैः अनेकार्हणैः ॥ ५१ ॥ महिमभिरैश्वर्य्यैः अजा माया तदाद्याभिः शक्तिभिः चतुर्विंशतिभिरिति महत्त्वसूत्रत्वतयोः पार्थक्यविवक्षया तत्त्वैर्जगत्कारणैः ॥ ५२ ॥ कालादिभिश्च तत्सहकारिभिः तत्र स्वभावः परिणामहेतुः संस्कार उद्बोधकः स्वमहिध्वस्तमहिभिर्भगवन्महिम्ना तिरस्कृतस्वातन्त्र्यैः ॥ ५३ ॥ न चैतत् सर्वं भगवता मायया दर्शितमिति मन्तव्यमित्याह—सत्येति । सत्याश्च ज्ञानरूपाश्च अनन्ताश्च आनन्दरूपाश्च तत्रापि तदेकमात्राविजातीयसम्भेदरहिताः तत्राप्येकरसाः कालपरिच्छेदकाभावात् सदैकरूपा मूर्त्तयो वपूंषि येषां ते । यद्वा "सत्यं विज्ञानमानन्दं ब्रह्मेति, सत्यं विज्ञानमनन्तं ब्रह्मेति, आनन्दं ब्रह्मणो रूपम्" इत्यादि श्रुत्युक्तं सत्यादिरूपं यद्ब्रह्म तदेव मूर्त्तयो येषां ते । ननु, दृश्यत्वबहुविविधत्वादिकं ब्रह्मणो नैव श्रूयते वेदान्तदर्शिनस्तत्राह–अस्पृष्टेति । उपनिषदः पश्यन्ति भक्त्यभावान्नतु तदर्थं जानन्तीत्युपनिषद्दृशो दार्शनिकास्तेषां तैर्न स्पृष्टमपि भूरिमाहात्म्यं येषां ते "भक्त्याहमेकया ग्राह्यः" इति "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" इति "न चक्षुषा पश्यति रूपमस्य, यमेवैष वृणुते तेन लभ्यस्से एष आत्मा विवृणुते तनुं स्वाम्" इति आदित्यवर्णं तमसः परस्तात्" इति आनन्दमात्रमजरं पुराणम् एकं सन्तं बहुधा दृश्यमानम्" इति "बहुमूर्त्त्यैकमूर्त्तिकम्" इति—

"सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः । हानोपादानरहिता नैव प्रकृतिजाः क्वचित् ।
परमानन्दसन्दोहा ज्ञानमात्राश्च सर्वतः" ॥

इत्यादि श्रुतिस्मृतिप्रसिद्धं ब्रह्मणोऽप्यप्राकृतरूपगुणादिमत्त्वं तदिच्छया भक्तिमच्चक्षुर्गम्यमस्तीति ज्ञेयम् ।। ५४ ॥ यस्य परब्रह्मणः ॥ ५५ ।। अतिकौतुकेन उद्वृत्त्यानि विलोड्यानि स्तिमितान्यानन्दस्तन्धानि एकादशेन्द्रियाणि यस्य स उद्वृत्त इति पाठे अतिकुतुकेन क्षुभितः तेषां धाम्ना तेजसा तूष्णीं किमपि वक्तुं चेष्टितुं चाशक्तोऽभूत् । अत्र दृष्टान्तः पूर्देवी बहुलोकैः पूज्यमाना ग्रामदेवता तस्या अन्ति निकटे पुत्रिका बालकेन खेल्यमाना अपूजिता क्षुद्रा मृण्मयी पञ्चालिकेव ।। ५६ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भूरि पुण्यवदर्पितैः बहुजन्मार्जितपुण्यवद्भिर्निवेदितैः ।। ४९ ॥ चन्द्रिकावत् चन्द्रज्योत्स्नावत् विशदस्मितयुक्तैः आरुण्यसहितापाङ्गवीक्षितैः स्वकार्थानां स्वभक्तपुरुषार्थानाम् रजःसत्त्वाभ्यां स्रष्टृपालका इव विशदस्मितेन पालकाः इव व्यदृश्यन्त यथा केचित्सत्त्वेन स्वभक्तमनोरथपालकाः अरुणगुणेन स्रष्टार इव व्यदृश्यन्त यथा केचित् रजसा स्वभक्तमनोरथस्रष्टार इत्यर्थः ॥ ५० ॥ चरैरचरैश्च आत्मादिस्तम्बपर्यंतैः स्वप्रभृतिभिस्तम्बान्तैः तावन्त्येव जगन्त्यभूरिति वक्ष्यमाणात्स्वस्वब्रह्माण्डयुक्तैः कर्तृभिः नृत्यं च गीतं च आदिना वाद्यं च तैः अनेकैरर्हैः अर्हणैश्च पृथक् पृथगुपासिताः तत्राचरकृता तदुपासना "ता आप अब्रुवन्" इति वद्देवताभिप्रायेण युज्यते ॥५१॥ अणिमाद्यैरैश्वर्यैः न जायन्ते कर्मकालादिपारवश्यतया यास्ताः अजाः श्रीदेवीलीलादेव्याद्या आदिना पार्षदसङ्ग्रहः ताभिः विभूतिशब्देन परमधामादिसंग्रहः परमवैकुण्ठरमावैकुण्ठश्वेतद्वीपादिभिः महतः आदिर्महदादिः प्रकृतिस्तदादिभिः प्रकृतिमहदहङ्कारादिभिरित्यर्थः ॥ ५२ ॥ कालो गुणक्षोभादिहेतुः भगवच्छक्तिविशेषः स्वभावः परिणामहेतुः परिणामिपदार्थस्य प्रकृत्यादेर्धर्मविशेषः संस्कारः उद्बोधकः कामः कर्महेतुः कर्माणि चतुर्वर्गसाधनानि गुणाः तत्तत्पदार्थधर्मभूताः आदिना सर्वपदार्थप्रतिवादका वेदेतिहासपुराणादिसङ्ग्रहास्तैः स्वमहिध्वस्तमहिभिर्भगवन्महिम्ना तिरस्कृतमहिमभिः सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां विशेषणमिदम् ॥५३॥ यतस्ते वेदान्तैकवेद्यस्य परब्रह्मपुरुषोतमवासुदेवनारायणादिसंज्ञस्यानन्ताचिन्त्यस्वाभाविकगुणशक्तिसिन्धोः स्वभावतोपास्तसमस्तदोषस्य श्रीकृष्णस्य मूर्त्तयोऽत एवम्भूता व्यदृश्यन्तेत्याह–सत्येति । सत्यज्ञानाऽनन्ताऽऽनन्दमात्रैकरसस्य श्रीकृष्णस्य मूर्त्तयः मात्रच्प्रत्ययः विकारित्वजडत्वपरिछिन्नत्वनिरानन्दत्वादिदोषैरसंस्पृष्टत्वं भगवतो द्योतयति, इयत्तानवच्छिन्नत्वं तेषां द्योतयन्नाह–अस्पृष्टेति । उपनिषच्छब्देन तदभ्यासजन्यं ज्ञानं सैव दृक् चक्षुर्येषां तेषामपि न स्पृष्टं परिच्छेतुं शक्यं भूरिमाहात्म्यं येषां ते तथाभूताः व्यदृश्यन्तेति ॥५४॥ उक्तार्थं निगमयति–एवमिति । अजो ब्रह्मा एवं सकृत् युगपत् परब्रह्म श्रीकृष्णः तदात्मनस्तद्रूपान् अखिलान् वत्सादीन् ददर्श यस्य परब्रह्मणः श्रीकृष्णस्य ।। ५५ ॥ ततस्तदाश्चर्यदर्शनादेव कुतुकानि सर्वाणि आश्चर्याणि अतिक्रान्तः अतिकुतुकः तेनैवाश्चर्यदर्शनेन तुच्छीकृतेतराश्चर्य इत्यर्थः । "अत्यादयः क्रान्ताद्ये द्वितीया" इति समासः । तद्धाम्ना तेषां तेजसास्तिमितैकादशेन्द्रियः स्तब्धसकलेन्द्रियः अत एव उद्वृत्य सकलेन्द्रियवृत्तीः परावृत्य तूष्णीं निश्चलोऽभूदित्यन्वयः । तूष्णींभावे दृष्टान्तः पूर्देवो व्रजाधिष्ठात्री काचिद्देवता तस्या अन्ति समीपे पुत्रिका चतुर्मुखी कनकप्रतिमेव ॥ ५६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

भूरीणि पुण्यानि विशुद्धिकराणि श्रवणकीर्त्तनादीनि तद्वद्भिर्भक्तैः ।। ४९ ।। चन्द्रिकावद्विशदैः स्मेरैः स्मितैः अरुणापाङ्गवीक्षितेन सहितैः स्वकार्थानां स्वानुकम्पितभक्तमनोरथानां रजः सत्त्वाभ्यां स्रष्टृपालका इव व्यदृश्यन्त रजसेवारुणापाङ्गवीक्षणेन स्रष्टारः सत्त्वेनैव विशदस्मितेन पालका इत्यर्थः ॥ ५० ॥ आत्मात्र विरिञ्चस्तदादिभिः नृत्यगीतादिभिर्नैकार्हैरनेकार्हणैः ॥ ५१ ॥ महिमभिरैश्वर्यैः अजा मूलप्रकृतिस्तदाद्याभिर्विभूतिभिः शक्तिभिः चतुर्विंशतिभिरिति बहुवचनं प्रत्येकं तावद्भिस्तत्त्वैरुपासनात् चतुर्विंशतित्वं च महत्तत्त्वसूत्रयोर्भेदविवक्षया ।। ५२ ॥ कालादिभिश्च तत्सहकारिभिर्मूर्तिमद्भिस्तत्तदधिष्ठातृभिः, कीदृशैरित्याह—स्वमहीति । भगवन्महिम्ना तिरस्कृतस्वातन्त्र्यैरित्यर्थः, कालः क्षोभकः, स्वभावः परिणामहेतुः संस्कारः उद्बोधहेतुः, कामो विषयाभिलाषः कर्मपुण्यादिरूपं गुणाः सत्त्वाद्याः ॥ ५३ ॥ न चैते हरिणा मायया त्रिगुणया विरचिता इत्याह—सत्येति । "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्मे"ति श्रुत्युक्तं यत् सत्यज्ञानानन्तानन्दं ब्रह्म तन्मात्रास्तदेकरूपा अत एकरसाः कूटस्था मूर्त्तयो येषां ते देहदेहिभेदाभावेऽपि तद्भेदव्यपदेशः सत्ताऽसतीत्यादिवद्विशेषादेवेति बोध्यम् । उपनिषद् वेदान्तोदृक् येषां तैरप्यस्पृष्टं साकल्येनागृहीतं माहात्म्यं येषां ते "नमो वेदान्तवेद्यायौपनिषदः पुरुषः" इति श्रुतेरुपनिषद्वेद्यत्वं "कात्स्न्र्येन नाजोऽप्यभिधातुमीश" इति स्मृतेः साकल्येनावेद्यत्वम् ।। ५४ ।। प्राकृतैर्महदादिभिस्तत्त्वैरुपासितान् ब्रह्मात्मकान् वत्सतत्पालान् सकृत् प्रदर्श्य चिन्मयैस्तैरुपासितांस्तानतिकृपालुः सकृददर्शयदित्याह—एवमिति । अखिलान् वत्सतत्पालांस्तत्त्वपर्यन्तान् परब्रह्मात्मकानजः सकृद्ददर्श । एवमिति संख्यया नामभिश्च पूर्वंतुल्यानित्यर्थः । यस्य परब्रह्मणो भासा शक्त्या सर्वं सचराचरमिदं जगद्विभाति कार्यक्षमं भवति "द्रव्यं कर्म च कालश्चे"त्यादिवचनात् इदं द्वितीयदर्शनम् "अद्यैवत्त्वदृतेऽस्य कि"मित्यादिना अपराध्याये व्यक्तीभावि ।।५
अतिकुतुकेनोद्वृत्तानि क्षुब्धानि स्तिमितान्यानन्दक्षुब्धानि एकादशेन्द्रियाणि यस्य सः तेषां धाम्ना तेजसा तूष्णीं वक्तुमप्य
शोऽभूत् । तत्र दृष्टान्तः पूर्देवी सर्वपुरजनैर्नोपचारैः पूज्या महामाहात्म्या देवी तस्या अन्ति सन्निधौ पुत्रिकेव शिशुभिः खे
मानाऽपूज्या पाञ्चालिकेवेत्यर्थः ॥ ५६ ॥

श्रीसुबोधिनी

तुलसीनूतनमालाभि**राङ्घ्रिमस्तकं** नखशिखाग्रपर्यन्तमासमन्तात् **पूर्णा**स्तानि च **दामानि कोमलतुलसी**निर्मितानि, **सर्वगात्रेषु** च पृथक् पृथक् स**मर्पिता**नि, समर्पकाश्च **भूरिपुण्यव**न्तः ॥ ४९ ॥ असाधारणं भगवद्भावं तत्र वर्णयति **चन्द्रिके**ति, **चन्द्रिका**वद् विशदाः **स्मेरा** मन्दहासा **अरुणा**न्य**पाङ्गवीक्षि**तानि **स्मेरैर्वीक्षि**तैश्च **स्वकार्थानां** भक्तपुरुषार्थानां **स्रष्टृपालका** जाताः **वीक्षितैः** पुरुषार्थानामुत्पत्तिः **स्मेरैः** पालनं, तत्रोपपत्तिं वदन् दृष्टान्तमाह **रजःसत्त्वाभ्यामि**वेति, अरुणवर्णत्वाद् वीक्षितं **रज**स्तुल्यं, शुभ्रत्वात्**स्मेरं** सत्त्वतुल्यं, रजसोत्पाद्यते सत्त्वेन परिपाल्यते ॥ ५० ॥ किञ्चात्मा ब्रह्मा **स्तम्ब**स्तृणस्तम्बो ब्रह्मादितृण**स्तम्बपर्यन्तै**राधिदैविकेर्मू**र्तिमद्भि**र्विग्रहवद्भि**श्चराचरैः** स्थावरैर्जङ्गमैश्च **पृथक्पृथगुपासिता** इति सम्बन्धः, पृथगुपासने हेतुर्नृ**त्यगीताद्यनेकार्हैर्य**थाधिकारं स्वस्य धर्मा भगवत् सेवोपयिकाः पृथक् पृथक् सन्तीति सर्वेषां **पृथगुपा**सनम् ॥५१॥ अणिमाद्यष्टैश्वर्यैरपि सेविताः **अणिमा**दीनां महित्वं माहात्म्यरूपत्वं, **अजाद्या विभू**तयः, उत्पत्तिव्यतिरेकेणैव स्वस्योत्पत्तिभावमन्येषां चोत्पत्तिं सम्पादयति या शक्तिः साजा, सादिर्यासां लक्ष्म्यादीनां, ताभिरपि प्रत्येकमुपासिताश्चतुर्विंशतितत्त्वाभिमानिन्यो देवताः ॥५२॥ **काला**दयोप्यभिमानिदेवाः, **गुणाः** सत्त्वरजस्तमांसि, **आदि**शब्देन नामसृष्टिवर्गः सर्वोप्यासन्यादयश्च, तेषां माहात्म्यमाह **स्वमहिध्वस्तमहिभि**रिति, **स्वम**हिम्नैव **ध्वस्तो म**हिमान्येषां यैः, भगवन्महिम्ना वा **ध्वस्तम**हिमानः, ते **च** सर्वे **मूर्ति**मन्तः, तैरपि 'पृथक्पृथ' **गुपासिताः** ॥५३॥ धर्मानुक्त्वा स्वरूपमाह **सत्ये**ति, **सत्यज्ञानमनन्त**शब्देन दोषाभावः, इतरान्यत्वमा**नन्द**श्च स्वरूपे दोषाभावोप्यवश्यं वक्तव्यः, **तन्मात्रा एकरसा मूर्त**यो येषां, **रस**भेदस्तु विजातीयसंश्लेषाद् भवति, उत्कर्षमाहा**स्पृष्टभूरी**ति, **उपनिषद्दृग्भिरपि** न **स्पृष्टं भूरि माहात्म्यं** येषाम् ॥ ५४ ॥ एवं सर्वमेव **भगवत्स्वरूपं** वर्णयित्वोपसंहरंस्तस्य दर्शनमाह, **अजो** ब्रह्माप्येवं **सकृदेव ददर्श** सर्वानेव **परब्रह्मात्मनः** परब्रह्मरूपान्, एकं हि परब्रह्म **प्रसिद्धं** दृश्यते त्वनन्तरूपमिति, नन्वेकेन ब्रह्मणा कथमेतावन्तो दृष्टास्तत्राह **यस्ये**ति, **यस्य** भगवतो **भासेदं सर्व**मेव **सचराचरं विभाति,** अतो भगवदिच्छयैव **भगवद्भासा** सर्वज्ञो जातः ॥५५॥ **ततोतिकुतुकेना**तिसन्तोषे**णोद्वृत्य** दृष्टीः परावृत्य **स्तिमितान्येकादशेन्द्रिया**णि यस्य तादृशो जातः, तेन हर्षादपि **स्तोत्रे न समर्थो** जातः अशक्यं च स्तोत्रं, प्रदर्शितस्य मनसाप्याकलयितुमशक्यत्वात्, हेत्वन्तरमप्याह **तद्धाम्नाभूदि**ति, **भगवत्तेजसा** निष्प्रतिको ब्रह्मा **तूष्णीमा**सीत्, तत्र दृष्टान्तो लौकिकः **पूर्देव्यन्ती पुत्रिकेव, पूर्देवी** सर्वैरेव पुरवासिभिः पूज्यते न तु तन्निकटस्था पुत्रिका, न हि समानदेशस्थितिमात्रेण पूजार्हता भवति, अतस्तदानीं दृष्टैः सर्वैरेवायमुपेक्षित इति निष्प्रतिभत्वमुचितमेव ॥ ५६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सर्वगात्रेषु भूरिपुण्यवद्भिः बहुजन्मोपार्जितपुण्यवद्भिर्भक्तजनैरर्पितैः कोमलैस्तुलसीनवदामभिराङ्घ्रिमस्तकं चरणमारभ्य मस्तकपर्यन्तमासमन्तात् पूर्णाः ॥ ४९ ॥ चन्द्रिकावद्विशदाः स्मेरा मन्दहासास्तैः सत्त्वगुणेन स्वकानां भक्तानां येऽर्था मनोरथास्तेषां पालका इव, तथा अरुणापाङ्गवीक्षितैश्च रजसा गुणेन तेषां मनोरथानां स्रष्टार इव च ॥ ५० ॥ आत्मा ब्रह्मा, स्तम्बस्तृणविशेषः, ब्रह्मादितृणपर्यन्तै मूर्तिमद्भिश्चराचरैः प्राणिभिः स्वस्वाधिकारभेदेन नृत्यगीताद्यनेकार्हैः अनेकैरर्हणसाधनैः पृथक् पृथगुपासिताः ॥५१॥ 'अणिमाद्यैर्महिमभिः, अष्टैश्वर्यैः मूर्तिमद्भिः' इति सर्वत्र ज्ञेयम्। अजाद्याभिर्मायाविद्यादिभिर्विभूतिभिः शक्तिभिः चतुर्विंशतिभिस्तत्त्वैर्जगत्कारणैर्महदादिभिश्च परीताः सेविताः। "महत्तत्त्वं, सूत्रम्, अहङ्कारः, मनः, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च महाभूतानि, पञ्च तन्मात्राणि च" इति चतुर्विंशतितत्त्वानि ॥ ५२ ॥ कालादिभिश्च मूर्तिमद्भिरुपासिताः। तत्र कालो गुणक्षोभकः, स्वभावः परिणामहेतुः संस्कारः कामोद्बोधकः, कामश्च भोगेच्छा, कर्म लौकिकवैदिकव्यापारम्, गुणाः सत्त्वादयः उपादानम्, आदिपदेन जात्यादिग्रहणम् ॥ स्वमहिध्वस्तमहिभिः इति। भगवन्महिम्ना तिरस्कृतस्वातन्त्र्यैरित्यर्थः ॥ ५३ ॥ एवं सर्वेषां मूर्तिमत्त्वेऽप्युपास्यमूर्तीनां विशेषमाह— सत्येति। सत्यं परमार्थभूतम्, ज्ञानं चैतन्यरूपम्, अनन्तमविनाशि, आनन्दरूपम्, प्राकृतसम्बन्धनिरासार्थं मात्रपदम्, सर्वदैकरूपताप्रतिपादनार्थमेकरसपदम्। सत्यज्ञानादिमात्रैकरसं यद्ब्रह्म तदेव मूर्तिर्येषां ते। अत एव भक्तिहीनानां केवलमुपनिषत्सु दृग् येषां तेषामपि अस्पृष्टं स्पर्शायोग्यं भूरि माहात्म्यं येषां तथाभूताः। "भक्त्याऽहमेकया ग्राह्यः" "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" इत्यादि प्रमाणं सूचयितुमाह–हीति। एवं दुर्लभदर्शनत्वेऽपि भगवदिच्छया व्यदृश्यन्त ॥५४॥ यस्य परब्रह्मात्मनो भासा प्रकाशेनेदं सचराचरं विश्वं विभाति, अखिलान् वत्सवत्सपालादीन् सकृत् एकदैव अजो ब्रह्मा एवमुक्तप्रकारेण ददर्शेत्यन्वयः ॥ ५५ ॥ अतिकुतुकेन अत्याश्चर्येण उद्वृत्य दृष्टीः परावृत्य, कुतुकशब्दे च तृतीयायाश्छान्दसो लुक्। 'कुतुकोद्वृत्तः' इति पाठान्तरे तु कुतुकेन उद्वृत्तः क्षुभितः। तथा तेषां भगवद्विग्रहाणां धाम्ना तेजसा स्तिमितानि स्तब्धानि एकादशेन्द्रियाणि यस्य सः अजो ब्रह्मा तूष्णीमभूत् किमपि वक्तुमसमर्थोऽभूत् निश्चलोऽभूदिति वाऽर्थः। तत्र दृष्टान्तमाह—पूर्देव्येति। पूर्देवी व्रजाधात्री काचिद्देवता, तस्या अन्ति समीपे पुत्रिका चतुर्मुखी कृत्रिमप्रतिमा यथा तथेत्यर्थः ॥ ५६ ॥

अन्वितार्थप्रकाशिका

आङ्घ्रीति ॥ सर्वगात्रेषु भूरिपुण्यवद्भिः बहुजन्मोपार्जितपुण्यवद्भिर्भक्तजनैरर्पितैः कोमलैस्तुलसीनवदामभिराङ्घ्रिमस्तकं गमारभ्य मस्तकपर्यन्तमासमन्तात् पूर्णाः ॥ ४९ ॥ चन्द्रिकेति ॥ स्वकानां भक्तानां येऽर्था मनोरथास्तेषां चन्द्रिका इव विशदं

स्मयन्ते इति मृदुपाचकवत्समासः । भावप्राधान्येन मन्दहासाः तैः तथा अरुणापाङ्गेन सहितैर्वीक्षितैश्च रजःसत्त्वाभ्यां स्वकार्थानां स्रष्टृपालका इव व्यदृश्यन्त । तत्र सत्त्वतुल्यविशदस्मितेन स्वकार्थानां पालका इव रजोवदरुणगुणेन च तेषां स्रष्टार इव वचेति तादृक्कटाक्षैर्द्योतमानाः ॥ ५० ॥ आत्मेति ॥ आत्मा ब्रह्मा स्तम्बस्तृणगुच्छः ब्रह्मादितृणपर्यन्तैर्मूर्तिमद्भिश्चराचरैः प्राणिभिः स्वस्वाधिकारभेदेन नृत्यगीताद्यनेकार्हैः अनेकैरर्हणसाधनैः पृथक् पृथगुपासिताः एतेन तेषां प्रत्येकमेकैकब्रह्माण्डेशत्वमुक्तम् ॥ ५१ ॥ अणिमेति ॥ अणिमाद्यैर्महिमभिः अष्टभिरैश्वर्यैः मूर्तिमद्भिरिति सर्वत्र ज्ञेयम् । अजाद्याभिर्मायाविद्यादिभिर्विभूतिभिः शक्तिभिः महदादिभिः चतुर्विंशतिभिस्तत्त्वैः जगत्कारणैः परीताः महत्सूत्रयोः पृथक् तत्त्वविवक्षया चतुर्विंशतित्वं बहुत्वमार्षम् । तथा च महत् सूत्रमहङ्कारः मनो दशेन्द्रियाणि पञ्च भूतानि पञ्च तन्मात्राणि चेति तत्त्वानि ॥ ५२ ॥ कालेति ॥ "स्वमहिध्वस्तमहिभिः" इति भगवन्महिम्ना तिरस्कृतस्वातन्त्र्यैरित्यर्थः । पूर्वोक्ततत्त्वसहकारिभिः कालादिभिश्च मूर्तिमद्भिरुपासिताः । तत्र कालो गुणक्षोभकः स्वभावः परिणामहेतुः कामोद्बोधकः कामश्च भोगेच्छाकर्मलौकिकवैदिकव्यापारः गुणाः सत्त्वादय उपादानमादिपदेन जात्यादिग्रहणम् ॥५३॥ सत्येति । सत्यं परमार्थभूतं ज्ञानं चैतन्यरूपमनन्तमविनाशि आनन्दरूपं प्राकृतसंबन्धनिरासार्थं मात्रपदम् सत्यज्ञानादिमात्रैकरसं यद् ब्रह्म तदेव मूर्तिर्येषां ते सत्यज्ञानादिमात्रा एकरसाः सदा एकरूपा मूर्तयो येषामिति वा अत एव भक्तिहीनानां केवलहीनानां केवलमुपनिषदमेव पश्यन्ति ये केवलं ज्ञानिनः दार्शनिकाः तेषामपि अस्पृष्टं स्पर्शायोग्यं भूरि माहात्म्यं येषां तथाभूताः व्यदृश्यन्त ॥ ५४ ॥ एवमिति ॥ यस्य परब्रह्मात्मनो भासा प्रकाशेनेदं सचराचरं विश्वं विभाति तत्परब्रह्मात्मरूपान् अखिलान् वत्सवत्सपालादीन् सकृत् एकदैवाजो ब्रह्मा एवमुक्तप्रकारेण ददर्श ॥ ५५ ॥ तत इति ॥ अतिकुतुकेन अत्याश्चर्येण उद्वृत्य दृष्टीः परावृत्य हंसपृष्ठे निपत्य वा कुतुकशब्दे च तृतीयायाश्छान्दसो लुक् । यद्वा अतिकुतुकेन उद्वृत्यः कोऽहमित्यनुसन्धानरहितः सन् । अत्र "खर्परे०" इति विसर्गलोपः । कुतुकोद्वृत्तः इति पाठान्तरे तु कुतुकेन उद्वृत्तः क्षुभितः तथा तेषां भगवद्विग्रहाणां धाम्ना तेजसा स्तिमितानि स्तब्धानि एकादशेन्द्रियाणि यस्य सः अजो ब्रह्मा तूष्णीमभूत् किमपि वक्तुं न समर्थोऽभूत् । निश्चलोऽभूदिति वार्थः अत्र दृष्टान्तः पूर्देवी व्रजाधिष्ठात्री काचिद्देवी तस्या अन्ति समीपे पुत्तिका चतुर्मुखप्रतिमेव ॥ ५६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अंघ्रिमस्तकं अंघ्रिमभिव्याप्यमस्तकपर्यंतेषु सर्वांगेषु भूरिपुण्यवद्भिर्नरैरर्पितैः आपूर्णाः निभृताः ॥४९॥ चंद्रिकाचंद्रज्योस्नावत् विशदानि श्रद्धानि स्मेराणि मंदहास्यानि येषु तैः अरुणगुणेन सहवर्त्तमाना ये अपांगाः कटाक्षास्तद्युक्तवीक्षितैः स्वकार्थानास्वकीयजनमनोरथानां रजःसत्वाभ्यां स्रष्टृपालका इव रजस्तुल्यरक्तगुणेन सत्वतुल्यविशदस्मितेन च उत्पादका रक्षका इव स्थिताः ॥ ५० ॥ ब्रह्मादिस्तंबपर्यंतैश्चराचरैः जंतुभिः नृत्याद्यनेकविधपूजनैः ॥ ५१ ॥ महिमभिः महासिद्धिभिः अजाद्याभिः अजाः प्रधानरूपाः प्रकृतयः आद्याः प्रधानपतयः पुरुषाश्च एवंरूपाभिः विभूतिभिः परीताः परिवृताः ॥ ५२ ॥ कालादिभिः तत्तदभिमानिदेवैरुपासिताः कथंभूतैस्तैः स्वीयेन महिना महिम्ना ध्वस्तस्तिरस्कृतो महिमा येषां तैः ॥ ५३ ॥ तेषां कीदृशादेहा इत्याशंक्याह सत्येति । सत्यज्ञानानंदमात्राः सत्पादिधर्ममयाः एकरसाः सदैकरूपाश्चमूर्त्तयो देहा येषां ते उपनिषदि छांदोग्यादौ दृक् श्रवणमनननिदिध्यासनरूपं ज्ञानं येषां तेषामपि अस्पृष्टं न स्पृष्टं योग्यं भूरिमाहात्म्यं येषां एवंभूताः अजस्य व्यदृश्यंतेति पूर्वेणान्वयः ॥५४॥ एवमिति अखिलान् वत्सपादीन् परब्रह्मात्मनः परमात्मरूपान् अजोविधिः सकृत् एकदैव ददर्श यस्य दिव्यमूर्तेः परब्रह्मणः भासा प्रकाशेन इदं प्रत्यक्षं चराचरैः सहितं विश्वं सर्वं अक्षर ब्रह्म तत्स्थमुक्तकोटिकालप्रकृतिपुरुषरूपं समग्रं विभाति ॥ ५५ ॥ तत इति ततस्तदनंतरं अतिकुतुकेन अत्याश्चर्येण अत्र सुपांसुलुगित्यादिनाछंदसितृतीयाया लुक् उद्वृत्य दृष्टिं परावृत्य तद्धाम्ना तेषां प्रकाशेन स्तिमितानि स्थिरीभूतानि एकादशेंद्रियाणि यस्य सः अजो विधिः पूर्द्देव्याः व्रजाधिष्ठातृ देवतायाः अंति समीपे पुत्रिका इव चतुर्मुखीप्रतिमा इव तूष्णीं स्थिरोऽभूत् ॥ ५६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ एवममुना प्रकारेण, विश्वं मोहयतीति विश्वमोहनस्तं, विमोहं स्वतो मोहरहितं, विष्णुं श्रीकृष्णं संमोहयन् विमोहयितुमुद्युक्तः अजश्चतुर्मुखः अपि, स्वयाऽऽत्मीयया एव, मायया, स्वयं एव, विमोहितः, न तु श्रीकृष्णः ॥ ४९ ॥ विश्वमोहने भगवति मायान्तरस्याकिंचित्करत्वे दृष्टान्तद्वयमाह ॥ तम्यामिति ॥ तम्यां तमिस्रायां रात्रावित्यर्थः । नैहारं हिमकणप्रभवं, तमोवत्तम इव, नीहारकणप्रभवं तमो यथा रात्रौ न ततः पृथगावरकं जायते, किं तु तत्रैव लीयत इत्यर्थः । यथा च, खद्योताचिर्ज्योतिरिङ्गणतेजः, अहनि दिवसे इव दिनमणिकृतप्रकाशवति दिवसे खद्योतप्रकाशः ततः पृथक् प्रकाशं न करोत्येवेत्यर्थः । एवं महति महापुरुषे, युञ्जतः मायां कर्त्तुमुद्युक्तस्य पुंसः, इतरमाया नीचा माया, तत्र तु न किंचित् करोतीति शेषः । प्रत्युत, आत्मनि स्वस्मिन्नेव, ऐश्यं सामर्थ्यं, निहन्ति । यथा जगति महति केनचित् कृतं कार्मणं विपरीतं सत्तमेव, वल्गति तद्वदिति भावः । तद्धितार्थोपसर्जनस्यापि तमसो नैहारमिति विशेषणं छान्दसमेव । अस्यायं भावः । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः, तत्र वृत्तिपतितस्य विशेषणयोगो न सविशेषणानां वृत्तिर्न, अतस्तद्धितवृत्तिपतितस्य तमसो नैहारमिति विशेषणं न

संगच्छते। ताद्धितकवत्प्रत्ययस्य तुल्यत्वेनार्थेनोपसर्जनत्वात्। स्वार्थनिष्ठत्वे सति अर्थान्तरोपसंक्रान्तत्वमुपसर्जनत्वं यथा ब्राह्मणतुल्यं ब्राह्मणवदधीते, तस्मात्तद्धितार्थोपसर्जनस्य तमसो नैहारमिति विशेषणं छान्दसमेवेति ॥ ५० ॥ अन्यदप्यत्याश्चर्यमाह ॥ तावदिति ॥ अजस्य ब्रह्मणः, पश्यतः सतः, तावत् सर्वे वत्सपालाः वत्साः पालाश्चेत्यर्थः। तत्क्षणात् तस्मिन्नेव क्षणे इत्यर्थः। घनश्यामा नीलघन इव मेचकवर्णाः, पीतकौशेयवाससः परिहितपीतपीताम्बराः, व्यदृश्यन्त। एतदारभ्य नवसु श्लोकेष्वेतदेव क्रियापदं ग्राह्यम् ॥ ५१ ॥ चतुर्भुजा इति ॥ चत्वारो भुजा येषां तु शङ्खश्च चक्रं च गदा च राजीवं पद्मं च पाणिषु येषां ते, किरीटान्येषां सन्तीति, कुण्डलान्येषां सन्तीति, हारा विद्यन्ते एषामिति, वनमालाः सन्त्येषामिति ॥ ५२ ॥ श्रीवत्सेति ॥ श्रीवत्सप्रभायुक्तान्यङ्गदानि दोःषु भुजेषु येषां रत्नमयानि कम्बुवच्छङ्खवद्वर्त्तुलानि कङ्कणानि पाणिषु येषां ते च ते च तथा, श्रीवत्सैरङ्कितानि वक्षांसि येषां, कौस्तुभैरामुक्ताः संयेक्ताः कंधरा ग्रीवा येषाम् ॥ ५३ ॥ नूपुरैरिति ॥ भूरिपुण्यवर्दपितैः बहुजन्मार्जितपुण्यवद्भिरर्पितैः, नूपुरैर्मञ्जीरैः, कटकैर्वलयैः, भाताः शोभमानाः, कटिसूत्राणि काञ्च्यश्च अङ्गुलीयकानि स्वर्णमुद्रिकाश्च तैः भाताः, आङ्घ्रिमस्तकमापदमस्तकं, सर्वगात्रेषु कोमलैः तुलसीनवदामभिः, आपूर्णाः ॥ ५४ ॥ चन्द्रिकेति ॥ चन्द्रिकाविशदस्मेरैः चन्द्रज्योत्स्नावद्विशदस्मितयुतैः, सारुणापाङ्गवीक्षितैः आरुण्यसहितापाङ्गवीक्षितैः, स्वकार्थानां स्वभक्तमनोरथानां, रजःसत्त्वाभ्यां, स्रष्टृपालकाः स्रष्टारश्च पालकाश्च तथाभूताः इव, सत्त्ववद्विशदस्मितेन पालका इव रजोवदरुणेन गुणेन स्रष्टार इव तादृक्कटाक्षैर्द्योतमाना इत्यर्थः ॥ ५५ ॥ आंत्मेति ॥ आंत्मा चतुर्मुख आदिर्येषां स्तम्बः पर्यन्तो येषां ते च ते च तैः, मूर्त्तिमद्भिः, चराचरैः कर्त्तृभिः नृत्यगीताद्यनेकार्हैः नृत्यप्रभृत्यनेकार्हणैः करणैः, पृथक् पृथक्, उपासिताः ॥ ५६ ॥

कृष्णप्रिया

चरणकमलों से लेकर मस्तक पर्यन्त - नख शिखान्त प्रत्येक श्री अङ्गों में पूर्ण पुण्यशाली परम भागवतो ने पहनायी कोमल नव तुलसी दल मालाओं से समलङ्कृत थे ॥ ४९ ॥ उनकी मुस्कराहट चांदनी सी समुज्ज्वल थी, रतनारे नयनों की कटाक्षपूर्ण तिरछी चितवन से देखना गजबठाहती थी। ऐसा जान पड़ता था कि मानो कटाक्षावलोकन और स्मेरस्मित के माध्यम से रजोगुण द्वारा भक्तजनों के मन में मङ्गल मनोरथों को जगाकर सत्वगुण द्वारा उन विशुद्ध मनोरथों की पूर्ति करते थे ॥ ५० ॥ श्री ब्रह्माजी ने यह भी देखा कि, ब्रह्माजी जैसे अनेक आधिदैविक विग्रह वाले ब्रह्माओं से लेकर तृणस्तम्ब पर्यन्त सर्व सचराचर जीव निज-निज अधिकार और शक्ति अनुसार नृत्य-गीत आदि विविध प्रकार की सेवा सामग्रीओं से साधनों से प्रियतम प्रभुकी पृथक् पृथक् सेवा कर रहें है ॥ ५१ ॥ फिर सबके सब अणिमादि समग्रसिद्धियों माया विद्या अविद्या श्री गिरा पुष्टि क्रान्ति समग्र शक्तियों और महत् तत्व आदि चौवीसो तत्वों से समावृत्त परिपूर्ण थे ॥ ५२ ॥ काल (प्रकृतिक्षोभकर्त्ता) स्वभाव आदि के अभिमानी देवता, संस्कार कामनाहँ कर्म विषय फल नामसृष्टि आदि के देवता मूर्तिमन्त बनकर प्रभु के प्रत्येक रूप की उपासना कर रहे हैं। वे सब अपनी सत्ता और महत्ता से सबकी महिमा को निःसत्व निस्तेज बना रहे थे, या भगवान की महिमा के सामने उनकी महिमा अपना अस्तित्व खो बैठी थी ॥ ५३ ॥ आगे ब्रह्माजी देख रहें है कि ये सब एक मात्र त्रिकालाबाधित स्वयं प्रकाश ज्ञान अनन्त आनन्द एक रस ही उनका स्वरूप था। उनमें जड़ता या चेतना का कोई भेदभाव नहीं था। क्या कहा जाय उपनिषद् द्रष्टा तत्त्व ज्ञानिओं की बुद्धि भी उनकी अपार-अनन्त महिमा को छु नहीं सकती ॥ ५४ ॥ इस प्रकार श्री ब्रह्माजी ने एक ही काल में उन सब वत्सपाल बालकों को उस परब्रह्म परमातमा श्रीकृष्ण के स्वरूप में देखा कि जिसकी ज्योति से सारा चराचर विश्व आलोकित हो रहा है ॥ ५५ ॥ भगवान् के दिव्य आश्चर्यपूर्ण ऐश्वर्य के दर्शन के बाद ब्रह्माजी अवाक् हो गये कि उनकी ग्यारहों इन्द्रियों की गति उनके तेज से अवरूद्ध हो गयी और स्वयं सर्वथा अक्रिय-निश्चेष्ट हो गये। निश्चेष्ट बने ब्रह्माजी ऐसे प्रतीत होते थे कि मानो व्रज की नगर देवता के समीप खड़ी की हुई कोई पुतली है ॥ ५६ ॥

इतीरेशेऽतर्क्ये निजमहिमनि स्वप्रमितिके परत्राजातोऽतन्निरसनमुखब्रह्मकमितौ।
अनीशेऽपि द्रष्टुं किमिदमिति वा मुह्यति सति चच्छादाजो ज्ञात्वा सपदि परमोऽजाजवनिकाम् ॥ ५७ ॥
ततोऽर्वाक् प्रतिलब्धाक्षः कः परेतवदुत्थितः। कृच्छ्रादुन्मील्य वै दृष्टीराचष्टेदं सहात्मना ॥ ५८ ॥
सपद्येवाभितः पश्यन् दिशोऽपश्यत् पुरः स्थितम्। वृन्दावनं[1] जनाजीव्यद्रुमाकीर्ण[2] समाप्रियम् ॥ ५९ ॥
यत्र नैसर्गदुर्वैराः सहासन् नृमृगादयः। मित्राणीवाजितावासगत रुट्तर्षकादिकम्[3] ॥ ६० ॥

---

१. जीव्य–श्रीधर. वंशी. वीर. विज.। २. द्रुत–श्रीधर. वंशी. वीर. विज. विश्व. शुक.। ३. दिके–वीर.।

कर्दमक्षमा

अन्वयः—इति ईरेशे निजमहिमनि अतर्क्ये स्वप्रमितिके अजातः परत्र अतन्निरसनमुखब्रह्मकमितौ दृष्टुं अनीशे अपि "इदं किं वा इति मुह्यति सति ज्ञात्वा परमः अजः सपदि मायाजवनिको चच्छाद ॥ ५७ ॥ ततः अर्वाक् प्रतिलब्धाक्षः परेतवदुत्थितः कः कृच्छ्रात् वै दृष्टीः उन्मील्य आत्मना सह इदं आचष्ट ॥ ५८ ॥ सपदि एव अभितः दिशः पश्यन् जनाजीव्यद्रुमाकीर्णं समप्रियं पुरःस्थितं वृन्दावनं अपश्यत् ॥ ५९ ॥ यत्र अजितावासगतरुट्तर्षकादिकं नैसर्गदुर्वैराः नृमृगादयः मित्राणि इव सह आसन् ॥ ६० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं मोहमग्नमजमुज्जहारेत्याह । इतीति । इरेशे इरा सरस्वती तस्य ईशे ब्रह्मणि किमिदमिति मुह्यति सति पश्चात्तद्द्रष्टुमप्यनीशे सति परमोऽजः श्रीकृष्णः सपद्यजाजवनिकां मायारूपां तिरस्करिणीं ययाऽद्भुतं दर्शितं तां चच्छाद तिरोधत्त । अपसारितवानित्यर्थः । अथ वा अयं लोकाभिमानी ममैश्वर्यं द्रष्टुमयोग्य इति तस्योपरि मायां प्रसारितवानिति । कस्मिन्स्वरूपे मुमोह तदाह । अतर्क्ये तर्कागोचरे निजोऽसाधारणो महिमा यस्य तस्मिन्निति मोहे हेतुद्वयमुक्तम् । दर्शनायोग्यत्वाय त्रीणि विशेषणानि । स्वप्रमितिके स्वप्रकाशं च तत्कं सुखं च यस्मिन् अत एवाजातः प्रकृतेः परत्र परस्मिन् । अत एव अतन्निरसनमुखेन ब्रह्मकैः श्रुतिशिरोभिर्मितिर्ज्ञानं यस्मिंस्तस्मिन्स्वरूपे ॥ ५७ ॥ अर्वाक् बहिः प्रतिलब्धान्यक्षीणि येन सः । परेतवन्मृतो यदि कथंचित्पुनरुत्तिष्ठति तथा दृष्टिर्नेत्राणि ॥ ५८ ॥ जनानामाजीव्यैर्द्रुमैराकीर्णम् । समाप्रियं संततान्यासमंतात्प्रियाणि यस्मिंस्तत् ॥ ५९ ॥ तदाह यत्रेति । नैसर्गदुर्वैराः स्वाभाविकाप्रतिकार्यवैरवंतोऽपि नराः सिंहादयश्च मित्राणीव यत्र सहैवासन् । अजितस्यावासेन द्रुताः पलायिता रुट्तर्षादयः क्रोधलोभादयो यस्मात्तथाभूतं वृंदावनमपश्यदिति ॥ ६० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमुक्तप्रकारेण । मोहमग्नं मोहितम् । अजं ब्रह्माणम् । उज्जहारोद्धार । इरा सरस्वती । "इरा सरस्वतीमद्यजलकामप्रदेषु च" इति धरणिः । पश्चान्मोहादनु । तत् सत्यानंदमूर्तिव्यूहम् । "प्रतिसोरा जवनिका स्यात्तिरस्करिणी च सा" इत्यमरः । अपसारितवान्दूरीचकार । इत्यर्थ इति—'सति प्रसिद्धेर्थेऽप्रसिद्धार्थकल्पनमन्याय्यम्' इति हेतोः प्रसिद्धार्थपरतया व्याचख्यौ-अथ वेति । महिमाधिक्यम् । अतर्क्येऽद्भुतवैभवे मोहो भवत्येवेति अतर्क्यत्वादिति हेतुरूहनीयः । अतन्निरसनमुखेनातद्व्यावृत्त्या । इरा सरस्वती तस्या ईशे महाबुद्धिमत्यपीत्यर्थः । ज्ञात्वा स्वैश्वर्यरसानुभवे तदयोग्यतां वीक्ष्य अजाजवनिकां योगमायातिरस्करिणीं चच्छाद । यया पुलिने भुंजानाञ्श्रीदामादिबालकांस्तृणं चरतो वत्सान्वत्सपान्वेषकं स्वं चाच्छाद्य स्वरूपभूतान्वत्सबालकादीन्पुनस्तानेव चतुर्भुजादित्वेन दर्शयामास तामंतर्धापयदित्यर्थः । या वास्तवं वस्त्वावृणोति अवास्तवं च दर्शयति सा माया, या तु वास्तववस्तूनामपि मध्ये किमप्यावृणोति किमपि दर्शयति सा योगमायेति मायायोगमाययोर्भेदादजाशब्देनात्र बहिरंगा माया न व्याख्येयेति विश्वनाथः ॥५७॥ ततो मायाच्छादनानंतरम् । को ब्रह्मा । आत्मना भगवता सहेदं वक्ष्यमाणं वृंदावनमाचष्ट ददर्श ॥ ५८ ॥ सपदि झटित्येव । आजीव्यैराम्रजंब्वादिभिः । यद्वा—जनानाजीवयंति क्षेत्रकर्षणादिनेति जनाजीव्या वृषास्तेषां द्रुमा द्रुमवदुत्पादका गावस्ताभिराकीर्णम् । यद्वा-जनाजीव्यं जलं तस्य द्रुमा द्रुमवद्धात्री कालिंदी तया जनाजीव्या भक्तिः सैव द्रुमो मोक्षफलप्रदत्वेन तयाकीर्णमितिवा । प्रियकराणि पुष्पपत्रादीनि । मा लक्ष्मीस्तस्याः प्रियो हरिस्तेन सहेति समाप्रियम् । मा लक्ष्मीः प्रियाशब्दोदिता श्रीराधा ताभ्यां सहेति पूर्ववत् । मा लक्ष्मीस्तस्याः प्रिया गावस्तासु नित्यं सन्निहितत्वात्तस्यास्ताभिस्सहेति ॥ ५९ ॥ तत् समाप्रियत्वम् । अप्रतीकार्यं निवर्तनाशक्यम्, यथा गोव्याघ्राखुबिडालादीनाम् । यत्र वृंदावने । तदपश्यदिति पूर्वेण संबंधः ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति पूर्वरीत्या बालवत्सादिरूपमेकमद्भुतं दृष्टं इदं वा किमिति वा शब्दार्थः ज्ञात्वा तन्मोहादिकमवधार्य अन्यत्तैः, अत्र प्रथमपक्षे मायया अविद्याविद्यावृत्तिकत्वात् अविद्यारूपेण तिरस्करिणीं ब्रह्मणो दृष्टिं प्रति श्रीकृष्णरूपस्य व्यवधायिकां तथा यया अविद्यारूपयाऽतर्क्यं इत्यादिपञ्चविशेषणकत्वादन्यादृश्यं तदद्भुतं दर्शितं तद्रूपेण प्रकाशिकामपि तामपसारितवानिति तमेतं पक्षमवैष्णवमयुक्तं चाशङ्क्य पक्षान्तरमाह अथवेति । अत्र तस्य स्वप्रकाशत्वात् स्वप्रकाशताशक्तिरेव दर्शने हेतुः माया त्वविद्यावृत्त्यावरणधर्मैव विद्यावृत्त्या च न तस्य तस्या अपि प्रकाशकस्य, तस्य प्रकाशनसमर्थेत्युक्तं तदेवाह—परत्राजात इति । अतस्तादृशवैभवं प्रति ब्रह्मदृष्टितो मायापसारणेन तद्दर्शितं तत्र प्रसारणेन त्वाच्छादितमिति प्रसारितमपि प्रसारितवानिति छदेरन्तर्भूतण्यर्थत्वात् मायायाश्चाण्यन्तकर्मत्वात् इति शब्द अथवेति पक्षसमाप्त्यर्थः । उत्तरग्रन्थस्य उभयत्रान्वितत्वात् क्व मुह्यतीति कुत्र तस्य मोह इत्यर्थः । स्वरूपे घनश्यामादिरूपे निजमहिमनीति बहुव्रीहिः । यद्वा, निजमहिमनीत्येव विशेष्यं कर्मधारयात् तादृशचतुर्भुजवृन्दे तैद्वभव इत्यर्थः अन्यत्समानम् ॥ ५७ ॥ उत्थित इति मोहेन हंसपृष्ठे पतनं बोधयति इदं ममतास्पदं विश्वम् आत्मना

देहेनाहन्तास्पदेन सहितं तस्यापि विस्मृतत्वात् ॥ ५८ ॥ ततश्च परमकृपया श्रीकृष्णस्तस्मै स्वान्तरङ्गवैभवं प्रकाशितवानित्याह-सपदीति त्रिभिः। यद्वा, पूर्वं वृन्दावनाधिष्ठानकश्रीकृष्णाख्यं परमस्वरूपं यया मायाजवनिकाच्छाद्य स्वशक्तिविशेषेणस्वरूपवैभवान्तरं दर्शितवान् तामपसारितवानिति प्राचीनतृतीयश्लोकार्थः। ततश्च स्वतेजोभिः सर्वाच्छादकेन अप्राकृतेन परमस्वरूपेणैव प्रकाशते इत्याह—तत इति चतुर्भिः। अर्वाचि सम्प्रत्यवतीर्णे श्रीकृष्णाख्यपरमस्वरूपे पुनर्लब्धदृष्टिः सन् इदं श्रीवृन्दावनमात्मना सह व्यचष्ट तदेव विवृणोति—सपदीति। अभितो दिशः पश्यन् सपद्येव वृन्दावनमपश्यत् स ब्रह्मा मायालक्ष्म्याः श्रीराधारूपायाः प्रियं "राधावृन्दावने वन" इति मात्स्यपाद्मादिभ्यः। 'यद्वा, मया तथैव लक्ष्म्या सह वर्त्तत इति समः श्रीकृष्णः तस्य आ सम्यक् प्रियं वृन्दावनं गोवर्द्धनम् इत्याद्युक्तम्। यद्वा, मायास्तस्या एव प्रियः श्रीकृष्णस्तेन सह वर्त्तमानमिति एवं चेत् समानामात्मारामाणामपि आप्रियमिति कियत् ॥ ५९ ॥ तल्लक्षणमाह—यत्रेति। तैर्व्याञ्जितमेव। यद्वा निसर्गदुर्वैरा अहिनकुलादयः सहैवासन् ततः सुतरां नृमृगादयश्च मित्राणीवासन्नित्यर्थः। तत्र हेतुः, अजितस्य योगादिना महाप्रयासेन हृद्यपि वशीकर्त्तुमशक्यस्य श्रीभगवत आवासः सदावस्थितिः तेन तद्रूपेण निजमहिम्ना द्रुतं रुट्तर्षादिकं यस्मात्तत् ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ज्ञात्वानुभूय भगवन्माहात्म्यमिति प्रकरणादध्याहार्य्यमतः प्रेमोद्रेकेणानन्दविशेषेण वा मुह्यति सति पश्चात्तत्तदतिरेकेण द्रष्टुमप्यशक्ते सति। चार्थे वा-शब्दः। अन्यत्तैर्व्याख्यातम्। यद्वा, ततश्च पृथक्त्वेन प्रकाशितं तद्वत्स-वत्स-पादि-रूपं पूर्व्वबालकेषु श्रीब्रह्मणो मायाञ्च, तां नितरामनुगृह्णन् श्रीभगवान् संवृतवानित्याह—इतीति; इति—एतानित्यर्थः। अजस्य श्रीब्रह्मणोऽजाजवनिकाञ्च बालादीनां मोहनाच्छादनात्मिकां मायां चछाद संवृतवान्। ज्ञात्वेत्यस्यात्रैवान्वयोऽवसरं विचार्य्येत्यर्थः। अन्यत् समानम् ॥ ५७ ॥ ततः सम्वरणादर्व्वाक् पश्चात् प्रतिलब्धाक्षः प्राप्तसंज्ञ इत्यर्थः। परेतवदिति मोहस्यातिशय्यात्; किंवा गतेऽपि मोहे चिरेण चेष्टोत्पत्तेः। उत्थित इति मोहेन पूर्व्वं हंसपृष्ठे पतनं बोधयति। इदं विश्वमात्मना सहितमिति मोहेन विस्मृतस्यात्मनस्तदानीमनुसन्धानोत्पत्तेः; यद्वा, इदं वक्ष्यमाणं वृन्दावनादिकम्। सहैकदैवात्मना स्वयमेवापश्यत् ॥ ५८ ॥ अभितो दिशः पश्यन् सपद्येव वृन्दावनमपश्यत् स ब्रह्मा। मायाया लक्ष्म्याः श्रीराधारूपायाः प्रियम्,—तत्र तस्याः श्रीभगवत्प्रदत्ताधिपत्येन परमप्रीतेः श्रीभगवत्प्रियत्वाद्वा तस्याः; यद्वा, मया लक्ष्म्या सह वर्त्तते समो भगवान्, तस्य आ सम्यक् प्रियम् ॥ ५९ ॥ तल्लक्षणमाह—यत्रेति। तैर्व्याञ्जितमेव; यद्वा, नैसर्गदुर्व्वैरा अहि-नकुलादयः सहैवासन् नृ-मृगादयश्च मित्राणीवासन् परस्परं हिताचरणात्। तत्र हेतुमाह—अजितस्य योगादिना महाप्रयासेन हृद्यपि वशीकर्त्तुमशक्यस्य भगवत आवासः सदा सम्यग्वसतिर्यस्मिन्; अतएव स्वभावत एव वा, द्रुत-रुट्तर्षादिकं तच्च तच्च तस्मिन्; आदि-शब्देन दम्भमात्सर्य्यादयः ॥ ६० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

इळेति इडेति इरेति च देवीत्रयम् "इडा भू वाक् सुराप्सु स्यात्" इति कोशात् देवीत्रयनियामके ब्रह्मणि स्वमहिमनि मुह्यति सति परमः अजः श्रीकृष्णः अजाजवनिका तस्मिश्चछाद छादयामास स्वेनैव प्रमितिर्यस्य तादृक् कं सुखं यस्मिन् मायातः परस्मिन् अतन्निरसनेन ब्रह्मणो वैलक्षण्यप्रतिपादकेन मुखेन द्वारभूतेन ब्रह्मकैः वेदशिरोभिः मितिर्यस्य तस्मिन्महिम्नि ॥ ५७ ॥ अर्वाग्भूतेन तत आकृष्टे प्रतिलब्धे अक्षिणी येन सः आत्मना स्वेन सह श्रीकृष्णेन वा सह इदं सन्निकृष्टं श्रीवृन्दावनादिकम् ॥ ५८ ॥ सम्यक् आसमन्तात्प्रियं स ब्रह्मा माप्रियं लक्ष्मीप्रियं श्री नारायणं कृष्णं चापश्यदिति लक्ष्मीप्रियं वृन्दावनं वा रमाक्रीडमभूदिति वाक्यात् ॥ ५९ ॥ स्वाभाविकं दुष्टं वैरं येषां ते मनुष्यसिंहसर्पनकुलादयः मित्राणीव सह आसन् सहैव सञ्चारादिकर्त्तार आसन् न चेदृषीणां तपोबलेनापि सम्भवो दृश्यते इत्यत्राह—अजितस्य कृष्णस्यावासः आभिमुख्येन वासस्तेन श्रीभगवत्कृपाकटाक्षेणैव पलायितक्रोधलोभतृष्णामोहादिके वृन्दावने अनेन "कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्" इति आसुरसम्पद्बीजरहिते इति स्थलपरमैश्वर्यम् उक्तम् ऋषीणां कामक्रोधादिराहित्याभावान्न तादृशवैभवमिति भावः ॥ ६० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं मुह्यते चतुर्मुखाय पूर्ववदात्मवत्सवत्सपादीन् दर्शयितुमसाधारणस्वमूर्तिदर्शनाच्छादिकां मायामाच्छादितवानित्याह-इतीति परो मा यस्मात् स परमः सर्वाऽभ्यधिको यः अजः कर्मायत्तोत्पत्तिरहितः श्रीकृष्णः सपदि ज्ञात्वा चतुर्मुखस्यावस्थां ज्ञात्वा अजां यवनिकामजारूपां यवनिकां तिरस्कारिणीं चछादावृतवान् कस्मिन् सति स्वासाधारणो महिमा यस्मिंस्तस्मिन्स्वरूपे विषयभूते इत्थम् इरायाः सरस्वत्या ईशे ब्रह्मणि द्रष्टुमप्यनीशेऽसमर्थे प्रत्युतेदं किमिति मुह्यति सति निजमहिम्नो दर्शनाशक्यत्वं दर्शयितुं विशिनष्टि, अतर्क्ये इदम् इत्थन्तया केवलतर्कागोचरे तत्र हेतुरजातः परत्र अजातः अजायाः प्रकृतेः परत्र विलक्षणे प्राकृतमेव कथञ्चित्तर्कगोचरमिति भावः। स्वप्रमिति स्वयंप्रकाशं ज्ञानं कं सुखं सुखात्मकं यस्मिन् कशब्देनात्र सङ्कोचकाभावादपरिच्छिन्नसुखवाचिना परिमिति सुखस्वरूपजीवव्यावृत्तिः इतोऽप्यतर्क्यत्वमवगन्तव्यम् अतर्क्य इत्यनेन तन्मूलप्रत्यक्षागोचरत्वमपि

विवक्षितं प्रत्यक्षानुमानाभ्यां प्रमाणाभ्यामनवगम्य इति फलितोऽर्थः। तर्हि किं शशविषाणवत्तुच्छं नेत्याह—अतन्निरसनमुखब्रह्मकमितौ अतदपरमात्मवस्तु प्रकृतिपुरुषादिकं तस्य निरसनमुखेन परमात्मस्वरूपत्वनिरसनद्वारा ब्रह्मणो वेदस्य केन मूर्द्ध्नोपनिषद्भागेनेति यावत् मितिरवगतिर्यस्य तस्मिन् प्रत्यक्षादिमानान्तरानवगम्यस्वरूपस्वभावस्य परमात्मनः केवलवेदान्तवेद्यस्य प्राकृतचक्षुषा द्रष्टुमयोग्यत्वात्तद्दर्शनाशक्ते सति ब्रह्मणि तज्ज्ञात्वा यथावस्थितवत्सवत्सपादिदर्शनार्थं प्रदर्शितस्वासाधारणरूपाच्छादनार्थं चाजां चच्छादेत्यर्थः ॥ ५७ ॥ ततोऽजायवनिकाच्छादनानन्तरमर्वाग्बहिः प्रतिलब्धान्यक्षा-णीन्द्रियाणि येन सः, कः परेतवत्मृतो यथा पुनः कथं-चिदुत्तिष्ठति तद्वदुत्थितः संज्ञां प्राप्तः कृच्छ्रात्कथंचिद्दृष्टीर्नेत्राण्युन्मील्यानिमीलितानि कृत्वा दृष्टिरिति पाठे मील्ये उन्मिषिते दृष्टि यस्य सः, आत्मना चतुर्मुखेण सहेदं जगदपश्यत् पूर्वं भगवद्रूपेभ्योऽन्यदपश्यन्निदानीं जगज्जगदेवात्मानमात्मान-मेवाचष्टेत्यर्थः ॥५८॥ ततः पूर्वस्थितं वृन्दावनं चापश्यत् कथम्भूतं ? जनानामाजीव्यैरुपजीव्यैर्द्रुमैराकुलं व्याप्तं समाप्रियं सम्यञ्चयाऽऽसमन्तात्प्रियाणि यस्मिन् तत् ॥ ५९ ॥ तदेवाह—यत्रेति। यत्र वने नैसर्गदुर्वैराः नैसर्गिकं स्वाभाविकं दुर्वारमनिवार्यं वैरं येषां ते नरगो पादयो मृगाः सिंहादयश्च मित्राणि सुहृद इव वसन्तः सहैवासन् तत्र हेतुं वदन्वनं विशिनष्टि अजितस्य भगवतः आवासेन द्रुताः पलायिताः रुट्तर्षादयः क्रोधलोभादयः यस्मात्तस्मिन् ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

इति अनेन प्रकारेण तां तदुपरि चच्छाद छादयामासेत्यन्तर्भूतण्यर्थत्वात् कुत्र मोहस्तत्राह— निजमहिमनि व्यद्दृश्यन्त घनश्यामा इत्यादि स्ववैभवे तद्विशेषणानि स्वप्रमितिक इत्यादीनि मा लक्ष्मीस्तया श्रीराधादेव्या सहितः समः श्रीकृष्ण तस्य आ सम्यक् प्रियं राधा वृन्दावने वन इति ॥ ५७–५८ ॥ वृन्दावनं गोवर्द्धनमिति प्रसिद्धेः ॥ ५९ ॥ अजितावासरूपश्च तत् द्रुतरुट्तर्षादिकश्च तत् तस्मिन् ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तथाविधया प्रकाशिकया मायया किमिदमिदमिति ब्रह्मणि मोहं गते तां पुनस्तिरोधापयांश्चकारेत्याह—इतीरेश इत्यादि। कतर्क्योऽचिन्त्यनीय निजमहिमनि प्रकाशिका-शक्तिवैभवे स्वप्रमितिके स्वप्रमाणके स्वस्वरूपे विषयसप्तमीयम् तथाविधनिजमहिमविषये इति यावत्। ईरेशे ब्रह्मणि मुह्यति सति अजाजवनिकामजस्य ब्रह्मणा आजवनिकामजत्वाभिमान—वनिकां वनीं चच्छाद, स्वमायया तस्य मायां छादयामासेत्यर्थः। अजस्येदमाजमजत्वाभिमानः, तदेव वनिका अत्यल्पवनम्, अल्पत्वाद्वनमेव वनी। अल्पत्वादीप्, तत्राप्यल्पत्वे कन्। निजमहिमानं पुनर्विशिनष्टि—अजातः प्रकृतितः परत्र। तत्र हेतुः—अतन्निरसनमुखेन यद्ब्रह्मकं ब्रह्मानन्दस्तस्य मितिर्यत्र। ईरेशे कीदृशे ? द्रष्टुमपि अनीशे। पुनः कीदृशे ? किमिदमिति मुह्यति सति। कश्चच्छाद ? तत्राह- अजः श्रीकृष्णः। द्वयोरेवाजत्वे कथं तारतम्यमित्याह —परमः। अयं तु परमोऽजः स त्वौपचारिकः। यद्वा, अजा माया, अजा चासौ अजवनिका अतिरस्करणी अनावरिका प्रकाशिकेति यावत्। सा चेति कर्मधारयः। तां-प्रकाशिकां स्वकीयां चच्छाद संवृतवानित्यर्थः। किं कृत्वा ज्ञात्वा, ब्रह्मणो मोहं ज्ञात्वा ॥५७॥ ततस्तस्या संवरणे ब्रह्मा प्रकृतिं प्राप्त इत्याह—ततोऽर्वागित्यादि। को ब्रह्मा परेतरं मृत वत् प्रतिलब्धात्मा सन् उत्थितः कृच्छ्राद्दृष्टीरुन्मील्यात्मना सह इदमुक्तप्रायवैभवमाचष्टे ॥ ५८ ॥ न केवलं तदेवाचष्टे, स्वरूपस्थं वृन्दावनञ्च ददर्शेत्याह—सपदीत्यादि। अभितः सर्वा दिशः पश्यन् पुरःस्थितं वृन्दावनमपश्यत्, पुरःस्थितमपि या या दिशः पश्यति तासु तास्वेव पश्यतीत्यर्थः। वृन्दावनमपि व्यापकेन ददर्श। अथवा, पुरोवृन्दावनदर्शनयोग्यता नासीत्, पश्चादेवाहङ्कारहतो ददर्श। कीदृशम् ? जनाजीव्यद्रुमाकीर्णम्, जनाजीव्यद्रुमाः कल्पद्रुमाः। स ब्रह्मा मा शोभा तस्याः प्रियं दयितम्,—तस्यास्तत्रैवानुगतत्वात्। मा लक्ष्मीर्वा तस्या अप्रियं सम्यक् प्रीतिस्थानम्,—वैकुण्ठादपि मनोहरत्वात्। आत्मना सहेत्यत्रैव वान्वेतव्यम्। या या दिशः पश्यति, तासु तास्वात्मना सह वृन्दावनं ददर्शेति वृन्दावनस्य व्यापकत्वम्। अतस्तृतीये भगवता ब्रह्माणं यत् प्रत्युक्तम्-(भा. ३।९।३१) "तत आत्मनि लोके च भक्तियुक्तः समाहितः। द्रष्टासि मां ततं ब्रह्मन् मयि लोकांस्त्वमात्मनः ॥" इति तस्येदमुदाहरणं व्याख्यातञ्च तत्रैव तथा ॥ ५९–६० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अजां जवनिकां चच्छाद संवृतवान्।मायान्तः—पटसंवरणानन्तरमेव वृन्दावन-स्वरूपदर्शन-योग्यताऽभूदिति भावः ॥ ५७–५८ ॥ वृन्दावनं कीदृशम् ? मा प्रियम्, मा शोभा अस्याः प्रियम्। स ब्रह्मा ॥ ५९–६० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तावन्मात्र एव मञ्जुमहिमनि निमज्जन्तमनुभवासमर्थं ब्रह्माणमालोक्य ततः परस्सहस्रेषु दर्शयितव्येष्वसाधारणेषु निजमहामञ्जुमहिमसु तमनधिकारिणमभिमृश्य मञ्जुमहिमदर्शनां समापयामासेत्याह-इतीति। ईरेशे ब्रह्मणि इरा सरस्वती तस्या ईशे महाबुद्धिमत्यपीत्यर्थः। किमिदमिति मुह्यति सति पश्चाद्द्रष्टुमप्यनीशे सति परमोऽजः श्रीकृष्णः ज्ञात्वा स्वैश्वर्य्यरसानुभवे तद्योग्यतां वीक्ष्य सपदि अजाजवनिकां योगमायारूपां तिरस्करणीं चच्छाद यया पुलिने भुञ्जानान् श्रीदामादिबालकान् तृणं चरतो

वत्सान् वत्सान्वेषकं स्वं चाच्छाद्य स्वरूपभूतान् वत्सबालकादीन् पुनस्तानेव चतुर्भुजादित्वेन दर्शयामास तामन्तरधापयदित्यर्थः। या वास्तवं वस्त्वावृणोति अवास्तववस्त्वेव दर्शयति सा माया या तु वास्तववस्तूनामपि मध्ये किमप्यावृणोति किमपि दर्शयति सा योगमायेति मायायोगमाययोर्भेदादजाशब्देनात्र बहिरङ्गा माया न व्याख्येया, क्व मुह्यति ? निजमहिमनि दर्शितचतुर्भुजादिरूपस्वमहैश्वर्य्ये कीदृशे अतर्क्ये यतः स्वप्रमिति स्वप्रकाशं च तत् कं सुखरूपं च तस्मिन् अत एव अजातः प्रकृतेः परत्र परस्मिन् अतन्निरसनमुखेन ब्रह्मकैः "अस्थूलमनणु अह्रस्वम्" इत्यादिकैः श्रुतिशिरोभिर्ब्रह्माभिव्यञ्जकैर्मितिज्ञानं यत्र तस्मिन् स्वरूपे ॥ ५७॥ अर्वाक् बहिः प्रतिलब्धानि अक्षाणि येन सः परेतवत् मृतो यदि कथञ्चित् पुनरुत्तिष्ठति तथेत्यर्थः । विस्मयरसमहाभारमर्दितत्वादिति भावः । इदं जगत् ममतास्पदं आत्मनाऽहन्तास्पदेन सह अपश्यत् तयोरपि विस्मृतपूर्वत्वात् ॥ ५८ ॥ ततश्च परमकृपया कृष्णस्तस्मै स्वमाधुर्य्यवैभवं प्रकाशितवानित्याह—सपद्येवेति । सम्यगासमन्तात् परस्परं प्रियाण्येव यत्र तत् ॥५९॥ तदेवाह—नैसर्गं निसर्गोत्थं मिथो दुर्वैरं येषां तेऽपि मनुजव्याघ्रादयः मित्राणीव सहैवासन् अजितस्यावासेन द्रुताः पलायिताः तुट्तर्षादयः क्रोधलोभादयो यस्मात्तस्मिन् ॥ ६० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इत्येवम् इरेशे सरस्वतीशे किमिदमिति नुह्यति सति पश्चाद्द्रष्टुमप्यनीशे सति परमोऽजः श्रीकृष्णः तथा ज्ञात्वा भजाजवनिकां अजारूपां तिरस्करिणीं तदोपरि चछाद प्रसारितवान् मूर्तिव्यूहदर्शनानर्हं मूर्त्तिव्यूहप्रकाशकसाक्षात्स्वरूपदर्शनार्हं चकारेति फलितोऽर्थः । वक्ष्यमाणस्तोत्रोपपत्तेः कुत्र मुह्यति सति ? अतर्क्ये तर्कागोचरे अनुमानादिभिः प्रतिपादयितुमशक्ये "नेन्द्रियाणि नानुमानम्" इति श्रुतेः । तर्हि कथं तज्ज्ञानं स्यादत आह, अतन्निरसनमुखब्रह्मकमिताविति अतद्भगवत्स्वरूपभिन्नं चिदचिदात्मकं जगत् तन्निरसनमुखेन तत्तत्पदार्थानां भगवत्स्वरूपत्वनिषेधद्वारा ब्रह्मकैर्वेदान्तैर्मितिर्ज्ञानं यस्मिन् तत्रापि स्वप्रमितिके स्वकीयभक्तप्रमितेः प्रतीतेः क आत्माश्रयो विषय इत्यर्थः । "को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे" इति मेदिनीकरकोशात् तस्मिन् स्वभक्तज्ञानबिषये यतः अजातः परत्र मायातः परस्मिन् अभक्तैर्मायामोहितैर्वेदान्ताभ्यासेनापि ज्ञातुमशक्ये इत्यर्थः । किं बहुना निजमहिमनि निजः असाधरणः महिमा यस्य तस्मिन् अत्यद्भुतमूर्त्तिव्यूहप्रकाशके श्रीकृष्णे कथं तेन किमाकारो मूर्त्तिव्यूहः प्रकाशितः तत्रापि स कतमः इत्येवं मुह्यति सति तं च विशेषतो द्रष्टुमनीशे सति तां चच्छादेत्यर्थः ॥ ५७ ॥ ततस्तदनन्तरं को ब्रह्मा अर्वाग् बहिः प्रतिलब्धान्यक्षीणीन्द्रियाणि येनः सः परेतवदुत्थितः शवो यथा कथञ्चिदुत्तिष्ठति तद्वदुत्थितः दृष्टीः नेत्राण्युन्मील्य सहात्मना स्वेन सह इदं विश्वम् आचष्ट समन्ततोऽपश्यत् पूर्वमनेकानि ब्रह्माण्डानि तदभिमानिनोऽनेकान् चतुर्मुखान् तत्तन्मूर्त्त्युपासकान् दृष्ट्वा पश्चादेकमात्मानं चतुर्मुखमेकमेव ब्रह्माण्डमपश्यदित्यर्थः ॥ ५८ ॥ पुरः स्थितं वृन्दावनं चापश्यत् कथम्भूतं समाप्रियं सन्ततानि आसमन्ततः प्रियाणि यस्मिन् तत् ॥ ५९ ॥ यत्र वृन्दावने नैसर्गं नैसर्गिकं स्वाभाविकं दुर्वैरं येषां ते मृगसिंहादयः मित्राणीव सहैवासन् अजितस्य श्रीकृष्णस्य आवासेन द्रुताः पलायिताः रुट्तर्षादयः क्रोधलोभादयो यस्मात्तस्मिन् तत्राद्वयं ब्रह्मपरमेष्ठ्यचष्टेत्युत्तरेणान्वयः ॥३०॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

मञ्जुमहिमचुलुकेऽपि निमज्जन्तः ततोऽन्यस्मिंस्तदर्णवे दर्शयितव्यो अनधिकारिणं विरिञ्चं विज्ञाय हरिस्तद्दर्शनं समापयदित्याह—इतीति । इरा सरस्वती तस्या ईशे तत्पितरि महाबुद्धिशालिनि विरिञ्चे किमिदमिति मुह्यति सति पश्चात् द्रष्टुमप्यनीशे च सति परमोनन्दार्भकः सर्वेशस्तं स्वमञ्जुमहिमदर्शने तदनुभवे चायोग्यं ज्ञात्वा सपदि तत्क्षणात् अजाजवनिकां चछाद यया प्रकृतान् वत्सबालांस्तदन्वेषकस्वपर्यन्तानाच्छाद्य पुनः स्वात्मभूतांस्तान् घनश्यामादिलक्षणानदर्शयन्तामजाजवनिकां योगमायाख्यां तिरस्करणीमन्तर्धापयदित्यर्थः। मायायोगमाययोर्भेदस्तु "विष्णोर्माया भगवती"ति पद्यटिप्पण्यां द्रष्टव्यः । क्व मुह्यतीत्यत्राह—निजे असाधारणे महिमनि दर्शिते घनश्यामादिलक्षणे महैश्वर्ये, कीदृशे अतर्क्ये यतः स्वप्रमितिके स्वप्रकाशविज्ञानानन्दरूपे इत्यर्थः। तादृशस्य मूर्तत्वादिना अतर्क्यत्वमित्यर्थः । अतएवाजातस्त्रिगुणायाः परत्र तदस्पृष्टे इत्यर्थः । अतन्निरसनमुखेन ब्रह्मकैर्वेदशिरोभिः "अस्थूलमनण्वह्रस्व" मित्याद्योपनिषद्वाक्यैर्मितिज्ञानं यस्य तस्मिन् ॥ ५७ ॥ अर्वाग् बहिः प्रतिलब्धान्यक्षाणीन्द्रियाणि येन सः परेतवदुत्थितः मृतश्चेत् कथञ्चिदुत्तिष्ठति तथेत्यर्थः । विस्मय महाभाव विमर्दितत्त्वादिति भावः। आत्मना स्वेन सहेदं जगदाचष्टापश्यत् ॥ ५८ ॥ अथ कृपालुः नन्दार्भकः स्वशिष्याय तस्मै स्वमाधुर्याश्रयं वृन्दावनमदर्शयदित्याह—सपदीति। अभितो दिशः पश्यन् वृन्दावनमपश्यत् जनाजीव्यैर्नानास्वादुफलरसवद्भिर्द्रुमैराकीर्णं सम्यगासमन्तात् प्रियाणि यत्र यत् ॥ ५९॥ तदेवाह नैसर्गिकं स्वाभाविकं दुर्वैरं येषां ते नृमृगादयो मनुजव्याघ्रादयो यत्र मित्राणीव सहैवासन् अजितस्यावासेन द्रुताः पलायिता रुट्तर्षादयः क्रोधलोभादयो यतस्तस्मिन् ॥ ६० ॥

श्रीसुबोधिनी

एवमप्रयोजके ब्रह्मणि जाते भगवांस्तद्रूपमुपसंहृतवानित्याहे**तीरेश** इति, **इत्य**मुना प्रकारेणे**रेशे** वाक्पतौ ब्रह्मणि **द्रष्टुमप्यनीशे मुह्यति** च **सति** तस्य मोहादिक्लेशं ज्ञात्वा**जाजवनिकां** मायारूपतिरस्करिणीं **चछादा**च्छादितवान्, नदुपरि

प्रसारितवान्, यथा ब्रह्मणो दर्शनं न भवति, उद्घाटितमाययैव तेषां दर्शनं न तु निर्माणमत आच्छादनेदर्शनं युक्तमेव, ननु ब्रह्मणो मोहेदर्शने च को हेतुस्तत्राह **निजमहिमन्यतर्क्ये** सति, भगवतोसाधारणमहिमान्येषां तर्कविषयोपि न भवति, अतः कथं द्रष्टुं शक्यते ज्ञातुं वा ? तदेव कुतस्तत्राह **स्वप्रमित्तिक** इति, **स्वस्यैव** भगवत **एव प्रमिति**र्यस्य, केवलं स्वसंवेद्यमेव तन् न त्वन्यसंवेद्य, तत्रापि हेतुर**जातः परत्रे**ति, प्रकृतेः परः सः, प्रकृतौ चान्ये, अतो यत्र **भगवां**स्तत्रान्यो नास्तीति भगवत्संवेद्यमेव भगवन्-माहात्म्यं, ननु श्रुत्वा कथं न ज्ञायते ? तत्राहा**तन्निरसनमुखब्रह्मकमिता**विति, ब्रह्मव्यतिरिक्तस्य निरसनद्वारैवोपनिषदो ब्रह्मस्वरूपं बोधयन्ति न तु साक्षादाहृत्य, संङ्केतग्रहाभावात्, वैदिकव्यवहारेपि यावदयं बहिर्मुखस्तत्र प्रविशति ताद्बहिर्निरसनेनैव प्रवेशनीयः प्रविष्टस्तु तद्भावमेव प्राप्स्यतीति स्वसंवेद्य एव भविष्यति, अतः प्रथमाधिकारे श्रुतिस्तथैवा 'हाथात आदेशो नेति नेती'ति, अतः श्रुतयोप्याहृत्य न वदन्तीति युक्तमेव तस्य द्रष्टुमशक्तिर्मोहश्च **ततो** दुःखं चेति ।। ५७ ।। भगवतैवं कृते मूर्छित एव ब्रह्मा पतितस्ततः कियत्कालानन्तरमुत्थितः, **अर्वागेव प्रतिलब्धमक्षं** ज्ञानं येन, लोकदर्शनार्थमेवोत्थितो न तु भगवद्दर्शनार्थमिति व्यर्थमस्योत्थानमिति दृष्टान्तमाह **परेतव**दिति, यथा मृत उत्तिष्ठति केनचिन्निमित्तेन तथायमप्युत्थितः पूर्वं मृतो मूर्छितः पश्चादुत्थित इति वा **कृच्छ्रा**दतिकष्टेनैव **दृष्टीरुन्मील्येदं** जगदेव दृष्टवान् ।। ५८ ।। ततः **सपद्येवाभितः पश्यन् दिशोपश्यत्** ततः **पुरःस्थितवृन्दावनं चापश्यत्** ततस्तस्मिन् वने जीवनार्थमागताँल्लोकानपश्यत् तदाह **जनाजीव्य**मिति, **द्रुमाकीर्ण**मिति द्रुमैर्व्याप्तं न तु शून्यारण्यं **समं च** तदासमन्तात् **प्रियं** च ।। ५९ ।। ततस्तत्रत्यान् मृगानपि दृष्टवानित्याह **तत्र नैसर्गदुर्वैरा** इति, स्वभावत एव दुष्टवैरा अप्यश्वमहिषादयः **सहैवासन् नरा मृगाश्च** किञ्च **मित्राणीव**, तत्र हेतु**रजितस्य** भगवत **आवा**सेन **गता** रुट् **तर्षा** तृष्णान्यपि कामादयो दोषाः, **गतरुट्तर्षादिकं** यथा भवति तथा **सहास**न्नितिसम्बन्धः ।। ६० ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'एवं मोहमग्नं ब्रह्माणं भगवान् कृपया उज्जहार' इत्याह—इतीति । इत्येवं दृष्ट्वा इरेशे इरा सरस्वती, तस्या ईशे भर्तरि ब्रह्मणि 'किमिदं दृश्यते' इति मुह्यति सति पश्चात्तद्द्रष्टुमप्यनीशे असमर्थे च सति परमोऽजः श्रीकृष्णस्तस्य मोहादिक्लेशं ज्ञात्वा 'अयं लोकाभिमानी ममैश्वर्यं द्रष्टुमयोग्य' इति कृत्वा सपदि झटिति तस्योपरि अजाजवनिकां मायारूपां तिरस्करिणीं चच्छाद प्रसारितवान् । अनेन 'स्वैश्वर्यदर्शनार्थं पूर्वं भगवता स्वमाया प्रसारिता, अन्यथा तद्दर्शनं न स्यात्' इति ज्ञेयम् । 'क्व मोहः को वा मोहे हेतुः' इत्यपेक्षायामाह—अतर्क्य इति । तर्कागोचरे भगवति इत्यर्थः । तत्र हेतुमाह—निजमहिमनीति । निजः असाधारणो महिमा यस्य तस्मिन् इत्यर्थः । दर्शनायोग्यत्वे हेतुमाह—स्वप्रमितिके इति । स्वप्रमितिः स्वप्रकाशं च तत् कं सुखं च तस्मिन्, स्वप्रकाशसुखरूपे इत्यर्थः । तत्र हेतुमाह–अजातः प्रकृतेः परत्र परस्मिन्निति । 'एवंभूते किं प्रमाणम् ?' इत्यपेक्षायामाह—अतदिति । अतन्निरसनमुखेन 'अथात आदेशो' 'नेति नेति' 'अस्थूलमनण्वह्रस्वम्' इत्येवं ब्रह्मव्यतिरिक्तनिरासप्रकारेण ब्रह्मकैः श्रुतिशिरोभिर्मितिर्ज्ञानं यस्मिस्तस्मिन्नित्यर्थः ।। ५७ ।। ततो मायाप्रसारणानन्तरं अर्वाक् बहिः प्रतिलब्धानि अक्षाणि इन्द्रियाणि येन सः को ब्रह्मा परेतवत् मृतो यथा कथञ्चित् पुनरुत्तिष्ठेत् तथोत्थितः कृच्छ्राच्छनैर्दृष्टीर्नेत्राणि उन्मील्यात्मनाऽहङ्कारास्पदेन देहादिना सन्देहं ममकारास्पदं विश्वमचष्ट अपश्यत् ।। ५८ ।। ततः सपद्येवाभितः सर्वतः सर्वा दिशः पश्यन् जनानामाजीव्या जीविकारूपा ये द्रुमारस्तैराकीर्णं व्याप्तम्, समाप्रियं सन्ततानि आसमन्तात् प्रियाणि वस्तूनि यत्र तद्वृन्दावनं पुरतः स्थितमपश्यदित्यन्वयः ।। ५९ ।। समाप्रियत्वे हेतुं सूचयन् वृन्दावनं वर्णयति–यत्रेति । यत्र वृन्दावने नैसर्गदुर्वैराः स्वाभाविकप्रतिकार्यवैरवन्तोऽपि नर–व्याघ्रादयः आदिपदेन अहि-नकुलादयो मूषक-मार्जारादयश्च मित्राणीव सहैवासन्नित्यन्वयः । ननु 'कथमेवं स्वाभाविकवैरत्यागः ?' इत्यपेक्षायां 'वैरं हि कामक्रोधभयादिभिर्भवति, ते च सर्वे तत्रत्यानां भगवन्महिम्ना निवृत्ताः । अतः कारणाद्वैरं कथं स्यात् ?' इति सूचयन्नाह—अजितेति । अजितस्य वशीकृतकालकर्मस्वभावादेः श्रीकृष्णस्य आवासेन द्रुताः पलायिता रुट्तर्षादयः क्रोधलोभादयः आदिपदेन भयादयश्च यस्मात्, तथाभूतं वृन्दावनमपश्यदित्यन्वयः ।। ६० ।।

अन्वितार्थप्रकाशिका

इतीति ।। इत्येवं दृष्ट्वा अतर्क्ये तर्कागोचरे निजः असाधारणो महिमा यस्य तस्मिन् स्वप्रमितिः स्वप्रकाशं च तत्कं सुखं च तस्मिन्स्वप्रकाशसुखरूपे अजातः प्रकृतेः परत्र परस्मिन् अतन्निरसनमुखेन "अथात आदेशो नेति नेति" अस्थूलमनण्वह्रस्वमित्येवं ब्रह्मव्यतिरिक्तनिरासप्रकारेण ब्रह्मकैः श्रुतिशिरोभिर्मितिर्ज्ञानं यस्मिन् तस्मिन् भगवति विषये इरेशे इरा सरस्वती तस्या ईशे भर्तरि महाबुद्धिमत्यपीत्यर्थः । ब्रह्मणि किमिदं दृश्यत इति मुह्यति सति पश्चात्तद्द्रष्टुमप्यनीशे असमर्थे च सति परमोऽजः श्रीकृष्णस्तस्य मोहादिक्लेशं ज्ञात्वा अजाजवनिकां मायारूपां तिरस्करिणीं चच्छाद अपसारितवान् । तुगभाव आर्षः । "छद, अपवारणे" आधृषीयः । तत्तद् वत्सबालकान् चतुर्भुजादित्वेन दर्शयन्मायामन्तरक्षापयत् । यद्वा । अयं लोकाधिपत्याभिमानी ममैश्वर्यं द्रष्टुमयोग्य इति कृत्वा सपदि झटिति तस्योपरि प्रसारितवान् । अनेन स्वैश्वर्यदर्शनार्थं पूर्वं भगवता स्वमाया न प्रसारिताऽन्यथा तद्दर्शनं न स्यात् इति ज्ञेयम् ।। ५७ ।। तत इति ।। ततो मायाप्रसारणानन्तरम् अर्वाक् बहिः प्रतिलब्धानि अक्षाणि इन्द्रियाणि येन

सः को ब्रह्मा परेतवत् मृतो यथाऽमृतसेकेन कथंचित्पुनरुत्तिष्ठेत् तथोत्थितः कृच्छ्राच्छनैर्दृष्टीर्नेत्राणि उन्मील्यात्मना देहादिना सह इदं विश्वम् अचष्ट अपश्यत् ॥ ५८ ॥ सपदीति ॥ सपदि एव अभितः सर्वतः सर्वा दिशः पश्यन् जनानामाजीव्या जीविकारूपा ये द्रुमास्तैराकीर्णं व्याप्तं समाप्रियं सन्ततानि आसमन्तात् प्रियाणि वस्तूनि यत्र मा लक्ष्मीस्तत्प्रियो भगवान् तेन सहितं वा तद् वृन्दावनं पुरतः स्थितमपश्यत् ॥ ५९ ॥ यत्रेति ॥ यत्र वृन्दावने नैसर्गदुर्वैराः स्वाभाविकाप्रतिकार्यवैरवन्तोऽपि नरव्याघ्रादयः मित्राणीव सहैवासन् यतस्तद्वृन्दावनमजितस्य श्रीकृष्णस्य आवासेन द्रुताः पलायिता रुट् तर्षादयः क्रोधलोभादयः आदिपदेन भयादयश्च यस्मात्तादृशमस्ति । अतस्तत्र विरोधाभाव एव ॥ ६० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दृष्टैश्वर्यात् अजस्य परावृत्तिमाह इतीति । अतर्क्ये जनैस्तर्कागोचरे स्वप्रमितिके स्वस्यैव प्रमितिर्ज्ञानं प्रकाशकं यस्य तत् श्रीकृष्णोपदिष्टज्ञानेनैव गम्यमित्यर्थस्तस्मिन् अतः अजातः प्रकृतेः परत्र परस्मिन् तस्मात् परमेश्वरादन्येऽक्षरब्रह्मतत्स्थमुक्तकोटिप्रकृतिपुरुषादयः अतदस्तेषां निरसनमुखेन परमेश्वरतुल्यत्वनिषेधमुखेन ब्रह्मकेषु श्रुतिशिरस्सु उपनिषत्सु मितिः प्रमाणं यस्य तस्मिन् तथाचोक्तं श्रुतिस्मृत्योः नतत्समश्चाभ्यधिकश्च दृश्यत इति । निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नम इति एवंभूते निजमहिमनि निजः स्वकीयोऽन्यातुल्यो महिमा यस्य तस्मिन् अतिशयैश्वर्ययुक्ते श्रीकृष्णस्वरूपे इरेशे इरा वाणी तस्या ईशे ब्रह्मणि किमिदं मया दृष्टमिति मुह्यति तदनंतरं द्रष्टुमप्यनीशे राजसस्वभावादीक्षितुमसमर्थे सति इति मुह्यंतं विधिं ज्ञात्वा परमः क्षराक्षरेभ्य उत्कृष्टोऽजः प्राकृतजन्महीनः श्रीकृष्णः सपदि शीघ्रं तस्योपरि अजाजवनिकां सर्वजीवावरणकारिणीं मायारूपां तिरस्करिणीं चच्छाद आच्छादयामास ॥ ५७ ॥ तत इति तत आच्छादनानंतरं अर्वाक् बहिः प्रतिलब्धानि प्राप्तानि अक्षीणि येन सः परेतवन्मृतवत् को ब्रह्मा उन्मील्य उद्घाट्य आत्मना स्वदेहेन सह ॥ ५८ ॥ जनानामाजीव्यैः फलादिभिर्जीवनार्हैः द्रुमैराकीर्णं व्याप्तं समाप्रियं जनानां सम्यक् आसमंतात्प्रियं हितं यस्मिन् तत् पुरःस्थितं वृन्दावनम् अपश्यत् ॥ ५९ ॥ तदेव विस्तरतो वदति यत्रेति यत्र वृंदावने नैसर्गेण स्वभावेन दुर्वैराः अनिवार्य्य वैरयुक्ताः नृमृगादयो नरव्याघ्रादयः मित्राणीव सहासन् एकत्र स्थिता बभूवुः अजितस्यावासेन निवासेन द्रुताः पलायिताः रुट्तर्षादयो मन्युतृष्णादयो यस्मात् एवंभूतं वृंदावनमपश्यदिति पूर्वेण संबंधः ॥६०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अणिमेति ॥ अणिमाद्यैः महिमभिः सिद्धिभिः, अजा माया तदादिभिः विभूतिभिः, महदादिभिः, चतुर्विंशतिभिः तत्त्वैः, परीताः परितो वेष्टिताः, अजाद्याभिरिति प्रकृतेः पृथगुक्तेः । तत्त्वानां जीवात्मना सह चतुर्विंशतित्वम् ॥ ५७ ॥ कालेति ॥ स्वस्य भगवतो महि महिमा तेन ध्वस्तो निरस्तः महि स्वतन्त्रतारूपो महिमा येषां तैः, मूर्त्तिमद्भिश्च, कालो निमेषादिर्वत्सरान्तश्च स्वभावः परिणामहेतुश्च संस्कार उद्बोधहेतुश्च कामः कर्महेतुश्च कर्म तद्देहोपलब्धिहेतुश्च गुणाः सत्त्वादयो ज्ञानविक्षेपमोहहेतवश्च ते आदयो येषां तैः, उपासिताः ॥ ५८ ॥ सत्येति ॥ सत्यं विकाररूपासत्यत्वप्रतियोगि च ज्ञानं जाड्यप्रतियोगि च अनन्तोऽनन्तता परिच्छेदप्रतियोगी च आनन्दः दुःखप्रतियोगी च तन्मात्रा एकरसमया मूर्त्तयो येषां ते, उपनिषद्दृशां ज्ञानचक्षुषाम् अपि, हि निश्चितमेव, न स्पृष्टं स्पर्शयोग्यं भूरि माहात्म्यं येषां ते तथाभूताः ॥ ५९ ॥ एवमिति ॥ अजो ब्रह्मा, एवं सचराचरं स्थावरजङ्गमसहितं, इदं, सर्वं यस्य भासा विभाति, एवंभूतं यत् परब्रह्म तदात्मा स्वरूपं येषां तान्, समासान्तर्गतस्यापि परब्रह्मेति पदस्य यस्येत्यादिविशेषणं छान्दसम् । अखिलान् सकृदेकदैव, ददर्श । यद्वा । अजः, एवं अखिलान् सकृत् परब्रह्मात्मनः ददर्श । इति पूर्वार्द्धं व्याख्याय यस्येत्येतत्पदस्य तद्धाम्ना तष्णीमभूदित्युत्तरेणैवान्वयः ॥ ६० ॥

कृष्णप्रिया

राजन् परीक्षित् ! सर्वथा तर्क के अविषय-अगोचर-असाधारण निज महिमा वाले, स्वसंवेद्य, स्वप्रकाश, सुखस्वरूप, प्रकृति-माया से पर, वेदोपनिषद् सरस्वतीजी भी भगवान का साक्षात् रूप से निरूपण करने में असमर्थ होने के कारण, ब्रह्म से अतिरिक्त कोई वस्तु नहीं है ऐसा निषेध मुख सच्चिदानन्द स्वरूप का किसी प्रकार कुछ संकेत ही करता है "ऐसे वागगोचर" ऐसे भगवान् श्रीकृष्ण की महिमा में समस्त विद्याओं के अधिपति ब्रह्माजी भी मूक बन गये और यह सब क्या है मैं क्या देख रहा हूँ ऐसे अकुला उठे लेकिन दर्शन करने में भी असमर्थ हो गये। ब्रह्माजी की ऐसी दयनीय दशा को, स्थिति को देखकर दयानिधि अजन्मा भगवान ने अपनी माया का परदा बिना विलम्ब ढक दिया ॥ ५७ ॥ स्वरूपाच्छादन के अनन्तर भगवत्कृपा से ब्रह्माजी के अन्तःकरण में ज्ञानोदय हुआ। अब बाह्य ज्ञान प्राप्त कर ब्रह्माजी जैसे मृत्यु पाकर पुनः पुनरुज्जीवित बने वैसे सचेत हो उठे। सचेत दशा पाने के बाद ज्यों त्यों करके अति श्रम से ब्रह्माजी निज नेत्र खोले तब कुछ अंश में ब्रह्माजी अपनी देह और इस जगत् को देख पाये ॥ ५८ ॥ बहिर्दृष्टि पाने के बाद ब्रह्माजी ने चारों ओर देखा, सबसे प्रथम दिशाएँ पुनः शीघ्र ही श्रीवृन्दावन का दर्शन सन्मुख दर्शन पाया। श्रीवृन्दावन सबको एक समान प्रिय लगता है। जन जीवन देने वाले विविध

फलफूल समृद्ध तरुवरों से सघन यह श्रीवृन्दावन है ॥ ५९ ॥ श्रीवृन्दावन में श्रीवृन्दावनबिहारी श्रीकृष्ण भगवान् नित्य विराजते हैं। इसलिये तृष्णा-काम-क्रोध-लोभ आदि दोष सबके अनायास दूर हो गये थे। स्वभाव से ही दुष्ट वैर भाव रखने वाले मृगादि पशुपक्षी वृन्द और नर-नारी निर्वेर मित्र बन कर रहते थे ॥ ६० ॥

तत्रोद्वहत् पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनन्तमगाधबोधम् ।
वत्सान् सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्ट ॥ ६१ ॥
दृष्ट्वा त्वरेण निजधोरणतोऽवतीर्य पृथ्व्यां वपुः कनकदण्डमिवाभिपात्य[1] ।
स्पृष्ट्वा चतुर्मुकुटकोटिभिरङ्घ्रियुग्मं नत्वा मुदश्रुसुजलैरकृताभिषेकम् ॥ ६२ ॥
उत्थायोत्थाय कृष्णस्य चिरस्य [2]पादयोः पतन् । आस्ते महित्वं प्राग्दृष्टं स्मृत्वा स्मृत्वा पुनः पुनः ॥६३॥
शनैरथोत्थाय विमृज्य लोचने मुकुन्दमुद्वीक्ष्य विनम्रकन्धरः ।
कृताञ्जलिः प्रश्रयवान् समाहितः सवेपथुर्गद्गदयैलतेलया[3] ॥ ६४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे [4]त्रयोदशोऽध्यायः ॥ १३ ॥

प्रक्षिप्तेषु द्वितीयोऽध्यायः

कर्दमक्षमा

अन्वयः—तत्र परमेष्ठीं अनन्तं परं अगाधबोधं पशुपवंशशिशुत्वनाट्यं उद्वहत् पुरा इव परितः सखीन् वत्सान् विचिन्वत् सपाणिकवलं एकं अद्वयं ब्रह्म अचष्ट ॥ ६१ ॥ दृष्ट्वा त्वरेण निजधोरणतः अवतीर्य पृथ्व्यां कनकदण्डं इव वपुः निपात्य चतुर्मुकुटकोटिभिः अङ्घ्रियुगं स्पृष्ट्वा नत्वा मुदश्रुजलैः अभिषेकं अकृत ॥ ६२ ॥ प्राक् दृष्टं कृष्णस्य महित्वं पुनः पुनः स्मृत्वा स्मृत्वा पुनः पुनः उत्थाय उत्थाय चिरस्य पादयोः पतन् आस्ते ॥ ६३ ॥ अथ शनैः उत्थाय लोचने विमृज्य मुकुन्दं उद्वीक्ष्य विनम्रकन्धरः कृताञ्जलिः प्रश्रयवान् समाहितः सवेपथुः गद्गदया इलया ऐलत ॥ ६४ ॥

समाप्तः त्रयोदशोऽध्यायः ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र च परमेष्ठी ब्रह्मा इव पुरा पूर्वदेव ब्रह्म अचष्टापश्यत् । कथंभूतम् । पशुपवंशशिशुत्वं नाट्यमुद्वहत् । नाट्यमित्यत्र हेतुः—अद्वयमित्यादि अद्वयं च वत्सान्विचिन्वत् । एकं च सखीन् । अगाधबोधं च विचिन्वत् । अनंतं च परितो विचिन्वत् । परं च शिशुत्वमुद्वहत् । ब्रह्म च सपाणिकवलमिति नाट्यमेवोद्वहदित्यर्थः ॥ ६१ ॥ निजधोरणतः स्ववाहनात्त्वरेण वेगेनावतीर्य दंडवन्नत्वा चतुर्णां मुकुटानामग्रैरंघ्रियुग्मं स्पृष्ट्वा मुदश्रुसुजलैरानंदाश्रुरूपैः सुजलैरभिषेमककरोदिति ॥ ६२ ॥ चिरस्य चिरं पादयोः पतन्नास्ते ॥ ६३ ॥ सवेपथुः सकंपः अत एव गद्गदया अनुकरणमेतत् । इलया वाचा ऐलताऽस्तौत् ॥ ६४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कंधपूर्वार्धे टीकायां ब्रह्ममोहनिरूपणं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र वृंदावने । इत्यर्थ इति—नाट्यविनाद्वयस्य वत्सविचयनम्, एकस्य सखिविचयनम्, अगाधबोधस्य विचयनम्, अनंतस्य परितो विचयनं परस्य शिशुत्वं, ब्रह्मणः सपाणिकवलत्वं च कदाचिदपि न संपनीपद्यत इति भावः । ततः स्वरूपभूतानि चतुर्भुजत्वादीनि योगमाययैवाच्छाद्य प्रकटमेवाद्वयं ब्रह्म श्रुत्युक्तं दर्शितसर्वस्वरूपमूलभूतं स्वरूपं दर्शयामास । कीदृशम्—पशुपवंशशिशुत्वेपि प्रौढपरमचतुरोचितं नाट्यं मत्प्रभुर्मया मोहित एवेति ब्रह्माणं मिथ्याभिमानं ग्राह्ययितुं शाद्वले वत्सानदृष्ट्वापि पुलिनेऽपि सखीनदृष्ट्वाप्यदर्शनाभिनयं नटानां कर्मोद्वत् । दर्शितानां ब्रह्मादिस्तंबपर्यंतानामाच्छादनादद्वयं सर्वमूलस्वरूपत्वात्परं दर्शितेभ्यश्चिद्वभवेभ्योऽप्यपरेषां चिदानंदमयपरः सहस्रमहावैभवानां विद्यमानत्वादनंतं परमेष्ठिनो वराकस्य का गणना, श्रीबलदेवाद्यैरवतारैरपि दुःप्रवेशत्वादगाधबोधम् उक्तलक्षणान्नाट्याद्वत्सान्सखींश्च पुरैव परित इतस्ततो विचिन्वदिति वत्सबालान्वेषणं पूर्ववर्षे ब्रह्मणा मायामोहितत्वाद्यथार्थमेवागतम् । अधुना तु मायासक्तवात्छाद्वलतृणं चरतो वत्सान्पुलिने च भुंजानान्बालान्पश्यता स्वापहृतान्मायि-

---

१. मिपात्य—वीर. ; गो. प्रे. पु. ; निपात्य—श्रीधर. वंशी. विज. विश्व. शुक. । २. पदयोः—च. पु. टी. । ३. यैडतेरया—वीर. । ४. पूर्वार्धे—श्रीधर. ।

कवत्सबालांश्चापश्यता तेन मन्मोहनार्थमभिनयमात्रमित्यवगतम्। अत एव 'नौमीड्य ते' इत्यग्रिमस्तुतिवाक्येन वत्सबालान् विचिन्वत इति विशेषणं नोपन्यस्तम्। स्वरूपभूतानां वासुदेवमूर्तीनां स्वभेदानां योगमाययैवाच्छादनादेकं भक्तमनोहरमाधुरीलीलामयत्वात्सपाणिकवलम्। अत्र कस्मिंश्चिदधिकारिणि निकृष्टे धर्मधर्मिभावरहितं निराकारं ज्ञानमात्रं यद्ब्रह्मेतिप्रसिद्धं तदपि योगमाययैव तद्दृष्टीः प्रति चिदानंदमयानामपि रूपगुणनामलीलापरिकरधामादीनामाच्छादनाज्ज्ञानमात्रस्यैव प्रकाशनात्संगतमित्येवमेव मिथो विरुद्धार्था अपि श्रुतयो निर्विरोधमेव संगमयितव्या इति दिक्। तत्र पशुपवंशशिशुत्वनाट्यमेवोद्वहन्न तु स्वरूपमिति श्रीभागवतस्य मोहिनीत्वप्रतिपादकमेव व्याख्यानमत एव स्वामिनोऽपि स्तुतौ भगवतः कर्मत्वे ज्ञाते प्रयोजनापेक्षायां भगवानेव प्रयोजनमिति व्याख्यातत्वान्निराकारत्वं नाभिमतम्, न ह्यवास्तवीभूतं वस्तु स्तुतिप्रयोजनीक्रियत इति तत्त्वमिति चक्रवर्ती ॥६१॥ 'युग्यं पत्रं च धोरणम्' इत्यमरः। कनकदंडमिव हेमयष्टिरिव। इदमेव नराकृति परं ब्रह्म सर्वमूलभूतमित्यवगम्य त्वरया वाहनादुत्तीर्य देहाभिमानं परित्यज्य भूमौ दंडवत्पपात। भक्त्युद्भूताश्रूणां पावित्र्यात्सुप्रयोगः ॥६२॥ महित्वमनंतब्रह्माण्डप्रदर्शनरूपम् ॥ ६३ ॥ अत एव सकंपत्वादेव। एतद्गद्गदयेत्येतत्, अनुकरणं वाच एव तच्च तद्वत्तन्त्रेतिलक्षणकम्। ईड्यतेऽनयेति ईडा डलयोरैक्यत्वादीवेति। ह्रस्वेकारादिरप्ययं वाग्वाचकोस्ति। ऐलत 'ईड्–स्तुतौ'।। ६४ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च तत्तत्सर्वफलं साक्षाच्चकारेत्याह– तत्रेति ब्रह्मेति। प्रापञ्चिकानां तेषां तेनैवाविर्भावादिदर्शनेन तदाद्यन्तयोरेकस्वरूपोदयेन च तत्तल्लक्षणाक्रान्तत्वात्। ननु, सम्प्रति दृश्यमानप्रपञ्चस्यान्यत् कारणमस्तु तत्राह, अद्वयं "एकमेवाद्वितीयं ब्रह्म" इति श्रुतेः। सजातीयभेदरहितं ततो दृष्टं परित्यज्य किमर्थमदृष्टं कल्प्येत -तत्रेदमप्येकं तत्र तत्र स्वशक्त्येकमात्रसहायं पूर्वयुक्त्या बहुमूर्त्तित्वेऽपि सत्यज्ञानादिस्वरूपैकमूर्त्तिकमित्यर्थः। अनेन विजातीयसम्भेदश्च निषिद्धः केषाञ्चित् स्वगतभेदनिषेधश्च शक्तिशक्तिमतोरभेदविवक्षया एवं सर्वकारणत्वेन सर्वपरत्वमनन्तत्वं तथा सर्वज्ञत्वसत्यसङ्कल्पत्वसर्वातर्क्यस्वरूपतच्छक्तित्वादिभिरगाधबोधत्वं च प्रसिद्धम्। महापुरुषादिकारणनराकृतित्वेनैव सर्वबृहत्तमत्वात् ब्रह्मत्वं साधयित्वा परं ब्रह्मापश्यदित्युक्तं वक्ष्यते च 'अद्यैव त्वदृते' इत्यादि तदेवमनुभूतपारमैश्वर्यस्य "लोकवत्तु लीलाकैवल्यम्" ।२।१।३३। इति न्यायेन सर्वलीलानिधानस्य तादृशनराकृतित्वोचितपरमलीलामाधुर्यमप्यनुभूतवानित्याह, तत्र तादृशे श्रीवृन्दावने पशुपवंशशिशुत्वं श्रीगोपराजकुमारलीलत्वमेव नाट्यं वैचित्रीभिस्तद्वत् परमचमत्कारकारकम् उत्सर्वोत्कृष्टतया वहत् यत्नेन बिभ्रदिति तत्र च तादृशब्रह्मत्वादिधर्माणामप्युपसर्जनताजननीं ब्रह्मादिचाण्डालपर्य्यन्तजनमनोहरां निजजनप्रेमवशतामयीं कामपि लीलामनुभूतवानित्याह–वत्सानिति। "सर्वं विधिकृतं कृष्णः सहसाऽवजगाम ह" इति तेषां ज्ञातत्वात् पुरेव विचिन्वदित्यर्थः। अन्यत्तद्व्याख्यावत् एवं वत्सरं यावत्तेनैव रूपेण वत्सबालपालकतया तत्परोक्षमवस्थितिस्तस्य गम्यते व्रजे गमनं च स्वस्वरूपप्रकाशद्वैतेन जनकश्रुतदेवगृहगमनवत् तत्प्रकाशे कालगमनं च सखीनामिव तस्यापि सङ्क्षेपेणेव ज्ञातं कवलादीनां तथैव स्थितेरिति ज्ञेयम् ॥ ६१ ॥ कथं नत्वेत्येतदाह–पृथ्व्यामिति पादद्वयेन। तेन देवाभिमानापगममपि बोधयति, अन्यथा न हि देवा भुवं स्पृशन्तीति न सिद्ध्येत् कियद्वेदं "तद्भूरि भाग्यमिह जन्म" इत्यादि वक्ष्यमाणात् कनकेति तद्वपुष ईषद्रक्तपीतवर्णत्वात् चतुर्मुकुटाग्रैः स्पृष्ट्वेति चतुर्दिक्षु स्थितानां चतुर्णामपि कृतार्थतायै क्रमेण परिवृत्त्या भूमौ ललाटपातनात् पश्चादानन्दोदयेन चुम्बन्निवाङ्घ्रिस्पर्शनमुखैरपि कृतवानिति ज्ञेयम्, अकृताभिषेकमित्युपपत्तौ अनेनाश्रूणामत्यन्तबाहुल्यं बोध्यते ॥ ६२ ॥ उत्थायोत्थाय पतन् पुनः पुनश्चिरमास्ते आसीत् लकारव्यत्ययश्छान्दसः साक्षात्पश्यत इवोक्तेरौपचारिका वा तत्र पतने हेतुः महित्वमिति उत्थाने हेतुस्तु तच्छ्रीमुखदिदृक्षैव ज्ञेयः ॥ ६३ ॥ शनैरिति भक्त्युद्रेकेण प्रणामपरित्यागाशक्तेः किं वा प्रेमभराक्रान्त्या स्वभावत एव जाड्यापत्तेः लोचने विमृज्येति गलदश्रुधारया सम्यग्दर्शनाशक्तेः अष्टलोचनत्वेऽपि लोचनद्वयोक्तिः श्रीभगवदभिमुखवर्त्त्यपेक्षया मुकुन्दमिति मुक्तिदातृतीर्थत्वेऽपि मुक्तिशब्दस्य भक्तावपि सम्मतत्वात् यथा पञ्चमे यथा वर्णविधानमपवर्गश्च भवतीत्यारभ्य अनन्यभक्तियोगलक्षणा इति उद्वीक्ष्य उच्चैर्विलोक्य पश्चाद्विशेषतो नम्रकन्धरः सन् अपराधभयलज्जादिना इति श्रीब्रह्मणो भक्तिविशेषेण वत्सादिमार्गणप्रायार्थं भ्रमणं विहाय स्थिरीभूतोऽसाविति गम्यते। समाहित इत्यनेन सवेपथुर्गद्गदयेति प्रेमसम्पल्लक्षणेन च स्तोत्रस्य परमसम्यकत्वं सूचितम्, ऐलत ऐट्टलकारोच्चारणं गद्गदभावानुकरणेनैव अन्योऽन्यं पूर्वं पूर्वं चोत्तरोत्तरमपि स्फुटं सर्वमेतन्महाश्चर्यं विलोकयति मन्मनः ॥ ६४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्च श्रीकृष्णं ददर्शेत्याह—तत्रेति। अब्दगतेऽपि पूर्व्ववद्वत्स-सखिगण-मार्गणादिकं श्रीब्रह्मणः परमकौतुकाय; किंवा भावि-मोह-निवृत्तिर्निज-सहचराणां पूर्व्ववत् समागमादिसुखार्थम्। अन्यत्तैर्व्याख्यातम्। तत्र तादृशं वस्त्वीदृग्वर्त्तत इति चमत्कारविशेषस्य भक्तिविशेषस्य वा कारणत्वे तात्पर्य्यम्, न तु ब्रह्मदृष्टाविति; यद्वा, परंब्रह्म श्रीभगवन्तमचष्ट। कथम्भूतम् ? पशुप–वंश–

शिशुत्वेन श्रीनन्दकुमारत्वेन नाट्यं लीलामुद्वहत्; यद्वा, पशुप-वंशोगोपवेगुस्तस्मिन् शिशुत्वं वादनादि-परत्वम्, तदेव नाट्यमुद्वहत् कदाचित् कौतुकेन दक्षिणेन हस्तेन, कदाचित् वामेन तस्य वादनात्, कदाचिच्च भोजनार्थं जठरपट-सन्धौ न्यसनात्। कथम्भूतं नाट्यम् ? अद्वयमसाधारणमित्यर्थः। कथम्भूतं परं ब्रह्म ? एकमेकाकि-वत्सबालादिरूप-संवरणादत एव पुरेव विचिन्वत्। अन्यत् समानम्। एवमेषां श्रीब्रह्मदृष्टानां यथोत्तरं श्रैष्ठ्यमुह्यम् ॥ ६१ ॥ कथं नत्वेत्येतदाह—पृथ्व्यामिति पादद्वयेन; तेन देवाभिमानापगममपि बोधयति, अन्यथा 'नहि देवा भुवं स्पृशन्ति' इति तन्न सम्भवेत्। कनकेति श्रीब्रह्मवपुष ईषद्रक्तपीतवर्णत्वात्। चतुर्मुकुटाग्रैः-स्पृष्ट्वेति शिरसश्चतुर्दिशं वर्त्तमानानां चतुर्णां मुखानां कृतार्थतार्थं क्रमेण परिवृत्य चतुर्ललाटानां भूमौ निपातनात्; अतएवोक्तमभितः पातयित्वेति, तथा भयादिव दूरतो नतिश्च बोधयति। पश्चादानन्दोदयेनाङ्घ्रियुग्मस्पर्शनं मुखैर्ज्ञेयम्। अकृताभिषेकमिति तस्यैवाभिषेकोक्तेः; अनेनाश्रूणामत्यन्त-बाहुल्यं च बोध्यते। यद्वा, पदमस्पृशतो ब्रह्मणस्तादृश्यश्रुधारा स्नुता, यया चरणाभिषेकोऽभूत्। यद्वा, श्रीवृन्दावनस्याभिषेकमिति ॥ ६२ ॥ ततश्चोत्थानानन्तरं श्रीमुखदर्शनानन्दविशेषेण पादाब्जयोरेव चिरं पतन्नास्त इति प्रणाम-बाहुल्यं बोधयति। यद्वा, पुनः पुनरिति सर्व्वैरेवान्वेति; तथापि वीप्साद्वयं परमहर्षभरोदयात्; यद्वा, महिमविशेष-दर्शनाद्भक्तिविशेषेणादौ श्रीचरणाब्जयोर्दण्डवत् पतति, तदनन्तरं श्रीमुखदर्शनलोभेनोत्तिष्ठति, पुनर्माहात्म्य-स्मरणात् पतति, पुनस्तथैवोत्तिष्ठतीत्येवं चिरमवर्त्ततेत्यर्थः ॥ ६३ ॥ शनैरिति भक्त्युद्रेकेण प्रणाम-परित्यागाशक्तेः। अष्टलोचनत्वेऽपि लोचनद्वयोक्तिः श्रीभगवदभिमुखवर्त्ति-मुखस्य लोचनाभ्यामेवोद्वीक्षणात्। यद्वा, प्रतिमुखं नेत्रद्वयमिति लोचनाभ्यां सर्व्वाण्येव तान्युपलक्षितानि। मुकुन्दमिति तं प्रति परमानन्दप्रदत्वाभिप्रायेण, उद्वीक्ष्य निजमुखमुत्थाप्योच्चैर्विशेषेण दृष्ट्वा, पश्चाद्विशेषतो नम्रकन्धवः सन् माया–विस्तारणापराधतो भयलज्जादिना, किंवा भक्तिस्वभावेन प्रश्रयवान् विनयीति प्रीतभक्तिरुक्ता। समाहित इत्यनेन सवेपथुर्गद्गदयेति प्रेमसम्पल्लक्षणेन च स्तोत्रस्य परमसम्यक्त्वं सूचितम्। 'इला' सरस्वती, तया सर्व्वथैव वाचेत्यर्थः; – चतुर्मुखानां कृतार्थतायै तैः सर्व्वैरेव स्तवनात्। ऐलतेत्यादौ लकारप्रयोगः प्रोक्त-श्रीब्रह्मभाव-विशेष-स्मरणेन श्रीवादरायणेरपि भावविशेषाविर्भावाद्वाग्विकारापत्तेरिति श्रीब्रह्मणो भक्तिविशेषेण वत्सादि-मार्गणार्थं भ्रमणं विहाय स्थिरीभूय स्थितममुमसौ तुष्टावेति ज्ञेयम्। एवमध्यायेऽस्मिन्नप्यारम्भादन्तान्तं प्रतिपदादिकं यथोत्तरामधिकमाश्चर्य्यमभिज्ञैरूह्यम्। तत्र तथा राजप्रश्नानुमोदनं प्रथममाश्चर्य्यम्; तत्र च विट्-दृष्टान्तेन सारग्राहिसतां श्रीभगवत्कथापरता स्वभाववर्णनम्; ततोऽपि श्रीभगवता सरः पुलिनश्लाघनम्; ततोऽपि क्षुत्पीडाविज्ञापनम्; ततोऽपि बालकानां भोजनपरिपाटी; ततोऽपि श्रीभगवतो भोजनमुद्रा; ततोऽपि विदूरगतवत्सानयनार्थं मित्राणामाश्वासनपूर्व्वकं स्वयंगमनम्; तत्रापि सपाणिकवलत्वम्; ततोऽपि दुर्गमस्थानेषु प्रयत्नेन वत्सान्वेषणम्; ततोऽपि मायया ब्रह्मणा वत्सवत्सपवर्गाणां मोहनमाच्छादनञ्च; ततोऽपि परमव्यग्रतया श्रीभगवता वत्सवत्सपानां सर्व्वत्रान्वेषणम्; ततोऽपि सद्य एव ब्रह्मशेषचेष्टितज्ञानम्; ततोऽपि तन्मातृणामिव ब्रह्मणोऽपि प्रमोदनेच्छा; ततोऽपि वत्सवत्सपादितत्तद्रूपतावाहिकौशलम्; ततोऽपि तैः सह पूर्व्ववत् क्रीडा; ततोऽपि तत्तन्मातृणां स्नेहोद्रेकस्ताभिर्लालनादिविशेषश्च; ततोऽपि पूर्व्वतोऽन्योऽन्यं स्नेहविशेषस्ततोऽपि श्रीबलदेवस्य चिरं तत्तत्त्वाज्ञानम्; ततोऽपि तद्बोधनार्थं वत्सरान्ते गवां गोपानाञ्च स्नेहविशेषप्रकाशनम्; ततोऽपि रामेण विचारविशेषतो वितर्कणम्, श्रीभगवदुक्त्यैव तत्सम्यग्बोधनञ्च; ततोऽपि श्रीब्रह्ममोहस्तत्रापि ब्रह्मणा तत्त्वतस्तत्तद्रूपदर्शनम्; तत्र च तत्तत्तत्त्वं तत्तन्माहात्म्यञ्च; ततोऽपि परमविस्मयेन ब्रह्मणो निश्चेष्टतादि; ततोऽपि सद्य एव तत्तद्रूपादिसम्वरणम्; ततोऽपि ब्रह्मणो व्युत्थान–प्रकारः, श्रीवृन्दावनादिदर्शनप्रकारः, श्रीभगवद्दर्शनविशेषः, नमस्कारमुद्राप्रेमाश्रुभिरभिषेको मुहुरुत्थानं पतनञ्च प्रेमस्तुत्यारम्भश्चेत्येवं क्रमेण तत्तदवान्तरेऽपि प्रकरणविषयकाश्चर्य्यपरम्परा द्रष्टव्या। अन्या च ग्रन्थविस्तरभयान्न विस्तार्य्यते। श्रीभगवद्भक्तिरसिकानां विचारेण सा स्वमेव हृद्येव ॥ ६४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्व्वार्द्धे श्रीश्रील-सनातनगोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषण्यां श्रीदशमटिप्पण्यां त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पशुपवंशे गोपवंशे शिशुत्वस्य बाल्यस्य नाट्यमुद्वहत् अद्वयमेकं नारायणं श्रीकृष्णाख्यं ब्रह्म अद्वयमिति निःसमाभ्यधिकम् एकं सपाणिकवलं करधृतस्निग्धकवलम् अचष्टापश्यत् ॥ ६१ ॥ निजवाहनहंसात् अवतीर्य पृथिव्यां वपुरभिपात्य चतुर्मुकुटकोटिभिः अङ्घ्रियुग्मं स्पृष्ट्वा नत्वा च मुदश्रुसुजलैरभिषेकमकृत ब्रह्मेत्यध्याहारः परमेष्ठीति पूर्वपदस्यान्वयो वा ॥ ६२ ॥ उत्थायोत्थाय श्रीकृष्णपदयोः पतन् चिरस्यास्ते ॥ ६३ ॥ अथ तन्महित्वं शनैः स्मरन्नेवोत्थायाश्रुपिच्छिले लोचने विमृज्य मुकुन्दं स्वस्य दमनोपयोग्युपायमहावदान्यं तं मोक्षदमुद्वीक्ष्य तदानीं तस्य स्वाभाविककृष्णस्य प्राग्दृष्टं महित्वं पुनः पुनः स्मृत्वा कृपाऽनुरञ्जितं लोचनयुगलं पिबन्निवोद्वीक्ष्य स्वस्य तत्कृपाविस्मरणेन कृतघ्नत्वमिवालोच्य विनम्रकन्धरः तादृशापराधनिवृत्त्यर्थं कृताञ्जलिः उत्तरत्रापराधस्यानुवृत्तिनिराकरिष्णुरिव प्रश्रयवान् समाहितः श्रीमन्नारायणस्य तस्य ध्यानानन्दमग्नोऽत एव सवेपथुः उपर्यपि गद्गदया इलया वाण्या तं साक्षात्कृतस्वरूपरूपगुणविभूतिकं ऐलताऽस्तौत् ॥ ६४ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्र च परमेष्ठी ब्रह्मा पुरेव पूर्ववत्तथैवापश्यत् कथम्भूतं गोपालशिशुत्वनटनमुद्वहत् श्रीकृष्णात्मकं परं ब्रह्माद्वयं स्वतुल्यवस्त्वन्तररहितं स्वतुल्यगोपबालकान्तररहितं वा अपरिच्छिन्नज्ञानस्वरूपम् अनन्तं त्रिविधपरिच्छेदरहितं एकमसहायं पाणौ कवलेन सहितं सखीन् वत्सांश्च विचिन्वत् एवम्भूतं कृष्णात्मकं ब्रह्माऽचष्टेत्यर्थः ॥ ६१ ॥ इत्थं दृष्ट्वा त्वरया निजधोरणात्स्ववाहनादवतीर्य पृथिव्यां कनकदण्डमिव स्वशरीरं पातयित्वा चतुर्णां मुकुटानां किरीटानां कोटिभिरग्रैरङ्घ्रियुग्मं स्पृष्ट्वा आनन्दाश्रुरूपैः सलिलैः अभिषेकमकृताकरोत् ॥ ६२ ॥ चिरस्य चिरं पादयोः पतन् उत्थायोत्थायेत्यनेन पुनः पुनः यतन्निति सूचितम्। प्राग्दृष्टं श्रीकृष्णस्य माहात्म्यं पुनः पुनः स्मृत्वाऽऽस्त इत्यर्थः ॥ ६३ ॥ अथ शनैरुत्थाय नेत्रे विमृज्य मुकुन्दम् उद्वीक्ष्य विनम्रा कन्धरा ग्रीवा यस्य सः अत एव बद्धाञ्जलिः विनयवानेकाग्रचित्तः सवेपथुः सकम्पः अत एव गद्गदया वाण्या ऐलत तुष्टाव ॥ ६४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्रेति । ब्रह्म "अद्यैवत्वदृतेऽस्य" इत्यादिन्यायेन नराकृतितयैव परब्रह्म तदपश्यत् अत एवाद्वयमित्यादि एवमपि "लोकवत्तु लीलाकैवल्यम्" २।१।३३ इति न्यायेन सर्वलीलाविधानस्यापि तस्य तादृशाविर्भावाभीष्टलीलामनुभूतवानित्याह–तत्रेति । श्रीगोपराजकुलतिलकलीलत्वमेव नाट्यं तद्वच्चमत्कारकारकं तदुत्कृष्टतया वहत् यत्नेन बिभ्रत् तत्राप्युपसर्ज्जनीकृतं परब्रह्मत्वभावां निजजनप्रेमवशतामयीं काञ्चित् तदन्तरीणां लीलामनुभूतवानित्याह—वत्सानिति । अन्यत् टीकादृष्टम् ॥ ६१–६२ ॥ पुनः पुनश्चिरमास्ते ऐलत पेट्ट ॥ ६३–६४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ प्रकाशिकां मायामन्तर्धाप्य स्वरूपेण स्थितमेकमेव ददर्शेत्याह –तत्रोद्वहदित्यादि । स परमेष्ठी एकमद्वयं ब्रह्माचष्ट ददर्श । कीदृशम् ? वत्सान् सखींश्च पुरेव विचिन्वत् । पुनः कीदृशम् ? पाणिकवलं पाणौ कवलो यस्य, परं परात्परम्, अनन्तमेकमप्यपरिच्छिन्नम्, अगाधबोधमनवगाह्य बोधम् । ननु कथमेकत्वम्, (भा० १०।१३।४६) "ततः सर्वे वत्सपालाः" इत्यादौ (भा० १०।१३।५४) सत्यज्ञानानन्तानन्दमात्रैकरसमूर्त्तयः" इति स्वस्यैव बहुत्वात् । सत्यमित्याह–पशुपवंशशिशुत्वनाटयमुद्वहत्, पशुपानां, गोपानां वंश पृथक् पृथगन्ववायास्तेषां शिशवो बालकास्तेषां भावः स्वरूपं तदेव नाटयं नाटकीयवस्तु तद्यथा प्रवेश-निर्गमाभ्यामाविर्भावतिरोभाववत्, तथा तदुद्वहत् (भा० १०।१३।४६) "व्यदृश्यन्त घनश्यामाः" इत्यादिना ये ये दृष्टाः, तेषां सर्वं तत्रैवान्तर्भावादेकमेवेति सिद्धम्, नतु स्वस्य नन्दकिशोरत्वनाटयम्, तदा वंशशब्दो निरर्थकः स्यात् । पशुप-शिशुत्वनाट्यमित्युक्तेरेव सिद्धेः । एतेन श्रीनन्दकिशोरस्वरूपस्यैवाद्वयब्रह्मतेति सिद्धम् । नराकृति परं ब्रह्म' 'परमात्मा नराकृतिः' (भा० ७।१०।४८, ७।१५।७५) "गूढं परं ब्रह्म मनुष्यलिङ्गम्" इत्यादि पूर्वोक्तेन च । पाणिकवलत्वेन द्विभुजत्वमेव परब्रह्मणः श्रीकृष्णस्य साहजिकम् अद्वयं ब्रह्मेत्युक्तेः । ब्रह्मणाप हृताः सर्व इति ज्ञानतोऽपि तत्तद् विचयनमगाधबोधत्वे हेतुः ॥ (६१–६४)

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तत्रोद्वहदित्यादि । श्रीविग्रहस्य परिच्छिन्नत्वादिविरुद्धधर्मनिरासमुखेन बहिर्मुखानां मुखमुद्रणार्थं ब्रह्मैव तदिति निर्विशति—तत्रोद्वहदिति । पशुपानां वंशोऽन्वयस्तस्य ये शिशवस्तेषां भावस्तद्रूपता स एव नाट्यं लीलामुद्वहत् सत्- अद्वयं ब्रह्म पुरेव एकं पाणिकवलं पाणौ कवलो यस्य तं परमेष्ठी अचष्ट । अद्वयमिति तदतिरिक्तं ब्रह्मान्यन्नास्ति, स एव श्रीविग्रहे ब्रह्मेति केचित् सात्वताः । यद्वा, पशुपवंश–शिशुत्वनाटयमुद्वहत् श्रीकृष्णाख्यं परं परमेश्वरं परात्परं किमपि वस्तु अचष्टः, पुरेव एकं ददर्श, नाट्यमित्यलीकत्वं निवारयति । ब्रह्माद्वयं ब्रह्मणा सहाद्वयं तदेव ब्रह्मरूपम् । अतः सत्यज्ञानानन्तानन्दत्वादिसिद्धम् । परं कीदृशम् ? अगाधब्रोञ्च । पुनः कीदृशम् ? वत्सान् सखींश्च विचिन्वत्, 'अतीतसामीप्ये वर्त्तमाना' (६२।६४) ।

इति त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च स्वस्वरूपभूतानि चतुर्भुजत्वादीनि योगमाययैवाच्छाद्य "एकमेवाद्वयं ब्रह्म" इति श्रुत्युक्तं स्वदर्शितसर्वस्वरूपमूलभूतं स्वरूपं तं दर्शयामासेत्याह–तत्र वृन्दावने परमेष्ठी ब्रह्मा ब्रह्म अचष्ट अपश्यत् कीदृशं पशुपवंशशिशुत्वेऽपि प्रौढपरमचतुरोचितम् नाट्यं मत्प्रभुर्मया मोहित एवेति ब्रह्माणं मिथ्याभिमानं ग्राहयितुं शाद्बले वत्सान् दृष्ट्वापि पुलिनेऽपि सखीन् अदृष्ट्वापि दर्शना-

भिनयं नटानां कर्म उद्वहत् दर्शितानां ब्रह्मादिस्तम्बपर्यन्तानां योगमाययाच्छादनादद्वयं सर्वमूलभूतस्वरूपत्वात् परं दर्शितेभ्यश्चिद्वैभवेभ्यो अप्यपरेषां चिदानन्दमयपरस्सहस्रमहावैभवानां विद्यमानत्वादनन्तं परमेष्ठिनो वराकस्य का गणना श्रीबलदेवाद्यैरवज्ञारैरपि दुष्प्रवेशत्वादगाधबोधं उक्तलक्षणात् नाट्यात् वत्सान् सखींश्च पुरेव परित इतस्ततो विचिन्वदिति वत्सबालान्वेषणं पूर्ववर्षे ब्रह्मणा मायामोहितत्वात् यथार्थमेवावगतम् अधुना तु मायानिर्मुक्तत्वात् शाद्वले तृणं चरतो वत्सान् पुलिने च भुञ्जानान् बालान् पश्यता स्वापहृतान्मायिकवत्सबालकांश्च अपश्यता तेन मन्मोहनार्थमभिनयमात्रमिदम् इत्यवगतम् अत एव नौमीड्य ! ते इत्यग्रिमस्तुतिवाक्येन वत्सबालान्विचिन्वते इति विशेषणं नोपन्यस्तं स्वरूपभूतानां वासुदेवमूर्तीनां स्वभेदानां योगमाययैवाच्छादनादेकं भक्तमनोहरमहामधुरलीलामयत्वात्सपाणिकवलम् अत्र कस्मिंश्चिदधिकारिणि निकृष्टे धर्मधर्मिभावरहितं निराकारं ज्ञानमात्रं यत् ब्रह्मेति प्रसिद्धं तदपि योगमाययैव तद्दृष्टीः प्रति चिदानन्दमयानामविरूपगुणनामलीलापरिकरधामादीनामाच्छादनाज्ञानमात्रस्यैव प्रकाशनात् सङ्गतमित्येवमेव मिथो विरुद्धार्था अपि श्रुतयो निर्विरोधमेव सङ्गमयितव्या इति दिक्। अत्र पशुपवंशशिशुत्वं नाट्यमेवोद्वहन्न तु स्वरूपमिति व्याख्यानं श्रीभागवतस्य मोहिनीत्वप्रतिपादकमेव "नौमीड्यतेऽभ्रवपुषे" इत्यत्र नौमीत्युक्त्वा प्रस्तुतस्य भगवतः कर्मत्वे ज्ञाते प्रयोजनापेक्षायामेवंभूतो भगवानेव प्रयोजनमिति व्याचक्षाणानां स्वामिचरणानामपि नाभिमतमित्यवसीयते न ह्यवास्तवीभूतं वस्तु स्तुतिप्रयोजनीक्रियते इत्यवधेयम् ॥ ६१ ॥ दृष्ट्वेति इदमेव नराकृति परं ब्रह्म सर्वमूलभूतमित्यवगम्यत्वरेण त्वरया निजधोरणतः स्ववाहनात् पृथ्व्यां वपुरभिपात्येति न हि देवा भुवं स्पृशन्तीति नियमोल्लङ्घनाद्ब्राह्मणोऽस्य देवत्वाभिमानापगमो ज्ञेयः चतुर्णां मुकुटानामग्रैरङ्घ्रियुग्मं स्पृष्ट्वेति चतुर्दिक्स्थितानां चतुर्णामपि मुखानां बलेन कृष्णाभिमुखीकरणात् अभिषेकमर्थादङ्घ्रियुगमस्याकरोदित्युत्थायोत्थाय भूमौ द्रुतपतने अश्रूणां बाहुल्येन पुरो वेगाच्चरणयोर्निपातो ज्ञेयः अश्रूणां भक्त्यनुभावरूपत्वेन पावित्र्यात् सुपदः प्रयोगः ॥ ६२ ॥ पतन्नास्ते इति बहुतरप्रणामान्ते आनन्दजाड्योदयात् वर्तमानप्रयोगो मुनेस्तदानीं तत्साक्षात्कारानुभवात् ॥ ६३ ॥ लोचने इति द्वित्वं पाणिद्वयेन लोचनद्वयस्यैव युगपन्मार्जनोपपत्तेः गद्गदया गद्गदभाववत्या इलया वाचा ऐलत ऐट्ट अस्तौत् ॥ ६४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। त्रयोदशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ १३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र वृन्दावने स परमेष्ठी ब्रह्मा ब्रह्म मुमुक्षुभिर्जिज्ञास्यं यत् बृहद्गुणशक्तिमद्वस्तु तदचष्ट अपश्यत्। ननु, दृश्यस्य ब्रह्मत्वं नेति चेन्न "आत्मा वा अरे द्रष्टव्यः" सदा पश्यन्ति सूरयः" इत्यादिश्रुतेः। कथम्भूतं ? परं पूर्णम् अद्वयं निःसमानातिशयम् अनन्तमियत्तानवच्छिन्नम् अगाधबोधमनवच्छिन्नज्ञानगुणं पुरेव पाणिकवलं पाणौ कवलं यस्य तत् एकं वत्सबालविरहितम् अत एव सर्वतो वत्सान्सखींश्च विचिन्वत्। नन्विदं बृहद्गुणशक्तिमतः पूर्णस्य पाणिकवलत्वं अद्वयस्यागाधबोधस्य वत्सबालान्वेषणपरत्वं किमभिप्रायमित्यत आह। पशुपवंशशिशुत्वनाट्यमुद्वहदिति। भक्तवात्सल्येन श्रीनन्दपुत्रत्वलीलामुद्बिभ्रदित्यर्थः ॥६१॥ तत्परं ब्रह्म दृष्ट्वा त्वरेण त्वरितं निजधोरणतः स्वकीयवाहनात् अवतीर्य कनकदण्डमिव पृथ्व्यां वपुः शरीरं निपातचतुर्णां मुकुटानामग्रैरङ्घ्रियुग्मं स्पृष्ट्वा मुदश्रुसुजलैरानन्दाश्रुरूपैः शोभनैर्जलैरभिषेकमकृताऽकरोत् ॥ ६२ ॥ चिरस्य चिरं पदयोः पतन्नास्ते ॥ ६३ ॥ इलया वाचा ऐलताऽस्तौत् ॥ ६४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्रयोदशाध्यायार्थप्रकाशः ॥ १३ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अथ प्रकाशितैर्वत्सतत्पालैः सहैकेन प्रकाशितेनैव रूपेण वन-गोष्ठयोर्विक्रीडन्नैव प्रकृतान् तत्र तत्र स्थितानेव तांस्तन्मैत्र्याविष्टत्वात् प्रकृतेनैव रूपेण विचिन्वन् हरिरस्थात् तच्च प्रकृतं तद्रूपमन्तःप्रवेशितं प्रकाशितं ब्रह्माणं प्रत्यदर्शयदित्याह तत्रेति। तत्रोक्तस्वरूपे वृन्दावने परमेष्ठी ब्रह्मा अचष्ट कीदृशं तदित्याह पशुपवंशशिशुत्वे गोपालकुलबालकत्वेऽपि प्रौढातिचतुरोचितं नाट्यमुच्चैर्वहत्। विरिञ्चस्य मिथ्या मोहकृताभिमानग्रहणाय शाद्वले वत्सान् सरःपुलिने तत्पालांश्च दृष्ट्वापि तददर्शनाभिनयं नटानां कर्म धारयदित्यर्थः। प्रकाशितानामन्तः परेशितत्वादेकं जीवप्रकृतिरूपावयवद्वयान्यत्वादद्वयं विशुद्धमित्यर्थः। तदन्यत्वेऽत्र नञ्, तत्तच्छक्तिमत् खल्ववयविप्रकाशिततत्तद्दर्शित्वात् परं प्रकाशितेभ्योऽपि वैभवेभ्योऽन्येषां तादृशानामसंख्यानां तस्मिन् सत्वादनन्तं श्रीबलभद्रेणापि दुष्प्रवेशत्वादगाधबोधं पुरेव वत्सादीन् सम्प्रत्यपि विचिन्वत् ॥ ६१ ॥ दृष्ट्वा इदमेव स्वयं रूपं ब्रह्मेति विज्ञाय निजधोरणतः स्ववाहनात् पृथिव्यामिति "देवा भुवं न स्पृशन्तीति नियमविलोपस्तद्भुवस्तद्धामत्वात् चतुर्मुकुटकोटिभिरङ्घ्रियुग्मं स्पृष्ट्वेति-चतुर्दिक्स्थितानां बलेन कृष्णाभिमुखाविधानात् अभिषेकमङ्घ्रियुग्मस्यैव बोध्यम् ॥ ६२ ॥ पतन्नास्ते इति बहुप्रणामोत्तरमानन्दजाड्योदयात् शुकस्य तत्साक्षात्कारानुभवाल्लटः प्रयोगः ॥ ६३ ॥ लोचने इति द्विवचनं प्राणिद्वयेन तद्द्वयस्य युगपदविमार्जनात् गदगदया सगलदक्षरया इरया वाचा ऐलत अस्तौत् ॥ ६४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीसुबोधिनी

तस्मिन् वने भगवन्तमपि पूर्ववद् दृष्टवानित्याह **तत्रोद्वहदिति**, **तत्र** वृन्दावन **उद्वहत्पशुपवंशशिशुत्वनाट्यं** येन वस्तुतस्त्वद्वैतं **ब्रह्मै**व, **परं** कालादिनियन्तृ, **अनन्त**मत एवापरिच्छिन्नम्, **अगाधो बोधो** यस्य, **उद्वहदिति** भिन्नपदं वा **विचिन्वदि**त्यनेन सम्बध्यते, **सखीन् वत्सांश्च परितो** विचिन्वन्तं, **विचिन्वन्** यो वर्तते तमितियोजना **एक**मेव वर्षात् पूर्वमेव गृहीतं **कवलं** हस्ते यस्य, **पाणौ कवलं** तेन सहितम**चष्ट** दृष्टवान् ॥ ६१ ॥ ततो भगवन्तं **दृष्ट्वा त्वरेण निजधोरणतो** विमानाद**वतीर्य** विमानं परित्यज्य भूमौ समागत्य **पृथिव्यां** स्वस्य **वपुः कनकदण्डमिवा**समन्तात् **पात**यित्वा परिवर्तनेन **चतुर्मुकुटकोटिभिरङ्घ्रियुग्मं स्पृष्ट्वा** पुनर्वाचापि **नत्वाश्रुजलैः** प्रेमाश्रुभिः पादयुग्मस्यै**वाभिषेकमकृत** ॥ ६२ ॥ ततोपि **पुनःपुनरुत्थाय कृष्णस्य पादयोः पतन्** स्तब्ध इवास्ते, तत्र हेतुः **प्राग्दृष्टं महित्वं पुनः पुनः स्मृत्वा स्मृत्वा** ॥ ६३ ॥ ततः पुनर्मूर्छां परित्यज्य **शनैरुत्थाय** नेत्रे **विमृज्य** ततो निर्मलचक्षुषा **मुकुन्दमुद्वीक्ष्य विशेषेण नम्रा कन्धरा** यस्य तादृशो जातः, ततः **कृताञ्जलिः प्रश्रयवान्** विनयसहितः **समाहितः** सावधानः **सवेपथुः** कम्पमानो **गद्गदयेलया** सरस्वत्**यैडत** स्तोत्रं कृतवान् ॥ ६४ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे प्रक्षिप्ताध्यायेषु द्वितीयाध्यायविवरणम ॥ २ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'ततश्च तत्र पूर्ववच्छ्रीकृष्णं दृष्टवान्' इत्याह—**तत्रेति** । तत्र वृन्दावने परमेष्ठी ब्रह्मा पुरेव पूर्ववदेव पशुपवंशशिशुत्वनाट्यं नन्दपुत्रत्वानुकरणमुद्वहत् दधत् ब्रह्म अचष्ट अपश्यत् । नाट्यमेव स्पष्टयति —अद्वयमित्यादिना । अद्वयं च वत्सान् विचिन्वत् । अद्वयस्य विजातीयभेदशून्यत्वेन विजातीयवत्सान्वेषणं नाट्यं विना न सङ्गच्छते ॥ तथा एकं सखीन् विचिन्वदिति । एकस्य सजातीयभेदशून्यस्य सजातीयसख्यन्वेषणमपि नाट्यमन्तरेण न सङ्गच्छते ॥ तथाऽगाधबोधमपि विचिन्वदिति । अगाधबोधस्य सर्वज्ञस्य अज्ञकार्यमन्वेषणमपि नाट्यमन्तरेण न सङ्गच्छते ॥ तथाऽनन्तं च परितो विचिन्वदिति । अनन्तस्य देशकालपरिच्छेदरहितस्य देशान्तरगमनेनान्वेषणमपि नाट्यमन्तरेण न सङ्गच्छते ॥ तथा परं च शिशुत्वमुद्वहदिति । परमेश्वरस्य गोपपुत्रत्वमपि नाट्यंविना न सङ्गच्छते ॥ **तथा ब्रह्म च** सपाणिकवलमिति । ब्रह्मणोऽपाणिपादस्य पाणिकवलमपि नाट्यंविना न सङ्गच्छते ॥ अतो गोपपुत्रत्वादिकं सर्वं नाट्यमेवेत्यर्थः ॥ ६१ ॥ एवं दृष्ट्वा च त्वरेण वेगेन निजधोरणतः स्ववाहाद्धंसादवतीर्य पृथ्व्यां कनकदण्डवद्वपुरनिपात्य नत्वा परिवर्तनेन चतुर्णां मुकुटानां कोटिभिरग्रैः तदङ्घ्रियुग्मं स्पृष्ट्वा मुदश्रुसुजलैः आनन्दाश्रुरूपैः सुजलैस्तत्पादयोरभिषेकमकरोदित्यन्वयः ॥ ६२ ॥ प्राग्दृष्टं कृष्णस्य महित्वं महिमानं स्मृत्वा स्मृत्वा पुनः पुनः उत्थायोत्थाय चिरस्य चिरकालं पादयोः पतन्नास्ते स्म इत्यन्वयः ॥ ६३ ॥ अथानन्तरमुत्थाय अश्रुपरिपूरितनेत्रस्य सम्यग्दर्शनाशक्तेस्तस्याष्टलोचनत्वेऽपि दर्शनोपयुक्ते सन्मुखस्थे द्वे लोचने विमृज्य मुकुन्दं मुक्तिदातारं कृष्णमुद्वीक्ष्य सम्यग् दृष्ट्वा लज्जया विशेषेण नम्रा कन्धरा यस्य सः, आदरेण कृतः संयोजितः अञ्जलिर्येन सः, प्रश्रयवान् विनयवान्, भयेन सवेपथुः सञ्जातकम्पः, तथापि समाहितः स्वशक्त्यनुरूपं मनःसमाधानं कृत्वा गद्गदया स्खलिताक्षरया इलया वाण्या ऐलत अस्तौत् ॥ ६४ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने । त्रयोदशो गतो ज्ञप्ति ब्रह्ममोहनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

तत्रेति ॥ तत्र वृन्दावने परमेष्ठी ब्रह्मा पुरेव पूर्ववदेव पशुपवंशशिशुत्वनाट्यं नन्दपुत्रत्वानुकरणमुद्वहन् दधत् अद्वयं परम् अनन्तम् अगाधबोधं परितः वत्सान् सखींश्च विचिन्वत् एकं सपाणिकवलं हस्तगतग्रासेन सहितं ब्रह्म श्रीकृष्णाख्यमचष्ट अपश्यत् । नाट्यं च विरोधवशात् तथाहि अद्वयमपि वत्सान्विचिन्वत् स्वभावत एकमपि सखीन् विचिन्वत् अगाधबोधमपि विचिन्वत् अनन्तमपि परितो विचिन्वत् अनन्तमपि परितो विचिन्वत् परमपि शिशुत्वमुद्वहत् ब्रह्म अपि सपाणिकवलम् इति ॥ ६१ ॥ दृष्ट्वेति ॥ एवं दृष्ट्वा च त्वरेण वेगेन निजधोरणतः स्ववाहाद्धंसादवतीर्य देवाभिमानापगमाद्भुमिमेव स्पृशन् पृथ्व्यां कनकदण्डवद्वपुरभिपात्य नत्वा परिवर्तनेन चतुर्णां मुकुटानां कोटिभिरग्रैः तदङ्घ्रियुग्मं स्पृष्ट्वा मुदश्रुसुजलैः आनन्दाश्रुरूपैः सुजलैस्तत्पादयोरभिषेकमकृत अकार्षीत् ॥ ६२ ॥ उत्थायेति ॥ प्राक् दृष्टं कृष्णस्य महित्वं महिमानं स्मृत्वा स्मृत्वा पुनः पुनः उत्थायोत्थाय चिरस्य चिरकालं पादयोः पतन्नास्ते स्म ॥ ६३ ॥ शनैरिति ॥ अथानन्तरमुत्थाय अष्टनेत्रोऽपि कृष्णदर्शनाय सम्मुखस्थे द्वे लोचने विमृज्य मुकुन्दमुद्वीक्ष्य सम्यग्दृष्ट्वा लज्जया विशेषेण नम्रा कन्धरा यस्य सः आदरेण कृतः संयोजितः अञ्जलिर्येन सः प्रश्रयवान् विनयवान् भयेन सवेपथुः सञ्जातकम्पः तथापि समाहितः स्वशक्त्यनुरूपं मनःसमाधानं कृत्वा गद्गदया स्खलिताक्षरया इलया वाण्या ऐलत अस्तौत् । "ईड्, स्तुतौ" शपो लुगभावश्छान्दसः । डस्य लकारो गद्गदभावानुकरणार्थः ॥ ६४ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाद्दशमस्य त्रयोदशे ॥

इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्रेति । तत्र वृंदावने पशुपस्य गोपस्य वंशे शिशुत्वस्थ नाट्यं वेशमुद्वहत् अनंतमंतवर्ज्जितं अगाधबोधं दुर्ज्ञेयं एवंभूतमपि पाणौ कवलेन सहितं एकं वत्सान् सखीन् पुरेव पूर्ववत् परितः सर्वतः विचिन्वत् अद्वयं आदौ गोपादि बहुरूपतया दृष्टं पश्चादद्वितीयत्वेन दृश्यमानं परं क्षराऽक्षरेभ्यः श्रेष्ठं ब्रह्मबृहत्वादिगुणाविशिष्टं श्रीकृष्णाख्यं परब्रह्म परमेष्ठी ब्रह्मा अचष्ट अपश्यत् ॥ ६१ ॥ निजधोरणतः स्ववाहनरूपहंसात् त्वरेण अवतीर्य्य कनकदंडमिव वपुरभिपात्य क्षिप्त्वा चतुर्णां मुकुटानां कोटिभिरग्रभागैरंघ्रियुग्मं स्पृष्ट्वा नत्वा मुदा हर्षेण पतमानैरश्रुरूपैः सुजलैः अभिषेकमकृत चकार ॥६२॥ चिरस्य चिरकालं कृष्णस्य पादयोः ॥ ६३ ॥ विशेषेण नम्रा कंधरा ग्रीवा यस्य कृतांजलिर्बद्धकरपुटः प्रश्रयवान् विनयवान् समाहितः सावधानः सवेपथुः सकंपः गद्गदया प्रेमार्द्रया इलया वाण्या । ऐलत ऐट्ट स्तुतिमकरोत् बहुलं छंदसीतिशयो न लुक् लकारोच्चारणं तु गद्गदभावानुकरणो नैव बोध्यम् ॥ ६४ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढाऽर्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कंधव्याख्याने ब्रह्ममोहो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः, अतिकुतुकशब्दोत्तरतृतीयायाश्छान्दसो लुक् । अतिकौतुकेनात्याश्चर्येण, उद्धृत्य दृष्टिं परावृत्य, हंसपृष्ठे निपत्येति वा । पाठान्तरेऽप्ययमेवार्थः । स्तिमितानि निश्चलान्येकादशेन्द्रियाणि यस्य सः, 'अतिकुतुकोद्रिक्तस्तिमितैकादशेन्द्रिय' इति पाठे अतिकौतुकेनोद्रिक्तान्युत्कटान्यत एव स्तिमितानि दीनप्रायाणि पारवश्यं प्राप्तानीति यावत् । एकादशेन्द्रियाणि यस्य सः, अजो ब्रह्मा, तद्धाम्ना तेषां तेजसा, अभिभूतः सन्निति शेषः । पूर्देवी व्रजाधिष्ठात्री काचिद्देवता तस्या अन्ति समीपे, पुत्रिका चतुर्मुखी कनकप्रतिमा इव, तद्वदित्यर्थः, । तूष्णीं अभूत् ॥ ६१ ॥ एवं मुह्यते चतुर्मुखाय पूर्ववदात्मवत्सादीन् दर्शयितुमसाधारणस्वमूर्त्तिदर्शनाच्छादिकां मायामाच्छादितवानित्याह ॥ इतीति ॥ अतर्क्ये तर्कागोचरे, निजोऽसाधारणो महिमा यस्य तस्मिन्, स्वप्रमिति स्वयंप्रकाशं ज्ञानं कं सुखं च यस्मिंस्तस्मिन्, अत एव अजातः प्रकृतेः सकाशात्, परत्र परस्मिन्, अतन्निरसनमुखेन प्राकृतभावनिरसनद्वारा ब्रह्मकैः श्रुतिशिरोभिः मितिर्ज्ञानं यस्य तस्मिन्, एवंभूते भगवति श्रीहराविति शेषः । इरा सरस्वती तस्या ईशो ब्रह्मा तस्मिन्, किं इदं इति वा इत्थमेव, मुह्यति मोहं प्राप्तवति सतीत्यर्थः । पश्चात् द्रष्टुमुक्तविधभगवत्स्वरूपं विलोकयितुं अपि, अनीशेऽसमर्थे जाते सति, परमः सर्वोत्तमः, अजः श्रीकृष्णः, ज्ञात्वा चतुर्मुखस्य तथाविधावस्थां विबुध्य, सपदि तत्क्षणमेव, अजाजवनिकां मायारूपां तिरस्करिणीं, इति वक्ष्यमाणप्रकारो ब्रह्मा यथा भवेत्तेन प्रकारेणेत्यर्थः । चच्छाद अपसारितवान् । यया माययाऽद्भुतं दर्शितं तां तिरोधत्तेत्यर्थः । अथवाऽयं लोकाभिमानी ममैश्वर्यं प्रष्टुमयोग्य इति, तस्योपरि मायां प्रसारितवानिति ॥ ६२ ॥ तत इति ॥ ततोऽजाजवनिकाच्छादनानन्तरं, अर्वाक् बहिः प्रतिलब्धानि अक्षाणीन्द्रियाणि येन सः, कः ब्रह्मा, परेतवत् मृतः यथा पुनः कथंचित् उत्तिष्ठते तद्वदित्यर्थः । उत्थितः संज्ञां प्राप्तः, कृच्छ्रात् कथंचित्, दृष्टीः नेत्राणि उन्मील्य वै उन्मीलितानि कृत्वैव, आत्मना स्वेन सह, इदं जगत्, आचष्ट अपश्यत् । पूर्वं भगवद्रूपेभ्योऽन्यदपश्यत्, इदानीं तु जगज्जगदेव आत्मानमात्मानमेवाचष्टेत्यर्थः ॥ ६३ ॥ सपदीति ॥ ततः सपदि एव, अभितः दिशः पश्यन्, पुरःस्थितं जनानामाजीव्या उपजीव्या ये द्रुमास्तरवस्तैराकीर्णं व्याप्तं, सं संततानि आसमन्तात् प्रियाणि यस्मिन्, तथाभूतं, वृन्दावनं, अपश्यत् ॥ ६४ ॥ तदेवाह ॥ यत्रेति ॥ अजितस्य भगवतः आवासेन द्रुताः पलायिताः रुट्तर्षादिका आदिना क्रोधलोभादयश्च यस्मिंस्तस्मिन्, यत्र वृन्दावने, नैसर्गिकं स्वाभाविकं दुर्वारमनिवार्यं वैरं येषां ते, नरो गोपादयः मृगाः सिंहादयश्च, मित्राणि इव, सह आसन् ॥ ६५ ॥ तत्रेति ॥ तत्र वृन्दावने, परमेष्ठी ब्रह्मा, पुरा इव वत्साहरणविधानात् प्रागिवेत्यर्थः । पशुपो नन्दस्तस्य वंशस्तत्र यच्छिशुत्वनाट्यं शिशुभावनाटनं तत्, उद्वहत्, अद्वयं स्वतुल्यवस्त्वन्तररहितं, अगाधबोधपरिच्छिन्नज्ञानस्वरूपं, अनन्तं त्रिविधपरिच्छेदरहितं, एकमसहायं, सपाणिकवलं पाणौ कवलेन सहितं, वत्सान्, सखींश्च, परितः विचिन्वत् मृगयत्, परं ब्रह्म, अचष्ट श्रीकृष्णाख्यं परं ब्रह्मापश्यदित्यर्थः अद्वयमपि वत्सान् विचिन्वत्, एकं च सखीन्, अगाधबोधं सद्विचिन्वत्, अनन्तं च परितो विचिन्वत्, परं च सच्छिशुत्वमुद्वहत्, ब्रह्म च सपाणिकवलमिति नाट्यं बोध्यम् ॥ ६६ ॥ दृष्ट्वेति ॥ दृष्ट्वा इत्थं विलोक्य, त्वरेण, निजधोरणतः स्ववाहनात् अवतीर्य पृथ्व्यां कनकदण्डं इव, वपुः अतिपात्य, स्वशरीरं पातयित्वेत्यर्थः । नत्वा दण्डवत् प्रणामान् कृत्वेत्यर्थः । चतुर्णां चतुःसंख्याकानां मुकुटानां किरीटानां कोटयोऽग्रणिताभिः, अङ्घ्रियुग्मं पादद्वयं, स्पृष्ट्वा संस्पृश्य मुदश्रुसुजलैरानन्दाश्रुसुसलिलैः, अभिषेकं, अकृताकरोत् ॥६७॥ उत्थायेति ॥ विधिः, प्राक् दृष्टं महित्वं कृष्णस्य निरवधिकातिशयं महिमानमित्यर्थः । स्मृत्वा स्मृत्वा, चिरस्य चिरं, कृष्णस्य, पादयोरङ्घ्रियुग्मयोः, उत्थाय उत्थाय, पुनः पुनः पतन् आस्ते पतन्नेवास्ते स्मेत्यर्थः ॥ ६८ ॥ शनैरिति ॥ अथ वेधाः, शनैः उत्थाय, लोचने नेत्रे, विमृज्य परिमार्ज्य, मुकुन्दं स्वाश्रितमुक्तिदायिनं श्रीकृष्णं, उद्वीक्ष्य, विनम्रा अवनता कंधरा ग्रीवा यस्य सः,

कृताञ्जलिर्निबद्धाञ्जलिः, प्रश्रयवान्विनयवान्, समाहित एकाग्रचितः, सवेपथुरङ्गकम्पसहितः, अत एव, गद्गदया अनुकरणमेतत्। इलया वाचा, ऐलत तुष्टाव ।। ६९ ।।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यविरचितायामन्वयार्थाबोधिन्यां
भक्तमनोऽन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे त्रयोदशोऽध्यायः ।। १३ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सपाणिकवलमिति : १०.१३.६१.

कार्यान्तरनिमग्नोऽपि न स्वकान् विस्मराम्यहम्। दयाब्धिर्दर्शयन्नेवमासीत् पूर्ववदच्युतः ।। ७९ ।।
स्वाविद्ययैव निखिलो भ्रमतीह लोको मायाकुलं कमपि वा न करोति देवः।
नाभूत् स्फुटं किमिदमत्र यदब्जयोनिः स्वाज्ञानतः स्वयमगाद्भ्रममुत्कटं सः ।। ८० ।।
अविज्ञायाल्पत्वं निजमलघुगर्वेण यतते परीक्षार्थं कोऽपि प्रकटमहसोऽन्यस्य महतः।
तदा तस्यासीमो विधिवदपमानः प्रभवति प्रमाणं धातैवाद्भुतविभुपरीक्षोद्यतमतिः ॥ ८१ ॥
सत्सेवनं साधुफलं प्रसूते नात्यद्भुतं त्वद्भुतमेतदेव। छले प्रवृत्तोऽपि विभोर्विधाता ददर्श यत्तात्त्विकविष्णुरूपम् ॥ ८२ ॥

दृष्ट्वेति : १०.१३.६२.

तदन्तर्धानतः पूर्वं शून्यत्वात् खस्थितो विधिः। युक्तं रूपं वीक्ष्य विष्णोरथासीत् स नखाश्रितः ॥ ८३ ॥
आर्द्रापराधमपि दण्ड्यमुदीक्ष्य मां वै दण्डं दयानिधिरुदारमना न कुर्यात्।
जानन्निति स्वयमसौ तदघापनुत्यै दण्डप्रणामसहितः पदमाललम्बे ॥ ८४ ॥
चतुर्भिः स्तूयसे वेदैस्त्वमेवेति विबोधयन्। विधिस्तावद्भिरात्मीयैरस्पृशन् मुकुटैः पदम् ।। ८५ ।।
तज्जलैरेव तत्पूजा कृताऽप्यजनि तन्मुदे। नूत्नैः कैमुत्यतो भूयादित्यानन्दाश्रुणाऽकरोत् ॥ ८६ ।।
गर्वस्थितेरप्यगर्व - स्थितिरत्यन्तशोभिनी। यद्धाता खस्थितः पूर्वं ततोऽजनि सुखस्थितः ॥ ८७ ।।

श्रीशकल्पतरु० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने त्रयोदशोऽध्यायः ॥ १३ ॥

कृष्णप्रिया

राजन् श्रीब्रह्माजी ने श्रीवृन्दावन बिहारी जी की कृपा से ही दर्शन पाया। भगवान् विरुद्ध धर्म समाश्रयी थे। आज आप श्रीनन्दनन्दन स्वरूप से गोपवंश का नाट्य कर रहे हैं। स्वयं तो अद्वितीय परंब्रह्म, अनन्त अगाध बोध पूर्ण पुरुष है फिर भी नाम करकमल में दहीं-ओदन के कौर को लिए हुए अनजान की तरह बछड़ों और बालकों को खोजते विचरण कर रहे हैं। ब्रह्माजी ने पूर्ववत् इसी अवस्था में पुनः दर्शन पाया ॥ ६१ ॥ पाणिकवल पुरुषोत्तम की झाँकी होते ही त्वरा से अपने वाहन हंस से नीचे कूद पड़े और सुवर्ण सम समुज्ज्वल अपनी अङ्ग यष्टि को श्रीचरणों में पृथ्वी पर लेटाकर लेटाया, पुनः चारों मुकुटों के अग्रभाग से भगवान के श्रीचरणों का स्पर्श किया, दण्डवत् किया और स्नेह-भक्ति अश्रु सलिलों से पाद कमलों पर अभिषेक किया ॥ ६२ ॥ अब ब्रह्माजी भगवान श्रीकृष्ण की पूर्वदृष्ट महिमा की पुनः पुनः स्मृति करते न अघाते बार-बार उठकर बार-बार श्रीपादों में लेट जाते थे और अन्त में तो प्रभुचरणों में चिरकाल पर्यन्त लेटे ही रहे ॥ ६३ ।। पुनः धीरे से प्रभु के पाद कमलो से उठकर अश्रु पोंछ कर, भगवान् मुकुन्द का दर्शन किया। भगवान के सामने सिर-गरदन झुक गये। अन्जलि बद्ध विवेक से परिपूर्ण सावधानी से गद्गदाक्षर से स्तुति करने लगे। वाणी कुण्ठित हो गई। उस अवसर काया भी कंपकपी रही थी ।। ६४ ॥

तेरहवाँ अध्याय समाप्त।

* * *

अथ चतुर्दशोऽध्यायः

श्लोकाः अनु. व. इ.वं. वं. इ.व. शार्दू. मि.उ. उ. श्लो. अ. उ. अ. अ. अ. सं. श्लो. अ. सं. श्लो. अक्ष.
६१ २५ ६ ३ २ १ २ १९ ४ २५४० २० ५६ २६१६ ८१।।।

ब्रह्मोवाच

नौमीड्य तेऽभ्रवपुषे तडिदम्बराय गुञ्जावतंसपरिपिच्छलसन्मुखाय ।
वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय ॥ १ ॥
[१]अस्यैव देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य [२]तनुभूतमयस्य कोऽपि ।
नेशे महि त्ववसितुं मनसाऽऽन्तरेण साक्षात्तवैव किमुतात्मसुखानुभूतेः ॥ २ ॥

कर्वमक्षमा

अन्वयः—ईड्य ! अभ्रवपुषे तडिदम्बराय गुञ्जावतंसपरिपिच्छलसन्मुखाय वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय ते नमः ॥ १ ॥ देव मदनुग्रहस्य स्वेच्छामयस्य तनुभूतमयस्य अस्य एव वपुषः महि अन्तरेण मनसा अवसितुं न ईशे, तु, आत्मसुखानुभूतेः तव एव साक्षात् वपुषः किम् उत ! ॥ २ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चतुर्दशेऽद्भुतं दृष्ट्वा पूर्वागंतुकनिश्चयम् । अनीशः कर्तुमस्तौषीत्कृष्णं ब्रह्मा विमोहितः ॥ १ ॥

स्वकृतापराधेन भिया सकंपतया भगवन्महिमानमनवगाहमानस्तावद्यथादृष्टस्वरूपमेव कीर्तयन्नाह । नौमीति । हे ईड्य स्तुत्य ते तुभ्यं नौमि स्तौमि । द्वितीयार्थे चतुर्थ्यः । अथ वा नौमीत्युक्त्वा प्रस्तुतस्य भगवतः कर्मत्वे ज्ञाते प्रयोजनापेक्षायामेवंभूतो भगवानेव प्रयोजनमिति तादर्थ्ये चतुर्थी । यद्वा तुभ्यं त्वामेव प्रसादयितुं त्वामेव स्तौमीत्यर्थः । अभ्रवद्वपुर्यस्य तस्मै । तडिद्वदंबरं यस्य तस्मै । गुंजाभिरवतंसौ कर्णभूषणे परि परितः पिच्छं च बर्हापीडं तैर्लसन्मुखं यस्य तस्मै वन्याः स्रजो यस्य तस्मै । कवलादिभिर्लक्ष्मभिः श्रीः शोभा यस्य तस्मै मृदू पादौ यस्य तस्मै, पशुपस्य नन्दस्यांगजाय ॥ १ ॥ ननु नौमीति प्रतिज्ञाय किं स्वरूपानुवादमात्रं क्रियतेऽत आह । अस्यापीति । भो देव अस्यापि सुलभत्वेन प्रकाशितस्यापि तव वपुषोऽवतारस्य महि महिमानमवसितुं ज्ञातुं कोऽपि को ब्रह्मा अहमपि नेशे न शक्नोमि । यद्वा कश्चिदपि नेशे न समर्थ आसीत् । सुलभत्वाय विशेषणद्वयम् । मदनुग्रहस्य ममानुग्रहो यस्मात्तन्मदनुग्रहं तस्य । किं च स्वेच्छामयस्य स्वेषां स्वीयानां भक्तानां यथायथेच्छा तथातथा भवतः । तर्हि किमिति ज्ञातुं न शक्यतेऽत आह । न तु भूतमयस्याचिंत्यशुद्धसत्त्वात्मकस्य । यदाऽस्यैवं तदा किमुत कथं पुनः साक्षात्तव केवलस्यात्मसुखानुभूतेरेव स्वसुखानुभवमात्रस्यावतारिणो गुणातीतस्य महिमानमांतरेण निरुद्धेनापि मनसा को वा ज्ञातुं समर्थो भवेत् । अथ वा भूतमयस्यास्यापि तुविराड्रूपस्य तव त्वन्नियम्यस्य वपुषो महि महिमानमेवावसितुं कोऽपि नेशे तदा साक्षात्तवैवासाधारणस्य नियम्यनियंतृभेदरहितस्योक्तलक्षणस्यास्य महिमानवसितुं कोऽपि नेशे इति किमु वक्तव्यमित्यर्थः ॥ २ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पूर्वस्मिन्नध्याये आगंतुकं संप्राप्तं यद्भगवतो वत्सपालीभूय पुनः सत्यज्ञानादिरूपेण प्रतिभानं तस्य निश्चयम् किमिदं कथमेतदिति व्यवसितुम् अनीशोऽकल्पः । विमोहितो विशेषेण मोहितः (१) । अनवगाहमानो याथातथ्येनाजानन् । छांदसाश्रयणतो यत्नान्तरं वरमित्यभिप्रेत्याह—अथ वेति । प्रस्तुतस्य प्रसंगागतस्य । परानंदरसं त्वां विना पुरुषार्थांतरासंभवात्त्वमेव प्रयोजनमिति धनाप्तये धनस्येव न हि तत्प्राप्तये तत्स्तुतिरुचितेत्यस्वारस्यादाह—यद्वेति । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी । अभ्रवन्मेघवत् श्यामस्निग्धसुंदरं सर्वजीवजीवनानंदं साभिवर्षं वपुर्यस्य तस्मै । तडिद्वत्सचमत्कारे पीते चंचले अंबरे वस्त्रे यस्य तस्मै "अवतंसः कर्णपूरे न स्त्रियां शेखरेऽपि च" इति मेदिनी । वन्याः पत्रपुष्पमय्यः । स्रजो मालाः वेत्रं वेतसदंडम् । विषाणं शृंगम् । मृदू लक्ष्म्या अपि करस्पर्शासहौ, पापमर्दनशीलौ वा । पशुपो नंदस्तस्यांगाज्जायते इति तथा तस्मै । यद्वा—पशुपो नंदस्तस्यांगं मित्रं वसुदेवस्तज्जाय । यद्वा—पशुपां गोपानां मध्ये गजाय मुख्याय "मानेमतंगजे मुख्ये वस्तुभेदे गजोऽचले" इति धरणिः ।

---

१. अस्यापि—श्रीधर. वंशी. वीर. विज. विश्व. । २. न तु—श्रीधर. वंशी. वीर. विज. विश्व. शुक. ; तनु—चित्सुख ।

यद्वा—"पशुर्वै स देवानाम्" इति श्रुतेः पशवः कर्मजडास्तान्पांतीति पशुपा देवास्तेंगजा यस्य। यद्वा—पशुपो रुद्रः सोंगं शरीरं यस्य स पशुपांगो ब्रह्मा तं जनयतीति तथा । मम जनकायेत्यर्थः । अत्र वैकुंठीयानर्घ्यरत्नालंकारेभ्योऽपि वृन्दावनीयगुंजादीनामुत्कर्षः । वन्या वृन्दावनीया एव पत्रपुष्पमय्यः स्रजो यस्येति नैःश्रेयसवनस्थपारिजातादिभ्योऽप्युत्कर्षः सूचितः। कवलेत्यादिना तदीयसर्वाचरणेभ्यो गोपालचरणस्यैव श्रैष्ठ्यम्। पशुपांगजायेति वसुदेवादिभ्यः श्रीनंदराजस्य सौभाग्याधिक्यं व्यंजितमिति चक्रवर्ती ॥ १ ॥ शंकते—नन्विति । अनुवादः पुनः पुनः कथनम् । त्वं मा समर्थो भूरन्ये तु संतीति शंकोपनोदव्याजेनार्थांतरमाह—यद्वेति । इहाऽभाव आर्षः । सर्वान्विहाय तवानुग्रहे पक्षपातः स्यादिति चेदाह—किञ्चेति । इह प्राधान्ये मयट् । यद्येतादृशस्तर्हीति। अचिंत्यशुद्धसत्त्वात्मकस्य ज्ञानं दुर्घटमिति भावः । यदाऽस्य शुद्धसत्त्वतनोरेवं महिमा ज्ञातुमशक्यस्तदा को वा न कोपीत्यर्थः। भूतमयस्यापि ज्ञानं दुर्घटं न केवलं शुद्धसत्त्वाचिंत्यरूपस्यैवेत्यभिप्रेत्याह अथ वेति। भूतमयस्योक्तलक्षणस्य विराज इत्यर्थः। तन्नियम्यवपुषस्त्वदायत्तस्य । इत्यर्थ इति—कैमुत्यन्यायेन बोधयति । ब्रह्मेति– ननु भो ब्रह्मन् त्वं जगदैश्वर्याधिपतिरहं तु वन्यगोपालपुत्रः, त्वं पुरातनोऽहं तु बालः, त्वं वेदार्थतात्पर्यज्ञत्वात्परमविद्वान्सदाचारपरायणोऽहं तु वत्सचारकत्वाज्ज्ञानशून्यस्मार्ताचारगंधमप्यजानंस्तिष्ठन् भ्राम्यन्नप्योदनकवलं भुंजानः, त्वं मायी परमसुखी साक्षात्परमेश्वर एवाहं तु त्वन्मायामोहितो मनोदुःखेन वनं पर्यटंस्तव स्तवं कर्तुं नार्हामीति ब्रह्मा तदुक्तिमाशंक्य–सत्यम्, अज्ञानान्महापराधमहमकरवमिति व्यंजयन्नाह–अस्येति। हे देव अस्यापि बालचेष्टामयस्य प्रकटितमौग्ध्यस्यापि तव वपुषो महिमानं ज्ञातुं नेशे, किमुत कैशोरलीलस्य प्रकटयिष्यमाणमहाचातुर्यस्य वपुषः, किमुतात्मनो मनसो या सुखानुभूतिस्तस्या निरतिशयानंदमयोपि वत्सचारणादिना यादृशं सुखमनुभवसि तस्येति चक्रवर्ती ॥ २ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीवृन्दावनचन्द्राय नमः

एवं यस्य रूपस्य ज्ञातपरमैश्वर्यमाधुर्यस्तद्रूपमेव निजपरमपुरुषार्थत्वेन स्तोतुमुपक्रमते—नौमीति । हे ईड्य ! इति त्वमेव स्तुतियोग्य इत्यर्थः । परब्रह्मणस्तवैश्वर्यमाधुर्य्ययोरेवाद्यसर्वप्रापञ्चिकाप्रापञ्चिकनिर्गमप्रवेशदर्शनात् अतः स्तौमि त्वां किमर्थं ते तुभ्यं त्वां प्राप्तुं "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" (२।३।१४) इति एधोभ्यो व्रजतीतिवच्चतुर्थी । ननु, ब्रह्मरूपेण रूपान्तरेण वा मत्प्राप्तिः स्यात् तत्राह अपो बिभर्त्तीत्यभ्रं नवीनश्याममेघः तद्वत् स्निग्धं कृष्णकान्ति वपुर्यस्य तडिद्वत्पीतमम्बरं यस्य तस्मै। ननु, ईदृशाः श्रीवैकुण्ठेश्वरादयोऽपि सम्भवन्तीत्याशङ्क्याह—गुञ्जेत्यादि । परितः पिच्छानि यस्य तत्परिपिच्छं बर्हापीडं वन्या वनोद्भवा नानावर्णपत्रपुष्पादिमय्यः स्रजो यस्य तस्मै तत्र च विशेषतो बाल्यलीलयाकृष्टचित्तस्तामेवोद्दिशति–कवलेति। अत्र कवलं दध्योदनग्रासो वामहस्ते, वामकक्षे वेत्रविषाणे जठरपटसन्धौ वेणुरिति पूर्वोक्तानुसारेण बोद्धव्यं तान्येव लक्ष्माणि असाधारणलक्षणानि अत एव तैः श्रीः शोभा यस्य तस्मै मृदुपद इति बाल्यमेवाभिप्रेतं साक्षात्तदनुक्तिः पितृत्वगुरुत्वप्रभुत्वादिना परमगौरवात् अनुक्तमन्यद्वृन्दावनविहारित्वं वनधातुचित्रिताङ्गत्वादिकं च सङ्गृह्णन् सर्वान्ते सर्वविशेषणाश्रयमभीष्टं विशेषणमाह—पशुपस्य श्रीनन्दराजस्य अङ्गजाय पुत्राय तत्कुमारत्वेन स्वत एव नित्यम् तत्तत्समवेतत्वादित्येतच्छ्रीबालगोपालरूपं त्वामत्र प्राप्तुं त्वामेव नौमीति परमलालसया प्रागेव प्रयोजनमुद्दिष्टम् ॥ १ ॥ अस्यापीति, तैर्व्याख्यातं तत्र नन्वित्याद्यन्ते उत्कर्षवर्णनमेव हि स्तुतिर्नामेति हेतुरध्याहार्य्यः तव वपुष इति चतुर्थचरणादत्रापि तवेति योजनया साधितंस्तव यद्वपुषः कश्चिदप्यवतारस्तस्येत्यर्थः । कीदृशस्यापि तस्य तत्राह—अस्यापीति । जगति सुलभत्वेन प्रकाशितत्वात्तत्रेदन्तानिर्देशं प्राप्तस्येत्यर्थः । मदनुग्रहस्येति मदीयसृष्टिपालकत्वादिति भावः । तदेतन्मते तु । ननु भूतमयस्येति तवर्गपञ्चमद्वयादिभागमय एव पाठः न तु तत्पञ्चमप्रथमादिभागमयः न तु वा तत्प्रथमपञ्चमादिभागमयः उत्तरव्याख्यायां तयोर्न तु तन्वोरस्पर्शात् तस्माद्यत्तु प्रथमव्याख्यायां नत्विति व्याख्यातं तत्खलु नु कारस्यैव तकारार्थतया स्वीकाराज्ज्ञेयं नेशे महित्ववसितुं इत्यस्मान्नत्रायोजनया वा अत्र नतु वितर्कार्थो ज्ञेयः । द्वितीयार्थे ननु निश्चयार्थो ज्ञेयः । नन्विति तवर्गापञ्चमान्तपाठस्तु टीकायां मूले च प्रायः सर्वत्र दृश्यते तस्मादथवेत्यस्य पाठान्तर इत्येवार्थो ज्ञेयः साक्षात्तवेति स्वयं भगवतस्तवेत्यर्थः । केवलस्येत्येवकारव्याख्या तत्तदवतारानतीत्य विराजमानस्येत्यर्थः। गुणातीतस्येति, तत्र च पुरुषत्रिदेवीवन्नतु त्रैगुण्यतत्तद्गुणपरिच्छिन्नाधिकारस्येत्यर्थः । स्वसुखानुभूतिमात्रस्यापि तत्तदवतारित्वं महिमवत्त्वं च "एतस्यैवानन्दस्यान्यानि भूतानि मात्रानुपजीवन्ति" इति "को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इति "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतिप्रामाण्यादृगम्यते । न च निर्विशेषतया तदाविर्भावविशेषस्य" ब्रह्मण एव दुर्ज्ञेयताधिक्यमत्र प्रतिपाद्यते तथापि "भूमन् महिमागुणस्य ते" इत्याद्युत्तरवाक्यद्वये सविशेषस्यैव तदाधिक्यं व्याख्यास्यते अर्थवत्यत्र विराड्रूपस्यापि दुर्ज्ञेयत्वोल्लेखः स्वयं भगवति तस्मिन् परमकैमुत्यं प्रतिपादयति स्म अस्मिन्नेव पक्षे तनुभूतमयस्येति चित्सुखपाठः । सङ्गच्छते तनुभिः सूक्ष्मैराब्रह्मस्तम्बपर्यन्तैर्व्याप्तत्वादिति हितद्व्याख्या पूर्वस्मिन् पक्षे तु तनुसूक्ष्ममचिन्त्यं यद्भूतं शुद्धसत्त्वात्मकं भगवत्तत्त्वं तत्स्वरूपस्येत्यर्थः । "अस्य महतो भूतस्य" इति श्रुतेः । "लोकनाथो महद्भूतम्" इति सहस्रनामस्तोत्राच्च नियन्तृनियम्यभेदरहितस्येति विराड्रूपस्य त्वन्नियम्यस्येत्युक्तत्वात् न तस्य कश्चिन् नियंता न च स कश्चिन्नियम्य इति विवक्षया उक्तलक्षस्येति अभ्रवपुरादिविशेषणैर्दर्शि-

तस्येत्यर्थः । अथ स्वव्याख्या । ननु, ममैतादृशं स्वरूपमनूद्य किं स्तौषीत्यशङ्क्या ससम्भ्रमं तत्र निजासामर्थ्यमाह—अस्यापीति । अस्य जगतो यद्देववपुराधिदैविकरूपं नारायणाख्यं तव वपुरधुना दर्शितेषु चतुर्भुजरूपेष्वेकमपि वपुस्तस्यापीति योज्यम् । "नारायणोऽङ्ग नरभूजलायनात्" इति हि वक्ष्यते वपुषो विशेषणानि मदनुग्रहस्येत्यादीनि साक्षात्तवैवेति पूर्ववत् आत्मना स्वयमेव कर्त्रासुखानुभूतिर्यस्य अनन्यवेद्यानन्दस्येत्यर्थः । यद्वा अस्य तव यद्देववपुरधुनादर्शितेषु चतुर्भुजरूपेष्वेकमपि वपुस्तस्यापीति योज्यम् । अत्र मदनुग्रहस्येति तद्दर्शनादेव हि त्वन्महिमा ज्ञात इति भावः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीभगवतैव नितरामनुकम्पितः श्रीचतुर्म्मुखः परममनोहररूपगुणलीलावैभवं तमवलोक्य परमप्रेमरसनिमग्नः साक्षाद्दृश्यमानं तद्रूपमेवादौ वर्णयन् स्तौति—नौमीति । हे ईडयेति त्वमेव स्तुतियोग्यः, न तथा ब्रह्मा, न च श्रीवैकुण्ठनाथो नापि त्वदवतारादयोऽन्ये केचिदित्यर्थः, परब्रह्मणि त्वय्येवावतारिणोऽवतारादेश्चाद्य दृष्टत्वात् । अतः स्तौमि त्वाम् । किमर्थम् ? ते तुभ्यं त्वत्प्राप्त्यर्थमेवेत्यर्थः । ननु, ब्रह्मरूपत्वेनान्तर्य्यामिरूपत्वेन च मम स्वतः प्राप्तिरस्त्येव ? तत्राह—अपो बिभर्त्तीत्यभ्रं नवीनश्याममेधस्तद्वत् स्निग्धकृष्णकान्तिर्वपुर्यस्य; तड़ित्वत्पीतमम्बरं यस्य । नन्वीदृशः श्रीवैकुण्ठेश्वर श्रीरघुनाथश्चेत्याशंक्य तद्वैलक्षण्यार्थमाह—गुञ्जेत्यादि । परितः पिच्छानि यस्मिन् तत् परिपिच्छं बर्हापीड़म् । वन्या वनोद्भवा नानावर्णपुष्पपत्रादिमय्यः स्रजो यस्य तस्मै । तत्र च विशेषतो बाल्यलीलयाकृष्णचित्तस्तामेवोद्दिशति—कवलेति । तत्र कवलं दध्योदनग्रासो वामहस्ते, वामकक्षे वेत्र-विषाणे जठर-पट-सन्धो वेणुरिति पूर्व्वोक्तानुसारेण बोद्धव्यम् । तान्येव लक्ष्माण्यसाधारणलक्षणानि, अतएव तैः श्री शोभा यस्य तस्मै । मृदुपद इति बाल्यमेवाभिप्रेतम्, साक्षात्तदनुक्तिः पितृत्व-गुरुत्व-प्रभुत्वादिना परम–गौरवात् । अनुक्तमन्यच्छ्रीवृन्दावनविहारत्वं वनधातुविचित्रतांगत्वादिकञ्च संगृह्णन्नाह—पशुपस्य श्रीनन्दस्य अंगजाय पुत्राय, तत्कुमारत्वेन स्वत एव नित्यं तत्तत्समवेतत्वादित्येतच्छ्रीबालगोपालरूपं त्वामत्र प्राप्तुं त्वां नौमीति परम-लालसया प्रागेव प्रयोजनमुद्दिष्टं स्तवनं चेदमेवाभिप्रेतम् । एवमत्रापि विशेषणानामेषामुत्तरोत्तरमुत्कर्षेण प्रतिपदादिकमाश्चर्यमूह्यम् ॥ १ ॥ ननु, नौमीति प्रतिज्ञातमुत्कर्षवर्णनमेव स्तुतिर्नाम, तत् किं स्वरूपमात्रं वर्ण्यते ? तत्राह – अस्येति । वपुषोऽवतारस्याप्येकत्वमवतारजात्यपेक्षया, यद्वा, यस्य कस्याप्येकस्येत्यर्थः । मदनुग्रहस्येत्यधर्म्मनाशन-धर्मप्रवर्त्तन-द्वारा ब्रह्मसृष्टेः पालनान्न तु भूतमयस्य ज्योतिर्म्मय-देवतान्तरदेहवत् पाञ्चभौतिकत्वरहितस्येत्यर्थः । तर्हि कीदृशस्येत्यपेक्षायामाह—आत्मसुखानुभूतेः परब्रह्मात्मकस्येत्यर्थः । यद्वा, आत्मनः सुखेनानुभूतिः साक्षाज्ज्ञानं तस्या हेतोर्यदान्तरं बाह्यविषयादि परित्यागेनान्तर्मुखीभूतं मनस्तेनापि, किमुत साक्षात्तवावतारिणः । अन्यत्तैर्व्यञ्जितम् । अतस्तव यथादिष्ट-रूपवर्णनमेव स्तुतिरिति भावः । यद्वा, तव देववपुषः श्रीवैकुण्ठाधिष्ठातृदिव्यरूपादप्यस्य वपुषः श्रीबालगोपालरूपस्य, यद्वा, अस्य श्रीबालगोपालरूपिणस्तव महि कोऽप्यवसितुं नेशे, किमुतात्मसुखानुभूतेर्ब्रह्मणः सकाशात् सच्चिदानन्दघन-दिव्यचतुर्भुजरूपादात्मसुखानुभूति-स्वरूपस्यात्मनस्तव ब्रह्मणस्तत्त्वस्य न्यूनत्वेन किमुतेति न्यायोक्तिर्दिव्यरूपतोऽप्यस्य महिमाधिक्येन तस्याः (आत्मसुखानुभूतेः) सकाशात् स्वत एव महिमाधिकता-सिद्धेः ॥ २ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

श्रीमते रामानुजाय नमः

चत्वारिंशत्सङ्ख्यपद्यैर्ब्रह्मा कृष्णं स्तुवन्प्रभुम् । स्वरूपोपायसाध्यानि विविच्याह चतुर्दशे ॥ १ ॥

तत्र तावद् ब्रह्माऽष्टाभिः स्वरूपरूपगुणविभूतिविवेकं कर्मज्ञानभक्तिप्रपत्तिविवेकं च स्पष्टयति—तत्तद्वादिनिरासश्चार्थप्राप्त एवेति तत्र प्रयत्यते, तत्र प्रथमेन स्वरूपादपि रूपस्याऽभ्यर्हितत्वमाह—नौमीति । हे ईड्य ! स्तुत्य ! अहं ते त्वदर्थं त्वां नौमि स्तौमि प्रणमामि चेति अनेन माधवस्यैवोपायोपेयत्वं व्यञ्जितम् । श्रीभगवद्रूपस्य भक्त्यवलम्बनत्वात् तस्य स्वरूपादपि परमभोग्यत्वमाह, अभ्रवपुषे अभ्रवत् श्यामसुन्दराय तडिदम्बराय तडिद्वत्पीताम्बरद्वयं गुञ्जामालिकयाऽवतंसः कर्णावतंसः परिपिच्छं परितः सर्वतः वर्त्तमानं पिच्छंजात्यैकत्वं बहुमयूरचन्द्रिकारचितं मुकुटं तेन लसत् शोभमानं मुखं यस्य तस्मै, वन्या वने भवा वनमाला आपादलम्बिनी स्रग्यस्य तस्मै एतेषां पदानां सत्त्वतमोमयरजस्तमोमयान्तःकरणस्याऽपि स्वदर्शनकर्त्तुः स्वकर्णप्रान्तलग्नत्वम् "उदाराः सर्व एवैते" इति न्यायेन अहृदयपूर्वकं स्वदर्शनकर्तृनेत्राणां चन्द्रिकारूपतया शिरोधारणम् अज्ञाद्यर्पितपत्रपुष्पवन्यमालादीनामपि चरणधार्यत्वादिकमत्र व्यङ्ग्यं ज्ञेयम् । अश्नामीति वर्त्तमाननिर्देशसार्थक्यायैव कवलं केवलकर्मजडानां पशूनां ताडनाय वेत्रम्, तेषामेव स्वज्ञापनाय उच्चशब्दकारिविषाणं स्वसङ्केतितार्थज्ञानिष्वात्मभूतप्रियनित्यवर्गेषु स्वाभिप्रायव्यञ्जकशब्दं वेणुं तेषां नित्यसंश्लेषव्यञ्जकं श्रीवत्सलक्ष्म तत्सम्बन्धिस्मारकत्वन्यायेन श्रीश्च एतैः श्रीः शोभा यस्य तस्मै कोमलवालुकस्वधामश्रीवृन्दावनशैत्यकारिणी मृदुनी पदे यस्य तस्मै नौमीति शरणागतस्य मेऽञ्जलिबन्धमात्रेणाऽपराधं क्षमस्वेति पशवः पालाश्च स्वसङ्कल्पजाता यस्य तस्मै पशुपः शिवः अङ्गजः शरीरभूतब्रह्मणः जातो यस्य तस्मै इति वा एवं प्रथमपद्यव्यञ्जितं सुधीभिरनुभाव्यं नन्दस्याङ्गजः मानसः पुत्रतुल्यसुखदयितया पुत्र इव अङ्गभूर्मानसः पुत्र" इति कोशात् ॥ १ ॥ रूपविवेकमनुवदन्स्वरूपविवेकमाह—हे देव ! क्रीडाप्रवृत्त ! मय्यनुग्रहो यस्मात्तन्मदनुग्रहं तस्य स्वेच्छामयस्य स्वसङ्कल्पप्रचुरस्य

स्वसङ्कल्पस्यैव सर्वरूपाविर्भावकारणत्वात् नतु पाञ्चभौतिकस्य कः ब्रह्मा अहमपि जीव इति वा नेशे न समर्थः महि माहात्म्यवतः अस्य शुद्धसत्त्वस्य वपुषोऽपीत्यनेनावतारविग्रहाणां सर्वेषां गुणविभूतीनाञ्च मह्यवसितुं न शक्यमिति भावः। भगवत्स्वरूपज्ञानदौर्लभ्येऽपि तत्प्राप्त्युपायं कैमुत्येनाह, आत्मसुखानुभूतेः स्वस्वरूपानन्दानुभवकर्त्तुः साक्षात्सच्चिदानन्दस्वरूपगुणविभूतिकस्य अत एव तवैव मनसा सङ्कल्पमन्तरेण विना साक्षान्महि अवसितुमहं कोऽपि नेशे इति किमुत वक्तव्यं त्वत्स्वरूपज्ञानन्तु त्वदिच्छयैवेति भावः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

श्रीमते रामानुजाय नमः

वात्सल्यसौशील्यगुणाविष्कारपूर्वकं स्वापराधं क्षमापयितुकामः तावत् त्वन्मायातितरणेत्वत्प्रपत्तिरेवोपायो नान्योऽस्तीत्यभिप्रायेण प्रस्तुतरूपयुक्तं भगवन्तं शरणं व्रजति–नौमीति। हे ईड्य ! ते तुभ्यं केवलं नौमि "णु स्तुतौ" स्तुतिरत्रापराधसहनमायातरणतदर्थशरणत्वाद्युपयुक्तवात्सल्यक्षमादिगुणाविष्कारपूर्वकोपायत्वाध्यवसायरूपा विवक्षिता स्तुतेर्गुणनिष्ठगुणाभिधानरूपत्वात्तस्याश्चोपायत्वाध्यवसायार्थत्वाद्धातोर्लक्षणया तत्र वृत्तिसम्भवात् इति कर्मण एव सम्प्रदानत्वविवक्षया चतुर्थी तदतिरेकेण पृथक् स्तुतेः साधनत्वनिरासाय तथाविवक्षा कृता उपायत्वाध्यवसायात्मकप्रपदनेऽपि तस्यैव प्रयोजककर्तृत्वेन तस्या अपि तदधीनत्वेन तस्याः स्वतः साधनत्वाभावादिति भावः। तावत्सौशील्याद्यनन्तकल्याणगुणनिलयस्य भगवतः कृष्णस्य सौशील्यमाविष्कुर्वन्विशिनष्टि–पशुपाङ्गजाय नन्दसुताय निःसीममहिम्नः सौशील्यमन्तरेण पशुपाङ्गजत्वासम्भवेन सौशील्यमाविष्कृतं तच्च महतो मन्दैः सह संश्लेषस्वभावत्वं मृदू पादौ यस्य कवलादिभिर्लक्ष्मभिः चिन्हैः शोभा यस्य वनजानां पुष्पाणां स्रग्यस्य गुञ्जाभिरतंसौ कर्णभूषणे परितः पिच्छं बर्हापीडं तैर्लसन्मुखं तडिदिवाम्बरं यस्याभ्रवद्वपुर्यस्य तस्मै ते नौमीत्यन्वयः ॥ १ ॥ निःसीममहिमत्वमेव कैमुत्यन्यायेन दर्शयन् स्तौति—अस्यापीति अस्य मह्यं प्रदर्शितस्य पशुपाङ्गजरूपस्यापि वपुषो महित्वं महि महिमानमन्तरेण मनसाऽन्तरिन्द्रियेण मनसा व्यवसितुमध्यवसितुं कोऽपि ब्रह्मापि अहमपि सन् नेशे न प्रभवामि किन्तु पुनरात्मनः परमात्मनः सुखानुभूतेरनुकूलज्ञानस्वरूपस्य तव महिमानमवसितुं नेश इत्यन्वयः। किन्तद्वपुषो महित्वं यदवसितुं न प्रभवतीत्यपेक्षायां तद्वाचामगोचरमित्यभिप्रायेणास्मदादिवपुषो वैलक्षण्यमात्रं वेद्मीति तद्वपुर्विशिनष्टि–मदनुग्रहस्य मय्यनुग्रहो यस्य मत्प्रार्थनां सफलीकर्त्तुमुपात्तस्येत्यर्थः। स्वेच्छामयस्य स्वेच्छात आगतः स्वेच्छामयः "तत आगत" ४।३।७४। इत्यधिकारे "मयट्च" ४।३।८२ इति मयट् स्वेच्छामात्रपरिगृहीतस्य नत्वस्मदादिजीववपुर्वत्कर्मायत्तस्येत्यर्थः। किञ्च ननु, भूतमयस्याभूतसङ्घसंस्थानरूपस्य "न भूतसंघसंस्थानो देहोस्य परमात्मन" इति वचनार्थोऽत्रानुसन्धेयः शुद्धसत्त्वमयस्येति भावः ॥ २ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

श्रीमते रामानुजाय नमः

श्रीनिवासाङ्घ्रिदासेन नत्वा श्रीयतिशेखरम्। भव्या ब्रह्मस्तुतेर्व्याख्या क्रियते तत्त्वदीपिका ॥ १ ॥

अथ स्वस्य सर्वोत्पादकत्वागतपितामहत्वाभिमानरूपस्वातन्त्र्येण विस्मृतपरशेषतैकस्वरूपतया भगवति प्रकटितस्वमायत्वेन पूर्वं स्वकृतापराधतया सभयः कम्पमानो ज्ञातभगवच्छेषतैकरूपपारतन्त्र्यस्तन्महिम्न इयत्तां वक्तुमशक्यतया स्वस्यानभिज्ञत्वं ख्यापयन् स्वापराधं क्षमापयंश्चेदानीं यथादृष्टस्वरूपं श्रीकृष्णं स्तौति, नौमीति। हे ईड्य ! स्तुत्य ! ते तुभ्यं नौमि कारकाणां वैवक्षिकत्वाद्द्वितीयार्थे चतुर्थी त्वामित्यर्थः यद्वा, इतः पूर्वं सर्वेश्वरोऽहमेवेत्येवं रूपस्वातन्त्र्यात् विस्मृतत्वच्छेषत्वैकस्वरूपोऽभवमिति कृतापराधो जातः, इदानीं तु त्वत्कृपया सञ्जातत्वच्छेषत्वज्ञानस्त्वामनुकूलयितुं नौमीत्युच्यत इत्यर्थः। अथवा नौमीत्यत्रायमाशयः ममेयं नमस्क्रिया तुभ्यमेवास्तु तत्कुतस्तवैव निरूपाधिकनन्तव्यत्वात् अस्मदादीनां सर्वेषां निरूपाधिकनन्तृत्वात् तथा च हारीतः "नन्तव्यः परमशेषी शेषानन्तार ईरिताः" इति। अन्यत्रापि—

"दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः। नान्यथा लक्षणं तेषां बन्धे मोक्षे तथैव च ॥
स्वत्वमात्मनि सञ्जातं स्वामित्वं ब्रह्मणि स्थितम्। स्वोजीवनेच्छा यदि ते स्वसत्तायां स्पृहा यदि ॥
आत्मदास्यं हरेः स्वाम्यं स्वभावं च सदा स्मर" ॥

इति तथा च प्रह्लादवाक्यं श्रीनृसिंहप्रति "अहन्त्वकामस्त्वद्भक्तस्त्वञ्च स्वाम्यनपाश्रयः" इति अनपाश्रयो निरुपाधिक इत्यर्थः। अत्रापि अग्रे वक्ष्यति स्वयम्—

"तदस्तु मे नाथ स भूरिभागो। भवेऽत्र वाऽन्यत्र तु वा तिरश्चाम् ॥
येनाऽहमेकोऽपि भवज्जनानाम्। भूत्वा निषेवे तव पादपल्लवम्" ॥

इति, अतो ब्रह्मण ईश्वरजीवयोः पारमार्थिकं भेदज्ञानं सञ्जातमिति तं स्तौतीति, ये पुनर्जीवेश्वरयोरौपाधिकभेदं स्वीकृत्य तन्निवृत्तये पारमार्थिकाभेदज्ञानमेवेति वदन्ति, ते प्रष्टव्याः, अयं चतुर्मुखः सञ्जातपारमार्थिकाभेदज्ञानो न वा ? नाद्यः पक्षः पारमार्थिकाभेदज्ञानिनो भेदपूर्वकस्तुत्यभावात् न च नष्टस्य भेदज्ञानस्यानुवृत्तिर्वक्तुं शक्यते ज्ञानोत्तरकाले तस्या अनुदयात्

द्विचन्द्रज्ञानादौ तु पारमार्थिकदोषस्य विद्यमानत्वादनुवृत्तिर्युक्ता सा च पारमार्थिकचन्द्रैकत्वज्ञानादकिञ्चित्करा इह तु सकारणस्य सकार्यस्य चाज्ञानस्य पारमार्थिकाभेदज्ञानविनष्टत्वान्न कथञ्चिदनुवृत्तिरिति। नापि द्वितीयः तस्य पारमार्थिकाभेदज्ञानशून्यतया तत्पूर्वकस्वकृतस्तुतिवाक्यानां श्रीमद्भिरपि पारमार्थिकाभेदज्ञानत्वेन व्याख्यातानां "नारायणस्त्वं न हि सर्वदेहिनाम्" "एकस्त्वमात्मा पुरुषः पुराणः" "सत्यः स्वयं ज्योतिरनन्त आद्यः" "नित्योऽक्षरोऽजस्रसुखो निरञ्जनः" "पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः" इत्यादीनां प्रलापापत्तेरविश्वसनीयत्वाच्च कुतः ? अज्ञोक्तत्वात् अतो जीवेश्वरयोर्निरुपाधिकस्वरूपभेदज्ञानमेवास्य जातमिति मत्वा स्तौतीति, स्वस्य परमात्मात्मकत्वनारदाय स्वेनैवोक्तं द्वितीये "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः। विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्" इति नच भेदस्य प्रत्यक्षसिद्धत्वेनानुवादमात्रमिदमिति वक्तुमुचितं स्वनिष्ठत्वेन प्रतीयमानेपि ईश्वरोऽहं ब्राह्मणोऽहमित्यादिभेदे तन्नियाम्यत्वतदुपाद्यत्वतत्पाल्यत्वादीनां श्रुत्यैकगोचरत्वेनाननुवादत्वात्। तथाच श्रुतयः "ज्ञाज्ञौ द्वावजावीशनीशौ "द्वा सुपर्णा" "पृथगात्मानं प्रेरितारञ्च मत्वा, जुष्टस्ततस्तेनामृतत्वमेति" "अत्रान्तरंब्रह्मविदो विदित्वा" "प्रधानक्षेत्रज्ञपतिर्गुणेश" इत्यादयः तथा च सूत्रकारः" भेदव्यपदेशाच्चान्यः" (१।१।२२) "अधिकन्तुभेदनिर्देशात्" (२।१।२२) "स्थित्यदनाभ्याञ्च" (१।३।६) "अधिकोपदेशात्तु बादरायणस्यैवन्तद्दर्शनात्" (३।४।८) "भोगमात्रसाम्यलिङ्गाच्च" (४।४।२१) इत्यादिसूत्रैर्निरुपाधिकस्वरूपभेदमेव निश्चिनोतीति। स्मृतयोऽपि "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा। परस्य ब्रह्मणः शक्तिस्तदेदमखिलं जगत्" इत्यादयो भेदमेव प्रतिपादयन्तीति अभेदवादास्तु सर्वस्य ब्रह्मनिष्ठत्वेन तच्छरीरत्वेनोपपन्नाः "सर्वं खल्विदं ब्रह्म, तत्त्वमस्ययमात्मा ब्रह्म" इत्यादिभिरिति अत एव सामानाधिकरण्यमपि मुख्यत्वेनैवोपपन्नमतोऽस्य स्वाभाविकं नन्तृनन्तव्यसम्बन्धज्ञानमुत्पन्नम् अतः स्वकृतापराधभीतः संस्तं क्षमापयति–नौमीति। अतो यथोक्त एवार्थः समीचीनः कथम्भूताय तुभ्यम् ? अभ्रवपुषे स्निग्धनीलघनवद्वपुर्यस्य तस्मै तडिदम्बराय नीलघनोपरिविद्यमानतडिद्वदम्बरं यस्य तस्मै गुञ्जावतंसपरिपिच्छलसन्मुखाय गुञ्जावतंसाभ्यां कर्णभूषणाभ्याम् परिपिच्छेन शिरोभूषणेन च लसन्मुखं यस्य तस्मै वन्यस्रजे वन्याः स्रजो विद्यन्ते यस्य तस्मै कवलवेत्रविषाणवेणुलक्ष्मश्रिये कवलवेत्रविषाणवेणव एव लक्ष्माणि चिह्नानि तैः श्रीः शोभा यस्य तस्मै मृदुपदे मृदू पादौ यस्य तस्मै पशुपाङ्गजाय पशून् पान्ति वृष्ट्यादिना इति पशुपा देवास्ते अङ्गाज्जाता यस्य तस्मै। यद्वा, अयं मम स्वामी श्रीकृष्णः स्वावतारैश्वर्यं कंसादिभ्यो गोपयितुं नन्दगोपकुले प्रच्छन्न इति ज्ञात्वा वसुदेवात्मजत्वज्ञानवानपि असुरा एनं मा जानन्त्विति मनसि विचिन्त्य पशुपाङ्गजाय नन्दात्मजायेति प्रयुक्तवानिति तथा च श्रुतिः "अजायमानो बहुधा विजायते तस्य धीराः परिजानन्ति योनिम्" इति। धीरा उपासकास्तस्य योनिं जन्मकारणं जानन्तीत्यर्थः। तथा च द्वितीये स्वेनैवोक्तं नारदं प्रति—

> वेदाहमङ्गपरमस्य हि योगमायाम्।
> यूयं भवश्च भगवानथ दैत्यवर्यः। पत्नी मनोः स च मनुश्च तदात्मजाश्च॥ इत्यादि।
> ते वै विदन्त्यतितरन्ति च देवमायाम्। स्त्रीशूद्रहूणशबरा अपि पापजीवाः॥
> यद्यद्भुतक्रमपरायणशीलशिक्षाः । तिर्यग्जना अपि किमु श्रुतधारणाः ये॥

इत्यन्तमिति ॥ १ ॥ अथ पूर्वाध्यायोक्तम्—

> ततः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च। उभयायितमात्मानं चक्रे विश्वकृदीश्वरः॥

"यावद्वत्सकवत्सपालकवपुर्यावत्कराङ्घ्र्यादिकम्" इत्यादि "सर्वस्वरूपो बभौ"इत्यन्तं श्रीकृष्णस्यावताररूपपरिच्छिन्नदिव्यमङ्गलविग्रहस्य महिमानमनवगाहमानोऽपरिच्छिन्नसर्वव्यापकसर्व–कल्याणगुणनिलयदिव्यविग्रहविशिष्टस्य महिमानं कैमुत्यन्यायेन सविस्मयेन स्तौति–अस्यापीति। हे देव ! अस्य सौशील्यसौलभ्यादिगुणविशिष्टस्य परिच्छिन्नदिव्यविग्रहस्याऽपरिच्छिन्नं महि तु महिमानमवसितुं निश्चेतुं कोऽपि चतुराननोऽप्यहं नेशे न समर्थो भवामि। यद्वा, कोऽपि मत्सदृशः कश्चिदन्योऽपि नेशे न समर्थो बभूव किं विशिष्टस्य वपुषः ? मदनुग्रहस्येत्युपलक्षणं ममानुग्रहो यस्मात्तस्य स्वाश्रितानुग्रहार्थं गृहीतस्येत्यर्थः। तथा च गीतोपनिषदि—

> "परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे"॥ इति।

स्वेच्छामयस्य स्वस्येच्छा स्वेच्छा सा प्रधाना यस्मिंस्तस्य तथा च भगवद्वाक्यम्—

> अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥

इति प्रकृतिं स्वभावं अजत्वादि स्वस्वभावमेवाधिष्ठाय स्वकृत्य मायया स्वसङ्कल्पेनेत्यर्थः। "माया वयुनं ज्ञानम्" इत्यनुशासनात् सम्भवामि आविर्भवामि। यद्वा, स्वीयानामिच्छा स्वेच्छा तन्मयस्य तथा च वाल्मीकिनोक्तम्—

> "सहि देवैरुदीर्णस्य रावणस्य वधार्थिभिः। अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः"॥ इति।

तत्र हेतुमाह-नतु भूतमयस्य न पुनर्भूतमयस्य तस्य भूतमयत्वाभावात् तत्कुतः अप्राकृतदिव्यात्मकस्य तस्यालौकिकत्वात् "आदित्यवर्णं तमसः परस्तात्" इत्यादिश्रुतेः उपबृंहणमपि—

"न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः" । इति ।

ननु, मन्महीया यदि सर्वथा दुर्ज्ञेयः तर्हि कथं ज्ञास्यन्ति ? केचिद्दृषय इत्यत्राह—मनसान्तरेणेति । शुद्धमनो विना ज्ञातुं न शक्यते त्वत्कृपया निर्मलमनसा तु जानन्ति ते मनसा विशुद्धेन" ।

"दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" ।

इत्यादिश्रुतेः शुद्धमनोग्राह्यत्वात्—

"तथापि भूमन् ! महिमागुणस्य ते । विवोद्धु मर्हत्यमलान्तरात्मभिः" ॥

इति वक्ष्यमाणत्वाच्च । किमुत साक्षात्तवैवात्मसुखानुभूतेः स्वज्ञानानन्दानुभववतः अन्तर्यामितया सर्वव्यापित्वेन चिदच्छिरीरिणः तद्विलक्षणस्य सर्वाश्रयस्य दिव्यस्वरूपात्मकस्य दिव्यमहिमानमियत्तया निश्चेतुं न शक्नोमोति किं वक्तव्यमिति तथा च श्रुतिः "वेदाहमेतं पुरुषं महान्तम्" इति सर्वाश्रयभूतो विग्रह उक्तः तथा च भगवद्वाक्यमर्ज्जुनं प्रति—

"मया प्रसन्नेन तवार्ज्जुनेदम् । रूपं परं दर्शित्तमात्मयोगात् ॥
तेजोमयं विश्वमनन्तमाद्यम् । यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ इति ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रीवृन्दावनचन्द्राय नमः

एवं श्रीमन्नन्दनन्दनचरणारविन्दमेव परमपुरुषार्थतया निश्चित्य तद्रूपमेव स्तोतुमुपचक्रमे—नौमीति ॥ १ ॥ पूर्वमहित्वं दृष्ट्वा विमूढस्तत्स्तुतिमुपेक्षमाण इव ससम्भ्रममाह, अस्येति ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ ब्रह्मणः स्तुतिमाह—नौमीत्यादि । त्वामित्यध्याहार्यम्, भीतस्योक्तौ न्यूनपदता गुणः, त्वां नौमीत्यर्थः । ननु स्तुत्य एव स्तूयते, ब्रह्मणस्ते गोपबालकोऽहं किं स्तुत्यः ? इत्याशङ्क्याह—हे ईड्य ! भवानेवेड्यो नान्यः कोऽपीत्यर्थः । अन्यत्र स्तवनमर्थवादः, त्वयि तु सर्वं यथार्थमेव किमर्थं नौमीत्यत आह – ते तुभ्यं त्वदर्थं त्वत्प्रातय इत्यर्थः । ननु मत्स्वरूपमेव किं यत् प्राप्त्यर्थं स्तौषीत्याह—अभ्रवपुषे मेघश्यामविग्रहाय । एवमेव ते स्वरूपम् । तर्हि नारायण एव नूयताम्, सोऽपि तथा ? नेत्याह–गुञ्जावतंसपरिपिच्छलसन्मुखायेत्यादिविशेषणान्यासमातेः । स त्वेवं न भवति, द्विभुजश्च न भवति, 'नराकृतिः' इति । यद्वा हे ईड्य ! वपुषे ते वपुरूपाय तुभ्यम् पूर्ववत्तादर्थ्ये चतुर्थी, त्वां नौमि । ननु नारायणाज्जातोऽसि तं त्यक्त्वा कथं परं नौषि ? तत्राह—हे अभ्र ! अं नारायणं बिभर्तीति तथा, तस्य सम्बोधने नारायणस्यापि भर्तरित्यर्थः, (१४ श० श्लो०) "नारायणोऽङ्गम्" इत्यत्रैव वक्ष्यमाणत्वात् । वपुष इत्यस्यैव सर्वाणि विशेषणानि । ते कीदृशाय ? पशुपाङ्गजाय नन्दपुत्राय । तडिदिव गौरमम्बरं यस्य, अथवा यदा पवनस्पन्दो भवति तदा दृश्यते, अन्यदा न लक्ष्यते, अति सूक्ष्मत्वाद् गौरत्वाच्च तडिदुपमानम् । अथवा वपुषे वपुर्निमित्तमित्युपस्थिते वपुषो महनीयत्वे तदेव कथमित्याशङ्क्याह—तडिदम्, इदं वपुस्तद् उच्छ्रायवत् उच्छ्रायः सर्वोत्कर्ष; ननूच्चैरिति वाक्यान्तरं हेतुत्वेनोत्थापनीयम्, 'तद उच्छ्राये' इत्यतः क्विपि सिद्धम्, सर्वोच्छ्रितं परात्परमित्यर्थः । ते कीदृशाय ! सर्वश्रेष्ठाय, अथवा वरायाभिमतफलदानाय इदं तद् उच्छ्रितमित्येकमेव वाक्यान्तरम् । 'वृ वरणे' वादिः पवर्गीयः, तेनानुस्वारस्य पञ्चमः । हे गुञ्जावतंस ! 'गुञ्जि अव्यक्ते शब्दे' गुञ्जोऽव्यक्तशब्दः शब्दब्रह्म, अव्यक्तत्वादपौरुषेय इत्यर्थः, तस्यापि अवतंस ! श्रुतिशिरोऽवतंस ! प्रत्यक्षतया स्वावतंसः स्वयं न दृश्यत इति शब्दब्रह्मागोचर इत्यर्थः । हे परिपिच्छल ! परि परितः पीः प्यानं वृद्धिर्यस्य तत् परिपि, नपुंसकत्वात् ह्रस्वः, परिपि सर्वतो वृद्धं छलं माया यस्य सः सम्प्रत्येवानुभूतत्वात्, ध्याप्योरिति क्विपि प्यैङ् धातोः सम्प्रसारणेपिः, सन्मुखाय सत्सु भक्तेषु मुखाय अभिमुखायेति ते इत्यस्य विशेषणम् 'वपुषे इत्यस्य वा, अथवा, ते तव मृदुपदे नौमि; किमर्थम् ? वपुषे वपुरर्थम्, एतदेव वपुर्निरन्तरं स्फुरत्विति । काक्वा सर्वाण्येव वपुर्विशेषणानि ॥ १ ॥ अथ यो यज्जानाति, स तत् स्तोतुमर्हति, नाज्ञातस्य स्तवः कर्तुं शक्यत इति । नौमीति यदुक्तं तदसम्भाव्यमित्याशङ्क्याह–अस्यापीति । हे देव सर्वविजिगीषापर । अस्यापि वत्सपालरूपस्य, वपुषश्चिदेक-रसत्वाज्जातावेकवचनम्, महि महिमानम् अवसितुं ज्ञातुं कोऽपि ब्रह्माप्यहं नेशे न समर्थोऽस्मि, यतः सर्व एव चतुर्भुजाः, सर्व एव सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तयः, सर्व एव महदादिभिः सेव्यमानाः अतस्तथाविधस्यास्येति साक्षाद्दृष्टस्य, सर्वनाम्नो बुद्धिस्थवृत्तित्वादिदं शब्दः खलु वत्स-वत्सपादिपरः । कीदृशस्य ? मदनुग्रहस्य मम दर्पहानिरूपोऽनुग्रहो यत्र । पुनः कीदृशस्य ? स्वेच्छामयस्य, स्वस्य तव इच्छा तन्मयस्य, तया प्रकटितस्य, अतो न तु भूतमयस्य । तुरेवार्थः—अव्ययानामनेकार्थत्वात् । आन्तरेणापि समाधिनिश्चलेनापि मनसा साक्षादपरोक्षस्यात्मसुखानुभूतेविग्रहरूपपरमानन्दावबोधस्य तव तु श्रीकृष्णस्य महि अवसितुं यन्न ईशे, तत् किमुत, 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म च' अत्र वर्ष्मपरः । तेऽपि सत्यज्ञानादिरूपमूर्तयः अयञ्चात्मसुखानुभूतिरिति तुल्यत्वादविशेषे साक्षाच्छब्दः, वस्तुतस्तु तदिच्छामयत्वादेच्छिक्याः प्रकाशिकाख्याया मायाया एव विलासः, अयं तु साक्षात्तथाविधमाय इति विशेषः ॥ २ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नौमीड्येत्यादि। त्वामित्यध्याहार्यम्, भयेन जातक्षोभतया त्वामिति वक्तुं नाशकत्। ननु स्तव्य एव स्तूयते, ब्रह्मणस्ते गोपबालकोऽहं किं स्तव्यः ? तत्राह-हे ईड्य। भवानेव स्तव्य इत्यर्थः। अन्यत्र स्तवनमर्थवादः त्वयि तु सर्वं यथार्थमेवेति। किमर्थं नौषि ? तत्राह–ते तुभ्यं त्वत् प्रार्थये। यदर्थमित्यवगतम्, अहं निराकारं ब्रह्म, तर्हि तथात्वेनैव स्तूयताम् ? नेत्याह–अभ्रवपुषे मेघश्यामविग्रहाय, तडिदम्बराय पीतवाससे। तर्हि नारायणः स्तूयताम् ? सोऽपि तथा नेत्याह–गुञ्जावतंसपरिपिच्छलसन्मुखायेत्यादि–विशेषणान्यासमाप्तेः। स त्वेवं न भवति। यद्वा, हे ईड्य ! वपुषे एतद्रूपाय वपुषे तुभ्यं वपुरूप त्वदर्थं त्वां नौमि, अस्मिन्नेव वपुषि रतिर्भवत्विति फलमुद्दिश्य नौमि। ननु नारायणाज्जातोऽसि तं त्यक्त्वा कथं मां नौषि ? तत्राह–हे अभ्र ? अं नारायणं बिभर्त्तीति तथाभूतनारायणस्यापि भर्त्तः, (१४ श–श्लो०) "नारायणोऽङ्गम्" इत्यादेरत्रैव वक्ष्यमाणत्वात्। स बकारपाठे (मनुसंहितायाम् १।१०) "आपो नारा इति प्रोक्ताः" इत्यादि अपामयनत्वेनापो बिभर्त्तीति अब् भ्र शब्देन नारायण एवोच्यते हे नारायण ! नारायणनामा खलु त्वद्भिन्ना न भवति, त्वयि स्तुते सोऽपि स्तुतः, (भा० ४।३१।१४) "यथा तरोर्मूलनिषेचनेन" इत्यादि। अब् भ्र शब्दः संबोधनतात्पर्यः तदा सर्वाणि वपुर्विशेषणानि। पशुपाङ्गजाय पशूनां पालं रक्षणं तदर्थमङ्गजा चेष्टा यस्य वपुरिति वपति परमानन्दमिति जनि-धनि वपि प्रभृतिभ्यः ऊसौणादिकः। तडिदम्बराय तडिदिव गौरं चञ्चलञ्च पीताम्बरं यस्य, यदा पवनस्पन्दो भवति, तदा दृश्यते अन्यथा न दृश्यत इति तडिता सहोपमानम्। यद्वा, वपुषे वपुर्निमित्तमिति, वपुषः किमेतावद् गौरवमित्याह तडिदम् इदं वपुः अनुस्वाराभावः सन्धिविवक्षितत्वात्, किं वा मकारश्छान्दसः, तट्शब्देन उच्छ्रितं सर्वोपरि वर्त्तमानमिति यावत्, तट् उच्छ्रये' इत्यतः क्विपि सिद्धेः परात्परमित्यर्थः। वपुषे कथम्भूताय ? वराय व्रियत इति वरमभिलषणीयम्। हे गुञ्जावतंस। गुञ्जा च अध्यक्तशब्दस्तस्य अवतंसः परिपिच्छलः परि परितः पीः प्यानं वृद्धिर्यस्य तथाभूतं छलं माया यस्य, 'पैङ् वृद्धौ' ध्यापोरिति संप्रसारणम् क्लीबत्वात् ह्रस्वः ग्रामणिकुलमित्यादिवत् पश्चात् समासः। सन्मुखाय सत् प्रसन्नं मुखं यत्र वपुर्विशेषणम्। सतां भक्तानां मुखं यत्र सन्मुखमिति वा। अथवा हे ईड्य ! ते तव मृदुपदे नौमि। किमर्थम् ? वपुषे वपुरर्थम्, एतदेव वपुः सर्वदा स्फुरत्विति कृते। तदा सर्वं वपुर्विशेषणम् ॥ १ ॥ किंवा स्तोतव्यम् ज्ञातस्यैव वस्तुनः सम्भवति भवन्महिमा तु न ज्ञायत एव इत्याह–अस्यापीत्यादि हे देव। अस्य गोवत्स गोपबालकरूपस्य वपुषः 'चिदेकरूपत्वादेकवचनम्' महि महिमानमवसितुं ज्ञातुं कोऽपि ब्रह्माप्यहं न ईशे, ईशो न भवामि, यतः सर्वं एव सत्यज्ञानानन्तानन्दमात्रैकवपुषः, सर्वं एव प्रत्येकं मदादिभिर्वन्द्यमानाः, कथमेतद्घटतामिति तव सच्चिदानन्दप्रपञ्चभूतस्य वत्सवत्सपादिव्यतिकरस्य महिमा न ज्ञातः। किम्भूतस्य ? मदनुग्रहस्य मम दर्पहानिरूपोऽनुग्रहो यत्र, स्वेच्छामयस्य स्वस्य तवेच्छा स्वेच्छा तन्मयस्य, तव नित्येच्छत्वात् तस्यापि नित्यत्वम्। अतो न तु भूतमयस्य तुशब्द एवार्थः आन्तरेण समाधिनिश्चलेन मनसापि अस्तु तावद् वचसा वक्तुमिति भावः। आत्मसुखानुभूतेः साक्षात् प्रकटीभूतस्य तव सर्वेश्वरेश्वरस्य सान्द्रानन्दविग्रहस्य महिमा किमुत वक्तव्यः। आत्मसुखं वंशीविलासरसस्तत्रानुभूतिरनुगताभूतिः सम्पद्यस्य ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रीवृन्दावनचन्द्राय नमः।

भक्तिज्ञानमहैश्वर्य्यमाधुर्याब्धौ पतन्विधिः। अस्तौत् प्रीतिविधौ प्रश्नोत्तरं चोक्तं चतुर्दशे ॥
मम रत्नवणिग्भावं रत्नान्यपरिचिन्वतः। हसन्तु सन्तो जिह्रेमि न स्वस्वान्तविनोदकृत् ॥
श्रीमद्गुरुपदाम्भोजध्यानमात्रैकसाहसम्। विधिस्तवाम्बुधेः पारं यियासति मनो मम ॥

निखिलसच्चिदानन्दस्वरूपमूलभूतं श्रीगोपेन्द्रनन्दनं साक्षादनुभूय तत्रैवोद्भूतभक्तिनिष्ठस्तमेव विधिर्वर्णयति—नौमीति। हे ईड्य ! अधुनैव दृष्टब्रह्मादिस्तम्बपर्य्यन्त सर्वस्तुत ! वासुदेव ! सहस्रांशित्वेन परमस्तव्य ! ते तुभ्यं नौमि स्तुत्या त्वामभिप्रैमि पत्ये शेत इति वदेतां स्तुतिं तुभ्यं ददामीत्यर्थः। यद्वा, त्वामेव प्राप्तुं प्रसादयितुं वा त्वां नौमि अभ्रतुल्यवपुषे तडिद्वदम्बरायेति भूतलसन्तापहारित्वं भक्तचातकजीवत्वं च, गुञ्जा चूडावर्त्तिनी अवतंसः पौष्पः चूडावर्त्ती श्रोत्रवर्ती च परिपिच्छमुत्कृष्टबर्हं चूडाप्रवर्ति तैर्लसन्मुखं यस्येत्यसाधारणलक्षणवत्त्वम् वैकुण्ठीयाऽनर्घ्यरत्नालङ्कारेभ्योऽपि वृन्दावनीयगुञ्जादीनामुत्कर्षश्च वन्या वृन्दावनीया एव पत्रपुष्पमय्यः स्रजो यस्येति नैश्रेयसवनस्थपारिजातादीनां निकर्षः कवलादिभिर्लक्ष्मभिरेव श्रीः शोभा यस्येति गोपबालोचिताऽऽचरणस्यैव तदीयसर्वाचरणेभ्यः श्रैष्ठ्यं मृदू अतिसुकमारौ पादौ यस्येति ताभ्यां वनभ्रमणदर्शिनां कारुण्यप्रेममूर्च्छोत्पादकत्वं पशुपाङ्गजायेति श्रीवसुदेवादिभ्योऽपि श्रीमन्नन्दस्य सौभाग्याधिक्यं व्यञ्जितम् ॥ १ ॥ ननु, भो ब्रह्मंस्त्वं जगदैश्वर्य्याधिपतिरहं तु वन्यगोपालपुत्रस्त्वं पुरातनोऽहं तु बालस्त्वं वेदार्थतात्पर्य्यविज्ञत्वात् परमविद्वान् सदाचारपरायणः अहं तु वत्सचारकत्वादध्ययनशून्यः स्मार्त्ताचारगन्धमप्यजानंस्तिष्ठन् भ्राम्यन्नप्योदनकवलं भुजानस्त्वं मायी परमसुखी साक्षात्परमेश्वर एव अहं तु त्वन्मायामोहितो मनोदुःखेन वने पर्य्यटंस्तव स्तवं कर्त्तुं नार्हामीति वक्रोक्तिमाशङ्क्य सत्यमज्ञानान्महापराधमकरवमिति व्यञ्जयन्नाह,

अस्येति । हे देव ! अस्यापि बाल्यचेष्टामयस्य प्रकटितमौग्ध्यस्य तव वपुषो महि महिमानमवसितुं ज्ञातुं नेशे न शक्नोमि किमुत कैशोरलीलस्य प्रकटितमहाचातुर्यस्य वपुषः वपुषोऽपि महि ज्ञातुं नेशे किमुत तव आत्मनो मनसो या सुखानुभूतिस्तस्याः निरतिशयस्वानन्दमयोऽपि वत्सचारणादिना यादृशं सुखमनुभवसि तस्येत्यर्थः । तथा त्वत्सहचराणामपि मनः सुखानुभूतेर्महि ज्ञातुं नेशे किमुत साक्षात्तवैव अन्तरेण प्रत्याहृत्यान्तर्वशीकृतेनापि मनसा किमुतास्थिरेण तथा को ब्रह्माप्यहं नेशे किमुतान्य इति कैमुत्यपञ्चकमज्ञानातिशयप्रतिपादकं ममापि ज्ञानसम्भावनायां न शास्त्राभ्यासतपोयोगादिकं हेतुः । किं तु कृपाकटाक्षकण एवेति ब्रुवन् वपुर्विशिनष्टि—मय्यपराधिन्यप्यनुग्रहो महैश्वर्य्यदर्शनोत्थमोहोत्तरकालदर्शनदानानुमितो यस्य तस्य अनुग्रहे हेतुः स्वेच्छामयस्य स्वीयानां प्रेमभक्तिमतां यथा यथा या या इच्छा दिदृक्षा सिसेविषादिस्तन्मयस्य भक्तवत्सलत्वात् तत्तत्सम्पादकस्येत्यर्थः । अतो मय्यपि भक्त्याभासवत्त्वादपराधित्वेऽप्यनुग्रहलेशप्राप्त्यधिकार इति भावः । नन्विच्छानुग्रहो नरवपुर्धर्मावित्यत आह – न तु भूतमयस्य भूतमयं हि वपुर्जडं न तु चिन्मयम् अत एव ब्रह्मसंहितायामुक्तम् "अङ्गानि यस्य सकलेन्द्रियवृत्तिमन्ति" इति एतच्च सर्वेन्द्रियवत्त्वं तदेतस्य गोविन्दस्याङ्गानां यथा कालमन्यान् अवतारान् प्रत्येव (तदङ्गानां यथा कालमन्यान्प्रत्येव) न तु साक्षात्तं प्रति स तु स्वचक्षुर्भ्यामेव पश्यति स्वश्रोत्राभ्यामेव शृणोति स्वमनसैव विचारयति न तु स्वपाणिभ्यामपि पश्यतीत्यादिविवेचनीयम् अथवा अस्यापि देववपुषो देवाकारस्य अधुनैव त्वया दर्शितस्य वासुदेवमूर्त्तेर्मदनुग्रहस्य चतुःश्लोकीभागवतोपदेष्टृत्वेन मय्यनुग्रहवतः स्वीयस्यांशिनस्तवेच्छा सम्पादकस्य त्वदिच्छा सम्पादकत्वेऽपि न वयमिव भौतिका इत्याह—न तु भूतमयस्य महि महिमानं को ब्रह्माऽपि स्वव्यञ्जकान् वेदान् वेदफलं श्रीभागवतं चाध्यापितोऽप्यहं ज्ञातुं नेशे किमुत साक्षात्तवैव नरवपुषः सर्वांशिनः स्वयं भगवतः कथम्भूतस्य आत्मनः ? स्वस्य सुखेषुदधिचौर्य्यगोपिकास्तन्यपानवत्सचारणबाल्यचापल्याद्युत्थेषु स्वावतारान्तरासाधारणेषु अनुभूतिर्यस्य तस्य ।। २ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीश्रीभगवन्निम्बार्काय नमः ।

एवं मञ्जुमहित्वं दृष्ट्वा तद्दर्शनार्थं कृतवत्सादिहरणरूपमपराधं क्षमापयितुं भगवन्तं स्तौति–नौमीति । हे ईड्य ! स्तुत्य ! ते तुभ्यं नौमि स्तौमि "णु स्तुतौ" द्वितीयार्थे चतुर्थी अभ्रवपुषे घनश्यामाय तडिदम्बराय पीताम्बराय गुञ्जाभिरवतंसौ कर्णाभरणपरिपिच्छं बर्हापीडं तैर्लसन्मुखं यस्य तस्मै वन्यस्रजे वन्याः वनपुष्पभवाः स्रजो यस्य तस्मै कवलादिभिर्लक्ष्मभिः श्रीः शोभा यस्य तस्मै पशुपाङ्गजाय श्रीनन्दात्मजाय अत्र सम्बोधनेन सर्वेश्वरत्वम् अभ्रेत्यादिपदद्वयेन स्वयंविष्णुत्वं गुञ्जेत्यादिपदत्रय्या पशुपाङ्गजायेत्यनेन च भक्तेच्छानुरूपत्वम् मृदुपदे इत्यनेनोपलक्षणतया मार्दवादिगुणगणश्च भगवतो द्योत्यते ।। १ ।। अभ्रवपुषे इत्युपमेयत्वेन भगवद्विग्रहस्य परिच्छिन्नत्वप्रतीतिं तत्स्वरूपस्य विग्रहवत्त्वेन परिच्छिन्नत्वप्रतीतिं च प्राप्तां निराकर्त्तुं । "हिरण्यश्मश्रुः हिरण्यकेशः सत्पुण्डरीकं नयनं मेघाभं वैद्युताम्बरं द्विभुजम्" इत्यादिप्रसिद्धमप्राकृतं विग्रहं "सत्यं ज्ञानमनन्तम्" इत्यादिश्रुतिप्रसिद्धं स्वरूपं चेयत्तानवच्छिन्नतया स्तौति–अस्यापीति । हे देव ! परमेश्वर ! अस्य तव वपुषः अपि निश्चितं महि महित्वं महिमानमियत्तामिति यावत् अवसितुं ज्ञातुं कोऽपि न ईशे न समर्थ आसीत् । नन्वस्येति त्वदुक्त्यैव परिच्छिन्नतया सुज्ञातत्वं मद्वपुष आगतमतः कथं घटेत कोऽप्यवसितुं नेशे ? इत्यत्राह–मदनुग्रहस्येति । मद्वचनं सत्यं कर्तुं गोपबालतया स्थितस्य । ननु, त्वद्वचनसत्यत्वसिद्धये यत्संस्थितं तस्य त्वन्नियम्यत्वेन सुज्ञेयत्वे कथं दुर्ज्ञेयत्वं यत्र च बालतरुणत्वादिव्यवहारस्य कथं परमेश्वरः स्यादत्राह–स्वेच्छामयस्येति। स्वेच्छयैव भक्तमनोरथानुरोधेन बालत्वादिना द्विभुजत्वचतुर्भुजत्वादिना एकधा शतधा सहस्रधा अनन्तधा वर्त्तितुं शक्तस्येत्यर्थः। किंच भूतमयस्य प्राकृतस्य विराड्रूपस्य "ईदृग्विधाऽविगणिताण्ड" इत्यगणिततया वक्ष्यमाणस्य तव वपुषः महिमानं ज्ञातुं न तु न च कोऽपि ईशे यदा तदा किमुत वक्तव्यमप्राकृतस्य वपुषो दुर्ज्ञेयत्वमित्यर्थः । एवं सति किमुततरां साक्षात्सुखानुभूतेरुभयशरीरिणोऽन्तरेण निरुद्धेनाऽपि मनसा कोऽपि ज्ञातुं नेश इति वक्तव्यम् । द्वितीयस्तुशब्दः विग्रहगुणानां स्वरूपगुणानां च दुर्ज्ञेयत्वं सूचयति "को वेद ब्रह्मणो रूपम्" "यस्याऽमतं तस्य मतं मतं यस्य न वेद सः" इत्यादिश्रुतेः भक्तैः सुज्ञेयत्वं स्वेच्छाशब्देन दर्शितमेवेति दिक् ।। २ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

चतुर्दशे स्तुतः कृष्णः सर्वेशः परमेष्ठिनः । शुद्धप्रीतिविधौ प्रश्नोत्तरे च परिदर्शिनी ।।

अष्टादशार्णमन्त्रराजोपदेष्टृत्वेन गुरुं विश्वैश्वर्यदातृत्वेन प्रभुमुपदेशवेलायां मञ्जुमहिमदर्शनोत्तरञ्च गोपवेषत्वेन दृष्टं कृष्णां विरिञ्चस्तद्वेषमेव तावत् स्तौति—नौमीति ! हे ईड्य ! मञ्जुमहिमशालित्वेन मम स्तुतियोग्य ते तुभ्यं नौमि त्वामेव प्रातुं त्वां स्तौमीत्यर्थः । पुष्पेभ्यो यातोतिवत् प्रयोगः कीदृशाय अभ्रमिव वपुर्यस्य तड़िदिवाम्बरं यस्येति निखिलतापहारित्वं स्वभक्तचातकजीवातुत्वञ्च सूच्यते, गुज्जा चावतंसश्च पौष्पश्चूड़ा श्रोत्रवृत्तिः परिपिच्छं मन्त्रशिखिशिखण्डश्चूड़ाग्रवृत्तिस्तैर्लसत् मुखं यस्येति,

वन्या वृन्दावनभवपत्रपुष्पमयी स्रक् माला यत्य, कवलादिभिर्लक्ष्मभिः गोपचिह्नैः श्रीः शोभा यस्य, मृदू कोमलौ पादौ यस्य, पशुपस्य नन्दगोपस्याङ्गाज्जाताय तदौरस्यायेति इत्थञ्च "तदुहोवाच हैरण्यो गोपवेषमभ्रामं तरुणं कल्पद्रुमाश्रितं" तदिह श्लोका भवन्ति—

सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् । द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ।।

गोपगोपीगवावीत "मित्यादि श्रुतिगीतं स्वयं भगवत्परब्रह्म गोपालरूपमिह स्तुतम् ।। १ ।। ननु गोपकुमारे मयि किमैश्वर्यं यत् सर्वज्ञेन जगत्प्रभुणा विरिञ्चेनापि नूयेहमितिवत्तत्र कैमुत्यं दर्शयन्नाह अस्यापीति । देव सर्वाराध्य ! अस्येदानीं त्वया प्रकटितस्य घनश्यामादिलक्षणस्य वपुषो वासुदेवव्यूहस्य महि महिमानमवसितुं बोद्धुं कोऽपि विरिञ्चोऽप्यहं नैशोसमर्थो नास्मि मत्सृष्टस्यान्यस्य का कथेति भावः । कीदृस्य मदनुग्रहस्य सापराधेऽपि मयि व्येत्वस्य विमोह इत्यनुग्रहो यस्मात्तस्य स्वेच्छामयस्य स्वेषां भक्तानां या इच्छास्तन्मयस्य तदधीनस्य ममापि मृत्यत्वान्महैश्वर्यं मञ्जु महिमानं द्रष्टुं वाञ्छाभूदेव तत्पूरकस्येत्यर्थः । ननु, मायया तद्वपुः केनचित्तव दर्शितं स्यात्तत्राह नतु भूतमयस्येति सत्यज्ञानान्तानन्देत्याद्युक्तेर्विज्ञानानन्दमयस्येत्यर्थः । आन्तरेण निरुद्धेनापि मनसा चेदेवं तर्हि साक्षत्तदंशिनस्तबैव गोपकुमारस्य महिमानमवसितुं नेशे इति किमुत वाच्यमित्यर्थः । तव कीदृशस्येत्याह—आत्मसुखेति । "गोपगोपीगवावीतम्" इत्यादि श्रवणादे गोपादिविशिष्टस्यात्मनः सुखेषु तव सहक्रीडोद्भूतेषु त्वदसाधारणेष्वनुभूतिर्यस्येति त्वत्स्वांशानां महिमानं वोद्धुमसम स्वयंरूपस्य तव महिमा कथं शक्यो बोद्धुमित्यर्थः ॥ २ ॥

श्रीसुबोधिनी

स्तुतिर्ब्रह्मप्रसादश्च वत्सानां पुनरागतिः । स्नेहोपपत्तिः श्रवणे फलं चेति निरूप्यते ॥ १ ॥

प्रथमं व्याकुलो ब्रह्मा दृष्टं रूपं वर्णयन् नमस्यति **नौमी**ति "णु स्तुतौ" स्तौमि भगवन्तं, तत्र हेतुं सम्बोधनेनाह हे **ईड्ये**ति, सर्वैरेव स्तूयतेतो मयापीति, "प्रयोजनमनुद्दिश्य कोपि न प्रवर्तत" इति किमर्थं स्तोत्रमित्याशङ्क्याह **त** इति, **ते** तुभ्यमेव त्वमेव फलं न त्वहं, ब्रह्मप्राप्तिश्च तपोज्ञानादिभिः किं स्तोत्रेणेति चेत् तत्राहा**भ्रवपुष** इति, नास्माकं फलं शब्दविषयकं ब्रह्म किं त्वेतदेव प्रत्यक्षतो दृश्यं तदपि प्राकृतचक्षुषैव तत्रापि सर्वाभरणभूषितं तत्रापि प्राकृतालङ्कारसहितं तत्राप्येतदवस्थापन्नमिति वक्तुं तथाविशेषणान्याहा**भ्रवन्** मेघवद् **वपुर्य**स्य नीलमेघश्यामाय, **तडिद्वत्** पीत**मम्बरं** यस्य, **गुञ्जा**फलाना**मवतंसः** **परि**तो मयूर**पिच्छानि** तै**र्लसन्** **मुखं** यस्य, **वनो**द्भवानां पुष्पाणां स्रग् यस्य, **कवलं** दध्योदनो हस्ते, **वेत्रविषाणे** कक्षयोः, **वेणु**र्जठरपटयोः, एतान्येव यानि **लक्ष्माणि** चिह्नानि तैः **श्रीः** शोभा यस्य, **मृदू** पादौ यस्य, **पशुपस्य नन्दस्याङ्गाच्च** जातो नन्दसूनुः, **अनेन** **यथैव** व्यवहारो लौकिकस्तद्विषय एव भगवानस्माकं फलरूपोस्त्वित्यर्थः ॥ १ ॥

लौकिके प्राकृते भावे यस्य भावः स भक्तिमान् । हीनभावं तं विदित्वा योन्यथा वेद सोधमः ॥ १ ॥
यद् गृह्णाति यथैवायं रोधयत्यत्र लौकिके । तत् प्रमाणमिहास्माकं नान्यद् भिन्नाधिकारतः ॥ २ ॥

नन्वेतदेव फलत्वेन किमिति प्रार्थ्यते ? प्रदर्शनार्थमेवैतदतः श्रुतिसिद्धमेव फलत्वेन प्रार्थ्यतामित्याशङ्क्या**हास्यैवे**ति, एतदप्यस्माकं महत् फलं, यस्य हि स्वरूपानुभावौ ज्ञायेते तत् फलमिष्टं भवति, अस्माकं त्वेतस्यापि स्वरूपानुभावौ न बुद्धिगोचरावत इदमेव फत्वेन धार्ष्ट्यादेव प्रार्थ्यते, **देवे**तिसम्बोधनमुपास्यत्वाय, **अस्या**पि **वपुषो महि** महिमान**मन्तरेणा**पि **मनसा**न्तर्मुखेन विचारयुक्तेनापि मनसाहं **ब्रह्मा**पि **नेशे** "कश्चिद् धीरः प्रत्यगात्मानमैक्षदावृतचक्षु" रितिपक्षं व्यावर्तयति, यद्यपीदं वपु**र्मनुदग्रहं** मय्यनुग्रहो यस्य, ब्रह्मकृपयैवावतारो ब्रह्मवचनाच्च **गो**कुले समागमनं ब्रह्मणि कृपयैवेदानीं प्रादुर्भाव इति, अत इदं रूपं **ब्रह्मार्थ**मेव, तर्हि कथं न माहात्म्यं ज्ञायत इत्याशङ्क्याह**स्वेच्छा**मयस्येति, **स्वस्य** येच्छा **तन्मयोयं**, इच्छा त्वपराधेन्यथा भवतीति न नियमो मय्यनुग्रहमेव करिष्यतीति, न च कालकर्मस्वभावानां नियामकत्वं, तथा सति ब्रह्मणस्तेनुकूला इत्यनुग्रहमेव करिष्यतीति कल्पयितुं शक्यते, अतः कालाद्यधीनत्वाभावे हेतुमाह **तनुभूतमय**स्येति, कोप्यहमपि, यत्रास्य रूपस्यैव महिमा न ज्ञायते तत्र साक्षात् **तवैव** श्रुत्यैकसमधिगम्यस्या**त्मसुखानुभूतेः** स्वत एव बोभूयमानाशेषपुरुषार्थस्वरूपस्य सच्चिदानन्दरूपस्य वा, यद्यप्येतदेव तत् तथाप्यप्रतीयमानमपि फलत्वेन भिन्नतया निर्दिष्टम् ॥ २ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सञ्जातेश्वरज्ञानेन ब्रह्मणा हरिसंस्तुतिः । कृष्णस्नेहोपपत्तिश्च चतुर्दशे निरूप्यते ॥ १ ॥

तत्र भगवत्प्रभावं दृष्ट्वा नष्टगर्वो ब्रह्मा दृष्टस्वरूप एव भगवति लब्धभक्तिस्तत्प्राप्त्यर्थं तमेव स्तौति—नौमीति । 'नौमि' इत्युक्त्वा प्रकरणागतस्य भगवतः कर्मत्वम् । त्वां नौमि, स्तौमीत्यर्थः । ननु 'प्रयोजनंविना न कोऽपि कुत्रापि प्रवर्तते, अतस्तव स्तुतौ प्रवृत्तौ किं प्रयोजनम् ?' इत्यपेक्षायामाह—ते इति । ते तुभ्यमिति तादर्थ्ये चतुर्थी । त्वत्प्राप्त्यर्थं त्वां स्तौमीत्यर्थः ।

ननु 'अन्यसर्वप्राप्तिं विहाय मत्प्राप्तिरेव तव कुत इष्टा ?' तत्राह—हे ईड्येति। यतोऽस्मदादिभिः सर्वैरपि त्वमेव ईड्यः स्तुत्यः परमानन्दरूपत्वात्, अतः प्राप्तियोग्यत्वात्तवैव प्राप्तिरिष्टेति भावः। 'ममाप्यनन्तरूपत्वात् कथंभूतं मां प्राप्तुमिच्छसि' इत्यपेक्षायां 'श्रीकृष्णमूर्तिमेव त्वां प्राप्तुमिच्छे' इत्यभिप्रेत्य तद्विशेषणान्याह—अभ्रवपुषे इत्यादिना। अभ्रवत् श्यामं वपुः यस्य तस्मै। तडिद्वत् पीते देदीप्यमाने अम्बरे यस्य तस्मै। गुञ्जाभिः गुञ्जाफलैः रचितौ अवतंसौ कर्णभूषणे, परिपिच्छं बर्हापीडं तैर्लसत् शोभमानं मुखं यस्य तस्मै। वन्याः वनपुष्पपत्रमय्यः स्रजो यस्य तस्मै। पूर्वोक्तरीत्या वामे पाणौ दध्योदनकवलः, वामे कक्षे वेत्रविषाणे, जठरपटयोः सन्धौ वेणुः, एतान्येव यानि लक्ष्माणि चिह्नानि तैः श्रीः शोभा यस्य तस्मै। मृदू पादौ यस्य तस्मै। पशुपस्य श्रीनन्दस्य अङ्गजः पुत्रः तस्मै ॥ १ ॥ एवं स्तुतिकरणं प्रतिज्ञाय स्तुतिर्हि महिमवर्णनरूपा भवति, भगवतस्तु दुर्ज्ञेयमहिमत्वेन तत्करणमशक्यं मत्वा दुर्ज्ञेयमहिमत्वेनैव स्तौति—अस्यापीति। दुर्ज्ञेयमहिमत्वे हेतुं सूचयन् सम्बोधयति—हे देव! अस्यापि भूतमयस्य विराड्रूपस्य स्वेच्छामयस्य 'क्रीडार्थमात्मन इदं त्रिजगत्कृतम्' इति वाक्यात् स्वक्रीडार्थं स्वेच्छया प्रकटितस्य मदनुग्रहस्य मम ब्रह्माण्डविग्रहस्य जीवस्यानुग्रहो भोगसम्पत्तिः येन तस्य तव वपुषः कोऽपि को ब्रह्माऽहमपि आन्तरेण अन्तर्मुखीकृतेनापि मनसा महि महिमानमवसितुं ज्ञातुं नेशे न समर्थः। तदा तु साक्षात् आत्मसुखानुभूतेः आत्मपदेन सत्ता, सच्चिदानन्दात्मकस्यैव तव महिमानमवसितुं नेशे इति तु किमुत ? किमु वक्तव्यमित्यर्थः ॥ २ ॥

अन्वितार्थप्रकाशिका

चतुर्दशे विस्मितस्तु कर्मणा तेन पद्मजः। भक्त्या श्रीकृष्णमस्तावीत्तत्र श्लोकाः कुषण्मिताः (६०) ॥
उवाचेति चतुःसंख्या (४) एकाशीतिरनुष्टुभः (८१) ॥ १४ ॥

नौमीति ॥ हे ईड्य स्तुत्य ! अभ्रमिव श्यामं वपुर्यस्य तस्मै तडिदिव पीते दीप्ते च अम्बरे यस्य गुञ्जानिर्मितौ यौ अवतंसौ कर्णभूषणे परितः पिच्छानि यस्य तत् परिपिच्छं बर्हापीडं तैर्लसत् शोभमानं मुखं यस्य तस्मै वन्याः वनपुष्पपत्रमय्यः स्रजो यस्य कवलो ग्रासः वेत्रविषाणवेणवश्च लक्ष्म श्रीवत्साख्यं तैः श्रीः शोभा यस्य कवलादिभिर्लक्ष्मभिः श्रीर्यस्येति वा। मृदू पादौ यस्य पशुपस्य नन्दस्य अङ्गजाय पुत्राय ते तुभ्यं त्वां प्रसादयितुं "क्रियार्थोपपदस्य" इति चतुर्थी। पत्ये शेते इति वद्वा। नौमि स्तौमि ॥ १ ॥ अस्यापीति ॥ हे देव ! ममानुग्रहो यस्मात् यस्य स्वेच्छामयस्य स्वेच्छया प्रकटितस्य स्वेषां भक्तानामिच्छामयस्य भक्तेच्छानुसारेणाविर्भवतः नतु भूतमयस्य शुद्धसत्त्वस्य रूपस्य अस्य प्रकटितकौमारस्यापि वपुषः कोऽपि को ब्रह्माऽहमपि आन्तरेण अन्तर्मुखीकृतेनापि मनसा महि महिमानमवसितुं ज्ञातुं इकार आर्षः। अवसातुमित्यर्थः। नेशे न समर्थोऽस्मि। यद्वा भूतमयस्य विराड्रूपस्यापि महिमानं ज्ञातु नेशे तदा तु साक्षात् आत्मसुखानुभूतेः आत्मपदेन सत्ता सच्चिदानन्दात्मकस्यैव तव महिमानमवसितुं नेशे इति तु किमुत वक्तव्यमित्यर्थः। नतु इत्यत्र ननु इति पाठे भूतमयस्य विराड्रूपस्येत्यर्थः। तनुभूतेति चित्सुखसम्मतपाठे तनु सूक्ष्मं यद् भूतं शुद्धसत्वात्मकं तद्रूपस्य "अस्य महतो भूतस्य" इति श्रुतौ "लोकनाथं महद्भूतम्" इति स्मृतौ च परमात्मनि भूतशब्दः इत्याद्यन्यत्र ज्ञेयम् ॥ २ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं चतुर्दशोऽध्याये उपनिषद्भिर्बद्धमुक्तनियंतृत्वे नोक्तो यो ब्रह्मपुरनिवासी स एव प्रत्यक्षः श्रीकृष्णोस्तीति ब्रह्मणा स्तूयते अत्र च क्षेपकश्लोका बहवः संति तत् प्रहाणेन व्याख्यायते तत्रादौ स्वदृष्टभगवन्महिमानं चिंतयन्नृनाट्यधरं श्रीकृष्णं नमस्कुर्वन्नाह नौमीति हे ईड्य बद्धमुक्तक्षेत्रज्ञवृंदैः सकामनिष्कामतया स्तोतुमर्ह पशुपांगजाय पशुपो नंदस्तत्पुत्राय तत् पालितपुत्रायेत्यर्थः अंगजायेत्युक्तिस्तु नंदसुतोयमिति लोकोक्त्यनुसारेण यद्वा पशुपस्य नंदस्यांगं स्नेहाधिक्यादंगत्वेन स्वीकृतो वसुदेवस्तस्माज्जाताय ते चेतनाचेतननियामकतया वृष्टाय श्रीकृष्णाय तुभ्यं नौमि स्तौमि नमस्करोमीत्यर्थः। व्यत्ययो बहुलमिति बाहुलकात्कारकव्यत्यये न स्तवनार्थक्रियायोगे द्वितीयायोगे द्वितीयार्थे चतुर्थी अभ्रवत् सजलनूतनजीमूतसदृशं वपुर्मूर्त्तिर्यस्य तस्मै तडित् विद्युत्ततुल्यतया प्रकाशमानानि अंबराणि सुवर्णं तं तु ग्रंथितवसनानि यस्य तस्मै अद्य न प्रेमिभक्तदत्तौ गुंजानामवतंसौ कर्णाभूषणे च परिपिछं मयूरपिछनिर्मितमुकुटं च तैर्लसत् शोभमानं मुखं यस्य तस्मै वन्यावनपुष्परचिताः स्रजोहारा यस्य तस्मै कवलादिरूपाणि लक्ष्माणि चिह्नानि तैः श्रीः शोभा यस्य तस्मै जलस्य पद्मवन्मृदू कोमलौ पादौ यस्य तस्मै एवंभूताय तुभ्यं नौमीति संबंधः ॥ १ ॥ नुतहरिमहिम्नोदुर्बोधत्वमाह अस्यापीति हे देव मदनुग्रहस्य तपःकरणादनंतरमपि अनुग्रहः तथैव तत्त्वविज्ञानमस्तुते मदनुग्रहादिति भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचिच्चेति कृपा यस्य तस्य निर्गुणस्य तव स गुणावतारस्य तनुभूतमयस्य तनुर्देहो तनुर्देहो भूतमयः पृथिव्यादि महाभूतप्रचुरो यस्य तस्य राजनारायणस्यापि महि महिमानं अवसितुं इयत्तया प्रमातुं कोऽपि कः पद्मभूरहमपि नेशे न समर्थोऽस्मि अथवा कः ब्रह्मांडस्थः कश्चिदपि जनोनेशे नेष्टे न समर्थो भवेत्तर्हि आत्मनां जीवात्मनां सुखानुभूतिर्मोक्ष सुखानुभवो यस्मात् यद्वा आत्मानात्मभावं प्राप्तानां मुक्तानामपि सुखानुभवो यस्मिस्तस्यस्वेछामयस्यासंख्यजनोद्धरणाय स्वेछ्या प्रादुर्भूतस्य अस्य तव साक्षात् वपुषः प्रत्यक्षमूर्त्तेः महिमानं अंतरेण अष्टांगयोगरुद्धेनापि मनसा कोपि अवसितुं इयत्तया ज्ञातुं किं ईशे समर्थो भवति न भवतीत्यर्थः ॥ २ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दृष्ट्वाद्भूतं विधिः पूर्वागन्तुकस्य विनिश्चयम् । कर्त्तुं चतुर्दशेऽनीशोऽस्तौषीत् कृष्णं विमोहितः ॥ १ ॥

स्वकृतापराधेन भिया सकम्पतया भगवन्महिमानमनवगाहमानो भगवतो वात्सल्यसौशील्यादिगुणाविष्कारपूर्वकमं स्वापराधं क्षमापयितुकामो ब्रह्मा तावत्त्वन्मायादितरणे त्वत्प्रपत्तिरेवोपायो नान्योऽस्तीत्यभिप्रायेण यथादृष्टं भगवन्तं संकीर्त्तयन् शरणं व्रजन्नाह ॥ नौमीति ॥ हे ईडय स्तुत्य, अभ्रवत् सद्यः संभृतजलजलदवद्वपुर्यस्य तस्मै, घनवच्छ्यामसुन्दरायेत्यर्थः । तडिद्वदम्बरे यस्य तस्मै, परिहितपीतपीताम्बरायेत्यर्थः । गुञ्जाभिरवतंसौ कर्णभूषणे परिपिच्छं परितो बर्हापीडं च तैर्लसच्छोभमानं मुखं यस्य तस्मै, वन्या वन्यपुष्पमय्यः स्रजो माला यस्य तस्मै कवलो मसृणौदनग्रासः वेत्रं विषाणं वेणुश्च तैर्लक्ष्मभिः श्रीः शोभा यस्य तस्मै, मृदू कोमलौ पदौ पादौ यस्य तस्मै, पशुपो नन्दगोपस्तस्याङ्गजः पुत्रस्तस्मै, अत्राङ्गजशब्दः पुत्रार्थे रूढः । यद्वा नन्दसखत्वात्पशुपो वसुदेवस्तस्याङ्गजस्तस्मै, यद्वा । पशून् जीवान् पान्ति रक्षन्तीति पशुपा देवाः, "तिर्यग्जातौ पशुः प्रोक्तः सर्वप्राणिनि पुंस्ययम्' इति व्याख्यासुधायां पशुपतिशब्दव्याख्याने कोशः । ते अङ्गजा अङ्गाज्जाता यस्य तस्मै, अथवा पशून् पान्तीति पशुपा गोपास्तेषां गजाय मुख्याय, ते तुभ्यं क्षमापयितुं त्वामेव, नौमि स्तौमि । तुमर्थयोगे चतुर्थी । कर्म तु भगवानेव । द्वितीयार्थे चतुर्थी वा । केचित्तु तादर्थ्ये चतुर्थीमाहुः । अपरे संप्रदानविवक्षयेति वदन्ति ॥ १ ॥ निःसीममहिमत्वमेव कैमुत्यन्यायेन प्रदर्शयन् स्तौति ॥ अस्यापीति ॥ हे भगवन्, देवं दिव्यं वपुर्यस्य तस्य दिव्याकृतेरित्यर्थः । ममानुग्रहो येन तस्य, अलौकिकदर्शनप्रदानेन मामनुगृह्णत इत्यर्थः । स्वानामात्मीयानामिच्छा प्रचुरा यस्मिन् तस्य स्वभक्तेच्छानुसारीच्छावत् इत्यर्थः । भगवत इत्थंभूतत्वात् 'भगवान् भक्तभक्तिमान्' इत्युक्तमस्ति । तनवः स्वशरीरभूतानि भूतानि यस्य स एव तनुभूतमयस्तस्य, स्वार्थे मयट् । यस्य पृथ्वी शरीरम् 'यस्यापः शरीरम्' इत्यादिश्रुतेः । न तु भूतमयस्येति पाठे प्राकृतभूतजकरणकलेवरादिरहितस्येत्यर्थः । 'न भूतसंघसंस्थानो देहोऽयं परमात्मनः' इति वचनात् । तथापि, साक्षात् प्रत्यक्षतया प्रतीयमानस्य, तथात्वेऽपि, आत्मसुखानुभूतेः सर्वदाऽपरोक्षतयानुभूयमानात्मनन्दानुमवस्य, अस्य तव, महि महिमानं, अवसितुं निर्णेतुं तु, आन्तरेण अपि, अन्तर्धृतेनापि मनसा एव, केवलेन मनसापीत्यर्थः । कोऽपि को ब्रह्माहमपीत्यर्थः । नेशे समर्थो न भवामि, किमुत अन्ये इति शेषः । अन्ये समर्था न स्युस्तत्र किं वक्तव्यमित्यर्थः । अतस्त्वन्महिमावबोधो यथातथाविधोऽस्तु, किं तु त्वत्प्रपत्तिं कृत्वाहं तु स्वधर्ममनुपालयंस्त्वां संसेव्य सहसात्मसात्करिष्यामीति भावः ॥ २ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तत्तादृग्योगसिद्धस्थितिसहजफलोद्बुद्धसिद्धिप्रभावप्रख्यातानन्तरूपा-कलनसमुदिताद्वैत-सद्ब्रह्मभावः ।
पश्यन्स्वात्मानमित्थं गुणमथ च मुहुर्वर्णयन् श्रौतवर्णैरेवं योगी कृतार्थस्थितिरतनुसुखं गोकुले क्रीडतीह ॥ १ ॥

इत्याद्यनेकाद्भुतकृत्यजाता योगस्थितौ ब्रह्मसुखानुभूतिः । सद्भक्तिसौलभ्यपदेति बोध्या तृतीयकाध्यायविवेकतोऽस्मात् ॥ २ ॥

हैरण्यगर्भमज्ञानमनेकाद्भुतकल्पकम् । एवमादर्श्यतस्तत्त्वज्ञानं तत्त्वविचारणात् ॥ ३ ॥

विश्वव्याप्तः सुखात्मा खमिव तडिदिव प्रोल्लसन्मुख्यभूतो गुञ्जावद्रक्तिमाक्तो जगदुदयमुखे स्रग्वदाधारभूतः ।
भूषावद् द्योतमानः पशुपमुखसुरोत्पादको निर्मलात्मा यस्तं वन्दे रमेशं सगुणमहमिहेत्याद्यपद्यार्थ एषः ॥ ४ ॥

निष्कर्मताश्रयतुरीयपदं स्वरूपं लीलात्तकर्मगुणकारकमीदृगर्थात् ।
नौमीड्य ते इति चतुर्थ्यभिधानयोगाद् युक्ता विधि स्तुतिरियं श्रुतिबोधितार्था ॥ ५ ॥

श्रौतः स्तोत्रप्रकारः प्रतिपदममलो योगपक्षे वलक्षे संल्लक्ष्यो लब्धवर्णैरविकलमतिभिर्दर्शितब्रह्मभावः ।
प्रक्रान्तोदात्तवस्तुप्रथितरसकथाभङ्गभीत्या न तादृग् व्याख्यातोऽर्थोमयाऽसौ सगुणहरिगुणोल्लासिसन्मानसेन ॥ ६ ॥

नौमीड्येति : १०.१४.१.

यद्गुञ्जाभरणं घनच्छविलसत्पिच्छातिसञ्छादितोत्तंसं वेत्रविषाणभूषणपरिष्वक्तांस-पीताम्बरम् ।
साल्पग्रास-सवेणु-पाणियुगलं वन्यस्रगत्युज्ज्वलं तद्रूपं भवता प्रदर्श्य हि विभो सत्यं वयं वञ्चिताः ॥ ७ ॥

अस्यापीति : १०.१४.२.

यद्वस्तु प्रथितं यदर्थमखिलं तद्वेत्ति सर्वांशतः सोऽस्मिन्नेवमनन्त सत्यपि ममेदानींतनाज्ञानता ।
रूपेऽस्मिन् मदनुग्रहोद्यतपदेऽप्यद्यासयत्तत्त्वयि सद्रूपे त्वलमित्यवेदि च मद्ज्ञानं मदज्ञानजम् ॥ ८ ॥
स्वाज्ञानं मयि ते प्रकल्प्य कवयस्तत्तात्त्विकज्ञे लिखन्त्यर्थं कोऽपि न वेत्ति तत्वत इति श्लोषेण वर्णाविलिम् ।
जाने सत्यमित्थत्तया न भवतो माहात्म्यमीदृक्स्थितेः, तत्त्वतसद्यशसां तदीयवचसा मत्रावकाशोऽजनि ॥ ९ ॥

कृष्णप्रिया

ब्रह्मा श्री भगवान् कृष्णजीकी स्तुति कर रहे हैं कि हे ईड्य गुणगान योग्य हे श्री कृष्ण ! मेघश्याम स्वरूप विग्रह धारण वाले, बीजली के समान तेजोमय पीत अम्बरधारी, कर्णों में गुंजा के कर्णपूर, कण्ठ में घुंघची की माला, घुंघची का मुकुट और सिरपेच ये मयूर पैखों की शोभा को कान्ति को बढाने वाला मुख कमल वाले, वन्य कुसुमों की पादावलम्बिनी वनमाला को धारण करने वाले वनमाली, वाम हथेली में दधि औदन की कौर लिये हुए, छडी लकुटी सींग और कमर की फेंट में बासुरी के मङ्गल चिह्नों से परम सौन्दर्य वाले और कोमल पदवाले श्रीनन्दराय कुमार की प्राप्ति के लिये प्रणाम करता हूँ और यथामति गुणगान करता हूँ ॥ १ ॥ हे देव ! हे दिव्य ऐश्वर्य सम्पन्न मुझ किंकर पर कृपा वरसाने के लिये आपने यह श्रीविग्रह धारण किया है । नाथ ! यह श्रीविग्रह पांच भौतिक क्षण भङ्गुर नहीं किन्तु दिव्य विग्रह है आपके इस श्रीविग्रह की महिमा ब्रह्मा होने पर भी मैं मन से भी जान नहीं पाता तो फिर साक्षात् सच्चिदानन्दात्मक, निर्गुण, निर्विकार श्रीविग्रह की महिमा कैसे जान पायेंगे (यद्यपि दोनों विग्रह एक ही है फिर भी ब्रह्माजी अपनी समझ अनुकूल यह कह रहे हैं अथवा आपके श्रीविग्रह की महिमा को कोई नहीं जान पाता तब अनुभव वेद्य आपकी महिमा को तो कोई कैसे जान सकेगा) ॥ २ ॥

ज्ञाने प्रयासमुदपास्य नमन्त एव जीवन्ति सन्मुखरितां भवदीयवार्ताम् ।
स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोऽजित जितोऽप्यसि तैस्त्रिलोक्याम् ॥ ३ ॥
[1]श्रेयः स्रुतिं भक्तिमुदस्य ते विभो [2]यतन्ति ये केवलबोधलब्धये ।
तेषामसौ [3]क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—अजित ये ज्ञाने प्रयासं उदपास्य स्थाने स्थिताः तनुवाङ्मनोभिः सन्मुखरितां श्रुतिगतां भवदीयवार्तां नमन्तः एव जीवन्ति प्रायशः तैः त्रैलोक्यां अजितः अपि जीतः असि ॥ ३ ॥ हे विभो श्रेयः स्रुतिं ते भक्तिं व्युदस्य केवलबोधलब्धये यतन्ति तेषां स्थूलतुषावघातिनां यथा असौ क्लेशल एव शिष्यते न अन्यत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तर्ह्यज्ञाः कथं संसारं तरेयुरत आह । ज्ञान इति । उदपास्य ईषदप्यकृत्वा सद्भिर्मुखरितां स्वत एव नित्यं प्रकटितां भवदीयवार्तां स्वस्वस्थान एव स्थितास्तत्सन्निधिमात्रेण स्वत एव श्रुतिगतां श्रवणं प्राप्तां तनुवाङ्मनोभिर्नमंतः सत्कुर्वंतो ये जीवंति केवलं यद्यपि नान्यत्कुर्वंति तैः प्रायस्त्रिलोक्यामन्यैरजितोऽपि त्वं जितः प्राप्तोऽसीति किं ज्ञानश्रमेणेत्यर्थः ॥ ३ ॥ भक्तिं विना ज्ञानं तु नैव सिद्ध्येदित्याह । श्रेयः स्रुतिमिति । श्रेयसामभ्युदयापवर्गलक्षणानां स्रुतिः श्रवणं यस्याः सरस इव निर्झराणां तां ते तव भक्तिमुदस्य त्यक्त्वा । श्रेयसां मार्गभूतामिति वा । तेषां क्लेशलः क्लेश एवावशिष्यते । अयं भावः । यथा अल्पप्रमाणं धान्यं परित्यज्यांतःकरणहीनान्स्थूलान्धान्याभासांस्तुषानेवावघ्नंति तेषां न किंचित्फलमेवं भक्तिं तुच्छीकृत्य ये केवलबोधाय क्लिश्यंति प्रयतंते तेषामपीति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यदि ज्ञातुमशक्यस्तर्हि तदा "ऋते ज्ञानान्न मुक्तिः" इति श्रुतेरज्ञानां कदापि संसारविरामो न भवेदिति चेदत आह—ज्ञान इति । ज्ञानसाधने शमदमादौ । इत्यर्थ इति – तव कथैव मोक्षदेति भावः । ज्ञाने त्वदीयस्वरूपैश्वर्यमहिमविचारे । स्थाने निवास एवाव्यग्रतया स्थिता न तु तीर्थयात्रादिक्लेशान्कुर्वन्तः । तन्वादिभिः सत्कुर्वन्तः । तन्वा सत्कारः श्रवणसमयेऽञ्जलिबन्धादिः, वाचाऽनुमोदनादिः, मनसा चास्तिक्यादिः । सन्मुखरितां सन्तोऽनृतोक्त्यादिपरिहारार्थं प्रायो मौनशीला अपि मुखरिता मुखरीकृता यया ताम् । यद्वा–भवदीयानां श्रीव्रजराजादीनां वार्ताम् । यद्वा–भवदीयवार्तां जीवन्ति उपजीवन्ति तदेकजीवनत्वेन सद्भ्यः श्रुत्वा श्रावयन्ति । यद्वा–तन्वादिभिस्तत्तच्चेष्टयाऽजित अप्राप्य स्वप्रकाशेनेन्द्रियाद्यगोचरत्वात् । यद्वा-तन्वादिभिः कृत्वा तैरपि जितोऽसि तत्तद्वृतौ सदा स्फुरसीत्यर्थः । यद्वा–तन्वादिभिरेव साक्षात्प्राप्तो भवसि । तत्र तन्वा प्राप्तिः स्वहस्तादिना श्रीपादाब्जादिस्पर्शादिः, वाचाह्वानादिना समागमनादिः, मनसा च सङ्कल्पेनैव दर्शनादिः । यद्वा–तन्वादिभिः सह जितस्तव तन्वादीन्यपि तैर्वशीकृतानि । तत्र तनोर्वशीकरणं तद्भक्तपार्श्वे सदाऽवस्थित्यादिः, वाचस्तद्गुणकथनादिः, मनसश्च तच्चिन्तनादिरिति तोषिण्याम् ॥ ३ ॥ भक्तिरेव ज्ञानहेतुरित्याह—केवलबोधलब्धये इति । जीवोपाधित्यागेन केवलस्य शुद्धचिदानन्दघनस्य तव

---

१. श्रेयःसृतिं–इति कस्यचित् । २. क्लिश्यन्ति–श्रीधर. वंशी. सुदर्शन. वीर. विज. श्रीनिवास शुक. । ३. क्लेशलवोवशिष्यते–वीर. ।

ज्ञानाय। अयं भाव इति—तण्डुलप्राप्तये धान्यमिव मुक्त्यवाप्तये भक्तिरेवादर्तव्येति भावः। "भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥" इत्यादिगीतोक्तेः, 'भक्त्याहमेकया लभ्यः' इत्यग्रिमोक्त्या च। तपआदिपूर्तेस्तत्फलस्य ज्ञानस्य च भक्त्यधीनतया तेषां क्लेश एवेति तत्त्वम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत एव भक्तास्तदन्वेषणश्रमं परित्यज्य भक्तिविशेषरूपतया त्वदीयरूपगुणलीलावार्त्तामेव शृण्वन्ति तेन वशीकुर्वन्ति च तादृशमपीत्याह, ज्ञान इति। ज्ञाने त्वदीयस्वरूपैश्वर्यमहिमविचारे स्थाने सतां निवास एवाव्यग्रतया स्थिता न तु तीर्थाटनादिक्लेशान् सहन्तः तन्वादिभिर्नमन्तः सत्कुर्वन्तः तत्र तन्वा सत्कारः श्रवणसमये अञ्जलिबन्धनादिः वाचानुमोदनादिः मनसा चास्तिक्यादिः सन्मुखरितां सन्तः अनृतोक्तिसर्वेन्द्रियक्षोभपरिहाराद्यर्थं प्रायो मौनशीला अपि मुखरिता मुखरीकृता यया ताम् "वाहिताग्न्यादिषु" (२।२।३७) इति निष्ठायाः परनिपातोऽपि भवदीयां भवदीयानां श्रीमद्व्रजराजादीनां वा वार्त्ताम् अन्यत्तैः। यद्वा भवदीयवार्त्तां जीवन्ति उपजीवन्ति तदेकजीवनत्वेन सद्भ्यः श्रुत्वा स्वादयन्तीत्यर्थः। हे तन्वादिभिस्तत्तच्चेष्टया अजित! अप्राप्य! स्वप्रकाशत्वेनेन्द्रियाद्यगोचरत्वात्। यद्वा तन्वादिभिः कृत्वा तैरपि जितोऽसि वशीकृतोऽसि तत्तद्वृत्तौ सदा परिस्फुरसीत्यर्थः। यद्वा, तन्वादिभिरेव साक्षात्प्राप्तो भवसि अत्र तन्वा प्राप्तिः हस्तादिना श्रीपादाब्जस्पर्शनादिः वाचा आह्वानादिना समागमनादिः मनसा च सङ्कल्पेनैव दर्शनादिः। यद्वा, सहार्थे तृतीया तन्वादिभिः सहितो जितः तव तन्वादीन्यपि तैर्वशीकृतानीत्यर्थः। तत्र तनोर्वशीकरणं तद्भक्तपार्श्वे सदावस्थित्यादिः वाचः तद्गुणकथनादिः मनसश्च तच्चिन्तनादिः अन्यत्समानम् ॥ ३ ॥

ननु, तद्विधां भक्तिं त्यक्त्वा मन्महिमपर्यवसानदर्शनाय तदुचितश्रवणमननादिभिः कंचिज्ज्ञानाभ्यासिनोऽपि दृश्यन्ते तत्राह, श्रेय इति। श्रेयसां सर्वेषाम् एव सृतिमिति अवान्तरफलत्वेन स्वत एव ज्ञानमपि भवितैवेति सूचितम्। तथाभूतामपि मधुररूपादिवार्त्तामयीं भक्तिमुदस्य उच्चैः अवहेलया दूरे क्षिप्त्वाऽत्यन्तमनादृत्येत्यर्थः। केवलस्य तद्विधभक्तिशून्यतया स्वविज्ञतामात्रतात्पर्य्यस्य बोधस्य लब्धये क्लिश्यन्ति तदुचितश्रवणमननाद्यर्थमितस्ततो गमनादिभिर्यमनियमादिभिश्च श्रमं कुर्वन्ति तेषां क्लेशल एवं शिष्यते तेषु तवानुग्रहानुदयादिति भावः। एवकारेण चित्तशुद्ध्यादिकं फलं च निरस्तम्। ननु, योगाभासादिश्रमेण सिद्धिलाभस्तु भविता तत्राह—नान्यदिति। "सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम्" इति न्यायेन अत एव वक्ष्यते स्वयं श्रीभगवता—

"यस्यां न मे पावनमङ्ग ! कर्मस्थित्युद्भवप्राणनिरोधमस्य। लीलावतारेप्सितजन्म वा स्यात् वन्ध्यां गिरन्तां बिभृयान्न धीरः" ॥

इति तत्रोपयुक्तो दृष्टान्तः यथा स्थूलतुषावघातिनो लोकमूर्खा इत्युपहस्यन्ते तुषा बुषानि तेषामप्यतिचूर्णितानां नाशः केवलं हस्तादिवेदनैव च स्यात् तद्वदित्यर्थः। विभो ! हे प्रभो ! इत्यवश्यभजनीयतोक्ता ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतो यथाकथञ्चित्तव भजनेन त्वं वशीक्रियस इत्याह— ज्ञान इति। त्वत्तत्त्ववेदने 'उत्' उच्चैरपास्य, तन्वादिभिर्नमन्तः सत्कुर्वन्तस्तत्र तन्वा सत्कारः श्रवणसमयेऽञ्जलिबन्धनादिर्याचानुमोदनादिर्मनसा चास्तिक्यादिः। सन्मुखरिताम् सन्तोऽनृतोक्तिसर्वेन्द्रियक्षोभपरिहाराद्यर्थं प्रायो मौनशीला अपि मुखरिता मुखरीकृता यथा तां भवदीयां भवदीयानां वार्त्ताम्। परं तैर्व्यञ्जितम् यद्वा, वार्त्तां जीवन्ति उपजीवन्ति जीविकार्थमेव सद्भ्यः शृण्वन्तीत्यर्थः। हे तन्वादिभिस्तत्तच्चेष्टयाऽजित अप्राप्य! स्वप्रकाशत्वेनेन्द्रियाद्यगोचरत्वात्; यद्वा, तन्वादिभिः कृत्वा तैरपि जितोऽसि वशीकृतो भवसि, तत्तद्वृत्तौ सदा परिस्फुरसीत्यर्थः। यद्वा, तन्वादिभिः साक्षादेव प्राप्तो भवसि, तत्र तन्वा प्राप्तिर्हस्तादिना श्रीपादाब्जस्पर्शनादिना समनुभवादिर्वाचाह्वानादिना समागमनादिर्मनसा च संकल्पेनैव सन्दर्शनादिः। यद्वा, सहार्थे तृतीया,—तन्वादिभिः सहितो जितस्तव तन्वादीन्यपि तैर्वशीकृतानीत्यर्थः; तत्र तव तन्वोर्वशीकरणं तद्भक्तपार्श्वे सदावस्थित्यादि, वाचस्तद्गुणकथनादि, मनसश्च तच्चिन्तनादि। अन्यत् समानम् ॥ ३ ॥

एवं यथाकथञ्चिद्भजनेनापि परमफलमुक्तम्; समग्रायाश्च भक्तेर्माहात्म्यं केन वर्ण्यताम्? तथाप्येतादृशभक्तिपरित्यागेनात्मतत्त्वज्ञानार्थं यत्नपरा महादुःखिन एवेत्याह—श्रेय इति। श्रेयसां सर्व्वेषामेव सृतिमित्यवान्तरफलत्वेन स्वत एवात्मज्ञानमपि भवितेवेति सूचितम्। तथाभूतामप्युदस्योच्चैरवहेलया दूरे क्षिप्त्वात्यन्तमनादृत्येत्यर्थः। क्लिश्यन्ति यमनियमादिभिः श्रम कुर्व्वन्ति, केवलस्य शुद्धात्मतत्त्वस्य बोधलब्धये; यद्वा, कथञ्चिदपि भक्त्यमिश्रितस्य बोधस्यात्मतत्त्वज्ञानस्य लब्धये। एव-कारेण स्वर्गादिकं चित्तशुद्ध्यादिक च फलं निरस्तम्। ननु, यागाभ्यासादिश्रमेण प्रतिष्ठाया धनस्य वावश्यं लाभो भविता? तत्राह – नान्यदिति, अन्यत् किञ्चिदपि न स्यात्। तत्रोपयुक्तो दृष्टान्तो यथा स्थुल-तुषावघातेन लोकमूर्ख इत्युपहस्यते, तुषा बुषाणि तेषामप्यतिचूर्णितानां नाशः केवल हस्तादिवेदनैव स्यात्तद्वदित्यर्थः। विभो! हे प्रभो इत्यवश्य-भजनीयतोक्ता, अतस्तेषां नरकपातोऽपि स्यादिति भावः। तथा चैकादशस्कन्धे (११।५।३)—'य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम्। न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः ॥ इति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कर्मणां विवेकमाह–ज्ञान इति । पूर्वोक्तभगवत्स्वरूपज्ञाने प्रयासं श्रमम् उदपास्य त्यक्त्वा नमन्त एव भक्तिपूर्वकं नमनं कुर्वन्त एव ये जीवन्ति तनुवाङ्मनोभिः स्थानस्थिताः वर्णाश्रमधर्मस्थाः श्रुतिगतां वेदप्रोक्तां सद्भिर्मुखरितां भवदीयवार्त्तां त्वदीयवार्त्तां च शृण्वन्तीत्यध्याहारः । तैरपि त्रिलोक्याम् अजितस्त्वं जितोऽसि एवं स्वरूपज्ञानस्य दुर्ज्ञेयत्वं वर्णाश्रमकर्मणां भक्त्युत्पादकत्वं भक्तेरेव भगवद्वशीकारित्वं गुणभवणस्य भक्त्युपायत्वं चोक्तम् ॥ ३ ॥ इदानीं भक्तेरुत्तमोपायत्वं केवलात्मज्ञानस्य "क्लेशोऽधिकतरस्तेषाम्" इत्युक्तश्रमावहत्वं चाह—श्रेयःसृतिमिति । भुक्तिमुक्तिरूपं श्रेयः भक्तिं परस्नेहरूपामुदस्य ये केवलस्यात्मनः बोधलब्धये केवलात्मज्ञानार्थं क्लिश्यन्ति न तु श्रीभगवज्ज्ञानार्थं तेषामसौ देवतिर्यङ्मनुष्यस्थावरशरीरविलक्षणात्मबोधः क्लेश एव क्लेशलः क्लेशदायी एव शिष्यते यथा स्थूलतुषावघातः क्लेशदायो अन्यत्सुखं नेति तद्वत् अनेन ज्ञानविवेक उक्तः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु मां मोहयितुं प्रवृत्तः पराजितश्च त्वं मच्छरणागतिमात्रेण कथं मामजितं जेतुमुद्युङ्क्षे । किञ्च, जीवस्वरूपमपि सुखानुभूतिरूपमेवातः प्रकृतिवियुक्ततत्स्वरूपावस्थितिरूपकैवल्याय तदुपासनमेव कुरु किम्मच्छरणवरणेनेत्यत आह–ज्ञान इति । ज्ञाने ज्ञानयोगे प्रकृतिविविक्तप्रत्यागात्मोपासनयोगे प्रयासं त्यक्त्वा नमन्त एव शरणागता एव त्वामेव त्वन्मायातरणसाधनत्वेनाध्यवस्यन्ति इति यावत् उपायवाचिशरणादिपदस्थाने नमः शब्दप्रयोगो दृष्टचरः "द्रौपद्या सहिताः सर्वे नमश्चक्रुर्जनार्दनम्" इति स्थाने स्वस्ववर्णाश्रमानुरूपधर्मानुष्ठानरूपे त्वदाज्ञारूपत्वेन प्रपन्नैरप्यनतिलङ्घ्ये स्थाने स्थिताः तन्वादिकरणत्रयेण सद्भिः प्रकटितां भवदीयवार्तां त्वत्कथां श्रुतिगतां श्रवणपथं प्राप्तां ये जीवन्त्युपजीवन्ति भवदीयवार्तामेव धारकीकुर्वन्तीत्यर्थः । हे अजित ! कैरप्यजितोऽपि त्वमिति सम्बोधनाभिप्रायः तैरुक्तविधैस्त्रिलोक्यन्तर्भूतैहिकामुष्मिकविषयेष्वसितैः "षिञ्बन्धने" अनासक्तैः प्रायशः त्वं जित एव त्वच्छरणागतिरेव त्वद्वशीकारोपाय इति भावः । ज्ञाने प्रयासमुदपास्येत्यनेन ज्ञानयोगः केवलं प्रयासमात्रफलो न तु पुरुषार्थपर्यवसायीति सूचितम् "सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक्" इति केवलिनोऽपि च्यवनधर्मत्वाभिधानादिति भावः ॥३॥ ननु, तर्हि ज्ञानयोगः शास्त्रैः कर्तव्यतया किमर्थमुच्यत इत्यपेक्षायां कैवल्यार्थज्ञानयोगस्य पुरुषार्थापर्यवसायित्वेऽपि भक्तियोगानुग्राहकतया अनुष्ठितस्य तत्पर्यवसायित्वमस्त्येवेति सूचयन् प्रपत्तियोगवद्भक्तियोगस्य तद्वशीकरणोपायत्वमस्तीत्याह–श्रेयःस्रुतिमिति । हे विभो ! श्रेयस्स्रुतिं श्रेयसः स्रुतिः स्रवो यस्यास्तां त्वन्मायातरणद्वारा निरतिशयापरिच्छिन्नानन्दरूपत्वत्प्राप्तिरूपश्रेयसो दोग्ध्रीं ते तव भक्तिमुदस्य त्यक्त्वा केवलप्रत्यगात्मानुभूतिलब्धये कैवल्याय ये क्लिश्यन्ति साक्षान्मुक्तिसाधनभूतां त्वद्भक्तिं तदनुग्राहकं ज्ञानयोगं च विहाय केवलकैवल्यार्थतया ज्ञाने क्लिश्यन्तीत्यर्थः । तेषामसौ क्लेशलवोऽवशिष्यते न त्वन्यत्फलं क्लेशल एवेति पाठे क्लेशं लात्यादत्त इति क्लेशलः क्लेशावहो व्यापार इत्यर्थः । अन्तःसारभूततण्डुलकणरहितान् स्थूलधान्याभासान् तुषानवघ्नन्ति इति तथा तेषां यथा नान्यत्तद्वदित्यर्थः ॥ ४ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

अतो ये केवलप्रत्यगात्मस्वरूपज्ञाने परिश्रममकृत्वा स्वस्वामिसम्बन्धज्ञानपूर्वकत्वच्चरित्रमेवात्यादरेण इदमेवास्मत्प्राणधारणमिति मत्वा शृण्वन्ति तैस्त्वं वशीकृत इत्याह–ज्ञाने प्रयासमिति । हे अजित ! स्ववशीकृताखिललोक ! ये त्वच्छेषतैकस्वरूपज्ञानवन्तः केवलप्रत्यगात्मस्वरूपज्ञाने प्रयासम् उदपास्य दूरेण त्यक्त्वा सद्भिर्मुखरितां त्वमेव निरुपाधिकसर्वशेषीति ज्ञानवद्भिः शब्दितां भवदीयवार्तां त्वदीयचरित्ररूपकथां स्वस्थाने स्वाश्रमे स्थिता एव श्रुतिमतां श्रवणप्राप्ताम् । यद्वा, श्रुतिगतां वेदप्रतिपाद्यां तनुवाङ्मनोभिर्नमन्त एव साष्टाङ्गप्रणामं कुर्वन्त एव तथा च प्रणामलक्षणमुक्तं श्रीभाष्यकारैः—

"मनोबुद्ध्यभिमानेन सह न्यस्य धरातले । कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम्" ॥ इति ।

प्रणामपूर्वकमेव त्वद्वार्तां जीवन्ति उपजीवन्ति स्वप्राणधारकतया शृण्वन्तीत्यर्थः । अत्र ज्ञानशब्देनाक्षरशब्दवाच्यप्रत्यगात्मस्वरूपज्ञानं विवक्षितं तथाक्षरशब्दवाच्यः प्रत्यगात्मा "क्षरं प्रधानममृताक्षरं हरः, क्षरात्मानावीशते देव एकः" इति श्रुत्युक्तः । तथा च भगवद्वाक्यमर्जुनं प्रति—

"मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते । श्रद्धया परयोपेता ते मे युक्ततमा मताः ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्य्युपासते । सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्" ॥

इत्युक्त्वा ।

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् । इति ।

क्लेश एव उक्तः इति । तथाक्षरशब्दवाच्याज्जीवाद्विलक्षणत्वेनोक्तः परमात्मा "कूटस्थोऽक्षर उच्यते, उत्तमः पुरुषस्त्वन्यः" इति तैस्त्वं प्रायशस्त्रिलोक्यामजितोऽपि जितोऽसि स्ववशीकृतोऽसि तथा च भगवद्वचनं दुर्वाससं प्रति—

"अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ! । मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि" ॥ इति ॥ ३ ॥

अथ त्वदुपासनरूपं भक्तियोगमनादृत्य केवलाक्षरज्ञाने प्रयत्न कुर्वन्ति तेषां परिश्रममेव फलं नत्वन्यदित्याह—श्रेयःस्रुतिमिति । हे विभो ! स्वामिन् ! श्रेयः स्रुतिं परमनिःश्रेयसरूपमोक्षप्रापिकां ते भक्तिम् ।

"प्रीतिरूपमनुध्यानं भक्तिरित्युच्यते बुधैः" ।

इत्युक्तप्रकारेण प्रीतिरूपां भक्तिमुदस्यानादृत्य केवलबोधलब्धये केवलप्रत्यगात्मज्ञानप्राप्त्यै क्लिश्यन्ति परिश्रमं कुर्वन्ति तेषां क्लशल एव शिष्यते अवशिष्यते नान्यत्किञ्चिदपि, तत्र दृष्टान्तः यथा स्थूलतुषावघातिनां यथा सूक्ष्मपरिमाणान् बहुफलान् व्रीहीन् हित्वा अन्तःकणहीनान् व्रीह्याभासान् स्थूलतुषानेवावघ्नन्ति खण्डयन्ति तेषां क्लेश एव भवति तद्वदिति अत्र "क्लेशोधिकतरस्तेषाम्" इति पूर्वोक्त एवेति ॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यस्मादेवं तस्माज्ज्ञान इति ॥३॥ ननु, केचिद्भक्तिमपि परित्यज्य ज्ञाने प्रयतमाना दृश्यन्ते तत्राह—श्रेयःसृतिमिति ॥४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

न तु भो ब्रह्मन् ! ज्ञानयोगेनैव महि ज्ञातुं शक्यते, स ते नास्ति, कथ ज्ञातव्यो भवता ? इति चेत् मम तु ज्ञानोपदेष्टा श्रीनारायण एव, तथापि तव महिमा न ज्ञातः, अतो भवदनुग्रहं विना ज्ञानयोगेऽपि तत्तव तत्त्वज्ञानकारणं न भवतीत्याह—ज्ञाने प्रयास मित्यादि । स्थाने त्वयि स्थिता त्वयि भावं कुर्वन्त इत्यर्थः—'स्थानभ्रष्टाः पतन्त्यधः' इत्युक्तेः, ज्ञाने प्रयासमुदपास्य उत्कर्षेण त्यक्त्वा सम्यक् त्यक्त्वेत्यर्थः । तदनुवाङ्मनोभिः—तन्वा प्रणामादिना, वाचा कीर्त्तनेन, मनसा स्मरणादिना भवदीयवार्तां नमन्तः सन्मानयन्त एव ये केचिज्जीवन्ति, तैस्त्रिलोक्यामजितोऽपि त्वं जितोऽसि प्रायशो बाहुल्येन यत्र भवद्वार्ता भवति, तं देशमेव प्रणमेदिति । तन्नेति तृतीयाविभक्तेर्व्यञ्जकता, अथवा, तनुवाङ्मनोभिर्जितोऽसीत्यन्वयः । वार्तां कीदृशीम् ? सद्भिर्मुखरितां श्रुतिगतामिति श्रवणपथप्राप्तमात्र एव तदर्थाद्यवधारणमप्यनवेक्ष्येत्यर्थः ॥ ३ ॥ ननु तर्हि किं ज्ञानं स्वतः साधनं न भवति ? अथ किम्, न भवत्येवेत्याह—श्रेयः सृतिमित्यादि । हे विभो ! ते तव भक्तिमुदस्य केवलबोधलब्धये ये क्लिश्यन्ति तेषां क्लेशलः क्लेश एव शिष्यतेऽवशिष्टो भवति, श्यामादित्वात् स्वार्थे ल-प्रत्ययः । नान्यत् कैवल्यादि, भक्तिसनाथेनैव ज्ञानेन कैवल्यं जन्यत इति नियमात् भक्तिं कीदृशीम् ? श्रेयःसृतिं श्रेयसः सरणिम, ज्ञानं तु न तथा । तत्र दृष्टान्तः—यथा स्थूलतुषारघातिनां स्थूलतुषारघाते हि क्लेश एव केवलम्, परेषामपि कर्णकाटवम् ॥ ४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ज्ञानयोगेनैव यन्महिमा ज्ञातुं शक्यते, स ते नास्ति, कथं ज्ञातव्य इति चेन्मम ब्रह्मणो भवानेव ज्ञानोपदेष्टा, तेनापि किमपि नाभूत्, अतो ज्ञानं तन्महिमज्ञानकारणं न भवतीत्याह—ज्ञाने प्रयासमित्यादि । स्थाने त्वयि स्थिताः, त्वयि भावं कुर्वन्त इत्यर्थः । (भा० ११।५।३) "स्थानाद् भ्रष्टाः पतन्त्यधः" इत्युक्तत्वात् । तनुवाङ्मनोभिः तन्वा-प्रणामादिना पूजादिना-वा, वाचा उत्कीर्त्तनादिना; मनसा-स्मरणादिना नमन्तः सत् कुर्वन्तः सन्तो ये जीवन्ति, तैस्त्रिलोक्यां त्वमजितोऽपि जितोऽसीति । सद्भिर्मुखरितां साक्षाद् वा भागवतादिशास्त्रद्वारा वा, किन्तु ज्ञाने प्रयासमुदपास्य त्यक्त्वा ईषदप्यकृत्वेति स्वामिनः ॥ ३ ॥ तर्हि ज्ञानं किं स्वतः श्रेयः साधनं न भवति ? अथ किम्, न भवत्येवेति ज्ञापयन्नाह—श्रेयः सृतिमित्यादि । हे विभो ! तव भक्तिमुदस्य ये केवलं बोधलब्धये क्लिश्यन्ति, तेषां क्लेशलः क्लेश एव शिष्यते, अवशिष्टो भवति, कर्मकर्तरि प्रयोगः । भक्तिं कीदृशीम् ? श्रेयःसृतिं श्रेयसः सरणिम्, ज्ञानन्तु न तथा, केवलं बोधः खलु मोक्षं जनयत्येव, कथं क्लेश इति नाशङ्कनीयम्, तस्यापि क्लेशत्वम्, भक्तिशून्यत्वात् । तत्र दृष्टान्तः—यथा स्थूलतुषावघातिनां क्लेश एव फलम्, नान्यत् किमपि । कथं भक्त्या मोक्षोऽपि भवति ? तथा—च (भा० २।३।१०) "अकामः सर्वकामो वा मोक्षकाम उदारधीः तीव्रेण भक्तियोगेन" इत्यादि भक्तेः कामद्वयत्वात्, अतो भक्तिरेव कार्या ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, तर्हि "तमेव विदित्वा अतिमृत्युमेति" इति श्रुतेरज्ञानाल्लोकाः कथं संसारं तरेयुस्तत्राह—ज्ञान इति । उदपास्य ईषदप्यकृत्वा सन्मुखरितां सन्तो मौनशालिनोऽपि स्वमाधुर्य्येण मुखरिता मुखरीकृता यया तां भवदीयां भवदीयानां वा वार्तां स्थाने सतां निवास एव स्थिताः न तु तीर्थान्यप्यटन्तः सन्तः श्रुतिगतां तत्सन्निधिमात्रेण स्वत एव श्रुतिगतां श्रवणप्राप्तां तनुवाङ्मनोभिरारम्भपरिसमाप्त्योर्नमन्तः तत्र तन्वा पाणिभ्यां सह शीर्ष्णा भूमिस्पर्शेन वाचा कृष्णकथायै तदास्वादकेभ्यः वैष्णवेभ्यश्च नम

इति वचनेन मनसा श्रुतायाः कथायाः अवधारिकया बुद्ध्या प्रणमन्तो ये जीवन्ति केवलं यद्यपि नान्यत् कुर्वन्ति तदपि तैः प्रायशस्त्रिलोक्यामन्यैरजितोऽपि त्वं जितोऽपि वशीकृतोऽपि भवसि। ज्ञानाल्लब्धमुक्तिभिस्तु न वशीकृतो भवस्यतः संसारतरणं कथाश्रोतॄणां किं चित्रमिति भावः। अतस्त्वत्कथैकदेशज्ञानमेव त्वज्ज्ञानं तेन संसारमपि तरन्तीति श्रुत्यर्थो ज्ञेय इति भावः ॥ ३ ॥ श्रवणकीर्त्तनादीनामेकतरयाऽपि भक्त्या कृतार्थीभवन्ति यदुक्तं नृसिंहपुराणे—

"पत्रेषु पुष्पेषु फलेषु तोयेष्वक्रीतलभ्येषु सदैव सत्सु ॥
भक्त्या सुलभ्ये पुरुषे पुराणे। मुक्त्यै किमर्थं क्रियत प्रयत्नः ॥" इति।

तदपि ये तां परिहाय ज्ञाने प्रयासवन्तस्तेषां दुःखमेव फलतीत्याह—श्रेयसामभ्युदयापवर्गलक्षणानां सृतिः सरणं यस्याः सरस इव निर्झराणां तां तव भक्तिं उदस्येति श्रीस्वामिचरणानां व्याख्या। श्रेयांसि ज्ञानकर्मादिनानासाधनसाध्यानि फलानि ययैव स्युस्तां भक्तिं त्यक्त्वेत्यर्थः। तेषां असौ बोधः क्लेशलः क्लेशं लाति ददातीति सः शिष्यते पर्यवसितो भवति तत्र दृष्टान्तः स्थूलतुषावघातिनाम् अल्पप्रमाणं तण्डुलं परित्यज्य यतस्ततः परिभ्रम्यानीय पर्वतप्रमाणं स्थूलतुषपुञ्जं सञ्चित्य तस्यान्तः कणहीनधान्याभासस्यावघातं कुर्वतां जनानां यथा स स्थूलतुषः क्लेशलः केवलं हस्तादिवेदनामात्रफलप्रदः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं विग्रहतः स्वरूपतश्च तव इयत्तानवच्छिन्नत्वात्साकल्यज्ञानाग्रहं विहाय भक्तिप्रधानैः कर्मज्ञानवैराग्याख्यैः साधनैः "तमेतं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा ब्रह्मविदाप्नोति परं, किं कर्मणा किं धनेन त्यागेनैकेनामृतत्वमानशुः" इतिभक्तिरेवैनं दर्शयति भक्तिवशः पुरुषः भक्तिरेव भूयसी" इत्यादिप्रसिद्धैर्मुमुक्षुस्त्वां प्राप्नोत्येवेत्याह—ज्ञान इति त्रिभिः। ज्ञाने त्वत्स्वरूपविग्रहादिसाकल्यज्ञाने प्रयासमुदपास्येषदप्यकृत्वा सन्मुखरितां सद्भिः प्रकटितां भवदीयवार्तां भवदीयां श्रवणमात्रेण भगवज्ज्ञानभक्तिजननीं वार्तां कीर्तिं स्थाने स्वकीये स्वकीये वर्णे आश्रमे च स्थिताः तत्सन्निकर्षेण श्रुतिगतां श्रवणप्राप्तां तनुवाङ्मनोभिर्नमन्तः सत्कुर्वन्तो ये जीवन्ति केवलं तैः प्रायशस्त्रिलोक्यामन्यैरजितोऽपि त्वं जितोऽसि प्राप्त एवासि ॥ ३ ॥ हे विभो! इयत्तानवच्छिन्नश्रेयसां श्रेयः साधनानां ज्ञानवैराग्यपरभक्तीनां सृतिं मार्गभूतां भवदीयवार्ताश्रवणादिरूपां भक्तिमुदस्य त्यक्त्वा केवले निःसमानातिशये यो बाधः इयत्ताज्ञानं तल्लब्धये क्लिश्यति ये तेषां क्लेशलः क्लेश एव शिष्यते। अन्यत् इयत्तानाज्ञानप्राप्तिलक्षणं फलं न इयत्ताज्ञानासम्भवात् यथा स्थूलतुषावघातिनां धान्याभासघातिनां क्लेश एवावशिष्यते नान्नलाभस्तद्वदित्यर्थः ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु, त्वमपि चेन्महिमानं न जानासि तर्ह्यज्ञाः कथं संसारं तरेयुः श्रुतिस्तु ज्ञानादेव तत्तरणमाह "ज्ञात्वा देवं सर्वपाशापहानिरित्यादिकेतिचेत्तत्राह—अनन्तस्वरूपगुणविभूतेस्तव स्वरूपादिविषयके कृत्स्ने ज्ञाने ये प्रयासं श्रममुदपास्य परित्यज्य सन्तो मौनिनोऽपि मुखरिता यया तां भवदीयां वार्त्तां तन्वादिभिर्नमन्त एव केवलं जीवन्ति नान्यत् किञ्चित् कुर्वन्तीत्यर्थः। स्थाने स्वनिवास एव स्थिता न तु तीर्थानि पर्य्यटन्तः, श्रुतिगतां तत्सन्धिमात्रेण स्वत एव श्रोत्रप्राप्तां, हे अजित! त्रिलोक्यामजितोऽपि त्वं तैस्त्वद्वार्त्ताश्रद्धालुभिः प्रायशो बाहुल्येन जितोऽसि वशीकृतोऽसीति त्वद्वार्त्तयैव विज्ञातया संसारतो निस्तारात् किं कृत्स्नविषयकेन ज्ञानेन तस्याशक्यत्वाच्च ॥ ३ ॥ सुकरां भक्तिमननुष्ठाय कृत्स्नज्ञाने प्रयतमानानां क्लेशो भवतीत्याह—श्रेयसामभ्युदयापवर्गलक्षणानां श्रुतिः प्रस्रवो यस्याः निर्झराणामिवाक्षयत् सरसः तां ते भक्तिं त्वद्वार्त्ताश्रवणादिकामुदस्य ये केवलबोधलब्धये क्लिश्यन्ति तेषामसौ बोधः क्लेशलः सन्नेव शिष्यते क्लेशं लाति ददातीति सः यथाल्पप्रमाणं तण्डुलचयं विहाय तुषराशिमवघ्नतां स तद्राशिः क्लेशलस्तद्वत् ॥ ४ ॥

श्रीसुबोधिनी

नन्वेवं सति कथं ज्ञानार्थं यतन्ते? तत्राह **ज्ञाने प्रयास**मिति, **ज्ञानं** द्विविधं भगवतः स्वस्य **च**, तत्र स्वज्ञानमपि भगवज्ज्ञानं तु न कस्यापि भवति, न ह्यापाततो दृष्टो भगवान् ज्ञातो भवति नापि श्रुतः, भक्त्यापि तत्त्वं ततो ज्ञानमिति प्रवेशोपयोग्येव तावदेवापेक्ष्यत इति, अतो **ज्ञाने प्रयासमुदू**र्ध्वमेवा**पास्य** दूरीकृत्य तव द्वारकादि**स्थानेषु** स्थिता देशदोषाभावाय यत्र क्वाप्युपविष्टा वा **सद्भिर्मुखरितां** भगवदीयवार्तां स्वस्य **श्रुतिग**तां कर्णगतां **तनुवाङ्मनोभिर्नम**न्तो ये **जीवन्ति** ते प्रथमतः प्रसिद्धा भवन्ति, किं बहुना? **तैरजितो**पि भवान् **जितः**, अयमेको मार्गः सर्वेषां पुरुषार्थसिद्ध्यर्थं प्रसिद्धः सुगमः, आदौ स्थानस्थितानां जीविकोपद्रवाभावादिः स्वतःसिद्धः, **सन्तश्च सर्वत्र भगवदाज्ञया परिभ्रमन्ति, तेषां चैतदेव कृत्यं, भगवद्गुणगाने ते मुखरा एव भवन्ति,** तत्रापि कथायां ज्ञात्वा वक्तव्यमिति न नियमः, केवलं भगवत्सम्बन्धिनी वार्ता भवतु न तूपपन्नानुपपन्ना वेति, तत्राप्यनायासेन स्वकर्णे समागता भवति, परं **कायवाङ्मनोभिर्नम**स्या सा, तदनुगुणतया **कायवाङ्मनां**सि स्थापनीयानि, न तु तत्र विरोध आचरणीयः, एतावदेव कृत्यमत्र साधनं जीवनमेव न तु कर्मकरणादिकमपि, **प्रायश** इति ते चेद् भावान्तरं न कुर्युः

कालादयः प्रतिबन्धकत्वाद्वा, **अतोनेनैव प्रकारेणाग्रिम तनानां निस्तारो मम त्वनेनव स्वरूपेणे**तिस्वतन्त्रः पक्षो निरूपितः ॥३॥ ये तु पुनः स्वज्ञानार्थ यतन्ते तेन च पुरुषार्थं साधयितुं ते भ्रान्ता एवेत्याह **श्रेयःस्रुतिमि**ति, **श्रेयसः स्रुतिः** प्रस्रवः, **सृतिर्गति**र्वा, यया **भक्ति**र्हि चिन्तामणिरूपा प्रार्थ्यते चेदन्यदिवात्मज्ञानमपि प्रयच्छति दृशीमपि परित्यज्य **केवलं** स्वरूपज्ञानमेवास्त्विति ये **यतन्ते तेषामसौ** यत्नः **क्लेशल एव शिष्यते,** क्लेशयुक्तः **क्लेशलो** न तु फलयुक्तोपि, तेन प्रयत्नेन गौणमपि फलं साधितं भविष्यतीतिशङ्कां वारयति **नान्यदि**ति, **अन्यत्** फलं प्रासङ्गिकमपि न भवतीत्यर्थः ननु तपस्यादिना यत्ने कथं नान्यफलसिद्धिरन्तःकरणशुद्धिर्वा भवेदित्याशङ्क्य दृष्टान्तमाह **स्थूलतुषावघातिना**मिति, महता कष्टेनाप्युत्पादिताः **स्थूलतुषा अव**हता अपि स्वरूपत **एव** परं नश्यन्ति न तु कश्चन तेषु सारांशोस्ति, अतः सत्त्वमूर्तेस्वीकारे सत्त्वाभावाच् छुद्धिज्ञानादिकं न भवत्येव, मौर्ख्यात् प्रवृत्ताः क्लिष्टा एव भवन्तीत्यविवादम् ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'यदि त्वमेव न जानासि तदाऽन्येपि नैव जानन्ति' इत्यर्थादागतम्, तर्हि "तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय' इति श्रुतेरज्ञानां कथं संसारात् मोक्ष' इत्यत आह–ज्ञाने इति। ज्ञाने ज्ञाननिमित्तं प्रयासं श्रममुदपास्य दूरतस्त्यक्त्वा स्थाने 'सतां निवासस्थाने' स्थिताः सद्भिर्भगवद्भक्तैः मुखरितां स्वभावत एव नित्यं प्रकटितां श्रुतिगतां श्रवणं प्राप्तां भवदीयां वार्तां कथां ये तनुवाङ्मनोभिर्नमन्तः सत्कुर्वंत एव जीवन्ति, हे अजित ! कालकर्मादिभिरजितोऽपि प्रायशस्त्रिलोक्यां तैस्त्वं जितोऽसि वशीकृतोऽसि। "धर्मादिचतुर्विधपुरुषार्थप्रदो भवान् येषां प्रसन्नस्तेषां ज्ञानादिकं किं दुर्लभम् ? कथं वा संसारः ?" इति भावः। तत्र तन्वा सत्कारः सावधानतया कथायामुपवेशनम्, वाचा प्रश्नः स्तुत्यादि, मनसा अवधारणं मननादि ॥ ३ ॥ 'श्रवणादिभक्तिविना तु ज्ञानं दुर्लभमेव' इत्याह –श्रेयः स्रुतिमिति। श्रेयसां धर्मार्थकाममोक्षाणां श्रुतिः 'सरसो निर्झराणामिव स्रवणं' यस्यास्तां ते तव भक्तिमुदस्य त्यक्त्वा ये केवलं बोधलब्धये ज्ञानप्राप्त्यर्थं क्लिश्यन्ति शास्त्राभ्यासादिक्लेशं कुर्वन्ति, तेषामसौ शास्त्राभ्यासादिजनितः क्लेशलः क्लेश एवावशिष्यते, नान्यत्। ज्ञानं तु नैव भवति॥ तत्र दृष्टान्तमाह–यथेति। यथा अल्पप्रमाणं धान्यं परित्यज्यान्तःकणहीनान् स्थूलधान्याभासान् तुषानवघ्नतां तदन्तस्तण्डुलाभावादवहननजनितहस्तक्लेश एव भवति, न तण्डुललाभः, एवं श्रवणादिभक्तिं तुच्छीकृत्य केवलं ज्ञानार्थं प्रयततामपि भक्तिविना चित्तशुद्ध्यभावाच्छास्त्राभ्यासादिक्लेश एव भवति। न ज्ञानमित्यर्थः॥ 'युक्तं चैतेषां निष्फलत्वम्, महतस्त्वत्तो विमुखत्वात्' इत्याशयेन सम्बोधयति—विभो इति। लोके वैदिके च सर्वत्र 'ये साधनं परिहृत्य परित्यज्य फलार्थं यतन्ते, ते केवलं क्लेशभागिन एव भवन्ति, न फलभागिनः' इति प्रसिद्धत्वात् भक्तेश्च ज्ञानजनकत्वस्य "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" "वासुदेवे भगवति भक्तियोगः प्रयोजितः॥ जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम्" इत्यादिवचनैः प्रसिद्धतरत्वात्तद्धीनानां ज्ञान कथं स्यात् इत्याशयः ॥ ४ ॥

अन्वितार्थप्रकाशिका

ज्ञान इति॥ ज्ञाने ज्ञाननिमित्तं प्रयासं श्रममुदपास्य दूरतस्त्यक्त्वा स्थाने सतां निवासस्थाने स्थिताः सद्भिर्भगवद्भक्तैः मुखरितां स्वभावत एव नित्यं प्रकटितां श्रुतिगतां श्रवणं प्राप्तां भवदीयां वार्तां कथां ये तनुवाङ्मनोभिर्नमन्तः सत्कुर्वन्त एव जीवन्ति। हे अजित ! कालकर्मादिभिरजितोऽपि प्रायशस्त्रिलोक्यां तैस्त्वं जितोऽसि वशीकृतोऽसि। अतः किं ज्ञानप्रयासैः॥ ३॥ श्रेय इति॥ हे विभो ! श्रेयसां धर्मार्थकाममोक्षाणां स्रुतिः सरसो निर्झराणामिव स्रवणं यस्यास्तां सृतिमिति पाठे श्रेयोमार्गभूतां ते तव भक्तिमुदस्य त्यक्त्वा ये केवल बोधलब्धये ज्ञानप्राप्त्यर्थं क्लिश्यन्ति शास्त्राभ्यासादिक्लेशं कुर्वन्ति तेषाम् अल्पप्रमाणं धान्यपुञ्जमुज्झित्वा बहुप्रमाणस्थूलतुषावघातिनां स्थूलतुषानेवावघ्नतां यथा स्थूलतुषः क्लेशल एव शिष्यते तथा असौ बोधः क्लेशं लाति इति क्लेशलः। क्लेशजनक एवावशिष्यते नान्यत् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तर्हि मुमुक्षुभिर्मम महिमा कथं ज्ञातव्य इत्याशंक्याह ज्ञान इति हे अजित ये पुरुषाः ज्ञाने उपनिषत्प्रोक्तकेवलजीवात्मवेदने प्रयासं परिश्रमं उदपास्य त्यक्त्वा सद्भिर्मुखरितां सदैव स्वमुखेनोच्चरितां भवदीयानां त्वदीयानां वा भवदीयां त्वदीयां वार्त्तां स्थाने यथा योग्यं स्वस्ववर्णाश्रमे स्थिताः संतः सत्समागमे न श्रुतिं श्रोत्रेंद्रियं गतां प्राप्तां तनुवाङ्मनोभिर्नमंतः स्वीकुर्वंत एव जीवंती त्रिलोक्यां त्वं प्रायशोऽन्यैरजितोऽपि तैस्त्वं जितोसि एवं मुमुक्षुभिः सत्संगेनैव तव महिमा ज्ञेय इत्यर्थः ॥ ३ ॥ इदानीं सत्समागमेन प्राप्तां हरिभक्तिविना जीवानां मोक्षो न भवेदित्याह श्रेय इति श्रेयस्यां चतुर्वर्गाणां यद्वा श्रेयसां पंचविधमुक्तीनां स्रुतिः प्रस्रवणं यस्यास्तां ते तव भक्तिं नवविधामुदस्य परित्यज्य केवलस्य शुद्धात्मस्वरूपस्य बोधोपथार्थोऽनुभवस्तस्य लब्धये प्राप्तये ये क्लिश्यंति तेषामसौ क्लेशलः कृतश्रमरूपः क्लेश एव शिष्यते नाऽन्यत् अत्र दृष्टांतः यथा व्रीहीन् त्यक्त्वा तंडुललब्धये अंतःकणहीनान् धान्याभासान् स्थूलतुषान् अवघ्नंतीति स्थूलतुषावघातिनस्तेषां श्रम एवाऽवशिष्टो भवति नाऽन्यत्तद्वत् ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु ममात्मसात्करणसाधनं तु ज्ञानं तद्धित्वा किमिति मद्भजनमिच्छसीत्यत्राह ॥ ज्ञान इति ॥ हे अजित, ज्ञाने कैवल्यज्ञानसंपादने, प्रयासं उदपास्य ज्ञानसंपादनायासमुदस्येत्यर्थः। सन्मुखरितां सतां तथाविधस्वभाववत्त्वात्तैः श्रोतारं समीक्ष्य स्वत एव नित्यं प्रकटितां, अत एव श्रुतिगतां श्रवणविषयतां प्राप्तां, भवदीयवार्त्तां त्वत्कथां, स्थाने स्वस्ववर्णाश्रमानुरूपस्वधर्मानुष्ठानरूपे स्वस्थाने, स्थिताः सन्तः, तनुवाङ्मनोभिः, नमन्तो भवद्वार्त्तां सत्कुर्वन्तः सन्तश्च एव, ये जीवन्ति, तैः त्रिलोक्यां अजितः अपि, त्वं प्रायशः जितो वशीकृतः असि। भक्तेरित्थंभूतसामर्थ्यवत्त्वात्तां परित्यज्य किं ज्ञानश्रमेणेत्यर्थः। त्वच्छरणा गतिरेव त्वद्वशीकरणोपाय इति भावः ॥ ३ ॥ ननु 'ऋते ज्ञानान्न मुक्तिः' इति श्रुत्यादिभिः ज्ञानयोगोऽपि कर्त्तव्यतया किमर्थमुच्यते इति चेत् कैवल्यार्थकज्ञानयोगस्य पुरुषार्थपर्यवसायित्वेऽपि 'भक्त्या मामभिजानाति यावान् यश्चास्मि यादृशः' इति श्रुत्यादिभिः ज्ञानयोगोऽपि कर्त्तव्यतया किमर्थमुच्यते इति चेत् कैवल्यार्थकज्ञानयोगस्य पुरुषार्थपर्यवसायित्वेऽपि 'भक्त्या मामभिजानाति यावान् यश्चास्मि यादृशः' इति प्रबलभगवद्वाक्यपेक्षया तस्य भक्तियोगानुग्राहकतयैव पुरुषार्थपर्यवसायित्वश्रवणात् प्रपत्तियोगवद्भक्तियोगस्यापि त्वद्वशीकरणोपायत्वमस्तीत्याह ॥ श्रेयःस्रुतिमि ॥ हे विभो, श्रेयसामभ्युदयापवर्गलक्षणानां स्रुतिः स्रुतिः स्रवो यस्याः सरस इव निर्झराणां तां, त्वन्मायातरणद्वारा निरतिशयापरिच्छिन्नानन्दरूपत्वत्प्राप्तिरूपश्रेयसो दोग्ध्रीमिति वा। ते तव, भक्तिं उदस्य त्यक्त्वा, ये जनाः, केवलबोधलब्धये केवलप्रत्यगात्मानुभूतिप्राप्तये कैवल्यार्थमिति यावत्। क्लिश्यन्ति, साक्षान्मुक्तिसाधनभूतां त्वद्भक्तिं तदनुगृहीतं ज्ञानयोगं च विहाय केवलकैवल्यार्थतया ज्ञाने क्लिश्यन्तीत्यर्थः। तेषां जनानां, असौ, क्लेशं लात्यादत्ते इति क्लेशलः एव, क्लेशावहो व्यापार एवेत्यर्थः। शिष्यते अवशिष्यते न त्वन्यत्फलमित्यर्थः। केषामिव। यथा स्थूलाश्च ते तुषाश्च तानवघ्नन्तीति तेषां अन्तसारभूततण्डुलरहितान् स्थूलधान्याभासान् तुषान् ये कण्डयन्ति तथाविधानां तेषामित्यर्थः। अन्यत् न, तद्वदित्यर्थः। भक्तिं तुच्छीकृत्य ये केवलबोधाय प्रयतन्ते, तेषां क्लेश एवाधिकतर इत्युक्तं स्वयं भगवतापि 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्' इति। अयं भावः। ज्ञानमपि त्वद्भक्तिसहितं स्याच्चेत्तदा तु तत् कथंचित्पुरुषार्थपर्यवसायि सत् त्वद्वशीकारोपायभूतं स्यान्न केवलमिति ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ज्ञाने प्रयासमिति : १०.१४.३.

येषां वशोऽस्यनिशमीश समग्रकृत्ये येभ्यः सुखं दिशसि मत्प्रमुखैरलभ्यम्।
तैर्वज्रसारसदृशः सुजनैः प्रयासो ज्ञाने कुतोऽधिगतपूर्णसुखैर्विधेयः ॥ १० ॥
मित्राणि मा विरमताशनतोऽहमेव वत्सानिहैव भवतां द्रुतमानयामि।
इत्यक्षरस्रुत सुधारसपूर्णकर्णैर्गोपभर्कैः किमजितोऽपि जितोऽसि न त्वम् ॥ ११ ॥

श्रेयः सृतिमिति : १०.१४.४.

श्रीगङ्गावदनन्तभूमिरुचिरा शश्वच्छिवोल्लासिनी यावद्भक्तिझरी सुरासुरनुता तां ये विहाय भ्रमात्।
धीवापीं श्रुतिमात्रमञ्जुलपदामज्ञातमार्गक्रमां सञ्चिन्वन्ति गुहागतां श्रमफलास्ते ह्यत्र कः संशयः ॥ १२ ॥
श्रीमद्भक्तिसुबोधयोस्तव पदाम्भोजप्रसादोदये स्वोत्कृष्टत्वविवादकाग्रहजुषो स्तद्वादनिर्णायकाः।
सन्त्याद्ये बहुसाक्षिणः सुमनसस्त्वन्त्येऽहमेकः प्रभो प्रागासं प्रकृते तु भक्त्यनुभवार्त्तैर्निर्जितोऽहं स्फुटम् ॥ १३ ॥
तत्साक्षिप्रथिता विवादरहिता भक्तिर्यदि प्रेष्ठकृत् तत्किं तामपहाय केचिदनिशं बोधोदयोद्योगिनः।
बीजं तस्य तु सिद्धमेव भगवन्नङ्गीकृतस्य स्फुटं त्यागो दूषणमित्यनन्यशरणास्त्वां ते तथोपासते ॥१४॥(युग्मम्)
अनादृत्य श्रेयःसृजममलभक्तिं तव कृतप्रयत्नो यो ज्ञप्त्यै श्रमफलभुगेवेत्यथ च यः।
तदेकासक्तोऽसावधिगत-समष्टिश्च भवतीत्यहं जातोऽत्रैवोभयमत सदर्थैककथकः ॥ १५ ॥
श्रोतव्यं श्रुतिवाक्यतश्च गुरुतो मन्तव्यमन्तस्ततो ध्येयं स्यादपरोक्षमित्युपनिषत्तान्वञ्चयत्वन्वहम्।
आगोपाङ्गन मा च पण्डितमभीष्टार्थप्रदं सुन्दरं रूपं नेदमलोचि लोचनचरं यैस्ते दयाम्भोनिधे ॥ १६ ॥

कृष्णप्रिया

हे अजित प्रभो ! ज्ञानप्राप्ति का भूरि श्रम न करके केवल निजनिवास में वास करते हुए अथवा वृन्दावन-द्वारकादि स्थलों में रहकर अथवा सज्जन निवासों में निवास कर सत्पुरुष भक्तों के श्रीमुख से गायी हुई हरिगाथा सुधा का नित्य पान करते हुए जीवन यापन करते हैं या तो हरिलीला को ही जो निजजीवन बना लेते हैं और तन-मन-वचन से कथा को सुनते-सुनाते आप के श्रीचरणों में नमन करते रहते हैं वे भगवदीय जन स्ववश आपको वश में कर लेते हैं। क्या कहा जाय त्रिलोक में

आप किसी के वश नहीं फिर भी हे अजित भगवदीयों ने भक्ति-सेवा से आप को जीत लिये हैं ॥ ३ ॥ हे विभो श्रेयो वाहिनी आपकी भक्ति कल्याण सरिता के अमृत पान की उपेक्षा कर केवल बोध प्राप्ति के लिये श्रम उठाते और कष्ट सहते हैं उनको केवल श्रम-ही-श्रम हस्तगत होता है भला भूसी कूटनेवाले को केवल क्लेश ही मिलता है और क्या मिलेगा ॥ ४ ॥

पुरेह भूमन् बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया ।
विबुध्य भक्त्यैव कथोपनीतया प्रपेदिरेऽञ्जोऽच्युत ते गतिं पराम् ॥ ५ ॥
[१]अथापि भूमन् महिमागुणस्य ते विबोद्धुमर्हत्यमलान्तरात्मभिः ।
अविक्रियात् स्वानुभवादरूपतो ह्यनन्यबोध्यात्मतया न चान्यथा ॥ ६ ॥

कर्दमक्षमा

अन्वयः—भूमन् ! अच्युत ! इह पुरा त्वदर्पितेहा बहवः योगिनः अपि निजकर्मलब्धया कथोपनीतया भक्त्या एव अञ्जः ते परां गतिं प्रपेदिरे ॥ ५ ॥ अथ अपि भूमन् ! अगुणस्य ते महिमा अनन्यबोध्यात्मतया अमलान्तरात्मभिः अविक्रियात् स्वानुभवात् अरूपतः हि विबोद्धुं अर्हति न च अन्यथा ॥ ६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भक्त्यैव ज्ञानं नान्यथेत्युक्तं तत्र सदाचारं प्रमाणयति । पुरेति । हे भूमन्नपरिच्छिन्न इह लोके पूर्वं योगिनोऽपि संतो योगैर्ज्ञानं प्राप्यापि पश्चात्त्वदर्पितेहास्त्वय्यर्पिता लौकिक्यपीहा चेष्टा यैस्ते निजकर्मलब्धया त्वदर्पितैर्निजैः कर्मभिर्लब्धया त्वय्यर्पिता ईहा च निजानि कर्माणि च तैर्लब्धयेत्येकं पदं वा । कथोपनीतया कथया त्वत्समीपं प्रापितया भक्त्यैव विबुध्य विश्वव्यापकमात्मानं ज्ञात्वा अंजः सुखेनैव ते परां गतिं प्राप्ताः ॥ ५ ॥ एवं तावत्सगुणनिर्गुणयोरुभयोरपि ज्ञानं दुर्घटमिति त्वत्कथाश्रवणादिनैव त्वत्प्राप्तिर्नान्यथेत्युक्तम् । इदानीं यद्यप्युभयोरविशेषेण दुर्ज्ञेयत्वमुक्तं तथापि गुणातीतस्य ज्ञानं कथंचिद्भवेन्न तु सगुणस्य तदचिंत्यानंतगुणत्वादिति स्तौति श्लोकद्वयेन । तथाऽपीति । हे भूमन्नपरिच्छिन्नगुणस्य ते महिमा अमलैरंतरात्मभिः प्रत्याहृतेंद्रियैर्विबोद्धुं बोधगोचरीभवितुमर्हति योग्यो भवति । अथ वा विबोद्धुं ज्ञातुमर्हति अर्ह्यते शक्यत इत्यर्थः । यद्वा । महिमेति महिमानं कश्चिद्बोद्धुमर्हतीत्यर्थः कथम् । स्वानुभवादात्माकारांतःकरणसाक्षात्कारात् । नन्वंतःकरणमपि सविकारमेव विषयीकरोतीति कथमात्माकारता तस्येत्यत आह । अविक्रियादिति । विक्रिया विशेषाकारस्तद्रहितात् । एवंभूतात्स्वानुभवात् विशेषपरित्याग एवात्माकारतेत्यर्थः । नन्वंतःकरणसाक्षात्कारविषयत्वेनात्मत्वप्रसंगः स्यादत आह । अरूपत इति । रूपं विषयः अविषयात् । वृत्तिविषयत्वमेवात्मनो न फलविषयत्वमतो नायं दोष इति भावः । कथं तर्हि स्फूर्तिः अनन्यबोध्यात्मतया स्वप्रकाशत्वेनैव न त्वन्यथा । इदं तदिति विषयत्वेनेत्यर्थः । अथ वा मा सर्वतोंतरंगा लक्ष्मीरप्यगुणस्य ते महि महिमानममलैरंतवृत्तिभिरिंद्रियैरपि तथा यादृग्वस्तुतस्तेन रूपेण विबोद्धुं किमर्हति नार्हत्येवेत्यर्थः । कथं तर्ह्यर्हति तदाह स्वानुभवादित्यादिना । उक्तार्थमेवैतत् ॥ ६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यत्र अस्मिन्स्थले । पृथक्पृथक्समासे भ्रमादाह-एकपदं वेति । परां गतिं जीवमुक्तिरूपां परां भक्तिं वेति ॥ ५ ॥ हे भूमन् भूः प्रादुर्भावस्तद्युक्तैतन्मधुररूपप्रादुर्भाववन् । अगुणस्य प्राकृतगुणरहितस्य तव महिमा महित्वं बृहत्त्वरूप एको धर्मः । "मदाय महिमानश्च परब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे" इति मत्स्यावतारे त्वदुक्तेः, "सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्" इति ध्रुवोक्तेश्च महिमशब्देन प्रसिद्धं परं ब्रह्मस्वयमेव विबोध्या भवितुमर्हति । पच्यते ओदनः स्वयमेवेतिवत् कर्मणः कर्तृत्वम्, यथा कुठारः स्वयमेव वृक्षं छिनत्तीत्यत्र करणस्य कर्तृत्वं विवक्षितम् । कस्मान्निमित्तात् । अमलैः शुद्धैरंतरात्मभिः । स्वकर्मकादनुभवात् । नन्वनुभवः खल्वंतः करणवृत्तिः सा च सूक्ष्मदेहविकारमयी । नीर्विकारं ब्रह्म कथं विषयीकुर्यादित्यत आह–अविक्रियात्, न विद्यते विकारो यत्र तथाभूतात् । विकारो हि मायाधर्मः स च विषयोपरमे कथं स्यादिति लिंगदेहाभाव एव व्यंजितः । ननु तदपि ब्रह्मणोऽविषयत्वेनानुभवविषयानौचित्यादतः पुनर्विशिनष्टि–अरूपतः, रूपं विषयस्तदितराद्विषयाकारत्वरहिताद्ब्रह्माकारादित्यर्थः । ब्रह्मणो ब्रह्माकारानुभवविषयत्वं न दोष इति । नन्वस्ति किं तद्बोधः प्रकारांतरं तत्राह–अनन्यबोध्यम् आत्मस्वरूपं यस्य तत्तथा । स विबोध्या भवितुमर्हतीत्यवगन्तव्यम् । गुणातीतस्य निर्गुणस्य । सकर्मकस्याकर्मकत्वापादनमनुचितं मत्वार्थांतरमाह–अथ वेति । अत्रापि कर्त्रर्थकप्रत्ययस्य कर्मत्वापादनं छांदसाश्रयणं विना न संभवेदित्यस्वरसात्प्रकारांतरमाह–यद्वेति । इहापि द्वितीयार्थे प्रथमा ज्ञेया । आशंकते–नन्विति । इत्यर्थ इति तात्पर्यम् । पुनराशंकते–नन्विति । इत्यर्थ इति–अविषयत्वात्तस्येति भावः । वृत्तिविषय-

---

[१] तथापि–श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक. ।

त्वमिति फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं वृत्तिव्याप्यत्वमेवास्य स्वीकृतं श्रौतसंमतम् । तथा चोक्तं विद्यारण्यैः—"बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्यदाभासनघटःस्फुरेत् ॥" इति । इयं व्यवस्थाऽनात्मनि, आत्मनि तु—"ब्रह्मण्यज्ञाननाशाय वृत्तिव्यातिरपेक्षिता । स्वयं स्फुरणरूपत्वान्नाभासस्तत्र युज्यते ॥" इति मनुष्यादिर्ज्ञातुं न शक्नोतीति नाद्भुतं किन्तु तदर्द्धाङ्‌ग्यपि लक्ष्मीः सापि ज्ञातुं न कल्पेति । इत्यर्थ इति—-काकूक्त्या लभ्योऽर्थ इति । यद्वा—-जिज्ञासुः कर्मयोगेन भक्त्या चामलैरन्तर्मुखैर्ब्रह्मादिभिः संपादितात् अविक्रियात् । विक्रियाभेदहेतुर्जीवे सोपाधिस्तद्भागत्यागरूपादविरुद्धचिदानंदस्वरूपानुभवान्महावाक्यप्रमाणजप्रमारूपाद्विशेषेण प्रत्यगभेदेनापरोक्षतया बोद्धुमर्हति । अरूपत इति—रूप्यते प्रकाश्यतेऽनेनेति रूपं चिदाभासः, वृत्तौ तत्सत्त्वेपि स्वप्रकाशे तदनुपयोगे तदज्ञानावरणनिवृत्तावेव वृत्तेरुपक्षीणतया तज्ज्ञानं स्वप्रकाशतयैव नेदंतयेति भावः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रेयःसृतित्वं च न केवलं वाङ्मात्रेण किं तु पूर्वं बहुशोऽनुभूतमेवास्तीत्याह–पुरेति । तैर्व्यञ्जितमेव तत्र लब्धया—

"धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः । नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्" ॥

इति न्यायेन कथारुचिरूपया त्वत्समीपं प्रापितया सतां प्रसङ्गादित्यादौ "तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिः" इत्यनुसारेण कथनीयरुचिरूपया आत्मानं परमात्मानं त्वां विज्ञाय "भक्तिर्विरक्तिर्भगवत्प्रबोधः" इति न्यायेन प्रेमवृद्धिक्रमतोऽनुभूय पराम् अन्तरङ्गां तव गतिं सामीप्यं प्रपेदिरे प्रपत्तिसहितं प्रापुरित्यर्थः भूमन् ! हे अपरिच्छिन्नमाहात्म्येति त्वद्भक्तेरेतद्युक्तमेवेति भावः । हे अच्युत ! इति, यतस्तव भक्त्या कथञ्चिदपीष्टसिद्धेश्च्युतिर्नास्त्येवेति भावः यथोक्तं काशीखण्डे—

"न च्यवन्तेऽथ यद्भक्ता महत्यां प्रलयापदि । अतोऽच्युतः स्मृतो लोके त्वमेको विष्णुरव्ययः" ॥ इति ॥ ५ ॥

तदेवं यद्यपि ज्ञाने प्रयासमित्यादिना ज्ञानमात्रस्यामृतत्वमुक्तं तथाप्यस्ति विशेष इत्याह—तथापीति द्वाभ्याम् । अगुणस्य क्वचिदधिकारिणि अप्रकाशितगुणस्य सतः विबोद्धुं बुद्धौ प्रकाशितुं पचेर्विक्लितिविक्लेदनावत् कर्मनिष्ठो विकारादिः कर्तृनिष्ठश्च तस्य हेतुत्वलक्षणो भावः । सर्वमकर्मकधातोर्गौणमुख्यभावेन वाच्यो भवति अन्तर्भूतण्यर्थत्वात् अतो बुधधातोरपि प्रकाशमात्रत्वम् इन्द्रियकरणकप्रकाशहेतुत्वं च विद्यते तदेवं कर्मनिष्ठप्रकाशमात्रविवक्षया ओदनः पचतीतिवत् विबोद्धुमर्हतीत्यपि स्यात् अर्हति अर्ह्यत इति अनेन बोधगोचरीकर्तुं शक्यत इत्यर्थः । अन्यकर्तृकगोचरीकरणाय योग्यो भवतीत्युक्तेस्तथैव तात्पर्यात् महि महिमानमिति "सुपांसु लुग्" इत्यादिना सुभावात् अनन्यबोध्यात्मतया चिदेकाकारांशेन जीवेशयोरभेदभावनया अन्यत्तैः, तत्र वृत्तिर्निर्विषयं चित्तमेव फलं च विषयाकारचिदाभासयुक्तं तदेवेति ज्ञेयम् । यद्वा, यद्यपि भक्त्यैव विबुद्धयेत्युक्तं तथाऽप्यनन्तकल्याणगुणमहादधेस्तव सम्यग् ज्ञानं न स्यादेव किं तु कस्यचिदेकस्य त्वद्गुणस्य माहात्म्यज्ञानं कस्यापि जनस्य यत्किञ्चिदेव भवेदित्याह–तथापीति । ते गुणाः करुणादिलक्षणास्तेषाम् एकोऽपि तस्य महि महिमा तस्य मा लक्ष्म्यः सम्पद इत्यर्थः । ताः कश्चिद्विबोद्धुमर्हति तच्च स्वानुभवात् स्वानुभवं स्वकीयानुशीलनमनुसृत्य यथा स्वानुभवस्तथा न तु सर्वथेत्यर्थः । कथम्भूतात् अविक्रियात् अभिलाषान्तरशून्यात् स कीदृशोऽनुभव इत्यपेक्षायामाह अनन्यबोध्यात्मतया आत्मैकज्ञेयस्वरूपत्वेन, अरूपतः रूप्यत इति रूपः अनिरूप्यादित्यर्थः । न चान्यथेति न स्वानुभवव्यतिरेकेण न च स्वानुभवातिरेकेण विबोद्धुमर्हतीत्यर्थः । एवं श्रीभगवद्गुणस्यापि ब्रह्मरूपत्वमभिप्रेतम् ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रेयः सृतित्वञ्च न केवलं वाङ्‌मात्रेण, किन्तु पूर्वं बहुशोऽनुभूतमेवास्तीत्याह–पुरेति । हे भूमन्, हे अपरिच्छिन्नमाहात्म्येति त्वद्भक्तेरेतद्युक्तमेवेति भावः । योगिनो मुक्ता अपि ते तव कथोपनीयतया त्वत्कथाश्रवणकीर्त्तनादिरूपयेत्यर्थः । तत्र साधनमाह–त्वदिति । यद्वा ननु, तथापि परमगति–प्रापिका भक्तिर्दुर्घटा ? तत्राह–कथेति । त्वल्लीलाकथनेनोपनीतया संस्कृतया; यद्वा, ते कथया कीर्त्त्यापनीतया त्वन्माहात्म्येन प्रवृत्तितयेत्यर्थः । परामुत्कृष्टाम् । हे अच्युतेति यतस्तव भक्त्या कथञ्चिदपीष्टसिद्धेश्च्युतिर्नास्त्येवेति भावः । अथवा भक्त्यैव योगिनस्त्वत्संगिनः सन्तस्ते तव परामुत्कृष्टां गतिं पदं श्रीवैकुण्ठलोकादि लक्षणं प्रेमलक्षणं वा गतिं विबुध्य परमफलत्वेनावधार्य्य तामेव प्राप्ताः । अन्यत् समानम् ॥ ५ ॥ ईदृशं तव भक्तिमाहात्म्यं भजनीयस्य च तव महिमा केन वक्तुं शक्यताम् ? अहो अस्तु तावद्गुणिनस्तव, त्वदेकगुणस्यापि माहात्म्यं तत्त्वतो ज्ञातुमपि न शक्यत इत्याह; यद्वा, ईदृशे भक्तिमाहात्म्ये सत्यपि ज्ञाने परमाग्रहश्चेत्तथाप्यनन्तकल्याणगुणमहोदधेस्तव ज्ञानं न स्यादेव, कथञ्चित् कस्यचिदेकस्य तद्गुणस्य माहात्म्यज्ञानं कस्यापि जनस्य भवेदित्याह–तथापीति । ते गुणः करुणा-लक्षणस्तस्यापि महि महिमा, तस्य मा लक्ष्म्यः सम्पद इत्यर्थः, ताः कश्चिद्विबोद्धुमर्हति । यद्वा, मा लक्ष्मीरेव श्रीराधारूपा–बाल्येऽपि नित्यलीलापेक्षयोक्तमिदम्, तथा

तत्त्वतः, यद्वा, तेन प्रकारेण महि माहात्म्यं विशेषेण बोद्धुमर्हति । तत्प्रकारमेवाह—स्वानुभवात् स्वस्य तदनुभवतः परमदयालोर्भगवतः स्वस्मिन् कारुण्यविशेषसम्पत्तेः । कथम्भूतात् ? निर्विकारात् सम्पूर्णादित्यर्थः । स कीदृशोऽनुभव इत्यपेक्षायामाह–अनन्यबोध्यात्मतयात्मैकज्ञेयस्वरूपत्वेनारूपतो रूप्यत इति रूपमनिरूप्यादित्यर्थः, न त्वन्यथा, स्वानुभवस्य व्यतिरेकेण न विबोद्धुमर्हतीत्यर्थः । एवं श्रीभगवद्गुणस्यापि ब्रह्मरूपत्वमभिप्रेतम् । यद्वा, तदनुभवः कदा स्यादित्यपेक्षायामाह–स्वप्रकाशतयाऽनिरूप्यादिति तद्वक्तुं न शक्यत इत्यर्थः, अथवा त्वद्गुणस्याप्येकस्य माहात्म्यं कथमपि ज्ञातुं न शक्यत इत्याह–मा लक्ष्मीरप्यविक्रयात् स्वानुभवादपि विबोद्धुमर्हति किम् ? काक्वा; अपि तु नैवेत्यर्थः । तत्र हेतुत्वेन सम्बोधनम्, भूमन् ! हे सर्वतोऽपरिच्छिन्नमाहात्म्येति । किञ्चानन्यबोध्यात्मतया अकाराख्यस्य विष्णो रूपतस्तत्स्वरूपत्वादित्यर्थः, गुणगुणिनोरभेदात्, न त्वन्यथा, अत्र च मिथ्यात्वं नास्तीत्यर्थः । अत एवोक्तं श्रीयामुनाचार्य्यपादैः–'उपर्य्युपर्य्यब्जभुवोऽपि पुरुषान्' इति ॥ ६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पुरेह इति । फलनिगमनेन पूर्वोक्तमेव ज्ञानं स्फुटीकृतं योगिनः कर्मयोगिनः निजवर्णाश्रमधर्मप्राप्तया भक्त्या विबुद्ध्य विशेषेण त्वज्ज्ञानं प्राप्य ते परां गतिं त्वत्सम्बन्धिनीमर्चिरादिमार्गेण परमपदगतिं प्रकर्षेण प्रापुरिति, कीदृशाः त्वदर्पितेहाः त्वय्येवार्पितसकलचिन्तितनिमिषितादिकर्माणः "यत्करोषि" इत्यादिप्रामाण्यात् ॥ ५ ॥ इदानीं तव स्वरूपलीलाविभूतिसर्वचिदचिद्व्यापकपरमात्मरूपतयावर्त्तमानस्य ज्ञानं सुशकमित्याह—तथेति । अगुणस्य त्रिगुणविलक्षणस्य ते परमात्मनः महिमा सर्वस्थूलावस्थचेतनाचेतनव्यापकत्वं विबोद्धुं ज्ञातुमर्हति योग्यो भवति । कैः अमलान्तरात्मभिः निर्मलैरन्तःकरणैः मनोबुद्धिचित्तैः कुतो हेतोः विक्रियारहितात् स्वानुभवात् आत्मनो जीवस्यानुभवात् देहेन्द्रियादिविलक्षणस्ववैलक्षण्यानुसन्धानेन परमात्मनोऽपि वैलक्षण्यानुसन्धानं भवति, एतदेव हेतुभिरुच्यते । ननु, स्वानुभवस्तु देहसम्बन्धेनैव स्थूलोऽहमित्यादिकः कथम् ? तेन परमात्मवैलक्षण्यानुसन्धानम् इत्यत्राह, अरूपतः आत्मनोऽप्यणुपरिमाणान्यरूपाभावात् । ननु, रूपं देहादिकं विनात्मन इव कथं तद्ज्ञानं ? तत्राह—अनन्यबोध्यात्मतया इति । अन्येन श्रीभगवदन्येन भगवद्बहिर्मुखेनेति यावत् न अन्येन बोध्यश्चासौ आत्मा अनन्यबोध्यात्मा तस्य भावस्तत्ता तया असौ परमात्मा स्वबहिर्मुखेन न बोध्य इत्यर्थः । अथवा अनन्यैः देवतान्तरकर्मान्तरप्रयोजनान्तरशून्यैर्बोध्यस्वरूपतया तद्ज्ञानं नान्यथात् चकारः सर्वथाऽसिद्धिमेव वदति । अथवा न अन्यत्वेन बोध्य आत्मा स्वरूपं यस्य सः तस्य भावस्तत्ता तया स्वात्मशरीरितया स्वशेषित्वेन स्वाधारतया च बोध्यस्वरूपतः न चान्यथा तज्ज्ञानम् इति पर्यवसन्नोऽर्थः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, भक्त्या युक्तः कश्चित् किं दृष्टचर इत्यपेक्षायां न केवलं कश्चिदेवापि तु बहव इत्याह–पुरेति । हे भूमन् ! विपुलानन्दरूप ! इह लोके बहवः पुरुषा योगिनः भक्तियोगानुग्राहकात्मयाथात्म्ययोगयुक्ताः त्वय्यर्पिता इहा चेष्टा वर्णाश्रमानुगुणधर्मानुष्ठानरूपा चेष्टा यैस्तथाभूता निजकर्मभिर्वर्णाश्रमानुगुणैः सत्कर्मभिर्लब्धया निष्पन्नया । यद्वा, त्वदर्पितेहा ईहा फललिप्सा फलाभिसन्धिरहिता इत्यर्थः । निजकर्मभिर्लब्धयाऽनेन फलाभिसन्धिरहितवर्णाश्रमानुगृहीतत्वमुक्तं कथोपनीतया नित्यं त्वत्कथाश्रवणादिभिः प्रत्यक्षरूपतां प्रापितया भक्त्यैव विबुध्य यथावस्थितस्वरूपस्वभावं त्वां ज्ञात्वा दृष्ट्वेति यावत्—

"भक्त्या त्वनन्यया शक्य अहमेवंविधोर्जुन ! । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप !" ॥

इति भगवदुक्तेः हे अच्युत ! भक्तान्न च्यावयतीत्यच्युतेति सम्बोधनाभिप्रायः पराङ्गतिं मुक्तिं प्रपेदिरे ॥ ५ ॥ ननु, "नेशे महित्ववसितुम्" इति मन्महिमा मदनुग्रहपूर्णपात्रभूतेनापि त्वया दुरवबोध्यत्वादितरैर्दुरवबोध्य. कैमुत्यन्यायेनोक्तः अत्र तु विबुध्य भक्त्येति सुखावबोध्य उक्तः । कथमेतद् विरुद्धं वदसीत्यत्राह–तथापीति । हे भूमन् ! यद्यप्यगुणस्य प्राकृतगुणरहितस्य तव महि महत्त्वममलान्तरात्मभिः सनकादिभिर्मत्प्रभृतिभिः कर्तृभिः विबोद्धुं तेषां बोधगोचरीभवितुं मार्हति नार्हति तथाप्यविक्रियत्वादिरूपेण बोद्धुमर्हत्येवेत्यनुषज्यते न चान्यथा परिच्छिन्नत्वादिरूपेण नार्हति अविक्रियाद्विकाराभावादरूपतः कर्मायत्तशरीरसंयोगवियोगरहितत्वात्स्वयाथात्म्यानुभवादनन्यबोध्यात्मतया स्वेतरात्रोध्यस्वरूपतया स्वसंवेद्यैकस्वरूपतयेति यावत् आवक्रियात्स्वानुभवादरूपत इति निर्द्देशा भावप्रधानाः तृतीयार्थे पञ्चम्यार्षत्वाद् अविक्रियत्वादिरूपेण बोद्धुमर्हति स्वरूपतः स्वभावतश्च विकाररहितत्वेन प्रकृतिपुरुषविलक्षणत्वेन स्वरूपेण ज्ञायत इत्यर्थः । प्रकृतेः स्वरूपतो विकारात्पुरुषस्य स्वरूपतस्तदभावेऽपि स्वभावतस्तत्सम्भवात् एवं च जीववत्स्वभावतो विकारं वारयितुमरूपत इत्युक्तं कर्मायत्तशरीरसंयोगवियोगप्रयुक्तो हि जीवस्य धर्मभूतज्ञानसङ्कोचविकासात्मको विकारः । अतो रूपाभावादविक्रियत्वेन ज्ञायते इत्यर्थः । जीवस्य रूपवत्त्वं च स्वयाथात्म्यानुभवप्रयुक्तमिति तदननुभवो वार्यते स्वानुभवादित्यनेन स्वरूपस्यैवं विधत्वात्तन्महिमाऽप्यनितरसाधारणत्ववेषेण ज्ञायत इत्यर्थः । यद्वा, विक्रियादित्यनन्यबोध्यात्मतायां हेतुरविक्रियादित्यत्र हेतुररूप इति तत्रापि हेतुः स्वानुभवादिति अयमर्थः, नित्यं प्रत्यक्षित-

स्वयाथात्म्यानुभवाद्धेतोः पराभिध्यानमूलकर्मायत्तशरीराभावात्तत्संयोगवियोगप्रयुक्तस्वभावविकाराभावादचेतनवत्स्वरूपविकाराभावाच्च स्वरूपतः स्वभावतो वा विकृतस्यैवान्यबोध्यस्वरूपत्वात्तदुभयाभावेनानन्यबोध्यात्मतया ज्ञायत इत्यनन्यबोध्यात्मस्वरूपोयमेको महिमा अमलान्तरात्मभिर्ज्ञायते न तु स्वरूपस्वभावयोरियत्ता ज्ञायत इति समुदायार्थः । अमलान्तरात्मभिः सनकादिभिः सह मा लक्ष्मीरपि महत्त्वं विबोद्धुं नार्हतीति केचिद्योजयन्ति तत्र तथापीत्यस्यानन्वयापत्तिः तेनाक्षेपपरिहारयोः प्रतितेर्नञाध्याहारप्रसङ्गश्च ॥ ६ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

अथ त्वच्छेषत्वज्ञानपूर्वकत्वद्भक्तियोगरसिकास्तु तेनैव भक्तियोगेन त्वां बहव एव प्राप्ता इत्याह—हे भूमन् ! बहुगुणविशिष्ट ! "यः सर्वज्ञः सर्ववित्, पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिश्रुतिषु तस्य निरुपाधिककल्याणगुणकत्वं प्रसिद्धमिति इह लोके श्रुतिस्मृतिभिराचार्योपदेशेन त्वच्छेषत्वरूपमात्मानं विबुध्य ज्ञात्वा पश्चाद्भक्त्यैव अञ्जः साक्षात् ते परामुत्कृष्टां गतिं संसारनिवृत्तिपूर्वकत्वत्साम्यरूपां गतिं प्रपेदिरे प्राप्तवन्तः तथा च श्रुतिः "तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" इति । स्मृतिरपि "मम साधर्म्यमागताः" इत्यादि तथा च भगवद्वाक्यम्—

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ! । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ! ॥ इति ।

किंविशिष्टया भक्त्या कथोपनीतया त्वत्कथाश्रवणेन प्राप्तया पुनः कीदृश्या निजकर्मलब्धया त्वदाराधनरूपैः स्वस्ववर्णाश्रमकर्मभिः प्राप्तया कीदृशास्ते योगिनः त्वदर्पितेहाः ।

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्" ।

इत्याद्युक्तप्रकारेण त्वय्यर्पितानि लौकिकवैदिककर्मकलापानि यैस्ते ॥ ५ ॥ अथ यद्यपि "अस्याऽपि देववपुषो मदनुग्रहस्य । स्वेच्छामयस्य न तु भूतमयस्य कोऽपि । नेशे महित्ववसितुं मनसाऽन्तरेण" इत्युक्तं विषयकलुषितैर्मनःप्रभृतीन्द्रियैस्तव महिमा ज्ञातुं न शक्यते तथापि त्वद्दिव्यमङ्गलविग्रहप्रवणैरत एवाकलुषितैस्तैरेव साक्षात्कर्तुमर्हतीत्याह—हे भूमन् ! अनन्ताप्राकृतगुणविशिष्ट ! तदुक्तम्—

"न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि । वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः" ॥

इति । अगुणस्य ते प्राकृतगुणरहितस्य ते महि महिमानं द्वितीयार्थे प्रथमा विबोद्धुं ज्ञातुम् अमलान्तरात्मभिर्वशीकृतमन आदिभिरिन्द्रियैरर्हति—

"दृश्यते त्वग्रयया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः । मनसा तु विशुद्धेन" ॥

इत्यादिश्रुतेः तथा च ब्रह्मा नारदं प्रति—

"ऋषे ! विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः" ।

इति । नान्यथा चस्त्वर्थे न तु केनाप्युपायेनेत्यर्थः । तत्र हेतुः, अविक्रियात् विषयात्मकानीन्द्रियाणि विकारात्मकानेव पदार्थान् गृह्णन्ति तव त्वविकारात्मकत्वात् तथा च पराशरः—

"अविकाराय शुद्धाय नित्याय परमात्मने । सदैकरूपरूपाय विष्णवे प्रभविष्णवे" ॥

इति । तत्कुतः ? स्वानुभवात् स्वीयज्ञानानन्दानुभवात् मलिनेन्द्रियाणि शब्दादीन्येव विषयीकुर्वन्ति न तु नित्यज्ञानानन्दानुभवस्वरूपं त्वामित्यर्थः । तदपि कुतः ? यतोऽरूपतः प्राकृतरूपरहितत्वात् "आदित्यवर्णं तमसः परस्तात्" इत्यादिश्रुतेः। तदुक्तं मोक्षधर्मे—

"न भूतसङ्घसंस्थानो देहोस्य परमात्मनः" ।

इति । अनन्यबोध्यात्मतयेति स्वप्रकाशत्वेन नान्यैर्बोध्य आत्मा दिव्यविग्रहः स्वरूपं वा यस्य तस्य भावः तत्ता तया तथा च भगवद्वाक्यम् ।

"नाहं वेदैर्न तपसा न दानेन च चेज्यया" । "भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन !" ।। इति ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

किञ्च, पुरेहेति । निजकर्मलब्धया कथारुचिरूपकथोपनीतया रुचिरूपया आत्मतत्त्वमारभ्य श्रीभगवत्तत्त्वपर्यन्तमनुभूय ते तव परमान्तरङ्गां गतिं सामीप्यं प्रपेदिरे सप्रतिपत्तिकं प्रापुरित्यर्थः ॥ ५ ॥ अथापि भूमन् ! यद्यपि विबुध्येत्युक्तं तथापि तव कथञ्चिन्निर्विशेषज्ञानं स्यादपि विशेषगुणज्ञानन्तु सम्यक् (न) स्यादित्याह ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अत्र प्रमाणं दर्शयन्नाह—पुरेह भूमन्नित्यादि । हे भूमन् ! सर्वोपरि विराजमान ! इह निःश्रेयसलिप्सायां योगिनश्चिरं योगे कृताभ्यासा अपि योगैरकृतार्थाः सन्त इत्यपेरर्थः । पश्चात्त्वयार्पितेहास्त्वयि अर्पितमीहामात्रं यैस्तथा सन्तो निजकर्मलब्धया त्वयीहार्पणरूपं यन्निजं कर्म तेन लब्धया प्राप्तया भक्त्यैव विबुध्य जागृद्दशां लब्ध्वा हे अच्युत ! ते तव परां गतिं तव निजं धाम प्रपेदिरे । भक्त्यैवेत्येवकारोऽन्ययोग-व्यवच्छेदपरः, न ज्ञानादिनेत्यर्थः । भक्त्या कीदृश्या ? कथोपनीतया तव कथामात्रेणैव प्रस्तुतयेत्यनायास-साध्यत्वम् । एतेन 'तेषामसौ क्लेशल एव शिष्यते' इति यदुक्तं तत् सप्रमाणमेव ॥ ५ ॥ एवम्भूतास्तव गुणा येषां कथयैव भक्तिरुत्पद्यते, उत्पन्नया च तया सुखेन त्वत्पदप्राप्तिस्तथापि किं तव गुण-महिमा इयानेवेति वक्तुं न शक्य एवेत्याह—तथापीत्यादि । हे भूमन् ! अपरिच्छिन्नवैभव । ते गुणस्य ऐश्वर्यादिगुणषट्कस्य महिमानं विबोद्धुमर्हति न समर्थो भवति कश्चिदिति शेषः । अमलानि निर्मलानि अन्तरन्तःकरणानि आत्मा च येषां तैर्विशिष्टोऽपि, विशेषणे तृतीया; अथवा, आत्मानश्चेति बहुवचनमेव, आत्मा च आत्मा च आत्मा च आत्मान इत्येकशेषः । धृतिबुद्धिस्वभावा आत्मानः, 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावः' इत्याद्युक्तेः । पूर्ववत् तृतीया । महि कीदृशम् ? अविक्रियाद्विक्रिया विकारस्तामततीति विक्रियात्, न तथा अविक्रियात् विकारशून्यमित्यर्थः । तर्हि किं बोध्यमेव न भवति ? तत्राह—स्वानुभवादनन्यबोध्यात्मतयैव बोद्धुमर्हति, स्वे भक्तास्तेषामनुभवः स्वानुभवो भक्तानुभवस्तस्मात् । अनन्यबोध्यात्मतया तन्मात्रबोध्यात्मकत्वेन बोद्धुमर्हति, न चान्यथा नान्यप्रकारेण । कुतः ? अरूपतः—अनिरूपणात् हेतोः; 'रूप निरूपणे' रूपणं रूपं, न रूपोऽरूपस्तस्मात्; यद्वा अमलान्तरात्मभिः सात्वतैरगुणस्य प्राकृतगुणरहितस्य तव महिमा तथा तेनैव प्रकारेणापि प्राप्तः । कस्मिन् काले ? अर्हति योग्ये काले भक्तिसम्पन्नतायां सत्याम् । 'अर्ह' प्रशंसायामित्यतः शतृ-प्रत्यये रूपम् । कोऽसौ प्रकार इत्याह—अविक्रियात् अविकारात् स्वानुभवात् अरूपतश्चेत्यस्य पूर्ववन्निरुक्तिः । अनन्यबोध्यात्मतया च भक्तैर्विना नान्येषां बोध्यस्तस्य भावस्तत्ता तया च, अत एव प्रकाराः, न चान्यथेत्युपसंहारः । अथवा, तव महिमा ब्रह्म अमलान्तरात्मभिः पुरुषैस्तथार्हति योग्ये काले बोद्धुमपि, न तु भवान् दृश्यमान-श्रीविग्रहः । तथा बोद्धुमपीति तमेव प्रकारमाह—अविक्रियादित्यादि पूर्ववत् । अथवा, आत्मभिरात्मभूतैर्योगिभिस्तथा तेनैव प्रकारेणापि । कुत्र ? विमलान्तर्विमलेऽन्तःकरणे ! कीदृशि ? अर्हति योग्ये । अन्यत् पूर्ववत् । अथवा, तव महि महिमानं मा लक्ष्मीर्वहति नान्यः । कीदृशी ? आत्मभिर्यत्नधृतिबुद्धिवर्ष्मभिरन्तर्विमला अन्तः शुद्धिमती । कुतः ? स्वानुभवात् । कीदृशात् ? अविक्रियात् अखण्डात्, अरूपात् रूप्यत इति रूपम्, अनिरूप्यादित्यर्थः । सैवार्हति, नान्य इति को नियमः ? तत्राह—अनन्यबोध्यात्मतया, तां विनान्येषामबोध्यस्वरूपतया, न चान्यथा, नान्येन प्रकारेण; सैवार्हति, नान्यः कोऽपीत्येवंरूपेण प्रकारेणेति यावत् ॥ ६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

भक्तिजनितं ज्ञानं हि ज्ञानम्, तस्योपास्योपासकत्व–ज्ञानरूपम्, तेनैव निःश्रेयसावाप्तिरिति दर्शयति–पुरेत्यादि । हे भूमन् श्रीकृष्ण ! इह निःश्रयसलिप्सया योगिनश्चिरं योगाभ्यासे कृतपरिश्रमाः 'नित्ययोगे इन्' योगैरकृतार्थाः सन्तः पश्चात्त्वय्यर्पितानीहानि इहा चेष्टामात्रं देहमात्राणि निजकर्माणि शुभाशुभकर्माणि च तैर्लब्धया भक्त्यैव विबुध्य उपास्यत्वेन त्वां बुद्धवा अज्ञः सुखेन ते परां गतिं चरणारविन्दलक्षणं परमं पदं प्रपेदिरे । गतिश्चरणम्, गम्यतेऽनेनेति 'करणबोधिकोक्तिः; कथोपनीतया कथा तव गुणानां गानं श्रवणं वा तयोपनीतया, अतः केवलेन योगेन न भवन्तीति भावः ॥ ५ ॥ एवम्भूतास्ते गुणा येषां कथयैव भक्तिरुत्पद्यते, उत्पन्नया च तया सुखेन त्वत्पदप्राप्तिः, तथापि तव गुण-महिमा किं वक्तुं शक्यते ? नैवेत्याह–तथापीति । हे भूमन् अपरिच्छिन्न ! ते तव गुणस्य महि महिमानं विरोद्धुं माऽर्हति कोऽपीति शेषः । स कीदृशः ? अमलं निर्मलमन्तः अन्तःकरणमात्मदेहश्च तैर्विशिष्टोऽपि, 'विशेषणे तृतीया' तर्हि किं मम गुणमहिमा अबोध्य एव ? तत्राह अनन्यबोध्यात्मतया बोद्धुमर्हति, न चान्यथा । अन्यैर्भक्तिव्यतिरिक्तैर्योगादिभिर्बोध्यः स चासौ आत्मा स्वरूपश्चेति स तथा, न तथा अनन्यबोध्यात्मा तस्य भावस्तत्ता तया अन्यप्रकारेण बोद्धुं नार्हत्येव । महि कीदृशम् ? अविक्रियादविक्रिया ह्रासवृद्धिरूपा तामततीति विक्रियात् न विक्रियात् अविक्रियात्, कुतः ? स्वानुभवात् स्वप्रकाशाद्धेतोः; अरूपतोऽनिरूप्याद्धेतोः । रूप्यत इति रूपम् । अनिरूप्यत्वं कुतः ? अनन्यबोध्यात्मतयेति वा, अनन्यबोध्यात्मतया हेतुत्वं द्रढयति–न चान्यथा, नान्यप्रकारेणेत्यपरोऽर्थः । यद्वा, अगुणस्य प्राकृतगुणरहितस्य तव महि महिमा ब्रह्म अमलान्तरात्मभिः पुरुषैस्तथा तेन प्रकारेणैव विरोद्धुमपि प्रापि । कदा ? अर्हति योग्ये काले 'अर्हः प्रशंसायामिति शतृ' कोऽसौ प्रकारः ? तत्राह अविक्रियादित्यादि । त्रयो हेतवः प्रकाराः अनन्यबोधयात्मतया च, न चान्यथा, एवमादिभिर्विशिष्टैरेव विरोद्धमपि, न तु इदमित्थमिति भावेन स्वरूपनिर्देशेन । न तु त्वमनुभूयमानश्रीविग्रहः कदापि बोध्य इति निर्गलितोऽर्थः । यद्वा, आत्मभिरात्मभूतैरपि योगीन्द्रैरप्यमलान्तः अमलान्तःकरणेऽपि । कीदृशे ? अर्हति योग्ये । अतो ब्रह्मापि वरमेवं प्रकारेण निर्ववतुं शक्यते, तथापि न त्वमित्यर्थः । अथवा, तव महि माहात्म्यं विरोद्धुं मा लक्ष्मीरर्हति, नान्यः कीदृशी ? अमला कैरर्हति ? अन्तरात्मभिरन्तःकरणैः, अन्तःकरणैरमलेति वा । कुतः ? स्वानुभवात् । कीदृशात् ? अविक्रियादखण्डात्,

अरूपतोऽनिरूप्यात् रूप्यत् इति रूपम्, अनन्यबोध्यात्मतया च सापि अनन्यबोध्यात्मा अन्यथा न च अन्यथा तां विनेत्यर्थः, न च कोऽप्यर्हतीति । यद्वा, तव महि अगुणस्य प्राकृतगुणरहितस्येति पूर्ववत् कोऽपि विरोद्धुं मार्हतीति पूर्ववदेव, किन्तु अनर्हत्वे हेतुः– अविक्रियात् स्वानुभवादरूपतो ब्रह्मणो हेतोः ब्रह्मैव तव महिमा, तस्या विक्रियत्वादीनां हेतुत्वात्, अनन्यबोध्यात्मकतया च हेतुभूतया स्वयमेव भवता बुध्यते, न चान्यैरिति भावः । अन्यथा तु न, च-कारस्त्वर्थः । अन्यप्रकारेण नेत्यर्थः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवं श्लोकद्वयेनान्वयव्यतिरेकाभ्यां भगवत्प्राप्तौ भक्तिमेव स्थिरीकृत्य तत्र सदाचारं प्रमाणयति—पुरेति हे भूमन् ! प्रभो ! इह जगति योगिनो भक्तियोगवन्तः एवं त्वय्येवार्पिता ईहा चेष्टा यैस्त्वद्भक्त्यर्थमेव सर्वेन्द्रियव्यापारं कुर्वाणा इत्यर्थः । भक्तियोगश्रद्धावतां वर्णाश्रमकर्मानधिकारान्निजकर्मश्रवणकीर्त्तनाद्येव, तेन लब्धया विशेषतस्तु कथया श्रुतकीर्त्तितस्मृतया उप आधिक्येन नीतया प्रापितया भक्त्या प्रेमलक्षणयैव विबुध्य विज्ञाय तद्रूपगुणलीलादिकमनुभूत्येत्यर्थः । परां प्रेमवत्पार्षदत्वलक्षणां गताः प्राप्ताः । यद्वा, यथा केवलबोधो विफलस्तथा केवलयोगश्चेत्यत्र सदाचारं प्रमाणयति-पुरेति । बहुकालं योगिनो भूत्वाऽपि योगं निष्फलं ज्ञात्वा त्वयि अर्पिता ईहा चेष्टा च निजकर्म च ताभ्यां लब्धया भक्त्या ज्ञानमिश्रयैव विबुद्ध्य त्वां ज्ञात्वा ॥ ५ ॥ एवं यद्यपि केवलया प्रेमभक्त्यैव तव साक्षादेतत्स्वरूपानुभवो भवति तथाऽपि केवलज्ञानस्य विगीतत्वाद्भक्तिमिश्रज्ञानमपि तव निर्विशेषब्रह्मस्वरूपानुभवे कारणं भवति किन्तु ज्ञानञ्च मयि संन्यसेदिति तदुक्तेर्ज्ञानं संन्यासानन्तरमेवेत्याह, तथाऽपीति । यद्यपि केवला भक्तिर्न स्यात्तदपीत्यर्थः । हे भूमन् ! भूः प्रादुर्भावस्तद्युक्तमधुरैतद्रूपप्रादुर्भाववन् ! अगुणस्य प्राकृतगुणरहितस्य तव महिमा महत्त्वं बृहत्वरूप एको धर्मः—

"मदीयं महिमानं च परब्रह्मेति शब्दितम् । वेत्स्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदि" ॥ इति

त्वदुक्तेः "सा ब्रह्मणि स्वमहिमन्यपि नाथ" इति ध्रुवोक्तेश्च महिमशब्देन प्रसिद्ध परंब्रह्म विबोद्धुं स्वयमेव विबोध्यो भवितुमर्हति पच्यते ओदनः स्वयमेवेतिवत् कर्मणः कर्तृत्वं यथा कुठारः स्वयमेव वृक्षं छिनत्तीत्यत्र करणस्य कर्तृत्वं विवक्षितं कस्मान्निमित्तात् ? अमलैः शुद्धैरन्तरात्मभिः स्वानुभवात् स्वकर्मकादनुभवात् । नन्वनुभवः खल्वन्तःकरणवृत्तिः सा च सूक्ष्मदेहविकारमयी निर्विकारं ब्रह्म कथ विषयीकुर्य्यादित्यतो विशिनष्टि-अविक्रियात् न विद्यते विक्रिया विकारो यत्र तथाभूतात् विकारो हि मायाधर्मः स च मायोपरमे कुतः स्यादिति लिङ्गदेहाभाव एव व्यञ्जितः । ननु, तदपि ब्रह्मणोऽविषयत्वेनानुभवविषयत्वानौचित्यादित्यतः पुनर्विशिनष्टि, अरूपतः रूपं विषयस्तदितरात् विषयाकारत्वरहितात् ब्रह्माकारादित्यर्थः । ब्रह्मणा ब्रह्माकारानुभवविषयत्वं न दोष इति । नत्वस्ति किं तद्बोधे प्रकारान्तरं ? तत्राह–अनन्यबोध्य आत्मा स्वरूप यस्य तत्तया नैवान्यथा स विबोध्यो भवितुमर्हतीत्यन्वयः । यथा विषयाकारानुभव एव शब्दस्पर्शादीन् विषयीकरोति न ब्रह्म तथैव ब्रह्माकारानुभव एव ब्रह्मविषयीकरोति न शब्दादीनित्यर्थः ॥ ६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भवदीयवार्ताश्रवणादिरूपया भक्त्या तु भवद्विषयकं ज्ञानमन्यत्र वैराग्यं परा भक्तिस्तया त्वत्प्राप्तिश्च भवत्येवेति सदाचारेणोपपादयति–पुरेति । हे भूमन् ! साकल्यतो ज्ञातुमशक्य ! पुरा ये योगिनः "परो हि योगो मनसः समाधिः" इति वचनाज्जितमनस्काः भक्त्यैव विबुध्य त्वां ज्ञात्वा भक्त्यैव त्वदर्पितेहाः त्वयि अर्पिता ईहा फललिप्सा यैस्ते त्वदितरेषु ऐहिकामुष्मिकपदार्थेषु विरक्ताः सन्तः भक्त्यैव अञ्जः सुखेन ते परां गतिं प्रपेदिरे प्राप्ताः कथम्भूतया ? साधनभूतैः स्ववर्णाश्रमकर्मभिर्ज्ञानद्वारा लब्धया प्राप्तया पुनः कथम्भूतया ? कथोपनीतया त्वत्कथाश्रवणादिना आत्मन्युपनीतया प्रवेशितया एवंभूतया नानाकारयेत्यर्थः । क्रमस्तु प्रथमं यथाऽधिकारं कर्म ततो हरिकथाश्रवणादिसाधनभक्तिद्वारा ज्ञानं ततो ऽनुपादये पदार्थे वैराग्यं भगवति परा भक्तिश्च तथा मुक्तिरिति दिक् ॥ ५ ॥ भगवतः प्राकृतगुणवर्जितत्वान्निर्गुणत्वं स्वाभाविकगुणयोगात्सगुणत्वं दर्शयन् पूर्वोक्तं दुर्ज्ञेयत्वं हेतुभिः कैमुत्तिकन्यायेन च दृढीकरोति–तथापीति द्वाभ्याम् । यद्यप्युक्तप्रकारेण ज्ञानविषयोऽसि तथाऽपि अगुणस्य प्राकृतगुणशून्यस्य ते महि महित्वं इयत्ताम् अमलैः शुद्धैरप्यन्तरात्मभिरन्तःकरणैः कोऽपि बोद्धुं मार्हति न योग्यो भवति "न ते विष्णार्जायमानो न जातो देवस्य महिम्नः परम तमाप" इति श्रुतेः । तत्र हेतुगर्भे सम्बोधनं करोति, हे भूमन् ! इयत्ताशून्य ! हेत्वन्तराण्याह, अविक्रियात् विकारवर्जितापरिमितस्वरूपत्वात् स्वानुभवात्स्वप्रकाशत्वात् रूपं कार्यं तद्विलक्षणत्वात् भावप्रधाना निर्देशाः अनन्यबोध्यात्मतया अन्यनिरपेक्ष्यविज्ञेयस्वरूपत्वेन उक्तसिद्धान्तं दृढयति न चान्यथेति । उक्तार्थोन्यथा न भवति ॥ ६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अत्र सदाचारं दर्शयति–पुरेति । हे भूमन् इह जगति पुरा बहवोऽपि योगिनो योगैस्त्वत्साक्षात्कारमप्राप्य त्वयार्पिताभ्यां ईहनिजकर्मभ्यां लब्धया भक्त्या कथोपनीतया त्वद्वार्त्ताविवृद्धया त्वां विबुध्यानुभूय ते परां गतिं स्थानमञ्जः प्रपेदिरे प्राप्ताः ईहा

लौकिकी-चेष्टा निजकर्म वैदिकमग्निहोत्रादि ताभ्यां लब्धया कर्मोपसृष्टयेत्यर्थः ।। ५ ।। ननु भक्त्या विबुद्ध्येत्युक्तेर्ज्ञानस्यापेक्ष्यत्वात्तत् प्रयासत्यागः कथं तत्राह तथेति । हे भूमन् ! यद्यप्येवं तथापि ते गुणस्य कारुण्याद्येकतमस्य बहुपल्लवस्यैकस्यापि महिमा माहात्म्यसम्पदः कश्चिदतिप्रयासी विद्वानमलैर्विशुद्धैरन्तरात्मभिरन्तःकरणवृत्तिभिर्विबोद्धुमर्हति न तु सर्वः –

"चतुर्मुखायुर्यदि कोऽपि वक्ता भवेन्नरः क्वापि विशुद्धचेताः ।
स ते गुणानामयुतैकमंशं वदेन्नवा देववर प्रसीद ।।" इति ।

वाराहात्, ननु चक्षुषा रूपमिव मनसा तन्महिमा बोध्याऽस्ते किं तच्छुद्ध्येति तत्राह न चान्यथेति शुद्धिं विना तद्बोधो नेत्यर्थः । तच्छुद्धिश्चापेक्ष्या आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिरित्यादिश्रवणात् कस्मान्निमित्तादित्याह – स्वानुभवात् स्वकर्तृकादनुभवात् यथा स्वानुभवस्तथैव न तु सर्वथेत्यर्थः । कीदृशात् अरूपतः रूपं विषयस्तद्रहितात् शब्दस्पर्शादिविषयसंसर्गशून्यादित्यर्थः । अविक्रियात् गुणान्याभिलाषो विक्रिया तद्रहितात् तथानुभवे प्रकारमाह अनन्येति । नान्यैरुपनिषद्भिन्नैः प्रमाणैर्बोध्य आत्मा स्वरूपं यस्य तत्तया घ्राणेन गन्ध इवोपनिषदैव तद्गुणो बुध्यते इत्यर्थः । तथा च कृत्स्नज्ञाने प्रयासं हित्वा भक्तिरेकाङ्गापि कार्या तया बिसतन्तुवदन्तर्गतज्ञानया हृद्विशुद्धिपूर्वा तत्पदप्राप्तिरिति भावः ।। ६ ।।

श्रीसुबोधिनी

अस्मिश्च मार्गे फलसिद्धिर्बहूनां जातेत्याह **पुरेति**, हे **भूमन्** व्यापक, पूर्वमपि विद्यमान, इहास्मिन् **बहवोपि** सङ्घशो **योगिनो** योगेनावधृतभक्तिसामर्थ्याः, अत एव **त्वय्यर्पितेहा** चेष्टा यैस्तेनैव समर्पणलक्षणेन **कर्मणा** त्वत्**सेवा**लक्षण**कर्मणा** वा **लब्धया भक्त्यैव विबुध्य** स्वरूपं ज्ञात्वा **हेच्यु**त केनापि प्रकारेण च्युतिरहित ते **गतिं** मार्गं येन प्रकारेण त्वं गच्छसि तां **प्रपेदिरे**, पश्चात् त्वदनुगानां न कापि चिन्ता, **अञ्जो**नायासेनैव **परां** लोकातीतां **प्रपेदिरे** प्राप्तवन्तः, अत आत्मज्ञानापेक्षायामप्ययमेव मार्ग उचितः ।।५।। एवं लौकिकप्रकारं समर्थयित्वा वैदिकं च व्यवस्थया निरूप्य पौराणिकप्रकारेणापीदमेवोपास्यं न त्वन्तर्यामिरूपमिति वक्तुं तदपेक्षयास्य माहात्म्यं वदिष्यन्नन्तर्यामिरूपं सुकरत्वेन निरूपयत्**यथापी**ति, हे **भूमन् ? अगुणस्य** गुणातीतस्य **ते महिमा**-मलान्तःकरणै**र्बोद्धुं** बोधगोचरीभवितु**मर्हति** योग्यो भवति, हेतौ तृतीया, बोधविषयो **महिमा** भवति, यथा बोधे कर्ता योग्यो भवत्येवं कर्मापि "ग्रामो गन्तुमर्हती"तिवत्, अन्तःकरणनैर्मल्ये **गुणस्य महिमा** चित्ते प्रकाशते दर्पणे मुखवत् प्रयासाभावात्, चित्तं हि सत्त्वाकारं तद् गृह्णाति, अग्रहणे हेत्वभावात्, तत्र विकारं हेतुत्वेनाशङ्क्य परिहरत्य**विक्रिया**दिति, न **विक्रिया** यस्मिन् विकारे हि सति शुद्धचित्तेन न गृह्यते किञ्च **शुद्धं** चित्तमात्मगाम्यात्मस्थितमेव पदार्थं गृह्णाति, महिमा पुनरात्मनिष्ठ एव, अतोपि ग्रहणयोग्यो भवतीत्याह **स्वानुभवा**दिति, **स्वस्यानुभव** एवानुभवो यस्य, आत्मग्रहणेनैव गृह्यत इति **स्व**शब्देनात्मा, महिम्न एव **स्व**शब्दवाच्यत्वे महिम्न एवानु पश्चाद् **भव** उद्भवो यस्मान् महिमसम्बन्ध्यनुभवोन्तःकरणे भवति, **गुणा**तीतस्य चेत् तथा महिमा न भवति तदान्तःकरणे ज्ञानं न भवेदेव, अत एवात्मानमपि गृह्णन् स्वजनकं ज्ञापयत्येव, स्वस्यायं **महिमानुभव**रूप एव वा, **स्वयमेवानुभव**स्तथा सति स्वप्रकाश एव, किञ्च शुद्धे ह्यन्तःकरणे ब्रह्माकारेण परिणते रूपवत्पदार्था एव न गृह्यन्ते महिमा तु ब्रह्मभूत एवेति भिन्नरूपत्वाभावाद् बोद्धुमर्हति, तदाहान**न्यबोध्यात्मत**येति, **अन्येन बोध्य आत्मा स्वरूपं** यस्य तादृशभिन्नोयमात्मत्वेनैव भासमानत्वात्, अन्तःकरणधर्मा वा एते निर्दिष्टाः, सर्वविकारं परित्यज्य ज्ञानरूपेण परिणतं सप्रापञ्चिकविषयग्रहणहेतुभूतवासनारहितं सत् स्वत एव स्फुरज् ज्ञानरूपमन्तःकरणं भगवन्महिमानं गृह्णातीति ॥ ६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'भक्त्यैव ज्ञानं भवति, नान्यथा' इत्यत्र न केवलं शास्त्रमेव प्रमाणम्, अपि तु 'अन्वयव्यतिरेकाभ्यां सदाचारोऽपि प्रमाणम्' इत्याह-पुरेति । 'तवाग्रे मया किं बहुवक्तव्यम् ? महत्त्वेन सर्वज्ञत्वात्' इत्याशयेन सम्बोधयति—भूमन्निति । इह लोके बहवोऽपि पुरा प्रथमं योगिनो भक्तिव्यतिरिक्तानेकोपायवन्तोऽपि सन्तस्तैर्ज्ञानमप्राप्य पश्चात्त्वदर्पितेहाः त्वदर्पिताः लौकिकवैदिकी चेहा कर्मणि यैस्ते निजकर्मलब्धया तैस्त्वदर्पितैर्निजकर्मभिर्लब्धया चित्तशुद्धिद्वारा कथाश्रवणादरादिरूपया ततश्च कथोपनीतया कथाश्रवणजनितप्रेमलक्षणया च भक्त्यैव हे अच्युत ! अञ्जः सुखेनैव ते तव परां गतिं परं तत्त्वं विबुद्ध्य प्रपेदिरे प्राप्ता इत्यन्वयः । संसारे पतनं नैव भवति' इति सम्बोधनेन सूचितम् । यथोक्तं काशीखण्डे—"न च्यवन्तेऽथ मद्भक्ता महति प्रलये यदि ।। अतोऽच्युतः स्मृतो लोकेऽहमेको विष्णुरव्ययः" इति ।। ५ ।। एवं सगुणनिर्गुणविभागमन्तरेणैव सामान्यतो भगवतो दुर्ज्ञेयत्वमुक्तं तत्र 'गुणातीतस्य ज्ञानं कथञ्चिद्भवेदपि, सकलगुणविशिष्टस्य ज्ञानं तु सर्वथा दुर्घटमेव' इत्याह—तथापीति द्वयेन । विषयवासनादूषितान्तःकरणानां दुर्ज्ञेयमपि अगुणस्य गुणातीतस्य ते महिमा तत्त्वममलैस्तपःप्रवचनादिभिः निरस्तनिखिलवासनादोषैः अन्तरात्मभिः अन्तःकरणवृत्तिभिः अनन्यबोध्यात्मतया अन्यैरिन्द्रियादिभिर्न बोध्यः आत्मा स्वरूपं यस्य स अनन्यबोध्यात्मा, तस्य भावस्तत्ता, तया बोद्धुं बोधगोचरो भवितुमर्हति योग्यो भवतीत्यन्वयः । ग्रामो गन्तुमर्हतीतिवत् प्रयोगः । न चान्यथेति घटपटादिवत्

'इदमेवंभूतम्' इत्येवं बोधगोचरो भवितुं नैवार्हतीत्यर्थः। तत्र हेतुत्रयमाह—'अविक्रियात्' इत्यादिपदत्रयेण। तत्र भावप्रधानो निर्देशः। यो हि जन्मादिविक्रियावान् स 'इदमित्थम्' इति बोधगोचरीभवितुमर्हति, ब्रह्मणस्त्वविक्रियत्वात् तत् कथं तथा स्यात् इत्यर्थः। यो हि परप्रकाश्यस्तस्येदमित्थंतया बोधो भवति, ब्रह्मणस्तु स्वानुभवात् स्वप्रकाशत्वात् स कथं स्यात् ? यो ह्याकारविशेषवांस्तस्य तथा बोधो भवति, अक्षरब्रह्मणः अरूपत आकारविशेषरहितत्वात् स कथं स्यादित्याशयः। 'एतत् सर्वं वेदान्तशास्त्रे प्रसिद्धम्' इति सूचयन्नाह—हीति ॥ ६ ॥

अन्वितार्थप्रकाशिका

पुरेति ॥ हे भूमन् ! हे अच्युत ! इह लोके बहवोऽपि पुरा प्रथमं योगिनो भक्तिव्यतिरिक्तानेकोपायवन्तोऽपि सन्तस्ते ज्ञानमप्राप्य पश्चात्त्वदर्पितेहाः त्वय्यर्पिताः लौकिक्यो वैदिक्यश्चेहाः कर्माणि यैस्ते निजकर्मलब्धया तैस्त्वदर्पितैर्निजकर्मभिर्लब्धया चित्तशुद्धिद्वारा कथाश्रवणादरादिरूपया भक्त्या ततश्च कथोपनीतया कथाश्रवणजनितप्रेमलक्षणया च भक्त्यैव अञ्जः सुखेनैव ते तव परां गतिं परं तत्त्वं विबुध्य प्रपेदिरे प्राप्ताः। त्वदर्पितया ईहया निजकर्मभिश्च लब्धयेत्येकं पदं वा ॥ ५ ॥ यद्यपि सगुणनिर्गुणयोरुभयोरपि ज्ञानं दुर्घटं तथापि निर्गुणस्य ज्ञानं कथंचिद्भवेदपि ननु सगुणस्यानन्ताचिन्त्यगुणस्येत्याह—तथापीति ॥ हे भूमन् ! तथापि अगुणस्य निर्गुणस्य ते महिमा तत्त्वम् अमलैः शुद्धचित्तैः अन्तरात्मभिः अन्तर्मुखतया प्रत्याहृतेन्द्रियैः पुरुषैः स्वानुभवात् आत्माकारान्तःकरणसाक्षात्कारात् विबोद्धुं बोधगोचरीभवितुम् अर्हति। इदमग्रेऽपि प्रत्येकं सम्बध्यते। अथवा विबोद्धुं ज्ञातुमर्हति शक्यत इत्यर्थः। नन्वन्तःकरणं सविकारमेव विषयीकरोति तत्कथमात्माकारता तस्येत्यत आह। अविक्रियात् इति। विक्रियाविशेषाकारः तद्रहितात् विशेषपरित्याग एवात्माकारतेत्यर्थः। नन्वन्तःकरणविषयत्वेऽनात्मत्वप्रसङ्ग इत्याशङ्क्याह—अरूपतः रूपं विषयः फलव्याप्यता तद्भिन्नत्वात् वृत्तिविषयत्वमेवात्मनो न फलविषयत्वमतो न दोषः। इत्येतैर्हेतुभिः विबोद्धुमर्हति। कथं तर्हि स्फूर्त्तिः अनन्यबोध्यात्मतया अन्यैरिन्द्रियादिभिर्न बोध्यः आत्मा स्वरूपं यस्य सः अनन्यबोध्यात्मा तस्य भावस्तत्ता तया स्वप्रकाशतयेत्यर्थः। नच ननु अन्यथा घटादिवदेवंभूतमिति विबोद्धुं नैवार्हति वृत्तिफलव्याप्त्योस्तु अयं पन्थाः घटादिजडवस्तुज्ञानविषये अन्तःकरणं चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटाद्याकारेण परिणमते। स एव परिणामोवृत्तिरित्युच्यते वृत्तिप्रतिबिम्बितचिदाभासः फलमित्युच्यते। तत्र वृत्त्या घटाद्यावरकमज्ञानं नाश्यते। चिदाभासेन फलाख्येन घटः प्रकाश्यते। ततोऽयं घट इत्यादि ज्ञानं जायते अतो घटादिस्फुरणार्थं फलव्याप्तिरपेक्ष्यते ब्रह्मविषये तु आवरकाज्ञाननाशाय वृत्तिव्याप्तिमात्रमपेक्ष्यते। ब्रह्माकारवृत्तौ जातायां ब्रह्मस्फुरणार्थन्तु रविदर्शनार्थं दीपापेक्षेव चिदाभासापेक्षा नास्ति ब्रह्मणः स्वयंप्रकाशत्वात्। एतदर्थसंग्रहश्लोकौ च। "बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम् ॥ तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥ ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥ स्वयं स्फुरणरूपत्वान्नाभासस्तत्र युज्यते ॥" यद्वा। अगुणस्य महिमा विबोद्धुमर्हतीत्यत्र हेतवः। अविक्रियात् इत्यादौ भावप्राधान्यम्। विविधा क्रिया विक्रिया तद्रहितत्वात् सगुणस्तु सृष्ट्यादिविविधक्रियावान् अनन्तलीलाचरितनिधिश्च स्वानुभवात् स्वाकारानुभवरूपत्वात् सगुणस्तु न केवलं स्वानुभवरूपः किन्तु ब्रह्मादिनानाऽनन्तरूपः मत्स्यादिरूपोऽपि च अरूपतः उपलक्षणतया रूपादिगुणवत्त्वाभावात् सगुणस्तु अचिन्त्यानन्तकल्याणगुणः अनन्यबोध्यात्मतया स्वप्रकाशतया सगुणस्तु न केवलं स्वप्रकाशः किन्तु अनन्तचरितरूपगुणवत्त्वात् तद्बोधकानन्तश्रुत्यादिशास्त्रभक्तजनेन्द्रियादिबोध्योऽपि अतः अगुणस्य महिमा कथंचित् बोद्धुमर्हति ननु सगुणस्य। अन्यथा इयत्तया इदन्तया च अगुणस्यापि महिमा बोद्धुं नार्हति कुतः सगुणस्य ॥ ६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भक्त्यैव मोक्षप्राप्तिरित्थंभूतान् सदाचारान् दर्शयन्नाह पुरेति। हे भूमन् पुरा पूर्वं इहलोके त्वयि अर्पिता त्वदर्थं कृता ईहा इन्द्रियव्यापाराः यैस्ते बहवोपि योगिनस्तव प्रत्यक्षसंयोगं प्राप्ताः साधवः निजकर्मभिस्त्वदाराधनरूपक्रियाभिर्लब्धया यद्वा त्वयि अर्पितानि ईहालौकिकी चेष्टा च निजानि स्वकीयानि शास्त्रीयकर्माणि च तैर्लब्धयेत्येकं पदं कथोपनीतया शास्त्रोक्तलक्षणसंपन्नैः सद्भिः कृतया तया तव कथया भवत्समीपं नीता प्रापिता या भक्तिस्तयैव त्वन्महिमानं शुद्धजीवात्मस्वरूपं च विबुद्ध्य हे अच्युत अंजः अनायासेन ते तव परां सर्वोत्कृष्टां गतिं ब्रह्मपुरे त्वत्सेवारूपां प्राप्तिं प्रपेदिरे ॥ ५ ॥ हरेर्गुणानामसंख्यतामाह गुणात्मन इति। गुणात्मनः गुणाः सत्यशौचादयोपहतपाप्मादयश्च आत्मनि स्वरूपे यस्य यद्वा गुणाः सत्यादयः आत्मनः स्वरूपभूता यस्य तस्य अस्य जनवृंदस्य हितायावतीर्णस्य ते तव गुणान् सर्वज्ञतातृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तदृष्टिरित्याद्यसंख्येयगुणगणान् चरित्राणि वा विमातुं इयत्तया परिमातुमपि के पुरुषाः ईशिरे समर्था अभवन् ननु कालेन तु सुकल्पैः प्रमातुमशक्या इति चेत्तत्राह वा वितर्के यैः सुकल्पैः निपुणपुरुषैः कालेन देवायुःकालेन भूपांसवो भूमिरेणवः विमिताः गणिताः स्युः तथा खे मिहिकास्तुषारकणा अपि विमिताः तथा दिवि स्वर्गे भासोग्रहादीनां रश्मिपरमाणवोपि विमिताः भूयांस्वादीनामानंत्येपि एकब्रह्मांडस्थितत्वाच्छेषादिर्गणायेदसंख्येयकोटिब्रह्मांडाधिपयोः प्रकृतिपुरुषयोरपि नियामकस्य तव गुणगणनं कथं भवेदिति भावः ॥ ६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु भक्त्या मुक्तिं प्राप्तः कश्चित्किं दृष्टचर इत्यपेक्षायां न केवलं कश्चिदेवापि तु बहव इत्याह ॥ पुरेति ॥ हे भूमन् विपुलानन्दरूप, पुरा पूर्वं, इह लोके, बहवः पुरुषाः, योगिनः भक्तियोगानुग्राहितात्मयाथात्म्ययोगयुक्ताः, त्वदर्पितेहाः त्वयि समर्पिता ईहा-वर्णाश्रमानुगुणधर्मानुष्ठानरूपा चेष्टा यैस्तथाभूताः, निजकर्मभिर्वर्णाश्रमानुगुणैः सत्कर्मभिर्लब्धा निष्पन्ना तया, एकपदत्वे त्वय्यर्पिता ईहा निजानि कर्माणि च तैर्लब्धया, कथोपनीतया नित्यं त्वत्कथाश्रवणादिभिः प्रत्यक्षरूपतां प्रापितया, भक्त्या एव, विबुध्य यथावस्थितस्वरूपस्वभावं त्वां ज्ञात्वा दृष्ट्वेति यावत् 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप इति भगवदुक्तेः । भक्तान्न च्यावयतीति अच्युतस्तत्संबोधनम् । ते तव, परां गतिं मुक्तिं, अञ्जः सुखेनैव, प्रपेदिरे ॥ ५ ॥ ननु 'नेशे महि त्ववसितुं मनसाऽन्तरेण' इति मन्महिमा मदनुग्रहपूर्णपात्रभूतेनापि त्वया स्वदुरवबोध्यत्वोक्तिपूर्वमितरैर्दुरवबोध्यः कैमुत्यन्यायेनोक्तः स एव त्वयैवात्र तु विबुध्य भक्त्यैव कथोपनीतयेति स सुखावबोध्यतयोक्तः कथमेवमेतत्परस्परविरुद्धं यथा प्रतीयेत तथा वदसीत्यत्राह ॥ तथापीति ॥ हे भूमन् निरवधिकातिशयानन्दमयस्वरूप, यद्यपि, अगुणस्य प्राकृतगुणरहितस्य, ते तव, महि महिमा अपरिमितमहामहित्वमित्यर्थः । अमलान्तरात्मभिः मत्प्रभृतिसनकादिभिर्ब्रह्मनिष्ठैः कर्तृभिरित्यर्थः । विबोद्धुं, मा अर्हति । त्वन्महिमा मदादीनामपि बोधगोचरीभवितुमर्हो न भवतीत्यर्थः । तथापि, अविक्रियात् स्वानुभवात् अरूपत इति निर्देशा भावप्रधानास्तेषु पञ्चमी तृतीयार्थे आर्षत्वात् । एवं सति, अविक्रियत्वेन स्वरूपतः प्रकृतिवद्विकाराहित्येन पुरुषवत् स्वभावतश्च विकारराहित्येन, स्वानुभवत्वेन नित्यं प्रत्यक्षितस्वयाथात्म्यानुवत्वेन, अरूपत्वेन जीववत्कर्मायत्तदेहादिविकारराहित्येन, जीवो हि कर्मायत्तशरीरसंयोगवियोगवान् स्वधर्मभूतज्ञानसंकोचविकासात्मकविकारवानतस्तद्रूपतो भगवद्रूपस्य विलक्षणत्वद्योतनायारूपत्वेनेत्युक्तमित्यर्थः । अनन्यबोध्यात्मतया स्वकृपां विनाऽन्यथा इतरसाधनैरबोधनीयस्वयाथात्म्यवत्तया च, बोद्धुं तु अर्हति हि । अन्यथा न 'द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि' इत्युक्तेः सर्वथा त्वन्महिम्नोऽबोध्यत्वेऽपि अविक्रियत्वादिना किंचिन्मात्रतया बोधनमपि संभवत्येवातो न विरुद्धं वदामीत्यर्थः । अमलान्तरात्मभिरविक्रियत्वादितया ज्ञायते न तु स्वरूपस्वभावयोरियत्तयेति समुदायार्थः ॥ ६ ॥

कृष्णप्रिया

हे अच्युत ! पुरा काल में भी अनेक ज्ञान-ध्यान करनेवाले योगियों ने अपने लौकिक कर्म और वैदिक कर्म एवं उन कर्मों के फल आप के श्रीचरणों में समर्पित कर दिये थे । पुनः आप के सेवारूप कर्म और कथा-श्रवण से प्राप्त की गई भक्ति से ही आप के स्वरूप का एवं निज जीव स्वरूप का ज्ञान प्राप्त कर लिया था और अनायास आप के परम पद को भी पा लिया था ॥ ५ ॥ हे भूमन् ! हे सर्वत्र व्यापक हे श्रीकृष्ण ! तथापि निर्गुण रूपधारी आप की महिमा शुद्ध अन्तःकरण वाले यतात्म पुरुषों ने अपनी इन्द्रियों को आत्माभिमुख बना लिया है वे जितचित्त पुरुष केवल अपने अनुभव से विशेषाकार से रहित एवं बिना रूप का होने के कारण स्वप्रकाश रूप से ही जान सकते हैं और कोई उपाय से नहीं ॥ ६ ॥

गुणात्मनस्तेऽपि गुणान् विमातुं हितावतीर्णस्य क ईशिरेऽस्य ।
कालेन यैर्वा विमिताः सुकल्पैर्भूपांसवः खे मिहिका द्युभासः ॥ ७ ॥
तत्तेऽनुकम्पां [1]प्रसमीक्षमाणो भुञ्जान एवात्मकृतं विपाकम् ।
हृद्वाग्वपुर्भिर्विदधन्नमस्ते जीवेत यो मुक्तिपदे स दायभाक् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—यैः सुकल्पैः कालेन वा भूपांसवः खे मिहिकाः द्युभासः विमिताः ते अपि हितावतीर्णस्य गुणात्मनः अस्य ते गुणान् विमातुं के ईशिरे ॥ ७ ॥ तत् ते अनुकम्पां आत्मकृतं विपाकं भुञ्जानः एव प्रसमीक्षमाणः हृद्वाग्वपुर्भिः ते नमः विदधन् यः जीवेत सः मुक्तिपदे दायभाक् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गुणात्मनो गुणानामात्मनो गुणाधिष्ठातुस्ते तव पुनर्गुणान्विमातुमेतावन्त इति गणयितुमपि के ईशिरे समर्था बभूवुर्दूरतस्तद्विशेषवार्ता । कथंभूतस्य तव । अस्य विश्वस्य हिताय पालनाय बहुगुणाविष्कारेणावतीर्णस्य । ननु कालेन निपुणैः किमशक्यमत आह । कालेनेति । वाशब्दो वितर्के । सुकल्पैरतिनिपुणैर्बहुजन्मना महता कालेन भूपरमाणवो विमिता विशेषेण गणिता

---

[1] सुसमीक्षमाणो—श्रीधर. वंशी. वीर. विज. शुक. गिरि. ।

भवेयुः । तथा खे नभसि मिहिका हिमकणा अपि तथा द्युभासो दिवि नक्षत्रादिकिरणपरमाणवोपि ॥ ७ ॥ तस्माद्भक्तिरेव संगच्छत इत्याह । तत्तेऽनुकंपामिति । सुसमीक्षमाणस्तव कृपा कदा भविष्यतीति बहु मन्यमानः स्वार्जितं च कर्मफलमनासक्तः सन् भुंजान एव नातीव तपआदिना क्लिश्यन्नेवं यो जीवेत स मुक्तौ दायभाग्भवति । भक्तस्य जीवनव्यतिरेकेण दायप्राप्ताविव मुक्तौ नान्यदुपयुज्यत इति भावः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

निपुणाः सर्वं कर्तुं समर्था इत्याशङ्कते–नन्विति । 'प्रालेयं मिहिका चाथ' इत्यमरः । दिवि भासन्त इति द्युभासः गुणा आत्मा स्वरूपं यस्य तस्येति गुणानां नित्यत्वमप्राकृतत्वञ्चोक्तम् । तथा च ब्रह्मतर्के–"गुणैः स्वरूपभूतैश्च गुण्यसौ हरिरीश्वरः" इति । ईशिर इहामभावस्त्वार्षः । किञ्च–"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः । स शुद्धः सर्वशुद्धेभ्यः पुमानद्य प्रसीदतु ॥" इति वैष्णवे च । "मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् । सुहृदं सर्वभूतानां साम्यासङ्गादयो गुणाः ॥" इत्येकादशे वक्ष्यति चेति तोषिणी ॥ ७ ॥ यतस्त्वमनन्तकल्याणगुणनिलयो भजतां मोक्षदोऽसि तस्माद्भक्तिरेवेति । तदित्युक्तार्थः । हृद्वाग्वपुरित्यनेन साष्टाङ्गानतिलक्ष्यते "दोर्भ्यां पदाभ्यां जानुभ्यामुरसा शिरसा दृशा । मनसा वचसा चैव प्रणामोऽष्टाङ्ग ईरितः ॥" इति लक्षणात् । इति भाव इति–भक्तिं कुर्वतो जीवतोऽपि मोक्षो, देहावसाने तु तच्छङ्कैव नास्तीति भावः । भुञ्जान एव समये दुःखं सुखञ्च भवदनुकम्पाफलमेवेदमिति जानन्, पिता यथा स्वपुत्रं समये दुग्धं पाययति, निम्बञ्च भक्षयति, आश्लिष्य चुम्बति, पाणितलेन प्रहरति चेत्येवं मम हिताहितं पुत्रस्य पितेव मत्प्रभुरेव जानाति न त्वहं, मयि तद्भक्ते नास्ति कालकर्मादीनां केषामप्यधिकार इति स एव कृपया सुखं दुःखञ्च भोजयति स्वं सेवयति चेति विमृश्य "यथा चरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुम्" इति पृथुरिव प्रत्यहं विज्ञापयन् हृदादिभिर्नमस्कुर्वन्नातीव विलश्यन्यो जीवति स मुक्तिश्च पदञ्च तयोर्द्वन्द्वैक्यं तस्मिन्संसारमुक्तौ त्वच्चरणसेवायाञ्चेत्यानुषङ्गिकमुख्यफलयोर्दायभाग्भवति । यथा पुत्रस्य दायप्राप्तौ जीवनमेव कारणं तथा भक्तस्य जीवने । तच्च भक्तिमार्गस्थितिरेव 'दृतय इव श्वसन्त्यसुभृतः' इति वेदस्तुत्युक्तेरिति विश्वनाथः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गुणात्मन इति । तत्र पूर्वस्मिन्नर्थे पूर्वैरावतारिका उत्तरस्मिंस्त्वियं यथा विशेषतः स्वयमवतीर्णस्याऽस्य तव गुणानां माहात्म्यमियत्त्वमपि न केनचिदपि ज्ञातुं स्यादित्युपक्रमवत् श्रीकृष्ण एवावान्तरप्रकरणस्याप्यर्थं पर्य्यवसाययति––गुणेति । यद्वा, गुणानामात्मनश्चतयितुः पूर्वमवतारान्तरजंगत्प्रकटनेन प्रसुप्तानामपि गुणानामधुना प्रकटनेन प्रबोधनात् । गुणान् प्रकटयत इत्यर्थः । यद्वा, गुणा आत्मानः स्वरूपभूता यस्येति नित्यत्वमप्राकृतत्वं चोक्तम्, तथा च ब्रह्मतर्के––

"गुणैः स्वरूपभूतैस्तु गुण्यसौ हरिरुच्यते । न विष्णोर्न च मुक्तानां क्वापि भिन्नो गुणो मतः ॥" इति ।

तथा श्रीविष्णुपुराणे––

"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः । स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु ॥"

"ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥"

पाद्मोत्तरखण्डे––

"योऽसौ निर्गुण इत्युक्तः शास्त्रेषु जगदीश्वरः । प्राकृतैर्हेयसंयुक्तैर्गुणैर्हेयत्वमुच्यते ॥" इति ।

एकादशे च––

"मां भजन्त्यगुणाः सर्वे निर्गुणं निर्विशेषकम् । सुहृदं सर्वभूतानां साम्यासङ्गादयो गुणाः ॥" इति ।

व्याख्यातं च तैरेव, अगुणा गुणपरिणामा न भवन्ति किं तु नित्या इत्यर्थः । विशेषेण एतावन्माहात्म्या इयत्संख्यावन्तश्चेति मातुं गणयितुं के ईशिरे अपि तु न कोऽपीत्यर्थः तत्र कैमुत्यम् अस्य जगतः सर्वेषामेव जीवानां हितायावतीर्णस्य तदर्थं प्रकटितगुणस्यापि अयमर्थः, यस्य जीवस्य येन यथा हितं स्यात् तथाऽसौ गुणस्तदर्थं प्रकटयितुमपेक्ष्यते तत्र जीवानामानन्त्यं तत्र च स्वभावानामानन्त्यं तत्राप्यवस्थादिभेदेनानन्त्यं अतस्तदर्थं गुणानामप्यानन्त्यं तत्तद्विविधभेदेन परमानन्त्यं स्यादेवेति तद्गणना न सम्भवेत् किमुत कालदेशाद्यपरिच्छिन्ने स्वलोके विहरत इति यैर्विमितास्तेऽपि न ईशिरे इति पूर्वेणान्वयः यद्यपि भूपांस्वादीनामपि यथोत्तरं सूक्ष्मतयाऽऽनत्यं तथापि श्रीसङ्कर्षणादिज्ञानेन तद्गणनमपि सम्भाव्यते ब्रह्माण्डेन परिच्छिन्नत्वात् अनन्तकोटिब्रह्माण्डपरमाणुप्रमाणाश्रय रोमकूपविवरगवाक्षस्य महापुरुषस्याप्यंशिनस्तव तत्कथं स्यादिति भावः । श्लोकद्वयेऽस्मिन् सगुणस्य श्रीकृष्णस्यैव महिम्नि दुर्बोधतातिशयो दर्शितः तस्मादप्यनेन कृतविवृतावस्यापि देववपुष इत्यत्र निर्गुणस्य ब्रह्मणो नासावङ्गीकृतः एतद्द्वयानुसारेण विराट्प्रस्तावस्तु स्वतो बहिर्भूत एवेति सोऽपि नादृतः तस्मात्तैरप्यस्यापीत्यादिश्लोकद्वयव्याख्याद्वयमिति पूर्वपक्षतया दर्शयित्वा श्लोकद्वये

त्वस्मिन्नुत्तरपक्षः कृत इति नासामञ्जस्यं मन्तव्यम् ॥ ७ ॥ तत्त इति । एवशब्दो यथाऽपेक्ष्यमग्रेऽप्यनुवर्त्तनीयः आत्मना कृतमर्जितमित्यवश्यभोग्यतोक्ता अतस्तत्र सुखदुःखादिकममन्यमान इत्यर्थः । विपाक विविधकर्मफलं पुरेह भूमन्नित्यादिरीत्या तद्विधकथयाभिरुचितोक्ताय तुभ्यं हृद्वाग्वपुर्भिर्नमो विदधदिति तत्र त्वाशक्तिं कुर्वन्निति भावः । उपलक्षणं चैतद्दैन्यात्मकस्य भक्तान्तरस्य मुक्तिनामक पदं चरणारविन्द "येनापवर्गाख्यमदभ्रबुद्धिर्भेजेखगेन्द्रध्वजपादमूलम्" इति प्रथमे । यद्वा, अत्र सर्गो विसर्गश्चेत्यादौ नवमपदार्थरूपाया मुक्तेरपि पदे आश्रये दशमपदार्थरूप "दशमे दशमं लक्ष्यम्" इत्यादिनिर्णीते त्वयि स दायभाक् भवति भ्रातृवण्टन इव त्वमेव तस्य दायत्वेन वर्त्तसे अतो वराक्या मुक्तेर्वा का वार्तेत्यर्थः । अत्र तद्व्याख्यायां नान्यादिति बुद्धिपौरुषादिकं निषिद्धं तद्विनाऽपि जीवतः पुत्रस्य दायप्राप्ते अत्रापि जीवत्वं भक्तिमार्गस्थितत्वं ज्ञेयम् "दृतयः एव श्वसन्ति" इत्याद्युक्तेः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

विशेषतः स्वयमवतीर्णस्यास्य तव गुणानां माहात्म्यमियत्त्वमपि न केनचिदपि ज्ञातं स्यादित्याह–गुणात्मन इति । गुणानामात्मनश्चेतयितुः पूर्वमप्रकटनेन प्रसुप्तानामिव गुणानामधुना प्रकटनेन प्रबोधनाद्गुणान् प्रकटयत इत्यर्थः । तथाभूतस्यापीति गुणानां व्यक्ततया विमानयोग्यतोक्ता; विशेषेणैतावन्माहात्म्या इयत् संख्यावन्तश्चेति मातुं गणयितुं क ईशिरे ? अपि तु न केऽपीत्यर्थः । तत्र हेतुः–अस्य जगतः सर्वेषामेव जीवानां हितायावतीर्णस्य । अयमर्थः—यस्य जीवस्य येन यथा हितं स्यात्तथाऽसौ गुणस्तदर्थं प्रकटयितुपेक्ष्यते । तत्र जीवानामानन्त्यम्, तत्र च तत्तत् स्वभावानामानन्त्यम्, तत्राप्यवस्थादि-भेदेनानन्त्यमतस्तदर्थं गुणानामप्यानन्त्यम्, तत्तद्विविधभेदेन च परमान्त्यं स्यादेवेति तद् (गुण) गणना न सम्भवेदिति, यैर्विमितास्तेऽपि नेशिर इति पूर्वेणान्वयः । भूपांश्वादीनां यथोत्तरं सूक्ष्मतयानन्त्यमूह्यम् ॥ ७ ॥ सुसमीक्षमाणः सुष्ठ्वपेक्षमाणः । एवशब्दो यथा पेक्षमग्रेऽप्यनुवर्त्तनीयः । आत्मना कृतमर्जितमित्यवश्यभोग्यतोक्ता, अतस्तत्र सुखदुःखादिकं न मन्तव्यमिति भावः । विपाकं विविधकर्म्मफलम् । हृद्वाग्वपुर्भिर्नमो विदधदिति तत्रैवासक्तिः कार्य्या, नान्यत्रेति भावः । मुक्तिपदं मोक्षो महाकालपुरं वा; यद्वा, मुक्तिरूपं पदं श्रीवैकुण्ठाख्यं स्थानं पादाब्जं वा; यद्वा, अकार–प्रश्लेषेण न मुक्तिर्भक्तानां यस्मात्—यन्माहात्म्यामृतार्णवनिमज्जनेन मुक्तिर्लवणाम्बुकणवत्तुच्छीक्रियते–तस्मिन् पदे पादाब्जे तत्प्रेमलक्षणे वा दायो दानम्, तद्भाक् तद्दाता भवतीत्यर्थः । हृद्वाग्वपुर्भिरित्यस्यात्रैव वान्वयः । ततश्च हृदा दायभाक् संकल्पमात्रेणैवान्येभ्यो मुक्तिपदं ददाति, तथा वचनमात्रेण देहस्पर्शनादिना चेत्यूह्यम् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

गुणविभूत्योर्विवेकं तन्त्रेणाह–गुणात्मनः गुणपरिणामरूपस्याऽस्य प्रपञ्चस्य हितायाऽवतीर्णस्य सर्वज्ञत्वकारणत्वादिविशिष्टस्य ते विभूतिविशिष्टस्य च गुणान्विमातुं ये ईशिरे ते के सुकल्पैः यैरेते भूपांसवः खे मिहिका हिमकणाः द्युभासः नक्षत्राणि च कालेन विमिताः गणिता इति ॥ ७ ॥ इदानीमष्टमेनाशक्तानां प्रपत्तिं विविच्याह–तत्तेऽनुकम्पामिति । तत्ततः कारणात् ते पूर्वोक्तानन्तवभवस्यानुकम्पां जन्मकालिककटाक्षदानरूपां सुतराम् अतिशयिता सम्यगीक्षमाणः चातकवृत्तिरित्यर्थः । आत्मना कृतं विपाकं प्रारब्धं विपच्यते इति तथा तं भुञ्जानः न तु तत्रोद्विग्न इत्येवकारार्थः हृद्वाग्वपुर्भिः ते नमः विदधत् इत्यनेनानुकूल्यादि पञ्चपरिकरोक्तिः एवं प्रकारेण यो जीवेत इति दृप्तत्वोक्तिः । मुक्तिपदेऽचिरादिना दायभाग्भवतीति जीवतः पुत्रादेः पितृदायभावत्वमिवेति भावः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

न चान्यथेत्यनेनाभिप्रेतमेव विवृणोति–गुणात्मनः इति गुणानां कल्याणगुणानामात्मनः आश्रयस्य तव गुणान् अपिशब्दात्स्वरूपमपि विमातुम् इयत्तया परिच्छेतुं क ईशिरे के प्रभवन्ति न केपीत्यर्थः । सत्यं परत्वेनावस्थितस्य मम गुणानपि मातुं नेशिरे न तु विभवस्थितस्येति शङ्कां वारयन् विशिनष्टि–अस्य जगतो हितायावतीर्णस्य विभावास्थितस्यापि विमातुं नेशिर इति भावः । क इत्यनेन बुद्धिकुशला विवक्षितास्तदेव दर्शयितुं क इत्यनेन विवक्षितान्विशिनष्टि–कालेनेति । यैर्महता कालेनापि भुवः पांसवः तथा खे मिहिका हिमकणाः तथा द्युभासः दिवि नक्षत्रादिकिरणपरमाणवो विमिताः विशेषेण गणिताः भवेयुस्तेपि क ईशिरे इत्यन्वयः ॥ ७ ॥ एवं भक्तिप्रपत्त्योर्भगवद्वशीकारसाधनत्वमुक्त्वेदानीं प्रपत्तेर्विशेषमाह–तदिति । तत्तस्माद्दुरवबोधनिस्समिमहिमत्वात्त्वत्प्रपत्तिमन्तरेण त्वन्मायाया दुस्तरत्वाच्च केवलं तन्वादिभिस्त्रिभिः करणैस्तुभ्यं नमो विदधच्छरणं कुर्वन् तवानुकम्पामपराधानवेक्षणेन केवलमनुजिघृक्षारूपां कृपां सुसमीक्षमाणः कृतापराधानामपि प्रपन्नानामुत्तारिकां मन्वानः आत्मकृतं स्वकर्मसम्पादितं विपाकं सुखदुःखादि फलं भुञ्जान एव अनेन प्रपन्नानां प्रारब्धानुभवमात्रमेव कार्यं नतु भगवत्प्राप्तये यत्नान्तरमिति सूचितं यः पुमान् जीवेत स मुक्तिपदे दायभागंशभाग्भवति "अविज्ञाताः कुमारकाः इति श्रुत्युक्तरीत्या त्वत्कुमारप्रायैर्जीवैर्नित्यमुक्तैः सह त्वदनुभवात्मकं दायं रिक्थं विभज्यानुभवतीत्यर्थः ॥ ८ ॥

श्रीश्रीनिवाससूरिकृततत्त्वदीपिका

गुणात्मनस्ते अनन्तकल्याणगुणाकरस्य तदुक्तम् विष्णुपुराणे--

"समस्तकल्याणगुणात्मकोऽसौ, स्वशक्तिलेशोद्धृतभूतसर्गः ॥
इच्छागृहीताभिमतोरुदेहः, संसाधिताशेषजगद्धितोऽसौ" ॥ इति ।

अस्य विश्वस्य हितावतीर्णस्य हितार्थमवतीर्णस्य तथा चोक्तं शुकेन परीक्षितं प्रति—

"कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् । जगद्धिताय सोऽप्यत्र देहीवाभाति मायया" ।। इति ।

ते गुणान् विमातुं इयत्तया प्रमातुं क ईशिरे न केपि समर्था आसन्नित्यर्थः। ननु, बहुकालेन चिरजीविभिः कैश्चित् मातुं शक्यमेवेत्यत्राह–कालेनेति । वाशब्दः सम्भावनायां सुकल्पैरतिसमर्थैर्बहुकालजीविभिर्भूपरिमाणवो विमिता विमातुं सङ्ख्यातुं शक्या भवेयुः तथा खे मिहिका हिमकणाश्चभासः दिवि तारागणकिरणपरमाणवोपि गणयितुं शक्या भवेयुर्न तु तव गुणा इत्यर्थः। तथा च श्रुतिः "विष्णोर्नु कं वीर्याणि नोचं यः पार्थिवानि विममे रजांसि" इत्यादि तथा चैकादशे द्रमिलवाक्यं विदेहं प्रति—

"यो वा अनन्तस्य गुणाननन्ताननुक्रमिष्यन् सतु बालबुद्धिः ।
रजांसि भूमेर्गणयेत्कथञ्चित् कालेन नैवाखिलशक्तिधाम्नः" ।। इति ।। ७ ।।

तस्मात्त्वद्भक्तिरेव संसारनिवर्तकेत्याह–तत्तेऽनुकम्पामिति । तस्मात्कारणात्तेऽनुकम्पां कृपां समीक्ष्यमाणः भवतानुकम्पी भगवान् ममोपरि कृपाकटाक्षं करिष्यत्येवेत्यालोचयन् आत्मकृतं विपाकं स्वप्रारब्धफलं सुखदुःखात्मकं भुञ्जान अनुभवं कुर्वाण एव हृद्वाग्वपुर्भिस्ते तुभ्यं नमो विदधत् कुर्वन् यो मुमुक्षुर्जीवेत स मुक्तिपदे दायभाग् भवतीत्यन्वयः । यथा नित्यानुवृताश्च दायादास्तथायमपि भवतीत्यर्थः । तथा च श्रुतिः "तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयति तेह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः, यथा पादोदरस्त्वचा विमुच्यते एवं ह वै स पाप्मना विनिर्मुक्तः सामभिरुन्नीयते ब्रह्मलोकं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इत्यादि ।। ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गुणात्मन इति हितावतीर्णस्य कृपया प्रकटितगुणस्यापि ॥ ७ ॥ तत्ते इति ।। ८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

वरमविक्रियादित्यादि प्रकारेण तव महिमा ब्रह्म च ज्ञातुं शक्यते, तथापि न तवावतारस्य मत्स्यापिरूपस्यापि गुणान् विमातुं क ईशिरे, न केऽपीत्यर्थः । भवतस्तु यन्नेशेरंस्तत् किमुतेत्यर्थः । तव कीदृशस्य ? हितावतीर्णस्य हितं स्वशक्तिप्राकट्यम्; क इत्यस्य किम् शब्दस्य यच्छब्देन पुनः प्रतिनिर्देशं करोति । कालेन यैर्वेत्यादि । सुकल्पैर्योग्यैः सर्वज्ञैरिति यावत् । अन्यत् सुगमम् ॥७॥ अतः केऽपि ते तत्त्वं न जानन्त्येव, बहिरङ्गत्वात्, भवतास्तु यत्किञ्चिज्जानन्ति, अन्तरङ्गत्वात् । न यावदिति तत्प्रशंसामाह–तत्तेऽनुकम्पामित्यादि । तत् तस्मात् ते तवानुकम्पामनुग्रहं सुष्ठु सम्यक् प्रकारेणेक्षमानोऽनुभवन्, सर्वे दर्शनार्था ज्ञानार्थाः, हृद्वाग्वपुर्भिस्तेतुभ्यं नमो विदधत् कायवाङ्मनोभिर्भजन् यो जीवेत, जीवति स मुक्तिपदे मुक्तिलक्षणे नित्यपार्षदरूपे दायभाक्, अथवा, अमुक्ति अकैवल्यं यथा स्यात्तथा पदे चरणारविन्दे दायभाक् ममोपास्यमिदमेवेति ममकार परस्परं दायभाक् भवति । अथवा, मुक्तिपदे मुक्तिरूपे पदे स दायभाक् खण्डनकृत् भवति । 'दो अवखण्डने' इति घञि रूपम् । इतः परं मुक्तिसुखमन्यन्नास्तीति निश्चिनोति । ननु कथमेवं पूर्वकर्मभोगे दुर्निवारे सति तेन बाध्यमानो हृद् वाग् वपुर्भिर्जनो मां भजतादित्याह–आत्मकृतं विपाकमभुञ्जान एव तवानुकम्पानुभवेनैव तस्य प्रारब्धक्षयात्तदभोगः ॥ ८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

वरिमविक्रियादित्यादि प्रकारेण ब्रह्मापि निर्वक्तुं शक्यते, तथापि न ते गुणा इत्याह—गुणात्मन इत्यादि । ते तव गुणात्मनः सच्चिदानन्दादि–गुणानामात्मनः कृपामैत्रीप्रभृतिकान् गुणान् विमातुं क ईशिरे ? न केऽपीत्यर्थः । ममेति किं ब्रह्मणो नारायणस्य वा ? तत्राह—अस्य पुरो दृश्यमानस्य हिताय भक्तानां मङ्गलायावतीर्णस्य ॥ ७ ॥ अतो भक्तिरेव श्रेयस्करी, यदर्थं भक्तहितायावतरसि, अतः सैव कार्येत्याह—तत्तेऽनुकम्पामित्यादि । एवम्भूतः सन् यो जीवति, स ते दायभाक् । कुत्र ? पदे चरणारविन्दे अमुक्ति अकैवल्यं यथा भवति तथा, नित्यपार्षदः सन् चरणारविन्द-सेवी भवति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अप्राकृतकल्याणगुणमयं तवेदं भगवत्स्वरूपन्तु प्रेमभक्त्याविना विज्ञातुं केऽपि मायासिन्धूत्तीर्णा अपि विद्यावन्तोऽपि न शक्नुवन्ति यदिमे जगज्जना अस्मदादयस्त्वां पश्यतोऽपि न जानन्तीति किं वक्तव्यं तव महामधुरान् गुणानपि सङ्ख्यातुमपि न शक्नुवन्ति तन्माधुर्य्यानुभववार्त्ता दूरे वर्त्ततामित्याह–गुणा आत्मानः स्वरूपभूता यस्येति गुणानां नित्यत्वमप्राकृतत्वं चोक्तं तथा

च ब्रह्मतर्क्के "गुणैः स्वरूपभूतैस्तु गुण्यसौ हरिरीश्वरः" इति अपिस्त्वर्थे गुणात्मनस्तु तव गुणान् विमातुम् एतावन्त इति गणयितुं के ईशिरे शक्नुवन्ति अपि तु नैव आमभाव आर्षः अस्य विश्वस्य हिताय संसाररोगनिवृत्तये अवतीर्णस्य वेति वितर्के यैः सुकल्पैरतिनिपुणैः सङ्कर्षणादिभिर्भूपरमाणवो रेणवोऽपि विमिता गणितास्तथा ततोऽप्यधिकाः खे मिहिका हिमकणा अपि तथा ततोऽप्यधिका द्युभासः दिवि सूर्य्यादीनां किरणपरमाणवस्तथाऽपि ते सङ्कर्षणाद्या यान् अद्यापि गायन्तो गायन्तः सीमानं नैवाप्नुवन्तीत्यर्थः। यद्वा, गुणे त्रिगुणमये जगति आत्मा पालनार्थं मनो यस्य तथाभूतस्यापि तव गुणान् विमातुं न ईशिरे किं पुनर्गुणातीतमहाचमत्कारिदधिचौर्य्यादिक्रीडात्मन इति ॥ ७ ॥ तदेवमन्यत् सर्वसाधनं परित्यज्य भक्तिमेव कुर्वंस्त्वां लभते इति प्रकरणार्थोऽवगतस्तत्र कीदृशः सन् कुर्य्यादित्यपेक्षायामाह—तत्ते इति यस्मादेवं तत्तस्मादात्मकृत विपाक "धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते" इत्यत्र प्रतिपादितं भक्तेरप्यननुसंहितं फलं सुखं तदपराधफलं दुःखं च भुञ्जान एव तं तवानुकम्पां सुष्ठु सम्यगीक्षमाणः समये प्राप्तं सुखं दुःखं च भगवदनुकम्पाफलमेवेदमिति जानन् पिता यथा स्वपुत्रं समये समये दुग्धं निम्बरसं च कृपयैव पाययति आश्लिष्य चुम्बति पाणितलेन प्रहरति चेत्येवं मम हिताऽहितं पुत्रस्य पितेव मत्प्रभुरेव जानाति न त्वहम् मयि तद्भक्ते नास्ति कालकर्मादीनां केषामप्यधिकार इति स एव कृपया सुखदुःखे भोजयति च स्वं सेवयति चेति विमृश्य "यथा चरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितम्" इति पृथुरिव प्रत्यहं भगवन्तं विज्ञापयन् हृदादिभिर्नमस्कुर्वन् नातीव विलश्यन् यो जीवेत स मुक्तिश्च पदञ्च तयोर्द्वन्द्वैक्यं तस्मिन् संसारान्मुक्तौ त्वच्चरणसेवायां चेत्यानुषङ्गिकमुख्यफलयोर्दायिभाग्भवति यथा पुत्रस्य दायप्राप्तौ जीवनमेव कारणं तथा भक्तस्य जीवनं तच्चेह भक्तिमार्गे स्थितिरेव "दृतय इव श्वसन्त्यसुभृतो यदि तेनुविधा" इत्याद्युक्तेरिति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गुणिनस्तु का कथा गुणानामप्यन्तं कोऽपि न जानातीत्याह गुणात्मन इति। गुणानां स्वाभाविकानामात्मन आश्रयस्य अस्य विश्वस्य हितायावतीर्णस्य ते गुणान् विमातुम् एतावन्त इति गणयितुमपि के ईशिरे समर्था बभूवुः न केऽपीत्यर्थः। वेति वितर्के यैः सुकल्पैरपि कालेन यथेष्टेन भूपांसवः तथा खे मिहिका हिमकणा अपि तथा द्युभासः दिवि नक्षत्रादिकिरणपरमाणवोऽपि विमिताः गणिताः भवेयुस्तेऽपि ॥ ७ ॥ यथा त्वां ज्ञात्वा तव परां गतिं पूर्वे प्रपेदिरे सा भक्तिस्तु तव कृपां सुसमीक्षमाणस्य दैन्यादियुक्तस्य त्वत्कृपया जायमानया भविष्यतीत्याशयेनाह—तत्ते इति। आत्मकृतं स्वार्जितं कर्मफल सुखं वा दुःखं वा भुञ्जान एवेत्यनेन दैन्यादियुक्त इति सूचितम् भगवान् कर्मव्यालगृहीते मयि कदा कृपां करिष्यतीत्येवं ते तवानुकम्पां सुसमीक्षमाणः तदर्थं हृदादिभिस्ते तुभ्यं नमो विदधत् साधनरूपिकां भक्तिं कुर्वन् यो जीवेत स मुक्तिदायभाग्भवेत् तव कृपां प्राप्य परमभक्तो भूत्वा विमुक्तो भवेदित्यर्थः। तथा हि भगवान्पूर्वाचार्य्यः—

"कृपाऽस्य दैन्यादियुजि प्रजायते। यया भवेत्प्रेमविशेषलक्षणा॥
भक्तिर्ह्यनन्याधिगतेर्महात्मनः। सा चोत्तमा साधनरूपिकापरा"॥ इति ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

समस्तानां गुणानां ज्ञानन्तु कस्यापि न भवेत्तेषामानन्त्यादित्याह गुणात्मन इति; गुणा आत्मानः "समस्तकल्याणगुणात्मकोऽसौ" इत्यादि श्रीवैष्णवात् स्वरूपानतिरेकिणो यस्य तस्य ते गुणान् विमातुं संख्यातुमपि के ईशाश्चक्रिरे आमभाव आर्षः। तदनुभववार्त्ता तु दूरेऽस्त्वित्यर्थः। कीदृशस्य? अस्य जगतो हितायावतीर्णस्य, ननु निपुणैः कालेन किमशक्यं तत्राह वेति वितर्के यैः सुकल्पैरतिनिपुणैर्महता कालेन भूपांसवः पृथ्वीपरमाणवो विमिताः संख्याता भवेयुः, खे नभसि मिहिका हिमकणाः दिवि भासो नक्षत्रकिरणाश्च तैरपि शेषादिभिस्त्वद्गुणा विमिता नेति ॥ ७ ॥ तस्माज्ज्ञाने प्रयासं हित्वा भक्तिरेव यथाशक्ति कार्येत्याह—तदिति। ते अनुकम्पा कदा स्यादिति सुष्ठु समीक्षमाणः आत्मकृतं स्वार्जितं विपाकं कर्मफल सुख-दुःखं स्वामिनैव पायसनिम्बरसं पित्रेव हितेच्छुना दत्तं भुञ्जान एव हृदादिभिर्नमो विदधत् कुर्वन् व्रतादिभिर्नातीव विलश्यन् यो जीवेत सत्सम्प्रदाये तिष्ठेत् स मुक्तिश्च पदञ्च तयोर्द्वन्द्वैक्यं तस्मिन् मोक्षे तदङ्घ्रिसेवने च दायभाक् भवेत् जीवन्नेव हि पितुः सम्पत्तौ दायं भजेन्नाजीवन्नेव वेदोक्ततद्भक्तिवर्त्मनि तिष्ठंस्तदङ्घ्रिदायभाक् नान्य इति भावः ॥ ८ ॥

श्रीसुबोधिनी

गुणात्मनस्तु महिमा ज्ञातुं न शक्यत इत्याह गुणात्मनस्त इति, सर्वगुणरूपो भगवानेव जातस्ते च गुणा अनन्तास्तेषां विमानेपि कश्चिन्न शक्तः, यतः सर्वजगद्धितार्थमवतीर्णः, बहवोपि मिलित्वा नेशिरे महतापि कालेन सुकल्पैरतिसमर्थैर्भूपांसवो विमिता भवन्ति पंचाशत्कोटिघनस्य गणनायां घनान्तरवत् तदपि गणयितुं शक्येत, ख आकाशे मिहिका हिमकणाः, द्युभासो ज्योतिश्चक्रतेजोंशाः, एते तामसा राजसाः सात्त्विकाः सर्वहितार्थं प्रवृत्ताः परिमितत्वात् गणितुं शक्याः, अपरिमितास्तु भगवद्गुणा गणितुं न शक्याः ॥ ७ ॥ अतो ये सगुणोपासकास्ते गुणज्ञानाग्रहं परित्यज्यास्मदुक्तानुसारेण चेत् प्रवृत्तास्तदा कृतार्था

भवन्तीत्याशयेनाह **तत्** तस्मात् कारणात् **तेनुकम्पां** कृपामेव प्रकर्षेण **समीक्षमाणः** कदा कृपां करिष्यतीति तावत्पर्यन्त**मात्मकृतमेव विपाकं** कर्मविपाकं **भुञ्जानो** हृदयमेव मनो **वाङ्मनोवपुर्भिस्ते नमो विदधद् यो जीवेत स मुक्तिपदे दायभाग्** भवति, यथा पितृद्रव्ये जीवन् पुत्र एव भागी ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गुणात्मनः गुणाधिष्ठातुस्ते तव गुणान् विमातुम् 'एतावन्त' इति गणयितुमपि के ईशिरे समर्था बभूवुः ? 'तदधिष्ठानं तु दूरतः' इति सूचयितुमपिशब्दः । गणनाशक्यत्वे हेतुमाह—अस्य विश्वस्य हिताय पालनाय बहुधा गुणाविष्कारेणावतीर्णस्येति । ननु 'कालेन निपुणैः किमशक्यम् ?' अत आह—कालेनेति । वाशब्दो वितर्के । यैः सुकल्पैरतिनिपुणैः जनैर्बहुजन्मना कालेन भूपरमाणवः, तथा खे आकाशे मिहिका हिमकणाः, तथा द्युभासः दिवि नक्षत्रादिकिरणपरमाणवश्च विमिताः विशेषेण गणिता भवेयुस्तथाभूता अपि के ईशिरे इत्यन्वयः ॥ ७ ॥ 'तस्माद्भजनमेव सङ्गच्छते, नतु ज्ञानाग्रहः' इति फलितमाह—तत्तेऽनुकम्पामिति । यस्मात् ज्ञानं सुदुर्घटं तत्तस्मात् हे भगवन् ऐश्वर्यादिगुणपरिपूर्ण ! यः प्राणी ते तव अनुकम्पां कृपां सुसमीक्षमाणः 'कदा भगवत्कृपा भविष्यति ?' इति प्रतीक्षमाणस्तावदात्मकृतं विपाकं स्वार्जितं कर्मफलमनासक्तः सन् भुञ्जानो हृद्वाग्वपुर्भिस्ते तुभ्यं नमो विदधत् । 'नम' इत्युपलक्षणमन्यासामपि श्रवणादिभक्तीनाम्, तासां मध्ये यथासम्भवं भक्ति कुर्वन्नेव जीवेत् स मुक्तिपदे मुक्तिरूपे फले दायभाग्भवतीत्यन्वयः । 'दायभाक्' इत्यनेन यथा "पितृदायप्राप्तौ पुत्रस्य पितृभजनपूर्वकजीवनव्यतिरिक्तमन्यन्नापेक्षितम्, तथा भक्तस्यापि मुक्तिप्राप्तौ भगवद्भजनपूर्वकं जीवनव्यतिरिक्तमन्यन्न किञ्चिदपेक्षितम्" इति सूचितम् ॥ ८ ॥

अन्वितार्थप्रकाशिका

अतः सगुणस्य महिमा बोद्धुमशक्य इत्याह—गुणात्मन इति ॥ यैः सुकल्पैः अतिनिपुणैः जनैः बहुजन्मकालेन भूपांसवः भूपरमाणवः तथा खे आकाशे मिहिका हिमकणास्तथा द्युभासः दिवि नक्षत्रादिकिरणपरमाणवश्च विमिताः विशेषेण गणिता भवेयुः तेऽपि गुणात्मनः गुणानामात्मनोऽधिष्ठातुः अस्य विश्वस्य हिताय पालनाय बहुधा गुणाविष्कारेणावतीर्णस्य तव गुणान् विमातुमेतावन्त इति गणयितुमपि के ईशिरे समर्था बभूवुः दूरतस्तद्विशेषबोधः । आम्भावः आर्षः ॥ ७ ॥ तदिति ॥ यस्माज्ज्ञानं सुदुर्घटं तत्तस्मात् हे भगवन् ! यः प्राणी ते तवानुकम्पां कृपां सुसमीक्षमाणः कदा भगवत्कृपा भविष्यतीति प्रतीक्षमाणस्तावदात्मकृतं विपाकं स्वार्जितं कर्मफलमनासक्तः सन् भुञ्जानो नातीव तपआदिना क्लिश्यन् हृद्वाग्वपुर्भिस्ते तुभ्यं नमो विदधत् उपलक्षणतया नमनश्रवणादिषु भक्तिषु यथासंभवं भक्ति कुर्वन्नेव जीवेत । तङार्षः । स मुक्तिपदे मुक्तिरूपे फले दायभाग् भवति भक्तस्य जीवनव्यतिरेकेण दायप्राप्ताविव मुक्तौ नान्यदुपयुज्यत इति भावः । जीवनं चात्र भक्तौ स्थितिरेव ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्मात्सर्वप्रकारेण जनैस्त्वानुकंपायुक्तैर्भवितव्यमित्याह तदिति । तत्तस्मात्कारणात् ते तव अनुकंपां दयां सुसमीक्षमाणः हरेः कृपाकटाक्षो मयोपरि कदा भविष्यतीति निरंतरं प्रपश्यमानः हरेराज्ञानुसारेणैव वर्त्तमान इत्यर्थः । आत्मकृतं स्वकृतं विपाकं कर्मफलरूपं सुखदुःखं अनाकुलः सन् भुंजान एव मनोवाणीदेहैः ते तुभ्यं नमो विदधत् नमस्कारं कुर्वन् दुःखप्राप्तावपि तव दोषमगृह्यमाण इत्यर्थः । एवं वर्त्तमानो यो जीवेत् स मुक्तिपदे दायभाक् दायो विभागस्तं भजतीति सः मुक्तौ विभागीत्यर्थः । एवंभूतस्त्वद्भक्तेर्महिमास्तीति श्लोकाभिप्रायः ॥ ७ ॥ स्वकृतापराधं क्षमापयन्नाह द्वाभ्यां पश्येति हे ईश मे अनार्यं असाधुतां त्वं पश्य तत्किमिति चेत्तत्राह आद्ये सर्वेषामादिभूते अनंते अनवधौ अविनाशि मूर्तौ वा परात्मनि सर्वोत्कृष्टस्वरूपे अत एव मायिनां अस्मदादीनां मायाविनामपि मायिनि मोहजनके त्वयि प्रत्यक्षमूर्तौ श्रीकृष्णेपि मायां वितत्य विस्तार्य आत्मवैभवं आत्मनस्तव वैभवं ऐश्वर्यकलापं ईक्षितुं दृष्टुं ऐछंद्रष्टवान् अग्नौ महानले अर्चिः दीपज्योतिरिव तवाग्रे अहं कियानस्मि अपरिमितैश्वर्यवतः सर्वांतर्यामिणस्तव पुरतोऽल्पज्ञस्य कनीयसो वराकस्य मम का गणनेत्यर्थः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न चान्यथेत्यनेनाभिप्रेतमेव विवृणोति ॥ गुणेति ॥ गुणानां कल्याणगुणानामात्मा आश्रयस्तस्य, यद्वा । गुणाः सत्यशौचादयः आत्मनि स्वस्वरूपे यस्य तस्य, 'एते चान्ये च भगवन्नित्या यत्र महागुणाः' इति पृथिव्युक्तेः । अस्य विश्वस्य, हितावतीर्णस्य पालनाय प्रादुर्भूतस्य, ते तव, गुणान् अपिशब्दात् स्वरूपमपि, विमातुमियत्तया परिच्छेत्तुं, के ईशिरे प्रभवन्ति न केऽपीत्यर्थः । क इत्यनेन बुद्धिकुशला विवक्षिताः, तदेव दर्शयितुं क इत्यनेन विवक्षितान्विशिनष्टि—कालेनेति । सुकल्पैर्बुद्धिकुशलतावद्भिः, यैर्वा यैरेव, कालेन महताऽनेहसापि, भूपांसवो भुवो रजःकणाः, तथा खे आकाशे, मिहिका हिमकणाः, तथा द्युभासः दिवि नक्षत्रादिकिरणपरमाणवः, विमिता विशेषेण गणिताः, भवेयुः । तेऽपि क ईशिरे इत्यन्वयः ॥ ७ ॥ एवं भक्तिप्रपत्त्योर्भगवद्वशीकरणसाधनत्वमुक्त्वा इदानीं प्रपत्तेर्विशेषमाह ॥ तदिति ॥ तत्तस्मात् त्वन्महिमावबोधादेर्यथार्थतया संपादनाशक्यत्वात्, प्रपत्तिमन्तरेण त्वन्मायाया दुस्तर-

त्वाच्च। केवलं हृद्वाग्वपुर्भिः मनोवाणीदेहैः करणैः, ते तुभ्यं, नमः विदधत्, कायवाङ्मनोभिस्त्वच्छरणमेव कुर्वाण इत्यर्थः। ते तव, अनुकम्पामपराधानवेक्षणपूर्वं केवलमनुजिघृक्षारूपां कृपां, सुसमीक्षमाणः, आत्मकृतं स्वकर्मसंपादितं, विपाकं सुखदुःखादिफलं भुञ्जानः एव। अनेन प्रपन्नानां प्रारब्धानुभवमात्रमेव कार्यं, न तु भगवत्प्राप्तये यत्नान्तरमिति सूचितम्। यः पुमान् जीवेत, स पुमान् मुक्तिपदे दायभागंशभाक्, भवति। 'अविज्ञाताः कुमारकाः' इति श्रुत्युक्तरीत्या त्वत्कुमारप्रायैर्नित्यमुक्तैर्जीवैः सह त्वदानन्दानुभवात्मकं दायं विभज्यानुभवतीत्यर्थः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गुणात्मन इति : १०.१४.७.

अब्धेः पानमिलाखिलाकलनमप्यन्यत्रिलोकीजनिर्वायुः स्तम्भनमन्तरिक्षगणनं चन्द्रार्कभस्तम्भनम्।
क्वापि क्वापि विभो श्रुतं भुवि परं त्वय्यपि नैतत्क्वचित् कृत्स्नत्वद्गुणवर्णनं यदमुकेनाकारि सर्वांशतः ॥ १७ ॥

कृष्णप्रिया

भगवन्! कदाचित् निर्गुण ब्रह्म को जान लिया जाय। किन्तु निपुण पुरुषों ने, अन्य कवियों ने अथवा देवों ने अनेक जन्म पर्यन्त परिश्रम करके पृथ्वी के कणों को, सूर्य की किरणों को, आकाश के ओस बिन्दुओं को और उसमें प्रकाशमान नक्षत्र तारागण को भले ही गिन डाला है अथवा गिन डाले परंतु उनमें भला ऐसा कौन हो सकता है कि जो आपके सगुण स्वरूप के अनन्त गुणों की गणना कर सके ?। हे नाथ! आप केवल विश्व कल्याण के लिये ही भूतल पर पधारे हैं ऐसे आपकी महिमा कैसे जानी जाय ॥ ७ ॥ हे भगवन्! जो पुरुष प्रति क्षण आपकी असाधारण कृपा की प्रतीक्षा करता रहता है या तो प्रतिक्षण उत्कण्ठा से आपकी अनुकम्पा का अच्छी तरह से अनुभव करता रहता है और अपने कृतकर्मों के फलों सुख दुःखादि को अनासक्त होकर भोग लेता है और भक्ति पूर्ण हृदय, वाणी, और सरोम शरीर से अपने को आपके श्रीचरणों में समर्पित करते हुए प्रणाम करता 'हुआ' अपना जीवन व्यतीत करता है वह मुक्ति का अधिकारी हो जाता है ॥ ८ ॥

पश्येश मेऽनार्यमनन्त आद्ये परात्मनि त्वय्यपि मायिमायिनि।
मायां वितत्येक्षितुमात्मवैभवं ह्यहं कियानैच्छमिवार्चिरग्नौ ॥ ९ ॥
अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः।
अजावलेपान्धतमोऽन्धचक्षुष एषोऽनुकम्प्यो मयि नाथवानिति ॥ १० ॥

कर्दमक्षमा

अन्वयः—ईश! अनन्त! आद्ये परात्मनि मायिमायिनि अपि त्वयि मायां वितत्य आत्मवैभवं हि ईक्षितुं अग्नौ अर्चिः इव ऐच्छम् मे अनार्यं पश्य ? ॥ ९ ॥ अतः अच्युत अजावलेपान्धतमोऽन्धचक्षुषः हि अजानतः त्वत् पृथक् ईश मानिनः रजोभुवः मे क्षमस्व मयि नाथवान् इति एषः अनुकम्प्यः ॥ १० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवं स्तुत्वा भगवंतं क्षमापयितुं स्वापराधं निवेदयति। पश्येति। हे ईश मेऽनार्यं दौर्जन्यं पश्य। यदहं मायिनामपि मायिनि विमोहके त्वय्यपि स्वमायां प्रसार्यात्मवैभवमात्मैश्वर्यमीशितुमैच्छमभिलषितवान्। अहो एवं कर्तुं त्वय्यहं कियान्न किंचित्। यथाग्नेरुद्भूता ज्वाला अग्नौ न किंचित्तद्वदिति ॥ ९ ॥ रजोभुवो रजसो जातस्यातोऽजानतोऽत एवाजावलेपांधतमोंधचक्षुषः अजोऽहं जगत्कर्ताहमिति मदेन गाढतमोरूपेणांधीभूते नेत्रे यस्यातस्त्वत्तः पृथगीशमानिनः। अन्यत्र प्रभुत्वेन वर्तमानोऽपि मयि नाथे सति नाथवान्मद्भृत्य एवायमत एषोनुकंप्य इति मत्वा क्षमस्वेत्यर्थः ॥ १० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् तदा। ईक्षितुं द्रष्टुम्। अहं तु भक्तिलेशमपि न कुर्वेऽपि त्वपराधपुञ्जमिति सानुशयमाह–हे ईशेति ॥ ९ ॥ यतस्त्वं महानतो हेतोः क्षमस्व 'क्षान्तिर्महीयसि' इत्युक्तेः। अतो राजसत्वात्। अत एवाज्ञत्वादेव। 'ध्वान्त गाढेन्धतमसम्' इत्यमरः। अन्धीभूतनेत्रस्य नष्टज्ञानस्य। अतो ज्ञानहीनस्य अजानत इत्यत्र सामान्यतोऽज्ञस्य, इह तु विशेषतोऽज्ञस्येति न पुनरुक्तिः। इत्यर्थ इति-अपराधेऽप्यज्ञभृत्योपरि कृपैवौचितेति भावः। दौर्जन्योचितस्य दण्डस्य मौढ्योचितायाः क्षमायाश्च सामर्थ्यं त्वय्येवास्तीति दयालोस्तव क्षमैवोचितेत्याह–अत इति। हे अच्युत यतस्त्वं महाकृपालुत्वादिगुणेभ्यश्च्युतिरहितः, अहं च महानीचः अतो ममापराधं

क्षमस्व 'नीचे दयाऽधिके स्पर्धा' इति नीतेरिति भावः। महानीचत्वमाहुः–रजोभुवः श्लेषेण रजसो धूलेः पुत्रस्यात एवाज्ञातस्यात एव त्वत्तः पृथगेव ईशोऽहमित्यभिमानवतः। ईशमानित्वं विवृणोति–अजावलेपोऽजन्यत्वमद एवान्धतमः समासान्ताभावस्त्वार्षः। तेतान्धानि चक्षूंषि यस्य तेन मयि कारुण्यचन्द्रोदयेनैव मद्गर्वतमस्यपहृते सति त्वं दृश्यो भविष्यसि नान्यथेति भावः। केन विचारेण क्षमे इति चेत्तत्राह–एष ब्रह्माऽनुकम्प्योऽनुकम्पार्हः यतोऽन्यत्र नाथत्वाभिमानवानपि मयि तु नाथवान् दास एव। यद्वा–मौढ्यान्मय्यपि स्वातन्त्र्यं कुर्वन्नपि वस्तुतो मन्मायाधीनत्वादधीन एवेति मत्वा। 'परतन्त्रः पराधीनः परवान्नाथवानपि' इत्यमरः॥ १०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र ज्ञानस्याप्रयोजकत्वे स्वमेव दृष्टान्तीकुर्वंस्तत्रैव स्वापराधमपि क्षमापयितुमुपक्रमते–पश्येति। आर्यः सुजनः तस्य भाव आर्य्यं तत्तु विज्ञत्वमपि क्रोडीकरोति अतस्तद्विपरीतं दौर्जन्यं मूढत्वं चानार्य्यं पश्येति तस्य प्राकट्यादिकं बोधितं तत्र ईशे स्वप्रभौ तत्र चाद्ये पितरि त्वय्यपीतिदौर्जन्यम् अनन्ते अपरिच्छिन्नमहिम्नि परमात्मनि आत्मनोऽप्यात्मनीति मूढत्वं तत्तदज्ञानत्वेऽपि मायिमायिनि मायां वितत्येति परममूढत्वं किं तत् आत्मनस्तव वैभवं माहात्म्यमीक्षितुमैच्छं यत् द्रष्टुं मञ्जुमहित्वमन्यदपीत्युक्तेः, हि निश्चये। ननु, मम माहात्म्यं द्रष्टुं चेत्तर्हि को दोषः तत्राह–त्वन्माहात्म्यं द्रष्टुं तत्रापि मायां वितत्य द्रष्टुं कियान् को वराकोऽहमित्यर्थः। कियत्त्वे दृष्टान्तः अग्नौ अर्चिरिवेति। यद्वा, आत्मनः स्वस्य वैभवं द्रष्टुमिति दैन्येन पूर्वार्थमाच्छाद्य प्रोक्तम्॥ ९॥ अत इत्यस्य टीकायां प्रभुत्वेनेति प्रभुंमन्यत्वेनेत्यर्थः। यद्वा, अतो ममातितुच्छत्वात् तवातिमहत्त्वाच्च क्षमस्व अतितुच्छत्वमेव दर्शयति–रजो भुव इत्यादिभिः। अजानत इति तमोंऽशश्च व्यञ्जितः, पश्यतामपि मच्चक्षुषां च ताभ्यामेव सगर्वत्वमान्ध्यं च जातमित्याह—अजेति। हि प्रसिद्धौ त्वमपि जानासीति भावः। हे अच्युतेति त्वमेवाच्युतनामा अतः "सकृदेव प्रपन्नो यः" इत्यादिरूपव्रतादपि तवाच्युतिर्योग्यैव अस्माकं च तन्नामतानर्हत्वादेव तादृशच्युतिरपि न सम्भवतीति भावः। एषोऽहमनुकम्प्यः कथं नाथवानिति दास इत्येवम्। ननु, परमेष्ठिनस्तव दास्ये किमर्थं तत्राह—मयि भगवति निमित्ते मदेकप्राप्त्यर्थमिति॥ १०॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

पश्येत्यनार्य्यस्य प्राकट्यादिकं बोधितम्। हे ईशेति स्वप्रभौ तत्र चानन्ते अपरिच्छिन्नमाहात्म्ये, तत्राप्याद्ये पितरि, तत्रापि परात्मनि परमगुरौ–हृदि सर्ववेदप्रकाशनात्, तत्रापि मायिनामपि मायिनि, तत्रापि त्वयि श्रीकृष्णेऽपीति माया विस्तारणस्यायोग्यता, तत्रापि यथोत्तरमाधिक्येनोक्ता। आत्मनस्तव वैभवं माहात्म्यमीक्षितुमैच्छम्, (भा. १०।१३।१५) 'द्रष्टुं मञ्जु महित्वमन्यदपि' इत्युक्तेः। हि निश्चये खेदे वा; कियानिति यद्यप्येवं तत्त्वतोऽपराधो न स्यात्, तथाप्येवमपि कर्त्तुं को वा वराकोऽहमित्यर्थः॥ ९॥ अतो मदतितुच्छत्वान्निजात्यन्त-माहात्म्याच्च क्षमस्व। अतितुच्छत्वमेव दर्शयति रज इत्यादिविशेषणैः। अप्यर्थे हिशब्दः सर्वैरेवान्वेति। हे अच्युतेति–यथाकथञ्चिदपि प्रपन्नस्य सर्वेऽपराधाः क्षम्यन्त इत्यादि माहात्म्यतः कथमपि कुतोऽपि कदापि च्युतिर्नास्ति यस्येत्यर्थः। एषोऽहमनुकम्प्यः, कथं नाथवानिति दास इत्येवम्। ननु परमेष्ठिनस्तव दास्यं किमर्थम्? तत्राह—मयि भगवति निमित्तेत्वदेकप्राप्त्यर्थमित्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, तत्र तत्र हेतुः–अजया माययावलेपो व्याप्तिः, स एव बान्धतमस्तेनाधचक्षुषः॥ १०॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अथ द्वाभ्यां स्वापराधं क्षमापयति। हे ईश! मेऽनार्य्यं दौर्जन्यं क्षमस्व तदेवाह—अनन्ते आद्ये परमात्मनीत्यादि सर्वदेशसर्वकालसर्वावस्थास्ववस्थित्या व्यापके जगत्कारणत्वाद्यसाधारणलक्षणेऽन्तर्यामिणि विभवरूपतया सुलभेऽपि इत्यपिशब्दार्थः। कुतः? मायाविनामपि मोहकेऽर्चारूपे मायामन्तर्धानादिकरणरूपां वितत्यात्मवैभवमीक्षितुं द्रष्टुम् ऐच्छम् अर्चिः स्फुलिङ्गकणः अग्नाविवेति दृष्टान्तेन स्वाल्पव्यक्तिः॥ ९॥ हे अच्युत! अतः कारणात् मे क्षमस्व राजसजन्मनः अजस्य त्वत्तः पृथक्तयेश्वरत्वाभिमानिनः स्वस्य ब्रह्मत्वमानान्धकारेणान्धस्य मे क्षमस्वेति तव क्षमैवोचिता एषः मयि नाथवानिति स्वस्वामिभावरूपसाधारणादनुकम्प्य इत्येवंरूपेणेति॥ १०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्यमभिष्टूय स्वापराधं क्षमापयितुं तावन्निरूपर्यातपश्येति। हे ईश! ममानार्यं दौर्जन्यं पश्य किं तद्यदहं मायिनामाश्चर्यशक्तियुक्तानामपि मायिन्यत्याश्चर्यशक्तियुक्तेऽनन्तेऽपरिच्छेद्यस्वरूपस्वभावे जगत्कारणभूते परमात्मनि मायां वितत्याच्छाद्यात्मैश्वर्यमीक्षितुमैच्छमभिलषितवानित्येतदहम् एवं त्वयि कुर्वन्नहङ्कियान्न किञ्चिदतितुच्छ इत्यर्थः। यथाऽग्नावुत्थितार्चिर्ज्वालास्फुलिङ्गस्तद्वत्॥९॥ मम युक्तमेवैतदिति वदन्नपराधं क्षमापयति–अत इति। हे अच्युत! रजोभुवः रजसा जातस्यात एवाजानतस्त्वन्महिमेति शेषः। त्वत्तः पृथगीशमात्मानं मां मन्वानस्याऽजो ब्रह्मेति योऽवलेपो गर्वः स एव अन्धं तमस्तेनान्धीभूते चक्षुषी यस्य एवम्बिधस्य दौर्जन्यं युक्तमेवेति भावः। अतः दौर्जन्यं क्षमस्व क्षमाप्रकारमाह, मयि नाथवान्मद्भूत्य एवात एषोऽप्यनुकम्प्य इति मत्वा क्षमस्वेत्यन्वयः॥ १०॥

श्रीश्रीनिवाससूरिकृततत्त्वदीपिका

एवं तावत्स्तुतिवाक्यैर्भगवन्तं स्तुत्वा अथ तस्मिन्ननन्तगुणाकरे भगवति शरणागतदोषभोग्यत्वं दोषादर्शित्वं वा वात्सल्यमिति लक्षणलक्षितं वात्सल्यगुणमाकलय्य तदग्रे स्वापराधरूपं दोषमाविष्करोति, पश्येश ! मेऽनार्य्यमिति । हे ईश ! सर्वस्वामिन् ! मे अनार्य्यं दाष्ट्यं धाष्ट्र्यमिति यावत् पश्य आश्चर्यत्वेनावलोकय तदेवाह–योऽहं अनन्ते अपरिच्छिन्नमहिम्नि आद्ये सर्वकारणे परात्मनि चिदचिच्छरीरके मायिमायिनि मायिनामपि मोहके त्वयि मायां स्वमायां वितत्य प्रसार्य आत्मवैभवम् अहो अखिलब्रह्माण्डनायकं भगवन्तमपि मोहितवानित्येवंरूपं देवानां श्लाघारूपमैश्वर्यमीक्षितुं द्रष्टुम् ऐच्छम् इच्छामकार्षं सोऽहं त्वन्महिम्नि विचार्यमाणे कियान् कियत्परिमाणः न किमपीत्यर्थः । कमिव अग्नौ अर्चिरिव यथा अग्नेरुत्पन्नोऽर्चिस्तत्प्रकाश्यस्तत्प्रकाशयितुं न किमपि समर्थस्तद्वदित्यर्थः ॥ ९ ॥ एवं स्वापराधं निवेद्य तं क्षमापयति–अत इति । अतः अपराधस्य कृतत्वात् त्वच्छेषभूतस्य मे क्षमस्व ममोपरि क्षमां मोचय—

"मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन । दोषो यद्यपि तस्य स्यात्" ॥

इति त्वयैवोक्तं हे अच्युत ! शरणागता यस्मान्न च्यवन्ति सोऽच्युत इति नामनिर्वचनम् अतः क्षमस्व । किञ्च, मदुत्पत्तिस्थानं दृष्ट्वा क्षमस्वेत्याह–हि यतः रजोभुवः रजोगुणोत्पन्नस्य तथा च वाराहे अगस्त्यम्प्रति रुद्रः "नारायणः परो देवः" इत्यारभ्य—

"रजस्तमोभ्यां युक्तोऽभूत् रजःसत्त्वाधिकं विभुम् । ससर्ज नाभिकमले ब्रह्माणं कमलासनम् ॥
रजसा तमसा युक्तं सोऽपि मां ससृजे प्रभुः" ।

इति । अजानतस्त्वामिति शेषः । सर्वशेषिणं त्वामजानत इत्यर्थः । अत एव त्वत्पृथगीशमानिनः "प्रजापतिः प्रजा असृजत" इत्यादि श्रुतेः । प्रजापतित्वाभिमानवतः अजाऽवलेपान्धतमोऽन्धचक्षुषः अजायास्तव शक्तिरूपाया मायाया अवलेपेन संश्लेषेणान्धतमो गाढतमस्तेनान्धीभूते चक्षुषी नेत्रे यस्य तस्य कथं क्षान्तिः कार्येति चेदत आह–मयि नाथवानिति । सर्वस्य पितामहत्वेन प्रसिद्धोऽपि मयि सति नाथवानयं मन्नाथ इति यावत् इति मनसि विचिन्त्य मयाऽनुकम्प्यः मम कृपापात्रभूत इति मत्वा क्षमस्वेति भावः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पश्येति, आर्यः सुजनस्तस्य भावः आर्यं तेन विज्ञत्वमपि गम्यते तद्विपरीतमनार्यं दौर्जन्यं मूढत्वञ्च तत्तद्दौर्जन्यमाह—आद्य त्वय्यपीति । मूढत्वम् अनन्ते परात्मनीति परममूढत्वं मायिमायिनि मायां वितत्येति यद्यपि द्रष्टुं मञ्जुमहित्वमित्युक्त तत्रापि स्वगर्वः पर्यवस्यतीत्याह—आत्मेति । कियत्त्वे दृष्टान्तः अग्नावर्चिर्चरिवेति "विष्णोस्तु त्रीणि रूपाणि" इत्याद्यनुसारेण प्रथमपुरुषतया स्तौति ॥ ९-१० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु त्वमपि यद्भक्तत्वाद्दायभागेवासि ? मैवम्, यदि भक्त एवाभविष्यम्, तदा कथमेवमतिमौग्ध्यं मेऽभविष्यदिति स्वमौग्ध्यं प्रदर्शयति—'पश्येश मे' इत्यादि । हे ईश ! मे ममानार्य्यं मौढ्यं पश्य । किं तदित्याह—त्वय्यपीति त्वयापि अनन्ते आद्ये परमात्मनि मायां वितत्यात्मवैभवमीक्षितुमैच्छं मायिनामपि मायिनि मायिनोऽपि मोहयितुं समर्थे । नन्वहमिव त्वमप्येकोऽसि ? नेत्याह—हीत्यादि । हि निश्चितम् । अहं कियान् क्षुद्र एव । तत्र दृष्टान्तः—अग्नौ सति अर्चिरिव । अग्न्याद्यपेक्षया अर्चिः क्षुद्र इव ॥ ९ ॥ तस्मादयं मेऽपराधः क्षन्तव्य एवेत्याह—अतः क्षमस्वेत्यादि । अतः क्षुद्रत्वात् क्षुद्रस्यापराधो महद्भिः क्षम्यत एव । हे अच्युत ! रजोभुवो मे मम अजावलेपान्धतमः क्षमस्व । अजा अविद्या तत्कृतो योऽवलेपो गर्वः स एवान्धतमो गाढं तमः, समासान्तविधेरनित्यत्वादजभावः । अतएवान्धचक्षुषः, अतएव अज्ञानतस्त्वन्महिमानमित्यर्थः । कुतः ? त्वत्पृथगीशमानिनः; त्वत्तः पृथगहमेक ईश इति मन्यमानस्य; यद्वा त्वत् त्वामजानतः पृथगीशमानित्वात् अजावलेपान्धतमोऽन्धचक्षुष इत्येकं वा पदम्, तदा क्षमस्वेत्यस्य कर्माध्याहार्य्यम्; क्षमायां युक्तिं वक्ति —मयि नाथवानिति । मदीय एवायमिति कृत्वा स्वामिना हि भृत्यापराधः क्षम्यते ॥ १० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

भक्ताभावे यद्दूषणं तत् स्वाचरितेनैव दर्शयति—पश्येश इत्यादि । त्वय्यपि परमात्मनि आत्मनोऽपि ब्रह्मणोऽपि परे ॥९॥ तस्मादयं ममापराधः क्षन्तव्य एवेत्याह—अत इत्यादि । न केवलं ममापराध-क्षमापनमेव मेऽभिमतम्, अपि त्वयमनुग्राह्योऽपि, तत्र हेतुमाह—मयि नाथवानिति यदभृत्यत्वाद्भृत्यापराधः स्वामिनैव क्षम्यते ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहन्तु भक्तिलेशमपि न कुर्वे प्रत्युतापराधपुञ्जमेवेति सानुतापमाह, पश्येति । हे ईश ! मे अनार्यम् आर्यः सुजनो विज्ञश्च तस्य भाव आर्य्यं तद्विपरीतमनार्य्यं दौर्जन्यं मौढ्यं च पश्येत्यवधाय समुचितं दण्ड क्षमां वा कुरुष्वान्यथा मादृशानां दौर्जन्यमौढ्ये

एव वर्द्धिष्येते इति भावः । किन्तद्दौर्जन्यं मौढ्यं चेत्यत आह, **आद्ये** स्वकारणत्वात्पितरि तत्रापि **त्वयि सुखेन सहचरैः** सह भुञ्जान एवेति दौर्जन्यम् **अनन्ते** अपरिच्छिन्नैश्वर्य्ये **परात्मनि** आत्मनोऽप्यात्मनीति मूढत्वं मायिमायिनीति परममूढत्वम् एवम्भूतेऽपि त्वयि **मायां** प्रसार्य्य आत्मैश्वर्यमीक्षितुमहमैच्छं हि अहो अहं त्वयि **कियान्** किम्परिमाणकः अचिर्ज्वाला यथा महाग्नेरुद्भूय **तमेव** दग्धुमिच्छेत् ॥ ९ ॥ दौर्जन्योचितस्य दण्डस्य मौढ्योचितायाः क्षमायाश्च सम्भवेऽपि महाकृपालोस्तव क्षमैवोचितेत्याह—अत इति । हे **अच्युत** ! यतस्त्वं महाकृपालुत्वादिगुणेभ्यश्च्युतिरहितः अहं च महानीचः । अतो ममापराधं **क्षमस्व** नीचे दयाधिके स्पर्द्धेति नीतेरिति भावः महानीचत्वमाह, **रजोभुवः** श्लेषेण रजसो धूलेः पुत्रस्य अत एव **अज्ञस्य** अत एव त्वत्तः **पृथगेव** ईदृशोऽहमित्यभिमानवतः ईशमानित्वं विवृणोति—**अजावलेपः** अजन्यत्वमद एवान्धतमः समासान्ताभाव आर्षः । तेनान्धानि **चक्षूंषि** यस्य तेन मयि त्वत्कारुण्यचन्द्रोदयेनैव मद्गर्वतमस्यपहृते सति त्वं दृश्यो भविष्यसि नान्ययेति भावः । केन विचारेण क्षमे इति चेत्तत्राह, **एष** ब्रह्मा **अनुकम्प्यः** मदनुकम्पार्हः यतोऽन्यत्र नाथत्वाभिमानवानपि **मयि** तु **नाथवान्** दास एव । यद्वा, मौढ्यान्मय्यपि स्वातन्त्र्यं कुर्वन्नपि वस्तुतो मन्मायाधीनत्वात् अधीन एवेति मत्वा "परतन्त्रः पराधीनः परवान्नाथवानपि" इत्यमरः ॥ १० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवमियत्तानवच्छिन्नतया भगवत्कृपामूलकभक्तिप्रधानसाधनप्राप्यतया च भगवन्तं स्तुत्वा तं क्षमापयितुं निजापराधं निवेदयति—पश्येति । मायिनामाश्चर्यशक्तिमतामपि मायिनि अत्याश्चर्यशक्तिमति अनन्तेऽपरिच्छिन्ने आद्ये विश्वहेतौ परात्मनि परमात्मनि स्वमायां वितत्य प्रसार्य्य आत्मनः सर्वात्मनस्तवैश्वर्य्यमीक्षितुमैच्छमभिलषितवान् इति मे अनार्य्यं दौर्जन्यम्, हे ईश ! पश्य यतः एवं कर्तुं त्वयि अहं कियान्न किञ्चिदपि अग्नार्वचिस्तदुद्भूता विस्फुलिङ्गा यथा न किञ्चित्तद्वत् ॥ ९ ॥ हे अच्युत ! नित्यमूर्त्ते ! रजोभुवः त्वच्छक्तिलेशाद्रजोगुणाज्जातस्य अत एवाजावलेपान्धतमोऽन्धचक्षुषः अजो जगत्स्रष्टाऽहमिति मदेन गाढतमोरूपेणाऽन्धीभूतनेत्रस्य अत एवाजानतः अत एव त्वत्तः पृथगीशमानिनः मयि नाथे सति एव नाथवानतोऽनुकम्प्य इति मत्वा क्षमस्व ॥ १० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

भक्तस्त्वयि दायभाक् अहं त्वपराधीति सानुतापमाह—पश्येति । हे ईश ! मे अनार्यं दौर्जन्यं मौढ्यं च पश्येति विचार्य दण्डं क्षमां वा कुर्वित्यर्थः । ते द्वे दर्शयति । आद्ये स्वकारणत्वात् पितरि त्वयि सखिभिः सह सुखेन भुञ्जान इति दौर्जन्यं अनन्ते अनवच्छिन्नैश्वर्यपरात्मनि मायिनामपि मायिनि विमोहके इति विमूढत्वं ईदृशो मायां वितत्याहमात्मनस्तव वैभवमैश्वर्यमीक्षितुमैच्छम् अहो त्वय्येवं कर्त्तुमहं कियान् न किञ्चित् यथाग्नेरुद्भूतार्चिर्जाला तस्मिन्नकिञ्चित्तद्वत् ॥ ९ ॥ दण्डोऽपि मयि क्षमैव ते महाकृपालुत्वाद्भविष्यतीत्याह अत इति । हे कारुण्यादच्युत ! रजोभुवो रजोगुणाश्रयस्य अतोऽजानतोऽज्ञस्य अजपरेशपुत्रो जगत्कर्त्ताऽहमिति योऽवलेपो गर्वस्तद्रूपेणान्धतमसेन गाढतिमिरेण समासान्ताभाव आर्षः, अन्धानि चक्षूंषि यस्य अतस्त्वत्पृथगीशमानिनो मे अपराधं क्षमस्व केन विमर्शेन क्षमे तत्राह एष विरिञ्चो ममानुकम्प्यः यतोऽन्यत्र स्वतन्त्रत्वेन वर्त्तमानोऽपि मयि मदन्तिके नाथवान् परतन्त्रो भृत्य एवेत्यर्थः "परतन्त्रः पराधीनः परवान् नाथवानपि" इत्यमरः ॥ १० ॥

श्रीसुबोधिनी

एवम्भूतस्यैव भगवतः सर्वोपास्यत्वमुक्त्वा स्वापराधं क्षमापयितुमनुवदति **पश्ये**ति, हे ईश **मेनार्यं** दुष्टत्वं पश्य, **अनार्य**मेवाहानन्त उत्तरावधिरहित **आद्ये** पूर्वावधिरहिते परमात्मनि नियामकात्मरूपेणान्तर्बहिः स्थित एतादृशे **त्वय्यपि मायिना**मपि **मायिनि** मोहके, प्रकृतोपयोगि विशेषणमेतत्, तादृशे **मायां वितत्यात्मवैभवमीक्षितुमैच्छं**, अनेन प्रदर्शनार्थमेवैतदित्यपराधाभावोपि सूचितः, परमेतदत्यनुचितं तत्र हेतुमाह **कियानह**मिति, को वाहं वराकः ? तत्र दृष्टान्तोऽ**ग्नार्वाचि**रिवेति, न ह्यग्नेर्ज्वालाविशेषोऽग्निमेवं कर्तुमर्हति ॥ ९ ॥ **अतोनु**चितं यद्यपि तथापि **क्षमस्व** यतस्त्व**मच्यु**तस्तव न काचित् क्षतिः, मम चायं सहजो दोषो यतोहं **रजोभूः**, तत्राप्यजानतः अर्थात् तव माहात्म्यं, तत्र हेतुस्त्वत्तः **पृथ**गेवाह**मीश** इत्य**भिमान**युक्तः, हेत्वन्तरमप्याहाजोहं न कस्माद्प्युत्पन्न इति योय**मवलेपो** गर्वो वस्तुत**स्त्वज** एव, तेनावलेपेनान्धं **चक्षु**र्यस्य, क्षमायां हेतुमाहै**षोनुकम्प्यो मयि नाथवा**निति, **एष** ब्रह्मानुकम्प्यः कुतः ? **मय्येव** सत्ययं **नाथवान्**, अन्यथा त्वनाथ एव स्यात्, अतो ब्रह्मण एतावत्त्वं मत्त एवेति क्षमोचिता ॥ १० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदेवं भगवन्तं स्तुत्वा क्षमापयितुं स्वापराधं निवेदयति—पश्येति । हे ईश स्वामिन् ! मे मम अनार्यं दौर्जन्यं मूढत्वं पश्य । 'किं तत् ?' इत्यपेक्षायामाह—त्वय्यपि स्वमायां वितत्य प्रसार्य आत्मवैभवं स्वप्रभावमीक्षितुं द्रष्टुमैच्छमभिलषितवानिति । एवं कर्तुं त्वदग्रेऽहं कियान् ? न किञ्चित् । तत्र हेतून् सूचयन् विशिनष्टि—परमात्मनीति । सर्वनियन्तरीत्यर्थः ॥ तत्र हेतुमाह—मायि-

नामपि मायिनि मोहके इति । तत्रापि आद्यन्तशून्यत्वे हेतुमाह— आद्ये सर्वकारणभूते पूर्वावधिरहिते इति । अनन्ते विनाशरहिते । 'एतत् सर्वं प्रसिद्धमेव' इत्याशयं सूचयन्नाह—हीति । असामर्थ्ये दृष्टान्तमाह—अग्नावर्चिरिति । यथा अग्नेरुद्भूता अर्चिः ज्वाला अग्नौ न कमपि स्वप्रभावं कर्तुं शक्नोति, तथा त्वत्त उद्भूतोऽहमपि त्वयि न कमपि स्वप्रभावं कर्तुं शक्त इत्यर्थः ॥ ९ ॥ यद्यप्यहं सर्वथाऽनुचितमेव कृतवान्, तथापि मयि निकृष्टे सर्वोत्तमस्य तव क्षमैव युक्ता, अतो ममापराधं क्षमस्व । तत्र भगवतः सर्वोत्तमत्वं द्योतयन् सम्बोधयति - अच्युतेति । त्वद्विमुखा एव सर्वे देशतः कालतोऽवस्थातो गुणत ऐश्वर्यादिभ्यश्च च्युता भवन्ति, तव भक्तानां तु कुतोऽपि कथमपि त्वत्कृपया च्युतिर्न भवति । तव च्युतिस्तु दूरापास्ता, अतस्त्वं सर्वोत्तम इति भावः । तर्हि 'कुत एवं ममापराधं कृतवान् ?' तत्राह—त्वत्पृथगिति । 'त्वत्तः पृथक् अहमेव ईश । इति अभिमानवतः । तत्र हेतुमाह—हि यस्मात् त्वत्प्रभावमजानतः । तत्रापि हेतुमाह—अजेति । अजा त्वन्माया, तस्याः योऽवलेपः सम्बन्धः, तेन यत् अन्धं तमः गाढमज्ञानम्, तेन अन्धं चक्षुः विवेकहेतुरन्तःकरणं यस्य तस्य । तत्रापि हेतुमाह—रजोभुव इति । रजोगुणादुत्पन्नस्येत्यर्थः । 'तथापि केन विचारेण क्षमा कर्तव्या' इत्यपेक्षायामाह–एष इति । 'मयि नाथे स्वामिनि सत्येव अयं नाथवान्, ममोपेक्षितश्चेत्तस्यास्य कोऽप्यन्यो रक्षकः कुत्रापि स्थानं च नास्ति' इति हेतोरेष मम भृत्यो मयाऽनुकम्प्यः 'मत्कृपायोग्य' इति मत्वा इत्यर्थः ॥ १० ॥

अन्वितार्थप्रकाशिका

पश्येति ॥ हे ईश स्वामिन् ! मे मम अनार्यं दौर्जन्यं मूढत्वं पश्य । योऽहम् अनन्ते आद्ये सर्वकारणे परात्मनि सर्वनियन्तरि मायिनामपि मायिनि त्वय्यपि स्वमायां वितत्य प्रसार्यात्मवैभवं स्वप्रभावमीक्षितुं द्रष्टुमैच्छमभिलषितवान् । अग्नौ अर्चिरिव यथा अग्नेरुद्भूता अर्चिः ज्वाला अग्नौ न कमपि स्वप्रभावं कर्तुं शक्नोति तथा एवं कर्तुं त्वदग्रेऽहं कियान् न किञ्चित् ॥ ९ ॥ अत इति ॥ हे अच्युत ! अतः रजोभुवः रजोगुणादुत्पन्नस्य त्वत्तः पृथक् अहमेवेश इति अभिमानवतः हि यस्मात् त्वत्प्रभावमजानतः अजा त्वन्माया तस्या योऽवलेपः संबन्धस्तेन यत् अन्धंतमः गाढमज्ञानं तेन अन्धं चक्षुः विवेकहेतुरन्तःकरणं यस्य तस्य अजो जगत्कर्ताऽहमिति योऽवलेपो मदः स एवान्धंतमः । समासान्ताभावः आर्षः । तेनान्धीभूते चक्षुषी यस्येति वा ममापराधम् अन्यत्र प्रभुत्वेन वर्त्तमानोऽपि मयि नाथे स्वामिनि सति नाथवान् मम भृत्यो मयाऽनुकम्प्यः मत्कृपायोग्य इति मत्वा क्षमस्व ॥ १० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अत इति अतो हेतोर्हे अच्युत रजोभुवो रजोगुणोत्पन्नस्य अत एव त्वां प्रत्यक्षपरमेश्वरमजानतः अजो विश्वकर्त्ता अहमस्मीत्यवलेपो मदः स एव अंधतमोगाढध्वांतं तेनांधीभूतानि चक्षूंषि यस्य तस्य अत एव त्वत्तः पृथगीशमानिनो मे मम अनार्यं क्षमस्व मयि स्वामिनि सति नाथवान् स्वामिमान् मद्दास एव अतो मे एषोऽनुकंप्यो दयां कर्त्तुमर्हं इति ज्ञात्वा ममापराधं क्षमस्वेति संबंधः ॥ ९ ॥ संप्रति भगवतो माहात्म्यं द्योतयन् स्वस्यात्यऽल्पत्वमाह क्वेति तमआद्यष्टावरणैः संवेष्टिते ब्रह्मांडरूपे घटे निजमानेन सप्तवितस्तिप्रमाणः कायो देहो यस्य एवंभूतोऽहं क्व ईदृग्विधानामगणितब्रह्मांडरूपाणां परमाणूनां चर्यायै भ्रमणार्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य एतादृशस्य च ते तव महित्वं क्व अतोऽत्यल्पे मयि त्वया कृपा विधेयेति श्लोकाभिप्रायः द्वौ । क्व शब्दौ तयोर्महदंतरं सूचयतः तमः प्रकृतिः खमाकाशः चरो वातः वार्जलम् ॥ १० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमभिष्टूय स्वापराधं क्षमार्पयितुं तावत्तं निरूपयति ॥ पश्येति ॥ हे ईश, अहं मायिनामाश्चर्यशक्तियुक्तानामपि मायिनि अकलनीयानन्ताश्चर्यशक्तियुक्ते, अनन्ते अपरिच्छेद्यस्वरूपस्वभावे, आद्ये जगत्कारणभूते, परात्मनि परमात्मनि त्वयि अपि मायां वितत्य प्रसार्य, आत्मवैभवमात्मैश्वर्यं, ईक्षितुं प्रदर्शयितुमित्यर्थः । ऐच्छमभिलषितवान् । एतत् । मे मम, अनार्यं दौर्जन्यं, पश्य । अहो अहं त्वय्येवं कुर्वन्नहं, अग्नौ अर्चिः इव, अग्नेरुत्थितः स्फुलिङ्गोऽग्नाविवेत्यर्थः । कियान् हि । न किंचिदतितुच्छ इत्यर्थः ॥ ९ ॥ मम युक्तमेवैतदिति वदन्नपराधं क्षमापयति ॥ अत इति ॥ हे अच्युत, रजोभुवः रजोगुणतो जातस्य, अतः, अजानतः त्वन्महित्वमिति शेषः । अजा ब्रह्माहमिति योऽवलेपो गर्वः स एवान्धतमो गाढध्वान्तं तेनान्धेऽन्धीभूते चक्षुषी यस्य तस्य, अतः त्वत्पृथगीशमानिनः त्वत्तः पृथग्भूतमात्मानं मामीश इत्येवं मन्यमानस्य, मे मम, क्षमस्व हि । दौर्जन्यमिति शेषः । अहो एवंविधं दौर्जन्यं कथं सोढुं शक्यमित्यत्राह । अयं मयि, नाथवान् यथातथाविधोऽप्ययं मद्भृत्य एवास्तीति मत्वा, एषः अनुकम्प्यः, इति च मत्वा, क्षमस्व ॥ १० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पश्येति : १०.१४.९.

ज्येष्ठोऽस्मिन् भुवने प्रजापतिरिति प्रख्यातिमापादितो लोकैरस्मि कथं सदाऽखिलगुरौ ज्येष्ठे प्रभौ जाग्रति ।
जातस्तस्य विनिर्णयोऽद्य न परोऽस्त्यज्ञानवृद्धोऽवनौ मत्तुल्यो यदिहाल्पगोपशिशुभिर्ज्ञातं न तज्ज्ञातवान् ॥ १८ ॥

अतिवृद्धवया भ्रान्तो भवतीति जनश्रुतिः । यथार्थाऽद्य मयि श्रीश जाता जनपितामहे ॥ १९ ॥
अदृष्टपूर्वोऽयमभून्ममभ्रमश्छलप्रवृत्तिस्त्वयि यत्प्रभावतः ।
जगज्जनादृष्टविदाऽप्यहो मया नाज्ञाय्यदृष्टं निजमित्यदोऽद्भुतम् ॥ २० ॥
अर्चिः स्वदृष्टया त्वभिमानभावं वहत्वलं भिन्नधिया प्रकाशे ।
कार्यात्महेत्वात्मतया स्थितस्य बह्नेर्हशीशास्ति हि नाभिमानः ॥ २१ ॥

अतः क्षमस्वेति ः १०.१४.१०.

अत्यल्पमुद्गतरजोऽक्षिण यदि प्रविष्टं स्पष्टं करोति पुरुषं सहसाऽन्धमीशः ।
दुर्घर्षमर्षणरजोमयचक्षुषो मे नान्धत्वमद्भुतमितीह कृतं क्षमस्व ॥ २२ ॥
दुर्वासस्थितिराहृता च शुचयो हंसा विमाने कृताः, दुर्वर्णाचलसद्रुचिर्बहुसुरोल्लासस्पृहा सर्वदा ।
किं वैतैर्बहुपातकैरहमहो मोहं बलात् प्रापितः किं वै तैर्बहुपुण्यदैस्तव कृपापर्याप्तिपात्रीकृतः ॥ २३ ॥

कृष्णप्रिया

हे जगदीश ! जरा मेरी उद्दण्डता को–खलता को तो देखिये । मायावियों के मायावी–अनन्त मायी, पुराण पुरुष, हे अनन्त भगवन् ! आप के ही उपर मैंने अपनी माया फैलाकर अपना प्रभाव–सामर्थ्य देखना चाहा, लेकिन मुझ अकिञ्चित्कर की शक्ति ही क्या ! नाथ ! अग्नि-प्रज्वलित आग के सामने तनिक सी अग्नि ज्वाला की इज्जत क्या है ॥ ९ ॥ नाथ ! आप इसलिये मुझे क्षमा करें । अरे प्रभो, मेरे अपराधों को क्षमा करें ? नाथ आखिर तो मैं रजोगुण से उत्पन्न हुआ हूँ आप की महिमा को मैं नहीं जानता । मैंने आपसे भिन्न अपने को संसार का स्वामी माना और मैं अजन्मा हूँ इस प्रकार के अभिमान से छका हुआ मोह के गाठ-घने अन्धकार से अन्धा बना अब प्रभो ! आप यह समझकर कि—"यह मेरा भृत्य है मुझसे यह सनाथ है मेरे बिना यह अनाथ इस पर मुझे अनुकम्पा करनी चाहिये" मेरे अपराधों को क्षमा करे ॥ १० ॥

क्वाहं तमोमहदहंखचराग्निवार्भूसंवेष्टिताण्डघटसप्तवितस्तिकायः ।
क्वेदृग्विधाविगणिताण्डपराणुचर्यावाताध्वरोमविवरस्य च ते महित्वम् ॥ ११ ॥
उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजागसे ।
किमस्तिनास्तिव्यपदेशभूषितं तवास्ति कुक्षेः कियदप्यनन्तः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—तमोमहदहंखचराग्निवार्भूसंवेष्टिताण्डघटसप्तवितस्तिकायः अहं क्व ? च ईदृक् विधाविगणिताण्डपराणुचर्यावाताध्वरोमविवरस्य ते महित्वं क्व ! ॥ ११ ॥ गर्भगतस्य पादयोः उत्क्षेपणं मातुः आगसे कल्पते किं अस्तिनास्तिव्यपदेशभूषितं हे अधोक्षज तव कुक्षेः अनंतः कियत् अपि किम् अस्ति ? ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु ब्रह्मांडविग्रहस्त्वमपीश्वर एवेति चेत्तत्राह । क्वाहमिति । तमः प्रकृतिर्महान् महत्तत्त्वमहंकारः खमाकाशः चरो वायुः अग्निर्वार्जलं भूश्च प्रकृत्यादिपृथिव्यंतैरष्टभिरेतैः संवेष्टितो योंडघटः स एव तस्मिन्वा स्वमानेन सप्तवितस्तिः कायो यस्य सोऽहं क्व क्व च ते महित्वम् । कथंभूतस्य । ईदृग्विधानि प्रकृत्यादिभिः संवेष्टितानि यान्यविगणितान्यंडानि त एव परमाणवस्तेषां चर्या परिभ्रमणं तदर्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य तव । अतोऽतितुच्छत्वात्त्वयाऽनुकंप्योऽहमिति ॥ ११ ॥ अपि च गर्भगतस्य शिशोः पादयोरुत्क्षेपणं मातुः किमपराधाय भवति लोके । अस्तिनास्तिव्यपदेशाभ्यां भावाभावशब्दाभ्यां स्थूलसूक्ष्मकार्यकारणशब्दैर्वा भूषितमभिहितम् । एतेषां शब्दानां भवि विषये उषितं स्थितमिति वा । सर्वं वस्त्वित्यर्थः । अधोक्षज तव कुक्षेरनंतर्बहिः कियदपि किंचिन्मात्रमपि किमस्ति न किंचिदस्तीत्यर्थः । अतः सर्वस्य तव कुक्षिगतत्वेन ममापि तथात्वान्मातृवत्त्वया मेऽपराधः सोढव्य इति भावः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ब्रह्माण्डं विग्रहे वपुषि यस्य स त्वं ब्रह्माण्डाविर्भावयितापीश्वर इति चेद्भवदुक्तिः स्यात्, तत्र तदुक्तौ ब्रह्माह – तदन्तर्गतप्रतीतेस्तस्मिन्नण्डे घटे वा । 'वितस्तिर्द्वादशाङ्गुलम्' इत्यमरः । द्वौ क्वशब्दौ महदन्तरं सूचयतः । ईदृग्विधानि मत्स्वरूपभूतब्रह्माण्डसदृशानि मदधिकरणीभूतांबुसदृशानि वा । त एवेति विधेयापेक्षं पुंस्त्वम् । तदर्थं भ्रमणार्थम् । 'वातायनं गवाक्षोऽथ'

इत्यमरः। यतस्त्वं महानहं न अतो हेतोः। तेन ममैश्वर्यं पराक्रमो वा त्वां प्रति शलभस्य गरुडं प्रतीव न गणनार्हमिति भावः॥ ११॥ अनुकम्प्यत्वे कारणान्तरमाह—अपि चेति। इन्द्रियगाचरीभूतपदार्थानामस्तित्वे व्यपदेशेऽपि तदगोचराणां परमाण्वादीना नास्तित्वव्यपदेशो मा भूदित्येतदर्थमाह–स्थूलेत्यादि। भूषितशब्दस्य कथने वृत्तेरनुपलब्धेः प्रकारान्तरेण व्याचष्टे–एतेषां किमस्ति नास्तीत्येतेषाम्। भुवि लोके, एकत्वं सामान्याभिप्रायम् 'भूः स्थानमात्रे कथितो धरण्यामपि योषिति' इति मेदिनी। इत्यर्थं इति–वस्तुमात्रस्य लोकान्तगतत्वादिति तात्पर्यम्। अक्षेभ्योऽधोऽधोक्षजमिन्द्रियविषयं ब्रह्माण्डं तज्जनयति जानाति वेत्यधोक्षजस्तत्सम्बुद्धौ तथा हे सर्वजनक सर्वज्ञ वेति। एतेन सर्वज्ञस्य तव ज्ञापनमपि पुनरुक्तिरेवेति सूचितम्। यद्वा–अन्तर्मध्ये न विद्यते यत्तदनन्तः "सह सुपा" इति शास्त्रात्समासः। अन्तर्मध्येर्थेऽव्ययम्। इत्यर्थं इति–सर्वजनकत्वात्तवेति भावः। अतः सर्वजनकत्वात्। तथात्वात्तव कुक्षिगत्वात्। इति भाव इति–मातृवदानन्द एव विधेयो न तु कोप इति तात्पर्यम्। अत्र विश्वनाथः—ममापराधोऽवश्यं सोढव्य एव यतस्त्वं माता सर्वस्य त्वत्कुक्षिगतत्वात् "पिताऽहमस्य जगतो माता धाता पितामहः" इति त्वदुक्तेः॥ १२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो अवितुच्छतमोऽहं परममहत्तमं त्वां क्षमयितुमपि नार्हामि यत आस्तां तावत्सर्वप्रपञ्चाप्रपञ्चव्यापकवासुदेवत्वं सर्वप्रपञ्चनाथत्वेऽपि त्वत्तो मम बह्वन्तरमिति वक्तुं सङ्कर्षणविशेषमहत्स्रष्टृप्रथमपुरुषत्वेन स्तौति–क्वाऽहमिति। ब्रह्माण्डस्य घटरूपकत्वं स्वल्पकालत एव नश्वरताऽभिप्रायेण कायस्य सप्तवितस्तित्वं निकृष्टपुरुषत्वविवक्षया महापुरुषस्य तु नववितस्तित्वमवात मुहुः सृष्टिप्रलययोर्निष्क्रमप्रवेशाभ्याम् ईदृग्विधेत्याद्युक्तं रोमविवरत्वं सूक्ष्मतमैकदेशत्वं तदुक्तं श्रीविष्णुपुराणे "यस्यायुतायुतांशांशे विष्णुशक्तिरियं स्थिता" इति महित्वं माहात्म्यम् अतः स्वयमेवानुकम्पां कर्त्तुमर्हसीति भावः॥ ११॥ किञ्च, मादृशैः क्रियमाणोऽप्यपराधस्त्वयि न घटेतैव यतस्तादृशाऽनन्तकोटिब्रह्माण्डनाथोऽपि त्वमस्मत्कृपयैतदेकब्रह्माण्डमपि मातेवोदरे विधाय विराजस इति द्वितीयपुरुषभेदहिरण्यगर्भान्तर्यामिप्रद्युम्नविशेषपुरुषत्वेन स्तौति–उत्क्षेपणमिति। अधोक्षजेति, स्वनियम्यत्वेन अधः कृतं अक्षजम् इन्द्रियं सामर्थ्यं येन हे तादृशेति ममेन्द्रियस्यापि त्वद्वशत्वान्न मयि मूढे दीनेऽपराधो गृहीतव्य इति भावः। कुक्षिशब्देनात्र समष्टिजीवस्य सूक्ष्मदेहरूपहिरण्यगर्भस्थूलदेहरूपविराजोर्व्यापकोऽचिन्त्यशक्तिमयस्तद्देह एवोच्यते। यद्वा, गर्भगतस्य गर्भप्रविष्टस्येति अतिगूढता द्योतिता यथा तस्य तथैव ममेत्यर्थः। तस्य पादयोरुत्क्षेपणं ताभ्यां ताडनं यथा मातुर्जठरे मातुरागसेऽपराधायेति किं कल्पते किं तु न कल्पते न मन्यते अपि तु हर्षाय भवति मम गर्भोऽस्तीति जीवन्त्येवेत्यर्थः। तथा त्वयाऽपि माननीयं नोपराधायेति भावः। ननु, स तदुदरस्थो वर्त्तते त्वं किं ममोदरे तिष्ठसीति चेत्तत्राह—किमस्तीति। अस्तीदमिति मीमांसकाः वदन्ति। नास्तीति साङ्ख्या वदन्ति, विशेषेण अपदेशमात्रभूषितं वन्ध्यापुत्रवत् इति अनीश्वरसाङ्ख्या वदन्ति, एतैः शास्त्रवादैः प्रत्यक्षतश्च यद्भूषितं प्रकाशितं तत्कियदपि तव हिरण्यगर्भान्तर्य्यामिणः पुरुषस्य कुक्षेरुदरस्य अनन्तर्बहिरेवास्ति किं वद नास्त्येव बहिः सर्वाधिष्ठानत्वात् अहमपि तर्ह्येवास्मीति अपराधः क्षन्तव्य इति भावः। यद्वा, अस्ति—नास्तिव्यपदेशेन कथनेन भूषितं स्वस्वमतया शोभितं तदन्यदपि कियत् अस्मदादिकं सर्वमपि तव कुक्षेर्बहिर्नास्त्येवेत्यर्थः। अस्ति जन्म नास्ति नाशो व्ययो नास्त्येवेत्यर्थः। भूषितमिति॥ १२॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो ममातितुच्छतमत्वादहं परममहत्तमेत्वय्यपराधं क्षमापयितुमपि नार्हामीत्याह—क्वाहमिति। ब्रह्माण्डस्य घटरूपकत्वं श्रीभगवन्माहात्म्यापेक्षयातितुच्छत्वाभिप्रायेण। महित्वं माहात्म्यम्, अतः स्वयमेवानुकम्पां कर्त्तुमर्हसीति भावः॥ ११॥ किञ्च, मादृशैः क्रियमाणोऽप्यपराधस्त्वयि न घटेतैवेत्याह—उत्क्षेपणमिति। अधोक्षज! हे शकटस्याधस्तदीयेऽक्षे पुनर्ज्जातोपम! तथा च श्रीहरिवंशे (विष्णु० प० १०१।३०–३३) श्रीवासुदेव-माहात्म्ये श्रीनारदवाक्यम्—

> 'अधोऽनेन शयानेन शकटान्तरचारिणा। राक्षसी निहता रौद्रा शकुनीवेध-धारिणी॥
> पूतना नाम घोरा सा महाकाया महाबला। विषदिग्धं स्तनं क्षुद्रा प्रयच्छन्ती जनार्द्दने॥
> ददृशुर्निहतां तत्र राक्षसीं वनगोचराः। पुनर्ज्जातोऽयमित्याहुरुक्तस्तस्मादधोक्षजः॥' इति।

व्याख्यातञ्च तदीयटीकाकारैः—अधः शकटस्याक्षे पुनर्ज्जात इवेत्यधोक्षजः, इत्यनेन व्रजराजकुमारता-प्रतिपादनेन महालीलत्वसूचनात्। आगसोऽकल्पने हेत्वन्तरगर्भं सम्बोधनम्। लोके हि लीलावन्तः कृतमहापराधस्यापि चौरादेरपराधं क्षान्त्वा प्रत्युत प्रसादं कुर्वाणा दृश्यन्ते, अतो ममापराधो भवता सोढव्य इति तात्पर्य्यम्॥ १२॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम

इदमेव विवृणोति—क्वाऽहमित्याद्यष्टभिः। अहं क्व ते महित्वं च क्व द्वौ क्वशब्दौ तव च मम च महदन्तरं सूचयतः, कीदृगहं तमोमहदहमित्यादिरूपः स्पष्टं तव च कीदृशस्य ईदृग्विधेत्यादि स्पष्टमेव बृहत्त्वाणुत्वरूपस्वरूपोक्त्या व्याप्यव्यापकभाव

उक्तः ॥ ११ ॥ अथ द्वाभ्यां सर्वजगत्कारणस्य श्रीमन्नारायणस्य श्रीकृष्णस्य स्वोत्पादकत्वतदुदरवर्त्तित्वेन च स्वस्य क्षम्यापराधत्वं तस्य चास्य चावतार्यवतारत्वेनाभेदमपि व्यञ्जयति—उत्क्षेपणमिति । हे अधोक्षज ! अधः लीलाविभूतौ अक्षेभ्यो जायत इति अधोक्षजः तत्तद्भक्तेन्द्रियगोचरत्वेन तत्तल्लीलावतारत्वेन च जायत इव "अजायमानो बहुधा विजायत" इति श्रुतेः गर्भगतस्य देहिनो जीवस्य पादयोरुत्क्षेपणं किं तत्तन्मातुरागसेऽपराधाय कल्पते, भवति वेति काकुः अतः कारणादस्तिनास्तिव्यपदेशाभ्यां भूषितमलङ्कृतं चिदचिद्वस्तु अविनाशस्वभावः सत्त्वं विनाशस्वभावो ह्यसत्त्वं सत्त्वासत्त्वे द्रव्यधर्मौ धर्मो विशेषणं "स्वबुद्ध्या रज्यते येन विशेष्यं तद्विशेषणम्" इति लक्षणात् एवनुभयविधं चिदचिद्वस्तु तव कुक्षेरनन्तः किं वर्त्तते कियदपि कियदत्यल्पम् अपिशब्दादनन्तमपि अनन्तर्वर्तते किमिति सर्वस्य त्वदाधेयत्वादिना त्वच्छेषत्वमेवेति अनेन कार्यकारणभाव आधाराधेयभावः। पारार्थ्येन लीलारसनिष्पादकत्वेन शेषशेषिभावश्च सम्बन्ध उक्तः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नन्वण्डादिपतिस्त्वमीश्वर एव न तु पृथगोशमानी अतो न मयानुकम्प्यस्तत्राह—क्वेति । तमः प्रधानमहमहङ्कारो भूतादिः खमाकाशस्तच्चरो वायुश्च वार्जलं तमआदिभिर्वेष्टितेऽण्डघटे स्वमानेन सप्तवितस्तिपरिमितः कायो यस्य सोऽहं क्व, एवंभूतस्य मम महित्वं कियत् न किञ्चिदप्यतितुच्छमिति भावः । क्व च तव महित्वं कथंभूतस्येदृग्विधानि यान्यविगणितान्यसंख्यातान्यण्डानि तान्येव परमाणवस्तेषां चर्या भ्रमणं तदर्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य तव अत्र तमआदिषु पूर्वपूर्वापेक्षयोत्तरोत्तराण्यन्तरावरणानि विज्ञेयानि वार्भ्वित्यत्र भ्विति वारां विशेषणम्, वारि च तानि भूनि च वार्भूणि अग्नेरुत्पन्नानि वारि चेत्यर्थः । बहुलग्रहणाद्विशेष्यस्यापि पूर्वनिपातः ततस्तमआदीनां द्वन्द्वः न तु वार्भिः भुवा पृथ्व्या च सम्वेष्टित इत्यर्थः । वैष्णवे पुराणे भुवः आवरणत्वानुक्तेरावरणानां सप्तत्वोक्तेश्च तथा हि ।

दशोत्तरेण पयसा मैत्रेयाण्डं च तद्वृतम् । सर्वोऽम्बुपरिधानोऽसौ वह्निना वेष्टितो बहिः ॥
वह्निश्च वायुना वायुर्मैत्रेय ! नभसावृतः । भूतादिना नभः सोऽपि महता परिवेष्टितः ॥
दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै । महान्तं च समावृत्य प्रधानं समवस्थितम् ॥
अनन्तस्य न तस्यान्तं संख्यानं चापि विद्यते । तदनन्तमसंख्यातप्रमाणं चेति वै यतः ॥
हेतुभूतमशेषस्य प्रकृतिः सा परा मुने !।

इति दशोत्तराण्युत्तरोत्तरं दशगुणाधिकानीत्यर्थः । न च खचरो वायुरेकमावरणं तेन सह तमआदीनि सप्तैवेतिनिर्वाहः आकाशस्यावरणत्वाभावप्रसङ्गेन "वायुर्मैत्रेय ! नभसाऽऽवृतः" इत्युदाहृतवचनविरोधापत्तेः तस्माद्यथोक्त एवार्थः । अतोऽतितुच्छत्वात्त्वयाऽनुकम्प्योऽहमिति भावः ॥ ११ ॥ अपि च हे अधोक्षज ! गर्भगतस्य शिशोः पादयोरुत्क्षेपणमाघातः किं मातुरागसेऽपराधाय भवति न भवत्येवेत्यर्थः । विषमोऽयं दृष्टान्तः तव मम गर्भस्थत्वाभावादित्यत्राह—किमिति । तव कुक्षेरनन्तर्बहिः कियदपि किञ्चिन्मात्रमपि अस्तिनास्तिव्यपदेशभूषितम् अस्ति नास्तीतिव्यवहारचिह्नितं तद्व्यवहारविषयभूतमिति यावत् चिदचिदात्मकं जगत्किमस्ति न किञ्चिदित्यर्थः । चिद्वस्तुनः सततमेकरूपत्वात्सदास्तीत्येव व्यवहारभूषितत्वम् अचिद्वस्तुनस्तु सततपरिणामित्वात्पूर्वपूर्वावस्थां विहायोत्तरोत्तरावस्थापत्तौ सत्याम्पूर्वपूर्वावस्था नास्तीति व्यपदेशभूषितत्वात्तत्त्वमवगन्तव्यमतः सर्वस्य त्वत्कुक्षिगतत्वेन ममापि तथात्वान्मातृवन्मदपराधः सोढव्य इति भावः ॥ १२ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

ननु, त्वमपि विराडभिमानी सर्वेश्वरत्वेन प्रसिद्ध एव किमिति क्षमापयसीत्यत आह—क्वाहमिति । हे भगवन् ! तमोमहदहंखचराग्निवार्भूमिः तमःशब्दवाच्या प्रकृतिः महानहङ्कारः खमाकाशं खचरो वायुः वार्जलं तैः संवेष्टितं यदण्डं तदेव घटस्तस्मिन् स्वमानेन सप्तवितस्तिः कायो यस्य इत्थंभूतोऽहं क्व ईदृग्विधाऽविगणितान्यसङ्ख्यातान्यण्डान्येव परमाणवस्तेषां चर्यार्थं परिभ्रमणार्थं वाताध्वानो गवाक्षा इव रोमविवराणि रोमकूपा यस्य तस्य तव महित्वं क्वेत्यालोचय द्वौ क्वशब्दौ महदन्तरं सूचयतः तदुक्तम्—

"आण्डकोशो बहिरयं पञ्चाशत्कोटिविस्तरः । दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ॥
लक्ष्यन्तेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः" ॥ इति ॥ ११ ॥

किञ्च मम शिशुत्वात् शिशोरपराधो मात्रैव ममापराधस्त्वया क्षन्तव्य इत्याह—उत्क्षेपणमिति । हे अधोक्षज ! अध अक्षजं इन्द्रियजन्यं ज्ञानं यस्मात्स तत्संबुद्धौ अधोक्षज ! गर्भगतस्य गर्भस्य पादयोरुत्क्षेपणं चालनं किं मातुरागसे अपराधाय कल्पते योग्यो भवति न भवतीत्यर्थः । ननु, गर्भगतस्य पादयोरुत्क्षेपणं मातुरागसे मास्तु मम तु त्वं न गर्भगत इत्यत आह, किमस्ति नास्तोति। अस्तिनास्तिव्यपदेशभूषितं सदैकस्वरूपतया अनाशित्वादानन्दस्वरूपं चिद्वस्तु अस्तिशब्दवाच्यं प्रतिक्षणपरिणामित्वेनावस्थान्तरापत्त्या नाशित्वादचिद्वस्तु यत्तन्नास्तिशब्दवाच्यमिति तच्च परब्रह्मशरीरभूतं तदुक्तं भगवता पराशरेण—

"अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते। तत्तु नाशि न सन्देहो नाशिद्रव्योपपादितम् ॥
यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै। परिणामादिसम्भूतं तद्वस्तु नृप ! तच्च किम्" ॥ इति ।

कियदपि किञ्चिदपि तव कुक्षेस्तवोदरात् अनन्तर्बहिस्तद्व्यतिरेकेण किमस्ति नास्त्येवेत्यर्थः। सर्वस्य चिदचिदात्मकस्य जगतस्त्वदुत्पन्नत्वादत्यल्पत्वात्त्वयि लीनत्वाच्चेति भावः । तथा च श्रुतिः "सर्वं खल्विदं ब्रह्म तज्जलानिति" इत्यादि अतः सर्वस्य त्वदात्मकत्वादहमपि त्वदात्मक एवेति क्षमस्वेति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

क्वाऽहमिति द्वितीयपुरुषतया स्तौति ॥ ११ ॥ उत्क्षेपणमिति तत्र स्वस्य विशेषतः पुत्रत्वमेव स्थापयति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु, त्वं ब्रह्माण्डाधिकारी जगत्स्रष्टा अहं गोपबालकः कथं मयि नाथवानसि ? मैवं कोऽहं क्षुद्रतमः तथाहि यदिदं ब्रह्माण्डं तत्र पेश्याम्पक्षिपोत इवाहं सप्तवितस्तिमात्रम् एवं विधानन्तकोटिब्रह्माण्डानि पराणुरूपेण यद्रोमकूपेषु तथाभूतस्त्वमसीत्याह–क्वाहन्तमोमहदित्यादि । अहं क्व तव महित्वञ्च क्व अहं कीदृशः तमःशब्दो गुणत्रयपरः तेन प्रकृतिरेवोच्यते तमआदिभिः खादिभिश्च सम्वेष्टितो योऽण्डघटः ब्रह्माण्डभाण्डं तत्र सप्तवितस्तिमात्रः कायो यस्य स तथा ते कथम्भूतस्य ? ईदृग्विधानि उक्तप्रकाराणि अविगणितानि असङ्ख्यानि यानि अण्डानि ब्रह्माण्डानि तान्येव पराणवः परमाणवः तेषां चर्य्या सञ्चरणं तस्य वाताध्ववत् गवाक्षवत् रोमविवरा यस्य एतेन परिच्छिन्नवद्दृश्यमानोऽपि परिमाणत्रयविलक्षणः परिच्छिन्नोऽपि व्यापकश्चेति तव महित्वं क्व अहं वा क्वेत्यसम्भावनाधिक्ये क्वद्वयं तस्मान्ममायमपराधः क्षम्यताम् ॥ ११ ॥ ननु, कथमेतावानपराधः क्षन्तव्यः ? सत्यं यद्यपि महानेवायमपराधस्तथापि त्वयि करुणामये नापराधाय कल्पत इति सदृष्टान्तमाह–उत्क्षेपणमित्यादि । त्वदुदरवर्त्तित्वात् त्वं सर्वस्यैव मातेत्याह–किमस्तीत्यादि । अस्तिनास्तिव्यपदेशभूषितम् अस्तिनास्तीति यो व्यपदेशस्तस्य भूभूमिस्तत्र उषितं स्थितं यत् कियत् यत् किञ्चित्तत्तव कुक्षेरनन्तर्बहिरिति यावत् तत्र किमस्ति नैवेत्यर्थः। भावाभावरूपं यत् किंचित्ततसर्वं त्वत्कुक्षावेवेति यावत् अतो मातृगर्भस्थशिशोः पादोत्क्षेपो मातरि यथा आगसे न कल्पते तथा ममापीति क्षन्तुमुचित एवाऽयमपराधः ॥ १२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

त्वं ब्रह्माण्डाधिकारो, अहं गाप-बालकः कथं मयि नाथवानिति आह–क्वाहमित्यादि । अत्यन्तासम्भावनायां क्वद्वयम् । हे नाथ ! सम्यगुक्तम्, किन्तु यद्यहमधुना कोटिकोटिब्रह्माण्डाधिकारिणो मदतिरिक्तान् प्रत्येकबालकपदोपसेविनो नो लोकयिष्यम्, तदायं संदेहोऽभविष्यदिति मद्वाक्यार्थः ॥ ११ ॥ तर्ह्ययमपराधः क्षमापयितुमशक्य एव ? नैवमित्याह—उत्क्षेपणमित्यादि । उत्क्षेपणं कुक्षिगतत्वात्, सर्वस्य त्वं माता, तर्हि कथमयमपराधो न क्षन्तव्यः ? ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, विश्वस्रष्टाऽतिप्रसिद्ध एव न त्वमीशमानी मम तु किमैश्वर्यं तद्ब्रूहीत्यत आह, क्वेति । तमः प्रकृतिश्च महांश्च अहमहङ्कारश्च खमाकाशं च चरो वायुश्च अग्निश्च वार्जलं च भूश्चेत्येभिस्तत्त्वैः संवेष्टितो योऽण्डघटस्तस्मिन् पातालादिसत्यलोकान्तैः स्वमानेन सप्तवितस्तिनिकृष्टलक्षणः कायो यस्य सोऽहं क्व, ईदृग्विधानि यान्यविगणितान्यण्डानि तान्येव परमाणवस्तेषां चर्य्या निष्क्रमप्रवेशरूपं परिभ्रमणं तदर्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य तव महित्वमैश्वर्य्यं क्वेति महत्स्रष्ट्रा प्रथमपुरुषेण कृष्णस्यैक्यविवक्षयोक्तं तेन ममैश्वर्य्य विक्रमो वा त्वां प्रति शलभस्य गरुडं प्रतीव न गणनार्हमिति भावः ॥ ११ ॥ किं च ममापराधोऽवश्यं सोढव्यो यतस्त्वं मातेति द्वितीयपुरुषेण पद्मनाभेन सहैक्यं भावयन्नाह—उत्क्षेपणमिति। गर्भगतस्य शिशोः पादयोरुत्क्षेपणं मातुः किमपराधाय भवति नैव अस्तीति नास्तीति वा व्यपदेशेन भूषितं परमतं विखण्ड्य स्वमतस्थापनं समुचितोपपत्तिभिः सत्यत्वेन मिथ्यात्वेन वा सुस्थिरीकृतं वस्तु जगद्रूपं कियदपि एकत्वभुवनात्मकमपि किं तव कुक्षेरनन्तर्बहिरस्ति अपि त्वन्तरेव अतो ममापि त्वत्कुक्षिगतत्वात् पुत्रस्य मात्रा त्वया अपराधः सोढव्य एव "पिताऽहमस्य जगतो माता धाता पितामहः" इति त्वदुक्तेरित्यर्थः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु, प्रकृत्याद्यावरणसंयुक्तविराड्विग्रहस्त्वमपीश्वर एवातो न मयाऽनुकम्प्य इत्यत्राह–क्वाहमिति । तमः प्रकृतिः खमाकाशश्चरो वायुः तम आदिभिरष्टभिरावरणैः सम्वेष्टितो योऽण्डघटस्तस्मिन्स्वमानेन सप्तवितस्तिकायो यस्य सोऽहं क्व ? ईदृग्विधानि यान्यविगणितान्यण्डानि ते एव पराणवः परमाणवस्तेषां चर्याः परिभ्रमणं तदर्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य ते महित्वं च क्व ? अतस्त्वयाऽनुकम्प्य एवाहम् ॥११॥ किञ्च, कार्यकारणवस्त्वाधारस्य ते गर्भस्थेन मयाऽपराधः

कुतः स त्वया मातृवत्सोढव्य इत्याह—उत्क्षेपणमिति । हे अधोक्षज ! गर्भगतस्य शिशोः पादयोरुत्क्षेपणं मातुः किमागसेऽपराधाय कल्पते योग्यं भवति न भवतीत्यर्थः । तव कुक्षेरनन्तर्बहिः कियदपि किञ्चिदपि वस्तु अस्ति–नास्ति–व्यपदेशाभ्यां शब्दाभ्यां भूषितमभिहितं किमस्ति ? न किञ्चिदस्तीत्यर्थः । "यच्चेहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितम्" इति श्रुतेः तस्मात्स्वगर्भगतस्य ममापराधो मातृवत्सोढव्यः ।। १२ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु जगदण्डविग्रहः सर्वकर्त्ता त्वमपीश्वरोऽसीति चेत्तत्राह क्वाहमिति । तमः प्रकृतिर्महानहमहङ्कारः खं नभः चरो वायुः अग्निस्तेजः वार्जलं भूश्चेत्येतैस्तत्त्वैः सम्वेष्टितो यो अण्डघटस्तस्मिन् पातालादिसत्यान्ते स्वमानेन सप्तवितस्तिर्निकृष्टः कायो यस्य सोऽहं क्व, क्व च ते महित्वं, कीदृशस्येत्याह ईदृग्विधानि यान्यविगणितान्यण्डानि ते एव पराणवस्तेषां चर्या प्रवेशनिर्गमरूपः परिभ्रमस्तदर्था वाताध्वानो गवाक्षा रोम्णां विवराणि यस्येति कारणोदशयेनैक्यविवक्षयैतत् तथा च गरुडे शलभस्येव त्वयि मे वैभवमिति ।। ११ ।। किञ्चावश्यं सोढव्यस्त्वया ममापराध इत्याह-उदिति, गर्भगतस्य बालस्य पादयोरुत्क्षेपणं किं मातुरागसेऽपराधाय कल्पते नैव कथं मे गर्भगः तत्राह अस्तीति व्यपदेशश्चेतनवाचिशब्दः, नास्तीतिव्यपदेशस्तु जडवाची तयोर्भुवि विषये उषितं स्थितं चिज्जडात्मकं जगत् तव कुक्षेरनन्तर्बहिः कियदपि किञ्चिदपि किमस्ति नास्त्येवेत्यर्थः । अस्ति-नास्ति-शब्दयोरेवमर्थता "ज्योतींषि विष्णु"रित्यादौ श्री वैष्णवे प्रसिद्धा अतो जगदन्तःपातिनो ममापि त्वत्कुक्षिगतत्वान्मात्रा त्वया अपराधः सोढव्य एव "पिताहमस्य जगतो माता धाता पितामह" इति त्वदुक्तेरेव एतच्च गर्भोदशयेनैक्यविवक्षया ।। १२ ।।

श्रीसुबोधिनी

एवमाधिभौतिकब्रह्माणमात्मानं तिरस्कृत्याधिदैविकमपि तिरस्करोति क्वाहमिति, तमः प्रकृतिर्महन् महत्तत्त्वमहमहङ्कारः खमाकाशश्चरो वायुरग्निर्वार्जलं भूमिश्चेत्यष्टावरणानि तैः सम्यग् वेष्टितो योयमण्डरूपो घटस्तस्मिन् घटे सप्तवितस्तिपरिमितः कायो देहो यस्य, वितस्तिमात्रं शिरः परित्यज्य कायः सप्तवितस्तिर्भवति, ईदृग्विधानामविगणितानामण्डपरमाणूनां गतिर्यत्र तादृशो वाताध्वो गवाक्षः, गवाक्षे हि सूर्यकिरणेषु त्रसरेणूनां गतिर्दृश्यत इति गवाक्षवद् रोमविवराणि यस्य, यादृशस्य ते महत्वं क्वाहं च क्वेति सर्वथा परीक्षायामयोग्यता ।।११।। आध्यात्मिकस्यापि ब्रह्मणः स्वरूपमाश्रित्यापराधक्षमापनामाहोत्क्षेपणमिति गर्भगतस्य पादयोरुत्क्षेपणं मातुरागसे किं भवति ? अपराधाय न कल्पते, ननु विषयो दृष्टान्त इति चेदस्तिनास्तिव्यपदेशाभ्यां भावाभावशब्दाभ्यां भूषितमलङ्कृतं जगत् तव कुक्षेरनन्तर्बहिः किम् ? सर्वं हि तव कुक्षौ, अतो ममापि सर्वमध्ये पातान्नापराध इत्यर्थः, अनेनापि प्रकारेणापराधक्षमापनं, अयं साधारणः पक्ष इति ।। १२ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'ब्रह्माण्डविग्रहस्त्वमपीश्वर एव' इति चेत्तत्राह— क्वाहमिति । तमः प्रकृतिः, महान् महत्तत्त्वम्, अहमहङ्कारः, खमाकाशम्, चरो वायुः, अग्निः, वार्जलम्, भूश्च, एतैः प्रकृत्यादिपृथिव्यन्तैः संवेष्टितो योऽण्डघटः ब्रह्माण्डरूपो घटः 'नश्वरत्वज्ञापनाय घटपदप्रयोगः' स एव तस्मिन् वा स्वमानेन सप्तवितस्तिकायो यस्य सोऽहं क्व ? ईदृग्विधानि एवंप्रकारकाणि यानि अविगणिताम्यण्डानि तान्येव परमाणवः, तेषां चर्या परिभ्रमणम्, तदर्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य ते तव महित्वं च क्व ?' अतोऽतितुच्छत्वात् त्वयाऽनुकम्प्योहमिति भावः ।। ११ ।। अपि च हे अधोक्षज ! गर्भगतस्यापि शिशोः पादयोरुत्क्षेपणं किं मातुरागसे कल्पते अपराधाय भवति ? न भवत्येवेत्यर्थः । सत्यमपराधाय न भवति । 'ततः किम्' अत आह—अस्तिनास्तिव्यपदेशाभ्यां भावाभावशब्दाभ्यां भूषितमभिहितं वस्तु तव कुक्षेरनन्तः बहिः कियदपि किमस्ति ? न किञ्चिन्मात्रमपि बहिरस्ति, किन्तु सर्वं तदन्तरेवास्तीत्यर्थः । अतः सर्वस्य त्वत्कुक्षिगत्वेन ममापि तथात्वात् मातृवन्ममापराधः सोढव्य एवेति भावः । 'एवं भूतस्य तव ज्ञानं संसारिणां नास्ति, अतोन्द्रियत्वात्' इति सम्बोधनेन सूचितम् ।। १२ ।।

अन्वितार्थप्रकाशिका

क्वाहमिति ।। तमःप्रकृतिः महान् महत्तत्त्वम् अहमहंकारः खमाकाशं चरो वायुः अग्निः वार्जलं भूश्च एतैः प्रकृत्यादिपृथिव्यन्तैः संवेष्टितो योऽण्डघटः ब्रह्माण्डरूपो घटः नश्वरत्वज्ञापनाय घटपदप्रयोगः । स एव तस्मिन्वा स्वमानेन सप्तवितस्तिमात्रकनिष्ठपरिमाणः कायो यस्य सोऽहं क्व ईदृग्विधानि एवंप्रकारकाणि यानि अगणितान्यण्डानि तान्येव परमाणवस्तेषां चर्या परिभ्रमणं तदर्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य ते तव महित्वं च क्व । अतोऽतितुच्छत्वात्त्वयानुकम्प्योऽहमिति भावः ।।११।। उत्क्षेपणमिति । हे अधोक्षज ! गर्भगतस्य शिशोः पादयोः उत्क्षेपणं कि मातुरागसे कल्पते अपराधाय भवति न भवत्येवेत्यर्थः । अस्तिनास्तीत्यपदेशाभ्यां भावाभावशब्दाभ्यां स्थूलसूक्ष्मकार्यशब्दैः कारणैर्वा भूषितम् एतेषां शब्दानां भुवि विषये उषितम् अभिहितं सर्वं

वस्तु तव कुक्षेरन्तः बहिः कियदपि किंचिन्मात्रमपि किमस्ति न किंचिन्मात्रमपि बहिरस्ति किंतु सर्वं तदन्तरेवास्तीत्यर्थः। अतः अहमपि कुक्षिगत एव तेन पुत्रस्य मात्रेव त्वया ममापराधः सोढव्यः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

किंच गर्भगतस्यापत्यस्य पादयोरुत्क्षेपणं ताडनं मातुः आगसे अपराधाय कल्पते किं न कल्पते न भवतीत्यर्थः। ननु स्त्रीगर्भन्यायेन मत्कुक्षौ त्वं कदा स्थितोऽसीति चेत्तत्राह ॥ अस्तिनास्तिव्यपदेशाभ्यां सदसच्छब्दाभ्यां भूषितं साध्वसाधु कार्यकारणस्थूलसूक्ष्मशब्दैरलंकृतमित्यर्थः। यद्वा एतैः शब्दैर्भुवि भूमौ उषितं स्थितं यत्तत्समग्रं वस्तु तव कुक्षेरनंतो बहिः कियदपि किंचिन्मात्रमपि किमस्ति न किंचिदस्तीत्यर्थः। अतस्तथाभूतस्य ममाप्यपराधो न गण्य इति भावः ॥ ११ ॥ अन्ये तु परंपरयोत्पन्ना अहं तु त्वत्त एवोत्पन्न इत्याह जगदिति। जगत्त्रयस्य दशलोकात्मकत्रिभुवनस्य अन्ते प्रलये य उदधीनां समुद्राणां संप्लवो मिश्रत्वं तस्मिन्नुदे महाजले नारायणस्योदरनाभिनालात् उदरस्थनाभौ नालं पद्मं तस्मात् नलिने तु नलं मतमिति विश्वः स्वार्थेऽण् अजो विधिर्विनिर्गत उत्पन्न इति वाक् मृषा नैवास्ति हे ईश्वर त्वत्तोऽहं किं न विनिगर्तोस्मि विनिर्गत एव ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वेतदण्डाधिपतिस्त्वमपीश्वर एव ततो न मयाऽनुकम्प्यस्तत्राह ॥ क्वेति ॥ तमः प्रकृतिश्च महन्महत्तत्त्वं च अहमहंकारश्च खमाकाशं च चरो वायुश्च अग्निस्तेजश्च वार्जलं च भूर्भूमिश्च ताभिः संवेष्टितो योऽण्डघटोऽडात्मको घटस्तस्मिन् सप्तवितस्तिः स्वमानेन सप्तवितस्तिपरिमितः कायो देहो यस्य तथाभूतः, अहं ब्रह्मा, क्व, ईदृग्विधानि यान्यविगणिताण्डानि तान्येव पराणवः परमाणवस्तेषां चर्या परिभ्रमणं तदर्थं वाताध्वानो गवाक्षास्त इव रोमविवराणि यस्य तस्य, ते तव, महित्वं महिमातिशयत्वं च क्व, तव महिमानं विचारयतो मम तवाग्रेऽतितुच्छत्वमित्यर्थः। अतितुच्छत्वात्त्वयाहमनुकम्प्य इति भावः ॥ ११ ॥ लोके मातृपितॄणां स्वपुत्रेष्वनुकम्प्यत्वदर्शनात् स्वपुत्रकृतापराधानां सहिष्णुत्वदर्शनाच्च त्वत्पुत्रोऽहं त्वयानुकम्प्यो मत्कृतोऽपराधश्च त्वया क्षन्तव्य इत्याह ॥ उत्क्षेपणमिति ॥ हे अधोक्षज, गर्भगतस्य शिशोः, पादयोः, उत्क्षेपणमाघातः, किं मातुः स्वजनन्याः, आगसेऽपराधाय कल्पते भवति। न भवत्येवेत्यर्थः। ननु विषमोऽयं दृष्टान्तस्तव मम गर्भस्थत्वाभावादित्यत्राह। तव कुक्षेः, अनन्तः बहिः, अस्तीति नास्तीति यो व्यपदेशो व्यवहारस्तेन भूषितमभिहितं, यद्वा अस्ति नास्तीत्येवंभूतानां शब्दानां भुवि विषये उषितं स्थितं, कियदपि किंचिन्मात्रमपि, अस्ति किम्। नास्त्येवेत्यर्थः। चिदचिदात्मकस्य जगतस्त्वत्कुक्षिस्थत्वं प्रसिद्धमेवास्ति। एवं सति त्वत्पुत्रोऽहं त्वयाऽनुकम्प्योऽपराधश्च क्षन्तव्य इति भावः। चिद्वस्तुनः सततमेकरूपत्वात्सदास्तित्वमेव। अचिद्वस्तुनस्तु सततमस्तित्वेऽपि सततपरिणामित्वात्पूर्वपूर्वावस्थां विहायोत्तरोत्तरावस्थापत्तौ सत्यां पूर्वपूर्वावस्थाया निवृत्तीक्ष्या नास्तित्वेन व्यपदेशः। एवमुभयोरस्तित्वनास्तित्वभूषितत्वं बोध्यम् ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

क्वाहमिति : १०.१४.११.

अनार्यकार्यं कथमाचरस्त्विदं सदार्यवर्योऽपि मयीति मा वद।
तथा भवत्वेकपिशाचयोगतोऽप्यनेकभूताकलितस्त्वहं प्रभो ॥ २४ ॥
अनन्तकोटिब्रह्माण्डभाण्डीभूतोदरस्य ते। आगोऽणुमात्रमेतन्मे भारकृन्न तवाच्युत ॥ २५ ॥

उत्क्षेपणमिति : १०.१४.१२.

वितस्तिमितिकोदरस्थनिजबालपादाहतिर्न मातुरिहमन्तवे भवति नापि दुःखाय च।
अलं सदय चिन्तया मदपराधराशेर्यतो विभुस्त्वमसि विश्रुतो भुवि च सत्यमाता मम ॥ २६ ॥

कृष्णप्रिया

हे अनन्त ! प्रकृति-महत्तत्व-अहङ्कार-आकाश-वायु-अग्नि-जल और पृथ्वीरूप अष्ट वस्तुओं से घिरा-बना हुआ ब्रह्माण्ड नाम का घटरूप सात वितस्ति-साढ़े तीन हस्त की देह वाला मैं तुच्छ जीव कहाँ। आपके श्री अङ्ग के एक ही रोम कूप में रहे अनन्त कोटि ब्रह्माण्डों को धारण करने वाले आप की महिमा यदि अगेय-अज्ञेय ही है। तो फिर आप के अनन्त रोम छिद्रों में अनन्त कोटि ब्रह्माण्ड उसी प्रकार उड़ते दीख पड़ते हैं कि जैसे किसी गवाक्ष की जाली के छिद्र में से प्रविष्ट होती सूर्य की किरणों में धूली के छोटे कोटि कोटि परमाणु उड़ते हुए दिखायी पड़ते हैं। अब कहिये भगवन् कहाँ आप की महिमा ? और कहाँ मैं क्षुद्र जीव ॥११॥ अये अधोक्षज ! आप तो स्वयं ज्ञानस्वरूप हैं आप को कहाँ मनुष्य की तरह इन्द्रियों से ज्ञान पाना है। इसलिये तो आप अधोक्षज हैं। तो हे अधोक्षज अब कहिये ! कि आपने गर्भ में स्थित बालक को, जैसे के पैरों का उछलना होता है क्या माता

उसे प्रहार मान कर अपराध मानती है ? और उस पर क्या रोष करती है ? नाथ ना, ना, कभी नहीं, तो वैसे आप भी मुझ पर दया करें। क्योंकि मैं भी कुक्षिगत बालक के समान ही हूँ और आप मेरी अम्माँ ही हैं। नाथ अस्ति और नास्ति-भाव-अभाव शब्दों से कही जाने वाली कोई भी ऐसी वस्तु है क्या ? जो आप की कुक्षिगत-कोख में न हो ?॥ १२॥

जगत्त्रयान्तोदधिसम्प्लवोदे नारायणस्योदरनाभिनालात् ।
विनिर्गतोऽजस्त्विति वाङ् न वै मृषा किं त्वीश्वर त्वन्न विनिर्गतोऽस्मि ॥ १३ ॥
नारायणस्त्वं न हि सर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी ।
नारायणोऽङ्गं नरभूजलायनात्तच्चापि सत्यं न तवैव माया ॥ १४ ॥

कर्दमक्षमा

अन्वयः—जगत्त्रयान्तोदधिसम्प्लवोदे नारायणस्य उदरनाभिनालात् अजः विनिर्गतः इति वाक् तु मृषा न वै तु ईश्वर त्वत् न विनिर्गतः अस्मि किम् ?॥ १३ ॥ त्वं नारायणः न हि सर्वदेहिनाम् आत्मा असि अधीश अखिललोकसाक्षी नरभूजलायनात् नारायणः अङ्गं तत् च अपि न सत्यं तव माया एव ॥ १४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च विशेषतोऽपि त्वत्तो मम जन्म प्रसिद्धमित्याह । जगत्त्रयेत्यादि । जगत्त्रयस्यांते प्रलये य उदधीनां संप्लवः संश्लेषस्तस्मिन्नुदे उदके नारायणस्योदरे नाभिस्तस्य नालादजो विनिर्गत इति या वाक्सा तावन्मृषा न भवति । वै निश्चितम् । तथापि तु हे ईश्वर त्वत्त्वतोऽहं किं न विनिर्गतो नोत्पन्नोऽस्मि । अपि तु त्वत्त एवोत्पन्न इत्यर्थः ॥ १३ ॥ तर्हि नारायणस्य पुत्रः स्यास्त्वं मम किमायातं तत्राह । नारायणस्त्वमिति न हीति काक्वा त्वमेव नारायण इत्यापादयति । कुतोऽहं नारायण इति चेदत आह । सर्वदेहिनामात्माऽसीति । एवमपि किं नारायणो न भवसि नारं जीवसमूहोऽयनमाश्रयो यस्य स तथेति । त्वमेव सर्वदेहिनामात्मत्वान्नारायण इति भावः । हे अधीश त्वं नारायणो न हीति पुनः काकुः । अधीशः प्रवर्तकः । ततश्च नारस्यायनं प्रवृत्तिर्यस्मात्स तथेति पुनस्त्वमेवासाविति । किं च त्वमखिललोकसाक्षी अखिलं लोकं साक्षात्पश्यसि अतो नारमयसे जानासीति त्वमेव नारायण इत्यर्थः । नन्वेवं नारायणपदव्युत्पत्तौ भवेदेवं तत्त्वन्यथा प्रसिद्धमित्याशंक्याह । नारायणोंगमिति । नरादुद्भूता येऽर्थास्तथा नराज्जातं यज्जलं तदयनाद्यो नारायणः प्रसिद्धः सोऽपि तवैवांगं मूर्तिः । तथा च स्मर्यते । "नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः॥ तस्य तान्ययनं पूर्वं तेन नारायणः स्मृतः ॥" इति । तथा "आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥" इति च ननु मन्मूर्तेपरिच्छिन्नायाः कथं जलाश्रयत्वमत आह ! तच्चापि सत्यं नेति ॥ १४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सर्वजनप्रख्यातप्रवृत्तमाह—किञ्चेति । विशेषतः सर्वापेक्षया । त्वत्तो भवतः । नालात् पद्मदण्डात् 'नालं नालीपद्मदण्डे' इति सात्वतः । तावदिदानीम् । इत्यर्थ इति—तव नाभ्युद्भूतकज्जाज्जातोऽपि त्वत्त एव जात इति भावः ॥१३॥ तर्हि भगवन्नाभिकमलोद्भूतत्वे । स्याः त्वं भवेः । मम नन्दनन्दनस्य किमागतम् । तत्र तदा । इति भाव इति–सर्वात्मन एव नारायणपदार्थत्वमिति तात्पर्यम् । पुनरर्थान्तरेणापि तत्समर्थयति—अधीश इति । त्वमेव नन्दात्मजरूप एवासौ नारायण इति । पुनस्तथैवाह—किञ्चेति । इत्यर्थ इति – सर्वज्ञत्वात्त्वमेव स इति भावः । यशोदासूनुराशङ्कते—नन्विति । व्युत्पत्तौ व्युत्पादने । एवमुक्तप्रकारेणाप्यर्थो भवेदेव । तत् नारायणत्वं भगवतः । अन्यथा उक्तार्थव्यतिरेकेण प्रसिद्धं न त्वनेन पूर्वोक्तव्युत्पादनेन । आशङ्क्य स्वयमेव शङ्कित्वा पुनराह । एतदर्थस्वीकारे भगवानाशङ्कते—नन्विति । अपरिच्छिन्नाया देशकालवस्तुपरिच्छेदत्रयशून्यायाः तच्चापि जलाश्रयं वपुरपि ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विशेषतश्च कृपया पितृनामपि प्राप्तेन त्वया क्षन्तव्यमेवेति द्वितीयपुरुषभेदान्तराऽनिरुद्धविशेषविराडन्तर्यामिपुरुषत्वेनापि स्तौति—जगदिति । जगत्त्रयस्य सावरणब्रह्माण्डस्याऽन्ते प्राकृतप्रलये तदवसान इत्यर्थः । तत्र ब्राह्मकल्पादौ यदुदधिसम्प्लवस्योदमवशिष्टमुदकं तत्रेत्यर्थः । इति तेषामभिप्रायः । यद्वा, जगत्त्रयस्य योऽन्तः सर्वाऽधोभागः तत्र तदुदधिसम्प्लवोदकं गर्भोदकाख्य एकार्णवस्तत्रेत्येवार्थः । व्याख्यान्तरं ब्रह्मणो जन्मकालं ब्राह्मकल्पादिकं न बोधयतीति उदरशब्दस्तदानीं तद्गतं सर्वं सूचयति, नालं कमलदण्डः तेन कमलं लक्ष्यते । यद्वा, "नलिने तु नलं मतम्" इति विश्वकोषान्नलं कमलं स्वार्थे तद्धितः तस्मात् तु शब्देनान्यतो विशेषं बोधयति । विनाऽपि मातृव्यवधानमुत्पन्नत्वात् अत एव विशब्दश्च अत एव निर्गत इति चिरमुदरान्तःस्थितिः

सूचिता। हे ईश्वरेति पुनर्भगवति पितृ [मातृ] दृष्टिमयोग्यां मत्वा ॥ १३ ॥ अङ्गं तवैव रूपमेकम् अतो मुख्यस्य नारायणस्य तवाङ्गत्वादेव तस्य च नारायणत्वं नाराश्रयत्वे न तु गौणमित्याह—तच्चेति। अतोऽचिन्त्यशक्त्यैव तद्विग्रहस्य परिच्छिन्नापरिच्छिन्नत्वं न तु नाराश्रयत्वेन नारपरिच्छिन्नत्वमिति भावः। अन्यत्तैः तत्र तच्चेति जलाद्याश्रयत्वमित्यर्थः। यद्वा, पुनस्तत्प्रस्तावव्याजेन तादृशे श्रीकृष्ण एवावान्तरप्रकरणमिदं पर्यवसाययति–अधीश ईशो महत्स्रष्टा प्रथमः पुरुषः। हे स्वयं भगवत्त्वात्तस्याप्युपरिविराजमान ! यथोक्तं द्वितीये "आद्योऽवतारः पुरुषः परस्य" इति तैर्व्याख्यातं च परस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः यस्य सहस्रशीर्षेत्याद्युक्तो लीलाविग्रहः स आद्योऽवतार इति। अतो नराणां तृतीयपुरुषभेदानां तत्तद्भूतस्थानां तथा तत्तदण्डसंस्थितानां द्वितीयपुरुषभेदानां च समूहो नारं तच्च तत्समष्टिरूपो महत्स्रष्टैव ततस्तस्याप्ययनं प्रवृत्तिर्यस्मात् इति त्वमेव मुख्यो नारायण इत्यर्थः। अतः सर्वदेहिनामात्मा सर्वभूतस्थतृतीयपुरुषः तथाऽखिललोकसाक्षी अण्डस्थद्वितीयपुरुषः तथा नरभूजलायनात् "नराज्जातानि तत्त्वानि" इत्यनुसारेण ये नरभुवो महदादयस्तत्साहित्यपाठाज्जलं च नरप्रभवमेव ततो "आपो नाराः" इत्याद्यनुसारेण तद्रूपश्च यः कारणजलार्णवस्तदाश्रयत्वात् प्रथमपुरुषश्च यो नारायणः स त्वं हि निश्चितं नासि किंतु तत्तद्रूपो नारायणस्तवाङ्गं त्वं पुनरङ्गीत्यर्थः। यथोक्तम्—

"विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः। प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ॥
तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते" ॥ इति।

अतस्त्वदङ्गोत्पन्नत्वादपि तवैव पुत्रो भवेयमिति भावः। एवमेव द्वितीये "भूमेः सुरेतर" इत्यादौ "कलयासितकृष्णकेशो जात" इत्यत्र श्रीब्रह्मवाक्ये यः सितकृष्णकेशः यत्र तत्तद्वर्णसूचकौ सितकृष्णौ केशौ देवैर्दृष्टौ सोऽपि यस्यांशेन स स्वयमेव जातः सन्नित्यर्थः। सितकृष्णकेशत्वं च मोक्षधर्मीयनारायणोपाख्यानदर्शितनानारश्मिच्छविमयत्वात् तथा च सहस्रनामभाष्यधृतं भारतीयं भगवद्वचनम्—

"अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः। सर्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तम !" ॥

इति एवमेव प्रथमे—

"जगृहे पौरुषं रूपं भगवान् महदादिभिः। सम्भूतं षोडशकलमादौ लोकसिसृक्षया ॥
यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः। नाभिह्रदाम्बुजादासीद्ब्रह्मा विश्वसृजाम्पतिः॥
यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः। तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम्" ॥

"पश्यन्त्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननादभुतम्" इत्युक्त्वा "स एव प्रथमं देवः कौमारं सर्गमास्थितः" इत्यादिना द्वाविंशत्यवतारांश्च प्रोच्य कृष्णस्यापि तदन्तःपातित्वेन साधारण्ये प्राप्ते विशेषमाह—"एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" इति एषामर्थः भगवान् परमपुरुषोत्तमः लोकानां ब्रह्माण्डानां सिसृक्षया हेतुना पौरुषं रूपं जगृहे प्रादुश्चकार कथम्भूतं ? महदादिभिः सम्भूतं मिलितं अन्तर्भूतमहदादितत्त्वं प्रलयादौ "सोन्तः शरीरेऽर्पितभूतसूक्ष्मः" इति तृतीयस्कन्धात् षोडशकलं "श्रीभूःकीर्तिरिलालीलाकान्तिर्विद्येति सप्तकं विमलाद्या नवेत्येता मुख्याः षोडशशक्तयः" इति भक्तिविवेकोक्तेस्ताः षोडशकला यस्य तत् इदमाद्यं पुरुषरूपमुक्त्वा द्वितीयमाह—यस्याम्भसीति। ब्रह्माण्डसृष्ट्या तदनुप्रवेशेन अम्भसि प्रलयकालीनगर्भोदके शयानस्य यस्य कीदृशान्नाभिह्रदाम्बुजादित्यत आह यस्यावयवेति। यस्य नाभिह्रदाम्बुजस्य किं स्वरूपं पौरुषं रूपं तद्वै प्रसिद्धौ विशुद्धसत्त्वाख्यस्वरूपशक्तिविशेषाभिव्यक्तत्वात् तत्प्रचुरं स्वरूपमित्यर्थः। "नातः परं परम ! यद्भवतः स्वरूपम्" इति तृतीयोक्तेः तच्चोर्जितं बलवत् परमानन्दरूपत्वात् "को ह्येवान्यात्" इत्यादिश्रुतेः तस्याकारमाह—पश्यन्त्यद इति। तस्यावतारानाह स एव गर्भोदशायिपुरुष एवेति अथात्रैव तस्य पुरुषस्याप्यवतारिणं श्रीभगवन्तं परिचाययति—एत इति। पुंसः पुरुषस्य एते कौमारसर्गाद्याः अंशकलाः तद्विवेकस्तत्र तैरेव कृतः कृष्णस्तु भगवान् तु शब्दो भिन्नोपक्रमे यः पौरुषं रूपं जगृहे श्रीकृष्ण एव स इत्यर्थः। तत्रापि स्वयमात्मनैव न तु तत्प्रतिरूपत्वेन दीपाद्दीपवत् एवं च स्वयं श्रीस्वामिपादैरपि "अथाहमंशभागेन" इत्यत्र व्याख्यातम्। अंशेन पुरुषरूपेण भागो मायाया भजनमीक्षणं येन तेन सर्वथा परिपूर्णरूपेणेति विवक्षितम् इति तथा च वक्ष्यते श्रीवसुदेवेन "यस्यांशांशांशभागेन विश्वस्थित्यप्ययोद्भवाः" इति तैरेव व्याख्यास्यते च यस्यांशः पुरुषस्तस्यांशो मायेत्यादि यथा ब्रह्मसंहितायां श्रीकृष्णस्तवे—

"यस्यैकनिःश्वसितकालमथावलम्ब्य। जीवन्ति रोमबिलजा जगदण्डनाथाः ॥
विष्णुर्महान् स इह यस्य कलाविशेषो गोविन्दमादिपुरुषं तमहं भजामि" ॥ इति।

तस्मात् साधूक्तं नारायणोऽङ्गमिति दृष्टं च तथैव, तावत्सर्वे वत्सपाला इत्यादौ वक्ष्यते च "अद्यैव त्वदृतेऽस्य" इत्यादौ अथ प्रकृतमनुसरामः। ननु, मायिकजलान्तःपातेन तदपि ममाङ्गं किमु जगदिव मायिकं न हि न हीत्याह। तच्च तवाङ्गं सत्यमेव न तु माया मायिकमित्यर्थः। अपीति सम्भावितमेवेदमित्यर्थः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

विशेषतश्च साक्षात् पित्रा त्वया पुत्रस्य ममापराधः क्षन्तव्य एवेत्याह – जगदिति । नालं (नाला) कमलदण्डस्तेन कमलं लक्ष्यते, यद्वा, 'नलिने तु नलं मतम्' इति विश्वोक्तेर्नलं कमलम्,—स्वार्थे तद्धितस्तस्मात्; यद्वा, तदीयमध्यभागादित्यर्थः। तु-शब्देनान्यतो विशेषं बोधयति,—साक्षात्तस्मादेवोत्पन्नत्वात्, अतएव वि-शब्दश्च, तत्रापि निर्गत इति चिरमुदरान्तःस्थितिः सूचिता । हे ईश्वरेति भगवति पितृदृष्टिमयोग्यां मन्वानो भक्त्या प्रभुत्वेन सम्बोधयति । यद्वा, हे ईश्वर ! नारायणाद्विनिर्गमेऽपि त्वत्त एव विनिर्गतोऽहमीश्वरत्वान्नारायणेन महाभेदादित्यर्थः ॥ १३ ॥ अंगं तवैव रूपमेकम् । ननु, नरभूजलायनादुपाधेर्नारायण इति चेत्तर्ह्युपाधेरसत्यतया नारायणत्वस्याप्यसत्यता प्रसज्येत ? तत्राह—तदपि जलं सत्यमेव, न च तव मायया; यथाऽङ्गं सत्यम्, तथा तदपीत्यपिशब्दार्थः । त्वल्लीलायाः सत्यतयायतस्य तथा तदुपकरणत्वेन, अतएव श्रीभगवदवतारान्नराज्जातत्वेन च जलस्यापि सत्यता सिद्धेः, अतो मायिकत्वाभावेन तस्यापरिच्छिन्नत्वान्नारायणस्याप्यपरिच्छिन्नत्वं स्वत एवाव्याहतम् । अथवा, नारायणादप्यधिकतमं श्रीकृष्णस्य महिमानमनुभूय तस्य नारायणत्वोक्त्या भीतः ससम्भ्रममाह – नारायणस्त्वं नेति । अधीश ! ब्रह्माण्डमण्डलाधीश्वर ! त्वं नारायणो न भवसि, हि यतो नर-भू-जलायनाद्यो नारायणः, स च तवांगमंशः, (भा० ११।४।३) ''भूतैर्यदा पञ्चभिरात्मसृष्टैः, पुरं विराजं विरचय्य तस्मिन् । स्वांशेन विष्टः पुरुषाभिधान,—मवाप नारायण आदिदेवः ॥' इत्युक्तत्वात् नारायणोऽत्रावतारी श्रीपुरुषोत्तमः पुरुषाभिधानमवाप, जलशायी नारायणो बभूवेत्यस्यार्थः । (भा० १०।१४।३२) 'यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्' इति वक्ष्यमाणत्वात् कृष्णस्तु पूर्णः पुरुषोत्तम एव । अतएव त्वमखिललोकसाक्षी – अखिला लोका भुवनानि येषु तान्यखिल-लोकानि ब्रह्माण्डानि तेषां साक्षी, (भा० १०।१४ ११) 'क्वेदृग्विधाविगणिताण्डपराणुचर्य्या' इत्याद्युक्तत्वात्, तदैव वृन्दावनान्तर्ब्रह्माण्डकोटीनां स्वयमेव दृष्टत्वाच्च । नारायणस्त्वेकस्यैवास्य ब्रह्माण्डस्य इत्यतः सर्व्वदेहिनां—सर्व्वे देहिनो व्यष्टिजीवा येषु ते सर्व्वदेहिनो वैराजास्तेषामनन्तकोटिब्रह्माण्ड वर्त्ति-समष्टीनामात्माऽसि । शेषं पूर्व्ववत् । ननु (भा० १०।१।१९–२०)—

'ब्रह्मा तदुपधार्य्याथ सह देवैस्तया सह । जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥
तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् । पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥'

इति विराडन्तर्य्यामिणः क्षीराब्धिशायिनो नारायणाख्यस्य पुरुषस्यैवोपस्थानात्तस्यैव कृष्णरूपेणावतरणात् कृष्ण एव नारायणाख्यः पुरुष इत्यवसीयते; तत् कथं त्वं नारायणो नेत्युच्यते ? सत्यम्, वाढ़मत्रावधीयताम् (भा० १।३।१–३)—

'जग्रहे पौरुषं रूपं भगवान् महदादिभिः । सम्भूतं षोड़शकलमादौ लोकसिसृक्षया ॥
यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः । नाभिह्रदाम्बुजादासीद्ब्रह्मा विश्वसृजां पतिः ॥
यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः । तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम् ॥' इति ।

एषामर्थः—भगवान् श्रीपुरुषोत्तम आदौ सर्गादौ स्ववीक्षया सृष्टैर्महदादिभिर्लोकसिसृक्षया पौरुषं रूपं जगृहे प्रादुश्चकार । कथम्भूतम् ? सम्भूतं षोडशकलम्—

'अणिमा महिमा प्राप्तिः प्राकाम्यं लघिमेशिता । तथा कामावशायित्वं वशितेत्यष्टसिद्धयः ॥'

इत्यष्ट; (विष्णु० पु० ६।५।७४)—

'ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चापि षण्णां भग इतींगना ॥'

इति षट्;

'लीला-कृपाभिधौ विष्णोः स्व-परार्थौ गुणावुभौ । लीला स्वस्यैव सौख्याय परेषां तु कृपा स्मृता ॥'

इति द्वौ । एताः षोडशकला गुणा यत्र, तत् इदमाद्यन्तु महतः पुरुषरूपमुक्तम्; द्वितीयं त्वण्डसंस्थितं पुरुषरूपमाह—यस्येति; ब्रह्माण्डसृष्ट्या तदनुप्रवेशेनाम्भसि शयानस्य यस्य नाभिह्रदाम्बुजाद्ब्रह्मासीत् । कीदृशात् ? नाभिह्रदाम्बुजस्यावयवैः कर्णिका-पत्रादिभिर्लोकविस्तरः कल्पितस्तस्मात् । कथम्भूतं नारायणरूपम् ? तदाह—तद्वा इति । न ह्यम्भःशायिनः सकाशात् क्षीराब्धिशायी सोऽन्योऽवतारो मन्तव्यः । यत्तस्यैव लोकपद्मप्रविष्टत्वात् 'तल्लोकपद्मं स उ एव विष्णुः, प्रावीविशत् सर्व्वगुणावभासम्' इति तृतीयस्कन्धे (भा० ३।८।१५) हि कथितं पुरुषस्यास्य (भा० १।३।६) 'स एव प्रथमं देवः कौमारं सर्गमास्थितः' इत्याद्याः कल्कयन्ता द्वाविंशत्यवताराः प्रोक्ताः । ततः कृष्णस्यापि तदन्तःपातित्वेन पुरुषावतारत्वे प्राप्ते विशेषमाह (भा. १।३।२८) 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्' इति पुंसः पुरुषस्यैते कुमाराद्या अंशकलास्तद्विवेकस्तैरेव कृतः । कृष्णस्तु भगवानिति 'तु-शब्दो भिन्नोपक्रमे,—यो भगवान् पौरुषं रूपं जगृहे, स एव कृष्णः, तत्रापि स्वयं स्वातंत्र्येण, न तु 'दीपादुत्पन्न-दीपवत्' इति न्यायेन, न तस्यान्यतः प्रादुर्भूतत्वम्, किन्तु मुख्यदीपस्थानीयत्वमेव कृष्णस्य; तथा च ब्रह्मसंहितायाम् (५।५९)—यस्यैकनिः-

श्वसितकालमथावलम्ब्य, जीवन्ति रोमविलजा जगदण्डनाथाः। विष्णुर्महान् स इह यस्य तनूविशेषो, गोविन्दमादिपुरुषं तमहं भजामि ॥' इत्यस्यावतारिवरस्याप्यवतारमध्ये गणनं नान्यलीलाद्यवतारमाधुरीविशेषापेक्षया। ननु, भवतु कृष्णस्य सर्व्वथा पूर्णत्वम्, क्षीराब्धिशायिनश्चतुर्थव्युहानिरुद्धत्वेन पद्मपुराणमोक्षधर्म्मादिषु कथितत्वात्कथमंशत्वम्? सत्यम्, वासुदेवादयश्चत्वारो व्यूहा अस्यासमोर्द्ध्वमाहात्म्यभरस्य कृष्णस्यापेक्षयांशविशेषा एव; तत्राप्यनिरुद्धादयो नितरामेव यस्य महानारायणस्यामी व्यूहाः, तस्याप्याविर्भावपदं कृष्ण इत्युक्तमेव—'यस्यैकनिःश्वसित–' इत्यादिना यच्चोक्तं क्षीराब्धिशायिन उपस्थानात् स एव कृष्ण इति, तत्र क्षीराब्धितीर एव तदनुग्रहस्य देवैः सुलभत्वात्तथोक्तम्, न तु तदवतारत्व-विवक्षया,—'अनुग्रहाय देवानां तत्र सन्निहितो हरिः' इति पाद्मादिषूक्तत्वात्, वस्तुतस्तु देवानां तत्रोपस्थानात् सर्व्वैः स्वरूपैः सम्भूय श्रीपुरुषोत्तम एतावतीर्ण इति निरूपितमेव। एतच्च श्रीस्वामिपादानामपि सम्मतमेव, तथा च (भा० १०।२।९) 'अथाहमंशभागेन' इत्यत्र तैर्व्याख्यातम्—'अंशेन पुरुषरूपेण भागो मायाया भजनमीक्षणं येन तेन' इति ॥ १४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अथ स्वस्य पितृपुत्रत्वरूपं सम्बन्धमपि विशिष्याह—जगदिति। जगत्त्रयान्ते य उदधिसम्प्लवः समुद्रैकीभावः तत्सम्बन्ध्युदकशायिनः नारायणस्योदरे नाभिः तत्सम्बन्धिनालात् कमलात् अजः विनिर्गतः इति वाक् न मृषा अतः तुरप्यर्थे। हे ईश्वर! त्वत् त्वत्तः किन्न विनिर्गतोऽहमिति ॥ १३ ॥ ननु, नारायणस्त्वन्य एव नाहमिति शङ्कायां तस्य अवतारस्य नारायणादवतारिणोऽनन्यत्वमेव श्रुतिस्मृतिपुराणेतिहासाद्युद्घुष्टं स्फुटयति–नारायणस्त्वं नहीति। काकुः सर्वदेहिनां नारपदवाच्यानां बद्धमुक्तनित्यरूपाणां आत्मा अयनं शरीरी यः नारायणः संज्ञायां णत्वविधानात् नारायणसंज्ञः स त्वं किं नहीति काकुः। अपि त्वस्यैव अधीशोऽसि प्रवर्तकः "अपगतौ" इत्यतः "मत्तः सर्वं प्रवर्त्तते" इति स्वमुखेनैव नारायणत्वस्फोरणात् चिदचित्प्रेरक इत्यर्थः, ज्ञानार्थत्वाद्धातोः अखिललोकसाक्षी चिदचिद्द्रष्टा यः सोऽसि श्रीमन्नारायणत्वमेवोक्तम् अथ सच्चिदानन्दस्वरूपस्य सच्चिदानन्दगुणकत्वेन रूपस्यापि तादृशत्वेन च नारायणत्वं निर्वहति अङ्गं मूर्तिः तवेत्यत्रापि योज्यम्। पूर्वोक्तविशेषणविशिष्टं तवाङ्गमपि नारायणः नरभूजलायनात् यत्प्रसिद्धं नारायणत्वं तच्चापि सत्यं किन्न? अतः तव माया एव कापटचमेव नेति, अथवा तव जीवसमष्टिसंयुक्तं मायात्त्वम् अङ्गं शरीरं न भवति वेति काकुः "योऽव्यक्तमन्तरे सञ्चरन्यस्याव्यक्तं शरीरम्" इत्यन्तर्यामिश्रुतेः "मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्" इति पुरुषसमष्टिसंयोगस्य श्रीनारायणकृतत्वात् चिदचिच्छरीरकत्वात् तव नारायणत्वमिति। यद्वा, तवाङ्गं मूर्त्तिरपि माया नैवेति अद्वैतवाद्यभिमतमायाकार्यं न भवति इति अथवैवं सम्बन्धः नारायणः नरभूजलायनाद्यः प्रसिद्धस्तस्य त्वमङ्गं मूर्तिरवतारः किं नासीत् आनन्दस्वरूपस्य रूपत्वात् तच्चाप्यङ्गत्वं सत्यं नेति काकुः किन्तु तव माया एव स्वेच्छामयत्वमेव ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च, विशेषतस्त्वत्त एव मम जन्म प्रसिद्धमित्याह—जगदित्यादि। जगत्त्रयस्यान्ते प्रलये य उदधीनां सम्प्लवः संश्लेषः तस्मिन्नुवे उदके नारायणस्योदरे नाभिस्तस्य नालादजो विनिर्गत इति जनवाक् सा तु मृषा मिथ्या न भवति, किं त्वमृषैव वै निश्चितं तथाहि हे ईश्वर! त्वत्त्वत्तः विनिर्गत उत्पन्नो नास्मि किं अपि तूत्पन्न एवेत्यर्थः ॥ १३ ॥ तर्ह्यस्तु भवान्नारायणपुत्रस्तथापि मम किमायातं तदाह, नारायणस्त्वम् इति। नहीति काक्वा त्वमेव नारायण इत्युपपादयति कुतोऽहं नारायण इति चेत्तत्राह—यतः सर्वदेहिनामात्माऽसि नारं जीवसमूहस्तस्यायनमाश्रयः सवाऽयनं यस्य सः त्वमेव सर्वदेहिनामाश्रयत्वात्सर्वशरीरकत्वेन तदाश्रयत्वाच्च नारायण इति भावः। हे अधीश! त्वं नारायणो नहीति पुनः काकुः कुतः? यतोऽधीशः प्रवर्त्तकः नारस्यायनं प्रवृत्तिर्यस्मात्स तथेति। किञ्च त्वमखिललोकसाक्षी अखिलं लोकं साक्षात्पश्यतीति तथातो नारमेषि जानासीति नारायणः "इण्गतौ" ये गत्यर्थास्ते बुद्ध्यर्थाः नन्द्यादित्वात्कर्त्तरि ल्युः। नन्विदं नारायणपदव्युत्पत्तौ भवदेवं तत्त्वन्यथा प्रसिद्धं तथाहि—

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः प्रोक्तास्तेन नारायणः स्मृतः" ॥

इत्यत्राह—नारायणोऽङ्गमिति। नरः परमात्मा "जह्नुर्नारायणो नर" इति नरशब्दस्य श्रीभगवन्नामसु पाठात् 'रीङ्क्षये' इति धातुः, न रीयते न श्रीयते न नश्यतीति नरः, इति व्युत्पन्ननरशब्दप्रवृत्तौ निमित्तस्य नित्यत्वस्य श्रीभगवत्यपि अनुगतत्वाच्च ततश्च नराद्भुवां जातानां जलानामयनाद्यो नारायणः प्रसिद्धः सोऽपि तवैवाङ्गम् मूर्त्तिः राहोः शिर इति वत् तवाङ्गमित्यभेदसम्बन्धे षष्ठी सोऽपि त्वमेवेत्यर्थः। नन्वहमेव नारायणश्चेत् "विश्वं नारायणं देवमक्षरं परमम्" इत्यादिभिर्वेदान्तैर्विश्वसमानाधिकृतत्वेन प्रतीयमानस्य विश्वव्यापकस्य कथं विश्वान्तर्भूतजलमात्रवर्त्तित्वमत आह—तच्चापि सत्यमिति। तव विभोरपि यज्जलाश्रयत्वं तत्सत्यमबाधितमेव व्यतिरेकमुखेनापि दृढयति–न तु मायेति। तज्जलशायित्वं न माया न मृषा किं तु सत्यमेवेत्यर्थः। "अणोरणीयान्महतो महीयान् एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामकतण्डुलाद्वा एष म

आत्मान्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्य उभे अस्मिन् द्यावा पृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितम्" इत्यादिभिरवगतं स्वरूपतो रूपतश्चाणोरणीयस्त्वं महतो महत्तरत्वं चेत्युभयं जगन्निर्माणोपासनाद्युपयुक्ततया जीवहृदयगुहादिष्ववस्थितस्य सर्वशक्तेस्तवोपपन्नमिति जलशायित्वमबाधितमेवेत्यर्थः । अवतारभेदेन तत्तदाकृतिभेदेपि तत्तत्कालकार्य्यकर्मादिचरित्रभेदेऽपि चावतारिणस्तवाभेदः अवतारी सदा त्वमेक एव न तु नानेति दिक् ॥ १४ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

अपि च सर्वोऽपि प्रपञ्चः परम्परया त्वत्तो जातः अहं तु साक्षात् त्वत्त एव जात इत्याह—जगत्त्रयान्तोदधिसम्प्लवोद इति । जगत्त्रयस्य प्रपञ्चस्यान्ते प्रलये य उदधीनां समुद्राणां सम्प्लव एकार्णवस्तस्मिन्नुदे उदके भोगिभोगशयनस्य नारायणस्योदरे नाभिस्तस्य नालादजो ब्रह्मा विनिर्गत इति वाक् मृषा न भवतीति निश्चितं हे ईश्वर ! तथापि त्वन्न विनिर्गतोऽस्मि ? अपि तु त्वत्त एव विनिर्गत इत्यर्थः । तथा च मार्कण्डेयः—

"स्वपतस्तस्य देवस्य पद्मं सूर्यसमप्रभम् । नाभेर्विनिःसृतं तस्य तत्रोत्पन्नः पितामहः" ॥

इति श्रीमद्रामायणे च ब्रह्मवाक्यं श्रीरामचन्द्रं प्रति—

"महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः" । इति ॥ १३ ॥

ननु, स तु नारायणो जगत्कर्त्ता अन्यं अहं तु गोपबालक इत्यत आह—नारायणस्त्वं न हि किमिति काकुः किन्तुं त्वमेवत्यर्थः । कुतः ? यतः सर्वदेहिनां जीवानां शरीरभूतानामात्माऽसि आधारोऽसि अधीशोऽसि सर्वशेष्यसि अखिललोकसाक्ष्यसि साक्षात् शुभाशुभद्रष्टासि सर्वफलप्रद इत्यर्थः । ननु, नारायणस्य जलशायित्वात्परिच्छिन्नत्वेन कथं सर्वात्मकत्वमित्यत आह—नारायणोऽङ्गमिति । नारायणोऽङ्गं परिच्छिन्नत्वेन मूर्त्तिरूपः स तु नरभूजलायनात् नरादुद्भूतानि जलानि तेषामयनात् नारायणः नरशब्दवाच्यत्वमस्य "जह्नु नारायणो नरः" इत्यादौ प्रसिद्धं तदुक्तम्—

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ता पूर्वं तेन नारायणः स्मृतः" ॥

इति तच्चापि सत्यं न किमिति पुनः काकुः तव जलशायित्वेन दिव्यविग्रहवत्त्वमपि सत्यमेवेत्यर्थः । किन्तु तवैव माया तवैव सङ्कल्प इत्यर्थः "माया वयुनं ज्ञानम्" इत्यनुशासनादत्र मायाशब्दः सङ्कल्पवाची ता अपः सृष्ट्वा तासु दिव्यमङ्गलविग्रहविशिष्टः सञ्छेते इत्येयं तवैव सङ्कल्प इत्यर्थः । तथैव स्वसङ्कल्पेन सर्वात्मापि तत्रापि प्रमाणान्तरम्—

"नाराणामयनत्वाच्च नारायण इति स्मृतः । नारशब्देन जीवानां समूहः प्रोच्यते बुधैः ॥
तेषामयनभूतत्वान्नारायण इति स्मृतः । नारो नराणां सङ्घातस्तस्याहमयनं गतः ॥
तेनाऽस्मि मुनिभिर्नित्यं नारायण इति स्मृतः । चेतनाचेतन सर्वं विष्णोर्यद्व्यतिरिच्यते ॥
नारं तदयनं चेदं यस्य नारायणस्तु सः" ॥

इति अतः सर्वस्यायनत्वादपि नारायणस्त्वमेवेत्यर्थः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

जगत्त्रयेति । पुनः संभ्रमेण ताभ्यां वैशिष्ट्यं वदन्नपि तत्पुत्रत्वमेव स्थापयति ॥ १३ ॥ नारायणस्त्वम् । यद्वा, अधीश-प्रथमपुरुषस्याप्युपरि वर्त्तमानो नारायणस्त्वं नराणां द्वितीय–तृतीय–पुरुषभेदानां समूहो नारं तत्समष्टिरूपः प्रथमपुरुष एव तस्याप्ययनं प्रवृत्तिर्यस्मात् स अतः सर्वदेहिनामात्मा यस्तृतीयपुरुषो यश्चाखिललोकसाक्षी द्वितीयपुरुषो यश्च नरभूजलायनात् तृतीयपुरुषो नारायणः सन्नसि किन्तु स स तवाङ्गं त्वं पुनरङ्गीत्यर्थः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु सर्वस्य कुक्षिगतत्वेन यथाहं माता, तथा तवापि; ततो यदा सर्वस्यैवापराधः क्षम्यते, तदा तवापि क्षन्तव्य इति चेत् सर्वेषां तव कुक्षिगतत्वं परम्परया, मम तु साक्षादेवेति विशेषं दर्शयन्नाह—'जगत्त्रयान्त–' इत्यादि । जगत्त्रयान्ते महाप्रलये य उदधिसंप्लवस्तस्योदके नारायणस्योदरनाभिनालाद् विनिर्गतोऽस्मि, जातोऽस्मि । ननु त्वमज एव, कथं जातोऽस्मीत्युच्यते ? नैवमित्याह—अजस्त्वति वाक्, वै प्रसिद्धम्, न न मृषा ? अपि तु मृषैव । अजस्त्वमेव नाहम्; नु भो ईश्वर ! त्वद्विनिर्गतोऽस्मि; त्वत्त एव जातोऽस्मि, नाजः; अतः सर्वजीवसाम्यं ममेति वाक्यार्थः ॥ १३ ॥ ननु भो ब्रह्मन् ! तथापि नारायणादेव जातोऽसि, कुतो मत्त इत्युच्यते ? सत्यम्, त्वञ्च नारायणः, यस्मादहमभूवम्, स तवाद्यावतारश्च । नारायण इत्यभिन्नत्वात्त्वदुत्पन्न एवेति श्रीकृष्णस्यैव मूर्त्तिविशेषो नारायण एव यतस्त्वं सर्वदेहिनामात्मासि, अखिललोकसाक्षी चासि । ननु तर्हि यस्य नाभिनालात्त्वमुत्पन्नोऽसि,

स तावत् क्वेत्याशङ्क्याह—नारायणोऽङ्गमित्यादि । स नारायणः खलु तवाङ्गं मूर्तिराद्यावतारत्वात् । ननूभयोरेव नारायणत्वे कथं त्वज्जनकस्य मदङ्गत्वमित्याह—नर-भू-जलायनात् । नारायणशब्दस्य व्युत्पत्तिद्वयम्—नरभूर्नरोत्पत्तिः, जलञ्च; तदयनात् तत्स्थानात् । एकस्त्वं नरोत्पत्त्ययनान्नारायणः, नरशब्दोऽत्र जीवपरः; अन्यस्तवाङ्गं जलायनात् 'आपो नारा इति प्रोक्ताः' तेन सर्वे जीवा नारं तदयनात्त्वं नारायणः जलशायित्वात्तवाङ्गं नारायण इत्येष विशेषः । ननु जलशायित्वं तस्य मायिकं नेत्याह—तच्चापि सत्यम्, तज्जलशायित्वं तस्य च सत्यम्, सत्यलीलात्वात्तवैव; न तव माययैव; अतः पूर्वोक्तं त्वदुद्भवत्वं मम सिद्धमेव ॥१४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ननु सर्वस्य कुक्षिगतत्वेनैव यथाहं सर्वस्य माता, तथा तवापि, ततो यदा सर्वस्यापराधः क्षम्यते, तदा तवापि क्षन्तव्य इत्याह—जगत्त्रयेत्यादि । अहं त्वत्त एव जातः सर्वेषामिव नान्यः पिता मेऽस्ति, अतः सर्वजीवसाम्यं कुतो ममेति । अन्यच्च—काचिन्माता कश्चित् पिता, त्वन्तु मे पिता च माता च, अतः क्षन्तव्य एवायमपराधः ॥ १३ ॥ ननु ब्रह्मन् ! यस्य नाभेरुद्भूतोऽसि, स तु नारायण एव, नाहं ते पितेत्याह—नारायणस्त्वमित्यादि । ननु भो ब्रह्मन् ! नारायणोऽपि नाहम्, त्वमपि तस्य नाभिनाले नाभूः, सर्वं तन्मायिकम्, अतो मत्पुत्रतापि ते मृषा इत्याशङ्क्याह—तच्चापि सत्यम् तत्सकलं सत्यमेव, नैव मायया कृतम्, भवल्लीलाया मायिकत्वाभावात् । अतस्त्वदङ्गमेव नारायणस्तदुद्भवत्वादहमपि ते पुत्रः, अतः पुत्रस्य ममापराधः क्षन्तव्य एवेति निर्गलितोऽर्थः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, पुत्रो हि मातुः कुक्षेरुद्गच्छति न तु सदा कुक्षावेव तिष्ठतीति चेदत आह—जगत्त्रयस्यान्ते प्रलये य उदधीनां सम्प्लवः एकीभावस्तदुदके अजस्त्विति अन्यो निर्गतोऽस्तु न वाऽस्त्वित्यर्थः । नु भोस्तदपि त्वत्तोऽहं न विनिर्गतः अपि तु निर्गत एवेत्यर्थः ॥ १३ ॥ तर्हि त्वं नारायणस्य पुत्रः स्यास्तेन मम किं तत्राह, नारायणस्त्वं नहीति काक्वा नारायणो भवस्येवेत्यर्थः । हे अधीश ! ईशानामप्यधिपते ! "विष्टभ्याऽहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति त्वदुक्तेः सर्वदेहिनामात्माऽसि आत्मत्वादेवाखिललोकसाक्षी च स च नारायणो जीवमात्रान्तर्यामित्वादात्मा साक्षी चेत्यतस्त्वदेकांश एव सोऽवगम्यते इति त्वमेव स इत्यर्थः । ननु, ब्रह्मन्नहं कृष्णवर्णत्वात् कृष्णनामा वृन्दावनस्थः स तु नारशब्दोक्तजलस्थत्वान्नारायणनामेत्यतः कथमहमेव स इति तत्राह—नरभूजलायनात्—

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः" ॥ इति

निरुक्तेर्नरोद्भूतजलवर्तित्वात् यो नारायणः स तवाङ्गं त्वदंशत्वादिति भावः । अतस्तत्कुक्षिगतोऽप्यहं त्वत्कुक्षिगत एव । किञ्च, स्वेच्छामयस्य न तु भूतमयस्येत्युक्त्या तव बालवपुर्वासुदेववपुश्च सच्चिदानन्दमयत्वेनैव वर्णितं तथा तच्चाप्यङ्गं नारायणाख्यं सत्यं सर्वकालदेशवर्तिशुद्धसत्त्वात्मकमेव न तु वैराजस्वरूपमिव मायया मायिकमित्यर्थः । चकारादन्यदपि मत्स्यकूर्माद्यङ्गं सत्यम् ॥ १४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सामान्यतः सर्वं त्वत्कुक्षिस्थमित्युक्तमहं तु विशेषतस्त्वत्पुत्र एव "नारायणाद् ब्रह्मा जायते" इत्यादिश्रुतिप्रामाण्यादित्याह—जगदित्यादिना । जगत्त्रयस्यान्ते प्रलये यः उदधीनां सम्प्लवः संश्लेषस्तस्मिन्नुदे उदके नारायणस्योदरनाभिनालादजो ब्रह्मा विनिर्गत इति या वाक् सा मृषा न भवति किन्त्वमृषैव वै निश्चितं तथापि तु हे ईश्वर ! त्वत्त विनिर्गतोऽस्मि किम् ? त्वत्तो नोत्पन्नोऽस्मि किम् ? अपि तूत्पन्न एवाऽस्मीत्यर्थः ॥ १३ ॥ ननु, नारायणपुत्रो भवतु भवान् तत्र मम किमायातमित्यत आह—नारायणस्त्वमिति । हे अधीश ! नरसमूहशास्तः ! नरसमूहो नारः अयनं प्रवेशस्थानं यस्य सः त्वं नारायणो न हि अपि तु त्वमेव नारायणः "अन्तः प्रविष्टः शास्ता जनानाम्" इति श्रुतेः । किञ्च, सर्वदेहिनामात्मासि नराः देहिनो जीवास्तेषां समूहो नारस्तस्यांशभूतस्य अयनमाश्रय आत्मा अंशी "ममैवांशो जीवलोके जीवभूतः सनातनः" इति निजवचनात् अतोऽपि नारायणोऽसि किञ्च अखिललोकसाक्षी अखिलान्साङ्गोपाङ्गान् लोकान्साक्षात्पश्यसि अतो नारमयसे जानासीति त्वमेव नारायणः यस्तु नरभूजलायनात् नयति स्वपादमूले स्वानन्यशरणमिति नरो भगवानेव ततो जाता नारा आपः तासु यदयनं तस्मात्प्रसिद्धो नारायणः स तु तवैवाङ्गं वपुर्भवति अतः सर्वथा परमनारायणस्त्वमेवासीति फलितोऽर्थः "नयतीति नरः प्रोक्तः परमात्मा सनातनः" इति—

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः" ॥

इति च स्मृतेः । ननु, व्यापकस्य मम तेन रूपेणाल्पदेशस्थत्वं वञ्चनयैव भवत्वत्राह—तच्चेति । तच्च जलाश्रयत्वं त्वन्मूर्तेः सत्यमेव न तु माया काचिद्वञ्चनेत्यर्थः । सर्वगतस्यैव भगवतोऽल्पदेशस्थत्वमचिन्त्यशक्तिमत्त्वात्तच्च भाष्यकारेण श्रीश्रीनिवासाचार्येण प्रथमाध्याये सुदृढं स्थापितमतोऽत्रोपरम्यते ॥ १४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु मातुः कुक्षेर्निर्गतः पुत्रो भवति त्वं कदा मत्कुक्षेः निर्गतस्तत्राह—जगत्त्रयस्यान्ते प्रलये य उदधीनां संप्लवः एकीभावस्तदुदके नारायणस्योदरे नाभिस्तस्य नालादजो ब्रह्मा विनिर्गत इति वाक् वै निश्चये मृषा न भवति तथा सति हे ईश्वर त्वत्तः किमहं न विनिर्गतोऽपितु निर्गत एवेत्यर्थः ।। १३ ।। ननु भव त्वं नारायणस्य पुत्रस्तेन मे नन्दसूनोः किमागतं तत्राह—नारायणस्त्वं न हीति काक्वा त्वं नारायणो भवस्येवेत्यर्थः । कुत इत्यत्राह सर्वदेहिनामात्मा व्यापको यदसि नारं जीवसमूहमयसे व्याप्नोषीति तद्व्युत्पत्तिः । अखिलेति–अखिलान् लोकान् साक्षात् पश्यसीति नारं जीवसमूहं अयसे जानासीति तद्व्युत्पत्तिः। ननु नारायणपदस्य व्युत्पत्तिरन्यथेति चेत्तत्राह नारायणोऽङ्गमिति । नरभूर्महदादितत्त्ववर्गस्तत्सहपाठाज्जलञ्च तदुद्भवमेव कारणाम्भस्तदयनात्तद्वर्त्तित्वात् यो नारायणः ख्यातः प्रथमपुरुषः सोऽपि तवाङ्गं त्वत्स्वांश एव एवमाह स्मृतिः—

> नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः । तस्य तान्ययनं पूर्वं तेन नारायणः स्मृतः ।।
> आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ।। इति ।

हे अधीश ईश्वरेश्वर स्वयं भगवन् ! तथा च महदादितत्त्वान्तस्थः कारणोदशय एव गर्भोदशयानो मत्पिता तस्य च त्वदंशांशत्वात्त्वत्सन्तानोऽहमस्मीति क्षन्तव्यं मदाग इति भावः । तच्च नारायणाख्यं त्वदङ्गं सत्यं पारमार्थिकं सर्वदेशकालवृत्तिचिद्घनमेव न तु मायया वैराजस्वरूपमिव मायिकं नेत्यर्थः । अपिरत्र सम्भावनायां इदमेव सम्भावितमित्यर्थः ।। १४ ।।

श्रीसुबोधिनी

विशेषप्रकारेण स्वस्य पुत्रत्वं भगवतः पितृत्व चाह जगत्त्रयेति, **जगत्त्रय**स्यान्ते प्रलये य **उदधिसम्प्लव** उदधीनां संश्लेषस्तस्मिन् प्रल**योद**के **नारायण**स्योदरनाभि**नालात् कमलादजो विनिर्गत इतिवाङ् न मृषा**, उपाख्यानानामपि सत्यार्थप्रतिपादकत्वात्, अत एव हे **ईश्वर** किं त्वत्तोहं न निर्गतः ? अपि तु निर्गत एवास्मि ।। १३ ।। ननु नाहं नारायण इति चेत् तत्राह **नारायणस्त्व**मिति, त्वं किं **नारायणो न** ? हि यतो नारायणत्वसाधका हेतवः सन्ति, तानाह **सर्वदेहिनामात्मे**ति, **नारं** जीवसमूह**स्तदयनं** यस्येति, **आत्मा** हि सर्वभूतेषु तिष्ठति, "अहमात्मा गुडाकेश सर्वभूताशयस्थित"इति वाक्यात्, किञ्च नारमयते प्रेरयतीति **नारायणः**, अस्मिन्नपि पक्षेधीश्वरत्वाद् भवान् **नारायणो**"नराज् जातानि तत्त्वानि नाराणीति विदुर्बुधास्तेषामधीश्वरः साक्षान् नारायण इतिस्मृत" इतिवाक्यात्, **नारं** जीवसमूहमयते जानातीति चेत् तथापि भवान् **नारायणो** यतो**खिललोकसाक्षी,** ननु नैवं **नारायण**शब्दो व्युत्पन्नः कि"न्त्वापो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन **नारायणः स्मृत**" इतिवाक्यान् नरोत्पन्नजलायनान् **नारायण** इति चेत् तत्राह **नारायणोङ्ग**मिति, **नरभूजलायना**द् यो **नारायणः** स तवाङ्गं पुरुषत्वात् 'पुरुषो ह वै नारायणो कामयते"तिश्रुतेः,"विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं खण्डसंस्थितं तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत" इतिवाक्यान् नारायणस्तवाङ्गमवतारः, किञ्च नारायणशब्दो वस्तुतस्तथा न व्युत्पन्न एव, यतो जलवासस्य प्रदर्शनमात्रपरत्वात् न ह्यवस्तुना शब्दो व्युत्पद्यते, अन्यथा रजतदाने शुक्तिकामपि दद्यात्, अतो जलस्थितेः प्रदर्शनमात्रपरत्वात् तेन न नारायणयोगार्थः सिध्यति, तदाह **तच्चापि सत्यं ने**ति, जलाधिकरणत्वं न सत्यं किन्तु **तव मायैव** ।। १४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्च 'विशेषतोऽपि मम जन्म त्वत्त एव प्रसिद्धम्' इत्याह—जगत्त्रयेति । जगत्त्रयस्यान्ते प्रलये य उदधीनां सम्प्लवः संश्लेषः, तस्मिन्नुदे उदके शयानस्य नारायणस्य या नाभिस्ततो जातं यन्नालं कमलम्, तस्मादजो ब्रह्मा विनिर्गत इति वाक् सा तु तावन्मृषा नैव भवति । 'वै'इत्यवधारणे । तथाहि—हे ईश्वर ! त्वमेव वद, किं त्वत्तोऽहं न विनिर्गतोऽस्मि न उत्पन्नोऽस्मि ? त्वत्त एवोत्पन्नोस्मीत्यर्थः ।। १३ ।। 'एवं चेत्तर्हि नारायणस्य पुत्रस्त्वं मम किमायातम् ?' इत्याशङ्क्याह— नारायणस्त्वमिति । अत्र काकुः । त्वं किं नारायणो नहि ? अपि तु 'त्वमेव नारायण' इत्यर्थः । 'कुतोऽहमेव नारायणः ?' इत्यपेक्षायां चतुर्भिर्हेतुभिर्नारायणत्वं साधयति—सर्वदेहिनामात्माऽसीति । 'नारं जीवसमूहोऽयनमाश्रयो यस्य' इति व्युत्पत्तेस्त्वमेव सर्वजीवानामात्मत्वान्नारायण इत्यर्थः । "नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः तेषामधीश्वरः साक्षान्नारायण इति स्मृतः" इति स्मृतेः ।। 'नाराणि चतुर्विंशतितत्त्वानि अयति प्रेरयति' इति व्युत्पत्त्यापि 'त्वमेव नारायण' इति सूचयन् सम्बोधयति—अधीश हे प्रवर्तक इति, विसर्गान्तपाठो वा ।। 'नारं जीवसमूहं जानाति साक्षात् पश्यति' इति व्युत्पत्त्याऽपि 'त्वमेव नारायण' इत्याशयेनाह - अखिललोकसाक्षीति ।। ननु "यद्यप्येवं नारायणपदव्युत्पत्तावहमपि नारायणस्तथापि तव जनकस्य नारायणस्य 'आपो नारा इति प्रोक्ता आपो वै नरसनवः ।। तस्य ता अयनं पूर्वं तेन नारायणः स्मृतः' इति स्मृतेर्भिन्नव्युत्पत्तिकत्वेन मत्तो भिन्नत्वात्" इत्यत आह–नारायणोऽङ्गमिति । नरः परमात्मा, तस्मात् भूतं यज्जलं तदयनाद्यः प्रसिद्धो नारायणः सोपि तवैवाङ्गं मूर्तिः, न त्वत्तो भिन्न इत्यर्थः ।। एवं जलाधिष्ठानत्वोक्त्या परिच्छिन्नत्वमायाति, तथाच 'यच्च किञ्चिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा ।। अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः

स्थितः' इति मन्त्रवर्णाद्विरोधमाशङ्क्य निराकरोति—तच्चापि सत्यं नेति। तथा परिच्छिन्नत्वमपि सत्यं यथार्थं न भवति, किन्तु तव माया लीलैव। सृष्ट्यादिलीलार्थमेव तथा स्वरूपं प्रदर्शितम्, वस्तुतो व्यापक एवेत्यर्थः ॥ १४ ॥

अन्वितार्थप्रकाशिका

जगत्त्रयेति ॥ जगत्त्रयस्यान्ते प्रलये य उदधीनां संप्लवः संश्लेषः तस्मिन्नुदे उदके शयानस्य नारायणस्य उदरे या नाभिस्ततो जातं यन्नालं कमलं "नलिने तु नलं मतम्" इति विश्वः। स्वार्थेऽण्। तस्मादजो ब्रह्मा विनिर्गत इति वाक् सा तु तावन्मृषा नैव भवति। वै इत्यवधारणे। तथापि तु हे ईश्वर ? त्वमेव वद किं त्वत् त्वत्तोऽहं न विनिर्गतः नोत्पन्नोऽस्मि अपि तु त्वत्त एवोत्पन्नोऽस्मीत्यर्थः ॥ १३ ॥ यस्मादहं जातः स नारायणस्त्वमेवेति नानाव्युत्पत्तिभिराह—नारायण इति ॥ त्वं किं नारायणो न हि अपि तु त्वमेव नारायण इत्यर्थः। यतः सर्वदेहिनामात्माऽसि नारं जीवसमूहोऽयनं यस्येति व्युत्पत्त्या त्वमेव नारायणः अधीशः प्रवर्त्तकः ततश्च नारस्यायनं प्रवृत्तिर्यस्मात्तथेति त्वमेव नारायणः। क्वचिदधीशेति संबुद्धिपाठः। तथा अखिललोकसाक्षी च त्वमसि अतः नारं जीवसमूहमयते जानातीति व्युत्पत्त्या त्वमेव नारायणः। नरः परमात्मा तस्माद्भवन्तीति नरभुवः पदार्थाः नरभूजलं च तदयनाद्यः प्रसिद्धो नारायणः सोऽपि तवैवाङ्गं मूर्तिर्न त्वद्भिन्नः "नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः ॥ तस्य तान्ययनं पूर्वं तेन नारायणः स्मृतः ॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥" इति जलाश्रयत्वेन प्राप्तं परिच्छेदं निरस्यति। तच्चापि जलायनत्वेन परिच्छिन्नत्वमपि सत्यं न भवति किन्तु तव मायैव लीलार्थमेव तद्रूपं वस्तुतो व्यापकमेव ॥ १४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सर्वदेहिनां चेतनवृंदानां आत्मा अंतर्यामितया कर्मफलप्रकाशकः परमात्मा अधीशो नियंता यद्भयाद्वाति वातो यमित्युक्तेः अखिलानां लोकानां साक्षी साक्षात् द्रष्टा त्व पुरुषोत्तमोसि अतो भवानेव नारायणः अहं वैराजनारायणा नास्मीत्युच्यते चेत्तर्हि तत्र वदामि नरभूः नराज्जातं यज्जल तत्रायनान्निवासान्नारायण इति नामा यः प्रसिद्धो वैराजः स तवांगं चराचरधारणाय त्वदवतारोस्ति अतः स एव त्वमसीति यच्छ्रुतिस्मृतिवचनं च तदपि सत्यं माया नास्ति जग्रहे पौरुषं रूपं भगवान् महदादिभिरित्युक्तेः नारायणशब्दनिरुक्तिश्च स्मर्यते आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति ॥ १३ ॥ वैराजपुरुषोत्तमयोरभेदत्वं वर्णयन्नाह तच्चेदिति हे भगवन् अमितसामर्थ्य जगत् जगदाधारभूतं सत् स्थूलं तत्तव वपुःनारायणरूपमंगं जलस्थं चेत्तर्हि पद्मनालवर्त्मना अंतः प्रविश्य वर्षशतं मृगयतापि मया तदैव तत्रैव किं कस्मान्न दृष्टं तदनंतरं हृदि हृदयावकाशेऽपि पुनर्मृगयता मया किं नो व्यदर्शि कस्मान्न दृष्टं तदेव तपःकरणानंतरकाले सपद्येव वैकुंठस्थतव स्वरूप सुदृष्टं अतस्तव स्वरूपं ममोत्पत्तिकारणं किं नास्ति अस्त्येव अयं भावः येन मज्जन्मकारणेन तप उपदेशः कृतस्तेनैव मह्यं दर्शनं दत्तमधुना स एव मया दृष्टः अतस्त्वत्त एवाहमुत्पन्नोस्मीति ॥ १४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च विशेषतस्त्वत्त एव मम जन्म प्रसिद्धमस्तीत्याह ॥ जगत्त्रयेति ॥ जगतां त्रयं तस्यान्तः प्रलयस्तस्मिन् य उदधीनां संप्लवः संश्लेषस्तस्मिन् यदुदमुदकं तस्मिन्, वर्त्तमानस्येति शेषः। नारायणस्य, उदरे यो नाभिस्तस्य नालस्तस्मात्, अजः ब्रह्मा, विनिर्गतः, इति वाक् तु शास्त्रलोकवाणी त्वित्यर्थः। मृषा न वै। मिथ्याभूता नैव भवतीत्यर्थः। एवं सति हे ईश्वर, अहं त्वत् त्वत्तः, न विनिर्गतः अस्मि, किं तु अहं त्वत्त एव उत्पन्नोऽस्मीत्यर्थः ॥ १३ ॥ तर्ह्यस्तु भवान्नारायणसुतस्तथापि मम किमायातमित्याशङ्क्य नारं जीवसमूहोऽयनमाश्रयो यस्येति नारायणः, नारस्य जीवसमूहस्यायनं प्रवृत्तिर्यस्मादिति नारायणः, नारं जीवसमूहमयसे जानासीति नारायण एवं प्रकारत्रयेण नारायणशब्दस्य त्वय्येव प्रवृत्तिसत्त्वात्त्वमेव नारायण इति दर्शयति ॥ नारायण इति ॥ त्वं, सर्वदेहिनां आत्मा, न हि असि, अपि तु त्वमेव भवसीति हेतोः' त्वमेव नारायणः, एवं काक्वा प्रथमपक्षमाश्रित्य नारायणत्वं समर्थितम्। किं च त्वं सर्वदेहिनां अधीशः प्रवृत्तिहेतुः, न असि। भवस्येवेत्यर्थः। अतः त्वमेव नारायणः, एवं काक्वा द्वितीयं पक्षमाश्रित्य नारायणत्वं समर्थितम्। त्वं अखिललोकसाक्षी, न असि, भवस्येव। अतः, त्वमेव नारायणः। एवं काक्वा तृतीयं पक्षमाश्रित्य नारायणत्वं समर्थितम्। नन्वेवं नारायणपदव्युत्पत्तौ भवेदेव तत्त्वन्यथा प्रसिद्धं, तद्यथा 'नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः। तस्य तान्ययनं पूर्वं तेन नारायणः स्मृतः' इति। 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत" इति स्मृतिद्वयेक्षया नरादुद्भूता येऽर्थास्तथा नराज्जातं यज्जलं तदयनाद्यो नारायणः प्रसिद्धः सोऽन्य एव नाहमिति चेत् सोऽपि त्वमेवत्याह। नरभूजलायनात्, यः नारायणः संप्रसिद्धः, सोऽपि तवैव, अङ्गं मूर्त्तिः। राहोः शिर इतिवत्तवाङ्गमिति अभेदसंबन्धे षष्ठी। सोऽपि त्वमेवेत्यर्थः। एवं नराणामात्मत्वादधीशत्वादखिललोकसाक्षित्वाज्जलायनाच्च नारायण इति चतुर्धा नारायणशब्दव्युत्पत्तिर्दर्शिता, सांप्रतं तत्र विभोरपि तव यज्जलाश्रयत्वमुक्तं तदपि सत्यमेवेत्याह। तच्चापि सर्वव्यापकस्य तव

यज्जलाश्रयत्वं तदपि, सत्यमबाधितं एव, न माया शाम्बर्या मायया समं नेत्यर्थः । यद्वा । सत्यं नेति काकुः । किं तु सत्यमेवेत्यर्थः। सा च तव माया इच्छैवेत्यर्थः । अत्र सर्वत्र मायाशब्दस्य क्वचित् प्रकृतिरूपोऽर्थः, क्वचित् ज्ञानपरः, क्वचिद्विचित्रशक्तिपरः, क्वचिद्योगात्ममायापरः, क्वचिच्छाम्बर्यर्थपरोऽपि यथोपयोगमुपादेयः । 'मायां तु प्रकृतिं विद्यात्' इत्यनेन प्रकृतिपरत्वं 'माया वयुनं ज्ञानं' इति निघण्टुपाठात् 'मायया सततं वेत्ति' इत्यभियुक्तप्रयोगाच्च ज्ञानपरत्वं, तत्र ज्ञानेच्छयोरेकार्थत्वं, 'योगमायां समादिशत्' 'ऋते मायां विशालाक्षीम्' इत्यादौ विचित्रशक्तितापरः शाम्बरीरूपोऽर्थः प्रसिद्ध एव । एकस्यैव भगवतो विभुत्वजलाश्रयत्वयोर्निर्वोढृत्वे 'अणोरणीयान्महतो महीयान्' 'व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा तण्डुलाद्वा एष म आत्मान्तर्हृदयेऽणीयान्' 'ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः' 'उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते' 'उभावग्निश्च वायुश्च सूर्याचन्द्रमसौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितं' इत्यादिकाः श्रुतयः प्रमाणभूताः ।। १४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

जगदिति : १०.१४.१३.

हेतावपूर्णे जनिरप्यपूर्णा कार्यस्य सिद्धेति ममापि नालम् ।
हेतुस्तदासीदिति युक्तमेव त्वद्वीक्षणापूर्णदृगस्मि जातः ।। २७ ।।

नारायण इति १०.१४.१४.

आजन्मोदयमास मय्यनुसृतो मायाप्रपञ्चस्त्वयं तत्कालं बत तत्र तत्र हि ममाप्यासीच्च मोहो महान् ।
संहृत्यापि पुनः क्षणेन करुणादृष्ट्या प्रसादोन्मुखः तत्र त्वं भवसीति नूतनगिरा किं वाऽद्य संप्रार्थये ।। २८ ।।
जातो यद्यपि पुत्रपौत्रजनको विज्ञश्च मान्योऽखिलैः, तत्तातस्तु तथापि गर्भशिशुवत् पश्यत्यलं पाति च ।
एतच्छ्रावणमासपूर्णमधुना त्वद्दृष्टिमागःसहां संवीक्ष्याम्बुजनाभ तावकसुतो जातस्तदर्थान्वयी ।। २९ ।।

कृष्णप्रिया

भगवन् ! ये तीनों लोक–जगत् के प्रलय अवसर में एकाकार बने हुए महासागरों के सलिल में सोये हुए श्रीनारायण के नाभि कमल से ब्रह्मा का जन्म हुआ यह श्रुति उक्ति कभी असत्य नहीं है । हे ईश, क्या मैं आपके उदर से निकला पुत्र नहीं ? क्या आप मेरी माँ नहीं ? नाथ, माँ, के नाते मुझे क्षमा न करेंगे ! ।। १३ ।। नाथ सर्व देहिओं के जीवों के आप आत्मा है इसलिये तो आप नारायण है । "नार" का अर्थ है जीवसमुदाय और "अयन" का अर्थ है आश्रय इस प्रकार नारायण शब्द बना (१) अब दूसरी बात कि आप सर्व के अधीश्वर है इसलिये भी नारायण हैं (२) अब तीसरी बात कि आप "अखिललोकसाक्षी" अखिल जीवों के द्रष्टा हैं इसलिये भी आप नारायण है (३) अब चौथी बात कि नर से उत्पन्न होने वाले जल में आप निवास करते हैं इसलिये भी जल निवासी आप नारायण है (४) जल में निवास करने वाले नारायण आपका ही अंश अवतार है । यह अंश रूप से दर्शन होना यह भी सत्य नहीं केवल आपकी माया है ।। १४ ।।

तच्चेज्जलस्थं तव सज्जगद्वपुः किं मे न दृष्टं भगवंस्तदैव ।
किं वा सुदृष्टं हृदि मे तदैव किं नो सपद्येव पुनर्व्यदर्शि ।। १५ ।।
अत्रैव मायाध[१]मनावतारे ह्यस्य प्रपञ्चस्य बहिः स्फुटस्य ।
कृत्स्नस्य चान्तर्जठरे जनन्या मायात्वमेव प्रकटीकृतं ते ।। १६ ।।

कवंमक्षमा

अन्वयः—जलस्थं जगत् तव वपुः सत् चेत् हे भगवन् ! तदैव तत् मे किं न दृष्टं ! किं वा । मे हृदि तदैव सुदृष्टं ! सपदि एव पुनः किं नो व्यदर्शि ।। १५ ।। अथ हे मायाधमन ! अत्र एव अवतारे बहिः स्फुटस्य अस्य कृत्स्नस्य प्रपञ्चस्य ते जठरे अन्तः मायात्वं एव प्रकटीकृतम् ।। १६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपरिच्छेदमेवोपपादयति । तच्चेदिति । जगदाश्रयभूतं तव तद्वपुर्जलस्थमित्येवं यदि सत्सत्यं स्यात्तर्हि तदैव कमलनालमार्गेणांतः प्रविश्य संवत्सरशतं विचिन्वताऽपि मया हे भगवन्नचिन्त्यैश्वर्यं तत्र किमिति न दृष्टम् । न च बाह्यदृश्यं सद्वपुः किन्त्वन्तः

---

[१] दमना–वीर. ।

करणदृश्यमेवेति चेत्तदा हृद्यपि किमिति नो व्यदर्शि न दृष्टम् । तदैव तपःकरणानंतरं सपद्येव सुदृष्टमतो मायैव । अतस्त्वन्मतेर्देशविशेषपरिच्छेदः सत्यो न भवतीत्यर्थः ॥ १५ ॥ अपि च यदि जलादिप्रपंचः सत्यः स्यात्तर्हि तेन तव परिच्छेदो भवेत् स तु मायाविलसित इति त्वयैव दर्शितमित्याह श्लोकत्रयेण । हे मायाधमन मायोपशमन । अत्रैवावतारे बहिः स्फुटस्यापि आत्मनो जठरमध्ये जनन्याः प्रदर्शनेन ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदैव प्रलयोत्तरकाले एव । तत्र जले । चक्षुर्विषयं तन्नेत्याह—किन्त्विति । तदा तदात्वेऽन्तःकरणदृश्यत्वे इति यावत् । पुनस्तदैवेति व्याख्यातमेवात्र । यतः कादाचित्कोऽतो हेतोर्मायैव 'भावाभावविषयिणी माया' इति लक्षणात् सत्यं नेत्यर्थः । यतो मायाऽतो हेतोः । इत्यर्थ इति—न हि सिकतातोयस्य शीतत्वादि ज्ञातुं शक्यमसत्यत्वादेवमत्रापि वपुषो मायात्वे तत्परिच्छेदस्य सुतरां मायात्वमिति भावः ॥ १५ ॥ इहैव विमर्शेन तमेवार्थमाह—अपि चेति । तेन प्रपञ्चेन । स तु प्रपञ्चस्तु । विलसितः प्रकाशितः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्भावनामेव दर्शयति—तच्चेदिति । तत्तव सत् पारमार्थिकसत्यमेव वपुर्जलस्थं चेत्तत एव जगदिति जगदात्मकं चेत् तत्तदा किं मया समष्टिजीवतया सर्वजगदात्मकेनापि न दृष्टं तथा किं वा हृदि तृतीयोक्तानुसारेणैव दृढसमाधियोगविरूढबोधेन मया सु सुष्ठु "नातः परं परम ! यद्भवतः स्वरूपम्" इत्यादि तत्रत्यमदुक्तानुसारतः सच्चिदानन्दघनत्वेन दृष्टं वाशब्दस्यान्वयात् पुनश्च किम्वा बहिर्वृत्तौ सत्यां नो व्यदर्शीति ॥ १५ ॥ ननु, पूर्वरीत्या जगतस्तदन्तरपि स्थितत्वात्तद्वत्पारमार्थिकसत्यत्वं कथं न स्यात् तत्राह—अत्रैवेति । पूर्वोक्ते मायाधिष्ठातरि नारायणदेहे समाधिमात्रानुभूते मया पूर्वं तदसत्यत्वमनुभूतं बहिर्दृष्ट्यनुभूते जगति नेत्यास्ताम् अत्रैव मायाधमनार्थमवतारे स्वयं भगवत्तया प्रकाशे हि निश्चितमस्य कृत्स्नस्य प्रपञ्चस्य जगतस्त्वत्तो बहिःस्फुटस्य दृश्यमानस्य तथा तव जठरेऽपि स्फुटस्य दृश्यमानस्य सर्वमनुभूतवत्या ते तव जनन्यापि कर्त्र्या मायात्वं मायिकत्वमेव प्रकटीकृतं व्यञ्जितम् अहं ममासावित्यादौ तथाऽपि "यन्माययेत्थं कुमतिः स मे गतिः" इत्यनेन यद्यप्यहं ममासावित्यादि तथाऽपि यन्माययेत्थं स्वसुतान्तर्जगद्दर्शनरूपा कुमतिर्मम जाता स एव मम गतिरित्यर्थ एव हि तत्तत्सम्बद्धः । अतस्तदपि तवाङ्गं न जलाद्याश्रयं नापि जगदिति निश्चितं तत्र त्वमेवं दृष्टान्त इति व्याजेन पुनः श्रीकृष्णविग्रहमेव परमतत्त्वरूपत्वेन साधयति–अत्रैवेति त्रिभिः । मायाधमनावतार ! इति तत्सम्बन्धमात्रं न सोढम् अघादीनामपि तत्सम्बन्धानाकरणदृष्टेरिति भावः । तच्च युक्तं स्वयं भगवत्त्वेन परात् परत्वात् तथा चैकादशे "नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते" इत्यत्र व्याख्यातं तैरेव "विराड् हिरण्यगर्भश्च कारणं चेत्युपाधयः । ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदं विदुः" इति अस्य बहिःस्फुटस्य प्रपञ्चस्य निजान्तर्जठरे जनन्यास्तां प्रति दर्शनेनेत्यर्थः । मायात्वं पूर्वोक्तं यत्तदीयजलादिप्रपञ्चाश्रयत्वस्य मायिकत्वं तदेव व्यक्तीकृतम् । यद्वा, विशेषेण तात्पर्यं जगदिदं बहिरेव स्फुटं नान्तरित्यस्यार्थस्येति "अथोऽमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग" इति तथैव स्वाभाविकाचिन्त्यशक्तिमयपरिच्छेदा परिच्छेदनिर्णयात् देवमायात्वस्य परिहारत्वाच्च श्रीशुकेन "न चान्तर्न बहिर्यस्य" इत्यादिना तादृशत्वनिर्णयात् जगतः स्वाभाविकमेव त्वदाश्रयकत्वं न सम्भवति इति भावः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

सत्यत्वमेवोपपादयति—तदिति । प्राकृत-जलस्थमहो बहिर्दृष्ट्यापि नैव दृष्टमित्याह—किं वेति । सुशब्देन 'तप तप' इत्याज्ञा-श्रवणरूपमात्रदर्शनम्, तदैवेत्यनेन च महाप्रयासतश्चिरकालेनैव दृष्टमिति सूच्यते । न च प्रयाससाध्यमपीत्याह—किं नो इति, हृद्यपि किमिति न दृष्टम्, पुनरिति श्रीब्रह्मणे वरं दत्त्वा ध्याने वा सुकृदात्मानं दर्शयित्वा श्रीभगवत्यन्तर्हिते सति तद्विरहाकुलो ब्रह्मा पूर्ववत्तद्दर्शनार्थं पुनरपि तपश्चक्रे, तथापि हृदि न ददर्शेति सूचयति—सपद्येवेति, कालान्तरे स्वत एव हृदि दृष्टमिति बोधयति, यद्वा, न च तत्र तन्नास्तीति वक्तव्यम्, पश्चात्तत्कृपया तत्रैव दृष्टत्वादित्याह—किमिति । पुनः पश्चाद्विशेषेण तत्तत्सौन्दर्य्यपरिच्छदपरिवारसाहित्यादिनाऽदर्शि नो किम् ? अपि तु दृष्टमेव । एवं श्रीभगवद्वपुष इव तत्क्रीडापरिच्छदजलादेरपि स्वप्रकाशत्वमभिप्रेतम् । यद्यपि जलाद्युपाधेरसत्यत्वेऽपि सदा तत्सम्बन्धाभावेऽपि सदा सत्यं नारायणत्वं सुसिध्येदेव, तथापि तल्लीलाया नित्यत्वादिना तत्परिकरादेरपि सत्यताद्यपेक्षया तथा व्याख्यायते ॥ १५ ॥ ननु, तर्हि तज्जलादि-सत्यत्ववज्जलादिमयस्यास्य प्रपञ्चस्यापि सत्यता घटेत, तथा सति च सच्छास्त्रेण सदनुभवेन च विरुद्ध्यते ? सत्यम्, प्रपञ्चोऽयं मायिक एवेत्याह—अत्रैवेति द्वाभ्याम् । माया-धमनो योऽवतारस्तस्मिन्नित्येतदवतारसम्बन्धिनां सर्वेषामप्यमायिकत्वम्, तथैतदवतारोपासकानामपि मायापगमादिकमभिप्रैति । किञ्च, अप्यर्थे एवशब्दो माया-धमनावतारेऽपि, हि निश्चितम् । मायात्वं प्रकटीकृतमिति परम-मायिकत्वं सूचयति । ते जनन्या श्रीयशोदया प्रकटीकृतमिति परमाप्तत्वेन तत्र प्रामाण्यञ्च । अप्यर्थे च कारः, कृत्स्नस्यापि, किं वोक्तसमुच्चये,

त्वदन्तर्जठरे वर्त्तमानस्य चेति दृष्टान्तः, सिद्धस्य साध्यान्तिके निर्द्देशात् । अयमर्थः – सत्यतया साक्षादनुभूतस्यापि तस्य क्षणान्तेऽदर्शनाद्यथा स्वाप्निकेन्द्रजालिकादिवन्मायिकत्वम्, तथा तादृशस्य बहिःस्फुटत्वेन वर्त्तमानस्यापि मायिकत्वमेव संगच्छेतेति तया श्रीनन्दादिष्वभिव्यञ्जितमित्यर्थः । एतच्च स्तन्यपाने जृम्भया विश्वदर्शनावसर इति बोद्धव्यम् । यद्वा, श्रीब्रह्मणः सर्वज्ञत्वात् सम्प्रति श्रीभगवदनुग्रहविशेषाच्च तद्वारद्वयवृत्तज्ञानमेव वृत्तम्, ततश्च जनन्या तद्द्वारा तस्यां प्रदर्शनेन त्वया व्यक्तीकृतमित्यर्थः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पूर्वप्रकृतस्वेच्छामयत्वमेव प्रकटीकरोति–द्वाभ्यां तच्चेज्जलस्थमिति । हे भगवन् ! तव सज्जगद्वपुः सत्यं जगदेव वपुर्यस्य एतादृशन्तत्तव स्वरूपं नारायणस्य तव स्वरूपं जलस्थमेव चेत्तदा मे मया किं न दृष्टं नालमार्गेण विचये कृतेऽपि अदर्शनं त्वदिच्छाविलसितं पुनः हृदि मे मम तदैव किं वा सुदृष्टं अनन्तरं सपद्येव अवतारादिना पुन· किन्नो एव व्यदर्शि तदिदं सर्वं त्वदिच्छामन्तरेण कथं संभवेत् अनेन स्वरूपरूपयोर्विवेक उक्तः दुर्ज्ञेयत्वं स्वदयैकदृश्यत्वं चोक्तम् ॥ १५ ॥ किञ्च अत्रैवेति अवतारे प्रादुर्भावे हे मायाधमन ! दम्भस्य कपटस्य वा निवर्त्तक ! प्रपञ्चासत्त्वस्य वा निवर्त्तक ! सर्वपदार्थस्य तत्ख्यात्यङ्गीकाराद् बहिःस्फुटस्य स्थूलावस्थस्यास्य प्रपञ्चस्य कृत्स्नस्य सूक्ष्मस्य च अन्तर्जठरे वर्त्तमानस्य त्वया यथा जनन्या यशोदाया मायात्वमेव स्वसङ्कल्पायत्तत्वमेव प्रकटीकृतं तथा तदानीं सृष्टयवसरे मयापि त्वया स्वरूपरूपादिप्रकाशनं ज्ञानोपदेशद्वारा एव कृतं न तु साक्षात्त्वेन अचिन्त्यत्वान्मनोवचसोरगोचरत्वात् च इदानीं तु साक्षादिति विशेषः । एवं च मम मोहोऽप्युचित एव मदीयकलाविकल्पेषु कल्पनं विविधकलनं च तेषु मम मोहाभावस्त्वयैवोक्तः "यथा पूर्वमकल्पयत्" इति श्रुतेः सृष्टावेव कर्त्तव्यायां मम मोहो न भवतीति वरो भवता दत्त इति ज्ञेयम् अन्यथा बहुविरोधः स्यात् । नतु भवल्लीलाविकल्पेष्विति रहस्यम् अनेनाध्यायत्रयस्य प्रक्षिप्तवादः प्रक्षिप्तः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं चतुर्द्धा नारायणशब्दव्युत्पत्तिर्दर्शिता नराणामात्मत्वादधीशत्वाच्चाखिललोकसाक्षित्वाच्च जलायनत्वाच्च नारायण इति अस्त्वेवं न मय्येतानि प्रवृत्तिनिमित्तानि दृष्टानीति नाहं नारायण इत्यपेक्षायां तत्प्रवृत्तिनिमित्तचतुष्टयमपि तस्मिन्स्वानुभवेन दर्शयति, तच्चेदित्यादिना, सन्ति विद्यमानानि जगन्ति यस्मिस्तत्तव वपुः सृष्ट्यादौ जलस्थ चेत्त्वं नारायण एवेत्यर्थः । स जगदित्यनेन सर्वजगद्धारकत्वरूपतदात्मत्वमाद्यं प्रवृत्तिनिमित्तं तस्मिन्प्रदर्शितं जलस्थमित्यनेन तुरीये तवेत्यनेन तवापि कुक्षिस्थाखिलचिदचिदात्मकलोकस्य स्रक्ष्यमाणस्य सर्गोपयुक्तप्रवर्तकत्वं साक्षित्वं चेत्युभयं विवक्षितं तवाधीशस्याखिललोकसाक्षिणश्चेत्यर्थः । चेदिति यद्यर्थकमव्ययं यदिशब्दश्च सम्भावनायां सा च क्रियासु योग्यताध्यवसायरूपा जलस्थ चेज्जलावस्थितिविषयकमदध्यवसायविषयं चेदित्यर्थः । तत्र स्वानुभवमेव काक्वा विशदयति, हे भगवन् ! तदेव जलस्थमेव वपुः मे मया न दृष्टं किं दृष्टमेवेत्यर्थः । यज्जलस्थ तदेव मे हृदि नेत्यनुषङ्गः न सुदृष्टं किं सुदृष्टमेवेत्यर्थः । पुनः सपद्येव तदैव नो व्यदर्शि तिरोधापितं न किं त्वयेति शेषः । नो व्यदर्शीत्यनेन तत्र प्रत्यभिज्ञाप्रमाणत्वेनोपन्यस्ता ॥ १५ ॥ ननु, यज्जलस्थं यच्च भवता जले हृदि च दृष्टं यच्च तिरोभूतं तद्वपुरनिरुद्धमूर्त्तेर्जगत्कारणभूतस्यैव न तु ममाऽतो नाहं नारायण इत्यपेक्षायामेतदवतारदशायामपि तच्चतुष्टयं त्वन्मात्रापि दृष्टमेवेत्याह—अत्रैवेति । हे मायादमन ! अस्मदादिकर्तृकमायां मोहनात्मिकां दमयति निरस्यतीति तथाभूतप्रपन्नानां प्रकृतिसम्बन्धनिवर्तकेति वा बहिः स्फुटस्यास्य चिदचिदात्मकस्य प्रपञ्चस्यास्मिन्नेवावतारेऽन्तर्जठरे जनन्या प्रदर्शनेनेति शेषः । ते त्वया मायात्वं विचित्रशक्तित्वं प्रकटीकृतमेव "विपुलं जगदल्पीयसि मत्कुक्षौ जनन्या दृष्टम्" इत्येतद्वचस्त्वदीयमग्निना सिञ्चेदितिवदयोग्यार्थप्रतिपादनमितीयमाशङ्का मायात्वं प्रकटीकृतमित्यनेन व्युदस्ता विचित्रशक्तियुक्तत्वात्तद्दर्शयितुं प्रभुरेव त्वमिति भावः ॥ १६ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

तदेवोपपादयति तच्चेदिति हे भगवन् ! निरुपाधिकज्ञानादिषड्गुणसम्पन्न ! तथाचोक्तम्—

"ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः" ॥ इति ।

तदैव जन्मकाल एव तत्सज्जगद्वपुः सज्जगच्छरीरकं जलस्थं तव वपुः किं मे न दृष्टमिति पुनः काकुः किन्तु अन्तःकरणमालिन्यात्साक्षाद्दर्शनाभावेऽपि अनुमानेन दृष्टमेव तथा तृतीये स्वेनैवोक्तम्—

"क एष योऽसावहमब्जपृष्ठे एतत्कुतो वाब्जमनन्यदप्सु । अस्ति ह्यधस्तादिह किञ्चनैतदधिष्ठितं यत्र सतानुभाव्यम्" ॥ इति ।

पश्चात्तपसा शुद्धान्तःकरणे सति साक्षादपि दृष्टमित्याह–किं वा सुदृष्टमिति किम्वाशब्दौ पक्षान्तरे पुनस्तदैव समाधिरूपतपःकरणानन्तरं भगवत्प्रसादात् शुद्धेन मनसा सुदृष्टं तद्रूपं हृदि सपद्येव किं मे न व्यदर्शि ? दृष्टमेवेति अतस्तव दिव्यविग्रहं मलिन-

सत्त्वानां दृष्टिगोचरं न भवति अप्राकृतत्वात्तस्य तथा च "श्रुतिः न मांसचक्षुरभिवीक्षते तं न सन्दृशे तिष्ठति रूपमस्य आदित्यवर्णं तमसः परस्तात्" इत्यादि अतस्तव विग्रहस्य परिच्छिन्नत्वापरिच्छिन्नत्वरूपं त्वत्सङ्कल्पायत्तमेवेति भावः। तथा च भगवद्वाक्यमर्जुनं प्रति –

"इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्। मम देहे गुडाकेश! यच्चान्यद्द्रष्टुमिच्छसि॥
न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा। दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्"॥ इति ॥ १५ ॥

अथ ब्रह्मणः स्वस्य भगवत्प्रसादात् दिव्यं ज्ञानं जातमिति। जनन्यै दर्शितं विश्वरूपं करामलकवत् पश्यन् कथयति हे मायाधमन! शरणागतमायाकार्यसंसारनिवर्त्तक! तदुक्तं भगवता "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति अत्रैवावतारे बहिः स्फुटस्य प्रसिद्धस्य कृत्स्नस्याऽस्य प्रपञ्चस्य जठरे स्वोदरे जनन्याः प्रदर्शनेनेति शेषः। मायात्वं योगैश्वर्यमेव ते त्वया आदर्शितं प्रकटीकृतम् अतस्त्वमेव सर्वशरीरीत्यर्थः॥ १६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तच्चेज्जलस्थमित्याद्यष्टकम् ॥ १५-२२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

जलस्थस्य नारायणरूपस्य सत्यत्त्वं पुनः प्रतिपादयन्नाह- तच्चेत्-जलस्थमित्यादि। तत् प्रसिद्धं जलस्थं नारायणाख्यं वपुः सत् सत्यम्। कीदृशम्? चेतयति सर्वमिति चेत्। पुनः कीदृशम्? सज्जगत् सन्ति जगन्ति यत्र तत्तथा, तर्हि तन्नारायणाख्यं माययैव न अपि तु सत्यमेवेत्यर्थः। ननु तस्य सत्यत्वे किं प्रमाणमित्याह—किं मे न दृष्टम्, मे मया किं न दृष्टम्, न ज्ञातम्? अपि तु दृष्टं ज्ञातमेवेति मदनुभव एव प्रमाणम्। सत्यं चेद्भवता कथं न विलोकितम्? तत्राह—हे भगवन्! तदैव मे मया हृदि किं वा न सुदृष्टम्? हृदये सुविलोकितमेव। ननु भावनया किं न दृश्यते? तेन तत्प्रामाण्यं नास्ति? तत्राह—किं नो तदैव सपद्येव साक्षादेव पुनर्व्यदर्शि, अपि त्वदर्शि। अतोऽनुभवेन प्रत्यक्षण च सिद्धमेव तत् सत्यत्वम्॥ १५॥ ननु तस्य सज्जगत्त्वं त्वया कथमवगतम्? तस्य तन्मायिकमेव? मैवम्। (भा. १।३।५) "यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः" इत्युक्तेस्तस्य सर्वबीजत्वादन्ते च सर्वाश्रयत्वात् स एव भुवनद्रुमः, त्वदुदरे यज्जगत्तदेव न माया त्वन्तु केवलघनानन्द इत्याह—अत्रैव मायाधमनेत्यादि। हे मायाधमन! अत्रैवावतारे बहिः स्फुटस्य कृत्स्नस्य प्रपञ्चस्यान्तर्जठरे जठरस्यान्तर्जनन्यै मायात्वं दर्शितम्, बहिर्वर्तमानत्वेऽपि यदंतर्वर्तित्वं प्रपञ्चस्य तन्मायैव, जनन्याः—चतुर्थ्यर्थे षष्ठी नारायणान्तर्वर्तित्वं तु तस्य सर्गादौ महाप्रलये चेति तव तस्यायमपि भेदोऽन्यः॥१६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

यदि सत्यं तत्तदा कथं नेदृशीत्याह—तच्चेदित्यादि। तव तु वपुर्जलस्थमेव सदिति चेत्तदा कथं न मया दृष्टम्? अतस्तस्य जलस्थता अनित्या, न तु तद्वपुः, त्वद्विग्रहस्य देश-कालपरिच्छिन्नता तु न सत्या व्यापकत्वात्, व्यापकत्वञ्च द्वेधा-परिच्छिन्नाकारमपरिच्छिन्नाकारञ्च। परिच्छिन्नाकारञ्च द्वेधा-एकतया अनेकतया च। तदेवाह—किं वा हृदि सुदृष्टं तत्राप्यनियतत्वम्, व्यापक-धर्मत्वात्। अत आह—किं वा नो पुनर्व्यदर्शि? किंवा सज्जगद्वपुः सन्ति जगन्ति यत्र तत् सज्जगत्। जलस्थमेव तत्तदा कथं न मे दृष्टम्, हृदि सुदृष्टं चेत्तदा कथं पुनर्नो व्यदर्शि? अतो जले वा हृदये वा कुत्रापि तत् नियतं न भवति। किंवा तव वपुः किं जलस्थं नैव? कीदृशम्? सज्जगच्चेतयति भुवनमिति चेत् यदि जलस्थमभविष्यत्, तदा किं न मे दृष्टमित्यादि पूर्ववत्। यद्वा, जलस्थ तव वपुर्जगन्निवासत्वेन जगदित्युपचारः सत् सत्यम्, तर्हि त्वया कथं न दृष्टम्, तत्राह—हे भगवन्! अचिन्त्यमहिमन्! मया न दृष्टम्? तत् किं वा तेन किं वा इत्यर्थः। किं वा सुदृष्टं हृदि हृदये दृष्टं तेन वा किम्? तेन-चेत् स तदा कथ पुनर्नो व्यदर्शि वा किम्? अतो मद्दर्शने नासदिति नैव, वस्तुतः सदेव तदित्यर्थः॥ १५॥ सज्जगदिति यदुक्तं तन्मृषा, मम वपुषि कथ जगदुद्वर्त्ताम्? तत्राह—अत्रैवेत्यादि। अस्तु दूरत उदाहरणम्, हे मायाधमन! बहिः स्फुटस्याप्यस्य कृत्स्नस्य प्रपञ्चस्यान्तर्जठरे मायात्वं प्रकटीकृतं जनन्या इति चतुर्थ्यर्थे षष्ठी। एवं नारायणवपुषि यज्जगत्, तदपि मायैव। यद्वा, तस्य विश्वस्यान्तर्जठरेऽवतारे सति बहिः स्फुटस्य मायात्वमादर्शितम्, बहिर्यद्दृश्यते तन्मायिकम्, नान्तः, तदेव नारायणवपुस्त्वय्येव जनन्यै च दर्शितम्॥ १६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, नारायणस्वरूपं तत् यदि शुद्धसत्त्वात्मकं तर्हि प्राकृते गर्भोद एव परिच्छिन्नं कुतः सदा दृश्यते न हि सर्वव्यापकस्य तस्य गर्भोदमात्रपरिच्छेदः सम्भवेत्तत्र तस्य तज्जलस्थत्वमेव न नियतमित्याह—तत् नारायणाख्यं वपुस्तव सज्जगत् सत् वर्तमानं जगत् यत्र तत् जलस्थमेव चेत् तर्हि तदैव कमलनालमार्गणान्तः प्रविश्य सम्वत्सरशतं विचिन्वतापि मया हे भगवन्नविचिन्त्ययोग-

मायैश्वर्य्य ! किं न दृष्टम् । ननु, तत्तत्र जल एव स्थितं त्वया त्वज्ञानान्न दृष्टमिति चेत् तदा त्वां ध्यायता मया तदैव हृद्यपि सुष्ठु कि वा दृष्टं तत्क्षण एव तत्राऽपि किं पुनर्न व्यदर्शीत्यतस्तद्वपुस्तव जलस्थत्वेन परिच्छिन्नमपि अचिन्त्यशक्त्या स्वकुक्षीकृतजगत्कत्वेनाऽपरिच्छिन्नं च सर्वत्रैव देशे काले च वर्त्तमानमेवापि त्वदीययोगमायया आवरणप्रकाशाभ्यामेव दृश्यते न दृश्यते चेत्यवगतम् ॥ १५ ॥ ननु, यस्यैव जगतोऽन्तर्वर्त्तिनि जले तद्वपुः स्थितं तदेव जगत् तत्कुक्षौ तिष्ठतीत्यसङ्गतं न हि गृहस्यान्तर्वर्त्तिनि घटे तदेव गृहं तिष्ठेदित्यतः शुद्धसत्त्वात्मकवपुषि तस्मिन्नस्मान्मायिकादन्यदमायिकमन्यदेव वा जगद्भवेदित्यवसीयते एवं च सति न त्वं मत्कुक्षिगत इत्याशङ्क्य कुक्षिगतस्य जगतो बहिःष्ठजगदैक्यं वदन्नेव मायिकत्वं प्रतिपादयति—द्वाभ्यामत्रैवेति । हे मायाधमन, मायोपशमक ! अस्य बहिः स्फुटस्यैव प्रपञ्चस्य कृत्स्नस्यापि अन्तर्जठरे प्रदर्शनयेति शेषः । जनन्याः जननीं श्रीयशोदां प्रतीत्यर्थः । मायात्वं मायिकत्वम् अतो दुस्तर्कयोगमायैव त्वद्वपुर्जगदन्तर्वर्त्त्यपि सर्वजगद्व्यापकं युगपदेवेति ध्वनिः । तेन साक्षात्तवापि कुक्षिगतोऽहमधुनापि वर्ते इति साक्षात् त्वमपि मन्मातेत्यनुध्वनिः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अल्पदेशस्थस्यैव वपुषः व्यापकत्वं स्वानुभवेन प्रपञ्चयति, तच्चेदिति । तव तद्वपुः जलस्थं चेत्तदा सज्जगत् सन्ति सत्यरूपाणि जगन्ति यस्मिन् तत्तथाभूतं व्यापकं न किम् ? अपि त्वस्त्येव तदैव मे मया न दृष्टं किम् ? अपि तु दृष्टमेव । ननु, व्यापकं वपुर्जलस्थं कथं भवेदित्यत्राह–हे भगवन्निति । अचिन्त्यैश्वर्ये त्वयि सर्वं सूपपन्नमिति सम्बोधनाभिप्रायः । अचिन्त्यैश्वर्य्यमेव स्फुटत्वेन दर्शयति—किं वा तदैव नाभिजपद्मस्थेन मे मया जलस्थं बहिःस्थमपि हृदि नो सुदृष्टं किम् ? अपि तु सुदृष्टमेव आश्चर्यान्तरमाह—सपद्येव पुनर्नो व्यदर्शि तिरोहितं जातमित्यर्थः ॥ १५ ॥ सज्जगदिति पदेन विश्वस्य यत्सत्यत्वमुक्तं तदुपपादयति, अत्रैव अस्मिन् एवावतारे अस्य विश्वस्य मायात्वं स्वशक्त्यभिन्नत्वं सदुपादानकतया सत्यत्वम् अन्तर्जठरे परमकारणस्य तवोदरमध्ये प्रकटीकृतम् । ननूदरमध्ये वञ्चनापरपर्य्यायिभूतया माययैव कुतो न जननीं प्रति विश्वप्रकटीकरणमङ्गीक्रियते ? इत्यत्राह हे मायाधमनेति । स्वानन्यशरणानामन्येषामपि मायां कापट्यं वञ्चनां निवारयति, यः तस्मिन् सत्यसङ्कल्पे सर्वेश्वरे स्वभावतोऽपास्तसमस्तदोषे त्वयि कापट्यगन्धलेशोऽपि नास्तीति सम्बोधनशब्दार्थः । अत्र यदि जलादिप्रपञ्चः सत्यः स्यात्तर्हि तेन तव परिच्छेदो भवेत्स तु मायाविलसित इत्यादिमायाद्युक्तिर्निर्मूलत्वात् "सन्मूलाः सौम्येमाः प्रजाः" इत्यादिश्रुतिविरुद्धत्वाच्चोपेक्षणीया ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु गर्भोदे शयानस्य न पारमार्थिकं परिच्छिन्नत्वात् विभु परमाणु च तथा स्वीक्रियते एवं कारणोदे शयानस्याचित्तत्त्वं न स्यादिति चेत्तत्राह यच्चेदिति, तन्नारायणाख्यं वपुस्तव सद्विद्यमानं जगद्यत्र तादृशं चेज्जलस्थमेव तर्हि मे मया कमलनालमार्गेणान्तः प्रविश्य सम्वत्सरशतं विचिन्वता तदा किं न दृष्टं हे भगवन् अतर्क्यैश्वर्य ! ननु तस्मिन् जल एव स्थितमज्ञानात् त्वया न दृष्टमिति चेत् ध्यायता मया तदैव हृदि किम्वा सुष्ठु दृष्टं सपदि तत्क्षण एव पुनः किं नो व्यदर्शि न दृष्टमिति तथा च जलस्थमपि तद्वपुः कुक्षिगतं जगत्कं विभु चेति पारमार्थिकं तत् एवञ्च कारणोदशयञ्च व्याख्यात कृपौदासीन्ये एव दर्शनादर्शनयोर्हेतु एव भावः ॥ १५ ॥ ननु जगदन्तर्वर्त्तिजलस्थं वपुः कुक्षिगतं जगत्कमिति विरुद्धं तत्राह अत्रैवेति । हे मायाधमन प्रकृतिनियन्तः अत्रैव स्वयं भगवत्यवतारे अस्य कृत्स्नस्य प्रपञ्चस्य त्वज्जठराद्बहिः स्फुटस्य दृश्यमानस्यान्तर्जठरे जनन्याः श्रीयशोदायास्तां प्रति प्रदर्शयता ते त्वया मायात्वमचिन्त्यशक्तित्वमेव प्रकटीकृतं मया विज्ञातं तथा च त्वद्वपुषो जगदन्तस्थत्वमन्तर्गतजगत्कत्वञ्चेति द्वयमचिन्त्यशक्तिसिद्धमित्यधुनापि मे त्वत्कुक्षिस्थत्वात् मात्रेवापराधः सोढव्य इति भावः ॥ १६ ॥

श्रीसुबोधिनी

तस्य मायिकत्वार्थे तर्कमाह, तच् चेत् **जलस्थ**मिति, **तद् वपुश्चेत् सज् जलोपरि** च वर्तते तदा **मे** मया **किं तदैव न दृष्टं** ? यो हि स्थूलपदार्थः परिच्छिन्नो योग्ये वर्तते स दृश्यते यथा घटः, अतस्तदा मया न दृष्टमिति न तज् जले तिष्ठति, नन्वयोग्यत्वान्न दृश्यते न त्वविद्यमानत्वादित्याशङ्क्याह **किं वा सुदृष्टं हृदि मे** तदैवेति ? न हि हृदये जलमस्ति, अतो जलस्थितिर्न **नारायण**शब्दप्रवृत्तिप्रयोजिका, किञ्च **सपद्येव पुनः किं नो व्यदर्शि** ? अस्मभ्यं कथं न दर्शितवान् ? यद्यहं तस्य नारायणस्यैव पुत्रः, लोके हि पितापुत्रावन्योन्यं प्रत्यक्षसिद्धौ भवतः, न हि तयोरन्यतरो योग्यो भवितुमर्हति, वस्तुतो भवानेव **नारायणो** न तु सः, **नारं** सर्वमेवायते प्रविशति यमिति **नारायणः** सर्वजगदाधारः, स भवानेव न तु सः ॥ १५ ॥ तस्योदर एवाहं स्थितो जगत् कृतवान् यदि जगत् तत्र सहजं तिष्ठेत् मम कृतिर्व्यर्था स्यादत्र तु तिष्ठतीत्याहात्रैवेति, हे **मायाधमन** मायानिवारक, अनेन मायासम्बन्धो भगवति निराकृतः, **अस्य प्रपञ्चस्य बहिःस्फुटस्य कृत्स्नस्याप्यन्तर्जठरे ते जनन्यामायात्वमेव प्रकटीकृतं**, "अथो अमुष्ये"ति वाक्यात्, अतः सत्यप्रपञ्चाधारत्वाद् भवानेव नारायणः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उक्तमेव स्पष्टयति—तच्चेदिति । चेद्यदि सद्विद्यमानं जगत् यस्मिंस्तत् वपुर्नारायणस्वरूपं जलस्थं परिच्छिन्नमेव, तर्हि हे भगवन् अचिन्त्यैश्वर्य ! मे मया तदा कमलनालमार्गेणान्तःप्रवेशान्वेषणसमये एव किं न दृष्टम् ? तदा तपःकरणानन्तरं हृदि स्वहृदय एव किंवा सुदृष्टं सम्यक् दृष्टम् ? पुनश्च सपदि तत्क्षणमेव तत्रापि नो व्यदर्शि नैव दृष्टम् । अतो व्यापकस्यैव तवेच्छया तथा दर्शनम्, न परिच्छिन्नत्वमिति भावः ।। १५ ।। हे मायाधमन भक्तजनमोहनिवारक ! अत्र अस्मिन्नेवावतारे अस्य बहिःस्फुटस्य प्रत्यक्षसिद्धस्य कृत्स्नस्यापि प्रपञ्चस्य स्वजठरमध्ये जनन्याः यशोदायाः प्रदर्शनेन मायात्वं स्वेच्छाधीनलीलामात्रत्वमेव ते त्वया स्फुटीकृतम् "सा वा ईशस्य सन्द्रष्टुः शक्तिः सदसदात्मिका ।। "माया नाम महाभाग ! ययेदं निर्ममे विभुः" इति तृतीयस्कन्धे लीलानुकूलेच्छाविशेषस्यैव मायाशब्देनोक्तत्वात् । हिशब्दः प्रसिद्धयर्थकः ।। १६ ।।

अन्वितार्थप्रकाशिका

अपरिच्छेदमुपपादयति—तच्चेदिति ।। चेद्यदि सद्विद्यमानं जगत् यस्मिंस्तत् जगदाश्रयभूतं तव तद्वपुर्नारायणस्वरूपं जलस्थं परिच्छिन्नमित्येवं यदि सत् सत्यं तर्हि हे भगवन् अचिन्त्यैश्वर्य ! मे मया तदा कमलनालमार्गेणान्तः प्रवेशान्वेषणसमय एव दृष्टं तदा तपःकरणानन्तरं हृदि स्वहृदय एव किं वा सुदृष्टं सम्यक् दृष्टं पुनश्च सपदि तत्क्षणमेव तत्रापि नो व्यदर्शि नैव दृष्टम् अतो व्यापकस्यैव तवेच्छया तथा दर्शनं न परिच्छिन्नत्वमिति भावः ।। १५ ।। वस्तुतो जलादिप्रपञ्चस्यावास्तवात्तेन तव कथं परिच्छेद इत्याह—अत्रैवेति ।। हे मायाधमन मायोपशमन ! धमतेः सौत्राल्ल्युः । अत्र अस्मिन्नेवावतारे अस्य बहिःस्फुटस्य प्रत्यक्षसिद्धस्य कृत्स्नस्यापि प्रपञ्चस्य अन्तर्जठरे स्वजठरमध्ये जनन्याः यशोदायाः प्रदर्शनेन मायामात्रत्वमेव ते त्वया प्रकटीकृतम् ।। १६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रत्यक्षस्त्वमेव सत्योसि अन्यच्च सर्वं मायेत्याह हे मायाधमन मायानिवर्त्तक अत्रैवावतारे बहिःस्फुटस्य कृत्स्नस्यास्य विश्वस्य अंतर्जठरे जठरमध्ये जनन्याः स्वमातुः दर्शनेन मायात्वं योगैश्वर्यत्वं ते त्वया प्रकटीकृतम् ।।१५।। स्फुटतया तदेव योगैश्वर्यमाह श्लोकद्वयेन यस्येति–यस्य तव कुक्षौ सात्मं आत्मना त्वया सहितम् इदं सर्वं विश्वं यथा भाति तथा तत्सर्वम् इहापि बहिरपि तथैव भाति इदं तत्सर्वं त्वयि मायया योगैश्वर्यबलेन विना किं घटेत न घटेत ।। १६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

जलस्थभगवद्वपुषः सत्यत्वोक्त्या संप्राप्तपरिच्छिन्नत्वं निवारयितुं तदपरिच्छेदं तदाश्चर्यशक्तिमत्त्वोक्त्योपपादयति ।। तच्चेदिति ।। जगत् जगदाश्रयभूतं, तव तत् जलस्थं, वपुः सत् चेत्, परिच्छिन्नत्वेन सच्चेदित्यर्थः । तर्हि, तदैव संवत्सरशतपर्यन्तं सम्यगन्वेषणकरणकालेऽपि, मे मया, हे भगवन्, किं न दृष्टम्, चक्षुर्भिरिति शेषः । चक्षुर्भिर्वीक्षणं मास्तु । हृदि हृदयेऽपि, मे मया, किं नो व्यदर्शि न दृष्टम् । तदा एव तपःकरणानन्तरमेव, सपद्येव, पुनः किं वा सुदृष्टम् । अतः मायाख्यत्वदिच्छाशक्तेः सर्वमपि संभवत्येव, वस्तुतस्त्वन्मूर्त्तेर्देशविशेषपरिच्छेदः सत्यो न भवतीति भावः ।। १५ ।। ननु यच्च जलस्थं, यच्च भवता जले हृदि च दृष्टं, यच्च तिरोभूतमेवं महैश्वर्यप्रदर्शकं तद्वपुरनिरुद्धमूर्त्तेर्जगत्कारणभूतस्यैव न तु ममातो नाहं नारायण इत्यपेक्षायां हे कृष्णैतदवतारदशायामपि महदैश्वर्य त्वन्मात्रापि दृष्टमेवातस्त्वमेव नारायण इत्याह ।। अत्रेति ।। मायामस्मदादिकृतमोहनात्मिकां दमयति निरस्यतीति मायादमनस्तत्संबोधने हे मायादमन, पाठान्तरे हे मायोपशमन प्रपन्नानां प्रकृतिसंबन्धनिवर्त्तकेत्यर्थः । अत्रास्मिन् अवतारे एव, बहिः स्फुटस्य, कृत्स्नस्य च, अस्य चिदचिदात्मकस्य, प्रपञ्चस्य, अन्तर्जठरे स्वकीयोदरान्तरे, जनन्याः स्वमातुः, प्रदर्शनेनेति शेषः । एव ते त्वया, मायात्वं विचित्रशक्तिमत्त्वं प्रकटीकृतं हि । विचित्रशक्तियुक्तत्वात्तथा दर्शयितुं त्वं प्रभुरेवासीति भावः । विपुलं जगदत्तीयसि मत्कुक्षौ जनन्या दृष्टमित्येतत्त्वदीयं वचोग्निना सिञ्चतीतिवदयोग्यार्थप्रतिपादकमितीयमाशङ्का मायात्वं प्रकटीकृतमित्यनेन व्युदस्ता ।। १६ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अत्रैवेति : १०. १४. १५.

मायाऽप्राकृतिकारिणीहभवता श्रीशावतारेऽप्यहो यन्मायां स्वमुखे प्रदर्श्य जननी निर्मन्तुकं मोहिता ।
तत्प्रायः प्रतिभाति कौतुकदृशः क्रीडेदृगेवास्ति ते मन्मन्तूदितमीदृशं फलमिति प्राग्राहि चित्तेन मे ।। ३० ।।

कृष्णप्रिया

विश्व के आश्रयभूत वह आपका श्रीविग्रह केवल जल में ही रहने वाला है यदि यही सत्य हो तो हे भगवन ! कमलनाली के छिद्र से प्रवेश कर जब मैंने ढूंढा तब उस अवसर पर मुझे क्यों नहीं दर्शन हुआ ? पुनः तपश्चर्या के अन्त में मैन मेरे

अन्तःकरण में ही उस श्रीविग्रह का भलीभाँति क्यों दर्शन पाया ? और फिर यह भी बात है कि उस समय भी उसी क्षण मैंने क्यों नहीं दर्शन पाया ! इसलिये मेरा मन्तव्य है कि सर्वव्यापक आप की इच्छा से ही उस अवसर मुझे आप के स्वरूप का दर्शन हुआ था ॥ १५ ॥ हे मायानिवर्तक नाथ ! और अवतारगाथा को छोड़ें इसी ही अवतार में बहिर्दृश्यमान विश्व को अपने उदर में ही माता यशोदा जी को दिखला दिया जिस दर्शन से माता आश्चर्यचकित हो गयी थी । इससे यह निश्चय हुआ कि यह प्रपञ्च केवल माया ही माया है तात्पर्य यह है कि अन्तःस्थित सत्यप्रपञ्च के आधार होने के कारण आप ही सत्य है ॥ १६ ॥

यस्य कुक्षाविदं सर्वं सात्मं भाति यथा तथा । तत्त्वय्यपीह तत् सर्वं किमिदं मायया विना ॥१७॥
अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वमादर्शितमेकोऽसि प्रथमं ततो व्रजसुहृद्वत्साः समस्ता [1]अपि ।
तावन्तोऽसि चतुर्भुजास्तदखिलैः साकं मयोपासितास्तावन्त्येव जगन्त्यभूस्तदमितं ब्रह्माद्वयं [2]शिष्यते ॥१८॥

कर्दमक्षमा

अन्वयः—यस्य कुक्षौ सात्मम् इदं सर्वं यथा भाति तथा तत् इह त्वयि तत् सर्वं अपि भाति इदं किं मायया विना ॥ १७ ॥ अद्य एव ते त्वत् ऋते अस्य मायात्वं किं न मे आदर्शितं ? प्रथमं त्वम् असि, ततः समस्ताः व्रजसुहृत्वत्साः, अपि तावन्तः चतुर्भुजाः असि, तदखिलैः साकं मया उपासिताः, तावन्ति एव जगन्ति अभूः तत् अमितम् अद्वयं ब्रह्म शिष्यते ॥ १८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु बहिः सत् एवांतर्जठरे प्रतिबिंबोऽस्तु तत्कुतः सर्वथा मायात्वं तत्राह । यस्येति । यस्य तव कुक्षौ सर्वमिदं यथा भाति तत्सर्वमिहापि बहिरपि तथैव भाति । किं च सात्मं त्वत्सहितं तदिदं सर्वं त्वयि मायया विना किं घटेत । अयं भावः । त्वयि प्रतिबिंबश्चेत्तर्हि बाह्याद्विलोमतया प्रतीयेत न तु तदस्ति तव चादर्शस्थानीयस्य त्वयि प्रतीतिर्न स्यादतः सर्वथा मिथ्यात्वमेवेति ॥ १७ ॥ अपि च न केवलं जनन्या ममापि तथैव दर्शितमित्याह । अद्यैवेति । त्वदृते त्वां विना । अस्य विश्वस्य मायात्वं त्वया ममैव च तदप्यद्यैव किं न दर्शितं किं तु दर्शितमेव । तथाहि एकोऽसीत्यादि । तत्ततो मया सहाखिलैस्तत्त्वादिभिरुपासितास्तावंतश्चतुर्भुजा असि । जगंति ब्रह्मांडानीति प्रागनुक्तमपि दृष्टमिति ज्ञातव्यम् ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्राशङ्कते—नन्विति । सतो विद्यमानस्य । तत्र आक्षेपे । अद्भुतमाह—किञ्चेति, अयं भाव इति । तत् विलोमतया दर्शनम् । यत्तस्त्वमप्यत्र प्रतीयसे अतो हेतोः । न हि प्रतिबिम्बाधिकरणमपि प्रतिबिम्बावलोकने युगपत्प्रतीयतेऽन्यथादर्शोऽप्यादर्शः प्रतीयेत इति तात्पर्यम् ॥ १७ ॥ इहैवान्यदाह—अपि चेति । तथैव मातृवत् । तत् तदनु ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवोपपादयति—यस्येति । यस्य सावरणस्य ब्रह्माण्डस्य कुक्षाविदं सर्वं सात्मं त्वत्सहितं भाति तद्ब्रह्माण्डमिह एतद्रूपे त्वय्यपि भाति तत्तस्मात् दुस्तर्कत्वान्मायया विना तदिदं किं सम्भवति तेन त्वत्संबन्धाभावान्न सम्भवत्येवेत्यर्थः । तस्माच्च नेदं त्वमिव पारमार्थिकं सदिति भावः ॥ १७ ॥ जनन्यनुभवोऽप्यास्तामित्याह—अद्यैवेति । त्वत्पदेनात्र साक्षाद्रूपं बालवत्सचतुर्भुजादिलक्षणं साक्षात्तद्रूपमप्युच्यते "पुरोवदाब्दं क्रीडन्तं ददृशे सकलं हरिम्" इति "तावत् सर्वे वत्सपालाः पश्यतोऽजस्य तत्क्षणात् । व्यदृश्यन्त घनश्यामाः पीतकौशेयवाससः" इति "सत्यज्ञानानन्तानन्दमात्रैकरसमूर्त्तयः" इति चोक्तत्वात् अस्येत्यनेन चात्र तदन्यदुच्यते "आत्मादिस्तम्बपर्यन्तैर्मूर्त्तिमद्भिश्चराचरैः । नृत्यगीताद्यनेकार्हैः पृथक् पृथगुपासिता" इत्यादौ "स्वमहिध्वस्तमहिभिः" इत्युक्तत्वात् साकं मयेत्यनेन स्वाधिष्ठानब्रह्माण्डस्यापि तदन्तःपातो विवक्षितः ततश्च त्वदृते त्वां त्वत्साक्षाद्रूपबालवत्सचतुर्भुजाद्यं च विना यदखिलं दर्शितमस्य जगतस्त्वन्महिमध्वस्तमहिमतया दर्शितस्य किं मायिकत्वं न सम्यग् दर्शितं किं तु दर्शितमेवेत्यर्थः । अथ सर्वमेव तद्दर्शितं विवृणोति—एकोऽसीत्यादिना । तत्र मायिकामायिकसर्वदर्शनाद्यन्तःस्थितं तवैतद्रूपमेव पूर्णं ब्रह्मेत्यपि दर्शितं ब्रह्मलक्षणाक्रान्तत्वादित्याह—ब्रह्माद्वयं शिष्यत इति अद्वयपदेन शास्त्रान्तरप्रसिद्धं यद्ब्रह्म तदप्येतदेवेति द्योतितं "न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि" (३।२।११) इति न्यायात् वक्ष्यते च स्वयमेव अहो भाग्यमहो भाग्यम् इत्यादिना ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु, अस्यैव प्रतिबिम्बत्वेन तस्य मिथ्यात्वमास्तामयं सदा साक्षादनुभूयमानः सत्य एवेति चेत्तत्राह—यस्येति । सात्मं सात्मकम् । अन्यत्तैर्व्यञ्जितम् । यद्वा, अयमपि सत्यः, सोऽपि सत्य इति द्वयमेव सत्यमस्तु ? तत्राह—यस्येति । सर्व्वथा द्वयोरेक-

---

१. असि—वीर. । २. शिष्यसे—वीर. ।

रूपत्वेन बिम्बप्रतिबिम्बन्यायापत्त्यैकस्य मिथ्यात्वमेव सेत्स्यतीति भावः। यद्वा, सर्व्वथैकरूपस्य प्रपञ्चचयस्याश्रवणाप्रसिद्धेरेको मिथ्यैव कल्पते। यदि वा वक्तव्यम् (भा० १०।१४।११) 'क्वेदृग्विधाऽविगणिताण्ड—' इत्यादिवचनतः प्रपञ्चस्य बाहुल्यं मन्तव्यमिति, तथापि सर्व्वेषामेव सत्यतया भगवदीयानामन्येषाञ्च प्राकृतानां विभूतेः साम्यमेवापद्यते; तच्चायुक्तम्। किञ्च, सतां स्वप्नमनोरथादिवन्मिथ्यात्वानुभवेन बहुलश्रुतिस्मृत्यादिवचनैश्च विरोधः स्यादिति सर्व्वथास्य मायिकत्वं युक्तमेव। अतएवोक्तम्—तत् सर्व्वमिति ॥ १७ ॥ ननु, सर्व्वं तत्तन्मायिकं चेत्तर्हि तत्रात्र च वर्त्तमानस्य ममापि मायिकतैव प्रसज्येत, न प्रपञ्चान्तर्गतत्वेऽपि तव भावकानाञ्च सत्यता त्वधुना साक्षान्मयैवानुभूतेति पुनर्मायिकपक्षमेवानुसृत्य साहंकारमाह—अद्यैवेति। यदस्य प्रपञ्चस्य मायात्वम्, तच्च त्वत्तः स्वप्नमनोरथादौ मायामये प्रपञ्चे वर्त्तमानादपि तथा विचित्रबहुरूपतया दृश्यमानादपि विनैवेत्यद्यैव कि ते त्वया मम नादर्शितम्, न सम्यग्दर्शितम्? अपि तु दर्शितमेवेत्यर्थः। कथम्? तत्राह एकोऽसीत्यादिना सुहृदः सखायो बालाः। न च तत्तन्मायिकमित्याह—तत्तद्यदभूस्थं तत् सर्व्वममितं बालकवत्सादिभेदेन परिच्छिन्नत्वेऽप्यपरिच्छिन्नमेव; अद्वयं तत्तन्नानाविधत्वेऽप्येकमेवातो ब्रह्मैव शिष्यते स्वयं पर्य्यवस्यति (भा० १०।१३।५४) 'सत्यज्ञानानन्तानन्द–' इत्यादिस्वरूपतया दर्शनात् ॥१८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

श्रीभगवतः सृष्टिप्रवेशनियमनकर्त्तुर्नारायणस्य श्रीमद्ब्रह्मणः श्रीकृष्णस्य निरङ्कुशैश्वर्यमेव निरूप्य पुनरपि तत्सङ्कल्पायत्तत्वमेव विश्वस्य द्रढयति—यस्य तव नारायणस्य कुक्षाविदं सर्वमचेतनम् आत्मभिः बद्धैः जीवात्मभिः सहितं यथा भाति तथा त्वय्यपि अवतारविग्रहेऽपि तत्सर्वं चिदचिद्रूपं तत् इदं विश्वं किं मायया विना त्वत्सङ्कल्पाधीनत्वं विनादर्शितम् इति काकुः अपि तु तवावताराद्यवस्थापन्नस्य श्रीनारायणस्य स्वेच्छामर्त्त्यत्वमेवेति भावः। तत्तदद्विरुक्तिः सूक्ष्मस्थूलावस्थयोर्जगतोश्चिदचित्त्वेनैकरूप्यं व्यनक्ति ॥ १७ ॥ अद्यैवेति, अद्यैवेदानीमेव त्वयास्य स्वस्य स्वसृष्टस्य चिदचिद्रूपस्य च मायात्वमेव स्वेच्छामयत्वं मम किन्नादर्शितं ऋते सत्यस्वरूपरूपगुणके त्वत् त्वयि दर्शितमेवेति तदेवाह, त्वं प्रथममेकोऽसि ततो व्रजसुहृद्वत्साः समस्तास्त्वमेवाऽसि अनन्तरं तावन्तः वत्सबालाश्चतुर्भुजाः ते त्वमेवासि तत्तदनन्तरम् अखिलैः ब्रह्माण्डैः साकं वर्त्तमानैः मया मद्रूपैर्ब्रह्मभिः तैः सर्वैः उपासिता मया दृष्टा इति वा तावन्ति जगन्ति ब्रह्माण्डानि त्वमेव तद्विशिष्टः श्रीमान्नारायण एवाऽभूरिदानीं तु तत् श्रीनारायणाख्यम् अमितमनन्तं ब्रह्म अद्वय समाभ्यधिकरहित सर्वचिदचिद्विशिष्टं साक्षाद्भवानेवावशिष्यते इदानीं विनैव समाधि प्रत्यक्षो मयाऽनुभूयसे अत्याश्चर्यात्तव सौलभ्यपरा काष्ठेति भावः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेव काक्वा विवृणोति—यस्येति। इदं परिदृश्यमानं चिदचिदात्मकं सात्ममात्मभ्यामावाभ्यां सहितं सर्वं यथा बहिर्भाति तथा तत्सर्वं त्वय्यपि त्वज्जठरे भातमिति शेषः। हेति तदाश्चर्यशक्तिविषयकविस्मयद्योतकमिदं त्वज्जठरे मानं मायया त्वदाश्चर्यशक्त्या विना किं? तन्मूलकमेवेत्यर्थः ॥ १७ ॥ न केवलं जनन्या ममापि तथैव विचित्रशक्तिर्दर्शितेत्याह, अद्यैवेति। अद्य त्वदृते आधुनिकं त्वां विनाऽधुना गोपालकावस्थावस्थितं त्वां विनेत्यर्थः। अस्य त्वत्पूर्वोत्तरावस्थाद्वयं पश्यतो मम ते त्वया मायात्वं विचित्रशक्तित्वं नादर्शितं किं? दर्शितमेवेत्यर्थः। विचित्रशक्तिमूलकं किं किं तव दर्शितमित्यत्राह—प्रथमं मया वत्सवत्सपापहरणदशायाम् एकोऽसि ततः समस्ता व्रजसुहृदो गोपबाला वत्साश्चासि ततः तावन्तः यावन्तो व्रजसुहृद्वत्सास्तावन्तश्चतुर्भुजा असि कथम्भूता मया सहाखिलैश्चराचरादिभिरुपासिताः ततस्तावन्ति यावन्तः चतुर्भुजाः तावन्ति जगन्त्यभूस्तावन्ति विराड्रूपाणि आसीरित्यर्थः। इदं प्रागनुक्तमपि तदा दृष्टमत्रोच्यते इति ज्ञेयम्। तत्ततोऽमितमपरिच्छिन्नमद्वयं स्वतुल्यवस्त्वन्तररहितं कृष्णात्मकं ब्रह्म शिष्यसे अवशिष्यसे ॥ १८ ॥

श्रीश्रीनिवाससूरिकृतातत्त्वदीपिका

किञ्च सर्वमिदं जगत्त्वदाधारमेवेत्याह—यस्य कुक्षाविति। हे स्वामिन्! यस्य तव कुक्षौ सर्वमिदं सात्मं विश्वं जीवात्मसहितं चेतनाचेतनात्मकं यथा भाति आधेयतया प्रकाशते तथा तत्सर्वमपि इह बहिरपि त्वय्येव त्वदाधारमेव भाति तदिदं मायया विना किं तव? योगैश्वर्य्यं विना किं? किन्तु तव या नित्या योगमाया तस्या विलास एव, तथा च श्रुतिः। "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" इति। तथा परमात्मनो व्याप्ति दर्शयति—

"अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः"। इति ॥ १७ ॥

तदेवोपपादयति—त्वां विना त्वां मायाविनं विना अस्य प्रपञ्चस्य मायात्वम् अचिन्त्ययोगैश्वर्यं त्वया ममापि तदप्यद्यैव अस्मिन्नेवावसरे किं न दर्शितं? दर्शितमेव तदेव दर्शयति, प्रथमं त्वम् एकोऽसि कवलपाणिर्नन्दसूनुरेकोऽसि ततो व्रजसुहृद्वत्साः समस्ता अप्यसि पुनस्तावन्तश्चतुर्भुजा असि ते च तदखिलैर्महदादितत्त्वैस्सह मया सहोपासिताः जगन्त्यसि अनेनासङ्ख्यातानि

ब्रह्माण्डान्यपि दृष्टानीति ज्ञायते । तत्सर्वं दर्शयित्वा अद्वयं ब्रह्म समाभ्यधिकरहितं ब्रह्म त्वमेव शिष्यसे अत इदं कवलपाणिगोपात्मजत्वरूपयोगैश्वर्यं त्वद्विमुखजनविमोहनार्थमिति ज्ञातं मयेति भावः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

त्वत्कुक्षिगतं यज्जगत्तन्मायेति यदुक्तम्, तत्प्रकारान्तरेण पुनः स्थापयति—यस्या कुक्षावित्यादि । इदं बहिः स्थितं विश्वं सर्वं सात्मम्, सान्तर्यामि चिज्जडात्मकम्, यस्य कुक्षौ यथा तथा याथातथ्येन भाति तन्नारायणाख्यञ्च वस्तु दृश्यमानं त्वयि भाति; अत इहापि त्वयि तत् सर्वं जगत्, सर्वांशपरिपूर्णे सर्वांशान्तर्गतस्यान्तर्भावः, इत्यपि तवैव प्रकाशिकाया मायायाः शक्तेर्विलास इत्याह—किमिदं मायया विना; प्रकाशिका नाम मायैवैतत् सर्वम्, न कुहकमित्यर्थः । यद्वा, यस्य तव कुक्षौ इदं विश्वं सा तव जननी; आ आत्ममात्मानमभिव्याप्य; अव्ययीभावे समानलक्षणदीर्घे, अध्यात्मवद्यथा भाति (भा० १०।८।३९) "व्रजं सहात्मानम्" इत्युक्तेस्तथा तत् सर्वं जगज्जननी च बहिश्च भाति । इहशब्दो बहिरर्थः । तत्तु अयि हे श्रीकृष्ण ! मायया विना किमिदम्, मायावैभवमेवैतत् । यद्वा किमिदं किमेतदिति सन्देहः पुनर्मायया विना कोऽर्थः ? मायया विना यद्भवति, तदेवेदमिति निश्चयः । इदं मिथ्या न भवति, किन्तु स्वयोगशक्तिवैभवमेवैतत्; यद्वा, सात्ममात्मना सहितम्, आत्मशब्दः सम्बोध्यस्य नारायणाख्यमूर्तिपरः नारायणसहितमित्यर्थः । कुतः ? स हि सज्जगद्वपुरित्युक्तः, स त्वय्येव वर्तते, तेन जगच्च त्वदुदर एव पूर्वं एवार्थो यथा भाति, तथा इहापि बहिरपि, तत् सर्वं किमिदं मायया विना ? मायाशब्दो न मिथ्यापरः, अपि तु ऐच्छिकी प्रकाशिकाख्या मायेति या पूर्वमाख्याता, तस्या एव विलसितमेतत्, न मिथ्या न च बहिर्गतस्य विश्वस्य प्रतिविश्वस्तथासति प्रातिलौम्यमस्याद्रक्ष्यत् । न हि प्रतिविश्वः प्रातिलोम्यं जहाति, नापि विधान्तरम्,—असम्भवात् । तत उक्तप्रकारयोगशक्तिविलसितमेवेति ॥ १७ ॥ नन्विदं कुत्रोपयुज्यते ? सत्यम्, किं नाना भवति ? न हि सत्यस्य नानात्वमिति न्यायात् नैवमित्याह—अद्यैव त्वदृते इत्यादि । अद्यैव इदानीमेव त्वदृते त्वां विना त्वद्बहिरङ्गस्यास्यापराद्धुर्मम मह्यं मायात्वं किमादर्शितम् ? न । यद्दर्शितं तत् किं माया, कुहकम् ? नेत्यर्थः । कुतो न मायात्वम् ? तत्राह—एकोऽसि प्रथमम्, तन्मायैव, न एकात्वं सजातीयशून्यत्वं तव स्वरूपमेव, ततो व्रजसुहृद्वत्सा इति यत्तदपि न कुहकम् । कुतः ? तत्राह—तावन्तश्चतुर्भुजा असि, त्वमेवेत्यर्थः, (भा० १०।१३।५४) "सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तयः" इत्याद्युक्तेः । कथं कुहकम् ? तदित्यव्ययम्, तत्ते अखिलैर्महदादिभिः सार्द्धं मयोपासिता इति यत् तदपि न कुहकम्, तेषां मम च तथा तथा भवितुमसामर्थ्यात्, स्वयमेव भवता तथा तथा भूतमिति न कुहकम् । तावन्त्येव जगन्त्यभूरिति चेत्तदपि न कुहकमभूरित्युक्तेस्तेषां त्वत्वात् तदपरं पश्चादद्वयं ब्रह्म भवानेक एव यत्तदपि न कुहकम्, ब्रह्मत्वात् । अतः पूर्वं यदुक्तम् "किमिदं मायया विना" इति यत्तदेवेति तत् सत्यमेवेति वाक्यार्थः ॥ १८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तद्जगत्तु न मायेति प्रपञ्चयति—यस्येत्यादि । यस्य नारायणस्य कुक्षौ इदं सर्वं विश्वं सा जननी आआत्मम् आत्मानमभिव्याप्य । आत्मं समानलक्षणो दीर्घत्वम्,—(१०।८।३९) "व्रजं सहात्मानम्" इति पूर्वोक्तेः । यथा भाति, तथेह बहिरपि तद्विश्वं सा च भाति, तत्तु अये हे कृष्ण ! मायया विना किं घटत इति शेषः । यद्वा, आत्मं त्वत्सहितं तवैव कुक्षौ विश्वं भाति, बहिरपि च त्वत्सहितं भाति । अतः प्रति विश्वतया त्वयि भातीत्यपि न घटते, न ह्यादर्शः प्रतिविश्व लभते, नापि प्रतिविश्वः प्रातिलौम्यं जहाति । इदं सर्वं हि अनुलोममेव दृश्यते, अतः किमिदं त्वय्यचिन्त्य-परमैश्वर्ये किमपि विस्मयकरं न भवति । किमपि प्रश्नभूतस्योत्तरं मायया विना यद् भवति, तदेवेदम्, तत्तु लीलैव, तेन वक्ष्यमाणवासे रासविलासे च नानेव या लीला, सापि न मायेति भावः ॥ १७ ॥ इममेवार्थं प्रपञ्चयति —अद्यैव ते इत्यादि । ते त्वया अद्यैवास्य विश्वस्य मायात्वं मम मह्यं न आदर्शितम् ? दर्शितमेव, किन्तु त्वदृते त्वां विना त्वन्तु माया बहिर्भूत एव, अतस्तदृत इति मिलितस्यैव सर्वस्य त्वदिति पञ्चमान्तेन निर्देशः । एवञ्चेन्मायात्वं कस्य यद्दर्शितं तवेत्याशङ्क्याह—तदखिलैः सार्द्धं ममोपासितास्तावन्त्येव जगन्त्यभूरिति यत्तन्माया अखिलैस्तत्त्वादिभिः सह मायोपासिताः । तेन हि (भा० १०।१३।५४) "सत्यज्ञानानन्तानन्दमात्रैकरसमूर्त्तयः" इति यत् पूर्वमुक्तम्, तेन सह सङ्गतिः । अदो बालादिरूपं शुद्धचैतन्यमेव; अत आह —तदमितं ब्रह्माद्वयं शिष्यते । तद्बालादिरूपममितमपरिच्छिन्नं ब्रह्म अद्वयं शिष्यते, तव वैभवत्वेनैव द्वितीयशून्यं सत् शिष्यत इत्यर्थः । ननु ब्रह्मणः कथमिदं घटताम्, नानात्वमपि मे मदभिन्नत्वात् शुद्धचैतन्यमेव यदुच्यते इति नाशङ्कनीयम्, यतोऽस्य विग्रहस्य तथैव काचिच्छक्तिः, वस्तु-महिमनि हेत्वन्तरापेक्षा न क्रियते ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कुक्षिस्थबहिःस्थयोर्जगतोरनयोः सर्वथैवाभेदादेवैक्यमैवयादेव कुक्षिस्थस्य मायिकत्वमवधारितमित्याह— यस्य तव कुक्षौ इदं विश्वं यथा भाति तथैव इह बहिरपि स्थितं विश्वं भाति ननु, बहिःस्थितस्य कुक्षौ प्रतिबिम्ब एवायं तयाह – सात्मं त्वत्सहितमेव न हि दर्पणे दर्पणो दृश्यते इति भावः । तेन बहिःस्थितं मायिकमेव विश्वं त्वत्कुक्षौ दृष्टं त्वयीति यथा कुक्षिस्थं विश्वं त्वदधि-

करणक तथा बहिष्ठमपि विश्वं त्वदधिकरणकमित्यर्थः। तत्तस्माद्वैलक्षण्यगन्धस्याप्यभावात् इदं जठरगतं विश्वं किं मायया विना अपि तु मायिकमेव अत्र त्वज्जनन्यनुभवो मदनुभवश्च प्रमाणमतो मायिकजगन्मध्यवर्त्यहं त्वत्कुक्षिगत एव भवामीति मुहुर्विज्ञाप्यसे "उत्क्षेपणं गर्भगतस्य" इत्याद्यतः क्षमस्वेति भावः॥ १७॥ किञ्च त्वत्कुक्षिगतं जगत् बहिःष्ठं तवादिपुरुषस्य रोमकूपगतं च जगत् सहस्रं सर्वं मायोपादानकत्वान्मायिकमेवेत्येतावत्कालपर्य्यन्तं मया अवधारितमेव किन्तु अतर्क्यमहामहैश्वर्यस्य तव त्वदीयस्वरूपशक्त्यात्मकं चिन्मयमपि जगत्सहस्रमस्तीत्यद्यैवानुभूतमित्याह—अद्यैव अस्य मञ्जुमहिमनि मद्दृष्टस्य जगत्सहस्रस्य किं त्वदृते जगत् सहस्रसम्बन्धि किं वस्तु त्वद्विनाभूतं अपि तु सर्वमेव त्वत्स्वरूपभूतमेवेत्यर्थः। अत एव मम मां प्रति ते त्वया अस्य न मायात्वम् आदर्शित किन्तु चिन्मयत्वमेव दर्शितमिति भावः। कुत इत्यत आह—एकोऽसीति। प्रथममेकस्त्वमसि ततः स्वरूपशक्त्यैव व्रजसुहृदो बालाः वत्साः समस्ता अपि त्वमेवाभूः ततो योगमाययैव तानाच्छाद्य प्रकाशिताः स्वरूपशक्तिमयाश्चतुर्भुजास्त्वमभूः कीदृशाः अखिलैरात्मादिस्तम्बपर्य्यन्तैश्चिन्मयैरेव मया मादृशेन ब्रह्मणापि चिन्मयेनैवोपासितास्ततश्च तावन्त्येव जगन्ति चिन्मयब्रह्माण्डान्यभूस्ततो योगमायैव त्वदिच्छया तान् सर्वानाच्छाद्य प्रकाशितममितमपरिमितसौन्दर्यमनुपमब्रह्मपूर्णमद्वयमेकं शिष्यते सम्प्रत्यपि मद्भाग्याद् योगमायया मद्दृष्टीः प्रत्यनावृतमेव भवान् वर्त्तत इत्यर्थः। अत्र त्वमभूस्त्वमभूरितिनिर्देशेन व्रजसुहृदादीनां जगदन्तानां भगवता मायाशक्ति विनैवाविर्भावितत्वाच्चिन्मयत्वमवधारणीयम्। माययाभूरित्यनुक्तेस्त्वदृते किमित्युक्तेश्च जगतां तु सुतरामेव॥१८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

जगतः भगवच्छक्तिपरिणामितया पुनः सत्यत्वमुपपादयन् कवलवेत्रादियुक्तस्य पुरःस्थितस्य भगवद्वपुषो विभुत्वं च सूचयति अत्याश्चर्यं दर्शयति—यस्येति। सात्मं जीवात्मसहितम् इदं मायाकार्यं वेदद्वारा भगवद्दत्तेन वयुनेन वा यस्य तव नन्दसूनोः कुक्षौ यथा भाति तथा इह बहिरपि तत्सर्वं भाति तदिदं कार्यजातं त्वयि मायया तव शक्त्या विना किमपि तु तयैव न घटेतेत्यर्थः। स्वरूपस्यापरिणामित्वात् निर्मूलकार्य्योदयासम्भवाच्चेति दिक्॥ १७॥ स्वरूपस्यापरिणामित्वं जगतः शक्तिमयत्व पुनर्दर्शयति। अद्यैवेति। त्वदृते त्वन्मूर्तिव्यूहं विना अस्य अस्मच्छरीरादिस्तम्बपर्यन्तस्य ते त्वया मायात्वं शक्त्यभिन्नत्वं किं नादर्शितमेव तदेव दर्शयति—एकोऽसीत्यादिना। ततो यावन्तो व्रजसुहृद्वत्साः तावन्तो मया सहाखिलैस्तत्त्वादिभिरुपासिताश्चतुर्भुजास्त्वमेवासि तावन्त्येव जगन्ति ब्रह्माण्डानि तत्तन्मूर्तिनियम्यान्यभूः एतत्प्रागनुक्तमपि दृष्टमिति बोध्यम्। तदनन्तरं सर्वं स्वस्मिन् प्रविलाप्याऽद्वयं निःसमानातिशयं ब्रह्म भवान् शिष्यते॥ १८॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु उज्ज्वले सद्विग्रहे बहिष्ठमेव जगत् प्रतिबिम्बितं मन्मात्रा दृष्टं मुखमिव मुकुरे न तु तदन्तस्तदस्तीति तत्राह यस्येति। यस्य ते कुक्षाविदं विश्वं यथा भाति तथैवेह त्वत्कुक्षेर्बहिरपि भाति तच्च सात्मं त्वत्सहितमिति प्रतिबिम्बो निरस्तः नहि मुकुरे मुकुरो दृश्यते त्वयीति तथा कुक्षिस्थ विश्वं त्वदाधारकं तथा बहिष्ठमपीति तत्तस्माद्वैलक्षण्यलेशस्याप्यभावात्तदिदं सर्वं द्विविधदर्शनं किं मायया अविचिन्त्यशक्त्यशक्त्या विना भवति तयैवैतद्भवतीत्यर्थः॥ १७॥ अपि च त्वत्कुक्षौ ततो बहिश्च जगत् त्वन्मात्रा दृष्टं तव कारणोदशयस्य रोमकूपेषु च जगत् कोटयः परिभ्रमन्ति तत्सर्वं त्वन्मायया त्रिगुणया विरचितमित्येतावत् कालं मया निश्चितमेव अद्य त्वद्विचिन्त्यपराख्यशक्तेस्तव विज्ञानानन्दमयो निर्विकारः सर्गोऽस्तीत्यनुभूतमिति सरोमाञ्चं निवेदयति—अद्यैवेति। अस्य मञ्जु-महिमनि दृष्टस्य वासुदेव-निवहस्य सम्बन्धि तत्रत्यपरिच्छदरूपं वस्तु किं त्वदृते त्वां विनाभूतं अपि तु त्वदात्मकमेव सर्वमित्यर्थः। मम मां प्रति ते त्वया अस्य सन्निवहस्य मायात्वं नादर्शितं किन्तु पराख्यशक्तिमयत्वमेव दर्शितमित्यर्थः। कथमित्याह प्रथममेकत्वमसि ततो व्रजसुहृदो बालाः समस्ता वत्सा अपि त्वमेवाभूः ततस्तानाच्छाद्य प्रकाशितास्तावन्तश्चतुर्भुजास्त्वमभूः कीदृशास्ते मया लक्ष्म्या साकमखिलैस्तत्त्वरुपासिताः तावन्ति जगन्ति विज्ञानमयान्यण्डानि चाभूः तत्ततस्तानि सर्वाण्याच्छाद्य अमितमन्तर्गततत्सर्वत्वाद्विभु ब्रह्मावशिष्यते अद्वयमिति प्राग्वत् अत्र त्वदृते किं त्वमभूस्त्वमभूरितिनिर्देशान्मायया अभूरित्यनुक्तेश्च पराख्यशक्त्यैव व्रजसुहृदादिजगदन्ततया नन्दसूनोराविर्भावो दर्शितः एष खलु नारदपञ्चरात्रे शुद्धसर्गशब्देनोच्यते "शुद्धं सर्गमहं देव ज्ञातुमिच्छामि तत्त्वतः" इत्यादिभिः॥ १८॥

श्रीसुबोधिनी

ननु विश्वाधारो नारायण एव पुरुषस्तस्मिन् विश्वप्रतीतेरतोऽहं प्रपञ्चमध्ये स्थितः सूक्ष्मो नारायणो न भवामीति चेत् तत्राह **यस्ये**ति, **यस्य** नारायणस्य **कुक्षाविदं सर्वं सात्म**मात्मसहितं **भाति तथा त्वय्यपीह भाति,** अतो विशेषाभावाद् भवानपि नारायणः, यस्तु भेदः परिच्छेदोऽन्यथाप्रतीतिरेतत् **सर्वं किं मायया विना ?** अपि तु तव व्यामोहिकया शक्त्या माययैवं भासते भवान् परिच्छिन्न आधेयो नारायणाद् भिन्न इति, अतः पुरुषस्य नारायणपक्षेपि भवान् नारायणः॥१७॥ किञ्च नारायणः पुरुषोत्तमः स एव सर्वं न त्वन्यो नारायणो भवतीति चेत् तत्राहाद्यैवेति, **अद्यैव ते** त्वया **त्वदृतेस्य** प्रपञ्चस्य भिन्नतया सत्त्वं नास्तीति ज्ञापयितुं

मायात्वमादर्शितं, ये हि भिन्नतया जगद् भगवद्व्यतिरिक्तमस्तीत्याहुस्तेद्यैव भ्रान्ताः कृता यतः सर्वं त्वमेवेति, तदुपपादयत्ये**कोसि** **प्रथमं** यदा मया वत्सा अपहृता बालाश्च ततो **व्रजस्य** सम्बन्धिनः **सुहृदो** बाला **वत्साश्च ततः समस्ता अपि** वंब्रह्माण्डरूपस्ततः क्षणानन्तरं **तावन्तो**पि भगवत्स्वरूपाश्च**तुर्भुजा** दृष्टास्तत्राप्यखिलैर्ब्रह्माण्डैस्तत्रत्यैर्वा **मया चोपासितास्तावन्त्येव जगन्ति** त्वमेवाभूः, अतःकारणाद् **ब्रह्माद्वय**मेव शिष्यते, न त्वन्यः पदार्थो विचार्यमाणः सिध्यति, तस्माद् भवानेव नारायण इति समर्थितम् ।। १८ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उक्तमेव स्पष्टयति–यस्येति । इह बहिः जगति इदं सर्वं यथा भाति तथैव तस्य तव कुक्षावपि तत् सर्वं भाति, तदिदं भानं त्वयि मायया विना त्वदिच्छया विना किं कथं घटते इत्यन्वयः । ननु "तर्हि विद्यमानस्य विश्वस्य मुखे प्रतिबिम्बे एव कुतो न स्यात्" इत्याशङ्क्याह–सात्ममिति । आत्मना त्वया सहितमित्यर्थः । त्वयि प्रतिबिम्बत्वे बाह्याद्विलोमतयैव प्रतीयेत ननु तदस्ति । तव चादर्शस्थानीयस्य त्वदन्तः प्रतीतिर्न स्यात् । अतोऽचिन्त्यशक्त्या त्वदिच्छयैव तथा प्रतीतिरिति भावः ।। १७ ।। न, केवलं जनन्याः प्रदर्शितम्, अपि तु ममापि’ इत्यत आह—अद्यैवेति । त्वदृते त्वां विना अस्य विश्वस्य मायात्वं स्वेच्छाधीनत्वं ते त्वया अद्यैव किं मम न आदर्शितम् ? अपि तु प्रदर्शितमेव । तथाहि –प्रथमं यदा मया वत्सादयो नापहृतास्तदा त्वमेकः श्रीकृष्णरूपोऽसि । ततो वत्सबालादिहरणानन्तरं व्रजसम्बन्धिनो सुहृदो बाला वत्साः समस्ता वेणुविषाणादयश्च सर्वेऽपि त्वमेव अभूः । ततो मया सह अखिलैस्तत्त्वादिभिरुपासिताः सेवितास्तावन्तस्तावत्सङ्ख्याकाश्चतुर्भुजाः त्वमसि अभूः । ततश्च तावन्त्येव जगन्ति ब्रह्माण्डानि त्वमभूः। तत्र तत्राप्येकैकमूर्तिरस्मदादिभिः सेवित इति ज्ञेयम् । एवमनन्तरूपस्त्वमभूः । तस्मात् अमितमपरिमित ब्रह्म परिपूर्णमद्वयमेव त्वत्स्वरूपमवशिष्यते । ब्रह्माण्डदर्शनं पूर्वमनुक्तमपि अत्रत्योक्त्यैव ज्ञेयम् ।। १८ ।।

अन्वितार्थप्रकाशिका

ननु बहिस्थस्य जठरे प्रतिबिम्बोऽस्तु ननु मायेत्यत आह—यस्येति ।। यस्य तव कुक्षौ इदं सर्वं सात्मम् आत्मना त्वया सहितम् आत्मानमपरित्यज्य सात्मं साकल्येऽव्ययीभावः । अनश्चेति टच् । "अव्ययीभावे चाकाले" इति सहस्य सः । यथा भाति तथैव तत्सर्वमपि इह बहिरपि भाति तदिदं भानं त्वयि मायया विना किं कथं घटते । अयं भावः । त्वयि प्रतिबिम्बश्चेत् बाह्याद्विलोमतया प्रतीयेत ननु तथास्ति तव चादर्शस्थानीयस्य त्वयि प्रतीतिर्न स्यात् । नहि दर्पणे दर्पणो दृश्यते अतो मिथ्यात्वमेवेति ।।१७।। अद्यैवेति ।। त्वदृते त्वां विना अस्य विश्वस्य मायात्वं ते त्वया अद्यैव किं मम नादर्शितम् न दर्शितमपि तु प्रदर्शितमेव । तथाहि प्रथमं यदा मया वत्सादयो नापहृतास्तदा त्वमेकः श्रीकृष्णरूपोऽसि ततो वत्सबालादिहरणानन्तरं व्रजसंबन्धिनः सुहृदो बालाः वत्साः समस्ता वेणुविषाणादयश्च सर्वेऽपि त्वमेवाभूः । ततो मया साकं सहाखिलैस्तत्त्वादिभिरुपासिताः सेवितास्तावन्तस्तावत्संख्याकाश्चतुर्भुजाः त्वमसि अभूः ततश्च तावन्त्येव जगन्ति ब्रह्माण्डानि त्वमभूः तस्मात् अमितमद्वयं ब्रह्मैव त्वत्स्वरूपमवशिष्यते । ब्रह्माण्डदर्शनं पूर्वमनुक्तमप्यत्रत्योक्त्यैव ज्ञेयम् ।। १८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

न केवलं मातुर्दर्शितं किंतु ममापि दर्शितमित्याह अद्येति । त्वदृते त्वां विना अस्य वत्सादिरूपस्य प्रदर्शनरूपं यन्मायात्वं योगैश्वर्यत्वं ते त्वया ममाद्यैव तत्किं न दर्शितं दर्शितमेव तदेवाह प्रथमं त्वमेकोऽसि तावंतः चतुर्भुजाः त्वमसि तत्तदनंतरम् एते मया सहाखिलैः पृथिव्यादिभिः उपासिताः यावंतस्ते तावंत्येव जगन्ति ब्रह्मांडानि अभूः तत्तदनंतरम् अमितमप्रमेयम् अद्वयं वत्सपादिरहितं ब्रह्म श्रीकृष्णाख्यमवशिष्यते ।। १७ ।। पुनस्तदेव योगैश्वर्यं प्रकारांतरेणाह अजानतामिति आत्मा परमात्मा त्वं आत्मना स्वतंत्रतया अनात्मनि त्रिगुणात्मकप्रकृतौ मायां योगैश्वर्यं वितत्य विस्तार्य भासि अंतर्यामिशक्त्या प्रकाशमानोऽसि एवंभूतां त्वत्पदवीं तव मार्गम् अजानतां पुंसां चेतनाचेतनभिन्नस्त्वं जगतः सृष्टौ सर्जने अहं विधिरूपक्षेत्रज्ञ इव भासि एवंभूतस्त्वं विधाने पालने एषः विष्णुरिव सत्त्वगुणाभिमानी क्षेत्रज्ञ इव भासि अंते प्रलये त्रिनेत्र इव तमोगुणाभिमानी रुद्र इव भासितेभ्यस्त्वं स्वरूपभावादिभिरतिविलक्षणोसीति भावः ।। १८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एतदेव काक्वा विवृणोति ।। यस्येति ।। इदं परिदृश्यमानं, सर्वं चिदचिदात्मकं, सात्ममात्मभ्यां सहितं, जनन्यास्तव चात्मना सहितमित्यर्थः । यथा इह बहिः भाति, तथा तत् सर्वं त्वयि त्वत्संबन्धिनि, कुक्षावपि त्वज्जठरेऽपि, मातुर्भातमिति शेषः । तत्तस्मात्, इदं यस्यास्य तवेत्यर्थः । मायया विना, किम् । एतत्त्वदाश्चर्यशक्तिमूलकमेवेत्यर्थः ।। १७ ।। न केवलं जनन्याः ममापि तथैव विचित्रशक्तिर्दर्शितेत्याह ।। अद्यैवेति ।। अद्य त्वदृते आधुनिकं त्वां विना, अधुना गोपालबालकावस्थावस्थितं त्वां विनेत्यर्थः । अस्य त्वत्पूर्वो-

तरावस्थाद्वयं पश्यतः, मम, ते त्वया, मायात्वं विचित्रशक्तिमत्त्वं, न एव आदर्शितं, आदर्शितमेवेत्यर्थः। विचित्रशक्तिमूलकं मया तव किं किमादर्शितमित्यत्राह। प्रथमं मत्कृतवत्सवत्सपाहरणदशायां, एकः, त्वं असीति। ततः, समस्ताः व्रजसुहृद्वत्साः व्रजसुहृदो गोपबाला वत्साश्च अपि, त्वमसीति। तत्ततः, मया ब्रह्मणा, साकं सह, अखिलैश्चराचरादिभिः, उपासिताः, तावन्तः यावन्तो व्रजसुहृद्वत्सास्तावन्तः अपि, चतुर्भुजाः त्वमसीति, ततः, तावन्त्येव, जगन्त्यभूः तावन्ति विराड्रूपाणि त्वमासीरित्यर्थः। इदं प्रागनुक्तमप्यत्रोक्त्या तत्रापि विज्ञेयम्। एतन्मायात्वमादर्शितमिति संबन्धः। तत्ततः; इदानीं अमितमपरिच्छिन्नं, अद्वयं स्वतुल्यवस्त्वन्तररहितं, ब्रह्म श्रीकृष्णात्मकं परं ब्रह्म, शिष्यतेऽवशिष्टं वर्त्तते ॥ १८ ॥

कृष्णप्रिया

जब आत्मा सहित यह सम्पूर्ण विश्व जैसा बाहर दीखता है वैसा ही आपके उदर में भी देखा तो क्या यह सर्व दर्शन आप की माया के विना ही आप में प्रतीत हुआ ? इसलिये आप और नारायण एक ही है जो भिन्न देखने में आता है वहीं आप की माया है ॥ १७ ॥ क्या प्रभो, अभी भी आपने यह अनुभव नहीं कराया कि आपके स्वरूप से यह विश्व सत्य है। आप से अतिरिक्त विश्व नहीं ? प्रथम आप अकेले थे, फिर आप ही समस्त व्रज के मित्र और बछड़े स्वरूप हो गये और वस्त्राभूषणादि स्वरूप भी बन गये। जब उसके बाद देखा तो सर्व चतुर्भुज दीख पड़े। पुनः तो मैं और मेरे सहित सबके सब ब्रह्मांड आप की सेवा करते दीख पड़े। पुनः आप अनन्त अलग-अलग ब्रह्मांड स्वरूप बन गये अब आप केवल, अपरिमेय, अद्वितीय ब्रह्मस्वरूप से अवशिष्ट रहे हैं ॥ १८ ॥

अजानतां त्वत्पदवीमनात्मन्यात्माऽऽत्मना भासि वितत्य मायाम्।
सृष्टाविवाहं जगतो विधान इव त्वमेषोऽन्त इव त्रिनेत्रः ॥ १९ ॥
सुरेष्वृषिष्वीश तथैव नृष्वपि तिर्यक्षु यादस्स्वपि तेऽजनस्य।
जन्मासतां दुर्मदनिग्रहाय प्रभो विधातः सदनुग्रहाय च ॥ २० ॥

कर्दमक्षमा

अन्वयः—जगतः सृष्टौ अहम् इव विधाने त्वम् इव अन्ते त्रिनेत्र इव एष त्वत् पदवीं अजानताम् अनात्मनि आत्मना मायां वितत्य भाति अन्ते त्वम् एव ॥ १९ ॥ ईश ? सूरेषु ऋषिषु तथा एव नृषु अपि तिर्यक्षु यादस्सु अपि अजनस्य ते जन्म हे प्रभो ? हे विधातः ! असतां दुर्मदनिग्रहाय च सदनुग्रहाय ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु ब्रह्मंस्तव मया दर्शितं शुद्धमेव चैतन्यं कथं प्रपंचवन्मायेत्युच्यते। सत्यम्। किं त्वद्वितीये त्वयि नानात्वं गुणावतारमत्स्याद्यवतारेष्विव कार्यवशेन स्वतंत्रमायानिबंधनमित्याह श्लोकद्वयेन। अजानतामिति। त्वत्पदवीं तव स्वरूपमजानतामनात्मनि प्रकृतौ स्थित आत्मैव त्वमात्मनैव स्वातंत्र्येण मायां वितत्य भासि। कथम्। जगतः सृष्टावहमिव ब्रह्मेव। विधाने पालने च एष त्वमिव। अते संहारे त्रिनेत्र इवेति ॥ १९ ॥ सुरेषु उपेंद्रः। ऋषिषु परशुरामः। नृष्वपि रामः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भगवतः शङ्कान्तरमाह—नन्विति। स्वीकृत्य किञ्चिदाह—सत्यं, किं त्विति। स्वतन्त्रमायानिबन्धनं स्वाधीनमायाहेतुकम्। त्रिनेत्रो रुद्रः ॥ १९ ॥ सुरेषु उपेन्द्रः। ऋषिषु परशुरामादिः। तथैव देवादिष्विव। तिर्यक्षु वाराहादिः। यादस्सु मत्स्यादिः 'यादांसि जलजन्तवः' इत्यमरः। असतां रावणादीनाम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं गुणावतारलीलावतारेष्वपि त्वमेव मूलमित्याह, अजानतामिति द्वाभ्याम्। त्वमित्यस्य भासीत्यनेनान्वयः कर्त्तुः क्रियान्वयस्यैव मुख्यत्वात् विधाने पालने एष इव एतत्कार्य्यपरिच्छिन्न इव पालनमात्रकर्त्तेवेत्यर्थः। विष्णोस्तदैक्यान्न ब्रह्मादिवत् तत्रामोक्तिरिति ज्ञेयम् यथा द्वितीये श्रीब्रह्मणैवोक्तम्—

"सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः। विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्" ॥ इति ॥ १९ ॥

अजनस्य प्राकृतवज्जन्मरहितस्य स्वरूपशक्त्या स्वयमाविर्भावात् तच्च केवलं भक्तपरिपालनायेति मायाकार्यानासक्तिमाह, असतामिति। प्रभो, हे अविचिन्त्यशक्तियुक्त ! विधातः, हे अनन्तावतारकर्त्तः ! अत्राजानतामित्यादौ या टीकावतारिका ननु, ब्रह्मन्नित्याद्या तत्रायमभिप्रायः ईश्वरः खलु स्वाधीनया मायया प्रपञ्चविलक्षणं शुद्धसत्त्वात्मकं स्वविग्रहादिकं भजति ततस्तत्राविष्टश्च न

भवति शुद्धसत्त्वस्य स्वच्छत्वेन शुद्धचैतन्यतादात्म्यापन्नत्वात्तद्रूपमेव तत्सर्वम्। जीवस्त्वीश्वराधीनया माययाऽधीनीकृतः प्रपञ्चात्मकं रजस्तमोमयं विग्रहादिकं प्राप्नोति ततस्तत्राविष्टश्च भवति रजस्तमसोरस्वच्छत्वेन चिद्रूपत्वानाविष्काराज्जडरूपमेव तत्सर्वमित्यतो भवेदेव वैलक्षण्यमिति किं तु मायाशब्दस्य स्वरूपशक्तिवाचित्वेनापि प्रतिपादयिष्यमाणत्वात्तन्मतस्वमतयोरेकत्वमेव दर्शयिष्यते ।२०

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ईदृश-त्वन्माहात्म्यानभिज्ञेषु त्वदभक्तेषु त्वमन्यथैव स्फुरसीत्याह— अजानतामिति। उक्तां तव पदवीं तत्त्वं भक्तिमार्गं वा अनात्मनि जडे देहे आत्मा स्वयमेव त्वमात्मना जीवरूपेण प्रकाशसे। ननु, जीवेश्वरयोः परमवैलक्षण्यं श्रुतिस्मृतिप्रतिपाद्यमानं ते कथं नावगच्छन्ति ? तत्राह – वितत्य मायामिति, अभक्तत्वेन त्वन्मायामोहितत्वादित्यर्थः। अत एव जगत् सृष्टिनिमित्तं योऽहं स इव भासि। एवमग्रेऽपि। एष त्वमिति मन्वन्तरपालकावतारश्रीविष्णुना सहाभेदाद्यभिप्रायेण—अहमेव ब्रह्मा विष्णुः शिवश्चेति ते जानन्तीत्यर्थः। सृष्ट्यादिप्रयोजननिर्द्देशेन तेषामज्ञतैव दर्शिता। सृष्ट्यादिकर्तृत्वेन जीवतः परमवैलक्षण्येऽपि तत्तदभिमानात् सृष्ट्यादिक्रमापेक्षया ब्रह्मादिक्रमेण निर्देशः। यद्वा, यथा सृष्ट्यादिनिमित्तमहदादिरूपेण मायां वितत्य भासि तथेत्यर्थः, तत्ततस्तवैव सृष्ट्यादिकर्त्तृत्वात् (भा० १।१।१) 'जन्माद्यस्य यतः' इत्याद्युक्त्या॥ १९॥ तेषामपि हिताय निरुपाधिककरुणया त्वं बहुधाऽवतरसीत्याह—सुरेष्विति। अजनस्य—जननं जनः, न विद्यते जनो जन्मलक्षणसंसारो भक्तानां यस्मात्तस्य। दुर्म्मदः—'अहं शास्त्रार्थज्ञो योगाभ्यासरतः सिद्धः' इत्यादिरूपः, तस्य निग्रहाय निरसनाय, तत्तल्लीलाश्रवणेन भक्त्या स्वत एव तदपगमात्। न केवलं तेषामेव हितार्थम् साधूनां सन्तोषणार्थमपीत्याह –सदिति। असद्दुर्म्मदनिग्रहेण सद्धर्म्मप्रवर्त्तनं तथा तत्तन्मधुरलीलादिप्रकाशनमेव सत्स्वनुग्रहस्तस्मै। ननु, असत्सु कथमीदृशी कृपा ? तत्राह—प्रभो ! हे परम स्वतन्त्रेत्यर्थः, यद्वा, तथापि तेषां सा दुर्वासना कथमपयातु ? तत्राह—प्रभो ! हे समर्थेति ? तवाशक्यं न किञ्चिदस्तीत्यर्थः। विधातः ! हे तत्तदवतारकर्त्तरिति प्रकृतोपयोगित्वादवतारित्वेन सम्बोधनम्, अथवा, मायामोहितत्वात्ते त्वदवतारेषु जीववद्दृष्टिञ्च कुर्वन्ति, जन्मादिश्रवणात्, तत्त्वतस्तु वयमिव ते तव प्रादुर्भावरूपा एवेत्याह—सृष्टाविति सार्द्धेन। सृष्ट्यादिनिमित्तं यथा वयं त्रयस्तथा तेऽपि तत्तदर्थमतो न जीववत्तेषां जन्मादीत्यर्थः। ततश्च सुरेषु धर्म्मादिषु श्रीनर-नारायणादयो ज्ञयाः। अथवा, तर्हि भक्तेषु कथं भासीत्यपेक्षायां (१८ श० श्लो०) 'त्वदृते' इत्युक्तम्; तत्सत्यत्वमेव दर्शयन्नाह—सृष्टावित्यादि। सृष्ट्यादिनिमित्तं ब्रह्मादिरूपेण तत्तदर्थञ्च श्रीनरनारायणादिरूपेण त्वमेव तेषु भासीत्यर्थः। तदर्थं प्रपञ्चान्तर्गतमपि त्वां ते सत्यमेवानेकमप्येकमेव जानन्तीति भावः ।। २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

एवं क्वाहमित्याद्यष्टभिः परब्रह्मणः श्रीमन्नारायणस्य तस्यावतारस्य कृष्णस्य निरङ्कुशमहित्वं प्रतिपाद्य गुणावतारादिषु अवतारिणस्तस्यावताररहस्यं दुर्ज्ञेयमित्याह –त्रिभिः अजानतामिति। एवं त्वत्पदवीं त्वत्स्वरूपगुणविभूतितत्त्वरूपाम् अजानतां त्वमात्मा "आत्मा नारायणः" इति श्रुतेः "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेश्च तत्तज्जीवशरीरकः आत्मना स्वसङ्कल्पेन अनात्मनि तत्तद्देहे गुणकलांशादिव्याप्ये मायां जीवेषु "अजायमानो बहुधा विजायते" इत्यज्ञानरूपां वितत्य विस्तार्य वर्तमानः भासि तव तत्त्वज्ञानां भासि सृष्टाविवाहं सष्टिसमयेऽहं ब्रह्मेव गुणावतारः जगतः विधाने पालने एव त्वमिवेति एषः प्रत्यक्षं दृश्यमानः एवं विष्णुकृष्णयोरेकत्वमुक्तं साक्षादेव नतु जीवान्तरितः तौ तु जीवान्तरितावेव ब्रह्मरुद्राविति भावः ॥ १९ ॥ अथावताराणामनन्तानां गणयितुमशक्यत्वात् "यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा" इति न्यायोक्तं तदधिकरणभूतानि सुरादीनि गणयति–सुरेष्वृषीष्वीश तथैव नृष्वपीत्यादिना। साधुपरित्राणं दुष्टनिग्रहश्च श्रीभगवदवतारप्रयोजनमुक्तम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मया साकमखिलैरुपासिता इत्युक्तं तत्राह—नन्वहमेवंविधश्चेत्सर्वेषामप्येवं किं न प्रतीये ? तत्राह--अजानतामिति, अनात्मनि देहे आत्माऽत्मना आत्मभावेन देहात्माभिमानस्वतन्त्राभिमानादिना हेतुना त्वत्पदवीं त्वद्याथात्म्यमजानतां भासि किं कृत्वा मायां वितत्य तेषु मायां प्रसार्य कथ भासि ? जगतः सृष्टावहमिव सृष्टौ निमित्तभूतायां सृष्ट्यर्थमिति यावत् एवमुत्तरत्रापि अहं चतुर्मुख इव विधाने रक्षणे एष त्वमिव विष्णुरिवान्ते संहारे त्रिनेत्रो रुद्र इव पृथक् स्वतन्त्र इव भासि त्वत्पदवीं जानतां तु ब्रह्मरुद्राख्यजीवान्तर्यामितया तच्छरीरकत्वेन विधाने तु साक्षात् स्वावताररूपत्वेन भासीत्यर्थः। मायाशब्दस्त्वत्र प्रकृतिपरः प्रकृतिगुणान् रजआदीन्वितत्येत्यर्थः। स हि "मायां तु प्रकृतिं विद्यात्" इति प्रमाणवशात्क्वचित्प्रकृतिपरः "माया वयुनं ज्ञानम्" इति निघण्टुपाठात् "मायया सततं वेत्ति" इत्यभियुक्तप्रयोगाच्च क्वचित् ज्ञानपरः क्वचिच्च विचित्रशक्तिपरः "योगमायां समादिशत्" इति भागवतप्रयोगादेव "ऋते मायां विशालाक्षीम्" इति श्रीरामायणप्रयोगाच्च "जलं संस्तभ्य मायया" इति जलस्तम्भनशक्तौ भारतप्रयोगाच्च तस्मात्तत्र यथोचितस्तदर्थो ग्राह्यः ।। १९ ॥ विधाने त्वमिवेत्येतदेवोपपादयति, सुरेष्विति। हे ईश ! अजनस्य कर्मायत्तोत्पत्तिरहितस्य ते तव सुरादिषु जन्मावतारः हे प्रभो, विधातः ! दुष्कृतां दुर्मदनाशनाय साधूनामनुग्रहाय च भवति तत्र सुरेषूपेन्द्रादिरूपं जन्म ऋषिषु नरनारायणपरशुरामात्मकं नृषु दाशरथ्यादिकं तिर्यक्षु वराहादिरूपं यादस्सु मत्स्यकूर्मादिरूपम् ।।२०॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

तदेव प्रपञ्चयति–अजानतामिति । त्वत्पदवीं तवाचिन्त्ययोगैश्वर्यम् अजानतां त्वद्विमुखानाम् अनात्मनि प्रकृतौ तिरस्करणीरूपायां योगमायायां आत्मा आत्मतया स्थितः "यस्य प्रकृतिशरीरं यः प्रकृतौ तिष्ठन्" इत्यादिश्रुतेः। आत्मना उपकरणरहितः स्वेनैव मायां वितत्य विमुखानामुपरि प्रसार्य तदुक्तम् "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति भासि प्रकाशते कथं जगतः सृष्टावहमिव विधाने पालने एष मम नेत्रगोचरस्त्वमिव अन्ते संहारे त्रिनेत्र इवेति अत्र सर्वस्य जगत उत्पत्त्यादिकं सर्वेश्वरस्त्वमेव करोषि नान्यः किन्तु सृष्टिसंहारौ चतुर्मुखरुद्रान्तर्यामित्वेन करोषि पालनं तु स्वयमेव विष्ण्ववताररूपेण करोषि "नहि पालनसामर्थ्यमृते सर्वेश्वरं हरिम्" इत्यादिप्रमाणात् तथा च द्वितीये ब्रह्मा नारदं प्रति––

"नारायणे भगवति तदिदं विश्वमाहितम् । गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥
सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्" ॥ इति ॥ १९ ॥

अन्येऽप्यवताराः साधुपरित्राणार्थं क्रियन्ते त्वयेत्याह–सुरेष्विति हे ईश ! अचिन्त्यैश्वर्य ! अजनस्य जन्मरहितस्य ते सुरेषु जन्म त्रिविक्रमादि ऋषिषु व्यासादि तथैव नृष्वपि रामकृष्णादि तिर्यक्षु वराहादि यादस्सु मत्स्यादि आविर्भावः असताम् आसुरसम्पद्युक्तानां दुर्मदनिग्रहाय तेषां प्रशान्त्यै हे प्रभो, स्वामिन् ! विधातः, जगद्रक्षक ! सदनुग्रहाय स्वाश्रितानुग्रहार्थं तदप्युक्तम् ।

"परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" ॥ इति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

किन्तु ये तु तन्महिमानं न जानन्ति, ते मायैवेयमिति वदन्ति, न पुनरनिर्वचनीयं तव स्वयोगशक्तिविलसितं तथाविधमेवेति दर्शयन्नाह—अजानतां त्वत्पदवीमित्यादि । त्वत् पदवीं तव वर्त्म अजानतां जनानामज्ञानतो जनाननादृत्य, अनादरे षष्ठी, अना अपुरुष ईश्वरस्त्वमात्मा चेदात्मना इच्छाशक्त्या आत्मनि स्वभावे मायां योगमायां नामैच्छिकीं प्रकाशिकाख्यां शक्तिं वितत्य भासि, त्वत्पदवीमजानन्तस्ते तन्न विदन्तीति तेष्वनादरः । ननु तर्हि विश्वसृष्ट्यादिलीलापि प्रकाशिकायाः शक्तेर्विलसितमेवास्तु, न त्वावरिकायाः ? नैवेत्याह—सृष्टाविवाहमित्यादि । जगतः सृष्ट्यादौ योऽस्माकमभिमानः, स त्वावरिकाया एव प्रभावोऽस्मदादिरूपेण त्वमेव करोषि, तत्तु तव लीलैव, न कुहकम् । यथा वत्स-वत्सपादयस्त्वद्रूपा एव न कुहकम्, अहं ब्रह्माख्यः कश्चन, विधाने पालने त्वमिव विष्णुरिव विष्णुर्नाम कश्चन, अन्ते नाशे त्रिनेत्रे इति रुद्राख्यः कश्चनेति, वस्तुतस्तव लीलैव, न तु कुहकमिदम्, तद्वद्वत्सपालादिकं तद्दर्शितं तदपि न कुहकम्, तत्ते ऐच्छिकाख्यप्रकाशिका योगमायैव सृष्ट्याद्यपि अस्मदादिरूपेण त्वमेव करोषि तत्रास्मदादीनां योऽभिमानः, स एवावरिकाख्याया विलसितम्, न त्वस्मदादिस्त्वद्रूपत्वात् यथा वत्स-वत्सपादय इत्यन्योन्योपमाव्यङ्ग्या तेन नेदं ते कुहकमिति पूर्वानुवादः ॥ १९ ॥ एव तव मत्स्याद्यवतारा अपि न कुहकम् । ऐच्छिकया एव प्रकाशिकाया योगशक्तेर्विलसितमेवास्मदादिवत् स वत्सपादिवदित्याह—सुरेष्वृषिष्वीशेत्यादि । सुरेषु यज्ञादिरूपेण, ऋषिषु नरनारायणादिरूपेण, नृषु पृथ्वादिरूपेण, तिर्यक्षु वराहादिरूपेण, यादःसु मत्स्यकूर्मादिरूपेण अजनस्यापि तव जन्म प्रादुर्भावोऽसतां दुर्मदनिग्रहाय, सदनुग्रहाय च । हे ईश ! कर्तुमकर्तुमन्यथाकर्तुं समर्थ ! प्रभो सर्वेश्वरेश्वर ! सर्वविधातः ! विधा विधिस्तस्मात् प्रयोजनादेव विधा प्रकारस्ततो वा, विधातरिति सम्बोधनं वा, न तु तत् कुहकम्, पूर्ववत् प्रकाशिकाख्ययोगशक्तिविलसितमेव ॥ २० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एतदजानन्तो हि मुह्यन्तीत्याह—अजानतामित्यादि । त्वत्पदवीमजानतां त्वन्महिमानमविदुषां मध्ये अनात्मनि अनात्मीये भक्ते भवे आत्मना स्वयमेव मायां वितत्य भासि, यद्यपि सर्व एव ते महिमानमभिज्ञास्तथापि भक्तेषु मायां न करोषि भक्तास्तव मायाहता न भवन्तीत्यर्थः ! मायामेवाह— सृष्टौ अहमिव वस्तुतस्तु त्वमेव सृजसि, पासि, लुम्पसि च, 'अहं विद्वान्, अहमेव जगत्कर्ता' इति यदभिमानमावहामि विधाने पालने एष त्वं विष्णुरूपी यः, त्वामचक्षाणस्त्वमन्ते त्रिनेत्रः । एतेषां पार्थक्यं हि मायया ॥ १९ ॥ एवं नानावतारोऽपि ते एव पृथक्त्वेन यया भासते, सा माया, वस्तुतस्त्वं सुरादिर्न भवसि । अत उक्तम् (भा० ८।३।२४) "स वै न देवासुर" इत्यादि । तत्तद्भावस्तु मायेत्याह—सुरेष्विति । एष तव जन्म प्रादुर्भावः, स खलु असतां दुर्मद–निग्रहाय च, तेषु यत् पार्थक्यं यश्च चतुर्जातीयावतारस्तन्माया । नरेषु पृथ्वादिषु । न तु एते मे दृष्टाः सत्यज्ञानानन्तानन्दादिविशेषण–विशिष्टा वा नास्ति न माया । नन्वहमपि नरत्वमङ्गीकृतवानस्मीति नैवं तवैतत् स्वरूपमेव (पाद्मोत्तरे) "नराकृति परं ब्रह्म" (भा० ७।१०।४८) "गूढं परं ब्रह्म मनुष्यलिङ्गम्" इत्युक्तेः। यस्मादेते सत्यज्ञानानन्तानन्दादिमूर्त्तयः प्रादुर्भूताः, तस्य तव नरत्वे का कथेति पूर्वापरसङ्गतिः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दुर्गममहिम्नस्तव चिन्मयजगतां वार्ता दूरे तावदास्तां बहिर्मुखानां मते तु त्वमपि मायोपाधिर्मायामय एव भवसीत्याह—अजानतामिति । त्वत्पदवीं त्वत्प्रापकं वर्त्म भक्तियोगमजानतां ज्ञानमानिनां तु मते त्वमनात्मनि प्रकृतौ स्थित एव आत्मैव त्वम् आत्मनैव स्वातन्त्र्येणैवेति तव जीवाद्विशेषः मायां वितत्यैव भासि आकारशून्योऽप्याकारवत्त्वेन भातो भवसि सृष्टौ रजोगुणेन यथाहं विधाने पालने सत्त्वेन एष त्वं विष्णुरिव अन्ते तमसा त्रिनेत्रो रुद्र इवेति निराकारस्याप्यात्मनो मायिकाकारा यथा ब्रह्मविष्णुरुद्रास्तथा मायिकमेव जलस्थ नारायणरूपम् अवताराश्च सर्वे मायिकरूपा माययैव वत्सबालचतुर्भुजादीन् क्षणिकान् दर्शयामासेति ते प्राहुरित्यर्थः ॥ १९ ॥ अतस्तैः स्वभक्तानां पराभवाभावार्थं यत् स्वपदवीज्ञापनं प्रायस्तदर्थमेव तव सर्वेऽवतारा इत्याह—सुरेष्विति। असतामसाधूनां वयमेव ज्ञानवन्त इति यो दुष्टो मदस्तस्य निग्रहाय सतां भक्तानां स्वीयसच्चिदानन्दमयरूपगुणलीलानुभावनयानुग्रहाय यदुक्तम् "स त्वं नचेद्धातरिदं निजं भवेत्" इत्यादि ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नन्वद्वयं ब्रह्माहं चेत्तदान्यतुल्यता भ्रमः कुत इत्यत आह, अजानतामिति । त्वत्पदवीमजानतां जगतः सृष्टौ अहं अन्ते त्रिनेत्रश्च त्वमिव त्वं च एष निःसमानातिशयोऽपि आत्मना अन्यनिरपेक्षेणापि मायां प्रकृतिं वितत्य जगदाकारेण प्रसार्य्यापि अनात्मनि जगति आत्माऽपि सन् विधाने पालने कृतावतारः अहमिव त्रिनेत्र इव भासि अन्यतुल्यतया प्रतीतिविषयो भवसीत्यन्वयः ॥ १९ ॥ विधाने अवतारानाह - सुरेष्विति ॥ २० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु ब्रह्मन् ममेत्थंभावमन्ये न वदन्ति यथा त्वमात्थेति चेत् सत्यं येषु तवात्यन्तिकी कृपा त एवैतं विदन्ति अन्ये त्वीश्वरः कश्चिदस्ति स जगत्कार्यार्थी ब्रह्मादिरूपः सृष्ट्यादि, वामनादिरूपस्तु सुरसाहाय्यञ्च करोतीत्येतावदेव जानन्ति नान्यदित्याह—अजानतामिति द्वाभ्याम् । त्वत्पदवीं त्वत्पराख्यशक्तिविलाससिद्धान्तपद्धतिमजानतामनुपासिततज्ज्ञानां तान् प्रत्यगात्मनि प्रकृतौ नियन्तृतया आत्मा स्वयमवस्थितस्त्वमात्मना स्वातन्त्र्येण मायां तामेव वितत्य भासि, कथं ? जगतः सृष्टावहं विरिञ्चिरिव विधाने पालने एष त्वमिव विष्णुना सहाभेदान्नामानुल्लेखः अन्ते विनाशे त्रिनेत्रो रुद्र इव ॥ १९ ॥ अजनस्यापूर्वदेहयोगशून्यस्य ते सुरादिषु जन्म सुरेषु वामनः ऋषिषु भार्गवः नृषु श्रीरामचन्द्रः तिर्यक्षु क्रोडः यादःसु मत्स्यः ॥ २० ॥

श्रीसुबोधिनी

अत परं भवान् स्वाम्यहं सेवक इति सकृदपराधः सेवकस्य भर्त्रा सोढव्य इति वक्तुं सर्ववस्तूनां तत्त्वमाहा**जान**तामित्यादिदशभिः, **त्वत्पदवीमजानताम**ेतदग्रे वक्ष्यमाणं सर्वं तत्त्वं **न तु त्वत्पदवीं जान**ते, एवमपि तेन तत्त्वेन न तेषां निस्तारो भ्रमतत्त्वभावात्, किन्तु तेषामपि तव पादाम्बुजानुग्रहलेशादेव मुख्यतत्त्वप्राप्तिर्न तु भावित्वेन, भ्रान्ते निरीश्वरसाङ्ख्यादिपरिकल्पिते न काचित् सिद्धिरिति, तत्र तेषां प्रथमं भ्रममाह**नात्मनी**ति, **अनात्मनि** देहादा**वात्मात्मना** देह **आत्मे**न्द्रियेणात्**मना** कृत्वा **भाति,** नन्वनात्मनि कथं कर्तृत्वं करणत्वं चेत्याशङ्क्याह **वितत्य माया**मिति, **मायां वितत्य** विस्तारयित्वानात्मन्येवात्मबुद्धि सम्पादयति, तत्र दृष्टान्तो **यथा सृष्टाव**हं ब्रह्मा, ब्रह्मा हि देहो न हि स कर्ता भवति, जगत्कर्तृत्वं भगवत एवेति **जगतो विधाने** स्थापने **त्वमिव** यथा गुणावतारो विष्णुः पालकत्वं च भगवत एवेति विष्णुरपि चतुर्भुजादिरूप इति **त्वमिवे**त्युक्तं, **एष त्रिनेत्र**ः, अत एवेदानीं महादेवोप्यागत इति ज्ञायते, नाप्ययमन्तकर्ता, "जन्माद्यस्ये" तिन्याय उत्पत्तिस्थितिलया भगवतः सकाशादेवेत्युक्तं, अतो यथोत्पत्तिस्थितिप्रलयकर्तारो वयं कल्पिता एवं देहोप्यात्मा, इन्द्रियाणि च करणाण्यात्मा, अहमन्यथा पश्यामीति **सामा**नाधिकरण्यप्रतीतिर्नोपपद्येत ॥ १९ ॥ नन्वेवं भ्रमे सति कथं निस्तार इति चेत् तत्राह **सुरे**ष्विति, भ्रान्तानां स्वरूपस्वतत्त्वपरिज्ञापनाय, **सुरेषु** देवेषु वामनरूपेण, ऋषिषु परशुरामरूपेण, **तथा** नृषु रामरूपेण, तिर्यक्षु वराहरूपेण, **यादःसु** मत्स्यकूर्मरूपेणा**जनो**पि जन्म कृतवान्, अन्यथा तत्त्वं को वा जानीयात् को वोपदिशेत् ? अतस्तव **जन्मासतां दुर्मदनिग्रहाय सदनुग्रहाय च**, दुष्टनिग्रहे तदुपद्रवस्तदावेशेन बुद्धिनाशश्च निराकृतो भवति ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'सर्वसाधारणतया ममापि प्राकृतत्वप्रतीतेः कथमद्वयब्रह्मत्वम् ?' तत्राह—अजानतामिति । त्वत्पदवीं तव परमस्वरूपमजानतामेव प्रकृतौ स्थितः आत्मा त्वमेव आत्मना स्वातन्त्र्येण मायां वितत्य विस्तार्य प्राकृत इव भासीत्यन्वयः । "अनात्मनि देहादौ आत्मात्मना आत्माभिमानेन त्वत्पदवीमजानतामेव स्वमायां वितत्य प्राकृत इव भासि 'ननु विवेकिनाम्'" इतिवाऽन्वयः । अज्ञानां भेदेन भाने दृष्टान्तत्रयमाह—जगतः सृष्टौ निमित्तभूतायां रजसाऽहं ब्रह्मेवेति, जगतः विधाने पालने सत्त्वेन एष त्वं विष्णुरिवेति,

जगतोऽन्ते प्रलये तमसा त्रिनेत्रो रुद्र इवेति ॥ १९ ॥ जगत्पालकत्वमेव प्रपञ्चयति—सुरेष्विति । हे प्रभो स्वामिन् ! अजनस्य कर्माधीनजन्मरहितस्यापि ते तव सतां सन्मार्गनिष्ठानामनुग्रहाय संरक्षणाय सुरादिषु जन्म स्वेच्छया प्रादुर्भावो भवतीत्यन्वयः । असतां सत्प्रतिपक्षिणां निग्रहं विना सतां रक्षणासम्भवादाह—असतां यो दुष्टः सत्पीडाहेतुभूतो मदः, तस्य निग्रहाय विनाशाय चेति । 'जगत्कर्तुर्युक्तं च सत्संरक्षणम्' इति सूचयन् सम्बोधयति—हे धातरिति । रक्षायां सामर्थ्यं सूचयन्नाह - ईशेति । तत्र सुरेषु वामनरूपेण, ऋषिषु परशुरामादिरूपेण, नृषु रामकृष्णादिरूपेण, तिर्यक्षु वराहादिरूपेण, यादःसु जलचरेषु मत्स्यादिरूपेण ॥ २० ॥

अन्वितार्थप्रकाशिका

मया दर्शितं शुद्धमेव चैतन्यं कथं प्रपञ्चवन्मायेत्युच्यते सत्यं किन्त्वद्वितीये त्वयि नानात्वं गुणावतारमत्स्यादिष्विव कार्यवशेन स्वतन्त्रमायानिबन्धनमपीत्याह —अजानतामिति ॥ त्वत्पदवीं तव परमस्वरूपमजानतामेव अनात्मनि प्रकृतौ स्थितः आत्मा त्वमेव आत्मना स्वातन्त्र्येण मायां वितत्य विस्तार्य भासि । अत्र जगतः सृष्टौ निमित्तभूतायां रजसाऽहं ब्रह्मेवेति भासि । जगतः विधाने पालने सत्त्वेन एष त्वं विष्णुरिवेति भासि । जगतोऽन्ते प्रलये तमसा त्रिनेत्रो रुद्र इव भासि ॥ १९ ॥ सुरेष्विति ॥ हे प्रभो ! हे विधातः ! हे ईश ! अजनस्य जन्मरहितस्यापि ते तव असतां दुर्मदनिग्रहाय सतामनुग्रहाय च सुरेषु वामनरूपेण ऋषिषु परशुरामादिरूपेण नृषु रामकृष्णादिरूपेण तिर्यक्ष् वराहादिरूपेण यादःसु जलचरेषु मत्स्यादिरूपेण जन्म स्वेच्छया प्रादुर्भावो भवति ॥२०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवंभूतस्य हरेरवतारप्रयोजनमाह सुरेष्विति सुरादिषु अजनस्य ते जन्म तिर्यक्षु वराहादिषु यादःसु जलस्थमत्स्यादिषु ।१९। हरेर्जन्मादीनां दुर्ज्ञेयत्वमाह को वेत्तीति हे योगेश्वर योगानामसंख्ययोगैश्वर्याणां नियामकस्त्वं योगमायां योगैश्वर्यं विस्तारयन् क्रीडसि एवंभूतस्य भवतः ऊतीर्जन्मकर्मादिलीलाः इयत्तया त्रिलोक्यां को वेत्ति इयत्तामाह क्व कस्मिन्स्थाने तव जन्मादिलीला भविष्यंति कथं केन प्रकारेण वा कति कियत्यो वा कदा कस्मिन्काले भविष्यंतीति को वेत्तीति संबंधः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वहमेवंविधश्चेत्सर्वेषामपि तवेव कथं बोध्यो नाभवमित्यत्राह ॥ अजानतामिति ॥ अनात्मनि देहे, आत्मात्मना आत्मभावेन, देहात्माभिमानदेवत्वाद्यभिमानस्वतन्त्रत्वाभिमानादिना हेतुनेत्यर्थः । त्वत्पदवीं त्वद्याथात्म्यं, अजानतां, मायां वितत्य, तेषु मायां प्रसार्येत्यर्थः । जगतः सृष्टौ, अहं इव, विधाने रक्षणे, त्वं इव पालनधर्मावस्थितत्वदवतारो विष्णुरिवेत्यर्थः । अन्ते संहारे, त्रिनेत्रः शिवः, इव, एषः त्वं भासि । अयं भावः । सृष्ट्याद्यवसरेषु त्वत्प्राप्तैश्वर्या वयं त्रयोऽपि त्वन्मायावृतमतीनां परमेश्वरत्वेन प्रतीयमानाः सन्तोऽपि वास्तविकपरमेश्वराः न भवामः, वास्तविकः परमेश्वरस्त्वमेक एवैवं याथार्थ्येऽपि त्वत्पदवीमजानतां त्वन्मायावृतत्वान्न तथा प्रतीयसे, त्वत्पदवीं जानतां तु त्वं यथाविधोऽसि तथा प्रतीयसे इति ॥ १९ ॥ ननु मम त्वदुक्तविधसामर्थ्यवत्त्वे कथं मम देवादिष्ववतार इति चेदनितरसाध्यासन्निग्रहसदनुग्रहार्थमेवेत्याह ॥ सुरेष्विति ॥ हे ईश, अजनस्य कर्माधीनोत्पत्तिरहितस्य, ते तव, सुरेषु देवेषु, उपेन्द्रादिरूपं ऋषिषु नरनारायणपरशुरामादिरूपं, तथैव नृषु मनुष्येषु. दाशरथ्यादिरूपं, तिर्यक्षु पशुषु अपि, वराहादिरूपं, यादःसु जलजन्तुषु अपि, मत्स्यकूर्मादिरूपं, जन्म अवतारः, हे प्रभो, हे विधातः, असतां दुष्कृतीनां, दुर्मदनिग्रहाय दुर्मदनाशाय, सदनुग्रहाय साधूनामनुग्रहार्थं च, भवति ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सुरेष्विति : १०.१४.२०.

मात्स्यं रूपमलोकि काच्छपमपि क्रौडं च काण्ठीरवं ब्राह्मं चादितिरेणुकातनुभवे रामीयमप्युत्तमम् ।
अन्यान्यप्यभितः परन्तु न पुरा क्वापीदृगैक्षि प्रभो त्वद्रूपं स्वबलाविलासचतुर बालात्तलीलं च सत् ॥ ३१ ॥

कृष्णप्रिया

हे भगवन् ! आप ही विश्व की उत्पत्ति-स्थिति-प्रलय के कर्त्ता है । जो लोग आपके स्वरूप को नहीं जानते उन लोगों को आप अनात्मदेहादि पदार्थों में देहेन्द्रियप्राणादिरूप से प्रतीत होते हैं आप ही अपनी माया को विस्तारकर अनात्म पदार्थों में आत्ममति सम्पादित कर देते हैं और विश्व रचना के अवसर आप ब्रह्मा के स्वरूप से, जगत्पालन के अवसर आप विष्णुस्वरूप से और प्रलय-अन्त के अवसर यहाँ ही विद्यमान यह भगवान् त्रिनेत्र के स्वरूप में प्रतीत होते हैं ॥ १९ ॥ हे ईश हे भगवन् ! हे प्रभो हे विधाता ! आप तो स्वयं अजन्मा ही हैं फिर भी असज्जन पुरुषों के दुर्मद-घमंड के नाश के लिये और सज्जनों पर असीम अनुग्रह करने के लिये देवता-ऋषि-मनुष्य-पक्षी-क्षुद्रप्राणी और जलचर आदि योनियों में आप अवतार धारण करते हैं ॥ २० ॥

को वेत्ति भूमन् भगवन् परात्मन् योगेश्वरोतीर्भवतस्त्रिलोक्याम् ।
[1]क्वाहो कथं वा कति वा कदेति विस्तारयन् क्रीडसि योगमायाम् ॥ २१ ॥
तस्मादिदं जगदशेषसमत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् ।
त्वय्येव नित्यसुखबोधतनावनन्ते मायात उद्यदपि यत् सदिवावभाति ॥ २२ ॥

कर्दमक्षमा

अन्वयः—भूमन् ! भगवन् ! परात्मन् योगेश्वर ! अहो क्व ! कथं वा ! कति वा ! कदा वा ! योगमायां विस्तारयन् क्रीडसि इति भवतः ऊतीः त्रिलोक्यां कः वेत्ति ! ॥ २१ ॥ तस्मात् असत्स्वरूपं स्वप्नाभम् अस्तधिषणं पुरुदुःखदुःखम् इदम् अशेषं जगत् यत् मायातः उद्यत् अपि नित्यसुखबोधतनौ अनन्ते त्वयि एव सत् इव अवभाति ॥ २२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु च स्वातंत्र्ये कथं कुत्सितेषु मत्स्यादिषु जन्म कथं वा वामनाद्यवतारे याञ्चादिकार्पण्यं कथं वाऽस्मिन्नेव कदाचिद्भयपलायनादि अत आह । को वेत्तीति । अन्वर्थैः संबोधनैर्दुर्ज्ञेयत्वमेवाह भूमन्नित्यादिभिः । भवत ऊतीर्लिलास्त्रिलोक्यां को वेत्ति क्व वा कथं वा कदा वा कति वेति । अचित्य तव योगमायावैभवमिति भावः ॥ २१ ॥ ननु भवत्ववताराणामचिंत्यो महिमा प्रपंचस्य ह्यसत्त्वे कथ सत्त्वप्रतीतिरितीमामाशंकां सपरिकरमुपसंहरन्परिहरति । तस्मादिति । अस्तधिषणं निरस्तप्रतिभासं त्वय्येवोद्यदुद्भवदपि यन्नश्यत् सदिवेत्युपलक्षणमेतत् । नित्यमिव सुखमिव चेतनमिव चाधिष्ठानभूतस्य तव गुणैस्तथा तथा भातीत्यर्थः ॥ २२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्राशङ्कते–नन्विति । अतः अत्र । अन्वर्थैरर्थानुगतैर्यथार्थैरिति यावत् । क्व कुत्र । कथं केन प्रकारेण । कदा कस्मिन् काले । कति कियत्सङ्ख्याका ऊतीः करोति चक्रे करिष्यति वेत्यर्थः । इति भाव इति–अघटनघटनापटीयस्या मायातोऽपि योगमाया प्रबला 'परास्य शक्तिर्विविधैव श्रूयते' इत्यादिश्रुतेरित्यर्थः । ननु कृष्णस्य मम भूभारहरणार्थमेव जन्म, रामस्य रावणवधार्थमेव, शुक्लाद्यवतारगणस्य तत्तत्समयधर्मप्रवर्त्तनार्थमेवेति प्रसिद्धिर्न तु ज्ञानिमानिनां दुर्मदनाशार्थं - सत्यम्, तव प्रादुर्भावादिलीलानां कुत्रकुत्र विषये किं किं प्रयोजनं कदाकदा वा कियन्त्यो वा ता इति कार्त्स्न्येन ज्ञातुं कोऽपि न प्रभवतीत्याह–हे भूमन् विश्वव्यापकानन्तमूर्ते, हे भगवन् भूमत्वेऽपि षडैश्वर्यश्रीपूर्ण, हे परमात्मन् भगवत्त्वेऽपि परमात्मस्वरूप, हे योगेश्वर योगमाययैवानुभाव्यमानभूमत्वादिमहैश्वर्य । ऊतीर्जन्मादिलीलाः । त्रिलोक्यां त्रिलोकीमध्यवर्तिनीर्लीलाः । को वेत्ति न कोऽपीति । यतः क्वेत्यादि । ननु तवानन्ता एव मूर्त्तयो विश्वव्यापिकाः षडैश्वर्यवत्यः परमात्मस्वरूपा न तु भौतिकाः, त्रिलोकीवर्त्तिनीरेव भक्तविनोदार्या लीलाः कुर्वंत्यः सर्वा एव सदैव युगपदेव क्रीडन्तीति कथं संभवेदित्यत आह—विस्तारयन्निति । अचिन्त्यशक्त्या योगमाययैव तत्तदुपासकभक्तान्प्रति तासां यथाकालं प्रणाशनावरणाभ्यां क्रीडानिर्वाह इत्यर्थ इति विश्वनाथः ॥ २१ ॥ तदङ्गीकृत्याप्याशङ्कते—नन्विति । सपरिकरं सानुबन्धम् । तत्र सत्यत्वप्रतीतौ । इत्यर्थ इति—अधिष्ठानगुणेन प्रपञ्चे सत्प्रतीतिर्न तु स्वत इति भावः ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं सर्वमिव निरूप्य सम्भ्रमेणाह–को वेत्तीति । भूमन् ! हे अपरिच्छिन्न ! भगवन्, हे सर्वैश्वर्ययुक्त ! परमात्मन् हे सर्वान्तर्यामिन् सर्वकारणस्वरूपेति वा योगेश्वर, हे स्वाभाविकयोगशक्त्या सर्वकालव्यापक ! भवत ऊतीर्लीला अहो विस्मये क्व कथं वा कति वा कदा वा स्युरिति को वेत्ति किं त्वपरिच्छिन्नत्वादपरिच्छिन्नानामाधारं सर्वैश्वर्ययुक्तत्वात् तासां प्रकारं परमात्मत्वात् तासामियत्तां सर्वकालव्यापकत्वातदवसरमपि त्वमेव वेत्सीत्यर्थः । तत्र सर्वत्र हेतुः योगमायां महास्वरूपशक्तिमिति ॥ २१ ॥ यस्मादेवं त्वमेवैष सर्वकारणं तस्मान्मायातः प्रधानत उद्भवत् प्रलीनं भवच्च त्वय्येव त्वामाश्रित्यैव सदिव त्वदीयं स्वरूपमिदं नित्यधाम वा यत् सद्वस्तु तदिवावभाति त्वदीयतत्तत् सत्तयैव यत्किञ्चितत्तत् सत्तां प्राप्नोतीत्यर्थः । मायाया अपि त्वच्छक्तित्वेन त्वदाश्रयतामात्रतः सद्भावादिति भावः । तादृशत्वद्व्यतिरेकं तु असत्स्वरूपं शशविषाणतुल्यं त्वदन्येऽपि त्वदस्फूर्तौ स्वप्नाभं स्थिरार्थप्रात्यभावात् तत एवास्तधिषणमित्यादि नित्या सुस्वबोधरूपा च येयं परब्रह्मभावेन निर्णीता तनुः तत्स्वरूपे "सच्चिदनन्दरूपाय कृष्णायाक्लिष्टकारिणे" इति तापनीश्रुतिहयशीर्षपञ्चरात्रयोः अत्र "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा" इत्यादिवक्ष्यमाणविष्णुपुराणवाक्यं "वैधर्म्याच्च न स्वप्नादिवत्" (२।२।२८) इति वेदान्तसूत्रं च विचार्य अत्रैतदप्युक्त भवति मायाशब्देन क्वचिन्मिथ्याभिव्यञ्जकः शिक्षाविशेष उच्यते क्वचिद्दुर्वितर्कसत्यव्यञ्जकः शक्तिविशेषोऽप्युच्यते तत्र प्रथमं इन्द्रजालपर्यायस्त-

---

[1] क्व वा–श्रीधर. वंशी. वीर. विज. ।

द्विज्ञेषु दृष्टः स च स्वप्रत्यायितजलादिना तेषां तु न भ्रमं करोति स्वाश्रयाऽव्यामोहकत्वात् अन्येषां चापातमात्रे भ्रमेऽपि न दृष्टयादिक हरति मृगतृष्णातुल्यत्वात् द्वितीयस्तु मुनिदेवादौ श्रुतः यथा तृतीये श्रीसनकादिवैकुण्ठगमने तदीययोगमायाशब्दः स्वामिभिर्व्याख्यातः स चायं न पूर्वतुल्यः श्रीकर्दमादीनां तत्कल्पितविहारविमानादिभिः स्वार्थकरत्वात् श्रीप्रद्युम्नादीनां युद्धादौ शत्रुच्छेदादिदर्शनाच्च सोऽयं मुन्यादिषु तत्र आदिमयः श्रीभगवति तु स्वाभाविकः यथा "सर्वभूतेषु सर्वात्मन् ! या शक्तिरपरा तव। गुणाश्रयाः नमस्तस्यै शाश्वतायै सुरेश्वर !" इति श्रीविष्णुपुराणोक्तायाः अपराख्यशक्तेः "अस्मान्मायी सृजते विश्वमेतदस्मिंश्चान्यो मायया सन्निरुद्धः" इत्यादिश्रुतौ मायाख्यया कथितया स्वाभाविकत्वममिथ्यात्वव्यञ्जकत्वं विष्णुपुराण एव दर्शितम् "शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः। अतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः।। भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णता" इति "एकदेशस्थितस्याग्नेर्ज्योत्स्नाविस्तारिणी यथा। परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्" इति च "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्रुतिश्च। प्रकृतिशब्देन स्वभावमाह, न तु तत्पर्य्यायं विद्यादिति ज्ञापनतात्पर्य्यतयानूद्य विधेयत्वप्राप्तेः पर्यायमात्रकथने लक्षणत्वाभावाज्ज्ञानासिद्धेः "मायिनं तु महेश्वरम्" इत्यत्रानूद्य विधेयत्वस्यैव लब्धेश्च किं तु "मायिनन्तु महेश्वरम्" इति महेश्वरस्य माययाश्रितत्वं बाधयति ततश्च महेश्वरत्वमेवान्तरङ्गं तदकृत्रिमं चेत्यायाति इन्द्रो मायावान् पुरुषः शूर इति वत् मायया बहिरङ्गत्वेऽपि स्वाभाविकत्वमेकदेशस्थितस्याग्नेरिति दृष्टान्तेनैव लब्धं मायाया बहिरङ्गत्वे च न तद्दोषेण महेश्वरत्वं लिप्तं स्यात् यथोक्तं प्रथमे श्रीमदर्जुनेन "त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः। मायां व्युदस्य चिच्छक्त्या कैवल्यं स्थित आत्मनि" इति सेयमेव चिच्छक्तिः परात्वेन विष्णुपुराणे प्रोक्ता—

"याऽतीतगोचरा वाचां मनसां च विशेषणा। ज्ञानिज्ञानपरिच्छेद्या वन्दे तामीश्वरीं पराम्" ।। इति।

अस्या एव परात्वेनान्तरङ्गत्वं परमाचिन्त्यत्वं विविधवृत्तित्वं महेश्वरता पर्य्यायकत्वमप्युद्दिष्टम् "न तस्य कार्य्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति। अत्र खलु "न तत्समश्चाभ्यधिकश्च" इति परात्वस्यारोपोपजीव्यवस्त्वन्तराभावज्ञापितस्य स्वाभाविकत्वस्य परमाचिन्त्यत्वस्य च बोधकं तृतीये श्रीसनकादिवैकुण्ठगमने योगमायेति निर्दिष्टा चिच्छक्तित्वेन स्वामिभिर्व्याख्याता तत्त्ववादिभिश्च स्वभाष्ये "योगमाया च माया च तथेच्छाशक्तिरेव च। मायाशब्देन भण्यन्ते शब्दतत्त्वार्थवेदिभिः" इति शब्दमहोदधिमुदाहृत्य स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः "अतो मायामयं विष्णुं प्रवदन्ति सनातनम्" इति श्रुतिमपि प्रमाणीकृत्य योगमायाशब्दवन्मायाशब्दोऽप्येतद्वाचित्वेन सम्मतः श्रीरामानुजाचार्यचरणैश्च "माया वयुनं ज्ञानम्" इति निघण्टुस्थितपर्यायशब्दाः स्वभाष्ये लिखिताः तृतीये स्वामिभिश्च "सा वा एतस्य सन्द्रष्टुः शक्तिः सदसदात्मिका। माया नाम" इत्यत्र द्रष्टृदृश्यानुसन्धानरूपेति आत्मेच्छानुगता वाऽऽत्मेत्यत्रात्मेच्छा मायेति "कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः। पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्।। ततोऽभवन्महत्तत्त्वमव्यक्तात् कालचोदितात्" इत्यव्यक्तमपि मायाशब्देन वोच्यते स्म "प्रायो मायास्तु मे भर्तुर्नान्या मेऽपि विमोहिनी" इत्यादौ मोहिनीशक्तिरपि स्यात् "माया दम्भे कृपायां च" इति विश्वप्रकाशे "स्यान्माया शाम्बरीबुद्धयोः" इति त्रिकाण्डशेषे च कृपादयोऽपि तत्पर्य्याया दृश्यन्ते अत्रैव च "तम्यान्तमोवन्नैहारम्" इत्यादौ मायाशब्देन प्रभावमात्रमभिप्रेतं सत्यं तत्प्रकाशने ऽपि दोषाऽविशेषात् दृष्टान्ते तस्य च तादृशत्वात् तदेवं तत्र तत्र यथायथं मायाशब्दो योजनीयः श्रीस्वामिव्याख्या चेति सर्वं समञ्जसम् अत्र च प्रकरणे मायाशब्देन दुस्तर्कशक्तेरेवाभिधानं तदुक्तम् "मत्स्थानि सर्वभूतानि नचाऽहं तेष्ववथितः। न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्" इति अतो यत्र यस्य स्पर्शो नास्ति तत्र तस्य स्थितत्वं मिथ्येति मिथ्यात्वमपि तद्व्याख्यातं युक्तं किं च या पराख्यशक्तित्वेनोक्ता सैव वैकुण्ठादौ स्वरूपविभूतिव्यञ्जिका यथा "न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः" इति द्वितीये "दर्शयामास लोकं स्वं गोपानां तमसः परम्" इत्यग्रे "इतीरेशेऽतर्क्ये" इत्यादिकं सत्यज्ञानेत्यादिकं च पूर्वत्र एतन्मयी विभूतिश्चाऽनश्वरा यथा द्वितीये तत्रैव न च कालविक्रम इति श्रीविष्णुपुराणे—

"कला काष्ठा निमेषादिकालसूत्रस्य गोचरे। यस्य शक्तिर्न शुद्धस्य प्रसीदतु स मे हरिः" ।। इति।

"कलामुहूर्त्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः" इति च अत्र शुद्धस्येत्युक्तत्वात् भगवत्स्वभावैषा महती शक्तिः या त्वपरा सा न तादृशी किं तु यथा तत्रैव "यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता" इति "सर्गाद्या भावशक्तयः" इति च एकादशे च "एषा माया भगवतः सृष्टिस्थित्यन्तकारिणी" इति तदेवमपि यथार्हं विवेचनीयम् ।। २२ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु, तर्हि त्वदवताराणां कस्यापि जीववदत्यन्तलौकिकी चेष्टा नोपपद्यते ? तत्राह—को वेत्तीति। भूमन् अपरिच्छिन्न ! भगवन् सर्व्वैश्वर्य्ययुक्त ! परात्मन् सर्व्वान्तर्निगूढ ! योगेश्वर दुर्घटघटनसमर्थ। सम्बोधनानामेषां यथोत्तरं दुर्ज्ञेयत्वे श्रैष्ठ्यमूह्यम्। योगमाया सच्चिदानन्दविलासरूपो भगवच्छक्तिविशेषः, तां विस्तारयन्निति तद्वतीनामपि सत्यता सूचिता। एतच्च श्रीभागवतामृतोत्तरखण्डे विस्तरतोऽस्ति। अन्यत्तैर्व्याख्यातम्। यद्वा, योग ऐश्वर्य्यं तद्युक्तां मायां भक्तेषु कृपाम्। एवमूतीनामप्यैश्वर्य्यमत्त्वेना-

नन्तत्वेन चाज्ञेयत्वं युक्तमेवेति भावः। यद्वा, कथं तथाप्यद्यापि दुर्व्वासना ग्रस्ता बहवो दृश्यन्ते ? तत्राह—को वेत्तीति। तव योगमायाविस्तारणेन तत्तल्लीलानां दुर्वितर्क्यत्वात्ते प्रायो मुह्यन्त्येवेत्यर्थः। तच्चोचितमेवेति सम्बोधन-चतुष्टयेनोक्तमेव। एवं भगवतो दुर्वितर्क्यत्वात्तल्लीलानामपि दुर्वितर्क्यत्वं सिद्धमेव। तत्तल्लीला तत्त्वज्ञानाय त्वद्भक्तान् प्रपन्नाः सन्त एव ते निस्तरन्ति, न चान्यथेति भावः॥ २१ ॥ अहो ! किं वक्तव्यं तवावतारवर्गतत्तल्लीलादीनां सत्यतादि, मिथ्यादिरूपोऽप्ययं प्रपञ्चस्त्वत्सम्बन्धात् सत्यादिरूपेण विद्योतत इत्याह,—तस्मादिति। योगमायाविस्तारणेन तव क्रीडनाद्धेतोः। यद्वा, 'अत्रैव' इत्यादि (१६-१८ श०) पद्यत्रयेण जगतो मिथ्यात्वमुक्त्वा तदन्तरा पतिताशंकां त्रिभिर्निरस्याधुनोपसंहरन्नाह,—तस्मादिति, जनन्यां मयि च तन्मिथ्यात्वप्रदर्शनाद्धेतोः; अस्याद्यपादेनैवान्वयः। अन्तो नाशस्तद्रहित इति नित्यसत्तोक्ता, अतोऽसत्स्वरूपमप्यनन्तस्य सम्बन्धात् सत्, स्वप्नाभमनित्यम्, नित्यस्य सम्बन्धान्नित्यम्, अस्तधिषणं बोधस्य सम्बन्धाच्चेतनम्, पुरुदुःखदुःखञ्च, सुखस्य सम्बन्धात् सुखमिति विवेचनीयम्। अन्यत्तैर्व्याख्यातम्। यद्वा, एवं सत्यपि त्वत्सेवया तेषामपि परममंगलं भवतीत्याह, तस्मादिति। यस्मात्तव त्वदवतारवर्गतत्तल्लीलादीनामचिन्त्यो महिमा तस्मादसत्स्वरूपं प्रायोऽसल्लोकमयत्वात्, स्वप्नाभं नश्वरत्वेनानित्यत्वात्, अस्तधिषणं प्रायो भगवन्माहात्म्याज्ञानात्। तत्र तत्र हेतुः—मायात उद्यदिति। तथाभूतमपि यद्यपि त्वयि निमित्ते त्वत्प्राप्त्यर्थं भवति, त्वत्सेवां करोतीत्यर्थः, तदा सदिवावभात्युत्तमतां प्राप्नोतीत्यर्थः। इवेति लौकिकोक्तिन्यायेनानधिकार्थम्। यद्वा, सद्वस्तु श्रीवैकुण्ठपदं तद्वद्विराजत इत्यर्थः। अन्यत् समानम्॥ २२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

हे भूमन्, सर्वाधिक ! श्रीमन्नारायण, भगवन्, ज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधे ! परात्मन्, सर्वान्तर्यामिन्, हे योगेश्वर, विभवार्चावताररूप ! भवतः ऊतीर्लीलाः को वेत्ति ताश्च क्व देशे कथं केन करणेन कतिसङ्ख्याकाः कदा कस्मिन् काले भवन्ति एवं कोऽपि न जानाति। त्वन्तु योगमायां योगाय प्रपन्नभक्तानां स्वसंयोगाय मायां कृपां विस्तारयन् क्रीडसि ताश्च क्रीडाः सर्वदेशसर्वकाल सर्वावस्थास्वनन्ता एवेति भावः॥२१॥ एवमवताररहस्यं प्रतिपाद्य क्रीडसीत्युक्तं प्रपञ्चसृष्टिस्थितिसंहारादिरूपं क्रीडनं प्रपञ्चस्वरूपं च विशेषत आह-तस्मादिति, द्वाभ्याम्। तस्मादिदं चिदचिद्रूपं सर्वं सूक्ष्मस्थूलावस्थं जगदसत् स्वरूपम् असच्छब्दवाच्यो यः स्वम् आत्मा त्वं तस्य तव सूक्ष्मावस्थनामरूपविभागरहितचिदचिद्विशिष्टत्वेनासच्छब्दवाच्यस्येति पर्यवसितार्थः। रूपं शरीरं कार्यावस्थायां क्षेत्रज्ञकर्मानुगुणं त्वत्सृष्टत्वात् स्वप्नतुल्यं विचित्रमेव अस्ता धिषणा जीवधर्मज्ञानं येनेति अत एव तस्य जीवस्य पुरूणि दुःखादनन्तरं दुःखान्येव येन तत्पुरूणि बहूनीत्यर्थः। त्वय्येव नित्यसुखे ज्ञानतनौ। अथवा नित्यः सत्यश्चासौ सुखबोधतनुश्च सत्यानन्दज्ञानस्वरूपरूपः तस्मिन् त्वय्येवाधिकरणे अनन्ते चेतनाचेतनवस्तुपरिच्छेदादिरहिते सर्वचिदचिच्छरीरिणि मायातः विचित्रशक्तेः उद्यत् अपि यत् सदिवावभाति कार्यावस्थायां उद्यत् त्वत्सङ्कल्पेन कारणावस्थायाम् अपि यच्च अप्ययावस्थं भवत्तत्र सदिव त्वत्स्वरूपमिवावभाति इवशब्दो भवद्विलक्षणत्वमेव द्योतयति। एवं जगदुपादाननिमित्तत्वोक्त्या ब्रह्मपरमात्मभगवन्नारायणस्यासाधारण लक्षणं लीला च मुख्योक्तेति॥ २२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अवतारप्रसङ्गात्तेषां जातिप्रकारसङ्ख्याकालनियमाभावं क्रीडैकप्रयोजनत्वं विचित्रशक्तिमत्त्वं चाह को वेत्तीति। अवतारदशायामपि स्वासाधरणविपुलानन्दरूपत्वषाड्गुण्यपूर्णत्वप्रशासितृत्वयोगनिर्वाहकत्वाद्यप्रहाणप्रदर्शनार्थं भूमन्नित्यादिसम्बोधनचतुष्टयं भवतः तव ऊतीर्गतीश्चेष्टास्त्रिलोक्यां कः पुमान् क्व वा कस्यां जातौ कथं केन प्रकारेण कति कियत्सङ्ख्याकाः कदा कस्मिन् काले अवतारा इत्येतच्च वेद न कोऽपि जानातीत्यर्थः। केवलमाश्चर्यशक्ति विस्तारयन्नेवं क्रीडसीति मम भातीति भावः॥ २१॥ किं चाजानतामहमादिरूपेण केवलं त्वमेव भासि जगदपि विपरीतं भातीत्याह—तस्मादिति। तस्मात्त्वद्व्यतिरिक्तस्वतन्त्रवस्त्वभावान्नित्यसुखबोधतनौ नित्यानुकूलज्ञानरूपे त्वय्येवानन्तेऽपरिच्छेद्यमहिम्नि यन्मायातस्त्वत्सङ्कल्परूपज्ञानादुद्यदुदयमानमपि यल्लीयमानमतस्त्वदपृथक्सिद्धमिति भावः। पुरुभ्यो दुखेभ्य उपरि तथाविधानि दुःखानि यस्मिन् स्वप्नाभं स्वप्नतुल्य सर्वत्र दृष्टान्तदार्ष्टान्तिकयोः साधर्म्ये सति वैधर्म्येण भवितव्यमन्यथा तयोरैक्यमेव स्यात्तत्रोभयानुगतं साधर्म्यमनित्यत्वरूपं स्वप्नं तु तत्कालमात्रावस्थायित्वं तद्द्रष्ट्रैकानुभाव्यत्वरूपं वैधर्म्यं दार्ष्टान्तिके तु कालान्तरेऽवस्थायित्वमनेकानुभाव्यस्वरूपं चेति विवेकः। इदं चिदचिदात्मकशेषं जगदसत्स्वरूपमपि अजानतां सदिव भाति सततविकारवदपि तद्विपरीतवदाभातीत्यर्थः॥ २२॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

अथ तिर्यगादिषु तवाऽवतारो दुष्कृतनाशपूर्वकसाधुपरित्राणार्थमित्येतावज्ज्ञातम्, यास्तव विभूतयस्तास्तु केऽपि न जानन्ति अनन्तत्वात्तासामित्याह—को वेत्तीति। हे भूमन्, भूमगुणविशिष्ट ! भगवन्, ऐश्वर्यादिगुणाकर ! परात्मन्, परमात्मन् ! योगेश्वर, योगफलप्रद ! भवत ऊतीर्विभूतीर्लीला वा त्रिलोक्यां को वेत्ति अहो इत्याश्चर्ये क्व कुत्र कथं केन प्रकारेण कति वा कतिसङ्ख्याकाः कदा वा कस्मिन् काले स्वयोगमायां विस्तारयन् क्रीडसि इति को वेत्ति इयत्तया न कोऽपि जानातीत्यर्थः। तथा

चैकादशे भगवानुद्धवं प्रति "सङ्ख्यानं परमाणूनां कालेन क्रियते मया। न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः" इति ॥२१॥ तस्मादिदं विश्वं तवाचिन्त्ययोगमायावैभवकार्यमित्याह — तस्मादिति। तस्मादिदमशेष जगन्नित्यसुखबोधतनौ नित्यानन्दज्ञानादिस्वरूपे अनन्ते अपरिच्छिन्नमाहात्म्ये त्वय्येवाधारभूते मायातस्तव प्रकृत्याख्यशक्तेः उद्यदपि उदयं प्राप्नुवत् अपि यत् नाशं प्राप्नुवत् सदिवावभाति ब्राह्मणोऽहं स्थूलोऽहं कृशोऽहमिति आत्मवद्भाति न तु आत्मस्वरूपं जडत्वेन विरुद्धस्वरूपत्वादत एव सदैकरूपाभावात् आत्मनस्तु चेतनत्वात् कथम्भूतं जगत् असत्स्वरूपं नाशित्वात् सदैकरूपाभावाच्च अत एव स्वप्नाभं स्वप्नतुल्यम् अस्थिरत्वात् स्वप्नपदार्थानामपि न स्वरूपेण मिथ्यात्वम् ईश्वरसृष्टत्वात्तेषां किन्तु अनित्यत्वमेव तथा च श्रुतिः "न तत्र रथा न रथयोगाः" इत्यादि "स हि कर्त्ता" इत्यन्तम् एतच्छ्रुतिव्याख्यानरूपं सूत्रमपि "सन्ध्ये सृष्टिराह हि" [३।२।१] इत्यादि। पुनः कीदृशं अस्तधिषणम् अस्ता लुप्ता त्वत्स्वरूपप्रवणरूपा धिषणा बुद्धिर्यस्मात्तत् तथा च तृतीये ब्रह्मा भगवन्तं प्रति—

"दैवेन ते हृतधियो भवतः प्रसङ्गात्। सर्वाशुभोपशमनाद्विमुखेन्द्रिया ये" ॥ इति।

पुनः कीदृशं पुरुदुःखदुःखं दुःखोदर्कं दुःखादुत्तरं दुःखस्यैव जनकं न तु सुखलवमात्रमपीत्यर्थः। तदुक्तं विदुरेण मैत्रेयं प्रति —

"सुखाय कर्माणि करोति लोको न तैः सुखं चान्यदुपारमं वा ॥
विन्देत भूयस्तत एव दुःखम् यदत्र युक्तं भगवान् वदेन्न" ॥ इति ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु त्वमेवेदं वेत्सि, किमुतान्येऽपि इत्याशङ्क्य न कोऽपि तव लीलां वेत्तीत्याह — को वेत्तीत्यादि। हे भूमन्! देशतोऽपरिच्छिन्न! विश्वव्यापक हे भगवन्! अचिन्त्यसर्वैश्वर्यसम्पन्न! हे परात्मन् अनन्तगुणकर्मन्! हे योगेश्वर! कालतोऽपरिच्छिन्न! तव ऊतीर्लीलाः, अहो आश्चर्यम्; क्व वा को वेत्ति, देशतोऽपरिच्छिन्नत्वात्, क्वेत्यसिद्धम्, अथवा, को वेत्ति, अचिन्त्यपरमैश्वर्यत्वात्; कति वा को वेत्ति—अनन्तगुणकर्मत्वात्; कदा वा को वेत्ति,—कालतोऽपरिच्छिन्नत्वात् इति। देश-प्रकार-संख्या-कालवचनैः क्वेत्यादिभिश्चतुर्भिर्भूमन्नित्यादि-सम्बोधन-चतुष्टयमसम्भावनायां हेतुमद्धेतुभावेन समन्वेतव्यम्। एतेन सर्वथैव ते महिमा ज्ञातुमशक्य इति वाक्यार्थः ॥ २१ ॥ यतस्त्वदवतारास्तल्लीलाश्च तवैच्छिक-प्रकाशिकाख्ययोगमायाशक्तिविलसितत्वान्नित्या एव तस्मात्तद्व्यतिरिक्तं सर्वं जडजातं मिथ्या दुःखञ्चेत्याह—तस्मादिदमित्यादि। इदं जगज्जडमयः प्रपञ्चः, अशेष सर्वमेवासत्। असत्त्वे हेतुः—स्वप्नाभम्। कुतः? अस्तधिषणं ज्ञानशून्यम्, जडत्वात्; अतएव पुरुदुःखदुःखम्, पुरूणि यानि दुःखानि तैर्दुःस्थितानि निखिलानीन्द्रियाणि यस्मात्तथा। ननु यदीदं सर्वमसदेव, तदा कथं मदुदरे मन्मात्रा सर्वं दृष्टम्? तत्राह —नित्या शाश्वती सुखस्वरूपा आनन्दमयी बोधस्वरूपा ज्ञानघना तनुर्विग्रहो यस्य सः; तथा तस्मिन् त्वय्येव श्रीनन्दकुमार एव मायातः पूर्वोक्तरूपैच्छिक-प्रकाशिकाख्ययोगमायात उद्यदाविर्भवदपि सम्भावनायां, सदिव सदेवावभाति; इव एवार्थः। त्वय्येवेत्येवकारस्यान्ययोगव्यवच्छेदकत्वेन बहिर्वर्तमानस्यासत्त्वमिति भावः। त्वयि तु सच्चिदानन्दघनेऽसद्रूपस्य तु न सम्भवः, त्वद्विग्रहमात्रस्यैवायं स्वभावः। उक्तञ्चाष्टमे—(भा० ८।६।९) "योगेन धातः सह नस्त्रिलोकान्, पश्याम्यमुष्मिन् सह विश्वमूर्त्ते" इति। त्वयि स्थितस्य नित्यरूपस्य प्रपञ्चवद्दृश्यमानस्य निजलोकस्य वर्त्तमानत्वान्नित्यत्वमेव अस्य न मृषात्वमित्यर्थः ॥ २२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नन्वेवं कथं घटतां ब्रह्मणो नराकृतित्वं यदुच्यते इति न वक्तव्यम्, मतस्त्वमचिन्त्यानुभावोऽसि तव महिमानं को वेत्तीत्यादि। हे भूमन्, भगवन्, परात्मन् योगेश्वरेति चत्वारि विशेषणानि सम्बोधन-पराण्यचिन्त्यमहिमाख्यापकानि। यतस्त्वं योगमायां भुवि तन्वन् क्रीडसि भूमन्नित्यपरिच्छिन्नत्वे, क्वेति भगवन्नित्यचिन्त्यमहिमत्वे कथमिति परात्मनः सर्वेषां पुरुषादीनामपि, आत्मन्निति, कतीति योगेश्वरेति नानारूपत्वे, कदेति तस्मात्तव महिमा कैरपि वक्तुं न शक्यते, तवावताराणां वा नित्यत्वादिकं कैर्निरस्यताम् ॥ २१ ॥ यदधिष्ठाने प्रपञ्चोऽपि सन्निव प्रतीयते इत्याह —तस्मादित्यादि। त्वय्येव नान्यत्र, एवकारोऽन्ययोगव्यवच्छेदपरः। त्वयि श्रीयशोदानन्दने यशोदा यज्जगदपश्यत्, तत् सदिव, सदेवावभाति मायातोऽचिन्त्यशक्तित उद्यदपि। त्वयि कीदृशे? नित्यसुखबोधतनौ नित्या सुखस्वरूपा बोधस्वरूपा तनुर्यस्य तस्मिन्, यत्किञ्चित् तदेव सदिति प्रागुक्तपरमतखण्डनम्। अथवा, इदं विश्वं मायात उद्यदपि मायिकमपि त्वयि त्वद्विषयकं यदि भवति, तदा सदिव सदेवावभाति, इवशब्द एवार्थः ॥२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, कृष्णस्य मम भूभारहरणार्थमेव जन्म रामस्य रावणवधार्थमेव शुक्लाद्यवतारगणस्य तत्तत्समयधर्मप्रवर्त्तनार्थमेवेति प्रसिद्धिर्न तु ज्ञानिमानिनां दुर्मदनाशार्थम्, सत्यम्, तव प्रादुर्भावादिलीलानां कुत्र कुत्र विषये किं किं प्रयोजनं कदा कदा वा कियत्यो वा ता इति कार्त्स्न्येन ज्ञातुं कोऽपि न प्रभवति इत्याह—को वेत्तीति। भूमन्, हे विश्वव्यापकाऽनन्तमूर्त्ते! हे भगवन् भूमत्वेपि

षडैश्वर्य्यपरिपूर्ण ! हे परात्मन् ! भगवत्त्वेऽपि परमात्मस्वरूप ! हे योगेश्वर, योगमाययैवानुभाव्यमानभूमत्वादिमहामहैश्वर्य्य ! ऊतीर्जन्मादिलीलाः त्रिलोक्यां त्रिलोकीमध्यवर्तिनीः लीलाः को वेत्ति न कोपि, यतः क्वा हो इत्यादि । ननु, तवानन्ता एव मूर्त्तयो विश्वव्यापिकाः षडैश्वर्यवत्यः परमात्मस्वरूपा न तु भौतिक्यः त्रैलाक्यान्तर्वर्तिनीरेव भक्तविनोदनार्था लीलाः कुर्वत्यः सर्वा एव सदैव युगपदेव क्रीडन्तीति कथ सम्भवेदित्यत आह—विस्तारयन्निति । अचिन्त्यशक्त्या योगमाययैव तत्तदुपासकभक्तान् प्रति तासां यथासमयं प्रकाशनावरणाभ्यामेव क्रीडानिर्वाह इत्यर्थः ॥ २१ ॥ तस्मादिदङ्कारास्पदं जगदेव मायिकं मध्यमपरिमाणवत्त्वेऽप्येतत्परिच्छेदकं त्वद्वपुस्तु शुद्धसत्त्वात्मकमेवेति प्रकरणमुपसंहरति—तस्मादिति । असत् सार्वकालिकसत्तारहितं स्वरूप यस्य तत् अत एव स्वप्नाभं स्वप्नवदल्पकालवर्ति न तु स्वाप्निकवस्तुवदस्य जगतो मिथ्यात्वं व्याख्येयम् "प्रधानपुम्भ्यां नरदेव सत्यकृत्" इति सप्तमोक्तेः 'सत्यं ह्येवेदं विश्वमस्रजत" इति माध्वभाष्यप्रमाणितश्रुतेश्च अस्ता लुप्ता धिषणा ज्ञानमविद्यया यस्य तत् नित्यमिति सन्धिनी सुखमिति ह्लादिनी बोध इति संविदत एतत्स्वरूपशक्तित्रितयात्मकत्वात् सदानन्दचिन्मय्यस्तनवो यस्य तस्मिन् त्वयि अधिष्ठाने मायातः कारणादुद्यत् उद्गच्छत् अपि यत् अस्तं गच्छदपि सदिव सर्वकालिकमिव । यद्वा, यस्मात् सदनुग्राहकाणि तत्तत्स्वरूपाण्येव मङ्गलानि तस्मादिदं जगदेव असत्स्वरूपम् अमङ्गलात्मकम् ननु मिथ्याभूतस्य जगतः किं भद्राभद्रविचारेण तत्राह—स्वप्नाभं स्वप्नवन्न भातीति तत् मिथ्यात्वेन न प्रतीतमित्यर्थः । किं तु अस्तधिषणत्वात् पुरुदुःखदुःखत्वादभद्रमपि सदिव विषयानन्ददृष्ट्या उत्तममिवाऽभाति ॥ २२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

देशतः प्रकारतः कालतश्च भगवदवताराणां तल्लीलानां च दुर्ज्ञेयत्वमाह–को वेत्तीति । त्रिलोक्यां को भवतः सुरादिषु कृतावतारस्य ऊतीर्लीलाः वेत्ति न कोऽपि । ननु, तत्कालिका जना जानन्त्वत्राह–योगमायां जनमोहिनीं विस्तारयन् तत्र तत्र क्रीडसि । ननु, तत्तल्लीलापरं त्वां कथञ्चित् ज्ञात्वा लीलामपि तत्र त्वत्कृतां जानन्त्वत्राह—हे भगवन्, दुर्ज्ञेयषडैश्वर्यसम्पन्न ! हे भूमन्. दुर्ज्ञेयस्वरूप ! हे योगेश्वर, अघटितघटनाकुशल ! त्वां त्वत्कृपां विना को वेत्तीति भावः ॥ २१ ॥ ननु, यदि दुर्ज्ञेयोऽहं तर्हि मां हित्वा जगदेवाश्रयणीयं भवतीत्यत्र न हि न हि भगवन्, जगदाश्रयणीयं पुरुदुःखदुःखत्वात् त्वमेव परमानन्दत्वादाश्रयणीय इत्याह—तस्मादिति द्वाभ्याम् । नित्यसुखबोधतनौ त्रैकालिकानन्दप्रकाशविग्रहे अनन्ते अपरिच्छिन्ने परमकारणे उद्यदपि उत्पन्नमपि स्वरूपतोऽपरिणामित्वं द्योतयन्नाह–मायातः शक्तिभूतायाः प्रकृतेरिति सदुपादानकमपीत्यर्थः । तथाऽपि स्वप्नाभमनित्यम् अस्तधिषणं बुद्धिव्यामोहकं बहुदुःखानामपि दुःखम् यत् यस्मादिदमेवंविधं तस्मात् अखिलं सकलं जगत् असत्स्वरूपमनुपादेयस्वरूपं नाश्रयणीयमित्यर्थः । कथं तर्हि अस्मिन् सर्वे आसक्ताः ? इत्यतः सदिवोपादेयवत् भातीति ॥ २२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु परया योगमायया मम विज्ञानमयः सर्गः पूर्वोक्तलक्षणः कियति स्थाने केन विधिना कियता कालेन भवेत् स च कियानिति वेत्थ न वेति चेत्तत्राह—को वेत्तीति । हे भूमन् विश्वव्यापकासंख्यमूर्त्ते ! हे भगवन् पूर्णषडैश्वर्य ! हे परात्मन् बद्धमुक्तसर्वजीवान्तर्यामिन् ! हे योगेश्वर योगायाः परायाः स्वामिन् ! भवतस्तव त्रिलोक्यां ऊतीस्तत्सर्गसिद्धा जन्मादिलीलाः को वेत्ति न कोऽपीत्यर्थः । यतः क्वाहो कथं वेत्त्यादि नत्वसङ्ख्यताभिः षडैश्वर्यपूर्णाभिस्तव मूर्त्तिभिस्ता ऊतयो युगपदेव कथ संभवेयुस्तत्रा योगमायां विस्तारयन्निति स्वरूपभूतया नित्यशक्त्या मायाख्यया युत इत्यादिश्रुत्युक्तयाऽचिन्त्यया अनया तत् सर्व-निर्वाह इत्यर्थः ॥ २१ ॥ मया अधिष्ठितं जगत्तु प्राकृतत्वादनित्यमित्याह तस्माद्विज्ञानमयात् सर्गादन्यदिदमशेषं जगत् असत् स्वरूपमशोभन वपुः स्वप्नाभम् अल्पकालवर्त्तीत्यर्थः । अस्ता विलुप्ता धिषणा ज्ञानं यत्र तत् अतः पुरुदुःखेति प्रचुरदुःखस्वरूपमेव तत्रत्यसुखस्यापि विषसम्पृक्तमधुन्यायेन दुःखत्वादिति भावः । कुत ईदृक् तत्राह त्वय्याश्रये स्थितायाः मायातस्त्रिगुणायाः कारणादुद्यदुद्भवत् अपि यत् तत्रैवास्तं गच्छत् तथापि अज्ञानिनां सदिव शोभनमिवावभाति त्वयि कीदृशीत्याह नित्येति । नित्यसुखबोधरूपं यद्ब्रह्म सा तनुर्मूर्तिर्यस्य तस्मिन् ब्रह्म–विग्रहे इत्यर्थः ॥ २२ ॥

श्रीसुबोधिनी

ननु तदव्यतिरेकेणापि वेदादिना कथं न तत्त्वपरिज्ञानं ? तत्राह **को वेत्ती**ति, तत्त्वं भवान् भवल्लीला च, तत् को वा जानाति ? वेदस्तु व्याख्यात्रभावान् मूकवन् नार्थं समर्पयति, भूमन्निति, व्यापकत्वादेकदेशे स्थितो न जानातीत्युक्तं, **भगव**न्निति, षड्गुणैश्वर्यसम्पन्नत्वादनीशत्वादिगुणयुक्तः कथं जानीयात् ? न हि पामरा विदुषस्तत्त्वं जानन्त्वनीशो वेश्वरस्याविरक्तो वा विरक्तस्य, **परात्म**न्निति, परमात्मनस्तत्त्वं न हि जीवो जानाति, **योगेश्वरे**ति, न हि स्वच्छन्दगतेर्बद्धो जानाति, किञ्च साऽपि **लीला क्व वा** जायते ? **अहो** आश्चर्ये, न हि मत्स्यादिरूपे ज्ञानप्रकाश उचितः, **कथं वा** जायते ? न हि भगवतो लीलासमुद्रे प्रस्तरणादिरूपा कस्यचिद् बुद्धिगम्या भवति, **कति वा** लीलाप्रकारा **भ**वन्ति **कदा** वा **भवन्तीति न कोपि वेद**, तत्र हेतु**र्विस्तारयन्** क्रीडसि **योगमाया**

मिति, यदि मायामविस्तारयन् क्रीडेत् तदा लोको जानीयादपि, अत**स्त्वत्स्वरूपं त्वमेव** जानासीति तत्त्वोपदेशार्थं **तवावतारः** ॥ २१ ॥ एवं देहाद्यात्मभावं भवान् दूरीकरोतीत्युक्त्वा प्रपञ्चेपि योयं भ्रमः प्रपञ्चमिथ्यात्वं भिन्नतयापि सत्यत्वं सोपि **निवर्तत** इत्यतिदिशति **तस्मादिति, इदं जगदशेषमसत्स्वरूपमसतां** बहिर्मुखानामिव **स्वरूप** यस्य सन्मार्गप्रतिबन्धकं, अत्र ममतायां **भगवद्वैमुख्यं** भवतीति स्वरूपतोप्यनित्यमुदयास्तमितप्रायं, तदाह **स्वप्नाभमिति, स्वप्नस्येवाभा** यस्य, किञ्च ज्ञानप्रतिबन्धकं **चैतत्, यतोस्ता गता धिषणा** यस्मात्, किञ्च क्लेशरूपं च **पुरुदुःखादपि दुःखं** यस्मात्, एतादृशमपि **त्वय्येव सदिवावभाति** त्वन्निमित्तं **यथा सद् नारदादि**स्तथा घटादिरपि **भाति** भगवत्सेवासाधकत्वात्, तत्र हेतुर्नित्य**सुखबोधतनावनन्त** इति, उदयास्तमितत्वं नित्यस्य भगवतः सम्बन्धात् नित्यमिवाभाति, **पुरुदुःखदुःखमपि सुखात्मक**माभाति, **अस्तधिषणमपि बोधात्मक**माभाति, अनित्यम**प्यनन्त** आभातं नित्यमिव भासते, भ्रमादप्युद्गतं देहात्मज्ञानं सेवौपयिकत्वात् **सदिवावभाति, अतः सर्वमेव जगत् त्वत्सम्बन्धे सति समीचीनं, अन्यथा विपरीतमिति जगतस्तत्त्वम्** ॥ २२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'एवं सामान्यत उक्त्वा, विशेषतस्तु तव लीलाः कोऽपि न जानाति' इत्याह—को वेत्तीति । अहो आश्चर्यरूपां योगमायां विस्तारयन् यदा त्वं क्रीडसि, तदा त्रिलोक्यां हे भूमन् ! व्यापकस्य भवतः ऊतीः लीलाः क्व भवन्तीति परिच्छिन्नः को वेत्तीति । तथा हे भगवन् ! 'षड्गुणसम्पन्नस्य तव लीलाः कथं भवन्ति' इति स्वयं भगहीनः अज्ञः को वेत्ति ? तथा हे परमात्मन् ! 'कालादिनियन्तुस्तव लीलाः कदा भवन्ति' इति को वेत्ति ? तथा हे योगेश्वर ! 'अनन्तरूपेण क्रीडतस्तव लीलाः कति भवन्ति' इति अल्पज्ञः को वेत्तीति योज्यम् ॥ २१ ॥ उपपादितं श्रीकृष्णस्य परब्रह्मत्वमुपसंहरति—तस्मादिति । अचिन्त्यमायाधिपतित्वेन स्वतन्त्रत्वात् । अनन्ते देशपरिच्छेदरहिते नित्यसुखबोधतनौ नित्यानन्दज्ञानविग्रहे त्वयि इदमज्ञदृष्ट्या प्रतीयमानं जगत् प्राकृतत्वमशेषमसत्स्वरूपमेव मायातः त्वदिच्छया उद्यदपि यत् आविर्भावतिरोभावं प्राप्नुवत् सदिवावभाति इत्यन्वयः । तत्र दृष्टान्तमाह– स्वप्नदृष्टपदार्थस्याभा उपमा यस्य तत् । तद्भानस्य फलमाह—अस्तधिषणमिति । आसुरसम्पद्वतां त्वद्विमुखानामस्ता विपरीता प्राकृतत्वनिश्चयरूपा भवति धिषणा बुद्धिर्यस्मात् तत्, अत एव पुरुदुःखदुःखमिति । प्राकृतदृष्ट्या तवापमानात् बहुदुःखभोगानन्तरमपि दुःखानि दुःखपरम्परा यस्मात्तत् । तथा चोक्तं गीतासु—"अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् ॥ तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम्" इति ॥ २२ ॥

अन्वितार्थप्रकाशिका

को वेत्तीति ॥ हे भूमन् ! हे भगवन् ! हे परात्मन् ! योगेश्वर ! अहो आश्चर्यरूपां योगमायां विस्तारयन् यदा त्वं क्रीडसि तदा त्रिलोक्यां भवतः ऊतीः लीलाः क्व देशे भवन्ति कथं वा भवन्ति कति वा भवन्ति कदा वा काले भवन्ति इति को वेत्ति न कोऽपीत्यर्थः ॥ २१ ॥ तस्मादिति ॥ तस्माद्धेतोः अनन्ते नित्यसुखबोधतनौ नित्यानन्दज्ञानरूपे त्वयि एव स्वप्नपदार्थवदाभा यस्य तत् अस्ता धिषणा प्रतिभासो यस्य पुरु बहुलं दुःखानन्तरं दुःखं यत्र इदमज्ञदृष्ट्या प्रतीयमानं जगत् अशेषमसत्स्वरूपमेव मायातः उद्यत् उद्गच्छत् अपि यन्नश्यत अपि । पूर्वादिणः शता इणो यण् । सदिव उपलक्षणतया नित्यमिव सुखमिव चेतनमिव अधिष्ठानभूतस्य तव गुणैरवति ॥ २२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तर्हि कोऽपि न विद्यादित्याशंक्य वेत्तीत्याह महिम्नः तत्त्वं याथार्थ्यं जानाति अननुगृहीतः अन्य एकोऽपि चिरं विचिन्वन् मृगयन् सन्न जानाति ॥ २१ ॥ अनुग्रहं कांक्षन्नाह तत्तस्माद्धेतोर्हे नाथ अत्र भवे अस्मिन् विधिजन्मनि वा अन्यत्र मनुष्यजन्मनि वा तिरश्चां पशूनामपि मध्ये जन्मनि सः मे भूरिभागो महद्भाग्यमस्तु येन भाग्येन भवतो जनानां भक्तानां मध्ये एकोऽपि यः कश्चिदपि अहं भूत्वा तव पादपल्लवं चरणकमलं निषेवे ॥ २२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अवतारप्रसङ्गात्तेषां जातिप्रकारसंख्याकालनियमाभावं क्रीडैकप्रयोजनत्वं विचित्रशक्तिमत्त्वं चाह ॥ क इति ॥ तत्रावतारदशायामपि स्वासाधारणविपुलानन्दरूपत्वषाड्गुण्यपूर्णत्वप्रशासितृत्वयोगनिर्वाहकत्वाद्यप्रहाणप्रदर्शनार्थं भूमन्नित्यादिसंबोधनचतुष्टयं वक्ति । हे भूमन् स्वासाधारणविपुलानन्दरूप, हे भगवन् षाड्गुण्यपूर्ण, हे परात्मन् हे प्रशासित हे योगेश्वर सकलयोगनिर्वाहक, भवतस्तव, ऊतीश्चेष्टाः, त्रिलोक्यां, कः पुमान्, क्व वा कस्यां जातौ, कथं वा केन प्रकारेण, कति वा कियत्संख्याकाः, कदा कस्मिन् काले, इत्येतत् वेत्ति । न कोऽपि जानातीत्यर्थः । केवलं योगमायां स्वकीयामाश्चर्यशक्तिं, विस्तारयन्नेव, क्रीडसि । इति मम भातीति

भावः ॥ २१ ॥ अहो त्वदीया योगमायारूपाश्चर्यकारिणी शक्तिर्या त्वयि स्वशरीरभावेन स्थितं चिदचिदात्मकमिदं जगत्परिणामितयाऽसदपि त्वामजानतां सदिव भातीत्याह ॥ तस्मादिति ॥ तस्मात् अत्वद्ब्रह्मात्मकस्वतन्त्रवस्त्वभावात् नित्यसुखबोधतनौ नित्यानुकूलज्ञानस्वरूपे, अनन्तेऽपरिच्छेद्यमहिम्नि, त्वय्येव मायातस्त्वत्संकल्परूपज्ञानशक्त्या, उद्यदुत्पद्यमानं अपि, यत्लयमप्युपगच्छत्, पुरुभ्या दुःखेभ्य उपर्युपरि विविधानि दुःखानि यस्मिंस्तत् । स्वप्नाभं स्वप्नतुल्यं, सर्वत्र दृष्टान्तदार्ष्टान्तिकयोः साधर्म्ये सति वैधर्म्येण भवितव्यमन्यथा तयोरैक्यमेव स्यात् तत्रानित्यत्वस्वरूपं साधर्म्यनुभयानुगतम् । स्वप्ने स्वाप्नार्थानां तत्कालमात्रावसायित्वं दार्ष्टान्तिके तु कालान्तरावसायित्वमनेकानुभाव्यरूपत्वमिति च तयोर्वैधर्म्यं, अस्तधिषणं प्रशस्तमतिमद्भिरपि दुराकलनीयम् इदं चिदचिदात्मकं अशेषं जगत्, असत्स्वरूपं सततपरिणामित्वेनासत्तया प्रत्यक्षेक्ष्यं सदपि, त्वामजानतामिति शेषः । सदिव, अवभाति । सततविकारवत्सदपि तद्विपरीतवदाभातीत्यर्थः ॥ २२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

को वेत्तीति : १०.१४.२१.

इयानेव भूयान् प्रसादो मयीश त्वयाकारि येनाद्य लीलास्तवेमाः ।
समालोकिता नान्यथा कोऽपि शक्तः पुरावाऽऽस नाग्रेऽपि नाद्यापि भूमन्॥ ३२ ॥

कृष्णप्रिया

हे सर्व व्यापक श्रीहरि ? हे भगवन् ! हे परात्मन् ! हे योगेश्वर । जब कभी भी आप आपकी योगमाया का विस्तार करते हुए लीलाओं का विस्तार करने लगते हैं तब इस त्रैलोक्य में कौन ऐसी व्यक्ति है जो जान सके कि भगवान् अपनी लीला कैसे, कहाँ, किसलिये और कितनी करते है ॥ २१ ॥ नाथ, यह विश्व असत्स्वरूपवाला, स्वप्न जैसा, ज्ञान का प्रतिबन्धक उत्तरोत्तर दुःख देने वाला ही है। और सारा जगत् माया से उत्पन्न होनेवाला है फिर भी नित्यानन्दबोधस्वरूप हे अनन्त आप में हो रहा है इसलिये आपके सम्बन्ध से यह सत्य है । यदि आपका सम्बन्ध न होता तब तो यह जगत् असदादि ही है।।२२।।

एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनन्त आद्यः ।
नित्योऽक्षरोऽजस्रसुखो निरञ्जनः पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः ॥ २३ ॥
एवंविधं त्वां सकलात्मनामपि स्वात्मानमात्मात्मतया विचक्षते ।
गुर्वर्कलब्धोपनिषत्सुचक्षुषा ये ते [1]तरन्तीव भवानृताम्बुधिम् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—पुरुषः पुराणः सत्यः स्वयंज्योतिः अनन्तः आद्यः नित्यः अक्षरः अजस्रसुखः निरञ्जनः पूर्णः अद्वयः उपाधितः मुक्तः अमृतः त्वम् एकः आत्मा ॥ २३ ॥ गुर्वर्कलब्धोपनिषत्सुचक्षुषा ये त्वां एवंविधं सकलात्मनाम् अपि स्वात्मानम् आत्मात्मतया विचक्षते ते भवानृताम्बुधिं तरन्ति इव ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्वमेव तु सत्य इत्याह । एकस्त्वं सत्यः । कुतः आत्मा दृश्यमसत्यं दृष्टं न चात्मा दृश्योऽतः सत्यः । किं च यद्विकारवत्तदसत्यम् । न च त्वयि जन्मादयो विकाराः संतीत्याह । आद्यः कारणमतो न जन्म । आद्यत्वे हेतुः । पुराणः पुरापि नवः कार्यात्पूर्वमपि वर्तमान इत्यर्थः । अत्र हेतुः पुरुष इति । तथा च श्रुतिः । "पूर्वमेवाहमिहासम्" इति, "तत्पुरुषस्य पुरुषत्वम्" इति । जन्मानंतरास्तित्वलक्षणं विकारं वारयति । नित्य इति । सनातन इत्यर्थः । पूर्णोऽजस्रसुखोऽक्षरोऽमृत इति चतुर्भिः पदैः क्रमेण वृद्धिविपरिणामापक्षयविनाशान्वारयति । पूर्णत्वे हेतुः । अनंतोऽद्वय इति च । देशकालपरिच्छेदरहितो वस्तुपरिच्छेदरहितोऽपीत्यर्थः । अमृतत्वोपपादनाय चतुर्विधक्रियाफलत्वं वारयति स्वयंज्योतिर्निरंजन उपाधितो मुक्त इति पदत्रयेण । अयं भावः । तत्रोत्पत्तिराद्य इत्यनेनैव निराकृता । प्राप्तिरपि क्रियया ज्ञानेन वा भवेत् । क्रियया प्राप्तिरात्मपदेनैव निराकृता । ज्ञानतः प्राप्तिं वारयति । स्वयंज्योतिरिति । विकृतिरपि तुषापाकरणेनावघातेन व्रीहीणामिवोपाध्यपाकरणेन भवेत्तत्त्वसंगत्वान्न संभवतीत्याह । मुक्त उपाधित इति । संस्कारोऽपि किमप्यतिशयाधानेन मलापाकरणेन वा तत्रातिशयाधानं पूर्णत्वेनैव निराकृतम् । मलापाकरणं निवारयति । निरंजन इति । निर्मल इत्यर्थः ॥ २३ ॥ तस्मादेवंभूतज्ञानान्मुच्यंत इत्याह । एवंविधमिति । त्वां ये विचक्षते सम्यक्

---

१. तरन्त्येव—वीर. ।

पश्यंति। कथम् आत्मात्मतया आत्मा प्रत्यक्चैतन्यं तस्य स्वरूपेण। न चैतत्पुत्रादिष्विव गौणमित्याह। सकलात्मनामपि स्वात्मानम्। केन। गुरुरेवार्कस्तस्माल्लब्धा उपनिषज्ज्ञानं तदेव सुचक्षुस्तेन भव एवानृतांबुधिस्तं ते तरंतीव ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवं जगतो मिथ्यात्वेन बाधसामानाधिकरण्ये "नैतदात्म्यमिदं सर्वम्" इत्यादिश्रुतिसिद्धं विजातीयभेदाभावमभिधाय 'सृष्टाविवाहम्' इत्यत्र स्वगतभेदं च वारयित्वा जीवैर्मुख्याभेदं दर्शयन्सजातीयभेदमपनुदति एक इति। अतो दृश्यत्वात्। सत्यत्वेऽन्यदप्याह–किञ्चेति। अतः परमकारणत्वात्। इत्यर्थ इति–पुराणशब्दोऽत्र जीर्णार्थपरो नेत्यर्थः। इहास्य जगत इति यत्पूर्वभवनं तदिति श्रुतिपदार्थः। इत्यर्थ इति—सनातनस्यैव नित्यपदार्थत्वादिति भावः। परिच्छेदः परिमितिः। उत्पाद्याप्यविकार्यसंस्कार्यरूपाणि चतुर्विधानि क्रियाफलानि। अयं भाव इति—तत्र चतुर्षु आत्मनो विनैव क्रियां स्वरूपत्वेन प्राप्तत्वात्, स्वयंप्रकाशस्य ज्ञानाविषयत्वादित्याह—ज्ञानत इत्यादि। तुषाणामपाकरणं येन अवघातेनावहननेन। तच्च उपाध्यपाकरणम्। तत्र तयोः। इत्यर्थ इति –निर्मले मलसत्त्वे निर्मलत्वव्याघातादित्यर्थः। अत्र विश्वनाथः—बहिर्मुखानां मते तु त्वमपि मायोपाधिर्मायामय एव, दुर्गममहिम्नस्तव चिन्मयजगतां तु मायिकत्वे का वार्तेति। त्वत्पदवीं त्वत्प्रापकं वर्त्म 'भक्त्याहमेकया लभ्यः' इति त्वदुक्तेः। भक्तियोगमजानतां ज्ञानिमानिनां तु मते त्वमनात्मनि प्रकृतौ स्थित एवात्मैव त्वमात्मनैव स्वातन्त्र्येणैवेति तव जीवाद्विशेषः। मायां वितत्यैव भासि, आकारशून्योऽप्याकारवत्त्वेन जातो भवसि, सृष्टौ रजोगुणेन यथाऽहंविधानेन पालने सत्त्वेन एष त्वं विष्णुरिव अन्ते तमसा त्रिनेत्रो रुद्र इवेति निराकारस्यात्मनो यथा मायिकावतारा ब्रह्मविष्णुरुद्रास्तथा मायिकमेव जलस्थं नारायणरूपमवताराश्च सर्वे मायिकरूपा माययैव वत्सबालचतुर्भुजादीन् क्षणिकान्दर्शयामासेति ते प्राहुः ॥ २३ ॥ यस्मात्त्वं सर्वविकारादिशून्यस्तस्माद्धेतोः। एवंविधं सत्यज्ञानादिरूपम्। प्रत्यक् जीवः। आत्मशब्दोऽत्र स्वरूपपरः। एतत् आत्मदर्शनम्। पुत्रे आत्मदृष्टिर्यथा गौणी न तथेत्याह—सकलेति। अनृतत्वादेव तरन्तीवेत्युक्तम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुनरवान्तरप्रकरणं तथैवोपसंहरति एक इति। यस्मान्नारायणस्त्वमित्यादि, एकोऽसीत्यादि च, तस्मात् सपाणिकवलोऽयं त्वमेक एवात्मा सर्वेषां प्रापञ्चिकाप्रापञ्चिकानां मूलं स्वरूपं "तमेकं गोविन्दं सच्चिदानन्दविग्रहम्" इति "साक्षात् प्रकृतिपरोऽयमात्मा गोपालः कथं त्ववतीर्णो भूम्यां ह वै" इति च श्रीगोपालतापनीश्रुतेः। वक्ष्यते च "सर्वेषामेव भावानाम्" इत्यादि "कृष्णमेनमवेहि त्वम्" इत्यादि च तदात्मत्वमेव साधयति–पुरुष इत्यादिना। तत्र पुरुषः "योऽसावुत्तमः पुरुषो गोपालः" इति तच्छ्रुतेः पुराणः गूढः "पुराणपुरुषो वनचित्रमाल्यः" इति वक्ष्यमाणवचनात्। सत्यः "सत्यव्रतं सत्यपरं त्रिसत्यम्" इत्याद्युक्तत्वात्। स्वयञ्ज्योतिः "यो ब्रह्माणं विदधाति पूर्वं यो विद्यास्तस्मै गापयति स्म कृष्णः तं ह देवमात्मबुद्धिप्रकाशम् मुमुक्षुर्वै शरणममुं व्रजेत्" इति तच्छ्रुतेः। अनन्तः "न चान्तर्न बहिर्यस्य" इत्यादि "योऽयं कालस्तस्य ते" इत्याद्युक्तत्वात्, आद्यः "ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः। अनादिरादिर्गोविन्दः सर्वकारणकारणम् इति ब्रह्मसंहितायाम् "विदितोऽसि भगवान् साक्षात्" इत्यादि श्रीवसुदेववाक्यादेः नित्यः "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् तं पीठगं येऽनुयजन्ति विप्रास्तेषां सिद्धिः शाश्वती नेतरेषाम्, एतद्विष्णोः परमं पदं ये नित्ययुक्ताः संयजन्ते न कामान् तेषामसौ गोपरूपः प्रयत्नात् प्रकाशयेदात्मपदं तदेव" इति तच्छ्रुतेः। अक्षरः "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः" इति श्रीगीताभ्यः अजस्रसुखः "कृष्णात्मकोनित्यानन्दैकरूपः" इति तच्छ्रुतेः केवलानुभवानन्दस्वरूप" इति श्रीवसुदेववाक्यादेः निरञ्जनः "विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थम्" इति श्रीनारदवाक्यात्। पूर्णः "ते होचुरुपासनमेतस्य गोविन्दस्याखिलाधारिणो ब्रूहि" इति तच्छ्रुतेः "को वेत्ति भूमन्" इति ब्रह्मवाक्यादेः। अद्वयः "अद्वितीयाय महते श्रीकृष्णाय नमो नमः" इति तच्छ्रुतेः मुक्त उपाधितः "साक्षात्प्रकृतिपरः" इति तच्छ्रुतेः अमृतः "गोविन्दान्मृत्युर्बिभेति" इति तच्छ्रुतेः "मर्त्योमृत्युव्यालभीतः पलायन्" इत्यादिवाक्यादेः तथा "जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयं योऽसौ सौर्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गोपान् पालयति योऽसौ गोपेषु तिष्ठति" इत्यादितच्छ्रुतेरेव, अत्र टीकायां पदत्रयेण चतुर्विधं क्रियाफलं वारयतीति तद्वारणं समाप्तीत्यर्थः ॥ २३ ॥ एतादृशत्वज्ज्ञानेनाऽनायासेनैव संसारान्मुच्यत इत्याह एवमिति। एवंविधं पूर्वोक्तप्रकारकं त्वां श्रीकृष्णं सकलात्मनामपि जीवभेदानां पूर्वोक्तपुरुषत्रयभेदानां चापि रश्मीनां स्वैकदेशानां च सूर्यमण्डलमिव स्वात्मानं परमस्वरूपम् आत्मात्मतया सकलेत्यादिना यथोक्तं तथैव न तु केवलशुद्धात्मादितयेत्यर्थः। विचक्षते आत्मादितः सर्वतः परमप्रेमास्पदत्वेनानुभवन्ति साक्षात् त्वदुपदेष्टृत्वात् तादृशो गुरुरेवार्कः न त्वन्योपदेष्टृवह्निदीपादिस्थानीयः तद्विधश्च "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" इत्यनुसारेण श्रीशुकदेवादिः उपनिषच्छ्रीगोपालतापन्याद्या "योऽसौ ब्रह्म परं ब्रह्म गोपालः" इत्यादिरूपा भवो जन्ममरणादिमयः संसारः तस्यानृतत्वात् तदाश्रयेण च "त्वय्यम्बुजाक्ष !" इत्यादि रीत्या गोवत्सपदायमानत्वादिवशब्दः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पूर्व्वोक्तं श्रीभगवतः सत्यत्वमेवोपपादयन् जीवतत्त्ववैलक्षण्येन भगवतस्तत्त्वमाह—एक इति । एकोऽपि त्वमात्मा व्यापकः पुरुषः सर्वजीवानां प्रत्येकमन्तर्य्यामी—'पुरि शयनात् पुरुषः' इत्युक्तेः; पुराणश्च पूर्वतो निजैश्वर्य्येण वर्त्तमानोऽपि नव एवेति परममहाशक्तिमानीश्वर इत्यर्थः । एवं परब्रह्मत्वं परमात्मत्वं परमेश्वरत्वञ्च क्रमेणोक्तम् । न चैश्वर्य्यादिकं मायिकमित्याह—सत्य इति । ननु साकारत्वेन दृश्यत्वात् कथं सत्यता ? तत्राह—स्वयंज्योतिः स्वप्रकाशस्त्वत्कृपयैव दृश्यत्वात् । किञ्चानन्तः उत्तरावधिरहितः; आद्यः पूर्वावधिरहितः, एवमपरिच्छिन्न इत्यर्थः । यद्वा, अनन्तोऽपरिच्छिन्नः आद्यो जीववज्जन्मरहितः, नित्यः सदैकरूपः सर्वविकाराभावात्, अक्षरः स्थिरः । यद्वा, प्रपञ्चातीतः (गी० १५।१६)—'क्षरः सर्वाणि भूतानि' इति श्रीगीतोक्तेः, अजस्रसुखो नित्यानन्द आनन्दघनमूर्तिरित्यर्थः, निरञ्जनो निर्म्मलो विशुद्ध इत्यर्थः, पूर्णः सम्पूर्णोऽनन्यापेक्ष इत्यर्थः, अद्वयो विजातीयसम्बन्धरहितः उपाधितो मुक्तो निरुपाधिरकारणसर्वजीवनिरन्तरहितकारी यद्वा, स्वत एव तत्तद्गुणादियुक्त इत्यर्थः । अमृतोऽविनाशी यद्वा, न विद्यते मृतं मृतिर्मरणलक्षणसंसारो भक्तानां यस्मात् सः । एवं मूर्त्तिमत्त्वेन जीववत् प्रसक्तं परप्रकाश्यत्वं परिच्छिन्नत्वं गर्भवासादिपूर्वकजायमानत्वमवस्थादिभेदेन विविधरूपत्वमस्थिरत्वमल्पसुखत्वमविशुद्धत्वं विजातीयसम्बन्धत्वं सोपाधिकत्वं संसारित्वञ्च निरस्तम् । एतेषां यथायथं हेतु-हेतुमत्तोह्या ॥२३॥ एतादृशत्वज्ज्ञानेन भक्त्यानायासेनैव संसारान्मुच्यन्त इत्याह—एवमिति । सर्वजीवानां स्वात्मानं परमनियन्तारमप्यात्मनोऽपि सकाशादात्मतया प्रियतया । मद्वा, सर्वजीवानां स्वात्मानं परमात्मानमप्यात्मनो ममैवात्मान्तर्य्यामी तत्तयापि किमुत प्रियत्वादिना विचक्षते सम्यग्जानन्ति, ते त्वदभक्ता मिथ्याभूतोऽपि संसार एवाब्धिर्दुस्तरत्वात्तं तरन्ति । अनृतेति तत्त्वतोकिञ्चित्करत्वादज्ञानमात्रोत्पन्नत्वाद्वा । इवेति चात्मज्ञानस्य भगवज्ज्ञानान्तर्गततया तज्ज्ञानस्यानायससिद्धत्वात् ॥ २४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

एवं विलक्षणत्वेन विश्वस्य चिदचिद्रूपस्य तच्छरीरत्वं तव चात्मत्वमित्याह—एकस्त्वमिति । अनेकजीवविलक्षणः त्वमेवात्मा इति विश्वात्मत्वं विधीयतेऽत्र अततीत्यात्मा व्यापकः जीवाणुत्वव्यावृत्तिः पुरुषः व्यष्टिजीवपुरुषनियन्ता पूर्षु चिदचित्सु शेत इति च "आत्मनि योऽव्यक्ते" इत्यादिश्रुतेः । पुराणः पुरापि नवकिशोरमूर्त्तिरेव, सत्यः इच्छामूर्तिमत्त्वेऽपि सत्यः सत्यस्वरूपरूपगुणकः एवमपि न परप्रकाश्यः यतः स्वयञ्ज्योतिः रविचन्द्रवह्निनामपि ज्योतिःप्रदः स्वप्रकाशः एवमपि न परिच्छिन्नः यतः अनन्तः सर्वदेशसर्वकालसर्वावस्थासु ज्योतिरादिपरिच्छिन्नतारहितः यत आद्यः सर्वकारणं कारणत्वेऽपि बीजवन्नानित्यः किन्तु नित्यः नित्यत्वेऽपि क्षरणस्वभावचिदचिद्वस्तुविलक्षणः अक्षरः अजस्रसुखः इति मुक्ताक्षरव्यावृत्तिः तस्य पूर्वमनित्यसुखत्वात् यतः निरञ्जन उपाधिरहितः अत एव पूर्णः स्वरूपरूपादिभिः यतः अद्वयः समाधिकदरिद्रः उपाधितो मुक्त इति पुनरुक्तिर्मायोपाधिकेश्वरनिरासार्था अमृत इति मुक्तनित्यादिपरमभोग्यस्वरूपरूपगुण इति भावः ॥ २३ ॥ एवं विभूतिद्वयविशिष्टत्वं श्रीभगवतो नारायणस्य श्रीकृष्णस्य प्रतिपाद्याचार्यप्रपत्तिमुखेनैव तत्कृपया एतादृशा श्रीभगवज्ज्ञानतत्प्राप्तिः इति विशिष्याह—पञ्चभिः । एवंविधं पूर्वप्रकारेणोक्तपरमस्वरूपं त्वां ये श्रीभगवतो नारायणस्य तव जन्म सामयिककृपाकटाक्षविषया ये त एव गुर्वर्कलब्धोपनित्सुचक्षुषा गुरुरेवार्कः यस्य दृष्टौ च परमतत्त्वश्रीमन्नारायणस्वरूपरूपादितत्त्वज्ञानहीनगुरोरतारकत्वम् अभिप्रेति तस्माल्लब्धं यदुपनिषद्रूपं सर्वोपनिषद्रूपस्य रूपमेव सुचक्षुः शोभनं चक्षुः व्यापको रहस्यत्रयावेदको मन्त्रस्तेनेत्यर्थः । सकलात्मनां बद्धमुक्तनित्यानां जीवानामपि स्वात्मानं निधनवत्प्रियमात्मानं शरीरिणं त्वां ये आत्मात्मतया विचक्षते आत्मनो ममात्मा प्राणप्रियस्तद्भावेन "माता पिता भ्राता निवासः शरणं सुहृद्गतिर्नारायणः" इति श्रुत्युक्तरीत्या नवविधसम्बन्धानुसन्धानेनेति भावः । ये पश्यन्ति ते भवानृताम्बुधि तरन्ति इव, एवार्थे इवशब्दः निश्चयेन तरन्त्येवेति भावः । भूयतेऽस्मिन्निति भावः अनृताम्बुधिम् ऋतेतरविषयो ह्यनृतशब्दः अनृतं कर्मादिपञ्चकम् अभिवक्ति तस्याम्बुधित्वरूपणम् अपारत्वाशोष्यत्वानुल्लङ्घनीयत्वाऽतार्यत्वादिना तत्राविद्याया अपारत्वं कर्मजलस्य शोष्यत्वम् "नाभुक्तं क्षीयते कर्म" इति वाक्यात् वासनाया अनुल्लङ्घनीयत्वं रुचेरतार्यत्वं प्रकृतेरम्बुधित्वं चेति तस्य सत्यत्वं च व्यज्यते ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यद्यसदिदं जगत् मच्छरीरभूतं मय्येवोत्पद्य लीयते तर्हि तद्दोषभागहमप्यसन्नेवेत्यतस्तं प्रकृतिपुरुषविलक्षणत्वेन शोधयति एक इति । सत्यः स्वञ्ज्योतिरनन्त इति पदत्रयेण "सत्यं ज्ञानमनन्तम्" इति जगत्कारणत्वेन लक्षिते सूक्ष्मचिदचिद्विशिष्टे वस्तुनि विशेष्यांशशोधनं वाक्यं प्रत्यभिज्ञायते सत्यः निर्विकारः अनेनाचेतनात्तत्संसृष्टचेतनाच्च व्यावृत्तिः स्वयञ्ज्योतिः सङ्कोचकाभावान्नित्यासङ्कुचितस्वयंप्रकाशस्वरूप इत्यर्थः । अनेन मुक्तजीवानां व्यावृत्तिः तेषां बद्धदशायां सङ्कुचितप्रकाशत्वात् अनन्तः स्वरूपतः स्वभावतश्च त्रिविधपरिच्छेदरहितः अनेन नित्यसिद्धव्यावृत्तिः तेषां स्वभावत आनन्त्येऽपि स्वरूपतस्तदभावात्, तत्र सत्यत्वमेव

विवृणोति उपाधितोऽमृतो निरञ्जनोऽक्षरश्चेति अमृत इति छेदः । जीवस्योपाधितो मरणं नाम कर्मायत्तदेहवियोगात्मकं तद्रहित इत्यर्थः । अमृत इत्यजातत्वस्याप्युपलक्षणम् उपाधित इत्यस्य काकाक्षिन्यायान्मुक्त इत्यनेनापि सम्बन्धः । उपाधितो मुक्तः नित्यं कर्मायत्तदेहसम्बन्धान्मुक्तः तत्प्रतिभट इत्ययमुपाधितोऽमृतत्वे हेतुः । निरञ्जनः पुण्यपापरूपाञ्जनरहितः तत्प्रतिभट अनेन प्रकृतिसंसृष्टजीवव्यावृत्तिः स्पष्टीकृता भवति अक्षर इत्यनेन षड्भावविकारात्मकक्षरणस्वभावरहितवस्तुवाचिना प्रकृते व्यावृत्तिः स्पष्टीक्रियते आनन्त्यं विवृणोति नित्यः पूर्णोऽद्वयश्चेति नित्य इति कालपरिच्छेदव्यावृत्तिः पूर्ण इति देशपरिच्छेदराहित्यमुच्यते "तेनेदं पूर्णं पुरुषेण सर्वम्" इति श्रुत्युक्तरीत्या सर्ववस्तुव्यापकत्वं तेन विवक्षितम् अतो देशपरिच्छेदव्यावृत्तिः स्पष्टैव अद्वय इत्यनेन वस्तुपरिच्छेदराहित्यमुच्यते, अद्वयः अब्रह्मात्मकद्वितीयवस्तुरहितः सर्वस्य स्वात्मकत्वेन सर्ववस्तु सामानाधिकरण्यार्हत्वरूपं वस्तुपरिच्छेदराहित्यमुक्तं भवति । यद्वा, अद्वयः स्वस्वरूपगुणापेक्षयोत्कृष्टगुणयुक्तवस्त्वन्तररहितः निरतिशयगुणयुक्तत्वमपि वस्त्वपरिच्छेदः तत्राद्यकल्पे स्वरूपस्यैव सर्वशरीरकत्वेन सर्ववस्तुसामानाधिकरण्यार्हत्वरूपं वस्तुपरिच्छेदराहित्यं न तु गुणानामित्यवगन्तव्यं द्वितीये तु निरतिशयत्वं स्वरूपे गुणेषु चानुगतमित्युभयेषामपि वस्तुपरिच्छेदराहित्यमिति विवेकः, एवं प्रकृतिपुरुषव्यावृत्तस्य स्वरूपस्य कीर्तनम्, अजस्रसुख इति अजस्रं सततमविच्छिन्नं दुःखासम्भिन्नम् इति यावत् तत्सुखं यस्य सः बहुव्रीहिणाऽवगतस्याजस्रसुखस्यान्यपदार्थसम्बन्धो राहोः शिर इतिवदभेदरूपः कथमेवम्विधस्य ममासत्स्वरूपजगत्कारणत्वमित्यत उक्तम् आद्य इति, आदौ भव आद्य एवम्विधोऽपि जगत्कारणभूत इति साध्यधर्म्मनिर्द्देशः अत्रोपपत्तिरुच्यते । "एक आत्मा पुरुषः पुराणः" इति "एकमेवाद्वितीयम्" इति स्थानप्रमाणेन तत्रेवात्रापि सृष्टिदशावस्थनामरूपविभागनिबन्धनप्रपञ्चगतबहुत्वप्रतिसम्बन्धितदविभागनिबन्धनैकत्वमेकशब्देनोच्यते नामरूपविभागाऽनर्हसूक्ष्मचिदचिद्विशिष्टतयैकत्वव्यपदेशार्हः न विशेष्याकारेण कारणभूतः किं तु विशिष्टत्वाकारेणेति भावः । आत्मेत्यनेन स्वशरीरभूतप्रकृतिपुरुषकालादिद्रष्टृत्वं विवक्षितं स्वक्षेत्रस्य द्रष्टा ह्यात्मा "एतद्यो वेत्ति सततम्" इति भगवदुक्तेः । यद्यपि सा क्षेत्रज्ञशब्दव्युत्पत्तिस्थाऽपि तत्पर्यायतया प्रयुज्यमानस्यात्मशब्दस्याप्यन्तःप्रविश्य धारकवाचिनस्तत्पर्यन्तताऽत्र विवक्षिता, अनेन निमित्तकारणत्वोपयुक्तं सर्वज्ञत्वं विवक्षितम् इदनुपादानकारणत्वोपयुक्तसर्वशक्तित्वस्याप्युपलक्षणम् एक इत्युपादानादिकारणत्वं प्रसाधितम्, अथ निमित्तकारणत्वं साधयति—पुरुषः पुराणः पुरुषशब्देनाऽत्र कर्तृत्वं विवक्षितं तस्यैव कर्तृत्वदर्शनात् "कर्ताशास्त्रार्थवत्त्वात्" (२।३।३३) इति सूत्रस्वारस्याच्च पुराणः पुरापि नवः पुरा जगत्सृष्टेः पूर्वं वर्त्तमानः पुरुषः जगत्कर्त्तेत्यर्थः ॥ २३ ॥ यतस्त्वमेवं कारणभूतोऽत एव "कारणं तु ध्येयः" इति श्रुत्युक्तरीत्या त्वामेवंविधं ध्यात्वा मुच्यन्त इत्याह—एवमिति । ये जना गुरुरेवार्कः सूर्यवत्तमसोऽज्ञानस्य निवर्त्तकत्वात् तथा रूपणं तस्मादुपलब्धा या उपनिषद्वेदान्तः अत्रोपनिषच्छब्देन तद्वाक्यार्थज्ञानं विवक्षितं सैव शोभनं चक्षुस्तेनैवंविधं त्वां विचक्षते चक्षिर्दर्शनेऽपि वर्त्तते पश्यन्तीत्यर्थः । गुरुमुखाद्वेदान्तवाक्यार्थं निश्चित्य तन्मननपूर्वकं प्रत्यक्षतापत्तिपर्यन्तरूपामुपासनां ये कुर्वन्तीति भावः । कथम्भूतं कथं च ? तत्राह–सकलात्मनां सर्वेषामात्मनाम् उपासकानां चान्तरात्मानमात्मनामुपासकानामात्मतया त्वच्छरीरतया । यद्वा, सकलात्मनां सर्वजीवानां देवमनुष्यादीनां ये आत्मानः देवमनुष्यादिशरीरान्तर्वर्त्तिनो जीवास्तेषामप्यन्तरात्मतया स्वात्मानमुपासकानामप्यन्तरात्मानं य इह विचक्षते त एव भवानृताम्बुधिन्तरन्तीत्यन्वयः । भवे संसारे यान्यनृतानि तान्येवाम्बुधिस्तं यथा सम्पुष्पितस्य वृक्षस्य दूराद्गन्धो वातीत्यादिना पुण्यं कर्म प्रस्तुत्य तत्प्रतिसम्बन्धिनि पापे "एवमनृतादात्मानं जुगुप्सेत्" इत्यनृतशब्दप्रयोगादनृतशब्दः पापकर्मवाची पापत्वं चानिष्टसाधनत्वं मुमुक्षोः स्वर्गादिफलस्याप्यनिष्टत्वेन तत्साधनं कर्माप्यनृतशब्देन विवक्षितम् एवं च पुण्यपापानि तरन्तीत्यर्थः ॥ २४ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

अथ सर्वस्य चिदचिद्वस्तुनस्त्वमेव धारकत्वेन निरुपाधिक आत्मा इत्याह–एकस्त्वमिति । एकः मुख्यस्त्वमेव "एके मुख्यान्यकेवलाः" इति निघण्टुः, निरुपाधिक आत्मा चिदचिच्छरीरो यद्यपि प्रकृत्यपेक्षया जीवोऽप्यात्मा तथापि परमात्मापेक्षया शरीरमपि भवति त्वन्तु शरीर्येव न तु कस्यापि शरीरभूतः "यस्यात्मा शरीरम्" इत्यादिश्रुतेः । तत्कुतः ? पुरुषः पुरि शयनात्पुरुषः अत एव पुराणः पुराणोऽपि अभिनवत्वेनानुभाव्यः सत्यः उत्पत्त्यादिरहितः तथा च श्रुतिः "सत्यस्य सत्यम् इति प्राणा वै सत्यं तेषामेष सत्यम्" इति प्राणसाहचर्याज्जीवात्मानः प्राणाः तेहि स्वरूपेणानुत्पाद्यत्वेऽपि कर्मानुगुणदेहयोगेन जन्मवन्तस्तदप्यस्य नास्तीति तेषामेष सत्यमिति श्रुतेरर्थः । स्वयञ्ज्योतिः सदा स्वप्रकाशः असङ्कुचितज्ञानैश्वर्यः "यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः" इति प्रमाणात् अनन्तः अपरिच्छिन्नज्ञानानन्दादिगुणः तदुक्तम्—

"योऽनन्तशक्तिर्भगवाननन्तो महद्गुणत्वाद्यमनन्तमाहुः" । इति ।

आद्यः कारणानामपि कारणम् "सकारणं करणाधिपाधिपः, अस्मान्मायी सृजते विश्वमेतत्" इत्यादिश्रुतेः । नित्यः सदैकरूपः चिदचिद्गतत्वेऽपि तद्गतविकाराभावात् तदुक्तं पराशरेण—

"अविकाराय शुद्धाय नित्याय परमात्मने । सदैकरूपरूपाय विष्णवे प्रभविष्णवे" ॥ इति ।

तत्कुतः ? यतः अक्षरः अप्रच्युतस्वरूपस्वभावः "एष आत्मा अपहतपाप्मा, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकीज्ञानबलक्रिया च" इत्यादिश्रुतेः । अजस्रसुखः निरन्तरज्ञानानन्दादिगुणानुभववान् "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन" "रसं ह्येवायं लब्ध्वानन्दी भवति" इत्यादि श्रुतेः । निरञ्जनः अप्राकृतदिव्यविग्रहवत्त्वेनास्पृष्टप्रकृत्यंशः "आदित्यवर्णं तमसः परस्तात्" इत्यादिश्रुतेः, । पूर्णः अन्तर्यामितया सर्वत्रानुस्यूतः अत एवाद्वयः समाभ्यधिकशून्यः "न तत्समश्चाभ्यधिकश्च दृश्यते" इत्यादिश्रुतेः । उपाधितो मुक्तः सदा असङ्कुचितज्ञानतया अविद्यादिदोषरहितः अत एवामृतः यं प्राप्य प्रपन्ना न मृता इत्यमृतः संसारनिवृत्तिपूर्वकमोक्षप्रद इत्यर्थः "निरञ्जनः परमं साम्यमुपैति" ।

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" ।।

इति श्रुतिस्मृतिप्रमाणात्, अत्र सत्यः स्वयञ्ज्योतिरनन्त इति पदत्रयेण "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतिवाक्यमुपबृंहितमित्युक्तं भवति तत्र सत्यपदं निरुपाधिकसत्यत्वगुणयोगि ब्रह्माऽऽह—तेन परिणामादिविकारास्पदमचेतनं तत्संश्लिष्टश्चेतनश्च व्यावृत्तः अवस्थान्तरयोगेन तयोर्निरुपाधिकसत्यत्वविरहात् स्वयञ्ज्योतिः-पदवाच्यज्ञानपदं नित्यासङ्कुचितज्ञानत्वेन गुणयोगिब्रह्माऽऽह—तेन पूर्वं सङ्कुचितज्ञानत्वेन मुक्तो व्यावृत्तः अनन्तपदं देशकालवस्त्वपरिच्छिन्नं स्वरूपमाह- कल्याणगुणाकरत्वेन । सगुणत्वात् स्वरूपस्य स्वरूपेण गुणैश्चानन्त्यं श्रुतिसिद्धं तेन सत्यज्ञानपदद्वयव्यावृत्तबद्धमुक्तविलक्षणाः सातिशयस्वरूपरवगुणा नित्याः व्यावृत्ताः विशेषणानां व्यावर्त्तकस्वभावत्वात् ततः "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यनेन सत्यत्वादिगुणविशिष्टं ब्रह्म सकलेतरवस्तुविसजातीयमिति निश्चितमिति विस्तरस्तु आकरेषु द्रष्टव्यः अतः प्रकृतमनुसरामः ।। २३ ।। तस्माज्जीवात्मपरमात्मनोः स्वस्वामिभावशरीरशरीरिभावादिसम्बन्धज्ञानमेव संसारमोचकमित्याह—एवंविधे त्वामिति । एवंविधं एकस्त्वमात्मेत्यादि पूर्वोक्तप्रकारेण त्वां सकलात्मनामपि नित्यमुक्तबद्धानाम् अपि शब्दात्प्रकृतेरपि स्वात्मानं स्वधारकतयात्मानं "य आत्मनि तिष्ठन् यस्यात्मा शरीरम्" इत्यादिश्रुतेः । आत्मात्मतया आत्मनामात्मा आत्मात्मा तस्य भावः आत्मात्मता तया विचक्षते पश्यन्ति ज्ञानिन इति शेषः । केन साधनेन विचक्षते इत्यत आह—गुर्वर्कलब्धोपनिषत्सुचक्षुषा गुरुः—

"गुकारस्त्वन्धकारः स्याद्रुकारस्तन्निरोधकः । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते" ।।

इति निर्वचनसिद्धो गुरुशब्दः स गुरुरेवार्कस्तस्माल्लब्धं यदुपनिषत्सुचक्षुः रहस्यज्ञानचक्षुस्तेन आचार्योपदिष्टरहस्यज्ञानेन ये पश्यन्ति त्वदाराधनं कुर्वन्तीत्यर्थः । ते भवानृताम्बुधि अनृतशब्दवाच्याविद्याकार्यसंसारसागरं तथा च श्रुतिः "अनृतेन हि प्रत्यूढास्तेषां सत्यानामनृतमपिधानम्" इति तरन्त्येव । "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति स्मृतेः । अत्र तरतिस्त्यागपरः त्यजन्तीत्यर्थः । तमुत्सुज्य त्वामेव सेवन्ते इति भावः ।। २४ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एकस्त्वम् ।। २३–२४ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

यद्यपि तवावताराः सर्वे नित्याः, यद्यपि वत्सवत्सपादिरूपेण सम्प्रत्येव सत्यज्ञानादिवपुर्भिर्नाना दृष्टोऽसि, तथापि त्वमेक एव, यत इदानीं तत्तत् सर्वमन्तर्धाप्यैक एव वर्त्तसे; तेन सजातीय-विजातीय-द्वैतशून्यत्वादेक एवासीत्याह- एकस्त्वमात्मेत्यादि। त्वमेकः यदिदं सर्वं दृष्टम्, तत्त्वमेव, न तत् सजातीयं विजातीयं वा। त्वत्तः पृथगात्मा, न शरीरम् । तर्हि किं नोरूपः ? नेत्याह—पुरुषो दृश्यमानपुरुषाकारतया श्रीनन्दकिशोर एव । तर्हि किमहमर्वाचीनः ? नेत्याह—पुराणः । तर्हि कथं नन्दपुत्रः ? तत्राह—सत्यः, एवंरूपेणैव सत्यः, एवंरूपेणैव नन्दादयोऽपि सत्या इत्यर्थः। कुत इयं सङ्गतिः ? तत्राह—स्वयंज्योतिः स्वप्रकाशः; तव स्वयंज्योतिष्ट्वेन सर्वमेव सङ्गच्छते,—अचिन्त्यपरमशक्तित्वात् । तर्हि किमहं परिच्छिन्नः ? तत्राह—अनन्तः—एवरूपेणैव व्यापकत्वात्। ननु पुराण इति यदुक्तं तत् किं प्राचीनः ? नेत्याह—आद्यः। ननु तथाप्यादौ भवत्वात् आदिशब्दस्य च सावधित्वात् सृष्टेः प्राक्जातत्वमायातम् । तथा सति प्राचीनत्वमेवायाति, न तु मे नित्यत्वमित्याशङ्क्याह—नित्यः । तर्हि किमहमाकाशवन्नित्यः ? नेत्याह—अक्षरः । स तु क्षर एव,—भूतविशेषत्वात्, –(गी० १५।१६) "क्षरः सर्वाणि भूतानि" इत्युक्तेः। अतएवाजस्रसुखो निरन्तरानन्दः। तर्हि कथ भवताहृतेषु मे दुःखम् ? तत्राह—निरञ्जनोऽलिप्तः, तेनापि लिप्तो न भवसि । तर्हि निर्विशेषं ब्रह्मैव ? नेत्याह पूर्णः, परिपूर्णं ब्रह्म बृहद्ब्रह्मेत्यर्थः। अतएव अद्वयः, द्वयमपूर्णता नास्ति यस्य, यत उपाधितो मुक्तः, अतोऽमृतः; अमृतमासाद्यं यत् किञ्चित्तदस्यास्तीत्यर्श आदित्वादच् । एतत् सर्वाण्येव विशेषणानि; विशेष्यन्तु त्वमिति त्वच्छब्दवाच्यं श्रीकृष्णरूपम्, तेन त्वद्रूपस्यानिर्वचनीयत्वे तात्पर्यम् ।। २३ ।। ये त्वेवम्विधे तव श्रीविग्रहे आत्मबुद्धि कुर्वन्ति, न पुनः शरीरबुद्धिम्, त एव निस्तरन्तीत्याह—एवम्विधं त्वामित्यादि । एवम्विधमेवम्प्रकारं त्वां श्रीविग्रहरूपं ते आत्मात्मतया आत्मनामपि आत्मतया विदन्ति, परमात्मत्वेन जानन्ति । किंवा आत्मा विग्रहः, स एवात्मा चिद्रूपस्तत्तया, ते भवानृताम्बुधि तरन्तीव, तरन्त्येव; इव एवार्थः । कीदृशम्?

सकलात्मनामपि आत्मानम् । केन ? गुर्वर्कलब्धोपनिषत्सुचक्षुषा, गुरुरेवार्कस्तेन लब्धा अधिगता या उपनिषत् तत्त्वं रहस्यमिति यावत्, सैव सुष्ठु शोभनं चक्षुस्तेन, अथवा, एवम्विधं परमाचिन्त्यमहैश्वर्यं त्वां ये आत्मनः स्वस्यात्मतया स्वजीवनबुद्धया विचक्षते, ते तरन्तीव, तरन्त्येवेति पूर्ववत् । यद्वा, एवम्विधं परमप्रेमास्पदविग्रहं त्वां ये ज्ञानिन आत्मा आत्मेत्येव विचक्षते, न तु श्रीनन्दकिशोरोऽयं प्राणनाथ इत्यादिरूपेण ते भवानृताम्बुधिं तरन्तीव न तु भवन्ति, इवशब्दोऽसम्भवानार्थः ॥ २४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवञ्चेदवताराणां सत्यत्वम्, तर्हि किमहं नाना इत्याशङ्क्याह—एकस्त्वमित्यादि । त्वमेकः, परमात्मा सर्वात्मरूपः, तर्हि किमहं नीरूपः ? तत्राह –पुरुषो दृश्यमानपुरुषाकारः । तत् किमहमर्वाक् ? तत्राह—पुराणः एवंरूपेणैव प्राक्सिद्धः, अतएव सत्यः । तर्हि कथं नन्दसुतः ? तत्राह—स्वयंज्योतिर्नन्दगृहे स्वयंकृतप्रकाशः, न तु तत्सुतः । तर्हि किमेवाहं परिच्छिन्नः ? तत्राह—अनन्तोऽपरिच्छिन्नः परिच्छिन्न इव दृश्यते । अधुनैव तवानन्तता च दृष्टा न केवलमनन्त आद्यश्च सर्वंकारणकारणम्, अतएव नित्योऽक्षरः क्षरतीति क्षरा माया, न विद्यते सा यस्य स तथा, अतएव अजस्रसुखः, अतो निरञ्जनोऽज्यतेऽनेनेत्यञ्जनं प्रमाणं प्रमाणान्निर्गतोऽप्रमेय इत्यर्थः । अतः पूर्णोऽद्वयः न विद्यते द्वयं प्रपञ्चो यस्य उपाधितो मुक्त उपाधिशून्यः अमृतोऽमृतरसवदास्वाद्यः । एवंविधं त्वां केचिदेव विरला जानन्ति, इति भावः ॥ २३ ॥ येतु एवंविधं त्वामविज्ञाय केवलेनैवात्मज्ञानेन भवाम्बुधिं तितीर्षन्ति, तेषां केवलं कृच्छ्रमेवेत्याह – एवंविधं त्वामित्यादि । तरन्तीव, न तु तत्तरन्ति । यद्वा, एवंविधं दृश्यमानश्रीनन्दकिशोरविग्रहं परमप्रेमास्पदं त्वां ये हि आत्मतयैव विचक्षते, ते तरन्त्येवेति भावः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च तवानन्तमूर्त्तित्वेऽपि त्वमचिन्त्यशक्त्या एकमूर्त्तिरेवेत्याह–एक इति । त्वम् एक आत्मा परमात्मेत्यर्थः । जीवात्मनां बहुत्वेनैकत्वभावात् । ननु, परमात्मा निराकार एव न पुरुषः पुरुषशब्दस्याऽऽकृतिमत्येव पदार्थे रूढेः किमन्यः पुरुष इवार्वाच्चीनः न पुरातनः । ननु, नन्दपुत्रत्वादर्वाचीनोऽप्यहं पुरातनो भवतः स्तुत्यैवाऽभूवं न तु यथार्थतयेति तत्राह, सत्यः त्वं नन्दपुत्रोऽपि सत्यः त्रैकालिकसत्तावान् पुराणपुरुष इत्यर्थः । नन्वस्य पुरुषस्य कालकर्मादिप्रकाश्यत्वादहमपि किन्तथैव न स्वञ्ज्योतिः त्वन्तु स्वप्रकाशः किं सूर्यादिवत् परिच्छिन्नः न अनन्तः न विद्यतेऽन्तः कालतो देशतश्च यस्य सः नन्वन्येऽप्यवतारा एवम्भूता एव तेषामहं कतमस्तत्राह, आद्यः त्वं तेषामपि मूलभूतोऽवतारीत्यर्थः । नन्वहं द्विपरार्द्धान्ते किमेतत्स्वरूपेणैवावस्थास्यामि न वेत्यत आह, नित्यः जगदिदं पुरातनमपि सत्यमपि द्विपरार्द्धान्ते स्वरूपेणास्थायित्वादनित्यमुच्यते त्वं तु तदापि नन्दपुत्राकारेणापि स्थास्यसीति नित्य उच्यसे त्वदाकारस्य पूर्णब्रह्मस्वरूपत्वात् "योऽसौ सौर्य्ये तिष्ठतीत्यादौ यः साक्षात् परब्रह्मेति गोविन्दं सच्चिदानन्दविग्रहं वृन्दावनसुरभूरुहतलासीनम्" इति तापनीश्रुतेः । "ब्रह्मणो हि प्रतिष्ठाऽहम्" इति त्वदुक्तेश्च । नन्वाकारवतः षड्विकारवत्त्वेन प्रतिक्षणक्षरत्वादहमपि किं तथैव न अक्षरः । नन्वाकारवन्तो ह्यवश्यमेव सुखदुःखधर्माणो भवन्ति तत्राह—अजस्रसुखः । ननु, मम बाल्ये गोपीस्तन्यदुग्धदधिघृतादिषु लोभः पौगण्डे कालियादिषु कैशोरे गोपिकासु काम इत्यहं कामादिमालिन्ययुक्त एव, न निरञ्जनः त्वत्कामादीनामपि चिन्मयत्वात् । ननु, तदपि गोपीकादिसापेक्षत्वादपूर्णस्तु भवाम्येवेति तत्राह, पूर्णः प्रेमिभक्तसापेक्षत्वं हि न पूर्णत्व व्याहन्तीत्यर्थः । नन्वेवम्भूतो मद्विधः कोऽप्यन्यो वर्तते न वेति तत्राह, अद्वयः । ननु, सत्यमद्वयत्वात् पूर्णब्रह्मैवाहन्तदपि केचिन्मां विद्योपाधिं मन्यन्ते तत्राह–उपाधितो मुक्त इति । "विद्याविद्याभ्यां भिन्नः" इति गोपालतापनीश्रुतेः यतस्त्वममृत इति "अमृतं शाश्वतं ब्रह्म" इति श्रुत्युक्तममृतशब्दवाच्यं निरुपाधिब्रह्मैव श्लेषेण न विद्यते मृतं मृत्युर्यस्मात् स इति ॥२३॥ किञ्च त्वदीयनिर्विशेषब्रह्मस्वरूपोपासका अपि त्वयि पुरुषाकारस्वरूपे परमात्मत्वेन भक्त्या भाग्यवशाद् यदि प्राप्तनिष्ठाः स्युस्तर्हि ते शान्तभक्ताः सञ्ज्ञीयन्त इत्याह–एवम्विधमुक्तलक्षणं त्वां सकलात्मनां सर्वजीवात्मनां स्वात्मानं मूर्त्तत्वेन मनोनयनाह्लादकत्वात् शोभनमात्मानं पुरुषस्वरूपमेव आत्मात्मतया परमात्मत्वेन भक्त्या ये पश्यन्ति "परमात्मतया कृष्णे जाता शान्ती रतिर्मता" इति श्रीभक्तिरसामृतोक्तेः । केन, गुरुरेवार्कस्तस्माल्लब्धाऽध्ययनेन प्राप्ता या उपनिषत् सैव सुचक्षुस्तेन तदर्थावगाहनोत्थेन ज्ञानेन भव एव अमृताम्बुधिस्तं तरन्तीव ॥२४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अतस्त्वमेवोपादेय इत्याह –एक इति । त्वं सत्यः किं स्वर्गादिर्न नित्यः ? किं प्रधानं न अक्षरः ? किं जीवो न अनन्तः ? किं शेषो न पुराणपुरुषः ? सर्वतो वैलक्षण्ये विशेषणानि स्वयञ्ज्योतिः अजस्रसुखः पूर्णः एकः समानाधिकशून्योऽतोऽद्वयोऽनुपमः आत्मा सर्वात्मा आद्यः हेतुः निरञ्जनो निखिलदोषवर्जितः यतः उपाधितः सर्वदा मुक्तः अत एव नास्ति मरणं यस्मात्सोऽमृतः ॥२३॥ उपादेयमुक्त्वा तत्प्राप्तिकामस्य संसारतरणोपायमाह—एवमिति । आत्मनः स्वस्य आत्मतया भेदसहिष्णवभेदेन ये त्वां विचक्षते सम्यक् पश्यन्ति त्वद्ध्यानं कुर्वन्ति ते भव एव अनृतयुक्तः कपटग्राहयुक्तोऽम्बुधिस्तं तरन्तावतरणे संशयाभावं सूचयतीवशब्दः भेदसहिष्णवभेदचिन्तनमेव मुक्तिसाधनमुक्तं सूत्रकारेण "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" (४।१।३) इति सूत्रार्थो वेदान्तकौस्तुभे

द्रष्टव्यः । ननु, "बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः" इत्यादिश्रुतिभ्यः । अणुपरिमाणकस्य "नित्यो नित्यानाम्" इत्यादिश्रुतिभ्यः सर्वदैव स्वरूपतो भिन्नस्य केन हेतुना तादृशोऽप्यभेदः सङ्गच्छते ? इत्यतो हेतुगर्भं विशेषणमाह—सकलात्मनां स्वात्मानमिति "ममैवांशो जीवलोके जीवभूतः सनातनः" इति श्रीमुखवचनाद्भगवदंशभूतजीवस्वरूपाणां स्वात्मानं स्वाश्रयमंशिनमित्यर्थः । अंशस्यांशिनिरपेक्षस्वरूपस्थितिप्रवृत्त्याद्यभावात्स्वरूपतो भिन्नस्यैव तदभिन्नत्वं युक्तमेवेति भावः । तथाह भगवान्सूत्रकारः "अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके" (२।३।४२) इति केन ? गुरुरेव अर्कस्ततो लब्धा उपनिषत् अध्यात्मविद्या तदेव सुचक्षुस्तेन गुरूपदिष्टवेदान्तजन्येन स्वस्य ब्रह्मात्मकत्वज्ञानेनेत्यर्थः ।। २४ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

चिज्जडात्मकस्य जगतः स्वरूपमशोभनं स्वप्नसदृशं दुःखाकुलमुक्तं त्वय्येव नित्येत्युक्तं भगवत्स्वरूपन्तु विशिष्य दर्शयति एकत्वमिति । एक आत्मा त्वं व्रजसुहृदादिबहुरूपत्वेऽप्यैक्यात्यागात् श्रुतिश्चाह "एकोऽपि सन् बहुधा योऽवभाती"ति । स्मृतिश्च "एकानेकस्वरूपाये"ति । नन्वात्मा किं तार्किकानामिवाकृतिहीनः न पुरुषः मुखपादकरोदरादिमान् आनन्दमयवाक्ये पुरुषविध इति श्रवणात् । ननु किमितरपुरुषवदाधुनिकः न पुराणः पुरातन इत्यर्थः । ननु नन्दपुत्रत्वादहमाधुनिक एव न सत्यः त्रैकालिकः पुरापि तत्पुत्र इत्यर्थः । नन्वितरपुरुषवत् किं कालादिप्रकाश्यः न स्वयंज्योतिः स्वप्रकाश इत्यर्थः । ननु किं दीपादिप्रकाशवत् परिच्छिन्नः न अनन्तः सर्वदेश इत्यर्थः । नन्वीदृशा मत्स्यादयोऽप्यवतारास्तेषु कतमोऽहं तत्राह–आद्य इति, तेषामवतारी स्वयं रूपत्वमित्यर्थः । "कृष्णस्तु भगवान् स्वयमि"ति स्मरणाच्च । ननु महाप्रलयेऽप्येवमेव स्थास्यामि न वेति चेत्तत्राह नित्यः सदैकरसः तदाप्येवमेव स्थास्यसीत्यर्थः । नन्वाकृतिमतो भावस्य विकारदर्शनात् ममापि स स्यात् न अक्षरः निर्विकार इत्यर्थः । ननु तादृशस्य कदाचिद्दुःखस्यापि दर्शनान्ममापि तत् स्यात् न अजस्रसुखः । ननु बाल्ये दध्यादिषु लोभः पौगण्डे कालियादिषु क्रोधः कैशोरे गोपकिशोरीषु मे कामश्चेति लोभादिमालिन्यवानहं न निरञ्जनः तल्लोभादीनां स्वरूपधर्मत्वान्निर्मलरत्वमित्यर्थः । ननु मध्यादीनां गोपकिशोरीणाञ्चापेक्षणादपूर्णोऽहं न पूर्णः तेषां तासाञ्च तद्विभूतित्वादिति भावः । अद्वय इति प्राग्वत्, ननु मामन्ये सोपाधिमाहुः न, उपाधितो मुक्तः "साक्षात् प्रकृतिपरोऽयमात्मा गोपालः" इति श्रुतेः उपासितः सन्नमृतः न विद्यते मृतं मृत्युर्यस्मादिति मुक्तिप्रद इत्यर्थः "गोविन्दान्मृत्युर्बिभेति" इति श्रुतेः ।।२३।। त्वां भजतामश्रमा मुक्तिरित्याह एवमिति । एवम्विधमुक्तलक्षणं त्वां सकलात्मनां निखिलक्षेत्रज्ञानां स्वात्मानं दिव्यपुरुषत्वात् शोभनमात्मानं आत्मात्मतया स्वान्तर्यामितया स्वस्वामितया च ये विचक्षते ध्यायन्ति, केन ? गुरुरेवार्कस्तस्माल्लब्धा अध्ययनेन प्राप्ता "एष त आत्माऽन्तर्याम्यमृत" इत्युपनिषत् सैव सुचक्षुस्तेन तदुत्थेन निर्णयेनेत्यर्थः । ते भव एवानृताम्बुधिर्दुष्कर्मफलसिन्धुस्तं तरन्ति "ऋतं पिबन्ता" वित्यादावृतशब्दः, सुकर्मफलपरो दृष्टः त्वदाश्रयेण तस्य गोवत्सपदतुल्यत्वादनायासतरणसूचनायेवशब्दः उपनिषदर्थस्तु एष आत्मा विज्ञानानन्दः ते तवान्तर्यामी अमृतो नित्य इत्यन्तर्यामित्वं तस्य नित्यमित्यर्थः । न चैष ते तवात्मेति सम्बन्धनीयं तथा सति षष्ठ्यर्थस्यौपचारिकत्वापत्तेः ।। २४ ।।

श्रीसुबोधिनी

भगवतस्तत्त्वमाहै**कस्त्वम**ात्मेति, त्वमादावेक एव सजातीयविजातीयस्वगतभेदशून्यः ततः **आत्मा** त्रिविधो जीवरूपोन्तर्यामिरूपो विभूतिरूपश्च जातः, ततः **पुराणः पुरुषः** पुरुषोत्तमः, अथवै**को** ब्रह्मवादे, **आत्मा योगे, पुरुषः** साङ्ख्ये, **पुराणो** वैष्णवे, **सत्यः** पाशुपते, **सत्** त्यदितिभेदे **सत्यो** जगद्रूपो वा, एवं पञ्चविधोपि **स्वयञ्ज्योतिः** स्वप्रकाशो न तु जडः, **अनन्तो**न्तशून्य उत्तरावधिरहितः, **आद्यः** पूर्वावधिरहितः **नित्यः** सदैकरूपः, न तु वृद्धिक्षयवान् यथा समुद्रश्चन्द्रो वा, एवं प्रपञ्चरूपत्वे दोषचतुष्टयं निवार्य **भगवतो** रूपान्तराण्याहाक्षर इति, शब्दब्रह्माक्षररूपः प्रकृतिपुरुषकारणरूपो वा, तेन ज्ञानविषय उक्तः, तत्साध्यमोक्षरूपत्वमाहा**जस्रसुख** इति नित्यसुखरूपः, तस्मिन्नपि सुखे प्रातदोषान् निवारयति निरन्तरसुखरूपमप्यज्ञानयुक्तं भवति यथा सुषुप्तिः, तद्व्यावृत्त्यर्थमाह **निरञ्जन** इति, **अञ्जन**मविद्या तद्रहितः, परिच्छेदोपि भवति तद्व्यावृत्त्यर्थमाह **पूर्ण** इति, तरतमराहित्यार्थमाहा**द्वय** इति, केनचिदुपाधिनैव भोक्तव्यमितिशङ्कां वारयति **मुक्त उपाधित** इति, **यथा** स्त्रीसुखं पुरुषेणैव **भोक्त**व्यं पुरुषसुखं स्त्रियैव तथा ब्रह्मानन्दानुभवे न कोप्युपाधिरपेक्षितः, किञ्च स्वरूपतोपि स ऋतोलौकिकः श्रुत्यैकसमधिगम्यो न तु लौकिकप्रमाणवेद्यः, अन्यथा पूर्वोक्तरूपो न स्यात्, एभिरेव षोडशविशेषणैर्देहाद् वैलक्षण्यमपि ज्ञातव्यं, "षोडशकलोयं पुरुषः," देहस्तु बाल्यकौमारादिभेदेनानेको नापि व्यापको नाप्यात्मेत्यादि स्वयमूह्यं, एकादशेन्द्रियपञ्चमहाभूतेभ्यो वा वैलक्षण्यं ज्ञातव्य, षोडशकलो वा नारायण एभिरुक्तः ।। २३ ।। एवं भगवत्स्वरूपमुक्त्वैवंविधं ये वक्ष्यमाणप्रकारेणोपासते ते भ्रान्ता इत्याहै**वंविध**मिति पञ्चभिः **एवं** षोडशकलं **त्वां सकलात्मनामपि सर्व**जीवानामात्मानं देहरूप**मात्म**रूपं चात्मन एव स्वस्यैवात्मतयाहमेव भगवानिति ये **विचक्षते** पश्यन्ति तत्र विषयप्रबोधको **गुरुरर्को ज्ञान**करणमुपनिषदेव चक्षुः, य एवमहमेव परं ब्रह्मेति जानन्ति **ते भवानृताम्बुधिं तरन्तीव** सर्वं ब्रह्मेतिज्ञाने सर्वतरणं केवलमात्मन **एव ब्रह्मत्वेन** ज्ञाने यः संसारोनृतरूपः केवलं स्वमोहात् कल्पितोहम्ममात्मा स एवाम्बुधिस्तरणेशक्यः, तादृशमपि **तरन्तीव** दोषाधारस्यानिवृत्तत्वात्, अन्तर्दोष एव निवृत्तो न तु देहेन्द्रियविषयाणां, **अतोनृताम्बुधिस्तीर्णोप्यतीर्ण**प्राय इत्यर्थः ।। २४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'नित्यसुखबोधतनौ' इत्युक्तमेव सर्ववेद्यं भगवतस्तत्त्वं विशदयति–एक इति । एकस्त्वं सत्यः परमार्थभूतः । तत्र हेतुमाह—आत्मेति । किञ्च यद्विकारवत्तदसत्यम्, तव च जन्मादयो विकाराः न सन्ति । तत्र जन्माभावे हेतुमाह—आद्य इति, सर्वकारणमित्यर्थः । कारणत्वे हेतुमाह—पुराण इति कार्यात् प्रपञ्चात् पूर्वमपि वर्तमान इत्यर्थः । तत्र हेतुमाह—पुरुष इति, । "पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वम्" इति श्रुतेः । जन्मानन्तरभाव्यस्तित्वविकारं वारयति– नित्य इति, सनातन इत्यर्थः । वृद्धयभावे हेतुमाह—अनन्त इति, देशपरिच्छेदरहित इत्यर्थः विपरिणामाभावे हेतुमाह—अजस्रसुख इति, नित्यानन्तरूप इत्यर्थः । अपक्षयं वारयति—अक्षर इति । विनाशं वारयति –अमृत इति । तत्र हेतुमाह—निरञ्जन इति, निर्मल इत्यर्थः । तत्र हेतुमाह—उपाधितो मुक्त इति, कालकर्मगुणादिपारवश्यरहित इत्यर्थः । तत्रापि हेतुमाह –पूर्ण इति, अचिन्त्यानन्तशक्तिपरिपूर्ण इत्यर्थः । तथाच द्वैतापत्तिमाशङ्क्याह—अद्वय इति । 'एवंभूते किं प्रमाणम् ?' इत्याकाङ्क्षायामाह—स्वयंज्योतिरिति । 'यस्य भासा सर्वमिदं विभाति' इति श्रुतेः स्वयंप्रकाश एव, न तत्र प्रमाणान्तरम् । अन्यथा जडत्वापत्तेः ॥ २३ ॥ 'एवंभूतस्य तव आत्माऽभिन्नज्ञानात् मुक्तिर्भवति' इत्याह—एवमिति । गुरुरेवार्कः सूर्यवत् अज्ञानान्धकारनिरासेन परमार्थप्रकाशकः, तस्माल्लब्धा उपनिषत् उपनिषज्जन्यं ज्ञानमेव चक्षुस्तेन ये एवंविधमुक्तप्रकारकं त्वामात्मात्मतया स्वाभेदेन पश्यन्ति, ते भवानृताम्बुधिं 'भवतीति भवः देहेन्द्रियान्तःकरणादावात्माध्यासः स एव मिथ्यात्वात् दुस्तरत्वाच्चानृताम्बुधिः, तं, तरन्तीवेत्यन्वयः । 'भवाम्बुधेरनृतत्वात् तत्तरणमपि तथैव' इत्याशयेन इवशब्दप्रयोगः । 'न चायमभेदः पुत्रादिष्विव, किन्तु यथार्थ एव' इत्याह– स्वात्मानमिति । स्वरूपभूतं न केवलं स्वात्मानम्, किन्तु सकलात्मनां सर्वजीवानामप्यात्मानमिति । "ममैवांशो जीवलोके जीवभूतः सनातन" इति वचनात्, अंशांशिनोरभेदाच्च ॥ २४ ॥

अन्वितार्थप्रकाशिका

एक इति ॥ त्वम् एकः आत्मा पुराणः पुरुषः सत्यः स्वयंज्योतिः स्वयंप्रकाशः अनन्तः आद्यः नित्यः अक्षरः अपक्षयहीनः अजस्रसुखः नित्यानन्दः निरञ्जनः निर्मलः पूर्णः अद्वयः उपाधितो मुक्तः अमृतः नाशरहितश्च ॥ २३ ॥ एवंविधमिति ॥ गुरुरेवार्कः परमार्थप्रकाशकस्तस्माल्लब्धा उपनिषत् उपनिषज्जन्यं ज्ञानमेव चक्षुस्तेन ये एवंविधमुक्तप्रकारकं स्वरूपभूतं सकलात्मनां सर्वजीवानामप्यात्मानं त्वामात्मात्मतया स्वाभेदेन विचक्षते पश्यन्ति । ते भवानृताम्बुधिं भवतीति भवः स एव मिथ्यात्वात् दुस्तरत्वाच्चानृताम्बुधिस्तं तरन्तीवेत्यन्वयः । भवाम्बुधेरनृतत्वात् तत्तरणमपि तथैवेत्याशयेनेवशब्दप्रयोगः ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भगवत्संबंधं प्राप्तान् जनान् स्तुवन्नाह अहो इत्यादिना व्रजगोरमण्यः व्रजस्य गावश्च रमण्यो गोप्यश्च अहो अतिधन्याः कुतो धन्यत्वं तत्राह हे विभो यासां स्तन्यामृतं स्तनोद्भवं क्षीरं वत्सतराणां वत्सानाम् आत्मजानां पुत्राणाम् आत्मना तद्रूपेण त्वया मुदा अतीव पीतं यस्य तव तृप्तयेऽध्वराः सर्वे यज्ञा अपि अद्यापि नालं पूर्णतां च न प्राप्ताः अहोऽति धन्या इत्यत्र संधिरार्षः ॥ २३ ॥ नंदादीनां व्रजनिवासिनाम् । अहो इति आश्चर्ये भाग्यमस्ति कुतः यतः परमः सर्वोत्कृष्टः आनंदोऽस्मिस्तत् श्रीकृष्णाख्यं ब्रह्म येषां मित्रं भवति ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मच्छरीरभूतमप्येतज्जगत् यद्यसत् सदेवोत्पद्य लीयते तर्हि तद्दोषभागहमप्यसन्नेवेत्याशङ्कानिवारणाय तं प्रकृतिपुरुषविलक्षणत्वेन शोधयति ॥ एक इति ॥ हे हरे, त्वं सत्यः निर्विकारः, अनेन अचेतनात् तत्संसृष्टचेतनाच्च व्यावृत्तिः कृता । स्वयंज्योतिः संकोचकत्वाभावान्नित्यासंकुचितस्वयंप्रकाशस्वरूप इत्यर्थः । अनेन मुक्तजीवव्यावृत्तिः कृता । तेषां बद्धदशायां संकुचितप्रकाशकत्वात् । अनन्तः स्वरूपतः स्वभावतश्च त्रिविधपरिच्छेदरहितः, अनेन नित्यसिद्धमुक्तेभ्यो व्यावृत्तिः कृता । तेषां स्वभावत आनन्त्येऽपि स्वरूपतस्तदभावात् । अनेन पदत्रयेण 'सत्यं ज्ञानमनन्तम्' इति जगत्कारणत्वलक्षकश्रुतिलक्षितचिदचिद्वस्तुविशिष्टो विशेष्यांशः शोधितः उपाधितः मुक्तः नित्यं कर्मायत्तदेहसंबन्धात् मुक्त इत्यर्थः । निरञ्जनः पुण्यपापरूपाञ्जनरहितः, अनेन प्रकृतिसंसृष्टजीवेभ्यो व्यावृत्तिः कृता । तेषां कर्मायत्तदेहसंबन्धवत्त्वात्पुण्यपापरूपाञ्जनसहितत्वात् । उपाधिपदस्य काकाक्षिन्यायादमृत इति पदेनापि संबन्धः । उपाधितः, अमृतः । जीवा उपाधितः मृताः, न तथाविधस्त्वं, जीवानामुपाधितो मरणं नाम कर्मायत्तदेहयोगवियोगभाक्त्वं, त्वं तथात्वरहित इत्यर्थः । अक्षरः विकारषट्करहितः, नित्यः कालकृतपरिच्छेदरहितः, पूर्णः देशकृतपरिच्छेदरहितः, 'तेनेदं पूर्णं पुरुषेण सर्वम्' इति श्रुत्युक्तं सर्ववस्तुव्यापकत्वमनेन सूचितम् । अद्वयः अस्वात्मकद्वितीयवस्तुरहितः । यद्वा । अद्वयो नाम स्वस्वरूपसापेक्षयोत्कृष्टगुणयुक्तवस्त्वन्तररहितः । अजस्रं संततमविच्छिन्नं दुःखासंभिन्नमिति यावत् । एवंविधं सुखं यस्य सः, बहुव्रीहिणावगतस्याजस्रसुखस्यान्यपदार्थसंबन्धो राहोः शिर इतिवदभेदरूपः । आद्यः आदौ भवः, जगत्कारणभूतत्वात् । एकः नामरूपविभागानर्हसूक्ष्मचिदचिद्विशिष्टतया एकत्वव्यपदेशार्हः । आत्मा स्वशरीरभूतप्रकृतिपुरुषकालादिद्रष्टा, आत्मा हि स्वक्षेत्रस्य द्रष्टा एव 'एतद्यो वेत्ति तं प्राहुः

क्षेत्रज्ञम्' इति भगवदुक्तेः । अनेन निमित्तकारणत्वोपयुक्तं सर्वज्ञत्वं विवक्षितम् । पुरुषः अनेन कर्त्तृत्वं विवक्षितम् । तस्यैव कर्त्तृत्वदर्शनात् 'कर्त्ता शास्त्रार्थवत्त्वाच्च' इति सूत्रस्वारस्याच्च । पुराणः पुरापि नवः पुराणः, जगत्सृष्टेः पूर्वं वर्त्तमानो जगत्कर्त्ता पुरुषस्त्वमेवेत्यर्थः ॥२३॥ यतस्त्वमेव कारणभूतोऽत एव 'कारणं तु ध्येयः' इति श्रुत्युक्तरीत्या त्वामेवंविधं ध्यात्वा एव सर्वे मुच्यन्ते इत्याह ॥ एवमिति ॥ ये जनाः, गुरुरेवार्कः सूर्यस्तस्माल्लब्धा या उपनिषद्वेदान्तवाक्यार्थज्ञानं सैव सु शोभनं चक्षुस्तेन, अत्र गुरोः सूर्याभिन्नत्वं तमोनिरासकत्वेन, तत्र सूर्यस्तु बाह्यमेव तमो निरस्यति, गुरुस्त्वान्तरं तम इति भेदः । उपनिषच्छब्दो यद्यपि वेदान्तवचनस्तथाप्यत्र तेन तद्वाक्यार्थज्ञानमेव विवक्षितम् । एवंविधमुक्तप्रकारं, सकलात्मनां अपि, स्वात्मानं सुतरामात्मभूतं, त्वां आत्मात्मतया, सर्वान्तरात्मतया, विचक्षते पश्यन्ति । चक्षिर्दर्शनार्थः । ते एव, भवानृताम्बुधिं पुण्यपापात्मकं संसारसमुद्रं, तरन्ति । तरन्तीवेति पाठे इव अवधारणे । यथा 'संपुष्पितस्य दूराद्गन्धो वाति' इत्यादिना पुण्यं कर्म प्रस्तुत्य तत्प्रतिसंबन्धिनि पापे, एवं 'अनृतादात्मानं जुगुप्सेत्' इत्यनृतशब्दप्रयोगादनृतशब्दः पापकर्मवाची, पापत्वं चानिष्टसाधनत्वं, मुमुक्षोः स्वर्गादिफलस्याप्यनिष्टत्वेन तत्साधनं कर्म अनृतशब्देन विवक्षितम् । एवं च पुण्यपापानि तरन्तीत्यर्थः ॥ २४ ॥

कृष्णप्रिया

हे नाथ ? आप "षोडशकलः" सोलह कलाओं से परिपूर्ण है। आप एक :—भेदरहित है (१) आत्मा अन्तर्यामी रूप जीवरूप विभूति रूप है (२) पुरुषः सांख्यशास्त्र के सांख्यपुरुष आप है (३) पुराणः - वैष्णव मत के पुराण पुरुष आप हैं। (४) सत्यः—पाशुपत मत के आप सत्य तत्व हैं यदि सत् त्यद् ऐसा भेद माना जाय तो सत् सत्यरूप और त्यद् जगद् रूप आप हैं (५) स्वयंज्योतिः—स्वयं प्रकाश हैं जड़ नहीं हैं (६) अनन्तः उत्तरावधि से रहित अन्तरहित हैं (७) आद्यः—पूर्वावधि से रहित है (८) नित्यः—वृद्धि क्षय रहित सदैकरस रूप हैं (९) अक्षरः—अक्षर ब्रह्म शब्द ब्रह्म रूप हैं (१०) अजस्रसुखः—नित्य सुख स्वरूप है (११) निरञ्जनः अविद्यारहित हैं (१२) पूर्णः—परिपूर्ण हैं (१३) अद्वयः - तारतम्य से रहित हैं (१४) मुक्तः—उपाधि से रहित हैं (१५) ऋतः आप अलौकिक केवल श्रुतिवेद्य हैं अमृतः - ऐसा भी पाठ है तब आप अमृत स्वरूप हैं भगवन् एकादश इन्द्रिय और पञ्चभूतों से विलक्षण "षोडशकल" सोलह कलाओं से पूर्ण नारायण हैं ॥ २३ ॥ षोडशकल हे भगवन् ? सकल जीवों के आत्मा और देह स्वरूप आप ही हैं । सद्गुरु रूप सूर्य से प्राप्त तत्त्व ज्ञान-उपनिषद् ज्ञान नाम के दिव्य चक्षु से जो भक्त लोग आपको अपने आत्म स्वरूप में जान लेते हैं वे इस संसाररूप असत्य महासागर को पार कर जाते हैं ॥ २४ ॥

आत्मानमेवात्मतयाविजानतां तेनैव जातं निखिलं प्रपञ्चितम् ।
ज्ञानेन भूयोऽपि च तत् प्रलीयते रज्ज्वामहेर्भोगभवाभवौ यथा ॥ २५ ॥
अज्ञानसंज्ञौ भवबन्धमोक्षौ द्वौ नाम नान्यौ स्त[1] ऋतज्ञभावात् ।
अजस्रचित्यात्मनि केवले परे विचार्यमाणे तरणाविवाहनी ॥ २६ ॥

कर्दमक्षमा

अन्वयः—आत्मतया आत्मानं एव विजानतां तेन एव निखिलं प्रपञ्चितं जातं इति ज्ञानेन यथा रज्ज्वां अहेः भोगभवाभवौ-(तथा) च ज्ञानेन तत् अपि भूयः प्रलीयते ॥ २५ ॥ अजस्रचिति परे केवले आत्मनि विचार्यमाणे तरणौ अहनी इव ऋतज्ञभावात् अज्ञानसंज्ञौ भवबन्धमोक्षौ नाम द्वौ अन्यौ न स्तः ॥ २६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र च ज्ञानेन तरंतीति तच्च तरंतीवेति तच्चात्मात्मतया ज्ञानेनेत्यर्थत्रयं प्रतिज्ञातं क्रमेणोपपाद्यते तत्रात्मानमेवात्मतयेत्यनेन श्लोकेन ज्ञानेन तरंतीत्येतदुपपाद्यते । अज्ञानसंज्ञावित्यनेन तरंतीवेत्येतत् त्वात्मानमित्यादिश्लोकद्वयेन त्वात्मात्मतयेत्येतदुपपाद्यते । ननु ज्ञानेन कथं भवं तरंतीति तस्याज्ञानमूलत्वादित्याह । आत्मानमेवेति । तेनेवाज्ञानेनैव । प्रपंचितं प्रपचः । रज्ज्वामहेर्भोगभवाभवौ सर्पशरीरस्याध्यासतदपवादौ रज्ज्वज्ञानेन यथेति ॥ २५ ॥ ननु ज्ञानेन तरंत्येव किमिदमुच्यते तरंतीवेति तत्राह । अज्ञानसंज्ञाविति । अज्ञानेन संज्ञा ययोस्तौ भवबंधमोक्षौ भवेन बंधस्तस्मान्मोक्षश्च तौ द्वौ नाम प्रसिद्धौ ऋतज्ञभावात् ऋतश्चासौ ज्ञश्च यो भावस्तस्मादन्यौ न स्तः । ननु कथं महानपलापः क्रियते । परमार्थविचारादित्याह । अजस्रेति । अखंडानुभवरूपे परे शुद्धे आत्मन्यज्ञानं न च बंधः । अत एव न ज्ञानं न च मोक्षः तरणौ सूर्ये रात्र्यहनी इवेति ॥ २६ ॥

---

[1] ऋतेज्ञ—वीर ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र भवसन्तरणेऽर्थत्रयं प्रतिज्ञातमिति योजनीयम्। तत्र तेषु। ज्ञानेन संसारतरणे शङ्कते-नन्विति। तस्य संसारस्य ॥२५॥ पुनराशङ्कते – नन्विति। तत्र तस्मिन्नाक्षेपे ऋतः सत्यः ज्ञो ज्ञानरूपः यो भाव आत्मा, भावशब्द आत्मवाचकोऽप्यस्ति व्युत्पादितमधस्तात्। सदन्यत्वे त्वसत्त्वापत्तेः ज्ञभेदे भानापत्तेश्चान्यौ न स्तः। पुनराशङ्कते—नन्विति। अपलापो निह्नवः। परमार्थविचारात्सत्यविमर्शात्। अज्ञानस्यैव बन्धकत्वात्तदभावे बन्धाभावः स्फुट एव। अत एव बन्धाभावादेव। बद्ध एव मुच्यते न त्वबद्धोऽपीति तस्य स्वत एव मुक्तत्वादित्यर्थः। तरणौ नित्यप्रकाशरूपे सूर्ये रात्र्यभावात्तद्विविक्तदिनस्याप्यभावात्। अहनी रात्रिश्चाहश्चाहनी, एकशेषस्त्वार्षः। सम्बन्धस्य मृषात्वेन तद्विविक्तमोक्षानुपपत्तेर्द्वौ न स्त इति भावः। अजस्रचिति व्यभिचारिण्यवस्थात्रयेऽपि निरन्तरं तत्साक्षिचिदात्मना भासमाने ।। २६ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वात्मा खलु शुद्धावस्थो जीव एव मूलं ततस्तदज्ञानेनैव जातः प्रपञ्चः तज्ज्ञानेनैव नश्येत् किं भगवज्ज्ञानेनेति विप्रतिपन्नान्निराकरोति–आत्मानमेवेति। आत्मानं स्वमेवात्मतया मूलस्वरूपत्वेन विजानतां जीवानां भवन्तं तु तद्रूपत्वेनाप्यविजानतामित्येवकारार्थः। तेनैव मूलेन भवदज्ञानेनैव हेतुना निखिलं प्रपञ्चितं जातं तं दोषमसहिष्णवा भवद्भक्त्या मायया विस्तारितं देहादिकं तेषां जातं स्वरूपास्फूर्त्तिपूर्वकतदध्यासेन तदीयतया सम्पन्नं तस्माज् ज्ञानेन मूलेन भगवदज्ञानच्छेदकेन भगवज्ज्ञानेनैव स्वरूपज्ञानं तदध्यासहेतुरज्ञानमपि प्रलीयते तत्प्रलयमेव दृष्टान्तेन स्पष्टं बोधयति रज्ज्वामिति। अत्रैकदेश द्विशेषो द्रष्टव्यः "भयं द्वितीयभिनिवेशतः स्यादीशादपेतस्य विपर्य्ययोऽस्मृतिः। तन्माययाऽतो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा" इति तैश्च व्याख्यातं यतो भयं तन्मायया भवेत् ततो बुधो बुद्धिमान् तमेवाभजेत् उपासीत। ननु, भयं द्वितीयाद्यभिनिवेशतो भवति स च देहाहङ्कारतः स च स्वरूपास्फुरणात् किमत्र तस्य माया करोति अत आह, ईशादपेतस्येति। ईशविमुखस्य तन्मायया अस्मृतिः स्वरूपास्फूर्तिर्भवति ततो विपर्य्ययो देहोऽस्मीति ततो द्वितीयाभिनिवेशाद्भयं भवति एवं हि प्रसिद्ध लौकिकीष्वपि मायासु उक्तं च श्रीभगवता "दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इत्यादि यद्यप्येवं तथापीश्वरतत्त्वमात्रस्यापेक्षया तत्र च प्रतिपत्तिमात्रस्य न चांशिनः न चानुभवस्य श्रीरामनाम्नापि तच्छ्रवणात् तस्मात् तत्र जीवस्वरूपानुभव एष सम्यगपेक्षते परिपूर्णाविर्भावस्य स्वयं भगवतस्तज् ज्ञानं परमं महदेवेति तस्य च फल त्वयि च परमप्रेमादय एवेति भावः ॥ २५ ॥ अनृतत्वं दर्शयति—अज्ञानेति। ऋतशब्देनात्राव्यभिचार्य्युच्यते ज्ञशब्देन ज्ञाता भावशब्देन पदार्थविशेषः ऋतश्चासौ ज्ञश्चेति ऋतज्ञः स चासौ भावश्चेति ऋतज्ञभावः एष एवाजस्रचित्यात्मनीत्यनुवदिष्यते तत्र ऋताजस्रयोरेकत्व व्यक्तमेव अचितोरेकत्वं प्रकाशरूपस्य सूर्यादेः प्रकाशमानत्ववच्चितोऽपि चेतनरूपत्वात् यत् खलु स्वप्रकाशमज्ञानरहितञ्च तज्ज्ञातृ स्यादेव भावात्मनोरेकत्वन्तु भावयति प्रकाशयति चेतयतीति निरुक्तेः आत्मनीत्यात्मानमित्याभ्यां जीवस्वरूपमेवात्र पूर्वत्र च पद्ये लभ्यते तत्रैवाज्ञानज्ञानबन्धमोक्षविचारार्हत्वात् प्रकरणेऽस्मिन्नाभ्यामन्यत्र भगवद्वाचित्वात् युष्मद्भवच्छब्दयोः सर्वत्र प्रयुक्तत्वाच्च तस्मादयमर्थः यौ भवबन्धमोक्षावृतज्ञभावात् अन्यौ स्तः मायावृत्तित्वात् तौ तस्मिन्नजस्रचिदात्मरूपे ऋतज्ञभावे तु विचार्य्यमाणे न स्तः तत्रानयोः सम्बन्धोऽस्ति नास्ति वेति विचारे क्रियमाणे तु तत्र न सम्भवत इत्यर्थः। तर्हि कथं तौ स्फुरतः तत्राह–अज्ञानेनैव सञ्ज्ञाप्रतीतिर्ययास्तौ तथा दृष्टान्तेन दर्शयति, ये अहनी लिङ्गसमवायन्यायेन रात्र्यहनी तरणेरन्यौ स्तः कालवृत्तिरूपत्वात् ते तु तरणौ तथा विचार्य्यमाणे यथा न सम्भवत इत्यर्थः ॥ २६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अनायाससिद्धत्वमेवाह—आत्मानमिति। आत्पतया ब्रह्मत्वेन कर्त्तृत्वभोक्तृत्वादिरहितस्वरूपत्वेनात्मानमविजानतामेव, तेनात्मतत्त्वाज्ञानेनैव जातमिति तेनैव प्रपञ्चस्यात्मन्यध्यासेन भासमानत्वात्, अथवात्मानं भगवन्तमात्मतया प्रियतया भगवत्तया वाविजानतां प्रपञ्चितं संसारः। यद्वा, अहमेवेश्वरः, 'भगवांश्चाहमेव' इत्यादिमायाविस्तारस्तादृशज्ञानमात्रेणैव प्रकर्षेण लीयते नश्यति; चकारान्मुमुक्षादिकञ्च प्रलीयते, किं वक्तव्यं भवानृताम्बुधिरिति। भूयोऽपीति भूयिष्ठमपि प्रपञ्चितम् ।। २५ ।। संसारतरणस्याततितुच्छतामेवाभिव्यञ्जयन् मोक्षस्यापुरुषार्थतामाह—अज्ञानेति। ऋतज्ञभावात् सत्यज्ञानादन्यौ न स्तः, तत्त्वतो मिथ्याभूतावेवेत्यर्थः। अजस्रचिति नित्यज्ञानरूपे केवले शुद्धे परे प्रपञ्चातीत आत्मतत्त्वे विचार्य्यमाणे सति यथा बन्धो मिथ्यैव, तथा सति विचारान्मोक्षोऽपि मिथ्यैवेत्यर्थः। तत्र दृष्टान्तो यथा रवौ न रात्रिस्तदभावाद्विचारेण दिनमपीत्यर्थः। एवं संसाराभावमात्रत्वेन मोक्षस्य तुच्छतया न पुरुषार्थतासिद्धिरिति भावः। अथवा परे परमेश्वरे केवले एकस्मिन्नेवात्मनि मनसि विषये विचार्य्यमाणे सत्येव। ननु, तद्विचारमात्रेणैव कथं तौ मिथ्या भवतः? तत्राह—अजस्रचितीति नित्यज्ञानघने तद्विचारप्रवृत्त्यैव तयोस्तत्त्वज्ञानोदयादिति भावः। मिथ्यात्वे दृष्टान्तः—सूर्य्ये रात्रिदिने इव, रात्रेरभावेन तत्परिच्छेद्यदिवाभागस्याप्यभावात् ।। २६ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तदेव तरणप्रकारं दर्शयति-आत्मानं स्वं जीवस्वरूपं आत्मतया "आत्मा नारायणः परः" इति श्रुतेः। श्रीनारायणशरीरत्वेनैव विजानतां शारीरकशास्त्रोक्तवैशिष्ट्यज्ञानेन युक्तानां सतां तथा तेनैव श्रीनारायणेनैव निखिलं प्रपञ्चितं नामरूपव्याकरणं जातमिति विजानताञ्च तेषां ज्ञानेन स्वस्वरूपज्ञानेन परमकारणश्रीमन्नारायणज्ञानेन च तन्नामरूपपरिष्वञ्जनरूपं बन्धनं भूयः प्रतीयतेऽपि स्वस्वरूपं शुद्धं भासते—

"बन्धको भवपाशेन भवपाशाच्च मोचकः। कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः"॥

इत्युक्तेः। तत्तत्कर्मानुगुणं जीवानां बन्धक इत्यर्थः। जीवे रज्जुस्थानीये अहेः भोगस्य शरीरस्य जन्मोत्पत्तिः इव नामरूपपरिष्वङ्गः तदभावश्चेति दृष्टान्तः स्पष्टतरः॥ २५॥ जीवे नामरूपनिष्ठां भगवति सर्वजीवशरीरिण्यपि प्राकृतनामरूपभावं विज्ञानोपयोगित्वेनाह—द्वौ नाम प्रसिद्धौ भवबन्धमोक्षौ क्रमादज्ञानसञ्ज्ञौ अज्ञानञ्च सम्यग् ज्ञा ज्ञानञ्च ययोस्तौ अज्ञानसंज्ञौ तौ च ऋतज्ञभावात् अन्यौ न स्तः अज्ञानज्ञानरूपावेवेत्यर्थः। ऋतः सत्यः ज्ञः ज्ञानस्वरूपः भावः पदार्थः जीवः स्वभावो धर्मभूतज्ञानं वा तस्मादेव स्तः स्वपररूपाज्ञानज्ञानाद्भवतः अथवा ऋतश्चासौ ज्ञश्च जीवः तस्य भावात् स्वभावाद्धर्मभूतज्ञानादन्यौ न स्तः तदावरणरूपत्वादिति अजस्रचित्यात्मनीति त्वयि अजस्रचिति निरन्तरज्ञानस्वरूपरूपे व्यापके आत्मनि सर्वशरीरिणि केवले चिदचिद्विलक्षणे परऽसङ्गे विचार्यमाणे तौ न स्तः इति किं वक्तव्यम् इत्यध्याहार्यं कस्मिन् काविव तरणौ सूर्ये अहनी दिनरात्री इवेति॥ २६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ये विचक्षते ते तपन्तीत्युक्तमथ प्रसङ्गात्तद्विपरीतानां का गतिर्यदि संसृतिस्तर्हि कस्तन्निवृत्त्युपायस्तत्राह—आत्मानमिति। अविजानताम् इति छेदः आत्मानं परमात्मानं त्वामात्मतयैव सर्वान्तरात्मतयैवाविजानतां तेनैव तदविज्ञानेनैव निखिलं प्रपञ्चितं जातं प्रपञ्चो जातः संसारः प्राप्त इत्यर्थः। देहात्मभ्रमस्वतन्त्रात्मभ्रमतन्मूलकापरमात्मोपासनादिनैव संसारः प्राप्त इत्यर्थः। तत्प्रपञ्चितं पुनर्ज्ञानेन देहात्माद्यनभिमानपूर्वकपरमात्मोपासनात्मकेन प्रलीयते नश्यति, निवर्त्तत इति यावत् परमात्मोपासनात्मकज्ञानाभावप्रयुक्तस्य संसारस्य ज्ञानसद्भावे सति निवृत्तौ दृष्टान्तमाह - यथा रज्ज्वामधिष्ठानभूतायामहेः सर्पस्य भोगिनः शरीरं तस्य भवाभवौ भोगविषयकज्ञानोदयतल्लयौ रज्जुयाथात्म्यज्ञानप्रयुक्तौ तद्वद्देहात्माद्यभिमानपूर्वक प्रत्यक्षतापत्तिपर्यन्तभगवदुपासनात्मज्ञानाभावतत्सद्भावप्रयुक्तौ संसारतन्मोक्षावित्यर्थः। मृषावादिनस्त्वत्र रज्जुयाथात्म्यज्ञानप्रयुक्तः सर्पभ्रमस्तद्याथात्म्यज्ञानान्निवर्त्तते एवमपरमार्थभूतो बन्धो ब्रह्माभिन्नं जीवे तत्त्वमस्यादिवाक्यजन्यतद्याथात्म्याज्ञानमूलकस्तद्याथात्म्यज्ञानान्निवर्त्तते इति व्याचक्षते तत्र वाक्यार्थज्ञानस्य निवर्तकत्वानुपपत्तिस्तेन सत्यभूतस्यैव बन्धस्य निवृत्त्यनुपपत्तिश्च भाष्यादिषु च सप्तविधानुपपत्तिप्रतिपादनपरप्रकरणे द्रष्टव्या विस्तरभयात्त्वत्र न लिख्यते॥२५॥ उक्तदृष्टान्तेनाभिप्रेतमेव दार्ष्टान्तिके पुनर्दृष्टान्तान्तरेणानुगमयति-अज्ञानसंज्ञाविति। भवः संसारस्तद्रूपो बन्धः तस्मान्मोक्षश्चेत्येतौ द्वौ अज्ञानसंज्ञावज्ञानमुक्तविधपरमात्मोपासनात्मकज्ञानाभावः संज्ञा तदुपासनात्मकं ज्ञानं तेऽनयोः स्त इति तथाभूतौ अर्शं आदित्वान्मत्वर्थीयोऽच् सम्बन्धोऽत्र हेतुहेतुमद्भावरूपः उपासनात्मकज्ञानाभावतस्तद्भावहेतुकौ भवबन्धमोक्षावित्यर्थः। नान्यौ स्तः अन्यमूलकौ न स्तः नामशब्दः शास्त्रीयप्रसिद्धिद्योतकः एवं स्थिते यथाहनि तरणौ सूर्ये सति तम इवेति शेषः। तदा अज्ञभावादृते देहात्मभ्रमस्वतन्त्रात्मभ्रमं विना अज्ञभावं विहायेत्यर्थः। अजस्रचिति नित्यज्ञानैकाकारे प्रत्यगात्मनि केवले परे परस्मिन्नात्मनि परमात्मनि विचार्यमाणे प्रत्यगात्मान्तरात्मत्वेन वेदान्तवाक्यार्थविचारपूर्वकं परमात्मन्युपास्यमान इत्यर्थः। तत्प्रलीयते इत्यनुषङ्गः। प्रपञ्चितं प्रलीयत इत्यर्थः॥ २६॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

अथ त्वदज्ञानात्संसारप्राप्तिस्त्वज्ज्ञानात्तन्नाश इत्याह – आत्मानमिति। त्वामात्मानमेवात्मतया स्वात्मतया अविजानतां तेनैव त्वदज्ञानेनैव निखिलं प्रपञ्चितं जातं प्रकृतिवशात्संसारो जात इत्यर्थः। तथा च भगवद्वाक्यम्—

"नाहं प्रकाशः सर्वस्य योगमायासमावृतः। मूढोऽयं नाभिजानाति लोको मामजमव्ययम्॥
अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप !। अप्राप्य मां निवर्त्तन्ते मृत्युसंसारवर्त्मनि"॥ इति।

"ज्ञानेन भूयोऽपि च तत्प्रलीयते" त्वज्ज्ञानेन स्वस्वामिसम्बन्धज्ञानेन भूयोऽपि तत् प्रलीयते स संसारो निवर्त्तते तत्र दृष्टान्तः रज्ज्वामहेर्भोगभवाभवौ यथा रज्जौ यथा अहेः सर्पस्य भोगभवाभवौ भवतः रज्ज्वज्ञानात्सर्पभ्रमस्तज्ज्ञानात् पुनस्तन्नाशस्तद्वदित्यर्थः। यद्वा, आत्मानं स्वात्मानमेवात्मतया विजानतां ज्ञानानन्दादिगुणकं त्वच्छेषत्वस्वरूपमविजानतां तेनैव निरुपाधिकज्ञानानन्दादिगुणकज्ञानस्वरूपाज्ञानेनैव निखिलं प्रपञ्चितं ज्ञातं देवोऽहं मनुष्योऽहमिति देहात्मभ्रमो जात इत्यर्थः। ज्ञानेन आत्मयाथात्म्यस्वरूपज्ञानेन भूयोऽपि तत्सर्वं विलीयते शेषं पूर्ववत्॥ २५॥ अथ जीवानामेव स्वस्वरूपपरस्वरूपाज्ञानवशाद्भवबन्धमोक्षौ

तव तु तयोर्गन्धोऽपि नास्तीत्याह—अज्ञानसंज्ञाविति । अज्ञानसंज्ञौ अज्ञानकारणौ भवबन्धमोक्षौ भवेन बन्धो भवान्मोक्ष इत्येतौ द्वौ नाम प्रसिद्धौ नान्यौ नान्यकारणौ स्तः कुतस्तव इति शेष ऋतज्ञभावात् ऋतं सत्यं ज्ञो ज्ञाता "ज्ञः कालकालो गुणी सर्वविद्यः यः सर्वज्ञः सर्ववित्" इत्यादिश्रुतेः क्व सति अजस्रचिति नित्यानन्दे आत्मनि चिदचिच्छरीरिणि केवले चिदचिद्गतविकारशून्ये "निर्विकारं निरञ्जनम्" इत्यादिश्रुतेः परे परमात्मस्वरूपे त्वयि विचार्यमाणे सति तत्र दृष्टान्तः तरणौ सूर्ये अहनी इव रात्रिदिवसाविव नहि सदा प्रकाशमाने आदित्ये रात्रिदिवसव्यवहारः सम्भवति किन्तु जगत्येव एवं निरुपाधिकसदासर्वज्ञे त्वयि बन्धमोक्षौ न संभवतः किन्तु, त्वत्स्वरूपानभिज्ञानां जीवानामेवेति भावः । तदुक्तमेकादशे "बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः । गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम्"। एकस्यैव ममांशस्य जीवस्यैव महामते ! । बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतरः" इति ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नन्वात्मा खलु शुद्धावस्थो जीव एव मूलं ततस्तज्ज्ञानेनैव जातः प्रपञ्चस्तज्ज्ञानेनैव नश्येत् तत्र तादृशमतज्ज्ञानां किमिति केषाञ्चिन्मतमित्याशङ्क्याह—आत्मानमिति । आत्मानं शुद्धजीवमेवात्मतया मूलस्वरूपत्वेन विजानतां त्वां तु तद्रूपत्वेनाविजानतामित्येवकारार्थः । तेनैव मूलेन त्वदज्ञानेनैव हेतुना लब्धच्छिद्रया मायया निखिलं देहादिकं प्रपञ्चितं शुद्धे जीवे अहंममतयाऽध्यस्तं जातं तस्माज्ज्ञानेन मूलत्वादज्ञानच्छेदकेन त्वज्ज्ञानेनैव तदध्यासहेतुरज्ञानमपि प्रलीयते तत्प्रलयमेव दृष्टान्तेन बोधयति-रज्ज्वामिति । तथा चैकादशे वक्ष्यते "भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य" इत्यादि ॥२५॥ अनृतत्वमेव दर्शयति–अज्ञानसज्ज्ञाविति । आत्मशब्देनात्र पूर्वत्र च पद्ये शुद्धजीवश्चोच्यते न तु श्रीभगवान् तत्रैवाज्ञानबन्धमोक्षविचारार्हत्वात् प्रकरणेऽस्मिन्नाभ्यामन्यत्र भगवद्वाचित्वाय युष्मद्भवच्छब्दयोः सर्वत्र युक्तत्वात् ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ हे भगवन् ! तवायं श्रीविग्रह एवात्मा, तस्यानात्मत्वज्ञाने संसृतिः स्वरूपज्ञाने संसृतिनाशश्चेति दर्शयति–आत्मानमेवात्मतयेत्यादि । आत्मान तव श्रीविग्रहमात्मतया चिद्रूपतयाऽविजानतां जनानां निखिलं प्रपञ्चितम्, निखिलप्रपञ्चो जायते, तेनैव ज्ञानेन आत्मताज्ञानेन भूयोऽपि तत्प्रपञ्चित-निखिलमेव प्रलीयते । तत्र दृष्टान्तः–रज्ज्वामित्यादि । रज्जौ यथा रज्जुज्ञानाभावे अहिभोगस्य भवः, अहिरेवायमिति प्रतीतिः, रज्जुज्ञाने सति तस्याभवः तथा शुद्धज्ञानानन्दघने तव श्रीविग्रहे नरविग्रहसादृश्यान्नरविग्रहोऽयमिति भ्रान्तिः, उत्तरकालं भवदनुग्रहवशाद्यदा शुद्धज्ञानानन्दघनोऽयमिति ज्ञाने सति प्रमाभ्रान्त्या संसृतिः प्रमया तन्नाश इति वाक्यार्थः ॥ २५ ॥ अथ तवायमिति श्रीविग्रहो नित्यसुखबोधस्वरूपः, एतस्यैवंविधो ज्ञानमूलको हि भवबन्धो मोक्षश्चेत्याह–'अज्ञानसंज्ञौ भवबन्धमोक्षौ' इत्यादि । अजस्रचिति केवले परे परात्परे आत्मनि तव श्रीविग्रहे विचार्यमाणे सति ऋतस्वभावाद्धेतोर्भवबन्धमोक्षौ अज्ञानसंज्ञौ अज्ञानेन संज्ञा ययोः वस्तुतस्तु बन्धोऽपि अज्ञानजः मोक्षोऽपि बन्धस्य मिथ्यात्वात, तथा असति बन्धे कः मोक्षः ? द्वौ अन्यौ न स्तः ऋतुस्वभाव एवास्ति, न तौ, ऋतस्वभावो हि पार्षदरूपलक्षणः, तस्माद्धेतोर्न बन्धो न च मोक्षः । तत्र दृष्टान्तः—तरणाविवाहनी, तरणो सूर्ये सत्येव अहनी रात्रिदिने, तरणावसति न रात्रिर्न च दिनम्, एतेन तव यथार्थाज्ञाने सति भवबन्धश्च मोक्षश्च, यथार्थज्ञाने तु न बन्धो न मोक्षश्च, केवलं भक्तत्वमेव ॥ २६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अज्ञानेन प्रपञ्चः, ज्ञानेन तन्नाश इति प्रपञ्चस्य भवाभवौ परश्लोकेन दर्शयित्वा भवबन्धतन्मोक्षयोरज्ञानकल्पितं संज्ञामात्रम्, न तु वस्तुतः सत्तेत्यपि तत्परश्लोकेन दर्शयित्वा (२१ श-श्लो०) "त्वामात्मानं परं मत्वा" इत्यादिना तत्परश्लोकेन तथाविधानामज्ञतां प्रतिपाद्य (२८ श-श्लो०) "अन्तर्भवेऽनन्त" इत्यादिना असदपवादेनाधिष्ठानतत्वमनुभवन्तः सन्तोऽप्यन्तर्भवे मृगयन्त्येव, न तु पश्यन्तीति श्रीकृष्णतत्त्वस्य दुर्ज्ञेयतां प्रतिपाद्य भक्ता एव तत्तत्वं जानन्तीति सर्वापवादेन दर्शयति–अथापीत्यादि । किञ्च पूर्वोक्तं (३ य-श्लो) "ज्ञाने प्रयासमुदपास्य नमन्तः" इत्यादिना, (४ र्थ-श्लो०) "श्रेयस्सृतिं भक्तिम्" इत्यादिना चान्वयव्यतिरेकाभ्यां ज्ञानाद्भक्तेः प्राधान्यं यत् सूचितम्, तस्यैव विवरणं कुर्वन् पञ्चभिः श्लोकैर्ज्ञानस्य निःश्रेयसकरत्वं प्रयासबहुलत्वं भक्तेस्त्वयत्नसाध्यत्वमिति क्रमेण दर्शयति तथा हि एवंविधं त्वामेवंविधं दृश्यमानं सुखध्येयं सुखोपास्यं परमप्रेमास्पदं सर्वेन्द्रियरसायनं ये आत्मतयैव विचक्षते, ते भवाम्बुधिं तरन्तीव, न तु सम्यक् तरन्ति । ननु आत्मानमात्मतया यदि न जानीयात्, तदा कथं संसाराभावः ? तत्राह–आत्मानमेवात्मतयेत्यादि । अयमर्थः –आत्मतया अज्ञानेन प्रपञ्चः, ज्ञानेन तन्नाशः, एतावता किं मिथ्याभूतस्य प्रपञ्चस्य स्थित्या वा ? नाशेन वा किमर्थः, यथा रज्ज्वां सर्पभावाभावौ द्वावेव मृषेति दर्शयति-तद्भावे बन्धः, तदभावे मोक्षः एवेत्येव महत् फलमिति चेत् बन्धमोक्षावपि मृषा इति दर्शयति–अज्ञानसंज्ञाविति । अथाज्ञानिनां पन्थाः अज्ञानिनस्तु त्वां न जानन्त्येव ? ॥ २५-२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, तरन्त्येव ते किमिति तरन्तीवेति ब्रूषे ? तथा भवस्य चानृतत्वं वा कुतस्तत्र तेषां ज्ञानिनामाश्रयणीये विवर्त्तवादमते जगदिदमनृतमेव तत् तरणमप्यनृतमेवेत्यतस्तरन्तीवेत्युच्युते इत्याह द्वाभ्याम् । आत्मानञ्जीवम् आत्मतया ज्ञानानन्दमयात्मत्वेन अविजानतां किन्तु अविद्यया आवरणात् ज्ञातुमशक्नुवतां नैव जानतान्तेनैवाऽज्ञानेन निखिलं प्रपञ्चितं सर्वः संसारोऽभूत् भूयः पुनश्च साङ्ख्ययोगवैराग्यतपोभक्तिभिरात्मनो देहव्यतिरिक्तत्वेन यज्ज्ञानन्तेन तत्सर्वं प्रपञ्चितं विलीयते, यथा रज्ज्वाम् अहेर्भोगस्य सर्पशरीरस्य अज्ञानज्ञानाभ्यां भवाभवौ अध्यासाऽपवादौ ॥ २५ ॥ अत एव भवस्यानृतत्वम् अनृतत्वादेव तत्तरणस्याप्यनृतत्वं स्पष्टयति–अज्ञानेति । अज्ञानेन संज्ञा ययोस्तौ भवबन्धमोक्षौ भवः संसारस्तद्रूपो बन्धश्च तन्मोक्षश्च तौ द्वौ नाम ज्ञभावा ज्ञातृत्वं ज्ञानमिति यावत् ऋतश्चासौ ज्ञभावश्च तस्मादन्यौ यौ स्तः तौ ऋतज्ञभावे तस्मिन्नजस्रचित्यात्मनि तत्स्वरूपे जीवे केवले देहादिसङ्गरहिते । विचार्य्यमाणे सति न स्तः न सम्भवत इत्यन्वयः । दृष्टान्तेन दर्शयति, ये अहनी लिङ्गसमवायन्यायेन रात्र्यहनी तरणेरन्यौ स्तः ते तु तरणौ तथा विचार्य्यमाणे यथा न सम्भवत इत्यर्थः ॥ २६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उक्तज्ञानाभावे जन्ममरणप्रवाहलक्षणः संसारस्तज्ज्ञानसद्भावे तन्निवृतिरित्याह–आत्मानमिति । आत्मानमात्मतया अविजानतां तेनैव भगवद्ध्यानविरोध्यज्ञानेन निखिलं प्रपञ्चितं जन्ममरणप्रवाहलक्षणं जगत् जातं प्राप्तं भवति ज्ञानेन स्वस्वब्रह्मात्मकत्वज्ञानेन भगवद्ध्यानसाधनभूतेन च तज्जन्ममरणप्रवाहलक्षणञ्जगत् विलीयते यथा रज्ज्वाम् अज्ञाने अहेः भोगस्य भवोऽनुभवः ज्ञानेनाभवोऽननुभवस्तद्वत् ॥ २५ ॥ ननु, जन्ममरणप्रवाहलक्षणसंसारप्राप्तिनिवृत्तिलक्षणौ बन्धमोक्षौ जीववत् परमात्मनोऽपि कुतो न ? ज्ञानरूपत्वाद्यविशेषादित्याशङ्क्य निराकरोति–अज्ञानसंज्ञाविति । अज्ञानेन अल्पज्ञानेन जीवेन संज्ञा ययोस्तौ बद्धजीवविषयकावित्यर्थः । अनुदरीत्यादिवन्नञर्थोऽत्र बोध्यः अल्पज्ञानत्वं जीवोऽल्पशक्तिः "अज्ञो जन्तुरनीशश्च" इत्यादिश्रुतिस्मृतिषु प्रसिद्धम् एवम्भूतौ नाम प्रसिद्धौ भवेन बन्धश्च ततो मोक्षश्च तौ भवबन्धमोक्षौ अन्यौ परमात्मविषयकौ न स्तः "न मे मोक्षो न बन्धनम्" इति श्रीमुखवचनात् त्वं तु बन्धमोक्षप्रद एवासीत्याह—अजस्रेति । अजस्रचिति नित्यानुभवे केवले निःसमानाधिके परे परमेश्वरे त्वयि आत्मनि स्वहृत्पद्मे अविचार्य्यमाणे असन्निहिते ऋतश्चासौ ज्ञश्च परमात्मा तद्भावस्तद्भक्तिस्तस्मात् सन्निहिते मोक्ष इति भावः । क्रमाद् द्वौ स्तः त्वयि अविचार्य्यमाणे सति बन्धः त्वद्भक्तेश्च त्वद्भावापत्तिलक्षणो मोक्ष इत्यर्थः "बन्धको भवपाशेन भवबन्धाच्च मोचकः" इति स्मृतेः यथा तरणौ असन्निहिते सन्निहिते क्रमादहनी गतागते भवतस्तद्वदित्यर्थः ॥ २६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एतद्युपनिषज्ज्ञानविहीनानां संसृतिर्दुर्वारेत्याह—आत्मानमिति । अतति प्रकाशते अत्यते गम्यते मुक्तैरिति निरुक्तेर्विज्ञानानन्दं त्वाम् अतति व्याप्नोति सर्वमिति निरुक्तेरात्मतया स्वव्यापितया स्वस्वामितया चाविजानतां पुंसां तेनैव तादृशत्वाविज्ञानेनैव तद्वैमुख्येनेति यावत् निखिलं प्रपञ्चितं जातं देहगेहादिष्वहन्ताममतालक्षणः सर्वो विस्तारोऽभवत्, भूयः पुनः पुनः "भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोः स्मृति"रित्यादेः ज्ञानेनोक्तलक्षणेन त्वद्विषयकेन तत्प्रलीयते विनश्यति, अत्र दृष्टान्तः रज्ज्वामिति यथा रज्जुस्वरूपाज्ञानात्तस्यामहिभोगस्य भवः तज्ज्ञानात्तु तस्यामहिभोगस्याभवस्तद्वत् । ये तु रज्जूरगदृष्टान्तादतात्त्विकान्यथाभावं विवर्त्तमिह विरिञ्चिरूपादिशत् रज्जोरज्ञानादुरगो यथा भासते तज्ज्ञानात्तु विनश्यति भानकालेऽपि स मिथ्यैव तद्वदद्वितीयचिन्मात्रात्माज्ञानात् प्रपञ्चो भासते तज्ज्ञानात्तु विनश्येत् भानकालेऽपि मिथ्यैवेत्याहुः ते प्रष्टव्याः; क्वेदमज्ञानं कस्य भासते ? इति । ब्रह्मण्येव तदेव प्रतीतिः चेन्न "सत्यं ज्ञानमनन्तं ब्रह्म" "यः सर्वज्ञः सर्ववित्" इति श्रुतिव्याकोपात् आत्मेतरस्य सर्वस्य मिथ्यात्वेन "यतो वा" इत्यादेः वेदस्य "एष वन्ध्यासुतो भाति" इत्यादितौल्येन तद्वादिनो नास्तिकतापत्तेस्तस्यापि मिथ्यात्वेन तद्वादस्यापि शून्यत्वापत्तेश्चेति यत् किञ्चिदेतत् तस्मादभगवद्वैमुख्यादस्य संसारस्तत्साम्मुख्यात्तु तद्विनाश इत्येतदशमेव दृष्टान्तो ग्राहयतीति सुस्थं विशेषस्तु तदनन्यत्वाधिकरणभाष्ये पीठके च द्रष्टव्यः ॥ २५ ॥ परमात्मत्वेन त्वज्ज्ञानाभावाज्जीवस्योक्तलक्षणः संसारः स च तत्त्वेन त्वज्ज्ञानाद्विनश्येत् परमात्मा तु नित्यमसंसारीत्याह ज्ञानेति । ऋतश्चासौ ज्ञश्च स चासौ भावश्च पदार्थः सोत्यज्ञा नगुणको जीव इत्यर्थः । तस्मात्तं लक्षीकृत्येति "ल्यप् लोपे पञ्चमी" अज्ञानेन यथार्थज्ञानविरोधिना अन्यसादृश्यतत्त्वज्ज्ञानेन संज्ञाप्यते विबुध्यते निरूप्यते इति यावत् भवबन्धो देहगेहादावहन्ताममतालक्षणः संसारः मोहश्च तद्विनाशस्तौ द्वौ प्रयोजकत्वेन प्रतियोगित्वेन चाज्ञाननिरूप्यौ नान्यौ नाम नाज्ञाननिरपेक्षौ जीव एव स्तः भवतः परमात्मनि लये तु तौ नेत्याह—अजस्रेति नेत्यनुवर्त्तनीयं अजस्रचिति निरन्तरसार्वज्ञ्ये "यः सर्वज्ञः सर्ववित्" इत्यादिश्रुतेः । न खलु परमात्मनः स्वस्मिन् विरुद्धधीरस्ति येन संसारः स्यात्तदभावादेव तद्विनाशो मोक्षश्च नेत्यर्थः । आत्मनि सर्वव्यापके सर्वस्वामिनि च केवले विशुद्धे परे सर्वान्तर्गतत्वेऽपि सर्वास्पृष्टे विचार्यमाणे योगिभिर्निःश्रेयसार्थिभिर्ध्यायमाने इत्यर्थः । दृष्टान्तमाह तरणाविवेति । सूर्ये यथा अहनी रात्रिदिवसौ न स्तस्तद्वत् ॥ २६ ॥

श्रीसुबोधिनी

ननु सर्वस्यैव तेन ज्ञानेन कथं न विलयः ? तत्राह**आत्मानमेवे**ति, ह्यात्मानमेवात्मतया **जान**न्ति, अतस्**तेनैव** भ्रमाद् यावज् **जातं निखिलमपि प्रपञ्चितं** प्रपञ्चाकारेणात्मीयतया परिकल्पते **ज्ञानेन भयोपि** तदेव तावन्मात्रमेव **लीयते** न तु कृतिसाध्यं, तत्र दृष्टान्तो रज्ज्वामहेः कल्पितस्यैव सर्वस्य **भोगस्य** कायस्य **भवाभवा**वुत्पत्तिनाशौ सर्पोयं नायं सर्प इति स्वबुद्धिकल्पितस्यैव नाशो नान्यस्य जगतो भगवत्कृतस्य नापि स्वकृतस्य भ्रमात् सर्पदेहे रज्जुर्न पूनरावर्तते नायं सर्प इति ज्ञातेपि, अतोज्ञानकृतमेव निवर्तते नान्यदित्यहम्ममाभिमान एव **गच्छति** नान्यत् ।। २५ ।। किञ्च वस्तुतोस्य तदपि न निवर्तते, मुक्तोहमिति ब्रह्माहमित्येतदप्यज्ञानकृतमेव, आत्माज्ञानादेवैवमपि जानाति, बन्धस्य तज्जनितत्वेन कार्यत्वाविशेषाज् ज्ञानमोक्षावप्यज्ञानकार्यमेव, न हि शयानः स्वप्न उत्थाय भोजनादिकमपि कुर्वन् वस्तुत उत्थितो भवति, स्वप्नस्यानिवृत्तेः, तथा भगवच्छक्तेरज्ञानस्याप्यनिवृत्तेर्न तेषां परमार्थतो मोक्षोपि सम्भवति तत्र हेतुमाह **ऋतज्ञभावा**दिति, मोक्षस्त्वावृतज्ञानरूपः, न त्वज्ञानजनितज्ञानरूपः, भगवज्ज्ञानशक्त्यैव मोक्ष इत्येकादशे वक्ष्यति, किञ्च **मोक्षो हि भगवति सायुज्यं,** स **चाजस्रचिदा**त्मा नित्यचिदानन्दरूपः, तत्राज्ञानकृतप्रपञ्चज्ञानयोरभावाज् जीवस्याज्ञानकृतज्ञानेन कथं प्रवेशः स्यात् ? तदाह **केवल** इति, किञ्च स तु **परो** नियामकः, न हि नियम्यैर्भगवदाज्ञाव्यतिरेकेण निकटे गन्तुं शक्यते, अतो जीवब्रह्मज्ञानिनो न मोक्षः, तत्रोपपत्तिं वदन् दृष्टान्तमाह **विचार्यमाणे तरणाविवाहनी** इति **सूर्ये विचार्यमाण** एव अहनी भवतो न तु स्वबुद्ध्या, अन्यथा निमीलिताक्षः स्वयमेव रात्रिं कुर्यात् प्रसारिताक्षश्च दिनं अतः सूर्यं एवागते दिनमपगते रात्रिरिति **केवलं खण्डाद्वैतवादिनो भ्रान्ता** एव ।। २६ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु ‘समुद्रस्य तरणं क्रियया अप्रसिद्धम्, तत्कथं ज्ञानेन तरणं सम्भवति ?’ इत्याशङ्क्य अध्यासस्य अज्ञानमूलकत्वात् ‘ज्ञानेन तत्र तरणं युक्तम्’ इति सदृष्टान्तमाह—आत्मानमिति । आत्मानमात्मतया याथातथ्येन अजानतामेव तेनैव तदज्ज्ञानेन निखिलं प्रपञ्चितं देहादावहन्ताममतात्मकं जातमात्मज्ञानेन च भयः पुनरपि तत् प्रलीयते । तत्र दृष्टान्तमाह – रज्ज्वामिति । यथा रज्ज्वज्ञानात्तत्र जातोऽहेर्भोगः सर्पदेहः पुनः रज्जुतत्त्वज्ञानात् प्रलीयते, तथेत्यर्थः ।।२५।। ‘अहन्ताममतात्मकसंसारस्य कल्पितत्वादेव भवानृताम्बुधिं तरन्तीव’ इत्युक्तं तदुपपादयति—अज्ञानसंज्ञाविति । नाम प्रसिद्धौ । भवोऽहन्ताममतात्मकोऽध्यासः, स एव बन्धस्ततो मोक्षश्च तौ द्वावपि ऋतः अबाधितश्चासौ ज्ञश्चिदात्मकश्च यो भावः परमार्थभूतः आत्मा, तस्मादन्यौ न स्तः । तत्र हेतुमाह—अज्ञानसंज्ञाविति । अज्ञानेनैव संज्ञामात्रमेव ययोस्तौ, नाबाधिताविति्यर्थः । ननु ‘कथमेवं प्रसिद्धयोस्तयोरपलापः क्रियते ?’ इत्याशङ्क्याह—अजस्रेति । विचार्यमाणे सति आत्मनि वास्तवबन्धमोक्षासम्भवादित्यर्थः । तत्र हेतुं सूचयन्नात्मानं विशिनष्टि—अजस्रमिति । नित्यज्ञानरूपे, केवले अद्वितीये, परे प्रकृतिविलक्षणे, इति । तत्र दृष्टान्तमाह –तरणाविति । यथा सूर्यस्वरूपे विचार्यमाणे तत्र न रात्रिर्न दिवसः, किन्तु ‘तदप्रकाशात् रात्रिः तत्प्रकाशाच्च दिवस’ इति व्यवहारः, तथा आत्मस्वरूपाप्रकाशादहन्ताममतात्मकबन्धः, तत्प्रकाशाच्च मोक्ष इत्यर्थः । बन्धस्याप्यज्ञानकृतत्वेन अवास्तवत्वात्तत्प्रयुक्तमोक्षस्यापि तथात्वमुक्तम् ।।२६।।

अन्वितार्थप्रकाशिका

अत्र ज्ञानेन तरन्ति तच्च तरन्तीव तच्चात्मात्मतया ज्ञानेनेत्यर्थत्रयं प्रतिज्ञातं तत्राद्यमुपपादयति – आत्मानमिति ।। आत्मानमात्मतया याथातथ्येन अजानतामेव तेनैव तदज्ञानेन निखिलं प्रपञ्चितं प्रपञ्चः जातम् तच्च यथा रज्ज्वज्ञानजौ अहेर्भोगस्य शरीरस्य भवाभवौ रज्ज्वां रज्जुतत्त्वज्ञानादेव लीयेते तथा आत्मज्ञानेन भूयः पुनरपि तत्प्रपञ्चितं प्रलीयते ।। २५ ।। द्वितीयमुपपादयति—अज्ञानेति ।। नाम प्रसिद्धौ । भवो बन्धस्ततो मोक्षश्च तौ द्वावपि नाम अज्ञानेनैव संज्ञामात्रं ययोस्तौ अजस्रचिति नित्यज्ञानरूपे केवले अद्वितीये परे शुद्धे आत्मनि विचार्यमाणे सति तरणौ सूर्ये अहनी लक्षणया रात्रिदिने इव ऋतः अबाधितश्चासौ ज्ञश्चिदात्मकश्च यो भावः परमार्थभूतः आत्मा तस्मादन्यौ न स्तः । यथा सूर्ये विचार्यमाणे तत्र न रात्रिर्न दिवसः एवमात्मनि न बन्धो न मोक्षः इति ।। २६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुनः किंच एतेषां भाग्यस्य महिमा महत्त्वं तावदास्तां वक्तुम् अशक्यं भवतु शर्वादयः शर्वोऽहंकाराधिष्ठाता रुद्रः स आदिर्येषां ते वयं मनोबुद्धिदेवाः एकादश इन्द्रियदेवाश्चापि बतेति हर्षे भूरिभागाः भवामः कुतस्तत्राह एतद्धृषीकचषकैः एतेषां व्रजवासिनां हृषीकाणां इन्द्रियाण्येव चषकाः पानपात्राणि तैर्वयं ते तव अंघ्र्युदजमध्वमृतासवं असकृतमुहुर्मुहुः पिबाम अंघ्री एव उदजे उदकजे पद्मे तयोर्मधुमकरंदस्तदेवामृतं मिष्टम् आसवं मदजनकम् अयं भावः यदा एकैकेंद्रियदेवा वयं त्वत्कीर्त्तिश्रवणरूपदर्शनोच्छिष्टजलपानादि कुर्वाणा अपि महद्भाग्यास्तदा समग्रेंद्रियैस्त्वत्संबंधं प्राप्तानां तेषां महद्भाग्यं तत्र किमु वक्तव्यमिति ।। २५ ।। ततोप्यधिकहरिभक्तानां साक्षात्समागमं प्रार्थयन्नाह तदिति–इह नृलोके यत्किमपि जन्म ततोऽप्यधिकम् अटव्यां मार्गे यज्जन्म

ततोऽप्यधिकं गोकुले जन्म तदेव भूरि भाग्यं महद्भाग्यमस्तु कुतो महद्भाग्यं तदाह व्रजवासिनां मध्ये कतमस्य यस्य कस्यापि अंघ्रिरजसा अभिषेकः स्नानं यस्मिन्नेवंभूतं जन्म तेषां पदरजोभिषेके किमाधिक्यमित्याशंक्याह ।। निखिलं सर्वं येषां जीवितं तु मुकुंद एवास्ति प्रत्यक्षमुकुंदस्य दुर्लभत्वमाह यस्य हरेः पदरजः अद्यापि श्रुतिभिर्वेदैः मृग्यम् अन्वेषणीयमेवास्ति एवंभूतस्य मुकुंदस्य तदेकजीवनानां भक्तानां च संबंधो येषामस्ति तेषां महद्भाग्यमित्यभिप्रायः ।। २६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पूर्वश्लोके ये विचक्षते ते तरन्तीत्युक्तमथ प्रसङ्गात्तद्विपरीतानां का गतिः, यद्युच्यते संसृतिरेव, तर्हि कः सुकरस्तन्निवृत्त्युपायस्तत्राह ।। आत्मानमिति ।। आत्मानं परमात्मानं त्वां, आत्मतया एव, सर्वान्तरात्मतयैवेत्यर्थः । अविजानतां जीवानां, तेन एव, तव सर्वान्तरात्मतया अविज्ञानेनैव, निखिलं प्रपश्चितं जातं, प्रपश्चो जातः । संसारः संप्रात इति यावत् । तव सर्वान्तरात्मताभिज्ञानाभावात्तेषां त्वदुपासनाभावस्ततश्च देहात्मभ्रमस्वतन्त्रात्मभ्रमोदयेन संसारप्राप्तिरिति भावः । तदेवमज्ञानजातं प्रपञ्चितम् । भूयः प्रचुरतया संपादितेन ज्ञानेन अपि, देहात्माद्यनभिमानपूर्वं संपादितपरमात्मोपासनरूपज्ञानेनैवेत्यर्थः । चकारादात्मज्ञानेन, प्रलीयते नश्यति निवर्त्तते इति यावत् । परमात्मोपासनात्मज्ञानाभावप्रयुक्तस्य संसारस्य ज्ञानसद्भावे निवृत्तौ दृष्टान्तमाह । यथा रज्वामधिष्ठानभूतायां सत्यां, अहेः सर्पस्य, भोगभवाभवौ सर्पशरीरस्य भवाभवौ, सर्पशरीरविषयकज्ञानोदयतल्लयौ, रज्जुयाथात्म्याऽज्ञानज्ञानप्रयुक्तौ, संभवतः । तद्वद्देहाद्यभिमानपूर्वकप्रत्यक्षतापत्तिपर्यन्तभगवदुपासनात्मकज्ञानाभावतत्सद्भावप्रयुक्तौ ससारतन्मोक्षावित्यर्थः ।। २५ ।। उक्तदृष्टान्तेन बोधितमप्यर्थं दृष्टान्तान्तरेण दार्ष्टान्तिकेऽनुगमयति ।। अज्ञानसंज्ञाविति ।। भवः ससारस्तद्रूपो बन्धस्तस्मान्मोक्षश्च तौ द्वौ, अज्ञानमुक्तविधपरमात्मोपासनात्मकज्ञानाभावश्च सज्ञा भगवदुपासनात्मकं ज्ञानं च ते अनयोः स्तः इति अज्ञानसंज्ञौ स्तः । अर्शआदित्वान्मत्वर्थीयोऽच् । उपासनात्मकज्ञानाभावतत्सद्भावहेतुकौ भवबन्धमोक्षौ भवत इत्यर्थः । संबन्धोऽत्र हेतुहेतुमद्भावरूपः । अज्ञानज्ञानवत्तया भवबन्धमोक्षप्रवृत्तिरस्तीति भावः । अन्यौ न स्तः । अन्यमूलकौ न भवत इत्यर्थः । नामशब्दः शास्त्रीयप्रसिद्धिद्योतकः । 'बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथतरः' इति भगवदुक्तेः । अत्राविद्याविद्याशब्दाभ्यामज्ञानज्ञाने विवक्षिते स्तः । एव स्थिते, यथा अहनि दिवसे, तरणौ सूर्ये सति, निरावरणे सूर्ये साक्षात् समीक्षिते सतीत्यर्थः । तम इति शेषः । इव, तमः यथा प्रलीयते तद्वदित्यर्थः । अज्ञभावात् ऋते अज्ञभावं विना, देहात्मभ्रमस्वतन्त्रात्मभ्रमं त्यक्त्वेत्यर्थः । अजस्रचिति नित्यं ज्ञानैकाकारे, आत्मनि प्रत्यगात्मनि विषये, केवले शुद्धे, परे परस्मिन् परमात्मनीत्यर्थः । विचार्यमाणे देहत्रयविलक्षणं निजात्मान ब्रह्मरूपं विभाव्य तत्र परमात्मनि त्वयि साक्षात् कृते सतीत्यर्थः । तत् प्रपञ्चितम् । प्रलीयते इति शेषः ।। २६ ।।

कृष्णप्रिया

षोडश कला और सर्व की आत्मा ब्रह्म-भगवान को ही मैं ब्रह्म हूँ मैं भगवान हूँ ऐसा समझने वालों ने तो उस प्रकार की भ्रान्ति से सारा प्रपञ्च कल्पित किया है। जैसे रस्सीरज्जू में कल्पित साँप **के** शरीर की उत्पत्ति और नाश होता है वैसे ज्ञान से भी कल्पित प्रपञ्च का ही नाश होता है भगवत्कृत प्रपञ्च का नहीं।। २५ ।। भव रूप बंध और मोक्ष दोनों अज्ञान रूप है, वास्तविक दृष्टि से तो अज्ञान की ही यह दो संज्ञा है विवेक दृष्टि से देखने से ऐसा लगता है कि जैसे सूर्य में दिन और रात दोनों रहे हैं और है वैसे ही मोक्ष, सदानन्द रूप केवल नियामक भगवान में सत्य ज्ञान स्वरूप है इससे निश्चय है आत्मा की न तो मुक्ति है और न तो बन्धन है।। २६ ।।

त्वामात्मानं परं मत्वा परमात्मानमेव च । आत्मा पुनर्बहिर्मृग्य [1]अहोऽज्ञजनताज्ञता ।। २७ ।।
अन्तर्भवेऽनन्त भवन्तमेव ह्यतत्त्यजन्तो मृगयन्ति सन्तः ।
असन्तमप्यन्त्यहिमन्तरेण सन्तं गुणं तं [2]किमयन्ति सन्तः ।। २८ ।।

कर्दमक्षमा

अन्वयः—परमात्मानं त्वाम् आत्मानं परं मत्वा च पुनः आत्मा बहिः मृग्यः अहो अज्ञजनताज्ञता एव ।। २७ ।। हे अनन्त ! सन्तः अन्तर्भवे (हृदयाकाशे) भवन्तम् एव अतत् त्यजन्तः मृगयन्ति असन्तम् अपि अहि अन्तरेण (परित्यागेन) अन्ति सन्तं गुणं कि सन्तः अयन्ति ।। २८ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु परमार्थज्ञानादज्ञानकृतो बंधो निवर्ततामात्मतयैव ज्ञानादिति कोऽयमाग्रह इत्याशंक्य यदध्यासादात्मनः पररूपास्फूर्तिस्तदपवादेन तत्रैव ज्ञानं युक्तमितीममर्थं विस्मयेनाक्रोशन्निवाह । त्वामिति ! त्वामात्मानं परं देहादिरूपं मत्वा आत्मनि

---

१. अहो अज्ञजनाज्ञता—वीर. । २. किमु—श्रीधर. वंशी. वीर. विज. विश्व. शुक. ।

देहादिमध्यस्य तथा परं देहादिमात्मानं मत्वा देहादावात्मानमध्यस्येत्यर्थः। एवमन्तर्नष्ट आत्मा बहिर्मृग्य इत्यहो चित्रम्। न हि गृहे नष्टं वने मृग्यत इत्यर्थः॥ २७॥ विवेकिनस्तु प्रत्यक्स्वरूपे एव परमात्मानं विचिन्वंतीत्याह। अंतर्भव इति। भवतीति भवश्चिज्जडात्मकं शरीरं तन्मध्य एव हि प्रसिद्धं त्वां मृगयंति। कथम् अतज्जडं त्यजंतोऽपवदंतः। ननु सतो ज्ञानेनालं किमसतोऽपवादेनेत्याशंक्याध्यस्तापवादं विनाऽधिष्ठानतत्त्वं न ज्ञायत इति सतां व्यवहारेणाह। असंतमिति। अंति समीपे असंतमप्यहिमंतरेण तन्निषेधं विनेत्यर्थः। संतं गुणं रज्जुं संतः किमु यंति जानंति। अंति संतमपि गुणमिति वा न जानंतीत्यर्थः। तस्मादात्मात्मतयैव ज्ञानान्मुक्तिरिति भावः॥ २८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनराशंकते—नन्विति। आग्रहो हठः। यस्याध्यासात्, अन्यत्रान्यदृष्टिरध्यासः। अस्फूर्तिज्ञानम्। तदपवादेन अध्यस्तापवादेन। अपवादस्त्वारोपितापाकरणम्। तत्रैव यत्रापवादः कृतस्तस्मिन्नेव। आक्रोशन् उच्चैर्वदन्। अध्यस्य प्रकल्प्य। अत्र देहे। बहिर्वनादौ। मृग्यतेऽन्विष्यते। इत्यर्थ—इति भावः। ये आत्मविन्मन्याः पुरुषाकारं त्वां नाद्रियंते त एव पूर्वोक्ताः स्थूलतृषावघातिन इत्याह—त्वामिति। चोऽप्यर्थे, परमात्मानमेवापि त्वां पुरुषाकारं परं शुद्धपरमात्मतोप्यन्यं मायाशबलमात्मानं मत्वा आत्मा परमात्मा पुनस्त्वत्तो बहिरेव मृग्यः, अहो तस्या अज्ञजनताया अज्ञताऽत्यद्भुतेत्यर्थः। अयमर्थः—विवर्त्तपरिणामादयो वादाः खलु चिद्भिन्ने मायिके जगत्येव प्रवर्त्तते न तु पूर्णचिति ब्रह्मणि। तथा 'शाब्दं ब्रह्म वपुर्दधत्' इति तृतीयात्। "यत्तद्वपुर्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्विभुः। बभूवतेनैव स वामनः" इत्यष्टमात्। "सत्यज्ञानानंतानंदमात्रैकरसमूर्त्तयः" इति दशमात् गोविन्दं सच्चिदानंदविग्रहं वृंदावनसुरभूरुहतलासीनमिति। "तासां मध्ये साक्षाद्ब्रह्मगोपालपुरी हि" इति गोपालतापिनीश्रुतेश्च पूर्णब्रह्मात्मके भगवद्वपुर्द्धामादावपि। ये तु श्रुतिस्मृतीक्षणाभावादंधास्तत्रतत्रापि विवर्तमंधपरंपरयैव प्रवर्त्तयंतो भ्रश्यंति ते त्वहोशब्देन ब्रह्मणा स्वसृष्टौ शोच्येषु मध्ये विस्मयरसविषयीचक्रिर इति विश्वनाथः॥ ये तु सकलात्मनामप्यात्मानं त्वामात्ममात्रया विचक्षते ते त्वतिमूर्खा एवेत्याह—त्वामिति। परमात्मानमेव त्वां परं केवलमात्मानं शुद्धजीवरूप मत्वा। अप्यर्थे चकारः। "आततत्वाच्च मातृत्वादात्मा हि परमो हरिः" इति। स भवानपि अपुनर्बहिर्मृग्यः स्यात्। 'अभावे नह्यनो ना च' इत्यमरः। न पुनर्बहिर्वृंदावने मृग्यते किं तु शुद्धजीवस्वरूपभेदेन देहान्तरे एव मृग्यते इत्यर्थः। आहो विस्मये। इयमज्ञजनताया अज्ञता पूर्वोक्तस्य विविधवैलक्षण्यस्य हानाननुसंधानात्। यद्वा—आत्मानं सर्वेषां मूलस्वरूपं त्वां परमात्मानं मत्वा तथा परं त्वत्तोऽन्यमेव तादृशमात्मानं मत्वा यः कश्चिदन्यो भवेदिति कल्पयित्वा बहिस्त्वत्पादाब्जसदनादस्मादन्यत्रात्मा मृग्यो भवति मृग्यत इत्यर्थः। इयमहो अज्ञजनताया अज्ञता। यद्वा—त्वं केवलमात्मान जीवस्य शुद्ध स्वरूपमेव मत्वा तत उत्कर्षावातौ परमात्मानमंतर्यामिमात्रञ्च त्वां तथातथा वा यदि मन्यते तदापीत्यर्थः। अज्ञजनताया अज्ञतैव परिशिष्यते। "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति भगवद्वाक्याननुसंधानात्। यश्चात्मा मुख्यवृत्त्या तत्तच्छब्दवाच्यो बहिर्मृग्य एवेति तर्जनीयुगलेन चरणकमलयुगलं दर्शयति। यद्येवं न स्यात्तदाहमपि स्वसदन एव स्थित्वा मनसि समाधास्यं न पुनरत्र श्रीवृंदावने समायास्यम्। न हि गृहे नष्टं वने मृग्यत इति भावः। संधिश्छन्दोनुरोधेन। जन्मन्यज्ञानताया अज्ञतेति वा। यद्वा—ये जीवतत्त्वेश्वरतत्त्वविदोपि सर्वं परित्यज्य तादृशं श्रीकृष्णं संप्रति श्रीवृंदावन एव मृगयंते तान् स्तौति। प्रथमं तावत् परं केवलमद्वैतोपासनया त्वामात्मानं जीवस्वरूपानतिरिक्तमनुभूय ततः परमात्मानश्चाऽनुभूय पुनरधुना आत्मा तल्लक्षणं सर्वेषां मूलस्वरूपं बहिश्चक्षुरादिगोचरे मृग्यः सम्पद्यते। तस्मादहो विज्ञजनताया विज्ञतेति। 'अज्ञजनताऽज्ञता' इति क्वचित्पाठः। तत्राज्ञशब्देनाऽनुत्तमशब्दवद्विज्ञ एवात्र व्याख्येयः। अत्र मृग्ये। अहो इत्यत्र रोरुत्वाभावः। सदैन्यरोदनवचनत्वेन मृग्य इत्यकारस्य प्लुतत्वात् "अतो रोरप्लुतादप्लुते" इति सूत्रं न प्रवर्तते इति॥ २७॥ प्रत्यक्स्वरूपे जीवे। विचिन्वंति पश्यंति। "तत्त्वमसि" इत्यादिषु तच्छब्दश्चेतनपरस्तद्भिन्नमतत्। अत्राक्षिपति—नन्विति। तत्त्वं स्वरूपम्। असंतमविद्यमानमपि। तन्निषेधं नायं सर्प इत्येवंरूपं निषेधम्। इत्यर्थ इति—अंतरेणेत्यव्ययस्य वर्जनार्थत्वादिह तृतीयाभ्रमो न कार्य इति तात्पर्यम्। "गुणास्त्वावृत्तिशब्दादिज्येंद्रियामुख्यतंतुषु" इति वैजयंती। तं तु शब्देन रज्जुरपि लक्ष्यतेऽत एव गुणं रज्जुम्। असतः समीपत्वासंभव मन्वानः प्रकारांतरेण याजयति—अंतीत्यादि। इत्यर्थ इति—किमुना निपातद्वयेन प्रकृतिविरुद्धाऽर्थो द्योत्यत इति भावः। यस्मादध्यस्तापवादो वस्तुयाथात्म्यबोधी तस्मात्। आत्मतया स्वरूपतया। इति भाव इति। अहं ब्रह्मास्मीत्येवं जीवभावनापरित्यागपूर्वकं स्वस्मिन्ब्रह्मभावेनैव मोक्षहेतुरिति तात्पर्यम्॥ पूर्वत्र हेतुमाह—हे अनंत सर्वव्यापिन्, हि यस्मादंतर्भवे व्यष्टिसमष्टिरूपस्य भवस्य जगता मध्ये संतो विवेकवंतो भवन्तं श्रीकृष्णमेव मृगयंति सर्वदोषहीनं सर्वगुणपूर्णमेव प्राप्तुं तेषां मनोरथः स्वयं भगवान्भवानेव च तादृश इति। किं कुर्वन्तः। अतत् तद्व्यतिरिक्तमन्यदन्यदपरितोषेण त्यजतः। ननु जगदेव ममावरणं तत्कमत्र मत्प्राप्तिस्स्यात्, उच्यते—भवेदेवमविवेकिनां, विवेकिनां तु गूढस्य कारणस्य तव तत्तद्गुणलेशाभासभावितं तदेव कार्यभूतं प्रत्यायकं, तव चास्तु नाम सद्रूपमसद्रूपमप्यन्विष्यन्, तदाश्रयलाभो दृश्यते इत्याह—असंतमपीति। संत इति साधारणविवेकिनः पूर्वेषां तद्विशेषाणां दृष्टांताः। अत्र च तदंशत्यागे व्यष्टिप्रक्रियेयं—प्रथमतो देहादीनां जडमलिनादित्वात् क्रमशस्त्यागेन तच्चेतनादिहेतुः शुद्ध आत्मोपलभ्यते। निर्विशेषब्रह्मदृष्टिस्तु "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथा-

श्रवणेन वा स्यात् । सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्" इत्यादिध्रुववाक्यादिभ्यः, 'ब्रह्मणो हि प्रतिष्ठाहम्' इत्यादिश्रीगीतादिभ्यश्च परिहृतैव । ततः शुद्धजीवस्यापि प्रकाशकः "केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतम् । चतुर्भुजम्" इति द्वितीयोक्तेस्तदंतर्यामी तस्यापि तत्राल्पगुणोल्लासेन ततः पूर्णोदशायी तृतीये वर्णितः । समष्ट्यंतर्यामी तदवतारश्च ततोपि सर्वब्रह्मांडसमष्ट्यंतर्यामी 'आद्योवतारः पुरुषः परस्य' इति सूचितः । कारणार्णवशायी प्रथमपुरुषः ततः 'विष्टभ्याहमिदं कृत्स्नम्' इत्यादि "यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता" इत्यादिदृष्ट्या साक्षात्त्वमेव । अथ समष्टावपि पूर्वमिंद्रचंद्रादिमयं विराड्रूपं मामेवेश्वरं मन्यंते, पश्चात्तस्यापि नश्वरत्वादिना तदंतर्यामीत्यादि पूर्ववत् । तस्मादधुना केनापि भाग्योदयेन साक्षात्त्वैव लाभे सति साधूक्तं—त्वामात्मानमित्यादि । अत्रेयं श्रीवैष्णवप्रक्रिया—यर्ह्येव यदेकं चिद्वस्तु मायाश्रयं विद्यामयं तर्ह्येव तन्मायाविषयमविद्यापरिभूतं चेत्युक्तमयुक्तमिति जीवात्मपरमात्मनोर्विभागोऽवगतः । ततश्च स्वरूपसामर्थ्यवैलक्षण्येन तद्द्वितयं मिथो विलक्षणस्वरूपमेवेत्यायातम् । न च परिच्छेदेप्रतिबिंबादिव्यवस्थया विभागः स्यात्, तत्र यद्यनादिविद्यकत्वेनोपाधेर्वास्तवत्वं तर्ह्यविषयस्य तस्य कथमपि परिच्छेदविषयत्वासंभवः । निर्द्धर्मकस्य व्यापकस्य निरवयवस्य प्रतिबिंबत्वायोगोप्युपाधिसंबंधाभावात्प्रतिबिंबभेदाभावात् दृश्यत्वाभावाच्च । उपाधिपरिच्छिन्नाकाशस्य ज्योतिरंशस्यैव प्रतिबिंबो दृश्यते न त्वाकाशस्य । दृश्यत्वाभावादेव तथा वास्तवपरिच्छेदादौ सति सामानाधिकरण्यज्ञानमात्रेण न तत्त्यागश्च भवेत्, शास्त्रे क्वचित्प्रतिबिंबत्वाद्यंगीकारस्तु तत्सादृश्येनैव अंबुवद्ग्रहणात् । वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवेति न्यायेन । उपाधेराविद्यकत्वे तु वास्तवपरिच्छेदाद्यभावात् प्राक्तनो मायाश्रयमित्युभयात्मको विरोधस्तदवस्थ एव स्यात् । यथा शुद्धायां चितावविद्याकल्पितोपाधौ तस्यामीश्वराख्यायां विद्येत्यसमंजसा च कल्पना स्यादित्याद्यनुसंधेयम् । तस्मादेकमेव तत्परमतत्त्वं स्वाभाविकाचिंत्यशक्त्या सर्वदैव चतुर्द्धावतिष्ठते । सूर्यान्तर्मंडलस्थतेज इव बहिर्मंडलतद्बहिर्गतरश्म्यादिरूपेण । अचिंत्यशक्तित्वं च मणिमंत्रमहौषधादीनां कारणगुणकारणे तस्मिन्नाश्चर्य्यम् । 'श्रुतेश्च शब्दमूलत्वात्' इति । 'आत्मनि चैवं विचित्राश्च हि' इति च न्यायेन 'आत्मेश्वरोऽतर्क्यसहस्रशक्तिः' इति षष्ठेप्येतद्दर्शितम् । अतस्तत्तत्समावेशाद्यनुपपत्तिश्चाचिंत्यशक्तित्वेनैव पराहता, दुर्घटघटकत्वमचिंत्यत्वं, येन खलु सा शक्तिरपरिच्छिन्नमपि परिच्छिन्नत्वेन दर्शयति । यथैव दर्शयिष्यते 'एकदेशस्थितस्याग्नेः' इति । सा शक्तिश्च त्रिधा । अंतरंगा, तटस्था, बहिरंगा चेति । अत्रान्तरंगया स्वरूपशक्त्याख्यया पूर्णेनैव स्वरूपेण वैकुंठादिवैभवेन चावतिष्ठते । तटस्थया रश्मिस्थानीयचिदेकात्मरूपशुद्धजीवरूपेण बहिरंगया मायाख्यया आभासगतवर्णशाबल्यस्थानीयतदीयबहिरंगवैभवजडात्मप्रधानस्वरूपेण चेति चतुर्धात्वम् । यथोक्तं श्रीवैष्णवे—"एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्" इति । श्रुतौ च—"यस्य भासा सर्वमिदं विभाति" इति । अत एव तदात्मत्वेन जीवस्यैव तटस्थशक्तित्वं, प्रधानस्य मायांतर्भूतत्वमभिप्रेत्य शक्तित्रयं तत्रैव दर्शितम् "विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा । अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ।।" इति । तत्र परा—'यातीतगोचरा वाचाम्' इत्यनेनोक्ता । क्षेत्रज्ञाख्या जीवभूता सेयमपरा, प्रथमातृतीययोर्मध्यवर्त्तिनी तृतीया सेयमपि परेति वा । तथा च श्रीगीतासु "भूम्यादितया भेदं प्राप्ता प्रकृतिरष्टधा" इत्युक्त्वा प्राह, "अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूताम्" इति 'सर्वभूतेषु सर्वात्मन्' इत्यनेनोक्ता तु अविद्या कर्म कार्यं यस्याः । अपरायाः सा तत्संज्ञा मायेत्यर्थः । अत एव जीवस्य रश्मिस्थानीयत्वात् । मंडलविलक्षणं मायाव्यवधानतिरोधापनीयत्ववैभवत्वं युक्तम् । तदंतरं ह्युक्तम् "यथा क्षेत्रज्ञशक्तिः सा तारतम्येन वर्त्तते" इति । अत्रान्तरंगत्वतटस्थत्वबहिरंगत्वादिनैव तेषामेकात्मकानां तत्र साम्यं न तु सर्वात्मनेति तत्तत्स्थानीयत्वमेवोक्तं न तु तत्तद्रूपत्वं ततस्तत्र दोषा अपि नावकाशं लभंते । अत्र विशेषविवेकाः श्रीभागवतसंदर्भतट्टीकयोरवलोकनीया इति दिक् । विश्वनाथस्तु—विज्ञास्तु त्वां मायोपाधित्वेन मन्यंते किं तु जीवात्मानमेव, अतस्तमेव मायामालिन्यतो विच्युतीकर्त्तुं तमेव केवलं शुद्धं मृगयंतीत्याह—अंतर्भवे शरीरमध्ये एव वर्त्तमानम् । अनन्ताः असंख्याता भवा नानायोनिषु जन्मानि यस्य त प्रसिद्धम् अल्पज्ञ जीवात्मानं मृगयंति । किं कुर्वन्तः । अतत् आत्मभिन्नं मायिकं मायाश्चापवदंतः, न तु चिन्मयस्य जीवात्मनो ज्ञानेनाल, किंचिद्भिन्नस्यापवादेनेत्याशंक्याध्यस्तापवादं विनाऽधिष्ठानतत्त्वं सम्यङ् न ज्ञायत इति सत्यम्, व्यवहारेणाह—असंतमिति । अतरेण नायं सर्प इत्यपवादं विनेत्यर्थः । अन्यत्तैः । "असंगो ह्ययं पुरुषः" इति श्रुतेर्जीवात्मनो हि स्थूलसूक्ष्मदेहसंबंधो नैवास्ति, तत एव देहो देहिकाः शोकमोहादयश्च तस्य नैव संति, तदप्यविद्ययैव तस्मिञ्जीवात्मनि देहोऽध्यस्तः । ततश्च कदाचिदुद्भूतेन ज्ञानेन 'नायमात्मा देहः' इति देहस्यासतोप्यपवादं विना तथैव शुद्धं सत्यं जीवात्मानं किं जानंति नैव जानन्ति, यथैवाहिमनपवाद्य रज्जुं न जानंतीत्यर्थः ।। २८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ये तु सकलात्मनाप्यात्मानं त्वाम् आत्ममात्रतया विचक्षते ते त्वतिमूर्खा एवेत्याह—त्वामिति । परमात्मानमेव त्वां परं केवलमात्मानं शुद्धजीवस्वरूपं मत्वा अप्यर्थे चकारः आत्मा "आततत्वाच्च मातृत्वादात्मा हि परमो हरिः" इति स भवानपि अपुनर्बहिर्मृग्यः स्यात् "अभावे न ह्यनो ना च" इत्यमरः न पुनर्बहिः श्रीवृन्दावने मृग्यते, किन्तु शुद्धजीवस्वरूपभेदेन देहान्तरेव मृग्यत इत्यर्थः । अहो विस्मये इयमज्ञजनता वा अज्ञता पूर्वोक्तस्य विविधवैलक्षण्यस्य हान्यननुसन्धानात् । यद्वा, आत्मानं सर्वेषां मूलस्वरूप त्वां परम् अनात्मानं मत्वा तथा परं त्वत्तोन्यमेव तादृशमात्मानं मत्वा यः कश्चिदन्यो विदिति कल्पयित्वा बहिस्त्वत्पदाब्जसदनाद-

स्मादन्यत्र आत्मा मृग्यो भवति मृग्यत इत्यर्थः। इयमहो अज्ञजनताया अज्ञतेति। यद्वा, त्वां केवलम् आत्मानं जीवस्य शुद्धस्वरूपमेव मत्वा तत उत्कर्षावगतौ परमात्मानमन्तर्यामिमात्रं च त्वां मत्वा तथा तथा वा यदि मन्यते तदापीत्यर्थः। अज्ञजनताया अज्ञतैव परिशिष्यते "विष्टभ्याऽहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति भगवद्वाक्याऽननुसन्धानात् यश्च आत्मा मुख्यवृत्ततच्छब्दवाच्यो बहिर्मृग्य एवेति तर्जनीयुगलेन चरणकमलयुगलं दर्शयति–यद्येवं न स्यात्तदाऽहमपि स्वसदन एव स्थित्वा मनसि समाधास्यं न पुनरत्र श्रीवृन्दावने समायास्यं न हि गृहे नष्टं वने मृग्यत इति भावः। सन्धिश्छन्दोऽनुरोधेन ज्ञम्मन्यजनताया अज्ञतेति वा। यद्वा, ये जीवतत्त्वेश्वरतत्त्वविदोऽपि सर्वं परित्यज्य तादृशं श्रीकृष्णं संप्रति वृन्दावन एव मृगयन्ति, तान् स्तौति प्रथमं तावत् परं केवलम् अद्वैतोपासनया त्वाम् आत्मानं जीवस्वरूपानतिरिक्तमनुभूय ततः परमात्मानमेव चानुभूय पुनरधुना आत्मा तल्लक्षणं सर्वेषां मूलस्वरूपं बहिश्चक्षुरादिगोचरे मृग्यः संपाद्यते तस्मादहो विज्ञजनतायाः विज्ञतेति अहो अज्ञजनाज्ञतेति क्वचित्पाठः। तत्र चाज्ञशब्देनाऽनुत्तमशब्दवद्विज्ञ एवात्र व्याख्येयः। अत्र मृग्य अहो इत्यत्र रोरुत्वाभावः सदैन्यरोदनवचनत्वेन मृग्य इत्यकारस्य प्लुतत्वात् "अतो रोरप्लुतादप्लुते" (६।१।११३) इति सूत्रं न प्रवर्तते इति ॥२७॥ पूर्वत्र हेतुमाह–हे अनन्त! सर्वव्यापिन्! हि यस्मात् अन्तर्भवे व्यष्टिसमष्टिरूपस्य भवस्य जगतो मध्ये सन्तो विवेकवन्तः भवन्तं श्रीकृष्णमेव मृगयन्ति सर्वदोषहीनं सर्वगुणपूर्णमेव प्राप्तुं तेषां मनोरथः स्वयं भगवान् भवानेव च तादृश इति। किं कुर्वन्तः? अतत् त्वद्व्यतिरिक्तमन्यदन्यदपरितोषेण त्यजन्तः। ननु, जगदेव ममावरणं तत्कथमत्र मत्प्राप्तिः स्यात्? उच्यते भवेदेवमविवेकिनांविवेकिनान्तु गूढस्य कारणस्य तव तत्तद्गुणलेशाभासभाषितां कार्य्यभूतं तदेव प्रत्यायकं तत्र चास्तु नाम सद्रूपम् असद्रूपमप्यनन्विश्यन् तदाश्रयलाभो दृश्यत इत्याह असन्तमपीति। सन्त इति साधारणविवेकिनः पूर्वेषां तद्विशेषाणां दृष्टान्ताः अत्र च तदंशत्यागे व्यष्टिप्रक्रियेयं प्रथमतो देहादीनां जडमलिनादित्वात् क्रमशस्त्यागेन तच्चेतनादिहेतुः शुद्ध आत्मोपलभ्यते निर्विशेषब्रह्मदृष्टिस्तु "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्। सा ब्रह्मणि स्वमहिमन्यपि नाथ! माभूत्" इत्यादि श्रीध्रुववाक्यादिभ्यो "ब्रह्मणो हि प्रतिष्ठाऽहम्" इत्यादि श्रीगीतादिभ्यश्च परिहृतैव ततः शुद्धजीवस्यापि प्रकाशकः "केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तं-चतुर्भुजम्" इति द्वितीयोक्तेस्तदन्तर्यामी तस्यापि तत्राल्पगुणोल्लासेन ततः पूर्णो गर्भोदशायी तृतीये वर्णितः समष्ट्यन्तर्यामी तदवताराश्च ततोऽपि सर्वब्रह्माण्डसमष्ट्यन्तर्यामी "आद्योऽवतारः पुरुषः परस्य" इति सूचितः कारणार्णवशायी प्रथमपुरुषः ततो "विष्टभ्याहमिदं कृत्स्नम्" इत्यादि "यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता" इत्यादि दृष्ट्या साक्षात्त्वमेव। अथसमष्टावपि पूर्वमिन्द्रचन्द्रादिमयं विराड्रूपं मामेवेश्वरं मन्यन्ते पश्चात्तस्यापि नश्वरत्वादिना तदन्तर्यामीत्यादि पूर्ववत् तस्मादधुना केनापि भाग्योदयेन साक्षात्तवैव लाभे सति साधूक्तं त्वामात्मानमित्यादि। अत्रेयं श्रीवैष्णवप्रक्रिया यद्यैव यदेकं चिद्वस्तु मायाश्रयं विद्यामयं तद्यैव तन्मायाविषयमविद्यापरिभूतं चेत्युक्तमयुक्तमिति जीवात्मपरमात्मनोर्विभागोऽवगतः ततश्च स्वरूपसामर्थ्यवैलक्षण्येन तद्द्वितयं मिथोविलक्षणस्वरूपमेवेत्यागतं नच परिच्छेदप्रतिबिम्बत्वादिव्यवस्थया विभागः स्यात् तत्र यद्युपाधेरनादिविद्यकत्वेन वास्तवत्वं तर्ह्यविषयस्य तस्य कथमपि परिच्छेदविषयत्वाऽसम्भवः निर्धर्मकस्य व्यापकस्य निरवयवस्य प्रतिबिम्बत्वायोगोऽपि उपाधिसम्बन्धाभावात् प्रतिबिम्बभेदाभावात् दृश्यत्वाभावाच्च उपाधिपरिच्छिन्नाकाशस्य ज्योतिरंशस्यैव प्रतिबिम्बो दृश्यते नत्वाकाशस्य दृश्यत्वाभावादेव तथा वास्तवपरिच्छेदादौ सति सामानाधिकरण्यज्ञानमात्रेण न तत्त्यागश्च भवेत् शास्त्रे क्वचित् प्रतिबिम्बत्वाद्यङ्गीकारश्च तत्सादृश्येनैव "अम्बुवदग्रहणात्तु न तथात्वम्" (३।२।१९) वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्" (३।२।२०) इति न्यायेन उपाधेराविद्यकत्वेतु वास्तवपरिच्छेदाद्यभावात् प्राक्तनो मायाश्रयमित्याद्युभयात्मको विरोधः तदवस्थ एव स्यात्। तथा शुद्धायां चित्यविद्या तदविद्याकल्पितोपाधौ तस्यामीश्वराख्यायां विद्येत्यसमञ्जसाच्च कल्पना स्यादित्याद्यनुसन्धेयम्। तस्मादेकमेव तत्परमतत्त्वं स्वाभाविकाचिन्त्यशक्त्या सर्वदैव चतुर्द्धाऽवतिष्ठते सूर्यान्तर्मण्डलस्थतेज इव बहिर्मण्डलतद्बहिर्गतरश्म्यादिरूपेण अचिन्त्यशक्तित्वं च मणिमन्त्रमहौषध्यादीनां कारणगतकारणे तस्मिन्नाश्चर्य्यम् "श्रुतेस्तु शब्दमूलत्वात्" (२।१।२७) "आत्मनि चैवं विचित्राश्चहि" (२।१।२८) इति च न्यायेन "आत्मेश्वरो ऽतर्क्यसहस्रशक्तिः" इति षष्ठे ऽप्येतद्दर्शितम् अतस्तत्तत्समावेशाद्यनुपपत्तिश्चाचिन्त्यशक्तित्वेनैव पराहता दुर्घटघटकत्वं ह्यचिन्त्यत्वं येन खलु सा शक्तिरपरिच्छिन्नमपि परिच्छिन्नत्वेन दर्शयति, यथैव दर्शयिष्यते "एकदेशस्थितस्याग्नेः" इति शक्तिश्च सा त्रिधा अन्तरङ्गा तटस्था बहिरङ्गा चेति तत्रान्तरङ्गया स्वरूपशक्त्याख्यया पूर्णेनैव स्वरूपेण वैकुण्ठादिस्वरूपवैभवेन चाऽवतिष्ठते तटस्थया रश्मिस्थानीयचिदेकात्मशुद्धजीवरूपेण बहिरङ्गया मायाख्यया आभासगतवर्णशावल्यस्थानीयतदीयबहिरङ्गवैभवजडात्मप्रधानरूपेण चेति चतुर्द्धात्वम् यथोक्तं श्रीवैष्णवे "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा। परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्" इति। श्रुतौ च "यस्य भासा सर्वमिदं विभाति" इति। अत एव तदात्मत्वेन जीवस्यैव तटस्थशक्तित्वं प्रधानस्य च मायान्तर्भूतत्वमभिप्रेत्य शक्तित्रयं तत्रैव दर्शितं "विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा। अविद्या कर्मसञ्ज्ञान्या तृतीयाशक्तिरिष्यते" इति। तत्र परा "या ऽतीतगोचरा वाचाम्" इत्यनेनोक्ता क्षेत्रज्ञाख्या जीवभूता सेयमपरा प्रथमतृतीययोर्मध्यवर्तिनी तृतीयापेक्षया सेयमपरेति वा तथा च श्रीगीतासु भूम्यादितया भेदं प्राप्ता प्रकृतिरष्टधेत्युक्त्वा प्राह "अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूताम्" इति "सर्वभूतेषु सर्वात्मन्" इत्यनेनोक्ता अविद्याकर्मकार्य्यं यस्याः

अपरायाः सा तत्सञ्ज्ञा मायेत्यर्थः । अत एव जीवस्य रश्मिस्थानीयत्वात् मण्डलविलक्षणं मायाव्यवधानतिरोधापनीयवैभवत्वं युक्तं तदनन्तरं ह्युक्तम् "यथा क्षेत्रज्ञशक्तिः सा तारतम्येन वर्त्तते" इति अत्रान्तरङ्गत्वतटस्थत्वबहिरङ्गत्वादिनैव तेषामेकात्मकानां तत्र साम्यं न तु सर्वात्मनेति तत्तत्स्थानीयत्वमेवोक्तं न तु तत्तद्रूपत्वं ततस्तत्तद्दोषा अपि नावकाशं लभन्ते अत्र विशेषविवेकाः श्रीभागवतसन्दर्भतट्टीकयोरवलोकनीया इति दिक् ।। २८ ।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं तत्तत्त्वे आत्मतत्त्वे प्रपञ्चतत्त्वे च विचिन्तितेऽपि ये त्वामात्मानमेव मन्यन्ते, न त्वात्मविलक्षणो भिन्नोऽप्यसीति ते परमज्ञा एवेत्याह त्वामिति । परमात्मानमेव त्वां परं केवलमात्मानं क्षेत्रज्ञमेव मत्वा; अप्यर्थे च शब्दः, अतएवात्मा अन्तर्ब्बहिश्च व्यापकोऽपि त्वमपुनर्बहिर्मृग्यं स्याः; 'अभावे नह्य नापि' इत्यमरः, न पुनर्बहिर्वृन्दावनादौ मृग्यतेऽसद्भिः, किन्तु देहान्तरे वेत्यर्थः। अहो विस्मये । इयमज्ञजनताया अज्ञता, पूर्व्वोक्तविविधवैलक्षणस्य व्यापकत्वस्य च हान्यनुसन्धानात् । अकारलोपश्छन्दोऽनुरोधेन। अज्ञजनाज्ञतेति क्वचित् पाठः ।। २७ ।। साधवस्तु बहिरन्तश्च व्यापकतया वर्त्तमानं त्वां मृगयन्तीत्याह—अन्तरिति । अनन्त ! हे अपरिच्छिन्न ! अन्तर्बहिर्व्यापकेत्यर्थः । सन्तस्त्वद्भक्तास्त्वन्तर्भवे स्वदेहान्तरेव भवन्तं मृगयन्ति किम् ?—काक्वा। नैव, किन्तु बहिरपि मृगयन्तीत्यर्थः । कथम् ? अतदवस्तु मिथ्याभूतमसद्भिस्त्वसत्तया ज्ञायमानमात्मतत्त्वं त्यजन्तः परिहरन्तो यतस्तत्त्यागं विना विशुद्धज्ञानं न भवतीत्याशयेनाह, - अन्तमिति । अन्तरेण तन्निषेधं विनेत्यर्थः । नाहं सः, किन्तु तदीयोऽस्मीति बुद्ध्या प्रथममात्मनो मिथ्येश्वरत्वज्ञानं निरस्यैव सन्तोऽपि त्वां प्राप्नुवन्तीति भावः । यद्वा, अतदसद्वस्तु निर्व्वाणमित्यर्थः । अवस्तुत्यागेन विना सद्वस्तु न प्राप्यत इत्याह—असन्तमिति । अथवा, ननु तर्हि कथमभिज्ञा मृगयन्ते ? तदाह—अन्तर्भवतीत्यन्तर्भवं हृदयकमलं तस्मिन् । अतत् त्वन्मार्गणव्यतिरिक्तं सर्व्वं त्यजन्तः । ननु भगवत्स्मरणात् स्वयमेव तदपयास्यति, किं तत्त्यागाग्रहेण ? तत्राह—असन्तमिति । विना विषयादिपरित्यागम्, विना च कर्म्मज्ञानादिपरित्यागम्, भगवत्स्मरणं न सिध्यतीति भावः । अन्यत् समानम् ।। २८ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अन्येषान्तु जीवपरमात्मयाथात्म्यज्ञानमेव स्वोक्तार्थस्थेम्ने आह—त्वामात्मानमिति । परं चिदचिद्विलक्षणं त्वां श्रीमन्तं नारायणं परं ब्रह्म अज्ञानाध्यस्तमात्मानं जीवरूपं मत्वा च पुनः अपरमर्वाचीनं संसारिणं जीवमात्मानं देहमन्तःकरणावच्छिन्नत्वेनौपाधिकत्वेन प्रतिविम्बत्वेन वा मत्वा आत्मा पुनः बहिः घटाद्यवच्छिन्नचैतन्यादिरूपेण मृग्य इति एवमज्ञजनताया अज्ञता इत्याश्चर्यम् ।।२७।। सतां पुनस्तत्त्वविचारसामर्थ्यमाह—अन्तरिति । हे अनन्त ! सर्वदेव सर्वकालसर्वावस्थासु व्यापक ! भवे संसारमध्येऽन्तर्वर्त्तमानं भवन्तमेव सर्वचिदन्तर्यामिणम् अत एव अतत् तच्छब्दवाच्यभवद्भिन्नत्वं भवे प्रपञ्चः त्यजन्तः सन्तः भवन्तं त्वामेव मृगयन्ति तच्छरीरत्वेन विचिन्वन्ति तदेव विचयमर्थान्तरन्यासेनाह–सन्तं कालत्रये सत्यं गुणम् अन्तरेण विना असन्तं गुणादविनाभूतं सन्तम् अपि अहिम् उ इति वितर्के भ्रान्ताः अन्ति निकटे भ्रमात् विनाभूतमेव सत्यमेव रज्ज्वज्ञानात् यन्ति जानन्ति पश्यन्ति वा इति काकुः तेषां भ्रमाभावात् एवं परमात्मानं विना पृथक्त्वेन स्थूलावस्थं च जगत् रूपं वस्तु अवर्त्तमानमपि भ्रान्ता जीवाः परमात्मा पृथग्भूतमेव तत्किं यन्ति ? अपितु नैव, सन्तस्तु उभयावस्थं जगत्परमात्मशरीरभूतमेव जानन्तीति भावः ।। २८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अज्ञभावादित्यनेन उक्तमज्ञत्वमेव विशदयन् विस्मयते–त्वामिति । देहात्मभ्रमोऽहमेवेश्वरः इत्येवं स्वतन्त्रात्मभ्रमश्चेति द्विविधोऽपि भ्रमोऽनर्थहेतुतया त्याज्यतया च तत्र तत्रोच्यते अत्राप्युभयविधभ्रस्यात्मपरमात्मयाथात्म्यज्ञानमूलकत्वमुक्त्वा विस्मयते परं प्रकृतिपुरुषविलक्षणमात्मानं प्रकृतिपुरुषान्तःप्रवेशेन तद्गतदोषाऽसंस्पर्शेन प्रशासनेन च भर्त्तारं त्वाम्, इदमेव हि परमात्मशब्दप्रवृत्तिनिमित्तं यल्लोकत्रयान्तःप्रवेशनतद्गतदोषास्पर्शनप्रशासनैर्भर्त्तृत्वं यथोक्तं भगवता—

"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" ।।

इत्येवमत्यन्तविलक्षणमपि त्वाम् इत्यर्थः । एवंविधं त्वामात्मानं प्रत्यगात्मानं मत्वा चस्त्वर्थः । आत्मानं च प्रत्यगात्मानं तु परमन्यं देहमेव मत्वेत्यर्थः । आत्मा परमात्मा पुनर्बहिर्मृग्यः मृग्यत इत्यर्थः । अहोऽज्ञजनानाम् इयमज्ञता न हि गृहे नष्टं वने मृग्यत इति भावः । विवेकिनस्तु जीवान्तरात्मतयैव त्वामुपासत इति भावः ।। २७ ।। इदमेव दृष्टान्तमुखेन काक्वोपपादयति–अन्तर्भव इति । हे अनन्त ! सन्तो विवेकिनः अन्तर्भवे भवतीति भवः देहः तन्मध्ये अतत् तदन्यार्थकोऽत्र नञ् परमात्मनोऽन्यद्यज्जीवपर्यन्तं पञ्चविंशतितत्त्वजातं तत्त्यजन्तः तस्मिन्परमात्माभिमानं त्यजन्तस्तद्विलक्षणमेव मुक्तविधं भवन्तं त्वां मृगयन्ति विविच्योपासत इत्यर्थः । "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" इति श्रुत्यनुसारात् सन्तः विवेकिनः रज्जुयाथात्म्यज्ञानवन्तः अन्ति समीपे सन्तं तत्त्वेनैव प्रतीयमानं गुणं रज्जुमसन्तमप्यहिं सर्पं किमु प्रतियन्ति सन्निहितस्यापि विस्मरणे व्यवहिताध्यासे चायं दृष्टान्तः । यथा विवेकिनः

सन्निहिते गुणे हि विलक्षणतया प्रतीयमाने न व्यवहितसर्पबुद्धिं कुर्वन्ति एवं जीवान्तरात्मतया सन्निहिते त्वयि जीवपर्यन्ततत्त्वविलक्षणतया प्रमितेन जडजीवबुद्धिं कुर्वन्ति किन्तु तां विहाय स्वरूपतः स्वभावतश्च तद्विलक्षणं त्वामध्यवस्यन्त उपासत इत्यर्थः ॥२८॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

अथ—"एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयञ्ज्योतिरनन्त आद्यः एवम्विधं त्वां सकलात्मनामपि स्वात्मानमात्मात्मतया विचक्षते" इत्याद्युक्तप्रकारेण श्रुतिस्मृत्यादिवाक्यैश्च त्वां समाभ्यधिकशून्यं परमकारणं सर्वाधारं सर्वशेषिणं निरुपाधिकानन्तज्ञानानन्दादिकल्याणगुणनिधिं स्वाश्रितसंसारनिवर्त्तकं सत्यप्रतिज्ञं चिदचिन्नियन्तारं ज्ञात्वाऽपि त्वत्तः परं किञ्चिदन्यत्तत्त्वं मन्यमाना अज्ञा इति तान् विस्मयेनाक्रोशं कुर्वन्निवाह—त्वामात्मानमिति । त्वामात्मानं निरुपाधिकसर्वात्मानं परमुत्कृष्टं मत्वा निश्चित्य "य आत्मनि तिष्ठन् यस्यात्मा शरीरम्" इत्यादिश्रुतेः । ननु, जीवात्मापि देहाद्यपेक्षया परः अतः स एव कथं न स्यादित्याह, परमात्मानमेव च चकारोऽप्यर्थः एवकारोऽन्ययोगव्यवच्छेदार्थः त्वामेव परमात्मानं मत्वा। मा परो यस्मादिति परमः परमश्चासावात्मा च परमात्मा तं त्वामेवेत्यर्थः । "मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय !" इत्यादि स्मृतयः "परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे, प्रधानक्षेत्रज्ञपतिर्गुणेशः, ज्ञाज्ञौ द्वावजावीशानीशौ, नित्यो नित्यानां चेतनश्चेतनानां, द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति, पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" इत्यादयः श्रुतयश्च इममेवार्थमुपपादयन्तीति भावः । एवम्भूतं त्वां ज्ञात्वाऽपि सर्वावधिभूते त्वय्येव परतत्त्वनिश्चयं कृत्वापि आत्मा पुनर्बहिर्मृग्यः त्वत्तोऽपि यत्किञ्चिद्गुणदरिद्रं सर्वविशेषशून्यत्वेन निर्विशेषं चिन्मात्रं वस्तु अन्वेषयन्ति श्रुतिस्मृत्यर्थमज्ञात्वा तत्रैव निश्चयं कुर्वन्तीति यदहोऽज्ञजनता अहो इत्याश्चर्ये अज्ञजनताया अज्ञता तेषामज्ञाने त्वन्मायैव कारणमिति मया निश्चितमित्यर्थः । ननु "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म" यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुरश्रोत्रं सत्यं ज्ञानमनन्तं ब्रह्म, तत्त्वमसि" इत्यादिश्रुतिभिर्निर्विशेषं चिन्मात्रं ब्रह्मैव परमार्थस्तदतिरेकि सर्वं मिथ्याभूतं तस्मिन्नेव कल्पितमिति कथं सर्वशेषी सर्वनियन्तृत्वादिगुणकः परमेश्वर एव परं तत्त्वमिति प्रतिपाद्यते इति चेत्, तदसत् कथमित्युक्ते शृणु, सदेवेत्यत्र सच्छब्दवाच्यः परमात्मा नारायण एवेत्यवधारय "एकोऽहं वै नारायण आसीत्" इत्यादिश्रुत्यैक्यार्थात् "एकमेवाद्वितीयम्" इति "न तत्समश्चाभ्यधिकश्च दृश्यते नत्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः" इत्यादिश्रुतिस्मृत्युक्तसमाभ्यधिकशून्यत्वं प्रतिपाद्यते "यथा चोलनृपः सम्राडद्वितीयोऽद्य भूतले" इत्यत्र तत्समाभ्यधिक एव प्रतिषिध्यते न तु तत्पुत्रकलत्रादिकमपीति यत्तदद्रेश्यमित्याद्यपि हेयपदार्थनिषेधपरम् –

"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः"

इत्याद्यनुसारात् अन्यथा "आदित्यवर्णं तमसः परस्तात्" इत्यादिभिर्विरोधः स्यात् "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यत्रापि सत्यत्वादिगुणकमेव ब्रह्मेति पूर्वमेवावोचामः । अन्यथा बृहत्वाद्बृंहणत्वाच्च तस्मादुच्यते परं ब्रह्मेति ब्रह्मशब्दनिर्वचनविरोधः स्यात् तत्त्वमसीत्यत्रापि परब्रह्मात्मकत्वं जीवस्य प्रतिपाद्यते "य आत्मनि तिष्ठन् यस्यात्मा शरीरम्" इत्याद्यनुरोधात् अन्यथा "क्षरं प्रधानममृताक्षरं हरः, क्षरात्मानावीशते देव एकः" इत्यादिभिर्विरोधः स्यात् । अत एव श्रुतिस्मृतिभिः सिद्धेऽर्थे त्वदुक्तलक्षणाया अनवकाशः । मुख्यार्थबाधे सत्येव लक्षणा अत्र तु बाध एव नास्ति श्रुतिस्मृतिभिर्विरोधाभावात् ऋजुगत्या कार्ये सिद्धे वक्रगत्या साधयितुमन्याय्यत्वाच्च अतो यथोक्त एवार्थः समीचीनः । यद्वा, त्वामात्मानं परं जीवं मत्वा परमात्मानमेव च परं जीवमात्मानं त्वां मत्वा अयमाशयः आत्मा ब्रह्मैव त्वं स्वाविद्यया जीवरूपेणावस्थित इति मत्वा परं जीवमात्मानं त्वां मत्वा स्वाविद्यानिवृत्तौ पुनर्ब्रह्मस्वरूपेणैव तिष्ठतीति मत्वा आत्मा पुनर्बहिर्मृग्य ईश्वरजीवात्मव्यतिरिक्तं किञ्चिच्चिन्मात्रमस्तीति निश्चिन्वन्ति अहोऽज्ञजनताज्ञतेति अहो तेषां दुराग्रहः निर्विशेषस्वप्रकाशं ब्रह्म वदन्ति पुनस्तस्यैवाविद्यया आवृत्तिं वदन्तीति अहो बुद्धिवैपरीत्यं तेषामिति "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायेन शुद्धे ब्रह्मणि अविद्याप्रसक्तिमङ्गीकृत्य पुनस्तन्निवर्तने शमदमादिसम्पदमङ्गीकृत्य तस्यैव मोक्षं वदन्तीत्यहो तेषामज्ञता इत्याक्रोशति ते शोच्या इत्यर्थः । अत्र त्वामात्मानं परं देहादिमत्वा आत्मनि देहादिमध्यस्य तथा च परं देहादिमात्मानं मत्वा देहादावात्मानमध्यस्यात्र नष्ट आत्मा बहिर्मृग्यते इति न तावज्जीवात्परत्वं वक्तुं शक्यं तस्य जडत्वेनातितुच्छत्वात् प्रत्युत जीवस्यैव देहादेः परत्वात् "परः पराणाम्" इत्यादि श्रुतेः । नापि पृथिव्यादितत्त्वेभ्यः परत्वं तस्य तत्कार्यत्वात् अतः देहादेः परत्वं स्वमतिविजृम्भितं किञ्चाध्यासोऽपि देहात्मवादिनां देहादावात्माध्यासः शुक्तौ रजतादिवद्भवति देहोऽहं कृशोऽहं स्थूलोऽहमिति आत्मनि देहाध्यासस्तु कस्याऽपि न दृष्टचरः न हि रजते शुक्त्यध्यासः किन्तु शुक्तौ रजताध्यास एव अत इदमप्यसमञ्जसमित्यलमतिपल्लवितेनेति ॥ २७ ॥ त्वत्स्वरूपज्ञास्तु त्वामेव सर्वावधिभूतं सर्वापद्विमोचकं निरुपाधिकानन्तकल्याणगुणाकरं सर्वसेव्यं स्वशरीरे एव विचिन्वन्तीत्याह—अन्तर्भवे इति । अन्तर्भवे भवतीति भवः शरीरं तस्मिन् भवन्तमेव सर्वस्वामिनं सन्तस्त्वत्सम्बन्धज्ञानवन्तो मृगयन्ति उपासते इत्यर्थः । किं कुर्वन्तः अतत्त्यजन्तः न तत् अतत् देवादिप्रपञ्चः तस्य नश्वरत्वात् तज्ज्ञानं विना तत्त्यागो न सम्भवतीत्याह, असन्तमपि अन्ति समीपे अहिं

योनिषु जन्मानि यस्य तं प्रसिद्धमलाज्ञं जीवात्मानं मृगयन्ति किं कुर्वन्तः ? अतत् आत्मभिन्नं मायिकं मायां च त्यजन्तः अपवदन्तः। ननु, चिन्मयस्य जीवात्मनो ज्ञानेनाऽलं किञ्चिद्भिन्नस्यापवादेनेत्याशङ्क्य अध्यस्तस्यापवादं विना अधिष्ठानतत्त्वं न सम्यक् ज्ञायत इति सतां व्यवहारेणाह–असन्तमिति। अन्ति समीपे असन्तमप्यहिमन्तरेण नायमहिरिति तदपवादं विनेत्यर्थः। सन्तं गुणं रज्जु सन्तः किमु यन्ति जानन्ति ? नैव जानन्ति, तथैव "असङ्गो ह्ययं पुरुषः" इति श्रुतेर्जीवात्मनः स्थूलसूक्ष्मदेहसम्बन्धो नैवास्ति तत्सम्बन्धाभावादेव देहा दैहिकाः शोकमोहादयश्च तस्य नैव सन्ति तदप्यविद्ययैव तस्मिन् जीवात्मनि देहोऽध्यस्तः ततश्च कदाचिदुद्भूतेन ज्ञानेन नायमात्मा देह इति तस्य देहस्याऽसतोऽप्यपवादं विना सत्यं शुद्धं जीवात्मानं किं जानन्ति ? नैव जानन्तीत्यर्थः ।।२८।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवमणुपरिमाणकः सनातनो ब्रह्मांशभूतो जीवः विभुपरिमाणकः सनातनः ब्रह्म नारायणादिपदवाच्योंशी श्रीकृष्णः तयोरंशांशिनोः प्रभाप्रभावतोरिव गुणगुणिनोरिव जातिव्यक्त्योरिव अवयवावयविनोरिव कार्यकारणयोरिव स्वरूपतो भिन्नयोरेवाभेदः "एवंविधं त्वां सकलात्मनामपि स्वात्मानमात्मात्मतया विचक्षते" इत्यनेनोक्तः तस्य चांशभूतस्यानादिमायावृतज्ञानस्याज्ञस्य स्वांश्यविचारेण बन्धस्तद्भञ्जनेन तद्भावापत्तिलक्षणो मोक्षः पूर्वश्लोकेन वर्णितः अथेममेव सर्ववेदार्थभूतं स्वसिद्धान्तं विशदयन् अत्यन्तभेदवादिमतं सर्वश्रुतिस्मृतिविरुद्धं निराकरोति, त्वामिति। त्वां सकलात्मनामात्मानं तेषां सत्यत्वमूलं परमं सत्यं अंशिनं "नित्यो नित्यानाम्" इत्यादिश्रुतिप्रोक्तम् परमत्यन्तभिन्नं मत्वा तथात्मानम् अंशभूत परमत्यन्तं भिन्नम् ब्रह्मात्मकं मत्वा परं स्वभावत एव भिन्नत्वेऽप्यभिन्नयाः जीवपरमात्मनोरन्योन्यतोऽत्यन्तं भेदं मत्वा पुनर्बहिः "तत्त्वमसि" इत्यादिश्रुतिसिद्धान्तात्पृथग्भूते स्वेच्छाविलसिते कुपथि ब्रह्मात्मकः जडस्वरूपः ज्ञानपरिणामवदादिरूपो वा आत्मा मृग्यः अहो इति अज्ञजनतायाः तार्किकादिजनसमूहस्य अज्ञता नहि जीवपरमात्मनोरत्यन्तभेदोऽस्ति तत्तादात्म्यविधायकानां त्वमस्यादिवाक्यानां बाधप्रसङ्गात् न पुनरत्यन्ताभेदोऽप्यस्ति उपदेशवैयर्थ्यापत्तेः एकस्मिन्नद्वितीये भेदकल्पनायाः तदपवादस्य च वर्षसहस्रेणापि विद्वत्सभायामुपपादयितुमशक्यत्वात् अतः स्वरूपतो हि भेद एव "सर्वं खल्विदं ब्रह्म" इत्यत्र जडाजडयोः स्वरूपतोऽभेदासम्भवात् आत्मनो जडत्वस्वीकारः ज्ञानपरिणामवत्त्वादिस्वीकारश्चतुच्छ एव "चेतनश्चेतनानाम्" इत्यादिश्रुतिविरोधादित्यलं विस्तरेणविस्तरस्तु वेदान्तकौस्तुभादिषु द्रष्टव्यः ।२७। ननु, यद्यहमेव बन्धमोक्षप्रदः सर्वभिन्नाभिन्नः परमपुरुषस्तर्हि केचिन्मयि मनुष्यबुद्धिं कुतः कुर्वन्तीत्यत्राह–अन्तर्भव इति। हे अनन्त ! त्रिविधपरिच्छेदशून्य ! भवे संसारे स्वमायाकार्यभूते ब्रह्माण्डे यदान्तर्मध्यन्तत्रभवन्तं स्वेच्छया प्रविष्टं त्वां स्वासाधारणेनैव रूपेण वर्तमानम् हि यत् भ्रान्त्या गृहीतमतद्ब्रह्मत्वं मनुष्यत्वम् तत्त्यजन्तः सन्तः विवेकिनः मृगयन्ति तत्त्वतो निश्चिन्वन्ति यथेन्द्रेण "कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनम्" इति। श्रीकृष्णे मर्त्यत्व भ्रान्त्या प्रकल्पितम् पुनर्विविच्य बुद्ध्वा "विशुद्धसत्त्वं तव धाम शान्तम्" इत्यादिना परमपुरुषत्वेन श्रीकृष्णो वर्णितः तत्र दृष्टान्तमाह—यथा सन्तः रज्जुस्वरूपविदः असन्तं भ्रान्त्या गृहीतमहिमन्तरेण तन्निषेध विना अन्ति समीपे सन्तं गुण रज्जुं किमुयन्ति जानन्ति ? किं तु भ्रान्तिगृहीतमहिं निषेधयित्वैव रज्जु जानन्तीत्यर्थः। तद्वत् अत एवोक्तम्—

"इत्थं सतां ब्रह्मसुखानुभूत्या दास्यङ्गतानां परदैवतेन।
मायाश्रितानां नरदारकेण साकं विजह्रुः कृतपुण्यपुञ्जाः" ।। इति ।। २८ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु ब्रह्मन् ! मामेव त्वं परमात्मानं ब्रवीषि, न चैव मन्ये इति चेत्तत्र साक्षेपमाह—त्वामिति। चकारोऽप्यर्थ परमात्मानमेवात्त्वा परं मायाशबलमात्मानं मत्वा त्वत्तो बहिः पुनरात्मा परमात्मा मृग्यः अहो इत्याश्चर्ये ज्ञजनताया विज्ञमन्यजनसमूहस्याज्ञता आश्चर्येत्यर्थः। अधीतशास्त्राया अपि तस्याः संसारो दुर्वार इति भावः ।। २७ ।। तर्हि मे परमात्मता जगति विलुप्ता तत्राह—अन्तरिति। हे अनन्त विभो ! अन्तर्भवे शरीरमध्ये हृदि सन्ता वैष्णवास्तु भवन्तं त्वामेव नन्दसुतं मृगयन्ति परमात्मत्वेन ध्यायन्तीत्यर्थः। अततः परमात्मत्वाद्भिन्नमन्यसादृश्यप्रतीतं मायाशबलत्वं पादादिगतैरङ्कैः पूतनादिमोक्षदानैश्च विशेषैस्त्यजन्तः परिहरन्तः। मार्गणेऽतत्त्यजनमावश्यकमिति दृष्टान्तेनाह अन्ति समीपेऽसन्नविद्यमानमप्यहिमन्तरेण तन्निषेधं बिना सन्तं विद्यमानमपि तं गुणं सन्तः पण्डिताः किम् यन्ति जानन्ति नेत्यर्थः यथा रज्जावुरगस्याभावेऽपि तद्बुद्धिविगमं विना तस्याः स्वरूपं न स्फुरेदेवं नन्दसुते त्वयान्यस्य प्रतीततच्छबलत्वबुद्धिविगमं विना परमात्मत्वं न स्फुरेत् अतस्तद्वदतत्त्यजनमावश्यकमित्यर्थः। तथा च भ्रान्तैः प्रतीतं तच्छबलत्वं निर्धूय तवैव परमात्मता प्रचार्यन्त्यतः प्रगलभन्त इति ।। २८ ।।

श्रीसुबोधिनी

किञ्च ये स्वात्मब्रह्मविचारकाः सर्वसङ्गं परित्यज्य देशान्तरे गय आत्मा प्राप्तव्य इति परित्यागं कुर्वन्ति तेतिभ्रान्ता इत्याह त्वामात्मानमिति, त्वं कृष्णः सर्वात्मा सर्वरूपस्तादृशं त्वां भिन्नं मत्वा नाहं सर्वः किन्तु विलक्षण इति परं च भगवद्रूपमेव

ज्ञानप्रकाश्य **आत्मा** भगवद्विभूतिरूपो भावनया स्फुरितो व्यापकत्वादिधर्मः साङ्ख्यादिस्मृतिसिद्धस्त**मात्मानं मत्वा**, स तु न जीवरूपः कदाचिदपि न हि घटः पर्वतो भवति, अतः **परमात्मा** पुनर्बहिर्गत्वा सन्न्यासं गृहीत्वा **मृग्य** इत्यहो अज्ञानां भ्रान्तएतस्मिन्नुतरमन्तरं कुरुतेथ तस्य भय भवती'तिश्रुत्युक्तं तेषां भयं निरूप्य ये पुनरिहैवान्तःकरणे भगवच्चिन्तका अन्तर्यामिणमितरपरित्यागेन भावयन्ति ते कृतार्थाः ।।२७।। एकत्रं लब्धपदं चितमन्यत्रापि प्राप्स्यतीत्याहा**न्तर्भव** इति, अन्तर्भवतीत्य**न्तर्भवो** हृदयाकाशस्तस्मिन्, हे **अनन्त** देशकालवस्तुपरिच्छेदरहित, तत्रापि विद्यमान **भवन्तमेव ये मृगयन्ति** ते **सन्तो** भवन्ति, अन्वेषणे प्रकारमाहातत् **यजन्त** इति, न तद् यत्र येषु साधनेषु **भगवच्चिन्तनं** सम्यङ् न भवति **तदतत् त्यजन्तो** विरुद्धसाधनपरित्यागेन निरन्तर भगवच्चिन्तकाः **सन्त** इत्युक्तं भवति, किञ्च भ्रमबुद्धिमपि त्यक्त्वा **भगवच्चिन्तनं** कर्तव्यमिति दृष्टान्तेनाहा**सन्तमपो**ति, अविद्यमानमप्यहि सर्प**मन्तरेण** तद्व्यतिरेकेणान्ति निकटे स**न्तं गुणं** रज्जुं **किमयन्ति** जानन्ति ? अन्तरशब्दो नानार्थः सोत्रापरित्यागवाची, भ्रमप्रतिपन्नं विषयमपरित्यज्य वस्तुस्वरूपचिन्तनं न सम्भवति, अतो **मूलभ्रमप्रतिपन्नं देहात्मभावं व्यामोहकशास्त्रप्रतिपन्नं च भावं परित्यज्य हृदये विद्यमानो भगवान् भावनोयः**, पुनः **सन्त** इतिपदं ते तथैव भावयन्तीतिप्रमाणकथनार्थम् ।। २८ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु "परमात्मज्ञानात् बन्धो निवर्तताम्, तस्यात्मत्वेन ज्ञाने कोऽयमाग्रहः ?" इत्याशङ्क्य "सर्वत्र यदज्ञानादेव भ्रमो जातस्तज्ज्ञानादेव भ्रमनिवृत्तिर्दृष्टा, न त्वन्यज्ञानात्, तथात्रापि आत्माज्ञानाज्जातस्य संसारबन्धस्य आत्मज्ञानादेव निवृत्तिर्युक्ता" इत्यभिप्रेत्य इत्यजानतो निन्दन् आश्चर्यं करोति - त्वामिति । स्वात्मानं त्वां परं स्वतो भिन्नं मत्वा, परं स्वतो भिन्नं 'कार्यकारणसङ्घातरूपं' देहादि च आत्मानं मत्वा । आत्मा परमात्मा पुनः स्वस्माद्बहिरेव मृग्यः अन्वेषणीय इति अज्ञजनानां समूहः अज्ञजनता तस्या अज्ञता । अहो आश्चर्यम्, नहि गृहे नष्टं वस्तु वने सुज्ञैर्मृग्यते इति । अत्र सन्धिद्वयमार्षम् । न च 'एवमात्मज्ञानात् मुक्तिकथने भक्तिमार्गविरोध' इति शङ्कनोयम्, "माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोधिकः ।। स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा" इति सिद्धान्तवचनानुसारेण मर्यादामार्गे आत्माभेदज्ञानमन्तरेण भगवति सर्वतोऽधिकस्नेहात्मकभक्तेरसम्भवात् । "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुत्याऽऽत्मन्येव स्नेहाधिक्यप्रतिपादनात् ।। २७ ।। 'अतएव विवेकिनोऽस्मिन् सङ्घाते एव त्वदभिन्नत्वेनात्मानं मृगयन्ति' इत्याह --अन्तर्भव इति । हे अनन्त सर्वस्वरूप ! भवतोति भावः शरीरादिसङ्घातः, तन्मध्य एव अतत् त्वद्व्यतिरिक्तमात्मतयाऽध्यस्तं प्राकृतं देहादिकं त्यजन्तः अपवदन्त एव सन्तो विवेकिनो भवन्तं भवदभिन्नमात्मानं मृगयन्ति अन्विष्य जानन्ति । ननु 'तत्त्वज्ञानेन एवालम्, किमतदपवादेन ?' इत्याशङ्क्य 'अध्यस्तापवादं विना अधिष्ठानतत्त्वं न ज्ञायते' इत्यत्रापि सतां व्यवहारः प्रमाणमाह–असन्तमिति । असन्तमिति । अविद्यमानमपि अहिमन्तरेण तदपवादं विना अन्ति समीपे सन्तं विद्यमानमपि तं गुणं रज्जु सन्तो विवेकिनोऽपि किनु यन्ति जानन्ति ? नैव जानन्तीत्यर्थः । अतो विचारेण तदपवादोऽप्यावश्यकः इति भावः ।।२८।।

अन्वितार्थप्रकाशिका

तृतीयमाह—त्वमिति ।। स्वात्मानं त्वां परं स्वतो भिन्नं मत्वा परं स्वतो भिन्नं देहादि चात्मानं मत्वा आत्मा परमात्मा पुनः स्वस्माद्बहिरेव मृग्यः अन्वेषणीय इति जनानां समूहः जनता अज्ञा चासौ जनता तस्या अज्ञता अहो आश्चर्यं नहि गृहे नष्टं वस्तु वने सुज्ञैर्मृग्यते इति मृग्य अहो इत्यत्र मृग्योहो इत्यकरणम् अहोज्ञेति संधिश्चार्षः ।। २७ ।। अन्तर्भव इति ।। हे अनन्त ! भवः चिज्जडात्मकं शरीर तस्य अन्तः तन्मध्य एव अतत् त्वदतिरिक्तमात्मतयाऽध्यस्तं प्राकृतं देहादिकं त्यजन्तः अपवदन्त एव सन्तो विवेकिनो भवन्तं भवःभिन्नमात्मानं मृगयन्ति अन्विष्य जानन्ति । असन्तमप्यविद्यमानमपि अहिमन्तरेण तदपवादं विना अन्ति समीपे सन्तं विद्यमानमपि तं गुणं रज्जुं सन्तो विवेकिनोऽपि किमुपयन्ति जानन्ति नैव जानन्ति । अतः असतोऽपवादं विनाऽधिष्ठानतत्त्वं न ज्ञायते ।। २८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवंभूतानां भक्तानां हरेर्ऋणित्वमाह एषामिति । हे देव भवानपि एषां घोषनिवासिनां विश्वफलात्समग्रफलरूपात्त्वतः अपरं अन्यत्किं फलं तेभ्यो एता दास्यति इति नोऽस्माकं चेतोंतःकरणं यत्र कुत्रापि अयत्प्राप्नुवत् अन्वेषयत् सत् मुह्यति ननु मम स्वरूपदानेनानृणीभवेयमिति चेत्तत्राह सतां भक्तानां वेषात् वेषमात्रेणापि सकुला बकाघासुराभ्यां सहिता बालघातिनी पूतनापि त्वामेव अर्पिता तत्स्वरूपमेव प्रापिता तर्हि एषां धामादयः त्वत्कृते त्वदर्थमेव संति तेभ्यः किं दास्यसीति संबधः अत एतेषां त्वमृणवानेव भवसीत्यर्थः । धामगेहं अर्थो धनं आत्मा देहः ।।२७।। ननु तेषां रागादयो भक्तेस्तान् पातयंतीति चेत्तत्राह—तावदिति। हे कृष्ण यावत् ते जनास्तव भक्ता न भवंति रागादयः आदिशब्देन द्वेषकामादयः तावत् स्तेनाः धर्मज्ञानवैराग्यभक्तीनां चौरा घातकाः भवति तावत् गृहमपि कारागृहं बंधनगेहसदृशमस्ति तावन्मोहोप्यंघ्रिनिगडः चरणशृंखलारूपोऽस्ति ।। २८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अज्ञभावादित्यनेनोक्तमज्ञत्वमेव विशदयन् विस्मयते ॥ त्वामिति ॥ परं प्रकृतिपुरुषविलक्षणं प्रकृतिपुरुषान्तःप्रवेशेन तद्गतदोषासंस्पर्शनेन प्रशासनेन च भर्त्तारमित्यर्थः । त्वां आत्मानं प्रत्यगात्मानं मत्वा, चस्त्वर्थः । आत्मानं च प्रत्यगात्मानं तु, परं देहं एव मत्वा, आत्मा परमात्मा त्वं, पुनर्भूयो भूयः, बहिः मृग्यः अज्ञैर्मृग्यते इत्यर्थः । इत्थंभूता अज्ञजनताज्ञता गृहे नष्टस्य वनेऽन्वेषकस्येवाज्ञानिनो जनसमूहस्याज्ञभावः, अहो अत्याश्चर्यरूपा, विवेकिनस्तु जीवान्तरात्मतयैव त्वामुपासत इति भावः ॥ २७ ॥ इदमेव दृष्टान्तमुखेन काक्वोपपादयति ॥ अन्तर्भव इति ॥ हे अनन्त, सन्तो विवेकिनः, भवतीति भवो देहः भवे इत्यन्तर्भवं तस्मिन् देहमध्ये इत्यर्थः । अतत् त्यजन्तः, अतदित्यत्रान्यार्थको नञ् । परमात्मनोऽन्यज्जीवपर्यन्तं पञ्चविंशतितत्त्वजातं निरस्यन्तः सन्त इत्यर्थः । भवन्तं एव, तद्विलक्षणमुक्तविधं त्वामेवेत्यर्थः । मृगयन्ति हि । विविच्योपासते एवेत्यर्थः । 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इत्यादिश्रुतेः । स्वात्मपर्यन्तातत्त्यागेनासंप्रज्ञातसमाधिना भगवन्तमुपासितुं मृगयन्तीति भावः । एवमसंप्रज्ञातसमाधिनोपासने भगवदन्तिकस्थस्वविस्मरणपूर्वं तदन्तरायापादकं स्वात्मध्यानं न कार्यमिति दृष्टान्तेन दर्शयति । सन्तः रज्जुयाथात्म्यज्ञानवन्तो विवेकिनः, अन्ति स्वसमीपे, सन्तं तत्त्वेनैव प्रतीयमान, तं प्रसिद्धं, गुणं रज्जुं, अन्तरेण, रज्जुतां परित्यज्येत्यर्थः । असन्तं अपि अहिं सर्पं, यन्ति किमु । प्रतियन्ति किमित्यर्थः । यथा विवेकिनः संनिहिते गुणेऽहिविलक्षणतया प्रतीयमाने न व्यवधानकारकसर्पबुद्धिं कुर्वन्ति । एवं जीवान्तरात्मतया संनिहिते त्वयि जीवपर्यन्तत्वविलक्षणतया प्रमिते सति तत्र मिथ्यात्वेनापि न जडजीवबुद्धिं सन्तः कुर्वन्ति, किं तु तां विहाय स्वरूपतः स्वभावतश्च तद्विलक्षणं त्वामेवोपासते इति भावः । तस्मादिदं जगदशेषमित्यारभ्यैतच्छ्लोकपर्यन्तं सप्तापि श्लोकाः क्षेपकाः सांप्रदायिकानां प्रीत्यै यथासंप्रदायं व्याख्याताः ॥ २८ ॥

कृष्णप्रिया

हे भगवन् ! आप श्रीकृष्ण ही सर्व की आत्मा है और आप सर्व स्वरूप हैं ऐसे आप को भिन्न मानकर और भगवद्रूप को अपनी आत्मा समझकर आप भगवान को घरपरिवार त्यज के बाहर खोजने के लिये निकल चल पड़ते हैं अहो अज्ञ जन की कहाँ तक अज्ञता ॥ २७ ॥ हे अनन्त ! "अतत् त्यजन्तः" अतत् का तात्पर्य है कि जिन साधनों से श्रीकृष्णचिन्तन ठीक नहीं हो पाता ऐसे "अतत्" साधनों का त्याग करके केवल श्रीकृष्ण के चिन्तन कराने वाले साधनों से हृदय आकाश में विराजमान आप को जो परमभागवतजन खोजते हैं वे ही सत्पुरुष हैं । रज्जू में जो नहीं है फिर भी जो दिखता है ऐसे साँप का भी बिना त्याग किये समीप में रहे हुए गुण--रस्सी को सज्जन कैसे जान सकते हैं ॥ २८ ॥

अथापि ते देव पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि ।
जानाति तत्त्वं भगवन् महिम्नो न चान्य एकोऽपि चिरं विचिन्वन् ॥ २९ ॥
तदस्तु मे नाथ स भूरिभागो भवोऽत्र[१] वान्यत्र तु वा तिरश्चाम् ।
येनाहमेकोऽपि भवज्जनानां भूत्वा निषेवे तव पादपल्लवम् ॥ ३० ॥

कर्दमक्षमा

अन्वयः—अथ अपि देव ? ते पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि भगवन्महिम्नः तत्त्वं जानाति च अन्यः एकः चिरं विचिन्वन् अपि न (जानाति) ॥ २९ ॥ नाथ ! अत्र वा अन्यत्र तु वा तिरश्चां वा सः भूरिभागः भवः अस्तु येन अहं भवज्जनानां एकः अपि भूत्वा तव पादपल्लवं निषेवे ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वेवं ज्ञानैकसाध्ये मोक्षे किमिति भक्तिरुद्बोधिताऽत आह । अथापीति । यद्यपि हस्तप्राप्यमिव ज्ञानमुक्तं तथापि हे देव तव पदांबुजद्वयमध्ये एकदेशस्यापि यः प्रसादलेशोऽपि तेनानुगृहीत एव भगवतस्तव महिम्नस्तत्त्वं जानाति । हे भगवँस्ते महिम्नस्तत्त्वमिति वा । एकोऽपि कश्चिदपि चिरमपि विचिन्वन्नप्यतदंशापवादेन विचारयन्नपीत्यर्थः ॥ २९ ॥ तत्तस्मात् भूरिभागो महद्भाग्यम् । अत्र भवे जन्मनि तिरश्चामपि मध्ये यज्जन्म तस्मिन्वाऽन्यत्र येन भाग्येन भवदीयानां जनानामेकोऽपि यः कश्चिदपि भूत्वा निषेवेऽत्यर्थं सेवेय इति ॥ ३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनराशंकते—नन्विति । एवम् उक्तरीत्या । ज्ञानैकसाध्ये केवलज्ञाननिर्वर्त्ये । 'श्रेयःस्रुतिम्' इति, 'भक्त्याहमेकया लभ्यः' इत्यादिवाक्यैः उद्घोषिता विशेषेण कथिता । यतो भक्तिरेव ज्ञानजनिकाऽतो हेतोः । समासे पुनरुक्तिमाशंक्यावग्रहेणाह—हे इति ।

---

[१] भवेऽत्र—श्रीधर. वंशी. वीर. विज. ।

इहापिशब्दोऽस्यैव भार्येति वक्ष्यमाणैवकारसंबंधवच्चतुर्भिः संबध्यते सूत्रमणिन्यायेनेति । इत्यर्थं इति । अतदंशापवादस्यैव विचारपदार्थत्वादिति भावः । हे देवेति । सर्वप्रकाशक सर्वत्र प्रकाशमानेति । यद्वा —दीव्यति सदा वृंदावने क्रीडतीति । हे भगवन्निति हे निजकारुण्यादिगुणप्रगटनपरेत्यर्थः ॥ किञ्च, तस्य जीवस्य ब्रह्मसुखानुभवस्तु केवलेन त्वद्भक्तिलेशे नापि भवति नान्यथेत्याह— तथापीति । यद्यपि मायामायिकसमस्तांशविच्युतः स्यात्तथा स जीवात्मा तदपि तव पदाब्जप्रसादलेशेनानुगृहीत एव भगवतस्तव यो महिमा महिमशब्दवाच्य ब्रह्म, तस्य तत्त्वं जानाति । तदुक्तं त्वयैव मत्स्यरूपेण—"मदीयं महिमानञ्च परं ब्रह्मेतिशब्दितम् । वेत्स्यस्यनुगृहीतम्मे" इत्यादि । व्याख्यातं च तैः । तथा च श्रीगीतासु –'ज्ञानञ्च मयि संन्यसेत्' इति । ज्ञानमपि त्यक्त्वा तत उर्वरितां भक्तिमेव केवलां बहु मानयंस्तामेवाभ्यसेत् । यो ज्ञानी, तमेव प्रसादलेशरूपो भक्तियोगोऽनुगृह्णतीत्यर्थः । यस्तु फलप्राप्ता सत्यां न साधनोपयोग इति मत्वा ज्ञानं भक्तिञ्च त्यक्त्वा केवलब्रह्मानुभव एवोद्यतः स एकोऽपि मुख्योपि ज्ञानिसहस्रगुरुर्भवन्नपीत्यर्थः । चिरं विचिन्वन् बहुशास्त्राभ्यासयोगाभ्यासाभ्यां विचारयन्नपि ॥ २९ ॥ यतो भवत्पदसेवैव मुक्तिहेतुस्तस्मादिति ॥ भो ब्रह्मन् साध्यसाधनतत्त्वज्ञशिरोमणेस्तुत्यैव व्यंजितलक्षणयोर्भक्तिज्ञानयोर्मध्ये तव कुत्र स्पृहाऽत आह—तदस्त्विति । हे नाथेति संबोधनेनैव व्यंजितायां सत्यामपि दास्यस्पृहायां भो ब्रह्मन् उत्कर्षनिकर्षौ सम्यग्विचार्य्यैव सर्वोत्कृष्टं वस्तु स्पष्टं प्रार्थयस्वेति चेतस एव मे भूरिभागो महदेव भाग्यं मनसा निर्द्धारितमेव वर्त्तते इति भावः । येन भूरिभागेनात्र भवे ब्रह्मजन्मनि वा तिरश्चामपि मध्ये यज्जन्म तस्मिन्वेति । ब्रह्मजन्मारभ्य तिर्यग्योनिपर्यन्तं यावंति जन्मानि संभवंति तेष्वपि क्वापि जन्मनीति भावः । 'गजो गृध्रो वणिक्पथः' इति वचनात्तिर्यग्योनावपि भक्तिश्रवणात् । तिरश्चामपीति बहुवचनेनापिशब्देन च मोक्षाय जलांजलिं दत्त्वा स्वस्य त्वत्रार्थे सहस्रजन्मप्रार्थनापि व्यंजिता । भवदीयानां जनानां मध्ये एको यः कश्चिदपि नितरां साधकत्वसिद्धत्वदशयोः सेवेत । तदेवम् 'नौमीड्य ते' इत्येकेन माधुर्यम्, "अस्यापि देव" इत्यादिभिः, 'तदस्तु मे नाथ' इत्यंतैः पद्यैरैश्वर्यं विवृतवता ब्रह्मणा तन्मध्य एव 'ज्ञाने प्रयासम्' इति 'तत्तेऽनुकम्पाम्' इत्याभ्यां केवलाया भक्तेरुत्कर्षः । 'त्वामात्मानं परं मत्वा' इति, 'अजानतां त्वत्पदवीम्' इत्याभ्यां केवलज्ञानस्याक्षेपः । 'श्रेयःस्रुतिम्' इति, 'परेह भूमन्' इत्याभ्यां केवलयोर्ज्ञानभक्त्योर्वैफल्यसाफल्ये । 'अन्तर्भवेऽनन्त' इति, 'अथापि हे देव' इत्याभ्यां भक्तिमिश्रं ज्ञानम् । 'एवंविधं त्वाम्' इत्यनेन शांतभक्तिः । 'तदस्तु मे' इत्यनेन दास्यभक्तिश्चाभ्यधायि । अतः पर माधुर्यसिन्धावेव निपतिष्यता ब्रह्मणा 'अहोतिधन्याः'इत्यादिभी रागात्मकवात्सल्यादिरतिमन्त एव स्तोष्यंत इति स्तुत्यर्थतात्पर्यनिष्कर्षः । अत्र तोषिणी - मम तु तादृशप्रसादस्य फलं यज्ज्ञानं तस्यापि यत्फलमुपासनं तस्यापि यत्फलं साक्षात्कारः स एव सहसा संवृत्तस्तस्मादेतदेव प्रार्थयते इति । 'नौमि' इत्यादिप्रतिज्ञामेव संगमयन्सर्वं प्रकरणं तादृशे श्रीकृष्ण एव पर्यवसाययन्नाह यावत्समाप्ति । तत्तस्मान्नाथ हे सर्वकामपरिपूरक । पारमेष्ठ्यपदप्रापकं यन्मे भाग्यं तन्महन्न भवति किन्तु स एव भूरिभागः यद्भवज्जनानां मध्ये एकोऽपीति सेवायाः सम्यक्त्वापेक्षया, अत एव निःशब्दः, तत्र च तत्र ब्रह्मजन्मनि, अन्यत्र तत्प्रतियोगिहरिणादितिर्यग्योनौ वा न मम ग्रहः, किं तु त्वद्भक्तावेवेतिवाशब्दाभ्यां सूच्यते । हरिणादियोनौ सेवा च स्नेहेन रजआदिमार्जनायावहेलनादिरूपा गम्या, सा च तद्विधानादृष्टैव किल प्रार्थ्यते । पद्यद्वयमिदमित्थं वा संगमनीयम्—यद्यप्येवं तव महिमाऽथापि त्वत्पदांबुजद्वयस्य यः प्रसादोऽनुग्रहस्तस्य लेशोऽपि यत्र, किमुत पूर्णः, स तेनानुगृहीत एव भवज्जनानामनुगतरूप एकोऽपि कश्चनापि भूत्वेति च ॥३०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यद्यप्येवमपरिच्छिन्नं तन्माहात्म्यं प्रस्फुटमेव तथापि त्वत्प्रसादेनैव तद्विवेकस्य तत्परिसरगमनं स्यान्न त्वन्यथेत्याह— अथापीति । योजनात्र स्पष्टा तत्र चाथापि तव महिम्नस्तत्त्वं जानातीत्यनेन पूर्वप्रकरणे विवर्त्तवादमयव्याख्यानयनं च प्रस्फुटमेव पदार्थास्तु दर्श्यन्ते देव ! हे सर्वप्रकाशक ! सर्वत्र प्रकाशमानेति वा । यद्वा, दीव्यति श्रीवृन्दावने सदा क्रीडतीति देवस्तस्य सम्बोधनं प्रसादः कृपा तस्य लेशेनानुगृहीत एवेति "यमेवैष वृणुते" इत्यादिश्रुतिं सूचयति, भक्त्या तु पदाम्बुजशब्दप्रयोगः हि निश्चितं भगवन् ! हे निजकारुण्यादिगुणप्रकटनपरेत्यर्थः । अयं प्रसादे हेतुरूह्यः महिम्नः स्फुटमस्यापि देववपुष इत्यादिभिरपरिच्छेद्यतयोपक्रान्तस्य "को वेत्ति भूमन् ! इत्यादिना तथा भ्यस्तस्यापि तत्त्वं स्वरूपं यत्किञ्चिदनुभवति अन्यः प्रसादहीनः एकः एकाकी निःसङ्गः सन्नपीत्यर्थः । श्रेष्ठो रुद्रादिरपीति वा विचिन्वन् तत्त्वं कीदृक् कियद्वेति शास्त्राभ्यासेन विचारयन् योगाभ्यासेन च मृगयन्नपीत्यर्थः । लेशेत्युक्तिः तस्य वर्द्धिष्णोः क्रमेण पूर्णप्राप्त्यभिप्रायेण ॥ २९ ॥ मम तु तादृशप्रसादस्य फलं यज्ज्ञानन्तस्यापि यत्फलम् उपासनं तस्यापि फलं यत् साक्षात्कारः स एव सहसा संवृत्तस्तस्मादेतदेव प्रार्थय इति नौमीत्यादि प्रतिज्ञामेव सङ्गमयन् सर्वं प्रकरणं तादृशे श्रीकृष्ण एव पर्यवसाययन्नाह—यावत्समाप्ति, तत्तस्मात् नाथ ! हे सर्वकामपरिपूरक ! पारमेष्ठ्यपदप्रापकं यन्मम भाग्यं तन्महन्न भवति किं तु स एव भूरिभागः महद्भाग्यं यत् भवज्जनानाम् एकोऽपीति सेवायाः सम्यक्त्वाद्यपेक्षया अत एव निशब्दः तत्र च तत्र ब्रह्मजन्मनि अन्यत्र तत्प्रतियोगिहरिणादितिर्यग्योनौ वा न ममाग्रहः किं तु त्वद्भक्तावेवेति वा शब्दाभ्यां सूच्यते हरिणादियोनौ सेवा च स्नेहेन रजआदिमार्जना यावहेलनादिरूपा गम्या सा च तद्विधानां दृष्टैव किल प्रार्थ्यते पद्यद्वयमिदमित्थं वा सङ्गमनीयं यद्यप्येवं तव महिमा तथापि त्वत्पदाम्बुजद्वयस्य यः प्रसादोऽनुग्रहः तस्य लेशोऽपि यत्र किमुत पूर्णः सः तेनानुगृहीत एवेति भवज्जनानामनुगतरूपः एकोऽपि कश्चन अपि भूत्वेति च ॥ ३० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यद्यप्येवं त्वन्माहात्म्यं प्रस्फुटमेव, तथापि त्वत्प्रसादेनैवानुभूतं स्यात्तथेत्याह—अथापीति । देव ! हे सर्व्वप्रकाशक ! सर्व्वत्र प्रकाशमानेति वा । यद्वा, दीव्यति श्रीवृन्दावने सदा क्रीडतीति देवस्तस्य सम्बोधनम्; यद्वा, देवेति तथैव पदाम्बुजविशेषणम् । प्रसादः प्रसन्नता कृपा वा, तस्य लेशेनानुगृहीत इति । यद्वा, प्रसादस्तत्सम्बन्धितुलस्यादिमहाप्रसादः । हि निश्चितम् । भगवन् ! हे निजकारुण्यादिगुणप्रकटनपरेत्यर्थः,—अयं प्रसादे हेतुरूह्योऽन्यः प्रसादहीनः । यद्वा, पूर्व्वं भक्तेः प्रकृतत्वात् तदन्तरापतितवितर्ककुलपरिहारे सत्यपि निरन्तरश्लोके भक्तेरेव प्रार्थनाद्भक्तिलक्षणस्य महिम्न इति ज्ञेयम् । तत्त्वम्—कीदृक्, कियान् वेति । एक एकाकी निःसंगः सन्नपीत्यर्थः, श्रेष्ठो रुद्रादिरपीति वा, विचिन्वन् शास्त्राभ्यासेन विचारयन् योगाभ्यासेन च मृगयन्नपीत्यर्थः । यद्यपि सम्पूर्णप्रसादेनैव तत्तत्त्वज्ञानं स्यात्, तथापि लेशेत्युक्तिस्तस्य दौर्लभ्याद्यभिप्रायेण ।। २९ ।। त्वत्प्रसादस्तु त्वद्दास्ये सत्येव सिध्यतीति दास्यं प्रार्थयते—तदिति । नाथ ! हे सर्व्वकामपरिपूरक ! पारमेष्ठ्यपदप्रापकं यन्मम भाग्यम्, तन्महद्भाग्यं न भवति, किन्तु स एव भूरिभागो महद्भाग्यम् – त्वज्ज्येष्ठपुत्रस्य मम स एव श्रेष्ठो भाग इति शेषार्थः । भवज्जनानामेकोऽपीति सेवायाः सम्यक्त्वाद्यपेक्षया, अतएव निशब्दस्तत्र चात्र ब्रह्मजन्मन्यन्यत्रान्यस्मिन् ब्रह्मजन्मनि वा। यद्वा, अन्यत्र तत्प्रतियोगिकीटादितिर्य्यग्योनौ वा न ममाग्रहः, किन्तु त्वद्भक्तावेवेति, अत्रान्यत्रशब्दाभ्यां सूच्यते । अन्यत्तैर्व्याख्यातम् । यद्वा, त्वत्प्रसादस्तु तावकानां निषेवयैव सिध्येदिति याचते–तदिति । एक इति पूर्व्ववत्, तव भवतो ये जनाः सद्यो भक्तौ प्रवृत्ता नूतनभक्ता इत्यर्थः, तेषामपि पादपल्लवम् ।। ३० ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

एवं एतावता प्रघट्टकेन स्वरूपोपायसाध्यानि तत्त्वतः प्रतिपाद्य श्रीभगवन्नारायणस्य श्रीकृष्णस्य शरणागतिमेव गुरू करोति—अथापीति । हे देव ! लोकानुग्रहार्थं क्रीडनप्रवृत्त ! तव पदाम्बुजसम्बन्धिद्वयमन्त्रप्रसादलेशेनाऽनुगृहीत एव जीवः श्रीभगवतस्तव महिम्नस्तत्त्वं जानाति नान्यः अप्रपन्नो न जानातीति सर्वोत्तमार्त्तप्रपत्त्यभावेऽपि दृप्तप्रपत्त्यापीत्यतः लेशेनेत्युक्तम् एकोऽपि मुख्योपि शास्त्रज्ञेषु व्यपदेश्यो ऽपीत्यर्थः । चिरं विचिन्नपि अत्र "शास्त्रज्ञानं बहुक्लेशं बुद्धेश्चलनकारणम्" "मनुष्याणां सहस्रेषु.०० कश्चिन्मां वेत्ति तत्त्वतः" श्रीमन्नारायण–परब्रह्मत्वेनेत्यर्थः । षष्ठे परीक्षिता च जन्तवः रजोभिः समसङ्ख्या जीवाः तेषु श्रेयोविचेष्टाः ज्ञानिनः तेषु मुमुक्षवः तेषु कश्चिदविद्यानिवृत्तिमान् तेष्वपि सिद्धाः तेष्वपि सर्वेष्वपरिमितेषु कोटिष्वपीत्युक्तेः एकः षष्ठकक्षायां श्रीनारायणपरायणः सुदुर्लभ इत्युक्तः एवञ्च प्रपन्न एव श्रीमन्नारायणस्य तत्त्वं जानातीति सुष्ठूक्तं यतः भक्तानाम् "अनेकजन्मसंसिद्धस्ततो याति पराङ्गतिम्" इत्युक्त्या प्रारब्धक्षयान्ते मुक्तिरुक्ता, प्रपन्नानां तु "सकृदेव प्रपन्नाय, अहं त्वां सर्वपापेभ्यः" सकृत्कृतः शास्त्रार्थः" इत्याद्युक्तिभिः "दृप्तानामपि जन्तूनां जन्मान्तरनिवारिणी" इत्युक्तेश्च एतद्देहपातानन्तरं मुक्तिरित्याचार्य्यैर्निर्णीतत्वाच्चेत्यलं पल्लवितेन । प्रकृते तु चिरं विचिन्वन्नपि उपायं शास्त्रेषु न जानात्येवेति भावः ।। २९ ।। प्रपत्तिरूपमन्त्रालाभे भक्तिरूपं ज्ञानं प्रपत्तिरूपञ्च ज्ञानं दुर्लभमुक्त्वा स्वस्य एतादृशज्ञानलाभमेवाशास्ते—तदस्तु मे नाथेति । हे स्वामिन् ! अनेन स्वामिसेवकभावसम्बन्ध उक्तः तत्तस्मात् मे स भूरिभागः भाग्यमंशो वा त्वद्वरणीयताहेतुर्गुणविशेषः प्रपत्तिरूपो ऽस्तु अत्र भवे ब्रह्मजन्मनि अन्यत्र भवे वा मनुष्यादिजन्मनि तिरश्चां भवे वा अनेन प्रपत्तेः सर्वाधिकारित्वमुक्तं येन शरणागतिरूपोपायेन एकोऽपि असहायोऽपि अभक्तत्वात् कर्मज्ञानभक्तिसहायहीनोऽपि भवज्जनानां श्रीरामश्रीकृष्णभक्तानां मध्ये भूत्वा भवनं जन्म भक्ताख्यं लब्ध्वा दास्यसंवलितं नाम च लब्ध्वा तव पादपल्लवं निषेवे नितरां सेवे इति –

"पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम्" ॥

इत्युक्तेः वैष्णवो भागवत आचार्यादिः शरणागतिमार्गो वा पश्वादीनां जन्मान्तरीयस्य तस्य कल्पनात् अविरोध इति सर्वथा प्रपत्त्येव मोक्ष इति राद्धान्तः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, केचिदज्ञाः सन्तः संसरन्ति केचित्तु विवेकिनः सन्तो मामुपास्य तरन्तीत्युक्तं कस्तर्हि विवेकाविवेकहेतुरित्यत्र भवदनुग्रहविशेषभावाभावादेवेत्यभिप्रायेणाह—तथापीति । यद्यपि केचिदज्ञाः संसरन्ति केचिद्विवेकिनः सन्तस्तरन्ति तथापि हे देव ! तव पदाम्बुजद्वयस्य प्रसादलेशेनानुगृहीत एव पुमान्प्रणत्यालम्बनस्य पदाम्बुजद्वयस्य तत्प्रसादमूलत्वादेव मुक्तिः भगवतस्तव महिम्नस्तत्त्वं याथात्म्यं जानाति अन्योऽननुगृहीतस्तु एकोऽपि निर्जनदेशस्थोऽपि चिरमपि विचिन्वन्न च नैव जानाति हि ।। २९ ।। कस्तर्हि मदनुग्रहहेतुरित्यत्र त्वद्भक्तजनसङ्गतिविशेष एवेत्यभिप्रयंस्तमेवात्मनः प्रार्थयते, तदस्त्विति । तत् तस्मात्त्वदनुग्रहस्यैव विवेकहेतुत्वात् हे देव । स भूरिभागः महाभाग्यं महांस्तु कोऽसौ येन भाग्येनाहमत्र भवे चतुर्मुखजन्मन्यन्यत्र तु वा मनुष्यजन्मनि किं बहुना तिरश्चां मध्ये वा भवज्जनानां केनापि प्रकारेण त्वदाभिमुख्यार्हाणां जनानां मध्ये एकोऽपि यः कश्चिदपि भूत्वा तव पादपल्लवं निषेवे नितरां सेवे तावन्मां भवज्जनान्तर्भूतत्वेनाऽनुगृहाणेति भावः ।। ३० ।।

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

अथैवमपि संसारनिवृत्तिरशक्या एव तथापि त्वत्प्रसादात्तत्त्वज्ञानेन सुशका तन्निवृत्तिरित्याह—अथापीति । हे देव, द्योतनशील ! अथापि तव महिमा ज्ञातुमशक्य इति एवमपि तथाऽपि ते पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि निश्चितं तव पदाम्बुजसेवया त्वत्प्रसादात् भगवतस्तव महिम्नस्तत्त्वं जानाति जानात्येव न चान्य एकोऽपि त्वच्चरणारविन्दसेवाविमुखश्चिरं विचिन्वन्नपि चिन्तयन्नपि न जानातीत्यर्थः । तदुक्तं प्रथमे—

"स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः । यो मायया सन्ततयाऽनुवृत्या भजेत तत्पादसरोजगन्धम्" ॥ इति ।

त्वय्यभक्ता न जानन्तीत्यत्र शुकवाक्यं द्वितीये —

"भूयो नमस्ते ऋषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम् ।
निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रस्यते नमः" ॥ इति २९ ॥

अथ तस्मात्त्वत्कृपाकटाक्ष एव त्वन्महिम्नस्तत्त्वयाथात्म्यज्ञाने कारणं नान्यत् तस्मात्कस्यामपि योनौ मम संसृतावपि तव पादपद्मसेवास्त्विति प्रार्थयन्नुपसंहरति—तदस्त्विति । हे नाथ ! तस्मान्मे स एव भूरिभागः महद्भाग्यं मे अस्तु किं तदित्याह, अत्र भवे चतुर्मुखजन्मनि वा अथवा अन्यत्र मनुष्यादौ, अथवा तिरश्चां पशुपक्षिणां मध्ये जन्म स्यादिति शेषः । स भूरिभागः येन भाग्येनाहं भवज्जनानां तव पादभक्तानां एकोऽपि कश्चिदपि भूत्वा तव पादपल्लवं निषेवे नितरां सेवयामि समुद्रे गङ्गौघ इव निरन्तरं चिन्तयामीत्यर्थः । ननु, देवादौ जन्म भवतु नाम भगवत्सेवानुपयोगिनि तिर्यगादौ कथं जन्म प्रार्थयतीति चेन्न, भगवद्भक्तियोगिनां सहवासो तिरश्चामपि संसारनिवर्त्तकः तदुक्तम्—

"पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम्" ॥ इति ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तथापि तद्विवेकस्य त्वत्पर्यन्तगमनं त्वत्प्रसादेनैव स्यादित्याह—अथापीति । भक्त्या पदाम्बुजशब्दप्रयोगः लेशेत्युक्तिस्तस्य वर्द्धिष्णोः क्रमेण पूर्णप्राप्त्यभिप्रायेण महिम्नः ऐश्वर्यमाधुर्यादिरूपमाहात्म्यस्य मम तु तादृशप्रसादस्य फलं यज्ज्ञानं तस्यापि यत् फलमुपासनम् तस्यापि यत् फलं साक्षात्कारः स एव सहसा संवृत्तस्तस्मादेतदेव प्रार्थय इति ॥ २९ ॥ नौमीत्यादिप्रतिज्ञामेव सङ्गमयन् सर्वप्रकरणं श्रीकृष्ण एव पर्यवसाययितुमाह—तदस्त्वित्यादिना । यावत्समाप्ति, अन्यत्र हरिणादियोनौ वा सेवा चात्र स्नेहेन रज आदिमार्ज्जना यावहेलनादिरूपा सा च तद्विधानां दिष्ट्यैव किल तत् प्रार्थ्यते ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवम् विज्ञयोः पन्थानं दर्शयित्वा विज्ञस्य चान्वेषणमात्रम्, न तु स्वरूपतो ज्ञानमिति यदुक्तम्, तत्तु व्यतिरेकमुखेन पुनर्निश्चाययति अथापीत्यादि । अत्र-विज्ञयोर्वर्त्म-दर्शनानन्तर यदुच्यते, तदवधीयतामित्यानन्तर्यार्थवचनोऽथशब्दः । तत्स्वरूपज्ञानयोग्यता त्वां विचिन्वतोऽपि नास्तीति स्वरूपज्ञातुरसम्भावनायां स्वरूपज्ञाता कोऽप्यस्तीति पुनः सम्भावनायामपि-शब्दः । हे देव ! सर्वजिगीषाशालिन् ! ते तव पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि प्रसादस्य लेशेनापि, किमुत सम्यक्-प्रसादेन, एव हीति निर्द्धारणाधिक्यम् । भगवत्तत्त्वज्ञानं न लौकिकप्रमाणागम्यम्, तथाहि न तावत् प्रत्यक्षस्य साक्षात्कारि, प्रमाकरणत्वात्, नाप्यनुमानगम्यम्, तस्य च प्रत्यक्षोपजीवित्वात्; नाप्युपमानगम्यम्,—सादृश्याभावात्, नापि शब्दगम्यम्—तस्य शक्तिलक्षणाभ्यामविषयत्वात् । तेनालौकिकं किमपि प्रमाणान्तरमन्वेषणीयम्, तच्च भगवत्प्रसादजन्यानुभवः । तथा चोक्तं स्वयमेव—(भा० २।९।३१) "यावानहं यथाभावो यद्रूपगुणकर्मकः । तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ।।" इति । तेन सम्यगेवोक्तम्—न चान्य एकोऽपि चिरं विचिन्वन्नपि, अन्यस्त्वत् प्रसादाभाजनम्, एकः प्रधानतमोऽपि सर्वशास्त्रतत्त्वज्ञोऽपीत्यर्थः ॥ २९ ॥ तस्मादवगतम्, हे नाथ ! भवदनुगृहीता एव भवत्तत्त्वविदः, ततो भवदनुगृहीतीभवितुं क्व मे तादृशी योग्यता ? भवज्जनानां मध्ये या कश्चिदपि भूत्वा भजनं करोतीत्याह—तदस्तु मे नाथेत्यादि । तत्तस्मात् हे नाथ ! स भूरिभागो महद्भाग्यं मेऽस्तु, कोऽसौ ? तत्राह—येन भूरिणा भागेन भवज्जनानां मध्ये एकोऽपि भूत्वा तव पादपल्लवं निषेवे, अथवा, तव विभूतिमध्ये एकोऽपि मुख्यतमोऽपि भूत्वा भवज्जनानां पादपल्लवं निषेवे नितरां सेवे ॥ ३० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अथापीत्यादि । अथ ज्ञानाद्यनन्तरं हि देव ! ते तव पदाम्बुजद्वयस्य प्रसादलेशेनाप्यनुगृहीत एव हि एव हीति निर्धारणातिशये, जानात्येव हि निर्धारणशब्दावुत्तरत्रानुवर्तनीयौ । हे भगवन् ! न चान्य एकोऽपि मुख्योऽपि चिरमेव हि विचिन्वन्नेव हि । एतेन ज्ञानमार्गमनूद्य भक्तिरेव परमपुरुषार्थ इति सिद्धान्तितम् ॥ २९ ॥ भो ब्रह्मन् ! किं तेऽभिलषितम् ? ज्ञानं भक्तिर्वा ? तत्राह—तदस्त्वित्यादि । एकोऽपि ब्रह्मापि भूत्वा; यद्वा, भवज्जनानां मध्ये एकोऽपि यः कोऽपि भूत्वा तव एकोऽपि मुख्योऽपि भवज्जनानां पादपल्लवमिति वा ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च, तस्य जीवात्मनो ब्रह्मसुखानुभवस्तु केवले न त्वद्भक्तिलेशेनापि भवति नान्यथेत्याह—अथापीति । यद्यपि मायामायिकसमस्तांशविच्युतः स्यात् तथा स जीवात्मा तदपि तव पदाब्जप्रसादलेशेनानुगृहीत एव भगवतस्तव यो महिमा महिमशब्दवाच्यं ब्रह्म तस्य तत्त्वं जानाति यदुक्तं त्वयैव मत्स्यरूपेण—

"मदीयं महिमानं च परब्रह्मेतिशब्दितम् । वेत्स्यस्यऽनुगृहीतं मे संप्रश्नैर्विवृत्तं हृदि" ।। इति ।

व्याख्या च तत्रत्या श्रीस्वामिपादानां मे मया अनुगृहीतं तुभ्यं प्रसादीकृतं परब्रह्म वेत्स्यसीति अत्र प्रसादलेशो गुणीभूतभक्तियोगो ज्ञानिनां पूर्वसिद्धो वर्तते एव तेन अनुगृहीत इति अविद्यायामुपरतायां विद्यायाश्चोपरमारम्भे "ज्ञानं च मयि संन्यसेत्" इति भगवदुक्तेर्ज्ञानमपि त्यक्त्वा तत उर्वरितां भक्तिमेव केवलां बहुमानयंस्तामेवाभ्यसेत् यो ज्ञानी तमेव प्रसादलेशरूपो भक्तियोगोऽनुगृह्णातीत्यर्थः । यस्तु फलप्राप्तौ सत्यां न साधनोपयोग इति मत्वा ज्ञानं भक्तिं च त्यक्त्वा केवलब्रह्मानुभव एवोद्यतः स्यात् स एकोऽपि मुख्योऽपि ज्ञानिसहस्रगुरून्नभवन्नपीत्यर्थः । चिरं विचिन्वन् बहुशास्त्राभ्यासयोगाभ्यासाभ्यां विचारयन्नपि ।। २९ ।। भो ब्रह्मन् ! साध्यसाधनतत्त्वज्ञशिरोमणे ! स्तुत्यैव व्यञ्जितलक्षणयोर्भक्तिज्ञानयोर्मध्ये तव कुत्र स्पृहेत्यत आह—तदस्त्विति हेनाथेति सम्बोधनेनैव व्यञ्जितायां सत्यामपि दास्यस्पृहायां भो ब्रह्मन् ! उत्कर्षनिकर्षौ सम्यक्तया विचार्यैव सर्वोत्कृष्टं वस्तु स्पष्टं प्रार्थयस्वेति चेत् स एव भूरिभागो महदेव भाग्यं मनसा निर्द्धारितमेव वर्त्तत इति भावः । येन भूरिभागेन अत्र भवे ब्रह्मजन्मनि वा तिरश्चामपि मध्ये यज्जन्म तस्मिन् वेति ब्रह्मजन्मारभ्य तिर्य्यग्योनिपर्य्यन्तं यावन्ति जन्मानि सम्भवन्ति तेष्वपि क्वापि जन्मनीति भावः । गजो गृद्धो वणिक्पथ इति वचनात्तिर्य्यग्योनावपि भक्तिश्रवणात् तिरश्चामपीति बहुवचनेनापि शब्देन च मोक्षाय जलाञ्जलिं दत्त्वा स्वस्य अत्रार्थे सहस्रजन्मप्रार्थनापि व्यञ्जिता भवदीयानां जनानां मध्ये एको यः कश्चिदपि नितरां साधकत्वसिद्धत्वयोर्दशयोः सेवे तदेवं नौमीड्य ! ते इत्येकेन माधुर्य्यम् अस्यापि देवेत्यादिभिस्तदस्तु मे नाथेत्यन्तैः पद्यैरैश्वर्य्यं विवृतवता ब्रह्मणा तन्मध्य एव ज्ञाने प्रयासमिति तत्तेऽनुकम्पामित्याभ्यां केवलायाः भक्तेरुत्कर्षः "त्वामात्मानं परं मत्वेति, अजानतां त्वत्पदवीम्" इत्याभ्यां केवलज्ञानस्याक्षेपः श्रेयःसृतिमिति पुरेह भूमन्नित्याभ्यां केवलयोर्ज्ञानभक्त्योः क्रमेण वैफल्यसाफल्ये अन्तर्भवेऽनन्तेति अथापि ते देवेत्याभ्यां भक्तिमिश्रं ज्ञानम् एवम्विधं त्वां सकलात्मनामित्यनेन शान्तभक्तिः तदस्तु मे इत्यनेन दास्यभक्तिश्चाभ्यधायि अतः परन्तु माधुर्य्यसिन्धावेव निपतिष्यता ब्रह्मणा अहोऽतिधन्या इत्यादिभीरामात्मकवात्सल्यादिरतिमन्त एव स्तोष्यन्ते इति स्तुत्यर्थतात् पर्य्यनिष्कर्षः ।। ३० ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यद्यपि साक्षात्परमपुरुष एव सर्वदृग्गोचरतया स्थितोऽथापि भगवन्महिम्नस्तत्त्वं ते पदाम्बुजद्वयप्रसादलेशानुगृहीत एव जानाति अन्यस्तु एकोऽपि उपायज्ञेषु मुख्योऽपि चिरं विचिन्वन्न जानाति अनेन भगवत्पदाम्बुजद्वयप्रसादलेशस्यैव भगवज्ज्ञाने मुख्यहेतुत्वमुक्तम् ।। २९ ।। हे नाथ, प्रार्थनीय ! तस्मात् अत्र भवे ब्रह्मजन्मनि तिरश्चामपि मध्ये अन्यत्र मनुष्यादौ वा यज्जन्म तस्मिन् येन भूरिभागेन तत्तेषां ते पदाम्बुजद्वयप्रसादलेशानुगृहीतानां भवज्जनानां भागवतानां मध्ये एकोऽपि यः कश्चिदपि भूत्वा तव पादपल्लवं निषेवे नितरां सेवेयं स भूरिभागः महद्भाग्यं मे ममापि अस्तु ।। ३० ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु गुरूपलब्धया अन्तर्याम्युपनिषदा मे परमात्मतां विदित्वा संसारं तरिष्यन्ति, किं "विबुध्य भक्त्यैवे"ति मत्कथाश्रवणादि भक्त्याग्रहेणेति चेत्तत्राह अथेति । यद्यपि सा उपनिषल्लब्धा तथापि कथाश्रवणादिहेतुकेन ते पदाम्बुजद्वयस्य प्रसादलेशेनाप्यनुगृहीत एव सन् जनो महिम्नस्तत्त्वं स्वरूपं जानाति; न चान्यस्तद्धेतुकतत्प्रसादलेशशून्य एकोऽतिपाण्डित्येन मुख्यस्तामुपनिषदं चिरं विचिन्वन् विचारयन्नपि तथा च भक्त्यैव निस्तारो ज्ञानन्तु विषतन्तुन्यायेन तदेतदेवोत्पद्येतेति किं तदाग्रहेणेति ।। २९ ।। एवं विरञ्चिर्माधुर्यैश्वर्यगुणिकां स्तुतिं हरेर्विधाय तस्मिन् भक्तिमेव मुख्यापायमभिधाय तामेव प्रार्थयते—तदिति । हेनाथ गोपालस्वामिन् । स भूरिभागो मे अस्तु येनाहमत्र भवे ब्रह्मजन्मनि "गजो गृध्रो वणिक्पथ" इति तिर्यक्योनावपि भक्तिस्मरणात् तिरश्चामपि मध्यो यो भवस्तस्मिन् वैतद्भवादनात्र भवज्जनानामेको भूत्वा तव पादपल्लवं निषेवे "नीचानुसन्धिर्भक्तिवर्द्धन" इति तिरश्चामित्युक्तं कुत्रापि जन्मास्तु तव भक्तिश्च भूयादिति एवनुक्तं श्रीनारदं प्रति जितन्तस्तोत्रे—यत्र कुत्र कुले वासो येषु केषु भवोऽस्तु मे । तव दास्यैकभावे स्यात् सदा सर्वत्र मे रतिः ।। इति ।। ३० ।।

श्रीसुबोधिनी

यद्यप्येवम्भावनान्तःकरण उचिता तथापि भजनमार्गव्यतिरेकेण तच्छास्त्रव्यतिरेकेण च भगवन्माहात्म्यं न परिज्ञातं भवतीति केवलचिन्तनं तथा नोपयोगाय भगवदाविर्भावं सम्पादयति नापि प्रपञ्चनिवृत्तिमित्याहा**थापीति**, हे **देव ते पदाम्बुजद्वय-**

प्रसादलेशेनैवानुगृहीतो भगवन्महिम्नस्तत्त्वं जानाति बहूनां मध्य **एकोपि चिरमपि विचिन्वन्नन्यो न जानाति** तस्मादावश्यकत्वाल् लाघवाच्च **भगवन्मार्गेणैव भगवान् सेव्यो नान्य इतिशास्त्रार्थान् मम भगवद्भक्तेषु जन्मास्त्विति** प्रार्थयते **तदस्तु मे नाथेति,** हे **नाथ**, भक्तिमार्गानुसारेण सम्बोधनं, **स भूरिभागो भवो मेस्तु अत्र गोकुले**न्यत्र वा, कि बहुना ? **तिरश्चाम**पि मध्ये, **येन** भवने जन्म**नाहमपि भवज्जनानां** मध्य **एको भूत्वा तव पादपल्लवं निषेवे**, अन्यथा **विजातीयैः सह भक्ता भजनं न कुर्वन्ति** ।। ३० ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवम्विधज्ञानेनैव चेन्मोक्षो भवति तदा तत्र तत्र भक्तिः किमित्युद्घोषितेत्याशङ्क्याह—अथापीति । यद्यपि ज्ञानं सुलभमिवोक्तमथापि हे देव ! नानाविधसृष्ट्यादिक्रीडापरस्य ते तव पदाम्बुजद्वयस्य यः प्रसादलेशस्तेनानुगृहित एव पुमान् भगवतस्तव महिम्नस्तत्त्वं जानाति अन्यस्त्वद्भक्तिहीनस्तु एकोऽपि निर्जने देशे एकाकी स्थितोऽपि चिरं बहुकालं विचिन्वन् अतदंशापवादेन शास्त्रबलेन विचारयन्नपि तन्नैव जानातीत्यन्वयः "भक्त्या मामभिजानन्ति यावान्यश्चास्मि तत्त्वतः" इति शास्त्रमत्र प्रमाणं सूचयति, हीति ।। २९ ।। स्वामिनस्तव दासे मय्यनुग्रह एव युक्त इत्याशयेन सम्बोधयति–नाथेति । यस्मात्त्वद्भक्तिहीनस्य न पुरुषार्थसिद्धिस्तत्तस्मादत्र भवे अस्मिन् ब्रह्मजन्मनि कर्मवशात्तिरश्चाम्पश्वादीनामपि मध्ये यज्जन्म तस्मिन्वापि जन्मनि स एव मे भूरिभागो महद्भाग्यमस्तु येन भाग्येनाहं भवज्जनानां मध्ये एको यः कश्चिदपि भूत्वा तव पादपल्लवं नितरां सेवे इति ।। ३० ।।

अन्वितार्थप्रकाशिका

अथापीति ।। यद्यपि ज्ञानं सुलभमिवोक्तमथापि हे देव ! ते तव पादाम्बुजद्वयस्य यः प्रसादलेशस्तेनानुगृहीत एव पुमान् भगवतस्तव महिम्नस्तत्त्वं हे भगवन्निति संबुद्धिर्वा जानाति अन्यस्त्वद्भक्तिहीनस्तु एकोऽपि निर्जने देशे एकाकी स्थितोऽपि चिरं बहुकालं विचिन्वन् अतदंशापवादेन शास्त्रबलेन विचारयन्नपि तन्नैव जानाति ।। २९ ।। तदस्तु इति ।। हे नाथ ! यस्मात्त्वद्भक्तिहीनस्य न पुरुषार्थसिद्धिस्तत्तस्मादत्र भवे अस्मिन् ब्रह्मजन्मनि कर्मवशात्तिरश्चां पश्वादीनामपि मध्ये यज्जन्म तस्मिन्वापि जन्मनि स एव मे भूरिभागो महद्भाग्यमस्तु येन भाग्येनाहं भवज्जनानां मध्ये एको य कश्चिदपि भूत्वा तव पादपल्लवं नितरां सेवे ।। ३० ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यद्धरेरेकांतिकभक्तऋणित्वमुक्तं तस्य मनुष्यसदृशतया वर्त्तनेन निवृत्तिमाह प्रपंचमिति हे प्रभो प्रपन्नानां शरणागतानां जनतानां जनसमूहानां आनंदसंदोहं सुखपुंजं अनवधिकातिशयानंदमित्यर्थः प्रथितुं प्रथयितुं विस्तारयितुं निःप्रपंचोऽपि मनुष्यादिभावरहितोऽपि भूतले प्रपंचं पुत्रत्वशिष्यत्वबंधुत्वादिमनुष्यप्रभृतिभावं विडंबयसि अनुकरोषि पुत्रत्वादिभावेन तेभ्योतिशयानंदप्रदानत्वात्तवानृणित्वमिति भावः ।। २९ ।। संप्रति स्तुतिमुपसंहरन्नाह तव वैभवं योगैश्वर्यं मे मम मनआदीनां न गोचरं समग्रतया प्रत्यक्ष्यं न भवति ।। ३० ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

केचिदज्ञाः सन्तः संसरन्ति केचित्तु विवेकिनः सन्तः मामुपास्य तरन्ति इत्युक्तं कस्तर्हि विवेकाविवेकहेतुरिति चेदत्र भवदनुग्रहविशेषभावाभावावेवेत्यभिप्रायेणाह ।। अथापीति ।। अथापि यद्यपि केचिदज्ञाः संसरन्ति केचिद्विवेकिनः सन्तः तरन्ति तथापीत्यर्थः । हे देव, ते तव, पदाम्बुजद्वयस्य यः प्रसादलेशस्तेनानुगृहीतः पुमान् एव, प्रणत्यालम्बनस्य पदाम्बुजद्वयस्य तत्प्रसादमूलत्वादेवमुक्तिः । भगवन्महिम्नः भगवतस्तव महिम्नः, तत्त्वं याथात्म्यं, जानाति हि अन्यः अननुगृहीतस्तु, एकोऽपि निर्जनदेशस्थोऽपि, बहुकालमपि विचिन्वन् सन्नपि, न च नैव जानातीत्यर्थः ।। २९ ।। कस्तर्हि मदनुग्रहहेतुरित्यत्र त्वद्भक्तजनसंगतिविशेष एवेत्यभिप्रयंस्तमेवात्मनः प्रार्थयते ।। तदस्त्विति ।। तत्तस्मात् त्वदनुग्रहस्यैव विवेकहेतुत्वात्, हे नाथ स्वामिन्, येन भाग्येन, अहं, अत्र भवे चतुर्मुखजन्मनि, अन्यत्र तु वा मनुष्याणामेव जन्मनि वा, किं बहुना । तिरश्चां मध्ये वा, भवज्जनानां येन केनापि प्रकारेण त्वदाभिमुख्यार्हाणां जनानां मध्ये, एकोऽपि यः कश्चिदपि भुत्वा, तव पादपल्लवं निषेवे नितरां सेवे, तत्तथाविधः, सः भूरिभागः महाभाग्यं, मे मम, अस्तु । मां भवज्जनान्तर्भूतत्वेनानुगृहाणेति भावः ।। ३० ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तदस्त्विति : १०.१४.३०.

भूभारक्षपणाय शेषशयनो नारायणोऽयं स्वयं यद्भूयोऽवतरिष्यतीह धरणौ तत्तत्प्रियार्थं सुराः ।
यूयं यात सयोषितोऽचिरमिति प्राघोषयन्नप्यलं मोहान्नाभवमंशभागहमहो धिङ् मां हितत्यागिनम् ।। ३३ ।।
धिग् ज्ञानं मम नित्यवेदपठनं धिक् सत्यलोकस्थितिं वृद्धत्वं वयसोऽपि धिक् च धिगिमां सर्वज्ञताहङ्कृतिम् ।
स्त्रीबालैरनुभूयतेऽक्षिभिरहो त्वद्रूपमेतद्वरं येनावैक्षि मया न जातु सकृदप्यर्वागितः सौख्यदम् ।। ३४ ।।

कृष्णप्रिया

हे देव "निज भक्तजनों के हृदय कमल में नित्य दर्शन देने वाले दयानिधि" हे देव ! आप के स्वरूपज्ञान की महिमा ऐसी शक्तिशालिनी है जिससे संसार का नाश हो ही जाता है–लेकिन आप के कोमल चरण युगल कमलों का तनिक भी अनुग्रह-प्रसाद को जो भक्त जन पा लेता है वही आप की महिमा के महत्व को जान लेता है लेकिन कोई योग-याग-त्याग-वैराग्य–ज्ञान आदि साधनाभिमान से आप का चिरकालपर्यन्त कितना भी चिन्तन करता रहे फिर भी आप की महिमा को जान नहीं पाता ॥ २९ ॥ अब यही अभ्यर्थना है कि हे नाथ ? इस गोकुल में-व्रज में-वृन्दावन में-गोवर्धन जो की तरहटी में अथवा अन्य किसी भी स्थल में मुझे इस जन्म में दूसरे जन्म में-अथवा किसी क्षुद्र पशु-पक्षी आदि की योनि में "भूरिभागो भवो भवेत्" सेवोपयोगी बड़भाग जन्म मिले कि जिससे मैं आप के तदीय-तादृशजनों में से कोई एक सेवक बन कर आप के श्री चरणों की सदा सेवा कर सकूँ ॥ ३० ॥

अहोऽतिधन्या व्रजगोरमण्यः स्तन्यामृतं पीतमतीव ते मुदा ।
यासां विभो वत्सतरात्मजात्मना यत्तृप्तयेऽद्यापि [1]न चालमध्वराः ॥ ३१ ॥
अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् । यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—विभो अद्य अपि यत्तृप्तये अध्वराः न च अलं अहो व्रजगोरमण्यः अति धन्याः यासां वत्सतरात्मजात्मना अतीव मुदा ते स्तन्यामृतं पीतम् ॥ ३१ ॥ नन्दगोपव्रजौकसाम् अहो भाग्यम् अहो भाग्यं यत् परमानन्दं पूर्णं सनातनं ब्रह्म मित्रम् ? ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

देवादिजन्मनोऽपि यत्र कुत्रचित्त्वद्भक्तिमज्जन्मैव श्रेष्ठमित्यौत्सुक्येन सप्तभिः श्लोकैरभिनंदति अहोऽतिधन्या इत्यादिभिः । व्रजगोरमण्यः व्रजस्था गावो रमण्यो गोप्यश्च । ते त्वया वत्सतरात्मजात्मना वत्सानामात्मजानां च रूपेण यस्य तव तृप्तये सर्वेऽपि यज्ञा अद्यापि नालं न शक्तास्तेन त्वया प्रतिक्षणं तृप्यता यासां स्तन्यममृतरूपं पीतमिति ॥ ३१ ॥ अहो इति पुनरुक्त्या भाग्यस्य सर्वथाऽपरिच्छिन्नत्वमुक्तम् ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यत्र कुत्र यस्मिन्कस्मिन्योनौ । ते त्वयेति । तृतीयैकवचनेप्यादेश आर्षः । किञ्च, त्वद्भक्तेष्वतिनिकृष्टस्य ममैतावत्येव प्रार्थना समुचिता, त्वत्प्रसादात्सा सफलीभूयात् । ये तु त्वद्भक्तेष्वतिप्रकृष्टास्तेषां त्वयि शुद्धवात्सल्यादिरतिभाजां पदवीं प्रार्थयितुमयोग्यास्मदादिभिरतिदुर्लभा केवलं स्तूयत एवेत्याह—अहोतिधन्या इति ॥ ननु भवेयं नाम सर्वपूर्णस्त्वयापि सेवितुमन्वेषणीयः, किन्तु भवान् परमेष्ठी मज्जनाश्चात्र गोपा गोरक्षका एव, तस्मात्कथंचिद्यादवासंग एव त्वम्प्राप्तुमर्हिष्यसीत्याशंक्य एषामेव महिमा सर्वतः पर इति तदेकदेशोदाहरणेन व्यंजयति, तेन च स्वाभिलाषं सूचयति—अहो इति । प्रथमत एव विस्मयवाचकप्रयोगोयमतीव विस्मयेन । अतिधन्याः कृतार्थतापरमकाष्ठां प्राप्ताः । कास्ताः—व्रजगोरमण्य इति । बहुत्वमन्यत्रैव कस्या अपि तथा भाग्यं दुर्लभमिति बोधयति । कथं धन्यास्तत्राह—हे विभो परिपूर्ण । ते त्वयापि यासां स्तन्यामृतं पीतम् । विभुत्वमेवाह—अथ कात्स्न्र्ये, सर्वेप्यध्वरा इत्यर्थः । ते यस्य तवाद्यापि वेदस्यानादित्वात्तद्विहितानामध्वराणामप्यनादिकालतोऽद्यपर्यंतं तृप्तये संतोषमात्राय नालम् न समर्थाः, परिपूर्णत्वादेवेति भावः । तथाभूतेनापि पीतम्, अन्यामृताशिनोऽपि यज्ञभागमात्रोपजीविनस्तत्तु (त्र) तत्र च तेषु च न सादरः । अहो किमिदममृतमिति भावः । तत्रापि स्तन्यमित्यनेन तादृशस्यापि तस्य तच्छरीरोद्भवरसविशेषास्वादनमिति । तथा पीतमित्यर्थवैशिष्ट्येन स्वयं स्वमुखेन चूषितमिति । तत्र चातीवेत्यनेनात्यंतमिति, तत्र च मुदेत्यनेन परमामोदपूर्वकमिति । तत्रापि वत्सवत्सपरूपेणेत्यनेन परमलोभेन कोटिधा भूत्वेत्येवमुत्तरोत्तरचमत्कारवैशिष्ट्यं बोधयति । न केवलमस्मिन् व्रजे तासामेव परमविशिष्टानां कादाचित्कमेवेदृशं भाग्यम्, न च कर्मकांडमात्रानुसारेण 'यत्तृप्तयेऽद्याप्यथ नालमध्वराः' इति यदेव भगवन्माहात्म्यं मद्विधचमत्कारकरम्, अपि तु तद्वासिमात्रेष्वेव नित्यमेव च किमपि तद्विराजते, ब्रह्मकांडानुसारेण भगवन्माहात्म्यमपि न तावन्मात्रतत्तायोग्यमित्यस्ति ॥ ३१ ॥ अपरिच्छिन्नत्त्वम् महत्त्वम् । परमानंदमित्यादिपदैर्नंदनन्दनस्य सर्वथा तारतम्यं, व्रजवासिनाञ्च पूर्वजन्मापादितसकलज्ञानसाधनीभूतयज्ञतपसां परमसाफल्यमत्यानंदमग्नो ब्रह्माभिनंदतीति ज्ञेयम् । अत्र

---

[1] ऽद्याप्यथ नालमध्वरा–इति कस्यचित् ।

विश्वनाथः —रागात्मकवात्सल्यवतीं स्तुत्वा रागात्मकसख्यवतः स्तुवन्नाह अहो भाग्यमिति । इह वीप्साऽत्यानंदे। परमानंदमिति क्लीबत्वमार्षम्, तेन च "सत्यं विज्ञानमानंदं ब्रह्म" इति श्रुतिवाच्यं ब्रह्म सूचयति । परमपदेन कृष्णस्य तत्प्रतिष्ठाभूतत्वं, पूर्णपदेन ब्रह्मस्वरूपाणामंशावताराणां व्यावृत्तिः । एतादृशं ब्रह्म येषां श्रीदामादिबालकानां मित्रं सखा । मित्रत्वस्य तत्कालभवत्वं वारयति-सनातनं सार्वकालिकमिति । मित्रत्वस्य सार्वकालिकत्वेन श्रीदामादीनामपि सार्वकालिकत्वं ज्ञापितम् । 'अयं तूत्तमो ब्राह्मणः' इत्युक्तेब्राह्मणस्यैवोत्तमत्वात्तद्विशिष्टोप्युत्तम इतिवदत्रापि मित्रत्वस्यैव सनातनत्वं विवक्षितं, तथा मित्रशब्दस्य बंधुमात्रवाचकत्वादेव व्याख्येयम् । श्रीमन्नन्दराजव्रजवासिमात्राणां पशुपक्षिपर्यंतानां सर्वेषामेवाहो भाग्यं, किं पुनर्नन्दस्य, तदीयगोपानां च । किं तत्; येषां वात्सल्यादिसर्वविधप्रेमवतां परमानन्दं ब्रह्म सनातनं मित्रं बन्धुः बंधुत्वोचितप्रीतिकर्त्तृ, वक्ष्यते च गोपैः–"दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषां नो व्रजौकसाम् नन्द ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम् ।।" इत्यत एषु व्रजवासिष्वौत्पत्तिकानुराग्येव पूर्णं ब्रह्मेत्यर्थ आयातः । तेन परमानदमप्यानंदयति व्रजवासिन इति ते सच्चिदानंदमया एव, अथ च परमविस्मयरसविषयीभूता इति ध्वनितम् ।। अतिशयांतरमपीति स्मरन्निव सचमत्कारमाह—अहो इति । अहो आश्चर्यं, भाग्यमनिर्वचनीयस्त्वत्प्रसादः, वीप्सा तदतिशयिता प्रागल्भ्येन पुनः पुनश्चमत्कारावेशात् । ननु कथं प्रथमतश्चमत्कारमात्रं व्यंजयसि, येषां तत्तान् कथय तत्राह–श्रीमन्नन्दराजव्रजवासिमात्राणां पशुपक्षिपर्यंतानां, कथमाश्चर्यं कथं वा भाग्यं तत्राह—परमानंदम्, तदेव येषां मित्रं स्वाभाविकबंधुजनोचितप्रेमकर्तृ तादृशप्रेमविषयश्चेत्यर्थः तथा च वक्ष्यते च श्रीगोपैः–"दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषां नो व्रजौकसाम् । नंद ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम् ।।" इति। आनंदस्य क्लीबत्वं छान्दसम् । तेन च "विज्ञानमानंदं ब्रह्म" इति श्रुतिवाच्यं तत्सूचयति । यत्र क्वाप्यानंद एव खलु तादृशप्रेमकर्त्तारो दृश्यंते न त्वानंदः कुत्रचित्, एष त्वानंदोऽपि तत्कर्त्ता तत्र च श्रुतिमात्रवेद्यत्वेन परमः खंडामृततारतम्यवत्स्वरूपत एवालौकिकमाधुर्यः, अत आश्चर्यं भाग्यं चेति भावः । अन्यदप्याश्चर्यमयमिदमित्याह –सनातनं, तत्तादृशमपि नित्यं, कस्य चित्सुखानंदोऽपि न नित्यो दृश्यते एषां तु तादृशोपि । पुनः कथंभूतं ब्रह्म–"अथ कस्मादुच्यते ब्रह्म बृंहति बृंहयति च" इति श्रुतेः "बृहत्वाद् बृंहणत्वाच्च यद्ब्रह्म परमं विदुः" इति विष्णुपुराणाच्च बृहत्तमत्वेन ब्रह्मसंज्ञमपि "अथानंदस्य मीमांसा भवति" इत्यारभ्य 'ये ते शतम्' इति वारंवारं मनुष्यानन्दान्मर्त्यपर्यन्तानंदं दशधा शतशतगुणाधिक्येन गणयित्वा मत्तोऽपि शतगुणमानंदं परब्रह्मणः प्रोच्यापि संभ्रमेण "यतो वाचो निवर्त्तंते अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन" इत्येनानंत्यं स्मृत्वा वाङ्मनसातीते सर्वतो बृहत्तमत्वेन श्रुतिभिर्गीतमपीत्यर्थः । तत आनंदस्यैतादृशत्वमेतादृशबृहत्तापि क्वचिन्मित्रत्वमिति भावः । न चैतावदेव पूर्णमप्यमृतं सौरभादिभिरिव स्वाभाविकगुणरूपैश्वर्यलीलामाधुरीभिः सर्वाभिरेव पूरितं सत् एतदपि कुत्रापि न दृष्टं श्रुतं, न च तादृशमित्रमित्यर्थः । अत्राऽपरोक्षेपि श्रीकृष्णे परोक्षवन्निर्देशः कौतुकविशेषाय । किञ्च, मित्रत्वमत्र विधेयं, परमानन्दत्वमनूद्यम्, ततश्चानूद्यधर्मा विधयवैशिष्ट्याय प्रयुज्यन्ते इति मित्रताया अपि तत्तद्द्वारा लभ्यन्ते । मनोरमं सुवर्णमिदं कुण्डलं जातमितिवत्प्रयुज्यते युज्यते चानूद्यस्य विधेयं तादात्म्यापन्नत्वेन विवक्षितत्वात् । तत्र च परमानंदत्वं पूर्णत्वं च तस्यासिद्धमेव तत्प्रेमरूपत्वात्। सनातनत्वमपि तस्य सनातनत्वात्, निरुपाधित्वेनोक्तत्वात् कालवैशिष्ट्यादिनिर्देशेन कालसामान्यलाभात्, अन्यत्र श्रीरुक्मिण्यादौ दृष्टत्वात्, एषामपि तथैव श्रुतितन्त्रादौ दृष्टत्वाच्च । एवं पूर्ववत् श्रीकृष्णस्य स्वभगवत्त्वमपि दर्शितं तथा निजाभिलाषस्य युक्तता चेति ।। ३२ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, भवेय नाम सर्वपूर्णस्त्वयापि सेवितुमन्वेषणीयः किं तु भवान् परमेष्ठी मज्जनाश्चात्र गोपा गोरक्षका एव तस्मात् कथञ्चिद्यादवादिसङ्ग एव तत्प्राप्तुर्महिष्यसीत्याशङ्क्य एषामेव महिमा सर्वतः पर इति तदेकदेशोदाहरणेन व्यञ्जयति, तेन च स्वाभिलाषं सूचयति । अहो इति । प्रथमत एव विस्मयवाचकप्रयोगोऽयमतीवविस्मयेन अतिधन्याः कृतार्थतापरमकाष्ठां प्राप्ताः के ते व्रजगोरमण्य इति रमणीशब्देन परमोत्कृष्टत्वं स्तन्यदानेन भगवत्सुखहेतुत्वं च व्यञ्जितम् बहुत्वमन्यत्रैकस्या अपि तथाभाग्यं दुर्लभमिति बोधयति कथं धन्यास्तत्राह, हे विभो ! परिपूर्ण ! ते त्वयापि यासां स्तन्यामृतं पीतं विभुत्वमेव दर्शयति—अथ कार्त्स्न्ये सर्वेऽप्यध्वरा इत्यर्थः । ते यस्य तव अद्यापि वेदस्यानादित्वात् तद्विहितानामध्वराणामप्यनादित्वादनादिकालतोऽद्य पर्य्यन्तं तृतये सन्तोषमात्राय नालं न समर्थाः परिपूर्णत्वादेवेति भावः । तथाभूतेनापि पीतमित्यनेन अन्यामृताशिनोपि यज्ञभागमात्रोपजीविनस्त्वं तु तत्र च तेषु च न सादरः तस्मादहो किमिदममृतमिति भावः । तत्रापि स्तन्यं तादृशस्यापि तस्य तच्छरीरोद्भवरसविशेषास्वादनमिति तथा पीतमित्यर्थवैशिष्ट्येन स्वयं श्रीमुखे चूषितमिति तत्र चातीवेत्यनेनात्यन्तमिति तत्र च मुदेत्यनेन परमामोदपूर्वकमिति तत्रापि वत्सरूपेणेत्यनेन परमलोभेन कोटिधाभूत्वेत्येवमुत्तरोत्तरचमत्कारवैशिष्ट्यं बोधयति ।। ३१ ॥ किञ्च, न केवलमस्मिन् व्रजे तासामेव परमविशिष्टानां कादाचित्कमेवेदृशं भाग्यं न च कर्मकाण्डमात्रानुसारेण "यत्तृप्तयेऽद्याप्यथ नालमध्वरा इति यदेव भवन्माहात्म्यं मद्विधचमत्कारकरम् अपि तु तद्वासिमात्रेष्वेव नित्यमेव च किमपि तद्विराजते ब्रह्मकाण्डानुसारेण भवन्माहात्म्यमपि न तावन्मात्रतायोग्यमित्यस्त्यतिशयान्तरमपीति स्मरन्निव पुनरतीव सचमत्कारमाह—अहो इति । अहो आश्चर्यं भाग्यमनिर्वचनीयः तत्प्रसादः वीप्सा तदतिशयिताप्रागल्भ्येन पुनः पुनश्चमत्काराऽऽवेशात् ननु, कथं प्रथमतश्चमत्कारमात्रं व्यञ्जयसि येषां तत् तान्

कथय ? तत्राह, श्रीमन्नन्दराजव्रजवासिमात्राणां पशुपक्षिपर्यन्तानां कथमाश्चर्यं कथं वा भाग्यं तत्राह, परमानन्दं यत् तदेव येषां मित्रं स्वाभाविकबन्धुजनोचितप्रेमकर्त्तृ तादृशप्रेमविषयश्चेत्यर्थः । तथा च वक्ष्यते श्रीगोपैः "दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसाम् । नन्द ! ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम्" इति आनन्दस्य क्लीबत्वं छान्दसं तेन च "विज्ञानमानन्दं ब्रह्म" इति श्रुतिवाच्यं तत्सूचयति, यत्र क्वाप्यानन्द एव खलु सर्वे तादृशप्रेमकर्त्तारो दृश्यन्ते न त्वानन्दः कुत्रचित् एषु त्वानन्दोऽपि तत्कर्त्ता तत्र च श्रुतिमात्रवेद्यत्वेन परमः खण्डामृततारतम्यवत् स्वरूपत एवालौकिकमाधुर्यः अत आश्चर्य्यं भाग्यं चेति भावः । अन्यदप्याश्चर्य्यमयमिदमित्याह—सनातनं तत्तादृशमपि नित्यं कस्यचित्क्षुद्रानन्दोऽपि न नित्यो दृश्यते एषां तु तादृशोऽपीति पुनः कथम्भूतम् "अथ कस्मादुच्यते ब्रह्म बृंहति बृंहयति च" इति श्रुतेः । "बृहत्वाद्बृंहणत्वाच्च यद्ब्रह्म परमं विदुः" इति विष्णुपुराणाच्च बृहत्तमत्वेन ब्रह्मसञ्ज्ञमपि "अथानन्दस्य मीमांसा भवति" इत्यारभ्य "ते ये शतम्" इति वारं वारं मनुष्यानन्दान्मत्पर्यन्तानन्दं दशधा शतशतगुणाधिक्येन गणयित्वा मत्तोऽपि शतगुणमानन्दं परब्रह्मणः प्रोच्यापि सम्भ्रमेण "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन" इत्यनेनानन्त्यं स्मृत्वा वाङ्मनसातीतेन सर्वतो बृहत्तमत्वेन श्रुतिभिर्गीतमपीत्यर्थः । तत आनन्दस्यैतादृशत्वमेतादृशबृंहता ऽप्यनेन मित्रत्वं क्वचित् दृष्टमिति भावः । न चैतावदेव किं तर्हि पूर्णमपि अमृतं सौरभ्यादिभिरिव स्वाभाविकरूपगुणलीलैश्वर्यमाधुरीभिः सर्वाभिरेव पूरितं सत् एतदपि कुत्रापि न दृष्टं श्रुतं न च तादृशं मित्रमित्यर्थः अत्रापरोक्षेऽपि श्रीकृष्णे परोक्षवन्निर्देशः कौतुकविशेषाय । किञ्च, मित्रत्वमत्र विधेयं परमानन्दमनूद्यं ततश्चानूद्यधर्मविधेयवैशिष्ट्याय प्रयुज्यन्त इति मित्रताया अपि तत्तद्भावो लभ्यते मनोरमं सुवर्णमिद कुण्डलं जातमितिवत् युज्यते च अनूद्यस्य विधेय तादात्म्यापन्नत्वेन विवक्षितत्वात् तत्र परमानन्दत्व पूर्णत्वं च तस्याः सिद्धमेव, तत्प्रेमरूपत्वात् सनातनत्वमपि तस्य सनातनत्वात् निरुपाधिकत्वेनोक्तत्वात् कालवैशिष्ट्यानिर्देशेन कालसामान्यलाभात् अन्यत्र श्रीरुक्मिण्यादौ दृष्टत्वात् एषामपि तथैव श्रुतितन्त्रादौ दृष्टत्वाच्च एवं पूर्ववत् श्रीकृष्णस्य स्वयं भगवत्त्वमपि दर्शितं तथा निजाभिलाषस्य युक्तता चेति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र च श्रीनन्दव्रजजनैः सदृशीं भक्ति तेषां पादपल्लवनिषेवां वा प्रार्थये इत्याशयेन, तथा 'मधुरेण समापयेत्' इति न्यायेन, तथा भगवतः प्रियजनानां माहात्म्यवर्णनमेव तस्य परमास्तुतिरित्यभिप्रायेण च तानभिनन्दति—अहोऽतीति दशभिः । अहो आश्चर्य्ये, अथेति मांगल्ये । अतिधन्याः कृतार्थतापरमकाष्ठां गता इत्यर्थः । रमयन्ति स्तनदानेन त्वां तर्पयन्तीति रमण्यः । यस्य तव तृप्तये तुष्टये । विभो हे सर्वथापरिपूर्ण ! तथापि पीतम्, तच्चातीवात्यन्तम्, तत्र च मुदा, तत्रापि वत्स वत्सपरूपेण साक्षात्त्वया पीतमित्यतीत-निर्देशो भगवता तत्तन्निजरूप-सम्वरणात्, अद्यापीति पूर्वतोऽद्यपर्य्यन्तमित्यर्थः, यद्वा, सम्प्रति बाल्ये प्रकटितेऽपि ॥ ३१ ॥ न केवलं स्तन्यदायिन्यस्ता एव धन्याः, किन्तु श्रीनन्दादयः सर्वेऽपि व्रजवासिनोऽतिधन्या इत्याह—अहो इति वीप्सा परमहर्षेण, भाग्यातिशयाभिप्रायेण वा । नन्दगोपस्य व्रज ओको निवासो येषाम्, यद्वा, नन्दश्च गोपाश्चान्ये च व्रजोकसः पशुपक्ष्यादयः सर्वे तेषाम्, कि वक्तव्यं नन्दस्य भाग्यम्, अहो गोपानामपि सर्वेषां परमभाग्यमित्येवमत्र कैमुतिकन्यायोऽवतार्य्यः—येषां मित्रं बन्धुस्त्वम् । तत्र च परम आनन्दो यस्मादिति कदाचित् शोकदुःखादिकं सुखाल्पत्वञ्च निरस्तम्; पूर्णमिति प्रत्युपकारापेक्षकत्वादिकम्; ब्रह्म व्यापकमिति कुत्रचिदलभ्यत्वम्, सनातनं नित्यमिति कदाचिदप्यप्राप्यत्वम् । यद्वा, पूर्णं ब्रह्म त्वं येषां मित्रं सनातनं नित्यमित्रतयैव नित्यं वर्त्तमानमित्यर्थः । न केवलमापत्त्राणादिकरम्, किन्तु परमानन्दप्रदं चेत्याह—परमानन्दं परमानन्दस्वरूपम्, यद्वा, आनन्दयतीत्यानन्दं परं केवलम्, मित्रम्, न त्वीश्वरादिरूपम्, प्रेमविशेषहान्यापत्तेः, यद्वा, पूर्णः ब्रह्मापि त्वमेव नन्दगोपव्रजोकस एव मित्राणि यस्य, तथाभूतमसि, नपुंसकत्वं ब्रह्मविशेषणत्वात्, श्रीभगवत्प्रियतमानामपि श्रीराधादीनां माहात्म्यम्, तदानीं बाल्ये तद्रसाप्रवृत्तेः कि वा पुत्रत्वादिना लज्जातः परमगोप्यत्वाद्वा व्यक्तं न वर्णितम् ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

एवं सर्वशास्त्रप्रमाणकं प्रपत्तिवैभवं प्रख्याप्य प्रपत्तिमतां श्रीभगवान् वशीकृतोऽतिसुलभो भवतीत्याह–अहो इति । अहो इत्याश्चर्ये अतिधन्या इति अत्यन्तं धन्याः द्वाभ्यां धन्याश्चर्योपाख्यानं हरिवंशस्थं स्मारितं व्रजस्था गावः रमण्यः गोप्यः कुतो धन्या अत आह, हे विभो ! चिदचिद्व्यापक ! ते त्वया वत्सतराणां शरीरधारकेण गवां गोप्यात्मजशरीरेण च गोपीनां स्तन्यामृतं दुग्धरूपममृत अतीव मुदा महताऽऽनन्देन पीतं यत्तृप्तये यस्य तव तृप्तये अध्वराः अग्निष्टोमादयोऽश्वमेधान्ताः अद्यापि अलं समर्था न भवन्ति श्रीभगवद्वशयितृत्वं प्रपत्तेरसाधारणं लक्षणम् ॥ ३१ ॥ अथ यत्तत्वं ममापि दुर्लभ दुर्ज्ञेयं तदेषां सुलभ सुज्ञेयं स्वरूपरूपगुणविभूत्यादिकमभूदिति सरोमाञ्चाश्रु प्राह–अहो भाग्यमहोभाग्यम् इति । पुनरुक्त्या भाग्यापरिच्छेद्यत्वम् उक्त नन्दगोपसम्बन्धिव्रजवासिनाम् अथवा नन्दश्च गोपाश्च व्रजवासिनश्च वृक्षभूमिलतागिर्य्यादयः तेषामहो आश्चर्ये महद्भाग्यमिति यन्मित्रं शरणागतिवशीकृतमित्यर्थः । मित्रपदं श्रीरामायणे शरणागतिभावद्योतकम् उक्तं श्रीरामचन्द्रेण विभीषणं प्रति—

"मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन । दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम्" ॥ इति ।

श्रीकृष्णचन्द्रोप्यऽग्रे वक्ष्यति "तस्मान्मच्छरणं गोष्ठं मन्नाथे मत्परिग्रहम्। गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः" इति परिग्रहः भार्येति भार्या मित्रमिति न्यायात् अतः शरणागतिवशितः सः सुलभत्वेन येषां सर्वतो हितकारीति तच्च परमानन्दविषयप्रयोजनेन मैत्रीभङ्गरहितम् एतच्चान्तर्धानानन्तरम् इति रहस्यं यद्यपि गोचारणादिना श्रीकृष्णविश्लेषदुःखं गोपादीनाम् अस्ति, तथापि "वियोगे तन्मयं जगत्" इति न्यायेन तच्चिन्तनात्साक्षाद्दर्शनादानन्दप्राप्त्या सुखमेव प्राकृतमित्रे तु न तथेति विभाव्यम्, एवं पूर्णत्वब्रह्मत्वव्यापकत्वज्ञानेन मथुराद्वारकावासिन्यपि तस्मिन्तेषां विश्लेषदुःखं नाऽभूदेव एवञ्च प्राकृतमित्रव्यवच्छेदः तच्च सनातनं परव्योमाधिपश्रीमतो नारायणभगवत एव स्वामिनः लीलाविभूतौ स्वेच्छयाविर्भावात् सनातनत्वमनादित्वम् ।।३२।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

चतुर्मुखजन्मतोऽपि यत्र क्वचित्त्वज्जनसङ्गिजन्मैव श्रेय इत्यौत्सुक्येन नन्दगोपगोपिकादीनभिनन्दति—सप्तभिः अहो इति। व्रजस्य गावो रमण्यो गोप्यश्चातिधन्याः कुतः ? इत्यत्र ता विशिनष्टि, यासां व्रजगोरमणीनां स्तन्यामृतं वत्सरूपेणाऽऽत्मजरूपेण च त्वयातीव पीतं यस्य विभोस्तव तृप्तयेऽध्वराः सर्वे यज्ञाश्च नालं न पर्याप्तास्तेन त्वयेत्यन्वयः ।। ३१ ।। नन्दादीनां भाग्यमहो कुतः ? यद्यतः निरतिशयानन्दं सर्वव्यापकं सनातनं ब्रह्म मित्रमभूत् ।। ३२ ।।

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

तदेवोपपादयति—अहो इति। अहो इति हर्षे व्रजगोरमण्यः नन्दव्रजगावो गोपिकाश्चातिधन्याः अस्माभिरपि अतिशयेन श्लाघ्याः कथमित्युक्ते। हे विभो, निरुपाधिकस्वामिन् ! यासां स्तन्यामृतं दुग्धामृतं ते त्वया वत्सतरात्मजात्मना वत्सतररूपेणात्मजरूपेण चातीव मुदा अतिहर्षेण तृष्णापूर्वकमिति यावत् पीतं उपयुक्तं यत्तृप्तये यस्य तव प्रीणनाय अद्यापि मज्जन्मारभ्य अद्य पर्यन्तम् अध्वरा यज्ञा मद्यज्ञमारभ्य सर्वैः कृतामखा न चालं न समर्था इत्यर्थः। ननु, देवादिभिर्भगवदाराधनरूपे यज्ञे आहूतो विष्णुरायात्येव स्वभागार्थमिति कथमुच्यते नालमिति चेत्सत्यम्, यद्यपि सर्वकर्मफलप्रदो विष्णुस्तत्तत्फलदानार्थमायाति स्वपूजां गृह्णाति तथापि तत्र अतितृप्तिरलंबुद्धिर्न जाता इति द्रष्टव्यं लोके प्रसिद्धमिति भावः ।। ३१ ।। किञ्च, चतुर्मुखेन मयाऽप्येतेषां भाग्यमहिमा वर्णयितुमशक्य इत्यत्यादरेणाभिनन्दतीत्याह—अहो भाग्यमिति। नन्दगोपव्रजौकसाम् अहो भाग्यम् इत्यत्यादरे वीप्सा कथमित्युक्ते यद्येषां मित्रं ब्रह्म आसीदिति शेषः। ननु, परस्परोपकारकत्वं मित्रत्वमिति तेषामुपकारापेक्षया मित्रं किमिति नहि नहीत्याहपरमानन्दमिति। परमानन्दसन्दोहं यद् ब्रह्म तदेव निरपेक्षमेवेत्यर्थः। ननु, परमानन्दसन्दोहो मुक्तोऽपि भवतीति स एव किमिति चेन्न, सनातन पूर्णमिति सदापूर्णं मुक्तस्य बद्धावस्थायां न्यूनानन्दो जातः अस्य तु सदा स्वतः पूर्णत्वमिति भावः। तथाचोक्तं संवित्सिद्धौ —

"तथा सुरासुरनरब्रह्माण्डशतकोटयः। क्लेशकर्मविपाकाद्यैरस्पृष्टस्याखिलेशितुः ।।
ज्ञानादिषाड्गुण्यनिधेरचिन्त्यविभवस्य ताः। विष्णोर्विभूतिमहिमसमुद्र इव बिन्दवः" ।। इति

श्रीयामुनाचार्यचरणैः ।। ३२ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

के ते भवत्साहित्ययोग्या मज्जनाः ? इत्याशङ्क्य तानेव व्यञ्जयितुमाह—अहो इति। यद्वा, अहो इति न केवलमत्र तासामेवेदृ (श्यं) शं भाग्यं तच्च तद्वत् कादाचित्कमेव नच यत्तृप्तये इति यदेव भवन्माहात्म्यम् अपि तु तद्वासिमात्रेष्वेव नित्यमेव च किमपि तद्विराजते ।। ३१ ।। भवन्माहात्म्यमपि न तादृशतायोग्यमित्यस्ति अतिशयान्तरमपीति स्मरन्निव पुनरतीव चमत्कारमाह—अहो इति। अहो आश्चर्ये भाग्यमनिर्वचनीयस्तत्प्रसादः वीप्सा तदतिशयताप्रागल्भ्येन पुनः पुनश्चमत्कारावेशात् केषां तत्राह, नन्दगोपव्रजौकसां व्रजस्थमात्राणां पशुपक्षिपर्यन्तानां किं तत् येषां परमानन्दं मित्रं स्वाभाविकबन्धुजनोचितप्रेमकर्तृ क्लीबत्वं छान्दसं तेन च "विज्ञानमानन्दं ब्रह्म" इति श्रुतिवाच्यं तत् सूचयति, यत्किञ्चिदानन्द एव खलु सर्वे तादृशप्रेमकर्त्तारो दृश्यन्ते नत्वानन्दः कुत्रचित् एषु त्वानन्द एव तत्कर्त्ता। तत्र च श्रुतिमात्रवेद्यत्वेन परमखण्डाऽमृततारतम्यवत् स्वरूपत एवालौकिकमाधुर्यात् न चैतावदेव किं तत् पूर्वमपि अमृतं सौरभ्यादिरिव स स्वरूपतो गुणलीलैश्वर्ये माधुरीभिः सर्वाभिरेवामर्यादमेव सत् एतदपि कुत्रापि न दृष्टं श्रुतञ्च न च तादृशं मित्रमित्यर्थः पुनः कथम्भूतमपि ब्रह्म आनन्दानन्त्येन सर्वतो बृहदपि आनन्दस्य तादृशबृहत्त्वं तादृशबृहतोऽप्यन्येन मित्रत्वं क्व दृष्टमिति भावः। अन्यदप्याश्चर्यमिदमित्याह, सनातनं तत्तादृशमपि नित्यं कस्यचित् क्षुद्रानन्दोऽपि न नित्यो दृश्यते एषान्तु तादृशोऽपीति ।। ३२ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु त्वं ब्रह्माण्डाधिकारी जगत्कर्ता, कथं मज्जनानां मध्ये यः कश्चिदपि भवितुमभिलषसि ? मैवं वादीः। भवज्जनानां यथा सौभाग्यं तथा न केषामपीति संश्लाघ्य तानभिनन्दति-अहोऽतिधन्या इत्यादि। अहो अहो आश्चर्यम् सन्धिरार्षः। व्रजरमण्यो

गोरमण्यो धेनवश्चातिधन्याः। कुतः ? यासामुभयीषां वत्सतरात्मजात्मनेति यथायोगं योजनीयम्। गोरमणीनां वत्सतरात्मना व्रजरमणीनामात्मजात्मना ते तया स्तन्यामृतं पीतमतीव मुदा अत्यन्तहर्षेण। ननु मम यथा तथैव हर्षो भवति, स्तन्यामृतपानाद् यद् भविष्यति तत् किम् ? नैवम्, यत्तृप्तयेऽद्यापि अध्वरा नालं न समर्थाः, तस्मादासां भाग्यातिशयं किं क्रम इति ॥ ३१ ॥ नन्वस्तु तावदासां भाग्यम्, तवानेन किमायातम् ? भवज्जनानां मध्ये एकोऽपि भूत्वा तव पादपल्लवं निषेवे इति यदुक्तं तत्रेदं नोपयुज्यते ? सत्यम्, अहन्तु व्रजौकसां मध्ये यः कश्चिदपि भूयासमिति व्रजौको मात्रमेव स्तौमीत्याह—अहो भाग्यमहो भाग्यमित्यादि। अतिशयविस्मये वीप्सा। यद् येषां नन्दगोपव्रजौकसां पूर्णं ब्रह्म श्रीकृष्णस्त्वं मित्रं सुहृद्विग्रहतया पूर्णं घनमतः सनातनं परम आनन्दो यत्र, अथवा, सनातनं मित्रम्, न हीदानीन्तनमेव अपि तु त्रैकालिकमेतेषामपि त्रिकालसिद्धत्वात् ॥ ३२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तेषामेव साधुवादं करोति अहो इत्यादि बहुभिः ॥ ३१ ॥ पूर्णं ब्रह्म विग्रहत्वात् पूर्णं ब्रह्म श्रीकृष्णः, पूर्णं ब्रह्मपरं ब्रह्मेत्यादि श्रीकृष्णपरमेव। परमप्रेमास्पदरूपत्वाद् वा पूर्णत्वम्, परमो ब्रह्मानन्दादपि परस्यानन्दो यस्मात्तथा तत् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किं च तत्र त्वद्भक्तेष्वतिनिकृष्टस्य—ममैतावत्येव प्रार्थना समुचिता त्वत्प्रसादात् फलवती भूयात् ये तु त्वद्भक्तेष्वतिप्रकृष्टास्तेषां त्वयि शुद्धवात्सल्यादिरतिभाजां पदवीं प्रार्थयितुमयोग्या अस्मदादिभिरतिदुर्लभा केवलं स्तूयते एवेत्याह— अहो इति द्वाभ्याम्। व्रजस्था गावो रमण्यो गोप्यश्च अतिधन्यास्तत्राप्यहो इत्याश्चर्य्याभिधायकपदेन वाङ्मनसाऽगोचरश्चमत्कारातिशयो व्यञ्जितः तमेवाह—ते त्वया सच्चिदानन्दस्वरूपेणापि यासां स्तन्यं देहैकावयवस्तनोद्भवम् अमृतं पीतं तत्रापि मुदा तत्राप्यतीवेति पुनः पुनः पानेऽपि मुदः प्रतिक्षणवर्द्धिष्णुत्वमेव तत्रापि गवां वत्सतरात्मनेति दोहनादिव्यवधानस्यासह्यत्वं गोपीनामात्मजात्मनेत्यन्यथा तत्प्राप्त्यभावः तत्रापि विभो ! इत्यतिलोभात् स्वस्य बहुस्वरूपीकरणेनेति तासां मध्ये एकस्या अप्येकस्तनोत्थो रसोऽपि त्वया त्यक्तुमशक्य इत्यानन्दमात्रस्वरूपस्य तवाप्यानन्दकत्वात्तासां वपुषः सच्चिदानन्दत्वे के नाम संशेरते इति भावः। यस्य तव तृप्तये "तृप प्रीणने" यं त्वां प्रीणयितुमित्यर्थः अद्यापि। अनादिकालतः प्रवृत्ता अद्यपर्य्यन्ता अपि सर्वेऽपि यज्ञा अस्मदादिकृता मन्त्रा अनुष्ठानपावित्र्याद्यविकला अपि नालं न समर्थाः ॥ ३१ ॥ रागात्मकवात्सल्यप्रेमवतीः स्तुत्वा रागात्मकसख्यप्रेमवतः स्तुवन्नेव तन्त्रेण वात्सल्यादिसर्वरतिमतोऽप्युपश्लोकयति—अहो भाग्यमहोभाग्यमिति। वीप्सा अत्यानन्दचमत्कारेण परमानन्दमिति क्लीबत्वमार्षं तेन च "सत्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतिवाच्यं ब्रह्म सूचयति—परमपदेन श्रीकृष्णस्य तत्प्रतिष्ठाभूतत्वं पूर्णपदेन ब्रह्मस्वरूपाणामंशावताराणां व्यावृत्तिः एतादृशं ब्रह्म येषां श्रीदामादिबालकानां मित्रं सखा मित्रत्वस्य तत्कालभवत्वं वारयन् विशिनष्टि, सनातनं सर्वकालिकमिति मित्रत्वस्य सार्वकालिकत्वे न श्रीदामादीनामपि सार्वकालिकत्वं ज्ञापितम् अयं तूत्तमो ब्राह्मण इत्युक्ते ब्राह्मण्यस्यैवोत्तमत्वात्तद्विशिष्टोऽप्युत्तम इतिवदत्रापि मित्रत्वस्यैव सनातनत्वं विवक्षितं तथा मित्रशब्दस्य बन्धुमात्रवाचकत्वादेवं च व्याख्येयं श्रीमन्नन्दराजव्रजवासिमात्राणां पशुपक्षिपर्य्यन्तानां सर्वेषामेवाहो भाग्यमहो भाग्यं किं पुनर्नन्दस्य तस्य तदीयगोपानां च किं तत् येषां वात्सल्यादिसर्वविधिप्रेमवतां परमानन्दं ब्रह्म सनातनं मित्रं बन्धुः बन्धुत्वोचितप्रीतिकर्तृ यद्वक्ष्यते गोपैः "दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसाम्। नन्द ! ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम्" इत्यत एव व्रजवासिष्वौत्पत्तिकानुराग्येव पूर्णं ब्रह्मेत्यर्थ आयातः तेन परमानन्दमप्यानन्दयन्ति व्रजवासिन इति। सच्चिदानन्दमया एवाऽथ च परमविस्मयरसविषयीभूता इति ध्वनितम् ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्रापि भगवदन्यभक्तगोगोप्यादिपादरेणुरञ्जिते व्रजे किमपि जन्म मे भवत्विति प्रार्थयितुमाह— अहो इत्यादि। ते त्वया यद्यस्य ॥ ३१ ॥ यत् येषां पूर्णं ब्रह्म सनातनम् मित्रम् मिन्दयतोष्टार्थानिति मित्रं मिन्देर्धातो रूपम् मिनुते मानं करोतीति मित्रम् मानार्थस्य मिनुतेर्वा मोदतेऽस्य सुखेनेत्यर्थस्य मोदतेर्वा ॥ ३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

त्वत्परिकराणां पदवी त्वस्माकं सुदुर्लभा केवलं स्तूयत एवेत्याह—अहो इति द्वाभ्याम्। व्रजस्था गावो रमण्यश्च गोपाः अतिधन्यास्तत्राप्यहो इत्यनिर्वाच्या तद्धन्यतेत्यर्थः। तामेवाह, हे विभो ! यासां स्तन्यामृतं ते त्वया चिद्घनेन पूर्णेनाप्यतीव मुदा पीतं वत्सतरात्मजात्मना वत्सबालवपुषेत्यर्थः। तथा च तवेव तासामपि चिद्घनानां स्तन्यञ्च रसरूपमेव गन्धादिवत्भुक्तमिति न त्वसारांशसंभावनेति ध्वन्यते यस्य तव तृप्तये अद्याप्यनादिकालतः प्रवृत्ता इदानीं पर्यन्ता अध्वरा यज्ञा अस्मदाद्यनुष्ठिताः साङ्गा अपि नालं न समर्था भवन्ति ॥ ३१ ॥ अहो भाग्यमित्यानन्दचमत्कारादत्यादराद्वीप्सा नन्दगोपस्य नन्दाभिधानस्य भूपतेर्व्रजौकसां भाग्यमहो आश्चर्यं वीप्सया अत्याश्चर्यमित्यर्थः। कथमित्यत्राह—यदिति। पूर्णं स्वयं भगवत् परमानन्दं ब्रह्म येषां मित्रमिति

परमानन्दमिति क्लीबत्वमार्षं तेन "विज्ञानमानन्दं ब्रह्म" इति श्रुत्युक्तं तत् सूच्यते मित्रतायास्तात्कालिकतां वारयितुं सनातनमिति सार्वदिकमित्यर्थः। तथा च तद्व्रजौकसामपि सनातनत्वमुक्तं न च ब्रह्म सनातनमितिसम्बन्धः पूर्णत्वेनैव ब्रह्मणस्तत्त्वलाभात् तस्मान्मित्रं सनातनमिति सम्बध्यते 'अयमुत्तमः पण्डित' इत्यत्र यथा पाण्डित्यस्यैवोत्तमत्वं तथा मित्रत्वस्य सनातनत्वमिह विधीयते मिदेरधिकरणे कर्त्तरि च प्रत्ययान्मिथो मित्रत्वमभिमतं "दुस्त्यजश्चानुरागोऽस्मिन्" इत्यादिवक्ष्यमाणाच्च व्रजौकसां तिर्यगन्तानां भावेषु मैत्री सङ्क्रमस्तद्धूर्त्तस्वभावात् हरेस्तेषु सा तु तद्भावानुसारादितिबोध्यम् ॥ ३२ ॥

श्रीसुबोधिनी

एवं स्वप्रार्थनामुक्त्वा गोकुलवासिनां भाग्यमभिनन्दत्य**हो** इति, **व्रजे** स्थिता **गावो रमण्य**श्च **धन्याः**, यतस्ते त्वया **स्तन्यामृतं पीत**मत्यर्थं सन्तोषपूर्वकं च, तत्र प्रकारमाह, **यासां गोरमणीनां वत्सतरात्मनात्मजात्मना** च, **विभो** सर्वभवनसमर्थ, कथमेतावता भाग्यमित्याशङ्क्याह **यत्तृप्तय** इति, यस्य भगवतस्तृ**प्तयेद्यापि अध्वरा** यागा **नालं** न समर्थाः ॥ ३१ ॥ किञ्च न केवलमेतावन्मात्रमेव किन्त्वन्यदपि करोतीत्याहा**होभाग्य**मिति, पूर्वकाण्डस्याप्रयोजकता स्वतः स्तनपानेनैव कृता, उत्तरकाण्डस्याप्रयोजकतां कृतवानित्युच्यते **यद् ब्रह्म मित्र**मिति, **ब्रह्म** हि **सर्वसमं मित्रं** हि विषम हिताचरणादहितादिदूरीकरणाच्च, भगवांस्तु **ब्रह्मा**पि संस्तेषां मित्रं जातस्तत्प्रतिपक्षान् हन्ति तांश्च सर्वतः परिपालयतीति, **अहोभाग्यमहोभाग्य**मितिवीप्सया पुनःपुनर्भाग्यस्मरणं ज्ञापयति, **नन्दगोपस्य व्रजे** ये तिष्ठन्ति तेषां सर्वेषामेव, अथवादौ **नन्दस्य** भाग्याभिनन्दनं ततो **गोपानां** ततो **व्रजौकसा**मितिक्रमोपपत्तिः स्पष्टैव, किञ्च नोपकारेणैव तेषां कृतार्थता किन्तु स्वयमानन्दरूपः फलात्मा स्वरूपानुभवं कारयति, तदाह **परमानन्दं पूर्णं सनातन**मिति, **अनित्यपरिच्छेदरहितो ह्यानन्दः फल**मिति ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वतोऽपि व्रजभक्तानामुत्कर्षमालक्ष्य तानभिनन्दति—अहो इति सप्तभिः। व्रजस्था गावो, रमण्यो गोप्यश्चातिधन्या अतिकृतार्थाः। तत्रापि 'अहो' इत्याश्चर्याभिधायकपदेन तासां कृतार्थताया वाङ्मनसागोचरत्वं सूचयति। 'कुत एवम्?' इत्यपेक्षायामाह—यतस्ते त्वया वत्सतरात्मजात्मना वत्सानामात्मजानां बालानां च स्वरूपेण यासां गोगोपीनां स्तन्यं दुग्धं अमृतवत् स्वादु मत्वा अतीव अत्यर्थं सन्तोषपूर्वकं मुदा हर्षेण स्वाग्रहेण पीतमिति। ननु 'कथमेवं मत्कर्तृकदुग्धपानमात्रेण तासां कृतार्थता?' इत्यत आह—यदिति। यस्य परमपुरुषस्य तव तृप्तयेऽद्यापि अनादिकालतः प्रवृत्ता अद्यपर्यन्तमपि सर्वेप्यध्वरा यज्ञाः नालं समर्था न जाताः, तस्य तव यासां दुग्धपानेन तृप्तिर्जाता तासां कृतार्थतायां कः सन्देह इत्यर्थः। यज्ञैस्तृप्त्यभावे महत्त्वं हेतुं सूचयन् सम्बोधयति - विभो इति ॥ ३१ ॥ एवं वेदपूर्वकाण्डार्थसम्पत्त्या तेषां कृतार्थता उक्ता, इदानीमुत्तरकाण्डार्थसम्पत्त्याऽपि तेषां कृतार्थतामाह - अहो भाग्यमिति। नन्दगोपस्य यो व्रजस्तदोकसां सर्वेषां 'अहो भाग्यमहो भाग्यम्' इति पुनरुक्त्या तेषां भाग्यस्य सर्वथाऽपरिच्छिन्नत्वं सूचयति। तत्र हेतुमाह—यदिति। पूर्णं ब्रह्म येषां मित्रं मित्रतया वर्तते। 'परमानन्दम्' इति फलरूपत्वमुक्तम्। क्लीबत्वमार्षम्। 'पूर्णम्' इत्यंशत्वव्यावृत्तिः। 'सनातनम्' इति जन्मादिविकारराहित्यम्। अत्र परं ब्रह्म हि सर्वसमं भवति मित्रत्वं च हिताचरणादि; तद्दूरीकरणादिरूपं वैषम्यम्। तथाच येषां प्रेमवशात् स्वभावमपि साम्यं परित्यज्य विषमतया वर्तते, तेषां भाग्यमहिमा केन वक्तुं शक्यते इति भावः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

अहो इति ॥ हे विभो ! यस्य तव तृप्तयेऽद्यापि अनादिकालतः प्रवृत्ता अद्यपर्यन्तमपि सर्वेऽप्यध्वरा यज्ञा नालं न समर्था जाताः। तेन ते त्वया वत्सतरात्मजात्मना वत्सतराणामात्मनां बालानां च स्वरूपेण यासां गोगोपीनां स्तन्यं दुग्धम् अमृतमिव स्वादु अतीव अत्यर्थं संतोषपूर्वकं मुदा हर्षेण स्वाग्रहेण पीतम्। अहो ! ताः व्रजस्थाः गावो रमण्यो गोप्यश्चाहो अतिधन्या अतिकृतार्थाः। सन्धिरार्षः ॥ ३१ ॥ अहो भाग्यमिति ॥ परमानन्दं क्लैब्यमार्षं पूर्णं सनातनं ब्रह्म यन्मित्रं येषां मित्रतया वर्त्तते तेषां नन्दगोपस्य यो व्रजस्तदोकसां सर्वेषामहो ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं स्वमहत्त्वं परित्यज्य आह हे कृष्ण मामनुजानीहि स्वस्थानं यातुमाज्ञां कुरु सर्वं मत्कृतवत्सहरणादिसमग्रं वेत्सि जगतां अनंतं कोटिब्रह्मांडानां नाथः स्वामी त्वं जगत् मत्कृतविश्वं एतत् मद्धृतवत्सपादि च तवार्पितं तुभ्यं दत्तं ॥ ३१ ॥ एवं भगवता प्रस्थापितः सन्नतयादरेण तं नमस्कुर्वन् स्तुतिमाह श्रीकृष्णेति यदुकुलकमलहर्षदायित्वात् हे भानूपम क्ष्माभूश्च निर्जरा अमराश्च द्विजा विप्राश्च पशवो गवादयश्च उदधिः समुद्रश्च तेषां वृद्धिकारित्वात् हे उडुराजोपम उद्धर्मः सद्धर्मविरुद्धोऽधर्मस्तदेव शार्वरं रजनीध्वांतं तद्धरतीति उद्धर्मशार्वरहरस्तत्संबुद्धिः हे क्षितिराक्षसध्रुक् आर्कं सूर्यमारभ्य वैकुंठगोलोकपर्यंतानां सर्वेषामर्हन् पूज्य हे हरे आकल्पं कल्पपर्यंतं ते तुभ्यं नमः यद्वा आकल्पं त्वदीयगुजावतंसबर्हापीडादिकं हस्तकवलादिकं च भूषणं च अभिव्याप्य ॥३२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चतुर्मुखजन्मनोऽपि यत्र क्वचित्त्वज्जनसङ्गिजन्म एव श्रेय इत्यौत्सुक्येन नन्दगोपगोगोपिकादीनभिनन्दति सप्तभिः ॥ अहो इति ॥ व्रजगोरमण्यः व्रजस्य गावो रमण्यो गोप्यश्च, अतिधन्याः । कुत इत्यत्र ता विशिनष्टि । यासां व्रजगोरमणीनां, स्तन्यामृतं पयः, ते त्वया, वत्सतरात्मजात्मना वत्सरूपेण आत्मजरूपेण चेत्यर्थः । मुदाऽप्यानन्देन, अतीवातिशयेनैव, पीतं, हे विभो, यत्तृप्तये यस्य विभोस्तव तृप्तिं विधातुं, अद्यापि, अध्वराः च, सर्वे यज्ञाश्चापीत्यर्थः । न अलं न पर्याप्ता भवन्ति । तेन त्वया पीतमिति संबन्धः । अहो अत्याश्चर्यम् ॥ ३१ ॥ अहो इति ॥ नन्दाख्यो यो गोपस्तस्य यो व्रजो गोष्ठः स ओको निवासस्थानं येषां तेषां, अहो भाग्यमहो भाग्यं, एतेषां भाग्यस्यान्तं यातुं न पारयामीत्यर्थः । यद्यतो हेतोः, परमानन्दं निरवधिकातिशयानन्दमयं, पूर्णं सर्वव्यापकं, सनातनं ब्रह्म, मित्रं, अभूत् । येषामिति शेषः ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

धन्यं तत्किल गोकुलं च तदधिष्ठात्र्यश्च ता देवता धन्यास्ते तरवस्तदेकसुखदा धन्याश्च धन्याश्च ते ।
नित्यं यैरखिलैस्त्वदर्पित-भवव्यापार संभारकैः सन्मित्रत्वपदं प्रभुः स्वयमसावानायि संयोगतः ॥ ३५ ॥
तासामुत्कृष्टता भाग्यमसीममिति किं ब्रवे सर्वेषामपि नः सर्वं याभिः पुण्यमघः कृतम् ॥ ३६ ॥
यस्मात्सुखं निरुपमं स्पृहयन्ति धन्या यं वर्णयन्ति निगमाः सुखरूपमस्मिन् ।
स त्वं प्रभो प्रतिदिनं सुखमीहसे यद् येभ्यस्ततः स्फुटमिमे न किमीश धन्याः ॥ ३७ ॥
श्रीशाऽप्नोम्यहमेष सृष्टिजनकः शर्वादिदेवेडितोप्येषां त्वत्पदरागिणां पदरजःसाम्यं न रम्यं यतः ।
तस्मादार्थिकमेव सिद्धममलैरेतैः सुभाग्यास्पदैरानन्दप्रदपुण्यलोकरुचिराप्यञ्जस्त्रिलोकी जिता ॥ ३८ ॥
तमश्छेदकं भाग्यमह्नोऽर्क एवं ध्रुवं भात्यहो भाग्यमेषामपि त्वम् । यदज्ञानबन्धं निरस्यैव मित्रीकृतो येन निर्यत्नमानन्दमूर्तिः ॥३९॥
यत्स्वैरप्रपदप्रपातजनितस्पर्शोद्भवत्यूर्ध्वगोऽप्यल्पो रेणुरपीह यस्तृणकणस्तद्योगतो वा विभो ।
एतावेव वयं न वर्णयितुमप्यस्मिन्नलं किं पुनः प्रेमालिङ्गनरञ्जितां च भवता गोगोपगोपीशिशून् ॥ ४० ॥

कृष्णप्रिया

हे विभो ! इस व्रज की गायों और व्रज रमणियाँ कितनी बड़भागिनी है कि हे नाथ ? जिसने जिन गायों का और व्रज त्रियों का अत्यंत आनन्द हर्ष चाव से अपने स्तन्य दूध अमीमय दूध पिया ? हे कृपानाथ बड़े बड़े वाजपेय सोम आदि यज्ञसृष्टि प्रारम्भ से लेकर अद्यापि पर्यन्त आपकी तृप्ति प्राप्ति संतुष्टि के लिये पूर्णतया समर्थ न बनी, ऐसे सदानन्द भगवान् श्रीकृष्ण गौओं के बछड़े बनकर और गोपियों के बालक बनकर स्तनंधय बने इससे अधिक बड़भाग बन पाता है क्या ? ॥ ३१ ॥ अहो आनन्द की बात है कि श्रीनन्द बाबा एवं व्रजनिवासिओं के भाग्य की महिमा अपार है । इनके सद्भाग्य की सीमा का मूल्याङ्कन कौन कर सकता है देखो तो सही परमानन्द सनातन पूर्ण ब्रह्म–श्रीकृष्ण जिनके मित्र बन गये हैं । इतना ही कहाँ ! व्रज समस्त धन्य धन्य है, बड़भागी है ॥ ३२ ॥

एषां तु भाग्यमहिमा[1]च्युत तावदास्तामेकादशैव हि वयं बत भूरिभागाः ।
एतद्धृषीकचषकैरसकृत् पिबामः शर्वादयोऽङ्घ्र्युदजमध्वमृतासवं ते ॥ ३३ ॥
तद् भूरिभाग्यमिह जन्म किमप्यटव्यां यद् गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम् ।
यज्जीवितं तु निखिलं भगवाननन्त[2]स्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ॥ ३४ ॥

कर्दमक्षमा

अन्वयः—अच्युत ? एषां तु भाग्यमहिमा तावत् आस्तां एतद्हृषीकचषकैः ते अङ्घ्र्युजमध्वमृतासवं शर्वादयः वयं एकादश एव हि असकृत् पिबामः बतभूरिभागाः ॥ ३३ ॥ भगवान् अनन्तः तु यत्जीवितं यत्पदरजः अद्य अपि श्रुतिमृग्यं एव यत् इह गोकुले अटव्यां अपि कतमाङ्घ्रिरजोभिषेकं किं अपि जन्म तद् भूरिभाग्यम् (अस्तु) ॥ ३४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च । एषां भाग्यस्य तावन्महिमा आस्तां कस्तं वक्तुं शक्नोति शर्वादयः शर्वोऽहंकाराधिष्ठाता आदिर्येषां चंद्रादीनामेकादशानां ते तथा वयं च । वयमित्यात्मानमेव बहुमन्यमान आह । एवं मनोबुद्ध्यहंकारचक्षुराद्यधिष्ठातारस्त्रयोदश देवा एव

---

१. महिता–जीव. । २. भगवान् मुकुन्द–श्रीधर. वंशी. सुदर्शन. वीर. विज. जीव. विश्व. शुक. ।

तावद्बताहो भूरिभागाः यस्मादेतेषां नंदगोपव्रजौकसां हृषिकाणींद्रियाण्येव चषकाणि पानपात्राणि तैस्ते तव चतुर्दशस्य चित्ताधिष्ठातुरंघ्री एव उदजे वारिजे तयोर्मधु मकरंदस्तदेवामृतं स्वाद्वासवं मादकं पिवामः। एतदुक्तं भवति। यदा प्रत्येकमिद्रियाभिमानिनो वयं कीर्तिसौंदर्यसौगंध्याद्येकदेशसेविनोऽपि कृतार्थास्तदा सर्वेन्द्रियैः सर्वसेविनामेतेषां किं वर्ण्यते भाग्यमिति ॥ ३३ ॥ अतो मया प्रार्थितं 'तदस्तु मे नाथ स भूरिभागः' इति यत्तदेतदेवेत्याह। तद्भूरिभाग्यमिति। किं तत्। इह मनुष्यलोके यत्किमपि जन्म तत्राप्यटव्यां यत्तत्रापि गोकुले यत्। अहो सत्यलोकं विहायात्र जन्मनि जाते को लाभोऽत आह। अपि कतमांघ्रिरजोभिषेकमिति। गोकुलवासिनां मध्येऽपि कतमस्य यस्य कस्याप्यंघ्रिरजसाऽभिषेको यस्मिंस्तत्। ननु कुतो गोकुलवासिन एव अति धन्यास्तत्राह। यदिति। येषां जीवितं निखिलं भगवान्मुकुंदः। मुकुंदपरमेव जीवनमित्यर्थः। दुर्लभतामाह। अद्यापीति। श्रुतिमृग्य वेदैरपि मृग्यत एव न तु दृश्यत इत्यर्थः ॥ ३४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तेषां भाग्यमहत्त्वं तु परतममेव परंत्वस्माकमपि भाग्यं परमेवेत्याह–किञ्चेति। एतेषां गोपानाम्। तावदधुना। त्रयोदशशर्वचन्द्रब्रह्मदिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाख्याः। बत हर्षे। अहो अद्भुतम्। 'चषकोऽस्त्री पानपात्रम्' इत्यमरः। चित्ताधिष्ठातुर्वासुदेवस्यास्य। एतदुक्तमित्यारभ्य भाग्यमित्यंतेन नन्दव्रजवासिभ्यो ब्रह्माण्डे न कोऽपि भाग्यविशेषवानस्तीति बोध्यते॥ अहो एषां माहात्म्यं को नाम वर्णयितुं शक्नुयात्, वयमप्येषां सम्बन्धेनैव कृतार्था जाता इत्याह–एषामिति। तुर्भिन्नक्रमे। अंघ्युदजमधु श्रीचरणारविन्दमाधुर्य्यं, तत्पानं तु तदीयाभिमानाध्यवसायसंकल्पदर्शनश्रवणादिरूपम्। देवताश्च—शर्वब्रह्मचंद्रदिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रका इति। यद्वा–गुह्यें द्रियद्वयस्यानुपयोगादश्लीलत्वाच्च तदधिष्ठात्रोर्मित्रप्रजापतयोस्त्याग एव, पादाधिष्ठातोपेंद्रस्तु तदीयधारणशक्त्यावेशावतारो देवताविशेष एव कश्चित्, चित्ताधिष्ठातारं श्रीवासुदेवं विना तेषां सर्वेषामपाकर्तुं क्षमत्वेन तृतीये कथनात्। तस्य तु तत्समीपगतानुभवसुखं श्रीगोपादीनां स्वयं भगवतो नित्याप्राकृतपरिकरत्वादेतेषां च प्राकृताधुनिकत्वात्तदसंभवेऽपि तन्नित्यावरणस्थदेवगणाऽभेदविवक्षयेदमुक्तं तदावेशिरूपात्तेषाम्, तथा च पाद्मोत्तरखण्डे "नित्याः सर्वे परे धाम्नि ये चान्ये च दिवौकसः। ते वै प्राकृतलोकेस्मिन्ननित्यास्त्रिदिवेश्वराः ॥" इति। "उभयथापि तस्य च नित्यत्वात्" इत्यत्र करणपक्षस्यैव हि देवता, न भोक्तृपक्षस्येति शारीरकनिर्णयः। श्रीगोपादीनामन्तरंगपरिकरत्वेन सर्वशक्तित्वमिति श्रीकृष्णोपासनाशास्त्राभिप्रायः। पूर्ववदश्लीलपरिहारः, सूर्यादीनां नयनादिकोटिभिर्युगपद्दर्शनादिसुखाधिक्यसातत्यपरिहारस्तु विरुध्यते। ततश्चेयं वा व्याख्या। श्रीमन्नन्दराजव्रजौकसां तादृशं भाग्यमेव कैमुत्येन स्तोतुं कादाचित्केनापि तन्माधुरीमात्रलाभेन स्वेषामपि भाग्यमभिनंदति, तेन च तादृशनिजाभिलाषमपि द्रढयति—एषामिति। यद्वैकाऽद्वितीयाऽनुपमेत्यर्थः। तदेतद्व्रजे प्रथमानं तदेतदित्यर्थः। ते त्वांघ्युदजमधु हृषीकचषकैर्निजनिजचक्षुरादिभिरेव पानपात्रैः शक्त्या भक्त्या च, प्राधान्यात् शर्वं आदिर्येषां ते दशदिक्पालदेवता वयमसकृत्पुनः पुनरिहागत्य पिबामः। वक्ष्यते च 'वंद्यमानचरणः' इत्यादि। कीदृशम्—अमृतासवं परमस्वादुत्वादिनाऽमृतं परममादकत्वेन चासवं तयोर्द्वंद्वैक्यं तद्रूपम्। यद्वा–एते च ते हृषिकचषकाश्च तैः, एतच्छब्दप्रयोगश्चात्यन्तचमत्कारेण। अमृता मृत्युहीना मुक्तास्तेषामप्यासवं मादकम्। किञ्च, व्रजवासिभिर्वयमपि भूरिभाग्याः क्रियामहे। एतद्धृषीकैस्तत्रत्याऽभिमानाध्यवसायसंकल्पशब्दसर्शरूपरसगन्धकीर्त्तनसंवाहनातिकगत्यात्मकं तदेवामृतासवं स्वादु मादकं गुह्यें द्रियद्वयस्याश्लीलत्वाच्चित्ताधिष्ठातुर्वासुदेवस्य त्वदभेददृष्ट्या त्यागादेकादशैवेति। यद्यप्यत्रैषामन्तरात्मन एव विषयभोगो न तु तत्तत्कर्तृणामिंद्रियाधिष्ठातृणामित्यध्यात्मसिद्धान्तस्तथापि बुद्धौ ब्रह्मा तिष्ठति, चक्षुषि सूर्यश्च। तमधिष्ठातारं विना तत्तदिन्द्रियं श्रीकृष्णनिष्ठानामपि रूपरसादीनां ग्राहकं न स्यादिति सामान्यदृष्ट्यात्मविदां प्रवादोऽपि श्रीकृष्णे रत्यौत्कंठावतां ब्रह्मादीनामानंदहेतुः कर्तृत्वामात्रेणैव भोक्तृत्वाभिमानांगीकारात्, तथैव स्वेषां प्राकृतत्वेप्यप्राकृततत्तद्रिन्द्रियाधिष्ठातृत्वाभिमानाच्च। प्रेम्णामेव विलक्षणप्रक्रियेयं, दृश्यते चान्यत्र पद्यावल्यादौ–'मिथ्यापवादवचसाप्यभिमानसिद्धे" इत्यादि। अन्यथा चिदानंदमयवपुषामपि श्रीभगवत्परिवाराणामिंद्रियादीनामपि भगवत इव तन्मयत्वमेव न तु प्राकृतत्वं संभवेत्, कुतस्तत्र प्रपंचगतानां ब्रह्मादीनां प्रवेश इति ज्ञेयम्। अत्रैतादृशपदेन गुह्यें द्रियद्वयस्याश्लीलत्वादनुपयोगाच्च तदधिष्ठात्रोर्मित्रप्रजापत्योस्त्याग एव ध्वनितः। यद्वा—कादाचित्केनापि तन्माधुरीलाभेन स्वेषामपि भाग्यमभिनन्दन्ति, एषां भाग्यमहिता एकाऽद्वितीयाऽनुपमेत्यर्थः। दशैव वयं दशदिक्पाला भूरिभागा भवामः। कुत इत्यत आह— एतदिति। स्वतर्जन्या स्वनेत्रश्रोत्रं स्पृशति। वत्सचारणाय व्रजान्निष्क्रांतस्य तव चरणसौन्दर्यामृतं नेत्रश्रोत्रैः पिबामः। असकृत् पौनःपुन्येन। 'वन्द्यमानचरणः पथि वृद्धैः' इत्युक्तेः 'शक्रशर्वपरमेष्ठिपुरोगाः' इत्युक्तेश्चेति विश्वनाथः ॥ ३३ ॥ यतो ब्रजवासिन एव धन्या अतः कारणात्। यस्य कस्यापीत्यनेनोच्चनीचभेदो निरस्तः। "स्त्री राधा पुरुषः कृष्णो विज्ञेयो व्रजमध्यगः। न तत्र सर्वजातेषु विशेषो विद्यते क्वचित्॥" इति संहितोक्तेः। अत्राशंकते – नन्विति। तत्र क्षेपे। निखिलं सर्वात्मतया। इत्यर्थ इति। अहर्निशं कृष्णकेताना एत इति भावः। इत्यर्थ इति। अहो तेषां भाग्यं, ये प्रत्यक्षं पश्यंतीति भावः ॥ तस्माज्जगदैश्वर्याय प्राताय, प्राभव्याय मोक्षाय च मया जलाञ्जलिर्दत्तः। केन प्रकारेणैषां व्रजवासिनां चरणधूलयो लभ्यंत इति विभाव्य सनिश्चयमाह—तदेव मे भूरिभाग्यं भवत्विति शेषः। यदि श्रीमत्कृपाकटाक्षा उदारा भवंतीति भावः। किं तत्। इहाटव्यां वृन्दावने यत्किमपि कोमलतृणदूर्वादिजन्म, यदुपरि

त्वत्प्रियसखादिव्रजवासिजनचरणविन्यासससौभाग्यं संभवेत्। नन्वस्मिन्नतिदुर्लभे लोभं विहाय स्वयोग्यमन्यत्प्रार्थयस्वेति चेत् तर्हि गोकुलेऽपि त्वन्नगरप्रांतादावपि कतमस्य त्वदीयशौचिककालारुहदिद्वपाद्येकतरस्यांघ्रिरजसोऽभिषेको यत्र तथाभूतं शिलापीठं पट्टिकादिजन्म भवतु। नन्वेषां व्रजवासिनामेतावन्माहात्म्ये को हेतुः, कथ वा जगत्पूज्यस्य जगत्स्रष्टुः परमेष्ठिनस्तवैषां नीचजातीनां पादधूलिलिप्सायां नास्ति लज्जेति तत्राह —येषां जीवितं भगवान् 'भगः श्रीकाममाहात्म्य–' इत्यमरनानार्थवर्गात्। सौन्दर्य्यसौस्वर्य्यादिगुणविशिष्टो भवान्। मुकुन्दमुखे कुन्दवद्धास्यं यस्य स इति। त्वत्सौन्दर्य्यमन्दहसिताद्येवैकजीवनोपायः, तेन विना सद्य एवामी म्रियन्त इति भावः निखिलमिति। किञ्चिदपि जीवितं न भोजनपानादिहेतुकमित्यर्थः। अतोऽद्यापि येषां पादरजः श्रुतिभिर्मृग्यत एव न तु प्रायः प्राप्यत इत्यतोऽहं ब्रह्मापि किं वेदेभ्योधिको यतः एतत्प्रार्थने मम लज्जा स्यादिति भावः। अतो मया 'तदस्तु मे नाथ' इति यत्पूर्वं प्रार्थितं तत् स्वस्य वैधभक्तिमत्त्वे एव। यदि व्रजजनानुगतिमत्त्वेन मां रागानुगामृताम्भोधौ निमज्जयति तदेवं प्रार्थितम्॥ अत्र तोषिणी—तदेवं तेषां महामाहात्म्यमनुवदन् जातदैन्यस्त्वज्जनान्तःपातितया त्वच्चरणसेवेच्छामपि धाष्टर्येनैवाकरवमिति व्यञ्जयन् यत्किञ्चित्त्वज्जनचरणरज एव बहु मन्यमानः प्रार्थयते–तदिति। तत्प्रतिकूलं मुक्त्यादिपञ्चकम् इहेत्यादिपदपञ्चकेन निरस्तम्। जन्मेति। मुक्तिरिह मथुरामण्डल इति वैकुण्ठादिकमपीति सारूप्यादि, अटव्यामिति मथुरादि, गोकुल इति मधुवनादि। तत्रापि किमपि दूर्वादिमृदुतृणत्वमित्यभिप्रायः। तत्रैवांघ्रिरजोभिः सम्यगभिषेकसिद्धेः त्वच्चरणसेवायामन्तरीणाभिलाषाच्च। अभिषेक इति सर्वाङ्गसाफल्यलोभादुक्तम्। ननु कथं साक्षाद्गोपादिजन्मैव न प्रार्थ्यते, तत्राह - यदिति। यस्य गोकुलस्य तद्वासिमात्रस्य निखिल भगवान् मुकुन्द एव, तत्र यः स्वय भगवान् परात्परत्वात्साधयितुमशक्य इत्यर्थः। साधितोऽपि यो मुकुन्दः प्रायशो मुक्तिमेव दाता न तु भक्तियोगमात्रमपि तमेतं विना सज्जनः क्षणमपि न जीवितुं शक्नोतीत्यर्थः, इति परमप्रेमविशेषवत्त्वमुक्तम्। आस्तां तावदन्यैर्दुस्साध्यत्वं दुर्लभप्रेमत्वं च, यस्य पादरजः श्रुतिभिरद्यापि त्वयि साक्षादत्रावतीर्णेऽपि दृश्यत एव कतम रजः कियान्महिमेति ज्ञातुमिष्यत एव, न तु तदन्तः प्राप्यत इत्यर्थः। "यतो वाचो" इत्यादिश्रुतेः। अतः परमप्राचीनतादृशसर्वज्ञानप्रदश्रुतिदुर्लभज्ञाने त्वत्पादरजस्यपि प्रार्थना मेऽनुपयुक्ता, कुतः पुनः प्रेमतरवशीकृतत्वत्पादाब्जश्रीगोपादिजन्मप्रार्थनेति भावः। एवम् 'अहोऽतिधन्याः' इत्यारभ्य श्रीव्रजवासिभेदानां यथापूर्वंमाहात्म्यकैमुत्य दर्शयित्वा श्रीव्रजेश्वरयोस्तु तदतीव बोधितं, साक्षात्तदप्रस्तावश्च तौ प्रशंसितुमपि कोऽहं वराक इति विवक्षया। सखायस्तु—स्वापराधजभयलज्जाभ्यां न प्रस्तुता एव। अतश्च तदाच्छादनाय लब्धानन्दविशेषा जन्मान्तर एव प्रथमत उपन्यस्ता इति ज्ञेयम्॥ ३४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो एषां माहात्म्यं को नाम वर्णयितुं शक्नुयात् वयमप्येषां सम्बन्धेनैव परमकृतार्था जाता इत्याह–एषामिति। तु शब्दो भिन्नोपक्रमे अङ्घ्र्युदजमधु श्रीचरणारविन्दमाधुर्यं तत्पानं तु तदीयाभिमानाध्यवसायसङ्कल्पदर्शनश्रवणादिरूपं देवताश्च शर्वब्रह्मचन्द्रदिग्वातार्कप्रचेताऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः। यद्वा, गुह्येन्द्रियद्वयस्यानुपयोगादश्लीलत्वाच्च तदधिष्ठात्रोर्मित्रप्रजापत्योस्त्यागेनैकादश पादाधिष्ठातोपेन्द्रस्तु तदीयधारणशक्त्यावेशावतारो देवताविशेष एव कश्चित् चित्ताधिष्ठातारं श्रीवासुदेवं विना तेषां सर्वेषामप्यकर्तुं क्षमत्वेन तृतीयेऽभिधानात् तस्य तु तत्समीपगत्यनुभवसुखं श्रीगोपादीनां स्वयं भगवतो नित्याप्राकृतपरिकरत्वादेतेषां च प्राकृताधुनिकत्वात्तदसम्भवेऽपि तन्नित्यावरणस्य देवगणाभेदविवक्षयेदमुक्तं तदावेशिरूपत्वात्तेषां तथा च पाद्मोतरखण्डे—

"नित्याः सर्वे परे धाम्नि ये चान्ये च दिवौकसः। ते वै प्राकृतनाकेऽस्मिन्ननित्यास्त्रिदशेश्वराः"॥ इति।

उभयथापि तस्य च नित्यत्वादित्यत्र करणपक्षस्यैव हि देवता न भोक्तृपक्षस्येति शारीरकनिर्णयः श्रीगोपादीनामन्तरङ्गपरिकरत्वेन स्वतः सर्वशक्तित्वमिति श्रीकृष्णोपासनाशास्त्राभिप्रायः पूर्ववदश्लीलपरिहारः सूर्यादीनां नयनादिकोटिभिर्युगपद्दर्शनादिसुखाधिक्यसातत्यपरिहारश्च विरुद्धचेत् तत इयं वा व्याख्या श्रीमन्नन्दराजव्रजौकसां तादृशं भाग्यमेव कौतुकेन स्तोतुं कादाचित्केनापि तन्माधुरीमात्रलाभेन स्वेषामपि भाग्यमभिनन्दति तेन च तादृशानिजाभिलाषमपि दृढयति एषामिति। एका अद्वितीया अनुपमेत्यर्थः। एतत् व्रजे प्रथमानं तदेतदित्यर्थः। ते तवाङ्घ्र्युदजमधु हृषीकचषकैर्निजनिजचक्षुरादिभिरेव पानपात्रैः शक्त्या भक्त्या च प्राधान्याच्छर्व आदिर्येषां ते दशदिक्पालदेवता वयमसकृत्पुनः पुनरिहागत्य पिबामः वक्ष्यते च "वन्द्यमानचरणः पथि वृद्धैः" इति "शक्रशर्वपरमेष्ठिपुरोगाः" इति च कीदृशम् अमृतासवं परमस्वादुत्वादिना अमृतं परममादकत्वेन चासवः तयोर्द्वन्द्वैक्य तद्रूपम्। यद्वा, एते च ते हृषीकचषकाश्च तैः एतच्छब्दप्रयोगश्चात्यन्तचमत्कारेण अमृता मृत्युहीना मुक्ताः तेषामप्यासवं मादकमित्यर्थः॥ ३३॥ तदेव तेषां महामाहात्म्यमनुवदन् जातदैन्यस्त्वज्जनान्तः पातितया त्वच्चरणसेवेच्छामपि धाष्टर्येनैवाकरवमिति व्यञ्जयन् यत्किञ्चित्तज्जनचरणरज एव बहुमन्यमानः प्रार्थयते, तदिति। तत्प्रतिकूलमुक्त्यादिपञ्चकम् इहेत्यादिपदपञ्चकेन निरस्तं तत्र जन्मेति मुक्तिः इह मथुरामण्डल इति वैकुण्ठादिकमपीति सारूप्यादि अटव्यामिति मथुरादि गोकुल इति मधुवनादि तत्रापि किमपि दूर्वादिमृदुतृणत्वमित्यभिप्रायः तत्रैवाङ्घ्रिरजोभिः सम्यगभिषेकसिद्धे तच्चरणसेवायामन्तरीणाभिलाषाच्च अभिषेक इति सर्वाङ्गसाफल्यलोभादुक्तम् अन्यत्तैः। यद्वा, ननु कथं साक्षाद्गोपादिजन्मैव न प्रार्थ्यतां तत्राह–यदिति। यस्य गोकुलस्य तद्वासिमात्रस्य निखिलं

जीवितं भगवान् मुकुन्द एव तत्र यः स्वयम्भगवान् परात्परत्वात् साधयितुमशक्य इत्यर्थः। साधितोऽपि यो मुकुन्दः प्रायशो मुक्तिमेव दाता न तु भक्तियोगमात्रमपि तमेतं विना मज्जनः क्षणमपि न जीवितुं शक्नोतीत्यर्थः। इति परमप्रेमविशेषवत्त्वमुक्तम् आस्तां तावदन्यैर्दुःसाध्यत्वं दुर्लभप्रेमवत्त्वं च यस्य पादरजःश्रुतिभिरद्यापि त्वयि साक्षादत्राऽवतीर्णेऽपि एव कतमं रजः कियन्महिमेति ज्ञातुमिष्यत एव न तु तदन्यः प्राप्यत इत्यर्थः। "यतो वाचः" इत्यादिश्रुतेः अतः परमप्राचीनमादृशसर्वज्ञानप्रदश्रुतिदुर्लभज्ञानेत्वत्पादरजस्यपि प्रार्थना मेऽनुपयुक्ता कुतः पुनः प्रेमभरवशीकृतत्वत्पादाब्जकश्रीगोपादिजन्मप्रार्थनेति भावः। एवम् अहोऽतिधन्या इत्यारभ्य श्रीव्रजवासिभेदानां यथापूर्वं माहात्म्यकैमुत्यं दर्शयित्वा श्रीव्रजेश्वरयोस्तु तदतीतबोधितं साक्षात्तत् प्रभावश्च तौ प्रशंसितुमपि कोऽहम् वराक इति विवक्षया सखायस्तु स्वापराधजभयलज्जाभ्यां न प्रस्तुता एव अतश्च तदाच्छादनाय लब्धानन्दविशेषास्तन्मातर एव प्रथमत उपन्यस्ता इति ज्ञेयम् ॥ ३४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो एषां माहात्म्यं को नाम वर्णयितुं शक्नुयात् ? वयमप्येषां सम्बन्धेनैव परमकृतार्था जाता इत्याह—एषामिति। तुशब्दः कटाक्षे वाक्यालंकारे वा; भाग्यमहिता, पुनः हे अच्युतेति त्वद्भक्तानामपि भाग्यमहिमा सर्व्वतोऽच्युत एवेति भावः। अङ्घ्रयदजमधु श्रीचरणारविन्दमकरन्दं श्रीभगवद्दास्यतदीयबुद्धिनिश्चयाध्यवसायसंकल्परूपदर्शनकथाश्रवणादिरूपम्; कथम्भूतम् ? परममाधुर्य्यादिनामृतञ्च तदासवञ्च, असवः प्राणास्तन्मयं परमजीवनरूपमित्यर्थः। यद्वा, अमृता मृत्युहीना मुक्तास्तेषामप्यासवं परममादकमित्यर्थः—मोक्षसुखादप्याधिक्येन तद्विस्मारकत्वात्, एवमीदृशस्य मधुनोऽसकृत् पानविशेषादन्येभ्योऽपि भक्तेभ्यो व्रजौकसामधिकं माहात्म्यं दर्शितमेकादशेति, (भा० २।५।३०) 'दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः' इतीन्द्रियाधिष्ठातारो दश, मनोऽधिष्ठाता चन्द्रश्चैक इत्येकादश। वयमिति बुद्ध्याधिष्ठाता ब्रह्मा, शर्व्वादय इति तद्गुणसंविज्ञानबहुब्रीहिणाऽहंकाराधिष्ठाता रुद्रश्चेति त्रयोदशेत्यर्थः। अन्यत्तैर्व्याख्यातमेव। यद्वा, पायूपस्थयोर्भक्तौ साक्षादुपयोगाभावात्तदधिष्ठात्रोर्मित्रप्रजापत्योः परित्यागेनैकादश, यद्वा, पुंसां वैष्णवपुत्रोत्पादनादिना योषिताञ्च तत्रत्यानां प्रायोभगवत्साक्षाद्भजनादिना कथञ्चित् प्रजापतेरुपयोगे सति पादाधिष्ठातोपेन्द्रः श्रीवासुदेवस्य भगवतोऽवतारत्वेन तदभिन्न एवेति तद्व्यतिरेकेण एकादशैव सिध्यन्ति। यद्यपि सच्चिदानन्दविग्रहाणां व्रजजनानां तेषामिन्द्रियाद्यधिष्ठातृत्वयोग्याः प्राकृताश्चन्द्रादयो देवा न भवन्ति, किन्तु सच्चिदानन्दविग्रहाः श्रीवैकुण्ठवर्त्तिन एव, तथापि श्रीवैकुण्ठवासिनां छायारूपत्वेन तैः सहैषामेवाभेदविवक्षया बहिर्दृष्ट्या वा तथोक्तम्। तथा च पाद्मोत्तरखण्डे नित्यवैकुण्ठकथने तत्रत्यदेवानां नित्यत्वम् —'नित्याः सर्व्वे परे धाम्नि ये चान्ये च दिवौकसः। ते वै प्राकृतनाकेऽस्मिन्ननित्यास्त्रिदशेश्वराः ॥' यद्वा, सर्व्वातिशायिनीं कृष्णस्य विविधां माधुरीमनुभूय कादाचित्केनापि तल्लाभेन स्वेषामेव भाग्यमभिनन्दति—एषामिति। एतद्व्रजे प्रथमानं तवाङ्घ्रयदजमधु हृषीकचषकैः स्वस्वेन्द्रियपानपात्रैः पिबामः। कथम्भूतम् ? अमृतासवममृतवन्मधुरमासववन्मादकं च वयं निरुक्तिवर्जिता लोकपाला नव, चन्द्रसूर्य्याविति चैकादशेति ॥ ३३ ॥ श्रीनन्दव्रजजनसदृशभक्तीच्छया तत्पादपल्लवनिषेवेच्छया वा तत्प्रतिकूलनुक्त्यादिपञ्चकमिहेत्यादिपदपञ्चकेन निरस्तम्,—तत्र जन्मेति मुक्तिः, इहेति स्वर्गादि, किमपीति ब्राह्मणादि, अटव्यामिति पुरग्रामादि, गोकुल इति तपोवनादि; किमपीति क्षुद्रतरतृणत्वमभिप्रेतम्, तवैवाङ्घ्रिरजसः सम्यगभिषेकसिद्धेरभिषेकशब्देन शिर आरभ्य सर्व्वांगस्नपनमभिप्रेतम्, महालोभात् सर्व्वांगसाफल्यापेक्षया वा; यद्वा, रजसैकेनाप्यभिषेकम्, ततश्च रजसः सर्व्वतीर्थमयत्वं सर्वपदस्थापकत्वञ्च ध्वन्यते। यस्य पदरजः श्रुतिभिरप्यद्यापि त्वयि साक्षादत्रावतीर्णेऽपि मृग्यत एव, न तु प्राप्यत इत्यर्थः, यतो भगवत्प्राप्त्यर्थमेव (तै० २।५।१) 'ब्रह्म पुच्छं प्रतिष्ठा' इति श्रुतेः, (कठ० १।३।९) 'तद्विष्णोः परमं पदम्' इति भगवत्पदत्वेनैव ब्रह्म प्रशस्यते, ज्ञानकर्म्मादिकं च प्रबोध्यते, अन्यथा प्राप्तौ सत्यां साध्यसिद्ध्या साधनत्यागन्यायेन तत्प्रशंसाज्ञानादिबोधनानुपपत्तिः। स मुकुन्दः—मादृशदुर्ल्लभभक्तिदाता, विशेषतश्च भगवान् निजाखिलैश्वर्य्यप्रकटनपरः। यस्य गोकुलस्य सर्वेषामपि तत्रत्यानामित्यर्थः, निखिलं जीवितम् —क्षणमपि त्वां विना यैर्न जीव्यत इत्यर्थ इति परमप्रेमविशेष उक्तः। अन्यत्तैर्व्याख्यातमेव। यद्वा, ननु गोकुलवासिनां कस्यापि पादरजःस्पर्शि किमपि जन्म प्रार्थ्यते, न कथं साक्षाद्गोपादि ? तत्राह —यज्जीवितमिति। अर्थः स एव। परमप्राचीनमादृशसर्वज्ञानप्रदश्रुतिदुर्ल्लभस्य त्वत्पादरजसोऽपि प्रार्थना मेऽनुपयुक्ता, कुतस्तु प्रेमभरवशीकृतत्वत्पादाब्जजश्रीगोपादिजन्मप्रार्थनेति भावः ॥ ३४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अथैकादशेन्द्रियाधिष्ठातृदेवानां महदात्मकस्वस्वरूपत्वेन तद्भोग्यस्य भगवतः स्वभोग्यत्वमङ्गीकृत्य स्वाश्वासनं विधत्ते एषां त्विति। अङ्घ्र्युदजमधु अङ्घ्रिकमलयोर्मधुमादकम् अमृतं सेवामृतं कथामृतञ्चेति अन्यत्स्पष्टम् ॥ ३३ ॥ भवज्जनानां इत्युक्तप्रपन्नसङ्गस्य प्रपन्नशेषत्वज्ञानस्य च परमभोग्यत्वमाह–कैमुत्येन तद्भूरिभाग्यमिति। इहाटव्यां किमप्यनिर्वाच्यं कीटतृणादिजन्म यच्चापि गोकुले गवां कुले वत्सादिजन्म श्रीकृष्णहस्तकमलस्पृश्यदोह्याभिनन्द्याह्वानयोग्यतयाभ्यर्हितं तदपि भूरिभाग्यम् उभयविधं जन्म मम स्यादपि पूर्वतनोक्तं कीटादिजन्म विशिनष्टि—कतमाङ्घ्रिरजोऽभिषेकं बहुष्वेकस्य व्रजवासिनोऽप्यङ्घ्रिसम्बन्धिरजसाम-

भिषेको यस्य तत् उभयविधस्यापि श्रीभगवत्श्रीकृष्णसम्बन्धित्वमाह—यज्जीवितं त्विति । तुशब्दः जीवितभिन्नस्यात्यसारत्वं व्यनक्ति, तत्रापि निखिलम् इति च पतिपुत्रादिबन्धुविशिष्टम् इति भगवान् ज्ञानबलशक्ति-तेज-ऐश्वर्यवीर्याद्यनन्तगुणविशिष्टः सुलभतयाऽघादिमुक्तिदातृत्वेन मुकुन्दः स भगवान् येषां गोगोपालवृक्षतृणादीनां जीवितमेव जीवितकाल आयुरूपः प्राणरूप इति यावत् यस्य तव पदरजस्तु अद्यापि श्रुतिमृग्यम् एव वेदोपनिषद्भिर्मृग्यम् अन्वेषणीयम् "यमेवैष वृणुते तेन लभ्यः कोऽद्धा वेद क इह प्रावोचत् मुमुक्षुर्वै शरणमहं प्रपद्ये" इत्याद्याः श्रुतयो वदन्ति इति भावः ॥ ३४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे अच्युत ! तेषां नन्दादीनां भाग्यस्य महिमा तावदास्तां कस्तमियत्तया वर्णयितुं शक्नुयादित्यर्थः । शर्वोऽहङ्काराधिष्ठाता आदिर्येषां ते मनोबुद्धिचित्ताधिष्ठातॄणां चन्द्रादीनां ते वयमेकादश च स्वस्य चित्ताधिष्ठातृत्वेऽपि मेढ्राधिष्ठातृत्वाच्च एकादशेत्युक्तम् एवं चतुर्दश वयं इति भावः । वयं मेढ्रादिकर्मज्ञानेन्द्रियाभयाधिष्ठातारश्च भूरिभागाः महाभाग्यवन्तः वयमित्यात्मानमेव बहुमन्यमानस्योक्तिः एवं मनोबुद्ध्यहङ्कारोभयेन्द्रियाधिष्ठातारः त्रयोदश देवाः विवक्षिताः । कुतः ? यस्मादेतेषां हृषीकाणीन्द्रियाण्येव चषकाणि पात्राणि तैस्तवाङ्घ्रिरेवोदजं कमलं तस्य मधु मकरन्दस्तदेवामृतं स्वाद्वासवं मादकं पिबामः एतदुक्तं भवति । यथा प्रत्येकेन्द्रियाभिमानिनो वयं कीर्त्तिसौगन्ध्याद्येकैकदेशसेविनोऽपि कृतार्थास्तथा सर्वेन्द्रियैः सर्वसेविनामेतेषां किमु वर्ण्यते भाग्यमिति ॥ ३३ ॥ यन्मया प्रार्थनीयं तदेवेत्याह–तदिति । यन्मया प्रार्थनीयं भूरिभाग्यं तदेवेत्यर्थः, किं तदिह मनुष्यलोके यत् किमपि मनुष्यजन्म तत्राप्यटव्यां यत्तत्रापि गोकुले यदहो सत्यलोकं विहायात्र जन्मनि ते को लाभः अत, आह, गोकुलवासिनां मध्येऽपि कतमस्य यस्य कस्यापि अङ्घ्रिरजसाऽभिषेको यस्मिंस्तत् कतमं विशिनष्टि–यस्य गोकुलवासिनः कतमस्यापि जीवितं भगवान् मुकुन्द एव भगवान्मुकुन्दपरमेव जीवनमित्यर्थः । तस्य दुर्लभत्वमाह अद्यापीति । यस्य तव पदरजः केवलं श्रुतिभिर्वेदान्तैर्मृग्यत एव न तु दृश्यत एवेत्यर्थः ॥ ३४ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

अपि चैतेषां भाग्यमहिमाऽऽस्तां तावत् कस्तं वक्तुं शक्नोति वयं सर्वे शर्वादय एतेषामिन्द्रियाणामधिष्ठातार एव महाभागा इत्याह–एषां त्विति । हे अच्युत ! एषां घोषनिवासिनां भाग्यमहिमा तावदास्तां तिष्ठतु शर्वादयः अहङ्काराधिष्ठाता शर्व आदिर्येषां चन्द्रादीनां ते शर्वादय एकादश वयमिति स्वस्य भगवद्दर्शनेन बहुमन्यमानः पूज्यत्वं ख्यापयति, पृथक्त्वेनेति भावः । अतस्तत्साहित्येन द्वादशैव एते सर्वे तत्तदिन्द्रियाधिष्ठातारो बत इति हर्षे भूरिभागा धन्याः कुतः ? यस्मादेतेषां हृषीकाणीन्द्रियाण्येव चषकाणि पानपात्राणि तैस्ते त्रयोदश चतुर्दशस्य विष्णुवासुदेवशब्दवाच्यस्य पादेन्द्रियचित्तेन्द्रियाधिष्ठातुस्तवाङ्घ्री एवोदजे पद्मे तयोर्मधु मकरन्दरूपामृतं स्वादु आसवं रसम् असकृद्वारं वारं क्षणे क्षणे पिबामः अनुभवामः अतो वयं भूरिभागा एते भूरिभाग्यवन्त इत्यत्र किं वक्तव्यमिति भावः । तत्रैतेषां ज्ञानेन्द्रियेषु श्रोत्रचक्षुर्घ्राणरसनात्वग्भेदात्पञ्चसु दिगादित्याश्विवरुणवायवः पञ्चाधिष्ठाय भगवच्चरित्रश्रवणतद्दिव्यविग्रहदर्शनतत्पादतुलस्याद्यवघ्राणतत्प्रसादशेषास्वादनतत्पादसम्वाहनादिद्वारा अनुभवं कुर्वन्ति एतेषां कर्मेन्द्रियेषु वाक्पाणिपादपायूपस्थेषु अग्नीन्द्रोपेन्द्रयमप्रजापतयः पञ्चाधिष्ठाय तद्गुणकीर्त्तनतत्कर्मरूपाराधनतद्दर्शनाद्यर्थगमनतत्कैङ्कर्योपयोगितया पायूपस्थद्वारा शरीरशुद्ध्यादिभिरनुभवन्ति, त्वामिति । तत्र विष्णुवासुदेवशब्दवाच्ये त्वया एतेषां पादेन्द्रियचित्तयोरधिष्ठात्रा स्वेनैव स्वस्यानुभवः क्रियते विवेकः अतो द्वादशैव वय धन्या इत्यर्थः । एतेषां सर्वेन्द्रियाणि भगवत्प्रवणानीति स्वयमेव वक्ष्यति "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" इति ॥ ३३ ॥ अतो मया यत्पूर्वं प्रार्थितं तदेवास्त्वित्याह—तद्भूरिभाग्यमिति । मम तदेव भूरिभाग्यं किन्तत्तदाह—इहास्मिन् लोकेऽपि यत्किमपि जन्म स्यादिति शेषः । तत्राप्यटव्यामपि यत् तत्रापि गोकुले यत् । ननु सर्वलोकोपरि वर्त्तमानसत्यलोकवासं तिरस्कृत्यात्र जन्म किमिति प्रार्थयतीत्यत आह–कतमाङ्घ्रिरजोऽभिषेकम् अपीति सम्भावनायां गोकुलवासिनां मध्ये कतमस्यापि अङ्घ्रिरजसाऽभिषेको यस्मिन् जन्मनि तत् । ननु, गोकुलवासिनामेवाङ्घ्रिरजः किमर्थं प्रार्थ्यमिति चेत्तेषां त्वय्यनन्यभक्तत्वादित्याह, यज्जीवितं निखिलं मुकुन्द एव येषां सर्वं जीवितं धारणपोषणादिरूपं जीवनं मुकुन्द एव अतस्तेषामङ्घ्रिरजः प्रार्थ्यमित्यर्थः । येषां त्वमतिदुर्लभोऽपि श्रुतिमृग्यमेव न तु तासां गोचर अतो गोकुले मम जन्म स्यात्तदेव भूरिभाग्यमिति भावः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एषामित्यादिपञ्चकम् ॥ ३३–३७ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अत एषां भाग्यं वर्णनीयं न भवति, तद्दूरेऽस्तु; एषां सम्बन्धाद्वयमेव धन्या इत्याह—एषां त्वित्यादि । हे अच्युत ! एषां भाग्यमहिमा सौभाग्यमहिमा दूरादास्ताम् वयमेव भूरिभागा अतिधन्या वयमिति किमहमेवेत्यर्थे बहुवचनम् । किं वा अन्ये अपीत्याः

शङ्कयाह—एकादशैव । कुतः ? तत्राह—एतदित्यादि । गृहीतनराकृतीनामेषामप्राकृतत्वेऽपि नराकृतित्वादिन्द्रियाधिष्ठातार एवास्मदादय एषां हृषीकचषकैस्तु तवाङ्घ्र्युदजमध्वमृतासवं पिबामः । के ते एकादश ? तत्राह–शर्वादयः शर्वादीनां त्रयोदशानां मध्ये एकादशैवेति पायूपस्थाधिष्ठात्रोरनौचित्याद्वर्जनम्, यद्वा, हे अच्युत ! एषां भाग्यमहिमा दूरादास्ताम्, सा किं वर्णनीया, मित्रीभूतपूर्णब्रह्मत्वात् । कीदृशी ? एका मुख्या अदशा, दशा अवस्था, तद्रहिता एकरूपा । एवकार उभयत्र योज्यः । किन्तु शर्वादयो वयमेव भूरिभागाः । कुतः ? इत्यत आह—हृषीकचषकैरेषामेतदङ्घ्र्युदजमधु पिबामः । कीदृशम् ? अमृतासवम्—अमृतस्य आ सम्यक् सवः प्रसवो यस्मात्, 'सु प्रसवे' इत्यतः, अतएव रसकृदानन्दकृत्ते प्रसिद्धा दश दिगधीशाः शर्वादयो वयमित्यन्वयः । अतः पूर्वोक्तेन (३२ श-श्लो) "यन्मित्रं परमानन्दं पूर्णं ब्रह्म" इत्यादिना कृतश्लाघानां व्रजौकसां चरणमधुपानं त्वच्चरणमधुपानादप्यभीष्टमिति ध्वनिः ।। ३३ ।। अतो भगवन् ! अनेन शरीरेणासकृदेषां चरणमधुपानं स्वाच्छन्द्येन न सम्भवति, विनात्रैव लब्धेन जन्मान्तरेण तेन तथा कृपा कार्या, यथात्र यत् किञ्चिदपि जन्म भवतीत्यादि । तद्भूरि भाग्यमित्यादि, तत्तस्मादटव्यां श्रीवृन्दावने व्रजे वा किमपि जन्म भूरिभाग्यमस्तु, मे इति शेषः । किमपीति यत्किञ्चिदपि जन्म तदेव भूरिभाग्यम् । कुतः ? इत्याह—यदिति । यज्जन्म गोकुले व्रजेऽपि कतमस्य यस्य कस्यचिज्जनस्याङ्घ्रिरजसामभिषेको यत्र गोकुलवासिनां यस्य कस्यापि पदधूलिसेको यत्रेति सापेक्षसमासः, तेषां पादरजोऽभिषेकः कथमेव तवाभिलषणीय ? इत्याशङ्क्याह यदिति । यद्येषां भगवान् मुकुन्दस्त्वं जीवितं प्राणा निखिल जातिधनादि सर्वमपरञ्च । ननु मुकुन्द एवाहम्, किमेवं दुर्लभः ? अथ किम्, दुर्लभातिदुर्लभ एवेत्याह—अद्यापि यत्पदरजः श्रुतिमृग्यमेव । यस्य तव भगवतो कुमुन्दस्य पदरजः श्रुतिभिर्मृग्यत एव न तु लभ्यते ।। ३४ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एषां त्वित्यादि । एषां व्रजवासिनां भाग्यमहितां किं वर्णयामः ? सा तु दूरत आस्ताम्, वयमेव भूरिभागा अतिधन्याः, वयमिति गौरवेण बहुवचनम् । कियत् संख्यकाः ? तत्राह–एकादशैव तु । कुतः ? एतद्धृषीकचषकैस्ते तवाङ्घ्र्युदजमध्वमृतासवमसकृत् पिबामश्चेत् के ते एकादश शर्वादयः सर्वप्रधानाः त्रयोदशानां मध्ये एकादशैवेति निर्धारणं पायूपस्थाधिष्ठात्रोरनौचित्याद्वर्जनम् । यद्वा, एषां भाग्यमहिता दूरादास्ताम्, यत एषामेका मुख्या, अतोऽदशैव दशावस्था तत्र स्थिता एकरूपा एकैव अदशैव इत्येवकार आवर्त्तनीयः । अतः सा किं वक्तुं शक्यते ? किन्तु ते प्रसिद्धा वयं भूरिभागाः । कुतः ? हृषीकचषकैरेषामङ्घ्र्युजमधु पिबामः । कीदृशम् ? अमृतासवममृतादपि आसवमसूनामिदं हितमासवम् । वयं कीदृशाः ? शर्वादयः शर्व आदिर्येषाम् ।। ३३ ।। यत्सम्पर्काद्वयमपि धन्याः, तत्स्वरूपा तु परमप्रेयसीत्याह –तद्भूरिभाग्यमित्यादि । इह नृलोके तत्राप्यटव्यां वृन्दावने, तत्रापि गोकुले नन्दव्रजे अपि कतमस्य यस्य कस्याप्यङ्घ्रिरजसमभिषेको यत्र । नृलोक इति नृजन्म वा, अटव्यामिति तर्वादिजन्म वा, गोकुल इति गवादि-जन्म वा । यद्येषां तु भगवान् मुकुन्दस्त्वं निखिलं जातिकुलशीलादि जीवितं प्राणाः यस्य मुकुन्दस्य तव पादरजस्तु अद्यापि श्रुतिमृग्यमेव, न तु तासां लभ्यम् । मुक् मुक्तिस्तां नुन्दति क्लेदयति भक्तान् प्रति मुक्तिं विक्लेदयतीत्यर्थः । पृषोदरादित्वात् न्यङ्क्वादित्वाद् वा चस्य कः ।। ३४ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्चैभिर्व्रजवासिभिर्वयमपि भूरिभागा क्रियामहे इत्याह–एषां तु भाग्यस्य महिमा तावदास्तां कस्तं वक्तुं शक्नोति वयमेकादश एतेषामिन्द्रियाधिष्ठातारोऽपि भूरिभागाः अत एतेषां हृषीकाणीन्द्रियाण्येव चषकाणि पानपात्राणि तैस्तव अङ्घ्र्युदजयोश्चरणकमलयोर्मञ्जीररञ्जितयोर्मधु तत्रत्याऽभिमानाध्यवसायसङ्कल्पशब्दस्पर्शरूपरसगन्धकीर्त्तनसम्वाहनान्तिकगत्यात्मकं तदेव अमृतं स्वादु आसवं मादकं शर्व्वादयो रुद्रादय इत्यश्लीलस्येन्द्रियद्वयस्याधिष्ठातृदेवताद्वयस्य त्यागात् चित्ताधिष्ठातुर्वासुदेवस्यापि तदभेददृष्ट्या त्यागादेकादशैव पिबामः अत्र यद्यप्यभिमन्तुरात्मन एव विषयभोगा न तु तत्कर्तॄणामिन्द्रियाधिष्ठातॄणामित्यध्यात्मसिद्धान्तस्तथापि बुद्धौ ब्रह्मा तिष्ठति चक्षुषि सूर्यस्तिष्ठति तं तमधिष्ठातारं विना तत्तदिन्द्रियं श्रीकृष्णनिष्ठानामपि रूपरसादीनां ग्राहकं न स्यादिति सामान्यदृष्ट्या अध्यात्मविदां प्रवादोऽपि श्रीकृष्णे रत्यौत्कण्ठ्यवतां ब्रह्मादीनामानन्दहेतुः कर्तृत्वमात्रेणैव भोक्तृत्वाभिमानस्वीकारात् तथैव स्वेषां प्राकृतत्वेऽपि प्राकृतत्वेऽपि अप्राकृततत्तदिन्द्रियाधिष्ठातृत्वाभिमानाच्च प्रेम्णामेव विलक्षणेयं प्रक्रिया दृश्यते चान्यत्र पद्यावल्यादौ "मिथ्यापवादवचसाप्यभिमानसिद्धिः" इत्यादीति अन्यथा चिदानन्दमयवपुषां श्रीभगवत्परिवाराणामिन्द्रियादीनामपि भगवत इव तन्मयत्वमेव न तु प्राकृतत्वं सम्भवेत् कुतस्तत्र प्रपञ्चगतानां ब्रह्मादीनां प्रवेश इति ज्ञेयम् । यद्वा, कादाचित्केनापि तन्माधुरीलाभेन स्वेषामपि भाग्यमभिनन्दति, एषामिति । भाग्यमहिता एका अद्वितीया अनुपमेत्यर्थः । दशैव दशापि वयं दिक्पालदेवताः भूरिभागा भवामः कुत इत्यत आह, एतदिति स्वतर्ज्जन्या स्वनेत्रश्रोत्राणि स्पृशति वत्सचारणाय व्रजान्निष्क्रान्तस्य तव चरणसौन्दर्य्यसौस्वर्य्यामृतनेत्रश्रोत्रैः पिबाम इति ।। ३३ ।। तस्माज्जगदैश्वर्य्याय प्रीताय प्रीतव्याय मोक्षाय च मया जलाञ्जलिर्दत्तः केन प्रकारेणैषां व्रजवासिनां चरणधूलयो लभ्यन्त इति विभाव्य सनिश्चयमाह—तदेव मे भूरिभाग्यं भवत्विति शेषः । यदि श्रीमत्कृपाकटाक्षा उदारा भवन्तीति भावः किन्तत् इह अटव्यां वृन्दावने यत् किमपि कोमलतृणदूर्वादिजन्म

यदुपरि त्वत्प्रियसखादिव्रजवासिजनचरणविन्याससौभाग्यं सम्भवेत्। नन्वस्मिन्नतिदुर्लभे लोभं विहाय स्वयोग्यमन्यत्प्रार्थयस्वेति चेत् तर्हि गोकुलेऽपि त्वन्नगरप्रान्तादावपि कतमस्य त्वदीयसौचिककाहडिपाद्येकतरस्याप्यङ्घ्रिरजसोऽभिषेको यत्र तथाभूतं शिलापीठपट्टकादिजन्म भवतु, नन्वेषां व्रजवासिनामेतावन्माहात्म्यवत्त्वे को हेतुः कथं वा जगत्पूज्यस्य जगत्स्रष्टुः परमेष्ठिनस्तवैषां नीचजातीनां पादधूलिलिप्सायां नास्ति लज्जेति तत्राह, येषां जीवितं भगवान् भगं श्रीकाममाहात्म्येत्यमरनानार्थवर्गात् सौन्दर्य्यसौस्वर्यादिगुणविशिष्टो भगवान् मुकुन्दः मुखे कुन्दवद्धास्यं यस्य सः इति त्वत्सौन्दर्य्यादिमन्दहसिताद्येव जीवनोपायः तेन विना सद्य एवामी म्रियन्ते इत्येषामसाधारणस्त्वयि महाप्रेमैव सर्वोत्कर्षे हेतुरिति भावः। निखिलमिति किञ्चिदपि जीवितन्न भोजनपानादिहेतुकमित्यर्थः, अतोऽद्यापि येषां पदरजः श्रुतिभिर्मृग्यते एव न तु प्रायः प्राप्यत इत्यतोऽहं ब्रह्मापि किं वेदेभ्योऽप्यधिको यत एतत् प्रार्थने मम लज्जा स्यादिति भावः। अतो मया तदस्तु मे नाथेति यत् पूर्वं प्रार्थितन्तत्स्वस्य वैधभक्तिमत्त्वे एव यदि व्रजजनानुगतिमत्त्वेन मां रागानुगामृताम्भोधौ निमज्जयति तदेवं प्रार्थितम् ॥ ३४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किंच, हे अच्युत, नित्यमूर्ते! एषां नन्दगोपव्रजौकसां भाग्यस्य महिता महिमा तावदास्ताम्, कस्तद्वर्णने क्षम इत्यर्थः। बुद्ध्याद्यधिष्ठातारो वयमेकादश अन्ये चाहङ्काराद्यधिष्ठातारः शर्वादयः त्रियः भूरिभागा महाभाग्यवन्तः यस्मादेतेषां हृषीकाणीन्द्रियाण्येव चषकाणि पात्राणि तैः अङ्घ्री एवोदजे कमले तयोर्मधु मकरन्दस्तदेवामृतं स्वादु आसवं मादकमसकृत्पुनः पुनः पिबामः यदा प्रत्येकं करणाधिष्ठातारो वयं कीर्त्तिसौन्दर्य्यसौगन्ध्याद्येकैकदेशसेविनोऽपि कृतार्थास्तदा सर्वेन्द्रियैः सर्वसेविनां किं वर्ण्यते इति भावः ॥ ३३ ॥ तस्मात् यन्मया प्रार्थितं "तदस्तु मे नाथ! स भूरिभागः" इति तद्भूरिभाग्यमिदमेवेत्याह—तद्भूरिभाग्यमिति। किं तदित्याकाङ्क्षायामाह—इह मनुष्यलोके तत्रापि अटव्यां तत्रापि गोकुले गोपीगोपानां गमनागमनादिव्यवहारभूमौ यत्किमपि जन्म तत् अहो ब्रह्माण्डाधिपतेरत्र तव जन्म प्रयोजनं किमत आह—अपि कतमाङ्घ्रिरजोभिषेकमिति। गोकुलवासिनां मध्ये अपि कतमस्याप्यङ्घ्रिरजोऽभिषेको यस्मिन् तत्। नन्वत्रत्यानामेवम्विधमाहात्म्ये को हेतुरत्राह यदिति। यत्र येषां जीवितं तु भगवान् मुकुन्दस्त्वं निखिलं साङ्गं सफलं करोषि यत् यस्य तव पादरजः श्रुतिभिर्मृग्यमेव न तु दृश्यते प्रथमस्तु शब्दो भगवत्सम्बन्धवर्जितस्य जीवितस्य तुच्छत्व सूचयति, द्वितीयस्तुशब्दो भगवदितरैः सफलीकृतस्य जीवितस्य तुच्छत्वं सूचयति ॥ ३४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कदाचित्केन भगवन्माधुरीलाभेन स्वभाग्यमभिनन्दति एषामिति। एषां व्रजौकसां भाग्यमहिमा तावदास्तां कस्तां शक्नुयात् वक्तुं यत एका अद्वितीया निरुपमेत्यर्थः। दशैव दशापि वयं शर्वादयो दिक्पाला भूरिभागा भवामः कुत इत्यत्राह एतदिति तर्जन्या स्वनेत्रश्रोत्राणि स्पृशति एतैः हृषीकचषकैरिन्द्रियप्राणपात्रैस्ते अङ्घ्र्युदजयोश्चरणपद्मयोर्माधुर्यमधूनि नेत्रचषकैः शिञ्जितमधूनि च श्रोत्रचषकैरसकृत् पिबामः तानि च स्वादुत्वान्मादकत्वाच्चामृतासवरूपाणीति शर्वादयो व्रजे तद्दर्शनाय मुहुरायान्तीति युगलगीते व्यक्तीभावि यत्तेषां व्रजौकसां हृषीकचषकैस्तदधिष्ठातारो देवा वयं तानि पिबाम इत्याहुस्तत्र करणाधिष्ठातॄणां भोक्तृत्वानङ्गीकारात् ॥ ३३ ॥ अथ वृन्दाटवीदर्शनमहिम्ना रुचितभक्तिवर्त्मनि सतृष्णः प्रार्थयते तद्भूरीति। प्रभुरुदारश्चेत् कृपाकटाक्षस्तर्हि मे तदेव भूरिभाग्यं भूयादितिशेषः। किं तत्। इह वृन्दाटव्यां यत्किमपि पूर्वादिजन्म यत्र ते समित्रगणस्य पादसंस्कारः स्यादिति भावः। एतच्चेन्नाभिमतं तर्हि गोकुले त्वन्नगरप्रान्तेऽपि किमपि शिलापट्टिकात्मकं जन्मास्तु, कीदृशं तत्? कतमस्य यस्य कस्यापि तद्वासिनः अङ्घ्रिरजसाभिषेको यस्मिंस्तत् ननु तद्वासिनां कुतोऽयं महिमा कथं वा जगत्पूज्यस्य जगत्पतेस्तव तत्पादरजःस्पृहायां न त्रपेति चेत्तत्राह मुखे कुन्दवत् हासो यस्य सोऽतिमधुरमूर्त्तिर्भगवान् स्वयं प्रभुर्येषां निखिलं जीवितं तदेकजीवनत्वात्ताद्दृशमहिमानस्ते इत्यर्थः। येषां पादरजोऽद्यापि श्रुतिभिर्मृग्यते न तु लभ्यतेऽतो मे तत्स्पृहायां का त्रपेति भावः। श्रुतिधारणादेव मे जगत्पूज्यतादीति ॥ ३४ ॥

श्रीसुबोधिनी

एवमधिभौतिकस्य जन्मप्रार्थनेन तेषां भाग्याभिनन्दनेन च भगवान् स्तुतः, इदानीमाध्यात्मिकरूपस्य स्वस्यैवाभिनन्दनेन स्तौत्येषामिति, तुशब्दः पूर्वापेक्षयाप्याधिक्यकथनार्थः, **एषां** भाग्यस्य **महिमा तावदास्तां** ततः पूर्वमेतदेव निरूपयिष्यामः, एतन्निरूपणे तु ततस्त्रयोदशगुणमेषां भाग्यमर्थादेवोक्तं भविष्यति, वयमेतेषां गोकुलवासिनामिन्द्रियाधिष्ठातृदेवा **एकादश** "दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रका" श्चन्द्रश्चेति, केचिदन्तःकरणचतुष्टयस्य भिन्नं भिन्नमाहुस्तदा चतुर्दश त्रयोदश वा भवन्ति, सर्वानात्मतया गृहीत्वा वदति वयमिति, बतेति हर्षे **भूरि** भाग्यमेषां, यद्येते गोकुलवासिनो नोत्पन्ना भवेयुस्तदास्माकमधिष्ठातृता विफलैव स्यात्, भाग्ये निदानमाहैत**तद्धृषीकचषकै**रिन्द्रियपानपात्रैरसकृद् वारंवारमङ्घ्र्युद**जमध्वमृतासवं शर्वादयो** महादेवसहिता **वयं पिबामः,** अङ्घ्रेरेवोदजं कमलं तत्र मध्वेव मकरन्द **एवामृतासवं** मिष्टं देहादिविस्मारकं च, रोमाञ्चः स्वदश्च दशमकार्यं, अन्येषानुपयोगः

स्पष्ट एव, पुंसामपि बालककन्योत्पादनादिद्वारा मित्रकौ परित्यज्य शर्वादय एकादशैव वा ।। ३३ ।। एवं गोकुलवासिनां भाग्यमभिनन्द्य वृन्दावनबृहद्वनादिष्वपि ये वृक्षादयोऽपि जाता लतागुल्मादयश्च कीटादयो वा तेषामपि भाग्यमभिनन्दति **तद् भूरिभाग्य**मिति, तदेव जन्म **भूरिभाग्य**मधिकभाग्ययुक्तं, इह वृन्दावने **गोकुले वा किमप्य**प्रयोजकमपि **जन्म**, तत्र हेतुः **कतम**स्य परब्रह्मणोऽ**ङ्घ्रिरजसामभिषेको** यत्र, **कतम**स्य गोकुलवासिनो वा यस्यकस्यचित्, येषामुत्पन्नानां गोकुलवासिनां वा **निखिल**मपि **जीवितं** स्वार्थं परार्थमैहिकपारलौकिकार्थं च सर्वमेव **भगवाननन्तः**, **अनन्त**पदेन ब्रह्मवादप्रकारो व्यावर्तितः, किन्तु विशेषप्रकारेण रजसां महात्म्यमा**हाद्यापि** यस्य भगवतः **पदरजः श्रुतिमृग्यमेव**, श्रुतयो हि **भगवत्प्रदान्वेषण**परा ब्रह्म भगवत्पदं ज्ञात्वा "ब्रह्म पुच्छं प्रतिष्ठा" "तद् विष्णोः परमं पद" मित्यादिभिर्ब्रह्म प्रशंसन्ति, रजःप्राप्तौ तु कृतार्थाः सत्यो न पुनर्बोधयेयुः प्रयोजनाभावात् ।। ३४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्च हे अच्युत ! एषां व्रजवासिनां भाग्यस्य महिता महिमा तावदास्ताम्, कस्तं वक्तुं शक्नोति ? 'बत' इति हर्षे । शर्वो रुद्रः आदिर्येषां ते एकादशेन्द्रियाधिष्ठातृदेवता एव वयं भूरिभागाः महाभाग्यवन्तः । नात्र सन्देह' इत्याह–होति । तत्र हेतुमाह—एतदिति । एतेषां व्रजवासिनां हृषीकाणि इन्द्रियाणि एव **चषकाणि** पानपात्राणि तैः ते तवांघ्री एव उदजे कमले, तयोर्मधु मकरन्दः, तदेवामृतं तद्वत् स्वादु आसवमन्यविस्मृतिकारकं मादकमसकृत् पिबामः । यदा प्रत्येकमिन्द्रयाभिमानिनो वयं रूपरसगन्धस्पर्शशब्दाद्येकैकविषयसेविनोऽपि कृतार्थास्तदा सर्वेन्द्रियैः सर्वसेविनामेनेषां भाग्यं वक्तुं केन शक्यते इति भावः । तत्र शर्वः अहङ्कारस्याधिष्ठाता, ब्रह्मा बुद्धेः, चन्द्रो मनसः, दिशः श्रोत्रयोः, वातस्त्वचः, अर्कश्चक्षुषोः, वरुणः रसनायाः, अश्विनीकुमारौ नासिकयोर्द्वयोरेकत्वेन ग्रहणम्, वह्निर्वाचः, इन्द्रो हस्तयोः, उपेन्द्रः पादयोः, मित्रः पायोः, ब्रह्मैव उपस्थस्यापि, इत्येवं त्रयोदश । तत्र पायूपस्थयोः सेवायामुपयोगाभावात्तयोर्देवते विहाय 'एकादश' इत्युक्तम् ।। ३३ ।। एवं भगवद्भक्तानां भाग्यमभिनन्द्य तेषु प्रवेशे स्वस्यानधिकारं मत्वा 'तेषां पादरजः—सम्बन्धेनैव तदधिकारसिद्धिर्भवति' इति निश्चित्य पूर्वं यत् प्रार्थितं "भवज्जनानां मध्ये कोऽपि भूत्वा तव पादपल्लवं निषेवे' इति, तत्राप्याग्रहं त्यक्त्वा व्रजवासिजनपादरजोऽभिषेकयोग्यं जन्म प्रार्थयते—तद्भूरिभाग्यमिति । तादृशं भूरिभाग्यमस्तु, येन इह मनुष्यलोके तत्रापि गोकुले तत्राप्यटव्यां वृन्दावने किमपि पशुपक्षिवृक्षलताकीटादीनां मध्ये जन्मास्तु । ननु "सत्यलोकं जगत्स्वामित्वं विहाय अत्र जन्मनि को लाभः ?" तत्राह–अपीति । गोकुलवासिनां मध्ये कतमस्य यस्यकस्यापि अङ्घ्रिरजसाऽभिषेको यस्मिन् तत् गोकुलवासिनां चरणरजःसम्बन्ध एव महाँल्लाभः । 'एषामपि कुत एवं महत्त्वम्' इत्यत आह – यदिति । येषां जीवितं निखिलं गृहवित्तपुत्रादिसर्वस्वं च भगवान् मुकुन्द एव, सर्वथा त्वत्परत्वादेव एषामेवं महत्त्वमित्याशयः । ननु 'ममैव एवं महत्त्वं कुतः ?' तत्राह —अद्यापीति । अनादिकालमारभ्य अद्यपर्यन्तमपि यस्य तु भवतः पदरजः श्रुतिभिरपि मृग्यते एव, नतु दृश्यते इत्यर्थः । अतस्त्वदनन्यभक्तानामेषां माहात्म्यं किं वर्णनीयमित्याशयः ।। ३४ ।।

अन्वितार्थप्रकाशिका

एषामिति ।। हे अच्युत ! एषां घोषनिवासिनां व्रजवासिनां भाग्यस्य महिमा तावदास्तां कस्तं वक्तुं शक्नोति । बतेति हर्षे । शर्वो रुद्रः आदिर्येषां ते एकादशेन्द्रियाधिष्ठातृदेवता एव वयं भूरिभागाः महाभाग्यवन्तः यतः एतेषां व्रजवासिनां हृषीकाणि इन्द्रियाणि एव चषकाणि पानपात्राणि तैस्ते तव चतुर्दशस्य चित्ताधिष्ठातुः अङ्घ्री एव उदजे कमले तयोर्मधु मकरन्दस्तदेवामृतं तद्वत्स्वादु आसवमन्यविस्मृतिकारकं मादकमसकृत् पिबामः । तत्र शर्वः अहङ्कारस्याधिष्ठाता ब्रह्मा बुद्धेः चन्द्रो मनसः दिशः श्रोत्रयोः वातस्त्वचः अर्कश्चक्षुषोः वरुणः रसनायाः अश्विनीकुमारौ नासिकयोर्द्वयोरेकत्वेन ग्रहणं वह्निर्वाचः इन्द्रो हस्तयोः उपेन्द्रः पादयोः मित्रः पायोः ब्रह्मैव उपस्थस्यापि इत्येवं त्रयोदश । तत्र पायूपस्थयोः सेवायामुपयोगाभावात्तयोर्देवते विहायैकादशेत्युक्तम् । यदा प्रत्येकमिन्द्रियाभिमानिनो वयं कीर्त्तिसौन्दर्यसौगन्ध्याद्येकदेशसेविनोऽपि कृतार्थाः तदा सर्वेन्द्रियैः सर्वसेविनामेषां भाग्यं किमुच्यते ।। ३३ ।। "तदस्तु मे नाथ स भूरिभाग" इति यत्प्रार्थितं तदिदमेवेत्याह—तद्भूरिभाग्यमिति ।। तादृशं भूरिभाग्यमस्तु येन इह मनुष्यलोके तत्रापि गोकुले तत्राप्यटव्यां वृन्दावने किमपि पशुपक्षिवृक्षलताकीटादीनां मध्ये जन्मास्तु । तत्रापि कतमस्य यस्य कस्यापि अङ्घ्रिरजसाऽभिषेको यस्मिन् तत् जन्मास्तु गोकुलवासिनां चरणरजःसम्बन्ध एव महाँल्लाभः । येषां जीवितं निखिलं गृहवित्तपुत्रादिसर्वस्वं च भगवान्मुकुन्द एव । यतः अद्यापि अनादिकालमारभ्याद्यपर्यन्तमपि यस्य तु भवतः पदरजः श्रुतिभिरपि मृग्यत एव ननु दृश्यत इत्यर्थः ।। ३४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

त्रिः त्रीन् वारान् परिक्रम्य प्रदक्षणीकृत्य जगद्धाता ब्रह्मा अभीष्टं प्रेष्टं स्वस्थानं प्रत्यपद्यत जगाम ।। ३३ ।। तत इति स्वभुवं स्वस्मादुत्पन्नं विधिं भगवान् अनुज्ञाप्य गमनाऽऽज्ञां दत्त्वा ततस्तदनंतरं यथापूर्वं चेष्टाद्यनतिक्रमेण स्थिताः सखायो यत्र तत् स्वकं स्वकीयं पूर्वभोजनस्थलं पुलिनं तटस्तत्प्रागवस्थितान् पूर्वान् वत्सान् आनिन्ये आनीतवान् ।। ३४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एषमिति ।। हे अच्युत, एषां तु एतेषां नन्दादीनां तु इत्यर्थः । भाग्यमहिमा भाग्यस्य महत्ता, तावत् आस्ताम् । कस्तन्महिमानमियत्तया वर्णयितुं शक्नुयादित्यर्थः । शर्वोऽहंकाराधिष्ठाता रुद्रः आदिर्येषां ते, एकादश चन्द्रादयः, वय अहं च, वयमित्यात्मानमेव बहुमन्यमानस्योक्तिः । एवं मनोबुद्ध्यहंकारोभयेन्द्रियाधिष्ठातारो वयं त्रयोदश देवा इत्यर्थः । हि निश्चितं, बतेति हर्षे, भूरिभागाः महाभाग्यवन्तः । कुतः । यतः एतेषां व्रजवासिनां हृषीकानीन्द्रियाणि तान्येव चषकानि पानपात्राणि तैः, ते तव, अङ्घ्रिश्चरण एवोदज कमलं तस्य मधु मकरन्दः तदेवामृतवत् स्वादु आसववत् मादकं, असकृत् पिबामः, एव, एकैककरणाभिमानिनो वयमेकैकदेशसेविनोऽपि कृतार्थास्तदा सर्वेन्द्रियैस्तव सर्वाङ्गलावण्यसेविनामेतेषां भाग्यं किं वर्ण्यते इति भावः । अत्र ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकमिति दश बाह्यकरणानि मनोबुद्ध्यहंकारचित्ताख्यानि चत्वार्यन्तःकरणानि तेषां चतुर्दशानां चतुर्दशाधिष्ठातारो देवास्तत्र चित्ताधिष्ठातुरच्युतस्य कृष्णस्य चाभेदात्तदगणने त्रयोदश शिष्टास्तत्रापि शर्वादय इत्यत्र शर्वोपादाने द्वादशावशिष्टाः, वयमिति पदेन स्वयं ब्रह्माप्युपात्तः । एवं सति आदिशब्दोपादेया एकादश शिष्टास्तत एकादशेत्युक्तमिति बोध्यम् । अत्र केचित्तु गुह्येन्द्रिययोरनुपयोगादश्लीलत्वाच्च तदधिष्ठात्रोर्मित्रप्रजापत्योस्त्यागेन पादाधिष्ठातुरुपेन्द्रस्य सर्वपद्धारणशक्त्यावेशमात्रेणानुपयुक्तप्रायत्वात्तत्त्यागेनैकादशत्वमित्याहुः ।। ३३ ।। यन्मया प्रार्थनीयं तदेतदेवेत्याह ।। तदिति ।। इह मनुष्यलोके, किमपि यत् जन्म, मानुषं जन्म तत्रापि, अटव्यां विपिने यज्जन्म, तत्रापि गोकुले यज्जन्म तदपि, कतमस्य गोकुलवासिनां मध्येऽपि यस्य कस्यापि अङ्घ्रिरजसा अभिषेको यस्मिंस्तथाभूतं, यत् जन्म, तत्तदेव, भूरि भाग्यं, अतो मया यत् प्रार्थनीयं तदेतदेवेत्यर्थः । सत्यलोकं विहायात्र जन्मोपलभ्य व्रजजनपत्स्पृष्टरेणोरभिषेकं प्रार्थयामीति भावः । यत्पादरजः यस्य तव पादरजः तु अद्यापि श्रुतिमृग्यं एव, वेदान्तैरपि तन्मृग्यत एव न तु दृश्यत इत्यर्थः । इत्थंभूतमहिमः, मुकुन्दो मुक्तिप्रदः, भगवान् षाड्गुण्यपूर्णः परमेश्वरस्त्वमेव, निखिलं यज्जीवितं येषां परमजीवनरूपः असि, तत एतन्मया प्रार्थ्यते इति भावः ।। ३४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तद्भूरिभाग्यमिति : १०.१४.३४.

अत्रत्येषु रजःसितोपलशिलाशैलादिपूर्वीरुहामल्पीयस्तृणवल्लरीषु यदि वा पक्ष्यादितिर्यक्षु वा ।
एतेष्वन्यतमं जनुर्दिश तथा श्रीशानिशं प्रार्थये साष्टाङ्गं प्रणिपत्य येन भविता त्वत्पादयोगः सदा ।। ४१ ।।
त्वन्नाभिपद्मादहमासमीश त्वत्पादपद्मोदित एष रेणुः । सोदर्यसङ्गस्पृहयालुचेतो वस्तुं तदत्रेच्छति सावकाशम् ।। ४२ ।।
नानासत्त्वनिषेवितं शिवकरं सूर्याश्रितं निस्तमो भूयोऽनन्तपदानुगामि विलसद्गोभूषितं तत्सुखम् ।
दृष्ट्वा माधव सर्वतोमुखगति प्रोद्भूतमेतद्रजस्तत्तुल्यां स्थितिमाकलय्य च निजां मन्येऽतिधन्यं निजम् ।। ४३ ।।

कृष्णप्रिया

हे अच्युत प्रभो ! श्री नन्दबाबा-यशोदारानी रोहिणी देवी और समग्र व्रजजन पशु-पक्षिओं के भाग्य की तो दूर रहे कौन तारीफ कर सकेगा इनकी महिमा की जहाँ शेष-सरस्वती-श्रुति की गति नहीं । लेकिन ब्रह्मा शिव-विष्णु आदि ग्यारह देव भी कम भाग्यवान् नहीं, क्योंकि सेवा स्नेह निरत इन व्रजवासिओं की ग्यारह इन्द्रियों के आसवपेययोग्य-चषक-प्याले बनाकर हे नन्दलाल ! आप के श्रीचरण कमलों के अमृत से भी अधिक मधुर मादक मकरन्द आसव रस का बार-बार पान करते रहते हैं भला जिन व्रज प्यारे का हम देव केवल एक एक इन्द्रिय के माध्यम से मकरन्द रस पीकर अघा गये हैं-कृत-कृत्य बन गये हैं तब समग्र इन्द्रियों से रसराज की सेवा रस का पान करने वालो के लिये तो क्या कहा जाय ।।३३।। अब नाथ एक अभिलाषा यह है कि–इस व्रजभूमि में किसी भी अटवी-वन में, यदि मान ले तो विशेष करके इस गोकुल में वह बड़भागी गोप जन का नन्द परिवारिक दौवारिक का या तो किसी भी योनि का जन्म मिले यही दैन्य पूर्वक निवेदन है । नाथ, यदि व्रज में देह मिली तब तो किसी न किसी भगवदीय जन की पदरज उड़कर मुझ पर आ ही जायगी । नाथ ? जिनके जीवन और गृह-पुत्र-परिवार आदि सर्वस्व मुकुन्द भगवान हो, उनके पद पराग की प्राप्ति आप के श्रीपदपंकज पराग की ही प्राप्ति है । हे भगवन् ! हे श्री कृष्ण, आप के श्रीचरण पङ्कजों की 'रज' तो आज अनादि काल से अद्यापि श्रुति भगवती तलसती है पर देख नहीं पाती ।। ३४ ।।

एषां घोषनिवासिनामुत भवान् किं देव रातेति नश्चेतो विश्वफलात् फलं त्वदपरं कुत्राप्ययन् मुह्यति ।
सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता [1]ये धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ।।३५।।
तावद् रागादयः स्तेनास्तावत् कारागृहं गृहम् । तावन्मोहोऽङ्घ्रिनिगडो यावत् कृष्ण न ते जनाः ।।३६।।

---

१. यद्धा–श्रीधर. वंशी. वीर. विज. ।

कर्दमक्षमा

अन्वयः हे देव सद्वेषात् पूतना अपि सकुला त्वां एव आपिता (तर्हि) ये त्वत्कृते धामार्थसुहृत्प्रियात्मतनयप्राणाशयाः नः चेत् विश्वफलात् त्वदपरं फलं कुत्र अपि अयत् मुह्यति एषां घोषनिवासिनां भवान् किं त्वदपरं फलं राता इति ॥ ३५ ॥ ? हे कृष्ण ! जनाः यावत् ते न, तावत् रागादयः स्तेनाः तावत् गृहं कारागृहम् अङ्घ्रिनिगडः मोहः तावदेव ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च किं वर्ण्यते कृतार्थत्वमेतेषां येषां भक्त्या भवानपि ऋणीवास्ते। ननु किं दातुमसमर्थोऽहं येन ऋणी स्यामत आह। उत अपि भवानपि एषां कुत्रापि किं विश्वफलात्सर्वफलात्मकात्त्वत्तः परं फलं राता दास्यतीति नश्चेतः अयत्सर्वत्र गच्छद्विचारयत् मुह्यति। ननु मामेव दत्त्वाऽनृणः स्यामिति चेन्नहि नहि। सद्वेषादिव सतां भक्तानां यो वेषस्तदनुकरणमात्रेण पापिष्ठा पूतनाऽपि त्वामेवापिता प्रापिता तर्हि एतत् महद्रूपं फलम् एतत्संबंधिनामपि नंदादीनामपीत्यर्थः। मां दास्यामीति चेत्तत्राह। सकुलेति। बकाघासुरसहिता एषामपि तावदेव चेदपर्याप्तमित्याह। यदिति। येषां धामादयस्त्वत्कृते त्वदर्थमेवेत्यर्थः ॥ ३५ ॥ ननु वीतरागादिदोषाणां संन्यासिनामपि न मत्तः परं किंचिदस्ति कथमेषामपर्याप्तमित्यत आह। तावदिति। हे कृष्ण रागादयस्तावदेव स्तेनाश्चोरा भवंति। तथा तावद्गृहमपि कारागृहं बंधनागारम्। मोहोऽपि तावदेवांघ्रिनिगडः पादशृंखला। यावत्ते त्वदीया जना न भवंति। त्वदीयानां तु रागादयोऽपि त्वन्निष्ठा मोचका एवेति न यतिभ्यो विशेषो भजनं त्वधिकमिति भावः ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदपि तेषामलौकिकमहत्त्वमाह—अपि चेति। अत्राशङ्कते—नन्विति। एषां व्रजवासिनाम् कुत्रापि कस्मिन्स्थाने। सर्वफलात्मकात् सर्वाभ्युदयस्वरूपात्। त्वत्तो भवतः। परम् अन्यत्, किं फलमित्यन्वयः। मुह्यति आकुलीभवति। माम् आत्मानम्। नहिनहीति द्विरुक्त्या सर्वथाऽऽनृण्याऽभाव उक्तः। यदि पूतनैकाकिनी मुक्ता तर्हीति। तत्राक्षेपे। बकाघभ्रातृसहिता सापि सकुलैव “कुलं समूहे देहे च वंशसम्बन्धिनोरपि” इति धरणिः। एषां व्रजवासिनाम्। तावदेव पूतनातुल्यमेव ददासि चेत्तर्हि अपर्याप्तं न्यूनमेव तत्। येषां व्रजवासिनाम्। धाम गृहम्। अर्थो वसु। सुहृदः सम्वन्धिनः। प्रिया भार्या। आत्मा देहः। आशयोन्तःकरणम्। त्वदिति षष्ठ्यर्थे—तव। कृते इति विभक्तिप्रतिरूपकमव्ययं तादर्थ्ये। इत्यर्थ इति। न हि सर्वात्मभावेन सर्वसमर्पिणां परमभक्तानां मारणार्थमागतपापपूतनया साम्यमुचितमिति भावः॥ ननु भवद्विधायापि यद्येवं चरण रज एव परमफलत्वेन दास्ये, किञ्च पूर्वं भवता त्वां लब्धुमेव त्वां स्तौमीति प्रतिज्ञातमधुना पुनरेतच्चरणरज एव प्रार्थ्यते, भद्रेयं निष्ठा भवद्विधानामिति सनर्मप्रश्नमाशंक्य तथैवाह। एषां पूर्वोक्तमाहात्म्यानाम्। उत प्रश्ने। विश्वफलादपीत्यपिशब्दान्वयः। ततश्चास्याः श्रीव्रजभूमेरूर्द्ध्वं तव स्थानं नास्ति एतत्स्वरूपादूर्ध्वंश्च फलं नास्तीति कुत्र च दातेत्यर्थः। अयदिति नञ्पूर्वमिण्धातो रूपम्। त्वत्तः परं फलं कुत्राप्यजानदित्यर्थः। मुह्यतीति। निश्चयाशक्तेः। सत्यं मद्भावयुक्तानां व्रजवासिविशेषाणां धात्री जनानां वेशात् ‘लेभे गतिं धात्र्युचितां ततोन्यम्’ इति तृतीयोक्तेः। इवेति हिंसामयदम्भेनैव न तु भक्त्येत्यर्थः। अतः समानफलत्वं कथं स्यादिति भावः। पूतनापि अन्यस्य का वार्तेत्यर्थः। अपिशब्दोऽयं यथायोगमन्यत्रापि योज्यः। सकुलेति। प्राक्तनाधुनिकतत्कुलोत्पन्नसहिता गोकुलप्रतिकक्षत्वेन निर्देशात्। बकाघयोस्तु स्वतन्त्र एव तत्स्पर्शोस्त्यन्येष्विव त्वामेवेति। पूतनायाः साक्षात् अन्येषां तु भगवद्द्वेषिणां पूतनाऽनुवर्तित्वेनैव। बकाघयोस्तु विरोधिवेशान्मुक्तिमात्रमिति ज्ञेयम्। आपिता त्वयैवेति शेषः। सुहृन्निरुपाधिहितकारी, प्रियः तादृशप्रीतिविषयः। त्वत्कृत इति। प्रत्येकं स्वाभाविकमेव तेषां तदेकार्थत्वं, तव पुनस्तत्तद्भेदेनानेकप्रियजनार्थत्वमित्यर्थः। तदेवं ते पूर्णा एव। श्रीभगवच्चरणास्तुप्रत्युपकारासामर्थ्येनाऽपूर्णा इवातस्तेभ्यः किमिव दास्यन्त्यतोऽहमपि भवतामृणित्वेन पारवश्यमाशङ्क्य तादृशनिजाभिलाषसिद्ध्ये तच्चरणरजश्शरण एव भवितुं युक्त इति भावः। तदेवमपि श्रीकृष्णतद्वासिनोर्व्यभिचारत्वमेव व्यञ्जितम्। तथा पूर्वपक्षतयैवायं परमसिद्धान्तः सूचितः। तादृशत्वद्वशीकारमयप्रेम्ण एव परमफलत्वात् ॥ विश्वनाथस्तु—किञ्च, येषां पादरजो मया लोभात्प्रार्थ्यते तल्लभ्यतां न लभ्यतां वा मयेति स्पष्टं न ब्रूषे चेत्, मा ब्रूहि, किं त्वन्यदेकं यत्पृच्छ्यते तदुत्तरमवश्यमेव देहीत्याह—एषामेभ्यो भवान् किं रातेति किं फलं दास्यतीति। उत प्रश्ने, इत्यहं पृच्छामीत्यर्थः। ननु सर्ववेदार्थतत्त्वज्ञेन त्वयैव चेतसि विचार्य स्वयमेव ज्ञायतां तत्राह—नोऽस्माकं चेत इति। बहुवचनेन न केवलं ममैव अपि तु रुद्रसनकादीनां नारदादीनां च सर्वेषामेव सर्वज्ञानां चेतो मुह्यति। चेतः कीदृशम्—किं च फलात्सर्वफलात्मकात्त्वत्तोऽपि अपरमन्यत्फलं कुत्रापि देशे काले वा यत् बुद्ध्या बहुधाऽन्विष्याऽपि अप्राप्नुवत् ‘इण्—गतौ’ शत्रन्तः। अयमर्थः—सर्वफलरूपमेभिरनादित एव पुत्रादिरूपेण प्राप्त एव वर्तसे अत एव मयैषां भवानिति षष्ठी प्रयुक्ता। यदि तु त्वत्तोऽप्यधिकमन्यत्किञ्चन वस्तु प्रशस्तमस्थास्यत् तु तदेवैतेभ्यो देयत्वेन योग्यमभविष्यत्, तत्तु नास्तीत्यस्माकं चेतोमोहहेतुरिति। ननु ब्रह्मन् सत्यं तत्त्वानभिज्ञ एवासि मयैतेषां भविष्यन्तीमनुरागमयीं भक्तिं जानतैव तत्साध्यफलभूतस्वात्मा पुत्रादिरूपः प्रथममेव दत्त इत्यन्ये खलु कृतज्ञाः, अहं तु करिष्यमाणविज्ञ इति मयैव

जितमिति चेत्सत्यं, प्रभो तदपि त्वं न्यायेन जीयस एवेत्याह—सद्वेषादिव सद्वेषादेवेत्यर्थः। पूतना पापिष्ठापि स्वकुलसहितापि त्वामेवार्पिता त्वयैव त्वां स्वात्मानं प्रापिता, तथा येषां धामादयो ममतास्पदाहंतास्पदानि त्वत्कृते त्वदर्थमेव ते चैते व्रजवासिनोऽपि त्वया त्वामेवार्पिता इति वाक्यशेषो नासानेत्रभ्रूग्रीवाभंग्यव ज्ञापितः। ययैव स्वात्माऽतिनिकृष्टायै पापिष्ठायै पूतनायै दत्तः स एव स्वात्माऽतिप्रकृष्टेभ्यः पुण्यवच्चिरोमणिभ्यो व्रजवासिभ्यो दत्त इति प्रथमतो दानेष्यनुचितानुष्ठितिर्दुर्वारा एवेत्येषामृणित्वस्वीकार एव तव निष्कृतिरिति भावः॥ ३५॥ पुनराक्षिपति—नन्विति। एषामेव कथमपर्याप्तं तेषामप्येतत्तुल्यत्वादपर्याप्तमेवेति। रागोऽत्यंताभिनिवेशः 'कारा स्याद्बंधनागारे' इति यादवः, मोहः पुत्रादिषु स्नेहविशेषः। इति भाव इति। केवलज्ञानिभ्यस्तव भक्ता एवाधिका इति तात्पर्यम्। "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्। सा ब्रह्मणि स्वमहिमन्यपिनाथ मा भूत्" इति ध्रुवोक्तेः। नन्वेते गृहस्थाः पुत्रकलत्रादिसंसारज्ञाने निपतिता इति संन्यासिभिरुच्यते, सत्यं, त्वल्लक्षणपुत्रत्वद्भक्तलक्षणकलत्रादिमन्त एते गृहस्था वर्तंतां, देशान्तरस्था ये त्वद्भक्तास्तेऽपि सन्न्यासिभ्योऽधिका इत्याह—तावदिति। रागादयो रागद्वेषाभिनिवेशाः, ते च महाचौरा जीवनिष्ठज्ञानानंदादिमहाधनान्यपहृत्य परमेश्वरे राजनि एते मा फूत्कुर्वन्त्विति बुद्ध्या कर्माधिकारमये गार्हस्थ्यकारागृहे मोहनिगडेन बद्धा जीवाः स्थाप्यन्ते। हे कृष्ण जना जीवा यावत्ते त्वद्भक्तानुग्रहभाजनत्वेन त्वदीया न भवन्ति तावदेव रागादयः स्तेनाः, त्वदीयत्वे सति तेषां त्वद्भक्तेष्वेव रागः भक्तिप्रतिकूले वस्तुन्येव द्वेषः त्वय्येवाभिनिवेश इति। प्रत्युत त्वन्निष्ठज्ञानानंदादिकमप्यानीय दधानास्त एव परमसाधवो भूत्वा नित्यमुपकुर्वंते। एवमेव गृहं भद्राभद्रकर्मसाधनं यत्कारागारमासीत्तदेव तेषां त्वत्परिचर्याकीर्तनादिसाधनं त्वदीयनित्यधामप्रापकं भवेत्। एवं मोहविषयस्य त्वद्भक्तत्वात्सोऽपि चेत्प्रेमानुभावरूपमोहप्रापक इति कथमेतत्समकक्षतां संन्यासिनो लभंताम्। ये 'कृच्छ्रे महानिह भवार्णवमप्लवेशाम्' इत्यादिना मत्पुत्रेण सनत्कुमारेणापकर्षितास्तेभ्यः संन्यासिभ्योऽपि भक्ताः परमाधिकाः, ये देशांतरगृहस्थभक्तास्तेभ्यः परं सहस्रगुणतोऽपि प्रेम्णाधिकतमास्ते व्रजवासिनः तैरेभिस्त्वं साक्षात्पूर्णस्वरूपोऽपि पुत्रादिरूपेण स्वाधानीकृत एव वर्तस इति भावः॥ ननु धामादीनां मदेकार्थतयैव यदि तेषां महिमा तर्हि भवानपि निजगृहं तथैवाचरेदिति चेत्, आस्तां तावत्, एषां स्वात्मनोऽपि त्वदेकार्थत्वेनात्मारामगणेभ्योऽपि महत्तरं भावमाहात्म्यम्, मादृशां तु भवदुन्मुखत्वमपि दुर्घटमित्याह—तावदिति। अयमर्थः—रागो विषयप्रीतिः, तदाद्यस्तन्मयविषयलाभालाभहानिषु हर्षविषादशोकाद्याः, गृहं विषयमात्रं, मोहो रागादिहेतुरविवेकः, ते च तत्तद्विक्रियायां रागमुखनिरीक्षका एव सर्वे इति प्रथमं स एवोक्तः। तत्र निरुपाधिप्रेमास्पदस्यात्मनोऽप्यात्मत्वेन त्वमेव रागस्य स्वाभाविकपरमयोग्याश्रयः। अतस्तल्लक्षणानिजस्वामिनमुपलभ्यैव भ्रमन्नसौ जनानां शुभवासनारूपां त्वद्भजनसामग्रीं हरंश्चौर एव, ततस्तदनुवर्त्तिनोऽपि तादृशाः। अथ गृहमयो विषयोऽप्यवशिष्टदण्डनायैव कारागारीकृतः स्यात्। त्वत्पादानुस्मरणविरोधिवोधप्रदत्वात्। मोहोप्यसौ तेन तेनावस्थावैशिष्ट्यं प्राप्तस्तत्र स्वयं निगडायते। नष्टेऽपि तादृशकारागृहे रागादिमयस्य तस्यावशेषेणापि त्वत्पादानुसरणोन्मुखत्वाशक्तेः। तदेवं त्वदीयानुसृतौ ते तावत्तादृशा भवंति यावज्जनास्ते तव न भवन्ति त्वया न स्वीक्रियंत इत्यर्थः। जाते तु तावकत्वे रागादीनामप्यात्मनोऽप्यात्मनस्तव प्राप्तौ सत्यां तैर्नात्माप्याश्रियते इति स्वयमेव ते दोषा अपगच्छन्तीत्यर्थः। अत्र रागस्य तत्प्राप्तिः "या प्रीतिरविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सा मे हृदयान्नापसर्पतु॥" इत्यनुसारेण गृहस्य त्वदर्पितत्वेन मोहस्य च त्वत्प्रेममयत्वेनेति। अत एव ते तावत्तावकानां शिरोमणयो, मादृशास्त्वेतच्चरणरेणुस्पर्शिगणे यत्किंचित्प्राप्तावप्यभिलाषिण एव, कथमेतत्कक्षां प्राप्नुयुरिति भावः। यद्वा—ननु तेषां प्रत्युपकारासमर्थमपि मां सदा सेवमानास्त एव दूषणीयास्तत्राह—हे कृष्ण सर्वचित्ताकर्षक यावत्ते तव जना न भवन्ति, साक्षात्सेवां न प्राप्नुवन्तीत्यर्थः। अर्थात्त्वद्भक्तास्तावत्तेषां त्वत्स्मृतौ स्वाभाविकभोजनेच्छादयो निवासस्थानं कदाचिन्निद्रादिना त्वद्विस्मृतिलक्षणो मोहोऽपि तावत्परमदुःखदा एव न भवन्ति। यद्वा—तव रागादयस्तव लीलास्थानमपि त्वत्प्रेममूर्च्छापि तावत्परमदुःखदा भवन्ति। यावत्साक्षात् त्वत्सेवां न प्राप्नुवन्तीति पूर्ववत्। तदेवं सति तव मोहनत्वमेवैषां व्रजवासिनां तवानुसरणे कारणं तस्मादेषां को दोष इति भावः। किमर्थं—तत्राह—प्रपन्नजनता निजव्रजजनरूपा मदादिरूपा च। प्रथितुं प्रथयितुम्। ऐश्वर्यलीलातोऽप्यस्या लीलाया भक्तजनपरानंदत्वादित्यर्थः। तदुक्तम्—'नंदः किमकरोद्ब्रह्मन्' इत्यादि, "गायंतेऽद्याऽपि कवयो यल्लोकशमलापहम्" इति, 'येन येनावतारेण' इत्यादि, 'यच्छृण्वतोऽपैत्य रतिर्वितृष्णा' इत्यादि॥ ३६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, भवद्विधायाऽपि यद्येषां चरणरज एव परमफलत्वेन दास्ये तर्ह्येभ्यो वा किं दास्ये। किञ्च, पूर्वं भवता त्वां लब्धुमेव त्वां स्तौमीति प्रतिज्ञातम् अधुना पुनरेतच्चरणरज एव प्रार्थ्यते भद्रेयं निष्ठा भवद्विधानामिति सनर्मप्रश्नमाशङ्क्य तथैवाह, एषामिति। एषां पूर्वोक्तमाहात्म्यानाम् उत प्रश्ने विश्वफलादपीत्यपि शब्दान्वयः ततश्चास्याः श्रीव्रजभूमेरूर्ध्वं तव स्थानं नास्ति एतत्स्वरूपादूर्ध्वं च फलं नास्तीति कुत्र च किं दास्येत्यर्थः। अयदिति नञ् पूर्वमिण्धातो रूपं त्वत्तः परं फलं कुत्राऽप्यजानदित्यर्थः। मुह्यतीति निश्चयाशक्तेः सतां सद्भावयुक्तानां व्रजवासिविशेषाणां धात्रीजनानां वेशात् "लेभे गतिं धात्र्युचितां ततोऽन्यम्" इति तृतीयोक्तेः इवेति तत्रापि हिंसामयदम्भेनैव न तु भक्त्येत्यर्थः। अतः समानफलत्वं कथं स्यादिति भावः। पूतनाऽपीत्यन्यस्य का

वार्त्तेत्यर्थः। अपि शब्दोऽयं यथा योग्यमन्यत्राऽपि योज्यः। सकुलेति, प्राक्तनाधुनिकतत्कुलोत्पन्नसहिता गोकुलप्रतिकक्षत्वेन निर्देशात् बकाघयोस्तु स्वतन्त्र एव तत्स्पर्शोऽस्त्यन्येष्विव त्वामेवेति पूतनायाः साक्षात् अन्येषां तु भगवदद्वेषिणां पूतनानुवर्त्तित्वेनैव बकाघयोस्तु विरोधिवेषान्मुक्तिमात्रमिति ज्ञेयम्, आपिता त्वयैवेति शेषः। सुहृत् निरुपाधिहितकारी प्रियस्तादृशप्रीतिविषयः त्वत्कृत इति प्रत्येकं स्वाभाविकमेव तेषां त्वदेकार्थत्वं तव पुनस्तत्तद्भेदेनानेकप्रियजनार्थत्वमित्यर्थः। तदेवं ते पूर्णा एव श्रीभगवच्चरणास्तु प्रत्युपकाराऽसामर्थ्येनाऽपूर्णा इव ततस्तेभ्यः किमिव दास्यन्ति अतोऽहमपि भवतामृणित्वेन पारवश्यमाशङ्क्य तादृशनिजाभिलाषसिद्धये तच्चरणरजःशरण एव भवितुं युक्त इति भावः। तदेवमपि श्रीकृष्णतद्वासिनोरव्यभिचारित्वमेव व्यञ्जितम्, तथा पूर्वपक्षभङ्ग्यैवाऽयं परमसिद्धान्तः सूचितः। तादृशतद्वशीकारमप्रेम्ण एव परमफलत्वात् ॥ ३५ ॥ ननु, धामादीनां मदेकार्थतयैव यदि तेषां महिमा तर्हि भवानपि निजगृहं गत्वा तथैवाचरेति चेत्? आस्तां तावदेषामात्मनोऽपि त्वदेकार्थत्वेनात्मारामगणेभ्योऽपि महत्तरं भावमाहात्म्यं मादृशां तु भवदुन्मुखत्वमपि दुर्घटमित्याह—तावदिति। अयमर्थः रागो विषयप्रीतिः तदादयस्तन्मयविषयलाभालाभहानिषु हर्षविषादशोकाद्याः गृहं विषयमात्रं मोहो रागादिहेतुरविवेकः ते च तत्तद्विक्रियायां रागोन्मुखनिरीक्षका एव सर्व इति प्रथमं स एवोक्तः, तत्र निरुपाधिप्रेमास्पदस्यात्मनोऽप्यात्मत्वेन त्वमेव रागस्य स्वाभाविकपरमयोग्याश्रयः अतस्त्वल्लक्षणनिजस्वामिनमनुपलभ्यैव भ्रमन्नसौ जनानां शुभवासनारूपां त्वद्भजनसामग्रीं हरंश्चौर एव ततस्तदनुवर्तिनोऽपि तादृशाः। अथ गृहमयो विषयोऽप्यवशिष्टदण्डनायेव तेनैव कारागारीकृतः स्यात् त्वत्पदानुसरणविरोधिरोधसदनत्वात् मोहोऽप्यसौ तेन तेनावस्थावैशिष्ट्य प्राप्तस्तत्र स्वयं निगडायते नष्टेऽपि तादृशकारागृहे रागादिमयस्य तस्याऽवशेषेऽपि त्वत्पदानुसरणोन्मुखत्वाशक्तेः तदेवं त्वदीयानुसृतौ ते तावत्तादृशा भवन्ति यावज्जनास्ते तव न भवन्ति त्वया न स्वीक्रियन्त इत्यर्थः। जाते तु तावकत्वे रागादीनामप्यात्मनोऽप्यात्मनस्तव प्राप्तौ सत्यां तैर्नाऽत्माप्याश्रियत इति स्वयमेव ते दोषा अपगच्छन्तीत्यर्थः। तत्र रागस्य तत्प्राप्तिः—

"या प्रीतिरविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सा मे हृदयान्नापसर्पतु" ॥

इत्यनुसारेण गृहस्य तदर्पितत्वेन मोहस्य च तत्प्रेममयत्वेनेति अत एते तावत् तावकानां शिरोमणयः मादृशास्त्वेतच्चरणरेणुस्पर्शिगणे यत्किञ्चित्त्वत्प्राप्तावप्यभिलाषिण एव कथमेतत्कक्षां प्राप्नुम इति भावः। यद्वा, ननु तेषां प्रत्युपकारासमर्थमपि मां सदा सेवमानास्त एव दूषणीयाः तत्राह—हे कृष्ण! सर्वचित्ताकर्षक! यावत्ते तव जना न भवन्ति साक्षात् त्वत्सेवां न प्राप्नुवन्तीत्यर्थः। अर्थात् त्वद्भक्ताः तावत् तेषां त्वत्स्मृतौ स्वाभाविकभोजनेच्छादयो निवासस्थानं कदाचिन्निद्रादिना त्वद्विस्मृतिलक्षणो मोहोऽपि तावत् परमदुःखदा एव भवन्ति। यद्वा, तव रागादयस्त्वल्लीलास्थानमपि त्वत्प्रेममूर्च्छापि तावत्परमदुःखदा भवन्ति यावत् साक्षात् त्वत्सेवां न प्राप्नुवन्तीति पूर्ववत्, तदेवं सति तव मोहनत्वमेवैषां व्रजवासिनामपि तवानुसरणे कारणं तस्मादेषां को दोष इति भावः। किमर्थं तत्राह, प्रपन्नजनता निजव्रजजनरूपा मदादिरूपा च प्रथितुं प्रथयितुं ऐश्वर्यलीलातोऽप्यस्या लीलाया भक्तपरमानन्दप्रदत्वादित्यर्थः। तदुक्तं 'नन्दः किमकरोद्ब्रह्मन्!" इत्यादौ "गायन्तेऽद्यापि कवयो यल्लोकशमलापहम्" इति 'येन येनावतारेण" इत्यादि "यच्छृण्वतोऽपैत्यरतिः" इत्यादि ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मुह्यतीति निश्चयाशक्तेः, यद्वा, ऋणित्वेनैषां वश्यतया मादृशान् विहाय्यात्रैव स्थास्यतीति शोकःदुखाद्यतिशयेन मोहं प्राप्नोति। सकुला बकाद्यासुर-सहितेति तयोर्भगवत्प्राप्तिहेतु-तत्स्पर्शादि-प्राप्तौ तत्सम्बन्ध एव हेतुरिति ज्ञेयम्। अन्यत्तैर्व्याख्यातम्। विश्वकलादपीत्यपिशब्दान्वयः, कुत्रेति श्रीमाथुरव्रजभूमावेव स्वतो जन्मादिसिद्धेः। यद्वा, कुत्रापीत्यस्य यथास्थितमेवान्वयः। (अयदिति इन् गतौ शत्रन्तः) गत्यर्थादिण्धातोर्ज्ञानार्थत्वात् कथञ्चित् कदाचिदत्यजानदित्यर्थः। सद्द्वेषात् सतां द्वेषात् मारणोद्यमादपि सकुलाऽपि बालघातनादि-महादुष्टत्वेन प्रसिद्धा पूतनापि त्वामापिता त्वयैव प्रापणकारणं स्तन्यदानादिकं पूर्व्वं निर्द्दिष्टमेवास्ति। इवेति सुखविशेषप्राप्त्या तत्त्वतः साक्षाद्भगवदप्राप्तेः। आपितेति च तत्सुखेन सह भगवदभेदात्तदवाप्त्या भगवदाप्त्यभिप्रायेण। एते च त्वन्मित्राणीत्युक्तमेव, अतः प्राप्येऽवश्यविशेषोऽपेक्षत एवेति भावः। ननु, तर्हि निजस्थानधनादिसहितमात्मानं साक्षादेभ्यो दास्यामि? तत्राह—यद्धामेति। त्वत्कृते त्वत्सेवालक्षण-कर्म्मणि निमित्ते तैर्यत्तुभ्यमर्पितमस्ति, त्वयापि तन्मात्र एव प्रत्युपकारेण साम्यमेव, न च तव प्रसिद्ध औदार्य्यादिविशेषः सम्पद्येतेति भावः ॥३५॥ आदि-शब्दात् क्रोधादयस्त्वदीयानां क्रोधोऽपि भक्तिः, तन्नर्त्तादिना दुर्बुद्धीनामन्येषामपि मोचकत्वे पर्य्यवस्यत्येव। कृष्ण! हे साक्षात्परमेश्वर! अन्यैस्तैर्व्याख्यातम्। यद्वा, यदि मदर्थमेवैषां धामादयस्तर्हि कथ विषयभोगादौ रागादय आतिथ्यपालनादिगार्हस्थ्यं वान्योऽन्यं स्नेहो वा दृश्यते? तत्राह—कृष्णस्य तव न ते। यद्वा, हे कृष्ण! सर्व्वथा परमानन्दप्रद! अर्थात् ममैव नते नमने भक्तावित्यर्थः। स्तेनाः स्वभावतो लोकानां विवेकधैर्य्यादिगुणरत्नमोषका अपि विषयभोगादौ रागादयो भवन्ति; आदिशब्दात्तदप्राप्त्यादौ क्रोधादयोऽपि ज्ञेयाः। सकीर्णत्वादिना कारागारवद्दुःखदमपि गृहं गृहस्थाचारः। अङ्घ्रिनिगडवदस्वातन्त्र्यापादकोऽपि मोहोऽन्योऽन्यं स्नेहभरश्च। अयं भावः—भक्तानां स्वभावतस्त्वदर्पितमहाप्रसादद्रव्यादावेव प्रवृत्त्या तत्र रागलोभादीनामपि भक्तिपरिपोषकत्वात्, तथा तदन्यत्र प्रवृत्तजनेषु क्रोधस्य च भक्तिप्रवर्त्तकत्वात्, तथा वैष्णवातिथिसेवादिना-गार्हस्थ्ये सर्व्वहितसाधारणास्त्वद्वार्त्ताद्युपयुक्तास्तत्रैवेति तत्र च यावत्तावकं विना

तत्र प्रवृत्त्यसम्भवादिति । ननु, तेषामभीष्टसिद्धिदानासमर्थमपि मां सदा सेवामानास्त एव दूषणीयाः ? तत्राह--हे कृष्णः ! सर्व्वचित्ताकर्षक ! यावत् ते व्रजवासिनो जनास्त्वत्सेवनपरा न भवन्ति, तावत्तव रागादयो नृत्यगीतादिविलासाः स्तेना इव परमोपद्रवका भवन्तीत्यर्थः, गृहमपि कारागारं परमदुःखदमित्यर्थः, मोहः सर्व्वंभक्तविषयकोऽङ्घ्रिनिगडयन्त्रणाकारः, परमास्वातन्त्र्यापादनात् । यद्वा, श्रीवैकुण्ठादिविषयका रागादयस्तत्रत्यमेव गृहं मोहश्च महालक्ष्म्यादिविषयको ज्ञेयः । अन्यत् समानम् । त्वयैव यत्नतस्तथा क्रियते, सर्व्वेऽपि लोका यथा त्वां भजन्तीति तेषां को दोष इति भावः । यद्वा, भावत्तेषां स्वदेहादिषु पश्वादिषु वा रागादयः स्तेना भवन्ति, गृहं तावत् कारागृहं स्वबान्धवेषु मोहस्तावदङ्घ्रिनिगडो यावत्ते व्रजस्था जनास्त्वत्सेवनपरा न स्युः ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अथ भवानेषां प्रपत्तिमताम् ऋणी एव भविष्यतीति वदति एषामिति । घोषनिवासिनां व्रजवासिनाम् उत अप्यर्थे भवानपि कैवल्यादिप्रदोऽपि हे देव, क्रीडाप्रवृत्त ! विश्वफलात् सर्वफलरूपात् त्वत् त्वत्तः अपरं फलं कुत्रापि देशे काले वा अयत् न गच्छत् न जानत् इति यावत् अतः किं राता किं दास्यतीति अथवा, "अय गतौ" इत्यतः अयत् विचारयत् नः चेतः मुह्यति यद्यतः पूतना सकुला अघबकादिसहिता हे देव, क्रीडनमदनुदित ! सद्वेषात् सत्याः श्रेष्ठायाः प्रतिव्रतायाः यशोदाया मातुर्वेषात् एवार्थे इव वेषमात्रादेव त्वामेव त्वया आपिता प्रापिता अत एषां गोगोपगोपीनन्दयशोदादीनां तु धामार्थसुहृत्प्रियात्मतनयप्राणाशयाः त्वत्कृते वर्त्तन्ते त्वदर्थं श्रीकृष्णस्य श्रीमतो नारायणस्य तव शेषभूताः शेषत्वज्ञानपूर्वं समर्पिता वर्त्तन्ते धाम गृहम् अर्थाः दुग्धादयः अमूल्यरत्नादिपर्यन्ताः, सुहृदः प्रियाः स्त्रियः, आत्मा जीवः, तनयाः प्राणाः चेष्टाविशिष्टशरीराणि, आशयो वासनाः एवमात्मात्मीयभरसमर्पणविशिष्टरक्षाभरार्पणं कृते इति चतुर्थ्यर्थभूतशेषत्वव्यङ्ग्ये वर्त्तते, एवं चैषामपि सत्यनुकार्याणां स्वात्मानमपि ददासि चेत्तवायं लीलाभिनिवेशकारितोऽविवेक एवेति भावः ॥ ३५ ॥ इति श्रीभगवज्जनानां प्रपन्नानां च वैभवमुक्त्वा श्रीभगवत्स्नेहादिमतामपि गोपगोप्यादीनां रागादिगृहादिबन्धनेन देहाभिमानित्वेन चान्यसंसारितुल्यत्वं निराकरोति-तावदिति । अनेन हे कृष्ण ! स्वरूपरूपगुणविभूतिभिश्चित्ताकर्षक ! यावदेते रागद्वेषादयः त्वत्सम्बन्धिनो न भवन्ति तावत्स्तेनाः विवेकहारिणो भवन्ति यावत् गृहं त्वन्मन्दिरं न भवति तावत्कारागृहं तत्तुल्यम् एवं मोहः देहात्मबुद्धिरूपः चिदचितोः त्वच्छेषत्वज्ञानेन त्वत्सेवोपयोगी न भवति तावत्संसारो निगडः एवं ममतास्पदाहन्तास्पदयोः भगवत्सेवोपयोगित्वेन एषां व्रजवासिनाम् अन्येषां च प्रपन्नादीनां न संसार बन्ध इति भावः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इदमपि न प्रार्थनीयं किन्तु कमपि त्वत्सम्बन्धविशेषमेवेत्यभिप्रयन् येन केनापि रागद्वेषाद्यन्यतमेन त्वत्सम्वन्धमात्रेणैव निरतिशयानन्दपुरुषार्थभूतत्वत्प्राप्तौ सत्यां ततोऽन्यत्किं फलं दातुं व्रजवासिष्ववतिष्ठस इति मन्मनो नितरां मुह्यतीत्याह, येषामिति । हे देव ! सकुला बकासुरादिसहिता पापिष्ठाऽपि पूतना सद्वेषादिव सतां साधूनां वेषादिव साधुवेशानुकारमात्रेणैवेत्यर्थः । वस्तुतो जिघांसयाऽपीति भावः । यन्त्वामेव प्रापिता सोऽयं भवानेषां घोषनिवासिनां विश्वस्य पुरुषार्थभूतात्त्वत्तोऽन्यत्परमुत्कृष्टं फलं राता दास्यतीति नोऽस्माकं चेतः कुत्रापि सर्वत्राऽप्ययदगच्छन्विचारयन्मुह्यति विश्वफलभूतस्त्वं प्रत्यक्षतोऽतिष्ठस एव तत उत्कृष्टस्य फलस्याभावात्किन्दास्यतीति मच्चेतो मुह्यतीत्यर्थः । घोषनिवासिनो विशिनष्टि—येषां घोषनिवासिनां ये धामादयः ते त्वत्कृते त्वदर्था एवेत्यर्थः । धाम गृहमर्थो धनं तनुर्देहः आशयो मनः ॥ ३५ ॥ ननु, मत्प्राप्तिप्रतिबन्धकरागद्वेषादिमतामपि मत्सम्बन्धविशेषमात्रेणैव कथं मत्प्राप्तिस्तत्राह—तावदिति । हे कृष्ण ! तावदेव रागादयः स्तेनाश्चौरा भवन्ति त्वत्प्राप्तिप्रतिबन्धका भवन्तीत्यर्थः । तथा तावद्गृहमपि कारागृहं बन्धनागारं मोहोऽपि तावदेव पादशृङ्खलं यावत्ते तव जना येन केनाऽपि प्रकारेण त्वत्सम्बन्धिनो न भवन्ति त्वदीयानां तु रागादयोऽपि त्वन्निष्ठामोचका एवेति भावः ॥ ३६ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

किञ्च, तेषां भाग्यमहिमा किं वर्ण्यते यैस्त्वमपि भक्त्या वशीकृत इत्याह—एषामिति । हे देव ! उत अपि भगवानपि एषां विश्वफलात्सर्वफलस्वरूपात् किं त्वत्तः परं फलं राता दास्यतीति नश्चेतः अयन् विचारयन् मुह्यति मोहं प्राप्नोति अत एतेषां त्वं ऋणी एवेति मया ज्ञातं तत्कुतस्त्वत्तोऽधिकफलाभावात् ननु, मत्सारूप्यं दत्त्वा अनृणी भविष्यामीति चेन्नहि नहीत्याह, सद्वेषादिवेति सद्वेषात् समीचीनमातृवेषात् तदनुकरणमात्रेण दुष्टा पूतनाऽपि त्वामेव त्वत्सारूप्यमोक्षमापिता प्रापिता त्वयेति शेषः । एतेषामनुयायिनां मोक्षं दत्त्वा अनृणी भविष्यामीति चेन्न, साऽपि सकुला बकादिसहिता त्वत्सारूप्यं प्रापिता अत एतदप्येतेषामपर्याप्तमिति भावः । कथमपर्याप्तमित्यत आह-यद्धामार्थ इत्यादि येषां धाम गृहम् अर्थो धनं सुहृत्सुहृदः प्रियाश्च ते आत्मतनयाश्च प्राणा इन्द्रियाणि आशया अन्तःकरणानि त्वत्कृते त्वदर्थमेवेति अतस्त्वमेतेषाम् ऋणी एव सदेति निश्चितमित्यर्थः ॥३५॥ ननु, रागद्वेषादिशून्यानां परमात्मतत्त्वज्ञानिनां न मत्तः परं किञ्चिदप्यस्ति अतः कथमेतेषामपर्याप्तमित्यत्राह—तावद्रागादय इति । हे कृष्ण ! कर्षति

वात्सल्यादिगुणैर्वशीकरोति प्रपन्नानिति कृष्णस्तत्सम्बुद्धौ हे कृष्ण ! तावदेव रागादयः स्तेनाश्चौरास्तावदेव गृहं कारागृहं बन्धनागारं तावदेव मोहो निगडः पादबन्धनं यावत्ते जनास्त्वदनन्यभावा न भवन्ति त्वच्छरणागतानां तु त्वन्निष्ठास्ते विपरीता गुणा एव भवन्तीति भावः । एतावदन्तरं ते ज्ञानिनस्त्वां सर्वशेषिणं परमात्मानं ज्ञात्वा भजन्ति एते तु त्वां पुत्र इति सखा इति सुहृदिति ज्ञात्वा वात्सल्यादिवशेन भजन्तीति तथा च सप्तमे नारदः "कामाद्द्वेषाद्भयात्स्नेहात् यथा भक्त्येश्वरे मनः । आवेश्य तदघं हित्वा बहवस्तद्गतिङ्गताः" इति अन्यत्रापि—

"मन्निमित्तं कृतं पापम्मद्धर्माय प्रकल्पते । मामनादृत्य धर्मोऽपि पापः स्यान्मत्प्रभावतः" ।। इति ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

किन्तु, भगवन् ! एक एवास्ति मे महान् सन्देहस्तं स्वयमपि त्वं दूरीकर्तुं न शक्नोषीत्याह—एषामित्यादि । हे देव ! एषां घोषनिवासिनाम्, उत विस्मये, भवान् विश्वफलाद्विश्वस्य फलभूतात् त्वत्तोऽपरं किं राता दाता इति कुत्रापि सन्देहसङ्कटे अयत् पतन्नोऽस्माकं चेतो मुह्यति । ननु कथं ते चेतोमोहः ? आत्मानमेव दास्यामीति चेदवैदग्ध्यापत्तेरिदमनुचितमित्याह—सद्द्वेषादिवेति, सती माता तद्द्वेषादिव, न तु तद्द्वेषात्, स्तन्यदानाय मातृवपुः कृत्वा गतेति न, अपि तु जिघांसयैवेति इव-शब्दः, तद्वेषाभासमात्रेणैव पूतना त्वामेवात्मानमेवापिता प्रापिता, तत्रापि सकुला बकाघादिसहिता । एभ्योऽपि यदि स एवात्मैव दातव्यस्तदा योग्यायोग्यविचाराभावादवैदग्ध्यमेवापतति । आत्मनोऽधिकं वस्तु तव नास्त्येव, तत् किमपरं दास्यसीति योग्य एव सन्देहः । ननु भो ब्रह्मन् ! मा सन्देहं कार्षीः, एभ्यो यद्देयं तद्दत्तमेव । यद्वा त्वत्कृते त्वत्कर्मणि धामादीनि सर्वाणीति ब्रह्मणो वाक्यशेष एवान्तर्यामिरूपेण सरस्वतीं देवीं प्रेरयता सिद्धान्तितम् । तेभ्यः पूतनादिभ्य आत्मानं सायुज्यं दत्तम्; एभ्यस्तु एवम्भूतं सायुज्यादपि परमदुर्लभं प्रेम दत्तमिति न ममावैदग्ध्यमिति सिद्धान्तः ।। ३५ ।। अथ हे ब्रह्मन् एषामेवम्विधत्वं कथं भवता लक्षितमित्याशङ्क्य व्यतिरेकमुखेन तत् प्रपञ्चयन्नाह—तावद्रागादय इत्यादि । स्तेनाश्चोरप्रायाः, ज्ञाने मोषकत्वाद्रागादयस्तावदेव कारागृहप्रायम्, विना प्रारब्धक्षयेन ततो बहिर्भवनमशक्यमिति कारागृहसदृशं गृहं तावदेव निगडप्रायः, स्वयमभेद्यत्वाद्दुर्भिदो मोहश्च तावदेव यावत् हे कृष्ण ! जनास्ते न भवन्ति, त्वदीया न भवन्ति, तव चेद्बभूवुस्तदा स्तेनादिप्राया रागादयस्तेषां न सन्तीति सिद्धम् । सिद्धान्ते यदेषां तथैवाकलितं तदेते त्वदर्पितधामादित्वेनोक्तप्रकारा एव ।। ३६ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तदेषां प्रेमभक्तानां भवान् ऋणीव कथमपि प्रत्युपकारः कर्त्तुं शक्यत एवेत्याह—एषामित्यादि स्वामिपादानां व्याख्यैव शरणीकार्या ।। ३५ ।। नन्वेषां रागादयो दृश्यन्ते, तथापि कथमेते श्रम-दम-तितिक्षादिभिः शुद्धसत्त्वेभ्योऽप्यधिकास्ते इत्याह—तावद्रागादय इत्यादि । अत्रापि स्वामिव्याख्यैव ।। ३६ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किं च येषां पादरजो मया लोभात् प्रार्थ्यते तल्लभ्यतां न लभ्यतां वा मयेति स्पष्टं न ब्रूवे चेन्मा ब्रूहि किं त्वन्यदेकं यत्पृच्छ्यते तदुत्तरमवश्यमेव देहीत्याह–एषाम् एभ्यो भवान् किं रातेति फलं दास्यतीति उत प्रश्ने इत्यहं पृच्छामीत्यर्थः । ननु, सर्ववेदार्थतत्त्वज्ञेन त्वयैव चेतसा विचार्य्य स्वयमेव ज्ञायतां तत्राह–नोऽस्माकं चेत इति बहुवचनेन न केवलं ममैव अपि तु रुद्रस्य सनकादीनां नारदादीनां च सर्वेषामेव सर्वज्ञानां चेतो मुह्यति चेतः कीदृशं विश्वफलात् सर्वफलात्मकात्त्वत्तोऽपि अपरमन्यत् फलं कुत्रापि देशे काले वा अन्यत् बुद्ध्या बहुधा अन्विष्याप्यप्राप्नुवत् "इण गतौ" शत्रन्तः अयमर्थः सर्वफलरूपस्त्वमेभिरनादित एव पुत्रादिरूपत्वेन प्राप्त एव वर्तसे अत एव मया एषां भवानिति षष्ठी प्रयुक्ता यदि तु त्वत्तोऽप्यधिकममन्यत् किञ्चन वस्तु प्रशस्तमस्थास्यत् तदेवैतेभ्यो देयत्वेन योग्यमभविष्यत् तत्तु नास्तीत्यस्माकं चेतो मोहे हेतुरिति । ननु, ब्रह्मन् ! सत्यं त्वं तत्त्वानभिज्ञ एवासि मयैतेषां भविष्यतीमनुरागमयीमद्भुतां भक्तिं जानतैव तत्साध्यफलभूतः स्वात्मा पुत्रादिरूपः प्रथममेव दत्त इत्यन्ये खलु कृतज्ञा भवन्ति अहं तु करिष्यमाणविज्ञ इति मयैव जितमिति चेत् सत्यं प्रभो ! तदपि त्वं न्यायेन जीयस एवेत्याह, सद्द्वेषादिव सद्द्वेषादेवेत्यर्थः । पूतना पापिष्ठाऽपि स्वकुलसहिताऽपि त्वामेवापिता त्वयैव त्वां स्वात्मानं प्रापिता तथा येषां धामादयो ममतास्पदाहन्तास्पदानि त्वत्कृते त्वदर्थमेव ते चैते व्रजवासिनोऽपि त्वया त्वामेवापिता इति वाक्यशेषो नासानेत्रभ्रुग्रीवाभङ्ग्यैव ज्ञापितः य एव स्वात्मा अतिनिकृष्टायै पापिष्ठायै पूतनायै दत्तः स एव स्वात्मा अतिप्रकृष्टेभ्यः पुण्यवच्छिरोमणिभ्यो व्रजवासिभ्यो दत्त इति प्रथमतो दानेऽप्यनुचितानुष्ठितिर्दुर्वारित्येषां ऋणित्वस्वीकार एव तव निष्कृतिरिति भावः ।। ३५ ।। नन्वेते गृहस्थाः पुत्रकलत्रादिसंसारजाले निपातिता इति संन्यासिभिरुच्यते सत्यं त्वल्लक्षणपुत्रत्वद्भक्तलक्षणकलत्रादिमन्त एते गृहस्था वर्तन्तां देशान्तरस्था ये त्वद्भक्ता गृहस्थास्तेऽपि संन्यासिभ्योऽप्यधिका इत्याह– तावदिति । रागादयो रागद्वेषाऽभिनिवेशास्ते च महाचौरा जीवनिष्ठज्ञानानन्दादिमहाधनान्यपहृत्य परमेश्वरे राजनि एते मा फूत्कुर्वन्त्विति बुद्ध्या कर्माधिकारमये गार्हस्थ्यकारागारे मोहनिगडेन निबद्ध्या जीवाः

स्थाप्यन्ते हे कृष्ण ! जना जीवा यावत्ते त्वद्भक्तानुग्रहभोजनत्वेन त्वदीया न भवन्ति तावदेव रागादयः स्तेनाश्चोराः त्वदीयत्वे सति तेषां त्वद्भक्तेष्वेव रागः भक्तिप्रतिकूले वस्तुन्येव द्वेषः त्वय्येवाभिनिवेश इति प्रत्युत त्वन्निष्ठज्ञानानन्दादिकमप्यानीय दधानास्त एव परमसाधवो भूत्वा नित्यमुपकुर्वते एवमेव गृहं भद्राभद्रकर्मसाधनं यत्कारागृहमासीत्तदेव तेषां त्वत्परिचर्याकीर्त्तनादिसाधनं त्वदीयनित्यधामप्रापकं भवेत् एवं मोहविषयस्य त्वद्भक्तत्वात् सोऽपि त्वत् प्रेमानुभावरूपमोहप्रापकः इति कथमेतत् समकक्षतां संन्यासिनो लभन्तां ये "कृच्छ्रो महानिह भवार्णवमप्लवेषां षड्वर्गनक्रमसुखेनतितीर्षन्ति" इत्युक्त्या मत्पुत्रेण सनत्कुमारेणापकर्षितास्तेभ्यः संन्यासिभ्योऽपि भक्त्या परमाधिका ये देशान्तरस्थभक्तास्तेभ्यः परः सहस्रगुणतोऽपि प्रेम्णा अधिकतमा ये व्रजवासिनस्तैरेभिस्त्वं साक्षात् पूर्णब्रह्मस्वरूपोऽपि पुत्रादिरूपत्वेन स्वाधीनीकृत एव वर्त्तसे इति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

व्रजस्थानां भाग्यातिशयमाह एषामिति । सद्वेषादिव सतां त्वद्भक्तानां गोपीजनानां यो वेशस्तदनुकरणमात्रेणैव सकुला बकादिसहिता पूतनाऽपि पापिष्ठा राक्षस्यपि त्वामेवापिता प्रापिता तथाऽपि विश्वफलात्सर्वफलात्मका त्त्वत्तोऽपरं फलं कुत्राऽप्यस्ति ? किन्तु न कुत्राऽप्यस्ति अतो येषां धामादयस्त्वत्कृते त्वदर्थमेव एवम्विधानामेषां हे देव ! किं दास्यतीति नश्चेतः अयत् सर्वत्र गच्छत् विचारयत् मुह्यति ॥ ३५ ॥ किं बहुना जनमात्रोऽपि त्वदीयो भूत्वा कृतार्थो भवतीत्याह–तावदिति । हे कृष्ण ! यावत् ते त्वदीयाः जना न भवन्ति त्वदितरसम्बन्धपरित्यागपूर्वकं त्वां शरणं न व्रजन्ति तावत् रागादयः ऐहिकामुष्मिकपदार्थतत्साधनादिषु रागस्तद्विरोधिषु द्वेषः उदासीनेषूपेक्षा एवमादयः स्तेनाश्चोरा पुरुषार्थहराः भवन्ति तावदेव गृहं कारागृहं बन्धनालयं भवति तावदेव मोहोऽपि अङ्घ्र्योर्निगडं शृङ्खला भवति ॥ ३६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तद्व्रजःस्पृहयाऽतिप्रसन्नमालक्ष्य तद्वाचं श्रोतुकामोऽस्यायमेकं पृच्छति—एषामिति । हे देव । एभ्यो घोषनिवासिभ्यो भवान् किं फलं राता दास्यति, उत प्रश्ने एतदहं पृच्छामीत्यर्थः । ननु वेदज्ञेन त्वयैव विचार्य बुध्यतां तत्राह नोऽस्माकं मम शिवस्य च नारदादेश्च सर्वेषां वेदज्ञानां चेतः विश्वफलान्निखिलफलस्वरूपात् त्वत्तोऽपरं फलं कुत्रापि देशे काले वा अयदप्राप्नुवत् विमुह्यति किं प्रदायायमनृणी भवेदिति विमोहमेति "इण् गतौ" शत्रन्तः । नन्वेभ्य एतदीयेभ्यो वा अहमात्मानमेव प्रदाय पर्याप्तिं कुर्याम् तत्राह सद्वेषादिवेति धात्रीवेषादेव सकुला बकाघसहिता पूतनापि पापिष्ठापि त्वामेवार्पिता त्वयैव त्वां स्वात्मानं प्रापिता येषां धामादयस्त्वत्कृते त्वदर्थं विनियुक्तास्तेभ्यः पुण्यवच्छिरोमणिभ्यस्त्वदनुरागनिभृतेभ्यः स्वात्मदानेनापि न पर्याप्तिरिति सर्वदा तेषां ऋण्येव भवानिति तत्पादरजोऽभिषेको मेऽनुगृह्यतां जगत्पतित्वं मे न रोचते इति भावः ॥ ३५ ॥ नचैषां घोषनिवासिनां गृहकलत्रापत्येषु रागादिसत्त्वान्नैष महिमा सम्भवेदिति चेत्तत्राह तावदिति । देशान्तरस्थानामपि गृहिणा कलत्रापत्यं प्रतीपवतां कलत्रादिषु रागाभिनिवेशद्वेषास्तावत् स्तेनाज्ञानादिधनहरा भवन्ति, गृहमपि तावत् कारागृहं गृहादिविषयको मोहोऽपि तावदेवाङ्घ्रिनिगडः पादशृङ्खला यावत्ते जनास्त्वदुक्ता न भवन्ति त्वदीयत्वे तु सति तेषां त्वदुक्तेषु रागस्त्वयि त्वत्सम्बन्धिनि चाभिनिवेशस्त्वदुक्तिप्रतीपेषु द्वेषश्चेति त्वज्ज्ञानादीन् ददानास्ते परमोपकारिणः साधवो भवन्तीत्यर्थं गृहञ्च त्वत्परिचर्यादिभक्तिसाधनं सत्त्वनित्यधामोपलम्भकं भवेत् कलत्रादेरपि त्वदुक्तत्वात्तद्विषयको मोहोऽपि परमार्थपर्यवसायीति त्वत्सम्बन्धादेव स्पर्शमणिस्पर्शन्यायेन संन्यासिनां रागादीनां तत्पर्यवसायित्वे सति का कथैषां त्वन्मित्राणां त्वन्नियुक्तधामादीनामिति दर्शितमहिमानस्ते भवन्तीति ॥ ३६ ॥

श्रीसुबोधिनी

तेषां फलमेतदेव न भवति, सेवायाः क्रियमाणत्वात्, अतस्तत्फलं कथं नाभिनन्द्यत इत्याशङ्क्य तत् फलं न ज्ञायत एवेत्याहैषामिति, एतेभ्यो **घोषनिवासिभ्य** एतत्सेवासाध्यमेतत्सम्बन्धि हे **देव त्वं किं राता** ? किं दास्यसीति नोऽस्माकं चित्तं त्वत्तोन्यत् **फलं कुत्रापि** ब्रह्माण्डे सकलेऽप्ययद् गच्छन् विमुह्यति, यतस्त्वमेव विश्वस्यैव **फलं** परमानन्दस्त्वत्तोन्यत् कथं **फलं** भविष्यति ? तर्ह्यात्मानमेव दास्यामीति चेत् तत्राह. **सद्वेषादिवेति**, **सतो** यशोदाया **वेषाद्** वेषं प्राप्य **वेषाद्धेतोर्वा** **पूतना सकुला** भ्रातृसहितापि **त्वामेवा**पिता प्रापिता, अर्थात् त्वयैव, **देवे**तिसम्बोधनं पूज्यार्थं, **ये** पुनस्त्वदर्थमेव **धाम** गृहमर्थो धनं **सुहृदो** मित्राणि **प्रियाः** प्रीतिविषयाः पदार्था **आत्मा** देहस्तनयाः पुत्राः **प्राणा** इन्द्रियाणि चाशयोन्तकरणमेतत् सर्वं केवलं **त्वत्कृते** त्वदर्थम् ॥ ३५ ॥ नन्वेतेषां संस्कारो जीवतामेव निवर्तनीयः पूतना तु मारितेति संसारनिवृत्तिं दास्यामीति चेत् तत्राह **तावदिति**, गृहादिषु **रागादयस्ताव**देव **स्तेना** विवेकधैर्यापहारकास्तावदेव गृहमपि **कारागृहं** बन्धनस्थानं **ताव**देव पुत्रादिषु **मोहोऽङ्घ्रिनिगडः** पादशृङ्खला **यावत् कृष्ण न ते जना**स्त्वत्सेवका न भवन्ति, **त्वत्सेवकानां त्वेतानि त्रीण्यपि सात्त्विकादीनि सेवौपयिकानीति शास्त्रतोऽप्यभिलाषितान्येव** ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'अपि चैषां कृतार्थत्वं किं वर्ण्यते ? येषां भक्त्या भवान् अपि ऋणीव दृश्यसे' इत्याह—एषामिति । उत अपि हे देव बहुधा द्योतमान ! एषां घोषनिवासिनां भवान् सर्वप्रकारेण सर्वं कर्तुं सर्वं दातुं च समर्थोऽपि किं राता किं दास्यति ? एषां भक्त्यनुरूपं तवापि किञ्चिद्देयं नास्तीत्यर्थः । 'तर्ह्यात्मानमेव दत्त्वाऽनृणः स्याम्' इति चेत्तत्राह—विश्वफलादिति । सर्वफलात्मकात् त्वत्तोऽप्यपरनुत्कृष्टं फलमेषां योग्यमित्यर्थः । 'कुत एषां मत्तोऽप्युत्कृष्टफलयोग्यता ?' तत्राह—सद्वेषादिति । इवशब्द एवकारार्थकः । सत्या जनन्या वेषमात्रादेव दुष्टा पूतनाऽपि हे देव त्वत्कृपया त्वामेवापिता प्रापिता, अत एषां तत उत्कृष्टं फलमपेक्षितमित्याशयः । 'तर्हि एतत्सम्बन्धिनामपि आत्मानमेव दास्यामि' इति चेत्तत्राह—सकुलेति, बकासुराघासुरसहिता । एवमपि नैतेषां फले आधिक्यमिति भावः । फलाधिक्यावश्यकत्वे तेषां भक्त्याधिक्यं हेतुमाह—यद्धामेति । येषां धामादयस्त्वत्कृते त्वदर्थमेव । येषामपि दुष्टपूतनाया दत्तमेव फलं चेद्दास्यसि, तदा तदपर्याप्तमेवेति भावः । धाम गृहम् । अर्थो धनम् । सुहृदो मित्राणि । प्रियाः प्रीतिविषयाः स्त्र्यपत्यादयो ये के च पदार्थाः । आत्मा देहः । तनयाः पुत्राः । प्राणाः इन्द्रियाणि, मुख्यप्राणश्च । तेन जीवितमाशयोऽन्तःकरणम् । ननु "त्वमपि सर्ववेदार्थतत्त्वज्ञः, अतस्त्वमेव एषां योग्यस्य फलस्य निश्चयं कुरु, तद्दास्यामि" इत्यत आह इति नश्चेत इति । इत्येतस्मिन्नर्थे नोऽस्माकं मम रुद्रस्य सनकादीनां च सर्वेषां सर्वज्ञानाम् अयत् विचारेण स्वशक्त्या सर्वत्र गच्छत् अपि चेतो मुह्यति, निश्चयं न प्राप्नोति इत्यर्थः ।। ३५ ।। ननु "एते गृहस्था अतो रागादिभिश्चौरैर्विवेकधैर्यादिधनं विलुम्पद्भिर्मोहनिगडेन बद्ध्वा कारागृहरूपे गृहे निरुद्धाः, अतः कथमेषां ततो विमुच्य मम प्रातिरूपं फलमपर्याप्तम् ? यतो विगतरागादिदोषाणां संन्यासिनामपि न मत्तः परं किञ्चित् प्राप्यं फलमस्ति" इति चेत्तत्राह—तावदिति । हे कृष्ण सदानन्दरूप ! यावज्जनाः जीवास्ते त्वदीया न भवन्ति 'त्वदेकशरणतया त्वया स्वकीयत्वेन अङ्गीकृता न भवन्ति' तावदेव रागादयः, आदिशब्देन द्वेषादयः स्तेनास्तथा तावदेव गृहं कारागृहं बन्धनागारम् । तावदेव मोहोऽप्यङ्घ्रिनिगडः पादबन्धनशृङ्खला भवति । यथा राजपरिकरबहिर्भूतानामेव चोरादय उपद्रवं कुर्वन्ति, राजानुगृहीतानां तु प्रत्युत सेवामेव कुर्वन्ति तथा त्वद्विमुखानामुपद्रवकारिणोऽपि रागादयस्त्वयाऽनुगृहीतानां तु रागमोहादीनामपि त्वद्भजनपर्यवसायित्वेन द्वेषादीनां त्वद्भजनविरोधिविषयत्वेन च संसारदुःखविमोचकत्वात् उपकारिण एव ते । तथाच केवलविरागेभ्यस्त्वद्भक्तानां त्वद्भजनस्याधिक्यात् न तत्सदृशं फलं पर्याप्तमिति भावः ।। ३६ ।।

अन्वितार्थप्रकाशिका

किमेषां धन्यता वर्ण्यते तेषां भवानपि ऋणीवास्ते इत्याह—एषामिति ।। उत अपि हे देव ! एषां घोषनिवासिनाम् । संप्रदानस्य शेषत्वविवक्षया षष्ठी । भवान् सर्वप्रकारेण सर्वं कर्तुं दातुं च समर्थोऽपि किं राता किं दास्यति इति विश्वफलात् सर्वफलात्मकात्त्वत्तोऽपि अपरम् अन्यत्फलं कुत्रापि देशे काले वा नयत् अयत् बुद्ध्या बहुधा अन्विष्याप्यप्राप्नुवत् । "इण्, गतौ" शत्रन्तं नञ्समासः । नोऽस्माकं मम रुद्रस्य सनकादीनां च चेतो मुह्यति । ननु मामेव दत्त्वाऽनृणी स्यां तत्राह । यतः हे देव ! सद्वेशादिव मातृतुल्यवेषादेव सकुला प्राक्जन्मकुलसहितापि बकाघासुरयोस्तु स्वतन्त्र एव भगवत्स्पर्शोऽस्ति ततस्तौ न गण्यौ । दुष्टा पूतनाऽपि त्वत्कृपया त्वामेवापिता प्रापिता अत एषां तत उत्कृष्टं फलमपेक्षितमित्याशयः । येषां घोषनिवासिनां तु धाम गृहम् अर्थो धनं सुहृदो मित्राणि प्रियाः प्रीतिविषयाः स्त्र्यपत्यादयो ये के च पदार्थाः आत्मा देहः तनयाः पुत्राः प्राणाः इन्द्रियाणि मुख्यप्राणाश्च तेन जीवितमाशयोन्तः करणम् एते सर्वे त्वत्कृते त्वदर्थमेव । तथा च य आत्मा पापिष्ठायै पूतनायै दत्तः स एव चेदतिप्रकृष्टेभ्यो दीयेत तदा नौचिती एव भवेदतः एषामृणित्वस्वीकार एव तव निष्कृतिः ।। ३५ ।। यतीनामिव मुक्तिस्त्वेषामतितुच्छं दानं त्वदीयत्वसंकल्पमात्रेण लभ्यत्वादित्याह—तावदिति ।। हे कृष्ण ! यावज्जनाः जीवास्ते त्वदीया न भवन्ति स्वस्मिन् त्वदीयत्वं न संकल्पयन्ति तावदेव रागादयः आदिशब्देन द्वेषादयः स्तेनाश्चौराः परमार्थमोषका भवन्ति तावदेव गृहं कारागारं बन्धनागारतुल्यं भवति तावदेव मोहोऽप्यङ्घ्रिनिगडः पादबन्धनशृङ्खला भवति त्वदीयत्वाभिमानिनां तु रागादयोऽपि त्वन्निष्ठामोचका एवेति न यतिषु विशेषः भजनं त्वधिकमिति भावः ।। ३६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नन्वेतावत्कालपर्यंतं कथं भोजनशयनोपवेशनादिविस्मृतं तत्राह द्वाभ्यां एकस्मिन्निति आत्मनः प्राणेशं प्राणाधारं हरिमंतरा विना एकस्मिन्नब्दे संवत्सरेपि याते गते सति अर्भकाः कृष्णमायाहृताः संतः आत्मनः स्वस्य क्षणार्द्धं पलपंचकं मेनिरे काकाक्षिगोलकन्यायेन आत्मशब्दस्योभयत्र संयोगः ।। ३५ ।। इह अस्मिन् लोके सर्वं जगत् यया हरिमायया मोहितं सत् अभीक्षणं भूयोभूयः विस्मृतः आत्मा गतजन्मनां देहकलापो येन तत् विस्मृतात्मकमभूत् ।। ३६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यथाकथंचित् निरतिशयपुरुषार्थभूतत्वत्प्राप्तौ सत्यां ततोऽन्यत् किं फलं दाता इति मन्मनो नितरां मुह्यतीत्याह ।। एषामिति ।। हे देव, सकुला बकासुरादिस्वकुलजनसहिता, अपिशब्दादतिपापनिष्ठापि पूतना, सद्वेषादिव मातृसमानवेषमात्रधारणादिव,

वस्तुतस्तु जिघांसयेति भावः । त्वां आपिता एव त्वया मातृगतिं प्रापितैवेत्यर्थः । सोऽयं भवान्, हे देव, येषां घोषनिवासिनां धाम गृहं च अर्थो धन च सुहृदो मित्राणि च प्रियाः प्रेमास्पदीभूताश्च आत्मा देहश्च तनयाः पुत्राश्च प्राणा असवश्च आशयो मनश्च ते, त्वत्कृते त्वदर्थमेव, वर्त्तन्ते तथाभूतानाम्, एषां घोषनिवासिनां, किं उत किं न्वित्यर्थः । विश्वफलात् सकलपुरुषार्थभूतात्, त्वत्त्वत्तः, अपरमन्यत्, फलमुत्कृष्टं फलमित्यर्थः । राता दाता दास्यतीति यावत् । इति, नोऽस्माकं चेतः, कुत्रापि सर्वत्रापि, अयत् गच्छत् विचारयत् सत्, मुह्यति । विश्वफलभूतस्त्वं तु प्रत्यक्षतोऽवतिष्ठसे एव । तत उत्कृष्टस्य फलस्याभावात् किं दास्यसीति मच्चेतो मोहमुपगच्छतीत्यर्थः ॥ ३५ ॥ ननु मत्प्राप्तिप्रतिबन्धकरागद्वेषादिमतामपि मत्संबन्धविशेषमात्रेणैव कथं मत्प्राप्तिस्तत्राह ॥ हे कृष्ण, तावत् एव रागादयः, स्तेनाश्चौराः, भवन्ति । त्वत्प्राप्तिप्रतिबन्धका भवन्ति इत्यर्थः । तथा तावत्, गृहमपि, कारागृहं बन्धनागारं, मोहः अपि, तावदेव, अङ्घ्रिनिगडः पादशृङ्खलतुल्यः, यावत् ते तव, जनाः न येन केनापि प्रकारेण त्वत्संबन्धिनो न भवन्ति, तावदेव रागादय उक्तप्रकाराः, त्वदीयानां तु रागादयोऽपि त्वन्निष्ठत्वेन मोचका एवेति भावः ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तावदिति : १०.१४.३६.

मुष्णन्ति प्रसभं प्रविश्य हृदये कामादिपाटच्चराः सर्वस्वं ननु तावदेव जठरावासोऽपि दुःखप्रदः ।
मोहाऽहंममतात्मकोऽपि निगडः स्यात्तस्य तावद्ध्रुवे यावत्कृष्ण कृपां विधाय भवता स्वत्वेन नाङ्गीकृतः ॥ ४४ ॥
कृता मन्तुक्षान्तिर्द्विषदपहृतिश्चाघविहृतिः दुरुन्नेयं मायाऽऽवरणमपि नीतं लयमिदम् ।
परात्मेक्षालाभः सुखमविकलं चाप्यधिगतं न चेहेऽन्यत् किञ्चित्सदय तव पादाब्जभजनात् ॥ ४५ ॥
पुंसां सर्वजनानुरञ्जकगुणप्रोल्लासितेनापि चेद्आत्मेष्टोऽन्यगतो गुणो लघुरपि स्वीकार्य एवादरात् ।
युक्तं चैतदसौ यतोऽखिलरजः साम्राज्यलक्ष्मीरपि ब्रह्मा तत्पदरेणुसंग्रहविधौ साकाङ्क्षचित्तोऽभवत् ॥ ४६ ॥
ज्येष्ठो विधिर्लोकदृशा कनिष्ठा गोपालबाला व्रजवासिनश्च । श्रीशाङ्घ्रिसेवासुखतारतम्ये व्यत्यस्तभावो नहि कस्य मान्यः ॥ ४७ ॥
वत्सानस्य करोमि मोहकलितान् सर्वानपीति त्वया धातश्चिन्तयता न चिन्तितमिदं यद्वत्सरूपोऽप्यहम् ।
तत्त्वं स्वोक्तित एव मोहितमतिर्जातोऽस्यलं नो मयाऽकारीत्यर्थमसूचयत् कमलजं मन्येऽब्रुवन्नेव सः ॥ ४८ ॥
यन्मायाकलिला बभूवुरखिलाः पालाः सवत्सा विधेः तस्याद्धैत्र सकाशतोऽपहरता निःशेषमाया मया ।
स्वातन्त्र्येण किमर्थमर्थनमितः कार्यं स चानीयतां वर्गो मत्सुहृदामिति प्रभुरुदासीनस्तदाऽऽसीन्मुदा ॥ ४९ ॥

कृष्णप्रिया

हे देव हे करुणानिधान ? इस गोकुल व्रज निवासी दान में दानी शिरोमणि होते हुए भी क्या देंगे ? भगवन् ! मोक्षादि समस्त फलों के फल तो आप ही हैं । आप ही सर्व फल स्वरूप हैं इसलिये आप से उत्तम तो कोई फल है ही नहीं ऐसा विचार करता हुआ मेरा मन असमञ्जस में पड़ गया है—अचम्भे में पड़ गया है । यदि इन सर्व समर्पित व्रज भक्तों को आप अपना स्वरूप भी दें फिर भी करज मुक्त नहीं होंगे । हे कृपानिधि ? यशोदाजी के या लक्ष्मी जी के समान केवल वेशभूषा बनाकर आपको मारने के लिये ही समीप आयी हुई पूतना भी अपने सारे परिवार सहित जब आपको ही प्राप्त हो गई । अब बताईए नाथ वैरिणी बालघातिनीने ऐसा फल पाया तो अब आपके पास क्या फल रहा कि जिन्होंने अपने गृह परिवार धन सुहृद प्रिय जन प्रिय आत्मा तनय प्राण इन्द्रिय अन्तःकरण आदि सर्वस्व आपके लिये ही हैं और न्योछावर कर चुके हैं उन व्रजजनों को भी वही फल देकर आप कैसे ऋण मुक्त बनेंगे ॥ ३५ ॥ हे श्रीकृष्ण ! विषयानुराग काम क्रोध आदि चौर तब तक ही मनुष्य के विवेक धैर्य आदि धन का अपहरण कर सकतें है और तभी तक घर उनके लिये काराग्रह है और तभी तक पैरों को जकड़ रखने वाली जीवों की बेड़ियां है जब तक जीव आपके नहीं बनते आपके श्रीचरणों में सर्व समर्पन नहीं करते ॥ ३६ ॥

प्रपञ्चं निष्प्रपञ्चोऽपि विडम्बयसि भूतले[1] । प्रपन्नजनतानन्दसन्दोहं प्रथितुं प्रभो ॥ ३७ ॥
जानन्त एव जानन्तु किं बहूक्त्या न मे प्रभो । मनसो वपुषो वाचो वैभवं तव गोचरः ॥ ३८ ॥

कर्दमक्षमा

अन्वयः—प्रभो ? भूतले प्रपन्नजनतानन्दसन्दोहं प्रथितुं निष्प्रपञ्चः अपि प्रपञ्चं विडम्बयसि ॥ ३७ ॥ प्रभो, जानन्तः एव जानन्तु किं बहु उक्त्या ! तव वैभवं मे मनसः वपुषः वाचः गोचरः न ॥ ३८ ॥

---

[1] मायया—च. पु. टी. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वत एवाहमेषां पुत्रादिरूपेण वर्त्ते इति चेत्तत्राह । प्रपंचमिति । प्रपन्ना या जनता जनसमूहस्तस्याश्चानंदानां संदोहं समूहं प्रथयितुमिति । न हि कपटपुत्रत्वादिना तादृग्भक्तेरानृण्यं संपद्यत इत्यर्थः ॥ ३७ ॥ तदेवमादित आरभ्याचिंत्यानंतगुणत्वेन स्वय दुर्ज्ञेयत्वमुक्तम् । केचित्तु वय जानीम इति स्थितास्तानुपहसन्निवाह । जानंत इति । न तु मे मनआदीनां तव वैभवं विषय इति ॥ ३८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

समर्थयन्नाशङ्कते—नन्विति । यत एते यतिभ्योऽधिका अत एव । तत्राक्षेपे । तादृग्भक्तेः परमप्रेमभक्तेः । इत्यर्थ इति । निष्कपटभक्तेषु सकपटव्यवहृत्या दोषस्तु भवति कुत आनृण्यमिति तात्पर्य्यम् । भूतल इति । वैकुण्ठीयलीलातोऽपि विस्तृतीकर्तुं विडम्बयसीति । अयं भावः—प्रकाशे दीपो नातिशोभते यथान्धकारे, श्वेतराजतपात्रे हीरकरत्नं नातिशोभते यथा नलिकाचादिपात्रे तथैव चिन्मये वैकुण्ठे चिन्मयी लीला नातिचमत्करोति यथा मायामये प्रपञ्चे इति । यद्यपि व्रजमण्डलमपि चिन्मयमेव तदपि कृष्णस्य प्राकृतपुरुषसाधर्म्यमिव भूतलस्थव्रजमण्डलस्यापि । प्राकृतभूतलसाधर्म्यमेव दृष्टमतो न लीला चमत्करोत्येवेति । हे प्रभो इति । मामपि प्रपन्नमध्ये गणयेति भावः ॥ ननु व्रजेऽस्मिन्नेतत्पुत्रादिभावं **पूर्णब्रह्मणो** मम न वस्तुत इति केचिन्मन्यते, सत्यं, त भ्रान्ता एवेत्याह—प्रपञ्चमिति । प्रपञ्चातीतोऽपि त्वं भूतले सदा स्थितस्सन् प्रपञ्चं प्रपञ्चस्थपुत्रादिभावं प्रपञ्चयसि अनुकरोषि । प्रापञ्चिकेषु पित्रादिषु प्रापञ्चिकाः पुत्रादयो यथा चेष्टन्ते तथैव त्वमपि चेष्टस इत्यर्थः । तेन जीवानां यथा पितृपुत्रादिभावो ह्यवास्तवस्तथा तव न, तव तु सनिष्प्रपञ्चत्वाद्वास्तवो नित्य एवेति । तव लीला नित्या प्रपंचातीताऽपि प्रपञ्चानुकरणमयीति सिद्धान्त उक्तः । किमर्थ विडम्बयसि । प्रपन्ना या जनता तस्या यस्तादृशलीलास्वादनोत्थ आनन्दसन्दोह आनन्दपुञ्जस्तं ब्रह्मानन्दाद्वैकुण्ठीयेत्येतत्तरयितोऽवसेयम् ॥ ३७ ॥ तदेवम्—तद् वाक्यालङ्कारे, एवम् प्रकारे । यद्वा—तद्दुर्ज्ञेयत्वमिति याजना। वैभवम् ऐश्वर्य्यम् । गोचरो विषयः ॥ सत्यं तर्हि मत्स्वरूपस्य मद्व्रजवासिनां मदीयलीलाया मद्भक्तेश्च सर्वमेव तत्त्वं मदग्रेऽपि सप्रतिममेवं व्याचक्षाणा भवद्विधा अस्मिञ्जगति कियन्तो वर्त्तन्ते, तान् जिज्ञासे कथयेति वक्रोक्तिमाशङ्क्य सत्रपं सकम्पं सानुतापमाह—जानन्त एवेति । ये जानन्तस्ते जानन्तु, अहं तु महामूर्ख एवास्मीति भावः । ननु तर्हि कथमेतावत्क्षणपर्यन्तं ब्रूत एव तत्राह किम्बहूक्त्येति । त्वदग्रे बहूक्तिरेव मूर्खत्वद्योतिनीत्यर्थः । ननु ब्रह्मन् निष्कपट ब्रूहीति तत्राह—नेति । तव वैभवमैश्वर्यं मम मनसो न गोचर इति ध्यानेनान्तप्राप्त्यभावात् । वपुष इत्यधुनैव चक्षुषाऽपि, वाच इति 'गुणात्मनस्तेऽपि गुणान् विमातुम्' इति मया तावदुक्तमेव । यद्वा—तव मनसो वैभवं मम न गोचर इति त्वन्मनसि यत्किमप्यस्ति तत्किं मया ज्ञातुं शक्यते 'साक्षात्तवैव किमुतात्मसुखानुभूतेः' इति पूर्वमेव मदुक्तेः । एवं त्वद्वपुष इति त्वद्वपुषि किमस्तीति तव वाच इति तव वेदलक्षणायां वाचि किमस्तीति, साक्षात्तव तु मयि मौनवत्त्वाद्वचनगन्धस्याऽप्राप्तिरेव । तस्मात्के खलु तवाग्रे मदादयो वराका इति भावः ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वहो भाग्यमित्यादौ मित्रत्वस्य कालविशेषानिर्दिष्टत्वेन परमानन्दादीनामनूद्यधर्माणां तस्मिन् विधेये सङ्क्रमणेन च व्रजौकोभिः समं मम लीलाया नित्यत्वमभिप्रेतम् एषां त्वित्यादावेकेत्यनेन तदेव निर्दिष्टं तद्भूरीत्यादौ वैकुण्ठादिपरित्यागपूर्वकमेषां चरणरजःसम्बन्धेन स्वजन्म प्रार्थ्यं पुनरेषामनादिश्रुतिमृग्यमद्रूपपुरुषार्थप्राप्ति च जीवनरूपां समर्थ्य तदेव द्रढीकृतम् एषां घोषेत्यादौ मम तद्दणविगणनासमर्थत्वेनानादिकल्पपरम्परायां पुत्रादिरूपेणानुगतत्वप्राप्त्या तदेवानीतं तावदित्यादौ तत्र विघातकासम्भवात्तदेव पर्य्यवसायित तत्तदप्यास्तां नौमीड्येत्यादौ तेषामेषां सम्बन्धि यदेतन्मम रूपं तदेव निजपुरुषार्थत्वेन प्रतिज्ञातं तत्र कश्चित् प्रपञ्चरीतिदृष्ट्या लीलेयमन्यथेत्याशङ्क्येत् तत्र कि वक्तव्यं तत्राह–प्रपञ्चमिति । नित्यमेवैतैः समं लीलायमानस्त्वं निष्प्रपञ्चः प्रपञ्चास्पृष्टलीलोऽपि मध्ये मध्ये त्वेतैः समं भूतलेऽवतीर्य प्रपञ्चं विडम्बयसि नरान्तरवज्जन्मादिलीलयाऽनुकुर्वन्नपि महान्तम् एव तत उत्कर्षं दर्शयतीत्यर्थः । ननु, किमर्थमिदं तत्राह—प्रपञ्चमिति । नित्यमेवैतैः समं लीलायमानस्त्वं निष्प्रपञ्चः प्रपञ्चास्पृष्टलीलोऽपि मध्ये मध्ये त्वेतैः समं भूतलेऽवतीर्य प्रपञ्चं विडम्बयसि नरान्तरवज्जन्मादिलीलयाऽनुकुर्वन्नपि महान्तम् एव तत उत्कर्षं दर्शयतीत्यर्थः । ननु, तत्राह—किमर्थमिदं प्रपन्नेति । यद्यपि तस्यां नित्यायाम्भूतलाप्रकटलीलायां नित्यानां प्रपन्नजनसमूहानाम् एषाम् अनित्यानां चास्माकं यथास्वन्दर्शनेन श्रवणेन चानन्दो भवत्येव तथाऽप्यस्यां भूतले प्रकटायां जन्मादिलीलायां त्वानन्दानां सन्दोहः प्रथितो भवतीत्येतदर्थमित्यर्थः ॥ ३७ ॥ तदेवमस्यापि देववपुष इत्यादिभिः सामान्यतस्तस्य महिम्नो दुस्तर्कत्वं दर्शितं पुनश्च पश्येश ! मेऽनार्यमित्यादिभिः, स्वरूपशक्तिमायाशक्त्योः स्वरूपस्य च विशेषतः । अथ अहोऽतिधन्यादित्यादिभिः, तन्निजजनप्रेम्णः एषां घोषनिवासिनामित्यादिना, कारुण्यस्य प्रपञ्चमित्यादिना, लीलायाश्चेति तत्तन्निरूपणं परित्यज्योपक्रमार्थमेव निजाभीष्टत्वेनाभिप्रयन्नुपसंहरति—जानन्त इति । प्रभो ! हे विचित्रानन्तमहाप्रभाव ! तव वैभवं वेदादिभिः श्रुतमपि मम मनसो न गोचरं न परिच्छेद्यं सामक्ष्येण दृष्टादिरूपमपि वपुषश्चक्षुरादिगोलकस्य न अत एव न वाचः तस्मान्नौमीत्यादिना यत्प्रार्थितं तदेव प्रार्थय इति भावः ॥ ३८ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रपञ्चं पुत्रत्वादिकम् । निष्प्रपञ्चः प्रपञ्चातीतोऽपि भूतले पृथिव्यां विडम्बयस्यनुकरोषि । किमर्थम् ? व्रजसम्बन्धिस्वलीलाकर्णनद्वारा निजभक्तानन्दविस्तारार्थम् । अन्यत्तैर्व्यञ्जितम् । अथवा, तत्त्वत एव पुत्रादिरूपेणैभिः सह विहारविशेषं करोषि ? तत्राह—प्रपञ्चमिति । निर्गतः प्रपञ्चोऽन्येषामपि यस्मात्तथाभूतस्त्वं विडम्बयसि विडम्बयसि स्थिरीकरोषि । प्रपन्नजनता व्रजवासिजनसमूहस्तद्द्वारा (विहारद्वारेण) स्वस्यैवानन्दविस्तारणाय ॥ ३७ ॥ तदेवं (भा० १०।१४।३) 'ज्ञाने प्रयासमुदपास्य' इत्यारभ्य प्रतिपादितं ज्ञानतुच्छत्वं भक्तिमाहात्म्यं चोपसंहरन्नाह—जानन्त इति । ये तव वैभवं त्वद्भक्तिमाहात्म्यं जानन्तो वर्त्तन्ते, ते महापण्डितम्मन्या जानन्तु नाम; अतो ज्ञाने यतमाना ज्ञानमपि किल साधयन्त्विति भावः । इति सोल्लुण्ठोक्तिः, बह्वयोक्त्या ज्ञानादितुच्छतया भक्तिमाहात्म्यस्य च वर्णनेनापरेण किम् ? प्रभो ! हे विचित्रानन्तमहाप्रभाव ! तव वैभवं मम वपुषो लिखनादिशक्त्या, वाचश्च वर्णनादिना, मनसोऽपि चिन्तनादिनाऽविषयोऽपरिच्छिन्नत्वादवितर्क्यत्वाच्च । एवं तद्व्यतिरिक्तमन्यत् सर्व्वं गोचर इति सूचितम् । यद्वा, प्रथम परमस्तुतितया प्रारब्धं श्रीभगवद्वपुषो वर्णन तदन्तरायोत्तरकालपतितशंकापरम्परया तद्भक्तिभजनमाहात्म्यवर्णनेन च तदेव सुदृढीकृत्योपसंहारेऽपि तदेवाह—प्रकर्षेण सुन्दरतराकारादिना भवति प्राकट्यं प्राप्नोतीति प्रभुस्तत्सम्बोधनम्—हे असाधारणप्रकृष्टतर इत्यर्थः । तव वपुषो वैभवं न मम गोचर इत्यन्वयः । यद्वा, तव मनआदेर्वैभवं न मे गोचरस्तत्र यथा समुद्रकोटिगम्भीराशयस्य तव मनसस्तथैकस्यैव परिच्छिन्नत्वापरिच्छिन्नत्वादिना वपुषश्च तथानन्तागाधवेदरूपस्य; यद्वा, परिमितस्यापि सर्वथातिशयस्य साम्प्रतं सख्यादिषूच्चार्य्यमाणस्य वचसश्च वैभवं तत्तदभिप्रायादिकं न गोचरः; यद्वा, प्रस्तुतश्रीभगवन्महास्तुतिरूपं श्रीनन्दव्रजमाहात्म्यवर्णनमुपसंहरन् तज्ज्ञानाभिमानिनो मूढानुपहसन्निवाह—एषामित्यादेः । श्रीव्रजवासिनोऽनुवर्त्तन्त एव, ततश्चैषां वैभवमित्यर्थबलाज्ज्ञेयम् । प्रभो ! हे श्रीगोकुलेश्वर ! व्रजवासिनामेषां माहात्म्यं मम तवापि न कायवाङ्मनसां गोचरः, तथापि तज्ज्ञानाभिमानं ये कुर्य्युस्ते परमाज्ञा उपहास्या एवेति भावः । अन्यत् समानम् ॥ ३८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

ननु, मम को वा संसारिभेदापादको गुणः ममताऽहन्तादर्शनाद्वैषम्यनैर्घृण्यसत्त्वादित्यत्राह—निष्प्रपञ्चोऽपि स्वरूपरूपगुणैः सर्वचेतनाचेतनविलक्षणोऽपि प्रपञ्चं सूक्ष्मस्थूलरूपं विडम्बयसि तत्तच्छरीरकत्वेन स्वैच्छिकविग्रहेण च विडम्बयसि अनुकरोषि न तु तवाऽहन्ताममतास्पदतत्तत्पदार्थसङ्गे न वैषम्यनैर्घृण्यादिप्रसक्तिः संसारो वा तर्हि विडम्बनेन किं प्रयोजनं तत्राह–प्रपन्नेत्यादि । परमपदस्थलक्ष्मीशेषविष्वक्सेनादिप्रपन्नानन्दसमूहविस्ताराय भोगविभूतिमत्त्वमिह च अनन्ततत्तद्भक्तप्रपन्नमनोरथाऽनुगुणानन्दविस्ताराय तत्तद्रूपैः क्रीडनं तवेति भावः ॥ ३७ ॥ एवम्भूततत्त्वज्ञाने हि दुर्ज्ञेयत्वमेवापरिमेयस्वरूपरूपगुणविभूतिलीलामयस्य भगवतः प्रस्तावयन् स्तौति, एकेन जानन्त एवेति ये वदन्ति जानीमो वयं भगवत्तत्वम् इति ते जानन्तु "अविज्ञातं विजानताम्" इति श्रुतेः ते न जानन्त्येवेति भावः । "विज्ञातमविजानताम्" इत्यादिश्रुतेरर्थमाह—किं बहूक्त्येति बहूक्त्या बहुकथनेन किम् ? "वाचो विग्लापनं हि तत्" इत्युक्तेः तव वैभवं त्वत्स्वरूपरूपादिवैभवं मे परिमितमनोवृत्तिशरीरशक्तेः विषयः गोचरो न भवति सङ्कल्पविकल्पाभ्यां मनोविषयो न भवति वपुषः परिच्छिन्नविषयतया ग्रहणविषयो न भवति वाचो विषयश्च वर्णनीयत्वेन न भवति ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं मोहितचित्तोऽपि पुनरेव अध्यवस्यामीत्यभिप्रायन्नाह—प्रपञ्चमिति । निष्प्रपञ्चोऽपि "निष्क्रियं निष्कलम्" इति श्रुत्युक्तरीत्या प्राकृतशरीरतद्व्यापाररूपप्रपञ्चरहितोऽपि मायया सङ्कल्पेन प्रपञ्चं विडम्बयसि अनुकरोषि किमर्थम् ? हे प्रभो ! प्रपन्नजनसमूहस्यानन्दसन्ततं प्रथितुमाविष्कर्तुं वर्द्धयितुम् इति यावत् मम त्वेवं निश्चय इति भावः ॥ ३७ ॥ ननु, मम प्रपञ्चविडम्बनहेतुं तत्त्वतस्त्वं न जानीष इत्यत्राह—जानन्त इति । ये जनास्त्वत्स्वरूपस्वभावादिकं जानन्ति त एव विडम्बनहेतुं जानन्तु मम बहुभाषितेन किं न किञ्चिदपि साध्यमस्तीत्यर्थः । एवमात्मनोऽज्ञत्वमाविष्कृतं पुनः सार्वजनीनमेतत्तु जानामीत्यभिप्रयन्नाह—मनस इति । तव वैभवं मनआदिकरणत्रयस्य गोचरो नेत्यनुवर्तते न गोचरो न विषय इत्यर्थः । वपुषः इति दृष्टान्तार्थ यथा वपुषो न गोचरः तथा वाङ्मनसयोरपीति अथवा तव वपुषोऽपि वैभवं वाङ्मनसागोचरमित्येतावत्तु जानामीत्यर्थः ॥ ३८ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

ननु, यथाहमेषां पुत्रादिरूपेण वर्त्ते न तथा तेषामिति वैषम्यादानृण्यं स्यादित्यत आह—प्रपञ्चमिति । हे प्रभो ! त्वं निष्प्रपञ्चोऽपि प्रपञ्चरहितोऽपि "न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः" इति प्रमाणात् भूतले प्रपञ्चं विडम्बयसि अनुकरोषि किमर्थमिति चेदत आह—प्रपन्नजनतानन्दसन्दोहं प्रथितुं प्रपन्नजनता प्रपन्नजनानां समूहस्तस्या आनन्दानां त्वत्स्वरूपरूपगुणानुभवकृतानन्दानां सन्दोहं समूहं प्रथितुं प्रथयितुं विस्तारयितुं तदुक्तं भगवता "परित्राणाय साधूनां विनाशाय च दुष्कृताम्" इति

स्वदर्शनदानेन साधुपरित्राणमेव परमप्रयोजनं दुष्कृतनाशस्त्वानुषङ्गिक इति भावः। अतो ये त्वद्गुणश्रवणकीर्त्तनादि विना शरीरधारणमपि न बहुमन्यन्ते तान् दर्शनादिना सुखयति अतस्तेषां ऋणी एव त्वमिति भावः ॥ ३७ ॥ अतो मयाऽप्येतदेव निश्चितमित्याह—जानन्त इति। हे प्रभो ! स्वामिन् ! किं बहूक्तेन बहूक्त्या किं ? ये केचिन्निर्विशेषं गुणदरिद्रं चिन्मात्रं प्रमाणशून्यं यत्किञ्चित्तत्त्वं त्वत्तः परमस्तीति जानीम इति निश्चयं कृत्वा स्थितास्ते जानन्तु तेषां ममाऽऽग्रहो नास्ति अहोऽज्ञजनताऽज्ञता इति पूर्वमेवोक्तं कुतः ?—

"मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय, !"। "नारायणात्परो देवो न भूतो न भविष्यति" ॥

इत्यादिप्रमाणैर्निश्चयेन तादृशस्य ब्रह्मणः स्वपुष्पायमाणत्वात् अत एव मम तु मनसो वपुषो वाचस्तव वैभवं त्वन्महिमा गोचरो विषयो भवत्विति शेषः। इतः परं निरुपाधिकत्वच्छेषशेषिसम्बन्धज्ञानं मम विस्मृतं माभूदित्यर्थः ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवमस्यापि देववपुष इत्यादिभिस्तस्यानेकधा दुस्तर्कत्वमेव प्रदर्श्य तत्तन् निरूपणं परित्यजन् उपक्रमार्थमेवाभीष्टत्वेनाभिप्रायं तूपसंहरति-जानन्त इति। हे कृष्ण ! सर्वेन्द्रियाकर्षकगुणरूप ! अनुजानीहीति गमनानुज्ञेयं नात्मेच्छया प्रार्थ्यते किन्त्ववस्थानार्हतयैवेति भावः ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

नन्वगतमेव भवतैषां तत्त्वम्, यत्तत्वं कीदृशम् ? तदपि कथयेत्याह – प्रपञ्चं निष्प्रपञ्चोऽपीत्यादि। हे प्रभो ! तव तत्त्वं को वेत्तु-प्रभुत्वात्। प्रभुर्हि कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थः तथापि यत् किञ्चिद्वदामीति। प्रभो इति सम्बोधनार्थः। किं वक्तव्यम्, तद्वदेत्याह-निष्प्रपञ्चोऽपि त्वं केवलसच्चिदानन्दलीलोऽपि भूतले प्रपञ्चं लौकिकव्यवहारं विडम्बयसि, अनुकरोषि। किं कर्त्तुम् ? तत्राह-प्रपन्नजनतानन्दसन्दोहं प्रथितुं प्रथयितुं तव लौकिकलीलायां येषां प्रपन्नानामानन्दसन्दोहस्तं वर्द्धयितुम् ॥ ३७ ॥ इत्येवाहं जानामि, अन्ये येऽन्यज्जानन्ति, ते जानन्तु नामेति सकटाक्षमाह—जानन्त एवेत्यादि। जानन्त एव तव महिमानं जानीम इत्यभिमानवन्त एव जानन्तु, किं बहूक्त्या, तान् प्रति बहुना व्याहारेण, अथवा, किं बहूक्त्येति परवाक्येन सह सम्बध्यते। ते जानन्त्वेव मम तु मनसा वपुषो वाचो गोचरस्तव वैभवं न भवति, अचिन्तनीयत्वान्न मनसो गोचरः, अनन्तत्वान्न वाचो गोचरः वपुःशब्दोऽत्र चक्षुःश्रवणाद्यर्थः, तेन तदगोचरत्वेन चक्षुरादेरप्यगोचरः ॥ ३८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

हे प्रभो ! ज्ञातं ज्ञातम्, निजानृण्यहेतोरेव त्वयैव मध्यवसितमेवेत्याह-प्रपञ्चमित्यादि। निष्प्रपञ्चत्वं प्रपञ्चं प्रकृष्टविस्ताररचनमपि विडम्बयसि अनुकरोषि। प्रपञ्चं लोकव्यवहारमिति वा, यद्वा, प्रपञ्चं कुहकं मायामिति यावत्, विडम्बयसि विशेषेण लम्बयसि 'डलयोरेकत्वात्' विस्रंसयसीत्यर्थः। एभिः सह यद्यत् करोषि तत् सत्यत्वेनैव प्रतिपादयसि, न मायया। किमर्थम् ? प्रपन्नजनतानन्दसन्दोहं प्रथितुं प्रथयितुम्। अतस्तन्महिमानं केऽपि न जानन्ति। जानीम इति ये मन्यन्ते, ते जानन्तु एव, इति तान् प्रति असूयया वदति-जानन्त एवेत्यादि। जानन्त एव जानन्तु, किन्तु मे ब्रह्मणोऽपि मनआदीनां तव वैभवो न गोचर एव ॥ ३७-३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, व्रजेऽस्मिन्नेतत्पुत्रादिभावं पूर्णब्रह्मणो मम न वस्तुत इति केचिन्मन्यन्ते सत्यं ते भ्रान्ता एवेत्याह-प्रपञ्चमिति। निष्प्रपञ्चोऽपि प्रपञ्चातीतोऽपि त्वं भूतले सदा स्थितः सन् प्रपञ्चं विडम्बयसि प्रपञ्चस्थं पुत्रादिभावमनुकरोषि प्रापञ्चिकेषु पित्रादिषु प्रापञ्चिकाः पुत्रादयो यथा चेष्टसे इत्यर्थः। तेन जीवानां यथा पितृपुत्रादिभावो ह्यवास्तवस्तथा तव न तव तु सनिष्प्रपञ्चत्वाद्वास्तवो नित्य एवेति तव लीला नित्या प्रपञ्चातीताऽपि प्रपञ्चानुकरणमयीति सिद्धान्त उक्तः किमर्थं विडम्बयसि प्रपन्ना या जनता तस्या यस्तादृशीलीलास्वादनोत्थ आनन्दसन्दोहस्तं प्रथयितुं ब्रह्मानन्दाद्वैकुण्ठीयलीलानन्दादपि विस्तृतीकर्तुं भूतल इत्ययं भावः। प्रकाशे दीपो नातिशोभते यथान्धकारे एव श्वेतराजतपात्रे हीरकरत्नं नातिशोभते यथा नीलकाचादिपात्रे, तथैव चिन्मयवैकुण्ठे चिन्मयी लीला नातिचमत्करोति यथा मायामये प्रपञ्चे इति यद्यपि व्रजमण्डलमपि चिन्मयमेव तदपि कृष्णस्य प्राकृतपुरुषसाधर्म्यमिव भूतलस्थव्रजमण्डलस्यापि प्राकृतभूतलसाधर्म्यमेव दृष्टमतोऽत्र लीला चमत्करोत्येवेति हे प्रभो ! इति मामपि प्रपञ्चमध्ये गणयेति भावः ॥ ३७ ॥ सत्यं तर्हि मत्स्वरूपस्य मद्व्रजवासिनां मदीयलीलाया मद्भक्तेश्च सर्वमेव तत्त्वं मदग्रेऽपि स प्रतिभमेवं व्याचक्षाणा भवद्विधा अस्मिन् जगति कियन्तो वर्तन्ते तान् जिज्ञासे कथयति वक्रोक्तिमाशङ्क्य सत्रपं सकम्पं साऽनुतापमाह—जानन्त एवेति। ये जानन्तस्ते जानन्तु अहं तु महामूर्ख एवास्मीति भावः। ननु, तर्हि कथमेतावत्क्षणपर्यन्तं ब्रूषे एव तत्राह, किं बहूक्त्येति। त्वदग्रे

बहूक्तिरेव मूर्खत्वद्योतिनीत्यर्थः । ननु, ब्रह्मन् ! निष्कपटं ब्रूहीति तत्राह, नेति तव वैभवमैश्वर्य्यं मम मनसो न गोचर इति ध्यानेनान्तप्राप्त्यभावात् वपुष इत्यधुनैव चक्षुषाऽपि वाच इति "गुणात्मनस्तेऽपि गुणान् विमातुम्" इति मया तावदुक्तमेव । यद्वा, तव मनसो वैभवं मम न गोचर इति त्वन्मनसि यत् किमप्यस्ति तत् किं मया ज्ञातुं शक्यते "साक्षात्तवैव किमुतात्मसुखानुभूतेः" इति पूर्वमेव मदुक्तेः एवं त्वद्वपुष इति त्वद्वपुषि किमस्तीति तव वाच इति तव वेदलक्षणायां वाचि किमस्तीति साक्षात्तव तु मयि मौनवत्त्वात् वचनगन्धस्याप्यप्राप्तिरेव तस्मात् के खलु त्वदग्रे मदादयो वराका इति भावः ।। ३८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु, सर्वदा परच्छन्देन वर्तमानस्य कथं सर्वजनशरण्यत्वमित्यत्र भगवतः स्वातन्त्र्यं वदन् शरणागतेषु कृपालुतामाह—प्रपञ्चमिति । निष्प्रपञ्चोऽपि पारवश्यादिरूपप्रपञ्चरहितोऽपि प्रपञ्चं पारवश्यादिचेष्टितं विडम्बयसि अनुकरोषि तत्प्रयोजनमाह, प्रपन्नेत्यादि । हे प्रभो, समर्थ ! प्रपन्नजनतायाः शरणागतजनसमूहस्य आनन्दसन्दोहं स्वकृपानिमित्तसुखसमूहं प्रथयितुम् ।। ३७ ।। यथाशक्ति भगवन्तं स्तुत्वा पूर्वोक्तमियत्तानवच्छिन्नत्वमुपसंहरति । जानन्त इति ।। ३८ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु ब्रह्मन् ! एते मनुष्या जातिसम्बन्धादतिस्निग्धाः मनुष्यविग्रहं यां लालयन्ति न हि किञ्चिदैश्वर्यमेभ्यो मया दत्तं यत् सचमत्कारं स्तवनीयमिति चेतत्राह—प्रपञ्चमिति निष्प्रपञ्चत्वमेभिर्निष्प्रपञ्चैः सह भूतलेऽवतीर्णः प्रपञ्चं विडम्बयसि तमनुसरन्नप्यन्तर्निभृतपारमैश्वर्यैः कर्मभिस्तं न्यक्करोषीत्यर्थः । किमर्थमेतत्तत्राह प्रपन्नेति प्रपन्नाया जनताया यस्तादृशकर्मानुभवोत्थ आनन्दसन्दोहस्तं प्रथितुं विस्तारयितुं भूतले तानि तादृशानि कर्माणि निशि दीपवृन्दानीवातिशोभितान्यनुभावयितुमित्यर्थः ! तव चैषाञ्च मनुष्यत्वं स्वरूपतन्तुविज्ञानानन्दत्वमेव ऐश्वर्यन्तु तेषां पृष्ठलग्नमेवेति भावः ।। ३७ ।। तदेवं यथामति प्रभुं स्तुत्वा विज्ञमन्यानुपहसन् दुर्ज्ञेयतामाह हे प्रभो तव मन आदीनां भवं सङ्कल्पविभूतितात्पर्यरूपं मे गोचरो नेति ।। ३८ ।।

श्रीसुबोधिनी

नन्वेतत् सर्वं साक्षात्स्वरूपे युक्तं न तु कृत्रिम इत्याशङ्क्याह **प्रपञ्चमिति, निष्प्रपञ्चो**पि त्वं प्रपञ्चं **विडम्बयसि** प्रापञ्चिकेपि चेष्टां करोषि, तत्र हेतुः **प्रपन्ना** या **जनता** तस्या **आनन्दस**न्दोहमानन्दसमूहं **प्रथि**तुं स्थूलं कर्तुं, ननु विपरीतरूपेण कथं तदधिकं भविष्यतीत्याशङ्क्याह **प्रभो** इति, सर्वप्रकारेणापि सर्वसमर्थः ।। ३७ ।। ननु ज्ञानेनाप्यानन्दप्रथनसम्भवात् किमिति प्रपञ्चं विडम्बयतीत्याशङ्क्याह **जानन्त** इति, ये जानन्तो भवन्ति त **एव जान**न्तु वस्तुतो ज्ञानं स्वप्नप्रबोधरूपं, अतो भ्रान्ता एव ते, ननु तथा सति तन्मतं दूषणीयमिति चेत् तत्राह **किं बहूक्त्ये**ति, **बहूक्त्या किं** प्रयोजनम् ? अल्पेनैव तु दूष्यते न हि मत्तः कश्चिन् महानस्ति वेदगर्भोहं मम तु **मनसो वपुषो वाचोपि वैभवं न गोचरो** न ज्ञातुं शक्यं, न देहकृत्या परिच्छेत्तुं शक्यं, स हि सर्वं करोति तथा भगवद्वैभवमपि कृत्वा प्रदर्शयिष्यतीति शङ्कयोक्तं वचसां विषयो न भवत्येव तथा चेतसोपि ।। ३८ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'अतएव अहमेषां पुत्रादिरूपेणापि स्थित' इति चेत्तत्राह—प्रपञ्चमिति । हे प्रभो सर्वकरणसमर्थ ! त्वं निष्प्रपञ्चः प्रपञ्चातीतोऽपि प्रपन्ना शरणमागता या जनता जनसमूहस्तस्यानन्दानां सन्दोहं समूहं प्रथयितुं विस्तारयितुमिह भूतले प्रपञ्चं विडम्बयसि बहूनां पुत्रादिरूपेणानुकरोषि । तथाच नैतेन विडम्बनमात्रेण एषामनिर्वचनीयप्रेमवतामानृण्यं सम्पद्यते इति भावः ।। ३७ ।। तदेवमादित आरभ्य अचिन्त्यानन्तगुणत्वेन स्वयं भगवतो दुर्ज्ञेयत्वमुक्त्वा, ये तु 'वयं तत्त्वतो जानीम' इत्यभिमन्यन्ते तानुपसंहरन्निवाह—जानन्त इति । ये जानन्ते 'जानीम' इति वदन्ति त एव जानन्तु । बहूक्त्या तेषां बहुनिन्दावचनेन किं प्रयोजनम् ? हे प्रभो ! मम मन आदीनां तव अचिन्त्यानन्तगुणस्य वैभवं गोचरो विषयो न भवति । 'अहं हि वेदगर्भो, नहि लोके मत्तोऽन्यः कश्चिदधिकज्ञानवानस्ति' इति यद्यहमेव न जानामि, तदा ये 'वयं भगवत्तत्त्वज्ञा' इति वदन्ति ते तु 'केवलमभिमानेन भ्रान्ता एव' इति भावः । वपुषश्चक्षुरादेः ।। ३८ ।।

अन्वितार्थप्रकाशिका

पुत्रादिरूपतया वर्त्तनमप्यानृण्यकरं न भवतीत्याह–प्रपञ्चमिति ।। हे **प्रभो** ! **निष्प्रपञ्चः** प्रपञ्चातीतोऽपि **प्रपन्ना** शरणमागता या **जनता** जनसमूहस्तस्यानन्दानां **संदोहं** समूहं **प्रथितुं** प्रथयितुं विस्तारयितुमिह भूतले **प्रपञ्चं विडम्बयसि** बहूनां पुत्रादिरूपेणानुकरोषि अतस्तेनैषां कथमानृण्यं स्यात् ।।३७।। एवं भगवतो दुर्ज्ञेयत्वमुक्तं ये भगवत्तत्त्वं जानीम इति मन्यन्ते तान् मानिनो जनानुपहसति **जानन्त इति** ।। ये **जानन्तः** वयं भगवत्तत्त्वं जानीम इति वदन्तः सन्ति त **एव जानन्तु बहूक्त्या** तेषां बहुनिन्दावचनेन **किं** प्रयोजनम् । हे **प्रभो** ! तव **वैभवं मे** मम **मनसः वपुषः** चक्षुरादेः **वाचः**श्च **गोचरो** विषयो **न** भवति अहं तव वैभवज्ञाने मूर्खः अन्ये पण्डितम्मन्यास्तु मूर्खतमा इत्याशयः ।। ३८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ऊचुरिति ते त्वया अतिरंहसा अतिवेगेन स्वागतं सुष्टु आगमनं कृतं अस्माभिस्त्वद्दृते एकोऽपि कवलो नाभोजि न जग्धः यद्वा त्वया एकोपि कवलः स्वहस्ते एव स्थितोपि न भुक्तः इतोऽत्र एहि साधु सम्यक् भुज्यतामिति सुहृदो बाला ऊचुः ॥ ३७॥ हृषीकाणां सर्वजीवेन्द्रियाणां ईशो नियामकः अभवहृत्यभुक्त्वा अघासुरस्य चर्म दर्शयन् सन् न्यवर्त्तत अगमत् ॥ ३८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं मोहितचित्तोऽपि पुनरेवमध्यवस्यामीत्यभिप्रयन्नाह ॥ प्रपञ्चमिति ॥ निष्प्रपञ्चोऽपि 'निष्कलं निष्क्रियम्' इति श्रुत्युक्त रीत्या प्राकृतशरीरतद्व्यापाररूपप्रपञ्चरहितः सन्नपि, प्रपञ्चं मायया संकल्पेन, अत्र भूतले इति पाठे, माययेति शेषो ग्राह्यः। विडम्बयस्यनुकरोषि । किमर्थमिति चेत्तत्राह । हे प्रभो, प्रपन्ना शरणं प्राप्ता चासौ जनता जनसमूहस्तस्या य आनन्दसंदोह आनन्द संततिस्तं प्रथितुमाविष्कर्तुं वर्द्धयितुमिति यावत् । मम त्वेवंभूतो निश्चयोऽस्तीति भावः ॥ ३७ ॥ ननु मम प्रपञ्चविडम्बनहेतुं तत्त्व तस्त्वं न जानीषे इत्यत्राह ॥ जानन्त इति ॥ हे प्रभो, ये जनाः, जानन्तः त्वत्स्वरूपस्वभावादिकं विजानन्तः भवन्ति, ते एव, विडम्बनहेतुमिति शेषः । जानन्तु । मे मम, बहूक्त्या बहुभाषितेन, किं न, किंचिदपि साध्यं नास्तीत्यर्थः । एवमात्मनोऽज्ञत्वमा विष्कृत्य सार्वजनीनमेतत्तु जानामीत्यभिप्रयन्नाह । मनस इति । तव वैभवं, मनसः, वपुषः, वाचः, मनआदिकरणत्रयस्येत्यर्थः। गोचरः । नेत्यनुवर्त्तते । विषयभूतं नेत्यर्थः । वपुष इति दृष्टान्तार्थं, यथा वपुषस्तव वैभवं न गोचरस्तथा वाङ्मनसोरपि न गोचर एतावत्तु जानामीति भावः ॥ ३८ ॥

कृष्णप्रिया

हे प्रभो, शरणागत भगवदियों को परमानन्द समूह प्रदान करने के लिये ही निष्प्रपञ्च होते हुए भी आप इस भूतल पर पधारकर प्रपञ्च का केवल अभिनय दिखावा ही करते हैं। नाथ ? यदि कोई कहे कि ज्ञान प्रदान से भी आनन्द प्रदान हो सकता था तब प्रपञ्च का अभिनय क्यों किया ! तव कहते हैं कि ऐसा जो कहतें हैं उनको कहने दीजिये लेकिन नाथ आपकी कृपा से आपके स्वरूप और स्वभाव को जानते हैं वे ही जाने और क्या जाने ! प्रभो मैं खूद ब्रह्मा भले हूँ । इससे क्या मतलब ! आपका वैभव आपकी महिमा मेरी वाणी मन और देह से अप्राप्य और अवर्ण्य है ॥ ३८ ॥

अनुजानीहि मां कृष्ण सर्वं त्वं वेत्सि सर्ववित् । [1]त्वमेव जगतां नाथो जगदेतत्तवार्पितम् ॥ ३९ ॥
श्रीकृष्ण वृष्णिकुलपुष्करजोषदायिन् क्ष्मानिर्जरद्विजपशूदधिवृद्धिकारिन् ।
उद्धर्मशार्वरहर क्षितिराक्षसध्रुगाकल्पमार्क[2] महन् भगवन् नमस्ते ॥ ४० ॥

कर्दमक्षमा

अन्वयः –कृष्ण ? मां अनुजानीहि सर्ववित् त्वं सर्वं वेत्सि जगतां त्वं एव नाथः एतत् जगत् तव अर्पितम् ॥ ३९॥ श्रीकृष्ण वृष्णिकुलपुष्करजोषदायिन् क्ष्मानिर्जर ? द्विजपशूदधिवृद्धिकारिन् अद्धर्मशार्वरहर क्षितिराक्षसध्रुक् अर्हन् भगवन् आर्कम् आकल्पं ते नमः ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

जगदीशत्वाद्यभिमानं परित्यज्याह । अनुजानीहीति । स्वमहिमानमस्मदादीनां च ज्ञानबलादि सर्वं त्वमेव वेत्सि यतः सर्वदृक् जगतां नाथस्तु त्वमेवेत्येतावज्ज्ञातमतो ममतास्पदं जगदेतच्छरीरं च तवार्पितम् ॥ ३९ ॥ तदेवं किंकरं मां प्रस्थापयेत्यला दरेण नमस्करोति । श्रीकृष्णेति । वृष्णिकुलपद्मस्य प्रीतिदातृत्वेन हे सूर्योपम । क्ष्मा चावनिर्निर्जरा देवाश्च द्विजाश्च पशवश्च त एवो दधयस्तेषां वृद्धिकारित्वेन हे चंद्रोपम । उद्धर्मः पाखडधर्मस्तदेव शार्वरं तमस्तद्धरतीति तथा अनेन द्वयोपम हे क्षितिराक्षसध्रुक् क्षितौ राक्षसाः कंसादयः उद्यन्नेव तेभ्यो द्रुह्यतीति पुनः सूर्योपम । सूर्याद्युपमाऽपि न्यूनेति मत्वाह । आर्कमर्कमभिव्याप्य सर्वेषा महंन् पूज्य भगवन्नाकल्पं कल्पपर्यंतं ते तुभ्यं नम इति ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वन्यूनताद्योतनेन भगवतो महत्त्वमाह– जगदीशेति । अनुजानीहि अनुज्ञां देहि ॥ ननु मम वैभवं तव मास्तु गोचरस्तव वैभवमहं वेद्मि न वेति तत्र किमहमत्र प्रत्युत्तरं कुर्यामिति व्यञ्जयन्सलज्जं सनिर्वेदमाह—अनुजानीहीति । अन्तर्भावितण्यर्थं, अनुज्ञापयेत्यर्थः । अत्र स्थले क्षणमपि स्थातुमयोग्यमतिनीचं मामाज्ञापय, यादृशोऽहं तादृशं स्थलं सत्यलोकमेव गच्छेयमिति भावः।

---

१. दृक्–श्रीधर. वंशी. वीर. विज. । २. मार्कसुमहन्–वीर. ।

हे कृष्ण चित्तं त्वस्माकमत्राकर्षस्येव । किन्तु, 'तद्भूरिभाग्यमिह जन्म' इति मत्प्रार्थनायां दृगिङ्गितेनाप्यस्त्विति श्रीमच्चरणैर्नोक्तमतः किं कुर्वे, तस्मात्तत्पुलिनभोजनकेलेरन्तरायं कुर्वन्नयमपराधी त्वल्लीलाप्रातिकूल्यादेव श्रीमुखोद्गतवचनसुधालेशमप्यनाप्नुवन्नहमितो झटिति दूरमपसरामि, त्वं वत्सान्पाययित्वा पुलिने भुञ्जानैः प्रियसखैः सह सहासोक्तिप्रत्युक्तिकौतुकं भोजनलीलाशेषं समापयेति ध्वनयः । अयमहं त्वतितारल्यात्पुनः पुनः किं वा विज्ञापयामीत्याह - सर्वमस्मदादीनां मनोवपुर्वाचां वैभवं त्वमेव वेत्सि । किञ्च, नाहमस्य जगतः स्वष्टृत्वान्नाथः किन्तु त्वमेव जगतामन्येषां बहूनां नाथः । अत एतच्च जगत्क्षुद्रतरं तव त्वदीयमेव त्वयार्पितम्, यमिच्छसि योग्यमस्य जानासि तमस्याधिकारिणं कुर्विति भावः ।। ३९ ।। तदेवमित्युक्तार्थम् । पशवो गावश्च । उद्गतो धर्मो यत्र स उद्धर्मः । शर्वर्यां भवं शार्वरम् ।। यद्यपि मामपराधिनं विज्ञाय न ब्रूषे तदपि स्वनेत्राभ्यां सानुग्रहावलोकनामृतं तु मह्यं देहि, यथा तेनैवाहारेण नित्यं प्राणान्रक्षन्कल्पपर्यन्तं जीवितुं प्रभविष्यामीति व्यञ्जयन्प्रणमिति—श्रीकृष्णेति । सूर्यस्वरूपं दक्षिणं नेत्रमालक्ष्याह—वृष्णिकुलपद्मस्य पोष प्रफुल्लत्वं तत्प्रदायिन् । मामपि पद्मसन्तानं कृपया प्रफुल्लयेति भावः । चन्द्रस्वरूपं वामं नेत्रमालक्ष्याह—क्ष्मा तत्रत्या मनुष्यादयः, निर्जराः स्वर्गस्था देवाः, द्विजाः पशवश्च वृन्दावनस्थाः, पशवो गावश्च त एवोदधयस्तेषां वृद्धिकारिन् । मामपि देवाधमं कृपया वर्द्धयेति भावः । युगपदेव नेत्रे द्वे एव पुष्पवन्तावालक्ष्याह—उद्धर्मः पाषण्डधर्मः स एव शार्वरमन्धतमसम् 'शार्वरं त्वन्धतमसे' इत्यमरः । तद्धरतीति तथा । तेन स्वप्रभौ त्वय्यपि मायाचिकीर्षालक्षणं पाषण्डं मम हर कृपया, यथा पुनरेवं न कुर्यामिति भावः । क्षितिराक्षसाः अघासुरादयस्तेभ्यो द्रुह्यति द्रोहेणापि स्वर्गतिं ददासीत्यतस्त्वद्वयस्य वृन्दवत्सवृन्दद्रोहित्वावत्सलोकब्रह्मराक्षसं मामपि दण्डप्रदानेनापि संस्कुरुष्वेति भावः । स्वप्रभोरनुग्रहं निग्रहं बा दृष्ट्वा दासो जोवितुमुत्सहते, औदासीन्यं दृष्ट्वा तु न प्राणान्धर्तुमीष्ट इति भावः । हन्तहन्त महामहेश्वरोऽपि वेत्रगुञ्जागैरिकपिच्छादिरचिताकल्पो गोचारकबालकैः समं खेलन् हृष्यतीत्यनौचित्यं मत्प्रभोरिति पूर्वं विचारितवतात्वनभिज्ञेन मया येष्वपराद्धं तानपि प्रसादयामीति मनसि विभाव्याह—आकल्पं त्वदीयगुञ्जादिवेशमभिव्याप्य । आर्कम् आर्को नाम वृक्षो भगवदनर्हपुष्पोऽपि तमभिव्याप्य । हे अर्हन् मत्पूज्य, किं वा हे योग्य कृपाकृपाभ्यां मद्भद्राभद्रं कर्तुं समर्थ ते तत्तत्सहिताय तुभ्यं नमः । ''सर्वसंशयहृत्सर्वभक्तिसिद्धान्तसन्ततिः । अस्तु ब्रह्मस्तुतिश्चित्तभित्तौ मे चारुचित्रिता ।।'' इति विश्वनाथः । तोषणीकारास्तु—प्रीतिसादरसर्वसम्पदनुभवपूर्वकं प्रणामाय प्रथमतः कृष्णेतिस्वरूपनाम्ना सम्बोधनम्, पुनः क्रमेण बहिर्बहिर्विशेषणं व्यञ्जयञ्जन्मकर्मनामभिरपि सम्बोधयति—वृष्णीत्यादिना । वृष्णिकुलं श्रीवसुदेवादिकं श्रीनन्दादिकञ्च पूर्वोक्तप्रामाण्यात् । तत्र प्रस्तुतत्वेन श्रीनन्दादिकमेवात्र मुख्यं ज्ञेयं, पशुपाङ्गजायेति प्रतिज्ञातत्वात् । क्ष्मेत्यविशेषेण प्राप्तत्वेऽपि विशेषविवक्षया द्विजपश्वोरुपादानं गोब्राह्मणहितावतारताप्रसिद्धेः । उद्धर्मो भगवद्विमुखो धर्मः, क्षितिराक्षसाः उद्धर्मप्रवर्तकाः कंसादयश्च । चन्द्रसूर्यरूपोभयत्वेन रूपकव्यंजिका सर्वशुभकारिता विवक्षया कीर्तिप्रतापप्रशंसाद्योतनेच्छया च । हे भगवन् एवम्भूतश्रीकृष्णरूपत्वेन स्वयं भगवन्नित्यर्थः । तथार्कम् स्वर्भुवर्भूर्लोकव्यापकप्रकाशमर्कमारभ्य महावैकुण्ठपर्यन्तम् । अर्हन् पूज्य । यद्वा—एतच्चापूर्वं दृष्टं त्वमेव कर्तुमर्हसि नान्यः कोऽपीत्याह - अर्हतीत्यर्हन् हे सर्वं कर्तुं योग्य समर्थेति वा । अत आकल्पं मज्जीवनकालकल्पातभिव्याप्य । यद्वा—आकल्पं त्वदीयगुंजावतंसबर्हापीडादिकं वामहस्तस्थकवलादिकं च भूषणमभिव्याप्य । तथार्कमिति पूर्ववत् ।। ४० ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ तत्तत्प्रकरणान्ते या दैत्यात्मिका भक्तिरेव तत्प्रीतिकारणत्वेन दर्शिता, तामेवाविष्कुर्वन् अनुज्ञां प्रार्थयते—हे कृष्ण ! सर्वेन्द्रियाकर्षकरूपगुण ! अनुजानीहि अनेन गमनानुज्ञेयं नात्मेच्छया प्रार्थ्यते किं त्वत्राऽवस्थानानर्हतयैवेति सा च प्रार्थितस्यापि तस्य मौनितयेति भावः । त्वयि च यन्मयोक्तं यद्वा वक्तव्यं तत्सर्वं पुनरुक्तमेवेत्याह—सर्वं स्ववैभवं मद्वैभवं च स्वमनोगतं मन्मनोगतं च स्वनिगूढलीलत्वं मदयोग्यत्वं चेत्यादिकं त्वमेव वेत्सि नाहमिति अतस्त्वदाज्ञां विना तृणादिरूपेणाप्येषां तृणादीनां सौभाग्यमासादयितुं न शक्नोमीति भावः । विषयमपि त्यक्तुं न शक्नोमीत्याह—त्वमेवेति । तव त्वयैव मह्यमर्पितं दासस्याऽऽज्ञास्थायित्वमेव युक्तमिति भावः । यदि चैवं ब्रूषे अपहृतात्मनां बालवत्सानां दर्शनं विना कथमनुज्ञां याचसे तत्राप्येवं निवेदयामीत्याह—सर्वं त्वं वेत्सि सर्वदृगिति चात्र ज्ञापितम् ।। ३९ ।। श्रीति सादरसर्वसम्पदनुभवपूर्वकं प्रणामाय प्रथमतः कृष्णेति स्वरूपनाम्ना सम्बोधनं पुनः क्रमेण ततो बहिर्बहिर्विशेष्यं व्यञ्जयन् जन्मकर्मनामभिरपि सम्बोधयति, वृष्णीत्यादिना । वृष्णिकुलं श्रीवसुदेवादिकं श्रीनन्दादिकं च पूर्वोक्तप्रामाण्यात् तत्र प्रस्तुतत्वेन श्रीनन्दादिकमेवाऽत्र मुख्यं ज्ञेयम् पशुपाङ्गजायेति प्रतिज्ञातत्वात् क्ष्मेत्यविशेषेण प्राप्तत्वेऽपि विशेषविवक्षया द्विजपश्वोरुपादानं गोब्राह्मणहिताऽवतारताप्रसिद्धेः उद्धर्मो भगवद्विमुखो धर्मः क्षितिराक्षसाः उद्धर्मप्रवर्त्तकाः कंसादयश्च चन्द्रसूर्य्यरूपोभयत्वेन रूपकव्यञ्जना सर्वशुभकरिताविवक्षया कीर्तिप्रतापप्रशंसाद्योतनेच्छया च हे भगवन् ! एवम्भूतश्रीकृष्णरूपत्वेन स्वयं भगवन्नित्यर्थः । तथार्कं स्वर्भुवर्भूर्लोकव्यापकप्रकाशमर्कमारभ्य महावैकुण्ठपर्यन्तमर्हन् पूज्य ! यद्वा, एतच्चापूर्वं दृष्टं त्वमेव कर्तुमर्हसि नान्यः कोऽपीत्याह—अर्हतीत्यर्हन् हे सर्वं कर्तुं योग्य ! समर्थेति वा अत आकल्पं मज्जीवन-

कालरूपान् कल्पानभिव्याप्य यद्वा, आकल्पं त्वदीयगुञ्जावतंसबर्हापीडादिकं वामहस्तस्थकवलादिकं च भूषणमभिव्याप्य तुभ्यं तथा आर्कम् अर्को नामवृक्षो भगवदनर्हपुष्पो वैष्णवानामनादरणीयः तमप्यन्तं समभिव्याप्य तत्तत्सहितायेत्यर्थः ।

"श्रीमच्चैतन्यदेवानुगृहीतानामनुग्रहात् । तेषां मुदेस्तुतिर्ब्राह्मी व्याख्यातेयं यथामति" ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्थं स्तुतिप्रभावजनित श्रीभगवत्प्रसादविशेषतोऽखिलाभिमानापगमेन परमदैन्यमाश्रितोऽतज्ज्ञानादिनेव निजस्थानं गन्तुमनुज्ञां प्रार्थयते—अनुजानीति । कृष्ण ! हे निजाशेषभगवता प्रकटनपर ! सर्वमुक्तत्वद्वैभवं त्वमेव वेत्सि; यतः सर्वदृक् सर्वज्ञः, यद्वा, सर्वदृगपि त्वं वत्सि किम् ? काक्वा; नैवेत्यर्थोऽनन्तत्वात्, अतस्तत् स्तोतुमपि नार्हामीति प्रस्थापयेत्यर्थः । किञ्च, त्वद्भक्तिसिद्धयेऽभिमानत्यागेन निज सर्वं त्वय्यर्पयामीत्याह – त्वमेवेति । अन्यत्तैर्व्यञ्जितम् । अथवा, भो ब्रह्मन् ! त्वयात्र किमपि जन्माधुनैव प्रार्थितम्; तत् किमन्यत्र गन्तुमिच्छसि ? तत्राह—सर्वमिति चतुर्मुखेनानेन देवदेहेनात्र स्थातुं नार्हामीत्यादिकं मद्वृत्तम्, त्वं चैषां प्रेमवश्यो यथेष्टमेतान् रमयितुं व्यग्रोऽसीत्यादिकं च वृत्तम्, हे कृष्ण ! व्रजजनैकप्रिय ! त्वं वेत्स्येव, तत् कथमत्र स्थास्यामीति भावः । किन्तु निजं तत् प्रार्थितसिद्धये सर्वं त्वय्यर्पयामीत्याह, जगतां नाथस्त्वमेवेत्यर्पणाभिमानोऽपि न मम घटतेऽतोऽर्पणमप्यर्पितमिति भावः । अथवा भोः परमेष्ठिन् ! सृष्ट्यादिना भावज्जगदीशस्त्वम्; तत् कथमीदृशं दैन्यमालम्बसे ? तत्राह - जगतामेव नाथस्त्वमित्यहं दास एवेति भावः । ननु, पितामहस्य तव पुत्रपौत्रादिमयं जगत् साक्षात्त्वयाधिक्रियमाणमेतद्दृश्यते तत्राह, तवैवैतज्जगदर्पित मयि त्वयैवातोऽत्र न मम नाथत्वम्, किन्तु त्वत्कर्त्तृकार्येण महिम्नैव मदधिकृततया स्फुरतीति भावः ॥ ३९ ॥ हे श्रीकृष्णेति श्रीः सर्वविषयक विविधशोभा, तद्युक्त कृष्ण ! श्रीमत्त्वादेव सर्वचित्ताकर्षकेति सर्वथा सर्वतो वैशिष्ठ्यमभिप्रेतम् । तदेवाभिव्यनक्ति वृष्णीत्यादिना; तत्र हेतुः—भगवन्निति सर्वैश्वर्य्यविस्तारकेत्यर्थः । अन्यत्तैर्व्याख्यातम् यद्वा, इत्थं सञ्जातपरमभक्त्यान्ते विचित्रनामसंकीर्त्तनरूपां स्तुतिं कुर्वन् सर्वमवतारप्रयोजनमेकश्लोकेन संक्षिप्य वर्णयन् सपदाब्जग्रहं प्रणमति । तत्र वृष्णिकुलेति—सूर्य्योदयेन कमलानां तमोमुद्रानिरसनपूर्वकप्रकाशनमिवाविर्भावमात्रेण श्रीवसुदेवादियादववर्गाणां दुःखनाशनपूर्वकानन्दप्रदत्व प्राग्वर्णितम् । तच्चोक्तमेव (भा० १०।२।१७) 'स बिभ्रत् पौरुषं धाम' इति, (भा० १०।२।३८) 'दिष्ट्या हरेऽस्या भवतः पदो भुवः' इत्यादिना । किञ्च, पृथिव्याश्च देवानाञ्च विप्राणाञ्च पशूदधेश्च गवादिपशुसमुद्रस्य श्रीनन्दव्रजस्य वृद्धिकारिन् ! अधर्म्मनिवर्त्तनधर्म्मप्रवर्त्तनादिना साक्षाद्दुःखहरणसुखसम्पादनादिना च वर्द्धनशील ! यद्यपि क्ष्मा वर्द्धनेनैव तदन्तर्गतानां द्विजगवादीनां वृद्धिकारित्वं स्वत एवायाति, तथाप्यवतारेऽस्मिन् तद्विशेषापेक्षया पृथङ्निर्दिष्टम् । यद्वा, महर्लोकादिवर्तिनामृषीणां गोलोकादिवर्त्ति गोकुलानाञ्च ग्रहणार्थम्, यद्वा, व्रजसम्बन्धिनो ये क्ष्मा निर्ज्जरा विप्रा द्विजाश्च पक्षिणः पशवश्च गोमहिष्यादयोऽतिप्राचुर्य्यात्त एवोदधयस्तद्वृद्धिकारिन्निति प्राधान्यव्रजस्यैव सम्बर्द्धकत्वमुक्तम् । अधुना प्रेमभक्तिविस्तारणं मुख्यप्रयोजनमन्ते वर्णयति, धर्म्मोऽत्र भक्तिलक्षणस्तद्विरुद्ध ज्ञानादिकमेवोत्तथादिन्यायेनोद्धर्म्मः, स एव सदा सर्वत्र प्रकाशमानस्यापि भक्तिमार्गस्याच्छादकत्वाच्छार्वं तमस्तद्धरतीति तथा, अत एव हे क्षितिराक्षसध्रुक् ? क्षितिराक्षसा द्विविधाः, एके भवतमसि ये चरन्ति रजनीचरसाम्पादखिललोकैककजीवनभक्तिमार्गविघातकत्वाच्च राक्षसा अन्तर्निगूढासुरभावा असन्तः, अन्ये च वृष्णिकुलादि द्वेषिणः प्रकटदैत्याः कंसादयस्तेभ्यो द्रुह्यतीति तथा, तत्रासतां दुर्म्मदादिनिग्रहेण कंसादीनाञ्च साक्षान्मारणेनैव । तच्च तेषां हितार्थमेवेत्याह –भगवन्! हे परमदयालो ! सतां भक्तौ प्रवर्त्तनात् । एतच्चापूर्वदृष्टं त्वमेव कर्त्तुमर्हसि, नान्यः कोऽपीत्याह, अर्हतीत्यर्हन् हे सर्वं कर्त्तुं योग्य समर्थेति वा, अत आकल्पं मज्जीवनकालमभिव्याप्य, यद्वा, आ आकल्पं त्वदीयगुञ्जावतंसवर्हापीडादिकं वामहस्तस्थकवलादिकञ्च भूषणमभिव्याप्य, तथार्कमर्को नाम वृक्षो भगवदनर्हपुष्पो वैष्णवानामनादरणीयस्तमप्यर्कमभिव्याप्य तत्तत्सहितायाशेष निजैश्वर्य्यप्रकटनशोभायुक्त कृष्ण परमानन्द नन्दनन्दन ! नमस्ते ॥ ४० ॥

श्रीमच्चैतन्यदेवानुगृहीतानामनुग्रहात् । तेषां मुदे स्तुतिब्राह्मी व्याख्यातेयं तथारुचि ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

इति स्तुत्वाऽनुज्ञां प्रार्थयते—अनुजानीहीति । अतो मामनुज्ञापय याहीत्याज्ञापय हे कृष्ण ! मयि सत्त्वसुखज्ञानप्रदत्वेन सच्चिदानन्दघनस्वरूपरूपे "अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः" इति श्रुतेः । वत्सबालादीन् सर्वान् त्वमेव वेत्सि यतः सर्वदृक् सर्वदर्शी जगतां समष्टिजीवानां नाथः त्वमेव नाहं एतज्जगत् चिदचिद्विशिष्टं ब्रह्माण्डं तव शरीरभूतं न मम तच्चार्पितं त्वयि समर्पितम् एवम् आत्मात्मीयभरसमर्पणं कृत्वा नमस्करोति ॥ ३९ ॥ श्रीकृष्णेति हे श्रीकृष्ण ! श्यामसुन्दरविग्रह ! सदानन्दस्वरूपरूप ! अयं परवासुदेवः विष्णुर्नारायणः श्रीकृष्णावतारश्रीरामावतारश्यामसुन्दरः सच्चिदानन्दस्वरूपरूप एव सर्वत्रानुसन्धेयो वैष्णवैरिति रहस्यं नन्वहो यादवकुले जातो यादव एवेत्यत्राह, वृष्णिकुलमेव पुष्करं तस्य जोषं प्रीतिः तां दान्तुं शीलं यस्य सः तत्सम्बोधनम् "यदोः प्रियस्याऽन्ववाये मलयस्येव चन्दनम्" इति कुन्तीवाक्येन यदुकुलस्य यशोदानायैव भवत्प्रादुर्भाव इति अवतारहेतुत्वकथनम्, अनेन सूर्योपमत्वं च क्ष्मानिर्जरा विप्राः द्विजाः पक्षिणः पशवः गवादयः श्रीवृन्दावनस्थाः तेषाम् उदधिरिवोदधि

श्रीवृन्दावनं तस्य वृद्धिं करोतीति तत्सम्बोधनं चन्द्रोपमत्वं च उद्धर्मं पाखण्डमेव शार्वरं शर्वरीसम्बन्धि अन्धकारं हरतीति हरः तत्सम्बोधनं क्षितिराक्षसध्रुक्, क्षितौ ये राक्षसाः तान् द्रुह्यतीति कंसादिमारक ! मन्देहाश्च तेषामुदयसमय एव मारक ! सूर्योपम ! पुनः सम्बोधयति; आ अर्कम् अर्हन् ! अर्कं देवम् अभिव्याप्य सर्वदेवानां पूज्यतम ! आकल्पं कल्पपर्यन्तं ते नमः आकल्पं शृङ्गारम् अर्हन् ! योग्य ! इति वा ।। ४० ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ जिगमिषुरावयोस्तारतम्यं सर्वज्ञस्त्वमेव वेत्सीति वदन्ननुज्ञां पृच्छति—अनुजानीहीति । हे कृष्ण ! सर्वदृक् हेतुगर्भमिदं तत्त्वात्सर्वं वेत्सि जगतां नाथस्त्वं न त्वहमिति भावः । एतत् परिदृश्यमानं जगत्तव त्वयाऽर्पितम् उत्पाद्य स्वस्मिन्नेव निहितमित्यर्थः । न तु ममेति भावः अतो मामनुजानीह्याज्ञापयेत्यर्थः ।। ३९ ।। एवमापृच्छ्याक्षिसङ्कोचनेनैव तदनुज्ञातः पुनर्हर्षातिशयात्प्रकृतावताराऽसाधारणधर्मैः सम्बोधयन्परिक्रम्य प्रणम्य च जगामेत्याह – श्रीकृष्णेति द्वाभ्याम् । वृष्णिकुलपद्मस्य प्रीतिदातृत्वेन सूर्योपमा क्ष्मानिर्जरा भूदेवा ये द्विजास्तेषाम् । यद्वा, क्ष्मायाः निर्ज्जराणां देवानां द्विजानां पशूना य उदधिवद्विस्तारः तस्य वृद्धिं करोतीति तथाभूत ! तत्समुदायवृद्धिकारित्वेन चन्द्रोपमाद् उद्धर्मः पाषण्डधर्मः स एव शार्वरं तमः तद्धरतीति तथाऽनेन हि द्वयोपमा हे क्षितिराक्षसध्रुक् ! क्षितौ ये राक्षसाः कंसादयः उद्यन्नेव तेभ्यो द्रुह्यतीति पुनः सूर्योपमा सूर्याद्युपमाऽपि न्यूनेति मित्वाऽऽह–आर्कमर्कमभिव्याप्य सर्वेषां सुमहन्पूज्य ! हे भगवन् ! आकल्पं कल्पपर्यन्तं ते तुभ्यं नमः ।। ४० ।।

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

किञ्चेदानीमहमस्मिन्नेवाधिकारे स्थास्यामीत्याग्रहो नास्ति अतस्त्वमेव यस्मिन् त्वदाराधनभूते कर्मणि माम् नियोजयितुमिच्छा तव वर्त्तते तस्मिन्नेव नियोजयेत्याह –अनुजानीहिति । कर्षति स्वशेषभूतान् ब्रह्मादीन्स्वस्वाधिकारे नियोजयतीति कृष्णस्तत्सम्बुद्धौ हे कृष्ण ! मां अनुजानीहि आज्ञां देहि मम तु त्वत्कैङ्कर्यमेव परमप्रयोजनमिति त्वमेव वेत्सि यतस्त्वं सर्वदृक् "यः सर्वज्ञः सर्ववित्" इत्यादि श्रुतेः नियोजने हेतुमाह, यतस्त्वमेव जगतां असङ्ख्यातब्रह्माण्डानां नाथः किञ्च तज्जगत्त्वयार्पितं त्वच्छेषभूतं त्वदर्थमित्यर्थः तथाचोक्तं "कृष्णस्य हि कृते सर्वं जगदेतच्चराचरम्" इति ।। ३९ ।। तदेव नौमीत्यारभ्य स्वाभाविकनन्तृनन्तव्यभाव एवैतावत्पर्यन्तं स्थापितः अतः पुनस्तमेव स्वशेषिणमत्यादरेण "कृताञ्जलिपुटा हृष्टा नम इत्येव वादिनः" इति न्यायेन नमस्कुर्वन्नुपसंहरति–श्रीकृष्णेत्यादिभिर्विशेषणैः स्वज्ञानबलादिभिः शत्रून् स्वाश्रितविराधिन आकर्षति नाशयतीति कृष्णस्तत्सम्बुद्धौ हे श्रीकृष्ण वृष्णिकुलपुष्करजोषदायिन् ! वृष्णीनां कुलमेव पद्मं तस्य जोषदायिन् प्रीतिदानेन सूर्यतुल्य ! क्ष्मानिर्जरद्विजपशूदधिवृद्धिकारिन् ! क्ष्माऽवनिर्निर्जरा देवा द्विजा भूदेवाः पशवश्च त एवोदधयस्तेषां वृद्धिकारिन् चन्द्रतुल्य उद्धर्मशार्वरहर ! उद्धर्मः पाषण्डं तदेव शार्वरं गाढं तमस्तद्धरतीति पुनः सूर्यतुल्य ! आकल्पमार्कं क्षितिराक्षसध्रुक् क्षितौ राक्षसाः कंसादयस्तेभ्य आकल्पं ब्रह्मकल्प मर्यादीकृत्य आर्कं सूर्यप्रलयं मर्यादीकृत्य "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" इति श्रुतेः । उद्यन्नेव द्रुह्यतीति पुनः सूर्यतुल्य ! यथा सूर्य उद्यन्निव राक्षसेभ्यो द्रुह्यति तथा त्वमपि आविर्भवन्नेव तान्नाशयतीत्यर्थः । हे अर्हन् ! अस्मदादीनां सर्वेषां पूज्यतम ! भगवन्, हेयनिषेधपूर्वकाप्राकृतज्ञानादिषडैश्वर्य ! तुभ्यन्नमः अहं त्वच्छेषभूतस्त्वदर्थमेव स्यां न मम इति फलितार्थः । यद्वा, आकल्पमित्यत्र आ अकल्पमितिच्छेदः अकल्पो मोक्षस्तमभिव्याप्येत्यर्थः । तदुक्तं प्रथमस्कन्धे उपक्रमे "पिबत भागवतं रसमालयम्" इति आर्कमिति तू पूर्वोक्त एवार्थः ।। ४० ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सर्वमिति तथाप्यत्रावस्थानाज्ञाया अलाभात् कथं स्थास्यामीति भावः । विषयमपि न त्यक्तुं शक्नोमीत्याह—तवेति । तव त्वयैव मय्यर्पितं दासस्याज्ञास्थायित्वमेव च युक्तमिति भावः ।। ३९–४० ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

उपसंहरति—अनुजानीहीत्यादि । हे कृष्ण ! मामनुजानीहि । ननु किमनुज्ञास्यामीत्याशङ्क्याह – सर्वं त्वं वेत्सि, तत् किं कथनीयम् । ननु कथमहं वेद्मि ? तत्राह – सर्वदृक् सर्वज्ञोऽसि । ननु ज्ञातं भो ज्ञातम्; तत् भूरिभाग्यमिहेति यदुक्तम् तदेव तव तु जगत्स्रष्टुरेवं न युज्यत इत्याशङ्क्याह – त्वमेवेति जगतां नाथस्त्वमेव, नान्योऽस्मद्विधादिः । कुत ? इत्याह—जगच्चैतत्त्वार्पितं त्वय्येवार्पितम्, त्वय्यार्पितस्य नाथस्त्वां विना कोऽन्यो भवतु ? तस्माद्यथाभिलषितमेव भूयादित्यनुजानीहि ।। ३९ ।। तस्माद्भूयोऽपि ते नम इति सस्तवं प्रणमति —श्रीकृष्णेति । हे भगवन् ! नमस्ते, वृष्णिकुलपुष्कराणां जोषः प्रीतिस्तां दातुं शीलं यस्येत्यनेन भानुत्वं व्यङ्ग्यम्; क्ष्मा पृथ्वी, निर्जरा देवाः, द्विजाः पशवश्च वृन्दावनसम्बन्धिनस्त एवोदधयः, दुरवहग्राह्यत्वात्, तेषां वृद्धिकारित्वेन चन्द्रत्वम्, उद्धर्मा एव शार्वराणि तमांसि तेषां हरत्वेन महाज्योतिष्ट्वाद् वह्नित्वं 'वह्नीन्द्वर्कास्तमोनुदः' इत्युक्तेः । अत एक एव त्वं भानुचन्द्रवह्नीनां मण्डलानि । अयमर्थः । यथा अमी तेजोमण्डलरूपेण बहिः प्रकाशन्ते, अन्तस्तु स्वस्वाकारेण वर्तन्ते, तथा त्वमपि

ब्रह्माकारेण विश्वव्यापी दृश्यमानाकारेण परिच्छिन्न इति ।। क्षितिराक्षसध्रुक् ! त्वम्, अतत्त्रितयतेजोव्यतिरिक्तनिजतेजोविशेषवत्त्वम्, आर्कमर्कमभिव्याप्य, नमो यावत् सूर्यो भास्यति, तावत्कालपर्यन्त नम इत्यर्थः । कि बहुना ? आकल्प कल्पो द्विपरार्द्धकालं यावज्जीवामि, तावदेव नम इति भावः । हे अर्हन् ? नमस्य ! एवं नौमीत्युपक्रम्य नमस्त इत्युपसंहारः ।। ४०-५६ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कि बहुना प्रलपेन ? सर्वमेव त्वं वेत्सीत्याह—अनुजानीहि, इत्यादि । एतज्जगत्तवार्पितं त्वय्येवार्पितम्, एतेन सह मम कर्तृत्वेन दायो नास्ति, नाहमस्य कर्त्ता, च-कारात् एतत् शरीरञ्च त्वय्येवार्पितम् ।। ३९ ।। नौमीत्युपक्रम्य नमस्कारेणोपसंहरति श्रीकृष्णेत्यादि ।। ४०-५६ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, मम वैभवं तव मास्तु गोचरस्तव वैभवमहं वेद्मि न वेत्तीति वक्रोक्तिमाशङ्क्य किमहमत्र प्रत्युत्तरं कुर्य्यामिति व्यञ्जयन् सलज्जं सनिर्वेदमाह—अनुजानीहीति । अन्तर्भावितण्यर्थम् अनु अनुज्ञापयेत्यर्थः । अत्र स्थले क्षणमपि स्थातुमयोग्यमतिनीचं मामाज्ञापय यादृशोऽहं तादृशं स्थलं सत्यलोकमेव गच्छेयमिति भावः । हे कृष्णेति चित्त तु त्वमत्राकर्षयेव कि तु तद्भूरिभाग्यमिह जन्मेति मत्प्रार्थनायां दृगिङ्गितेनाऽप्यस्त्विति श्रीचरणैर्नोक्तमतः किं कुर्वे तस्मात्त्वत्पुलिनभोजनवेलावन्तरायं कुर्वन्नयमपराधी त्वल्लीलाप्रातिकूल्यादेव श्रीमुखोद्गतवचनसुधालेशमप्यनाप्नुवन्नहमितो झटित्येव दूरमपसरामि त्वं वत्सान् कालयित्वा पुलिने भुञ्जानैः प्रियसखैः सह सहासोक्तिप्रत्युक्तिकौतुकं भोजनलीलाशेषं समापयेति ध्वनयः । अयमहं त्वतितारल्यात् पुनः पुनः कि वा विज्ञापयामीत्याह, सर्वमीत्याह, सर्वमस्मदादीनां मनोवपुर्वाचां वैभवं त्वमेव वेत्सि किं च नाहमस्य जगतः स्पृष्टृत्वान्नाथः किं तु त्वमेव जगतामन्येषामपि बहूनां नाथः अत एतच्च जगत् क्षुद्रतरं तव त्वदीयमेव त्वय्यर्पितं यमिच्छसि योग्यमस्य जानासि तमस्याधिकारिकं कुर्विति भावः ।। ३९ ।। यद्यपि मामपराधिनं विज्ञाय न ब्रूषे तदपि स्वनेत्राभ्यां सानुग्रहाऽवलोकनाऽमृतं तु मह्यं देहि यथा तेनैवाहारेण नित्यं प्राणान् रक्षन् कल्पपर्य्यन्तं जीवितुं प्रभविष्यामीति व्यञ्जयन् प्रणमति—श्रीकृष्णेति । सूर्य्यस्वरूपं दक्षिणं नेत्रमालक्ष्याह, वृष्णिकुलपद्मस्य जोषः प्रफुल्लत्वं तत्प्रदायिन् मामपि पद्मसन्तानं कृपया प्रफुल्लयेति भावः । चन्द्रस्वरूपं वामनेत्रमालक्ष्याह क्ष्मा क्ष्मातलस्था मनुष्यादयः निर्जराः स्वर्गस्थाः देवा द्विजाः पशवश्च वृन्दावनस्थाः पक्षिणो गावश्च त एवोदधयस्तेषां वृद्धिकारिन् ! मामपि देवाधमं कृपया वर्द्धयेति भावः, युगपदेव नेत्रे द्वे एव पुष्पवन्तावालक्ष्याह—उद्धर्मः पाषण्डधर्मः स एव शार्वरमन्धतमसं "शार्वरं त्वन्धतमसम्" इत्यमरः तद्धरतीति तथा तेन स्वप्रभौ त्वय्यपि मायाचिकीर्षालक्षणं मम पाषण्डं कृपया हर यथा पुनरेवं न कुर्यामिति भावः । क्षितौ राक्षसा अघासुरादयस्तेभ्यो द्रुह्यसि द्रोहेणापि स्वगतिं ददासीत्यतस्त्वद्द्रुह्यस्य वृन्दवत्सवृन्दविद्रोहित्वात् सत्यलोकब्रह्मराक्षसं मामपि दण्डप्रदानेनापि संस्कुरुष्वेति भावः । स्वप्रभोरनुग्रहं वा दृष्ट्वा दासो जीवितुमुत्सहते औदासीन्यं दृष्ट्वा न प्राणान् धर्त्तुमीष्टे इति भावः । हन्त हन्त महामहेश्वरोऽपि क्षेत्रगुञ्जागैरिकपिच्छादिरचिताकल्पो गोचारकबालकैः समं खेलन् हृष्यतीत्यनौचित्यं मत्प्रभोरिति पूर्वं विचारितवता तत्त्वानभिज्ञेन मया येष्वपराद्धं तानपि प्रसादयामीति मनसि विभाव्याह—आ आकल्पं त्वदीयगुञ्जादिवेषमभिव्याप्य आर्कं अर्को नाम वृक्षो भगवदनर्हपुष्पस्तमपि व्रजस्थमभिव्याप्य हे अर्हन्, मत्पूज्य ! किं वा हे योग्य कृपाऽकृपाभ्यां मद्भद्राभद्रं कर्तुं समर्थ ! ते तत्तत् हिताय तुभ्यं नमः –

"सर्वसंशयहृत् सर्वभक्तिसिद्धान्तसन्ततिः । अस्तु ब्रह्मस्तुतिश्चित्तभित्तौ मे चारु चित्रिता" ।। ४० ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ सर्वज्ञः सर्वेश्वरः सर्वाधारस्त्वमेवेति वदन् आज्ञां देहीत्याह—अनुजानीहीति । इहैव परिचर्य्यां कर्त्तुं सत्यलोकं प्रति गन्तुं वा आज्ञापय मामित्यर्थः ।। ३९ ।। अक्षिसंकोचेनैव स्वलोकं व्रजेत्यनुज्ञातो नमस्करोति –श्रीकृष्णायेति । हे श्रीकृष्ण ! श्रीयुक्तसदानन्द ! वृष्णिकुलपुष्करस्य जोषदातृत्वेन प्रीतिदातृत्वेन हे भास्करोपम ! क्ष्मादय एवोदधयस्तेषां वृद्धिकारित्वेन हे चन्द्रोपम ! उद्धर्माः नानापाखण्डधर्मास्त एव शार्वराः निशाचराः तान् हन्तीति हे देवेन्द्रोपम ! क्षितिराक्षसाः दुर्वृत्ताः जनाः तेभ्यो द्रुह्यतीति हे नरेन्द्रोपम ! निःसमानातिशयप्रीतिदातृत्वादिगुणनिधे ! भास्कराद्युपमा न्यूनेति मत्वाऽऽह, आर्कमर्कमभिव्याप्य सर्वेषामर्हन्, पूज्य ! हे भगवन् ! आकल्पं कल्पपर्य्यन्तं ते तुभ्यं नमः ।। ४०–४१ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु मम वैभवं तव गोचरो मास्तु तव वैभवमहं वेद्मि न वेति चेत्तत्र सत्रपं सनिर्वेदमाह अनुजानीहि अन्तर्भावितण्यर्थोऽयं अनुज्ञां देहि तव सजग्धिक्रीडान्तरायत्वादपराधवानहं दूरमपसरामि "तद्भूरिभाग्य"मिति मदभ्यर्थितः श्रीमच्चरणैर्दृगिङ्गितेनापि नाङ्गीकृतं किं बहु विज्ञापयामि दूरतस्तद्भावयामि सर्वं त्वं वेत्सि यतः सर्वदृक् । ननु जगत्पतिस्त्वं जगत्कार्यं कुरु तत्राह त्वमेवेति बहूनां जगतां त्वमेव नाथः एतच्चाल्पकं जगत्त्वादाज्ञयैव मया रचितं त्वयार्पितं यमिच्छसि तस्मै देयं न मे किञ्चिदनेन प्रयोजनं

मद्वाञ्छितु तदेव दयासिन्धुना सम्पाद्यमिति भावः ॥ ३९ ॥ यद्यपि सागसं मां न-सन्तापयेथास्तथापि कृपावलोकं विना मे जीवितं दुर्द्धरमिति व्यञ्जयन् प्रणमति श्रीकृष्णेति । वृष्णिकुलमेव पुष्करं तस्य जोषो विकासस्तद्दायिन्निति सूर्यत्वं तेन ममापि पद्मभवत्वात्तद्दानं साम्प्रतं क्ष्मा च निर्जराश्च द्विजाश्च पशवो गावश्च त एवोदधिस्तद्वृद्धिकारिन्निति चन्द्रत्वं तेन ममापि निर्जरद्विजस्य वृद्धिकरणं साम्प्रतं क्षितौ राक्षसेभ्यो अघादिभ्यो द्रुह्यसि द्रोहेणापि स्वपदं ददासीति अतस्त्वत्सजग्धिप्रत्यूहकारिणं ब्रह्मराक्षसं मामपि दण्डेन संस्कृत्य स्वपदं देहि त्यजौदासीन्य तेन मज्जीवनं दुद्धरमिति भावः । किञ्च सर्वेश्वरस्यानन्तलक्ष्मीकस्य गुञ्जापिञ्छादिवेषो गोचारणं गोपभिस्तैः सह सख्यञ्च नोचितमित्यविज्ञेन मया मनसि सम्भाव्यापराद्धं तदिदानीं क्षमयामीत्याह आकल्पं गुञ्जादिवेषमभिव्याप्य अर्कस्त्वदनर्हपुष्पो वृक्षो व्रजस्थस्तं चाभिव्याप्य तत्सहिताय ते नमोऽस्ते तत्तत्सर्वस्य त्वदीयत्वाद्धि ज्ञानघनत्वाच्च मद्वन्द्यत्वम् । हे अर्हन् पूज्य ॥ ४० ॥

"परमैश्वर्यमाधुर्य भक्तिभृद्ब्रह्मणोदिता । जीयाद्गोकुलमाहात्म्य धात्रीनन्दसुतस्तुतिः ॥"

श्रीसुबोधिनी

एवं स्तुत्वा गमनं प्रार्थयति बालकानामानयनार्थ**मनुजानीही**ति, गन्तुमनुज्ञां प्रयच्छ, **कृष्णे**तिसम्बोधनं स्वस्य प्रेमख्यापनार्थं, प्रेषणेपराधाभावे वा न किञ्चिन् मया वक्तव्यं यतस्त्वमेव **सर्वं वेत्सि** यतः **सर्ववित्**, तत्र गतस्य स्वातन्त्र्यशङ्का न कर्तव्या, **यतस्त्वमेव जगतां नाथः**, अतोधिकारस्थित्यर्थं प्रेषय, **एतज् जगत्** नवैव त्वयैव चार्पितं मयि स्थापितं अतः प्रेषणमुचितमेव ॥३९॥ गच्छन् नमस्यति हे **कृष्णे**ति, **वृ**ष्णयो यादवास्तेषां कुलमेव **पुष्करं** तस्य **जोषो** विकासस्तस्य **दायिन्नि**ति सूर्यरूपतोक्ता, **क्ष्मा** पृथिवी **निर्जरा** देवा **द्विजा** ब्राह्मणाः पशवश्च त **एवोदधि**स्तस्य **वृद्धिकारिन्नि**ति चन्द्ररूपता, **उद्धर्मः** पाषण्डधर्मस्तदेव **शार्वरं** तस्य निवारकेत्यग्निरूपता, **क्षितिराक्षसध्रुगि**ति, क्षितावुत्पन्ना ये **राक्षसा**स्तान् द्रोग्धीत्यवतारप्रयोजनम्, **आकल्पं नमस्त** इति, **आर्कमर्हन्नि**ति, **अर्क**मभिव्याप्य सर्वपूज्येति स्वस्यापि नमस्कारे हेतुः ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जगदीशत्वाभिमानं परित्यज्याह—अनुजानीहीति । हे कृष्ण ! जगतामनन्तकोटिब्रह्माण्डानां त्वमेव नाथश्च स्वामी । तत्र हेतुमाह—एतत् सर्वमपि जगत् तवार्पितं त्वयैव विनिर्मितम्, यद्वा एतत्पर्यन्तं ममतास्पदं जगत् अहन्तास्पदमेतच्छरीरं च तत्तवार्पितम्, स्वकीयत्वाभिमानं परित्यज्य तुभ्यं समर्पितमित्यर्थः । ननु 'कथं तर्हि तत्र स्वकीयत्वाभिमानः ?' तत्राह—सर्वमिति । स्वमहिमानमस्मदादीनां ज्ञानबलादिकं च सर्वं त्वं स्वयमेव वेत्सि जानासि, तत्र मया को वा विशेषो वक्तव्य इत्यर्थः । तत्र हेतुमाह—सर्वदृगिति । सर्वसाक्षित्वादित्यर्थः । तथा चाज्ञस्य ममोपरि सर्वज्ञस्य तत्र कृपैव युक्ता इति भावः । ननु 'तवाधिकारोऽधुना न परिसमाप्तः, कथं वृन्दावने जन्म प्रार्थयसे ?' इत्याशङ्क्याह—अनुजानीहि मामिति । तद्ध्यधिकारस्थित्यर्थं मामनुजानीहि, सत्यलोकं गन्तुमनुज्ञां देहीत्यर्थः ॥ ३९ ॥ नेत्रकटाक्षेणैव गमनाज्ञां प्राप्य गच्छन् बहुधा सम्बोधयंश्च नमस्कारं प्रार्थयते - हे श्रीकृष्ण सदानन्दरूप ! वृष्णयो यादवाः, तेषां कुलमेव पुष्करं कमलम्, तस्य जोषो विकासः, तस्य दायिन् ! 'जुष प्रीतौ' इति प्रीतिदातृत्वेन सूर्योपमा सूचिता। तथा क्ष्मा पृथ्वी, च निर्जरा देवाः, द्विजा ब्राह्मणाश्च, पशवो गावश्च, ते एव उदधयस्तेषां वृद्धिकारिन् ! इति चन्द्रोपमा । तथा उद्धर्मः पाखण्डधर्मः, तदेव शार्वरं तमः तद्धरतीति तथा, तत्सम्बोधनेन चन्द्रसूर्ययोर्द्वयोरुपमा । अनेन 'ममापि मायाप्रतारणरूपपाखण्डकृतापराधं हर' इत्यपि सूचितम्। क्षितौ ये राक्षसाः कंसादयस्तेभ्य उद्यन्नेव द्रुह्यतीति तथा, तत्सम्बोधनेन पुनरपि सूर्योपमा । 'सूर्याद्युपमाऽपि न्यूना' इत्याशयेनाह—आर्कमर्कमभिव्याप्य सर्वेषामर्हन् हे पूज्य ! पूज्यत्वे हेतुमाह - हे भगवन् ! आकल्पं कल्पपर्यन्तं ते तुभ्यं नमोऽस्तु ॥ ४० ॥

अन्वितार्थप्रकाशिका

अनुजानीहीति ॥ हे कृष्ण ! त्वं मामनुजानीहि सत्यलोकं गन्तुमनुज्ञां देहि सर्वदृक् त्वं सर्वमपि वेत्सि त्वमेव जगतां नाथः अतः मया ममतास्पदमेतत् जगत् शरीरं च तव अर्पितम् ॥ ३९ ॥ श्रीकृष्णेति ॥ हे श्रीकृष्ण ! वृष्णयो यादवाः तेषां कुलमेव पुष्करं कमल तस्य जोषो विकासः तद्दायिन् इति सूर्योपमा । तथा क्ष्मा पृथ्वी च निर्जरा देवा द्विजा ब्राह्मणाश्च पशवो गावश्च ते एव उदधयस्तेषां । वृद्धिकारिन्निति चन्द्रोपमा । तथा उद्धर्मः पाखण्डधर्मः तदेव शार्वरं तमः तद्धरतीति तथा तत्सम्बोधनेन चन्द्रसूययोर्द्वयोरुपमा। क्षितौ ये राक्षसा कंसादयस्तेभ्य उद्यन्नेव द्रुह्यतीति तथा तत्संबोधनेन पुनरपि सूर्योपमा आर्कमर्कमभिव्याप्य सर्वेषामर्हन् हे पूज्य ! हे भगवन् ! आकल्पं कल्पपर्यन्तं ते तुभ्यं नमोऽस्तु ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गोष्टप्रवेशप्रकारमाह बर्हेति-बर्हादिभिः विचित्रितानि चित्रीकृतानि अंगानि करमस्तकादीनि येन सः प्रसूनानि पुष्पाणि वनधातवो वनाकरोद्भवाः गैरिकादयः प्रोद्दामाः श्रेष्ठाः ये वेण्वादीनां रवाः शब्दास्तैरुत्सवस्तेन आढ्यो युक्तः दलं पर्णं वत्सान् गुणान्

मनोहरशब्दैः संबोधयन् अनुगैः अनुचरैः गोपैर्गीता पवित्रा कीर्त्तिर्यस्य गोपीनां दृशो दृष्टयस्तासां उत्सवप्रदा दृशिर्दर्शनं यस्य सः गोष्ठं गोकुलं प्रविवेश ॥ ३९ ॥ अस्मात् महाव्यालात् वयं अविता रक्षिताः स्मः ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ जिगमिषुरावयोस्तारतम्यं सर्वज्ञस्त्वमेव वेत्सीति वदन्ननुज्ञां पृच्छति ॥ अनुजानीहीति ॥ हे कृष्ण त्वं सर्वदृक् हेतुगर्भमिदम् । सर्वज्ञत्वात् सर्वं वेत्सि । जगतां नाथः, त्वं एव न त्वहमिति भावः । एतत् परिदृश्यमानं जगत्, तव अर्पितं त्वयैव समुत्पाद्य मह्यमर्पितमित्यर्थः । अतः, मां अनुजानीह्याज्ञापय ॥३९॥ एवमापृष्टोऽक्षिसंकोचेनैव तदनुज्ञातः पुनर्हर्षातिशयात् प्रकृतावतारसाधारणधर्मैः संबोधयन् परिक्रम्य प्रणमति ॥ श्रीकृष्णेति ॥ श्रीकृष्ण, वृष्णीनां कुलमेव पुष्करं पद्मं तस्य जोषः प्रकाशस्तं ददातीति तत्संबुद्धिः प्रीतिप्रकाशदातृत्वेन सूर्योपमा । क्ष्माऽवनिश्च निर्जरा देवाश्च द्विजा ब्राह्मणाश्च पशवो गावश्च त एवोदधयस्तेषां वृद्धिकारी तत्संबुद्धिः, क्ष्मादिसमुदायवृद्धिकारित्वेन चन्द्रोपमा, उद्धर्मः पाषण्डधर्मः स एव शार्वरं तमस्तद्धरतीति तत्संबोधनम् । अनेन द्वयोरौपम्यम् । क्षितौ भूमौ ये राक्षसाः कंसादयस्तेभ्यो द्रुह्यति उद्यन्नेव जिघांसतीति तत्संबुद्धिः । अनेन पुनः सूर्योपमा । सूर्याद्युपमापि न्यूनेति मत्वाऽऽह । आर्कमभिव्याप्य, अर्हन् सर्वेषामपि पूज्य हे भगवन्, आकल्पं कल्पपर्यन्तं, ते तुभ्यं, नमः । स्वसखवत्सविमोचनतोऽद्भुतं गतवतां विधितत्सुहृदां मुदे । विधृतचित्रतदाकृतिरच्युतो व्रजसुभद्रकरोऽवतु वो हरिः ॥ ४० ॥

कृष्णप्रिया

हे कृष्ण ! प्रभो, अब मुझे निज निवास जाने की अनुज्ञा दीजिये आप सर्वज्ञ होने से सब कुछ जानते ही हैं आप ही अनेक जगतों के नाथ हैं आपने ही इस जगत् रचनादि की सेवा के लिये मुझे प्रसादी रूप में दिया इसलिये मुझे सेवा करने के लिये जाना चाहिये अब आप अनुमति दीजिये ॥३९॥ श्रीकृष्ण ! हे यादव, कुल कमल को विकसित करने वाले दिवाकर ! पृथ्वी–देव-द्विज और गोवृन्द स्वरूप समुद्र की समृद्धि करने वाले चन्द्र, पाखण्ड धर्म नाम के घोर तिमिर को हटाने वाले और पृथ्वी में पैदा हुए राक्षसों के विनाशक भगवन् ! सूर्य से लेकर सर्वजन के सेव्य-पूज्य हे श्रीकृष्ण भगवन् ! कल्प पर्यन्त आपके श्रीचरणों में मेरे प्रणाम हो ॥ ४० ॥

श्रीशुक उवाच

इत्यभिष्टूय भूमानं त्रिः परिक्रम्य पादयोः । नत्वाभीष्टं जगद्धाता स्वधाम प्रत्यपद्यत ॥ ४१ ॥
ततोऽनुज्ञाप्य भगवान् स्वभुवं प्रागवस्थितान् । वत्सान् पुलिनमानिन्ये यथापूर्वसखं स्वकम् ॥ ४२ ॥

कर्दमक्षमा

अन्वयः—जगद्धाता भूमानम् इति अभिष्टूय पादयोः त्रिः परिक्रम्य अभीष्टं नत्वा स्वधाम प्रत्यपद्यत ॥ ४१ ॥ भगवान् स्वभुवं अनुज्ञाप्य ततः यथापूर्वसखं स्वकं प्राग् अवस्थितान् वत्सान् पुलिनं आनिन्ये ॥ ४२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ससखिवत्सकमोक्षणकौतुकद्रुतविलंबितपुत्रमुदेऽद्भुतम् । निखिलरूपमतो दधदच्युतोऽवतु स वः कलयन्व्रजमंगलम् ॥ १ ॥

पादयोर्नत्वा । अभीष्टं सर्वतः पूजितमभिप्रेतं वा ॥ ४१ ॥ अनुज्ञाप्यानुज्ञां प्रदाप्य पृष्ट्वेत्यर्थः । स्वभुवं ब्रह्माणम् । यथापूर्वं स्थिताः सखायो यस्मिंस्तत्स्वकं पुलिनम् प्रागवस्थितान्वनं प्रति पूर्ववदवस्थितान्वत्सानानिन्ये ॥ ४२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ससखवत्सकमोक्षणेन यत्कौतुकं तेन द्रुतं गतं विलम्बितं विलंबो यस्य स तथा । यद्वा–द्रुतः शीघ्रतायुतश्चासौ विलम्बितो जातविलम्बश्चेति द्रुतविलम्बितः वत्सपालावलोकनार्थं भगवदवलोकनार्थं वा प्रथमं द्रुतो दृष्ट्वा च संशयितः सन् विलम्बितोऽभूदिति, स चासौ पुत्रो ब्रह्मा चेति तथा । यद्वा–द्रवति निसर्गेण निम्नं गच्छतीति द्रुतं तोयम्, द्रुते विलम्बते ऊर्ध्वदेशे तिष्ठतीति द्रुतविलम्बितं कमलम्, तस्य पुत्रस्तथा तस्य मुदे । यद्वा–द्रुतोऽतिवेगवान् विः पक्षी हंसो यस्य स द्रुतविर्ब्रह्मा, लंबनं लंबा क्रीडा, सा च—जंघाधोभागेन लघु काष्ठदंडं दूरे निक्षिप्य तदानयनार्थगतबालात्प्रागेव वृक्षशाखां गृहीत्वा ततोऽप्यूर्द्ध्वशाखामालंबनरूपा, सैव मर्कटोत्प्लवनशब्देन लक्षिता, सा च गोपालेषु प्रायोऽस्ति, लंबा जाता येषां ते लंबितास्ते पुत्रा यस्य गोपीजनस्य स लंबितपुत्रः, ससखवत्सकमोक्षणेन कौतुकं यस्य स तथा स चासौ द्रुतविश्चेति तथा, ससखवत्सकमोक्षणकौतुकद्रुतविश्च लंबितपुत्रश्चेति समाहारद्वंद्वस्तस्य मुदे 'तन्मातॄणां च कस्य च' इत्युक्तेः । यतो निखिलरूपं रूपे निरूपे निखिलं निखिलरूपं निखिलानां रूपमिति वा दधत् अतो हेतोः व्रजमंगलं

कलयन् रचयन् सः प्रसिद्धोऽनेकरूपत्वेप्यच्युतो निर्विकारः वोऽध्येत्रध्यापकानवतु (१)। भूमानं सर्वेश्वरम्। त्रिरभिष्टूय वेति संबन्धः। यथोक्तान्वये तु "एका चंड्या रवेः सप्त तिस्रो गणपतेः स्मृताः चतस्रः केशवस्योक्ताः शिवस्यार्द्धा प्रदक्षिणा ।।" इति विरोधः स्यात्। सर्वतः पूज्यत्वे नास्तिकाभावप्रसङ्गं मन्वानोऽर्थांतरं ब्रूते—अभिप्रेतं वेति। स्वधाम सत्यलोकम्। प्रत्यपद्यत प्राप ॥ भूमानं सर्वथैवापरिच्छिन्नम्। अभीष्टं भगवता प्रस्थापयिमिति शेषः। यतो जगद्धाता अन्यथा सहसा तत्पदत्यागे विश्वसृष्टेरसिद्धेः, ततश्च 'यावदधिकारमवस्थितिराधिकारिकाणाम्' इति न्यायेनाधिकारान्ते तदभीष्टं सेत्स्यतीति बुद्धयते ॥ ४१ ॥ ततः स्तवनानन्तरम्। इत्यर्थ इति। प्रयोजकणिजन्ताज्ज्ञपेर्ल्यप् "नाऽन्ये मितोऽहेतौ" इति मित्वाभाव इहायमर्थो बोध्यः प्रदाप्य दापयित्वेति। वस्तुतः स्वभुवं स्वोद्भूतमपि मनुष्यनाट्याभिप्रायेण लोकसंग्रहार्थं वा पृष्टवानिति भावः ।। स्वभुवं मौनेनैवानुज्ञाप्य 'अनुजानीहि मां कृष्ण' इत्याज्ञाप्रार्थने कृते "मौनं सम्मतिलक्षणम्' इति ब्रह्मणा सहसावगमात्। मौनत्यागाभावस्तु–पशुपवशशिशुत्वदशायामङ्गीकृतस्य ब्रह्ममोहनार्थमंगीकृतस्य नाट्यस्यारंभपरिसमाप्तिसिद्धयर्थम्। तत्र "ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान्। उभावपि वने कृष्णो विचिकाय समंततः ।।" इति वत्सबालकान्वेषणनाट्यारंभः। 'नौमीड्य०' इत्यादिब्रह्मस्तुतौ प्रवृत्तायां कुतस्त्योयं चतुर्मुखः किं तिष्ठते किं वा मुहुर्ब्रूते इति स्ववत्सान्वेषणव्यग्रोऽहं गोपशिशुर्न बुध्ये इति व्यञ्जकेन मौनेनैव तस्यैव नाट्यस्य समाप्तिरिति स्वाधीनब्रह्मणोग्रे निजमहैश्वर्यस्याज्ञानमभिनीयते स्मेति तन्नाट्यशब्देनोच्यते। 'तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यम्' इत्यादिना वात्सल्यरसपरिकरव्रजेश्वर्यादीनामग्रे तु तत्प्रेमाधीनेन श्रीकृष्णेन निजमहैश्वर्यस्य तन्महाप्रेममाधुर्यरसाच्छादितस्याज्ञानयाथार्थ्यमेव, तत्र न तस्याभिनय इति न तन्नाट्यशब्देन वाच्यमिति विवेचनीयम्। प्राक् प्राग्वदेव। तृणचरणादिचेष्टादिभिरवस्थितान् स्वकं स्वभोजनस्थानं पुलिनमानिन्ये। यथापूर्वं पूर्वोपवेशादिकमनतिक्रम्यापरित्यज्य वर्तमानाः सखायो यत्र तत्, समासान्त आर्षः। यद्वा – यथा यथावदेव स्थिताः पूर्वसखाः स्वरूपभूतसखेभ्यः पूर्वसखायो यत्र तत्। एतत्सर्वसमाधानञ्च श्रीकृष्णेच्छासंवलितमायावैभवमेव, तथा मात्रादिभिर्व्यवहारौपयिकं ह्यस्तनादि तत्तद्बालकादिचरितं स्मृतमपि प्राचोनेषु स्मारयितुं नेष्टमित्यादि बोध्यम् ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भूमानं सर्वथैवापरिच्छिन्नम् इति एवम् अभिष्टूय अभिष्टुत्य अभितः स्तुत्वा। यद्वा सर्वव्यापकमेव तथावस्थितं भक्त्या त्रिःपरिक्रम्य अभीष्टं सामीप्ययाच्ञायां कृतमौनेन श्रीकृष्णेनाभिप्रेतं धाम यतो जगद्धाता अन्यथा तत्पदत्यागे विश्वसृष्ट्यसिद्धेः एवं "यावदधिकारमवस्थितिराधिकारिणाम्' (३।३।३१) इति न्यायेन तदन्ते तदभीष्टसिद्धिर्भविष्यतीति ज्ञाप्यते ।। ४१ ।। स्वभुवम् आत्मजम् इति सर्वापराधक्षमादिकं सूचितम् अनुज्ञाप्य इदानीमप्यानयानीति सस्मितं पृष्ट्वा अनुज्ञापनं चेदं स्वसार्वज्ञादिव्यञ्जनोपालम्भनोत्प्रातशिक्षाक्षमानुग्रहविनयादिव्यञ्जकमपीदं व्यञ्जयति, तादृशस्वरूपैरपि बालवत्सैर्न मम लीलासुखं किन्तु तैरेवेति ततो ब्रह्मानुज्ञापनानन्तरं प्राक् प्राग्वदेवावस्थाचेष्टादिभिरवस्थितान् यथापूर्वं पूर्ववदवस्थाचेष्टाद्यनतिक्रमेण वर्त्तमानाः सखायो यत्र तत् स्वकं स्वभोजनस्थानं पुलिनमानिन्ये अत्र सकवलपाणेः कृष्णस्यागतस्य तैः पूर्ववदेव दृश्यमानस्यावस्थितिश्च पूर्ववदेव ज्ञेया एतत्सर्वसमाधानं च श्रीकृष्णेच्छासम्वलितमायावैभवमेव तथा मात्रादिभिर्व्यवहारौपयिकं ह्यस्तनादितत्तद्बालकाचरितं स्मृतमपि प्राचीनेषु स्मारयितुं नेष्टमित्यपि वोद्धव्यम् ।। ४२ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भूमानमपरिच्छिन्नमाहात्म्यम्। इत्येवमभिष्टूय अभिष्टुत्याभितः स्तुत्वा। यद्वा, सर्वव्यापकमपि तथावस्थितं भक्त्या त्रिः परिक्रम्याभीष्टं प्रियतमं स्वधाम सत्यलोकवर्त्ति निजगृहं गत इति प्रथमं लज्जादिना व्रजवासलोभेन वा पारमेष्ठ्यं पदं परित्यज्य कुत्रापि निलीय स्थास्यामीति मनसि कृत्वा स्थितः, इदानीञ्च श्रीभगवत्प्रसादमासाद्य निजप्रियपदमेवागच्छदित्यर्थः, यतो जगद्धाता, अन्यथा तत्पदच्युत्या विश्वसृष्ट्यसिद्धेः, अतः श्रीभगवानेव प्रस्थापयामास ।। ४१ ।। न च केवल स्वेच्छया गत इत्याह—तत इति। अनुज्ञाप्य प्रस्थाप्येत्यर्थः। स्वभुवमात्मजमिति सर्वापराधक्षमादिकं सूचितम्। ततो ब्रह्मानुज्ञापनानन्तरमेव, प्राक् पूर्वमेव, यथा—पूर्वसखं स्वकं निजभोजनस्थानं वत्सानां पूर्वावस्थितिस्थानं वा, सरःपुलिनमवस्थितान् वनान्तर्वर्त्तमानान् वत्सानानिनाय। इत्थञ्च श्रीब्रह्मणानीय समर्पिता इति श्रीभगवतैव वा कुतोऽपि सवत्सा बालका आनीतास्ते वा, स्वयं कुतोऽप्यागताः पुनस्तत्रोपविष्ट्य इत्युक्त्यभावात् केवलं मायापगमेन पूर्ववत् पुलिने भोजनार्थमासीनेषु पूर्वमेव तानाश्वास्य वत्सानयनार्थं गतोऽसौ वत्सानेवाधुनानीतवानित्युक्तश्च मायामोहिताः सन्तोऽब्दं यावत्ते तत्र तत्रावर्त्तन्ते इति स्पष्टमेवावगम्यते, न च व्यक्तमिदमन्यैर्जनैर्गोपादिभिः कथं त तत्र न दृष्टाः ? शीतवातादिना वा कथं न हि वाधिता इति, मायायाः सर्वशक्तिमत्वात् ? यदि वा वक्तव्यमिदम्—श्रीभगवता दृष्ट्वापि तादृगवस्थास्ते कथमुपेक्षिताः स्युरतः श्रीब्रह्मणा सत्यलोकादौ श्रीभगवददृश्यस्थाने कुत्रापि नीत्वा मायया मोहयित्वा रक्षिता इति ? तत्र युक्तम्, यतो ब्रह्ममुदे न ते समानीता इत्यादावुक्तमेव, (भा० १०।१३।४१) 'मायाशये' इत्युक्त्या श्रीभगवत्कृपया च तेषां दुःखाभाव एव, यत्र कुत्रापि नीता अपि ज्ञानघनमूर्त्तेः श्रीभगवतो नैवादृश्याः स्युर्नाम, पूर्वन्तु यत् क्षणं न ते दृष्टा इतस्ततो मार्गिताश्च

तत्स्नेहपरवशतया किंवा श्रीब्रह्ममोहार्थमेवेत्यपि पूर्वमुक्तमेवेति सर्व्वथा ते तत्र तत्रैव तथा स्थिता इति सुसिध्येत् । अतएव श्रीस्वामिपादैरपि लिखितम्—'नन्वेतावन्तं कालं कथं ते तत्रैवोपविष्टाः ? कथञ्च क्षुत्पिपासादिविस्मरणम्' इत्यादि । यथापूर्व्व सखायो यस्मिन्निति प्रागवस्थितानिति च बालकवत्सपुलिनभोज्यभोजनार्थोपवेशादिकमपि सर्वं पूर्व्ववदेव वर्त्तमानं बोधयति, किन्त्वाब्दिकरयसा कियत्याकारादिवृद्धिर्ज्ञेया । तथा मात्रादिषु तद्वद् बालकाचरितादिकं श्रीभगवत्प्रभावेण तेषु निजतया परिस्फुरितमिति च बोद्धव्यमन्यथाब्दस्थितेरागन्तुकैस्तैः सह वैलक्षण्यापत्तेरिति दिक् ।। ४२ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भूमानमिति, सर्वतोऽल्पत्वरहितं स्वरूपरूपगुणविभूतिभिर्वैपुल्यविशिष्टसुखरूपम् अभीष्टं सुखमेव सर्वाभीष्टं भवत्यतोऽभीष्टं स्वस्य प्राप्यतयाऽभीष्टं प्रियं परब्रह्मनारायणावतारतया तदभिन्नं त्रिःपरिक्रम्य परव्यूहविभवेषु त्रिसङ्ख्येषु तृतीयस्य विभवरूपस्य भगवतः त्रिः परिक्रमणं योग्यमेव पादयोर्नत्वा शरणागतस्य नमनमेव पुमर्थः जगद्धाताऽपि नत्वेति अहन्ताममतानिवृत्तिर्व्यज्यते नाहं न मम तवैवाहम् इति नमःशब्दार्थत्वात् इत्यलम् ।। ४१ ।। ततो भगवान् ज्ञानबलैश्वर्यादिषड्गुणः स्वभुवं स्वस्य नारायणत्वात्स्वपुत्रम् अनुज्ञाप्य आज्ञाप्य अपराधक्षमालक्षणं यथापूर्वं सखाय उपविष्टा यस्मिन् तत् पुलिने स्वकं स्वीयं वत्सान् आनिन्ये द्विकर्मकस्य धातोरन्वयः । स्वस्य कं सुखं यस्मिन् तत्पुलिनमिति वा ।। ४२ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीत्थं सम्बोधनैः पूर्वोक्तैश्च धर्मैरभिष्टूय जगद्धाता ब्रह्मा भूमानमपि लीलया सङ्कुचितविग्रहं भगवन्तं परिक्रम्य पा-योर्नत्वा प्रणम्य स्वधाम सत्यलोकं प्रत्यपद्यत जगाम ।। ४१ ।। तत इति । ततः स्वस्माद्भवश्चतुर्मुखमाज्ञाप्याक्षिसङ्कोचेनेति शेषः। ययापूर्वं सखायो यस्मिंस्तत्स्वकं पूर्वाधिष्ठितं पुलिनं प्रत्येव वत्सानानिन्ये ।। ४२ ।।

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

भूमानं निरवधिकभूमगुणविशिष्टं पादयोर्नत्वा नमस्कृत्य द्वितीयार्थे षष्ठी पादौ नत्वेत्यर्थः । अभीष्टं सर्वतः पूजितं वा ।। ४१ ॥ अनुज्ञाप्य अनुज्ञां प्रदाय स्वभवं स्वस्माद्भवो जन्म यस्य तच्चतुर्मुखं यथापूर्वं विद्यन्ते सखायो यस्मिन् तत् स्वकं पुलिनम् ।। ४२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अभीष्टसामीप्ययाच्ञायां कृतमौनेन श्रीभगवताऽभिप्रेतं स्वधाम भूमानमेवाभीष्टम् ।।४१।। अनुज्ञापनेन चैवं ज्ञापितं तादृशस्वरूपैरपि बालवत्सैर्न मम लीलासुखं किन्तु तैरेवेति स्वकं निजभोजनस्थानं यथापूर्वसखमिति प्राक् प्राग्वदेवावस्थितानिति ।४२-४४।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अभीष्टं भगवता प्रस्थापयितुमिति शेषः, यतो जगद्धाता अन्यथा सहसा तत्पदत्याजने विश्वसृष्ट्यसिद्धेः ततश्च "यावदधिकारमवस्थितिराधिकारिकाणाम्" [३।३।३१] इति न्यायेनाधिकारान्ते तदभीष्टं सेत्स्यतीति बुद्ध्यते ।। ४१ ।। स्वभुवं ब्रह्माणम् अनुज्ञाप्य आज्ञाप्येति मौनेनैव अनुजानीहि मां कृष्णेत्याज्ञाप्रार्थने कृते "मौनं सम्मतिलक्षणम्" इति ब्रह्मणा सहसावगमात् मौनत्यागाभावस्तु पशुपवंशशिशुत्वदशायामङ्गीकृतस्य ब्रह्ममोहनार्थे नाट्यस्यारम्भपरिसमाप्तिसिद्धयर्थे तत्र "ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान् । उभावपि वने कृष्णो विचिकाय समन्ततः" इति वत्सबालकान्वेषणनाट्यारम्भे नौमीड्येत्यादिब्रह्मस्तुतौ प्रवृत्तायां कुतस्त्योऽयं चतुर्मुखः किञ्चेष्टते किं वा मुहुर्ब्रूते इति स्ववत्सान्वेषणव्यग्रोऽहं गोपशिशुर्न बुद्ध्ये इतिव्यञ्जकेन मौनेनैव तस्यैव नाट्यस्य परिसमाप्तिरिति स्वाधीनब्रह्मणोऽग्रे कृष्णेन निजमहैश्वर्य्यस्याज्ञानमभिनीयते स्मेति तन्नाट्यशब्देनोच्यते "तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यम्" इत्यादिना वात्सल्यादिरसपरिकरव्रजेश्वर्य्यादीनामग्रे तु तन्महाप्रेमाधीने कृष्णे निजमहैश्वर्य्यस्य तन्महाप्रेममाधुर्य्यरसाच्छादितस्याज्ञानं यथार्थमेवेति तत्र न तस्याभिनय इति न तन्नाट्यशब्दे वाच्यमिति विवेचनीयं प्राक् प्राग्वदेव तृणचरणादिचेष्टाभिरवस्थितान् स्वकं स्वभोजनस्थानं पुलिनमानिन्ये कीदृशं यथापूर्वं पूर्वोपवेशादिकमनतिक्रम्य अपरित्यज्य वर्त्तमानाः सखायो यत्र तत् समासान्त आर्षः । यद्वा, यथा यथावदेव स्थिताः पूर्वसखाः स्वरूपभूतसखेभ्यः पूर्वे सखायो यत्र तत् ॥ ४२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं स्वभुवं ब्रह्माणमनुज्ञाप्य अक्षिसङ्कोचेनैव तल्लोकं प्रत्याज्ञाप्य यथापूर्वं सखायो यस्मिंस्तत्स्वकं पुलिनं प्रतिवत्सानानिन्ये ।। ४२ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एवं मधुरस्तुतिनिगर्वव्रजभावाभिवाञ्छापरितुष्टेन भगवता कृपया अवलोकितो विरञ्चिर्भूमानं कृष्णं पुनः किञ्चिदभिष्टूय त्रिः परिक्रम्य पादौ नत्वा सम्प्रति जगत्कार्यं कुरु तदवसाने 'यावदधिकार' न्यायेन वाभीष्टं भावीति तेनोक्तः स्वधाम प्रत्यपद्यत

प्राप ॥ ४१ ॥ गृहीतमौन एव भगवान् दृगन्तेनैव स्वभुवं ब्रह्माणमनुज्ञाप्य स्वलोकं गच्छेत्याज्ञाप्य वत्सान् स्वकं स्व-सजग्धिस्थानं पुलिनमानिन्ये, कीदृशान् प्राक् पूर्ववदेव तृणभक्षणादिचेष्टयाऽवस्थितान् पुलिनं कीदृशं यथा यथावदेव स्थिताः पूर्वसखाः प्रकाशित-सखेभ्यः पूर्वे प्रकृताः सखायो यत्र तत् ॥ ४२ ॥

श्रीसुबोधिनी

एवं स्तुत्वा गत इत्याहेतीति **भूमानं** पूर्वमनन्तकोटिब्रह्माण्डरूपेण प्रदर्शितात्मानं त्रिः **परिक्रम्य** पुनः **पादयोर्नत्वाभित इष्टं** भगवन्तं स्वाभिलषितं **स्वस्य धाम वा प्रत्यपद्यत** प्रस्थितः, गत इतियावत् ॥ ४१ ॥ ततो भगवत्कृत्यमाह **तत** इति, यावद् गत्वा ब्रह्मा स्वगृहं बालकान् वत्सांश्चानयति तावद् **भगवानेव** ब्रह्माण**मनुज्ञाप्य प्रागवस्थितान् वत्सान् पुलिनमानिन्ये**, पुलिनमपि **स्वकमेव**, यत्र पूर्वं बालकाः स्थितास्तत्रापि **यथापूर्वसखं** पुलिनं यथापूर्वं **सखायो** यत्र पूर्वं पुलिने बालकान् पूर्ववदुपवेश्य पश्चाद् वत्सानयनार्थं गत इव **वत्सान् पुलिनमानिन्ये** ॥ ४२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जगद्धाता ब्रह्मा इत्येवं भूमानं सर्वतो व्यापकमपि जगद्धिताय अल्परूपेण विराजमानं श्रीकृष्णमभिष्टूय स्तुत्वा त्रिः परिक्रम्य तत्पादयोर्नत्वा अभीष्टं सर्वतः उत्कृष्टतया सर्वाभिप्रेतं स्वाभिप्रेतं वा स्वधाम सत्यलोकं प्रत्यपद्यत जगाम । 'जगद्धाता' इत्यनेन सृष्ट्यधिकारस्थानत्वात्तत्र तस्य स्थितिरावश्यकीति सूचितम् ॥ ४१ ॥ भगवानेवं स्वभुवं स्वपुत्रं ब्रह्माणमनुज्ञाप्य स्वलोकगमनानुज्ञां दत्त्वा ततस्तदनन्तरं यावत् ब्रह्मा स्वस्थानाद्बालकवत्सानानयेत्, तावत् स्वशक्त्यैव ततस्तानानीय प्रथमतो बालान् पुलिने पूर्ववदवस्थितान् कृत्वा पश्चाद्वत्सानयनार्थं गत एव वत्सानपि यथापूर्वं सखायो यस्मिंस्तत् स्वकं स्वकेलिसम्पत् सरःपुलिनमानिन्ये । ब्रह्मद्वारा तेषामानयने पुनरपि पूर्ववद् संवत्सरो व्यतीतः स्यादिति ज्ञेयम् ॥ ४२ ॥

अन्वितार्थप्रकाशिका

इतीति ॥ जगद्धाता ब्रह्मा इत्येवं भूमान व्यापकं श्रीकृष्णम् अभिष्ट्य स्तुत्वा । दैर्ध्यमार्षम् । त्रिः परिक्रम्य तत्पादयोर्नत्वा अभीष्टं स्ववाञ्छितं पूजितं वा स्वधाम सत्यलोकं प्रत्यपद्यत जगाम ॥ ४१ ॥ तत इति ॥ भगवानेव स्वयंभुवं ब्रह्माणं सत्यलोकगमनाय अनुज्ञाप्य ततः प्राक् प्राग्वदेव तृणचरणादिचेष्टाभिरवस्थितान् वत्सान् यथापूर्वं पूर्वोपदेशनादिकमनतिक्रम्य अपरित्यज्य वर्तमानाः सखायो यस्य यत्र तत् । समासान्त आर्षः । सखीति शुद्धः पाठः । यद्वा । यथा यथावस्थिताः पूर्वसखा पूर्वे सखायो यत्र तत् स्वकं स्वभोजनस्थानं पुलिनमानिन्ये । एवं च प्रथमं बालान् पुलिनमानीय ततस्तत्र वत्सानानिन्ये इति भावः ॥ ४२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

समेति पुण्ययशसो मुरारेः पादावेव पल्लवे पद्मे ते एव प्लवो नौका तं ये समाश्रिताः कथंभूतं महतां ब्रह्मादिदेवानां महामुक्तानां गोलोकब्रह्मपुरनिवासिनां च पदं आश्रयभूतं तेषां भवांबुधिः वत्सपदं सदृशोस्ति किंच परं पदं सर्वोत्कृष्टं ब्रह्म पुराख्यं स्थानं तेषां पदं प्राप्यं भवति पद्यते प्राप्यते तत् पदं विपदां यत् पदं आधारभूतं संसरणं तेषां तन्न भवति ॥ ४१ ॥ यत् कौमारे कृतं तत् पौगंडे कथमुक्तमिति यद्वचनं प्रति इह आख्याने त्वयाऽहंपृष्टः ॥ ४२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं अभिष्टूय स्तुत्वा जगद्धाता ब्रह्मा, भूमानं संप्रदर्शितवत्सवत्सपादिरूपेण बहुभावं सन्तमपि लीलया संकुचितसर्वात्मकविग्रहं भगवन्तं, त्रिस्त्रीन् वारान्, परिक्रम्य, पादयोः नत्वा प्रणम्य, अभीष्टं स्वधाम सत्यलोकं, प्रत्यपद्यत जगाम ॥ ४१ ॥ तत इति ॥ ततः, भगवान् कृष्णः, स्वस्माद्भवतीति स्वभूश्चतुर्मुखस्तं, अक्षिसंकोचेनेति शेषः । अनुज्ञाप्य अनुज्ञां प्रदाय, प्रागवस्थितान् स्वचक्षुर्विषयप्रदेशे ब्रह्मणाऽऽनीयावस्थापितान्, वत्सान्, यथापूर्वं सखायो यस्मिंस्तत्, स्वकं स्वेन पूर्वमधिष्ठितं पुलिनं प्रति, आनिन्ये ॥ ४२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तत इति : १०.१४.४२.

विना ब्रह्मानुसन्धानोपरतिं नैति लौकिकीम् । दृष्टिं योगीत्यजे याते युक्तं तत्तादृगीक्षणम् ॥ ५० ॥

कृष्णप्रिया

श्रीशुकदेव जी ने कहा–राजन् ? इस प्रकार ब्रह्माजी ने अनन्त कोटि ब्रह्माण्ड के स्वरूप से दर्शन कराने वाले अपने सर्वथा इष्ट भगवान् श्रीकृष्ण की स्तुति करने के बाद प्रभु के श्री चरणों में दण्डवत् प्रणाम किया पुनः तीन प्रदक्षिणा करके

भगवान के अनुग्रह स्वरूप निज धाम सत्यलोक की ओर प्रस्थान किया ॥ ४१ ॥ भगवान् श्रीकृष्ण ब्रह्माजी को प्रस्थान के लिये अनुज्ञा देकर यथा पूर्व घास चुरकर अब स्थित उन बछड़ों को हाँक कर उस अपने यमुना पुलिन पर ले गये जहाँ पर प्यारे नन्द लालन के मित्र गोपाल बालक अपने-अपने भोजन स्थल पर जिस-जिस अवस्था में बैठे थे ॥ ४२ ॥

एकस्मिन्नपि यातेऽब्दे प्राणेशं चान्तराऽऽत्मनः । कृष्णमायाहता राजन् क्षणार्धं मेनिरेऽर्भकाः ॥ ४३ ॥
किं किं न विस्मरन्तीह मायामोहितचेतसः । यन्मोहितं जगत् सर्वमभीक्ष्णविस्मृतात्मकम् ॥ ४४ ॥
ऊचुश्च सुहृदः कृष्णं स्वागतं तेऽतिरंहसा । नैकोऽप्यभोजि कवल एहीतः साधु भुज्यताम् ॥ ४५ ॥
ततो हसन् हृषीकेशोऽभ्यवहृत्य सहार्भकैः । दर्शयंश्चर्माजगरं [1]न्यवर्तत वनाद् व्रजम् ॥ ४६ ॥

बर्हप्रसूनवन[2]धातुविचित्रिताङ्गः [3]प्रोद्दामवेणुदलशृङ्गरवोत्सवाढ्यः ।
वत्सान् गृणन्ननुगगीतपवित्रकीर्तिर्गोपीदृगुत्सवदृशिः प्रविवेश गोष्ठम् ॥ ४७ ॥

अद्यानेन महाव्यालो यशोदानन्दसूनुना । [4]हतोऽविता वयं चास्मादिति बाला व्रजे जगुः ॥ ४८ ॥

कर्दमक्षमा

अन्वयः -राजन् ! अर्भकाः आत्मनः प्राणेशं च अन्तरा एकस्मिन् अब्दे याते अपि कृष्णमायाहताः क्षणार्धं मेनिरे ॥४३॥ अभीक्ष्णविस्मृतात्मक सर्वं जगत् यन्मोहितं मायामोहितचेतसः इह किं किं न विस्मरन्ति ॥ ४४ ॥ ते सुहृदः स्वागतं कृष्णं अतिरंहसा ऊचुः च एकः अपि कवलः न अभोजि इतः एहि साधु भुज्यताम् ॥ ४५ ॥ ततः हृषीकेशः अर्भकैः सह हसन् अभ्यवहृत्य आजगरं चर्म दर्शयन् वनात् व्रजं न्यवर्तत ॥ ४६ ॥ बर्हप्रसूनवनधातुविचित्रिताङ्गः प्रोद्दामवेणुदलशृङ्गरवोत्सवाढ्यः अनुगगीतपवित्रकीर्तिः गोपीदृगुत्सवदृशिः वत्सान् गृणन् गोष्ठं प्रविवेश ॥ ४७ ॥ अद्य अनेन नन्दसूनुना महाव्यालः हतः च वयं अस्मात् अविताः इति व्रजे बालाः ऊचुः ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वेतावंतं कालं कथं तत्रैवोपविष्टाः कथं च क्षुत्पिपासादिविस्मरणमत आह एकस्मिन्निति श्लोकद्वयेन । अब्देऽपि याते प्राणेशं कृष्णमंतरा च विनापि प्रियविरहे क्षणोऽपि वर्षाधिको भवति तथापि मायाहताः क्षणार्धं मेनिरे ॥ ४३ ॥ यद्यया मायया मोहितं जगदभीक्ष्णं पुनःपुनर्विस्मृतात्मकं विस्मृत आत्मैव येन तत्तथा ॥ ४४ ॥ अत एवमूचुश्च त्वयाऽतिवेगेन स्वागतं सम्यग्वत्सानानीय आगतम् । एकोऽपि ग्रासस्त्वां विनाऽस्माभिर्नाभोजि न भुक्तः । इत एहि साधु अविक्षेपेण भुज्यतामिति ॥ ४५ ॥ अभ्यवहृत्य भुक्त्वा ॥ ४६ ॥ प्रोद्दामो वेण्वादिस्तस्य रवैरुत्सवस्तेनाढ्यः संपन्नः । गृणन्नुपलालनराह्वयन् । गोपीदृगुत्सवदृशिः गोपीदृशामुत्सवरूपा दृशिर्दर्शनं यस्य सः ॥ ४७ ॥ यशोदानंदसूनुनेति बहूनामुक्तिः सहैव दर्शिता । केचिदाहुर्यशोदासूनुनेति अपरे नंदसूनुनेति । यद्वा यशोदां नंदयतीति यशोदानंदः स चासौ सूनुश्चेति तथा तेन । अस्मान्महाव्यालाद्वयं चाविता रक्षिताः ॥ ४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कौतुकाविष्टः शङ्कते—नन्विति । ते गोपाः । तत्रैव पुलिने । अब्दे वर्षे । आत्मनो जीवमात्रस्य । प्राणेशं स्वामिनम् । मायात्र योगमाया तयैव सर्वेषां गोपगोपीनन्दादीनामब्दकालोऽपि मुहूर्तयामदिनमासर्त्वादिपरिवृत्ति विनैव पञ्चपलात्मकक्षणार्धकाल एव साधितमिति न तस्या अचिन्त्यवैभवायाः किमपि दुःसम्पाद्यमिति ॥ ४३ ॥ इह संसारे अभीक्ष्णं सुषुप्तौ शास्त्रे वा ज्ञातस्यापि देहद्वयातिरिक्तस्य तस्य मुहुर्विस्मरणादिति योगमायैव बहिरंगमायात्वेनात्र ज्ञेया अतो भगवदिच्छाबलायास्तस्यास्तादृशेष्वपि मोहनत्वं घटत एवेति भावः ॥ ४४ ॥ अतो मायामोहितत्वात् । स्वागतं सर्ववत्सानयनपूर्वकं सुखेनागतमित्यर्थः । एवं वर्षेऽप्यतीते तथैव कवलादिस्थितिः श्रीकृष्णेच्छयैव जातेति ज्ञेयम् । अतिरंहसेति—दूरगतवत्सानयने घटिकैका त्ववश्यं गमिष्यतीत्यस्माभिर्विचारितम्, त्वया तु क्षणार्द्धेनैवागतमिति भावः । एकोऽपि ग्रासस्त्वया नाभोजि श्रीहस्ते पूर्वकवलवृत्तेः अत इतः अस्मिन् सर्वेषामस्माकं मण्डलस्थाने एहि प्रविश साधुवत्साद्यन्वेषणे वैयग्र्यं त्यक्त्वा सम्यग्यथा स्यात्तथा भुज्यतामिति तोषिणीचक्रवर्तीकारौ ॥ ४५ ॥ ततो बालोक्तिश्रवणानन्तरम् । आजगरम् अघासुरदेहसम्बन्धि । हसन्निति तदानन्ददर्शनात् । अभ्यवहृत्येति । वर्षे गतेऽप्यत्र व्यञ्जनादीनां क्षणार्द्धमात्रपरिणामित्वं जातम् । दर्शयन्नित्याह—हे सखायः अद्य मृतोऽयं सर्पः वसारक्तादिकलिलो वर्त्तत इति पश्यत तद्वधस्य व्रजे प्रख्यापनार्थमेतावत्कालपर्य्यन्तं तत्तदाच्छादनं सर्वं योगमायाकृत्यमेवेति ॥ ४६ ॥ नव धातवस्तु—हरितालगैरिकाहिङ्

---

१. निववर्त–इति कस्यचित् । २. नव–श्रीधर. वंशी. वीर. विज. । ३. प्राध्मातवेणु–वीर. । ४. हतो नीतः–वीर. ।

लुमनःशिलसौराष्ट्रीसौवीरसौभाग्यतुत्थवोलाख्याः । यद्वा—नूयन्ते इति नवा देवद्विजादयः, तैर्धीयन्ते धार्यन्त इति नवधातूनि चन्दनानि, दधातेस्तुः । तानि च —श्वेतरक्तागुर्वादिभेदेनाऽनेकानि तैर्विचित्रिताङ्गः प्रोद्दामो महान् । उपलालनैरौष्ठसंयोगजशब्दादिभिः ।। इति निजप्रियसहचरबालकवत्ससङ्गतिजनितहर्षभरतो वन्यवेशादिविशेषेण व्रजस्त्रीजनानां नेत्रानन्दं सञ्जनयन् व्रजान्तर्जगामेत्याह—बर्हेति । वन धातुर्गैरिकादिः । वनपदं गृहलभ्यसुवर्णादिव्यवच्छेदार्थम् । प्राचीनपुस्तकेषु तु 'नवधातुः' इति पाठ एव, सोऽप्यर्थैक्येन सम्यगेवेति बर्हादिभिर्विशेषणचित्रितानि भूषितान्यङ्गानि येन, किं वा सखिभिर्यस्य । अतः प्रोद्दामोऽत्युच्चो यो वेणुदलशृङ्गाणां रवस्तेन स एवोत्सवः किं वा स चोत्सवश्च नृत्यक्रीडागीतादिरूपस्तेनाढ्यः परमसमृद्धिमान् । अत एवानुगैस्तैरेव बालकैर्गीता हर्षभरेण गीतवत्सुस्वरं तालादिसंयुतमुच्चैः कीर्त्तिता पवित्रा निर्मला जगत्पावनी वा अघासुरादिवधरूपा यस्य । गोपीशब्देन श्रीयशोदाद्याः सर्वा एव व्रजस्त्रियः, तासामपीदानीमेव श्रीकृष्णहर्षभरेणाधिकं नेत्रानन्दोत्पत्तेः ।। ४७ ।। लोके मातापित्रोरुभयोर्नामग्रहणपूर्वकं पुत्रनामोच्चारणं प्रायो न दृश्यत इत्यस्वारस्येनाह यद्वेति । केचिद्यशोदासुहृदः, अपरे नन्दसुहृदः, पितृतो मातुरधिकस्नेहाद्बालानां वृद्धनामोच्चारणस्याऽयोग्यत्वाद्वा मातृकुलोत्पन्नास्तु—यशोदासूनुरयमिति वदन्ति । तदन्ये नंदसूनुरिति तोषिणीकाराः । विश्वनाथस्तु यशोनंदयोर्भाग्यमानंदो यशो वा यस्मात्तथाभूतेन सूनुना शाकपार्थिवादित्वान्मध्यमपदलोपि कर्मधारयमाह ।। ४८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथा तेषां कालाज्ञानं च माययैवेत्याह—आत्मनः स्वस्य प्राणेशम् आत्मनः श्रीकृष्णस्य मायाहता इति वा माया यद्यपि ब्राह्म्येव तथाऽपि श्रीभगवताऽनुमोदिता सती भागवत्येव संवृत्तेति अतः श्रीबलदेवचिन्तने "प्रायो मायाऽस्तु मे भर्तुः" इति तत्तच्चासम्भवमपि तदिच्छाशक्तेः सर्वशक्तितो बलवत्त्वान्नात्यसम्भवम् अतस्तया हताः प्रतिबद्धाः "मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः" इत्यमरः । प्राणेशत्वे हेतुः कृष्णं बल्लवेन्द्रकुमारम् । किञ्च, अर्भकाः श्रीनन्दव्रजबालकाः क्षणार्द्धं पलपञ्चकं मेनिरे तत्र तेषां प्रतीतौ मुहूर्त्तयामदिवसऋत्वादिपरिवर्त्तं विनैव तस्य कालस्य स्थिते हे राजन्निति परमाद्भुतत्वात ।। ४३ ।। तत्र दृष्टान्तमाह—कि किमिति । इह जगति अभीक्ष्णमिति सुषुप्तौ शास्त्रे वा ज्ञातस्याऽपि देहद्वयातिरिक्तस्य तस्य मुहुर्विस्मरणात् इति मायामहिमोक्तेः अतो भगवदिच्छाबलात्तस्यास्तादृशेष्वपि मोहनत्वं घटेत इति भावः ।। ४४ ।। स्वागतं सर्ववत्सवर्गानयनपूर्वकं सुखेनागतमित्यर्थः । एवं वर्षेऽप्यतीते तथैव कवलादिस्थितिः श्रीभगवदिच्छावैभवेन ज्ञेया अन्यत्तैः यद्वा, त्वयाऽप्येकोऽपि कवलो नाऽभोजि श्रीहस्ते पूर्वकवलवृत्तेः अतः इतः अस्मिन् सर्वेषामस्माकं मण्डलमध्यस्थाने एहि प्रविश साधुवत्साद्यन्वेषणे सम्प्रत्यपि तत्सम्भालने वा जातवैयग्र्यं त्यक्त्वा सम्यक् यथा स्यात्तथा भुज्यताम् ।। ४५ ।। हसन्निति तेषां मायामुग्धानां वाक्यश्रवणात् दुःखादिव्यञ्जकोक्तिश्रवणेन प्रहर्षोदयाच्च हृषीकेश इति तेषां परमप्रेष्ठत्वात् व्रजं प्रति व्यवर्तत, निरवर्तेदिति पाठे स एवार्थः परस्मैपदमार्षम् आजगरं चर्म दर्शयन्निति अघासुरवधस्य व्रजे कथनाय इति तच्चर्माऽपि श्रीभगवता तावत् कालं माययाऽऽच्छाद्य तथैव रक्षितमासीदिति ज्ञेयम् ।। ४६ ।। इति निजप्रियसहचरबालकवत्ससङ्गतिजनितहर्षभरतो वन्यवेषादिविशेषेण व्रजस्थस्त्रीजनानां नेत्रानन्दं सञ्जनयन् व्रजान्तर्जगामेत्याह—बर्हेति । वनधातुर्गैरिकादिः वनपदं गृहलभ्यसुवर्णादिव्यवच्छेदार्थं बर्हादिभिर्विशेषेण चित्रितानि भूषितान्यङ्गानि येन किं वा सखिभिर्यस्य सः अतः प्रोद्दामोऽत्युच्चैः यो वेणुदलशृङ्गाणां रवः तेन स एव वोत्सवः किं वा स च उत्सवश्च नृत्यक्रीडागीतादिरूपस्तेनाढ्यः परमसमृद्धिमान् अत एवानुगैस्तैरेव बालकैः गीता हर्षभरेण गीतवत् सुस्वरं तालादिसहितमुच्चैः कीर्तिता पवित्रा निर्मला जगत्पावनी वा कीर्तिः अघासुरवधादिरूपा यस्य गोपीशब्देन यशोदादयः सर्वा एव ब्रजस्त्रियः तासामपीदानीमेव श्रीकृष्णहर्षभरेणाधिकनेत्रानन्दोत्पत्तेः एवं सख्यांशेन श्रीकृष्णाविर्भावेभ्यस्तेभ्योऽप्येषामाधिक्यं दर्शितम् ।। ४७ ।। मातृकुलोत्पन्नैर्यशोदासूनुना अन्यैर्नन्दसूनुतेति प्रोक्तमिति ज्ञेयम् । यद्वा अतिसन्तोषेण द्वयस्यैवाविशेषतः प्रशंसा द्वाभ्यामपि ताभ्यां गोकुलकुलभाग्यद्योतनाच्च।।४८।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आत्मजः स्वस्य प्राणेशमात्मनः श्रीकृष्णस्य मायाहता इति वा, माया यद्यपि ब्राह्म्येव, तथापि श्रीभगवतानुमोदिता सती भागवत्येव संवृत्ता । अतः प्राक् श्रीबलदेवचिन्तने (भा० १०।१३।३७) 'प्रायो मायास्तु मे भर्त्तुः' इति एवं सर्व्वमेव संगच्छते । तच्च पूर्व्वं लिखितमेव, अतस्तयाहता व्याप्ताः । प्राणेशत्वे हेतुः—कृष्णं श्रीव्रजेन्द्रकुमारम् । किञ्च, अर्भकाः श्रीनन्दव्रजबालकाः । हे राजन्निति परमाद्भुतत्वात् ॥ ४३ ॥ इह जगति विस्मृत आत्मैव, किं वा सर्व्वव्यापको भगवानपि येन तत् सर्व्वमितीन्द्रादि-मोहापेक्षया । अभीक्ष्णमिति कथञ्चित् कदाचित् स्मृतस्य स्मारितस्यापि वा मुहुर्विस्मरणादिति मोह-महिमोक्तेः ॥४४॥ स्वागतं सर्व्ववत्स-वर्गानयनपूर्व्वकं सुखेहागतमित्यर्थः । अन्यत्तैर्व्याख्यातम्, यद्वा, अतिरंहसा स्वागतमित्यस्य लक्षणम्, नैकोऽपीति, यद्वा, त्वयैकोऽपि कवलो नाभोजि,—श्रीहस्ते पूर्वकवलवृत्तेः । अत इतोऽस्मिन् सर्व्वेषामस्माकं मण्डलमध्यस्थाने एहि प्रविश । साधु निजोदरपरिपूरणादिप्रकारेण सम्यग् यथा स्यात्तथा भुज्यताम् ॥ ४५ ॥ हसन्निति तेषां मायामुग्धवाक्यश्रवणात् किंवा दुःखादिव्यञ्जकोक्त्यश्रवणेन प्रहर्षोदयादर्भकैः सहाभ्यवहृत्येतितैर्विना स्वयं तेनैतावन्तं कालं किमपि नाभोजीति सूचयति । ननु तर्हि श्रीयशोदा-

दिभिस्तत् कथं सोढ़म् ? तत्राह – हृषिकेशः सर्वेन्द्रियवृत्तिप्रवर्त्तक इति भुज्यतामित्यनुकारादिचातुर्य्येण तेषां चित्ते ग्राहितामित्यर्थः, यथा श्रीलक्ष्मणेन श्रीरघुनाथादिषु, तद्‌वृत्तञ्च पुराणेषु प्रसिद्धमेव। यद्वा, तदानीं स्वयं प्रीतिरहितोऽपि केवलं तेषां सन्तोषार्थमभुङ्क्तेः, इदानीञ्च निजरसनेन्द्रियादिप्रवर्त्तनेन तत्तद्‌रसगन्धादि-ग्रहणपूर्वकं परमप्रीत्या भुङ्क्तेवेत्यर्थः। व्रजं प्रति न्यवर्त्तत, निववर्त्तेति पाठे स एवार्थः। आजगरं चर्म्मं दर्शयन्नित्यघासुरवधस्य व्रजे कथनाय तत्स्मरणार्थमिति तच्चर्म्मापि श्रीभगवता तावत्कालं माययाच्छाद्य रक्षितमासीदिति ज्ञेयम् ॥ ४६ ॥ इति निजप्रियसहचरबालकवत्ससंगतिजनितहर्षभरतो वन्यवेषादिविशेषेण व्रजस्थस्त्रीजनानां नेत्रानन्दं सञ्जनयन् व्रजान्तर्जगामेत्याह – बर्हेति। वनधातुगैरिकादिबर्हादिभिर्व्विशेषेण चित्राणि भूषितान्यंगानि येन, किंवा सखिभिर्यस्य सः। अतः प्रोद्दामोऽत्युच्चो यो वेणुदलशृङ्गाणां रवस्तेन स एवोत्सवः, किंवा उत्सवश्च नृत्यगीतादिरूपस्तेनाढ्योऽत एवानुगैस्तैरेव बालकैर्गीता हर्षभरेण गीतवत् सुस्वर तालादिसहितमुच्चैः कीर्त्तिता पवित्रा निर्म्मला जगत्पावनी वा कीर्त्तिरघासुरवधादिरूपा यस्य। गोपीशब्देन श्रीयशोदादयः सर्वा एव व्रजस्त्रियस्तासामपीदानीमेव श्रीकृष्णदर्शनहर्षभरेणाधिकनेत्रानन्दोत्पत्तेः, यद्वा, श्रीकृष्णैकप्रिया भगवत्यः श्रीराधादयस्तन्नेत्राणामेव विशेषतस्तद्दर्शनोत्सवसिद्धेः। अन्यत्तैर्व्याख्यातम्, यद्वा, गोपीनां दृग्भिस्तत्कर्त्तृकसाक्षाद्दर्शनैरुत्सवो यस्यास्तथाभूता दृशिर्दृष्टिर्यस्येत्यन्योऽन्यं सन्दर्शनसुखमुक्तम्। एतच्च व्रजान्तरेव बोद्धव्यम्–तदानीं वत्सपालने व्रजाद्दूरचरत्वेनाति विरहानुत्पत्त्या व्रजाद्बहिरग्रेऽनभिगमनात्। तच्चाग्रे गोपालने रसविशेषाविर्भावसमये व्यक्तं वक्ष्यते ॥ ४७ ॥ यशोदाया आनन्दरूपमूनुनेति तस्य तत्कर्म्मणा तस्या एव विशेषतः सन्तोषोत्पत्तेः ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आत्मनः प्राणेशं कृष्णमन्तरा विना एकस्मिन्नब्दे यातेऽपि ब्रह्ममाया हृता अर्भकाः क्षणार्द्धं मेनिरे इत्यन्वयः। अथवा मायाहृता मायया कृष्णकृपया प्राप्ता व्याप्ताः "हृन हिंसागत्योः" इति धातोः। अन्यथा श्रीकृष्णस्य विरहे क्षणस्यापि कथं तेषां सहनं स्यात् ? एवं रात्र्यादावपि ज्ञेयम् ॥ ४३ ॥ कृपाव्याप्तत्वमेवाभिनयेनाह माया श्रीभगवत्कृपा तया मोहितचेतसः किं किं विषयं न विस्मरन्ति यथाऽत्रैव श्रीयशोदायाः कुन्त्याः वसुदेवदेवक्योः कंसवधानन्तरम् अक्रूरादेश्च श्रीभगवदिच्छया तत्तत्त्वविस्मरणं श्रीकृष्णनाटयानुसारिकमेव वर्णितमिति तदेवाह—यथा मायया इच्छया विचित्रशक्त्या वा जगत् चिदचिद्रूपम् अभीक्ष्णं वारंवारं विस्मृतस्वस्वरूपरूपकं वर्त्तत इति ॥ ४४ ॥ अत एव ते ऊचुरित्यादि, श्लोकः स्पष्टार्थः ॥ ४५ ॥ हृषीकाणामीशः देहेन्द्रियप्राणमनोविशिष्टात्मसमूहनियन्ता परमात्मा तैः सहाभ्यवहृत्य भुक्त्वा व्रजं न्यवर्त्तत इत्यनेन तेषां सर्वक्रिया श्रीभगवत्कृतैवेति ॥४६॥ बर्हादिभिः विचित्रितानि अङ्गानि येन तत्र बर्हेण मुकुटशोभा कृता प्रसूनैः मालारूपैः सर्वाङ्गालङ्कारः वनेन जलेन धातुभिस्तिलकादिरचनेति विभागः नवधातु इति वा पाठः वेणुरवेण शृङ्गरवेण प्रोद्दामः प्रबलः उत्सवः तेनाढ्यः वत्सान् तत्तन्नाम्नानुच्चारणेन गृणन् गोपीदृशानुत्सवदायि दर्शनं यस्य सः गोष्ठं प्रविवेश ॥ ४७ ॥ महाव्यालः अघासुरः अद्येति वर्षानन्तरमुक्तावपि मायामोहितत्वेन तेषाम् एकदिवसलीलाज्ञानं बाला इति च इदमेव उपोद्बलयति व्रजे व्रजस्य पुरुषस्त्रीषु जगुरकथयन् ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नन्वेतावन्तं कालमेते कथं तत्रैवोपविष्टा कथं वा तेषां क्षुत्पिपासादिविस्मरणं तत्राह–एकस्मिन्निति द्वाभ्याम्। अब्देऽपि याते आत्मनः प्राणेशं कृष्णमन्तरा विरहेणाऽपि प्रियविरहक्षणोपि वर्षाधिको भवति तथापि हे राजन् ! कृष्णस्य मायया हृता मोहिता क्षणार्द्धं मेनिरे ॥ ४३ ॥ भगवन्मायया मोहितानि चेतांसि येषां तेऽत एव किं किं न विस्मरन्ति ? सर्वं विस्मरन्त्येव यस्य मायया मोहितं जगदभीक्ष्णं पुनः पुनः विस्मृत आत्मैव येन तत्तथा किमुत क्षुत्पिपासादिकमिति भावः ॥ ४४ ॥ अत एवैवमूचुरित्याह–ऊचुश्चेति। ते त्वयाऽतिवेगेन स्वागतं सम्यगागतम् एकोऽपि ग्रासस्त्वां विनाऽस्माभिर्नाभोजि न भुक्तः अत एहि साध्वविक्षेपेण भुज्यतामिति ॥ ४५ ॥ ततोऽर्भकसहितोऽभ्यवहृत्य भुक्त्वा वनाद्व्रजं प्रति न्यवर्त्तताजगाम ॥ ४६ ॥ कथम्भूतो न्यवर्त्तत तत्राह–बर्हेति। बर्हादिभिर्विचित्रितान्यङ्गानि यस्य धातवो गैरिकादयः प्रोध्माताः दाध्मायमानाः ये वेणवः दलानि च तरुपर्णानि वेष्टनीकृत्य मुखवायुपूरितानि शृङ्गाणि च तेषां रवेण य उत्सवो हर्षस्तेनाढ्यः वत्सान् गृणन्हुङ्कारादिभिः प्रेरयन्नित्यर्थः। अनुगैर्वत्सपैर्गीता पवित्रा कीर्तिर्यस्य गोपीदृशामुत्सवरूपादृशिर्दर्शनं यस्य तथाभूतो गोष्ठ प्रविवेश ॥ ४७ ॥ ततो व्रजे आगता वत्सपा जगुर्जगदु किमिति तदाह–अद्यास्मिन्नहन्यनेनाजगरो हतः अस्मान्महाव्यालमुखाद्द्वयमनेन नीताः व्रजं प्रापिताश्चेति ॥ ४८ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

आत्मनः स्वस्य प्राणेशं कृष्णमन्तरा विना अब्देऽपि याते तथापि कृष्णमायाहृता अर्भका क्षणार्द्धं मेनिरे अयमाशयः श्रीकृष्णं विना पूर्वं क्षणार्द्धमपि वर्षाधिकं भवति तदेवाद्य कृष्णमायामोहितास्ते अब्दमपि क्षणार्द्धं मेनिर इत्यर्थः ॥ ४३ ॥ अहो! भगवन्मायावैभवमिति मन्वानं प्रत्याह— किंकिमिति। यया मायया अभीक्ष्णं पुनःपुनर्विस्मृतात्मकं विस्मृत आत्मा स्वात्मा श्रीकृष्णाऽऽख्यो येन तत्तथा तथा च वक्ष्यति श्रीशुकः "कृष्णमेनमवेहित्वमात्मानमखिलात्मनाम्" इति ॥ ४४ ॥ अतिवेगेन त्वया

स्वागतं एकोऽपि ग्रासस्त्वां विनास्माभिर्नाभोजि न भुक्तः इत एहि साधु धैर्येण भुज्यताम् ।। ४५ ।। अभ्यवहृत्य भुक्त्वा स्पष्टमन्यत् ।। ४६ ।। प्रोद्दाम उत्कटो वेण्वादिरवैरुत्सवस्तेनाढ्यः सम्पन्नः वत्सान् गृणन् उपलालनैराह्वयन् गोपीदृगुत्सवदृशिः गोपीनां दृशां दृष्टीनां उत्सवरूपा मङ्गलरूपा दृशिर्दर्शनं यस्य सः ।। ४७ ।। यशोदानन्दयोः सूनुना यशोदासूनुना नन्दसूनुना इति वा बहूनामुक्तिः स्पष्टमन्यत् ।। ४८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

"ऊचुश्च सुहृदः कृष्णं स्वागतं तेऽतिरंहसा" इति च वत्सानितो वत्सपान्नीत्वान्यत्रेत्यनेनान्यत्र सकृदीक्षितानामपि तेषां पुनस्तत्रावस्थापनं तेषां तु तदपि न ज्ञातमासीदिति ज्ञापयति, अत्र सर्वा ह्यनुपपत्तिर्माययैव वारिता सा च माया ब्रह्मणोऽपि श्रीभगवदनुमोदितत्वात्तदीयैव जातेति ज्ञेयम् अतः श्रीसङ्कर्षणेनोक्तम् "प्रायो मायाऽस्तु मे भर्तुः" इति अभीक्ष्णं यया मोहितम् ।।४५–४६।। गोप्यः श्रीयशोदादयः ।। ४७–४८ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अत्र तावत् कालाज्ञानं तथैव कवलपाणेः कृष्णस्यागतस्य तैः सह तथैव भोजनलीलाशेषादिकं दुस्तर्क्ययोगमायावैभवमेवेत्याह–एकस्मिन्नित्यादिचतुर्भिः । आत्मनः स्वस्य प्राणेशं कृष्णमन्तरा विनाऽपि योगमायया आहृता आवृताः ।। ४३ ।। मोहनसाधर्म्येण योगमायया बहिरङ्गमायां दृष्टान्तयति–किं किमिति । विस्मृत आत्मा येन तत् तथैव योगमायया वर्षं व्याप्य कृष्णविरहदुःखं ते विस्मारिता इति भावः ।। ४४ ।। अर्भका ऊचुः, अतिरंहसा सुखेनैवागत दूरगतवत्सानयने घटिकैका त्ववश्यं भविष्यतीत्यस्माभिर्विचारितं त्वया तु क्षणार्द्धेनैवागतमिति भावः । एकोऽपि कवलो ग्रासस्त्वया विना नाभोजि तस्मादित एहि ।। ४५ ।। हसन्निति, तेषामानन्ददर्शनात् अभ्यवहृत्येति वर्षे गतेऽप्यन्नव्यञ्जनादीनां क्षणार्द्धमात्रपरिणामित्वं जातं तच्च न वैरस्यं जनयतीति भावः । दर्शयन्नित्यहो सखायः अद्य मृतोऽयं सर्पो वसारक्तादिकलिलो वर्त्तत एवेति पश्यतेति तद्वधस्य व्रजे प्रख्यापनार्थं योगमाययैव तावत्कालपर्य्यन्तं तत्तदाच्छादितमासीदिति ज्ञेयम् वनात् वनविहरणात् व्रजञ्जगामेति शेषः ।। ४६ ।। गृणन् उपलालनैराह्वयन् गोपीनां वत्सलानां दृशामुत्सवरूपा दृशिदर्शनं यस्य सः ।। ४७ ।। यशोदानन्दयोर्भाग्यमानन्दो यशो वा यस्यात्तथाभूतेन सूनुनेति शाकपार्थिवादित्वान्मध्यमपदलोपी कर्मधारयः तस्मान्महाव्यालाद्वयश्चाविताः ।। ४८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आत्मनः प्राणेशं श्रीकृष्णमन्तरा विना एकस्मिन्नब्दे यातेऽपि कृष्णमायया हृता मोहिता अर्भकाः क्षणार्द्धं मेनिरे ।। ४३ ।। विस्मृत आत्मा येन तत् ।। ४४ ।। ते त्वया अतिरंहसा अतिवेगेन स्वागतं सम्यगागतम् एकोपि कवलस्त्वां विना अस्माभिर्नाभोजि न भुक्तः एहि साधु अविक्षेपेण भुज्यताम् ।। ४५ ।। ततस्तेषामुक्तितः हसन् अभ्यवहृत्य भुक्त्वा ।। ४६ ।। बर्हादिभिर्विचित्रितानि विभूषितान्यङ्गानि येन सः प्रोद्दामो यो वेण्वादिरवैरुत्सवः तेनाढ्यः सम्पन्नः तत्र दलानि मधुरशब्दोदयार्थमावेष्टितानि पिप्पलादिपत्राणि गोपीदृशामुत्सवरूपा दृशिर्दर्शनं यस्य सः वत्सान् गृणन् उपलालयन् ।। ४७ ।। अस्मात् महाव्यालात् ।। ४८ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अत्र समयापरिज्ञानं तथैवागतस्य कवलपाणेर्नन्दसूनास्तैः सह सजग्धिलीलासमापनञ्च तस्याचिन्त्ययोगमायाविलसितमेवाह–एकस्मिन्निति चतुर्भिः । आत्मनः स्वस्य प्राणेशं कृष्णमन्तरा विना कृष्णस्य मायया योगाख्यया आहृता आवृताः क्षणार्द्धं पलपञ्चकम् ।। ४३ ।। मोहनसाधर्म्येण योगमायां त्रिगुणां दृष्टान्तयति – किं किमिति । इह जगति मायया त्रिगुणया मोहितानि चेतांसि येषां ते किं किं न विस्मरन्ति अभीक्ष्णमिति विस्मृतः सुषुप्तौ शास्त्रे वा देहद्वयातिरिक्ततया ज्ञातोऽप्यात्मा येन तादृशं भवति तथाच वर्षं व्याप्य कृष्णविच्छेददुःखं सखायो योगमायया विसस्मरुरिति ।।४४।। ऊचुश्चेति । त्वया अतिरंहसा क्षणार्द्धेनैव सुखेनागतं अस्माभिस्तु घटिकावश्यं भाविनीति दृष्टं त्वया विना अस्माभिरेकोऽपि कवलो नाभोजि तस्मादित एहि ।। ४५ ।। ततो हसन्निति तेषां हर्षदर्शनात् वर्षे गतेऽपि भक्ष्याणामवैरस्यं तस्य क्षणामवैरस्यं तस्य क्षणार्द्धे परेशात् तेषां रसात्मकत्वाच्च चर्माजगरमिति शुष्कस्यापि तस्य सद्यो मृतत्वप्रदर्शनं तद्वधचरितस्य व्रजे व्याख्यानार्थं वनाद् वनविहाराद् व्रजं प्रति न्यवर्तत जगामेत्यर्थः ।। ४६ ।। बर्हेति वनधातुर्गैरिकादिः प्रोद्दामोऽत्युच्चो वेण्वादिरवस्तेनोत्सवेनाढ्यः अनुगैस्तैर्बालैर्गीता पवित्रा लोकपावनी कीर्त्तिरघवधादिरूपा यस्य सः, वत्सान् गृणन्नुपलालनैराह्वयन् गोपीनां श्रीयशोदादीनां वत्सलानां दृशामुत्सवरूपदृशिर्दर्शनं यस्य ।। ४७ ।। अद्यानेन महाव्यालो हतः तस्माद्वयञ्च अविता रक्षिता कीदृशेनेत्याह यशोदेति मातृपक्षीयैर्यशोदासूनुरिति पितृपक्षीयैर्नन्दसूनुरिति चोक्तेनेत्यर्थः ।। ४८ ।।

श्रीसुबोधिनी

तदा बालकाः समागतं भगवन्तं कथं ज्ञातवन्त इत्याकाङ्क्षायामाहैकस्मिन्नपीति, एकस्मिन्नप्यब्दे वर्षे याते गत आत्मनः प्राणेशमन्तरा भगवन्तं विनाल्पोपि कालो यत्र विरहाद् भूयान् भवितुमर्हति तत्र तावन्तमपि कालं कृष्णमायया आहृता व्याप्ता न

तु ब्रह्ममायया **क्षणार्धमेवार्भका मेनिरे** ॥ ४३ ॥ ननु कथमेतावतः कालस्य विस्मरणम् ? तत्राह **किं किमिति**, **मायामोहितचेतसः किं किं न विस्मरन्ति ?** **यद्** यस्मात् **सर्वमेव जगत् मोहितं** सदभीक्ष्णं सर्वदैव **विस्मृतात्मकं** विस्मृत आत्मा येन तादृशम् ॥४४॥ अत एव **स्वसुहृदं कृष्णमूचुस्ते** त्वयातिरंहसा **स्वागतमि**ति, तत्र हेतुत्वेनाहु**र्नैकोप्यभोजि कवल** इति तव गमनानन्तरमे**कोपि कवलो नाभोजि** न भुक्तः, अनेन भगवति प्रेमापि सूचितं, अत एवैहि, मध्ये पूर्ववत् तिष्ठ, **साधु** भुज्यतामिति ॥ ४५ ॥ ततो भगवता तथैव कृतमित्याह **तत** इति, **अर्भकैः सहाभ्यवहृत्य** भुक्त्वाघासुरस्य च चर्म प्रदर्शयन् **वनाद् व्रजं** प्रति **न्यवर्तत** ॥ ४६ ॥ समागच्छन्तं भगवन्तं वर्णयति बर्हेति प्रोद्दामगोबन्धनरज्जुर्दोहसम्बन्धि, अधिको वा, **वत्सान् गृणन्**नुच्चारयन्, **अनुगैर्बा**लकै**र्गीता पवित्रा कीर्तिर्यस्य**, **गोपीदृशामुत्सवरूपा** दृष्टिर्यस्य ॥ ४७ ॥ ततो बालका अघासुरवधं **व्रज** आहु**रद्यानेनेति**, केचिद् **यशोदासूनुने**त्यन्ये **नन्दसूनुनेति**, **वयं चास्माद्** व्यालादविताः ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'एवं संवत्सरपर्यन्तं कालं ते कथं तत्रैवोपविष्टाः ? कथं वा क्षुत्पिपासादीन् विस्मृतवन्तः ?' तत्राह— एकस्मिन्निति। आत्मनः स्वस्य प्राणेशमन्तर्यामिणः प्रियतमं कृष्णमन्तरा विना एकस्मिन्नब्दे याते व्यतीतेऽपि तेऽर्भका क्षणार्धं मेनिरे। ननु 'प्रियविरहेण क्षणार्द्धमपि वर्षादधिकं भवति, कथं तेषां वैपरीत्यं जातम् ?' तत्राह—कृष्णमायाहता इति। नच "तर्हि 'मन्मायामोहितेतर' इति ब्रह्मणा कथमुक्तम् ?" इति शङ्कनीयम्, भगवत्परिग्रहभूतानां ब्रह्ममायया मोहासम्भवात्। 'प्रायो मायाऽस्तु मे भर्तुः' इति श्रीबलभद्रेणापि तथैवोक्तत्वात् ॥ भगवतैव स्वलीलासिद्ध्यर्थं ते मोहिताः, ब्रह्मणस्तथा वाक्यं त्वभिमानमात्रेण ज्ञेयम्। 'राजन्' इति सम्बोधनं विश्वासार्थम् ॥ ४३ ॥ भगवन्मायामाहात्म्यमाह—किं किमिति। मायया मोहितं चेतो येषां ते प्राणिन इह संसारे किं किं न विस्मरन्ति, सर्वमेव पर्यायेण विस्मरन्तीत्यर्थः। किं बहुनोक्तेन ? सर्वमेव जगत् प्राणिमात्रं यया मायया मोहितं सत् अभीक्ष्णं पुनः पुनः शास्त्राचार्यैः प्रबोधितमपि विस्मृतः आत्मा स्वरूपमपि येन तथा भवति ॥ ४४ ॥ मोहेन क्षणार्धाभिमानादेव ते सुहृदः गोपबालास्तं कृष्णं ते त्वयाऽतिरंहसा अतिवेगेन स्वागतं सम्यगागतमस्माभिस्तु तावदेकोऽपि कवलो ग्रासस्त्वां विना नाभोजि न भुक्तः, अत इतः अस्मिन् स्वोपवेशस्थाने एहि उपविश, साधु यथा भवति तथा वत्सानां प्राप्तत्वादपि क्षेमेण भुज्यतामित्यूचुश्च ॥ ४५ ॥ ततो मोहप्रयुक्ततद्वाक्यश्रवणानन्तरं हृषीकेशः सर्वान्तर्यामी श्रीकृष्णः हसंस्तैरर्भकैः सह अभ्यवहृत्य भुक्त्वा आजगरमघासुरशरीरजं चर्म तेषां दर्शयन् वनात् व्रजप्रति न्यवर्ततेत्यन्वयः ॥ ४६ ॥ वनाद्व्रजमागच्छन्तं वर्णयति— बर्हेति। बर्हो मयूरपिच्छं च प्रसूनानि च नवधातवो गैरिकादयश्च तैर्विचित्रितान्यङ्गानि यस्य सः, प्रोद्दामा अत्युत्कटा ये वेण्वादिरवाः शब्दास्तैर्य उत्सवस्तेनाढ्यः सम्पन्नः, वत्सान् गृणन् उपलालननामभिराह्वयन्, अनुगैर्गोपैर्देवैर्वा गीता पवित्रा श्रवणादिपराणां सर्वदोषनिवर्तिका कीर्तिर्यस्य सः, गोपीनां दृशामुत्सवरूपा हरिदर्शनं यस्य सः कृष्णः गोष्ठं व्रजं प्रविवेश ॥ ४८ ॥ बहूनां सहैवोक्तिः। तत्र केचिदाहुः—यशोदासूनुनेति, केचिच्च नन्दसूनुनाऽनेनाद्य वने महाव्यालो हतोऽस्माच्च व्यालाद्वयमविता रक्षिता इति गोपबाला व्रजे जगुः कथितवन्तः ॥ ४८ ॥

अन्वितार्थप्रकाशिका

एकस्मिन्निति ॥ हे राजन् ! आत्मनः स्वस्य प्राणेशमन्तर्यामिणं प्रियतमं यं विना क्षणमपि वर्षायते तं कृष्णमन्तरा विना एकस्मिन्नब्दे याते व्यतीतेऽपि कृष्णस्य मायया हताः मोहितास्तेऽर्भकाः क्षणार्द्धं मेनिरे ॥ ४३ ॥ किं किमिति ॥ मायया मोहितं चेतो येषां ते प्राणिन इह संसारे किं किं न विस्मरन्ति। सर्वमेव पर्यायेण विस्मरन्तीत्यर्थः। किं बहुनोक्तेन। सर्वमेव जगत् प्राणिमात्रं यया मायया मोहितं सत् अभीक्ष्णं पुनः पुनः शास्त्राचार्यैः प्रबोधितमपि विस्मृतः आत्मा स्वरूपमपि येन तथा भवति ।४४। ऊचुरिति ॥ मोहेन क्षणार्द्धाभिमानादेव ते सुहृदः गोपबालास्तं कृष्णं ते त्वरयाऽतिरहसातिवेगेन स्वागतं सम्यगागतमस्माभिस्तु तावदेकोऽपि कवलो ग्रासस्त्वां विना नाभोजि न भुक्तोऽत इतः अस्मिन्स्वोपवेशस्थाने एहि उपविश। साधु यथा भवति तथा वत्सानां प्राप्तत्वादपि क्षेमेण भुज्यतामित्यूचुश्च ॥ ४५ ॥ तत इति ॥ ततः हृषीकेशः हसन् तैरर्भकैः सहाभ्यवहृत्य भुक्त्वा आजगरमघासुरशरीरजं चर्म तेषां दर्शयन् वनात् व्रजं प्रति न्यवर्तत। आजगरचर्मदर्शनं च व्रजे प्रख्यापनाय योगमायया तत्कालपर्यन्तमाच्छादितत्वान्न नन्दादिभिर्दृष्टमिति ॥ ४६ ॥ बर्हेति ॥ बर्हो मयूरपिच्छं च प्रसूनानि च नवधातवो गैरिकादयश्च तैर्विचित्रितान्यङ्गानि यस्य सः प्रोद्दामा ये वेणुदलशृङ्गाणां रवास्तैर्य उत्सवस्तेनाढ्यः सम्पन्नः वत्सान् गृणन् उपलालनैराह्वयन् अनुगैर्गीता पवित्रा कीर्तिर्यस्य स गोपीनां दृशामुत्सवरूपा दृशिर्दर्शनं यस्य सः कृष्णः गोष्ठं व्रजं प्रविवेश ॥४७॥ अद्येति ॥ यशोदानन्दसूनुनेति बहूनामुक्तिः सहैव दर्शिता। तत्र केचिद्यशोदासूनुनेत्याहुः। परे नन्दसूनुनेति। यद्वा। यशोदां नन्दयति यशोदानन्दः स चासौ सूनुः यशोदाया आनन्दरूपः सूनुर्वा तेन अनेनाद्य वने महाव्यालो हतोऽस्माच्च व्यालाद्वयमविता रक्षिता इति गोपबाला व्रजे जगुः कथितवन्तः ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एतदिति सुहृद्भिर्मित्रैः सह शिक्यादिस्तेयप्रभृति चरितं क्रीडितं अघार्दनं अघासुरनाशनं च शाद्वले हरिततृणवति पुलिने जेमनं च व्यक्तेतरद्रूपं व्यक्तात् चेतनाचेतनमिश्रात् विश्वात् इतरत्भिन्नं वत्सवत्सपादिरूपं स्वरूपं च अजस्य श्रीकृष्णस्य ऊरुर्महान् अभिष्टवो ब्रह्मस्तुतिरूपः प्रबंधस्तं एतत्सर्वं शृण्वन् गृणन् कथयन् नरः अखिलान् अर्थान् पुरुषार्थान् एति प्राप्नोति ॥ ४३ ॥ कौमारैः कुमारावस्थायां कृतैः कौमारं जहतुः रामकृष्णौ तत्यजतुः निलायनैः केचिद्गोपाः निलीय अन्येषामदृश्यतया स्थिता अन्यैर्मृग्या इत्येवं विविधानि क्रीडनानि तैः सेतुबंधैरिति श्रीरामचंद्रलीलानुकरणैः ॥ ४४ ॥

इति श्रीशुद्वैकांतधर्मप्रवर्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कंधव्याख्याने ब्रह्मस्तुतिर्नामा चतुर्दशोऽध्यायः ॥ १४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वेतावन्तं कालमेते कथं तत्रैवोपविष्टाः कथं वा तेषां क्षुत्पिपासादिविस्मरणं तत्राह एकस्मिन्निति श्लोकद्वयेन ॥ एकस्मिन्निति ॥ आत्मनः, प्राणेशं श्रीकृष्णं, अन्तरा विना, एकस्मिन् अब्दे वर्षे याते गते सत्यपि, हे राजन्, कृष्णस्य मायया हृताः मोहिताः, अर्भका क्षणार्द्धं मेनिरे। चोऽवधारणे ॥ ४३ ॥ किं किमिति ॥ इह संसारे, मायामोहितचेतसः, किं किं न विस्मरन्ति, अपि तु सर्वं विस्मरन्ति। यत् यया मायया, मोहितं सर्वं जगत्, अभीक्ष्णं पुनः पुन, विस्मृत आत्मा येन तथाभूतं, भवति। तदा क्षुत्पिपासाविस्मरणं किं वक्तव्यमिति भावः ॥ ४४ ॥ ऊचुरिति ॥ यत एवं भगवन्माययोपहतास्तत एव, सुहृदः कृष्णं एवं ऊचुश्च। ते त्वया, अतिरंहसाऽतिवेगेन, स्वागतं सम्यगागतम्। एकोऽपि, कवलः ग्रासः, त्वां विना, अस्माभिः, न अभोजि नैव भुक्तः। अतः, इतोऽत्र एहि। साध्वविक्षेपं यथा तथा, भुज्यतां इति ॥ ४५ ॥ तत इति ॥ ततः, हसन् हासं कुर्वन्, हृषीकेशः कृष्णः, अर्भकैः सह, अभ्यवहृत्य भुक्त्वा, आजगरं महासर्पसंबन्धि, चर्म दर्शयन् अद्यायं व्यापादित इति स्मृत्यनुसंधानं कारयित्वेत्यर्थः। वनात् व्रजं प्रति, न्यवर्त्तताजगाम ॥ ४६ ॥ कथंभूतो न्यवर्त्तत तत्राह ॥ बर्हेति ॥ बर्हा मयूरपिच्छानि च प्रसूनान्युत्तमपुष्पाणि च वनधातवः सिन्दूरादयो वन्या धातवश्च तैर्विचित्रितं चित्रधाऽलंकृतमङ्गं स्वशरीरं येन सः, प्रोद्दामो दाध्मायमानो यो वेणुश्च दलं पत्रनिर्मितवाद्यं च शृङ्गं च तेषां यो रवोत्सवो नादविधानोत्सवस्तेनाढ्यः संपन्नः, वत्सान् गृणन् उपलालनादिभिः संबोधयन्, अनुगैर्वत्सपैः गीता पवित्रा कीर्त्तिर्यस्य सः, गोपीनां दृशामुत्सवरूपा दृशिर्दर्शनं यस्य सः, एवंभूतः सन्, कृष्णः, गोष्ठं, प्रविवेश ॥ ४७ ॥ अद्येति ॥ यशोदानन्दसूनुना, एषां बहूनामुक्तिः सहैव दर्शिता। तत्र केचिदाहुर्यशोदासूनुना, अपरे नन्दसूनुनेति, यद्वा यशोदां नन्दयत्यानन्दयतीति यशोदानन्दः स चासौ सूनुस्तेन, अनेन कृष्णेन, अद्यास्मिन्नहन्येव, महाव्यालोऽतिमहानजगरः, हतः अस्माद्व्यालात्, वयं च तदुदरप्रविष्टा वयमपि, अविताः रक्षिताः। इत्येवं, बाला गोपदारकाः, व्रजे जगुः ऊचुः। कालान्तरकृत तात्कालीनं कथं भवेत्' इति यत्पृष्टं तदित्थं समाहितम् ॥ ४८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सत्याः के इति : १०.१३.४३.

इमे वेमे सत्याः स पशुपशुपा इत्ययमभूद् भ्रमो धातुः पूर्वं तदनु किमिमे वाऽथ किमहम्।
विलोक्याजोपास्यान् पृथगिह रमेशानिति मतिः ततोऽयं को वेत्याकलितमवनावेकमखिलम् ॥ ७६ ॥
एवमेव प्रपञ्चोऽपि विचाराचिन्तितो यदि। तदा सदाऽद्वैतरूपापरोक्षमिति लक्ष्यताम् ॥ ७७ ॥ (युग्मम्)
पूर्वं वत्सप वत्सरूपधृदथो साजाश्चतुर्बाहवः सर्वेऽपीत्यलमेक इत्यनुपदं त्रेधाऽऽत्मसंदर्शनात्।
आत्माऽसङ्गचकलस्त्र्यवस्थितिजगत्साक्षीति विज्ञापितो मन्ये तत्त्वविचारदृष्टिविधिरप्यस्मै च लोकाय च ॥ ७८ ॥

कृष्णप्रिया

प्राणप्रिय प्यारे नन्दलाल से बिछुड़े इन बालकों को एक वर्ष बीत चुका था, किन्तु हे राजन्! कृष्ण की माया के प्रभाव से उन ग्वाल बालकों को वह सुदीर्घ काल क्षणार्ध के समान ही लगा ॥ ४३ ॥ राजन्, इस संसार में माया मोहित चित्त मानव क्या क्या नहीं बिसर जाता? अरे बाबा यह सारा विश्व मायामोहित जिस प्रभु की माया से मुग्ध बनकर शास्त्रों के बार-बार उपदेश सुनने पर भी अपना स्वरूप बिसर बैठा ही है ॥ ४४ ॥ भगवान् श्रीकृष्ण को सन्मुख देखकर अत्युत्कण्ठा से एक साथ मित्र वृन्द बोल उठा हे कृष्ण आओ भैया यहाँ आप के विना हम सबने एक भी कौर नहीं खाया, आओ इधर मिल जुल कर अब सब ठीक ठीक भोजन कर लें ॥ ४५ ॥ वापस आने के बाद भगवान् हृषीकेश व्रज सखाओं को हंसते हंसाते प्रेमपूर्वक भोजन करने लगे। पुनः मार्ग में मित्रों को अजगर के चर्म को दिखलाते हुए व्रज की ओर लौटे ॥ ४६ ॥ मयूरपंख-पुष्प-एवं नयी वन की

गैरुक आदि धातुओं की चित्र विचित्र रचनाओं से विभूषित श्रीअङ्गवाले, उन्नत स्वर वाले वेणु-दल-सींग आदि की ध्वनियों से उच्छलित-आनन्दवाले नाम लेकर बछड़ों को पुकारते हुए, अपने अनुगामी मित्रों द्वारा गायी जा रही पवित्र कीर्ति वाले, और दर्शन देकर गोपीजनों के नयनों को आनन्दरस में सराबार करने वाले श्रीव्रजराज व्रज में पधारे ॥ ४७ ॥ व्रज में जाकर बालकों ने कहा कि आज श्री नन्दयशोदालाल ने एक बड़े अजगर को मार दिया और उस अजगर से हम लोगों को बचा लिया ॥४८॥

राजोवाच

ब्रह्मन् परोद्भवे कृष्णे इयान् प्रेमा कथं भवेत् । [1]योभूतपूर्वः स्तोकेषु स्वोद्भवेष्वपि कथ्यताम् ॥ ४९ ॥

श्रीशुक उवाच

सर्वेषामपि भूतानां नृप [2]स्वात्मैव वल्लभः । इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ॥ ५० ॥
तद् राजेन्द्र यथा स्नेहः स्वस्वकात्मनि देहिनाम् । न तथा ममतालम्बिपुत्रवित्तगृहादिषु ॥ ५१ ॥
देहात्मवादिनां पुंसामपि राजन्यसत्तम । यथा देहः प्रियतमस्तथा न ह्यनु ये च तम् ॥ ५२ ॥

कर्दमक्षमा

अन्वयः—ब्रह्मन् स्वोद्भवेषु अपि लोकेषु यः अभूतपूर्वः इयान् प्रेमा परोद्भवे कृष्णे कथं भवेत् ॥ ४९ ॥ नृप ! सर्वेषां अपि भूतानां स्वात्मा एव वल्लभः इतरे अपत्यवित्ताद्याः तद् वल्लभतया एव हि प्रियाः ॥ ५० ॥ राजेन्द्र ! तत् देहिनां स्वस्वकात्मनि यथा स्नेहः तथा ममतालम्बि पुत्रवित्तगृहादिषु न ॥ ५१ ॥ राजन्यसत्तम ! देहात्मवादिनां पुंसां अपि यथा देहः प्रियतमः हि ये च तं अनु न तथा ॥ ५२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

"व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहम् ॥ शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववत्" इत्यादिना स्वतोकेभ्योऽपि परपुत्रे कृष्णे प्रेमाधिक्यमुक्तं तत्र पृच्छति । ब्रह्मन्निति ॥ ४९ ॥ श्रीकृष्णस्य साक्षादात्मत्वात्तस्मिन्नात्मीयेभ्यः प्रेमाधिक्यं युज्यत इति वक्तुं प्रथमं तावदात्मनः स्वतः प्रेष्ठत्वमन्येषां तु तदुपाधिकमिति दर्शयति पंचभिः । सर्वेषामपीति ॥ ५० ॥ कुतः तथा दर्शनादित्याह- तदिति । तस्मादेव कारणात्स्वस्वकात्मन्यहंकारास्पदे देहे ॥ ५१ ॥ आत्माध्यासतारतम्येन प्रेमतारतम्यं दृश्यमानं तन्निबंधनमेवेति दर्शयितुं मूढामूढभेदेन विशेषमाह । देहात्मवादिनामिति द्वाभ्याम् । तं देहमनुलक्ष्य भवंति ये पुत्रादयस्ते तु न तथा प्रियतमः तदर्थत्वेन ते प्रिया इत्यर्थत्वेन ते प्रिया इत्यर्थः ॥ ५२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

लोके हि अतिगुणवत्तमादपि परपुत्राद्गुणहीनेऽपि स्वपुत्रे प्रेमाधिक्यं दृश्यते तच्चात्र विरुद्धम्, यतः स्वपुत्रेभ्योऽपि परस्य नंदस्य पुत्रे प्रेमाधिक्यमिति कथमिति संदिहानः पृच्छति—हे ब्रह्मन्निति । साक्षाद्भगवद्रूपत्वात्त्वं सर्वं जानासीति संबुद्ध्याशयः । इयान् एतत्प्रमाणकः । तदाह–यो भूतेत्यादि ॥ स्नेहस्तावत्त्रिधा । विषयसौंदर्येण ममताविशेषेण स्वाभाविकदैहिकसंबन्धविशेषेण च । तत्र प्रथमं प्राग्वदेव 'यावद्वत्सप' इत्याद्युक्तेः । द्वितीयश्च तद्वदेव तत्तत्संबंधस्यानतिरेकात् । यश्च तृतीयः श्रीप्रद्युम्नागमने तन्मातरि श्रुतः स त्वत्र विपरीत एव, तर्हि 'व्रजौकसां स्वतोकेषु' इत्यादिकमुक्तमित्यभिप्रेत्य विशेषबुभुत्सया परबुबोधयिषया वा पृच्छति–ब्रह्मन्निति । श्रीदामादिनामरूपाभ्यां व्यक्ते न तु स्वस्वरूपेण व्यक्ते तस्मिन् । यः यावान् । अत्र परोद्भवत्वं 'नंदस्त्वात्मज उत्पन्ने' इत्युक्तसिद्धांतानुसारेणैवोक्तम्, अन्यथा श्रीमन्नंदयशोदे प्रत्यप्ययं पूर्वपक्षः प्रसज्जेत, स च पुराणकृत इति । यद्वा–'यथा कृष्णे त्वपूर्ववत्' इति दृष्टांतिते श्रीकृष्ण एव पूर्वपक्षः । एतत्पक्षे विषयसौंदर्यस्याधिक्यमस्त्येव । किं तु, ततोऽपि ममतादेहसंबंधयोराधिक्यं विवक्षितम्, तच्च सिद्धान्तविशेषबुभुत्सयेति ज्ञेयम् ॥ ४९ ॥ आत्मीयेभ्यः देहपुत्रादिभ्यः "आत्मनस्तु कामाय सर्वं प्रियं भवति' इति श्रुत्यभिप्रायेणाह–अन्येषामिति । तदुपाधिकम् आत्मोपाधिकम् । पंचभिः 'सर्वेषाम्' इत्यारभ्य 'चराचरम्' इत्यंतैः ॥ परमात्मा श्रीकृष्णोऽसौ सर्वेषामेव प्रियादात्मनोऽप्यधिकप्रियः, किमुतात्मीयेभ्यः इति सुखदविषयेभ्यः वक्तुमादावात्मनस्स्वतः प्रेष्ठत्वमन्येषां तदुपाधिकमेवेत्याह सर्वेषामिति पञ्चभिः । अतः प्रथमं स्वात्मेति । देहदेह्यविवेकेनाहन्तास्पदमात्रमुच्यते, ममतास्पदे प्रेमव्यवच्छेदार्थं, स्वशब्दश्च प्रतिस्वमनुभवापेक्षया । हे नृपेति । तादृशस्यास्य स्वधर्मतः प्रजापालनमपि तथैवेति भावः । भूतानामित्यौपचारिकभेदेन । हीति तत्रानुभवप्रामाण्यं बोधयति ॥ ५० ॥ कुतः–सर्वेभ्यः आत्मा प्रियः । तथादर्शनात् सर्वाधिकप्रेमदर्शनात् । यत आत्मैव प्रियस्तस्मात् । अहंकारास्पदे आत्मत्वेन स्वीकृते न त्वात्मनि यथा ममतां ममत्वमालम्बन्त आश्रयन्त इति ममतालम्बीनि तानि च स्नेह इत्यन्वयः॥

---

१. योऽभूतपूर्वं–श्रीधर. वंशी. वीर. विज. । २. स्वात्मैकवल्लभ–इति कस्यचित् ।

तदेव व्यतिरेकेणाह—तदिति । तत्राऽहङ्कारास्पद इत्यन्तैव तेषां व्याख्या परत्र पद्ये तु अहङ्कारस्पदे हे आत्मेत्यादिका ज्ञेया । पाठान्तरं न संमतम् अस्यैव विवक्षितत्वात् । ममतालम्बीति षष्ठयर्थस्य व्यवहितत्वान्न्यूनता योग्यैवेत्यर्थः । हे राजेन्द्रेति । साम्राज्येऽप्यात्मवस्नेहो नास्तीति भवता ज्ञायत एवेति भावः ॥ ५१ ॥ तारतम्यम् न्यूनाधिक्यभावः । तन्निबन्धनमात्महेतुकम् । मूढामूढौ अज्ञज्ञौ । राजन्यं प्रायेण देहात्मवद्येव, त्वं तु तेषु सत्तमोसीति न तव देहाध्यास उचित इति संबुद्धयभिप्रायः । साम्राज्येप्यात्मवत्प्रेमा नास्तीति त्वया ज्ञायत एवेति भावः । पूर्वश्लोकस्थराजेन्द्रेत्यस्याप्ययमेवाभिप्रायः । इत्यर्थ इति । प्रियं धनादि, प्रियतरं पुत्रादि, प्रियतमो देह इति भावः ॥ देह एवात्मेतिवादिनामत्यन्ताविवेकिनामित्यर्थः । तन्मतेप्यात्मन एव प्रियतमत्वं पर्यवस्येत् आत्मतयैव देहेऽभिमानेन प्रियतमत्वात् । हि निश्चये । त्वथ चकारः । हे राजन्यसत्तमेति । केचिद्राजन्या देहात्मवादिनोऽसन्त एव, आत्मवादिनश्च सन्तः, ईश्वरवादिनः सत्तरास्तेषु । श्रीकृष्णैकप्रियत्वात्त्वं तु सत्तम इति भावः ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, स्नेहस्तावत्त्रिधा दृश्यते विषयसौन्दर्येण ममताविशेषेण स्वाभाविकदैहिकसम्बन्धविशेषेण च तत्र प्रथमं प्राग्वदेव यावद्वत्सपेत्याद्युक्तत्वात् द्वितीयश्च तद्वदेव तत्तत्सम्बन्धस्यानतिरेकात् यश्च तृतीयः श्रीप्रद्युम्नागमने तन्मातरि श्रुतः स त्वत्र विपरीत एव तर्हि कथं "व्रजौकसां स्वतोकेषु" इत्यादिकमुक्तमित्यभिप्रेत्य विशेषबुभुत्सया परविबोधिषया वा पृच्छति–ब्रह्मन्निति । श्रीकृष्णे श्रीदामादिनामरूपाभ्यां व्यक्ते न तु स्वस्वरूपेणैव व्यक्ते तस्मिन् अन्यथा तत्रापि पूर्वपक्षः प्रसज्जेत स च पुरा न कृत इति यः यावान् अत्र परोद्भवत्वं "नन्दस्त्वात्मज उत्पन्ने" इत्युक्तसिद्धान्तानुसारेणैवोक्तम् अन्यथा श्रीमन्नन्दयशोदे प्रत्यप्ययं पूर्वपक्षः प्रसज्जेत स च पुरा न कृत इति यद्वा यथा कृष्णे त्वपूर्ववदिति दृष्टान्तिते श्रीकृष्ण एव पूर्वपक्षः एतत्पक्षे विषयसौन्दर्यस्याधिक्यमस्त्येव किं तु ततोऽपि ममतादेहसम्बन्धयोराधिक्यं विवक्षितं तच्च सिद्धान्तविशेषबुभुत्सयेति ज्ञेयम् ॥ ४९ ॥ परमात्मा श्रीकृष्णोऽसौ सर्वेषामेव प्रियादात्मनोऽप्यधिकप्रियः किमुतात्मीयेभ्यः सुखदविषयादिभ्य इति वक्तुमादावात्मनः स्वतः प्रेष्ठत्वमन्येषां तदुपाधिकमेवेत्याह–सर्वेषामिति पञ्चभिः । अत्र प्रथमतः स्वात्मेति देहदेह्यविवेकेनाहन्तास्पदमात्रमुच्यते ममतास्पदे प्रेमव्यवच्छेदार्थं स्वशब्दश्च प्रतिस्वमनुभवापेक्षया भूतानामित्यादावौपचारिकभेदेन हे नृपेति त्वादृशस्य स्वधर्मतः प्रजापालनमपि तथैवेति भावः । हीति तत्रानुभवादिप्रामाण्यं बोधयति ॥ ५० ॥ तदेव व्यतिरेकेणाह—तदिति अत्राहङ्कारास्पद इत्यन्तैव तेषां व्याख्या परत्र पद्ये तु अहङ्कारास्पदेऽपि देह आत्मेत्यादिका ज्ञेया पाठान्तरं तु न सङ्गतम् अस्यैव विवक्षितत्वाद्देहस्य निरन्तरश्लोके वक्ष्यमाणत्वात् ममतालम्बीति षष्ठ्यर्थस्य वा व्यवहितत्वात् न्यूनता योग्यैवेत्यर्थः । हे राजेन्द्रेति साम्राज्येऽप्यात्मवत् स्नेहो नास्तीति भवता ज्ञायते एवेति भावः ॥ ५१ ॥ देह एवात्मेति वादिनां अत्यन्ताविवेकिनाम् इत्यर्थः । तन्मतेऽप्यात्मन एव प्रियतमत्वं पर्यवस्येत् आत्मतयैव देहाऽभिमानेन प्रियतमत्वात् हि निश्चये त्वर्थे चकारः हे राजन्यसत्तमेति केचिद्राजन्या देहाऽत्मवादिनोऽसन्त एव आत्मवादिनश्च सन्तः ईश्वरवादिनः सत्तराः तेषु श्रीकृष्णैकप्रियत्वात् त्वं सत्तम इति भावः ॥ ५२ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ब्रह्मन् ! साक्षाद्वेदरूपेति त्वं सर्व्वमेव वेत्सीति भावः । इयानेतावान्, यो यावान्, परोद्भव इति श्रीकृष्णे तेषां श्रीयशोदानन्दनबुद्धिरेव, न तु भगवद्बुद्धिर्यया स्वापत्येभ्योऽप्यधिकस्नेहः स्यादिति भावः । ननु वस्तुस्वभावेन भवेदिति चेत्तर्हि तत्र का युक्तिरिति पृच्छति—कथमिति । 'च' अपि, स्वोद्भवेष्वपि, पाठान्तरं स्पष्टम् । कथ्यतां तन्निरूप्यताम् । एवं तत्प्रकारस्यैव प्रश्नः, न तु तद्योग्यतायास्तदर्थं पुत्रादिपरित्यागसुप्रसिद्धेः । यद्वा, तत्रोपविष्टानां केषाञ्चित्तपःपराणां मुनीनां पुत्रादिष्वेव स्नेहं दृष्ट्वा श्रीभगवति तमनालोक्य तानुपहसन्निव पृच्छति ब्रह्मन्निति । कथं कुतः ? अन्यत् समानम् ॥ ४९ ॥ परमात्मा श्रीकृष्णोऽसौ सर्वेषामेव प्रियादात्मनोऽप्यधिकप्रियः, किमुतात्मीयेभ्य इति वक्तुं आत्मनः स्वतः प्रेष्ठत्वमन्येषाञ्च तदुपाधिकमेवेत्याह—सर्वेषामिति पञ्चभिः । स्वस्यात्मेति सम्यग्ज्ञानानुत्पत्त्या परेषामात्मना सह भेददृष्टेः, किंवा स्वस्यात्मनः प्रेष्ठतायाः स्वयमेव साक्षादनुभवसिद्धेः । आद्यशब्दाद्गृहदारादयोऽपत्यादिभ्योऽधिकवल्लभस्यापि देहस्यानुक्तिरग्रे देहात्मरागिणां मते विशेषेण देहस्यैव प्रियतमताया वक्ष्यमाणत्वात् । यद्वा, आद्यशब्देन सोऽपि गृहीतस्तस्य स्पष्टानुक्तिः सदाधिकपालनादिना तस्य वल्लभतायाः प्रत्यक्षत्वात् । एवमग्रेऽपि । हे नृपेति प्रजापालनमपि भवादृशो राज्ञो यत् प्रियम्, तदप्यात्मात्मत्वेनात्मनः प्रियत्वादेवेति भावः । हीति तत्रानुभवादिप्रामाण्यं बोधयति ॥५०॥ तदेवाह–तदिति । स्वार्थे कः, स्वस्मिन् स्वस्मिन्नात्मनि देहाधिष्ठातरि, अतस्तस्य साभिमानत्वात्तेऽपि व्याख्यातम्–'अहंकारास्पदे' इति । आत्मनि देह इति व्याख्या चायुक्ता,—तस्य निरन्तरश्लोके वक्ष्यमाणत्वात् । देहिनां देहातिरिक्तात्मज्ञानवतामित्यर्थः । ममतालम्बीत्यहन्तास्पदादप्यात्मनः सकाशान्ममतास्पदपुत्रादिषु स्नेहस्य न्यूनतायोग्यत्वादित्यर्थः । हे राजेन्द्रेति साम्राज्येऽप्यात्मवत् स्नेहो नास्तीति भवता ज्ञायत एवेति भावः ॥ ५१ ॥ देह एवात्मेतिवादिनामत्यन्ताविवेकिनामित्यर्थः । अतएव देहातिरिक्तात्माज्ञानाद्देह एव प्रियतमस्तन्मतेऽप्यात्मनः प्रियतमत्वं पर्य्यवस्येदेव, आत्मतयैव देहस्य मननेन प्रियतमत्वात् । हि

निश्चये; त्वर्थे चकारः । हे राजन्यसत्तमेति केचिद्राजन्या देहात्मवादिनोऽसन्त एव, ब्रह्मवादिनश्च सन्तः, ईश्वरवादिनः सत्तरास्तेषु च श्रीकृष्णैकप्रियत्वात्त्वं सत्तम इति भावः ॥ ५२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

परोद्भवे परपुत्रे श्रीकृष्णे इयान् बुद्धिस्थोऽपरिच्छिन्नः प्रेमा यः स्वोद्भवेष्वपि तोकेषु बालेषु अभूतपूर्वः कथञ्जातः ? इति कथ्यताम् ॥ ४९ ॥ उत्तरयति शुकः भूतानां चेतनजीवशरीरयोः वाची भूतशब्दः सर्वेषां देवतीर्यङ्मनुष्यस्थावरशरीरवतां स्वात्मा जीवदेहविशिष्टं स्वस्वरूपं परमात्मरूपं विशेष्यं न तु देहात्पृथग्भूतं वा प्रीतिविषयं तस्याऽननुभवात् इतरेऽपत्यवित्ताद्या तद्वल्लभतया तस्य देहविशिष्टस्य स्वस्य प्रियत्वेन प्रीतिदातृत्वेनैव प्रिया भवन्ति ॥ ५० ॥ देहाधीनाम् एवात्मपदवाच्यानां त्रयाणां प्रेमास्पदत्वं विवृणोति—तदिति । हे राजेन्द्र ! ततः कारणात् यथा देहिनां स्वस्वदेहज्ञानविशिष्टानां जीवानां स्वस्वकात्मनि अहन्ताविषये स्वस्य स्वस्य देहे स्नेहः भवति तथा ममतालम्बिपुत्रवित्तगृहादिषु ममताविषया ये पुत्रवित्तगृहदासादयस्तेषु स्नेहो न भवति ॥ ५१ ॥ अपि च देहात्मवादिनाम् आसुरस्वभावानां पुंसामपि यथा देहः प्रियतमः प्रीतिविषयीभूतः तथा तं देहमनु ये पुत्रकलत्रादयस्ते न प्रियतमा इति ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

"व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहम्" इत्युक्तं पुरस्तात्तत्र स्नेहाधिक्यकारणं पृच्छति—राजा ब्रह्मन्निति स्वोद्भवेष्वपत्येष्वभूतपूर्वः प्रेमा स परोद्भवे कृष्णे कथमभूदिति प्रश्नः, कथ्यतां तत्र हेतुः कथ्यताम् ॥ ४९ ॥ "न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति" इत्यादि श्रुत्युक्तरीत्या पुत्रादिषु प्रेमा यत्सङ्कल्पायत्तं तस्मिन्नेव साक्षात्पुत्रतामापन्ने सति युक्तमेव प्रेमाधिक्यमित्युत्तरमाह—सर्वेषामिति । स्वात्मा जीवान्तरात्मा परमपुरुष एव निरतिशयप्रिय इतरे तु देहतदनुबन्ध्यादयो जीवपर्यन्तास्तस्य परमात्मनो वल्लभतयैव निरतिशयप्रियत्वेनैव हेतुना प्रियाः ॥ ५० ॥ तस्माद्धे राजेन्द्र! देहिनां निरतिशयस्वरूपपरमात्मसङ्कल्पायत्तप्रीतियुक्तानाञ्जीवानां स्वस्वदेहे या ममता तदवलम्बी प्रेमा यथा स्वस्वदेहे न तथा पुत्रादिषु । अयं भावः साक्षान्निरतिशयप्रियस्वरूपपरमात्मसम्बन्धादात्मनि या प्रीतिर्न सा देहे जीवे न व्यवहितत्वाद्या च देहे प्रीतिर्न सा पुत्रे देहात्मभ्यां व्यवधानाद्या च पुत्रे न सा वित्ते या च वित्ते न सा गृहादिष्विति ॥ ५१ ॥ इदं देहात्माभिमानि तदनभिमानि साधारणमनुभवसिद्धम् इत्याह—देहात्मवादिनाम् इति । हे राजन्यसत्तम ! अपि शब्दस्य देहात्माभिमानरहितानमपीति भावः तन्देहमनु देहानुबन्धिनो य इत्यर्थः । ते न तथा देहवत्प्रियाः किन्तु तारतम्येनेति भावः ॥ ५२ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

'व्रजौकसां स्वतोकेषु स्नेहवल्लयाऽऽब्दमन्वहम् । शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववत्' ॥ इति ॥

पूर्वोक्तं हृदि स्थितमाविष्कुर्वन् पृच्छति, ब्रह्मन्निति ॥ ४९ ॥ श्रीकृष्णस्य साक्षात् स्वात्मत्वात्तस्मिन्नात्मीयेभ्यः प्रेमाधिक्यं युक्तमेवेति परिहरति, तत्र प्रथमं स्वस्वात्मनः प्रेमाधिक्यं स्वतः प्रेष्ठत्वम् अन्येषां तु तत्प्रेष्ठतयैत्याह, सर्वेषामिति । स्पष्टम् ॥ ५० ॥ तस्मात्कारणात् हे राजेन्द्र ! यथा देहिनां देहयुक्तानां स्वस्वकात्मनि स्वे स्वे आत्मनि प्रत्यगात्मनि स्नेहः प्रेमाधिक्यं भवति तथा ममतालम्बिषु ममतास्पदेषु पुत्रवित्तादिषु न भवति ममेयं भार्या ममायं पुत्रः ममेदं धनमित्यादीनां यत्सम्बन्धतया प्रियत्वं स आत्मा भिन्न इत्यर्थः ॥ ५१ ॥ किञ्च, येषां देह एवात्माभिमतस्तेषामपि देहस्नेहवत्तदनुबन्धिषु न प्रेमाधिक्यमित्याह—देहात्मवादिनामिति देहोऽहं कृशोऽहं स्थूलोऽहमित्युक्तप्रकारेण देहात्मवादिनां पुरुषाणामपि यथा देहः प्रियत्वेनाभिमतस्तथा ये तन्देहमनुवर्त्तन्ते गृहादयस्ते प्रियत्वेन नाभिमताः तदुक्तम्—

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामञ्जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ इति ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कृष्णे श्रीदामादिनामरूपाभ्यां व्यक्ते यो यावान् ॥ ४९ ॥ परमात्मा श्रीकृष्णोऽसौ सर्वेषामेव प्रियादात्मनोऽप्यधिकप्रिय किमुतात्मीयेभ्यः इति वक्तुमादावात्मनः स्वतः प्रेष्ठत्वमन्येषां तदुपाधिकमेवेत्याह—सर्वेषामिति पञ्चभिः । अत्र प्रथमतः स्वात्मेति देहदेहिविवेकेनाहन्तास्पदमात्रमुच्यते ममतास्पदे प्रेमव्यवच्छेदार्थं स्वशब्दश्च प्रतिस्वम् अनुभावापेक्षया भूतानामित्यौपचारिकभेदेन ॥ ५० ॥ तदेव व्यतिरेकेणाह—तदिति ॥ ५१-५२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

"व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहम् । शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववत्" इत्यादिना स्वतोकेभ्योऽपि परपुत्रे कृष्णे प्रेमाधिक्यं व्यञ्जितं तत्र पृच्छति, ब्रह्मन्निति । परोद्भवे नन्दपुत्रे स्वोद्भवेषु स्वस्वपुत्रेष्वपि यः प्रेमा अभूतपूर्वः ब्रह्ममोहनात् पूर्वं न भूतः लोके हि अतिगुणवत्तमादपि परपुत्रात् गुणहीनेऽपि स्वपुत्रे प्रेमाधिक्यं दृश्यत इत्यतो लोकविरुद्धत्वादिदं

पृच्छ्यते इति भावः ।। ४९ ।। भो राजन् ! ममतास्पदेभ्यः पुत्रादिभ्यः सकाशादहन्तास्पदे आत्मनि प्रेमाधिक्यमिति लोकरीतिः प्रथमं दृश्यतां तत एवास्य सिद्धान्ता भविष्यतीत्याह, सर्वेषामिति पञ्चभिः । वल्लभः लोकदृष्ट्या आत्यन्तिकप्रीतिविषयः स च प्रतिदेहमेकैक एव न तथान्ये इत्याह, इतरे इति ।। ५० ।। यथा निरुपाधिकः ।।५१।। स चात्मा मूढैर्देह एव ज्ञायते इति तन्मतेनाह–देह एवात्मेति वदितुं शीलं येषां तं देहम् अनुभवन्ति ये पुत्रादयस्ते तथा न प्रियतमा इत्यर्थः ।। ५२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यदुक्तं "व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहम् । शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववत्" इत्यादिना स्वतोकेभ्योऽपि परपुत्रे कृष्णे प्रेमाधिक्यं तत्र कारणं पृच्छति ब्रह्मन्निति ।। ४९ ।। श्रीकृष्णस्य आत्मनामप्यात्मत्वात्सर्वोत्तमप्रेमविषयत्वं युक्तमिति वक्तुं प्रथमं तावदात्मनः स्वतः प्रेष्ठत्वमात्मीयानां तु तदर्थमिति दर्शयति–सर्वेषामिति पञ्चभिः ।।५०।। स्वस्वकात्मनि अहमर्थे ।।५१।। अहमर्थेऽपि अज्ञात्मनां देहे आत्मज्ञानां स्वरूपभूते च स्नेहाधिक्यमित्याह—देहात्मवादिनामिति त्रिभिः । तं देहं ये अनु पुत्रादयस्ते तथा प्रियतमाः न भवन्ति ।। ५२ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

व्रजौकसां स्वतोकेषु इत्यादिना स्वपुत्रेभ्योऽपि सकाशात् परपुत्रेऽपि कृष्णे प्रेमाधिक्यं पूर्वं दर्शितं तत्र पृच्छति ब्रह्मन्निति, परोद्भवे नन्दपुत्रे कृष्णे स्वोद्भवेषु स्वपुत्रेष्वपि यः प्रेमा अभूतपूर्वः विरञ्चिमोहनां पूर्वं न भूतः स कथं तत् कथ्यतां लोके खलु महागुणादपि परपुत्रात् स्वपुत्रेष्वल्पेष्वपि प्रेमाधिक्यं दृश्यते इति लोकविरुद्धत्वान्ममायं प्रश्न इति ॥ ४९ ॥ लोकप्रेमरीतिपरीक्षणेनैवायं सिद्धान्तो भवेदिति तावदाह सर्वेषामिति स्वात्मैव देहेन्द्रियाध्यक्षो जीववल्लभः प्रियः तस्य विज्ञानानन्दत्वादिति भावः । तस्मादितरेऽपत्यादयस्तु तद्वल्लभतया तदीयत्वेनैव प्रिया इत्यर्थः ।। ५० ।। तत्तस्माद्यथा स्वस्वकात्मनि विज्ञानानन्देऽहन्तास्पदे जीवात्मनि स्नेहस्तथा ममतास्पदेषु पुत्रादिषु तत्सम्बन्धिषु नास्ति पुत्रकलत्रयोः स्वतौल्येपि देहादिपिहितत्वेन स्वरूपाप्रकाशात् स्वतोऽनधिकत्वाच्च न स्नेहो मुख्यः ।। ५१ ॥ मतभेदेनाप्यात्मन एव प्रेमास्पदत्वं दर्शयति—देहात्मेति । गौरोऽहं स्थूलोऽहमिति प्रत्ययात् ये देहमेवात्मानं मन्यन्ते लोकायतिकास्तेषामात्मत्वेनाभिमतो देहो यथा प्रियतमस्तथा तं देहमनु ये पत्यादयो भवन्ति ते न तथा प्रिया इत्यात्मैव वल्लभ इति ।। ५२ ॥

श्रीसुबोधिनी

एवं भ्रान्तमोहनिवृत्त्यर्थं सर्वसिद्धान्तमुपपाद्य स्नेहाश्रयविवेचनार्थं प्रक्रियान्तरमारभते, स्नेहः **स्वात्म**निष्ठः स **चात्मा** भगवान् जीवो वा, सहजस्नेहा भगवति तत्सम्बन्धात् तदंशत्वादाहोस्वित् जीव एव ? तथा सति भगवति स्नेहः कथमित्याक्षिपते ब्रह्मन्निति, जीवस्य देहेन सम्बन्धस्ततः पुत्रादिषु ततो नन्दे ततो नन्दपुत्र इतिक्रमः, **परोद्भवे** स्वप्राणापेक्षयापि योधिकः **प्रेमा** स **कथं भवेत् स्वोद्भवेष्वपि स्तोकेषु** योभूत**पूर्वः** ? अतो सिद्धान्तः **कथ्यताम्** ॥ ४९ ॥ तत्र भगवति स्नेहमुपपादयति **सर्वेषा**मिति, लोके तावत् **सर्वेषां** प्रेमविषय आत्मा देहः, **इतरेपत्यवित्ताद्यास्त**स्य देहस्य **वल्लभतया** प्रियतया, युक्तश्चायमर्थः, अन्यथा परबालके परदेहे वा स्नेहः स्यात् ।। ५० ॥ तत्रापि तारतम्यमित्याह **तद् राजेन्द्रे**ति, **देहा**भिमानवतां **यथा स्वस्वकात्मनि** देहे स्नेहोऽहमभिमानविषयत्वान्न **तथा पुत्रवित्तादिषु ममता**विषयत्वात् ॥ ५१ ।। नन्वत्र देहो वात्मा वा कः प्रियत्वेन सहजोभिनिर्दिष्टः आत्मा चेत् स न देहादतिरिक्तः प्रतीतः केनापि पामरेणातः प्रेम कथम् ? तत्र देहश्चेत् को हेतुरित्याकाङ्क्षायामाह **देहात्मवादिना**मिति, अस्ति देहव्यतिरिक्त आत्मा पामराणामपि मते, तथाप्यङ्गीकृत्याप्युच्यते **देह एव आत्मा** येषामपि **वादिनां, राजन्यसत्त**मेतिसम्बोधनं स्नेहार्थं, **यथा देहः प्रियतमो न तथा** पुत्रादयः ॥ ५२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'व्रजौकसां स्वतोकेषु' इत्यादिना स्वपुत्रेभ्योऽपि परपुत्रे कृष्णे यत् प्रेमाधिक्यमुक्तं, तत्र शङ्कमानः पृच्छति—ब्रह्मन्निति सम्बोधनं सर्वज्ञत्वसूचनाय । लोके ह्यतिगुणवत्तमादपि परपुत्रान् गुणहीनेऽपि स्वपुत्रे प्रेमाधिक्यं दृश्यते, व्रजवासिनां तु य स्वपुत्रेष्वपि पूर्वं नाभूत् स इयान् अत्युत्कटः प्रेमा परोद्भवे कृष्णे कथं भवेत् ? तत्रोपपत्तिः कथ्यताम् ।। ४९ ।। एवं पृष्टः शुकः "श्रीकृष्णस्य साक्षात् सर्वात्मकत्वात् आत्मनश्च निरुपाधिकप्रेमास्पदत्वस्य लोकसिद्धत्वात् 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति श्रुतिसिद्धत्वाच्च, तस्मिन् आत्मीयेभ्यश्च पुत्रादिभ्यः प्रेमाधिक्यं युज्यते एव" इति सिद्धान्तयितुं प्रथमं तावत् 'आत्मनः स्वतःप्रेष्ठत्वमन्येषां तु तदुपाधिकं प्रेष्ठत्वम्' इति दर्शयति—सर्वेषामिति पञ्चभिः । 'सकलराजश्रेष्ठत्वेन विवेकित्वात्त्वयाऽपि एतद्विचारणीयम्' इति सूचयन् सम्बोधयति–नृपेति । सर्वेषामपि भूतानां प्राणिनां स्वात्मैव वल्लभः निरुपाधिकातिशयप्रीतिविषयः, तदितरेऽपत्यवित्ताद्यास्तु तद्वल्लभतयैव तस्यात्मनः सुखसाधनतयैव वल्लभाः, न स्वत इति । 'लोकसिद्ध एवायमर्थं' इति सूचयन्नाह– हीति ।। ५० ।। लोकप्रसिद्धिमेव स्पष्टयति—तदिति । तत् तस्मात् आत्मनो निरुपाधिकप्रेमास्पदत्वादेव हे राजेन्द्र ! प्राणिनां यथा स्वस्वकात्मनि अहङ्कारास्पदे

देहे स्नेहस्तथा ममतास्पदेषु पुत्रादिषु स्नेहो न भवति ।। ५१ ।। एवं सामान्यतः 'सर्वत्र दृश्यमानं प्रेमतारतम्यमात्माध्यासतारतम्यनिबन्धनमेव' इत्युक्तं, तदेव विशेषतः स्पष्टयति—देहात्मवादिनामिति द्वाभ्याम् । 'तव तु देहाद्विविक्तात्मज्ञानमस्ति' इत्याशयेन सम्बोधयति—राजन्यसत्तमेति । 'देह एव आत्मा' इति वदितुं शीलं येषां तेषामपि यथा देहः प्रियतमस्तथा तं देहमनु ये गृहापत्यादयस्ते प्रियतमा न भवन्ति । 'हि' इति सन्देहनिरासाय ।। ५२ ।।

अन्वितार्थप्रकाशिका

व्रजौकसां स्वतोकेषु इत्यादिना स्वपूत्रेभ्योऽपि परपुत्रे कृष्णे स्नेहाधिक्यमुक्तं तत्पृच्छति–ब्रह्मन्निति ।। हे ब्रह्मन् ! यः प्रेमा स्वोद्भवेषु तोकेषु स्वस्वपुत्रेष्वपि अभूतपूर्वः ब्रह्ममोहनात्पूर्वं नाभूत् । स इयान् अत्युत्कटः प्रेमा परोद्भवे कृष्णे श्रीदामादिरूपे कथं भवेत् तत्रोपपत्तिः कथ्यताम् । लोके गुणवत्तमादपि परपुत्रादतिनिर्गुणेऽपि स्वपुत्रे स्नेहदर्शनादिदं लोकविरुद्धम् ।। ४९ ।। आत्मीयेभ्योऽप्यात्मनि स्नेहोऽधिको भवति कृष्णश्च साक्षादात्माऽतस्तत्र स्नेहाधिक्यमिति प्रकरणेनोत्तरयति सर्वेषामिति ।। हे नृप ! सर्वेषामपि भूतानां प्राणिनां स्वात्मैव वल्लभः निरुपाधिकातिशयप्रीतिविषयः तदितरेऽपत्यवित्ताद्यास्तु तद्वल्लभतयैव तस्यात्मनः सुखसाधनतयैव वल्लभा न स्वत इति ।। ५० ।। तदिति ।। हे राजेन्द्र ! तत्तस्मात् देहिनां प्राणिनां यथा निरुपाधिकः स्वस्वकात्मनि अहङ्कारास्पदे स्नेहस्तथा ममतालम्बिषु ममेदमिति ममकारास्पदेषु पुत्रवित्तगृहादिषु स्नेहो न भवति ।। ५१ ।। अध्यासतारतम्येन प्रेमतारतम्यं दर्शयति–देहेति ।। हे राजन्येषु सत्तम ! देह एवात्मेति वदितुं शीलं येषां तेषामपि यथा देहः प्रियतमस्तथा तं देहमनु ये गृहापत्यादयस्ते प्रियतमा न भवन्ति ।। ५२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथेदानीं "व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहम् । शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववत्' इत्यादिना स्वतोकेभ्योऽपि परपुत्रे कृष्णे प्रेमाधिक्यमुक्तं तत्र पृच्छति राजा ।। ब्रह्मन्निति ।। हे ब्रह्मन्, परोद्भवे कृष्णे, इयान् प्रेमा, कथं भवेत् । यः प्रेमा, स्वद्भोवेष्वपि, तोकेषु, अभूतपूर्वः पूर्वं न भूतः, सः प्रेमा, अस्मिन् कथं, एतत् कथ्यताम् । न हि ते एनं पुरुषोत्तमं जानन्ति, येन तत्र तथा भावः स्यात्ततोऽयं प्रश्नसंभवः । श्लोका न वेत आरभ्य क्षेपकाः सन्त्यथापि ते व्याख्यायन्ते स्वबोधाय संप्रदायानुसारतः ।। ४९ ।। 'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति' इत्यादिश्रुत्युक्तरीत्या पुत्रादिषु यः प्रेमा स यत्संकल्पायत्तस्तस्मिन्नेव साक्षात् पुत्रतामापन्ने सति तत्र युक्तमेव प्रेमाधिक्यमित्युत्तरमाह ।। सर्वेषामिति ।। हे नृप, सर्वेषां अपि, भूतानां, स्वात्मा जीवान्तरात्मतयावस्थितः पुरुषोत्तमः एव, वल्लभः निरतिशयप्रियः, इतरे अपत्यवित्ताद्याः, जीवपर्यन्ता देहतदनुबन्धिनोऽर्भकधनाद्यास्तु, तद्वल्लभतयैव परमात्मनो निरतिशयप्रियत्वेनैव हेतुना, प्रियाः भवन्ति हि ।। ५० ।। तदिति ।। तत्तस्मात्, हे राजेन्द्र, देहिनां निरतिशयप्रेमास्पदस्वरूपपरमात्मसंकल्पायत्तप्रीतियुक्तानां शरीरिपर्यायजीवानां, स्वस्वकात्मनि, यथा स्नेहः, तथा ममतालम्बिपुत्रवित्तगृहादिषु, न । अयं भावः । साक्षान्निरतिशयप्रियस्वरूपपरमात्मासन्नसबन्धादात्मनि या प्रीतिर्न सा देहे, कुतः । प्रेमास्पदपरमात्मनो देहस्य च जीवेन व्यवहितत्वात् । या च देहे प्रीतिर्न सा पुत्रे, देहात्मभ्यां व्यवधानाद्या च पुत्रे न सा वित्ते, या च वित्ते न सा गृहादिष्विति ।। ५१ ।। इदं च देहात्माभिमानानभिमानितया मूढा मूढानां साधारणं सिद्धमित्याह ।। देहात्मवादिनामिति ।। हे राजन्यसत्तम, देहात्मवादिनां पुंसां अपिशब्दाद्देहमात्मानमवादिनामपि, यथा देहः, प्रियतमोऽतिशयेन प्रियः, तथा च तथैव, तं देहं अनु, ये देहानुबन्धिनस्ते इत्यर्थः । न हि । किं तु तारतम्येन प्रिया इति भावः ।। ५२ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सर्वेषामिति : १०.१४.५०.

आत्मप्रीत्यै प्रियं सर्वमिति ते जानतः श्रुतिम् । कृष्णं च परमात्मानं क प्रश्नः किमुवोत्तरम् ।। ५९ ।।

कृष्णप्रिया

परीक्षितजी ने पूछा—भगवन् ? यह बात बताइए कि आज पर्यन्त इन व्रजवासियों का निजी बालकों में भी जो प्रेम नहीं देखने में आया आज उस प्रेम से भी अधिक स्नेह श्रीनन्दराय जी के कुमार में कैसे हुआ ? ।। ४९ ।। श्रीशुकाचार्यजी ने कहा—राजन् ! प्राणिमात्र को अपनी आतमा देह ही अधिक प्रिय होती है। और जो पुत्र पुत्री धन आदि पर जो प्रेम होता है वह इसलिये कि सबको अपनी देह प्रिय होती है और ये सब देह की प्रियता के कारण प्रिय है ।। ५० ।। राजन् ! आप जानते हैं कि देह धारी जनों में से प्रत्येक व्यक्ति को जैसी अपनी देह प्रिय लगती है उतनी प्रियता ममता के पात्र विषय पुत्र पौत्र धन आदि के लिये नहीं होती ।। ५१ ।। राजन् ! देह ही आतमा है ऐसे मतावलम्बी को अपनी देह जैसे अधिक प्रिय होती है वैसे उस देह के पीछे पीछे चलने वाले उनके अपत्य पौत्र वित्तादि प्रियतम नहीं होते ।। ५२ ।।

देहोऽपि ममताभाक् चेत्तर्ह्यसौ नात्मवत् प्रियः । यज्जीर्यत्यपि देहेऽस्मिन् जीविताशा बलीयसी ॥ ५३ ॥
तस्मात् प्रियतमः स्वात्मा सर्वेषामपि [1]देहिनाम् । तदर्थमेव सकलं जगदेतच्चराचरम् ॥ ५४ ॥
कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् । जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥ ५५ ॥
वस्तुतो जानतामत्र कृष्णं स्थास्नु चरिष्णु च । भगवद्रूपमपरं[2] नान्यद् वस्त्विह किञ्चन ॥ ५६ ॥

कर्दमक्षमा

अन्वयः – देहः अपि ममताभाक् चेत् तर्हि असौ आत्मवत् प्रियः न यत् अस्मिन् देहे जीर्यति अपि बलीयसी जीविताशा न जीर्यति ॥ ५३ ॥ तस्मात् सर्वेषां अपि देहिनां स्वात्मा प्रियतमः एतत् सकलं चराचरं जगत् तदर्थमेव ॥ ५४ ॥ त्वं अखिलात्मनां एनं कृष्णं एव आत्मानं अवेहि सः अपि अत्र जगत् हिताय मायया देही इव आभाति ॥ ५५ ॥ वस्तुतः अत्र स्थास्नु च चरिष्णु भगवद्रूपं कृष्णं जानतां अन्यत् अपरं किञ्चन वस्तु इह न ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यद्यस्माज्जीर्यत्यप्यासन्नमरणेऽपि जीविताशा भवति । अयं भावः । न जीविष्यतीति निश्चितेऽपि देहे यत्प्रेमास्पदत्वं तदात्मगतमेव न तु देवगतं तस्य मरणोन्मुखत्वात् बीभत्सत्वाच्च । अथ वा तद्यस्मिन्देहे जीर्यत्यपि जीविताशा अविवेकदशायां बलीयस्यासीत्सा तु विवेकिनो यदा ममताभाग्भवति तदात्मवत्प्रियो न भवत्यतस्तत्र नातीवास्थेति ॥ ५३ ॥ तदर्थमेव सकलं प्रियमित्यर्थः ॥ ५४ ॥ प्रस्तुतमाह । कृष्णमेनमिति ॥ ५५ ॥ न केवलमात्मनामात्माऽपि तु जडानामपीत्याह । वस्तुत इति । सर्वजगत्कारणमिति । कृष्णं जानतां पुंसां स्थावरं जंगमं च सर्वं भवगद्रूपं भगवानेव स्वरूपं यस्य तन्नान्यत् ॥ ५६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अज्ञवृत्तमुक्त्वा ज्ञवृत्तमाह—अयं भाव इति । न हि विवेकिनो देहाद्यसज्जडेऽध्यासो भवति चिन्निष्ठत्वात्तस्येति तात्पर्यम् । ननु विवेकदशातः प्राक् तु तेषामपि देहाध्यासोऽस्त्येवेति चेत्तत्राह—अथ वेति । सोऽपि ममताश्रयो देहोऽपि । तदा ममत्वसमयेपि प्रियो न, विनाशित्वनिश्चयात् । अतो विनाशित्वादेव । तत्र देहे । नातीवास्था नात्यन्तं स्नेह इत्यर्थः । ममेति देहं मन्यमानानामविवेकिनां मतमालम्ब्याह—देहोपीति । तैर्व्याख्यातम् । तत्र प्रथमपक्षे अपीति सम्भावनायां पुत्राद्यपेक्षया समुच्चये वा, द्वितीयपक्षेऽविवेकदशायामिति बलीयसीति विशेषणेनाक्षिप्यते, एतत्प्रतियोगितया विवेकिन इत्यपि । असौ देहोपीत्यनयोरन्वितयोरर्थं व्याचष्टे-सोपीति । नातीवास्था इति—म्रियतां जीवतु वेत्यपेक्षाधिक्यं नास्तीत्यर्थः । इदं नात्मवत्प्रिय इत्यस्य व्याख्यानमिति । यद्वा—आत्मवत्पूर्वमविवेकेनात्मतया गृहीतोऽहन्ताविषयो देहस्तद्वत्प्रियो न भवतीत्यर्थः । यद्यस्माज्जीर्यति रोगादिनाभिभूते ममतास्पदेऽस्मिन्देहविषये जीविताशा अयं देहश्चिरं तिष्ठत्विति वाञ्छापि अबलीयसी पूर्वापेक्षया स्वल्पापि भवति, विवेकतोऽस्मिन्नात्मतागमेनातिप्रियत्वाभावात् । विश्वनाथस्तु–बेहात्मवादिनां तेषामपि कदाचिदीषद्विवेके सति आत्मैव प्रियः स्यान्न तथा देह इत्याह—देहोपि । अहंतास्पदीभूतोऽपि देह ईषद्विवेकेन यदि ममताभाक् स्यात्तदाऽसौ देह आत्मवत्प्रियो न भवेत् किन्त्वात्मानुरोधेनैव प्रियः स्यादित्यर्थः । तत्र लोकानुभवमेव प्रमाणयति—यदिति । सर्वत्र देहत्यागे आत्मनोऽतिकष्टं दृष्ट्वा तदतिकष्टं ममात्मनो मा भवत्विति बुद्ध्यैव आत्मन्यतिस्नेहादेव देहे जीविताशाधिका भवतीत्यर्थः ॥ ५३ ॥ यत आत्मनोऽन्यः कोऽपि न प्रियतमस्तस्मात् । स्वात्मा प्रियतमो निरुपाधिप्रेमास्पदः, प्रज्वलति गृहे स्थितं पुत्रादिकमानेतुं प्रवेशादर्शनादिति भावः । तदर्थम् स्वात्मार्थम् । इत्यर्थ इति । पूर्वोदाहृतश्रुतेरिति भावः । तस्मादिति । चरं पुत्रकलत्रादि, अचरं गृहघटादि, तेन लोकदृष्ट्या पुत्रादिभ्यः सकाशादात्मन एवात्यंतिकप्रीतिविषयत्वं प्रतिपादितम् ॥ ५४ ॥ यदर्थमेतदुक्तं तदाह—अखिलात्मनां सर्वजीवानाम् । ननु सर्वान्तर्यामिणोऽदृश्यत्वात्कथं देहरूपेण प्रतीतिस्तत्राह—मायया कृपया । तत्र हेतुः—जगतां निजदर्शनश्रवणवताम् । हिताय बंधनिवृत्तये । निर्गुणरूपस्य ज्ञातुमशक्यत्वाद्भक्तकृपया सगुणविग्रहमाविश्चकारेतिभावः । विवक्षितं सिद्धान्तं प्रतिपादयंस्तत्त्वदृष्ट्या तस्याप्यात्मत्वेनापेक्षिकप्रीतिविषयत्वमेव, आत्यंतिकप्रीतिविषयत्वं तु केवलं श्रीकृष्णस्यैवेत्याह—कृष्णमिति । अखिलानामात्मनां जीवानामप्यात्मानं परमात्मानमेव कृष्णमवेहि, तेन पुत्रादिषु प्रीतिर्यथा देहानुरोधेन देहे च प्रीतिर्यथात्मानुरोधेन तथैवात्मन्यपि प्रीतिः परमात्मानुरोधेन । स च परमात्मा कृष्ण एव मूर्तः पूर्ण एव । यदुक्तम्—"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इत्यतः कृष्णस्यैवात्यंतिकप्रीतिविषयत्वात्तत्रैव प्रीतेः परा काष्ठेति स्वपुत्रेभ्योऽपि तत्र यत्प्रेमाधिक्यं तदुपपादितम् । किञ्च, जीवानां भक्त्यभावान्मायया ज्ञानावरणाच्च भक्त्यैकप्राकाश्ये तस्मिंस्ताद्दृशत्वेनानुभवो मायिकजीवानामभक्तानां कथमस्त्वित्यतः पुत्रादिष्वेव लोकानां प्रीतिविषयत्वेनानुभवो न तस्मिन् । व्रजवासिनां तु मायातीतत्वाद्भक्तिपूर्णत्वाच्च यथार्थत एवानुभव इत्यतस्तेषां स्वपुत्रादिभ्योऽपि तस्मिन्

---

१. जन्मिनां–वीर. । २. मखिलं–श्रीधर. वंशी. सुदर्शन. विज. सनातन. जीव. शुक. ; मपरं–वीर. ।

प्रेमाधिक्यं स्वाभाविकं वर्तत एवेति समाधेयम् । जगद्धितायावतीर्णः स कृष्णोऽपि मायया देहीवाभाति स्वाविद्यया मूढैर्जीव इव भौतिकदेहवान्प्रतीयते इत्यर्थः । यद्वा—माययैव यो देहस्तद्वानिव मायोपाधिरिव प्रतीयते न तु स मायोपाधिरित्यर्थः । अत एव मधुसूदनसरस्वतीपादैरपि "सच्चित्सुखैकवपुषः पुरुषोत्तमस्य नारायणस्य महिमा नहि मानमेति, चिदानदाकारं जलदरुचिसारं श्रुतिगिरां व्रजस्त्रीणां हारम्" इत्यादि बहुशो वर्णितम् । यद्वा—ननु परमात्मा खल्विन्द्रियग्राह्यो न भवेत् कृष्णश्च सर्वैर्दृश्यत एवेति तत्राह—जगत एव हिताय मायया निर्हेतुकाचिंत्यया कृपया सोऽपि अत्र जगज्जनेन्द्रियेषु देहीवाभाति स्वयमेव तद्ग्राह्यत्वेन प्रकाशत इति अतर्क्यतदिच्छया तद्गृहीतैरिन्द्रियैरेव स गृह्यते न पुनरिन्द्रियैः स्वयमेव शब्दादिरिव ग्रहीतुं शक्य इति भावः । अत एव भागवतामृतधृतं नारायणाध्यात्मवचनम् । "नित्याव्यक्तोऽपि भगवानीक्ष्यत निजशक्तितः । नामृते परमानन्दं कः पश्येतामितं प्रभुम् ॥" इति तत्रत्या कारिका च । ततः स्वयं प्रकाशत्वशक्त्या स्वेच्छाप्रकाशया "सोऽभिव्यक्तो भवेन्नेत्रे न नेत्रविषयत्वतः" इति । अत्र हितमन्यदेशीयानामनुकूलजनानां स्वकृपादृष्टिदानेनैव स्वमाधुर्यग्राहणम्, प्रतिकूलानां कंसाद्यसुराणां तु पित्तदूषितरसनया मत्स्यण्डिकाभोजनमिव प्राकृतैरेवेंद्रियैस्तन्माधुर्यग्रहणरहितमेव दर्शनं ध्यानावेशसिद्ध्यर्थम् । आवेशफलञ्च सर्वापराधोपशमनपूर्वको मोक्षः, स एव तेषां हितम् । किञ्च, व्रजस्थानामैश्वर्यज्ञानशून्यानामन्येषामनुकूलप्रतिकूलानामपि स देहीवाभाति । तदपि "देहदेहिविभागोऽत्र नेश्वरे विद्यते क्वचित्" इति मध्वाचार्यधृतमहावाराहवचनादेव । शास्त्रज्ञैर्देहीति वक्तुमयोग्यत्वादिवशब्दप्रयोगः । तोषिणी तु—माययेति आत्मारामाणां तत्प्रियजनानाञ्चात्माधिकनिरुपाधिपरमप्रेमास्पदसर्वांशत्वेन तद्व्यतिरिक्तवस्तुसंभेदाभावादिति भावः । निरुपाधिपरमप्रेमास्पदत्व खल्वात्मत्वमानन्दत्वं चेति । अत एव श्रीमध्वाचार्यधृतमिति पूर्ववत् । तदेवमसुरादीनां मायावरणान्न तथा भाति "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति भगवद्गीतोक्तेश्च । तत्र योगमायादुर्घटनाकारि किमपि मम बुद्धिसौष्ठवमिति । श्रीस्वामिचरणाश्च तत्प्रियजनानां तत्प्रेमभावितान्तःकरणे क्षीरे सितोपलवदेकजातीयत्वेन प्रेमास्पदतास्वभावोऽसौ स्वमाधुरीभिरधिकमाभाति । अन्यत्र यथोचितमिति स्थिते सर्वातिशयितप्रेमस्वभावानां श्रीव्रजवासिनां किमुतेति भावः ॥ ५५ ॥ ननु केवलात्माऽऽत्मत्वे तु सर्वव्यापिता नश्येदिति चेत्तत्राह—न केवलमिति । वस्तुतो याथात्म्येन । अत्र लोके । अन्यत् कृष्णेतरत् । न केवलं सर्वेषां क्षेत्रज्ञानामेव परमस्वरूपमपि तु अन्ते सर्वेषां जडानामादौ सर्वेषां साक्षात्तद्रूपाणां चेति वक्तुं तस्य भूमत्वमाह—वस्तुत इति । वस्तुतः तत्त्वतः । कृष्णमत्र जगति जानतां विचारयतां तद्विचारज्ञानामित्यर्थः । सत् स्थावरजङ्गमरूपमखिलं यच्च भगवतो रूपं नारायणाद्यभिधमखिलं तत्तत्सर्वमिह श्रीकृष्ण एव तत्तदन्तर्भूतत्वेनैव स्फुरतीत्यर्थः । नान्यत्किञ्चन, यत्तत्र नास्ति तन्नास्त्येवेत्यर्थः । कारणांशिनोर्विज्ञानेन कार्यांशयोर्विज्ञानात्, तद्व्यतिरेकेण तद्व्यतिरेकाच्च । महासमुद्रस्य सागरतरंगफेनादिवत् । सूर्यान्तरीणमण्डलात्मकस्य बहिर्मण्डलकिरणपरमाणुगणमरीचिकादिवदिति ज्ञेयम् । तदुक्तं द्वितीये—"सोऽयं तेऽभिहितस्तात भगवान्विश्वभावनः । समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत् ॥" इति । विश्वनाथस्तु—किञ्चापेक्षिकप्रेमास्पदानि ये चात्मदेहपुत्राद्यास्तेऽपि विचारवतः स एवेत्यापेक्षिकप्रेमास्पदत्वमपि तस्यैवेत्याह—वस्तुत इति । वस्तुतस्त्वित्यर्थः । कृष्णं जानतां पुंसां मते स्थावरजङ्गमञ्च सर्वं तद्रूपमेव तस्यैव सर्वकारणत्वात्, कारणस्यैव कार्याकारत्वादिति भावः ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ममेति देहं मन्यमानानामविवेकिनां मतमालम्ब्याह—देहोऽपीति, तैर्व्याख्यातम् । तत्र प्रथमपक्षे अपीति सम्भावनायां पुत्राद्यपेक्षया समुच्चये वा द्वितीयपक्षे अविवेकदशायामिति बलीयसीति विशेषणेनाक्षिप्यते एतत्प्रतियोगितया विवेकिन इत्यपि असौ देहोऽपीत्यनयोरन्वितयोरर्थं व्याचष्टे—सोऽपीति, नातीवास्थेति म्रियतां जीवतु वेत्यपेक्षाधिक्यान्नास्तीत्यर्थः । इदं नात्मवत्प्रिय इत्यस्य व्याख्यानमिति । यद्वा, आत्मवत्पूर्वमविवेकेनात्मतया गृहीतोऽहन्तविषयो यो देहस्तद्वत् प्रियो न भवतीत्यर्थः । यद्यस्माज्जीर्यति रोगादिनाऽभिभूतेऽस्मिन् ममतास्पदे देहविषये जीविताशा अयं देहस्तिष्ठत्विति वाञ्छापि अबलीयसी पूर्वापेक्षया स्वल्पापि भवति त्रिवेकतोऽस्मिन्नात्मतापगमेनातिप्रियत्वाभावात् ॥ ५३ ॥ चरं देहापत्यादि अचरं गेहादि तदात्मकमेतज्जगच्चापि सकलमपि यत्किञ्चिदित्यर्थः । एतेनात्मनः सुखस्वरूपत्वञ्च बोधितम् ॥ ५४ ॥ एवं देहद्वयातिरिक्तिस्य शुद्धस्यात्मनः स्वतः प्रियत्वमुक्त्वा विवक्षितमाह—कृष्णमिति—

"कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः" "तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते"

इत्येतल्लक्षणत्वेन तन्नामानमेनं श्रीयशोदानन्दनरूपम् अखिलानामात्मानं सूर्य्यमण्डलस्थानीयस्य तस्य रश्मिपरमाणुस्थानीयानां शुद्धानामपि क्षेत्रज्ञानां परमस्वरूपत्वेन परमात्मानमवेहि तर्हि कथं लोके दृश्यतया भाति तत्राह—जगद्धितायेति । सोऽपि सर्वात्मपरमस्वरूपरूपोऽपि परमकल्याणगुणत्वेन परमकारुणिकत्वात् स्वभक्तप्रसङ्गेन जगतोऽपि हितायाऽत्र जगति भाति कल्पे कल्पे स्वरूपशक्त्या प्रकाशते । ननु, यदि तादृश एव कृष्णस्तर्हि कथं देहात्मविभागादिना तद्विरुद्धधर्म इवाभाति तत्राह—माययेति । आत्मारामाणां तत्प्रियजनानाञ्चात्माधिकनिरुपाधिपरप्रेमास्पदसर्वांशत्वेन तद्व्यतिरिक्तवस्तुसम्भेदाभावादिति भावः । निरुपाधिपरमप्रेमास्पदत्वङ्खल्वात्मत्वमानन्दत्वञ्चेति अत एव श्रीमध्वाचार्यधृतं महावाराहवचनं "देहदेहिविभागोऽत्र नेश्वरे विद्य

क्वचित्" इति तदेवमसुरादीनां मायावरणान्न तथा भाति "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीभगवद्गीतासु च तत्र योगमायादुर्घटघटनाकारि किमपि मम बुद्धिसौष्ठवमिति श्रीस्वामिचरणाश्च तत्प्रियजनानान्तु तत्प्रेमभावितान्तःकरणे क्षीरे सितोत्पलवदेकजातीयत्वेन प्रेमास्पदतास्वभावोऽसौ स्वमाधुरीभिरधिकमाभाति अन्यत्र तु यथोचितमिति स्थिते सर्वातिशयि तत्प्रेमस्वभावानां श्रीव्रजवासिनां किमुतेति भावः ॥ ५५ ॥ न केवलं सर्वेषां क्षेत्रज्ञानामेव परमं स्वरूपम् अपि तु अन्ते सर्वेषाञ्जडानाम् आदौ सर्वेषां साक्षात्तद्रूपाणां चेति वक्तुन्तस्य भूमत्वमाह—वस्तुत इति । वस्तुतस्तत्त्वतः कृष्णमत्र जगति जानतां विचारयतां तद्विचारज्ञानाम् इत्यर्थः । यत्स्थावरजङ्गमरूपमखिलं यच्च भगवतो रूपं नारायणाद्यभिधमखिलं तत्तत्सर्वम् इह श्रीकृष्णे एव तदन्तर्भूतत्वेनैव स्फुरतीत्यर्थः । नान्यत्किञ्चन यत्तत्र नास्ति तन्नास्त्येवेत्यर्थः । कारणांशिनोः विज्ञानेन कार्यांशयोर्विज्ञानात् तद्व्यतिरेकेण तद्व्यतिरेकाच्च महासमुद्रस्य सागरतरङ्गफेनादिवत् सूर्य्यस्यान्तरीणमण्डलात्मकस्य बहिर्मण्डलकिरणपरमाणुगणमरीचिकादिवदिति ज्ञेयन्तदुक्तं द्वितीये—

"सोयन्तेऽभिहितस्तात ! भगवान् विश्वभावनः । समासेन हरेर्नान्यदन्यस्मात् सदसच्च यत्" ॥ इति ॥ ५६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ममेति देहं मन्यमानानां विवेकिनां मतमालम्ब्याह—देहोपीति । तैर्व्याख्यातं तत्र नातीवास्थेति म्रियतां जीवतु वेत्यपेक्षाऽधिकं नास्तीत्यर्थ इति । यद्वा, आत्मवत् पूर्वमविवेकेनात्मतया गृहीतोऽहन्ताविषयो यो देहस्तद्वन्न प्रियो भवतीत्यर्थः । यद्यस्मात् जीर्य्यति रोगादिनाभिभूतेऽस्मिन् ममतास्पदे देहे विषये जीविताशा अयं देहस्तिष्ठत्विति वाञ्छापि अबलीयसी पूर्वापेक्षया स्वल्पैव भवति विवेकतोऽस्मिन्नात्मत्वाभिमानापगमेनातिप्रियत्वाभावात् ॥ ५३ ॥ चरं देहापत्यादि अचरं गेहादि तदात्मकमेतत् जगत्प्रपञ्चः च अपि सकलमपि । यद्वा, सकलं देहदैहिकं जगच्च चराचरद्रव्याणां यज्ञादिसाधनतया तत्तत्फलोपभोगेन च क्रमशः सर्वस्याप्यात्मार्थत्वात् अन्यत्तैर्व्याख्यातम् यद्वा, तदर्थं तत् सुखार्थं तत् सुखार्थमेवेत्यर्थः ॥ ५४ ॥ अखिलानामात्मनां क्षेत्रज्ञानामात्मानम् अन्तर्यामित्वात् परमात्मानमित्यर्थः । एवं श्रीयशोदानन्दनं सोऽपि ईदृशोऽपि अत्रावतीर्णः लोके वा देहीव यथाऽन्यो जनस्तद्वदाभाति ईषत्प्रकाशते तच्च मायया तस्य तत्त्वाज्ञानेनैव लौकिकत्वेऽपि सर्वत्रैवालौकिकत्वात् तच्चादावुक्तमेव ईषदिति तत्त्वतः प्रायः परमैश्वर्य्यप्रकटनाभिप्रायेण । यद्वा, मायया कृपया देही जीव इव सन् आ सम्यक् भाति राजते उक्तयुक्त्या प्रियत्वेन साधितानामखिलात्मनामेवात्मानं जगद्धिताय कृष्णमवेहि जगतां दुःखध्वंसाय परमानन्दप्रातये च कृष्णस्वरूपेणावतीर्णमवेहीत्यर्थः । ननु, कृष्णे स्नेहः परमात्मतयोपाधिरिति चेदुच्यते तर्हि असुराणामपि वस्तुतस्तथात्वात्तेषां स्नेहः कथं नोत्पद्यते तत्राह— सोऽपीति । सोऽपि देहिदेहविभागरहितोऽपि अत्र एषु दृष्टेष्वसुरादिषु मायया तदायस्वाभाविकप्रेमास्पदत्वाद्वाऽऽवरणशक्त्या देहीव प्राकृतशरीरीव आभाति तथाचोक्तं महावाराहे "देहदेहिविभागोऽत्र नेश्वरे विद्यते क्वचित्" इति । अयं भावः आवरणभावादेव तत्प्रियत्वानुभावः स्यात् मल्लोके परमोत्कटदोषावृता आत्मानमपि व्यापादयन्तो दृश्यन्ते तदावरणं तु भक्त्यैव सम्यगपयाति तेन भक्तितारतम्येनैव प्रेमतारतम्यम् अतो व्रजवासिनां सर्वातिशायिभजनविशेषात् कृष्णे प्रेमाधिक्यमेवेति ॥ ५५ ॥ भगवान् रूप्यते परमकारणतया साक्षादनुभूयते यस्मिन् तथाभूतमखिलं भवति न चान्यदन्यप्रकारकं स्यादित्यर्थः । अन्यतैर्व्याख्यातम् । यद्वा, तादृशत्वज्ञानस्य फलमाह—वस्तु इति । अखिलात्मनामात्मेति कृष्णं जानतां भगवतो रूपमधिष्ठानं सर्वत्रैव भगवानयं निवसतीति परिस्फुरतीत्यर्थः ॥ ५६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

एवं सामान्यतः विशेषतः आत्मनः प्रेमविषयीभूतं देहं प्रतिपाद्य आत्माऽज्ञानवतां च देहस्यैवाऽऽत्मत्वेन प्रीत्यास्पदत्वमुक्त्वा इदानीं देहविलक्षणात्मज्ञानवतां प्रीतिवृत्तिं विवेचयति—देहोऽपीति । येषां देहोऽपि ममताभाक् इति मतं भवेत् चेद्यदि तर्हि तदाऽसौ देहः आत्मवत्प्रियः कुतस्तेषां आत्माऽनुभवस्य प्रीतिविषयत्वात् तस्य च देहनाशे सति विनाशात् अदर्शनाद्यतः तेषामस्मिन् देहे जीर्यति सति अपि सम्भावनायां जीविताशा बलीयसी भवति औषधादिकरणेन व्याध्यादिनिवारणेन योगेन वा आसनादिभिः धारणाभेदैश्च देहस्य नीरोगीकरणेनात्माऽनुभवस्यैव तेषां प्रियत्वमिति भावः ॥ ५३ ॥ एवमेव परमात्मप्रीतिमतां प्रपन्नानाम् भक्तानां च भगवत्प्रीतिमेवाह - द्वाभ्याम्, तस्मात्सर्वेषामपि देहस्याऽपि आत्मविशेष्यकत्वेनेव प्रियत्वमतः स्वात्मा स्वस्य जीवस्य आत्मा परमात्मा एव, देहिनां देहविशिष्टजीवानां प्रियतम इत्यस्माभिः आत्मज्ञैर्निर्णीयते अत एतच्चराचरं जगत् तदर्थं आत्मार्थं आत्मा परमात्मा तच्छेषभूतमित्यर्थः ॥ ५४ ॥ एतदेव विशदयति–कृष्णमेनमिति । एनं कृष्ण सदानन्दस्वरूपरूपं परं ब्रह्म श्रीनारायणाख्यम् अखिलात्मनां सर्वावस्थबद्धमुक्तनित्यजीवानाम् आत्मानं शरीरिणं शेषिणामाधारम् अवेहि सोऽपि तादृशस्वरूपरूपगुणविभूतिमानपि अत्र श्रीवृन्दावनभूमौ जगद्धिताय चेतनाचेतनकल्याणाय मायया स्वसङ्कल्पेन वर्त्तमानोऽपि "माया वयुनं ज्ञानम्" इति नैघण्टुकाः देहीव भौतिकदेहधारीवाज्ञानां भाति ॥ ५५ ॥ एवं वैशिष्ट्येन भगवदज्ञानवतां चिदचिदन्यत्त्व प्रतिपादयति—कारणत्वप्रतिपादनेन परिणामं च वारयति, भगवत इति । श्रीकृष्णं वस्तुतः स्वात्मात्मत्वेन स्थास्नु चरिष्णु च चेतना-

चेतनम् अखिलं सर्वं भगवद्रूपं श्रीभगवतः श्रीकृष्णस्य रूपं शरीरम् इति च जानतां तदन्यद्वस्तु किञ्चनाऽपि नहि "तदनन्यत्वमारम्भणशब्दादिभ्यः" (२।१।१५) इति सूत्रे चिदचिद्वस्तुनोः शरीरशरीरिभावेन परमात्मानन्यत्वप्रतिपादनात् स्वरूपपरिणामानभ्युपगमात् श्रुतिपुराणेषु सहस्रशः साङ्कल्पिकप्रवेशस्यैव घोषितत्वाच्च ।। ५६ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

विवेकिष्वेतावान्विशेष इत्याह – देहोऽपीति । ममताभाक् येषां देहोऽपि ममताविषयः न त्वहन्ताविषय इति भावः। तर्हि तेषामसौ ममताभाग्देहः नात्मवत्प्रियः किन्तु ततः किञ्चिदूनप्रिय इत्यर्थः। ननु, विवेकिनो देहे सुतरां प्रीत्यभावः किं न स्यात्तत्राह –यद्यस्माद्देहे जीर्यत्यपि विपत्तुमुद्युक्तवत्यपि जीविताशा बलीयसी न जीर्णतां याति किन्तु बलीयस्येवावतिष्ठतेऽतः किञ्चिदूनप्रिय इति भावः ।। ५३ ।। अस्तु प्रकृते किमायातं तत्राह तस्मादिति । तस्माल्लोकपरिपाटेरेवंविधत्वाज्जन्मिनां जननवतां देहभृतामित्यर्थः । प्रियतमः कृष्ण इति शेषः । तत्र हेतुः स्वात्मा स्वेषां जीवानामन्तरात्माऽत एतच्चराचरात्मकं जगत्सर्वं तदर्थमेव प्रिय तदिष्टसम्पत्तये एव प्रियम् इत्यर्थः। "आत्मनस्तु कामाय" इति श्रुत्यनुसारेणायं निर्देशः अर्थशब्दः प्रयोजनवाची प्रयोजनं चेष्टसम्पत्तिः तदिष्टसम्पत्तय एव प्रियमिति यावत् "न वा अरे" इति श्रुतेस्त्वयमर्थः पतिपुत्रादीनां कामाय कामसिद्ध्यै तदभीष्टसिद्ध्यै भार्या पित्रादीन् प्रति पतिपुत्रादीनामभीष्टसिद्ध्यर्थं न पतिपुत्रादयः प्रिया भवन्ति, अपि त्वात्मनः तत्तत्पुत्रादिनिमित्तभोगप्रदातुः परमपुरुषस्यैव सङ्कल्पास्तेषां पतिपुत्रादीनां भार्यापुत्रादीन् प्रियत्वं भगवत्सङ्कल्पायत्तम् अस्या भार्याया अयं पतिः प्रियोऽस्य पितुरयं पुत्रः प्रियः स्यादित्येवं भगवता सङ्कल्पिते सति तत्तत्प्रियं भवतीति एवं च स्वस्य निरतिशयप्रियरूपत्वाभावे सतोरेषां प्रियावहत्वासम्भवात्तस्य तत्त्वं कैमुत्यनयसिद्धम् (प्रेमास्पदत्वं प्रियतमत्वं पवित्रीकरणत्वं नित्यहीनमङ्गलसुखदायित्वं तत्त्वश्च सर्वमङ्गलं च श्रीकृष्णकमल एव नान्यत्रात्रत्यदेहकलत्रपुत्रमित्रधनाप्तादौ चेति दिक्) ।। ५४ ।। कृष्णे परमात्मत्वसंशयं निराकरोति- कृष्णमिति । एनं कृष्णम् अखिलात्मनामात्मानमवेहि जानीहि यद्यखिलात्मनामात्मा तर्हि किमर्थं मानुषतामापन्नस्तत्राह—मायया आत्मीयसङ्कल्पेनात्र लोके गोपादिषु देहीव कर्मायत्तदेहभृदिवाभात्यविवेकिनामिति भावः ।। ५५ ।। तदेव विशदयति वस्तुत इति। स्थावरजङ्गमात्मकं कृत्स्नं जगद्भगवतः शरीरमन्यत्तत्पृथक्सिद्धं वस्तु किञ्चिदपि न विद्यत इत्येवं वस्तुतो जानतां देहीवाभातीत्यन्वयः । एवं जानतां तु देवमनुष्यादिविजातीयत्वेनैव सर्वशरीकत्वेनैव च भातीत्यर्थः ।। ५६ ।।

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

देहोऽपि ममेदं शरीरमिति ममताभाक् ममतास्पदस्तर्हि असौ देहो नात्मवत् प्रियो भवति, कुतः ? यत् यस्मात् अस्मिन् देहे जीर्यत्यपि विशीर्यमाणेऽपि जीविताशा बलीयसी "आयुराशास्ते" इत्यादिश्रुत्युक्तप्रकारेण जीविताशा बलीयसी उत्कटा भवति ममेदं शरीरं कियत्कालं स्थायि स्यादिति सर्वस्याभिलाषा जायते इति प्रसिद्धमित्यर्थः ।। ५३ ।। तस्मात् स्वात्मैव प्रियतम इत्युपसंहरन्नाह–तस्मादिति । तस्मात् कारणात्सर्वेषामपि देहिनां जीवात्मनां प्रियतमः स्वात्मैव परमात्मैव कुतः ? एतच्चराचरं जगत्तदर्थमेव हेतुगर्भितमिदं तदर्थत्वात्सर्वस्येत्यर्थः ।। ५४ ।। कः सर्वात्मनामात्मेत्यत आह–कृष्णमिति । त्वम् अखिलात्मनां जीवात्मनाम् आत्मानं शरीरिणम् एकं श्रीकृष्णमवेहि जानीहि सोऽप्यत्र जगद्धिताय जगद्रक्षणार्थं मायया स्वसङ्कल्पेन देहीवाभाति मनुष्यसजातीयतया भाति तथा चोक्तं मोक्षधर्मे—

"एष नारायणः साक्षात् क्षीरार्णवनिकेतनः । नागपर्यङ्कमुत्सृज्य ह्यागतो मथुरां पुरीम्" ।। इति ।। ५५ ।।

अतः श्रीकृष्ण एव सर्वशरीरीत्याह—वस्तु इति । लोके वस्तुतो यथार्थत्वेन स्थास्नु चरिष्णु जङ्गमस्थावरं सर्वं कृष्णमेव जानतां ज्ञानिनामिह नान्यत्किञ्चन वस्तु किन्तु अपरं चिदचिद्रूपं जगत् भगवद्रूपमेव तेषां भगवच्छरीरमेव भाति नान्यदित्यर्थः तथा च श्रुतिः "यस्मात्मा शरीरं, य आत्मनि तिष्ठन् यमात्मा न वेद य आत्मानमन्तरो यमयति, यस्य पृथिवी शरीरं यस्याव्यक्तं शरीरम्, एष सर्वभूतान्तरात्मा अपहतपाप्मा" इत्यादि तथा चैकादशे कविवाक्यं जनकं प्रति—

"खं वायुमग्निं सलिलं महीं च । ज्योतींषि सत्त्वानि दिशो द्रुमादीन् ।।
सरित्समुद्रांश्च हरेः शरीरम् । यत्किञ्च भूतं प्रणमेदनन्यः" ।। इति ।। ५६ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ममेति देहं मन्वानानां विवेकिनां मतमालम्ब्याह– देहोऽपीति । अत्र देहादहन्ताममतयोरपगमेनात्मगतमेव सङ्गच्छत इति टीका योज्या पुत्राद्यपेक्षया समुच्चयार्थोऽयमपिशब्दः टीकायाश्च अविवेकदशायामिति बलीयस्त्वविशेषणेनाक्षिप्यते एतत् प्रतियोगितया विवेकिन इत्यपि सोऽपीत्यसौ देहोऽपीत्यनयोर्व्यञ्जकमिति ज्ञेयम् । सरलार्थस्त्वयं यस्मान्ममताभाक्त्वादेव पुत्रादाविव देहे जीर्यति तस्य देहस्य जीविताशा बलीयसी भवति ममता चात्मसम्बन्धादेवेति ।। ५३ ।। एवमात्मनः स्वतःप्रियत्वेन

मुख्यस्वरूपत्वञ्च बोधितम् ॥ ५४ ॥ अथ विवक्षितमाह—कृष्णमिति । एवं श्रीयशोदानन्दनरूपम् अत्र जगति जगतो हितायाभाति स्वयं प्रकाशते देहीव देहात्मविभागादिना तद्विरुद्धधर्म इव माययैवाभाति न केवलं सर्वेषां जीवानामेव परमस्वरूपम् अपि तु अन्ते सर्वेषां जडानाम् ॥ ५५ ॥ आदौ सर्वेषां साक्षाद्रूपाणां चेति वक्तुं तस्य भूमत्वमाह, वस्तुत इति । वस्तुतः तत्त्वतः श्रीकृष्णम् अत्र जगति जानतां जनानां विचारयतां तद्विचारज्ञानामित्यर्थः । यत् स्थावरजङ्गमरूपमखिलं यच्च भगवतो रूपं नारायणाद्यभिधमखिलं तत्तत् सर्वम् इह श्रीकृष्ण एव तदन्तर्भूतत्वेनैव स्फुरतीत्यर्थः । नान्यत् किञ्चन यत्तत्र नास्ति तन्नास्त्येवेत्यर्थः । कारणांशिनोर्विज्ञानेन कार्यांशयोर्विज्ञानात् तद्व्यतिरेके व्यतिरेकाच्च महासमुद्रस्य सागरतरङ्गफेनादिवत् सूर्यस्यान्तरीणमण्डलात्मकस्य बहिर्मण्डलकिरणपरमरीचिकादिवदिति ज्ञेयम् ॥ ५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देहात्मवादिनां तेषामपि कदाचिदीषद्विवेके सति आत्मैव प्रियः स्यान्न तथा देह इत्याह—देहोऽपि अहन्तास्पदीभूतोऽपि देह ईषद्विवेकेन यदि ममताभाक् स्यात्तर्ह्यसौ देह आत्मवत् प्रियो न भवेत् किं त्वात्मानुरोधेनैव प्रियः स्यादित्यर्थः । तत्र लोकानुभवमेव प्रमाणयति—यदिति । सर्वत्र देहत्यागे आत्मनोऽतिकष्टं दृष्ट्वा तदपि कष्टं ममात्मनो मा भवत्विति बुद्ध्यैव आत्मन्यतिस्नेहादेव देहे जीविताशा अधिका भवतीत्यर्थः ॥ ५३ ॥ तस्मादिति चरं पुत्रकलत्रादि अचरं गृहघटपटादि तेन लोकदृष्ट्या पुत्रादिभ्यः सकाशादात्मन एवात्यन्तिकप्रीतिविषयत्वं प्रतिपादितम् ॥ ५४ ॥ विवक्षितं सिद्धान्तं प्रतिपादयंस्तत्त्वदृष्ट्या तस्याप्यात्मन आपेक्षिकप्रीतिविषयत्वमेव आत्यन्तिकप्रीतिविषयत्वं केवलं कृष्णस्यैवेत्याह– कृष्णमिति । अखिलानामात्मनां जीवानामप्यात्मानं परमात्मानमेव कृष्णमवेहि तेन पुत्रादिषु प्रीतिर्यथा देहानुरोधेन देहे च प्रीतिर्यथा आत्मानुरोधेन तथैवात्मन्यपि प्रीतिः परमात्मानुरोधेन स च परमात्मा कृष्ण एव मूर्त्तः पूर्ण एव यदुक्तं "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इत्यतः कृष्णस्यैवात्यन्तिकप्रीतिविषयत्वात्तत्रैव प्रीतेः पराकाष्ठेति स्वपुत्रेभ्योऽपि तत्र यत् प्रेमाधिक्यं तदुपपादितम् । किञ्च, जीवानां भक्त्यभावात् मायया ज्ञानावरणाच्च भक्त्यैकप्रकाश्ये तस्मिन्तादृशत्वेनानुभवो मायिकजीवानामभक्तानां कथमस्त्वित्यतः पुत्रादिष्वेव लोकानां प्रीतिविषयत्वेनानुभवो न तस्मिन्, व्रजवासिनां तु मायातीतत्वाद्भक्तिपूर्णत्वाच्च यथार्थ एवानुभव इत्यतस्तेषां स्वपुत्रादिभ्योऽपि तस्मिन् प्रेमाधिक्यं स्वाभाविकं वर्तते एवेति समाधेयं जगद्धितायावतीर्णः स कृष्णोऽपि मायया देहीव आभाति स्वाविद्यया मूढैर्जीव इव भौतिकदेहवान् प्रतीयत इत्यर्थः । यद्वा, माययैव यो देहस्तद्वानिव मायोपाधिरिव प्रतीयते न तु स मायोपाधिरित्यर्थः । अत एव मधुसूदनसरस्वतीपादैरपि "सच्चित्सुखैकवपुषः पुरुषोत्तमस्य नारायणस्य महिमा नहि मानमेति" चिदानन्दाकारं जलदरुचिसारं श्रुतिगिरां व्रजस्त्रीणां हारम्" इत्यादिबहुशो वर्णितम् । यद्वा, ननु परमात्मा खल्विन्द्रियग्राह्यो न भवेत् कृष्णस्तु सर्वैर्दृश्यत एवेति तत्राह, जगत एव हिताय मायया निर्हेतुकाचिन्त्यया कृपया सोऽपि अत्र जगज्जनेन्द्रियेषु देहीव आभाति स्वयमेव तद्ग्राह्यत्वेन प्रकाशते इति अतर्क्यतदिच्छया तद्गृहीतैरिन्द्रियैरेव स गृह्यते, न पुनरिन्द्रियैः स्वयमेव शब्दादिरिव ग्रहीतुं शक्य इति भावः । अत एव भागवतामृतधृतं नारायणाध्यात्मवचनम् । "नित्याव्यक्तोऽपि भगवानीक्षते निजशक्तितः । तामृते परमानन्दं कः पश्येतामितं प्रभुम्" इति तत्रत्या कारिका च "ततः स्वयंप्रकाशत्वशक्त्या स्वेच्छाप्रकाशया । सोऽभिव्यक्तो भवेन्नेत्रे न नेत्रविषयत्वतः" इति तत्र हि तमन्यदेशीयानामनुकूलजनानां स्वकृपादृष्टिदानेनैव स्वमाधुर्य्यग्राहणम्, प्रतिकूलानां कंसाद्यसुराणां तु पित्तदूषितरसनया मत्स्यण्डिकाभोजनमिव प्राकृतैरेवेन्द्रियैस्तन्माधुर्य्यग्रहणरहितमेव दर्शनं ध्यानावेशसिद्ध्यर्थम् आवेशफलन्तु सर्वापराधोपशमनपूर्वको मोक्षः स एव तेषां हितम् किञ्च, व्रजस्थानामैश्वर्यज्ञानशून्यानामन्येषामनुकूलप्रतिकूलानामपि यद्यपि स देहीवाभाति तदपि "देहिदेहविभागोऽत्र नेश्वरे विद्यते क्वचित्" इति मध्वाचार्य्यधृतमहावाराहवचनादेव शास्त्रज्ञैर्देहीति वक्तुमयोग्यत्वादिवशब्दप्रयोगः ॥ ५५ ॥ किञ्चापेक्षिकप्रेमास्पदानि ये चात्मदेहपुत्राद्यास्तेपि विचारवतः स एवेत्यापेक्षिकप्रेमास्पदत्वमपि तस्यैवेत्याह— वस्तुत इति । वस्तुतस्त्वित्यर्थः । कृष्णं जानतां पुंसां मते स्थावरं जङ्गमं च सर्वं तद्रूपमेव तस्यैव सर्वकारणत्वात् कारणस्यैव कार्याकारत्वादिति भावः ॥५६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यत् यतः अज्ञानकाले जीर्यत्यपि जीविताशा आसीत् सोऽपि देहः ममताभाक् चेद्यदा आत्माऽनात्मविवेकदशायां भवति तर्हि आत्मवत् प्रियो न भवतीत्यन्वयः ॥ ५३ ॥ तस्मात्सर्वेषां ज्ञानिनामज्ञानिनां च आत्मैव प्रियतमः तदर्थमात्मार्थमेव सकलं प्रियं भवति तथा च श्रुतिः "न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति" इति ॥ ५४ ॥ प्रकृतमनुसरति—कृष्णमिति । अखिलात्मनां सर्वेषां जीवानामंशभूतानामात्मानं परमात्मभूतमंशिनमित्यर्थः । ननु, सर्वात्मनो नन्दगृहे कथं प्रवेश इत्यत आह, अत्र जगद्धिताय आविरभूदिति शेषः । ननु, अखिलात्मनि श्रीकृष्णे केषाञ्चित् प्रतिकूलाचरणे किं बीजमित्यत्राह—सोऽपि सर्वात्मापि श्रीकृष्णः मायया सामान्यजनमोहिन्या देहीव स्वात्मौपम्येन आभातीति ॥ ५५ ॥ न केवलं श्रीकृष्ण आत्मनामात्मा अपि तु चिदचित्पदार्थानां स्वशक्तिरूपाणां सर्वेषामात्मेत्याह—वस्तुत इति । सर्वकारणकारणं श्रीकृष्णं जानतां विदुषाम् स्थावरं जङ्गमं च अखिलं सर्वं भगवद्रूपं चेतनत्वेनाऽचेतत्वेन भिन्नत्वेऽपि सर्वकारणकारणात् श्रीकृष्णात् पृथक्-

स्थितिप्रवृत्त्याद्यभावात् अभिन्नमित्यर्थः "तदनन्यत्वमारम्भणशब्दादिभ्यः" (२।१।१५) इत्यादिसूत्रेभ्यः "ऐतदात्म्यमिदम्" इत्यादि श्रुतिभ्यः "सर्वं कृष्णः स्थावरं जङ्गमं च विश्वात्मानं विश्वमेतं प्रतीहि" इत्यादि स्मृतिभ्यश्च अतोऽन्यदकृष्णात्मकं किञ्चनापि वस्तु न ॥ ५६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तेषामेव तत्त्ववित् प्रसङ्गेनेषद्विवेकलाभे सति देहोऽपि चेन्ममताभाक् स्यात्तर्ह्यसावात्मवत् प्रियो न भवेत् किन्तु तत्सम्बन्धेनैवेत्यर्थः । लोकानुभवं प्रमाणयति यदिति यस्माद्रोगादिना देहे जीर्यति सति तत्रातिक्लेशं वीक्ष्यात्मनो मम सोऽतिक्लेशो माभूदित्यात्मन्यतिस्नेहादेव देहे जीविताशा बलीयसी भवतीत्यर्थः ॥ ५३ ॥ निगमयति – तस्मादिति । चरम् अपत्यादि, अचरं गृहादि सकलं तदर्थमेव प्रियतममिति लोकदृष्ट्यात्मन एवाति स्नेहविषयत्वमुपपादितम् ॥ ५४ ॥ प्रस्तुतमाह–कृष्णमिति ।

कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥

इति स्मृत्युक्तलक्षणत्वेन तन्नामानं विभुविज्ञानानन्दमेनं श्रीनन्दराजसूनुम् अखिलानामात्मना विशुद्धानामपि जीवानामात्मानमवेहि तेन यथा अपत्यादिषु देहानुरोधेन देहेत्वात्मानुरोधेन स्नेहः प्रतीयते तथात्मनि जीवे कृष्णदेहस्थानीये तदनुरोधादेव स्नेह इति कृष्णस्यैवातिस्नेहविषयत्वात् स्वपुत्रेभ्योऽपि तत्र स्नेहाधिक्य सिद्धम् । इदमत्र बोध्यम् प्रेमा खलु सुख एव चेतनस्य दृश्यते स च प्रकाशरूपे तस्मिन् स्थिरः जडस्य विषयसुखस्य विवेकिना हेयत्वात् तादृशं सुखञ्च जीवस्वरूपमेव स्वप्रकाशे सुखे जात्यापरिमाणु न चोत्कृष्टे प्रकाशं सुख चातिशयितमर्षयति जीवस्य तादृशस्यापि प्रेमा भवेदेव तादृशञ्च वस्तु परं ब्रह्मैव "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्म" "राति दातुः परायणः" "एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्" "एको बहूनां यो विदधाति कामान्" इत्यादि श्रुतिभ्यः गुडात् मधु इव जात्या बिन्दोः सिन्धुरिव परिमाणेन च ब्रह्मोत्कृष्टं जीवादिति निर्णीतं सूत्रकृता परमतः सेतून्मानेत्यादिकेऽधिकरणे तत् परं ब्रह्म कृष्ण एव साक्षात् प्रकृतिपरोऽयमात्मा गोपाल" इति "योऽसौ परं ब्रह्म गोपाल" इति च श्रवणात् सोऽपि कृष्णो जगद्धितायात्र व्रजेऽवतीर्णो मायया देहीवाभाति वस्तुतः स्वात्ममूर्तिरेवोक्तश्रुतेरिति ॥५५॥ न केवलं जीवात्मनामेवात्मा कृष्णोऽपि तु जडानामपीत्याह—वस्तुत इति तत्त्वतोऽत्र जगति कृष्णं जानतां विचारयतां विदुषां स्थास्नु चरिष्णु चाखिलं भगवतस्तस्यैव रूपं भवति तद्व्याप्यत्वात्तदधीनवृत्तिकत्वात्तद्रूपमिति प्राणसंवादादवगतम् अत एवं श्राव्यते "स वासुदेवो न यतोऽन्यदस्ति" इति ॥ ५६ ॥

श्रीसुबोधिनी

पश्चादल्पविवेकेन **देहोपि ममताभाक् चेत् तर्ह्यसावेव** देह **आत्म**वत् पूर्वानुभूतदेहवदहमभिमानयुक्तदेहवत् **प्रियो न** भवति, किञ्च प्राणश्चेदात्मा तदापि प्राणवन्न देहः प्रियः, **यज जीर्यत्यपि देहेस्मि**न्नपि देहे **बलीयसी** तस्य **जीविताशा** ॥ ५३ ॥ तस्मादात्मा प्रिय इत्यविवाद, तदर्थं चान्यत् ॥ ५४ ॥ स चात्मा कृष्ण एवेत्याह **कृष्णमेन**मिति, **अखिला**त्मनामयमात्मा, अस्यैव स्नेहः सहजो धर्म एतद्विषयकस्तदंशः पश्चादन्यत्र **गच्छति** तदंशेषु, एतन् मैत्रेयीब्राह्मणे वाक्यान्वयादित्यधिकरणे स्पष्टमसमाभिरुपपादितं भगवद्धर्मा एवाऽन्यत्र कार्ये अंशे च भासन्त इति । ननु, कृष्णः कथमात्मा तत्राह, **जगद्धितायेति** । केवलं जगद्रक्षार्थं मायया देहीवाभाति वस्तुतस्तु परब्रह्मैव ॥ ५५ ॥ किञ्च, **कृष्णं जानतां** सर्वमेव स्थावरजङ्गमात्मकं भगवद्रूपं भाति यत अन्यत् नास्त्येव किञ्चन । ननु, भगवतः कथमेवं रूपं तत्राह–**अपरमिति** । परं कृष्णरूपम् अपरं जगत् अतो महापुरुषप्रतीत्यापि कृष्णो भगवान् यस्मिन् विदिते सर्वमिदं विदितं भवतीति तदैव सङ्गच्छते ॥ ५६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जीर्यत्यपि आसन्नमरणे अपि अस्मिन् देहे अविवेकदशायां यथाऽहन्तास्पदत्वेन प्रियतमत्वेन च बलीयसी उत्कटा जीविताशा भवति, तथा सोऽपि देहो यदि विवेकदशायां ममताभाग्भवति, तर्ह्यसावपि आत्मवत् प्रियो न भवति । जीवतु वा नश्यतु वा, तत्र नाग्रहः ॥ ५३ ॥ यद्यस्मादेवं तस्मात् सर्वेषामपि देहिनां स्वात्मैव प्रियतमः । चरं पुत्रकलत्रादि, अचरं गृहधनादि । सकलमप्येतज्जगत् तदर्थमेव आत्मसुखार्थमेव प्रियं भवतीत्यर्थः ॥ ५४ ॥ 'भवत्वात्मा सर्वतः प्रियः, कृष्णः कथं प्रियो भवति ?' तत्राह–कृष्णमिति । एनं कृष्णमखिलात्मनां सर्वप्राणिनामात्मानं त्वमवेहि जानीहि । ननु 'सर्वात्मा चेत्तर्हि कथमिन्द्रियगोचरः सन् परिच्छिन्नमनुष्यवत् प्रतीयते ?' तत्राह– जगद्धितायेति । यादृशीर्लीलाः श्रुत्वा जनो मनोमलं विहाय स्वपरायणः स्यात्तादृशलीलाकरणेन जगतो हिताय सर्वात्माऽपि मायया स्वेच्छयैवात्र व्रजे देहीवाभाति, न तु वस्तुतः । कर्माधीनो मनुष्य एवेत्यर्थः ॥ ५५ ॥ 'न केवलं चेतनानामेवायमात्मा, अपि तु जडानामपि' इति वदन् 'तस्य सर्वात्मत्त्वे महतां दर्शनमपि प्रमाणम्' इत्याह –वस्तुत इति । वस्तुतः परमार्थतः श्रीकृष्णं जानतां पुंसामत्र संसारे स्थास्नु स्थावरं चरिष्णु जङ्गमं च सर्वं भगवद्रूपं भगवान् श्रीकृष्ण एव रूपं यस्य तथाभूतं भाति, ततोऽन्यदिह जगति किञ्चनापि नावशिष्यते इत्यर्थः ॥ ५६ ॥

अन्वितार्थप्रकाशिका

देहोऽपीति ।। अहंतास्पदीभूतोऽपि देहो यदि ईषद्विवेकेन ममताभाक् आत्मभिन्नत्वेन ज्ञातो भवेत् तर्ह्यसौ देहः आत्मवत् प्रियो नैव भवेत् । किन्त्वात्मानुरोधेनैव प्रियो भवेत् । यद्यतः अस्मिन् देहे जीर्यत्यपि जीर्णत्वेन प्रीतेरविषयेऽपि न जीविष्यतीति निश्चयेऽपि च देहत्यागे आत्मनोऽतिकष्टं दृष्ट्वा ममात्मनः कष्टं माभूदिति बुद्ध्यैव जीविताशा बलीयसी अधिका भवति यद्वा । यद्यस्माज्जीर्यति रोगादिपीडितेऽस्मिन् विवेकिनां ममतास्पदे देहे जीविताशा तिष्ठत्वयं देह इति वाञ्छाऽपि अबलीयसी पूर्वापेक्षया स्वल्पा भवति । विवेकेनात्मत्वाभिमानापगमे नातिप्रियत्वाभावात् ।। ५३ ।। तस्मादिति ।। हे भारत ! तस्मात्सर्वेषामपि देहिनां स्वात्मैव प्रियतमः चरं पुत्रकलत्रादि अचरं गृहधनादि सकलमप्येतज्जगत् तदर्थमेव आत्मसुखार्थमेव प्रियं भवति ।। ५४ ।। कृष्णमिति ।। एनं कृष्णमखिलात्मनां सर्वप्राणिनामात्मानं त्वमवेहि जानीहि । जगद्धितायावतीर्णः स कृष्णोऽपि अत्र लोके मायया देहीव आभाति तत्तच्चरितैर्लोकास्तत्प्रवणाः स्युरिति लीलाप्रकटीकरणम् ।। ५५ ।। न केवलमात्मनामात्मा अपि तु जडानामपि मूलमित्याह— वस्तुत इति ।। वस्तुतः परमार्थतः श्रीकृष्णं जगत्कारणं जानतां पुंसामत्र संसारे स्थास्नु स्थावरं चरिष्णु जङ्गमं च अखिलं वस्तु भगवद्रूपं भाति । ततोऽन्यदिह जगति किंचनापि नावशिष्यते ।। ५६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विवेकिष्वेतावान् विशेष इत्याह ।। देहोऽपीति येषाम् ।। असौ देहोऽपि, ममताभाक् ममताविषयः स्यात् चेत्, न त्वहंताविषय इति भावः । तर्हि, तेषां असौ, ममताभाक् देहः, आत्मवत् प्रियः, न, किं तु ततः किंचिदूनप्रिय इत्यर्थः । ननु विवेकिनो देहे सुतरां प्रीत्यभावः किं न स्यात्तत्राह । यद्यस्मात्, अस्मिन् देहे जीर्यत्यपि विपत्तुमुद्युक्तवत्यपि, जीविताशा बलीयसी जीर्णतां न यातीत्यर्थः । किं तु बलीयस्येव तिष्ठत्यतः आत्मनः सकाशाद्देहः किंचिदूनप्रिय इति भावः ।। ५३ ।। अस्त्वेवमेव एतावता प्रकृते किमायातं तत्राह ।। तस्मादिति ।। तस्माल्लोकपरिपाटेरेवंविधत्वात्, सर्वेषां अपि, देहिनां देहभृतां, जन्मिनामिति पाठे जन्मवतां प्रियतमः, श्रीकृष्ण इति शेषः । तत्र हेतुः । यतः सः स्वात्मा स्वेषां देहिनां जीवानामिति यावत् । आत्माऽन्तरात्मा भवति । अत एव, चराचरं स्थावरजङ्गमात्मकं, सकलं एतत्, जगच्च विश्वमपि, तदर्थमेव, सकलरसमयश्रीकृष्णस्यान्तरात्मतामालम्ब्येत्यर्थः । प्रियमिति शेषः । तदिष्टसंपत्तये एव प्रियमित्यर्थः । 'आत्मनस्तु कामाय' इति श्रुत्यनुसारेणायं निर्देशः । अर्थशब्दः प्रयोजनवाची । प्रयोजनं चेष्टसंपत्तिः, तदिष्टसंपत्तय एव प्रियमिति यावत् । 'न वा अरे' इति श्रुतेरयमर्थः । पतिपुत्रादीनां कामाय कामसिद्ध्यै तदभीष्टसिद्ध्यै भार्यापुत्रादीन् प्रति प्रियत्वं भगवत्संकल्पायत्तं, अस्या भार्याया अयं पतिः प्रियः, अस्य पितुरयं पुत्रः प्रियः स्यादित्येवं भगवता संकल्पिते सति ततस्तत्प्रियं भवतीत्येवं भगवतः निरतिशयप्रियरूपत्वाभावे सति इतरेषां प्रियावहत्वासंभवात्तस्य तत्त्वं कैमुत्यनयसिद्धम् ।। ५४ ।। श्रीकृष्णे परमात्मत्वसंशयं निराकुर्वन्नाह ॥ कृष्णमिति ॥ हे राजन्, त्वं एनं कृष्णं, अखिलात्मनां सकलशरीरिणां, आत्मानं, अवेहि । यद्ययमखिलात्मनामात्मास्ति, तर्हि किमर्थं मानुषतामापन्नस्तत्राह । सोऽपि उक्तविधोऽपि कृष्णः, जगद्धिताय विश्वस्य हितं कर्त्तुं, मायया स्वीयसंकल्पेन, अत्र लोके गोपादिषु देहीव कर्मायत्तदेहभृदिव, आभाति । अविवेकिनामिति शेषः ।।५५।। तदेव विशदयति ।। वस्तुत इति ।। स्थास्नु स्थावरात्मकं, चरिष्णु जङ्गमात्मकं च, अखिलं कृत्स्नं जगत्, भगवद्रूपं भगवतः शरीरं, भवति । अन्यत् तत्पृथक्सिद्धं वस्तु, इह ब्रह्माण्डगोलके, किञ्चन किंचिदपि, न अस्ति । नैव विद्यते इत्यर्थः । इत्येवं, अत्र लोके, कृष्णं, वस्तुतः अजानतां देहिनां, देहीव मनुष्य इव भातीति पूर्वेणान्वयः । एवं जानतां तु देवमनुष्यादिविजातीत्वेनैव सर्वशरीरकत्वेनैव च भातीत्यर्थः ।।५६।।

कृष्णप्रिया

राजन्, यद्यपि ममता का आश्रय शरीर भी कुछ विवेक ज्ञान होने से आत्मा से भिन्न है ऐसा प्रतीत हो जाय तब आत्मा के समान कदापि प्रिय नहीं रह सकता किन्तु आत्मा के अनुरोध से प्रिय बना रहता है - कारण यह है कि सर्वथा शरीर के शीर्ण होने पर भी प्राणियों को जीने की इच्छा बनी रहती है ।। ५३ ।। इसलिये यह निश्चित सिद्धान्त है कि सभी प्राणियों को आत्मा ही सबसे अधिक प्रिय है । उसी आत्मा के हितार्थ ही देह गेह द्रव्य आदि पदार्थ हैं, अतः ये सब प्रिय हैं स्वतः उसमें प्रियत्व नहीं है ।। ५४ ।। अब राजन् ? यह निर्णय हुआ कि आत्मा ही सबसे अधिक प्रिय है तब भगवान् श्रीकृष्ण को ही प्राणियों की आत्मा की आत्मा जानिये । विश्व के कल्याण के लिये पृथ्वी पर अवतीर्ण वह भगवान् श्रीकृष्ण भी अपनी माया से सामान्य शरीर धारी पुरुष जैसे सांसारिक जीवों को प्रतीत होते हैं परंतु भगवान की देह भी आनन्द रूप ही है ।। ५५ ।। राजन् परीक्षित् ! वास्तविक स्वरूप से भगवान् श्रीकृष्ण को जो जानते हैं उन भगवदीयों को तो ऐसा ज्ञान है ही कि यह स्थावर जङ्गम रूप जगत् है वह भगवान् श्रीकृष्ण जी का अपर रूप है और आनन्दमात्र करपादमुखोदरादि रूप जो स्वरूप है वह भगवान् का "पर" स्वरूप है इस ब्रह्माण्ड में भगवान् श्रीकृष्ण को छोड़कर और कोई वस्तु नहीं है ।। ५६ ।।

[1]सर्वेषामेव भावानां भावार्थो भवति [2]स्थितः । तस्यापि भगवान् कृष्णः [3]किमतद्वस्तु रूप्यताम् ॥ ५७ ॥

समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशोमुरारेः ।
भवाम्बुधिर्वत्सपदं परं पदं पदं पदं यद् विपदां न तेषाम् ॥ ५८ ॥

एतत्ते सर्वमाख्यातं यत् पृष्टोऽहमिह त्वया । यत् कौमारे हरिकृतं जगुः [4]पौगण्डकेऽर्भकाः ॥ ५९ ॥

एतत् सुहृद्भिश्चरितं मुरारेरघार्दनं [5]शाद्वलजेमनं च ।
[6]व्यक्तेतरं [7]रूपमजोर्वभिष्टवं शृण्वन् गृणन्नेति नरोऽखिलार्थान् ॥ ६० ॥

[8]एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे । निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराण पारमहंस्यां संहितायां दशमस्कन्धे ब्रह्मस्तुतिर्नाम [9]चतुर्दशोऽध्यायः ॥ १४ ॥

समाप्तेयं कौतुकलीला

कर्दमक्षमा

अन्वयः—सर्वेषां अपि भावानां भावार्थः भवति स्थितः तस्य अपि भगवान् कृष्णः अतद्वस्तु किं ? रूप्यताम् ॥ ५७॥ ये पुण्ययशोमुरारेः महत्पदं पदपल्लवप्लवं समाश्रिताः तेषां भवाम्बुधिः वत्सपदं परंपदं पदं न यद् विपदां पदं न ॥ ५८ ॥ अर्भकाः कौमारे हरिकृतं यत् पौगण्डके जगुः यत् त्वया अहं पृष्टः ते एतत् सर्वं आख्यातम् ॥ ५९ ॥ नरः मुरारेः सुहृद्भिः अघार्दनं च शाद्वलजेमनं व्यक्तेतरं रूपं अजोर्वभिष्टवं एतत् चरितं शृण्वन् गृणन् अखिलार्थान् एति ॥ ६० ॥ निलायनैः सेतुबन्धैः मर्कटोप्लवनादिभिः एवं विहारैः व्रजे कौमारं जहतुः ॥ ६१ ॥

इति चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कत इति तदाह। सर्वेषामिति । भावार्थः सद्रूपार्थः परमार्थ इत्यर्थः। भवतीति भवत्परिणामं प्राप्नुवत्कारणं तस्मिन् भवति परिणामिनि स्थितः "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिश्रुतेः। तस्यापि भवतः कारणस्यापि भगवान्कृष्णो भवत्कारणम्। अतः किमतत् श्रीकृष्णव्यतिरिक्तं वस्तु रूप्यताम् ॥ ५७ ॥ तस्माच्छ्रीकृष्णस्यैव परमार्थत्वात्तदेकशरणानामयत्नसिद्धो मोक्ष इति प्रकरणार्थमुपसंहरति समाश्रिता इति। पुण्यं यशो यस्य स पुण्ययशाः स चासौ मुरारिश्च तस्य पदपल्लव एव प्लवस्तं ये सम्यगाश्रिताः। कथंभूतम्। महत्पदं महतां पदमाश्रयम्। यद्वा महच्च तत्पदं चेति तथा। तेषां भवांबुधिर्वत्सपदमात्रं भवति किं च परं पदं श्रीवैकुंठाख्यं पदं स्थानं भवति। विपदां यत्पदं विषयस्तत्पुनः कदाचिदपि तेषां न भवति। न ततः पुनरावर्तंत इत्यर्थः ॥ ५८-५९ ॥ सुहृद्भिश्चरितं 'मुष्णंतोऽन्योऽन्यशिक्यादीन्' इत्यादिनोक्तम्। अघार्दनं च शाद्वले जेमनं भोजनं च व्यक्तेतरम् व्यक्ताज्जडप्रपंचादितरच्छुद्धसत्त्वात्मकं वत्सतत्पालरूपम्। यद्वा व्यक्तेतरच्चिद्विलासस्तदेव रूप्यत इति रूपम्। अजस्य उरुर्महानभिष्टवः स्तवस्तं ब्रह्मकृतां स्तुतिम् एतच्छृण्वन्गृणन्गायन्नरः सर्वपुरुषार्थान्प्राप्नोति ॥ ६०-६१ ॥

इति श्रीपरमानंदनृसिंहपदषट्पदः। व्याकरोच्छ्रीधरस्वामी यथामति विधिस्तुतिम् ॥ १ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कंधपूर्वार्धे टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सर्वं कृष्ण एवेति कुतस्तत्सर्वात्मत्वम्। यद्वा—भवत्यस्मादिति भवत् तस्मिन्नुपादाने मृत्तत्त्वादिष्विव घटपटादीनां भावार्थः सत्यताकारणं परमकारणं परपरकारणान्वेषणे कारणतायास्तत्रैव विश्रान्तत्वादिति जगद्विवर्तस्य तस्यैवाधिष्ठानत्वादिति भावः। यतः कृष्ण एव परमकारणमतो हेतोः। अयमेवार्थः श्रीनीलकण्ठेनापि भारतसभापर्वटीकायां दृढीकृतः। तथाहि—बीजाङ्कुरतरूपमेषु ईशसूत्रविराट्स्वनन्तबीजगर्भफलोपमः श्रीकृष्णो नन्दनन्दन एव महामायावी सुप्तिप्रलयकैवल्येषु कर्मोपरमे सति जगदि

---

१. अपि वस्तूनां—श्रीधर. वंशी. वीर. विज. सनातन जीव. श्रीनिवास. गिरि. शुक. । २. स्मृतः—वीर. । ३. किमेतद्वस्तु—वीर. । ४. पौगण्डे परिकीर्तितम्—श्रीधर. वंशी. विज. गिरि. ; पौगण्डे कीर्तितं भुवि—वीर. । ५. भोजनं च—वीर. । ६. तरद—श्रीधर. वंशी. वीर. विज. ; तरत्—विश्व. । ७. मजस्य संस्तुति—वीर. । ८. अयं श्लोको वीर. पाठे नास्ति । ९. द्वादशादिचतुर्दशान्तास्त्रयोऽध्याया न सन्ति ।

जालं स्वमूर्त्या सह तिरोधायास्तसमस्तविशेषं ब्रह्मात्मानं प्रापयति, कर्मशेषसत्त्वे पुनरुद्भावयतीति ।। विचारमेवाह—सर्वेषामिति । सर्वेषामपि प्राकृताप्राकृतवस्तूनां भावरूपो योऽर्थः सत्ता सम्भवति तत्सत्ताश्रयसत्तावदुपादानादौ वस्तुनि स्थितं स्यात् । एवं यद्यत् उपादानाद्यात्मकं वस्तु तस्य सर्वस्यापि प्राकृताप्राकृतस्य भगवान् तत्सर्वशक्तिविशिष्टः श्रीकृष्ण एकस्तादृश इत्यर्थः । 'अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वम्' इत्यादिकस्य श्रीब्रह्मणैवानुभूतत्वादिति भावः । तस्मादेतत्सर्वकारणादित्वेन स्वयं भिन्नादपि तस्मादन्यत्किं वस्त्विति तन्निरूप्यतामित्यर्थः । तदेवं तस्य सर्वमूलात्मकत्वे सिद्धे तेषां बालवत्सानां च तत्प्रादुर्भावत्वे स्थिते एव स्वभावतः तादृशप्रेमास्पदत्वं पूर्वयुक्त्या श्रीव्रजवासिषु तच्चाधिकं युक्तमेवेति ज्ञापितम् । अथवा—ननु कथमेषु श्रीयशोदानन्दन एव सर्वात्मोच्यते, यदि भगवद्रूपत्वेनोच्यते तर्हि सन्त्यन्यानि तद्रूपाणि बहूनीत्याशङ्क्याह—वस्तुत इति । सहस्रशीर्षादिचरिष्णु तत्तदवतारादि तत्तदखिलं भगवद्रूपमिह श्रीकृष्ण एवेत्यादि पूर्ववत् । किञ्च, सर्वेषां भावानां पदार्थानां मध्ये भावः प्रेमा तद्रूप एवार्थः पुरुषार्थः स्थितः पर्यवसितो भवति । तात्पर्यपर्यवसानविषयो भवतीत्यर्थः । तस्य प्रेम्णोऽपि । भगवान् श्रीकृष्ण इति पूर्ववत् । तं तिरोहितसर्वविलक्षणगुणरूपत्वेऽपि सर्वतः पूर्णपरमानन्दरूपं विना तस्याप्यलब्धप्रतिष्ठत्वात्, तस्मात्ततोऽन्यद्वस्तु निरूप्यतां यत्प्रेमयोग्यं स्यादिति । तदेवमपि पूर्ववत्स्वाभाविकप्रेमास्पदत्वमेव स्थापितमिति । विश्वनाथस्तु—सर्वेषामपि स्थावरजङ्गमानां भावः भवत्यस्मादिति भावः कारणं प्रधानम्, तद्रूपोऽर्थः स्थितः स्थिरो भवति तस्यापि भावस्य भावः कारणं श्रीकृष्ण एव, अतः किमतत् श्रीकृष्णव्यतिरिक्तं वस्तु रूप्यताम् । यद्वा—वस्तूनां बुद्धीन्द्रियाणां भावार्थो व्यङ्ग्योर्थः आत्मा स्थिरो भवति, तस्याप्यंशत्वात्तद्व्यंग्योंशी श्रीकृष्णः, अतः किमतत् तद्भिन्नं वस्तु किम्, किमर्थं रूप्यतां स एव सेव्यतां केवलमित्यर्थः ।। ५७ ।। यतः श्रीकृष्ण एव सर्वस्वरूपस्तस्मात् । प्लवः तरणसाधनम् । महतामाश्रयत्वं तु स्वर्गादेरप्यस्ति तन्निवृत्तये समासान्तरमाह—यद्वेति । वत्सपदमयत्नतार्थमित्यर्थः । न हि केवलमेतदेव वैकुण्ठानन्दानुभवादपि तेषां भवति । ततो वैकुण्ठात् । इत्यर्थं इति । जन्ममरणशून्याः सन्तस्तत्रैव तिष्ठन्तीति भावः ।। तदेवं प्रेमदस्वभावादपि श्रीकृष्णादघासुरादिवदघयुक्तानामेव मोक्षमात्रं परमं फलम्, तस्मादेवान्येषां तत्तन्माधुर्यज्ञानेन मोचकतामात्रं गुणमुपादायापि तत्पदमाश्रयतां श्रीब्रह्मादिवत्परमप्रेम्णा तदुचितपरमतत्पदप्राप्तिरेव परमं फलम् । मोक्षस्तु भावी भवन्भूतो वेति तदाश्रयामोदेन नानुसन्धातुं शक्यः स्यादिति । सर्वप्रकरणार्थमुपसंहरति—समेति । पुण्यं तद्वतु चारु वा यशो यस्य । तादृशतया मद्विधवर्ण्यमानगुणो य इत्यर्थः । यश्च नरकासुरसेनापतेर्मुरस्य हन्ता । अघनरकसदृशानेकमोक्षदातेत्यर्थः । तस्य श्रीकृष्णस्य पदमेव पल्लवः । सौकुमार्यादिगुणैः स्वतः परमसुखद इत्यर्थः । स एव प्लवः तादृशसुखदत्वाज्ञानेन तत्तरणोपायमात्रतया जात इत्यर्थः । अत्र पल्लवपदेन तेषां क्रूरत्वादिकं पदस्य महौषधिपल्लववन्महाप्रतापत्वं च सूचितम् । तादृशं तं तथा ये समाश्रितास्तेषामपि । यस्तु स्वभावतः सुखोदयेन भवाम्बुधिर्वत्सपदं तर्तव्यतीर्णवस्तुभानास्पदं भवति तस्य न तत्फलमित्यर्थः । किन्तु, परं पदं तन्नित्यधाम श्रीवृन्दावनवैकुण्ठादि निजप्रेमानुसारेण पदं परमास्पदं भवति । विपदां पदं यत् दुर्विषयं जगद्वा तत् खलु तेषां कदाचिदपि न भवति, यतस्तेषां मतिस्ततोऽन्यत्र नासज्जते इत्यर्थः । किंभूतम् महतां तन्नित्यपार्षदानां पदमित्यर्थः ।। ५८ ।। यत् त्वयाहं पृष्टोऽस्मि एतत् । इह संदेहे ।। ५९ ।। शाद्वलजेमनम् नवतृणानां वत्सरूपेण भोजनम् । 'शाद्वलो नवघासः स्यात्' इति कोशात् । यद्वा—शाद्वलाशनेन सहितं जेमनं. गोपीयभोजनं शाद्वलजेमनम् । मध्यमपदलोपी समासः । अत एव स्वामिचरणैः शाद्वलजेमनं भाजनं चेति व्याख्यातम् । शुद्धसत्त्वात्मकरूपस्यापि व्यक्तान्तःपातित्वादर्थान्तरमाह—यद्वेति । चितो विलासस्तद्रूपेण भवनम् । सर्वपुरुषार्थान् धर्मार्थकाममोक्षान् ।। ब्रह्मणस्तत्प्रार्थितं सेत्स्यति न वेति संदिहानं प्रति कैमुत्येनाह—एतदिति । व्यक्तेतरत् व्यक्तादितरत् । प्रपञ्चातीतमित्यर्थः । सर्वत्राप्यन्वितमिदम् अघार्दनादीनां सर्वेषां श्रीभगवत्स्वरूपशक्तिविलासत्वात् । अकारान्तत्वमार्षम् । शृण्वन् गृणन् । तत्तत्प्रवृत्तिमात्रेणैवेत्यर्थः । तदैव सूक्ष्मतया फलोत्पत्तेश्च । नर इति चाधिकारानपेक्षत्वमुक्तम् । विश्वनाथस्तु—सुहृद्भिश्चरितम् 'मुष्णंतोऽन्योन्यशिक्यादि–' इत्यादिनोक्तम् । व्यक्तात्प्रपञ्चादितरत् । अदन्तत्वमार्षम् ।। ६० ।। एतद्द्वयस्य पुनरुक्तिस्त्वस्या लीलाया बाल्यलीलान्तर्गतत्वबोधनायैवेत्यलम् ।। कौमारलीलामुपसंहरति—एवमेतदुपलक्षणकैरित्यर्थः । जहतुः संवृतवंतौ । व्रज इति । कदाचिदप्यन्यत्र कौमारलीलासंबन्धो नास्तीति व्रजस्योत्कर्षं सूचयति । निलायनं नाम कश्चिन्निलीय स्थितोऽन्येन परिमृग्य दृश्यत इत्येवम् । मर्कटोत्प्लवनमादि येषां तैः । सेतुबन्धैरिति । श्रीरघुनाथलीलानुकरणं खल्विदम् । बहुत्वं पौनःपुन्यात् । एवं चाल्यमानयन्त्रमन्त्रवारणादीति युद्धमुद्राद्यनुकरणमपि गम्यम् । आदिना क्षीराब्धिमंथनादिलीलावतारांतरकृतापि ज्ञेया ।। ६१ ।। श्रीपरमानंदनृसिंहयोः पदेषु पंकजस्थानेषु षट्पदो भ्रमरस्थानीयः । इति एवम् । व्याकरोत् विवृतवानिति (१) यत्तु कैश्चिदुक्तं ब्रह्मणो मोहासंभवादध्यायत्रयं प्रक्षिप्तमिति, तदसत् "भवान्कलाविकल्पेषु न विमुह्यति कर्हिचित्" इत्युक्तेर्मोहासंभवेपि भगवल्लीलायां तदसंभवाभावात् । वस्तुतस्तु—भगवदिच्छाधीनप्रवृत्तेः 'द्रष्टुं मंजुमहित्वमन्यदपि ते' इत्युक्तेश्च मोहाभाव एव । यथाश्रुतमोहकल्पने तु सर्वज्ञस्यापि भगवतः तदवज्ञा अन्वेषणे मोहापत्तेः तेषामेवानयनाभावे सर्वशक्तेरशक्तत्वापत्तेश्च । सिद्धांतदर्पणेप्येतच्छंकित्वा समाहितम् । तथाहि—"किं त्वध्यायत्रयं त्वस्मिन्नघासुरवधादिकम् । ब्रह्मणो मोहकथनाद्विवर्तस्य च वर्णनात् ।। १ ।। संगतेः परिदृष्टत्वाद्बाल्यपौगण्डलीलयोः । सूचनेऽनुक्तितश्चापि प्रक्षिप्तमिव भाति मे ।। २ ।।" व्याख्या—अघविमोक्षं सखिभिः सह संपृक्तां भुक्तिं च वीक्ष्य तदीश्वरत्वे संदिहानो ब्रह्मा मोहं प्रापेति तत्र

वर्णितम्। स मोहस्तु न संभवति "भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित्" इति तं प्रति भगवद्वचनात्, "न भारती मेंग मृषोपलभ्यते न वै क्वचिन्मे मनसो मृषा गतिः" इत्याद्युक्तेश्च। 'आत्मानमेवात्मतया विजानताम्' इत्यादौ रज्जुसर्पन्यायेन प्रपञ्चस्य ब्रह्मविवर्तितत्वं वर्णितम्। तत्र तद्वादश्च वैष्णवसिद्धान्तविरोधी। 'एवं विहारैः' इत्यारभ्य 'मर्कटोत्प्लवनादिभिः' इत्यंतैकादशाध्यायान्तिमपद्येन कौमारीं लीलां समाप्य पञ्चदशाध्यायादौ 'ततश्च पौगण्डवयःश्रितौ' इत्यादिना बाल्यपौगण्डलीलयोः सङ्गतेर्दृष्टत्वाद्द्वादशस्कन्धोक्तानुक्रमणिकायामनुक्तेश्च ॥ १-२ ॥ "मैवं वादीर्महाबुद्धे ब्रह्ममोहस्तृतीयके। एकादशे विवर्त्तोक्तिर्वैराग्यप्रतिपादिका ॥ ३ ॥" अर्थः - 'भवान् कल्प-' इति यो वरो भगवता ब्रह्मणे दत्तः स किल कल्पेषु ये विकल्पाः सर्गास्तेषु वैषम्यादिदोषेण भवान्न विमुह्यतीत्यर्थकः, न तु मन्मायया न विमुह्यतीत्यर्थकश्च। तथा बकश्रियोस्तदभ्यधिकयोरपि मोहदर्शनात्। अन्यथा 'नैते सुरेशा ऋषयो न चैते' इत्याद्युक्तेः, 'सा नोपेपाय शङ्किता' इत्याद्युक्तेश्च तृतीये ईश्वरत्वाभिमानपरिहारफलकं सरस्वत्यनुगमनेन तन्मोहवर्णनं 'छाया प्रत्याह्वयामास' इत्येकादशे विवर्त्तवर्णनं च प्रक्षिप्तं स्यात्। ननु भवतां विवर्त्तवर्णने का सङ्गतिस्तत्राह वैराग्येति। अविषयेभ्रमाऽसम्भवादेवेति भावः ॥ ३ ॥ नन्वेवमवस्थालीलयोः सगतेरांतरालिकाध्यायत्रयं प्रक्षिप्तं स्यादिति चेत्तत्राह—"यत्समाप्यापि कौमारीं लीलां तां स्मृतिगां मुनिः। अपूर्वां प्रार्थितां प्राख्यत्तेन किंचिन्न दूषणम् ॥ ४ ॥" अर्थः—तां कौमारीमेवाघासुरवधादिकां लीलामपूर्वां पूर्वमनुक्तामाश्चर्यां वेत्यर्थः। प्रार्थितां परीक्षिता वाञ्छिताम्। स्मृतिगां स्मृतिपथमारूढाम्। एतदुक्तं भवति—न चाघासुरवधाद्या लीलात्रासगंता, कौमारलीलानंतरत्वात् पौगंडलीलामुक्त्वानुक्तेश्च। न च पुनरुक्तत्वादसंगता प्रागनुक्तेः। न च समाप्यापि तदुक्तिः शंकाहेतुः श्रोतृप्रेष्ठाया विचित्रायाः स्मृतिपथमारूढायास्तस्याः कथने समाप्योक्तिदोषव्युदासात्। श्रोतृप्रेष्ठत्वं च 'तथान्यदपि कृष्णस्य तोकाचरितमद्भुतम्' इत्यादितदुक्तेः। किञ्च, समाप्तपुनरात्तत्वदोषः पुराणादौ नादर्त्तव्यस्तस्य काव्यालंकारविषयत्वात् ॥ ४ ॥ ननु द्वादशस्कंधे भागवतार्थानुक्रमणिकायामेतस्या असूचनादिदमध्यायत्रयं प्रक्षिप्तं स्यात्तत्राह—"गोपीगीतादिषु स्पष्टमघस्य हृतीरीक्ष्यते। लीलास्थानप्रसिद्धेश्चान्यत्रापीदमतोन्यथा ॥ ५ ॥ आचारादिकथानां च तत्ते प्रक्षिप्तताभवेत्। तस्मादत्र स्युरध्यायाः पञ्चत्रिंशच्छतत्रयम् ॥ ६ ॥ गोपीगीते तावत् 'विषजलाप्ययाद्व्यालराक्षसात्' इति व्यालराक्षसोऽघासुर एव निर्दिष्टः। "यन्न व्रजंत्यघभिदो रचनानुवादाच्छृण्वंति येन्यविषयाः कुकथा मतिघ्नीः" इति तृतीयेऽघभिदिति तद्वधचरितनिमित्तकं नामोक्तमभेदनं मूर्त्तस्यैव न त्वमूर्त्तस्यामूर्त्तपापाभिप्रायत्वे त्वघहरेरित्येवं ब्रूयात्। 'अघः स्याद् व्यपापयोः' इति धरणिधरेणापि दैत्यवाचकोघशब्दो वर्णितः। न चासुरमुक्तेः सिद्धांतविरुद्धत्वादेतत्प्रतिपादकाध्यायत्रयमिदं प्रक्षिप्तमेव न तदार्षमिति वाच्यं, कृष्णमारितेषु सर्वेषु दृष्टत्वात्। "आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय ततो यांत्यधमां गतिम् ॥" इत्यादिष्वपि मां श्रीकृष्णलक्षणमप्राप्यैव न तु प्राप्येत्याद्यंगीकारात्। तथा चोक्तम् —"ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः। अन्ये च शाल्वकपिबल्वलदंतवक्त्रसतोक्षशंबरविदूरथरुक्मिमुख्याः ॥ ये वा मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुकेकयसृंजयाद्याः। यास्यत्यदर्शनमलं बलभीमपार्थव्याजाह्वयेन हरिणा निलयं तदीयम् ॥" इति। न च पुराणांतरप्रसिद्धत्वेन सा लीला न संभाव्या पाद्मब्रह्मांडयोः स्पष्टत्वात्। न च भक्तिगतिसाम्येन तेषां सा प्राप्तिरसमंजसा शुद्धभक्तैस्तादृशप्राप्तेरनुपादेयत्वात् 'नात्यंतिकं विगणयंत्यपि ते प्रसादम्' इत्याद्युक्तेः। "अवासुरविघाती च पूतनामोक्षदायकः" इति श्रीशंकरेणापि संमोहने गोपालसहस्रनामसु पठितमिति ॥ ६१ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विचारमेवाह—सर्वेषामपि प्राकृताप्राकृतवस्तूनां भावरूपो योऽर्थः सत्ता स भवति तत्सत्ताश्रयसत्तावति उपादानादौ वस्तुनि स्थितः स्यात् एवं यद्यदुपानाद्यात्मकं वस्तु तस्य सर्वस्यापि भगवान् तत्तत्सर्वशक्तिविशिष्टः श्रीकृष्ण एकस्तादृश इत्यर्थः। "अद्यैव त्वदृतेऽस्य किं मम न ते" इत्यादिकस्य श्रीब्रह्मणैवानुभूतत्वादिति भावः। तस्मादेतत्सर्वकारणादित्वेन स्वयं भिन्नाद तस्मादन्यत् किं वस्त्विति तन्निरूप्यतामित्यर्थः। तदेव तस्य सर्वमूलाधारत्वे सिद्धे तेषां बालवत्सानां च तत्प्रादुर्भावत्वे स्थिते स्वभावत एव तादृशप्रेमास्पदत्वं पूर्वयुक्त्या श्रीव्रजवासिषु तच्चाधिकं युक्तमेवेति ज्ञापितम्। अथवा ननु, कथमेषु श्रीयशोदानन्द एव सर्वात्मेत्युच्यते यदि भगवद्रूपत्वेनोच्यते तर्हि सन्त्यन्यानि बहूनि तद्रूपाणि इत्याशङ्क्याह, वस्तुत इति स्थास्नु सहस्रशीर्षादि चरिष्णु तत्तदवतारादि तत्तदखिलं भगवद्रूपम् इह श्रीकृष्ण एवेत्यादिपूर्ववत् किञ्च सर्वेषामिति सर्वेषामेव भावानां पदार्थानां मध्ये भावः प्रमा तद्रूप एवार्थः पुरुषार्थः स्थितः पर्य्यवसितो भवति तात्पर्यपर्यवसानविषयो भवतीत्यर्थः। तस्य प्रेम्णोऽपि भगवान् कृष्ण इति पूर्ववत् तं तिरोहितसर्वविलक्षणगुणरूपत्वेऽपि सर्वतः पूर्णपरमानन्दस्वरूपम् विना तस्याप्यलब्धस्वतिष्ठत्वात् तस्मात्ततोऽन्यद्वस्तु निरूप्यतां यत्प्रेमयोग्य स्यादिति तदेवमपि पूर्ववत् स्वाभाविकप्रेमास्पदत्वमेव स्थापितमिति ॥ ५७ ॥ तदेव प्रेमदस्वभावादि श्रीकृष्णादघासुरादिवदवयुक्तानामेव मोक्षमात्रं परमफलं तस्मादेवान्येषां तु तत्तन्माधुर्याज्ञानेन मोचकतामात्रं गुणमुपादायापि तत्पदमाश्रयतां श्रीब्रह्मादिवत्परमप्रेम्णा तदुचितपरमतत्पदप्राप्तिरेव फलं मोक्षस्तु भावी भवन् भूतो वेति तदाश्रयामोदेन नानु सन्धातुं शक्यः स्यादिति सर्वप्रकरणार्थमुहसंहरति, समाश्रिता इति। पुण्यं तद्धेतुश्चारु वा यशो यस्य तादृशतया मद्विधवर्ण्यमानगुणा

य इत्यर्थः। यश्च नरकासुरसेनापतेर्मुरस्य हन्ता अघनरकसदृशानेकमोक्षदातेत्यर्थः तस्य श्रीकृष्णस्य पदमेव पल्लवः सौकुमार्यादिगुणैः स्वतः परमसुखद इत्यर्थः। स एव प्लवः तादृशसुखदत्वाज्ञानेन तत्तरणोपायमात्रतया जात इत्यर्थः। अत्र पल्लवपदेन तेषां क्रूरत्वादिकं पदस्य महौषधिपल्लववन्महाप्रभावत्वञ्च सूचितं तादृशं तं तथा ये समाश्रितास्तेषामपि वस्तुस्वभावतः सुखोदयेन भवाम्बुधिर्वत्सपदं भवति तर्त्तव्यस्तीर्णो वेति अपि न ज्ञायेत तस्य न तत्फलमित्यर्थः किन्तु परम्पदं तन्नित्यधामैव निजप्रेमानुसारेण पदं स्थानं भवति विपदां यत्पदं जगत्तत्तु न यतो महतां तन्नित्यपार्षदानां पदमिति ॥ ५८ ॥ यदित्येव प्रपञ्चयति—यदिति ॥ ५९ ॥ श्रीब्रह्मणस्तत्प्रार्थितं सेत्स्यति। न वेति सन्दिहानं प्रति कैमुत्येनाह, एतदिति। व्यक्तेतरं व्यक्तादितरत् प्रपञ्चातीतमित्यर्थः सर्वत्राप्यन्वितमिदम् अघार्दनादीनां सर्वेषां श्रीभगवत्स्वरूपशक्तिविलासत्वात् अकारान्तत्वमार्षं शृण्वन् गृणन् तत्तत्प्रवृत्तिमात्रेणैवेत्यर्थः। तदैव सूक्ष्मतया फलोदयात्तेश्च नर इति चाधिकारानपेक्षत्वमुक्तम् ॥ ६० ॥ कौमारलीलामुपसंहरति—एवमिति। एवमेतदुपलक्षणैरित्यर्थः। जहतुः संवृतवन्तौ व्रज इति कदाचिदप्यन्यत्र कौमारलीलासम्बन्धो नास्तीति सर्वतो व्रजस्योत्कर्षं सूचयति, निलायनं नाम कश्चित् कुत्रापि निलीय स्थितो अन्येन परिमृग्य दृश्यत इत्येवं मर्कटोत्प्लवनमादिः प्रथमं येषां तैः सेतुबन्धैरिति श्रीरघुनाथलीलानुकरणं खल्विदम्, वहुत्वं पौनःपुण्यात् एवं चाल्यमानयन्त्रमन्त्रवारणादिभिर्युद्धाद्यनुकरणमपि गम्यम् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कुतः? परमकारणत्वेन सर्व्वत्रैव विद्यमानत्वादित्याह सर्वेषामिति, तैर्व्याख्यातमेव। अथवा ननु, कथमखिलात्मनामात्मानमित्युच्यते,—तेषां तत्स्वरूपत्वेन ततो भेदाभावात्? तत्राह—वस्तुत इति, अकारप्रश्नेनैव कृष्णस्य तत्त्वमजानतामेवाखिलं तत्स्वरूपं भवति, जानतान्तु भिन्नत्वेन परिस्फुरतीत्यर्थः। कुतः? परमकारणतया तस्य कार्य्यतो भिन्नत्वादिति। तामेव दर्शयति—सर्व्वेषामिति। अर्थः स एव अथवैतादृशज्ञानतोऽपि तस्य श्रीमूर्त्तिषु भक्तिः परमफलेत्याह—प्रस्तुत इति। अत्र स्थातुं स्थावरन्तु श्रीमूर्त्त्यादिकम्, चरिष्णु च तदभक्तलक्षणम्, यद्वा, स्थास्नु—अचल-श्रीमूर्त्तिलक्षणम्, चरिष्णु—श्रीशालग्रामशिलादिकमखिलं श्रीभगवतो रूपमधिष्ठान कृष्णं साक्षात् कृष्ण एवायमिति जानतामिह जगति किञ्चिदतत् तद्व्यतिरिक्तं किञ्चिदन्यत् मोक्षादिकं वस्तूपादेयं न भवति; किन्तु कृष्णो भगवद्रूपमेव वा वस्तु स्यादित्यर्थः। श्रीभगवतः परमवस्तुत्वमेवोपपादयति—सर्व्वेषामिति। अर्थः समान एव। यद्वा, वस्तूनां मध्ये भावः प्रेमा तद्रूपोऽर्थो वस्तुस्थितो विचारेण सारतया स्थितो भवत्यन्येषां सर्व्वेषामेव तत्साधनत्वात्तस्य भावार्थस्यापि भगवान् प्रकटाशेषैश्वर्य्यः कृष्णः स्थितो भवति,—तेन प्रेम्णापि तस्यैव साध्यत्वात्। यद्वा, तस्य भगवान् परमेश्वरः श्रीनारायणस्तस्यापि कृष्णः श्रीनन्दनन्दनो निजाशेषभगवत्ता-प्रकटनेन ततोऽप्यस्य श्रैष्ठ्यात्। वस्तु परमफलरूपम्, अतत्—तद्व्यतिरिक्तं किमस्ति, तन्निरूप्यताम्, अपि तु नास्त्येवेत्यर्थः। अन्यत् समानम् ॥ ५७ ॥ अतस्तदेकशरणानामयत्नतो महादुःखावलीविनाशः श्रीवैकुण्ठलोकलाभश्च सुखं सम्पद्यत इत्याह—समाश्रिता इति। पदमेव पल्लवः सौकुमार्य्यारुण्यादिना; यद्वा, पल्लवशब्देन पदस्य कल्पद्रुमत्व ध्वन्यते,—पदस्य पल्लवोऽङ्गुलिरेकेत्यर्थः; स एव प्लवः पोतस्तं सम्यक् तदेकनिष्ठत्वादिना शरणागतत्वेनाप्याश्रिताः। महतां मुक्तानामपि किंवा भगवद्भक्तानां श्रीनारदादीनां पदमाश्रयं पुण्यं परमं-मंगलं परमोत्तमं वा यशोऽघासुरमोचनलक्षणं यस्य तादृशो यो मुरारिर्भगवान् श्रीकृष्ण इत्यर्थस्तस्य, यद्वा, नरकासुरसेनानीमुख्य-मुरदैत्य-हन्ता मुरारिः श्रीकृष्ण एव प्रसिद्धः, यद्वा, पुण्यं यशो भवति भक्तानां यस्मात्तदिति महत्पदविशेषणम्। अन्यत्तैर्व्याख्यातम्। यद्वा, यद्यस्माद्विपदां पदं विघ्नवर्गस्तेषां कदापि न भवति ॥५८॥ यदित्येव प्रपञ्चयति —यदिति, यद्वा, यत् परिकीर्त्तितम्। इहास्मन्नर्थे यत् पृष्टमिति ॥ ५९ ॥ किं वक्तव्यम्, समाश्रितानां तत्तत् स्यादिति। तस्यैतल्लीला—श्रवणादिना सर्व्वार्थसिद्धिः स्यादित्याह—एतदिति तैर्व्याख्यातमेव। यद्वा, सुहृद्भिः सह चरितं कृतमिति सर्व्वेषामेव विशेषणमघार्द्दनादेस्तैः सहितेनैवाचरणात्। तत्र रूपे साहित्यं तेषामेव रूपाचरणात्, ब्रह्मस्तुतौ च तेषामपि माहात्म्यपूर्णत्वात्। शिक्यमोषणादिकं चाघार्द्दनलीलान्तर्गतमेवेति पृथङ्नोक्तम्। व्यक्तेतर प्रपञ्चातीतमिदमपि सर्व्वेषामेव विशेषणम्; अघार्द्दनादीनां सर्व्वेषामपि तेषामत्यन्तालौकिकत्वात्। अ-तकारान्तत्वमार्षम्, शृण्वन्निति गृणन्निति च वर्त्तमानता तत्र तत्र प्रवृत्तिमात्रतैवाभिप्रेता। नर इति चाधिकारानपेक्षा ॥६०॥ इत्थ श्रीभगवतः कौमारलीलामुक्त्वान्यामपि द्वयोरेव भ्रात्रोर्व्वक्ष्यमाण-पौगण्डलीलानुसारेणैकत्रैव संक्षिप्य तामुद्दिशन् समापयति—एवमिति, ईदृशैर्जहतुः संवृतवन्तौ। व्रज इति कदाचिदप्यन्यत्र कौमारलीलासम्बन्धा नास्तीति सर्व्वतो व्रजस्योत्कर्षं सूचयति। निलायनं नाम कश्चित् कुत्रापि निलीय स्थितोऽन्येन परिमृग्य दृश्यत इत्येवम्। यद्वा, (भा० १०।३७।२६) 'चक्रुर्निलायनक्रीडां चौरपालापदेशतः' इत्यग्रे वक्ष्यमाणप्रकारकम्, सेतुबन्धश्च कुतोऽपि निःसरतो जलस्य मृत्तिकादिना निरोधनम्, यद्वा, कदाचिज्जलविहारादौ श्रीरघुनाथकृत—सेतुबन्धं दिदृक्षमाणानां वयस्यानां प्रीत्यै वानरायितैस्तैरेव सरोवरमध्ये सेतुनिर्म्माणम्, तथा श्रीमधुपुर्य्यां श्रीमज्जन्मस्थान-पश्चिमभागे, बहुत्वम्,—तत्तद्बाहुल्यात् पौनःपुन्याच्च, आदिशब्देन कन्दुकोत्क्षेपणादीनि ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीशीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषिण्यां
श्रीदशम-टिप्पण्यां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कार्यकारणानन्यत्वमेवाह— सर्वेषां वस्तूनां स्थूलावस्थचिदचिद्वस्तूनां भावार्थः सत्यत्वरूपोऽर्थः अभिधेयो भवति इति भवत्स्वरूपपरिणते तस्मिन् सूक्ष्मावस्थचेतनसमष्टिगर्भके महद्ब्रह्मणि जगद्योनिभूते प्रकृत्याख्ये सूक्ष्माचेतन इति भवच्छब्दार्थे स्थितः इति कालत्रये पदार्थसत्यत्वमुक्तं सर्वपदार्थसत्ख्यातिस्वीकारात् अत एवैकादशे श्रीभगवता श्रीकृष्णचन्द्रेण "विकल्पः ख्यातिवादिनाम्" इति वक्ष्यते विविधतया कल्प्यते रच्यत इति सत्पदार्थ इत्यर्थः। तस्यापि भवच्छब्दार्थसूक्ष्मावस्थचेतनस्यापि चेतनसमष्टिरूपगर्भदातृत्वेन भगवान् ज्ञानबलादिषड्गुणैः परिपूर्णः श्रीमन्नारायणः परं ब्रह्म परं तत्त्वं सर्वश्रुतिशिरःप्रतिपाद्यः श्रीकृष्णः परममाधुर्यविशिष्टस्वरूपरूपगुणविभवैश्वर्यः सौशील्याद्यनवधिकातिशयासङ्ख्येयकल्याणगुणनिधिः स्वभक्तप्रपन्ननित्याकर्षकः सत्यत्वज्ञानत्वानन्तत्वादिस्वरूपरूपगुणकश्च "पिता माता भ्राता निवासः शरणं सुहृद्गतिर्नारायणः" इति श्रुत्युक्तः "अहं बीजप्रदः पिता" इति गीतासु स्ववचनोक्तः "सर्वकारणकारणम्" इत्युक्तश्च अतः अतद्वस्तु न तद्वस्तु अतद्वस्तु तद्भिन्नं वस्तु किं वर्त्तते यदि तद्भिन्नं वस्तु वर्त्तते तर्हि रूप्यतां कथ्यतामिति प्रश्नः अतः—

"पिता च रक्षकः शेषी भर्त्ता ज्ञेयो रमापतिः। स्वाम्याधारोऽयमात्मा च भोक्ता चेति मनूदितः" ॥ इति।

नवविधसम्बन्धानुसन्धानवतां सर्वस्य भगवच्छेषत्वानुसन्धानं स्वस्य चाधेयत्व–विधेयत्व–शेषत्वानुसन्धानेन श्रीभगवदधीनसत्तास्थितिप्रवृत्तिकत्वमिति, विशदमनुसन्धेयम् ॥ ५७ ॥ अत एव श्रीभगवच्छरणागतिरेव श्रीमदाचार्यकारिता सर्वाधिकारिका इति सुस्पष्टमाह–समाश्रिता य इति। ये पुरुषा मुरारेः मुरहननसमर्थस्य भाविनोऽपि भूतवन्निर्देशश्चानादिसिद्धनामवत्त्वं हरेः सूचयतीदं पदं पुण्ययशाश्चासौ मुरारिः तस्य पदपल्लवप्लवं पदश्चरणः स पल्लव इव शीतलः सुखदः प्लवः नौकातुल्यः सान्निध्यस्पर्शाभ्यामेव तारकत्वं व्यञ्जितम् महत्पदं महतां ब्रह्माण्डाधिगनामपि पदमाश्रय तेषां भवाम्बुधिः जन्ममृत्युप्रवाहरूपः संसारः समुद्र इव दुस्तरोऽपि वत्सपदं वत्सपदतुल्यं भवेत् अयत्नतरणीयो भवेत् परं पदं स्थूलावस्थचिदचिद्विशिष्टब्रह्मणः लीलाविभूतिविशिष्टस्य परं विरजातश्च परम्पदं परमव्योमाख्यं श्रीवैकुण्ठं पदं स्थानं स्वगृहरूपं भवेत् विरजाप्रमाणञ्च "प्रधानपरमव्योम्नोरन्तरे विरजा नदी। वेदान्तस्वेदजनिततोयविस्राविता च सा" इति "अर्चिरादिना तत्प्रथिते (४।३।१) इति सूत्रकृदभिमतार्चिरादिना एव गमनेन प्रपन्नानां परमपदप्राप्तिः अत एवात्मात्मीयभरसमर्पणवतां प्रपन्नानां यद्विपदां पदं संसारभ्रमणरूपं तत् तेषां न भवेदेवेत्यर्थः ॥ ५८–६१ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नान्यद्वस्त्वस्तीत्येतदेवोपादयति—सर्वेषामिति। धातुशब्दोऽत्र "भूवादयो धातवः" (१।३।१) इति सङ्केतितधातुपरः स च तदुत्तरप्रत्ययानां तदुभयार्थानां चोपलक्षकः सर्वे शब्दा व्युत्पन्ना इति व्युत्पत्तिपक्षश्चाभिप्रेतः भवतिरिति भूधातुः "एकस्तिपौ" धातुनिर्देशे इति विहितस्तिप्प्रत्ययान्तोऽत्र निर्दिष्टः तदयमर्थः। सर्वेषां शब्दानां तदर्थानां च यो भावः सत्ता स एवार्थोऽभिधेयो यस्य तथाभूतो भवतिर्भूधातुः स्मृतः "भू सत्तायाम्" इति स्मृत इत्यर्थः सत्ता च प्रमाणसम्बन्धार्हत्वरूपा एवं च तस्य सर्वशब्दतदर्थानाञ्च या सत्ता तद्बोधकस्य भूधातोस्तदर्थतत्प्रत्ययतदर्थादेरपि शब्दात्सर्वधातुतत्प्रत्ययतदुभयार्थानाञ्च यो भावः सत्ता स भगवान् श्रीकृष्णः तत्सत्तानिर्वाहकः कृष्ण इति, भावग्रहणं प्रवृत्तिस्थित्योरुपलक्षणं सर्वशब्दः तदर्थसत्तास्थितिनिर्वाहकः इति फलितार्थः। एवं च सति कृष्णात्पृथक्सिद्ध वस्तु किमस्ति ? तन्निरूप्यतामिति, किमतद्वस्त्विति पाठे अन्यदकृष्णात्मकं वस्तु किमस्ति ? यन्निरूप्येतेत्यर्थः एव भगवतः परत्वं सर्वकारणत्वं चोपपाद्य "ब्रह्मविदाप्नोति परं, कारणन्तु ध्येयः" इति श्रुत्युक्तरीत्या तद्वेदनमेवानिष्टपरिहारपूर्वकेष्टप्रापणक्षममिति वदन्नुपसंहरति समाश्रिता इति। पुण्यं यशो यस्य तस्य मुरारेर्महत्पद महतामाश्रय पदपल्लवं ये समाश्रिताः समाश्रयणमत्र न्यासोपासनान्यतररूपं तेषामेव भवाम्बुधिर्वत्सपदतुल्यो भवति नान्येषामित्यर्थः किञ्च, परं पदं वैकुण्ठाख्यं पदं स्थानं भवति इति। त्रिपदां दुःखानां यत्पदं विषयः संसारः तत्पुनः कदाचिदपि तेषां न भवति पुनर्न निवर्तन्त इत्यर्थः ॥ ५७–५८॥ प्रश्नस्योत्तरं कथितमित्याह बादरायणिः–एतदिति यत्प्रत्यहं पृष्टः किं तद्यत्कौमारे श्रीकृष्णकृतं तत्कथमर्भकाः पौगण्डे विदुरित्येतदेतदुत्तरं सर्वं ते तुभ्यं मे मया ख्यातम् ॥५९॥ अध्यायत्रयार्थश्रवणादिफलमाह–एतदिति। सुहृद्भिश्चरितं "मुष्णन्तोऽन्योऽन्यशिक्यादीन्" इत्यादिनोक्तं मुरारिकर्तृकमघासुरहननं शाद्वले भोजनं जेमनमिति पाठेऽपि स एवार्थः व्यक्तात्मकृतिरूपादितरद्रूपं शुद्धसत्त्वात्मकं वत्सवत्सपादिरूपमजस्य ब्रह्मणोऽभिष्टवं स्तुतिं चेत्येतत्सर्वं शृण्वन्गृणन्कथयंश्च पुमानखिलानभीष्टानर्थान्प्राप्नोति ॥ ६०–६१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीश्रीनिवाससूरिकृता तत्त्वदीपिका

अतः फलितार्थमाह—सर्वेषामिति। सर्वेषामपि वस्तूनामचित्पदार्थानां देहादीनां भावार्थः सत्ता भवति चेतने त्वयि स्थितः कुतः ? सर्वस्याचित्पदार्थस्य चेतनाधारत्वात् तस्यापि भवतश्चेतनभूतस्य तव भगवान् कृष्ण आधार इति शेषः। भवा

भगवति कृष्णे स्थित इत्यर्थः । अतोऽतद्वस्तु किमस्ति ? तद्रूप्यतां निरूप्यतां तथा च श्रुतिः "यथा रथस्यारासु नेमिरर्पिता नाभावरा अर्पिता एवमेव भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिताः" इति ॥ ५७ ॥ तस्मात् श्रीकृष्णस्यैव निरुपाधिकसर्वशेषित्वात्सर्वाधारत्वात्सर्वसेव्यत्वात्सर्वफलप्रदत्वाच्च तदाश्रितानां मोक्षो हस्तगत एवेत्याह—समाश्रिता इति । पुण्यं यशो यस्य स पुण्ययशाः स चासौ मुरारिश्च तस्य पादपल्लवं कथम्भूतं महत्पदं महतां भागवतानां पदमाश्रयभूतं तदेव प्लवस्तं ये समाश्रिताः प्रपन्नास्तेषां भवाम्बुधिः संसारसमुद्रः वत्सपदमात्रं भवति परम्पदं वैकुण्ठाख्यं पदं भवति संसारनिवृत्तिपूर्वकनित्यमुक्तभोग्यस्थानं भवति यद्विपदां पदं शोकमोहादिरूपं यत्पदं तत्कदाचित्तेषां न भवतीत्यर्थः । तथा च श्रुतिः "न स पुनरावर्त्तते देवानां पूरयोध्या" इत्यादि एतच्छ्रुतिव्याख्यानुरूपं सूत्रमपि प्रमाणम् "अनावृत्तिः शब्दादनावृत्तिः शब्दात्" (४।४।२२) इति ॥ अत्र "उपक्रमोपसंहारावभ्यासो पूर्वताफलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये" इति षड्विधतात्पर्यलिङ्गेनापि जीवेश्वरयोः स्वरूपभेद एव प्रतीयते तथाहि उपक्रमे तावत् नौमीड्येत्यनेन नन्तृनन्तव्यभावेन स्वरूपभेद एव उक्तः उपसंहारेऽपि "श्रीकृष्णवृष्णिकुलपुष्करजोषदायिन्" इत्यारभ्य अर्हन् भगवन्नमस्ते, इत्यन्तं भगवतो निरुपाधिकमनन्तव्यत्वेन स्वस्य नन्तृत्वेन च जीवात्मपरमात्मनोः स्वरूपभेद एव समर्थितः । अभ्यासोऽपि तस्यैव दृश्यते तथा हि "श्रेयः स्रुतिं भक्तिमुदस्य ते विभो !, तथाऽपि भूमन्महिमाऽगुणस्य ते, तत्तेनुकम्पाम्, पश्येश ! मे नार्यम्' अतः क्षमस्व, क्वाहं, नारायणस्त्वं नहि सर्वदेहिनाम्, अजानतां त्वत्पदवीं, को वेत्ति भूमन्, एकस्त्वमात्मा, एवंविधं त्वां सर्वात्मनामपि स्वात्मानं, त्वामात्मानं परं मत्वा, अन्तर्भवेऽनन्त ! भवन्तमेव, तदस्तु मे नाथ ! सभूरिभागः, अनुजानीहि मां कृष्ण ! सर्वं त्वं वेत्सि सर्वदृक्" इत्यादिभिर्वाक्यैर्भेद एवोपपादितः अपूर्वता प्रमाणान्तराप्राप्तिः नहि शास्त्रप्रमाणं विना जीवपरमात्मनोः स्वस्वामिभावसम्बन्धज्ञानं जायते फलमपि मोक्षरूपः "गुर्वर्कलब्धोपनिषत्सुचक्षुषा ये ते तरन्त्येव भवानृताम्बुधिम्" इत्यादिभिः प्रतिपादितम् अर्थवादोपि—

"जगत्त्रयान्तोदधिसम्प्लवोदे नारायणस्योदरनाभिनालात् । विनिर्गतोऽजस्त्विति वाङ्न वै मृषा किन्त्वीश्वर त्वन्न विनिर्गतोस्मि" ॥

इत्यादिना दर्शितः उपपत्तिस्तु "असन्तमप्यन्त्यहिमन्तरेण सन्तं गुणन्तं किमुयन्ति" इत्यनेनानुपपत्तिमुक्त्वा "अथापि ते नाथ ! पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि । जानाति तत्त्वं भगवन्महिम्नः" इत्यनेन दर्शिता, अत उपक्रमादिषड्विधतात्पर्यलिङ्गेन जीवात्मपरमात्मनोः स्वरूपभेद एव प्रतिपादितः सामानाधिकरण्यं तु "सर्वं खल्विदं ब्रह्म तत्त्वमस्ययमात्मा ब्रह्म" इत्यादिभिर्मुख्यतयोपपद्यते अतः शरीरशरीरिभावेन सामाधिनाधिकरण्येनाभेदः स्वरूपेण तु भेद एव तथा "ज्ञाज्ञौ द्वावजावीशनीशौ, प्रधानक्षेत्रज्ञपतिर्गुणेशः, क्षरं प्रधानममृताक्षरं हरः, क्षरात्मानावीशते देव एकः, पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" इत्यादिश्रुतयः स्वाभाविकं भेदं प्रतिपादयन्ति स्मृतिरपि—

"यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥
दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः । नान्यथा लक्षणं तेषां बन्धे मोक्षे तथैव च" ॥ इत्यादि ।

अत एव ये चिन्मात्रस्वरूपं निर्विशेषं गुणशून्यमेव ब्रह्मेति वदन्ति ते स्वमतिविजृम्भितत्वेन स्वगोष्ठीनिष्ठा एव न तु प्रामाणिकाः कुतः इति चेत् ? तादृशस्य ब्रह्मणः श्रुतिस्मृतीतिहासादिषु कुत्राप्यश्रवणात् जीवेश्वरयोरविद्यामयौपाधिकत्वाभावात् अन्यथा तयोरादिमत्त्वापत्तेर्नित्यत्वप्रतिपादक—"नित्यो नित्यानां, द्वावजो, अजो नित्यः शाश्वतः" इत्यादिश्रुतिस्मृतिविरोधापत्तेर्व्यासपराशरादीनां तयोरनादित्वेनाभिमतत्वाच्च । ननु' सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन, तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" —

"यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः । नश्वरं गृह्यमाणं च विद्धि मायामनोमयम्" ॥

इत्यादि श्रुतिस्मृतिभिः सर्वस्य मिथ्यात्वश्रवणात् निर्विशेषमात्रप्रतीतेः कथं तादृशस्य ब्रह्मणः स्वाभाविकसगुणत्वमिति चेदहो विद्वत्ता ! हन्त त्वदुक्तानां श्रुत्यादीनामर्थमज्ञात्वा त्वयोपन्यस्ता एताः कथमिति चेच्छृणु सर्वं खल्विति सर्वं ब्रह्मात्मकमित्यर्थः "नेह नाना" अब्रह्मात्मकत्वेन स्वनिष्ठं किञ्चिदपि नास्ति, नेदं यदिदं यन्मनुष्याः प्रकृतिविकारमुपासते तन्नित्यं न भवतीति प्रतिपादयति, न पुनः "आदित्यवर्णं तमसः परस्तात्" इति श्रुतिप्रतिपादितमप्राकृतदिव्यविग्रहमपि निषेधति "यदिदं मनसा वाचा" इत्याद्यपि दृश्यमानं देवत्वादिकमेव निषेधति । अन्यथा "सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः" इत्यादीनां दत्तजलाञ्जलिः स्यात् अतः सर्वस्य तच्छरीरतया तन्निष्ठत्वात्तद्व्यतिरेकेणाब्रह्मात्मकस्य निषेधात् अस्मदुक्तरीत्या श्रुतिस्मृतीतिहासादीनां विरोधाभावात्सर्वं सुस्थम् अतोऽत्र निर्विशेषब्रह्मणो जीवेश्वरयोः स्वरूपैक्यस्य च गन्धोऽपि न प्रतीयते इति व्यासपराशराद्यनुगामिनां विशिष्टाद्वैतवादिनां पन्थाः ॥ ५८–६१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीगोवर्द्धनकृतवासश्रीवेङ्कटाचार्यदासदासेन, श्रीश्रीनिवासदासेन,
विरचितायां तत्त्वदीपिकायां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विचारमेवाह—सर्वेषामिति । सर्वेषामपि प्राकृताप्राकृतवस्तूनां भावरूपो योऽर्थः सत्ता सम्भवति तत्सत्ताश्रयसत्तावति उपादानादौ वस्तुनि स्थितः स्यात् एवं यद्यत् उपादानाद्यात्मकं वस्तु तस्य सर्वस्यापि प्राकृताप्राकृतस्य भगवान् तत्तत्सर्वशक्तिविशिष्टः श्रीकृष्ण एकस्तादृश इत्यर्थः तदेव तस्य सर्वमूलान्ते सिद्धिस्तेषां बालवत्सानाञ्च तत्प्रादुर्भावत्वे स्थिते स्वभावत एव तादृशप्रेमास्पदत्व स्वाभाविकप्रेमात्मसु श्रीव्रजवासिषु अधिकं स्फुरन्तीति युक्तमेवेति भावः। तदेव प्रेमस्वभावात् श्रीकृष्णादघासुरादिवद्युक्तानामेव मोक्षमात्रं पुरुषार्थः, अन्येषां तु तन्माधुर्यज्ञानेन मोचकतामात्रं गुणनुपादायापि तत्पदमाश्रयतां श्रीब्रह्मादिवत् परमप्रेम्णा तदुचितपरमतत्पदप्राप्तिरेव पुरुषार्थः मोक्षस्तु भावी भवन् भूतो वेति तदाश्रयामोदेन नानुसन्धातुं शक्यः स्यात् तदानीन्तनमायावृतगोपबालकवत् इति ॥५७॥ सर्वप्रकारणार्थमुपसंहरति—समाश्रिता इति ॥५८॥ यदित्येव प्रपञ्चयति–यदिति ॥५९॥ श्रीब्रह्मणस्तत् प्रार्थितं सेत्स्यति नवेति सन्दिहानं प्रति कैमुत्येनाह—एतदिति ॥ ६० ॥ मर्कटोत्प्लवनमादिर्येषां तैर्बहुत्वं पौनःपुन्यात् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ ब्रह्मस्तवस्य निर्गलितार्थमाह—सर्वेषामित्यादि। सर्वेषामेव भूतानां भावार्थः सत्तार्थः सत्तारूपपदार्थो भवति ब्रह्मणि स्थितः, तस्यापि भवतो ब्रह्मणो भगवान् कृष्णोऽवधित्वेन स्थित इत्यर्थः। यथोक्तम् 'भेदस्तु कथितो वेदैर्मणितत्तेजसोरिव' इति। अतोऽतत् कृष्णेतरत् किं वस्तु रूप्यतां निरूप्यताम्। कृष्ण एव ब्रह्म, न तदतिरिक्तं तदिति वाक्यार्थः। अतः (भा० १०।१३।३) "ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत" इति यद् प्रतिज्ञातम्, तदेतदतिरहस्यमध्यायद्वयेन कथितमिति ॥ ५७–६१ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

सर्वेषामित्यादि। सर्वेषां वस्तूनां भावार्थो भवति सत्तायां सत्तामात्रे ब्रह्मणि स्थितः, तस्यापि ब्रह्मणः श्रीकृष्ण एव भवत्कारणम् ॥ ५७–६१ ॥

इति चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कुत इति तदाह सर्वेषामपि। स्थावरजङ्गमानां भावः भवन्त्यस्मादिति भावः कारणं प्रधानं तद्रूपोऽर्थः स्थितः स्थिरो भवति तस्यापि भावस्य भावः कारणं कृष्ण एव अतः किमतत् श्रीकृष्णव्यतिरिक्तं वस्तु रूप्यताम्। यद्वा, वस्तूनां बुद्धीन्द्रियादीनां भावार्थः व्यङ्ग्योऽर्थः आत्मा स्थिरो भवति तस्याप्यंशत्वात्तद्व्यङ्ग्यो अंशी श्रीकृष्णः अतः किमतत् तद्भिन्नं वस्तु किं किमर्थं रूप्यतां स एव केवलं सेव्य इत्यर्थः ॥५७॥ तदेवं साधितं श्रीकृष्णस्यैव तच्चरणाश्रयणैकहेतुकान्मायातरणादेवानुभवगोचरी भवतीति तच्चरणाश्रयिणामेव सर्वोत्कर्षमभिव्यञ्जयति—समाश्रिता इति। पुण्यं चारु मनोहरं यशो यस्य तस्य मुरारेः पदपल्लव एव प्लवस्तं ये सम्यक् कैवल्येनाश्रिताः कीदृशं महतां पदम् आश्रयं तेषां भवाम्बुधिर्वत्सपदं तीर्णतर्त्तव्यवस्तुमानानास्पदं भवति परं पदं नित्यधाम श्रीवृन्दावनवैकुण्ठादि तेषां पदमास्पदं विपदां यत्पदं दुर्विषयः तत्खलु तेषां कदाचिदपि न भवतीति तेषां मतिस्ततोऽन्यत्र नासज्जते इत्यर्थः ॥ ५८–५९ ॥ सुहृद्भिश्चरितं "मुष्णन्तोऽन्योन्यशिक्यादीन्" इत्यादिनोक्तं व्यक्तात् प्रपञ्चादितरत् अतकारान्तत्वमार्षम् अजस्र उरुर्महानभिसर्वतो भावेन स्तवस्तम् ॥ ६० ॥ "ब्रह्मन्! कालान्तरकृतं तत्कालीनम् कथं भवेत्" इति राजप्रश्नोत्तरं समाप्य पुनस्तां कथामेवामवलम्बमान आह—एवमिति। जहतुः संवृतवन्तौ निलायनैः निलीयस्थितिं तदन्वेषणाद्यैः सेतुबन्धलङ्काप्रयाणक्षीराब्धिमथनादिभिरवतारान्तरचरितैः ॥ ६१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। चतुर्दशोऽयं दशमे सङ्गतः सङ्गतः सताम् ॥ १४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एतदेवोपपादयति—सर्वेषामिति। सर्वेषां वस्तूनां भावेन सत्तापरपर्यायेण सहितोऽर्थः स्थितिप्रवृत्त्यादिनामकः भवतीति भवत् परिणामं प्राप्नुवत् कारणम् एतस्मिन् स्थितः कारणं विना कार्यसत्तास्थितिप्रवृत्त्याद्यसम्भवात् तस्यापि भवतः कारणस्य भगवान् कृष्णो भवत् कारणमस्ति अतः किमतदकृष्णात्मकं वस्तु अस्ति यद्रूप्यतां यन्निरूप्येत ॥ ५७ ॥ अतः सर्वकारणकारणस्य श्रीकृष्णस्योपासनया संसारनिवृत्तिः परमपदप्राप्तिश्च भवतीति प्रकरणार्थमुपसंहरति—समाश्रिता इति। पुण्यानि यशांसि यस्य स पुण्ययशाः मुरस्यारिर्मुरारिः स चासौ स च तस्य पदपल्लव एव प्लवस्तं महतां पदमाश्रयं ये सम्यगाश्रिताः तेषां भवाम्बुधिर्वत्सपदतुल्यं भवति परम्पदं परमं वैकुण्ठं पदं स्थानं भवति विपदामापदां यत् पदं विषयः तत्पुनः कदाचिदपि न भवति ॥ ५८–५९॥

सुहृद्भिः सह मुरारेः एतत् "मुष्णन्तोऽन्योन्यशिक्यादीन्" इत्यादिनोक्तं चरितम् अघासुरहननं च शाद्बले जेमनं च व्यक्तेतरमप्राकृतं रूपं च अजस्य यः उरुर्महानभिष्टवः स्तवस्तं च शृण्वन् गृणन् नरः अखिलार्थानेति प्राप्नोति ॥ ६० ॥ कौमारं जहतुरिति कौमारावस्थागोपनं कृतवन्तौ ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुर्दशाध्यायार्थप्रकाशः ॥ १४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

सर्वेषां देहेन्द्रियादीनां वस्तूनां भावार्थो व्यङ्ग्योऽर्थस्तत्प्रवृत्तिबोध्यो जीवात्मा स्थिरो भवति कौटस्थ्यात् तस्याप्यंशत्वात्तद्व्यङ्ग्योंऽशी कृष्ण एव निरूप्यताम्। अतः तद्भिन्नं वस्तु निरूप्यतां नेत्यर्थः ॥५७॥ सर्ववृत्तिप्रदस्य सर्वस्वामिनः श्रीकृष्णस्य चरणाश्रयणादेव मुक्तिरित्युपसंहरति समिति। पुण्यं यशो यस्य चासौ मुरारिश्च कृष्णस्तस्य पदपल्लव एव प्लवो नौस्तं ये सम्यगेकान्तिभावेनाश्रिताः। कीदृशं ? महतां पदमाश्रयं तेषां भवाम्बुधिर्दुष्पारोऽपि वत्सपदं भवति, पदं पदं परव्योमपदं स्थानं भवति यद्विपदां पदमाश्रयस्तत्तेषां न भवति न च पुनरावर्तत इति श्रुतेः ॥ ५८-५९ ॥ सुहृद्भिश्चरितं "मुष्णन्तोऽन्योन्यशिक्यादीन्" इत्यादिभिरुक्तम्। शाद्वले जेमनं भोजनं व्यक्तेतरप्रपञ्चादन्यत्रूप चिद्घनवत्सतत्पालादि अतान्तमार्षम् अजस्य विरञ्चेरुरुर्महानभिसर्वतोभावेन स्तवस्तम् ॥ ६० ॥ इत्थमवशिष्टां कुमारलीलामभिधाय तत् समापकं पद्यं पूर्वोक्तमेवाह—एवमिति ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीसुबोधिनी

किञ्च, न केवलं सर्वस्य भगवत्त्वे महतां दृष्टिरेव प्रमाणमपि तु युक्तिरपि अत आह—सर्वेषामिति। सर्वपदार्थानामबाधितोऽर्थो भवति कारणे स्थितः कारणातिरिक्तं कार्यं नास्तीति तस्य कारणस्यापि कारणं तत्त्वं भगवानेव अतो भगवद्व्यतिरिक्तं वस्तु किं निरूप्यतां स्नेहोऽपि धर्मः जगद्वत् पूर्वमुत्पन्नः अतो भगवत्येव युज्यत इति प्रसङ्गात्तस्य कारणत्वमुक्तम् ॥ ५७ ॥ सर्वपुरुषार्थरूपत्वाच्च तस्मिन् स्नेह इत्याह—**समाश्रिता इति** ये मुरारेः पदं समाश्रिताः पुण्यं यशो यस्य पदपल्लव एव प्लवः तत्स्वभावतोऽपि महत्पदं तेषां भवाम्बुधिर्वत्सपदं परम्पदं तु पदम्, विपदां यत्पदं न तत्तेषां पदम् ॥ ५८ ॥ उपसंहरति —**एतत्त इति**। कौमारे यद्धरिणा कृतं तत्पौगण्डे परिकीर्त्तितमित्यत्र तत्रानुपपत्तिः परिहृतेत्यर्थः ॥ ५९ ॥ अध्यायत्रयश्रवणकीर्त्तनयोः फलमाह—**एतदिति**। आदौ मुरारेः सुहृदां बालकानां चरितं क्रीडा ततः अघार्दनं ततः शाद्बले जेमनं भोजनं चकाराद्वत्साग्रहरणं व्यक्तादितरमव्यक्तम् अलौकिकं भगवद्रूपमजस्योर्वभिष्टवं स्तोत्रं एतत्सर्वं शृण्वन् गृणन्नपि सर्वपुरुषार्थान् प्राप्नोति ॥ ६०–६१ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे प्रक्षिप्ताध्यायेषु तृतीयाध्यायविवरणम् ॥ २ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्रोपपत्तिमाह—सर्वेषामिति। सर्वेषामपि वस्तुनां भावार्थः परमार्थः भवति भवत्परिणामं प्राप्नुवदिति कारणम्, तस्मिन् स्थितः। तस्यापि सर्वकारणस्य कारणं भगवान् कृष्ण एव, अतः अतत् कृष्णव्यतिरिक्तं वस्तु किं तत् रूप्यताम् निरूप्यताम् ॥ ५७ ॥ 'तस्मात् श्रीकृष्णस्यैव परमार्थत्वात्तदेकशरणानामेव अयत्नसिद्धो मोक्षो, नान्येषाम्' इति प्रकरणार्थमुपसंहरति—समाश्रिता इति। महतां ब्रह्मशिवादीनामपि पदमाश्रयभूतं, पुण्यं 'श्रवणादिपराणामन्तःकरणशोधकं' यशो यस्य स पुण्ययशाः स चासौ मुरारिश्च तस्य, पदपल्लव एव प्लवः संसारसिन्धुतरणे नौस्तं ये सम्यक् निष्कपटमाश्रिताः तेषां भवाम्बुधिः वत्सपदमिव सुतरो भवति। परं पदं श्रीवैकुण्ठाख्यं पदं स्थानं भवति विपदां दुःखानां यत् पदं स्थानं संसारस्तत्पुनः कदापि न भवति। न ततः पुनरावर्तन्ते इत्यर्थः ।५८। यत्त्वयाऽहमिह भगवल्लीलायामाश्चर्येण पृष्टस्तदेतत् प्रश्नस्योत्तरं सर्वं मया ते तुभ्यमाख्यातं प्रकथितम्। कथितमेवानुवदति—यदिति। यत् कौमारावस्थायामघासुरवधादि हरिणा कृतं तद्यथा तत्पौगण्डावस्थायां बालैर्व्रजे परिकीर्तितमिति ॥ ५९ ॥ अध्यायत्रयश्रवणकथनपराणां फलमाह—एतदिति। एतन्मुरारेः सुहृद्भिश्चरितं, मुष्णन्तोऽन्योन्यशिक्यादीन्' इत्यादिनोक्तं, अघार्दनमघासुरमोक्षणं च, शाद्वले हरिततृणे सखिभिः सह जेमनं भोजनं च, व्यक्तेतरत् व्यक्ताज्जडात् प्रपञ्चादितरत् शुद्धानन्दात्मकं, वत्सवत्सपालादिरूपं च, अजेन ब्रह्मणा कृतमुरुं महान्तमभिष्टवं स्तोत्रं च, शृण्वन् गृणन् नरोऽखिलार्थान् सर्वपुरुषार्थान् एति प्राप्नोति ॥६०॥ एवमुक्तप्रकारकैरन्यैरपि निलायनादिभिः कौमारैः कुमारावस्थायां योग्यैर्विहारैः कृत्वा व्रजे स्थितौ रामकृष्णौ कौमारं कुमारावस्थां जहतुस्त्यक्तवन्तौ इत्यर्थः। निलायनं निलीय स्थितिः सेतुबन्धः नद्यादिषु सेतुबन्धः। मर्कटवदुत्प्लवनं शाखातः शाखान्तरगमनम्। आदिपदेनानेकविधलीलान्तरग्रहणम् ॥ ६१ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना। श्रीमन्मुकुन्दारायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने। त्रयोदशो गतो ह्यपि ब्रह्मस्तुतिनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

सर्वेषामिति ।। सर्वेषामपि स्थावरादिवस्तूनां भवत्यस्मादिति भावः कारणं प्रधानं तद्रूपोऽर्थः स्थितः स्थिरो भवति। तस्यापि भावस्य भावः कारणं भगवान् कृष्ण एव। यद्वा। भावार्थः सद्रूपार्थः परमार्थ इत्यर्थः। भवतीति भवत् परिणामं प्राप्नुवत् कारणं तस्मिन् भवति परिणामिनि स्थितः तस्यापि भवतः कारणस्यापि भगवान् कृष्णो भवत्कारणम् अतः अतत् कृष्णव्यतिरिक्तं किं वस्तु अस्तीति रूप्यतां निरूप्यताम् ।। ५७ ।। समाश्रिता इति ॥ महतां ब्रह्मशिवादीनाम् अपि पदमाश्रयभूतं महच्च तत्पदं चेति वा पुण्यं मनःशोधकं यशो यस्य स पुण्ययशाः स चासौ मुरारिश्च तस्य पदपल्लव एव प्लवः संसारसिन्धुतरणे नौस्तं ये सम्यक् निष्कपटमाश्रिताः तेषां भवाम्बुधिः वत्सपदमिव सुतरो भवति। परं पदं श्रीवैकुण्ठाख्यं पदं स्थानं भवति विपदां दुःखानां यत्पदं स्थानं संसारस्तत्पुनः कदापि न भवति। न ततः पुनरावर्तन्ते इत्यर्थः ।। ५८ ॥ एतदिति ।। यत्त्वयाऽहमिह भगवल्लीलायामाश्चर्येण पृष्टस्तदेतत्प्रश्नस्योत्तरं सर्वं मया ते तुभ्यमाख्यातं प्रकथितम्। यत्कौमारावस्थायामघासुरवधादि हरिणा कृतं तद्यथा तत्पौगण्डावस्थायां बालैर्व्रजे परिकीर्त्तितमिति ।। ५९ ।। एतदिति ।। एतन्मुरारेः सुहृद्भिश्चरितं मुष्णन्तोऽन्योऽन्यशिक्यादीनि इत्यादिनोक्तम्। अघार्दनमघासुरमोक्षणं च शाद्वले हरिततृणे सखिभिः सह जेमनं भोजनं च व्यक्तेतरत् व्यक्ताज्जडात् प्रपञ्चादितरत्। व्यक्तेतरमिति अड्डादेशाभाववान् पाठस्त्वार्षः। स एव तोषणीसारार्थसंदर्शिनीभ्यां स्वीकृतः शुद्धानन्दात्मकं वत्सवत्सपालादिरूपञ्च। यद्वा। व्यक्तेतरच्चिद्विलासस्तदेव रूप्यत इति रूपम् अजेन ब्रह्मणा कृतमुरु महन्तमभिष्टवं स्तोत्रं च शृण्वन् गृणन् नरोऽखिलार्थान् सर्वपुरुषार्थान् एति प्राप्नोति ।। ६० ।। एवमिति ।। एवमुक्तप्रकारैरन्यैरपि निलायनादिभिः कौमारैः कुमारावस्थायां योग्यैर्विहारैः कृत्वा व्रजे स्थितौ रामकृष्णौ कौमारं कुमारावस्थां जहतुस्त्यक्तवन्तौ इत्यर्थः। निलायनं निलीय स्थितिः सेतुबन्धः नद्यादिषु सेतुबन्धः श्रीरामलीलानुकरणं वा मर्कटवदुत्प्लवनं शाखातः शाखान्तरगमनम् आदिपदेनानेकविधलीलान्तरग्रहणं तैः ।। ६१ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ।। गङ्गासहायो निरमाद्दशमस्य चतुर्दशे ॥
इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां चतुर्दशोऽध्यायः ।। १४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नान्यद्वस्त्वस्तीत्येतदेवोपपादयति ।। सर्वेषामिति ॥ सर्वेषां ब्रह्माण्डे वर्त्तमानानां सकलानां अपि, वस्तूनां पदार्थानां, भावार्थः सत्तास्थितिप्रवृत्त्यादिरूपोऽर्थः, भवति परिणामं प्राप्नोति भवत् प्रकृतिपुरुषात्मकं कारणं तस्मिन्, स्थितः। तस्य अपि प्रकृतिपुरुषात्मककारणस्यापि, भगवान् कृष्णः कारणं, अतत् सर्वान्तरात्मककृष्णव्यतिरिक्तं, अब्रह्मात्मकमित्यर्थः। वस्तु किं रूप्यतां निरूप्यताम्। अयं भावः 'रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति' इति श्रुतेः सर्वेषां प्रेमास्पदरसमूर्त्तिः श्रीकृष्णः स यदा नयनविषयतां प्राप्तस्तदा, सर्वेषां प्रेमातिशयस्तत्रैव भवेन्न तत्र परोद्भवात्मभवत्वादिविचार इति ।। ५७ ॥ एवं भगवतः श्रीकृष्णस्य परत्वं सर्वकारणत्व प्रेमास्पदत्वं चोपपाद्य 'ब्रह्मविदाप्नोति परं कारणं तु ध्येयः' इति श्रुत्युक्तरीत्या समाश्रयणपूर्वं तद्वेदनमेवानिष्टपरिहारकेष्टप्रापणक्षममिति वदन्नुपसंहरति ।। समाश्रिता इति ।। पुण्यं यशो यस्य स चासौ मुरारिश्च तस्य, पवित्रकीर्त्तेर्भगवत इत्यर्थः। महत्पदं महतामाश्रयं पदपल्लव एव प्लवस्तं, पल्लववत्सुकोमलचरणरूपनावमित्यर्थः। ये समाश्रिताः, समाश्रयणमत्र प्रपत्त्युपासनान्यतररूपं, तेषां एव, भवाम्बुधिः, वत्सपदं वत्सपदतुल्यो भवति नान्येषामित्यर्थः। किं च, परं पदं भगवद्धामापि तेषामेव प्राप्यं भवतीत्यर्थः। यत्, विपदां दुःखानां, पदं संसार इत्यर्थः। तत्, तेषां पदं स्थानं, कदाचिदपि, न भवति। न ततः पुनरावर्त्तत इत्यर्थः ।। ५८ ।। एवं त्वत्प्रश्नोत्तरं कृतमित्याह बादरायणिः ।। एतत्त इति ।। हे राजन्, इह त्वया, यत् अहं पृष्टः, तत् एतत्, सर्वं ते तुभ्यं, आख्यातम्। किं तत्। यत्, कौमारे, हरिकृतं श्रीहरिणा विहितं, तत् पौगण्डे, अर्भकैः व्रजे, परिकीर्त्तितं, तदाख्यातमिति संबन्धः ॥ ५९ ।। अथाध्यायत्रयार्थश्रवणादिफलमाह ॥ एतदिति ॥ मुरारेः एतत्, सुहृद्भिः चरितं 'मुष्णन्तोऽन्योन्यशिक्यादीन्' इत्यादिनोक्तम्। अघार्दनं मुरारिकृतमघासुरविमर्दनं, शाद्वलजेमनं चापि, व्यक्तेतरत् व्यक्ताज्जडात् प्रपञ्चादन्यत्, रूपं शुद्धसत्त्वात्मकवत्सवत्सपादिरूपं, अजोर्वभीष्टवं ब्रह्मणा कृतां महतीं स्तुतिं च, सर्वमपीदं शृण्वन्, गृणन् कथयन्, नरः पुमान्, अखिलार्थान् स्वाभीष्टसकलार्थान्, एति प्राप्नोति ॥ ६० ।। एवमिति ॥ पूर्वं व्याख्यातः, अन्ये त्वेनमत्र न पठन्ति ।। ६१ ॥

इति श्रीहरिकृष्णाख्यभगवत्पादषट्पदः। तत्पौत्रोऽकरवं व्याख्यां स्तुतेः कस्य यथामति ॥ १ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यविरचितायामन्वयार्थबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे चतुर्दशोऽध्याय ।। १४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यत्कौमार इति : १०.१४.५९.

कौमार आचरेदेवं प्रह्लादोक्तिमनुस्मरन्। युक्तं कौमार एवेदृक् क्रीडाकृद्भगवानभूत् ।। ६० ।।

योगज्ञानपदातिशायिचरितं भक्तिप्रवाहं स्फुटं यश्चक्रे व्रजबालकेलिकुतुकी लोकेषु सर्वेष्वपि ।
सोऽस्मान्पातु रमापतिर्निजजनत्राणात्तदीक्षः सदेत्यालोच्योऽत्र समन्वयो निगदितस्त्र्यध्याय्युपात्तो बुधैः ॥ ६१ ॥

एवमिति : १०.१४.६१.

कौमारैरेव कौमारं विहारैर्जहतुर्व्रजे । इत्युक्त्या कर्मनिर्हारः कर्मणेत्यपि बोधितम् ॥ ६२ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने चतुर्दशोऽध्यायः ॥ १४ ॥

कृष्णप्रिया

सभी कार्यों के कारणरूप अर्थ ही स्थिर होते हैं भगवान् श्रीकृष्ण उन कारणों के भी कारण हैं तो फिर उनसे भिन्न कौन वस्तु हो सकती है ? यदि कोई वस्तु हो तो निरूपण कीजिये ॥ ५७ ॥ राजन् ! मुरारि-मुर नाम के दैत्य के शत्रु मुरारि भगवान् श्रीकृष्ण चन्द्र जी का यशस्वि पुण्यमय चरण पल्लव तो नौका है। उस नौका का अच्छी तरह से दृढता और श्रद्धा से आश्रय करने वाले प्रपन्न जनों के लिये यह संसार सागर तो बछड़े के खुर के समान हो जाता है और वैकुंठ धाम निवास बन जाता है और उनके जीवन में विपत्तियों का कोई स्थान नहीं होता ॥ ५८ ॥ राजन् ! आपने मुझसे जो प्रश्न किया था कि भगवान् ने जिस कार्य को पांचवें वर्ष में किया था बालकों ने उसे एक वर्ष के बाद आज ही हुआ है, यह समझकर क्यों कहा उसका समाधान मैंने कर दिया ॥ ५९ ॥ जो भक्तजन गोपाल बालकों का भगवान् श्रीकृष्ण के साथ खेलने, हरे हरे घासों पर जिमने अघासुर का उद्धार, स्वयं बालक और बछड़े के स्वरूप हो जाना और ब्रह्माजी की विस्तारपूर्ण स्तुति इत्यादि प्रसङ्गों का श्रवण कीर्तन स्मरण करेंगे वह समस्त पुरुषार्थों को पा लेंगे ॥ ६० ॥ इस प्रकार आँख मिचौनी, पुल बांधना, वानरों की तरह उछलना कूदना, आदि कुमारोचित्त खेलों के द्वारा कृष्ण एवं बलराम ने व्रज में अपनी कुमारावस्था बिता दी ॥ ६१ ॥

चौदहवां अध्याय समाप्त ।

* * *

अथ तामसप्रमेयप्रकरणम्

अथ पञ्चदशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	वसंत	वंश.	इ. वं.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
५२	४१	४	५	१	१	३	१८८०	१९	६०	१९५९	६१	७

[1]श्रीशुक उवाच

ततश्च [2]पौगण्डवयः श्रितौ व्रजे बभूवतुस्तौ पशुपालसम्मतौ ।
गाश्चारयन्तौ सखिभिः समं पदैर्वृन्दावनं पुण्यमतीव चक्रतुः ॥ १ ॥
तन्माधवो वेणुमुदीरयन् वृतो गोपैर्गृणद्भिः स्वयशो बलान्वितः ।
पशून् पुरस्कृत्य पशव्यमाविशद् विहर्तुकामः कुसुमाकरं वनम् ॥ २ ॥
तन्मञ्जुघोषालिमृगद्विजाकुलं महन्मनःप्रख्यपयःसरस्वता ।
वातेन जुष्टं शतपत्रगन्धिना निरीक्ष्य रन्तुं भगवान् मनो दधे ॥ ३ ॥
स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः ।
स्पृशच्छिखान् वीक्ष्य वनस्पतीन् मुदा स्मयन्निवाहाग्रजमादिपूरुषः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—ततः तौ व्रजे पौगण्डवयःश्रितौ पशुपालसम्मतौ बभूवतुः तौ सखिभिः सह गाः चारयन्तौ पदैः वृन्दावनं अतीव पुण्यं चक्रतुः ॥ १ ॥ विहर्तुकामः वेणुम् उदीरयन् स्वयशः गृणद्भिः गोपैः बलान्वितः पशून् पुरस्कृत्य माधवः पशव्यं तत् कुसुमाकरं वनम् आविशत् ॥ २ ॥ मञ्जुघोषालिमृगद्विजाकुलं महन्मनःप्रख्यपयःसरस्वता शतपत्रगन्धिना वातेन जुष्टं तत् निरीक्ष्य भगवान् रन्तुं मनः दधे ॥ ३ ॥ सः आदिपुरुषः तत्र तत्र अरुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः स्पृशच्छिखान् वनस्पतीन् वीक्ष्य मुदा स्मयन् इव अग्रजम् आह ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततः पंचदशे धेनुपालनं धेनुकार्दनम् ॥ कालियक्ष्वेडतो गोपरक्षणं च निरूप्यते ॥ १ ॥
अहिवक्त्रप्रवेशेन वृथाखिन्नान्सखीनतः ॥ कृष्णः प्रावेशयत्पक्वफलं तालालिकाननम् ॥ २ ॥

पशुपालसंमतौ पशूनां पालने संमतौ पशुपालानां वा संमतौ । ईषद्वयोबलातिरेकमनुक्तवंतावित्यर्थः । अतीव चक्रतुः सर्वतः प्रसर्पणेन ॥१॥ स्वयशो गृणद्भिर्गोपैर्वृतस्तद्वनं प्राविशत् ॥ २ ॥ तद्वनं निरीक्ष्य रंतुं मनो दधे । कथंभूतम् । मंजुघोषा येऽलिमृगद्विजा भ्रमरमृगपक्षिणस्तैराकुलं व्याप्तम् । महन्मनःप्रख्यपयःसरस्वता महतां मनसा प्रख्यं तुल्यं स्वच्छं पयो यस्मिंस्तत्सर आश्रयत्वेनास्ति यस्य तेन वा तेनेति शैत्यमुक्तम् । शतपत्रगंधिनेति परिमलवत्त्वं जुष्टं वनमिति मांद्यं च सूचितम् ॥ ३ ॥ अरुणपल्लवश्रिया सह । स्पृशंत्यः शिखाः शाखाग्राणि येषां तान् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो ब्रह्मस्तुतेरनंतरम् । 'क्ष्वेडस्तु गरलं विषम्' इत्यमरः (१)। यतो वृथा खिन्नास्ततः कारणात् । तालानामालिः पंक्तिर्यत्र कानने तत्तथा । 'तृणराजाह्वयस्तालः' इत्यमरः (२)। 'पौगंडं दशमावधि' इत्युक्तेः पंचमवर्षतो दशमाब्दांतं पौगंडम् । पशुपालने संमतस्यापि पालकांतराप्रोत्या तेषु प्रवेशो दुर्घट इति मत्वा समासांतरम् । इत्यर्थ इति । वयोबलाभावे पशूनां निवर्त्तनस्थापनादि न संभवतीति भावः । गोचारणस्य प्रथमदिने कार्तिकशुक्लाष्टमीति पाद्मे । तथाहि—"शुक्लाष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः । तद्दिनाद्वासुदेवोऽभूद्गोपः पूर्वं तु वत्सपः ॥" इति ॥ १ ॥ बलान्वितः सरामः । कुसुमाकरं पुष्पखनिरूपम् । तद्वनं वृंदावनम् । श्लेषेण माधवं इति वसंतवत्तदुल्लासक इत्यर्थः ॥ २ ॥ मंजुघोषा मनोहरशब्दाः । 'मनोज्ञं मंजु मंजुलम्' इत्यमरः ।

---

[1] बादरायणिरुवाच—गो. प्रे. टी. । [2] वयः समाश्रितौ व्रजे—वीर. ।

महतां हरिपराणां मनसा प्रख्यं तुल्यं स्वच्छं पयो जलम् 'विमर्दोत्थे परिमलो गंधो जनमनोहरे' इत्यमरः । 'शतपत्रं कुशेशयम्' इत्यमरः । वनस्य सघनत्वाद्वायोर्वेगस्तत्र मंदीभवतीति भावः ॥ ३ ॥ आदिपुरुष इति अनुजत्वेऽपि वस्तुतस्तदादिरेवेत्याह । स्मयन्निव विस्मित इव । वनस्पतीन्, अत्र भक्तिभरभग्नग्रीवा नरा यथा पुष्पादिना हरिचरणारविंदमर्चयंति तथैवेमे वृक्षा इति ध्वनितम् । विवक्षितवनस्पत्युत्कर्षस्य स्वोत्कर्ष एव पर्यवसानं, स्वोत्कर्षस्य स्वयमुक्तावनौचित्यात् । मुदानंदजनितेन गांभीर्याभावेन स्थातुमशक्तेश्च । रामे सख्यभावोत्थेन स्मितेनानेन स्वमहोत्कर्षारोपस्तत्रैव व्यंजितः । अत एवाग्रिमश्लोके आदिपूरुषेति स्वनाम्नापि सबोधनम् । तस्य करिष्यते इवेति मदभिप्रायं मदग्रजो मा बुध्यतामिति स्मितनिह्नववान्न तु स्मयन्नित्यर्थः । तथाहि –"श्रीवृंदावनतद्वासिमाधुर्योल्बणचेतसा । तत्स्तवे हरिणारब्धे निजोत्कर्षावसायिनम् ॥ तमालोच्य ततो राममपदिश्य व्यधायि सः । अतोऽत्र नैव तात्पर्यं रामोत्कर्षानुवर्णने । सख्यभावात्तदा रामे नर्मणेदमुदीरितम्" इति भागवतामृतीयकारिकाः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततः पञ्चमवर्षक्रीडानन्तरं त्वर्थे चकारो भिन्नोपक्रमात् व्रज इति पूर्ववत् एवमग्रेऽपि ज्ञेयम्, पशुपालसम्मताविति समन्ततः श्रीवृन्दावनविहारार्थं साग्रजस्य श्रीभगवतो गोपालनेच्छा चिरं जाताऽस्ति सा च बाल्यदृष्ट्या श्रीनन्दादीनां स्नेहभरेण सम्मता न स्यात् अधुना च यथाकालं किञ्चिद्वयोबलातिरेकप्रकटने सम्मताऽभूदित्यर्थः । पशुपालानां वा सम्मतौ इति व्याख्या तु तयोः पशुपालनप्रावीण्यसूचिका पण्डितसम्मत इति वत् किं वा पशूनां पालानां च सम्मतौ सन्तौ श्रीभगवता पालितानां मुक्तस्तन्यत्वेन मातृसङ्गे मेलितानामपि तं त्यक्तुमशक्नुवतां वत्सानां तन्मातॄणां च तदनुगत्वेन वृषादीनामपि साहचर्य्येण निरुध्यमानानामपि सर्वेषां तस्यान्तिके समागमनात् तेन विना वने पशूनामगमनाच्च तत्र ताविति युगलत्वेन निर्देशात् स्नेहभरद्योतना क्रीडा सौष्ठवार्था सखिभिः सममिति ततः प्रभृतिपूर्वे गोपालनान्निवृत्ता इति ज्ञेयम् ये खलु "ततः प्रवयसो गोपाः" इत्यादौ वर्णिता इति ज्ञेयम् अयम्भावः । पूर्वं स्वधर्मरूपेण गोचारणे तस्मिन् पुत्ररूपस्य प्रतिनिधेरयोग्यत्वात् श्रीव्रजेश्वरेण स्वयमेव गोचारणं ततस्तत्सङ्गानुरोधेन तत्सवयस्कैरेव स्वस्वगोचारणम् अधुना तु श्रीकृष्णेन तदारम्भेण तत्सङ्गयोग्यैस्तत्सवयस्कैरेव तदिति एतच्च कार्त्तिकशुक्लाष्टम्यां तथा च पाद्मे कार्त्तिकमाहात्म्ये—

"शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाऽष्टमी बुधैः । तद्दिनाद्वासुदेवोऽभूद्गोपः पूर्वं तु वत्सपः" ॥ इति ।

पदैः तादृशगोसेवायाः गोपजातिस्वधर्मत्वेन पादुकाद्यग्रहणात् साक्षादुदितैः श्रीपादाब्जचिह्नैः पुण्यं पुण्यजनक सुन्दरं वा अतीवेति पूर्वापेक्षया (वैकुण्ठाद्यपेक्षया) वा सर्वतः प्रसर्पणेन ॥ १ ॥ एवं सामान्येन द्वयोरपि गोचारणादिकमुद्दिश्याऽधुना विशेषतो विचित्रमधुरमधुरक्रीडां वक्ष्यन् तत्र च श्रीभगवतः प्राधान्यं द्योतयन् प्रथमदिनक्रीडामन्यत्रातिदेशाथमाह—तदित्यादिना । तच्छ्रीवृन्दावनाख्यं किं वा सुप्रसिद्धमनिर्वचनीयमाहात्म्यं वा तच्छब्दप्रयोगश्च प्रेमभरेण स्मरणविशेषात् माधवो लक्ष्मीकान्तः इति वृन्दावनस्य सर्वसम्पद्विस्तारणाभिप्रायेण श्लेषेण वसन्त इव तदुल्लासकः उच्चैः ईरयन् वादयन् तच्च तदन्तःप्रवेशेन स्वस्यैव हर्षोदयात् श्रीवृन्दावनवर्त्तिनां निजप्रवेशज्ञापनेन प्रहर्षेणौत्सुक्याच्च स्वस्य यशोगुणद्भिरिति विहारारम्भे तेषां तत्र समयहर्षभरोदयः सूचितः, आविशत् आविवेश प्रीत्यान्तः प्रविवेश श्लेषेण पशुपक्षिवृक्षादयः तत्रत्याः सर्वे श्रीकृष्णाविष्टा बभूवुरित्यर्थः । कुसुमानामाकरमिति स्वभावत एव सदा सर्वपुष्पसमृद्धेः अनेन तथा पशव्यमिति स्वत एव पशूनां सुखसिद्ध्या तत्पालनप्रयासाभावेन च तथा गोपैर्वृत इति बलान्वित इत्येताभ्यां सुखविहारसामग्री दर्शिता अत एव विहर्त्तुकाम इत्येवोक्तम् ॥ २ ॥ अन्यामपि तां वर्णयन् श्रीभगवतो विहारारम्भमाह— तदिति । महान्तो भगवद्भक्ताः तन्मनःप्रख्यत्वेनात्यन्तस्वच्छत्वं श्रीभगवद्विहारयोग्यत्वं चोक्तं किन्त्वत्र समासप्रविष्टः सरस्वच्छब्दो बहुवचनान्त एव ज्ञेयः, तज्जलकणिकाव्याजेन महन्मनोवृत्तय इवेत्युत्प्रेक्षा च ध्वनिता निरीक्ष्य सर्वतः प्रसन्नदृष्टिप्रसारणेनानुमोद्य मनोदधे प्रीत्या मनोऽभिनिविष्टं चक्रे भगवानपीति तन्मोहनत्वातिशयो द्योतितः ॥३॥ तत्र तत्र स्थाने स्थाने सर्वत्रैवेत्यर्थः । श्रीः सम्पत् भरो भारः अरुणेति तैर्व्याख्यातम् । यद्वा, तथा तेन च हेतुना करणेन वा सृशच्छिखान् एव श्रेष्ठ्येन वनानां पतीन् वनस्पतीन् महावृक्षानित्युक्तं यद्यपि "वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः" इत्यमरोक्त्या वनस्पतिशब्देन वृक्षसामान्यं नाच्यते तथापि लिङ्गसमवायन्यायात् तच्छब्देन वानस्पत्या अपि गृह्यन्ते स्मयन्निति नर्मद्योतकं कुर्वन्ति गोप्य इवेत्यादौ तत्प्राकट्यात् तत्तदितिचाञ्चल्यक्रीडोपोद्वलकत्वेन एवमित्यादिना वक्ष्यमाणाच्च तच्चैकात्म्येन सवयस्कतया सह सर्वदा क्रीडापरत्वेन बाल्ये सख्यांशप्राबल्यात् तथैवाऽग्रजस्य तदानीं गौणत्वमालम्ब्याह—अग्रजमिवेति, अग्रजमपि स्मयन्निवेति च तथैवाभिप्रायः, दर्शयिष्यते च तद्भावद्वये कस्यापि कदाचिदुद्भूतत्वं क्वचित् क्रीडापरिश्रान्तम् इत्यादिभ्यां अतोऽग्रजभावांशसद्भावेन नर्म चेदं स्तुतिरीत्यैव कृतम् नन्वेवञ्चेत् श्रेष्ठत्वादग्रजेनैव कथं न तस्मै नर्म निर्मितं तत्राह–आदिगुणादिना श्रेष्ठश्चासौ पुरुषश्चेति एवं कविना तु सविनोदं तत्तन्नर्मसङ्गीतमयोस्तुतिरपि तस्मिन्नेव पर्य्यवसायिता एतदपि कर्त्तव्येषु रमणविशेषेषु चित्तोल्लासेन प्रथममेकं क्रीडनमेव रन्तुं मनो दध इत्युक्तत्वात् एवं सनर्मवचनमपि भगवन्निर्मितत्वात् सर्वं यथावदेव ज्ञेयम् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्चेति कथारीत्या वाक्यालंकारे. यद्वा, ततो वत्सपालनक्रीडानन्तरमेवेति मध्ये क्रीडान्तरादिना विलम्बो निरस्तः। त्वर्थे चकारो भिन्नोपक्रमात्, पौगण्डवयसा पूर्व्वतोऽधिकरसप्रकटनयोग्यषष्ठाब्दारम्भकालेन श्रितौ सेवितौ सन्तौ। व्रज इति पौगण्डलीलाया अन्यत्राभावं बोधयन् व्रजसम्बन्धेन तस्या माधुर्य्यं तत्रत्यानाञ्च भाग्यभरं सूचयति। एवमग्रेऽन्यत्रापि ज्ञेयम्। पशुपालने सम्मताविति श्रीवृन्दावनविहारार्थं साग्रजस्य श्रीभगवतो गोपालनेच्छा चिरं जातास्ते, सा च बाल्यदृष्ट्या श्रीनन्दादीनां स्नेहभरेण सम्मता न स्यात्, अधुना च यथाकालं किञ्चिद्वयोबलातिरेकप्रकटनेन सम्मताऽभूदित्यर्थः, यद्वा, पशुपालानां सर्व्वेषां गोपजातीनाम्, किंवा पशूनां पालानाञ्च सम्मतौ सन्तौ गाश्चारयन्तौ बभूवतुः। श्रीभगवता पालितानां मुक्तस्तन्यत्वेन मातृसंगे मिलितानामपि तं त्यक्तुमशक्नुवतां वत्सानां तन्मातृणाञ्च तदनुगत्वेन वृषादीनामपि, साहचर्य्येण निरुद्धमानानामपि सर्व्वेषां तस्यान्तिके समागमनात्, तेन विना वने पशूनामगमनाच्च, तत्र च द्वित्वं स्नेहभरेण श्रीबलदेवेन सहाभेदात् सहचरत्वाच्च। गाश्चारयन्ताविति तयोर्गवामेव पालने उक्तेऽपि पशुपालसम्मताविति तत्संगे महिष्यादीनामपि सर्व्वपशूनां पालनापेक्षया। सखिभिः सममिति वत्सपानामेव सर्व्वेषां तत्सहचराणां गोपालने प्रवृत्तेः। एवं ततः प्रभृति पूर्व्वगोपालनकर्त्तारो गोपालनान्निवृत्ता इति ज्ञेयम्। श्रीभगवतो गोपालने प्रवृत्तिः कार्त्तिकशुक्लाष्टम्याम्, तथा च कार्तिकमाहात्म्ये—'शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः। तद्दिनाद्वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः॥' इति,—पदैः स्वावतारार्थरोदनादिप्रयत्नकृच्छ्रीधरण्यनुग्रहाय पादुकाद्यग्रहणात् साक्षादुदितैर्वज्राङ्कुशाद्यसाधारणलक्षणयुक्तैः श्रीपादाब्जचिह्नैः पुण्यं साक्षात् पुण्यरूपं सुन्दरं वा; अतीवेति स्वभावतः पुण्यमपि वृन्दावनमधुना पूर्व्वापेक्षया सर्व्वतप्रसर्पणेनात्यन्तं चक्रतुरित्यर्थः; यद्वा, श्रीवैकुण्ठादाधिक्याभिप्रायेण ॥ १ ॥ एवं सामान्येन द्वयोरपि गोचारणादिकमुद्दिश्याधुना विशेषतो विचित्रमधुरमधुरक्रीडां वक्ष्यन्, तत्र च श्रीभगवतः प्राधान्यं द्योतयन् प्रथमदिनक्रीडामन्यत्रातिदेशार्थमाह—तदित्यादिना तत् श्रीवृन्दावनाख्यम्, किंवा सुप्रसिद्धमनिर्व्वचनीयमाहात्म्यं वा, यद्वा, श्रीबादरायणेः प्रेमभरेण स्मरणविशेषात् सर्व्वथार्थः स एव। माधवो लक्ष्मीकान्त इति वृन्दावनस्य सर्व्वसम्पद्विस्तारणाभिप्रायेण, यद्वा, निजाशेषभगवत्ताप्रकटनार्थं मधुवंशेऽवतीर्ण इति तस्य तदुचितमेवेति भावः। श्लेषेण माधवाख्य वसन्तस्य प्रवेशेन यथा स्वत एव सर्व्वं वनं पुष्पादिभिः समृद्धं स्यात्, तथा तस्य प्रवेशेन तदिति, किंवा मधु मधुररसस्तेन क्रीडतीति माधवः, श्रीवृन्दावनस्य मधुररसोपभोगार्थमित्यर्थः। उच्चैरीरयन्, तदिति श्रीमदधरपल्लवमाधुर्य्येणैव वादयन्,—तच्च श्रीवृन्दावनवर्त्तिनां निजप्रवेशविज्ञापनेन प्रहर्षणार्थम्, किंवा तदन्तःप्रवेशेन स्वस्यैव हर्षभरोदयात्, स्वस्य किंवा स्वं निजधनरूपं यशो गृणद्भिः कीर्त्तयद्भिरिति विहारार्थं तस्य विहारेच्छया निजप्रहर्षात्। पशूनिति संगिनां महिष्याद्यपेक्षया, आविवेश प्रीत्यान्तः प्रविवेश, श्लेषेण पशुपक्षिवृक्षादयस्तत्रत्याः सर्व्वे श्रीकृष्णाविष्टा बभूवुरिति। कुसुमानामाकरमिति शरत्काले बहुलपुष्पसम्पत्तेः, किंवा श्रीवृन्दावनस्य स्वभावत एव सदा सर्व्वपुष्पसमृद्धेः, अनेन तथा पशव्यमिति स्वत पशूनां सुखसिद्धया तत्पालनप्रयासाभावेन च, तथा गोपैर्वृत इति बलान्वित इत्येताभ्यां सुखविहारसामग्री दर्शिता ॥ २ ॥ अन्यामपि तां वर्णयन् श्रीभगवतो विहारारम्भमाह—तदिति। महान्तो भगवद्भक्तास्तन्मनः प्रख्यत्वेनात्यन्तस्वच्छत्वं श्रीभगवद्विहारयोग्यत्वं चोक्तम्। जुष्टं सेवितमिति श्लेषेण वायोरपि सेवकतया वनस्य माहात्म्यञ्च निरीक्ष्य सर्व्वतः प्रसन्नदृष्टिप्रसारणादिना दृष्ट्वा मनो दधे, प्रीत्या मनोऽभिनिविष्टं चक्रे, प्रारभतेत्यर्थः। भगवानिति निजभगवत्तां दर्शयितुमिति भावः ॥ ३ ॥ तत्र तत्र स्थाने स्थाने सर्व्वत्रैवेत्यर्थः। श्रीः सम्पत्, भरः भावः। अरुणेति तैर्व्याख्यातम्, यद्वा, तया तेन च हेतुना कृत्वा वा, यद्वा, पादयोर्निजारुणपल्लवादपि श्रिया शोभया हेतुनेवेति पराजयेन परमसौन्दर्य्येण च, स्पृशच्छिखानिति भक्त्या स्पर्शनं बोधितम्। ततश्च पत्राणामनुक्तिः फलपुष्पवदुपादेयत्वाभावात्। एव तेषां श्रैष्ठ्येन वनानां पतीन् वनस्पतीन् महावृक्षानित्युक्तम्। स्मयन्निवेति स्वत एव सदा श्रीमुखप्रसत्तेः (प्रसादात्)। यद्वा, अग्रजमिवाह, वस्तुतः स्वतस्तस्मिन्नेव तत्तद्वणनस्य पर्य्यवसानात्। आदिपुरुष इति तस्याग्रजत्वासम्भवेऽपि क्रीडाविशेषार्थमग्रजतया प्रादुर्भूतं तं प्रति तथा वक्तुं युज्यत एवेति भावः। एतदप्यग्रे आद्यरतिविशेषेषु चित्तोल्लासार्थं प्रथममेकं क्रीडनमेव (पूर्वश्लाके) 'रन्तु भगवान् मनो दधे' इत्युक्तत्वात्। यद्वा, आदिपुरुषः पुरुषोत्तम इति लोकशिक्षणार्थमग्रजसम्माननं तत्तद्विनोदमाधुर्य्यादिकञ्च सर्वं तस्य युक्तमेवेति भावः। अत्रेदं तत्त्वम्—वनस्पतीनां प्रणतिविशेषेण सन्तुष्टः सन् तेभ्यसद्दातुकामोऽपि सद्गुणगणविनम्रो लज्जया तान् स्वस्मिन्नपि तेषां सेवापरतां चानिर्द्दिशन्नग्रजस्य सम्मानमिषेण तं प्रत्येव तां वर्णयन् तेषां तत्तद्गुणवर्णनद्वारा प्रथमं श्रीवृन्दावनान्तः प्रवेशे तत्रत्यान् सर्वानेव प्रति प्रसादविशेषमकरोदिति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पञ्चमादुपरि आनवमात्पौगण्डम् आषोडशात्कैशोरम् ॥ १–४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ पौगण्डावस्थावस्थितयो रामकृष्णयोः काञ्चित्क्रीडां वर्णयन् रामकर्तृकं धेनुकासुरभञ्जनम् उभयकर्तृकं तदनुचरभञ्जनं कृष्णकर्तृककालीयह्रदजलपानमूर्च्छितगोगोपोत्थापनं च वर्णयति पञ्चदशेन। ततः कैशोरानन्तरं प्रातपौगण्डवयसौ पशुपालौ

सम्मतौ पशुपालानां वा सम्मतौ तौ रामकृष्णौ सखिभिः सह गाश्चारयन्तौ पदैः पादविन्यासैर्वृन्दावनमतीवपुण्यवच्चक्रतुः, तत्तदा स्वकीर्ति गृणद्भिर्गोपैः परिवृतो बलेन सह समन्वितो वेणुमुदीरयन्नादयन् पशून् पुरस्कृत्य विहर्त्तुमिच्छुः कुसुमानामाकरं पशुभ्यो हितं वनं प्राविशत् ॥ १–२ ॥ मञ्जूः रमणीयो नादो येषां तैरलिमृगपक्षिभिर्व्याप्तं महतां योगिनां मनसा तुल्यं स्वच्छं पयो यस्मिस्तत्सर आश्रयत्वेनास्ति यस्य तेनैवमतिशैत्यमुक्तं शतपत्राणां गन्धो यस्य तेन वातेन जुष्टम् एवं परिमलयुक्तत्वमुक्तम् एवम्विधं वनं निरीक्ष्य रन्तुं मनश्चक्रे ॥ ३ ॥ अरुणपल्लवानां श्रिया सह फलानां प्रसूनानां च भरेण पादयोः स्पृशन्त्यः शिखा अग्राणि येषां तांस्तरून् वीक्ष्यादिपुरुषः श्रीकृष्णः मुदा स्मयन्निवाग्रजं रामं प्रतीदं वक्ष्यमाणमाह ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

श्रवणमननाभ्यां दुरितहरणाय हरेः पौगण्डवयसि क्रियमाणं विक्रमं निरूपयत्यस्मिन्नध्याये ततः कौमारात्पौगण्डवयः नववर्षलक्षणं वयः श्रितौ प्राप्तौ पशुपालत्वेन सम्मतौ योग्यौ ॥ १ ॥ उदीरयन् ध्वनयन् कुसुमाकरं कुसुमोत्पत्तिस्थानम् ॥ २ ॥ मञ्जवः मनोहराः घोषा येषाम् अलयश्च मृगाश्च द्विजाश्च मञ्जुघोषैः अलिमृगद्विजैः आकुलं महतां नारायणचरणारविन्दनिरन्तरमनसां मनःप्रख्यं मनस्तुल्यं निर्मलं पयो जलं यस्य तत्तथा महन्मनःप्रख्यपयश्च तत्सरश्च महन्मनःप्रख्यपयःसरस्तदस्यास्तीति महन्मनःप्रख्यपयःसरस्वान् तेन शतपत्राणां पद्मानां गन्धोऽस्यास्तीति शतपत्त्रगन्धी तेन वातेन वायुना ॥ ३ ॥ पल्लवारुणश्रिया युक्तयोः पादयोः प्रसूनोरुभारेण स्पृशन्त्यः शिखा एव कराग्रकोटयो येषां ते तथा तान्वनस्पतीन् वृक्षान्दृष्ट्वा अत्र भक्तिभरभुग्नग्रीवाः पुरुषाः यथा पुष्पनिचयादिना मुकुन्दचरणारविन्दमर्चयन्ति, तथा वृक्षाश्च पुष्पभरोपनतशाखाकराग्रैः पूजयन्तीत्याक्षिप्तः शेषार्थो बोद्धव्यः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स्मयन्निति नर्म्मद्योतकं कुर्वन्ति गोप्य इवेत्यादौ तत्प्राकट्यात् तत्तदिति चापल्यक्रीडोपोद्बलकत्वेन एवमित्यादिना वक्ष्यमाणाच्च तच्च सवयस्कतया सह सर्वदा क्रीडापरत्वैनैकात्म्येन सख्यांशभावात् तत्रैवाह—अग्रजमिवेति। अतस्तत्तद्भावेन नर्म चेदं स्तुतिरीत्यैव कृतम् एवं सनर्म्मवचनर्मा भागवतत्वात् सर्वं यथावदेव ज्ञेयम् ॥ १–४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

स्मयन्निवाहाग्रजमित्यादि । आदिपुरुषत्वेनाग्रज इति महानुपपत्तिः अत एवाग्रजं स्मयन्नेवाग्रजमुपलक्ष्यीकृत्य ॥ १–४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

धेनूनां रक्षणं ज्येष्ठस्तुतिः स्वैः सह खेलनम् । धेनुकस्य वधो रक्षा विषात् पञ्चदशे गवाम् ॥

ततः पञ्चमवर्षक्रीडानन्तरं पशूनां पालने सम्मतौ गोपैः सम्मतीभूतौ तद्दिनं तु पाद्मे कार्तिकमाहात्म्ये दृष्टम्—

शुक्लाष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः । तद्दिनाद्वासुदेवोऽभूद्गोपः पूर्वं तु वत्सपः ॥ इति ॥

पदैः पदचिह्नैर्ध्वजादिभिः पुण्यं चारु अतीवेति पूर्वमूनविंशतिचिह्नानां चरणयोर्लघुत्वाद्रेखाणामतिसूक्ष्मत्वेन स्पष्टीभावात ॥ १ ॥ तद्वनं पशव्यं पशुभ्यो हितम् आसमन्तादवित् माधव इति श्लेषेण वसन्त इव तदुल्लासकः ॥ २ ॥ तत्पञ्चेन्द्रियाह्लादकं वनं निरीक्ष्य मञ्जुघोषा अलयो मृगा द्विजाः पक्षिणश्च तैर्व्याप्तमिति विविधेन सौस्वर्य्येण श्रोत्रस्य वातेन जुष्टं सेवितमिति व्यञ्जितेन मान्द्येन महतां मनःप्रख्यं मनःसदृशं शीतलमधुरस्वच्छं पयो यत्र तत्सर आश्रयत्वेनास्ति यस्य तेनेति शैत्येन च त्वगिन्द्रियस्य माधुर्य्येण रसनायाः शतपत्रगन्धिनेति सौरभ्येण नासायाः शतपत्रस्थसौन्दर्य्येण नेत्रस्याप्याह्लादकम् ॥ ३ ॥ अरुणपल्लवानां श्रीः शोभा अधोमुखत्वेन पादस्पर्शनात् फलानां प्रसूनानां चोरुभरेण पादयोः स्पृशन्त्यः शिखा येषां तान् वनस्पतीन् वृक्षान् विलोक्य स्मयन् स्मयमान इति विवक्षितस्य वनस्पतीनानुत्कर्षस्य पर्य्यवसानं सोत्कर्ष एव स्यात् स्योत्कर्षस्य च स्वयमुक्त्यनौचित्यात् मुदेत्यानन्दजनितेन गाम्भीर्य्याभावेनोक्त्या विना स्थातुमशक्तेश्च रामे सख्यभावोत्थेन स्मितेनानेन स्वमहोत्कर्षारोपस्तत्रैव व्यञ्जितः अत एवाग्रिमश्लोके आदिपुरुषेति स्वनाम्नाऽपि तस्य सम्बोधनं करिष्यते इति मदभिप्रायमिमं मदग्रजो माबुद्धचतामिति स्मितनिन्हुवान्न तु स्मयन्नित्यर्थः, तथा हि "श्रीवृन्दावनतद्वासिमाधुर्योल्बणचेतसा । तत्स्तवे हरिणा लब्धे निजोत्कर्षविसार्यनम् ॥ तमालोच्य ततो राममपदिश्य व्यधायि सः । अतोऽत्र नैव तात्पर्यं रामोत्कर्षानुवर्णने ॥ सख्यभावात्तदा रामे नर्मणेदमुदीरितम्" इति भागवतामृतीया सार्द्धकारिका आदि पुरुष इति तदनुजत्वेऽपि स्वयं भगवत्त्वात्तदादिः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इति प्रकटीकृतपौगण्डावस्थयोः राममाधवयोर्गोपालनादिलीलां सानुचरधेनुकासुरवधं कालीयनागक्ष्वेडतो गोपरक्षणं च पञ्चदशेऽस्मिन्नध्याये वर्णयति—तत इति । कौमारगोपनानन्तरं पौगण्डवयः श्रितौ आविष्कृतपौगण्डवस्थौ राममाधवौ सखिभिः

समं सह गाश्चारयन्तौ पदैः पादपद्मविन्यासैः वृन्दावनमतीव पुण्यं चक्रतुः ॥ १ ॥ तत्तदा कुसुमाकरं पुष्पालयं गोपालानां प्रियं पशव्यं पशुभ्यो हितं वनं माधवः श्रीपतिः प्राविशत् ॥ २ ॥ तद्वनं निरीक्ष्य भगवान् अखण्डैश्वर्यो रन्तुं मनो दधे कथम्भूतम् मञ्जुमधुरो घोषो नादो येषां तैरल्यादिभिराकुलं व्याप्तम् महतां मनोभिः प्रख्यानि तुल्यानि अत्युज्ज्वलानि पयांसि यस्मिन् तत्सरः आश्रयत्वेनास्ति यस्य तेन शीतलेन शतपत्रगन्धिना शतपत्राख्यपद्मपरिमलवता वातेन जुष्टं सेवितम् अनेन निविडवनसङ्गाद्वातस्य मन्दगतित्वमपि द्योतितम् ॥ ३ ॥ स आदिपुरुषः प्रकृतिपुरुषप्रेरकः श्रीकृष्णः अरुणपल्लवश्रिया सह पादयोः स्पृशन्त्यः शिखा अग्राणि येषां तान् वनस्पतीन् वीक्ष्य मुदा स्मयन्निव अग्रजं श्रीराममाह, स्वभावत एव सदा प्रसन्नवदनत्वादिवेत्युक्तिः ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

धेनूनां पालनं पञ्चदशे सङ्कर्षणस्तुतिः । स्वैः क्रीडाधेनुकवधं सत्त्राणञ्च विषतोऽभवत् ॥

ततः पञ्चमाब्दक्रीडान्तरं पौगण्डं वयः षाष्ठ्याब्दिकीमवस्थामाश्रितौ व्यञ्जयन्त्यौ तौ श्रीबलकृष्णौ पशुपालसम्मतौ बभूवतुः तद्दिनन्तु गोपाष्टमीत्युक्तम् :—

शुक्लाष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः । तद्दिनाद् वासुदेवोऽभूद् ज्ञेयः पूर्वन्तु वत्सपः ॥ इति ॥

पाद्मकार्तिकमाहात्म्ये । पदैरङ्घ्रिचिह्नैर्ध्वजवज्रादिभिर्वृन्दावनमतीव पुण्यं मनोज्ञं चक्रतुः, इदानीमङ्घ्रिचिह्नानां प्रव्यक्त्या तत्र शोभाधिक्यात्, ननु कृष्णस्य गोपस्यापि राजपुत्रत्वात् गोचारणं न युक्तमिति चेन्तस्य परेशत्वेन तदौचित्यात्, स हि यज्ञपुरुषः मन्त्रैर्हविषा च गव्येन यज्ञसिद्धिरिति गोपालनस्य यज्ञपुरुषतासम्पादकत्वात् ॥ १ ॥ तद्वनं माधवः कृष्णः श्लेषेण वसन्त इव तदुल्लासकृत् ॥ २ ॥ तद्वनं वीक्ष्य भगवान् तत्र रन्तुं मनो दधे, कीदृक् ? मञ्जुघोषा अलिनो मृगा द्विजाः पक्षिणश्च तैराकुलं व्याप्तमिति विविधसुस्वरवत्वात् श्रोत्रेन्द्रियस्य वातेन जुष्टं सेवितं कीदृशेन ? महन्मनःप्रख्यं साधुचित्तमयं शीतत्वमधुरस्वच्छं पयो यत्र तत् सरो यस्याश्रयत्वेनास्तीति तेन मान्द्यशैत्यधारित्वात् त्वगिन्द्रियस्य माधुर्येण रसनेन्द्रियस्य, शतपत्रगन्धिनेति सौगन्ध्यवत्वात् घ्राणेन्द्रियस्य च शतपत्रसौन्दर्यधारित्वात् त्वगिन्द्रियस्य च, आह्लादकमितीन्द्रियपञ्चकाह्लादि वनं सूच्यते ॥३॥ तत्र तत्र पर्यटन् स नन्दसूनुरादिपुरुषो वनस्पतीन् वीक्ष्य स्मयन्निवाग्रजमोहेत्यन्वयः, कीदृशान् ? अरुणानां पल्लवानामधोमुखानां श्रिया शोभया सह फलादीनां गुरुभरेण हेतुना पादयोः स्पृशन्त्यः शिखा येषां तान् अत्र वनस्पत्युत्कर्षस्य स्वोत्कर्षे पर्यवसानात्तस्योत्कर्षस्य च स्वस्मिन्नभिधातुमयुक्तत्वादग्रजं व्यपदिश्याभिधानं न दोषावहं मुदा स्मयन्निवेत्यतिगाम्भीर्यं मुक्ति विनास्थातुमशक्तिश्च व्यज्यते ॥४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अपि चमसं वत्सरं बाल्यमानं पौगण्डं तत उत्तरमाषोडशं कैशोरं तत्र कृष्णपौगण्डवयःकृतं चरितं दुरितहारि निरूपयत्यस्मिन्नध्याये । ततो बाल्यात्पौगण्डसंज्ञं वयःश्रितौ पशवो महान्तस्तत्पालाविति सम्मतौ तत्त्वेन लोकानां सम्मतौ बभूवतुः । सखिभिर्मित्रैः समं साकं गाश्चारयन्तौ पदैः साङ्घ्रिनिक्षेपैः स्वतः पुण्यं वृन्दावनमतीव पुनरधिकं चक्रतुः ॥ १ ॥ स्वयशो गृणद्भिः स्तुवद्भिर्गोपैर्वृतो माधवः सबलः पशून्पुरस्कृत्य पशव्यं तद्धितं विहर्तुकामः । तुं काममनसोरपीत्यादेर्विहर्तुं काम इच्छा यस्य सः । कुसुमाकरं कुसुमानां पुष्पाणामाकरः खनिरुत्पत्तिस्थानमिति यावत् तद्वनं वेणुमुदीरन्त्रणयन्प्राविशत् ॥ २ ॥ मञ्जवो मञ्जुला मनोहरा घोषा येषां तेऽलयश्च भ्रमराश्च सिंहादयश्च द्विजाः कोकिलादिपक्षिणश्च तैराकुलं । मञ्जुघोषेत्यलिमात्रविशेषणं वा । तन्मञ्जुघोषेण वेणुमनोहरघोषेणालयो मृगा द्विजा आकुला अपूर्वरवश्रवणतो यत्रेति तद्वा । महतां मनो महन्मनस्तेन प्रख्यं पयो जलं तद्यत्सरस्तद्वान् तदुपरि पतनेन तेनात एव शतपत्राणां कुशेशयानां गन्धः सोऽस्यास्तीति तद्वांस्तेन वातेन जुष्टं निरीक्ष्य भगवान्रन्तुं मनो दधे दध्रे ॥ ३ ॥ आदिपूरुषस्तत्र तत्र वनाद्वनं अरुणपल्लवश्रियाऽरुणानां पल्लवानां श्रिया सह । अनेन नीराजनं ध्वन्यते । फलानां प्रसूनानां चोरुर्महान्भरो भारस्तेन पादयोः स्पृशन्त्यः शिखा अग्रभागा येषां ते तान् । अनेन नमनसत्कृतनमनवद्ध्वन्यते । वीक्ष्य मुदा स्मयन्नग्रजं बलं प्राह । स्वसाम्राज्यं जनसभाजनार्थमग्रजेऽर्पयन्नाहेतीवशब्देन द्योतयति ॥ ४ ॥

श्रीसुबोधिनी

यशोदानन्दयोरेवं निरोधः सुनिरूपितः । गोपालानां निरोधोत्र सस्त्रीकाणां निरूप्यते ॥ १ ॥
मध्यमोयं समस्तानां निरोधः परिकीर्त्यते । पञ्चधैवानुभावोत्र दुष्टनिग्रहरूपवान् ॥ २ ॥
आध्यात्मिकीमविद्यां वै दूरीकर्तुं तथाकृतिः । तदर्थं क्रमतोध्याया उभयेषां तथा द्वयम् ॥ ३ ॥
स्नेहाधिक्यसुसिद्ध्यर्थं स्नेहान्तो मध्यमः स्मृतः । प्रथमं द्वादशेध्याये देहाध्यासो हि धेनुकः ॥ ४ ॥
तद्वधो ज्ञानपूर्वो हि फलावधि निरूप्यते । कालीय इन्द्रियाण्याहुर्विषयास्तद्विषं मतम् ॥ ५ ॥
ततः सर्वविनाशः स्यादित्यन्ते मरणाभिधा । ततश्चेज् जीविताः सर्वे पुनर्देहान्तरस्थितिः ॥ ६ ॥

तत्र प्रथमं ज्ञानं निरूपयन् भगवान् देशशुद्धि वनप्रवेशं वनक्रीडायां मनश्च कृतवानित्याह त्रिभिः ततश्चेति, **वन एव ज्ञानं सात्त्विकत्वात्** तत्रोद्वेगो न भवतीति तत्र क्रीडायां मनो निरूपणीयं प्रवेशश्च ग्रामाद् भिन्नप्रक्रमार्थो वक्तव्यः, तत्र प्रथमं भगवतो

मध्यमलीलायां वृन्दावनस्य दैत्यभूयिष्ठत्वाच्छुद्धिमाह **तत** इति, **पौगण्डं वयः** षष्ठवर्षमारभ्य नववर्षपर्यन्तं, पुरुषार्थचतुष्टयसाधककालाभिमानिन्या देवता भगवन्तं सेवितुमागताः **पौगण्डशब्देनोच्यन्ते**, दोषाभावः प्रथमं निरूपणीय इति पञ्चात्मकः कालः **पूर्वं** निरूपितः, **ततस्**तदनन्तर **पौगण्डमेव वय**स्तारुण्यमिव **श्रितौ व्रजे पशुपालानां सम्मतौ बभूवतुः** पशूनां **पालने** वा योग्यौ, तौ रामकृष्णौ साधारणं चरित्रमुभयोरिति, अतो **गाश्चारयन्तौ सखिभिः** सख्यपर्यन्तमागतैर्बालकैर्गोरक्षा धर्मः स तैः कार्यतेन्यथा सख्यपर्यन्तं गता यदि विक्षिता भवेयुस्तदा वैकुण्ठे **नयनलक्षणमात्मसमर्पणं** नोपपद्येरन्, **सखिभिः समं, समं** वा **वृन्दावनमतीव पुण्यं चक्रतुः, सम**त्वाद् यागभूमिरेषा, इदानीं **पुण्यरूपै**व जाता, **पदैः** पादन्यासैः, पादयोः **पुण्य**निकायोस्तीति पूर्वमवोचाम, **पुण्यं ऐहिकपारलौकिकसाधनं कामानुरूपफलदं च** इदमपि निःसाधनानां स्वयमेव भगवत्प्राप्तिसाधनरूपं लीलाविशिष्टं सत् स्वतः फलरूपं, अयमेवातिशयो ज्ञेयः, कामाभावेपि भगवत्प्रापकं च ॥ १ ॥ ततो भगवान् विशेषाकारेण वृन्दावनप्रवेशं कृतवानित्याह **तन्माधव** इति, सामान्यलीलैकेनैवोक्ता, **तत्** तत्र **माधवो** लक्ष्मीपतिर्लक्ष्म्या सह क्रीडां कर्तुं शब्द ब्रह्म **च** संवादार्थ**मुदीरयन्, वेणु**रिति वश्चेश्च वयौ स्वरूपानन्दविषयानन्दावणू यस्मात् स **वेणु**रुभयविस्मारकस्तद्वादने विषयिणो मुक्ताश्च सर्वे समायान्त्याध्यात्मिका आधिदैविकाश्चोद्बुद्धा भवन्ति ततो **वृतो गोपै**राधिदैविकैस्त एव **स्वयशो गृणद्भिः**, **भगवद्यशस्तैर्निरन्तरं गीयते**, सामर्थ्यार्थं **बलान्वितः**, बलभद्रो हि बलात्मा, क्रियायां पशूनां विनियोग इति, **पशून पुरस्कृत्य** तानादौ क्रियाशक्त्या शुद्धान् कर्तुं **वनमाविशत्**, स्थानमपि **पशव्यं** पशूनां हितं, भगवता पूर्वं तथाकृतत्वात्, **विहर्तुकाम** इति, तत्र विहारेच्छया प्रविष्टः, **विहारे हि क्रिया पूर्णा भवति**, रजसैव विहार इति स्थानस्य रजस उद्रेकमाह **कुसुमा**करमिति, **कुसुमानां** रजोविकासाना**माकरं** स्थानभूतं, **वन**मिति, **वन**लाला सात्त्विकीति सत्त्वप्रधानैव रजोलीला ॥ २ ॥ पश्चाद् भगवांस्तत्र स्थिताभिः सर्वाभिरेव देवताभिरलौकिकीभिः सह रन्तुं मनः कृतवानित्याह तदिति **मञ्जुघोषा** येषामलीनां मृगाणां **द्विजानां च कुलैराकुलं दृष्ट्वा रन्तुं मनो दध** इतिसम्बन्धः, यत्र त्रिविधा अपि **मञ्जुघोषा**स्तत्र भूदोषो नास्तीति ज्ञातव्यं, **तृणपुष्पफलात्मकं च वनं भवति**, तत्सम्बन्धिनश्चेन् निर्दुष्टास्तदा तृणादयोपि निर्दुष्टा एव अत्राल्यादीनां **मञ्जुघोष**त्वस्यानुक्तिसिद्धत्वेपि यत् कथनं तेन लोकप्रसिद्धातिरिक्तो भगवत्स्वरूपनादानुभवानन्दजत्वलक्षणो **मञ्जु**त्वविशेषो यः स उच्यतेतो **नानर्थक्यं, अत एव मृगाणामप्युक्तिः**, अन्यथा रसोद्दीपकत्वं तेषां लोके न सिद्धमिति तदुक्तिरयुक्ता स्यात्, स्वस्थितिदेशे प्रियस्थितिज्ञापकत्वमपि **मञ्जु**त्वं तेषां ज्ञेयं, किञ्च न केवल दोषाभावस्तत्र किन्तु गुणपूर्णतापीत्याह **महन्मनःप्रख्यपयःसरस्वता वातेन** जुष्टमिति, **अन्तरिक्षदेवत्या हि पशवोरण्यप्रतिष्ठाः** तत्र वायुरुभयाधिपतिर्गवामरण्यस्य च, स चेत् सर्वथादोषरहितो गुणवांश्च भवति तदैव लीला सङ्गच्छते, श्रमापनोदनार्थं च तस्यापेक्षा लोकसिद्धा, वृन्दावने सामान्यतः सर्वदोषनिवृत्तेरुक्तत्वाद् वायोरागन्तुकदोष एव परिहर्तव्यः, जलं पुष्पाणि च तत्सम्बन्धीनि शैत्यमान्द्यसौरभ्याणि च गुणाः, तथा सति वायुराधिदैविको भवति, महतां मनोवद् यत् **सरः सर्वदोषाभावपूर्वकगुणेषु निदर्शनं महतां मनः**, ततोपि प्रकर्षेण ख्यातिर्यस्य भगवल्लीलौपयिकत्वात्, एतादृशं पयस्तद्युक्तं **सरो** लयविक्षेपशून्यं शान्तं तरङ्गादिरहितं, अनेन शैत्यमान्द्ये निरूपिते, सदादिपदेषु सत्स्वपि यन्महत्पददानं तेन सरस्वत्पि नाल्पत्वं महत्परिमाणवत्त्वमेतल्लीलामध्यपात्यतिरिक्ताज्ञातत्वं **च** ज्ञाप्यते, शतपत्राणि कमलानि कुशेशयानि पुष्पविशेषा वा, तेषां **गन्धोस्यास्तीति** सौरभ्यं निरूपितं, तेनापि चेत् सेवितं तदा **भगवान्** षड्गुणैः सह तत्र रमणार्थं प्रवृत्तः, भृङ्गादिषु त्रयो गुणा वा ते च त्रयः, अतो वृन्दावनं षड्गुणैर्युक्तं **स्वसमाने च रमणं भवति** ॥ ३ ॥ कदाचित् प्राकृतरतिं भगवान् करोतीति कस्यचिच्छङ्का स्यात् तत्परिहारार्थं वृक्षाणां भ्रमराणां मृगपक्षिणां भूमेश्च स्वरूपं वक्तव्यं, वनं हि भूमिवृक्षात्मकं, तत्स्था अपि यदि दुष्टा भवेयुः स्वरूपतोपि तदापि वनं त्याज्यमिति दोषाभावो गुणाश्च वक्तव्याः, तान् भगवानेव जानाति बुध्यते च बलभद्र एव, अतोग्रे प्रत्यक्षतो लीलां कर्तुं तेषां स्वरूपं बलभद्रं बोधयति **स तत्र तत्रे**ति, यदि वनस्थानं स्वभावं प्रकटयेयुस्तूष्णीं वा तिष्ठेयुस्तदा भगवांस्तेषां स्वरूपं न वदेत् किन्तु त एव नम्रा इत्याह **स तत्र तत्र सर्वत्र** व**नेरुणपल्लवानां श्रियोप**लक्षितान् फलप्रसूनयो**रुरुभरेण** स्व**पादयोः स्पृशच्छिखान् वनस्पतीन् वीक्ष्ये**ति, **पल्लवा** अङ्गुलिस्थानीयाः, येन हस्ताभ्यां नमस्कारः सूच्यते **फलानि** पुष्पाणि **च** निवेदयन्ति, साष्टाङ्गश्च नमस्कारः **पादयोः शिखास्पर्शेन** यथासम्भवं सूचितः, तानुद्धृतान् **दृष्ट्वा** भगवतो हर्षः, **स्मयन्निवे**ति मन्दहासो मुखप्रसादहेतुः, बलभद्रस्य तदज्ञानाद् विस्मयः, आश्चर्यभा**वादिवे**ति, **बल**भद्रोप्यावेशित्वेन बोधनीयः, अन्यथा देवताचिन्तनाभावे सा देवता नाविष्टा स्यात्, नन्वावेशापेक्षयावतारो मुख्य इति कथं बलभद्रपरत्वेन तेषां निरूपणमित्याशङ्क्याग्रजमिति, अग्रे स एवाविर्भूत इति, तर्हि बोधनमनुचितमिति चेत् तत्राहादिपूरुष इति पुरुषोत्तमः ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

प्रमेयप्रकरणम् ।

द्वादशेध्याये प्रकरणार्थोक्तौ, गोपालानां निरोध इत्यादि । एतयोर्निरोधो मुख्यतयोच्यत इत्यर्थः । मध्यमोयमिति । वयस्यानां स्वामिनीनां चाग्रेस्मान्निरोधादधिकस्य तस्य वक्ष्यमाणत्वादेतत्प्रकरणोक्तस्तमपेक्ष्य स तयोरपि मध्यम एवेत्यर्थः । पञ्चधेति । धेनुककालीयदावाग्निद्वयप्रलम्बनिग्रहात्मक इत्यर्थः । साधारणानां व्रजस्थानामेतेनान्तःकरणनिरोधप्रतिबन्धकापगमः उक्तः,

वयस्यानां सखीनां तु मुख्यत्वेन निरोध एकैकेनाध्यायेनोक्त इत्याहुः उभयेषामिति । तत्र निमित्तमाहुः स्नेहाधिक्येति । साधारणापेक्षयाधिकस्नेहज्ञापनार्थमित्यर्थः । प्रथमं द्वादशेध्याय इति श्लोकः । अत्र अयमाशयः । अत्र ह्यादौ लीलासम्बन्धिवस्तुस्वरूपज्ञानं निरूप्यते । तदनन्तरं दशरसात्मकलीलानुभवश्च । तथा चैवं भावोक्त्यनन्तरं देहादिसर्वविस्मृतिरेव वक्तुं युक्ता, सापि न तात्कालिकी, किन्तु सार्वदिकीति स्थितौ सत्यां यदेतदग्रे धेनुकवधनिरूपणं तत्तादृग्रूपमित्येव ज्ञेयम् । धेनुकातिरिक्ततदध्यासाभावश्चेत्यपि । अध्यासनिवृतौ तत्स्मृत्यसंभवात् । किञ्च । अध्यासस्य अविद्याजन्यत्वनियम इति ग्रहिलवादिनं प्रति 'तुष्यतु दुर्जन' इति न्यायेनाहुः यद्याग्रहस्तदैतमेव धेनुकं तथा मानयेति । आवश्यकदैहिककर्मप्रवृत्तिनिमित्तत्वेन भगवद्भजनप्रतिबन्धकत्वं हि देहाध्यासे । अयमपि स्वाभीष्टभजनप्रकारविशेषानुकूलतद्वनगमनप्रतिबन्धक इति तथा । अत एव मूले 'प्रेम्णेदमब्रुव'न्नित्युक्तम् । गोपेष्टप्रकारस्य भगवदभिमतत्वमपि ज्ञापयितुं सखित्वमप्युक्तम् । अन्यथा सीतिवीर्य इत्यादेः कृतनरहारत्वस्य चोक्तत्वात्सम्भावितानिष्टदेशे गमनविज्ञापनं प्रेमविरुद्धमिति तदुक्तिर्विरुद्धा स्यात् । यथा तत्त्वज्ञानस्वभावादेव तदध्यासनिवृत्तिरावश्यकी, तथात्रोक्तरसानुभवस्वभावजनिततत्प्रकारविशेषोत्कटरागतः स्वेष्टलीलाप्रतिबन्धकत्वातिरिक्तस्तद्धर्मो भासमानोपि न बाधकस्तेषां विज्ञतावभूत्, अतस्तन्निवृत्तेरावश्यकत्वात् । अन्यथा सा न स्यादेव । अत एवाग्रेत्युच्चाधिकारवत्प्राप्यं फलं प्राप्तवन्तः । एतदेवाहुः फलावधीति क्रियाविशेषणेन । कालीय इन्द्रियाण्याहुरिति । इत्याहुरिति सम्बन्धः । इति मतमिति च । आध्यात्मिकीमविद्यामित्युक्तत्वात्तादृशस्यैव देहादेरध्यासनिवृत्तिरत्र कार्या । स च लिङ्गशरीरात्मक इति प्राकृततन्निवृत्तिरेव वाच्या । सैवाध्यायान्ते निरूपिता । अत एव 'दवोपहतचेतस' इति वक्ष्यति । लीलास्थलभक्तजीवनादिकमपि नादृष्टजन्यम्, अलौकिकत्वादिति ज्ञापनाय । एतेदेवोक्तमाचार्यैः ततश्चेज्जीविता इत्यनेन । देहस्य प्रारब्धजन्यत्वनियमेन तस्य च नष्टत्वेन न तज्जन्योग्रिमो देह इति पूर्वस्माद्भिन्न एवेत्याहुः पुनर्देहान्तरेति । 'मृत्युरत्यन्तविस्मृति' रिति वाक्यात् हरिविस्मृतेरेव तथात्वम् । तथा च विषयोन्मुखेन्द्रियाणां तद्धेतुत्वात्तथात्वमित्याशयेनोक्तं कालीय इन्द्रियाण्याहुरित्यादि । एतेनैतेषां भगवद्भावातिरिक्तभावाभावः सार्वदिक इति सूचितम् । यद्यपि पूर्वमप्येतेषां तथात्वमेवासीत्तथापि यथा वाचा लीलास्थतर्वादिस्वरूपं ज्ञापितम्, तथा स्वकृत्यैतेषां स्वरूपमाधुनिकान् ज्ञापयितुं लौकिकमपि भावं स्थापयित्वा तथाकृतवान्, अन्यथा 'दैवोपहतचेतस' इति न वदेत्, अलौकिकत्वात्, लौकिकेष्वेव तथात्वसम्भवादिति भावः । ततश्च पौगण्डवय इत्यत्र, दोषाभावः प्रथममित्यादि । पुरुषे हि देहेन्द्रियप्राणान्तःकरणजीवात्मकः सङ्घः । तथात्वं भगवत्यपि भासत इति तदभावनिरूपणेन दोषाभावः उक्तः । प्रमाणप्रकरणत्वात् । तेन भक्तानामपि तथात्वं सिध्यति । अन्यथा सख्यदानं न स्याद् । स चोक्तलीलयैवोक्तः। तथा हि । नहि जीवस्य तादृगुत्सवहेतुत्वं पूतनान्तकत्वं मुक्तिदत्वं वा सम्भवति । न वा स्वोपकारकर्त्र्यामपि ब्रह्मादिदुरापुरुषार्थहेतुकृपायुक्तमन्तःकरणमन्यस्य भवति । यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनादिति न्यायः सर्वत्र दृष्टव्यः । न वा पूतनास्तन्यसम्बन्धे प्राणरक्षा सम्भवति । अत एव दुर्जरवीर्यमित्युक्तम् । अतितोकस्य प्राणधर्मरूपस्तनार्थित्वदशायां प्रवालमृद्वंघ्रिस्पर्शमात्रेण शकटे तथात्वोक्त्या चावस्थाविरुद्धकार्यकरणेन भौतिकप्राणराहित्यमेवोक्तं भवति । तृणावर्तगलग्रहणेपि तथा । बकमुखान्तःप्रवेशेपि। स्वमुखकमलेखिलप्रदर्शनेनैकदैव लघुत्वगुरुत्वप्राकट्येन रज्जुन्यूनतया चेन्द्रियदेहराहित्यं ज्ञाप्यते । न हि 'यः पृथिव्यां तिष्ठ'न्नित्यादिश्रुत्युक्तधर्मवतीन्द्रियं देहो वा सम्भवति । न हि देहे लघुत्वगुरुत्वे एकदैव सम्भवतः, तावद्रज्ज्वमानं वा । उक्तन्यायोनुसन्धातव्यः। एव सति देहाद्यभावेन तदध्यासादेरप्यभावादुक्तगुणैश्च निर्दोषपूर्णगुणविग्रहरूपत्वं सिद्धम् । तेन दोषाभावज्ञापककालाभिमानिन्यस्ता इति पूर्वं ता एव निरूपिताः । अत्रैव श्लोके सखिभिः सममित्यत्र, गोरक्षा धर्म इत्यारभ्य नोपपद्येरन्नित्यन्तम् । ननु गोरक्षा हि वर्णधर्मः । तथा च भगवत्सख्यं प्राप्तानां तदपेक्षाविक्षेपावसम्भावितावित्यनुपपन्नमिति चेत् । अत्रायं भावः । 'अधिकं तत्रानुप्रविष्टं न तु तद्धानि' रितिन्यायेन स्वाभाविकधर्मान् स्थापयित्वैव सख्यं दत्तवान्प्रभुरिति मन्तव्यम् । अन्यथाग्रे दैवोपहतचित्तत्वं विषपानेन चान्यथाभावो नोपपद्यते । अत एव स्वाभाविकपूर्वसर्वधर्मनिवृत्तिर्विषपानकार्यव्याजेन भगवता कृतेत्युक्तम् । एवं सति सख्यस्य फलपर्यवसायित्वार्थं स्वकर्तव्यं गोरक्षणं तैः कारयति प्रभुः । सख्यं प्राप्तानां प्रभुकर्तव्यकरणस्यैव स्वधर्मत्वात् । अन्यथा तदकरणेन स्वाभाविकधर्मैश्च चित्तमितस्ततो भ्रमद्भगवन्माहात्म्यग्रहणाक्षमं सद्भगवल्लोकदिदृक्षामपि न जनयेदिति तद्दर्शनमपि न स्यात्। समर्पणे कृतेपि प्रभुश्चेन्न मनुते, तदा न तत् सम्पद्यत इत्यात्मीयत्वेनाङ्गीकारे सत्येव तत्सम्पत्तिः । इह तु तदर्थं स्वगृहप्रकटनेनात्मत्वमेव भगवानेतेषु मनुत इति ज्ञायते । तेन अस्य आत्मसमर्पणरूपत्वम् । इदं तु साधनरूपम् । अतः साधनप्रकरणे निरूपितम् । फलरूपं तु फलप्रकरणे निरूपयिष्यते । साधनरूपनवविधभक्त्यनन्तरं हि फलरूपाणि तानि नवापि भवन्ति । अतः साधनप्रकरणान्ते निरूपितम् । पुण्यमतीवेत्यत्र, पूर्वमवोचामेति । 'या वै लसच्छ्रीतुलसी' ति श्लोक इत्यर्थः । तन्माधवो वेणुमित्यत्र, लक्ष्म्या सह क्रीडां कर्तुमिति । व्रजसीमन्तीन्य एवात्र लक्ष्मीपदेनोच्यन्ते । एकवचनं तु दिवा कथञ्चित्तथैव सम्भवतीत्याशयेनोक्तम् । अत्रैव शब्दब्रह्म च संवादार्थमिति । अत्र हि स्वच्छन्दविहारार्थं वनप्रवेश उच्यते । स चामर्यादारूप इति मर्यादानिरूपकशब्दब्रह्मणा विसंवादादप्रामाण्यं स्यात्तन्निरासाय तल्लीलास्वरूपनिरूपकं शब्दब्रह्म प्रकटयति । एवं सति यत्र प्रवर्तकशब्दस्यैव मोक्षादिविस्मारकत्वम्, तत्र तद्विषयस्य कीदृशत्वं वाच्यमिति कैमुतिकन्यायप्रदर्शनार्थं वेणुपदव्युत्पत्तिकथनम् । वेदे चातथात्वं स्फुटम् । इदं च स्वतःपुरुषार्थरूपम् । फलाविसंवादि च । तेन प्रमाणोत्तमत्वं सूचितम् । तथा चायं मार्गः पुष्टिरूप इति मर्यादामार्गीयप्रमाणाविषयत्वं

युक्तमिति भावः । कुसुमाकरं वनमित्यत्र, रजसैव विहार इति । रसोद्दीपिका सामग्री रजःशब्देनोच्यते । यथा रसशास्त्रसिद्धा लौकिकी रीतिः, तथात्रापीति ज्ञापनाय । अत्रैव सत्त्वप्रधानैवेति । 'सत्त्वात्संजायते ज्ञान' मिति वाक्याद्रसस्वरूपज्ञानपूर्विकैव लीलेत्यर्थः । स्पृशच्छिखान्वीक्ष्येत्यत्र, तान् उद्धृतान् दृष्ट्वेति । निरुद्धान् दृष्ट्वेत्यर्थः ।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

॥ तत्रादौ द्वादशाध्यायप्रकाशः ॥

लोकप्रसिद्धया प्राप्तं प्रक्षिप्ताध्यायत्रयं सङ्क्षेपतो व्याख्यायाथैकादशा**ध्यायान्त**प्रमाणप्रकरणानन्तरं **प्रमेयप्रकरणं** व्याचिख्यासवः पूर्वोक्तैतत्प्रकरणयोः सङ्गतिं **निरूपयितुं** द्वयोरर्थमाहु**र्यशोदे**त्यादि, **एवं** बाल्यभावेन **यशोदानन्दयो**र्निरोधः पूर्वप्रकरणे सुष्ठु मुख्यत्वेन **निरूपितः**, **अत्रा**स्मिन् प्रकरणे **सस्त्रीकाणां गोपालानां निरूप्यते**, तथा च प्रतिबन्धकीभूतबाल्यभावकृतनिरोधजिज्ञासानिवृत्तावश्यवक्तव्यत्वादवसर**सङ्गत्यास्मिन् प्रकरणे** पौगण्डभावकृत**निरोधो निरूप्यत** इत्यर्थः, ननु पूर्वप्रकरण एव सस्त्रीकाणां गोपालानां निरोधस्य श्रीयशोदानन्दनिरोधेन सहोक्तत्वात् किं पुनरत्र तन्निरूपणेनेत्याकाङ्क्षायां टिप्पण्यामाहु**रेतयो**रित्यादि, तथा च निरोध एषां मुख्यताज्ञापनमेव प्रयोजनमिति पूर्वोक्तनिरोधवैलक्षण्यार्थं **निरूप्यत** इत्यर्थः ॥ १ ॥ सुबोधिन्यां नन्वध्यायद्वयेनैव निरोधवैशिषिट्यसिद्धौ पुनः प्रकरण**द्वयं** व्यर्थं स्यादित्यत आहु**र्मध्यम** इत्यादि, तथाचोत्तमस्याग्रे साधनप्रकरणे निरूप्यत्वान्न वैयर्थ्यमित्यर्थः, ननु किमत्र मध्यमत्वमित्याकाङ्क्षायां टिप्पण्यामाहु**र्वयस्याना**मित्यादि, **सुबोधिन्यां** ननु भवत्वेवं तथापि धेनुकादिबोधोक्तेरत्र किं प्रयोजनमत आहुः **पञ्च**धेत्यादि, कथं पञ्चधेत्यत**ष्टिप्पण्यामाहु**र्**धेनुके**त्यादि, तथा च भगवदनुभावनिरूपणार्थं तन्निरूपणं **भक्तौ** माहात्म्यज्ञानस्य पूर्वाङ्गत्वेनावश्यकत्वादिति ॥ २ ॥ **सुबोधिन्यां** ननु दुष्टनिवारणस्य पूर्वं कृतत्वादत्रापि तेनैवैतदुपकार**सिद्धेः** पुनः प्रकटीकरणेपि कस्यचिदेकस्य दुष्टस्य निवारणेपि तत्सिद्धेः पञ्चानां निवारणस्य किं प्रयोजनमत आहु**राध्यात्मिकी**मित्यादि, **तथा कृतिरिति** पञ्चनिग्रहकृतिः, अत्र किञ्चिद् विशेषं **टिप्पण्यामाहुः साधारणाना**मित्यादि, शिष्टाध्यायद्वयप्रयोजनमाहु**र्वयस्याना**मित्यादि ॥ ३ ॥ **सुबोधिन्यामेवं**विभागस्य प्रयोजनमाहुः **स्नेहे**त्यादि, तदवतार्य तदर्थं **टिप्पण्यामाहु**स्**तत्रे**त्यादि, सुबोधिन्यां मध्यमत्वं निगमयितुमाहुः **स्नेहान्त** इत्यादि, **स्नेह** एवा**न्तः** फलं यत्र तादृशत्वादयं निरोधो **मध्यम** इत्यर्थः, एवं प्रकरणार्थ उक्तः, एतस्य च **प्रमेयप्रकरणत्वं निबन्ध** एवमुक्त "मतः प्रमेयसम्पत्त्या कृष्णासक्तिर्हि वर्ण्यते" **इति**, **अर्थस्तु** पूर्वप्रकरणोक्तलीलाभि'र्मनः कृष्णासक्तमभू'**दतो** हेतोः **प्रमेयस्य** भगवतो या **सम्पत्ति**र्हार्दी प्राप्तिस्तया कृत्वा **हि** यतो हेतोः **कृष्णासक्तिर्वर्ण्यते**तः प्रमेयप्रकरणमिति, तेन **प्रमेय**बलादत्र निरोध इति सिध्यति ॥ ३½ ॥ "निरोध"श्च प्रपञ्चविस्मृतिपूर्विकासक्तिरतः पूर्वाङ्गस्य पूर्वं वक्तव्यत्वादध्यायार्थमाहुः **प्रथमं द्वादशेध्याय** इति **सार्धद्वयेन**, तत् कथमित्याकाङ्क्ष्य **तदर्थं टिप्पण्यामाहुरत्राय**मित्यादि, **तादृग्रूप**मिति देहादिसर्वविस्मृतिनिरूपणरूपमित्यर्थः, **धेनुके**त्यादिवधस्य विस्मृतिरूपत्वे प्रतियोगिनः स्मृतिरूपता सिध्यति सैव चात्र देहाध्यास इति **धेनुकातिरिक्तो** यो **देहाध्यासस्तदभाव इत्यपि** सिध्यतीत्यर्थः, तत्र हेतुमाहु**रध्यासे**त्यादि आनन्तर्यमात्रेण स्मृत्यसम्भवमात्रेण **च** न देहाध्यासरूपत्वमस्योच्यते किन्तु प्रकारान्तरेणापि मूलतो निश्चीयत इत्याशयेनाहुः **किञ्चे**त्यादि तथेत्यन्तं, तथा **च** कार्यादपि **तस्य** देहाध्यासत्वनिश्चय इत्यर्थः, **अत एवेति भजनप्रतिबन्धक**ताज्ञापनस्यावश्यकत्वादेव उक्तमिति "रामकेशवयोः सखे"त्यनेनोक्तं, **तथा च** तन्निवृत्तेः **प्रेम्णा** विज्ञापनादपि तस्य तथात्वमित्यर्थः, एवं प्रतिबन्धकत्वं निर्णीय देहाध्यासत्वपरिचायकं भजनप्रतिबन्धतावच्छेदकं रूपं धेनुके विवृण्वन्त्**यथे**त्यादि, तथा च **तद्वनगमना**भावानुकूलं **यदावश्यकं दैहिकं कर्म** तत्प्रवृत्तिनिमित्तत्वं **चातिवीर्यत्वकृतनराहार**त्वाभ्यां भीतिजनकत्वेन धेनुके निश्चीयत इति **स देहाध्यासरूपः** परिच्चेय इत्यर्थः, एवं देहाध्यासकार्यजनकत्वेनास्य देहाध्यासत्व निश्चित्य देहाध्यासनाशकनाश्यत्वेनापि देहाध्यासत्वमस्याहु**र्यथे**त्यादि, **तन्निवृत्तिरिति** धेनुका**निवृत्तिः**, **अन्यथा सा न स्यादेवे**ति देहाध्यासरूपत्वाभावे निवृत्तिर्न **स्यादेव**, तथा **च** यथात्मविषयकनिरुपध्यनुरागद्वारा **तत्त्वज्ञान**नाश्यत्वं देहाध्यासस्य तथा भगवद्विषयकानुरागद्वारोक्तरसानुभवनाश्यत्वमस्येत्यतोप्ययं **देहाध्यास**रूप इतिभावः, भगवतो रसरूपत्वमात्मत्वं **चाविवादमतो न कोपि** शङ्कालेश इति दिक्, **अत एवे**त्यादि देहाध्यास**निवृत्ते**रेव देहसम्बन्धिषु स्वीयत्वबुद्धे**र्निवृत्तत्वादत्युच्चाधिकारवद्भिर्यत् फलं प्राप्य**ते सेवकत्वरूपं तत् प्राप्नवन्त इत्यर्थः, पुरःस्फूर्तिकं तु तालफलरूपं गतसाध्वसरूपं वा बोध्यं, एतेन **प्रथम**मितिकारिकोत्तरार्धं पूर्वार्धे हेतुत्वेनान्वेतीति बोधितम् ॥ ४ ॥ निवृत्ते देहाध्यास इन्द्रियाध्यासनिवृत्तितः पूर्वमेव विषयाणां बन्धकत्वं निवर्तत इत्यतापि तस्य देहाध्यासत्वं निश्चाय्यत इति **सुबो**धिन्याशयोग्रिम**का**रिकातो ज्ञायते, तथा चायं कारिकार्थ**स्तद्वधो** धेनुक**वधो ज्ञानपूर्वो** धेनुकस्वरूपलीलास्थानस्वरूप**ज्ञानपर्वः फलावधि** यथा स्यात् तथा **निरूप्यत** इति ज्ञेयः, **कालीय इन्द्रियाण्या**हुरित्यादेरर्थं विवृण्वन्ती**त्याहु**रित्यादि, **तादृशस्यैवेत्या**ध्यात्मिक**स्यैव**, **तन्निवृत्तिरिति** लिङ्गशरीरनिवृत्तिः ॥ ६ ॥

ततश्चेत्यत्र **ज्ञाने** निरूपणीये **देशशु**द्ध्यादिनिरूपणस्य किं प्रयोजनमित्याकाङ्क्षायामाहु**र्वन एवे**त्यादि, "वनं तु सात्त्विको वास" इतिवाक्येन **वनस्य** तथात्वात् 'सत्त्वात् सञ्जायते ज्ञान'मितिवाक्याज् ज्ञानस्य तथात्वेन तथेत्यर्थः, अत्र हि कौमारत्यागानन्तरं **पौगण्डाश्रय उच्यते तत्र कौमारे को दोषः** कश्च तस्य **भाव** इत्याकाङ्क्षायां **दोषाभाव** इत्यादेरर्थं टिप्पण्यामाहुः **पुरुषे ही**त्यादि, **स चोक्तलीलयैवोक्त** इति **दोषाभावः** प्रमाणप्रकरण**ोक्तलीलायैवोक्तः**, **कथमुक्त** इत्याकाङ्क्षायां

तद् व्युत्पादयन्ति **तथा हीत्यादि**, तत्र पूर्वं जीवतां निराकुर्वन्ति न हीत्यादि **सम्भवती**त्यन्तं, अन्तःकरणवत्तां निराकुर्वन्ति **न** वेत्यारभ्य **द्रष्टव्य** इत्यन्तं, प्राणवतां निराकुर्वन्ति न वेत्यारभ्य **प्रवेशोपी**त्यन्तं, इन्द्रियवत्तां शुद्धतां च निराकुर्वन्ति **स्वमुखे**त्यारभ्य **सन्धातव्य** इत्यन्तं सिद्धमाहुरेवं **सती**त्यादि, एवं दोषाभावं साधयित्वा **पञ्चात्मकः काल** इत्यादेस्तात्पर्यमाहुस्**तेने**त्यादि, **ता** इति देवताः, अयमर्थः, यदि हि कालपरिच्छेद्यत्वं स्यात् तदा दोषवत्त्वं सम्भाव्येतापि तत् तु नास्ति देशपरिच्छेदस्येव कालपरिच्छेदस्यापि लीलार्थमिच्छयैव प्रकटनादतो न कोपि शङ्कालेश इति दिक्, सुबोधिन्यां **गोरक्षा धर्म** इत्यादि, तदर्थं टिप्पण्यामाहुर्ननु **गोरक्षा हीत्यादि**, **अन्यथे**त्यादि, स्वाभाविकधर्माभावे, **अयमेवाचार्याशय** इति ज्ञापयितुमाहुरत **एवे**त्यादि, सुबोधिन्या**मन्यथा सत्ये**त्यादिफक्किकां विवृण्वन्त्य**न्यथे**त्यादि, **अन्यथे**ति भगवता तैस्तदकारणे, **न तत् सम्पद्यत** इति नोपपद्येरन्नित्यस्यायमर्थः, **स्वगृहप्रकटनेने**ति वैकुण्ठ**प्रकटनेन**, **अस्यात्मसमर्पणरूपत्व**मिति वैकुण्ठप्रकटन**स्यात्मसमर्पणरूपत्वं**, अत्र मूले **गाश्चारयन्ता**वित्यनेन गोचारणमात्रमुक्तं **पाद्मो**त्तरखण्डे तु तत्र दिनादिविशेष उच्यते 'कार्त्तिकामलपक्षे तौ रामकृष्णौ बुधाष्टमीदिने गोपालतामाप्तौ कृष्णौ षट्सप्तहायना'विति ॥ १ ॥ **तन्माधव** इत्यत्र **लक्ष्म्या सहे**त्यादेरर्थं **शब्दब्रह्मे**त्यादेरर्थं च टिप्पण्यामाहु**र्व्रजे**त्याद्य**त्र** हीत्यादि च, **स** इति स्वच्छन्दविहारः, **अप्रामाण्य**मिति प्रमाणागोचरत्वं, **तद्विषयस्ये**ति प्रवर्तना**विषयस्य** भक्तागमनादेरित्यर्थः, **अतथात्व**मिति वेणुतुल्यत्वाभावः, तदेव विशदयन्तीदमित्यादिना, **फलाविसंवादि** चेति, भगवत्स्वरूपात्मक**फलाविसंवादि** चेत्यर्थः, सुबोधिन्यां **विषयिणो मुक्ताश्चे**तिपरोक्षवादो लौकिकभावयुक्ताः सर्वात्मभावयुक्ताश्चेत्यर्थः, **आध्यात्मिका** इत्यादि तत्तद्गता धर्मा इत्यर्थः, **रजसैव विहार** इत्यादेरर्थमाहुष्टिप्पण्यां **रसे**त्यादि, अत्रैवं बोध्यं, सर्वस्य मूलं सच्चिदानन्दो भगवान् गुणाश्च सत्त्वादयो भगवत एवोत्पन्ना इति द्वितीयस्कन्धसुबोधिन्यां स्थितं रजसश्च "काम ईहा" इत्येकादश वृत्तय उक्तास्तज्जनकत्वं यथा लौकिकस्य रजसस्तथा भगवद्धर्मरूपस्याप्यतो लोकसदृशी रससामग्र्यलौकिकी वाच्या, किञ्च यद् यज्जनकं तत् तदात्मकमितिव्याप्तिः समन्वयसूत्रे दर्शितेतीह "रसो वै स" इतिश्रुत्युक्तभगवद्रसात्मिकैव सर्वापि सामग्री रजआदिशब्दैराचार्यैरुच्यते रसशास्त्ररीतिकलीलाबोधनायेति न कोपि शङ्कालेशः, **सत्त्वप्रधाने**त्यादेरर्थमाहुः **सत्त्वादि**त्यादि ॥ २॥ **तन्मञ्जिव**त्यत्रा**न्तरिक्षदैवत्या** इत्यादेरयमाशयः प्रतिभाति, "वायुर्वा अन्तरिक्षस्याध्यक्षोन्तरिक्षदैवत्याः खलु वै पशव" इतितैत्तिरीयब्राह्मणश्रुतेस्तादृशाः पशवो यदान्तरिक्षप्रधानेरण्ये प्रविष्टास्तत्र वायुरन्तरिक्षाध्यक्षत्वादुभयाधिपतिस्तदीयाश्चेत् तद्देशे यान्ति तदा तदधिष्ठातुरानुगुण्यमावश्यकं यदि सोन्यथा प्रेरयेद् देशं वा शोषयेत् तदा सा लीला तत्र न सङ्गच्छत इति तस्य निर्दोषत्वं गुणवत्त्वं च वाच्यमिति **तत्तत्सम्बन्धिनी**ति वृन्दावनसम्बन्धिनी तेन निर्दोषत्वबोधनाद् वायोरागन्तुको दोषः परिहृतो गुणास्तु स्पष्टाः, निर्दुष्टत्वगुणवत्त्वे सामान्यस्यापि वायोः सम्भवत इत्याधिदैविकत्वं बोधयितुं **महन्मन** इत्यादिविशेषणं व्याकुर्वन्ति **महता**मित्यादि, **महन्मन**सोपि सकाशात् **प्रकर्षेण ख्याति**र्यस्य तन् **महन्मनःप्रख्यं** तादृशं यत् **पयस्त**द्युक्तं यत् सरस्तदस्यास्तीत्येतत्सम्बन्ध्यस्तीति तादृशो यो वायुः, तथा च **महन्मनोदृष्टान्तेन** लयविक्षेपशून्यताशान्तीनां बोधनादा**धिदैविकत्वं** बोध्यमित्यर्थः, पुरःस्फूर्तिकं तात्पर्यमाहुर**नेने**त्यादि, अत्र यद्यपि वायोः सरःसम्बन्धिपयःकणयोगेन शैत्यमान्द्ये निरूपिते भवतस्तथापि तादृशपयोयुक्तसरस एतत्सम्बन्धित्वकथनेन शैत्यमान्द्ययोः कश्चिद् विशेषः सूच्यते स च लौकिकरीतिभिन्नत्वरूप इति तथा, तदेतत् स्फुटीकुर्वन्ति **सदे**त्यादि, **तेनापी**ति वायुना ॥३॥ **स तत्रे**त्यत्र **तूष्णीं** वेति **वा**शब्द एवकारार्थो वाक्यालङ्कारे, **नम्रा इत्याहे**ति वैकुण्ठस्था इव प्रकटसच्चिदानन्दा **इति** हेतोराहेत्यर्थः, नम्रत्वमेव स्फुटीकुर्वन्ति **तत्रे**त्यादि **सूचित** इत्यन्तं, तथा च वैकुण्ठस्थैर्यथा तुलसीतपो**बहुमानेन स्वस्मिन्** सच्चिदानन्दप्राकट्यं बोध्यते **तथैतैर्नम्र**तेत्यर्थः, तेभ्योप्येतेष्वाधिक्यं बोधयितुं **ता**नित्यादेरर्थं टिप्पण्यामाहु**र्निरुद्धान्** दृष्ट्वेत्यर्थ इति, तथा च तान् **दृष्ट्वा** भगवतो न हर्ष एतान् दृष्ट्वा तु हर्ष इति महदेवाधिक्यमित्यर्थः, ननु स्मयन्नित्यनेन मायामोहबोधनात् कथं हर्षोवगन्तव्य इत्याकाङ्क्षायां तस्यार्थमाहुः सुबोधिन्यां **स्मयन्निवे**त्यादि, तथा च मन्दहासस्यान्यार्थत्वाद्धर्षो निर्बाधः सुखेनावगन्तव्य इत्यर्थः, ननु भवतु भगवतो हर्षस्तथापि बलभद्रे तेषां स्वरूपबोधनस्य किं प्रयोजनमित्यत आहु**र्बलभद्रोपे**त्यादि, **अन्यथे**त्येवम्भङ्ग्या स्वस्वरूपबोधनाभावे, **नाविष्टा स्या**दिति बलभद्रे तिरोहितैव तिष्ठेन्न तु प्रकटा स्यात्, अत्रायं भावः, एते हि साक्षात्पुरुषोत्तमसेवका एवेति **तेषामन्यनमस्कारादिकमनुचितं** तथा चात्र साधारण्येन नमस्कारकृतावनन्यत्वभङ्गशङ्का स्यात् तन्निवृत्त्यर्थं बलभद्रे प्रविष्टं स्वस्वरूपं तदानीं बलभद्राय बोधनीयं येन तस्यापि स्वाभिमानः पृथक्तया निवर्तेतेत्येतत् प्रयोजनमित्यर्थः, अयं च सर्वोप्यर्थः स्वरूपबोधनान्यथानुपपत्त्या समर्थितो ज्ञेयः, **पुरुषोत्तम** इति, तथा च **महत** इदमेवकृत्यं **यत् स्वसेवार्थमागतमुत्कृष्टं करोति** यथैकादशस्कन्धे "निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शिनमनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभि"रिति तथा च न दोष इत्यर्थः ॥ ४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अथ तामसप्रकरणे प्रमेयप्रकरणम्

द्वादशेऽध्याये **यशोदानन्दयो**रिति प्रसङ्गात् सर्वेषामेव निरूपितस्तथाप्येतयोः सुष्ठु मुख्यतया निरूपित इत्यर्थः, **आध्यात्मिकी**मिति स्थूलदेहाद्यध्यासरूपाधिभौतिकी लिङ्गदेहाद्यध्यासरूपाध्यात्मिकी अलौकिकदेहाद्यध्यासरूपाधिदैविकी, इयं

भगवत्सेवोपयोगित्वान् न निवर्तनीयेति भावः, **उभयेषा**मिति निरोधार्थमिति शेषः, **देहाध्यासो** हीति धेनुकपदस्य देहाध्यासवाचकत्वं योगरूढ्योरभावेपि कल्पनया टिप्पण्यां व्याख्यातं, परोक्षवादस्थले कल्पना । अपि प्रवृत्तिनिमित्तत्वं "कल्पनोपदेशाच्चे"ति सूत्रे व्यवस्थापितं, धेनुकमारणं देहाध्यासनिवारणं चैकपदवाच्यत्वादैक्येनैव भगवता सम्पादितमिति भावः, **ज्ञानपूर्वं** इति अत्र ज्ञानपदेन तर्वादिस्वरूपज्ञानं दशरसानुभवश्चेति टिप्पण्यामुक्तं, यद्यपि बलभद्र प्रति बोधयति तथापि प्रसङ्गादन्येषामपि श्रवणमिति ज्ञेयं, ततश्चेदिति ल्यब्लोपे पञ्चमी, तं मरणं प्राप्य पुनर्जीविता इत्यर्थः । **ततश्च** इत्यस्याभासे **तत्रेति** ज्ञानपूर्वधेनुकवधे निरूपणीये, तस्य वनलीलात्वात् प्रथममिद त्रयमाहेत्यर्थः, च त्रयं ज्ञानं निरूपयन्नाह सत्त्वप्रधानैव लीलेतिवक्ष्यमाणत्वाद् रसस्वरूपज्ञानं निरूपयन्नित्यर्थः, तादृशलीलार्थं वनप्रवेशे हेतुमाहुर्वन एवेति, वनस्य तत्तद्रसस्वरूपज्ञापकस्तम्भादिसात्त्विकभावहेतुत्वात् तत्रैव तद्ज्ञानं भवतीत्यर्थः, मध्ये मार्गमेवं न भवतीति तद्व्यावर्तनायैवकारः, वनस्य तादृशत्वे हेतुमाहुः **तत्रोद्वेगो न भवतीति**, मध्येमार्गं वक्ष्यमाणसत्कृतिमात्रसम्भवेप्यन्यदर्शनसम्भावनयोद्वेगो भवतीति तेन न तावती लीला यया स्तम्भादिभावा भवन्ति, वने तादृशोद्वेगो न भवतीति वनस्यैव सात्त्विकत्वमित्यर्थः, इदमेव 'सत्त्वप्रधानैव लीले'त्यनेन वक्ष्यते, तथा च **विहर्तुकाम** इति पदस्य वनपदसमभिव्याहारात् सत्त्वप्रधानलीलाकाम इत्यर्थ इति भावः, **तत्रे**ति तादृशवने क्रीडायां तस्या मनोजन्यत्वान् मनो निरूपणीयमतोग्रिमश्लोकेन तदुक्तमित्यर्थः, ननु 'तन् निरीक्ष्य मनो दधे' इति कथनात् प्रवेशः प्राप्त एवेति भिन्नतयैकेन प्रवेशः कथमुक्त इत्यत आहुः प्रवेशश्चेति, पूर्वाध्यायेपि वनलीलोक्ता तथा'प्यविदूरे व्रजभुव' इति वाक्याद् ग्रामसम्बन्धिन्येव, अत्र ततो भिन्नप्रक्रमेण केवलवनलीलाबोधनार्थं प्रवेशश्च वक्तव्य इत्यर्थः, **मनो निरूपणीयमयं च वक्तव्य** इत्यन्वाचयः, दैत्येति दैत्यस्य मधोर्भूमौ मधुवने तत्तुल्या वृन्दाया वनमस्तीत्यर्थः, **दोषाभाव** इति पौगण्डलीलाभक्तेषु पुरुषार्थान् स्थापितवानिति वक्ष्यते **एवंवृन्दावने** इति चतुर्भिः, ते च चत्वार इति चतुर्वर्षात्मकत्वं तस्य, कौमारलीलाया भगवति दोषाभावनिरूपणेन भक्तेषु दोषाभावो निरूपितस्ते च पञ्चेति पञ्चवर्षात्मकत्वं तस्येत्यर्थः, **तदनन्तर**मिति भगवति दोषाभावेन भक्तेष्वपि दोषाभावसाधकलीलाकालानन्तरं पुरुषार्थसाधकलीलाकालमाश्रितावित्यर्थः, भगवति दोषाभावेन भक्तेष्वपि दोषाभावः सिद्ध इति टिप्पण्यां व्युत्पादितं "अन्यथा सख्यदानं न स्या"दित्यनेन, **ततश्चेति** चकारस्यार्थमाहुः **तारुण्यमिवेति**, **पशूना**मिति अस्मिन् पक्षे पालनं पालः पशूनां पाले पालने सम्मतौ योग्यावित्यर्थः, **स्वयमे**वेति पुण्यं साधितं तत्साधनं भवति इदं स्वयमेवेत्यतिशयः, स्वत इति पुण्यं फलदमिदं स्वयं फलरूपमिति चातिशयः ॥ १ ॥ **विशेषाकारेणेति** सामान्यतस्तु प्रथमश्लोकेप्युक्त एवेतिभावः, **तन्माधव** इत्यत्र **लक्ष्म्या सहे**ति **माधव**पदसमभिव्याहाराद् **विहर्तुकाम** इत्यस्य **लक्ष्म्या सह विहर्तुकाम** इत्यर्थोऽग्रिमश्लोके 'रन्तु'मित्यस्य "सर्वाभिरेव देवताभिः सह रन्तु"मित्यर्थ इति विशेष इति भावः, **संवादार्थ**मिति वेणुनादस्य लीलास्वरूपनिरूपकत्वं वेणुपदव्युत्पत्त्या निरूपितं टिप्पण्युक्तकैमुत्येन लीलायास्तदुभयविस्मारकत्वबोधनेन सर्वोत्तमत्वबोधनाय वेणुवादनमित्यर्थः, **स्वरूपानन्देति** मोक्षानन्दस्वर्गाद्यानन्दावित्यर्थः, वेणोस्तादृशत्वं साधयन्ति **तद्वादने** इति, यत इति शेषः, यतो वेणुवादने सति **विषयिणो** भोगपरा **मुक्ता** निवृत्तिमार्गीयाः शक्रशर्वपुरोगाः **समायान्ति**, तद् विहायैतद्विचारपरा एव भवन्तीत्यर्थः, प्रयोजनान्तरमाहुः **आध्यात्मिका** इति, आत्मानं जीवमधिकृत्य वर्तन्ते ते **आध्यात्मिकाः**, देवं भगवन्तमधिकृत्य वर्तन्ते ते **आधिदैविकाः**, उभयानुगुणकर्तारोपि स्वामिनीः समानीय भगवन्तं प्रतीक्षन्ते नादश्रवणे भगवानागत इति ज्ञानादुद्बुद्धा भवन्ति, तत आधिदैविका **आगत्य स्वामिन्यागमनं भगवते सूचयन्ति** इति तैर्वृतो भवतीत्यर्थः, सौन्दर्यं वेशः अमर्यादलीला इत्यादिरूपं यशस्तैर्निरन्तरं **गीयते**, **सामर्थ्यार्थ**मिति प्रतिबन्धकागमनाभावार्थमित्यर्थः, **बलात्मे**ति बलं प्रतिबन्धकनिरसनसामर्थ्यमात्मनि यस्येत्यर्थः, **क्रियाया**मिति गोचारणलीलायामित्यर्थः, **क्रियाशक्त्येति** वनप्रवेशनेनेत्यर्थः, **शुद्धा**निति यथा वत्सासुरमारणेन वत्सानां कण्टकशर्कराक्षेत्रप्रवेशहेतुभूतं भावं निवर्तितवानित्युक्तं, तथा वनप्रवेशनेन गवां तं भावं निवर्तितवान्, तथा च शुद्धांस्तादृशभावरहितानित्यर्थः, वृन्दावनस्य निर्दुष्टतृणादिमत्त्वमनुपदमेव वक्ष्यतेतस्तत्सम्बन्धाद् गवामपि निर्दुष्टत्वं भविष्यतीति भावेन **पशव्यपद**मुक्तमित्याहुः **स्थानमपी**ति, **विहारे हीति क्रिया** अन्तरङ्गलीला पूर्णा स्तम्भादिभावावधिका **विहारे हि** सति भवतीत्यर्थो ज्ञेयः, **रजोविकासाना**मिति रजोरूप उद्दीपको विकासो येषामित्यर्थः, **सत्त्वप्रधानैवे**ति स्तम्भादिपर्यन्ता रसस्वरूपज्ञानहेतुत्वात् सात्त्विकी लीला, उद्बोधकोद्बुद्धरसस्य सत्कृतिरूपा लीला रसे लोभजननाद् राजसी, अमर्यादलीला प्रमादमोहनीवी प्रतीतिप्रकारकाज्ञानसम्पादकत्वात् तामसी, इयं त्वधुना वने गृह इव निर्भयतया स्थित्यभावान् न सम्भवतीति एवकारेण व्यावर्त्यते, रजोलीलेति रसोद्दीपकसामग्रीविशिष्टा लीलेत्यर्थः ॥ २ ॥ **तदि**त्यस्याभासे **पश्चादिति** तदागमनसूचनानन्तरमित्यर्थः, **सर्वाभिरेवेति** पूर्वं त्वेकत्रैव सङ्केतस्य कृतत्वात् तत्रैव रिरंसासीत् तदुक्तं लक्ष्म्येत्येकवचनेन सर्वागमनज्ञानानन्तरं तु सर्वत्रैव रिरंसा जातेत्यर्थः, **देवताभिः** क्रीडायोग्याभिः, **अलौकिकीभिः** लोकावेद्यतया स्थिताभिरित्यर्थः, व्याख्याने, **तत्र भूदोष** इति नीरसत्वमित्यर्थः, तथा सति तृणपुष्पफलाभावादेते त्रयो न तिष्ठेयुरित्यर्थः, तृणादीनामपि निर्दुष्टत्वात् तदात्मकवनस्य लीलोपयोगित्वमाहुः **तृणे**ति, तत्सम्बन्धिनां **वक्ष्यमाणस्वरूपमञ्जुघोषत्वेन** तृणपुष्पफलानामप्यास्तरणकुसुमग्रथनफलभोगादिरूपलीलोपयोगित्वमेव, इदमेव निर्दुष्टत्वं, भगवतस्तत्तदाकाङ्क्षायामकालेप्याविर्भावात्, तदाकाङ्क्षाभावे कालेप्यनाविर्भावात्, **प्रियस्थितिज्ञापकत्वमिति** तेषा निर्जन एव देशे **यथेच्छं क्रीडया घोषसम्भवेन तत्रैव** ता **इति ज्ञ न नकत्वमित्यर्थः**,

गुणपूर्णतापीति निर्दुष्टगुणवद्वातसेवितत्वमित्यर्थः, **अन्तरिक्षदैवत्या** इति वायवस्थेत्याह "वायुर्वा अन्तरिक्षस्याध्यक्षः अन्तरिक्षदेवताः खलु वै पशवः वायव एवैनान् परिददाती"ति श्रुतेः, तथा च गावोन्तरिक्षदेवत्या अन्तरिक्षं च वायुदेवत्यमतो वायुर्गवाधिपतिरित्यर्थः, रुद्रदेवत्यपक्षेऽपि त्रिदेवतापक्षे रुद्रस्यापि वायुभेदत्वाद् गवाधिपतित्वं वायोः, **तदैव लीले**ति वायोर्दोषराहित्ये गवाधिपतित्वादरण्यस्थान्तरङ्गनिकुञ्जाधिपतित्वाच् चान्तरङ्गनिकुञ्जेषु ता न **गमये**दिति भावः, **आगन्तुके**ति औष्ण्यचण्डतानिकृष्टगन्धश्च वक्ष्यमाणगुणैरेव परिहृतो भवतीति भावः, **जलं पुष्पाणि च** विशेषणान्युक्तानीति शेषः, तेनैते **गुणाः** उक्ता इति शेषः, अत्र **लयविक्षेपे**ति **लयः** शोष **विक्षेपः** प्रवाहः तडागे नद्यां च तत्सम्भवात् **सरः**पदमित्यर्थः, **सदादी**ति पयसि महन्मनःप्रख्यत्वकथनेन पयस्वति सरसि महत्प्रख्यत्वमुक्तं जातमिति भावः, **पयसो मनस्त्वं** तत्सम्बन्धेन सरसो महत्त्वं च सादृश्येन कल्पनया, यथा ज्योतिषोलादोग्धृत्वादिसादृश्येनाजात्वं "ज्योतिरुपक्रमा"दितिसूत्रे व्युत्पादितं तथात्रापि ज्ञेयं, भागवतेपि वेदफलरूपत्वात् तथा व्याख्यानं कर्तव्यमिति भावः, **पुष्पविशेषा वे**ति कुशेशयानां रात्रिविकासित्वादिदमुक्तं, **गन्धोस्यास्ती**ति अस्तिविवक्षायां मत्वर्थीय इन्, **तेनापी**ति आभासे **मनो दधे** इत्यत्र धातोर्धारणार्थमादाय वाक्यार्थ उपक्रान्तः, अत्र पोषणार्थमादाय **प्रवृत्त** इत्यनेनोपसंहृतः, आगमनज्ञानानन्तरं मनः कृतवान्, तादृशवायुसेवितवनदर्शने तूद्बुद्धभावः सन् **प्रवृत्त** एवेत्यर्थः, तथा च धात्वर्थतावच्छेदकावच्छिन्नो वाक्यार्थ इत्युपक्रमोपसंहाराविरोध इत्याकलनीयम्, तथा च **प्रवृत्त** इत्यस्य मनः पोषितवानित्यर्थः, दर्शनेन प्रवृत्तौ मनःपोषस्यावान्तरव्यापारत्वेपि फलरूपप्रवृत्तिनान्तरीयत्वात् प्रवृत्तित्वेनोक्तः, व्यापारान्तरमाहुः **भृङ्गादि**ष्विति, साम्यज्ञानं चावान्तरव्यापार इत्यर्थः ॥ ३ ॥ 'रन्तुं मनो दध' इत्यनन्तरमेवं'वृन्दावने' इत्येव वक्तुमुचितं तथापि मध्ये श्लोकपञ्चकमुपोद्घातार्थमित्याहुः **कदाचि**दित्यारभ्य **बोधयती**त्यन्तेन, **प्राकृते**ति प्राकृतैः पदार्थैः रतिमित्यर्थः प्राकृतसामग्र्या रतिं करोतीतिशङ्कायां लीलासामग्री भावनीया न भवेदिति विवरिष्यते, **स्वरूप**मिति दोषाभावो गुणाश्चेत्यर्थो विवरिष्यते, **भूमेश्चे**ति चकारेण तच्छ्लोकोक्तास्तृणवीरुधादयो ज्ञेयाः, भूमिवृक्षयोर्वनस्वरूपत्वमाहुः **वनं ही**ति, **तत्स्था** इति अलयो मृगपक्षिणश्चेत्यर्थः, **स्वरूपतोपी**ति 'यदि दुष्टं भवे'दिति पूर्वेणान्वयः, अलीनां मृगपक्षिणां च दोषस्तत्स्थदोषः भूमेर्वृक्षाणां च दोषः स्वरूपदोषः, एवं चतुर्विधदोषे भावनया त्याज्यं स्यादियमविशेषात् सर्वैव च लीलासामग्री भगवद्भावनायां भावनीया न भवेत्, तथा सति मुक्तिरेव सिध्येन् न तु निरोध इत्यवतारप्रयोजनं विरुध्येतेत्येतन्न्यायेन सर्वस्या अपि निर्दोषत्वेनाप्राकृतत्वं निर्धारितं भविष्यतीतिभावेन भगवता रमणारम्भे **दोषाभावो** वक्तव्य इत्यर्थः, तर्हि गोपैरन्योन्यं वक्तव्यं किं भगवद्बलभद्रसंवादेनेत्याशङ्क्याहुस्तानिति, **बलभद्र एव च** बुध्यत इत्यन्वयः, **अत** इति यतस्तयोरेव बोध इत्यर्थः, **प्रत्यक्षत** इति प्रतिबन्धकागमनार्थं बलभद्रं ज्ञापयित्वैव लीलाकरणात् तन्मानसप्रत्यक्षविषयत्वेन लीलां कर्तुं बलभद्रबोधनमित्यर्थः; **स तत्रे**त्यस्याभासमाहुः **यदि वनस्था** इति, इत्याहेति **इति** 'स तत्र तत्रे'ति श्लोकेन **आहे**त्यन्वयः, **उपलक्षिता**निति लक्ष दर्शनाङ्कनयोः तादृशश्रियाङ्कितान् तत्सहितानित्यर्थः, तथा च सहार्थे तृतीयेतिबोध्यं, बलभद्रे सिद्धं बोधनप्रयोजनमाहुः **आवेशितत्वेने**ति, चतुर्व्यूहविशिष्टभगवदावेशवत्त्वेन हेतुनेत्यर्थः, तादृशावेशसिद्ध्यर्थं बोधनमित्यर्थः, **अन्यथे**ति एवम्बोधनाभावे सदोषत्वेन प्राकृतत्वं मत्वा तच्चिन्तनं न कुर्यात् तदा तदावेशो न भवेदित्यर्थः, **बलभद्रपरत्वेन** निरूपणे हेतुरधुनैवावेशस्य शैघ्र्यमित्यग्रे वदिष्यन्त्या "वेशिना सर्वभावेने"त्यादिना, अतस्तत्पराणीमानि वाक्यानि न त्वावेशाधिकरणशेषपराणीत्यर्थः । तथापि तदपेक्षया अवतारस्य मुख्यत्वात् तत्परत्वेनैव कथनमुचितमित्याहुः नन्विति ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

द्वादशाध्यायविवृतौ **पञ्चधैवानुभावोत्रे**ति अविद्यायाः पञ्च पर्वाणि देहेन्द्रियप्राणान्तःकरणाध्यासाः स्वरूपविस्मृतिरूपश्चेति तन्निवारको भगवदनुभावोत्र निरूपित इत्यर्थः, **दुष्टनिग्रहरूपवा**निति देहाद्यध्यासः स्वरूपविस्मृतिसंज्ञकश्चेति पञ्च पर्वाणि यानि निरूपितानि तान्यत्र धेनुकादयो दैत्या मूर्तिमन्तः "लोभक्रोधादयो दैत्या" इति कृष्णोपनिषद्भ्यः, **तन्निग्रहरूपवान्** भगवदनुभाव इत्यर्थः, **आध्यात्मिकीमविद्यां** वा इति एतानि पञ्च पर्वाणि निवर्तितानीत्यनेनाध्यात्मिकी अविद्यैव निवर्तिता, भौतिकी तु पूतना पूर्वं नाशिता, आधिदैविकी तु लीलोपयोगिदेहाद्यध्यासरूपा तादृग्लीलापयोगिस्वरूपाज्ञानरूपा चेति सा न निवर्तनीयेतिभावः, **ततः सर्वविनाशः स्या**दिति विषरूपविषयसम्बन्धात् सर्वपारमार्थिकहानिः स्यादित्यर्थः ॥ ० ॥ **ततश्च पौगण्डवय** इत्यस्याभासे **भगवतो मध्यमलीलाया**मिति प्रेमासक्तिव्यसनानि क्रमेण प्रमाणप्रमेयसाधनप्रकरणैर्व्रजजनानां सिध्यन्तीति निबन्धे उक्तं, अतः प्रमेयप्रकरणे अस्मिन् आसक्तिसाधकलीला **मध्यमली**लेत्यर्थः, **पशुपालने वे**ति अस्मिन् पक्षे पालनं पालः पशूनां पालः पशुपालः तत्र सम्मतौ योग्यावित्यर्थः **समं वे**ति अस्मिन् पक्षे **समं** तुल्यमित्यर्थः ॥१॥ **तन्मञ्जुघोषाली**त्यस्याभासे **तत्र स्थिताभि**रिति वृन्दावनगोवर्धननिकटवर्तिग्रामस्थिताभिरित्यर्थः, **देवताभि**रिति व्रजवरनितम्बिनीभिरित्यर्थः, परोक्षवादेन "देवता"पदवाच्यत्वात् तासां, **अन्तरिक्षदैवत्याः पशव** इति 'वायुर्वा अन्तरिक्षस्याध्यक्षः, अन्तरिक्षदैवत्याः खलु पशवो वायव एवैतान् परिदधाती'तिश्रुतेर्वायुरन्तरिक्षस्याध्यक्षः, अन्तरिक्षं पशुदैवतमतो वायोरुभयाधिपतित्वं, **भृङ्गादि**ष्विति अलिभृङ्गद्विजादिष्वत्यर्थः, **त्रयो गुणा** इति **मञ्जु**पदवाच्यास्त्रयो गुणास्तत्र निर्दुष्टत्वमेको गुणः भगवत्स्वरूपनादानुभवानन्दजत्वलक्षणो द्वितीयः स्वस्थितिदेशे भगवत्स्थितिज्ञापकत्वरूपस्तृतीयः ॥ ३ ॥ **भगवानेव जानाति बध्यते च बलभद्र एवेति** "स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे"तिवाक्याद् भगव-

त्स्वरूपं **भगवानेव जानाति** वृन्दावनं च साक्षात्पुरुषोत्तमात्मकमेवेति, तत्रस्थतरुलतालिमृगपक्षिपश्वादिरूपं भगवदितरो न जानात्यतः प्रभुरेव निरूपयति, बलभद्रस्य वेदात्मकत्वात् स एव बुध्यते, **अनेन वृन्दावनस्वरूपं वेदेनापि स्वतो न** बुध्यते **भगवदुपदेशेन ज्ञायते इति** सूचितमिति यत्र सर्वज्ञस्य वेदस्यापीयं व्यवस्था तत्रान्यस्य कथं बोध इति कैमुत्यं दर्शितं, **स्मयन्निवाहाग्रजमादिपुरुष** इत्यस्य विवृतौ अग्रे **स एवाविर्भूत** इति यद्यप्यावेशावतारयोर्मध्येवतारस्य मुख्यत्वात् तत्परत्वं वृक्षादीनां वक्तव्य न तु बलदेवपरत्वं तथापि ज्येष्ठभ्रातुरभ्यर्हितत्वस्य वेदे निरूपितत्वाद् धर्ममार्गसरणिमादाय ज्येष्ठभ्रातुरुत्कर्षकथनार्थं तत्परत्वं वृक्षादीनां वर्णितमित्याहुः **अग्रे स एवाविर्भूत** इति **तर्हि बोधन**मिति ज्येष्ठभ्रात्रे उपदेशस्यानुचितत्वादाशङ्का, समाधानं तु "आदिपुरुष" इत्यनेन पुरुषोत्तमत्वमादाय पुरुषोत्तमस्य सर्वगुरुत्वात् ॥ ४ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

द्वादशेध्याये **यशोदेति** का० १२५ ३/४ । प्रसङ्गात् सर्वेषामेव निरोधः पूर्वप्रकरणे निरूपितः, तथाप्येतयोः सुष्ठु मुख्यतया निरूपित इत्यर्थः, अत्रास्मिन् प्रकरणे सस्त्रीकाणां गोपालानां निरोधो मुख्यतयोच्यत इत्यर्थः, नन्वत्र प्रमेयप्रकरण एव मुख्यनिरोधसिद्धावग्रिमप्रकरणवैयर्थ्यमित्याशङ्क्याहु**र्मध्यम** इति का० १२६ ३/४ । यद्यपि वयस्यानां स्वामिनीनां च पूर्वप्रकरणोक्तनिरोधापेक्षयास्मिन् प्रकरण अधिको निरोध उच्यते तथापि वक्ष्यमाणनिरोधमपेक्ष्य एतत्प्रकरणोक्तो निरोधो गोपालानां स्वामिनीनां च द्वयोरपि मध्यम एवेत्यर्थः, पञ्चधेति का० १२६ ३/४ । धेनुककालियप्रथमदावाग्निप्रलम्बद्वितीयदावाग्निनिग्रहात्मकः पञ्चधा **भगवदनुभावोत्र** प्रकरणे निरूप्यत इत्यर्थः, एते पञ्च देहेन्द्रियप्राणान्तःकरणाध्यासस्वरूपविस्मृतिरूपाः पञ्चभिरध्यायैर्निरूप्यन्ते, तत्र प्रथमो दावाग्निः प्राणाध्यासरूपः, प्रलम्बः अन्तःकरणाध्यासः, द्वितीयदावाग्निः स्वरूपविस्मरणात्मक इति तत्र तत्र स्फुटं, **आध्यात्मिको**मित्यादि का० १२७ ३/४ । लिङ्गशरीराद्यध्यासरूपामविद्यां दूरीकर्तुमविद्यापर्वरूपधेनुकादिवधकरणं, आधिभौतिक्यविद्या पूतनारूपा पूर्वं नाशिता, आधिदैविकी तु लीलासाधकत्वान् न निवर्तनीयेति भावः, तदर्थं धेनुकादिवधार्थं **क्रमतः** पञ्चाध्यायाः, **उभयेषां** वयस्यानां स्वामिनीनां च निरोधार्थं क्रमेण सप्तदशाष्टादशात्मकमध्यायद्वयमित्यर्थः, उभयेषां निरोधस्य पृथङ्निरूपणे निमित्तमाहुः **स्नेहाधिक्ये**ति का० १२८ ३/४ । साधारणापेक्षया अधिकस्नेहज्ञापनार्थं पृथङ्निरूपणमित्यर्थः, एतत्प्रकरणीयनिरोधस्य मध्यमत्वोक्तौ हेतुमाहुः **स्नेहान्त** इति, स्नेह एवान्तः फलं यस्य तादृशो निरोधो मध्यम इत्यर्थः, अत्र स्नेहपदेनासक्तिर्ज्ञेया स्नेहान्तनिरोधस्य प्रमाणप्रकरण एव सिद्धत्वात्, व्यसनसिद्धिश्च साधनप्रकरणे, तथा चोक्तं दशमस्कन्धनिबन्धे "सर्वतस्त्वधिकः स्नेहः पूर्वत्र विनिरूपितः आसक्तिस्तु द्वितीये हि तृतीये व्यसनं मतं फलप्राप्तिश्चतुर्थे हि सिद्धो रोधश्चतुर्विध" इति, अध्यायार्थमाहुः **प्रथम**मिति का० १२९ ३/४ । अत्र **ज्ञान**पदेन लीलासम्बन्धितर्वादिस्वरूपज्ञानं दशरसात्मकलीलानुभवश्चेति टिप्पण्यामुक्तं, फलं चात्र विषाम्भःपानेन परेतानाममृतवर्षिण्या ईक्षया पुनर्जीवनसम्पत्त्या ज्ञानपूर्णालौकिकदेहप्राप्तिः, **फलावधी**ति नपुंसकप्रयोगात् क्रियाविशेषणमिति टिप्पण्यां व्याख्यातं, क्रियाविशेषणे द्वितीया क्लीबत्वं चेति वैयाकरणसिद्धान्तात्, **कालीय** इति का० १२९ ३/४ । अत्र इति शब्दमध्याहृत्य इत्याहुरिति व्याख्यातं टिप्पण्यां, तत्रायमाशयः, **आहुरितिकर्तरिप्रयोगेण** कालीयशब्दादनभिहिते कर्मणि द्वितीया स्यात्, इति शब्दाध्याहारे तु आख्यातादिभिरिव निपातेनाप्यभिधाने प्रथमानुशासनान् न काप्यनुपपत्तिः, तथा च इन्द्रियाणीतिपदमपि प्रथमान्तमेव, इतीति निपातेनाभिधानात्, एतदेव हृदि कृत्वा तथा व्याख्यातं प्रभुभिः, **तत** इति का० १३० ३/४ । **तत** इन्द्रियेभ्यो विषयेभ्यश्च सर्व**विनाशः स्या**दिति बोधयितुमन्ते अध्यायान्ते **मरणाभिधा** विषाम्भःपानेन मरणोक्तिः, **ततो** मरणानन्तरमपि **सर्वे जीविता**श्चेत् तदा **पुनः** अलौकिकदेहान्तरस्थितिरित्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पञ्चदशे तरुस्तोत्रं धेनुरक्षा विनाशनम् ॥ धेनुकस्य विषाद्गोपवत्सरक्षा निरूप्यते ॥ १ ॥

तदेवं कौमारलीलां निरूप्य पौगण्डलीलां निरूपयति—तत इति । ततश्च **कौमारावस्थानन्तरं** यदा तौ रामकृष्णौ व्रजे पौगण्डवयःश्रितौ ईषद्वयोबलातिरेकमनुकृतवन्तौ, अत एव पशूनां गवादीनां पालने चारणसंयोजनबन्धनादौ नन्दादीनां सम्मतौ बभूवतुस्तदा सखिभिः सह गाश्चारयन्तौ ब्रह्मादिवन्द्यैः पदैः सर्वतः प्रसर्पणेन वृन्दावनमतीव पुण्यं पवित्रं पुण्यजनकस्थानं चक्रतुरित्यन्वयः । तद्गोचारणारम्भदिनं तु पाद्मे कार्तिकमाहात्म्ये उक्तम् "शुक्लाष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः ॥ तद्दिनाद्वासुदेवोऽभूद्गोपः पूर्वं तु वत्सपः" इति ॥ १ ॥ तत्र वृन्दावनगमनप्रकारमाह—तदिति । तद्वृन्दावनं विहर्तुकामो वेणुमुदीरयन् वादयन् स्वयशो गृणद्भिर्गोपैर्वृतः बलेन चान्वितः पशून् गाः पुरस्कृत्य माधवो लक्ष्मीपतिः श्रीकृष्ण आविशत् । वनस्य विहारयोग्यतां दर्शयंस्तद्विशिनष्टि—पशव्यं तृणजलच्छायादिबाहुल्येन पशुभ्यो हितम् । कुसुमानामाकरम् ॥ २ ॥ तत् पञ्चेन्द्रियाह्लादकं वृन्दावनं निरीक्ष्य भगवान् कृष्णो रन्तुं मनो दधे । मञ्जुघोषा मधुरनादा ये अलिमृगद्विजाः भ्रमरभृङ्गपक्षिणस्तैराकुलं व्याप्तमिति श्रोत्राह्लादकत्वमुक्तम् । महता भगवद्ध्याननिष्ठानां योगिनां मनसा प्रख्यं सदृशं शीतलं मधुरं स्वच्छं च पयो यस्मिंस्तत् सर आश्रयत्वेन विद्यते यस्य तेन वातेन जुष्टमिति जलगतमाधुर्येणाग्रिमश्लोकोक्तफलबाहुल्येन च रसनाह्लादकत्वमुक्तम् । अनेनव

जलसम्बन्धनात् शीतलेन वनसम्बन्धान्मन्देन च वायुना जुष्टत्वेन त्वगिन्द्रियाह्लादकत्वमुक्तम् । 'शतपत्रगन्धिना' इति घ्राणाह्लादकत्वमुक्तम् ।। ३ ।। 'अरुणपल्लवश्रिया जुष्टम्' इति नेत्राह्लादकत्वमुक्तम् । स आदिपूरुषः श्रीकृष्णस्तत्र तत्र वने फलानां प्रसूनानां चोरुभरेण पादयोः स्पृशन्त्यः शिखाः शाखा येषां तान् वनस्पतीन् वृक्षान् वीक्ष्य मुदा हर्षेण स्मयन् प्रहसन्, यद्वा आश्चर्यं कुर्वन्निव अग्रजं बलभद्रमाह । स्वसङ्कल्पकृतत्वेन वस्तुत आश्चर्याभावादिवशब्दप्रयोगः ।। ४ ।।

अन्वितार्थप्रकाशिका

गोपालत्वं पञ्चदशे धेनुकस्य विनाशनम् ।। विषाद्रक्षा च गोपानां श्लोकास्तत्र द्विमार्गणाः (५२) ।।

श्रीण्युवाचेति (३) पादोना ऊनषष्टिरनुष्टुभः (५८।।।) ।। १५ ।।

पञ्चमवर्षलीलामाह ततश्चेति ।। ततः कौमारानन्तरं यदा तौ रामकृष्णौ व्रजे पौगण्डवयःश्रितौ अत एव पशूनां गवादीनां पाले पालने चारणसंयोजनबन्धनादौ नन्दादीनां संमतौ बभूवतुः । ईषद्वयोबलातिरेकमकृतवन्तौ इत्यर्थः । स्वधर्मे गोचारणे प्रतिनिधिना पुत्रेणारब्धे नन्दो निवृत्त इति ज्ञेयम् । तदा सखिभिः सह गाश्चारयन्तौ पदैः ध्वजादिभिश्चरणचिह्नैः सर्वतः प्रसर्पणेन वृन्दावनमतीव पुण्यं पवित्रं चक्रतुः । पूर्वं तु बालत्वेन सूक्ष्माणां चरणचिह्नानामप्रकटत्वात् एतत् गोचारणारम्भदिनं तु "शुक्लाऽष्टमी कार्तिकस्य स्मृता गोपाष्टमी बुधैः ।। तद्दिनाद्वासुदेवोऽभूद्गोपः पूर्वं तु वत्सपः ।।" इति पाद्मे ।।१।। तन्माधव इति ।। विहर्तुंकामो वेणुमुदीरयन् वादयन्स्वयशो गृणद्भिर्गायद्भिर्गोपैर्वृतः बलेन चान्वितः पशून् गाः पुरस्कृत्य माधवो लक्ष्मीपतिः श्रीकृष्णः श्लेषेण वसन्त इव तदुल्लासकः पशव्यं तृणजलच्छायादिबाहुल्येन पशुभ्यो हितं कुसुमानामाकरं तद्वृन्दावनम् आविशत् ।। २ ।। तन्मञ्जुघेति ।। मञ्जुघोषा मधुरनादा ये अलिमृगद्विजाः भ्रमरहरिणपक्षिणस्तैराकुलं व्याप्तमिति श्रोत्राह्लादकत्वमुक्तम् । महतां योगिनां मनसा प्रख्यं सदृशं शीतलं मधुरं स्वच्छं च पयो यस्मिंस्तत् सर आश्रयत्वेन विद्यते यस्य तेन शतपत्रगन्धिना कमलगन्धवता वातेन जुष्टमिति रसनात्वग्घ्राणाह्लादकता । अग्रिमश्लोके तु नेत्राह्लादकता । तद्वृन्दावनं निरीक्ष्य भगवान् रन्तुं मनो दधे । अत्र वातेनेति शैत्यं शतपत्रेऽतिपरिमलवत्त्वं जुष्टं वनमिति पवनमान्द्यम् ।। ३ ।। स तत्रेति ।। स आदिपूरुषः श्रीकृष्णस्तत्र तत्र वने अरुणाः ये पल्लवास्तेषां श्रिया फलानां प्रसूनानां चोरुभरेण पादयोः स्पृशन्त्यः शिखाः शाखा येषां तान् वनस्पतीन् वृक्षान् वीक्ष्य मुदा हर्षेण स्मयमानः आर्षशता । यद्वा । आश्चर्यं कुर्वन्निव अग्रजं बलभद्रमाह स्म ।। ४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं पंचदशेऽध्याये वृंदावनं गत्वा श्रीकृष्णकृतं वृक्षादिप्रशंसनं अनेकविधक्रीडनं च विषोदपानेन मृतगोपजीवनं च रामकृतं धेनुकहननं च निरूप्यते तत्रादौ लीलाकरणार्थं वृंदावनप्रवेशमाह द्वाभ्यां तत इति पौगंडवयःश्रितौ प्राप्तौ अतः पशुपालानां नंदादीनां पशुपालने वा संमतौ पूर्वं बाल्यदृष्ट्याऽसंमताविदानीं तु बलाधिक्यप्रकटनेन पशुपालने नंदादिभिः संमानितावित्यर्थः पदैः स्वपादन्यासैः अतीव अतिशयं पुण्यं पवित्रं चक्रतुः ।। १ ।। तयोर्मध्ये श्रीकृष्णस्य प्राधान्यमाह तदिति स्वस्य यशः कीर्तिं गृणद्भिर्गायद्भिः समवयोभिः गोपैः वृतो रामेण युक्तः माधवो रमापतिः वेणुं मुरलीं उदीरयन् वादयन्सन् तद्वनं प्राविशत् कथंभूतं तत् कुसुमानां आकरं अत्युद्भवस्थानं पशव्यं तृणादिभिः पशूनां हितकरं ।। २ ।। वृंदावनशोभां निरूपयन्नाह मंजुर्मनोहरो घोषः शब्दो येषां तैर्भ्रमरमृगपक्षिभिराकुलं व्याप्तं महतां धर्मवतां मनोवत् प्रख्यं स्वच्छं यत्पयो यमुनाजलं तस्मिन् सरः सरणं गमनं विद्यते यस्य तेन शतपत्राणां सरोजानां गंधो विद्यते यस्य ते न वा तेन जुष्टं सेवितं तद्वनं ।। ३ ।। अरुणानां पल्लवानां नवांकुराणां शोभया सहितान् फलपुष्पयोः उरुभरेण बहुभारेण पादयोः विषये स्पृशंत्यः शिखाः अग्रभागाः येषां तान् वनस्पतीन तरून् वीक्ष्य मुदा स्मयन्नुपहसन्निव सः अग्रजं रामं जगाद ।। ४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

धेनूनां पालनं पञ्चदशेऽथो धेनुकार्दनम् । विषात्कालीयसर्पस्य गोपत्राणं च कथ्यते ।। १ ।।
अघास्यसंप्रवेशेन सखीन् खिन्नान् वृथा ततः । पक्वतालफलं कृष्णः काननं तानवेशयत् ।। २ ।।

तत इति ।। ततश्च कौमारानन्तरमपि, पौगण्डं च तद्वयश्च तच्छ्रितौ संप्राप्तपौगण्डवयसावित्यर्थः । तौ रामकृष्णौ, सखिभिः समं सह, व्रजे, गाः धेनूः, चारयन्तौ सन्तौ, पशुपालने पशुपालानां वा संमतौ, बभूवतुः । पदैः पादन्यासैः, वृन्दावनं, अतीव, पुण्यं चक्रतुः ।। १ ।। तदिति ।। तत्तदा, स्वयशः स्वकीर्तिं, गृणद्भिर्वर्णयद्भिः, गोपैर्गोपबालकैः, वृतः परिवीतः, बलान्वितः बलभद्रेण सहितः, वेणुं स्ववंशीं, उदीरयन् मुखवायुपूर्त्या निनादयन्, विहर्तुंकामः वने क्रीडितुमनाः, माधवः स्वयं कृष्णः, पशून् पुरस्कृत्य, धेन्वादीनग्रचरान् कृत्वेत्यर्थः । कुसुमाकरं कुसुमप्रधानतरुप्रायमित्यर्थः । पशव्यं प्राज्याभिनवघासवत्त्वेन पशुभ्यो हितं, वनं प्राविशत् ।। २ ।। तदिति ।। मञ्जुः रमणीयो घोषो नादो येषां ते येऽलयो भ्रमराश्च मृगा हरिणाश्च द्विजाः पक्षिणश्च तैराकुलं व्याप्तं,

महतां योगिनां यत् मनस्तेन तुल्यं स्वच्छं निर्मलं पयो यस्मिंस्तत् सरः आश्रयत्वेनास्ति यस्येति सरस्वान् तेन, अनेनातिशैत्यमुक्तम्। शतपत्राणां गन्धो यस्य तेन, वातेन जुष्टं अनेन परिमलवत्त्वमुक्तम् । तद्वनं निरीक्ष्य वीक्ष्य, भगवान्, रन्तुं तत्र क्रीडितुं, मनः दधे। मनसा सकल्पितवानित्यर्थः ।। ३ ।। स इति ।। आदिपूरुषः सः कृष्णः, तत्र तत्र, अरुणाश्च ते पल्लवाश्च तेषां या श्रीस्तया सह, फलानि च प्रसूनानि च तेषां य उरुभरस्तेन, पादयोः, स्पृशन्त्यः शिखाः अग्राणि येषां तान्, वनस्पतींस्तरून्, वीक्ष्य, स्मयन् उपहसन् इव, मुदा अग्रजं रामं प्रति, आह वक्ष्यमाणमुवाच ।। ४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततश्चेति : १०.१५.१.

तादृग् गवावनमिहाऽऽत्मदृशा विधेयं स्यात्संभ्रमो न खलपद्धतिसाध्वसं च ।
तारोदिताऽतनुरसग्रहणस्पृहा चेत्यर्थं प्रभुर्विशदयन् भृशमास गोपः ।। १ ।।

भूत्वाऽनन्तगवावनैकरसिकस्यार्कस्य वंशे पुरा यद्गोत्राणमकारि चित्रमिह किं का वाऽन्वयोत्कृष्टता ।
इत्यावेशविशेषजुष्टहृदयो मन्येऽन्वयोत्कृष्टतां प्रेप्सुः क्षिप्रमिहाचकाङ्क्ष भगवान् निःसंख्यगोपालनम् ।। २ ।।

मत्पालनं हृदि निधाय धृतावतारो यद्यप्यथापि कथमत्र भवेन्न जाने ।
इत्यप्रगल्भकुविशङ्कितमार्जनाय नाना गवावनमधात् प्रथयन्स्वशक्तिम् ।। ३ ।।

दुर्दैत्यनाशनविधावुपयोगिरूपं स्याद्यादृशं विपिनसीम्नि स तादृगासीत् ।
तत्तद्द्वयो विलसता व्रज एव कार्यमेतत्स्फुटं व्रजवयः कथनाद्विभाति ।। ४ ।।

पशुपतिपदवाच्यो भासतेऽत्र त्रिनेत्रो भुवि तदनुमतत्वं नाम तत्कार्ययोगः ।
ध्वनितमिदमिहैवं गोपगोत्राणकर्ता खलहृतिमतिरासीत्तत्प्रभृत्यच्युतो यत् ।। ५ ।।

वृन्दावनं तदनघ हि पुराऽग्रहत्या सञ्जातमित्यलमवेक्ष्य रमाधवोऽसौ ।
पुण्यास्पदं निजपदैरकरोत् तदीड्यं युक्तं च पुण्यदमघघ्नमिहेशवर्त्म ।। ६ ।।

तदिति : १०.१५.२.

विना निजयशः स्तुतिं भवति नैव वीर्योदयाभिवृद्धिरिह शूरसत्कुलजनैरपीति प्रभुः ।
तदह्नि सबलः स तैर्निजयशो गृणद्भिर्वृतः सुमङ्गलरवोन्मुखो वनमगात् खलध्वस्तये ।। ७ ।।

वने लसन्तं प्रसमीक्ष्य माधवमनन्तशाखागमबोधितागमम् । स्वतुल्यमेवात्मविभूतिवैभवं जानन् ययौ तद्विपिनं स माधवः ।। ८ ।।

तन्मञ्जिवति : १०.१५.३.

तत्तच्छ्रुत्युपपदिताऽतनुफलप्राग्वासनापुष्पितेष्वञ्जोमञ्जुविचारभाजिविषयोल्लासावगाहिन्यपि ।
सानन्दं विहरामि तत्र हृदि यत्सत्सत्कृतावानतं भूयादेवमबोधि तादृशि तरुप्रान्ते च रन्त्वा स्वयम् ।। ९ ।।

मामुद्दिश्य न चेदमीह विहितं कर्मागमख्यातिभिः प्रोद्यद्भक्तिफलैर्विचारहृदयैर्भूसंभवैः सन्नरैः ।
स्वीकुर्यामहमेव तन्निजधिया सर्वं तथाप्यादरान्नित्यानन्तपदर्शकतयेत्याधात् स्फुटार्थं प्रभुः ।। १० ।।

अग्रजमिति : १०.१५.४.

नित्यानन्तपदस्पृष्टशिरसस्तान् विभाव्य सः । युक्तमेवाच्युतोऽनन्तं प्रोचे तच्छुभदस्थितिम् ।। ११ ।।
सर्वाग्रस्य ममैव सर्वविषयेष्वग्र्याधिकारोऽस्त्यथाप्यद्यास्मिन् हिमदर्पिताविजयते रामे मदीयाग्र्यता ।
तस्मात् तत्कृतसत्कृतिग्रहणकृत् संप्रत्यसौ नाहमित्यालोच्यैव तमच्युतोऽग्रजमिति प्रोचे प्रजेशाग्रणीः ।। १२ ।।

कृष्णप्रिया

धेनुकासुर का उद्धार और ग्वालबालों को कालियनाग के विष से बचाना ।

श्रीशुकदेवजी कहते हैं—परीक्षित् ! अब बलराम और श्रीकृष्ण ने पौगण्ड अवस्था में अर्थात् छठे वर्ष में प्रवेश किया। अब उन्हें गौएँ चराने की स्वीकृति मिल गयी। वे अपने सखा ग्वालबालों के साथ गौएँ चराते हुए वृन्दावन में जाते और अपने चरणों से वृन्दावन को अत्यन्त पावन करते ।। १ ।। यह वन गौओं के लिये हरी-हरी घास से युक्त एवं रंग-बिरंगे पुष्पों की खान हो रहा था। आगे-आगे गौएँ, उनके पीछे-पीछे बाँसुरी बजाते हुए श्यामसुन्दर, तदनन्तर बलराम और फिर श्रीकृष्ण के यश का गान गाते हुए ग्वालबाल-इस प्रकार विहार करने के लिये उन्होंने उस वन में प्रवेश किया ।। २ ।। उस वन में कहीं तो भौंरे

बड़ी मधुर गुंजार कर रहे थे, कहीं झुंड के झुंड हिरण चौकड़ी भर रहे थे, और कहीं सुन्दर-सुन्दर पक्षी चहक रहे थे। बड़े ही सुन्दर-सुन्दर सरोवर थे, जिनका जल महात्माओं के हृदय के समान स्वच्छ और निर्मल था। उनमें खिले हुए कमलों के सौरभ से सुवासित होकर शीतल मन्द सुगन्ध वायु उस वन की सेवा कर रही थी। इतना मनोहर था वह वन कि उसे देखकर भगवान् ने मन ही मन उसमें विहार करने का संकल्प किया ॥ ३ ॥ पुरुषोत्तम भगवान ने देखा कि बड़े-बड़े वृक्ष फल और फूलों के भार से झुककर अपनी डालियों और नूतन कोपलों की लालिमा से उनके चरणों का स्पर्श कर रहे हैं, तब उन्होंने बड़े आनन्द से कुछ मुसकराते हुए से अपने बड़े भाई बलरामजी से कहा ॥ ४ ॥

[1]श्रीभगवानुवाच

अहो अमी देववरामरार्चितं [2]पादाम्बुजं ते [3]सुमनःफलार्हणम् ।
नमन्त्युपादाय शिखाभिरात्मनस्तमोऽपहत्यै तरुजन्म यत्कृतम् ॥ ५ ॥
[4]एतेऽलिनस्तव यशोऽखिललोकतीर्थं गायन्त [5]आदिपुरुषानुपदं भजन्ते ।
प्रायो अमी मुनिगणा भवदीयमुख्या गूढं वनेऽपि न [6]जहत्यनघात्मदैवम् ॥ ६ ॥
नृत्यन्त्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वन्ति गोप्य इव ते प्रियमीक्षणेन ।
सूक्तैश्च कोकिलगणा गृहमागताय धन्या वनौकस इयान् हि सतां निसर्गः ॥ ७ ॥
[7]धन्येयमद्य धरणी [8]तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः ।
नद्योऽद्रयः खगमृगाः सदयावलोकैर्गोप्योऽन्तरेण भुजयोरपि यत्स्पृहा श्रीः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—अहो अमी यत् तरुजन्म कृतं आत्मनः तमोऽपहत्यै शिखाभिः सुमनःफलार्हणं उपादाय देववरामरार्चितं ते पादाम्बुजं नमन्ति ॥ ५ ॥ आदिपुरुष, एते अलिनः अखिललोकतीर्थं तव यशः गायन्तः अनुपद भजन्ते प्रायः अमी भवदीयमुख्याः मुनिगणाः अनघ वने गूढं अपि आत्मदैवं न जहति ॥ ६ ॥ ईड्य गृहम् आगताय अमी शिखिनः मुदा नृत्यन्ति हरिण्यः गोप्यः इव ईक्षणेन ते प्रियं कुर्वन्ति कोकिलगणाः सूक्तैः वनौकसः धन्याः हि इयान् सतां निसर्गः ॥ ७ ॥ इयं धरणी अद्य धन्या त्वत्पादस्पृशः तृणवीरुधः करजाभिसृष्टाः द्रुमलताः धन्याः सदयावलोकैः नद्यः अद्रयः खगमृगाः धन्याः (तथा) श्रीः अपि यत्स्पृहा भुजयोः अन्तरेण गोप्यः धन्याः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तरुजन्म येन तमसा कृतं तस्य तमसः पापस्यापहत्यै नाशाय अथवा येन त्वयेश्वरेण सर्वोपकारकं तरुजन्म कृतं तं त्वां नमंति । एवं श्लाघ्येऽपि जन्मनि यदज्ञानरूपं तमोऽस्ति तस्यापहत्यै ॥५॥ हे अनघ वने गूढमपि त्वां न त्यजति । त्वयि मनुष्यवेषेण निगूढे सति मुनयोऽप्यलिवेषेण निगूढास्त्वां भजंतीत्यर्थः ॥ ६ ॥ इयान् हि सतां निसर्ग इति । यदस्ति स्वस्मिंस्तद्गृहमागताय महते महापुरुषाय समर्पयंतीति ॥ ७ ॥ तृणवीरुधश्च तव पादौ स्पृशंतीति तथा करजाभिमृष्टा नखैः स्पृष्टाः । सदयैरवलोकनैः । श्रीरपि यस्मै स्पृहयति केवलं तेन भुजयोरंतरेण वक्षसा गोप्यो धन्या इति ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेवाह—येन पापेन । न हि पापिनो भगवद्दृष्टिगोचरीभवंतीत्यरुच्यार्थांतरमाह—अथ वेति । श्रीवृंदावनतरूणामुपासना-प्राप्तद्रुमरूपाणाम् 'वृंदावने किमपि गुल्मलतौषधीनाम्' इत्याद्युक्तेर्ब्रह्मादिभिरपि प्रार्थ्यमानजन्मनां तमोऽभावात्, लोके सजातीय-तरूणां यत्तमोजन्यं जन्म तत्तमोपहत्यै इति वा । यद्वा-तमसोऽपराधस्यापहत्य, येनापराधेन कृतं तरुजन्म । हतास्माभिरपराध एव कश्चित्कृतः यत्कृष्णसन्निधिगमनासमर्थमस्माकं तरुजन्म विधात्रा कृतमिति तेषामनुरागोत्थ वचनमेवान्ववोचद्भगवान् । वस्तुतस्तु-ब्रह्मादिप्रार्थ्यवृंदावनीयतरुजन्म नापराधफलमिति तत्त्वम् ॥ ५ ॥ अनघेति । गोपवेषत्वेऽप्यपरिमितैश्वर्यत्व तवेति संबुध्यभिप्राय

---

१. प्राचीनप्रत्यां "श्री भगवानुवाच" इत्ययमंशो न दृश्यते । २. पदाम्बुजं—वीर. । ३. फलार्हणैः—विज. । ४. एतेऽलयस्तव—वीर. । ५. पुरुषानुपथ—विज. । ६. त्यमरा मदैवं—विज. ७. विज. पाठे अयं श्लोकः "ग्राम्यवदीशचेष्टितः" इति एकोनविंशश्लोकानन्तरं वर्तते । ८. सूक्त इति कस्यचित् ।

अलिनो भ्रमराः "भ्रमराणां पक्षमूलमलमाहुर्मनीषिणः" इत्युक्तेरलमस्ति येषामित्यलिनः। इत्यर्थ इति। 'प्रकाशे प्रकाशं गुप्ते गुप्तम्' इति न्यायेन गुप्तस्य गुप्तवेषेणैव भजनमुचितमिति भावः। "वेत्ता सर्वस्य वेद्यस्य मुनिः सद्भिरुदाहृतः" इत्युत्पलः। मुनिगणा रहस्यलीलागमनार्थं भ्रमरीभवंति, तेन भा भ्रमरा मदतिरहस्यकुंजमपि प्रविश्यास्मत्सौरभ्यमास्वादयत मा संकुचतेति तान्प्रति प्रसादो ध्वनितः। अखिललोकानां मुक्तमुमुक्षुवादीनां तीर्थं सेव्य शोधकं वा। यद्वा—अखिलोऽनल्पः लोको ज्ञानं येषां तेषां सर्वज्ञानामपि सेव्यम्। अनघानां निर्दुःखानां मुक्तानामात्मदैवं प्राप्यत्वेन निश्चितम् 'मुक्तानां परमा गतिः' इत्युक्तेः। 'दुःखैनोव्यसनेष्वघम्' इत्यमरः। आदिपुरुषसर्वकारणकारणाभजने पातित्यं मा भूदित्यर्थः। आत्मप्रभवमीश्वरं न भजंत्यवजानन्ति 'स्थानाद्भ्रष्टाः पतंत्यधः' इत्युक्तेः। पूर्वोक्तमुनिगणपक्षेऽपि योजनास्येति ॥ ६ ॥ सतां निसर्ग इति। नृत्यसहर्षावलोकप्रियवचनैर्गृहागतस्य साधोः संमाननमिति सतां विदुषां स्वाभाविको धर्म इत्यर्थः। शिखिनो मयूरा यद्वा—केशशिखाधारिणः। हरिण्यः मृग्यः। पक्षे हरिं नयंति प्राप्नुवंति इति हरिण्यः हरिभक्ताः। सूक्तैः कर्णप्रियैर्वचोभिः। पक्षे कः ब्रह्मा, ओ विष्णुः, उ शिवः, तेषां किलो वार्त्ता येषां ते कोकिला इंद्रादयः, तान् गणयति पूजनार्थमिति कोकिलगणा यज्ञादिकरणशीलाः। 'वार्त्तासंभाव्ययोः किल' इति शाश्वतः। इयान् एतावान्। सतां शास्त्रश्रद्धावताम्। निसर्गः स्वभावः यद्गृहागतायातिथये सुदृष्टिसुवचोनमनादिना पूजनमिति, अन्यथा "अतिथिर्यस्य भग्नाशो गृहाद्याति ह्यपूजितः। तस्य पूर्वकृतं पुण्यं नाशमायाति सर्वतः॥" इत्यादिस्मृतिर्व्याकुप्येतेति ॥७॥ वक्षसा तत्संबंधेन लक्षितलक्षणया भुजांतरेण वक्षःसंयोगो लक्ष्यते। धन्येयं भूमिर्धन्याश्चात्रत्याः पदार्था इति भावः। यद्वा—सन् अयः शुभावहो विधिर्येभ्यस्तथाभूतैरवलोकैः सहिता। यतः किञ्चित्सुगन्धशीतलां गोपीपर्यायां सारिवां वल्ला वक्षसि कौतुकेन ध्रियमाणां विलोक्याह—गोप्यः श्यामवल्लयोऽपि भुजयोरंतरं वक्षस्तेन सहिता यतः श्रीः शोभापि यस्मै स्पृहयति सा या वल्ली शोभामपि शोभयतीत्यत एव वक्षसि त्वया ध्रियत इति भावः। पक्षे गोप्यो व्रजसुंदर्यः यत्स्पृहा यस्मै भुजांतराय लक्ष्मीरपि स्पृहयति, तदुक्तं भागवतामृते—"सदा वक्षःस्थलस्थापि वैकुंठेशितुरिंदिरा। कृष्णो वः स्पृहयास्यैव रूपं विवृणुतेऽधिकम्। पौराणिकमुपाख्यानमत्र संक्षिप्य लिख्यते। श्रीः कृष्णे प्रेक्ष्य सौन्दर्यं तत्र लुब्धा ततस्तपः। कुर्वतीं प्राह तां कृष्णः किं ते तपसि कारणम्॥ विजिहीर्षे त्वया गोष्ठे गोपीरूपेति साऽब्रवीत्। तद्दुर्लभमिति प्रोक्ता लक्ष्मीस्तं पुनरब्रवीत्॥ स्वर्णरेखेव तेनाथ वस्तुमिच्छामि वक्षसि। एवमस्त्विति सा तस्य तद्रूपा वक्षसि स्थिता॥" इति विश्वनाथः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो इति प्रहर्षे आश्चर्य्ये वा अमी इमे स्थावरयोनयोऽपि हे देववर! सर्वदेवोत्तम! सुमनसः पुष्पञ्च फलं च तदेवार्हणं पूजोपकरणमात्मनः शिखाभिरग्रभागैः श्लेषेण शिरोभिः उपादाय उपादेयत्वेन गृहीत्वा ते तव पादाम्बुजं नमन्ति नमस्कुर्वन्तः शिखाभिरेव तव पादाम्बुजे समर्पयन्तीत्यर्थः। कीदृशं पादाम्बुजम् अमरा ब्रह्मादिदेवा मुक्ताश्च तैरप्यर्चितम्। ननु, कथं स्थावराणामीदृशं ज्ञानं तत्राह—तम इति। येषामीदृशो भावस्तेषामज्ञानं नास्त्येव प्रत्युत तमोऽपहत्यै पश्यतां शृण्वतां च तमोनाशाय यत् यैः श्रीवृन्दावनसम्बन्धि तरुजन्म कृतम् अङ्गीकृतम्। यद्वा, तमोऽपहत्यै पशुपक्ष्यादिवत्त्वत्सङ्गमासक्तिदुःखनाशाय नमन्ति के तेऽमी यत् यैस्तरुजन्म कृतं प्राप्तमित्यर्थः। एवं नित्यसिद्धान् प्रतिविवक्षितं साधनसिद्धान् प्रति तु आत्मनस्तमोऽपहत्यै तवाप्राप्तिदुःखनाशाय यदित्यादि यथा ब्रह्मणा प्रार्थितमिति भावः। एवं सर्वत्र प्रचारेण मुहुः सर्वेषामेव सुखं कार्य्यमिति स्वैरविहारेच्छया प्रोक्तम्॥ ५॥ एत इति। श्रीमदङ्गुल्या दर्शयति—अविशेषेणाखिललोकानां तीर्थं संसारमलपावनं त्वद्भक्तिमाहात्म्यद्योतकगुरुरूपं वा अनुपथं पथि पथि भजन्ते अनुवर्त्तन्ते त्वाम् अनुपदमिति पाठेऽपि तथैव तच्च युक्तमेवेत्याह, हे आदिपुरुषेति। सदा स्वतः सर्वेषां त्वत्सेवकत्वादिति भावः। अत्रानुमिमीत इव प्राय इति भवदीया भवतो नाना रूपस्योपासका ये तेष्वपि पूर्णस्य मदग्रजरूपस्य भवत उपासकत्वान्मुख्या ये मुनयः परममनननिश्चिततद्रूपत्वद्भजनेन तत एवान्यत्र मौनशीलत्वेन चानन्या इत्यर्थः। तेषां गणाः अत एव श्लेषेण मुनयोऽपि गणा अनुगा येषां ते मुनीश्वरा इत्यर्थः। श्रीब्रह्मणापि दुर्लभस्य लाभात् ते वने श्रीवृन्दावने गूढमन्यरूपोपासकैरज्ञातमपि अत्रैव क्वचित् क्रीडाविशेषाय निलीयस्थितमपि च न जहति तत्र हेतुः, आत्मदैवमिति। भवदीयमुख्या इति च अनयोश्च मिथो हेतुत्वं हे अनघ! न विद्यते भक्तानामघं यस्मिन् सः हे अपराधाग्राहिन्! परमकारुणिकेति यावत् अनघात्मदैवमित्येकं वा पदं तदेवमेषामभीष्टसिद्धिः कार्येति भावः। प्राय इति वितर्के श्रीनारदादिवत् यशोगानपरमरहस्यतदन्वेषणाऽनुगत्यादिसाम्यात् ॥६॥ ईड्य! हे स्तुतियोग्येति लज्जया स्मित्वा विमुखीभवन्तमिवाग्रजमभिमुखीकरोति मुदेत्यस्य सर्वैरप्यनुषङ्गः ईक्षणेन प्रियं प्रीतिं भावं ते तुभ्यं जनयन्ति "रुच्यर्थानां प्रीयमाणः" (१।४।३३) इति संप्रदानत्वं गोप्य इवेति वीक्षणस्य सुष्ठुतया प्रेम्णा च साम्यात् दैर्घ्यचाञ्चल्यसप्रेमत्वादिना तत् स्मरणाच्च अत एव श्रीरामप्रेयस्योऽप्यन्या ज्ञेयाः इत्थं पौगण्डमारभ्य तासु तस्य भावोदयः सूचितः। परमतेजस्वित्वेन पौगण्ड एव कैशोरांशाविर्भावात् तासामपि तादृशत्वात् सूक्तैः श्रोत्रसुखदशब्दैः तत्तत् कुतः? गृहमागताय अभ्यागतायेत्यर्थः। तच्च "वाक् चतुर्थी च सूनृता" इति न्यायेन युक्तमेवेत्याह, इयानिति ॥ ७॥ एवं तत्कर्तृकसेवया तान् स्तुत्वा श्रीरामकर्तृकप्रसादेनापि धरण्यादिसहितान् एव तान् स्तौति–धन्येति। इयमादितो वर्त्तमाना विचित्रावतारस्पर्शसौभाग्यवती विशेषतः श्रीवराहशेषप्रसादातिशयलब्धमाहात्म्यापि अद्य त्वदवतार एव धन्या परप्रशंसनीयाऽभूत् आस्तां तावदस्या धन्यात्वं तत् संभवानां मध्ये लघिष्ठा

इमाः श्रीवृन्दावनवर्तिन्यः तृणवीरुधस्तृणरूपा लता दूर्वाद्या अपि धन्याः यतस्त्वत्पादस्पृशः एवमुत्तरत्र च धन्येयमिति वचनं लिङ्गव्यत्ययेनानुवर्त्त्यं त्वदिति छान्दसो ङसो लुक् ततो यथास्थानमाकर्षणीयं तथा द्रुमा लताश्च करजैरङ्गुलिभिः किसलयादीनां सौकुमार्यस्पर्शाय भूषणाद्यर्थच्छेदनाय वा स्पृष्टाः सन्तः "मालत्यदर्शि वः कच्चित्" इत्यादिवत् करजाः नखा इत्यर्थे तु तैरभिमर्षो नाम नावरतासूचकः किसलयादौ लेखो ज्ञेयः, स च श्रीगोपीनामुद्दीपनार्थः "पश्यतेमा लताः" इत्यादिवत् तथा एताः नद्यः एतेऽद्रयोऽपि त्वत्पादस्पृशः सन्त इति गम्यं योज्यं वा तेषु तस्यैव प्राधान्यात् नद्यस्तदेत्यादौ गृह्णन्ति पादयुगलमिति हन्तायमद्रिरित्यादौ यद्रामकृष्णचरणस्पर्शप्रमोद इति वक्ष्यमाणाच्च अथ गोपीपर्यायां श्यामसारिवां तर्हि कथञ्चित्तद्वक्षोलग्नां दर्शयन् श्लेषेणाह, गोप्य इति। मत्पितृव्यादवतीर्णस्य पुनर्मत्पितुर्धर्मतां प्राप्तस्य गोपकन्यापरिणयनमेव भविष्यतीति सूचयन्त्य इति भावः तदेवम्भावी यस्तस्य प्रियात्वं प्राप्स्यन्तीभिः काभिश्चिद्गोपीभिः सह विहारस्तस्य सूचना कृता यत्स्पृहेति श्रीवैकुण्ठनाथवक्षस्थिता लक्ष्मीरपि यत्स्पृहेत्यर्थः। न केवलं स्पृहामात्रं किन्तु वक्ष्यते चान्यन्नागपत्नीभिः "यद्वाञ्छया श्रीर्ललनाचरत्तपः" इति एवमप्यत्र श्रीगोकुले तदप्राप्तिः श्रीगोपीनामिव तदनन्यत्वाभावात् तासु तदधिकारिणीष्वननुगतत्वाच्चेति भावः। अत्र सर्वेषां सर्वेषु सत्स्वपि तस्य तस्य प्रसादस्य परमकाष्ठाप्राप्तत्वात् विशेषोक्तिरिति ज्ञेयम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो इति प्रहर्षे, सादरसम्बोधने वाश्चर्य्ये वा। अमी इमे स्थावरयोनयोऽपि। देववर हे पूज्यश्रेष्ठ ! सर्व्वदेवोत्तमेति वा। अतएव सुमनसः पुष्पं फलञ्च, तदेवार्हणमर्ह्यतेऽनेनेति पूजोपकरणम्, शिखाभिरग्रभागैः कृत्वोप समीपे उपटौकनत्वेन वादाय, सुमन इति श्लेषेण भावरूपता तस्य ध्वनिता। तमसोऽज्ञानस्यापहत्यै, अमरैः सत्त्वप्रधानैरर्च्चितमित्यन्वयः। यद्वा, अहो भ्रातः! देववरैः श्रीब्रह्मादिभिरमरैश्च मृत्युरहितैरप्यर्च्चितम्,—तत्र मुक्तानामज्ञानं मोक्षस्वीकारात्। यद्वा, आत्मनः शिखाभिर्लोके हि भक्त्यौपटौकनद्रव्यं निजशिरसि कृत्वयानीयेत। सामान्येन तरुजन्म, सर्व्वस्थावरजातिः, महात्त्यां सर्व्वस्थावरत्वमेव प्रार्थनात्, तस्य कारणं यत्तमः दुष्प्रारब्धं तस्यापहत्यै इति सामान्यदृष्ट्योक्तम्,—स्थावरत्वेन पशुपक्ष्यादिवत् त्वत्संगे गमनाशक्तेरिति भावः, यद्वा, आत्मनस्तमः शोकस्तदपहत्यै। ननु तत् कुतः ? तत्राह,—यद्यस्मात् त्वया तरुजन्म कृतम्। अन्यत् समानम्। अत एते सदा त्वत्संगिनो भवन्त्विति वरो ज्ञेयः ॥५॥ एत इति श्रीमदंगुल्या दर्शयति। अखिलानामधिकारानपेक्षया सर्व्वेषामेव लोकानां जीवानां तीर्थं संसारतारकं भगवद्भक्तिमाहात्म्यद्योतकगुरुरूपं वा। अनुपथं पथि पथि भजन्तेऽनुवर्त्तन्ते त्वाम्, यद्वा, अनुपथं गायन्तो यश एव भजन्ते सेवन्ते। तच्च युक्तमेवेत्याह,—हे आदिपुरुषेति, सदा स्वतस्तव सेव्यत्वात् तेषाञ्च सेवकत्वादिति भावः। यद्वा, गायन्तः सन्त आदिपुरुषस्य श्रीब्रह्मणोऽनुपथं भजन्ते, स्वभावं लभन्त इत्यर्थः। सदा यशोगानाद्भवदीयाश्च ते, अतो मुख्याश्च मुनिगणा इति मौनादिलक्षणमात्मारामत्वमपास्य भगवद्भजने प्रवृत्तेषु मुख्या इत्यर्थः। एवं श्लाघामिषेण वरोऽयमेव, प्राय इति केषाञ्चित् स्वतः प्रथमत एव भक्तत्वात्। यद्वा, प्रायो गूढमित्यन्वयः, कदाचिदैश्वर्य्यप्रकटनात् प्रायःशब्दः। न विद्यतेऽघमपराधो भक्तानां यस्मिन्, तेषां सर्व्वापराधमर्षणात् तत्सम्बोधनम्, यद्वा, अनघञ्च तमात्मदैवञ्चेति। अयमत्यागे हेतुः। प्राय इति वितर्के वा। ततश्चेदमुक्तं भवति,—यथा परमवैष्णवा मुनयो वेदवचने निगूढमपि दुर्व्बोधलीलत्वसुलभत्वादिनापि हेतुना न त्वां त्यजन्ति, किन्तु कर्म्मज्ञानादिमार्गेषु वर्त्तमाना अपि तत्र तत्र सारभूतं त्वद्यश एव परमश्रेयोबुद्ध्यानुक्षणं गायन्तः सर्व्वपरित्यागेन त्वां प्रेम्णा सेवन्ते, तथैवैतेऽलिनोऽप्यतो नूनं त एवेमे इति, यद्वा, ननु श्रीब्रह्मणोऽप्यत्र किञ्चिन्मात्रजन्मप्रार्थनया तस्मादप्यत्रत्यानां माहात्म्येनामी मुनिगणा इति न संगच्छेत ? अत आह,—भवदीयेषु मुख्या इति श्रीनारदादय इत्यर्थः। अतो मुनयोऽप्यनुगा येषां ते मुनीश्वरा इत्यर्थः। अन्यत् समम् ॥ ६ ॥ ईड्य ! हे स्तुतियोग्येति लज्जया विमुखीभवन्तमग्रजमभिमुखीकरोति, यद्वा, ईड्याया श्लाघ्यया, मुदा परमहर्षेणेत्यर्थः, अस्य सर्व्वैरप्यनुषंगः। प्रेमनृत्यकारिणो भवन्त्विति वरो ज्ञेयः। ईक्षणेन प्रसन्ननेत्रदृष्ट्या प्रियं प्रीतिभावं वा ते तव जनयन्ति, दृष्टिसौन्दर्य्यत एव, किंवा श्रीगोपिकास्मारणात्। एवमग्रेऽपि। सूक्तैर्मधुरस्तोत्रविशेषसदृशैरुत्तमस्वनैः। तत् कुतः? गृहमागतायाभ्यागतस्य प्रीत्यै तं प्रति निजनिजोत्तमद्रव्यसमर्पणोपपत्तेः। यद्वा, ते तव गृहं प्रत्यागताय,—भावे निष्ठा, स्वस्वगृहे तवागमनार्थमित्यर्थः। अत एता गोप्यो भवन्त्विति वरो ज्ञेयः, स्वभावनिरीक्षणात् स्त्रीत्वाच्च। यद्वा, गोप्य इवेति सर्व्वत्रैव दृष्टान्तः। एवं तासां तत्तदखिलसम्पत्त्या सर्व्वेभ्यस्तेभ्यो वैशिष्ट्यम्, मयूरादीनाञ्च परं नृत्यादिष्वेव सौष्ठवं सूचितम्। ततश्च सदा त्वत्प्रियरहस्यगीतविशेषगायका भवन्त्विति वरः। धन्याः परमभाग्यवन्तः। एषामेतदुपयुक्तमेवेत्याह —इयानिति। हि यतः स्वभावत एवैषां परमसाधुत्वादिति भावः। यद्वा, धन्याः परमप्रेमधनयुक्ता भवन्त्विति वृन्दावनीयान् सर्व्वानेव प्रत्ययं वरः। हि यस्मात्, सतां प्रेमभक्तानामेवेयान् स्वभावो भवतीति ॥ ७ ॥ एवं प्रथमदृष्टानां हृद्यतमानां विशेषतो माहात्म्यमभिवर्ण्य पुनर्हर्षभरेण सामान्यतः सर्व्वेषामपि वर्णयति, यद्वा, किं विशेषवर्णनेन ? सर्व्व एवात्रत्या धन्या इत्याह—धन्येति। इयमादितो वर्त्तमाना विचित्रावतारैर्भूषिता श्रीवराहेणोद्धृत्य रमिता, शेषरूपेण त्वया शिरसि धार्य्यमाणाप्यद्य श्रीमथुरायामवतीर्णे त्वयि, किंवा, श्रीनन्दव्रजे पौगण्डलीलया गोपाले सत्येव धन्या परमभाग्यवती सर्व्वोत्तमाऽभूत्। अद्येति सर्व्वत्राग्रेऽप्यनुवर्त्त्यम्, धन्येयमित्यपि वचनादिव्यत्ययेन, तथा त्वदिति समासान्तः प्रविष्टमपि यथास्थानमाकर्षणीयम्। इमानि तृणानीमा वीरुधश्च गुल्मिन्यो धन्याः, न च स्वर्गादिवर्त्तिन्यो

दण्डकादिस्थिताश्च । तत्र हेतुः – त्वत्पादस्पृशः । एवमग्रेऽपि व्याख्येयम् । धरण्या धन्यत्वेऽप्ययमेव वा हेतुर्द्रष्टव्यः, असाधारणसुन्दरपदैर्गोष्ठाद्यक्षुण्णप्रदेशेषूदितैरलंकारविशेषसम्पत्तेः । द्रुमा लताश्च फलपुष्पादिग्रहणेन, भूषणाद्यर्थं पत्रादिच्छेदनेन च नखैः स्पृष्टाः, नद्यः श्रीयमुनाद्याः, अद्रयः श्रीगोवर्द्धनादयः, खगा मयूरादयो मृगाः कृष्णसारादयश्च, दूरस्थिताः सदयैरवलोकैर्धन्याः । नद्यद्रीणां पादाब्जस्पर्शधन्यतासद्भावेऽपि तथोक्तिः प्रायो दूरवर्त्तित्वात्, तथा धरण्यादिषु सर्वेषु सदयावलोकसम्भवेऽपि, तथा द्रुमादिष्वपि यथायथं पादस्पर्शादिसम्भवेऽपि तेषु तेषु तत्तत्प्रधान्यापेक्षया तथोक्तम् । एवमग्रेऽपि । इमाः श्रीनन्दव्रजवर्त्तिन्यः, किंवा, सदा हृद्वर्त्तित्वेनापरोक्षाः । भुजयोरन्तरेणालिंगनेनेत्यर्थः । अन्यत्तैर्व्याख्यातम्, यद्वा, अपिशब्दः समुच्चये, भुजयोरन्तरेण सदयावलोकादिभिश्च तासु धन्यताकारणानां पादस्पर्शनादीनां सर्व्वेषामपि प्राधान्येन सद्भावादिति तासां सर्व्वतोऽधिकतरधन्यतोक्ता । श्रीवैकुण्ठेशस्य वक्षसि नित्यमेव वसन्ती लक्ष्मीस्त्वद्वक्षस एव स्पृहयतीत्यसंगतमेव । तेनायमर्थः—कृष्णस्यासमोर्द्ध्वं माधुर्य्यभरमवेक्ष्य तस्मै स्पृहयन्ती श्रीस्तपश्चकार । तच्च (भा० १०।१६।३६)—'यद्वाञ्छया श्रीर्ललनाचरत्तपः' इति नागपत्नीभिर्वक्ष्यते, अतः श्रियोऽप्यधिकमाहात्म्यं व्रजसुन्दरीणां सुव्यक्तमेव ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अमी तरवः सुमनःफलार्हणं सुमनःफलानुरूपं पूजासाधनन्तमोऽपहत्यै "पाप्मापेत" इति श्रुतेः ॥ ५–६ ॥ निसर्गः स्वभावश्चरितमवलक्ष्यते ॥ ७–१३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह–अहो इत्यादिभिः चतुर्भिः स्वयमादिपुरुषोऽपि लोकमर्यादास्थापनार्थमवतीर्णत्वात्स्वशेषभूतमपि शेषमग्रतोऽवतीर्णत्वमात्रेण स्वतोऽधिकमिव सम्भावयन्नाह—अहो इति । हे देववर ! यद्वा, देववरैरमरैरर्चितं तव पादाम्बुजं पुष्पफलादिरूपं पूजासाधनमुपादाय शिखाभिर्नमन्ति तरवः किमर्थमात्मनस्तमसः पापस्याऽपहत्यै नाशाय येन तमसा तरुजन्म कृतं सम्पादितं तस्य तमसोऽपहत्यै इत्यन्वयः ॥ ५ ॥ हे आदिपुरुष ! एते भृङ्गास्तवानुपदमखिललोकपावनं यशो गायन्तः भजन्ते तिरश्चां कथमेवंविधं ज्ञानं तत्राह—अमी अलयः प्रायेण भवद्भक्तेषु मुख्या मुनिगणा एवात एवानघानामात्मनां दैवतं गूढं गोपवेषेणेति शेषः । त्वां न जहति न त्यजन्ति ॥ हे ईड्य ! अमी शिखिनो मयूरा नृत्यन्ति तथा हरिण्यो गोप्य इवेक्षणेन ते तुभ्यं प्रियं कुर्वन्ति तथा स्वगृहं प्रत्यागताय ते कोकिलानां गणाः सूक्तैः प्रियं कुर्वन्ति एते कोकिलादयो वनौकसोऽपि धन्या एव सतां निसर्गः स्वभाव इयान् हि मृदूक्त्यादिभिर्बहुमानमियानेव हि इयं धरणी तृणानि वीरुधश्च धन्याः कुतः ? यतस्तव पादौ स्पृशन्तीति तथा तथा द्रुमलताश्च धन्याः कुतः करजैर्नखैरभिमृष्टाः तथा अद्र्यादयोऽपि धन्या कुतः ? सदयैरवलोकनैः त्वया वीक्षिता इति शेषः । तथा गोप्योऽपि धन्याः कुतः ? भुजयोरन्तरेण वक्षसा आलिङ्गिता इति शेषः । कथम्भूतेन यद्यस्मिन्स्पृहा स्पृहावती श्रीः तेन ॥ ६–८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इममेवार्थं विशदयति–अहो इति । देववर ! यद्वा, देववराः ब्रह्मादयः अमरा देवाः एतैरर्चितं सुमनःफलार्हणैः पुष्पफलोपायनैरात्मनः स्वस्य तमोपहत्यै अज्ञाननिमित्तपापनिरासाय तरुषु जन्म येन तमोनिमित्तपापेन ॥ ५ ॥ यतो यथा देवादयो मनुष्यलिङ्गमवाप्य भगवन्तं सेवन्ते तथा एते भ्रमरा अपि तेष्वेतेषु तस्मात्त्वच्चरणपद्मसेवानवरतं न हातव्या मुमुक्षुभिरिति भावेनाह—एत इति । अलिनो भ्रमराः "भ्रमराणां पक्षमूलमलमाहुर्मनीषिणः" इति अखिललोकतीर्थं समस्तजनस्य स्नानलक्षणं कीर्तनयोग्यं शुद्धिजननस्थानीयं "शास्त्रेष्वम्भसि पावने" इति च अखिलः अनल्पः लोकः प्रकाशः ज्ञानं येषां ते तथा तेषां सेवायोग्यशास्त्रस्थानीयं "लुक् प्रकाशे" इति धातुः अनुपथ "पथ गतौ" इति धातुः यत्र गच्छसि त्वं तत्रानुगमनलक्षणसेवां कुर्वन्तीत्यर्थः । अनुपदं वा मुनिगणाः सर्वज्ञानां देवादीनां गणाः "वेत्ता वेद्यस्य सर्वस्य मुनिः सद्भिरुदाहृतः" इत्युत्पलमाला त्वदीयेषु वैष्णवेषु मुख्या गूढं मनुष्यलिङ्गधरं न जहति त्यजन्ति "आहाक् त्यागे" इति धातुः जहातीति पाठे वा "व्यत्ययो बहुलम्" (३।१।८५) इति सूत्रान्निर्णयः अमराणामात्मदैवं कुलदैवं अनघात्मदैवमिति पाठे अनघानां निर्दुःखानां मुक्तानाम् आत्मदैवम् "मुक्तानां परमा गतिः" "दुःखेनोव्यसनेष्वघम्" इत्यमरः अनघेति पृथक् पदं वा ॥ ६ ॥ पूर्वोक्तमतिदिशति–नृत्यन्तीति । शिखिनो मयूराः अन्यत्र केशशिखाधारिणः तापसाः हरिण्यः मृगस्त्रियः अन्यत्र हिरण्मयवत्तपस्तेजसा ज्वलन्त आसां भारोऽस्तीति हरिण्यः परोपदेशसम्बन्धेन हरिभक्तजनतापहरिण्य इत्युच्यन्ते "महेशाज्ज्ञानमन्विच्छेन्मोक्षमिच्छेज्जनार्दनात्" इति स्मृतेः "हरिणी सा हिरण्मयी" इत्यभिधान ते तवेक्षणेन प्रियं कुर्वन्ति कोकिलगणाश्च सूक्तैः कर्णरम्यैः वचनैः प्रियं कुर्वन्तीति अन्यत्र कः ब्रह्मा उः शिवः तयोः किल वार्ता कीर्तनं सम्भावना च येषां ते कोकिलाः इन्द्रादयः परभृतः इतरप्राणिरक्षार्थं प्राणधारिणः न स्वार्थं परमभागवता इत्यर्थः । स्मार्त्तन्यायः गृहमिति गृहमागतायातिथये गृहिणाऽर्घ्यपाद्यादिकं दातव्यमिति यत्तस्मात् वनौकसो मृगादयो वा वानप्रस्थादयो वा धन्याः कृतार्थाः स्वं स्वं निवासमागतं त्वां सभाजयन्ति, अयं सतां जातिस्वभाव इत्याह—सतां निसर्गः नितरां स्वभावः इयान् एतावान्

हि यस्मात्तस्मादिदमुचितमिति भावः । "वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् तस्यैतां शान्तिं कुर्वन्ति हर वैवस्वतोदकम् आशां प्रतीक्षे सङ्गतं सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान् एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे" इति "वार्ता सम्भावयोः किल" इति यादवः ईड्य ! सर्वंकर ! ।। ७–८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अहो इति ।। ५ ।। भवदीया भवतो नानारूपस्योपासका ये तेष्वपि पूर्णस्य मदग्रजरूपस्य भवत उपासकत्वात् मुख्या ये मुनयस्तेषां गणा वने श्रीवृन्दावने गूढमन्यरूपोपासकैरवज्ञातमिति न जहति हे अनघ ! अपराधाग्राहिन् ।। ६–७ ।। गोप्य इवेति नेत्रगुणेन तत्स्मरणात् अथ गोपीपर्यायां श्यामसारिवां तर्हि कथञ्चिद्वक्षोलग्नां दर्शयन् श्लेषेण गोप्य इति नेत्रगुणेन तत्स्मरणात् रामप्रियाभिः काचिद्रामस्य भाविविलाससूचनेयम् ।। ८ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

१–४ अथ वृन्दावनस्य तर्वादेरलौकिकतां स्वसेवापरायणताञ्च दर्शयितुं स्व-महिमकथने स्वस्यानौचित्यमिति बलदेव-व्यपदेशेनैव तस्य वृन्दावन–तर्वादेरात्मविषयां रतिं भगवान् प्रपञ्चयति–अहो इत्यादि । (४ र्थ–श्लो०) "स्मयन्निवाहाग्रजमादिपूरुषः" इति पूर्वश्लोकपठितेनादिपुरुषशब्देन स्वस्याग्रजवत्वाभावात् अग्रजवत्त्वं स्वयमेव स्वीकृतमित्यायातम् । अतः स्मयन्निव प्रहासपूर्वमिवेति स्वाश्रयस्याराध्यत्वस्य तत्रारोपोऽवगन्तव्यः । एवमेव धीरोदात्तनायकलक्षणं यदात्मश्लाघापराङ्मुखता, तेनात्रास्मच्छब्द-प्रयोगे कर्तव्ये युष्मच्छब्द–प्रयोगः । तथाहि अहो आश्चर्ये, अस्मयन्निवाहाग्रजमादिपूरुष इति यदाह, तस्य विवृतिम् । अहो आश्चर्यम्, हे देववर ! ते तव पादाम्बुजमयी तरवः सुमनः फलार्हणमादाय शिखाभिर्नमन्ति । न फलभरेणामी नम्राः, अपि तु प्रणामञ्चिकीर्षयैव नम्रशिरस इत्यर्थः । अमी इति के ते इत्याशङ्क्याह – यत् यैस्तरुभिस्तमोऽपहत्यै द्रष्टॄणां तमोनाशायात्मनस्तरुजन्म कृतं गृहीतम् । कीदृशं तरुजन्म ? अमरार्चितम, अमरैर्ब्रह्मादिभिरर्प्यर्चितं स्पृहणीयम्, – (भा० १०।१४।३४) "किमप्यटव्याम्" इत्युक्तेः । एतेन वृन्दावनतरूणां परमभागवत्त्वमायातम् ।। ५ ।। न केवलं तरव एवोपासते, भ्रमराश्चेत्याह—एनेऽलिनस्तव यश इत्याहि । तवेति पूर्ववदस्मच्छब्द–प्रयोगे युष्मच्छब्दः । अतोऽमी मुनिगणा मननशीलानां भागवतानां गणा मननधर्मत्वाद् यशोगानस्यास्पष्टता समुचितैव ! भवदीयानां भागवतानां मुख्या परमभागवता इत्यर्थः । हे अनघ ! वने गूढमप्यात्मदैवं न जहति, सहैव यशो गायन्तो भ्रमन्तीत्यर्थः ।। ६ ।। न केवलमलिन एव एतेऽपीत्याह—नृत्यन्त्यमीत्यादि । अमी शिखिनो मुदा नृत्यन्ति । एतेनैतेऽपि परमभागवताः,- (भा० ११।२।४०) "उन्मादवन्नृत्यति लाकबाह्यः" इति तल्लक्षणोक्तेः । हे ईड्य ! हरिण्योऽवीक्षणेन ते प्रियं कुर्वन्ति । 'ते' इति पूर्ववत् । का इव ? गोप्य इव, अथवा, गोप्ये निर्जने स्थले, इव–एवार्थः । एतेनैता अपि परमभागवताः,—"यत् सर्वत्र तदीक्षणम्" इत्युक्तेः । न केवलमेता एव, कोकिला अपीत्याह–सूक्तैरपीत्यादि । कोकिलगणा अपि सूक्तैः प्रियं कुर्वन्ति । एतेनैतेऽपि परमभागवता निरन्तरस्तवनात् । गृहमागताय अतिथय इवेति, इव-शब्द उभयत्र योज्यः । तदर्थे अतिथिनिमित्तम्,—वाक् चतुर्थी च सूनृता' इत्युक्तेः अतो वनौकसा वृन्दावनौकसा धन्या एव । तत्र हेतुः—इयान् हि सतां वैष्णवानां निसर्गः स्वभावः, एतेनामी वैष्णवा एवेत्यर्थः ।। ७ ।। किञ्च, एतषां धन्यता तु नित्यसिद्धैव, अप्राकृतत्वात् । धरण्यपि अद्य इदानीं धन्येत्याह—धन्येयमित्यादि । अद्य इदानीमियं धरणी धन्या । तृणवीरुधश्च एतास्तृणवीरुधा धरणीसम्बन्धिन्य एव । पूर्वं तु (५ म–श्लोक) "अहो अमी देववरामरार्चितम्" इत्यादिना य उक्तास्तरवस्तेऽप्राकृताः । अद्येति कालस्य पार्थक्य-निर्देशात् । तत्रायं विचारः । वैकुण्ठं तु त्रिविधं भवति, भौममभौमं भौमाभौमञ्चेति । भौमं भौमस्वर्गवत् पुरुषोत्तमक्षेत्रम्, "वपुर्भूतं महात्मनः" इत्युक्तेः । अभौमं स्वयंगशक्त्याधारम्, भौमाभौमं व्रजवृन्दावनादि, 'सान्निध्य नित्यदा हरेः' (भा० १०।१।२८) "यत्र सन्निहितो हरिः" इत्यादिना विहित–महिम–ख्यापनायान्तर्भूतत्वात् । भौमत्वम् (भा० १०।५।१८) "ततः प्रभृति नन्दस्य व्रजः सर्वसमृद्धिमान् हरेर्निवासात्मगुणे रमाक्रीडमभून्नृप ।।" इत्यादिना हरेर्निवासस्य परमवैकुण्ठस्य भावगुणैः सह रमाक्रीडमभूत् । सर्वसमृद्धिमान्—अष्टसिद्धि-नवनिधिभिश्च समृद्ध इत्यनेनाभौमम् । तेनाद्येति कालनियमः, अद्य मदवतारे यद्यप्यंशेन सर्वदैव मम सान्निध्यमेवः, तथापि परिपूर्णभावेननाद्यावतीर्णोऽस्मीति पूर्णभावेन मल्लोकोऽप्यवतीर्ण इति भौमाभौमत्वसिद्धिः धन्यत्वे हेतुः —त्वत्पादस्पृशः, पूर्ववद् युष्मच्छब्द–प्रयोगः । द्रुमलता इति धरणीसम्बन्धित्वात् पुनरुपादानम्, न केवलं धरण्यादय एव, नद्यादयश्च । नद्यो यमुनाद्याः, अद्रयो गोवर्द्धनादयः श्रीरपि यद्भावाय स्पृहयति । अतः श्रीशब्दापादानादुक्तस्य सर्वस्य स्वाश्रयत्वं प्रकाशितश्रियः सङ्कर्षणपरत्वे प्रसिद्धत्वात् ।। ९–१८ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अदस्–शब्द प्रयोगेणाह–अहो अमीत्यादि । तमोऽपहत्यै तमोनाशाय । यत् यस्मात् तरुजन्म वृन्दावने कृतमङ्गीकृतम् । आत्मन इति तृतीयार्थे षष्ठी, अथवा, आत्मनस्तरुजन्म; यद्वा, तरूणामन्येषां जन्म यत्कृतं तस्य तमसोऽपहत्यै आत्म–साजात्यादन्येषां तरूणामपि तमोनाशका वृन्दावन तरव इत्यर्थः । कुतः ? आत्मन आत्मजातीयहेतोः, न तु ते तमोजन्मानः तेषां मन्मयत्वात् । तथा

चोक्तं वैकुण्ठवर्णने (भा. ३।१५।१६) "कैवल्यमिव मूर्त्तिमत्" इति एवमुत्तरश्लोकेऽपि ।। ५ ।। एतेऽलिनो मुनीनां मननशीलानां गणा भवदीयमुख्या पार्षदप्रवरान्तरयशो गायन्तो मम यशो गायन्तीत्यर्थः, लोके च परमगभीरो धीरोदात्त ईश्वरो भ्रातरं सखायममात्यं वा लक्ष्यीकृत्यात्मनो महिमानं प्रकटयति । आदिपुरुषस्य ममानुपथ भजन्ते इत्यनेनैवादिपुरुषशब्देनैतद्व्यज्यते । अलिनां तिर्यक्जातीनामपि मुनित्वे पार्षदत्वे अप्राकृतत्वम् एवं तरूणामपि कुतस्तमः ? ।। ६ ।। न केवलमलिनः, अमी शिखिनोऽपीत्याह–नृत्यन्तमित्यादि । न केवलं शिखिनो नृत्यन्ति, हरिणाश्च ईक्षणेन प्रियं कुर्वन्ति, का इव, गोपिका इव । न केवल हरिण्यः, कोकिलगणा अपि सूक्तैरुपनिषत्प्रायैः । एते हि वेदमूर्त्तयः ।। ७ ।। न केवलमेते धन्याः, धरणी चेत्याह–धन्येयमद्येति । अद्य धरणी धन्यैव, यतस्त्वत्पादस्पृश इत्यादि पूर्ववत् । द्रुमलताश्च करजाभिमृष्टाः अतो धन्याः नद्योऽद्रयश्चाभिमृष्टा, इत्येकदेशेनानुवर्त्तनीयम् । खग मृगाश्च सदयावलोकैर्धन्याः । गोप्यो भुजयोरन्तरेण वक्षसा धन्याः, स्वात्मानं (प्रति) सर्वेयमुक्तिः । तत्प्रकाशः—यत्स्पृहा श्रीरिति वाक्याद् यानि यानि स्पृहयतीति, यत्स्पृहा, श्रीस्तु श्रीकृष्ण एव स्पृहावती, तेन तस्य सेवोपकरणेष्वपि तस्याः स्पृहा ।। ८ ।। (९-१८)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वीयपुष्पफलादिभिः स्वप्रभोः श्रीकृष्णस्य चरणा र्चयाम इति मनोनुलापं युष्माकमहं जानामीति स्वविज्ञत्वं परमभक्तान् श्रीवृन्दावनीयवृक्षान् कटाक्षेण ज्ञापयन्नग्रजमाह—अहो इति । शिखाभिः स्वस्वशिरोभिरुपायनं तत्तदुपाय पदाम्बुज नमन्तीति भक्त्याशिरोभिरेव चरणयोस्तत्तदर्पयन्तीत्यर्थः । किमर्थम् आत्मनस्तमसोऽपराधस्याऽपहत्यै येनापराधेन कृतमुत्पादितं तरुजन्महन्तास्माभिरपराध एव कश्चित्कृतः यत्कृष्णसन्निधिगमनासमर्थमस्माकं द्रुरुजन्म विधात्रा कृतमिति तेषामनुरागोत्थ वचनमेवान्ववोचद्भगवान् वस्तुतस्तु ब्रह्मादिभिरपि प्रार्थ्यमानत्वाद्वृन्दावनीयतरुजन्म नापराधफलमिति ज्ञेयम् ।। ५ ।। तत्रत्यान् जङ्गमान् स्तौति–द्वाभ्याम् एतेऽलिनो भ्रमराः अनुपथं त्वदङ्गसौरभानुसारित्वात् वने क्वचिद्रहस्यलीलार्थं गूढं सहचराद्यगम्यमपि त्वां न जहति न त्यजन्ति हे अनघेति तत्र गमनेष्वेषां त्वघं त्वं न गृह्णासि तस्मादेते भवदीयमुख्या एव मुनिगणा रहस्यलीलामननशीला भ्रमरीभवन्ति तेन भो भ्रमराः ! मदतिरहस्यकुञ्जमपि प्रविश्याऽमत्सौरभ्यमास्वादयत मासङ्कुचतेति तान् प्रति प्रसादो ध्वनितः ।। ६ ।। ते गृहमागताय त्वां ग्रहमागतं सम्मानयितुं सूक्तैः प्रियं कुर्वन्तीति पूर्वेणैवान्वयः । इयान् सतां निसर्ग इति नृत्यसहर्षावलोकनप्रियवचनैर्गृहागतस्य साधोः सम्मानमिति सतां स्वाभाविको धर्म इत्यर्थः ।। ७ ।। एवं तत्तत् कर्त्तृकसेवया तान् स्तुत्वा श्रीरामकर्त्तृकप्रसादेनापि तानेवानुरक्तैरन्यैश्च सहितान् स्तौति–धन्येयं धरणी अद्येत्यवतारगतस्थूलकालमालम्ब्योक्तिवाचकेन पदेन त्वत्स्वरूपवराहशेषस्पर्शादपि त्वत्स्पर्शोऽस्या अतिसुखद इति द्योतितम् कुतो धन्येयमिति चेत् धरणीस्थानां तृणादीनामपि त्वत् सम्पर्कादेवेत्याह तृणानि च वीरुधश्च तास्त्वत्पादाभ्यां स्पृक् स्पर्शो यासां तथाभूता यतः द्रुमा लताश्च करजैः पुष्पत्रोटनार्थं नखैरभिमृष्टा स्पृष्टाः यतः नद्यादयश्च सकृपावलोकैः । यद्वा, सन् अयः शुभावहो विधिर्येभ्यस्तथाभूतैरवलोकैः सहिता यतः किञ्चित् सुगन्धशीतलां गोपीपर्य्यायां शारिवां वल्लीं वक्षसि कौतुकेन ध्रियमाणां विलोक्याह, गोप्यः श्यामवल्ल्योऽपि भुजयोरन्तर वक्षस्तेन सहिता यतः श्रीःशोभापि यस्मै स्पृहयति सा या वल्लीशोभामपि शोभयतीत्यत एव वक्षसि त्वया ध्रियत इति भावः । पक्षे गोप्यो व्रजसुन्दर्य्यः यत्स्पृहा यस्मै भुजान्तरा लक्ष्मीरपि स्पृहयति तथा हि भागवतामृतीयाः कारिकाः—

> "सदा वक्षःस्थलस्थापि वैकुण्ठेशितुरिन्दिरा । कृष्णोरःस्पृहयाऽस्यैव रूपं बिभृतेऽधिकम् ।।
> पौराणिकमुपाख्यानमत्र संक्षिप्य लिख्यते । श्रीःप्रेक्ष्य कृष्णसौदर्य्यं तत्र लुब्धा ततस्तपः ।
> कुर्वन्ती प्राह तां कृष्णः किन्ते तपसि कारणं ।। विजिहीर्षे त्वया गोष्ठे गोपीरूपेति साऽब्रवीत् ।
> तद्दुर्लभमिति प्रोक्ता लक्ष्मीस्तं पुनरब्रवीत् । स्वर्णरेखेव ते नाथ ! वस्तुमिच्छामि वक्षसि ।
> एवमस्त्विति सा तस्य तद्रूपा वक्षसि स्थिता" ।। इति ।। ८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अहो इत्यतिकौतुके अव्ययम् हे देववर ! यत् येन त्वया स्वचरणसंस्पर्शयोग्यम् ब्रह्मादिभिरपि वाञ्छितं तरुजन्म कृतम् तस्य त पादाम्बुजं सुमनःफलार्हणमुपादाय नमन्ति । ननु, ब्रह्मादिभिः प्रार्थितं वृन्दावने तरुजन्म प्राप्य पुनः किं वाञ्छन्त्यत आह–तमोऽपहत्यै इति । तमः पुनर्भवलक्षणः संसारो निरन्तरभवत्पादपद्मसन्निकर्षप्रतिबन्धकस्तन्निवृत्तये इत्यर्थः ।। ५ ।। हे आदिपुरुष ! प्रायः अमी भवदीयेषु भागवतेषु मुख्याः एव अलिनः भृङ्गात्मना स्थिताः यत एते वने गूढमपि आत्मदैवं त्वां न जहति न त्यजन्ति अपि तु । हे अनघ ! अखिललोकतीर्थं तव यशोऽनुपदं गायन्तो भजन्ते त्वां भजन्तीत्यर्थः ।। ६ ।। हिर्हेतौ यतः सताम् ईयान् निसर्गः साधूनामीदृशः स्वभावः अतः केचित्सन्त एव मयूरादिरूपेणेह वसन्तीति भावः ।। ७ ।। अद्य इदं त्वयाक्रम्यमाणा धरणी धन्या त्वत्पादौ स्पृशन्तीति त्वत्पादस्पृशस्तृणवीरुधश्च धन्याः करजैर्नखैरभिमृष्टाः स्पृष्टाः द्रुमलताश्च धन्याः त्वदीयैः सदयावलोकैर्नद्यादयश्च धन्याः श्रीरपि यत्स्पृहा यत्र स्पृहावती भवति तेन भुजयोरन्तरेण वक्षसा गोप्यो धन्याः ।। ८ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अहो इति । हे देववर ! अमी तरवः सुमनःफलार्हणम् आत्मनः शिखाभिः शिरोभिरुपादाय तद्रूपमुपायनं गृहीत्वा अमरैर्विरिञ्च्यादिभिरर्चितं ते पादाम्बुजं नमन्ति । किमर्थम् ? अस्मन्नमस्कारं शृण्वतां तमसोऽज्ञानस्य अपहत्यै विनाशाय यद्यः पुष्पादिभिस्तत्पादार्हणाय तरुजन्म कृतं स्वीकृतं यद्वा, तमसः पशुपक्ष्यादिवत् त्वत्सङ्गमाशक्तिजन्यदुःखस्यापहत्यै नमन्ति यद् येन ते पदाम्बुजेन तरुजन्म कृतं, न चैषामज्ञानं शक्यं वक्तुं तादृग्भाववत्वात् ब्रह्मादिप्रार्थितत्वाच्च तज्जन्मनः ॥ ५ ॥ अथ वृन्दावनस्थान् जङ्गमान् स्तौति—एत इति द्वाभ्याम् । हे आदिपुरुष ! एते अलिनः तव यशोगायन्तोऽनुपथं त्वदङ्गसौरभ्यनुसारेण त्वां भजन्ते क्वचिद्रहस्यलीलायै गूढं सखिभिरगम्यमपि त्वामात्मदैवं न जहति तस्मादमी भवदीयेषु मुख्या मुनिगणास्त्वद्रहस्यमननशीलाः शुकादय एव भवेयुः, हे अनघ ! तत्र गमनेऽप्येषामघं न गृह्णासीति तत्रानुमतिश्च व्यज्यते ॥ ६ ॥ गृहमागताय ते तुभ्यं त्वां सत्कर्तुमित्यर्थः। सूक्तैः प्रियं कुर्वन्तीति पूर्वेणैव सम्बन्धः सतां निसर्गः इयान् स्वगृहागतस्य साधोर्नृत्यसहर्षवीक्षणप्रियवचनैः सम्माननं सतां स्वाभाविको धर्म इत्यर्थः ॥ ७ ॥ अथ वृन्दावनमुत्तं तत्रत्यानन्यांश्च बलभद्रप्रसादपात्रत्वेन स्तौति—धन्येयमिति, इयं धरणी वृन्दावनभूमिर्धन्या श्लाघ्या अद्येति, तदवतारवराहस्पर्शादपि त्वत्स्पर्शोऽस्या अतिहर्षकृदिति सूच्यते तद्भवास्तृणवीरुधस्तृणरूपा लतादूर्वाद्याश्च धन्याः यतस्त्वत्पादस्पृशः द्रुमलताश्च धन्याः यतस्त्वत्करजैः पुष्पत्रोटनार्थमपि तैरभिमृष्टाः स्पृष्टाः नद्यादयश्च सन् "अयः शुभावहो विधिः" येभ्यस्तैः सकृपैर्वाविलोकैर्धन्याः मरुता चलन्तीं श्यामलतां तद्वक्षोलग्नां वीक्ष्याह गोप्यः श्यामलताः श्लेषेण व्रजकिशोर्यस्तव भुजयोरन्तरेण वक्षसा धन्याः तदन्तरं कीदृशं श्रीर्यत्स्पृहेति लक्ष्मीर्यत्स्पृहयतीत्यर्थः । वक्ष्यते चैवं नागपत्नीभिः "यद्वाञ्छया श्रीर्ललनाचरत्तपः" इत्यादिना व्रजकिशोरीविषयकः पूर्वरागोऽत्र पद्ये नन्दसूनोः सूचितः ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

किमाह महामाहात्म्यो हरिर्हलधरं प्रतीत्यतः श्लोकत्रितयेनाह ॥ अहो इति । हे देववर । अमरार्चितं देवपूजितं ते पदाम्बुजं पादकमलं सुमनः फलार्हणं पुष्पफलात्मकं पूजोपायनमुपादाय शिखाभिर्येन पापेन कृतमात्मनस्तरुजन्म तस्य तमसः पापस्यापहत्याऽमी शिखाभिर्नमन्ति । अहो आश्चर्यचयोऽस्यार्थत्वमिति भावः ॥ ५ ॥ हे आदिपूरुष अग्रज । अलानि पक्षमूलानि सन्त्येषामित्यलिनो भ्रमराणां पक्षमूलमाहुर्मनीषिण इति वचनादखिललोकतीर्थमखिलानां लोकानां तीर्थमृषिजुष्टजलतुल्यमखिललोकस्य ज्ञानिजनस्य शास्त्ररूपमिति तीर्थं वा यशो दिकस्फूर्तिमतीं कोर्ति । दिक्षुग्रानाद्यश इति छान्दोग्यभाष्योक्तेः । गायन्तः सन्तोऽनुपथमनुपदं वा भजन्ते यतोऽतः प्रायो बाहुल्येन भवदीयेषु तावकसेवकेषु मुखा मुनिगणा एवामी । हे अनघ निर्दोष हे अमर वा । आत्मदैवं स्वस्तुत्यं त्वां वने गूढमपि न जहाति न त्यजन्ति । मनुजतनुं निगूढ त्वामेतेऽप्यल्यादितया गूढस्वस्वरूपास्तज्जात्यनुरूपस्वरादिना त्वां सेवन्त इति भावः । अला वृश्चिकलाङ्गूलं तदिवास्त्येषामित्यलिनअलभूषणादौ सर्वधातुभ्य इन् । मधुपालिनः । षट्पदभ्रमराला इत्युभयतश्चामरः । पूर्वत्र चापयुक्त उत्तरत्र चोपयोक्ष्यत इति लेखनमत्रेति ज्ञेयं ॥६॥ अमी शिखिनः केकिनः । शिखी केकीत्यमरः। नृत्यन्ति । ईडय मुदेति योग्ययोग्यान्वयि । इदं तु स्वजलदतुलकायच्छविविलोकनघटितनानेतान्भ्रातर्यारोप्योचे हरिरित्यास्मरपामरं विज्ञातमेव सर्वत्रासम्भावितं भगवति योज्यमित्यान्तरङ्गिको भावोऽवसेयः । ईडचमुदेति पदमेकं वा । या रमयेडचः स्तुत्योऽहं तद्धेतुकमुदेति तदाऽर्थः । यदा शुभाण्यप्यभ्राणि सन्ति वलकलेवरमपि शुभ्रमिति तदभ्रान्त्या तन्नर्तनप्रवर्तनं युक्तमित्येवमुक्तिः। उक्तं च रामायणे । पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च । प्रविशन्नभ्रजालानि निष्कामश्च पुनः पुनरिति । अत एव नीलमेघः समाभास इत्यादौ नीलादिपदसार्थकता दृढनिरूढेति ज्ञेयं । हरिण्यो हरिणतरुण्यो गोप्य इव ते ईक्षणेन निरीक्षणेन प्रिय कुर्वन्ति कोकिलगणाः सूक्तैः पञ्चमरागप्रपञ्चनवचनैर्वनौकसो वनमोको भवनं येषां ते तथा गृह वनरूपस्वनिवासमागताय प्रियं कुर्वन्ति किलैतत्सम्भावितं हि यतोऽतो धन्यः कृतार्थः सतां निसर्गः स्वभाव इयानेतावानेवामी मुनिगणा इति पूर्वोक्तमत्राप्यनुसन्धेयं ॥ ७॥ एवमग्रजसमर्पितस्वप्राज्यः साम्राज्यः श्रीमद्वृन्दावनमिति प्रीतमना अद्रेर्गोवर्धनसम्बन्धिनी या सरिद्यमुना तद्रोधस्सु तत्तीरेषु। कूलं रोधश्च तीरं चेत्यमरः । सानुगः पशूंश्चारयन्नेम इत्यन्वयः । अद्रेः सानुग इति वाऽन्वयः। तदगुशृङ्गोपरिग इत्यर्थः ॥ ८ ॥

श्रीसुबोधिनी

प्रथमं वनस्पतीनां वैष्णवत्वात् स्वरूपमाहाहो इति, **अहो** इत्याश्चर्ये, तेषामवान्तरभेददर्शनं स्मृत्वाश्चर्यमाह **हे देववर!** **अमी** वृक्षा **अमरार्चितं ते पादाम्बुजं शिखाभिर्नमन्ती**तिसम्बन्धः, प्रदर्शनेन तेषां चेतनत्वं सूचितमाधिदैविकत्वं च, यद्यप्येते देवास्तथापि भवान् **देववरः**, तरतमभावेपि देवानां देवभजनं न युक्तमित्याशङ्क्याह**ामरार्चित**मिति, **अमरा** ये मुख्यदेवास्तै**रप्यर्चितं** महि **सङ्कर्षणो** देवकार्यसाधकोतो भूभारहरणार्थं प्रार्थितोतो यथा तेषां खेदं दूरीकरोष्येवं वनस्पतीनामपि तमो दूरीकर्तव्यं, दूरीकरणार्थं प्रवृत्तेः, अतो **नमन्ति, तमोपहत्या** इति, येन **तमसा तरुजन्म कृतं, सजातीयेनैव सजातीयनिराकरणं** भवतीत्याधिदैविकतमोनियामकमेव नमस्यन्ति, अत एव भगवता स्वनमस्कारो नोक्तः, **मूलभूतं च तमो न कर्मणा ज्ञानेन** च गच्छति

किन्तु देवतयैव, तरुत्वदोषनिवृत्त्यर्थं त्वां ज्ञापयितुं तद्रूपेणैव नमस्कार कुर्वन्ति दयासिद्ध्यर्थं च, गुणाधिकारोस्मै दत्त इति मर्यादार्थं तन्निराकरणाय निवेदनं, शिष्टं स्वयमेव करिष्यति, तदर्थं लाला क्रियत एव, यद्वा केनचिद् भगवांस्थितिमज्ञात्वा तत्प्रश्ने कृते सुज्ञस्तं प्रत्याह, तस्य कदम्बस्य प्रियालस्य पनसस्य वा तले क्रीडतीति तदा तदज्ञाननिवृत्तिः स्वस्माद् भवत्येतच्च तरुत्व एव सम्भवति नान्यथेति तादृक **तरुजन्म यत्कृतं** येन भवता **कृतं**. **तमोपहृत्यं,** उक्तरीत्या सर्वेषां तमोज्ञानं तदपहृत्यर्थमित्यर्थः, **आत्मपदस्य शिखाभिरित्यनेन तरुजन्मेत्यनेन वा सम्बन्धः,** हरौ स्वतले क्रीडत्यन्यदेशीयतरुवन्न मौढ्य किन्तु तत्सर्वपरिज्ञानमानन्दश्च भवतीत्या**त्मनस्तमोपहृत्या** इत्यत्रैव **सम्बन्धः**, अतस्तमुपकार स्मृत्वा **नमन्तीति** वार्थः, यद्वा **यद्** यस्माद्धेतो**रात्मन** आत्मीयं स्वीयत्वेन परिगृहीतमिति यावत् तादृ**क् तरुजन्म** कृतमर्थात् त्वयैवातो **नमन्तीतिसम्बन्धः, वृन्दावनभूमावुत्पत्तिमात्रेणैव** हरि**रात्मीयत्वं** मनुत इति तथा, यत्रोत्पत्त्यादिरूपधर्माणामेतादृशत्वं तत्र धर्मिणां किं वाच्यमितिभावः, वक्ष्यति चाग्रे "न नः पुरो जनपदा" इत्यारभ्य "नित्यं वनौकस" इति "तस्मात् मच्छरणं गोष्ठ'मित्यादि, **तमः**पदं गुणत्रयोपलक्षकं, विशेषाकथनात् सम्बन्धमात्रेण सर्वेषां तथा त्वयेति ज्ञेयं, 'मन्निकेतं तु निर्गुण'मितिवाक्यात् ।।५।। एवं वृक्षाणां विज्ञापनमुक्त्वा भ्रमराणां विज्ञापनमाहै**तेऽलिन** इति, लोकप्रतीत्या यद्यप्येते झङ्कारमिव कुर्वन्ति तथापि वस्तुतस्ते **यश एव गायन्ति,** एतेपि तामसाः परं वृक्षापेक्षया किञ्चित्समीचीनाः, ते तु फलपुष्पाढ्या इति सुमनांसि फलानि चार्हणरूपाणि पूजारूपाण्यग्रे **स्थापयित्वा** कायिकं नमनं कृतवन्तः, एते तु राजसा इति फलाद्यभावाच्च वाचनिकीमेव सेवां कुर्वन्ति, ते सङ्गे मुखामोदार्थमायान्तीति न मन्तव्यं यतो **यश एव गायन्तोनुपथं भजन्ति,** प्रार्थना त्वेतेषां नापेक्ष्यते यतो**ऽखिललोकतीर्थं यशो गायन्ति सर्वेषामेव यच् छोधकं तदात्मानं शोधयत्येवेत्यविवादं, प्रभूणां गायका अपि सेवका भवन्ति,** कदा वा कृपां करिष्यती**त्यनुपथं** भजनं, नन्वेते भ्रमरा हीनाः कथं यशो ज्ञास्यन्तीत्याशङ्क्याह **प्राय** इति, अमी सर्वे **मुनिगणा एव भवदीयेषु** भवत्सेवकेषु **मुख्याः,** ननु ब्रह्मविदो भक्ताः कथं नीचयोनिं प्राप्तवन्त इत्याह **गूढं वनेपि न जहत्यनघात्मदैव**मिति, भवान् गूढस्तेपि गूढाः, यथा भवान् मनुष्यभावं प्राप्त एवमेतेऽपि भ्रमरभावं **भवदीयमुख्यत्वादनुपथं** भजनं, **मुनिगणत्वाद् गानं,** ननु किमिति गूढं भजन्ते प्रकटमेव देवान्तरं महादेवादिरूपं कथं न भजन्ति ? तत्राहा**नघात्मदैव**मिति, अनघश्चासावात्मा **दैवं च निर्दोषो हि त्यक्तुं न शक्यः,** तत्राप्या**त्मनः,** तत्रापि **दैवं** तामसा एव हि सेव्याः, तत्र **महादेवादयः स्वसम्बन्धिनोपि देवता अपि भूतगणावृता इति न सेवितुं शक्याः,** ब्रह्मादयस्तु स्वसम्बन्धिन एव न भवन्ति, अन्ये तामसा देवता एव न, अत एवानन्यगत्या **गूढ**मपि भजन्ते, **वने** वा **गूढं** यथा भवति तथा; अन्यथा भगवान् रोषं वा कुर्यात्, अत एतेष्वप्यनुग्रहः कर्तव्य इति।।६।।मृगपक्षिणां विज्ञापनमाह **नृत्यती**ति, हे ईड्य ? **अमी शिखिनस्त्वामा**गतं ज्ञात्वा नृत्यन्ति, ईड्येतिसम्बोधनादन्ये गायन्ति स्वयं नृत्यन्ति, शिखिनां नृत्यमेव प्रशस्तं, **आगमने यो नृत्यति स महान्** भक्तः, **आगमनमेव तस्याभीष्टं, यतो** हरिण्योपि **त ईक्षणेन प्रियं कुर्वन्ति,** कथञ्चित् प्रीतिरुत्पादनीया, ता अपि **मुदा** भवन्तं पश्यन्ति स्वस्य च चक्षूंषि भवते प्रदर्शयन्त्यो गोपिकादिस्मारकत्वेन सुखं जनयन्ति, **गोप्य** इवेति, गोप्यो यथा स्वरूपतः सुखजनिका एवं तत्स्मारिका अपि, नाट्यकाव्येषु तथानिरूपणात्, **कोकिलगणास्तु सूक्तैः** स्तोत्ररूपैः प्रियं कुर्वन्ति, तासां शब्देन च महानन्दो भवति, एते वनस्था गृहस्था इव **धन्याः**, यत **इयानेव सतां निसर्गः** स्वभावः,

आगते परमस्तोषः प्रियार्थस्योपनायनम् । वाक्यैः स्तुतिश्च परमा महत्येतावदेव हि ।। १ ।।
तृणानि भूमिरुदकं सामान्ये **गृहमागते** ।। १½ ।।

अत **आहेयानेव सतां निसर्ग** इति ।। ७ ।। वृन्दावनभूम्यादीन् स्तौति **धन्येति,** इयं **धरणी** भूमि**र्धन्या** तव **पाद**स्पर्शात् **तृणवीरुधोपि धन्याः, त्वत्पादस्पृशो द्रुमलता अपि धन्याः, करजैर्नखैरभिमृष्टा नद्योद्रयः खगा मृगाश्च धन्याः, दयासहितावलोकनैर्गोप्योपि धन्यास्तव भुजयोरन्तरेण** कृत्वा तत्रालिङ्गनं प्राप्य, ननु कथमस्य दुर्लभत्वम् ? तत्राह **यत्स्पृहा श्री**रिति, भूम्यादीनां विज्ञापनं न किञ्चित् कर्तव्यं यतस्त्वया यथाकथञ्चित् सर्व एव तत्तत्प्रकारेण प्रीणिताः, आवेशिनः सर्वभावेन निरूपणे आवेशाधिकरणभूतः सम्यग् भावयति ततः शीघ्रमेवाविष्टा सा देवता भवति, अन्यथोभयेषामप्यनिष्टं स्यात् वृन्दावनस्थानां सङ्कर्षणस्य च भजनेभजनेपि देवतान्तरभजनेन तेषां नाशो भगवद्भोग्यानां स्वीकारेणेतरस्य चाभजने तु सर्वदैवाभजनेतिक्रमः स्यादन्यस्य च क्रोधः, अतो नित्यस्वावेशसिद्ध्यर्थं बलभद्रस्य प्रबोधनम् ।। ८ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अत्रैव तमोपहृत्यं तरुजन्मेत्यत्र **तरुत्वदोषनिवर्त्यर्थ**मिति । अत्रायं भावः । तमसोऽज्ञानहेतुत्वेन ज्ञानविरोधित्वाच्च कदाचित् स्वसमीपे भगवत्यागते स्वसम्बन्धिपत्रपुष्पफलाद्यपेक्षायां च सत्यां पूर्वोक्तदोषेणेदमज्ञात्वा न प्रकटयेयुः स्वजातिस्वभावेन स्वस्वकाले एव च प्रकटयेयुस्तदापराधः स्यात् । अत्र तादृक्तरुजन्मवैयर्थ्यं च अतस्तमोनिवृत्तावज्ञानस्यापि निवृत्तेर्यथोचिता सेवा भवतीति तन्निवृत्तिः प्रार्थनीया, न तु तरुत्वस्यापि, परमेष्टत्वादिति ।। ५ ।। **एतेऽलिन** इत्यत्र, **वृक्षापेक्षया किञ्चित्समीचीना** इति । देवापेक्षया मुनीनां तथात्वं स्पष्टम् । वाचनिकं भजनमनुपथं च भजनं रसविशेषोद्दीपकत्वं चाधिकमेतेषु तेन तथा ।। ६ ।।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अहो इत्यत्रा**वान्तरभेददर्शन**मिति, गोपाल्वेषु सत्स्वप्यसमच्चरणयोरनिपातेनावेशावतारादिविषयकभेददर्शनं, **तरुत्वदोषनिवृत्त्यर्थ**मिति तरुत्वसमानाधिकरण**दोषनिवृत्त्यर्थं**, तं दोषं टिप्पण्यां स्फुटीकुर्वन्ति **तमस** इत्यादि **परमेष्ठत्वा**दित्यन्तं, सुबोधिन्यां **गुणाधिकार** इत्यादि, तमो**गुणाधिकारो**ऽस्मै **सङ्कर्षणाय** भगवता दत्त इति मर्यादारक्षणार्थं तमोनिराकरणाय बलभद्रे कथनमित्यर्थः, **तदर्थ**मिति तरुकृतसेवार्थं, प्रकारान्तरेण व्याकुर्वन्ति **यद्वे**त्यादि, पुनस्ततोपि प्रकारान्तरेण व्याकुर्वन्ति **यद्वा यदि**त्यादि, एतेषां पक्षाणां **समुच्चय** एवेति ज्ञेयं, **तमः**पदस्य गुणत्रयोपलक्षकत्वे मानमाहु**र्विशेषे**त्यादि, तथा च गुणदूरीकरणे प्रकारविशेषप्रार्थनाभावाद् यथाकथञ्चित् स्वसम्बन्धसम्पादनेन **तथात्वाय** सम्पादितस्वकीयत्वसाफल्याय च नतिरिति ज्ञेयमिति भावः ॥ ५ ॥ **एतेलिन** इत्यत्र **परं वृक्षापेक्षये**त्यादेस्तात्पर्यं टिप्पण्यामाहु**र्देवापेक्षये**त्यादिना, सुबोधिन्यामेते **राजसा** इति विक्षेपधर्मकत्वाद् **राजसाः**, यत् पुनः पूर्वं तामसत्वमुक्तं तत् तामसराजसत्वमभिप्रेत्येति न विरोधः, प्रार्थनानपेक्षायां हेतुमाहु**र्यत** इत्याद्य **विवाद**मित्यन्तं, अनुपथभजनप्रयोजनमाहुः **प्रभूणा**मित्यादि, **एवमेतेपि भ्रमरभाव**मिति, तथा च "न कर्मबन्धनं जन्म वैष्णवानां च युज्यते विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिण" इति**गारुड**वाक्यान्नैषां 'कर्मबन्धन'त्वं भ्रमरत्वं किन्तूक्तहेतुकमिति न दोष इत्यर्थः, **गूढ**मिति "मनुष्यभावेन गूढं मां", **तामसा एव** हीत्यादि, अत्रैवं भाति, "यजन्ते सात्त्विका देवा"निति**गीता**वाक्ये तत्तद्गुणवतां तत्तद्गुणकदेवभजनमुक्तं **पञ्चमस्कन्धे** च शिवस्य सङ्कर्षणभजनमेव सति यद्यपि महादेवादिभजनं प्राप्नोति तथापि त एतत्समा भूतगणावृता इति दुःसङ्गविशिष्टा इति नैतेषां सेव्याः ब्रह्मादयस्तु विजातीयत्वान्न सेव्या अन्ये सजातीयास्तु निकृष्टाः अतो **मुनित्वात्** सर्वमिदमवगत्यानन्यगत्या गूढमपि त्वामेव भजन्त इत्यर्थः, पक्षान्तरमाहु**रन्यथे**त्यादि, **अन्यथे**ति योग्यत्वेपि भजनाकरणे ॥ ७॥ **धन्येय**मित्यत्र नन्वन्यप्रकारकनिरूपणं बलभद्रबोधनाय भवतु नाम तथापि "गोप्योन्तरेणे"त्यादि त्वसम्भावितमेवेति तत् किमिति वदतीत्याशङ्क्य तन्निरूपणतात्पर्यमाहु**रावेशिन** इत्यादि, **सम्यग् भावयतो**त्यात्मान तत्त्वेन **भावयति, तेषा**मिति भजनकर्तृणां, **भगवद्भोग्याना**मिति गोप्यतिरिक्तानामिति ज्ञातव्य'मक्षण्वता'मित्याद्यग्रिमेण "कृष्णो रेमे" इत्यत्र भगवत एव भोगकर्तृत्वोक्त्या, चान्यथा विरोधः स्यात्, **भगवद्भोग्या**पदेन तदतिरिक्ताः सुखेन स्वीकरोतु । भगवदावेशाच्च पुष्पादिग्रहणदोषः परिहृत इति न काप्यनुपपत्तिरत एवाग्रिमाभासे 'तत्रत्याना'माधिदैविकवृन्दावनस्थानां 'स्वरूपं' मदुपभोग्यमेवेदमितिरूप'मर्था'न्निरूप्य 'तादृशे' स्वयं 'क्रीडां कृतवा'नित्युक्तं, अन्यथा वृन्दावनस्वरूपनिरूपण एव तत्प्राप्तेरस्य निरूपितत्वात् पुनस्तदुक्तिरार्थिकेत्वोक्तिश्च निरर्था स्यात्, नित्यस्वावेशेन चान्यभावोत्पत्त्यभावात् तदस्वीकारेणापराधसम्भव इति तथा **क्वचित् क्रीडापरिश्रान्त**मित्यत्र या **क्रीडा** सा तु मल्लयुद्धरूपा तथैव **विवृतौ** दृश्यमानत्वादिति सर्वमवदातम् ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अहो इत्यत्र **अवान्तरभेददर्शन**मिति दोषाभावार्थं सजातीयत्वात् **सङ्कर्षण एव नमस्य** इति **भगवदंशावतारभेदज्ञान** वृक्षाणामित्यर्थः, **प्रदर्शने**नेति 'अमीनमन्ती'तिप्रदर्शनेनेत्यर्थः, **चेतनत्व**मिति नमनाच्चेतनत्वं, 'असौ लोक' इत्यादिष्वदस्शब्दस्य पारलौकिकपदार्थवाचकत्वेन अमीपदादाधिदैविकत्वं च सूचितमित्यर्थः, **देवकार्यसाधक** इति यज्ञप्रतिबन्धकासुरनिवारणेन यज्ञसाधक इत्यर्थः, **अत एवे**ति तमोपहत्यर्थं नमनकथनादित्यर्थः, **नोक्त** इति कृतस्तु चतुर्व्यूहविशिष्टपुरुषोत्तमनमस्कारः, तन्मध्ये सङ्कर्षणमात्रनमस्कारोत्र भगवता उक्त इत्यर्थः **मूलभूतं चे**ति देहिकारणीभूतं तमो यावद्देहं न गच्छतीत्यर्थः, **शिष्ट**मिति रसानुभावनमित्यर्थः, **तदर्थ**मिति रसानुभावनार्थमित्यर्थः, **वृन्दावने**ति मूले जन्मन आत्मीयत्वमुक्तं तदनेन साधितं, उत्पत्तिमत आत्मीयत्वे उत्पत्तेर्हेतुत्वाज् जन्मन आत्मीयत्वमुक्तं, तथा च वृन्दावनस्वरूपभूतानामात्मीयत्वे किं वाच्यमिति भाव इत्यर्थः, **वक्ष्यति चे**ति भगवदीयत्वमत्र सूचितं अग्रिमवाक्याभ्यां वक्ष्यति चेत्यर्थः ॥ ५ ॥ **एतेलिन** इत्यस्याभासे **विज्ञापन**मिति, भगवते स्वदोषाभावगुणविज्ञापनमित्यर्थः, व्याख्याने, **तामसा** इति वृक्षवदेतेषामपि स्वरूपाज्ञानसम्भवादिति भावः, **राजसा** इति रसोद्दीपका इत्यर्थः, **प्रार्थना**त्विति स एव तमोपहतिरूपो दोषाभावो गुणश्च सेवारूपः सर्वत्रानुसन्धेयः, परन्त्वत्र यशसः स्वत एव दोषनिवारकत्वात् प्रार्थना नापेक्ष्यत इत्यर्थः, गानस्य सेवारूपगुणत्वं विवृण्वन्ति **प्रभूणा**मिति, **अग्रे वने** चेति सात्त्विकभावहेतौ रहःस्थले इत्यर्थः, **अन्यथे**ति उच्चैःशब्दे सर्वेषां ज्ञानसम्भवादिति भावः, **अनुग्रह** इति आत्मीयत्वं माननीयमित्यर्थः ॥ ६ ॥ नृत्यन्तीत्य **तासां शब्देन चे**ति हरिणीनां स्वरूपेण तासां शब्देन च महानानन्द इत्यर्थः ॥ ७ ॥ **धन्ये**त्यस्याभासे **स्तौती**ति स्तुतिरुत्कर्षाधायकगुणवर्णनं, तथा चोत्कर्षार्थं दोषाभावं गुणांश्च वर्णयतीत्यर्थः, व्याख्याने, धनं भगवांस्तत्सम्बन्धो यथाधिकारं सर्वत्र ज्ञेयः, ननु **कथमस्ये**ति आलिङ्गनस्यापि शब्दसूचितं दुर्लभत्वं कथमित्यर्थः, **प्रीणिता** इति धनयोग्यताकथने तत्सम्बन्धेन धनधर्मप्रीतिजनन सूचितमितिभावः, **अन्यथे**ति अधुनावेशाभावे इत्यर्थः, **अर्था**दिति 'आवेशिनः सर्वभावेने'त्यादिनोक्तप्रयोजनाद्धेतोस्तत्सिद्धयर्थ मित्यर्थः, **बलभद्रबोधनं** बलभद्रपरत्वेन बोधनमित्यर्थः, इत्याहेति इदं निरूप्य इदं कृत्वा क्रीडां कृतवानितिहेतोस्तदनन्तरं रमणमाहेत्यर्थः, तथा च व्याख्याने अध्याहारनिषेधेप्यार्थिकमानन्तर्यमिति भावः ॥ ८ ॥

(५) भगदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

नृत्यन्त्यमीत्यत्र **आगत** इति का० १३१¼, १३२¼। अत्र शिखिनां हरिणीनां कोकिलानां च क्रमेण तोषः प्रियार्थनिवेदनं स्तुतिश्चोक्ता ॥ ७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भगवदुक्तिमेव दर्शयति अहो इति। अहो आश्चर्यं वृन्दावनस्य माहात्म्यं यत्रत्यानां वृक्षाणामपि विवेकिनामिव व्यवहार इत्यर्थः। तदेव स्पष्टयति—हे देववर ! अमी वृक्षा आत्मनः शिखाभिः शाखाभिः सुमनः फलार्हणं पुष्पफलादिपूजोपकरणमुपादाय समर्प्य अमरैर्ब्रह्मादिदेवैरप्यर्चितं ते तव पदाम्बुजं नमन्तीत्यन्वयः। एवं नमस्कारे हेतुमाह—तम इति। यद्यस्मात् अमीषां तमसः अज्ञानस्य, पापस्य वाऽपहत्यै विनाशाय ब्रह्मादिदुर्लभं वृन्दावने भवता तरुजन्म कृतमित्यर्थः। अनेन बलभद्रस्य वस्तुतः स्वाभिन्नत्वं सूचितम् ॥५॥ तत्रत्यान् जङ्गमान् स्तौति एते इति द्वयेन। एतेऽलिनो भ्रमरा लोकप्रतीत्या झङ्कारमिव कुर्वन्तोऽपि वस्तुतस्तव यशो गायन्तोऽनुपदं पथि पथि त्वां भजन्ते। यशोगाने हेतुमाह—अखिललोकतीर्थमिति। वक्तृश्रोतृसर्वजनानां शोधकमित्यर्थः। यशसः शोधकत्वे भगवतो भजनीयत्वे च हेतुत्वेन सम्बोधयति—आदिपुरुषेति। ननु 'एते जातिहीनाः कथं यशो ज्ञास्यन्ति' इत्याशङ्क्याह प्राय इति। हि यस्मात् अमी भ्रमरा मुनिगणा भवदीयेषु भवत्सेवकेषु मुख्याः। ननु 'मम भक्ता मुनिगणाः कथं नीचां योनिं प्राप्तवन्तः ?' तत्राह—गूढमिति। त्वयि मनुष्यवेषेण निगूढे सति मुनयोऽप्यलिवेषेण निगूढास्त्वां भजन्ति, न न त्यजन्तीत्यर्थः। ननु 'तर्हि प्रकटं देवान्तरमेव कुतो न भजन्ति ?' तत्राह—अनघेति। अनघो निर्दोषश्चासावात्मनः स्वस्य दैवं च तं भजन्ति। नह्येवंभूतो भवान् सेवकैस्त्यक्तु शक्य इति भावः ॥ ६ ॥ हे ईड्य स्तुत्य ! अमी शिखिनो मयूरा मुदा नृत्यन्ति नृत्येनैव गृहमागताय ते तुभ्यं प्रियं कुर्वन्ति, तथा हरिण्योऽपि गोप्य इव गृहमागताय ते तुभ्यमीक्षणेन प्रियं कुर्वन्ति, तथा कोकिलगणा अपि गृहमागताय ते सूक्तैः स्तोत्ररूपैर्मधुरशब्दैः प्रियं कुर्वन्ति। अत एते वनौकसो वनवासिनो निकृष्टजातयोऽपि भ्रमरादयो धन्याः कृतार्थाः। तत्र हेतुमाह—इयानिति। हि यस्मात् स्ववशवर्तिपदार्थस्य स्वगृहमागताय महते निवेदनाग्रहरूपः सतां सदाचारनिष्ठानां निसर्गः स्वतः सिद्धः स्वभावः ॥ ७ ॥ एवं तत्तत्कर्तृकसेवया तांस्तान् स्तुत्वा स्वकर्तृकप्रसादविषयान् स्तौति—धन्येति। तव पादस्पर्शादियं धरणी अद्य धन्या। तथा त्वत्पादौ स्पृशन्तीति त्वत्पादस्पृशस्तृणवीरुधश्च धन्याः। तथा तव करजैर्नखैरभिमृष्टाः द्रुमलताश्च धन्याः। तथा दयासहितावलोकनैर्नद्योऽद्रयः खगा मृगाश्च धन्याः। तथा तव भुजयोरन्तरेण कृत्वा भुजमध्ये वक्षःस्थले आलिङ्गनं प्राप्य गोप्योऽपि धन्याः। ननु कथमालिङ्गनस्यैवं माहात्म्यम् ?' तत्राह—यत्स्पृहा श्रीरिति। लक्ष्म्या अपि यस्यालिङ्गनस्य स्पृहा भवति ॥ ८ ॥

अन्वितार्थप्रकाशिका

अहो इति ॥ अत्र बाल्ये सख्यांशप्राबल्येन अग्रजत्वस्य गौणत्वात्तादृशान्येव वचांसि सख्ये नर्मापि स्तुतिरीत्यैव अग्रजांशसद्भावात्। अहो हे देववर ! अमी वृक्षाः यत् येन तमसा पापेन तरुजन्म कृतं तस्य आत्मनः तमसः अपहत्यै शिखाभिः शाखाभिः सुमनःफलार्हणं पुष्पफलादिपूजोपकरणमुपादाय समर्प्य अमरैर्ब्रह्मादिदेवैरर्चितं ते तव पादाम्बुजं नमन्ति। यद्वा। यद्यस्मात् अमीषां तमसः अज्ञानस्य पापस्य वाऽपहत्यै विनाशाय ब्रह्मादिदुर्लभं वृन्दावने भवता तरुजन्म कृतमित्यर्थः ॥ ५ ॥ एते इति ॥ हे आदिपुरुष ! एते अलिनो भ्रमराः झङ्कारं कुर्वन्तोऽपि वस्तुतः अखिललोकस्य तीर्थं शोधकं तव यशो गायन्तोऽनुपदं पथि त्वां भजन्ते। हि यतः अमी भ्रमराः प्रायः भवदीयेषु भवत्सेवकेषु मुख्याः मुनिगणा एव। अतः हे अनघ ! वने गूढमपि आत्मनो दैवं त्वां न जहति अलिवेषेण निगूढास्त्वां भजन्ति ॥ ६ ॥ नृत्यन्तीति ॥ हे ईड्य ! गृहमागताय गृहमागतं त्वां प्रसादयितुम्। "क्रियार्थे"ति चतुर्थी। अमी शिखिनो मयूराः मुदा नृत्यन्ति तथा हरिण्योऽपि गोप्य इव ईक्षणेन प्रियं कुर्वन्ति तथा कोकिलगणाः सूक्तैर्मधुरशब्दैः प्रियं कुर्वन्ति। अत एते वनौकसो वनवासिनो निकृष्टजातयोऽपि भ्रमरादयो धन्याः कृतार्थाः। हि यस्मात् इयान् गृहागतसत्काररूपः सतां निसर्गः स्वतः सिद्धः स्वभावः ॥ ७ ॥ धन्येति ॥ तव पादस्पर्शादियं धरण्यद्य धन्या तथा त्वत्पादौ स्पृशन्तीति त्वत्पादस्पृशस्तृणवीरुधश्च धन्याः। तथा पुष्पादित्रोटनार्थं तव करजैर्नखैरभिमृष्टाः द्रुमलताश्च धन्याः। तथा दयासहितावलोकनैर्नद्योऽद्रयः खगा मृगाश्च धन्याः। तथा श्रीरपि यद्भुजान्तरं स्पृहयति इति यत्स्पृहा भवति तेन तव भुजयोरन्तरेण कृत्वा भुजमध्ये वक्षस्थले आलिङ्गनं प्राप्य गोप्योऽपि धन्याः। अत्र पौगण्डेऽपि कदाचित्कैशोराविर्भावाद्रहसि व्रजबालाभी रेमे इति सूचितम्। अग्रिमश्लोके सानुग इत्यस्य अनुगाभिः सहित इति ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

बलदेवव्याजेन स्वमाहात्म्यद्योतनाय स्वसंबंधवतस्तरून् प्रशंसन्नाह अहो इति संबोधने आश्चर्ये वा देवेभ्यो ब्रह्मशिवादिभ्यो रः श्रेष्ठस्तत्संबुद्धौ हे संकर्षण अमी द्रुमाः सुमनांसि पुष्पाणि फलानि च तान्येवार्हणं पूजनोपकरणं शिखाभिः शाखारूपैः शिरोभिः

गृहीत्वा ते पादपद्मं नमंति किमर्थं यत् येन तमसा आत्मनः स्वस्य तरुरूपं जन्म कृतं तस्य तमसः पापस्य अपहत्यै निवारणाय नमन्तीति संबंधः ॥ ५ ॥ हे आदिपुरुष अनुपदं प्रतिक्षणं भजंते हे अनघनिष्पाप भवदीयेषु भक्तेषु मुख्याः भ्रमरवेषेण गूढा मुनयः गोपवेषेण गूढं गुप्तं आत्मदैवं आत्मनः स्वस्य दैवं परमभाग्यं त्वां वनेपि न जहति न त्यजंति ॥ ६ ॥ शिखिनो मयूराः हे ईड्य ईडितुं स्तोतुमर्ह मुदा हर्षेण गोप्यो यथा तथा हरिण्यः ईक्षणेन मनोहरेण प्रेमगर्भितावलोकनेन ते प्रियं पूजनं कुर्वंति सूक्तैः सुंदरशब्दैः गृहमागताय तुभ्यं सत्कारं कुर्वंति एते वनौकसः धन्याः संति कुतः यतः सतां साधूनां इदं परिमाणमस्येति इयान् निसर्गः स्वगृहं प्राप्ते पूज्ये स्वसामग्न्यनुसारेण सत्कारः समर्पणरूपः स्वभावः॥७॥ रामस्य स्वावतारत्वात् स्वाभेदेन श्रीप्रभृति संबंधं वर्णयन् हर्यादि धन्यतामाह धन्येति इयं भूः तव पादचारेण धन्या धन्येति ईयमिति च पदं वचनविपरिणामेन सर्वत्र योज्यं त्वदित्यत्र व्यत्ययेन षष्ट्यार्थे पंचमी न तु समासः तेनाग्रेप्यन्वयो बोध्यः त्वत् तव पादौ स्पृशंतीति तथा तृणानि वीरुधो भूतलताश्च करजैर्नखैः अभिमृष्टाः पुष्पग्रहणाय स्पृष्टाः द्रुमलतास्तरुलताः सदयैः दयासहितैः तवावलोकनैः एते अवलोकिताः श्रीरपि यत्स्पृहा यस्मै हृदयकमला यस्पृहयति आलिंगितुमिच्छतीति तथा भुजयोरंतरेण हृदयेन स्पृष्टाः गोप्यो धन्याः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वयमादिपुरुषः सन्नपि लोकमर्यादाख्यापनार्थमवतीर्णत्वात् स्वशेषभूतमपि शेषमग्रतोऽवतीर्णत्वमात्रेण स्वतोधिकमिव संभावयन्नाहाहो इत्यादिचतुर्भिः ॥ अहो इति ॥ हे देववर, अमरैर्देवैरर्चितं पूजितं' देववराश्च तेऽमराश्च तैरर्चितमिति वा । ते तव पादाम्बुजं चरणकमलं, अमी तरवः' सुमनः फलार्हणं पुष्पफलादिरूपं पूजासाधनं उपादाय, यत् येन तमसा, आत्मनः तरुजन्म, कृतं संपादितं, तमोपहत्यै तस्य तमसो विनाशाय, शिखाभिः स्वेषां मूर्द्धस्थानीयाग्रभागैः, नमन्ति त्वां प्रणमन्तीत्यर्थः । अहो अत्याश्चर्यमिदम् ॥५॥ एत इति ॥ हे आदिपुरुष, एते अलिनो भृङ्गाः, अखिललोकतीर्थं सकलजनपावनं, तव यशः, गायन्तः, सन्तः, अनुपदं भजन्ते । तिरश्चां कथमेवं ज्ञानं तत्राह । अमी अलिनः, प्रायः प्रायेण, भवदीयमुख्याः भगवतस्तव भक्तेषु मुख्याः, मुनिगणाः सन्त्येव । अत एव, अनघो निर्दोष आत्मा येषां तेषां दैवं परमगतिरूपस्तं, अनघेति पृथक् संबोधनं वा । तदा आत्मदैवं स्वान्तर्यामिणमिति । गूढं गोपवेषेणाच्छादितस्वपरमेश्वरभावं, त्वां वने अपि, न जहति न त्यजन्ति ॥ ६ ॥ नृत्यन्तीति ॥ हे ईड्य स्तुत्य, अमी शिखिनो मयूराः, मुदा अत्यानन्देन, नृत्यन्ति । तथा हरिण्यः गोप्य इव, ईक्षणेन, ते तव, प्रियं कुर्वन्ति । तथा कोकिलानां गणाः, गृहं स्वभवनं, आगताय ते तुभ्यं, प्रियं सूक्तैः कर्णरम्यैर्वचनैः, कुर्वन्ति च । अत एवैते वनौकसः धन्याः एव । तथा हि । सतां सज्जनानां, निसर्गः स्वभावः, इयान् । स्वगृहागताय मृदूक्त्यादिभिः प्रियसंपादनं बहुमानप्रदानमेतावान् सज्जनस्वभाव इत्यर्थः ॥७॥ धन्येति ॥ अद्य इयं, धरणी पृथ्वी, धन्या । तृणानि च वीरुधश्च ताः अपि, धन्याः । कुतः । यतः त्वत्पादस्पृशः नित्यं त्वत्पादस्पर्शं प्राप्नुवन्ति ततो धन्या इत्यर्थः । तथा द्रुमास्तरवश्च लताः प्रतानिन्यश्च ता अपि, धन्याः । कुतः । यतः करजाभिमृष्टाः तव नखैः, संस्पृष्टाः, ततो धन्या इत्यर्थः । तथा नद्यः कालिन्द्यादयः, बहुवचनं कालिन्दीसंपृक्तेतरनदीबोधकम् । अद्रयः गोवर्द्धनः, बहुवचनं तदुपरि वर्त्तमानद्रुमाद्यभिप्रायकम् । खगाः नानाविधा हंसादयः पक्षिणः, मृगा आरण्याः पशवः, तव सदयावलोकैः, धन्याः । त्वया दयापूर्णदृशा वीक्षितत्वाद्धन्या इत्यर्थः । तथा गोप्यः अपि, तव भुजयोः अन्तरेण, धन्याः । त्वया वक्षसा आलिङ्गितत्वात् धन्या इत्यर्थः । कथंभूतेन भुजयोरन्तरेण । श्रीः स्वयं लक्ष्मीरपि, यस्मिन् भुजान्तरे स्पृहा यस्यास्तथाभूता भवति, तद्विधेनेति संबन्धः ॥८॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अहो इति : १०. १५. ५.

भो राम यस्त्वमनिशं विगतान्यकृत्यो यन्मातरं वहसि मूर्ध्नि भरस्खलन्तीम् ।
प्राप्तं तमन्तिकमवेक्ष्य भवन्तमेते वृक्षा नमन्त्युचितमेव कुलीनमूलाः ॥ १३ ॥

नानानेत्रजुषो जटाभरभृतो दिव्योल्लसत्सफलाः सत्पत्राः स्थिरविग्रहा रसहृदः शाखोन्मुखा ये क्षमाः ।
स्वाराड्वच्च तपस्विवच्च विधिवद् भूपालवच्छूरवद् विद्वद्वद् द्विजवच्च सत्पदरतिस्तेषां क्षमाशालिनाम् ॥ १४ ॥

दृष्ट्वा गोत्रोद्धारकं त्वामिमेऽपि गोत्रोद्भूताः सन्नतास्त्वत्पदाब्जे । तच्छ्रीरामालोकयैनान् स्वपुत्रैस्तुल्यानेवं तद्दयावानवोचत् ॥१५॥

प्रत्येकं गुरु-देवता-नरपतीनस्मिन्नपूर्वेक्षितान् पश्येज्जातु न रिक्तपाणिरिह तु त्रित्वावलीढो भवान् ।
भूभृत्त्वादिति संविचिन्त्य तरवो भूसंभवाः साध्विमे त्वां श्रीराम नमन्ति पल्लवकरश्लिष्यत्फलोपायनाः ॥ १६ ॥

दुष्टानेककुजन्मिनां निवसनं ते भारकृद् भूभृतः श्रीमद्राम यथा ततोऽप्यतितरां भारापनोदक्षमः ।
आवासश्च परोपकृत्यविरत-व्यापारितात्माऽखिलस्वेष्टानामपि वर्तते त्वमिति विभुस्तं किं तथाऽदर्शयत् ॥ १७ ॥

लघूनवितगोगणानपि निरीक्ष्य नः सम्प्रति नमन्त्युरुफलार्पणैः सतत-विप्रसङ्गा इमे ।
अहो वननिवासिना-मतिथिसत्कृतिप्रेमता सुविष्णुपदगामिता तदुचितेति मन्यामहे ॥ १८ ॥

एतेऽलिन इति : १०. १५. ६.

नाम्ना मुनिर्नहि मुनिर्मुनिराट् स एव यस्त्वच्युताच्युत–यशश्रय–गानचित्तः ।
श्रीमत्पदाम्बुजरतिः स हि कीदृशोऽपीत्येतत् स्फुटं मुनिपदव्यपदेशतोऽली ।। १९ ।।
न चोत्तमे जन्म कुले निदानं मदृक्प्रसादे जगतीह किन्तु । सदागमान्तर्मधुरोक्तितेति प्राकार्यली तादृशि तत्स्फुटार्थम् ।। २० ।।
सदागमलसन्तो ये सुमनोरससेविनः । श्रुत्यानन्दगिरो देव मुनयो हि कथं न ते ।। २१ ।।

नृत्यन्त्यमीति : १०. १५. ७.

मद्बर्हभारः पतितोऽपि येन मौलावलङ्कारपदं प्रणीतः । युक्तं मयूराः प्रसमीक्ष्य तं त्वां नृत्यन्त्यमी राम घनप्रमोदाः ।। २२ ।।
विलसद्विषयोल्लासा हरिण्यो हरिणाश्रिताः । गोपीवत्प्रियमप्यासां सिद्धं रामावलोकनम् ।। २३ ।।
यस्यान्यपुष्टस्य न शक्तिरन्नदाने भृशं तेन मनोज्ञवाचा । कार्याऽतिथेः सत्कृतिरादरेणेत्यभूद् विविक्तं परपुष्टसूक्तैः ।। २४ ।।
ये दृष्ट्वाऽतिथिमागतं निजगृहे वाचा रसालोच्चया सत्कुर्वन्त्यथ ये च तत्प्रियदृशो ये वा तदङ्घ्रिस्पृशः ।
येषां वाऽतितरां फलार्पणमतिर्नित्यं त एवावनौ सत्याः सन्त इति प्रकाशितमभूत् तत्तत्पदोत्कीर्तनात् ।। २५ ।।

धन्येयमिति : १०. १५. ८.

मत्पालको मदनुवर्तनमीक्षमाणो दिष्ट्याऽद्य मामधिगतो यदनन्त एषः ।
क्लेशापनोदनमितो ह्यचिरेण भूयादित्यन्तरेऽवनिरियं बहुधा कृतार्था ।। २६ ।।

गोप्य इतिः

अध्यासो यस्य यस्मिन् मनसि दृढतरो वर्तते वस्तुजाते तद्वक्त्रात्तद्विनिर्यात्यवशमसमये भूरिसंस्कारयोगात् ।
एव गोपीगतात्मा सहि विभुरवदद् गोपिकाधन्यतोक्ति नो चेदुद्दिश्य रामं विपिनगतनुतौ तादृगुक्तःचप्रसक्तिः ।। २७ ।।
न वृक्षैः प्रणामः स्तुतिः षट्पदैर्वाकृता सूक्तमुक्तं चनान्यप्रपुष्टैः । कृपावत्सलत्वं तथात्वेन मत्वाऽनुगृह्णासि दीनानिहेत्येव सत्यम् ।।२८।।
अनादृत्य श्रेयः पदमपि पदं स्वं कमलभूः कथं वा लुब्धोऽभूदधमतरतर्वादिजनिषु ।
निरस्तेयं शङ्का यदिह विपिने यन्मुखसुरस्तुतोऽपीशस्तेषां स्तुतिकृदभवत्तत्पदगतिः ।। २९ ।।

कृष्णप्रिया

भगवान श्रीकृष्ण ने कहा :— देवशिरोमणे ! यो तो बड़े-बड़े देवता आपके चरणकमलों की पूजा करते हैं; परन्तु देखिये तो ये वृक्ष भी अपनी डालियों से सुन्दर पुष्प और फलों की सामग्री लेकर आपके चरण कमलों में झुक रहे हैं। क्यों न हो, इन्होंने इसी सौभाग्य के लिये तथा अपना दर्शन एवं श्रवण करने वालों के अज्ञान का नाश करने के लिए ही तो वृन्दावनधाम में वृक्षयोनि ग्रहण की है। इनका जीवन धन्य है ।। ५ ।। आदिपुरुष ! यद्यपि आप इस वृन्दावन में अपने ऐश्वर्यरूप को छिपाकर बालकों की-सी लीला कर रहे हैं, फिर भी आपके श्रेष्ठ भक्त मुनिगण अपने इष्टदेव को पहचानकर यहाँ भी प्रायः भौरों के रूप में आपके भुवन-पावन यश का निरन्तर गान करते हुए आपके भजन में लगे रहते हैं। वे एक क्षण के लिये भी आपको नहीं छोड़ना चाहते ।। ६ ।। भैया ! वास्तव में आप ही स्तुति करने योग्य हैं। देखिये, आपको अपने घर आया देख ये मोर आपके दर्शनों से आनन्दित होकर नाच रहे हैं। हरिनियाँ मृगनयनी गोपियों के समान अपनी प्रेमभरी तिरछी चितवन से आपके प्रति प्रेम प्रकट कर रही हैं, आपको प्रसन्न कर रही हैं। ये कोयलें अपनी मधुर कुहू-कुहू ध्वनि से आपका कितना सुन्दर स्वागत कर रही हैं। ये वनवासी होने पर भी धन्य हैं। क्योंकि सत्पुरुषों का स्वभाव ही ऐसा होता है कि वे आये अतिथि को अपनी प्रिय-से-प्रिय भेंट कर देते हैं ।। ७ ।। आज यहाँ की भूमि अपनी हरी-हरी घास के साथ आपके चरणों का स्पर्श प्राप्त करके धन्य हो रही है। यहाँ के वृक्ष लताएँ और झाड़ियाँ आपकी अँगुलियों का स्पर्श पाकर अपना अहो भाग्य मान रही हैं। आपकी दया भरी चितवन से नदी, पर्वत, पशु, पक्षी सब कृतार्थ हो रहे हैं, और वन की गोपियाँ आपके वक्षःस्थल का स्पर्श प्राप्त करके, जिसके लिये स्वयं लक्ष्मी भी लालायित रहती हैं, धन्य-धन्य हो रही हैं ।। ८ ।।

[1]श्रीशुक उवाच

एवं [2]वृन्दावनं [3]श्रीमत् कृष्णः प्रीतमनाः पशून् । रेमे सञ्चारयन्नद्रेः सरिद्रोधस्सु सानुगः ॥ ९ ॥
क्वचिद् गायति गायत्सु मदान्धालिष्वनुव्रतैः । उपगीयमानचरितः [4]सखि सङ्कर्षणान्वितः ॥ १० ॥
क्वचिच्च कलहंसानामनु कूजति कूजितम् । अभि नृत्यति नृत्यन्तं बर्हिणं हासयन् क्वचित् ॥ ११ ॥
मेघगम्भीरया वाचा नामभिर्दूरगान् पशून् । क्वचिदाह्वयति प्रीत्या गोगोपालमनोज्ञया ॥ १२ ॥

कर्दमक्षमा

अन्वयः—एवं श्रीमत् वृन्दावनं (प्रति) प्रीतमनाः कृष्णः सानुगः अद्रेः सरिद्रोधःसु पशून् सञ्चारयन् रेमे ॥ ९ ॥ अनुव्रतैः उपगीयमानचरितः संकर्षणान्वितः स्रग्वी मदान्धालिषु क्वचित् गायत्सु गायति ॥ १० ॥ क्वचित् कलहंसानां कूजितम् अनुकूजति क्वचित् हासयन् नृत्यन्तं बर्हिणं अभिनृत्यति ॥ ११ ॥ गोगोपालमनोज्ञया मेघगाम्भीरया वाचा नामभिः दूरगान् पशून् प्रीत्या क्वचित् आह्वयति ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं श्रीमद्वृंदावनं प्रति प्रीतः सन्नद्रेः समीपवर्तिसरित्तटेषु पशून्संचारयन्सानुगो गोपैः सह वर्तमानः प्रीतमनाः रेमे ॥९॥ तामेव रतिमाह क्वचिदित्यादिभिर्दशभिः ॥ १० ॥ बर्हिणं नृत्यंतमन्वभिनृत्यति बर्हिणमभिमुखो नृत्यतीति वा। सखीन्हासयन् ॥ ११-१२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवम् एवं प्रकारम् । अद्रे र्गोवर्द्धनस्य । यद्वा–इत्थमग्रजं परितोष्य गोप्योंतरेण भुजयोरिति निजोक्त्यैवोद्दीपितकंदर्पस्तत्संग एव गाः सखींश्च नियुज्य भोः श्रीमदीक्षणमत्र सुबलेन सार्द्धं गोवर्द्धनकंदरारोधसि विश्रम्यागंतास्मि त्वमग्रे कालिंदीरोधस्सु तावद्विहरेत्युक्त्वा ततो वियुज्य पौगंडेपि कैशोराविर्भावाद्रहसि व्रजबालाभिः सार्द्धं रेमे इत्याह–एवमग्रजं स्तुत्वा तद्द्वारैव पशून्वृंदावनं रयन्नद्रेः सरितो मानसगंगाया रोधस्सु रेम इत्यन्वयः। श्रीमती व्रजयोषिन्मुख्याऽस्यैव प्रीता प्रेमवती यस्मिन्सः कुलालकर्तृको घट इतिवत् प्रीतेत्यस्य विशेष्यत्वविवक्षया परनिपातः । अत एव प्रीतमनाः अनुगाभिः सखिभिः सहितः । व्याख्यानस्यास्य रहस्यत्वादेतस्यावरकं रत्नस्य कनकसंपुटमिव व्याख्यांतरमवतारिकां विनैवास्ति । तद्यथा श्रीमंतो बलदेवाद्याः प्रीता यस्मिन्सः । सानुगोनुगैस्सहितः । अन्यत्समानम् ॥९॥ या वृंदावने रतिः कृता तामित्यर्थः । अनुव्रतैः सखिभिः । स्रग्वी वनमालाधरः ॥१०॥ बर्हिणम् मयूरम् अभिनृत्यति तत्तुल्यं नृत्यति सर्वतो वा । मयूरतुल्यत्वं पक्षैर्विनाऽसंभवं मत्वार्थांतरमाह—अभिमुखेति । हासयन् हासं जनयन् ॥ ११ ॥ नामभिः प्रसूतिवारप्रयुक्तादिलक्षणैः—हे सूर्ये, हे सोमे । यद्वा—हे अश्विनि, हे यमुने, हे कृष्णे, हे पीते इत्येवं रूपैः । गवां गोपालानां मनसः प्रियया ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं सनर्मवर्णनादिप्रकारेण वृन्दावनं व्याप्य प्रीतः सन् "कालाध्वभावदेशानाम्" इत्यादिना कर्मत्वम् अद्रेः श्रीगोवर्द्धनस्य प्रीतत्वप्रीतमनस्त्वयोः सामान्यविशेषाभ्यां भेदः ॥ ९ ॥ प्रीतमनसो रतिं दर्शयन् वर्त्तमानप्रयोगेण साधारणदिनगतामेवाह - क्वचिदित्यादिना । पूर्वं "केचिद्वेणून्वादयन्तः" इत्यादिना बालकानामेव प्राधान्येन तत्तत्क्रीडोक्ता, इदानीं तु प्रीतमनस्त्वेन साक्षात् श्रीकृष्णस्यैवेति विशेषः, क्वचित् कस्मिंश्चित् (पथि सङ्कर्षणान्वित इति वा पाठः) पथि स्रग्वीति पाठे कस्मिंश्चित् प्रदेशे कदाचिदिति वा एवमग्रेऽपि मदेन श्रीवृन्दावनपुष्परसपानजेन श्रीभगवत्सान्निध्यसौभाग्यजेन वा अन्धेषु महामत्तेषु तादृशेष्वलिष्विति गानमाधुर्यमभिप्रेतं सङ्कर्षणशब्दः श्रीभगवता सह तस्यापृथक्तया गानाभिप्रायेण अनुव्रतैः तदेकप्रीतिपरैर्गोपैः अत्र भ्रमराणां स्वजातीयस्य स्वरमात्रस्य गानं श्रीभगवतस्तदनुसारिस्वरस्य तदुचितरागस्य च अनुव्रतानां तु तयोर्गीतबद्धतच्चरितस्य चेति मिथो गानमेलनं ज्ञेयम् ॥ १० ॥ कलवाक्यैरिति शुकादप्युत्तमजल्पनं बोधयति, एवं वल्गिवति च चशब्दो वल्गिवात समुच्चिनोति अर्थस्तथैव बर्हिणम् अभिलक्ष्यीकृत्य नृत्यति तदभिमुखः सन् नृत्यतीत्यर्थः । तेषां व्याख्याने उत्तरत्राऽप्यनुराकर्षणीयः तज्जातिनृत्येनैव तन्निर्जयात् सखीन् हासयन् ॥ ११ ॥ पशूनिति श्लेषेण श्रीकृष्णपार्श्वतो दूरं गत्वा निर्बुद्धित्वमुक्तं येन पूर्ववदात्मपश्चादेव तत्स्फुरणात् दूरगत्वज्ञानमपि न जातमिति भावः । मेघेति तद्गर्जितं लक्ष्यते तद्वद्गम्भीरयेति महापुरुषस्वभावत एव ॥ १२ ॥

---

[1] प्राचीनप्रत्यां "श्रीशुक उवाच" पाठो न दृश्यते । [2] वने कृष्णः श्रीमान् प्रीत०–गो. प्रे. टी. । [3] श्रीमत्पश्यन्प्रीत–वीर. ।
[4] स्रग्वी–श्रीधर. वंशी. ; सखि–वीर. विज. विश्व. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमीदृशं वर्णयन्नित्यर्थः; यद्वा, अनेन प्रकारेण; तत् प्रति प्रीतः सन्तुष्टः कृतप्रसाद इत्यर्थः ॥ ९ ॥ प्रीतमनसो रतिमेव दर्शयति क्वचिदित्यादिना, पूर्व्वं (भा. १०।१२।७)—'केचिद्वेणून् वादयन्तः' इत्यादिना बालकानामेव प्राधान्येन तत्तत्क्रीडोक्ता, इदानीन्तु प्रीतमस्त्वेन साक्षाच्छ्रीकृष्णस्यैवेति विशेषः । क्वचित् कस्मिंश्चित् पथि, 'स्रग्वी' इति पाठे कस्मिंश्चित् प्रदेशे कदाचिदिति वा। एवमग्रेऽपि । मदेन श्रीवृन्दावनपुष्परसस्य पानजेन श्रीभगवत्सान्निध्य-सौभाग्यजेन वा अन्धेषु सुखविशेषेण निमीलिताक्षेषु महामत्तेषु वा, तादृशेष्वलिष्विति गानमाधुर्य्यमभिप्रेतम् । संकर्षणशब्दः श्रीभगवता सह तस्यापृथक्तया गानाभिप्रायेण; तथा चोक्तम् (श्री भा. १०।८।१२)—'यदूनामपृथग्भावात् संकर्षणमुशन्त्यपि' इत्यनुव्रतैस्तदेकप्रीतिपरैर्गोपैरुप समीपे सर्व्वोपरितनत्वेन वा, गीयमानानि चरितानि यस्य; यद्वा, उपगीयमानमलिगानादप्युत्तमतया संश्लाघ्यमानं चरितमलिगानानुकारलक्षणं यस्य सः । एवमिदं विशेषणमग्रेऽपि पद्यपञ्चकं यावदनुवर्त्त्यम् ॥ १० ॥ कलवाक्यैरिति शुकादप्युत्तमजल्पनं बोधयति । एवं वल्गिवति च शरच्छेषेऽपि कोकिलकूजनं सर्वत्राश्रयश्रीवृन्दावन-स्वभावात् ॥ ११ ॥ च-शब्दो वल्गिवति समुच्चिनोति; अर्थस्तथैव बर्हिणमभिलक्ष्यीकृत्य नृत्यति, तदभिमुखः सन् नृत्यतीत्यर्थः । ह स्फुटम्; आसयन् तमेकोपवेशयन् । निर्ज्जित्य नृत्यादुपरमयन्नित्यर्थः; यद्वा, नायं साधु नृत्यतीति बर्हिणमेव प्रति सखीन् हासयन् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेव प्रपञ्चयति—क्वचिदित्यादिना । श्रीदामेत्यतः प्राक्तनेन । मदेन मधुपानमदेनान्धेषु भृङ्गेषु गायत्सु सत्सु स्वयं सखीन् हासयन् क्वचिदनुगायति अनुगैः उद्गीयमानं चरितं यस्य सखिभिः सङ्कर्षणेन चान्वितो रेमे क्वचित् कलहंसानां कूजतमनुकृत्य कूजति चुकूज । तथा नृत्यन्तं बर्हिणमभिनृत्यति अनु अभिनयं करोतीत्यर्थः । क्वचिन्मेघस्येव गम्भीरया वाचा सङ्केतितनामभिः सखीन् हासयन् दूरगान् पशूनाह्वयति आजुहाव कया गवां गोपानां च मनोज्ञया प्रीत्या तयोपलक्षितो वा ॥ १०–१२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कृष्ण एवम्विधमाहात्म्यं वृन्दावनमवाप्य रेमे इत्यन्वयः अद्रेः पादेषु सरितो नद्यः रोधःसु तीरेषु पशून् सञ्चारयन् ॥ ९ ॥ रतिप्रकारं दर्शयति–क्वचिदिति । अनुव्रतैरनुचरैः सखिभिः सङ्कर्षणेन चान्वितः अनुगतः ॥ १० ॥ हासयन् हासं जनयन् ॥ ११ ॥ नामभिः प्रसूतिवारप्रयुक्तादिलक्षणैः गवां गोपालानां मनोऽन्तःकरणं ज्ञापयन्त्या बोधयन्त्या मनोरमया वा ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवं सनर्मवर्णनादिप्रकारेण वृन्दावनं व्याप्य प्रीतः सन् ॥ ९–१० ॥ एवं प्रथमगोचारणादिप्रसङ्गे साधारणदिनगतां लीलामाह –क्वचिदित्यादिना । बर्हिणमभिलक्ष्यीकृत्य नृत्यति पशूनां दूरगातम–पश्चादेव श्रीकृष्णगमनस्फूर्तेः सत्त्वानां मध्ये यो व्याघ्रसिंहयोः भीतः तद्वच्चानुरौति स्म तेषामीषद्भयदर्शनकौतुकार्थमिति भावः ॥ ११–१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवमिति स्पष्टम् । यद्वा, इत्थमग्रजं परितोष्य गोप्योऽन्तरेण भुजयोरिति निजोक्त्यैवोद्दीप्तकन्दर्पस्तत्सङ्ग एव गाः सखींश्च नियुज्य भोः श्रीमदार्य्य ! क्षणमहमत्र सुबलेन सार्द्धं गोवर्द्धनकन्दरारोधसि विश्रम्यागन्तास्मि त्वमग्रे कालिन्दीरोधस्सु तावद्विहरेत्युक्त्वा ततो वियुज्य पौगण्डेऽपि कैशोराविर्भावाद्रहसि व्रजबालाभिः सार्द्ध रेमे इत्याह—एवमग्रजं स्तुत्वा तद्द्वारैव पशून् वृन्दावनं सञ्चारयन् अद्रेः सरितो मानसगङ्गाया रोधस्सु रेमे इत्यन्वयः। श्रीमती व्रजयोषिन्मुख्या सैव प्रीता प्रेमवती यस्मिन् स कुलालकर्तृको घट इति वत् प्रीतेत्यस्य विशेष्यत्वाविवक्षया प निपातः अत एव प्रीतमनाः अनुगाभिः सखीभिः सहितः व्याख्यानस्यास्य रहस्यत्वादेत स्यावरकं रत्नस्य कनकसम्पुटमिव व्याख्यान्तरमवतारिकां विनैवास्ति तद्यथा श्रीमन्तो बलदेवाद्याः प्रीता यस्मिन् सः सानुगः अनुगैः सहितः अन्यत् समानम् ॥ ९–१० ॥ बर्हिणम् अभिलक्ष्यीकृत्य नृत्यति सखीन् हासयन् बर्हिणामेव रसोल्लासयन् ॥ ११–१२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं श्रीमदवृन्दावनं प्रति प्रीतः सन् अद्रेः समीपम् इति शेषः सरिद्रोधःसु यमुनातटेषु च पशून् सञ्चारयन् सानुगः प्रीतमनाः रेमे ॥ ९ ॥ तदेव प्रपञ्चयति—क्वचिदित्यादिभिः ॥ १० ॥ हासयन् वयस्यानिति शेषः ॥ ११–१२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एवमग्रजस्तुतिविधया वृन्दावनं रेमे अकर्मकधातुना योगात् देशस्य कर्मत्वं, श्रीमन्तौ बलभद्रादयः प्रीता यस्मिन् सः अनुगैर्भृत्यैः सहितः अद्रेर्गिरिराजस्य सरितो मानसगङ्गाया रोधःसु पशून् सञ्चारयन् रहस्यार्थश्चायं एवमुक्तविधयाग्रजं स्तुत्वा गोप्या-

न्तरेणेति स्वोक्तिसमुद्दीपितस्मरो धेनुर्मित्राणि च **तस्मिन्** नियोज्य ससुबलोऽहमद्रिशोभां विलोक्य आगच्छामीति निवेद्य तद्द्वारा पशून् वृन्दावनं सञ्चारयन् । श्रीमती प्रीता प्रेमवती यत्र तादृशः तत एव प्रीतमनाः सानुगस्तदनुगाभिः सहितश्चाद्रेः सरिद्रोधःसु रेमे इति ॥ ९–१० ॥ नृत्यन्तं बर्हिणमभिनृत्यति सखीन् हासयन् ॥ ११–१३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कुसुमरसास्वादनमदेनान्धा अलिनोऽलयो वा तेषु **गायत्सु** क्वचित्क्वापि **गायत्यनुवृत्तैस्तत्कूजनाकृतस्वकूजनैरुपगीयमानचरित** इदं मुद्रणाभावादेवादिभिरित्यर्थः । अनुव्रतैर्गोपालैरिति व्याख्या सखीति स्तुत्यकृष्णेन सह छत्रिन्यायेन वा तदात्तमत्वेन स्तव्यतया सन्मतजनविशेषकतया नेतव्यं । सखीभिः सङ्कर्षणेन चान्वितोऽनुगतः ॥ ९ ॥ कूजितं कुजनमनु कूजति मयूरं बर्हिणं हासयन्पार्श्वस्थैर्लोकैरयं स्वरो न कृष्णस्वरवदित्युपहासयन् बर्हिणमिति वा ॥ १० ॥ **गोगोपालमनोज्ञया मनोहारिण्या मेघगम्भीरया वाचा** नामभिः स्वसङ्केतितैस्तन्मना जानातीति तथा ।११। चक्रोरक्रौञ्चक्रव्हभारद्वाजालिर्बर्हिणामित्यत्रान्तरविद्यमानमाह्वेति देहलीदीपन्यायेन सर्वान्वयि । चकोरेत्यादि बर्हिणान्तं गतं । चकोरादीनां सत्त्वानामिति सामानाधिकरण्यं । वंय्यधिकरण्येन तदितरेषां **सत्त्वानां** प्राणिनामिति वा । **अनु रौति** तद्रुतवद्रुतं करोतीत्यर्थः । सिंहव्याघ्रयोः सकाशाद्भीतवदनुरौति व्याघ्रो मां ग्रसत्यर आगच्छेति यं कञ्चित्प्रति शब्दं कराति ॥ १२ ॥

श्रीसुबोधिनी

एवं वृन्दावनस्वरूपं निरूप्यात्रत्यानां च स्वरूपमर्थाद् बलभद्रबोधनं च कृत्वा तादृशे वृन्दावने भगवान् क्रीडां कृतवानित्याहैवमितिदशभिः, पौगण्डवयसः पुरुषार्थचतुष्टयसाधककालरूपत्वादादौ पुरुषार्थचतुष्टयप्रतिपादनं क्रमेण ततो दशरसोद्भावनेन क्रीडापरमानन्दस्य दशधा रसो लोकेनुभूयत इति ब्रह्मानन्दापेक्षया भजनानन्दस्योत्तमत्वप्रतिपादनार्थं, तथा प्रथमं धर्ममाविष्कुर्वन् रतिं कृतवानित्याहैवम्रूपे **वृन्दावने कृष्णः पशून् सञ्चारयन् रेम** इतिसम्बन्धः, वृन्दावनगुणनिरूपणार्थमेव वचनानामुपयोगादेवमित्यनेनैव सम्बध्यते अतो निरूप्योक्त्वेत्यादिक्रिया नाध्याहर्तव्याः, शाब्दी च सङ्गतिरेवमित्यत्रैव योजनीया, यत्र रन्तुं मनो दधे यत्र चोवाच रेमे न्यानि च कृतवानिति महावाक्ये सर्वेषां सम्बन्धः, यदा पुनस्तत्तदभिमानिदेवताभिः सह रतिं **कर्तुमारम्भं** कृतवांस्तदा लक्ष्मीः स्वत एव समागतातो रमणमनुक्तसिद्धमेवेत्यनुभावा उद्दीपनविभावा व्यभिचारिणश्च निरूप्यन्ते, आलम्बनं तु लक्ष्मीरेव, नायकोत्कर्षमाह **कृष्ण** इति, सदानन्दो हि पुरुषोत्तमो मनश्च करणं, तस्यापि दोषनिवृत्तिपूर्वकं गुणा वक्तव्याः, तदाह **प्रीतमना** इति, प्रीतं निर्दुष्टं सन्तुष्टं मनो यस्य, **पशून् सञ्चारय**न्निति**धर्मः**, सम्यक् **चारणं** देशविशेषे, गह्वरादिवने वक्तव्ये स्वरमणं बाध्येतेत्युभयोरुपयोगार्थं देशविशेषान् निर्दिशत्यद्रेः **सरिद्रोधस्स्विति**, पर्वतसम्बन्धिन्यो याः **सरितस्तासां रोधस्सु** कूलेषु, तत्र हि हरिततृणानि भवन्ति प्ररूढानि च, पर्वते स्थित्वाग्रस्तात् स्थित्वा वा तासामन्यत्र गमनशङ्काभावाच्चारयन्नेव रमणं सम्भवति, अत एव **सम्यक् चारणं**, धर्मरस्तौ रक्षायां स्वाभिनिवेशे धर्मरमणयोर्हीनता स्यादिति तद्व्यावृत्त्यर्थमाह **सानुग** इति, अनु पश्चाद्गच्छन्तीत्य**नुगाः** सेवकास्तैः सहितः ॥ ९ ॥ एवं धर्मोद्भावनेन क्रीडामुक्त्वार्थोद्भावनेनापि क्रीडामाह **क्वचिदिति**, **मदान्धालिषु गायत्सु क्वचिद्** भगवानपि **गायति**, **अनुव्र**तैर्निजभक्तै**रुपगीयमानचरितश्च सखिसङ्कर्षणाभ्यां चान्वितः**, 'यदा खलु वै पुरुषः श्रियमश्नुते वीणास्मै वाद्यते' इतिश्रुतेर्वीणानुरणनस्थानीया भ्रमरा भवन्ति, **अर्थभोगेनैव** गीतमपि गायति, अन्यथा तद्रसोद्रेको न ज्ञापितः स्यात्, सर्वतश्च स एव स्तूयमानोपि भवति परिकरयुक्तश्च, परिकरा द्विविध इति **सखिसङ्कर्षणौ** निरूपितौ स्वसम्बन्धिनः कुलसम्बन्धिनश्चेति, ''बन्धुभिर्यान्न भुज्यत' इत्यर्थे तेषां सहभाव आवश्यकः, समीपे गानं स्तोत्रं **वार्थभोग** एव, **मुनीनां** भ्रमरत्वनिरूपणात् समीपे धाष्टर्याद् गानं न भविष्यतीति **मदान्धता** निरूपिता, **मदोत्र** भगवत्सान्निध्यानन्दो भक्तिरसोन्मादो वा वृन्दावने पुष्पेषु मकरन्दश्चरणसमर्पितेषु भक्तिरूप एवेति, **अनु व्रतं** येषामिति तेषामपि स्वसाम्यकरणं सर्वे सखायः सङ्कर्षणश्च सम्यगन्वयस्तेषामप्यर्थभोगः सम्यक् सम्पाद्यत इति, **एव वृन्दावने श्रीमान् कृष्णः प्रीतमना** इति पञ्चपदानि सर्वत्रानुवर्तन्ते ॥ १० ॥ एवमर्थलीलामुक्त्वा **काम**लीलामाह **क्वचिच्चेति** **कलहंसानां** कूजित**मनुकूजति**, कामे हि द्वयं कर्तव्यं कूजितं रसोद्गमनार्थं बन्धाश्च रसार्थं, तत्र मयूरस्य मयूर्या सह सम्बद्धस्यैव मत्तस्य गात्रविक्षेपे सर्वतो रस एकीभूय नेत्राभ्यां निर्गतो मयूर्या मुखे प्रविशत्यूर्ध्वं च रेतो निर्गच्छति ज्ञानद्वारा च, अन्ये सर्वे कामे प्राकृता एव रसाः, अत एव विचित्रं तत्र कार्यमुत्पद्यते, शब्दो मनःपूर्वक इति रसारसयोर्भेदकस्य हंसस्य मानसैकशरणस्य तादृशं भवति **कूजितं**, अत एव सर्वविलक्षणत्वं हंसे वक्तुं **कलहंस** उक्तः, स हि कलानां हंसः, बहूनामेकविधप्रतिपादकत्वेत दर्शनिष्णातत्वं भवति भगवांस्तु सर्वेषामेव **कूजितं** रसावान्तरभेदाविर्भावार्थम**नुकूजति**, **अभितश्च नृत्यन्तं बर्हिणं नृत्यति** यदि मयूरो मयूर्या सह रसेन नृत्यति, अन्यथा मेघादिदर्शनेन स्वभावतो वा यदि नृत्यति तदापि भगवान् नृत्यति रसाभासभावाभासनिरूपणार्थेन्यथा रसपुष्टो न भवेत् तदाह **हासयन् क्वचिदिति** कदाचिद् **बर्हिणं हासयन् नृत्यति** बाला बर्हिणं हसन्ति नायं सम्यक् नृत्यतीति, सर्वदैवमितिनिषेधार्थमाह **पुनः क्वचिदिति** ॥ ११ ॥ मोक्षलीलामाह **मेघगम्भीरयेति**, **वाचा दूरगान् पशून् नामभि**र्भगवान्

क्वचिदाह्वयतीतिसम्बन्धः, **भगवत्सायुज्यं मुक्तिश्च भगवद्दत्तैव भवति, सर्वशास्त्रनिरूपितानां साधनानां भगवति तत्तद्धर्मसम्बन्धजनकानां ततः प्रतिफलितानां भगवत्कृतानामेव साधकत्व**मितिसिद्धान्तः, ''यदनुस्मर्यते काले स्वबुद्ध्या भद्ररन्धन येनोपशान्तिभूताना'' मित्यत्र विशेषतो निरूपणात्, अतो **भगवन्नामस्मरणं कीर्तनं च भगवता नामग्रहणार्थं**, तदपि ग्रहणं सर्वेषां तापनिवर्तकरूपेण तद**पि** कृपयावसरे. यदा ते दूरं, गता भवन्ति, यथा ते साक्षात्कृतस्य भगवतो न गृह्णन्ति तथा भगवानपि **दूरगानेवाह्वयति,** पशवः सर्वथा गत्यन्तररहिताः स्वतो बुद्धिरहिताश्च, तदपि नामग्रहणं **प्रीत्यैव**, अन्यथान्यस्य विषयनिवारकत्वं न सम्भवति, प्रत्यक्षापेक्षया शब्दस्य दुर्बलत्वात्, सापि चेद् वाण्यलौकिकी । भवेत् तदालौकिकं फलं न प्रयच्छेदिति ज्ञापयितुं **गोगोपालमनोज्ञ**येत्युक्तं, गवां गोपालानां च मनोज्ञा भवति साक्षाद्वाणी, गोपाला गुरव इव गावोधिकारिण्य इव, उभयेषां मनोज्ञता पूर्वं ततः फलानुभवात्, इमामेव हि लीलां **भगवान्** मुक्तौ करोति, केवलवाचा समाह्वाने स्वाधिकारो न भात इति न निवर्तेतातो भिन्नभिन्नाधिकारिनिरूपणार्थं **नामभि**रितिबहुवचनं तदवान्तरसाधनपरिग्रहार्थं च, प्रथमत एव पशवस्ततोपि **दूरगा**स्ते चेद् **भगवता** स्वतो न मुच्यन्ते मुक्ता एव तिष्ठन्ति ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

एवंवृन्दावन इत्यस्यावतारिकायां, **तत्र प्रथमं धर्ममाविष्कुर्व**न्निति । अत्र हि भगवद्दास्यमेव मुख्यो धर्मः । स च वृक्षाणां भगवता निरूपितः । तथा चैवं 'वृन्दावने पशून्सचारयन् रेम' इति वाक्येन पूर्ववाक्यानां सम्बन्ध इति तादृशधर्मप्रकटनपूर्वकं रमणं महावाक्यार्थो भवति । स्वयं पशुचारणे क्रीडायां प्रतिबन्धः स्यादिति तदभावाय भगवत्कार्यं स्वयं गोपाः कुर्वन्तीति पशुचारणमपि सेवैवेति स्वधर्म एव, वैश्यानां चायं **धर्मो** भवत्येवेत्यर्थः समाज इति भावः ॥ ९ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

एवं वृन्दावनमित्यत्र श्लोकचतुष्टये पुरुषार्थचतुष्टयप्रतिपादनमुक्तं **तत्र** धर्मः को वेत्याकाङ्क्षायां तत्र प्रथमं **धर्ममाविष्कुर्व**न्नित्यनेन यो **धर्मोभिसंहितस्तं टिप्पण्यां** स्फुटीकुर्वन्त्यत्र हीत्यादिना, तथा च भगवद्दास्यरूपो वृक्षधर्मः, सेवारूपो गोप**धर्मो** गोचारणरूपो वैश्य**धर्म**, इति त्रयमप्य**भिसंहित**मित्यर्थः, **सुबोधिन्यां** ननु पूर्वं वृन्दावने प्रवेशस्य रन्तुकामतया वृन्दावनवर्णनस्य चोक्तत्वात् प्रकारवाचिन एवम्पदस्य पूर्वोक्तक्रियाभिः सम्बन्धे वाक्यभेदप्रसङ्गाद् 'रेम' इत्यनेन सम्बन्धाङ्गीकारे च क्रीडानामनुक्तत्वेन तदनन्वयात् तदन्वयाय सन्निहितपरामर्षार्थं निरूप्येत्यादिक्रियाध्याहार्येत्याशङ्कानिवृत्त्यर्थं तद्योजनप्रकारमाहु**र्वृन्दावने**त्यादि, एव**मित्यनेनैवे**ति, एवमितिपदं **वृन्दावन**पदेनैव सम्बध्यतेतो नाध्याहार इत्यर्थः, तर्हि कथं शाब्दी सङ्गतिरित्यत आहुः **शाब्दी** चेत्यादि, एव**मित्यत्रे**त्यस्मिन् श्लोके, **अन्यानि चे**ति श्लोकान्तरे वक्ष्यमाणानि, **महावाक्य** इति **'रेमे रमालालितपादपल्लव'** इत्यन्त्ये वाक्ये, **रेमे सञ्चारय**न्नितिसमभिव्याहारसूचितमर्थमाहू **रमण**मित्यादि, **उभयो**रिति भगवतो गवां **चानुभाव** इत्यादि, तत्र ये रसाननुभावयन्त्यनुभवगोचरतां नयन्तीति यावत् **तेनुभावा** ये रसमुद्दीपयन्त्युत्पादयन्तीति यावद् ये बाह्यास्त **उद्दीपनविभावा** य इतस्ततो रसेषु सञ्चरन्त्यनेकरसव्याप्या भवन्तीतियावत् ते **व्यभिचारिणस्ते**त्र निरूप्यन्त इत्यर्थः, ते रसतरङ्गिण्यादिभ्योवगन्तव्याः । **क्वचिद्गायती**त्यत्रैवं **धर्मोद्भावनेने**त्यादि, **धर्मस्य** स्वदास्यरूपस्य गोचारणादेश्चोच्चैः प्रकटीकरणेन लीलामुक्त्वार्थस्य स्वस्वरूपस्य स्वप्रसादरूपस्य स्रक्पुष्पफलान्नादेश्च दानादुच्चैः **प्रकटीकरणे**नेत्यर्थः, **चरितश्चे**ति भवतीति शेषः, ननु कथमत्रार्थोद्भावनमित्याकाङ्क्षायां तदुपपादयन्ति यदेत्यादि **युक्तश्चे**त्यन्तं, **अर्थभोगेने**ति, मातृप्रभृतिप्रेषितवस्तूनां **भोगेन** वन्यवस्तूनां **भोगेन** च मदान्धालिसाधर्म्यात् तेषां च मधुगन्धग्राहित्वादिति, किञ्चात्रार्थपदेन श्रीरपि ज्ञातव्योक्तश्रुत्युपन्यासात्, **स एवे**ति श्रीयुक्त एव, कोत्र परिकर इत्याकाङ्क्षायां तं स्फुटीकुर्वन्ति **परिकर** इत्यादि, **स्तोत्रं वार्थभोग एवे**त्यर्थस्य प्रसादस्य प्राप्तावेव, अन्यथा गानस्तोत्रयोः स्फूर्तिरेव न स्यात्, मदान्ध्ये तूष्णींस्थितिरेव स्यान्न तु गानमित्याशङ्क्य मदस्वरूपमाहु**र्मदोत्रे**त्यादि, **स्वसाम्यकरण**मिति स्रगादिदानेन मुख्यभक्ततुल्यभावसम्पादनं, **अनुव्रत**पदेन भक्ता ग्राह्या **अनुव्रत**पदव्याख्यानरूपत्वात्, स्वतुल्यभोगसम्पादनं वा, सङ्कर्षणाय तु स्रगादिकमनुच्छिष्टमेव ददातीति ज्ञातव्यं, एवमर्थोद्भावनमुपपाद्यैतच्छ्लोकोक्तपदानां सर्वत्रावश्यकत्वं बोधयन्त्येवमित्यादि, **सर्वत्रे**त्यग्रिमश्लोकेषु ॥ १० ॥ **क्वचिच्च कलहंसे**त्यत्र भगवान् **स्वकाम**लीलामलौकिकीं ज्ञापयितुं तद्धेतुभूतं रसमलौकिकमेव प्रकटयति तादृशं च मयूर इति **तमभिनृत्यती**ति शुकाशयं प्रकटीकर्तुमाहु**स्तत्र मयूरस्ये**त्यादि **द्वारा**चेत्यन्तं, तथा चात्र 'गात्रविक्षेप' एव बन्धस्थानीय इत्यर्थः केवले रसे तत्र सिद्धत्वादिति, ननु तथापि बन्धाभावान्न्यूनतेवेत्यत **आहुरत्र** इत्यादि बन्धवन्तः **प्राकृत** इति सप्तमी उपयोगिन इत्यर्थात्, अप्राकृतत्वे गमकमाहुरत एवेत्यादि, तथा चात्र नृत्यमात्रेणैव सा लीलेत्यर्थः, तेनात्र 'हरेरिहैव काम' इति स्फुटीभविष्यति, यथा लौकिके रसे मयूरस्तथालौकिके कूजिते कलहंस इत्याशयेनाहुः **शब्दो ही**त्यादि, **कलानां हंस** इत्यव्यक्तमधुरशब्दानां विवेचको **भवती**ति ज्ञापितं भवति एवं रसं निश्चित्य **क्वचिच्चे**तिमूलस्थपदद्वयस्यार्थमाहुर्भगवांस्त्वित्यादि ॥ ११ ॥ **मेघगम्भीरे**त्यत्र **मोक्षलीलां** व्युत्पादयन्ति **भगवत्सायुज्यमि**त्यादि, मोक्षस्य मार्गद्वयभेदभिन्नत्वादुभयपरत्वेन व्याख्येति ज्ञेयं, तत्र सह युनक्तीति **सयुक्** तस्य भावः **सायुज्यं,** तथा च भगवता सह प्राथमिकसंयोग इति

फलति मुक्तिश्च दुःखाभावरूपा मार्गान्तरे तु सायुज्यं स्वरूपप्रवेशात्मकं मुक्तिश्च स्वरूपेण व्यवस्थानं सोभयविधापि भगवद्दत्तैव भवति ‘मोक्षमिच्छेज् जनार्दना’दिति वाक्यात्, ननु तयोर्भगवद्दानैकप्राप्यत्वे शास्त्रोक्तसाधनानां का गतिरित्याकाङ्क्षायां तेषां गतिमुपपादयन्ति **सर्वे**त्यादि सर्वेषु शास्त्रेषु मोक्षप्रतिपादकेषु **श्रुतिपुराणयोगसाङ्**ख्यादिषु निरूपितानां साधनानां ज्ञानोपासनाचित्तनिरोधसन्न्यासादीनां स्वनुष्ठितत्वे सति साधनस्योत्कृष्टतासम्पादको यो मनोधर्मस्तदेकताननतारूपस्तेन स्वस्य भगवत्सम्बन्धजनकानां ततो **भगवद्बुद्धौ** प्रतिफलितानां ततो भगवानपि तानि करोति **यथा** शरतल्पे **गते भीष्मे** भगवन्तं ध्यायति भगवानपि तं ध्यातवानिति राजधर्मं उक्तं “शरतल्पगतो भीष्मः शाम्यन्निव हुताशनो मां ध्याति पुरुषव्याघ्रस्ततो मे तद्गतं मन” इत्यादिभिः कतिपयैः श्लोकै**र्यथा च ध्रुवे** भगवति सङ्गतात्मनि सति, भगवांस्तत्र गत्वा तस्मा आत्मनि प्रदर्शितवानिति **चतुर्थ**स्कन्ध उक्तं तथा **भगवत्कृतानामेव** मोक्षसाधकत्वमितिसिद्धान्तः, तथा चैवं शास्त्रोक्तसाधनानां **गतिरित्यर्थः**, ननु निदर्शनस्य क्वाचित्कत्वेन सर्वत्रैवं शास्त्रार्थाङ्गीकारे किं मानमत आहु**र्यदन्वि**त्यादि, इदं हि चतुर्थस्कन्धे **प्रचेतोभिर्भगवन्तं प्रत्युक्तं**, एतस्य पूर्वं“मेतावदेव प्रभुभिर्भाव्यं दीनेषु वत्सलै’रित्यर्धमोस्ति, एतस्याग्रे “क्षुल्लकानामपीहता’’मिति चतुर्थः पादोस्ति, तथा चात्रैवं विशेषतो निरूपणादिदमेव मानमतो महतां क्षुल्लकानां च भगवता तदनुस्मरणे कृता एव कार्यसिद्धिरिति निर्विवादमित्यर्थः, एवं साधनगतिमुपपाद्य सिद्धमाहुरत इत्यादि, एवं प्रकृतोपयोगशास्त्रार्थं निरूप्य **मेघगम्भीरये**त्यादि व्याकुर्वन्ति **तदपि ग्रहण**मित्यादि, **ग्रहण**मिति नाम**ग्रहणं**, दूरगतावेवाह्वाने हेतु**र्यथे**त्यादि, **त** इति भक्ताः, **न गृह्णन्ती**ति युष्मदस्मद्भ्यामेव व्यवहारसम्भवान्न **गृह्णन्ति, तथे**ति वैधर्म्ये दृष्टान्तः साधर्म्येपि वा, चोपानीतभोजनसामग्र्यादिसहिता दूरत एव भगवन्तमाह्वयन्ति न तु निकट आगत्य तथा भगवानपि दूरगत एवाह्वयतीत्यर्थः, **पशु**पदसूचितमर्थमाहुः **पशव** इत्यादि, तथा चानन्यचित्ता भीरवो रमानभिज्ञाश्च सङ्गृहीताः, **प्रीत्ये**ति पदकृत्यमाहुरन्यथेत्यादि, **विषयो** लज्जादिर्भयं वा, अवशिष्टविशेषणकृत्यमाहुः **सापी**त्यादि, **अलौकिकी**ति गुप्ता, **गोपाला गुरव** इति शिक्षका इत्यर्थः, **पूर्वं ततः फलानुभावा**दिति वाणीतः **फलानुभावात्** पूर्वमित्यन्वयः, पुष्टिमुक्तिप्रकारं विवृत्य मर्यादायामतिदिशन्**तोमा**मिति, अस्मिन् पक्षे स्वतो बुद्धिराहित्यज्ञानस्य स्वदत्तत्वाभिप्रायेणालौकिकत्वं च मुक्तिदानेच्छया प्रकटितत्वं, अन्यद् यथायथ योज्यं, केवलेत्याद्युभयत्र योज्यं, **बहुवचन**मिति चेत्येवं योज्यं, **अवान्तरसाधनं** योगमाया, नन्वेतावत्करणे को हेतुस्तत्राहुः **प्रथम**मित्यादि पश्यतोन्वेषयतश्चातोपि **दूरगास्त**त्स्थानाज्ञातारः, **मुच्यन्त** इत्यन्तर्भावितण्यर्थः ॥ १२ ॥

(३) श्रीमद्वल्लभमहाजकृतः श्रीसुबोधिनीलेखः

एवं वृन्दावन इत्यत्र स्वत **एव समाग**तेति आज्ञामनपेक्ष्येच्छामेव ज्ञात्वा सर्वास्वाविष्टेत्यर्थः, **अत** इति श्रीमत्पदसूचितलक्ष्म्यावेशाद्धेतोरालम्बनवाचकैस्ताभिरित्यादिपदैरनुक्तमपि ताभिः सह रमणं सिद्धमेवेतिहेतोस्त्रयोपि निरूप्यन्ते इत्यन्वयः, **अनुभावा** इति गवां स्मरणे तासामागमनसम्भावनया रसे शङ्का भवतीतिशङ्कारूपव्यभिचारिभावहेतुत्वाद् धर्मस्य व्यभिचारित्वं, तथा चैते त्रयो मनोदेशधर्मा इति ज्ञेयं, आलम्बनाकथने हेतुमाहुः **लक्ष्मीरेवे**ति, अनाविष्टाः नालम्बनमित्येवकारः, सा तु श्रीमत्पदेन सूचितैवेति भावः, **तस्यापी**ति नायकेपि कृष्णपदेन सत्त्वं दोषाभाव आनन्दो गुण उक्त इत्यपि शब्दः, कृष्णपदसमभिव्याहारात् मनस्यपि सत्त्वं सूचितमित्याशयेनाहुः **निर्दुष्ट**मिति, **उभयो**रिति चारणरमणयोरित्यर्थः, **रमण**मिति करोतीति शेषः ॥ ९॥ **क्वचिदि**त्यत्र **निजभक्तै**रिति वेण्वादिकं सङ्गे नयन्ति तादृशैरित्यर्थः, **स एवे**ति अर्थभोगवानेवेत्यर्थः, भक्तेष्वर्थोद्भावनमाहुः **तेषामप्यर्थभोग** इति ॥ १० ॥ **कामलीलामाहे**ति भगवत्कूजितबन्धस्वरूपज्ञाने भगवत्कामो भवतीतिभावः, **क्वचिच्चे**त्यत्र **रसार्थ**मिति कूजितोद्गतरसानुभवार्थमित्यर्थः, **सम्बद्ध**स्येति सहितस्येत्यर्थः, **अन्ये सर्वे** इति जीवनिष्ठा आश्लेषादय (स्वतस्स्वभावाज् जायन्ते मुख्यो भोगस्तु रसनिर्गमनमेवातोनुकरणं तस्यैव) इत्यर्थः, **अत एवे**ति कामस्य विलक्षणत्वादेवेत्यर्थः, **शब्द** इति शब्दस्य मनःपूर्वकत्वात् तज्जनकं मनःसम्बन्ध्येव किञ्चिद् वाच्यमतो **मानसैकशरणस्यैव** कूजितं, **तादृशं** भगवत्कूजितजनकं भवतीत्यर्थः, “मानस”पदे श्लेषो ज्ञेयः, कूजितस्य भगवदीयत्वात् तज्जनककूजितवति रसारसयोर्भेदकत्वमुक्तं **तथा** च तदनुकरणेन भगवता स्वकूजितस्य यत्र यथोचितं तत्र तथा श्रवणमश्रवणमन्यथाश्रवणं वा भवतीति **रसारसभेदपूर्वकत्वं** बोधितं स्वस्य मानसैकशरणत्वं च, मानसमेवैकं शरणं गृहं यस्य तत्त्वं, अन्तःकरणसम्बन्धित्वमित्यर्थः, उपलक्षणेन सर्वस्यैवेन्द्रियकार्यस्य रसारसभेदपूर्वकत्वं बोधितमिति भावः **अत एवे**ति भगवत्कूजितजनककूजितवत्त्वादेवेत्यर्थः, **सर्वे**ति जीवान्तरविलक्षणत्वमित्यर्थः, **कलाना**मिति अव्यक्तमधुरशब्दानां **हंसः** प्रकाशक इत्यर्थः, **हंसानां** कू**जित**मितिबहुवचनैकवचनयोस्तात्पर्यमाहुः **बहूना**मिति, बहुप्रतिपादितस्यैकस्य श्रवणे श्रोता तन्निष्णातो भवतीति भगवति कूजितनिष्णातत्वं सूचितमित्यर्थः, **भगवांस्त्व**ति हंसस्त्वेक एकविधं कूजितं करोति भगवांस्तु सर्वेषामेवेति तुशब्दः, (**हासयन् क्वचि**दित्यस्याभासमाहु**रन्यथा मेघादी**ति क्रीडायामेतत् द्वयमप्यस्तीति ज्ञापयितुमेव नृत्यन्तमभिनृत्यतीत्यर्थः, आद्यनृत्यपक्षे तु रस एवास्तीति तत्र **रसेने**त्युक्तं, **तदाहे**ति रसपोषकोभयनिरूपणार्थमिदं नृत्यमिति श्रृङ्गारोद्बोधकनृत्ययुक्त हासविषयत्वकथनेन भावस्य पक्षिनिष्ठत्वकथनेन चाहेत्यर्थः ॥ ११ ॥ **मेघगम्भीरये**त्यत्र **मुक्ति**श्चेति ससारान् मोचनमित्यर्थः, अत्रापि स्वस्य सहयोगस्तृणादिविषयान् मोचनं च सम्पादनीयमितिभावः, **तत्तद्धर्मे**ति श्रवणकीर्तनादिधर्मद्वारा सम्बन्धजनकानां श्रवणादीनामित्यर्थः, **भगवत्कृताना**मिति “श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभय” मितिवाक्योक्तानां त्रयाणां भगवत्कृतानामेव साधकत्व

भक्ता एतत्साधनं भगवते विज्ञापयन्तीति श्रवणं, **अयं मोचनीय** इतिचिन्तनं स्मरणं, आतिवाहिकेभ्यस्तादृशाज्ञादानं च **कीर्तन**मित्यर्थः, **यथा ते** इति भक्ता इत्यर्थः, साक्षात्कारानन्तरं तु पादसेवनादिकमेव भवतीतिभावः, तथा चासाक्षात्कृतस्य नाम गृह्णन्तीति पर्यवसितं, **दूरगाने**वेति असाक्षात्कृतानित्यर्थः, **पशव** इति पूर्वोत्तरकाण्डसाधनाभावोनेन विवृतः पशुत्वेनायोग्यत्वाद् बुद्धिविरहाच्च, **गोपाला गुरव इवे**ति गा भगवत्समीपमानयन्तीति भगवत्प्रापकत्वाद् **गुरु**त्वं, **पूर्वं तत** इति दर्शनात् पूर्वमेव **ततो** वाणीत एव रसानुभवस्तथा च साधनदशायामेव फलानुभव इत्यर्थः, इदमेवालौकिकत्वं, **इमामेवे**ति अय मां प्रापणीय इत्यतिवाहिकमाज्ञापयतीत्यर्थः, श्रवणस्मरणे तु तस्यापि पूर्वाङ्गे इत्येवकारः, अत्र तु साक्षादेव मोक्षदानार्थं प्रकट इति नातिवाहिकापेक्षेतिभावः **तदवान्तरे**ति **कीर्तनस्यावान्तर**साधनानि रूपध्यानादीनीत्यर्थः, अत्र तत्तद्धर्मसम्वन्धजनकमपि साधनं नास्ति तथापि मुक्तिदाने हेतुमाहुः **प्रथमत एवे**ति ॥ १२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एवंवृन्दावने इत्यस्य विवरणे **दशधा रस** इति शृङ्गारादिभक्त्यन्तै रसै**र्दशधा रस** इति स्वरूपानन्दो लोके लीलासृष्टौ अनुभूयते इत्यर्थः, **ब्रह्मानन्दापेक्षये**त्यादि ब्रह्मानन्दे हि एकरूपत्वेन सुखानुभवः भजनानन्दे दशधा रसानुभव इत्याधिक्यं, **आलम्बनं तु लक्ष्म्येवे**ति लक्ष्म्येति तृतीया, **लक्ष्म्या** इव गोपिकाभिः सहः क्रीडां कुर्वाणो भगवानेवालम्बनविभावरूप इत्यर्थः, यमालम्ब्य रस उत्पद्यते स आलम्बनविभाव इति रसशास्त्रराद्धान्तात्, **अन्यत्र गमनशङ्काभावाच् चारयन्नेव रमणं सम्भवतीति** इह "चारयन्नेवे"त्यन्तं भिन्ना फक्किका, तथा च "चारयन्नेव रेमे" इति मूले विद्यमानेन **रेमे** इतिपदेनान्वयो बोधितः, ततो **रमणं सम्भवती**तिभिन्ना फक्किका, यत एवं रमणं सम्भवति ततो रेमे इत्यर्थः न ह्यत्र गोचारणक्रियाव्यापृतस्य भगवतः आनन्दतिरोभावः किन्तु गोचारणं कुर्वत एव रमणसम्भवात् परमानन्दानुभव इतिहार्दं, अत एतत्सूचनार्थं सानुगपदं मूले अनुगा गाश्चारयन्ति स्वयं तु रमत इति भावः ॥ ९ ॥ **क्वचिद् गायती**त्यस्याभासे **एवं धर्मोद्भावने**नेति 'रेमे सञ्चारयन्नद्रे'रित्यनेन गोचारणाख्यक्रीडानिरूपणेन धर्मोद्भावनमुक्त्वेत्यर्थः, निबन्धे "मोक्षः कामश्चेतिसाक्षात्पुरुषार्थद्वयं मतं तत्साधकत्वं धर्मस्ये"ति व्यवस्थापितं, प्रकृतेपि व्रजसीमन्तिनीभिः सह तृतीयपुरुषार्थरूपरमणस्य साधकं गोचारणमिति धर्मत्वं ज्ञेयं, साक्षात्पुरुषार्थत्वं शृङ्गाररमणस्य, तत्साधकत्वं गोचारणस्य, एवं व्रजसुन्दरीविचारेपि धर्मत्वं तासामपि शृङ्गाररमणरूपपुरुषार्थं गोचारणलीलैव साधयति ॥ १० ॥ **क्वचिच्चे**त्याभासे **एवमर्थलीलामुक्त्वे**ति "क्वचिद् गायति गाय"त्स्विति **पूर्वश्लोके**नेत्यर्थः, भगवत्कर्तृको गानादिसम्पत्तिभोगो भगवतो**र्थलोला**, तादृगर्थलीलामनुभवन् भगवानेवार्थरूपपुरुषार्थस्वरूपो भक्तानाम् ॥ ११ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं वृन्दावनवृक्षादीन् स्तुत्वा, 'तत्र क्रीडां कृतवान्' इत्याह–एवमिति । एवं श्रीमत् शोभायुक्तं वृन्दावनं स्तुत्वा प्रीतमनाः कृष्णः अद्रेः सानुषु प्रान्तेषु सरितो रोधःसु तटेषु च पशून् गाश्चारयन् रेमे इत्यन्वयः ॥ ९ ॥ तामेव क्रीडां वर्णयति—क्वचिदिति दशभिः ॥ अनुव्रतैः अनुगैर्देवादिभिर्गोपैर्वा **उपगीयमानं** चरितं यस्य स सङ्कर्षणेनान्वितः स्रग्वी श्रीकृष्णः मधुपानमदेनान्धा येऽलयो भृङ्गास्तेषु क्वचिद्गायत्सु सत्सु स्वयमपि गायति ॥ १० ॥ क्वचित् कलहंसानां कूजितमनुकृत्य स्वयं कूजति । तथा नृत्यन्तं बर्हिणमभि सम्मुखं नृत्यति । 'एवमनुकरणं किमर्थम् ?' इत्यत आह—हासयन्निति । 'सखीन्' इति शेषः ॥ ११ ॥ गवां गोपानां च मनोहरया मेघस्येव गम्भीरया वाचा सङ्केतनामभिः दूरगान् पशून् प्रीत्या क्वचिदाह्वयति ॥ १२ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ एवं श्रीमत् शोभायुक्तं वृन्दावनं स्तुत्वा तत् प्रति वा प्रीतमनाः कृष्णः अद्रेः सानुषु रम्यसमस्थानेषु सरितो रोधःसु तटेषु च पशून् गाश्चारयन् रेमे । सानुग इति पाठे अद्रेः समीपवर्त्तिषु सरिद्रोधःसु सानुगः गोपैः सहित कृष्णो रेमे ॥ ९ ॥ क्वचिदिति ॥ अनुव्रतैः अनुगैर्देवादिभिर्गोपैर्वा उपगीयमानं चरितं यस्य सः संकर्षणेनान्वितः स्रग्वी श्रीकृष्णः मधुपानमदेनान्धा येऽलयो भृङ्गास्तेषु क्वचिद् गायत्सु सत्सु स्वयमपि गायति ॥ १० ॥ क्वचिच्चेति ॥ क्वचित् हासयन् सखीनिति शेषः । कलहंसानां कूजितमनुकृत्य स्वयं कूजति तथा नृत्यन्तं बर्हिणमभिसंमुखं नृत्यति । बर्हिणमेव वा हासयन् उल्लासयन् ॥ ११ ॥ मेघेति ॥ गवां गोपालानां च मनोज्ञया मनोहरया मेघस्येव गम्भीरया वाचा सङ्केतनामभिः दूरगान् पशून् प्रीत्या क्वचिदाह्वयति ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सानुगः अनुगैः पश्चाद्गच्छद्भिर्गोपैः सहितः कृष्णः वृंदावनं प्रविश्य प्रीतमनाः सन् अद्रेः **गोवर्धनस्य** सरिद्रोधस्सु तत्समीपस्थनदीपुलिनेषु पशून् चारयन् रेमे ॥ ९ ॥ हरेः **रमणमाह** क्वचिदित्यादिदशभिः मदेन पुष्पादिमकरंदघ्राणजनितेन अंधाः मत्ता अलयः षट्पदाः तेषु अनुव्रतैः गोपैः स्रग्वी पुष्पहारयुक्तः ॥ १० ॥ जल्पंतं शब्दं कुर्वंतं शुकमनुपश्चात् कलैर्मधुरैर्वाक्यैः सः हरिः वल्गु अनुकुजति ॥ ११ ॥ गोपान्हासयन् बर्हिणं मयूरं नृत्यन्तमभिलक्ष्य तदभिमुखो नृत्यतीत्यर्थः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ।। एवं, अग्रजं वदन्निति शेषः । श्रीमच्छोभावहं, वृन्दावनं, पश्यन्निति शेषः । प्रीतं प्रसन्नं मनो यस्य सः, सानुगोऽनुगः सहितः कृष्णः, पशून् संचारयन् सन्, अद्रेर्गोवर्द्धनस्य संबन्धिषु, सरिद्रोधस्सु, गोवर्द्धनपादनिःसृतासु नदीषु, तच्छिखरेषु चेत्यर्थः ।। रेमे चिक्रीड ।। ९ ।। तदेव प्रपञ्चयति क्वचिदित्यादिना श्रीदामेत्यतः प्राक्तनेन ग्रन्थेन ।। क्वचिदिति ।। मदेन मकरन्दात्मकमधुपानमदेनान्धाश्च तेऽलयो भ्रमराश्च तेषु, गायत्सु सत्सु, क्वचित् अनुव्रतैरनुगैः, उपगीयमानं चरितं यस्य सः, स्रग्वी विधृतनानाविधपुष्पहारः, संकर्षणान्वितो बलभद्रेण सहितः कृष्णः, गायति ।। १० ।। क्वचिदिति ।। क्वचिच्च कुत्रचित्तु, कलहंसानां राजहंसानां, कूजितं अन्वनुकृत्य, तत्कूजनानुकरणं कृत्वेत्यर्थः । कूजति । क्वचित्, हासयन् स्वसखीन् हासं कारयन् सन्, नृत्यन्तं बर्हिणं मयूर, अनुकृत्येति शेषः । अभिनृत्यति तत्सन्मुख स्थित्वा नृत्यं करोति ।। ११ ।। मेघेति ।। क्वचित् मेघगम्भीरया जलदस्येव गम्भीरया, अत एव गावश्च गोपालाश्च तेषां मनोज्ञा तया, वाचा, दूरगान् पशून्, नामभिः संकेतितसंज्ञाभिः, प्रीत्या आह्वयति ।।१२।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

क्वचिद् गायतीति : १०.१५.१०.

अलिहंसकेकिशुकपिकचकोरचक्रस्वनानुकरणमिषात् । विश्वक्रीडा क्रीडा मम न तदन्येत्यबोधि हरिणेह ।। ३० ।।
मच्चेष्टया विश्वमिदं विचेष्टते तथा यथाऽहं प्रकृते करोमि । इत्थं जनान् ज्ञापयितुं त्वयाश्रितो मन्ये विभो पक्षिरवानुकारः ।। ३१ ।।

कृष्णप्रिया

श्री शुकदेवजी कहते हैं—परीक्षित् ! इस प्रकार परम सुन्दर वृन्दावन को देखकर भगवान् श्रीकृष्ण बहुत ही आनन्दित हुए । वे अपने सखा ग्वालबालों के साथ गोवर्धन की तराई में यमुनातट पर गौओं को चराते हुए अनेकों प्रकार की लीलाएँ करने लगे ।। ९ ।। एक ओर ग्वालबाल भगवान् श्रीकृष्ण के चरित्रों की मधुर तान छेड़े रहते हैं तो दूसरी ओर बलरामजी के साथ वनमाला पहने हुए श्रीकृष्ण मतवाले भौंरो की सुरीली गुनगुनाहट में अपना स्वर मिलाकर मधुर संगीत अलापने लगते हैं ।। १० ।। कभी-कभी श्रीकृष्ण कूजते हुए राजहंसो के साथ स्वयं भी कूजने लगते हैं और कभी नाचते हुए मयूरों के साथ स्वयं भी ठुनुक-ठुनुक नाचने लगते हैं और ऐसा नाचते हैं कि मयूर को उपहासास्पद बना देते हैं ।। ११ ।। कभी मेघ के समान गम्भीर वाणी से डर गये हुए पशुओं को उनका नाम लेकर बड़े प्रेम से पुकारते हैं उनके कण्ठ की मधुर ध्वनि सुनकर गायों और ग्वालबालों का चित्त भी अपने वश में नहीं रहता ।। १२ ।।

चकोरक्रौञ्चचक्राह्वभारद्वाजांश्च[1] बर्हिणः । अनुरौति स्म सत्त्वानां भीतवद् व्याघ्रसिंहयोः ।। १३ ।।
[2]क्वचित् क्रीडापरिश्रान्तं गोपोत्सङ्गोपबर्हणम् । स्वयं [3]विश्रमयत्यार्यं पादसंवाहनादिभिः ।। १४ ।।
नृत्यतो [4]गायतः क्वापि [5]युध्यतो वल्गतो मिथः । गृहीतहस्तौ गोपालान् हसन्तौ प्रशशंसतुः ।। १५ ।।
क्वचित् पल्लवतल्पेषु नियुद्धश्रमकर्शितः । वृक्षमूलाश्रयः शेते गोपोत्सङ्गोपबर्हणः ।। १६ ।।

कर्दमक्षमा

अन्वयः—चकोरक्रौञ्चचक्राह्वभारद्वाजान् बर्हिणः च सत्त्वानां (मध्ये) व्याघ्रसिंहयोः भीतवद् अनुरौति स्म ।। १३ ।। क्वचित् क्रीडापरिश्रान्तं गोपोत्सङ्गोपबर्हणं आर्यं पादसंवाहनादिभिः स्वयं विश्रमयति ।। १४ ।। क्वापि मिथः नृत्यतः गायतः वल्गतः युध्यतः गोपालान् गृहीतहस्तौ हसन्तौ (रामकृष्णौ) प्रशशंसतुः ।। १५ ।। क्वचित् नियुद्धश्रमकर्शितः गोपोत्सङ्गोपबर्हणः वृक्षमूलाश्रयः पल्लवतल्पेषु शेते ।। १६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

चकोरादीननुकृत्य रौति । कदाचिच्च सत्त्वानां मध्ये व्याघ्रसिंहगोचरां भीतवद्भवति । सत्त्वेषु पलायमानेषु पलायत इत्यर्थः । तयोः सत्त्वानां बलोद्रेकाणां भीतवद्भवतीति वा ।। १३ ।। आर्यमग्रजं विश्रमयति विगतश्रमं करोति ।। १४ ।। मिथो नृत्यादीन्कुर्वतो गोपान्प्रशशंसतुः ।। १५–१६ ।।

---

[1] भारद्वाजालिर्बर्हिणः–विज. ।

[2] **अनुजल्पति जल्पन्तं कलवाक्यैः शुकं क्वचित् । क्वचित् सवल्गु कूजन्तमनुकूजति कोकिलम् ।।**
क्वचिदयमधिकः दृश्यते ।

[3] विश्राम–बिज. । [4] गायतो वापि–विज. । [5] वल्गतो युध्यतो–श्रीधर. वंशी. वीर. विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

चकोरो जीवंजीवश्चंद्रप्रियः पक्षीः क्रौञ्चो जलचरः पक्षी, चक्राह्वः कोकः, भारद्वाज उद्धर्वाधश्चंचुश्चित्रितांगः पक्षी। सत्त्वानां जीवानां 'सत्त्वं जीवे बले गुणे' इति कोशात्। व्याघ्रसिंहयोरिति पञ्चम्यर्थे षष्ठी। इत्यर्थ इति। सत्त्वेषु मृगादिषु धावत्सु स्वयमपि तथैव धावति न तु भीत इति भावः। अन्येऽपि सर्पादयो भयहेतवो बहवः संति द्वयोरेवोपादानं कथमित्यस्वरसादर्थांतरमाह–तयोर्व्याघ्रसिंहयोः। सत्त्वानां सकाशाद्भीतवदिति। यद्यप्यन्ये भयहेतवः संति, न तेष्वेतयोस्तुल्यं बलमिति भावः। सत्त्वानां प्राणिनां मध्ये व्याघ्रसिंहयोः शब्देन भीतवद्भवति सखिषु पलायमानेषु स्वयमपि पलायते। वस्तुतस्तु स्वस्य स्वाभाविकशौर्येण भयाभावो वतिनोक्त इति विश्वनाथः ॥ १३ ॥ गोपस्योत्संग उपविष्टस्योरुजं धायोग उपबर्हणमुपधानं शिरःपीठं यस्य तम् ॥ १४ ॥ नृत्यत इत्यादीनां चतुर्णां द्वितीयांतानां गोपालानित्यनेन संबंधः। वल्गतः प्लवतः 'वल्ग–प्लवने' धातुः। स्खलनादिविषये हसंतौ। प्रशशंसतुः तुष्टुवतुः ॥ १५ ॥ नियुद्धं बाहुग्रहणादिना द्वंद्वयुद्धम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

क्वचिदित्यनुवर्त्तत एव चकोरश्चन्द्रिकापायी क्रौञ्चश्चिञ्चाटकन्दभक्षी चक्राह्वचक्रवाकः भरद्वाज एव भारद्वाजः स्वार्थेऽण् व्याघ्रयाटाख्यः पक्षी चकोरादीनां कञ्चित् क्वचिदनुकृत्य रौति सर्वानेव युगपदनुकृत्य रौति सर्वशक्तिमत्त्वात् इत्यैश्वर्यं तत्रापि पूर्ववद्बोध्यं भीतवदिति क्रीडाकौतुकेन वतिप्रत्ययस्तयोर्हिंस्रत्वाभावेनापि वस्तुतस्ताभ्यां भयाभावात् स्मेति प्रसिद्धमेवेदं नात्र संशयः कार्य इत्यर्थः। अत्र तेषामुत्तरपक्षे व्याघ्रादिबलातिशयानां सम्बन्धे भीतायत इत्यर्थः। यद्वा, सत्त्वानां मध्ये यो व्याघ्रसिंहयोः सम्बन्धे भीतः तद्वच्चानुरौति तेषामीषद्भयदर्शनकौतुकार्थमिति भावः ॥ १३ ॥ आदिशब्दाद्बीजनादीनि ॥ १४ ॥ नृत्यत इति क्वापि प्रशशंसतुः वल्गतः उत्प्लुत्योत्प्लुत्य गतिविशेषं कुर्वतः मिथो अन्योन्यमासक्त्येत्यर्थः। अन्यत्तैः। यद्वा, तौ क्वापि नृत्यतः क्वापि गायत इत्येवं क्वापीति सर्वैरपि योज्यं किञ्च क्वापि मिथो गृहीतहस्तौ क्वापि हसन्तौ भवतः। यद्वा, पदद्वयमिदं विशेषणत्वेन सर्वत्रैव योज्यं क्वापि गोपालान् हसन्तौ अहो इमे गानेन गन्धर्वगणतिरस्कारिणो नृत्येन विद्याधरगणविडम्बका युद्धेन त्रिलोकीजित्वरा इत्यादिपरिहासं कुर्वन्तौ प्रशशंसतुरेव तत्त्वतो माहात्म्यविशेषख्यापनात् ॥ १५ ॥ उपसंहरिष्यन् विश्रामक्रीडां वदन् गोपानां सौभाग्यभरं वर्णयति, क्वचिदिति त्रिभिः। पल्लवेत्युपलक्षणं कोमलनवदलकोरकपुष्पाणां तल्पेषु बहुत्वं पृथक् पृथक् पञ्चषैर्मिलित्वा निर्मितत्वेन बाहुल्यात् ततश्च बहुतरेष्वपि तेषु तेषां प्रीत्यै तत्तदलक्षितस्तत्तत्प्रेमोद्बोधितेन निजशक्तिविशेषेण बहुरूपतयैव शेत इति विज्ञापयति—एवम् ईशचेष्टित इति वक्ष्यमाणमैश्वर्यमत्रापि सङ्गतं स्यात्। नियुद्धं तैरेव सह बाहुयुद्धं तेन श्रमः श्रीगण्डादिविषयकमौक्तिकसुन्दरप्रस्वेदकणिकोदयादिकरः तेन कर्शितो दुर्बल इव अनेन सखीनामपि तादृशं बलवत्त्व सूचितम्, तथा चागमे "गोपैः समानगुणशीलवयोविलासवेषैः" इति तदेवमपि तेषां स्वयमसुरमारणादौ यदप्रवृत्तिस्तत्रेदं पश्यामः सर्वस्य व्रजस्य तेनापि गुणेन श्रीकृष्णैकसुखतार्थलीलाशक्तिरेव तेषामुद्यमं स्तभयतीति गोपेति ते किञ्चिदज्येष्ठा ज्ञेयाः तत्रोपबर्हणरचनं च तत्सुखलाभायैव तेन तत्कृतं किं वा रचितस्यापि तेनैव तदर्थं त्यागो ज्ञेयः ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पशून् गो-वृष-वत्सतर्य्यादीन्; यद्वा, आत्मनो गवादीन् सर्व्वानेव चतुष्पदो दूरगान् सतः पशूनिति श्लेषेण श्रीकृष्णवर्श्वतो दूरं गतत्वान्निर्बुद्धित्वमुक्तम्। नामभिर्गंगा-यमुना-हंसी-धवलीत्यादि-तत्तत्संज्ञाभिः प्रीत्याह्वयति। अतएव गवां तेषु प्रीतिविशेषेण किंवोपलक्षणमेतत्। सर्वेषामेव पशूनाञ्च मनोज्ञया चित्ताकर्षिण्या वाचा वचनेनेव, न तु वश्या। कथम्भूतया? मेघस्य गर्जितवद्गम्भीरया, सा च महापुरुषस्वभावत एव, किंवा, दूरगाह्वानेऽत्र तद्विशेषापेक्षया ॥ १३ ॥ क्वचिदित्यनुवर्त्तत एव। चकोरश्चन्द्रिकापायी, क्रौञ्चश्चिञ्चाटभक्षी, चक्राह्वश्चक्रवाको भरद्वाज एव भारद्वाजः—स्वार्थेऽण्, व्याघ्राटाख्यः पक्षी चकोरादीनां कञ्चित् क्वचिदनुकृत्य रौति, सर्वशक्तिमत्त्वादित्यैश्वर्यं तत्रापि पूर्ववद्बोद्धव्यम्। भीतवदिति क्रीडा-कौतुकेन वति-प्रत्ययस्तयोर्हिंस्रत्वाभावेनापि वस्तुतस्ताभ्यां भयाभावात्। यद्वा, यथान्यः कश्चिद्बालको भीतो भवेत्, तथैव भीतः स्यादित्यर्थः, बाल्यलीला-स्वभावात्। स्मेति प्रसिद्धमेवेदम्, नात्र संशयः कार्य्यं इत्यर्थः ॥ १४ ॥ आदि-शब्दाद् बीजनादीनि ॥ १५ ॥ कृष्णलीला-प्रसंग एव द्वयोरपि युगपदेवाह—नृत्यत इति। क्वापि प्रशशंसतुर्वल्गतो गतिविशेषं कुर्वतो मिथोऽन्योऽन्यमासकल्येत्यर्थः, यद्वा, अस्य युध्यत इत्यनेनैव परेण वान्वयः। अन्यत्तैर्व्याख्यातम्। यद्वा, तौ क्वापि नृत्यतः, क्वापि गायत इत्येवं क्वापीति सर्वैरपि योज्यम्। किञ्च, क्वापि मिथो गृहीतहस्तौ क्वापि हसन्तौ भवतः, यद्वा, पदद्वयमिदं विशेषणत्वेन सर्वत्रैव योज्यम्। क्वापि गोपालान् प्रशशंसतुः,—'परमविदग्धाः' 'शूराः' 'सुस्निग्धाः' इत्यादिश्लाघां चक्रतुः, किंवा, नृत्यादिना प्रहर्षोदयेन हसन्तौ प्रशशंसतुः, किंवा, गोपालान् हसन्तौ—'अहो इमे गानेन गन्धर्वगण-तिरस्कारिणः, नृत्येन विद्याधरविड़म्बकाः, युद्धेन त्रिलोकीजित्वराः, इत्यादिपरिहासं कुर्वन्तौ प्रशशंसतुरेव, तत्त्वतो माहात्म्यविशेषख्यापनात् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उपबर्हणम् उपधानम् । आर्यम् बलभद्रम् सम्वाहनं लालनम् ॥ १४–१८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

क्वचिच्चकोरादीननुसृत्य रौति रुराव सत्त्वानां मृगाणां मध्ये व्याघ्रसिंहयोस्ताभ्यां भीतवद्भवति ॥ १३ ॥ क्वचिद्गोपानानुत्सङ्गोऽङ्क एवोपबर्हणमुपधानं यस्य तं क्रीडापरिश्रान्तमार्यमग्रजं स्वयं पादपीडनादिभिर्विश्रमायति ॥ १४ ॥ वल्गत उत्प्लवतः नृत्यादीन् कुर्वतो गोपान् गृहीतौ हस्तौ याभ्यां तथाभूतौ प्रशशंसतुः ॥१५॥ क्वचिन्नियुद्धेन बाहुयुद्धेन यः श्रमस्तेन कर्शितः म्लानः वृक्षमूलाश्रयः पल्लवतल्पेषु गोपानां उत्सङ्गमुपधानं यस्य तथाभूतः शेते शिश्ये ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

व्याघ्रशार्दूलसिंहयोः सकाशात् भीतवत् स्वयमपि भीतो भवति ॥ १३ ॥ गोपस्य उत्सङ्गोऽङ्क एव उपबर्हणं शिरःपीठं यस्य स तथा तम् आर्यं ज्येष्ठं पादसम्वाहनादिभिः विश्रामयति, क्रीडाप्राप्तं क्लेशं नाशयति ॥ १४ ॥ रामकृष्णौ नर्तनादिकुर्वाणान् गोपालान् नृत्यादिविशेषविषयेषु प्रशशंसतुः स्खलनादिविषये हसन्तौ वल्गतः उत्प्लवतः ॥ १५ ॥ नियुद्ध बाहुवल्लीग्रहणादिद्वन्द्वयुद्धम् ॥ १६–१७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तल्पेष्विति वहुत्वं तत्र तत्रानेकेन प्रकारेणेति द्योतकं महात्मनः महात्मानः परमभाग्यवन्तः "सुपां सुपो भवन्ति" इत्युपसङ्ख्यानेन ॥ १५–१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किन्तु सत्त्वानां प्राणिनां मध्ये व्याघ्रसिंहयोः शब्देन भीतवद् भवति सखिषु पलायमानेषु स्वयमपि पलायते वस्तुतस्तु स्वस्य स्वाभाविकशौर्येण भयाभावो वतिप्रत्ययेनोक्तः ॥ १३ ॥ उपबर्हणं शीर्षोपधानम् ॥ १४ ॥ हसन्तौ कृष्णरामौ नृत्यादीन् कुर्वतो गोपालान् प्रशशंसतुः ॥ १५–१८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

क्वच्चिच्चकोरादीन् अनुरौति तदनुकरणशब्दान् करोति क्वचिच्च सत्त्वानां मृगादीनां मध्ये व्याघ्रसिंहयोस्ताभ्यां भीतवद्भवति ॥ १३ ॥ विश्रमयति विगतश्रमं करोति ॥ १४–१६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

चकोरादीननुकरोति कतिचिच्च सत्वानां प्राणिना मध्ये व्याघ्रसिंहयोः शब्देन भीतवद्भवति सत्वेषु विद्रवत्सु स्वयमपि विद्रवति, वतिना भयाभावो दर्शितः स्वयमतिशूरत्वात् तच्च शूराणामपि सखीनां विद्रवणेन हासोयमिति बोध्यम् ॥ १४ ॥ उपबर्हणं शीर्षोपधानं विश्रमयताश्रमं करोति ॥ १५ ॥ हसन्तौ रामकेशवौ मिथो नृत्यादीन् कुर्वतो गोपान् प्रशशंसतुः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गोपस्य यस्य कस्यचिदुत्सङ्ग आरोह उपबर्हणं शिरः पीठमार्यपादसंवाहनादिभिः स्वयं साक्षाद्विश्रामयति । वा चित्तविराग इत्यनुवृत्तो वाशब्दो व्यवस्थितविकल्पार्थः । विश्रमं करोति रजो विश्रामयत्राज्ञां धुर्यान्विश्रामयेति स इत्यादिवत् ॥ १३॥ वल्गत उत्प्लवनादिकुर्वतो गृहीततद्धस्तौ रामकृष्णौ हसन्तौ प्रशशंसतुर्नर्तनादिकं बहुसमीचीनमिति तुष्टुवतुः ॥ १४ ॥ नियुद्ध द्वन्द्वयुद्धं तेन जातो यः श्रमस्तेन कर्शितः क्लिष्ट इव । पल्लवतल्पेषु कामलकिसलयकोलतास्तरणेषु ॥ १५ ॥ हतः पाप्मा येषां ते तथा । इदं संवहद्वीजयद्विशेषणम् ॥ १६ ॥

श्रीसुबोधिनी

एवं पुरुषार्थचतुष्टयलीलानुपपाद्य दशरसप्रकारेण भगवतो लीलां वदन् प्रथमं षड्रसलीलामाह **चकोरेति**, चकोरा हि चन्द्रकिरणभोक्तारो लौकिकभोगाः, न ह्यन्येन चन्द्रकिरणा भूमौ स्थिता भोक्तुं शक्यन्ते त एव परं भोक्तारः सूर्यकिरणा इव, अन्यथा ततः शैत्यादिकं न स्यात्, तथैव सर्वे पुरुषाः स्त्रीभिर्भुज्यन्ते तद्दास्यं चानुभवन्ति, तथैव लोकप्रतीतिः, तद्वदयं भगवान् न रसानुभव करोतीति ज्ञापयितुं शृङ्गाररसे **चकोरवद्** भगवता वाग्व्यापारो निरूप्यत, क्रौञ्चो वीरे, चक्रवाकः करुणायां, स हि वियुक्तश्चक्रस्य आवर्तनेन मारणमभिप्रेतमिति तेनाह्व आह्वानं यस्येति तस्यावश्यं करुणा युक्तैव, भारद्वाजोद्भुते, क्रमस्य नियामकत्वादः, भारद्वाज इत्याख्या यस्य, स हि द्विजन्मा, तन्नामसम्बन्धख्यापनमद्भुतरसेनुगुणं भवति **बर्हौ** हास्ये, तस्य तथात्वं पूर्वमेव निरूपितं, एवं पञ्चविधा नात्यन्तं विरुद्धा इत्येकीकृत्य निरूपिताः, भयानकरसस्तु सर्वोपमर्दक इति पृथङ् निरूपयति, **सत्त्वानां मध्ये व्याघ्रसिं**

योर्भीतवच्चानुरौतीति, एवं रसाविर्भावे प्रमाणं प्रसिद्धमिति **स्मे**त्याह, **भयं द्विविधं स्वरूपनाशादभिमानादिधर्मनाशाद्** वा, तत्र स्वरूपे **व्याघ्रो**भिमानादिधर्मे सिंहः, बहुप्रकारं च भयं प्रतीकारासमर्थानां सम्भावनायामप्यन्यथा, अन्येषां चान्यथेति तत्र **सत्त्वानि शशादीनि** प्रतीकारसम्भावनारहितानि, भये परमा काष्ठा सत्त्वसम्बन्धिन्यवस्था, रसाभिनये चेष्टापेक्षया वचनमतिसुन्दरमिति तदेव निरूपितम् ॥ १३ ॥ **बीभत्सरसलीलामाह** क्वचित **क्रीडापरिश्रान्तमिति आर्यं स्वयं क्वचिद् विश्रमयति** विगतश्रमयुक्तं करोति **पादसंवाहनादिभिः**, पादे हि चलतः श्रमो भवति, अङ्गमर्दनं च तदुक्तकरणं च शय्यास्तरणादिकं **चादि**शब्देनोच्यते, हीनाद्धीनभाव उत्तमस्य बीभत्सो भवति **भक्तिमतामेव स बीभत्स** इति**प्रती**तेत्यन्तानुचितप्रतीतिस्तेषामेवेति यथा “स्थपुटगतमपि क्रव्यमश्यग्रमत्ती”ति न पिशाचानां तादृशदर्शनेन बीभत्सरस उदेति किन्त्वस्मदादीनामेव तथेदमपि भक्तानां, एते हि सर्वे रसा **भगवद्भजने तत्तदधिकारनिरूपकाः**, सर्व रसाविष्टा अपि भगवति सायुज्यं प्राप्नुवन्तीति, पादसंवाहनादिकरणे हेतुः **क्रीडापरिश्रान्त**मितिक्रीडा **मल्लक्रीडा**, भगवतैव सह बलिष्ठेन सह कृतश्रमो बलाधिक्यजनको भवति **परं प्रथमं पीडां प्राप्नोति**, तत्प्रतीकारं नान्यो **जानाति** भगवद्बलेनैवातिमात्रं व्यापृतत्वात्, तदाह **परितः श्रान्त**मिति, अतिविह्वलतासूचनार्थं **गोपस्यैव कस्यचिदुत्सङ्ग उपबर्हणं** यस्य, अत एव विकलत्वात् स्वामिकृतमुपचारमपि सहते, **आर्य**त्वादेव भगवतस्तथाकरणम् ॥ १४ ॥ **रौद्ररसमाह नृत्यत इति**, मल्लानामिव हि वीररसो रौद्रः, स चान्यत्रोदासोपि भगवतोपनिबध्यत इति **भगवतो रसयुक्तलीला**,

कायवाङ्मनोभिर्यद्युक्तमयुक्तं पीडकं च तत् । चतुर्विधा मल्ललीला स्तूयते हरिणा मुदा ॥ १ ॥

साधारणत्वादत्रोभयोर्ग्रहणं, उभावुभौ मल्लयुद्धे, अन्यत्र बहवः, तत्र कायिकं **नृत्यं गानं वाचिकं वल्गनं मानसं स्वप्रौढिख्यापकत्वात् मिथश्च युध्यत** इति पीडारूपक्रिया कायिकीव, कांश्चिद्ध**सन्तौ** कांश्चित् **प्रशशंसतुः**, **गृहीतहस्ता**विति न पक्षपातेन कस्यचित् क्रियाभिनिवेशः केनचित् कर्तव्य इतिज्ञापनार्थः, सापि लाली लोकप्रसिद्धा मुख्यत्वख्यापिका, **हसन्ता**विति, प्रथमं सन्तोष पश्चात् **प्रशशंसतु**रिति वा ॥ १५ ॥ शान्तरसलीलामाह **क्वचित् पल्लवतल्पेष्वि**ति, शयानो हि **शान्त** इव भवति **नियुद्धं** बाहुयुद्धं तत्र यः **श्रमः स कर्षितो** येन जितश्रम इत्यर्थः, शान्तरसः प्रत्येकपर्यवसायीति निरूपयन् भगवाननेकरूपः **सर्वत्र वृक्षमूलेषु** सर्वैरेव गोपालैरहमहमिकतयास्तृता बहव एव **तल्पा**स्तेषां सर्वेषामेव युगपत्सौख्यसिद्ध्यर्थं सर्वेष्वेव तल्पेषु **भगवान्** शयानो जातः, तदाह बहुवचनं, ननु तथापि भगवान् किमिति तत्र शयनं कृतवानित्याह **वृक्षमूलाश्रय** इति, वृक्षस्य मूलमेवाश्रयत्वेन येषां ते **वृक्षमूलाः** परमहंसास्तानाश्रय**ते**तस्तत्रतत्रातीन्द्रियत्वेन स्थितान् परमर्षीन् कृतार्थीकर्तुं तथा करोतीत्यर्थः, लोकानामेव प्रतीतिस्तल्पे **शेत** इति, वस्तुतस्तानि योगिनामन्तःकरणान्यतस्तेषु शेते गोपानामुत्सङ्ग एवोप**बर्हणं** यस्येति तेषु भगवतः प्राधान्यस्थापनमृषित्वप्राधान्यस्थापनमिति ज्ञापयति, ते हि वैश्या अतः स्वधर्मख्यापकमुत्सङ्गादं, **उपबर्हणं** शिरस उपधानम् ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

वृक्षमूलाश्रय इत्यत्र, **वृक्षस्य मूलमे**वेत्यारभ्या**तस्तेषु शेत** इत्यन्तम् । गोपोत्सङ्गोपबर्हणस्य तल्पेषु शयानस्य वृक्षमूलाश्रयत्वमनुपपन्नमित्येवं व्याख्या । न च तत्र तल्पस्थित्या तथात्वमुक्तमिति वाच्यम्, भगवद्विशेषणत्वानुपपत्तेः । एवं सति विवक्षितार्थस्यातिगोप्यत्वेन परोक्षवादेनैवोक्तिरियं श्रीशुकस्येत्याचार्यैरपि तथैवोच्यते । तथा हि इमानि वृक्षमूलानि स्वप्रियाभ्यः सङ्केतितानि, गोपाश्चान्तरङ्गाः प्राप्तसख्या इत्युभयानुगुणकार्यकर्तारोऽत उक्तमूलेष्वेव तद्रचनां कृतवन्तः तथा च सङ्केतानन्तरं नायिकान्तःकरणानि तत्रैव सन्तीति तेषु तथात्वेनोक्तिः । गुप्ततया स्थितिरित्यतीन्द्रियत्वम्, सर्वपरित्यागेन मानसोत्कटभावप्राधान्येन च परमहंसत्वम् । रहःसन्देशवाक्यानामतिगोप्यानामुक्त्या चर्षित्वम्, अत एव परमत्वमुक्तम् । प्रिययोगवत्त्वेन योगित्वम् । शयन उपबर्हणस्य प्राथमिकत्वेन तथैव वक्तुमुचितत्वेपि यदन्ते कथनं तेन रतिश्रान्त्या पश्चाद्यच्छयनं तदत्रोच्यत इति ज्ञायते, अन्यथोपबर्हणस्य तल्पान्तर्गतत्वेन तेनैव तत्प्राप्तेर्गोपोत्सङ्गो नोच्येत । एवं सति तदुक्त्या तल्पान्तर्गततदभावः सूचितो भवति । स च विविधबन्धैरेव भवतीति तदन्ते श्रमापनोदनार्थमन्तरङ्गगोपास्तथा कृतवन्तः, तदा तेषामेव प्राधान्यम्, न नायिकानाम् । इदमेवाभिसन्धाय तेषु भगवतः प्राधान्यस्थापनमित्याद्युक्तमाचार्यैः **परोक्षवाद** इति । समरयुद्धं निरुद्धपदेनोक्तवान्, अन्यथा पूर्वोक्तरीत्या शान्तरसो नोक्तः स्यात् ॥ १६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

चकोरेत्यत्रान्येन न भोक्तुं शक्नुन्त इत्यत्र दृष्टान्तः **सूर्यकिरणा इवे**ति, चन्द्रकिरणानां भोज्यत्वे युक्तिमाहुर**न्यथे**त्यादि, **तथा च** तत्स्पर्शस्य त्वचा बहिरनुभवेपि तद्द्वारा ते शरीरान्तर्न प्रविशेयुस्तदान्तः शैत्यादिकं नानुभूयेतातः कार्यबलात् तेषां भोज्यत्वं, श्रुतिश्च “तेजोशितं त्रेधा भवती”ति, चकोरेषु तु भूमिष्ठभोक्तृत्वं विशेषः, ननु पुरुषेषु भोग्यत्वं नोपपन्नं तेषां भोक्तृत्वेनैव प्रसिद्धेरित्याकाङ्क्षायां किरणदृष्टान्तेन तेषामपि तथात्वं व्युत्पादयन्ति **तथैवे**त्यादि, **अनुभवन्ती**ति स्त्रिय इति शेषः, प्रकृतेतिदिशन्ति **तद्व**दित्यादि, रसान्तरमाहुः **क्रौञ्चो वीर** इति, क्रौञ्चा हि **काश्मीरादौ** महाहिमसंहतिदेशेण्डानि दत्वा तानि हिमसंहति-

पिहितान्यपि स्वयं देशान्तरे वर्तमाना अप्याकाशे उड्डीयमाना वाण्या सेवन्ते तेनाण्डानि जीवन्तीति तेषां वीर्यं प्रसिद्ध तद्वदत्रापि बोध्यं, 'किञ्चोत्साहवर्धनो वीर' इति हेमन्ते कौञ्चरुतमेव रसोद्बोधकत्वेन वर्ण्यत इत्यतोपि तथा, तृतीयं रसमाहुश्चक्रवाक इत्यादि, शोकस्य करुणास्थायित्वाच्चक्रवाके तदभावमाशङ्क्य तत्र स्थायिनं सङ्क्रमयन्ति चक्रपदेत्यादिना, चतुर्थं रसमाहुर्भारद्वाज इत्यादि, तत्राद्भुतस्याङ्गीकारे नियामकमाहुः **क्रमस्येत्यादि, व्याघ्रसिंहयो**रितीवेत्युन्नेयमत एव **भीतवच्चेत्यत्र चकार** उक्तः, अनुपदात् स्वयं पश्चाद्व्याघ्रवद् रौति भक्तभयोपस्थितौ भक्तानां स्वरूपज्ञाने पश्चात् सिंहवत् **एव**मित्यनुकरणेन **प्रसिद्ध**मिति रसशास्त्रे **प्रसिद्धं** तेन विशेषतो नोच्यत इत्यर्थः, ननु व्याघ्रस्य सिंहस्य च भीतिजनकत्वाविशेषादेकेनापि भयोत्पत्तौ द्वयोः कथनस्य किं प्रयोजनमत आहु**र्भयं द्विविध**मित्यादि, **स्वरूपनाशा**दिति स्वरूपनाशहेतुभूतं, एवमग्रेपि, **स्वरूपे व्याघ्र** इति **स्वरूप**नाशहेतुभूतभयोद्दीपने व्याघ्रः, एवमग्रेपि, तथात्वं चात्र विप्रयोगाधैर्याभ्यां भक्तेषु प्रकटयत्यत एवोक्तं 'सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं कन्दर्पोपि यमायते विरचयन् शार्दूलविक्रीडितं' तथा च दशाविशेषे तद्वदपि करोतीत्यर्थः, तदेतदाहु**र्बहुप्रकार**मित्यादिना **निरूपित**मित्यन्तेन, **एवं वृन्दावन** इति श्लोकेनुभावोद्दीपनविभावव्यभिचारिणां निरूपणस्योक्तत्वादत्र **चकोरा**दिकथनेन षण्णां रसानामनुभावा अनुरावरूप उद्दीपनविभावो यथासम्भवं व्यभिचारिणश्च निरूपिता बोध्याः, एवमत्र षड् रसा निरूपिताः ॥ १३ ॥ **क्वचित्** क्रीडेत्यत्र **बीभत्सरसलीला**मिति तद्रसानुभाविकां तद्रसोद्दीपिकां **च लीलां** कथमत्र बीभत्सरसः प्रत्येतुं योग्य इत्यत आहु**र्हीना**दित्यारभ्य **भक्ताना**मित्यन्तं, अत्र बीभत्सरसनिरूपणं परोक्षवादरूपं वस्तुतस्त्वत्र भगवत एवाविष्टत्वान्न दोषरूपं किन्त्वापातत एव तथेति, एवं सप्त रसान् निरूप्य तदभिनयप्रयोजनमाहुरेते हीत्यादि **प्राप्नुवन्ती**त्यन्तं, **तत्तदधिकारनिरूपका** इति दशश्लोकोक्तानां पशुपक्ष्यादीनां तत्तद्रसालम्बनानां चेत्यर्थः, **सर्वरसाविष्टा** इति **तत्तद्रसाविष्टाः**, तथा चैतज्ज्ञापनार्थं तत्तदभिनय इत्यर्थः ॥ १४ ॥ **नृत्यत** इत्यत्र **रौद्ररसमा**हेति गोपैरुद्दीपितमनुभावितं च तमाहेत्यर्थः, ननु भगवान् मल्ललीलां स्वयं कुतो न कृतवानुपनिबन्धनमात्रमेव कुतः कृतवानित्यत्र हेतुमाहुः **कायवागि**त्यादिकारिकया, **कायवाङ्मनोभिर्य**न्नर्तनादिकं तत् सर्वं **युक्तमयुक्तं पीडकं च** श्रमेणेत्युत्कृष्टत्वाभावात् **तत् सा लीला स्तूयत** एव न तु क्रियत इत्यर्थः, युक्तापीडिके तु मुख्यभक्तैः सह क्रियेत एवेति भावः, तदिति नपुंसकप्रयोगेणैतस्याः फलपर्यवसायित्वं द्योत्यते ॥ १५ ॥ **क्वचित् पल्लवे**त्यत्र **शान्तरसलीला**मिति **शान्तरसा**नुभाविकां **लीलां, वृक्षस्य मूल**मित्यादेरर्थं **टिप्पण्यामाहुर्गोपोत्सङ्गे**त्यादि **स्या**दित्यन्तं, **सुबोधिन्यां** ननूत्सङ्गे कुतः प्राधान्यस्थापनमत आहुस्ते **हि वैश्या** इत्यादि, **ते हि वैश्या** भगवदूरुतो जाता अतः स्वस्य यो धर्मं ऊरुजत्वं तत्स्थापकमुत्सङ्गपदमित्यर्थः, शेषं स्फुटम् ॥ १६ ॥

(३) श्रीमद्वल्लभमहाजकृतः श्रीसुबोधिनीलेखः

चकोरेत्यत्र चकोरभोगं दृष्टान्तेन साधयन्ति **सूर्यकिरणा इवेति,** आप्यमण्डलजलांशाश्चन्द्रकिरणास्तद्भोक्तारः सूर्यकिरणाः, अन्यथा किरणद्वारा जलाग्रहणे पर्जन्यो न वर्षेत्, "याभिरादित्य" इतिश्रुतेः, तथा चकोरा अपि, ननु तादृशकिरणदर्शनेनास्मदादेरिव नेत्रयोस्तापो निवर्तत इत्येव वाच्यं, न तु भोक्तृत्वमित्यत आहु**रन्यथेति**, भोगाभावे अन्तःशैत्याभावेनाङ्गारभक्षणजनिततापनिवृत्तिर्न स्यादित्यर्थः **तथैवेति** चन्द्रकिरणवदित्यर्थः, **स्त्रीभिर्भुज्यन्त** इति गतसाराः क्रियन्त इत्यर्थः, स्त्रीभिः पुरुषा भुज्यन्ते पुरुषाश्च दास्यमेवानुभवन्ति न तु रसमिति, ननु प्रतीयते भोक्तृत्वमित्यत आहु**स्तथैवेति**, प्रतीतिस्तथैव वस्तुतस्तूक्तहेतोस्तथैव क्रियन्ते परन्तु गतविवेकत्वाद् भोक्तृत्वं मन्यन्त इत्यर्थः, इदं "कामिनां दर्शयन् दैन्य" मित्यत्र विवरिष्यते, तथा च चन्द्रकिरणस्थानीयाः पुरुषाः चकोरस्थानीयाः स्त्रिय इति पर्यवसन्नं, भगवति वैलक्षण्यमाहुस्तद्वदयमिति, चन्द्रकिरणस्थानीयाः स्त्रियः स्वयं **चकोरवत्** तद्भोक्तेति **तथा अनुरौती**त्यर्थः, यस्य यस्य स्थायिभावो यत्र यत्र प्रसिद्धः स स तत्तद्रसेनुक्रियते तत्र चन्द्रविषयिणी रतिश्चकोरे प्रसिद्धा, क्रौञ्चे युद्धोत्साहः, अग्रेप्यूह्यं, तत्तदनुकरणे तत्तद्धर्मस्मृत्या स्वस्य तत्तद्रसाविष्टा भक्ताः सेवितुं शक्ता भवन्तीत्यर्थः, चक्रवाके करुणास्थायिभावं शोकमाहुः स हीति, करुणाप्यस्तीत्याहुः चक्रेति, चक्रपदश्रवणे प्रायेण कश्चिन् मारयिष्यतीति ज्ञानेन मार्योपरि करुणा चक्रवाकस्य भवतीत्यर्थः, सत्त्व**सम्बन्धिन्येवस्थेति** शशादिसम्बन्धिनीत्यर्थः, अत्र परन्त्वतिशेषः, मौनस्थितिरूपा शशाद्यवस्था **भये परमा काष्ठा** भवति परन्तु **वचनस्यातिसुन्दरत्वात्** तदेव निरूपितमित्यर्थः ॥ १३ ॥ **क्वचित् क्रीडापरिश्रान्त**मित्यत्र **विगतश्रमेति युक्त**मिति भावे क्तः, योग इत्यर्थः, तथा च विगतं श्रमयुक्तं श्रमयोगो यस्मात् तादृ करोतीत्यर्थः, अङ्गान्तरं विहाय पादयोरेव संवाहे हेतुमाहुः पादे हीति, **बीभत्सो भवती**ति द्रष्टुर्जुगुप्साजनको भवतीत्यर्थः, अ **अत एव विकलत्वा**दिति अधुना क्रियामात्रव्यापृतत्वेन स्वामित्वस्फूर्तिरूपज्ञानकलारहितत्वादित्यर्थः, **उपनिबध्यत** इति तेषूक्त रसो भगवतानूद्यत इत्यर्थः ॥१४॥ **क्वचित् पल्लवतल्पे**ष्वित्यत्र **शान्त इवे**ति निर्वेदः प्रयत्नशैथिल्यं तेन युक्त इवेत्यर्थः, यद्यप्यष्टावे रसा मुख्यास्तथापि शृङ्गारव्यभिचारित्वेन निर्वेदस्य स्वीकृतत्वात् तस्यैव च शान्तस्थायिभावत्वाच् छान्तरसोप्युक्तो जात इति ह भवतीत्युक्तं, मूले शृङ्गाराङ्गत्वेनायं रस उक्तस्तत्तात्पर्यमिदमुक्तमिति ज्ञेयं, **प्रत्येकपर्यवसायी**ति समुदाये निर्वेदावधिरमण सम्भवात् पूर्वोक्तरसवत् समुदाये पर्यवसन्नो न भवतीत्यर्थः, **निरूपयन् बहुवचनं तत्** तस्मादाहेत्यन्वयः, **भगवा**निति अनेकर

हेतुत्वार्थमुक्तं अग्रे स्वरूपकथनार्थ मुक्तमितिविभागः, तथा च भगवत्त्वादनेकरूपः सन् भगवांस्तत्र **शयानो जात** इत्यन्वयः, **ननु तथापी**ति तल्पेषु स्थातव्यमेव शयनं किमर्थमित्यर्थः, **तानाश्रयत** इति तेषु पदकमलं स्थापयतीत्यर्थः, **कृतार्थीकर्तु**मिति समरयुद्धानन्तरमपि तल्पे शयानो भवतु तदा वयं चरणसेवां कुर्म इति तासां मनोरथं पूरयितुमित्यर्थः, **लोकानामेवे**ति श्रान्तत्वादतिकोमलतल्पे शेत इत्यन्तरङ्गगोपानां प्रतीतिर्भगवांस्तु योगिमनोरथपूरणार्थमेव शेते न तु श्रान्त इत्यर्थः, **स्वधर्मख्यापक**मिति स्वकारणजातीयैः स्वावयवैः सेवा स्वधर्मः मुखेनोपदेशेन सेवा ब्राह्मणधर्मः बाहुभ्यां रक्षया सेवा क्षत्रियधर्मः तथोरुभ्यां सेवैतेषां स्वधर्म इति तत्ख्यापकमित्यर्थः ॥ १६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

चकोरक्रौञ्चेत्यस्य व्याख्याने, **सर्वे पुरुषाः स्त्रीभिर्भुज्यन्त** इति कामशास्त्रोक्तलक्षणानां कस्मिन्नपि पुरुषेऽसम्भवात् पुरुषस्य भोक्तृत्वं भाक्तं, वस्तुतः कामिन्य एव भोक्त्र्यः, भगवति तु तच्छास्त्रोक्तलक्षणानां सर्वेषां सत्त्वाज् जागरूकं भोक्तृत्वमित्याहुः **तद्वदयं भगवान्** नेत्यारभ्य **वाग्व्यापारो निरूप्यत** इत्यन्तेन, चकोरो हि परमरसिकोत्यन्तालौकिकप्रकारेण चन्द्रकिरणान् भुङ्क्ते तदेकरतश्च, तद्वद् भगवानपि दूरस्थितचन्द्रमुखीमुखचन्द्रिका भुङ्क्ते तन्मात्रासक्तश्च, अतिदुरापनायिकाभोगस्त्वतिचातुर्येण भवतीति तादृक्चातुर्यचमत्कारसूचनाय चकोरवद् वक्तीति शृङ्गाररसोनेन निरूपितः, **क्रौञ्चो वीर** इति क्रौञ्चस्य युद्धाद्युत्साहवत्त्वात् उत्साहस्य वीररसस्थायिभावत्वात् वीररसः **क्रौञ्चवद्** वाग्व्यापारेणोक्तः, **चक्रवाकः करुणाया**मिति करुणारसो दुःखिते भवति, शोकस्थायिभावकत्वात् चक्रवाको ह्यत्यन्तं दुःखितः, चक्रवाकी वियोगव्याकुलः, अतस्तत्र करुणारसः स्फुट एवेति तदेतदाहुः, **स हि वियुक्त** इति, **चक्रपदेन मारणमभिप्रेतमि**तीति चक्रे जलचक्रे पतितः परमकष्टं प्राप्नोति चक्रपतितपुरुषमारणाय चक्रं बहुप्रकारेण यतते, एवं चक्रवाको विरहचक्रे पतितः परमपीडामनुभवति, तद्वद् वाग्व्यापारकरणात् स्वस्मिन् व्रजवामलोचनाविरहव्याकुलत्वं चक्रभ्रमणगतपुरुषवद् दुःखितत्वं भगवान् सूचयतीति युक्तः करुणारसः, अत एव गीतगोविन्दे उक्तं "प्रहरन् हरभ्रान्त्यानङ्ग मुधा किमु धावसी"ति "सद्वृत्तः स्तनमण्डलः सखि कथं प्राणैर्मम क्रीडती"ति च, एवं करुणारसो विप्रलम्भशृङ्गारे स्पष्ट इति, शृङ्गाररससम्बन्धित्वाद् रसत्वं करुणारसस्य, यत्र तु करुणायाः शृङ्गारसम्बन्धो नास्ति तत्र करुणामात्रत्वं न तु रसत्वं, एवमेव हास्यादीनामपि शृङ्गाररसमध्यपातित्वे रसत्वं न त्वन्यथा, शृङ्गार एव सर्वे रसा इति नाटचशास्त्रसिद्धान्तात्, ननु वियोगेनेतादृशी व्याकुलतास्ति चकोरवद् दुःप्रापपदार्थभोगचातुर्यं चास्ति तर्हि भगवान् किमिति वियोगमनुभवतीत्याकाङ्क्षायां भयस्य प्रतिबन्धकत्वबोधनाय भयानकरसं निरूपयन् व्याघ्रसिंहयोर्भीतवदनुरौति, भयानकरसोपि शृङ्गाररसेनुकूलः, अन्यथा निर्भीततया प्रवृत्तौ तु सर्वत्र प्रसिद्धचापत्त्या रसत्वमेव भज्येत, गुप्तो हि रसो रसत्वमापद्यत इति राद्धान्तात्, अत एव शृङ्गाररससम्बन्धित्वाद् भयानकरसस्य रसत्वं अन्यथा तु भयमात्रत्वमिति ॥१३॥ **क्वचित् क्रीडापरिश्रान्त**मित्यस्याभासे **बीभत्सरसलीलामा**हेति अयमपि शृङ्गाररससम्बन्धं लब्ध्वैव रसतां प्राप्नोति अन्यथा तु बीभत्सत्वमेव न तु रसत्वं, "स्युः शृङ्गारसंवलिता रसा हास्यादयो यदी"ति वाक्यात्, शृङ्गाररसे एतस्याप्यपेक्षास्ति, अन्यथा उभयोः आलम्बनविभावयोः परस्परात्यन्ताकाङ्क्षावशवर्तित्वान् मानखण्डितादिभावा नोद्भवेयुः, बीभत्सरसस्तु जुगुप्सास्थायिभावकत्वान् मनसः परावृत्तिमात्रजन्मा स्वल्पाया अपि स्नेहन्यूनताया दर्शनाद् भ्रमात्मकज्ञानाद् वा अयोग्यतादिदर्शनेन वा परमानन्दकाङ्क्षां निवारयन् मानखण्डितादिभावसम्पादको भवति, अत एव शृङ्गाररसं पोषयन् रसत्वमाप्नोति, अत एव "वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिक"मित्यादौ नायकेऽधमत्वोक्तिर्युज्यते, दूतिकासम्भोगवद्ज्ञानान्नायकतो मनसः परावृत्त्या बीभत्सरसोदयात्, श्रीगीतगोविन्देपि "याहि माधव याहि केशव मा वद कैतववाद"मित्यत्र "याही"त्युक्त्या बीभत्सरसोदयो दृश्यते, प्रकृते बलदेवपादसंवाहनं निरीक्ष्य किमयं भगवान् शृङ्गाररमणोद्योगं विहाय वृथाव्यागारं करोतीति सुदृशां मनसि बीभत्सरस उदेति, एतावदेव बीभत्सरसत्वं, यत्र तु कुत्सितपदार्थसत्तानिरूपणं तत्र बीभत्सरसो नास्तीतिज्ञेयं, रसस्वरूपाभावात्, रसत्वं ह्युत्तमजनोपादेयत्वं सुखजनकत्वं च, कुत्सितवस्तुनिरूपणे तूत्तमानां वमनाद्युत्पत्त्या दुःखजनकत्वेन सुखसंसर्गाभावान् न रसत्वं, अत एव नोपादेयत्वं अपि तु हेयत्वमेवेति तत्र रसतानिरूपणमाग्रहमात्रं, अत एव श्रीमदाचार्यैर्भगवत्ययं रसो निरूपितः, एवं सति वीरकरुणाहास्यादिरसाः शृङ्गाररसस्यावयवास्तैः पुष्टः शृङ्गाररसो भवतीति "रसो वै स" इत्युपनिषत्सिद्धः शृङ्गाररसात्मा श्रीवृन्दावनविधुः श्रीकृष्णो निरूपित इति भाग्यभाजो विभावयन्तु ॥ १४ ॥ **नृत्यतो गायत** इत्यस्याभासे **रौद्ररसमाहे**ति अयमपि शृङ्गाररससम्बन्धी, प्रकृतेपि मल्लयुद्धदर्शनासक्तिं दृष्ट्वा वृथाकालक्षेपकर्तरि नन्दनन्दने शृङ्गाररससम्बन्धिक्रोधजन्मा रौद्र रस उदेति वधूनां, अत एव रसत्वं, अयं रौद्ररसः क्रोधस्थायिभावको मानिनीनां विप्रलब्धानां च बहुधा बोभवीति ॥ १५ ॥ **क्वचित् पल्लवत**ल्पेष्वित्यस्याभासे **शान्तरसलीलामा**हेति अयमपि शृङ्गाररससम्बन्धीति भवत्येतस्य रसत्वं शृङ्गाररससम्बन्धस्तु सुबोधिन्यां परोक्षवादेनोक्तः टिप्पण्यां तु स्फुट एव, एवं नव रसाः शृङ्गाररससम्बन्धिनो भूत्वा रसतां लभन्ते, भक्तिरसस्तु शृङ्गाररसाङ्गभूतः कुत्रचित् स्वतन्त्रोपीति नास्मिन्नङ्गभावेनैव रसत्वमित्याग्रहो विदुषां, 'शृङ्गार एव सर्वे रसा' इत्यत्र तु नवानामेवाङ्गत्वोक्तिः भक्तिरसस्य तत्राप्रसिद्धत्वात् ॥ १६ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

नृत्यतो गायतः क्वापीत्यत्र कायवाङ्मनोभिरिति का० १३३३ । नृत्यतो गायतो वल्गत इति पदत्रयेणोक्तं कायवाङ्मनोभिर्यद्युद्धं युक्तं पीडारहितं युध्यत इति पदोक्तं **पीडकं अत एव अयुक्तं चतुर्विधापि** मल्ललीला हरिणा मुदा स्तूयते ॥१५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

चकोरादीन् पक्षिणः अनुरौति तत्तज्जातिशब्दानामनुकरणं करोति। सत्त्वानां प्राणिनां मध्ये व्याघ्रसिंहयोः शब्देन भीतवद्भवति, वतिप्रत्ययेन वस्तुतो भयाभावं सूचयति ॥ १३ ॥ क्वचित् क्रीडया परिश्रान्तमतो गोपोत्सङ्गमुपबर्हणमुच्छीर्षकं यस्य तमार्यमग्रज सुतं पादसंवाहनादिभिः पादसम्मर्दनादिभिः स्वयं कृष्णः विश्रमयति विगतश्रमं करोति ॥१४॥ क्वापि मिथो नृत्यादीन् कुर्वतो गोपालान् गृहीतहस्तौ रामकृष्णौ हसन्तौ "अहो ! यूयं नृत्येन विद्याधरविडम्बका, गानेन गन्धर्वगणतिरस्कारिणो, युद्धेन त्रिलोकीजित्वरा" इत्येवं प्रशशंसतुः ॥१५॥ नियुद्ध बाहुयुद्धम्, तेन यः श्रमस्तेन कर्शितः श्रान्त इव गोपोत्सङ्गोपबर्हणः वृक्षमूलाश्रयः वृक्षच्छायाश्रितः सन् कृष्णः क्वचित् पल्लवे एव शेते। 'पल्लवतल्पेषु' इति बहुवचनात् पुष्पादीनामपि तल्पा गोपैरहमहमिकया पृथक्पृथग्रचितास्तेषु तेषां प्रीत्यर्थं तत्तदलक्षितस्तावद्रूपः सन् शेते। एवमीशचेष्टित इति वक्ष्यमाणं सङ्गच्छते ॥ १६ ॥

अन्वितार्थप्रकाशिका

चकोरेति ॥ चकोरक्रौञ्चादीन् पक्षिणः अनुरौति तत्तज्जातिशब्दानामनुकरणं करोति। सत्त्वानां प्राणिनां मध्ये व्याघ्रसिंहयोः शब्देन भीतवद् भवति सखिषु पलायमानेषु पलायते। वस्तुतो भयाभावाद्वतिः प्रत्ययः ॥ १३ ॥ क्वचिदिति ॥ क्वचित् क्रीडया परिश्रान्तमतो गोपस्योत्सङ्गमुपबर्हणमुच्छीर्षकं यस्य तमार्यमग्रज सुतं पादसंवाहनादिभिः पादसंमर्दनादिभिः स्वयं कृष्णः विश्रमयति विगतश्रमं करोति ॥१४॥ नृत्यत इति ॥ क्वापि मिथो नृत्यतः गायतः वल्गतः धावतः युध्यतः युद्धमिच्छतः। क्वयजन्तम्। गोपालान् गृहीतहस्तौ हसन्तौ रामकृष्णौ अहो यूयं नृत्येन विद्याधरान् गानेन गन्धर्वान् वल्गनेन मल्लवरान् युद्धेन शूरांश्च जयथ इत्येवं प्रशशंसतुः ॥ १५ ॥ क्वचिदिति ॥ नियुद्ध बाहुयुद्ध तेन यः श्रमस्तेन कर्शितः श्रान्त इव गोपोत्सङ्गोपवर्हणः वृक्षमूलाश्रयः वृक्षच्छायाश्रितः सन् कृष्णः पल्लवतल्पेषु गोपैः रचितेषु शेते ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्वचिदितिशेषः। मेघगर्जिततुल्यया गंभीरया गोगोपालानां मनोज्ञया मनोहरया वाचा ॥ १३ ॥ चकोरश्चंद्राऽभिलाषी तदादीन् पक्षिविशेषानानुसृसरौति सत्वानां सत्वेभ्यो बलाधिक्येभ्यो जंतुभ्यः तथा व्याघ्रसिंहयोर्व्याघ्रसिंहाभ्यां भीतवत्पलायते व्यत्ययो बहुलमिति बाहुलकात्कारकव्यत्ययेन पंचमीस्थाने षष्ठी बोध्या ॥ १४ ॥ आर्यं बलदेवं पादयोः संवाहनादिभिः संमर्द्दनादिभिः हरिः स्वयं विश्रामयति श्रमरहितं करोति ॥ १५ ॥ मिथः परस्परं वल्तो ग्रहणं कुर्वतो गोपालान् हसंतौ गृहीतहस्तौ द्वौ रामकृष्णौ प्रशशंसतुः यद्वा तौ क्वापि नृत्यतः क्वापि मिथो गृहीतहस्तौ क्वापि हसंतौ भवतः यद्वा गोपालान् हसतौ अहो इमे गानेन गन्धर्वतिरस्कारिणः नृत्येन विद्यारविडंबिकाः युद्धेन त्रिलोकीजित्वरा इत्यादि परिहासं कुर्वन्तौ प्रकर्षतः शशंसतुः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चकोरेति ॥ चकोराश्चन्द्रज्योत्स्नापिबाश्च क्रौञ्चाः कुञ्चश्च चक्रवाकाश्च भारद्वाजा व्याघ्रटाश्च तान्, बर्हिणो मयूरांश्च अन्वनुसृत्य, रौति स्म। सत्त्वानां मृगादिबलवत्सत्त्वजातीनां मध्ये, व्याघ्रसिंहयोः, पञ्चम्यविवक्षया सामान्ये षष्ठी। व्याघ्रसिंहाभ्यामित्यर्थः। भीतवत्, भवति। ताभ्यामन्ये यथा भयं प्राप्नुवन्ति, तद्वत्सर्वथा निर्भीकः सन्नपि तदनुकरणं करोतीत्यर्थः ॥ १३ ॥ क्वचिदिति ॥ क्वचित्, क्रीडापरिश्रान्तं क्रीडनकृतपरिश्रमनाटनं कुर्वन्तं, गोपानामुत्सङ्गोऽङ्क एवोपबर्हणमुपधानं यस्य तं, आर्यं स्वाग्रजभ्रातर बलभद्रं स्वयं श्रीकृष्ण एव, पादसंवाहनादिभिः पादोपमर्द्दनादिभिः, विश्रमयति श्रमरहितं करोति ॥ १४ ॥ क्वापि, नृत्यतौ नृत्यं कुर्वाणम्, गायतो गानं कुर्वाणम्, वल्गत उत्प्लवतः, मिथः परस्परं, युद्धचतः युद्ध कुर्वाणम्, गोपालान्, गृहीतहस्तौ संगृहीतपरस्परपाणी रामकृष्णौ, प्रशशंसतुः तत्कृतनृत्यादिविशेषविषये तेषां प्रशंसां चक्रतुरित्यर्थः। तत्कृतनृत्यादौ स्खलनविषय इति शेषः। हसन्तौ, बभूवतुः ॥ १५ ॥ क्वचिदिति ॥ क्वचित् कृष्णः, नियुद्धेन बाहुयुद्धेन यः श्रमस्तेन कर्शितो ग्लानः भवति तदा वृक्षमूलमाश्रयो यस्य तथाभूतो भगवान्, गोपानामुत्सङ्ग एवोपबर्हणमुच्छीर्षकं यस्य तथाभूतः सन्, पल्लवतल्पेषु बहुवचनं पल्लवप्राचुर्यबोधनार्थम्। शेते। अत्र सर्वत्र वर्त्तमानप्रयोगा भूतेऽर्थे बोध्याः ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

क्वचित् क्रीडेति : १०.१५.१५.

तत्त्वज्ञेनापि नो लङ्घ्या मर्यादा लोकपावनी। इति किं दर्शयन्नीशश्चक्रे रामङ्घ्रिसेवनम् ॥ ३२ ॥

कृष्णप्रिया

कभी चकोर क्रौंच (कराँकुल), चकवा भरदूल और मोर आदि पक्षियों की सी बोली बोलते तो कभी बाघ, सिंह आदि की गर्जना से डरे हुए जीवों के समान स्वयं भी भयभीत की सी लीला करते ॥ १३ ॥ जब बलरामजी खेलते-खेलते थककर किसी ग्वाल-बाल की गोद के तकिये पर सिर रखकर लेट जाते तब श्रीकृष्ण उनके पैर दबाने लगते, पंखा झलने लगते और इस प्रकार अपने बड़े भाई की थकावट दूर करते ॥ १४ ॥ जब ग्वाल-बाल नाचने गाने लगते अथवा ताल ठोंक ठोंककर एक दूसरे से कुश्ती लड़ने लगते, तब श्याम और बलराम दोनों भाई हाथ में हाथ डालकर खड़े हो जाते और हँस-हँस कर 'वाह-वाह' करते ॥ १५ ॥ कभी-कभी स्वयं श्रीकृष्ण भी ग्वाल-बालों के साथ कुश्ती लड़ते-लड़ते थक जाते तथा किसी सुन्दर वृक्ष के नीचे कोमल पल्लवों की सेज पर किसी ग्वाल-बाल की गोद में सिर रखकर लेट जाते ॥ १६ ॥

पादसंवाहनं चक्रुः केचिदस्य[1] महात्मनः । अपरे हतपाप्मानो व्यजनैः समवीजयन् ॥ १७ ॥
[2]अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः । गायन्ति स्म महाराज स्नेहक्लिन्नधियः [3]शनैः ॥ १८ ॥
एवं निगूढात्मगतिः[4] स्वमायया गोपात्मजत्वं चरितैर्विडम्बयन् ।
रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितः[5] ॥ १९ ॥
[6]श्रीदामा नाम गोपालो रामकेशवयोः सखा । [7]सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन् ॥ २० ॥

कर्दमक्षमा

अन्वयः—केचित् तस्य महात्मनः पादसंवाहनं चक्रुः हतपाप्मानो अपरे व्यजनैः समवीजयन् ॥ १७ ॥ महाराज अन्ये स्नेहक्लिन्नधियः तदनुरूपाणि महात्मनः मनोज्ञानि शनैः गायन्ति स्म ॥ १८ ॥ चरितैः गोपात्मजत्वं विडम्बयन् स्वमायया निगूढात्मगतिः ईशचेष्टितः रमालालितपादपल्लवः सः ग्राम्यैः समम् ग्राम्यवद् रेमे ॥ १९ ॥ रामकेशवयोः सखा श्रीदामा नाम गोपालः (अन्ये) सुबलस्तोककृष्णाद्याः गोपाः प्रेम्णा इदम् अब्रुवन् ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्यजनैः पल्लवादिनिर्मितैः ॥ १७–१८ ॥ ईशचेष्टित इति । विगूढस्वभावत्वेऽप्यंतरांतरा ईशस्यैव चेष्टितानि दृश्यंते यस्मिन्सः ॥ १९ ॥ ईशचेष्टितत्वमेव दर्शयितुमाह । श्रीदामेति । स्तोकः कृष्ण इति कश्चित् ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पादसंवाहनं चरणमर्दनम् । तस्य हरेः । महात्मनः ब्रह्मादिपूज्यस्य । केचित्सुबलादयः । अपरे श्रीदामादयः । हतपाप्मानो जन्मांतरार्जितानंतपुण्याः । व्यजनैः वस्त्रपत्रादिरचितैः ॥ १७ ॥ अन्ये मनःसौख्यादयः । तदनुरूपाणि तयोः प्रियाणि गीतानि । स्नेहेन क्लिन्ना रागवती धीर्येषां ते तथा ॥ १८ ॥ एवं गोपलीलया । निगूढात्मगतिः प्रच्छन्नात्मस्वरूपः । ग्राम्यैर्गोपैः 'ग्राम्यो नैपुण्यवर्जितः' इति कोशः । ईशचेष्टितः प्रादुष्कृतनिजैश्वर्यः । अंतरांतरा मध्येमध्ये दैत्यदलनादिना स्वकीयस्वरतामपि बोधयतीति भावः ॥ १९ ॥ शेषकार्यमाह–। आद्यशब्दात् वृंदबंधु–देवभद्र–विनोदार्जुन–कामकंद–प्राणभानु–दृष्टिभानु–चन्द्रभानु-जयभानु–कलोत्तान–वीरसेन–कीर्त्तिसिंधु–कमलाकर–सुखसागर–संजयादयो ज्ञेयाः । श्रीदाम्नः प्राङ्निर्देशः सखिषु मुख्यत्वात् । स्तोककृष्ण इति चतुरक्षरमेव नाम ज्ञेयम् । तत्र चेदमेव लक्ष्यते बालस्यास्य रूपं कृष्णमनुगच्छदेव वर्त्तते तस्मान्नाम च तमनुगमिष्यत्प्रणयविशेषाय संपत्स्य इति विचार्य्य सम्यगुल्लसता तत्पित्रा तादृशं नाम प्रकाशितमिति । प्रेम्णेति न तु तालफललोभेन न तु दुष्टवधार्थं वेति, किं तु प्रियजनप्रीतिविशेषार्थमेवेति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

केचिदिति, बहुत्वं क्रमेण परिवृत्त्या श्रीमत्पादाब्जयोर्बहुभिः सम्वाहनात् किं वा बहुलशय्यासु प्रत्येकं त्रिचतुरतया तत्र प्रवृत्तेरभिप्रायेण महात्मन इति छान्दसं महात्मानः परमभाग्यवन्त इत्यर्थः । यद्वा, तस्य महागुणगणाश्चर्यरूपस्य हतः ततस्तादृशतत्सेवान्तरायरूपः पाप्मा यैः इत्यात्मानमधिक्षिपति तेषां नित्यतादृशत्वेऽपि अयमात्माऽपहतपाप्मेति वत्तत्प्रयोगः एवमिदं पदं पूर्वेण परेणाऽपि योज्यं सम्यक् मन्दमधुरचालनादिमुद्रया बीजयन् ॥ १७ ॥ तस्याऽवसरस्य योग्यानि तस्य श्रीभगवतोऽपि सदृशानि वा

---

१. तस्य–श्रीधर. वंशी. वीर. विज. । २. परेतुं–विज. । ३. क्लिन्नहृदः–वीर. । ४. रतिः–वीर । ५. चेष्टितं–विज. । ६. श्रीदामनामा–वीर. । ७. सुबलाद्योककृष्णाद्यान्गोपाप्रेम्णेदमब्रवीत–विज. ।

भीतानीति शेषः । विशेषमप्याह, मनोज्ञानि चित्ताकर्षणानि विचित्राद्भुतस्वरतालादिमयत्वात् शनैरिति विश्रामावसरयोग्यत्वादुत्तमगानमुदात्वाच्च स्नेहक्लिन्नधीत्वस्यात्रैवोक्तिर्गानस्वभावतस्तत्प्राकट्यविशेषाभिप्रायेण यद्वा, पदद्वयस्यास्य सर्वान्ते निर्देशात् पूर्वश्लोके वाक्यद्वयेनापि सम्बन्धो द्रष्टव्यः ॥ १८ ॥ अनुक्तामप्यन्यां गोपलीलामुद्दिशन् तादृशलीलायाश्च तदतिप्रियत्वं प्रतिपादयन्नुपसंहरति—एवमिति । स्वाविर्भावान्तरे रमालालितपादपल्लवोऽपि एवं वृन्दावनविहारप्रकारेण रेमे रतिं प्राप तदेवमत्र सुखं तादृशसुखस्याप्यनादरः सूचितः किं कुर्वन् चरितैर्नन्दस्त्वात्मज उत्पन्न इत्यादिरूपैरलौकिकैर्लौकिकं गोपात्मजत्वं विडम्बयन् हीनोपमारूपं कुर्वन् अलौकिकं गोपात्मजत्वमात्मनि दर्शयन्नित्यर्थः । ननु, श्रीभगवतः कथमात्मजत्वं तत्राह, स्वे ये श्रीनन्दयशोदादयः पित्रादिरूपास्तेषां मायया कृपया वात्सल्यवशतयेत्यर्थः । अत एव नितरां गूढा सर्वेषामप्यगम्या आत्मगतिर्महाप्रणयमयनिजमाधुरीविशेषो यस्य अत एव कैश्चिद्ग्राम्यैर्बन्धुभिः समं कश्चिद् ग्राम्यो बन्धुरिवेति आत्मजवत् सख्येऽपि तादृशोपमत्वमिति भावः । ननु, तर्हि सर्वत्रोच्यमानं श्रीभगवत्ताप्रकटनं तत्र कथं सङ्गच्छतां तत्राह, ईशं सर्वैश्वर्ययुक्तं चेष्टितं यस्य तल्लीलाशक्तिरेव तादृशी सती श्रीभगवदनुसंहितापि सर्वं सम्पादयतीत्यर्थः ॥ १९ ॥ एवं प्रथमदिनक्रीडयाऽन्यदिनक्रीडामप्युपलक्ष्याऽधुना कदाचिन्निजप्रियजनप्रीत्यै गोपालने किञ्चिदैश्वर्यमपि साक्षात् प्रकटितमिति प्रसङ्गादाह—श्रीदामेत्यादिना । तत्र श्रीरामस्य सखेति निर्देशस्तद्युद्धे तस्यैव प्राधान्यात् सुबलाद्याश्च सखायः श्रीदाम्नः प्राङ्निर्देशः सखिषु मुख्यत्वेन व्रजे तस्मिन्नन्यस्य केवलकृष्णनाम्ना प्रचारणायामन्याय्यत्वात् स्तोककृष्ण इति चतुरक्षरमेव नाम ज्ञेयं तत्र चेदेवमेव लभ्यते बालस्यास्य रूपं कृष्णमनुगच्छदेव वर्त्तते तस्मान्नाम च तमनुगमिष्यत्तत्प्रणवविशेषाय सम्पत्स्यत इति विचार्य सम्यगुल्लसता तत्पित्रा तादृशनामप्रकाशितमिति प्रेम्णेति न तु तालफललोभेन न च दुष्टवधार्थं कि तु प्रियजनप्रीतिविशेषार्थ किञ्चिदिष्टद्रव्यप्रार्थनलक्षणप्रेमस्वभावेनैव । यद्वा, स्वव्याजेन श्रीकृष्णरागयोरेव तादृशभोजनसम्पादनेच्छामयेनत्यर्थः । अत्र च सख्यमयप्रेम्णेति लभ्यते सख्यं च साजात्येनैव भवतीति मिथः प्रभावादिज्ञानमयमेव यथोक्तं तैः "अस्मान् किमत्र ग्रसिता निविष्टानयं तथा चेद्बकवद्विनङ्क्ष्यति" इति वक्ष्यते चानन्तरं रामरामेति ततोऽर्जुनेन तत्तद्युद्धसाहाय्यप्रार्थनावत् वीररसस्वाभाविकसख्यमयप्रेमैवेदमिति स्थितम् ।। २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणो

उपसंहरिष्यन् विश्रामक्रीडां वदन् गोपानां सौभाग्यभरं वर्णयति—क्वचिदिति त्रिभिः । पल्लवेत्युपलक्षणम्—कोमलनवकोरकपुष्पाणां तल्पेषु, किंवाविलम्बार्थं केवलं पल्लवैरेव रचितेषु तल्पेषु । तत्र च तदानीमेव प्रेमसम्भ्रमेण त्वरया बहुभिर्वयस्यैर्विरचितत्वाद्-गौरवेण बहुत्वम्, किंवा प्रत्येकं परमदक्षैः सर्व्वैरेव तैरेकैकशो निर्म्मितत्वेन बाहुल्यात्, ततश्च बहुतरेष्वपि तेषु तेषां प्रीत्यै तदलक्षितो निजशक्तिविशेषेण बहुरूपतयेव शेत इति ज्ञेयम् । एवम् (२० श. श्लो.) 'ईशचेष्टितः' इति वक्ष्यमाणमैश्वर्य्यमत्रापि संगतं स्यात् । नियुद्धं तैरेव सह बाहुयुद्धाख्यमल्ललीला, तेन श्रमो मौक्तिकसुन्दरश्रीगण्डादि-विषयकप्रस्वेदकणिकोदयादि-तल्लक्षण स्वीकारात्, तेन कर्शितः खिन्न इव । गोपः श्रीराधादेव्याः भ्राता श्रीदाम-नामा प्रियसखस्तस्योत्संगः क्रोड़मेवोपबर्हणमुपधानं यस्य सः । एवं श्रीदाम्नोऽपि तद्वतत्तत्र वहुत्वं ज्ञेयम् । यद्वा, गोपानामुत्संगोपबर्हण इति कुत्रापि कस्यचिदित्येव बोध्यम्, तच्च तल्पांगत्वेन यस्य कस्याप्युबर्हणस्थस्तैर्निजोत्संगोपधानता—सुखार्थमवचितत्वात्. किंवा रचितस्यापि तेनैव तदर्थं त्यागात् ॥ १७ ॥ केचिदिति बहुत्वं क्रमेण परिवृत्त्या श्रीमत्पदाब्जयोर्बहुभिः सम्वाहनात्, किंवा बहुलशय्यासु प्रत्येकं त्रिचतुरतया तत्र प्रवृत्तेरभिप्रायेण, किंवैश्वर्य्यविशेषेणैकस्यापि तस्य बहुतरः सम्वाहन—सम्भवात् । महात्मन इत्यार्षम्, महात्मानः परमभाग्यवन्त इत्यर्थः । यद्वा, तस्यैव विशेषणमपरिच्छिन्नस्येत्यर्थः । स्वयमेकेनव शक्तिविशेषतः सर्वास्वपि शय्यासु व्यापकत्वेन शयनात् । हतः—निजकीर्त्त्यादिना श्रीभगवतैव नाशितः पाप्मा जगतामपि यैस्ते तादृश-सेवा-सौभाग्याभावात्, वयन्तु पापिष्ठा एवेति भावः। एवमिदं पदं पूर्वेण परेणापि योज्यम् । सम्यक् मन्दमन्दमधुरभ्रमणादिमुद्रयाऽबीजयन् ॥ १८ ॥ तस्यावसरस्य श्रीभगवतोऽनुरूपाणि योग्यानि गीतानीति शेषः । महात्मन इति पूर्ववत्, यद्वा, समुद्रकोटिगभीरस्याक्षोभ्यतरस्यापि तस्य मनोज्ञानि चित्ताकर्षकाणि विचित्राद्भुत—स्वर-तालादिमत्त्वाच्छ्रीगोपीगुणादिमयत्वाच्च । हे महाराजेति सम्राजोऽपि भवादृशस्तादृशक्रीड़ासुखं न सिध्यतीति भावः, यद्वा, महाराजोऽत्यन्तप्रकाशमानः परमश्रेष्ठो यः स्नेह इत्यर्थः, तेन क्लिन्नधिय आर्द्रचित्ताः सन्तः, अतएव शनैर्बाष्परुद्धमानकण्ठतया लघु लघु अगायन्, स्नेहक्लिन्नधीत्वस्यात्रैवोक्तिर्गानस्वभावत्वेन तत्प्राकट्यविशेषाभिप्रायेण, यद्वा, परद्वयस्यास्य सर्वान्ते निर्देशात् पूर्वश्लोके वाक्यद्वयेनापि सम्बन्धो द्रष्टव्यः ॥ १९ ॥ अनुक्तामप्यन्यां तस्मिन् दिने कृतां गोपलीलामुद्दिशन् तद्दिनवन्यक्रीड़ामुपसंहरति—एवमित्युक्तप्रकारेण, किंवेदृशैश्चरितैश्चेष्टितै रमा-लालितपादपल्लवोऽपि रेमे रतिं प्रापेति महालक्ष्म्याः पादाब्ज-लालन-सुखादपि गोपक्रोड़ासुखस्य माहात्म्यं सूचितम्, यद्वा, रमयति सदा तमिति रमा श्रीराधा-देवी तया लालित-पादपल्लवः सन्निति दिवारण्य-परिभ्रमण-श्रमापनोदनार्थ-सम्वाहनादिना रतेरुपकारकत्वं दर्शितम् । किं कुर्वन् ? गोपात्मजत्वं विडम्बयन् प्रकटयन्नित्यर्थः । यद्वा, डलयोरेकत्वात् स्थिरीकुर्वन्नित्यर्थः, चरितैरित्यस्यात्रैव वान्वय इति श्रीनन्दादेव जीतोऽस्मीति श्रीभगवद्बुद्धिमपि बोधयति । ननु, प्रकट-तादृशैश्वर्य्यस्य कथं नाम तद्विड़म्बनं सिध्येत् ? तत्राह—स्वस्य मायया मायाख्य-शक्त्या कृपया वा, नितरां गढाच्छादितात्मनो गतिरात्मारामत्वपूर्णकामत्वादिलक्षणमैश्वर्य्यं येन सः; यद्वा, नितरां गूढातिरहस्योपनिषादामप्यगम्यात्म

गतिनिजमाधुरीविशेषो यस्य। अतएव कैश्चिद्ग्राम्यैर्बन्धुभिः समं कश्चिद्ग्राम्यः समो बन्धुः प्रभुरिवेति परमलौकिकत्वम्; तेन गोपक्रीडामाधुर्य्यञ्च बोधितम्। ननु, तर्हि सर्वत्रोच्यमानं भगवत्ताप्रकटनं कथं तत्र संगच्छताम्? तत्राह—ईशस्य चेष्टितं यस्य सः, तत्तच्चरितानामेव लोकातीतत्वादिति भावः। इति लौकिकालौकिकत्वेन भगवत्ता विशेषप्रकटनं पूर्ववत् सिद्धमेव। अथवा, निगूढात्मनो गतिः श्रीवसुदेवद्वारा गोकुले गमनं येन (सः), श्रीनन्दादेवात्मनो जन्मज्ञानात् तदनुरूपव्यवहाराच्चेति गोपात्मजत्वविडम्बनस्य मुख्यसाधनमुक्तम्। ईशं सर्वैश्वर्य्ययुक्तं चेष्टितमपि यस्य; यद्वा, ईशचेष्टित ऐश्वर्य्यचेष्टायुक्तोऽपि ग्राम्यवत् रेम इतीशचेष्टितादपि ग्राम्यवच्चरितस्य माहात्म्यं सूचितम्। अन्यत् समानम्॥ २०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

निगूढा आत्मगतिः स्वविषयज्ञानं सर्वेषाम्॥ १९–४२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा तस्य महात्मनः कृष्णस्य पादसम्वाहनं केच्चिच्चक्रुः अपरेऽपहतपाप्मानः तत्सेवालाभादिति भावः। तरुपल्लवनिर्मितैः व्यजनैः सम्यग्बीजयन्॥ १७॥ अन्ये तु हे महाराज! प्रेमार्द्रचित्ताः हृदयङ्गमानि तदनुरूपाणि चेष्टितानि जगुः॥ १८॥ इत्थं निगूढा आत्मरतिः स्वात्मानुभूतिर्येन तथाभूतः स्वसङ्कल्पेन चरितैश्चेष्टितैः गोपात्मजत्वमनुकुर्वन् रमया लालितौ पादौ एव पल्लवौ यस्य तथाभूतोऽपि ग्राम्यैः प्राकृतैः सह तद्वद्रेमे कथम्भूतः मध्ये मध्ये ईश्वरासाधारणानि चेष्टितानि यस्य तथाभूतः॥ १९॥ तदेव दर्शयति—श्रीदामेत्यादिना। श्रीदामा सुबलादयश्च इदं वक्ष्यमाणमब्रुवन्॥ २०॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

महात्मनः कृष्णस्य मनोहराणि स्नेहेन क्लिन्ना आर्द्रा धियो येषां ते तथा॥ १८॥ बाललीलामुपसंहरति–एवमिति। स्वमायया स्वेच्छयैव निगूढात्ममतिः प्रच्छन्नस्वरूपानुभवः अन्याऽपेक्षयेति शेषः। ग्राम्यैः मूर्खजनैः किमर्थमेवं कृतमत्राह, ग्राम्यवदिति धर्मं इति शेषः॥ १९॥ शुकः परीक्षितमाह—धन्येयमिति। कस्माद्धन्येत्यत्राह, तृणवीरुध इति। तस्य कृष्णस्य पादौ स्पृशन्तीति तत्पादस्पृशः करजैर्नखैः अभिमृष्टा अभितः श्रिताः लूना इत्यर्थः। नद्यादयो दयासहितैरवलोकैरवलोकिताः गोप्यः श्रीर्मद्भुजयोरन्तरं वक्षःस्थलं स्पृहयतीति यत्स्पृहा तस्मिन् भुजयोरन्तरेण मध्यम् आलिङ्गिता इति यत्तस्मादियं पृथिवी तद्गताः पदार्थाश्च धन्या इत्यर्थः॥ यद्देवकार्यार्थमवतीर्णं हरिणा तच्छेषं वक्तुमुपक्रमते, श्रीदामेति। सुबलश्चाशोकश्च कृष्णश्चाद्या येषां ते तथा तान्॥२०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तस्य महागुणगणस्येति हतः तादृशतत्सेवान्तरायरूपः पाप्मा यैरित्यात्मानम् अधिक्षिपति तेषां नित्यतादृशत्वेऽप्ययमात्माऽपहतपाप्मेतिवत्तत्प्रयोगः॥ १७॥ तदनुरूपाणि तदवसरार्हाणि॥ १८–१९॥ एवं गोचारणलीलासामान्यप्रसङ्गे कादाचित्कमप्याह—श्रीदामेति। स्तोककृष्ण इत्येव नाम न तु स्तोकेति विशेषणं तदग्रे तन्नामकरणानर्हत्वात् प्रेम्णा प्रियजनोचितप्रार्थनामयेन स्वव्याजेन तयोरेव तादृशभोजनेच्छामयेन च॥ २०–३४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ श्रीकृष्णस्य लीलावैचित्र्यं श्रीशुकः प्रपञ्चयति, एवमित्यादि। निगूढा अप्रकटा आत्मगतिरात्मनस्तत्वं सच्चिदानन्दादिलक्षणः स्वभावो यस्य स तथा। कोऽर्थस्तस्मिन्नेव विग्रहे सन्नपि सच्चिदानन्दलक्षणो धर्मो मायया आवरिकाख्यमायया अभक्तान् प्रति न प्रकाश्यते, ते तु मनुजार्भक एवायमिति जानन्तीति गूढशब्दस्यायं भावः। अत आह–चरितैर्गोपार्भकत्वं विडम्बयन्ननुकुर्वन्, चरितैरेव, न तु श्रीविग्रहेण स तु सच्चिदानन्दलक्षणः। अत आह—रमा आनन्दिनी शक्तिस्तया लालितः पादपल्लवो यस्य, गोपबालकैः सहेत्यर्थः। कैः क इव! ग्राम्यैः समं ग्राम्यवत् ग्राम्यैर्बालकैः समं ग्राम्यबालक इव। वस्तुतस्तु न तेऽपि ग्राम्याः, अयन्तु नैवेत्येवाह–ईशचेष्टित ईशेषु ईशप्रायेषु तेषु तथाविधैस्तैर्वा चेष्टितं चेष्टा यस्य। अन्यथा रमालालित–पादपल्लव इत्यनेनैवेश्वरत्वसिद्धेरीशचेष्टित इति पौनरुक्त्यम्, चरितैर्गोपार्भकत्वं विडम्बयन्नित्यनेन सहापि विरोधश्च स्यात्॥ २०–३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवं निगूढात्मगतिरित्यादि। चरितैश्चेष्टितैरेव गोप्यात्मजत्वं विडम्बयन्ननुकुर्वन्, न तु वस्तुगत्या रमा-लालितपादपल्लवोऽपि ग्राम्यैः समं ग्राम्यवदीशचेष्टितः सन् रेमे। ग्राम्यो जनो ग्राम्यैः सह यथा रमते, तथा रेमे, न तु तेऽपि ग्राम्याः, स्वयमपि न ग्राम्यः, यत् ईशचेष्टितः, इदमेव ईश चेष्टितं यस्य॥ २०–३७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वयोगमायया आवृतात्मैश्वर्य्यः स्वयं गोपात्मजोऽपि चरितैर्गोपात्मजत्वं भूपालपुत्रत्वं विडम्बयन् तिरस्कुर्वन् सोऽप्येवं लीलां कर्त्तुं न जानातीति भावः । "गोपा गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि" इति मेदिनी ऐश्वर्यदृष्ट्या रमालालितपादपल्लवोऽपि तदावरणात् कैश्चिद्ग्राम्यैः बन्धुभिः सह कश्चिद्ग्राम्यो बन्धुरिव रेमे न केवलमावृतमेव तदैश्वर्यमित्याह–असुरमारणादिप्रस्तावे ईशमैश्वर्य्यमयं चेष्टितं यस्य सः ॥ १९ ॥ ईशचेष्टितत्वमेव दर्शयितुमाह–श्रीदामेति । प्रेम्णेति कृष्णरामावेव स्वव्याजेन तालफलानि भोजयितुमित्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

व्यजनैः तालवृन्तादिरूपैः ॥ १७ ॥ स्नेहेन क्लिन्ना आर्द्रीकृता धीर्येषां ते ॥ १८ ॥ निगूढा साधारणैर्जीवैर्दुर्ल्लक्ष्या आत्मगतिर्यस्य सः कृपामात्रापेक्षया तु ईशस्य स्वस्यैव चेष्टितं यस्मिन् सः स्वमायया स्वसङ्कल्पेन गोपात्मजत्वं चरितैस्तदनुरूपैश्चेष्टितैर्विडम्बयन् अनुकुर्वन् रमालालितपादपल्लवोऽपि ग्राम्यैः ग्रामेषूत्पन्नैः स्वकृपापात्रभूतैर्गोपदारकादिभिः समं सह ग्राम्यवत् आसक्त इव रेमे इत्यन्वयः ॥१९॥ श्रीदामा सुबलाद्याश्चेदं वक्ष्यमाणमब्रुवन् सुबलश्च स्तोककृष्णश्च सुबलस्तोककृष्णौ तावादी येषां ते ॥२०॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

नियुद्धं सखिभिः सह भुजयुद्धं तेन श्रमः कपोलादिगतमौक्तिकसुन्दरस्वेदकणादिकरस्तेन कर्शितः कृशवत् प्रतीतः तेन तेषाञ्च तत्समं विक्रमत्वं सूचितं "गोपैः समानगुणशीलवयोविलासैः" इत्यागमोक्तेश्च श्रमत्वेन भृत्यसेवाभिलाषादुदितस्तत्सेवा रुचिरेव तस्याः अष्टादशदोषविरहस्मरणात् ॥ १७ ॥ सेवामाह—पादेति । हतपाप्मानो दहरवन्नित्यनिवृत्तदोषाः व्यजनैस्तालवृन्तैर्वालव्यजनैश्च ॥ १८ ॥ तदनुरूपाणि यशांसीति शेषः ॥ १९ ॥ उपसंहरति—एवमिति । एवं वृन्दाटवी क्रीडाप्रकारेण रेमे रतिं प्राप तेन वैकुण्ठविहारेषु नेदृशी रतिरिति सूच्यते स्वेषु मायया कृपया नितरां गूढ़ा मुकुराधरचित्रवन्नरचेष्टान्तरवस्थापितागतिर्विशुद्धनिजैश्वर्यं येन सः स्वेभ्यो विशुद्धं तत्र रोचेतेति भावात् स्वयं गोपात्मजोऽपि चरितैः पूतनादिवधरूपैरन्यद् गोपात्मजत्वं पृथ्वीपतिपुत्रत्वं वा विड़म्बयन् तिरस्कुर्वन् तत्र तत्र तत्तल्लेशस्याप्यभावात् रमया एवं वृन्दावनं श्रीमदित्याद्यधिगतया श्रीगोकुलमहालक्ष्म्या ललितावीप्सितौ पादपल्लवौ यस्य सः यद्यपि निजैश्वर्यं तेनानिगूह्यते तथापि क्वाप्यसुरमारणादौ तद्व्यक्तीभवेदित्याह—ईशमैश्वर्यमयं चेष्टितं यस्य सः स्वैः सार्द्धं विहारे तु तन्नास्तीत्याह ग्राम्यैर्बन्धुभिः समं ग्राम्यो बन्धुर्यथेति ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तदनुरूपाणि चरितानीति पूरणीयम् । स्नेहेनैतत्पादस्य कृष्णहस्तस्पर्शायोग्यस्वादेवोत्तरत्र गूढत्वप्राप्तिः फलमित्युत्प्रेक्षयन्ति । भक्तिरसेन क्लिन्ना आर्द्रा धीर्येषां ते तथा शनैर्निद्राविद्रुतिदरतः ॥ १७ ॥ एवं निगूढात्मनो मतिर्यस्य स स्वरूपभूतेस्यात्मा मतिर्यस्येति वा । गूहनमोहात एव नेतरत इत्याह ॥ स्वमाययेति । स्वेच्छयेत्यर्थः । चरितैः कर्मभिर्गोपात्मजत्वं विडम्बयन्ननुकुर्वन् रमालालितपादपल्लवोऽपि ग्राम्यैरश्लीलजनैः समं साकं रेमे । नरेषु जनने नरवत्प्रवृत्तौ रत्योदेरासे चेष्टितं ग्राम्यवदश्लीलवद्भूवात । अयं चानुकरणस्य महामहिमा ॥ १८ ॥ हरिचरणस्मरणपरवशचेताः शुकः स्वयमवन्यादिधन्यतां मनस्यानीय लोकावगत्यै प्रकाशयति ॥ धन्येति । अद्य धरणीयं धन्या तृणवीरुधस्तृणानि श्रीतृणानि धन्यास्तत्र तन्त्रम् । यत्पादस्पर्शो यस्य हरेः पादौ स्पृशन्तीति तास्तथा नद्योऽद्रयश्च धन्याः सदयावलोकैः खगमृगा धन्याः श्रीरपि यत्स्पृहा स्पृच्छा यस्याः सा तद्भुजयोरन्तरेणोरसालिङ्गितेन गाप्यो धन्याः । परवरश्रीरियामति न पूर्वोत्तरसङ्गातरतस्याः ॥ १९ ॥ प्रकृत आह ॥ श्रीदामेति । सुबलास्तोककृष्णाद्यान्गोपान्प्रेम्णा स्नेहेनेदं वक्ष्यमाणमब्रवीत् । सुबलस्तोककृष्णाद्या गोपाः प्रम्णेदमब्रुवन्निति पाठः सरलः । श्रीदाम्न एकस्योत्कृष्य कथने निमित्तं बहुप्रेमपात्रता । सुबलः कृष्णश्चान्यौ बलकृष्णाभ्याम् ॥ २० ॥

श्रीसुबोधिनी

भक्तिरसमाह **पादसंवाहनं चक्रुः**रिति **केचि**दिति दुर्लभाः, **अस्ये**ति, **शा**न्तरसाभिनयकर्तुः **स**र्वरसास्वादकस्य वा, **महात्मन** इति, ततोप्यधिकस्य रसान्तरमुत्पादायतुं समर्थस्य, **पादसंवाहन**मत्र दास्यं, पुनः कर्ममार्गानुसारेणापि भक्तिं कुर्वाणा **हतपाप्मानो** निष्कल्मषाः, कर्मिणां पापसम्भावना वर्तत इति तन्निराकरणार्थमुक्तं हत**पाप्मान** इति, ते ह्यासन्योपासकाः पूर्वं तेनैव तथाकृताः, अतो वायोः साम्यात् तदभिव्यक्तिहेतु**भिर्व्यजनैः** सम्यग्वीजयन्, एवमुभयविधा अपि भगवत्सेवालक्षणं भक्तिरसं भगवत्सन्निधानाल्लभन्त इति भक्तिरससहिता भगवत एव लीला ॥ १७ ॥ एवं रूपप्रपञ्चानुसारेण लीलामुक्त्वा नामप्रपञ्चानुसारेणापि तां लीलामाहात्म्य इति, भगवतो**नुरूपाणि** योग्यानि न त्वननुरूपाणि, निरोधार्थं केवलं **कृतानि मनोज्ञानि** मनोहराणि भगवतो

भक्तानां च, यद् भगवता गोप्यं तत्प्राकट्यं भगवतो मनोहरं भवति भक्तानां तु भक्तिमार्गविरुद्धं, **महात्मन** इति, भगवति सर्वं सम्भवति, अतो **भगवन्माहात्म्यं ज्ञात्वा भगवान् कीर्तनीय** इतिज्ञापनार्थं **महात्मन** इत्युक्तं, **गानं रागानुसारेण भगवद्गुणोपनिबन्धयुक्तानां** कीर्तनं, **स्मे**ति प्रसिद्धिः प्रमाणं, **महाराजे**तिसम्बोधनं राजलीलात्वज्ञापनाय, तेषामपि प्रेमोद्गमो भगवत्सान्निध्यादभीष्टगुणाच्च जात इति सर्वलीलान्ते तेषां प्रेमोच्यते **स्नेहक्लिन्नधियः शनै**रिति, स्नेहेन क्लिन्ना धीर्येषां, **आर्द्रवाससा स्पृष्टं सर्वमार्द्रमिव भवती**ति ज्ञापयितुं तेषां गानमपि तथा जातमित्याह **शनै**रिति, एतदन्तैव भगवल्लीला ॥ १८ ॥ अतः परं जीवाः सायुज्यमेव प्राप्स्यन्तीति कैः सह लीला कर्तव्या स्यादत उपसंहरत्येव, एता एव दशविधलीला यत्र क्वचिद् भगवत उच्यन्ते, **अग्रे** भगवतो राजसीं सात्त्विकीं च लीलां वक्ष्यन् तामसीयं **गोकुले ग्राम्यैः** सह कृतेत्याह, ननु ज्ञानरूपे भगवति कथमियं लीला सम्भवति ज्ञानस्य तमोविरोधित्वात् ? तत्राह **निगूढात्मगति**रिति, नितरां गूढा आत्मनो गतिर्ज्ञानलीला यस्य, **स्वमाय**येत्युभयत्र सम्बध्यते, स्वाधीनमायया **गोपात्मजत्वमपि चरितैः** कृत्वा **विडम्बय**त्यनुकरोत्युपहसति वा, न हि गोपा एतादृशा भवन्ति, अतो महानल्पस्य नाम स्वस्मिन् स्थापयंस्तानुपहसत्येव, चरितान्यलौकिकानि, विडम्बनं **चालौकिकचरित्रै**र्न भवतीति **माया** तेषु सहकारिणी क्रियते, बहूनामेव चरित्राणां बहुधा प्रदर्शितानां विडम्बनं सिध्यति, अतः स्वरूपं गोपयन् गोपानुकरणं चोपहसन् **रेमे**, लीलादावुक्ताया लक्ष्म्या उपसंहारे विनियोगमाह **रमालालितपादपल्लव** इति, **क्रीडान्ते पादसंवाहनं पतिव्रताया धर्मः** अन्यथा **समतया गता भक्तिनं पुनरागच्छेत्, अतः प्रत्यापत्त्यर्थमन्तेवश्यं पादसंवाहनं कर्तव्यं** एतादृशोपि **ग्राम्यैः समं** ग्राम्यरसानुभवार्थं **ग्राम्यवदेव** रेमे, अन्यथा विजातीये रसो नोत्पद्येत, **ईशचेष्टित** इति भगवतोप्यन्ते प्रत्यापत्तिः, ईशस्येव चेष्टितं यस्येति "लोकवत् तु लीलाकैवल्य"मितिन्याय उपदर्शितः, ईश्वरा अप्याखेटकादिरूपां व्याधवल्लीलां कुर्वन्ति तथैतदपि भगवता कृतमिति ॥ १९ ॥ एवं गोपानां संस्कारार्थं लीलां प्रदर्श्य तेषां दोषनिराकरणार्थं धेनुकवधलीलां प्रस्तावयति **श्रीदामानामे**ति **विंशत्या**, श्रीर्दाम यस्य, **लक्ष्म्याः** सम्बन्धी कश्चित् तद्भ्रातेव, सोपि गोपालो नन्दवंशोद्भवो **रामकेशवयोः सखा** साधारणः सख्यपर्यन्तमागतः स्त्रीसम्बन्धी लीलासम्बन्धी भक्तिसम्बन्धी च, तादृशानन्यानपि गणयति **सुबले**ति, **स्तोको** भिन्नः, कृष्णो भिन्नः, **स्तोक**कृष्णश्चापरः सुबलो बलभद्रानुसारी स्तोककृष्णो भगवदनुसारी सुबलस्तोककृष्णावेवाद्यौ येषां, ते सर्वे सम्भूय **प्रेम्णा** स्वाभिलषितं किञ्चित् प्रार्थयन्ति ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अन्ये तदनुरूपाणीत्यत्र, **भगवति सर्वं सम्भवती**ति भक्तिमार्गे विरोधलीलाया अभावात्तत्कृतो मनोज्ञत्वपरिहारोनुपपन्न इत्यत आहुः महात्मन इत्यस्य तात्पर्यं **भगवती**त्यादिना । यथा रोदनं यथा वाग्रे सर्वज्ञत्वेन जानन्नपि भक्तपरीक्षार्थमसन्तमपि भक्तदुःखहेतुं कालीयहृदे प्रदर्शितवान् । तथाविधा लीला न गीतेत्यर्थः ।॥ १८ ॥ **एवं निगूढात्मगति**रित्यत्र, स्वकार्याकरणमेवात्र निगूढत्वम्, तेन तद्विपरीतकार्यसम्भवापि । अत एव पूर्णशृङ्गाररसात्मत्वं संगच्छत इति दिक् ।॥ १९ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

पादसंवाहनमित्यत्र **भक्तिरस**मिति गोपानां **भक्तिरसं, ततोप्यधिक**स्येति नवरसास्वादकापेक्षयाप्यधिकरसास्वादकस्य, **कथं** तदित्यत आह **रसान्तर**मित्यादि, नवभ्यो रसेभ्योन्यो रसो **सान्तरं** भक्तिर**सम**न्यत्रोत्पादयितुं **समर्थस्य**, दास्यमत्र सख्यान्तरभावि ज्ञेयम् ॥ १७ ॥ **अन्य** इत्यत्र **भगवति सर्वं सम्भवती**त्येतस्यार्थं **टिप्पण्यामाहुर्भक्तिमार्गे**त्यादि, **सुबोधिन्यामभीष्टगुणा**दित्यभीष्टगुणप्रातेरित्यर्थः, **एतदन्तैवे**ति स्नेहान्तैव, **क्वचित् पल्लवे**त्यादिचतुर्षु पुष्टिप्रवाहमर्यादायां "पुष्ट्या विमिश्राः सर्वज्ञा" इतिकारिकोक्ताः पुष्टिमार्गीययाश्चतुर्विधा ज्ञातव्याः ॥ १८ ॥ **एव**मित्यत्राभासे**तःपर**मिति लीलाजन्यस्नेहोत्तरं पुनर्लीलाकरणे, **इत्याहेती**तिहेतोः प्रकारभेदोपसंहार**माहे**त्यर्थः, **नितरां गूढे**तिनिगूढपदतात्पर्यं **टिप्पण्यामाहुः स्वकार्याकरण**मित्यादि, **सुबोधिन्यां सहकारिणी क्रियत** इति, तथा चालौकिकेष्वेव सा तथा प्रदर्शयतीतिभावः ॥ १९ ॥ **श्रीदामे**त्यत्राभासे **संस्कारार्थ**मित्यलौकिकभावसिद्ध्यर्थम् । **राम रामे**त्यत्र प्रथम**राम**सम्बोधने हेतुमाहुः **कायिकश्चे**त्यादि, अयमाध्यात्मिकः कायिकदोषो बलदेवेनैव दूरीकर्तव्य इतिभगवदिच्छाज्ञानात् तथेत्यर्थः ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

पादसंवाहनमित्यत्र **अत्र दास्य**मिति पूर्वश्लोकोक्तं चरणसंवाहनं योगिकृतत्त्वादात्मनिवेदनरूपं, अत्रोक्तं गोपकृतत्वाद् योगिषु गतेषु गोपैः कृतं यद् दास्यं तादृशदास्यरूपं न त्विदं द्वयमपि पादसेवनभक्तिरूपं, तथा सत्यङ्गान्तरमर्दनादिकं न प्राप्येत, अत एव लक्ष्मीकृतजानुसंलालने 'करपल्लवरोचिषे'ति पदे **तस्याः** सभयत्वमेव व्याख्यातं, **एवमुभयविधा** इति हरिसेवयैव देहादीनां ब्रह्मभावं सम्पाद्य सायुज्यं प्राप्ता आसन्यस्य सेवया इन्द्रियाणां देवतात्वं सम्पाद्य हरिसेवया ब्रह्मभावरूपं सायुज्यं प्राप्ताश्चेत्यर्थः ॥१७॥ **अन्य** इत्यस्याभासे **तां लीलामाहे**ति भक्तिरसलीलामित्यर्थः, **अन्य** इत्यत्र **भक्तानां** त्विति भक्तानां भक्तिमार्गविरुद्ध चरित्रममनोहरमित्यर्थः, तथा च यत्प्राकट्यं भगवतोनभीष्टं तदन्तरङ्गचरित्रं भगवतोऽमनोहरं, भक्तानाममनोहरं रोदनादिचरित्रं च **न गीत**-

मित्यर्थः, **अनुरूपाणी**त्यनेन बालभावाननुरूपपूतनामारणादिचरित्रव्युदासो ज्ञेयः, **भगवत्सान्निध्यादभीष्टगुणा**च्चेति रूपलीलातो नामलीलातश्च प्रेमोद्गमः "स्नेहक्लिन्नधियः शनै"रितिपदद्वयेनोक्त इत्यर्थः, गानस्य शनैष्ट्वे हेतुमाहुः **आर्द्रवासस**ेति, इति दृष्टान्तेन क्लिन्नधीकृतगानस्यापि क्लेशाच् छनैष्ट्वमित्यर्थः, **सायुज्य**मिति नित्यलीलास्थितिमित्यर्थः, **कैः सहे**ति नित्यलीलास्थितावेतेषां तु निवर्तनीयदेहाद्यध्यासाभावाद् धेनुकवधादिलीला कैः सह स्यादित्यर्थः ॥ १८ ॥ एवमित्यत्र **तामसो**ति यत्र भगवानपि स्वस्वरूपं धर्मांश्च विस्मृत्य रन्तुं प्रवृत्तस्तादृशीत्यर्थः, **ज्ञानस्ये**ति तद्धर्मरूपस्येति शेषः, तमो विरुणद्धि तादृशत्वात् तस्येत्यर्थः, **ज्ञानलोले**ति धर्मरूपं ज्ञानमित्यर्थः, टिप्पण्यां **स्वकार्ये**ति स्वस्य धर्मरूपज्ञानस्य **कार्यं** तमसो विरोधः कार्यप्रतिबन्धस्तदकरणमित्यर्थः, **तेने**ति प्रतिबन्धाभावेन हेतुना तद्विपरीतस्य तमसः कार्यसम्भव इत्यर्थः, सुबोधिन्यां, **चरितानी**ति गवाह्वानादिचरितान्यलौकिकानि तेषु मोक्षदानरूपाणि, तथात्वज्ञानं मायया प्रतिबध्यते इति गोपात्मजत्वादेव करोतीत्येव ज्ञानं भवतीत्यर्थः, **चरितैरि**तिबहुवचनस्यार्थमाहुः **बहूनामेवे**ति ॥१९॥ **श्रीदामे**त्यस्याभासे **संस्कारार्थ**मिति नित्यलीलायोग्यतार्थमित्यर्थः, **दोषनिराकरणार्थ**मिति तनुनवत्वसिद्ध्यर्थमित्यर्थः, **श्रीदाम यस्ये**ति सा सूत्रं यस्य तत्सन्देशादिद्वारा सेवाकर्तेत्यर्थः ॥ २० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

व्रजरमणीनामपि भक्तिरस उदेति, अयं भगवान् न लौकिकनायक इत्यस्माभिरप्येतस्य भजनमेव कार्यं भक्तिलभ्यत्वात् पुरुषोत्तमस्येति, एवमत्र भक्तिरसोपि श्रृङ्गाररसाङ्गभूत एव, मातृचरणानां तु स्वतन्त्र एव पुत्रभावरूपो भक्तिरसः "ततो भक्तिर्भगवति पुत्रीभूते जनार्दन" इति वाक्यात् ॥ १७ ॥ एवं **निगूढात्मगति**रित्यस्य व्याख्याने **एता एव लीला यत्र क्वचि**दिति एतासु दशविधलीलास्वेव सर्वश्रृङ्गारसम्बन्धिलीलानामन्तर्भाव इति हार्दम, **रमालालितपादपल्लव** इत्यत्र **समतया गते**ति रमणे हि समत्वमपेक्षितं, तुल्यतायां तु न भक्तिरसोतो रमणसमये तुल्यतां कृत्वापि पुनर्भक्तिलाभार्थं श्रीलक्ष्मीः पादसंवाहनं करोति स्मेत्यर्थः ॥ १९ ॥ **श्रीदामा नामे**त्यस्य विवृतौ **लक्ष्म्याः सम्बन्धी कश्चिद् तद्भ्रातेवे**ति इह **लक्ष्मी**पदेन मुख्यस्वामिनी श्रीवृषभानुनन्दिनी ग्राह्या, वैष्णवास्तां लक्ष्मीं "परां राधां प्रचक्षते" इति ब्रह्मवैवर्ते लक्ष्मीपदवाच्यतोक्तेः तस्याः श्रीदामा भ्राता भवत्येवेति स्फुटं ब्रह्मवैवर्तादौ प्रसिद्धिश्च, **भ्रातेवे**त्यत्र इव पदोपादानं तु श्रीस्वामिन्या भगवद्रूपत्वादयोनिजनुस्त्वख्यापनार्थं, सोपि **गोपालः नन्दवंशोद्भव** इति श्रीनन्दस्य सम्बन्धी यो वंशः यदुवंशः तत्रोद्भवो यस्येत्यर्थः, पुराणे श्रीनन्दस्य श्रीवृषभानोश्च यदुवंशोद्भवत्वकथनात् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा केचिद्गोपास्तस्य महात्मनः श्रीकृष्णस्य पादसंवाहनं चक्रुः। अपरे तु गोपा व्यजनैः पल्लवादिनिर्मितैः समवीजयन् सम्यग्मन्दमधुरचालनादिमुद्रया अवीजयन् । एवं भगवत्सेवा विशुद्धान्तःकरणानामेव सम्पद्यते, इत्याशयेनाह–हतेति । बहुजन्मोपार्जितैः सुकृतैः हतो नष्टः पाप्मा येषां ते ॥ १७ ॥ अन्ये तत्स्नेहेन क्लिन्ना आर्द्रा धीर्येषां ते तदनुरूपाणि तस्य शयनस्यानुरूपाणि योग्यानि, अत एव महात्मनस्तस्य कृष्णस्य मनोज्ञानि सुखकराणि गीतानि शनैः यथा निद्राभङ्गो न स्यात्तथा गायन्ति स्म। 'हे महाराज !' इति सम्बोधनेन राज्ञामपि शयनं एवमेव भवति, तत्तु तव विदितमेवेति भावः ॥ १८ ॥ वस्तुतो रमया लक्ष्म्या लालितौ पादपल्लवौ यस्य स भगवानेव स्वमायया स्वेच्छया निगूढा आच्छादिता आत्मनो गतिस्तत्त्व येन सः स्वचरितैर्गोपात्मजत्वं विडंबयन् अनुकुर्वन् ग्राम्यैर्गोपैः समं सह ग्राम्यवत् एवमुक्तप्रकारेण रेमे इत्यन्वयः । ननु 'स भगवानेवायम्, इत्यत्र किं ज्ञापकं तत्राह– ईशचेष्टित इति । ईशस्य चेष्टितानि देवादिष्वप्यसम्भावितानि असुरसंहारादीनि कर्माणि यस्य सः ॥ १९ ॥ ईशचेष्टितत्वमेव दर्शयितुं चरित्रान्तरमाह–श्रीदामेति । रामकेशवयोः सखायः श्रीदामाद्या गोपाः प्रेम्णेदमब्रुवन्नित्यन्वयः । प्रेम्णा 'इत्यनेन स्वार्थप्रार्थनाव्याजेन तावेव तालफलानि भोजयितुमिति सूचयति ॥ २० ॥

अन्वितार्थप्रकाशिका

पादेति ॥ हतः पाप्मा पापं येषां ते केचिद् गोपास्तस्य महात्मनः श्रीकृष्णस्य पादसंवाहनं चक्रुः। अपरे तु गोपा व्यजनैः पल्लवादिनिर्मितैः समवीजयन् ॥ १७ ॥ अन्ये इति ॥ हे महाराज ! अन्ये तत्स्नेहेन क्लिन्ना आर्द्रा धीर्येषां ते तदनुरूपाणि हरिगुणा अत एव मनोज्ञानि रुचिराणि महात्मनो हरेर्यशांसि इति शेषः। शनैर्गायन्ति स्म । यद्वा। तदनुरूपाणि पूर्वोक्तशयनस्यानुरूपाणि अतो महात्मनः कृष्णस्य मनोज्ञानि सुखकराणि गीतानि शनैः निद्राभङ्गो यथा न स्यात्तथा गायन्ति ॥१८॥ एवमिति ॥ स्वचरितैर्गोपात्मजत्वं विडम्बयन् अनुकुर्वन् स्वमायया निगूढा आच्छादितात्मनो गतिस्तत्त्वं येन सः तादृशोऽपि क्वचिदन्तरान्तरा ईशस्यैवैश्वर्यमयं चेष्टितं यस्य सः रमया लक्ष्म्या लालितौ पादपल्लवौ यस्य स भगवान् ग्राम्यैर्गोपैः समं सह ग्राम्यवदेवमुक्तप्रकारेण रेमे ॥ १९॥ ईशचेष्टितत्वं दर्शयति —श्रीदामेति ॥ रामकेशवयोः सखा श्रीदामा नाम गोपालः तथा अन्येऽपि तयोः सखायः सुवलः स्तोककृष्णश्चेत्याद्या गोपाः प्रेम्णा स्वव्याजेन रामकृष्णावेव तालफलानि भोजयितुमित्यर्थः। इदं वचनमब्रुवन् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

युधश्रमेण कर्षितः पीडितः वृक्षमूलान्येव आश्रयः स्थानं यस्य सः गोपानामुत्संगः अक एव उपबर्हणं मस्तकस्याधोधृत्यर्थमुपधानं यस्य सः शेते ॥ १७–१८ ॥ स्नेहेन क्लिन्ना आर्द्रा धीर्येषां ते ॥ १९ ॥ स्वमायया स्वयोगसामर्थ्येन निगूढा गोपिता आत्मनः स्वस्य गतिरैश्वर्य्यप्रसरण येन तथाभूतः सन् ईशचेष्टितः गुप्तैश्वर्य्यत्वेपि ईशानि ब्रह्मादिनियामकानि चेष्टितानि यस्य विडंबयन् अनुसरन् ॥ २०–२१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पादसंवाहनमिति ॥ तदा केचित्, महात्मनः तस्य कृष्णस्य, पादसंवाहनं चक्रुः । अपरेऽन्ये, हतपाप्मानः सेवालाभान्निवृत्तसकलपापाः सन्तः, व्यजनैस्तरुपल्लवनिर्मितैस्तालवृन्तैः, समवीजयन् ॥ १७ ॥ अन्य इति ॥ हे महाराज परीक्षित्, अन्ये, स्नेहक्लिन्नधियः प्रेमार्द्रचित्ताः सन्तः, मनोज्ञानि हृदयंगमानि, महात्मनः कृष्णस्य, तदनुरूपाणि तदानीं तस्यामवस्थायां वा कर्त्तुं योग्यानि संचेष्टितानि, शनैः गायन्ति स्म ॥ १८ ॥ एवमिति ॥ एवमित्थं, निगूढा नितरां गुप्ता आत्मगतिः स्वात्मानुभूतिर्येन सः, स्वमायया स्वसंकल्पेन, चरितैः रचितैश्चेष्टितैः, गोपात्मजत्वं गोपबालकभावं विडम्बयन्ननुकुर्वन्, रमया लालितौ पादावेव पल्लवौ यस्य सः, एवंभूतः कृष्णः, ईशचेष्टितः मध्ये मध्ये परमेश्वरासाधारणचेष्टितानि प्रदर्शयन् सन् इत्यर्थः । ग्राम्यैः प्राकृतैः समं सह, ग्राम्यवत् ग्राम्यैस्तुल्यमेव, रेमे ॥ १९ ॥ तदेव दर्शयति श्रीदामेत्यादिना ॥ श्रीदामेति ॥ रामकेशवयोः बलकृष्णयोः सखा, नाम प्रसिद्धः, श्रीदामा, सुबलश्च स्तोककृष्णश्च तावाद्यौ मुख्यौ येषां ते, गोपाः प्रेम्णा हेतुना, इदं वक्ष्यमाणवचनं, अब्रुवन् रामकृष्णावुद्दिश्य कथयामासुः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ग्राम्यैरितिः १०.१५.१९

ग्राम्योऽपि चेत्वत्पदपद्ममक्तस्तं प्रीणयस्यन्वहमात्तलीलः । अदर्शि गोपालजने स्फुटं तत् कृपानिधे वञ्चय नाधुना माम् ॥३३॥

श्रीदामेति : १०.१५.२०

तारोल्लसद्रसफलाननुभवो न भक्तियोग विना प्रभवितेत्यवलोक्य गोपाः ।
कृष्णं सराममखिला भृशमार्थयन्त प्राप्तुं तमर्थमिति युक्ततरं विभाति ॥ ३४ ॥

कृष्णप्रिया

परीक्षित् ! उस समय कोई कोई पुण्य के मूर्तिमान स्वरूप ग्वालबाल महात्मा श्रीकृष्ण के चरण दबाने लगते और दूसरे निष्पाप बालक उन्हें बड़े-बड़े पत्तो या अँगोछियों से पंखा झलने लगते ॥ १७ ॥ किसी किसी के हृदय में प्रेम की धारा उमड़ आती तो वह धीरे-धीरे उदारशिरोमणि परममनस्वी श्रीकृष्ण की लीलाओं के अनुरूप उनके मन को प्रिय लगने वाले गीत गाने लगता ॥ १८ ॥ भगवान् ने इस प्रकार अपनी योगमाया से अपने ऐश्वर्यमय स्वरूप को छिपा रक्खा था । वे ऐसी लीलाएँ करते जो ठीक-ठीक गोपबालकों की सी ही मालूम पड़ती । स्वयं भगवती लक्ष्मी जिनके चरण कमलों की सेवा में संलग्न रहती हैं वे ही भगवान् इन ग्रामीण बालकों के साथ बड़े प्रेम से ग्रामीण खेल खेला करते थे । परीक्षित् ! ऐसा होनेपर भी कभी-कभी उनकी ऐश्वर्यमयी लीलाएँ भी प्रकट हो जाया करती थी ॥ १९ ॥ बलरामजी और श्रीकृष्ण के सखाओं में एक प्रधान गोप बालक थे श्रीदामा एक दिन उन्होंने तथा सुबल और स्तोककृष्ण (छोटे कृष्ण) आदि ग्वालबालों ने श्याम और राम से बड़े प्रेम के साथ कहा ॥ २० ॥

राम राम [1]महाबाहो कृष्ण दुष्टनिबर्हण । इतोऽविदूरे सुमहद् वनं तालालिसङ्कुलम् ॥ २१ ॥
फलानि तत्र भूरीणि पतन्ति पतितानि च । सन्ति किन्त्ववरुद्धानि धेनुकेन दुरात्मना ॥ २२ ॥
[2]सोऽतिवीर्योऽसुरो राम हे कृष्ण खररूपधृक् । आत्मतुल्य[3]बलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः ॥ २३ ॥
तस्मात् कृतनराहाराद् भीतैर्नृभिरमित्रहन् । न [4]सेव्यते पशुगणैः [5]पक्षिसङ्घैर्विवर्जितम्[6] ॥ २४ ॥

कर्दमक्षमा

अन्वयः—राम राम महाबाहो दुष्टनिबर्हण कृष्ण इतः अविदूरे तालालिसङ्कुलं समहद् वनं (अस्ति) ॥ २१ ॥ तत्र भूरीणि फलानि पतितानि पतन्ति च किन्तु दुरात्मना धेनुकेन अवरुद्धानि सन्ति ॥ २२ ॥ हे राम कृष्ण सः खररूपधृक् अतिवीर्यः असुरः अन्यैः आत्मतुल्यबलैः बहुभिः ज्ञातिभिः वृतः ॥ २३ ॥ अमित्रहन् कृतनराहारात् तस्मात् भीतैः नृभिः न सेव्यते पशुगणैः पक्षिसङ्घैः च विवर्जितम् ॥ २४ ॥

---

१. महासत्व–वीर. । २. सोतितीव्रो -विज. । ३. साम्य–द्विज. । ४. न सेव्यन्ते–विज. । ५. पक्षिसङ्घवि–विज. । ६. इदमर्धं नास्ति ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तालालिसंकुलं तालानां पंक्तिभिर्व्याप्तम् ॥ २१–२४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दुष्टानां निबर्हण उन्मूलकः। अविदूरे निकटे। इतः अस्मात्प्रदेशात्। हे रामेति रमसे क्रीडसीति तन्नामनिरुक्तेरेतामप्यशक्यां क्रीडां कुरु। किं वा–रमयसि क्रीडयसि सुखयसि वेति तयाऽस्मान्रमयेति भावः। वीप्सादरे। महासत्त्वेति तव किमप्यशक्यं नास्तीति भावः। हे कृष्णेति परमानंदप्रदस्वभावत्वेन सर्वाकर्षकत्वादस्माकमपि सुखं कर्त्तुमर्हसीति भावः। दुष्टनिबर्हणेति। वत्सासुरादीनां तस्मात्साक्षाद्वधदृष्टेः। इतो गोवर्द्धनादविदूरे क्रोशचतुष्टयांतरे'तारफरा–तालसी' इतिख्यातप्रदेशगतं वनम्। "अस्ति तालवनं नाम धेनुकासुररक्षितम्। मथुरापश्चिमे भागे ह्यदूरादेकयोजनम् ॥" इति वाराहोक्तेः। पश्चिमे पश्चाद्भवे भागे नैर्ऋतकोण इति व्याख्येयं, तत्रैव दर्शनात्। श्लेषेण तालानामलिवर्णत्वेनातिस्वादुजातीयत्वं ध्वनितम्। हे राम तव महासत्त्वपरीक्षा हे कृष्ण तवापि दुष्टनिबर्हणपरीक्षा, अद्यकर्त्तव्येति भावोयं तयोः सख्यभावेन बलिष्ठत्वज्ञानान्न प्रेम्णि विरुध्यते, प्रत्युत वीररसोत्साहोद्दीपनत्वेन सरुध्यत एवेति ज्ञेयम् ॥ २१ ॥ तत्र तालवने। यद्यपर्येव पाकं गतानि तर्हि अस्माकं किमिति चेत्तत्राह–पतितानीति। तर्ह्यानीय भुज्यतामिति चेत्तत्राह–धेनुकेनेति। तर्हि तं पृष्ट्वानीयतामिति चेदाह–दुरात्मनेति। प्रार्थितोऽपि दुरात्मा न प्रसीदतीति भावः॥ २२॥ तत्र गत्वा प्रसह्य भुज्यंतामिति चेदाह–अतिवीर्य इति। एकाकिनं तं निष्कास्य पुनः स्वकार्यं क्रियतामिति चेदाह आत्मतुल्यबलैरिति ॥ २३ ॥ तत्र तु गमनमेवास्माकं दुर्घटमित्याह–तस्माद्धेनुकात्। वनमिति शेषः। त्वमेव तादृशानां हंतेत्याहुः–हे अमित्रहन् शत्रुनाशक ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हे रामेति रमसे क्रीडसीति तन्नामनिरुक्तेरेतामप्येकां क्रीडां कुरु किं वा रमयसि क्रीडयसि सुखयसि वेति तयास्मान् रमयेति भावः। वीप्सा आदरे प्रोत्साहनार्थम् अत एव त्वामेवादौ सम्बोधयाम इति भावः। हे महासत्वेति तव किमप्यशक्यं नास्तीति भावः। हे कृष्णेति परमानन्दप्रदस्वभावत्वेन सर्वाकर्षकत्वादस्माकमपि सुख कर्त्तुमर्हसीति भावः। हे दुष्टनिबर्हणेति वत्सासुरादीनां तस्मात्साक्षाद्वधदृष्टेः अतस्तालवनरोधकधेनुकवधार्थमपि तालपातनादिकं युक्तमेवेति भावः। एवं दुष्टनिबर्हणेति श्रीकृष्णबलस्य सार्थकत्वं वदन्तो महासत्त्वेति तद्बलस्य विफलत्वं दर्शयन्तस्तमुत्तेजयन्ति इतः श्रीगोवर्द्धनादित्यर्थः। प्रायस्तत्रैव तदा गोचारणात् तथा च श्रीहरिवंशे तत्प्रसङ्ग एव—

"आजग्मतुस्तौ सहितौ गोधनैः सह गामिनौ। गिरिं गोवर्द्धनं रम्यं वसुदेवसुतावुभौ" ॥ इति।

अविदूरे अनतिदूरे श्रीगोवर्द्धनपूर्वतः क्रोशचतुष्टयान्तरे वृत्तेः तथा च वाराहे –

"अस्ति गोवर्द्धनं नाम क्षेत्रं परमदुर्लभम्। मथुरापश्चिमे भागे अदूराद्योजनद्वयम्" ॥ इति।

तथा—

"अस्ति तालवनं नाम धेनुकासुररक्षितम्। मथुरापश्चिमे भागे अदूरादेकयोजनम्" ॥ इति।

अत्र तु नैर्ऋतपश्चिमयोरभेदः यत्तु श्रीहरिवंशे "गोवर्द्धनस्योत्तरतो यमुनातीरमाश्रितम्। ददृशातेऽथ तौ वीरौ रम्यं तालवनं महत्" इति। तत्र गोवर्द्धनस्योत्तरभागे तदन्तर्गतेशानकोणे स्थित्वा ददृशाते इति ल्यब्लोपे पञ्चमी। यमुनातीरमाश्रितमिति मधुवनमध्यस्थिताया मधुपूर्य्या मधुवनसीम्नः परस्तादग्निकोणस्थयमुनाभागान्तमारभ्य रेखारूपतया स्थितस्य तस्य वनस्यैक प्रान्तस्तत्तीरभागः तालसीनामा तु ग्रामो मध्यत्वान्मुख्यो भागस्तत्पुर्य्या नैर्ऋतकोणस्थः तस्य च पश्चिमस्यां तारफरनामाऽन्यस्तत्रान्त इति तद्विशेषश्च हरिवंशे—

"स तु देशः समः स्निग्धः सुमहान् कृष्णमृत्तिकः। दर्भप्रायः स्थलीभूतो लोष्ठपाषाणवर्जितः" ॥ इति ॥ २१॥

ततः किमित्याशङ्क्य साभिलाषमनुवदन्ति–फलानीति। पतन्ति पतितानि चेति निर्भरस्वयम्पक्वत्वेनातिमधुरत्वं वृथा नश्वरत्वं च व्यञ्जितं तथा पातनप्रयासोऽपि निरस्तः इति। प्रायो भाद्रमासे क्रीडेयं तस्मिन्नेव सर्वेषां तालानां पाकात् एवमिमं लीला श्रीविष्णुपुराणाद्युक्तानुसारेण ग्रीष्मकृतकालियदमनानन्तरं ज्ञेयं तत्र विष्णुपुराणे क्रमप्राप्तत्वमेव कारणं हरिवंशे तु "दमिते सर्पराजे तु कृष्णेन यमुनाह्रदे" इत्यारभ्य सा लीला वर्णितेति स्पष्टमेव तदिति। ननु, तर्हि युष्माभिर्गत्वा तानि वन्यत्वेन साधारणानि स्वयमानीयन्तां तत्राहुः अवरुद्धानि ननु तस्य किं तैः प्रार्थ्यानीयन्तां तत्राहुः—दुरात्मनेति। अतस्तं हत्वा तानि ग्रहीतुं युज्यन्त एवेति भावः॥ २२॥ तद्भीत्या न च कश्चिदपि तत्फलानि भुक्तानि सन्तीत्युत्तेजयन्ति, स इति द्वाभ्याम्। अतिवीर्यः महाबल

रामं प्रत्युक्तिर्मात्सर्यजननाय खररूपधृगिति कृष्णं प्रत्युक्तिः प्रियसखस्य रसिकशिरोमणेस्तस्य हासाय (यद्वा, द्वौ प्रत्येव द्वयं खररूपधृगप्यतिवीर्यं इत्यतोऽवज्ञया न योद्धव्यमिति भावः) विशेषणद्वयसमाहारस्य तु खररूपधृगप्यतिवीर्य्य इत्यतः स तु नापरैर्बाध्यत इति भावः । किञ्च, ज्ञातिभिरिति तेषामपि तत्रात्यन्तसाहाय्यं दर्शितम् ॥२३॥ तस्मादिति सार्द्धकम् दुरात्मतामेवाभिव्यञ्जयन्ति–कृतनराहारादिति । अत्र न सेव्यत इत्यर्द्धं पद्यमनेकत्र, किं त्वनन्वितं चकारात्स्वादूनि च असुक्तपूर्वाणामपि सौरभ्येणैव साक्षादिवावेदयन्ति, एष इति । वै निश्चये गन्धोऽवगृह्यते उपलभ्यत इति प्रायोऽस्मिन् देशे भाद्रमासे वृष्ट्यनुकूलपौरस्त्यवातात् एवं फलानामुत्कृष्टत्वं निकटवर्त्तित्वं च सूचितं तदेतत्सर्वं श्रीकृष्णरामयोरज्ञातमिव मत्वा तैर्यज्ज्ञापितं तत्तु ताभ्यां नर्मणा तस्याज्ञातस्यैव क्रमशः पृष्टत्वादिति ज्ञेयम् ॥ २४–२५ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं प्रथमदिन क्रीड़याप्यन्यदिनक्रीडामप्युपलक्ष्याधुना कदाचिन्निजप्रियजनप्रीत्यै गो–पालने किञ्चिदैश्वर्य्यमपि साक्षात् प्रकटितवानिति प्रसंगादाह –श्रीदामेत्यादिना । सुबलाद्याश्च सखायः । श्रीदाम्नः प्राग्निर्द्देशः सख्यातिशयेन श्रैष्ठ्यात्, तादृशोक्तौ तस्य मुख्यत्वाद्वा; स्तोककृष्ण–नामा कश्चिद्गोपः कृष्णसनामत्वेन सखित्वाद्यर्थम्; यद्वा, कृष्णात् प्राग्जातस्य तस्य कृष्णेति नामकरणात्, तथापि सर्वथा कृष्णतो लघुत्वेन स्तोककृष्ण इति ख्यातेः, आदि–शब्देनांश्वर्ज्जुनविशाल–वृषभौजस्वि–देवप्रस्थवरूथप–भद्रसेनादय एते मुख्यतमा ज्ञेयाः । प्रेम्णेति, न तु तालफल–लोभेन, न च दुष्टवधार्थं वा; किन्तु प्रियजन-प्रीतिविशेषार्थमेव किञ्चिदिष्टद्रव्यप्रार्थनलक्षणप्रेमस्वभावेनैवेत्यर्थः, यद्वा, दुष्टनिग्रहादि तत्कीर्त्त्यनुरागेणैवेति ॥ २१ ॥ हे रामेति रमसे क्रीडसीति निरुक्त्या तालवने गत्वा तालपातनादि क्रीडां कुरु, किंवा रमयसि क्रीडयसि सुखयसि वेति तयास्मान् रमयेति भावः, वीप्सा आदरे, स च तालफलपातनाद्यर्थं प्रोत्साहनार्थम्, अत एवादौ तस्य सम्बोधनम् । हे महासत्त्वेति परमबलिष्ठस्य तव किमप्यशक्यं नास्तीति भावः । हे कृष्णेति परमानन्दघनत्वादस्माकमपि सुखं कर्त्तुमर्हसीति भावः । हे दुष्टनिबर्हणेति वत्सासुरादीनां तस्मात् साक्षाद्वधदृष्टेः, अतस्तालवनरोधकधेनुकवधार्थमपि तालपातनादिकं युक्तमेवेति भावः । एवं महासत्त्वतया दुष्टनिबर्हणत्वं दुष्टनिबर्हणतया च महासत्त्वत्वमिति तत्तदन्योऽन्यत्वयोरुक्तम्, तेन च तौ प्रति दुष्टतो निजशंका स्वयमेव निरस्ता, इतः श्रीगोवर्द्धनादित्यर्थः, प्रायस्तत्रैव तदा गोचारणात्, तथा च श्रीहरिवंशे (विष्णु प० १३।२) तत्प्रसंग एव—'आजग्मतुस्तौ सहितौ गोधनैः सहगामिनौ । गिरिं गोवर्द्धनं रम्यं वसुदेवसुतावुभौ ।' इति । अविदूरेऽनतिदूरे श्रीगोवर्द्धनपूर्वतः क्रोशचतुष्टयान्तरे वृत्तेः; तथा च श्रीवाराहे–'अस्ति गोवर्द्धनं नाम क्षेत्रं परमदुर्ल्लभम् । मथुरा पश्चिमे भागे अदूराद्योजनद्वयम् ।' इति, तथा – 'अस्ति तालवनं नाम धेनुकासुर-रक्षितम् । मथुरा पश्चिमे भागे अदूरादेकयोजनम् ॥' इति । सुमहत्क्रोशद्वयव्यापित्वात्; तद्विशेषश्च श्रीहरिवंशे (विष्णु प० १३।५)—'स तु देशः समः स्निग्धः सुमहान् कृष्णमृत्तिकः । दर्भप्रायः स्थलीभूतो लोष्ट्रपाषाणवर्जितः' ॥ इति ॥ २२ ॥ पतन्ति पतितानि चेति पातनप्रयासो निरस्तः । तालानां पक्वानां सतां स्वयमेव पतनादिति प्रायो भाद्रमासे क्रीडेयमवगम्यते, तस्मिन्नेव सर्वेषां तालानां पाकात् । एवमियं लीला श्रीविष्णुपुराणाद्युक्तानुसारेण ग्रीष्मे कृतकालियदमनानन्तरं ज्ञेया । ननु तर्हि युष्माभिर्गत्वा तान्यानीयन्ताम् ? तत्राहुः—अवरुद्धान्यावृतानि रक्षितानीत्यर्थः । ननु तर्हि प्रार्थ्य नीयन्ताम् ? तत्राहुः—दुरात्मनेति, यद्वा, कथं तर्हि परकीयाणि द्रव्याणि तानि ग्राह्याणि ? तत्राहुः दुरात्मना दुष्टदैत्येनेत्यर्थः । अतस्तं हत्वा तद्द्रव्याणि ग्रहीतुं युज्यन्त एवेति भावः । यद्वा, वन्यानि फलानि सामान्यतः सर्वेषामुपभोग्यानि, तेन केवलं दुष्टस्वभावतयैवावरुध्यन्ते, अतो ग्राह्याण्येवेति भावः ॥ २३ ॥ तद्भीत्या च न कैश्चिदपि तत्फलानि भुक्तानि सन्तीत्युत्तेजयन्ति–स इति द्वाभ्याम् अतिवीर्य्यो महाबल इति रामं प्रत्युक्तिर्मात्सर्य्यजननाय, गर्द्दभरूपधृगिति कृष्णं प्रत्युक्तिः,—प्रियसखस्य रसिकशिरोमणेस्तस्य हासाय । यद्वा, द्वौ प्रत्येव द्वयं खररूपधृगप्यतिवीर्य्यं इत्यतोऽवज्ञयाऽनवहिताभ्यां न भाव्यमिति भावः । किञ्च, ज्ञातिभिरन्यैश्च मित्रादिभिः, किं वान्यैरित्युक्ते प्रातनुदासीनत्वं निरस्यति ज्ञातिभिरिति ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

महासत्त्वमहाबलेति रामविशेषणं दुष्टनिबर्हणं दुष्टघ्नेति श्रीकृष्णस्य अविदूरे समीपे तालानां पङ्क्तिभिर्व्याप्तं महद्वनमास्ते ॥ २१ ॥ कानिचित्फलानि पतन्ति पातितुमुद्युक्तानि कानिचित्पतितानि च सन्ति किन्तु तानि दुरात्मना धेनुकासुरेणाऽवरुद्धानि ॥ २२ ॥ स चासुरोऽत्यन्तं वीर्यं यस्य तथाभूतः खररूपं बिभ्राणश्च स्वसमानरूपैः बहुभिर्ज्ञातिभिः परिवृतश्च ॥ २३ ॥ कृतः नरा एव आहारो येन तस्मादसुराद्भीतैर्नृभिरभुक्तपूर्वाणि कदाऽप्यननुभूतानि सुरभीणि च फलानि सन्ति एष अत्रापि सर्वतो व्याप्तस्तत्फलसुरभिगन्धो ऽनुगृह्यतेऽस्माभिः ॥ २४–२५ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दुष्टनिबर्हण ! दुष्टजनोन्मूलन ! अविदूरे निकटे तालानाम् आल्या पङ्क्त्या सङ्कुलं निबिडम् ॥ २१ ॥ तत्र खरतालवने फलान्यपरिपाकं प्राप्तानीति नेत्याह—पतितानीति । सन्तु तान्यानीय भुज्यन्तामिति तत्राह—किन्त्विति ॥ २२ ॥ तीव्रः क्रूरः

खररूपं गर्दभदेहं धारयतीति खररूपधृक् असहायश्चेन्निष्कासनीय इति नेत्याह, आत्मेति ॥ २३ ॥ कृतः नराणामाहारो येन स तथा तस्मात् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इतो गोवर्द्धनादविदूरे क्रोशचतुष्टयान्तरे तारफरा इति तालसीति ख्यातप्रदेशगतं वनम्—

"अस्ति तालवनं नाम धेनुकासुररक्षितम् । मथुरापश्चिमे भागे अदूरादेकयोजनम्" ॥ इति

वाराहोक्तेः । पश्चिमे पश्चाद्भवे भागे इति नैरृतकोणे इति व्याख्येयं तत्रैव तद्दर्शनात् तालानामालिभिर्व्याप्तं श्लेषेण तालानामलिवर्णत्वेनातिस्वादुजातीयत्वं ध्वनितम् । किन्तु धेनुकेन अवरुद्धानि वशीकृतानीत्यत एव हे राम ! तव महासत्त्वपरीक्षा हे कृष्ण ! तथापि दुष्टनिबर्हणत्वपरीक्षाद्य कर्तव्येति भावोऽयं तयोः सख्यभावेन बलिष्ठत्वज्ञानान्न प्रेम्णा विरुद्धयते प्रत्युत वीररसोत्साहोद्दीपनत्वेन संरुद्ध्यत एवेतिज्ञेयम् ॥ २१-२२ ॥ सोऽतिवीर्य्येत्यादि तयोः पराक्रमोत्तेजनम् ॥२३॥ आवयोरग्रे तस्य तदीयानां चातिवीर्य्यं खपुष्पायमाणं भविष्यतीति चेत्तर्हि चलनं तत्रत्यान्नरान्निर्भयान् तान् तालभोजिनश्च दत्तयुष्मदाशिषः कुरुतमित्याहुः – तस्मादिति । ननु, कस्यां दिशि तद्वनं तद्ब्रूतेत्यत आहुः, एष वै गन्धः भाद्रमासीयप्राच्यसमीरणेनानीत इति भावः ॥ २४-२५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तालानामालिभिः पङ्क्तिभिः सङ्कुलं व्याप्तम् ॥ २१-२४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ईशचेष्टितमाह—श्रीदामेति अयं श्रीराधायाः पूर्वजः पीठमर्दः सखा । प्रेम्णेति स्वव्याजेन तौ तालफलान्यास्वादयितुमिति भावः ॥ २१ ॥ इतो गोवर्द्धनादविदूरे योजनान्तरे—

अस्ति तालवनं नाम धेनुकासुररक्षितम् । मथुरा पश्चिमे भागे अदूरादेकयोजनम् ॥

इति वाराहवाक्यात् पश्चिमे पश्चाद्भवे भागे नैरृतकोणे इत्यर्थः । किन्तु धेनुकेनावरुद्धानीति हे राम ! तव महासत्वं हे कृष्ण ! तव दुष्टनिबर्हणत्वं चाद्य परीक्ष्यमिति भावः । न च भयस्थानप्रेरणं प्रेमक्षतिकरं तस्य तत्सखत्वेन तन्महाविक्रमविज्ञानात् प्रत्युत वीररसोद्दीपकत्वेन तद्वर्द्धकमेव ॥ २२-२३ ॥ सोऽतिवीर्य इति तयोर्विक्रमोत्तेजनम् ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

श्रीदामा श्रीदामोदरमतद्भागत्वाद्धेनुकस्यापुरस्कृत्य पुरस्कृत्य न तिरस्कार्योऽयमनार्य इति मतिमान् किञ्चायं ताला इति नेयादुपायात्तमन्यं निवारयेदिति तन्मुखबन्धं विधातुं बलं प्रत्यादावलपदित्यालपति ॥ राम रामेति । अविदूरे समीपे तालानां तृणराजतरूणामालयः पङ्क्तयस्ताभिः सङ्कुलं व्याप्तम् ॥ २१ ॥ पतितानि प्राक् पतन्तीदानीम् । तर्हि गच्छ भक्षय को नेति वदतीत्यत आह । किन्तु दुरात्मना धेनुकेन तन्नाम्नाऽसुरेणावरुद्धानि प्रतिबद्धानीति ॥ २२ ॥ कुमारान्गृहीत्वा गत्वा मारयित्वा तं भुङ्क्ष्वेत्युक्तावाह ॥ स इति । अतितीव्रो बहुतापकः । तीव्रमत्युत्कटकटुकनितान्तेष्वन्यवन्मतमिति विश्वः । तद्रूपं निरूपयति ॥ स्वरूपधृगिति । गर्दभाकार आत्मतुल्यबलैरात्मना तुल्यं अलसदृशं बलं येषां ते तैः साम्येति पाठे आत्मनो बलेन साम्यं यस्य तद्बलं येषामिति विग्रहः । अन्यैस्तर्हि भेदं विधायादाय फलान्यागच्छेत्यत आह ॥ ज्ञातिभिरिति । नास्मच्चतुर्विधोपायसाध्यः स इति भावः ॥ २३ ॥ गताश्चेत्किं गतिं यापयति स इत्यत आह । कृतनराहारात्कृतो नराणां गतानामाहारा येन तस्मादिति हे अमित्रहन् शत्रुसंहारक । पृथक् पृथगन्वयः । भीतैर्नृभिर्वनं न सेव्यते । पशुगणैः पक्षिसङ्घैश्च विवर्जितम् । विवर्जितमिति सरलः पाठः । विवर्जितैरिति पाठे सुपां सुपो भवन्तीति प्रथमायास्तृतीयादेश इत्युपदिशन्ति । भीतैः कथञ्चिद्गतैर्विवर्जितैः प्राणेभ्यः सर्वैः सेव्यत इति वा ॥ २४ ॥

श्रीसुबोधिनी

तदाहुः सुबलः प्रथमं निरूपित इति **रामरामेति** सम्बोधनं प्रथमं, कायिकश्चायं दोषस्तेनैव दूरीकर्तव्यः, **महासत्त्वेति** तस्य स्तुतिः प्रकृतोपयोगिनी, मल्लयुद्धादिना च महाबलत्वं ज्ञातं, भगवतस्तु तद्रूपं माहात्म्यजनकं न भवतीति, धेनुकवधस्यावश्यकत्वाय **दुष्टनिबर्हणे**तिस्तुतिः, **इतः** क्रीडास्थानाद**विदूर** एव निकट एव, **सुमह**दस्मादपि महत् **तालालिभि**स्तालपङ्क्तिभिर्व्याप्त- मस्ति ॥ २१ ॥ ततः किमत आह **फलानी**ति, पातनप्रयासोपि नास्ति **पतितानि सन्ति**, चिरपतितानां तथारसो न भवतीति **पतन्ति** चेत्युक्तं, न च तानि पतितानि केनचिन् नीयन्ते **किन्तु सन्त्येव**, तत्र हेतु**र्धेनुकेनावरुद्धानि**, तर्हि प्रार्थनायां दास्यतीत्याशङ्क्याह**दुरात्मने**ति, स हि दुष्टः प्रार्थितोपि न प्रयच्छति ॥ २२ ॥ किञ्च न तं कोपि प्रार्थयत इत्याह **सोतिवीर्य** इति, अतिवीर्यत्वान् न कमपि गणयति, हीनभावाश्रये तु भक्षयत्येव यतोयम**सुरः**, तद्ध्यस्माकमप्यशक्य इतिशङ्कां वारयितुं पुनर्नाम गृह्णन्ति

राम हे कृष्णेति, स कथं परिज्ञातव्य इत्याशङ्क्याहुः **खररूपधृगिति**, न चैकः सः बहवश्च भवन्तः अतः सम्भूय मारणीय इतिशङ्कां वारयन्ति **आत्मतुल्यबलै**रिति बहूनां तादृशबलवत्त्वे कुलमेव हेतुरिति ज्ञापयितुमाहु**र्ज्ञातिभि**रिति, **अन्यै**रपि बहुभिर्वृतः, तेप्यन्ये सङ्घशो बहव एव सजातीयाः ॥ २३ ॥ एवं तस्य वीर्यं प्रशस्तं यदर्थं तदाह **तस्मा**दिति, **कृतो नर** एवाहारो येन, स हि मनुष्यानेव विशेषतो भक्षयत्यत एव **तस्माद् भीतैर्नृभिर्न सेव्यते** तद् वनं, तह्यस्माभिरपि न गन्तव्यमित्याशङ्क्याहुर**मित्रह**न्निति, हे कृष्ण भवान**मित्र**हन्ता सोप्यमित्र इति त**द्धननं** तव शक्यं कर्तव्यं च, अयं धर्मो भगवन्निष्ठो जागरुक एतेषां हृदि स्फुरतीत्युक्तदोषवतोपि स्थाने गमनं प्रार्थयन्ति, अन्यथैवम्प्रेरणस्य प्रेमविरुद्धत्वेन "**प्रेम्णेदमब्रुव**"न्नितिवचनं विरुद्धं स्यात् प्रियस्यामित्रे च न स्थापयितुचितमिति च, किञ्च तद् वनं सर्वेषामेवासेव्यं ये भूचरा चान्तरिक्षचराः, अतः **पशुगणैः पक्षिसङ्घैश्च** विशेषेण **वर्जितं**, अतो ये पशुपालका ये वा देवपरिपालकास्तैः सोवश्यं वध्यः ॥ २४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

राम रामेत्यत्र प्रथम**राम**सम्बोधने हेतुमाहुः **कायिकश्चे**त्यादि, अयमाध्यात्मिकः कायिकदोषो **बल**देवेनैव दूरीकर्तव्य इतिभगवदिच्छाज्ञानात् तथेत्यर्थः । **तद्रूप**मिति भावप्रधानः ॥ २१ ॥

(३) श्रीमद्वल्लभमहाजकृतः श्रीसुबोधिनीलेखः

तदाहुरिति **तत्** तस्मात् प्रार्थनार्थमाहुः प्रथमश्लोकेन वनस्वरूपमिति शेषः ॥ २१ ॥ **तस्मा**दित्यत्र हे **कृष्णे**ति **अमित्रह**न्नित्येकवचनात् कृष्णे दुष्टनिबर्हणत्वस्य पूर्वमुक्तत्वाच्च कृष्णेत्यनेनैव सम्बध्यते इतिभावः ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सामर्थ्यमादरं च सूचयन्तो बहुधा सम्बोधयन्ति–'महासत्त्व, महाबल' इति रामविशेषणम् । 'दुष्टनिबर्हण, दुष्टविनाशन' इति कृष्णविशेषणम् । इतः अस्मात् क्रीडास्थानात् अविदूरे समीपे एव तालालिभिः तालानां पङ्क्तिभिः सङ्कुलं व्याप्तं सुमहद्वनमस्तीति ॥ २१ ॥ तत्र च भूरीणि फलानि सन्ति । 'नच तद्ग्रहणे प्रयासोऽस्ति' इत्याशयेनाहुः–पतितानीति । 'तर्हि चिरकालपतितानां फलानां वैरस्यं स्यात्' इत्याशङ्क्याहुः–पतन्ति चेति । 'तदा गृह्यन्ताम्' तत्राहुः–किन्तु धेनुकेनावरुद्धानीति । 'तर्हि स प्रार्थनीयः' तत्राहुः–दुरात्मनेति । दुष्टत्वात् न स प्रार्थनायोग्य इति भावः ॥ २२ ॥ 'तर्हि तं तिरस्कृत्य बलात्कारेण ग्राह्याणि' इति चेत्तत्राहुः–सोऽतिवीर्य इति । दुष्टत्वे बलाधिक्ये च हेतुमाहुः–असुर इति । 'कथं स विज्ञेयः ?' इत्यपेक्षायां तस्य स्वरूपतोऽप्यशुभत्वाभिज्ञापकं चिह्नमाहुः–खररूपधृगिति । बलवत्त्वं निर्भयत्वं च सूचयन्तः पुनः सम्बोधयन्ति–हे राम हे कृष्णेति । 'तथापि स एको युष्माकं बहूनां किं करिष्यति ?, इत्याशङ्क्याहुः–आत्मतुल्यबलैरिति ॥ २३ ॥ 'त्वमेव पूतनादिवत् एनमपि हत्वा एतन्निर्भयं कर्तुं शक्त' इत्याशयेन कृष्णं सम्बोधयन्ति–हे अमित्रहन् इति । तच्च वनं मनुष्यादिभिर्विवर्जितम् । तत्र हेतुमाह–तस्मादसुराद्भीतैर्मनुष्यादिभिर्न सेव्यते इति । भयहेतुत्वेन विशिनष्टि–कृतेति । कृतो नरा एव आहारो येन सः ॥ २४ ॥

अन्वितार्थप्रकाशिका

राम रामेति ॥ हे राम राम महाबाहो ! कृष्ण ! हे दुष्टानां निबर्हण नाशक ! इत अस्मात् क्रीडास्थानात् अविदूरे समीपे एव तालालिभिः तालानां पङ्क्तिभिः संकुलं व्याप्तं सुमहद्वनमस्तीति एतच्च गोवर्द्धनाद्योजनान्तरे मथुराया नैरृत्यां तारफरा इति तालसीति च ख्यातप्रदेशेऽस्तीति इयं क्रीडा ग्रीष्मर्त्तुकृतकालियदमनानन्तरवर्षासु भाद्रपदे ज्ञेया । पुराणान्तरात् तत्रैव तालफलपाकाच्च ॥ २१ ॥ फलानीति ॥ तत्र वने पतन्ति । शत्रन्तम् । पतितानि च भूरीणि बहूनि फलानि सन्ति किंतु दुरात्मना धेनुकेन तन्नाम्ना दैत्येन अविरुद्धानि ॥ २२ ॥ स इति ॥ हे राम ! हे कृष्ण ! सः असुरः सुरविरोधी धेनुकः अतिवीर्यः खररूपं धर्जति इति धृक् । धृजेः क्विप् । तथा आत्मतुल्यबलैर्बहुभिरन्यैर्ज्ञातिभिः खरैर्वृतश्चास्ति ॥२३॥ तस्मादिति । हे अमित्रहन् ! कृतो नराणामाहारो येन तस्मान्मनुष्यभुजो धेनुकात् भीतैर्नृभिः पशुगणैः पक्षिसङ्घैश्च न सेव्यते अत एव तैः विवर्जितम् ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दुष्टानां निबर्हण नाशक इतोऽस्मात्स्थानात् अविदूरे पूर्वस्यां दिशि कोशचतुष्टयांतरे ॥ २२ ॥ धेनुकेन रासभेन ॥ २३ ॥ अतिवीर्यो महाबलः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

रामेति ॥ हे महासत्त्व हे महाबलोपेत, हे राम हे राम, हे दुष्टनिबर्हण हे दुष्टघ्न, कृष्ण, इतोऽस्मात् स्थानात्, अविदूरे समीपे, तालानां तृणराजानामालयः श्रेणयस्ताभिः संकुलं व्याप्तं, सुमहत् वनं, आस्ते इति शेषः ॥२१॥ फलानीति ॥ तत्र वने, भूरीणि बहूनि 'फलानि पतन्ति पतितुमुद्युक्तानीत्यर्थः । सन्ति । कानिचित् फलानि तु, पतितानि च अधः पतितान्यपि, सन्ति । किंतु तान

दुरात्मना अतिदुष्टमनसा, धेनुकेन धेनुकनाम्नाऽसुरेण, अवरुद्धानि, सन्ति ।। २२ ।। स इति ।। हे राम, हे कृष्ण, अतिवीर्यः बहुबलयुक्तः, खररूपधृक् लम्बकर्णरूपं बिभ्राणः, आत्मतुल्यबलैः स्वसमानबलवद्भिः, अन्यैः बहुभिः ज्ञातिभिः सः असुरः वृतः परिवारितः, भवति ।।२३।। तस्मादिति ।। कृतो नराणामाहारो येन तस्मात्, पुरुषादादित्यर्थः । तस्मादसुरात्, भीतैरतिभीतिं प्राप्तैः, नृभिर्मनुष्यैः हे अमित्रहन् शत्रुनिबर्हण, न सेव्यते । किं बहुना । पशुगणैः पक्षिसंघैश्चापि, विवर्जितं अस्ति ।। २४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

फलानीतिः १०.१५.२२.

प्रपञ्चवनसंभूतेर्वस्तुनः सरसामनः । सम्प्राप्तौ स्फुटमत्युग्रनः क्रोधो रोधक इत्यभूत् ।। ३५ ।।

कृष्णप्रिया

हमलोगों को सर्वदा सुख पहुँचाने बाले बलरामजी ! आप के बाहु-बल की तो कोई थाह ही नहीं है। हमारे मनमोहन श्रीकृष्ण ! दुष्टों को नष्ट कर डालना तो तुम्हारा स्वभाव ही है। यहाँ से थोड़ी ही दूर पर एक बड़ा भारी वन है। बस उसमें पाँत के पाँत ताड़ के वृक्ष भरे पड़े हैं ॥ २१ ।। वहाँ बहुत से ताड़ के फल पक-पककर गिरते रहते हैं और बहुत से पहले के गिरे हुए भी हैं। परन्तु वहाँ धेनुक नाम का एक दुष्ट दैत्य रहता है। उसने उन फलों पर रोक लगा रखी है ।। २२ ।। बलरामजी और भैया श्रीकृष्ण । वह दैत्य गधे के रूप में रहता है। वह स्वयं तो बड़ा बलवान् है ही, उसके साथ और भी बहुत से उसी के समान बलवान् दैत्य उसी रूप में रहते हैं ।। २३ ।। मेरे शत्रुघाती भैया ! उस दैत्य ने अब तक न जाने कितने मनुष्य खा डाले हैं। यही कारण है कि उसके डर के मारे मनुष्य उसका सेवन नहीं करते और पशु-पक्षी भी उस जंगल में नहीं जाते ॥ २४ ॥

विद्यन्तेऽभुक्तपूर्वाणि फलानि सुरभीणि च । एष वै सुरभिर्गन्धो विषूचीनोऽवगृह्यते[1] ॥ २५ ॥
प्रयच्छ तानि नः कृष्ण गन्धलोभितचेतसाम् । [2]वाञ्छाऽऽसीन् महती राम गम्यतां यदि रोचते ॥ २६ ॥
एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया । प्रहस्य जग्मतुर्गोपैर्वृतौ तालवनं प्रभू ॥ २७ ॥
बलः प्रविश्य बाहुभ्यां तालान् सम्परिकम्पयन् । फलानि पातयामास मतङ्गज इवौजसा ॥ २८ ॥
फलानां पततां शब्दं निशम्यासुररासभः । अभ्यधावत् क्षितितलं सनगं परिकम्पयन् ॥ २९ ॥
समेत्य [3]तरसा [4]प्रत्यग् द्वाभ्यां पद्भ्यां बलं बली । निहत्योरसि काशब्दं मुञ्चन् पर्यसरत् [5]खलः ॥ ३० ॥
पुनरासाद्य संरब्ध उपक्रोष्टा[6] पराक् स्थितः । चरणावपरौ राजन् बलाय [7]प्राक्षिपद् रुषा ॥ ३१ ॥
स तं गृहीत्वा [8]प्रपदोर्भ्रामयित्वैकपाणिना । चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितम् ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—अभुक्तपूर्वाणि सुरभीणि च फलानि विद्यन्ते एषः वै सुरभिः विषूचीनः गन्धः अवगृह्यते ।। २५ ।। कृष्ण गन्धलोभितचेतसां नः तानि प्रयच्छ राम महती वाञ्छा आसीत् यदि रोचते गम्यताम् ॥ २६ ॥ एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया प्रहस्य गोपैः वृतौ प्रभू तालवन जग्मतुः ॥ २७ ।। बलः प्रविश्य मतङ्गजः इव ओजसा तालान् बाहुभ्यां सम्परिकम्पयन् फलानि पातयामास ॥ २८ ।। असुररासभः पततां फलानां शब्दं निशम्य सनगं क्षितितलं परिकम्पयन् अभ्यधावत ॥ २९ ॥ तरसा समेत्य प्रत्यग् द्वाभ्यां पद्भ्यां बलं उरसि निहत्य बली खलः काशब्दं मुञ्चन् पर्यसरत् ।। ३० ।। राजन् संरब्धः उपक्रोष्टा पुनः आसाद्य पराक् स्थितः रुषा अपरौ चरणौ बलाय प्राक्षिपत् ।। ३१ ॥ सः तं एकपाणिना प्रपदोः भ्रामयित्वा भ्रामणत्यक्तजीवितं तृणराजाग्रे चिक्षेप ।। ३२ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

विषूचीनः सर्वतः प्रसृतः ।। २५-२८ ।। सनगं सवृक्षम् ॥ २९ ।। प्रत्यग्द्वाभ्यां पश्चिमाभ्याम् । काशब्दमिति गर्दभजातिशब्दानुकरणम् । पर्यसरत्परितोऽधावदित्यर्थः ।।३०।। उपक्रोष्टा गर्दभः । पराक् प्रतिमुखः । अपरौ पश्चिमौ । बलाय बलं हंतुम्।।३१।। तृणराजस्तालः ।। ३२-३३ ।।

---

१. ऽनुगृह्यते-वीर.; विगृह्यते-विज. । २. वाञ्छास्ति-श्रीधर. वंशी. जीव. विश्व.; वाञ्छासीन्-वीर. विज. । ३. तरसाऽऽकृत्य-विज. । ४. पश्चाद्-गो. प्रे. टी. । ५. स्वरः-गो. प्रे. टी.; सरद्बलं-विज. । ६. उपक्रोष्टुं-विज. । ७. प्राहिणोद्रुषा-विज. । ८. पदयोः-वीर.; प्रपदोः-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विष्वक्सर्वत्रांचति प्रसरतीति विषूचीनः। पृषोदरादिरयम्। विशेषेण गृह्यते घ्राणेनेति शेषः ॥ २५ ॥ यद्वा–कदाप्यस्माकं लोभो नासीत्, नवनीतादिलुब्धस्यास्य संपर्कादेव लोभितचेतसो वयं जाता इति रामं प्रत्युक्तिर्गोपानामित्याह – कृष्णस्य गधेन लोभितं चेतो येषां तेषां तथा 'गधो गन्धे हिंसने च लेशसंपर्कयोरपि' इति कोशात्। अदनाकांक्षा चेत्तर्हि कालांतरं नेष्यामि तत्राहुः–वांछेति ॥ २६ ॥ एवम् गम्यतां यदि रोचत इत्येवप्रकारम्। प्रभू कृष्णबलदेवौ ॥ २७ ॥ मतंगजो हस्ती। ओजसा अवष्टंभेन बलेन वा 'ओजोऽवष्टंभबलयोः' इति यादवः ॥ २८ ॥ असुरश्चासौ रासभः खरः ॥ २९ ॥ इत्यर्थ इति। शीघ्रगतिद्योतनार्थं पर्यधावदिति तु छंदोभंगभयान्नोक्तमिति ॥ ३० ॥ उपक्रोष्टेति। क्रोष्टुवदत्युच्चध्वनित्वात्। रासभे गौणी लक्षणा प्राहिणोत् चिक्षेप ॥ ३१ ॥ सः बलः। तम् दैत्यम्। प्रपदाः पादाग्रयोः 'पादाग्रं प्रपदम्' इत्यमरः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

चतुर्थ्यर्थे षष्ठी कृष्णेत्यादि मुहुरुभयसम्बोधनमतिवैयग्र्यं सूचयति–कृष्णगन्धेति। श्लेषेणाऽस्माकं कदाऽपि लोभो नाऽसीत् नवनीतादिलुब्धस्यास्य सम्पर्केणैव लोभितचेतसामिति श्रीरामं प्रत्येवोक्तिः तेन च नर्मणा निजदुर्लभप्रार्थनदोषो निरस्त एव मुहुः प्रार्थनेऽप्यनङ्गीकारमिवालक्ष्य सप्रणयरोषमाहुः वाञ्छाऽस्तीत्यादि ॥ २६ ॥ वृतौ साहाय्यार्थं परितो वेष्टितौ प्रभू तेषां प्रहर्षार्थं स्वसामर्थ्यं दर्शयन्तौ ॥ २७ ॥ बलदेवस्यादौ प्रवेशादिक्रमादौ प्रार्थितत्वात्ततः श्रीकृष्णस्यापि तत्कीर्त्तये तत्र गौणायमाणत्वात् तालानिति बहुत्वमेकस्य कम्पनेनैव सङ्घट्टितानां तेषां बहूनां कम्पात् सम्यक् परितः कम्पयन्निति विकीर्य दूरे पतन्तु न तु शिरसीत्येतदिच्छया किंवा बाहुभ्यां द्वाभ्यामेव बहूनां तेषां युगपद्ग्रहणात् सम्यक् परितः कम्पयन्निति महाबलस्वभावेन ॥ २८ ॥ सपर्वतं क्षितितलं सर्वां पृथ्वीं परितः कम्पयन्निति तस्य पूर्वोक्तमतिवीर्य्यत्वं दर्शितम् ॥ २९ ॥ नितरां हत्वा प्रहृत्य यतो बली साधारणदेवताऽपेक्षया बलवत्त्वेन बलिमानीत्यर्थः। काशब्दं कुत्सितशब्दम् आर्षः कादेशः, पर्य्यसरत् पुनः पद्भ्यां हनने छिद्रान्वेषणाय परितो बभ्राम यतः खलः तादृशदुश्चेष्टः ॥ ३० ॥ आसाद्य निकटीभूय उपक्रोष्टा निकटे काशब्दं कुर्वन् पराक् विमुख स्थितः सन् पुनरेत्य ॥ ३१ ॥ एकेनैव पाणिना पदयोर्गृहीत्वा भ्रामयित्वा च प्रपदोरिति पाठस्त्वार्षः, पादयोरग्रभाग इत्यर्थः। पूर्वं तु तत्प्रहाराङ्गीकारः स्वानवधानप्रकाशनेन स्वस्य तेनाक्षोभ्यत्वं प्रख्यापयितुम् ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दुरात्मतामेवाभिव्यञ्जयन्ति—कृत-नराहारादिति; ननु, तर्हि परमस्निग्धा यूयं बत तादृशे कर्म्मणि किं मां प्रवर्त्तयथेत्याशंक्य श्रीकृष्णं प्रत्याहु—हे अमित्रहन्निति वकाद्यासुरादयो महादैत्या भवता लीलया हताः। एष गर्द्दभः कतमो नाम स्यात्? विशेषतश्च दुष्टामित्र-घातादिना तव कीर्त्तिरेव महती भवितेति भावः। इत्थमपि स्निग्धतराणां तेषां यद्यपि तत्र तत्प्रेरणं नोपयुज्यते, तथापि सपरिवारं रावणं हत्वा श्रीजानकीं श्रीरघुनाथान्तिके नेतुमिच्छन्तं श्रीहनुमन्तं प्रति श्रीरघुनाथेन स्वयं रावणे हते सति तस्य कीर्त्तिर्महती भवतीति सुन्दरकाण्डे तस्या वाक्यवत्तद्वीर्य्यानुभविनामेषामपि तत्कीर्त्तिविशेषार्थं तद्घटेतैवेति दिक् ॥ २५ ॥ च-कारात् स्वादूनि च, अभुक्तपूर्व्वाणामपि सौरभ्यं साक्षाद्वेदयन्ति—एष इति। वै निश्चये, गन्धोऽवगृह्यते उपलभ्यत इति प्रायोऽस्मिन् देशे भाद्रमासे वृष्ट्यनुकूलपौरस्त्यवातां पूर्वदिग्वातात्। एवं फलानामुत्कृष्टत्वं निकटवर्त्तित्वञ्च सूचितम् ॥ २६ ॥ अतः प्रयच्छ, यतो गन्धेन तालानां सौरभ्येण लोभितचेतसाम्, —चतुर्थ्यर्थे षष्ठी। हे कृष्णेति तं प्रति विशेषेणैवोक्तिः, परमप्रियतम एव तथा प्रार्थनस्य योग्यत्वात्, यद्वा, कृष्णस्य सर्व्वचित्ताकर्षकस्य गन्धेन सम्बन्धमात्रेण। लोभितचेतसामितीयं रामं प्रत्येवोक्तिः, दुर्ल्लभान्यपि तत्सम्बन्धप्रभावेण सुलभानि स्युरिति भावः। श्लेषेणास्माकं कदापि कुत्रापि लोभो नासीत्; नवनीतादि-लुब्धस्यास्य सम्पर्केणैव लोभितचेतसामिति नर्म्मणा निजगामिदुर्ल्लभप्रार्थनादोषो निरस्तः। अतो महती वाञ्छा तेष्वस्माकं चिरादस्ति। गूढोऽयमर्थः–मया वत्सासुरादयः साक्षाद्बहवो हताः, अग्रजेन तु न कोऽपीति तस्य कीर्त्त्यर्थं धेनुकोऽयं तेन घातयितव्यः, गर्द्दभाच्चामुष्मादल्पबलात् काचिच्छंका नास्त्येवेति श्रीकृष्णस्येच्छा चिरं जातास्तीत्यतो गम्यताम्, तथाप्यस्मत्प्रेरणयैव दुष्टाक्रान्तस्थाने न गन्तव्यम्, किन्तु निजरुच्यैव गम्यतामित्याहुः—तदीति। अनुजस्नेहाक्रान्तचित्ताय तस्मै तत्र गमनं कदाचिदेवारोचेतेत्याशंकया विशेषस्तं प्रति तथोक्तिः ॥ २७ ॥ सुहृदां श्रीदामादीनां प्रियं निजकीर्त्तिविस्तारणादि तस्य चिकीर्षया प्रकटमुच्चैर्हसित्वेति तेषां सभयोक्तिश्रवणात्, किंवा, तेषां शंका-निवारणार्थम्, अतएवोक्तं श्रीकपिलदेवेन (भा. ३।२८।३२)—'हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम्' इति। तथा वृतौ परितो वेष्टितौ स्नेहाकुलतया दुष्टतो भयात्, सार्द्धमिति पाठेऽपि तथैवार्थः। प्रभू तेषां प्रहर्षार्थं स्व-सामर्थ्यं दर्शयन्ताविति, यद्वा, तेषामीश्वरावतस्तेषां प्रीत्यर्थं तद्युक्तमेवेति भावः ॥ २८ ॥ बलदेवस्यादौ प्रवेशादिकमग्रजत्वेनाग्रतो गमनादनुजस्नेहाद्वा, किंवा तत्कीर्त्त्यर्थं श्रीकृष्णस्य तत्र गौण्यात्। तालानिति बहुत्वमेकस्य कम्पनेनैव सङ्घट्टितानां तेषां बहूनां कम्पात्, किंवा, बाहुभ्यां द्वाभ्यामेव बहूनां तेषां युगपद्ग्रहणात्। सम्यक् परितः कम्पयन्निति महाबलस्व-

भावेन, किंवा, चतुर्दिग्वर्त्ति सर्व्वफलानां सर्व्वदिक्षु तेषां पातनार्थमोजसा बलेन वेगेन वा पातयामास। मत्तो गज इवेति लीलया पातने दृष्टान्तः ॥ २९ ॥ सपर्व्वतं क्षितितलं सर्व्वां पृथ्वीं परितः कम्पयन्निति तस्य पूर्व्वोक्तमतिवीर्य्यत्वं दर्शितम् ॥ ३० ॥ उरसि नितरां हत्वा प्रहृत्य, यतो बली। काशब्दं कुत्सितशब्दं गर्द्दभस्वभावत्वात्। पर्य्यसरत् पुनः पद्मामेव ताभ्यां हननाय श्रीबलभद्रस्याग्रे पश्चाद्भागं कृत्वाग्रतोऽधावदित्यर्थः, यतः खरो गर्द्दभस्य तादृश-स्वभावादित्यर्थः, 'खलः' इति पाठे दुष्टस्तादृश-दुश्चेष्टत्वात्।३१। उपक्रोष्टेति निकटे का-शब्द-मोचनाभिप्रायेणातः पराक् विमुखं स्थितः सन् पुनरेत्य। हे राजन्निति प्रेम्णानिष्ठशंकयान्तः सीदन्तं राजानमाश्वासयति, यद्वा, राजमानक्रोधेनाशेष-निजतेजः प्रकटनात् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे कृष्ण ! तत्फलगन्धेन लोभितानि चेतांसि येषां तेषां नोऽस्मभ्यन्तानि फलानि प्रयच्छ प्रादाय देहि हे राम ! महती वाञ्छा तत्फलाऽनुबुभूषा वर्त्तते यदि रोचते तर्हि गम्यतां च वयं नियन्तुं प्रभवाम इति भावः ॥ २६ ॥ इत्थं सुहृदां वचः श्रुत्वा तेषां प्रिय कर्तुमिच्छया प्रहस्य गोपैर्वृतौ प्रभू रामकेशवौ तालवनं प्रति जग्मतुः ॥ २७ ॥ तत्र बलो रामः प्रविश्य बाहुभ्यां तालान्परितः कम्पयन् कथं मतङ्गज इवौजसा बलेन फलानि पातयामास ॥ २८ ॥ तदा पततां फलानां शब्दमाकर्ण्य रासभरूपोऽसुरः सवृक्षं क्षितितलं कम्पयन्नभ्यधावत् ॥ २९ ॥ बलं रामं स बल्यसुरः समेत्य पाश्चात्याभ्यां पादाभ्यां तरसा बलेन उरसि निहत्य काशब्दं गर्दभध्वनिं मुञ्चन्स खरः पर्यसरत्परितश्चचार ॥ ३० ॥ पुनराश्वासाद्य संरब्धः क्रुद्धः उपक्रोष्टा गर्दभः अनभिमुखं स्थितः हे राजन् ! रुषाऽपरौ पाश्चात्यौ पादौ रामाय प्राक्षिपदुद्योजयामास ॥ ३१ ॥ तदा स रामस्तमेकेनैव पाणिना पादयोर्गृहीत्वा भ्रमणेन त्यक्तं जीवितं येन तं तृणराजाग्रे तालाऽग्रे विक्षेप प्राऽक्षिपत् ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नृभिरभुक्तपूर्वाणि विष्वक् सर्वत्राऽञ्चतीति विषूचीनः सर्वत्र व्याप्तिमानित्यर्थः। विशेषेण गृह्यते घ्राणेन्द्रियेणेति शेषः ॥ २५ ॥ लोभ आकाङ्क्षा "लुभ गार्ध्ये" "गृधु अभिकाङ्क्षायाम्" इति धातुः अदनाकाङ्क्षा चेत्कालान्तरे आनेष्यामोति तत्राह – वाञ्छेति ॥ २६–२७ ॥ मतङ्गजः वारणः ओजसा बलेन अवष्टम्भेन वा "ओजोऽवष्टम्भबलयोः" इति च ॥ २८ ॥ रासभः गर्दभः नगैर्वृक्षैः एवं तैश्च सहितम् ॥ २९ ॥ काशब्दं गर्दभजातिजं कर्णनिष्ठुरं शब्दं पर्यचरच्च परितोऽवर्तत ॥ ३० ॥ उपक्रोष्टुं क्रोशतिरत्र क्षेपार्थः क्षेप्तुं पराक् स्थितः प्राङ्मुखः ॥ ३१ ॥ पदोः पादयोः भ्रामणेन परिभ्रमणकरणेन ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नोऽस्मभ्यं प्रयच्छ यतोऽस्माकं वाञ्छाऽस्ति ॥ २६ ॥ प्रहस्येत्यहो गर्दभोऽप्येवं बलीत्यसम्भाव्यत्वान्मृषैव वा ब्रूथेति भावः ॥ २७–२८ ॥ सनगं कुलपर्वतैरपि सहितम् ॥ २९ ॥ प्रत्यग्द्वाभ्यां पश्चिमाभ्यां द्वाभ्यां काशब्दमिति गर्दभशब्दानुकरणं पर्य्यसरत् परितोऽधावत् ॥ ३० ॥ संरब्धः कोऽपि उपक्रोष्टा निकट एव काशब्दं कुर्वन् पराक् पृष्ठीकृत्य स्थितः ॥ ३१ ॥ तं धेनुकं प्रपदोः पदयोरग्रभागे इत्यर्थः। तृणराजस्तालः ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विषूचीनः सर्वतः प्रसृतः ॥ २५–२८ ॥ नगैर्वृक्षैः सहितं सनगम् ॥ २९ ॥ प्रत्यक् पश्चिमाभ्यां द्वाभ्यां पद्भ्यां काशब्दं गर्द्दभध्वनिं मुञ्चन् पर्य्यसरत् परितोऽधावत् ॥ ३० ॥ उपक्रोष्टा गर्द्दभः संरब्धः क्रुद्धः सन् पुनरासाद्य पराक् अनभिमुखः स्थितः सन् अपरौ पाश्चात्यौ चरणौ बलाय हन्तुं रुषा प्राऽक्षिपत् ॥ ३१ ॥ तृणराजाग्रे तालशिरसि ॥ ३२–३३ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अस्मासु किं तस्य बलमिति चेत्तर्हि गन्तव्यमित्याह–तस्मादिति। जनोपकारश्च भावीति भावः ॥ २५ ॥ ननु कियद्दूरे तद्वनं तत्राह–एष वै इति विषूचीनः सर्वतो विसारी ॥ २६ ॥ नोऽस्मभ्यं तानि प्रयच्छ तेषु वाञ्छा अस्ति ॥ २७ ॥ प्रहस्येति सुहृत्सुखाय गर्दभानपि प्रक्ष्याव इति भावः ॥ २८–२९ ॥ स नगं सपर्वतम् ॥ ३० ॥ प्रत्यग् द्वाभ्यां पश्चिमाभ्यां द्वाभ्यामित्यर्थः। काशब्दमिति रासभशब्दानुकरणं पर्यसरत् परितोऽधावत् ॥ ३१ ॥ संरब्धः क्रुद्धः उप समीपे क्रोष्टा काशब्दं मुञ्चन् पराक् पृष्ठीकृत्य स्थितः, अपरौ पश्चिमौ ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सुरभीण्यभुक्तपूर्वाणि पूर्वमभुक्तान्यभुक्तपूर्वाणि। एतदावासात्प्राग्भुक्तपूर्वाणि पूर्वजैरिति वा। पक्षद्वन्द्वेऽपि तत्सुरसता कथं ज्ञातेत्यत ऊहनत इत्याह ॥ एष इति। विषूचीनो विष्वगञ्चतीति विष्वगिति स्थिते ऋत्विगित्यादिनाऽञ्चेः सुप्युपपदे क्विन्प्रत्यये तस्य सर्वापहारित्वेन लोपे तस्यानिदितां हल उपधायाः क्ङितीत्युपधानकारलोपे विभाषाञ्चेरदिक्स्त्रियां स्वार्थे खप्रत्यये

तस्येनादेशे यचि भमिति भसंज्ञायामच इति धात्वकारलोपे चावित्यणो दीर्घे विषूचीनो व्यात इत्यर्थः। सुरभिर्गन्धो विगृह्यते विशेषेण गृह्यते नासिकयेति शेषः ॥ २५ ॥ अन्ततो गत्वा बलबलादयं कृष्णत एवेति तं पुरस्करोतीतोरयति ॥ प्रयच्छ तानि नः कृष्ण इति। गन्धेन लोभितम्। लुभ गार्ध्ये। गृध अभिकाङ्क्षायामिति स्मरणात्साकाङ्क्षं चेतो येषां तेषां नो लोभितेति णिजन्तान्निष्ठा तानि फलानि प्रयच्छ देहि। हे राम महती विना तत्फलदानमनिवर्त्या वाञ्छाऽऽसीत्। यदि तुभ्यं रोचते तर्हि गम्यताम् ॥ २६ ॥ एवं सुहृदः श्रीदाम्नः सुहृदां श्रीदामादीनां वा वचः श्रुत्वा सुहृत्प्रियचिकीर्षया कियानयं खर इति प्रहस्य गोपैर्वृतं तालवनं प्रतिजग्मतुः। एवं साहसं नानुष्ठेयमित्यत आह ॥ प्रभू इति ॥ २७ ॥ तालो द्रुमभेद इति विश्वः। मतङ्गजो मत्तगज ओजसा बलेन। ओजोऽवष्टम्भबलयोरिति यादवः। असुररासभो रासभरूपी दैत्यः सनगं सवृक्षं क्षितितलं परिकम्पयन्नभ्यधावत् ॥ २९ ॥ बलं सम्मेत्य सङ्गम्य तरसाऽऽवृत्य परावृत्य द्वाभ्यां क्षितितलं स्पृष्ट्वा पद्भ्यां पाश्चात्त्याभ्यां गूढपात्परिवृढस्य पादघात एवारुन्तुदस्तत्रापि पाश्चात्याङ्घ्रिकुट्टनं बहुरोपावहमिति तत्स्वाभाविकेदं क्रियापदेशेन ग्रन्थकृद्ध्वनयामासेति ज्ञेयम्। उरसि निहत्योरगत्वादुरसि ताडनमपि तथा काशब्दं स्वजात्यनुरूप एव पथ्यक्षपुरुषान्यतमत्वाभावेऽपि शब्दशब्दस्य तस्मिन्परतः कुशब्दस्य कादेश आर्षः। अनुकरणशब्दो वा। इतिशब्दकलोपीति। इतिशब्दव्यपेतानीत्यादेः। शेषो वेतिशब्दस्य मुञ्चन्बल पर्यचरत्। अयमपि स्वभावो गर्दभानाम् ॥ ३० ॥ पुनर्बलमासाद्योपक्रष्टुं काशब्दं कर्तुं सरब्धः संरम्भयुतः परावास्थितः पुरेवापरौ चरणौ बलाय प्राहिणोत्ताभ्यां तताडेति यावत् ॥ ३१ ॥ स बलस्तं खरासुरं पदोः पादयोरेकपाणिनैकेन हस्तेन भ्रामयित्वा तेन भ्रामणेनैव त्यक्तं जीवितं येन तं मृतं तृणराजस्तालस्तदग्रे तत्प्रान्तभागे चिक्षेप ॥ ३२ ॥

श्रीसुबोधिनी

किञ्च तत्रा**भुक्तपूर्वाणि फलानि** दिव्यानि सन्ति, **केचिद्** भुक्तपूर्वाणीत्याहुरन्यथा कथं तेषां कामनेति, रक्षायां यद्यपि भोगो बाध्यते तथापि चौर्येण भक्षणं सम्भवति, **तानि च** फलान्यत्यन्त**सुरभीणि,** सौरभ्यं तु तेषां प्रत्यक्षसिद्धमेव, तदाहैष वै **सुरभिगंध** इति, **विषूचीनः** परितः प्रसरद्रूपः, अत एव सर्वतो **गृह्यते** ॥ २५ ॥ एवं दुर्लभतां फलोत्तमत्वं चोक्त्वा तानि प्रार्थयन्ते **प्रयच्छे**ति, **दाने भगवानेव समर्थ** इति **कृष्णे**त्युक्तं, तस्यैव सर्वत्र स्वत्वात्, अन्येन प्रतिबन्धनिवृत्तावपि परस्वं न ग्रहीतुं शक्यं, तत्र कामनायां हेतु**र्गन्धलोभितचेतसा**मिति, गन्धेन लोभितं चेतो येषां न केवलमिदानीमेव चित्तलोभः किन्तु पूर्वमपि **वाञ्छासीन् महती,** उत्सुको राम इति **राम गम्यता**मित्युक्तं, अतिनिर्बन्धे कदाचित् कोपं कुर्याद् गते चानिष्टं भवेदित्याशङ्क्याहु**र्यदि रोचत** इति, यदि गन्तुं रोचते ॥ २६ ॥ ततो गतावित्याहैवमिति, **सुहृदां स्वभावत एव हितं कर्तव्यं,** तत्रापि तेषां **वचनं** श्रुतं, अतः सुहृदामेव **प्रियचिकीर्षया** तत्र गतौ, अन्यथाक्लिष्टकर्मा भगवान् निरपराधिनं कथं मारयेत् ? अत एव भगवता न मारितोपि, **मित्रहितं च कर्तव्य**मतः **प्रहस्य,** तेषामाग्रहं दृष्ट्वा दोषनिवृत्तिं वाञ्छन्तीति वा, सामान्यकार्यमित्युभौ **जग्मतुः, गोपैर्वृ**ताविति कर्तव्यार्थनिर्धारः, अन्यथा तैः सह न गच्छेतां, शङ्काभावार्थमाह प्रभू इति ॥ २७ ॥ तत्र गत्वा यत् कृतवन्तौ तदाह **बल** इति अक्लिष्टकर्मा भगवान् बहिरेव स्थितो बलस्त्वन्तः **प्रविश्य बाहुभ्यां तालानि सम्परिकम्पयन् फलानि पातयामास, यानि सुपक्वानि तानि चालनेन पतन्ति,** ननु विद्यमानेषु फलेषु किमिति बहूनि पातयामास ? **मतङ्गज** इवेति, मतङ्गजः सर्वाण्येवानुपयुक्तान्यपि पातयति बलजनितकण्डूनिवृत्त्यर्थं, उपायेनापि पातनं सम्भवतीति तन्निवृत्त्यर्थमा**हौजसेति,** स्वबाहुबलेनैव ॥२८॥ ततो यज् जातं तदाह, **पततां फलानां शब्दं** श्रुत्वासुरेष्वपि, **रासभोधमः, असुरापेक्षयासुरपशवोधमा**स्तत्रापि **गर्दभाः,** तस्य निर्भयागमने हेतुमिव सामर्थ्यमाह **सनगं परिकम्पय**न्निति, गोवर्धनसहितं सर्वमेव **भूतलं परिकम्पयन्** ॥ २९ ॥ आगत्य बलभद्रं ताडितवानित्याह **समेत्ये**ति, **समेत्य** मिलित्वा निकटे समागत्य **तरसा प्रत्यग्**भूतो जातो विपरीतमुखस्ततो **द्वाभ्यां पद्भ्यां बलं** बलभद्रमु**रसि निहत्य** ताडयित्वा **काशब्दं** रासभशब्दं **मुञ्चन्**नुच्चारयन् **पर्यसरत्** परितो वेष्टनमिव प्रदक्षिणां कृतवान्, जातिस्वभावोयं, ननु महान् फलार्थी स्वस्थाने समागतः स्वयमेव फलान्युत्पाट्य गृह्णाति तत्र कथमागत्य ताडनमनुचितं कृतवान् ? तत्राह **खल** इति ॥ ३० ॥ बलभद्रोपि स्वयमेवागतस्तत्स्थान इति सकृदपराधः सोढः, तावतापि स न निवृत्त इत्याह **पुनरासाद्ये**ति, पुनर्निकटे गत्वा क्रोधसंरब्ध **उपक्रोष्टा** शृगालतुल्यो गर्दभः **पराक् स्थितः पुनर्विमुखो** भूत्वा**परौ चरणौ** पुन**र्बलाय प्राक्षिपत्,** प्रक्षेपपर्यन्तं क्रोधोनुवृत्तः इति ज्ञापयितुमन्ते **रुषे**त्युक्त, सम्बोधनं स्नेहादप्रतारणाय ॥ ३१ ॥ तदा द्वितीयापराधे बलभद्रो मारितवानित्याह प्राहिणोद् **स** तमिति, **प्रपदोः** गृहीत्**वैकपाणि**नैव **तं भ्रामयित्वा तृणराज**तालवृक्षस्योपरि प्राहिणोद् यथा वत्सो **भगवता,** अयमप्यन्तरिक्ष एव मृत इत्याह **त्यक्तजीवित**मिति, त्यक्तं जीवितं येन ॥ ३२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

विद्यन्तेऽभुक्तपूर्वाणीत्यत्र। केचिदित्यस्वरसोद्भावनम्। तद्बीजं तु गन्धविशेषेणेष्टरसानुमानात्कामः सम्भवति। अत एव गन्धलोभितचेतसामिति वक्ष्यन्ति। उक्तधर्मैश्चौर्यसम्भावनापि नेति ॥ २५ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

विद्यन्त इत्यत्र मतान्तरमनूद्य दूषयन्ति केचिदित्यादि, तट् टिप्पण्यां स्फुटीकुर्वन्ति केचिदित्यादि, ननु चौर्येण भक्षणसम्भवान्न दोष इत्यतस्तद् दूषयन्त्युक्तेत्यादि, ॥ २५ ॥ **स तमि**त्यत्र मूले धेनुकवधमात्रमुक्तं पाद्मोत्तरखण्डे तु दिनमप्युक्तं "कार्त्तिक्यां पूर्णमास्यां तु धेनुकानां वधः कृत,, इति, अत्र बहुवचनो 'धेनुकशब्दो जातिवाचीति ज्ञायते ।। ३२ ॥

(३) श्रीमद्वल्लभमहाजकृतः श्रीसुबोधिनीलेखः

पुनरासाद्येत्यस्याभासे **बलभद्रोपो**ति इतीत्यस्याग्रे **बलेने**ति शेषः, इति हेतोर्बलेनापराधः सोढ इत्यर्थः ॥ ३१ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अभुक्तपूर्वाणि यानि पूर्वं कदापि न भुक्तानि तथाविधानि सुरभीणि सुगन्धीनि च फलानि तत्र विद्यन्ते । ननु "यदि तत्र कदापि तद्भयेन गमनं न जातं तदा कथ ज्ञायते तत्र तथाविधफलानि सन्तीति" तत्राहुः—एष इति । विषूचीनः सर्वतः प्रसृतः एष तेषामेव सुरभिर्गन्धोऽवगृह्यते । तेन गन्धेन तथात्वं ज्ञायते इत्यर्थः ॥ २५ ॥ न केवलमिदानीमेव तल्लोभो जातः, किन्तु पूर्वमपि महती वाञ्छा आसीत् । तत्र केचिदाहुः—हे कृष्णेति । केचिदाहुः हे रामेति अतस्तानि फलानि गन्धेन लोभितानि चेतांसि येषां तेषां नोऽस्माकं प्रयच्छ देहि । 'अतिनिर्बन्धे कृते कदाचित् कोपं कुर्यात्, गते वा तत्र किञ्चिदनिष्टं स्यात्, इत्याशङ्क्याहुः—यदि रोचते तदा गम्यतामिति ॥२६॥ एवं सुहृदां मित्राणां गोपानां वचः श्रुत्वा प्रहस्य सुहृदां तेषां प्रियचिकीर्षया तैर्गोपैर्वृतौ रामकृष्णौ तालवनं जग्मतुः । अनेन फलप्रदाननिर्धारः सूचितः । तथानिर्धारहेतुत्वेन सामर्थ्यं सूचयन्नाह—प्रभू इति ॥ २७ ॥ तद्वनं प्रविश्य बलः बाहुभ्यां ओजसा बलेन तालवृक्षान् समरिकम्पयन् तत्फलानि पातयामास । तत्र दृष्टान्तमाह—मतगज इवेति ॥ २८ ॥ तदा चासुररासभः रासभो गर्दभः तद्रूपधृक् असुरो धेनुकः पततां फलानां शब्दं निशम्य श्रुत्वा नगा वृक्षास्तैः सहितं क्षितितलं परिकम्पयन् अभ्यधावत् हन्तुं सम्मुखमाजगाम । 'सनगं क्षितितलं कम्पयन्' इत्युक्त्या तस्य महत्त्वं युद्धसामर्थ्यं च सूचितम् ।। २९ ॥ समेत्य समागत्य प्रत्यग्द्वाभ्यां पश्चिमाभ्यां पद्भ्यां बलमुरसि निहत्य काशब्दं गर्दभजातिशब्दं मुञ्चन् पुनरपि हननावकाशं पर्यालोचयन् पर्यसरत् परितोऽधावत् । तत्र सामर्थ्यमाह—बलेति । ननु "सर्वफलदाता भगवांश्चेत् फलार्थी सन् स्वयमेव तत्स्थानमागतस्तदा तस्य स्वयमेव फलान्यानीय तस्मै देयानीत्युचितम्, तदकृत्वा कथमेवं विपरीतं कृतवान् ?" तत्राह खल इति । खलानामयमेव स्वभावो यन्महतो न गणयन्ति, योग्याय न प्रयच्छन्ति, प्रत्युत तत्र प्रतिबन्धका भवन्त्यतो न तथा कृतवान्, विपरीतं च कृतवानिति भावः ॥ ३० ॥ संरब्धः सङ्क्रुद्धः उपक्रोष्टा गर्दभरूपोऽसुरः पुनरासाद्य समीपमागत्य पराक्स्थितः पृष्ठीकृत्य स्थितः हे राजन् ! रुषा क्रोधेन बलाय बलं हन्तुमपरौ पश्चिमौ चरणौ प्राक्षिपदित्यन्वयः ॥ ३१ ॥ स बलस्तमसुरमेकेनैव पाणिना प्रपदोः पादाग्रयोर्गृहीत्वा भ्रामयित्वा च भ्रामणेनैव त्यक्तं जीवितं येन तं तृणराजाग्रे तालमूले चिक्षेपेत्यन्वयः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

विद्यन्त इति ॥ अभुक्तपूर्वाणि यानि पूर्वं कदापि न भुक्तानि तथाविधानि सुरभीणि सुगन्धीनि च फलानि तत्र विद्यन्ते विषूचीनः सर्वतः प्रसृतः एष तेषामेव सुरभिर्गन्धो भाद्रमासीयप्राच्यसमीरणेनानीतः अवगृह्यते तेन गन्धेन तथा त्वं ज्ञायते ॥ २५॥ प्रयच्छेति ॥ हे कृष्ण ! हे राम ! तानि फलानि गन्धेन लोभितानि चेतांसि येषां तेषां नोऽस्माकं प्रयच्छ देहि । यतोऽस्माकं महती वाञ्छाऽस्ति । अतः यदि रोचते तदागम्यताम् ॥ २६ ॥ एवमिति ॥ एवं सुहृदां मित्राणां गोपानां वचः श्रुत्वा प्रहस्य सुहृदां तेषां प्रियचिकीर्षया तैर्गोपैर्वृतौ प्रभू रामकृष्णौ तालवनं जग्मतुः ॥२७॥ बल इति ॥ तद्वनं प्रविश्य बलः बाहुभ्याम् ओजसा बलेन तालवृक्षान् संपरिकम्पयन् मतङ्गज इव तत्फलानि पातयामास ॥ २८ ॥ फलानामिति ॥ असुरो रासभः धेनुकः पततां फलानां शब्दं निशम्य श्रुत्वा नगा वृक्षास्तैः सहितं कुलाचलसहितं वा क्षितितलं परिकम्पयन् अभ्यधावत् हन्तुं संमुखमाजगाम ॥२९॥ समेत्येति ॥ तरसा वेगेन समेत्य समागत्य प्रत्यग् द्वाभ्यां पश्चिमाभ्यां पद्भ्यां बलमुरसि निहत्य बली खलश्च सः काशब्दं कुत्सितं गर्दभजातिशब्दम्। आर्षः कादेशः । मुञ्चन् पुनरपि हननावकाशं पर्यालोचयन् पर्यसरत् परितोऽधावत् ॥ ३० ॥ स पुनरिति ॥ हे राजन् ! संरब्धः संक्रुद्धः उपक्रोष्टा गर्दभरूपोऽसुरः पुनरासाद्य समीपमागत्य पराक्स्थितः पृष्ठीकृत्य स्थितः रुषा क्रोधेन बलाय बलं हन्तुमपरौ पश्चिमौ चरणौ प्राक्षिपत् ॥३१॥ स तमिति ॥ स बलस्तमसुरमेकेनैव पाणिना प्रपदोः पादाग्रयोर्गृहीत्वा । प्रपदोरित्यार्षः पाठः । पदयोरिति साधुः पाठः इति तोषणी । भ्रामयित्वा च भ्रामणेनैव त्यक्तं जीवितं येन तं तृणराजाग्रे तालमूले चिक्षेप । भ्रामयित्वेति मित्त्वेपि ह्रस्वाभाव आर्षः ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृतमनुजभक्षणात् धेनुकाद्भीतैः पूर्वं न भुक्तानि न भक्षितानीत्यभुक्तपूर्वाणि राजदन्तादित्वात्पूर्वप्रयोगार्हस्य पूर्वशब्दस्य परनिपातः चात् स्वादूनि ननु तर्हि कथं स्वादुता तेषां ज्ञाता तत्रोच्यते विषूची सर्वत्र विस्तारी सूचयैशून्ये इति धातोर्निष्पन्नोय

विषूचीशब्द इनंतो बोध्यः षोपदेशत्वमार्षं सुरभिः समीचीनो गंधः नोस्माभिः ॥ २५ ॥ प्रयच्छ देहि ॥ २६ ॥ सुहृदां प्रियं कर्त्तुमिच्छया प्रभू धेनुकहनने समर्थौ ॥ २७ ॥ मतंगजो मदोन्मत्तो हस्ती ओजसाबलेन ॥ २८ ॥ असुरश्चासौ रासभो गर्द्दभश्च सनगं सवृक्षं ॥ २९ ॥ तरसा वेगेन प्रत्यग्द्वाभ्यां पश्चिमाभ्यामुभाभ्यां पद्भ्यां बलरामं उरसि हृदये हत्वा काशब्दं कुत्सितं खरजातिनादं मुंचन् कुर्वन् पर्यसरत् हननाऽवसरं प्रतीक्षन् परितो बभ्राम कादेश आर्षः ॥ ३० ॥ संरब्धः क्रुद्धः उपक्रोष्टा रासभः पराक्पश्चान्मुखः स्थितः अपरौ पश्चिमौ बलाय बलं रामं हंतुं क्रियार्थोपपदस्य च कर्मणि स्थानिन इति चतुर्थी रुषा क्रोधेन ॥ ३१ ॥ पदयोरिति व्यक्तव्ये प्रपदोरिति पाठ आर्षः । पादयोः हस्ताभ्यां गृहीत्वा एकहस्तेन भ्रामयित्वा तृणराजाग्रे तालवृक्षाग्रे ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विद्यन्त इति ॥ किं च सुरभीणि, तानि फलानि, अभुक्तपूर्वाणि पूर्वमपि नरैरभुक्तानीत्यर्थः । विद्यन्ते । तेषां फलानां, विषूचीनः अत्रापि सर्वतः प्रसृतः, सुरभिः अन्यगन्धैरनभिभूतः, एषः गन्धः, अवगृह्यते उपाघ्रायते । अस्माभिरिति शेषः वै ॥ २५ ॥ प्रयच्छेति ॥ हे कृष्ण, तानि फलानि, गन्धेन लोभितानि चेतांसि येषां तेषां, नोऽस्माकं, अस्मभ्यमित्यर्थः । प्रयच्छ आदाय देहि । हे राम, महती वाञ्छा तत्फलानुबुभूषा, अस्ति वर्त्तते । अस्मदन्तःकरणे इति शेषः यदि, रोचते तर्हि, गम्यताम् । न वयं नियन्तुं प्रभवाम इति भावः ॥ २६ ॥ एवमिति ॥ एवमेवंविधं, सुहृद्वचः स्वसुहृद्दहूतगोपवचनं श्रुत्वा, सुहृत्प्रियचिकीर्षया स्वसुहृदां प्रियं कर्त्तुं वाञ्छया, प्रभू रामकृष्णौ, प्रहस्य हासं कृत्वा, गापैः वृतौ सन्तौ, तालवनं जग्मतुः ॥ २७ ॥ बल इति ॥ बलः रामः, प्रविश्य प्रथमतः प्रवेशं कृत्वा, बाहुभ्यां, ओजसा बलेन, मतंगजो मत्तमातङ्गः इव, तालान् संपरिकम्पन् परितः कम्पायमानान् कुर्वन् सन्, फलानि पातयामास ॥ २८ ॥ फलानामिति ॥ तदा पततामधः पतमानानां फलानां, शब्दं निशम्य आकर्ण्य, असुररासभः रासभाकृतिरसुर इत्यर्थः । सनगं सवृक्षं, क्षितितलं परिकम्पयन्, अभ्यधावत् ॥ २९ ॥ समेत्येति ॥ बली बलवान्, खलो धेनुकासुरः, बलं रामं, समेत्य संप्राप्य, प्रत्यक् पश्चात्, द्वाभ्यां पद्भ्यां, तरसा बलेन, उरसि निहत्य, काशब्दं गर्द्दभजातिध्वनिं, मुञ्चन् सन्, पर्यसरत् परितश्चचार ॥ ३० ॥ पुनरिति ॥ संरब्धः क्रुद्धः, उपक्रोष्टा गर्द्दभः सोऽसुरः, पुनः आसाद्य, बलमिति शेषः पराक् अनभिमुखं, स्थितः सन्, हे राजन्, अपरौ पाश्चात्यौ चरणौ, रुषा क्रोधेन, बलाय बलं ताडयितुं प्रकर्षेण उपरि चिक्षेप ॥ ३१ ॥ स इति ॥ तदा स रामः, तं धेनुकासुरं, एकपाणिना एकेन हस्तेनैव, प्रपदोः पश्चिमपादयोः, गृहीत्वोपादाय, भ्रामयित्वा स्वमूर्द्ध्नः परितो भ्रमणं विधाप्य, भ्रामणेनैव त्यक्तं जीवितं येन तं, भ्रामणमात्रत एव परासुतां प्राप्तं धेनुकमित्यर्थः । तृणराजाग्रे तालाग्रे, चिक्षेप प्राक्षिपत् ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं सुहृद्वच इति : १०.१५.२७.

वत्सानामनुभूय पालनसुखान्यद्यासि गोपालकस्तत्ताद्दग्भवता विधेयमधुना कान्तं गवां यद्भवेत् ।
इत्याकर्ण्य सुहृद्वचांसि भगवान् कर्तुं किमैषीत्तदा कृत्वाऽन्तं खरधेनुकस्य विपिनं तद्धेनुकान्तं बलात् ॥ ३६ ॥
कृतं प्राङ्मयैतद्वनं वत्सपेन सता वत्सकान्तं तथा धेनुकान्तम् । विधेयं च गोपालकेनाधुनापीत्यगात्तैः सहेशस्तदिष्टार्थदृष्टिः ॥ ३७ ॥
आकृत्या सुमनोहरोऽपि बकवत्स्याच्चेत् प्रकृत्या खलः शिक्ष्यः सोऽप्यनुपेक्षमेव जगतीत्यात्तप्रतिज्ञस्य मे ।
आकृत्यापि खलस्त्वसौ खलगणोपेतः प्रकृत्यापि तत् सम्प्रत्येव स दण्ड्य इत्यजनि तद्वाचा सहर्षोऽच्युतः ॥ ३८ ॥
नराशखरधेनुकस्य हि पुरः कथं रे मम बलस्य च नियोजनं नरशरीरभाजोऽधुना ।
स्फुटं कुरुत निस्त्रपा इति रुषं विहायादराद् हसन् प्रभुरगादिति प्रथमतः क्रुधो निर्जयः ॥ ३९ ॥
नित्यतृप्तोऽप्यहं भक्तान् कुर्वे सत्फलभोजिनः उत्सार्य विघ्नमप्युग्रमिति तत्कृतितः स्फुटम् ॥ ४० ॥
सुरोल्लासो यथा भूयात्तथा खलविनाशनम् । मया कार्यमिति श्रीशः शीघ्रं तद्वनमाययौ ॥ ४१ ॥

बलः प्रविश्येति : १०.१५.२८.

वृन्दावनमभयं मम कर्तुरिदं शेषकार्यमवशिष्टम् इत्यनुजवागभिज्ञो रामोऽग्रेऽभूत्तदा खलं हन्तुम् ॥ ४२ ॥
शीतोष्णादिसहिष्णवोऽप्यविरतं विष्णोः पदालम्बिनोऽरण्यस्थाश्च महातपस्थितिजुषोऽप्येकाऽग्र्यगा भूमिजाः ।
जाताश्चेत्खलसङ्गिनो विधिवशाद् भ्रश्यत्फलाः स्युः क्षणादेवं तालफलाभिपातनामषादाबोधि रामेण किम् ॥ ४३ ॥

समत्येति : १०.१५.३०.

अपूर्वाभ्यां पदाभ्यां यत्खरो राममताडयत् । सुराश्रितेष्वहं वीर्यादपूर्वोऽस्मीति बोधितम् ॥ ४४ ॥
खला मूर्खा अशूराश्च पाश्चात्यपददर्शकाः । स्वभावसिद्धा इत्यासीद् युक्तं तादृग्गतिः खरः ॥ ४५ ॥
शत्रोरपि सकृन्मंतुं सहेय चरणोदितम् । व्यञ्जयन्निति तत्पादप्रहारं सोढवान् बलः ॥ ४६ ॥

स तं गृहीत्वेति : १०.१५.३२.

यद्यप्यस्मि खरान्तकोऽहमधुना रामस्वरूपस्तथाप्याबालस्थविरं खरान्तक इति श्रीरामनामात्मनि ।
प्रख्यातं पदमद्य न व्यभिचरत्वित्याशयादच्युतो मन्ये पुण्यजनासुहृत्खलहृतौ रामं किमायोजयत् ।। ४७ ।।
शपथेन निवार्य मां पुरा यद् विहितोऽनेन वने खरप्रणाशः । अधुनापि तथा करिष्यतीति खरमुद्वृत्तमरं जघान रामः ।। ४८ ।।
दृष्ट्वा खरं प्रसभरुद्धसुतालमालं तालध्वजः स हतवानिति युक्तमेव ।
साधारणोऽपि सहते नृपतिर्न केतौ यस्मान्निजे जयपदे रिपुरुद्धभावम् ।। ४९ ।।
खलोऽयमिह भासते यदपि कान्तनामा तथाप्यपूर्वपदशक्तितो ध्रुवमसावपूर्वस्थितः ।
तदस्य तृणरोधिनः खलु वधे नु कः संशयोऽधुनेति स जघान तं सकलधेनुको धेनुकम् ।। ५० ।।
योऽन्तर्गीतानभिज्ञो बहिरतुलमहाकण्ठनादाभिमानोगोजातात्युच्चतालोच्चरणगतितया तत्परीक्षां विधाय ।
हन्याद्वेगेन गीतामृतजलधिशयः कुस्वरं तं वदन्तं द्वाभ्यां प्रत्यक्पदाभ्यां प्रकटितविभवं दुर्जनं सज्जनेशः ।। ५१ ।।
वनप्रवेशात्तत्तालकम्पनाच्च तदा रवात् । तत्क्षोभागतिदुःशब्द पद्धतिध्वंसतोऽध्वनि ।। ५२ ।। (युग्मम्)
आक्रम्य पादद्वयमेकपाणिनाऽनुजेन मे प्रागसुरः कृतभ्रमः ।
प्राक्षेपि वृक्षे त्विति तद्गरीयसो ममापि तत्साध्विति तत्तथाऽकरोत् ।। ५३ ।।
विधाय खलनाशनं बहुबलः स शूरः स्वयं भवत्यतितरां कृती निजनृपाय संवेदयन् ।
अहं तृणचरानुगस्तदिह तार्णराजाग्रतः खलाहतिनिवेदनं ह्युचितमित्यधात्कि तथा ।। ५४ ।।
तालैतावदिह स्थितोऽपि समभूस्त्वं यस्य संसर्गतस्त्यक्तो भक्तजनैर्द्विजैरपि समुद्भ्रान्तं खलं पश्य तम् ।
धृत्वैवाशयमीदृशं हृदि बलश्चिक्षेप तालोपरि सोऽप्यन्ये च शिरांसि सत्यमिदमित्यान्दोलयन् कम्पनात् ।। ५५ ।।

कृष्णप्रिया

उसके फल हैं तो बड़े सुगन्धित, परन्तु हमने कभी नहीं खाये। देखो न, चारों ओर उन्हीं की मन्द-मन्द सुगन्ध फैल रही है। तनिक सा ध्यान देने से उसका रस मिलने लगता है ।। २५ ।। श्रीकृष्ण ! उनकी सुगन्ध से हमारा मन मोहित हो गया है और उन्हें पाने के लिये मचल रहा है। तुम हमें वे फल अवश्य खिलाओ। दाऊ दादा ! हमें उन फलों की बड़ी उत्कट अभिलाषा है । आप को रुचे तो वहाँ अवश्य चलिये ।। २६ ।। अपने सखा ग्वालबालों की यह बात सुनकर भगवान् श्रीकृष्ण और बलरामजी दोनों हँसे और फिर उन्हें प्रसन्न करने के लिये उनके साथ तालवन के लिये चल पड़े ।। २७ ।। उस वन में पहुँचकर बलरामजी ने अपनी बाँहों से उन ताड़ के पेड़ों को पकड़ लिया और मतवाले हाथी के बच्चे के समान उन्हें बड़े जोर से हिलाकर बहुत से फल नीचे गिरा दिये ।। २८ ।। जब गधे के रूप में रहने वाले दैत्य ने फलों के गिरने का शब्द सुना, तब वह पर्वतों के साथ सारी पृथ्वी को कँपाता हुआ उनकी ओर दौड़ा ।। २९ ।। वह बड़ा बलवान् था। उसने बड़े वेग से बलरामजी के सामने आकर अपने पिछले पैरों से उनकी छाती में दुलत्ती मारी और इसके बाद वह दुष्ट बड़े जोर से रेंगता हुआ वहाँ से हट गया ।।३०।। राजन् ! वह गधा क्रोध में भरकर फिर रेंगता हुआ दूसरी बार बलरामजी के पास पहुँचा और उनकी ओर पीठ करके फिर बड़े क्रोध से अपने पिछले पैरों की दुलत्ती चलायी ।। ३१ ।। बलराम जी ने अपने एक ही हाथ से उसके दोनों पैर पकड़ लिये और उसे आकाश में घुमाकर एक ताड़ के पेड़पर दे मारा घुमाते समय ही उस गधे के प्राणपखेरू उड़ गये थे ।। ३२ ।।

तेनाहतो [1]महातालो [2]वेपमानो बृहच्छिराः । पार्श्वस्थं कम्पयन् भग्नः स चान्यं सोऽपि चापरम् ।। ३३ ।।
बलस्य लीलयोत्सृष्टखरदेहहताहताः । तालाश्चकम्पिरे सर्वे महावातेरिता इव ।। ३४ ।।
नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे । ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः ।। ३५ ।।
ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये । क्रोष्टारोऽभ्यद्रवन् सर्वे संरब्धा हतबान्धवाः ।। ३६ ।।
तांस्तानापततः कृष्णो रामश्च नृप लीलया । गृहीतपश्चाच्चरणान् प्राहिणोत्तृणराजसु ।। ३७ ।।
फलप्रकरसङ्कीर्णं[3] दैत्यदेहैर्गतासुभिः । रराज[4] भूः सतालाग्रैर्घनैरिव नभस्तलम् ।। ३८ ।।
तयोस्तत्[5] सुमहत् कर्म [6]निशम्य विबुधादयः । मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ।। ३९ ।।
अथ तालफलान्यादन् मनुष्या गतसाध्वसाः । तृणं च पशवश्चेरुर्हतधेनुककानने ।। ४० ।।

---

१. महांस्तालः-वीर. । २. पतमानो-वीर. विज. । ३. संकीर्णा-वीर. विज. । ४. स्वरतालाग्रैः-वीर. । ५. स्तु सुमहत्-वीर. । ६. निशाम्य-वीर. विज ; निशाम्य-श्रीधर. वंशी. ।

कर्दमक्षमा

अन्वयः –तेन आहतः वेपमानः बृहच्छिराः महातालः पार्श्वस्थं कम्पयन् भग्नः सः च अन्यं सः अपि अपरम् (तालं कम्पयन् भग्नः) ।। ३३ ।। बलस्य लीलया उत्सृष्टखरदेहहताः सर्वे तालाः महावातेरिताः इव च कम्पिरे ॥ ३४ ।। अनन्ते जगदीश्वरे भगवति एतत् चित्रं न अङ्ग तन्तुषु पटः यथा यस्मिन् इदं ओतप्रोतम् ।। ३५ ।। ततः हतबान्धवाः धेनुकस्य ये ज्ञातयः क्रोष्टारः सर्वे संरब्धाः कृष्णं रामं च अभ्यद्रवन् ॥ ३६ ।। हे नृप आपततः गृहीतपश्चाच्चरणान् तान् तान् कृष्णः रामः च लीलया तृणराजसु प्राहिणोत् ॥ ३७ ।। फलप्रकरसंकीर्णं भूः सतालाग्रैः गतासुभिः दैत्यदेहैः घनैः नभस्तलम् इव रराज ।। ३८ ।। विबुधादयः तयोः तत् सुमहत कर्म निशम्य पुष्पवर्षाणि मुमुचुः वाद्यानि चक्रुः तुष्टुवुः ॥ ३९ ॥ अथ गतसाध्वसाः मनुष्याः तालफलानि आदन् हतधेनुककानने पशवः च तृणं चेरुः ।। ४० ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

उत्सृष्टेन खरदेहेन हतैस्तालैराहताः चकंपिरे अकंपंत ।। ३४ ॥ यस्मिन्निदं विश्वमोतमूर्ध्वतंतुषु पट इव ग्रथितं प्रोतं तिर्यक्तंतुषु पटव देव संग्रथितम् । सर्वतोऽस्यूतं वर्तत इत्यर्थः ॥ ३५–३७ ।। घनैर्नभ इव भुवस्तलं रराज । तत्र फलप्रकरसंकीर्णमिति दैत्यदेहैश्च सतालाग्रैः संकीर्णमित्यनेन चारुणश्वेतनीलघनसादृश्यसंपादनम् ।। ३८–३९ ।। आदन्नभक्षयन् ॥ ४० ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तेन खरासुरदेहेन । बृहच्छिराः अतितुंगः । भग्नः त्रुट्यन् । पार्श्वस्थम् तालम् ॥ ३३ ॥ हतैर्भग्नैः । आहता भग्नाः ।।३४।। एतत्तालादिपातनम् । यस्मिन् बल । इत्यर्थ इति । सर्वाधारत्वेन तस्य तन्नाद्भुतमिति भावः । "न तस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते इत्येवं" वक्ष्यमाणरीत्या प्रतियोधाद्यनुकरणमात्रशक्तिप्रकाशकारिण्या नरलीलयैवदं कृतमित्याश्चर्य्यत्वेन वर्ण्यते, न त्वैश्वर्यलीलयेत्याह—नैतदिति । अचित्रत्वे हेतुः—भगवति शक्त्या समग्रैश्वर्यादियुक्तेऽनंते स्वरूपतोऽप्यपरिछिन्ने तथोपाधिसंबंधेनापि जगदीश्वरे ओतं प्रोतमित्यादिलक्षणे च दृष्टांतेऽपि तंतूनां कारणत्वेन पटादन्यत्वम् । अत्र तादृशभगवत्त्वादिकं श्रीकृष्णांशेषु मुख्यत्वाद्युक्तमेवेति भाव इति तोषिणी ॥ ३५ ।। क्रोष्टारः स्वजातिस्वनं कुर्वाणाः । ततः धेनुकपतनानंतरम् संरब्धाः कुपिता 'संरभः कोपवेगयोः' इति विश्वः । कृष्णमित्यादावुक्तिः श्रीबलदेवस्य पराक्रमदृष्ट्या भयात्तत्त्यागेन तदभिद्रवणात् । यद्वा—अग्रजप्रेम्णा स्वयमेवाग्रे गमनात् रामश्चेति पश्चादनुजस्नेहेन तस्यापि तत्पार्श्वे गमनात् । अभिद्रवणे तु द्वयोरपि प्राधान्याच्चकारौ । क्रोष्टारः महाक्रोशनं कुर्वाणाः हतबांधवा इति । शोकेनाप्यतिक्रोधाच्छक्त्यतिशयं कुर्वन्त इति भावः ।। ३६ ।। तांस्तान् धेनुकबांधवान् । हे नृपेति । नृपा यथा नरपालनार्थं दुष्टान्हंतीत्येवं श्रीकृष्णेनापि तत्कृतमिति भावः । यद्वा—नृपस्येव लीलया राजानोऽपि मृगयाक्रीडाकौतुकेन मृगान् घ्नंतीत्यनायास एव तात्पर्यात् ॥ ३७ ।। भूरिति । तलमित्यनेन व्यवहिते नापि संबध्यते । षष्ठ्यर्थे प्रथमा बोध्येत्याशयेन भुवस्तलमिति स्वामी । फलानां प्रकरेण समूहेन संकीर्णं मिलितम् । तत्र भूतले । दैत्यदेहैरित्यनेन संकीर्णमित्यस्य समासांतर्गतस्यापि "भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्" इतिवत्संबंधः । यद्वा – दैत्यदेहैः सह फलप्रकरसंकीर्णमिति संबंधः । पूर्णोपमेयम् उपमानोपमेयसादृश्यधर्मोपमावाचकपदानां चतुर्णामेवोपादानात् । यद्वा—नभस्तलं नभःस्वरूपम् 'तलं स्वरूपाधारयोः' इति विश्वः ।।३८।। तयोः रामकृष्णयोः । तद्दैत्यहननतालपातनरूपम् । नरकृत्यायोग्यत्वान्महत् । आदिना गंधर्वर्षयो ग्राह्याः ।।३९।। हतधेनुकस्य कानने चेरुः बभक्षुः । मनुष्यास्तत्रत्याः पुलिंदादय एव न तु गोपाला आदन्, गर्दभरक्तोक्षितत्वेन फलेषु घृणोत्पत्तेः।।४०।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

चकारादपरोऽपि परमित्येवं बहवो बहून् कम्पयन्तो भग्ना इति ज्ञेयम् ।। ३३ ॥ एवं सन्निकृष्टा भग्नाः दूरस्थास्तु कम्पिता इत्याह– बलस्येति ॥ ३४ ॥ इदं च "न तस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते" इत्येवं वक्ष्यमाणरीत्या प्रतियोद्धाद्यनुरूपमात्रशक्तिप्रकाशधारिण्या नरलीलयैव कृतमित्याश्चर्य्यत्वेन वर्ण्यते न त्वैश्वर्य्यलीलयेत्याह - नैतदिति । अचित्रत्वे हेतुः भगवति भक्त्या समग्रैश्वर्यादियुक्तं अनन्ते स्वरूपेणाप्यपरिच्छिन्ने तथोपाधिसम्बन्धेनापि जगदीश्वरे ओतं प्रोतमित्यादिलक्षणे च दृष्टान्तेपि तन्तूनां कारणत्वेन कार्यात् पटादन्यत्वम् अत्र तादृशभगवत्त्वादिकं श्रीकृष्णांशेषु मुख्यत्वात् युक्तमेवेति भावः ॥ ३५ ।। कृष्णमित्यादावुक्तिः श्रीबलदेवस्य पराक्रमदृष्ट्या भयात्तत्त्यागेन तदभिद्रवणात् किंवा अग्रजप्रेम्णा स्वयमग्रतो गमनात् रामश्चेति पश्चादनुजस्नेहेन तस्यापि तत्पार्श्वे गमनात् अभिद्रवणे तु द्वयोरपि प्राधान्याच्चकारौ क्रोष्टार इति महाक्रोशनं कुर्वाणाः हतबान्धवा इति च शोकेनातिक्रोधान्निजशक्त्यतिशयं दर्शयन्त इति भावः ।। ३६ ॥ हे नृपेति प्रहर्षोदयात् (यद्वा, नृपस्येव लीलया राजानो हि मृगया क्रीडाकौतुकेन मृगान् घ्नन्तीति अनायास एव तात्पर्य्यम्) तृणराजस्विति समासान्तविधेरनित्यत्वात्॥ ३७ ॥ गतासुभिरिति देहानामस्पन्दनं बोधयति अत एव रराज श्रीकृष्णपक्षीयाणामानन्दजनकत्वात् भूः भूमिरूपं तलं तालानामधो देशः किं वा भूरित्यव्ययं भूर्लोकादिवत् । यद्वा, सुपांसुलुगित्यादिना ङसः सुभावः । अथवा सतालाग्रैर्दैत्यदेहैरुपलक्षिता भूः फलप्रकरसङ्कीर्णं यथा

स्यात्तया रराज नभस्तलं नभःस्वरूपं "तलं स्वरूपाधरयोः" इति विश्वः ॥ ३८ ॥ गोपानामेव प्रीत्यर्थमपि तत्तत् अन्येषां जातमित्याह—तयोस्त्विति द्वाभ्याम् । तयोस्तदिति वा पाठः सुमहदिति सपरिवारस्यैव तस्यावहेलयापि मारितस्य देवादिभयकरत्वं च बोधयति आदि शब्दाद्विद्याधरादयो महर्ष्यादयश्च क्रमेण तेषां तत्तत्कर्म ज्ञेयम् वाद्यैर्गीतनृत्यान्यपि ज्ञेयानि प्रायोऽन्योन्यं तेषां सङ्गतत्वात् ॥ ३९ ॥ गोपाला इत्यनुक्त्वा मनुष्या इत्युक्तेस्ते तु मृतगर्दभप्रसङ्गेन घृणां विधाय नादन् किं त्वन्य एव मनुष्या इत्यर्थः । हतधेनुककानन इति तृणबाहुल्यमपि सूचितम् ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ प्रक्षेपकाल एवेत्यर्थ इति पादप्रहारस्य वञ्चनं ज्ञेयम् । पूर्व्वं तु निहत्येति तस्याबलत्वं स्वस्य च महासामर्थ्यं दर्शयितुमवञ्चनात् हननार्थं प्रक्षिप्तयोः पादयोरेव ग्रहणेन प्रहारासिद्धेः । तृणराजेत्यतिस्थूलात्युच्चत्वाभिप्रायेण, महाताल इति वक्ष्यमाणत्वात् । तदग्रे क्षेपणं गोपानां प्रहर्षार्थम्, तस्य लघुतामात्मनश्च महाबलिष्ठतां दर्शयितुं तथा लीलया तालपातनाद्यर्थञ्च ॥३३॥ तेन खरदेहेन, स पार्श्वस्थश्चान्यं स्वपार्श्वस्थं कम्पयन् भग्न इत्यर्थः । एवमग्रेऽपि, चकारदन्योऽप्यपरमित्येवं बहवो बहून् कम्पयन्तो भग्ना इति ज्ञेयम् ॥ ३४॥ एवं सन्निकृष्टा भग्ना दूरस्थास्तु कम्पिता इत्याह बलस्येति महासत्त्वेति (२२ श श्लोके) पूर्वमुद्दिष्टः श्रीबलदेवस्य बलातिशयो दर्शितः ॥ ३५ ॥ इदञ्च तस्य लोकेऽद्भुतमपि तत्त्वदृष्ट्या न चित्रमित्याह—नेति । एतत् लीलया धेनुकमारणतद्देहोत्क्षेपणादिकर्म्मसामर्थ्यं वा, चित्रमद्भुतं न भवति । कुतः ? भगवति सर्व्वैश्वर्य्ययुक्तेऽतोऽनन्तेऽपरिच्छिन्नशक्तावतएव जगदीश्वरे । भगवत्त्वादिकमेव दर्शयति—ओतः प्रोतमिति । इदञ्च सर्व्वं श्रीभगवदवतारत्वेन तदभेदादुक्तम् । दृष्टान्तस्तु सर्व्वतोऽनुस्यूतत्वमात्रे, न चाभेदविवक्षया । अन्यत्तैर्व्याख्यातम् । यद्वा, भगवतीत्यग्रजतया गौरवविशेषेण सर्व्वज्ञत्वाभिप्रायेण वा, अनन्ते शेषरूपेऽतो जगदीश्वरे, शिरसि पृथ्वीधारणेन जगत्पालनात् तदेवाभिव्यञ्जयति—इदं भूतलमोतंप्रोतं कारणकार्य्यात्मकमित्यर्थः, यद्वा, पर्व्वतादिभिर्दैर्घ्ये विस्तारे च सर्व्वतो निविडीभूतं यस्मिन् यन्मस्तकोपर्य्यस्ति । दृष्टान्तो नैविड्यमात्रे ॥३६॥ कृष्णमित्यादावृत्तिः श्रीबलदेवस्य पराक्रमदृष्ट्या भयात्तत्त्यागेन प्राक् कृष्णं प्रत्यभिद्रवणात्, किंवाग्रज-वात्सल्येन स्वयमग्रतो भवनात् (स्थितत्वात्) रामञ्चेति पश्चादनुजस्नेहेन रामस्यापि तत्पार्श्वे गमनात् । अभिद्रवणे तु द्वयोरपि प्राधान्याच्चकारौ । क्रोष्टार इति महा-क्रोशनं कुर्व्वाणा हतबान्धवा इति च । शोकेनातिक्रोधान्निजशक्त्यतिशय दर्शयन्त इति भावः ॥ ३७ ॥ हे नृपेति प्रहर्षोदयात्; यद्वा, नृपस्येव लीलया राजानो हि मृगयया क्रीड़ाकौतुकेन मृगान् घ्नन्तीत्यनायासे एव तात्पर्य्यम् । तृणराजस्वित्यार्षम्,—तृणराजेषु ॥ ३८ ॥ गतासुभिरिति देहानामस्पन्दनं बोधयति; अतएव रराज; भूभूमिरूपम्; तलं तालानामधोदेशः, किंवा भूरित्यव्ययम्,—भूर्लोकादिवत् ॥३९॥ गोपानामेव प्रीत्यर्थमपि तत्र तत्तदन्येषां जातमित्याह—तयोरिति द्वाभ्याम् । सुमहदिति देवादिभयंकरस्य महाबलिष्ठस्य सपरिवारस्य तस्यावहेलयाशुमारणात् । आदिशब्दाद्विद्याधरादयो महर्ष्यादयश्च; क्रमेण तेषां तत्तत्कर्म्म ज्ञेयम् । वाद्यैर्गीतनृत्यान्यपि ज्ञेयानि, प्रायोऽन्योऽन्यं तेषां संगतत्वात् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तेन परिक्षिप्तेनासुरेण हतस्ताडितो महान् तालः भग्नः पतमानो बृहच्छिरोऽग्रभागो यस्यात एव पार्श्वस्थं तालं पातयन् पपातेति शेषः । स च पार्श्वस्थः पतमानस्तथैवान्य सोऽपि तथैवान्यम् ॥ ३३ ॥ बलस्य रामस्य लील्योत्सृष्टेन खरदेहेन हता ये तैर्हताः सर्वे तालाश्चकम्परे यथा महावातेनेरिता कम्पितास्तद्वत् ॥ ३४ ॥ जगदीश्वरेऽनन्ते एतन्न चित्रं कुतः अङ्ग हे राजन् ! तन्तुषु पट इवेद जगद्यच्छिरस्योतं प्रोत च ॥ ३५ ॥ ततो धेनुकस्य ये ज्ञातयः क्रोष्टारो गर्द्भाः खरशब्दं कुर्वन्तो वा हतः बान्धवो येषां ते अत एव संरब्धाः सर्वेऽभ्यद्रवन् अभिमुखं जग्मुः ॥ ३६ ॥ हे नृप ! गृहीतौ पश्चाच्चरणौ येषांस्तांस्तालेषु प्राहिणोत् प्राक्षिपत् प्रत्येकाभिप्रायकमेकवचनम् ॥ ३७ ॥ फलसमूहैः सङ्कीर्णा धरा गतप्राणैर्दैत्यदेहैः कठिनैस्तालाग्रैश्च घनैर्नभस्तलमिव रराज खरदैस्तालाग्रैरित्यरुणश्वेतनीलघनसादृश्यसम्पादनम् ॥ ३८ ॥ निशाम्य दृष्ट्वा विबुधादयः पुष्पवर्षाणि मुमुचुर्ववृषुर्वाद्यानि दुन्दुभयश्चक्रुः वादयामासुः । तुष्टुवुर्विबुधादय इत्यनुवर्त्तते ॥ ३९ ॥ अथ ततः गतभया मनुष्यास्तालफलान्यादन् भक्षितवन्तः हतो धेनुको यस्मिंस्तस्मिन्कानने पशवश्च तृणमचरन् ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तेन खररूपासुरशरीरेण बलेन पार्श्वस्थं तालं कम्पयन् भग्नोऽभूत् किञ्च स च पार्श्वस्थः अन्यं तालं सोऽन्योप्यपरं तालमित्येवं परम्परया ॥ ३३ ॥ बलस्य लीलया कर्मणा उत्सृष्टेन उत्क्षिप्तेन खरदेहेन तालाहताः ॥ ३४ ॥ अन्यस्य चित्रमपि रामस्यैतत्कर्म चित्रं न भवतीति शुकः परीक्षितमाह—नैतदिति । हि शब्दोधराखिलेयम् ननु, सर्षपयतीति प्रसिद्धि द्योतयति ॥ ३५ ॥ क्रोष्टारः क्षेप्तुकामाः ताच्छीलिकस्तृन्प्रत्ययः स्वजातिरवं वा ॥ ३६–३७ ॥ फलप्रकरसङ्कीर्णा तालफलसमुहेन व्याप्ता ॥ ३८ ॥ तयोः रामकृष्णयोः ॥ ३९ ॥ आदन् भक्षितवन्तः ॥ ४०–४१ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

किञ्च, इदञ्च "न तस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते" इति वक्ष्यमाणरीत्या प्रतियोध्याद्यनुरूपमात्रशक्तिप्रकाशकार्यात् धारिण्या नरलीलयैव कृतमित्याश्रयेत्वेन वर्ण्यते—नैतदिति, दृष्टान्तेऽपि तन्तूनां कारणत्वेन कार्यात् पटादन्यत्वम् ॥ ३५–३७ ॥ दैत्यदेहैरुपलक्षिता भूः फलप्रकरसङ्कीर्णं यथा स्यात्तथा रराज नभस्तल नभःस्वरूपम् ॥ ३८–३९ ॥ यद्वा, साधारणमनुष्या एवादन् न तु गोपाः मृतगर्द्दभप्रसङ्गे घृणां विधायेति भावः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तालवनक्रीड़ामाह—फलप्रकरेत्यादि । फलप्रकरसङ्कीर्णं यथा स्यात्तथा भू रराज । कैः ? गतासुभिर्दैत्यदेहैः । कैः किमिव ? घनैर्नभः स्थलमिव ॥ ३९–५२ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

फल प्रकर–सङ्कीर्णमिति यथा स्यात्तथा । भूः रराज । कैः ? गतासुभिर्देहैः । कैः किमिव ? घनैर्नभस्थलमिव ॥३९–५२॥

इति पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उत्सृष्टेन खरदेहेन हतैस्तालैराहताः प्राप्ताघाताः ॥ ३४ ॥ विश्वम् ओतं अग्रतन्तुषु पट इव ग्रथितं प्रोतं तिर्य्यक् तन्तुषु पटवदेव ग्रथितं सर्वतोऽनुस्यूतं वर्त्तत इत्यर्थः ॥ ३५–३६ ॥ हे नृप ॥ ३७ ॥ फलप्रकरसङ्कीर्णं यथा स्यात् तथा भू रराज कैः दैत्यदेहैः निर्भिन्नतालाग्रसहितैः तेषां स्वतः श्यामत्वात् रुधिरोक्षितत्वाच्च घनैः श्यामरक्तैर्नभस्तलमिव "तल स्वरूपाधारयोः" इति विश्वः ॥ ३८–३९ ॥ मनुष्यास्तत्रत्याः पुलिन्दादय एव न तु गोपालाः आदन् गर्दभरक्तोक्षितत्वेन फलेषु घृणोदयात्तेः ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

लीलयोत्सृष्टेन खरदेहेन हतैस्तालैराहताः चकम्पिरे अकम्पत ॥ ३४॥ नैतदिति श्लोकः वासुदेवस्य सङ्कर्षणाख्या द्वितीया मूर्त्तिर्बलो न तु केवलशेषावतार इति ज्ञापयति ॥ ३५–३९ ॥ आदन् अभक्षयन् ॥ ४० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

स बलः प्रपदोः पादयोरग्रभागे तं खरं गृहीत्वा तृणराजस्य तालतरोरग्रे चिक्षेप ॥ ३३–३४ ॥ उत्सृष्टेन क्षिप्तेन खरदेहेन हतैस्तालैराहता लब्धाघाताः ॥ ३५ ॥ बलदेवस्येदं शौर्यन्नाश्चर्यमित्याह —नैतदिति । इदं विश्वं यस्मिन् ततमूर्द्धतन्तुषु पटवद्ग्रथितं प्रातं तिर्यक् तन्तुषु तद्वद्ग्रथितं सर्वतोऽनुस्यूतमस्तीत्यर्थः ॥ ३६–३७ ॥ हे नृप ॥ ३८ ॥ फलप्रकरैः संकीर्णं यथा स्यात्तथा भूः रराज कैरित्याह—दैत्यदेहैर्भग्नतालाग्रसहितैः तेषां श्यामत्वाद्रुधिरनिषिक्तत्वाच्च घनैः श्यामरक्तैर्नभस्तलमाकाशमिव "तलं स्वरूपाधारयोः" इति विश्वः ॥ ३९–४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तेन खरशवेनाहतस्ताडितो बृहच्छिराः पतमानो हि पतन्महातालः पार्श्वस्थं तालं कम्पयन्सन्स्वयं भग्नः स च तालविलोलितस्तालोऽन्यतालं सोऽप्यन्यमित्येवं पङ्क्तिशः समकम्पत ॥ ३३ ॥ स्वदेहहत एकस्तदाहतहता महावातेरिता इव सर्वे तरवश्चकम्पिरे ॥ ३४ ॥ एकतालताडने तालालीनां कम्पकं बलस्य बलमियदहो कथमिति मनसि सन्देहं कुर्वन्तमिवोर्वीशं विदित्वा शुकस्तमपास्तं कर्तुं किञ्च स्वस्य तत्त्वेनैव तत्त्वतो मुक्तावव्स्थानं चेति तन्महिमानमाह ॥ नैतदिति । जगदीश्वरे जगत्स्वामिनि । अङ्ग हे परीक्षित् । तन्तुषु पटो यथा तथेदं जगदोत प्रोतं तद्धारकतयाऽनन्ते तस्मिन्नि शेषे धराऽखिलेयं ननु सर्षपायतीत्यादिप्रसिद्धेहिराह । तस्मिन्नेतत्खरासुरासुहरणं तरुकम्पनं चेत्येतच्चित्रमाश्चर्यं नेति सर्वोपपत्तिकृद्भवतीति भगवति जगदीश्वरे कृष्णे सहाये सतीति वा ॥३५॥ क्रोष्टारः । क्रोष्टृशब्दो ऋकारान्तः । काशब्द कुर्वन्तो हतो बान्धवो धेनुको येषां ते तथाऽभ्यद्रवन् । प्राहिणोदिति पृथगन्वेति । तृणराजस्विति जानन्ति पूर्वराजान इत्यादिवत्समासान्तविधेरनित्यताश्रित्योक्तमिति ज्ञेयम् । तृणराजानां तालानां सुगर्भवद्विद्यमानफलस्तवकमोचनं यस्मिन्कर्मणि तद्यथा भवति तथोपरि प्राहिणोदिति वा । ह्रस्वो नपुंसक इति ह्रस्वः । सा तु हिंसायां सूस्तु गर्भविमोचन इति विश्वः ॥ ३६–३७ ॥ फलानां प्रकरो निकरस्तेन सङ्कीर्णा आकुला गतासुभिर्दैत्यदेहैर्गता असवः प्राणा येभ्यस्तैः सतालाग्रैस्तालशिरोभिः सहितैरिति देहविशेषणम् । घनैः सहितं नभस्थलमाकाशप्रदेश इव भू रराजाशोभत ।

नभस्थलमिन्द्रनीलमिति सुधाभिधानादिन्द्रनीलवच्च रराजेति वा । फलानां नैल्यात्तदुपमता चेति तलशब्दश्च केवलप्रदेशमात्रार्थकतापेक्षया युक्ततया चेति ज्ञेयम् । चशब्दाध्याहारमात्रं सोढव्यम् ॥ ३८ ॥ वाद्यानि चक्रुरवादयन् ॥ ३९ ॥ आदन्भक्षयन्गतं साध्वसं भयं येषां ते हतो धेनुको यस्मिंस्तच्च तत्काननं वनं च तस्मिंस्तृणं पशवश्चेरुरभक्षयन् ॥ ४० ॥

श्रीसुबोधिनी

पूर्वं तु फलान्येव पतन्तीदानीं तु वृक्षाः स्वयमपि पतिता इत्याह **तेनाहत** इति, **तेन** बलभद्रेण रासभदेहेन वा, **आसमन्ताद्धतो महातालोपि वेपमानो** जातस्ततो **बृहच्छिराः** स्थूलाग्रिमभागः कम्पने स्थिरीभवितुमशक्तः स्वपार्श्वस्थं वृक्षं **कम्पयन्नेव मध्ये भग्नः** सोपि पूर्ववद् वेपमानः पार्श्वस्थं कम्पयन् भग्नः, सोप्येवम**परः**, एवं सा पङ्क्तिः सर्वापि **पतिते**त्यर्थः ॥ ३३ ॥ किञ्च न केवलमेका पङ्क्तिः पातिता किन्तु **सर्व** एव वृक्षा वेपमाना जाता इत्याह **बलस्ये**ति, साक्षाद्बलरूप एवायमतस्तेन **लीलयाप्युत्सृष्टखरदेहेन हतेन** वृक्षेण आ सर्वतो **हतास्ताला महावातेरिता इव चकम्पिरे**, अस्य क्रियाशक्तिरनेकपरम्परायामपि न शान्ता सर्वात्मकत्वादस्य यत्रैवास्य क्रियाशक्तिर्व्याप्नोति तत्सम्बन्धात् तत्र स्थितापि क्रियाशक्तिरुद्गच्छति तया चान्यत्र स्पर्शे पुनरन्यत्र स्थिताप्युद्गच्छति यथा काष्ठेषु वह्निः, वह्निराधारमपि न स्थापयतीति वह्निसमानधर्मा वायुरत्र दृष्टान्तीकृतः, **महावातेन** स्पृष्टो गुप्तोपि वायुरुद्गतो महानेव भूत्वान्यमप्येवमुद्बोधयतीत्यन्तं महानेव भवति ॥ ३४ ॥ इदं बलभद्रचरित्रमाश्चर्यमिव मत्वा समाधत्ते **नैतच्चित्र**मिति **नेदं कर्म बलभद्रस्य किन्त्वाविष्टस्य भगवतः**, तदाह **भगवति नैतच्चित्र**मिति किञ्चायमनन्तः सर्वसंहर्ता सङ्कर्षणस्तस्य तालवृक्षमात्रकम्पनं किमाश्चर्यं यं कालं स्मृत्वा जगदेव कम्पते ? किञ्च **जगदीश्वरः**, अयं जगतो नियन्ता, **ईश्वरस्याज्ञयैव सर्वे कम्पन्ते** "यद्भयाद् वाति वातोय"मित्यादिवाक्यात्, प्रथमप्रहारपर्यन्तं बलभद्रः, ततो व्यथाप्रतीकारार्थमुपायान्वेषणे भगवदुपदेशे स्मृते सहसैवाविष्टो भगवांस्तथा कृतवान्, अन्यथा बाहुभ्यां कम्पन एव वृक्षभङ्गो **भवेत्**, किञ्च **यस्मिन्** सङ्कर्षणेहम्ममाभिमानाधिष्ठातरि सर्वमेव **जगदोतं प्रोतं** च समवायरूपत्वान्निमित्तरूपत्वाच्च, **तन्तुभिः पट** ओतः प्रोतश्च दीर्घतन्तव आतारितिर्यक्तन्तवः प्रोतास्तथा सर्वमेव जगद् भगवति समवेतत्वेन ग्रथितत्वेन च स्थितं, अतो हस्ताचालनेनापि सर्वजगत्कम्प उचितः, किमाश्चर्यं वृक्षाणां महाव्यापारे ॥ ३५ ॥ एवं धेनुकवधं भगवत्सामर्थ्यं चोक्त्वा प्रसङ्गात् तत्सम्बन्धिनां सर्वेषां वधमाह **तत** इति, ते तु बहवो मूर्खाः **कृष्णं रामं च धेनुकस्य ज्ञातयो ये** धेनुकवधेन क्लिष्टा **हतबान्धवाः** क्रोध**संरब्धाः** सन्तः **क्रोष्टारो गर्दभा** आक्रोशयुक्ता **अभ्यद्रवन्**, चकारद्वयेन गोपानप्य**भ्यद्रवन** तदा प्रतिगोपं कृष्णो रामश्चोपस्थितौ भवतः, अतो बहुधा कृष्णं बहुधा राममिति ज्ञापयति ॥ ३६ ॥ तदनु भक्तरक्षार्थं सर्वानेव मारितवन्तावित्याह **तांस्तानि**ति, **य** एवाग्रे मारिताः, **कृष्णो रामश्चे**ति, यस्यैवाग्रे पतन्ति, **नृपे**तिसम्बोधनं पूर्ववत्, तेषां वधे न कोपि प्रयास इत्याह **लीलये**ति, गृहीतौ पश्चाच्च**रणौ** येषां, सर्वेषामेवान्तरिक्षमारणार्थं दुष्टारोपिततालवनदूरीकरणार्थं च **तृणराजस्वेव प्राहिणोत्, रामः** कृष्णश्चैक **एवेत्येकवचनम्** ॥ ३७ ॥ ततो यज् जातं तदाह **फलप्रकरैः** फलसमूहैः **सङ्कीर्णं** दैत्यदेहैर्गतासुभिश्च **सङ्कीर्णं ध्वस्ता** भग्ना ये तालाग्रास्तालशिरांसि तैरपि **सङ्कीर्णं तलं** भूतलं **रराज** शोभामेव प्राप्तवत्, न तु भूशोभा काचिन्नष्टा, तत्र दृष्टान्तो **घनैर्नभ** इवेति, निर्मलं **नभः** सूर्यसहितं चन्द्रनक्षत्रसहितं यथा शोभते तथा घनैरपि सम्बद्धं शोभते घनानां सर्वजनापेक्षाविषयत्वात् त्रीण्यप्येतानि नीलावान्तरजातियुक्तानि, अतिनीलानि फलानि रासभास्तु धूसरास्तालाग्राश्च श्यामा मेघा अपि तथैव ॥ ३८ ॥ तत् कर्म तयोः सर्वजगत्प्रसिद्धं जातमिति ज्ञापकमाह **तयो**रिति, **सुमहत् कर्म** धेनुकवधलक्षणं **विबुधादयो** गन्धर्वादयः **पुष्पवर्षाणि मुमुचुर्वाद्यानि** चक्रुस्तुष्टुवुश्च, त्रिविधानां त्रयं हर्षनिधानं, **अनेन** देवानां हितार्थं वध उक्तः ॥ ३९ ॥ एवं सपरिकरो धेनुकवधो निरूपितः, भगवता तु तालफलानि न दत्तानि परं स्वेच्छयैव सर्वैर्भक्षितमित्याहाथेति भिन्नप्रक्रमेण, **तालफलान्यादन्** सर्व एव **मनुष्या गतसाध्वसाश्च** जाताः, **तृणं च प**शवश्चेरुः, हतो **धेनुको** यत्र तादृशे **कानने**, तत्र छायया तृणं न शुष्कं भवतीति, चकारात् पक्षिणोपि सुखिनो जाताः ॥ ४० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

ततः कृष्णं च रामं चेत्यत्र **चकारद्वयेने**तीति **ज्ञापयती**त्यनेन योज्यम् । **फलप्रकरे**त्यत्र **सर्वजनापेक्षाविषयत्वा**दिति देहलीदीपन्यायेनोभयत्र योज्यम् ॥ ३६ ॥ दृष्टान्तस्यांशिकत्वाभावाय ॥ ३८ ॥

(३) श्रीमद्वल्लभमहाजकृतः श्रीसुबोधिनीलेखः

तांस्तानित्यत्र **तृणराजस्वि**ति समासान्तस्यानित्यत्वान् न टच् ॥ ३७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तेन श्रीरामोत्सृष्टखरदेहेन आहतः, अतएव वेपमानः बृहच्छिरा विस्तृताग्रिमभागो महातालः पार्श्वस्थं तालान्तरं कम्पयन् भग्नः पतितः, स च तेन कम्पितस्तालोऽपि पार्श्वस्थं तालान्तरं कम्पयन् भग्नः, सोऽपि चापरं तालं कम्पयन् भग्नः ॥ ३३ ॥ न केवलमेतावत्, किन्तु समीपस्था एव भग्नाः दूरस्थास्तु बलस्य लीलयोत्सृष्टेन प्रक्षिप्तेन खरदेहेन यो हतस्तेनान्यः, तेन अन्य इत्येवं

हताहताः सर्वे एव तालाश्चकम्पिरे । तत्र दृष्टान्तमाह–महावातेनेरिताः प्रेरिता यथा कम्पन्ते तथेति ॥ ३४ ॥ एतच्छ्रवणेनाश्चर्यं मन्यमानं राजानं प्रत्याह–नैतदिति । अप्रतारकत्वं सूचयन् सम्बोधयति–अङ्गेति । यस्मिन्निदं विश्वं ओतमूर्ध्वतन्तुषु पट इव सङ्ग्रथितं प्रोतं तिर्यक् तन्तुषु पट इव संग्रथितं तस्मिन् जगदीश्वरे सङ्कल्पमात्रेण जगज्जननादिकर्तरि । तत्र हेतुः भगवति अनन्तशक्तियुक्ते अनन्ते स्वयं जन्मविनाशादिरहिते एतत् हस्तव्यापारेणासुरमारण–वनप्रकम्पनादि चित्रमाश्चर्यं नैव भवति ॥ ३५ ॥ ततो धेनुकवधानन्तरं ये धेनुकस्य ज्ञातयः क्रोष्टारो गर्दभास्ते सर्वे संरब्धाः क्रुद्धाः सन्तः कृष्णं रामं च चकारात् गोपांश्च हन्तुमभ्यद्रवन् । तत्र हेतुः–हतेति । हतो धेनुको बान्धवो येषां ते ॥ ३६ ॥ आपततः वेगादागच्छतो गृहीतौ पश्चाच्चरणौ येषां तथाभूतान् तान् दैत्यान् हे नृप ! कृष्णो रामश्च तृणराजसु तालमूलेषु प्राहिणोत् प्राक्षिपत् । प्रत्येकाभिप्रायकमेकवचनम् ॥ ३७ ॥ फलप्रकरैः फलसमूहैः सङ्कीर्णं सतालाग्रैः भग्नतालशाखाभिः सहितैर्गतासुभिः प्राणरहितैर्दैत्यदेहैश्च सङ्कीर्णं व्याप्तं भूतलं रराज । तत्र दृष्टान्तमाह–घनैरिव नभस्तलमिति । यथा नीलरक्तश्वेतादिनानावर्णैर्मेघैर्नानारूपं नभो भाति, तथा नानारूपैः फलादिभिर्भूतलमपि नानारूपं बभावित्यर्थः ॥ ३८ ॥ तयो रामकृष्णयोस्तु सुमहत् अन्यैर्दुष्करं धेनुकवधेन तालवनस्य निर्भयत्वसम्पादनरूपं कर्म निशम्य दृष्ट्वा विबुधादयः, आदिपदेन गन्धर्वादयः । तत्र देवाः पुष्पवर्षाणि मुमुचुः । गन्धर्वा गानपूर्वकं वाद्यानि चक्रुः । मुनयस्तुष्टुवुः ॥३९॥ अथ धेनुकवधाद्यनन्तरं हतो धेनुको यस्मिंस्तस्मिन् कानने गतसाध्वसा निर्भया मनुष्यास्तालफलानि आदन् अभक्षयन् । 'मनुष्या' इति पश्वादीनामप्युपलक्षणम् । 'मनुष्या, इति सामान्योक्त्या तदा भगवत्सखीनां गोपानां फलभक्षणं तु कैमुत्यन्यायेनार्थसिद्धम्, तदर्थमेव तत्र गमनात् । तथा पशवश्च गोमहिषादयस्तृणं चेरुः ॥ ४० ॥

अन्वितार्थप्रकाशिका

तेनेति ॥ तेन श्रीरामोत्सृष्टखरदेहेन आहतः अत एव वेपमानः बृहच्छिरा विस्तृताग्रिमभागो महातालः पार्श्वस्थ तालान्तरं कम्पयन् भग्नः पतितः स च तेन कम्पितस्तालोऽपि पार्श्वस्थं तालान्तरं कम्पयन् भग्नः सोऽपि चापरं तालं कम्पयन्भग्नः ॥ ३३ ॥ बलस्येति ॥ बलस्य लीलयोत्सृष्टेन प्रक्षिप्तेन खरदेहेन यो हतस्तेनाहतोऽन्यस्तेनान्य इत्येवं हताहताः सर्व एव ताला महावातेन ईरिता इव चकम्पिरे ॥ ३४ ॥ नैतदिति ॥ अङ्ग हे राजन् ! यस्मिन्निदं विश्वम् ओतमूर्ध्वतन्तुषु पट इव ग्रथितं प्रोतं तिर्यक्तन्तुषु पट इव संग्रथितं तस्मिन् जगदीश्वरे भगवति अनन्ते बलदेवे एतत् हस्तव्यापारेणासुरमाणवनप्रकम्पनादि चित्राश्चर्यं नैव भवति ॥ ३५ ॥ तत इति ॥ ततो धेनुकवधानन्तरं हतो बान्धवो धेनुको येषां ते धेनुकस्य ज्ञातयः क्रोष्टारो गर्दभास्ते सर्वे संरब्धाः क्रुद्धाः सन्तः कृष्णं रामं च चकारात् गोपांश्च हन्तुमभ्यद्रवन् ॥ ३६ ॥ तांस्तानिति ॥ हे नृप ! आषततः वेगादागच्छतः गृहीतौ पश्चाच्चरणौ येषां तथाभूतान् तान् तान् दैत्यान् कृष्णो रामश्च तृणराजसु तालमूलेषु । टजभाव आर्षः । प्राहिणोत् प्राक्षिपत् प्रत्येकाभिप्रायकमेकवचनम् ॥ ३७ ॥ फलप्रकरेति ॥ फलप्रकरैः फलसमूहैः संकीर्णा । संकीर्णमिति पाठे भूरिति विशेष्यमव्ययं क्रियाविशेषणं वा । सतालाग्रैः भग्नतालशाखाभिः सहितैर्गतासुभिः प्राणरहितैर्दैत्यदेहैश्च संकीर्णा व्याप्ता भूः घनैर्नभस्तलमिव रराज तत्र फलप्रकरसंकीर्णेति दैत्यदेहैः फलैः तालाग्रैश्चेति अरुणश्वेतनीलघनसादृश्यसंपादनम् ॥ ३८ ॥ तयोरिति ॥ अन्यैर्दुष्करं धेनुवधेन तालवनस्य निर्भयत्वसंपादनरूपं सुमहत् कर्म निशम्य दृष्ट्वा विबुधादयः आदिपदेन गन्धर्वादयः तत्र देवाः पुष्पवर्षाणि मुमुचुः । गन्धर्वा गानपूर्वकं वाद्यानि चक्रुः मुनयस्तुष्टुवुः ॥ ३९ ॥ अथेति ॥ अथानन्तरं हतो धेनुको यस्मिंस्तस्मिन् कानने गतसाध्वसा निर्भया मनुष्यास्तालफलानि आदन् अभक्षयन् तथा पशवश्च गोमहिषादयस्तृणं चेरुः । अत्र मनुष्याः पुलिन्दादयो नतु गोपाः । गर्दभरक्तोक्षितत्वेन घृणोत्पत्तेरिति चक्रवर्ती ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

चकारादपरोपि परमित्येवं बहुभंगः ॥ ३३ ॥ उत्सृष्टेन प्रक्षिप्तेन खरदेहेन हतैस्तालैराहताः ॥ ३४ ॥ यस्मिन् संकर्षणस्य चतुर्विंशतितत्वात्मकविराड्रूपे इदं देवमनुष्यादिरूपैश्चतुर्विंशतितत्वात्मकं विश्वं ओतं दीर्घतंतुषु पट इव ग्रथितं प्रोतं तिर्यक् तंतुषु पटवत् महाभूतात्मके विराड्देहे अल्पभूतात्मकं देवमनुष्यादिरूपं विश्वमनुस्यूतं वर्त्तते इत्यर्थः ॥ ३५ ॥ क्रोष्टारः खराः ॥ ३६ ॥ हे नृप ॥ ३७ ॥ स तालाग्रैः तालाग्रसहितैः गतप्राणैर्दैत्यदेहैः सहितं फलानां प्रकरैः निकरैः संकीर्णं व्याप्तं भूः भूरूपं तलं घनैः नभोगगनमिव रराज फलतालदेहैः रक्तनीलश्वेतांबुदवद् बभौ ॥३८॥ वाद्यानि वादित्राणि चक्रुः वादयामासुः ॥३९॥ गतसाध्वसाः गतभयाः आदन् भुजंति स्म ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तेनेति ॥ तेन परिक्षितेनासुरेण, आहतस्ताडितः, महातालः वेपमानः कम्पमानः, बृहदति प्रवृद्ध शिरोऽग्रं यस्य सः । अत एव, पार्श्वस्थं पार्श्ववर्त्तिनं, अन्यं तालं, कम्पयन्, भग्नः । स द्वितीयस्तालश्च, अन्यं तृतीयं तालं, कम्पयन् भग्नः । स तृतीयस्तालश्चापि, अपरं चतुर्थं तालं कम्पयन् भग्नः । एवं परंपरया बहूनां तेषां पतनं बोध्यम् ॥ ३३ ॥ बलस्येति ॥ एवं बलस्य बलदेवेन, लीलया, उत्सृष्टश्चासौ खरदेहश्च तेन हता ये तैराहताः सर्वे तालाः, महांश्चासौ वातश्च तेन ईरिताः कम्पिताः सन्त इव, चकम्पिरे ॥ ३४ ॥ नैतदिति ॥ अङ्ग हे राजन्, जगदीश्वरे सर्वजगन्नियन्तरि, अनन्ते भगवति, एतत् चित्रमाश्चर्यं, न भवति हि । यतः यस्मिन्ननन्ते, इदं सकलं जगत्, तन्तुषु सूत्रेषु, पटः यथा, तथा, ओतं प्रोतं च, भवति । इत्थंभूतमहिमा बलो भवतीति भावः ॥ ३५ ॥ तत इति ततः धेनुकस्य, ये ज्ञातयः, क्रोष्टारो गर्दभाः सन्ति, ते हता बान्धवो येषां तथाभूताः, अत एव संरब्धाः क्रुद्धाः सन्तः, सर्वेऽपि कृष्णं च' रामं चापि, अभ्यद्रवन् अभिमुखमाजग्मुः ॥ ३६ ॥ तांस्तानिति ॥ हे नृप, रामः कृष्णश्च, आपततोऽभ्यागच्छतः, तान् तान्, खराकृतीनसुरानित्यर्थः । गृहीतौ पाणिभ्यामुपात्तौ पश्चाच्चरणौ येषां तान् कृत्वा, लीलया, तृणराजसु तालेषु, प्राहिणोत् प्रत्येकाभिप्रायकमेकवचनम् ॥ ३७ ॥ फलेति ॥ फलानां प्रकराः समूहास्तैः संकीर्णा, यद्वा फलप्रकरेति लुप्ततृतीयमार्षम् । सतालाग्रैस्तालाग्रसहितैः, गतासुभिर्गतप्राणैः, दैत्यदेहैश्च, संकीर्णा भूर्भूमिः, घनैर्मेघैः, नभस्थलं इव, रराज उक्तविशेषणैररुणश्वेतनीलघनसादृश्यं बोध्यम् ॥ ३८ ॥ तयोरिति ॥ विबुधादयः देवप्रभृतयः, तयो रामकृष्णयोः, तत्पूर्वमुक्तं यत्तदित्यर्थः । सुमहत् कर्म, निशम्य दृष्ट्वा, पुष्पवर्षाणि नान्दनवनीयपुष्पवर्षणानि, मुमुचुः । वाद्यानि चक्रुरवादयन्, तुष्टुवुश्च ॥ ३९ ॥ अथेति ॥ अथानन्तरं, हतो व्यापादितः धेनुको यस्मिन् तच्च तत् काननं तस्मिन्, मनुष्याः, गतं निवृत्तं साध्वसं भयं येषां तथाभूताः सन्तः, तालफलानि आदन् 'पशवो गवादयः, तृणं तृणानीत्यर्थः । एकवचनं जात्यभिप्रायम् । चेरुरभक्षयन् च ॥ ४० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तेनाहत इतिः १०· १५· ३३.

संपीडितोऽपि सरलः फलदानशीलो दुष्टः समुद्धृतपदोऽपि स दुष्ट एव ।
तालादिकम्पनमथाङ्घ्रिततिः खलस्य मन्ये बलेन रचितेति निदर्शनाय ॥ ५६ ॥
अन्यानुपकृत्युपकृतिहेतू खलसङ्गनिर्गमौ भवतः । तालवनमीश्वरास्मिन् भवतोदाहृत्य दर्शितं मन्ये ॥ ५७ ॥
नो चेत्सत्फलशालिनो रसवतस्तारस्य जाताऽनघा शुद्धिस्तद्विहितोऽप्यलं स वितथो भूयागमेक्षाविधिः ।
आलम्ब्याशयमेवमेव विदधे तारं स तादृग्विधं प्राग्दृष्टागम इत्यभूत्स्फुटमिह व्यासोक्तराजोक्तितः ॥ ५८ ॥

कृष्णप्रिया

उसके गिरने की चोट से वह महान् ताड़का वृक्ष–जिसका ऊपरी भाग बहुत विशाल था–स्वयं तो तड़तड़ाकर गिर ही पड़ा । सटे हुए दूसरे वृक्ष को भी उसने तोड़ डाला । उसने तीसरे को तीसरे ने चौथे को इस प्रकार एक दूसरे को गिराते हु बहुत से तालवृक्ष गिर पड़े ॥ ३३ ॥ बलराम जी के लिये तो यह एक खेल था । परन्तु उनके द्वारा फेंके हुए गधे के शरीर चोट खा-खाकर वहाँ सबके सब ताड़ हिल गये । ऐसा जान पड़ा मानो सबको झंझावातने झकझोर दिया हो ॥ ३४ ॥ भगवा बलराम स्वयं जगदीश्वर है । उनमें यह सारा संसार ठीक वैसे ही ओत प्रोत है, जैसे सूतों में वस्त्र । तब भला उनके लिये य कौन आश्चर्य की बात है ॥ ३५ ॥ उस समय धेनुकासुर के भाई बन्धु अपने भाई के मारे जाने से क्रोध के मारे आग बबूला ह गये । सबके सब गधे बलरामजी और श्रीकृष्ण पर बड़े बेग से टुट पड़े ॥ ३६ ॥ राजन् । उनमें से जो जो पास आया उसी उसी बलरामजी और श्रीकृष्ण ने खेल खेल में ही पिछले पैर पकड़कर तालवृक्षों पर दे मारा ॥ ३७ ॥ उस समय वह भूमि ताड़ फलों से पट गयी और टूटे हुए वृक्ष तथा दैत्यों के प्राणहीन शरीर से भर गयी । जैसे बादलों से आकाश ढक गया हो, भूमिकी वैसी ही शोभा होने लगी ॥ ३८ ॥ बलरामजी और श्रीकृष्ण की यह मङ्गलमयी लीला देखकर देवतागण उनपर बरसाने लगे और बाजे बजाकर स्तुति करने लगे ॥ ३९ ॥ जिस दिन धेनुकासुर मरा, उसी दिन से लोग निडर होकर उस व तालफल खाने लगे तथा पशु भी स्वच्छन्दता के साथ घास चरने लगे ॥ ४० ॥

कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्तनः । स्तूयमानोऽनुगैर्गोपैः साग्रजो व्रजमाव्रजत्[1] ॥ ४१ ॥
तं गोरजश्छुरितकुन्तलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासम् ।
वेणुं क्वणन्तमनुगैर[2]नुगीतकीर्तिं गोप्यो दिदृक्षितदृशोऽभ्यगमन् समेताः ॥ ४२ ॥
पीत्वा मुकुन्दमुख[3]सारघमक्षिभृङ्गैस्तापं जहुर्विरहजं व्रजयोषितोऽह्नि ।
तत्सत्कृतिं समधिगम्य विवेश गोष्ठं सव्रीडहासविनयं[4] यदपाङ्गमोक्षम् ॥ ४३ ॥
तयोर्यशोदारोहिण्यौ पुत्रयोः पुत्रवत्सले । यथाकामं यथाकालं व्यधत्तां परमाशिषः ॥ ४४ ॥
[5]गताध्वानश्रमौ तत्र मज्जनोन्मर्दनादिभिः । नीवीं [6]वसित्वा रुचिरां दिव्यस्रग्गन्धमण्डितौ ॥ ४५ ॥
जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ । संविश्य [7]वरशय्यायां सुखं सुषुपतुर्व्रजे ॥ ४६ ॥
एवं स भगवान् कृष्णो वृन्दावनचरः क्वचित् । ययौ राममृते राजन् कालिन्दीं सखिभिर्वृतः ॥ ४७ ॥
अथ गावश्च गोपाश्च निदाघातपपीडिताः । दुष्टं जलं पपुस्तस्यास्तृषार्ता विषदूषितम् ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—अनुगैः गोपैः स्तूयमानः पुण्यश्रवणकीर्तनः कमलपत्राक्षः कृष्णः साग्रजः व्रजम् आव्रजत् ॥ ४१ ॥ दिदृक्षितदृशः समेताः गोप्यः गोरजश्छुरितकुन्तलः बद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासं वेणुं क्वणन्तं अनुगैः अनुगीतकीर्तिं तं अभ्यगमन् ॥ ४२ ॥ व्रजयोषितः मुकुन्दमुखसारघम् अक्षिभृङ्गैः पीत्वा अह्नि विरहजं तापं जहुः (श्रीकृष्णः) सव्रीडहासविनयं यदपाङ्गमोक्षं तत्सत्कृतिं समधिगम्य गोष्ठं विवेश ॥ ४३ ॥ तयोः पुत्रयोः पुत्रवत्सले यशोदारोहिण्यौ यथाकामं यथाकालं परमाशिषः व्यधत्ताम् ॥ ४४ ॥ तत्र व्रजे मज्जनोन्मर्दनादिभिः गताध्वानश्रमौ रुचिरां नीवीं वसित्वा दिव्यस्रग्गन्धमण्डितौ जनन्युपाहृतं स्वाद्वन्नं प्राश्य उपलालितौ वरशय्यायां संविश्य सुखं सुषुपतुः ॥ ४५–४६ ॥ राजन् एवं वृन्दावनचरः सः भगवान् क्वचित् रामम् ऋते सखिभिः वृतः कालिन्दीं ययौ ॥ ४७ ॥ अथ निदाघातपपीडिताः गावः च गोपाः च तृषार्ताः तस्याः विषदूषितं दुष्टं जलं पपुः ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गोरजोभिश्छुरितेषु कुंतलेषु बद्धं बर्हं वन्यानि प्रसूनानि च यस्य रुचिरे ईक्षणे चारुहासश्च यस्य तं च तं च दिदृक्षितदृशो दिदृक्षिता दर्शनोत्कंठायुक्ता दृशा यासां ताः ॥ ४२ ॥ मुकुंदस्य मुखपद्मगतं सारघं मधु । अह्नि यो विरहस्तस्माज्जातं तापम् । स च तासां सत्कृतिं पूजाम् । कां सत्कृतिं कथं वा कृतां तामाह । सव्रीडेति । सव्रीडेन सलज्जेन हासेन विनयो यथा भवति तथा यदेतत् । किं तत् । अपांगमोक्षं कटाक्षदर्शनम् तथा तां सत्कृतिं प्राप्येति ॥ ४३–५० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृष्ण इति व्रजस्थानां चित्ताकर्षणं, कमलपत्राक्ष इति नेत्रनासयोराकर्षणम् । पुण्ये धन्ये श्रवणे कर्णौ यतस्तादृक्कीर्त्तनं वेणुगानं यस्येति श्रोत्रस्याप्याकर्षणं सूचितम् । अनुगैः देवरूपैरित्यर्थः ॥ ४१ ॥ तम् श्रीकृष्णम् । गोरजोभिः छुरितेषु व्याप्तेषु कुन्तलेषु केशपाशेषु बद्धं बर्हं मयूरपक्षो यस्य स इत्युत्तरेण कर्मधारयः । 'छुरितं व्याप्तिभेदयोः' इति धरणिः । दिदृक्षा जाता यासां ता दिदृक्षिताः दृशः स्वयमेव कर्तृत्वं भेजुः, करणत्वं त्यक्त्वेति ध्वनिः । ताः दृशो यासामिति ॥ ४२ ॥ सरघाभिः संचितं सारघम् 'सरघा मधुमक्षिका' इति हलायुधः । मधु मकरंदं, मुखं लक्षणया पद्ममाह, सारघपदमपि लक्षितलक्षणया मकरंदमाह ॥ ४३ ॥ तयो रामकृष्णयोः । यथाकामं तदिच्छानुसारेणेत्यर्थः । परमाशिषस्तद्वांछितानि । व्यधत्ताम् अकुरुताम् ॥ ४४ ॥ अध्वनोऽयमाध्वनः स चासौ श्रमश्चेत्याध्वनश्रमः, गत आध्वनश्रमो ययोस्तौ तथा । विश्वनाथस्तु—न श्रमोऽश्रमः स चेश्वरत्वान्नरलीलया तस्याभावोऽनश्रमः, गतोऽध्वनोऽनश्रमः ययोस्तावित्याह । तत्र गोकुले सुषुपतुरिति द्वयोः संबंधः । नीवीं धौतवस्त्रम् "नीवी स्त्री कटिबंधेऽपि वणिग्मूलधने तथा । दृढबद्धे धौतबद्धे कटिदत्तकुशत्रये ॥ जितेंद्रियायां नार्यां च श्रीभक्तायाश्च कथ्यते" इति शारदः ॥४५॥ संविश्य पतित्वा । यद्यपि संपूर्वविशतेः शयने वृत्तिर्दृश्यते 'स्वप्नः संवेश इत्यपि' इत्यमरोक्तेस्तथाप्युपसर्गाणामनेकार्थत्वादत्र पतनेऽर्थे । वरशय्यायाम् मृदुवस्त्राच्छादितपर्यंके ॥ ४६ ॥ क्वचित् कदाचित् । राममृते बलभद्रं विना । एवं कुर्वन्निति शेषः ॥ ४७ ॥ निदाघो ग्रीष्मर्त्तुस्तत्संबंध्यातपो रविकरभवोष्णत्वविशेषस्तेन पीडिता व्याकुला इत्यर्थः अथ कार्त्स्न्येन । अथेति मंगलानंतरारंभप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु । दुष्टम् विकृतिजनकम् । तत्र हेतुः । विषदूषितमिति । तस्याः कालिन्द्याः ॥ ४८ ॥

---

१. व्रजमाविशत्–वीर. ; मागमन्–विज. । २. रुपगीत–वीर. विज. । ३. मुखसौरभ–गो. प्रे. टी. ; मुखसारस–वीर. । ४. विगमी वरपाङ्गमोक्षः–विज । ५. ततो गतश्रमो–वीर ; विगताध्वश्रमौ–विज. । ६. वासो वसित्वा रुचिरं–वीर. । ७. मृदु–विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं प्रसङ्गेन दिनान्तरस्य धेनुकवधलीलामपि समाहृत्य प्रथमगोचारणदिनसन्ध्यालीलापि यथायुक्तमित्थं ज्ञेयेति तद्दिनसन्ध्यालीलामाह षड्भिः—तत्र सामान्यव्रजजनदृश्यमानत्वेन वर्णयति -कृष्ण इति । कृष्ण इत्यभिप्रेतं सर्वचित्ताकर्षत्वं दर्शयन् विशिनष्टि—कमलेत्यादिना । कमलपत्राक्ष इति सौन्दर्य्यं शोणच्छविकोणतया विस्तीर्णताकीर्णतया च कैशोरांशव्यक्तिरपि पुण्ये श्रवणकीर्तने यस्य स इति सर्वसद्गुणकर्मादि माहात्म्यम् अनेन व्रजनाथसन्तच्छ्रवणादेव विरहार्त्त्युपशमस्तावकानां च चित्तोल्लासः सूचितः एवं स्वरूपशोभां दर्शयित्वा आवरणशोभामाह, स्तूयमान इत्यादिना ।। ४१ ।। अथ तदुल्लङ्घितबाल्यैः श्रीगोपकुमारीविशेषैरपि दृश्यमानत्वेन तं वर्णयंस्तेषामनुरागोत्पत्तिं स्पष्टयति—तमिति द्वाभ्याम् । ईक्षणमवलोकनं गोरज इत्यादिना उपरि मध्ये तले च श्रीमुखशोभा दर्शिता अन्यवेषसद्भावेऽपि तत्तन्मात्रस्यैव वर्णनं सायं वनादागतत्वेन वैशिष्ट्यात् वेणुक्वणनं स्वभावत एव विशेषतश्च तासां प्रहर्षणार्थमाकर्षणार्थं च उपेतिरागमात्रगानमयवेणुक्वणनोपगानत्वेन गीता कीर्त्तिर्यस्य तम् अत्र साग्रजतानुक्तिस्तस्य तत्रानुपयुक्तप्रायत्वात् अत एव छलेन व्यवहितत्वात् गुरुजनसङ्गतौ हि तस्याग्रजताभाव एव प्रबलते तस्य व्रजागमननिर्द्धारे गोरजश्छुरितेति सूचितगोरज उद्धूतिर्वेणुक्वणनमनुगोपगीतकीर्त्तित्वमिति हेतुत्रयं ज्ञेयम् अभिगमने हेतुः, दिदृक्षिताः सञ्जातदिदृक्षा दृशो यासामिति, अत्र प्रथमतो गोचरणेन दूरगमनतो विविधशङ्कोत्पत्तिः तथा पूर्वतोधुना गोपालते कालविलं वनेनागमनं चोत्कण्ठावैशिष्ट्ये हेतुः समेताः अन्योन्यं मिलिताः ऐकमत्येन सख्यात् तत एव भयलज्जादिहानेश्च तच्च स्वस्वगृहतः सर्वासामेव युगपद्धावनाच्छ्रीकृष्णाध्वनि वा पूर्वमेवागतानामुच्चस्थानविशेषे वा ज्ञेयम् ।।४२।। ततश्च यद्वृत्तं तदाह—पीत्वेति । तंव्याख्यातम् स्वमाधुरीपरिवेषणेन वियोगदुःखान्मुक्तिं ददातीति मुखे कुन्दानि दन्तरूपाणि यस्येति वा मुकुन्दः तस्य मुखाब्जसारघमक्षिभृङ्गस्वरूपैः पीत्वेति तत्सौदर्य्यपरमासस्त्वा नेत्रमात्रात्मिकासत्यो भृशं वीक्ष्येत्यर्थः । प्रकृत्याभिरूप इत्यादिवत्तृतीया किञ्च, भृङ्गरूपकेण श्रीमुखावयवेषु ततस्ततो मुहुर्दृष्टिश्च यद्धवनिता व्रजयोषित इति समुत्कण्ठाविशेषः अह्नीति रात्रौ विहरतापाभावः सूचितः । तस्यां व्रजेन्द्रग्रहादौ तत्सन्दर्शनादिसिद्धेः सत्कृतिमाह—सव्रीडो हासोपतादृशोऽपि विनयः रहस्यप्रियजनोचितव्यवहारोपत्रतादृशं यथा स्यात्तथा तद्रूपामित्यर्थः । यदित्येतत्प्रोक्ता तां किंरूपां अपाङ्गमोक्षकटाक्षदर्शनरूपामित्यर्थः यद्वा यद्यासां अपाङ्गमोक्ष एव सत्कारोपकरणत्वेन विद्यते यत्र तादृशं यथा स्यात् तथा सत्कृतिं समधिगम्येति यद्वा, यत्सद्वृत्त्यधिगमनं सव्रीडेत्यादिरूपं अपाङ्गस्य मोक्षो यत्र तद्रूपं च क्लीबत्वमार्षं वा कंसात्कृतिं यः अपाङ्गमोक्ष इत्यर्थः । तद्विशेषणं सव्रीडहासेति यद्वा व्रजयोषितः पूर्वोक्तास्तद्विशेषाः मुकुन्दस्य सर्वदुःखमोचकत्वेन तादृशनाम्नः श्रीकृष्णस्य मुखसारघं मुखकमलस्य सौन्दर्य्यरूपं मकरन्दमक्षिभृङ्गैरक्षिभिरेव भृङ्गारैः पानपात्रैः पीत्वा समास्वाद्य अह्नि यो विरहस्तेन यस्तापस्तदप्राप्तिजा तृष्णा तां जहू रात्रिजविरहतापं तु प्रातर्दर्शनेन जहुरेवेति भावः । यत् यत्रैव सव्रीडौ हासविनयौ यत्र तादृशमपाङ्गमोक्षं कटाक्षनिःक्षेपरूपां तत् सत्कृतिं ताभिः कृतं सम्मानं समधिगम्य मत्वा गोष्ठं गोष्ठान्तर्निजगृहं विवेशेति ।। ४३ ।। एवं तासामानन्दं द्वाभ्यामुक्त्वा मात्रोर्द्वयोराह—तयोरिति । पुत्रयोरिति । द्वयोरपि द्वौ प्रत्येव स्वपुत्रभावेन लालनभरं बोधयति—यथाकालमिति । शरदादौ सायं प्रदोषादौ च समये विधेयानुसारेणेत्यर्थः । यथा कामं पुत्रयोः स्वयोर्वा इच्छानुसारेण यथेत्यादिकयोर्विपर्य्ययेण पाठः क्वचित् परमा उत्कृष्टा आशिषः उपभोगान् सम्पादितवत्यौ यतः पुत्रवत्सले अनेन प्रागङ्कारोपणालिङ्गनचुम्बनादिकं कुशलप्रश्नसर्वाङ्गनिरीक्षणादिकञ्च सूचितम् ।।४४।। आशीर्विधानमेव प्रपञ्चयति—गतेति युग्मकेन । गताध्वानेति न श्रमो अश्रमः स चेश्वरत्वात् श्रीमन्नरलीलाङ्गीकारेण तस्याभावस्त्वनश्रमः श्रम एवेत्यर्थः । सम्प्रति क्षणं विश्रामलीयायां विगताध्वश्रमावित्यर्थः । आदिशब्देन केशप्रसाधनजलमार्जनादीनि स्नेहभरसंभ्रमेण क्रमोल्लङ्घनान्मज्जनस्यादावुक्तिः । यद्वा, जलेन धूलिमपसार्य पश्चात् सुगन्धिद्रव्येण तत् नीवीमिति अजहल्लक्षणया परिधानवस्त्रं च उत्तरीयस्य यज्ञोपवीतात् प्रागनपेक्षत्वात् अनुलेपनादिशोभाव्यवधायकतया तस्याग्रहणाच्च भूषणानामनुक्तिः वस्त्रादीनामिव म्लानत्वाभावेन तेषामपरिवर्त्तनात् प्रातरेव तदाधिक्यौचित्याच्च जननीभ्यामुपहृतं परिविष्टं प्राश्य प्रकर्षेण सुखेनाशित्वा उपलालितौ ताम्बूलादिमुखवासार्पणसुखगोष्ठीशिरोघ्राणादिभिः प्रतिलालितौ तत्र व्रजे तन्मध्ये अवरोधान्तर्महाप्रासादे तथा च पाद्मोत्तरखण्डे वर्णितम्—

"तस्मिंश्च भवने श्रेष्ठे रम्ये दीपैर्विराजिते । श्लक्ष्णे विचित्रपर्यङ्के नानापुष्पविवासिते ।।
तस्मिन् शेते हरिः कृष्णः शेषे नारायणो यथा" । इति

वरशय्यायां दिव्यपर्यङ्कोपरि संविश्य श्रीगात्रं प्रसार्य अनेन क्रीडार्थं निद्रायां क्षणं विलम्बो बोध्यते तदेव सूचयति, सुखं यथा स्यादिति सखिदासादिकृतोपस्कृतताम्बूलसमर्पणचामरान्दोलनपदाब्जसम्वाहननर्मगोष्ठीगीतगानादिसुखप्रकारेणेत्यर्थः ।४५-४६। अत्राध्यायसमाप्त्यकरणं क्रमप्राप्तामपि पूर्वत्र दुःखमयतया त्यक्तां कालियदमनलीलामनुस्मृत्य वैचित्यात् अनुस्मृतायाश्च तस्याम् आवेशादेव तां प्रथमभागतो वक्तुमारब्धामपि तन्मात्रमुक्त्वाध्यायः समापयिष्यते । पुनश्च विहरत्यपि तत्र स्वयं भगवति यमुनायाः स दोषो नापगत इति श्रोतॄणामपरितोषमाशङ्क्य विलोक्य दूषितां कृष्णामित्येकेनैव पद्येन सा लीला सूचयिष्यते राजप्रश्नसमुद्दीप्यमानावेशादेव तु विस्तारयिष्यते अथ तथैवोपक्रमे ते एवमित्यादिना एवं पूर्वोक्तप्रकारेण गोपालनभृङ्गाद्यनुकरणादिनेत्यर्थः । स

व्रजजनैकजीवनभूतो वृन्दावनचरो भगवान् कृष्ण इति भगवत्तायामपि सार्द्रचित्तस्तद्विशेषं स्मरन्ति, क्वचित् कदाचित् गोचारणारम्भवर्षस्य निदाघे रामं विनेति अन्यथा तेन तादृशसाहसनिषेधमयमातृशिक्षया कालियह्रदप्रवेशो निवार्य्येतेति सम्भाव्य तस्मिन् दिन एव तत्र गत इति भावः। वृतो वेष्टितः श्रीमुखसन्दर्शनाद्यर्थं सर्वेषामेव प्रेमस्पर्द्धया परितो ऽन्तिकागमनात् विशेषतः स्नेहेन व्रजेश्वर्या अनुशासनाच्च ॥ ४७ ॥ गावश्च गोपाश्च अथानन्तरमेव पपुरिति गावस्तावदन्यत्र चालिता अपि निदाघातपपीडिताः सत्यस्तज्जलमूदर्ध्वात् यमुनातीराद्दृष्ट्वा पशुतया तद्दोषाज्ञानादेव द्रुतगत्या प्रविश्य पपुः गोपाश्च तत्पीडिता एव किं तु प्रसिद्धतद्दोष जानन् तासां मृतिं दृष्ट्वा शरीरजिहासया पपुरिति ज्ञेयम् अत एव गोपाश्चेति तदनन्तरमुक्तं ताश्च ते चाग्रगामिनः कतिचिदेव ज्ञेयाः श्रीकृष्णस्यैकाकित्वेन पश्चात् त्यक्तुं तैरशक्यत्वात् सङ्ख्यातीतगोचारणाय समन्तात् भागश एव गन्तुं तेषां योग्यत्वात् पश्चाद्गामिना श्रीकृष्णेन दृश्यमानानां गवामपि तत्पानासम्भवात् दुष्टत्वे कारणमाह—विषदूषितामिति ॥ ४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ तदवधानन्तरं मनुष्या गोपा एव, गतं साध्वसं रामकृष्णविषयकानिष्ट-शंका येषाम्। आदन् तत्रैवाभक्षयन्। यद्वा, ततः प्रभृति गोपादयः सर्व एव मनुष्या धेनुकोत्पात-गतभया अभुक्तपूर्वाणि (भूपतितानि) तान्यभक्षयन्नित्यर्थः। किंवा, गोपास्तालफलान्यादन्; मनुष्या अन्येऽपि सर्वे गतसाध्वसा बभूवुरिति। हतधेनुकेति मनुष्याणामगम्यतया घनतृणादिसञ्चये तत्र निर्भयत्वेन सर्वत्र सुखेन तृणचरणादिकमभिप्रेतम् ॥ ४१ ॥ एवं प्रसंगादापतितां तालीवनक्रीडां निरूप्य पूर्वं प्रस्तुतां गोपालन–प्रथमदिन–क्रीडामेव वदन् वनविहारं समाप्य व्रजान्तर्विलासमाह—कृष्ण इति षड्भिः। अथवा, तस्मिन्नेव दिने तालीवनक्रीडापि सा द्रष्टव्या, एकदेत्याद्यनुक्त्या क्रमेण तद्दिनक्रीडामेव तत्कथनात्। ततश्च कालेऽपि कार्त्तिकशेषे पक्वतालानां समृद्धिः सर्वर्त्त्वाश्रयः श्रीवृन्दावनसम्बन्धात्। पुरो वातोऽपि शरद्वृष्ट्यर्थमेतद्देशस्वभावादघटत एवेति दिक्। साग्रजः कृष्ण इति प्राधान्येन तस्य निर्द्देशः प्रायः सर्वत्र तस्यैव मुख्यत्वात्, विशेषतश्च व्रजागमने तस्यात्यन्तोत्साहात्, व्रजजनानन्दविशेषोत्पादनाच्च, तथाग्रतोऽभिगमिष्यन्तीभिः श्रीगोपिकाभिः सह संगमोत्सवार्थमग्रे भवनाच्च। कृष्ण इत्यभिप्रेत–सर्वचित्ताकर्षकत्वं दर्शयन् विशिनष्टि, कमलेत्यादिना। कमलपत्राक्ष इति सौन्दर्य्यम्, पुण्ये श्रवणकीर्त्तने यस्येति सर्वसद्गुणकर्म्मादिमाहात्म्यम्। अनेन व्रजस्थानां तच्छ्रवणादेव विरहार्त्त्युपशमः, स्तावकानाञ्च चित्तोल्लासः सूचितः। एवं व्रजागमने व्रजस्थानां प्रहर्षार्थं विशेषतो रूप गुणादि प्रकटनमभिप्रेतमतो निजाभीष्टसिद्धेश्च, गोपैः स्तूयमानो रूपगुणादिप्रदर्शनेन विशेषतश्च तद्दिनकृत धेनुकवधादि वर्णनेनानुगैः पश्चाद्वर्त्तिभिः सद्भिः, श्रीकृष्णस्य गोपीनां चान्योऽन्यं सम्यग् दर्शनसिद्ध्यर्थम्, यद्वा, अनुगैः सेवकैर्गोपैश्च सहचरैरिति प्रेमस्तवनं बोधयति, यद्वा, अनुगैः श्रीदामादिभिः सख्यस्वभावत एव गोपैश्च व्रजस्थैरग्रतोऽभिगतैरन्यैर्बान्धवैस्तत्तच्छ्रवणात् स्तूयमान आव्रजदिति गंगातीरे निविश्य कथयतोऽपि श्रीवादरायणेर्भावविशेषेणात्मनः प्रायो व्रजस्थत्व स्फूर्त्तेः ॥ ४२ ॥ ततश्च सायन्तेनवन्यवेषविभूषितस्य श्रीभगवतो गोपीनाञ्चान्योऽन्यं सन्दर्शनसम्मानानन्दमाह– तमिति द्वाभ्याम्। कुन्तलाः केशा अलका वा। ईक्षणमवलोकनम्। एवमुपरि अधोऽधश्च सर्वतः श्रीमुखस्य सौन्दर्य्यमुक्तम्। अन्यालंकारादिसद्भावेऽपि तत्तन्मात्रस्यैव वर्णनं सायं वन्यवेशे तस्य तस्यैव मुख्यत्वात्, तेन तेन शोभाविशेषोदयाच्च। वेणुक्वणनं स्वभावत एव, विशेषतश्च निजागमनविज्ञापनेन तासामाकर्षणार्थं प्रहर्षणार्थञ्च। अत एवोप सामीप्येन वेणुक्वणनञ्चोपगीयते, तेन वा गीता कीर्त्तिर्धेनुकघातनादिलक्षणा यस्य तम्। अयमपि दिदृक्षितत्वे हेतुरेको द्रष्टव्यः। अभिगमनार्थञ्च तस्य व्रजागमनज्ञाननिर्द्धारे गोरज इति, वेणुं क्वणन्तमिति, अनुगैरुपगीतकीर्त्तिमिति च हेतुत्रयम् गोप्य उल्लङ्घितबाल्यास्तत्प्रियाः, अत एव श्रीबलदेवोऽपि दृढं व्यावर्त्तितस्ताभिः सहानुजस्यासंकोचसंगमसुखार्थं केनापि छलेन तस्य दूरगमनात्। अभिगमने हेतुविशेषः–दिदृक्षितदृशः। अस्तु तावदात्मा मनो वा, द्रष्टुं परमोत्सुका दृशोऽपि यासां प्रथम गोचारणेन दूरागमनतो विविधशंकोत्पत्तेस्तथा पूर्वं वत्सपालनतोऽधुना गोपालने कालविलम्बेनागमनाच्च। समेता अन्योऽन्यं मिलिताः सत्य ऐकमत्येन भय लज्जादि हानेरन्योऽन्यं सख्यस्वभावाद्वा, यद्वा, स्व स्व गृहतोऽतिवेगेन सर्वासामेव धावनाद्मोगपद्येन पथि, किंवा पूर्वमेव विरहार्त्त्या सर्वासामेकत्र संगतेः ॥ ४३ ॥ ततश्च तस्य सन्दर्शनामृतेन तासां विरहज्वरो निरस्त इत्याह, पीत्वेति। मुक्तिरपि कुत्सिता यस्मादानन्दात्, तं ददातीति मुकुन्द इति तन्मुखस्यापि तादृशत्वमभिप्रेतम्, यद्वा, मुखे कुन्दानि दन्तरूपाणि यस्य, एवमरुणाधरश्यामसुन्दरश्रीमुखस्य शोभाविशेषः सूचितः। तस्य सारघमक्षिभृंगैः पीत्वेति तत्सौन्दर्य्यं परमासक्त्या भृशं साक्षाद्दृष्ट्वेत्यर्थः। यद्यपि भृंगाः स्वयमेव मधु पिबन्ति, तथापि तेषां करणत्वमक्ष्णामेव पिपासुत्वात्। तदुक्तमेव (पूर्वश्लोके)–'दिदृक्षितदृशः' इति। किञ्च, भृंगरूपणे भृंगवदक्ष्णां चाञ्चाल्यादिना सौन्दर्य्यविशेषस्तथा श्रीमुखावयवेषु ततस्ततो मुहुर्द्दृष्टिश्च ध्वनिता। विरहजमिति तद्दिने विशेषतो विरहार्त्तिस्तच्च 'दिदृक्षितदृशः' इत्यत्रोक्तमेव। व्रजस्था योषित इति तत्रैव हेतुविशेषः। अह्नीति रात्रौ विरहतापाभावः सूचितः, तस्यां श्रीनन्दगृहादौ तत्सन्दर्शनादि-सिद्धेः, किंवा, अस्य परेणान्वयः। किञ्चिद्दिनशेषे गोष्ठान्तः प्रविवेश, रात्रौ सम्यग् दर्शनाद्यसम्पत्तेः। तामभिगमन श्रीमुखप्रेमसन्दर्शनलक्षणां तासां वा किञ्चिदुपायनार्पणपूर्वां गीति रञ्जनादि लक्षणां सत्कृतिम्, सम्यगधिकञ्च प्राप्य। श्रीभगवतापि ताः प्रेम्णा सम्मानिता इत्याह सव्रीडेति। विनयोऽत्र चापल्याभावः, न च विनयता मुखनम्रतादिना तासु सभावदृष्टिविशेषहानिरित्याह–यदिति। अपांगमोक्षञ्च यथा

स्यात्तथा। यद्व्यस्माद्विवेश ॥ ४४ ॥ एवं तासामानन्दमुक्त्वा द्वाभ्यां मात्रोर्द्वयोराह—तयोरिति । पुत्रयोरिति द्वयोरपि, द्वौ प्रत्येव स्वपुत्रभावेन स्नेहभरं बोधयति । ततश्च काचित् कञ्चित् प्रति किञ्चिदित्येवं द्वे एव ते क्रमशो युगपच्च द्वयोस्तयोर्व्यधत्तामिति ज्ञेयम्, तथापि परमास्निग्धत्वादिना व्रजेश्वर्य्या एव तत्र मुख्यत्वम्; श्रीरोहिण्याश्च साहाय्येन साहित्यमात्रमिति । यथाकालमिति विकाले सायं प्रदोषादौ च समये विधेयानुसारेणेत्यर्थः, यद्वा, आदौ नीराजनम्, ततो वन्यभूषणोत्तारणम्, ततोऽङ्गतो गोधूलिमार्ज्जनादिकमित्येव क्रमेणेति । यथाकामं पुत्रयोः स्वयोर्वेच्छानुसारेण । परमोत्कृष्टा आशिष उपभोगादीन् सम्पादितवत्यौ, यद्वा, परं केवलं तयोराशिष एव व्यधत्ताम्, न तद्गृहकृत्यं किमपि चक्रतुरित्यर्थः, यतः पुत्रवत्सले, अनेन प्रागंकारोहणालिंगनचुम्बनादिकं कुशल प्रश्न सर्वांग निरीक्षणादिकञ्च तथा स्तन्यस्रवार्द्रवस्त्रत्वादिकमपि सूचितमेव ॥ ४५ ॥ आशीर्विधानमेव प्रपञ्चयति—गतेति द्वाभ्याम् । तत्र गोष्ठमध्ये गृहे वा गत आध्वानः अध्वसम्बन्धी वनपरिभ्रमणभरः श्रमो ययोः । स विसर्ग पाठेऽलुक् समास आर्षः, 'गताध्वाहः श्रमौ' इति पुण्यारण्यश्रीपादधृतं पाठान्तरं चिन्त्यम् । आदिशब्देन केशप्रसाधन गात्रजल मार्ज्जनादीनि, स्नेहभरसम्भ्रमेण क्रमोल्लङ्घनान्मज्जनस्यादावुक्तिः । यद्वा, यथाकालमित्यादौ क्रमस्य सूचितत्वादत्रानिर्दिष्टोऽप्यसौ बोद्धव्य एव । यद्वा, उन्मर्द्दनं जलमार्ज्जनमादिशब्दान्निर्म्मञ्छनादयः । नाभीमिति लक्षणया परिधानवस्त्रमुत्तरीयस्य ब्रह्मचर्य्यात् प्रागनपेक्षत्वादनुलेपादि शोभा व्यवधायकतया तस्याग्रहणाद्वा, यद्वा, एकत्वेनापि नित्यसंयुक्ततया वस्त्रद्वयमेव तदुपलक्ष्यम्, भूषणानामनुक्तिर्वस्त्रादीनामिव म्लानत्वाभावेन तेषामपरिवर्त्तनात्, किंवा दिव्यस्रग्गन्धाभ्यां गृहे तान्यपि दिव्यान्युपक्ष्यन्ते ॥ ४६ ॥ जननीभ्यामुपहृतं परिवेषितं प्राश्य प्राशनरूपेण किञ्चित् किञ्चिद्भुक्त्वा, यद्वा, प्रकर्षेणाशित्वा यतस्ताभ्यामुपहृतमतः स्वादु । उपलालितौ ताम्बूलादिमुखवासार्पणसुख गोष्ठी मुखचुम्बनादिभिः । करशय्यायां दिव्यपर्य्यंकोपरि सम्विश्य शयित्वा, अनेन क्रीडार्थं निद्रायां क्षणं विलम्बो बोध्यते । तदेव सूचयति—सुखं यथा स्यादिति श्रीगोपिकाभिरुपस्कृत ताम्बूल समर्पण चामरान्दोलनपादाब्जसम्वाहन नर्म्मगोष्ठीगीत गानादि सुखप्रकारेणेत्यर्थः । तत्तद्विशेषः श्रीभागवतामृतोत्तरखण्डे श्रीगोलोकक्रीडाप्रसंगतो ज्ञेयः । व्रजे गवां वासमध्ये विविक्तत्वात् प्रियत्वाच्च, न च प्रासादादौ दासदास्यादिबहुललोकसंकीर्णतया स्वाच्छन्द्याभावात् । यद्वा, व्रज इति मुहुः पूर्वोक्ताभिप्रायमेव, ततश्च महाप्रासादान्तरिति ज्ञेयम्, वरशय्यायामित्युक्तेः, अन्यथा पित्रोः सुखानुत्पत्तेश्च सुषुपतुर्निद्रालीलां भेजतुः । एवमेतत् प्रथमदिनक्रीडानुसारेण तालीवनक्रीडां विना प्रायोऽन्यदिनक्रीडाप्यनुमेया । सा चावशिष्टजीवनावध्यल्पतरकालस्य श्रोतुः श्रीपरीक्षितस्तत्तदशेषकथनेन तावत्कालगते सत्यन्यस्यावश्यकथ्यस्य वृत्तस्यावकाशास्थितिशंकया न किल श्रीबादरायणिना विस्तारिता । इत्थं नाम सायं व्रजागमनादि क्रीडेव विशेषतो वर्णिता, न तु प्रातर्व्रजाद्वनगमनवार्त्ता, तदानीं श्रीयशोदादीनां सर्वेषां व्रजस्थजनानां श्रीभगवद्विच्छेदेन शोकवैकल्यादिवृत्तस्य परमदुःखापादकत्वादिति । तद्विशेषोऽपेक्ष्यश्चेत् सोऽपि तत एव विज्ञेयः ॥ ४७ ॥ इत्थं निगूढैश्वर्य्यां लौकिकीं लीलामुक्त्वा तालीवनक्रीडाप्रसंगेन प्रकटैश्वर्य्यान्तां वक्ष्यन् कालीयदमनं वक्तुमारभते एवमित्यादिना । एवं पूर्वोक्तप्रकारेण गोपालनभृंगादिविविधानुकरणादि विचित्र पौगण्डलीलयेत्यर्थः । स व्रजजनैकजीवनभूतो भगवान् निजैश्वर्य्यं साक्षात् प्रकटयन्नित्यर्थः । अतः कृष्णो जगच्चित्ताकर्षकः, यद्वा, भगवान् सर्वज्ञो यतः कृष्णः सर्वलोकहितार्थं स्वयमवतीर्णः परमेश्वरः कालियदुष्टत्वादिकं ज्ञात्वा तस्माद्वृन्दावनजीवरक्षाद्यर्थं तन्निग्रहानुग्रहार्थञ्च ययाविति भावः । वृन्दावने चरन् सन् क्वचित् कदाचित् षष्ठवर्षस्यान्ते ग्रीष्मकाल इत्यर्थः । रामं विनेत्यन्यथा कालियह्रदप्रवेशादिना शेषव्रजजनानामनर्थापत्तेः एतच्चाग्रे व्यक्तं भावि । एवं व्रजजन-रमणाभिप्रायेण राममित्युक्तम्, यद्वा, परमास्निग्धेन तेन स्वाभिप्रेतकालियह्रदान्तर्निपातस्य निवारणाशंकया । राजन्निति तल्लीलास्मरणेन स्वयमार्त्ततया किंवाऽग्रे राज्ञा धैर्य्यार्थं सम्बोधयति, यद्वा, राजमानः सन् किंवा तद्दिने कालियह्रद जलविहाराद्यर्थमुपयुक्तायुक्ताल्पभूषणस्वीकारेण सर्वांगशोभाभिव्यक्तेः, कालियदमनार्थं तेजोविशेषप्रकटनाद्वा । वृतो वेष्टितः श्रीमुखसन्दर्शनाद्यर्थं सर्व्वेषामेव प्रेमसन्दर्शनाद्यर्थं सर्व्वेषामेव प्रेमस्पर्द्धया परितोऽन्तिकागमनाद्विशेषतः स्नेहेन व्रजेश्वर्य्या अनुशासनाच्च । कलिं कलिकालदोषमन्योऽन्यकलहञ्च द्यत्यवखण्डयतीति कलिन्दस्तस्य पुत्रीमिति तस्या अपि तादृशत्वमभिप्रेतम् । अतः कालियनिःसारणार्थं तस्यां यान युक्तमेवेति भावः ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सारघं मधु ॥ ४३–५२ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

श्रोतॄणां कीर्त्तयतां च पुण्यावहं यच्छ्रवणं कीर्त्तनं च तद्यस्य सः कृष्णः साग्रजो व्रजमाविवेश ॥ ४१ ॥ तं व्रजमाविशन्तं दिदृक्षिताः दृशः यासान्ताः गोप्यः समेताः समुदिताः अभ्यगमन्नभिमुखमाजग्मुः कथम्भूतम् ? गोरजोभिर्व्याप्तेषु कुन्तलेषु बद्धं बर्हं वन्यानि प्रसूनानि च यस्य रुचिरमीक्षणं चारुः हासश्च यस्य अनुगैः उपगीता कीर्तिर्यस्य तं मुकुन्दस्य मुखसारघं मुखपद्मं पीत्वा तद्गतं मधु पीत्वेत्यर्थः । अह्नि यो विरहस्तज्जं तापं जहुः तासां व्रजयोषितां सत्कृतिं बहुमानं समधिगम्य, सत्कृतिस्वरूपमेवाह सलज्जं सहासं सविनयं च यथा तथा अपाङ्गयोर्नेत्रान्तयोर्मोक्षः प्रसरणं यस्मिंस्तत् । यत् तद्रूपां तासां सत्कृतिं प्राप्य गोष्ठं

विवेश ॥ ४२–४३ ॥ यथाकाममिच्छानुगुणं कालानुगुणं च यथा तथा परमा आशिषः कामान् व्यधत्तामकुर्वताम् ॥ ४४ ॥ तदेव दर्शयन्नाह तत्र गृहेऽङ्गमर्दनादिभिर्गताऽध्वसम्बन्धिश्रमो ययोस्तौ रुचिरं नवं वस्त्रं वसित्वा दिव्याभ्यां स्रग्गन्धाभ्यामलङ्कृतौ जनन्योपहृतं पात्रे दत्तं स्वादु मृष्टमन्नं प्राश्य उपलालितौ सुखं यथा तथा सुप्तवन्तौ ॥ ४५–४६ ॥ कदाचिद्रामं विनेतरैः सखिभिर्वृतः हे राजन् ! कालिन्दीं यमुनां ययौ ॥ ४७ ॥ निदाघे ग्रीष्मर्तौ य आतपः तेन पीडिता अत एव तृषार्त्ताः तस्याः कालिन्द्याः कालीयविषेण दूषितमत एव दुष्टं जलं पपुः पीतवन्तः ॥ ४८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गोरजसा छुरितकेशपाशैः बद्धानि बर्हवन्यप्रसूनानि पिच्छवनभवपुष्पाणि यस्य स तथा गोरजश्छुरितकुन्तलबद्धबर्हवन्यप्रसूनश्च रुचिरे ईक्षणे चारुहासश्च यस्य स तथा तम् ॥ ४२ ॥ मुकुन्दस्य मुखमेव सारघं मधु सरघायोग्यं सारघं "सरघा मधुमक्षिका प्रोक्ता" इति हलायुधः । अक्ष्णि विरहजं तापं यासामपाङ्गमोक्षः कटाक्षनिरीक्षणं व्रीडया सहितः सव्रीडश्चासौ हासश्च सव्रीडहासः तस्य विगमो राहित्यं विशेषेण प्राप्तिर्वा यस्य स तथा तासां सत्कृतिं सत्कारं समधिगम्य प्राप्य ॥ ४३–४४ ॥ मज्जनं स्नानम् उन्मर्दनं शरीरमलोद्वर्तनं नीवीं वस्त्रं वसित्वा आच्छाद्य ॥ ४५ ॥ प्राश्य पीत्वा सम्विश्य शयित्वा ॥ ४६ ॥ इदानीं कथान्तरं वक्तुमुपक्रमते, एवमिति ॥ ४७ ॥ निदाघातपः ग्रीष्मर्तुभवरविकिरणभव उष्णविशेषः तेन पीडिताः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्र सामान्यव्रजजनदृश्यमानत्वेन वर्णयति—कृष्ण इति । एकेन अथ परमतेजस्वित्वेन झटिति तदुल्लङ्घितबाल्यैः श्रीगोपकुमारीविशेषैरपि दृश्यमानत्वेन वर्णयंस्तेषामनुरागोत्पत्तिं स्पष्टयति—तदिति द्वाभ्याम् ।।४१–४२।। अक्षीण्येव भृङ्गास्तत्स्थाने स्वतः प्रवृत्तत्वात् तैः द्वारभूतैः स्वयमपि पीत्वा सत्कृतिमाह—सव्रीडा हासो यत्र तादृशो विनयरहस्यप्रियजनोचितव्यवहारो यत्र एतादृशं यथा स्यात्तथा यत् स्यात् तद्रूपामित्यर्थः । यदित्येतत् प्रोक्तां तां किंरूपां अपाङ्गमोक्षां कटाक्षदर्शनरूपामित्यर्थः ॥ ४३ ॥ परमाशिषः उत्कृष्टोपभोगान् तत्र गोष्ठमध्ये निजावरोधप्रासादे गतः आध्वनः अध्वसम्बन्धि श्रमो ययोः टेरलोप आर्षः सविसर्गपाठे गताध्वश्रमावित्यर्थः । षष्ठ्यलुक् छान्दसः सम्प्रति क्षणं विश्रमलीलायां विगतश्रमावित्यर्थः । एवं गोपालनभृङ्गाद्यनुकरणोक्तप्रकारेण ॥ ४४–४७ ॥ दुष्टत्वकारणमाह—विषदूषितमिति ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वनाद्गोष्ठप्रवेशलीलामाह त्रिभिः—कृष्ण इति । व्रजस्थानां चित्तस्याकर्षणं कमलपत्राक्ष इति नेत्रनासयोः पुण्ये श्रवणे कर्णौ यतस्तथाभूतं कीर्त्तनं वेणुगानं यस्य स इति श्रोत्रस्याप्याकर्षणं ध्वनितम् ॥ ४१ ॥ व्रजबालानां विशेषत आकर्षणमाह—तं गोप्योऽभ्यगमन् गोरजोभिश्छुरितेषु व्याप्तेषु कुन्तलेषु बद्धं बर्हं वन्यप्रसूनानि च यस्य रुचिरमीक्षणं चारुहासश्च यस्य ईक्षणयोर्हासो वा यस्य तं दिदृक्षितः सञ्जातदर्शनेच्छा दृशो यासान्ता इति गोपीकर्तृकं लज्जाभयहेतुकं वर्जनममानयन्त्यो दृशस्तदाकरणत्वं परित्यज्य स्वतन्त्रकर्तृत्वं प्राप्ता इति ध्वनिः तेन च प्रतिवेशिनां श्रोत्रघ्राणेन्द्रियाणां वेणुस्वर्याङ्गसौरभ्यसम्पल्लाभमालक्ष्य मात्सर्येणेव स्वेषां रङ्कत्वमसहमानाः स्वाश्रयभूता गोपीः परित्यज्येव सपत्नीभवितुमिव चापल्यात् स्वयमेव कृष्णपार्श्वं चलिता इत्युत्प्रेक्षा ध्वन्यते । समेता इति सर्वा एव कुलवध्वः स्वस्वगृहान् विहाय चलन्ति पश्य मामेव किं त्वं वारयन्ती वधिष्यसीति स्वस्वश्वश्रूः प्रत्युत्तरयन्त्य इति भावः ॥ ४२ ॥ अभिगम्य किं चक्रुरित्यत आह—पीत्वेति । मुकुन्दस्य मुखे सारघं स्मितरूपं मधु अक्षिभृङ्गैः पीत्वा नत्वपाङ्गभृङ्गैः । पीत्वेत्यनेन कृष्णस्यादृष्टगोपीकस्यान्यमनस्कस्यैव यत् साहजिकं स्मितं तत् ताभिर्निःशङ्कतया सम्पूर्णनेत्रैरेव पीतमिति गम्यते ततश्च द्वितीयक्षणे कृष्णस्य तत्रावधाने सति हर्षोत्थो हासस्तासां यदेवाजनि तदैवोद्भूतया लज्जया स सम्पूर्णावलोको हासश्चावृतः वामकरकृतमवगुण्ठनं च किञ्चित्संवृत्तं तत्तदावरणव्यञ्जितो विनयश्चाभूदित्येतत् सर्वमाधुर्यमेव कृष्णोऽनुबभूवेत्याह—तत्सत्कृतिं तादृशावलोकनरूपां सत्कृतिं ताभिः कृतं किञ्चिदुपायनप्रदानरूपं सम्माननमित्यर्थः । समधिगम्य विदग्धशिरोमणित्वात् सरसास्वादं स्वीकृत्य गोष्ठं विवेश अत्र सत्कारसमधिगमक्रिययोः क्रमेण सव्रीडेत्यादिविशेषणद्वयं तेन च व्रीडया सहितो हासो विनयश्च यत्र तत् यथा स्यात्तथा तासां सत्कृतिं यतः प्राप्नुवतः अपाङ्गस्य मोक्षो यत्र तद्यथा स्यात्तथा समधिगम्य गोष्ठं विवेशेत्यर्थः । ताभिः कृता सव्रीडहासविनया तादृशावलोकरूपा सत्कृतिः तस्याधिगमः कृष्णेन तत्प्राप्नुवदपाङ्गमोक्षसहितः कृत इति फलितम् अत्र सम्पूर्णनेत्राभ्यां दर्शने तासां लज्जया विमुखीभावः स्यादतस्तत्कटाक्षप्राप्त्यर्थमेव कृष्णेनापाङ्गमोक्ष इति ज्ञेयम् । अथैतद्विवरणं ताभिः प्रत्येकं स्वनयनाञ्जनावौत्सुक्यं सञ्चारिणा स्वपरिजनेनानीयावलोकनकुसुममर्पितं तथैव स्वाधरपल्लवाञ्जलौ हर्षसञ्चारिणोप्यादीयार्पितं हासकुसुमं च गृहीत्वा एतद्वस्तुद्वयमेवास्मद्गृहे तत्र भवते देयमस्ति तत् कृपया गृह्यतामिति यदेव दर्शितं तदेव तदुपायनद्वयमानेतुं कृष्णेन स्वप्रेष्योऽपाङ्गोऽन्वयुज्यत स च महाचपलः पूर्वमेव तद्द्वयं तासामन्तर्गृहगतमपि चोरयितुमुद्यतोऽतः कृष्णेन बध्वैव स्थापित आसीत् ताभिस्तस्मिन्नुपायनद्वये प्रकटीकृत्य दर्शिते सति स

एवबन्धान्मोचितः सन् शर इव शीघ्रं गत्वा तद्यदैव ग्रहीतुमारभत तत् क्षण एव तासां कोषाधिकारिण्या सख्या व्रीडया प्रादुर्भूय तदुपायनद्वयमावरीतुं प्रववृते ततश्च तयोर्विग्रहे प्रवृत्ते सन्ध्यर्थं विनये च तासां परिजने समायाते स च बलवान् कृष्णप्रेष्योऽपाङ्गो व्रीडाविनयाभ्यां सहितमेव सहासावलोकनमुपायनमाकृष्णानीय कृष्णाय प्रादात् स च तन्निकमतिदुर्लभमहारत्नमिव प्राप्य स्वहृदयमन्दिराभ्यान्तर एव स्थापयामासेति कथा सत्कारव्यञ्जितोपलब्धा यद्वा व्रजयोषितोह्नितोऽह्नि तापं जहुः, कास्ता व्रजयोषितः ? यासामपाङ्गमोक्षं तत्तां प्रसिद्धां सत्कृतिं समधिगम्य गोष्ठं विवेश कीदृशं सव्रीडहासविनयम् अत्र यत् पदस्योत्तरवाक्यगतस्वान्न तत्पदापेक्षा ॥ ४३ ॥ यथाकामं पुत्रयोर्वाञ्छितं भक्ष्यादिकमनतिक्रम्य यथाकालं प्रदोषादिकं भोजनकालमनतिक्रम्य परमाशिषो भक्ष्यपरिधेयादिभोगान् ॥ ४४ ॥ न श्रमोऽश्रमः स चेश्वरत्वात् नरलीलया तस्याभावस्त्वश्रमः गतोऽध्वनोऽनश्रमः श्रम एव ययोस्तौ नीवीं परिधवस्त्रम् ॥४५॥ एवं कार्त्तिकगोपाष्टमीदिनलीलां समाप्य तद्वर्षीयनिदाघगतस्य कस्यचिद्दिनस्य लीलामाह–एवमिति राममृते इति जन्मर्क्षशान्तिकस्नानार्थं मातृभ्यां तस्य तद्दिने गृह एवोपवेशितत्वात् ॥ ४७ ॥ गाव इति पश्चात् शनैरागच्छन्तं कृष्णमनपेक्ष्य तृषार्त्तत्वात् द्रुतगामिन्यः तदनुद्रुताः केचन गोपाश्च ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुण्ये श्रवणकीर्त्तने यस्य सः ॥ ४१ ॥ तं श्रीकृष्णं व्रजमाविशन्तम् दिदृक्षिता दर्शनोत्कण्ठायुक्ता दृशो यासां ताः गोप्यः अभ्यगमन् अभिमुखमाजग्मुः कथम्भूतम् ? गोरजोभिश्छुरितेषु कुन्तलेषु बद्धानि बर्हवन्यप्रसूनानि यस्य रुचिरमीक्षणं चारु हासश्च यस्य तं च तं च ॥ ४२ ॥ व्रजयोषितः मुकुन्दमुखस्य मुकुन्दमुखपङ्कजस्य सारघं मधु अक्षिभृङ्गैः पीत्वा अह्नि यो विरहस्ततो जातं तापं जहुः मुकुन्दोऽपि तत्सत्कृतिं तासां पूजां समधिगम्य गोष्ठं विवेश सत्कृतिमेवाह–सव्रीडेन हासेन विनयो यथा भवति तथा यदेतदपाङ्गमोक्षं कटाक्षदर्शनम् ॥ ४३ ॥ परमाशिषः प्रियान् कामान् ॥ ४४ ॥ रुचिरां नीवीं सुखदं वस्त्रं वसित्वा सुखं सुषुपतुः ॥ ४५–५० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

मनुष्यास्तत्रत्याः शवशदयः एवादन् नतु गोपाः तेषां रासभरुधिरानिषिक्तत्वेन तद्दिने तदस्वीकारात् ॥ ४१ ॥ वनाद् व्रजप्रवेशलीलामाह—कृष्ण इति त्रिभिः ॥ ४२ ॥ किशोरीणां विशेषतः समाकर्षणमाह—तमिति । गोपास्तमभ्यगमन् तद्दर्शनाय तदागमपथस्थप्रासादशिखराण्यारोहन्नित्यर्थः । कीदृश्यः ? दिदृक्षिताः सञ्जाता दिदृक्षा दृशो यासां ता इति करणानामपि दृशां दिदृक्षायां कर्त्तृत्व निर्देशात् लज्जा भयहेतुकं तन्निवारणं न मेनिरे इति तद्दृशस्तदवश्या इति भावः । श्रोत्रघ्राणयोस्तद्वेणुनादतदङ्गसौगन्ध्यलाभान्मात्सर्यादिव दृशां तद्रूपलाभप्रवृत्तिरिति सूच्यते । समेता मिथो मिलिता इति श्वश्रूणां गणना न कृतेति व्यज्यते। तं कीदृशं ? गो रजोभिः छुरितेषु व्याप्तेषु कुन्तलेषु बद्धं बर्हं वन्यानि प्रसूनानि च यस्य रुचिरयोरीक्षणयोश्चारुर्हासो यस्य तञ्च तञ्च तम् ॥ ४३ ॥ अभिगम्य यच्चक्रुस्तदाह—पीत्वेति । मुकुन्दस्य विरहदुःखमुक्तिदातुर्मुखे अरविन्दे स्मितरूपं यत् सारघं मधु तदक्षिरूपेण तु कटाक्षरूपभृङ्गैः पीत्वेति स्वकर्मकतदवलोकात् प्राकृतस्वभावसिद्धं तत् स्मितं ताभिर्निशङ्कं निपीतमिति भावः। अह्नि यो विरहस्तेन यस्तास्तदप्राप्तिजा तृष्णा तं जहुरिति रात्रिविरहजं तापन्तु प्रातर्दर्शनेन जहुरेवेति भावः । ततस्तत् सत्कृतिं कृष्णः समाधिगम्य गोष्ठं स्वभवनं विवेश । अत्र सव्रीडेति सत्कृतिक्रियाया विशेषणं यदपाङ्गेति तु समधिगमक्रियाया बोध्यं तेन च सव्रीडहासो विनयश्च यत्र तद्यथा स्यात्तथा ताभिः कृतां सत्कृतिं यतः प्राप्नुवतोऽपाङ्गस्य मोक्षो यत्र तद्यथा स्यात्तथा समधिगम्य गोष्ठं विवेशेत्यर्थः । ताभिः कृष्णमुखचन्द्रे समवलोक्यमाने तत्र कृष्णावधाने सति हर्षेण हासस्तासामभ्युदैत तदोद्भूतया लज्जया तत्समवलोकहासा वा वृतौ मुखपङ्कजानि चावगुण्ठितानीति सौशील्यरूपो विनयश्चाभूत् नेत्रोधराञ्जलिधृतस्यावलोकस्मितकुसुमगुच्छस्य विनयसौरभ्यादिग्रूपस्यार्पणं कृष्णस्य सत्कारः तञ्च यदपाङ्गमोक्षं समधिगम्येति नेत्राभ्यां विलोकने लज्जया अन्तस्तिरोदध्युरिति नेत्रास्तेनैव तदवलोकनं तत्कटाक्षलाभार्थकं ततश्च तां सत्कृतिं महारत्नसम्पदमिव स्वहृत्कोषे निदधानो गृहं प्रापेति भावः । यद्वा व्रजयोषितोऽह्नि तापं जहुस्ताः कास्तत्राह यासामपाङ्गमोक्षं प्रसिद्धां सत्कृतिं समधिगम्य गोष्ठं विवेश कीदृशं तत्राह स व्रीडेति । अत्र यच्छब्दस्योत्तरवाक्यगतत्वात् पूर्वत्र तच्छब्दापेक्षा नास्ति ॥ ४४ ॥ यथाकामं पुत्रवाञ्छामनतिक्रम्य यथाकालं प्रदोषकालमनतिक्रम्य परमाशिषो भक्ष्यपरिधेयादीनुत्तमभोगान् ॥ ४५ ॥ गतेति युग्मकम् । गतोऽध्वनो मार्गहेतुकः श्रमो ययोस्तौ श्रमः पूर्ववत् । नीवीं परिधानवस्त्रं वरशय्यायां दुग्धफेनमृदुलायां रत्नपर्यङ्कास्तृतायां सुषुपतुः विचित्रलीलाविश्लिष्टं स्वरूपानन्दयोगनिद्रया तु बभूवतुरित्यर्थः ॥ ४६–४७ ॥ एवं कार्तिकोपाष्टमीवासरीयां लीलां समाप्य तद्वर्षीयग्रीष्मर्तुगतस्य कस्यचिद्वासरस्य लीलामाहैवमित्यादिभिः राममृते इति तस्मिन् वासरे तज्जन्मर्क्षयोगात्तन्मात्रा गृह एव स्थापनात् ॥ ४८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पुण्यानि तद्वन्ति श्रवणानि येन तत्कीर्तनं यस्य स तथा ॥ ४१ ॥ गवां रजसा छुरिता रूपिताश्च ते कुन्तलाश्च तेषु बद्धानि बर्हाणि पिच्छानि वन्यानि वनभवानि प्रसूतानि यस्य स चासौ रुचिरे ईक्षणे यस्य स चासौ चारुर्मनोहरो हासो यस्य च । पिच्छबर्हे

नपुंसक इत्यमरः । दिदृक्षता दर्शनेच्छावत्त्वेनाशङ्किता दृशो यासां ता गोप्यः समेता मिलिता वेणुं क्वणन्तमनुगैरुपगीतकीर्तिं प्रत्यगमन् ॥ ४२ ॥ व्रजयोषितोऽह्निविरहजं हरिविरहजातं तापमक्षिभृङ्गैरक्षीण्येव भृङ्गास्तैर्मुकुन्दमुखसारघं मुकुन्दस्य मुखमेव सरघा मधुमक्षिकास्तासामिदं सारघं मधु पीत्वा । सरघा मधुमक्षिकेत्यमरः । सरं गतिं घातयति हन्त्यन्येभ्योऽपीति डः णिलोपटिलोपः रघणं रघि गतौ स्वनौघश्चेति घित्करणादन्येभ्योऽपीति घः । आगमशासनस्यानित्यत्वान्न नुम् । सहरघं वर्तत इति सरघा । यासामपाङ्गमोक्षो वीक्षणं तन्निरीक्षणं सव्रीडहासविगमो व्रीडा लज्जा तया सहितः सव्रीडो हासस्तस्य विगमो येन स लज्जाहासनिरासककटाक्षमोक्षो यासां तत्सत्कृतिं समधिगम्य प्राप्य गोष्ठं विवेश । यासां सव्रीडहासविगमो बहिर्व्रीडासहितहासप्रसरोऽपाङ्गस्यानङ्गस्य तदुपद्रवस्येति यावत् मोक्षो मोचनं येन स यासां तत्सत्कृतिं सत्कारमिति वा ॥४३॥ रोहिणीयं वाल्हीकपुत्री कौरव्यायणी । यथोक्तं बृहदारण्यकभाष्ये । बाल्हीकसुता रोहिणी । अतो बलभद्रः कौरव्यायणीपुत्र इति । प्रसङ्गसङ्गत्येदमुक्तमिति ज्ञेयम् । आशिषः परं व्यधतां परमाशिषो व्यधत्तामिति वा ॥ ४४ ॥ मज्जनं स्वपनमुन्मर्दनसङ्गादेर्मलनिष्कासनं तदादिभिरादर्शप्रदर्शनादिभिः । रुचिरां नीवीं वस्त्रं वसित्वाऽऽच्छाद्य । वस्त्रबन्धेऽपि नीवीत्यमरः । स्त्रीलिङ्गो नीवीशब्दः स्त्रीपुंससामान्यकटीवस्त्रवाचक इति बहवः । स्त्रीकटीवस्त्रमात्रवाचक इति पक्षेऽप्यन्वयव्यत्यसनेनानुपदं क्रियमाणं व्याख्यानान्तरमिति विवेकः । निवियते व्यञ् संवरणे नौ व्यञो यलोपः पूर्वस्य च दीर्घो ण इति दीर्घः कृदिकारादिति ङीष् । आच्छाद्य । नीवी स्त्रीकटबन्धन इति मेदिनी । दिव्यस्रग्गन्धालङ्कृतौ रुचिरां नीवीं योषिद्वस्त्रं वसित्वा स्थितया तया जनन्योपहृतं परिवेषितं स्वाद्वन्नं प्राश्य भुक्त्वा ताभ्यामुपलालितावादौ मृदुशय्यायां संविश्य सुखं यथा तथा सुषुपतुः ॥ ४६ ॥ रामं बलमृते तेनालोच्य तं गोपादिशान्त्यै स्थापयित्वा गत इति ज्ञेयम् । तथा हि हरिवंशे । ससङ्कर्षणमामन्त्र्य एवं कृते बाहुवीर्यं लोके ख्यातिं गमिष्यतीत्यादिनोक्तम् । ज्येष्ठं विहाय स काचिदचिन्त्यशक्तिर्गोगोपगोगणयुतो यमुनातटेषु । रेमे भविष्यदनुवीक्ष्य हि गोपदुःखं तद्बोधनाय निजमग्रजमेष सोऽधादित्याचार्योक्तेः । विना तस्य सरीसृपवरीयसाननसहगमने कालियस्याहेरेतत्परिचरस्य दमनं यमुनातो वहिर्यापनं च समक्षं चेत्किञ्चित्सङ्कुचितचेतस्ताहेतुर्भवेदिति राममृत इत्यनेन ध्वनयतीति मन्तव्यम् ॥ ४७ ॥ निदाघो ग्रीष्मर्तुस्तत्सम्बन्ध्यातप औष्ण्यं तेन पीडिता विदूषितमिति दुष्टम् ॥ ४८ ॥

श्रीसुबोधिनी

एवं वनलीलामुक्त्वा पुनर्व्रजे भगवतः समागमनमाह **कृष्णः कमलपत्राक्ष** इति, **कृष्णो व्रजमाव्रज**दिति व्रजस्थानां महानानन्दहेतुरुक्तः, तदेतावत्कालं विरहतप्तानां कथं तापं दूरीकरिष्यतीत्याशङ्क्याह **कमलपत्राक्ष** इति, **कमलपत्र**वदायतेतिविशाले परतापापनोदके **अक्षिणी** यस्य, अनेन दृष्ट्यैव तापहारित्वमुक्तं, ननु कारणभूत आध्यात्मिके पापे विद्यमाने कथं तापनिवृत्तिः ? तत्राह **पुण्यश्रवणकीर्तन** इति, **पुण्ये श्रवणकीर्तने** यस्य, अनेन पापं जलपूरेणेव नाश्यत इति निरूपितं, **श्रवणे प्रविशति कथा पूरो हृदयं ततः सर्वमेव दोषमालोड्य मुखतो निःसरति,** एवं कियत्कालपर्यावृत्त्या सर्वथैव शुद्धो भवति, नन्वेवमपि सति भगवत्कीर्तिः कथं प्राप्यते ? तत्राह **स्तूयमानोनुगै**रिति, **अनुगा** भक्ता **गोपाश्च**, तेन **भगवच्चरित्रं सर्वथैव सुलभ**मुक्तमलौकिकेन लौकिकेनापि प्रकारेण, **साग्रज** इति, धेनुकवधस्तेन कृत इति तं पुरस्कृत्य सहैवागतो भगवान् न तु पृथक् पृथग् यथायथम् ॥ ४१ ॥ **आगच्छन्तं** भगवन्तं वर्णयति **तं गोरजश्छुरितकुन्तले**ति, **तं** भगवन्तं **गोप्योभ्यगमन्नि**ति **सम्बन्धः**, पूर्वं पुरुषार्थचतुष्टयसहिता दशरसयुक्ता लीला च प्रदर्शिता, सा गोपिकाभिर्न दृष्टेति गोपिकानां भवति तापोतस्तन्निवृत्त्यर्थं चतुर्दशधर्मयुक्तो भगवानत्र निरूप्यते, तत्र **गोरजोभिश्छुरिता**नि व्याप्तानि **कुन्तला**नि यस्येति पुरुषार्थलीला प्रतिपादिता, गावोत्र **धर्मो रजोर्थो** व्याप्तिः **कामो अलका** मोक्षस्थानीयाः सत्यावलम्बिनः, **धर्मादिसहितानामेव मोक्ष** इति चतुर्णामेकवाक्यता, **कुन्तला**श्च कामरूपा **रजो** रजोगुण एव गावोत्रानुभावाः, तेन पुष्टः शृङ्गाररसो निरूपितः, **बद्धो बर्हः**, **बर्ह**स्य मयूरपिच्छस्य **बन्धनं वी**राद्भुतरसौ बोधयति, **वनोद्भवानां प्रसूनानां** सम्बन्धो भयानकहास्ये जनयति, **रुचिरेक्षणं** करुणाख्यं **चारुहासो रौद्र**रसं, महतस्तादृशो विशिष्टो वेषो नाट्यावशिष्टरसं जनयति, **वेणुं क्वणन्त**मिति **शान्तरसः**, ब्रह्मामृतं प्रकटीकुर्वन्, **अनुगैरनुगीता कीर्ति**र्यस्येति **भक्ति**रसः, एवं **सर्व**रसयुक्तं भगवन्तं पश्यन्त्योपि **दिदृक्षितदृष्टय** एव स्थिताः, **न हि साधारण्येन दृष्टो भगवान् स्वस्य परमरसमुत्पादयति**, एकान्ते समागतं भगवन्तं सर्वरससहितं द्रक्ष्याम इति दिदृक्षैव स्थिता, अत एव प्रथमं दर्शनं नोक्तं **समागम** एवोक्तः, समागमार्थं यद् दर्शनं तदन्यशेषभूतमिति न पृथङ्निरूपणमपेक्षते, **अभितः समागता** इति भगवतस्ताभिरेव वेष्टनं निरूपितं, ए..स्यास्तत्कार्यं न भवतीति **समेताः**, **अग्रे गावो** बलभद्रप्रमुखाश्च गताः पश्चादागच्छन्तो **गोपिकाभि**रेव व्यवहिताः, मध्ये **गोपिकाभि**र्भगवान् वेष्टित इत्यर्थः ॥ ४२ ॥ **ततस्ता यत्** कृतवत्यस्तदुक्त्वा पश्चाद् भगवतो व्रजे समागमनं निरूपयति पीत्वेति, **आदौ तापापनोदनार्थं गोपीजनवल्लभसरसः करुणावीचिवृत्ताल्लावण्यामृतं पातव्यं,** अन्ययान्तस्तापो न गच्छेत्, **गते हि तापे रसास्वादनं**, बहिस्तापो मिलनादेव गतः, स पेपीयमानो रसो यदि तापहारको मिष्टश्च भवति तदैव भूयान् पातुं शक्यः, तच्च लोके नास्ति, दुग्धादीनां तृषादिजनकत्वात्, जलं **नीहारवत्** पातुं न शक्यते, उभयात्मकमपि यदि परिणामे सुखदं न भवति तदापि न समीचीनं, अतो **भगवल्लावण्यामृतं सर्वगुणविशिष्ट**मित्याह, **मुकुन्दो** मोक्षदाता ज्ञानरूपः शान्तः, अतो नाग्रे दोषजनकः प्रत्युत मोक्षपर्यवसायी, **मुखं हि भक्त्यात्मकं भवति,** अतः

स्नेहाद् बहुपानं सम्भवति, तत्र **सारघं, सरघा** मधुमक्षिका तया सर्वेभ्यः पुष्पेभ्यो रसं समानीयैकत्र मधु क्रियते तत् कोटरादिषु तिष्ठति, अन्यजातीयं तु मधु न द्रवीभूतं भवति, **घनीभूतं च पातुं न शक्यं,** ब्रह्मादयोत्र सर्वे श्रुतयश्च सर्वाः **सरघास्थानीयाः**, तैः सर्वैरेव सर्वप्रकरणेभ्यः परमानन्दं समुद्धृत्यैकत्रानन्दनिधिर्बोधितः, **सर्वप्रकरणेषु प्रतिपादित आनन्द एकीभूयात्र स्थित** इत्यर्थः, ब्रह्मादिभिः श्रुतिभिश्च प्रार्थनया भगवानत्रानीतः, **रसस्तु गोपिकाभिरेव भुक्तः, त एव हि रसं जानन्ति ये तदेकोपजीविनो भवन्ति**, ते भृङ्गाः, न तेषामन्यद्देहनिर्वाहकमप्यस्तीति विषयान्तरसम्बन्धो नास्त्येव, केवलमन्यत्र परिभ्रमणमात्रं, तथा गोपिकानामपि चक्षूंषि परिभ्रमन्ति सर्वत्र, **विषयीकुर्वन्ति** भगवन्मुखलावण्यामृतमेव, अत आहा**क्षिभृङ्गै**रिति, अनेन गोपिकानां श्रुत्यादिभिः सह साजात्यमपि **निरूपितं**, **पानं** बहिःस्थितस्य द्रवद्रव्यस्यान्तर्निवेशनं, नेत्राणामपि स्वतो रसाभिज्ञत्वज्ञापनाय भृङ्गपदं, तथा सति स्वतोपि प्रवृत्तिर्भवति, **अन्यत्र** च न विनियोगः सिध्यति, गोपिकानामपि देवतात्वादन्येनापि पानं सम्भवति, अतोस्माभिरेतावत्कालं नानुभूत इति चिन्तया यस्तापः स लावण्यामृतरसेन्तः पूर्णे गच्छति, अन्यस्तु त्रिविधोपि तापः पूर्वमेव गत इति ज्ञापयितुं **विरहज**मित्युक्तं, ननु विरह एव किमिति सम्पाद्यते सन्निधान एव कथं न स्थीयत इत्याशङ्क्याह **व्रजयोषित** इति, **व्रजस्य** हि **स्त्रियो विवेकरहिताः पराधीनाश्च,** तत्राप्यह्नि, **अहनि स्त्रीस्वभावोपि बाधकः**, अतः परं ताभिर्मिलिताभिर्मध्यस्थिते भगवति यत् कर्तव्यं तद् वक्तुमशक्यमिति सङ्क्षेपेणाह **तत्सत्कृतिमि**ति, तासां सत्कारमनुभूय परितः समालिङ्गनादि यावद् वा भगवद्भवेनापि शक्यं तत् सर्वं तासां **सत्कार**त्वेनोच्यते, **सम्यगधिगम्य** प्रत्येकं भिन्नतया तत् सुखमनुभूय सम्यक्तया ताः कृतार्थीकृत्य **गोष्ठं विवेश,** ननु कोयं तत्कृतः सत्कारः ? लौकिकभोजनादिरपि चेत् तत्कृत एव पुनर्गोष्ठे समागमनं व्यर्थमेव स्यात् लौकिकं च बाध्येत, अतो विशिनष्टि **सव्रीडहासविनय**मिति **यदि**ति, विशेषतो वक्तुमशक्यं, **मख एव रसः,** तत्रान्धकारे यादृशी लीला सा व्यावर्त्यते, अपाङ्गानां **मोक्षो यत्रे**ति, अलसादय**श्चापाङ्गाः**, कं कं प्रकारमभिनेष्यतीति प्रथमप्रकारापन्नाया एव तस्याधिभूतांस्त्रिविधान् रसानाह **सव्रीडहासविनय**मिति, आदौ **व्रीडा** मध्ये पुष्टे रसे **हासो** रसान्ते च **विनयः,** तैः सह वर्तमानं; प्रत्येकं बहुधायं रस इति दिव्यो भगवत्प्रभाव उक्तः, अनौचित्यपरिहाराय **सत्कृति**शब्दः, जगत्पूज्यत्वाच्च, भगवतो यथाधिकारं च पूजा, नन्वत्राप्यागतस तद् भवेदिति कथं मार्ग एव सत्कारस्वीकारो जात इति शङ्कापरिहारार्थमाह **गोष्ठ**मिति, गवां बन्धनस्थानं तत्, तथापि भगवत्प्रभावाद् यथोचितम् ॥ ४३ ॥ तत्रापि सत्कारो जात इत्याह **तयो**रिति, साधारण इति ज्ञापनार्थमुभयोर्ग्रहणं, **यशोदारोहिण्या**विति लोके ख्यातिरुक्ता, **पुत्रयो**रिति **लौकिक एव भावः,** प्रेमरहितं न गृह्णातीत्याशङ्क्य **पुत्रवत्सले** इत्युक्तं, इच्छामप्यनतिक्रम्य कालमप्यनतिक्रम्य **परमाशिषो व्यधत्तां, कामः** स्वनिष्ठः, **सन्ध्याकाले च परोक्षतयैवाशिषो वक्तव्या** इति **काला**पेक्षानिरूपणं, नमस्कारे कृते स्वस्य महित्वं स्थापितवत्याविति ज्ञापयितु**माशिषां** निरूपणम् ॥ ४४ ॥ तत उपचारा **गताध्वानश्रमा**विति, **मज्जनान्युन्मर्दनादी**नि, उन्मर्दनमादिर्येषां **मज्जनानां,** छान्दसः परनिपातः, मज्जनं वा पादयोः, मज्जने वोन्मर्दनादिना, रजो निवृत्त्यर्थमादौ वा मज्जनं, प्रातीतिकोयं श्रमः, **नीवीं** मल्लानामिव रुचिरां पीताम्बरादिनिर्मितां **दिव्येन स्रग्गन्धादिना** च **मण्डितौ** जातौ मध्ये त्वधिकारिदेवैस्तथाकृतौ ॥ ४५ ॥ **पश्चाज्जनन्युपहृतं प्राश्ये**ति, रोहिण्या समानीतं, प्रायशो भगवतो बलभद्रेणैव सह भोजनं, असमासाद् द्रव्यमेकमेवेति न **य**शोदाया वैलक्षण्यं, **प्राश्ये**ति कोमलदुग्धान्नादिकं सूचितं, तत **उपलालितौ** पित्रादिभिः सर्वैरेव, सर्वेषामनुग्रहार्थमेवमुक्तं, **वरशय्यायां संविश्ये**ति रात्रिकृत्यमुक्तं, जनन्यादिभिः सह शयननिषेधार्थमुक्तं **सुखं सुषुपतु**रिति, लीलाह्निकी सम्पूर्णा निरूपिता, **व्रजे हि नात्यन्तं धर्मप्रधानता,** अतो न रात्रिकृत्यं किञ्चिदुक्तं, व्रजस्यानुक्तिसिद्धत्वेपि कथनेन **सम्पूर्ण व्रजे स्वप्रियाभिः सह शयनं** सूच्यते ॥ ४६ ॥ एवमाह्निकं भगवत्कृत्यं निरूप्य वैषयिकं भगवत्कृ वक्तुं कालीयहृदगमनार्थं प्रस्तावनामाहैवं **स भगवा**निति, **एवं निरोधार्थं वृन्दावनचरो** भगवान् जातः, तत्र हेतुः **स भगवा**निति, **स** इति निरोधार्थमेवागतः, **भगवा**निति सामर्थ्यं, **कृष्ण** इति नाम्नाऽनेन 'सर्वदुर्गाणि यूयमञ्जस्तरिष्यथे'ति वाक्यार्थं बोधयितुं प्रवृत्तिरुचितेति, क्वचित् कदाचित् कस्मिंश्चिद्देशे **वा** तत्कार्यं स्वसाध्यमेवेति ज्ञात्वा **राममृते कालिन्दीं ययौ**, वनं ह्युभयत्रा भवति पर्वतसमीपे कालिन्दीसमीपे च, तत्र **निदाघे प्रायशः कालिन्दीसमीप एव गोचारणं, सखिभिर्वृत** इति तेषां समानशीलतोक्ता, अपरिहार्यतापि, अन्यथा भगवान् स्वयमेव गच्छेत् ॥ ४७ ॥ एवं सम्भूयगतानां **मध्ये** भगवानन्यत्रैव स्थितः, भिन्नक्रमेणैव गावो गोपालाश्च गता इत्याहाथेति, **गच्छेत्** क्वचिद् वृक्षच्छायायां भगवन्तं स्थापयित्वा जलं पाययित्वा पीत्वा चागमिष्याम इत्यभ्यनुज्ञाय दूरे गन्तव्यमिति बोधिता अपि विशेषतो न निषिद्धा **निदाघात**पेनात्यन्तं **पीडिता दुष्टं तस्या** यमुनाया जलं पशु, सा हि यमभगिन्यतो दुष्टायापि स्थानं दत्तवती, स च दोषो न तस्याः किन्त्वन्यकृत इत्याह **विषदूषित**मिति, **विषे**णात्यन्तं दूषितं, उष्णस्पर्शादिनापि दूष्यते तदर्थं विशेषः ॥ ४८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

तं गोरज इत्यत्र, **गावोत्र धर्म** इत्यादि । धर्मस्य वृषरूपत्वेन गोजातीयत्वाद्गोशब्देन धर्मोत्रोक्तः । धर्महेतुत्वेन अर्थस्य धर्मसाध्यत्वेन तत्सम्बन्धित्वाद्विक्षेपहेतुत्वेन च रजोरूपत्वान्मदहेतुत्वाच्च रजःपदेनार्थ उक्तः । निष्कामस्यान्यसम्बन्धासम्भवा

कामे सत्येव तथात्वाद्व्याप्तिः कामः 'स नैव रेमे, तस्मादेकाकी न रमते, स द्वितीयमैच्छत्स हैतावानासे'ति श्रुतेः। 'तत्सृष्ट्वा तदेवानुप्राविश'दिति श्रुतेश्च कामेनैव सर्वरूपेणाविर्भूय सर्वव्याप्तवानिति च तथा। केशाः सदा बद्धास्तिष्ठन्ति, अलकाः सदैव मुक्ता एवेति तथा। दूरमिव **गतानां मानिनीमनसां** स्वशोभातिशयेनाकार्यैव स्वरूपानन्ददातार इति च मोक्षस्थानीया इति भावः। तत्तद्दर्शनेन सा सा लीला साक्षादनुभूतेव भवतीति निगर्वः। अत्रैव **कुन्तलाश्च कामरूपा** इत्यादि। उत्तमरसभोक्तृदर्शने स्वस्यापि तद्भोगेच्छा लोकसिद्धा। प्रकृते च भ्रमरतुल्या एते मुखाम्बुजस्य परितश्चकासत इति तद्द्रष्टुर्भावोद्दीपका इति कामरूपाः। गवां सदा भगवत्संगतत्वेन प्रियस्मारकत्वात् कदाचित् तासामन्यादर्शनसम्पादकत्वेन रसानुभवहेतुत्वाच्चानुभावकत्वम् ॥ ४५ ॥ मध्ये त्वधिकारिदेवैरिति तु परोक्षकथनं वेदितव्यम् ॥ ४६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तं गोरज इत्यत्र **गावोत्र धर्म** इत्यादेरर्थं टिप्पण्यामाहु**र्धर्मस्येत्**यादि, **व्याप्ति**रितिच्छुरि**त**पदोक्ता **व्याप्तिः तथे**ति मोक्षस्थानीयाः **सत्यावलम्बिन** इत्यस्यार्थं विवृण्वन्ति **दूरमिवे**त्यादि **भाव** इत्यन्तं, तथा च **सत्यं** वास्तवरूप**मवलम्बन्ते** दयाया प्रकटीकुर्वन्ति तच्छीला इत्यर्थः सिध्यति, **सत्त्वावलम्बिन** इतिपाठे तु **सत्त्वं** ज्ञान**जनकं** तद**वलम्बि**नोर्थात् तादृगिन्द्रिया**वलम्बिन** इत्यर्थो वोध्यः, नन्वेतद्विशेषणकभगवद्दर्शनेन कथं गोपिकानां तापनिवृत्तिरित्यत आहु**स्तत्त**दित्यादि, एतदेव **धर्मादिसहिते**तिफक्किकया सुबोधिन्यां सूचितं, **कुन्तलाश्चे**त्यादिनोक्तं प्रकारान्तरं विवृण्वन्त्यु**त्तमे**त्यादि, **कामरूपा** इति कामनिरूपका, **वीराद्भुतरसौ** बोधयतीत्युत्साहजनकत्वात् कथं बद्धमितिविस्मयजनकत्वाच्च तौ **बोधयति, भयहास्ये जनयती** दुर्गभूमौ दृष्टत्वात् कथञ्चिद् विकृतिरूपया भङ्ग्या स्थापितत्वाच्च ते **जनयति, रुचिरेक्षणं करुणा**मिति हा वयमेतावत्पर्यन्तस्थिता इतिशोकमूलानु**करुणां, रौद्ररस**मिति क्वचिदधिकारिविशेषे, **अविशष्टरसं** बीभत्सं क्वचिद् भक्तविशेषे जनयतीत्यर्थः ॥४२॥ **पीत्वे**त्यत्र **गोपिकाभिरेव भुक्त** इत्यत्र हेतुमाहु**स्त एवे**त्यादि **अनेने**त्यक्ष्णां भृङ्गत्वनिरूपणेन, **साजात्य**मिति यथा श्रुत्यादयः सर्वं वदन्ति परमत्रैव तात्पर्ययुक्तास्तथैता अपि सर्वत्र भ्रमणयुक्तदृष्टयोपि भगवदेकनिरीक्षका इति तथा, अक्ष्णां भृङ्गत्वोक्त्या व्यञ्जितमर्थमाहु**र्गोपिकाना**मित्यादिना **गच्छतीत्**यन्तेन **अन्येनापी**ति भावरूपेण प्रकारेणापि, **त्रिविध** इति देहेन्द्रियात्मनां सम्बन्धि, **बन्धनस्थान**मिति, तथा च भगवान् मार्ग एव रसं ददाति न तु संसाररूपे गृह इतिवस्तुस्थितिर्व्यज्यते ॥ ४३ ॥ **गताध्वाने**त्यत्र **मध्ये** त्वित्यादेरर्थं **टिप्पण्यामाहुर्मध्ये त्वधिकारी**त्यादि ॥ ४४-४५ ॥ **जनन्युपहृत**मित्यत्र **नात्यन्तं धर्मप्रधानते**ति किन्त्वत्यन्तं धर्मिप्रधानतेतिभावः ॥ ४६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

कृष्ण इत्यत्र **तदिति** कृष्णस्य व्रजागमनमागन्तुः कमलपत्राक्षत्वात् तापहारकमित्यर्थः, दृष्ट्यैव सङ्केतसूचनाद् **भाव्यर्थ**निश्चयेन तापनिवृत्तिरितिभावः, अग्रिमश्लोके तापान्तरस्य वक्ष्यमाणत्वादत्र विरहपदं, **नन्विति** अध्यात्ममन्तःकरणं तत्सम्बन्धिनि विरहकारणभूते मदमानादिरूपे इत्यर्थः, **अनेने**ति एतयोः पुण्यत्वकथनेनेत्यर्थः, पुण्यं हि प्रायश्चित्तं तात्कालिकपापभोगनिवर्तकं न तु स्वरूपतो नाशकमिति निबन्धे निरूपितं तत्सूचनाय जलपूरदृष्टान्तः, पूरो हि वस्तु देशान्तरे प्रक्षिपति न तु स्वरूपतो नाशयति, तथापि तात्कालिकमदमाननिवृत्तिः, कालान्तरे तु रसोद्रेकाद् भविष्यत एवेति भावः, **श्रवणे** इति सतीतिशेषः, **कथापूर** इति सुधासवलितकथापूर इत्यर्थः, **शुद्ध** इति पूर्वोक्तपापरहित इत्यर्थः, **नन्वेवमपीति** श्रवणकीर्तनाभ्यामाध्यात्मिकपापनिवृत्तावपि भगवत्यनित्यरतित्वादिदोषदर्शनलक्षणस्याधिदैविकपापस्य विद्यमानत्वात् तन्निवर्तकोत्कर्षाधायकगुणवर्णनरूपा कीर्तिः कथं प्राप्यते इत्यर्थः, करुणा इति अन्तरङ्गा इत्यर्थः, **अलौकिकेनेति** लोकावेद्येनेहैव भगवान् रतो यथापूर्वमेवेत्यादितद्वर्णनप्रकारेण भक्तस्तुत्या सुलभत्वयुक्, लोकवेद्येन प्रकारेण गोपस्तुत्या सुलभत्वमित्यर्थः ॥ ४१ ॥ **त**मित्यत्र न **दृष्टे**ति नानुभूतेत्यर्थः, तत्तद्धर्मदर्शनेन तत्तत्स्थायिभावोद्बुद्धो भवतीति ज्ञेयं **अत्र धर्म** इति पुरुषार्थपरत्वव्याख्याने इत्यर्थः शृङ्गाररसपरत्वे त्वनुभावत्वं वक्ष्यत इतिभावः, रजोदर्शनेन परम्परया तत्सम्बन्धिगोसम्बन्धिनी सर्वापि धर्मादि (विभावानुभाव) लीला नित्यत्वाद्धृद्यनुभूता भवति साक्षात्त्वर्थलीलानुभूता भवतीत्यर्थः, एवं सर्वत्र ज्ञेयं **मोक्षस्थानीया** इति **टि**प्पण्युक्तदिशा अलकेषु सर्वापि मोक्षलीला अन्यत्र त्वंशतो धर्मादिलीलेतिविशेषः, व्याप्यतेति **गोर**जश्छुरितकुन्तलेत्यस्य छुरणक्रियावत्त्वाद् वाक्यत्वं, तथा चैकस्मिन्नवान्तरवाक्ये सम्बन्ध इत्यर्थः, **कामरूपा इति** कामनिरूपकास्तदुद्बोधका इत्यर्थः, **रजोगुण** इति रजसः कामदातृत्वस्य फलप्रकरणे "दिनपरिक्षये"इतिश्लोके वक्ष्यमाणत्वाद् रसोद्दीपका इत्यर्थः, **अत्रानुभावा** इति पूर्वं व्यभिचारित्वेनोक्ता अप्यत्रानुभावा इत्यर्थः टिप्पण्युक्तदिशा परिरम्भादिरूपानुभावसम्पादनेन प्रियस्मारणेन च रसं बहिरन्तश्चानुभावयन्तीति यौगिकोर्थो ज्ञेयः, **तेने**ति उद्दीपनानुभावसाहित्येनेत्यर्थः, शृङ्गारे **चकोरदृष्टान्त**कथनात् चन्द्रे चकारेण इव भवतीष्वहं रत इतिज्ञापनेन भगवन्निष्ठा शृङ्गारस्थायिरूपा रतिः कुन्तलदर्शनादिना **भावोद्बोधना**देताभिरनुभूतेतासामपि तेन रतिर्जातेति पर्यवसन्नोर्थः, **निरूपित** इति भगवतैतासु स्थापित इत्यर्थः, **बर्हस्ये**ति अनेन समयविशेषे स्वबर्हबन्धस्मरणेन भगवतो लीलान्तरोत्साह आश्चर्यं चैताभिरनुभूतं भवतीत्यर्थः, एते त्रयो भगवन्निष्ठा एताभिरनुभूताः, अग्रिमास्त्वेतास्वेव जाता इति जनयतीति, तत्रोक्तं, वनसम्बन्धिपुष्पधारणेन वने रुचिज्ञापनाद् भगवान् पुनर्वनं गच्छेदिति भयं रसक्षमा अस्मान्

विहाय प्रकृष्टा सूना येषां तैरक्षमर्दिनं नीतवानिति हासः, एतादृशोस्मान् पूर्वोक्तपापवशात् त्यजतीति शोकः, त्यक्त्वा गत इति वयमेवं तताः स्वयं च हसतीति क्रोधः, पूर्वार्धसमुदितधर्मदर्शनेन तत्रापि नयनसमर्थस्तदकृत्वा अनुनयनार्थं किमित्येवं करोतीत्याकारिका जुगुप्सा, **नाट्यावशिष्टे**ति नाट्येष्ववशिष्ट इत्यर्थो ज्ञेयः, वेणुनादेन शान्तिरूपो निर्वेदो जनितः प्रयत्नशैथिल्यलक्षणः, येनान्तरेव नादरसानुभवो भवति, एतदेवोक्तं "**ब्रह्मामृत**"मिति नादब्रह्मरसं इत्यर्थः, अनुगत्वेन रूपात्मकभगवत्सेवालक्षणो गानेन नामात्मक भगवत्सेवालक्षणश्च भक्तिरसो जनितः, बद्धबर्हो वन्यप्रसूनानि रुचिरेक्षणं चेति द्वन्द्वः, ततस्तैः सहितश्चारुहासो यस्येति बहुव्रीहिस्ततो 'गोरजश्छुरिते' त्यनेन कर्मधारयः, **विवृक्षितदृष्टय** इति दिदृक्षा सञ्जाता आसामिति तद्धितान्तं ज्ञेयं, निष्ठान्तत्वे कर्मवाचकं दिदृक्षितपदं स्यात्, न **ह्ये**त्यादि रसानुभवे विशेषः, दर्शने तु सर्वसाधारण्यमेव, असाधारणं दर्शनमाहुः **एकान्त** इति, **अभि**पदार्थ माहुः **ताभिरेवे**ति एवकारेण व्यावर्त्यानाहुः अग्रे इति तथा च व्यावर्त्या गवादय इत्यर्थः, गोपिकागमनेनापि वेष्टनमेव निरूपितमिति भगवद्वर्णनलक्षण एव वाक्यार्थ आभासे उपक्रान्तोत्र **वेष्टित** इत्यर्थः इत्यनेनोपसंहृतः ।। ४२ ।।

पीत्वेत्यस्याभासे **तत** इति तत्कृतिकथनपूर्वकव्रजागमननिरूपणं वाक्यार्थ इत्यर्थः, व्याख्याने, **आदा**विति पानं तापत्याग सत्कृतिश्च तत्कृतिः तत्रादावित्यर्थः, **करुणे**ति करुणया वीचियुक्तादित्यर्थः, **पेपीयमान** इति यङ्लुगन्तात् कर्मणि शानच्, तच्चेति तादृ वस्त्वित्यर्थः, दोषत्रयेण बहुपानासम्भवस्तत्र दुग्धस्य मिष्टत्वेपि तृषाजनकत्वं न तु तापहारकत्वं, आदिपदाभ्यां निम्बादेस्तापहारकत्वे तिक्तत्वेन वैरस्य जनकत्वं न तु मिष्टत्वमित्यर्थः, जलं तादृशमपि बहु **पातुं न शक्यते** तत्र हेतुमाहु**र्यदी**ति, विकारजनकमित्यर्थः, **नीहारव**दिति हिमवदित्यर्थः, **सर्वगुणैरि** मुकुन्दसम्बन्धाद् दोषाजनकत्वं मुखसम्बन्धात् तापहारकत्वं मुखस्य दर्शनमात्रेणैव ताप हारकत्वात्, सारघत्वान् मिष्टत्वं, एभिस्त्रिभिर्गुणैर्बहु पानं सम्भवतीत्यर्थः, **भक्त्यात्मक**मिति तापहारकमित्यर्थः **तत्रे**ति मुखे इत्यर्थः, **मधु क्रियत** इति यथा कुसुमजलमानीय सारा निष्काश्यते तथेत्यर्थः, दृष्टान्ते स्थापनमुक्तमित्यत्र बोधनस्य स्थापनत्वमाहुः **सर्वप्रकारे**ष्विति, सरघाभिः पुष्पेभ्यो रसः समानीयते रसनिष्ठो यः सारः यथा कुसुमजलान् निष्काश्यते तन्मधुसारघं तथात्र सरघास्थानीया श्रुतयः रसस्थानीयो भगवान् सारघस्थानीयं लावण्यमिति ज्ञेयं, **रसस्त्व**ति लावण्यरूप इत्यर्थः, सरघाभिः पुष्परसो भुज्यते रसनि रसस्त्वन्यैरेव भुज्यते तथात्र **गोपिकाभिरेव** भुक्तः, तत्र हेतुः **त एवे**ति हि यत इत्यर्थः, रसो हि ज्ञात्वा भोक्तव्यः ज्ञानं तु भृङ्ग देतच्चक्षुषामेव, तथा च रसज्ञचक्षुर्युक्तत्वादेताभिरेव ज्ञात्वा रसो भुक्तः, भृङ्गनिष्ठं रसज्ञानमेव दृष्टान्तार्थः, अत एव जानन्तीत्यु न तु भुञ्जत इति **अनेने**ति श्रुतिबोधितरसनिष्ठसारघपानकथनेन श्रुतिभिरादिपदेन **ब्रह्मादिभिश्च**, **सह** साजात्यमेकरससम्बन्धि निरूपितं, इयान् परं विशेषः, श्रुतीनां सरघादृष्टान्तेन रसभोग एतासां तु भोक्तृजनदृष्टान्तेन रसनिष्ठसारघभोग इति अत एवा त्युक्तं, अनुक्त्यापि चक्षुभिरेव रूपदर्शनसम्भवेनाक्षिपदं किमर्थमित्याशङ्क्याहुः **गोपिकाना**मिति, ब्रह्मादीनां देवतात्वाच् चक्षुःसंयो विनैव योगजधर्मप्रत्यासत्त्या सर्वदर्शनं तथैतासामपि देवतात्वस्य वक्ष्यमाणत्वादुक्तत्वाच्च सम्भवतीत्यक्षिभृङ्गैरित्युक्तमित्यर्थः, इति लावण्यामृतस्य गुणत्रययुक्तत्वेन बहुपानात् तस्मिन्नन्तः पूर्णे सति पूर्वश्लोकोक्त**स्तापो**नुपदोक्तचतुर्दशधर्मविरहजो गच्छत्या इत्यर्थः, **अन्यास्त्व**ति 'कृष्ण' इति श्लाकोक्तो बाह्य इत्यर्थः, **त्रिविध** इति धर्मविरहरूपाधिभौतिकपापजनितः आध्यात्मिकपापज आधिदैविकपापजनितश्चेति, **सन्निधान एवे**ति भगवता व्रजे एव कुतो न स्थीयते इत्यर्थः, तथा सति चतुर्दशापि धर्माः साक्षाद स्युरितिभावः **व्रजस्य ह्ये**ति व्रजसम्बन्धित्वेनास्मदर्थमेव भगवान् प्रकट इति ज्ञानेन सर्वत्रैव यथेच्छं क्रीडितुमुचित इति विवेकरा त्याद् व्रजस्थितौ स्वाधीनत्वेन लीला अन्यास्ताभिर्बाध्येरन् स्त्रीत्वेन पराधीनत्वात् तास्वपि सा न सम्भवति, **ह्ये**ति व्रजसम्बन्धिनी तादृशविवेकराहित्यं युक्तमेवेत्यर्थः, **तत्राप्यह्नी**ति प्रतिबन्धकानां वनगमनादिना यथाकथञ्चित् समाधानसम्भवेपि मध्यमलीला त्रपाद्यनुरोधेनैव सर्वं कर्तव्यं न तु निःशङ्कतयेति त्रपारूपः स्वभावाप्यह्निबाधको भवति, निशि तु सर्वेषां शयानत्वेन स्वीयप्र बन्धकानां स्वपार्श्वस्थत्वमाननेन च सर्वं सम्पद्यत इतिभावः, **लौकिकभोजनादिरि**ति अग्रे मात्रा कर्तव्यं दुग्धान्नभोजनमित्य भोजनमिति हेतुमण्णिजन्ताद्भावे ल्युट्, सन्ध्याभोगसामग्रीभोजनानन्तरं तु पयःपानं सार्थकमेवेतिभावः, **पुनर्गोष्ठे** इति गोष्ठे गाः स्थापयित्वा गृहे गत्वा रात्रिकं स्वीकृत्य तं वेषमुत्तार्य तत्समयोचितलघुवेषं विधाय फेनभोगार्थं पुनर्गोष्ठे समागमनमित्य **लौकिकं चेति** लावण्यपानोक्त्या तत्कृतः सत्कारोपि तत्सजातीय एव वाच्यः, अतो लौकिकभोजनादिकं पाकादिवैयर्थ्यात् पूर्व बाध्यते अतोपि न तथेत्यर्थः, **विशिनष्टी**ति **समभिगम्ये**ति क्रियां विशिनष्टीत्यर्थः, **यादृशी**ति विभावानुभावरहिता मुख्यरसभा भवरूपेत्यर्थः, **अलसाद**य इति चस्त्वर्थे, एते तु अनुद्बुद्धरसदशायामेव सम्भवन्ति, तत्र च रसोद्बोधाय विभावानुभावा अपे अतो व्यावर्त्यतेऽनेन विशेषणेन, **सव्रीडे**त्यादि तु तमस्यपि सम्भवति, चेष्टयैव त्रितयबोधनसम्भवात् **तस्ये**ति मुख्यरसस्ये **अधिभूताना**निति शरीरभूतानित्यर्थः, **सव्रीडे**त्यत्र व्रीडनं व्रीडः इयं व्रीडा न निषेधिका किन्तूत्साहसंवर्धनेन रसार्थप्रेरिका, व्रीड लज्जायां चेति धातुपाठात्, अतःस्त्रीत्वविशिष्टस्य रूढ्या लज्जामात्रवाचकत्वेन स्त्रीत्वस्यात्राविवक्षितत्वान् न टाविति प्रति **गवा**मिति तत्र गवां बन्धनार्थमन्येषामामनावश्यकत्वे ताभिरेव वेष्टनासम्भवादित्यर्थः ।। ४३ ।। **गताध्वाने**त्यत्र **नीवी**मिति क पीतमित्यर्थः, ग्रन्थिमत्त्वेन मलकच्छसादृश्यं, धौत्रपरिधाने गोदोहनादौ तन् मुक्तं भवेदिति भावः, **मध्ये त्विति एतत्** कार्यं त्वात् सर्वत्र सङ्क्षेपेणैवोच्यते, अतः स्वमार्गीयसेवारीतिसिद्धं फेनभोगादिकं तत्र नासाभूषणोत्तारणादिकं च सर्वमेवास्तीति ज्ञे

गत इति वयमेवं
रोतीत्याकारिका
क्षणः, येनान्तरेव
गानेन नामात्मक-
ति बहुव्रीहिस्ततो
न्तत्वे कर्मवाचकं
इति, **अभिपदार्थं-**
मेव निरूपितमिति

ति पानं तापत्यागः
च्, तच्चेति **तादृशं**
ादेस्तापहारकत्वेपि
कारजनकमित्यर्थः,
र्शनमात्रेणैव ताप-
त्रे ति मुखे इत्यर्थः,
माहुः **सर्वप्रकरणे-**
ात्र सरघास्थानीयाः
सो भुज्यते रसनिष्ठो
ः ज्ञानं तु भृङ्गत्वा-
त एव जानन्तीत्युक्तं
त्यमेकरससम्बन्धित्वं
ग इति अत एवापी-
तात्वाच् चक्षुःसंयोगं
रित्युक्तमित्यर्थः, **अत**
रहजो गच्छत्यान्तर
ध्यात्मिकपापजनितः
धर्माः साक्षाद् दृष्टाः
चत इति विवेकराहि-
ति व्रजसम्बन्धिनीनां
वेपि मध्यमलीलात्वात्
शयानत्वेन स्वीयप्रति-
दुग्धान्नभोजनमित्यर्थः,
र्गोष्ठे इति गोष्ठे गत्वा
ष्ठे समागमनमित्यर्थः,
ादिवैयग्र्यात् पूर्वोक्तेन
हिता मुख्यरसमात्रानु-
ावानुभावा अपेक्षिताः,
येति मुख्यरसस्येत्यर्थः,
ार्थप्रेरिका, **व्रीड** चोदने
न टाविति प्रतिभाति,
त्र **नीवोमिति** कच्छपटं
वति एतत् कार्यं गोप्य-
र्वमेवास्तीति ज्ञेयं, पूर्व-

श्लोके जननीकृतत्वमुक्तमग्रिमश्लोकेपि तथा, मध्येस्मिन् श्लोके जननीकृतत्वानुक्त्या **तैरेव तथा कृता**वित्यर्थः ।। ४५ ।। **रोहिण्या** समानयने हेतुः **प्रायश इति**, **बलभद्रेणैवे**त्येवकारेणान्ये बालका व्यावर्तिताः तथा सति तज्जनन्योप्यानयेयुः, व्यावृत्तौ हेतुः **असमासा**दिति, समसनं समासः, आवेशेन सम्यक्तया स्थितिरित्यर्थः, अन्यैः सह तदभावात्, अतो जननीभिरिति बहुवचनान्तेन न समासः, लीलार्थं कदाचिदन्यैरपि सह सम्भवतीति **प्रायश** इत्युक्तं, तर्हि यशोदया समानीतमिति कुतो नोच्यत इत्याशङ्क्याहुः **द्रव्यमिति कोमलदुग्धान्नादिक**मिति, सुश्रृतं दुग्धमन्नादिकं चेत्यर्थः, आदिपदेन शाकः सन्धिताम्राद्रीदि चेति, व्रजे हीति पूर्वनाडीचतुष्टयावधि न सुप्तव्यमिति **धर्मस्तत्प्रधानता** न किन्तु 'निशि शयानमतिश्रमेणे' तिवाक्याच् छीघ्रमेव शयनं, अतो दिवा सुखस्वापार्थं व्याजेन वनगमनवद् रात्रौ महच् चरित्रं नापेक्षितं किन्तु माययैव तदज्ञानेन पार्श्वस्थत्वमाननेन तत्सिद्धिः, अतः 'सुखं सुषुप्तु'रित्येवोक्ते न तु तदर्थमन्यत् किञ्चिदुक्तमित्यर्थः ।। ४६ ।। **वैषयिक**मिति 'विषयास्तद्विष'मित्युक्तत्वाद् विषकार्यमरणनिवर्तकमित्यर्थः, एवमित्यत्र एवमित्यस्य विवरणं **निरोधार्थं**मिति, **तत्कार्य**मिति तनुनवत्वसम्पादनमित्यर्थः, **स्वसाध्यमेवे**ति सङ्कर्षणस्य प्रलयकर्तृत्वात् तस्मिन् विद्यमाने तद्विरुद्धं नूतनदेहोत्पादनं न भवेदित्यर्थः ।। ४७ ।। **अथेत्यस्याभासे इत्याहे**ति **इति** हेतोर्जलपानमाह, **भगवता** सह **गमने** तु तादृशं जलं न पिबेयुरित्यर्थः, **अथे**त्यनेनोक्तं भिन्नप्रक्रमं विवृण्वन्ति क्वचिदित्यादिना ।। ४८ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

स्तूयमानोनुगैरित्यत्र **अलौकिकेन लौकिकेनापि प्रकारेणे**ति रहस्यलीलाकथनं हि सर्वेषां लोकानां सन्निधौ न भवति किन्तु **तादृश**भक्तनिकटे रहस्येव भवति, तस्य वक्तारोपि विरला अतस्तेषां लोकावेद्यत्वा**दलौकिकप्रकारेणै**व तेभ्यो लीलास्वरूपं लभ्यते, प्रकटलीलास्तु गोपैः सर्वसमक्षं गीयते, तल्लाभोपि सर्वप्रसिद्ध**लौकिकप्रकारेणै**व भवतीत्यर्थः ।। ४१ ।। **तं गोरजश्छुरित**मित्यस्य विवृतौ **बर्हस्य मयूरपिच्छस्य बन्धनं वीराद्भुतरसौ बोधयती**ति वीरा हि स्ववीरताख्यापकं लक्ष्मविशेषं बिभ्रति, भगवानपीह शृङ्गाररससम्बन्धिस्ववीरताबोधनार्थं उद्बुद्धशृङ्गाररसस्य मयूरस्य चिह्नं बर्हं धारयत्यतस्तद्दर्शने वीररसोनुभूयते, **बर्हदर्शने** मयूरस्य लोकविलक्षणायाः कामलीलायाः स्मरणे आश्चर्यं भवति, प्रकृते भगवानप्यप्राकृतीं लोकविलक्षणामेव कामलीलां करोतीति तस्या अनुभवाददद्भुतरसो बोभूयते, **वनोद्भवानां प्रसूनाना**मिति बद्धबर्हतादर्शनेनाविर्भूतयोर्वीराद्भुतरसयोः प्राबल्यादस्मदर्थं भगवानेतावत् करोत्यस्मदेकरत इतिज्ञानादेतादृश्यार्तिरभूद् यया व्रीडादिपरित्यागेन बलात्कारेणायं ग्राह्यो यथास्मन्निकट एव तिष्ठेत् इति त्वरिता बभूवुः, परं वन्यप्रसूनदर्शने पुनरपि वने गमिष्यतीति भयमुत्पद्यते, ततश्च लज्जापरित्यागो न कर्तव्य इतिमतिरुदेति, युक्तं चैतत्, यदि भयानकरसो नोत्पद्येत तदा लज्जात्यागे रसप्राकट्याद् गुप्तो हि रसो रसत्वमापद्यत इति रसमर्यादाया अभावात् रसत्वमेव न स्यात्, अतो भयरसोपि शृङ्गाररसपोषक इति सिद्धं भयस्य रसत्वं, किञ्च वन्यप्रसूनदर्शने भगवति चातुर्याभावमवगच्छन्ति, एतादृशीः सौन्दर्यचातुर्यस्नेहादिवतीरस्मान् विहाय "वनं तु सात्त्विको वास" इतिवाक्यात् कामलीलाप्रतिबन्धके वने पशुपालान् गृहीत्वा पशूनां पृष्ठभागे परिभ्रमतीति हास्यरसमुदयते, **रुचिरेक्षणं करुणारस**मिति वन्यप्रसूनदर्शनेन प्रकटीभूतयोर्भयानकहास्यरसयोः प्राबल्येनोत्पन्नाया उदासीनतायाः प्रशमनाय करुणारस उत्पादनीयः, स च रुचिरेक्षणदर्शनेन उत्पद्यते इत्याशयः, रुचिरेक्षणावलोकनेन एतादृशे मध्यनिविष्टरसनिमग्नचञ्चरीकसरसिजसदृशे ईक्षणे एतावत्कालमस्माभिः कुतो नानुभूते इतिशोकस्थायिभावकः करुणारस उद्भवति, तथा च येन केनापि प्रकारेण सरसिरुहनयने सततमवलोकनीये इति पुनरभिलाषसङ्घः परिस्फुरति, एवं शृङ्गाररसाङ्गता करुणारसस्य, एवं करुणारसे उत्पन्ने मानादिकं नोत्पत्स्यत इति तदुत्पत्त्यर्थं पुनर्मानादिबीजमुद्बोधयितुं क्रोध आवश्यक इति तं प्रकटयितुं चारुहासं करोति, ततश्च वयमेतादृशानुरागवत्यः एतावत्कालपर्यन्तमेतादृग् दुःखमनुबभूविम भगवांस्तु दुःखितानप्यवलोक्य हसतीति नायमस्मद्विषयकस्नेहवानतः क्रोधस्थायिभावको रौद्ररसः आविर्भवति, सोयमित्थं शृङ्गाररसपोषक इति बोद्धव्यं, इत्थं कदाचिदुत्साहः कदाचिद् विस्मयः कदाचिद् भयं कदाचिद्धास्यं कदाचित् तापः कदाचित् क्रोध इति नानाविधपुरुषोत्तमभूषणावयवाद्यवलोकनैर्नानाप्रकारका भावाः समुज्जृम्भन्ते, एवं विविधभावोत्पत्त्या विलक्षणः कश्चिदास्वादः शृङ्गाररसे सर्वरसानामङ्गिभूते समुल्लसति, परं क्रमेण भवति, क्रमेणावलोकनात् क्रमेण तत्तात्पर्यावधारणात्, यदा तु समूहावलम्बनवत् युगपदेव सर्वे धर्मा गोरजश्छुरितकुन्तलबद्धबर्हादयः परिस्फुरन्ति तदा बीभत्सरस उदेतीत्याहुः **महतस्तादृशो विशिष्टो वेषो नाट्यावशिष्टरसं जनयतीति** नाट्ये अवशिष्टं नाट्यावशिष्टं बीभत्सरसं जनयतीत्यर्थः, "बीभत्साद्भुतसंज्ञौ चेत्यष्टौ रसाः स्मृता" इतिवाक्यादष्टौ रसा नाट्ये, तत्र शृङ्गारादिरौद्रान्ता रसा इह निरूपिता अतो बीभत्सरसोऽवशिष्टः, स तु "गोरजश्छुरितकुन्तलबद्धबर्हादिसर्वधर्मविशिष्टवेशावलोकने सम्भवति, अयं तु भगवाननेकचरित्रचमत्कारयुक्तोस्त्यतः कुत्र कुत्रास्य स्नेहः कुत्र कुत्रास्य रमणं किं किं न कामकापट्यं करोतीतिबुद्धौ जुगुप्सास्थायिभावको बीभत्सरस उदेति, सोयं मनसः परावर्तको रसः शान्तरसेन शमनीय इति शान्तमुत्पादयितुं वेणुनादं करोतीत्याहुः वेणुं क्वणन्तमिति, **शान्तरस** इति वश्च इश्च वयौ ब्रह्मानन्दविषयानन्दौ अणू यस्मादितिव्युत्पत्तिसिद्धो वेणुस्तत्क्वणने परमानन्दोत्पत्तौ घोषकामिनीनां भगवदितरविषयकनिर्वेदस्थायिभावकः शान्तरसो जायते तदा सर्वप्रयत्नराहित्येग्रिमलीला न सम्भवतीति तदुत्पादनाय स्वस्य शृङ्गाररसोपयोगिकीर्तिश्रवणं कारयित्वा भक्तिमुत्पादयतीत्याहुः **अनुगैरनुगीता कीर्तिर्यस्येति, भक्तिरस** इति अनुगा अन्तरङ्गगोपास्तैर्गीयमानां कामकीर्तिं भगवतः श्रुत्वा अयं

भगवान् सर्वोत्तमः सकलरसिकशिरोमणिरित्येतस्मादानन्दानुभवः सर्वथा कर्तव्यो न मानादिकं कर्तव्यमित्यभिलाषेण दास्यादिरूपो **भक्तिरसः** प्रकटीभवति, सोयं शृङ्गाररसानुसंसृष्ट इति ज्ञेयं, **एवं सर्वरसयुक्तं** भगवन्तमिति इदमत्र ज्ञेयं, अस्मिन् श्लोके ये दश रसा उक्तास्तेषु केचन भगवति जाताः शृङ्गारादयः, केचन भयादयो व्रजवामलोचनास्वेव जाता इति कथं सर्वरसयुक्तत्वं भगवतीति चेत्, इत्थं, यथा यशोदानन्दने वन्यप्रसूनाद्यासक्तिं दृष्ट्वा व्रजनारीणां भयहास्यादिरस उत्पद्यते एवमेतास्वपि गुरुजनपरतन्त्रादिज्ञानेन तादृक्चातुर्याभावज्ञानेन च भयहास्यादयो रसा भगवत्यपि प्रादुर्भवन्ति, अतिमाने च क्रोधश्च, कदाचिदित्याग्रहेण भगवत्प्रार्थिताकरणे जुगुप्सास्थायिभावको रसोपि सम्भवति, रतिरम्भादिमदहरस्मितावलोकनमधुरभाषणादिसौष्ठवं व्रजवधूटीनामवलोक्य तदितरविषयकनिर्वेदस्थायिभावकः शान्तरसः प्रभावप्युदेति, मानापनोदनादौ भक्तिरसस्तु व्रजसुन्दरे स्फुट एव, अत एव दशमस्कन्धे बहुलाश्वश्रुतदेवप्रसङ्गे उक्तं 'भगवान् **भक्तभक्तिमा**निति "अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विजे"त्यादि भगवताप्युक्तं, अतः सर्वरसयुक्तो भगवान् गोवर्धनधर इति सर्वरसयुक्तं भगवन्तमित्युक्तिर्युक्तैव ॥ ४२ ॥

पीत्वा मुकुन्देत्यत्र जलं नीहारवत पातुं न शक्यते इति बहु पातुं न शक्यत इत्यर्थः, तत्र दृष्टान्तः **नीहारवत्** इति हिमं यथा बहु पातुं न शक्यते १०–१२–४३ तथा तापहारकमपि जलं बहु पातुं न शक्यते, विकारोत्पादकत्वात्, मुकुन्दमुखसारघं तु तापहारकत्वान् मिष्टत्वात् तृषादिदोषाजनकत्वात् परिणामसुखदत्वाच्च भूयो भूयः पातुं शक्यत इति भावः, **ब्रह्मादयोत्र सर्वे श्रुतयश्च सर्वाः सरघास्थानीया** इति सरघा यथा पुष्पेभ्यो रसं समानीय मधु करोति तथा ब्रह्मादिभिः श्रुतिभिश्च भगवानानन्दनिधिरत्र व्रजे समानीत इति सरघास्थानीयत्वं ब्रह्मादीनां श्रुतीनां चेत्यर्थः, तथापि सरघा तु बहुभ्यः पुष्पेभ्यो रसं समानीयैकत्र मधु करोति भगवांस्त्वेक एवात्रानीत इति न दृष्टान्तस्वारस्यमतो दृष्टान्तस्वारस्याहुः तैः **सर्वैरेवेत्यारभ्य बोधित** इत्यन्तेन, यथा सरघया बहुभ्यः पुष्पेभ्यो रसं आनीय मधु क्रियते तथा ब्रह्मादिभिरपि निखिलवेदेषु उक्तो यः परमानन्दो भगवान् स श्रीकृष्ण एवेति बोधितं "वसुदेवगृहे साक्षाद्भगवान् पुरुषः परः" इत्यादिवाक्यैरित्यर्थः, श्रुतिभिरपि सर्वत्र प्रकरणेषु उक्तो यः परमात्मानन्दनिधिः स "रसो वै सः" "आनन्दमयमात्मानमुपसङ्क्रमति" "सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे" "कृषिर्भूवाचकः शब्दः णश्च निर्वृतिवाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इत्यादिभिः श्रीकृष्ण एव परब्रह्मस्वरूप इति बोधितं एवं सति सरघया यथा बहुपुष्पनिष्ठरसस्यैकीकरणेनैकत्र मधुकरणं तथा ब्रह्मादीनां श्रुतीनामपि सर्वत्रोक्तस्य परमानन्दरसस्यैकत्र श्रीकृष्णे एकीकरणं, इह श्रीकृष्णरूपपरमानन्दस्याजन्यत्वात् तद्बोधनमेव करणमिति ज्ञेयं, फलितमाहुः **सर्वप्रकरणेष्वित्यादिना**, **अतोस्माभिरेतावत्कालं नानुभूत इति चिन्तयेति** इदमनुशयानाया नायिकाया यल्लक्षणं रसशास्त्रे उक्तं तदत्र सिद्धं पश्चातापकरणात्, **तत्सत्कृतिं समधिगम्येत्यत्र** लौकिकं च बाध्यते लौकिकं भोजनादि तु बाध्यते इह न सम्भवतीत्यर्थः, व्रजनागरीभिः शृङ्गाररससम्बन्धिसत्कारकरणस्यात्रोचितत्वात् ॥ ४३ ॥

गताध्वानश्रमौ तत्रेत्यत्र मज्जनान्युन्मर्दनादीनीति मज्जनान्येव उन्मर्दनादीनीत्यभेदे कर्मधारयो बोद्धव्यः, तदुपपादयन्ति **उन्मर्दनमादिर्येषां मज्जनानामित्यनेन**, बहुव्रीहौ कृते मज्जनान्येव उन्मर्दनादिरूपाणि, अन्यथा पूर्वं मज्जनं पश्चादुन्मर्दनमित्युक्तिर्बाध्येत लोकविरुद्धत्वात् अरुचिसम्पादकत्वाच्च, बहुव्रीहौ कृते तु पूर्वमुन्मर्दनं पश्चात् मज्जनं सिध्यतीति युक्तमेव, लोके तथैव क्रियमाणत्वात् सुखदायकत्वाच्च, द्वन्द्वसमासमाश्रित्य पक्षान्तरेण व्याकुर्वते, **छान्दसः परनिपात** इति उन्मर्दनशब्दस्येत्यर्थः, मज्जनं च उन्मर्दनं चेति द्वन्द्वे कृते अजाद्यन्तमित्यनुशासनादुन्मर्दनशब्दस्य पूर्वनिपातोपेक्षितः स छान्दसत्वात् बाधितः किन्तु परनिपात एव जात इत्यर्थः, अस्मिन् पक्षे मज्जनोन्मर्दनयोः पूर्वापरभावो नास्ति किन्तु यथोचितं मज्जनोन्मर्दने इति, उन्मर्दनमज्जनयोः पूर्वापरभाव इत्यर्थः, **मज्जनं वेति** मज्जनशब्दस्य पूर्वं कथितत्वात् पूर्वं मज्जनमेव वाच्यमितिपक्षे तु चरणारविदमात्रमज्जनं **मज्जनपदेन** ग्राह्यं, तच्चोन्मर्दनात् पूर्वमेव, वनादागतस्य कृष्णस्य चरणारविन्देषु रजः सम्बन्धोस्ति तस्य दूरीकरणस्य पूर्वमेवोचितत्वात्, ततः पादयोर्मज्जनानन्तर सर्वत्रानन्दमयविग्रहे उन्मर्दनं, ततः स्नानं त्वर्थात् प्राप्तमतो नोक्तं, आदिशब्देन वा ग्राह्यं, एवं सति बोधसौकर्याभावजन्मामरुचिं मत्वा पक्षान्तरेण व्याकुर्वते **मज्जने वा उन्मर्दना**दिना इति; सप्तमीतत्पुरुषः, सप्तमी निमित्ते, मज्जननिमित्तं यानि उन्मर्दनादीनीत्यर्थो भवति, एवं सति सौकर्यं शब्दसाधनेर्थबोधने चेति ज्ञातव्यं, **रजोनिवृत्त्यर्थं आदो वा मज्जनमि**ति आदौ मज्जनं सकलानन्दविग्रहस्य, तत उन्मर्दनं, ततः पुनर्मज्जनं आदिशब्देन ग्राह्यं, पूर्वं चरणमात्रमज्जनमुक्तं, अस्मिन् पक्षे सकलाङ्गस्य मज्जनं वारद्वयमिति विवेकः ॥ ४५ ॥ **जनन्योपहृतं प्राश्येत्यस्य** विवरणे **रोहिण्या समानीतमि**ति जननीशब्दो रोहिणीवाचकः, तस्मात् इह जननीपदेन रोहिण्येवायाति बलदेवनिरूपितजननकारणत्वं तत्रैव, यतः बलदेवस्य गृहीतजन्मत्वात्, अत एव "अयं वै रोहिणीपुत्र" इत्यत्र रोहिणीपुत्रत्वनिश्चयार्थं वैपदं, व्याख्यातं च सुबोधिन्यां तथैव, अतः बलदेवे जननधर्मस्य विद्यमानत्वात् तत्कारणीभूता रोहिणी जननीपदवाच्या, यशोदा तु न जननीपदग्राह्या; भगवति जननधर्मस्याभावेन तन्निरूपितजननीत्वस्य श्रीयशोदायामभावात्, अत एव "अयं वै रोहिणीपुत्र" इत्यस्य विवृतौ "यदि भगवान् केनाप्यंशेन प्राकृतो भवेद् यशोदेयः देवकेय इति नाम भवेत्" इत्युक्तं, अतो न यशोदा जननीपदवाच्येति जननीपदेन रोहिण्येव ग्राह्येत्याशयेन **रोहिण्या समानीतमित्युक्तं प्रायशो भगवतो बलभद्रेणैव सह भोजनमसमासादिति जनन्योपहृतं प्राश्येत्यत्र** जनन्येत्य**समासा**दित्यर्थः, **समासे हि** जनन्या उपहृतं जनन्युपहृतं जननीभ्यां वा उपहृतं जनन्युपाहृतं इति स्यात्, तथा च यशोदा रोहिण्योरुभ-

योरपि ग्रहणं स्यात्, यद्यपि भगवति जननधर्माभावाद् यशोदायां जननीत्वांशो नास्ति, ततश्च जननीपदेन यशोदाया ग्रहणं न भवेत्, तथापि जननप्रसिद्धिमादाय जननीत्वसिद्धेर्जननीभ्यामुपहृतं जनन्युपहृतं इतिसमासे कृते यशोदाया अपि ग्रहणं स्यात्, परन्तु **जनन्योपहृत**मिति पाठादसमासे एकया जनन्या उपहृतमित्यर्थो भवति, सा जननीत्ववती तु रोहिणी, तया उपहृतं उभाभ्यां रामकृष्णाभ्यां प्राशितं, यदि उपहरणे यशोदाया अपि ग्रहणं स्यात् तदा यशोदया पृथक् भोजितो भगवानित्यर्थो भवेत्, प्रकृते तु जनन्येकवचना, तेन असमस्तपदेन पूर्वोक्तरीत्या रोहिणीमात्रग्रहणात् तयैकया समानीतं उभाभ्यां प्राशितमित्युक्तं भवति, ततश्च भगवतो बलभद्रस्य चैकत्रैव भोजनमायातीति युक्तमुक्तं **सहैव भोजनमिति, अतो न रात्रिकृत्यमुक्तमिति सुखं सुषुपतुरिति**, वाक्याच् छयनमात्रमुक्तं, भगवतस्तथैव गोपानामपि कृत्यन्तरस्यानुक्तेः शयनमात्रमायाति ततश्च **नास्ति धर्मप्रधानते**त्यवगम्यते, यदि धर्मप्रधानता स्यात् तदा दिवसे कार्यव्यापृत्या धर्मकरणाभावेपि रात्रौ कथाश्रवणादिकं स्यात्, तदपि नास्तीति केवलं धर्मिप्रधाना एवेति सर्वसाधनरहिता प्रमेयबलेनैव कृतार्था भविष्यन्तीति भावः, यद्यपि "वर्णकभेदेन गोपानामपि सोच्यते" इतिवक्ष्यमाणत्वाद् गोपानां रात्रौ भगवत्कथाश्रवणकीर्तनादिकमस्ति तथापि तत् केषाञ्चिदन्तरङ्गानामेव गोपानां न तु सर्वेषामतः सर्वस्य व्रजस्य तु "अह्नचापृतं निशि शयानमतिश्रमेणे"तिवाक्याद् दिवा व्यवहारकार्यं रात्रौ शयनमिति **न धर्मप्रधानता किन्तु** सर्वसाधनराहित्येन केवलं भगवत्यविहितस्नेहेन धर्मिमात्रपरतेत्येषां कृतार्थता भगवत्प्रमेयबलेनैवेति सर्वं सुस्थम् ॥ ४६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च साग्रजः अनुगैर्देवर्ष्यादिभिः गोपैश्च स्तूयमानः कृष्णः व्रजमागमत् । तत्सौन्दर्यातिशयं सूचयन्नाह कमलपत्रवदक्षिणी यस्य सः । पूर्णानन्दस्य विविधलीलाप्रयोजनं सूचयन्नाह–श्रोतॄणां च पुण्यजनकं श्रवणं कीर्तनं च यस्य सः ॥ ४१ ॥ दिदृक्षिता दर्शनोत्कण्ठायुक्ता दृशो यासां ताः, अत एव समेताः परस्परं मिलिता गोप्यस्तं वनादागच्छन्तं कृष्णमभ्यगमन् द्रष्टुमग्रतः सम्मुखं जग्मुरित्यन्वयः । दर्शनोत्कण्ठायां तत्सौन्दर्यातिशयं हेतुमाह गोरजोभिश्छुरितेषु व्याप्तेषु कुन्तलेषु केशेषु बद्धं बर्हं मयूरपिच्छं वन्यानि प्रसूनानि च यस्य तथा रुचिरमीक्षणं चारुर्मनोहरो हासश्च यस्य तम्, वेणुं क्वणन्तं वादयन्तमनुगैर्देवादिभिरुपगीता कीर्तिर्यस्य तम् ॥ ४२ ॥ एवमभ्युपगताश्च व्रजयोषितो मुकुन्दस्य मुखमेव पद्मं तद्गतं सारघं मधु अक्षिभृङ्गैर्नेत्ररूपैर्भ्रमरैः पीत्वा मुखसौन्दर्यं नयनैर्दृष्ट्वा अह्नि यस्तेन विरहः, तज्जं तापं जहुः । अनेन तासां श्रीकृष्णमनसां अन्यस्तु त्रिविधोऽपि तापो नास्तीति सूचितम् श्रीकृष्णस्तु तासां सत्कृतिं सन्मानं समधिगम्य प्राप्य गोष्ठं विवेश । 'का सा सत्कृतिः ? कथं वा कृता ?' इत्यपेक्षायामाह—सव्रीडेति । सव्रीडं सहासं सविनयं च यथा स्यात्तथा यदपाङ्गमोक्षं कटाक्षदर्शनं तां सत्कृतिमित्यन्वयः ॥ ४३ ॥ तयोः वनादागतयोः पुत्रयो रामकृष्णयोः यशोदारोहिण्यौ यथाकामं तदिच्छानुसारेण यथाकालम् ऋतुमासप्रभातादिकालानुसारेण च परमा उत्कृष्टा आशिषः भक्ष्यपरिधेयादिविषयान् व्यधत्तां सम्पादितवत्यौ । तत्र हेतुमाह–पुत्रवत्सले इति । माताऽपि यदि काचित् स्नेहरहिता तदा पुत्रानभिप्रेतमपि करोति, ते तु अतिस्नेहवत्यादित्याशयः ॥ ४४ ॥ ता आशिषो दर्शयति–गतेति द्वयेन । तत्र व्रजे नन्दभवने मज्जनं जलेन स्नानम्, उन्मर्दनं सुगन्धितैलादिना, आदिपदेन रजोदूरीकरणकेशप्रसाधनादिग्रहणम् । क्रमोऽत्र न विवक्षितः । मज्जनादिभिर्गताध्वश्रमौ 'अध्वान' इत्यार्षम् । यद्वा न श्रमः अश्रमः श्रमाभावः, तस्याभावस्त्वनश्रमः श्रम एव । गतोऽध्वनो अनश्रमो ययोस्तौ गताध्वानश्रमौ रुचिरां मनोज्ञां नीवीं वस्त्रं वसित्वा दिव्याभ्यां स्रग्गन्धाभ्यां पुष्पमालाचन्दनाभ्यां मण्डितौ त्वलङ्कृतौ ॥ ४५ ॥ जननीभ्यामुपहृतमानीतं स्वाद्वन्नं प्राश्य भुक्त्वा ताभ्यां ताम्बूलाद्यर्पणवीजनपादसंवाहनप्रियगानादिभिरुपलालितौ महाप्रासादे वरशय्यायां पुष्पास्तरणादिना रचितायां संविश्य स्वगात्रं प्रसार्य सुखं यथा स्यात्तथा सुषुपतुरिति द्वयोरन्वयः ॥ तथा चोक्तं पाद्मोत्तरखण्डे–"तस्मिंश्च भवनश्रेष्ठे रम्ये दीपैर्विराजिते । स्लक्ष्णे विचित्रपर्यङ्के नानापुष्पविवासिते ॥ तस्मिन् शेते हरिः कृष्ण शेते नारायणो यथा" इति ॥ ४६ ॥ लीलान्तरमाह–एवमिति षड्भिः । एवं पूर्वोक्तगोचारणप्रकारेण क्वचित् निदाघे वृन्दावनचरः सन् राममृते विना अन्यैश्च सखिभिर्वृतः स भगवान् कृष्णः कालिन्दी यमुनां ययौ । जलपानार्थमिति शेषः । 'इयमपि लीला ईश्वरत्वज्ञापिका, सावधानतया श्रोतव्या' इत्याशयेन सम्बोधयति–राजन्निति ॥ ४७ ॥ अथ शनैर्गच्छन्तं श्रीकृष्णं परित्यज्ज गावश्च गोपाश्च शीघ्रं गत्वा कालियविषेण दुष्टं तस्या यमुनाया जलं पपुरित्यन्वयः । तथागमने हेतुमाह–तृषार्ता इति । तत्रापि हेतुमाह—निदाघातपपीडिता इति ॥ ४८ ॥

अन्वितार्थप्रकाशिका

कृष्ण इति ॥ ततश्च साग्रजः अनुगैर्देवर्ष्यादिभिर्गोपैश्च स्तूयमानः कमलपत्रवदक्षिणी यस्य पुण्यजनकं श्रवणं कीर्तनं च यस्य सः कृष्णः व्रजमाव्रजदागमत् ॥४१॥ तमिति ॥ दिदृक्षिता दर्शनोत्कण्ठायुक्ता दृशो यासां ता अत एव समेताः परस्परं मिलिता गोप्यः गोरजोभिः छुरितेषु व्याप्तेषु कुन्तलेषु केशेषु बद्धं बर्हं मयूरपिच्छं वन्यानि प्रसूनानि च यस्य तथा रुचिरमीक्षणं चारुर्मनोहरो हासश्च यस्य वेणुं क्वणन्तं वादयन्तमनुगैर्देवादिभिरुपगीता कीर्तिर्यस्य तं वनादागच्छन्तं कृष्णमभ्यगमन् द्रष्टुमग्रतः संमुखं जग्मुः॥४२॥ पीत्वेति ॥ व्रजयोषितः व्रजकुमार्यः मुकुन्दस्य मुखमेव पद्मं तद्गतं सारघं मधु अक्षिभृङ्गैर्नेत्ररूपैर्भ्रमरैः पीत्वा मुखसौन्दर्यं नयनैर्दृष्ट्वा अह्नि यस्तेन विरहस्तज्जं तापं जहुः । श्रीकृष्णस्तु सव्रीडं सहासं सविनयं च यथा स्यात्तथा यदपाङ्गमोक्षं कटाक्षदर्शनं तद्रूपां तासां

सत्कृतिं सम्मानं समधिगम्य प्राप्य गोष्ठं विवेश ॥ ४३ ॥ तयोरिति ॥ तयोर्वनादागतयोः पुत्रयो रामकृष्णयोः पुत्रवत्सले यशोदारोहिण्यौ यथाकामं तदिच्छानुसारेण यथाकालमृतुमासप्रभातादिकालानुसारेण च परमा उत्कृष्टा आशिषः भक्ष्यपरिधेयादिविषयान् व्यधत्तां सम्पादितवत्यौ ॥ ४४ ॥ गतेति द्वयम् ॥ तत्र व्रजे नन्दभवने मज्जनं जलेन स्नानम् उन्मर्दनं सुगन्धितैलादिना आदिपदेन रजोदूरीकरणकेशप्रसाधनादिग्रहणम् । क्रमोऽत्र न विवक्षितः । न श्रमः अश्रमः श्रमाभावस्तस्याभावस्त्वनश्रमः श्रम एव गतोध्वनोऽनश्रमो ययोस्तौ गताध्वानश्रमौ । द्वौ नञौ प्रकृतमर्थं गमयतः । रुचिरां मनोज्ञां नीवीं वस्त्रं वसित्वा दिव्याभ्यां स्रग्गन्धाभ्यां पुष्पमालाचन्दनाभ्यां मण्डितौ अलंकृतौ जननीभ्यामुपहृतमानीतं स्वाद्वन्नं प्राश्य भुक्त्वा ताभ्यां ताम्बूलाद्यर्पणवीजनपादसंवाहनप्रियगानादिभिरुपलालितौ महाप्रासादे वरशय्यायां पुष्पास्तरणादिना रचितायां संविश्य स्वगात्रं प्रसार्य सुखं यथा सुषुपतुः ॥४५–४६॥ एवं कार्तिकगोपाष्ठमीदिनलीलां समाप्य तद्वर्षीयनिदाघगतस्य कस्यचिद्दिनस्य लीलामाह–एवमिति ॥ हे राजन्! एवं पूर्वोक्तगोचारणप्रकारेण क्वचित् निदाघे वृन्दादनचरः सन् राममृते विना अन्यैश्च सखिभिर्वृतः स भगवान् कृष्णः कालिन्दीं यमुनां ययौ । जलपानार्थमिति शेषः ॥ ४७ ॥ अथेति ॥ अत्र शनैर्गच्छन्तं श्रीकृष्णं परित्यज्य निदाघस्य ग्रीष्मस्यातपेन पीडिताः अतः तृषार्ता गावश्च गोपाश्च शीघ्रं गत्वा कालियविषेण दूषितं तस्या यमुनाया जलं पपुः ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गोरजोभिः गोपादपांसुभिश्छुरिता व्याप्ताश्च ते कुंतलाः केशाश्च तेषु बद्धानि बर्हाणि वन्यप्रसूनानि पुष्पाणि च यस्य रुचिरं सुंदरमीक्षणं चारुहासश्च यस्य स चासौ स च तं वेणुं क्वणंतं वादयंतं तं श्रीकृष्णं दिदृक्षितं दृशो दिदृक्षिता दर्शनाभिलाषया सहिता दृशो यासां ताः समेताः समूहिताः गोप्योऽभ्यगमन् संमुखा अगन् ॥४२॥ व्रजयोषितः । अक्षिभृंगैः मुकुन्दस्य मुखकमलोत्पन्नं सारघं मधु पीत्वा अह्नि दिवसे यो विरहो वियोगस्तस्माज्जातं विरहजं तापं जहुः स च स व्रीडेन हासेन विनयो यथा भवति तथा सव्रीडहासविनयं मदपांगमोक्षम् अपांगानां कटाक्षाणां मोक्षं श्रीकृष्णोपरि प्रसारणं एवंभूतांत्तत्सत्कृतिं तासां गोपीनां सत्कृतिमुपायनसामग्रीं समधिगम्य प्राप्य गोष्ठं विवेश ॥ ४३ ॥ परमाशिषः श्रेष्ठाशीर्वादान् व्यधत्तां कृतवंत्यौ ॥ ४४ ॥ न श्रमः अश्रमः न अश्रमः अनश्रमः श्रम एवेत्यर्थः गतः अध्वा अनश्रमश्च यतोस्तौ विगताध्वश्रमावित्यर्थः तत्र स्वगेहे रुचिरां मनोहरां नीवीं अनुत्तरीयं वस्त्रं वसित्वा परिधाय ॥ ४५ ॥ उपाहृतं दत्तं प्राश्य भुक्त्वा संविश्य प्रविश्य ॥४६॥ कालिंदीं यमुनां ॥ ४७ ॥ निदाघस्य ग्रीष्मर्त्तोः तापेन पीडिताः तस्या यमुनायाः दुष्टं निकृष्टं ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्ण इति ॥ पुण्ये श्रोतॄणां कीर्त्तयतां च पुण्यावहे श्रवणं चरित्राकर्णनं कीर्त्तनं तद्गायनं च यस्य सः, कमलपत्रे इवाक्षिणी यस्य सः, कृष्णः, साग्रजो रामसहितः, अनुगैरनुयायिभिः, गोपैः स्तूयमानः सन् व्रजं आविशत् ॥ ४१ ॥ तमिति ॥ गवां रजोभिः छुरिता व्याप्ताश्च ते कुन्तलाश्च तेषु बद्धानि बर्हाणि मयूरपिच्छानि प्रसूनानि च येन स चिरमीक्षणं चारुहासश्च यस्य स चासौ स च तं, वेणुं क्वणन्तं वादन्तं, अनुगैर्गोपैः, अनुगीता कीर्त्तिर्यस्य तं, तं व्रजमाविशन्तं कृष्णं, दिदृक्षिता दर्शनोत्कण्ठायुक्ता दृशो यासां ताः, समेताः समुदिताः गोप्यः, अभ्यगमन् अभिमुखमाजग्मुः ॥ ४२ ॥ पीत्वेति ॥ व्रजयोषितः, मुकुन्दस्य मुखसारसं मुखपद्मं, अक्षीण्येव भृङ्गास्तैः पीत्वा, तद्गतं मधु पीत्वेत्यर्थः । मुखसारघमिति पाठे, मुकुन्दस्य मुखमेव सारघं मधु इति, अह्नि दिवसे, विरहजं तापं जहुः । दिने वियोगजातो यः परितापस्तं जहुरित्यर्थः सव्रीडं सहासं सविनयं च यथा तथा, अपाङ्गयोर्नेत्रप्रान्तयोः मोक्षः प्रसरणं यस्मिस्तत्. यदवलोकनं तद्रूपां तासां व्रजयोषितां या सत्कृतिर्बहुमानस्तां, समधिगम्य संप्राप्य, गोष्ठं विवेश ॥ ४३ ॥ तयोरिति पुत्रवत्सले स्वपुत्रयोः स्नेहातिशयवत्यौ, यशोदारोहिण्यौ, तयोः पुत्रयोः, यथाकाममिच्छानुगुणं, यथाकालं कालानुगुणं, परमाशिष आशीर्वचनानि, अभिलाषान्वा, व्यधत्तामकुर्वाताम् ॥ ४४ ॥ तदेव दर्शयन्नाह ॥ गतेति ॥ तत्र गृहे, मज्जन स्नानं च उन्मर्द्दनं शारीरमलोद्वर्त्तनं च ते आदी येषां तैः, गतो निवृत्तः अध्वनि भवोऽध्वानः श्रमो ययोस्तौ रुचिरां नीवीं वसित्वा सुन्दरवस्त्रपरिधानं कृत्वा, दिव्याभ्यां स्रग्गन्धभ्यां मण्डितौ अलंकृतौ ॥ ४५ ॥ जननीति ॥ जनन्युपहृतं मात्रा पात्रे दत्तं, स्वादु मृष्टं, अन्नं उपलालितौ सन्तौ, प्राश्य भुक्त्वा, सुखं यथा तथा, मृदुशय्यायां संविश्य शय्यामधिरुह्य, सुखं यथा तथा, व्रजे सुषुपतुः सुप्तवन्तौ ॥४६॥ एवमिति । एवमित्थं वर्त्तमानः, वृन्दावनचरः, भगवान् सः कृष्णः, क्वचित् कदाचित्, हे राजन्, रामं ऋते बलभद्रं विना, सखिभिरितरैर्मित्रैः, वृतः सन्, कालिन्दीं यमुनां, ययौ ॥ ४७ ॥ अथेति ॥ अथ कालिन्दीप्राप्त्यनन्तरं, गावश्च, गोपाश्च, निदाघे ग्रीष्मर्त्तौ य आतपस्तेन पीडिताः, अत एव, तृषार्त्ताः सन्तः, विषदूषितं विषसंपर्कसंजातदोषं, अत एव दुष्टं, तस्याः कालिन्द्याः, जलं पपुः पीतवन्तः ॥ ४८॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृष्ण इतिः १०. १५. ४१.

अहमस्मि खलान्तकः सदैव ध्रुवमग्रेऽपि खलान्तको भवेयम् । अभिधा तु सदर्थिकाऽद्य जातेत्यलमानन्दयुगाययौ व्रजं सः ॥ ५१॥

तमितिः १०. १५. ४२.

दुरध्वखलनाशनं सुजनकामसम्पूरणं व्रतद्वयमहर्निशं लसति चारु दीनप्रभो ।
विभाव्य मनसेति ता युवतयस्तमभ्यर्चयन् स्वकामपरिपूर्तये सपदि दर्शिताद्यव्रतम् ॥ ६० ॥

जनन्युपहृतमिति : १०. १५. ४६.

मातृव्यपदेशजुषोऽप्यासीत् स्तनविषमिहामृतं किमुत । मात्रार्पितमद्धाऽमृतमिति तद्बुभुजेऽग्रकार्यदृक् स मुदा ॥ ६१ ॥

विलक्षणचमत्कृतिं भववने विधाय क्षणादनन्तविषयोदयं रसमथानुभूयाऽतुलम् ।
सुगोकुलकृतादरो भवति यो नु तस्य प्रिया सुभुक्तिरथ सुप्तिरप्यभवदीशकृत्या स्फुटम् ॥ ६२ ॥

राममृते इति : १०. १५. ४७.

अस्मिन्नहन्येष नीतो यदि सह विपिनं गोपवद्वारिपश्चेद्योगो भ्रश्यत्प्रयोगो मम भुवि भविता यरतदुज्जो वनार्थः ।
जीर्णं तद्वा न पीतं यदि तदपि तदन्वेषणे बद्धकक्षो भूयात्कुर्याच्च सद्योऽमृतमयमुदकं यामुनं शिक्षिताहिः ॥ ६३ ॥

गोगोपजीवनमथा–ऽहिनिरासपूर्वं यद्यामुनाम्बुविमलीकरणं च कार्यम् ।
सङ्कलितं भुवि मया तदिदं न सिद्ध्येदित्यच्युतो वनमगात्स विनैव रामम् ॥ ६४ ॥ (युग्मम्)

अहंकृत्या प्रकृत्याऽयं भुजङ्गेशो मदग्रजः । भुजङ्गाधमशिक्षायामहमेकोऽलमित्यगात् ॥ ६५ ॥

स्वप्रेयसीहार्दरसान्तरङ्गकेलिं न कुर्याद् गुरुसन्निधाने । भुजङ्गभोगं विमलश्चिकीर्षुर्ययौ विना राममितीव कृष्णः ॥ ६६ ॥

रामः शेषावतारो यदि स निजजन–त्राणजाताभिलाषस्तन्न स्यादस्य दण्डः कथमपि दुरहेर्दूषिताशेषवारः ।
इत्यालोच्यैव मन्ये प्रभुरखलसुहृद् गोकुलानन्ददायी हित्वा रामं जगामाधिकरुचिविपिनं कालियोन्मर्दनेऽह्नि ॥ ६७ ॥

स्वशत्रुर्यदि स्वीयमित्रानुयोगी तदा तत्समक्षं न शिक्षा विधेया ।
प्रभो लोकनीतिं विभाव्यैव यातो भवानेक एवाऽह्नि तत्रेति युक्तम् ॥ ६८ ॥

अद्यशेषा वयमिह यास्यामो गोधनानि पालयितुम् । इत्यच्युतस्य वचनं शृण्वन् प्रायोऽवसद् गृहे रामः ॥ ६९ ॥

जलं पपुरिति : १०.१५.४८.

आगोपमाबुधमिहाज्ञसुविज्ञसीमे ख्याते तयोर्विशदभावमनायि पूर्वा ।
गोपैः प्रपीतविषदुष्टजलैः परा तु श्रीशेन यत्तृडुदयो निखिलेषु तुल्यः ॥ ७० ॥

कृष्णप्रिया

इसके बाद कमलदललोचन भगवान् श्रीकृष्ण बड़े भाई बलरामजी के साथ व्रज में आये। उस समय उनके साथी ग्वालबाल उनके पीछे पीछे चलते हुए उनकी स्तुति करते जाते थे। क्यों न हो; भगवान् की लीलाओं का श्रवण-कीर्तन सबसे बढ़कर पवित्र जो है ॥ ४१ ॥ उस समय श्रीकृष्ण की घुँघराली अलकों पर गौओं के खुरों से उड़-उड़कर धूलि पड़ी हुई थी, सिरपर मोरपंख का मुकुट था और बालों में सुन्दर सुन्दर जंगली पुष्प गुँथे हुए थे। उनके नेत्रों में मधुर चितवन और मुखपर मनोहर मुसकान थी। वे मधुर-मधुर मुरली बजा रहे थे और साथी ग्वालबाल उनकी ललित कीर्ति का गान कर रहे थे। वंशी की ध्वनि सुनकर बहुत सी गोपियाँ एक साथ ही व्रज से बाहर निकल आयीं। उनकी आँखे न जाने कब से श्रीकृष्ण के दर्शन के लिए तरस रही थी ॥ ४२ ॥ गोपियों ने अपने नेत्ररूप भ्रमरों से भगवान् के मुखारविन्द का मकरन्द-रस पान करके दिनभर के विरह की जलन शान्त की। और भगवान् ने भी उनकी लाजभरी हँसी तथा विनय से युक्त प्रेमभरी तिरछी चितवन का सत्कार स्वीकार करके व्रज में प्रवेश किया ॥ ४३ ॥ उधर यशोदामैया और रोहिणी जी का हृदय वात्सल्यस्नेह से उमड़ रहा था। उन्होंने श्याम और राम के घर पहुँचते ही उनकी इच्छा के अनुसार तथा समय के अनुरूप पहले से ही सोचसँजोकर रक्खी हुई वस्तुएँ उन्हें खिलायीं पिलायीं और पहनायी ॥ ४४ ॥ माताओं ने तेल-उबटन आदि लगाकर स्नान कराया। इससे उनकी दिनभर घूमने फिरने की मार्ग की थकान दूर हो गई। फिर उन्होंने सुन्दर वस्त्र पहनाकर दिव्य पुष्पों की माला पहनायी तथा चन्दन लगाया ॥ ४५ ॥ तत्पश्चात् दोनों भाइयों ने माताओं का परोसा हुआ स्वादिष्ट अन्न भोजन किया। इसके बाद बड़े लाड़–प्यार से दुलार-दुलार कर यशोदा और रोहिणी ने उन्हें सुन्दर शय्यापर सुलाया। श्याम और राम बड़े आराम से सो गये ॥४६॥ भगवान् श्रीकृष्ण इस प्रकार वृन्दावन में अनेकों लीलाएँ करते। एक दिन अपने सखा ग्वालबालों के साथ वे यमुनातटपर गये। राजन्! उस दिन बलरामजी उनके साथ नहीं थे ॥ ४७ ॥ उस समय जेठ–आषाढ़ के घाम से गौएँ और ग्वालबाल अत्यन्त पीड़ित हो रहे थे। प्यास से उनका कण्ठ सूख रहा था। इसलिये उन्होंने यमुनाजी का विषैला जल पी लिया ॥ ४८ ॥

विषाम्भस्तदुपस्पृश्य [1]दैवोपहतचेतसः । निपेतुर्व्यसवः सर्वे सलिलान्ते कुरूद्वह ॥ ४९ ॥
वीक्ष्य तान् वै तथाभूतान् कृष्णो योगेश्वरेश्वरः । ईक्षयामृतवर्षिण्या स्वनाथान् समजीवयत् ॥ ५० ॥
ते सम्प्रतीतस्मृतयः [3]समुत्थाय जलान्तिकात् । आसन् सुविस्मिताः सर्वे वीक्षमाणाः परस्परम् ॥ ५१ ॥
अन्वमंसत तद् राजन् गोविन्दानुग्रहेक्षितम् । पीत्वा विषं परेतस्य पुनरुत्थानमात्मनः ॥ [4]५२ ॥

इति श्रीमद्भागवते महापुराण पारमहंस्यां संहितायां दशमस्कन्धे धेनुकवधो नाम पञ्चदशोऽध्यायः ॥ १५ ॥

कर्दमक्षमा

अन्वयः—कुरूद्वह दैवोपहतचेतसः तद् विषाम्भः उपस्पृश्य सर्वे सलिलान्ते व्यसवः निपेतुः ॥ ४९ ॥ योगेश्वरेश्वरः कृष्णः स्वनाथान् तथाभूतान् तान् वै वीक्ष्य अमृतवर्षिण्या ईक्षया समजीवयत् ॥ ५० ॥ सम्प्रतीतस्मृतयः ते जलान्तिकात् समुत्थाय सर्वे परस्पर वीक्षमाणाः सुविस्मिताः आसन् ॥ ५१ ॥ राजन् विष पीत्वा परे तस्य आत्मनः पुनरुत्थानं तत् गोविन्दानुग्रहेक्षितम् अन्वमंसत ॥ ५२ ॥

इति पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

संप्रति सद्य एव इता प्राता स्मृतिर्यैस्ते संप्रतीतस्मृतयः । यद्वा सम्यक्प्रतीता प्रतिप्राता स्मृतिर्यैस्ते तथेति ॥ ५१-५२ ॥

इति श्रीमद्भागवते महापुराणे दशमे पूर्वार्धे टीकायां पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् दुष्टम् । विषेण युतमंभो विषांभो मध्यपदलोपी समासः । दैवोपहतचेतसः दिष्टनाशितज्ञानाः । सलिलांते जलनिकटे । कृष्णकृपया कुरुवंशेऽपि दुर्योधनदत्तविषेण भीमो जलांते पतित्वा यथोत्थितस्तथेमेऽप्युत्थास्यंतीति बोधयितुं संबोधयति महामुनिः-कुरूद्वहेति ॥ ४९ ॥ तान् गोगोपान् । तथाभूतान् गतप्राणान् । स्व आत्मैव नाथो येषां तान् । मृतसंजीवनं तु योगिनोऽपि, स तु योगेश्वरेश्वर इति नात्राद्भुतमिति भावः । ईक्षया दृष्ट्या ॥५०॥ आद्यसमासे क्लिष्टकल्पनां मन्वानः समासांतरमाह—यद्वेति । स्मृतिरत्र 'अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ' इति गर्गाचार्यवचनस्मरणम् । केनापीदमुक्तं वचनं तेन सर्वैर्ज्ञातं श्रीकृष्णेनैव पुनर्जीविता वयमिति ॥ ५१ विषं सविषं जलम् । विषं विद्यतेऽत्रेति मत्वर्थीयोऽच्प्रत्ययः । परेतस्य मृतस्यात्मनः यत्पुनरुत्थानं तद्गोविंदानुग्रहेक्षितम् । अन्वमंसत ज्ञातवंतः । हे राजन्निति भवादृशामेतद्युक्तमिति भावः । यथा त्वमात्मनोश्वत्थामास्त्रहतस्य पुनरुज्जीवनं कृष्णानुग्रहं मनुषे तथा तेऽपीति भावः ॥ ५२ ॥ अत्र धेनुकवधलीलायां श्रुतिमाह—"समिद्र गर्दभं समृण" इति । अर्थः—हे इन्द्र गर्दभं तद्रूपं धेनुकं समृण मारयेत्यर्थः ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एतच्च सर्वं श्रीभगवतो भाविलीलाविशेषाधिष्ठातृशक्तिवैभवमेवेत्याह देवो भगवान् तस्येदं दैवं लीलाशक्तिवैभवं तेन उपहतं ज्ञानं येषां त इति तदुक्तं ईशचेष्टित इति वक्ष्यते च श्रीकृष्णेनाद्भुतकर्मणेति उपस्पृश्य किञ्चिदाचम्य विषाम्भ इति पुनरुक्तिस्तद्विशेषविवक्षया व्यसव इवात्र च तादृशदैवमेव कारणम् ॥ ४९ ॥ वै एव ईक्षणेत्यविलम्बं बोधयति, यतः स्वनाथान् अनन्यगतीन् अत एवामृतवर्षिण्या प्राकृतानां प्राकृतममृतमिव तेषां तदीयानामेकं जीवनहेतुं कारुण्यं वर्षितुं शीलं यस्याः । यद्वा, अमृतं तादृशं कारुण्याश्रुजलं तद्वर्षिण्या यथोक्तं द्वितीये "यद्वै व्रजे व्रजपशून् विषतोयपीतान् पालानजीवयदनुग्रहदृष्टिवृष्ट्या" इति सम्यक् ग्लानिशोकादिनिरासेन युगपदेवाजीवयत् स्वस्थानकरोत् तादृशी च शक्तिर्न कृत्रिमा किन्तु स्वाभाविक्येत्याह—योगेश्वरेश्वर इति । यदुपासनाविशेषेणैव योगेश्वराणामपि तत्तच्छक्तिरित्यर्थः ॥ ५० ॥ सुविस्मिताः सुषुप्तेरिव सर्वेषामेकदैव सद्यः समुत्थानात् परस्परं वीक्षमाणा इत्यन्तविस्मयस्वभावात् ॥ ५१ ॥ गोविन्दस्य गोकुलेन्द्रस्यानुग्रहेक्षितमन्वमंसत अनुमितवन्तः यद्वा विषं पीत्वा परेतस्यात्मनः पुनरुत्थानम् इति एतेप्यघासुरादात्मनां मोक्षणमनुस्मृत्वेति ज्ञेयम् । हे राजन्निति भवादृशामेतद्युक्तमेवेति भावः ॥५२॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां पञ्चदशोऽध्यायः ॥ १५ ॥

---

१. तदैवोपहत—वीर. । २. मूर्च्छिता वै—वीर. विज. । ३. उत्थाय च—वीर. विज. । ४. बालक्रीडायां पञ्चदशोऽध्यायः—गो. प्रे. टी.; अन्यत्र 'पूर्वार्धे' पाठो दृश्यते ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ यानानन्तरमेवेति विचारादिकं निरस्तम्, यद्वा, भिन्नोपक्रमेऽथशब्दः, महार्त्तिवार्त्तोरसत्तेः। चकाराभ्यामुभयेषामपि प्राधान्यं बोध्यते, सर्वेषामेकदैव सहपानात्, अन्यथा प्राक् कृतपानानां केषाञ्चिदनर्थापत्त्या पश्चादन्येषां तत्र प्रवृत्त्यसम्भवात्। ननु, कृष्णं विना ते कुतो जलं पपुः ? तत्राह, निदाघेति। अत एव तृषार्त्ता इति। दुष्टत्वे कारणमाह–विषदूषितमिति ॥ ४९ ॥ एतच्च श्रीकृष्णं विना जलपानं तेषां निदाघातपपीडितत्वादिकञ्च सर्वं कालियनिःसारणार्थं श्रीभगवदिच्छयैवेत्यग्रे व्यक्तं भावि। अत एवाह—दैवेन देवस्य भगवतो मनोभावेन, कालियस्य दैवेन वा, उपहतं चेतो ज्ञानं येषां ते इति अत एवोपस्पृश्य किञ्चिदाचम्य किंवा समीपे स्पृष्ट्वैव। एवं तद्विशेषविवक्षयोक्तगोषन्यायेन विषान्त इत्यादेः पुनरुक्तिः, किं वा निपातादौ तदेकहेतुताविवक्षया सर्वे गोगोपाश्च, सलिलस्य तस्यान्ते समीप एव, यद्वा, स्वरूपेऽन्तशब्दः सलिल एवेत्यर्थः। दुर्विषजलपानेन सद्यस्तत्रैव निपतनादन्यत्र गन्तुमशक्तेर्व्यसव एव। एतदन्यच्च वक्ष्यमाणमशेषं श्रीभगवतोऽद्भुतचेष्टितत्वमित्यूह्यम्, अद्भुतकर्म्मणेत्यन्ते वक्ष्यमाणत्वात्। तच्च तत्रैव विस्तार्य्यम्। कुरूद्वह हे कुरुकुलनन्दनेति विषीदन्तं राजानं सान्त्वयति ॥ ५० ॥ तान् सर्वान् तथाभूतान् तादृगवस्थागतान्, स्पष्टानुक्तिरमंगलस्य पुनरतिव्यञ्जनायोग्यत्वात् स्नेहभरोदयाद्वा, वै एव। वीक्ष्यैवेत्थमविलम्बं बोधयति, यतः स्वनाथाननन्यगतीन् एवामृतवर्षिण्या दृष्ट्या परमस्नेहावलोकनेनेत्यर्थः। अन्यथेच्छामात्रेणापि तदसिद्धेः। सम्यक् ग्लानिशोकादिनिरासेन युगपदेवाजीवयत् स्वस्वस्थानकरोत्; यतः कृष्णो व्रजजनैकबन्धुः परदुःखकातरो वा। एतच्चाद्भुतं न स्यादित्याह—योगेश्वराणामीश्वर इति तदीयशक्त्यांशगन्धेनैव योगेश्वराणामपि तत्तच्छक्तेरित्यर्थः, यद्वा, योगेश्वरानपि परिपालयति किमुत तान् व्रजजनानिति भावः ॥ ५१ ॥ सुविस्मिताः सुषुप्तेरिव सर्वेषामेकदैव सद्यः समुत्थानात्, परस्परं वीक्षमाणा इत्यत्यन्तविस्मयस्वभावात्, सर्वेषामैकमत्यर्थं वा ॥ ५२ ॥ गोविन्दस्य गोकुलेन्द्रस्यानुग्रहेणेक्षितं स्वीकृतम्, किंवा ईक्षेक्षणं तत्कृतमित्यर्थः। यद्वा, तदेककारणत्वविवक्षयाभेदोपचारः—ईक्षितमीक्षणमेवोत्थानममन्यत। हे राजन्निति भवादृशानां भागवतोत्तमानां श्रीभगवदनुग्रहं विनात्ममंगले कारणान्तरमननाद् यथा भवत्प्राणने श्रीयुधिष्ठिरादीनामिति भावः ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीशीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषिण्यां
श्रीदशम-टिप्पण्यां पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तद्विषोदकमुपस्पृश्य दैवोपहतचेतसः मूर्च्छिता व्यसवः प्राणव्यापाररहिताः हे कुरूद्वह ! निपेतुः तथाभूतान् मूर्च्छितान् पतितांश्च तान् दृष्ट्वाऽमृतसञ्जीवनादियोगनिर्वाहकः कृष्णः स्व आत्मैव नाथो रक्षको येषां तानमृतवर्षिण्या ईक्षया दृष्ट्या समजीवयत्सचेतनान् करोति स्म ॥ ४९-५० ॥ ताश्च ते च ते "पुमान्स्त्रिया" [१।२।६७] इत्येकशेषः गावो गोपाश्च संप्रतीताः सम्यक्प्राप्ताः स्मृतयो यैस्तथाभूता जलान्तिकादुत्थाय परस्परं वीक्षमाणाः सुविस्मिताश्चाऽऽसन् ॥५१॥ विषं पीत्वा सम्परेतस्य मृतस्यात्मनो पपुनरुत्थानं तद्गोविन्दस्यानुग्रहेक्षणकृतममन्यत ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उपस्पृश्य आचम्य पीत्वा च ॥ ४९-५० ॥ तथाभूतान् मृतप्रायान् ईक्षया दृष्ट्या सम्प्रति स्मृतयः सम्यक् प्राप्तप्रत्यभिज्ञानाः ॥ ५१ ॥ विषं विषमिश्रजलं पीत्वा परेतस्य मृतस्यात्मनः पुनरुत्थानं गोविन्दस्यानुग्रहयुक्तनिरीक्षणकृतमन्वमंसत निरूपयन् ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां पञ्चदशोऽध्यायः ॥ ५२ ॥
(विजयध्वजरीत्या त्रयोदशः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सर्वानुपपत्तिसमाधानार्थमाह–दैवेति। देवो भगवान् तस्येदं भाविलीलाशक्तिः वैभवं दैवं व्यसन इव अत्र च तादृशदैवमेव कारणं ज्ञेयम् ॥ ४९-५१ ॥ पुनरुत्थानं गोविन्दानुग्रहेक्षितं तद्धेतुकमन्वमंसत ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दैवो भगवांस्तस्येदं दैवं लीलाशक्तिवैभवं तेनोपहतबुद्धयः व्यसव इति लीलासौष्ठवार्थं योगमाययैव नित्यानामपि तेषाम-प्राणच्छाय तथा दर्शनात् ॥ ४९-५० ॥ ते जलान्तिकात्समुत्थाय सुविस्मिता इति मृता एव वयं केन जीविताः केनाप्यौषधेन

विषहरमन्त्रेण वा परस्परमिति सखे ! किन्त्वमेतद्रहस्यं जानासीति प्रत्येकं प्रश्नात् एवं महासन्देहे प्रवर्त्तमाने भो वयस्या आं मयैवैतत्कारणम् "अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ" इति गर्गाचार्य्यवचनस्मरणात् सम्यगवगतमिति केनाप्युक्ते सति सर्वे एव सम्यक् प्रकारेण प्रतीता प्रतीतविषयीकृता स्मृतिस्तदीया यैस्तथाभूता आसन्नित्यन्वयः ॥ ५१ ॥ अनु अनन्तरमैकमत्येन व्रजेष्टदेव-श्रीनारायणेनाविष्टय गोविन्दस्य अनुग्रहेक्षितमेव कारणममंसत यस्मात् पीत्वा विषमित्यादि ॥ ५२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमेऽस्मिन् पञ्चदशः सङ्गतः सङ्गतः सताम् ॥ १५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ताः गावश्च ते गोपाश्च तथा ते "पुमान् स्त्रिया" (१।२।६२) इत्येकशेषः सम्यक् प्राप्ताः स्मृतयो यैस्ते तथा ॥ ५१-५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चदशाध्यायार्थप्रकाशः ॥ १५ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अथ गाव इति तृष्णार्त्तत्वाद्द्रुतगमनाः पश्चात् शनैरायान्तं कृष्णमनपेक्ष्य तस्या जलं पपुः ॥ ४९ ॥ देवस्य कृष्णस्य इदं दैवं तल्लीलाशक्तिवैभवम् । वासव इति तद्वैभवेनैव तल्लीलासिद्धये तदसूनां मूर्च्छिततद्विधानात् बलभद्रधीमोहवत् ॥ ५० ॥ समजीवयत् सुस्थप्राणान् व्यधात् ॥ ५१ ॥ ते सर्वे सुस्थाः केनास्माकं स्वास्थ्यं कृतमिति परस्परं वीक्षमाणाः सम्प्रतीताः सम्यक् प्रतीतिविषयीकृताघाहिवर्यस्मृतिर्यैस्तादृशाः सन्तः सुविस्मिता आसन् ॥ ५२ ॥ अनु अनन्तरं गोविन्दानुग्रहेक्षितं तदमंसत किं तदित्याह पीत्वेति परेतस्य मूर्च्छितप्राणस्य ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतश्रीवैष्णवानन्दिन्यां पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

देवोपहतचेतसस्तद्विषाम्भ उपस्पृश्याचम्य पीत्वा च निपेतुर्व्यसवस्तत्प्राया मूर्छा सञ्जातैषामिति ते तथा विषं जलधरैः पीतं मूर्छिताः पथिकाङ्गना इत्याद्युदाहृत्याकरे विस्तरत उपपादितोपपत्तिर्ज्ञेया ॥ ४९ ॥ अमृतवर्षिण्या वीक्षया कटाक्षेण ॥ ५० ॥ सम्प्रति तत्काले इताः स्वान्प्राप्ताः स्मृतिर्येषां ते तथा ॥ ५१ ॥ विषं पीत्वा परेतस्य तत्प्रायस्य गोपजनस्यात्मनः पुनरुत्थानं यत्तद्गोविन्दानुग्रहेक्षितमनुग्रहाद्दर्शितमन्वमंसत व्यजानन् ॥ ५२ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीसुबोधिनी

पानफलमाह **विषाम्भ** इति, **उपस्पर्शनं** पानस्नानादिकं स्पर्शमात्रं वा, तावतैव सर्वे **व्यसवः सलिलान्त** एव **निपेतुः**, ननु तेषां जीवनादृष्टस्य विद्यमानत्वात् कथं व्यसवो जाताः ? तत्राह **दैवोपहतचेतस** इति, तेषां हि तावदेव जीवनादृष्टमतो दैवेनैवो**पहतचेतसः**, **सलिलसमीपे**ऽर्धजल एव **निपेतुः**, यद्यपि दोषो दूरीकृतो धेनुकवधेन तथापि पूर्वसन्ततिरपि दूरीकर्तव्या, **दृष्टेनैव हि दोषाणां नाशो भवत्य**लौकिकसुकृतेन च दिव्यभावोत्पत्तिः, विश्वासार्थं सम्बोधनम् ॥ ४९ ॥ ततो भगवत्कृत्यमाह **वीक्ष्येति**, स्वभावतोपि जानाति तथापि **क्रीडायां साधनं वक्तव्यमिति योगेश्वरेश्वर** इत्युक्तं, **योग**स्यापि नियन्ता, **योगेन हि सर्वेषां ज्ञानं भवति**, तत्राप्ययं नियामकः, किं पुनः स्वज्ञाने वक्तव्य इत्यर्थः, **योगेश्वराणामपीश्वर** इत्युपदेष्टॄणामप्ययं नियामक उक्तः, तत्र हेतुः **कृष्ण** इति, सदानन्दः, तान् निरोधार्थमानीतान् **वै** निश्चयेन तथाभूतान् न तु मूर्च्छितान् स्वयमागत्य वीक्ष्य वीक्षणेन नूतनदेहान् निर्मायामृत**वर्षिण्येक्षया समजीवयत्**, सर्वे हि **प्राणा मृता आधिदैविकाः**, तान् दृष्ट्यैवानीय तेषु देहेषु वर्षति स्म, नन्वेतावत्करणे को हेतुः ? तत्राह **स्वनाथा**निति, **सम्यगजीवय**दिति, पुनर्विषसम्बन्धेपि न तेषां काचित् क्षतिः ॥ ५० ॥ तेषां पूर्वस्माद् वैलक्षण्यं तद्रूपतां च प्रतिपादयति **त** इति, **त एवै**ते जीवाः, सम्यक् **प्रतीता स्मृति**र्येषां, अनुसन्धानं प्राप्तमेव भवति परं सर्ववृत्तान्तपुरःसरं न भवतीत्याधिदैविकभावमापन्नाः सर्वे स्मृतियुक्ता जाताः, अतः **समुत्थाय** जलसमीपं परित्यज्य प्रदेशान्तरं गताः **सुविस्मिता** जाताः, एतावान् भावो **भगवता विशेषः** कारितोतो **विस्मयो** भगवद्भावस्य निवृत्तत्वात् ततः **सर्वे परस्परं वीक्षमाणा** प्रत्येकमुद्बोधका इव जाताः ॥५१॥ अत एवोद्बुद्धज्ञानाः पूर्वसिद्धं सर्वमेव ज्ञातवन्त इत्याहा**न्वमंस**तेति, स्वयमेवानुमानं कृतवन्तः, प्रायेणैवं भविष्यतीत्युत्प्रेक्षितवन्तः, भगवद्वैभवस्याप्रत्यक्षत्वात्, **राजन्निति** स्नेहसम्बोधनं, **तदग्रे** वक्ष्यमाणं, **गोविन्दस्यानुग्रहेणेक्षणं** यत्रेति तज् ज्ञातवन्तः, तदाह **विषं पीत्वा परेतस्यात्मनः** स्वस्य **पुनरुत्थान**मिति, **भगवत्कृपावीक्षणेनैव** जातमिति ज्ञातवन्त, **एवं ज्ञानपूर्णो देहस्तैः** प्राप्त इति प्रथमो निरोधो निरूपितः ॥ **५२** ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वादशाध्यायविवरणम् ॥ १२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

वीक्ष्य तानित्यत्र **योगेश्वरश्चासावीश्वरश्चे**तिकर्मधारयो **योगेश्वराणामीश्वर** इतिषष्ठीतत्पुरुषो वा, तत्र प्रथमपक्ष ईश्वरत्वेन सर्वहितकर्तृत्वं च द्वितीयपक्षे **योगेश्वराणां** ब्रह्मसुखानुभवयोग्यतावत्त्वात् सुखस्य चैतदधीनत्वादीश्वरत्वमित्यभिप्रायेणाहुस्तत्रेत्यादि ॥ ५० ॥ **त** इत्यत्र **प्राप्तमेव भवतीति** देहान्तरप्राप्तावपि स्तनपान इष्टसाधनत्वज्ञानवदित्यर्थः, विस्मये हेतु**र्भगवदिति** ॥ ५१ ॥ अयं चैश्वर्याध्याय इत्यस्मिन्नध्याय ऐश्वर्यलीला तच्चैश्वर्यं प्रथमश्लोक एव कौमारपौगण्डादिकालाभिमानिनां भगवत्सेवार्थमागतत्वेन व्याख्यानाद् द्योतितमग्रे च भगवता बलदेवे स्वधर्मबोधनात् समाप्तौ च गोगोपानां स्वदृष्ट्या जीवनाच्च मूल एव स्फुटीकृतं बोध्यम् ॥ ५२ ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धश्रीसुबोधिनीटिप्पण्योः प्रकाशे द्वादशाध्यायविवरणम् ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

विषाम्भ इत्यत्र **पर्वसन्तति**रिति देहाध्यासस्य निवृत्तत्वाद् देहान्तरं तु नोत्पत्स्यते परन्तु पूर्वं जाता या स्थूलदेहरूपा लिङ्गशरीरस्य सन्ततिः सापीत्यर्थः, **अलौकिकसुकृतेने**ति ततः प्रतिफलितेन भगवत्कृतेनेत्यर्थः, तादृशानामेव साधकत्व 'मेघगम्भीरया वाचे'त्यत्र व्युत्पादितम् ॥ ४९ ॥ **वीक्ष्ये**त्यत्र **सर्वे हि प्राणा** इति जीव प्राणधारण इति धातोरिति भावः, **आधिदैविका** इति आसन्यरूपा भगवदर्थकोद्गानकर्तार इत्यर्थः, इदं 'वेधाद्यर्थभेदा'दित्यधिकरणे सम्यग् व्युत्पादितं, तेषु देहेष्विति नूतनलिङ्गकेष्वित्यर्थः ॥ ५० ॥ **त** इत्यत **अत** इति सर्वस्मृतियुक्तत्वादित्यर्थः, एतस्य **सुविस्मिता** इत्यनेनान्वयः, मध्ये स्वरूपकथनं, अत्र पञ्चम्युक्त्या जलान्तिकात् समुत्थाय अन्यत्र गत्वेत्येवमर्थ उक्तः, **एतावानि**ति तनुनवत्वरूपो भाव इत्यर्थः, **अत** इति कार्यस्य दृष्टत्वात् कारणस्य चाज्ञानात् कुत इदं जातमिति विस्मय इत्यर्थः कारणाज्ञाने हेतुमाहुः **भगवद्भावस्ये**ति, अलौकिकदेहाः सत्यज्ञानानन्दरूपा इति फलाध्याये निरूपितं, भगवता भक्तिमार्गीयलीलासिद्ध्यर्थं तेषां तत्त्वं निवर्तितं हस्तपिहितमिव कृतमतोऽज्ञानमित्यर्थः, अग्रिमश्लोके उत्प्रेक्षां वक्ष्यति तन् न याथार्थ्यज्ञानमिति भावः ॥ ५१ ॥ **अन्वमंसते**त्यत्र 'अन्वमंसते'त्यस्योत्प्रेक्षापरत्वेन व्याख्याने हेतुमाहुः **भगवद्वैभवस्ये**ति, भगवत्त्वस्य निवृत्तत्वेन 'नूतनदेहान् निर्माये'त्यादिनोक्तस्य भगवद्वैभवस्याप्रत्यक्षत्वादनुग्रहेक्षणहेतुकत्वानुमितिर्न सम्भवतीत्युत्प्रेक्षाया एवानुमितित्वमुक्तं 'परोक्षज्ञानस्यैवानुमानत्वमिति ब्रह्मवाद' इत्युत्वात् ॥ ५२ ॥

इति द्वादशाध्यायः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यैर्जलं न पीतं ते तद्विषयुक्तमम्भ उपस्पृश्य स्नानाचमनादिकं कृत्वाऽपि सर्वे व्यसवः प्राणरहिताः सलिलस्यान्ते तीरे निपेतुः । पानकर्तॄणां पतनं त्वर्थसिद्धमेव ज्ञेयम् । 'तन्निकटनिवासिनां दुष्टत्वज्ञानस्यावश्यकत्वान्मरणभयस्य तत्पानप्रतिबन्धकत्वाच्च कुतस्तत्पानम् ?' इत्यत आह—**दैवे**ति । दैवेन प्रारब्धविशेषेण उपहतं मोहितं चेतो येषां ते ॥४९॥ कृष्णस्तान् गोगोपान् तथाभूतान् निर्गतप्राणत्वेन पतितान् अमृतवर्षिण्या ईक्षया वीक्ष्य समजीवयदित्यन्वयः । तत्र हेतुमाह—स्वनाथानिति । स्व एव नाथो रक्षकः स्वामी येषां तान् । रक्षायां सामर्थ्यमाह—योगेश्वरेश्वर इति । यद्दत्तसामर्थ्येन योगेश्वरा अपि जीवयितुं समर्थास्तस्य तत्र सामर्थ्ये किमाश्चर्यमित्याशयः ॥ ५० ॥ सम्प्रति सद्य एव इता प्राप्ता स्मृतिर्यैस्ते सम्प्रतीतस्मृतयः, यद्वा सम्यक् प्रतीता प्रतिप्राप्ता स्मृतिर्यैस्ते सर्वे गवादयो जलान्तिकात् जलसमीपात् समुत्थाय परस्परं वीक्षमाणाः सुविस्मिता आसन्नित्यन्वयः ॥ ५१ ॥ विष पीत्वा परेतस्य मृतस्यात्मनः स्वदेहस्य पुनरुत्थानं तत् हे राजन् ! गोविन्दस्य अनुग्रहेक्षितमनुग्रहेक्षणकृतमन्वमंसतेत्यन्वयः ॥ ५२ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने ॥ गतः पञ्चदशो वृक्षस्तुल्यादिविनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

विषाम्भ इति ॥ हे कुरूद्वह ! जलेन पीतेऽपि दैवेन प्रारब्धविशेषेण उपहतं मोहितं चेतो येषां ते तद्विषयुक्तमम्भ उपस्पृश्य स्नानाचमनादिकं कृत्वापि सर्वे व्यसवः प्राणरहिताः सलिलस्यान्ते तीरे निपेतुः ॥ ४९ ॥ वीक्ष्येति ॥ योगेश्वराणामपीश्वरः कृष्णः स्वनाथान् स्व एव नाथो येषां तान् गोपान् तथाभूतान् निर्गतप्राणत्वेन पतितान् वीक्ष्य अमृतवर्षिण्या ईक्षया समजीवयत् ॥ ५० ॥ त इति ॥ सम्प्रति सद्य एव इता प्राप्ता स्मृतिर्यैस्ते संप्रतीतस्मृतयः । यद्वा । सम्यक् प्रतीता प्रतिप्राप्ता स्मृतिर्यैस्ते सर्वे गवादयो जलान्तिकात् जलसमीपात् समुत्थाय परस्परं वीक्षमाणाः सुविस्मिताः आसन् ॥ ५१ ॥ अन्वमंसतेति ॥ हे राजन् ! ते गोगोपाः विषं पीत्वा परेतस्य मृतस्यात्मनः स्वदेहस्य पुनरुत्थानं तत् गोविन्दस्य अनुग्रहेक्षितमनुग्रहेक्षणकृतमन्वमंसत ॥ ५२ ॥

इति श्रीमद्भागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायां पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तद्विषांभः विषमिश्रं जलमुपस्पृश्य पीत्वा सलिलांते जलसमीपे ॥४९॥ योगानां समग्रसुखोपायानां ईश्वरास्तेषां नियामकाः यद्वा योगेश्वराणां समग्रसिद्धिनियामकानामीश्वरो नियंता ॥ ५० ॥ संप्रतीतस्मृतयः सद्य एव संप्राप्तदेहदैहिकज्ञानाः ॥ ५१ ॥ विषं विषमिश्रं जलं पीत्वा परेतस्य मृतस्य आत्मनः गोपानामचेतनदेहसमूहस्य यत्पुनरुत्थानं तत् गोविंदानुग्रहेण ईक्षितं यथा तथा गोपाः अन्वमंसत ॥ ५२ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कंधव्याख्याने धेनुकवधो नाम पञ्चदशोऽध्यायः ॥ १५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विषाम्भ इति ॥ हे कुरूद्वह परीक्षित्, तत् विषाम्भो विषोदकं, उपस्पृश्य पीत्वा, तदैव दैवेनोपहतानि चेतांसि येषां ते, मूर्च्छिता इत्यर्थः । व्यसवः प्राणव्यापाररहिताः, सर्वेऽपि, सलिलांते जलसमीपप्रदेशे, निपेतुः ॥ ४९ ॥ वीक्ष्येति ॥ योगेश्वरेश्वरः मृतसंजीवनादियोगनिर्वाहकः, कृष्णः, तान् तथाभूतान्, मूर्च्छितान् पतितांश्चेत्यर्थः । वीक्ष्य वै दृष्ट्वैव, स्व आत्मैव नाथो रक्षको येषां तान्, अमृतवर्षिण्या ईक्षया दृष्ट्या, समजीवयत् सचेतनान् करोति स्म ॥ ५० ॥ त इति ॥ ताश्च ते च ते, पुमान् स्त्रिया' इत्येकशेषः गावो गोपाश्चेत्यर्थः । संप्रतीताः सम्यक् प्राप्ताः स्मृतयो यैस्तथाभूताः सन्तः, जलान्तिकात् सलिलस्य समीपप्रदेशात्, समुत्थाय, परस्परं, वीक्षमाणाः सन्तः, सर्वेऽपि सुविस्मिताः, आसन् ॥ ५१ ॥ अन्वमंसतेति ॥ हे राजन्, विषं पीत्वा, परेतस्य, मृतस्य, आत्मनः स्वस्य, पुनः यत्, उत्थानं जीवनं, तत् गोविन्दानुग्रहेक्षितं श्रीकृष्णानुग्रहेक्षणकृतं, अन्वमंसत अमन्यन्त ॥ ॥ ५२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

समजीवयदितिः १०.१५.५०.

जानन्तोऽपि भवापगां विषजलां जाग्रत्कृतान्तोरगां पश्यतोऽपि तदङ्गसङ्गविगतप्राणानपि प्राणिनः ।
तत्संसक्तधियो भवन्ति च पुनर्मोहात्तथा तद्भुजस्तादृक्षा अपि ये मदङ्घ्रिशरणास्तान् जीवयाम्यन्वहम् ॥ ७१ ॥
एतद्द्वयं जगति सूचयताऽच्युतेन गो-गोपजातकृत-तद्विषवारि-पानम् ।
नैव न्यषेध्यथ च तत्क्षण एव तेषा-मुज्जीवनं सदयया विहितं स्वदृष्ट्या ॥ ७२ ॥ (युग्मम्)
स एव मनुजो निजान् भृशमनिष्टदात्कर्मणो निवारयति यस्तदुत्थितफलोपाशान्त्यक्षमः ।
अचिन्त्यचरितस्त्वयं प्रभुरकुण्ठशक्तिस्तदा यदा स परमोचितं तदपि वीक्ष्य तूष्णीं स्थितः ॥ ७३ ॥
यस्त्वद्भक्तो मृत्युरस्मादपैतीत्येतत्सत्यं मातृवाक्यं विधास्यन् ।
गोगोपालोज्जीवनं तत्प्रमाणं स्पष्टं चक्रे भक्तकल्याणकर्ता ॥ ७४ ॥
बहुतृषोऽपि गवावनतत्परा अपि मदङ्घ्रिरता यदि तानहम् । अविरतं वनतो वत जीवयाम्यकृततत्कृतितः स्फुटमच्युतः ॥ ७५ ॥
गोविन्ददृष्ट्यमृतवृष्टिपरिप्लुतानामग्रेऽहमस्मि भुवनेषु विरूपमेव ।
कुर्वन् स्वनामविशदं विषमेवमासीद् गोपेष्वसह्यमपि तत्क्षणनष्टवीर्यम् ॥ ७६ ॥
गोविन्दपूर्णकरुणा यदि तन्न कस्मादप्यत्र दुर्विषयतोऽपि विषाद्भयं स्यात् ।
स्पष्टं तु मानमिदमेव यदत्र गोपास्तेजस्विनः समभवन् भुवि पूर्वतोऽपि ॥ ७७ ॥
अनुपेक्ष्य निमेषार्धमपि यत्प्रभुणा कृतम् । गोपसञ्जीवनं तेन वात्सल्यं विशदीकृतम् ॥ ७८ ॥
श्रीशकल्पतरु० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने पञ्चदशोऽध्यायः ॥ १५ ॥

कृष्णप्रिया

परीक्षित् ! होनहार के वश उन्हें इस बात का ध्यान ही नहीं रहा था। उस जल के पीते ही सब गौएँ और ग्वालबाल प्राणहीन होकर यमुनाजी के तट पर गिर पड़े ॥ ४९ ॥ उन्हें ऐसी अवस्था में देखकर योगेश्वरों के भी ईश्वर भगवान् श्रीकृष्ण अमृत बरसाने वाली दृष्टि से उन्हें जीवित कर दिया उनके स्वामी और सर्वस्व तो एकमात्र श्रीकृष्ण ही थे ॥ ५० ॥ परीक्षित्! चेतना आने पर वे सब यमुनाजी के तट पर उठ खड़े हुए और आश्चर्यचकित होकर एक दूसरे की ओर देखने लगे ॥ ५१ ॥ राजन् ! अन्त में उन्होंने यही निश्चय किया कि हम लोग विषैला जल पी लेने के कारण मर चुके थे, परन्तु हमारे श्रीकृष्णने अपनी अनुग्रहभरी दृष्टि से देखकर हमें फिर से जिला दिया है ॥ ५२ ॥

इति पञ्चदशोऽध्यायः समाप्तः ॥ १५ ॥

* * *

अथ षोडशोऽध्यायः

श्लोकाः	अनु.	वसं.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
६७	४०	१८	६	८	२७३८	४६	३८	२८२२	८८	६

श्रीशुक[1] उवाच

विलोक्य दूषितां कृष्णां कृष्णः कृष्णाहिना विभुः। तस्या विशुद्धिमन्विच्छन् सर्पं तमुदवासयत् ॥ १ ॥

राजोवाच

कथमन्तर्जलेऽगाधे न्यगृह्णाद् भगवानहिम्। स वै बहुयुगावासं[2] यथाऽऽसीद् विप्र कथ्यताम् ॥ २ ॥

ब्रह्मन् भगवतस्तस्य भूम्नः स्वच्छन्दवर्तिनः। गोपालोदारचरितं कस्तृप्येतामृतं जुषन् ॥ ३ ॥

श्रीशुक उवाच

कालिन्द्यां कालियस्यासीद्ध्रदः कश्चिद् विषाग्निना। [3]श्रप्यमाणपया यस्मिन् पतन्त्युपरिगाः खगाः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—विभुः कृष्णः कृष्णाहिना दूषितां कृष्णां विलोक्य तस्याः विशुद्धिम् अन्विच्छन् तं सर्पम् उदवासयत् ॥ १ ॥ विप्र भगवान् कथम् अगाधे अन्तर्जले अहिम् न्यगृह्णाद् सः वै यथा बहुयुगावासं आसीत् कथ्यताम् ॥ २ ॥ ब्रह्मन् स्वच्छन्दवर्तिनः भूम्नः भगवतः तस्य गोपालोदारचरितं अमृतं जुषन् कः तृप्येताम् ॥ ३ ॥ विषाग्निना श्रप्यमाणपयाः यस्मिन् उपरिगाः खगाः पतन्ति (एवंभूतः) कालिन्द्यां कालियस्य कश्चित् ह्रदः आसीत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

षोडशे कालियस्योक्तो निग्रहो यमुनाह्रदे। तत्पत्नीभिः स्तुतेनाथ कृष्णेनानुग्रहः कृतः ॥ १ ॥

हत्वा रासभदैतेयाञ्जग्ध्वा तालफलान्यलम्। प्रीतोऽनृत्यत्फणारंगे कालियस्य कलानिधिः ॥ २ ॥

उदवासयन्निःसारितवान् ॥ १ ॥ बहूनि युगान्यावासो यस्य तमहिम्। स वै अहिरजलचरोऽपि तस्मिन्नन्तर्जले यथा येन प्रकारेणासीत् अथ वा बहूनि युगान्यावासो यथा भवति तथा येन प्रकारेण स व तत्रासीदिति कथ्यताम् ॥ २ ॥ गोपालेन यदुदारं चरितमाचरितं तदेवामृतम् अतः कथ्यतामिति ॥३॥ श्रप्यमाणं पच्यमानं पयो यस्य सः। उपरि गच्छन्तः खगा यस्मिन्पतंति ॥४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ श्रुतिप्रोक्तं कालियदमनमाह–"योहन्नहिमन्वपस्ततर्देत्यपादहस्तो अपृतन्यदिन्द्रम्" इति। अर्थस्तु–योऽहिः सर्पोऽपो यमुनाजलानि ततर्द विषसंपर्केण नाशितवान्, तमिन्द्रोऽहन् हिंसितवान् पीडनमात्रमत्र हंत्यर्थः। स चाहिरपात् पादहीनः अहस्तः श्वसन् इंद्रम् अपृतन्यत् अयोधयत। इयमेवाहिरूपत्वाद्वृत्रस्य तद्वधमप्याह। अत्रेंद्रः कृष्णस्तत्र वासव इति॥ निग्रहो दण्डः। तत्पत्नीभिः कालियभार्याभिः (१) जग्ध्वा। भुक्त्वा। अलं प्रीतोऽतिप्रीतः। फणारंगे स्फटारूपक्रीडाभूमौ। कलानां नृत्यादीनां वक्ष्यमाणानां निधिराधारः (२)। श्रीशुक इह श्रीपदेन शुको यथाज्ञातमेव वदति तथा सोऽपि व्रजजनदुःखानुसंधानेन विस्तार्य नोवाच राज्ञः श्रीकृष्णाप्रियत्वात्। कृष्णाहिना श्यामसर्पेण। कृष्णाम् यमुनाम् "कृष्णा स्याद्द्रौपदी नीली कालिन्दी मरिचेषु च। कणाद्राक्षासु भद्रासु, इति धरणिः। तस्याः कृष्णायाः। विशुद्धिम् निर्विषतोयताम् ॥१॥ सः कालियः। अगाधे तलस्पर्शे। सर्पविशेषणत्वे त्वजलचरस्य जले चिरं स्थित्यसंभवात्प्रकारान्तरमाह–अथवेति। यथा येन प्रकारेण बहुयुगावासं बहुयुगान्यावासो यत्र तद्बहुयुगावासं स्यात्तथेतीहार्थेन गृह्णाति–तेन प्रकारेणेति। तत्र कृष्णायाम्। आसीद्बभूव। इति कोर्थः स प्रकारः कथ्यताम्। हे विप्र परमविद्याप्रवीणत्वात्त्वं सर्वं जानासीति भावः। "जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते। विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियलक्षणम् ॥" इति याज्ञवल्क्यात् ॥ २ ॥ हे ब्रह्मन्निति त्वं साक्षाद्ब्रह्मरूपत्वेनान्यप्रबोधनेऽपि समर्थोऽसीति भावः। एवं श्लेषेण

---

१. बादरायणिरुवाच–गो. प्रे. टी. । २. वासो–वीर ; वासी–विज. । ३. श्रप्यमाणं पयो-गो. प्रे. टी. ।

सर्वभक्तश्रोत्रादीन्द्रियाणां च पालनेनोदारं सुखदातृ चरितमिति । स्वानां स्वस्य वा छंदेन वर्त्तितुं शीलमस्येति तथा तस्य। जुषन् सेवमानः ॥ ३ ॥ 'कालिन्द्या ह्रदः' इति हरिवंशोक्तेर्योजनप्रमाणस्तस्या दक्षिणभागे वर्त्तमानस्तद्गर्त्तजस्तत्प्रवाहास्पृष्ट एव, अन्यथा तद्विषसंपृक्तजलवती सा मथुरादिदेशस्थजनैरव्यवहार्य्यैवाभविष्यदिति ज्ञेयम् । ह्रदः अगाधजलवदवटविशेषः । 'तत्रागाधजलो ह्रदः' इत्यमरः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्णामिति वर्णतो नामतश्च अतः सख्यास्तस्या दुर्विषदूषितत्वेनाऽवश्यप्रतीकार्यमभिप्रेतम् । कृष्णेनाहिनेति, महादुर्विषमयत्वमुक्तं न केवलं तस्या एव तद्धितायाभूत् अपि तु सर्वेषामपि यतः कृष्णः कर्षति दुःखानीति जलपानादिसिद्ध्या व्रजस्य महातीर्थोद्धारणादिना जगतामपि, दमनादिना कालियस्यापि हिताचरणात् बाल्यलीलारसाविष्टस्यापि तस्य पूर्ववत् स्वावसरेण ऐश्वर्यमप्युदयते इत्याह, विभुरिति ।। १ ॥ भगवान् सर्वेणापि प्रकारेण कर्तुं समर्थः तथापि कथं केन प्रकारेणेति वै च स च "बहुयुगावासम्" इति विश्रुतत्वात् बहूनि युगानि आवासो यत्र तादृशं यथा भवति तथा यथा आसीत्तत्कथ्यतामित्येवान्वयः । विप्र! हे परमविद्याप्रवीण ! तथा च याज्ञवल्क्यः—

"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियलक्षणम्" ।। इति ।। २॥

यद्यपि श्रीमुनीन्द्रेण तद्विशेषदुःखशङ्कया सङ्क्षिप्य कथितं तथापि तदज्ञानेन राज्ञा तल्लीलासामान्याभिलाषादेव यथा दृष्टमिति तद्वाक्येनैव दर्शयति —ब्रह्मन्निति । भगवतः ऐश्वर्यादिषट्कयुक्तस्य भूम्नः सर्वथापि सर्वातिशयितस्य तत्रापि स्वच्छन्दवर्तिनः स्वैरलीलाप्रकाशिनः एवमेवम्भूतस्य गोपालजात्यनुरूपम् उदारं सर्वतोऽपि महत्परमानन्ददातृ वा यच्चरितं तज्जुषमाणः कस्तृप्येत्? अतृप्तौ हेतुः अमृतमिवेति ॥ ३ ॥ श्रीशुक उवाचेति तदेवं निशम्य सवासनत्वे तस्मिन् जातस्नेहः सुखदुःखात्मकं सर्वमेव तादृशाय निवेदनीयमित्यभिप्रायेण श्रीव्रजवासिदुःखमयनिजदुःखात्मकमपि तन्निवेदयन् श्रीशुकवद्यथाश्रुतमेवोवाच न त्वन्यत्रैव विस्तार्यापीत्यर्थः । कालिन्द्यां ह्रद इति तस्या दक्षिणभागे वर्त्तमानस्य तस्य तद्गर्भजत्वात् तस्याः प्रवाहस्तूत्तरतः पृथगेवोह्यः अन्यथा तद्दुर्विषजलेन यादवकुलवासश्रीमधुपुर्य्यादिव्याप्तेः स तु कालियस्य विषाग्निना श्रप्यमाणपया आसीत् उपरिगाः ऊर्द्ध्वं गच्छन्तः खगा इति तत्रापि दूरगत्वमभिप्रेतम् ।। ४ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णामिति वर्णतो नामतश्चातः सख्यास्तस्या दुर्विषदूषितत्वेनावश्यप्रतिकार्य्यत्वमभिप्रेतम् । कृष्णेनाहिनेति महादुर्विषमयत्वमुक्तम् । कृष्णो जगद्धितार्थमेव स्वयमवतीर्णो भगवानित्यर्थः । जलविशोधनेन हि तस्यास्तेन जलपानादिसिद्ध्या व्रजस्य च, महातीर्थोद्धरणादिना च जगतामपि, तथा दमनादिना कालियस्यापि हिताचरणात् । एतत् सर्व्वमग्रे व्यक्तं भावि । यतो विभुरेकयापि क्रिययानेककार्यं कर्तुं समर्थ इत्यर्थः । अतएव सर्पतीति सर्पस्तमिति तस्यान्यत्र प्रयाणप्रयासोऽपि निरस्तः ।। १ ।। वै च—स च बहुयुगावासमिति दूषितामित्युक्तेः । कालियह्रद इति प्रसिद्धप्रलयकालवासेन तदसम्भवात् । भगवान् मादृशां प्रभुरिति प्रहर्षात्, किंवा अगाधजलान्तर्दुष्टाहिनिग्रहे दुःखशंकया शोकादेव, अतो विशेषेण प्रकर्षेण च कथ्यताम्; यद्वा, विशेषतः प्राति सर्वमनोरथं पूरयतीति विप्रस्तस्य सम्बोधनम्; तत्कथनेन मादृशां कामं परिपूरयेति भावः ।। २ ।। ननु, तद्विशेषकथनं परमदुःखप्रदम्, अतएव मया संक्षिप्य कथितम्, तत्राह—ब्रह्मन्निति भगवतः सर्वैश्वर्य्ययुक्तस्यात एव भूम्नः परिपूर्णस्य स्वच्छन्दवर्त्तिनश्च परमस्वतन्त्रस्य तादृशस्यापि गोपालनरूपमत एवोदारं सर्वोत्कृष्टं सुखप्रदं वा यच्चरितममृतमिति मरणतुल्यमहादुःखनिवर्त्तकम्, तदेव महौषधमिति भावः । यद्वा, गोपालनेनोदारचरितत्वस्य हेतुत्वेन त्रीणि विशेषणानि; —तत्र भगवत इति तेनैव भगवता विशेषप्रकटनात्, अतएव भूम्नोऽपरिच्छिन्नमाहात्म्यस्य, यतः स्वानां छन्देनेच्छया वर्त्तितुं शीलस्य; यद्वा, तत्तद्दृष्ट्या तद्दुःखं सह्यमपि स्यादिति त्रिभिर्विशेषणैराह,—तत्राद्याभ्यां वक्ष्यमाणावस्थादिकं निरस्तम्; आत्मेच्छया वर्त्तिन इत्यनेन च महाकौतुकिनस्तस्य लीलया कौतुकमेव न तु शोक इति; यद्वा, भक्तेच्छानुवर्त्तिन इति तस्य सदा सर्वत्र सुखमेवेति बोधितम् । अथवा, अमृतमिति परमदुःखमयस्यापि तच्चरितस्य तस्य प्रेमविशेषस्वभाववत् परमानन्दमयत्वमेवाभिप्रेतम् । तच्च श्रीभागवतामृतोत्तरखण्डे विवृतमस्ति । गोपालेति सम्बोधनम्; यद्वा, हे वाक्पते ! किंवा श्रीभगवता सह गुरोरभेददृष्ट्या, हे श्रीकृष्णेत्यर्थः । अन्यत् समानम् । अतस्तस्मादुर शक्नोमि, किं कुर्य्यामतः कथ्यतामेवेति भावः । ब्रह्मन् हे वेदमयेति यथा वेदेषु वर्त्तमानं दुःखव्रतमपि न किल त्यज्यते, तथेदम न त्याज्यं स्यादिति भवता ज्ञायत एवेति भावः ।। ३ ।। कालिन्द्यां ह्रद इति तस्या दक्षिणभागे वर्त्तमानस्य तस्य तया सह संगमे नैक्यप्राप्तेस्तस्याः प्रवाहस्तूत्तरत एवोह्योऽन्यथा तद्दुर्विषजलेन यादवकुलावास-श्रीमधुपुर्य्यादिव्याप्तेः । आसीदित्यतीतनिर्दे कालियसम्बन्धाद्यपेक्षया, कश्चिदेकोऽनिर्वचनीयो वा । अनिर्वचनीयत्वमेव दर्शयति—विषेत्यादिना । उपरिगा ऊर्द्ध्वं गच्छन्तः खगा इति, तत्रापि दूरगा इत्यभिप्रेतम् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कृष्णां यमुनाम् ॥ १ ॥ न्यगृह्णात् निगृहीतवान् ॥ २ ॥ भूम्नः अपरिच्छिन्नमहिम्नः गोपालोदारचरितं गोपालकाऽनुगुणमुदारचरितं तदेवामृतम् ॥ ३ ॥ श्रप्यमाणपया कथितजलाः ॥ ४–५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ कालीयदमनात्मकं कर्मानुवर्णयितुकामस्तावद्राज्ञः प्रश्नावसरप्रदानाय तत्सङ्गृह्य दर्शयति—विलोक्येति । कृष्णाहिना कालीयेन दूषितां कृष्णां यमुनां विलोक्यालोच्य तस्याः कृष्णायाः विशुद्धिमन्विच्छुः तं सर्पमुदवासयत्ततो निष्कासितवान् ॥१॥ तत्र विस्मितः पृच्छति राजा–कथमिति द्वाभ्याम् । अन्तर्जले तत्राप्यगाधे तत्राप्यहिं सर्पं कथं निगृहीतवान् ? स वै अहिर्बहूनि युगान्यावसतीति तथाभूतो यथा येन प्रकारेणासीत्तदपि हे विप्र कथ्यताम् ॥ २ ॥ आत्मनः शुश्रूषाधिक्यं व्यनक्ति–ब्रह्मन्निति । भूम्नः विपुलमाहात्म्यस्य स्वतन्त्रस्यापि लीलया गोपालस्य सतः यदुदारं चरितं तदेवामृतं जुषन् कः पुमान् तृप्येत न कोऽपि ॥ ३ ॥ विषाग्निना पच्यमानं पयो यस्मिंस्तस्य ह्रदस्योपरिगाः उपरि चरन्तः खगाः पक्षिणः पतन्ति पेततुः विषजलवायुप्रसारमात्रेऽपि मूर्च्छिताः पतन्तीत्यर्थः ॥ ४॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हरौ भक्तिमतां संसारविषं निर्वीर्यं भवतीति निदर्शयितुं अनन्तरातीताध्यायं सङ्क्षिप्योक्तं कालीयनागमर्दनमहिमानं प्रपञ्चयत्यस्मिन्नध्याये, तत्र राज्ञः प्रश्नमुत्थापयितुमाह–विलोक्येति । कृष्णां यमुनां कृष्णाहिना कृष्णसर्पेण उदवासयत् ततोऽन्यत्रावासमकारयत् ॥ १ ॥ अगाधे अतलस्पर्शे न्यगृह्णात् निगृहीतवान् प्रसह्य गृहीतवानित्यर्थः । यथा येन प्रकारेणासीत् स प्रकारः ॥२–३॥ श्रप्यमाणं क्वाथ्यमानं पयो जलं यस्मिन् ह्रदे स तथा यस्मिन् ह्रदे ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

बहुयुगावासमिति विश्रुतत्वात् बहूनि युगानि आवासो यत्र तादृशं यथा भवति तथा यथा स्यात्तथा कथ्यतामित्येवान्वयः ॥१॥ यद्यपि मुनीन्द्रेण तद्विशेषदुःखशङ्कया सङ्क्षिप्य कथितं तथा तदज्ञानेन वा तल्लीलासामान्याभिलाषादेव तथा पृष्टमिति दर्शयति॥२॥ ब्रह्मन्निति स तु तत्प्रीतये स्वदुःखकथानिवेदनाय च नात्यन्तमर्थेऽभिनिविश्य यथाश्रुतमेवोवाचेत्यर्थः ॥ ३–४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ कालिय-दमन-लीलां प्रवक्तुमुपक्रममाण आह,—विलोक्य दूषितामित्यादि । कृष्णः कृष्णाहिना दूषितां कृष्णां यमुनां विलोक्य तस्या विशुद्धिं विशेषेण शुद्धिमन्विच्छन्तं सर्पमुदवासयदिति वाक्यार्थः । तात्पर्यार्थस्तु स्वयं श्रीकृष्णः स्वनाम्ना मित्रभूतां कथमन्यो दूषयिष्यति, तत एनां शोधयिष्य इति मित्रवात्सल्यम्, एकदेशेन सुहृदपि यदि खलः स्यात्तदा सोऽपि दण्डनीय एव, तत्र मित्रत्वेनोपरोधो न कार्य इति सदुपदेशश्च दर्शयितुं तथा कृष्णः कृष्णां कृष्णाहिनेत्यनुप्रासध्वनिः ॥ १ ॥ अथ तत्केलिश्रवणश्रद्धालुतां राजा प्रकटयन्नाह ब्रह्मन्नित्यादि । हे ब्रह्मन् भूम्नः परात्परस्य तस्याचिन्त्यपरमैश्वर्यस्य भगवतः कृष्णस्य स्वच्छन्दवर्त्तिनः स्वाधीनस्य गोपालोदारचरितं जुषन् कस्तृप्येत । अत्र कस्यापि यस्य कस्यचिज्जनस्यापि तृप्तिर्नास्ति, तद्बन्धुपौत्रस्य तद्भागिनेयपुत्रस्य तेनैव रक्षितस्य मम पुनस्तृप्तिर्यन्न स्यात्, तत् किम् ? अयं भावः–तथाविधेश्वरस्य तथाविधैश्वर्यप्रतिपादकेषु चरितेषु वरं तृप्तिर्जायते, वैचित्र्याभावात्, तस्य तु गोपालक्रीडायां वैचित्र्यविशेषवत्तया न तृप्तिरिति गोपालोदारशब्दयोर्महिमा ॥ ४–८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

विलोक्य दूषितामित्यादि । कृष्णां यमुनां कृष्णाहिना दूषितां विलोक्य तस्य विशुद्धिमन्विच्छन् कृष्णाहिमुदवासयत् । अयं भावः—स्वयं कृष्णः कृष्णेति नाम्ना मित्रभूतां कथमन्यो दूषयिष्यति । मित्रभूताप्येषा शोधयितव्येति स्वनाम्ना मित्रमपि खलश्च दण्डनीय एवेति तथा द्वयं कृतवान् ॥१–२॥ गोपालोदारचरितमिति । गोपालवदुदारं सुन्दरं यच्चरितं तदेवामृतम् ॥३–८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

न्यगृह्णात् कालियं कृष्णो दर्शयन् स्वमयाद्व्रजम् । स्तुतोऽहिभिः प्रसन्नस्तान् षोडशे निरसारयत् ॥

कृष्णां यमुनाम् उदवासयत् तस्मान्निस्सारितवान् ॥ १ ॥ बहूनि युगानि व्याप्य आवासो यत्र तद्यथा स्यात्तथा आसीत् विशेषतः प्रकर्षेण कथ्यताम् ॥ २ ॥ गवां श्लेषेण सर्वभक्तश्रोत्रादीन्द्रियाणां च पालनेनोदारं सुखदातृचरितम् ॥ ३ ॥ कालिन्द्यां ह्रद इति हरिवंशोक्तेर्योजनप्रमाणस्तस्या दक्षिणे भागे तत्प्रवाहेणास्पृष्ट एव अन्यथा तद्विषसम्पृक्तप्रवाहवती सा मथुरादिदेशस्थजनैरव्यवहार्य्यैवाभविष्यदिति ज्ञेयं श्रप्यमाणं पच्यमानं पयो यस्य सः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

षोडशे कालीयनिग्रहस्तद्भार्याकृतं श्रीकृष्णस्तोत्रं कालीयं प्रत्यनुग्रहश्च निरूप्यते, उदवासयत् निःसारितवान् ॥ १ ॥ स अहिः बहूनि युगानि आवासो यथा भवति तथा केन प्रकारेण तत्रासीदिति कथ्यताम् ॥ २-३ ॥ कालिन्द्यां कालिन्दीसमीपे श्रप्यमाणं पच्यमानं पयो यस्मिन् सः ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ॐ नमः कालियमर्दनाय कृष्णाय

षोडशे कालियं कृष्णो न्यगृह्णात्तद्वधस्ततः । अनुगृह्य तमुत्सार्य यमुनां निर्विषां व्यधात् ॥

कृष्णां यमुनां नामतो वर्णतश्च साम्यात् सखीमवश्यकर्त्तव्योपकारामिति भावः । कृष्णाहिना कालियसर्पेण । उदवासयत् निःसारितवान् ॥ १ ॥ अगाधे जलेऽन्तः कथमहिं न्यगृह्णात् स वै स चाहिरजलचरोऽपि बहूनि युगान्यावासो यत्र तद्यथा स्यात्तथा तस्मिन् जले कथमासीत् कथ्यताम् । हे विप्र ! विद्यातिनिपुण !

"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियलक्षणम् ॥"

इति याज्ञवल्क्योक्तेः ॥ २ ॥ गवां पशूनां स्वभक्तश्रोत्रेन्द्रियाणाञ्च पालनेनोदारं सुखदातृचरितम् ॥ ३ ॥ कालिन्द्यामिति । तस्या दक्षिणे भागे तत्प्रवाहेणास्पृष्टो योजनप्रमाणो ह्रदः श्रीहरिवंशोक्तेर्बोध्यः तत् स्पर्शे तत्प्रवाहस्य माथुरादिभिरव्यवार्यता स्यात् श्रप्यमानं पच्यमानं पयो जलं यस्य सः पतन्ति विषज्वालया विग्लाताः सन्तः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरि ॐ ॥ संसारविषमतां जरयत्कंसारिचरितं सङ्कुच्योक्तं प्रपञ्चयत्यस्मिन्नध्याये । तत्रादौ शुको राजप्रश्नबीजमावपतीति निरूपयति ॥ श्रीशुक इति । कृष्णः कृष्णाहिना स कालिम्ना कालियेन कृष्णां यमुनां दूषितां विषविषमतया जनानुपयोजनां वीक्ष्य तस्या विशुद्धिं निर्विषतामन्विच्छंस्तं सर्पमुदवासयत्ततो निष्कासयामास ॥ १ ॥ स कुतो निकेतनं तत्र चक्रे कथं वा बहुतिथं तत्र कृतावासं वासुदेवो वासितमचीकरत्सोऽप्यनन्ताज्ञतः क्व वाऽवात्सीत्सर्वं हे विप्र सर्वज्ञ कथयेति पृच्छति परीक्षिदित्याह ॥ राजेति । अगाधे लोडयितुमशक्ये जलेऽहिं भगवान्कथं न्यगृह्णाज्जग्राह । स सर्पोऽन्तर्यमुनाऽन्तः कथं बहुयुगावास्यासीत् हे विप्रेदं सर्वं कथ्यतां । इदानीं । शुकेन बहुयुगेत्याद्यनुक्तामपि मानान्तरतोऽवगत्याप्राक्षीत्परीक्षिदित्यर्थद्योतको वैशब्दः ॥ २ ॥ इयताऽपि नातुष्यः किलेलापालेत्यतो लपति ॥ ब्रह्मन्निति । स्वच्छन्दवर्तिनो भूम्नस्तस्य भगवतो गोपालोदारचरितं गोभिर्गोपालिभिर्गोपालैश्च सह कृतं यदुदारचरितममृतं तदाख्यं पीयूषं जुषन्सेवमानः कस्तृप्येत । अलमिति लपेद्यदि कश्चित्तृप्येतालमिति वदेत्तर्हि स कः कुत्सित इत्यपि कश्छन्दसां योगमावेदेत्यादिवदन्वयो ज्ञेयः ॥ ३ ॥

श्रीसुबोधिनी

इन्द्रियाणि समस्तानां मृत्यवः समुदाहृताः । त एव विषपूर्णानि कालीयस्य शिरांसि हि ॥ १ ॥
अतस्तदुपमर्दोत्र निरूप्यो हि त्रयोदशे । सन्तुष्टो भगवांस्तेषु स्वलीलां चेत् करोति हि ॥ २ ॥
भक्तिमार्गानुसारेण निस्तारो नान्यथा भवेत् । तेषां प्रपञ्चः कामिन्यस्ताश्चेत् कृष्णस्य सर्वथा ॥ ३ ॥
ततोऽञ्जसैवेन्द्रियाणि भवन्त्याज्ञावशे हरेः । तदेव विषयश्चापि हरेर्भवति सर्वथा ॥ ४ ॥
सर्वोपयोगरहितः पूर्वसम्बन्धहानतः । परीक्ष्यैवेन्द्रियाणां हि निग्रहं कुरुते हरिः ॥ ५ ॥
परीक्षार्थं ततो देवः कालं प्रेरितवांस्तथा । स्वासक्तिश्चापि कर्तव्या निरोधे मध्यमे महान् ॥ ६ ॥
यत्नः कर्तव्य इत्येव मुग्धभावं चकार ह । कथामात्रत्वाभावाय सङ्क्षेपेणाह तां पुरा ॥ ७ ॥
अक्लिष्टकर्मा भगवान् ज्ञापयामास लीलया । उद्यमश्चापराधश्च परीक्षाकार्यमेव च ॥ ८ ॥
स्तुतिः प्रसाद इत्यत्र षडर्था परिकीर्तिताः ॥ ८½ ॥

तत्र प्रथमं सङ्क्षेपेण कथामाह **विलोक्येति**, **कृष्णां** यमुनां **कृष्णाहिना** कालसर्पेण कालीयेन **दूषितां विलोक्य** समर्थो भगवांस्**तस्या विशुद्धि**मग्रे क्रीडार्थम**न्विच्छंस्तं सर्पमुदवासयत्** ततोऽन्यत्र प्रेषितवान्, **सारूप्यं प्राप्तो हि भगवता निर्दुष्टः कर्तव्यः** **सारूप्यं प्राप्तेन च दोषो नान्येन निवारणीयो रूपान्तरे च रूपान्तरदोषो न निवार्य** इति**मर्या**दा, अतः कृष्णपदत्रयं, **विभुरिति** सामर्थ्यं प्रकृतोपयोगि, सारूप्यादेव न मारणं, हृषीकेशत्वाच्च नर्तनं अत एव **कलौ कृष्णएव सर्वदोषनिवारको** यदि सर्वेन्द्रियेषु नृत्यतीन्द्रियकृतमपराधं च सहते, अतो यमुना शुद्धा कर्तव्येति **यस्याः** प्रसिद्धायाः प्रसिद्धं **सर्पं** दूरीकृतवान् ॥ १ ॥ राजा विशे पृच्छति **कथमिति**, स हि जानाति बडिशेन यथा मत्स्यो बध्यते तथा कालीयो बद्ध इति, अतस्तस्य महतः कीदृशं बडिशमितिसाधन प्रकारप्रश्नः, यदि लोके तादृशमपि बन्धनं स्यात् तदा न प्रष्टव्यः स्यात्, स तु नास्ति, यतः स **बहुयुगपर्यन्तमावासो**

तादृशं यथा भवति तथा**वात्सीत्**, यदि तादृशं भवेद् बन्धनं पूर्वमेव निवृत्तः स्यात्, न चैतदसम्भावितं यतो **भगवान्**, अतः प्रकारं कथयेतिप्रश्नः, **विप्रे**तिसम्बोधनं विशेषेण ज्ञानपूरणाय विशेषेण प्रकर्षेण वा **कथ्यता**मिति ॥ २ ॥ जलचरसाधारणबन्धवदिदमपि भविष्यत्यतो न वक्ष्यतीत्याशङ्क्य साधारण्येन भगवत्कथां श्रोतव्यत्वेन स्तौति, ब्रह्मन्नितिसम्बोधनं ज्ञानायानुद्वेगाय च, **भगवत** इति सर्वैव लीला षड्गुणयुक्ता भविष्यतीत्यप्रयोजकत्वं निवारितं, भूम्न इति सर्वत्र लीलाधिक्यं, **स्वच्छन्दवर्तिन** इति लीलायां न कस्याप्यनुरोधः, तत्रापि **गोपालस्य** लौकिकानां बुद्धिपरिग्रहार्थं यतमानस्य, **उदारं** सर्वपुरुषार्थान् पात्रापात्रविवेकं परित्यज्य प्रयच्छतीति पुरुषार्थानामपेक्षितत्वात् सर्वथैतदेव वक्तव्यं श्रोतव्यं च, तदपि **चरितं** न तु कल्पितं, तत्रापि सर्वदोषनिवारकं मृत्युनिवारकं च, तदाह,**मृत**मिति, किञ्च, **अमृतं जुषन्** किं कश्चित् तत्र तृप्येतेतिलौकिकोक्तिः ॥ ३ ॥ भगवतोतिसामर्थ्यं ख्यापयितुं ह्रदस्वरूपमाह द्वयेन **कालिन्द्या**मिति, **कालियः कालीय** इत्युभयं, **कालीयस्य** सम्बन्धी कश्चिद् **ह्रद आसीत्**, सम्बन्धोग्रे वक्तव्यः, **विषाग्निना तस्यैव श्रप्यमाण**मावर्त्यमानं विषेण व्याप्यमानं वा **पयो यस्मिन्** यस्मिन् ह्रद आकाशमार्गेणोपरि गच्छन्तोपि **खगा** मध्ये **पतन्ती**त्युपरि दोषमर्यादा निरूपिता ॥ ४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अथ त्रयोदशाध्यायं विवरिषवोस्मिन् प्रकरणे समस्तानां मध्यमनिरोधस्य वक्तव्यत्वात् तदङ्गत्वेन पूर्वाध्याये देहाध्यासात्मकधेनुकस्य वधो निरूपितोत्र तादृशस्येन्द्रियाध्यासस्य **निष्कृतिं** निरूपयतीत्याहु**रिन्द्रियाणी**तिसार्धेन, "अत्रात्र वै मृत्युजयित" इतिश्रुत्युक्ते नानामृत्युपक्षे **समस्तानामिन्द्रियाण्येव** "विषयेन्द्रियसंयोगादि" तिगीतावाक्योक्तविषतुल्यपरिणामकराजससुखजनकत्वान् **मृत्यवः समुदाहृतास्ते मृत्यव एव हि** विषयाविष्टत्वाद्धेतो**र्विषपूर्णानि कालीयशिरांस्यतो** हेतोस्त**दुपमर्दोत्र त्रयोदशे**ध्याये **निरूप्यते**, तथा च हेतुतागर्भः प्रसङ्गसङ्गतिरित्यर्थः, अत्र **समस्त**पदं गोपपरं ज्ञेयं तेषामेव निरोधस्य चिकीर्षितत्वादिति, ननु कालीयशिरांसि चैतेषा**मिन्द्रियाणि** तदा तदु**पमर्दे** भगवतस्तत्सम्बन्धो वक्तव्यः स च "पराञ्चि खानी" तिश्रुत्या विरुध्यत इत्यु**पमर्दो** न सम्भवतीत्युपमर्दासम्भव इत्यत आहुः **सन्तुष्ट** इत्यादि, **हि** यतो हेतोः **सन्तुष्टो भगवांस्तेषु लीलां** चेत् **करोति** तदा **भक्तिमार्गानुसारेण** तेषां निस्तारो **भवेन् नान्यथा** न प्रकारान्तरेण, तथा च यथा ध्रुवस्य "तिरोहितं सहसैवोपलक्ष्य पुरःस्थितं ददर्शे" तिवाक्यात् पराचा चक्षुषा दर्शनं तथात्र **भक्तिमार्गानुसारेण** संसार**निस्तारस्य** चिकीर्षितत्वात् पराचामपीन्द्रियाणां सम्बन्ध **उपमर्द**श्चेति मार्गभेदान्न श्रुतिविरोध इत्यर्थः, ननूपमर्देपि स्वभावनाशाभावात् पुनश्चेद् विषयसम्बद्धानि स्युस्तदानि कृतोऽपि स निःफल इत्यत आहु**स्तेषा**मित्यादि द्वयं, **तेषा**मिन्द्रियाणां **प्रप**ञ्चो वृत्तिरूपो विस्तारः **कामिन्यो** नागपत्न्यर**ताश्चेत् सर्वथा कृष्णस्य** भवन्ति तत एवेन्द्रियाण्य**ञ्जसा** ह**रेराज्ञावशे भवन्ति तत्रैव विषयोपि** सर्वथा पूर्व**सम्बन्धहानतः सर्वोपयोगरहितो** ह**रेर्भवति**, तथा चेन्द्रियो**पमर्दे तद्वृ**तीनां **सर्वथा** भगवदधीनत्वाद् विषयस्य चान्योपयोगराहित्यान् नोपमर्दवैयर्थ्यमित्यर्थः, **परीक्षे**त्यारभ्य **प्रेरितवा**नित्यन्तस्यार्थं **टि**प्पण्यां व्युत्पाद्य विवृण्वन्ति **नन्वि**त्यादि, तथा च 'तत्रागभोगे' त्यादीनां परीक्षाहेतुत्वान्नानुपपत्तिरित्यर्थः, **तादृश**मिति निग्रहरूपं, सुबोधिन्यां नन्वन्यपरीक्षाकरणं भवतु नाम मुख्यभक्तेन्द्रियपरीक्षाकरणं तु नोचितं सर्वथा दोषराहित्यादनुभूतत्वाच्चेत्यत आहु**स्तथा स्वासक्तिश्चापि कर्तव्ये**ति, यथान्येषां साधारणानां परीक्षा कर्तव्या तथा मुख्यभक्तानामा**सक्तिश्चापि कर्तव्या** पूर्वाध्यायोक्तनिरोधस्य स्नेह एव पर्यवसानादिति, **किञ्च मध्यमे निरोधे महान् यत्न**श्च **कर्त्तव्य** इतिहेतोर्हरिरेव तु **मुग्धभावं चकार ह**, हेति हर्ष आश्चर्ये वा, तथा च मुख्यभक्तेषु परीक्षणीयत्वाभावेप्यासक्त्यर्थमन्येषु निरोधयत्नार्थं तथा करणमिति न दोष इत्यर्थः। नन्वियं कथा प्रासङ्गिक्युक्ता न तु निरोधसाधिका मूले तदिन्द्रियनिरोधस्यानुक्तत्वादत आहुः **कथे**त्यादि, **कथामात्रत्वाभाव**ज्ञापनाय **तां** विशुद्धिं **पुरा सङ्क्षेपेणाह**, अर्थात् पश्चाद् विशेषेणातोत्रापीन्द्रियनिरोधोभिप्रेत इति विशेषकथनान्यथानुपपत्त्यावसीयतेतो न दोष इत्यर्थः, ननु परीक्षायाः कर्तव्यत्वेप्यक्लिष्टतयैव कर्तव्या न तु क्लेशलेशेनापि क्लिष्टकर्मत्वात् तथा च कथं तथा कृतमित्यत आहु**रक्लिष्टकर्मे**ति, **भगवानक्लिष्टकर्मै**व विषयासक्तानामिन्द्रियाणामपराधकर्तृत्वमनया **लीलया ज्ञापयामास**, तथा च तज्ज्ञापनं नान्यथा भवतीति तदर्थमेवंकृतिरित्यर्थः, शेषं स्फुटम्। **विलोक्ये**त्यत्र **सारूप्यं प्राप्तेने**ति कृतप्रतिशेषः, **प्रकृतोपयोगिसारूप्या**दिति परीक्षो**पयोगीन्द्रियसारूप्यात् हृषीकेश** इत्यारभ्य **सहत** इत्यन्तं वस्तुतोर्थकथनम् ॥ १ ॥ कथमित्यत्र स इति बन्धनप्रकार इत्यर्थः, **विप्र कथ्यता**मितिसमभिव्याहारमङ्गीकृत्य पक्षान्तरमाहु**र्विशेषणे**त्यादि ॥ २ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

त्रयोदशेध्याये **समुदाहृता** इति 'शतायुः पुरुषः शतेन्द्रिय' इत्यत्रेन्द्रियत्वेन मृत्यव उक्ता इत्यर्थः, त एवेति पूर्वाध्याये गोपमृत्युजनकविषपूर्णत्वेन तन्मृत्युरूपेन्द्रियरूपत्वं कालीयस्योक्तं, अत्र रोषेण विषमुच्चैः स्थापितवान्, अत एवाक्षिभिर्गरलोद्गमनं, अतस्तेनैव हेतुना शिरसामिन्द्रियरूपत्वं, देहस्यालौकिकत्वसम्पत्त्या तत्र प्रवेष्टुमशक्नुवन्ति सविषयेन्द्रियाणि मृत्युरूपत्वेन साजात्यात् कालीयशिरःसु स्थितानि सङ्घातस्य विषसम्बन्धे देहस्य पात इन्द्रियाणां विषद्वारा कालीये स्थितिरिति भावः, अत इति इन्द्रियरूपत्वादित्यर्थः, उपमर्दो दोषनिवृत्त्या नवत्वसम्पादनं, **ही**ति तनुनवत्वानन्तरमिन्द्रियनवत्वमुचितमित्यर्थः, **सन्तुष्ट** इति एवं **चेत्** करोति तदा **भक्तिमार्ग**रीत्या तनूनवत्वरूपो निस्तारो **भवेत् अन्यथा** ज्ञानमार्गरीत्या **न भवेत्** सङ्घातराहित्यमेव स्यादित्यर्थः,

तेषामिति इन्द्रियाणां विषयरूपो विस्तरः **कामिन्यो** विशेषतस्तास्वेव विषयानुभवात्, **इन्द्रियाणां** हीति स्वेन्द्रियाणामित्यर्थः, **तत** इति स्वेन्द्रियाणां कार्यप्रकटनरूपनिग्रहादित्यर्थः, **अक्लिष्टे**ति **अक्लिष्टकर्म**त्वाल् लीलयैव स्वस्वरूपं कालियाय **ज्ञापयामासे**त्यर्थः, **कार्य**मिति भगवत्कार्यं तन्निग्रह इत्यर्थः ॥ **हृषीकेश**त्वादिति एतच्छिरसामिन्द्रियरूपत्वेन स्वस्य तदीशत्वादितिभावः ॥ १ ॥ **ब्रह्मन्नि**त्यत्र **बुद्धी**ति बुद्धेः स्वविषयत्वसम्पादनार्थमित्यर्थः, **यतमानस्ये**ति इन्द्रियविषयतां प्राप्नुवत इत्यर्थः, **गवा**मिन्द्रियाणां रक्षक इत्यर्थः, विषयविषयकत्वे इन्द्रियाणि नष्टानि स्युः ॥ ३ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

त्रयोदशाध्यायोक्तौ **कालियस्य शिरांसि** हीति कृष्णोपनिषत्सु कृष्णावतारे वध्यानां दोषरूपता निरूपिता तन्न्यायेन निगृह्याणामपि स्वरूपं किञ्चिद् विलक्षणं वाच्यमतो धर्मसाम्याच् चरित्रसाम्याच्च यस्य यद्दोषरूपत्वं तदवगम्यते, द्वादशाध्यायविवृतौ 'कालीय इन्द्रियाण्याहु''रित्यस्य टिप्पण्यां तदुपपत्तिर्निरूपिता, **अतस्तदुपमर्द** इति विषयरूपविषपूर्णानामिन्द्रियाणामुपमर्द एव कर्तव्यो न स्वरूपतो नाशः, स्वरूपनाशे भजनं न स्यात्, उपमर्दाभावे संसारासक्तिः स्यात्, अतः संसारासक्तिनिवारणाय कालियशिरसां उपमर्दः कृतः इति सारं, **सन्तुष्ट** इत्यारभ्य **नान्यथा** भवेदित्यन्तं तेषु विषयासक्तेन्द्रियेषु **स्वलीलां** नृत्यादिरूपां **चेत् करोति** तदा इन्द्रियवतो **निस्तारो** भवति, **भक्तिमार्गानुसारेणे**ति अनुजिघृक्षया स्नेहेनेत्यर्थः, अत एव भगवता भक्तिमार्गरूपचरणारविन्दाभ्यां कालियशिरःसु नृत्यलीला कृतेति ज्ञेयं, तथा चायमाध्यात्मिकः पक्षः सिद्धः, यदा जीवस्य विषयासक्तेन्द्रिये भगवद्रमणं भवेत् तदा जीवः कृतार्थो भवेदिति ।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

त्रयोदशेध्याये इन्द्रियाणीत्यादि का० १३४$\frac{१}{४}$ । **समुदाहृता** इति "शतायुः पुरुष शतेन्द्रिय" इत्यत्र इन्द्रियत्वेन मृत्यव उक्ता इत्यर्थः, **त एवे**ति ते इन्द्रियरूपा मृत्यवः एव **कालीयस्य विषपूर्णानि शिरांसि** ज्ञेयानि, **अत** इत्यादि का० १३४$\frac{३}{४}$ । अत इन्द्रियरूपत्वादु**पमर्द** एव युक्तो न तु नाश इति भावः, शिरस्सु नृत्यप्रयोजनमाहुः **सन्तुष्ट** इत्यादि का० १३५$\frac{३}{४}$ । अन्यथेन्द्रियाणामलौकिकत्वं न स्यात् किन्तु ज्ञानमार्गानुसारेण इन्द्रियादिसङ्घातराहित्यमेव स्यादित्यर्थः, **तेषा**मित्यादि का० १३६$\frac{३}{४}$, १३७$\frac{३}{४}$। तेषामिन्द्रियाणां विषयरूपो विस्तारः **कामिन्यो** नागपत्न्यस्ताश्चेत् सर्वथा कृष्णस्य भवन्ति तत एवेन्द्रियाणि अञ्जसा हरेर्वशे भवन्ति, तदैव विषयोपि पूर्वसम्बन्धहानतः सर्वोपयोगरहितः हरेर्भवति, तथा च इन्द्रियाणां विषयाणां **च भगवदीयत्वसम्पादनमेव** प्रकृतलीलाप्रयोजनमिति भावः, ननु कालीयस्य भक्तापराधित्वेन निग्रह उचितः, "तं नागभोगपरिबीतमदृष्टचेष्ट"मित्यादिनोक्तलीलात्वयुक्ता उत्पाताश्चानुपपन्नाः वस्तुतः कालादिभयरहिते भगवत्युत्पातहेत्वभावादित्याशङ्क्य तत्तात्पर्यमाहुः **परीक्षे**त्यादिना का० १३८$\frac{३}{४}$ । **परीक्षे**त्यनन्तरं निरूप्यत इति शेषः, तथा च कृतो निरोधः सम्पन्नो न वेति परीक्षैवास्मिन्नध्याये निरूप्यत इत्यर्थः, तत्रोपपत्तिं वदन्त'स्तं नागभोगे'त्यादिनोक्तभक्तपीडाजनकलीलातात्पर्यमाहु**रिन्द्रियाणां ही**ति, **हि** यतो हेतो**रिन्द्रियाणां** निग्रह परीक्षार्थं हरिः कुरुत इति सम्बन्धः, अत्रेन्द्रियपदं भगवदिन्द्रियपरं निग्रहपदं च भगवदिन्द्रियाणां स्वकार्यप्रकटनपरं, तथा च भगवान् "तं नागभोगपरीबीतमदृष्टचेष्ट"मित्याद्युक्तप्रकारेण स्वेन्द्रियाणां स्वकार्यप्रकटनरूपं निग्रहं यत् कृतवान् स निग्रहो भक्तानां पीडाजनकदण्डरूपो जात इति निग्रहपदं तथा च भगवतः स्वेन्द्रियकार्यप्रकटनं मृत्योरप्यधिकपीडाजनकनिग्रहरूपं भक्तानां पूर्णं निरोधे सत्येव भवेन् नान्यथेति पूर्णनिरोधपरीक्षार्थमेव तथात्मानं दर्शितवानित्यर्थः, उत्पातोत्पत्तिमाहु**स्ततो देवः कालं प्रेरितवा**निति, देवपदेनाधिदेवरूपः काल उच्यते, स च **भगवद्रूपः** स्वयमाध्यात्मिकाधिभौतिकौ **प्रेरितवान्** अत एव "त्रिविधा" इत्युक्तं मूले, **स्वासक्ति**रिति का० १३९$\frac{३}{४}$ । केषाञ्चिद् भक्तानां परीक्षा कर्तव्या कृतपरीक्षाणां केषांचिद् भक्तानामासक्तिश्चापि कर्तव्या, किञ्च एतस्मिन् प्रमेयप्रकरणीये मध्यमे निरोधे भगवता प्रमेयबलेन महान् यत्नः कर्तव्य इति हेतोर्मुग्धभावं चकारेत्यर्थः, नन्वियं कथा प्रासङ्गिकी न तु निरोधसाधिकेत्याशङ्क्याहुः **कथामात्रत्वे**ति का० १४०$\frac{३}{४}$ । एतत्कथायाः **कथामात्रत्वाभावाय** साधारणकथात्वाभावबोधनाय पुरा पूर्वं **सङ्क्षेपेण** "विलोक्य दूषितां कृष्णा"मित्येकेन **शुक आहे**त्यर्थः, ततः "कथमन्तर्जलेऽगाध" इति विशेषप्रश्ने सति शुको विस्तरेणाह, अतो ज्ञायते एतत्कथायां कश्चिदभिप्रायो वर्तत इति, अभिप्रायस्तु कालीयदमनेन भक्तानामिन्द्रियदोषनिवर्तनेन निरोधसाधकत्वमेवेति, अभिप्रायविशेषभावे तु प्रश्नं विनैव प्रसङ्गवशात् स्वयमेव वदेदिति भावः, तथा च भगवन्मार्गीयसिद्धान्तो विशेषप्रश्नं विना विस्तरेण न वक्तव्य इति सूचितं, तदुक्तं प्रथमस्कन्धनिवन्धे "ततो विशेषप्रश्नश्चेद् वाच्य रीतिरियं सदे"ति, **अक्लिष्टे**ति सदोषेन्द्रियरूपकालीयेन भगवदपराधकरणात् सदोषेन्द्रियाणां भगवदपराधकर्तृत्वमिति लीलया भगवान् ज्ञापयामास अन्यथा अक्लिष्टकर्मत्वं न स्यादित्यर्थः, अत्र प्रकरणानि विभजन्त **उद्यमश्चे**ति, का० १४१$\frac{३}{४}$ । **उद्यमः** कालीयदमनार्थो भगवदुद्यमः, **अपराधः** कालीयकर्तृकः, **परीक्षा** भक्तानां स्नेहपरीक्षा, **कार्यं** भगवत्कर्तृकं कालीयनिग्रहरूपं, स्तुतिर्नागपत्नीनां, **प्रसादो** भगवतः, एवं षट् प्रकरणानीत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

निग्रहः कालियस्यात्र तत्फणासु च नर्तनम् । पत्नीस्तुतिस्तदुद्वासः षोडशे विनिरूप्यते ॥ १ ॥

अथ कालियदमनात्मिकां लीलां सङ्ग्रहेणाह–विलोक्येति । कृष्णाहिना कालियेन दूषितां कृष्णां यमुनां विलोक्य तस्या विशुद्धिमन्विच्छन् कृष्णस्तं सर्पमुदवासयत् ततो निःसारितवान् । तत्र सामर्थ्यं सूचयन्नाह—विभुरिति ॥ १ ॥ एवं सङ्ग्रहेण कथितं कालियनिग्रहं पुनर्विस्तरतः श्रोतुं पृच्छति कथमिति । भगवान् सर्वप्रकारेण निग्रहितुं समर्थोऽपि श्रीकृष्णः अगाधे गम्भीरेऽन्तर्जले जलमध्ये अहिं कालियं कथं केन प्रकारेण न्यगृह्णात् निगृहीतवान् ? । तथा स वै स च रमणकद्वीपनिवासी कालियो बहूनि युगानि बहुयुगपर्यन्तमावासो यथा स्यात्तथा तत्र यथा येन कारणेनासीत्, तदेतत् हे विप्र ! कथ्यताम् । सम्बोधनेन 'तव अज्ञातं किञ्चिन्नास्ति, सर्वविद्याप्रवीणत्वात्' इति सूचितम् । यथोक्तं याज्ञवल्क्येन–"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ॥ विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियलक्षणम्" इति ॥ २ ॥ एवं प्रश्ने स्वस्य भगवच्चरितश्रवणे तृप्त्यभावं हेतुमाह–ब्रह्मन्निति । हे ब्रह्मन् ! तस्याद्भुतकर्मत्वेन प्रसिद्धस्य श्रीकृष्णस्य गोपालोदारचरितं गोपालरूपेण यदुदारं सर्वेषां सर्वपुरुषार्थप्रापकं चरितं जुषन् श्रवणादिना सेवमानः कस्तृप्येतेत्यन्वयः । तत्र दृष्टान्तमाह–अमृतमिति । यथाऽमृतं जुषन् न तृप्यते तद्वदित्यर्थः । गोपालरूपधारणे हेतुमाह—स्वच्छन्दवर्तिन इति । स्वेषां भक्तानां छन्दः इच्छा, तदनुवर्तनशीलस्येत्यर्थः । तच्चरितस्य सर्वपुरुषार्थहेतुत्वे हेतुमाह – भूम्न इति । विपुलमाहात्म्यत्वेन महापुरुषस्य । तत्रापि हेतुमाह – भगवत इति ॥ ३ ॥ एवं पृष्टो भगवतः सामर्थ्यातिशयं सूचयंस्तावद्ध्रदस्वरूपमाह–कालिन्द्यामिति द्वयेन । विषाग्निना श्रप्यमाणं पच्यमानं पयो यस्य, अत एव उपरि गच्छन्तः खगाः पक्षिणो यस्मिन् ह्रदे पतन्ति पेतुः ॥ ४ ॥

अन्वितार्थप्रकाशिका

षोडशे कालियदमे तत्पत्नीभिः स्तुतो हरिः ॥ अनुजग्राह तं तत्र श्लोकाः स्युः षष्टिरष्ट (६८) च ॥

सप्तोवाचेति सार्द्धास्तु पञ्चाशीतिरनुष्टुभः (८५॥) ॥ १६ ॥

विलोक्येति ॥ कृष्णाहिना कालियेन दूषितां कृष्णां यमुनां विलोक्य तस्याः विशुद्धिमन्विच्छन् विभुः कृष्णस्तं सर्पमुदवासयत् ततो निःसारितवान् ॥ १ ॥ कथमिति ॥ हे विप्र ! भगवान् अगाधे गम्भीरेऽन्तर्जले जलमध्ये अहिं कालियं कथं केन प्रकारेण न्यगृह्णात् निगृहीतवान् तथा स वै अजलचरोऽपि कालियः तस्मिन्नन्तर्जले बहूनि युगानि बहुयुगपर्यन्तमावासो यथा स्यात्तथा तत्र यथा येन कारणेनासीत् तदेतत् कथ्यताम् । बहूनि युगानि आवासो यस्येत्यहिविशेषणं वा ॥ २ ॥ ब्रह्मन्निति ॥ हे ब्रह्मन् ! भूम्नो महत्तमस्य स्वच्छन्दवर्तिनः स्वतन्त्रस्य भगवतः अमृतम् अमृततुल्यं गोपालोदारचरितं गोपालरूपेण कृतं यदुदारं चरितं तत् जुषन् सेवमानः । आर्षः शता । कस्तृप्येत । तङार्षः सकर्मस्य तृप्यतेः कर्मकर्त्तरि वा ॥३॥ कालिन्द्यामिति ॥ विषाग्निना श्रप्यमाणं पच्यमानं पयो यस्य अत एव उपरि गच्छन्तः पक्षिणो यस्मिन्ह्रदे पतन्ति स्म पेतुः एवंभूतः कालियस्य निवासरूपः कालिन्द्यां कश्चित् ह्रदः कालिन्दीप्रवाहेण अस्पृष्ट एव यमुनादक्षिणभागे योजनप्रमाणः आसीत् । प्रवाहेण तज्जलस्पर्शे तु यमुना तद्देशे अव्यवहार्यैवाभविष्यदिति ज्ञेयम् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं षोडशेऽध्याये श्रीकृष्णस्य यमुनापतनं तत्संबंधिजनानुतापं च कृष्णकृतनागदमनं तत्पत्नीनां स्तुतिं च यमुनायाः सकाशात्तन्निकाशनंच निगदति कृष्णाहिना कालीयसर्पेण दूषितां दोषं प्रापितां कृष्णां कालिंदीमुदवासयत् निष्काशयामास ॥ १ ॥ कथमिति अगाधे बहुले अंतर्जले जलमध्ये बहूनि युगान्यावासो यस्य तं बहुयुगपर्यंतं निवासिनं अहिं कथं न्यगृह्णात् स सर्पः तत्र यथा येन प्रकारेण आसीत् हे विप्र तेन प्रकारेण प्रश्नद्वयं कथ्यतां ॥२॥ स्वछंदं स्वतंत्रं वर्त्तते इति स्वछंदवर्त्ती तस्य यत् गोपालवेषेण उदारमुत्कृष्टमाचरितं त देवामृतं जुषन् सन् कस्तृप्येत अतः कथ्यतां ॥ ३ ॥ विषाग्निना श्रृप्यमाणं उत्सिच्यमानं पयो जलं यस्य सः सर्पस्य ह्रदः अतः उपरिगछंतः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निग्रहः कालियस्योक्तः षोडशे यमुनाह्रदे । नागपत्नीस्तुतकृष्णकृतस्तासामनुग्रहः ॥ १ ॥

दैतेयान् रासभान् हत्वा गोपांस्तालफलान्यलम् । आशयित्वा फणारङ्गेऽनृत्यत्कालीयभोगिनः ॥ २ ॥

अथ श्रीहरेः कालियदमनात्मकं कर्मानुवर्णयितुकामस्तावद्राज्ञः प्रश्नावसरप्रदानाय तत् संगृह्य दर्शयति ॥ विलोक्येति ॥ विभुः परमेश्वरः, कृष्णः, कृष्णाहिना कालियेन, दूषितां दूषितजलीकृतां, कृष्णां यमुनां, विलोक्यालोच्य, तस्याः, कृष्णायाः विशुद्धिमन्विच्छन् कर्त्तुंकामः सन्, तं कालियाख्यं सर्पं, उदवासयत्ततो निष्कासितवान् ॥ १ ॥ तत्र विस्मितः पृच्छति राजा कथमिति द्वाभ्याम् ॥ कथमिति ॥ अन्तर्जले जलमध्ये, तत्रापि अगाधे अतलस्पर्शे, तत्रापि, अहिं महाविषं सर्पं, कथं भगवान्, न्यगृह्णात्

निगृहीतवान् । सः अहिः, वै बहूनि युगान्यावसतीति तथाभूतः, यथा येन प्रकारेण, आसीत्, तदपि, हे विप्र, कथ्यताम् ॥ २ ॥ अत्रात्मनः शुश्रूषाधिक्यं व्यनक्ति ॥ ब्रह्मन्निति ॥ भूम्नः विपुलमाहात्म्यस्य, स्वच्छन्दवर्त्तिनः स्वतन्त्रस्य, तस्य भगवतः, हे ब्रह्मन्, गोपालोदारचरितं लीलया गोपालस्य सतो यदुदारं चरित्रं, तदेव अमृतं जुषन् संसेवमानः, कः पुमान्, तृप्येत । न कोऽप्येच्चरित्रश्रवणे तृप्तिं यायादित्यर्थः ॥ ३ ॥ कालिन्द्यामिति ॥ कालिन्द्यां यमुनायां, कश्चित् कालियस्य, ह्रदः, आसीत् । कथभूतः । विषाग्निना विषवह्निना, श्रप्यमाणं पच्यमानं पयः यस्मिंस्तथाभूतः, उपरिगाः तस्योपरि चरन्तः, खगाः पक्षिणः, यस्मिन्, पतन्ति पेतुः, विषमयजलविप्रुड्वायुप्रसारस्पर्शमात्रेणापि मूर्च्छिताः पतन्ति स्मेत्यर्थः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विलोक्येति : १०.१६.१.

श्रीकृष्णः स्वानुरूपां स्त्रियमलमहिना दूषितां स्वीयरूपाभासेनेन्द्रेण मृष्टां मुनियुवतिमिवालक्ष्य चेतःपवित्राम् ।
युक्तं तच्छुद्धिकामोऽभवदपसरणं तस्य कृत्वा यदग्रे स्पष्टं दावाग्निदिव्यं जनदृगघहरं स व्यधात्पूर्णकामः ॥ १ ॥

विधाय बलशालिना बहुलतालमानं वनं सलीलमखलं कृतं भुविजनोपजीव्यं यथा ।
विधातुमुचितं तथा तदनुजस्य सम्प्रत्यपि ममेति किमभूत्प्रभुः खलवनावगाहोन्मुखः ॥ २ ॥

पुत्रेण प्रियायाऽजेन च रसाप्त्यै साधुसूर्यादृतं कृत्वा नीतमरोगतामिह सरोगं चापि यत्प्रेमतः ।
तत्तादृग् वनजातमेतदधुना सत्कार्यमञ्जोमयेत्यालोच्याभवदच्युतः किमु समुच्चित्तोऽवगाहेऽम्भसः ॥ ३ ॥

कृत्वा रोगनिराकृतिं न सुखयाम्येनां यदा दर्शितप्रागभ्यन्तरभावनामिह तदा धन्वन्तरित्वं मम ।
किं वा मां शरणीभवेद्भवगदोच्छित्त्यै च को वा भुवीत्यार्तत्राणपरायणः स भगवांस्तां कर्तुमैच्छत्किमु ॥ ४ ॥

साधारणोऽपि सहते न पराङ्गनायामप्यन्यवीक्षणमपीति कथं स शौरिः ।
स्वस्त्रीगृहे बत सहेत भुजङ्गवासं तच्छासनोद्यतमना इति युक्तमीशः ॥ ५ ॥

यः कालाहियुतो भवो निगदितो भीतिप्रदः प्राणिनां तत्राहं विहरन् क्षणेन तमहिं तस्माद्विनिःसारयन् ।
भोग्यं भक्तजनैरनामयतया तं चातनोमि क्रमाद् व्यक्तीकर्तुमिति प्रभुः किमु तदा तत्तादृगारब्धवान् ॥ ६ ॥

अस्मिन्वने भवति यो विषयो मदीयभक्तापकार्यलमवामि ततः स्वकीयान् ।
तं शोधयामि विषयंच तथा यथाऽग्रे स्यात्तत्सुखावह इति प्रभुरेवमैषीत् ॥ ७ ॥

योऽस्मिन् पर्वतमूर्धतोऽम्बुनिधितःशस्त्रात्त्रसङ्घादपि प्रह्लादं विषतोऽप्यरक्षदखिलादप्यन्यतः साध्वसात् ।
स श्रीशो हि विषाकुलान्तरमिदं दृष्ट्वा तदीयाभिधं प्रह्लादं भुवनं यदैच्छदमृतं कर्तुं तदेतिक्षमम् ॥ ८ ॥

कालिन्द्यामिति : १०.१६.४.

यो यामुनोदरगतस्तनयो ममासौ स्पष्टस्ततोऽस्य परिहृत्य गदं विधेयम् ।
सौख्यं मयेत्यनुविचिन्त्य किमच्युतोऽसावैच्छध्रदं तमपि कर्तुमहिं गताधिम् ॥ ९ ॥
यज्जीवनं भवति नैव परोपकारि धिक् तस्य जन्म जगतीत्यनुतापयुक्तम् ।
आसीत्पयः किमु विषाग्निमिषेण तस्माच्छ्रीशोऽन्वगात् तदनुतापिजनानुकम्पी ॥ १० ॥

विषयाहिरगाधचित्रवीर्योऽवनिजानेव न केवलं हिनस्ति । अपि तूर्ध्वगतीनपीत्यसूचि वचसाऽर्षेण पतत्खगार्थकेन ॥ ११ ॥

कृष्णप्रिया

श्रीशुकदेवजी कहते हैं—परीक्षित् । भगवान् श्रीकृष्णने देखा कि महाविषधर कालिय नागने यमुना जी का जल विषैला कर दिया है । तब यमुनाजी को शुद्ध करने के विचार से उन्होंने वहाँ से उस सर्प को निकाल दिया ॥ १ ॥ राजा परीक्षित् ने पूछा : ब्रह्मन् ! भगवान् श्रीकृष्णने यमुनाजी के अगाध जल में किस प्रकार उस सर्पका दमन किया ? फिर कालिय नाग तो जलचर जीव नहीं था ऐसी दशामें वह अनेक युगोंतक जलमें क्यों और कैसे रहा ? सो बतलाइए ॥ २ ॥ ब्रह्मस्वरूप महात्मन्! भगवान् अनन्त है वे अपनी लीला प्रकट करके स्वच्छन्द विहार करते हैं। गोपालरूप से उन्होंने जो उदार लीला की है, वह तो अमृतस्वरूप है । भला उसके सेवन से कौन तृप्त हो सकता है ॥ ३ ॥ श्रीशुकदेवजी ने कहा—परीक्षित् । यमुनाजी में कालिय नाग का एक कुण्ड था । उसका जल विषकी गर्मी से खौलता रहता था । यहाँ तक कि उसके ऊपर उड़नेवाले पक्षी भी झुलसकर उसमें गिर जाया करते थे ॥ ४ ॥

[1]विप्लुष्मता विषोदोर्मिमारुतेनाभिमर्शिताः । म्रियन्ते तीरगा यस्य प्राणिनः स्थिरजङ्गमाः ॥ ५ ॥
तं चण्डवेगविषवीर्यमवेक्ष्य तेन दुष्टां नदीं च खलसंयमनावतारः ।
कृष्णः कदम्बमधिरुह्य [2]ततोऽतितुङ्गमास्फोट्य [3]गाढरशनो न्यपतद् विषोदे ॥ ६ ॥
[4]सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसिताम्बुराशिः ।
[5]पर्युत्प्लुतो विषक[6]षायविभीषणोर्मि[7]र्धावन् धनुःशतमनन्तबलस्य किं तत् ॥ ७ ॥
[8]तस्य ह्रदे विहरतो भुजदण्डघूर्णवार्घोषमङ्ग वरवारणविक्रमस्य ।
आश्रुत्य [9]तत् स्वसदनाभिभवं [10]निरीक्ष्य चक्षुःश्रवाः समसरत्त[11]दमृष्यमाणः ॥ ८ ॥

कर्दमक्षमा

यस्य विप्लुष्मता विषोदोर्मिमारुतेन अभिमर्शिताः तीरगाः स्थिरजङ्गमाः प्राणिनः म्रियन्ते ॥ ४ ॥ चण्डवेगविषवीर्यम् तम् अवेक्ष्य नदीं दुष्टां च तेन (अवेक्ष्य) ततः गाढरशनः खलसंयमनावतारः कृष्णः अतितुङ्गं कदम्बम् अधिरुह्य आस्फोट्य विषोदे न्यपतत् ॥ ६ ॥ पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसिताम्बुराशिः विषकषायविभीषणोर्मिः सर्पह्रदः धावन् पर्यक्धनुःशतं प्लुतः तत् अनन्तबलस्य किम् (आश्चर्यम्) ॥ ७ ॥ अङ्ग वरवारणविक्रमस्य ह्रदे विहरतः भुजदण्डघूर्णवार्घोषम् आश्रुत्य तत् स्वसदनाभिभवं निरीक्ष्य तत् अमृष्यमाणः चक्षुश्रवाः समसरत् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च । विप्रुष्मता अंबुकणयुक्तेन विषोदतरंगस्पर्शितमारुतेन स्पृष्टा यस्य तीरगा म्रियंते स ह्रद आसीदिति ॥ ५ ॥ तं कालियम् । चंडो वेगो यस्य तादृशं विषमेव वीर्यं सामर्थ्यं यस्य तम् । कदंबमिति भाविना श्रीकृष्णचरणस्पर्शभाग्येन स एकस्तत्तीरे न शुष्क इति ज्ञातव्यम् । अमृतमाहरता गरुत्मताऽऽक्रांतत्वादिति च पुराणान्तरम् । आस्फोट्य बाहु करतलेनाहत्य गाढा दृढं बद्धा रशना कटिबंधनवस्त्रं येन सः ॥ ६ तदा सर्पस्य ह्रदः पुरुषश्रेष्ठस्य पतनभारेण संक्षोभितानामुरगाणां विषैरुच्छ्वसितोंबुराशिर्यस्य सः । विषेण कषायीकृता भयंकरा ऊर्मयो यस्य सः । पर्यक् परितो धावन् धनुःशतं प्लुतः प्रसृतः नैतच्चित्रमित्याह । अनंतबलस्येति ॥ ७ ॥ ह्रदे विहरतो भुजदंडाहतोदकघोषं श्रुत्वा ततः स्वसदनाभिभवं निरीक्ष्य तदसहमानः सर्पः समसरत् समाजगाम ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्रान्यदाह–किं चेति यस्य ह्रदस्य । अभिमर्शिताः स्पृष्टाः ॥ ५ ॥ चंडस्तीक्ष्णो वेगः । तेन कालियेन । ततः कदंबात् । अतितुंगात् अत्युच्चात् । ह्रद इति शेषः ॥ ६ ॥ तदा पतनकाले । कषायीकृताः क्वथिताः । यद्वा–विषकषायेण विषरागेण विभीषणा ऊर्मयो यस्येति "क्वाथे रागे कषायोऽस्त्री निर्यासे सौरभे रसे" इति यादवः । किं तत् न किमपीत्यर्थः । लक्षयोजनविस्तारायामपरीमितभूप्लावनमपि तत्र नाद्भुतावहमिति भावः । 'षण्णवत्यंगुलं धनुः, इत्यमरः । 'धनुर्हस्तचतुष्टयम्' इति च ॥ ७ ॥ अंग हे नृप । वरवारणो गजेंद्रस्तद्वद्विक्रमस्य । यद्वा–अंगैरवयवैर्वरः श्रेष्ठो यो वारणस्तत्समविक्रमस्य । ततः श्रीकृष्णात् । स्वसदनाभिभवम् स्वस्थानपराभवं । समाजगाम बाधितुमाजगामेत्यर्थः । वरः श्रेष्ठे विट्पतौ च देवादेरीप्सिते वृते" इति यादवः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विप्रुष्मतेति । श्रप्यमाणपयस्तया सदा जवेन तत्कारणानामुच्चलनात् इति मारुतस्यापि दाहकत्वमुक्तम् अन्यश्च विशेषः श्रीहरिवंशे—

"दीर्घं योजनविस्तार (दुस्तरं) मगम्यं त्रिदशैरपि । गम्भीरमक्षोभ्यजलं निष्कम्पमिव सागरम् ॥
दुःखोपसर्पं तीरेषु ससर्पैर्विपुलैर्बिलैः । विषारणीभवस्याग्नेर्धूमेन परिवेष्टितम् ॥
तृणेष्वपि पतत्स्वप्सु ज्वलन्तमिव तेजसा । समन्ताद्योजनं साग्रं तीरेष्वपि दुरासदम्" ॥ इति ।

---

१. विप्रुष्मता–श्रीधर. वंशी. वीर. विश्व. ; विप्लुष्मता–शुक. । २. तुङ्गादास्फोटय–वीर. विज. । ३. रशनोऽभ्यपतत्–इति कस्यचित् । ४. सार्प-विज. । ५. पर्यक्–श्रीधर. वंशी. वीर. विज. विश्व. शुक. । ६. कषायितभीषणोर्मिरश्चद्धनुः–वीर. । ७. रश्चद्धनु–वीर. ; भीधोमनु विज. । ८. तस्मिन्ह्रदे–वीर. विज. । ९. तं स्वं सदना–वीर. । १०. भवं ससैन्यः । ११. तममृष्य–विज. ।

एवं भूमिगुहायां तत्पुरीजलस्तम्भविद्यया जलमध्य एव वा ।। ५ ।। वेगः शीघ्रप्रसर्पणं चण्डेति अप्रतिकार्य्यत्वादितोऽयं निःसार्य एवेति भावः । तेन कालियेन हेतुना अधिरुह्य तच्छिखरे आरुह्य तथा च तत्रैव "आरुढश्चपलः कृष्णः कदम्बशिखरे मुदा" इति ततः कदम्बात् गाढरसन इत्यनेन केशादीनामपि गाढबन्धनमुपलक्ष्यते तथा च तत्रैव "बध्वा परिकरं दृढम्" इति न्यपतदित्यत्र हेतुः खलानां संयमनाय अवतारः स्वलोकादवतरणं किंवा मत्स्याद्यवतारा अपि यस्य सः इति कालियदमनार्थमित्यर्थः । एकः कदम्बः किमवशिष्टः श्रीकृष्णवृक्षत्वात् कृष्णवत् "कदम्बः कृष्णवृक्षो हि कालियह्लदसमीपगः । तस्मादेको न शुष्कोऽसौ विषहारकरः परान्" इति प्रसिद्धया श्रीकृष्णेनैव स विहाराय रक्षित इति गम्यते, परानिति वचनात् तत्संनिवासिनो वृक्षगणा अपि न मृता इत्यायातमेवेत्यर्थः ।। ६ ।। पुरुषसारत्वादेव निपातवेगः अन्यत्तैः । यद्वा, पुरुषस्य भगवतः सारेण किञ्चिद्बलप्राकट्येन यो निपातस्तस्य वेगेन जवेन संक्षोभितः अत एवोरगविषोच्छ्वसितश्चाम्बुराशिर्यस्य स कषायितेति पाठः श्रीचित्सुखस्य श्रीस्वामिपादानां च सम्मतः कषायीकृत इति व्याख्यानात् । कषायोऽत्र क्वाथ्यरसो रक्तः पीतवर्णो वा "निर्यासेऽपि कषायोऽस्त्री" इत्यत्र क्षीरस्वामिना तत्तद्व्याख्यानात् । धीमन् हे विवेकिन् ! इति राजानमाश्वसयति, धनुषः प्रमाणमुक्तम् "अष्टभिर्यवमध्यैः स्यादङ्गुलं द्वादशाङ्गुलम् । तालं त्रितालको हस्तो हस्तौ द्वौ किष्कुरुच्यते । किष्कुद्वयं धनुः प्रोक्तम्" इति अतः पूर्वं तावत्प्रदेशमात्रमाक्रम्यैव बाला गावश्च रक्षिता इति ज्ञेयम् अनन्तं बलं शक्तिर्यस्य तत्कर्म । यद्वा, अनन्तस्य नागराजस्यापि विषादिबलं यस्मात्तस्य तद्विषं किम् ? अपि तु न किञ्चिदपीत्यर्थः ।। ७ ।। विहरतः विचित्रजलवाद्यसन्तारादिक्रीडां कुर्वतः वरवारणो दिग्घस्ती तद्वद्विक्रमस्य अङ्गेत्यव्ययं राज्ञः शोकनिरासार्थं सलालनसम्बोधनम् ।। ८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विप्रुष्मतेति श्रप्यमाणपयस्तया सदा जवेन तत्फणानामुच्चलनादिति मारुतस्यातिदाहकत्वमुक्तम् । अन्यश्च विशेषः श्रीहरिवंशे (विष्णु प. ११।४२,४४,४६)—

'दीर्घं योजनविस्तारं दुस्तरं त्रिदशैरपि । गम्भीरमक्षोभ्यजलं निष्कम्पमिव सागरम् ॥
दुःखोपसर्पं तीरेषु ससर्पैर्विपुलैर्बिलैः । विषारणिभवस्याग्नेर्धूमेन परिवेष्टितम् ॥
तृणेष्वपि पतत्स्वप्सु ज्वलन्तमिव तेजसा । समन्ताद्योजनं साग्रं तीरेष्वपि दुरासदम् ॥ इति ॥ ५ ॥

वेगस्तेजो जवो वा; चण्डेत्यप्रतिकार्य्यत्वादितोऽयं निःसार्य्य एवेति भावः । तेन कालियेन हेतुना । अधिरुह्य तच्छिखरमारुह्य; तथा च तत्रैव (हरिवंशे विष्णु प. १२।१) 'आरोहच्चपलः कृष्णः कदम्बशिखरं मुदा' इति । ततः कदम्बात् 'गाढरसनः' इत्यनेन केशादीनामपि गाढबन्धनमुपलक्ष्यते; तथा च तत्रैव (हरिवंशे विष्णु प. १२।१) 'बद्ध्वा परिकरं दृढम्' इत्यभिमुखमपतत्; 'न्यपतत्' इति पाठे महावेगेन कुर्द्दित्वा मध्येऽपतत् । यतः खलानां दुष्टानां संयमनायावतारः श्रीवैकुण्ठादवतरणम्; किंवा मत्स्याद्यवतारा अपि यस्य स इति कालियदमनार्थमित्यर्थः ।। ६ ।। पुरुषसारत्वादेव निपाते वेगः । अन्यत्तैर्व्याख्यातम् । यद्वा, पुरुषस्य भगवतः सारेण बलेन निपाताद्यो वेगो जलसञ्चालनम्, किंवा निपातस्य वेगेन जवेनातिशीघ्रं संक्षोभितोऽतएवोरगविषोच्छ्वसितश्चाम्बुराशिर्यस्य सः । 'कषायित' इति पाठः श्रीचित्सुखस्य श्रीस्वामिपादानाञ्च सम्मतः, 'कषायीकृतः' इति व्याख्यानात् । धीमन् हे विवेकिन्निति राजानमाश्वासयति । अनन्त बल शक्तिर्यस्य; तत् कर्म्म; यद्वा, अनन्तस्य नागराजस्यापि बल यस्मात्तस्य तद्विषं किम् ? अपि तु न किञ्चिदपीत्यर्थः ।। ७ ।। विहरतो विचित्रजलवाद्यसन्तारादिक्रीडां कुर्व्वतः । अंगेत्यव्ययम्, राज्ञः शोकनिरासार्थं स-लालन-सम्बोधने; हे अंगस्वरूपात्मीयेति वा । वरवारणो मत्तगजेन्द्रस्तद्वद्विक्रमो जलाहतिक्रीड़ा यस्य; किंवा, जलेऽपि वरवारणवद्विक्रमो लीलागतिर्यस्य; यद्वा, अंगे कश्मिश्चित् श्रीपादाब्जकनिष्ठांगुल्यवयवेऽपि वारवारणादैरावतादपि विक्रमः शक्तिविशेषो यस्य तस्येति भुजदण्डाभ्यामाहतस्य जलस्य महाशब्दो नादभुत इति भावः । निरीक्ष्यालोच्य चक्षुसैव शृणोतीति चक्षुःश्रवा इति तद्घोषश्रवणे चक्षुप्रवृत्तेस्तस्य वक्ष्यमाणसौन्दर्यं न किञ्चिदाकलयदिति भावः, अन्यथा दंशनासम्भवात् । यद्वा, चक्षुषि श्रवः कीर्तिर्यस्य चक्षुषा श्रवणस्यापि सिद्धेस्तत्साफल्यं त्वधुनैवाभूदिति भावः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

गाढरशनः द्रढीकृतवासः परिधानः ॥ ६ ।। पुरुषसारः कृष्णः विषोच्छ्वसिताम्बुराशिः विषजुष्टप्रवृद्धवारिपूरः धनुः शतं धनुः शतहस्तमितं देशं पर्यक्प्लुतः तीरप्रान्तमलङ्घयत् ।। ७–८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यस्य ह्रदस्य तीरगाः स्थिरजङ्गमाः वृक्षादिरूपा मृगादिरूपाश्च प्राणिनः विप्रुष्मता शीकरयुक्तेन विषजलतरङ्गाणां मारुतेनाभिमर्शिताः संस्पृष्टाः म्रियन्ते तथाविधः कश्चिद्ध्रदः कालीयस्यावासभूतः कालिन्द्यामासीदित्यन्वयः ॥ ५ ॥ स्पर्शमात्रेणैव व्यापनशीलं विषमेव वीर्यं बलं यस्य तं कालीयं ह्रदं वा तेन दुष्टां नदीं यमुनां चालोक्य खलानां संयमनाय दमनायाऽवतारो यस्य सः हेतुगर्भमिदं तत्त्वाद् कदम्बं वृक्षमधिरुह्य गाढा दृढीकृता रशना काञ्ची यस्य सः आस्फोट्य करतलेन भुजमुत्सङ्गं वा आहत्याधु

श्रतात्ततः कदम्बात् कथञ्चिद्विषोदे न्यपतत् अमृतमाहरता गरुत्मताक्रान्तत्वात्स कदम्बो विषजलेनापि न शुष्क इत्याहुः ॥ ६ ॥ सर्पस्य ह्रदः पुरुषवर्यस्य पुरुषोत्तमस्य निपातवेगेन संक्षोभितानामुरगाणां विषैरुच्छ्वसितः प्रवृद्धोऽम्बुराशिर्वारिपूरो यस्य विषैः कषायिताः कषायीताकृताः क्वाथिनाः भीषणा ऊर्मयो यस्मिन् तथाभूतः पर्यक् परितोऽश्चधनुश्शतं तत्परिमाणस्थलं प्लुत आवृतः, नैतच्चित्रमित्याह—अनन्तबलस्य तत्किं कियत् ॥ ७ ॥ तस्मिन् ह्रदे विहरतः गजश्रेष्ठस्येव विक्रमो यस्य तस्य भगवतो भुजदण्डाहतोदकघोषमाकर्ण्य अङ्ग हे राजन् ! स्वनिलयतिरस्कारमसहमानश्चक्षुःश्रवाः सर्पः स्वसैन्यसहितः समसरदाजगाम ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विप्लुष्मता विशेषेण दहता "प्रेष प्लुष दाहे" इति धातुः विषेण विशिष्टमुदं विषोदं तेन युक्ता ऊर्मयः विषोदोर्मयः यस्य स तथा स चासौ मारुतः विषोदोर्मिमारुतः तेनाभिमर्शिता आवृत्य गृहीताः यस्य ह्रदस्य ॥ ५ ॥ तेन कालियेन खलानां संयमनार्थं निग्रहार्थम् अवतारो यस्य स तथा आस्फोट्य द्विगुणीकृतहस्तप्रहारं कृत्वा गाढरशनः दृढबद्धकक्षप्रदेशः विषोदे विषमिश्रितजले ह्रद इति शेषः ॥ ६ ॥ सर्पस्य निवासभूतह्रदः सार्पह्रदः पुरुषभारस्य पुरुषवरस्य पुरुषश्रेष्ठस्य पुरुषोत्तमस्येत्यर्थः । निपातवेगेन सङ्क्षोभितस्य सञ्चालितस्य स्वस्थानस्थितिक्लिष्टस्योरगस्य विषेण सह उच्छ्वसितः उद्रेचितः अम्बुराशिर्यस्य ह्रदस्य स तथा विषकषायेण विषक्वाथेन विषरागेण वा विभीषणोर्मिभिः भयङ्करतरङ्गोर्मिभिः भयजनक "रागे क्वाथे कषायोऽस्त्री निर्यासे सौरभे रसे" इति यादवः । एवंविधो ह्रदो धनुश्शतं तीरस्थानमुल्लङ्घ्य पर्यक् प्लुतः परितः उद्रिच्य गतः हरेरेतन्न चित्रमित्याह—अनन्तबलस्येति । लक्षयोजनविस्तारायामपरिमितभूप्लावनेपि न चोद्यं किमुत धनुःशतमित्यर्थः ॥ ७ ॥ अङ्ग नृप ! शृणु वारवारणविक्रमस्य गजेन्द्रविक्रमस्य यद्वा अङ्गैरवयवैः वरणीयस्य वारणस्य विक्रम इव विक्रमो यस्य स तथा तस्य हरेर्भुजदण्डाभ्यां घूर्णस्य मन्द्रध्वनितया क्षुब्धस्य वारः जलस्य घोषमाश्रुत्य तस्मात्स्वसदनाभिभवो यस्तममृष्यमाणः चक्षुःश्रवाः सर्पः तं कृष्णं समसरत् संसृतवान् बाधितुमागतवानित्यर्थः "वरो ना रूपजामात्रोर्देवादेरीप्सिते वृते" इति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विप्रुष्मतेति जलस्तम्भविद्यया तन्मध्य एव तत्पुरीदुःखोपसर्पं तीरेषु ससर्पैर्विपुलैरिति श्रीहरिवंशदृष्ट्या बिलेष्वपि ॥५–६॥ पुरुषस्य भगवतः सारेण किञ्चिद्बलप्राकट्येनेत्याद्यपि ग्राह्यं कषायितेति पाठः श्रीस्वामीचित्सुखस्यापि मतः कषायीकृता इति व्याख्यानात् ॥७–८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विप्रुष्मता अम्बुकणयुक्तेन विषादकतरङ्गस्पर्शिमारुतेन अभिमृष्टाः स्पृष्टाः ॥ ५ ॥ तं कालियं कदम्बमिति भाविना श्रीकृष्णचरणस्पर्शभाग्येन स एकस्तत्तीरे न शुष्कः अमृतमाहरता गरुत्मताक्रान्तत्वादिति पुराणान्तरमिति श्रीस्वामिचरणाः गाढं दृढं बद्धा रशना रशनादौ लक्षिताः कुन्तलोष्णीषादयोपि येन सः आस्फोट्य बाहुं करतलेनाहत्य ॥ ६ ॥ ततश्च पुरुषस्य कृष्णस्य सारेण बलेन यो निपातवेगस्तेन संक्षोभितानाम् उरगाणां विषैरुन्नतोऽम्बुराशिर्यस्य सः विषेण कषायीकृता रक्तपीतवर्णीकृता भयङ्करा ऊर्मयो यस्य सः "निर्यासेऽपि कषायोऽस्त्रीत्यत्र" क्षीरस्वामिना तथा व्याख्यानात् पर्य्यक् परितः धनुश्शतं प्लुतः प्रसृतः—

"अष्टभिर्यवमध्यैः स्यादङ्गुलं तैस्त्रिभिर्भवेत् । तालं त्रितालको हस्तो हस्तौ द्वौ किष्कुरुच्यते ॥

किष्कुद्वयं धनुःप्रोक्तम्" इति ॥ ७ ॥ विहरतः विचित्रजलवाद्यसन्तारादिना क्रीडतः भुजदण्डाभ्यां घूर्णा येषां तथाभूतानां वारां जलानां घोषं श्रुत्वा तत्ततो घोषादेव स्वसदनस्याभिभवं निरीक्ष्य तत्तम् असहमानः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यस्य तीरगाः स्थिरजङ्गमाः स्थावराः जङ्गमाश्च विप्लुट् विषाम्बुकणो विद्यते यस्मिन् तेन विषोदकोर्मिस्पर्शिमारुतेन अभिमर्शिताः परितः स्पृष्टा म्रियन्ते स ह्रदः आसीत् ॥ ५ ॥ खलसंगमनाः अवताराः यस्य सः स्वयमाविर्भूतो भगवान् कृष्णः तं कालियं चण्डवेगं तीव्रवेगं यद्विषं तदेव वीर्यं यस्य तं तेन दुष्टां नदीं प्रावृषि अतिवृष्ट्यां सत्यां तज्जलप्रवेशादित्यर्थः । काद्रवेयैर्नियुक्तेनामृतमाहरता श्रीगरुडेनाक्रान्तत्वात्स कदम्बस्तत्तीरे न शुष्कस्तमधिरूढः गाढा दृढीकृता रशना काञ्ची येन सः बाह्वाद्यङ्गानि करतलाभ्यामास्फोट्याहत्य ततो निपतत् ॥ ६ ॥ तदा स सर्पह्रदः पुरुषसारस्य पतनवेगेन संक्षोभितानामुरगाणां विषैरुच्छ्वसितः उद्रिक्तोऽम्बुराशिर्यस्य सः विषैः कषायाः कषायीकृताः विशेषतो भीषणा ऊर्मयो यस्य सः पर्य्यक् परितो धावन् धनुःशतं प्लुतप्रसृतः एतच्चित्रं नेत्याह—अनन्तबलस्य किं तदिति ॥ ७ ॥ तस्य श्रीपुरुषोत्तमस्य भुजदण्डाहतोदकघोषमाकर्ण्य तत्ततः स्वसदनाभिभवं च निरीक्ष्य तदमृष्यमाणः तत्स्वसदनाभिभवमसहमानाः समसरत्समाजगाम ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

विप्रुष्मता तदम्बुकणयुक्तेन अभिमर्षिताः स्पृष्टाः सन्तः ॥ ५ ॥ तमहिं कदम्बमधिरुह्यातितुङ्गात्ततो विषोदेऽभ्यपतत्। एष कदम्बो भाविभगवत्पदस्पर्शसौभाग्यान्न शुष्कः सुधामाहरता गरुडेन तस्मिन्नुपवेशाद्वा गाढा दृढबद्धा रसना परिकरबन्धनं येनेति कुन्तलोष्णीषादेरुपलक्षणम्। बाहुं वामं दक्षिणपाणितलेनास्फोट्य आहत्य ॥ ६ ॥ पुरुषस्य हरेः सारेण बलेन यो निपातवेगस्तेनासंक्षोभितानामुरगाणां विषैरुच्छ्वसित उन्नतोऽम्बुराशिर्यस्य सः विषेण कषायां क्वाथरसो रक्तपीतवर्णता तेन विभीषणा भयङ्करा ऊर्मयो यस्य स सर्पह्रदः पर्यक् परितो धनुःशतं प्लुतः प्रसृतोऽभूत्—

अष्टभिर्यवमध्यैः स्यादङ्गुलं तैस्त्रिभिर्भवेत्। तालं त्रितालको हस्तौ हस्तौ द्वौ किष्कुरुच्यते ॥

किष्कुद्वयं धनुः प्रोक्तम्"। इति वचनात् धनुर्मानं बोध्यम् ॥ ७ ॥ तस्य विहरतो विचित्रजलवाद्यसन्तारादिना विक्रीडतो भुजदण्डाभ्यां घूर्णा येषां तादृशानां वारां घोषमाश्रुत्य तद्घोषादेव स्वसदनस्याभिभवञ्च निरीक्ष्य तत्तदमृष्यमाणोऽसहं चक्षुःश्रवाः सर्पः समसरदागतः ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यस्मिन् श्राप्यमाण श्रा पाके। पुगन्तः। विषजनिताग्निना क्वथ्यमानं पयो जलमुपरिगाः खगाः पक्षिणोऽपि पतन्ति स कश्चित्कालिन्द्यां कालियस्य कालीयस्य संज्ञाद्वयं ज्ञेयं ह्रद आसीत् चेत्किमित्यतो वक्ति ॥ विप्लुष्मतेति। विप्लुष्मता विषाग्निकणवता विषोदोर्मिमारुतेन विषविदूषितं यदुदं तस्य ये या वोर्मयस्तरङ्गास्तत्सङ्गतः सदा तेनाभिमर्शिताः स्पृष्टा यस्य तीरगाः स्थिरजङ्गमाः प्राणिनो म्रियन्ते प्राणिनोऽन्तश्चेष्टावतः कालियस्येति वाऽन्वयः। अनेन स्थिरजङ्गमा इत्यत्रत्यजङ्गमपदेन प्राणिनां लाभात्तदतिरिच्यत इति निरस्तं ॥ ५ ॥ चण्डः प्रचण्डोऽपरिहार्यो वेगो यस्य तच्च तद्युपवीर्यं यस्य तमवेक्ष्य तेन च दुष्टां नदीं यमुनां चावेक्ष्य। किमार्द्रकवणिजो वहित्रचिन्तयेति पशुपालस्य पथिकस्येति व्यर्थेत्यतः कथयति। खलसंयमनं येन सः संयमयतीति संयमनोऽवतारो यस्य स इति कृष्णः कदम्बं नीपपादपं। कदम्बमाहुः सिद्धार्थे नीपेऽपि निकुरम्बक इति विश्वः। तन्मात्रस्य विषोर्मिवापघातेऽपि न घातो गरुत्मतो हरतोऽमृतं बिन्दुः पतितः करत इति। यथोक्तं मात्स्ये। गृहीत्वाऽमृतपात्रं हि गच्छन्मार्गे क्षुधार्दितः। कदम्बे कलशं न्यस्य यमुनातीरगो विराट्। जहार मत्स्यं नीरस्थं शतः सौभरिणा रुपेति। सर्पराजसचिवमोचितविषभयं काननं तद्विहारार्थं रक्षितमिति वृक्षोऽपि तदुपान्तवर्त्यवर्ततेति वा। यथोक्तं हरिवंशे। तदिदं दारुणाकारमरण्यं रूढशाद्वलं। रक्षितं सर्पराजस्य सचिवैराप्तकारिभिः। वनं निर्विषयाकारं विषान्नमिव दुःस्पर्शं। तैराप्तकारिभिर्नित्यं सर्वतः परिरक्षितमित्यादि। अधिरुह्य ततस्तस्यातितुङ्गात्प्रदेशाद्गाढरसनो दृढबद्धकाञ्चिर्दृढशब्द इति वा। यथोक्तं हरिवंशे। बद्ध्वा परिकरं दृढं ह्रदमध्येऽकरोच्छब्दं निष्टतन्नम्बुजेक्षण इति। रसनं स्वादने ध्वाने रसना काञ्चिजिव्हयोरिति विश्वः। आस्फोट्य भुजेनैकेनापरं भुजं द्वाभ्यां कराभ्यामङ्कद्वन्द्वं वाऽऽस्फालयित्वा विषोदे ह्रदे न्यपतदुड्डीनं कृतवान् ॥ ६ ॥ सर्पस्यायं सार्पो ह्रदः पुरुषसारस्य रसः सारो वर इति गीताभाष्योक्तेः पुरुषोत्तमस्य निपातस्य यो वेगस्तेन सङ्क्षोभितस्येतस्ततश्चलनवत उरगस्य सर्पस्य गतं यद्विषं तेनोच्छ्वसित उद्रेचितोऽम्बुराशिर्जलजालं यस्मिन्स विषकषायेण तत्क्वाथेन विभीषयन्ति जनानिति विभिषणा ऊर्मयस्तैस्ताभिर्वा भीमो भयङ्करः। रागे क्वाथे कषायोऽस्त्री निर्यासे सौरभे रस इति यादवः। कषायो रसभेदे स्यादङ्गरागे विलेपने। निर्यासे च कषायोऽपि सुरभो लोहितेऽन्यवदिति विश्वाद्रसविशेषो वा। धनुःशतं तत्प्रमाणं विष्वङ्नद्याः परित प्लुत आप्लुतः। इदं यदुपतेर्न चित्रमित्याह ॥ अनन्तबलस्य किं तदिति। अनन्तं बलं यस्य तस्य धनुःशतजलोत्प्लावनं किं कियत तर्हि बहुदवीयः पदवीं प्रति कुतो नाकारी वारिप्लावनं भगवतेति तु तत्रत्यजनार्दनं स्यादिति जानता जनार्दनेनैतावदेवाकारीति निरस्तं। अमितादिपदानि बन्धनानन्तपदबन्धनेन नोभयथाऽपि विषविषमतेति द्योतयति। अनन्ते शेषे बलं परिवर्तमानं यस्य स तथा शेषशयनस्य न विषबाधेति नाद्भुतं। योऽनन्तनामा गरुडस्तदंसक इत्यादेरनन्तो गरुडस्तेन वलनं सञ्चरणं यस्य तस्येति नाद्भुतमिति ॥ ७ ॥ चक्षुरेव श्रवः श्रवणं यस्य स सर्पस्तस्मिन्ह्रदे विहरतः क्रीडतः। अङ्ग हे राजन्। वरवारणविक्रमस्य वरः श्रेष्ठो वारणो गजस्तस्य विक्रम इव विक्रमो यस्य तस्य। अङ्गेन वरो वारणः पृष्ठ इति तस्येति भुजदण्डाभ्यां घूर्णन्भ्रमन्वारुदकं तस्य घोषं स्वसदनस्याभिभवस्तिरस्क्रिया येन तं ध्वनिं श्रुत्वा ससैन्या इतरसरीसृपयुतोऽमृष्यमाणोऽसहमानस्तत्तस्मात्समसरदुपगतः। वरवारणविक्रमस्येत्युक्तिरित्वतरालक्ष्यतां निमित्तीकृत्येति वा जलविहारोत्साहो बहुलस्तस्येति वेति ज्ञेयं ॥ ८ ॥

श्रीसुबोधिनी

परितो दोषमाह **विप्लुष्मतेति**, बिन्दुसहितेन **विषोद**सम्बन्धिना**मूर्मीणां** चलनेन जातेन वायुना**भिमर्शिताः** स्पृष्ट एवोभयकूले विद्यमानास्तीरगा भूमिष्ठा अपि **प्राणिनः** स्थावरा वृक्षा **जङ्गमा** मण्डूकादयोपि प्रमादादप्यागता म्रियन्ते, लतावृक्षशाखाश्च वर्धमानास्तत्रायान्तीति तथोक्तम् ॥ ५ ॥ एतादृशो दोषः परिहरणीय इति भगवानुद्यमं कृतवानित्याह तमिति, आदौ भगवान् स्वयं तत्र गत इत्याह, **तं** कालीयं प्रसिद्धमल्पेन न निराकार्यं **चण्डवेगं** कालवदतिवेगवत्तरं, अत एव भगवतैव शक्यप्रतीकार

इत्यवेक्ष्य कदम्बमधिरुह्य ततोतितुङ्गात् बाहुस्फोटनं कृत्वा मल्लभावाविष्करणेन विषोदे न्यपतदितिसम्बन्धः, प्रथमत एव **चण्डवेगं** तत्रापि **विषं वीर्यं** यस्येत्युपासिता देवता तस्य प्रत्यक्षेति सूचितं, अत एव भगवदतिक्रमोपि, "विषमिति सर्पा" इतिश्रुतेः "तद्धैनान् भूत्वावतीति च" अत एव विषस्य चण्डवेगता गुण उक्तः, विषस्यापि पराक्रमः, **तेन दुष्टा**मिति विशेषणांशे भरः, अत एवाधिदैविकेन दुष्टा देवाधिदेवं विना नान्येन समीचीना कर्तुं शक्या, **चकारात्** तं चापि **दुष्टं** समीचीनं कर्तुं, **खलसंयमनावतार** इत्यवतारप्रयोजनमपि तत्, **खलाः** परोपद्रवकारिणस्तेषां **संयमो** नियमनं, **जीवने दोषनिवृत्तौ दोषमेव** दूरी**करोति न मारयती**त्यन्यदा **मारयती**तिनियमः, **नियमनार्थ**मेवावतारः, **कृष्ण** इति सदानन्दो दोषनिवृत्त्यर्थं, तज्जातीयश्च कदम्बो वृक्षः, स हि तुङ्ग उच्चे वर्तते, स हि कदम्बो भगवत्कृत एव गरुडस्थानभूतः, तत्रागत्य गरुडः कालीयनिर्गमनं मारणार्थं प्रतीक्षते, गरुडकृपयैव न शुष्यात **विप्लुष्मते**तिविशेषणात् सजलवायुस्पर्श एव मरणस्योक्तत्वादूर्मिजनितस्यैव वायोस्तथात्वादुच्चैः स्थितोयं **महान् वृक्षो न म्रियत** इतिसिद्धान्तः, प्रथमतस्तस्यारोहणं कृत्वा **ततो** वृक्षादतितुङ्गादत्युच्चे रोधसि प्ररूढादत्युच्चाधिदैविकेन सह समानेन युद्धं कर्तुमास्फोटनं कृत्वा मध्ये कालेन भूमौ मर्यादाभङ्गो मा भवत्विति **गाढा रसना** यस्य तादृशो भूत्वा **नितरामास्फालनं** कृतवान्, स्थानस्य क्रूरतानिर्देशो भगवन्माहात्म्यज्ञापनाय ॥ ६ ॥ ततो यज्जातं तदाह **सर्पह्रद** इति, **पुरुषसार**स्य पुरुषोत्तमस्य **निपातवेगे सम्यक् क्षोभितो** योयमुरगस्तस्य यद् **विषोच्छ्वसितं** विषोच्छ्वासस्तेनोच्छ्वसितो**म्बुराशि**र्यस्य, **उच्छ्वसित**पदमावृत्त्या योजनीयं, एतादृशो ह्रदः, **परितः** प्लुत उत् **प्लुतः**, वर्षायामिवोच्छूनो जात उत्प्लुत्य गच्छन्निव जाता वा, भगवन्निपातेन जातक्षोभादितोन्यत्र गमिष्यामीति, **विषेण कषाया** विशेषेण **भीषणा ऊर्मयो** यस्य तादृशश्च सः, एतादृशो धावन् जातः, अधावदिति वा, अडभावश्छान्दसः, **धनुःशतं** हस्तानां, चतुःशतं **अनन्तबलं** यस्य तादृशस्य नैतदाश्चर्यं, **अनन्ते** काले वा बलं यस्मात्, यस्तु जगदेवोत्प्लुतं करोति **विषकषायविभीषणोर्मि**त्वकथनात् सर्वमारकत्वं तस्योक्तं, उपासितभगवच्चरित्रमेतत् ॥ ७ ॥ भगवत्समीपमागत इत्याह **तस्ये**ति **ह्रदे विहरतो** भगवतः **समसरत्** समीपं गतः, **भुजदण्डयोः** प्रहारेण **घूर्णायमानं** यद् **वार्जलं** तस्य **घोषमाश्रुत्य तदमृष्यमाणः** समागत इति **सम्ब**ध्यते, आदौ निपाते किं जातमित्याश्चर्याविष्टस्ततः कश्चिद् विह**रती**ति श्रुतवान्, ततोपि **तस्य** बाहुप्रहारेण जले शब्दः श्रुतः, शब्दे हेतु**र्वरवारणविक्रमस्ये**ति, **वर उत्कृष्टो यो वारणो** गजस्तद्वद् **विक्रमो** यस्येति, तस्य हि स्वभावो जले विहरणं, सर्वोपमत्वाद् भगवतोपि तथा, न श्रवणमात्रेण तस्यागमनं किन्तु **तेन** भगवता **स्वसदनस्याभिभवं** श्रुत्वा **तेन** शब्देन वा **चक्षुःश्रवा** इति श्रवणदर्शने एकत्रैव, अतः श्रुतमपि दृष्टमिव मन्यते, **सम्यगागत** इति, स्वप्रौढिसहितः, **तत्स्वसदनाभिभवममृष्यमाण** इत्यागमने हेतुः ॥ ८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तं **चण्डवेगे**त्यत्र विषयस्य **चण्डवेग**तेतिव्याख्यानन्तरं, **खलसंयमनावतार** इत्यत्र खलानां **संयम**नं येन तादृशो**वतार** यस्येति **खलसंयमनायावतारो** यस्येति वा व्यधिकरणपदबहुव्रीहिर्ज्ञेयः, **दोषनिवृत्यर्थ**मिति तद्दोषनिवृत्त्यर्थं **गाढरशनत्वकथन**प्रयोजनमाहु**र्मध्य** इत्यादि, स्थितकाल**मध्येने**नागन्तुककालेन भूमौ स्थितिमर्यादाभङ्गो मा **भवत्वित्येतदर्थं तथे**त्यर्थः ॥ ६ ॥

(३) श्रीमद्वल्लभमहाजकृतः श्रीसुबोधिनीलेखः

तमित्यस्याभासे **एतादृश** इति उद्यमहेतुः पूर्ववाक्ययोः शक्योर्थः, भगवत्सामर्थ्यं तात्पर्यार्थः, **अतितुङ्गा**दित्यत्र देवाधिदेवादन्यस्य विषदोषनिवारणाशक्तेरुक्तत्वाद् गरुडस्य तन्निवारकत्वं न सम्भवतीत्यरुच्या सिद्धान्तमन्यमाहुः **विप्रुष्मतेती**ति ॥ ६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यस्य विप्रुष्मता अम्बुकणयुक्तेन विषोदोर्मिमारुतेन विषोदकतरङ्गस्पर्शिमारुतेन अभिमर्शिताः स्पृष्टास्तीरगाः स्थिरा वृक्षादयः, जङ्गमाः पश्वादयश्च प्राणिनो म्रियन्ते स्म । एवंभूतः कालियस्य निवासरूपः कश्चिद् ह्रदः प्रवाहं त्यक्त्वा गर्तविशेषः कालिन्द्यामासीदिति द्वयोरन्वयः ॥ ५ ॥ चण्डोऽपरिहार्यो वेगो यस्य तद्विषमेव वीर्यं बलं यस्य तस्य तथाभूतं तं कालियमवेक्ष्य तथा नदीं यमुनां च तेन दुष्टामवेक्ष्य ततस्तन्निःसारणार्थं गाढा दृढं बद्धा रशना कटिवस्त्रं येन सः कृष्णः अतितुङ्गमत्युच्चं कदम्बवृक्षमधिरुह्य आस्फोट्य करतलेन बाहुमाहत्य ततः कदम्बात् तस्मिन् विषोदे विषयुक्तमुदं यस्मिंस्तस्मिन् ह्रदे न्यपतत् । कालियनिग्रहे हेतुं सूचयन्नाह—खलेति । खलानां परोद्वेजकानां यत् संयमनं निग्रहस्तदर्थमवतारो यस्य सः । अत्र भाविश्रीकृष्णचरणस्पर्शभाग्यवशादेकः स कदम्बवृक्ष एव न शुष्क इति बोध्यम् । अथवा अमृतमाहरता गरुत्मताक्रान्तत्वात् स न शुष्क इति ॥ ६ ॥ भगवतः सामर्थ्यातिशयं स्पष्टयति सर्पह्रद इति । पुरुषसारस्य पुरुषोत्तमश्रीकृष्णस्य निपातवेगेन निपतनभरेण सङ्क्षोभितानामुरगाणां विषेण युक्त उच्छ्वसित उच्छलितोऽम्बुराशिर्यस्य सः, विषेण कषायीकृता रक्तपीतादिवर्णाः विभीषणा भयङ्करा ऊर्मयो यस्य सः, सर्पस्य ह्रदः धावन् पर्यक् सर्वतः धनुःशतं प्लुतः प्रसृतः । धनुर्मानं तु—"अष्टभिर्यवमध्यैः स्यादङ्गुलं तैस्त्रिभिर्भवेत् ॥ तालं त्रितालको हस्तो हस्तौ द्वौ किष्कुरुच्यते ॥ किष्कुद्वयं धनुः प्रोक्तम्" इति ज्ञेयम् ॥ एतच्छ्रुत्वा आश्चर्यं मन्यमानं प्रत्याह अनन्तेति । अनन्तमपरिमितं बलं यस्य तस्य निपातेन तदेतत् धनुःशतं ह्रदधावनमाश्चर्यतया प्रतीयमानमपि किम् ? नाश्चर्यमित्यर्थः । यद्वा विषोद्रेकेण भगवति किञ्चिद्वैगुण्यस्याशङ्कायां तन्निरासार्थमाह—अनन्तबलस्येति । अनन्तस्य नागराजस्यापि बलं यस्मात्तस्य

तत् कालियविषं किम् ? न किमपि कर्तुं शक्तमित्यर्थः ॥ ७ ॥ अङ्ग हे राजन् ! वरवारणः गजश्रेष्ठः तद्वद्विक्रमो विहारो यस्य तस्य ह्लिदे विहरतः कृष्णस्य भुजदण्डाभ्यां हततया घूर्णं यद्वार्जलं तस्य घोषं नादमाश्रुत्य तत् तस्मात् एवं तद्विहारात् स्वसदनस्याभिभवं च निरीक्ष्य तदुभयममृष्यमाणः असहमानः चक्षुःश्रवाः सर्पः समसरत् समीपमाजगाम ॥ ८ ॥

अन्वितार्थप्रकाशिका

विप्रुडिति ॥ यस्य विप्रुष्मता अम्बुबिन्दुयुक्तेन विषोदोर्मिमारुतेन विषोदकस्पर्शिवायुना अभिमर्शिताः स्पृष्टास्तीरगाः स्थिरा वृक्षादयः जङ्गमाः पश्वादयश्च प्राणिनो म्रियन्ते स्म ॥ ५ ॥ तमिति ॥ चण्डोऽपरिहार्यो वेगो यस्य तद्विषमेव वीर्यं बलं यस्य तथाभूत तं कालियमवेक्ष्य तथा नदीं यमुनां च तेन दुष्टामवेक्ष्य ततस्तन्निःसारणार्थं गाढा दृढ बद्धा रशना कटिवस्त्रम् उपलक्षणतया कुन्तलोष्णीषादयोऽपि येन खलानां संयमो निग्रहस्तदर्थम-तारो यस्य स कृष्णः अतितुङ्गमत्युच्चं कदम्बवृक्षमधिरुह्य आस्फोट्य करतलेन बाहुमाहत्य ततः कदम्बात् तस्मिन् विषोदे विषयुक्तमुदं यस्मिस्तस्मिन्हृदे न्यपतत् । अत्र भाविश्रीकृष्णचरणस्पर्शभाग्यवशादेकः स कदम्बवृक्ष एव न शुष्क इति बोध्यम् । अथवा अमृतमाहरता गरुत्मताऽऽक्रान्तत्वात्स न शुष्कः ॥ ६ ॥ सर्पहृद इति ॥ पुरुषसारस्य पुरुषोत्तमस्य श्रीकृष्णस्य निपातवेगेन निपतनभरेण संक्षोभितानामुरगाणां विषेण युक्त उच्छ्वसित उच्छूलितोऽम्बुराशिर्यस्य सः विषेण कषायीकृताः क्वथिताः रक्तपीतादिवर्णीकृता वा "निर्यासेऽपि कषायोऽपि" इत्यत्र क्षीरस्वामिव्याख्यानात्। विभीषणा भयंकरा ऊर्मयो यस्य सः सर्पस्य हृदः धावन् पर्यक् सर्वतः धनुःशतं चतुर्हस्तो धनुः तच्छतं हस्तचतुःशतीं प्रसृतः तत् धनुःशतधावनम् अनन्तबलस्य भगवतः किमाश्चर्यम् ॥ ७ ॥ तस्येति ॥ अङ्ग हे राजन् ! वरवारणः गजश्रेष्ठः तद्वद्विक्रमो विहारो यस्य तस्य हृदे विहरतः जलवाद्यादिक्रीडां कुर्वतः कृष्णस्य भुजदण्डाभ्यां हततया घूर्णं घूर्णनं यस्य तद्यद्वार्जलं तस्य घोषं नादमाश्रुत्य तत् तस्मात् तद्विहारात् स्वसदनस्याभिभवं च निरीक्ष्य तदुभयममृष्यमाणः असहमानः चक्षुःश्रवाः सर्पः समसरत् समीपमाजगाम ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विप्लुष्मता विप्लुषोजलकणा विद्यन्ते यस्मिन् तेन विषोदस्य गरलोदकस्य ऊर्मयस्तरंगास्तेषां स्पर्शयुक्तेन मारुतेन अभिमर्शिताः स्पृष्टाः यस्य हृदस्य तिरगास्तटस्थाः म्रियन्ते एवंभूतो हृद आसीदिति सम्बन्धः ॥५॥ चंडः प्राणिनाशकत्वाच्छ्लेध्य्मिश्र उग्रो वेगी यस्य एवंभूतं यद्विषं तदेव वीर्यं पराक्रमो यस्य तं नागं तेन दुष्टां दूषितां नदीं चावेक्ष्य गाढा दृढबद्धा रशना कटिबन्धनवसनं येन सः कृष्णः अतितुंगं अत्युच्चं कदंबं तरुभेदमारुह्य ततः आस्फोट्य हस्तेन बाहुं ताड़यित्वा विषोदे हृदे पपात अमृतमाहरता गरुडेन विश्रमायाधिष्ठितत्वात् स एव कदम्बो न शुष्क इति पुराणान्तराद्बोध्यम् ॥ ६ ॥ सर्पेति पुरुषोत्तमस्य पतनवेगेन संक्षोभिता उरगाः सर्पास्तेषां विषैरुच्छ्वसित ऊर्ध्वमागतः अंबुराशिर्जलसमुहो यस्य विषेण कषायाः नीलतां प्राप्ताः भयानकाः ऊर्मयो यस्य सः पर्यत् सर्वतः चापशतं धावन् सन् प्लुतो विस्तृतो भूदिति यत् अपरिमितसामर्थ्यस्य तत् किमाश्चर्यम् ॥७॥ तस्येति विहरतो रममाणस्य श्रेष्ठहस्तिपराक्रमस्य हरेः भुजदंडाभ्यां घूर्णं आहतं वार्जलं तस्य धोषं शब्दं श्रुत्वा तत् ततः स्वस्थानपराभवं च निरीक्ष्य तत्कृत्यममृष्यमाणः असहमानं चक्षूंसि एव श्रवांसि कर्णा यस्य सः नागः समसरत् आगच्छत् ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विप्रुष्मतेति ॥ यस्य हृदस्य, तीरगाः स्थिरजङ्गमाः वृक्षादिरूपाः स्थावराः मृगादिरूपा जङ्गमाश्च प्राणिनः, विप्रुष्मता शीकरयुक्तेन, विषोदोर्मिमारुतेन विषमयजलतरङ्गाणां मारुतेन, अभिमर्शिताः संस्पृष्टाः सन्तः, म्रियन्ते, तथाविधः कश्चित् हृदः कालियस्य निवासभूतः कालिन्द्यामासीदिति समन्वयः ॥ ५ ॥ तमिति ॥ चण्डवेगं स्पर्शमात्रेणैव व्यापनशीलं विषमेव वीर्यं यस्य तं, तं कालियं हृदं वा, तेन कालियेन हृदेन वा, दुष्टां नदीं यमुनां च, अवेक्ष्यालोक्य, खलानां संयमनाय दमनायावतारो यस्य सः, हेतुगर्भमिदम् । तत्त्वात्, कृष्णः, अतितुङ्गमत्युन्नतं, कदम्बं कदम्बतरुं, अवरुह्य अधिरुह्य, गाढा रशना यस्य सः, दृढनिबद्धपरिकरः सन्, आस्फोट्य करतलेन भुजमुत्सङ्गं वा आहत्य, ततः कदम्बाद्, विषोदे विषमयजलहृदे, न्यपतत् । अत्र कदम्बः भाविना श्रीकृष्णचरणस्पर्शभाग्येन य एकस्तीरे न शुष्कः । यद्वा । अमृतमाहरता गरुडेन सामृतं घटं यथा तथा क्रान्तत्वादेवात्रैकोऽतिष्ठतेति पुराणान्तरे ॥ ६ ॥ सर्पहृद इति ॥ हे धीमन्, सर्पह्लदः कालीयह्लदः, पुरुषसारस्य पुरुषोत्तमस्य यो निपातः संपतनं तस्य यो वेगस्तेन संक्षोभिताः क्षोभं प्राप्ता ये उरगाः सर्पास्तेषां विषैरुच्छ्वसितः प्रवृद्धोऽम्बुराशिर्वारिपूरो यस्य सः, विषेण कषायिताः कषायीकृता भीषणा ऊर्मयो यस्मिस्तथाभूतः सन्, पर्यक् परितः, धनुःशतं शतधनुष्परिमाणस्थलपर्यन्तं, प्लुतः प्रसृतः, नैतच्चित्रमित्याह । अनन्तबलस्य, तत् किं कियत् लक्षयोजनविस्तारायामपरिमितभूप्लावनमपि यत्र किंचिदिव, तत्र धनुःशतमिति किमु मिति भावः । 'चतुर्हस्तं धनुः प्रोक्तं द्विहस्त इषुरुच्यते' इति धनुष्प्रमाणम् ॥ ७ ॥ तस्येति ॥ अङ्ग हे राजन्, वरः श्रेष्ठो वारणो मतंगजस्तस्येव विक्रमो यस्य तस्य, ह्लदे विहरतः विहारं कुर्वतः, तस्य भगवतः, भुजावेव दण्डौ ताभ्यां घूर्णमाहतस्य वारि जलस्य यो घोषस्तं, भुजदण्डाहतोदकध्वनिमित्यर्थः । आश्रुत्याकर्ण्य, तेन यः स्वसदनस्याभिभवस्तं, अमृष्यमाणोऽसहमानः चक्षुःश्रवाः कालियः, तत्तदा, ससैन्यः स्वकीयसैन्यसहितः सन्, समसरत् सम्मुखमाजगाम ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विप्रुष्मतेति : १०.१६.५.

जातश्चेत्खलवाससङ्गतमरुत्-स्पर्शोऽप्यधः पातयत्यत्युच्चागम-योगसिद्धिनिपुणानप्यर्हतः प्राणिनः ।
सङ्गोऽद्धा यदि तस्य वाच्यमिह किं तद्भूव्यमाकाङ्क्षता कार्या दुर्जनसङ्गतिर्नहि कदाप्येतत्स्फुटं तद्गिरा ॥ १२ ॥

कदम्बमधिरुह्येति : १०.१६.६.

यस्मिन् श्रीशानुग्रहप्रागभावस्तस्याप्यन्ते नेह शक्तः कृतान्तः ।
जाते त्वीशानुग्रहे किं नु वाच्यमस्मिन् स्पष्टोदाहृति-स्तत्कदम्बः ॥ १३ ॥
सदम्बेषु सिद्धं कदम्बेऽपि कुर्यामदम्भेन चानुग्रहं सम्प्रतीति ।
मुदाऽसौ तदाधात्पदा स्वेन गत्वा कदम्बावलम्बावलम्बात् स्फुटार्थम् ॥ १४ ॥
वनीपो नवनीपो वा कोऽप्यस्तु भुवने तु यः । तटस्थवृत्तिः स प्रेयान् ममेत्यबोधि तच्छ्र्यात् ॥ १५ ॥
आगममवलम्ब्यैवं कार्यं जडजातशोधनं विदुषा । इति किं विशदं स्वाशयमीशश्चक्रे तदागमाश्रयतः ॥ १६ ॥
कुजन्म वा न प्रतिबन्धकं हरेरनुग्रहे नापि सुजन्म कारणम् ।
कुजन्मिमुख्योऽपि स भूरुहो भवत्प्रसादभाग् यत्तदवैमि तत्कृपाम् ॥ १७ ॥
नित्यागमः स हि यतोऽयमिहाधिरूढः श्रीमान् प्रभुर्भुवनविश्वविलासहेतुः ।
अन्ये त्वपायिन इति स्फुटमेव तत्र शिष्टस्तरुः स हि यदीशपदावलम्बी ॥ १८ ॥
को वा कस्मिन् स्यात्प्रसङ्गे सहायो धीमानेवं चिन्तयेन् स्नेहभावम् ।
सर्वैः कुर्याद्यज्जगन्नायकस्याप्यासीत् पक्षोऽहिप्रमाथे कदम्बः ॥ १९ ॥

आस्फोट्येति :

खलनिग्रहप्रसङ्गे निपुणतमो बाहुजातमहिमैव । इति तत्कारणभूतौ बाहू प्रतिबोधयंस्तथा चक्रे ॥ २० ॥
त्वामेव यास्यत्यहिरेष रोषादतस्त्वया भाव्यमविन्द्र तेन । यस्माद्भुजस्त्वं भुजगस्त्वसावित्यावोधयत्किं स्वभुज तदेशः ॥ २१ ॥

गाढरशन इति :

विधातुं भक्तानां सुखदमवनौ जीवनमहं तथा कर्तुं नाना खलमदविनाशं च सततम् ।
मया कामं बद्धः परिकर इति स्वाशयमिम प्रभुः शंसन् भक्तान् समभवदलं गाढरशनः ॥ २२ ॥
स्वोदरस्थितजनस्थितिभङ्गो मा भवत्विति धिया स दयालुः । विश्वविश्वपरिरक्षणचित्तः साधु तत्परिकरोदर आसीत् ॥ २३ ॥
सपरिकरमेव भुवनं निर्भयमधुना करोमि सुखशालि । इत्यखिलबोधनार्थं दयालुरासीत्स्वयं स सपरिकरः ॥ २४ ॥
यस्य स्यादुदरं सुराशनगुणश्रीकं न तस्याखिले ब्रह्माण्डेऽपि भयं जरामृतिभवं नाप्यन्यदीयं भयम् ।
क्षुद्रेऽस्मिन् भुवने स निर्भयतयैवान्योपकारेहयाऽऽत्मान केलिपदं नयेदिति तथा कृत्याऽच्युतोऽबोधयत् ॥ २५ ॥
निःसार्य काकोलमकारि सिन्धुपयो यथा प्रागमृतातिशायि ।
तदेव संप्रत्यपि कृत्यमस्तीत्यासीत् किमीशः स तथाप्रयत्नः ॥ २६ ॥
अवितुं भुवनमशेषं त्वनर्हमपि किमिह नहि सहेय । आशयमिमं विशदयन् स्वीचक्रेऽधोगतिं तदा कृष्णः ॥ २७ ॥
दुर्जनप्रवलगर्वहारकं भूमिजावतरणं हि मे मतम् । बोधयन्निति तदाऽच्युतो चिराच्छाखिनः स भुवने ह्यवातरत् ॥ २८ ॥
स्वागमे मम तटस्थवत्स्थितिः सर्वदा तु भुवने विहारभाक् । बोधयन् द्वितयमेतदच्युतस्तादृशस्थिततयाऽऽस यत्तदा ॥ २९ ॥
आद्याच्चरमं सुलभं भक्तानां वीक्षितुं हरे रूपम् । यन्नीपे स न दृष्टः कृष्णो भुवने व्यलोकि गोपालैः ॥ ३० ॥ (युग्मम्)

सर्पह्लद इति : १०.१६.७

मज्जीवनक्षोभकरः प्राप्तः कोऽयमिति क्रुधा । ह्लदः शतधनुःसंस्थाञ्छरौघान् ज्याश्रितानधात् ॥ ३१ ॥
क्रुद्धश्चेत्परमेश्वरस्तदिह रुट्शान्त्यै प्रसादाय च सत्कुर्याद्वसुदानपूर्वमभितो धर्मं हि नानाविधम् ।
आलोच्यैवमवेक्ष्य चाच्युतमपि क्रुद्धं स सर्पह्लदश्चक्रे धर्मशतं लसद्वसु मुदं नेतुं तमेतन्मिषात् ॥ ३२ ॥
त्वमेकमौलिः शतमौलिरेष यत् त्वत्तः शतांशैरधिको बलेन हि । इतीह विज्ञाय कुरु प्रभोऽनुना वैरं ह्लदः किं स जगाद तन्मिषात् ।३३।
धनवन्तरिस्तुतयशाः स किलायमद्य प्राप्तो हि रोगरहितं बत मां विधातुम् ।
जानन्निति ह्लदवरः स हि तन्मिषेण रोगस्थलं सुलभदर्शनयोग्यमाधात् ॥ ३४ ॥
भवह्लदोऽयं विषमस्वभावः क्षोभं गतोऽप्यत्र मम प्रवेशात् । न बाधते मां न मदीयभक्तानपीत्यबोधि ह्यभयोरभीत्या ॥ ३५ ॥

तस्येति : १०.१६.८

साक्षी यद्यपि चिन्मयोऽस्मि च तथाप्यस्मिन् भवाम्भोनिधौ लीलालम्बितविग्रहश्च विहराम्येव स्वभक्तावनम् ।
कर्तुं दुष्टविमर्दनं च तरसेत्यापामरख्यातये मन्ये सज्जनवत्सलेन विभुना तद्वाविहारः कृतः ।। ३६ ।।
प्रागासीद्विग्रहो युक्तः स मया च विनाऽधुना । कोऽयमाप्नोति मृदङ्गविग्रहोऽतिरुषाऽगमत् ।। ३७ ।।
परगृहे परगत्वमचिन्तयन्निजगमे तदिति स्मयसम्भृतः । भवति यः स हि जिह्मगतिः स्फुटं प्रभुगृहं यदहिःस्वमदोऽब्रवीत् ।। ३८ ।।

कृष्णप्रिया

उसके विषैले जलकी उत्ताल तरङ्गोंका स्पर्श करके तथा उसकी छोटी-छोटी बूँदें लेकर जब वायु बाहर आती और तट के घास-पात, वृक्ष, पशु-पक्षी आदि का स्पर्श करती, तब वे उसी समय मर जाते थे ॥ ५ ॥ परीक्षित्, भगवान् का अवतार तो दुष्टों का दमन करने के लिये होता ही है। जब उन्होंने देखा कि उस साँप के विष का वेग बड़ा प्रचण्ड (भयंकर) है और वह भयानक विष ही उसका महान् बल है तथा उसके कारण मेरे विहार का स्थान यमुनाजी भी दूषित हो गयी हैं, तब भगवान् श्रीकृष्ण अपनी कमर का फेटा कसकर एक बहुत ऊँचे कदम्ब के वृक्ष पर चढ़ गये और वहाँ से ताल ठोंककर उस विषैले जल में कूद पड़े ॥ ६ ॥ यमुनाजी का जल साँप के विष के कारण पहले से ही खौल रहा था। उसकी तरङ्गे लाल-पीली और अत्यत भयङ्कर उठ रही थी। पुरुषोत्तम भगवान् श्रीकृष्ण के कूद पड़ने से उसका जल और भी उछलने लगा। उस समय तो कालियदह का जल इधर-उधर उछलकर चार सौ हाथ तक फैल गया। अचिन्त्य अनन्त बलशाली भगवान् श्रीकृष्ण के लिए इसमें कोई आश्चर्य की बात नहीं है ।। ७ ।। प्रिय परीक्षित् ! भगवान् श्रीकृष्ण कालियदह में कूदकर अतुल बलशाली मतवाले गजराज के समान जल उछालने लगे। इस प्रकार जलक्रीड़ा करने पर उनकी भुजाओं के टक्कर से जल में बड़े जोर का शब्द होने लगा। आँख से ही सुनने वाले कालिय नाग ने वह आवाज सुनी और देखा कि कोई मेरे निवास स्थान का तिरस्कार कर रहा है। उसे वह सहन न हुआ। वह चिढ़कर भगवान् श्रीकृष्ण के सामने आ गया ।। ८ ।।

तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुन्दरास्यम् ।
क्रीडन्तमप्रतिभयं[1] कमलोदराङ्घ्रिं सन्दश्य मर्मसु रुषा [2]भुजया चच्छाद ॥ ९ ॥
तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा [3]भृशार्ताः ।
[4]कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो निपेतुः ॥ १० ॥
गावो वृषा वत्सतर्यः क्रन्दमानाः सुदुःखिताः । [5]कृष्णेन्यस्तेक्षणप्राणाः क्रन्दन्त्य[6] इव तस्थिरे ॥ ११ ॥
अथ व्रजे महोत्पातास्त्रिविधा ह्यतिदारुणाः । उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः ॥ १२ ॥

कर्दमक्षमा

अन्वयः–प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुन्दरास्यम् अप्रतिभयं क्रीडन्तं कमलोदराङ्घ्रिं तं रुषा मर्मसु संदश्य भुजया चच्छाद ।। ९ ।। तं नागभोगपरिवीतम् अदृष्टचेष्टम् आलोक्य भृशार्ताः दुःखानुशोकभयमूढधियः तत्प्रियसखाः कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामाः पशुपाः निपेतुः ॥ १० ॥ गावः वृषाः वत्सतर्यः कृष्णे न्यस्तेक्षणाः सुदुःखिताः भीताः क्रन्दमानाः रुदन्त्यः इव तस्थिरे ।। ११ ।। अथ अतिदारुणाः आसन्नभयशंसिनः भुवि दिवि आत्मनि (इति) त्रिविधाः महोत्पाताः व्रजे उत्पेतुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रेक्षणीयश्च सुकुमारश्च घनवदुज्ज्वलश्च तं श्रीवत्सपीतवसनं ह्रदे विहरतः श्रीवत्सेन संयुक्तमुच्चलत्पीतं वस्त्रं यस्य तं भुजया भोगेन चच्छादावेष्टयत् ॥ ९ ॥ स प्रियो येषां ते तत्प्रियास्ते च ते सखायश्चेति तथा ॥ १०–११ ॥ भुवि भूकंपादयः दिवि उल्कापातादयः आत्मनि वामनेत्रस्फुरणादयः । आसन्नं भयं शंसितुं शीलं येषां ते ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तम् कृष्णम् अवदातः श्यामः "अवदातोऽरुणे पीते श्वेते श्यामे निरामये" इति शाश्वतः । मर्मसु यत्र ताडनादिनाऽतीव पीडा मृत्युर्वा जायते तस्थानं मर्मेति । अप्रतिभयम् निर्भयम् । भुजयोर्भोगेन शरीरेण "भोगः सुखे धने चाहेः शरीरफणयोरपि" इति मेदिनी । भुजति कुटिलीभवतीति भुजा 'भुजो—कौटिल्ये' इगुपधत्वात्कः ॥ ९ ॥ सः श्रीकृष्णः । परिवीतं परिवेष्टितम् । न दृष्टा चेष्टा हस्तपादादिचालनरूपा यस्य तम् ॥ १० ॥ वत्सतर्यः गर्भाधानयोग्यवयसः ॥ ११ ॥ आसन्नम् निकटम् ॥ १२ ॥

---

१. प्रतिबलं । २. भुजगश्चछाद–वीर. विज. । ३. भयार्ताः–वीर. । ४. कृष्णार्पितात्म–वीर. । ५. कृष्णन्यस्तेक्षणाः–वीर. विज. । ६. क्षमा भीता रुदत्य–श्रीधर. वंशी. वीर. विज. विश्व. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तादृशोऽपि दुष्टोऽसौ तथाऽचेष्टतेति कालियस्य महापराधं दर्शयन् व्रजजनभावेनानुशोचन् विशिनष्टि—प्रेक्षणीयेत्यादिना। क्रीडन्तमित्यत्र हेतुः अप्रतिभयमिति तच्च कालियस्य निर्बुद्धित्वं सूचयति, चक्षुःश्रवा इति, प्रस्तुतत्वादेव ज्ञेयं कया भुजया भुजाकारत्वात्तस्य भोग एव भुजा यतो भुजग इत्यप्युच्यते तस्माद्भोगेनेत्यर्थः। भुजग इति पाठे भोगेनेति शेषः ॥ ९ ॥ तस्य प्रियसखा इति परमसौहार्दमुक्तं पशुपा इति स्वभावसारल्येन सुस्निग्धचित्तत्वं कृष्णे अर्पिता आत्मानः सुहृदादयश्च यैस्ते तत्साहाय्याय कृतसर्वार्पणा इत्यर्थः। तत्र सुहृदः पितृभ्रात्रादयः अर्था धनानि कामा लोकद्वयभोगाः सुहृच्छब्देन गृहीतस्यापि कलत्रस्य पृथङ्निर्देशो विशेषविवक्षया किन्तु कलत्रपदेन केचिल्लब्धयज्ञोपवीता ये ज्येष्ठास्ते च सखायो लभ्यन्त इति सर्वेषां तेषामनन्यापेक्षत्वम् अतो भृशार्ता अत्यर्थदुःखिताः सन्तः आर्त्तस्वरेण क्रन्दन्तो वा अत एव दुःखेन अनुशोकः वारं वारं शोचनं भयं च तं विना कथं भविष्याम इति ताभ्यां मूढा विवेकहीना धीर्येषां तथाभूता नष्टचेतना वा सन्तः यद्वा नागभोगपरिवीतमालोक्यादौ भृशार्ताः अदृष्टचेष्टं चालोक्य दुःखानुशोकभयैर्मूढधियः सन्तो नितरां छिन्नमूलवृक्षवदचेष्टत्वादिना पेतुः मूढधीत्वादेव तं हृदं न प्राविशन्निति ज्ञेयं तज्जलाप्लुतदेशपतनेऽप्येषां विषाक्रान्तत्वाभावः। श्रीकृष्णस्य स्पर्शप्रभावेन हृदस्यापि निर्विषीकरणात् अदृष्टचेष्टितत्वं च कालियस्य निःसारणाय तस्मिंस्तत्पत्नीषु च तद्दोषातिशयप्रदर्शनार्थम् ॥ १० ॥ क्रन्दमानां आर्त्तनादमुच्चैः कुर्वत्यः इवेति लोकोक्तौ रुदन्त्यः रुदत्यः अश्रूणि मुञ्चन्त्यः तस्थिरे इति परमवत्सलानां गवादीनामत्यन्तशोकेनापि स्तब्धतापत्तेः कदाचिद्वज्रविशेषघातेन मृतस्यापि प्राणिन ऊर्द्ध्वावस्थितिवत् आत्मनेपदमार्षं गवाद्युपलक्षितत्वेन महिष्यादयो हरिण्यादयश्च ज्ञेयाः पशुश्चेति वक्ष्यमाणात् तेषां किञ्चिद्दूरचरत्वेन पश्चादागमनादत्रानुक्तिरियमिति ज्ञेयम् ॥ ११ ॥ अथानन्तरमेव दारुणाः स्वभावतो महाभयङ्कराः महोत्पाताश्च महादुर्निमित्तं स्वभावतः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तादृशेऽपि दुष्टोऽसौ तथाचेष्टतेति कालियस्य महापराधं दर्शयन् भावविशेषेणानुशोचन् विशिनष्टि, तं प्रेक्षणीयेत्यादिना। क्रीड़न्तमित्यत्र हेतुः -अप्रतिभयमिति; यद्वा, अप्रतिभयमपि संदश्य चच्छादेति कालियस्य निर्बुद्धित्वं सूचयति; यद्वा, अप्रतिभयं यथा स्यात्तथा सन्दश्य चच्छाद। चक्षुःश्रवा इति प्रस्तुतत्वादेव ज्ञेयम्। कया ? भजया भोगेन, भुजगस्य भोगेनैव गमनेन भुजस्यैव भोगत्वात्, 'भुजगः' इति पाठेऽपि स एवार्थः। तत्त्वतस्तु मर्म्मसु दशनं तत्तदंगचुम्बनसौष्ठवं भोगेनाच्छादनञ्च सर्व्वांग-निविड़ालिंगनमिति ज्ञेयम्; अतो रुषेव रुषा वस्तुतस्तु प्रेम्णैवेति; यतः प्रेक्षणीयेत्यादि, अतएवाग्रे तं प्रति श्रीभगवतो महानुग्रहो भावीति ॥ ९ ॥ तस्य प्रियसखा इति परमसौहार्दमुक्तम्। पशुपा इति स्वभावतः सुस्निग्धचित्तत्वम्। कृष्णे अर्पिता आत्मनः सुहृदादयो यैरात्मनः सुहृदादयश्चेति वा; तत्र सुहृदः पितृभ्रात्रादयः, अर्था धनानि, कामा लोकद्वयभोगाः सुहृच्छब्देन गृहीतस्यापि कलत्रस्य पृथङ्निर्द्देशोऽर्पणविशेषविवक्षयेत्यनन्यापेक्षत्वम्, अतो भृशार्त्ता अत्यर्थं दुःखिताः सन्तः आर्त्तस्वरेण क्रन्दन्तो वा, अतएव दुःखेनानुशोको वारम्वारं शोचनं भयञ्चानाथत्वादिना; ताभ्यां मूढ़ा विवेकहीना धीर्येषाम्; तथाभूता नष्टचेतना वा सन्तः; यद्वा, नागभोग-परिवीतमालोक्यादौ भृशार्त्ताः, अदृष्टचेष्टञ्चालोक्य दुःखानुशोकभयैर्मूढ़धियः सन्तो नितरां छिन्नमूल-वृक्षवदचेष्टत्वादिना पेतुः। मूढ़धीत्वादेव ते तद्ह्रदं न प्राविशन्निति ज्ञेयम्। अदृष्टचेष्टत्वञ्च श्रीवृन्दावनाश्रितस्यापि कालियस्य निःसारणाय तेष्वन्येषु च लोकेषु तद्दोषातिशय-प्रदर्शनार्थं तत्प्रेमालिंगनानन्देन स्तब्धीभूतमिति तत्त्वार्थः ॥ १० ॥ क्रन्दमाना आर्त्तनादमुच्चैः कुर्व्वत्यः, इवेति लोकोक्तौ, क्रन्दन्त्यो रुदत्योऽश्रूणि मुञ्चन्त्यः। 'तस्थिरे' इति परमवत्सलानां गवादीनामत्यन्तशोकेनातिस्तब्धतापत्तेः। कदाचिद्वज्रविशेषघातेन मृतस्यापि प्राणिन ऊर्द्ध्वावस्थितिवत्। आत्मनेपदमार्षम्। वत्सतराणां वृषेष्वन्तर्भावो ज्ञेयः; प्राधान्याद् गवादयो व्यक्तमुक्ताः, किञ्च, महिष्यादयो ग्राह्या हरिण्यादयश्च। वन्याः सर्व्वेऽपि पशवस्तादृगवस्था एव ज्ञेयाः। पशूंश्चेति वक्ष्यमाणत्वात्तेषां गवादिभ्यः किञ्चिद्दूरचरत्वेन पश्चादागमनादत्रानुक्तिरिति ज्ञेयम् ॥ ११ ॥ अथानन्तरमेवातिदारुणाः स्वरूपतो महाभयंकरा महोत्पाताश्च महादुर्निमित्तस्वभावतः, किंवा, पूर्वोक्तन्यायेन भागवत-प्रवर-श्रीनन्दादिषु कालियस्य परमदुष्टताप्रदर्शनाय एतेषां तत्रागमनार्थम् ॥ १२ ॥

श्रीदर्शनसूरिकृतं शुकपक्षीयम्

फणां चच्छाद छादयामास पशवः पशुप्रायाः तत्प्रभावानभिज्ञाः ॥ १०-११ ॥ आत्मनि शरीरे भुवि शृगालकृतादि दिवि निर्घातादि आत्मनि वामनेत्रस्फुरणादि ॥ १२-१६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

भुजगः कालियस्तं कृष्णं मर्मसु सन्दश्य चच्छाद वेष्टितवान्, कथम्भूतम् ? प्रेक्षणीयश्च सुकुमारश्च घनवन्निर्मलश्च तं श्रीवत्सशब्दोऽत्रार्ष आद्यजन्तः श्रीवत्सयुक्तं पीतं वस्त्रं यस्य तं च स्मितेन सुन्दरमाननं यस्य प्रतिपक्षाद्भयरहितं कमलवदुदरमङ्घ्री च यस्य तम् ॥ ९ ॥ नागस्य भोगेन देहेन वेष्टितमत एवादृष्टा इतरैरलक्षिता चेष्टा यस्य तं कृष्णमालोक्य तस्य कृष्णस्य प्रियाः सखायः

गोपाः भयेनार्त्ताः कृष्ण एवार्पिता आत्मानो मनांसि शरीराणि वा सुहृदादयश्च यैस्तथाभूताः अर्थो वित्तं कामा इष्टार्था दुःखादिभिः मूढा धियो येषां ते निपेतुः दुःखं मानसिकं शोको रोदनम् ॥ १० ॥ वत्सतर्यो दम्याः सुतरां दुःखिताः क्रन्दमाना आह्वयन्त्यः कृष्ण एव न्यस्तानीक्षणानि याभिस्ता रुदन्त्य इव तस्थुः ॥ ११ ॥ दिवि भुव्यात्मनीत्येवं त्रिविधा आसन्नभयसूचका उत्पाता बभूवुः तत्र भुव्युत्पाताः भूकम्पादयः दिव्युल्कापातादयः आत्मनि वामनेत्रस्फुरणादयः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अवदातः श्यामलः "अवदातोऽरुणे पीते श्वेते श्यामे निरामये" इति च, चछाद आच्छादितवान् आवृतवानित्यर्थः ॥ ९ ॥ परिवीतं परिवेष्टितम् अदृष्टचेष्टं निश्चेष्टम् ॥ १० ॥ वत्सतर्यः गर्भाधानयोग्यवयसः ॥ ११ ॥ त्रिविधाः इत्युक्तं विव्रियते—दिवीत्यादिना । दिवि उत्पाताः आदित्यमण्डले कबन्धादिदर्शनं निर्घातादिभिः भुवि कम्पादिकिम् आत्मनि देहे वामनेत्रस्फुरणादि आसन्नभयशंसिनः समीपं भयसूचकः ॥ १२-१४ ॥

श्रीमज्जीव गोस्वामिकृतः क्रमसन्दर्भः

श्रीयुक्तं वत्सं वक्षो यस्य पीतं वसनं यस्य स च सच तं भुजाकारत्वात्तस्य भोग एव भुजा यतो भुजग इत्यप्युच्यते तस्माद्भोगेनेत्यर्थः । भुजग इति पाठे भोगेनेति शेषः ॥ ९-१३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ कालियस्य दौर्जन्यवर्णनद्वारा सौभाग्यविशेषमेव वर्णयन्नाह—तं प्रेक्षणीयेत्यादि । तं श्रीकृष्णं भुजश्छाद । द्वित्वाभावस्त्वार्षः, भोगेन छादयामास, तदङ्गसङ्गालिङ्गनेन सौभाग्यमेव । किं कृत्वा ? रुषा मर्मसु सन्दश्य सच्चिदानन्दघनेषु मर्मसु दशनैरालिख्य । प्रेक्षणीयो नवोदितत्वादतिशयदर्शनीयः सुकुमारः सुस्निग्धो यो घनस्तत्स्वरूपोऽपि अवदातः सुष्ठुतेजाः 'अवदातः सिते पीतः' इत्युक्तेः तेजसश्च शुभ्रधर्मत्वात् । वर्णमहिमा घनाभस्तेजोमहिम्ना सर्वप्रकाश इत्यर्थः । यद्वा, घनावदातो घनज्योतिर्घनानन्दवत् श्री-वत्से श्रीयुक्ते लक्ष्मीलक्ष्मभूषिते वत्से वक्षसि पीतवसनं यस्य । यद्वा, श्रीवत्सं दक्षिणावर्त्तं सूक्ष्मरोमराजिः, श्रीर्लक्ष्मीर्वक्षःस्थलस्था लक्ष्मीस्तस्या वत्समुरश्च । पश्चात् श्रीवत्सश्च श्रीवत्सश्चेत्येकशेषे श्रीवत्सम्, तत्र पीतवसनं प्रालम्बाकारेण स्थितं पीतोत्तरीयं यस्य । एतेन तादृशास्फलानवेगेनापि यथास्थितमुत्तरीयञ्च न लगितमित्यवहेला निःशङ्कतादिकं ध्वनितम् । अतः स्मितसुन्दरास्यं स्मितयुक्तं सुन्दरास्यम्; न तु स्मितेन यति यति असौ दशति, तति तत्येवास्य स्मितं वर्द्धते, तेन युक्तं सुन्दरं मुखं यस्येत्यर्थः । अप्रतिभयं यथास्यात्तथा क्रीडन्तं तेन सहैव क्रीडन्तमिव, एतेन भगवतः कोपाभावः सूचितः ॥ ९-१२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तं प्रेक्षणीयेत्यादि । प्रेक्षणीयः सुन्दरः सुकुमारः सुकोमलो घन इव घनश्यामल इति यावत्, तथाप्यवदातमुज्ज्वलं श्रीर्लक्ष्मीस्तद्युक्तं वत्सं वक्षस्तत्र पीतवसनं यस्य । तावता आवेगेनापि जलनिपाते वक्षसः पीतवासो न स्खलितमिति तात्पर्यम् ॥ ९-१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रेक्षणीयमतिसुखदमपि रूपं कालियं प्रति विपरीतमभूदित्याह—तमिति । घनवदुज्ज्वलं श्रीवत्से विहारवशात् आयातं पीतं वसनं यस्य तं यद्वा श्रिया लक्ष्मीरेखया युक्तं वत्सं वक्षो यस्य पीते वसने यस्य स च स च तम् "उरो वत्सं च वक्षश्च" इत्यमरः भुजया भोगेन ॥ ९ ॥ परिवीतं वेष्टितम् अदृष्टचेष्टमिति कालियस्योत्साहवर्द्धनार्थं क्षणं भीतस्तब्धवत् स्थितं यद्वा अरे कालिय त्वया यथेष्टं प्रथमं दश्यतां वेष्ट्यताम् अहं पश्चात् बलं दर्शयिष्यामीति वीरदर्पेण स्थितं पशुपाः केचित् गोपाः शालिक्षेत्रस्थाः कृषकाश्च शीघ्रमायाताः ते कीदृशाः कृष्णेऽर्पिता लालनार्थमात्मादयो यैस्ते ॥ १० ॥ रुदन्त्य इवेति भयवैयग्र्येणाश्रूणां शोषात् ॥ ११ ॥ त्रिविधाः भुवि भूकम्पादयः दिवि उल्कापातादयः आत्मनि वामनेत्रस्फुरणादयः भगवतः खल्वमङ्गलाशङ्काराहित्येपि यदुत्पातप्राकट्यं तद्गतां गोपादीनां च दुःखसूचनार्थं किंवा तत्तदधिष्ठातृदेवानामपि कृष्णे प्रीतिमत्त्वेनैश्वर्य्यविस्मरणात् कृष्णे ऽप्यशुभाशङ्किनः उत्पातं प्रकटयामासुरिति ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आगत्य किं कृतवानित्याकाङ्क्षायामाह—तमिति । तं श्रीकृष्णं मर्मसु सन्दश्य भुजया भोगेन चछाद अविष्टयत् ॥ ९ ॥ स प्रियो येषां ते तत्प्रियाः ते च ते सखायश्च ते तथा ॥ १० ॥ आसन्नं सन्निहितं भयं शंसितु शीलं येषां ते ॥ १२-१३ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

परममनोज्ञमपि तद्रूपं कालियं प्रति विपरीतमभूदित्याह तमिति । घनावदातं मेघवदुज्ज्वलं श्रिया रेखारूपया युक्तं वत्समुरो यस्य पीते वसने यस्य स च स च तम् । भुजया भोगेन ॥ ९ ॥ परिवीतं वेष्टितं अदृष्टचेष्टमिति त्वया आशौ यथेष्टं वेष्ट्यतामहन्तु पश्चाद्विक्रमं दर्शयिष्यामीति वीरदर्पेण स्थितमित्यर्थः । पशुपाः केचिद्गोपाः शालिक्षेत्रस्थाः कर्षकाश्च शीघ्रमागताः ते कीदृशाः ? लालनार्थं कृष्णेऽर्पितात्मादयो यैस्ते कामभोग्याः दुःखेनानुशोको मुहुः शोचनं तं विना कथं भविष्याम इति भयं ताभ्यां मूढा निर्विवेका धीर्येषां तादृशाः सन्तो निपेताश्छिन्नमूलतरुवन्नितरां पेतुः ॥ १० ॥ रुदन्त्य इवेति भयवैयग्र्येण तदश्रूणां विशेषणात् ॥११॥ त्रिविधाः भुवि भूकम्पादयः दिव्युल्कापातादयः आत्मनि च वामनेत्रस्पन्दनादयः इयमशुभसूचना तल्लीलाशक्त्यैव तत्र व्रजौकसां विक्षुब्धमनस्कतया समाकर्षणाय रचिता नहि भगवति सपरिकरे सा सन्तरेत् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रेक्षणीयश्चातिसुन्दरश्चासौ सुकुमारश्चासौ घनवन्मेघवदवदातः श्यामस्तं । अवदातोऽरुणे श्यामे पीते श्वेते निरामय इति यादवः । श्रीर्वत्से वक्षसि यस्य स चासौ पीतं वसनं यस्य स च तमुरो वत्सं च वक्षश्च । वत्सं तु वक्षसीत्यमरविश्वौ । स्मितेन सुन्दरमास्यं यस्य स तमप्रतिभयं प्रति प्रतिस्थितप्रतिभटभयशून्यम् । तु विप्रतिं नरमित्यृग्भाष्ये महान्प्रतिस्थश्च तु विप्रतिरीरित इत्युक्तेः विस्तरस्तु तट्टीकादितोऽनुसन्धेयः । क्रीडन्तं कमलोदराङ्घ्रिमुदरनाभिश्चाङ्घ्रिः पादश्च तौ कमले इव तस्य तमिति केचित् । कमलोदरवदङ्घ्रिर्यस्य स तं पद्मगर्भारुणेक्षणम् । पद्मोदरसुन्दराभ्यामित्यादेः । मर्मसु सन्दश्य भुजया बाहेयेतिवद्भुजाशब्दष्टाबन्तः । भोगेनेति यावत् । चच्छादापावृणोत् । तं नागभोगेत्युत्तरोक्तिस्वारस्यात्सरसः पाठः । ललितशुल्या बाहुयेति प्रयोगाद्भुजग इति लेखकगतिः ॥ ९ ॥ यस्मिन्कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा अर्पिताः सुहृदो बान्धवा अर्था रायः कलत्रं भार्याः कामोऽपेक्षणीयसर्वविषयो यैस्ते नागभोगपरिवीतम् । अत्र नागपददृष्ट्या भोगशब्दः शरीरमात्रपरः । सरीसृपशरीरबद्धमदृष्टचेष्टं स्वतः सचेष्टमपीतरादृष्टा चेष्टा यस्य तं विलोक्य सप्रियो येषां ते च ते सखायश्चेति ते पशुपा गोपा भृशमार्ता दुःखं चान्तरङ्गिकं तदनुशोको बहिरश्रुप्रदर्शनं भयं चैतैर्मूढा कर्तव्यास्फूर्तिहेतुर्धीर्येषां ते निपेतुः ॥ १० ॥ वत्सतर्यो गर्भाधानयोग्यवयस्काः क्रन्दमानाः क्रोशमाना रुदन्त्य इव तस्थिरे । छान्दसमात्मनेपदम् । इत्याश्चर्यात्मकमव्ययं वतस्थिरेऽवतस्थिरे । वष्टिभागुरिरल्लोपमवाप्योरित्युक्तेरल्लोपे समवप्रविभ्यस्थ इति वाऽऽत्मनेपदता ॥ ११ ॥ व्रजेऽतिदारुणा त्रिविधा उत्पाता उत्पेतुः । तान्प्रकारानुदीरयति । दिवि सवितरि सुषिरादिदर्शनं भुवि कम्पादिरात्मनि देहे पुंसि वामलोचनादिस्फुरणं वामलोचनानां दक्षिणाक्ष्यादिस्फुरणादीनिति । तत्फलं लपति । आसन्नभयशंसिन आसन्नमतिसमीपसमापतद्भयं तच्छंसितुं शीलं येषामातीति ते तथा । अन्ततो गत्वा किंरूपास्त इत्यतोऽप्याह ॥ आसन्निति । अभयशंसिनोऽभयं शंसितुं शीलं येषां ते तथा त आसन् ॥ १२ ॥

श्रीसुबोधिनी

ततोपराधं कृतवानित्याह तमिति, अयुक्तं कृतवानिति वक्तुं भगवन्तं वर्णयति **प्रेक्षणीय**मिति, **प्रेक्षणीय**श्चासौ **सुकुमार**श्चासौ **घनावदात**श्च सात्त्विकादित्रिविधानामप्यादरणीयः, अनेन लोकविरुद्धं तेन कृतमित्युक्तं भवति, परमार्थतोपि विरुद्धं कृतवानित्याह **श्रीवत्सेन** सहितं **पीतवसनं** यस्य, **प्रमेयविरोधः प्रमाणविरोध**श्चोक्तः, **स्मितयुक्तं सुन्दरमास्यं** यस्येति भक्तिमार्गविरोधश्च, **क्रीडन्त**मिति **रसशास्त्रविरोध**श्च, **अप्रतिभय**मिति **नीतिशास्त्रविरोध**श्च, **कमलोदराङ्घ्रि**मिति सर्वोपास्यत्वेन जगद्विरोधश्च, तत्रापराधं कृत्वा स्वस्थानं, नेष्यामीति विचार्य रोषेण **भुजया** स्वकायेन फणेन वा आच्छादितवान् वेष्टितवान् वा ॥ ९ ॥ ततो यज्जातं तदाह **तमि**ति, **नागशरीरेण परिवीतं** शेषशयनाभिनयकर्तारभत एवादृष्टचेष्टमालोक्य प्रलयो भविष्यतीत्याशङ्क्य तस्य भगवतः **प्रियाः** सखायश्च तादृशा **भृशमार्ता** जाताः, ते ह्यात्मनिवेदिनः, **आत्मनिवेदिनां न पृथक् स्थातुमुचितं**, अत एव व्याकुला जाताः, तदाह, **कृष्णे** भगवत्यर्पित **आत्मा** सङ्घातः **सुहृदो** मित्राण्यर्थो धनं **कलत्रं** स्त्री **कामाः** पुत्रादयः, सर्वं एवार्पिता यैः, अत एव दुःख, आत्मापि तत्र वर्तत इति, **अनु** पश्चाच्छोकश्च, सुहृदोपि तत्र निवेदिता इत्युभाभ्यां **मूढा भयेन** च गुणत्रयकार्यैस्त्रिभिरपि **मूढा** धीर्येषां ते, पूर्वं जीविता अपि मूर्छिताः सन्तो **निपेतुः** ॥ १० ॥ गावोपि गोपालवज्जाता इत्याह **गाव** इति, स्त्रियः पुरुषा बालाश्च **क्रन्दमानाः** सुदुःखिता जाताः, तेषां चित्ते सात्त्विकत्वाभावान्न मूर्छिताः किन्तु **कृष्णे न्यस्तानीक्षणानि** प्राणाश्च यस्य, ते सर्पादिभेदं न जानन्ति, पश्यन्ति च कृष्णं, किन्त्वगम्ये तिष्ठतीति **दुःखिताः**, **क्रन्दन्त्य** इति ग्राम्यपशुसङ्घत्वात् स्त्रीप्रयोगः, "ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री"त्यनुशासनात्, यथा वा विवेकयुक्ताः स्त्रियो रुदन्ति तद्वदेव **तस्थिरे,** सर्वं एव देवा लोका भूतानि च कालादयोपि भगवान् शेषशायी प्रलयं करिष्यतीति ज्ञात्वा प्रलये यावन्त उत्पातास्तान् सर्वानेव कृतवन्तः ॥ ११ ॥ ततो **गोकुलवासिनस्तान्** दृष्ट्वा भीता जाता इति वक्तुं प्रकृतोपयोगित्वाच्च **व्रज** एवोत्पातान्

वर्णयत्य**थेति**, सर्वकालविलक्षणार्थमथेति, **महोत्पाताः** प्रलयकालीना दिवि भुव्यन्तरिक्षे चेति **त्रिविधाः**, **हि** **युक्त**श्चायमर्थः, प्रलये हो ते कर्तव्या अन्यथाधिकारिणो दण्ड्याः स्युः, किञ्च शीघ्रमेव प्रलया भविष्यतीत्य**ासन्नभयशंसिनः**, सूचका अपि स्वरूपतोपि भयानका इत्याहा**तिदारुणा** इति **दिव्युत्पेतु**रुत्पन्नाः, **भुव्यात्मनि** शरीरे चोत्पन्नाः एकदोत्पन्नत्वादतिशीघ्रानिष्ट-पर्यवसायित्वम् ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तमित्यत्र प्रेक्षणीयत्वेन ज्ञानयोग्यत्वात् "सत्त्वात् सञ्जायते ज्ञान" मितिवाक्यात् सात्त्विकानामादरणीयः, **सुकुमार**त्वात् स्वरूपलोभेन 'रजसो लोभ एवे' तिवाक्याद् राजसानामादरणीयः, **घनावदात**त्वेन नीलश्वेतरूप इति वर्णतः साजात्यात् स्वदोषनिवृत्त्यर्थं तामसानामादरणीय इत्यर्थः, **प्रमेये**ति श्रीवत्सस्याक्षरात्मकत्वात् पीताम्बरस्य च वेदरूपत्वात् प्रमेयत्वप्रमाणत्वे, **नीतिशास्त्रविरोध** इति एतादृशदुष्टजले निर्भयश्चेत् किञ्चित् कारणं, तत्र विचार्य कर्तव्यं न तु सहसेति नीतिस्तद्विरोध इति ॥ ९ ॥ **तमि**त्यत्र **आर्ता जाता** इति प्रलये आत्मरमणेन नास्माकं सेवा सेत्स्यतीति भावः, **प्रियसखा** इति प्रियाश्च ते सखायश्चेति कर्मधारयस्ततष्टच्, **ते हीत्यारभ्य तदाहे**त्यन्तं **कृष्णेर्पितात्मे**त्यास्याभासो ज्ञेयः, अत एव दुःखमिति अपराधकृतदुःखं भगवति सम्बद्धुमशक्तं सदेतदात्मनि सम्बद्धमित्यथः, **भयेन** चेति दुःखानुशोकयोस्तामसराजसत्वान् मोहजनकत्वं, भयस्य तु सात्त्विकत्वात् सहकारित्वमेवेति भिन्नतया कथनं, **मूर्छिता** इति नीत्युपसर्गस्यार्थः ॥ १० ॥ गाव इत्यत्र सात्त्विकभावं विवृण्वन्ति **ते सर्पादिभेदं न** जानन्तीति, "रुदन्त्य" इत्यत्र रोदनस्य वक्तव्यत्वादि **'वे'** त्युनपपन्नमतः पक्षान्तर**माहुर्यथा** वेति **तस्थिरे** इत्यात्मनेपदानुपपत्त्या अवतस्थिर इत्युक्तं, तदा 'समवप्रविभ्यः स्थ' इत्यात्मनेपदं, भागुरिमतेनाकारलोपः, सवर्णे वर्णलोपः इति इवार्थे वा ॥ ११ ॥ **अथे**त्यत्र **दिवी**ति एत एव क्रमेणाधिदैविकाधिभौतिकाध्यात्मिकरूपा ज्ञेयाः, अत एव टिप्पण्यां तथैवोक्तं, **शरीरे** चेति चकारादात्मपदेनान्तरिक्षमपि गृह्यते, "सूर्यं ते चक्षु" रित्यनुवाके "अन्तरिक्षमात्मे" त्यनेन पश्चात्मत्वं मध्यवर्तित्वसाम्येनोपलक्षणेनोक्तमिति तेनैव हेतुना सर्वात्मत्वमपि ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आगत्य च रुषा क्रोधेन तं कृष्णं मर्मसु यत्र स्वल्पेऽपि ताडने कृते प्राणहानिः स्यात्तेषु कुक्षिकण्ठाद्यवयवेषु सन्दश्य भुजया स्वदेहेन चच्छाद आवेष्टितवानित्यन्वयः। कालियस्यापराधातिरेकं सूचयन् भगवन्तं वर्णयति—प्रेक्षणीयश्च सुकुमारश्च घनवत् अवदातः स्वच्छः श्यामश्च तम्, श्रीवत्सेन सह पीतं वसनं वस्त्रं यस्य तम्, स्मितेन सुन्दरं मनोहरमास्यं यस्य तम्, अप्रतिभयं निर्भयं यथा स्यात्तथा क्रीडन्तम्, कमलोदरवत् रक्तौ कोमलावङ्घ्री यस्य तम् ॥ ९ ॥ तं कृष्णं नागभोगेन परिवीतं परिवेष्टितमतएवादृष्टचेष्टमालोक्य भृशार्ताः अतिपीडिताः ततोऽपि दुःखानुशोकभयमूढधियो दुःखान्तरमपि वारंवार शोकश्च 'अनेन विना किं करिष्याम' इति 'कथं जीविष्यामि इति भयं च तैर्मूढा मूर्छिता विवेकरहिता धीर्येषां ते पशुपा गोपा निपेतुरित्यन्वयः। एवमार्तत्वे हेतुमाह तत्प्रियेति। स एव प्रियो येषां ते तत्प्रियाः, ते च ते सखायश्चेति तथा। तेषां सख्यमेव स्पष्टयति—कृष्णेर्ऽपिता आत्मादयो यैस्ते इति। आत्मा देहादिसङ्घातः, सुहृदः पुत्रादयः, अर्थो धनम्, कलत्रं स्त्री, कामाः इहामुष्मिकभोगाः। न च 'तत्र तादृशविषाक्रान्तदेशे पतितानां तेषां कुतो मरणम्?' इति शङ्क्यम्, भगवत्कृपादृष्ट्याऽमृतवृष्टेर्विद्यमानत्वात्। एवमग्रे नन्दादिष्वपि द्रष्टव्यम् ॥ १० ॥ गवादयोऽपि कृष्णे न्यस्तेक्षणा दत्तदृष्टयः, अतस्तस्य नागवेष्टनेन निश्चेष्टत्वं वीक्ष्य सुदुःखिता स्वरक्षकाभावं मत्वा मृत्योर्भीताश्च, अत एव क्रन्दमानाः आर्तनादमुच्चैः कुर्वत्यः रुदत्यः अश्रूणि विमुञ्चन्त्य एव तस्थिरे स्थिता बभूवुरित्यन्वयः। इवशब्द एवकारार्थकः ॥ ११ ॥ अथ हि अनन्तरमेवातिदारुणाः अतिभयङ्करा भुवि, दिवि, आत्मनि च इत्येवं त्रिविधमहोत्पाता व्रजे उत्पेतुर्बभूवुरित्यन्वयः। तत्र भुवि भूकम्पादयः, दिवि उल्कापातादयः, आत्मनि वामनेत्रस्फुरणादयः। अतिदारुणत्वमेव स्पष्टयति—आसन्नं समीपमागतं भयं शंसितुं शीलं येषां ते इति ॥ १२ ॥

अन्वितार्थप्रकाशिका

तमिति ॥ प्रेक्षणीयश्च सुकुमारश्च घन इव अवदातः स्वच्छश्यामश्च तं जलविहारात् श्रीवत्सेन सह संश्लिष्टं पीतं वसनं यस्य। यद्वा। श्रिया लक्ष्मीरेखया युक्तं वत्सं वक्षो यस्य स चासौ पीतवसनश्च तम्। "उरो वत्सं च वक्षश्च" इत्यमरः। स्मितेन सुन्दरं मनोहरमास्यं यस्य तम् अप्रतिभयं निर्भयं यथा स्यात्तथा क्रीडन्तं कमलोदरे इव रक्तौ कोमलौ चाङ्घ्री यस्य तं श्रीकृष्णं रुषा क्रोधेन मर्मसु प्राणहानिकरेषु कण्ठाद्यवयवेषु संदश्य भुजया स्वदेहेन चच्छाद आवेष्टितवान्। "छे च" इति तुगभाव आर्षः ॥ ९ ॥ तमिति ॥ तं कृष्णं नागभोगेन परिवीतं परिवेष्टितमत एवादृष्टचेष्टमालोक्य भृशार्ताः अतिपीडिताः ततोऽपि दुःखञ्च तदनु दुःखान्तरमपि वारंवारं शोकश्च अनेन विना किं करिष्याम इति कथं जीविष्याम इति भयं च तैर्मूढा मूर्छिता विवेकरहिता धीर्येषां ते स भगवानेव प्रियो येषां ते तत्प्रियास्ते च ते सखायश्चेति कृष्णेऽर्पिता आत्मा सुहृदः अर्था धनानि कलत्राणि कामा भोगाश्च यैस्ते पशुपा गोपा निपेतुः। अत एव मूढधीत्वात्कृष्णनिःसारणार्थं यत्नं कर्तुमपि नाशकन्। यद्यपि तीरगाणामपि विषवेगेन मरणं संभावित

तथापि भगवत्कृपया नाभूत् ॥ १० ॥ गाव इति ॥ गावः वृषाः वत्सतर्यः त्रिवर्षा वत्स्यः कृष्णे न्यस्तेक्षणा दत्तदृष्टयः अतस्तस्य नागवेष्टनेन निश्चेष्टत्वं वीक्ष्य सुदुःखिता स्वरक्षकाभावं मत्वा मृत्योर्भीताश्च अत एव क्रन्दमानाः आर्तनादमुच्चैः कुर्वत्यः रुदन्त्यः । इव एवार्थे नुमार्षः अर्षःश्रूणि विमुञ्चन्त्य एव भयवैयग्र्येणाश्रूणां शोषाद्वा रुदन्त्य इवेति तस्थिरे स्थिता बभूवुः । क्रन्दमानाः तस्थिरे इति च कर्मव्यतिहारे विवक्षिते आत्मनेपदम् ॥ ११ ॥ अथेति ॥ अथ हि अनन्तरमेवातिदारुणाः आसन्नं समीपमागतं भयं शंसितुं शीलं येषां ते भगवतो मङ्गलरूपत्वेऽपि गोगोपानां दुःखसूचनार्थाः भुवि भूकम्पादयः दिवि उल्कादय आत्मनि वामाङ्गस्फुरणादयः इति त्रिविधाः महोत्पाताः व्रजे उत्पेतुः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रेक्षणीयसुकुमारः घनवदवदातः शुद्धशामलः स चासौ स च तं जलविहारात् श्रीवत्सांकेन संलग्नं पीतं वसनं यस्य तं मंदस्मितेन सुंदरमुखं अप्रतिभयं निर्भयं कमलोदरवत् कोमलावंघ्री यस्य तं श्रीकृष्णं रुषा मर्मस्थानेषु संदश्य भुजया भुजाकारदेहेनावेष्टयत् ॥ ९ ॥ नागभोगेन परिवीतं वेष्टितं तस्य प्रियाः स एव वा प्रियो येषां ते च ते सखायश्च भृशार्त्ताः अतिदुःखिताः अर्पिता देहादयो यैस्ते कलत्रशब्देन केषांचिदुद्वाहितानां गोपानां स्त्रियो बोध्याः कामाः भोगाः ॥ १० ॥ वत्सतर्यो वत्सिकाः कृष्णे न्यस्तेक्षणाः धृतनेत्राः रुदत्य इति वक्तव्ये रुदंत्य इत्युच्चारणं बहुलं छंदसीति शपो लुगभावे नुमागमविधानात् तस्थिरे तस्थुः पदव्यत्ययेनात्मनेपदं ॥ ११ ॥ भुवि कंपादयः दिवि विद्युत्पातादयः आत्मनि स्त्रीपुरुषदेहे वामदक्षिणांगस्फुरणादयः आसन्ना भयशंसिनः समीपभयसूचकाः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ प्रेक्षणीयश्च सुकुमारश्च घनवदवदातः श्यामलश्च तं, 'अवदातोऽरुणे पीते श्वेते श्यामे निरामये' इति यादवः । 'अवदातं तु विमले विमले मनोज्ञे सितपीतयोः' इत्यनेकार्थसंग्रहः । श्रीवत्सशब्दोऽत्रार्श आद्यजन्तः । श्रीवत्सयुक्तं पीत वसनं यस्य तं हृदकृतविहारवत्तया श्रीवत्ससंयुक्तोच्चलत्पीतवसनमित्यर्थः । स्मितेन सुन्दरमास्यं यस्य तं, अप्रतिभयं प्रतिपक्षाद्भयरहितं यथा तथा, क्रीडन्तं, कमलस्योदरवत् कोमलावङ्घ्री यस्य तं कमलवदुदरमङ्घ्री च यस्य तमिति वा । श्रीकृष्णं, कालियः, मर्मसु हृदयकण्ठादिमर्मस्थानेषु, संदश्य, भुजया भोगेन स्वदेहेनेति यावत् । चच्छाद वेष्टितवान् ॥ ९ ॥ तमिति ॥ त श्रीकृष्णं, नागः कालियस्तस्य भोगो देहस्तेन परिवीतो वेष्टितस्तं, अत एव अदृष्टा इतरैरलक्षिता चेष्टा यस्य तं तथाभूतं, आलोक्य, तस्य श्रीकृष्णस्य प्रियाश्च ते सखायश्च तत्प्रियसखाः, यद्वा । सः श्रीकृष्णः प्रियो येषां ते च ते सखायश्च, पशुपा गोपाः, भयार्त्ता भयेन दुःखिताः । भृशार्त्ता इति पाठेऽत्यन्तदुःखाः, कृष्णे अर्पिता आत्मानो मनांसि शरीराणि वा सुहृदः अर्था धनानि कलत्राणि स्त्रियः कामा इष्टार्थाश्च यैस्तथाभूताः, दुःखं मानसिकमशर्म च अनुशोको रोदनं च भयं भीतिश्च तैः मूढा धियो येषां तथाभूताः सन्तः, निपेतुः ॥ १० ॥ गाव इति ॥ गावो धेनवः, वृषा वृषभाः, वत्सतर्यो गर्भाधानयोग्यवयसो गावः, सुदुःखिताः सुतरां सजातदुःखाः, क्रन्दमाना आक्रन्दन्त्यः, कृष्णे एव, न्यस्तानीक्षणानि याभिस्ताः, भीता भीतिमत्यः सत्यः रुदन्त्य इव तस्थिरे तिष्ठन्ति स्म ॥ ११ ॥ अथेति ॥ अथानन्तरं, आसन्नभयशंसिनः समीपागतमहाभीतिसंसूचका, अतिदारुणा, दिवि, भुवि, आत्मनि च इत्येवं त्रिविधाः महोत्पाताः, व्रजे उत्पेतुः हि । तत्र भुवि भूकम्पादयः, दिवि उल्कापातादयः, आत्मनि वामनेत्रस्फुरणादयः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तमिति : १०.१६.९.

श्रीवत्सहार्दाभरणं निरीक्ष्याप्यधोक्षजं नालमलक्षि मङ्क्षु । तेनाहिनेत्यत्र न विस्मयो यच्छ्रूत्यङ्गहीनस्थितिरीदृगेव ॥ ३९ ॥
विनापराधं नहि दण्डनार्हो भवत्यसावित्यवगत्य कृष्णः । सेहे तदुन्मादकृतिं निजाङ्गे नो चेत्तथा तत्र पुराऽप्यशक्यम् ॥ ४० ॥
आदावखिलं सर्वं परीक्ष्याथ निजं बलम् । व्यक्तीकार्यं हि शूरेणेत्यधादीशः स्फुटं नयम् ॥ ४१ ॥
स्वानिष्टकृत् स्यात्स्वयमेव जन्तुः स्वकर्मभिस्तत्र न हेतुरीशः । स्पष्टं तमोभोगगुणावृतं श्रीकान्तं चकाराहिरगाधमोहः ॥ ४२ ॥

तं नागेति : १०.१६.१०.

यो निःसीमं प्रेमपात्रं हि यस्य तस्मिन् क्लेशैरन्विते सोऽतिदुःखी ।
लोकेष्वेवं सिद्धमेवेति युक्तं कृष्णं दृष्ट्वा तादृशं ते तथाऽऽसन् ॥ ४३ ॥

अथेति : १०.१६.१२.

तमःप्रभावातिशयः प्रभुः स क्षुब्धो यदा स्याद्भुवने तदानीम् ।
सिद्धा त्रिधोत्पातजनिर्हि गोकुले स्फुटार्थमासीदिति तच्चरित्रात् ॥ ४४ ॥

कृष्णप्रिया

उसने देखा कि सामने एक साँवला-सलोना बालक है। वर्षाकालीन मेघ के समान अत्यन्त सुकुमार शरीर है। उसमें लगकर आँखे हटने का नाम ही नहीं लेतीं। उसके वक्षःस्थल पर एक सुनहली रेखा–श्रीवत्स का चिह्न है और पीले रंग का वस्त्र धारण किये हुए हैं। बड़े मधुर एव मनोहर मुख पर मन्द-मन्द मुसकान अत्यन्त शोभायमान हो रही है। चरण इतने सुकुमार और सुन्दर है, मानो कमल को गद्दी हो। इतना आकर्षक रूप होने पर भी जब कालिय नाग ने देखा कि बालक तनिक भी न डरकर इस विषैले जल में मौज से खेल रहा है, तब उसका क्रोध और भी बढ़ गया। उसने श्रीकृष्ण को मर्म स्थानों में डँसकर अपने शरीर के बन्धन से उन्हें जकड़ लिया॥ ९॥ भगवान् श्रीकृष्ण नागपाश में बँधकर निश्चेष्ट हो गये। यह देखकर उनके प्यारे सखा ग्वालबाल बहुत ही पीड़ित हुए और उसी समय दुःख पश्चाताप और भय से मूर्छित होकर पृथ्वी पर गिर पड़े, क्योंकि उन्होंने अपने शरीर सुहृद, धन-सम्पत्ति, स्त्री, पुत्र भोग और कामनाएँ सब कुछ भगवान् श्रीकृष्ण को ही समर्पित कर रक्खा था॥ १०॥ गाय बैल बछिया और बछड़े बड़े दुःख से डकारने लगे। श्रीकृष्ण की ओर ही उनकी टकटकी बँध रही थी। वे डरकर इस प्रकार खड़े हो गये, मानो रो रहे हों। उस समय उनका शरीर हिलता-डोलता तक न था॥ ११॥ इधर व्रज में पृथ्वी, आकाश और शरीरों में बड़े भयङ्कर-भयङ्कर तीनों प्रकार के उत्पात उठ खड़े हुए, जो इस बात की सूचना दे रहे थे कि बहुत ही शीघ्र कोई अशुभ घटना घटने वाली है॥ १२॥

तानालक्ष्य भयोद्विग्ना गोपा नन्दपुरोगमाः। विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतम्॥ १३॥
तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः। तत्प्राणास्तन्मनस्कास्ते[1] दुःखशोकभयातुराः॥ १४॥
आबालवृद्धवनिताः [2]सर्वेऽङ्ग पशुवृत्तयः। निर्जग्मुर्गोकुलाद् दीनाः कृष्णदर्शनलालसाः॥ १५॥
तांस्तथा कातरान् वीक्ष्य भगवान् माधवो बलः। प्रहस्य किञ्चिन्नोवाच प्रभावज्ञोऽनुजस्य सः॥ १६॥

कर्दमक्षमा

अन्वयः—अङ्ग तान् आलक्ष्य भयोद्विग्नाः अतद्विदः तत्प्राणाः तन्मन्सकाः दुःखशोकभयातुराः आबालवृद्धवनिताः पशुवृत्तयः ते दीनाः कृष्णपर्शनलालसाः नन्दपुरोगमाः गोपाः रामेण विना कृष्णं गाः चारयितुं गतं ज्ञात्वा तैः दुर्निमित्तैः निधनं प्राप्त गोकुलात् निर्जग्मुः॥ १३–१४॥ तान् तथा कातरान् वीक्ष्य माधवः अनुजस्य प्रभावज्ञः सः भगवान् बलः प्रहस्य किञ्चित् उवाच॥ १६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तानालक्ष्य गोकुलान्निर्जग्मुरिति तृतीये नान्वयः। भयोद्विग्ना भयहेतुभ्यो भीताः भयेन कंपमाना इति वा॥ १३॥ न तं हरिं विदंतीत्यतद्विदः॥ १४॥ पशुवृत्तयोऽतिवत्सलाः॥ १५॥ कातरान् भीतान्॥ १६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तान् उत्पातान्। भयहेतुभ्यो महोत्पातेभ्यः। 'लक्षणातो वरा शक्तिः' इत्युक्तिमाश्रित्य समासांतरमाह—भयेनेति। उद्विग्ना इति 'ओविजी—भय चलनयोः' अतः क्तप्रत्ययः, तस्य नत्वं च॥ १३॥ तैर्भूकंपादिभिः। अतद्विदः कृष्णमाहात्म्यमजानंतः। तस्मिन् कृष्णे इंद्रियाणि येषां ते तथा। नितरां धनं श्रीयमुनाह्लदरूपं स्वविहारास्पदमिति। सरस्वतीसंवादः॥ १४॥ बालानभिव्याप्याबालं तत्प्रभृति ये वृद्धा वनितास्ते आबालवृद्धवनिताः। पशुपदृष्टिमात्रात्व्यद्यवहारो येषां ते तथा॥ १५॥ तान् बालादीन्। तथा रोदनादिप्रकारेण। माधवो मधुवंशोद्भूतः। स बलः। अनुजस्य कृष्णस्य प्रभावज्ञः अयं तु साक्षात्सर्वसर्पेश्वरशेषशायी कथमेनमन्यः सर्पः पीडयितुं कल्प इति ज्ञानवानित्यर्थः। भगवान्सर्वशक्तियुक्तोऽपि माधवः सर्वविद्यापतिरपि असमर्थ इव न किञ्चिदुपदिष्टवान् किन्तु तद्दुःखेन दुःखेपि तेषामेव किञ्चिद्धैर्यार्थम् प्रकटं बहिरेव हसित्वा तूष्णीमासीत्। अयं निजानुजस्य तत्त्वज्ञः स्निग्धश्च हसतीति नात्र चिंतेति बोधयितुमित्यर्थः। यद्वा—शेषरूपेण मया क्रीडां त्यक्त्वा प्राकृतक्षुद्रकालीयसर्पाधमेन क्रीडास्य रोचत इति प्रहसने हेतुर्ज्ञेयः। नन्वीदृशे संकटेऽपि कथं स्वसामर्थ्यं न व्यंजितवान्, न च तत्प्रभावं स्पष्टमुपदिष्टवांस्तत्राह प्रभावज्ञ इति। तदिच्छां विना तत्कर्तुं न शक्तवानित्यर्थः। माधवपदार्थस्तु श्रीहरिवंशे—''मा विद्या च यतः प्रोक्ता तस्या ईशो यतोऽभवत्। तस्मान्माधवनामापि धवः स्वामीति कीर्त्तितः॥'' इति विश्वनाथसंदर्भतोषिणीकाराः॥ १६॥

---

१ मनःकाश्र–विज.। २. सर्वे वे–गो. प्रे. टो.।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तानिति त्रिकम्। विना रामेणेति परमस्निग्धस्य गम्भीरस्य सदा साहाय्यरतस्य तस्य समक्षे तस्य तादृशव्यसनता न सम्भवेदिति भावः। अन्यत्तैः, आलक्ष्यैव भयोद्विग्ना बभूवुः ॥ १३ ॥ अत एव निधनमेव प्राप्तं मत्वा नितरां धनं श्रीह्रदरूपं स्वविहारसर्वस्वमिति सरस्वतीसम्वादः अतद्विधमाहात्म्यमननुसन्दधाना इत्यर्थः। ननु कथं तत्रैव तेषां क्षोभः जातस्तत्राह – स एव प्राणो जीवनं येषाम् अतस्तस्मिन् मनो येषामिति ॥ १४ ॥ ते तदेकप्रियत्वेन प्रसिद्धाः पशुवृत्तित्वेन तदीयवात्सल्यस्वभावभाविता इत्यर्थः। पशुवद्वृत्ति वात्सल्यांशे येषामिति वा अत एव दीनाः इतस्ततो मुहुःस्खलन्तो निपतन्तश्चेत्यर्थः कृष्णव्रजजनचित्ताकर्षकः कथं कुत्रास्तीति तद्दर्शनोत्सुकाः सन्तः यद्वा स्वभावत एव तादृशाः ॥ १५॥ तथा तादृशकातर्यं प्राप्तानपि तान् वीक्ष्य स गोकुलैकप्रियोऽपि बलः भगवान् सर्वशक्तियुक्तोऽपि माधवः सर्वविद्यापतिरपि असमर्थ इव किञ्चिन्न कृतवान् अज्ञ इव च न किञ्चिदुपदिष्टवान् किन्तु तद्दुःखेन दुःखितोऽपि तेषामेव किञ्चित् द्वेष्यार्थं प्रेति प्रकटं बहिरेव हसित्वा तूष्णीमासीत् अयं निजानुजस्य तत्त्वज्ञः स्निग्धस्य हसतीति नात्र चिन्तेति बोधयितुमित्यर्थः। एवं तेषां प्राणरक्षायोग्यत्वात् नाश एव तदा तस्याविर्भूतः स्वभावत एव सर्वसमाधानशक्तिमयत्वात् भगवल्लीलया इति भावः। तर्हि कथमीदृशेऽपि दुःखसङ्कटे स्वसामर्थ्यं न व्यञ्जितवान् न च तत्प्रभावं स्पष्टमुपदिष्टवान्? तत्राह प्रभावज्ञ इति तज्ज्ञत्वेन तदिच्छां विना तत्कर्तुं न शक्तवानित्यर्थः। माधवपदं चेदं श्रीहरिवंशे व्युत्पादितम्—

"मा विद्या च यतः प्रोक्ता तस्या ईशो यतो भवेत्। तस्मात् माधवनामासि धवः स्वामीति कीर्तितः" ॥ इति ॥ १६ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विना रामेणेति परमस्निग्धस्य तस्य साक्षादनुजामंगलं न सम्भवेदिति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, आलक्ष्यैव भयोद्विग्ना बभूवुः, अतएव निधनं प्राप्तं मत्वैवातद्विदस्तन्माहात्म्यमननुसन्दधाना इत्यर्थः, यतः स च प्राणो जीवनं येषामतस्तस्मिन्नेव मनो येषामिति सर्व्वथा तदेकगतय इत्यर्थः। ते तदेकप्रियत्वेन प्रसिद्धाः, स्वपक्षे ते गोपाः, अतो दुःखादिभिरातुरा विवशाः ॥ १३–१४ ॥ अतएव दीनाः, इतस्ततो मुहुः स्खलन्तो निपतन्तश्चेत्यर्थः। कृष्णो व्रजजनचित्ताकर्षकः, कथं कुत्रास्तीति तद्दर्शनोत्सुकाः सन्तः यद्वा, सदा स्वभावतैव कृष्णदर्शनलालसा इति तदेकगतित्वमेव दर्शितम् ॥ १५ ॥ तथा तादृशान् सर्वज्ञानादिसम्पन्नानपीत्यर्थः। कातरान् भीतान् विह्वलान् वा; यद्वा, तादृशकातर्य्यप्राप्तानपि तान् वीक्ष्य साक्षाद्दृष्ट्वा सोऽनुजैकप्रियोऽपि बलः, प्रहस्य उच्चैर्हसित्वा किञ्चिदपि नोवाच; किञ्चित् प्रहस्येति वा; यतो भगवान् सर्व्वज्ञः, विशेषतो माधवो मधुवंशोद्भवः, अतएवानुजस्य प्रभावमैश्वर्य्यम्, किंवा प्रकृष्टं भावं कालिय-निःसारणार्थं तत्तदाचरणाभिप्रायं जानातीति तथा सः। प्रहासस्तेषां शोकादिलाघवार्थम्, किञ्चिदनुक्तिश्च श्रीभगवदभिप्रायाभिज्ञतासूचनेन तेषामाश्वासनाय; यद्वा, प्रहासेन किञ्चिदनुक्त्या च तं प्रति श्रीबादरायणे प्रणयकोपोक्तिरियम्। भगवान् परमस्वतन्त्रो निरपेक्षो वा। माधवो मधुकुलसम्बन्धस्फूर्त्या, न गोपवदतिस्नेहार्द्रचित्त इत्यर्थः, किंवा, मधुपानरसिक इत्यर्थः। बलो बलवानेव, न तु बुद्धिमानित्यर्थः, यतः स हलधर इत्यर्थ तस्य तद्युक्तमेवेति भावः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तानुरातानालक्ष्य भयेनोद्विग्नाः कम्पितगात्राः नन्दप्रभृतयो गोपा रामेण विना गाश्चारयितुं गतं कृष्णं ज्ञात्वा ॥ १३ ॥ तन्माहात्म्याभिज्ञास्तैर्दुर्निमित्तैर्निधनं तस्य विपत्तिं प्राप्तमिव ज्ञात्वा यतस्तस्मिन्नेव प्राणास्तस्मिन्नेव मनांसि च येषामतः शोकभयाभ्यामातुराः ॥ १४ ॥ सर्वे अङ्ग हे राजन्! पशुवत्सलाः धेनुवद्वात्सल्ययुक्ताः कृष्णस्य दर्शने निमित्ते लालसाः निर्जग्मुः ॥ १५ ॥ तदा तान्निर्गच्छतः कातरांश्चावलोक्य माधवो बलो रामः मधुवंशप्रभवत्वान्माधवः अनुजस्य प्रभावाभिज्ञोऽत एव किञ्चिदपि नोवाच ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पशुवत् वृत्तिर्येषां ते तथा दृष्टमात्रव्यवहारिणः ॥ १५ ॥ माधवो मधुकुलोद्भवः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

निधनमिति नितरां धनं श्रीयमुनाह्रदरूपमिति वास्तवार्थः ॥ १४–१५ ॥ भगवान् सर्वशक्तियुक्तोऽपि माधवः सर्वविद्यापतिरिति असमर्थ इव न किञ्चिदुपदिष्टवान् किन्तु तद्दुःखेन दुःखेऽपि तेषामेव किञ्चिद्धैर्यार्थं प्रकटं बहिरेव हसित्वा तूष्णीमासीत् अयं निजानुजस्य तत्त्वज्ञः स्निग्धश्च हसतीति नात्र चिन्तेति बोधयितुमित्यर्थः। तस्माच्च हेतोरतिदुःखितमाज्ञाय विचार्य तर्हि कथमीदृशेऽपि सङ्कटे स्वसामर्थ्यं न व्यञ्जितवान् न च तत्प्रभावं स्पष्टमुपदिष्टवान्, तत्राह–प्रभावज्ञ इति। तज्ज्ञत्वेन तदिच्छां विना तत्कर्तुं न शक्तवानित्यर्थः। माधवपदं चेदं श्रीहरिवंशे व्युत्पादितम्—

"मा विद्या च यतः प्रोक्ता तस्या ईशो यतो भवेत्। तस्मान्माधवनामासि धवः स्वामीति कीर्त्तितः" ॥ इति ॥ १६–२० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ दुर्निमित्तानि दृष्ट्वा गोकुलवासिनामाशङ्कामाह—तानालोक्येत्यादि द्वाभ्याम् । तैस्तथाविधैर्दुर्निमित्तैर्निधनं प्राप्तं समुपस्थितमिति मत्वा अहोऽस्माकं मरणमुपस्थितमिवेति मत्वा विना रामेण गाश्चारयितुं गतं कृष्णञ्च ज्ञात्वा, किमिदमाकस्मिकं किमभिव्यञ्जकं दुर्निमित्तमित्यतद्विदो दुर्निमित्तकारणाविदः सर्वे गोकुलान्निर्जग्मुरित्युत्तरेणान्वयः । यद्वा, रामेण विना अतद्विदः रामस्तु तद्विदेव । अयं वाक्यार्थः ।—एतद्दुर्निमित्तं यद्दृश्यते तदवगतं निधनं प्राप्तम्, मरण-सूचकान्येवैतानि दुर्निमित्तानि । कृष्णोऽपि न निकटवर्ती, योऽस्मान् रक्षिष्यति । स तु गाश्चारयितुं गतः, तदा तत्रैव सर्वे गच्छाम इति सर्वे तथा चक्रुः । वस्तुतस्तु दुर्निमित्तस्य कारणं किमपि नास्ति, भगवतः सकलविघ्नोपशमहेतुत्वाद् विघ्नस्य शङ्कापि नास्ति । असति विपत्तिसद्भावे कथं तस्य सूचकं दुर्निमित्तम्, तेन एतादृशं यद्वीर्यकौशलं सर्वैर्दृश्यतामिति सर्वेषां तत्रानयनार्थं भगवतैव तत् सम्पादितं कुहकम्, न तु तद्वास्तवमिति । अतएवोक्तम् (१२ श-श्लो.) "आसन्नभयशंसिनः" इति । अत्रेयं व्याख्याता एते उत्पाता भयशंसिनो नासन् भगवन्तं प्रतीति परमार्थोक्तिः ॥ १३–१९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

निधनं मत्वेति । रामेण विना गाश्चारयितुं गतं कृष्णं ज्ञात्वा स्वेषां मरणं प्राप्तं समागतमिति मत्वा च ॥ १४–१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तानालक्ष्य गोकुलान्निर्जग्मुरिति तृतीयेनान्वयः । निधनमेव प्राप्तं मत्वा नितरां धनं श्रीयमुनाह्लदरूपं स्वविहारास्पदमिति सरस्वतीसम्वादः महाशोकात् पशूनामिव बुद्धिविवेकप्रतीकारज्ञानशून्या वृत्तिः सत्ता येषां ते ॥ १३–१५ ॥

"मा विद्या च यतः प्रोक्ता तस्या ईशो यतो भवेत् । तस्मान्माधवनामाऽसि भवः स्वामीति कीर्तितः" ॥ इति

हरिवंशोक्तनिरुक्तेः प्रभावं लीलैश्वर्य्यं जानातीति सः तस्य स्वानुजमहाप्रेमवत्त्वेपि प्रेम्णा तदैश्वर्यानावरणं कृष्णेच्छानुरञ्जितलीलाशक्त्यैव अन्यथा श्रीनन्दादीन् शोकावेगेन सर्पह्लदं मंक्षु शीघ्रं मिमंक्षून् को वारयितुं प्रभवेदिति भावः प्रहस्येति मत्स्वरूपेण शेषनागेन सह क्रीडा न रोचते किन्तु प्राकृतक्षुद्रकालियसर्पाधमेनैवेति तस्य नरलीलत्वस्मरणात् किञ्चिन्नोवाचेति तेषां शोकान्धानां कृष्णं दिदृक्षूणां तदावरणस्थानौचित्यादशक्तत्वाच्च किन्तु स्वप्रहासशोकाभावदर्शनं यतो न किञ्चिदनिष्टाभावमूहयित्वा प्राणजिहासां शिथिलयामासुः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

न तं कालकालं श्रीकृष्णं विदन्तीत्यतद्विदः "ज्ञः कालकालो गुणी सर्वविद्यः" इति श्रुतिरत्रानुसन्धेया ॥ १४ ॥ पशवो यथा भयकाले सहैव पलायन्ते तद्वद्वृत्तिर्येषां ते पशुवृत्तयो निर्जग्मुः ॥ १५ ॥ कातरान् उद्भ्रान्तचित्तान् ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तानालक्ष्य गोकुलात् सर्वे निर्जग्मुरिति तृतीयगतेन सम्बन्धः रामेण विना गाश्चारयितुं गतं कृष्णं ज्ञात्वा ॥ १३ ॥ निधनं नाशं प्राप्तुं मत्वा नितरां धनं स्वविहारास्पदकालिन्द्या ह्लदमिति गीर्देव्या सूचितोऽर्थः अतद्विदस्तल्लीलाशक्तिचेष्टामजानन्तः ॥ १४ ॥ महाशोकात् पशूनामिव तत्प्रतीकारबोधहीना वृत्तिर्येषां ते ॥ १५ ॥ प्रहस्येति । मदवतारेण शेषनागेन स्वैकान्तिना सार्द्धं क्रीड़ा न रोचते किन्त्वनेन विमुखेन नागाधमेनेति प्रहासः यद्यपि नन्दादीनामिव बलदेवस्यापि कृष्णानुरागित्वात्तदैश्वर्यज्ञानाच्छादनेन भाव्यं तथापि तेषां ह्लदप्रवेशप्रतिषेधाय तदिच्छानुरञ्जितया तल्लीलाशक्त्या तज्ज्ञानं तस्य नाच्छादितं तत्प्रहासानुमिततन्मङ्गलानां तेषां लोके व्रजभवनं लोकजिहासापि नाभूदिति ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नन्दपुरोगमा गोपास्तानुत्पातानालक्ष्य दृष्ट्वा भयेनोद्विग्नाः कातराः कृष्णस्य किं भयमायातमित्युद्विग्ना भीता वा चारयितुं सञ्चारयितुं तृणानि खादयितुं वा ॥ १३ ॥ तैस्तैर्दिव्यभौमकायकैरतद्विदस्तत्प्रभावज्ञाः ॥ १४ ॥ आबालवृद्धवनिता इति पदे । आ अभिव्याप्य । इत्यादयः सर्वे पशुवृत्तयः पशूनां वृत्तिवद्वृत्तिर्येषां ते मुग्धा इति यावत् ॥ १५ ॥ माधवो मधुकुलजो बलोऽनुजस्य कृष्णस्य प्रभावज्ञः प्रहस्य किञ्चिदपि नोवाच ॥ १६ ॥

श्रीसुबोधिनी

ते च **व्रजस्थास्तानालक्ष्यैत** उत्पाता भवन्तीति ज्ञात्वा **भयेनोद्विग्ना** जाता यतो **गोपाः**, **नन्दः** कर्मसिद्धान्तयुक्तः पुरोगमो मुख्यो येषां, कृतनिरोधा वा विवेकिनः, कृष्णे विद्यमानेस्माकं प्रलयोपि न भविष्यतीति निश्चित्य प्राकृतबुद्ध्या कलयन्ति स्म, **विना रामेणेति**, **रामो** हि बलिष्ठो लोकप्रतीत्या धेनुकोपि तेनैव मारित इति **रामेण विना** भगवानेव **गाश्चारयितुं** गतस्तन्मध्य उत्पाता

जायन्ते ॥ १३ ॥ अतो **दुर्निमित्तान्यत्यनिष्टं** सूचयन्तीति विपरीतं ज्ञात्वा **निर्जग्मुरित्युत्तरेण** सम्बन्धः, विपरीतज्ञाने हेतुरतद्विद इति तस्य भगवतो माहात्म्यं न विदन्तीत्युचितमेव तेषां, लौकिका हि ते, **लौकिकानां प्रियोनिष्टं भावयत्यप्रिय इष्टमितिस्थितिः, भवननिषेधविषयत्वेन सर्वदानिष्टमेव भावयति प्रियः स्नेहस्य तथाभावकस्वभावत्वात्**, अन्यस्य विपरीतं, किञ्च ते आत्मानमेवानिष्टविषयं भावितवन्त इत्याह **तत्प्राणा** इति, तस्मिन्नेव प्राणा येषां, तस्मिन्नेव **मनो** येषां, अत एव **दुःखं** शोकं **भयं च** त्रिभि**रातुराः** ॥ १४ ॥ गोकुलं शून्यं विधाय **सर्व** एव निर्गता इत्याहा**बालवृद्धवनिता** इति, अङ्गेतिसम्बोधनं सर्वत्र स्नेहसूचकं, पशूनामिव वृत्तिर्येषामिति न देहवस्त्रादिदृष्टिः, **गोकुलादेव** निर्गताः, तेषां कामनामाह **कृष्णदर्शने लालसाः** दर्शनार्थमतिव्याकुलाः ॥ १५ ॥ तेषां श्रीभगवत्समीपगमने भ्रमाभावाय हेतुमाह **तेन्वेषमाणा** इति, पतिरेवान्वेषणीयस्ततोपि सदानन्दः, ते भगवद्गतमार्गेणैव गताः, तदाह **पदव्या यमुनातटमिति**, **पदवी** सूक्ष्मो मार्गः, **तया यमुनातट**मेव गताः, तेषां मार्गान्तरागमने तथैव च गमनेभिज्ञानमाह **भगवल्लक्षणैः पदैः सूचितयेति**, **ध्वजवज्राङ्कुशाद्यसाधारणचिह्नैर्भगवच्चरणसम्बन्धे भूमेरार्द्रता भवतीति स्फुटसर्वलक्षणानि पदानि भूमावुद्गच्छन्ति** ततः सूचिता **पदवी** भवति ॥ १६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

ते चेति चकारोन्वाचये, गोपा इत्यस्य पूर्वव्याख्याने कर्मित्वमेव स्यात् न तु भक्तिमार्गीयत्वमित्यतः पक्षान्तरमाहुः **कृतेति**, सङ्गस्थेभ्यः सकाशादेतेषां भाववैलक्षण्यं **विवृण्वन्ति कृष्ण** इत्यादिना ॥ १३ ॥ **आबालेत्यस्याभासे** गोकुलं शून्यमित्याङ्गोर्थः ॥ १५ ॥ **तेन्वेषमाणा** इत्यस्याभासे गमनस्य पूर्वश्लोके उक्तत्वादियं भावना पदव्यां पर्यवस्यति, 'दध्ना जुहोति'तिवत् तथा च भ्रमाभावहेतुपदव्येव वाक्यार्थः, **अभिज्ञानमाहेति** करणव्युत्पत्त्या अभिज्ञापकमित्यर्थः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे अङ्ग हे राजन् ! तान् उत्पातानालक्ष्य दृष्ट्वा नन्दादयः सर्वे गोपा भयेन उद्विग्नाः व्याकुलाः, अत एव दीनाः सन्तो गोकुलान्निर्जग्मुरिति त्रयाणामन्वयः । भयेन व्याकुलतायां हेतुं सूचयन्नाह—तैरिति । तैर्दुर्निमित्तैरुत्पातैः कृष्णस्य निधनं मरणं प्राप्तं मत्वेत्यन्वयः । तत्रापि हेतुं सूचयन्नाह—विनेति । रामेण विना कृष्णं गाश्चारयितुं वनं गतं ज्ञात्वेत्यन्वयः । 'गोकुलात्तेषां निर्गमं कृष्णान्वेषणार्थमेव' इत्याशयेनाह—कृष्णदर्शनलालसा इति । भयोद्विग्नत्वमेव स्पष्टयति—दुःखेति । दुःखं तद्वियोगजन्यः सन्तापः, शोकोऽनन्तरनिर्वाहचिन्ता, भयं तद्वियोगदुःखेन मरणभयम्, तैरातुरा विवशाः । तत्र दृष्टान्तमाह—पशुवत् विवेकशून्या चित्तवृत्तिर्येषां तथाभूता इति । 'न केवलं नन्दयशोदादीनामेवेयमवस्था, किन्तु सर्वेषामेव व्रजवासिनाम्' इत्याह—आबालवृद्धवनिता इति । ननु "एवमुत्पातदर्शनेऽप्यनिष्टान्तरशङ्कां विहाय कृष्णनिधनशङ्कैव कथं जाता" इत्याशङ्क्याह तत्प्राणा इति । तदधीन एव प्राणो जीवनं येषां ते, अत एव तस्मिन्नेव मनो येषां ते, अतः प्रथमतः सर्वेषां तत्रैवोपस्थितत्वात् वत्सबकाद्याद्युपद्रवस्य वने श्रुतत्वाच्च उत्पातदर्शनेन तन्निधनशङ्कैव जातेत्याशयः । "ननु तथा कृष्णस्य सदानन्दरूपत्वेन जन्ममरणादिरहितत्वात् कथं तथा शङ्का युक्ता ?" इत्याशङ्क्याह—अतद्विद इति । न तस्य परमस्वरूपं विदन्तीति तथा ते ॥ १३-१५ ॥ तान् नन्दादीन् तथा कातरान् व्याकुलान् वीक्ष्य माधवः मधुवंशप्रभवो भगवान् ज्ञानैश्वर्यादिमत्त्वेन तेषां प्रबोधे समर्थोऽपि बलः प्रहस्य किञ्चिन्नोवाचेत्यन्वयः। प्रहासे तूष्णींभावे च हेतुमाह—प्रभावज्ञ इति । यतः स बलः अनुजस्य कृष्णस्य प्रभावज्ञः कृष्णे सर्पस्याकिञ्चित्करत्वं निश्चित्य नन्दादीनां यमुनातीरगमनं कृष्णाभिप्रेतं च ज्ञात्वा प्रहस्य तूष्णीं बभूवेत्याशयः ॥ १६ ॥

अन्वितार्थप्रकाशिका

तानिति त्रयम् ॥ अङ्ग हे राजन् ! तान् उत्पातान् आलक्ष्य दृष्ट्वा भयेन उद्विग्ना व्याकुलाः भयहेतुभ्यो भीता वा भयेन कम्पमाना वा अतद्विदः हरिप्रभावानभिज्ञाः स हरिरेव प्राणा येषां तस्मिन् हरौ मनो येषां ते दुःखशोकभयैः आतुराः बालान् वृद्धान् वनिताश्चाभिव्याप्य । पञ्चम्यभावः आर्षः । यद्वा । रक्षणीयत्वात् आवृताः बालवृद्धवनिताः यैः । "प्रादिभ्यो धातुजस्य" इति समासः । पशूनामिव विवेकशून्या अतिवत्सला वा वृत्तिर्येषां ते दीनाः कृष्णदर्शनलालसाः सर्वे नन्दपुरोगमाः नन्दाद्याः गोपाः कृष्णः रामेण विना गाः चारयितुं गतं ज्ञात्वा तैर्दुर्निमित्तैः उत्पातैः हरिं निधनमिव प्राप्तं मत्वा नितरां घनं यमुनाह्रदरूपं स्वविहारास्पदमिति भारती । गोकुलान्निर्जग्मुः त्रयं भिन्नान्वयं वा । तत्राद्ये भयोद्विग्नाः बभूवुः द्वितीये दुःखाद्यैरातुरा बभूवुः तृतीये पशुवृत्तयः गोपा इति विशेष्यम् ॥ १३-१५ ॥ तानिति ॥ तान्नन्दादीन् तथा कातरान् व्याकुलान् भीतान्वा वीक्ष्य माधवः मधुवंशप्रभवः अनुजस्य कृष्णस्य प्रभावं जानाति तादृशः स प्रसिद्धः भगवान् बलः प्रहस्य मत्स्वरूपेण शेषनागेन क्रीडा न रोचते किन्तु क्षुद्रेण कालियेनेतिहासपूर्वकं लीलानाट्यं स्मृत्वा किञ्चिदपि नोवाच । किन्तु शोकान्धानां तेषां वारणमशक्यं मत्वा स्वप्रकाशशक्त्या अनिष्टाभावमूहयित्वा प्राणजिहासां शिथिलयामास ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तानालक्ष्य गोकुलान्निर्जग्मुरिति तृतीयेनान्वेतव्यं भयेनोद्विग्नाः विह्वलाः रामसहायस्य तस्य भयं न स्यादिति भावः ॥१३॥ दुर्निमित्तैः भूकंपादिभिः तं श्रीकृष्णं परमेश्वरं विदंति तथाभूतान् भवंतीत्यतद्विदः ॥ १४ ॥ हे अङ्गबालादिभ्योऽभिव्याप्य पशुभिर्वृत्तिस्तदुत्पन्नक्षीरादिभिराजीविका येषां ॥ १५ ॥ कातरान् भयाकुलान् माधवो विद्यापतिः मां विद्या च यातः प्रोक्ता तस्या ईशो यतो भवानिति हरिवंशोक्तेः बलदेवः अनुजस्य कनिष्ठभ्रातुः प्रभावज्ञः सर्वपराक्रमवेत्ता ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तानिति ॥ तानुत्पातान्, आलक्ष्य दृष्ट्वा, भयोद्विग्ना भयेन कम्पितगात्राः- नन्दपुरोगमा नन्दप्रभृतयः, गोपाः, रामेण विना, गा धेनूः, चारयितुं, गतं कृष्णं ज्ञात्वा, शङ्कितचेतस आसन्निति शेषः ॥ १३ ॥ तैरिति ॥ अतद्विदस्तन्माहात्म्यानभिज्ञाः, अत एव, तैः पूर्वोक्तैः, दुर्निमित्तैरपशकुनैः, निधनं मरणं प्राप्तं मत्वा, तस्मिन् कृष्णे एव प्राणा येषां ते, तस्मिन् श्रीकृष्णे मनांसि येषां ते, ते नन्दादयः, दुःख च शोकश्च भयं च तैरातुराः, आसन्निति शेषः ॥ १४ ॥ आबालेति ॥ अङ्ग हे राजन्, आबालवृद्धवनिता बालान् वृद्धान् स्त्रियश्च अभिव्याप्येत्यर्थः। पशुवत्सलाः धेनुवद्वात्सल्ययुक्ताः, पशुवृत्तय इति पाठे, पशूनामिव वृत्तिर्येषां ते, कृष्णदर्शने एव लालसा येषां ते, सर्वे दीनाः सन्तः, गोकुलात् निर्जग्मुः ॥ १५ ॥ तानिति ॥ तथोक्तप्रकारेण, कातरान् दीनान् तान् नन्दादीन् वीक्ष्य, भगवान् परमैश्वर्ययुक्तः, माधवो मधुवंशप्रभवः, स बलः, यतः अनुजस्य प्रभावज्ञः, भवति, ततः प्रहस्य किंचित्, न उवाच ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

निर्जग्मुरिति : १०.१६.१५.

अनिष्टजनकोत्पातोदयश्चेद्गोकुले तदा। तत्फलानुदयायैकः शरणं परमेश्वरः ॥ ४५ ॥

तांस्तथेति : १०.१६.१६.

विनैव मामद्य वनं प्रयातः प्रातर्विशेषाद्धृत-कार्यभागः। युक्ता न तद्व्यक्तिरितीव सोऽभूत् तूष्णीं सहासस्तु भयापनुत्त्यै ॥ ४६ ॥
अहो विचित्रं भगवच्चरित्रं यत्सेवकस्यापि मनोविधारणम्। इतीव किं विस्मयमादधानो रामो जहासाऽभयकृत्तदा क्षणम् ॥ ४७ ॥
प्रतिक्षणं गोपजनोऽखिलोऽयं पश्यन्नपीशाद्भुतकेलिजातम्। अतज्ज्ञवद् वक्त्यधुना किमेतज्जहास तद्विस्मयतः सरामः ॥ ४८ ॥

कृष्णप्रिया

नन्दबाबा आदि गोपों ने पहले तो उन अशकुनों को देखा और पीछे से यह जाना कि आज श्रीकृष्ण बिना बलराम के ही गाय चराने चले गये। वे भय से व्याकुल हो गये ॥ १३ ॥ वे भगवान् का प्रभाव नहीं जानते थे। इसीलिए उन अशकुनों को देखकर उनके मन में यह बात आयी कि आज तो श्रीकृष्ण की मृत्यु ही हो गयी होगी। वे उसी क्षण दुःख शोक और भय से आतुर हो गये। क्यों न हों, श्रीकृष्ण ही उनके प्राण मन और सर्वस्व जो थे ॥ १४ ॥ प्रिय परीक्षित्! ब्रज के बालक, वृद्ध और स्त्रियों का स्वभाव गायों जैसा ही वात्सल्यपूर्ण था। वे मन में ऐसी बात आते ही अत्यन्त दीन हो गये और अपने प्यारे कन्हैया को देखने की उत्कट लालसा से घर-द्वार छोड़कर निकल पड़े ॥ १५ ॥ बलरामजी स्वयं भगवान् के स्वरूप और सर्वशक्तिमान् हैं। उन्होंने जब व्रजवासियों को इतना कातर और इतना आतुर देखा, तब उन्हें हँसी आ गयी। परन्तु वे कुछ बोले नहीं, चुप ही रहे। क्योंकि वे अपने छोटे भाई श्रीकृष्ण का प्रभाव भली-भाँति जानते थे ॥ १६ ॥

तेऽन्वेषमाणा दयितं कृष्णं सूचितया पदैः। भगवल्लक्षणैर्जग्मुः पदव्या यमुनातटम् ॥ १७ ॥

ते तत्र तत्राब्जयवाङ्कुशाशनिध्वजोपपन्नानि पदानि विश्पतेः।
[1]मार्गे गवामन्यपदान्तरान्तरे निरीक्षमाणा ययुरङ्ग सत्वराः ॥ १८ ॥
[2]अन्तर्ह्रदे भुजगभोगपरीतमारात् कृष्णं निरीहमुपलभ्य[3] जलाशयान्ते।
गोपांश्च मूढधिषणान् परितः पशूंश्च संक्रन्दतः परमकश्मलमापुरार्ताः ॥ १९ ॥
गोप्योनुऽरक्तमनसो भगवत्यनन्ते तत्सौहृदस्मितविलोकगिरः स्मरन्त्यः।
ग्रस्तेऽहिना प्रियतमे भृशदुःखतप्ताः [4]शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकम् ॥ २० ॥

---

१. मार्ग–विज. । २. अन्तर्जले–विज. । ३. लक्ष्य–विज. । ४. शून्यां प्रियेण रहितां ददृशुस्त्रिलोकीं–वीर. ।

कर्दमक्षमा

अन्वयः—भगवल्लक्षणैः पदैः सूचितया पदव्या दयितं प्रियम् अन्वेषमाणाः ते यमुनातटं जग्मुः ॥ १७ ॥ अङ्ग ते गवाम् मार्गं तत्र तत्र अन्यपदान्तरान्तरे अब्जयवाङ्कुशाशनिध्वजोपपन्नानि विश्पतेः पदानि निरीक्षमाणाः सत्वराः ययुः ॥ १८ ॥ आरात् अन्तर्ह्रदे भुजगभोगपरीतम् निरीहं कृष्णं जलाशयान्ते उपलभ्य मूढधिषणान् गोपान् परितः संक्रन्दतः पशून् च (निरीक्ष्य) आर्ताः परमकश्मलम् आपुः ॥ १९ ॥ अनन्ते भगवति अनुरक्तमनसः तत्सौहृदस्मितविलोकगिरः स्मरन्त्यः गोप्यः प्रियतमे अहिना ग्रस्ते भृशदुःखतप्ताः प्रियव्यतिहृतं त्रिलोकं शून्यं ददृशुः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भगवंतं लक्षयंति यानि पदानि तैः पदैः सूचितया पदव्या मार्गेण ॥ १७ ॥ पदैर्मार्गज्ञानप्रकारमाह । त इति । विश्पतेः श्रीकृष्णस्यान्येषां पदानामंतरांतरे मध्येमध्ये तत्तदपोहेन गवां श्रुतीनां मार्गे सत्वरा अप्रमत्ता योगिनस्तत्तदुपाध्यपवादेन यथा परं तत्त्वं मृगयंते तद्वदिति भावः ॥ १८ ॥ ततश्च सर्पशरीरवेष्टितं कृष्णं दूरान्निरीक्ष्य गोपांश्च पशूंश्च तथा तथा निरीक्ष्यार्त्ताः परमकश्मलं परं मोहं प्रापुः ॥ १९ ॥ प्रियेण श्रीकृष्णेन व्यतिहृतं विरहितं त्रैलोक्यं शून्यं ददृशुः ॥ २०–२२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

लक्षयंति सूचयंति पद्मध्वजादिचिह्नैः ॥ १७ ॥ ते गोपाः । विशां प्रजानां नंदस्य वैश्यजातीयत्वाद्वैश्यानां वा पतेः 'वयं गोवृत्तयोऽनिशम्' इत्युक्तेः । तत्रतत्र स्थानेस्थाने । अशनिर्वज्रम् । अन्येषाम् गवादीनाम् । अंतरश्चांतरश्चानयोः समाहारोंतरम्, तस्मिंस्तथा मध्येमध्ये इत्यर्थः । तत्तदपोहेन तेषांतेषां गोपादानां गोपपदानां चापोहेन त्यागेन । गोशब्दस्य श्रुतिवाचकत्वं वाग्वाचित्वाद्बोध्यम् । श्रुतीनाम् वेदानाम् । मार्गे विचाररूपे । अप्रमत्ताः सावधानाः । तत्तदुपाध्यपवादेन अन्नमयाद्युपाधिनिराकरणेन । परं तत्त्वं शुद्धं ब्रह्म "ब्रह्म पुच्छं प्रतिष्ठा" इत्येवं पुच्छरूपत्वेनान्वेषयंतीति । तद्वदित्यत्र गवां धेनूनां मार्गेऽध्वन्यपि तथैवान्वेषयामासुः । इति भाव इति । संकलितान्तर्गतं संकलिताकरणं विना न लभ्यत इति तात्पर्यम् ॥ १८ ॥ ततश्च अनंतरं च । तथातथा मूर्छया पतितान् संक्रंदतश्च । निरीहम् निश्चेष्टम् । अंतर्ह्रदे ह्रदमध्ये । जलाशयांते ह्रदसमीपे । भो बालका वृत्तांतं तावत्कथयत—किं कालियेनैव तीरादाकृष्य कृष्णो जले पातितः किं वा कृष्ण एव तीरादवप्लुत्य जले पतितस्तत्रापि स्वबुद्ध्याऽन्यस्य कस्यचिदुपदेशेन वेत्यादिप्रश्ने मूढधिषणान् किमपि वक्तुमसमर्थान् गोपान्वीक्ष्य परमकश्मलं तन्मूर्च्छातोऽपि सकाशादधिकां मूर्च्छामापुरित्यर्थः ॥ १९ ॥ शून्यम् असत्तुल्यम् "शून्यमंकासने खे च श्वसमूहे वितथे तथा" इति धरणिः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अन्वेषमाणाः अन्विच्छन्त्यः तत्र हेतुः दयितं तत्र हेतुः कृष्णम् ॥ १७ ॥ तत्र तत्र श्रीचरणन्यासभुवि विशो वैश्या गोपरूपाः ततो गोकुलपतेरित्यर्थः । सत्वराद्यभावच्छान्दसः अन्यपदान्तरान्तर इति चिरं प्रस्थितस्य पशुपशुपवर्गपरिवेष्टितस्यापि तस्य पदानि न केनचिदाक्रान्तानीति बोधयित्वा भूम्यव तावदात्मभूषणत्वेन रक्षितत्वं सर्वेषामपि प्रेमास्पदत्वमचेतनैर्वाय्वादिभिरप्यक्षोभ्यत्वेन महाप्रभावत्वमिति हेतुत्रयं सम्भावयति एवमेवोक्तं भगवल्लक्षणैरिति ततश्च साक्षात्तस्य तादृशानां तादृशप्रेमास्पदत्वे कालियालङ्घ्यत्वे च को विस्मय इति भावः ॥ १८ ॥ मूढधिषणान् मोहं गतान् परितः सर्वमेव तीरं व्याप्य ॥ १९ ॥ एवं सर्वेषामेव सामान्येन दुरवस्थामुक्त्वा तत्रैव श्रीगोपीनां विशेषमाह—गोप्य इति । भगवति सर्वैश्वर्ययुक्ते अतो न विद्यतेऽन्तो नाशो भक्तानां यस्मात् तथाभूते अपरिच्छिन्न इति वा इत्यहिग्रसनासम्भव उक्तः तथाप्यहिना ग्रस्ते तदिच्छयैव भोगेनाक्रान्ते सति अत्यर्थंदुःखतप्ताः यतोऽनुरक्तमनसः स्वभावतो निरन्तरप्रेमवत्य इत्यर्थः । तथा तस्मात् तस्मिन्नपि स्वभावतः प्रियतम एवेति आत्मा प्रियः परमात्मा प्रियतरः ततोऽपि विशिष्टत्वात् श्रीकृष्णः प्रियतम एवेति ततः प्रेमभराक्रान्त्या तत्तत्त्वाननुसन्धानादित्यर्थः । यद्वा, भगवति परमसुन्दरे अनन्ते च अपरिच्छिन्नगुणे तथा प्रियतमे कस्यचित् प्रियतरे तासां तु प्रियतमे यतः सदानुरक्तमनसः अधुना च ग्रस्ते ग्रस्तवत् सर्वतो भोगेन परिवेष्टिते सति तस्य सौहृदेन प्रेम्णायाः स्मितावलोकगिरः ताः स्मरन्त्यो भृशदुःखतप्ताः सत्यः प्रियेणैव कर्त्रा विशेषेणातिशयेन हृतं स्वग्रस्ततादर्शनायान्धबधिरायमाणतां विधाय च विस्मारितमित्यर्थः । प्रियव्यतिकृतमिति पाठे च "व्यतिकरः समाख्यातो व्यसने व्यतिषञ्जने" इति विश्वप्रकाशात् "व्यसनं विपदि भ्रंशे" इत्यमरकोशाच्च । प्रियेण हेतुना भ्रष्टमिति तथैवार्थः टीकायां विरहितमित्यस्य च त्याजितमित्यर्थ इति तथैव तात्पर्यं ततस्तादृशं जगच्छून्यं ददृशुः शून्यमिति शोकवेगेनात्मन इव जगतामपि मरणमननात् निजप्रियतमाभावेन सर्वस्यैकारकारगमनाद्वा ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दयितमिति तत्पदलक्षणाभिज्ञत्वं सद्यस्यत्प्राप्तौ हेतुश्च द्योतयति । दयितत्वे हेतुः—कृष्णमिति । अतएवान्विष्यन्तो मृगयमाणाः ॥ १७ ॥ तत्र तत्र सर्वत्रैव श्रीमत्पादाब्जन्यासस्थाने । ननु चिरं प्रस्थितस्य पशुपवर्गपरिवेष्टितस्य तस्य पदानि न कथं मृष्टानि ? कथं वा पशुपक्ष्यादिभिर्नाक्रान्तानि ? तत्राह—विशां प्राणधनानां पत्युर्भूम्यात्मभूषणत्वेन प्रयत्नतो धृतानि व्रजवनवासिनां महाधनानि, न केनापि तान्याक्रम्यन्त इति भावः ॥ १८ ॥ मूढधिषणान् मोहं गतान्, परितः किञ्चिदधिकैकयोजनव्यापि तद्ध्रद-पूर्वदक्षिणपश्चिमप्रान्तेषु सम्यक् क्रन्दतः पशूंश्चोपलभ्य सर्वमेव ह्रदं व्याप्य विक्रीड़तो भगवते दर्शनार्थमनस्कानां पशूनां तत्र तत्र सर्वत्रैव स-संक्रन्दनावास्थितेः । च-कारादुभयेषामपि तत्र प्राधान्यं बोधयतः; यद्वा, एक उक्तसमुच्चये, ततश्च पक्षिणोऽपीति ज्ञेयम् ॥ १९ ॥ एवं सर्वेषामेव सामान्येन दुरवस्थामुक्त्वा तत्रैव श्रीगोपीनां विशेषमाह—गोप्य इति । भगवति सर्वैश्वर्य्ययुक्तेऽनो न विद्यते अन्तो नाशो भक्तानामपि यस्मात् तथाभूतेऽपरिच्छिन्न इति वा, इत्यहिग्रसनासम्भव उक्तः; तथाप्यहिना ग्रस्ते तदिच्छयैव भोगेनाक्रान्ते सति अत्यर्थदुःखतताः यतोऽनुरक्तमनसः स्वभावतो निरन्तरप्रेमवत्य इत्यर्थः । तत् कुतः ? प्रियतमे—आत्मा प्रियः परमात्मा प्रियतरः, श्रीकृष्णस्ततोऽपि विशिष्टत्वात् प्रियतमस्तस्मिन्, प्रेमभराक्रान्त्या तत्तत्त्वाननुसन्धानादित्यर्थः । यद्वा, भगवति परमसुन्दरेऽनन्ते चापरच्छिन्नगुणे तथा प्रियतमे स्वभावत एव सर्वतोऽधिकप्रिये, अतः सदानुरक्तमनस एव । अधुना च ग्रस्ते ग्रस्तवत् सर्वतो भोगेन परिवेष्टिते सति तस्य सौहृदेन प्रेम्णायाः स्मितावलोकगिरस्ताः स्मरन्त्यो भृशदुःखतप्ताः सत्यः । शून्यमिति शोकवेगेनात्मन इव जगतामपि मरणमननान्निजप्रियतमाभावेन सर्वस्यैवाभावमननाद्वा ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पदैः सूचितया पदव्या ॥ १७ ॥ गवामन्यपदान्तरान्तरैः गवां पदैरन्यपदैश्च मिश्रितैः ॥ १८ ॥ कश्मलम्मोहम् ॥ १९ ॥ प्रियप्रतिहृतं विराहतम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ते नन्दादयः कृष्णं मृगयन्तः भगवन्तं रामः लक्षयन्तीति तथा तैर्ध्वजवज्रादिभिश्चिह्नैरिति भावः । पदैः सूचितया पदव्या मार्गेण यमुनायास्तटं जग्मुः ॥ १७ ॥ तदेव प्रपञ्चयति—ते इति । विश्पतेः विश्वस्य पत्युः कृष्णस्य तत्र तत्र ध्वजादिरेखाभिरुपपन्नानि युक्तानि पदानि तत्राशनिर्वज्रः गवां मार्गे अन्येषां पदानामन्तरान्तरे मध्येमध्ये निरीक्षमाणाः अङ्ग हे राजन् ! त्वरायुक्ता ययुः ॥ १८ ॥ जलमध्ये भुजगदेहेन परिवेष्टितमदृष्टचेष्टितं कृष्णं ह्रदस्य तीरे मूर्च्छितान् गोपांश्च सङ्क्रन्दतः पशूंश्चारादेवोपलभ्य ज्ञात्वा आर्त्ताः सन्तो महत्कश्मलं मोहं प्रापुः ॥ १९ ॥ तस्य कृष्णस्य सौहृदेन सौहार्देन यत् स्मितं ये च विलोकाः कटाक्षास्तान् गिरश्च स्मरन्त्यः निरतिशयप्रीतिविषये तस्मिन् सर्पेण ग्रस्ते सति नितरां दुःखेन तप्ताः प्रियेण रहिताः त्रिलोकीं शून्यं ददृशुः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भगवल्लक्षणैर्हरेः पद्मध्वजादिलक्षणोपेतैः पदैश्चरणन्यासैः सूचितया सूचयन्त्या पदव्या मार्गेण ॥ १७ ॥ वैशद्याय पुनरुक्तं विवृणोति—त इति । यवो व्रीहिविशेषः शनिर्वज्रं "दम्भोलिरशनिर्द्वयोः" इत्यमरः । विश्पतेः प्रजापतेः कृष्णस्य गवां मार्गे कृष्णपादेनान्यस्य गोपस्य अन्यासां गवां पादेनान्तरान्तरे मध्ये मध्ये मिश्रित इति शेषः । गवां पादेन अन्यपदेन वज्रादिलक्षणेन पदेन इतरलक्षणेन पदेनान्तरान्तरे मध्याविनाभूते वा ॥ १८ ॥ जलशयान्ते ह्रदसमीपे परितः स्थितान् गोपादानुपलक्ष्य परमं कश्मलं मोहम् ॥ १९ ॥ तस्य कृष्णस्य सौहृदं च स्मितं च विलोकश्च गिरश्च तत्सौहृदस्मितविलोकगिरः ताः स्मरन्त्यः प्रियव्यतिहृतं विरहितम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

भगवतो लीलाविशेष एवायम्; मां प्रति कस्य कीदृक् प्रेमेति परीक्षितं समागतेष्वपि सर्वेषु तेषु क्षणमहिभोगवद्धः सन् कौतुकमकार्षीत् । तत्र तस्य प्रभावज्ञानामपि गोपगोपीनां पित्रोश्च 'अनिष्टाशङ्कीनि बन्धुहृदयानि' इति न्यायेन महिज्ञतामपि बाधित्वा प्रेमप्रभावेण सर्वेषां करुण एव रसो जातः । प्रेमवात्सल्ये तस्य प्रेम-वर्द्धकत्वेनाङ्गत्वमेवागतुरित्याह—गोप्योऽनुरक्तमनस इत्यादि द्वाभ्याम् । गोप्योऽत्र व्रजेश्वरीतुल्यवयसः; तुल्यव्यथा इति । वात्सल्यप्रतिपादकत्वादनुरक्तमनसो विक्लिन्नहृदया भगवत्यनन्तेऽहिना ग्रस्ते रुद्धे सति शून्यं जगद् ददृशुः । प्रियव्यतिकृतं प्रियमभीष्टं तेन विरहितं तु केवलं शून्यं ददृशुः । ताः कृष्णमातरं व्रजेश्वरीमपत्यं श्रीकृष्णं प्रति अनुप्रतप्राम्, तुल्यव्यथाः सत्यः समुपगुह्य शुचः स्रवन्त्यस्तास्ताः कथाः कथयन्त्य आसन्नितरुत्तरेणान्वयः । एतेन तुल्यव्यथत्वात्तत् सवयस एव । यास्तु भगवत्प्रियाः किशोर्यस्तासां दुःखानुभवो न वाग्विषय एवेति तन्नोक्तम्; तदवर्णनमेव वर्णनम् । तास्तु मूर्च्छयैव दत्ताश्वासास्तद्दुःखज्ञास्तथा न बभूवुः । पश्चात्तदुत्थिते भगवति यदा हर्षजयकोलाहलोऽभूत् तदैव ताः प्रबोधं गता इति तद्दुःखावर्णनात्तथैव मन्तव्यम् ॥ २०–२३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

गोप्योऽनुरक्तमनस इत्यादि गोप्योऽत्र यशोदासहचर्य्यः, (२१ श-श्लो) "तुल्यव्यथाः" इति विशेषणात्, तासां तं प्रति पुत्रभाव एव, भोग्यत्वेनानुरक्तास्तु नवीनाः तासां दुःखन्तु राग-विषयम्। तेन तन्नोद्दिष्टम्, तास्तु मूर्च्छयैव दत्तहस्तावलम्बास्तावन्तं कालमासन् भगवच्छक्त्यैव पुनर्जीविता इति भावः ॥ २०-२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भगवन्तं लक्षयन्ति यानि तैः सूचितया पदव्या ॥ १७ ॥ पदैः पदवीज्ञानप्रकारमाह—ते इति। विश्पतेः विशां वैश्यानां गोपानां पत्युरध्यक्षस्य कृष्णस्य, षत्वाभावं आर्षः। अन्येषां पदानामन्तरान्तरे मध्ये मध्ये तदपोहेन गवां श्रुतीनां मार्गे सत्वरा अप्रमत्ता योगिनस्तत्तदुपाध्यपवादेन यथा परन्तत्त्वं मृगयन्ति तद्वदिति भावः ॥ १८ ॥ सामान्यतो गोपगोपीजनानां वैक्लव्यमाह—तत्रान्तर्ह्रदे ह्रदमध्ये भुजगभोगपरीतं सर्पशरीरवेष्टितं भो बालकाः वृत्तान्तं तावत्कथयत किं कालियेनैव तीरात् कृष्णो बलादाकृष्य जले पातितः किंवा कृष्ण एव तीरादवप्लुत्य जले पतितः तत्रापि स्वबुद्ध्या अन्यस्य कस्यचिदादेशेन वेत्यादिप्रश्ने मूढधियः मूर्च्छितबुद्धीन् वक्तुं किमपि चेष्टितुं चासमर्थान् गोपान् वीक्ष्य परमकश्मलं तन्मूर्च्छातः सकाशादप्यतिमूर्च्छाम् ॥ १९ ॥ तत्रानुरागवतीनां वैक्लव्यमाह—भगवति परमसुन्दरे अनन्तगुणे तस्य सौहृदं स्वविषयकं प्रेमस्मितं विलोकं रहसि कृतां गिरं सौरतवार्तां च स्मरन्त्यः त्रिलोकं प्रियेण व्यतिकृतं विरहितं तद्विरहदावाग्निभस्मीभूतत्वाच्छून्यं व्यतिहृतमिति पाठे प्रियेणैव विशेषेणातिशयेन हृतं स्वदशान्तःपातीतिकृतं ददृशुः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ते नन्दाद्याः दयितं प्रियमन्वेषयन्तः भगवन्तं लक्षयन्तीति भगवल्लक्षणैरम्बुजादिलक्ष्मयुक्तैः पदैः सूचितया पदव्या मार्गेण यमुनातटं जग्मुः ॥ १७ ॥ तदेवाह ते इति। हे अङ्ग ! विश्पतेः अनेकब्रह्माण्डरूपायाः प्रजायाः पालकस्य श्रीकृष्णस्य तत्र तत्र गवां मार्गे अन्येषां पदानामन्तरं मध्ये मध्ये अब्जादिभिरुपपन्नानि पदानि निरीक्षमाणाः त्वरायुक्ताः ययुः ॥ १८ ॥ अन्तर्ह्रदे भुजगभोगेन परीतं वेष्टितं कृष्णं जलाशयस्यान्ते तीरे परितः मूढधिषणान् गोपान् सङ्क्रन्दतः पशूंश्च आरादेव उपलक्ष्य प्राप्य परं महत् कश्मलमापुः ॥ १९ ॥ भगवति अनुरक्तं मनो यासां ताः गोप्यः प्रियतमेऽहिना ग्रस्ते सति भृशदुःखतप्ताः प्रियेण श्रीकृष्णेन व्यतिहृतं विरहितं त्रिलोकं शून्यं ददृशुः ॥ २० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

भगवन्तं कृष्णं लक्षयन्ति यानि तैः पदैरब्जयवाङ्कुशादिचिह्नितैः सूचितया पदव्या जग्मुः ॥ १७ ॥ तदेवाह—ते तत्रेति। विश्पतेः विशां गोपानां पत्युः स्वामिनः अन्येषां पदानामन्तरान्तरे मध्ये मध्ये तत्तदपवादेन तानि निरीक्षमाणाः सत्वरा ययुः गवां श्रुतीनां मार्गे सत्वराः योगिनो अतन्निरसनेन यथा तमेव परं तत्त्वमन्विष्यन्ति तद्वदिति भावः ॥ १८ ॥ तत्र यतास्ते कृष्णं निरीहं गोपान् मूढधिषणान् पशूंश्च संक्रन्दत आराद्दूरादुपलभ्य दृष्ट्वा परमं कश्मलमापुः ॥ १९ ॥ व्रजकिशोरीणामवस्थामाह—गोप्य इति। भगवति परमसुन्दरे अनन्ते "बृहद्गुणत्वाद् यमन्तमाहु" रित्युक्तेर्महागुणशालिनि कृष्णोऽनुरक्तमनसः तस्य सौहृदं स्वविषयां मैत्रीं स्मितविलोकं गिरश्च रहो वार्त्तां स्मरन्त्यः त्रिलोकं प्रियेण तेन व्यतिहृतं विरहितं तद्विरहवह्निदग्धत्वाच्छून्यं ददृशुः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भगवन्ति श्रीमन्त्यैश्वर्यवन्तीतरविलक्षणानि लक्षणानि येषां तानि तैः पदैः पादैः। अनेन कृष्णमिति पृथक् सत्त्वात्तल्लक्षणैः पदैरिति वक्तव्यं भगवदित्यतिरिक्तमिति निरस्तम्। भग ऐश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु। यशोवीर्यप्रयत्नेच्छाश्रीधर्मविमुक्तिष्विति विश्वः। सूचितया पदव्याऽन्वेषमाणा यमुनातटं जग्मुः ॥ १७ ॥ लक्षणान्येवंरूपाणीति निरूपयति ॥ त इति। अब्जं कमलरेखा यवो व्रीहिरेखाऽशनिर्वज्रमङ्कुशरेखाध्वजेन चोपपन्नानि पदानि। विश्पतेः प्रजास्वामिनः। शब्दसुश्राव्यतायै विश्पतिरिति छान्दसः प्रयोगः। गवां मार्गेऽन्यपदान्तरान्तरेऽन्येषां गोपानां पदान्तरान्तरे तन्मध्यावकाशे निरीक्षमाणाः पश्यन्तः सत्वरा ययुः ॥ १८ ॥ ह्रदे भुजगभोगपरीतं भुजगश्च भोगश्च ताभ्यां बहिरन्तश्च परीतस्तम्। भोगः सुखे धने चाहेः शरीरफणकाययोरिति विश्वः। अन्तर्निभृतसुखं जलाशयान्ते ह्रदसमीपे मूढधिषणाम्बुद्धिहीनान्सङ्क्रन्दतो रुदतः स्वयमार्ताः परमकश्मलमापुः ॥ १९ ॥ अनुरक्तं मनो यासां तास्तस्य तत्कर्तृकाः सौहृदं च स्मितं च विलोकश्च गिरो वचनानि च ताः स्मरन्त्यस्त्रिलोकं प्रियव्यतिहृतं प्रियविरहितं शून्यं ददृशुः ॥ २० ॥

श्रीसुबोधिनी

तत्रापि भगवान्न केवलं गतः किन्तु गोगोपालसहित एव गत इत्यत्राभिज्ञानमाह **ते तत्रे**ति, **तत्र तत्र** मार्गे **विश्पते**-र्वैश्याधिपतेर्गोकुलराजस्य भगवतः **पदानि** दृष्ट्वा तेनागतप्राणाः **सत्वरा ययुः**, अन्यथा गमनेप्यसामर्थ्य स्यात्, **यवः** **कीर्तिप्रतिपादकः**, **अब्जाकाररेखा सुसेव्यत्वाय**, **भक्तानां मनोगजनिवारणायाङ्कुशरेखा**, **अशनिः पापपर्वतच्छेदाय**, **ध्वजो निर्भयवासदानाय**, एवमनेकविधैश्चिह्नै **रुपपन्नानि पदानि**, अतः स्वस्यापि कृतार्थता भविष्यतीति शकुनमिव प्राप्येष्टदर्शनार्थं शीघ्रं **गताः**, **गवां मार्गेन्येषां** गोपालानां **च पदान्यन्तरा** यत्र, तेन सर्वैः सह तिष्ठतीतिसन्तोषोपि, **अन्तरा** मध्ये ॥ १७ ॥ ननु कथमत्र **सर्वज्ञो बलभद्रो न** तेषां निषेधं कृतवानित्याशङ्क्याह **तांस्तथे**ति, **तथा कातरानतिदीनान् वीक्ष्य प्रहस्य** भगवत्परीक्षां स्मृत्वा विधिनिषेधयोरन्यतरदपि **नोक्तवान्**, यतो**नुजस्य** भगवतः **प्रभावज्ञः**, अयं **श्लोकः पूर्वत्र वा विगीतो वा** ॥ १८ ॥ गता भगवन्तं दृष्टवन्त इत्याह **अन्तर्ह्रद** इति, दूरादेव भगवन्तं यमुनाह्रदे समुद्रे शेषशायिनमिव भगवन्तं दृष्टवन्तः, तदाह, ह्रदमध्ये **भुजगभोगेन** सर्पशरीरेण **परीतं** वेष्टित**माराद्**देवोपलभ्य सुतत्वान् **निरीहं जलाशयसमीपे च गोपानुपलभ्य**, वृत्तान्तप्रश्नाभावाय विशेषणमाह **मूढधिषणा**निति, **मूढा** लयं प्राप्ता **धिषणा** बुद्धिर्येषां, **परितः** सर्वतो विक्षिप्तान् **पशूंश्च सङ्क्रन्दतः** इति तेषामनिष्टसूचकत्वं, **अतो मार्गे** यथाकथञ्चिदप्यगता एतत् त्रितयं दृष्ट्वा **परमकश्मल मूर्छामापुः**, **आर्ता** विकलाः सन्तापयुक्ताश्च जाताः ॥ १९ ॥ एवमार्त्यनन्तरं **गोपिकानां यशो**दासहितसाधारणस्त्रीणां नन्दादीनां च वृद्धगोपानामवस्था आह **गोप्य** इतित्रिभिः, **गोप्यस्तु** भगवन्तं तादृशं दृष्ट्वा त्रैलोक्यमेव प्रियरहितं ज्ञातवत्यः, **प्रिया एव हि रक्षणीयाः**, अत **प्राणरक्षायामिह** लोकरक्षायां परलोकरक्षायां च निवृत्तव्यापारास्तथैव लयं प्राप्तवत्य इति तामस्यवस्था, **अनुरक्तं मनो** यासां, अनेन तेषां प्राणवियोगाभावे हेतुरुक्तः, ननु भगवति साम्प्रतं मनः प्राणवियोजकमेव न तु प्राणरक्षकमित्याशङ्क्याह **भगवती**ति, सर्वकरणसमर्थो **भगवान्**, अतः षड्भिरपि गुणैस्तासां प्राणा रक्षिता इत्यर्थः, तथापि विषयस्यानिष्टरूपत्वे प्राणरक्षा भक्तिविरोधिनीत्याशङ्क्याहा**नन्त** इति, न **विद्यतेन्तो** यस्येति, **विषयश्च नानिष्टरूपः**, अतो भगवता रक्षिता सजीवा एवेतिकर्तव्यतामूढाः स्थिताः, किञ्च तासां जीवने हेत्वन्तरमपि जातमित्याह **तत्सौहृदे**ति, **तस्य** भगवतः **सौहृदं स्मितं विलोकं गिरश्च स्मरन्त्यः**, **सौहृद**स्मरणे शरीरस्थितिः **स्मित**स्मरण इन्द्रियाणां **विलो**कस्मरणे प्राणानां वाक्यस्मरणेन्तःकरणस्य, साधकानुक्त्वा बाधकमाहा**हिना** सर्पेण वेष्टिते परमप्रीतिविषये भृश **दुःखेन तप्ताश्च** जाताः, अति**त्रिलोकं प्रियेण व्यतिहृतं शून्य**मेव **ददृशु**रित्यर्धजरतीयम् ॥ २० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तांस्तथेत्यत्रैतस्य श्लोकस्यासङ्गतत्वं स्फुटीकुर्वन्त्यय **श्लोकः पूर्वत्र वा विगीतो वे**ति, बलभद्रस्य पूर्वमेव भगवत्प्रभावज्ञत्वादुत्पातदर्शनसमय एव न कातर्यं तत्रैवायं श्लोको वक्तुमुचितो वस्तुतस्तु किञ्चित्कार्यस्यात्रानुक्तत्वात् केवलहासस्य तूष्णीम्भावस्यानुचितत्वाच्च **विगीतः** क्षेपको वेत्युभयथाप्यत्रासङ्गत इत्यर्थः ॥ १८ ॥

(३) श्रीमद्वल्लभमहाजकृतः श्रीसुबोधिनीलेखः

ते तत्रेत्यत्र **पदवीविशेषणस्य भगवत्पदस्यापि पूर्वं** निरूपितत्वात् तत्राप्यनुपपन्ना तद्विशेषणे **गोगोपसाहित्याभिज्ञापके** तत्पदे पर्यवस्यति, दघ्नेन्द्रियकामस्येतिवदतिपारार्थ्यं, **अतः** स्वस्या**पी**ति भूमिः पदैः कृतार्था **स्वस्या**पि तथेत्यपिशब्दः ॥ १७ ॥ **अन्तर्ह्र**द इत्यस्याभासे **इति** हेतोराह **आर्ति**मिति शेषः, उपसंहारे **आर्ते**रेव वाक्यार्थत्वोक्तेः ॥ १९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भगवन्तं लक्षयन्ति ज्ञापयन्ति यानि वज्राङ्कुशादियुक्तानि पदानि तैः सूचितया ज्ञापितया पदव्या **मार्गेण** दयितं प्रियं कृष्णमन्वेषमाणाः मृगयन्तः ते **गोपादयो** यमुनातटं जग्मुरित्यन्वयः ॥ गमनप्रकारमाह—ते इति । हे अङ्ग हे राजन् ! ते गोपा गवां मार्गे तत्र तत्रान्येषां **गोपादीनां** पदानामन्तरान्तरे मध्ये मध्ये अब्जादियुक्तानि विश्पतेर्वैश्यानां गोपानामधिपस्य श्रीकृष्णस्य पदानि निरीक्षमाणाः सत्वराः त्वरया शैघ्र्येण युक्ता यमुनातटं ययुरित्यन्वयः ॥१८॥ गत्वा च आरात् दूरादेव अन्तर्ह्रदे ह्रदमध्ये भुजङ्गस्य **सर्पस्य भोगेन देहेन परीतं वेष्टितमत एव** निरीहं निश्चेष्टं तं कृष्णं जलाशयस्यान्ते तीरे मूढधिषणान् मूर्छया पतितान् गोपान् तथा **परितः सङ्क्रन्दतः आर्तनादं प्रकुर्वतः पशून् गवादींश्च** निरीक्ष्यार्ताः अतिपीडिताः सन्तः परमकश्मल मूर्च्छामापुरित्यन्वयः ॥ १९ ॥ **एवं** सामान्यतः सर्वेषां दुःखमुक्त्वा तत्प्रेमवतीनां गोपीनां दुःखमाह—गोप्य इति । गोप्यश्च तस्मिन् प्रियतमे कृष्णे अहिना ग्रस्ते गृहीते सति भृशदुःखतप्ताः अत्यन्तदुःखेन सन्तप्ताः सत्यः प्रियेण कृष्णेन व्यतिहृतं विरहितं त्रिलोकं त्रैलोक्यं शून्यं ददृशुरित्यन्वयः। **प्रियतमत्वज्ञापकमाह—तदिति** । तस्य सौहृदं प्रेम, स्मितं च, विलोकं च, गिरः प्रियवचनानि च **स्मरन्त्यः** । **स्मरणे** हेतुमाह-अनन्ते अनन्तगुणपूर्णे तस्मिन् **भगवति** अनुरक्तं मनो यासां ता इति ॥ २० ॥

अन्वितार्थप्रकाशिका

ते इति ॥ भगवन्तं लक्षयन्ति ज्ञापयन्ति यानि वज्राङ्कुशादियुक्तानि पदानि तैः पदैः सूचितया ज्ञापितया पदव्या मार्गेण दयितं प्रियं कृष्णमन्वेषमाणाः मृगयमाणाः "एष्टृ, गतौ" ते गोपादयो यमुनातटं जग्मुः ॥ १७ ॥ ते तत्र तत्रेति ॥ अङ्ग हे राजन् ! ते गोपाः गवां मार्गे तत्र तत्रान्येषां गोपादीनां पदानामन्तरान्तरे मध्ये मध्ये अब्जं कमलं यवः अङ्कुशः अशनिर्वज्रं ध्वजश्च तैः उपपन्नानि युक्तानि विश्पतेर्वैश्यानां गोपानामधिपस्य श्रीकृष्णस्य । षत्वाद्यभाव आर्षः । पदानि निरीक्षमाणाः सत्वरा यमुनातटं ययुः ॥ १८ ॥ अन्तरिति ॥ आरात् दूरादेव अन्तर्ह्रदे ह्रदमध्ये भुजगस्य सर्पस्य भोगेन देहेन परीतं वेष्टितमत एव निरीहं निश्चेष्टं तं कृष्णं जलाशयस्यान्ते तीरे मूढधिषणान् मूर्च्छया पतितान् कृष्णस्य ह्रदे पतनकारणं वक्तुमक्षमान्वा गोपान् तथा परितः संक्रन्दतः आर्तनाद प्रकुर्वतः पशून् गवादींश्च निरीक्ष्यार्ताः अतिपीडिताः सन्तः परमं कश्मलं मूर्छामापुः ॥ १९ ॥ अनुरक्तानां गोपीनां वैकलव्यमाह—गोप्य इति ॥ अनन्ते भगवति कृष्णे अनुरक्तं मनो यासां ताः तस्य सौहृदं प्रेम स्मितं च विलोकं च गिरः प्रियवचनानि च स्मरन्त्यः गोप्यः तस्मिन् प्रियतमे कृष्णे अहिना ग्रस्ते गृहीते सति भृशदुःखतप्ताः अत्यन्तदुःखेन सन्तप्ताः सत्यः प्रियेण कृष्णेन व्यतिहृतं विरहितम् । व्यतिकृतमिति पाठेऽपि स एवार्थः । त्रिलोकं त्र्यवयवं लोकं त्रैलोक्यं शून्यं ददृशुः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अन्वेषमाणाः मृगयमाणाः भगवतो लक्षणानि ध्वजोर्ध्वरेखापद्मादीनि चिह्नानि येषु तैः पदैः सूचितया पदव्या यथा ॥ १९ ॥ अब्जादिभिः युक्तानि । विश्पतेः विशां प्रजानां स्वकीयानां प्रकृतिपुरुषादीनां पतेः यद्वा विशां वैश्यजातीयगोपानां पतेर्हरेः पदानि षत्वाद्यभाव आर्षः गवां मार्गे अन्येषां पदानां अंतरांतरे मध्ये निरीक्षमाणाः ॥ १८ ॥ अंतररिति । भुजगस्य सर्पस्य भोगेन देहेन परीतं वेष्टितं निरीहं आरात् दूरादुपलभ्य दृष्ट्वा जलाशयांते ह्रदसमीपे मूढधिषणान् तमोग्रस्तबुद्धीन् गोपान् संक्रंदतः पशूंश्च दृष्ट्वा आर्त्ता व्रजवासिनः परमकश्मलं मोहं प्रापुः ॥ १९ ॥ तस्य सौहृदं मित्रत्वं च स्मितयुक्तोऽवलोकश्च गिरश्च ताः स्मरन्त्यः सर्प्पेण प्रियतमे कृष्णे ग्रस्ते सति अतिदुःखेन तप्ताः सत्यः गोप्यः प्रियेण हरिणा व्यतिहृतं रहितं त्रिलोकं शून्यं ददृशुः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त इति ॥ दयितं प्राणप्रियं, कृष्णं अन्वेषमाणा मृगयन्तः, ते नन्दादयः, भगवन्तं श्रीकृष्णं लक्षयन्ति ज्ञापयन्तीति तैः, ध्वजोर्द्ध्वरेखावज्रपद्मादिभिश्चिह्नयुक्तैरिति भावः । पदैः पादन्यासैः, सूचितया, पदव्या मार्गेण, यमुनातटं प्रति, जग्मुः ॥ १७ ॥ तदेव प्रपञ्चयति ॥ त इति ॥ ते नन्दादयः, तत्र तत्र प्रदेशे, अब्ज पद्म च यवो धान्यविशेषश्च अङ्कुशः सृणिश्च अशनिर्वज्रं च ध्वजश्च तैर्लक्ष्मभिः उपपन्नानि युक्तानि, विश्पतेर्विश्वपत्युः श्रीकृष्णस्य, पदानि गवां मार्गे, अन्येषां पदानां अन्तरान्तरं मध्यं मध्यं तस्मिन्, निरीक्षमाणाः सन्तः, अङ्ग हे राजन्, सत्वरास्त्वरायुक्ताः भूत्वा, ययुः ॥ १८ ॥ अन्तररिति ॥ यमुनातटे आगतास्ते इति शेषः । अन्तर्ह्रदे मध्यप्रदेशे, भुजगस्य सर्पस्य भोगः शरीरं तेन परितो वेष्टितस्तं, कृष्णं आरात् दूरात्, निरीहं निश्चेष्टं, उपलभ्य दृष्ट्वा, जलाशयान्ते जलाशयस्य समीपप्रदेशे च मूढधिषणान् मूर्च्छितप्रायान्, गोपान् परितस्तान् सर्वतः, संक्रन्दतः क्रन्दमानान्, पशून् गवादींश्च, उपलभ्य आर्त्ताः सन्तः, परमकश्मलं महामोहं, आपुः ॥ १९ ॥ गोप्य इति ॥ अनन्ते अपाररूपलावण्यौदार्यादिगुणवति, भगवति श्रीकृष्णे, अनुरक्तानि गाढानुरागं प्राप्तानि मनांसि यासां ताः, तस्य श्रीकृष्णस्य सौहृदेन सौहार्द्देन स्मितं च विलोकाः कटाक्षाश्च गिरो वाचश्च ताः, स्मरन्त्यः गोप्यः, प्रियतमे निरतिशयप्रीतिविषये कृष्णे, अहिना सर्पेण, ग्रस्ते सति, भृशदुःखतप्ताः नितरां दुःखेन परितापं गताः सत्यः, प्रियव्यतिहृतं प्रियविरहितं प्रियेण त्यक्तमित्यर्थः । त्रिलोकं भूरादिलोकत्रय, शून्यं निर्मनुजादिसदृशं, ददृशुः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तेऽन्वेषमाणा इति : १०.१६.१७.

भगवत्पदपद्मरञ्जिता या पदवी सैव कलौ सुखप्रदा हि । उपलब्धिरपि प्रभोस्तयैवेत्यभवद्गोवृत्ततः स्फुटार्थम् ॥ ४९ ॥

अन्तररिति : १०.१६.१९.

सर्वे क्लेशा यान्ति नाशं यदीयस्मृत्या सत्त्वं क्लेशलेशावभासम् ।
अङ्गीकृत्याक्लेशयस्तान् स्वभक्तान् कस्मादस्माल्लब्धमीश त्वया किम् ॥ ५० ॥

कृष्णप्रिया

व्रजवासी अपने प्यारे श्रीकृष्ण को ढूँढ़ने लगे । कोई अधिक कठिनाई न हुई, क्योंकि मार्ग में उन्हें भगवान के चरण चिह्न मिलते जाते थे । यव, कमल, अङ्कुश आदि से युक्त होने के कारण उन्हें पहचान होती जाती थी । इस प्रकार वे यमुना तट की ओर जाने लगे ॥ १७ ॥ परीक्षित् ! मार्ग में गौओं और दूसरों के चरण-चिह्नों के बीच-बीच में भगवान् के चरण-चिह्न भी दीख जाते थे । उनमें कमल, जौ, अङ्कुश, वज्र और ध्वजा के चिह्न बहुत ही स्पष्ट थे । उन्हें देखते हुए वे बहुत शीघ्रता से चले ॥१८॥

उन्होंने दूर से ही देखा कि कालिय-दह में कालिय नाग के शरीर से बँधे हुए श्रीकृष्ण चेष्टाहीन हो रहे हैं। कुण्ड के किनारे ग्वाल-बाल अचेत हुए पड़े हैं और गौएँ, बैल, बछड़े आदि बड़े आर्त स्वर से डकरा रहे हैं। यह सब देखकर वे सब गोप अत्यन्त व्याकुल और अन्त में मूर्छित हो गये ।। १९ ।। गोपियों का मन अनन्त गुणनिलय भगवान श्रीकृष्ण के प्रेम के रँग में रँगा हुआ था। वे नित्य निरन्तर भगवान के सौहार्द, उनकी मधुर मुसकान, प्रेमभरी चितवन तथा मीठी वाणी का ही स्मरण करती रहती थी। जब उन्होंने देखा कि हमारे प्रियतम श्यामसुन्दर को काले साँप ने जकड रक्खा है। तब तो उनके हृदय में बड़ा ही दुःख और बड़ी ही जलन हुई। अपने प्राण वल्लभ जीवन सर्वस्व के बिना उन्हें तीनों लोक सूना दीखने लगा ।। २० ।।

ताः कृष्णमातरमपत्यमनु प्रविष्टां तुल्यव्यथाः समनुगृह्य शुचः स्रवन्त्यः ।
[2]तास्ता व्रजप्रियकथाः कथयन्त्य आसन् कृष्णाननेऽर्पितदृशो मृतकप्रतीकाः ॥ २१ ॥
कृष्णप्राणान् निर्विशतो नन्दादीन् वीक्ष्य तं ह्रदम् । प्रत्यषेधत् स भगवान् रामः कृष्णानुभाववित् ॥ २२ ॥
इत्थं स्वगोकुलमनन्यपतिं[3] निरीक्ष्य सस्त्रीकुमारमतिदुःखितमात्महेतोः ।
आज्ञाय मर्त्यपदवीमनुवर्तमानः स्थित्वा मुहूर्तमुदतिष्ठदुरङ्गबन्धात् ॥ २३ ॥
तत्प्रथ्यमानवपुषा व्यथितात्मभोगस्त्यक्त्वोन्नमय्य कुपितः स्वफणान् भुजङ्गः ।
तस्थौ श्वसञ्छ्वसनरन्ध्रविषाम्बरीषस्तब्धेक्षणोल्मुकमुखो हरिमीक्षमाणः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—ताः अपत्यं अनुप्रविष्टां कृष्णमातरं समनुगृह्य तुल्यव्यथाः शुचः स्रवन्त्यः ताः ताः व्रजप्रियकथाः कथयन्त्यः कृष्णानने अर्पितदृशः मृतकप्रतीकाः आसन् ।। २१ ।। कृष्णानुभाववित् सः भगवान् रामः कृष्णप्राणान् तं ह्रदं निर्विशतः नन्दादीन् वीक्ष्य प्रत्यषेधत् ।। २२ ।। इत्थं मर्त्यपदवीं अनुवर्तमानः (कृष्णः) मुहूर्तं स्थित्वा अनन्यगतिं आत्महेतोः सस्त्रीकुमारम् स्वगोकुलं अतिदुःखितं आज्ञाय उरङ्गबन्धात् उदतिष्ठत् ।। २३ ।। तत्प्रथ्यमानवपुषा व्यथितात्मभोगः श्वसनरन्ध्रविषाम्बरीषस्तब्धेक्षणोल्मुकमुखः भुजङ्गः कुपितः (सन्) त्यक्त्वा श्वसन् फणान् उन्नमय्य हरिं ईक्षमाणः तस्थौ ।। २४ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनन्यगतिमात्मानमित्थं निरीक्ष्यात एवात्महेतोः स्वगोकुलमतिदुःखितमाज्ञायोरगबंधादुदतिष्ठदित्यन्वयः ।। २३ ।। तस्य प्रथ्यमानेन वपुषा व्यथितात्मशरीरो भुजंगः सर्पः कुंडलीमुन्मुच्य तं त्यक्त्वा कुपितः स्वफणानुन्नमय्य श्वसन्केवलमीक्षमाणस्तस्थौ। कथंभूतः ? श्वसनरंध्रेषु नासाविवरेषु विषं यस्य स तथा अंबरीषो मंडकपाकभाजनं तद्वत्संतप्तानि स्तब्धानीक्षणानि यस्य स तथा उल्मुकानि मुखेषु यस्य स च स च स च ।। २४ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ता गोप्यः। कृष्णमातरं यशोदाम्। सूचोऽश्रूणि। स्रवंत्योऽश्रुधारया नदीं कुर्वंत्यः। व्रजप्रियस्य कृष्णस्य कथाः तास्ताः पूतनावधादिरूपाः वा व्रजस्य प्रियकथाः—पूतनाद्या महादुष्टा अनेन बहवो हता अयं सर्पस्तेष्वेकः को नाम वराकः एनं हत्वाऽधुनेवायास्यतीति तन्मात्राश्वासनार्थमिति जीवगोस्वामिनः। 'प्रतीकोऽपघने तुल्ये' इति धरणिः। मृततुल्या इति ।। २१ ।। तद्ध्रदम् कालियह्लदम्। स प्रसिद्धः। प्रत्यषेधदिति—भो आर्यपादाः 'अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ' इति श्रीगर्गवचनादस्य त्वेतादृशदुर्गोत्तरणं किं चित्रमिति विचार्य विवेकं भजत युष्मासु ह्लदं प्रविष्टे पश्चात्स्वस्त्यागतस्यास्य मदनुजस्य लालनपालनादिकं कैः कर्त्तव्यम्, 'गोपायस्व समाहितः' इति गर्गमहर्षिनिदेशलंघने प्रवृत्ताः कथं स्वेल्यादिवाक्यैरित्यर्थः। ननु तेषां सर्वेषां प्रतिषेधं कर्तुं स कथं शक्तस्तत्राह भगवान् सर्वशक्तियुतः। कांश्चिदुक्तं युक्त्या कांश्चिद्बलेन कांश्चिदंतःप्रेरणया च। अत एव सर्वरमणाद्रामः। ननु सोऽपि कथं स्वस्थस्तत्राह—कृष्णस्य सर्वदुःखकर्षकस्य सदानंदमूर्तेरनुभाववैभवं दुष्टदलनादिरूपं वेत्तीति तोषिणी ।।२२।। इत्थम् सर्पवेष्टितम्। नान्या गतिस्त्राता यस्यासौऽनन्यगतिस्तम्। सर्वरक्षकत्वे सति सर्वारक्ष्य निरीक्ष्य विमृश्य। अत एव अनन्यगतित्वादेव। आत्महेतोः। मदर्थम्। उरगबंधादहिवेष्टनात्। उदतिष्ठत् पृथग्बभूव। गोकुलपक्षे त्वमो लुगभाव आर्षः। सकलाः स्त्रियः कुमाराः सस्त्रीकुमारमिति साकल्येऽव्ययीभावः। मुहूर्तं स्तब्ध इव स्थित्वा किं रे कालिय त्वया विक्रमसर्वस्वं दर्शितोऽहं संप्रति गोपालबालकोऽप्ययं विक्रमलवं दर्शयति पश्येत्युक्त्वोरगबंधादुदतिष्ठत्पृथग्भवितुमुद्यतोऽभूत् ।। २३ ।। प्रथ्यमानेन वर्द्धमानेन। 'मंडकं सूक्ष्मरोटिके' इति शाश्वतः। तताय इति प्रसिद्धम्। यद्वा - अंबरीषो भ्राष्ट्रम् अन्नभर्जनार्थं रचितो गृहकारयंत्रः 'क्लीबोंबरीषं भ्राष्ट्रो ना' इत्यमरः ।। २४ ।।

---

१. प्रतप्तां–वीर. । २. त्रस्ताः–विज. । ३. गतिं–श्रीधर. वंशी. वीर. विज. जीव. दिदृ. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, तन्माता हन्त कीदृशी जातेत्यपेक्षायां शोकभरेण किञ्चिदेव प्रकाशयन् सर्वासामेव तासां दशाविशेषमाह—ता इति। ताः पूर्वोक्ताः श्रीयशोदासख्योऽन्याः श्रीगोप्यः न पतति कस्मिन्नपि दुःखे कुलं यस्मात्तदपत्यं परमस्नेहपात्रपुत्रमित्यर्थः अत एव तत् अनुलक्षीकृत्य तदर्थं प्रकर्षेण सर्वतोऽधिकतया ततां प्रविष्टामिति पाठे ह्रदं प्रवेष्टुमारब्धामित्यर्थः। तुल्यव्यथा अपि स सम्यक् अनु निरन्तरं गृहीत्वा धृत्वा शुचः शोकाश्रूणि स्रवन्त्यः प्रवाहरूपेण मुञ्चन्त्यः तास्ताः पूतनादितो दैवकृतरक्षामयीः वत्सबकादिवधरूपास्तवैश्वर्यमयीश्च व्रजस्य प्रियकथाः कथयन्त्या तादृशा महादुष्टा बहवोपि हताः अयं सर्पः तेष्वेकः को नाम वराकः एनं हत्वाऽधुनैवायास्यतीति तन्मातृसान्त्वनार्थमित्यर्थः। तथा कृष्णार्पितदृशश्च सत्य आसन् पश्चात् मृतकतुल्याश्चासन्नित्यर्थः। विशेषतस्तासां शोकोक्तिः श्रीविष्णुपुराणे—

"सर्वा यशोदया सार्द्धं विशामोऽत्र महाह्रदे। नागराजस्य नो गन्तुमस्माकं युज्यते व्रजे" ॥

"दिवसः को विना सूर्यं विना चन्द्रेण का निशा। विना वृषेण का गावो विना कृष्णेन को व्रजः॥ विना कृता न यास्यामः कृष्णेनानेन गोकुलम् अरम्यं नातिसेव्यं च वारिहीनं यथा सरः॥ यत्र नेन्दीवरदलप्रख्यकान्तिरयं हरिः। तेनापि मातर्वसिन रतिरस्तीति विस्मयः॥ उत्फुल्लपङ्कजदलस्पष्टकान्तिविलोचनम्। अपश्यन्त्यो हरिं दीनाः कथं गोष्ठे भविष्यथः॥ अत्यर्थंमधुरालापहृताशेषमनोधनाः। न विना पुण्डरीकाक्षं यास्यामो नन्दगोकुलम्॥ भोगेनावेष्टितस्यापि सर्पराजस्य पश्यत। स्मितशोभिमुखं गोप्यः कृष्णस्यास्मद्विलोकने" ॥ इति ॥ २१ ॥ कथञ्चिन्मोहोपशमे कालविलम्बे च ह्रदं निश्शेषेण प्रविशतः नन्दादीन् सर्वानेव व्रजजनान् सः व्रजरक्षार्थं भगवता गृहे त्यक्तो यः बन्धुवत्सलत्वेन प्रसिद्धो वा ननु, तेषां सर्वेषां प्रतिषेधनं स कथं कर्त्तुं शक्तः? तत्राह भगवान् सर्वशक्तियुक्तः कांश्चिद्युक्तयुक्त्या कांश्चिद्बलेन कांश्चिदन्तःप्रेरणया च एवं सर्वरमणाद्रामः। ननु, सोपि नाम कुतः स्वस्थ आसीत्? तत्राह—कृष्णस्य परब्रह्ममूर्तेर्भगवतः अनुभावं प्रभावं वेत्तीति तथा सः॥ २२॥ इत्थम् अनेन सर्वेषां तेषामपि मोहनादिना प्रकारेण न विद्यते अन्या गतिः रक्षको यस्य तथाभूतम् आत्मानमिति शेषः। पतिमिति पाठे स एवार्थः उदतिष्ठत् श्रीकृष्णः अन्यत्तैः यद्वा स च मुहूर्त्तं स्थित्वा उरङ्गमबन्धादुदतिष्ठत् मुहूर्त्तस्थितौ हेतुः मर्त्यपदवीं यं प्रति दण्डो विधीयते तस्य दोषो लोके दर्श्यते इतीदृशीं तन्नीतिमनुवर्त्तमान इति उत्थाने हेतुः स्वात्मीयं गोकुलम् इत्थं निजोत्थानं विना न जीविष्यतीति प्रकारेण न विद्यतेऽन्या गतिः रक्षको यस्य किं वा न विद्यतेऽन्या यत्राहिवेष्टने स्वस्यावस्थितिस्तस्मादपरा गतिर्गमनं यस्येति तत्रैव प्रवेशनिश्चयो यस्येत्यर्थः। तादृशं निरीक्ष्य तच्चेष्टादर्शनेन निश्चित्य अमो लुगभावः आर्षः तत्रापि सस्त्रीकुमारं कृत्स्नमित्यर्थः। साकल्येऽव्ययीभावः, चेष्टादर्शनमेवाह—आत्महेतोरतिदुःखितं दुःखपराकाष्ठामापन्नं सम्यक् ज्ञात्वेति स्वभावतो जनमात्रस्य दुःखासहिष्णुता तस्मिन् वर्त्तत एव तत्रापि स्त्रीत्वस्य तत्राप्यात्मानवाप्तिहेतुकदुःखस्य तत्राप्यात्मदुःखदुःखितस्येति क्रमज्ञानेनोत्थानेति त्वरा बोधिता एवं तदुत्थानादिका सर्वैव लीलाव्रजजनेन दृष्टेति गम्यते॥ २३॥ उत्थानप्रकारमेव दर्शयन् कालियस्य ग्लानिमाह—तदिति। तस्य कृष्णस्य प्रथ्यमानेन स्वयं विस्तार्यमाणेन किञ्चिदुच्छ्वास्यमानेन वपुषा व्यथितः त्रुट्यन्निव पीडितः आत्मभोगो यस्य आत्मशब्देन तत्रात्यन्तमध्यास संत्यज्य पीडा वैशिष्ट्यं द्योतितं स्वशब्दश्चासाधारणतया विवक्षया अम्बरीषमत्र ज्वलद्विषभर्जनपात्रं हरिं दुरभिमानदोषहरणात् निजावासहरणोद्यमत्वाद्वा अन्यत्तैः तत्र कुण्डलं वेष्टनम्॥ २४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तन्माता का हन्त कीदृशी जातेत्यपेक्षायां शोकभरेण तत् किञ्चिदेव प्रकाशयन् सर्वासामेव तासां दशाविशेषमाह—ता इति। न पतति कस्मिन्नपि दुःखे कुलं यस्मात् तदपत्यं परमस्नेहपात्रत्वामित्यर्थः। अतएव तदनु लक्षीकृत्य तदर्थं प्रकर्षेण सर्वतोऽधिकतया तताम्। तुल्यव्यथा अपि सम्यक् अनु निरन्तरं गृहीत्वा धृत्वा, अन्यथा तस्याः सहसैव सद्यो ह्रदप्रवेशापत्तेः। शुचः शोकाश्रूणि स्रवन्त्यः प्रवाहरूपेण मुञ्चन्त्यः, तास्ताः पूर्वोक्ताः सर्वा अनिर्वचनीया वा; व्रजस्य प्रियः, किंवा व्रज एव प्रियो यस्य तस्य कथाः; यद्वा, व्रजे वर्त्तमानाः प्रियस्य कृष्णस्य कथाः; किंवा, व्रजस्य प्रियाः कथाः, श्रीकृष्णस्य बाल्यक्रीडादिवृत्तानि; सस्मितमधुरावलोकपूर्वक-सनर्मालापान् वेति सर्वथात्यन्तशोकविलापा उक्ताः; यद्वा, वत्सबकादि-वध-रूपाः कथाः कथयन्त्यस्तादृशा महादुष्टाः कृष्णेन हताः। अयं सर्पः को नाम वराकः? एनं हत्वाधुनैवायास्यतीति तन्मातृसान्त्वनार्थमिति भावः। विशेषतस्तासां शोकोक्तिः श्रीविष्णुपुराणे यथा (५।७।२५-३१)—

"सर्वा यशोदया सार्द्धं विशामोऽत्र महाह्रदे। नागराजस्य नो गन्तुमस्माकं युज्यते व्रजे॥
दिवसः को विना सूर्यं विना चन्द्रेण का निशा। विना वृषेण का गावो विना कृष्णेन को व्रजः॥
विना कृता न यास्यामः कृष्णेनानेन गोकुलम्। अरण्यं नापि सेव्यञ्च वारिहीनं यथा सरः॥
यत्र नेन्दीवरदल-प्रख्यकान्तिरयं हरिः। तेनापि मातुर्वसेन रतिरस्तीति विस्मयः॥

उत्फुल्लपंकजदल-स्पष्टकान्तिविलोचनम् । अपश्यन्त्यो हरिं दीनाः कथं गोष्ठे भविष्यथ ॥
अत्यर्थमधुरालाप-हृताशेषमनोधनाः । न विना पुण्डरीकाक्षं यास्यामो नन्दगोकुलम् ॥
भोगेनावेष्टितस्यापि सर्पराजस्य पश्यत । स्मितशोभि मुखं गोप्यः कृष्णस्यास्मद्विलोकने ॥'' इति ।

कृष्णाननेऽर्पितदृशश्च सत्यः, आसन् तत्सन्दर्शनार्थं स्थिताः शोकाकुलतया भूमावुपविष्टा वा । पश्चाच्च मृतकप्रतीका बभूवुः यद्वा, कथयन्त्यः कृष्णाननार्पितदृशः सत्यो मृतकप्रतीका आसन् बभूवुः, मोहं गता इत्यर्थः । एता हि प्रायो व्रजेश्वरीसम्वयस्काः, पूर्वोक्ताश्च प्रायो नववयस्का भगवत्प्रियतमा इति केचिदद्विवेचयन्ति ॥ २१ ॥ कथञ्चिन्मोहोपशमे कालविलम्बे च ह्रदं निःशेषेण निर्विशेषेण वा प्रविशतो नन्दादीन् सर्वानेव व्रजजनान्, स व्रजरक्षार्थं भगवता गृहे रक्षितो यः, बन्धुवत्सलत्वेन प्रसिद्धो वा । ननु तेषां सर्वेषां प्रतिषेधनं स कथं कर्त्तुं शक्तः ? तत्राह,—भगवान् सर्वशक्तियुक्तः—कांश्चिद्युक्त्युक्त्या, कांश्चिद्बलेन, कांश्चिच्च श्रीविष्णुपुराणानुसारेण स्मितशोभिमुखत्वदृष्ट्या भगवत्स्वस्थतादि—प्रदर्शनेऽप्यर्थः । एवं सर्वरमणाद्रामः । ननु सोऽपि रामः कुतः स्वस्थ आसीत् ? तत्राह—कृष्णस्य परब्रह्ममूर्त्तेर्भगवतोऽनुभावं प्रभावं वेत्तीति तथा सः; पुनश्च स्नेहभराकुलास्ते सर्वे श्रीकृष्णस्य तादृशसाक्षादवलोकनतः परमार्त्त्युद्भवेन विशेषतश्च ह्रदप्रवेशाप्राप्त्यान्तर्दुःख—भरोदयेन मोहिता भूमौ निपत्यासन्निति ज्ञेयम्,—(भा. १०।१७।१४) 'उपलभ्योत्थिताः सर्वे इति वक्ष्यमाणत्वात्' ॥ २२ ॥ इत्थमनेन तेषां सर्वेषामपि मोहादिना प्रकारेण। न विद्यतेऽन्यः पतिः रक्षको यस्य तथाभूतमात्मानमिति शेषः । उदतिष्ठन् श्रीकृष्णः । अन्यत्तैर्व्यञ्जितम् । यद्वा, इत्थमुक्ते मानेन शोकमोहाद्यनुपरम-प्रकारेणातिदुःखितम्, अनन्या एकान्तिनस्तेषां पतिं चात्मानं निरीक्ष्यालोच्येत्येषां रक्षावश्यमेवाशु कार्य्येति भावः । विशेषतश्चात्महेतोरेवातिदुःखितं स्वकीयमकृत्येनापि रक्ष्यं गोकुलमाज्ञाय स्वभावतः परदुःखासहिष्णुता भात्येव । तत्र च स्वकीयानां तत्राप्यात्महेतुकमित्युत्थानेऽतित्वरा बोधिता । स-स्त्री-कुमारमिति श्रीयशोदादीनां गोपीनां श्रीदामादि-सहचर-गोपकुमाराणाञ्च दुःखविशेषविवक्षया पृथङ्निर्दिष्टम्; अथवा, इत्थमुक्तप्रकारकं परमार्त्तं मरणोद्यतञ्च स्वगोकुलं निरीक्ष्य, न विद्यतेऽन्यत् किञ्चिदपि स्वस्माद्यस्य तं पतिञ्च गोकुलस्वामिनम्, किंवा, अनन्या गोपास्तेषां पतिं श्रीनन्दं स-स्त्रीकुमारमात्महेतो-रतिदुःखितमाज्ञाय । हे अनन्येति-श्रीपरीक्षितं प्रति सम्बोधनं वा,—तवेवानन्यानां तेषामपि प्राणरक्षापूर्व्वकाशेषमङ्गलं तेनावश्यं कृतमेवेति भावः । तथापि पतिं गोकुलस्येत्यर्थात् तमेव । अन्यत् समानम् । मर्त्त्यपदवीमनुवर्त्तमानो लौकिक-लीलां दर्शयन्नित्यर्थः। अतो मुहूर्त्तमल्पकालमेवोरगभोगबन्धे स्थित्वा; यद्वा, यं प्रति निःसारणादिदण्डो विधीयते, तस्य हि दोषो लोकेषु दर्श्यत इतीदृशीं मर्त्त्यपदवीमनुसरन्नपि शीघ्रमुदतिष्ठदित्यर्थः । भावविशेषालिंगनादिना यो हि मिलति, स बलान्न मोच्यते, किन्तु क्षणं तेन संगत्य स्थीयत इति लोकरीतिमनुसरन्निति तत्त्वार्थः ॥ २३ ॥ उत्थानप्रकारमेव दर्शयन् कालियस्य ग्लानिमाह तदिति । तस्य कृष्णस्य प्रथ्यमानेन स्वयंविस्तार्य्यमाणेन किञ्चिदुच्छ्वास्यमानेन वपुषा व्यथितः पीड़ित आत्मभोगः स्वदेहः, किंवा, आत्मनो देहो ? वा, भोगश्च देहो यस्य सः । निविड़दृढ़वेष्टनं गतस्य भोगस्य तदन्तर्वर्त्ति-श्रीवपुषः किञ्चिदुत्फुल्लनेनाकृष्ट्या त्रुटनदुःखोत्पत्तेः, कुपितत्वादेव किंवा व्यथितात्मभोगत्वात् श्वसन् मुहुरुच्चैः श्वासान् मुञ्चन्, किञ्च, श्वसनेत्यादिश्वसनरन्ध्रविषत्वम्, श्वासेनैव तदत्यन्ताभिव्यञ्जनात् । अम्बरीषोऽत्र विषपाकपात्रं तदुपमयेक्षणानामतिरक्तत्वं दुर्विषमयत्वञ्च । उल्मुकमुखत्वञ्च । मुखतो ज्वलद्विषाग्निशिखा-मोचनात् । एषामुत्तरोत्तरं घोरत्वमूह्यम् । एवं पूर्व्वोद्दिष्टं सर्व्वतोऽतिदुर्व्विषमयत्वं दर्शितम् । हरिं दुरभिमान-दोषहरणान्निजावास-हरणोद्यमाद्वा । तत्त्वार्थस्तु अव्यथितात्मभोगस्त्वरयोत्थानात् प्रणयेन कुपितो मनोहरत्वात् तमीक्षमाण एव तस्थौ । श्वासादयः सात्त्विकविकारा एव । तत्र विषाम्बरीषत्वादिकं जातिस्वाभाविकमेवेति ॥ २४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

व्रजप्रियः कृष्णः मृतकप्रतिकाः मृतकल्पाः ॥ २१–२२ ॥ वृध्यमानं वर्द्धमानम् उरङ्गबन्धात् ॥ २३ ॥ श्वसनरन्ध्रविषाग्निर्दृष्टिः श्वसनरन्ध्रमेव विषपावकं यस्य सः स्तब्धेक्षणो य अलातचक्रमुखः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तां कृष्णस्य मातरं यशोदामपत्यमनूद्दिश्य प्रतप्तां दुःखिताम् अनुगृह्य सम्यग्गृहीत्वा ह्रदे पतितुम् उद्युक्तां निवार्येत्यर्थः। शुचोऽश्रूणि स्रवन्त्यः तया तुल्यदुःखा प्रियो व्रजो यस्य तस्य कृष्णस्य तास्ताः कथाः पूतनायमलार्जुनभञ्जनादिरूपाः कथयन्त्यः कृष्णस्याननेऽर्पिताः निहिताः दृशो याभिस्ताः मृतकप्रतीकाः मृततुल्या आसन् ॥ २१ ॥ कृष्ण एव प्राणो येषां तान् कृष्णैकजीवनान् नन्दादीन् तं ह्रदं विशतः प्रवेष्टुमुद्युक्तान् रामः प्रत्यषेधन्निवारितवान् तत्र हेतुः तत्प्रभाववित् तत्रापि हेतुर्भगवान् ॥ २२॥ न विद्यते अन्या गतिः रक्षणोपायो यस्य तत् आत्मनः स्वस्य हेतोः स्त्रीकुमारप्रयन्तं दुःखितं गोकुलं निरीक्ष्य तद्दुःखं ज्ञात्वा मर्त्यपदवीमनुवर्त्तमानोऽत एव मुहूर्तमात्रं तूष्णीं स्थित्वा तत उरङ्गबन्धादुदतिष्ठत् त्याजितोरगबन्धो बभूवेत्यर्थः ॥ २३ ॥ तस्य कृष्णस्य प्रथ्यमानेन भारीक्रियमाणेन पृथुशब्दात्तत्करोतीति ण्यन्तात् "रऋतोहलदेर्लघोः (६।४।१६१) इति कृतेरभावात्

कर्मणि लटः शानच् वपुषा व्यथितस्वशरीरो भुजङ्गः कृष्णमुन्मुच्य कुपितः फणानुन्नमय्य श्वसन् केवलं हरिमीक्षमाणः तस्थौ कथम्भूतः? नासारन्ध्रेषु विषं यस्य अम्बरीषवत्सन्ततानि स्तब्धानि चेक्षणानि यस्य अम्बरीषशब्दो भ्राष्ट्रवाची "अम्बरीषः पुमान् भ्राष्ट्रम् क्लीबेम्बरीषं भ्राष्ट्रो ना" इत्यादिनामानुशासनात् अम्बरीष इत्यौणादिकसूत्रेण "अबि शब्दे" इत्यस्माद्धातोः कृतॄभ्यामीषन्नित्यत ईषन्नित्यनुवर्त्तमाने तत्सन्नियोगेन रुडागमो निपात्यते समस्तपाठे नासिकाच्छिद्रमेव विषपाकभ्राष्ट्रं यस्य स चासौ स्तब्धेक्षणः उल्मुकान्यग्निकणानि मुखे यस्य उल्मुकवज्ज्वलन्मुखो वा ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अपत्यमनुप्रविष्टाम् आत्मना पुरस्थितह्रदे प्रविष्टां शरीरेण तीरे स्थितां कृष्णमातरं यशोदां समनुगृह्य परिरभ्य यशोदादुःखतुल्यव्यथाः शुचः शोकादश्रूणि स्रवन्त्यः बाष्पधारया नदीं कुर्वन्त्यः याः पूर्वं व्रजप्रियस्य कृष्णस्य कथाः कथयन्त्यः आसन् ता अधुना त्रस्ताः कृष्णाननेऽर्पितनेत्राः गोप्यो मृतकप्रतीका विज्ञाता अनेनेति शेषः ॥ २१ ॥ कृष्ण एव प्राणो येषां ते तथा तान् ह्रदं निर्विशतः प्रवेष्टुकामान् ॥ २२ ॥ आज्ञाय ज्ञात्वा उरगबन्धात् सर्पकृतबन्धनात् उदतिष्ठत् उत्थितोऽभूत् ॥ २३ ॥ भगवत्युत्थिते सर्पः किंक्रियोऽभूदित्यत्राह—तत्प्रथ्यमानेति। तेन कृष्णेन प्रथ्यमानवपुषा वर्द्धमानशरीरेण व्यथितः आत्मभोगः स्वशरीरं यस्य स तथा अत एव कुपितोऽत एव श्वसन् दीर्घश्वासं कुर्वन् श्वसनरन्ध्रे नासिकाच्छिद्रे विषाम्बरीषं विभ्राष्ट्रं यस्य स तथा "क्लीबेऽम्बरीषं भ्राष्ट्रो वा कन्दुर्ना स्वेदिनी स्त्रियाम्" इत्यमरः। स्तब्धेक्षण उल्मुकमुखश्च स्तब्धे ईक्षणे उल्मुके मुखे यस्य स तथा "अङ्गारेऽलात उल्मुकः, इत्यमरः एवंविधो भुजङ्गो हरिमीक्षमाणस्तस्थावित्यन्वयः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ताः पूर्वपूर्वोक्ताः श्रीयशोदासख्योऽन्याः तास्ताः पूतनादिभ्यो रक्षामयीः ॥ २१–२२ ॥ स च मुहूर्त्तं स्थित्वा उरगबन्धादुदतिष्ठत् तावत् स्थितौ हेतुः मर्त्यपदवीमनुवर्त्तमानः उत्थाने हेतुः स्वमात्मीयम् इत्थं गोकुलं निजोत्थानं विना न जीविष्यतीति प्रकारेण न विद्यतेऽन्यः पतिः रक्षको यस्य तादृशं निरीक्ष्य दृष्ट्वा तथापि सस्त्रीकुमारं श्रीकृष्णमित्यर्थः। प्रकारमेवाह—आत्मेत्यादि ॥ २३–२९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तेषामेव करुणरसपराकाष्ठामालक्ष्य कदाचिदमी मद्वियोगमाशङ्क्य नश्येरन्, तदत्यसमञ्जसं भविष्यतीति तां लीलां संजिहीर्षुर्यदकरोत्तदाह—इत्थं स्वगोकुलमित्यादि। एते मर्त्यप्राया मद्वियोगेन मरिष्यन्त्येवेति तेषां मर्त्यपदवीमाज्ञाय ज्ञात्वा कालियेन सह तां पूर्वोक्तां खेलामनुवर्तमानः सन् मुहूर्त्तं स्थित्वा उरगबन्धनात् उरगे यः स्वकृतो बन्धः, न तु तत्कर्त्तृको बन्धः, तस्मादुदतिष्ठत्, स्वाधीनबन्धत्वादिच्छामात्रेणैवोत्थानम्। अन्यत् समम् ॥ २४–२५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

आज्ञाय मर्त्यपदवीमित्यादि। मर्त्यपदवीमाज्ञाय ज्ञात्वा, एते मर्त्या अतिक्षणभङ्गुर–प्राणा अस्मदनालोकेन मरिष्यन्त्येव, तदलं विलम्बेन—इत्यनुवर्त्तमानो विचारयन् मुहूर्त्तं स्थित्वा उरग–बन्धादुदतिष्ठत् ॥ २४–२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्र वात्सल्यवतीनां वैक्लव्यमाह ताः प्रसिद्धाः पुरन्ध्रयः अपत्यम् अनुलक्षीकृत्य प्रततां सन्तापजर्जरां प्रविष्टामिति पाठे अपत्य एव लीनतां प्राप्तां मूर्च्छितामिति यावत् यशोदां सम्यगनुगृह्येत्यधुनाप्यस्याः शरीरे प्राणाः वर्त्तन्ते तदिदं नोपेक्षणीयमिति तद्भुजाभ्यामङ्कीकृत्य शीतलसलिलेनाश्रुकलाविलन्नं मुखं मुहुर्मुहुः प्रक्षाल्य व्रजप्रियस्य कृष्णस्य कथास्तास्ताः उच्चैः कथयन्त्यः तच्चेतनाप्रापणार्थमिति भावः। ताः कीदृश्यः? शुचः शोकस्य स्रवन्त्यो नद्यः "स्रवन्ती निम्नगाऽपगा" इत्यमरः। स्वतरङ्गैरन्यानपि प्लावयन्त्य इति भावः। अन्ते तु मृतकस्येव प्रतीका अवयवा यासां ताः ॥ २१ ॥ प्रत्यषेधदिति भो आर्य्यपादाः! "अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ" इति गर्गवचनादस्यत्वे तादृशदुर्गोत्तरणं किञ्चित्रमिति विचार्य्य विवेकं भजत युष्मासु ह्रदं प्रविष्टेषु पश्चात् स्वस्त्यागतस्यास्पदमनुजस्य लालनपालनादिकं कैः कर्तव्यं "गोपायस्व समाहितः" इति वर्गमहर्षिनिर्देशलङ्घने प्रवृत्ताः कथं स्थेत्यादिवावर्य्यरित्यर्थः। भगवान् इति तत्र सामर्थ्यम् ॥ २२ ॥ अनन्यगतिमिति पुरत्वमार्षम् आज्ञाय सम्यक् ज्ञात्वा मुहूर्त्तं घटिकाद्वयं स्तब्ध इव स्थित्वा किं रे कालीय! त्वया विक्रमसर्वस्वमहं दर्शित एव सम्प्रति गोपबालकोऽप्ययं विक्रमलवं दर्शयति पश्येत्युक्त्वा उरङ्ग उरगस्तद्बन्धात् उदतिष्ठत् ॥ २३ ॥ उत्थानप्रकारमेव दर्शयन् कालियस्य ग्लानिमाह—तदिति। तेन कृष्णेन प्रथ्यमानं वेष्टनसमयगतसङ्कोचनां परित्यज्य विस्तार्य्यमानं यद्वपुर्भुजजङ्घादिकं तेन व्यथितः त्रुट्यन्निव पीडितः आत्मनो भोगा यस्य सः वेष्टनमुन्मुच्य तं त्यक्त्वा स्वफणान् उन्नमय्य श्वसन् केवलमीक्षमाण एव तस्थौ कीदृशः श्वसनरन्ध्रेषु नासाविवरेषु विषं यस्य तथा अम्बरीषं भ्राष्ट्रः ज्वलद्विषभर्जनपात्रं भाण्ड इति ख्यातं तद्वत् प्रातानि स्तब्धानि ईक्षणानि यस्य तथा उल्मुकानि निस्सरन्ति मुखेभ्यो यस्य सच सच सच सः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मृतकप्रतीकाः इति भगवदमृतदृष्टिवृष्ट्या न मृता इति भावः ॥ २१–२२ ॥ इत्थमुक्तं गोकुलस्य मर्त्यपदवीं मर्त्यप्रकृतिं तत्त्वानभिज्ञतमाज्ञाय स्वगोकुलमात्महेतोः दुःखितं च निरीक्ष्य मुहूर्तं स्थित्वा अनन्यगतिम् अन्यैर्दुर्धरं स्वायत्तमात्मानमनुवर्त्तमान उरङ्गबन्धादुदतिष्ठदित्यन्वयः ॥ २३ ॥ तत्तस्य श्रीकृष्णस्य प्रथ्यमानेन वपुषा व्यथितात्मभोगः पीडितात्मदेहः श्रीकृष्णे विनिर्गते तद्बन्धनार्थं कृतं कुण्डलं त्यक्त्वा कुपितः स्वफणानुन्नमय्य श्वसन् श्वासान् मुञ्चन् केवलं हरिमीक्षमाणस्तस्थौ, कथम्भूतः ? श्वसनरन्ध्रेषु नासाच्छिद्रेषु विषं यस्य तथा अम्बरीषाणीव भ्राष्ट्राणीव सन्तप्तानि स्तब्धानीक्षणानि यस्य तथा उल्मुकवत् प्रज्वलितानि मुखानि यस्य सच सच तथा ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

वत्सलानां दशामाह—ता इति । ता मातृभावेन प्रसिद्धा गोप्यः कृष्णमातरं श्रीयशोदां, अपत्यं कृष्णमनुप्रविष्टां तदन्तिकं प्रवेष्टुं कृतारम्भां भुजाभ्यां समनुगृह्य तत्तुल्यव्यथाः सत्यः शुचः शोकाश्रूणि स्रवन्त्यो मुञ्चन्त्यः व्रजप्रियस्य कृष्णस्य तास्ता अघविमर्दनादिकाः कथाः कथयन्त्यः अघमिवैतमपि सर्पं विमर्द्य सूनुरायातीति बोधयन्त्य आसन् अस्मासु विषविप्लुष्टासु स कथं स्यादिति भावः । मृतकस्येव प्रतीका अङ्गानि यासां ताः ॥ २१ ॥ प्रत्यषेधदिति भो आर्यचरणाः ! "अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ" "गोपायस्व समाहितः" इति गर्गाचार्यैरुक्तं किं विस्मरथ ? तच्च कालियदुर्गतरणमस्य महापुरुषस्य मदनुजस्य कियत् ? दष्टश्वासकृदस्य प्रभावो भवच्चरणे युष्मासु विषवह्निविप्लुष्टेषु कोऽस्य लालनकृदिति तान्यवारयदित्यर्थः ॥ २२ ॥ कालियस्योत्साहवर्द्धनाय व्रजौकसां भावशोभादर्शनाय च निरीहतां प्रकाश्येदानीं विक्रमं प्रकाशयदित्याह इत्थमिति । सर्वेषां मोहादिना प्रकारेण नान्यो गतिर्यस्य तत् पुंस्त्वं छान्दसं आत्महेतोरतिदुःखितमाज्ञाय मर्त्यपदवीं यं प्रति दण्डो विधेयस्तद्दोषो लोके दृश्य इति नीतिमनुवर्तमानोऽनुसरन् मुहूर्तं स्थित्वा उरङ्गस्य बन्धादुदतिष्ठन् निर्गतः ॥ २३ ॥ उत्थानविधं दर्शयन् उरगस्य ग्लानिमाह—तदिति । तस्य कृष्णस्य प्रथ्यमानेन विस्तार्यमाणेन वपुषा बाहूरुजङ्घादिना व्यथितः त्रुटितवत् पीड़ित आत्मभोगः स्वदेहो यस्य सः "भोगः सुखे धने चाहेः शरीरफणयोर्मतः" इति विश्वः । वेष्टनं त्यक्त्वा स्वफणानुन्नमय्य स्वसन् हरिमीक्षमाण एव तस्थौ । कीदृशः स्वसनरन्ध्रेषु नासाच्छिद्रेषु विषं यस्य अम्बरीषं जलदुर्जनभाजनभ्राष्टस्तत् समानि शुद्धानीक्षणानि यस्य उल्मुकानि विषाग्निखण्डानि निःसरन्ति मुखेभ्यो यस्य स च स च स च सः ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अपत्यमनुप्रविष्टां ह्रदं प्रवेष्टुकामां कृष्णमातरं समनुगृह्य परिरभ्य स्थापयित्वा तुल्यव्यथास्तद्यशोदासमानखेदाः शुचो निमित्ताच्छ्रवन्त्यः श्रावयन्त्यो विदूरस्ता अन्याः प्रति व्रजप्रियकथा व्रजे कृताः प्रियस्य कृष्णस्य कथाः । एवं बहव उपद्रवा जाताश्चेदपि न पोतघात इदानीमप्येवमिति चिन्ता कुत इति तत्कथाः कथयन्त्यः । अथवा प्राग्या एतादृश्यस्ता इदानीं मृतकप्रतीताः शववन्निश्चेष्टा ज्ञाताः । लोकेन लोकेशेन वा । प्रतीका इति पाठे शवसदृशा इत्यर्थः । कृष्णानने तन्मुखेऽर्पितास्तदेकविषया दृशो यासां ता आसन् । कृष्णस्याननं चेष्टा तद्विषयेऽर्पितदृश इति वा । हे कृष्णेति मातरं मा न विद्यत आतरस्तरपण्यं यस्य स तदपत्यमन्विति वा तरणोपकरणविरहितमित्यर्थः । आतरस्तरपण्यं स्यादित्यमरः ॥ २१ ॥ कृष्णानुभावविद्भगवान्रामः कृष्णः प्राणो येषां ते तथा तान्नन्दादीन् ह्रदं निर्विशतः प्रवेष्टुकामान्प्रत्यषेधन्निषिषेध ॥ २२ ॥ इत्थ स्वगोकुलं तज्जनं सस्त्रीकुमारमात्महेतोः स्वनिमित्तमतिदुःखितमाज्ञाय ज्ञात्वा पुच्छं वामकरणे धृत्वे सतीति शेषः । यथोक्तं रुक्मणीशविजये । स दन्दशूकस्य मुखं विभिन्दंस्तदीयपुच्छं जगृहे करेण । यथारावं ननु दण्डदाता निरागसं कं वरयेन्न शौरिरिति स्वरवाग्निनो याच्नां कृत्वा मोचनं कार्यमित्यत आह । इत्थं स्वमनन्यगतिं गत्यन्तरशून्यं स्वात्मानमेव सर्वगतिं निरीक्ष्य च मर्त्यपदवीमनुवर्तमानो मुहूर्तं स्थित्वोरंगबन्धादुरगबन्धात् । नुमागमो बिन्दुर्वा इतराशक्यपरिहारताद्योतको बन्धस्येति ज्ञेयः । उदतिष्ठत् । एवमाज्ञाय निरीक्ष्येति पदयोरन्वयेऽश्लिष्टता । अन्यथाऽन्यतरवैय्यर्थ्यमिवानन्यगतीति भाव्यं कथमनगतिमिति च निरस्तं । गवां कुलानि गोकुलं गोकुलश्च तमिति वा । अनुबन्धो हि भक्तिः स्याद्बन्धः स्नेह उदाहृत इति वचनादुरङ्गात्मनो बलरामस्नेहं निमित्तीकृत्योरङ्गबन्धादुदतिष्ठदिति वा । यथोक्तं हरिवंशे । सङ्कर्षणस्तु सङ्क्रुद्धो बभाषे कृष्णमव्ययं । कृष्णकृष्ण महाबाहो गोपानां नन्दवर्धन । दम्यतामेष वै क्षिप्रं सर्पराजो विषायुधः । इमे नो बान्धवास्तात त्वां मत्वा मानुषं विभो । परिदेवन्ति करुणं सर्वे मानुषबुद्धयः । तच्छ्रुत्वा रौहिणेयस्य वाक्यं तत्स्नेहयन्त्रितः । विक्रुश्यास्फोट्यद्बाहू इत्यादि ॥ २३ ॥ तस्य कृष्णस्य तेन वा प्रथ्यमानं विपुलिभवद्वपुः कलेवरं तेन व्यथितो व्यथायुक्त आत्मनः स्वस्य भोगो यस्य स हरिं त्यक्त्वोत्सृज्य स्वफणानुन्नमय्योद्धृत्य भुजङ्गः कुपितः श्वसन्श्वसनरन्ध्रयोर्नासिकयोर्विषमेवाम्बरीषं भ्राष्ट्रं लाजभर्जनभाण्डं यस्य कालिम्ना साम्यं स्तब्धानीक्षणानि यस्य चासावुल्मुकानीवास्पृश्यान्यास्यानि मुखानि यस्य सः । अम्बरीषं भवेद्भ्राष्ट्र इति विश्वः । क्लीबेऽम्बरीषं भ्राष्ट्रो ना । अङ्गारेऽलातमुल्मुक इत्युभयतश्चामरः । ईक्षमाणः श्वसंस्तस्थौ ॥ २४ ॥

श्रीसुबोधिनी

यशोदासहितानामवस्थामाह **ता** इति, **कृष्णमातरं समनुगृह्य** लोकन्यायेन **शुचः स्रवन्त्यो** जाताः, **यशोदा** त्वपत्यं भगवन्त**मनुप्रविष्टा** तत्रैव गता, अन्यासां जीवने हेतुः, **तास्ता व्रजप्रियस्य** भगवतः **कथाः कथयन्त्यः**, किञ्च **कृष्णाननेर्पिता दृशः**, भगवन्मुखारविन्दमपि पश्यन्ति, अतो **मृतकप्रतीका आसन्** मृतप्रायाः सजीवा एव स्थिताः, पूर्वं भगवता रक्षिता एता भगवद्गुणैर्दर्शनेन च ॥ २१ ॥ अन्ये तु **नन्दादयो** बलभद्रेण रक्षिता इत्याह **कृष्णेति**, **कृष्णे प्राणा** येषां, **प्राणस्थाने हि स्वेनापि स्थातव्य**मिति **तमेव ह्रदं निर्विशन्तो** जाताः, तदा **तान् बलः प्रत्यधत्**, कथं तेन प्रतिषिद्धाः स्थिता इत्याशङ्क्याह **स भगवानिति** स रामो भगवान् भगवत्सहितो वा, सोपि किमिति प्रत्यषेधत् ? तत्राह **कृष्णानुभावविदिति** कालीयदमनलक्षणं भगवद**नुभावं** जानातीति ॥ २२ ॥ एवं सर्वेषां **गोकुलवासिनां** वैयग्र्यमुपपाद्य सर्वसमर्थस्य भगवत एवङ्करणमनुचितमित्याशङ्क्य तत्समाधानार्थं भगवान् परीक्षां कृतवानित्याहेत्थमिति, परीक्षायां हेतुः **स्वगोकुलमिति, स्वस्य गोकुलं परीक्षणीयमेव, अन्यथा कृतकरिष्यमाणयोर्निरोधयोर्वैयर्थ्यं स्याद् यदि तेषु कृतकार्यं नोपलभ्येत,** परीक्षया यत् सम्पन्नं तदाहानन्य**पति**मिति **न विद्यतेन्यः पति**र्यस्य, जडत्वाद् गोकुलत्वेनान्यपतेरभाव एव निरूपितः, किञ्च **सस्त्रीकुमारमात्महेतोरतिदुःखितं निरीक्ष्य, स्त्रियः** साधारण्यः, **कुमारा** अतिबालाः तदन्वाज्ञाय विचार्य, भवेत्येवमेवैतदिति निश्चित्य, ननु स्वतः सर्वज्ञस्य किं परीक्षयेत्याशङ्क्याह **मर्त्यपदवीमनुवर्तमान** इति, **यथा तेषु मानुषभावेनैव निरोधं करोति तथा परीक्षामपि** कृतवान्, अतो **मुहूर्तं स्थित्वोरगबन्धात्** सर्पबन्धनादुदतिष्ठदुत्थितः निद्रागये सृष्टिमिव कृतवानित्यर्थः ॥ २३ ॥ तस्योत्थाने यदासीत् तदाह **तत्प्रथ्यमानेति**, **अत्र भारतादौ बलभद्रस्तुतिप्रबोधादिकं निरूपितं तत् कल्पान्तरीयं, तत्रांशावतारो मनुष्यमावापत्तिश्चेति केचित्, लीलयैव तथेत्यपरे, वस्तुतो यथा येन यत्र कारयति तथा स करोतीति व्यवस्था**, पूर्वं भगवान् सूक्ष्मः स्थितः पश्चात् पुष्टो जातस्तेन स्वयमेव वेष्टनानि भग्नानीव जातानि, तदाह **तेन** भगवता **प्रथ्यमानं** यद् **वपु**स्तेन कृत्वा **व्यथित आत्मा भोगो** यस्य, एतादृशः शीघ्रं भगवन्तं परित्यज्य **स्वफणानुन्नमय्य कुपितो भुजङ्गो** युद्धार्थं **तस्थौ क्रोधे हि बलमधिकं भवतीति**, स्थितिमयेपि **श्वसन्** विषवायुं विमुञ्चन् स्थितः, किञ्च **श्वसन्, रन्ध्रविषाम्बरीषस्तब्धेक्षणोल्मुकमुखस्तस्य** ह्युपरि पञ्च छिद्राणि नासे चक्षुषी मुखमिति, **स्थानत्रयेपि स घोर** इत्युच्यते, तत्र प्रथमं **श्वसनरन्ध्रे विषं** यस्य, **अम्बरीषवद्** भाष्ट्राग्निवत् **स्तब्धे ईक्षणे** यस्य, **उल्मुकयुक्तं मुखं** यस्य, एतादृशोपि **हरिमीक्षमाणो** भगवत्सान्निध्यात् स्वयमपि न ज्वलितः परं सम्मुखं स्थितः ॥ २४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

ता इत्यत्र नन्वेवं मातृचरणतुल्यनिरोधः कस्यापि न सम्पन्न इति पूर्ववाक्योक्तानां न परमोत्कर्षः सिध्यतीत्यत आहुः **पूर्व**इति, तास्तथैव स्युरेव परं **भगवता रक्षिता** इति न तथा जातास्तासां तथाभवनं भगवतोत्यन्तं दुःसहं **तिरोधानस्यापि** दुःसहत्वादिति रक्षणे हेतुः, एतच्च "नय मां यत्र ते मन" इत्यस्य द्वितीयव्याख्याने स्पष्टं, तथा च स्वकृत्या तथात्वाद् भगवत्कृत्या वा तथात्वात् सर्वोत्कर्ष एतास्वेव ध्वन्यत इतिभावः । **इत्थ**मित्यत्रानन्य**पति**पदेनैता एव ज्ञातव्या अन्येषां भिन्नत्वेन निरूपणात् ॥ २३–२९ ॥

(३) श्रीमद्वल्लभमहाजकृतः श्रीसुबोधिनीलेखः

इत्थमित्यस्याभासे **परीक्षा**मिति परित ईक्षा **येनेति परीक्षा**हेतु**मित्यर्थः**, अस्मिन् श्लोके इदं सूचितं, वाक्यार्थस्तूत्थानमेव, उपसंहारे तथैवोक्तत्वात्, व्याख्याने **जडत्वादिति गोकुलत्वेन** हेतुना मूढत्वादनन्यत्वमेव भगवदागतौ साधनमुक्तं न तु धर्मादिकमन्यदित्यर्थः ॥ २३ ॥ **तत्प्रथ्यमानेत्यत्र उल्मुकयुक्त**मिति तथा भ्राष्ट्राग्निरुल्मुकयुक्तस्तथा सर्वतो जाज्वल्यमानं मुखं यस्येत्यर्थः, तथा च मूले अम्बरीषदृष्टान्त उभयत्राप्यन्वेतव्यः, उल्मुकयुक्तमुल्मुकं, अर्श आद्यच् ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ता गोप्यः अपत्यं श्रीकृष्णमनुलक्षीकृत्य प्रविष्टां तदेकचित्तां विस्मृतस्वरूपाम् यद्वा अपत्यमनुह्रदं प्रविशन्तीं कृष्णमातरं समनुगृह्य हस्तेन धृत्वा तत्तुल्या व्यथा यासां ताः, अत एव शुचः अश्रूणि स्रवन्त्यः उद्गिरन्त्यः, तस्याः प्रतिबोधार्थे व्रजप्रियस्य कृष्णस्य तास्ताः पूतनानिधनयमलार्जुनभङ्गादिकथाः कथयन्त्यः, कृष्णस्यानने एवर्पिता स्थापिता दृक् दृष्टिर्याभिस्ताः, मृतकप्रतीकाः शवतुल्या मूर्छिता आसन् ॥ २१ ॥ पूर्वं तूष्णींभूतोऽपि राम इदानीं तु तं कालियह्रदं विशतो नन्दादीन् वीक्ष्य प्रत्यषेधत् । "पूतनादयो बहवो दुष्टा अनेन निहताः, अस्य तु वराकस्यैकस्य का गणना ? अधुनैव एनं निगृह्य आयाति । 'अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ' इति गर्गवचनाद् विषजलप्रवेशतो युष्माकं मरणे तु पश्चाद्ध्रदान्निःसृतेन तेन सम्बन्धो न सम्भवति, जीवतां तु सम्भवति, अतो वृथा प्राणत्यागो न कार्य" इत्युपपत्त्या निवारितवानित्यर्थः । तेषां ह्रदप्रवेशोद्योगे हेतुमाह–कृष्णे एव प्राणा इन्द्रियान्तःकरणानि येषां तानिति । रामस्य सावधानतायां नन्दादिप्रतिषेधे च हेतुमाह—कृष्णानुभावविदिति । प्रभावज्ञाने हेतुमाह—सोऽपि भगवानेवेति ॥ २२ ॥ 'अनन्यभक्तानां दुःखनिवारणे भगवान् विलम्बं न करोति' इति प्रदर्शयन् ततो यज्जातं तदाह–**इत्थमिति**। एवं

मुहूर्तमात्रं बन्धने स्थित्वा आत्महेतोः स्ववियोगात् सस्त्रीकुमारं स्त्रीभिः कुमारैश्च सहितं स्वगोकुलं गोकुलवासिजनमतिदुःखितं निरीक्ष्य उरङ्गबन्धात् कालियकृतपरिवेष्टनरूपादुदतिष्ठन् निःसरणार्थं स्वदेहं प्रथितवानित्यर्थः । गोकुलस्योपेक्षानर्हत्वं दर्शयति—अनन्यगतिमिति । न विद्यते अन्या गतिः रक्षको यस्य तदनन्यगतिः, तथाभूतं गोकुलमाज्ञायेत्यर्थः । पुंस्त्वमार्षम् । यद्वा न विद्यतेऽन्या गतिः रक्षको यस्मात् सोऽनन्यगतिः, एवंभूतमात्मानमाज्ञायेत्यर्थः । 'तर्हि किमिति मुहूर्तमात्रमपि बन्धने स्थितः ?' तत्राह—मर्त्यपदवीमनुवर्तमान इति । मनुष्यनाट्येन स्वेच्छया तथैव लीलां कुर्वन्नित्यर्थः ॥ २३ ॥ तस्य कृष्णस्य प्रथ्यमानेन संवर्ध्यमानेन वपुषा व्यथितः आत्मनः स्वस्य भोगो देहो यस्य स भुजङ्गः कालियाख्यः सर्पस्तं त्यक्त्वा श्वासान् विमुञ्चन् फणान् उन्नमय्य उत्थाप्य हरिमीक्षमाणस्तस्थावित्यन्वयः । तत्स्वरूपस्य भयंकरत्वं सूचयन् विशिनष्टि—श्वसनरन्ध्रेषु नासाविवरेषु विष यस्य, तथा अम्बरीषो भ्राष्ट्रस्तद्वत् सन्ततानि स्तब्धानि ईक्षणानि यस्य, तथोल्मुकान्यग्निकणानि मुखेषु यस्य स च स च ॥ २४ ॥

अन्वितार्थप्रकाशिका

अनुरागवतीनां वैक्लव्यमाह – ता इति ॥ ताः गोप्यः अपत्यं श्रीकृष्णमनुलक्षीकृत्य प्रविष्टां तदेकचित्तां विस्मृतस्वरूपाम् यद्वा । अपत्यमनु ह्रदं प्रविशन्तीम् । आदिकर्मणि क्तः । यद्वा । अपत्य एव लीनतां प्राप्तां मूर्छितामित्यर्थः । प्रतप्तामिति वा पाठः । कृष्णमातरं समनुगृह्य हस्तेन धृत्वा तत्तुल्या व्यथा यासां ताः अत एव शुचः अश्रूणि स्रवन्त्यः उद्गिरन्त्यः शुचामश्रूणां नदीभूता वा । "स्रवन्तीनिम्नगापगा" इत्यमरः । तस्याः प्रतिबोधार्थे व्रजप्रियस्य कृष्णस्य तास्ताः पूतनानिधनयमलार्जुनभङ्गादिकथाः कथयन्त्यः परिणामे तु कृष्णस्यानन एवार्पिता स्थापिता दृक् दृष्टिर्याभिस्ता मृतकप्रतीकाः शवतुल्या मूर्च्छिता आसन् ॥ २१ ॥ कृष्णेति कृष्णस्यानुभवं वेत्ति तादृक् स भगवान् रामः कृष्ण एव प्राणा येषां तान् कालियह्रदं निर्विशतो नन्दादीन् वीक्ष्य प्रत्यषेधत् । "नारायणसमो गुणैः" इति "अनेन सर्वदुर्गाणि" इत्यादिभिश्च कृष्णानुभावात्मिकाभिरुपपत्तिभिर्निवारितवान् ॥ २२ ॥ इत्थमिति ॥ इत्थम् एवं मर्त्यपदवीं मनुष्यरीतिम् अनुवर्तमानः हरिः एवं मुहूर्तमात्रं बन्धने स्थित्वा अनन्यगतिं नान्या गतिर्यस्य तथाभूतम् । पुंस्त्वमार्षम् । आत्महेतोः स्ववियोगात् सस्त्रीकुमारं स्त्रीभिः कुमारैश्च सहित स्वगोकुलं गोकुलवासिजनमतिदुःखितम् आज्ञाय निरीक्ष्य उरङ्गबन्धात् कालियकृतपरिवेष्टनरूपादुदतिष्ठत् निःसरणार्थं स्वदेहं प्रथयन्नुत्थितवान् ॥ २३ ॥ तदिति ॥ तस्य कृष्णस्य प्रार्थ्यमानेन संवर्ध्यमानेन वपुषा व्यथितः आत्मनः स्वस्य भोगो देहो यस्य श्वसनरन्ध्रेषु नासाविवरेषु विषं यस्य तथा अम्बरीषो भ्राष्ट्रस्तद्वत्संततानि स्तब्धानि ईक्षणानि यस्य तथोल्मुकानि मुखेषु यस्य सः स च भुजङ्गः कालियः कुपितोऽपिकुण्डलीमुन्मुच्य तं त्यक्त्वा श्वसन् श्वासान् विमुञ्चन् फणान् उन्नमय्य उत्थाप्य हरिमीक्षमाणस्तस्थौ ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनुप्रविष्टां ह्रदप्रवेष्टुमारब्धां कृष्णमातरं यशोदां तुल्यव्यथाः तां गोप्यो गृहीत्वा शुचः स्रवंत्यः अश्रूणि मुंचंत्यः सत्यः श्रीकृष्णस्य याः याः व्रजे पूतनाहननाद्याः प्रियकथाः तास्ताः सर्वाः कथयंत्यः कृष्णमुखे अर्प्पितदृशः मृतकप्रतीकाः शवसदृश्यः बभूवुः ॥ २१ ॥ तं ह्रदं निर्विशतः प्रवेष्टुं आरब्धान् प्रत्यषेधत् निवारितवान् यतः कृष्णप्रभावज्ञः ॥ २२ ॥ नास्ति अन्या श्रीकृष्णेतरा गतिर्यस्य तत् अमो लुगभाव आर्षः स स्त्रीकुमारं निरीक्ष्य आत्महेतोः अतिदुःखितं आज्ञाय मनुष्याचरणमनुसृतः अतो मुहूर्त्तं कालं स्थित्वा उरंगस्य सर्प्पस्य बंधनादुदतिष्ठत् निर्गतः ॥ २३ ॥ तदिति तस्य श्रीकृष्णस्य प्रथ्यमानेन विस्तारं प्रातेन वपुषा व्यथित आत्मभोगः स्वदेहो यस्य सः भुजंगवेष्टनमोचनेन श्रीकृष्णंत्यक्त्वाकुपितः सन् स्वफणान् उन्नमय्य तुंगान् कृत्वा श्वसन् हरिं ईक्ष्यमाणः सन् तस्थौ सः कीदृशः श्वसनरंध्रेषु नासाछिद्रेषु विषं यस्य स तथाभूतश्चासौ अंबरीषं रोदकभर्जनपात्रं तद्वत्ततानि स्तब्धानि ईक्षणानि यस्य सः तथा उल्मुकानि विषमयश्वासमत्वेन उल्मुकतुल्यानि मुखानि यस्य स चासौ स च ॥२४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ता इति ॥ ताः गोप्यः, अपत्यं श्रीकृष्णं, अनुप्रविष्टां ह्रदे पश्चात् प्रवेष्टु मुद्युक्तां, अनुप्रततामिति पाठे, अनुप्रततामपत्यमुद्दिश्य प्रततामतिदुःखितामित्यर्थः । कृष्णमातरं यशोदां, समनुगृह्य सम्यक् गृहीत्वा, ह्रदे पतन्तीं निवार्येत्यर्थः । तुल्यव्यथाः समानदुःखाः, शुचोऽश्रूणि स्रवन्त्यः, साश्रुनयना इत्यर्थः । ताः ताः, व्रजस्य प्रियः कृष्णस्तस्य कथाः पूतनामारणयमलार्जुनभङ्गादिरूपाः, कथयन्त्यः, कृष्णस्याननं मुखं तस्मिन्नर्पिता दृशो याभिस्तथाभूताः सत्यः, मृतकप्रतीकाः मृताङ्गाः, शवतुल्या इत्यर्थः । आसन् ॥ २१ ॥ कृष्णेति ॥ कृष्णे प्राणो येषां तान्, श्रीकृष्णैकजीवनानित्यर्थः । तं ह्रदं, निर्विशतः प्रवेष्टुमुद्युक्तान्, नन्दादीन् वीक्ष्य, कृष्णानुभाववित् श्रीकृष्णमहिमाभिज्ञः, हेतुगर्भमिदं विशेषणम् । तत्त्वात् भगवान् सः रामः, प्रत्यषेधत् निवारितवान् ॥ २२ ॥ इत्थमिति ॥ इत्थ, न विद्यतेऽन्या गतिः रक्षणोपायो यस्य तत्, अमो लुगभाव आर्षः । सस्त्रीकुमारं सस्त्रीकुमारपर्यन्तमित्यर्थः । स्वगोकुलं, आत्महेतोः, अतिदुःखितं निरीक्ष्य, आज्ञाय सर्वेषामतिशयितं दुःखं ज्ञात्वा, मर्त्त्यपदवीं अनुवर्त्तमानः प्रथमं गृहीतमर्त्यपदवीमित्यर्थः । स कृष्णः, मुहूर्त्तं स्थित्वा, मर्त्यानुकरणतया मुहूर्त्तपर्यन्तं तूष्णीं स्थित्वेत्यर्थः । ततः, उरङ्गबन्धात् उरगकृतबन्धनात्

उदतिष्ठत् त्यक्तोरगबन्धो बभूवेत्यर्थः ॥ २३ ॥ तदेव स्फुटतयाऽऽह ॥ तदिति ॥ तस्य कृष्णस्य प्रथ्यमानं विस्तीर्यमाणं च तद्वपुश्च तेन, व्यथित आत्मनः भोगः शरीरं यस्य सः, भुजङ्गः कालियः, त्यक्त्वा श्रीकृष्णमुन्मुच्य, कुपितः, सन्, स्वफणान् उन्नमय्य, श्वसन् श्वसान् मुञ्चन्, श्वसनरन्ध्रेषु नासारंध्रेषु विषं यस्य सः, अम्बरीषो मण्डपाकभाजनं तद्वत् संततानि स्तब्धानि निश्चलानि च ईक्षणानि यस्य सः उल्मुकानि अग्निकणाः मुखे यस्य स चासौ स च, समस्तपाठे नासारन्ध्रमेव विषाम्बरीषं विषपाकभ्राष्ट्रं यस्य स्तब्धानि ईक्षणानि यस्य स चासावुल्मुकमुखः, केवलं हरिमेव, ईक्षमाणः तस्थौ ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृष्णेति : १०.१६.२२

जडजात-विचित्रचेष्टितं यत् परमीशस्य निरीक्ष्य तन्न कार्यम् ।
भजकैर्यदसा वचिन्त्यशक्ति-रिति युक्तो हलिना कृतो निषेधः ॥ ५१ ॥

इत्थमिति : १०.१६.२३.

संत्यक्ताखिलबल-गोकुलाभिमानाः स्वात्मातौ धृतमनसश्च ये भवेयुः ।
दृष्ट्वा तान् भवति दयोदयोऽच्युतस्य चित्तेऽस्मिन्नभवदुदाहृतिः स्फुटैषा ॥ ५२ ॥

तत्प्रथ्यमानेति : १०.१६.२४

भुवने विहृतिस्तमोगुणाकलितेन क्रियते तु येन सः । नियतं पृथुदेहदृग्भवत्यलमीशेन तथा कृताद्व्यबोधि ॥ ५३ ॥
तमोगुणावृतः स्थूलदेहदृष्टिरिति क्षमम् । चित्रमीशस्तु तद्दृष्ट्याप्याधात् तद्गुणभञ्जनम् ॥ ५४ ॥
स्वरूपानुसन्धानबुद्धि-र्मुमुक्षु-र्यदा स्यात्तदैवारयो यातवीर्याः ।
अभीतं तमाशु त्यजन्तीति कृष्ण-स्तदा स्वप्रभावादभिव्यक्तमाधात् ॥ ५५ ॥

कृष्णप्रिया

माता यशोदा तो अपने लाड़ले लाल के पीछे कालियदह में कूदने ही जा रही थी परन्तु गोपियों ने उन्हें पकड़ लिया। उनके हृदय में भी वैसी ही पीड़ा थी। उनकी आँखों से भी आसुओं की झड़ी लगी हुई थी। सबकी आँखे श्रीकृष्णके मुखकमल पर लगी हुई थी जिनकी शरीर में चेतना थी, वे व्रजमोहन श्रीकृष्ण की पूतना-बध आदि की प्यारी-प्यारी ऐश्वर्य की लीलाएँ कह-कहकर यशोदाजी को धीरज बँधाने लगी। किन्तु अधिकाँश तो मुर्दे की तरह पड़ ही गयी थी ॥ २१ ॥ परीक्षित्! नन्दबाबा आदि के जीवन-प्राण तो श्रीकृष्ण ही थे। वे श्रीकृष्ण के लिये कालियदह में घुसने लगे। यह देखकर श्रीकृष्ण का प्रभाव जाननेवाले भगवान् बलरामजी ने किन्ही को समझा-बुझाकर किन्ही को बलपूर्वक और किन्ही को उनके हृदयों में प्रेरणा करके रोक दिया ॥ २२ ॥ परीक्षित्! यह साँप के शरीर से बँध जाना तो श्रीकृष्ण की मनुष्यों जैसी एक लीला थी। जब उन्होंने देखा कि ब्रज के सभी लोग स्त्री और बच्चों के साथ मेरे लिये इस प्रकार अत्यन्त दुखी हो रहे हैं और सचमुच मेरे सिवा इनका कोई दूसरा सहारा भी नहीं है तब वे एक मुहूर्त तक सर्प के बन्धन में रहकर बाहर निकल आये ॥ २३ ॥ भगवान् श्रीकृष्ण ने उस समय अपना शरीर फुलाकर खुब मोटा कर लिया। इससे साँप का शरीर टूटने लगा। वह अपना नागपाश छोड़कर अलग खड़ा हो गया और क्रोध से आगबबूला हो अपने फण उँचा करके फुफकारे मारने लगा। घात मिलते ही श्रीकृष्ण पर चोट करने के लिये वह उनकी ओर टकटकी लगाकर देखने लगा। उस समय उसके नथुनों से विष की फुहारे निकल रही थी। उसकी आँखे स्थिर थी और इतनी लाल-लाल हो रही थी मानो भट्ठी पर तपाया हुआ खपड़ा हो। उसके मुहँ से आगकी लपटें निकल रही थी ॥ २४ ॥

तं जिह्वया द्विशिखया परिलेलिहानं द्वे सृक्किणी ह्यतिकरालविषाग्निदृष्टिम् ।
क्रीडन्नमुं परिससार यथा खगेन्द्रो बभ्राम सोऽप्यवसरं प्रसमीक्षमाणः ॥ २५ ॥
एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरःस्वधिरूढ आद्यः ।
तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादाम्बुजोऽखिल[1]कलादिगुरुर्ननर्त ॥ २६ ॥
तं नर्तुमुद्यतमवेक्ष्य[2] तदा तदीय[3]गन्धर्वसिद्धमुनिचारणदेववध्वः ।
प्रीत्या मृदङ्गपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः ॥ २७ ॥
यद् यच्छिरो न [4]नमतेऽङ्ग शतैकशीर्ष्णस्तत्तन्ममर्द खरदण्डधरोऽङ्घ्रिपातैः ।
[5]क्षीणायुषो भ्रमत उल्बणमास्यतोऽसृङ् नस्तो वमन् परमकश्मलमाप नागः ॥ २८ ॥

---

१. ऽमृतकलाधि–विज। २. अवेक्ष्य–इति कस्यचित्। ३. सुर–श्रीधर. वंशी. वीर. विज। ४. नमते गरकाशीर्ष्ण–विज। ५; क्षीणे ते भगवतोत्वणमाशु वक्राद्रवतं वमन्परम–विज।

कर्दमक्षमा

अन्वयः क्रीडन् द्विशिखया जिह्वया द्वे सृक्किणी परिलेलिहानं अतिकरालविषाग्निदृष्टिं अमुं यथा खगेन्द्रः परिससार सः अपि अवसरं प्रसमीक्षमाणः बभ्राम ॥ २५ ॥ एवं परिभ्रमहतौजसम् उन्नतां सम् आनम्य तत्पृथुशिरःसु अधिरूढः तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादाम्बुजोऽखिलकलादिगुरुः आद्यः ननर्त ॥ २६ ॥ तदा तं नर्तुं उद्यतम् अवेक्ष्य तदीयगन्धर्वसिद्धमुनिचारणदेववध्वः प्रीत्या मृदङ्गपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसा उपसेदुः ॥ २७ ॥ अङ्ग शतैकशीर्ष्णः क्षीणायुषः भ्रमतः यद् यत् शिरः न नमते तत् तत् खरदण्डधरः अङ्घ्रिपातैः ममर्द (तदा) नागः आस्यतः नस्तः उल्बणं असृक् वमन् परमकश्मलं आप ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हरिश्च क्रीडंस्तममुं सर्पं परिससार परितो बभ्राम । अतिकरालविषाग्नियुक्ता दृष्टिर्यस्य तम् । जिह्वया द्विशिखयेति प्रतिमुखम् ॥ २५ ॥ एवं परिभ्रमेणैव हृतमोजो यस्य तम् । उन्नतावंसौ यस्य तम् । तस्य मूर्धसु ये रत्ननिकरास्तेषां स्पर्शेनात्यरुणं पदांबुजं यस्य सः । ननु कथं चञ्चलेषु शिरस्सु ननर्त तत्राह । अखिलकलानामादिगुरुः ॥ २६ ॥ उपसेदुः प्राप्ताः ॥ २७ ॥ शतैकशीर्ष्णः शतमेकानि मुख्यानि शीर्षाणि यस्य तस्य क्षीणायुषोऽपि पुनर्भ्रमतो यद्यच्छिरो न नमते स्तब्धतां न त्यजति । नृत्यच्छलेनांघ्रिपातैस्तत्तन्ममर्द तदा चास्यतो मुखेभ्यो नस्तो नासाविवरेभ्यश्चासृग्वमन् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं कालियम् । अमुम् अंगुलिनिर्दिष्टम् । सृक्किणी ओष्ठप्रांतौ । सोऽपि सर्पोपि बभ्राम ॥ २५ ॥ एवम् ग्रहणार्थम् । नर्त्तनासंभवं मत्वाशंकते—नन्विति । अखिलानां रज्ज्वाद्युपरि तननृत्यादीनां कलानां विद्यानां प्रथमाचार्यः ॥ २६ ॥ नर्तुम् नर्त्तितुम् । वर्णलोपः छांदसः । तदा नर्त्तनकाले । तदीया भगवदीया एव गंधर्वादयस्तस्य सर्वेश्वरत्वात् । "एष सर्वेश्वरः" इति श्रुतेः । पुष्पोपहारः पुष्पवृष्टिः । उपसेदुः सिषेविरे ॥ २७ ॥ शतमेकानि मुख्यानि शिरांसि यस्य तस्याग्रे फणासहस्रोक्तेः । क्षीणायुषोपि क्षीणबलस्यापि "आयुर्वै घृतम्" इत्यत्रायुःशब्दो बलपरोस्ति यथा तथात्रापि । स्तब्धताम् उच्चताम् परमकश्मलम् अतीवक्लेशं 'कश्मलं क्लेशपापयोः' इति धरणिः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सृक्किणी सृक्कणीपरितो मुहुर्लिहन्तमिति युगपदेव द्वाभ्यां द्वयोः परिलेहनात् अस्य जातिस्वभावत्वेप्यधुना कोपनातिशयोऽभिप्रेतः तेनातिघोरत्वं सूचितम् अत एव करालेति पुनरुक्तिश्च हि एव क्रीडन्नेव परितः ससार भ्रमणाय तस्य सर्वतो बभामेत्यर्थः । यथा खगेन्द्रः श्रीगरुड इति प्रबलत्वेन क्रीडायां शीघ्रतायां वा दृष्टान्तः स कालियोऽपि दंशनावसरं प्रकर्षेण प्रतिपदं सम्यगीक्षमाणः अभीक्ष्णं बभ्राम इति सर्पेण क्रीडाकौशलमुक्तम् ॥ २५ ॥ परिभ्रमहृतौजसमपि उन्नतांसम् अत एव आनम्य तं श्रीहस्तेन तथा च श्रीहरिवंशे "शिरः स कृष्णो जग्राह स्वहस्तेनावनम्य च" इति पृथ्विति तद्रङ्गयोग्यतोक्ता तन्मूर्द्धेतिसौन्दर्यविशेषः स्पर्शेति लाघवविशेषः तथापि अतिताम्रत्वं कोमलत्वात् आदिगुरुत्वे हेतुः आद्यः अनेन कालियस्य च महाभाग्यं सूचितम् ॥ २६ ॥ नृत्यसुखार्थं तदुपकरणमाह—तमिति । अवेक्ष्य अवेत्येति वा पाठः समानार्थः ईक्षेरिणश्च ज्ञानार्थत्वात् तदीयाः श्रीगरुडादयः पार्षदाः गन्धर्वादयश्च स्वर्ग्याः यद्वा, वैकुण्ठवर्त्तिन ये गन्धर्वादयस्ते तत्र मृदङ्गादीनां वादनैश्चारणा उपसेदुः असेवन्त गीतैर्गन्धर्वाः पुष्पैर्देवाः तद्वध्वश्चेत्यर्थः । उपहाराः विविधगन्धसुगन्धिचूर्णादयस्तैः सिद्धाः नुतिभिश्च मुनयः इत्येवं विवेचनीयं क्रमातिक्रमो हर्षभरेण बादरायणैरनुसन्धानात् । यद्वा, प्रीत्या सर्वेषामपि सर्वत्र प्रवृत्तिरभिप्रेता ॥ २७ ॥ एकशब्देन मुख्यवाचकेनान्यान्यपि बहूनि सन्तीति बोध्यते अग्रे फणासहस्रोक्तेः क्षीणायुषः मृतप्रायस्येत्यर्थः । उल्बणम् उद्भटं प्रचुरमित्यर्थः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

द्वे शिखे अग्रभागौ यस्यास्तया जिह्वया द्वे सृक्किणी सृक्किणी परितो मुहुर्लिहन्तमिति युगपदेव द्वाभ्यां द्वयोः परिलेहनादस्य जातिस्वभावत्वेऽप्यधुना कोपेनातिशयोऽभिप्रेतः, तेनातिघोरत्वं सूचितम् । अतएव करालेति पुनरुक्तिश्च बहुशिरसस्तस्य मुखानां बहुत्वेऽपि जिह्वयेत्येकत्वं सृक्कणश्च द्वित्वमंगानां युगलानां बहूनां वैकत्वेन द्वित्वेन चानिर्देशेऽपि स्वतो द्वित्वादि-सिद्धेः, किंवा, प्रतिमुखं तस्यास्तयोश्चैकत्वं द्वित्वाभिप्रायेण । हि अपि, तादृशमप्यमुं परितः ससार, भ्रमणार्थं तस्य सर्व्वतो बभ्रामेत्यर्थः । यथा खगेन्द्रः श्रीगरुडः इति सद्यो हन्तुं शक्तोऽपि यथा केवलं क्रीड़ार्थमेव परितो भ्रमतीति क्रीड़ायां शीघ्रतायां वा दृष्टान्तः । स कालियोऽपि दशनावसरं प्रकर्षेण प्रतिपदं समाग्रीक्षमाणा आसीदित्यर्थः; अपेक्षमाण इति वा, परिसरणेन तदप्राप्तेरिति सर्पेण सह क्रीड़ा कौशलमुक्तम् ॥ २५ ॥ परिभ्रम-हृतौजसमप्युन्नतासम्, अतएवानम्य चेति । पृथु अतिविस्तीर्णतया तद्रंगयोग्यतोक्ता । तन्मूर्द्धेति सौन्दर्य्यविशेषस्तथा नृत्यगतावभिनिवेशो वैदग्ध्यं चोक्तम्, अखिलकलानामादिगुरुरुपदेष्टृश्रेष्ठः प्रथमप्रवर्त्तको वा, यद्वा, आद्या यः स तच्छिरः स्वधिरूढ़ः इति तस्य महाभाग्यं सूचितम् । तच्चाग्रे विस्तरतो व्यक्तं भावि । कालाश्चाग्रे तैरेवाभिव्य-

ञ्जयितव्याः ॥ २६ ॥ नृत्यसुखार्थं तदुपकरणमाह –तमिति । तदा तत्क्षण एव, तदीयाः श्रीगरुडादयः पार्षदा गन्धर्वादयश्च स्वर्ग्याः, यद्वा, तदीया वैकुण्ठवर्त्तिनो ये गन्धर्वादयस्ते, तत्र मृदंगादीनां वाद्यैश्चारणा उपसेदुरसेवन्त, गीतैर्गन्धर्वाः, पुष्पैर्देववध्वोऽप्सरसः, श्रीभगवन्नृत्यापेक्षया नृत्यानाचारणात्; किंवा, सर्वा एव देव्यस्तथापि नृत्यानुक्तिस्तथैवोपहारा विविध गन्धसुगन्धिचूर्णादयस्तैः सिद्धाः, नुतिभिश्च मुनय इत्येवं विवेचनीयम् । क्रमातिक्रमः प्रीत्या, तेषां सहसोपसत्त्या तत्तत्सकीर्णताभिप्रायेण; किंवा, हर्षभरेण श्रीबादरायणेरननुसन्धानात्; यद्वा, तेन प्रीत्या सर्व्वेषामपि सर्वत्र प्रवृत्तिरभिप्रेता ॥ २७ ॥ एक-शब्देनान्यान्यपि बहूनि सन्तीति बोध्यते, अग्रे फणासहस्रोक्तेः । क्षीणायुषो मृतप्रायस्येत्यर्थः । उल्वणं प्रचुरमित्यर्थः । आस्य-नासाभिरसृजो वनामत्तेन तत्तद्द्वारनिरोधात् ॥ २८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अनुङ्कालियं क्रीडन् कृष्णः सोऽपि कालियः ॥ २५ ॥ अमितकलादिगुरुः भरतादिकलानामादिगुरुः ॥ २६–२७ ॥ नस्तः नासिकाभ्यः वमन् उद्गिरन् ॥ २८–२९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

द्वे शिखे अग्रभागौ यस्यास्तया जिह्वया द्वे सृक्किणी ओष्ठप्रान्तौ लेलिहानमतिकराला विषाग्निभीषणा दृष्टिर्यस्य तमसुं कालियं क्रीडन्निव परितश्चचार "अभितः परितः समये" इत्यादिवचनेनानुमिति षष्ठ्यर्थे द्वितीया अमुष्य परितः ससारेत्यर्थः । यथा गरुडस्तद्वत् सोपि कालियोऽप्यवसरं दंशनार्थमन्तरमन्वेषयन् परिबभ्राम ॥ २५ ॥ एवं परिभ्रमणेनैव गतबलम् उन्नतावंसौ यस्य तं कालीयमानम्य नम्रं कृत्वा तस्य पृथुषु विपुलेषु शिरस्स्वधिरूढः आद्योऽखिलविद्याकारणभूतः अखिलानां भरतशास्त्रविदाम् आदिगुरुः हेतुगर्भमिदं तत्त्वात् चपलेष्वपि शिरस्सु ननर्त्त, कथम्भूतः ? तस्य मूर्द्धसु ये रत्नसमूहास्तेषां स्पर्शेनात्यरुणं पादाम्बुजं यस्य तथाभूतः ॥ २६ ॥ नृत्य कर्तुमुद्यक्तं तं कृष्णमवेक्ष्य तदीयाः भगवत्सेवकाः गन्धर्वादयः प्रीतिपूर्वकं मृदङ्गादिभिरुपलक्षिताः सहसा आशु उपसेदुराजग्मुः । यद्वा, तदीयाः कालियस्य परिजनाः उपसेदुः गन्धर्वादयश्च तथा भगवन्तं सेवितुं मृदङ्गादिभिः सहोपसेदुरित्यन्वयः ॥ २७ ॥ शतमेकानि मुख्यानि शिरांसि यस्य तस्य शतैकशीर्ष्णः कालियस्य आर्षत्वात् "शीर्षन् छन्दसि" (६-१-६१) इति शिरःशब्दस्य शीर्षन्नादेशः यद्यच्छिरो न नमते नम्रं नाभूत्, अङ्ग हे राजन् ! तत्तच्छिरः कर्मअङ्घ्रिपातैः खलदण्डधरः हेतुगर्भं तत्त्वान्ममर्द कथम्भूतस्य क्षीणमायुर्बलं वा यस्य भ्रमतः तदा आस्यतः मुखेभ्यः नस्तो नासिकाभ्यश्चोल्वणमुष्णम् अधिकं वा असृग्रुधिरं वमन्नुद्गिरन् स नागः कालियः परमधिकं कश्मलं मोहं मूर्च्छां दुःख वा अवाप लेभे ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तम् अमुं सर्पं परिससार परितश्चचार द्वे सृक्किणी ओष्ठान्तर्भागौ स सर्पोऽप्यपसरन् तिर्यग्गच्छन् बभ्राम चतुर्दिशं परिवर्त्तमानोऽभूत् ॥ २५ ॥ हतौजसं क्षीणबलम् आनम्य प्रह्वीकृत्य अमृतकलस्य चन्द्रस्याधिगुरुः परमगुरुः अमृतकलानामधिको गुरुः उद्गिरणशील इति भावः । इदं विषौषधज्ञानार्थमुक्तम् ॥ २६ ॥ उपसेदुः उपस्थिताः ॥ २७ ॥ गरकालशीर्ष्णः विषेण नीलशिरसः सर्पस्य "मूर्च्छा तु कश्मलं मोहः" इत्यमरः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथोत्थिते भगवति रोषावेशादुत्थितस्य कालियस्य फणमण्डलानि दृष्ट्वा भगवतः कर्कशमार्गाश्रयगतिविशेषेण निर्नर्तिषा जाता । तदनुरूपवाद्यं गन्धर्वादिवधूभिरावद्धमिति दर्शयति–तं नर्त्तुमुद्यतमवेक्ष्येत्यादि । तं श्रीकृष्णं नर्त्तुमुद्यतमवेक्ष्य तदा तस्मिन्नेव काले गन्धर्वादिवध्वः प्रीत्या मृदङ्गादिवाद्यगीताभ्यां पुष्पोपहारवलिभ्याञ्चोपसेदुस्तदीयं नृत्यमुपचक्रुः । गन्धर्वसिद्धचारणवधेवा वाद्यगीताभ्याम्, वध्व इति मधुर-कमल-करतालघातेन वाद्यस्य माधुर्यम्, सौन्दर्य-विशेषेण च गीतस्य माधुर्यम्, मुनिदेववध्वः पुष्पोपहारवलिभ्याम्, काश्चित्, पुष्पवृष्ट्या काश्चिदुपहारैः, सर्वेषां वध्व एवेति गन्धर्वसिद्धादिपुंभ्यस्तत्तद्वधूनामेवातिहर्षो जातः,– तद्विषये तद्विधानामतिरतिमत्त्वात् ॥ २७–३० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तं नर्त्तुमित्यादि । नृत्ये वाद्यगीताद्यप्युज्यते, तेन गन्धर्वसिद्ध–चारण वध्वा मृदङ्गगीताभ्यां यथायोगमुपसेदुः । वध्व इति गाने मधुर-स्वरत्वात्, वाद्ये करकमलानां कोमलत्वादाघात-लाघवात् सुश्रव्यत्वात् । मुनिवधे वा देववध्वश्च पुष्पोपहार-नुतिभ्यामुपसेदुः । सम्यङ् नृत्यन्तम्, 'अहो ! नृत्यमहो नृत्यम्' इति स्तुवन्ति, पुष्पवृष्ट्या च सम्मानयन्ति । वध्व इति श्रीकृष्णो लीणामेवात्यन्तिकी रतिरिति वा तात्पर्यम् ॥ २७–३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

द्वे स्वीये सृक्किण्यौ पुनः पुनर्लिहन्तं तममुं परि परितः ससार तं भ्रमयितुं तस्य सर्वतो बभ्रामेत्यर्थः। स कालियोऽपि दंशनस्य अवसरं समीक्षमाण एव बभ्राम कृष्णकर्तृकभ्रमणलाघवाद्दंशनावसरं न प्रापेति तिर्य्यग्भ्रमिखेलयापि तं जिगायेत्यर्थः ॥२५॥ उन्नतावुच्चावंसौ यस्य तम् आनम्येति परिभ्रमहतौजस्त्वात् भ्रमणासमर्थस्य शिरांस्येव एकहस्तेनैवानम्य तत्राधिरूढः सन्ननर्त्त "शिरः स कृष्णो जग्राह स्वहस्तेनावनम्य च" इति हरिवंशोक्तेः तस्य मूर्द्धसु ये रत्ननिकरास्तेषां कठोराणां स्पर्शेनातिसुकुमारत्वादतिताम्रमत्यरुणं पादाम्बुजं यस्य सः स्थालीशरावादिषु कलाज्ञापनाय नटा नटन्ति। अयं तु सर्वकलानामादिगुरुत्वात् चञ्चलेषु कालियमूर्द्धसु ननर्त्तेति स्वकलाभिज्ञत्वदर्शनेयं व्रजसुन्दरीषु पूर्वरागवतीषु ज्ञेया ॥ २६ ॥ नर्त्तुं नर्त्तितुं तदीयेति वाद्यं विनैव स्वमुखेनैवोच्चारितैस्थैथैशब्दैः प्रभुर्नृत्यति तद्वयं कं समयं प्रतिस्थिता इति विचार्य्येति भावः ॥ २७ ॥ शतम् एकानि मुखानि शिरांसि यस्य तस्य अग्रे फणासहस्रोक्तेः यत् यत् न नमत्युच्चीभवति तत्रैव सहसाऽऽरुह्य अङ्घ्रिपातैस्तान्येव क्षणान्ममर्द तदा च आस्यतो मुखेभ्यो नस्तो नासाविवरेभ्यः असृग्वमन् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हरिश्च क्रीडन् द्विशिखयाजिह्वया द्वे सृक्किणी ओष्ठप्रान्तौ लेलिहानम् अतिकराला विषाग्नियुक्ता दृष्टिर्यस्य तममुं कालियम् परितः ससार सोऽपि कालियोऽपि अवसरं दंशनार्थम् अन्तरं प्रसमीक्षमाणः बभ्राम ॥ २५ ॥ आद्यः विश्वहेतुः एवं परिभ्रमणेनैव हतमोजो बलं यस्य तम् उन्नतावंसौ यस्य तं कालियम् आनम्य तस्य पृथुशिरस्सु अधिरूढः सन् ननर्त, कथम्भूतः? तस्य नागस्य मूर्द्धसु ये रत्ननिकरास्तेषां स्पर्शेनात्यरुणं पादाम्बुजम् यस्य सः; ननु, विषमेषु तच्छिरस्सु कथं ननर्त? इत्यत आह अखिलकलानामखिलाः कलाः येषु तेषां शिवादिनामादिर्हेतुश्चासौ गुरुश्च स तथा ॥ २६ ॥ देवशब्दवाच्यानां सर्वेषां वध्वः भार्य्याश्च ॥ २७ ॥ शतमेकानि मुख्यानि शीर्षाणि यस्य तस्य ॥ २८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कृष्णः क्रीडन्नमुं भुजङ्गं परितः ससार तं भ्रमयितुं तस्य सर्वतो बभ्रामेत्यर्थः। स भुजङ्गोऽपि दंशनावसरं प्रसमीक्षमाण एव बभ्राम तद्भ्रामणलाघवात्तदवकाशं न प्रापेति तिर्यग्भ्रमणलीलया तं जितवानित्यर्थः ॥ २५ ॥ उन्नतावंसौ यस्य तमानम्येति परिभ्रमहतौजस्त्वाद् भ्रमणाशक्तस्य तस्य शिरांस्येकहस्तेनानमय्य तेष्वधिरूढः सन् ननर्त। तन्मूर्द्धस्थस्य रत्ननिकरस्य स्पर्शेनातिताम्रे पादाम्बुजे यस्य सः "कालियफणामाणिक्यरञ्जितश्रीपादाम्बुजः" इति तन्नामस्तोत्रे। ननु सर्पशिरःसु चञ्चलेषु कथं नर्तनं तत्राह अखिलेति। नटाः खलु कलाविज्ञाः स्थालीवरत्रादिषु नृत्यन्ति अस्य तु निखिलकलाचार्यत्वान्न तच्चित्रम् एतत् कलाप्रदर्शनं स्वानुरागिणीनां रञ्जनार्थम् ॥ २६ ॥ न च नर्तने सामग्री न्यूनतेत्याह - तमिति। नर्तितुमुद्यतं मृदङ्गादिवाद्यैर्विनैव थै तथै शब्दमुच्चारयन्तं प्रभुमवेत्येत्यन्वयद्विकसितार्थं तदीयास्तत्सेवकाः ॥ २७ ॥ शतमेकानि मुख्यानि शीर्षाणि यस्य अग्रे फणासहस्रोक्तेः। तस्य यद् यच्छिरो न नमते उच्चीभवति तत्रैव सहसा बलेनारुह्य अङ्घ्रिपातैस्तालरक्षणान् ममर्द स तदास्यतो मुखेभ्यो नस्तो नासिकाछिद्रेभ्यश्चासृक् रुधिरं वमन् ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तं यथा खगेन्द्रो गरुडस्तथा जिह्वया द्विशिखया द्वे शिखे अग्रभागौ यस्याः सा तथा प्रातिस्विकमेवैकमुखशिखया द्वे सृक्किणी ओष्ठान्तःपुटयोर्लेलिहानमास्वादयन्तमतिकरालो यो विषाग्निस्तद्युक्तनेत्रममुं क्रीडन्नेव परिससार। सोऽप्यपसरन्पश्चाद्गच्छन्प्रसमीक्षमाणः सन् बभ्राम चचार ॥ २५ ॥ एवं परिभ्रमेण परितः परिवर्तनेन हतमोजो यस्य स उन्नता अंसाः स्कन्धा यस्य तमानम्यानमय्य शिरस्यधिरूढः आद्यः पुराणपुरुष आद्यः प्राक्तेन भक्ष्यत्वेन कृतः सोऽप्यधिरूढ इति वा। अद्धातोर्ऋहलोर्ण्यदिति ण्यत्प्रत्ययः। तस्य मूर्धसु विद्यमानानां रत्नानां निकरस्तत्स्पर्शेनातिताम्रं पादाम्बुजं यस्य सोऽमृतकलाधिगुरुरमृतकलो ह्यमृतकिरणः सोमः स एवाधिगुरुर्मूलपुरुषो यस्य स अमृतकला अधिरधिको यस्य तस्य वंशस्य गुरुरिति वा। अखिलकलाधिगुरुरिति पाठे सकलकलास्वामीत्यर्थः। पक्षद्वन्द्वेऽपि न विषविषमताऽस्येति ध्वन्यते। ननर्त ॥ २६ ॥ नर्तुं नर्तितुमुद्यन्तं तं कृष्णमवेक्ष्य तदीयास्तद्गताश्च गन्धर्वसिद्धमुनिचारणदेववध्वः प्रीत्या मृदङ्गपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः। उपास्याः सहस उपसेदुरिति पदद्वयं हे सहस एवं विपर्यासेऽपि हाससहितेत्युपसेदुरिति वा ॥ २७ ॥ गरेण कलानि श्यामानि शीर्षाणि यस्य तस्य यद्यच्छिरो न नमते न नमति तत्तद्दण्डधरोऽङ्घ्रिपातैः पादकुट्टनैर्ममर्द। एवं भगवता बले क्षीणे सति वक्त्रान्मुखेभ्य आशूल्वणं रक्तं वमन् रक्तश्मलं मूर्छां नाग आप। मूर्छा तु कश्मलं मोह इत्यमरः। परमकश्मलं नागः किं न प्राप्तोऽसि किमिति ममर्द ॥ २८ ॥

श्रीसुबोधिनी

तदा भगवान् यत् कृतवान् तदाह **तं जिह्वयेति**, **द्विशिखया जिह्वया** युगपदेव द्वे **सृक्किणी परिलेलिहानं तं** प्रसिद्धं **कालीयमतिकरालविषमेवाग्निर्दृष्टौ** यस्य तादृशं सर्वप्रकारेण क्रोधमूर्छितं **कौतुकी भगवान्** क्रीडन्नेवानु **परिससार**, भगवतो निर्भयगमने दृष्टान्तं हेतुत्वेनाह **यथा खगेन्द्र** इति, **न हि कस्यचिद् भक्ष्याद् भयमस्ति, दुष्टाश्च भगवतो दाह्याः, न हि काष्टाद् वह्नेर्भयं भवति**, अतः **स** एव भगवतो भीतः, युद्धार्थमेवा**वसरं प्रसमीक्षमाणो बभ्राम**, प्रदक्षिणां बहुधा कृतवान् ॥२५॥ तदा भगवांस्तं निगृह्य तदुपरि नृत्यं कृतवानित्याहैवमिति, ननु दुष्टः कथं नृत्यं कारितवान् ? तत्राह **परिभ्रमहतौ**जसमिति, **सर्पो हि परिभ्रमे व्यथां प्राप्नोति**, अतो बहुधा **परिभ्रमाद्धतौजा** इव जातः, केवल**मुन्नता** अंसा यस्य तादृश**मानम्य** तमपि भागमधस्तात् कृत्वा तत्र द्वयोर्द्वौ पादौ निवेश्यान्यौ हस्ताभ्यां धृत्वा**नम्य तत्पृथुशिरःस्वधिरूढो** जातः, ननु सर्पोयममङ्गलः कथं भगवता आरूढ इति चेत् तत्राहाद्य इति, **स हि सर्वकर्ता सर्वस्या**द्य**स्तस्यापि पिता** भवत्यतस्मारूढवानथ वा **शेषशायी स हि सर्वदा सर्पमेवारुह्य तिष्ठति**, अतस्तस्य सर्पारोहणेभ्यासात् तत्र स्थितः संस्तस्य **मूर्ध**सु यानि **रत्नानि** तेषां **निकरः** समूहस्तस्य **स्पर्शा**नातिताम्रं **पादाम्बुजं** यस्यैतादृशः, पूजितचरण इव सन्तुष्ट**स्तत्शिरस्सु ननर्त**, ननु विषमशिरस्सु कथं नृत्यं कृतवान् ? तत्राहा**खिलकलादिगुरु**रिति, **अखिलकलानामादिगुरुः**, **कलाकौशलानि यावन्ति लोके तानि सर्वाण्यनेनैव कृतान्युपदिष्टानि च**, लोका रज्जौ पादुकासहिता नृत्यन्तो दृश्यन्ते तत्र किमाश्चर्यं स्थूलेषु बहुषु शिरस्सु नृत्यतीति ॥ २६ ॥ नृत्ये गीतवाद्ययोरङ्गत्वात् तदभावे नृत्यं विगुणं स्यादित्याशङ्क्याह **तं नर्तुमुद्यतम**िति, **सर्वत्र देवा भगवन्तं पश्यन्त एव तिष्ठन्ति**, अत्रापि ते लौकिकानां सेवासामर्थ्यात् स्वयमेव सेवां कृतवन्त इत्याह **नर्तुमुद्यतं भगवन्तमवेक्ष्य तदा** तस्मिन् समये **तदीया** ये **गन्धर्वा**दयस्ते **प्रीत्या** स्वस्य **सेवाविनियोगं** ज्ञात्वा **मृदङ्गपणवानकानि वाद्यानि गीतानि पुष्पोपहाराः** पुष्पवृष्टयो **नुतिभिः** स्तोत्रैः **सहसा** शीघ्रमे**वोपसेदु**रुपसन्नाः, **नृत्ये हि प्रथमतो नान्दी तत्र देवतास्तुतिः पुष्पवृष्टिश्च कर्तव्या तदनु वाद्यं गीतं च**, तदत्रापि वाद्यगीतयोरारम्भं कृत्वा नान्दीप्रकटनार्थं पुष्पवृष्टिर्भवत्येव, **भगवन्तमेव च देवाधिदेवं स्तुवन्तः**, अत्र क्रमो न विवक्षित इति ज्ञापयितुं **सहसा** शीघ्रमे**वोपसे**दुरित्युक्तं, **गन्धर्वा** गायकाः, **सिद्धाः** पुष्पवृष्टिकर्तारः, **मुनयः** स्तोत्रकर्तारः, **चारणा** वाद्यकाः, **देववध्वोप्सरसः** सहनर्तक्यः, क्वचिदभिनय उभयोर्बहूनां च नृत्यं भवति तदोपकारस्तासाम् ॥ २७ ॥ एवं नृत्ये **क्रियमाणे** यदासीत् तदाह **यद्यदि**ति **यद्यदेव** कालीयस्य **शिरो न नमते** तदेव **नामयन् दमयाम्बभू**वेतिसम्बन्धः, **शतं** शतसङ्ख्याकान्येकानि प्रधानानि **शीर्षाणि** यस्य, एतादृशस्य कालीयस्य सर्वाण्येव शिरांसि प्रधानानीत्येकनमनेपि नान्येषां नमनं, अतः प्रत्येकं नामनं, अङ्गेतिसम्बोधनं स्नेहात्, आदौ यावन् नमनं **न मन्यते**न्यत्र स्थित **एवाङ्घ्रिपातं**नृत्ये गतिविशेषैस्तालसमाप्तिस्थानेषु तस्मिन्नेवोच्चशिरसि पादप्रहारं करोति, ततः पादप्रहारभिया तन् नतमेव तिष्ठति, किञ्च न प्रहारमात्रं करोति किन्तु **ममर्द**, पादेन मर्दनमपि करोति यथोपरितनी त्वग् गच्छति द्वितीयप्रहारेधिकव्यथाजननार्थं, नन्वक्लिष्टकर्मा किमित्येवं करोति ? तत्राह **खलदण्डधर** इति **खलानां दण्डमयं बिभर्ति**, अतो दण्डार्थमेवं करोतीत्यर्थः, ततः **क्षीणायुषः** क्षीणप्राणबलस्य मूर्छितस्य **रुधिरमुल्बणं** जातं, तदन्तःस्थापयितुमशक्यमिति मुखान् **नस्तो** नासिकातश्च **वमन् नागः परमकश्मलमाप**, मूर्छां महतीं व्यथां वा, **नागजातित्वान्न पलायते** शूरा हि ते, **क्षीणायुषो रुधिरमुल्बण**मिति भिन्नं वाक्यं सञ्ज्ञातपरं देहपरं वा, अन्यत् तु जीवपरम् ॥ २८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तं जिह्वयेत्यत्र भगवत्परिसरणं वाक्यार्थः, तद्भ्रमणं तु भगवति दृष्टान्तसूचितं भयाभावं दृढं कर्तुं, तथा च मूले **सोपीत्य**पिशब्देन न भगवत्समुच्चयः, किन्तु वाक्यार्थे भ्रमणस्यगौणत्वं बोधितं, एतत्सूचनाय व्याख्याने **स एवेत्येवका**रः, **बहुधे**ति अवसरप्रतीक्षाया उक्तत्वादिदमागतम् ॥२५॥ **तं** नर्तुमित्यत्र पुष्पवृष्टिनुतिश्च भगवतः एव कृता नविघ्नार्थं न तु ते नृत्याङ्गे, ततो भगवान् नृत्यं कृतवान्, अतस्तदङ्गत्वेन गीतवाद्यसमाप्तिरेव वाक्यार्थः ॥ २७ ॥ **यद्यदि**त्यस्याभासे **तदाहे**ति दमनमाह, श्लोकद्वयेनेति शेषः, अध्यायकारिकासु लील्या दमनमुक्तमिति मर्दनादिकमपि दमनप्रकारविवरणत्वेन व्याख्यायते, तथा च दमनप्रकारविवरणं प्रथमश्लोकार्थः, दमन द्वितीयश्लोकार्थः, सप्रकारं दमनं श्लोकद्वयमहावाक्यार्थः, तत्रैवमन्वयः, **यद्यच्छिरो न नमते तत्तन् नमयन् दमयाम्बभूव**, तत्र प्रकारः **अङ्घ्रिपातैर्ममर्द**, ततस्तस्य रुधिरं उल्वणं जातं तद् वक्त्रान् **नस्तो वमन्** स **परमकश्मलमाप**, ततो**क्षिभिर्गरलमुद्वमतस्तस्य शिरस्सु** मध्ये **यद्यत् समुन्नमति तत्तदनुनमयन्** जातः, एवं **दमयाम्बभूवेति**, प्रहारो नामनं तस्य विवरणं **ममर्देति**, यन् न नमते तस्य नामनं, ततोपि यत् समुन्नमति तस्यानुनामनमिति विशेषः ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हरिश्च क्रीडंस्तमनु सर्पं परिससार सर्वतो बभ्राम। अभयङ्करत्वं च सूचयन् सर्पं विशिनष्टि प्रतिमुखं द्विशिखया जिह्वया द्वे सृक्किणी ओष्ठप्रान्तौ लेलिहानमास्वादयन्तम्, अतिकराला विषाग्नियुक्ता दृष्टिर्यस्य तम्। तथापि भगवतो निर्भयत्वं सूचयन् दृष्टान्तमाह—यथा खगेन्द्रो गरुड इति। सोऽपि सर्पो दशनावसरं प्रसमीक्षमाणस्तमनुबभ्राम ॥ २५ ॥ एवं परिभ्रमणैव

हतमोजो देहेन्द्रियादिसामर्थ्यं यस्य तम्। तथाप्युन्नता अंसाः फणा यस्य तम्। समानम्य हस्तेन नम्रं कृत्वा तस्य पृथुशिरस्स्वधिरूढः। अत एव तस्य मूर्धसु ये रत्ननिकरा रत्नसमूहास्तेषां स्पर्शेनातिताम्रमत्यरुणं पादाम्बुजं यस्य स कृष्णो ननर्त। ननु "चञ्चलेषु शिरस्सु कथं ननर्त" इत्याशङ्क्याह—अखिलेति। अखिलानां कलानां नृत्यादिकौशलानामादिगुरुः प्रवर्तक इत्यर्थः। तत्र हेतुमाह—आद्य इति। सर्वकारणभूतः। अनेन तस्य परमं भाग्यं सूचितम् ॥ २६ ॥ ननु "नृत्ये गीतवाद्ययोरङ्गत्वात् तदभावे नृत्यं विगुणं स्यात्" इत्याशङ्क्य तत्सम्पत्तिमाह तमिति। तं स्वस्वामिनं कृष्णं नर्त्तुमुद्यतमवेक्ष्य ज्ञात्वा तदीयास्तत्सेवका गन्धर्वादयः प्रीत्या हर्षेण मृदङ्गादिभिः सहसा झटिति उपसेदुः सेवितवन्तः। तत्र गन्धर्वा गायका गीतैः। सिद्धाः पुष्पवृष्टिभिः उपहारैः, ताम्बूलादिभिश्च। सुराः स्तुतिभिः। चारणा मृदङ्गादिवाद्यैः। देववध्वः अप्सरसः सहनर्तनैः ॥ २७ ॥ एकपदम मुख्यवाचकम्, फणासहस्रस्य वक्ष्यमाणत्वात्। शतमेकानि मुख्यानि शीर्षाणि यस्य तस्य शतैकशीर्ष्णः क्षीणायुषः क्षीणबलतया मृतप्रायस्यापि क्रोधवशाद्भ्रमतः कालियस्य यद्यच्छिरो न नमते स्तब्धतां न जहाति, तत्तन्नृत्यच्छलेनाङ्घ्रिपातैर्ममर्द। तदा च स नागः आस्यतो मुखेभ्यो नस्तो नासाविवरेभ्यश्चोल्बणं विषमिश्रत्वेन भयङ्करमसृक् रुधिरं वमन् परमकश्मलं महतीं मूर्च्छामाप। ननु "परमकृपालुर्भगवान् कथमेवं पीडां दत्तवान्?" तत्राह—खलदण्डधर इति। तस्य खलत्वेन गर्वितत्वात् गर्वस्य सर्वश्रेयःपरिपन्थित्वात् दण्डेन गर्वनिवृत्तिद्वारा परमानुग्रहमेव कृतवानिति भावः ॥ २८ ॥

अन्वितार्थप्रकाशिका

तमिति ॥ हरिश्च क्रीडन् प्रतिमुखं द्विशिखया जिह्वया द्वे सृक्विणी ओष्ठप्रान्तौ लेलिहानमास्वादयन्तमतिकराला विषाग्नियुक्ता दृष्टिर्यस्य तम् अमुं सर्पं खगेन्द्रो गरुडो यथा गरुड इव परिससार सर्वतो बभ्राम। सोऽपि दंशनावसरं प्रसमीक्षमाणस्तमनुबभ्राम ॥ २५ ॥ एवमिति ॥ एवं परिभ्रमेणैव हतमोजो देहेन्द्रियादिसामर्थ्यं यस्य तं तथाप्युन्नता अंसाः फणा यस्य त समानम्य हस्तेन नम्रं कृत्वा तस्य पृथुशिरःस्वधिरूढः। अत एव तस्य मूर्धसु ये रत्ननिकरा रत्नसमूहास्तेषां स्पर्शेनातिताम्रमत्यरुण पादाम्बुजं यस्य अखिलानां कलानां नृत्यादिकौशलानामादिगुरुः प्रवर्तकः चञ्चलेष्वपि शिरःसु नर्त्तनकुशलः आद्यः कृष्णो ननर्त ॥ २६ ॥ तं नर्तुमिति ॥ तदा तं कृष्णं नर्तुं नर्तितुम्। इडभाव आर्षः। उद्यतमवेक्ष्य ज्ञात्वा तदीयास्तत्सेवका गन्धर्वादयः प्रीत्या हर्षेण मृदङ्गादिभिः सहसा झटिति उपसेदुः सेवितवन्तः। तत्र गन्धर्वा गायका गीतैः सिद्धाः पुष्पवृष्टिभिः उपहारैः ताम्बूलादिभिश्च मुनयः स्तुतिभिः चारणा मृदङ्गादिवाद्यैः देववध्वः अप्सरसः सह नर्तनैः ॥ २७ ॥ यद्यदिति ॥ अङ्ग हे राजन्! शतमेकानि मुख्यानि शीर्षाणि यस्य तस्य शतैकशीर्ष्णः शीर्षन्नार्षः। अत्र शतस्य शिरसां मुख्यत्वात् अन्यशिरोऽपेक्षया अग्रे सहस्रफणत्वोक्तेः। क्षीणायुषः क्षी॰ बलतया मृतप्रायस्यापि क्रोधवशाद् भ्रमतः कालियस्य यद्यच्छिरो न नमते। कर्मकर्तरि लट्। "न दुहस्नुनमाम्" इति यङ् न तत्तच्छिरः कर्मखलानां दण्डधरो हरिः नृत्यच्छलेनाङ्घ्रिपातैर्ममर्द। तदा च स नागः आस्यतो मुखेभ्यो नस्तो नासाविवरेभ्यश्चोल्बणं विषमिश्रत्वेन भयंकरमसृक् रुधिरं वमन् परमकश्मलं महतीं मूर्छामाप ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

द्विशिखया प्रतिमुखं द्विशिखावत्या जिह्वया द्वे सृक्किणी ओष्ठप्रांतभागौ परिलेलिहानं लिहंतं अतिकराला अतिभयानका विषाऽग्निविशिष्टा दृष्टिर्यस्य तं खगेंद्रो गरुडो यथा तथा कृष्णः क्रीडन् सन् अमुं नागं परितः ससार सर्वतो बभ्राम सोपि कृष्णग्रहणेऽवसरमवकाशं ईक्षमाणः सन् श्रीकृष्णमनु बभ्राम ॥ २५ ॥ एवमिति। परिभ्रमेण हतं ऊर्जो बलं यस्य तं उन्नताः अंसाः स्कंधभावा ग्रीवा यस्य तं हस्तेनामय्य तस्य नागस्य पृथुशिरस्सु नृत्ययोग्यमहाविशालफणेषु अधिरूढस्तदुपरि स्थितः तस्य मूर्द्धसु स्थिता रत्ननिकरा मणिसमूहास्तेषां स्पर्शेनाऽतिताम्रे रक्तपदांबुजे यस्य सर्वेषामाद्यो हरिरखिलकलानामादिगुरुत्वात् ननर्त्त ॥ २६ ॥ नृत्योत्साहार्थं तदुपकरणमाह तमिति। तदीयाः पार्षदाः मुनयश्च नुतिभिरुपसेदुः समीपं प्राप्ताः एवं यथा योग्यं योजनीयं ॥ २७ ॥ क्षीणयुषो मृतप्रायस्यापि भ्रमतः शतमेकानि प्रधानानि शीर्षाणि शिरांसि यस्य तस्य शतैकशीर्ष्णः तत्तच्छिरः अंघ्रिपात नृत्यकलया पादनिक्षेपैः ममर्द अपीडयत् आस्यतो वदनेभ्यः नस्तो नास्तिकाभ्यः उल्वणं विषमिश्रं असृक् रुधिरं वमन्नुद्वमन् स नागः कश्मलं कष्टं प्राप ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ द्वे शिखेऽग्रभागौ यस्यास्तया, जिह्वया द्वे सृक्किणी ओष्ठप्रान्ता परिलेलिहानं, अतिकराला विषाग्नियुक्ता दृष्टिर्यस्य तं, तं अमुं कालीयं, खगेन्द्रो गरुडः, यथा, तथा, क्रीडन् क्रीडयन्, कृष्णः परिससार परितश्चचार हि। परीत्यस्य परित इत्यर्थानुसरणात् 'अभितः परितः समया' इत्यादिवचनेनामुमिति षष्ठ्यर्थे द्वितीया। अमुष्य परितः ससारेत्यर्थः। सः कालिय अपि अवसरं दंशनार्थमन्तरं, प्रसमीक्षमाणः अन्वेषयन्, बभ्राम ॥ २५ ॥ एवमिति ॥ एवं परिभ्रमेण परितो भ्रमणेनैव हतं गतमोजो बलं यस्य तं, उन्नतावंसौ यस्य तं कालियं, आनम्य नम्रं कृत्वा, तस्य पृथूनि विपुलानि च तानि शिरांसि मस्तकानि च तेषु, अधिरूढः, आद्यः अखिलविद्याकारणभूतः श्रीकृष्णः, अखिलाः कला येषां भरतशास्त्रविदां तेषामादिगुरुः, हेतुगर्भमिदम्।

तत्त्वात्, तस्य कालियस्य मूर्द्धसु शिरस्सु ये रत्ननिकरा रत्नसमूहास्तेषां स्पर्शेन अतिताम्रमत्यरुणं पादाम्बुजं यस्य तथाभूतः सन्, ननर्त्त । अखिलकलाविद्गुरुत्वात्तदीयेषु सकलेष्वपि शिरस्सु नर्त्तनं चकारेत्यर्थः ॥ २६ ॥ तमिति ॥ तदा, नर्त्तुं नृत्यं कर्त्तुं उद्यतमुद्युक्तं, तं श्रीकृष्णं, अवेक्ष्य, तदीयाः श्रीकृष्णभगवतः सेवकाः ये गन्धर्वाश्च सिद्धाश्च मुनयश्च चारणाश्च देवाश्च वध्वस्तदङ्गनात्मिका अप्सरसश्च ताः, प्रीत्या, मृदङ्गाश्च पणवाश्च आनकाश्च वाद्यानि च गीतानि च पुष्पोपहाराश्च नुतयः स्तुतयश्च ताभिः, उपलक्षिताः सत्यः, सहसा आशु, उपसेदुराजग्मुः । पाठान्तरे तदीयाः कालियस्य परिजनाः, उपसेदुः । गन्धर्वादयश्चापि, उपसेदुः ॥ २७ ॥ यदिति ॥ अङ्ग हे राजन् ! शतं शतपरिमितानि एकानि मुख्यानि शीर्षाणि शिरांसि यस्य तस्य शतैकशीर्ष्णः, 'एके मुख्यान्यकेवलाः, इत्यमरः । 'शीर्षन् छन्दसि' इति शिरःशब्दस्य शीर्षन्नादेशः । क्षीणमायुर्बलं वा यस्य तस्य, कालियस्य यत् यत् शिरः, न नमते नम्रं नाभूत्, तत्तच्छिरः कर्म, अङ्घ्रिपातैः, खलदण्डधरः हेतुगर्भम् । तत्त्वात् ममर्द । वक्त्रान्मुखात्, मुखेभ्य इत्यर्थः । नस्तः नासिकायाः, नासिकाभ्य इत्यर्थः । आशु उल्बणमुष्णमधिकं वा, रुधिरमसृक्, वमन् उद्गिरन्, नागः परमधिकं, कश्मलं मोहं, मूर्च्छां दुःखं वा आर उपलेभे ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ननर्तेति : १०.१६.२६.

संसारे वर्तमानोऽप्यनुपदमभयस्तार्क्ष्यवत् सर्पभङ्गे निस्तन्द्रं संयतेत द्विषदधिदमने प्रेक्षमाणोऽवकाशम् ।
योऽसावाशु प्रमाता भवति रिपुलसद्वासनामस्तपादो भूयाद्भूयाश्च शर्वादपि चतुरतरस्ताण्डवेषु प्रवीणः ॥ ५६ ॥
सन्त्यन्याङ्गे देवा भुवनेहिशिरोविलासभागात्मा । श्रीशः श्रुत्यर्थमनु व्यक्तीचक्रेऽहिमौलिनर्तनतः ॥ ५७ ॥
लासे रासेऽप्येकरूपः सावर्ण्यादस्म्यहं सदा । इत्यग्रे रासधीरासील्लासधीरः प्रसङ्गतः ॥ ५८ ॥
दुर्दर्पसर्प-विमदीकरणाय शस्तं शास्त्रे जनेष्वनुभवादपि गारुडास्त्रम् ।
आचिन्तयन्निति पदा सविलासशाली प्रोद्यद्ध्वजेन किमनृत्यदहेः शिरस्सु ॥ ५९ ॥
नागालङ्कृतविग्रहः पशुपतिर्दुर्वर्णभूभृत्प्रियावासः सद्विहितस्तुतिः शिवपदो यः सर्वदोमाधवः ।
तस्यास्मिन् भुवने हि ताण्डवविधिर्युक्तो ममेत्यच्युतश्चित्रं चकार चारु सकलोत्तंसः सलास्यं तदा ॥ ६० ॥
सद्रत्नौघलसत्प्रदीप्तिकलित-प्रान्तान्तरङ्गं तथा स्वर्णश्रीललितान्तरङ्गसुषुमामध्याश्रितं तच्छिरः ।
स श्रीशो हृदि रङ्गमेव कलयन्निःशेषरङ्गाधिकं किं वा तत्र चकार नर्तनविधिं श्रीभारतेऽप्यस्थितिः ॥ ६१ ॥
यो युष्मान् द्वेष्टि भो भक्ता हन्तुमिच्छत्यनागसः । तं कालसर्पं दमयाम्येवेतीशो व्यबोधयत् ॥ ६२ ॥
संसारे निजगोकुले च भुवनेऽप्यात्मानुसन्धानदृग् यः स्यात्तस्य न भीतिरस्ति निखिलब्रह्माण्डखण्डादपि ।
सर्वेषामविशेषतो भयपुषोऽपि स्यात्कृतान्तस्य हि दत्वा मूर्ध्नि पदं सलीलमभयस्तद्भीतिदः प्रत्युत ॥ ६३ ॥

यद्यच्छिर इति : १०.१६.२८.

या या वलादुदयमेष्यति वासना सा दम्या पदेन गतवीर्यमदा यथा स्यात् ।
एवं कृते रिपुजयो भवति स्वयं च सन्मुक्तिभागिति तथेशकृतौ स्फुटार्थम् ॥ ६४ ॥

कृष्णप्रिया

वह कालीय नाग अपनी अपनी दो शिखा वाली दोहरी जिह्वा से अपने दोनों गलफरों को चाट रहा था ऐसे अत्यंत भयानक विषरूप अग्नि से भरे हुए कालीय नाग के चारों तरफ वर्तुलाकार क्रीडा करते हुए भगवान् श्रीकृष्ण गरुड के समान घूम ने लगे और कालीय भी (काटने के लिये) लाग देखता हुआ श्रीकृष्ण जी के चारों और घूमने लगा ॥ २५ ॥ इस प्रकार गोलाकार घूमते घूमते उस कालीय नाग का जब बल नष्ट हो गया तब ऊँचे कन्धे वाले कालीय को नवाँकर आदिपुरुष भगवान् श्रीकृष्ण उसके विशाल शिरों पर आरूढ हो गए एव मस्तकों पर सर्व कलाओं के अधिपति प्रभु नाँचने लगे । तब प्रभुजी के सुकुमार चरण कमल कालीयनाग के मस्तकों के रत्नों के समूह से अत्यत आरक्त हो रहे थे ॥ २६ ॥ जब भगवान् श्रीकृष्ण कालाय नाग के मस्तकों पर नर्तन के लिए तत्पर हुए, तब भगवान को देख भगवान के तदीय गन्धर्व, सिद्धजन, मुनिजन, चारण देव देवङ्गनाएँ आदि सर्व मृदङ्ग, पणव, आनक आदि, वाद्य गीत एवं पुष्प तथा उपहार और स्तोत्रों से सेवा करने के लिए प्रीतिपूर्वक यकायक समुपस्थित हो गए ॥२७॥ वत्स परीक्षित् ? उच्छृँखल उस कालीय नाग के सौ मस्तिष्क थे और ये प्रत्येक मस्तक था इसलिए प्रत्येक शिर का दमन करने के लिए भगवानको हर एक मस्तकका दमन पृथक् पृथक् करना पडता था । राजन्, कालीय नाग का जो जो शिर नहीं नमता था अथवा नहीं नमाता था, खलों को दण्ड देने वाले भगवान् निज पादप्रहार से उस मस्तक का दमन कर देते थे। कालीय नाग खल था उनकी आयु क्षीण होने जा रही थी फिर भी वह घूम रहा था इस लिए उसके मुख एव नासिका के छिद्रों से खून बहने लगा जिस से कालीय को खूब कष्ट होने लगा ॥ २८ ॥

[1]तस्याक्षिभिर्गरलमुद्वमतः शिरस्सु यद् यत् समुन्नमति निःश्वतो रुषोच्चैः ।
[2]नृत्यन् पदानुनमयन्[3] दमयाम्बभूव पुष्पैः [4]सुपूजित इवेह [5]पुमान् पुराणः ॥ २९ ॥
तच्चित्रताण्डवविरुग्णफणातपत्रो[6] रक्तं मुखैरुरु [7]वमन् नृप भग्नगात्रः ।
स्मृत्वा चराचरगुरुं पुरुषं पुराणं नारायणं तमरणं मनसा जगाम ॥ ३० ॥
कृष्णस्य गर्भजगतोऽतिभरावसन्नं[8] पार्ष्णिप्रहारपरिभग्न[9]फणातपत्रम् ।
दृष्ट्वाहिमा[10]द्यमुपसेदुरमुष्य पत्न्य आर्ताः श्लथद्वसनभूषणकेशबन्धाः ॥ ३१ ॥
[11]तास्तं विपन्नमनसोऽथ [12]पुरस्कृतार्भाः [13]कायं निधाय भुवि भूतपतिं प्रणेमुः ।
साध्व्यः कृताञ्जलिपुटाः[14] शमलस्य भर्तुर्मोक्षेप्सवः शरणदं शरणं प्रपन्नाः ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—रुषा उच्चैः निःश्वसतः अक्षिभिः गरलं उद्वमतः तस्य शिरःसु यत् यत् समुन्नमति (तत्तत्) नृत्यन् पदा अनुनमयन् दमयाम्बभुव इह पुराणः पुमान् पुष्पैः प्रपूजितः इव ॥ २९ ॥ नृप तच्चित्रताण्डवविरुग्णफणातपत्रः भग्नगात्रः मुखैः उरु रक्तं वमन् चराचरगुरुं पुराणं पुरुषं नारायणं तं मनसा अरणं जगाम ॥ ३० ॥ गर्भजगतः कृष्णस्य अतिभरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणातपत्रं अहिं दृष्ट्वा अमुष्य पत्न्यः आर्ताः श्लथद्वसनभूषणकेशबन्धाः आद्यम् उपसेदुः ॥ ३१ ॥ अथ भर्तुः पुरस्कृतार्भाः ताः शरणदं भूतपतिं शरणं प्रपन्नाः भुवि कायं निधाय प्रणेमुः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुनरपि रुषा उच्चैर्निःश्वसतो यद्यत्समुन्नमति तत्तत्पदाघातेनानुनमयन्निहास्मिन्नवसरे हृष्टैः गंधर्वादिभिः शेषासनः पुराणः पुरुष इव यशोदानंदनः पुष्पैः प्रपूजितः यद्वा तदा गंधर्वादिभिः पुष्पैः प्रपूजितो गोपैः पुराणः पुमानिव दृष्ट इति । यद्वा पुष्पैः प्रपूजित इव प्रसन्नः सन्दमयांबभूव । हितं कृतवानित्यर्थः ॥ २९ ॥ अरणं शरणम् ॥ ३० ॥ गर्भे जगंति यस्य तस्यातिभारेणावसन्नमाक्रांतम् । पार्ष्णिः पादपृष्ठम् । आद्यं श्रीकृष्णम् । श्लथंतो विस्रंसमाना वसनादयो यासां ताः ॥ ३१ ॥ ताः शरणं प्रपन्नाः सत्यस्तं प्रणेमुः । सुविग्नमनसोऽतिविह्वलचित्ताः । भुवीति । तस्मिन्स्थाने जलाधस्ताद्वा तीरे वा । शमलस्य पापात्-नोऽपि भर्तुर्मोक्षेप्सवः भर्तुर्यच्छमलं तस्य वा भूतपतिं प्राणिमात्रस्य पतिम् शरणदमाश्रयप्रदम् ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गरलम् विषम् । समुन्नमति उच्चैर्भवति । तत्तच्छिरः । गंधर्वाणां देवयोनित्वेन भ्रमोऽनुचित इति मत्वा प्रकारांतरेणाह—यद्वेति । गोपानामपि वस्तुतो देवर्षित्वे तत्रापि स नोचित इति मत्वा पुनराह—यद्वेति । इत्यर्थ इति । "परमोऽनुग्रहो दंडो भृत्येषु प्रभुणार्पितः" इति न्यायेन तद्धितमेव चकारेति भावः ॥ २९ ॥ तस्य कृष्णस्य चित्रतांडवेनाद्भुतनृत्येन रुग्णं भुग्नं फणातपत्रं फणरूपच्छत्रं यस्य सः । उरु महत् । भग्नगात्रो मर्दितांगः । तम् श्रीकृष्णम् । परमभक्ताभिस्तत्पत्नीभिः कृपारूपं भक्तिबीजं पूर्वमुप्तमपि पूर्वपूर्वापराधजनितक्रौर्य्यदोषव्याप्ते कालियांतःकरणे दुष्टक्षेत्र इव प्ररोढुमसमर्थमेवासीत्, तदा तु श्रीचरणस्पर्शेन तत्कृतदंडप्राप्त्या च तत्तद्दोषक्षये सति सहसैव तद्भक्तिबीजमंकुरितं बभूवेत्याह—स्मृत्वेति । मद्वैरिणो गरुडादप्यस्य सहस्रगुणाधिकं बलं मयोपलब्धं तस्मात्तत्पत्नीभिरुपादिष्टभक्तिः कोऽयमेव परमेश्वर इति स्वीयस्मृतिगोचरीकृतमेत्यर्थः । चराचरगुरुमित्यसाधारणं बलं दर्शयन्नहमेव परमेश्वर उपास्य इति मूढमपि मां ज्ञापयन्कृपया मच्छिरोर्पितचरणो गुरुर्भवन्प्रसीदति, तमिममहमीदानीं शरणं यामीति । अरणं शरणमिति चक्रवर्ती ॥ ३० ॥ गर्भजगत इति । रोमविवरांतर्निविष्टानंतब्रह्मांडत्वादिति भावः । "क्वेदृग्विधाविगणितांडवराण्डचर्यावाताध्वरोमविवरस्य" इति परमेष्ठ्युक्तेः । बहिर्मुखोऽयं भगवत्कृतदंडेन म्रियते चेन्म्रियतां वयं विधवा भूत्वा भगवंतं भजामेति । यदा तु भक्त्या शरणं गतस्य तस्य पत्युर्दैन्यनिर्वेदविषादवितर्कमत्वादिसंचारिलक्षणं ददृशुर्मुखाद्यंगेषु तदैवा-

---

१. प्राचीनप्रत्यां (२९, ३०) श्लोकद्वयं न दृश्यते । २. तत्तत्पद—इति कस्यचित् । ३. नमयन्स यदा बभूव पुष्पैः स्तुतोऽपि भगवान्पुरुषः—विज. । ४. प्रपूजित—श्रीधर वंशी. वीर. विश्व. शुक. । ५. पुनः पुराणः—च. पु. टी. । ६. फणासहस्रोवीर. । ७. मुखैरनुवम-वीर. । ८. सन्न पार्ष्णि—विज. । ९. रुग्ण—श्रीधर. वंशी. वीर. विज. शुक. । १०. हिराज—विज. । ११. तं तास्सुविग्न—विज ; तास्तं सुविग्न-श्रीधर. वंशी. शुक. । १२. पुरस्कृतार्हाः—विज. । १३. कायान्निधाय—वीर.; कायान्निपात्य—च. पु. टी. । १४. पुटीः परमस्य—विज. ।

होऽयमस्मद्भाग्यवशाद्वैष्णवोऽभूत्तदस्य रक्षणे यतामह इति संहतास्तत्र जातस्नेहत्वादार्त्ताः श्रीमच्चरणसंनिधिमाजग्मुः ॥ ३१ ॥ ता नागपत्न्यः। तम् श्रीकृष्णम्। पुरस्कृता अग्रे कृता अर्भा बाला याभिस्तास्तथा। जलाधस्थजलगतो नंतुं दर्शनमृतेऽशक्य इत्यरुच्याह—तीरे वेति। यद्वा—भुवीत्युक्तेर्ह्रदस्य मध्ये द्वीपोऽस्ति यत्र स्थितः कृष्णः कालीयवेष्टितो गोकुलजनैरदृश्यतेति ज्ञेयमत्र। साध्वीनां स्त्रीणां पापेऽपि भर्तरीश्वरदृष्टिरेवोचिता न त्वन्यथा। पापदृष्टिकरणे साध्वीत्वहतेरर्थांतरमाह भर्तुरिति। कृतांजलिपुटा इत्युक्तेस्तासां कामरूपत्वं प्रतीयते, अन्यथास्तुतिकरणादिकमपि दुर्घटं स्यादिति भावः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सर्वाङ्गवैवश्येऽपि अक्षिभिर्गरलमुद्वमत इति दुष्टस्वभावनिर्देशः ॥ २९ ॥ तस्य तद्वा अनिर्वचनीयं चित्रं विविधं भ्रान्तिरेचकादिगतिभेदं यत्ताण्डवं तेन विशेषतो रुग्णं जातव्रणं भग्नं वा फणानां सहस्रं यस्य सः। अथ साक्षात् श्रीचरणकृतदण्डात् सहजान्तर्दोषक्षयेण श्रीबलिवत् तत्स्पर्शाद्विशुद्धभावोत्पत्त्या च श्रीभगवन्तं ज्ञातवान् प्रपन्नश्चेत्याह—स्मृत्वेति। तं श्रीकृष्णं चराचराणां गुरुं जनकत्वादेः यतः पुराणं पुरुषं सर्वेषामाद्यमित्यर्थः। यतः नारायणं लोकपद्माकारनाभिमित्यर्थः। किं वा सर्वजीवानामाश्रयम् एते सर्वथा शरणापत्तौ हेतवः स्मृत्येति प्राचीनेन तेन शतशः श्रुतस्यापि तस्य दौरात्म्यमानराहित्यात् मनसेति परमार्त्त्यं तवास्मीत्युक्तावप्यशक्तेः यद्वा मनसो शरणगमने हेतुः पुरुषमन्तर्यामितया हृदयरूपाणां पुरि शेते सदा वर्त्तत इति तथा यद्वा तं श्रीकृष्णं नारायणं स्मृत्वा स्वपत्नीभ्यस्तथा श्रुतमनुसन्धाय शेषं प्राग्वत् ॥ ३० ॥ एवं शरणापत्या त्यक्तचरणाघातदण्डे सम्यक् प्रसन्ने यासां स्वभक्तानामपि दुष्टस्वामिसङ्कोचादनागतचरीणां सम्बन्धेन स्वयमेव तस्य तादृक्त्वं साधितं तदपेक्षान्यायेति तदर्थमेव ताभ्यस्तादृशप्रसाददर्शनार्थमेव च शिरस्येव विलम्बमाने श्रीभगवति तासां प्रतिपत्तिमाह—कृष्णस्येति द्वाभ्याम्। गर्भजगत इति विभुत्वादुक्तं "न चान्तर्न बहिर्यस्य" इति न्यायेन गर्भशब्देन ह्यत्रान्तरमुच्यते ततो व्याप्तसर्वस्येत्यर्थः। तथापि जगत्स्पर्शाभावस्तु दर्शितः "मया ततमिदं सर्वम्" तस्मिंश्चैवम्भूते भारतायाः कौतुत्याद्यत्कालियादेः सर्वस्यापि चूर्णत्वं न जायते तत् खलु तस्येच्छामयनिजशक्तिप्राकट्यस्योपेक्षात एव सम्भवतीति भावः आतपत्ररूपकेण फणानां परिरुग्णतया तस्य बाह्यश्रियो विमर्शः सूचितः उपसेदुः पार्श्वे जग्मुः आर्त्तत्वादेव श्लथद्वसनादिकाः इति महादैन्यमुक्तम् ॥ ३१ ॥ सुविग्नं पतिमरणशङ्कया तदप्यपराधशङ्कया वाऽतिभीतमतिदुःखितं वा मनो यासां ताः अयं प्रणामे प्रपत्तौ वा परमदैन्येन गुणविशेष उक्तः भुवि कायं निधाय दण्डवन्निपत्येत्यर्थः। एवं ह्रदस्य मध्ये कश्चित् द्वीपो बोध्यते यत्र क्रीडाविशेषार्थमुत्थितः श्रीकृष्णः कालियेनावृतो गोकुलजनैरदृश्यतेति वर्णितं पुरस्कृतार्भत्वं कृपाजननार्थम्, ननु, भर्तुरपराधेन वृतो न बिभ्यति स्म ? तत्राह भूतानां प्राणिनां सर्वेषामपि पतिं तासां तादृशतया स्फुरितं तस्माद्भयेऽपि कुत्रान्यत्र गन्तव्यमिति भावः। अत एव भर्तुः भर्त्रा यः शमलस्य मोक्षस्त्यागः तमिच्छन्त्यः कुतः साध्व्यः पतिव्रताः श्रीकृष्णभक्तिमत्यश्च ॥ ३२ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणो

अधुना केवलमक्षिभिरेवं विषमुच्चैर्वमतः। अनेन तदानीमपि तीक्ष्णदृष्टित्वमभिप्रेतम्; तत्त्वार्थपक्षे द्वयम्। अङ्घ्रिपातैर्नृत्यगत्या पादाब्जन्यासविशेषैर्मर्दनं तज्जातिस्वाभाविकदोष-निरसनम्; किंवा पादाब्जस्पर्शविशेष-महासौभाग्यलभनम्, अतएव तेन शिरसामुत्तम्भनञ्च क्षीणायुष्ट्वादिकं सहजदुष्ट-बलदर्पाद्यपगमस्तदर्थमेव खलेषु दुर्विषमयास्यादिस्थानेषु दण्डं दधत्। ततश्च प्रेमानन्दमूर्च्छास्ततश्च गरलोद्वमनं निजाशेषान्तर्दोषत्यागः, रुषा प्रणयकोपेन, यद्वा, अ-कार-प्रश्लेषेण न विद्यते रुट् यस्यां तया भवत्येत्यर्थः। दमयाम्बभूव सहजजातिदोषं त्याज्यामासेत्यर्थः। तेन च तत्त्वतो हितमेवाकरोत्; तच्च तैरपि व्याख्यातम्। 'दययाम्बभूव' इति पाठोऽपि क्वचित्। नन्वीदृशीमद्भुतां कृपां किमिति कृतवानित्याशंक्य स्वयमेव हेतुं वितर्कयति—पुष्पैरिति। इह श्रीवृन्दावनान्तः श्रीयमुनाह्रदे पुराणः पुमान् श्रीकृष्णोऽयं पुष्पैः प्रकर्षेण पूजितः। इवेत्युत्प्रेक्षायां वितर्क एव वा। पुराणः पुमानिति पुरुषोत्तमत्वेनेत्यर्थः, यद्वा, पुरापि नव इति निरूक्त्या पूर्वतो वर्त्तमानोऽपि नित्य-नूतन इत्यर्थः, यद्वा पुरं श्रीमथुराख्यमानयति प्राणयतीति पुराणः पुमान् श्रीकृष्ण एव। अन्यत् समानमिति ॥ २९ ॥ तस्य तत्त्वानिर्वचनीयं चित्रं विविधं भरतमुन्युक्तभ्रान्तिरेचकादि-गति-भेदात्, यद्वा, नृत्यगत्यैव दृढ़प्रहरणात्, किंवा, निग्रहायाचर्य्यमाणस्यापि तस्यानुग्रहे पर्य्यवसानादद्भुतं यत्ताण्डवं तेन विशेषतो रुग्णं जातव्रणं भग्नं वा फणानां सहस्रं यस्य सः। हे नृपेति यथा भवादृशां प्रजापालनाय दुष्टस्य निग्रहो दण्डोऽपि तत्त्वतो हितायैव, तथेतिभावः। तत्त्वार्थपक्षे तु सर्वफणेषु तादृशनृत्येन तत्साफल्यतोऽत्यन्तानुग्रह एव। तत्र विरुग्णेत्यनेन पूर्वोक्त—मर्दनवदनुग्रहभरसम्पत्तये ताण्डवाधिक्यं द्योत्यते। एवं फणावर्गविरुग्णत्वादिना दुर्मदाद्यपगमाद्दीनः सन्; तत्त्वार्थपक्षे-सहजान्तर्दोषक्षयेण च विशुद्धभावोत्पत्त्या श्रीभगवन्तं सस्मार, ततश्च तं प्रपन्न इत्याह—स्मृत्वेति। चराचराणां गुरुं जनकम्, यतः पुराणं पुरुषं सर्वेषामाद्यमित्यर्थः, यतो नारायणं लोकपद्माकर-नाभिमित्यर्थः, किंवा, सर्वजीवानामाश्रयम्। एते सर्वथा शरणापत्तौ हेतवः। स्मृत्वा विस्मृतमपि तं मनसि कृत्वा चिन्तयित्वा वा, तं नारायणमेव शरणं गतः। मनसेति परमार्त्त्या 'तवास्मि' इत्युक्तावप्यशक्तेः, यद्वा, मनसा शरणगमने हेतुः—पुराणमन्तर्य्यामितया हृदयरूपायां पुरि शेते सदा वर्त्तत इति, तथा तमिति। अन्यत् समानम्। तत्त्वार्थपक्षे—तं श्रीकृष्णं नारायणं स्मृत्वा ज्ञात्वा, कुतः ? चराचरात् तन्मयब्रह्माण्डादपि गुरुं गरिष्ठं महाभारवत्त्वात्, किञ्च, पुराणं पुरुषं बाल्येप्यबालमित्यर्थः, नृत्यादिकला—विशेषात्; अतस्तमेव शरणं गतः ॥ ३० ॥

एवं शरणापत्त्या प्रसन्नेऽपि श्रीभगवति तत्पत्नीः प्रति प्रसादविशेषार्थं तासां माहात्म्यं दर्शयितुं तमत्यजति सति पतिप्रपत्त्याधिकोत्पन्न-सज्ज्ञानानामादौ सम्यक्प्रपत्तिमाह—कृष्णस्येति द्वाभ्याम्। आतपत्ररूपकेण फणानां परिरुग्णतया तस्य राज्यश्रियोऽपि भ्रंशः सूच्यते। उपसेदुः पार्श्वे जग्मुरार्त्तत्वादेव श्लथद्वसनादिका इति महादैन्यमुक्तम् ॥ ३१ ॥ सुविग्नं पतिमरणशंकयातिभीतमतिदुःखितं वा मनो यासां ताः; अयं प्रणामे प्रपत्तौ वा परमदैन्येन गुणविशेष उक्तः, भुवि कायं निधाय, दण्डवन्निपत्येत्यर्थः। पुरस्कृतार्भत्वं कृपाजननार्थम्। ननु भर्त्तुरपराधेन कुतो न बिभ्यति स्म? तत्राह भूतानां प्राणिनां सर्वेषामपि पतिमनन्यगतित्वादित्यर्थः, अतएव भर्त्तुर्यत् शमलमपराधस्तस्य मोक्षं मर्षणमिच्छन्त्यः, किंवा पञ्चम्यर्थे षष्ठी, शमलान्मोक्षेच्छव इत्यर्थः। यद्वा, अपराधिनाऽपि भर्त्तुर्मोक्षः संसारदुःखध्वंसस्तदिच्छवः। कुतः? साध्व्यः पतिव्रताः श्रीकृष्णभक्तिमत्यो वा। अतस्तस्मादप्यासु तत्पादानुग्रहविशेषो युक्त एवेति भावः। शरणदं तद्ह्रदाश्रयप्रदम्, अन्यथा श्रीवृन्दावनमध्ये तत्र निवासासम्भवः, यद्वा, रक्षकनियोजकं यदन्येन केनापि रक्ष्यते, तत्तस्यैव प्रेरणादित्यर्थः। अतस्तासां तद्रक्षाहेतु-प्रपत्त्यादिकं तेनैव सम्पादितमिति भावः। शरणं प्रपन्नाः रक्ष रक्षेत्यार्तस्वरेण शरणागततया तमाश्रिताः यद्वा, शरणं सर्व्वापद्भ्यो रक्षितारं तथैवाश्रिताः, किंवा स्तोतुं प्रवृत्ताः सत्य इत्यर्थः। तत्वार्थपक्षे—अपराधो योग्योऽस्यापि (श्रीकृष्णभक्तिपरायण-तत्पत्नी) तच्चुम्बनादि-प्रवृत्तेः, किंवा दुर्व्विषज्वालया श्रीवृन्दावनवर्त्ति-प्राणिहिंसातः। एवमन्यदप्यूह्यम् ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

चित्रताण्डवम् अद्भुतनृत्यन्तेन विरुग्णं भग्नम् ॥ ३०–३१ ॥ पुरस्कृतार्भाः पुरस्कृतबालाः ॥ ३२–३३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अक्षिभिर्नेत्रैर्विषमुद्वमतः पुनः रुषा क्रोधेन उच्चैर्निश्वसतः श्वासं मुञ्चतस्तस्य शिरस्सु मध्ये यद्यच्छिरः कर्तृ समुन्नमति उद्धृतं बभूवेत्यर्थः। तत्तत्तदा पादघातेनानुनमयन् प्रह्वीकुर्वन्नित्थं नृत्यन् दमयांबभूव दण्डयामास, कथम्भूतः? पुष्पैः पुष्पवर्षैः सुपूजितः गन्धर्वादिभिरिति कर्तृपदाध्याहारः तादात्विकं भगवन्तं लक्षयति इह अस्मिन्नवसरे पुराणः पुमानिव शेषासनो भगवानिवालक्ष्यतेत्यर्थः ॥ २९ ॥ तस्य भगवतश्चित्रेणोद्भटेन ताण्डवेन नृत्येन निरुग्णं नितरां पीडितं फणानां सहस्रं यस्य भग्नं गात्रं यस्य सः कालियः हे नृप! मुखैः रुधिरमुद्वमन् उद्गिरन् तदा तं कृष्णं चराचरात्मकं सर्वभूतनियन्तारं पुराणं पुरुषं श्रीनारायणं स्मृत्वा तमेव मनसा अरण शरणं जगाम ॥ ३० ॥ कृष्णस्य गर्भे यज्जगत्तस्यातिभरेणावसन्नं पीडितं पार्ष्णिप्रहारैः पादपृष्ठघातैः परिता रुग्णाः पीडिताः फणा एवाऽऽतपत्राणि यस्य तमहिं कालियं दृष्ट्वा अमुष्य कालियस्य पत्न्यः आर्त्ता दुःखिताः विस्रत्समाना वस्त्रादयो यासां ताः आद्यं श्रीकृष्णमुपसेदुरुपजग्मुः ॥ ३१ ॥ ताः कालियपत्न्यः सुविग्नानि नितरां भीतानि मनांसि यासामत एव पुरस्कृताः पुरोनिधापिताः अर्भा बालाः याभिस्तास्तथाभूताः भुवि कायान् देहान्निधाय दण्डवत्पातयित्वा तं भूतपतिमपराधानवेक्षणेन शरणागतभूतमात्ररक्षितारं कृष्णं प्रणेमुर्नमश्चक्रुः ततस्ताः साध्व्यः पतिव्रताः शमलस्य पाप्मनो भर्तुर्बिभ्रतः मोक्षेच्छवः भर्तुः शमलस्य वा धृताञ्जलिपुटाः शरणदं शरणं रक्षणोपायमात्मानं ददातीति तथा तं "य आत्मदा बलदा" इति श्रुतेः! तं कृष्णं शरणम् उपायं प्रपन्नाः अध्यवसितवत्यः—

> "अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्। तदेकोपायता याच्ञा प्रपत्तिश्शरणागतिः" ॥

इत्युक्तविधां प्रपत्तिं चक्रुरित्यर्थः ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

शिरस्सु मध्ये यद्यच्छिरः समुन्नमति तत्तच्छिरः अनुनमयन् नृत्यन् बभूव ॥ २९ ॥ अङ्घ्रिपातविशेषेण रुग्णं भग्नम् अरणं शरणं क्षीरसागरशायी यस्तम् ॥ ३० ॥ गर्भे जठरे जगद्यस्य स गर्भजगत् तस्य कृष्णस्य अतिभरेणावसन्नः पीडितः पार्ष्णिः पादपृष्ठभागो यः तेन कृतेन प्रहारेण परिरुग्णं फलातपत्रं यस्य स तथा तम् ॥ ३१ ॥ पुरस्कृतार्हाः अग्ने कृतपूजनाः परमस्य सकाशात् पत्युर्मोक्षेच्छवः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तं श्रीकृष्णं नारायणं स्मृत्वा सपत्नीभ्यः श्रुतमनुसन्धाय एवं शरणापत्त्या क्षान्तवन्तमपि तदपेक्षया शिरस्येव स्थितं तत्पत्न्यः प्रपेदिरे इत्याह—कृष्णस्येति द्वाभ्याम्। गर्भजगत इति विभुत्वात् भुवि कायं निधायेति तत्र मध्यद्वीपः सूचितः ॥३०–३६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं नृत्यतस्तस्य पादाघातेन तालत्यागसमयातिशयशब्देन भुग्नशिरसं पतिमालोक्य नागपत्न्यः समुपतस्थुरित्याह-कृष्णस्य गर्भजगत इत्यादि। गर्भजगद् यस्य स तथा। कोऽर्थः? गर्भे उदरे स्वीकृतं जगद्येन। ननु सदैव तस्योदरे जगत् तिष्ठति तदा सर्व्वदैव सर्वस्यैव दुःसहः स्यात्; अपि तु ऐच्छिक्या प्रकाशिक्या योगमायया जगतो यावान् भरस्तावान् तस्मिन्नेव स्ववपुषि सञ्चारित इति तेन तत्पार्ष्णि प्रहार-रुग्णं फणारूपमातपत्रं यस्य, तद् दृष्ट्वा आद्यं तं श्रीकृष्णममुष्य कालियस्य पत्न्य आर्त्ताः सत्य उपसेदुः। आर्त्तत्वे हेतुः—श्लथद्वलयेत्यादि ॥ ३१–३४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

गर्भजगत इति भरातिशये उत्प्रेक्षा ॥ ३२–३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्य शिरस्सु मध्ये यत् यत् समुन्नमति तत्तदेव पदा पादप्रहारेण अनुनमयन् तस्मिन्नवसरे हृष्टैर्गन्धर्वादिवृष्यमाणैः पुष्पैः प्रपूजित इव प्रसन्नः सन् तेषामेव हितार्थं दुष्टन्तं दमयांबभूव ॥ २९ ॥ परमभक्ताभिस्तत्पत्नीभिः कृपारूपं भक्तिबीजं पूर्वमुप्तमपि पूर्वपूर्वापराधजनितक्रौर्य्यदोषव्याप्ते कालियस्य तस्यान्तःकरणे दुष्टक्षेत्रे इव प्ररोढुमसमर्थमेवासीत् तदा तु श्रीचरणस्पर्शेन तत्कृतदण्डप्राप्त्या च तत्तद्दोषक्षये सति सहसैव तद्भक्तिबीजमङ्कुरितं बभूवेत्याह—स्मृत्वेति । मद्वैरिणो गरुडादप्यस्य परस्सहस्रगुणाधिकं बलं मयोपलब्धं तस्मान्मत्पत्नीभिरुपदिष्टभक्तिः कोऽयमेव परमेश्वर इति स्वीयस्मृतिगोचरीकृत्येत्यर्थः । चराचरगुरुमित्यसाधारणं बलन्दर्शयन्नहमेव परमेश्वर उपास्य इति मूढमपि मां ज्ञापयन् कृपया मच्छिरोऽर्पितचरणो गुरुर्भवान् प्रसीदति तमिममहमिदानीं शरणं यामीति अरणं शरणम् ॥ ३० ॥ गर्भे जगन्ति यस्य तस्य अत एवाऽतिभरेण आद्यं श्रीकृष्णम् आर्त्ता इत्येतावत्कालपर्य्यन्तं याः पत्यावुदासीना एवासन् बहिर्मुखोऽयं भगवत्कृतदण्डेन म्रियते चेन्म्रियतां वयं विधवा एव भूत्वा भगवन्तं भजामेति यदा तु मनसा शरणं गतस्य पत्युर्दैन्यनिर्वेदविषादवितर्कमित्यादिसञ्चारिलक्षणं मुखाद्यङ्गेषु ददृशुस्तदैवाहो अस्मद्भाग्यवशादयं वैष्णवोऽभूत्तदस्य रक्षणे यतामह इति संहतास्तास्तत्र जातस्नेहत्वादार्त्ताः श्रीमच्चरणसन्निधिमाजग्मुः ॥ ३१ ॥ तास्तं प्रथमं प्रणेमुः—भुवीति । ह्रदस्य मध्ये केचित् द्वीपा बुद्ध्यंते यत्रैव स्थितः कृष्णः कालियवेष्टितो गोकुलजनैरदृश्यतेति ज्ञेयं पुरः कृष्णस्याग्रे कृता अर्भा बाला याभिस्ता इति कृपाजननार्थम् ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रुषोच्चैर्निश्वसतस्तस्य शिरस्सु मध्ये यद्यच्छिरः समुन्नमति तत्तत्पदा पादमूलेनानुनमयन् एवं नृत्यन् इह नृत्यक्रीडायां पुराणः पुमान् श्रीकृष्णः पुष्पैः प्रपूजित इव प्रसन्नः सन् दमयांबभूव हितं कृतवानित्यन्वयः ॥ २९ ॥ सोऽपि मनसा तं श्रीकृष्णमरणं शरणं गृहं रक्षितारं मुक्तौ आश्रयं साधनसमये सहायमित्यर्थः जगाम ॥ ३० ॥ गर्भे जगन्ति अस्य अत एवातिभरेण अवसन्नमाक्रान्तम् पार्ष्णिप्रहारैः पादपृष्ठघातैः परितः रुग्णानि फणा एवातपत्राणि यस्य तमहिं दृष्ट्वा आद्यं श्रीकृष्णमुपसेदुरुपजग्मुः कथम्भूताः ? श्लथन्ता विस्रंसमानाः वसनादयो यासां ताः ॥ ३१ ॥ ताः नागपत्न्यः सुविग्नमनसः अतिविह्वलमनसः पुरस्कृता अग्रे कृताः अर्भा बालाः याभिस्ताः भर्तुः शमलस्य पापस्य मोक्षेप्सवः तं श्रीकृष्णं भूतपतिं प्राणिमात्रस्य पतिं शरणदमाश्रयदं शरणं प्रपन्नाः सत्यः प्रणेमुः, प्रणामप्रकारमाह, भुवि कायं निधाय दण्डवत्पातयित्वेति कृताञ्जलिपुटा इत्यनेन करादियुक्तानि शरीराण्यपि ताभिः प्रकटीकृतानीति गम्यते ॥ ३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तस्य शिरःसु नृत्यन् कृष्णस्तेषु मध्ये यद् यत् समुन्नमति तत्तदेव पदाङ्घ्रिप्रहारेणानुनमयन् तदा गन्धर्वादिभिर्वृष्टिः पुष्पैः प्रपूजित इवाति प्रसन्नस्तेषां हिताय तं नागं दमयाम्बभूव ॥ २९ ॥ शेषदेवानुग्रहाद्वा हरिभक्तिभ्यः स्वपत्नीभ्यः श्रुतोऽपि हरिमहिमा कालियस्य हृदि क्रौर्यादिदोषान्नोदितः अधुना तु तच्चरणस्पर्शेन तद्विमर्दनदण्डेन च तद्दोषपरिक्षयात्तत्र तदुदयो बभूवेत्याह—तच्चित्रेति । पत्नीभ्यः श्रुतं महिमानं स्मृत्वा विचिन्त्य तं पुरुषं अरणं शरणम् ॥ ३० ॥ अथ कालियस्य शरणापत्तेः प्राक तत्पत्न्यो हरिविमुखोऽयं तत्कृतेन दण्डेन म्रियतां, वयं वैधव्यदशयैव हरिं भजाम इति पत्यावप्युदासीनास्तस्युरथ दैन्यादिचिह्नैरिति तच्चरणापत्तिकास्तत्प्राणत्राणाय प्रपेदिरे इत्याह कृष्णस्येति गर्भे जगन्ति यस्य अत एवातिभरेणावसन्नं निपीडितमहिं स्वपतिं दृष्ट्वा आद्यं कृष्णमुपसेदुस्तच्चरणान्तिकमाजग्मुः ॥ ३१ ॥ पुरस्कृतार्भा इति दयोत्पादनाय भुवि कामं निधायेति ह्रदमध्ये कश्चिद्द्वीपो बुध्यते यत्रैव कालियो हरिमवेष्टयन् शमलस्य सापराधस्य ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अक्षिभिर्नयनैर्गरलमुद्वमतो रुषा चोच्चैरुच्छ्वसतः शिरस्सु मध्ये यद्यत्समुन्नमति प्रह्वं भवति नृत्यञ्च पदाऽनुनमयत्पुनर्नम्रं कुर्वन्नृत्यन्यदा बभूव तदा पुष्पैस्तद्वर्षणपुरःसरं स्तुतो बभूव । दमयाम्बभूवेत्यपि पठन्ति । तत्र पदद्वयं । नियतश्चानुप्रयोगः । पुष्पैः सुपूजित इवेह पुमान्पुराण इति केचित्पठन्ति । स्फुटार्थः पाठः ॥ २९ ॥ तस्य श्रीकृष्णस्य चित्रं यत्ताण्डवमनीनदत्ताद्भवधवो मृदङ्गं जगौ हनूमान्जगतामधीशं । अदर्शयत्तालगतीः कपर्दी ननर्त गोपालकबालमौलिरित्यादेश्चित्रता ताण्डवस्य तेन विरुग्णं भग्नं फणारूपं वाऽऽतपत्रं यस्य स मुखैररु यथा रक्तं वमन्भग्नमितरद्गात्रं यस्य स चराचरगुरुं पुराणं पुरुषं नारायणं स्मृत्वा स एवायमिति सञ्चिन्त्य मनसाऽरणं शरणं दंशनादिरणाभावं च जगाम ॥ ३० ॥ गर्भं उदरमध्ये जगद्यस्य तत्स्थः योऽतिभरस्तेनाऽवसन्नं कृशं पार्ष्णैः पादपृष्ठभागस्य प्रहारैस्ताडनैः परिरुग्णं भग्नं फणातपत्रं यस्य तमहिराजं दृष्ट्वाऽमुष्य पत्न्यः श्लथद्वसनभूषणकेशबन्धाः सत्य आर्ता उपसेदुः ॥ ३१ ॥ विपन्नमनसो नम्रचित्ताः पुरस्कृतोऽर्होऽर्हणसाधनं याभिस्ताः खिन्नमानसा वा भुवि तीरभूमौ स्थलादिस्थानमात्रे वा कायं निधाय दण्डवत् । कायं निधायेत्यनेन बिना न कायजबाधाबाध इति वध्वो ध्वनयामासुरिति

तच्चातुर्यं महदिति ज्ञेयं । भूतपतिं जगद्राजं कृताञ्जलिपुटाः परमस्य स्वोत्तमस्य भर्तुः कालियस्य मोक्षेच्छवो मोक्षमिच्छन्तीति तास्तथा। नलोकेति निषेधान्न षष्ठी। स्वपतिमोचनमिच्छन्त्यः परमस्य सकाशात्पत्युर्मोक्षेप्सव इति व्याख्याने भूतपतिमिति किञ्चिद्दुश्लिष्टं भवतीति वदन्ति । शरणदं शरणं प्रपन्नाः प्रणेमुर्नेमुः। भुवि शरणदमिति वाऽन्वयः ॥ ३२ ॥

श्रीसुबोधिनी

पूर्वश्लोक आधिभौतिकस्याध्यात्मिकस्य च दण्डो निरूपितः, आधिदैविकस्य दण्डमाह **तस्याक्षिभिरिति,** नासिकामुखयो रुधिरमेव विषप्रतिबन्धकं जातं, अक्ष्णोस्तु ज्ञानप्रधानत्वान् प्रतिबन्धकं न जातमिति **यदाक्षिभिर्गरलमुद्वमति** तादृशस्य **शिरस्सु** मध्ये **यद्यत् समुन्नमति** तत्तदेव **पदानुनमयन् दमयाम्बभूव**, आधिदैविकभावान्नान्यपि कानिचिच् छिरांसि, तान्येव वा पुनरुद्गतानि, **गरलं** स्वस्योपास्यं रूपं, तदग्रे करोति, पश्चात् तस्मिन्नपि प्रतिहते **निःश्वसिति** नातः परं निस्तार इति, तादृशं क्षीणमपि चेन् मारयति भगवांस्तदा मरणार्थं **रुषोच्चैर्भवति, सम्यगुन्नमतीत्यनेन** देवताधिष्ठानं ज्ञापितं, आधिदैविके क्षीणे मरणार्थमुपस्थिते साक्षान्मारणमनुचितमिति **नृत्यत्पदा** नृत्यं कुर्वतैव नृत्यकरणभूतेन **पदा, अनुनमयन्** स्वसम्मुखतया नमनं कारयन् छिक्षयन्निव **दमयाम्बभूव** दमनं कारितवान्, स्वयमेव वा कृतवान्, एवं दमने कृत आधिदैविकस्योपास्यस्य भगवतो वन्नास्थ्यं भवेत् तदा मर्यादाविरोधः स्यादित्याशङ्क्याह **पुष्पैः सुपूजित इवेह पुमान् पुराण** इति, इहास्मिन्नवसरे **पुष्पैः सुपूजित** इव जात आध्यात्मिको भगवता सन्मार्गे शिक्षित इति तयोः सन्तोष एवातस्ताभ्यां **पूजितो** भगवान्, तौ ह्यलौकिकप्रकारेण दिव्यैः स्वतेजोभिः पूजां कृतवन्तौ, तानि पुष्पाणीव जातानि, तदाह **पुष्पैरिव सुपूजित** इति, उभयोः पूजायां प्रत्येकं हेतुमाह **पुरुष** इति, आधिदैविकपूजायां हेतुः, त्रयमपि प्राकृतमेवेति पुराणस्तूपास्यः पुरुषोत्तमो हि सर्वोपास्यरूपाणामप्युपास्यो यथा **व्यासक**पिलादेः, एवं मूर्छापर्यन्तं दण्डं कृतवानद्भुतकर्मत्वान्नृत्येनाक्लिष्टकर्मत्वान्न मारितवान् ॥ २९ ॥ एवं सति भगवच्चरणारविन्दप्रसादात् तस्य ज्ञानभक्ती जाते इत्याह **तच्चित्रे**ति, नन्वभिमाने विद्यमाने कथं ज्ञानम् ? तत्राह **चित्रताण्डवेन विरुग्ण फणातपत्रं** यस्येति, **अभिमानस्य सूचकाः फणा एव** श्वेतातपत्रस्थानीयाः, ते पूर्वं **विचित्रताण्डवेन विशेषेण** भग्नाः, नृत्यं द्विविधं **लास्यताण्डवभेदेन लास्यं स्त्रीनृत्यं पुरुषनृत्यं, तयोरवान्तरभेदाः शतशः सन्ति,** रसाभिनिविष्टः पुरुषः प्रलये महादेव इव **विचित्रताण्डवं करोति** तद् भगवतात्र तच्छिक्षार्थं कृतं, तेन **विशेषेण भग्नफणातपत्रो** जातः, ननु शरीरदोषे विद्यमान आध्यात्मिके भौतिके च कथं ज्ञानभक्ती भवत इत्याह **रक्तं मुखैरुरु वमन्निति, रुधिरमन्तर्दोषात्मकं, तद्वमनेनान्तर्दोषो गतः** भग्नगात्रत्वाद् **बहिर्दोषो**ऽपि, अतो **निर्गुष्टो नारायणं** स्मृतवान्, आधिदैविके हि शेषे स्वसम्बन्धिनि स शेते, अत **आधिदैविकेनोपकृतो नारायणं स्मृतवान्,** उपास्येन च स एवायं **नारायण** इति ज्ञातवान्, तदा स्वस्य दासत्वमस्य स भगवतः स्वामित्वं चाद्यत्वेन ज्ञात्वा **तमेवारणं** शरणं **मनसा** जगाम, **मनसा हि नारायणः शरणत्वेन भावनीयः स ह्यन्तःकरणसाक्षी,** शरणं **गतो** हि **पश्चात् सेवया भक्तो भवति, ततः परं न प्रहार** इति ज्ञातव्यम् ॥ ३० ॥ अन्येन स एवं जात इत्यन्येनैव तस्य विमोचनं वक्तुं तस्य स्त्रियः समागता इत्याह कृष्णस्येति, ता हि भर्तारं द्रष्टुमागताः पतिव्रता नार्यः, अतः स्वधर्मेणैव तासां ज्ञानं, **कृष्णस्य भारेणावसन्नं** पीडितं **पार्ष्णिप्रहारेण** च **परितो भग्नं फणातपत्रं** यस्य, एवं स्वतोऽभिमाना गतदोषमनुष्यैव **पत्न्यस्तं दृष्ट्वार्ताः** सत्यो भगवन्तमुपसेदुरितिसम्बन्धः, ननु **बालकस्य** भगवतः को भारः तत्रापि सच्चिदानन्दस्य स्थूलकार्यस्यैव भारत्वात् ? तत्राह **गर्भे जगद्** यस्येति, **न ह्येकेन जगद्भारः सोढुं शक्यते,** नन्वस्यैव भ्राता शेषः कथं सहते ? तत्रोक्तं परितो **भग्नं फणातपत्रं** यस्येति, **न** केवलं भगवान् भाररूपः किन्तु मारयति च नन्वयस्य स्त्रियः कथं भगवत्स्थाने **समागताः** ? तत्राहाद्यमिति स ह्यहेः स्वस्य च मूलभूतो भवति, किञ्चामुष्य **पत्न्यः** "पत्युर्नो यज्ञसंयोग" इति यज्ञसंयोग एवासां पत्नीत्वं, अयं च भगवान् यज्ञः, तत्र पतिः संयुक्तः स्वयं चेदसंयुक्ताः स्युस्तदा पत्न्य एव न स्युः, किञ्चार्ताः पत्नीत्वादेव तस्यार्धशरीरं भवन्त्यतः स्वयमेव ताडिता अर्धमृता विज्ञापयन्ति, नन्वन्यस्य मारणे कथमन्यो मारित इव पीडितो भवेत् ? शास्त्रं तूपचरितार्थमितिमतं दूरीकुर्वंस्तत्राविकारे तथैव भवतीति ताडितचिह्नान्याह **श्लथन्ति वासनानि भूषणानि केशबन्धाश्च** यासाम् ॥ ३१ ॥ आदिमध्यावसानेषु संयुक्तदार्थानामपगमस्ताडनव्यतिरेकेण न सम्भवति तत्रापि मानवतीनां तासां भर्तृमोचनार्थं भर्तरि दयोत्पादनार्थं भर्तुर्बालकत्वं ज्ञापयन्त्यो बालकान् पुरस्कृत्योपायनमिव स्वसर्वस्वं भर्तृस्थापितं निवेद्य स्वयमपि भूमौ जल एवोद्गताधिदैविकभूमौ तीरस्थभूमौ वान्तर्हृदमध्ये प्रविष्टं भगवन्तं वात्मनिवेदनमिव कुर्वन्त्यो नमस्कारं कृत्वा भगवत्स्तोत्रं कृतवत्य इत्याह **तास्तमिति,** नन्वागता एव कथं न प्रार्थितवत्यः ? तदाह **विपन्नमनस** इति, **विपन्नं मनो** यासां, भगवान् मोचयिष्यतीति गतविश्वासा भर्तुरपराधित्वात्, अतस्तं प्रकारं परित्यज्याथ भिन्नप्रकारेण स्तोत्रं कृतवत्यः, **पुरस्कृता अर्भा** बालका याभिः संयुक्ता तु सामग्री पूर्वमेव गतातो **भूमौ कायं निधाय,** नन्वेतादृगवस्थायां कथं पुरुषान्तरे पतिताः ? तत्राह **भूतपति**मिति, स हि **भूत**मात्रस्य **पतिः** साधारणः, तर्ह्येता एवानुगृहीताः स्युस्तत्राह **साध्व्य** इति, ता हि भर्तृरूपमेव भगवन्तं सेवितुं वाञ्छन्ति नान्यप्रकारेण, अतः **कृताञ्जलिपुटा** अञ्जलिं बद्ध्वा देवतारूपत्वाद् दिव्यस्त्रीरूपा **भर्तुः शमलस्य** पापस्यापराधस्य **च मोक्षे** मोक्षण इच्छा यासां तादृश्यः सत्यो भगवान् **शरणद** इति **शरणं प्रपन्नाः,** स तु **शरणागत** इति **भगवतैव मारणीय**स्तथापि तस्य पापं सहजं तमोरूपमपराधश्च न गच्छतीत्येतासामुद्योगः ॥ ३२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तस्याक्षिभिरित्यत्र **पुष्पैः सुपूजित** इतिचतुर्थचरणस्याभास **आधिदैविकस्योपास्यस्य भगवतो** वेत्याधिदैविकः शेष उपास्यरूपो **भगवांस्तस्ये**त्यर्थः, **मर्यादाविरोध** इत्याधिदैविकः सत्करणीय इति**मर्यादाविरोध**, परिहारं व्याकुर्वन्त्या**ध्यात्मिक इत्याध्यात्मिको** विषरूपः **स भगवता शिक्षित** ईदृशस्थल एवं न कर्त**व्यमिति तयोराधिदै**विकरूपविशेषरूपयोः **सन्तोष एवातस्ताभ्यां** तथेत्यर्थः, **पुमानि**ति तस्याधिदैविककर्तृकपूजाहेतुत्वं तमधिष्ठाय स्थितत्वाज् ज्ञातव्यं, ननु सोपि महांस्तमधिष्ठाय पुरुषः कथमास्ते तत्राहु**स्त्रयमपि प्राकृतमिवेति**, एकादशे द्वात्रिंशाध्याये "ममाङ्ग माया गुणमय्यनेकधा विकल्पबुद्धिश्च गुणैर्विधत्ते वैकारिकस्त्रिविधोध्यात्ममेकमथाधिदैवमधिभूतमन्यदि'त्यत्र तथा निरूपणात् **त्रयमपि प्राकृतमि**वातस्तदधिष्ठानमुचितमेवेत्यर्थः **उपास्यस्ये**ति पूज्य इतिशेषः ॥ २९ ॥ **तच्चित्रताण्डवे**त्यत्र ननु दोषराहित्येपि न महत्कृपां **विना** स्मरणं सम्भवतीति तत्राहु**राधिदैविके**त्यादि, आधिदैविकस्मरणे हेतुर्दोषराहित्यं, मूलस्थतत्पदानर्थक्यं परिहरन्त्यु**पास्ये**त्यादिना, अत्र **तं** पदमावर्तते, **स्मृत्वे**ति प्रत्यभिज्ञाय, ननु नारायणापेक्षया पुरुषोत्तम उत्कृष्ट इति तं परित्यज्य किमेतच्छरणगमनमित्याशङ्क्यैतमेव पुरुषोत्तमं ज्ञात्वा तथा कृतवानिति वदन्तो **मूलस्थं चराचरे**त्यादिविशेषणत्रयं व्याकुर्वन्ति **त**देत्यादिना, तदा यदैव नारायणं ज्ञातवान् ॥ ३० ॥ **कृष्णस्ये**त्यस्याभासे ननु **तस्मिन् मनसा** शरणागते सति **भगवान्** सर्वज्ञस्तं तदैव कुतो न **मुक्तवा**नित्यत आहुर**न्येने**त्यादि, **अन्येने**त्याध्यात्मिकेन तस्योपास्येन **विषेण सौभरिणा** वा, तथा **च** यद्ययं स्वत एव तथा भवेत् तदा भगवांस्तदैवैनं त्यजेदयं त्वाध्यात्मिकबलेन तथा जात इत्यन्यप्रार्थनमपेक्षते "ये यथा मा" मितिप्रतिज्ञानात् तथेत्यर्थः ॥ ३१ ॥ **तास्तमि**त्यस्याभासे **भगवन्तं** वेति लक्ष्यीकृत्येतिशेषः, अस्मिन् पक्षे हृदभूमिर्ज्ञातव्या, तासां तादृगवस्थां दृष्ट्वा कृपालुस्तल्लज्जास्थापनार्थं तत्सहित एव किञ्चिन्नीचैः प्रविष्ट इति तथा, **अथ**शब्दव्यञ्जितोर्थोयमुक्तो ज्ञेयः, **संयुक्ता सामग्री** वनादिरूपा ॥ ३२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

मर्दनस्य देहक्लेशजनकत्वा**दाधिभौतिकस्य** "ममर्दे"त्यनेन दण्ड उक्तः, "कश्मलमापे" त्यनेन **मूर्छाया** इन्द्रियसामर्थ्यनाशकत्वात् तद्दण्ड **आध्यात्मिकस्य**, विषस्योपास्यदेवत्वादग्रिमश्लोकेना**धिदैविकस्य** दण्ड उक्तः, **तस्याक्षिभि**रित्यत्र **ज्ञानप्रधानत्वादिति** तादृशे उपास्यदेवप्रतिबन्धकं नायातीत्यर्थः, विषस्याधिदैविकत्वेन तद्गमकशिरोनुनामनेपि विषस्य दण्डो न जात इत्यरुच्या पक्षान्तरमाहु**राधिदैविके**ति, विषस्य सततस्थितया तद्रूपाण्येव कानिचिज् जातानीत्यर्थः, **दमनं कारितवानि**ति इन्द्रियाणि दाम्यन्ति स चरणः तानि दमयाम्बभूव, तेन भगवान् दमयाम्ब**भूवेति** णिजन्ताण्णिच्, तथा च तेन चरणेन प्रयोज्यकर्त्रेन्द्रियाणां दमनं कारितवानित्यर्थः, तथा सति चरणकर्तृकं दमनमायाति, अत्र तु भगवत्कर्तृकमेवेन्द्रियाणां दमनरूपवत्त्वमभिप्रेतमिति तावद्गौरवे प्रयोजनाभाव इति पक्षान्तरमाहुः **स्वयमेवे**ति, अस्मिन् पक्षे **नृत्यतः पदा** करणेन भगवानिन्द्रियाणि तच्छिरांसि तत्र **यद्यन्न नमते** तत्तद् **दमयाम्बभूवे**त्यन्वयः, प्रथमपक्षे चरणस्य प्रयोज्यकर्तृत्वमितिविशेषः, **आधिदैविक**स्येति विषभावापन्नस्य शिरस इत्यर्थः, **उपास्य**स्येति विषस्येत्यर्थः, **अस्वारस्य**मिति तत्कृतः शोभाभाव इत्यर्थः, शिरसापि मणितेजसा रक्तोत्पलवत्स्थितेन शोभैव जाता विषेणापि स्वतेजसा नीलोत्पलवत्स्थितेन शोभैव जातेतिभावः, इयमेव पूजा ज्ञेया, **त्रयमपीति** आधिदैविकोपि प्राकृततुल्य इति प्रकृतिभर्तारं पुरुषं नाभिभवितुं शक्नोत्यतस्तत्र शोभाजनक एव भवति, पुरुषत्वेपि विषस्य नीलकण्ठे 'तस्यापि दर्शयामास स्ववीर्यं' मित्यनेनाभिभवस्योक्तत्वाद् विषेणाभिभवः शङ्क्येत पुरुषोत्तमे तदपि तथेत्यर्थः, श्लोकद्वयमहावाक्यार्थमुपसंहरन्ति एवमिति, **मूर्छापर्यन्त**मिति प्रकारः, दण्डदमनमित्यर्थः, एवं **सतीति** त्रयाणामपि दण्डे जाते सतीत्यर्थः ।२९। **तच्चित्रे**त्यत्र **आधिदैविके हीति** आधिदैविकानि शिरांसि शेषरूपाणि अतस्तत्पूजादर्शने शेषद्वारा नारायणस्मृतिः, **हि** यतस्तत्र स शेत इत्यर्थः, **आधिदैविकेने**ति स्वमणितेजसा तत्कृतपूजासम्पादनमुपकारो ज्ञेयः, **उपास्येने**ति उपकृत इतिशेषः, मणिप्रभायाः पुष्पायितत्वदर्शनेन "करपल्लवरोचिःसंलालित" स्मरणं, विषप्रभाया अपि पुष्पायितत्वेना**यमेव नारायण इति** ज्ञानमितिभावः, पुरुषत्वादाधिदैविकपूज्यत्वं नारायणत्वादुपास्यपूज्यत्वं चराचरगुरुत्वात् **स्वस्य दासत्वं** पुराणत्वात् तस्य **स्वामित्वमेवं** ज्ञानं भक्त्युपयोगित्वेन निरूपितं, **आद्यत्वेनेति** पुराणत्वेनेत्यर्थः, **आधिदैविके** हीत्यारभ्य ज्ञात्वेत्यन्तं ज्ञानविवरणं **मनसा** हीत्यारभ्य **भवती**त्यन्तं भक्तिविवरणमिति ज्ञेयं, **अन्येनेति** आधिदैविकेन उपास्येन **च** प्रपन्नो **जातः**, नतु स्वतः, अतः परिकरेण स्तुत्या मोचनं, न तु स्वस्य शरणागतिमात्रेण, स्वतः प्रपत्तौ तु शरणागतिमात्रेणैव मोचनं स्यादित्यर्थः ॥ ३० ॥ **कृष्णस्ये**त्यत्र **स्वत इति** देहत इत्यर्थः ॥ ३१ ॥ **अग्रेमानवतीना**मिति पातिव्रत्याभिमानेन शरीरे अभिमानवतीनामित्यर्थः, तथा च पत्नीपदस्यार्थोयं, तादृशीनां स्वभावत एवं न सम्भवतीतिभावः, अग्रिमश्लोकमाहुः **भर्तृमोचनार्थ**मिति **तीरस्थभूमौ** वेति नमस्कारं कृत्वेत्यग्रिमेणैतस्यान्वयः, पक्षान्तरमाहुः **अन्तरि**ति, एतादृशं भगवन्तं वा, प्रणम्येतिशेषः, प्रणम्य **भगवत्स्तोत्रं कृत**वत्य इत्यन्वयः, जले भूम्युद्गमस्यानुक्तत्वाद् द्वितीयः पक्षः, तीरेपि नन्दादिस्थित्या तथा न सम्भवतीति तृतीयः पक्षः, व्याख्यानान्ते स त्विति तुशब्दः मारणीय इत्यस्यानन्तरमन्वेति, **मारणीयस्तु न** परं पापापराधनिवृत्तिर्न भविष्यतीत्यर्थः, पापापराधयोर्निवारणमेव **मोचनमिति** 'कृष्णस्ये' त्यस्याभासेन न विरोधः ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तथापि रुषा उच्चैः निःश्वसतः श्वासान् विमुञ्चतः अक्षिभिर्गरलं विषमुद्वमतस्तस्य कालियस्य शिरःसु यद्यच्छिरः समुन्नमति उच्चीभवति, तत्तत् नृत्यन् पदा पादाघातेन अनुनमयन् प्रह्वीकुर्वन् भगवान् दमयाम्बभूव, दमनं चकारेत्यर्थः। इह अस्मिन्नवसरे पुमान् पुराणः शेषासनः श्रीनारायण इव श्रीकृष्णोऽपि हृष्टगन्धर्वादिभि. पुष्पैः प्रपूजितो जातः। यद्वाऽस्मिन्नवसरे पुमान् पुराणः श्रीकृष्णः कालियेन पुष्पैः प्रपुजित इव प्रसन्नो लक्षितः, तत्प्रसन्नतां विना तत्पादस्पर्शस्य अतिदुर्लभत्वात् ॥ २९ ॥ "एवं भगवच्चरणसम्बन्धेन अन्तर्दोषस्य क्षीणत्वात् तत्स्मरणेन तं शरणं जगाम" इत्याह तच्चित्रेति। नृत्य हि द्विविधम्, लास्यताण्डवभेदात्। तत्र स्त्रीकृतं लास्यम्, पुरुषकर्तृकं ताण्डवम्। 'स्वाम्यपराधीदण्ड्य' इत्यपि राजवृत्तं त्वया ज्ञायते एव, इत्याशयेन सम्बोधयति—नृपेति। तस्य श्रीकृष्णस्य चित्रेण लौकिकेन ताण्डवेन विशेषतो रुग्णानि सञ्जातव्रणानि फणातपत्राणि यस्य सः। 'विरुग्णफणासहस्र' इति पाठान्तरम्। तत्प्रथ्यमानवपुषा च भग्नानि गात्राणि यस्य सः। मुखैरुरु रक्तं बहु रुधिरं वमन् उद्गिरन् श्रीनारायणं स्मृत्वा ज्ञात्वा मनसा तमेव अरणं शरणं जगामेत्यन्वयः। तस्य शरणयोग्यतामाह - चराचरगुरुमिति। ब्रह्मादिपूज्यम्। तत्र हेतुमाह—पुरुषमिति। अन्तर्यामिणमित्यर्थः। तत्र हेतुमाह—पुराणमिति। सर्वकारणमित्यर्थः ॥ ३० ॥ भगवच्छरणागमनेन तत्पत्नीनामपि तद्विमोचनप्रयत्नो जातस्तमाह—कृष्णस्येति। गर्भे जगन्ति ब्रह्माण्डानि यस्य तस्य कृष्णस्यातिभरेण अवसन्नमाक्रान्तं तस्यैव पार्ष्णिः पादपृष्ठं तत्प्रहारेण परिरूग्णफणातपत्रं चाहिं दृष्ट्वा अमुष्य पत्न्यः आर्ताः, अत एव श्लथन्तो विस्रंसमाना वसनादयो यासां ताः आद्यं श्रीकृष्णमुपसेदुः तत्समीपं जग्मुः ॥ ३१ ॥ अथानन्तरं ता नागपत्न्योऽपि तं श्रीकृष्णं शरणं प्रपन्नाः कृताञ्जलिपुटाश्च सत्यो भुवि जलादधस्तात् तस्मिन् स्थाने कायं निधाय दण्डवच्छरीरं निपात्य प्रणेमुरित्यन्वयः। तत्र प्रयोजनं सूचयन्नाह-भर्तुर्यच्छमलमपराधस्तस्य मोक्षे ईप्सा इच्छा यासां तादृश्यः, अतएव तदपराधा स्वयमपि सुविग्नमनसो विह्वलितचित्ताः। तत्र हेतुमाह—साध्व्य इति, पतिव्रता इत्यर्थः। भगवतो दयोत्पादनार्थं पुरोऽग्रे कृता अर्भा बाला याभिस्ताः। ननु "देवतान्तरं विहाय तमेव कुतः शरणं गताः?" तत्राह—शरणदमिति, आश्रयप्रदमित्यर्थः। तत्र हेतुमाह—भूतपतिमिति, सर्वपालकमित्यर्थः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

तस्येति ॥ रुषा उच्चैः निःश्वसतः श्वासान् विमुञ्चतः अक्षिभिर्गरलं विषमुद्वमतस्तस्य कालियस्य शिरःसु यद्यच्छिरः समुन्नमति उच्चीभवति तत्तत् नृत्यन् पदा पादाघातेनानुनमयन् प्रह्वीकुर्वन् भगवान् दमयांबभूव दमनं चकार। इहास्मिन्नवसरे पुराणः पुमान् हरिः कालियेन पुष्पैः प्रपूजित इव लक्षितः। यद्वा। इहास्मिन्नवसरे हृष्टगन्धर्वादिभिः शेषासनः पुराणपुरुष इव यशोदानन्दनः प्रपूजितः। यद्वा। तदा गन्धर्वादिभिः पुष्पैः प्रपूजितो गोपैः पुराणः पुमानिव दृष्टः। यद्वा। पुष्पैः प्रपुजित इव प्रसन्नः सन् दमयांबभूव दण्डव्याजेन हितं कृतवान् ॥ २९ ॥ तच्चित्रेति ॥ हे नृप ! तस्य श्रीकृष्णस्य चित्रेणालौकिकेन ताण्डवेन विशेषतो रुग्णानि सजातव्रणानि फणातपत्राणि यस्य सः विरुग्णफणासहस्र इति पाठान्तरम्। तत्प्रथ्यमानवपुषा च भग्नानि गात्राणि यस्य सः मुखैरुरु रक्तं बहु रुधिरं वमन् उद्गिरन् बलातिरेकेण कृष्णचरणस्पर्शमहिम्ना जातज्ञानतया वा चराचरगुरुं पुराणं पुरुषं श्रीनारायण स्मृत्वा ज्ञात्वा मनसा तमेव अरणं शरणं जगाम ॥ ३० ॥ कृष्णस्येति ॥ गर्भे जगन्ति ब्रह्माण्डानि यस्य तस्य कृष्णस्यातिभरेण अवसन्नमाक्रान्तम् तस्यैव पार्ष्णिः पादपृष्ठं तत्प्रहारेण परिरुग्णफणातपत्रं चाहिं दृष्ट्वाऽमुष्य पत्न्यः आर्ताः अत एव श्लथन्तो विस्रंसमाना वसानादयो यासां ताः आद्यं श्रीकृष्णम् उपसेदुः तत्समीपं जग्मुः ॥ ३१ ॥ ता इति ॥ अथानन्तरं भर्तुर्यच्छमलमपराधस्तस्य मोक्षेप्सवः क्षमामिच्छन्त्यः अत एव तदपराधात् स्वयमपि सुविग्नमनसो विह्वलितचित्ताः साध्व्यः पतिव्रताः भगवतो दयोत्पादानार्थं पुरोऽग्रे कृता अर्भाः बाला याभिस्ताः नागपत्न्योऽपि शरणदमाश्रयप्रदं भूतानां पतिं पालकं श्रीकृष्णं शरण प्रपन्नाः कृताञ्जलिपुटाश्च सत्यो भुवि जलादधस्तात्तस्मिन्स्थाने तीरे वा कायं निधाय दण्डवच्छरीर निपात्य प्रणेमुः। कृताञ्जलित्वमिच्छारूपधारणसामर्थ्यात् अत्र ह्रदस्य मध्ये कश्चिद्द्वीपो बुद्ध्यते यत्रैव स्थितः कृष्णः कालियवेष्टितो गोपैरदृश्यतेति ज्ञेयमिति चक्रवर्ती ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अक्षिभिर्नेत्रैर्गरलं विषमुद्वमतः भूयो रुषोच्चैः निःश्वसतः श्वासोच्छा संकुर्वतः मस्तकेषु मध्ये यद्यच्छिरः समुन्नमति उत्तुंगं भवति तत्तच्छिरः हरिर्नृत्यन् सन् पदा पादताडनेन अनुनमयन् अधः कुर्वन् सन् इह अस्मिन्समये प्रसन्नैर्गोपैः पुष्पैः सुपूजित इव प्रसन्नः सन् दमयांबभूव ॥ २९ ॥ तच्चित्रतांडवविरुग्णफणा हे नृप तस्य चित्रं तांडवनृत्य तेन विरुग्णानि शिथिलानि फणारूपाणि आतपत्राणि यस्य उरु बहुरक्तं रुधिरं वमन् नारायणरूप अरणं रक्षकं प्राप ॥ ३० ॥ गर्भे जगत् यस्य तस्य अतिभरेणावसन्नं पीडितं पादपृष्ठप्रहारेण परिरुग्णं फणातपत्रं अहिं स्वपतिं दृष्ट्वा अमुष्य सर्पस्य पत्न्यः आद्यं श्रीकृष्णं प्रापुः श्लथंतो विस्रंसमाना वस्त्रादयो यासां ताः ॥ ३१ ॥ सुविग्नं भर्तुर्मरणं शंकाभीतं मनो यासां ताः अग्रे कृतबालकाः शमलस्य भगवतो दंशादिपीडाजनकतया पापिष्ठस्य भर्तुः स्वपतेर्मोचनमिच्छवः शरणदं आश्रयपदं भूतपतिं तं शरणं रक्षकं समीपं प्राता सत्यः भुवि कायं निधाय प्रणेमुः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्येति ॥ अक्षिभिर्नेत्रैः, गरलं विषं, उद्वमतः उद्गिरतः, रुषा क्रोधेन, उच्चैः निश्वसतः श्वासं मुञ्चतः, तस्य कालियस्य शिरस्सु मध्ये यद्यत् शिरः कर्त्तृ समुन्नमति उद्धतं भवति तत्तच्छिरः पदा पादमूलेन, अनुनमयन् नृत्यन्, कृष्णः पुष्पैः पुष्पवर्षैः प्रपूजितः सन्, गन्धर्वादिभिरिति कर्त्तृपदाध्याहारः । इह तस्मिन्नवसरे, पुराणः पुमान् इव स्वयं शेषासनो भगवान् इव संलक्ष्यमाणः सन्नित्यर्थः । तं दमयांबभूव दण्डयामासेत्यर्थः ॥२९॥ तदिति ॥ तस्य भगवतश्चित्रमुद्भटं यत्ताण्डवं नृत्यं तेन विरुग्णं नितरां परिरुग्णं फणातपत्रं फणारूपच्छत्रं यस्य सः, कालियः हे नृप, भग्नानि गात्राणि यस्य स तथाभूतः सन् मुखैः रक्तं रुधिरं, उरु वमन्नधिकमुद्गिरन् संश्च, तदा तं श्रीकृष्णं, चराचरगुरुं, पुराण पुरुषं नारायणं स्मृत्वा, मनसा तमेव, अरणं शरणं, जगाम ॥ ३० ॥ कृष्णस्येति ॥ गर्भे जगद्यस्य तस्य कृष्णस्य अतिभरोऽत्यन्तभारस्तेनावसन्नः पीडितस्तं यः पार्ष्णिः पादपृष्ठभागस्तेन यः प्रहारस्तेन परिरुग्णं फणातपत्रं यस्य तं अहिं कालियं दृष्ट्वा, अमुष्य कालियस्य, पत्न्यः श्लथन्तः स्रंसमानाः वसनानि च भूषणानि आभरणानि च केशबन्धाश्च ते यासां ताः, आर्त्ता दुःखिताः सत्यः, आद्यं श्रीकृष्णं, उपसेदुः संप्रापुः ॥ ३१ ॥ ता इति ॥ ताः कालियपत्न्यः, सु नितरां विग्नानि भीतानि मनांसि यासां ताः अत एव पुरस्कृताः पुरो निधापिता अर्भा बाला याभिस्तथाभूताः सत्यः, भुवि भूमौ, कायान् देहान्, निधाय दण्डवत्पातयित्वा भूतपतिं अवगाधानवेक्षणेन शरणागतभूतमात्ररक्षितारं, तं श्रीकृष्णं, प्रणेमुर्नमश्चक्रुः । अथ ततः साध्व्यः पतिव्रताः शमलस्य पाप्मनः भर्त्तृबिभ्रतः, मोक्षेप्सवः भर्त्तुः शमलस्य मोक्षेप्सव इति वा । कृताञ्जलिपुटाः विहिताञ्जलयः सत्यः शरणदमापद्भ्यो रक्षणकारकं भगवन्तं शरणं प्रपन्नाः ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नारायणमिति : १०.१६.३०.

जडजात—जनावनात्तदीक्षः स हि योऽस्मिन्भुवने जलायनः स्यात् ।
इति युक्तिमहिः स पीडिताङ्गो हृदि नारायणचिन्तकस्तदाऽऽसीत् ॥ ६५ ॥

पत्न्य इति : १०.१६.३१.

यो मत्पदं शरणमेति रिपोरपि स्यां श्रेयःप्रदोऽस्य भुवनेषु कयाऽपि गत्या ।
संव्यञ्जयन्निति हरिः शरणागताहिसौख्याय तस्य युवतीः कृतवान् स मध्ये ॥ ६६ ॥

पुरस्कृतार्भा इति : १०.१६.३२.

बाले तथा द्रुतमुदेति दया दयालोर्वृद्धे तथा न तरुणे न च वाऽबलासु ।
इत्थं विचिन्त्य मनसाऽखिलनागपत्न्यः श्रीशं ययुः किमु पुरस्कृतनूत्नपोताः ॥ ६७ ॥

कृष्णप्रिया

अतिशय रोष से ऊँचे निश्वास को लेता और अपने नेत्रों से भयानक विषको उगलता हुआ कालीयनाग अपने सौ मस्तकों में से जिस-जिस मस्तक को उठाता है उसी मस्तक को नृत्य करते हुए भगवान् ने अपने पादप्रहार से दबाकर सर्प का दमन किया। तब ऐसा दृश्य दृष्टि पथ हुआ कि गन्धर्वादि लोगों ने पुष्पों से भगवान के श्रीचरणों का अर्चन किया हो ॥ २९ ॥ राजन् परीक्षित् ! भगवान् श्रीकृष्णजी के इस चित्र ताण्डव नृत्य से जिस कालीय नाग के फणरूप छत्र टूट पड़े वह कालीय नाग अपने मुखों से रुधिर को उगलता हुआ भग्नगात्र हो गया तब कालीय नाग ने जाना कि यह श्रीकृष्ण भगवान स्थावर जंगम के गुरु हैं, पुराण पुरुष हैं, पुरुषोत्तम हैं एवं भगवान नारायण हैं अब मुझे इनकी शरण लेनी चाहिए। यह निश्चय कर मन से प्रभु का शरणागत बन गया ॥ ३० ॥ समस्त जगत को उदर में रखने वाले भगवान श्रीकृष्ण के अतिशय भार से मृतप्राय भगवान की एड़ी के प्रहार से टूटे हुए फणरूप छत्र वाले कालीय नाग को देख, शिथिल वस्त्र, शिथिल आभूषण और बिखरे केशों से शोभारहित बनी हुई कालीय नाग की पत्नियाँ आर्तावस्था को प्राप्त कर भगवान के श्रीचरणों के शरण में आ गयी ॥ ३१ ॥ पुनः अत्यंत दुःखित मन वाली वे कालीय नाग की पतिव्रता पत्नियाँ, निजपति कालीय नाग को पाप एवं अपराध से मुक्त कराने की इच्छा से अपने छोटे-छोटे बालकों को आगे कर शरणागत वत्सल शरणद श्रीकृष्ण प्रभु के शरण में आयीं और दोनों हाथ जोड़ अपने शरीर को जमीन पर दण्ड की तरह गिराकर के भगवान् को प्रणाम करने लगी ॥ ३२ ॥

नागपत्न्य ऊचुः

न्याय्यो हि दण्डः कृतकिल्बिषेऽस्मिंस्तवावतारः खलनिग्रहाय ।
रिपोः सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंसन्[1] ॥ ३३ ॥
अनुग्रहोऽयं[2] भवतः कृतो हि नो दण्डोऽसतां ते खलु कल्मषापहः ।
यद् दन्दशूकत्वममुष्य देहिनः क्रोधोऽपि तेऽनुग्रह एव सम्मतः ॥ ३४ ॥
तपः सुतप्तं किमनेन पूर्वं निरस्तमानेन च मानदेन ।
धर्मोऽथ वा सर्वजनानुकम्पया यतो भवांस्तुष्यति सर्वजीवः[3] ॥ ३५ ॥
कस्यानुभावोऽस्य न देव विद्महे तवाङ्घ्रिरेणुस्पर्शाधिकारः ।
यद्वाञ्छया श्रीर्ललनाऽऽचरत्तपो विहाय कामान् सुचिरं धृतव्रता ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—कृतकिल्बिषे अस्मिन् दण्डः न्याय्यः हि रिपोः सुतानाम् अपि तुल्यदृष्टेः तव अवतारः खलनिग्रहाय फलम् एव अनुशंसन् दमं धत्से ।। ३३ ॥ भवता नः अयं दण्डः अनुग्रहः कल्मषापहः खलु यत् अमुष्य देहिनः दन्दशूकत्वं ते क्रोधः अपि अनुग्रहः एव सम्मतः ।। ३४ ।। निरस्तमानेन मानदेन च अनेन पूर्वं किं तपः सुतप्तं सर्वजनानुकम्पया धर्मः अथ वा यतः सर्वजीवः भवान् तुष्यति ॥ ३५ ।। देव अस्य तवाङ्घ्रिरेणुस्पर्शाधिकारः कस्य अनुभावः न विद्महे यद्वाञ्छया ललना श्रीः कामान् विहाय धृतव्रता सुचिरं तपः आचरत् ।। ३६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रथमं तावत्कुपितं भगवंतं दंडानुमोदनेनोपशमयंत्यः स्तुवंति । न्याय्यो हीति ।

तत्र "दंडानुमोदनं षड्भिर्दशभिश्च हरेर्नतिः । प्रार्थनं पंचभिः श्लोकैस्ततः पन्नगयोषिताम्" ।। १ ।।

न च निग्रहानुग्रहलक्षणं वैषम्यं तवास्तीत्याहुः । धत्से दममिति । अनुशंसन्नालोचयन् ।। ३३ ।। निग्रहोऽप्यनुग्रहायेत्युक्तमिदानीमनुग्रह एवायं न निग्रह इत्याहुः । अनुग्रह इति । नोऽस्माकं यस्मादमुष्य सर्पत्वं दृश्यतेऽतस्तन्मूलपापनिवर्तको दंडोऽनुग्रह एव क्रोधत्वेन प्रतीयमानोऽपीत्यर्थः ।। ३४ ।। महांश्चायमनुग्रह इति । तस्य पूर्वंपुण्यमभिनंदंति । तप इति । स्वयं मानरहितेनान्येभ्यो मानदेन च । सर्वं जीरयतीति सर्वजीवः ।। ३५ ।। न तप आदिनिमित्त एवैष भाग्योदयः किं त्वचिंत्यं तव कृपावैभवमित्याहुः कस्यानुभाव इति श्लोकत्रयेण । तप आदिना ब्रह्मादयोऽपि यस्याः श्रियः प्रसादमिच्छन्ति स श्रीर्ललना उत्तमा स्त्री यस्य त्वदंघ्रिस्पर्शाधिकारस्य वांछया तप आचरत् । अस्य सर्पस्य । किं कृत इति को वेत्तीत्यर्थः ।। ३६ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कुपितानुनयकोविदा नागांगना आहुः । दंडानुमोदनम् दंडप्रशंसा षड्भिः श्लोकैरष्टत्रिंशदंतैः, ततो दशभिरष्टचत्वारिंशदंतैः, ततः पंचभिस्त्रिपंचाशदंतैः । पन्नगयोषिताम् सर्पस्त्रीणाम् (१) न्यायादनपेतो न्याय्य उचितः । अस्मिन् सर्पे । निग्रहानुग्रहकर्तृत्वेन किमहं विषमस्तत्राहुः—न चेति । रिपोः सुतानामिति षष्ठ्यौ सप्तम्यर्थे । रिपौ सुतेषु चेत्यर्थः । दमम् दंडम्, खलोऽयं दंडार्ह इत्यालोचयन्निति भावः । 'फलम्' इति पाठे तु अपराधानुरूपं फलं विचारयन्नित्यर्थः । यद्वा—रिपोः सुतानां रिपुसुतेषु अपिना स्वसुतेषु, च तुल्यदृष्टेः रिपोरपि पुत्रस्य प्रह्लादस्य शिष्टस्य पालनदर्शनात्स्वस्यापि सुतस्य नरकासुरस्य वधदर्शनाच्चेति भावः। न च खलनिग्रहेऽपि नैर्घृण्यमित्याहुः—धत्स इति । खलत्वहेतुकनानानरकदुःखोपशमपूर्वकनित्यसुखमयमोक्षलक्षणं फलमेव दीयते मयेत्यनुशंसन्कथयन्नेव दमं दंडं धत्स इति ।। ३३ ।। पूर्वं निग्रहदृष्टिरस्माकं प्रमादोऽतः क्षम्यतामित्याहुः—निग्रहोऽपीति । असताम् असद्योनिप्राप्तानाम् । यस्मात् पापात् । अमुष्य अस्मत्पतेः । दंदशूकत्वम् । तन्मूलपापनिवर्त्तकः सर्पयोनिकारणीभूताघनिवर्त्तको दंडोऽतः पापनिवर्त्तकत्वादनुग्रह एवेति संबंधः । इत्यर्थ इति । 'क्रोधोऽपि देवस्य वरेण तुल्यः' इत्युक्तिमाश्रित्य लोकदृष्टौ निग्रहोऽपि फलतोऽनुग्रह एवेति भावः ।। ३४ ।। अहो अस्य भाग्यमित्याहुः—महांश्चेति । अनेन सर्पेण । पूर्वम् पूर्वजन्मनि । यतस्तप आदेः । सर्वजीवः सर्वात्मा ।। ३५ ।। नहि तपआदिभिस्तव पादधृतिर्मस्तके जायतेऽत्यंतकृपामृत इत्याहुः—न तप इति । कस्य तपआदेः कर्मणः। अनुभावः प्रभावः । सोंघ्रिरेणुस्पर्शाधिकारः । किं कृतः केन कृतः । इत्यर्थ इति । न कोपीति भावः ।। ३६ ।।

---

[1] शंस्यं—विज. ; धर्ममेवानुशंसन्—च पु टी. । [2] भवता—वीर. विज. । [3] सर्वजीवनः—वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अस्मिन् दण्डो न्याय्य एव; तत्र हेतुः, कृतानि किल्बिषाणि गरुडे श्रीयमुनावृन्दावनयोस्तज्जीवसमूहे श्रीभगवति च अपराधा येन तादृशे यस्तवावतारः प्राकट्यमात्रं खलानां साधुद्रोहिणां निग्रहाय भवति एवं साधूनामनुग्रहाय चेति सूचितम् अन्यथा तु न निग्रहो न चानुग्रह इत्याह—रिपोरिति। रिपूणां सुतानां च सम्बन्धे च तुल्या दृष्टिर्यस्य तादृशस्य न च खलनिग्रहेऽपि नैर्घृण्यमित्याह—धत्स इति। फलं नानानरकादि दुःखहेतुत्वखलत्वोपशमपूर्वकं नित्यसुखदानलक्षणम् ॥ ३३ ॥ हि निश्चितं नोऽस्मान् प्रतिदण्डो दण्डत्वेन दृश्यमानोऽप्ययमनुग्रह एव भवता कृतः यतस्ते त्वया कृतः सोऽयमसतां कल्मषापह एव स्यात् यद्यस्मात् कल्मषादमुष्य देहिनः कर्मभिर्नानादेहं प्राप्नुवतः सम्प्रति दन्दशूकत्वं जातं कृते त्वनुगृहे निरन्तरभवदावेशेन जीवन्मुक्तत्वात् दन्दशूकत्वाभास एव स्थास्यतीत्यर्थः। तस्मात् क्रोधोऽपीत्यादि। यद्वा, असतां कल्मषापहोऽपि ते त्वया दण्डो नो कृतो कृतः यद्यस्मात् अमुष्य सर्पत्वं सर्पशरीरं तत्खलु अनुग्रहे निमित्ते त्वया सम्मतमेव तथा क्रोधो जातिस्वभावोऽपि अनुग्रहे निमित्त एव त्वया सम्मतः अङ्गीकृतः स्वक्रीडायै योजित इत्यर्थः। भोगपरिवेष्टनस्वीकारात् तथा फणेषु क्रोधेनोन्नम्यमानेषु परमहर्षेण नृत्याचरणाच्च ॥ ३४ ॥ तपः कृच्छ्रादि सुष्ठु तप्तं कृतं सौष्ठवमेव दर्शयति—निरस्तेति विशेषणद्वयेन। तेन चैच्छिकेन तस्य सन्तोषमसम्भाव्य पक्षान्तरमाहुर्धर्म इति, स्वधर्मो नित्यः कृत इति शेषः। एवं स्वरूपेण सामर्थ्यमुक्त्वा विशेषणेनाप्याहुः—सर्वजनानुकम्पयेति। अनुकम्पा सर्वात्मना हिताचरणं तत्पूर्वक इत्यर्थः। पूर्वमिति एतज्जन्मनि तत्तदसम्भवात् यतो याभ्यां तपोधर्माभ्यां त्वत्सन्तोषार्थं कृताभ्यामिति गम्यं सर्वे जीवा यस्येति जीवेषु सर्वेषु समानाद्यभावेन सम्माननाऽनुकम्पनादिना च तव तत्प्रभोस्तोषसिद्धेः ॥ ३५ ॥ तव श्रीगोकुलेश्वररूपस्याङ्घ्रिरेणूनां स्पर्शः तत्राधिकारः अस्यापराधिनः कालियस्य कतमस्य कारणस्याऽनुभावः फलं तन्न विद्मः तत्र हेतुर्यदिति तादृशतप आदिप्रसाद्या श्रीरपि ललना परमसुकोमलाऽपि यद्वाञ्छया कामात् त्वद्विधपरमधवसङ्गमयतत्तद्भोगान् विहाय धृतव्रता बद्धनियमा सती तप आचरदेव न तु तं प्रापेत्यर्थः। प्राप्तौ सत्यां "कस्यानुभावोऽस्य न देव ! विद्महे" इति नोच्यतेति भावः। तच्च युक्तमेवेति सम्बोधयन्ति—देव हे अद्भुतानन्तमहिम्ना द्योतमान ! इति। एतदुक्तं भवति श्रीरियं वैकुण्ठेश्वरादिप्रेयसीरूपा न तु गोपरामारूपा रेखादिरूपा च 'गोप्योऽन्तरेण भुजयोरपि यत्स्पृहा श्रीः" इति तदुक्तेस्तस्मिन्नेव पर्यवसानात् सूक्ष्मस्वर्णरेखारूपेण तद्वामवक्षो भागे स्थितत्वाच्च तपोऽत्र स्त्रीत्वात् स्वपत्याराधनम् अत एव पूर्वत उत्कृष्टत्वं श्रीकृष्णस्य तेन सहैकात्म्यज्ञानात्तथापि सौन्दर्यादिवैशिष्ट्येन लोभविशेषात् तद्वाञ्छात्वं च युक्तमिति श्रीत्वेन सर्वासां तासामैकात्म्ये सत्यप्यन्यतमाया अभिलाषः प्रादुर्भावभेदेनाभिमानभेदात् यथा वैकुण्ठनाथादिसङ्गिनीष्वपि तत्तल्लक्ष्मीषु सीतादीनां श्रीरामविरहाद्यं श्रूयत इति तस्याश्च तप आदिना त्रिकालमप्राप्तिरेव विवक्षिता अप्राप्तिकारणं च गोपीवत्तदनन्यत्वाभाव एवेति च यद्यपि तासां परमतद्भक्तानां सङ्ग एव श्रीवृन्दावनान्तर्यमुनावास एव च हेतुरस्ति तथापि स्वावमाननात् तद्वासस्य च तद्रजःस्पर्शमयत्वेन फलान्तःपातात् तदप्रस्ताव इति ज्ञेयम् ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृतं किल्विषमपराधो येन तस्मिन्। न्याय्यत्वे हेतुः, तवेत्यादि। यद्यपि तत्त्वतः प्रेमभक्तिविस्तारणायावतारस्तथापि खलनिग्रहे सत्येव तत् सम्पद्यत इत्याशयेन, किंवा दण्डप्रसंगानुसारेण खलनिग्रहायेत्युक्तं फलं हितमेवालोचयन्, अतो वैषम्यं किञ्चित्तत्र कुत्रापि न भजसीत्याहुः—रिपोरिति षष्ठी सप्तम्यर्थे दुःखभावेन द्वेष्टरि साधुत्वेन सुतवत् स्नेहविषयेष्वपि तुल्यदृष्टिः सन्, अन्यथा तत्तद्धितासिद्धिः, यद्वा, रिपोः सुतानामपि कृतकिल्बिषाणां सतां दमं धत्से। कथम् ? तुल्यदृष्टिः सन् रिपौ सुतेष्वपि साम्येनेत्यर्थः। रिपोरित्येकत्वं जात्यपेक्षया। षष्ठ्यन्तपाठे परमेश्वरत्वेन तत्र तत्र तुल्यदृष्टिरपि तव। अन्यत्तथैव। अयमेव पाठस्तेषां सम्मतः। धत्से दममिति धारणादन्यथा विशेषणत्वेन वर्त्तमानस्य रिपोरित्यादेः सर्व्वस्यापि धार्य्यत्वेन रिपोरिति लिखनोपपत्तिः, यद्वा, फलमेवेति लेख्ये लेखकभ्रमात् धत्से दममिति फलमेवेत्यादिनैव वैषम्यपरिहार-सिद्धेः। एवं प्रथमान्तपाठस्तेषामपि सम्मतः स्यात्। तत्र यद्यप्यत्रानुग्रहप्रसंगो नास्ति, तथापि निग्रहानुग्रहलक्षणमिति व्याख्या सुतेष्वनुग्रहसम्भावनया, किंवा तुल्यदृष्टित्वादिनानुग्रहस्यापि सूचनादिति, अथवा दण्डस्य न्याय्यत्वे हेतुः—कृतेति, विशेषतश्चातिदुष्टे तवायं दण्डो योग्य एवेत्याहुः—तवेति, दमं खलानां धत्से। प्रथमान्तपाठे दमस्य साम्ये तात्पर्य्यम्। ननु तर्हि सर्वत्र गीयमानं परमदयालुत्वं नाम कथं सिध्येत् ? तत्राहुः—फलमेवेति हितार्थमेव तदाचरणादित्यर्थः। अन्यत् समानम् ॥ ३३ ॥ नोऽसतामिति पुंस्त्वेन निर्देशः कालियादिसंग्रहात्। हि यतः खलु निश्चितं देहिनो विचित्रं देहं प्राप्नुवतोऽपि। एवन्शब्देन कथञ्चिदपि न निग्रह इति बोध्यते। सम्यङ्मतोऽस्माभिर्विद्वद्भिर्वा। अन्यत्तैर्व्याख्यानम्। यद्वा, नोऽस्मान् प्रति, यतो दण्डोऽसतां सर्वेषां कल्मषापहो दुर्वासनोन्मूलकः। तच्चेदं साक्षादनुभूयत इत्याहुः—देहाभिमानिनोऽप्यमुष्य महापराधिनोऽप्यस्य सर्पत्वस्य यदपसरणं दृश्यत भवतीति वा शरणापत्त्या सद्बुद्ध्युत्पत्तेरतो दण्डहेतुः क्रोधोऽप्यनुग्रह एवेति सम्मतः, यद्वा, असतां कल्माषपहोऽपि ते त्वया दण्डो न कृतः, यद्यस्मादमुष्य सर्पत्वं शरीरमित्यर्थः। तथास्य क्रोधो जातिस्वभावोऽनुग्रहे निमित्त एव त्वया सम्मतः, भोगपरिवेष्टन—स्वीकारात्, तथा फणेषु क्रोधेनोन्नम्यमानेषु परमहर्षेण नृत्याचरणाच्च ॥ ३४ ॥ तपः स्वधर्माचरणं कृच्छ्रादिकं वा, सुष्ठु तप्तं

कृतम् । सौष्ठवमेव दर्शयति, निरस्तेति, विशेषणद्वयेन मदमात्सर्य्यादि कृतस्वभावकस्य तपसस्तत्तदभावेन सुष्ठुत्वम् । तेन च तस्य सन्तोषमसम्भाव्य पक्षान्तरमाहुः, धर्म इति, कृत इति शेषः, सर्वजनानुकम्पयेति सर्वजीवेष्वहिंसा-लक्षणो हिताचरणलक्षणश्चेत्यर्थः । पूर्वमित्येतज्जन्मनि तत्तदसम्भवात्, यतस्तप-आदेः सर्वे जीवा यस्येति जीवेषु सर्व्वेषु मान-मात्सर्य्य-हिंसाद्यभावेन सम्मानानुकम्पादिषु च स्वत एव तत्प्रभोस्तोषसिद्धेः ॥ ३५ ॥ तवाङ्घ्रयो रेणूनां स्पर्शस्तेष्वधिकारोऽस्यापराधिनः कालियस्य कतमस्य तपआदेरनुभावः फलम्, तन्न विद्मस्तादृशतपआदिनापि दुर्लभत्वात् । दुर्लभत्वमेवाहुः—यदिति । तच्च युक्तमेवेति सम्बोधयन्ति—देव हे अद्भुतानन्त-महिम्ना द्योतमानेति, यद्वा, हे क्रीड़ापरेतीदृशनृत्यादि-बाल्यक्रीड़ारतस्यापि तव पादरेणुस्पर्शमात्राधिकारोऽप्यधुनापि सुदुर्लभ एवेति भावः । प्रियतया नित्यसिद्धाया अपि लक्ष्म्या भूगतेऽवतारे भगवदर्थं तपश्चरणाभिप्रायेण तथोक्तमिति, यद्वा, सदा वैकुण्ठेश-वक्षःस्थयापि श्रिया कृष्णस्य माधुर्य्यातिशयं दृष्ट्वा लुब्धया तथा तल्लब्धये तपः कृतम्, तथापि तन्न लब्धम्, किन्तु केवलं गौरसूक्ष्मरेखारूपेण वक्षसि निवासाभास एव वरो लब्ध इत्यागमदिक् ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

यद्दन्दशूकत्वं येन कल्मषेणामुष्य दन्दशूकत्वमभूत्तत्कल्मषापह इत्यन्वयः । अतस्तव क्रोधोऽप्यनुग्रहरूप इत्यर्थः ॥ ३५ ॥ कस्य पुण्यस्य श्रीललना वेदवतीसंज्ञा श्रीस्स्वयं तपश्चारेति श्रीमद्रामायणे श्रूयते ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्र भगवतस्तदितरासाध्यं स्वभर्तृप्राणसंरक्षणात्मकं स्वाभीष्टोपायतां महाविश्वासपूर्वकं वाचिकीर्षवस्तावद्याचनीयत्वोपयुक्तगुणवत्तां स्तुतिव्याजेनाविष्कुर्वन्त्यस्तावद्रक्षणीयस्वस्वभर्तुः कार्पण्यं भवान्तरसुकृतवत्वञ्च सूचयन्त्यः प्रकृतमेतस्य दमनमहितव्याजं हितमेव तच्च समदृशा त्वया कर्तुमुचितमेवेति विज्ञापयामासुः न्याय्य इत्यादिना द्वयेन । ततश्चतुर्भिः कार्पण्यसुकृतवत्त्वे ततो दशभिर्याचनायत्वोपयुक्तगुणानाविष्कर्तुं स्तुतिः ततः पञ्चभिर्याच्ञेति विवेकः कृतं किल्बिषं हृदविदूषणात्मकं त्वद्दर्शनात्मकं वा येनास्मिन् यस्त्वया धृतो दण्डः स न्याय्य उचित एव, कृतकिल्बिष इत्यनेन तस्य दण्ड्यत्वमाकिञ्चन्यं प्रत्युत सापराधत्वं च सूचितम् अथ तद्दण्डयितृत्वं न्याय्यमित्यभिप्रायेणाहुः—तवावतारः खलानां दुष्टानां निग्रहार्थं हि तवावतारः इत्यर्थः । नन्वमारि वात्सल्यनिधेः ममैव तदनुचितमित्यत्राहुः—रिपोरिति । रिपोः सुतानामपि विषये तुल्या वैषम्यरहिता दृष्टिर्यस्य तथाभूतस्त्वं फल हितात्मकमेव अनु समनन्तरमेव शंसन् सूचयंस्तावद्दमं दण्डं धत्से करोषि रिपोः सुतानामपीत्यनेन मित्रामित्रविभागानादरेणापराधिनां सर्वेषामपि दमं धत्स इति सूचितम् अत एव तुल्यदृष्टिः यद्वा, "हरिर्दुःखानि भक्तानां हितबुद्ध्या करोति वै । शस्त्रक्षुराग्निकर्माणि स्वपुत्राय पिता यथा" इत्युक्तरीत्या अनुगृह्यमाणानां तावत्पुत्रादीनामिव सर्वेषामपि तादात्विकहितव्याजं हितमेव करोषीति सूचितम् अतोऽयं दण्डोऽनुग्रहरूप एव वात्सल्यनिधेस्तवोचितश्चेति भावः ॥ ३३ ॥ दण्डस्याऽनुग्रहरूपतामेव स्पष्टयन्ति—अनुग्रह इति । भवता यः कृतो दण्डः सोऽयं नोऽस्माकमस्मद्विषये अनुग्रह एव, कुतः ? यतस्ते दण्डस्त्वत्कर्तृकदण्डोऽसतां नोऽस्माकं कल्मषापहः दुरितापहः किं तत्कल्मषं यदपहन्ता मद्दण्डस्तत्राहुः—अमुष्य देहिनः कालियाख्यजीवस्य यत् यस्मात्कल्मषाद्दन्दशूकत्वं सर्पत्वं प्राप्तमिति शेषः । तत्कल्मषापह इत्यर्थः । अतस्तव क्रोधोऽप्यनुग्रह एवाऽनुग्रहगर्भ एव सम्यक् मतो विज्ञातः ॥ ३४ ॥ कृतकिल्विषे दन्दशूकत्वं सर्पत्वमिति पदद्वयेन साधनान्यतरराहित्यात्मकमाकिञ्चन्यरूपं कार्पण्यं सूचितम् अथेश्वरानुग्रहनिमित्तं सुकृतवत्त्वमनुमान्ति—तप इति । अनेनास्मद्भर्त्रा पूर्वं पूर्वस्मिन् जन्मनि निरस्ताहङ्कारेण मानदेन महद्भ्यः पूजाप्रदेन च सता किं तपः सुततं सुष्ठु कृतं पाकं पचतीतिवन्निर्देशः । अथवा सर्वभूतानुकम्पया कश्चिद्धर्मो वा अनुष्ठितः स्यात्, कथमेवं ज्ञायते ? इत्यत्राहुः यतः सर्वान् जीवयति "को ह्येवान्यात्कः प्राण्यात्" इति श्रुत्युक्तरीत्या भोगमोक्षप्रदानेनाज्जीवयतीति तथा भवांस्तुष्यति तुष्टा भवितुं तावद्दण्डयतीति भावः । तपोधर्मयोरनिर्वचनीयत्वाभिप्रायकः किंशब्दः अनेनानुष्ठितौ तपोधर्मौ इदमित्थन्तया नास्माभिरल्पबुद्धिभिर्निर्वक्तुं शक्यौ किन्तु केवलं सर्वान्तरात्मनो भवतस्तोषाल्लिङ्गात् तन्निमित्त किञ्चित्तप आदिकं कृतमित्यनुमास्यामह इति भावः यद्वा, तप इत्यादिभिश्चतुर्भिः कार्पण्यमेवाविष्क्रियते अयमर्थः पूर्वमनुग्रहरूपाद्दण्डात्प्रागेवानेन निर्गतः क्रूरेणानेन सर्पेण किं तपः सुततं न किञ्चित् अथवा को धर्मः न कश्चित् यतो येन तपसा धर्मेण वा भवांस्तुष्यति तन्न किञ्चिदपि कृतमित्यर्थः । स्वभावतः क्रूरस्य निरस्तमानत्वाद्यसम्भावनाप्रदर्शनाय तद्विशेषणानि ॥ ३५ ॥ कस्येति । अस्य कालियस्य त्वत्पादरजःस्पर्शाधिकारः कस्य पुण्यस्यानुभावः प्रभावस्तत्पुण्यमयं न वेद वयमपि न विद्मः यद्वा, कस्य न कस्यचिदपि तादृशं पुण्यमस्मिन् सर्पजातौ किञ्चिदपि सम्भावितमित्ययं न वेद वयमपि न विद्मह इत्यर्थः । तवेत्यनेन तदङ्घ्रिरेणोर्दौर्लभ्यमभिप्रेतं तदेवाविष्कुर्वन्ति—यद्वाञ्छयेति । यद्वाञ्छया यदङ्घ्रिरेणुलिप्सया श्रीललना श्रीर्लक्ष्मीरेव ललना यस्याः पादरजो ब्रह्मादियो लिप्सन्ति सा श्रीरपि कामानङ्घ्रिरेणुव्यतिरिक्तान् पुरुषार्थान् विहायाऽनिच्छन्ति धृतव्रता धृतं तपश्चर्योपयुक्तम् इन्द्रियजयात्मकं व्रतं यथा तथाभूतं तपो बहुकालमचरत् पुरा श्रीर्वेदवतीरूपेण तपश्चचारेति श्रीरामायणकथाऽत्र सूच्यते ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दण्डः शासनं न्याय्यो युक्तः रिपोः सुतानामिति षष्ठी सप्तम्यर्थे रिपोः सुतेष्वपि तुल्यदृष्टेः त्वं तेषूभयेष्वपराधेषु दमं दण्डं धत्से, कथं धत्से ? इति तत्राह—फलमिति। अनुशंस्यम् अपराधानुरूपं फलम् अनुग्रहलक्षणं दण्डं करोषीत्यन्वयः ॥ ३३ ॥

ननु निगृह्णतः कथमनुग्रहो भवतीत्यत्राह–अनुग्रह इति। हिशब्द एवार्थे भवता सर्वपूज्येन त्वया नः अस्माकं अयमनुग्रह एव कृतो न तु विरोधः कृतः ते त्वया क्रियमाणो दण्डो ऽसतामसाधुभावानां दुष्टकर्मणां तामसयोनिं प्राप्तानां कल्मषापहः खलु पापपरिहारक एव अनुष्यासत्वं कथमत्राह यदिति। अमुष्य कालियनाम्नो दन्दशूकत्वं तत्तत्प्राणिदशनशीलयोनित्वमभूत् इति ज्ञायते यद्यस्मात्तस्मादसत्वं योग्यं तथा अतस्ते तव क्रोधः क्रोधकारणदण्डो योग्यस्य देहिनोऽनुग्रहः सम्मतः अस्माभिः प्रतिपन्न इत्यन्वयः "दण्डोऽपि भगवच्चीर्णोऽ ममैषोनुग्रहः कृतः" इत्यादिस्मृतेर्मुक्तिमत एवायं विशेष इति ज्ञायते ॥ ३४ ॥ यद्दन्दशूकत्वमपि न दुष्कर्मनिमित्तमपि तु पूर्वजन्मन्यत्युत्कटत्वद्विषयतप आदिप्रभावोपनतमिति मन्यामहे "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते" यतोऽस्य गवादिप्राणिद्रोहत्वदर्शनोत्पन्नपापपरिहाराय तव लक्ष्म्यादिसर्वदेवतावाञ्छितसेवाचरणसरोजरेणुमन्दिरमूर्द्धाऽभूदिति भावेन वदन्ति तप इत्यादिना। भूदानादिलक्षणो धर्मः सर्वेषां जीवानां प्राणभूतः सर्वान् जीवयतीति वा ॥३५ ॥ तप आदिषु कस्य पुण्यस्यानुभवोऽयं प्रभावः अध्यवसायो वा काम्यन्त इति कामाः विषयास्तान् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यद्वाञ्छयेति श्रीरियं वैकुण्ठेश्वरादिप्रेयसीरूपा तपोऽत्र स्त्रीत्वात् स्वपत्याराधनम् अत एव पूर्वत उत्कृष्टत्वं श्रीव्रजेन्द्रनन्दनरूपाविर्भावविशेषेऽस्मिन् लोभविशेषात्तद्वाञ्छत्वं च युक्तं तस्याश्च तप आदिना त्रिकालप्राप्तिरेव विवक्षिता कस्यानुभावोऽस्येत्यादेः अप्राप्तिकारणञ्च गोपीवत्तदन्यत्वाभाव एव तासां परमतद्भक्तानां सङ्ग एव यद्यपि श्रीवृन्दावनान्तर्वास एव च हेतुरस्ति तथापि स्वावमाननात्तद्वासस्य तद्रजस्पर्शमयत्वेन फलान्तःपातात् तदप्रस्ताव इति वज् ज्ञेयम् ॥ ३६–४४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

आगत्य यदुचुस्तदाह—तपः सुतप्तमित्यादि। भो नाथ! अनेनास्मत्पतिना किं तपः सुष्ठु विधिपूर्वकं तप्तम्! अस्य तमोयोनेः कथं नाम तप इत्याशङ्क्याह–पूर्वपूर्वस्मिन् जन्मनि। ननु पूर्वजन्मन्यप्ययं महामत्त एवासीत्? नैवमित्याह–निरस्तमानेन। न केवलं स्वयं निरस्तमान आसीत् मानदोऽप्यासीदित्याह–मानदेन सर्वभूत–सम्मानकारिणा। तपसः फलं तावदीदृशं न भवतीत्याह–धर्मोऽथवा कः सुकृत इति लिङ्गव्यत्ययेनान्वेतव्यः। धर्मो भगवदुक्तिलक्षणो धर्मः अन्यथा तप इत्यनेनैव धर्मो लभ्यते। भक्तिलक्षणो धर्मोऽपि साधनरूप एवेति न स च साध्यरूप एवेत्याह–सर्वजनानुकम्पया सह। सर्वभूतानुकम्पा हि भक्तौ ज्ञानेन वा सिद्धस्यैव भवति तेनायं पूर्वजन्मन्युत्तमभक्त एवासीदिति निश्चयः। ननु कुत इदं वो निश्चयज्ञानमित्याह–यत इत्यादि। यतो हेतोर्भवान् श्रीकृष्णस्तुष्यति। तव तोषस्तु न तपआदिभिर्भवति, अपि तु निष्कैतवयैव भक्त्या। तथा च (भा.७.७।५२) " न दानं न तपो नेज्या न शौचं न व्रतानि च। प्रीयतेऽमलया भक्त्या हरिः" इत्यादि ॥ ३५ ॥ ननु कथमहं तुष्यामि? हन्तुमेव प्रवृत्तोऽहम्! पश्यत मृतप्राय एवायम; किमितोषकार्यम्? अथ किमित्याहुः कस्यानुभाव इत्यादि। हे नाथ! तोषश्चेन्नायम्, तदायं कस्यानुभावः तथाविधस्यान्यस्य सम्भवात्। कोऽसावनुभाव इत्याहुः–तथाङ्घ्रिरेणुस्पर्शाधिकारः। तथाङ्घ्रिरेणुस्पर्शाधिकार एव तोषस्यानुभावः। अस्य सम्यक् स्पर्श एवाभूत्। अस्तु रेणुस्पर्शस्याधिकारः यस्याङ्घ्रेः सम्यक् स्पर्शस्य रेणुस्पर्शाधिकारस्य वा वाञ्छया श्रीर्ललना वक्षःस्थितापीति बोद्धव्यम्, तपोऽचरत्। किं कृत्वा? कामान् स्वयमुपस्थितान् भोगान् विहाय। कीदृशी? धृतव्रता ॥ ३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

यतो भवांस्तुष्यतीत्यस्यायमभिप्रायः तोषश्चेत्तव न भवति तदा अपराद्धोऽयं फणिपतिस्तदैव व्यापादितोऽभविष्यत् न तच्चेत् तेन तव तोषश्च प्रसादश्चानुमतः प्रसादहेतुस्त्विह जन्मनि नास्य दृश्यते तेन प्राक्तनं किमपि तपोऽनुमातव्यम् एतमेवार्थं विवृण्वते कस्यानुभाव इत्यादि येनायं त्वत्पादस्पर्शाधिकारी बभूवेत्यर्थः ॥ ३५–३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रथमं स्तुवन्त्यः कोयमुपशमयितुं दण्डमनुमोदयन्ति न्याय इति अनेन साधुद्रोहलक्षणस्य स्वखलत्वस्य फलमवश्य प्राप्यं प्राप्तमिति भावः। शिष्टपालनदुष्टनिग्रहकृतस्तव तु क्वापि वैषम्यं नैवास्तीत्याहुः रिपोः सुतानां रिपुसुतेषु अपिकारात् स्वसुतेषु च तुल्यदृष्टेः रिपोरपि पुत्रस्य शिष्टस्य प्रह्लादस्य पालनदर्शनात् स्वस्यापि सुतस्य नरकासुरस्य वधदर्शनाच्चेति भावः। नच खलनिग्रहेऽपि नैर्घृण्यमित्याहुः धत्से इति। खलत्वहेतुकनानानरकदुःखोपशमपूर्वकनित्यसुखमयमोक्षलक्षणं फलमेव दीयते मयेत्यनुशंसन्

कथयन्नेव दमं दण्डं धत्से ॥ ३३ ॥ तस्मादुष्टेष्वपि तव वस्तुतस्त्वानुग्रह एव निग्रहाकार इत्याहुः अनुग्रह इति । नोऽस्माकं दण्डः कल्मषं प्राचीनविविधपापम् अपहन्तीति सः यतः कल्मषात् अमुष्य देहिनो जीवस्य दन्दशूकत्व तस्मात् क्रोधोऽपीत्यादि ॥ ३४ ॥ इदानीं तु निग्रहाकारोपि नैवायमनुग्रहः किन्तु शिष्टजनता कष्टलभ्यमपि वस्त्वयमनायासेनैव लभते स्म यत्तत्र किं प्राचीनं सुपुण्यमस्तीति वितर्कयन्त्य आहुः तप इति । निरस्तमानेन गर्वशून्यत्वादन्यकृतसम्माननाभिलाषरहितेन मानदेन अन्येभ्यो मानन्ददतेति तपसो वैष्णवीयत्वं सूचितं वैष्णवेतरेषु तपस्विष्वमानित्वमानदत्वादर्शनात् "नाहं दानैर्न तपसा" इति त्वदुक्तेरन्यतपसस्त्वत्प्रसादकत्वाभावाच्च सर्वजनानुकम्पया उपलक्षितो यो धर्मः सकृत् इति धर्मस्यापि वैष्णवीयत्वं कर्मिणां सर्वभूतानुकम्पयानुत्पत्तेः यतस्तपसो धर्माद्वा हेतोस्तुष्यति अस्य शिरस्सु रङ्गस्थलीकृतेषु प्रहर्षनृत्याचरणात् सर्वजीवः सम्माननानुकम्पादिना सर्वजीवेषु सन्तोषितेषु सर्वजीवमन्दिरो भवानपि सन्तुष्यतीत्यर्थः । श्लेषेण सर्वांस्त्वं जीवयसि त्वत्सन्तोषकाममेव किं पार्ष्णिप्रहारैर्हंसीति द्योतितम् ॥ ३५ ॥ किञ्च न तप आदिहेतुक एष भाग्योदयः किन्त्वतर्क्यं तव कृपावैभवमेवेदमित्याहुः—कस्येति त्रिभिः । अस्य महानीचस्याऽपि कालियस्य कस्य तावदनुभावः फलं तन्न जानीमहे फलमेव किं दृष्टं तत्राहुः तव नन्दपुत्रस्य अङ्घ्रिरेणोरपि स्पर्शे स्वकर्तृको योऽधिकारः सोऽपि तप आदिसर्वसुकृतदुर्लभः अयं तु अङ्घ्रिद्वयकर्तृकं स्पर्शं तं च नृत्यलक्षणं तत्रापि स्वशिरस्सु प्रापेति भाग्यस्य कियान् महिमा वाच्य इति भावः । ब्रह्मादिसर्वभक्तेभ्योऽधिकापि श्रीस्तव नारायणरूपस्य ललनापि यस्य गोपालरूपस्य तव चरणस्पर्शवाञ्छया तव आचरत् तदपि न प्राप ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वेश्वरेण त्वया सर्वोद्वेजकेऽस्मिन् दण्डो हितायैव कृत इति दण्डानुमोदनपूर्वकं कालीयभाग्यं वर्णयन्ति न्याय्य इति षड्भिः । फलं हितमेवानुशंसन् आलोचयन् दमं दण्डं धत्से ॥ ३३ ॥निग्रहो हितायैव कृत इत्युक्तमेव साधयन्ति अनुग्रह इति भवता। कृतोऽयं दण्डः नोऽस्माकमनुग्रह एव हि यतस्ते दण्डः असतां कल्मषापहः पापनाशकः यद्यस्मात् कल्मषात् अमुष्य दन्दशूकत्वं सर्पत्वम् अतस्ते क्रोधोऽपि अनुग्रह एव सम्मतः ॥ ३४ ॥ अनुग्रहनिमित्तं किमपि तप आद्यनेन पूर्वमनुष्ठितमित्याहुः—तप इति । अनेन किञ्चिमप्यस्मद्बुद्ध्यगोचरं तपः सुततम् अथवा कश्चिद्धर्मः स्वनुष्ठितः यतः सर्वान् जीवयतीति सर्वजीवो भवांस्तुष्यति शिरस्स्वङ्घ्र्यर्पणेनास्मद्भर्तारं पवित्रीकराषीति भावः ॥ ३५ ॥ निमित्तानुग्रहस्वीकारे वैषम्यादिदोषप्रसङ्गात्किमप्यनुग्रहनिमित्तं तप आद्यस्यास्तीत्युक्तम् तद्विशेषतस्तु वयं न विद्मह इत्याहुः यद्वाञ्छया यस्याङ्घ्रिरेणुस्पर्शाधिकारस्य वाञ्छया यस्याः विश्वमातुर्ब्रह्मादयोऽपि पादपद्मरेणुस्पर्शाधिकारमिच्छन्ति सा श्रीरपि ललना भगवतोऽतिप्रिया नित्यसहचरी अपि लोलावशाद्वियुक्ता यदायदाऽभवत्प्रादुर्भावो चातस्तदा तदा तप आचरत् स तवाङ्घ्रिरेणुस्पर्शाधिकारः अस्य नागस्य कस्यानुभावः किमाकारस्य तप आदेरनुभावः, हे देव ! वयं न विद्महे न तद्विदः तवाङ्घ्रिरेणुस्पर्शाधिकारणं तप आदिकमपि अधिकारतः स्वरूपतश्च गहनमेवातो भवत्कृपा सर्वत्र कारणमिति भावः ॥ ३६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

नागपत्न्य ऊचुरिति—

षड्भिर्दण्डस्य युक्तत्वं दशभिः प्रणतिः प्रभो। पञ्चभिः प्रार्थना चेति स्तुतिः कालिययोषिताम् ॥

तत्र प्रथमं कोपोपशमनार्थं पतिदण्डस्य युक्तत्वमाहुर्न्याय्य इति खलेनानेन खलतायाः फलमवश्यं प्राप्यमित्यर्थः । साध्वसाधुत्राणदण्डनकर्त्तस्तव न वैषम्यमित्याह—रिपोः सुतानामपि स्वसुतानाञ्च तुल्यदृष्टेः रिपुसुतस्य साधोः प्रह्लादस्य त्राणात् स्वसुतस्यासाधोः भौमस्य विनाशाच्चेत्यर्थः । न च खले दण्डो वैषम्यमित्याह— धत्से इति अनेन दण्डेन साधुत्वं भावीति फलमेवाभिशंसन् दमं धत्से इति ॥ ३३ ॥ निग्रहोऽनुग्रहायेत्युक्तम् इदानीं सोऽनुग्रह एवेत्याहुः । अहेरयं दण्डोऽनुग्रह एव कृतः असतां ते दण्डो यतः कल्मषापहो भवति । यतः कल्मषादमुष्य देहिनो जीवस्य दन्दशूकत्वं सर्पत्वमभूत् तस्मादक्रोधोऽपीत्यादि क्रोधत्वेन प्रतीतोऽपि दण्डोऽनुग्रह एव सतां सम्मतः । इत्थं वारोषणो ह्यसौ देव इति स्मृतिः सङ्गता ॥ ३४ ॥ अनुग्रहरूपे दण्डे तस्मिन् पुरातनं पुण्यं सम्भावयन्ति तप इति निरस्तमानेन स्वसत्कारस्पृहाशून्येन अन्येभ्यो मानदेनेति तपसो विष्णूद्देश्यकत्वं व्यज्यते, तदन्यतपसि तथात्वादर्शनात् 'नाहं वेदैर्न तपसा" इत्यादि वाक्यात्तेन त्वदनुग्रहाभावाच्च सर्वजनानुकम्पया धर्मो वेति तस्यापि तदुद्देश्यत्वं स्वर्गाद्युद्देश्यकधर्मं तस्य अभावात् यतस्तपसो धर्माद्वा भवांस्तुष्यति अस्य फणारङ्गस्थलीविधाय प्रहर्षेण नृत्यसीत्यर्थः । सर्वजीवो निखिलजीवनप्रदः तेनास्यापि जीवनदानं साम्प्रतमिति भावः ॥ ३५ ॥ किञ्चायं भाग्योदयस्तपोधर्माभ्यां न भवेत् किन्तु करुणैव तवेयमित्याहुः—कस्येति त्रिभिः । कस्य साधनस्यायमनुभावः फलमिति वयं न विद्महे । किं तदित्यत्राहुः—अस्यातिदुष्टस्याहेस्तव नन्दसूनोरङ्घ्रिरेणोः स्पर्शे योऽधिकारः करुणैवेयमिति द्रढयन्ति यस्य नन्दसूनोस्तव चरणस्पर्शवाञ्छया ब्रह्मादिवन्द्यापि श्रीर्ललना वैकुण्ठगतान् भोगान् विहाय तपोऽचरत् तथापि न प्रायः यत्तपः स्थानं श्रीवनमिति ख्यातम् ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कृतकिल्बिषेऽस्मिन्विषधरे दण्डः शिक्षा न्याय्यो न्यायादनपेतो न्यायाप्राप्त इति यावत्। रिपोर्वैरिवारे सुतानां पुत्रेष्वपि तुल्या समा तत्तद्योग्यतानुसारिणी दृष्टिर्यस्य तस्य तवावतारः खलनिग्रहायैव। अनुशास्यमानोऽनुगुणतया वर्णनीयं फल तद्रूपं दममनुग्रहं धत्से धरसि करोषीति यावत्॥ ३३॥ अनुग्रहोऽयं भवता कृत इति श्लोके केशवकृतदमनमात्रस्य पात्राधिकारिमात्रपापनाशकता प्रतीयते। तथा चेज्जरान्सधादिदुर्जनैर्नो नाशकतापन्ना। सा च मानदेनेत्यतो मानतस्तदभिप्रायमाह॥ दण्डोऽपीति। एष भगवच्चीर्णो दण्डो ममोपर्यनुग्रहः कृत इति चिन्तयतां। तदपि न साल्वादिचिन्तनवदित्याह॥ भक्त्येति। अलं शुभकारि भवति। तत्राप्येवं दण्डे कृते द्वेषमेव कृतवान्भगवानिति द्वेषं कुर्वतां तमःप्राप्त्यै यथाऽशुभाप्त्यै तथा भवेदिति च महाकौर्म इति शेषः॥ ततश्चायं श्लोकार्थः॥ ननु निग्रहः कृतोऽयमनुग्रहः कथमित्यत एवमनुसन्धाने स तथा नैवं चेदनेवमित्यावेदयन्ति॥ अनुग्रह इति। भवता कृतो दण्डो न उपर्यनुग्रहस्तदात्मा हि यतो ते दण्डोऽसतामौपाधिकासत्कर्मणां कल्मषापहः पापहरः खलु निश्चयः। अयं तु तिर्यग्जन्मवानिति भवति चासन्नित्याह॥ यदिति। अमुष्य देहिनः कालियस्य यद्यतो दन्दशूकत्वं जनदंशनयोनित्वं तदयमसदत एतज्जन्मापादकपापमोचकत्वाद्वैतद्योनावपि त्वच्चरणस्मरणकारणत्वाद्वाऽयं क्रोधोऽपि तेऽनुग्रह एवेति नः सम्मतः। येऽसत्कर्माणोऽपि दण्डे त्वता चीर्णेऽयमनुग्रहः कृतः कृतज्ञेनेति चिन्तयन्ति तेषामन्तः सत्स्वभावानां कल्मषमसुरावेशादिसन्निवेशकृतं पापमपहन्ति स तथाऽखलु यत्कल्मषमपहन्तीति वा। कं मोक्षसुखं लुनाति छिनत्तीति तच्च तत्कल्मषं च तन्न भवतीत्यखलुकल्मषं तदपहन्ति नाशयतीति स तथेति वा। अनेन तरातकस्य स्वरूपाननुबन्धिता ध्वन्यते। येषामसतामसत्स्वभावानां चीर्णे दण्डे क्रोधो जरासन्धादीनां भवता कृतो दण्डः कल्मषापहः पातकघातकः खलु नेत्यप्यर्थो मानानुमानेन ज्ञेयः। अलंखल्वोः प्रतिषेधयोः खलु निषेधने च वीप्सायामिति विश्वः। पापापनोदेन तेषां तमःप्राप्त्यै भवतीति भावः। उपलक्षणमेतत्। असतां मध्यमानां च दण्डः खलुश्च कल्मषापहश्चेत्युभयरूप इत्यपि योजना ज्ञेया। इति भवता कृतो भवोऽस्त्येषामित्यर्शआद्यचि संसारिणस्तेषां भावो भविता नित्यसंसारिता कृता येन स इति तदर्थ इति वा। उतामृतत्वस्येशान इतिवद्वर्गार्थे वा त्वप्रत्ययवदयं तल्। संसारसङ्घकृदिति वा। अमुष्यानुं पतिभिश्चामिति यावत् नो देहीत्यान्तरङ्गिको भावो भामिनीनां ज्ञेयः॥ ३४॥ स्वपतिरपि न पतितः किन्तु त्वदनुग्रहपात्रमिति महानित्याहुः॥ तप इति। अनेन निरस्तो मानोऽहन्ता येन स तेन तथा मानदेन माननियमानप्रदेन मानदेन मौनव्रतवता वा मा न विद्यते नदः समुद्रः स्वावासत्वेन यस्य स इति प्रस्तुतविवक्षया। इदानीं त्यक्तसमुद्रवासेन प्राक् किं किंरूपं तपः सुतप्तं कृतं निर्धारणे सप्तमी तपस्सु तन्मध्ये किं तपश्चीर्णमिति वा। यथोक्तं हरिवंशे। उत्सृज्य सागरावासं यो मया विदितः पुरा। भयात्तगराजस्य सुपर्णस्योरगाशिन इति। सर्वजनानुकम्पया सर्वेषु जनेष्वकम्पया धर्मो भूदानादिलक्षणोऽअथवाऽनुष्ठितः कुत इत्यत आह॥ यत इति। भवान्सर्वजीवः सर्वजीवनदस्तुष्यति॥ ३५॥ हे देव। अयं कस्य तपआद्यन्यतमस्यानुभावः प्रभाव इति न विद्महे न जानीमः। हे देव न विद्मेति वा। अयं क इत्यत आह॥ तवाङ्घ्रिरेणुस्पर्शाधिकार इति। अङ्घ्र्यो रेणवो धुलयस्तेषां स्पर्शः सम्बन्धस्तस्मिन्नधिकारोऽनुभाव इत्यप्यन्वेति। कुतस्तस्य दुर्मिलता चरणरेणुस्पर्शस्येत्यत आहुः॥ यदिति। ललना श्रीरपि कामानितरविषयान्विहाय सुचिरं धृतव्रता सती यद्वाञ्छया तपोऽचरच्चचार॥ ३६॥

श्रीसुबोधिनी

दण्डानुमोदनं षड्भिर्नमनं दशभिस्तथा। प्रार्थना पञ्चभिश्चेति त्रेधा स्तुतिरुदीर्यते॥ १॥
द्विविधस्यापि पापस्य सापराधस्य नाशिका। भगवान् षड्गुणस्तास्तु दशधा पञ्चधा पतिः॥ २॥

तत्र प्रथमं भगवत्कृतस्य दण्डत्वं स्वीकृत्य तस्य न्याय्यत्वमाहुर्**न्याय्यो हि दण्ड** इति, अयं मारणलक्षणो दण्डो न्यायादनपेतः, **ईश्वरो हि त्रिविधदण्डं करोति न्याय्यं न्यूनमधिकं च प्रसादमर्यादेश्वरत्वधर्मास्तत्र प्रयोजकाः**, तत्रायं न्याय्यः, **कृतं किल्बिषं** पापं येन, अनेन बहव एव विहिंसिता इत्येतर्हि पाप्युचितैव, ननु पापे दण्डधरो यमोस्ति मया कथं स कर्तव्य इति चेत् तत्राहु**स्तवावतारः** खलनिग्रहायेति, **खला हि निरन्तरं दोषकर्तारो बहुजीविनश्च**, मरणानन्तरमेव यमोधिकारी तावत्पर्यन्तमुपेक्षायां सर्वनाश एव स्यात्, अतः खलानां निग्रहार्थमेव भगवान् मध्येवतीर्णः, ननु तथापि **कश्यप**पुत्रोयं **शेष**भ्राता कथं दण्ड्य इति चेत् तत्राहू **रिपोः सुतानामपि तुल्यदृष्टेरिति, न ह्यवतीर्णः सम्बन्धमपेक्षते दण्डार्थमेव ह्यवतारात्** रिपोः **सुतानां** स्वसुतानां च सम्बन्धिनी तद्विषयिका भगवतस्तुल्यैव दृष्टिः, अन्यथाकरणे वैषम्यं स्यात्, रिपोः सम्बन्धिनी सुतसम्बन्धिनी वा सप्तम्यर्थे वा षष्ठी, किञ्च **भगवान् दण्डं न पीडार्थं करोति तथा सत्यात्मत्वं भज्येताद्यत्वं च किन्तु भगवान् पुत्रमिव तस्याग्रे सत्फलमेवानुशंसन् दमं करोति**, तदाह **धत्से दमं फलमेवानुशंस**न्निति, अतोस्याग्रे भविष्यतीति दण्डेन विनिश्चितम्॥ ३३॥ एवं भगवत्कृतस्य दण्डत्वमङ्गीकृत्येदानीं दण्ड एवायं न भवति किन्त्वनुग्रह एवेत्याहु**रनुग्रह** इति, **भवतायमनुग्रह एव कृतः**, **अहिनोहेः**, अप्रयोजकत्वान्नपुंसकत्वं, ततो नुम्. अतो वा**नुग्रहः**, **अहीनो** वानुग्रहः, ननु दुःखात्मकस्यास्य कथमनुग्रहरूपत्वम्? तत्राहु**र्दण्डोसतां** खलु **कल्मषापह** इति, **दण्डो भगवा**निति भारते व्यवस्थापितं, अतः क्लेशरूपोपि तपोवद्यागवद् दण्डोपि **कल्मष-**

नाशक इत्य**नुग्रह एव**, ननु पापस्य **प्रत्यहं** जायमानस्य दीपेनान्धकारस्येव निवृत्तिरप्यप्रयोजिकान्तथा दुःखनिवारणार्थं कोपि पापं न कुर्याद् दण्डापेक्षया। पूर्वदुःखस्यैवाल्पत्वादत आह **यद् दन्दशूकत्व**मिति, आदावसत्त्वप्रतिपादकत्वं तस्योक्तमेव तद्गमनेन सत्त्वं भवतीति च सिद्धं, **दन्दशूकत्वं** सर्पत्वमपि जातं तदपि गच्छति चेद् दन्दशूकत्वमपि **गच्छेत्** ततो **देहिन** इतिशब्दाद् देहसम्बन्धस्तदभिमानश्च गच्छेत्, अतो **बह्वर्थसाधकदण्डस्य हेतुभूतः क्रोधोप्यनुग्रह एव, न** केवलं युक्तिमात्र किन्तु **सम्मतः** सतां मतः सर्वाविप्रतिपन्नरूपः, अतो **दण्डो दण्डहेतुः क्रोधश्चानुग्रह एव** ॥ ३४ ॥ किञ्चास्तां दण्डप्रसादवार्ता, एकमत्यन्तमाश्चर्यं प्रतिभाति यदस्मिन् नृत्यं कृतवानिति तत्र हेतुं न जानीम इत्याहुस्**तपः सुतप्त**मिति, **धर्मो द्विविधः प्रवृत्तिलक्षणो** निवृत्तिलक्षणश्च **तत्र निवृत्तिलक्षणो धर्मस्तपो विद्यमानस्यैवा**त्मसम्बन्धस्य त्याजकत्वात्, **अत एव "यदा वै दीक्षित कृशो भवत्यथ मेध्यो भवती"**त्यादिवाक्यानि **सम्पादकस्तु प्रवृत्तिलक्षणो धर्म** इत्युच्यते, एकस्तु **दोषनिवृत्त्या विद्यमानमेव फलं** प्रकटीकरोत्य**परस्तु दोषचिन्तां परित्यज्यागन्तुकं** फलं साधयति, **भगवांस्त्वात्मा ईश्वरश्चज्ञानप्रसादो भक्तिप्रसादश्च**, तत्राद्ये पक्षे **तपसा ये दूरीकर्तुमशक्या दोषास्तेषु विद्यमानेषु तपसा न निवृत्तिः सम्पादयितुं शक्या, स दोषस्त्वहङ्कारात्मकः यस्तपसा न गच्छति प्रत्युताहं तपस्वीत्यधिक एवाहङ्कारो भवति,** तदर्थमाह **किं वानेन** लोकोत्तरं **तपस्त**प्तमिति येन **भवान्** परमात्मा **तुष्यति** ? तोषान्यथानुपपत्त्या तादृशमपि तपोस्तीति कल्प्यते, तत्रापि **सुतप्तं, देशकालादिसाधनानि** सम्यग्ज्ञानानि प्रकारश्च, अन्यथा षड्गुणो भगवान् न तुष्येत्, परं दोषान्तरनिराकरणार्थं धर्मद्वयमपेक्षते, तदाह **निरस्तमानेन च मानदे**नेति, **स्वयं निरभिमानो महानप्यन्यस्मै हीनायापि मानं प्रयच्छति,** तदाह स्वकृतः परकृतश्चाभिमानो गच्छतः, यद्यप्यस्य पक्षस्य तोषजनकत्वमस्ति तथापि यावता भगवान् नृत्यति तावत्तोषजनकत्वं न भवतीति पक्षान्तरमाह **धर्मोथ वे**ति, **प्रथमपक्षे** बहिस्तोषरूपनृत्यहेतुत्वं नोपपद्यतेत उभयमप्यपेक्षित, वाशब्दः समुच्चये, वाशब्दप्रयोगाच्चैवं ज्ञायते तपो निवृत्तिलक्षणो धर्मोस्तु न वा बहिस्तोषहेतुरवश्यमपेक्ष्यते, अथेति भिन्नप्रक्रमे, तेन **धर्मशास्त्रानुसारेण धर्मो नैतादृशं फलं साधयति किन्तु भगवच्छास्त्रानुसारेणैव, तत्राप्येको दोषः परिहरणीयः द्रव्यमयश्चेत् परोपद्रवकारी क्रियामयश्चेदात्मोपद्रवकारी ज्ञानमयश्च तथा, अयमेवापरितोषस्तपसि,** अतस्तद्दोषपरिहारार्थमाह **सर्वजनानुकम्पये**ति **सर्वजनेषु यानुकम्पा यत्र स्वपरद्रोहसम्भावना नास्ति, भगवच्छ्रवणकीर्तनादौ, तत्रापि कीर्तने,** ननु भगवत्तोषहेतुषु परिचर्यादिरूपेषु भगवद्धर्मेषु सत्सु कथमयमेव सर्वोपकारी धर्मस्तोषहेतुरिति चेत् तत्राह **सर्वजीव** इति, सर्वान् जीवयतीति **सर्वजीवः**, सर्वे वा जीवा यस्मादिति वा, सर्वेषां जीवात्मरूपो वा, अतः सर्वोपकारिणि धर्मे तोष उचितः, **यतो भगवान् सर्वजीवः,** अनेनैवापराधाभावोपि सूचितः, **योनि जीवस्वभावकर्मणां विरुद्धत्वादाश्चर्यम्** ॥ ३५ ॥ किञ्चास्तामिदमाश्चर्यं, इतोप्यधिकमाश्चर्यमस्तीत्याहुः **कस्येति, भगवच्चरणारविन्दरेणवो भगवदीयदेहसम्पादका** इति पूर्वमवोचाम, तादृशानां सम्बन्धोस्य च जातस्तेन ज्ञायते भवदीयदेहं प्राप्स्यतीति परं **येषामेव** कोटिजन्मोपार्जितत्रिविधधर्मसंस्कृतभूतानि तेषामेव देहं सम्पादयन्तीति **मर्यादया व्यवस्था,** साधारणसंस्कारपक्षे तूपपत्तिः सम्भवति, तत्रापि हेतुः कश्चन वक्तव्यः, स **च क्रियारूपो न** भवति, अधिकारिणामेव तथात्वसम्पादकत्वात्, अलौकिकस्तु भवति, स लोके**नुभावो** न सिद्धः, ततोस्यापि **कस्यचिदनुभावो**स्तीति ज्ञायते, परं स सम्बन्धी न निर्णीतस्तस्यानुभावस्य **प्रयोजनमाहुस्तवाङ्घ्रिरेणुस्पर्शाधिकार** इति, **तवाङ्घ्रिरेणूनां स्पर्शेधिकारो येन गुणातीता एव हि जीवास्तदधिकारिणो न तु सगुणाः कथञ्चन,** यतो महद्भिरपि सगुणैर्जीवैस्तन्न प्राप्यत इत्याह **यद्वाञ्छये**ति, श्रीः सात्त्विकी भगवच्छक्तिः, तस्याश्चेन्नाधिकारो **ब्रह्मरुद्रयोस्तत्सम्बन्धिनां च सुतरामेव नाधिकारः, ब्रह्मानन्दरूपापि** सा भवतीति तद्व्यावृत्त्यर्थमाह **ललने**ति, या श्रीः स्त्रीरूपा शक्तिरूपेति यावत्, अनेन **भगवतोन्तरङ्गदासीभूता** निरूपिता, **सापि तपः करोति दास्यसिद्ध्यर्थं तथापि न प्राप्तवती** त्रितयमेवैतत्स्थानमिति सर्वप्रसिद्धिः, न तु चरणौ, **न च वक्तव्यं** स्त्रीभावेन **भोगेच्छा तत्र** प्रतिबन्धिकेतीत्याह **विहाय कामानिति, सर्वनिवान्तःकरणाभिलाषरूपान् धर्मान्** परित्यज्य **तपः करोति न च वक्तव्यं** दीर्घकालादरनैरन्तर्याभावस्तस्या इति, तत्राहुः **सुचिरं धृतव्रते**ति, **आदरनैरन्तर्ये** व्रताभिनिवेशाज् जायेते, एवं **साधनविचारेण** रेणूनामुत्कृष्टत्वमुक्त्वा तत्स्पर्शायोग्यत्वमस्य समर्थितम् ॥ ३६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

न्याय्यो हीत्यादिस्तुतितात्पर्योक्तौ **त्रेधा** स्तुतौ हेतुमाहु**र्द्विविधस्यापी**ति, भर्तुः स्वस्य **चे**त्यर्थः, तावत्तावच्छ्लोकैस्तत्तत्स्तुतिकरणे हेतुमाहु**र्भगवानि**त्यादि, **पतिः** कालियः, **न्याय्य** इत्यत्र **प्रसादमर्यादे**ति, क्रमोत्र न विवक्षित इति यथासम्भवं योज्यम् । **अनुग्रहोय**मित्यत्राङ्गीकृत्योक्तमिति**शेषः, अतो वानुग्रहो** इति नपुंसकत्वादनुग्रहो **यद्वान्यस्य** दण्डो **दुःखरूप** एवैतस्य त्वहितत्वान्निकृष्टदेहस्य दमन**मनुग्रह** एवे**त्यर्थः, अहिन** इत्यत्र **वर्णविकृति**मङ्गीकृत्य पक्षान्तरमाहु**र्हीनो वानुग्रह** इति, अहिन्शब्दस्याहीनवाचकत्वं शब्दभेदाख्यकोशे स्फुटमित्यपि, **तथा च** दण्डस्य **नानुग्रह** इतिभावः, **आदावि**ति पूर्वार्धे, दुःखस्यैवेतिवेति कामादिकृतदुःखस्यैव, **श्रीधरीये 'हि न'** इतिपदद्वयं कृत्वा व्याख्यातं तच्चिन्त्यं, न इत्यस्य नागपत्नीवाचकत्वे तासु दण्डस्य तदनुग्रहताया वक्तुमशक्यत्वान्न इत्यस्य कालियपरत्वे लक्षणापत्तेश्चेत्यादिदोषात्, पूर्वं **तस्योक्त**मिति **पापस्योक्तं**, दण्डस्य तद्धेतुभुतक्रोधस्य चानुग्रहत्वं व्युत्पादयन्ति **सिद्ध**मित्यादि, **तदपी**ति पापमिति । **तपः सुतप्त**मित्यत्र ननु ज्ञायत एव

नृत्यकरणे हेतुर्धर्म इत्याशङ्कायां धर्मस्वरूपं भगवत्स्वरूपं च विचारयन्ति **धर्म** इत्यादिना, **विद्यमानस्येति** शरीरे **विद्यमानस्य, सम्पादक** इति फल**सम्पादकः, विद्यमान** इत्यात्मलाभरूपं, **धर्मद्वयेनापि** भगवत्तोषाभावे हेतुमाहु**र्भगवांस्त्वि**त्यादि, **भगवांस्त्वात्मा** व्यापक इतिज्ञानेन प्रसादो यस्य तादृशः, **किञ्चेश्वरो नियामकश्चे**ति भक्त्या प्रसादो यस्य तादृशः, तथा च ज्ञानाभावे तपसा न तुष्यति "न च प्रमादात् तपसो वाप्यलिङ्गा" दिति "ज्ञानप्रसादेन विशुद्धसत्त्वतस्तु तं पश्यते निष्कलं ध्यायमान" इत्यादिश्रुतेर्भक्त्यभावे धर्मान्तरेणापि न तुष्यति "नाहं वेदै" रिति "नालं द्विजत्व" मित्याद्युपक्रम्य "प्रीयतेमलया भवते" त्यादिवाक्यैः तदेतत् स्फुटीकुर्वन्ति **तत्राद्ये पक्ष** इत्यादि, **किमिति** विकल्पे, **अन्यथेति** देशादिषडङ्गाभावे, तत्रापि विशेषमाहुः **पर**मित्यादि तथा च यद्यपेक्षितं धर्मद्वयमस्मिन् स्यात् तदेदानीमप्ययं तादृशस्वभावः स्यात् तदभावाच्च तादृशं साधनमनेन न कृतमित्यवसीयत इत्यर्थः, **एवं सामान्यतपःपक्षस्य** तोषहेतुत्वं नृत्याहेतुत्वं च साधयित्वा द्वितीयपक्षस्य तथात्वं **साधयन्ति यद्यपी**त्यादि, **तत्रापीति** भगवच्छास्त्रीये यज्ञादिरूपे धर्मे, **तत्रापि कीर्तन**मित्यन्यापेक्षाराहित्याच्च स्वतोपेक्षाराहित्याच्च स्वपरद्रोहरहितमित्यर्थः, **अनेनैवे**त्यात्मत्वेनैव ॥ ३५ ॥ **कस्यानुभाव** इत्यत्राधिकारहेत्वज्ञानं व्युत्पादयन्ति **तादृशा**मित्यादि, **एवं** फलानुमाने कुतो हेत्वज्ञानमित्यत आहुः **पर**मित्यादि, तेषां भगवदीयानामेव **कोटिजन्मा**र्जितश्रौतस्मार्तभगवदीय**धर्मसंस्कृत**भूतानि भगवदीयजीवानामेव देहं **सम्पादयन्तीति** मार्यादिकी **व्यवस्था,** तथा चैतस्य पूर्वं भगदीयत्वं नावगतमिति न मार्यादिकया व्यवस्थया हेतुज्ञानं, **साधारणसंस्कारपक्षे** तु त इच्छयैवाधिकार इत्यु**पपत्तिः सम्भवति** परमिच्छायामपि कश्चिद्धेतुर्वक्तव्यस्तत्र क्रियारूपस्य हेतोरुक्तरीत्यासम्भवादलौकिकोनुभावो वा वक्तव्यः **स लोके न सिद्ध** इति कार्यबलादनुभावोस्तीति ज्ञायते परमनुभाव**सम्बन्धो न निर्णीत** इत्यतो हेत्वज्ञानं, तथा च चरणरेणुस्पर्शरूपकार्यदर्शनबलादस्याधिकारस्तद्धेतुश्च कश्चिदस्तीति सामान्यतो ज्ञायते न तु विशेषतोयमेवेति निर्णेतुं शक्यत इतीद**माश्चर्य**मेवेत्यर्थः, **त्रितय**मिति गुणत्रयम् ॥ ३६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

कारिकासु द्विविधस्यापीति सर्पयोनिकारणीभूतस्य सहजस्य तमो अज्ञानं तद्रूपस्य प्रत्यहं जायमानस्य चेत्यर्थः, दण्डानुमोदनेन सहजपापस्य निवृत्तिः नमनेन तमोरूपस्य **प्रार्थनया अपराधस्येति,** त्रयाणां सङ्ख्यातात्पर्यमाहु**र्भगवानिति** "अवतारः खलनिग्रहाये" त्युक्तत्वाद् दण्डे हेतुः स्वरूपमेव, **तच्च षड्गुणमिति** दण्डानुमोदनं षड्भिरुक्तं, तासु **दशधेति प्रकट** इति शेषः, दशलीलाविशिष्टस्तासां हृदये प्रकट इति नमनं दशभिः, **प्रार्थनीयः** पतिः, भगवति पतित्वं पञ्चधा, पञ्चानां पतिरितियावत्, "श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपति" रिति, धराया अपि लोकत्वमभिप्रेत्य पञ्चधैवोक्तः, अत एव सङ्ग्रहकारिकायां "स्त्रीभिश्च याज्ञिकैर्लोकैर्बुद्धिमद्भिः स्थितैः क्वचित् असाधनैरपि ह्येतैः प्रार्थनीयो हरिः पति" रिति पञ्चानामेव पतिरुक्तः, अतः प्रार्थना पञ्चभिः कृतेत्यर्थः, न्याय्यो हीति अस्य न्याय्यत्वसमर्थनाय **दण्डत्रयं विवृण्वन्ति** ईश्वरो हि इति, राजादिरित्यर्थः, **रिपोरि**त्यत्र प्रथमपक्षे स्वसुतानामित्यध्याहारो भवतीति द्वितीय पक्षः, **उभयत्रापि** सम्बन्धमात्रप्रतीत्या विषयताबोधो **न स्वारस्येन** भवतीति तृतीयः पक्ष उक्तः ॥ ३३ ॥ अनुग्रह इत्यत्र खल्वित्यस्यार्थमाहुः **दण्डो भगवानितीति,** अतः क्लेशरूपोपीति दण्डस्य **भगवत्त्वात्** क्लेशजनकोपि दण्डः कल्मषनाशकः, यथा क्लेशजनकमपि तपः "तपो मे हृदय" मिति वाक्येन भगवत्त्वात् कल्मषनाशकं तथेति, ननु दण्डनलक्षणकर्मरूपस्यास्य कथं पापकर्मनाशकत्वं कर्मणः कर्मानाशकत्वस्य निबन्धे व्यवस्थापितत्वात्, अत आहुर्दण्डोपीति, दण्डनलक्षणकर्मरूपोपीत्यर्थः, यागवदिति यथा यागः कर्मरूपोपि "तरति ब्रह्महत्या" मितिश्रुत्युक्तत्वात् कर्मनाशकः तथायमपि भगवत्त्वात् तथेत्यर्थः, उत्तरार्धस्याभासमाहुः **नन्विति,** यथा दीपेनान्धकारनिवृत्तावप्यन्धकारकारणीभूताया रात्रेर्विद्यमानत्वाद् दीपे निवृत्तेन्धकारस्तिष्ठेदेव तथा प्रत्यहं जायमानस्य पापस्य दण्डेन **निवृत्तावपि** तत्कारणीभूतस्य दन्दशूकत्वजनकपापस्य विद्यमानत्वाद् दण्डे निवृत्ते पापं तिष्ठेदेवेति तादृशी निवृत्तिर्मूलभूतपापस्याभावं प्रत्यप्रयोजिकेत्यर्थः, अन्यथेति तादृशनिवृत्त्यैव मूलभूतपापनिवृत्तौ दण्डापेक्षया पूर्वदुःखस्याल्पत्वं ज्ञात्वा कामादिजनितदुःखनिवृत्त्यर्थं पापं न कुर्यात्, अतस्तथा ज्ञात्वापि मूलभूतपापवशात् पापं करोतीति भावः, यद् दन्दशूकत्वमिति यस्मात् कल्मषाद् दन्दशूकत्वं जातं तादृशकल्मषापह इत्यर्थः, आदाविति पापस्यासद्योनिजनकत्वं पूर्वमुक्तमेव, तदा तद्गमनेन सत्त्वं भवतीति च सिद्धमेव जातमित्यर्थः, जातमिति यस्मात् कल्मषादितिशेषः, तदपीति सर्पयोनिहेतुभूतकल्मषमपीत्यर्थः, अत्र सहेतुकदण्डस्यानुग्रहत्वं वाक्यार्थ इत्युपसंहाराद् ज्ञेयं, आश्चर्यं वाक्यार्थोग्रिमश्लोके आभासेन निरूपितः ॥ ३४ ॥ तपः सुतप्तमित्यत्र एतत्तपोधर्मयोर्लोकोत्तरत्वं निरूपयितुं लोकसिद्धे ते निरूपयन्ति **धर्मो द्विविध** इत्यादिना, विद्यमानस्यैवेति न त्वविद्यमानफलसम्पादक इत्येवकारः, असत्सम्बन्धस्येति स्त्रीपुत्रादिभिः सम्बन्धस्येत्यर्थः, एकस्त्विति निवृत्तिलक्षणो धर्मः असत्सम्बन्धं निवर्त्य विद्यमानमेवात्मरूपं फलं प्रयच्छति, प्रवृत्तिलक्षणस्तु दोषमनिवर्त्यैवाविद्यमानं स्वर्गादिकं प्रयच्छति, अत्र जातस्य भगवत्तोषरूपफलस्योभयविधत्वं निरूपयन्ति भगवांस्त्विति, तुशब्देन फलान्तरस्योभयविधत्वं निवारितं आत्मत्वाद् विद्यमानफलरूपं ज्ञानं प्रसादो यस्य तादृशः, **ईश्वरत्वाद**विद्यमानफलरूपा भक्तिः प्रसादो यस्य तादृशः, **तथा च** तपोधर्मयोर्भगवत्तोषं जनयित्वैव तदुभयजनकत्वात् **तपोधर्माभ्यां तत्सम्बन्धः** सम्भवति, तथापि लोकसिद्धतपसोभिमानरूपदोषसहितत्वात् तन्न सम्भवति, अतो लोकोत्तरं किं तप इत्याश्चर्यं, **धर्मोपि योनिजीवस्वभावकर्मणां** विरुद्धत्वात् कथमस्य सम्बन्ध इत्याश्चर्यमनुपसंहारे

वक्ष्यते, तत्राद्ये पक्ष इति तपसा भगवत्परितोषपक्ष इत्यर्थः, न निवृत्तिरिति असत्सम्बन्धस्येत्यर्थः, स दोष इति तपसा दूरीकर्तुमशक्य इत्यर्थः, प्रत्युतेति तपसि जाते प्रवर्धतेपीत्यर्थः, देशेत्यादि सु इत्यस्याक्षरार्थोयं, निर्दुष्ट षड्गुणं जातमित्यर्थः, भवत्पदस्य भागवते भगवानर्थः, तदर्थः षड्गुण इति तादृशो भगवान् षड्गुणेनैव तपसा तुष्यति, तपसः षड्गुणत्वं द्वितीयस्कन्धे विवृतं, दोषान्तरेति विषयाभिलाषया चित्तवैयग्र्यस्यान्तरदोषस्येत्यर्थः, निरभिमान इति गतदेहाभिमान इत्यर्थः, तेन शीतादिकालधर्मैश्चित्तवैयग्र्यं न भवति, अन्यस्मै मानदानेन च तत्कृतप्रतिबन्धाभावाच् चित्तवैयग्र्यं न भवति, पूर्वोक्तोहङ्कारस्तु अहं तपस्वी महानित्याकारको ज्ञेयः, परकृत इति अहं ब्राह्मणः कथमन्यस्य सन्माननं करोमीत्याकारको ब्राह्मण्यादिधर्मवृत इत्यर्थः, धर्मोथिवेत्यत्राथ वा इत्यव्ययद्वयं ज्ञेयं, एको दोष इति उपद्रवकारित्वरूपो दोष इत्यर्थः, अयमेवेति नृत्यावधितोषाजनकत्वरूपः पूर्वमुक्तोपि मुख्योयमेवेत्येवकारेण स व्यावर्त्यते, तपसीति विषयसप्तमी, तपोविषयक इत्यर्थः, तत्रापीति द्रोहाभाव उभयत्रापि, परन्तु कीर्तने लोकानुग्रहोपि सिध्येदितिभावः ॥ ३५ ॥ कस्येतिश्लोकत्रयेपि पूर्वोक्तादधिकमाश्चर्यमेव वाक्यार्थ इति आभासे किञ्चेति समुच्चय उक्तः, कस्येत्यत्र अनुभावपदार्थं विवृण्वन्ति भगवच्चरणारविन्दरेणव इत्यारभ्य ज्ञायत इत्यन्तेन, अस्य चेति भगवदीयानां जायत एव अस्यापि जात इति चकारः परमिति सम्बन्धो जातस्तेन तत्प्राप्तिश्च भविष्यति परमेवं व्यवस्थापक्षे असम्भावितमित्यर्थः, तेषामिति येषां रेणुसम्बन्धो जातः, त्रिविधेति अग्रिमश्लोके विवृतं सात्त्विकादित्रैविध्यमत्रापि ज्ञेयं, त्रिविधधर्मसंस्कृतरेणुसम्बन्धे त्रिविधधर्मफलं न वाञ्छन्तीति द्वयोः सङ्गतिः, भूतानीति चरणस्थितानि रेण्वादीनीत्यर्थः, साधारणेति तदुपार्जितत्वं विशेषः पूर्वमुक्तधर्ममात्रसंस्कृतानि रेण्वादीनि तादृशं देहं जनयन्तीतिपक्षे इत्यर्थः, तत्रापीति रेणुभिस्तादृशफलोपपत्तावपि रेणुसम्बन्धे हेतुर्वक्तव्य इत्यर्थः, धर्मे हेतुरुक्तः स त्वत्र तु न सम्भवतीत्याहुः स चेति, अलौकिकत्वेति अनुभावस्तु हेतुर्भवतीत्यर्थः, अनुभावस्यालौकिकत्वं व्युत्पादयन्ति स लोके इति लोकसिद्धत्वादलौकिक इत्यर्थः, तत इति अनुभावस्य हेतुत्वसम्भवादित्यर्थः, प्रयोजनमिति फलमित्यर्थः, समासमाहुरङ्घ्रीति, येनाधिकारो जातस्तादृशोनुभावः इत्यर्थः, अनधिकारिण्यधिकारसम्पादनमाश्चर्यमित्यर्थः, एतत्समर्थनार्थं अधिकाराभावमुत्तरार्धाभासेनाहुः गुणातीता एवेति, हि यत इत्यर्थः, तस्याश्चेदिति सगुणानां निरूपणीयत्वात् ब्रह्मरुद्रावपि निरूपणीयाविति कैमुतिकन्यायेन तन्निरूपणमुक्तं, ब्रह्मानन्देति सा तु गुणातीतैवेतिभावः, स्त्रीरूपेति विष्णोः सत्त्वाधिष्ठातुः स्त्रीत्यर्थः, त्रितयमिति सगुणमित्यर्थः, न तु चरणाविति भगवच्चरणयोर्गुणातीतत्वादितिभावः, सगुणेषु कामकामेष्वेव सा तिष्ठति न तु गुणातीतचरणाश्रितेषु भक्तेषु "तं भजन् निर्गुणो भवे" दित्यादिवाक्यैरितिभावः, ब्रह्मानन्दरूपा तु व्यावृत्तैव, दीर्घेति दीर्घकाल आदरः नैरन्तर्यं च तेषामभाव इत्यर्थः, एवमिति अस्मिन् श्लोके वाक्यार्थोयं, आभासे तु श्लोकत्रयस्योक्त इति ज्ञेयम् ॥ ३६ ॥

(५) भगदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

नागपत्नीस्तुतौ न्याय्यो हि दण्ड इत्यत्र अध्यायविभागपूर्वकं स्तुतेस्त्रैविध्यमाहुर्दण्डानुमोदनमित्यादि का० १४२¾ १४३¾। दण्डानुमोदनं षड्भिरिति कारिकातः पूर्वोक्तं सर्पयोनिकारिणीभूतं सहजं पापमेकं द्वितीयं च प्रत्यहं क्रियमाणमज्ञानरूपं तृतीयो भगवद्विषयकोपराधः, एवं त्रयाणामपि नाशिका त्रिविधास्तुतिरिति सङ्ख्यातात्पर्यं, भगवानिति "अवतारः खलनिग्रहाये"त्युक्तत्वाद् दण्डे हेतुः स्वरूपमेव, तच्च षड्गुणमिति दण्डानुमोदनं षड्भिरुक्तं, तासु दशधेति प्रकट इति शेषः, दशलीलाविशिष्टस्तासां हृदये प्रकट इति नमनं दशभिः, पञ्चधा पतिरिति तदुक्तं द्वितीयस्कन्धचतुर्थाध्याये, 'प्रार्थनीयः पतिः', भगवति पतित्वं पञ्चधा, "श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपति" रिति, धराया अपि लोकत्वमभिप्रेत्य पञ्चधैवोक्तः, अतः प्रार्थना पञ्चभिः कृतेत्यर्थः ॥३३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कुपितस्य कोपशान्तिमन्तरेण तत्प्रार्थनाया निष्फलत्वात् कोपशान्त्यर्थं प्रथमं तत्कृतस्य दण्डस्यानुमोदनं कुर्वन्ति—न्याय्यो हीति षड्भिः। अस्मिन् सर्पे दण्डो न्याय्यो हि युक्त एव। तत्र हेतुमाह कृतकिल्बिषे इति। कृतं किल्बिषं दंशनपरिवेष्टनाद्यपराधो येन तस्मिन्नित्यर्थः। तत्रैव हेत्वन्तरमप्याहुः—तवावतारः खलानां परोद्वेजकानां निग्रहायेति। 'सतां संरक्षणाय च' इति अर्थादेव ज्ञेयम्॥ 'एवं चेत्तर्हि वैषम्यं स्यात्' इत्याशङ्क्याहुः—रिपोरिति। शत्रोः स्वसुतानामपि च विषये तुल्या दृष्टिर्यस्य तस्य। "एवमपि स्पष्ट एव विरोधः प्रतीयते। समदृशो निग्रहानुग्रहाद्यसम्भवात्" इत्याशङ्क्याहुः—धत्से इति। फलं पुरुषार्थप्रतिबन्धकपापनिवृत्त्यादिरूपमेवानुशंसन् आलोचयन् दमं दण्डं धत्से। अतः सतामिव तेषामपि फललाभान्न वैषम्यमित्याशयः। 'खलमेवानुशंसन्' इति पाठे तु खलं दुष्टमेवालोचयन् दमं धत्से, तथा च नहि गुणदोषानुसारेण यथोचितमनुग्रहादि कुर्वतो वैषम्यं सम्भवतीत्याशयः॥ ३३॥ 'फलहेतुत्वात् नायं निग्रहः, किन्त्वनुग्रह एव' इत्याहुः— अनुग्रह इति। भवता नोऽस्माकमयं दण्डरूपोऽनुग्रह एव कृतः। पत्या सहैक्याभिमानाद्बहुवचनम्। ननु 'दण्डस्य कथमनुग्रहत्वम्?' तत्राहुः—हि यस्मात् ते त्वया कृतो दण्डः खलु निश्चयेन असतां दुष्टानां कलमाषपहः सर्वदोषनिवारकः। 'अत्र किं प्रमाणम्?' इत्याशङ्क्य 'ये ये हताश्चक्रधरेण दैत्यास्त्रैलोक्यनाथेन जनार्दनेन। ते ते गता विष्णुपुरीं नरेन्द्र! क्रोधोपि देवस्य वरेण तुल्यः' इत्यादिवाक्यप्रमाणमाहुः—क्रोधोऽपीति। ते तव क्रोधप्रयुक्तहननादिदण्डोऽपि मोक्षप्रतिबन्धकदुःखहेतुपापनिवर्तकत्वादनुग्रह एवेति सतां सम्मत इत्यर्थः। 'यस्य कालियस्य पापमस्तीति कथं ज्ञायते?' इत्यपेक्षायामाहुः—यद्दन्दशूकत्वमिति। 'यत् यस्मात् अमुष्य एतदन्तःस्थितस्य देहिनोऽनेकदेहं प्राप्नुवत

इदानीं दन्दशूकत्वं सर्पयोनित्वं दृश्यते, तेन तन्मूलं पापमस्ति' इत्यनुमीयते। तथाच पापनिवर्त्तकत्वेन अनुग्रह एव, अन्यथा उत्तरोत्तरपापवृद्धया अस्य एतत्सम्बन्धिनामस्माकं च नरकपातादि दुःखमेव स्यादित्याशयः ।। ३४ ।। 'चरणेन शिरःस्पर्शलक्षणेन महताऽनुग्रहेण तव सन्तोषहेतुसुकृतमपि पूर्वानुष्ठितमस्यानुमीयते' इत्याहुः तप इति । सर्वान् जीवयतीति सर्वजीवः सर्वान्तरात्मा भवान् यतो याभ्यां तपोधर्माभ्यां तुष्यति तथाभूतं तपः अनेन किं सुतप्तं सम्यगनुष्ठितम्, तथाभूतो धर्मोऽथवा कोऽनुष्ठित इत्यन्वयः । अस्मिन् जन्मनि तदसम्भवादाहुः—पूर्वमिति। यज्ञादिधर्मस्य हिंसाबाहुल्येन दयानाशकत्वात् श्रवणकीर्तनपूजानमस्कारादिलक्षणं धर्ममभिप्रेत्याहुः–सर्वजनानुकम्पयेति । तस्य सर्वेन्द्रियोपशान्तिं सूचयन्त्य आहुः निरस्तमानेनेति। यदृच्छालाभसन्तोषं सूचयन्त्य आहुः मानदेन चेति। यथासम्भवं प्राणिसम्मानं कुर्वता इत्यर्थः एवं च "दयया सर्वभूतेषु सन्तुष्ट्या येनकेनचित्। सर्वेन्द्रियोपशान्त्या च तुष्यत्याशु जनार्दनः" इति नारदोक्तः सिद्धान्तो दर्शितः ।। ३५ ।। यद्यपि 'अनेन भवत्सन्तोषकारणं किञ्चित्तप आदि अनुष्ठानं कृतम्' इति सामान्यतो वयं जानीमः, तथापि हे देव अचिन्त्यानन्तमहिम्ना बहुधा द्योतमान ! अस्य नीचस्यापि तवाङ्घ्रिरेणुस्पर्शेऽधिकारः कस्य तपआदेः सुकृतस्यानुभावः फलम्, इति विशेषतो न विद्महे इत्यन्वयः । तस्य दुर्लभत्वमाहुः– यद्वाञ्छयेति । यस्य त्वदङ्घ्रिरेणुस्पर्शाधिकारस्य वाञ्छया ब्रह्मादिभिरुपास्यापि श्रीर्लक्ष्मीः ललना उत्तमा स्त्री सर्वान् कामान् भोगवासना विहाय धृतव्रता गृहीताहारशयनादिनियमा सती सुचिरं दीर्घकालादरनैरन्तर्येण तप आचरत् ।। ३६ ।।

अन्वितार्थप्रकाशिका

तत्र दण्डानुमोदनेन कोपं शमयन्त्यः स्तुवन्ति-न्याय्य इति ।। कृतं किल्विषमपराधो येन तस्मिन् अस्मिन् सर्पे दण्डो न्याय्यो हि युक्त एव। यतः रिपोः सुतानाम् अपि रिपौ स्वसुतेषु चेत्यर्थः । सप्तम्यर्थे षष्ठ्यौ । यद्वा । रिपुसुतेषु अपिना स्वसुतेषु च तुल्या दृष्टिर्यस्य रिपुसुतस्यापि प्रह्लादस्य शिष्टस्य पालनात् स्वसुतस्यापि दुष्टस्य नरकासुरस्य वधकरणाच्चेति तस्य तवावतारः खलानां निग्रहायास्ति तथा खलं दुष्टमेव अनुशंसन् आलोचयन् दमं दण्डं धत्से । फलमिति पाठे पापनिवृत्त्यादि इत्यर्थः ।।३३।। अनुग्रह इति ।। भवता नोऽस्माकमयं दण्डरूपोऽनुग्रह एव कृतः खलु निश्चयेन असतां दुष्टानां कल्मषापहः यत् यस्मात् कल्मषात् अमुष्य एतच्छरीरान्तःस्थितस्य देहिनोऽनेकदेहं प्राप्नुवत इदानीं दन्दशूकत्वं सर्पयोनित्वं दृश्यते । अतः तत्कल्मषनिवर्तकत्वात् ते क्रोधोऽपि क्रोधत्वेन प्रतीयमानोऽपि अनुग्रह एव सम्मतः ।। ३४ ।। तप इति ।। स्वयं निरस्तमानेन निरभिमानेन अन्येषां सर्वेषां मानदेन सत्कर्त्रा अनेन सर्पेण पूर्वं प्राग्जन्मनि किं तपः सुतप्तं सम्यगनुष्ठितं तथा सर्वेषु जनेषु अनुकम्पया धर्मोऽथवाऽनुष्ठितः यतः याभ्यां तपोधर्माभ्यां सर्वान् जीवयति स सर्वजीवः भगवान् तुष्यति ।। ३५ ।। कस्येति ।। हे देव ! अस्य नीचस्यापि तवाङ्घ्रिरेणुस्पर्शेऽधिकारः । कस्य तपआदेः सुकृतस्यानुभावः फलमिति विशेषतो न विद्महे। तत्रार्थः । यस्य त्वदङ्घ्रिरेणुस्पर्शाधिकारस्य वाञ्छया ललना उत्तमा स्त्री श्रीर्लक्ष्मीरपि सर्वान् कामान् विहाय धृतव्रता गृहीतनियमा सती सुचिरं तपः अचरत् ।। ३६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं नागपत्नी कृतां स्तुति माह न्याय्यो हीति कृत किल्वषे कृतापराधे अस्मिन्नस्मद्भर्त्तरि दण्डो न्याय्यः न्यायादनपेतोऽस्तिरिपोः सुतानामपि मध्य तुल्यदृष्टेस्तव अतः खलमेवानुशसन् जानन् सन् त्वं तस्मिन् दमं धत्से करोषि ।। ३३ ।। भवता अयं दंडरूपो नोऽस्माकमनुग्रहः कृतः तथाहि ते त्वया असतां कृतो दंडः कल्मषापहः पापनिवर्त्तकोऽस्ति हि निश्चितं अमुष्य देहिनो जीवस्यय दंदशुकत्वं सर्प्पत्वं भवति तस्य तिवृत्तये ते तव क्रोधोःऽस्माभिरनुग्रह एव संमतः ।। ३४ ।। निरस्तमानेन मानवर्जितेनान्येषां मानदेनानेन सर्पेण सर्वजनेषु अनुकंपया दययाऽथवाधर्मः पालितः किं सर्वाणि अनेकोटिब्रह्मांडानि जीवयतीति सर्वजीवः यद्वा सर्वेषां जीवो जीवनं यस्मात् सर्वजीवः ।। ३५ ।। अस्य सर्पस्य यस्तवांघ्रिरेणुस्पर्शाधिकारः सः कस्य पुण्यस्यानुभावो महिमास्ति तं वयं न विद्महे कामानान्यविषयान् विहाय ।। ३६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शरणप्राप्त्यनन्तरं प्रथमतस्तु कुपितं भगवन्तं दण्डानुमोदनेनोपशमयन्त्यः स्तुवन्ति । दण्डानुमोदनं तत्र षड्भिर्दिग्भिर्हरेः स्तुतिः। पञ्चभिः प्रार्थना नागयोषिदाचरिता ततः ।। १ ।। न्याय्य इति ।। कृत किल्बिषं ह्रदजलविषदूषिततासंपादनात्मकं त्वन्मर्मसु दंशविधानात्मकं वा पापं येन तस्मिन्, अस्मिन् नागे, यः त्वया धृत इति शेषः । दण्डः, स न्याय्यः उचित एव । हि यस्मात्, तव अवतारः, खला दुष्टास्तेषां निग्रहो भर्त्सनं तस्मै, 'निग्रहो भर्त्सनेऽपि स्यात्' इति मेदिनी । परपीडनं वा निग्रहः 'निग्रहः परपीडनम्' इति वचनात्। भवति । नन्वेवमपि वात्सल्यनिधेर्ममानुचितमेवेत्यत्राहुः । रिपोः सुतानामपि, षष्ठी सप्तम्यर्थे, रिपुषु सुतेषु चेत्यर्थः । तुल्या वैषम्यरहिता दृष्टिर्यस्य तस्य, षष्ठी प्रथमार्थे। समानदृष्टिस्त्वमित्यर्थः । खलं अनुशंसन्नालोचयन् सन्नेव, दमं दण्डं, धत्से । न तेन निग्रहानुग्रहलक्षणं तव वैषम्यमस्तीति भावः । फलमेवानुशंस्यमिति पाठे, अनुशंस्यमपराधानुरूपं, फलं फलरूपं दमं धत्से, फलमेवानुशंसन् इति पाठे, फलं एव अनु शंसन् इति च्छेदः। फलमस्य हितमेवमेवेति, अनु तदपराधेक्षणानन्तरं, शंसन् पर्यालोचयन् सन्नेव, दण्डं करोषीत्यर्थः ।।३३।। तदेवमस्य निग्रहोऽयमनुग्रहायेत्युक्तं तदेव स्फुटं प्रदर्शयन्त्य आहुः ।। अनुग्रह इति ।। भवता कृतः

यः अयं दण्डः, सः नोऽस्माकं, अनुग्रहः एव । कुतः । हि यतः, ते दण्डः त्वत्कृतोऽयं दम इत्यर्थः । असतामस्माकं, कल्मषापहः दुरितविनाशकरः, खलु । किं तत् कल्मषं यदपहन्ता मद्दण्डस्तत्राहुः । अमुष्य देहिनः कालियस्य, यद्यस्मात्कल्मषात्, दन्दशूकत्वं, प्राप्तमिति शेषः । तत्कल्मषापह इत्यर्थः । अतः ते तव, क्रोधः अपि, अनुग्रहः एव, अनुग्रहगर्भ एव । संमतः सम्यक् विज्ञातः । अस्माभिरिति शेषः । 'दण्डोऽपि भगवच्चीर्णोऽनुग्रहः सर्वथा स्मृतः' इति स्मृतेः 'हरिर्दुःखानि भक्तानां हितबुद्ध्या करोति वै । शस्त्रक्षताग्निकर्माणि स्वपुत्राय पिता यथा' इति पद्मादिवचनाच्च ॥ ३४ ॥ दन्दशूकस्याप्यस्यातिमहानयमनुग्रहः पूर्वपुण्यकृत एवेति तत्पूर्वपुण्यमभिनन्दन्त्य ऊचुः ॥ तप इति ॥ हे कृष्ण, अनेनास्मद्भर्त्रा, पूर्वं पूर्वस्मिन् जन्मनि, निरस्तमानेन निरस्ताहंकारेण, मानदेनान्येभ्यो मानं प्रयच्छता सता च, किं तपः सुतप्तं सुष्ठु कृतं स्यात् । पाकं पचतीतिवन्निर्देशः । अथवा, सर्वजनानुकम्पया सर्वेषु जनेषु विहितया दयया युक्तः, कश्चित् धर्मो वा, अनुष्ठितः स्यात्, यतस्तपआदितः, सर्वान् जीवयतीति सर्वजीवः भवान्, तुष्यति तुष्टीभवितुं तावद्दण्डयतीति भावः ॥ ३५ ॥ अन्तर्विचारिते न तपआदिनिमित्त एष भाग्योदयः, किं तु अचिन्त्यं किंचित्तवेदं कृपावैभवमित्याहुः श्लोकत्रयेण ॥ कस्येति ॥ अस्य कालियस्य, तव अङ्घ्रिरेणुस्पर्शाधिकारस्त्वदीयपादरजः संस्पर्शाधिकारिता, कस्य पुण्यस्य, अनुभावः प्रभावः । तथाविधं पुण्यं, न वेद अयं सर्पो न जानाति । वयमपि, न विद्महे । तवेत्यनेन भगवदङ्घ्रिरेणोर्दौर्लभ्यमभिप्रेतं तदेवाविष्कुर्वन्ति । यद्वाञ्छया यदङ्घ्रिरेणुलिप्सया, ललना भगवतस्तव पत्नी सत्यपि, श्रीः स्वयं लक्ष्मीः, यदङ्घ्रिरेणुं ब्रह्मादयो वाञ्छन्ति, तथाभूता स्वयं रमेत्यर्थः । कामानङ्घ्रिरेणुव्यतिरिक्तान् सर्वान् पुरुषार्थान्, विहायानिच्छन्ती, धृतं व्रतं यया सा गृहीततपश्चर्योपयुक्तेन्द्रियजयात्मकव्रता तथाभूता सती, सुचिरं बहुकालं, तपः अचरत् । पुरा श्रीर्वेदवतीरूपेण तपश्चचारेति आर्षरामायणकथाऽत्र सूचिता ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

न्याय्य इति : १७.१६.३३.

अत्युग्रकर्माचरणानुरूपं फलं त्वनेनेदमभोजि भोगिना । एतावतैवाजनि तेऽवतारकृतार्थतेतः परमीश पाहि नः ॥ ६८ ॥

नृपो यदि न शिक्षयेदनयवर्त्मभाजः प्रजास्तदा निजपदानुगा यदुपते भवेयुः कथम् ।
अतः समुचितं प्रभो व्यरचि शासनं यद्वयं सदा भुवनवासिनस्त्रिभुवनैकनाथो भवान् ॥ ६९ ॥

शिक्षैव धर्मो न नृपस्य केवलो धर्मः प्रजारञ्जनप्यमुष्य हि ।
तत्कर्तुरीश प्रथमं तवोरगाधीशे द्वितीयाऽप्युचितोऽस्ति सम्प्रति ॥ ७० ॥

अनुग्रह इति : १०.१६.३४,

त्वद्बुद्ध्याऽयं दण्डोऽप्यस्मद्बुद्ध्या त्वनुग्रहो भूयान् । अपि दुर्लभं श्रीयस्तल्लब्धमनेन त्वदङ्घ्रिकञ्जरजः ॥ ७१ ॥

अनुग्रहात् केवलतो गरीयाननुग्रहो निग्रहपूर्वको यः । मदोऽस्विलोऽपि प्रथमादपैति परप्रसादं च परस्तनोति ॥ ७२ ॥

तप इति : १०.१६.३५,

यद्यप्यस्मिञ्जन्मनि क्रूरकर्मा निर्वर्ण्यं तु प्राक्तनं भागमस्य । यस्मादीशाशेषजीवाश्रयेण कामं चक्रे यस्त्वया रङ्गभूमिः ॥ ७३ ॥

कस्येति : १०.१६.३६.

किमस्याभिः पूर्वं सुकृतमिह वा जन्मनि कृतं न विद्मः पद्मेश त्रिभुवनपते यत्फलमिदम् ।
प्रपश्यामः सम्प्रत्यत्यनुतनुरूपं तव सुरैरजेशाद्यैर्बुद्ध्याऽप्यनधिगतमद्यापि यदहो ॥ ७४ ॥

स्वतस्त्वं पुन्नागो भवसि भुवने नागशयनस्तथाऽध्येयो नागानन गुरुमुखैर्नागपनुतः ।
अतस्त्वत्तो नागानवरत–दयाशालिहृदयान्न नस्तज्जातीनां भयमिति विभो निश्चितमिदम् ॥ ७५ ॥

नमः सनातनाय ते नमः सुधाब्धिवासिने नमो रमाविलासिनं नमोऽवतारशालिने ।
नमो व्रजार्तिहारिणे नमः सदिष्टकारिणे नमः कृपाप्रसारिणे स्वदासधारिणे नमः ॥ ७६ ॥

दुर्धर्ष–रोष–विष–भेषज–मेकमेव लोकोत्तरं नतिनुतिप्रचुरं वचो यत् ।
जानन्त्य इत्थमबलाः स्वधिकारहीनाश्चक्रुर्नतीर्बहुविधाः प्रणुतीस्तथेशे ॥ ७७ ॥

कृष्णप्रिया

नागपत्न्याँ निवेदन करने लगी कि–हे नाथ यह कालिय नाग बडा अपराधी एवं महापापी है आपने कालिय नागको दण्ड दिया वह सर्वथा समुचित है, एवं न्याययुक्त ही है । आपका अवतार खलोंके निग्रह के लिये ही है । आप सापराध संतानों के लिए एवं सापराध शत्रुओंके एक समान दृष्टि वाले हैं आप जो कुछ दण्ड शिक्षा आदि करते हैं वह हितकर परिणाम का

विचार कर ही करते हैं। निरपराधी शत्रुओं को आप कभी सताते नहीं ॥ ३३ ॥ भगवन्! कालिय नागको किया हुआ यह निग्रह–यह दण्ड, सचमुच कालिय नाग पर अनुग्रह है। आप जो असज्जनों को दण्ड देते हैं वह तो पापियों के पापोंके निवारण के लिए होता है। कालिय नागने जिस पाप के फलस्वरूप यह सर्पयोनि पाई थी, वह दण्ड से निवृत हो गई। नाथ! सज्जन तो जानते हैं एवं मानते हैं कि आपका क्रोध भी कृपा का स्वरूप है ॥ ३४ ॥ इस कालिय नाग ने पूर्व जन्म में कौन सा तप किया। कि जिस पुण्य के फलस्वरूप सर्वजीव को जिलाने वाले आप कालिय नाग पर प्रसन्न हो गए, ऐसा लगता है कि कालिय नाग ने अमानी बनकर सब को मान दिया है, भगवत्तोष साधक धर्मका अनुष्ठान किया है, जीव मात्र पर दया भी की है; अन्यथा आप कालिय पर प्रसन्न कैसे होते! ॥ ३५ ॥ हे देव! हे नाथ! यह बात समझ में नहीं आती कि यह कालिय आप श्री के श्री चरणोंकी पवन धुलीके स्पर्शका अधिकारी कैसे बना! हे देव! भगवती श्री जो आपकी प्रियतमा ललना है फिरभी सर्व कामनाओं से पर होकर चिर काल पर्यन्त व्रत का अधिकार कर आप के चरणों की रजःप्राप्ति के लिए सुदीर्घ तप किया, ऐसी श्रीदेवी के लिए दुर्लभ चरणों की रज कालीय नाग ने कैसे प्राप्त की। किस अनुग्रह का यह कालिय नाग को फल मिला ॥ ३६ ॥

न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति [1]यत्पादरजःप्रपन्नाः ॥ ३७ ॥
[2]तदेष नाथाप दुरापमन्यैस्तमोजनिः क्रोधवशोऽप्यहीशः[3] ।
संसारचक्रे भ्रमतः शरीरिणो यदिच्छतः[4] स्याद् विभवः समक्षः ॥ ३८ ॥
नमस्तुभ्यं भगवते पुरुषाय महात्मने । भूतावासाय भूताय पराय परमात्मने ॥ ३९ ॥
ज्ञानविज्ञाननिधये ब्रह्मणेऽनन्तशक्तये अगुणायाविकाराय नमस्तेऽप्राकृताय च ॥ ४० ॥

कर्दमक्षमा

अन्वयः—यत्पादरजःप्रपन्नाः नाकपृष्ठं न सार्वभौमं न च पारमेष्ठ्यं न रसाधिपत्यम् न योगसिद्धीः न अपुनर्भवं वा न वाञ्छन्ति ॥ ३७ ॥ हे नाथ संसारचक्रे भ्रमतः शरीरिणः यत् इच्छतः विभवः समक्षः स्यात् अन्यैः दुराप तत् तमोजनिः क्रोधवशः अपि एष अहीशः आप ॥ ३८ ॥ भगवते पुरुषाय महात्मने भूतावासाय भूताय पराय परमात्मने तुभ्य नमः ॥ ३९ ॥ ज्ञानविज्ञाननिधये ब्रह्मणे अनन्तशक्तये अगुणाय अविकाराय अप्राकृताय च नमः ते ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यत्तव पादरजःप्रपन्नाः प्राप्ताः पारमेष्ठ्याद्यपि तुच्छं मन्यंते ॥ ३७ ॥ अहो तदेषः अयत्नत एव प्राप। अन्यैः श्र्यादिभिरपि। कथंभूतं पादरजः। यदिच्छतः सेव्यं मे भवत्विति प्रार्थयमानस्यैव समक्षः प्रत्यक्ष एव विभवोऽपेक्षिता संपद् भवति ॥ ३८ ॥ नमस्तुभ्य भगवतेऽचिंत्यैश्वर्यादिगुणाय। तदुपपादनाय दशभिः श्लोकैर्विशेषणानि। पुरुषाय पूर्ष्वंतर्यामिरूपेण वर्तमानाय। महात्मने एवमपि नातिपरिच्छिन्नाय। कुतः। भूतावासाय आकाशाद्याश्रयाय। एतदपि कुतः भूताय पूर्वमपि सते। कुतः। पराय कारणाय। किं च परमात्मने कारणातीताय ॥ ३९ ॥ कारणत्वं कारणातीतत्वं च समर्थयितुमाहुः। ज्ञानविज्ञाननिधये ज्ञानं ज्ञप्तिः विज्ञानं चिच्छक्तिः उभयोर्निधये ताभ्यां पूर्णाय। कथं तथात्वमत उक्तं ब्रह्मणेऽनंतशक्तये। कथंभूताय ब्रह्मणे अगुणायाविकाराय। पुनः कथंभूतायानंतशक्तये। प्राकृताय प्रकृतिप्रवर्तकाय। अप्राकृतायेति वा अप्राकृतानंतशक्तियुक्ताय। अयमर्थः अगुणत्वादविकारं ब्रह्म ज्ञप्तिमात्रत्वात्कारणातीतं प्रकृतिप्रवर्तकोऽनंतशक्तिर्विज्ञाननिधित्वदीश्वरः कारणं तदुभयात्मने नम इति ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यस्य पादरजो यत्पादरजः। तुच्छं मन्यंते मृषात्वात्, अपुनर्भववांछा तु तेषाम् "अनिच्छतो गतिमण्वीं प्रयुंक्ते" इति तस्यानिच्छालभ्यत्वात्। यद्वा न पुनर्भवो यस्मात्तद्रज इति ज्ञेयम् ॥ ३७ ॥ अहो अद्भुतम्। तत्पादरज एष सर्प आप प्राप। यत्पादरजोऽपेक्षिता संपद्भवतीत्यन्वयः। ऐहिकी पारत्रिकी च विभूतिः प्रेमसंपद्वा भवतीत्यर्थः। अन्यैर्दुरापमत्र श्रुतिः–"नान्यैर्देवैर्मनसा वाचा" इति। मनोवाक्शब्दावत्र ज्ञानकर्मेंद्रियोपलक्षकौ। मनुष्यशरीरमेव कल्याणहेतुरिति नियमस्तु नास्तीत्याह अहीश इति। यदा भवतः कृपाकटाक्षपातस्तदैव कल्याणमिति तात्पर्यम् ॥ ३८ ॥ तत् अचिंत्यैश्वर्यादि। एवमपि पूर्षु वर्त्तमानत्वेऽपि। नातिपरिच्छिन्नाय अतिशयेनापरिमितायेत्यर्थः तदपि। तत्र हेतुं शंकते–कुत इति। आकाशाद्याश्रयत्वमपि। कारणस्याप्याकाशादेस्तन्मात्रा-

---

[1] त्वत्पाद–विज. । [2] तदीश–विज. [3] प्यनीशः–विज । [4] यदृच्छया स्याद्भवतस्समक्षं–वीर. ; यदीप्सितं स्याद्धि भवत्समक्षं–विज. ।

कार्यत्वश्रुतेस्तस्यापि कारणांतरेण भाव्यमित्याशंकानिवृत्त्यर्थमाह–किं चेति ।। ३९ ।। समर्थयितुं बोधयितुम् । तथात्वम् उभयपूर्णत्वम् । उभयपूर्णत्वप्रतिपादनाय । अत इति चतुर्थ्यर्थे तसिः । उक्तम् पदद्वयं ब्रह्मणे अनंतशक्तये इति । प्रकृतिप्रवर्तकत्वे तस्य प्रयोजकत्वं मन्वानोऽर्थांतरमाह–अप्राकृतेति । प्रकृतिकार्यकर्तृत्वादिवर्जिताय । अयमर्थ इति । व्यावहारिकज्ञानस्य सकारणत्वेऽपि परमार्थज्ञानस्य कारणातीतत्वमेव, अल्पज्ञस्य सृष्टिकारणताभावेऽपि सर्वज्ञस्यानंतशक्तिमतः कारणता भवत्येवेति निर्गलितोऽर्थः ।।४०।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो अस्तु तावत्त्वत्पादाब्जयोर्द्वयोर्बहुतररेणूनाम् स्पर्शमाहात्म्यं तदेकस्य यथाकथञ्चित् आश्रयणमाहात्म्यमप्यनिर्वाच्यमित्याहुः–नेति । नाकपृष्ठं न वाञ्छन्ति किमुत सार्वभौमम् एवं पारमेष्ठ्यमित्यादि कर्मफलं कैमुत्येनोक्त्वा योगादिफलं समुच्चयेनाहुः न योगेति अत्र टीकायां नाकपृष्ठादीति लेख्ये पारमेष्ठ्यादीति लेखभ्रमात् ।। ३७ ।। अन्यैर्ब्रह्मादिभिः परमोपासकैरपि दुःखेन प्राप्यं न त्वद्यापि प्राप्तम् एष महापराधोऽपि यतस्तमोजनिस्तामसजातिः तत्र च क्रोधवशः तत्रापि अहिषु श्रेष्ठोपि तदेव प्राप्तः एतच्च साधनसहस्रादपि न घटते केवलं त्वत्कारुण्यादेवेति सम्बोधयन्ति नाथयति दीनान् याचयतीति हे नाथेति । किञ्च यस्मिन् मनःसम्बन्धमात्रेण सर्वेषां स एव सिद्धिः स्यादित्याहुः–संसारेति देहाभिमानिनोपि विभवः ऐहिकी पारलौकिकी च विभूतिः प्रेमसम्पद्वा एवं प्राप्यमुद्दिष्टम् अतोऽधुना साक्षात्त्वत्पादाब्जद्वयाङ्गीकृतफणागणोऽयं व्यक्तविभवविशेषमेव खलु प्राप्तुमर्हतीति भावः ।। ३८ ।। एवं दण्डमनुमोदमाना एवंदृशेऽप्येतावदनुग्रहेणाश्चर्यं मत्वा तत्परिहाराय मिथो विरोधिनानाधर्माश्रयत्वं दर्शयन्त्योऽतर्क्यशक्तितास्फूर्त्या क्षमापणदन्येन च प्रणमन्ति–नम इति दशभिः । भगवते अतर्क्यानन्तैश्वर्यनिधये अत एव सर्वे विरोधास्त्वयि विलीयन्त इति स्तुवन्ति पुरुषायेत्यादिना । एतच्च प्रायो हेतुहेतुमत्तादिप्रदर्शनेन तैरपि व्यञ्जितमेव । यद्वा पुरुषायेत्यादिविशेषणानां मध्ये प्रायो द्वाभ्यां द्वाभ्याम् अतिदुर्घटतया क्वचिदेकैको विरोधः क्वचित्तु विश्ववैलक्षण्येन विस्मयो द्रष्टव्यः तथाहि पुरुषायापि महात्मने व्यापकाय भूतावासाय सर्वजीवेष्वन्तर्यामितया नियामकाय अथ च भूताय जीवानां तदंशत्वेनाभेदात् जीवनरूपाय तद्रूपत्वेन नियम्यायेत्यर्थः यद्वा भूतावासाय जननिवासाय भूताय गृहीतजन्मने तथा च वक्ष्यति स्कन्धान्ते "जयति जननिवासो देवकीजन्मवादः,, इत्यद्भुतत्वमेव पराय सर्वतो भिन्नत्वेन स्थिताय अथ च परमात्मने सर्वेषां हृदि वर्त्तमानाय ।। ३९ ।। ज्ञानस्वरूपाय अथ च विज्ञाननिधये कर्मधारयः ब्रह्मणे सजातीयादिभेदरहितस्वरूपाय अथ च अनन्तशक्तये अगुणत्वेनाविकाराय अथ च प्रकृतिप्रवर्त्तकाय इत्यत्राद्भुतत्वमेव परत्राप्येवमेव ज्ञेयम् ।। ४० ।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो ! अस्तु तावच्छ्रीपदाब्जयोर्बहुतर-रेणूनां स्पर्शविशेषमाहात्म्यम्; तदेकस्य यथाकथञ्चिदाश्रयणमाहात्म्यमप्यनिर्वाच्यमित्याहुः —नेति । नाकपृष्ठं स्वाराज्यम्, सार्वभौमं साम्राज्यम्, रसाधिपत्यं पातालस्वाम्यम्, योगसिद्धीरणिमाद्याः, अन्यत् स्पष्टम् । सच्चिदानन्दघनमूर्त्तेः श्रीभगवतः पादाब्जरजसोऽपि तादृशतया तत्प्रपत्तिमात्रेणापि तत्तदनिच्छा युक्तैव — तदपेक्षया नाकपृष्ठादीनामतितुच्छत्वादिति भावः । अत्र टीकायां नाकपृष्ठादिति लेख्ये पारमेष्ठ्यादीति लेखकभ्रमात् ।। ३७ ।। अन्यैर्ब्रह्मादिसेव्य-श्र्यादिभिरपि दुःखेन प्राप्यम्, यद्वा, त्वदभक्तेतरैर्व्रजजनेतरैर्वाऽलभ्यमप्येष महापराध्यपि, यतस्तमोजनिस्तत्र च क्रोधवशस्तत्राप्यहिषु श्रेष्ठोऽपि तदेव प्राप्तः । एतच्च कयापि युक्त्या न घटते, केवलं त्वदचिन्त्यप्रभावादेवेति सम्बोधयन्ति— नाथ हे ईश्वरेति, कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थ हे परमस्वतन्त्रेत्यर्थः । तमोजनिरित्यादिविशेषणानामयं गूढोऽभिप्रायः—ईश्वरेण त्वया विहित-जातिस्वभावस्य दोषो नामायम्, तत्रास्य कोऽपराध इति विचार्य्य त्वया क्षन्तुमेव युज्यते इति । एतच्चाग्रे व्यक्तं भावि । किञ्च, यस्मिन् मनःसम्बन्धमात्रेण सकामानां देहाद्यासक्तानामपि सद्य एव सर्वेष्टसिद्धिः स्यादित्याहुः संसारेति । संसारस्य जन्ममरणादिलक्षणस्य चक्रं समूहः, किंवा, संसार एव चक्रवत् पुनः पुनरावृत्त्या चक्रम्, तस्मिन् । अतएव भ्रमतो विविधदुःखमनुभवतः, पुण्यपापादि कुर्वतोऽपि वा, देहाभिमानिनोऽपि विभव ऐहिकी विभूतिः, प्रेमसम्पद्वा – रजसः श्रीचरणाब्जसम्बन्धेन परमाद्भुततानन्त-माहात्म्यात्, यद्वा, सम्यक् सारश्चतुर्वर्गश्रेष्ठो मोक्षः, स एव चक्रं परमभ्रामकत्वात्, तस्मिन् भ्रमतो मुमुक्षुवर्ग-प्रतिपाद्यमानाध्यात्मवाक्यादिभिस्ततो निःसर्त्तुमशक्नुवतोऽपि जनस्य, विभवः श्रीवैकुण्ठलोक-सम्पत्तिः, समक्षः साक्षादत्रैव स्यात् । अन्यत् समानम् । एवं प्राप्यमुद्दिष्टमतोऽधुना साक्षात् त्वत्पादाब्जद्वयमंगीकृतगणगणोऽयं व्यक्तविभवविशेषमेव खलु प्राप्तुमर्हतीति भावः ।। ३८ ।। नाथेति (३८ शश्लो०) सूचितमचिन्त्यप्रभावत्वमेव बहुधा दर्शयन्त्यो भक्त्या प्रणमन्ति, नम इति दशभिः । भगवतेऽतर्क्यानन्तैश्वर्य्यनिधये, अतएव सर्वे विरोधास्त्वयि विलीयन्त इति स्तुवन्ति—पुरुषायेत्यादिना । एतच्च प्रायो हेतुहेतु-मत्तादि-प्रदर्शनेन तैरपि व्यञ्जितमेव । यद्वा, पुरुषायेत्यादिविशेषणानां मध्ये प्रायो द्वाभ्यां द्वाभ्यामतिदुर्घटतया क्वचिदेकैको विरोधः, क्वचित्तु विश्ववैलक्षण्येन विस्मयो द्रष्टव्यः । तथा हि पुरुषायापि महात्मने व्यापकाय, भूतावासाय सर्वजीवेष्वन्तर्यामितया नियामकाय, अथ च भूताय जीवानां तदंशत्वेनाभेदाज्जीवरूपाय तद्रूपत्वेन नियम्यायेत्यर्थः, यद्वा भूतावासाय जननिवासाय भूताय गृहीत जन्मने । तथा च वक्ष्यति स्कन्धान्ते (भा. १०।९०।४८)—'जयति जननिवासो देवकीजन्मवादः' इत्यद्भुतत्वमेव, पराय सर्वनियंत्रेऽथ च परमात्मने सर्वप्रवर्त्तकाय

नियोजकस्याज्ञया कृतस्य कर्मणो नियोज्येषु दोषाद्यस्पृष्ट्या दण्डादि-नियमनमद्भुतमेव, यद्वा, पराय सर्वतो भिन्नत्वेन स्थितायाथच सर्वेषां हृदि हृदि वर्त्तमानाय ॥ ३९ ॥ ज्ञानस्वरूपायाथच विज्ञान-निधये ब्रह्मणेऽथचानन्तशक्तयेऽगुणत्वेनाविकारायाथचप्रवृत्ति-प्रवर्त्तकाय, यद्वा, ज्ञानादिनिधयेऽपि ब्रह्मणेऽनन्तशक्तयेऽप्यगुणायाविकारायाप्यप्राकृतायेत्यत्राद्भुतत्वमेव। परत्राप्येवमेव ज्ञेयम् ॥ ४० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

रसाधिपत्यं पातालाधिपत्यम् ॥ ३७ ॥ प्रत्यक्षत्वं साक्षात्कारः तमन्यैर्दुरापं एष आपेत्यन्वयः ॥ ३८–३९ ॥ ज्ञानविज्ञानशब्दौ धर्मिधर्मविषयौ अगुणाय सत्त्वादिगुणरहिताय अप्राकृताय अकार्यभूताय यद्वा प्राकृताय प्रकृतावुपलभ्याय ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नन्वैश्वर्यकैवल्यादिषु प्रार्थनीयपुरुषार्थेषु सत्स्वपि तान्विहाय किं विशेषेण मदङ्घ्रिरेणुं वाञ्छन्तीत्यत्राहुः नेति। ये त्वत्पादरजःप्रपन्नास्ते पारमेष्ठ्यादिकं न वाञ्छन्ति पारमेष्ठ्यादिभ्यो ऽतिशयपुरुषार्थरूपं त्वत्पादरजः सेवमानास्तेनैव तृप्ताः पारमेष्ठ्यादिकं न वाञ्छन्तीत्यर्थः। तत्र पारमेष्ठ्यं चतुर्मुखैश्वर्यं नाकपृष्ठं स्वर्लोकं सार्वभौमं चक्रवर्त्तित्वं रसाधिपत्यं भूर्लोकादधस्तनलोकाधिपत्यं योगसिद्धीरणिमादीन् अपुनर्भवं कैवल्यम् ॥ ३७ ॥ तर्ह्येवं कृपणस्यापि कथं दुर्लभतममत्पादरजःस्पर्शाधिकारः ? तत्राहुः–तदिति एष अहीशः सर्पाधिपस्तमोजनिस्तमः प्रचुरजन्माऽत एव क्रोधवशः तदपि तथापि हे नाथान्यैर्दुष्प्रापं त्वत्पदाम्बुजस्पर्शम् आप लेभे यद्भवतः समक्षं प्रत्यक्षत्वं तदन्यैर्दुरापमपि एष आपेति वान्वयः युक्तञ्चैतदित्याहुः–संसारचक्रं स्वकर्मभिर्भ्रमतो जीवस्य यदृच्छया भवतः समक्षत्वं स्यात् –

एवं संसृतिचक्रेऽस्मिन् भ्राम्यमाणं दुरत्यये। जीवे दुःखाकुले विष्णोः कृपा काप्युपजायत ॥

इतिस्मरणादिति भावः। विभव इति पाठे विभवस्तदनुग्रहरूपो विभवः समक्षः प्रत्यक्षः स्यादेव यादृच्छिकादिसुकृतविशेषरूपव्याजमात्रावलंबनेनानुजिघृक्षोर्वात्सल्यनिधेस्तवानुग्रहरूपो विभवः प्रत्यक्षः स्यादेव अन्यथा कस्यापि चेतनस्य निर्दुष्टस्यासम्भवात् तत्कृपानिर्विषयैव स्यादिति भावः ॥ ३८ ॥ तदेवं कार्पण्यमाविष्कृत्याथ शरण्यत्वोपयुक्तगुणैर्विशिंषन्त्यः स्तुवन्ति–नम इति दशभिः। चतुर्थ्यन्तानां भगवत इत्यादीनां तुभ्यं नमः इत्यन्वयः तत्राश्रितकार्यनिर्वाहका आश्रयणसौकर्यापादकाश्चेति द्विविधाः शरण्यगुणास्तत्र ज्ञानशक्तिपूर्तिप्राप्त्यादय आश्रितकार्यनिर्वाहकाः तत्र ज्ञानमनिष्टपरिहारेष्टप्रापणोपयुक्तरूपं तच्च ज्ञानविज्ञाननिधय इत्यनेनोक्तं ज्ञानमनिष्टपरिहारोपयुक्तं विज्ञानमिष्टप्रापणोपयुक्तं तयोर्निधिराश्रयः तस्मै शक्तिर्नाम अघटितघटनसामर्थ्याद्यात्मिका स चानन्तशक्तय इत्यनेनोक्ता ब्रह्मण इत्यनेन सर्वशेषित्वादिगुणबृहत्ववाचिना भगवत इत्यनेन षाड्गुण्यपूर्णवाचिना पूर्तिप्राप्ती विवक्षिते पूर्तिरवाप्तसमस्तकामत्व प्राप्तिर्निरुपाधिकशेषित्वम् आश्रयणसौकर्यापादकास्तु गुणाः परत्वस्वामित्वसौशील्यवात्सल्यादयस्तत्र भूताय पराय परमात्मन इति परत्वमुक्तम् परत्वं नाम स्वेतरापेक्षयोत्कृष्टत्वम् –

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

इति स्वेतरनिखिलजगदन्तः प्रवेशनप्रशासनाभ्यां व्याप्यगतदोषास्पर्शेन च धारकत्वं हि परमात्मशब्दप्रवृत्तिनिमित्तमवगतम् अनेन स्वेतरनियाम्यसर्ववस्त्वपेक्षयोत्कृष्टत्वं स्पष्टमेव पराय भूताय भूतत्वमत्र सर्वेभ्यः कारणतया प्रागवस्थितत्वं परमकारणायेत्यर्थः। अनेनापि परत्वं स्पष्टमेव भूतावासायेत्यनेन सौलभ्यमवगतं परत्वयुक्तोपि न मेर्वादिवद्दूरतरोऽपि तु सर्वभूतहृदयगुहावास इति भावः। अनेन सौलभ्यं सुव्यक्तमेव, पुरुषाय महात्मन इत्यनेन सौशील्य विवक्षितं स्वयं वाचामगोचरमाहात्म्ययुक्तोपि यादवानामन्यतमपुरुषरूपेण तैः सह संश्लेषस्वभाव इति भावः। महतो मन्दैः सह संश्लेषस्वभाववत्त्वं हि सौशील्यं महापराधीनं कालियमनुगृहीतुमुद्योगप्रख्यापनपरेणानेन प्रकरणेन वात्सल्यं व्यक्तमेवावगतं भूतावासाय परमात्मने इति व्यापकत्वोक्त्या प्रसक्तं व्याप्यगतदोषं परिजहुः अगुणायेति। हेयगुणरहिताय पराय भूतायेति कारणत्वोक्त्या प्रसक्तविकाराश्रयत्वपरिहाराभिप्रायेणाविकारायेत्युक्तिः सद्वारकविकाराश्रयत्वेन कारणत्वेऽपि स्वरूपतः स्वभावतश्चाविकारायेत्यर्थः। सद्वारकविकाराश्रयत्वमेव स्पष्टयन्ति प्राकृताय "भूमिरापोऽनलो वायुः'अपरेयमितस्त्वन्याम्" इति श्लोकद्वयोक्तप्रधानपुरुषात्मकप्रकृतिद्वयद्वारा तद्गतविकाराश्रयाय ॥ ३९–४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कीदृशा विषया इति भावेन तानाहुः—न नाकेति। नाकस्य पृष्ठे सुकृतेनुभूत्वा इमं लोकं हीनतरं वा विशन्तीति पारमेष्ठ्यं सत्यलोकः सार्वभौमं चक्रवर्तिपदं "इमा रामाः सरथाः सतूर्याः" इत्यादिलक्षणं रसाधिपत्यम् अखिलस्वर्गविभवं योगसिद्धिरणिमादिलक्षणाः अपुनर्भवम् अपवर्गभक्तिलभ्यं मोक्षम् "अपुनर्भवमात्राद्धि हरिसामीप्यमुत्तमम्" इत्यादि स्मृतेः ॥ ३७ ॥ किं बहु वक्तव्यमिति भावेन वदन्ति— तदिति। ईशनाथ, शङ्करस्वामिन् ! यद्भवत्समक्षं भवतः साक्षात्करणं तदपि दुरापम् "न चक्षुसा

पश्यति कश्चिदेनं, नान्यैर्देवैर्मनसा नापि वाचा" इत्यादिश्रुतेः। साधनसामग्रीमन्तरेण दुष्प्रापमित्यर्थः। तमसा गुणेन जनिर्जन्म यस्य स तथा अत एव क्रोधस्वभावः तथाप्यनीशोऽसमर्थः ॥ ३८ ॥ "दण्डोपि भगवच्चीर्णः" इति स्मृत्यर्थमात्मनि ज्ञापयितुं कृष्णं स्तुवन्ति—नम इत्यादिना। भूतावासायेत्यनेन भूतनाशेन नाशः स्यादित्युच्यत इति शङ्कां निवारयति भूतायेति सर्वदा विद्यमानाय "भू सत्तायाम्" इति धातुः ॥ ३९ ॥ अधिकारायेत्युक्तं समर्थयते, अप्राकृतायेति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

भो नाथ ! वयं स्त्रियस्तत्रापि तिरश्च्यः, तत्रापि शोकार्ता इत्यस्माकं प्रलाप एवायमिति मा जानिथाः; किन्तु तव पादरजसः प्रभाव ईदृश एवेत्याहुः—न नाकपृष्ठमित्यादि। यत्पादरजःप्रपन्ना यस्य तव पादरजसि प्रपन्ना जनास्तद्विना न किञ्चिदपि वाञ्छन्तीति भावः ॥ ३७ ॥ 'अहो किमस्य भाग्यम्' यदनेन तदप्रयत्नेनैव प्राप्तमित्याहुः—तदेष नाथेत्यादि। हे नाथ ! तत्ते पादरजः एव आप। तदिति एवं- प्रकारेण स्वयमेव मूर्ध्नि नटता तेन सर्वतः सञ्चारितम्। अत आहुः—दुरापमन्यैः, अन्येषामीदृक् सौभाग्यं नास्ति। तस्मादयमहीशः क्रोधवशोऽपि तमोऽजनिः, तमसा अजनिः, अतमोजनिरित्यर्थः। तमसा जातस्यैवंविधसौभाग्यभाक्त्वं न स्यात्। अन्यथा (३५ श-श्लो.) "तपः सुतप्तं किमनेन पूर्वम्" इत्यादि पूर्वोक्तस्यासङ्गतिः। तस्मात्तवैवेदृशी लीला नान्यथा प्रकारेण स्यादिति तवैवेच्छयायं नागयोनिमाप्तः क्रोधान्धश्चाभूत्। वस्तुतस्तव भृत्योऽयम्। तत् प्रापेति तच्छब्दस्य साकाङ्क्षत्वमुद्भाव्य यच्छब्देन तदर्थं परिपोषयन्त्य आहुः– संसारचक्रे इत्यादि। संसारचक्रे भ्रमतो जनसमूहस्य मध्ये यद्वाञ्छतो यत्तवाङ्घ्रिरजोऽभिलषत एव समक्षः साक्षाद्वर्ती विभवः परमपदलाभः स्यात्। प्राप्तवतस्तु किमुतेत्यस्य तव भृत्यत्वं सिद्धमेवेति ॥ ३८ ॥ तस्मान्निरुपमकरुणाय तुभ्यं नम इत्याहुः—नमस्तुभ्यमित्यादि। तुभ्यं भगवते नमः। कीदृशाय ? महात्मने, मह उत्सव आनन्द इत्यर्थस्तत्स्वरूप आत्मा विग्रहो यस्य तस्मै। अतएव पुरुषाय पुरुषोत्तमाय, भीमो भीमसेनवत्। अथवा अपुरुषाय पुरुषस्यापि पराय। अत एव भूतावासाय, भूतानां पृथ्व्यादीनामवासायानन्दमात्रविग्रहाय। भूताय भूः सत्ता तद्रूपाय सत्तारूपाय, अतः पराय परमात्मने परमपरमात्मन इत्यर्थः ॥ ३९ ॥ भो भगवन् ! ब्रह्मेति परे यत् परात्परं वदन्ति, तदपि त्वमेव। त्वदितरन्न तदिति ब्रह्मत्वेनापि तं स्तुवन्त्य आहुः—ज्ञानविज्ञाननिधये ब्रह्मणेऽनन्तशक्तय इत्यादि बहुभिः ॥ ४०–४४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

यः पादस्पर्शस्तव सर्वनैरपेक्ष्येणैव भवतीति दर्शयति-न नाकपृष्ठमित्यादि। किं बहुना, अपवर्गमपि न वाञ्छन्तीत्याह अपुनर्भवं वेति। ते के? तत्राहुः—यत् पादरजःप्रपन्नाः, स ईदृक् ते पादस्पर्शस्तिर्यक्योनेरप्यस्याभूदहो किमनेन सुकृतं कृतमित्यर्थः ॥ ३७ ॥ एतदेव प्रपञ्चयति–तदेष इत्यादि। हे नाथ ! अन्यैर्भक्तेतरैर्दुरापं त्वत्पादरज एष आप अहोचित्रम्। तमोजनिस्तत्रापि क्रोधवशस्तत्राप्यहीन्द्रः संसार–चक्रे भ्रमतोऽस्य शरीरिणः। समक्षः साक्षादपरोक्षो विभवो ब्रह्मसम्पत् स्याद् भवति। 'यदिच्छतो जनस्य' इत्यनादरे षष्ठी। अनिच्छतोऽप्यस्य यदिच्छन्तं जनमनादृत्य स्याद् य इच्छति तस्य वरमेष विभवो न स्यात्, अनिच्छतोऽपि स्यादित्यर्थः ॥ ३८ ॥ तस्मात् कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थाय नमस्ते इत्याह– नमस्तुभ्यमित्यादि। भगवते महात्मने मह उत्सव आनन्दस्तन्मयात्मने पुरुषाय पुरुषोत्तमाय। यद्वा, पुरुषाणां, नारायणादीनां त्रयाणामायो वृद्धिस्तत्स्वरूपो यो मह उत्सव आनन्दस्तदात्मने। भूतावासाय भूतानि पृथिव्यादीनि तेषामावासाय आनन्दमात्रविग्रहाय। भूताय भूः सत्ता तत्र उतायमित्यविग्रहायेत्यर्थः। यतः पराय परमात्मने परमात्मा हि यः कथ्यते, तस्मादपि पराय ॥ ३९ ॥ हे नाथ ! कथं स्तोतव्योऽस्माभिस्त्वमनिर्वाच्यमहिमा, वयं तिर्यञ्चः, तत्रापि स्त्रियस्तत्रापि शोकार्त्ताः, तदा कथं स्तोतव्यस्त्वम् ? त्वद् वैभवं ब्रह्म स्तुम इत्याहुः–ज्ञान विज्ञान,निधये इत्यादि। हे अनन्त ! अपरिच्छिन्न ? तव शक्तये शक्तिरूपाय ब्रह्मणे नमः। किम्भूताय ब्रह्मणे ? ज्ञान,विज्ञाननिधये इत्यादि कृष्णाय नम इत्यन्तं सर्वं तुल्यम् ॥ ४०–४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एतावन्महिमभिर्मत्पादरेणुभिः किं फलं स्यादिति चेन्मैवं वाच्यं तव चरणरेणव एव फलं सर्वफलेभ्योऽप्यधिकमित्याहुर्नेति। प्रपन्ना एव न वाञ्छन्ति किं पुनस्तत्प्राप्ताः अपवर्गमपि किम्पुनर्नाकपृष्ठादिकम् ॥ ३७ ॥ अन्यैर्लक्ष्म्यादिभिरपि किञ्च सर्वफलमुकुटभूतमपि त्वत्पादरजः सकामजन्यस्य फलसाधनमपि भवतीत्याहुः–संसारेति। इच्छतः सकामस्य शरीरिणः यत् यतो विभवः समक्षः इच्छाविषयीभूतादपि यतः अपेक्षिता सम्पत्तिः प्रत्यक्षैव भवतीत्यर्थः ॥ ३८ ॥

"षड्भिः श्लोकैः कृपामेवं विवृत्य दशभिः पुनः। एकादश नतीश्चक्रुर्भक्त्या कालिययोषितः" ॥

भक्तैरुपास्यत्वेनाहुः भगवते अप्राकृतषडैश्वर्य्यवते पुरुषाय नराकाराय महात्मने नराकृत्यापि सर्वव्यापकाय योगिभिरुपास्यत्वेनाहुः सर्वभूतनिवासाय भूताय पूर्वमपि सते ॥ ३९ ॥ ज्ञानिभिरुपास्यत्वेनाहुः–ज्ञानविज्ञानयोः सम्पदोर्निधिरिव निधिस्तस्मै पुनर्मुक्तोपास्ये नराकारे तस्मिन्मन्दधीभिः प्रसञ्जितान् गुणविकारादिदोषान् वारयन्त्य आहुः–अनन्तशक्तये अतर्क्यानन्तशक्तिसमुदाय अगुणायाविकाराय प्राकृतगुणविकाररहिताय अप्राकृताय अप्राकृतगुणविकारसहितायेत्यर्थः ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवदङ्घ्रिरेणुस्पर्शाधिकारिकृतार्थताकथनपूर्वकं कालीयभाग्यातिशयमाहुः–नेति द्वाभ्याम् । यद्येत्वत्पादरजःप्रपन्नाः प्राप्तास्ते पारमेष्ठ्याद्यपि न वाञ्छन्ति ।। ३७ ।। तत्तव पादरजः एष तमोजनिरपि आप अहो अस्य भाग्यमिति भावः यदिच्छतः यस्त्वदीयपादरजो मे सेव्यं भवत्त्विति प्रार्थयत एव समक्षः प्रत्यक्ष एव विभवः वाञ्छितः कामः स्यात् ।। ३८ ।। अथ स्तुवन्ति–नम इति द्वादशभिः भगवते—

"ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चापि षण्णां भग इतीरितः ।।

नेति स्वाभाविकैरैश्वर्यादिगुणैर्युक्ता यत्तदेवोपपादयन्ति पुरुषायेत्यादिना । पुरुषाय पूर्ष्वन्तर्यामिरूपेण वर्त्तमानाय तथापि महात्मने पूर्भिरपरिच्छिन्नाय भूतावासाय आकाशादिभूतोपलक्षितकार्यमात्रधारकाय भूताय पूर्ववर्तिने सर्वोद्गमनस्थानाय पराय तल्लयस्थानाय परमात्मने अन्यानिरपेक्षास्थितिप्रवृत्यादियुक्ताय ।। ३९ ।। ज्ञानं धर्मभूतं सामान्यतः सर्वपदार्थविषयकं ज्ञानमतीतानागतवर्त्तमानसर्वपदार्थविवेकलक्षण विविधं ज्ञानं तयोर्निधये अननाल्पज्ञाज्जीवात्सर्वज्ञः परमेश्वरो भिन्न इत्युक्तम् तथा च श्रुतिः "ज्ञाज्ञौ द्वावजावीशानीशौ" इति ब्रह्मणे बृहत्स्वरूपगुणाय अनन्ताः चेतनाचेतनरूपाः असंख्येयाः शक्तयो यस्य तस्मै अगुणाय सत्त्वादिगुणास्पृष्टस्वरूपविग्रहाय अविकाराय शक्तिविक्षेपत एव जगदुपादानकारणत्वात्स्वरूपतो विकारायेत्यर्थः । अप्राकृताय च प्राकृतविभूतिमते इत्यर्थः ।। ४० ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु किं मत्पादरेणुभिः फलमिति चेन्नैते फलहेतवोऽपि तु परमफलान्येवेत्याहुः । न नाकेति । यस्यते पादरजःप्रपन्नाः न तु प्राप्तास्तेऽपि नाकपृष्ठादिकं न वाञ्छन्ति अपुनर्भवं सुखैश्वर्यप्रधानं मोक्षम् ।। ३७ ।। तत् त्वत्पादरजः अन्यैः श्र्यादिभिरपि दुरापं इच्छतः सकामस्य शरीरिणो जीवस्य यद्यतो विभवः समक्षः तद्रजो मे सेव्यं भूयादिति वाञ्छा विषयीभूतादपि यस्मादपेक्षितादपि यस्मादपेक्षिता सम्पत्तिः प्रत्यक्षा स्यादित्यर्थः ।। ३८ ।। अथ दशभिर्नमस्कुर्वन्ति–नम इत्यादिभिः । भगवते नित्यपूर्णषडैश्वर्याय, पुरुषाय नराकाराय तत्वेऽपि महात्मने व्यापकाय अतोभूतावासाय निखिलप्राणिहृद्गताय भूताय पूर्वसिद्धाय पराय सर्वश्रेष्ठाय परा चासौ मा च श्रीस्तदात्मने तद्व्यापिने ।। ३९ ।। ज्ञान-विज्ञानयोर्निधिकारणाय ब्रह्मणे बृहद्गुणाय अनन्ताः शक्तयो यस्य तस्मै न गुणा सत्वादयो यस्मिन् न विकाराः षोड़श यस्मिन् अतोऽप्राकृताय ।। ४० ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

न नाकपृष्ठमिति श्लोके न मोक्षसदृशं किञ्चिदित्याद्युक्तपुरुषार्थोत्तमं मोक्षं न वाञ्छन्तीति कथं कथ्यत इत्यतस्तत्तात्पर्यं मानेनाह ।। अपुनर्भवमात्रादिति । जननादिविकलान्मोक्षाद्धरिसामीप्यं तद्रूपो मोक्ष उत्तमस्तत्रापि सामीप्येऽपि स्पर्शयोग्यत्वमुत्तममित्यन्वेति । यथा सम्यगुत्तममिति वेदविदो विदुः ।। ततश्चायं श्लोकार्थः ।। के ते कामास्तस्य त्यक्ता इत्यतस्तानाहुः ।। नेति । नाकपृष्ठं नाकस्य पृष्ठे सुकृत तेऽनुभूत्वेत्यादेः स्वर्गं न च पारमेष्ठ्यं सत्यलोकाधिपत्यं न सार्वभौमं चक्रवर्तितां गतं । इमा रामाः सरथाः सतूर्या इत्युक्तेः साम्राज्यं रसाधिपत्यं बलिप्रभाव न योगसिद्धिरणिमादीनपुनर्भवं सामान्यमुक्ति तत्पादरजः प्रपन्नाः । तदित्यव्ययं षष्ठ्यर्थे । त्वत्पादेति पाठः तु स्फुटार्थः । न वाञ्छन्तीत्यन्वयः ।। ३७ ।। ईश लक्ष्मीसुखद नाथ सर्वनाथ । संसारचक्रे तत्समुहे वा तदात्मकचक्रे वा भ्रमतः शरीरिणो देहधारिणो यदीप्सितं वाञ्छितं स्यात्तदन्यैः साधनसामग्रीशून्यैर्दुरापं दुष्प्राप्यं तमोजनिः क्रोधवशोऽनीशोऽस्मदादिप्राणिनां नार्थः समर्थेतरो वा भवत्समक्षं भवतोऽपरोक्षं प्राप । हिना सर्वानुभवसिद्धतामाहुः ।।३८ ।। नमस्तुभ्यं भगवत इति पद्ये भूताय भूतभूतायेतिजगज्जनार्दनैक्यमुच्यत इति भ्रमं भ्रंशयन्ननूद्य व्याकरोति ।। भूताय सदा विद्यमानायेति । भू सत्तायामित्यस्मात्कप्रत्ययः । कालप्रबन्धमात्र इति द्योतयितुं सदेति पूर्वाचार्यैरिति ज्ञेयं ।। ततश्चायं पदार्थः ।। महात्मने भगवते पुरुषाय भगवते नमः । भूतावासाय जगन्निलयाय भूताय सदा विद्यमानाय पराय परात्मने । तत्तद्वेदान्तगतशब्दानुकृतिरियमिति न पुनरुक्तिरिति हृदयं । एवमुत्तरत्रापि ।। ३९ ।। ज्ञानेति श्लोकेऽप्राकृतेति पदमिति दर्शयति ।। अप्राकृतायेति । ज्ञानं सामान्य विज्ञानं सामान्यर्ये त्वविज्ञेया विशेषा मम गोचराः । देवादीनां तु तज्ज्ञानं विज्ञानमिति कीर्तितमिति मानिकं विज्ञानं तन्निधयेऽगुणायाविकारायाप्राकृताय तुभ्य नमः ।। ४० ।।

श्रीसुबोधिनी

इदानीं फलविचारेणापि माहात्म्यं वदन्त्यस्तथात्वमाहुर्न **नाकपृष्ठमिति**, लोके ह्येतावन्ति फलानि त्रिविधधर्मसाध्यानि, तत्र सात्त्विकधर्मसाध्यः **स्वर्गो नाकपृष्ठात्मको** यत्रेन्द्रादयो निवसन्ति, राजसधर्मसाध्यं **सार्वभौमं** सर्वस्या अपि भूमेराधिपत्यं, ज्ञानसहितसात्त्विकराजसोभयधर्मसाध्यं **पारमेष्ठ्यं** ब्रह्मस्थानं, तामसधर्मसाध्यं **रसाधिपत्यं**, निवृत्तिधर्मसाध्यो **योगः**, **सिद्धयोऽ**णिमादयो ध्यानादिसाध्याः, **अपुनर्भवो** मोक्षः स सर्वसाध्यः, एतावन्ति फलानि, वाशब्देनानुक्तसर्वसमुच्चयोनादरश्च सूच्यते,

एतानि सर्वाण्येव फलानि यत्पादरजःप्रपन्ना न वाञ्छन्ति, रजःप्राप्तौ तु न वाञ्छन्तीति किं वाच्यम् ? रजःप्रपन्नाः एव यत्र न वाञ्छन्ति ॥ ३७ ॥ एवं रजसो महाफलत्वं निरूप्य तदनेन प्राप्तमित्यस्य भाग्यमभिनन्दन्ति **तदेष** इति, **नाथे**तिसम्बन्धेनेनोपपत्तिरुक्ता, **अन्यैर्दुरापमप्ययमाप** प्राप्तवान्, अस्यानधिकारधर्मानाह **तमोजनि**रित्यादिभिः, केवलतमसैव **जनि**र्जन्म यस्य, अनेन **मूला**शुद्धिरुक्ता, **क्रोधवश** इति कार्याशुद्धिः, **अहीश** इति संसर्गाशुद्धिरुक्ता, **ईश**पदेनान्यकृतपापसम्बन्धोप्युक्तः, **एवं सर्वदोषनिधानस्य सर्वोत्कृष्टदुर्लभफलप्राप्तिः केवलं भगवदिच्छयेत्याहुः संसारचक्र** इति, **यादृच्छिकमिदं फलं भगवदिच्छयैव भवती**ति निर्णीयते **चक्रे हि पतितः सर्वत्र परिभ्रमति, स भगवच्चरणेष्वायाति भगवति समागतेतो न कोपि हेतुः कर्मादिः**, किन्तु **यदिच्छतो** यस्य चरणारविन्दरेणो**रिच्छत** इच्छां कुर्वतः पुरुषस्य साधनरहितस्यापि **विभव** उत्कृष्टफलं कदाचित् **समक्षो** भवति प्रत्यक्षो भवति, **यदृच्छत** इति**पाठे** यदृच्छातोकस्माद् भगवदिच्छया वा ॥ ३८ ॥ एवं चरणस्पर्शभगवत्तोषादिलक्षणं तस्य भाग्यमभिनन्द्य **तत्सम्बन्धात् स्वयमपि भगवन्नमस्काराधिकारिण्य** इति नमस्यन्ति **नमस्तुभ्य**मितिदशभिः ॥

दश रूपाणि तु हरेर्मूलरूपः स्वशास्त्रतः । वेदान्तवेद्यरूपश्च जगद्रूपस्तथैव च ॥ १ ॥
सङ्घातजीवरूपश्च नानारूपश्च शास्त्रतः । एवं प्रमेयरूपाणि पञ्चधोक्तानि वै हरेः ॥ २ ॥
वेदार्थरूपस्तन्त्रार्थो गुणार्थो ह्यवतारकृत् । अन्तर्यामी च भगवान् दशधोक्तः स्वलीलया ॥ ३ ॥

ज्ञात्वा हि स्तोत्रं कर्तव्यं कोयमिति कियानिति कथङ्गुणक इति च, तत्र दशविधो भगवान् दशविधलीलाभिरेकस्यामेकस्यां लीलायां यावन्त्यवान्तररूपाणि तानि सर्वाण्युच्यन्ते, तत्र प्रथमं सृष्टिलीलां वदन्त्यः पुरुषोत्तमरूपं भगवन्तं निरूपयन्त्यो नमस्यन्ति **नमस्तुभ्य**मिति, भगवान् मूलभूतः स एव भवान्, तदाह **तुभ्यं भगवते नम** इति, आविर्भूतानाविर्भूतरूपे एते एव, ततः सर्वोत्तमोप्ययं जात इतीतरसापेक्षत्वेन पुरुषोत्तमत्वं पदद्वयेन निरूपयन्ति **पुरुषाय महात्मने, महांश्चासावात्मा** चेति, आत्मा हि साक्षात् सर्वस्मृतिप्रतिपाद्यः, **पुरुषः साङ्ख्य**प्रतिपाद्यः, **महान्** वेदप्रतिपाद्यः, त्रितयमेकीकृतं **महान् पुरुष**रूप **आत्मे**त्युक्तं भवति, अनेनैव **सच्चिदानन्दरूपता**प्युक्ता, **पुरुषः** सद्रूपो **महा**नानन्दरूपश्चिद्रूप **आत्मे**ति, ततो मूलभूतस्य पञ्चात्मकत्वमाह **भूतावासाये**त्यादिपदैः, **स एव मूलरूपो भवति यस्मिन् सर्वाणि भूतानि तिष्ठन्ति, एतदर्थमेव** भगवता **प्रदर्शितं मात्रे स्वस्मिन्** जगत्, तदाह **भूता**नामा**वासो** यस्मिन्निति, तानि चेद् भूतानि भिन्नानि भवेयुस्तदासङ्गत्वं भगवतो भज्येतेति **भूत**रूपोपि भगवान्, तदाह **भूताय पराये**ति, स एव च पुनर्मूलरूपो भवति यस्तु प्रशास्ति अनियामकस्य मूलत्वं न सम्भवतीति **पराये**ति 'एतस्यैवाक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत' इत्यादिश्रुतेः, यश्च पुनर्न सर्वोत्तमः स मूलभूतो न भवतीति **परम** उत्कृष्ट उक्तः, तथा न व्यापको योयं नात्मा स विभूतिमान् न भवतीति न तस्य मूलत्वं, तदाहा**त्मन इति**, **परमश्चासावात्मा** चेति, **सर्ग**लीलायां तु **प्रथमतो** भगवान्, ततः पुरुषः, ततो महत्त्वं ततो भूतावासोहङ्कारः, ततो **भूतानि**, ततः **सर्वं** जगत्, तत्रापि **परो** विराड्रूपः **परमात्मा नारायण**श्चेति ब्रह्माण्डविग्रहान्ता सर्वकथा ॥ ३९ ॥ विसर्गसहितं ब्रह्मरूपं भगवन्तं नमस्यन्ति **ज्ञानविज्ञाननिधय** इति, **ज्ञानं** शास्त्रीयं **विज्ञान**मनुभवः, निर्विषयकं सविषयकं वा, आत्मभूतं गुणभूतं च, तयो**र्निधि**रुत्पत्तिस्थानं, **ये केचन ज्ञानविज्ञानार्थिनस्ते सर्वे तत एव कृतार्था भवन्ती**ति, एवं साधनरूपतामुक्त्वा फलरूपतामाह **ब्रह्मण** इति, **ननु ब्रह्मणः** फलरूपत्वं जगत्कर्तृत्वं च कथमुपपद्यते? तत्राहा**नन्तशक्तय** इति **अनन्ताः शक्तयो** यस्य, तेन सर्वरूपोपि भवितुं शक्नोति, अनन्तशक्तित्वं गुणसङ्गाद् भविष्यतीत्याशङ्क्याहा**गुणाये**ति, **न** विद्यन्ते **गुणा** यस्य, गुणसम्बन्धाभावे हेतुर**विकाराये**ति, विकारेषु सत्सु कारणत्वेन गुणा मृग्यन्ते, **विकारा अत्र** जन्मादयो दोषाश्च, तत्रापि **हेतुराप्राकृताये**ति, प्राकृतो हि विकारी दोषवांश्च भवति, **च**कारादप्राकृतत्वेसङ्गित्वं हेतुरुक्तः, **विसर्गे** तु **ज्ञान**मधिकारिविशेषणं, ज्ञानपूर्णो ब्रह्मा भवति, **विविधज्ञानं** सृष्ट्युपयोगि, एवं स्वरूपकार्योपयोगिविशेषणद्वयमुक्त्वा **विसर्ग**रूपमाह **ब्रह्मण** इति, **ब्रह्मात्र** चतुर्मुखः, ततः सर्वकार्योत्पत्त्यर्थ**मनन्तशक्तय** इति, **बन्धाभावायागुणाये**ति, दोषाभावाया**विकाराये**ति, स्वेच्छया सृष्टिव्यावृत्त्यर्थमाहा**प्राकृताये**ति, अनेन **विसर्गे** षड् गुणाप्युक्ता गुणत्रये दोषत्रयाभावश्च, ज्ञानमहत्त्वसामर्थ्यानि **गुणाः** ॥ ४० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

न नाकपृष्ठमित्यत्राभासे तथात्वमिति चरणरेणुस्पर्शायोग्यत्वं, सर्वसाध्य–इति सर्वभावसाध्यः सर्वत्र ब्रह्मबुद्ध्या सर्वहितकृत्या च साध्य इत्यर्थः ॥ ३७ ॥ नतितात्पर्योक्तौ ननु वेदे ब्रह्मणः कर्मब्रह्मभेदेन द्विरूपत्वात् तन्त्रे च चतूरूपत्वाद् द्वयेन चतुर्भ्यो वा नमस्कार उचितो न तु दशभिस्तदधिकरूपानुपलम्भादिति शङ्कायां तत्करणतात्पर्यमाहुर्दश रूपाणि त्वित्यादि, तुशब्दः पक्षं व्यावर्तयति, तथा च श्रीभागवतानुसारेण सच्छास्त्रानुसारेण च दशरूपाणां सत्त्वात् तथेति न दोष इतिभावः, तत्तच्छ्लोकप्रतिपाद्यस्वरूपक्रमेणाहुर्मूलरूप इत्यादि, तथैवेति वेदान्तप्रतिपाद्येन प्रकारेण, सङ्घातजीवरूपश्चेतीदमपि वेदान्तप्रतिपाद्य एव प्रकारे प्रविशति साङ्ख्योक्ते वेति ज्ञेयं, ननु वेदार्थरूप एव कुतो न नमस्यते तत्राहुर्ज्ञात्वेति, हि युक्तोयमर्थो "योन्यथा सन्त"–मितिवाक्यात्, अयं च न केवलं वेदार्थरूप एव किन्तु श्रीभागवताद्यर्थरूपोपि तेन तथेत्यर्थः । नमस्तुभ्यमित्यत्र ततः सर्वोत्तमोपीत्यादेरर्थं टिप्पण्यामाहु

पीत्यादि, सुवोधिन्यामेतदर्थं सर्गलीलायां योजयन्ति सर्गेत्यादि कथेत्यन्तं, एव भगवच्छास्त्ररीत्या मूलरूपत्वमुक्तं श्रीभागवते "भूतमात्रेन्द्रियधियां जन्म सर्ग" इतिलक्षणाद् ब्रह्मण एवोपादानत्वात् कार्यरूपत्वमिति सा कथैतदन्ता निरूपिता गुणवैषम्यमत्र पूर्वं नोक्तं श्रौतमतसङ्कीर्णत्वादिति ज्ञेयम् ।। ३९ ।। ज्ञानेत्यत्र ब्रह्मरूपमिति, वेदान्तवेद्यरूपं तद् विसर्गसहितं पुरुषाद् ब्रह्मादीनामुत्पत्तिसहितं' तत्रापीति दोषभावे, द्वितीयपक्षे विसर्गस्य निरूपणीयत्वात् तत्प्रकटनार्थं पुनर्व्याकुर्वन्ति विसर्गे त्वित्यादि, स्वेच्छया सृष्टीति स्वाभाविकी सृष्टीत्यर्थः, अनेनेति विशेषणषट्केन ।। ४० ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

यत्पादरज इत्यत्र यदिति द्वितीयान्तं पादरजसो विशेषणं न तु समासः, प्रपत्तिः शरणागतिः ।।३७ ।। संसारचक्र इत्यत्र यस्येति इच्छां कुर्वत इत्यनेन सहान्वयात् षष्ठ्यन्तमुक्तं, मूले तु द्वितीयान्तमेव ।। ३८ ।। एवमिति चरणस्पर्शस्तत्तोषश्चाश्चर्यमिति पूर्वमुपक्रान्तः श्लोकत्रयार्थोत्रोपसंहृतः, कारिकासु वेदार्थरूप इति वेदार्थरूपोर्थरूपश्चेत्यर्थः, तन्त्रार्थं इति तन्त्रप्रतिपाद्य इत्यर्थः, गुणार्थ इति गुणानां वस्तुरूप इत्यर्थः, अवतारकृदिति "आद्योवतारः पुरुषः परस्ये" तिवाक्यात् तत्रावतरणकृदित्यर्थः, अन्तर्यामी चेति चकारेण "परावरगतिज्ञश्च" तत्रैवोक्तः, कारिकाणामन्ते ननु दशश्लोकेषु नमनमेव वाक्यार्थ इति स्वरूपवर्णनं कुत्रोपयुज्यते इत्यत आहुः ज्ञात्वा हीति, स्वरूपं ज्ञात्वा स्तोत्रमुचितं, हि युक्तोयमर्थः, अन्यथा स्तुतेरारोपित्वं भगवान् मन्येत, अत स्वज्ञानं भगवते बोधयितुं स्वरूपवर्णनमित्यर्थः, वाचिकनमनेन भगवतो नमस्यत्वगुणस्योक्तत्वान् नमनस्यापि स्तुतित्वमिति भावः ।। ३९ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

नमस्तुभ्यमित्यादिदशश्लोकार्थनिरूपककारिकासु मूलरूप इति 'नमस्तुभ्य' मितिश्लोके भगवत्पदोपादानात् परमात्मपदोपादानाच्च, वेदान्तवेद्य इति "ज्ञानविज्ञाननिधये" इतिश्लोके ब्रह्मादानन्तशक्तिपदोपादानात्, जगद्रूपेति "कालाये" ति श्लोके विश्वायेतिपदोपादानात्, सङ्घातजीवरूप इति "भूतमात्रेन्द्रिये"ति श्लोके भूतमात्रेन्द्रियेत्यादिपदोपादानात्, नानारूप इति "नमोनन्ताये" तिश्लोके अनन्तायेतिपदोपादानात्, वेदार्थरूप इति "नमः प्रमाणमूलाये"ति श्लोके प्रमाणमूलादिपदोपादानात्, तन्त्रार्थं इति "नमः कृष्णाये" ति श्लोके व्यूहसहितपुरुषोत्तमनिरूपणात्, तथा हि 'रामाये' त्यनेन सङ्कर्षण उक्तः, 'वसुदेवसुताये' त्यनेन वासुदेवः, 'प्रद्युम्नानिरुद्ध' पदाभ्यां तावेव, 'कृष्ण' पदेन सच्चिदानन्दः पुरुषोत्तमः उक्तः, गुणार्थ इति "नमोगुणे" तिश्लोके 'गुणप्रदीपाये" त्यादिपदोपादानात्, अवतारकृदिति "अव्याकृते" ति श्लोके 'अव्याकृतविहाराये'त्यद्युक्तेः, अन्तर्यामि चेति "परावरे" ति श्लोके 'परावरगतिज्ञाये' तिपदोपादानात् । तुभ्य भगवते इत्यस्य विवृतौ आविर्भूतानाविर्भूत इति तुभ्यमिति युष्मच्छब्देन पुरोवर्तिनिर्देशात् पुरोवर्तित्वस्याविर्भूत एव सत्त्वात्, भगवत्पदे अनाविर्भूत इति "ब्रह्मेति परमात्मेति भगवानिति शब्द्यत" इतिवाक्याद् भगवत्पदं परमकाष्ठापन्नवस्तुवाचकं, परमकाष्ठापन्नं त्वाविर्भूतानाविर्भूतत्वेन द्विविध, तत्र तुभ्यमित्यनेनाविर्भूतस्योक्तत्वाद् भगवत्पदेनानाविर्भूत उच्यत इत्यर्थः ।। ३९ ।। ज्ञानविज्ञाननिधाय इत्यस्य विवृतौ ज्ञानमहत्त्वसामर्थ्यानीति ."ज्ञानविज्ञाने"-त्यनेन ज्ञानं "ब्रह्म"पदेन महत्त्वं "अनन्यशक्ति" पदेन सामर्थ्यमित्यर्थः, बन्धदोषजडता इति "अगुण" पदेन बन्धभावः' "अविकार" पदेन दोषाभावः, "अप्राकृत" पदेन जडत्वाभावः, एवं दोषत्रयाभावः पदत्रयेण निरूपितः ।। ४० ।।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

नमस्तुभ्यमित्यादिदशश्लोकप्रतिपाद्यानि रूपाण्याहुर्दशरूपाणीत्यादि १४४$\frac{३}{४}$"कालाये" ति श्लोके जगद्रूप उक्तः, यद्यप्येतदाभासे जगद्रूपतामुक्त्वा नमस्यन्तीत्युक्तं तथाप्युक्त्वेति न पूर्वानुवादः किन्तु 'कालाये' तिश्लोक एव जगद्रूपताकथनपूर्वकं नमनमेव वाक्यार्थ इति, सङ्घातेति का. १४५$\frac{३}{४}$, १४६$\frac{३}{४}$ ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्याधिकारस्य महत्त्वे सदाचारमपि प्रमाणमाहुः—नेति । यत्पादरजःप्रपन्नाः शरणं प्राप्ताः भक्तजनाः नाकपृष्ठादिकं न वाञ्छन्ति तुच्छं मन्यन्ते । कं सुखम् । न कं सुखं यत्तदकं दुःखम् । न अकं यत्र तन्नाकम् । तदेव पृष्ठं स्थानं नाकपृष्ठं स्वर्गम्, सार्वभौमं सर्वभूमिराज्यम्, पारमेष्ठ्यं ब्रह्मपदम्, रसाधिपत्यं पातालादिबिलस्वर्गराज्यम्, योगसिद्धीः अणिमाद्यैश्वर्याणि, अपुनर्भवं लयात्मकं मोक्षं च ।। ३७ ।। 'यदि न वाञ्छन्ति तदा तेषां तन्न स्यात्' इत्याशङ्क्याहुः—संसारेति । जन्ममरणादिसंसारचक्रे भ्रमतः शरीरिणः प्राणिमात्रस्य, न जात्यादिविशेषनियमः, नीचस्यापि यत् पादरजः इच्छतः सेव्यमेव भवत्विति प्रार्थयतो विभवो लोकापेक्षिता सर्वापि सम्पत् समक्षः प्रत्यक्षः स्वयमेव स्यात्, प्रह्लादाम्बरीषादेस्तत्प्रसिद्धः । "उक्ततपआदिसाधनस्यापि भवत्कृपां विना दुष्करत्वाद्भवत्कृपैव मुख्यं साधनम्" इति सूचयन्त्यः सम्बोधयन्ति—नाथेति । अन्यैर्ब्रह्मादिभिरपि दुरापं तत् पादरजः एष कालियः आप । 'न चैष तत्प्राप्तियोग्यः, स्वभावदुष्टत्वात्' इत्याहुः—क्रोधवश इति । तत्र हेतुमाहुः—तमोगुणाज्जनिर्यस्य स इति । संसर्गदोषेणापि तस्य दुष्टत्वमाहुः—अहो इति ।। ३८ ।। एवं दण्डानुमोदनेन क्रोधस्य शान्ति विधाय प्रसन्नतार्थं तदैश्वर्याद

निरूपयन्त्यः प्रणमन्ति —नम इति दशभिः । भगवते अचिन्त्यानन्तैश्वर्यादिगुणनिधये तुभ्यं नमः । एतदुपपादनायैवान्यानि विशेषणानि । तत्र सर्वत्र 'तुभ्यं नम' इति सम्बन्धः । अत्र क्वचिद्द्विरुक्तिस्त्रिरुक्तिश्च व्याकुलतातिशयवशात् प्रेमातिशयवशाच्च बोध्या । पुरुषाय पूर्षु अन्तःकरणेषु नियामकतया शेते तिष्ठतीति तथा तस्मै, अत एव महात्मने महतां ब्रह्मादीनामपि नियन्त्रे । भूतानि आकाशादीनि प्राणिनश्च आवसन्त्यस्मिन्निति भूतावासस्तस्मै सर्वाधाराय । भूताय पूर्वमपि सते । पराय प्राकृतविलक्षणाय । परमात्मने परमेश्वराय ॥ ३९ ॥ ज्ञानं शास्त्रीयम्, विज्ञानमनुभवः, तयोर्निधये कारणाय । ब्रह्मणे व्यापकाय । अनन्ताः अपरिमिताः विद्याऽविद्यादयः शक्तयो यस्य तस्मै । अविकाराय जन्मादिविकारशून्याय तत्र हेतुः—अगुणाय सत्त्वादिप्राकृतगुणवश्यतारहिताय । तत्रापि हेतुमाहुः—प्राकृताय प्रकृतिप्रवर्तकाय च ॥ ४० ॥

अन्वितार्थप्रकाशिका

न नाकेति ॥ यस्य तव पादरजः प्रपन्नाः शरणं प्राप्ताः भक्तजनाः नाकपृष्ठं स्वर्गस्थानं न वाञ्छन्ति इति सर्वत्रान्वयः । न च सार्वभौमं सर्वभूमिराज्यं न पारमेष्ठ्यं ब्रह्मपदं न च रसाधिपत्यं पातालादिराज्यं न च योगसिद्धीः अणिमाद्याः अपुनर्भवं मोक्षमपि न वाञ्छन्ति ॥ ३७ ॥ तदेष इति ॥ हे नाथ ! संसारचक्रे भ्रमतः शरीरिणः प्राणिमात्रस्य यत्पादरजः इच्छतः विभवः सम्पत् समक्षः प्रत्यक्षः स्वयमेव स्यात् । अन्यैर्ब्रह्मादिभिरपि दुरापं तत् पादरजः कर्म तमोजनिः तमोगुणप्रभवः क्रोधवशश्च एषः अहीशः कालियः आप ॥ ३८ ॥ अथ नमस्कारात्मिका दशश्लोकी स्तुतिष्टीकाकृद्भिरनेकधा व्याख्याताऽप्यार्जवेनैकधैव व्याख्यायते नम इति ॥ भगवते पुरुषाय महात्मने भूतानामावासाय आधारभूताय भूताय च पराय परमात्मने तुभ्यं नमः ॥ ३९ ॥ ज्ञानेति ॥ ज्ञानं शास्त्रीयं विज्ञानमनुभवस्तयोर्निधये कारणाय ब्रह्मणे व्यापकाय अनन्ताः शक्तयो यस्य अगुणाय निर्गुणाय अविकाराय प्राकृताय प्रकृतिप्रवर्तकाय । अप्राकृतायेति वा छेदः । तुभ्यं नमः ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यस्य तव पादरजः प्रपन्नाः स्वर्गादीन् न वांछंति नाकपृष्ठं स्वर्गं सार्वभौमं सर्वभूमेरेकनियंतृत्वं पारमेष्ठ्यं विधिपदं रसाधिपत्यं पातालराज्यं योगसिद्धीरणिमाद्याः अपुनर्भवं मोक्षं च ॥३७॥ तदिति हे नाथ यदन्यैर्ब्रह्मादिभिर्दुरापं दुःखेन प्राप्यं तत्तव पादरजः तमोजनिस्तमोगुणजन्मा एषः अहीशः क्रोधवशोपि प्रापयत्तव चरणरज इच्छतो जनस्य समक्षः विभवश्चतुर्वर्गरूपा समृद्धिः स्वयमेव स्यात् ॥ ३८ ॥ दशभिः श्लोकैर्नमस्कारं कुर्वंत्य आहुः नम इत्यादिना भगवते अनेकविधैश्वर्यसंपन्नाय पुरुषाय अनादिनित्यसिद्धपुरुषविग्रहाय महात्मने अंतर्यामिशक्त्या सर्वत्र व्यापकाय अत एव भूतावासाय सर्वभूतधारकाय भूताय इह मनुष्यरूपेणाविर्भूताय पराय बद्धमुक्तेभ्यः श्रेष्ठाय परमात्मने तुभ्यं नमः ॥ ३९ ॥ ज्ञानेति । ज्ञानशास्त्रजन्यं विज्ञानं प्रत्यक्षानुभवस्तयोर्निधये ताभ्यां पूर्णाय अतः ब्रह्मणे परब्रह्मणे अनंतशक्तये अपरिमितिबलाय अगुणाय सत्वादिगुणवर्ज्जिताय अविकाराय विकारशून्याय अप्राकृताय प्रकृत्युत्पन्नविग्रहरहिताय अप्राकृतदेहायेति यावत् ते तुभ्यं नमः ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वैश्वर्यकैवल्यादिषु प्रार्थनीयपुरुषार्थेषु सत्स्वपि तान् विहाय किमर्थं विशेषेण मदङ्घ्रिरेणुं वाञ्छन्तीत्यत्राहुः ॥ नेति ॥ यत्पादरजःप्रपन्नाः यस्य तव चरणरेणुं सेवमानाः नाकपृष्ठं स्वर्गं स्वर्लोकवैभवमित्यर्थः । न च नैवेत्यर्थः । वाञ्छन्ति । सार्वभौमं सप्तद्वीपवत्या भूमेः चक्रवर्त्तिराज्यं, वाञ्छन्ति । पारमेष्ठ्यं ब्रह्मलोकसंबन्धि सुखं, न वाञ्छन्ति । रसाधिपत्यमधस्तनलोकाधिपत्यं, न वाञ्छन्ति । योगसिद्धीरणिमादिकाः सिद्धीश्च अणिमाद्यष्टविधमैश्वर्यमपीत्यर्थः । न वाञ्छन्ति । अपुनर्भवं वा कैवल्यमोक्षमपीत्यर्थः । न वाञ्छन्ति । पारमेष्ठ्यादिभ्यः अपि त्वत्पादरजसः अतिशयितपुरुषार्थरूपत्वात् न तद्वाञ्छन्तीति भावः ॥ ३७ ॥ तदिति ॥ एषः अहीशः सर्पाधिपः कालियः, तमोजनिस्तमःप्रचुरजन्मा, अत एव क्रोधवशः तथापि, हे नाथ, अन्यैः दुरापं तत्त्वत्पादरजः, आप लेभे । इदमतिचित्रमिति भावः । न च त्वच्चरणरजोमहिमा यथातथाविध इत्याह । संसारचक्रे भ्रमतः, यत्तव चरणस्पर्शवद्रजः इच्छतः एतन्मे सेव्यं भवत्विति प्रार्थयमानस्य शरीरिणः, विभवः चतुर्वर्गातिरूपा समृद्धिः, प्रत्यक्षः एव स्यात् । तदेष अयत्नत एव प्रापेत्यतः परं किं चित्रमिति भावः ॥ ३८ ॥ सांप्रतं भगवतोऽचिन्त्यैश्वर्यादिगुणवत्तां मनसि निधाय शरणत्वोपयुक्तैर्गुणैर्विशिषन्त्यः स्तुवन्ति दशभिः श्लोकैः । तत्र भगवते इत्यादीनां चतुर्थ्यन्तानां तुभ्यं नम इत्यनेनान्वयः ॥ नम इति ॥ भगवते अपरिमितैश्वर्यसंपन्नाय, पुरुषाय अनादिनित्यसिद्धपुरुषाकारविग्रहाय, महात्मने विग्रहवत्त्वेऽप्यपरिच्छिन्नाय भूतावासाय सर्वभूतहृदयगुहाविहितावासाय, भूताय सर्वदा विद्यमानाय, पराय बद्धमुक्तेभ्योऽतिश्रेष्ठाय, अत एव परमात्मने कारणकारणाय तुभ्यं नमः ॥ ३९ ॥ ज्ञानेति ॥ ज्ञानमनिष्टपरिहारोपयुक्तं च विज्ञानमिष्टप्रापणोपयुक्तं च तयोर्निधिराश्रयस्तस्मै, ब्रह्मणे गुणविभूत्यैश्वर्यादिभिर्बृहते अनन्तशक्तये अपरिमितशक्तियुक्तायापरिमितबलायेति वा अगुणाय सत्त्वादिमायिकगुणवर्जिताय, सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः इति स्मृते । अविकाराय चिदचिच्छरीरत्वेऽपि तद्गतपरिणामित्वादिविकारवर्जिताय, प्राकृताय सृष्टिकाले तदर्थं प्रकृतिप्रवर्त्तकाय, अप्राकृतायेति च्छेदे प्रकृतिगुणोद्भूतविग्रहरहिताय च ते तुभ्यं, नमः ॥ ४० ॥

कृष्णप्रिया

हे देव ! जिन्होंने आपके श्रीचरणों की रजः प्राप्त की और जो आपके चरण रज के शरण में हैं, वे भगवदीय जन न तो स्वर्गलोक, न तो सार्वभौमपद, न तो ब्रह्माजी का सत्यलोक, न रसातल-पातालादि का राज्य, न योग न अन्य सिद्धियों को चाहते हैं अधिक क्या वे मोक्ष तक की कामना भी नहीं करते हैं ॥ ३७ ॥ हे नाथ ! तप आदि साधननिष्ठ एवं ज्ञाननिष्ठ महानुभावों के लिए जो अप्राप्य मानी गयी वही दुर्लभ-रज, इस कालीय नाग ने कैसे पायी ? यह कालीय नाग तो (१) तमोगुण से उत्पन्न है, यह मूलरूप से अशुद्ध है । (२) फिर भी क्रोध से भरा हुआ है, इस क्रिया से अशुद्ध है । (३) सर्पों के स्वामी होने से संसर्ग दुष्ट है । वह चरणरज पा चुका है । नाथ आपके श्रीचरणों के रज की ऐसी दिव्य महिमा है, जिससे संसार चक्र में सतत् भटकने वाला भी यदि रज की कामना कर ले तो उसको मोक्ष अथवा ऐश्वर्य की प्राप्ति हो जाती है ॥ ३८ ॥ हे नाथ ! आप भगवान् को प्रणाम, आप सांख्य प्रतिपाद्य पुरुष हैं, आप वेदवेद्य महात्मा हैं, आप सर्वमहाभूतों के आश्रयदाता हैं, आप सर्वभूतस्वरूप हैं, आप सर्व से पर स्वरूप हैं, ऐसे उत्तमस्वरूप परमात्मा को हमारा नमस्कार है ॥ ३९ ॥ हे भगवन् ! ज्ञान एवं विज्ञान के भंडार, ब्रह्मस्वरूप, अनन्तशक्तिसम्पन्न, प्रकृति के गुणो से पर निर्विकार है क्योंकि आप प्राकृत गुण जो जन्म जरादि से पर अप्राकृत हैं वैसे आपको नमस्कार है ॥ ४० ॥

कालाय कालनाभाय कालावयवसाक्षिणे । विश्वाय[1] तदुपद्रष्ट्रे तत्कर्त्रे[2] तस्य हेतवे ॥ ४१ ॥
भूतमात्रेन्द्रियप्राणमनोबुद्ध्याशयात्मने । [3]त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये ॥ ४२ ॥
नमोऽनन्ताय सूक्ष्माय कूटस्थाय विपश्चिते । नानावादानुरोधाय वाच्यवाचकशक्तये ॥ ४३ ॥
नमः प्रमाणमूलाय कवये शास्त्रयोनये । प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—कालाय कालनाभाय कालावयवसाक्षिणे विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे तस्य हेतवे तुभ्यं नमः ॥४१॥ भूतमात्रेन्द्रियप्राणमनोबुद्ध्याशयात्मने । त्रिगुणेन अभिमानेन गूढस्वात्मानुभूतये तुभ्यं नमः ॥ ४२ ॥ अनन्ताय सूक्ष्माय कूटस्थाय विपश्चिते । नानावादानुरोधाय वाच्यवाचकशक्तये तुभ्यं नमः ॥४३॥ प्रमाणमूलाय नमः कवये शास्त्रयोनये । प्रवृत्ताय निवृत्ताय निगमाय नमः नमः ॥४४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनंतशक्तित्वात्कालशक्त्या विश्वस्रष्टत्वा दरूपेण नमस्यंति कालाय कालस्वरूपाय । कालनाभाय कालशक्त्याश्रयाय । कालावयवानां सृष्ट्यादिसमयानां साक्षिणे । ततश्च विश्वाय विश्वरूपाय । तर्हि किं जडोऽहं नहि तदुपद्रष्ट्रे । न च द्रष्टृमात्राय । किंतु तत्कर्त्रे । न च कर्तृमात्राय विश्वहेतवे सर्वकारकरूपाय ॥ ४१ ॥ तदेवाहुः । भूतमात्रेति । भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने आशयश्चित्तं भूतादिरूपाय । अतः सर्वकारकरूपायेति अहंकारात्मतया नमस्यंति । त्रिगुणेनेति । एवं सृष्टे कार्ये यस्त्रिगुणोऽभिमानस्तेन गूढा स्वांशभूतानामात्मनां जीवानामनुभूतिर्येन तस्मै ॥ ४२ ॥ त्वं त्वहंकारानावृत इति स्तुवंति । नमोऽनंतायाहंकारापरिच्छेदात् । अतः सूक्ष्मायादृश्यत्वात् अत एव कूटस्थायोपाधिकृतविकाराभावात् । अत एव विपश्चिते सर्वज्ञाय । एवं वस्तुतः स्तुत्वाऽचिंत्यमायात्वेन स्तुवंति नानावादानुरोधाय अस्ति नास्ति सर्वज्ञः किंचिज्ज्ञो बद्धो मुक्त एकोऽनेक इत्यादिनानावादाननुरुणद्धि माययाऽनुवर्तते यस्तस्मै । किं च । वाच्यवाचकशक्तये । अभिधानाभिधेयशक्तिभेदादपि नानात्वेन प्रतीयमानायेत्यर्थः ॥ ४३ ॥ अनावृतत्वमेव हेत्वंतरेणापि सूचयंत्यः स्तुवंति । नमः प्रमाणमूलाय । चक्षुरादीनां चक्षुरादिरूपाय । अत एव कवये स्वयं तन्निरपेक्षज्ञानाय । कुतः । शास्त्रयोनये वेदात्मकनिःश्वासाय । किं च प्रवृत्ताय निवृत्ताय निगमाय नमो नमः इति ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सतश्च सर्वसाक्षित्वाच्च यद्यहं विश्वरूपस्तर्हि जडतापत्तिस्तत्राह– नहीति । ननु केवलमुपद्रष्टैवाहं तत्राहुः– न च किंत्विति संबंधः । एवमग्रेपि ॥ ४१ ॥ तदेव सर्वकारकरूपत्वमेव । यतो भूतादिरूपोऽसि अतो हेतोः । एवम् उक्तरीत्या । सृष्टिकार्ये देहादौ । त्रिगुणोऽभिमानः सात्त्विकोऽहं ब्राह्मणोऽस्मीत्याद्याकारकाभिमानः । गूढाऽऽच्छादिता स्वांशभूतानां जीवानाम् अनुभूतिर्ज्ञानम् ॥ ४२ ॥ अहंकारापरिच्छेदात् अहंकारकृतपरिच्छेदाभाववत्त्वात् । अतः परिच्छेदाभावात् । अत एव अदृश्यत्वादेव । अत एव उपाधिकृतविकाराभावादेव । अनुरुणद्धि अनुसरति । नानात्वेऽन्यदप्याह–किं चेति । इत्यर्थ इति । वाच्यवाचकभेदोऽपि नानात्वप्रतीतौ हेतुरिति भावः ॥ ४३ ॥ अनावृतत्वम् आवरणहीनत्वम् । चक्षुरादिरूपाय "चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" इत्यादिश्रुतेः ।

---

[1] विश्वरूप य-वीर. । [2] विश्व-श्रीधर. वंशी. वीर. विज. विश्व. शुक. । [3] निर्गुणेना-विज. ।

यद्वा प्रमाणानां प्रत्यक्षादीनां मूलाय प्रतिष्ठापकाय। "प्रमाणमिंद्रियग्रामे प्रत्यक्षादौ प्रमातरि। मर्यादा नित्यशास्त्रे यत्तासत्ये हेतुमानयोः॥" इति विश्वः। अत एव चक्षुरादिप्रकाशकत्वादेव। तन्निरपेक्षज्ञानाय चक्षुरादिनिरपेक्षज्ञानाय। तत्र हेतुं शंकते–कुत इति। यद्वा–शास्त्रं योनिर्ज्ञप्तिकारणं यस्य तथा। "योनिः स्त्रीणां भगे स्थाने कारणे ताम्रके पणे" इति यादवः। यद्वा–निर्देशकारणाय इदं कुर्यादिदं नेत्यादिनिर्देशस्य कर्त्रे 'निर्देशग्रंथयोः शास्त्रम्' इत्यमरः। प्रमाणस्य वेदस्यापि मूलाय श्रीभागवतस्वरूपाय, चतुश्लोक्युपदेशानंतरमेव ब्रह्ममुखेभ्यो वेदानामाविर्भावात्। कवये तदाविर्भावकर्त्रे व्यासदेवाय नम इत्यर्थः। 'व्यासः प्राकट्यकृन्मतः' इति सिद्धांतदर्पणोक्तेः। शास्त्रं श्रीभागवतमेव प्रमाणं ज्ञप्तिसाधनं वा यत्रेत्यपि विश्वनाथः। न हि केवलं शास्त्रयोनिरेव किं तु तद्रूपमपि त्वमित्याह–किञ्चेति। प्रवृत्ताय प्रवृत्तिमार्गप्रवर्तकाय विधिरूपायेत्यर्थः। निवृत्ताय निवृत्तिमार्गप्रवर्तकाय निषेधरूपाय। यद्वा सृष्टौ प्रवृत्ताय, प्रलये निवृत्ताय। निगमाय उभयेषां मार्गाय, विषयायेत्यर्थः, 'अयनं पदवी मार्गः पद्या च निगमः पथि' इति हलधरः। यद्वा—उभयकारणे हेतुः– निगमाय वेदमूर्तये 'निगमो निश्चये वेदे परे पथि वणिक्पथे' इति यादवः॥ ४४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कालाय कालशक्तिकत्वेन तद्रूपाय अथ च कालस्य कालचक्रस्य नाभये मध्यवलयाय तदाश्रयायेत्यर्थः। समासान्तत्वमार्षं तथापि कालावयवानां साक्षिण एव न तु तेषु प्रसक्ताय विश्वाय विराड्रूपाय तदुपद्रष्ट्रे विश्वान्तर्यामिणे॥ ४१॥ भूतादीनामात्मने चेतयित्रे ज्ञानप्रदायेत्यर्थः। अथ च गूढा आच्छादिता स्वांशभूतानां जीवानामनुभूतिरात्मतत्त्वज्ञानं येन तस्मै॥ ४२॥ अनन्ताय परममहते अथ च सूक्ष्माय कूटस्थाय निर्विकाराय अथ च विपश्चिते विचित्रवैदग्धिगुरवे नानावादाननुरोधयति प्रवर्तयतीति तस्मै यतः वाच्यवाचकयोः अर्थशब्दयोः शक्तिर्यस्मात तस्मै॥ ४३॥ अतः प्रमाणं श्रीभागवतशास्त्रसारसङ्ग्रहाः वेदाः तस्य मूलाय कारणायाऽऽश्रयाय वा कवये स्वतः सिद्धज्ञानाय अथ च शास्त्रयोनये शास्त्रमेव योनिः प्रमाणं यस्य "शास्त्रयोनित्वात्" (१।१।३) इत्यत्र तथा तथा व्याख्यानात् प्रवृत्तं च निवृत्तं च शास्त्रं तदुभयस्मादपि निगमरूपाय अद्भुतत्वेन पुनर्नमो नम इति॥ ४४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कालाय कालशक्तिमत्त्वेन तद्रूपायाथच कालस्याश्रयाय, यद्वा, कालाय, अतः कालनाभाय तथापि कालावयवानां परमात्मादीनां द्विपरार्द्धान्तानां साक्षिण एव, न तु प्रवर्त्तकाय। प्रवर्त्तकत्वे संहारककालसम्बन्धादिना निर्द्दयत्वादिप्रसक्तेः, विश्वाय सर्वकर्तृ-कर्म्म-करणादिरूपाय तत्तच्छक्त्यादिप्रदत्वात्, अथच तदुपद्रष्ट्रे विश्वसाक्षिमात्राय तत्तत्कर्म्मभिरलिप्तायेत्यर्थः। यद्वा, विश्वाय विराड्रूपाय मायाश्रयत्वात्तदुपद्रष्ट्रे विश्वान्तर्य्यामिणे भूतादीनामात्मनामात्मने चेतयित्रे ज्ञानप्रदायेत्यर्थः॥ ४१॥ अथच गूढा आच्छादिता स्वांशभूतानामनुभूतिरात्मतत्त्वज्ञानं येन तस्मै॥ ४२॥ अनन्ताय परममहते अथच सूक्ष्माय, कुटस्थाय निर्विकाराय अथच विपश्चिते विचित्रवैदग्धीगुरवे, यद्वा, कूटं शाठ्यं तत्स्थाय, अथच विवेकिने नानावादप्रवर्त्तकाय, यतो वाच्यवाचकयोर्थशब्दयोः शक्तिर्यस्मात् तस्मै॥ ४३॥ अथच प्रमाणं वेदा वैष्णवसिद्धान्ता वा, तस्य मूलाय कारणाय आश्रयाय वा, कवये शास्त्रकृते, अथच शास्त्रार्थाश्रयाय, यद्वा, स्वतः सिद्धज्ञानाय, अथच शास्त्रपराय प्रवृत्तनिवृत्तरूपाय, शास्त्राय निगमाय त्वदाज्ञारूपाय तत्तद्विहिताचाराय वा, अद्भुतत्वेन पुनर्नमो नम इति॥ ४४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कालः नाभिवदंशभूतो यस्य सः कालनाभः हेतवे उपादानाय॥ ४१॥ निर्गुणेन अगुणहेतुना अभिमानेन स्वसङ्कल्पेन गूढस्वात्मानुभूतये स्वविषयमन्येषां ज्ञानं निरुध्यते॥ ४२॥ कूटस्थाय सर्वकारणाय अविकाराय वा नानावादाविरुद्धाय ताननाद्दत्यावस्थिताय॥ ४३॥ प्रवृत्ताय निवृत्ताय उभयविधकर्मनिर्वाहकाय निगमाय औपनिषद्ज्ञानप्रवर्त्तकाय॥ ४४-६५॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सत्त्वादिप्रकृतिगुणक्षोभनिमित्तकालस्यापि पृथङ् निमित्तताव्युदासाय तस्य तत्सामानाधिकरण्यनिर्देशः कालायेति कालात्मकायेत्यर्थः। तदात्मकत्वं न मृदात्मको घट इतिवत् स्वरूपाभेदनिबन्धनमपि त्वात्मा देवो जात इतिवच्छरीरात्मभावनिबन्धनमित्यभिप्रायेणाहुः—कालनाभायेति। कालो नाभिवदङ्गभूतो यस्य सः कालनाभः "अच्प्रत्ययपूर्वात्सामलोम्नः" (५।४।७५) इत्यत्राजितियोगविभागाश्रयणात्सर्वसमासान्तोऽच्प्रत्ययः। यद्वा, कालस्य नाभिर्नेम्यरादीनां नाभिवद्धारकः आत्मभूत इति यावत् देवमनुष्यादिदेहपारवश्येन जीवस्य तच्छरीरकत्ववन्न कालपारवश्येन तच्छरीरकत्वमपि तु तद्याथात्म्यावलोकनेनेत्यभिप्रायेणाहुः कालावयवसाक्षिण इति। कालावयवानां निमेषादिसंवत्सरान्तानां साक्षिणे साक्षाद्द्रष्ट्रे पराय भूतायुत्युक्तकारणत्वप्रयुक्तकार्यानन्तत्वाभिप्रायेण कार्यसामानाधिकरण्येन निर्दिशन्ति—विश्वायेति। विश्वात्मकायेत्यर्थः। तदात्मकत्वं किं तत्स्वरूपाभेदनिबन्धनं नेत्याहुः, विश्वरूपायेति। विश्वं रूपं शरीरं यस्य तस्मै शरीरात्मभावनिबन्धनं सामानाधिकरण्यमिति भावः। यद्वा, सूक्ष्मचिदचिद्विशिष्टस्यैव कारणत्वात् तस्य स्थूलचिदचिद्विशिष्टेनात्मना साकमनन्यत्वाभिप्रायेण विश्वायेत्युक्तिः विशेष्यांशस्यापि शरीरात्मभाव-

निबन्धनविश्वसामानाधिकरण्याभिप्रायेण विश्वरूपायेत्युक्तिः न केवलमुपादानकारणभूताय अपितु जगन्निमित्तभूताय चेत्यभिप्रायेणाहुः तत्कर्त्रे इति । उपकरणाधिकरणादिकमपि त्वमेवेत्यभिप्रायेणोक्तं विश्वस्य हेतव इति हेतुत्वं कारकषट्कसाधारणं गोबलीवर्द्दन्यायेन तत्कर्त्रे इत्युक्तिः ॥ ४१ ॥ विश्वाय विश्वरूपायेत्युक्तयोः कार्येण सह विशिष्टविशेष्यांशसामानाधिकरण्ययोर्निबन्धनद्वयमाहुः—भूतेति । भूतादिरूपेण परिणतत्वाद्भूताद्यात्मने अत्र भूतादिशब्दः । भूतादिकार्यरूपेण परिणताचिद्विशिष्टब्रह्मपराः एवं च कार्यावस्थब्रह्माभिन्नकारणावस्थब्रह्मण इत्यर्थः । भूतादीनामात्मने तदन्तः प्रवेशप्रशासनाभ्यां भर्त्रे इत्यप्यर्थस्तन्त्रेण विवक्षितः अन्तःप्रवेशप्रशासनाभ्यां भर्तृत्वमेव ह्यात्मशब्दप्रवृत्तिनिमित्तं तत्र भूतान्याकाशादीनि मात्राः शब्दादयः पञ्च इन्द्रियाणि ज्ञानकर्मोभयेन्द्रियाणि श्रोत्रादीनि दश प्राणाः पञ्च मनोबुद्धिश्चाशयो वासनाः एवं सूक्ष्मचिचिद्विशिष्टब्रह्मणः स्थूलावस्थाचिदचिद्विशिष्टभेदे तयोः कार्यकारणभावो विशेषणविशेष्ययोः शरीरात्मभावश्चेति निबन्धनद्वयमुक्तम् अथ चित्सामानाधिकरण्येऽपि निबन्धनमाहुः—त्रिगुणेनेत्यर्द्धेन । त्रिगुणेन गुणत्रयहेतुकेनाभिमानेन गूढा छन्ना स्वात्मानुभूतिर्जीवानां यस्मात्तस्मै ज्ञानविकासरूपजीवगतकार्यं प्रति कारणभूतायेत्यभिप्रेतार्थः ॥ ४२ ॥ एवं जगत्कारणत्वेन परत्वनिर्वाहणलक्षितस्य परमात्मनः चिदचिद्विशिष्टस्य स्वरूपं विशेष्यांशभूतं जगन्निमित्तकारणं विशोधयन्ति नमोऽनन्तायेति—अत्र सत्यादिवाक्यं प्रत्यभिज्ञाप्यते अनन्तपदेन तस्य कूटस्थपदेन निर्विकारवाचिना सत्यपदस्य विपश्चिच्छब्देन ज्ञानपदस्य च प्रत्यभिज्ञानात् विविधं पश्यति इति विपश्चित् तस्मै नित्यासङ्कुचितसर्ववस्तुविषयकधर्मभूतज्ञानाश्रयायेत्यर्थः । पृषोदरादित्वाद्यशब्दस्य चिभावः एवमचेतनात् त्रिविधजीवेभ्यश्च व्यावृत्तायेत्युक्तं भवति अनन्तायेत्यनेन सर्ववस्तुसामानाधिकरण्यार्हत्वरूपवस्तुपरिच्छेदराहित्यमप्युक्तं सर्ववस्तुसामानाधिकरण्यार्हत्वञ्च सर्वान्तःप्रवेशेन तच्छरीरकत्वेन च, तत्र कथमणुस्वरूपजीवान्तःप्रवेशेन तच्छरीरकत्वं विभोः परमात्मनः सङ्गच्छते ? इत्यत्राहुः—सूक्ष्मायेति । "अणोरणीयान्' नित्यं विभुं सर्वगतं सुसूक्ष्मम्'' इत्यादि श्रुत्युक्तरीत्या सूक्ष्मादपि सूक्ष्मत्वाज्जीवान्तःप्रवेशयोग्यायेति भावः । नन्वेवम्भूतं मां कथं केचिन्निमित्तकारणमेव वदन्ति केचिच्च जीवाभिन्नमित्यादीत्यत्राहुः—नानावादा वेदविरुद्धास्ताननुवृत्त्यावस्थिताय अनधिगतवेदान्तवाच्यैकवाक्यानां विप्रतिपन्नबुद्धीनां तत्तद्वादानुरूपेणापि प्रतीतायेत्यर्थः । तत्र हेतुः वाच्यवाचकशक्तये वाचकाः तत्तद्वादिप्रयुक्ताः विवक्षितार्थविषयाः शब्दाः वाच्यास्तत्तच्छब्दविवक्षिता अर्थाः, तत्र वाच्यशक्तिरुपस्थाप्यत्वयोग्यतालक्षणा वाचकशक्तिरुपस्थापकत्वलक्षणा तदुभयशक्तिनिर्वाहकत्वान्नानावादानुरोधायेत्यर्थः ॥ ४३ ॥ एवमपि केवलं शास्त्रयोनये शास्त्रं योनिः कारणं स्वरूपस्वभावप्रमितिजनकं यस्य तस्मै शास्त्रस्य भ्रमप्रमादविप्रलिप्सादिपुरुषदोषसम्भावनां निराकुर्वन्तो विशिंषन्ति—प्रमाणमूलाय प्रमाणं स्वप्रमितिसाधनं शास्त्रं तस्य मूलाय तदाविष्कर्तृत्वेन तत्कारणाय तथा च स्मर्यते—

अनादिनिधना ह्येषा वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी नाम्ना यतः सर्वाः प्रसूतयः ॥ इति ।

श्रूयते च "तस्य हवा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः" "ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मादजायत" इति च प्रमाणमूलत्वासम्भावनां निराकुर्वन्ति कवये पूर्वपूर्वानुपूर्वीविशिष्टत्वेन शास्त्राविष्कारोपयुक्तसार्वज्ञयुक्ताय न केवलं प्रमाणमूलाय अपि तु प्रमेयनिर्वाहकायापीत्याहुः प्रवृत्ताय निवृत्ताय च उभयकर्मनिर्वाहकाय निगमायोपनिषज्ज्ञानप्रवर्त्तकाय ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कालाय भक्तकामधेनवे कालनाभाय कालाश्रयाय विश्वाय स्वाधीनप्रपञ्चाय तस्य विश्वस्योपद्रष्ट्रे अध्यक्षाय तस्य कर्त्रे अवान्तरकारणाय प्रकृतेर्मूलकारणत्वं निवारयति—विश्वहेतव इति । प्रपञ्चस्य मूलकारणाय "विश्वस्य तदधीनत्वाद्विश्वं विष्णुरितीर्यते" इत्यादिस्मृतेः । विश्वाय विराट्पुरुषाय तत्कर्त्रे विश्वस्योत्पादनमायाप्रेरकाय इत्यादिरर्थो न युक्तः अप्रामाणिकत्वादिति ॥ ४१ ॥ विश्वस्य भगवदधीनत्वं विवृणोति—भूतेति । भूतानि पञ्चमात्राः शब्दादयः इन्द्रियाणि श्रोत्रादीनि प्राणाः दश मनः सङ्कल्पविकल्पलक्षणं बुद्धिर्निश्चयहेतुः एषामाशयः स्थानम् आत्मा स्वभावो यस्य स तथा तस्मै "आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च" इत्यमरः "स्थानेऽभिप्राय आशय" इति यादवः । निर्गुणेन सत्त्वादिगुणजन्मरहितेनाभिमानेनाऽज्ञानेन गूढा अप्रकाशिता स्वात्मानुभूतिर्यस्य स तथा तस्मै ॥ ४२ ॥ अनन्ताय नित्याय सर्वगताय सूक्ष्माय इन्द्रियाऽविषयाय "नित्यं विभुं सर्वगतं सुसूक्ष्मम्" इति श्रुतेः । कूटस्थाय शश्वदेकप्रकाराय विपश्चिते सर्वज्ञाय निपुणबुद्धये वा नानावादानां सिद्धान्तानाम् अनुरोधाय अनुकूलवर्तमानाय वाच्योऽर्थः । तस्य प्रतिपाद्यत्वे योग्यत्वं वाच्यशक्तिः वाचकः शब्दः तस्यार्थप्रतिपादनसामर्थ्यं तद्द्वयं यस्य स तथा तस्मै ॥ ४३ ॥ प्रमाणमूलाय प्रत्यक्षादिप्रमाणप्रतिष्ठापकाय कवये अतिक्रान्तदर्शिने शास्त्रं वेदः योनिर्ज्ञप्तिकारणं यस्य स तथा तस्मै, "योनिः स्त्रीणां भगे स्थाने कारणे ताम्रके पणे" इति यादवः । निर्देशकारणाय इदं कुर्यादिदं न कुर्यादिति विधिकर्त्रे "निर्देशग्रन्थयोः शास्त्रम्" इत्यमरः । प्रवृत्ताय प्रवृत्तिमार्गप्रवर्त्तकाय च सृष्टौ प्रवृत्ताय प्रलये निवृत्तायेति वा उभयेषां निगमाय मार्गाय विषयायेत्यर्थः । "अयनं पदवी मार्गः पद्या च विनिगद्यते निगम" इति हलायुधः । वेदमूर्त्तये वा निश्चायकाय वा "निगमो निश्चये वेदे पुरे पथि वणिक्पथे" इति यादवः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कालविशेषे देशविशेषे च प्रादुर्भवति तस्मिन् तत्तत्परिच्छेदादिदोषान् वारयन्त आहुः कालाय कालस्वरूपाय कालनाभाय कालशक्त्याश्रयाय तथापि कालावयवानां सृष्ट्यादिसमयानां साक्षिणे एव न तु तेषु सत्ताय विश्वाय विश्वरूपाय तर्हि किं जडोऽहं? न हि तदुपद्रष्टे न च द्रष्टृमात्राय किन्तु तत्कर्त्रे नच कर्तृमात्राय किन्तु विश्वहेतवे विश्वस्य हेतुसमुदायाय ॥ ४१ ॥ न च हेतुमात्रायापि यतो भूतानाम् आत्मने चेतयित्रे अतोऽद्भुतं ते चरित्रं यतो जडानपि चेतयसि चेतवान् जडीकरोषीत्याहुः–त्रिगुणो योऽभिमानस्तेन गूढा आवृता शोभना आत्मनो जीवस्याऽनुभूतिर्ज्ञानं येन तस्मै ॥ ४२ ॥ ननु किमत्र तत्त्वं तत्राहुः— अनन्ताय अस्यान्तं वयं न प्राप्नुम इत्यर्थः । तत्र हेतुः सूक्ष्माय दुर्ज्ञेयत्वादित्यर्थः । ननु, जीवात्मानं मदभिन्नमेव पण्डिता आहुस्तत् किमहमात्मानमेव मोहयामि तत्र मैवं वादीरित्याहुः—कूटस्थाय "एकरूपतया तु यः कालव्यापी स कूटस्थः" इत्यभिधानात् त्वमेकेनैवाप्रच्युतस्वरूपेण सर्वकालं व्याप्नोषि सः तु देवमनुष्यतिर्यगादिभिरनेकैः प्रच्युतैः स्वरूपैः कञ्चिदेव कालं व्याप्नोतीति कथं त्वदभिन्नः स इति भावः । देवमनुष्यादित्वं वस्तुतो जीवस्य न स्वरूपमिति चेत्तदपि त्वत्तः स भिन्न एवेत्याहुः विपश्चिते सर्वज्ञाय सत्वल्पज्ञ एव प्रसिद्ध इत्यर्थः । किञ्च, तदपि जीवात्मा ईश्वराद्भिन्न इति ईश्वराभिन्न इति जड इति चेतन इति एक इत्यनेक इत्यादिनानावादान् अनुरुणत्सि कौतुकार्थमवकाशयसीति तस्मै अत एव त्वदिच्छावशादेव तत्र मिथो विवादिनो मिथः संवादिनश्च पण्डिताः शब्दमेव प्रमाणीकुर्वन्तीत्याहुः वाच्यानामर्थानां वाचकानां शब्दानाञ्च नानाविधाः शक्तयो यस्मात्तस्मै ॥ ४३ ॥ शिष्टशब्दमात्रस्य प्रामाण्येपि श्रीभागवतस्य सर्वाधिक्यमाहुः प्रमाणमूलाय श्रीभागवतस्वरूपाय कवये तत्कर्त्रे वेदव्यासस्वरूपाय अत एव शास्त्रयोनये प्रादुर्भावकाय तथा चतुर्वर्गप्रतिपादकं शास्त्रमपि प्रमाणमित्याहुः प्रवृत्तशास्त्राय निवृत्तशास्त्राय तन्मूलनिगमशास्त्राय ॥ ४४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कालाय कालभिन्नाय ननु चेतनस्याचेतनेनाभेदः कथं घटेत ? इत्यतः शक्तितद्वतो हि भेदाभेदसम्बन्धादित्याशयेनाहुः कालनाभाय कालशक्त्याश्रयाय कालावयवानां सृष्ट्यादिसमयानां साक्षिणे विश्वाय विश्वाभिन्नाय कार्यकारणयोर्भेदाभेदसम्बन्धात् "सर्वं खल्विदं ब्रह्म तज्जलानिति" इतिश्रुतेः विश्वस्य ब्रह्मणि द्वैताद्वैतसम्बन्धहेतुं तज्जत्वादिकमाहुः तत्कर्त्रे विश्वजन्मादिकर्त्रे निमित्तकारणमात्रपक्षनिराकरणायाहुः विश्वहेतवे विश्वस्य निमित्तकारणायोपादानकारणाय चेत्यर्थः । हेतुशब्दस्योभयविधकारणवाचकत्वात् "तदात्मानꣳस्वयमकुरुत"इति श्रुतेश्च प्रधानकारणवादनिराकरणायाहुः तदुपद्रष्ट्रे विश्वपद्रष्ट्रे सर्वज्ञाय विश्वतत्सृष्ट्यादिसमयाद्यनभिज्ञस्य प्रधानस्य तत्कर्तृत्वासम्भवात् ॥ ४१ ॥ समष्टिव्यष्टिदेहावयवसंयोगवियोगहेतुत्वेन स्तुवन्ति–भूतेति । भूतानि समष्टिव्यष्टिदेहगतान्याकाशादीनि मात्राणि शब्दतन्मात्रादीनि च उभयेन्द्रियाणि च प्राणस्य तस्य वायोरवस्थाविशेषत्वात्पृथङ्निर्देशः "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणिच खम्वायुः" इति श्रुतावपि पृथगेव तन्निर्देशः । आशयश्चित्तं च तेषामात्मने आश्रयाय उत्पत्तिस्थितिप्रवृत्त्यादिहेतव इत्यर्थः । ननु, समष्टिदेहे तेषामाश्रयः समष्टिजीवः व्यष्टिजीवः तदाश्रय जीवानामात्मपरमात्मानुभूतिरपि स्वतो नास्ति कुतः ? पुनर्भूताद्याश्रयत्वमिति सूचयितुं जीवानुभूतिप्रदत्वेन स्तुवन्ति–त्रिगुणेनेति । त्रिगुणनिमित्तेनाभिमानेन देहाद्यभिमानेन गूढा देहे केनापि नियोजितः कश्चिदस्मीति किञ्चिद्विवेकरूपा स्वांशानामात्मनां जीवानामनुभूतिर्यस्मात्तस्मै ॥ ४२ ॥ अनन्ताय महतोऽपि महीयसे सूक्ष्माय अणोरप्यणीयसे "अणोरणीयान् महतो महीयान्" इति श्रुतेः कूटस्थाय सर्वबीजत्वेऽपि निर्विकाराय विपश्चिते सर्वज्ञाय दृश्यत्वादृश्यत्वनिर्गुणत्वैकत्वानेकत्वादिविषयान् नानावादान् वेदान्तवावचानि अनुरुणद्धि अविरोधप्रकारेणानुवर्तते यस्तस्मै "तत्त समन्वयात्" (१।१।४) इति न्यायात् वाच्यानां तत्तद्वाक्यार्थानां वाचकानाम् तत्तद्वावचानाम् उपस्थाप्योपस्थापकत्वादिलक्षणाः शक्तयो यस्मात्तस्मै सर्वाऽभिधेयाभिधानशक्तिमूलायेत्यर्थः ॥ ४३॥ प्रमाणं शास्त्रं मूलं ज्ञापकं यस्य तस्मै वेदैकवेद्याय कवये शास्त्रार्थद्रष्ट्रे शास्त्रयोनये शास्त्रप्राकट्यकर्त्रे "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग् वेदः" इति श्रुतेः । किञ्च कुरु कर्म त्यजेति चेत्याद्युभयविधाय प्रवृत्ताय प्रवृत्तिबोधकाय निवृत्ताय निवृत्तिबोधकाय निगमाय धर्मार्थकामस्वरूपतदुपायबोधकतया बुभुक्षूणां मुक्तिस्वरूपतदुपायबोधकतया मुमुक्षूणां च हितकर्त्रे नमः ॥ ४४॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कालाय "कलविलविक्षेपे" कलयति गुणक्षोभलक्षणं विक्षेपं करोतीति तस्मै, ननु तं समयः करोति तत्राह कालस्य नाभये मध्यवलयायाश्रयाय समासान्त आर्षः तेन तं करोषीत्यर्थः । कालावयवानां सृष्ट्यादिसमयानां साक्षिणो साक्षाद्द्रष्ट्रे विश्वाय प्रधानक्षेत्रज्ञशक्तिभ्यां जगद्रूपाय तस्योप समीपे द्रष्ट्रे न च द्रष्टृमात्राय किन्तु उत्कर्त्रे न च कर्त्तृमात्राय किन्तु विश्वस्य हेतवे तद्धेतुनिचयरूपाय तन्निचयस्य तदधीनवृत्तिकत्त्वादिना ततो अनितरत्वादिति भावः ॥ ४१ ॥ न च हेतुमात्राय किन्तु भूतादीनामात्मने चेतयित्रे जीवज्ञानहरत्वं चाह त्रिगुणो योऽभिमानोऽहङ्कारस्तेन गढा आवृता शोभना आत्मनो जीवस्यानुभूतिर्येन तस्मै "त्वात्तो ज्ञानं हि जीवानां प्रमोयस्तेऽत्रशक्तिश्च" इति वक्ष्यमाणात् ॥ ४२ ॥ अनन्ताय अहङ्कारपरिच्छेदरहिताय सूक्ष्माय प्रत्यग्रूपाय कूटस्थाय सदैकरूपाय विपश्चिते सर्वज्ञाय निर्गुणोऽभिन्न गुणो भिन्नगुणा अमूर्त्तिर्नित्यमूर्त्तिरात्ममूर्त्तिश्चेत्यवनानावादाननुरुणत्सि विनोदार्थं

मवकाशयसीति तस्मै एतदेव स्पष्टयन्ति वाच्यानामर्थानां वाचकानाञ्च शब्दानां तत्तद्वादस्थायिकाः शक्तयो यतस्तस्मै ॥ ४३ ॥ चे देवं तर्हि वास्तवार्थक्षतिस्तत्राह– प्रमाणानां मूलाय चतुर्लक्षणीरूपाय तेनैव हि प्रमाणानि स्थिरतां लभन्ते तत्र हि श्रुतिर्मुख्यं प्रमाणं प्रत्यक्षानुमाने तु तदनुगृहीते एव प्रमाणे इति निर्णीतं "श्रुतेस्तु शब्दमूलत्वा" दित्यनेन कवये तदाविर्भावकाय बादरायणाय शास्त्रं शासनं तस्य योनये कारणाय त्वत्त एव तत्प्रवृत्तमित्यर्थः। प्रवृत्ताय ज्योतिष्टोमादिरूपाय निवृत्ताय शमदमादिरूपाय निगमाय तदावेदकवेदरूपाय ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कालनाभायेत्यप्रतीतेरनूद्य व्याचष्टे ॥ कालनाभायेति । नाभिशब्दपर्यायोऽयं स्वार्थतद्धितो नाभशब्दः कालाश्रयत्वार्थक इति केचित्। नाभिरित्यथ नाभः स्याद्विष्णुः सर्वाश्रयो यत इत्यादेर्नाभिशब्द आश्रयमात्रार्थकः तथा च कालस्य नाभ इति विग्रह इति वदन्ति । भगवदङ्गानां भगवताऽभेदात्कालो नाभौ स्वस्मिन्नित्यच्प्रत्ययेति योगविभागात्कालनाभः पद्मनाभस्तस्मै । बहुव्रीह्यर्थं एवाचार्यैः साम्मुख्येनोक्त इत्यपि व्याचक्रिरे । विश्वाय तत्कर्त्रे । विश्वहेतव इति पदार्थं मानत आह ॥ विश्वस्येति । मूलहेतुत्वतो विष्णुहेतुः प्रातिम्बिकं प्रतिव्यक्तिकरणत्वात कर्तेत्युच्यत इत्यन्वयः । अनेन मूले कर्तृपदानन्तरं सतो विश्वहेतुपदस्य मुख्यसर्वकारणार्थकत्वात्प्रागन्वयनीयता सूचितेति मन्तव्यं ॥ ततश्चायं श्लोकार्थः ॥ कालाय पुमर्थदात्रे कालनाभाय तदाश्रयाय कालावयवसाक्षिणे क्षणलवादिलक्षणतदवयवसाक्षिणे विश्वाय स्वाधीनीकृतप्रपञ्चत्वाद्विश्वशब्दवाच्याय तदुपद्रष्टे तत्तत्कृतसुकृतदुष्कृतदेयफलज्ञाय तद्धेतुवते तन्मूलकारणाय तत्कर्त्रे प्रातिस्विकं तदुत्पत्तिकर्त्रे ॥ ४१ ॥ भूतानि पञ्च मात्राः शब्दाद्या इन्द्रियाणि श्रोत्रादीनि दश प्राणाः पञ्च दश वा मनः सङ्कल्पात्मकं बुद्धिः कार्याकार्यविनिश्चयो बुद्धिर्ज्ञानं प्रतीतिर्बुद्धिस्तु कार्याकार्यविनिश्चय इति गीताभाष्योक्तेः। भूतादीनामाशयः स्थानमात्मा देहः स्वभावो वा यस्य तस्मै । आशयोऽन्तःकरणं वा तेषामात्मा स्वामी तस्मै वा । आत्मा यत्नो धृतिबुद्धिः स्वभावो ब्रह्म वर्ष्म चेत्यमरः । स्थानेऽभिप्राय आशय इति यादवः । निर्गुणेन सत्त्वादिगुणसम्बन्धविधुरेणाभिमानेनेच्छया गूढाऽप्रकाशिताऽऽत्मनां जीवानां स्वास्वरूपभूताऽनुमुक्तिगा भूतिरैश्वर्यं येन स तस्मै । अन्वाश्रये बन्धने मोक्ष इति विश्वः ॥ ४२ ॥ अनन्ताय निर्नाशाय बद्धाय वा सूक्ष्मायाव्यक्तायानन्ताय सर्वगताय वा । नित्यं विभुं सर्वगतं सुसूक्ष्ममिति श्रुतेः कूटस्थाय शश्वदेकप्रकाराय कूटमाकाशः कूटं स्वं विदलं व्योम सन्धिराकाश उच्यत इत्यभिधानाद्गीताभाष्ये । विवक्षिते पूर्णज्ञानाय नानावादानुरोधाय नानाविधा वादाः सत्सिद्धान्तास्तेषामनुरोधायानुकूलतया स्थिताय नानावादानामनुरोधो मर्यादा येन स तस्मै वा वाच्यवाचकानां शब्दार्थशब्दानां शक्तिर्वाच्यत्ववाचकत्वसामर्थ्यं येन तस्मा इति वा ॥ ४३ ॥ प्रमाणानां मूलं प्रतिष्ठापकस्तस्मै कवयेऽतिक्रान्तदर्शिने शास्त्रयोनये शास्त्रं योनिर्ज्ञप्तिदारणं यस्य तस्मै प्रवर्तकतया प्रवृत्तायैवं निवृत्ताय निगमाय गर्भगतागमाय मार्गरूपाय वा । अयनं पदवी मार्गः पद्या चेति निगद्यत इति हलः । निश्चायकाय वा । निगमो निश्चये वेदे परे पथवणिक्पथ इति यादवः ॥ ४४ ॥

श्रीसुबोधिनी

जगद्रूपतां सहेतुकामुक्त्वा नमस्यन्ति **कालायेति, स्थानं** हि द्विविधमुक्तं, शब्दमर्यादायां कालो नियामकः, अर्थमर्यादायां भूमिरिति, तदप्याह जगतो हि मूलकारणं कालः, भगवच्चेष्टारूपत्वात्, **कालो नाभौ** यस्येति सृष्टौ प्रयोजनमुक्तं, मृत्युर्हि कालः, स स्वस्थाने तिष्ठति, नाभिस्तस्य स्थानं, मृत्युना भक्षिता हि मृत्योर्बहिःकृता मृत्युमन्तर्निवेश्य "मृत्युनैवेदमावृतमासीदि"त्यत्र विस्तरेण प्रपञ्चितं, तेन **कालत्वेन** क्रियाशक्तिरुक्ता, **कालनाभत्वे** सृष्टिप्रयोजनमुक्तं, सृष्टिप्रकारमाह **कालावयवसाक्षिण** इति कालावयवानां सर्वोत्पत्तिनिमित्तानां **साक्षिणे** अनेन विश्वसृष्टौ क्लेशाभावोप्युक्तः, शब्दमर्यादायां तु **कालः** सूर्यः **काल**नाभाः शब्दाः, सर्व एव वेदाः **कालावयवसाक्षिणः** कर्माणि, सूर्यस्य कालात्मत्वं तृतीये प्रपञ्चितं, वर्णा हि मात्रात्मकाः तेन **काल एव नाभौ** येषामिति सर्वथा कालापेक्षा तेषामेव "काले कर्म हि चोद्यत" इति**कालावयवसाक्षित्वं,** कर्मणां नित्यत्वाय कालावयवस्य साक्षित्वमुक्तं, विश्वकारणरूपत्वमुक्त्वा विश्वरूपत्वमाह **विश्वायेति** तस्य विश्वस्य त्रैविध्यं निरूपयन्नादावाधिदैविकरूपमाह तदुपद्रष्ट्र इति **तस्य** विश्वस्यो**पद्रष्टा,** आधिदैविकव्यतिरेकेण तस्य स्वरूपेणैवासम्भवात् **तत्कर्त्रे** इत्याध्यात्मिकरूपं, स हि सर्वकर्ता, आधिभौतिकमाह **तस्य हेतव** इति **हेतुः** कारणं भूतादि अनेनार्थमर्यादापि निरूपिता विश्वमेवार्थरूपः, तदुपद्रष्टा मोक्षरूपः तत्कर्ता कामरूपः, तद्धेतुर्धर्मः ॥ ४१ ॥ एव विश्वरूपत्वमुक्त्वा तद्भोक्तृसङ्घातजीवरूपत्वमाह, तत्र प्रथमं सङ्घातं निर्दिशति भूतमात्रेति भूतानि **मात्रा इन्द्रियाणि प्राणामनो बुद्धिराशय**श्चित्त**मात्मा**हङ्कारश्च अयमेव हि सङ्घातः एतद्रूपाय जीवरूपश्रेयाह, **त्रिगुणेनाभिमानेन गूढा स्वात्मानुभूतिर्यस्य इयमेव हि भगवतः पुष्टिर्यदमर्यादव्यवस्थया स्थितः,** स्वात्मानुभूतौ सत्यां जीवभावो विरुध्यत इति गुणैराच्छदनम् ॥ ४२ ॥ एवं भगवतोर्थसृष्टिरूपत्वमुक्त्वा शब्दसृष्टिरूपत्वमाह **नमोनन्ताये**ति रूपसृष्ट्यपेक्षया नामसृष्टिर्विलक्षणा, अन्तवती रूपसृष्टि**रनन्ता** नामसृष्टिः, स्थूला रूपसृष्टिः सूक्ष्मा नामसृष्टिः, विकृता रूपसृष्टिः कूटस्थाविकृता नामसृष्टिः, जडरूपा रूपसृष्टि**र्विपश्चिद्** बोधरूपा नामसृष्टिः, एवं चतुर्धा वैलक्षण्यमुक्तं, नन्वेवं नामसृष्टौ जगद्विलयप्रसङ्गस्तत्राह **नानावादानुरोधायेति** सिद्धान्ततदाभासतत्पाषण्डरूपा **नानावादा**स्तेषा**मनुरोधो** यस्य, सर्वैरेव यथा निरूप्यते तथा भगवान् भवतीति तत्रोपपत्तिमाह **वाच्यवाचकशक्तय** इति **वाच्यो**र्थो **वाचकः** शब्दः, उभयत्रापि **शक्तयो** यस्य, यथैवार्थं

वक्तुमिच्छति तथैवार्थो भवति तं प्रति **सर्वस्यापि** शब्दस्य, यथैवार्थं वक्तुमिच्छति तथैवास्मिन् छब्दे तदर्थं शक्तयो भवन्ति ऊतिरत्र स्पष्टैव ॥ ४३ ॥ एवं सामान्यतो नामसृष्टिलीलामुक्त्वा विशेषमाह **नमः प्रमाणमूलायेति** वेदादयो हि प्रमाणं तेषां यत् प्रामाण्यमादरणीयत्व वा तद् **भगवत्प्रतिपाद्यत्वेन** भगवत्प्रतिपादितत्वेन च, अन्यथा तत्प्रामाण्यं न स्यात्, नित्यत्वेपि भगवद्व्यतिरिक्तत्वेप्रामाण्यं च स्यात्, नित्यता च न स्यात् अतः **प्रमाणमूल**भूतो भवानेव **कवये** तद्रसाभिज्ञाय, अनेन शब्दवक्ता शब्दरसाभिज्ञः शब्दरूपश्चोक्तः, शब्दोपादानकारणरूपश्चेत्याह **शास्त्रयोनय** इति **शास्त्रस्य** वेदस्य **योनिः** कारणं एवं निदानरूपत्वमुक्त्वावान्तररूपत्वमाह **प्रवृत्ताय निवृत्तायेति** वेदो हि द्वयं सम्पादयति प्रवृत्तिं निवृत्तिं च कुतश्चिन्निवर्तयति क्वचित् प्रवर्तयति, **निगम** आज्ञारूपो भवति एवम्प्रकारेण **निगमरूपो** वेदरूपो वा, अनेन सद्धर्मा उक्ता ॥ ४४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

कालायेत्यत्रोक्त्वा नमस्यन्तीति वदन्तो नमस्यन्ति, स्थानं हि द्विविधमिति स्थानं नियमनं द्विविधं शब्देनार्थेन च, यद्यपि निबन्धे त्रिविधमुक्तं देशकालात्मभेदेन तथापि प्रकृते द्विविधमेव स्फुटमिति द्विविधमुक्तं तत्र शब्दमर्यादायां कालो नियामको यथास्थानं स्थापकोर्थमर्यादायां भूमिः शेषात्मिका ब्रह्माण्डरूपा तत्तत्साधनवतां तत्तद्देशनियामिकेति तत्कृत नियमनं सिध्यतीति तत् सर्वमत्राप्याहेत्यर्थः, प्रथमतो जगन्मूलकारणत्वं व्युत्पादयन्ति जगत इत्यादि, भगवच्चेष्टारूपत्वादिति "योयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहु" रिति "सताभिव्यञ्जकः काल" "इति पुरुषस्तदुपादान" मित्यादिवाक्येभ्यः, ज्योतिर्विद्भिस्तत्तन्मुहूर्त उत्पन्नानां कालबलेनैव भाग्याकृतिप्रभृत्यङ्गीकाराच्च, प्रयोजनमुपपादयन्ति मृत्युर्हीत्यादि, मृत्युना कालेन भक्षिताश्चराचरात्मकाः पदार्था मृत्योः सकाशाद् बहिः प्रकटिता "अशनाया" रूपं मृत्युमन्तर्निवेश्य, "तदेतन्मृत्युनवे" तिश्रुतावुक्त, श्रुतिस्तु काण्वानां बृहदारण्यकारम्भेऽग्निब्राह्मणेस्ति, प्रयोजनं मृत्योरन्तःप्रवेशः कालावयवानामिति 'निमेषादिवत्सरान्ता'नां अनेनेति साक्षित्वकथनेन साक्षिण उदासीनत्वात्, एवं जगद्धेतुत्वमुक्तं, अतः परं स्थानं व्युत्पादयन्तस्तत्र शब्दमर्यादायां कालस्य कथं नियामकत्वमित्यतस्तदुपपादयन्ति शब्देत्यादि, तृतीय इति तृतीयस्कन्ध एकादशाध्याये "ग्रहर्क्षताराचक्रस्थ" इत्यत्र वर्णा वैदिका मात्रात्मकाः प्रणवमात्रारूपो योकारस्तदात्मका "अकारो वै सर्वा वा" गितिश्रुतेः, तेन त्रयीमयः कालात्मा सूर्यो नाभावन्तर्येषामितिहेतोर्वर्णव्यवस्थाप्रकटनार्थं सर्वथा कालापेक्षा वेदानामेवातो वेदाः कालनाभाः, कालावयस्येति तन्मूलभूतकारणस्याकारस्य, एवं कालकृतनियमनमुक्तं, अनेनार्थमर्यादापि निरूपितेति त्रिविधविश्वरूपत्वकथनेनार्थकृता या मर्यादा तत्र तत्र तस्य स्थापनरूपा साप्यर्थबलान्निरूपितेत्यर्थः ॥ ४१ ॥ भूतमात्रेन्द्रियेत्यत्र ननु पुष्टिरनुग्रहस्तथा चात्र तन्निरूपणाभावे क्रमो भज्येतेत्यत आहुरियमित्यादि, इयमुभयरूपतैव हि यतो हेतोः भगवतः पुष्टिरनुग्रहो यद्यस्माद्धेतोरुभयरूपत्वेनामर्यादव्यवस्थया स्थितिः, तथा चानेन प्रकारेणानुग्रहनिरूपणान्न क्रमभङ्ग इत्यर्थः ॥ ४२ ॥ नमोनन्तायेत्यत्र ननु विश्वे निरूपिते तन्मध्यपातिशब्दसृष्टिरपि निरूपितप्रायेति पुनस्तन्निरूपणं किमर्थमित्यत आह रूपेत्यादि, तथा च वैलक्षण्यात् तथेतिभावः, कूटस्थेत्यस्यैव व्याख्यानमाविकृतेति, एवमिति ज्ञानरूपायां, सर्वैरेवेत्यादि, तथा च ये पाषण्डेनान्यथा वा भगवन्तं निरूपयन्ति तान् प्रति पाषण्डेनान्यथा च प्रकटीभवतीति त जगद्विलय इत्यर्थः, ऊतिरत्र स्पष्टैवेत्यस्मिन् श्लोके नानावादानुरोधकथनाद् वादनानात्वस्य च कर्मवासनयैव भवनात् तेन सा स्पष्टैवेत्यर्थः ॥ ४३ ॥ नमः प्रमाणमूलायेत्यत्र भगवत्प्रतिपाद्यत्वेनेति भगवान् प्रतिपाद्यो यस्मिंस्तत्त्वेन, अन्यथेत्याद्येतदुभयरूपत्वाभावे, तथा चाद्याभावे "सर्वे वेदा' इतिश्रुतिविरोधाद् द्वितीयाभावे "एकमेवाद्वितीय" मितिश्रुतिविरोधाच्च तथेत्यर्थः, अनेनेत्यादिप्रवृत्तिनिवृत्तिरूपकत्वकथनेन मन्वन्तररूपा सद्धर्मा उक्ता इत्यर्थः ॥ ४४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

कालायेत्यस्याभासे जगद्रूपतामिति एतत्कथनपूर्वकं नमस्कारो वाक्यार्थः न त्वयं पूर्वानुवादः, व्याख्याने, स्थानं हीति हि यतः स्थितिरेव स्थानं स्थीयतेस्मिन्निति च स्थानमेवं द्विविधं स्थानं पञ्चमस्कन्धे उक्तमित्यर्थः । शब्देति वेदोक्तकर्मप्रकारेण स्थितावित्यर्थः, अर्थानां शब्दप्रतिपाद्यानां पुरुषार्थानां मर्यादा जम्बूद्वीपतीर्थादिस्थानमित्यर्थः, तदपीत्यपिशब्देनैतस्य प्रासङ्गिकत्वं सूचितं मुख्यतया वाक्यार्थस्त्वाभासोक्त एवेतिभावः, मृत्युनेति कालस्य स्वस्थानस्थितिः प्रयोजनं तदर्थं मृत्युं स्वान्तर्निवेश्य प्रलये तदन्तःस्थिता, प्रजाः सृष्ट्या बहिः कृतवान् भगवानित्यर्थः, मात्रात्मका इति ह्रस्वादिमात्राणां मूलत्वादिभावः ॥ ४१ ॥ नमोनन्तायेत्यस्याभासे एवमिति श्लोकचतुष्टयार्थस्यानुवादोयं, शब्दस्यापि प्रमेयत्वात् पञ्चमश्लोके तथोक्तमतः कारिकासूक्तं पञ्चानामपि प्रमेयरूपत्वं सिद्धमितिभावः, व्याख्याने, तत्पाषण्डेति स चासौ पाषण्डश्च, सिद्धान्तरूपो यः पाषण्डो बाह्यसिद्धान्त इत्यर्थः, सिद्धान्ताभासो मायावादादिः, यथाकथञ्चिद् वेदनिष्ठत्वात् ॥ ४३ ॥ नमः प्रमाणेत्यत्र आदरणीयत्वमिति द्वितीयस्कन्धोक्तप्रमाणलक्षणमनुसृत्याबाधितत्व नित्यत्वमित्यर्थः, प्रमाणं मूलं यस्येतिव्युत्पत्त्या भगवान् प्रतिपाद्यो यत्र-तादृशत्वं प्रमाणानां, प्रमाणेन भगवज्ज्ञानं भवतीति यावत्, प्रमाणस्य मूलमिति व्युत्पत्त्या भगवत्प्रतिपादितत्वं तेषां प्रमाणभूतो मूलभूतश्चेतिव्युत्पत्त्या भगवद्रूपत्वं तेषामितिविवेकः, अन्यथा तदिति नित्यस्वरूपं प्रामाण्यमित्यर्थः, अप्रामाण्यं चेति सामान्यतः प्रमाजनकत्वं च न स्यादित्यर्थः, अनेनेति विशेषणद्वयेनेत्यर्थः, कर्मधारयपक्षमेवानुसृत्य मूलत्वेन शब्दवक्तृत्व प्रमाणत्वेन शब्दरूपत्वं कविपदेन तद्रसाभिज्ञत्वं च निरूपितम् ॥ ४४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

कालायेत्यस्य विवृतौ शब्दमर्यादायामिति वेदोक्तमर्यादायां कालस्य नियामकत्वं काले कर्मविधानादित्यर्थः, शब्दमर्यादायामिति वेदमर्यादायामित्यर्थः, कालः सूर्यः इति "कालाये" त्यनेन सूर्य उच्यते कालभौतिकरूपत्वात् सूर्यस्येत्यर्थः, तत्रोपपत्तिस्तु "सूर्यस्य कालात्मत्वं तृतीये प्रपञ्चित" मित्यनेन वक्ष्यत्यनुपदं, अत एव निबन्धे "सूर्यस्तस्याधिभौतिक" मित्युक्तं, अन्येनार्थमर्यादेति अनेनेति "विश्वाये"त्यादिपदचतुष्टयोपादानेनेत्यर्थः, अर्थमर्यादापीति वेदात्मकालौकिकशब्देन प्रतिपाद्या ये अर्थाः पुरुषार्था धर्मार्थकाममोक्षाख्यास्तेषां मर्यादापीत्यर्थः, पुरुषार्थान् प्रतिपादयन्ति विश्वमेवार्थरूप इत्यारभ्य तद्धेतुधर्मं इत्यन्तेन तदुपद्रष्ट्रे इति "कश्चिद् धीरः प्रत्यगात्मानमक्ष" दितिश्रुतेः उपद्रष्टृशब्दवाच्यस्य प्रत्यगात्मनो दर्शनं मोक्षः, मोक्षे च शुद्धाद्वैतस्फूर्तौ मोक्षरूपत्वं उपद्रष्टृ रुक्तं, तत्कर्ता काम इति "सोकामयत बहु स्यां प्रजायेये"तिश्रुतेः कामस्यैव जगत्कर्तृत्वाभिधानात् ॥ ४१ ॥ इयमेव हि भगवतः पुष्टिर्यदमर्यादव्यवस्थया स्थितिरिति "गूढस्वात्मानुभूतय" इत्यनेन भूताद्यात्मकस्यापि गूढस्वानुभवत्वमुक्तं, तच्च युक्तिविरुद्धमित्यमर्यादत्वं प्रदर्शितं, मर्यादाविरोध भगवत्कृतश्चेत् तदा पुष्टिकार्यत्वं तस्य कञ्चिज्जीवमनुगृहीतुमेव मर्यादाविरोधो भगवता क्रियते, अतो मर्यादाविरुद्धभगवत्कृत्या तत्कारणीभूता पुष्टिरनुमीयते, प्रकृते मर्यादाविरोधस्य "गूढस्वात्मानुभूतय" इत्यनेनोक्तत्वात् पुष्टिलीलानेनोक्तेत्यर्थः ॥ ४२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कालनाभाय कालशक्त्याश्रयाय । एवमुक्त्या प्रतीतं तद्भेदं वारयन्त्य आहुः—कालाय कालरूपाय । कालावयवानां सृष्ट्यादिसमयानां निमेषादिद्विपरार्धान्तानां साक्षिणे । विश्वाय विश्वोपादानतया विश्वरूपाय । तद्द्रष्ट्रे विश्वसाक्षिणे । तत्कर्त्रे विश्वकर्त्रे । विश्वहेतवे करणादिसर्वकारकरूपायेत्यर्थः ॥४१ ॥ सर्वकारकत्वमेव स्पष्टयति—भूतेति । भूतानि आकाशादीनि, मात्राः शब्दादयः पञ्च प्राणाश्च दशविधाः, इन्द्रियाणि ज्ञानकर्मोभयात्मकानि दश, मनश्च बुद्धिश्च आशयश्चित्तं च आत्मा अहङ्कारश्च तद्रूपाय । 'एव सर्वात्मा चेत्तदा तथात्वेन कुतो न प्रतीयते?' तत्राहुः—त्रिगुणेनेति । गुणत्रयहेतुकेनाभिमानेन देहाद्यात्माभिमानेन गूढा आच्छन्ना स्वांशभूतानामात्मनां जीवानामनुभूतिर्विवेकज्ञानं येन तस्मै ॥ ४२ ॥ अनन्ताया देशकालवस्तुपरिच्छेदरहिताय । सूक्ष्माय तथात्वेन दुर्ज्ञेयाय । कूटस्थाय संसर्गदोषरहिताय । विपश्चेति सर्वसाक्षिणे । नानावादानुरोधाय 'हस्तपादाद्यस्ति-तन्नास्ति, सर्वज्ञः-किञ्चिज्ज्ञः, बद्धः- मुक्तः, एक-अनेक' इत्यादीन् नानावादाननुरुणद्धि अनुवर्तते यस्तस्मै । वाच्यवाचकशक्तये वाच्यानामर्थानां वाचकानां शब्दानां च शक्तयो यस्मात्तस्मै ॥४३ ॥ प्रमाणानि चक्षुरादीनि तेषां मूलाय प्रकाशकाय, 'चक्षुषश्चक्षुः'इत्यादिश्रुतेः । अत एव कवये चक्षुरादिनिरपेक्षज्ञानाय । शास्त्रयोनये 'तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतदृग्वेद' इति श्रुतेः वेदात्मनिःश्वासाय । प्रवृत्ताय प्रवर्तकाय विधिरूपाय, निवृत्ताय निवर्तकाय निषेधात्मकाय एवमुभयात्मकाय निगमाय वेदरूपाय ॥ ४४ ॥

अन्वितार्थप्रकाशिका

कालायेति ॥ कालाय कालरूपाय कालनाभाय कालशक्त्याश्रयाय । समासान्त आर्षः । कालस्यावयवानां निमेषादीनां साक्षिणे विश्वाय तद्रूपाय तस्य विश्वस्य उपद्रष्ट्रे साक्षिणे तत्कर्त्रे विश्वकर्त्रे विश्वहेतवे करणादिसर्वकारणरूपाय तुभ्यं नमः ॥ ४१ ॥ भूतेति ॥ भूतानि आकाशादीनि मात्राः शब्दादयः पञ्च प्राणाश्च दशविधाः इन्द्रियाणि ज्ञानकर्मोभयात्मकानि दश मनश्च बुद्धिश्च आशयश्चित्तं च आत्माहङ्कारश्च तद्रूपाय त्रिगुणेन गुणत्रयहेतुकेनाभिमानेन देहाद्यात्माभिमानेन गूढा आच्छन्ना स्वांशभूतानामात्मनां जीवानामनुभूतिर्विवेकज्ञानं येन तस्मै तुभ्यं नमः ॥ ४२ ॥ नम इति ॥ अनन्ताय सूक्ष्माय कूटस्थाय निर्विकाराय विपश्चिते साक्षिणे नानावादात् तत्तन्मतप्रसिद्धान् शरीरी अशरीरी सर्वज्ञः किंचिज्ज्ञः इत्यादीन् अनुरुणद्धि अनुवर्तते यस्तस्मै वाच्यानामर्थानां वाचकानां शब्दानां च शक्तयो यस्मात्तस्मै तुभ्यं नमः ॥ ४३ ॥ नम इति ॥ प्रमाणानां चक्षुरादीनां मूलाय प्रकाशकाय कवये शास्त्रस्य वेदस्य योनये कारणाय स्वतःप्रवृत्ताय प्रवर्तकाय विधिरूपाय निवृत्ताय निवर्तकाय निषेधात्मकाय एवमुभयात्मकाय निगमाय वेदरूपाय तुभ्यं नमः ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुनः कथंभूताय कालाय कालकालाय कालनाभाय कालधारकाय कालस्याऽवयवानां दिनसंवत्सरयुगनित्यप्रलयादीनामंगानां सक्षिणे साक्षाद्द्रष्टे विश्वाय वैराजावताराय तदुपद्रष्ट्रे तस्य विश्वस्योपद्रष्ट्रे साक्षिणे तत्कर्त्रे विश्वकारकाय अतः विश्वहेतवे जगत्कारणाय ते नम इति प्रतिपदं संबध्यते ॥ ४१ ॥ जीवसमूहस्य पंचभूतादीनां आत्मने प्रवर्तकाय आशयश्चितं त्रिगुणेन सत्वादित्रिगुणात्मके नाभिमानेन जीवानां गूढा गुप्ता स्वात्मानुभूतिर्निजानुभवो यस्य जीवानां तवानुभवो गुप्त इत्यर्थः ॥ ४२ ॥ अनंताय अविनाशिने सूक्ष्मेष्वक्षरपुरुषादिषु सूक्ष्माय स प्रकाशशक्त्या व्यापकाय कूटस्थाय कूटं पर्वतशृंगं तद्वत्तिष्ठति अन्येभ्योऽपराभवनीयतया वर्त्तते तस्मै विपश्चिते सर्वबोधाय नानावादानां सांख्ययोगादीनां अनुरोधः समाप्तिर्यस्मिंस्तस्मै वाच्यः पदार्थश्च वाचकस्तज्ज्ञापक-

शब्दश्च तयोः शक्तिः अनेन शब्देनायं पदार्थो बोध्य इति संकेतो यस्मात् तस्मै नमः ॥ ४३ ॥ प्रमाणानां प्रत्यक्षादीनां मूलाय उत्पादकाय कवये सदा स्वतः सिद्धज्ञानाय यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वत इति श्रुतेः शास्त्राणां वेदानां योनये उत्पत्तिकारणाय एतन्महतोद्भुतस्य रुग्वेदः श्वसितमिति श्रुतेः यद्वा शास्त्रं योनिर्ज्ञानजनकं यस्य तस्मै शास्त्रैणत्वं ज्ञेय इत्यर्थः। तदुक्तं व्याससूत्रे शास्त्रयोनित्वादिति प्रवृत्ताय संकर्षण प्रद्युम्नादिरूपैः प्रवृत्तधर्मप्रवर्त्तकाय निवृत्ताय श्रीनरनारायणसनकादिदत्तादिरूपैनिवृत्तधर्मप्रवर्त्तकाय निगमायच्छात्ररूपाय नमो नमः ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कालायेति ॥ कालाय कालात्मकाय, 'कालोऽस्मि लोकक्षयकृत्' इति भगवद्गीतोक्तेः। कालो नाभिवदङ्गभूतो यस्य तस्मै, कालशक्त्याश्रयायेति वा। कालावयवानां निमेषादिसंवत्सरान्तानां साक्षिणे साक्षात् द्रष्ट्रे, विश्वाय विश्वात्मकाय, तर्हि किं जडोऽहं न, तदुपद्रष्ट्रे विश्वसाक्षिणे, विश्वरूपायेति पाठे विश्वं रूपं शरीरं यस्य तस्मै, तत्कर्त्रे विश्वकारकाय, न केवलं कर्त्तृमात्राय, किं तु विश्वहेतवे सर्वकारणरूपाय जगत्कारणरूपायेति यावत्। तुभ्यं नमः इति शेषः ॥ ४१ ॥ भूतेति ॥ भूतान्याकाशादीनि च मात्राः शब्दादयश्च इन्द्रियाणि ज्ञानकर्मोभयेन्द्रियाणि च प्राणाः प्राणादयः पञ्चासवश्च मनश्च बुद्धिश्च आशयश्चित्तं वासना वा च एतेषामात्मा प्रवर्त्तकस्तस्मै, त्रिगुणेन गुणत्रयहेतुकेन, अभिमानेनाहंकारेण, अहंकरणरूपाज्ञानेनेत्यर्थः। गूढा च्छन्ना स्वात्मानुभूतिर्जीवानां यस्य तस्मै, देहादावहंभावभाजामनाविष्कृतस्वसुखानुभवायेत्यर्थः। तुभ्यं नम इति शेषः ॥ ४२ ॥ त्वं सर्वदाहंकाराद्यनावृत एवासीत्यादि सूचयन्त्यः स्तुवन्ति ॥ नम इति ॥ अनन्ताय अहंकारकृतपरिच्छेदरहिताय, महते इत्यर्थः। सूक्ष्माय सूक्ष्मरूपजीवान्तःप्रवेशनेन ततोऽप्यतिसूक्ष्मायेत्यर्थः। 'अणोरणीयान् महतो महीयान्' इति श्रुतेः। 'सूक्ष्माणामप्यहं जीवः' इति 'य आत्मनि तिष्ठन्' श्रुतिस्मृतिभ्यां तथावबोधात्, कूटस्थाय उपाधिकृतविकाररहिताय, विपश्चिते सर्वज्ञाय, वस्तुवत्या स्तुत्वाऽचिन्त्यमायत्वेन स्तुवन्ति। नानावादानुरोधाय अस्ति नास्ति स गुणोऽगुणः साकारो निराकारः सर्वज्ञोऽल्पज्ञः ईश्वरः जीवः बद्धो मुक्तः अनेक एकः कर्त्ताऽकर्त्ता इत्यादीन् नानावादान् अनुरुणद्धि माययाऽनुवर्त्तते यस्तस्मै, वाच्यवाचकशक्तये अभिधेयाभिधानरूपयोर्वाच्यवाचकयोः शक्तिस्तन्निर्वाहकत्वं यस्य तस्मै, अतो नानात्वेन प्रतीतायेत्यर्थः। नमः ॥ ४३ ॥ नम इति ॥ प्रमाणानां चक्षुरादीनां मूलं चक्षुस्तस्मै, 'चक्षुषश्चक्षुः' इति श्रुतेः। कवये सार्वज्ञयुक्ताय, शास्त्रं वेदादिस्तद्योनये, 'तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' इत्यादिश्रुतेः। 'शास्त्रयोनित्वात्' इति श्रीमद्व्यासप्रणीतशारीरकसूत्राच्च। प्रवृत्ताय प्रवृत्तकर्मनिर्वाहकाय, निवृत्ताय निवृत्तकर्मनिर्वाहकाय, निगमाय उपनिषज्ज्ञाप्रवर्त्तकाय, नमः नमः ॥ ४४ ॥

कृष्णप्रिया

हे नाथ आप कालरूप हैं यानि जगत का मूल कारण कालरूप आप हैं, काल को अपनी नाभि में आश्रय देने वाले आप हैं, काल के अवयवों के आप साक्षी हैं, विश्वरूप हैं, विश्व के आप द्रष्टा हैं, विश्व के आप कर्ता हैं और विश्व के कारण हैं ऐसे भगवान को मेरा प्रणाम है ॥ ४१ ॥ पञ्च महाभूत, पञ्च तन्मात्रा, इन्द्रिय, प्राण, मन, बुद्धि, चित, आत्मा-अहंकार रूप आत्मा ऐसे भगवान को एवं त्रिगुणात्मक अभिमान से अपने अशरूप आत्माओं के अनुभव को ढकने वाले हम सब आपको प्रणाम करते हैं ॥ ४२ ॥ अनन्त, सूक्ष्म, कूटस्थ, सर्वज्ञ, अनेक वादों का अनुसरण करने वाले, एवं वाच्य तथा वाचक दोनों से जिनकी शक्ति हैं, ऐसे भगवान आपको हम सब प्रणाम करती हैं ॥ ४३ ॥ वेद आदि शास्त्र प्रमाण हैं, उन सब का प्रतिपाद्य आप हैं एवं प्रतिपादक भी आप हैं इसलिए प्रमाण-वेद के आदि कारण आपको हमारा प्रणाम है, आप ही कवि हैं, आप ही रस-रूप हैं और रसज्ञ हैं ऐसे कवि स्वरूप को हमारा प्रणाम, शास्त्र की प्रवृत्ति निवृत्ति कराने वाले आपको प्रणाम शास्त्र के कारण आपको प्रणाम निगम स्वरूप नाथ आपको प्रणाम है ॥ ४४ ॥

नमः कृष्णाय रामाय वसुदेवसुताय च। प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ ४५ ॥
नमो गुणप्रदीपाय गुणात्मच्छादनाय च। गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ॥ ४६ ॥
अव्याकृतविहाराय सर्वव्याकृतसिद्धये। हृषीकेश नमस्तेऽस्तु मुनये मौनशीलिने ॥ ४७ ॥
परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः। अविश्वाय च विश्वाय तद्द्रष्ट्रे तस्य हेतवे ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—कृष्णाय रामाय वसुदेवसुताय च नमः प्रद्युम्नायाय अनिरुद्धाय सात्वतां पतये नमः ॥ ४५ ॥ गुणप्रदीपाय गुणात्मच्छादनाय च नमो गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ॥ ४६ ॥ अव्याकृतविहाराय सर्वव्याकृतसिद्धये। मुनये मौनशीलिने हृषीकेश नमः ते अस्तु ॥ ४७ ॥ परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः अविश्वाय च विश्वाय तद्द्रष्ट्रे तस्य हेतवे तुभ्य नमः ॥ ४८ ॥

---

१. वृत्त्युपलभ्याय–वीर. ; प्रत्युपलक्ष्याय–विज. । २. विश्वहेतवे–वीर. विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च अनावृतैश्वर्यत्वादेव चतुर्मूर्तिरूपेण सर्वोपास्यत्वेन नमंति नमः कृष्णायेति श्लोकेन । रामाय संकर्षणाय । वसुदेवसुताय च वसुदेवशब्दितं शुद्धं सत्त्वं तत्र प्रकाशमानाय वासुदेवायेत्यर्थः । सात्वतामेतदुपासकानां पतये सालोक्यादिना पालकाय । एवं चतुर्मूर्तये कृष्णाय तुभ्यं नम इति ॥ ४५ ॥ कथं चतुर्मूर्तितेति तदाहुः । नमो गुणप्रदीपायेति । गुणा अंतःकरणानि तान् प्रदीपयति प्रकाशयतीति तथा तस्मै । चित्ताद्यधिष्ठातृत्वेन चतुर्मूर्तितेत्यर्थः । ननु तथाऽप्येकस्यैव कथं चतुष्ट्वमत आहुः । गुणात्मच्छादनाय तैरेव गुणैरुपासकानां फलवैचित्र्यायात्मानमाच्छाद्य नानात्वेन प्रकाशमानायेत्यर्थः । ननु तर्हि कथं प्रतीतिरत उक्तं गुणवृत्त्युपलक्ष्याय चित्तादीनां चेतनाध्यवसायादिवृत्तिभिरुपलक्ष्याय । उपलक्षणमेवाहुः । गुणद्रष्ट्रे तत्साक्षिणे । कथंचिदुपलक्ष्य एव न तु ज्ञेय इत्याहुः स्वसंविदे । अगोचरायेत्यर्थः ॥ ४६ ॥ अगोचरत्वमुपलक्ष्यत्वं च दर्शयंत्यो नमंति । अव्याकृतविहाराय अप्रतर्क्यमहिम्न इत्यर्थः । सर्वव्याकृतसिद्धये सर्वकार्योत्पत्तिप्रकाशहेतुत्वेनोपलक्षणयोग्यायेत्यर्थः । उपलक्षणांतरमाहुः हे हृषीकेश करणप्रवर्तक । किं विषयलिप्सया न मुनये आत्मारामाय । किं साधनवशेन वा नहि नहि मौनशीलिने मौनमात्मारामता तत्स्वभावाय ॥ ४७ ॥ कुतः । परावरगतिज्ञाय स्थूलसूक्ष्माणां गतिज्ञत्वेन न क्वापि सज्जमानायेत्यर्थः । अपि च सर्वाध्यक्षाय सर्वस्याधिष्ठात्रे । कुत एतत् । अविश्वाय न विश्वं यस्मिंस्तस्मै तन्निषेधावधये । विश्वाय च तद्विवर्ताधिष्ठानायेत्यर्थः । किं च तद्द्रष्ट्रे अध्यासापवादसाक्षिणे । अपि च अस्य विश्वाध्यासस्य तदपवादस्य च विद्याविद्याभ्यां हेतवे । यद्वा अविश्वाय विश्वतैजसाद्यवस्थारहिताय । विश्वाय च मायया स्वांशैस्तत्तदवस्थाय । तद्द्रष्ट्रे तासामवस्थानां भावाभावसाक्षिणे । अन्यत्समानम् । तस्मात्सर्वगतिज्ञत्वसर्वाधिष्ठातृत्वात्मारामत्वादिभिर्निरतिशयैश्वर्याय तुभ्य नम इति ॥

विशेषणैरसंकीर्णैः पंचपंचाशता नुतः ॥ अहिस्त्रीभिः प्रसन्नो वस्तासामिव भवेद्धरिः ॥ १ ॥ ४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वेदरूपत्वेऽपि भक्तवत्सलतया चतुर्व्यूहं दधर्थेत्याहुः—किं चेति । यद्वा—कृष्णाय सदानंदरूपाय प्रपन्नाघकर्षकाय, दैत्यादिषु वह्नये नीलवर्णाय वा "कृष्णः सीसाद्यलोहेषु कृष्णे नीलेऽनले कलौ । शूद्रे काके पिके व्यासे ध्वांते पक्षेऽर्जुने हरौ ॥" इति यादवः । रामाय अभिरामाय । प्रद्युम्नाय प्रकृष्टधनाय 'द्युम्नं द्रविणं धनम्' इति हलायुधः । ज्ञानं विना न निरुध्यते इत्यनिरुद्धस्तस्मै ॥ ४५ ॥ तदाहुः—चतुर्मूर्त्तिभवने प्रकारमाहुः । इत्यर्थ इति । चतुर्व्यूहं विनांतःकरणचतुष्टयाधिष्ठातृत्वं कथं घटेतेति भावः । तत्राप्याशंकते–नन्विति । तथापि चतुर्मूर्तित्वेपि अतः अत्र । इत्यर्थ इति । शुद्धब्रह्मरूपत्वमाच्छाद्य भक्तानां यथायथा कामं तथातथा भवनशीलायेत्यभिप्रायः । आत्मानमाच्छादयामि चेत्तर्हि कथमहं प्रतीय इत्याशंकते—नन्विति इत्यर्थं इति । स्वप्रकाशस्यान्यगोचरत्वे स्वसंवित्ता भ्रश्येतेति भावः । यद्वा–गुणाः सत्त्वाद्या भक्तिज्ञानाद्या वा तेषां ज्ञानकाय गुणात्मा प्रकृतिरेव छादनमावरकं यस्य तस्मै गुणैरिंद्रियादिभिरात्मनो जीवानाच्छादयतीति वा ॥ ४६ ॥ इत्यर्थ इति व्याकृतविहारस्तर्कितुं शक्यो भवतीति त्वं तु न तथेत्यर्थः । इत्यर्थ इति । कारणं विना कार्योत्पत्तेरसंभवादित्यभिप्रायः । प्रवर्त्तकत्वं तु 'कारणं विना मंदोऽपि न प्रवर्त्तते' इति न्यायात्किञ्चिदपेक्ष्यैव भवतीति शंकते–किमिति । आत्मरामतापि साधनसंपत्त्यैवेति पुनराशंकते– किमिति । यद्वा–अव्याकृता व्याकर्त्तुमशक्याः सृष्ट्यादिविहारा यस्य तस्मै । पर्वेषु भक्तेषु व्याकृता प्रकटिता सिद्धिः स्वरूपं येन तस्मै । मुनये सर्वज्ञाय मौनशीलिनेऽसंभावितोक्तिरहिताय ॥ ४७ ॥ आत्मारामत्वे हेतुमाशंकते–कुत इति । इत्यर्थं इति जीवेष्वपि ज्ञानिनो न कुत्राप्यासक्ता भवंति परमज्ञानिनस्तव तु कथमासक्तिर्भवेदिति तात्पर्यम् । अन्यदाह–अपि चेति सर्वाधिष्ठातृत्वे हेतुमाशंकते कुत एतत् सर्वाधिष्ठातृत्वम् इत्यर्थ इति न हि साक्षाद्विश्वरूपत्वं किं तु विवर्त्ताधिष्ठानत्वेन तदस्तीति भावः । तत्समर्थयति–किं चेति । तत्रैवान्यदाह–अपि चेति । पूर्वव्याख्याने क्लिष्टकल्पनां मत्वाह । विश्वेतदुपलक्षणं तैजसप्राज्ञयोः । तत्तदवस्थाय विश्वादिरूपाय । यतः आत्मारामादिरूपोऽसि तस्माद्धेतोः असंकीर्णैः अमिलितैः पुनरुक्तिदोषवर्जितैः । वः युष्माकमध्येत्रध्यापकानां श्रोतृवक्तॄणाम् । तासामिव नागांगनानामिव (१) ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किञ्च, स्वयं भगवान् कृष्णोऽपि त्वमेकश्चतुर्विधश्चेति वदन्तस्तत्रैव नतिं पर्यवसाययन्ति– नम इति । सात्त्वतामुपासकानां पतय इति पतित्वेनैकयमेव साधितम् अन्यथानर्थापत्तिः तथा चोक्तं पञ्चमस्कन्धे श्रीलक्ष्मीदेव्या 'स वै पतिः स्यादकुतोभयः स्वयं समन्ततः पाति भयातुरं जनम् । स एक एवेतरथा मिथोभयम्" इति अन्यत्तेः । यद्वा, कृष्णायेति प्रस्तुतत्वात् श्रीनन्दनन्दरूपाय "वक्त्रं व्रजेशसुतयोः" इत्यादि प्रसिद्ध्या रामाय च तत्तद्रूपाय वसुदेवसुताय च तस्मै तस्मै तत्सहयोगेन प्रद्युम्नायाऽनिरुद्धाय च तद्व्यूहान्तःपातिने एवमत्र कृष्णायेति वासुदेवान्तरस्य व्यावृत्त्यर्थं रामायेति सङ्कर्षणान्तरस्य अत एव वसुदेवसुतायेति क्रमेण धर्मपुत्रादेः दशरथपुत्रादेश्च तत्तत्सहयोगेन प्रद्युम्नानिरुद्धयोश्चान्वयोरिति तेन सात्वता यादवा एव तदेवं नित्यत्वमपि सूचितं तथा च श्रीगोपालतापन्याम्—

"प्राप्य मथुरां पुरीं रम्यां सदा ब्रह्मादिसेविताम् । शङ्खचक्रगदाशार्ङ्गरक्षितां मुसलादिभिः ॥
यत्रासौ संस्थितः कृष्णः त्रिभिः शक्त्या समाहितः । रामानिरुद्धप्रद्युम्नैः रुक्मिण्या सहितो विभुः" ॥

इति त्रिभिः रामादिभिः शक्त्या च रुक्मिण्येत्यन्वयः एवमेवोक्तं "मथुरा भगवान् यत्र" इति वसुदेवसुताय चेति श्रीकृष्णपक्षे चकारात् श्रीमन्नंदगोपकुमाराय "प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः" इति न्यायेन वसुदेवसुताय चेत्यर्थः । श्रीरामपक्षे "तातं भवन्तं मन्वानः" इति वक्त्र व्रजेशसुतयोः" इति व्यवहारेण श्रीमन्नन्दगोपकुमाराय चेत्यर्थः ॥ ४५ ॥ तदेवं भक्तान् प्रति गुणप्रदीपाय स्वरूपभूतानामैश्वर्यादिगुणानां प्रकाशकाय अभक्तान् प्रति तु गुणैः प्राकृतैरात्माच्छादनाय यद्यप्येवं तथापि तेषां प्राकृतगुणानां जडानामपि वृत्त्याप्रवृत्त्यालक्ष्याय तत्प्रवर्त्तकत्वेनानुमेयाय तत्प्रवर्त्तकत्वमेव कथं तत्राह तद्द्रष्ट्रे वीक्षामात्रेणेति भावः । स्वयन्तु स्वसम्विदे स्वप्रकाशस्वरूपगुणाय यद्वा एवं यादवसम्बन्धेऽपि गोकुलसम्बन्ध एव गरीयानित्याहुः प्रेमवश्यतादीनां गुणानां प्रकर्षेण प्रकाशकाय तादृशगुणप्रकाशनाप्यात्मच्छादनाय च आवृतनिजैश्वर्याय गुणैर्दामभिरात्मानमाच्छादयसि तथा तस्मै वा दामोदरत्वे श्रीयशोदया बहुभिर्दामभिर्बन्धनात् तथापि गुणानां यमलार्जुनमोचनादिलाक्षतानां दाम्नामेव वा बहूनामप्यपर्याप्तानां वृत्त्या प्रवर्त्तनेन ज्ञेयाय किञ्च गुणद्रष्ट्रे दाम्नां तेषामेव द्रष्ट्रे भीत्या मुहुर्दर्शनपराय अथ च स्वेषु वयस्यबालकेषु तदानीमपि नवनीतचौर्याद्यर्थसम्विदः सङ्केता यस्येति इदमद्भुतमेव ॥ ४६ ॥ अव्याकृतः प्रपञ्चातीतो विहारो यस्य अथ च सर्वत्र व्याकृते न तत्तल्लीलत्वेन सिद्धिः प्रसिद्धिर्यस्य सर्वव्याकृतस्यैव सिद्धिस्तत्तल्लीलासाधकता यस्येति वा तदुक्तं "प्रपञ्चं निष्प्रपञ्चोऽपि" इति अव्याकृतलीलत्वादेव 'परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया । गृहीतचेता राजर्षे ! आख्यानं यदधीतवान्" इत्यादिकं घटत इत्याहुः, हृषीकेश हे स्वस्मिन्नात्मारामतया स्थितानां सर्वेन्द्रियप्रवर्त्तकेति मुनये आत्मारामाय अथ च अकारप्रश्लेषेण अमौनशीलिने तद्विपरीतश्रीगोकुलानन्दलीलाय यद्वा, न व्याकृतो न व्यक्तो विहारो दधिपयश्चौर्यादिचेष्टा यस्य तथापि सर्वैरेव व्याकृता तन्मात्रादिभ्यो व्याख्याता सिद्धिस्तत्तच्चेष्टाफलं दधिपयोभक्षणादिकमपि यस्य तस्मै अहो तेन च सर्वेषां प्रीतिरेवासीदित्याहुः—हृषीकेश हे सर्वेन्द्रियवशीकारिणगुणगणेति । किञ्च, तत्रोपालम्भादौ मुनये मौनशीलिन इति स्वान्तःकरणनिहिततादृशवयुनापि बहिर्मौनेन सुप्रतीको यथास्त इत्येवमुक्तरूपो यस्तस्मा इत्यर्थः । श्लोकद्वयेऽस्मिन्नार्थान्तराच्छन्नतयोक्तिरियं प्रभुतास्फुरणात् सङ्कोचेनेति ज्ञेयम् ॥ ४७ ॥ तादृशातर्क्यलीलत्वे हेतुः परावरगतिज्ञाय तत्तदात्मत्वेन तत्तत्तत्त्वज्ञाय नतु ज्ञेयाय तथापि सम्प्रति सर्वेषामध्यक्षाय अक्षाण्यधिकृत्य वर्त्तत इति प्रत्यक्षाय किञ्च न विद्यते विश्वं यत्र तस्मै तथापि विश्वाय तदेव प्रतिपादयन्ति "तद्द्रष्ट्रेऽस्य च हेतवे" दृष्टृत्वात् दृश्यादस्माद्भिन्नाय उपादानरूपात् त्वदव्यतिरिक्तमिदमिति विश्वरूपाय श्रीगोपाललीलापक्षेपि "अद्यैव त्वदृतेऽस्य किं मम न ते" इत्यादिदृष्ट्या तत्तत्सङ्गमनीयम् एवं सर्वविरोधाश्रयत्वेनैवाचिन्त्यशक्तित्वं तेनैव चैश्वर्यमिति पूर्वमपि प्रतिपादितम् अतोऽशेषविरोधाश्रयत्वात् निग्राह्यस्याप्यनुग्रहो युक्त एवेति भावः ॥ ४८ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

किञ्च, कृष्ण एकोऽपि त्वं चतुर्विध इत्याहुः –नमः कृष्णायेति । सात्वतानामुपासकानां पतय इति पतित्वेनैक्यमेव साधितम्, अन्यथा नार्थाप्तिः, तथा चोक्तं पञ्चमस्कन्धे (५।१८।२०) श्रीलक्ष्मीदेव्या 'स वै पतिः स्यादकुतोभयः स्वयं, समन्ततः पाति भयातुरं जनम् । स एक एवेतरथा मिथोभयम्' इति, यद्वा, 'वृष्णीनां पतये' इति श्रीयदुकुलावतीर्णचतुर्णामिव परमाभिन्नत्वं दर्शितम् । ततश्च कृष्णाय वासुदेवायेत्यर्थः । रामस्य विशेषणं वसुदेवसुतायेति तस्यैव संकर्षणत्वात् ॥ ४५ ॥ सात्वतपतित्वेन कारुण्यादिगुणप्रकाशकाय, अथच तत्स्वभावाच्छादकाय, कदाचिदन्तर्द्धानादिना गुणानामिन्द्रियाणां वृत्तिभिरुपलक्ष्याय, हृषीकेशत्वादिना तत्प्रवर्त्तनेन लक्षणेन, अथच गुणानां तेषां द्रष्ट्रे साक्षिणे, किञ्च, स्वसम्विदे स्वप्रकाशाय; यद्वा, गुणप्रदीपत्वादेव गुणदामभिरात्मानमाच्छादयतीति तथा तस्मै—दामोदरत्वे श्रीयशोदया बहुभिर्दामभिर्बन्धनात्, तथापि गुणानां भक्तवात्सल्यादीनां दाम्नां वा, वृत्त्या वर्त्तनेन उपलक्ष्याय, बाललीलादिना स्वच्छन्दत्वेऽपि नलकूबरमणिग्रीवाभ्यामिव सर्वैः संलक्षयितुं शक्याय, किञ्च, गुणद्रष्ट्रे गुणानां दाम्नां तेषामेव द्रष्ट्रे प्रीत्या मुहुर्दर्शनपराय । किञ्च, स्वेषु वयस्यबालकेषु तदानीमेव नवनीतचौर्य्यार्थं सम्विदः संकेता यस्येति, इदमप्यद्भुतमेव नवनीतचौर्यतो गुणैर्बद्धस्य तान् साक्षात् पश्यतोऽपि पुनस्तच्चौर्य्यार्थसंकेतात् ॥ ४६ ॥ न व्याकृतः केनापि व्याख्यातो निर्व्वक्तुमशक्यो विहारो लीलापि यस्य तस्मै, तथा च श्रीविष्णुपुराणे – 'अनाख्येयप्रयोजन' इति । अथच सर्व्वैः शास्त्रज्ञैः शास्त्रैर्व्याकृता निरुक्ता सिद्धिर्यस्य, न्यायशास्त्रादौ सर्व्वत्र प्रागीश्वरसिद्धेरेव प्रस्तुतत्वात्, यद्वा, अव्याकृतः प्रपञ्चातीतो विहारो यस्य अथच सर्व्वस्य लौकिकादिकर्म्मप्रपञ्चस्य सिद्धिर्यस्मात् तस्मै, अतएव हृषीकेश हे तदर्थनिजसर्व्वेन्द्रियप्रवर्तकेति । मुनये आत्मारामाय, अथच अकारप्रश्लेषेण अमौनशीलिने धर्म्माद्याचरणाद्गोपीकुलरमणाद्वा ॥ ४७ ॥ पराणामुत्कृष्टानामवराणाञ्च निकृष्टानां गतिं शुभाशुभलक्षणम्, तत्त्वं जानातीति तथा तस्मै । अथवा पराणामवराणाञ्च अध्यक्षाय स्वामिने, निकृष्टानामुपेक्ष्याणामप्यध्यक्षत्वमद्भुतम्, अविश्वाय विश्वतैजसाद्यवस्थारहिताय, अथच विश्वाय तत्तदवस्थास्वीकारिणे, तद्द्रष्ट्रे तत्तदवस्थानां साक्षिणे, अथच तत्तद्धेतवे, यद्यप्यन्येऽपि विविधा बहवो विरोधादयः श्रीभगवति वर्त्तन्ते, तथापीमे प्रसिद्धाः प्रायः शास्त्रसिद्धा उक्ताः । विरोधाद्यलंकाराच्च परममाहात्म्यमेव पर्य्यवस्यति, किञ्च, एतदेव भगवत्त्वम्, यत्र महोदधौ विचित्र–

विचित्रप्रवाह इव सर्व्वे विरोधाः प्रविशन्ति, यतो निर्गुणत्व-निर्व्विशेषत्वादयो ब्रह्मणः सगुणत्व-सविशेष-त्वादयश्च मायिकप्रपञ्चस्य धर्म्माः परस्परं विरुद्धा अपि श्रीभगवतो निर्गुणत्वादावपि सगुणत्वादिना सगुणत्वादावपि निर्गुणत्वादिना सर्व्वेऽपि तस्मिन् सुखं लीयन्त एव, सच्चिदानन्दघनविग्रहत्वात्। एतदेव परब्रह्मत्वमेव, तदेव तर्कागम्यं तत्प्रसादैर्विज्ञेयं भगवताभिधेयं परमैश्वर्य्यमिति। एतच्च श्रीभागवतामृतोत्तरखण्डे विवृतमस्ति। अतोऽशेषविरोधाद्याश्रयात् श्रीवृन्दावनाश्रितस्य परमानुग्राह्यस्यापि निग्रहो युक्त एवेति भावः ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

गुणप्रदीपाय गुणप्रकाशाय गुणात्मस्थोदयाय च आत्मसङ्कल्पस्थगुणोन्मेषाय। यद्वा, गुणेषु आत्मनि च स्थित उपलम्भो यस्य तस्मै चेतनाचेतनेष्वन्तरात्मतयोपलभ्यायेत्यर्थः। गुणवृत्त्युपलक्ष्याय तत्कारणत्वेनोपलक्षणीयाय ॥ ४६ ॥ अव्याकृतविहाराय क्रीडापरिहाराय सर्वव्याकृतस्य नामरूपव्याकरणयुक्तस्य चिदचिद्घनसिद्धिहेतवे मुनिः अनुसन्धानता मौनं अनादरादवचनम् "अवाक्यनादरः इति श्रुतेः ॥ ४७–४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सत्यं परत्वावस्थितोऽहमुक्तगुणयुक्तो न तु व्यूहविभवाद्यवस्थ इत्यत्राहुः—नमः कृष्णायेति। रामकृष्णादिविभवावस्थायां प्रद्युम्नानिरुद्धादिव्यूहावस्थायाश्चाहीनस्वस्वभावायेतिभावः। विभवावस्थायां सौशील्यमेकमधिकमाविष्कृतमित्यभिप्रायेणाहुः—वसुदेवसुतायेति। यद्वा, शरण्यत्वोपयुक्तमाश्रितार्तिपरिजिहीर्षैकशीलत्वमाहुः—नमः कृष्णायेति। व्यूहविभवादिरूपेण सात्वतामाश्रितानां पतये अनिष्टपरिहारपूर्वकं पालकायेत्यर्थः ॥ ४५ ॥ पालकत्वप्रकारमेवाहुः – गुणप्रदीपायेति। सात्वतामित्यनुवर्त्तते तेषां गुणस्य धर्मभूतज्ञानस्य प्रदीपाय प्रदीपवद्विषयावारकनिवारकाय सात्वतां गुणप्रदीपायेत्यनेनासात्वतां तद्वैपरीत्यं सूचितं तदेव स्पष्टीकुर्वन्ति गुणात्मच्छादनाय गुणेन गुणमयमायया आत्मनो जीवानसात्वतश्छादयति सङ्कुचितज्ञानान् करोतीति तथा तस्मै एतद्विशेषणद्वयप्रसक्तवैषम्यपरिजिहीर्षया विशिषन्ति गुणवृत्त्युपलभ्याय गुणस्य गुणपरिणामात्मकमनोवृत्त्या न्यासोपासनान्यतररूपया उपलभ्यायोपलक्ष्याय गुणवृत्तिरूपव्याजमात्रापेक्षत्वाद्वैषम्यरहितायेतिभावः। गुणवृत्त्यपरिज्ञानासम्भावनां निराकुर्वन्ति—गुणद्रष्ट्रे सर्वान्तःकरणवृत्तीनां साक्षाद्युगपद्द्रष्ट्रे तत्र हेतुः स्वसंविदे स्वासाधारणापरिच्छिन्ननिरुपाधिकनित्यासङ्कुचितधर्मभूतज्ञानाश्रयाय ॥ ४६ ॥ यद्यहं गुणद्रष्टा तर्हि तथात्वेन किं न ज्ञायेत इत्यत्राहुः अव्याकृतेति। अव्याकृतोऽनभिव्यक्तः विहारः गुणद्रष्टृत्वादिरूपो यस्य तस्मै न केवलं गुणद्रष्ट्रेऽपि तु सर्वव्याकृतानां देवादिपदार्थानां तद्बुद्धिवृत्तीनां च सिद्धये निष्पत्तिहेतवे न केवलं तेषां सिद्धिहेतुरेवापितु सर्वेन्द्रियप्रशासिता चेत्यभिप्रायेण संबोधयन्ति—हृषीकेशेति। हृषीकाणाम् ईशः नियन्ता शरण्यत्वोपयुक्तगुणान्तरमाहुः मुनये तापत्रयातुरजीवोज्जीवनाय यादृच्छिकप्रासङ्गिकानुषङ्गिकादन्यतमसुकृतलेशानुचिन्तनात्मकमननशीलाय मौनी शीली अजल्पाकः परिपूर्णैश्वर्यत्वाद्ब्रह्मादिस्तम्बपर्यन्तं जगत् तृणीकृत्य जोषमासीनायेत्यर्थः। अयमपि परत्वावहो गुणः ॥ ४७ ॥ परावरगतिज्ञाय बन्धमोक्षाभिज्ञाय आश्रितानां मोचकायानाश्रितानां बन्धकाय चेत्यर्थः। तथाचोक्तं भगवतैव "तेषामहं समुद्धर्ता मृत्युसंसारसागरात्" इति—

"तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" ॥ इति च

आश्रयणसौकर्यापादकोऽयं गुणः कृतापराधानप्याश्रयरूपव्याजमात्रावलम्बनेन रक्षितुं उद्यमो ह्याश्रयणसौकर्यापादकः अनेन वैषम्यराहित्यं कारुणिकत्वञ्चाभिप्रेतं तथा च स्मर्य्यते—

"सर्वज्ञोऽपि हि सर्वेशस्सदा कारुणिकोऽपि सन्। संसारतन्त्रवाहित्वाद्रक्षापेक्षामपेक्षते" ॥ इति

सर्वाध्यक्षाय सर्वपुरुषार्थाधिपतये आश्रितानां धर्मादिस्वात्मपर्यन्तप्रदातृत्वरूपमहावदान्यायेत्यर्थः। अयमाश्रितकार्यापादको-गुणः पूर्वं पराय भूतायेत्युक्तपरत्वोपयुक्तजगदुपादानत्वप्रयुक्तविश्वानन्यत्वं विशिष्टस्य तथात्वेऽपि विशेष्यांशस्य विश्वशरीरकत्वेन तद्भिन्नत्वं तन्निमित्तत्वं तत्सृष्टौ स्वेतरोपकरणान्तरनिरपेक्षत्वञ्च "विश्वाय विश्वरूपाय तत्कर्त्रे विश्वहेतवे" इत्युक्तं तदेव विश्वाय तुभ्यं नमः इति युष्मच्छब्दविवक्षितषाड्गुण्यपूर्णत्वाभिमुखत्वादिविशेषणानां विश्वशब्दाद्यभिप्रेतविश्वानन्यत्वादीनाञ्चैकविशेष्यवृत्तित्वरूपमर्थसमानाधिकरण्यमुक्तम् अथ भिन्नप्रवृत्तिनिमित्तवद्विशेष्याभिधायिनां तत्तच्छब्दानाम् एकविशेष्यपर्यवसानात्मकं शब्दसामानाधिकरण्यमाहुः विश्वाय "नतास्म सर्ववचसां प्रतिष्ठा यत्र शाश्वता "वचसां वाच्यमुत्तमम्" इत्युक्तरीत्या सकलशब्दवाच्यायेत्यर्थः। विश्वशब्दस्यात्र पूर्वत्र च लाक्षणिकत्वात्सर्वनामकार्याभावः संज्ञापूर्वकविधेरनित्यत्वाद्वा एकस्यैव सर्वशब्दवाच्यत्वप्रयुक्तं सर्वेषां शब्दानां पर्यायत्वं निराहुः अविश्वायेति। तदन्यत्वमत्र न ह्यर्थः न विश्वः अविश्वः तस्मै तत्तच्छब्दप्रवृत्तिनिमित्तेभ्यो विलक्षणायेत्यर्थः। न हि स्वस्वप्रवृत्तिनिमित्तविलक्षणैकविशेष्यनिष्ठप्रवृत्तिनिमित्तविशिष्टैकविशेष्याभिधायिनां शब्दानां पर्यायत्व-

प्रसङ्ग इति भावः । कथं जातिगुणाद्याश्रयतत्तद्विशेष्यपर्यवसायिनामेव विशेष्याभिधायित्वमित्यत्राहुः विश्वहेतव इति अस्य च हेतव इति च पाठः तदा विश्वपरामर्शीदं शब्दः जातिगुणाद्याश्रयनिखिलविशेष्यजातगतसत्तास्थितिप्रवृत्तिहेतवे तत्सत्तादिहेतुत्वेन विश्वस्य तदपृथक्सिद्धविशेषणादपृथक्सिद्धविशेषणवाचिनां मत्वर्थीयप्रत्ययमन्तरेणापि विशेष्यपर्यवसायित्वमाकृतिनयसिद्धमिति भावः । विश्वसत्तादिहेतुत्वासम्भावनां निराकर्त्तुं हेतुत्वोपयुक्तज्ञानवत्तामाहुः तद्द्रष्ट्रे इति ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कृष्णाय उत्कृष्टानन्दरूपाय भक्तजनदुरितकर्षणशीलाय वा शत्रूणामग्नये वा नीलवर्णाय वा "कृष्णः सीसाद्यलोहेषु कृष्णो नीलेऽनले कलौ । शूद्रे काके पिके व्यासे ध्वान्ते पक्षेऽर्जुने हरौ" इति च रामाय रामनाम्ने अभिरामाय वा प्रकृष्टद्युत्या-मेयाय । यद्वा प्रकृष्टधनाय "प्रद्युम्नं द्रव्यं द्रविणम्" इति हलायुधः अनिरुद्धाय ज्ञानिनां निरोधरहिताय ॥ ४५ ॥ गुणाः सत्त्वादयः भक्तिज्ञानादयो वा तेषां प्रदीपाय ज्ञापकाय गुणात्मा प्रकृतिः तस्यां स्थितः उदयः स्वरूपं यस्य स तथा तस्मै गुणैः श्रोत्रादीन्द्रिय-जन्यज्ञानैः प्रत्युपलक्ष्याय अनुमेयस्वरूपाय गुणद्रष्ट्रे गुणसाक्षिणे स्वसम्विदे स्वयंप्रकाशाय "तद्ब्रह्म वेदाहं ब्रह्मास्मि" इति श्रुतिः अनेनाप्यस्याप्यन्यो द्रष्टा तस्याप्यन्य इत्यनवस्था निरस्तेति ज्ञातव्यम् ॥ ४६ ॥ अव्याकृताः व्याहर्तुमशक्याः सृष्ट्यादिविहारा यस्य स तथा तस्मै । ननु व्याहर्तुमशक्यविहारश्चेत्कथं तर्हि तज्ज्ञानम् अत्राहुः—सर्वेति । सर्वैर्व्याकृता विवृता सिद्धिः स्वरूपज्ञानं यस्य स तथा स्वानुग्रहेण ज्ञापितस्वरूप इत्यर्थः । तस्मै । यद्वा सर्वव्याकृतसिद्धये नामरूपात्मकं जगत्सर्वं व्याकृतं तस्य सिद्धि-रुत्पत्तिर्येन स तथा तस्मै मुनये सर्वज्ञानाय मौनशीलिने असम्भावितभाषणशीलरहिताय ॥ ४७ ॥ परावरगतिज्ञाय कार्यकारण-स्थितिज्ञाय सर्वाध्यक्षाय सर्वेषाम् उपरिगताय अविश्वाय विश्वेभ्यो जीवेभ्योऽन्यस्मै "शरीरेषु प्रविष्टत्वाद्विश्वो जीव उदीर्यते" इत्यादिस्मृतिः तात्पर्यात् पुनरुक्तमाहुः – विश्वायेति । जीवस्य जगदन्तःपातित्वेऽपि चेतनत्वेन स्वातन्त्र्यशङ्कानिवारणार्थं पृथग्जीवग्रहणं—

"जीवस्य तदधीनत्वाद्विश्वो विष्णुरिति स्मृतः । अस्योत्पत्त्यादिहेतुत्वाद्विश्वहेतुश्च कीर्त्तितः" ॥ इति ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कृष्णाय रामाय च वासुदेवाय वसुदेवसुतायेति वासुदेवादिचतुर्व्यूहान्तरं व्यावर्त्तितम् ॥ ४५–४६ ॥ अव्याकृतविहाराय प्रपञ्चातीतलीलाय ॥ ४७–४८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ब्रह्मत्वेन स्तुवन्त्यो भक्तिवासनया सुरसतया तथा स्तवने सन्तोषमलभमानाः पुनः स्वरूपेण स्तुवन्ति नमः कृष्णाय रामायेत्यादि । कृष्णाय परब्रह्मणे, कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥ रामा-दयोऽपि चत्वारो विग्रहास्त्वदभिन्ना एवेति दर्शयन्ति रामाय;–'रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि । इति रामपदेनासौ परं ब्रह्माभिधीयते' ॥ इति तुल्यार्थकत्वात् । वसुदेव-सुताय च, वसुदेव सुतोऽपि त्वम् (भा.४।३।२३) "सत्वं विशुद्धं वसुदेवसंज्ञितम्" तत्राविर्भूतेर्यो वासुदेवश्चित्ताधिष्ठाता, स च त्वमेव । एवं प्रद्युम्नायेति प्रद्युम्नोऽपि प्रकृष्टं द्युम्नं द्युतिः परममहस्तस्मै । अनिरुद्धाय केनापि न निरुद्धः स्वच्छन्दत्वात्तस्मै । अतो वासुदेव-संकर्षण-प्रद्युम्नानिरुद्धेभ्यः परः स त्वं श्रीकृष्ण इत्यर्थः । वक्ष्यति च स्वयमेव (भा. ११।१६।३२) "सात्वतां नवमूर्त्तीनामादिमूर्तिरहःपरा" इति विभूतियोग-कथने विभूतित्वेऽप्युपचारादहमिति । अतः सात्वतां पतये नमः सात्वता हि केचिद्वासुदेवादि–नवमूर्त्तिवादिनस्तेषां पतित्वात् त्वमेक एव वासुदेवादयो नवमूर्त्तयः । अथवा, सात्वतां यदूनां पतये इत्यनेन भाविद्वारकाविलासोऽपि स्तुतः ॥ ४५ ॥ हे भगवन् तव गुणाः किं स्तोतव्याः यतस्त एव मोहान्धकारहारिण इत्याहुः—नमो गुणप्रदीपायेत्यादि । गुणा एव प्रदीपास्तमोनुदा यस्य तस्मै, गुणात्मनो ब्रह्मादयस्तेषामपि छादनाय स्वतेजसावर-काय, गुणानां सत्वादीनां वृत्तिरूपलक्ष्याय हीनलक्ष्याय गुणवृत्तिभिरनङ्कितायेत्यर्थः,— "हीने उपश्च कथ्यते" इति श्रुतेः । अतएव गुणद्रष्ट्रे गुणनियन्त्रे । स्वेषां भक्तानां सम्वित् सम्यक् वित् सत्ता यस्मात्, नित्य–पार्षदायेत्यर्थः ॥ ४६ ॥ एव तव विहारा अपि स्तोतुं न शक्यन्त इत्याहुः अव्याकृतविहारायेत्यादिबहुभिः । अव्याकृता अप्राकृता विहारा यस्य, सर्वव्याकृतस्य सर्वपुरुषार्थस्य सिद्धिर्यस्मात । हे हृषीकेशेत्यस्यायं भावः । सर्वहृषीकेशत्वादस्माकं येयमुक्तिस्तस्यापि त्वमेव प्रवर्त्तकः तत् कथं नानुमोदस इत्यर्थः । एतावता स्तवेनापि न किञ्चिद्वदसि, तस्मान्मौनशालिने मुनये नमः । मौनञ्चापि तव तत्त्वमेकम्, तेन तन्न जहासि,–(गी.१०।३८) 'मौनं चैवास्मि गुह्यानाम्' इति श्री गीतासु स्वोक्तेः ॥ ४७ ॥ नानाबाधानुरोधाय परिच्छिन्ना व्यापी विग्रहो नित्यः, एको-ऽनेकः, निर्गुणः, स्वानन्दगुणवान, आनन्दो मूर्त्तः, इत्यादयो ये नानावादाः, तेष्वनुरोधो यस्य सर्ववादसंवादक इति यावत्तस्मै । अविश्वाय विश्वस्माद्भिन्नाय, विश्वाय विश्वप्रकाशकाय, तद्द्रष्ट्रे तस्य हेतवे च ॥ ४८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवं ब्रह्म स्तुत्वा मनः प्रसादाभावेन पुनः श्रीकृष्णमेव स्तुवन्ति—नमः कृष्णायेत्यादि। कूले रामं दृष्ट्वा अयं सहायो भवत्विति तमपि स्तुवन्ति—नमो रामायेति। प्रभो! त्वं नन्दसुत एव, स्त्रियोऽपि वयं सर्वं जानीम एव, किन्तु वसुभिर्गोधनैर्दीव्यतीति वसुदेवः। वसुषु देवभेदेषु दीव्यतीति वा (भा. १०।८।४८) "द्रोणो वसूनां प्रवरः" इत्युक्तेः। वसुदेव इति नन्दस्य नामान्तरम्। तेन त्वं वसुदेवसुतः, तस्मात् यथात्वेन त्वां नमाम इत्याहुः—वसुदेवसुताय चेति च-कारस्यार्थः। त्वमेव प्रद्युम्नस्तज्जनकत्वात्, त्वमेवानिरुद्धस्तत्पितामहत्वात् त्वमेव सात्वतां पतिरित्याहुः—प्रद्युम्नायेत्यादिना भाविद्वारकाविलासोऽपि तदा स्तुतः ॥ ४५ ॥ गुणा एव प्रदीपास्तमोहन्तारो यस्य, गुणात्मनां ब्रह्मादीनामपि छादनाय आच्छादनाय गुणवृत्तीनां सत्वादिवृत्तीनामुपलक्ष्याय, अथवा गुणवृत्तयोऽप्युपलक्ष्या यस्माद् गुणवृत्तीनामपि प्रकाशाय। गुणद्रष्ट्रे अदोषदर्शिने स्वसंविदे स्वतःसिद्ध-ज्ञानाय ॥ ४६ ॥ अव्याकृता अप्राकृता विहारा यस्य, सर्वव्याकृतस्य सर्वव्याकारस्य सर्वपुरुषार्थस्य सिद्धये सिद्धरूपाय, तेषां सिद्धिर्यस्मादिति वा। एतावता स्तवेनापि न किञ्चिद् वदसि त्वं मुनिरिव तिष्ठसि, तस्मात् मौनशीलिने मुनये नमः। उक्तञ्च (गी. १०।३८) मौनञ्चैवास्मि गुह्यानाम्" इति। हृषीकेश इत्यस्यायं भावः—अस्माभिर्यदुच्यते, तस्यापि त्वमेव प्रवर्त्तकः, तदा कथं नानुमोदसे इति ॥ ४७ ॥ अविश्वाय विश्वातीताय अथ च भक्तानां विश्वाय विश्वदेवत्वं भक्तानाम् सर्वनामत्वाभाव आर्षः। तद्द्रष्ट्रे विश्वद्रष्ट्रे विश्वहेतवे च ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सर्वशास्त्रप्रतिपादितसारस्वरूपाणि तु तव चत्वार्य्येवेत्याहुः, नम इति। चकारान्नन्दसुताय च सात्वतां सात्वतवंशोत्पन्नशूरादीनां पर्जन्यादीनां च पतये पालकाय ॥ ४५ ॥ यतस्तेष्वेव गुणानां प्रेमवश्यत्वादीनां प्रकर्षेण प्रकाशकाय प्रकाशितेन प्रेमवश्यत्वगुणेन आत्मच्छादनाय आवृतनिजैश्वर्य्याय तदपि त्वं भक्तितत्त्वज्ञैर्ज्ञातस्वरूप एव भवसीत्याहुः गुणस्य भक्तवात्सल्यातिशयस्य वृत्या असाधारणसत्तया उपलक्ष्याय स्वयं भगवन्तं विना कोऽप्येवं न भवतीति ज्ञेयाय यतो गुणद्रष्ट्रे स्वभक्तस्य गुणमेव पश्यति दोषगन्धमपि यस्तस्मै अत एव स्वेषु भक्तेष्वेव सम्विदनुभवो यस्य तस्मै ॥ ४६ ॥ लीलापुरुषोत्तमस्य तव लीलामाधुर्य्याधिक्यमित्याहुः—अव्याकृतः अनिर्वाच्यत्वादव्युत्पादितो प्राकृतो वा विहारो यस्य तस्मै। यद्वा, न व्याकृतो विवाहादिव्यापाररहित एव विहारो यस्य सः सर्वेषां भक्तविशेषाणामेव व्याकृतानां तत्सेवोचितविशिष्टाकृतीनां सिद्धिर्यस्मात्तस्मै अत एव हृषीकेश भक्तसर्वेन्द्रियाकर्षक भक्तहीनेषु मुनये आत्मरामाय अत एव तेषु स्वाभीप्सितप्रार्थकेषु सत्सु मौनशीलिने न किमपि ब्रुवते तेभ्यः सुखं दुःखाभावं च न ददते ॥ ४७ ॥ यतः परेषामुत्कृष्टानां भक्तानाम् अवरेषां निकृष्टानामभक्तानां च गतिं प्राप्यं जानते सर्वाध्यक्षाय सर्वफलाध्यक्षत्वात् तत्तत्समुचितफलस्य दात्रे इत्यर्थः। कर्मफलदातृत्वेऽपि न तव कर्मसम्बन्धः यतोऽविश्वाय प्रपञ्चातीताय तदपि मायाशक्त्या विश्वाय विश्वं स्रष्टुं तस्य विश्वस्य द्रष्ट्रे तथैवास्य विश्वस्य हेतुं प्रधानं च चेतयितुं विकारयितुं वा तस्य द्रष्ट्रे "क्रियार्थोपपदस्य" इत्यादिना चतुर्थी ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वेदरूपत्वेन नत्वा वेदवेद्यचतुर्मूर्त्तित्वेन नमन्ति—नम इति। सात्त्वतामुपासकानां पतये परवासुदेवाय वसुदेवसुताय वसुदेवापत्यतयापि वासुदेव इति प्रसिद्धाय एवम्भूताय कृष्णाय व्यूहाङ्गिने नमः अङ्गमूर्तीर्नमस्यन्ति रामाय सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय च नम इति ॥ ४५ ॥ अथ मुमुक्ष्वन्तःकरणशुद्धादिहेतुत्वेन बुभुक्षुमन्तःकरणं प्रदीपयति—तथा तस्मै अत एव गुणवृत्तिभिः उपलक्ष्याय ध्यानेन लभ्याय अत एव स्वकीयानां ध्यातॄणां मुमुक्षूणां संवित् ध्येयस्वरूपगुणादिविषयकं ज्ञानं यस्मात्तस्मै अत एव गुणद्रष्ट्रे स्वकीयानां स्वविषयकान्तःकरणसाक्षिणे किञ्च, गुणैरात्मानं जीवात्मानं बुभुक्षुर्जीवमाच्छादयति स्वध्यानपराङ्मुखं करोतीति तथा तस्मै च इत्यन्वयः ॥ ४६ ॥ नित्यलोकविहारित्वेन नमन्ति—अव्याकृतविहाराय नित्यलोकविहाराय नमः अनित्यलोकहेतुत्वेन नमन्ति—सर्वव्याकृतिसिद्धये नमः सर्वेन्द्रियप्रेरकत्वेन नमन्ति—हृषीकेश नमस्तेऽस्त्विति। लोकशिक्षायै मुनये मननकर्त्रे मौनशीलिने असम्बद्धवचनवर्जिताय च नमः ॥४७॥ परावरगतिज्ञाय मुमुक्षुबुभुक्षुमार्गविदे सर्वाध्यक्षाय सर्वाधिष्ठात्रे कार्यस्य कारणं विना स्वरूपतस्स्थित्त्याद्यभावात् विश्वाय विश्वाभिन्नाय कारणस्य कार्यत्वावच्छिन्नत्वाभावात् अविश्वाय विश्वभिन्नाय च नमः। नन्वेवंविधं विश्वहेतुत्वं प्रधानादेर्वाच्यम् इत्यत्रानीक्षतुर्विश्वहेतुत्वासम्भवात् "तदैक्षत बहु स्याम्" इत्यादिश्रुतिप्रसिद्धो विश्वद्रष्टा भवानेव विश्वहेतुरित्याहुः—तद्द्रष्ट्रेऽस्य च हेतवे इति। "ईक्षतेर्नाशब्दम्" [१ । १ । ५] इति सूत्रमात्राऽनुसन्धेयम् ॥ ४८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

प्रातनिर्णीतमुपास्यस्वरूपं दर्शयन्त्यो नमन्ति—नमः कृष्णायेति। रामाय बलभद्राय च नन्दसुताय च सात्वतां सात्वतवंशोद्भवानां शूरादीनां पर्ज्जन्यादीनाञ्च पतये पालकाय ॥ ४५ ॥ तेष्वेव प्रेमाधीनतादीनां गुणानां प्रदीपाय प्रदर्शकाय प्रदर्शितैस्तैर्गुणैरात्माच्छादनाय मुकुराधरचित्रन्यायेन स्वैश्वर्यावरकाय तथापि निहतदैत्यसौख्यदातृत्वादीनां गुणानां वृत्या स्वयं भगवत्त्वेनो-

पलक्षणाय बोध्याय गुणद्रष्ट्रे भक्तस्य गुणमेव तनुदोषं यः पश्यति तस्मै अतः स्वेषु भक्तेषु सम्विदनुभवो यस्य तस्मै ॥ ४६ ॥ अव्याकृतो विज्ञानघनो विहारो यस्य तस्मै नामरूपवन्मायिकं वस्तु व्याकृतमुच्यते तद्भिन्नं नित्यममायिकमव्याकृतं नित्यविहारायेत्यर्थः । "एको देवो नित्यलीलानुरक्तः" इति श्रुतेः सर्वेषां व्याकृतानां नामरूपिणां महदादीनां पृथिव्यन्तानां सिद्धिर्यतस्तस्मै । हे हृषीकेश ! मुनये देवहूतीपुत्राय कपिलाय मौनशीलिने ब्रह्माणमपि साभिमानं प्रति किमप्यब्रूवते इत्यर्थः ॥ ४७ ॥ परेषाम् ज्ञानिनामवरेषां कर्मिणाञ्च गति प्राप्यं जानातीति तस्मै । सर्वेषां मोक्षस्वर्गादीनां फलानामध्यक्षाय स्वामिने तत्तत् साधनानुसारेण तत्तत् फलदायेत्यर्थः । अविश्वाय न विश्वं यस्मिस्तस्मै तत्स्पर्शरहितायेत्यर्थः । तथापि विश्वाय तदन्तःप्रविष्टाय विशतीति तद्व्युत्पत्तेः "एतदीशनमीशस्ये"त्यादि पूर्वोक्तेः अस्य विश्वस्य हेतवे हेतुं प्रधानं परिणमयितुं तद्द्रष्ट्रे "स ऐक्षत लोकान्नुसृजा" इत्यादि श्रुतेः क्रियार्थोपपदस्येति चतुर्थी ॥ ४८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कृष्णाय वर्णतोऽपि नामतः गतं । रामाय तन्नाम्ने प्रकृष्टं द्युम्नं यस्य स तस्मै कीर्तिर्द्युम्नं सहस्रसातमामित्यृग्भाष्ये विद्यां कीर्तिं टीकायां च द्युम्नं कीर्तिं चेति व्याख्यातत्वात् । तथा तु विद्युम्नं महाकीर्तिं इति तत्रैवोक्तत्वाच्च । म्ना अभ्यास इत्यस्माद्धञर्थे कविधानमिति कर्मणि कप्रत्यये दिवि म्नायत इति व्युत्पत्त्या द्युम्नशब्देन कीर्तिरुच्यते । हिरण्यं द्रविणं द्युम्नमित्युक्तेः प्रकृष्टसुवर्णं वान्वा यस्मं द्युम्नं द्योतयतेर्यशो वाऽन्नं वेति । यास्कनिरुक्तेः प्रकृष्टान्नरूपाय वेति । अनिरुद्धाय केनापि निरुद्धो न भवतीत्यनिनः प्राणिनः सर्वे रुद्धा येनेति वा स तस्मै वा । सात्वन्तो भक्ता यादवा वा तेषां पतिस्तस्मै । सात्वतामिति षष्ठ्याऽलुक्त्वेनैकपद्ये घिसंज्ञेति वा षष्ठीयुक्तश्छन्दसि वेति वा पतिशब्दो लाक्षणिकोऽयमिति वोपपत्तिः ॥ ४५ ॥ नमो गुणप्रदीपायेत्यत्राकारप्रश्लेषेण पदभ्रमं विश्लेषयन्विवक्षितमर्थमाह ॥ गुणप्रदीपायेति । गुणान्दीपयति ज्ञापयतीति स तथा तस्मै । गुणात्मस्थोदयायेत्यनूद्य व्याचष्टे ॥ गुणात्मस्थोदयायेति । गुणात्मिका प्रकृतिस्तस्यां स्थित उदयः स्वरूपं यस्य स हरिस्तस्मै ॥ ततश्च श्लोकव्याकृतिः ॥ गुणान्प्रदीपयति ज्ञापयतीति स तथा तस्मै गुणात्मनि तिष्ठतीति स उदयो यस्येति वा स चासावुदयश्चेति वा तस्मै गुणैः प्रत्युपलक्षयितुं योग्यतानुसारेण ज्ञातुं योग्यस्तस्मै गुणद्रष्ट्रे भक्ततरतमभावस्थितगुणसाक्षिणे स्वसंविदे स्वप्रकाशाय । तद्ब्रह्मावेदहं ब्रह्मास्मीत्यादेः ॥ ४६ ॥ अव्याकृताः साकल्येन व्याख्यातुं विवरीतुमिति यावत् अशक्या विहारा यस्य स तस्मै दयायां सर्वव्याकृतासिद्धिर्यथायोग्यं येन तस्मै । मनःपूर्वकं नाग स्कृदयं नाग इति त्वं जानीष इति मनसि कृत्वा तथा सम्बोध्य नमन्ति ॥ हृषीकेशेन्द्रियस्वामिन्निति । मुनये गतं । मौनशालिनेऽसम्भाव्यभाषणशून्याय । इयताऽपि प्रयत्नेन किञ्चिदोष्ठानाकुञ्चनमिति युवतयोऽनेन कटाक्षयन्ति ॥ ४७ ॥ परावरगतिज्ञायेति श्लोकेऽविश्वाय विश्वायेति व्याहतमुच्यते । तद्द्रष्ट्रे विश्वहेतव इति प्रागभिहितेः पुनरुक्तिश्चेत्यतो विश्वपदं स्वयं व्याकृत्य मानं चोदाहृत्य पुनरुक्तिमपाकरोति ॥ अविश्वाय जीवेभ्योऽन्यस्मा इति । न विश्वऽविश्व इति व्युत्पत्तिः । शरीरेषु प्रविष्टत्वाज्जीवो विश्व उदीर्यते । विशेरौणादिकः कर्तर्यशुपृषिलटिकणिखटिविशिभ्यः क्वन्निति क्वन्प्रत्यये विशतीति विश्व इति व्युत्पत्तिर्ज्ञेया । विश्वायेति घटयदाह । जीवस्य विश्वस्य भगवदधीनत्वाद्विष्णुर्विश्व इति स्मृत इत्यन्वयः जीवस्यैव विश्वस्योत्पत्त्यादिहेतुत्वादिष्वहेतुरित्यत्र विश्वो जीवः प्राग्जगद्विश्वपदार्थ इति न पुनरुक्तिरिति भावः ॥ ततश्च श्लोकार्थः ॥ परावरगतिज्ञाय कारणकार्यस्थितिविदे उत्तमाधमगतिगतये वा सर्वाध्यक्षाय सर्वस्वामिनेऽविश्वाय जीवविलक्षणाय विश्वाय स्वाधीनजीवनिकायाय तद्द्रष्ट्रे जीवगुणकर्मादिद्रष्ट्रे विश्वस्य जीवस्योत्पत्त्यादिहेतवे नमः । प्रभुर्हि जीवो जडमपेक्ष्येत्युक्तेः प्रपञ्चान्तर्गतत्वेपि विशेषशङ्कास्पदतेति पृथगुक्तिरिति ज्ञेयम् ॥ ४८ ॥

श्रीसुबोधिनी

एवं वैदिकप्रमाणप्रमेयरूपतामुक्त्वा तदनाविर्भूतमित्याविर्भूतं भगवन्तं चतुर्मूर्त्ति तन्त्रप्रकारयुक्तं निरूपयति **नमः कृष्णायेति**, **कृष्णाय** सदानन्दायेतिस्वरूपमुक्तं, अवान्तररूपत्वमाह ततो **रामाय** सङ्कर्षणाय, **वसुदेवसुताय** वासुदेवाय, चकारादस्य प्रद्युम्नरूपताप्युक्ता, वसुदेवशब्दस्य शुद्धसत्त्वे वसुदेवे च सङ्केतात्, **प्रद्युम्नायानिरुद्धायेति**चतुर्मूर्तिर्भगवानुक्तः, सदानन्दो भगवांश्चतुर्मूर्त्या यावतीर्णो यदर्थं तदाह **सात्वतां पतये नम** इति **शुद्धसत्त्वानां** परमवैष्णवानां **पतिः**, भक्तिफलरूपो भक्तिप्रवर्तकश्च, अतोनेनेशानुकथा विष्णुभक्तिर्निरूपिता ॥ ४५ ॥ एवं तन्त्रन्यायेन भगवन्तं निरूप्य साङ्ख्ययोगादिभिः स्मार्तनिरूपितं भगवन्तं निर्णयेन निरूपयति **नमो गुणप्रदीपायेति**, **'भगवान् सगुण'** इत्यस्यायमर्थो **गुणान् प्रकर्षेण दीपयति तत्प्रकाशतार्थमेव** गुणान् **स्वनिकटे स्थापयति, ततो गुणान् प्रकाशयन् गुणानां माहात्म्यख्यापनाय गुणैरात्मनश्छादनं येन गुणैरात्मानं** छादितवान् **गुणेषु** स्वतेजो दत्वा **स्वयं तिरोहितो जात** इत्यर्थः, ततः पुनः कौतुकार्थं **गुणाना** वा **वृत्तय**श्चाद्युपज्ञानादयस्तै**रुपलक्ष्यत** इति तथा, एवं सत्त्वरजस्तमोभावा उक्ताः, नन्वेतदपि किमिति करोति ? तत्राह **गुणद्रष्ट्** इति **गुणानां द्रष्ट्रा**, तान् दृष्ट्वा तेषामेवमुपकारं कृतवानित्यर्थः, तैः कृतस्तु स्वस्योपकारो नास्तीत्याह स्वसंविद इति, स्वत एव संविद् यस्य न तस्य ज्ञानं केनचिदुत्पाद्यते केनचिन्नाश्यते वा, अतो **गुणानां सच्चिदानन्दधर्माणां स्वयमेव तद्रूपेणाविर्भूतस्वरूपाणामुपकारार्थं सगुण इत्युच्यत** इत्यर्थः ॥ ४६ ॥

एवं सगुणरूपत्वमुक्त्वा ज्ञेयं रूपं भगवन्तमाहाव्याकृतेति, **अव्याकृते प्रकृतिपुरुषरूपे विहारो** यस्य, **अव्याकृतो** वा केनाप्यज्ञातो **विहारो** यस्य, **अव्याकृतार्थं** वा **विहारो** यस्य, कपटमानुषभावं सम्पादयति यथा न कोपि जानात्विति, तस्याव्याकृतत्वे प्रमाणमाह **सर्वव्याकृतसिद्धय** इति, **सर्वे ये व्याकृता**स्तत्त्वानि ब्रह्माण्डानि च तदन्तर्वर्तीनि च तेषां **सिद्धिरुत्पत्ति**र्ज्ञप्तिश्च यस्मात्, "अव्यक्तादीनि भूतानी"तिवाक्यात्, अन्यथा व्याकृतोत्पत्तिर्न स्यात्, कार्यस्य पूर्वावस्थातो वैलक्षण्यस्यावश्यकत्वात्, एवमुत्पत्तिपक्षं निरूप्य ज्ञप्तिपक्षं निरूपयति **हृषीकेश नमस्ते**ऽस्त्विति, **हृषीकाणीन्द्रियाणि** तेषा**मीशः** प्रवर्तकः, प्रकृते भगवानेव ज्ञापनार्थं स्वेन्द्रियाणि प्रवर्तन्नुपस्थित इति साक्षात् तं नमस्यन्ति, तादृशीं वावस्थां प्रार्थयन्ति तर्ह्यव्याकृतस्य ज्ञानं कथं भवतीत्याकाङ्क्षायामाह **मुनय** इति, मननमेव तत्र हेतुः, मुनयश्च द्रष्टारः, तद्रूपो भगवान्, किञ्च साधनान्तरमप्यव्याकृतस्य भगवतो ज्ञाने निरूपयन्ति **मौनशीलिन** इति, **मौनमेव शीलं** सहजः स्वभावो यस्य, "उपरतायां वाचि किञ्ज्योति" रितिप्रश्ने "अत्रायं पुरुषः स्वयञ्ज्योति" रिति "वचस्युपरते प्राप्ये"तिवाक्याच्च, तदेकं भगवत एवाव्याकृतं रूपं यत्रैव "यस्यामतं तस्य मत" मित्यादिवाक्यानि सम्बध्यते ॥४७॥ शास्त्रार्थरूपश्चैको भगवान् पण्डितव्यवहार्यः, तमाह **परावरेति**, **परे** ब्रह्मादयः, **अवरे**ऽस्मदादयः, तेषां सर्वेषामेव **गतिं** व्यवस्थां जानातीति, शास्त्रेण ह्युत्पद्यते यज्ज्ञानं तदेतादृशं भवतीति, एव बहिर्ज्ञानमुक्त्वान्तर्ज्ञानमाह **सर्वाध्यक्षायेति**, सर्वेषामध्यक्षः साक्षी, अतस्तं प्रत्यक्षेण नमन्ति **ते नम** इति, तेषां प्रतिपाद्यरूपं सङ्ग्रहेणाहा**विश्वायेति**, **विश्वव्यतिरिक्तो विश्वरूपश्च**, विश्वरूप एव सन् विश्वव्यतिरिक्तश्च, यथा वृक्षः काण्डादिरूप एव सन् फलरूपोपि, चकारादुभयमुभयत्र, अनेन केचन विश्वरूपं प्रतिपादयन्ति केचन तद्व्यतिरिक्तं, केचनोभयं, केचित् पुनरेकदेशिन इति, किञ्च तद् **द्रष्टृ** तस्य रूपस्य द्रष्टा त्वमेव, अनेनाविश्वपक्षे प्रमाणमुक्तं, विश्वपक्षेपि प्रमाणमाह **तस्य हेतव** इति, तस्य विश्वस्य कारणरूपोपि, कारणात्मकतैव कार्यस्येति प्रमाणता, एवं निरोधमुक्त्याश्रयाः क्रमादेतैरेवोक्ताः ॥ ४८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

नमः कृष्णायेत्यत्राभासे तदिति तद्रूपमित्यर्थं अस्येति वसुदेवसुतस्य । ॥ ४५ ॥ नमो गुणप्रदीपायेत्यत्र निर्णयेनेति ते हि सगुणं भगवन्तं वर्णयन्ति तत्र यथा भगवतः सगुणत्वं तन्निर्णयेन, उपकारं कृतवानित्यर्थ इति तथा च गुणोपकारकतया सगुणत्वं न तु गुणोपहिततयेतिनिर्णय इत्यर्थः सिध्यति, उपधानमाशङ्क्य परिहरन्ति तैरित्यादि, तद्रूपेणेति सत्त्वरजस्तमोरूपेण, इदं यथा तथा द्वितीयसुबोधिन्यां स्फुटं, 'सद्रूपस्य मलं सत्त्वं चिद्रूपस्य रज आनन्दरूपस्य तम' इति तत्रोपपादनात् ॥ ४६ ॥ अव्याकृतेत्यत्रान्यथेति कारणस्य व्याकृतत्वे, एवं ज्ञानार्थमिति कार्यवैलक्षण्यज्ञानार्थं, प्रार्थयन्त्यस्त्विति पदेन प्रार्थयन्ति ॥ ४७ ॥ परावरेत्यत्र तेषामिति शास्त्राणां, ननु भवत्वेवं गुणप्रकाशत्वादिना गुणार्थत्वमव्याकृतविहारतादिना चावतारकृत्त्वं परावरगतिज्ञत्वादिना चान्तर्यामित्वं तथापि निरोधमुक्त्याश्रयाणामत्रास्फुटत्वाल्लीलाभिर्दशविधत्वं कथमित्यत आहुरेवंनिरोधेत्यादि, नमो गुणेत्यत्र सगुणोपकारकतया निरोधः, अव्याकृतेत्यत्र तादृशविहारतया स्वरूपवस्थानतया मुक्तिः परावरेत्यत्राविश्वायेत्यर्धश्लोकोक्तरीत्या ज्ञानाधारत्वेन क्रियाधारत्वेन चाश्रय इत्येवंक्रमादेतैरेव श्लोकैरेता उक्ता इति सुखेनैव दशलीलाभिरपि तथात्वं सिध्यतीत्यर्थः ॥ ४८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नमः कृष्णायेत्यस्याभासे वैदिकेति वेदप्रकारयुक्तामित्यर्थः, व्याख्याने, चकारादिति प्रद्युम्नोप्ययमेव न तु सङ्कर्षणवद् रूपान्तरमपीति चकारेण सूचितमित्यर्थः, शुद्धसत्त्वानामिति सात्वतपदस्यार्थद्वयमभिप्रेत्यात्र पदद्वयमुक्तं, भक्तेः फलं "भक्त्या मामभिजानाती" तिवाक्योक्तं ज्ञानमित्यर्थः ॥ ४५ ॥ नमो गुणेत्यत्र उपलक्ष्यते इति "गुणप्रकाशैरनुमीयते भवा' निति प्रकारेणोपलक्षणविधया ज्ञायते इत्यर्थः ॥ ४६ ॥ अव्याकृतेत्यत्र अव्याकृतो विहारो यस्येतिपक्षे विहारः पुरुषेवतरणमित्यर्थः, तस्यैव ब्रह्माण्डोत्पत्तिहेतुत्वात् तस्य व्याकृतत्वे ब्रह्माण्डोत्पत्तिकारणत्वं न स्यादितिभावः, अव्याकृतार्थमिति व्याकृतमिति भावे क्तः, तथा च स्वरूपस्याव्याकृतत्वार्थमज्ञापनार्थमित्यर्थः, तस्येति प्रकृतिपुरुषरूपस्य विहारस्य स्वरूपस्य चेत्यर्थः, आद्यस्य व्याकृतत्वे तत्त्वोत्पत्तिर्न स्यात् द्वितीयस्य व्याकृतत्वे ब्रह्माण्डोत्पत्तिर्न स्यात्, तृतीयस्य व्याकृतत्वे देवतिर्यगाद्युत्पत्तिर्नस्यात्, किन्तु तेषां मोक्ष एव स्यादितिभावः, कार्यवैलक्षण्यस्यावश्यवाच्यत्वादिति सर्वत्र हेतुः एवं व्याकृतोत्पत्तावव्याकृतत्वं हेतुरुक्तः, ज्ञप्तौ तु हृषीकेशत्वं हेतुर्वक्ष्यते, अत्र त्वव्याकृतमेव स्वरूपं स्वेच्छया ज्ञापितवानित्याहुः प्रकृते इति, साक्षादिति ते इत्यस्यार्थोयं तादृशीमिति नमनयोग्यामिन्द्रियप्रेरणावस्थामित्यर्थः, अस्त्विति प्रार्थनायां लोट्, तर्हीति व्याकृतज्ञापनार्थं हृषीकेशत्वे सतीत्यर्थः अव्याकृतस्येन्द्रियैस्तत्प्रतिप्रेरितैर्ज्ञापनाभावे वस्तुसत्तैव न सिध्येदितिभावः मननमेवेति एवकारेण भगवत्प्रतिकानीन्द्रियाणि व्यावर्त्यन्ते, मुनयश्चेति चकारोर्थविशेषे यत इत्यर्थे, तद्रूप इति भगवानेव मुनिरूपः सन्नात्मानं पश्यति तेनाव्याकृतत्वमपि न हीयते वस्तुसत्ता च साधितेतिभावः, एवमग्रिमविशेषणेपि स्वभावो यस्येत्यनेन मत्वर्थ एव विवृतः, तदेकमिति सर्वोत्पादकं सर्वज्ञापकं चाज्ञेयमक्षरं भगवत एव रूपं, पूर्वोक्तप्रकृत्यादेर्भिन्नत्वशङ्कापरिहारायेदमुक्तं, यत्रैवेति अक्षर एवेत्यर्थः, पुरुषोत्तमस्तु "भक्त्या मामभिजानाती" तिवाक्याद् ज्ञात एवेतिभावः ॥ ४७ ॥ परावरेत्यस्याभासे शास्त्रार्थरूप इति शास्त्रप्रतिपाद्यं रूपं यस्य, पूर्वमज्ञेयं रूपमुक्तं शास्त्रज्ञेयमप्येकं रूपमस्ति तदत्रोच्यत इत्यर्थः, अक्षरस्य रूपद्वयमज्ञेयं ज्ञेयं चेति एकदेशिमतमिदं न

भेदादिति चेन् न प्रत्येकमतद्वचना' दिति, व्याख्याने, शास्त्रेण हीति हि यतः शास्त्रेण यस्य रूपस्य ज्ञानमुत्पाद्यते तद्रूपं परावरगतिज्ञ सर्वप्रेरकं च भवति, शास्त्रं परावरगतिज्ञत्वप्रकारेणान्तर्यामित्वप्रकारेण च ज्ञानमुत्पादयतीत्यर्थः' एवमिति बाहिःस्थितस्य भगवद्ज्ञानं परावरमर्यादास्थापकत्वेन "मद्भयाद् वाति वातोय" मित्यादिवाक्येभ्यः, अन्तः स्थितज्ञानं सर्वप्रेरकत्वेन भवतीत्यर्थ अत इति बहिरन्तर्ज्ञानविषयो यत इत्यर्थः । तेषामिति शास्त्राणामित्यर्थः, प्रमाणतेति हेतुत्वस्येतिशेषः ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

रामाय सङ्कर्षणाय अहङ्कारे उपास्याय, वसुदेवसुताय "सत्त्वं विशुद्ध वसुदेवशब्दितं यदीयते तत्र पुमानपावृत" इति चतुर्थस्कन्धोक्तेः वसुदेवशब्देन शुद्धं चित्तम्, तत्सुताय तत्र प्रकाशमानाय उपास्याय वासुदेवाय, प्रद्युम्नाय बुद्धावुपास्याय, अनिरुद्धाय मनसि उपास्याय, एवं चतुर्मूर्तये कृष्णाय तुभ्यं नमः । कृष्णावतारप्रयोजनं सूचयन्त्यः प्रणमन्ति— सात्वतां भक्तानां पतये पालकाय नमः ॥ ४५ ॥ ननु 'एकस्य कथं चतुर्मूर्तिता ?, तत्राहुः—गुणप्रदीपायेति । गुणागुणकार्यान्तःकरणानि प्रदीपयति प्रकाशयतीति तथा तस्मै, चित्तादिचतुर्विधान्तःकरणाधिष्ठातृत्वेन चतुर्मूर्तितेत्याशयः । गुणैरहङ्कारादिभिरेवात्मनः आच्छादनं यस्य तस्मै । तथा गुणानां चित्तादीनां चेतनाध्यवसायादिवृत्तिभिरुपलक्ष्याय तत्प्रवर्तकत्वेन अनुमेयाय । तत्प्रकाशकत्वेनाप्यनुमेयत्वमाहुः -गुणद्रष्ट्रे इति । स्वसंविदे स्वयंप्रकाशरूपाय ॥ ४६ ॥ अव्याकृतः अप्रकटो विहारो यस्य, यद्वा अव्याकृते प्रकृतौ विहारो यस्य तस्मै । सर्वव्याकृतसिद्धये सर्वेषां व्याकृतानां तत्त्वानां ब्रह्माण्डानां च सिद्धिरुत्पत्तिः प्रकाशश्च यस्मात्तस्मै । हे हृषीकेश हृषीकाणीन्द्रियाणि, तेषामीश प्रवर्तक ! ते तुभ्यं नमः । मुनये मननशीलाय' तत्तत्प्राणिकर्मानुसारेण तत्तत्फलविचारकायेत्यर्थः। ननु "यदि सर्वफलदाताऽहमेव, तर्हि कथं न स्पष्टं वदामि ?" इत्याशङ्क्याहुः—मौनशीलिने इति ॥ ४७ ॥ मुनित्वमेव स्पष्टयन्ति परावरेति । परे ब्रह्मादयः, अवरे अस्मदादयः, तेषां गतिं कर्मानुरूपफलभूतामवस्थां जानातीति तथा तस्मै । तत्र हेतुमाहुः— सर्वाध्यक्षायेति, सर्वसाक्षिणे इत्यर्थः । एतदेव स्पष्टयन्ति-तद्द्रष्ट्रे इति । तत्रापि हेतुमाहुः —अविश्वायेति । विश्वतैजसाद्यवस्थारहिताय । तत्र जाग्रदवस्थाभिमानी विश्वः, स्वप्नावस्थाभिमानी तैजसः, सुषुप्त्यवस्थाभिमानी प्राज्ञ इति विवेकः। एवमवस्याभावे सर्वात्मकत्वे हेतुमाहुः - विश्वायेति । तत्रापि तदुपादानत्वे हेतुमाहुः—अस्य च हेतवे इति ॥ ४८ ॥

अन्वितार्थप्रकाशिका

नम इति ॥ कृष्णाय रामाय वसुदेवसुताय नमः प्रद्युम्नाय अनिरुद्धाय सात्वतां पतये भक्तपालकाय नमः प्रद्युम्नानिरुद्धयोः नित्यसिद्धयोरनुवादः । भगवत्प्रसादाद्वाविज्ञानेन वा ॥ ४५ ॥ नम इति गुणानामन्तःकरणादीनां प्रदीपाय प्रकाशकाय गुणैरहंकारादिभिरात्मनश्छादनं यस्य तस्मै गुणानां वृत्तिभिरुपलक्ष्याय गुणानां द्रष्ट्रे स्वसंविदे स्वप्रकाशरूपाय नमः ॥ ४६॥ अव्याकृतेति ॥ अव्याकृते प्रकृतौ विहारो यस्य सर्वेषां व्याकृतानां तत्त्वानां ब्रह्माण्डानां च सिद्धिरुत्पत्तिः प्रकाशश्च यस्मात्तस्मै। हे हृषीकेश ! हृषीकाणीन्द्रियाणि तेषामीश प्रवर्तक ! ते तुभ्यं नमः । मुनये मौनशीलाय मौनशीलिने तुभ्यं नमोऽस्तु ॥ ४७॥ परावरेति ॥ परे ब्रह्मादयोऽवरेऽस्मदादयस्तेषां गतिमवस्थां जानाति तस्मै सर्वेषामध्यक्षाय साक्षिणे विश्वाय विश्वरूपायापि अविश्वाय विश्वधर्मविकाररहिताय तद्द्रष्ट्रे विश्वसाक्षिणे अस्य विश्वस्य हेतवे च तुभ्यं नमः । अयमर्थः पूर्वमुक्तोऽपि विह्वलतावशात् प्रेमवशाद्वा पुनरुक्तः । अन्यत्राप्येवम् ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवमुपनिषच्छब्दैर्यः स्तुतः स एव मनुष्यरूपो जात इति सूचयंत्यः स्तुवंति नम इति सन् श्रीकृष्णे विद्यते येषु ते सत्वंता यादवा भक्ता वा आर्षत्वात्स्वार्थिकाण्लोपेन सत्वंत एव सात्वतास्तेषां पतये नमः ॥ ४५ ॥ भक्तेषु गुणान् कृपालुत्वादीन्प्रदीपयतीति गुणप्रदीपयस्यतस्मै यद्वा मनुष्यलोके आगत्य गुणान् स्वकीयान् सत्यशौचादीन् प्रदीपयति प्रकाशतया दर्शयतीति तथाभूतस्तस्मै देवमनुष्यादिष्वाविर्भूयगुणैः देवमनुष्यादिजातिस्वभावैः आत्मानं समग्रैश्वर्ययुक्तं स्वस्वरूपं स्वेच्छया आच्छादयतीति गुणात्मछादनस्तस्मै गुणवृत्युपलक्ष्याय गुणवृत्तिभिः सत्त्वगुणवृत्तिरूपैः शमदमादिभक्तिसाधनैरुपलक्षितुं योग्याय गुणद्रष्ट्रे दोषान् विहाय भक्तानां गुणान् पश्यतीति गुणद्रष्टा तस्मै स्वसंविदे स्वकीयेषु भक्तेषु संवित्गोष्ठिर्यस्य यद्वा स्वेन स्वकीयेन स्वदत्तेन संवित्त अन्येषां ज्ञातुं यस्य तस्मै ॥ ४६ ॥ अव्याकृतकार्यातीतो विहारो यस्य तस्मै अन्यथा गुणातीतानां शुकादीनां तल्लीलासुमनआकर्षणाभावात् परिनिष्ठितो निर्गुण्येत्युत्तमश्लोकलीलयेत्युक्तेः यद्वा अव्याकृते ब्रह्मपुरे विहारो रमणं यस्य तस्मै स्वधामनि ब्रह्मणि रंस्यते नम इत्युक्तेः व्याकृतानां नामरूपादिसमग्राणां व्याकृतीनां सिद्धिर्यस्मात्तस्मै हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुविश्य नामरूपे सर्वेषां व्याकरवाणीति परागा ब्रह्मश्रुतेः मौनशीलिने गुणात्मकवागुच्चारणरहितऽस्वभावाय मुनये नारायणमुनयेति नमः ॥ ४७॥ परावरगतिज्ञाय पुरस्थानां महामुक्तानामवराणां प्राकृतलोकस्थानां ब्रह्मादीनां च गतिर्यो गमनादिव्यवहारस्तां जानातीति तथाभूतस्तस्मै सर्वाध्यक्षाय सर्वेषां ब्रह्मपुरतत्रत्यमुक्तकालप्रकृतिपुरुषादीनामध्यक्षाय अधिपतये अविश्वाय विश्वातीताय तासां तन्मयस्वभावेन पूर्वापरस्मृत्यसंधानाभावादत्रविश्वायेत्यादिविशेषणत्रये पुनरुक्तिदोषो नगण्यः एतेषामर्थस्तु पूर्वं व्याख्यातः ॥ ४८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अनावृतैश्वर्यत्वादेव चतुर्व्यूहात्मकमूर्त्तिरूपेण सर्वोपास्यत्वेन स्तुवन्त्यो नमन्ति ॥ नम इति ॥ कृष्णाय उत्कृष्टानन्दमूर्त्तये, वा भक्तजनदुरितकर्षणशीलाय, रामाय सर्वजनाभिरामत्वेन रामसंज्ञाभाजे, वसुदेवे शुद्धेऽन्तःकरणे सूते आविर्भवतीति वसुदेवसुतस्तस्मै च शुद्धान्तःकरणप्रकाशमानत्वेन वसुदेवसुतायेत्यर्थः । प्रकृष्टं द्युम्नं धनं यस्य तस्मै, अनिरुद्धाय ज्ञानिनां निरोधरहिताय, सन् श्रीकृष्णः विद्यते उपास्यत्वेनैषु ते सत्वन्तो भक्तास्त एव सत्वन्तस्तेषां पतये, स्वभक्तजनानामनिष्टपरिहारपूर्वकं पालकायेत्यर्थः । नमः नमः । आर्षत्वात् स्वार्थिकाण्लोपेन सत्वन्त एव सात्वन्तस्तेषामिति सात्वत्सिद्धिः ॥ ४५ ॥ स्वभक्तपालकत्वप्रकारमेवाहुः ॥ नम इति ॥ सात्वतामित्यनुवर्त्तते । सात्वतां भक्तानां, गुणप्रदीपाय गुणस्य धर्मभूतज्ञानस्य प्रदीपः प्रदीपकस्तस्मै, अनाद्यविद्यारूपाज्ञानध्वान्तावृतस्वधर्मभूतज्ञानानां स्वभक्तजनानां प्रदीपवदज्ञानतिमिरनिवृत्तिपूर्वकं तत्प्रकाशकारकायेत्यर्थः । सात्वतां गुणप्रदीपायेत्यनेनासात्वतां तद्वैपरीत्यं सूचितम् । तदेव स्पष्टीकुर्वन्त्य आहुः । गुणेन गुणमयमायया आत्मनः असात्वतो जीवान् छादयति संकुचितज्ञानान् करोतीति तस्मै च, एतद्विशेषणद्वयप्रसक्तवैषम्यपरिजिहीर्षया विशिषन्ति । गुणवृत्त्या गुणपरिणामात्मकमनोवृत्त्या उपलक्ष्य उपलभ्यस्तस्मै, येषां यथाविधा त्वस्मिन्मनोवृत्तिस्तेषां तथाविधतया ज्ञानविषयायेत्यर्थः । भगवतो जीवगुणवृत्तिज्ञानासंभावनां निराकुर्वन्ति । गुणद्रष्ट्रे सर्वान्तःकरणवृत्तीनां साक्षादुद्द्रष्ट्रे, तत्र हेतुः । स्वसंविदे स्वासाधारणापरिच्छिन्ननिरुपाधिकनित्यासंकुचितधर्मभूतज्ञानाश्रयायेत्यर्थः । तुभ्यं, नमः ॥ ४६ ॥ ननु यद्यहं गुणद्रष्टा तर्हि तथात्वेन किं न ज्ञायेत इत्यत्राहुः ॥ अव्याकृतेति ॥ अव्याकृतोऽनभिव्यक्तो विहारो गुणद्रष्टृत्वादिरूपो यस्य तस्मै किं च, न केवलं गुणद्रष्ट्रे, अपि तु, सर्वेषां व्याकृतानां देवादिपदार्थानां तद्बुद्धिवृत्तीनां च सिद्धये निष्पत्तिहेतवे, न केवलं सिद्धहेतुरेवापि तु सर्वेन्द्रियप्रशासिता च त्वमेवेत्यभिप्रायेण संबोधयन्ति । हृषीकाणामिन्द्रियाणामीश नियन्तः, तत्स्थशरण्योपयुक्तं गुणान्तरमाहुः । मुनये संसारगतत्रिविधतापातुरजीवोज्जीवनाय यादृच्छिकप्रासङ्गिकाद्यन्यतमसुकृतलेशानुचिन्तनात्मकमननशीलाय, मौनेन शालते तस्मै, परिपूर्णैश्वर्यवत्वाद् ब्रह्मादिस्तम्बपर्यन्तं जगत्तृणवन्निःसार बुद्ध्वा जोषमासीनायेत्यर्थः । ते तुभ्यं, नमः अस्तु ॥ ४७ ॥ परेति ॥ परा चावरा च परावरे ते गती येषां ते परावरगतयस्तान् जानातीति परावरगतिज्ञस्तस्मै । तत्र परगतिर्मोक्षरूपा अवरगतिर्बन्धरूपा तत्तदधिकारवतां तत्तत्प्रदानप्रकारज्ञायेत्यर्थः । मोक्षाभिधगत्यर्हणानां स्वाश्रितानां मोक्षाभिधानेन संसृतिमोचकाय बन्धनात्मकावरगत्यर्हाणां तत्प्रदानेन बन्धकायेति भावः । तथा चोक्तं भगवतैव । 'तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् । तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु' इति । सर्वाध्यक्षाय सर्वपुरुषार्थाधिपतये, आश्रितानां धर्मादिस्वात्मपर्यन्तप्रदातृतया महावदान्यायेत्यर्थः । अविश्वाय विश्वातीताय, विश्वाय च 'शरीरेषु प्रविष्टत्वाद्विश्वो जीव उदीर्यते । जीवस्य तदधीनत्वाद्विश्वो विष्णुरिति स्मृतः' इति स्मृतेर्विश्वशब्दाभिहितजीवान्तःस्थतया विश्वशब्देनाभिहितायेत्यर्थः । जीवो देहे स्थितः सन्नपि यथार्थतया देहस्वरूपं स्वस्वरूपं च न जानाति, त्वं तु तत् द्वयं साक्षात्पश्यसीति तद्द्रष्टा तस्मै, अस्योत्पत्त्यादिहेतुत्वाद्विश्वहेतुश्च कीर्त्तितः' इति स्मृतेः । अस्य विश्वस्य, हेतुस्तस्मै च, ते तुभ्यं, नमः । विश्वशब्दस्यात्र पूर्वत्र च लाक्षणिकत्वात् सर्वनामकार्याभावः । संज्ञापूर्वकविधेरनित्यत्वाद्वा । विश्वायेत्यादिविशेषणत्रिकस्य पुनरुक्तत्वेऽपि तदर्थान्तरेण व्याख्यानान्न स दोषः । पञ्चपञ्चाशता त्वत्रासंकीर्णैर्हि विशेषणैः । नुतः स्त्रीभिरहेः प्रीतस्तासामिव स मेऽस्तु वै ॥ ४८ ॥

कृष्णप्रिया

सदानन्दस्वरूप श्रीकृष्ण को प्रणाम; संकर्षणस्वरूप राम आप को प्रणाम; शुद्धस्वरूप वासुदेवजी को प्रणाम; एवं वासुदेवपुत्र वंशवर्धक प्रद्युम्नस्वरूप आप को प्रणाम; एवं सात्वत–शुद्ध सत्व गुण वालों के स्वामी है वैसे सात्वत पति अनिरुद्धजी को प्रणाम । इस श्लोक में वासुदेव संकर्षण प्रद्युम्न अनिरुद्ध आदि चतुर्व्यूह स्वरूप भगवान को नमस्कार किया ॥ ४५ ॥ गुणो के सम्यक् रूपसे प्रकाशक प्रभुको प्रणाम; गुणों की महिमा बताने के लिए गुणों में अपने तेज को स्थापित कर अपने स्वरूप को आच्छादित करने वाले आप को नमस्कार । गुणोंको वृत्तियों से बोध कराने वाले प्रभुको प्रणाम; गुणों के द्रष्टा को प्रणाम; सच्चिदानन्दादि गुणों का स्वतः स्वयं ज्ञान कराने वाले भगवान को प्रणाम ॥ ४६ ॥ हे हृषीकेश ! अव्याकृत ऐसे प्रकृति पुरुष रूप में विहार करने वाले अथवा आप के विहारों को कोई नहीं जानता ऐसे अव्याकृत विहारीजी को प्रणाम; सर्व व्याकृत ब्रह्माण्डादि तत्वों की उत्पत्ति और ज्ञान आप से होता है ऐसे आप को प्रणाम; मननशील मुनियों में मनन रूप से रहने वाले मुनिस्वरूप आपको प्रणाम; मौनरूप सहज स्वभाव वाले मौनशील भगवान को प्रणाम ॥ ४७ ॥ ब्रह्मादि जैसे बडे और दूसरे जो छोटे माने जाय उनकी व्यवस्था को जानने वाले आपको प्रणाम; सर्वके अध्यक्ष–साक्षी आपको नमस्कार विश्वसे पृथक् स्वरूप आपको प्रणाम एवं विश्वस्वरूप को प्रणाम; एवं विश्व के द्रष्टा और विश्वके कारण स्वरूप आपको प्रणाम ॥ ४८ ॥

त्वं ह्यस्य जन्मस्थितिसंयमान् प्रभो गुणैरनीहोऽकृतकालशक्तिधृक् ।
तत्तत्स्वभावान्[1] प्रतिबोधयन् सतः समीक्षयामोघविहार ईहसे ॥ ४९ ॥
तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शान्ताः अशान्ता उत मूढयोनयः ।
शान्ताः प्रियास्ते ह्यधुनावितुः[2] सतां स्थातुश्च ते धर्मपरीप्सयेहतः ॥ ५० ॥
अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः । क्षन्तुमर्हसि शान्तात्मन् मूढस्य त्वामजानतः ॥ ५१ ॥
अनुगृह्णीष्व भगवन् [3]प्राणांस्त्यजति पन्नगः । स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयताम् ॥ ५२ ॥

कर्दमक्षमा

अन्वयः—प्रभो त्वं हि अनीहः अकृतकालशक्तिधृक् अमोघविहारः समीक्षया सतः तत्तत्स्वभावान् प्रतिबोधयन् गुणैः अस्य जन्मस्थितिसंयमान् ईहसे ॥ ४९ ॥ त्रिलोक्यां शान्ताः अशान्ताः मूढयोनयः उत तस्य ते एव तनवः हि सतां धर्मपरीप्सया ईहतः अत एव अवितुं स्थातुः च ते अधुना शान्ताः एव प्रियाः ॥ ५० ॥ हे शान्तात्मन् स्वप्रजाकृतः अपराधः भर्त्रा सकृद् सोढव्यः मूढस्य त्वाम् अजानतः क्षन्तुम् अर्हसि ॥ ५१ ॥ भगवन् पन्नगः प्राणान् त्यजति अनुगृह्णीष्व साधुशोच्यानां स्त्रीणां नः पतिः प्राणः प्रदीयताम् ॥ ५२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं तावद्दंडानुमोदनेन नमस्कारैश्च भगवंतं प्रसाद्येदानीं त्वदधीनानां प्राणिनां कोऽपराध इत्याशयवत्यः प्रार्थयंते। त्वं हीति। अस्य लोकस्य गुणैर्जन्मादींस्त्वमेव अकृत अकरोः। ततश्च तांस्तान्संस्काररूपेण सतः युज्यमानान्स्वभावान्घोरत्वादीन् प्रतिबोधयन्नीहसे क्रीडसि। यद्वा अस्य जन्मादींस्त्वमीहस इत्यन्वयः। कथंभूतः। अकृतानादिर्या कालशक्तिस्तां धारयतीति तथा। अन्यत्समानम् ॥ ४९ ॥ अतस्तस्य तवैवामूस्तनवस्तन्यंत इति क्रीडोपस्कराः तथापि तवाधुना शांताः प्रियाः। कुतः। सतां धर्मपरिपालनेच्छया ईहतः प्रवर्तमानस्यातस्तानवितुं स्थातुः स्थितस्य ॥ ५० ॥ एवं च तवाप्रियाचरणाद्यपराधस्तर्हि सोढव्य इति ॥ ५१–५२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवम् उक्तविधया। श्रीकृष्ण एव दोषमादधंत्य आहुः त्वं हीति। गुणैः सत्त्वादिभिः। आदिना शांतमूढत्वे ग्राह्ये। त्वमकृत इह युष्मत्प्रयोगे प्रथमपुरुषः छांदसः। 'ऋजुमार्गेण' इति न्यायमाश्रित्याह—यद्वेति। ईहसे करोषि धातूनामनेकार्थत्वादीहिरत्र करणे ॥ ४९ ॥ यतस्त्वमेवास्य कारणमतो हेतोः। तस्य कर्तुः। अमूः सर्पाद्याः। तथापि स्वीतनुत्वेऽपि। शांताः सात्त्विका देवादयः। अशांताः राजसा मनुष्यादयः। मूढयोनयः तामसा अस्मदादयः ॥५०॥ स्वामिधर्मं ज्ञापयंत्यः। क्षमापयंतीत्याह-एवमिति, पूर्वोक्तरीत्या। सोढव्यः क्षंतुमर्हसीति द्विरुक्तिरादरार्था संभ्रमाद्वा। मूढस्य तामसस्य। अत्र हेतुः—त्वां सर्वेश्वरम्। शांतात्मनामेतदेवोचितमिति संबुद्ध्यभिप्रायः। शांतलोकविप्रियकारित्वलक्षणोऽस्यापराधः सकृत्सोढव्य इति अधुना दंडयित्वा शिक्षितोऽप्ययं त्वदीयशांतजनेभ्यो यदि पुनरपरात्स्यति तदा न सोढव्य इति भावः। यद्वा—सकृदपि यो भर्ता तेनापि, त्वं तु स्रष्टृत्वादिना नित्येश्वरोऽस्यतस्त्वया तु किमुतेति भावः ॥ ५१ ॥ पद्भ्यां न गच्छत्यर्थादुरसा गच्छतीति पन्नग इत्यनेन तद्दैन्यं ध्वनितम्। साधुशोच्यानामित्युक्तेः त्वं साधुवर्योऽसि "पतिरेव हि साध्वीनां नारीणां जीवनं स्मृतम्" इत्याशयेनाह—प्राण इति। पतिजीवनपर्यंतमेव साध्वीनां जीवनम्, पत्यंते तदनुगमश्रवणादिति भावः। हे भगवन्परमदयालो। यद्वा—हे सर्वज्ञ निजकारुण्यमहिमानं स्वमापारवैभवं जीवानामस्माकं दैन्यं च जानास्येवेति भावः। ननु चिकित्सस्य साध्वेव कृता रोगो गत एव किं तु रोगशेषदूरीकरणार्थं सप्ताष्टौ प्रहारा अवशिष्यंते तेषु सम्मतिर्दीयतामित्यत आहुः—अनुगृह्णीष्वेति। दोषशेषोऽस्यानुग्रहामृतप्रदानेनैव नाश्यो न तु दंडतीव्रौषधपायनेन यतोऽसौ प्राणांस्त्यजति। ननु त्यजतु किमनेन विगीतसर्पदेहेनातः परं दिव्यदेहो मद्भक्त एव भविष्यति तत्राहुः-स्त्रीणामिति। सुंदरीणामस्माकं वैधव्ये सति कश्चिदन्यः पापिष्ठः सर्पो बलात्कामयिता भविष्यतीत्यतः शोच्यानामस्माकमयमेव संप्रत्युत्पन्नवैष्णवताकत्वात्प्राणः। स्नेहास्पदीभवन्प्राणतुल्य इति विश्वनाथः। तोषिण्यां तु—हे भगवन्निति संबुद्धेरभिप्रायांतरमपि। तच्च—"अन्नं हि प्राणिनां प्राणा आर्तानां शरणं त्वहम्" इति प्रतिज्ञां स्मरस्येवेत्येवंरूपः। आर्तत्वमाहुः—प्राणानिति। यद्वा-अहो बत मा कुर्वस्मिन्ननुग्रहमस्माकं तु स उपयुक्त एवेत्याहुः—स्त्रीणां साधुभिः शोच्यानां जात्यैवास्वातंत्र्यात्, परमदैन्यं ध्वनितम्। यद्वा—साधु यथा स्यात्तथा पुनर्यथापराधी न भवेदित्यर्थः। पतिरेव प्राणो जीवनं प्रकर्षेणाक्षतशरीरेणैव दीयतामिति ॥ ५२ ॥

---

१. तत्तत्स्वभावात्प्रतिबोधयस्व नः—विज. । २. वितुं सतां—श्रीधर. वंशी. वीर. शुक. ; वितुः सतां विश्व । ३. स्त्यक्ष्यति—वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वस्य को दोषः सर्पत्वदातुर्ममेवेश्वरस्येत्याशङ्क्याहुः, त्वमिति पञ्चभिः। हि एव हे विभो, सर्वेश्वर! अनीहः तत्तदभिलाषशून्य एव त्वमीहसे करोषि नन्वेतद्विरुद्धं तत्राहुः—सत इति। तत्र जन्मनि सतः प्रकृतिलीनप्राचीनकल्पगतसाधकभक्तजनस्य समीक्षया तदुद्बोधनाय तं द्रष्टुमेव कृतेन प्रकृतीक्षणेनेत्यर्थः। स्थितौ जन्ममध्येऽवतीर्य्य तमेव सम्यक् कृपापूर्वकं साक्षादवलोकितुमित्यर्थः। संयमे तमेवालिङ्ग्यापि समीक्षितुमित्यर्थः। "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः" इति पाद्मात् तत आनुषङ्गितयाऽन्येषामपि तत्स्यादिति भावः। ननु, यदर्था समीक्षाऽत एवोद्बुध्यन्तां तत्राहुः— अमोघविहारः यथा कथञ्चिदपि तत्सम्बन्धस्याव्यर्थत्वादित्यर्थः। तेषामप्युद्बोधने युक्तिः अकृतकालशक्तिधृक् कालस्वरूपया स्वाभाविकशक्त्येत्यर्थः। तथा गुणैरुपलक्षितान् स्वभावान् प्राचीनकर्मसंस्कारान् प्रति बोधयन्निति तस्मात् तथा कृतकर्मणोऽस्यैव दोषः न तु तव ईश्वरस्तु पर्जन्यवत् द्रष्टव्य इति न्यायादिति भावः ॥ ४९ ॥ यस्मादेवं साम्यं तस्मात्तस्यैव त इत्यादि त्रिलोक्यां वर्त्तमानाः सर्वा एवेत्यर्थः अशान्ताः घोराः उत अपि मूढयोनयोऽपि हि निश्चये विशेषस्त्वधुना शान्ता इत्यादि एवमपीदृशदुष्टानुग्राहकस्य तव परमकारुण्यमेव तादृशेऽपि त्वय्यपराधिनोऽस्य परमपामरत्वमेवेति भावः। ते द्वयस्य वाक्यभेदान्न पुनरुक्तिदोषः मध्यमं तु ते पदं शान्ता इत्यस्य विशेषणम् ॥ ५० ॥ अतस्त्वया क्षन्तुं युज्यत एवेत्याहुः - अपेति। भर्त्रा पोष्टृत्वात् पितृतुल्येन स्वप्रजाकृतोपराधः सकृदपि सोढव्यः सोढुं योग्यः तस्मात् क्षन्तुमित्यादि त्वन्तु शान्तात्मत्वात् सर्वथा क्षन्तुमर्हसीत्यर्थः। किञ्च, मूढस्य तामसजातिस्वभावेन ज्ञानहीनस्य अत एव त्वामजानतः त्वदद्भुतलीलादिदर्शनेनापि त्वां ज्ञातुमशक्नुवतः यद्वा सकृदपि यो भर्त्ता तेनापि त्वं तु स्रष्टृत्वादिना नित्येश्वरः किमुतेति ॥ ५१ ॥ किं वक्तव्यं क्षमा कार्येति अनुग्रह एव कर्त्तुं इत्याहुः—अन्विति। कुतः? भगवन्, हे परमदयालो! यद्वा, हे सर्वज्ञेति! निजकारुण्यमहिमानं स्वमायावैभवं च तत एव जीवानामस्माकं दैन्यं च त्वं जानास्येवेत्यर्थः। एतच्चाविलम्बेनेत्याहुः—प्राणानिति। यद्वा, "अन्नं हि प्राणिनां प्राणा" "आर्त्तानां शरणं त्वहम्" इत्यादिनिजप्रतिज्ञां स्मरस्वेत्यर्थः। आर्त्तत्वं दर्शयन्ति—प्राणानिति। अहो बत न क्रियतां वास्मिन्ननुग्रहः अस्मास्ववश्यं कर्त्तुमुपयोज्यत इत्याहुः—त्रीणामिति। साधुभिः शोच्यानां जात्यैव स्वातन्त्र्याद्यभावात् इति परमदैन्यं दर्शितम् यद्वा, साधु यथा स्यात् पुनरनपराधत्वादिसम्पादनेनेत्यर्थः। पतिरेव प्राणः जीवनं प्रकर्षेण शरीराक्षतत्वादिना च दीयताम् ॥ ५२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नन्वयमपराधो निग्रहयोग्य एवेति चेत्तत्राहुः–त्वमिति पञ्चभिः। हि एव, त्वमेव विभो हे सर्व्वेश्वर! गुणैः रजआदिभिर्जन्मादीन् ईहसे करोषि, अनीहस्तदनपेक्षोऽपि सतः पूर्व्वत एव वर्त्तमानानिति वैषम्यं परिहृतम्, समीक्षया दृष्टिमात्रेण परमापेक्षया वा। ननु किमर्थं समीक्षा? इत्यपेक्षायामाहुः–अमोघविहारः सदा क्रीड़ार्थमित्यर्थः। यद्वा, तत्तत्स्वभावप्रतिबोधनरूपत्वत्क्रीड़ा केनापि न विहन्तुं शक्यत इत्याहुः–अमोघेति। यतः स्वाभाविककालशक्तिधृक्, ब्रह्मादिभिरपि कालस्यालङ्घ्यत्वात् ॥४९॥ त्रिलोक्यां वर्त्तमानाः सर्व्वे एवेत्यर्थः। अशान्ता घोराः, उत अपि, मूढ़योनयोऽपि, हि हेतौ निश्चये वा, सतां वैष्णवानां धर्म्मो भक्तिलक्षणस्तस्य परीप्सया प्रतिपालनेच्छया परितः सिद्धीच्छया वा, ते द्वयस्य वाक्यद्वयेनान्वयादपुनरुक्तिदोषः। अन्यत्तैर्व्याख्यातम्। यद्वा, ते व्रजजनाः ॥ ५० ॥ किन्तु, अपराधोऽयं त्वया क्षन्तुं युज्यत एवेत्याहुः–अपेति। भर्त्रा पोषकेण स्वस्य प्रजया पोष्येण कृतोऽपराधः सकृदपि सोढ़व्य एव। अतस्त्वं क्षन्तुमर्हस्येव; विशेषतः शान्तस्वभावस्य तव क्षमोचितैवेत्याहुः–हे शान्तात्मन्निति। तत्र चाज्ञस्यावश्यं क्षन्तव्य एवेत्याहुः–मूढ़स्य तमोजातिस्वभावेन ज्ञानहीनस्य, तत्रापि त्वामजानतः, त्वदद्भुतलीलादिना त्वां ज्ञातुमशक्नुवतः, अथवा सकृदपि यो भर्त्ता, तेनापि त्वन्तु स्रष्टृत्वादिना नित्येश्वरः। वयञ्च जीवाः सेवका एव, अतो मुहुरप्यस्माकपराधस्त्वया सोढुमेव योग्य इति भावः, किञ्च, क्षन्तुमिति। अन्यत् समानम् ॥ ५१ ॥ किं वक्तव्यम्, क्षमा कार्य्येति, अनुग्रह एव कर्त्तुं योग्य इत्याहुः–अन्विति। कुतः? भगवन् हे परमदयालो! यद्वा, हे सर्व्वज्ञेति निजकारुण्यमहिमानं स्वमायावैभवञ्च तत एव जीवानामस्माकं दैन्यञ्च त्वं जानास्येवेत्यर्थः। तच्चाविलम्बेनेत्यादि-निजप्रतिज्ञां स्मरस्वेत्यर्थः। आर्त्तत्वं दर्शयन्ति–प्राणानिति। अहो बत न क्रियतामस्मिन्ननुग्रहः, अस्मास्ववश्यं कर्त्तुमुपयुज्यत इत्याहुः–स्त्रीणामिति। साधुभिः शोच्यानां जात्यैव स्वातन्त्र्याद्यभावादिति परमदैन्यं दर्शितम्। यद्वा, साधु यथा स्यात् पुनरनपराधत्वादिसम्पादनेनेत्यर्थः। पतिरेव प्राणः जीवनम्, प्रकर्षेण शरीराक्षतत्वादिना च दीयताम् ॥ ५२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अनीहः सङ्कल्पातिरिक्तव्यापारशून्यः अकृतकालशक्तिधृक् अनादिकालाख्यशक्तिधृक् ॥ ४९ ॥ अमरा देवादयः शान्ताः सत्त्वप्रचुराः अशान्ताः रजःप्रचुराः ॥ ५०–५१ ॥ पतिरेव प्राणः ॥ ५२–५३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवं शरण्यत्वोपयुक्तगुणविशिष्टं स्तुत्वाऽथ "अविज्ञाताः कुमारकाः इति श्रुत्युक्तरीत्या त्वत्कुमारप्रायस्य त्वच्छरीरभूतस्यास्मद्भर्तुः कदाचिदननुकूलस्य स्वशरीरस्येव स्वपुत्रस्येव चापराधः करणकलेबरादिप्रदानेनाखिलजीवोज्जिजीवीयषया सर्वजगदुदयविभवलयलीलेन सर्वशरीरेण विपुलापराधवत्त्वेऽपि किञ्चिदानुकूल्ययुक्तजीवोज्जिजीवीयषया कृतावतारेण त्वया सोढुमुचित इति क्षमापयन्त्यस्तावद्भर्तृप्राणरक्षां कैङ्कर्यञ्च प्रार्थयन्ते—त्वमिति पञ्चभिः। हे विभो ! त्वं ह्यनादिकालाख्यशक्तियुक्त अनीहः सङ्कल्पेतरव्यापारशून्यः अनेन "अकलितश्रम एव सृजत्यसौ" इति वचनार्थोऽभिप्रेतः गुणैः रजस्सत्त्वतमोभिरस्य जगतो जन्मस्थितिलयान् कुर्वन्निति शेषः। तत्तत्स्वभावान् रजस्तमस्तदुभयस्वभावानपि सतो जीवान् समीक्षयानुग्रहगर्भया दृष्ट्या दृष्ट्वा प्रतिबोधयंस्तावत्तदण्डनेन प्रबुद्धान् कुर्वन् अप्रतिहतजगद्व्यापाररूपविहारश्चेष्टसे यद्वा, समीक्षया त्वं "बहुस्यां प्रजायेयेति" त्युक्तया सङ्कल्पात्मिकया दृष्ट्या अनीहस्तद्व्यतिरिक्तव्यापारशून्यः प्रलयदशायां तत्तत् स्वभावान् तत्तत्कर्मवासनात्मकस्वभावमात्रयुक्तान् सङ्कुचितज्ञानान् असत् प्रायान् सतो जीवान् प्रतिबोधयन् स्वाराधनोपयुक्तकरणकलेवरादिप्रदानेन विकसितज्ञानान् कुर्वन् एवंविधं महोपकारं कर्तुमिति भावः। अप्रतिहतजगद्व्यापारात्मकविहारोऽस्य जगतो जन्मादीन् ईहसे चेष्टसे करोषीति यावत् तत्तत्स्वभावान् प्रतिबोधयन्नित्यनेन सर्वजीवसाधारण्येन तद्विषयकमहोपकारैकशीलत्वं सूचितम् एवमपराधानवेक्षणेन केवलमुपकारैकशीलस्य तव कियानयमपराध इति भावः ॥ ४९ ॥ जन्मादीनि ईहसे इत्यनेन सर्वजीवान् प्रति तस्य पितृस्थानीयत्वं सूचितं किञ्च तस्यैव प्रतिबोधयतोऽस्य जन्मादीनि ईहमानस्य ते तव त्रिलोक्याममूः सर्वाः शान्ताः सात्त्विक्यः अशान्ताः राजस्यः मूढयोनयस्तामस्यश्च प्रजास्तनवः देहाः आधेया विधेयाः शेषाश्चेत्यर्थः। सर्वा अप्यनुग्राह्या एवेति भावः। ननु, सर्वासामनुग्राह्यत्वे जगद्व्यापारोच्छेदप्रसङ्गस्तत्राहुः, यद्यप्येवं तथापि स्थातुः स्थितिकर्तुरत एव सतां धर्मपरिपालनेच्छया ईहतः प्रवर्त्तमानस्य कृतावतारस्येति यावत् ते तव शान्तास्तनवः अवितुं रक्षितुं प्रिया इष्टा हि सदा सकलजन्मसु सापराधा अप्यधुनाऽपराधविरिरंसवः प्रियाः अतोऽस्यानुग्राह्यत्वेऽपि न जगद्व्यपारोच्छेदप्रसङ्ग इति भावः ॥ ५० ॥ अतोऽयं यावच्छान्ति दण्डितोऽप्यधुनोपशान्तः पुत्रवत् सोढव्य एवेत्याहुः—अपराध इति। भर्तुरस्मद्भर्तुरपराधः सकृत् सोढव्यः इतः परं पुनरपराधः कृतश्चेन्न सोढव्यः इत्यभिप्रायेण सकृदित्युक्तिः स्वप्रजाकृतः स्वपुत्रकृतत्वाच्च सोढव्य इत्यर्थः। अनेन भगवतः पितृस्थानीयत्व सर्वजीवानां पुत्रस्थानीयत्वञ्चाभिप्रेतं किञ्चाज्ञानकृतोऽपराधः क्षमापणेन सह्य एव सर्वथेति लोकपरिपाटीमभिप्रेत्याहुः—क्षन्तुमर्हसीति। अधुना त्वयि शान्त्या भवितव्यम् इत्यभिप्रायेण शान्तात्मन्निति संबोधनं, यद्वा, कृतापराधेष्वप्यधुना शान्तेषु त्वदानुकूल्योपयुक्तशान्तिमत्त्वात्मा अनुग्रहप्रवणं मनो यस्य तथाभूतेति संबोधनं मूढस्यात एव त्वामजानतः क्षन्तुमर्हसि अपराधमिति विभक्तिविपरिणामेनानुसङ्गः प्रकृतत्त्वाच्छेषो वा ॥ ५१ ॥ हे भगवन् ! अयं पन्नगः सर्पः प्राणांस्त्यक्ष्यत्यतोऽनुगृह्णीष्व साधुशोच्यानां साधुभिर्दयनीयानां स्त्रीणामस्माकं पतिरेव प्राणः प्रदीयताम् ॥ ५२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रातिस्विकजीवाभीष्टदातृत्वात्तद्द्रष्ट् इति प्रपञ्चस्य मूलकारणं हरिरित्युक्तं तत्स्पष्टयितुमाह—त्वं हीति "सत्यधर्मा सत्यकर्मा" इति श्रुतेः। अमोघविहारस्त्वम् अत एवानीहोऽक्लिष्टकर्मा त्वं सत्त्वादिगुणैरस्य जगतो जन्मादीनीहसे हि यस्मात् "देवस्यैष स्वभावोयमाप्तकामस्य का स्पृहा" इति श्रुतेः। तस्मात्तव सत्यप्रपञ्चस्रष्टृत्वस्वभावात् समीक्षया सम्यज्ज्ञाने न नोऽस्मान्प्रतिबोधयस्वेत्यन्वयः। यथा तव जगत्स्रष्टृत्वं स्वभावस्तथास्मत्प्रतिबोधनमपि स्वभावोऽस्त्वित्याशयः। लोके स्वरूपसक्तयभावाद्द्वारादिना मायया वाऽन्यसहायेन वा श्रमेण कर्तृत्वं न तथा तवेत्याशयेनाह—अकृतेति। कालः कारणं ज्ञानं वा अकृतावरादिना नान्यनिमित्तं स्वरूपमिति यावत् एवंविधां शक्तिं धारयसीति स्वरूपभूतज्ञानक्रियाशक्तिधर इत्यर्थः तदुक्तं "हरेः स्वरूपशक्तिर्या कालशक्तिरुदीर्यते। सदा सर्वगुणात्मत्वान्" इति यथा स्वाधीनत्वात्सत्त्वादिगुणैः सृष्टिं करोषि तथा स्वनियतदुर्गावायुभ्यां संहारस्थिती करोषीत्याशयेनोक्तम् अकृतेति तयोरपि कालाधीनत्वेन कालशब्दवाच्यत्वादित्यर्थः 'दुर्गाचाप्यवरा ततः"—

"सर्वसंहारकारित्वाद्वायुः सर्वस्य जीवनात्। कालाभिमानिनावेतौ दुर्गावायुश्च कीर्तितौ। इति च ॥ ४९ ॥

विश्वायेत्यादिना हरेर्जगदात्मकत्वमुक्तमिति मन्दाशङ्कानिरासाय स्थावराज्जङ्गमस्य पृथक्कृत्य त्रैविध्यकथनेन मिथोऽपि भेदस्तात्त्विक इति दर्शनार्थं तस्य भगवत्प्रतिमात्वेन तत्त्वतः स्तवनेन हरेरतिशयिता प्रीतिर्भवतीति भावेनाहुः—तस्य वेति। यस्त्वं "नमस्तुभ्यं भगवते" इत्यादिना प्रसक्तस्तस्य ते तवैवामूस्तनवः प्रतिमास्थानीयाः शान्ता अशान्ता मूढयोनय उतेति यास्त्रिधा भिन्ना अमूरित्यर्थः। त्रिलोक्यां जङ्गमसंज्ञा इति शेषः अत्रापि तारतम्यमस्तीत्याहुः शान्ता इति सुखान्तं सुखस्वभावमेवाप्नुवन्तीति यत् तस्मात् शान्ता देवाः सतामप्यवितुः ते तव प्रियाः "परा पूर्वेषां सख्यावृणक्ति वितर्तुराणो अपरेभिरेति" इति श्रुतिः। प्रियस्यापि तारतम्यविशेषद्योतको हि शब्दः प्रियं द्विविधम् अन्तर्बहिश्चेति तत्रान्तः प्रियाः सन्तः बहिः प्रिया असन्तः अत्रापि कश्चन विशेषः संहारहेतुत्वादसन्त ईषदन्तः प्रिया इव स्थितिहेतुत्वात्सन्तो विशेषान्तः प्रिया इत्यतोऽधुनेति

विशेषणं तदुक्तं "अन्तः प्रियं बहिश्चेति द्विधा प्रियमुदाहृतम्" इत्यादिदेवादीनां शान्तत्वादिकं "सुखान्तं प्राप्नुयुर्यस्माद्देवाः शान्ता उदीरिता" इत्यादिस्मृतिसिद्धम् अशान्ताः मानुषाः प्रोक्ता मूढयोनयोऽसुरा इत्यर्थः। अवनादिकर्म प्रवर्तनं च प्राणमुखेनेत्याहुः, स्थातुरिति। कर्मप्रवर्तनार्थं सर्वशरीरेषु स्थातुरीहतः "ईह चेष्टायाम्" इतिधातुः चेष्टकत्वमीहशब्दस्य प्रवृत्तिनिमित्तं अवनशब्दस्यापि तदेवात ईहतः प्राणस्य सकाशात् कर्मपरीप्सया कर्मपालनेच्छया पालनं प्रवर्त्तनं तदिच्छया प्राणस्य सकाशात् कर्मप्रवर्तनामिच्छति भगवानित्यतः स महाविभुरित्यर्थः तदुक्तं "वायोः सकाशाज्जगतः प्रवृत्ति कामयत्यजः" इत्यादि "प्राणस्य प्राणम्" इति श्रुतिश्च शब्दगृहीता ॥ ५० ॥ सोढव्यः क्षन्तुमर्हसीति द्विर्वचनमादरार्थं स्वचापल्यप्रकटनार्थं च शान्तानां देवानामात्मन् स्वामिन् मूढस्येत्यस्य विवरणं त्वामजानत इति ॥ ५२–५३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नन्वस्य को दोषः ? सर्पत्वदातुर्मममैवेश्वरस्येति चेदित्यत आहुस्त्वमिति पञ्चभिः। हि एव हे विभो ! सर्वेश्वर अनीहस्तदभिलाषशून्य एव त्वमीहसे करोषि नन्वेतद्विरुद्धं तत्राहुः सतः प्रकृतिलीनप्राचीनकल्पगतः साधकभक्तवृन्दस्य समीक्षया तदुद्बोधनाय तद्द्रष्टुमेव कृतेन प्रतीक्षणेनेत्यर्थः। "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः" इति पाद्मात् तत आनुषङ्गिकतयाऽन्येषामपि तत् स्यादिति भावः। तस्मात्तथा कृतकर्मणस्यैव दोषो नतु भवेदिति भावः ॥ ४९–५९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

विश्वस्य न केवलं हेतुरसि, तत्पालननाशहेतुरप्यसीत्याहुः—त्वमस्य जन्मेत्यादि। विश्वस्य जन्मस्थितिसंयमानीहसे यद्यपि तथापि अमोघविहारो नित्यलीलः। जगन्नाशलीलायां तत्स्थितिलीलाया असम्भवादिति। तथा विहारस्य मोघत्वेऽपि अमोघलील एव, नित्यान्तरङ्गलीलत्वात्; इयन्तु बहिरङ्गलीला ॥ ५०–५७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तदेवाहुः— त्वं ह्यस्येत्यादि ॥ ५०–६७ ॥ क्रीडामानुषरूपिण इत्यस्यार्थः—क्रीडार्थममानुषा गोपगोपीप्रभृतयो यदवस्तान् रूपयितुं निरूपयितुं तत्तत् क्रीडायामवधापयितुं शीलं यस्य स तथा तस्य ॥ ६८ ॥

इति षोड़दशोऽध्यायः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वसृष्ट्या प्रधानं चेतनयुक्तं विकृत च कृत्वा मम किं फलमिति चेत्तत्राहुः-त्वमिति। सतः प्रधानस्य समीक्षया अस्य विश्वस्य पूर्वकल्पान्ते तत्रैव लीनस्य तत्तत्स्वभावान् तांस्तान् संस्काररूपेण सतः स्वभावान् घोरत्वादीन् प्रतिबोधयन् जन्मादीन् गुणैरज आदिभिः ईहसे करोषि गुणानां कर्तृत्वस्य त्वय्युपचाराद्वस्तुतस्तु त्वमनीहः अकृता क्षणादिर्या कालशक्तिस्तां धारयतीति सः एवञ्च प्रधानगत ईक्षणरूपस्तव विहाराऽमोघः ॥ ४९ ॥ केनाभिप्रायेणैवं स्तुध्वे इति चेत् तत्राहुः-तस्यैव पूर्वोक्तलक्षणस्य तव विश्वहेतुत्वाद्विश्वरूपस्य अमूः शान्ताद्यास्तनवः शान्तादिस्वभावान् त्वमेव प्रतिबोधयसि चेत्तत्र घोरस्वभावोऽयं कालियः स्वस्वभावं क्रौर्यं कथं त्यक्तुं शक्नोत्विति भावः तथापि तवाधुना शान्ताः प्रियाः कुतः ? सतां धर्मपालनेच्छया ईहतः प्रवर्तमानस्य अतस्तानवितुं स्थातुः स्थितस्य ॥ ५० ॥ अतः शान्तलोकविप्रियकारित्वलक्षणोऽस्यापराधोऽभूदेव स च सकृत् सोढव्य इति अधुना दण्डयित्वा शिक्षितोऽप्ययं त्वदीयशान्तजनेषु यदि पुनरप्यपराध्यति तदा न सोढव्य इति भावः। क्षन्तुमर्हसीत्यर्थपौनरुक्त्यमतिवैयग्र्यव्यञ्जकं क्षन्तुमित्यपराधमिति शेषः। शान्तात्मन्निति क्षन्तृत्वे हेतुः मूढस्याजानत इति क्षन्तव्यत्वे हेतुः ॥ ५१ ॥ ननु, चिकित्सास्य साध्वेव कृता रोगो गत एव किन्तु रोगशेषदूरीकरणार्थं सप्ताष्टाः पार्ष्णिप्रहारा अवशिष्यन्ते तेषु सम्मतिर्दीयतामित्यत आहुः-अनुगृह्णीष्वेति। सदोषशेषोऽनुग्रहामृतप्रदानेनैव नाशनीयो नतु दण्डतीव्रौषधपानेन यतोऽसौ सम्प्रति प्राणांस्त्यजति। ननु, त्यजतु प्राणान् किमनेन विगीतेन सर्पशरीरेण अतः परं दिव्यदेहो मद्भक्त एव भविष्यति तत्राहुः—स्त्रीणामिति। सुन्दरीणामस्माकं वैधव्ये सति कश्चिदन्यः पापिष्ठः सर्पो बलात् कामयिता भविष्यतीत्यतः शोच्यानामस्माकमयमेव सम्प्रत्युत्पन्नवैष्णवताकत्वात् प्राणः स्नेहास्पदीभवन् प्राणतुल्यः ॥ ५२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एतदेवोपपादयति—त्वमिति। हे विभो सर्वगत ! अकृतकालशक्तिमनादिकालाख्यशक्तिं धारयतीति तथा अनीहः अपूर्णत्वरागित्वव्यापारित्वादिदोषावहचेष्टाशून्यस्त्वं तेषां तेषां सृज्यानां सतः सूक्ष्मरूपेण सत्यानेव स्वभावान् समीक्षया प्रतिबोधयन् स्वशक्तिगुणैः अस्य विश्वस्य जन्मादीन् समीहसे इत्यन्वयः ॥ ४९ ॥ ननु, विश्वरूपः सर्वगतः सर्वहेतुश्चाहमेव चेर्तीह निग्रहानुग्रहौ

निर्विषयौ भवतः नेत्याहुः यद्यपि तस्यैव विश्वरूपस्य सर्वहेतोः सर्वगतस्य ते शान्ताः सात्त्विका अशान्ताः राजसाः मूढयोनयस्तामसाः अमूः प्रजाः तनवो देहाः तथापि ते तव ये सन्तस्तेषां सतां धर्मपरीक्षया धर्मपालनेच्छया अधुना ईहतस्तांश्चावितुं स्थातुः स्थितस्य ते शान्ताः प्रियाः अनुग्रहविषयाः तामसा राजसास्तु दण्ड्या एवेति भावः ॥ ५० ॥ एवं चेदसौ तमोजनिर्दण्ड्य एवेति प्राते प्रार्थयन्ते अपराधा इति त्रिभिः ॥ ५१-५२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अथ कृपालुतां दर्शयन्त्यः पत्युस्त्राणं प्रार्थयन्ते पञ्चभिः। ननु प्रधानपरिणमनादिना मे किं फलं तत्राह—त्वमिति। सतः प्रधानस्य समीक्षया अस्य विश्वस्य पूर्वकल्पावसाने तत्रैव मोक्षणे विलीनस्य तत्तत्स्वभावान् घोरत्वादीन् प्रतिबोधयन् गुणैरजःप्रभृतिभिर्जन्मादीनीहसे करोषि, कीदृशः? अकृतां नित्यां कालशक्तिं धरसीति सः अनीहो विश्वसर्गादिकर्मफलस्य ईहाशून्यः तर्हि प्रधानेक्षणतत्परिणमनादिप्रवृत्तिर्मेऽपार्था तत्राह—अमोघेति। तद्रूपो विहारस्तवामोघः जीवभोगाद्यर्थत्वात् सफल इत्यर्थः। तथा च कृपालुत्वात्तेऽस्यापि नागस्य त्राणं युक्तमिति ॥ ४९ ॥ तस्यैवेति। तस्यैव पूर्वोक्तस्य शक्त्या जगदाकारस्य तवामूः शान्ताद्यास्तनवः तन्यस्ते क्रीडा आभिरिति व्युत्पत्तेः क्रीड़ोपस्करा इत्यर्थः। तत्र शान्ताः सात्विकाः अशान्ता घोराः राजस्यः मूढ़योनयस्तामस्यः तथापि तवाधुना शान्ताः प्रियाः कुतः सतां धर्मपरीप्सया ईहतश्चेष्टमानस्य अतस्तान् सतोऽवितुं स्थातुः स्थितस्य तथा चास्य नागस्य त्वदरचितक्रौर्यस्वभावस्य स्वयं तत्त्यागे असामर्थ्यात् त्वत्कृपयैव तत्त्यागो भावीति ॥ ५० ॥ शान्तजनविप्रियकारित्वमस्यापराधः सकृत् सोढ़व्य एव पुनरेवं कारित्वे तु न सोढ़व्य इति भावः। क्षन्तुमर्हसीति वैयग्र्यात् पुनरुक्तिः शान्तात्मन्निति क्षन्तृत्वे मूढ़स्याजानत इति क्षन्तव्यत्वे हेतुः ॥ ५१ ॥ ननु पञ्चषैः पार्ष्णिप्रहारैरस्य दोषशेषोऽपनेयः सम्मतिश्चेद्भवतीनामिति चेत्तत्राह अनुगृहीष्वेति। तच्छेषोऽनुग्रहादेवापगच्छेदिति भावः। तैरेष प्राणांस्त्यजति नन्वस्य दुष्टस्य प्राणने यदुक्तानां वः कथमाग्रहस्तत्राहुस्त्रीणामिति। स्त्रीभ्योऽस्मभ्यमयं पतिर्दीयतां इदानीं त्वं प्रपन्नत्वादयमस्माकं इत्यर्थः। नः कीदृशानामित्याह—साध्विति। एतस्मिन् मृते वैधव्येन वैरूप्ये सति साधुभिः शेषदेवादिभिः शोच्यानामिति तेभ्यो नैतद्रोचेत इति भावः ॥ ५२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्वं अस्य जन्मस्थितिसंयमान्विभाविति श्लोके दुर्गमार्थत्वात्कालशक्तिपदं स्वयं व्याख्याय तत्स्थेम्ने मानमुदाहरति। अकृतकालशक्तिधृक् अकृतं वराद्यनिर्मितं स्वरूपमिति यावदिति। हरेर्या स्वरूपशक्तिः सा सदा सर्वगुणात्मकत्वानिमित्तात्कालशक्तिरुदीर्यते। कलकामधेनुरिति स्मरणात् गतम्। अन्यत्रापि तच्छब्दं सप्रवृत्तिनिमित्तं दर्शयति ॥ तत इति। ततो हरेरवरा दुर्गापि सर्वसंहारकारित्वात्कालशक्तिरुदीर्यते। वाशब्दो वायुरित्यनेन समुच्चायकः सन्नन्वेति। सर्वस्य जीवनाद्वायुर्वा कालशक्तिः रुदीर्यते। किञ्च कालाभिमानिनावभिमानी चाभिमानी चेत्यभिमानिनौ। एवमेवैतौ कीर्तितावित्ति ज्ञेयम्। अतोऽपि कालशक्तित्वं तयोः प्रबोधिन्यामनीहोऽकृतकालशक्तिधृगित्यत्र कृतकालधृगिति पदच्छेदेन काले शक्तिः कालशक्तिः कृता च सा कालशक्तिश्च तां धरतीति हरिशक्तेस्तत्काले जातत्वभ्रान्तिर्भवति तन्निरासाय पदच्छेदं प्रदर्श्य व्याचष्ट इत्यवतारितम्। तत्र पूर्वपक्षी सर्वथा प्रेक्षावांश्चेन्न तर्हि कक्षीकार्यः प्रेक्षावांश्चेदनीहोऽकृतेत्यत्र कुधाकपौ चेति कथं कृतत्यादिपदं विच्छिन्द्यादर्थंत उभयाप्यनुपपन्नावतारिकेति वदन्ति॥ ततश्चायं श्लोकार्थः ॥ मूलकारणं हरिरित्युक्तं स्पष्टयितुमाह ॥ त्वं हीति। अमोघविहारोऽव्यर्थक्रीडस्त्वमस्य जगतोऽनीहोऽक्लिष्टकारित्वादकृतकालशक्तिधृक् अकृताऽकारणिका नित्येति यावत् कालशक्तिः सकलगुणात्मकत्वात्कालाख्या शक्तिस्तां धृष्णोतीति कालधृक् कालशक्तिर्दुर्गा वायुश्च तौ धृष्णाति तद्द्वारा सृष्ट्यादिकरणेन तौ धारयसीति भावः। गुणैः सत्त्वादिभिर्जन्मस्थितिसंयमानीहसे हि यतस्तस्मात्। देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहेत्यादेः। स्पृहापूर्वं सृष्ट्याद्यकरणात्स्वभावात्समीक्षया सम्यग्ज्ञानेन नोऽस्मान्प्रतिबोधय जाग्रतीकुरु। स्वभावत एवाततीति स तथात वा। दासप्राणावित्यनीहोऽनिनि मुख्यप्राणे ईहा चेष्टा यस्य स ईहसे। या रमाया हसे हासार्थं सन्तोषार्थमिति यावत्। अमोघविहार इत्यर्थंकरणे मानानुयानं भवतीति ज्ञेयम् ॥ ४९ ॥ तस्यैव तेऽमूस्तनवस्त्रिलोक्यामिति श्लोके शान्ताः क्रोधरहितास्त तव प्रिया इति निष्कोपस्य कस्याचद्भगवत्प्रियत्वमिति भ्रान्तिनिरासाय प्रमाणेन तत्तात्पर्यं दर्शयंस्तेनैव प्रमाणेन भगवत्प्रियाणामैकविध्यभ्रान्तिं निरस्यानेकविधत्वं च दर्शयति ॥ अन्तःप्रियमिति। अन्तःप्रियं बहिःप्रियमित्यावर्तितमन्वेति। इति द्विधा प्रियमुदाहृतम्। चः समुच्चये। सन्तो हरेरन्तःप्रियाः सर्वे च सदसत्त्वाविवेकेन सर्वं हरेर्बहिःप्रियम्। सर्वमिति सङ्कोचयति ॥ असन्तश्चेति। संहारे कर्तव्ये ईषत्किञ्चिदसन्तोऽन्तः प्रिया इव भवन्ति तदपेक्षयाऽसदपेक्षया सन्ता विशेषान्तःप्रियाः। कुत इत्यत आह ॥ तथास्थिता इति। तथैव स्थितमन्त इति सन्तः शान्ताः। कथमित्यतो मानेन तद्व्युत्पत्तिप्रकारमाह ॥ सुखान्तमिति। शस्य सुखस्यान्तो निर्णयो येषां ते तथा यस्मात्सुखान्तं प्राप्नुयुस्तस्माद्देवाः शान्ता उदारिता अशान्ताः सुखदुःखमिश्रफलतयाऽतदन्ता मानुषाः प्रोक्ता असुरा विमूढा मताः। तत्रैव स्थातुः कर्मपरीप्सयेहत इत्यप्रतीतार्थतयाऽनूद्य व्याकरोति। सर्वकर्मपरीप्सया कर्मप्रवर्तनार्थम्। अनेन तृतीया चतुर्थ्यर्थ इति सूचयति।

स्थातुरित्यस्य किञ्चिदध्याहृत्यान्वयं दर्शयति ॥ सर्वशरीरेषु स्थातुरिति । ईहत ईहमानस्य प्राणस्य सकाशात् । विशिष्टवाक्यार्थमाह ॥ प्राणसकाशाद्धि कर्मप्रवर्तनमिच्छति भगवानिति । प्राणाद्धीति वक्तुं शक्ये प्राणस्य सकाशादिति वचनं मानगतवायोः सकाशादित्यनुकरणरूपं सत्समानस्य छन्दसीत्यतः समानस्येति योगो विभज्यते । तेन समक्षः साधर्म्यं सजातीयमित्यादि सिद्धमिति काशिकोक्तेः । प्राणस्य समानः काशः सुखभोजनं यस्य तस्माच्चतुर्मुखात् । सहशब्दो वा सदृशवाची । सदृशः सख्या ससखीति यथेति । तेनायमस्वपदविग्रहो बहुव्रीहिः । समानः पक्षो यस्येत्यादीति कौमुद्युक्तेः समानः काशो यस्येति सकाशस्तस्मादित्यर्थविशेषं द्योतयितुं सकाशादित्युक्तम् । अजो भगवान्हरिर्वायोः सकाशाज्जगतः प्रपञ्चस्य प्रवृत्तिं कर्मप्रवर्तनं कामयतीच्छति । पदव्यत्ययेन तमतिहायापि हरेः सामर्थ्यं द्योतयति वायोरपि प्रभुं विष्णुरतः प्राणप्राणं प्राहुः प्रेक्षावन्तः ॥ अथ श्लोकार्थः ॥ विलोक्यां विद्यमानचेतने तस्यैव नमस्तुभ्यमिति प्रस्तुतस्तुतस्यामूस्तनवस्ते तनव इव तनवः सन्निधानपात्रम् । ता आह । शान्ताः शस्यान्तो निर्णयो येषां देवानां तेऽशान्ता नित्यसंसारिण उत मूढयोनयो मूढा योनिर्येषां तेऽपुरा अधुना सतामवितू रक्षयितुस्ते शान्ता विशेषान्तः प्रियाः । हि शब्दोऽन्तः प्रियाः किञ्चिदन्तः प्रिया इव बहिः प्रियाश्चेति मानिकार्थद्योतकः । सतामवनादिकं पवनद्वारकमित्याह ॥ स्थातुरिति । सर्वशरीरस्थितस्येहत ईहमानस्य सकाशात्कर्मपरीप्सया कर्मणां परीप्सा तदर्थं तत्प्रवर्तनार्थमीहतश्चेष्टमानस्य त इत्यप्यन्वयः । यो भवान्कर्मपरीप्सया कर्मप्रवर्तनं स्थातुरहितो वायोः सकाशादिच्छति तस्यैव ते नम इति वान्वयः । अधुनेत्यनेन नास्मन्नाथनाशसमयोऽयमतो मुञ्चेति द्योतयन्ति । प्राणस्य प्राणमित्यादिप्रसिद्धिं वा हिराह ॥ ५० ॥ फलितमामलपन्ति ॥ अपराध इति । यस्माद्भर्त्रा पोषयित्रा सकृदेकवारं स्वप्रजाकृतः सोढव्यस्तस्मात् । यस्मात्तस्मादिति च पूर्वश्लोकादनुवर्तेते । त्वं ह्यस्य जन्मेत्यादि त्वन्महिम्नाऽथ त्वत्प्रजेति । हे शान्तात्मन् देवस्वामिन् समाधानमूर्तं इत्यन्तर्भावः । मूढस्येत्युक्तौ मूढयोनय इत्युक्तमूढता चेन्न कदाचिदपि दयनीयता स्यादिति त्वामजानत इति मौढ्यं विवृतवत्य इति ज्ञेयम् । क्षन्तुमर्हसि ॥ ५१ ॥ अम्बुजास्यः क्षणं प्रतीक्षध्वं मोक्षणमनन्तरं तनुयामिति । नानन्त वद तावदवकाशो नास्तीति विज्ञापयन्ति ॥ अनुगृह्णीष्वेति । हे भगवन् साधु यथा तथा शोच्यानां शोकयोग्यानां तत्रापि स्त्रीणां नोऽनुगृह्णीष्वानुग्रहं कुरु पन्नगः प्राणांस्त्यजति । अनुग्रहविग्रहमाहुः । पतिः प्राणस्तत्समः प्रदीयताम् । समस्तपाठे पतिश्चासौ प्राणश्चेति वा पत्युः प्राण इति वा विग्रहो ज्ञेय इति । साधुभिः शोच्यानामिति वा ॥ ५२ ॥

श्रीसुबोधिनी

एवं सर्वरूपेण नत्वा विज्ञापनार्थं प्रथमतोस्यापराधस्तथा नास्तीति वक्तुं त्वमेव सर्वस्वभावानां बोधक इत्युपपत्तिमाह **त्वं ह्यस्येति**, त्वमेव ह्यस्य जगतो **जन्मस्थितिसंयमान् गुणैरकृत** कृतवान्, स्वय**मनीह** एव चेष्टामकुर्वन्नेव, तादृशस्य करणे हेतुमाह **कालशक्तिधृगिति**, कालशक्तिं बिभर्तीति, **यदैव भगवता कालशक्तिरधिष्ठिता तदैव गुणक्षोभं करोति सिंहासनस्थितपुत्रिका वायुमिव, ततः सर्वाण्येव कार्याणि भवन्ति, गुणा** उपादानं, कालो निमित्तं, स्वभावो नियामकः, तमाह **तत्तत्स्वभावान् प्रतिबोधयन्निति**, तस्य तस्य वस्तुनः **स्वभावास्तत्तत्कार्यनियामकास्तेषां प्रतिबोधश्च** कालेनैव क्रियते, स्वभावान्तःस्थितस्वरूपेण वा, एवं कुर्वन् सतः **समीक्षयेहसे** लीलां करोषि, **तव कार्यद्वयं, अनवतीर्णेनाक्षरे समारूढे कालशक्तिगुणैः स्वभावश्चोद्गता भवन्ति, ततः सर्वमेव जगद् भवति परमनेकविधं तस्मिन्नपि च जगति सतः** सर्वस्यैव **जन्मागस्य सता च समीक्षया परिपालनपूर्वकं सम्यगवेक्षया लीलां च करोषि, तेन च तेषां सर्व एव पुरुषार्थाः सिद्धा भवन्ति** जगच्च रक्षितं भवति, **न च पुनः पुनः कर्तव्यं पतति**, तत्र हेतुमाह **अमोघविहार** इति, **न मोघो** व्यर्थो **विहारो** यस्य, अनेनोभयत्रापि हेतुरुक्तः ॥ ४९ ॥ अस्य दुष्टस्वभावत्वे भगवतश्च शिक्षकत्वे हेतुमुक्त्वा कार्यमाह **तस्यैव तेमूरिति** यदा भगवान् स्वार्थमेव सर्वं करोति तदा सर्वाण्येव शरीराणि भगवल्लीलौपयिकत्वाद् **भगवत्तनवो** भवन्ति, ते च त्रिविधाः **शान्ताः** सात्त्विका **अशान्ता** राजसा विक्षिप्ता **मूढयोनयस्तामसास्तथैव तनवः** द्वितीयसर्गप्रकारोऽत्रापि युज्यते, दैत्यादीनां तत्रैवोपकार इति, मूढयोनिषु तथात्वमनुचितमित्याशङ्क्य त इत्युक्तं, तथा सति कथं भगवदवतारलीला ? तत्राह **शान्ताः प्रियास्त** इति, अधु**नावितुः** पालकस्य **धर्मपरीप्सया** धर्मरक्षेच्छया **स्थातुः** स्थितेच्छुः, **शान्ता** एव सात्त्विका एव **प्रिया** न त्वतिरिक्ता उभयविधाः, ते हि नाशका उत्पादकाश्च, उत्पादका अवनाभिमताः, अधिकभारजनकत्वात्, नाशकास्तु विरोधिन एव, अनेनोभयमपि कार्यमुक्तम् ॥ ५० ॥ तथाप्यस्यापराधः सोढव्य इत्याहु**रपराध** इति, यद्यपि साम्प्रतमन्याभिनिवेशस्तथाप्यस्मदादीनामपि भवानेव पतिरतोनवसरे कार्यकरणा**दपराधः** सोपि सोढव्यः, स्वस्यैव **प्रजाभिः** पालनीयाभिः **कृत** इति, अन्यथा पालकत्वं न स्यात्, कार्यनिर्वाहार्थं च **सकृदेव** सोढव्यो ज्ञापनार्थं, **स्वस्य प्रजाभिः कृतः**, पुनरपराधे ज्ञात्वा करणान् मारणमेवोचितं, विरोधित्वात्, अत एव **क्षन्तुमर्हसि** क्षमायामुपायान्तरमप्याह **शान्तात्मन्निति**, **शान्त आत्मा** यस्य, सत्त्वनिधानत्वात् क्षोभाभावाद् दण्डने कार्यस्य सिद्धत्वादग्रे प्रतिबन्धकत्वाभावाच्च सोढव्यः, नन्वज्ञानात् कृतमिति कथमवगन्तव्यम् ? ज्ञातकरणपक्षे तु **सकृदपि न** सोढव्य इत्याशङ्क्याहुर्मूढस्येति, **स्वभावादेवायं सर्पयोनिस्तमसः, अतो मौढ्यात् त्वां न जानाति, अज्ञानात् कृतमकृतप्रायम्** ॥ ५१ ॥ क्षमायां यत् कर्तव्यं तदाहु**रनुगृह्णीष्वेति अनुग्रहः कर्तव्यः**, नन्वनुग्रहे को हेतुः ? तत्राह **भगवन्निति**, तवैव गुणो हेतुभूतो न त्वस्य, तर्हि सर्वत्रैव प्रसादो भवेदित्या-

शङ्क्य निमित्तमाहुः **प्राणांस्त्यजतीति** कृपावसरोयं, **यथा कृपायां** भक्त्यादिर्हेतुः, एवं समयोपि अत **एव ग्रहणादिकाले सेवारहितायामपि यथा दीयते तथा कृपा विधेये**त्यर्थः, पन्नग इति, जीवमात्रमित्यल्पतां दयायां हेतुः, नन्वल्पत्वादेव किमनेन जीवितेनेत्याशङ्क्याहुः **स्त्रीणा**मिति, **स्त्रीणामस्माकं पति**रूपोयं **प्राणः** प्रकर्षेण **दीयतां, स्त्रीणां प्राणरक्षा सर्वथा कर्त**व्येति, ननु स्त्रियोपि दुष्टाः "शालावृकाणां हृदयान्येता" इतिश्रुतेरित्याशङ्क्याहुः **साधुशोच्यानामिति, सत्यं** दुष्टाः **स्त्रियः परं स योनिदोष एव न तु जीवदोषः, अतः साधवस्तं जीवं शोचन्ति कथमयं स्त्रीशरीरे पतित इति यत्र सर्वदा भयं पराधीनता मुक्त्यभावश्च,** भवांश्च साधूनां परिपालकः, अतस्तेषां शोकाभावायास्मत्प्राणा रक्षणीया इतिभावः ॥ ५२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

त्वं ह्यस्येत्यत्र स्वभावा तःस्थितस्वरूपेणेति स्वभावाधिदैविकेन भगवद्रूपेण, सत इति द्वितीयाबहुवचनान्तं, लीलाकरणमेव व्याकुर्वन्ति तवेत्यादि ॥ ४९ ॥ तस्यैव तेमूरित्यत्र ननु मूढानां भगवद्विरोधित्वात् कथं तनुत्वमित्याशङ्क्योतपदतात्पर्यमाहुः द्वितीयसर्गेत्यादि, आसुरसर्गो द्वितीयसर्गो "द्वौ भूतसर्गावि"त्यादिवाक्यात् तत्प्रकारो येतेष्वज्ञास्तेषु तेषु यः प्रकारो दुष्टस्वभावत्याजनरूपोत्र मूढयोनिषु युज्यते, तत्र हेतुर्दैत्येत्यादि, तथा च साम्प्रतं तत्समयाभावादयमेवोपयुज्यत इत्यर्थः, उतेत्युक्तमिति विकल्पबोधकपदमुक्तं, अवतारलीलेति दुष्टनिग्रहलक्षणा उभयमिति दुष्टनिग्रहः शिष्टपालनं च ॥ ५० ॥ अपराध इत्यत्र यद्यपीत्यादेरर्थं टिप्पण्यामाहुः पालकत्वेनेत्यादि, ज्ञापनार्थं इति स्वस्वभावज्ञापनार्थः ॥ ५१ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

त्वं ह्यस्येत्यत्र हेतुमाहेति ईहाभावात् कारणमन्यमाहेत्यर्थः ॥ ४९ ॥ तस्यैवेत्यस्याभासे कार्यमाहेति शिक्षाकार्यमित्यर्थः, व्याख्याने, द्वितीयसर्गेति क्रीडार्थं जगत्करणप्रकार इत्यर्थः, उपसंहारे उभयमपीति सद्रक्षा धर्मपरीप्सा चेत्यर्थः ॥ ५० ॥ अपराध इत्यत्र अत एवेति यतो भर्त्रा सोढव्यो भवति अत एव त्वं क्षन्तुं सोढुमर्हसीत्यर्थः, उपायान्तरमिति प्रजात्वं स्वनिष्ठं कारणमुक्तं, शान्तिरपि भवन्निष्ठा कारणान्तरमस्तीत्यर्थः, कार्यस्येति निग्रहस्येत्यर्थः ॥ ५१ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं तावद्दण्डानुमोदनेन नमस्कारैश्च भगवन्तं प्रसाद्य इदानीं "तमेव साधु कर्म कारयति मूर्ध्वं निनीषति तमसाधुकर्म कारयति यमधो निनीषति" इत्यादिश्रुत्यनुसारेण 'त्वदधीनानां प्राणिनां कोऽपराधः ?' इत्याशयवत्योऽनुग्रहं प्रार्थयन्ते-त्वं हीति पञ्चभिः । हे प्रभो सर्वसमर्थ ! त्वं हि स्वयमनीहः आप्तकामत्वात् इच्छारहितोऽपि समीक्षया ईक्षणमात्रेण सतः संस्काररूपेण विद्यमानान् प्राणिनां तत्तत्स्वभावान् घोरत्वादीन् प्रतिबोधयन् गुणैः कृत्वा अस्य विश्वस्य जन्मस्थितिसंयमान् ईहसे करोषि। तथासामर्थ्ये हेतुमाहुः—अकृतेति। अकृता अनादिसिद्धा या कालरूपा शक्तिस्तां धारयतीति तथा। ननु 'अनीहस्य जगत्करणे किं प्रयोजनम् ?' इत्यपेक्षायामाह-अमोघविहार इति । अमोघो जीवानां चतुर्विधपुरुषार्थहेतुर्विहारः सृष्ट्यादिलीला यस्य सः ॥ ४९॥ तस्यैव जगज्जन्मादिकर्तुस्ते तव त्रिलोक्याममूः शान्ताः सात्त्विकाः, अशान्ता राजसाः, मूढयोनयः तामसा उत अपि तन्यन्ते क्रीडार्थं विस्तार्यन्ते इति तनवो देहाः । तथापि तेषु शान्ता एव अधुना ते तव प्रियाः, नेतराः । हिशब्दोऽवधारणे । तत्र हेतुमाहुः-सता धर्मपरीप्सया धर्मपरिपालनेच्छया ईहतः प्रवर्त्तमानस्य कृतावतारस्येति । अत एव तान् अवितुं स्थातुः स्थितस्य ते तत्र तामसानां राजसानां च धर्मविरोधित्वान्न प्रियत्वमिति ज्ञेयम् ॥ ५० ॥ एवं भगवतो जगत्स्वामित्वमुक्त्वा, उपपत्तिपूर्वकं क्षमापयन्ति अपराध इति । यतः स्वप्रजाकृतोऽपराधो भर्त्रा स्वामिना सकृत् सोढव्य इयमेव लोकरीतिः, अतस्त्वमपि अस्यापराधं क्षन्तुमर्हसि, सर्वभर्तृत्वात् । "पालनार्थगृहीतसत्त्वमूर्तेस्तव तु क्षमैव युक्ता, शिक्षादण्डस्य जातत्वात्" इत्याशयेन सम्बोधयन्ति-शान्तात्मन्निति। क्षमाया हेत्वन्तरमाहुः-त्वामीश्वरमजानत इति । अज्ञाने हेतुमाहुः-मूढस्येति । तामसत्वात् । 'सकृत त्वामजानत' इत्युक्त्या 'यदि पुनर्ज्ञात्वाऽप्यपराधं कुर्यात्तदा पुनर्निःसन्दिग्धं सर्वथा दण्डनीय' इति सूचितम् ॥ ५१ ॥ 'त्वदनुग्रहं विना त्वस्य निस्तारो नास्ति' इति सूचयन् सम्बोधयन्ति-भगवन्निति । यस्मादयं पन्नगः प्राणांस्त्यजति, अतोऽनुगृह्णीष्व अनुग्रहं कृत्वैनं मुञ्चेत्यर्थः । किञ्च पराधीनतया साधुभिः शोच्यानां स्त्रीणां नोऽस्माकं पतिरूपः प्राणः जीवनहेतुः प्रकर्षेणाङ्गभङ्गपीडादिराहित्येन दीयताम् ॥ ५२॥

अन्वितार्थप्रकाशिका

त्वं हीति ॥ हे प्रभो ! त्वं हि अनीहः इच्छारहितोऽपि अकृता अनादिसिद्धा या कालरूपा शक्तिस्तां धर्जति प्राप्नोति **तथा अमोघो जीवानां** चतुर्विधपुरुषार्थहेतुर्विहारः सृष्ट्यादिलीला यस्य स त्वं समीक्षया ईक्षणमात्रेण सतः संस्काररूपेण विद्यमानान् **प्राणिनां** तत्तत्स्वभावान् घोरत्वादीन् प्रतिबोधयन् गुणैः कृत्वा अस्य विश्वस्य जन्मस्थितिसंयमान् **ईहसे** करोषि । अत्र त्वमस्य **जन्माद्यकृतेति स्वामिनां प्रथमव्याख्याने प्रथमपुरुष आर्षः ॥ ४९ ॥ तस्यैवेति** ॥ त्रिलोक्यां ये शान्ताः सात्त्विकाः अशान्ता राजसा

मूढयोनयस्तामसा। उत अपि तस्य जगत्कर्तुः ते तवैव तनवः देहाः क्रीडोपस्कराः तथापि हि रवधारणे सतां धर्मपरीप्सया धर्मपरिपालनेच्छया ईहतः प्रवर्तमानस्य कृतावतारस्येति । शतार्थः । अत एव तान् अवितुं स्थातुः स्थितस्य तव अधुना शान्ता एव प्रियाः नेतरे ॥ ५० ॥ अपराध इति ॥ शान्तात्मन् ! यतः स्वप्रजाकृतः अपराधो भर्त्रा स्वामिना सकृत्सोढव्यः । अतः मूढस्य त्वामजानतश्चास्य त्वत्प्रियभूतशान्तलोकविप्रियकारित्वलक्षणमपराधं क्षन्तुमर्हसि सर्वभर्तृत्वात् ॥ ५१ ॥ अनुगृह्णीष्वेति ॥ हे भगवन् ! यस्मादयं पन्नगः प्राणांस्त्यजति अतोऽनुगृह्णीष्व अनुग्रहं कृत्वैनं मुञ्चेत्यर्थः । किञ्च । पराधीनतया साधुभिः शोच्यानां स्त्रीणां नोऽस्माकं पतिः पतिरूपः प्राणः जीवनहेतुः प्रदीयताम् ॥ ५२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सांप्रतं नमस्कारपूर्वकां स्तुतिमुपसंहरन्त्यः सत्यः स्वापेक्षितकृतं निवेदयंति त्वमित्यादि त्रिभिः हे प्रभो अनीहः प्राकृतचेष्टाहीनस्त्वं अस्यासंख्यकोटिब्रह्मांडरूपस्य जगतः उत्पत्त्यादीन् गुणैर्गुणाभिमानिसंकर्षणादित्रिभिः स्वाऽवतारैरकृत अकरोः हे कालशक्तिधृक् तेषां सत्वादित्रिगुणयुक्तानां क्षेत्रज्ञानां स्वभावान् सतः प्रलये संस्काररूपेण वर्त्तमानान् शांतयोरमूढाः प्रकृतिः समीक्षया बोधयन् अमोघः सत्यो विहारो जीवानां यथा कर्म न्यूनाऽधिकभावेन फलप्रदानरूपं क्रीडनं यस्य एवंभुतस्त्वं ईहसे नागशिरस्सु नृत्यं करोषि यद्वा ईहसे मत्स्याद्यवतारैर्लोके नानाविधचेष्टामसंख्यजनोद्धारणाय करोषि ॥ ४९ ॥ भर्त्रा प्रजापालकेन सकृदेकवारं सोढव्यः क्षंतुं योग्यः अतो हे शांतात्मन् मूढस्य तमसा मूर्खत्वं प्राप्तस्य तस्मात्त्वां सर्वभर्त्तारमजानतोऽस्यापराधं ॥५०॥ पन्नगोऽसौ नागः तस्मिन्मृते साधुसम्यक्शोच्यानां शोकं कर्त्तुमर्हाणां नोऽस्माकं ॥ ५१ ॥ ते किंकरीणां तव दासीनां नः तवाज्ञया यदनुष्ठेयं कर्त्तव्यं तद्विधेहि कथयेत्यर्थः यत् यां तवाज्ञां प्रति अनुतिष्ठन् जनः ॥ ५२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं तावद्दण्डानुमोदनेन नमस्कारैश्च भगवन्तं प्रसाद्येदानीं पित्रा पुत्रस्येवास्यापराधः करणकलेवरादिप्रदानेनाखिलजीवोज्जीविषया सर्वजगदुदयविभवलयलीलेन सर्वशरीरकेण स्वाश्रितस्य विपुलापराधवत्त्वेऽपि तदपराधमकिंचिद्गणयताऽऽश्रितहितं विधातुं कृतावतारेण त्वया सोढव्य इति क्षमापयन्त्यस्तावद्भर्त्तृप्राणरक्षां कैंकर्यं च प्रार्थयन्त्य ऊचुस्त्वमिति पञ्चभिः ॥ त्वमिति ॥ हे प्रभो, त्वं हि त्वमेव, अकृतकालशक्तिधृक् अनादिभूतकालाख्यशक्तिमुक्तः, अनीहः संकल्पेतरव्यापारशून्यः, अनेन 'अकलितश्रम एव सृजत्यसौ" इति वचनार्थः । गुणैः सत्त्वरजस्तमोभिः, अस्य जगतः, जन्म प्रादुर्भावश्च स्थितिः पालनं च संयमः संहारश्च तान्, कुर्वन्निति शेषः । तत्तत्स्वभावान्, सत्त्वादिगुणमयस्वभावान्, सतो जीवान्, समीक्षया अनुग्रहगर्भया दृष्ट्या, प्रतिबोधयन् दण्डेन प्रबुद्धान् कुर्वन्, अमोघविहारः अप्रतिहतजगद्व्यापाररूपविहारः सन्, ईहसे चेष्टसे । एवमपराधानवेक्षणेन केवलमुपकारैकशीलस्य तव कियानयमस्यापराध इति भावः । जन्मादीनीहसे इत्यनेन सर्वजीवान् प्रति तस्य पितृस्थानीयत्वं सूचितम् ॥ ४९ ॥ किं च ॥ तस्येति ॥ तस्यैव अस्य विश्वस्य जन्मादीनीहमानस्य, ते तव, त्रिलोक्यां, अमूः सर्वाः शान्ताः सात्त्विका उत अशान्ता राजसाः, मूढयोनयस्तामसाश्चेति त्रिप्रकाराः, तनवः शान्तादिप्रकृतिकप्रजारूपा देहाः, अनेन सर्वेषामस्य शरीरत्वं स्वस्य शरीरित्वं च प्रदर्शितम् । शरीरत्वात्सर्वा अपि तनवोऽनुग्राह्या एवेति भावः । ननु सर्वासामप्यनुग्राह्यत्वे जगद्व्यापारोच्छेदप्रसङ्गस्तत्राहुः । यद्यप्येवं तथापीति शेषः । स्थातुः स्थितिकर्त्तुः, सतां धर्मपरीप्सया धर्मपालनेच्छया, ईहतः प्रवर्त्तमानस्य, कृतावतारस्येति यावत् । ते तव, अधुना शान्ताः तनवः, अवितुं रक्षितुं, सदा, प्रिया इष्टाः, सन्ति हि । दण्डप्रदानात् प्राक् अशान्ततनुप्राया मूढतनुप्राया वा वयं त्वया दण्डप्रदानेन शान्ततनुतां यतो गमिता अतो नो हि प्रियतनुभाजो मत्वाऽनुगृहाण, न तन्मात्रेण जगद्व्यापारोच्छेदप्रसङ्ग इति भावः ॥ ५० ॥ दण्डविहितशिक्षोऽयमधुनोपशान्तोऽतः प्राक् कुमार्गगदण्डोपशान्तपुत्रवत् सोढव्य एवेत्याहुः ॥ अपराध इति ॥ भर्त्रा स्वामिना, स्वप्रजाकृतः अपराधः, सकृदेकवारं तु सोढव्यः । पुनरपराधे कृते स न सोढव्य इत्यभिप्रायेण सकृदित्युक्तम् । अज्ञानकृतमपराधं क्षमापणेन निवर्त्तयन्तीति लोकपरिपाटीमभिप्रेत्योक्तार्थमेव भूयः प्राहुः । हे शान्तात्मन्, मूढस्य, त्वां अजानतः, अस्यास्मद्भर्त्तुरपराधमिति शेषः । क्षन्तुं, अर्हसि ॥ ५१ ॥ अपराधातिशयात्तदुक्तीरगणयन्तं भगवन्तं दीना भूत्वा भूयोऽपि तदेवाहुः ॥ अनुगृह्णीष्वेति ॥ हे भगवन्, पन्नगोऽयं सर्पः, प्राणान् त्यजति । अधुना त्यक्ष्यतीत्यर्थः । अतः अनुगृह्णीष्व । साधुशोच्यानां साधुभिर्दयनीयानां, स्त्रीणां नोऽस्माकं, पतिः पतिरूपः प्राणः, प्रदीयताम् । भवतेति शेषः ॥ ५२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तस्यैव ते इति : १०.१६.५०.

कीदृशयोरपि करयोः स्वत्वं सममेव वामदक्षिणयोः । शान्ताशान्तशरीरिष्वस्ति शान्तिमानपि तवैष तनुरूपः ॥ ७८ ॥

विश्वात्मान् भगवन्नसौ तव मतः किं कालियोऽरि सुहृत्किं दान्तो यदि तन्न ते समुचितस्तत्रैष दण्डक्रमः ।

कृष्णाहिव्यपदेशतोऽरिरिति चेत्त्वत्काय एवार्थतः सिद्धस्तत्प्रियदेहशिक्षणमितः प्राक् क्वापि नाश्राव्यहो ॥ ७९ ॥

अपराध इति ः १०.१६.५१.

स्वसेवकानां सहतेऽपराधमेकं नृपो द्वावपि निर्घृणोऽपि । दयानिधिस्त्वं त्वसि तन्न युक्तः सकृत्कृतागस्यपि दण्डयोगः ॥ ८० ॥
किं नागाधिपवद्वपं यदुपते जातागसो वा न वायद्याद्यस्तदशङ्कमेव भण भोः को वाऽपराधोऽस्ति नः ।
अन्त्यश्चेदपराधलेशरहितास्त्वस्मासु कस्मात् समारब्धं दण्डनमेतदाद्यगुरुणा सौभाग्यभाग्यापहम् ॥ ८१ ॥
नानापराधनिधि -रप्यहि रीश्वरेण कृत्वा कृपां तदबलासु सपद्यमोचि ।
एवं यशोऽभिनमर्जय सर्वपूज्यपादाम्बुजानिशमनन्यधियाऽऽस्म दास्यः ॥ ८२ ॥

कृष्णप्रिया

हे भगवन् ! हे प्रभो ! यद्यपि आप अनीह-इच्छा रहित हो एवं कालशक्ति को धारण करने वाले हो फिर भी इस ब्रह्माण्ड की सत्वादि गुणों द्वारा उत्पत्ति-स्थिति-लय आदि करते हो; आप अमोघ सत्यलीला वाले हैं इसलिए आप उन-उन पदार्थों के जैसे-जैसे स्वभाव है वैसे-वैसे उन स्वभावों को जागृत कर, सत्पुरुषों का पूर्ण ध्यान करते हुए ही सब लीला करते हैं ॥ ४९॥ हे नाथ इस त्रिलोक के भीतर जो शान्त-सात्विक शरीर, अशान्त-राजस शरीर एवं मूढ़ योनि-तामस शरीर है, वे सब आपकी क्रीडा के उपकरण होने से आपका ही शरीर है । फिर भी जो शान्तस्वरूप हैं वे आपको प्रिय हैं क्योंकि सत्पुरुषों की और उनके धर्म की रक्षा करने की इच्छा से प्रवृत्ति करते हुए आपने उन्हीं की रक्षा के लिए अवतार धारण किया है ॥ ५० ॥ हे नाथ ! आप तो स्वामी हो, इसलिए दया करके स्वामी को एक बार अपनी प्रजा का अपराध सहना चाहिए । हे शान्तात्मन् भगवन् ! आपकी महिमा एवं स्वरूप से अनभिज्ञ एवं सर्पयोनि के कारण स्वभाव से मूढ ऐसे इस कालीय को क्षमा करनी चाहिए ॥ ५१ ॥ हे भगवन् इस कालीय नाग पर अनुग्रह कीजिए, यह नाग आसन्न मरणावस्था को प्राप्त कर रहा है, हम स्त्रीजन है, साधु पुरुषों के लिए हम दयापात्र है, हम पर कृपा कर हमारा पति ही प्राण है इसलिए हमें प्रति रूप प्राणों का दान करें यही प्रार्थना है ॥ ५२॥

विधेहि ते किङ्करीणामनुष्ठेयं [1]तवाज्ञया । यच्छ्रद्धयानुतिष्ठन् वै मुच्यते [2]सर्वतोभयात् ॥ ५३ ॥

श्रीशुक[3] उवाच

इत्थं स नागपत्नीभिर्भगवान् समभिष्टुतः[4] । मूर्च्छितं भग्नशिरसं विससर्जाङ्घ्रिकुट्टनैः ॥ ५४ ॥
प्रतिलब्धेन्द्रियप्राणः कालियः शनकैर्हरिम् । कृच्छ्रात् समुच्छ्वसन् दीनः कृष्णं प्राह कृताञ्जलिः ॥ ५५ ॥

[5]कालीय उवाच

वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः । स्वभावो दुस्त्यजो नाथ [6]लोकानां यदसद्ग्रहः ॥ ५६ ॥

कर्दमक्षमा

अन्वयः– ते किङ्करीणाम् अनुष्ठेयं विधेहि यत् श्रध्धया अनुतिष्ठन् वै सर्वतः भयात् मुच्यते ॥ ५३ ॥ इत्थं नागपत्नीभिः समभिष्टुतः सः भगवान् अङ्घ्रिकुट्टनैः भग्नशिरसं मूर्छितं विससर्ज ॥ ५४ ॥ शनकैः प्रतिलब्धेन्द्रियप्राणः कृच्छ्रात् समुच्छ्वसन् दीनः कृताञ्जलिः कालियः हरिं प्राह ॥ ५५ ॥ हे नाथ वयं उत्पत्त्या सह खलाः तामसाः दीर्घमन्यवः नाथ स्वभावः दुस्त्यजः लोकानां यत् असद्ग्रहः ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

युष्मदनुग्रहेऽन्येषां मृत्युरेवेति चेत्तन्नेत्याहुः । विधेहीति । त्वदाज्ञया प्राणिनो नाद्यामेति भावः ॥ ५३–५४–५५ ॥ यदसद्ग्रह इति । यतः स्वभावोऽसद्ग्रहरूपः । यद्वा यतः स्वभावादसति देहादौ ग्रहोऽभिमानः स दुरत्यज इति ॥ ५६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भिन्नान्वयात् ते तव योः पुनरुक्तिर्न शंकयेति । अनुष्ठेयम् कर्त्तव्यम् । विधेहि आज्ञापय 'विपूर्वाधा करोत्यर्थे' इति व्याड्युक्तः । करोत्यर्थत्वेपि तमुल्लंघ्यान्यार्थोऽपि प्रकृतसंगत्या भवतीति बोधार्थमयमर्थः । यत् भवदाज्ञतम् । सर्वतोभयात् संसारात् । इति भाव इति । प्राणिहिंसापरित्यागेन सद्गतिं लप्स्यामह इति तात्पर्यम् ॥५३॥ अंघ्रिकुट्टनैः पादमर्द्दनैः ॥ ५४ ॥ प्रतिलब्धेंद्रिय-

---

१. त्वदाज्ञया—वीर. । २. स पुमान्भयात्–वीर. विज. सर्वबन्धनात् -च पु. टी ३. बादरायणिरुवाच—गो. प्रे. टी. । ४. नुष्ठितः– इति कस्यचित् । ५. अन्यत्र "कालीय उवाच' पाठो न दृश्यते । ६. भूतानां–वीर. विज. ।

प्राणः त्यक्तमूर्च्छः । कृतांजलिरिति सर्वांगव्यथावत्वाद्दंडवद्भूमौ निपत्य प्रणामासमर्थ इति ।। ५५ ।। असतां ग्रह इव बंधकारी मिथ्याहठरूप इति वा । स्वभावः स्वजातिधर्मः । स्वभावस्य दुराग्रहरूपत्वमसंभवं मत्वाऽर्थांतरमाह—यद्वेति । यो ग्रहो ब्रह्मणोऽहमित्याद्यभिनिवेशः । हे नाथ हे ईश्वर तमपि त्वं खंडयितुं समर्थ इति भावः ।। ५६ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तवाज्ञया यदनुष्ठेयं विधेयं तत् किङ्करीः प्रति समादिश यद्वा, तवाज्ञयैव तव किङ्करीणां सतीनामस्माकमनुष्ठेयं तवाज्ञयेत्यस्य परेणान्वयः । यद्यस्मात् तवाज्ञया अनुतिष्ठन् कर्म कुर्वन् यदनुष्ठेयमिति वा वै प्रसिद्धो सर्वतः सर्वस्मादपि सर्वत्रापि वा । यद्वा, सर्वतो भयात् मुच्यते इति भगवल्लोकप्राप्तिरेवाभिप्रेता ।। ५३ ।। स स्तुतिमात्रप्रीतः श्रीवृन्दावनस्वच्छन्दक्रीडारसिको वा यद्वा, परदुःखकातरो भगवान् श्रीकृष्णः अङ्घ्रिभ्यां कुट्टनैः प्रहारैर्भग्नशिरसम् अत एव मूर्च्छितं तत्याज ।। ५४ ।। निजदुर्मदादिदोषं हरतीति हरिं यतः कृष्णं साक्षात् भगवन्तं दीनश्चार्त्तः गताभिमानो वा आर्त्तत्वादेवाशक्त्या पत्नीवन्न दण्डवत् प्राणनमिति ज्ञेयं प्रकृष्टं दीनजनानां वक्तुमुचितमाहेति अतो भगवति निजदोषारोपणमिव यत्करिष्यते तदपि दैन्येनैव स्वस्य तदधीनतायामेव तात्पर्य्यात् ।। ५५ ।। तथैवाह–वयमिति चतुर्भिः । उत्पत्त्या सहजजातिस्वभावेनैवेत्यर्थः । नाथ, हे ईश्वरेति तमपि त्वं खण्डयितुं समर्थोसीति भावः ।। ५६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तवाज्ञया यदनुष्ठेयम्, तवाज्ञयेत्यस्य परेण वान्वयः । त्वदाज्ञया चैतं ह्रदं परित्यज्य पूर्व्वस्थानं गतानामप्यस्माकं श्रीगरुड़ादिभ्यो भयं न भवितैवेत्याहुः–यदिति । यद्यस्मात् तवाज्ञयानुतिष्ठन् कर्म्म कुर्व्वन् यदनुष्ठेयमिति वा । वै प्रसिद्धौ, सर्व्वतः सर्व्वस्मादपि सर्व्वत्रापि वा, यद्वा, सर्व्वतो भयान्मुच्यत इति वैकुण्ठलोकप्राप्तिरेवाभिप्रेता ॥ ५३ ।। स स्तुतिमात्रप्रीतः श्रीवृन्दावनस्वच्छन्दसुखक्रीड़ारसिको वा, यद्वा, परमदुःखकातरो भगवान् श्रीकृष्णोऽङ्घ्रिभ्यां कुट्टनैः प्रहारैर्भग्नशिरसम्, अतएव मूर्च्छितं तत्याज, यद्यपि स इत्यादिकं विसर्ज्जने हेतुर्विभाति, तथाप्येतद्विशेषणद्वयं तद्दुष्टतासम्यगपगमबोधनार्थम् । किंवा, अग्रे वक्ष्यमाणकृपाविशेषार्थम् । तत्त्वार्थपक्षे तु भगवदानन्दनृत्यावेशेन भग्नशिरसमपि । यद्वा, शिर इव शिरः कामादिषु श्रेष्ठोऽभिमानः, हतदुरभिमानमित्यर्थः, मूर्च्छनैः समुच्चयार्थत्वात् । यद्वा, लब्धानन्दमोहमित्यर्थः । नागपत्नीभिरित्यस्यायं भावः–निजदयालुत्वादिना तद्दुःखदृष्ट्यापि स्वतः प्रसन्नोऽपि तासां स्तुत्याधिकं सन्तुष्ट इति । प्रेमविशेषविस्तारणार्थैतदवतारे तदनुरूपभावा योषितः प्रति प्रायः प्रसादविशेषात् । एतच्च प्रथमस्कन्धमारभ्य पौरवेन्द्रपुरन्ध्र्यादिस्तुत्यादिना व्यक्तमेव । अतएवात्र सम्यक् अभितः स्तुत इत्युक्तम् ।। ५४ ।। विसर्ज्जनेनानन्द-मूर्च्छापगमात् प्रतिलब्धेन्द्रियादिवृत्तिरिति तत्त्वार्थः । निजदुर्म्मदादिदोषं हरतीति हरिम्, यतः कृष्णं साक्षाद्भगवन्तं कृपाविशेषेण मनोहरं परमानन्दप्रदं चेति तत्त्वार्थः । एवमन्यदप्यूह्यम् । दीनो गताभिमान आर्त्तो वा । अतएवाशक्त्या पत्नीवन्न प्रणनामेति ज्ञेयम् । प्रकृष्टमाहेति–भगवत्येव निजदोषावर्ज्जनात, तच्चाग्रे व्यक्तं भावि ।। ५५ ।। दीनत्वेनान्यत् स्वयं रचयित्वा वक्तुमशक्नुवन् स्वपत्नीभ्यः श्रुतार्थमेव, किंवा, तासां तादृशोक्त्यैव प्रसन्नं मत्वा तथैवाह–वयमिति चतुर्भिः । उत्पत्त्या सह जातिस्वभावेनैवेत्यर्थः । नाथ हे ईश्वर ! इति त्वद्विहित एव स्वभाव इति भावः ॥ ५६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अङ्घ्रिकुट्टनैः मूर्च्छितमित्यन्वयः ।। ५४–५५ ।। असद्ग्रहः दुष्टपिशाचतुल्यः ।। ५६ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

युष्मदनुग्रहोऽन्येषां मृत्युरेवेति चेत्तत्राहुः–विधेहि त्वदाज्ञया यत्तव किङ्करीणामस्माकमनुष्ठेयं तद्विधेहि अनुष्ठेयं विशिषन्ति स पुमान् कालियो यदनुष्ठेयं श्रद्धयाऽनुतिष्ठन् भयात्प्रकृतान्मृत्युभयात् मुच्यते यथाऽस्मत्तो लोका न भीताः स्युर्यथा चायं मृत्युभयान्मुच्येत तादृशमनुष्ठेयं कर्म आज्ञापयेत्यर्थः ।। ५३ ।। एवं स भगवान् कृष्णो नागपत्नीभिरभिष्टुतः याचितश्चाङ्घ्रिकुट्टनैर्भग्नशिरसं मूर्च्छितं च कालियं विससर्ज ॥ ५४ ।। ततः शनकैः प्रतिलब्धानीन्द्रियाणि प्राणाश्च येन तथाभूतः कालियः कृच्छ्रादत्यायासात् श्वासं मुञ्चन् कृताञ्जलिः हरिं प्राह ॥ ५५ ॥ उक्तिमेवाह–वयमिति त्रिभिः । वयमुत्पत्त्या सह उत्पत्तिप्रभृति खलाः दुष्टास्तामसा दीर्घो मन्युर्येषां तथाभूताश्च वयमिति तिर्यगभिप्रायेण निर्देशः । अत एव "वयं च तत्र भगवन्" इत्यनेनापौनरुक्त्यम्, हे नाथ ! भूतानां स्वभाव औत्पत्तिको गुणः दुस्त्यजः यद्यतः स्वभावः असद्ग्रहः दुष्टपिशाचतुल्यः अतो दुस्त्यजः ।। ५६ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अङ्घ्रिकुट्टनैः अङ्घ्रिमर्द्दनैः ।। ५४–५५ ॥ यदसद्ग्रहो यो दुराग्रहः ।। ५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भवत्वयं युष्मभ्यं पतिर्दत्त एव किन्तु यन्मया आदिश्यते तत्कर्तव्यमिति तत्र सम्भ्रममवश्यमेवेत्याहुः–विधेहीति। तच्चेतःस्थानादन्यत्र शीघ्रं यातेत्यग्रे व्यक्तीभविष्यति ॥ ५३ ॥ अङ्घ्रिभ्यां कुट्टनैः प्रहारैर्भग्नशिरसं कालियं तत्याज तच्छीर्षेभ्यः सहसैवावप्लुत्य तदग्रे तस्थावित्यर्थः ॥ ५४ ॥ कृच्छ्रादतिकष्टादेव कथञ्चित् कृताञ्जलिः सर्वाङ्गव्यथावत्त्वात् नतु भूमौ दण्डवन्निपत्य प्रणामसमर्थ इति भावः ॥ ५५ ॥ यत् यतो असतो विरुद्धत्वेन ज्ञातस्यापि रागद्वेषादेर्ग्रहो ग्रहणं विदुषामपि किम्पुनर्मूढानामस्माकमिति भावः ॥ ५६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अनुग्रहे कृते युष्मद्भ्यो जनानां भयं भविष्यत्यत आहुः–यथा जनानाम् अस्मद्भ्यो भयं न भवेदस्माकं च कुशलं स्यात्तथा अनुष्ठेयं विधेहि ॥ ५३–५४ ॥ कृताञ्जलिरित्यनेन शरीरविशेषं प्रकटीकृत्वेति गम्यते त्वन्मायामोहिताः वयं खलाः स्वभावतन्त्राः त्वं तु सर्वेश्वरः सर्वकर्त्ताऽतो निग्रहमनुग्रहं वा यथेच्छसि तथा कुर्वत्याहु–वयमिति चतुर्भिः । यद्यतः असद्ग्रहः देहगेहादौ दुष्टः आग्रहः स्वभावो दुस्त्यजः ॥ ५५–५६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु दण्डोऽयं वः पतिः किन्तु मदाज्ञायां स्थेयमिति चेत्तत्र ससम्भ्रममवश्यमेवेत्याहुः—विधेहीति । तच्चेतः स्थानात् शीघ्रं यातेत्युपरिष्टात् स्पष्टीभावि ॥ ५३ ॥ विससर्जेति । सहसैव तन्मूर्द्धन्योऽवप्लुत्य तदग्रे तस्थावित्यर्थः ॥ ५४ ॥ कृच्छ्रात् कष्टादेव कृताञ्जलिः कुट्टनैरतिव्यथितगात्रत्वात् साष्टाङ्गं प्रणामं कर्त्तुमसमर्थ इति भावः ॥ ५५ ॥ उत्पत्या सह जातिस्वभावेनैवेत्यर्थः । यद् यस्मात् स्वभावादसतो रागद्वेषादेर्ग्रहो विदुषामपि भवति का कथा अस्माकं मूढानामिति भावः ॥ ५६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

युष्मत्पतिप्राणप्रदानमन्यमरणकारणमित्यत आहुः ॥ विधेहीति । ते तव किङ्करीणां दासीनां तवाज्ञयाऽनुष्ठेयं विधेहि यत्त्वदाज्ञप्तं श्रद्धयाऽनुतिष्ठन् यः पुमान्स भयान्मुच्यते । अयं श्रद्धयाऽनुतिष्ठन्भवेदित्येतद्दृष्टिविषयः पुमांश्चेतनमात्रं भयाद्विषभयान्मुच्यत इत्यावृत्त्याऽन्वयोऽपि ज्ञेयः । इतः परं नाद्यादयं परान्नरादीनिति हृदयम् ॥ ५३ ॥ स भगवान्नागपत्नीभिरित्थं समभिष्टुतोऽङ्घ्रिकुट्टनैः अनेन गूढपदः पादप्रहारो वज्ररुन्तुद इति माधवस्तथा चकारेति ध्वन्यते । भग्नानि शिरांसि यस्य तं मूर्छितं विससर्ज । ततोऽहिपत्नीप्रियमञ्जुवाक्यं निशम्य तं निर्भयमाशु चक्रे । तथाऽहिनारीकृतमृदुभाषणेन न कस्य चित्तं मृदुतामुपैतीति रुक्मिणीशविजयोक्तेः ॥ ५४ ॥ शनकैः प्रतिलब्धेन्द्रियप्राणः कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं हरिं कृताञ्जलिः सम्प्राह ॥ ५५ ॥ उत्पत्त्या सह खला आजनीनखलतौपेतास्तामसास्तमःप्रचुरा दीर्घकोपाश्च । स्वभावस्यानपायादित्याह ॥ भूतानां नाथेति । यद्यतोऽसद्ग्रहोऽसन् ग्रह आग्रहो दुराग्रहः स भूतानां स्वभाव इति वाऽन्वयः । दुस्त्यजो हातुमशक्यः ॥ ५६ ॥

श्रीसुबोधिनी

ननु मुक्तिः सर्वेषामपेक्षितातः प्राणरक्षापेक्षया मुक्तिरेव कथं न प्रार्थ्यत इत्याशङ्क्याहुर्**विधेहि ते किङ्करीणामिति वयं ह्यात्मनिवेदनेनैव तव दास्यो जाताः, तासां च स्वधर्मस्तवाज्ञापरिपालनं, यतस्ते किङ्करीभिस्तवाज्ञयैवानुष्ठेयं,** ततः किमत आह यत् तवोक्तं **श्रद्धयानुतिष्ठन्** सर्वत एव **भयान्मुच्यते, मुक्तिस्तु तवाज्ञाकरणेनापि** भविष्यति, **एवमेव मुक्तौ दास्यमात्मनिवेदनं व्यर्थं स्याद् भक्तिरसश्चाननुभूतः स्यात्, अतोय देय इति प्रार्थना** ॥ ५३ ॥ ततो यत् कृतवांस्तदाहेत्थमिति, एवम्प्रकारेण सम्यगभिष्टुतो मूर्छितमन्तःखिन्नं **भग्नशिरसं** बहिः खिन्नमङ्घ्रिकुट्टनैरेव **विससर्ज**, स्वयं जले जलक्रीडामेव कुर्वन् पादप्रहारेणैव तं स्त्रीणां स्थाने प्रक्षिप्तवानित्यर्थः ॥ ५४ ॥ ततो यज् जातं तदाह प्रतिलब्धेति **प्रतिलब्धानीन्द्रियाणि** प्राणाश्च येन, प्राणग्रहणं बलार्थं मूर्छितं 'स्यार्थसम्पत्त्या' इन्द्रियाणां प्राणानां च पुनरागमनं, अतः प्रतिलम्भः, **कालीय** इति प्रसिद्धिः सद्बुद्धिहेतुः **शनकै**रिति शीघ्रता सूचिता, हरिमिति निर्भयत्वं स्वस्य जीवनाशा च, अतो वाक्यान् निःसारणार्थं **कृच्छ्रात्** कष्टेन **सम्यगुच्छ्वसन्** यथाशास्त्रं देवरूपं गृहीत्वा **कृताञ्जलिः** सन्नाह ॥ ५५ ॥ स्वापराधं निवेदयति कृपार्थं वयं स्वभावात् एव खलाः परोपद्रवकारिणो दुष्टस्वभावाः, तदुत्पत्त्यैव सह, उत्पत्तिशिष्टोयं दोषो **न** त्वागन्तुकः, अतः शिक्षा व्यर्था, अनिवर्त्यदोषत्वात्, सर्वथा मारणपक्ष उत्पादनमेव व्यर्थं स्यात्, तथापि शिक्षया कश्चन गुणो भविष्यतीत्याशङ्क्याह **तामसा** इति **तामसास्तु ज्ञानरहिताः, अनुसन्धाने विद्यमाने हि शिक्षणमुपकाराय भवति, तामसानां तु नानुसन्धानं किञ्च प्रत्युपकार एव भवति** यतो वयं **दीर्घमन्वयः**, अनेनैवं ज्ञापितं मन्मारणेऽपि मदीयोन्योपकरिष्यति त्वत्सेवकेभ्यः पश्चाद्वा तस्मादप्रतीकार्यं दुष्टा वयमिति ॥ ५६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

प्रतिलब्धेत्यत्र मूर्च्छितस्यार्धसम्पत्त्येति 'मुग्धेर्धसम्पत्तिः परिशेषा'दिति तार्तीयीकसूत्रात् तथेत्यर्थः, शीघ्रता सूचितेति यद्यपि शनकैः पदार्थो मन्थरता तथापि घटिकानन्तरं स्तुतिकृतौ बलाधिक्यस्य जातत्वाच्छनकैः स्तुतिकरणं न स्यात् तथा चायं शनकैः करोतीतीन्द्रियप्राणप्रतिलम्भाव्यवहितोत्तरकालीनत्वं स्तुतौ प्राप्यत इति शनकैः पदेनैव स्तुतिकरणे शीघ्रता सूचितेत्यर्थः, यथाशास्त्रमित्यादि तु कृताञ्जलिपदतात्पर्यमुक्तम् ॥ ५५ ॥ वयं खला इत्यत्र तदिति दुष्टस्वभावत्वं त्वत्सेवकेभ्य इति चतुर्थी ।। ५६ ।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

विधेहि त इत्यत्र आत्मनिवेदनेनेति आत्मनो निवेदनं दुःखितत्वज्ञापनं तेनेत्यर्थः ॥ ५३ ॥ वयं खला इत्यत्र तदिति खलत्वमित्यर्थः ।। ५६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'युष्मदनुग्रहेऽन्येषामनर्थ एव स्यात्' इत्याशङ्क्य 'इदानीं प्रभावस्य ज्ञातत्वाद्भवदाज्ञानुसारेणैव वर्तिष्याम' इत्याहुः – विधेहीति । ते तव किङ्करीणामाज्ञाकरीणामस्माकं यदनुष्ठेयं कर्तव्यं तद्विधेहि आज्ञापय । यत् यस्मात्तवाज्ञया श्रद्धयाऽनुतिष्ठन् कर्माणि कुर्वन्नेव जनः सर्वतो भयं यस्मिंस्तस्मात् सर्वतोभयात् संसाराद्विमुच्यते ।। ५३ ॥ स भगवान् कृष्णो नागपत्नीभिरित्थं समभिष्टुतः सम्यक् स्तुतिनमस्कारादिपूर्वकं प्रार्थितः अङ्घ्रिकुट्टनैः पादप्रहारैर्भग्नानि शिरांसि यस्य तम्, अत एव मूर्च्छितं कालियं विससर्ज तत्याज, तच्छिरोभ्योऽवप्लुत्याग्रे तस्थावित्यर्थः ।। ५४ ।। ततश्च शनकैः प्रतिलब्धानीन्द्रियाणि प्राणाश्च येन सः, तथापि कृच्छ्रात् कष्टात् स उच्छ्वसन् ऊर्ध्वं श्वासान् विमुञ्चन् अत एव दीनः, कृतः संयोजितोऽञ्जलिर्येन स कालियः कृष्णं सदानन्दरूपं हरिं सर्वदुःखहारकं प्राहेत्यन्वयः । तस्य सर्पत्वेऽपि स्वेच्छयाऽन्यरूपधारणे सामर्थ्यमस्तीति ज्ञेयम्, कृताञ्जलित्वोक्तेः । तत्पत्नीष्वपि तज्ज्ञेयम् ॥ ५५ ।। कालियोऽपि "सर्वं जगत् त्वत्कर्तृकत्वेन त्वदधीनमेव, वयमपि तदन्तःपतिता एव, अतस्त्वन्नियन्त्रिता एव सर्वं कुर्मः । नात्रास्माकं कश्चिदपराधः । तथापि तवेश्वरत्वेन कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वाद्यथा मन्यसे तथा कुरु" इत्याह— वयमिति चतुर्भिः । वयं सहोत्पत्त्या जन्मनैव खलाः परोद्वेजकाः । तत्र हेतुमाह–दीर्घमन्यव इति । दीर्घो महान् मन्युः क्रोधो येषां तथाभूताः । तत्र हेतुमाह–तामसा इति । 'स्वामिनस्तवानुग्रह एव युक्त' इति सूचयन् सम्बोधयति–नाथेति । अतः स्वभावः सहजो धर्मो दुस्त्यजः । न केवलं ममैव एवम्, किन्तु सर्वेषामपि लोकानां प्राणिनाम् । यत् यस्मात् स्वभावात् असन् असमीचीनो ग्रहः अहन्ताममतारूपो देहादावाग्रहो भवति ।। ५६ ।।

अन्वितार्थप्रकाशिका

युष्मदनुग्रहेऽन्येषां मृत्युरिति चेत्तत्राहुः–विधेहीति । ते तव किङ्करीणामाज्ञाकरीणामस्माकं यदनुष्ठेयं कर्तव्यं तद्विधेहि आज्ञापय । त्वदाज्ञया प्राणिनो नाद्याम इत्याशयः । यत् यस्मात्तवाज्ञया श्रद्धयाऽनुतिष्ठन् कर्माणि कुर्वन्नेव जनः सर्वतो भयं यस्मिंस्तस्मात् सर्वतोभयात्संसाराद्विमुच्यते ॥ ५३ ॥ इत्थमिति ॥ स भगवान् नागपत्नीभिरित्थं समभिष्टुतः संस्तुतिपूर्वकं प्रार्थितः अङ्घ्रिकुट्टनैः पादप्रहारैर्भग्नानि शिरांसि यस्य तमत एव मूर्छितं कालियं विससर्ज तत्याज । तच्छिरोभ्योऽवप्लुत्याग्रे तस्थावित्यर्थः ॥ ५४ ॥ प्रतिलब्धेति ।। शनकैः प्रतिलब्धानीन्द्रियाणि प्राणाश्च येन सः तथापि कृच्छ्रात् कष्टात् समुच्छ्वसन् ऊर्ध्वंश्वासान् विमुञ्चन् अत एव दीनः कृतः संयोजितोऽञ्जलिर्येन । यद्वा । कृच्छ्रादेव कृतोऽञ्जलिर्येन सर्वाङ्गव्यथावत्त्वान्न दण्डवत्प्रणन्तुं शक्तः स कालियः कृष्णं प्राह स्म ।। ५५ ॥ वयमिति ।। हे नाथ ! वयं सहोत्पत्त्या जन्मनैव खलाः परोद्वेजकाः तामसाः दीर्घमन्यवः महाक्रोधाः अतः स्वभावः सहजो धर्मो दुस्त्यजः लोकानां प्राणिनां यत् यस्मात् स्वभावात् असन् असमीचीनो ग्रहः अहंताममतारूपो देहादावाग्रहो भवति ॥ ५६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अंघ्रिकुट्टनैर्भग्नशिरसं विससर्ज्ज मुमोच ।। ५३ ॥ शनकैः प्राह ।। ५४ ॥ अतोऽस्माभिर्दुस्त्यजः लोकानां जनानां यस्मात् स्वभावादसति देहादावैकग्रहो बंधनमस्तीति यदसद्ग्रहः॥ ५५ ।। हे धातः गुणैः सत्वादिभिर्विविधतया सर्ज्जनमुत्पत्तिर्यस्य तत् अतः नानाविधाः स्वभावादयो यस्य तत् वीर्योजसी शरीरेंद्रियसामर्थ्ये योनिबीजे मातृपितरौ आशयाकृती अंतःकरणदेहौ ।। ५६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

युष्मदनुग्रहेऽन्येषां मृत्युरेवेति चेत्तत्राहुः ॥ विधेहीति ॥ ते तव, किंकरीणामस्माकं, तव आज्ञया, अनुष्ठेयं तत्, विधेहि आज्ञापय । यद्यत्तवानुष्ठेयमित्यर्थः । तत् श्रद्धया, अनुतिष्ठन्नाचरन्नयं कालिय इति शेषः । सर्वतः सर्वस्मात्, भयात्, मुच्यते वै ।

यथा लोका अस्मत्तः भीताः न स्युः, यथा चायं मृत्युभयात् मुच्येत तादृशमनुष्ठेयं आज्ञापयेत्यर्थः ॥ ५३॥ इत्थमिति ॥ इत्थमेवं, भगवान् स कृष्णः, नागपत्नीभिः समभिष्टुतः प्रार्थितः सन्, अङ्घ्रिकुट्टनैः पार्ष्णिप्रहारैः, भग्नशिरसं, मूर्च्छितं च नागं विससर्ज ॥ ५४ ॥ प्रतीति ॥ ततः शनकैः, प्रतिलब्धानीन्द्रियाणि प्राणाश्च येन तथाभूतः कालियः, कृच्छ्रात्, समुच्छ्वसन् श्वासं मुञ्चन् दीनो दीनतां प्राप्तः, कृताञ्जलिः सन्, कृष्णं हरिं सांप्रतं कृष्णावतारमितोऽग्रे हर्यवतारं धरिष्यन्तमेतमेव भगवन्तमित्यर्थः। प्राह ॥ ५५ ॥ तदुक्तिमेवाह त्रिभिः ॥ वयमिति ॥ हे कृष्ण, वयं उत्पत्त्या सह, उत्पत्तित आरम्भेनैवेत्यर्थः खला दुष्टाः, तामसास्तमोगुणप्रधाना, दीर्घो मन्युः क्रोधो येषां तथाभूताः, वयमिति तिर्यग्जात्यभिप्रायेण निर्द्देशः । अत एव 'वयं च तत्र भगवन्' इत्यनेन वक्ष्यमाणेन सह न पौनरुक्त्यम् । हे नाथ, लोकातां स्वभावः दुस्त्यजः । यद्यतो दुष्टस्वभावात्, असति देहादौ ग्रहः आग्रहः, उत्पद्यतेऽतः स दुस्त्यज इत्यर्थः । यद्वा । हे नाथ लोकानां भूतानां, स्वभावः उत्पत्त्या सह संभूतो गुणत्वेन स्वीकृतः स्वभावः, दुस्त्यजः। यद्यतः, स स्वभावः, असद्ग्रहः दुष्टपिशाचतुल्यः, यथा वल्गितः पिशाचोऽनेकोपायैर्दुस्त्यजस्तद्वत् स्वभावोऽपीति भावः ॥ ५६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

इत्थमिति ; १०.१६.५४.

भर्तृक्षेमधिया स्तुतोऽप्यहमिह स्त्रीभिर्न चेज्जीवयाम्येनं तद्भविता दयास्पदपदे नूत्नः कलङ्काङ्कुरः ।
इत्यालोच्य दयानिधिः स भगवांस्तत्प्राणदानोत्सुकश्चक्रे प्राणभृदङ्घ्रिणाऽपसरणं तस्येति युक्तिक्षमम् ॥ ८३ ॥

प्रतिलब्धेति : १०.१६.५५.

सामान्योदकसङ्गमादपि नरस्तप्तः स्वतापोत्करं तत्कालं ह्यवधूय चारु लभते शान्तिं सुखावस्थितिम् ।
या नाम्नैव घ तापपापहृदसौ गङ्गाऽपि यं सर्वदा स्तौत्युत्तापहृतौ तदङ्घ्रियुगहिस्तादृक् सुखीति क्षमम् ॥ ८४॥

वय खला इति : १०.१६.५६.

तमःस्वभावान्वयि मत्प्रवर्तनं विभो न तद्दूषयितुं तव क्षमम् ।
यतः सदा श्रौतपदैस्त्वयैव हि तस्मिन् गुणत्वं समुदोपपादितम् ॥ ८५ ॥

कृष्णप्रिया

हे भगवन् हम तो आप की सेविकायें हैं, इस लिए जो चाहिए सो आज्ञा करें, हम आप जैसी आज्ञा करेंगे वैसा ही पालन करेंगे। नाथ ! आप की आज्ञा के अनुसार जो जीव चलता है वे सर्व प्रकार के भय से मुक्त हो जाता है ॥ ५३ ॥ श्रीशुकाचार्यजीने कहा राजन् ! नागपत्नियों की स्तुति से प्रसन्न हुए पुरुषोत्तम श्रीकृष्णने भग्नमस्तक एवं मूर्च्छित कालीय नाग को अपने चरणों की ठोकर से दूर फेंक दिया ॥ ५४ ॥ जब भगवानने कालीय नाग को पाद प्रहार से कालीय की पत्नियों के पास फेंक दिया तब कालीय को भगवान के पादस्पर्शसे गये हुए आधे प्राण इन्द्रियाँ आदि पुनः मिले, अब चरण स्पर्श की महिमा से वह देव बना फिर धीरे धीरे कण्ठ से उच्छवास लेता हुआ कृताञ्जलि होकर भगवान श्रीकृष्णचन्द्रजी को निवेदन करने लगा ॥ ५५ ॥ कालीयने कहा–हे नाथ ! हम तो जन्म से ही खल हैं, स्वभाव से तमोगुणी हैं, क्रोध से भरे हुये हैं नाथ ! स्वभाव का परिवर्तन सर्वथा कठिन है, क्योंकि लोगों का जो मिथ्या आग्रह है वह स्वभावजन्य है ॥ ५६ ॥

त्वया सृष्टमिदं [1]विश्वं धातर्गुणविसर्जनम् । नानास्वभाववीर्यौजोयोनिबीजाशयाकृति ॥ ५७ ॥
वयं च तत्र भगवन् सर्पा [2]जात्युरुमन्यवः । कथं त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः [3]स्वयम् ॥ ५८ ॥
भवान् हि कारणं तत्र सर्वज्ञो जगदीश्वरः । अनुग्रहं निग्रहं वा मन्यसे तद् विधेहि नः ॥ ५९ ॥

श्रीशुक उवाच

इत्याकर्ण्य वचः प्राह भगवान् कार्यमानुषः । नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरम् ।
[4]स्वज्ञात्यपत्यदाराढ्यो [5]गोनृभिर्भुज्यतां नदी ॥ ६० ॥

---

१. सर्वं धातुर्गुण–वीर.; विश्वं धातुर्गुण विज. । २. जात्योरु–वीर. । ३ मोहितास्तया–वीर ; मोहिताः प्रभो–विज ४ सगात्य–विज. । ५ दाराद्यैर्भुज्यतां गोनृभिर्नदी–वीर. ।

कर्दमक्षमा

अन्वयः—धातः गुणविसर्जनं नानास्वभाववीर्यौजोयोनिबीजाशयाकृति इदं विश्वं त्वया सृष्टम् ॥ ५७ ॥ भगवन् वयं सर्पाः च तत्र जात्युरुमन्यवः स्वयं मोहिताः दुस्त्यजां त्वन्मायां कथं त्यजामः ॥ ५८ ॥ तत्र सर्वज्ञः जगदीश्वरः भवान् हि कारणम् नः अनुग्रहं निग्रहं वा (यत्) मन्यसे तद् विधेहि ॥ ५९ ॥ इत्याकर्ण्य कार्यमानुषः भगवान् वचः प्राह सर्प त्वया अत्र न स्थेय स्वज्ञात्यपत्यदाराढ्यः समुद्रं याहि माचिरम् गोनृभिः नदी भुज्यताम् ॥ ६० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गुणैर्विविधतया सृज्यत इति गुणविसर्जनम् । तत्रापि नानास्वभावादयो यस्य तत् ॥ ५७ ॥ जात्या जन्मनैवोरुर्मन्युर्येषां ते वयं स्वयं कथं त्यजामः ॥ ५८ ॥ हि यस्मात्तत्र त्वन्मायात्यागे भवानेव कारणमित्यनुग्रहं विधेहि ममाज्ञया खादंतीति ईश्वरत्वान्निग्रहं वा विधेहीति ॥ ५९ ॥ यतो गोभिर्नृभिश्च नदी भुज्यत इति ॥ ६० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्रापि गुणविसर्गत्वेपि । नानास्वभावा अग्नेरूर्ध्वज्वलनम् वायोस्तिर्यग्गमनमित्येवमाकाराः । नानावीर्याणि मनुष्येऽयद्धस्तिन्यन्यदित्येवम् । ओजोऽवष्टंभः, बीजं शुक्लादि, आशयोऽभिप्रायः, आकृतिराकार एते नानाविधा यत्र संति तदित्यर्थः ॥ ५७ ॥ तत्र विश्वस्मिन् । त्वन्मायाम् क्रोधादिरूपेण परिणताम् ॥ ५८ ॥ यन्मन्यसे तद्विधेहीति संबधः । अनुग्रहम् प्रसादम् । निग्रहम् दंडम् । सर्वं निजमायावैभवादिकमस्माकं दैन्यादिकञ्च जानासीति सर्वज्ञ इत्यनुग्रहे हेतुः । जगदीश्वर इति, परमस्वतंत्र इति च निग्रहे । तथा च विष्णुपुराणे —'यथाहं भवता सृष्टम्' इत्यादि । यद्वा —सर्वज्ञ इति, निग्रहानुग्रहयोः कारणं वेत्सि, जगदीश्वर इति तयोरेकं विधेहीति । सत्यपि निग्रहकारणेऽनुग्रहमपि कर्तुं समर्थोसीति भावः ॥ ५९ ॥ कार्यमानुषो देवकार्यार्थं धृतनरदेहः । अत्र यमुनाह्रदे । सार्द्धेनान्वयः । कार्यं जगद्धितं तदर्थं स्वेन मानुषरूपेण प्रकटो यो भगवान् । यद्वा – कार्यं क्रीडा लीला तयैव मानुषो न तु तद्वद्भौतिकदेहविशेषत्वेनेत्यर्थः । यद्वा—कार्या निजप्रेमभक्तिविस्तरणादिना संपाद्या मानुषा येन मानुषेष्ववतारेण तेषामेव प्राधान्यात् । अतस्तस्य मूलस्थाने श्रीवृंदावने सर्पाणां स्थितिरनुचितेति भावः । यद्वा–काद्ब्रह्मणोऽप्यार्य्याः पूज्यतमा मानुषाः श्रीनंदादयो यस्य सः एवं तेषां सुखार्थमिति भावः । हे सर्पेति तत्र स्थित्ययोग्यत्वं याने समर्थत्वं चाह ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवाभिव्यञ्जयति–त्वयेति सार्द्धेन । ननु ब्रह्मणा सृज्यते नतु मयेत्याशङ्क्याह, हे धातरिति त्वमेव तद्रूपेण सृजसीति भावः । स्वभावः शान्तत्वादिः वीर्यौजसोर्देहेन्द्रियशक्तिभेदेन भेदः योनिबीजयोर्मातापितृभेदेन आशयो वासना आकृतिः रूपम् ॥५७॥ भगवन् ! सर्वेश्वरेति स्वकर्मणा एव सर्पा इति पक्षो निरस्तः कर्मणामपीश्वरत्वात् तस्मादस्वातन्त्र्येणैवामपराधो जात इति भावः । अतः कथमिति अन्यैरपि दुस्त्यजाम् ॥ ५८ ॥ स्वयं त्यागशक्तौ हेतुः भवानिति त्वया हेतुना एव सा त्याज्या स्यादित्यर्थः । मन्यसे त्वमिच्छसि तमेव विधेहीत्यर्थः । तत्र सर्वं निजमायावैभवादिकमस्माकं च दैन्यादिकं जानासीति सर्वज्ञः इत्यनुग्रहे हेतुः जगदीश्वरः परमस्वतन्त्र इति च निग्रहे तथा च विष्णुपुराणे "यथाहं भवता सृष्टः" इत्यादि अन्यत्तैः । यद्वा, सर्वज्ञ इत्यनुग्रहनिग्रहयोः कारणं वेत्सि जगदीश्वर इति तयोरेकं विधेहीति वाक्यार्थः तत्र च जगदीश्वर इति सत्यपि निग्रहकारणे अनुग्रहमपि कर्त्तुं शक्नोषीति भावः ॥ ५९ ॥ इत्याकर्ण्येत्यर्द्धकम् । मया यदादिश्यते तदनेनावश्यं कार्य्यमिति तदुक्तयभिप्राय ज्ञात्वेत्यर्थः, । कार्य्यं जगद्धितं तदर्थं स्वेन मानुषस्वरूपेण प्रकटो यो भगवान् । यद्वा, कार्यं क्रीडामनुष्यलीलयैव मानुषः । ननु, तद्वद्भौतिकदेहविशेषत्वेनेत्यर्थः । यद्वा, कार्य्याः निजप्रेमभक्तिविस्तारणादिना सम्पाद्या मानुषा येन मानुषेष्ववतारेण तेषामेव प्राधान्यात् अतस्तस्य मूलस्थाने श्रीवृन्दावने सर्पाणां स्थितिरनुचितेति भावः । यद्वा, कात् ब्रह्मणाऽपि आर्याः पूज्यतमा मानुषाः श्रीनन्दादयो यस्य सः एवं तेषां सुखार्थमिति भावः । हे सर्पेति तत्र स्थित्ययोग्यतां याने च शक्ति दर्शयति अत एव स्वस्य ज्ञात्यादिभिर्युक्त इति स्वशब्देन तेषां तादृशदुर्विषमयत्वं तदधीनत्वं च सूचितम् ॥ ६० ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तदेवाभिव्यञ्जयति त्वयेति सार्द्धेन । ननु श्रीब्रह्मणा सृज्यते, न तु मयेत्याशंक्याह-हे धातरिति । त्वमेव तद्रूपेण सृजसीति स्वभावः शान्तत्वादिः, वीर्य्योजसोर्देहेन्द्रियशक्तिभेदेन भेदः, योनिबीजयोश्च मातृत्व-पितृत्वभेदेन, आशयो वासना, आकृतिः रूपम् ॥ ५७ ॥ भगवन् हे सर्व्वेश्वर ! इति स्वकर्म्मणैव सर्पा इति पक्षो निरस्तः–कर्म्मणामपीश्वरत्वात् । यद्वा, हे परमस्वतन्त्र ! इति कर्म्मादिनामपि त्वदधीनत्वान्निजेच्छामात्रेणैव वयमीदृशा विहिताः, तत्र किं वक्तुं वराका वयं शक्नुम इति भावः । यद्वा, हे अनुल्लंघ्यशासन ! इति, अत उरुमन्युमयीं त्वन्मायां कथं त्यक्तुं शक्नुम इत्यर्थः । स्वयमिति यदि तां त्वया त्यज्यामहे, तदेव त्यागः सम्भवतीत्यर्थः । ननु, तत्त्यागाय मद्भजनोपायश्चिन्त्यताम्, तत्राह-मोहितास्त्वन्माययैव, यद्वा, स्वयं तयैव मोहिता इति ॥५८॥

तेदेवाभिव्यञ्जयति–भवानिति । कारणमिति त्वया हेतुनैव सा त्याज्या स्यादिति भावः । मन्यसे यमिच्छसि, तमेव विधेहीत्यर्थः। तत्र सर्व्वं निजमायावैभवादिकमस्माकञ्च दैन्यादिकं जानातीति सर्व्वज्ञ इत्यनुग्रहे हेतुः, जगदीश्वरः परमस्वतंत्र इति च निग्रहे, तथा च श्रीविष्णुपुराणे (५।७।७०) –'यथाहं भवता सृष्टः' इत्यादि । अन्यत्तैर्व्यञ्जितम् । यद्वा, अतस्तत्र महदपराधेऽपि भवानेव कारणम्, लज्जाभयादिनापराध इति व्यक्तं न निर्द्दिष्टम्, तच्च त्वमेव जानासीत्याह–सर्व्वज्ञ इति । किंवा, किमन्यद्वक्तव्यम्, सर्व्वं त्वमेव जानासीत्यर्थः । जगतामीश्वरः, अतोऽयोग्येष्वपि निग्रहं कर्त्तुमर्हसीति भावः । अतो यं मन्यसे कर्त्तुमिच्छसि, तदिति तम्, यद्वा, यदन्यद्वा मन्यसे, तदेवास्मान् प्रति विधेहि, तत्रास्माकमिच्छया किं भवेदिति भावः ॥ ५९ ॥ इत्याकर्ण्येति–मया यदादिश्यते तदनेनावश्यं कार्य्यमिति तदभिप्रायं ज्ञात्वेत्यर्थः । यद्वा, इति ईदृशं दैन्याद्यनुगृहीतं वचः कार्य्यं जगद्धितं तदर्थं मानुषरूपेण प्रकटो यो भगवान्, यद्वा, कार्य्या निजप्रेमभक्तिविस्तारणेन सम्पाद्या मानुषा येन, मनुष्यत्वं हि श्रीभगवत्प्रेमभक्त्यैव सम्पद्यते, अतएव देवानामपि तद्दुर्लभं प्रार्थ्यञ्च पूर्व्वं प्रायः प्रेमभक्त्यभावे न मनुष्यत्वं न वृत्तमिव, अधुना श्रीभगवता तत् सम्पाद्यमित्यर्थः । अतस्तस्य मूलस्थाने श्रीवृन्दावने सर्पाणां स्थितिरनुचितेति भावः । यद्वा, कात् ब्रह्मणोऽपि आर्य्याः पूज्यतमा मानुषाः श्रीनन्दादयो यस्य सः। एवं तेषां सुखार्थमिति भावः । हे सर्प ! इति तत्र स्थित्ययोग्यतां याने शक्तिञ्च दर्शयति । अतएव स्वस्य ज्ञात्यादिभिर्युक्त इति स्वशब्देन तेषां तादृशं दुर्व्विषमयत्वं तदधीनत्वञ्च सूचितम् । त्वमिति पाठेऽपि तस्य महादुष्टत्वादिसूचनेन स एवार्थोऽभिप्रेतः । नदी प्रवाहवती श्रीयमुनेति त्वदवस्थितया लोकानामपकारः स्यादिति भावः ॥ ६०–६१ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वीर्यं बलम् ओजः प्रवृत्तिसामर्थ्यं योनिरुत्पत्तिक्षेत्रम् ॥ ५७–६७ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

त्वयेति । हे धातः ! गुणैर्विविधतया सृज्यत इति गुणविसर्जनमिदं तिरश्चां जालं त्वया सृष्टं, कथम्भूतम् ? नानास्वभावादयो यस्य तथाभूतं तत्र वीर्यं बलमोजः प्रवृत्तिसामर्थ्यं योनिरुत्पत्तिक्षेत्रं बीजं कारणमाकृतिः संस्थानन् ॥५७॥ ततः किमत आह वयञ्चेति । हे भगवन् ! तत्रापि तिरश्चां मध्येपि वयं सर्पाः जात्या जन्मनैवोरुमन्युर्येषां तथाभूताः दुस्त्यजां त्वदनुग्रहमन्तरेण दुःखेनापि त्यक्तुमशक्यां त्वन्मायामोहिताः वयं कथं त्वन्मायां मायागुणरजःकार्यं क्रोधं कथं त्यजामः ? ॥ ५८ ॥ हि यस्मात्तत्र त्वन्मायात्यागे भवानेव कारणं त्वन्तु सर्वज्ञः निग्रहानुग्रहोचितज्ञानवान् जगदीश्वरः तदुचितसामर्थ्ययुक्तः अतस्त्वमनुग्रहं निग्रहं वा यन्मन्यसे त्वमेवं कुर्विति नियन्तुं चाहं च प्रभुरिति भावः । तत्त्वदभिमतं नोऽस्मभ्यं विधेह्याज्ञापय ॥ ५९ ॥ कार्यमानुषः दुष्कृद्दमनसाधुपरित्राणात्मककार्यार्थं मानुषः स्वेच्छोपात्तमनुष्याकृतिरित्थं कालियस्य वच आकर्ण्य प्राह, उक्तमेवाह–नेति चतुर्भिः । हे सर्प ! अत्र ह्रदे त्वया न स्थेयं किन्तु स्वज्ञात्यादिभिः सह माचिरमचिरात् समुद्रं याहि नदी यमुना गोनृभिश्च भुज्यतां पीयताम् ॥ ६० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

धातुर्हिरण्यगर्भस्य सकाशात् गुणभूत सर्जनं सृष्टिरस्य जगतः प्राधान्येन विष्णोरेषा सृष्टिः ''विष्णुः प्रधानतः स्रष्टा गुणस्रष्टा चतुर्मुख इति वचनात् नानास्वभावा अग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनमित्यादिनानाविधाः स्वभावाः वीर्याणि पराक्रमादीनि ओजोऽवष्टम्भः बीजं शुक्रादि आशयोऽभिप्रायः एषामाकृतिः स्वरूपं यस्य तत् ॥ ५७–५९ ॥ देवकार्यार्थं मानुषविडम्बः ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कार्यं क्रीडा मनुष्यलीला तयैव मानुषो न तु तद्वद्भौतिकदेहविशेषत्वेनापीत्यर्थः ॥ ६०–६७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे षोडशोऽध्यायः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं कालिये निःसारिते सद्य एव यमुना शुद्धासीदित्याह–तदैव सेत्यादि । सा यमुना तदैवामृतजलाभवत् । कुतः ? भगवतः श्रीकृष्णस्यानुग्रहात् । भगवत्स्वरूपमाह–क्रीड़ामनुजरूपिणः । क्रिड़ा लीला च मनुजरूपः नराकृतिश्च ते अस्य स्त इति नित्ययो इन्, नित्यलीलो नित्यमनुजाकृतिश्च यस्तस्येत्यर्थः–'नराकृति परं ब्रह्म' इत्याद्युक्तेः । नराकृतित्वम् द्विभुजत्वम् । द्वन्द्वसमासादिषट्के वलयीत्यादिवत् नित्ययोगेऽतिशायने संसर्गे च विवक्षायां मत्वाद्वयो भवन्त्यमी' ति दुर्गः ॥ ५८ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे षोडशोऽध्यायः

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यतो गुणैर्विविधं सर्जनं सृष्टिर्यत्र तत् विविधत्वमाह–नानास्वभावादयो यस्य तत् ॥५७॥ जात्या जन्मनैव बहुकोपाः ॥५८॥ तत्र मायात्यागे ॥ ५९ ॥ कार्येषु ब्रह्मरुद्रादिदुष्करेष्वपि कालियनिग्रहादिकर्मसु मानुषः एव न तु तत्तत्कृत्यसमुचितचक्रपाण्यादिरूप इत्यर्थः । यद्वा, कार्य्यं क्रीडा लीला तेनैव मानुषः लीलामयमानुषस्वरूप इत्यर्थः । यद्वा, कस्य ब्रह्मणोऽप्यार्यश्चासौ मानुषश्चेति सः। यद्वा, कार्य्यं मानुषस्येव यस्य सः, यतो गोभिर्नृभिश्च नदी भुज्यते तटप्रवाहगतघासपत्रफलजलानां भोगौचित्यात् ॥ ६० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे धातः ! इदं विश्वं त्वयैव सृष्टम् कथम्भूतं सत्त्वादिभिः स्वशक्तिगुणैः विविधतया सृज्यते इति गुणविसर्जनं तत्रापि नाना स्वभावादयो यस्य तत् ॥ ५७–५८ ॥ यन्मन्यसे तन्नोऽस्मभ्यं विधेहि ॥ ५९ ॥ कार्यार्थं मनुष्यलोको यस्य सः भूभारहरणाद्यर्थं मनुष्यलोकेऽवतीर्ण इत्यर्थः ॥ ६०–६६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

गुणैस्त्वदधीनैर्विविधतया सृज्यत इति गुणविसर्जनमिदं विश्वं तत्रापि नानास्वभावादयो यस्य तत्; स्वभावः शान्तत्वादिः वीर्यौजसोः शरीरेन्द्रियशक्तिभेदाद्भेदः योनिबीजयोस्तु मातापितृभेदात् आशयो वासना आकृतिः रूपम् ॥ ५७ ॥ जात्या जन्मनैवोरुर्महान् मन्युर्येषां ते स्वयम् कथम् त्यजामः ॥ ५८ ॥ तत्र मायात्यागे ॥ ५९ ॥ इत्याकर्ण्येत्यर्द्धकम् । मदुक्तमयं करिष्यत्येवेति तदुक्तिभावं विज्ञातेत्यर्थः । कार्यं लीलामानुषेषु यस्य सः तेषां सुखायेति भावः । यद्वा कार्याः स्वप्रेमवैशिष्ट्येन सम्पाद्य मानुषा येन सः तेष्ववतारेण तेषामेव प्राधान्यात् ॥ ६० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्वया सृष्टमिदं विश्वमिति श्लोके धातुर्गुणविसर्जनमित्यनूद्य व्याख्याय मानमुदाहरति । धातुरिति । धातुर्हिरण्यगर्भस्य सकाशाद्गुणभूता सृष्टिरस्य जगतः । तावकीना तु प्रधानसृष्टिरित्याह ॥ प्राधान्येन विष्णोरेवेति । विष्णुः प्रधानतो मुख्यतया स्रष्टा सृष्टिकर्ता चतुर्मुखो गुणकर्ता ॥ ततश्च श्लोकार्थः ॥ इदं विश्वं त्वया सृष्टं मुख्यतो धातुर्गुणरूपं विसर्जनं यस्य तत् । अर्थमाह ॥ नानेति । नानास्वभावा जलादीनां स्पन्दनादयो वीर्यं विलक्षणकार्यजननसामर्थ्यमोजोऽवष्टम्भो योनिर्बीजं रक्तशुक्लादिराशयोऽभिप्रायो येषामाकृतिः स्वरूपं यस्य तत् ॥ ५७ ॥ तत्राप्येवंविधे प्रपञ्चे वयं सर्पजातय इत्युरुमन्यो बहुकोपा यया मोहिता वयं दुस्त्यजां तां त्वन्मायां कथं त्यजामः ॥ ५८ ॥ तर्हि न कदाऽपि मोहापवाह इत्यत आह ॥ भवानिति । तत्रैतन्मोहापोहे भवान्कारणमनुग्रहं वा निग्रहं वेति यन्मन्यसे तन्नो विधेहि ॥ ५९ ॥ कार्यार्थं मानुषोऽवतार इति स तथा आज्ञापयति ॥ नेति ॥ ६० ॥

श्रीसुबोधिनी

अस्माकमेवम्र त्वे भवानेव हेतुरित्याह त्वया **सृष्टमिति** समुदायजननान् न दोषः, ब्रह्मणा सृष्टमित्याशङ्क्याह धातरिति, त्वमेव विधाता, ननु भगवत्कार्यं कथमेतादृशं ? तत्राह **गुणानां** विशेषेण **सर्जनं** यत्र, तत्रैविध्यं सर्वत्रैव सम्बध्यत इति भेदान् गणयति, **नानाविधाः स्वभावादयो** यस्मिन्निति, **स्वभावः** प्रकृतिधर्मो जीवगतः, **वीर्यं**मिन्द्रियधर्मः, **ओजः** प्राणधर्मः, **योनि**र्मातृधर्मः, **बीजं** पितृधर्मः, **आशयो**न्तःकरणस्य, एते सर्व एव **नानाविधाः**, प्रत्येकसमुदायाभ्यामनेकविधा भवन्ति, अत एव नानात्वं वैचित्र्यं च ॥ ५७ ॥ अस्माकं तु सर्वमेव तामसमित्याह **वय**मिति, चस्त्वर्थे, भौतिकाग्न्यादीनामपि सङ्ग्रहार्थं च तत्र सृष्टौ भगवन्निति सम्बोधनं ज्ञानार्थं, **सर्पा जात्यैव उरुमन्यवः**, जातिस्वभावौ दुष्टौ निरूपितौ, **गुणातीतावस्थया सात्त्विकावस्थया वा मायापरित्यागो** भवति, **सर्पाणां क्रोधवशानां च न तत् सम्भवति,** अतः **कथं त्वन्मायां त्यजामः ?** ननु दोषपरिज्ञाने कथं न त्यागः ? तत्राह दुस्त्यजामिति, **त्वदीया मायास्मत्कृतैरुपायैः सर्वथा दुस्त्यजा**, तर्हि त्यागार्थं भगवानेव किं न प्रार्थ्यते ? तत्राह **मोहिताः स्वयमिति, स्वयमेव मोहिताः**, आत्मैव विमोहितः, अतः स्वहितापरिज्ञानात् त्यागार्थमपि न प्रयत्न इत्यर्थः ॥ ५८ ॥ तर्ह्यवश्यं भवद्भ्यो दोषोत्पत्तिसम्भवान् मारणीया एव भवन्त इति चेत् तत्राह **भवान् हि कारण**मिति अस्माकमेवम्भावे **भवानेव कारणं** "बुद्धिर्ज्ञानम**सम्मोह"** इत्यादिवाक्यान्यत्र प्रमाणमिति हिशब्द आह, एवं सति तत्रानुग्रहं **निग्रहं** वा यदुचितं तन्नोऽस्मभ्य **विधेहि, अपराधः कृत इति निग्रहः कर्तव्यस्त्वया कारित इत्यनुग्रहः कर्तव्यः,** ननु विरोधे शास्त्रार्थः को वा भवेत् ? **यद्यनेन दण्डः कृतः स्यात् त्वयानुग्रहः कर्तव्य इति तूचितं** अथ **भवानेव सर्वरूपस्तदा निग्रहस्य कृतत्वादनुग्रहः** कर्तव्यः, अथ निग्रहोनुग्रहश्च कृतावाहोस्विन्न कृतावेतदुभयं सर्वज्ञत्वाद् भवानेव जानाति, अतो यन् **मन्यसे तद् विधेहि**, शक्त्यभावस्तु तव नास्तीत्याह **जगदीश्वर** इति ॥ ५९ ॥ एवं श्रुत्वा यत् कृतं भगवता तदाहे**त्याकर्ण्य**ति वच एव श्रुतमर्थस्तु पूर्वमेव परिज्ञातः, यद्यपि प्रसादः कर्तव्यः स्वकृतत्वात् पूर्वभावस्य स्तुतत्वाच्च तथापि समयानुरोधेन प्रसादोन्यथा कर्तव्य इति ज्ञापनार्थमाह कार्यमानुष इति, यत्र **कार्यार्थ**मयुक्तं **मानुष**भावमपि प्रदर्शयति तत्रास्य भक्तस्यापि प्रसादान्यथाकरणं किं वक्तव्यं ? न च तस्य बाधकशङ्कयान्यथा करोतीति शङ्कनीयं यतो भगवानाज्ञापयति, हे **सर्प** गमनसमर्थ, **अत्र त्वया न स्थेयं समुद्रं गच्छ चिरं** माज्ञात्रयं गमने प्रकारमाह **स्वज्ञात्यपत्यदाराढ्य** इति **ज्ञातयो** ज्ञातीया **अपत्यानि दाराश्च** तैराढ्य इति, क्वापि तव स्थितौ न कोपि प्रयास इति सूचितं, इतो गमने हेतुमाह **गोनृभिर्भुज्यतां नदी**ति अनेन त्वया नदी दूषितेति तस्याधिको दोषो निरूपितः ॥ ६० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

त्रयोदशेऽध्याये प्रकरणतात्पर्योक्तौ, परीक्षैवेन्द्रियाणामित्यादि । ननु कालीयस्य भक्तापराधित्वेन निग्रह उचितः । तं नागभोगेत्यादिनोक्तलीला त्वयुक्ता, उत्पाताश्चानुपपन्नाः वस्तुतो हेत्वभावादित्याशङ्क्य तत्तात्पर्यमाहुः परीक्षेत्यादिना । कृतो निरोधः सम्पन्नो न वेति परीक्षैवास्मिन्नध्याये निरूप्यत इत्यर्थः । अवोपपत्ति वदन्त एव तं नागभोगेत्यादितात्पर्यमाहुः इन्द्रियाणां हीति । हि यस्माद्धेतोस्तन्निग्रहं परीक्षार्थं हरिः कुरुते इति सम्बन्धः । मृत्योरप्यधिकपीडाजनको दण्डो निग्रहशब्देनोच्यते । भगवता स्वेन्द्रियकार्याप्रकटनमात्रमेव गोकुलवासिनां तादृशं पूर्णे निरोधे भवन्नान्यथेति तज्ज्ञापनार्थं तथात्मानं प्रदर्शितवानित्यर्थः । उत्पातोपपत्तिमाहुः ततो देव इति । देवपदेनाधिदेवरूपः काल उच्यते । स च भगवद्रूपः स्वयमाध्यात्मिकाधिभौतिकौ प्रेरितवानित्यर्थः । अत एव त्रिविधा इत्युक्तम् । पुरुषाय महात्मन इत्यस्याभासे, ततः सर्वोत्तमोपीत्यादि । यद्यपि सर्वोत्तमस्तथाप्ययं नन्दगेहे जातो, न तु नृसिंहवत्स्वयमेव प्रकटः । तथा च जननं गर्भादिसापेक्षमिति पुरुषोत्तमत्वमनुपपन्नं स्यादिति तदभावाय पुरुषोत्तमत्वं पदद्वयेनोपपादयतीत्यर्थः ॥ ५० ॥ अपराधः सकृद् भर्त्रेत्यत्र, यद्यपीत्यादि । पालकत्वेन साम्प्रतं सात्त्विकेष्वेव कृपा, न राजसतामसयोरतस्तयोः स्वकार्यकरणेऽनवसर इति तत्करणमपराधस्तथापि तयोरपि भवानेव पतिरिति सोढव्य इत्यर्थः ॥ ५१ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

त्वया सृष्टमित्यत्र नन्वेङ्कृतौ वैषम्यदोषापत्तिरिति तत्परिहारमाहुः समुदायजननान् न दोष इति सदसतोः समुदायस्यैकदेव जननात् तद्विभागाभावेनादोष इत्यर्थः, पूर्वमेकविधं सृष्ट्वा पश्चात् तत्रान्यथाकरणे हि तत् स्यादिति भावः ॥ ५७ ॥ आकर्ण्येत्यत्र प्रसादः कर्तव्य इति प्रसादः स्वधर्माविष्करणपूर्वकं स्थापनं, अन्यथा कर्तव्य इत्यन्यथा कृतिस्तथा कृत्वान्यत्र स्थापनं, ननु भगवत्स्थापितत्वाद् गरुडोत्र समयास्यतीत्यस्य बाधकशङ्कयायमन्यत्र प्रेषितो न तु कार्यमानुषत्वादित्याशङ्कायामाहुर्न चेत्यादि, यस्मादाज्ञापयत्यतः कार्यार्थमेव निस्सारणं न तु गारुडशङ्काभावार्थं तन्निवृत्तिः प्रकारान्तरेणापि निवृत्तत्वात् ॥ ६० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

इत्याकर्ण्येत्यस्याभासे यत्कृतमिति प्रकारान्तरेण प्रसादः कृत इति सार्धचतुष्टयश्लोकवाक्यार्थ उक्तः, एतद्वाक्यार्थस्त्वाज्ञात्रयकथनमुपसंहारे वक्ष्यते, व्याख्याने, वच एवेति अर्थस्य पूर्वमेव ज्ञातत्वान् न वाक्यत्वमिति भावः स्वकृतत्वादिति तदपराधं विना तत्सदनाभिभवस्य स्वत एव कृतत्वादित्यर्थः, पूर्वभावस्येति सृष्टिभावस्येत्यर्थः, अन्यथेति अत्र स्थापनप्रकारादन्येन प्रकारेण समुद्रे स्थापयित्वा गरुडभयाभावसम्पादनेनेत्यर्थः ॥ ६० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे धातः पितः ! गुणैर्विविधप्रकारेण सृज्यते इति गुणविसर्जनमिदं विश्वं त्वया सृष्टम् । तद्विश्वमेव विशिनष्टि—नानास्वभावादयो यस्य तत् । तत्र स्वभावः—शान्तत्वघोरत्वादिः, वीर्यम् - देहशक्तिः, ओजः - इन्द्रियशक्तिः, योनिः—मातृशक्तिः, बीजं शुक्रम् - पितृशक्तिः, आशयः - वासना, आकृतिः— स्वरूपम् ॥ ५७ ॥ तत्र तस्मिश्च वयं जात्या जन्मनैव उरुर्मन्युः क्रोधो येषां ते तथाभूताः सर्पाः । अतो हे भगवन् सर्वेश्वर ! दुस्त्यजां ब्रह्मादिभिरपि दुर्जयां त्वन्मायां तया मोहिताः स्वयं भवदनुग्रहमन्तरेण कथं त्यजाम इत्यन्वयः ॥ ५८ ॥ हिशब्दोऽवधारणे । तत्र शान्तत्वघोरत्वादिस्वभावे भवानेव कारणम्, यतो जगदीश्वरः । अतो यदि 'मत्प्रयुक्तस्वभावादेते अशुभं कुर्वन्ति' इति, 'नैषामपराध' इति च मन्यसे तर्ह्यनुग्रहं विधेहि यदि च 'एते स्वतन्त्रा अपराधिन एव' इति मन्यसे तर्हि नो निग्रहं दण्डं विधेहि सम्पादय । 'अविदितं च तव किञ्चिन्नास्त्येव, किं बहु वक्तव्यम्' इत्याशयेनाह–सर्वज्ञ इति ॥ ५९ ॥ कार्यमानुषः कार्यार्थमविद्याकामकर्मभिः, संसारे भ्राम्यमाणानामुद्धारार्थं श्रवणादियोग्यलीलाकरणार्थं मानुषतया प्रतीयमानः, वस्तुतस्तु भगवान् अनभिभूतैश्वर्यादिगुण एव श्रीकृष्णस्तस्य कालियस्य तत्पत्नीनां च इत्येवं निष्कपटं वच आकर्ण्य श्रुत्वा प्राह । तद्वचनमाह–हे सर्प ! यतो गोभिर्नृभिश्च नदी यमुना भुज्यते, अतस्त्वया विषधरेणात्र नद्यां न स्थेयम्, मा चिर शीघ्रमेव स्वज्ञातरपत्यदारैराढ्यो युक्तस्त्वं समुद्रं समुद्रमध्यस्थं रमणकं द्वीपं याहीत्यन्वयः ॥ ६० ॥

अन्वितार्थप्रकाशिका

त्वयेति ॥ हे धातः ! नानाविधः स्वभावः शान्तघोरत्वादिः वीर्यं देहशक्तिः ओजः इन्द्रियशक्तिः योनिर्मातृशक्तिः बीजं शुक्रं पितृशक्तिः आशयो वासना आकृतिः स्वरूपं यस्य तत् गुणैर्विविधप्रकारेण सृज्यत इति गुणविसर्जनमिदं विश्वं त्वया सृष्टम् ॥ ५७ ॥ वयमिति ॥ तत्र तस्मिश्च वयं जात्या जन्मनैव उरुर्मन्युर्येषां ते तथाभूताः सर्पाः स्मः अतो हे भगवन् ! दुस्त्यज ब्रह्मादिभिरपि दुर्जयां त्वन्मायां तया मोहिताः स्वयं भवदनुग्रहमन्तरेण कथं त्यजामः ॥ ५८ ॥ भवानिति ॥ तत्र घोरत्वादिस्वभावे सर्वज्ञो जगदीश्वरश्च भवानेव कारणम् । अतो यदि अस्मान्परतन्त्रान्मन्यसे तदा नोऽस्माकमनुग्रहं विधेहि । यदि स्वतन्त्रान्मन्यसे

तदा निग्रहं दण्डं विधेहि ॥ ५९ ॥ इतीति सार्द्धम् ॥ कार्यार्थं मानुषरूपो भगवान् इत्येवं कालियवचनमाकर्ण्य प्राह स्म । हे सर्प ! यतो गोभिर्नृभिश्च नदी यमुना भुज्यते । भुज्यतामित्यपि पाठः अतस्त्वया विषधरेणात्र नदीसमीपे ह्रदे न स्थयम् । मा चिरं शीघ्रमेव स्वज्ञात्यपत्यदारैराढ्यो युक्तस्त्वं समुद्रं समुद्रमध्यस्थं रमणकं द्वीपं याहि ॥ ६० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सर्पस्य जात्या जन्मनैव उरुर्बहुर्मन्युर्येषां ते त्वन्मायां दुष्टस्वभावरूपां ॥ ५७ ॥ यन्मन्यसे तद्विधेहि कुरु ॥ ५८ ॥ आकर्ण्य श्रुत्वा कार्यमानुषः ब्रह्मादिप्रार्थितभूभारहरणादिकार्याय मानुषत्वं यस्य सः स्वज्ञात्यादियुक्तः याहि गच्छ विलंबं मा कुरु यतो गोनृभिः नदी भुज्यतां नदीजलं उपभुज्यते इत्यर्थः ॥ ५९ ॥ तुभ्यं मदनुशासनं त्वयि कृतां मम शिक्षामित्यर्थः ॥ ६० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त्वयेति ॥ हे धातः, गुणैः सत्त्वादिभिः विविधतया सृजते इति गुणविसर्जनं, इदं तिरश्चां जालरूपं, विश्वं, नानास्वभाववीर्यौजोयोनिबीजाशयाकृति यथा तथा, त्वया सृष्टं भवति । तत्र अग्नेरूद्ध्र्वज्वलनं वायोस्तिर्यक् गमनमित्यादयो नानाविधाः स्वभावाः वीर्यं बलं, ओजः प्रवृत्तिसामर्थ्यं, योनिरुत्पत्तिक्षेत्रं, बीजं कारणं शुक्रादिर्वा, आशयोऽभिप्रायः, आकृतिः स्थानं, अत्र श्रीगोपालानन्दस्वामिचरणास्तु वीर्यौजसी शरीरेन्द्रियसामर्थ्ये, योनिबीजे मातृपितरौ, आशयाकृती अन्तःकरणदेहौ इत्याहुः ॥ ५७ ॥ ततः किमत आह ॥ वयं चेति ॥ हे भगवन्, तत्र च तिरश्चां मध्येऽपि, वयं जात्या जन्मनैव उरुरधिकः मन्युः क्रोधो येषां तथाभूताः, मोहितास्त्वन्माययैवं संप्राप्तमोहाः, सर्पाः स्वयं, दुस्त्यजां त्वदनुग्रहमन्तरेण स्वतः दुःखेनापि त्यक्तुमशक्यामित्यर्थः । त्वन्मायां त्वन्मायागुणकार्यं क्रोधं, कथं त्यजामः ॥ ५८ ॥ भवानिति ॥ हि यस्मात्, तत्र मायात्यागे, सर्वज्ञः निग्रहानुग्रहोचितज्ञानवान्, जगदीश्वरः जगन्नियमनोचितसामर्थ्ययुक्तः, भवांस्त्वमेव, कारणं अस्ति । अतः, अनुग्रहं निग्रहं वा, यत् मन्यसे, तत्त्वदभिमतं, नोऽस्मभ्यं, विधेहि त्वमेवं कुर्वित्याज्ञापयेत्यर्थः ॥ ५९ ॥ इतीति ॥ य इति ॥ कार्यं दुष्टदमनसाधुपरित्राणात्मककर्तव्यार्थसंपादनं तदर्थं मानुषः स्वेच्छोपात्तमानुषाकृतिः, भगवान् श्रीकृष्णः, इत्युक्तप्रकारं, वचः कालियस्य वचनं, आकर्ण्य प्राह । स यदाह तदाह चतुर्भिः । हे सर्प त्वया अत्र ह्रदे, न स्थेयम् । किं तु स्वज्ञात्यपत्यदाराढ्यः ज्ञात्यादिभिः सहेत्यर्थः । समुद्रं याहि, चिरं मा विलम्बो न कार्य इत्यर्थः । नदी यमुना, गोनृभिश्च, भुज्यतां पीयतामित्यर्थः । तुभ्यं मदनुशासनं मत्कर्तृक त्वद्दण्डतात्मकमित्यर्थः । एतत् चरित्रं, यः मर्त्यः पुमान्, उभयोः संध्योः संध्ययोः संस्मरेत्, स्मृत्वा च कीर्त्तयन् भवेत्, स संस्मर्त्ता कीर्त्तयिता चेत्यर्थः । युष्मद्भयं सर्पदंशजमृत्यतो भीतिमित्यर्थः । न आप्नुयात् । इत्याज्ञान्तरम् । इति सार्द्धद्वयश्लोकस्यैकान्वयः ॥ ६०-६१ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

त्वयेति : १०.१६.५७.

यदि मत्प्रकृतिं निरीक्ष्य रोषस्तव चेतस्युदितस्तथा ममापि । त्वयि तादृशयोनिदानकर्तर्यपि रोषो भविता कथं न विष्णो ॥ ८६ ॥

त्वत्प्रियोदरविहारवत्यपि रोषमेषि यदि मय्यनागसि । तद्वदेश किमपत्यरक्षणप्रेमता भुवि निराश्रयाऽजनि ॥ ८७ ॥

तार्क्ष्यपक्षमनुलक्ष्य शिक्षितः कालियो भगवतेति दुर्यशः । नार्जयेश करुणानिधे यतः शत्रुमित्रसमदृक् त्वमाश्रुतः ॥ ८८ ॥

त्वत्सृष्टजात्यर्हगुणानुरोधादनुष्ठितं नाथ मया त्विदानीम् । त्वं निग्रहानुग्रहयोः समर्थो यथेच्छमस्मिन् मयि यद्विधेहि ॥ ८९ ॥

या नाद्याप्यसुहृत्पदार्थमवनौ जानाति कोपाङ्कुरो यस्यां नाप्युदितो यया न विदितः स्वप्नेऽप्युपेक्षाविधिः ।
नानादीनजनावनैकनिपुणां तां ते दयाब्धे दयां स्तोतुं के जडजातसंभ्रमजुषः श्रुत्यङ्गहीना वयम् ॥ ९० ॥

सदयस्य हरेरनुग्रहे सति दोषोऽपि गुणाधिकेष्टदः । अपि वेदविनिन्दितं तमो यदहेरीशपदाप्तिसौख्यदम् ॥ ९१ ॥

समुद्रं याहीति : १०.१६.६०.

स्वभावश्चेत्त्यक्तो जनुरनुगतो विध्यभिहितं विपर्यस्तं शास्त्रं जगति भवितेत्यत्र वदतः ।
तवावासः कृष्णाजलममृत मेतद्द्वयमहे कथं स्यात्तस्मात्त्वं व्रजजलधिमाप्तैः परिवृतः ॥ ९२ ॥

कृष्णप्रिया

हे विश्वविधाता ! तीन गुणों से विविध प्रकार का यह विश्व आपने एक साथ ही रचा है इस विश्व के प्रकृति धर्म स्वभाव, वीर्य-इन्द्रिय धर्म, ओजः-प्राणधर्म, योनि-मातृधर्म, बीज-पितृधर्म, आशय अन्तकरणधर्म, आकृति-आकार ये सब भिन्न भिन्न ही हैं ॥ ५७ । हे भगवन् ! इस में हम सर्पजाति के जीव, जन्म से ही बडे क्रोधी हैं एवं हम अपने आप मोह को प्राप्त हुए हैं ऐसे क्रोधी और मोहवश हम आप की ज्ञानी जनों के लिये भी दुस्त्यज माया को कैसे छोडे ॥ ५८ ॥ हे नाथ ! क्रोधादि दोषों से भरे हम लोगों की उत्पत्ति में भी कारण आप सर्वज्ञ जगदीश्वर हैं। फिर भी आप हम पर अनुग्रह-कृपा अथवा

निग्रह दण्ड जो योग्य हो वह आप कीजिए ॥ ५९ ॥ श्रीशुकाचार्यजीने कहा राजन् ! भगवान् तो मनुष्य नहीं हैं लेकिन कार्य करने के लिए मानुष आकृति को धारण करने वाले भगवान् श्रीकृष्णने केवल कालीय के वचन सुने, अर्थ तो जानते थे उस पर ध्यान देने का प्रयोजन नहीं था । कालीय भक्त है इस लिए स्तुति वचन सुन लिये, पुनः भगवानने तीन आज्ञा की कि कालीय ? तुम यहाँ मत रहो, तुम्हारे जाति जन पत्नी पुत्र आदि परिवार को लेकर विना विलम्ब समुद्र की ओर प्रस्थान कर जाओ और रमणद्वीप में निवास करो और यहाँ पर श्रीयमुनाजीका निर्मल जल का यहाँ पशु पक्षी गोवृन्द एवं मनुष्यादि सेवन करें ॥ ६० ॥

य एतत् संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनम् । कीर्तयन्नुभयोः सन्ध्योर्न युष्मद् भयमाप्नुयात् ॥ ६१ ॥
[1]अस्मिन् स्नात्वा [2]मदाक्रीडे देवादींस्तर्पयेज्जलैः । उपोष्य मां स्मरन्नर्चेत् सर्वपापैः प्रमुच्यते ॥ ६२ ॥
द्वीपं रमणकं हित्वा ह्रदमेतदुपाश्रितः[3] । यद्भयात् स सुपर्णस्त्वां नाद्यान्मत्पादलाञ्छितम्[4] ॥ ६३ ॥

श्रीशुक[5] उवाच

[6]मुक्तो भगवता राजन् कृष्णेनाद्भुतकर्मणा । तं पूजयामास [7]मुदा [8]नागपत्न्यश्च सादरम् ॥ ६४ ॥

कृष्णप्रिया

अन्वयः— यः मर्त्यः एतत् तुभ्यं मदनुशासनम् उभयोः संध्योः संस्मरेत् कीर्तयन् युष्मद् भयं न आप्नुयात् ॥ ६१ ॥ (यः) मदाक्रीडे अस्मिन् स्नात्वा यज्जलैः देवादीन् तर्पयन् उपोष्य मां स्मरन् अर्चेत् (सः) सर्वपापैः प्रमुच्यते ॥ ६२ ॥ यद्भयात् रमणकं हित्वा एतद् ह्रदम् उपाश्रितः सः सुपर्णः मत्पादलाञ्छितं त्वां न अद्यात् ॥ ६३ ॥ राजन् अद्भुतकर्मणा भगवता कृष्णेन मुक्तः (सः) नागपत्न्यः च सादरं मुदा तं पूजयामास ॥ ६४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

न युष्मत्तो भयमाप्नुयात् तस्य युष्माभिर्भयं नोत्पादनीयमित्याज्ञा ॥ इतोऽपि त्वया निर्गंतव्यमित्याह । योऽस्मिन्निति त्वयि स्थिते तन्न संभवतीति भावः ॥ ६१-६२ ॥ न च तव गरुडभयं भवेदित्याह । द्वीपमिति ॥ ६३—६७ ॥

इति श्रीमद्भागवते महापुराणे दशमे पूर्वार्धे टीकायां षोडशोऽध्यायः ॥ १५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वशब्देन तेषां तादृशदुर्विषमयत्वं तदधीनत्वं च सूचितम् यतो गवादिभिर्भुज्यते न तु सर्पैरतस्त्वं याहीति पूर्वेण संबंधः । मत्तोऽनुशासनं शिक्षा दंडोऽयत्राध्याये तं मदनुशासनम् । संध्योः सन्ध्ययोः । सायं प्रातरित्यर्थः । तव पादस्पर्शे मम च दंडे इत्यावयोः कीर्तिराचंद्रार्कं स्थास्यतीत्याह य इति न युष्मद्भयमाप्नुयादिति तेन पद्यद्वयमिदं सर्पोच्चाटनमंत्र एव ज्ञेयः । तथा चर्ग्वेदस्थ मंत्रांतरम् "यमुना ह्रदे हि सो यातो यो नारायणवाहनः । यदि कालिकदंतस्य यदि काकालिकाद्भयम् ॥ जन्मभूमिपरिक्रान्तो निर्विषो याति कालिकः ।" इति ॥ इतोऽप्यस्मादपि हेतोः । ममासमंतात् क्रीडा यत्र तस्मिन् ह्रदे । आदिना ऋषिपित्रादयो ज्ञेयाः । इति भाव इति । तवात्र स्थितौ पूर्ववत्कोऽपि नायास्यति स्नानादि तु दूरापास्तमित्यर्थः ॥ ६१-६२ ॥ तस्य भयाभावं द्योतयति न चेति । यस्य सुपर्णस्य भयात् । नाद्यान्मा भक्षिष्यति, अपि तु मत्पादचिन्हं दृष्ट्वा नंस्यतीति भावः ॥ ६३ ॥ एवमुक्तो नाद्यादित्येवमुक्तः । तं श्रीकृष्णम् । अद्भुतकर्मणेति । कालियाद्व्रजस्थजीवस्य त्राणं कालियस्यापि गरुडात्त्राणमिति हिंस्यहिंसकयोरुभयोरपि कल्याणमित्यद्भुतं कर्म । कृष्णेनेति स्वभक्तगरुडापराधस्य स्वप्रियव्रजस्थजीवापराधस्य च कर्षणं परमभक्तकालियपत्नीप्रीत्यनुरोधात्कृतमिति भावः । सादरमिति । हे प्रभो दुष्टतायाः परमावधिरूपे मयि कृपायाः परमावधिरर्पितस्त्वया प्रकृताप्राकृतलोकेषु मदन्यः कोऽपि ध्वजवज्राङ्कुशादिचिह्नानि स्वमूर्ध्नि न धत्ते, तदहं साम्प्रतं श्रीमदङ्गानि मद्दत्तदंशोत्थविषतापतप्तानि सुगन्धशीतलचन्दनरसेन सस्त्रीक एव पाणिभिः स्पृशन् लिम्पानि, ततोऽत्र दिव्यासने क्षणमुपविशेत्युपवेश्य स्वाभीष्टं पूरयित्वा लब्धभगवत्प्रसादो निर्जगामेत्याह-दिव्येति सार्द्धद्वयेन ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्वां प्रति मदनुशासनं नाऽत्र स्थेयमित्यादिलक्षणमपि अस्तु तावदत्र क्रीडादिकं सन्ध्योः सन्ध्ययोः कीर्त्तयन् यः स्मरेत् तदेवं नात्रेत्यादिपद्यद्वयं सर्पोच्चाटने मन्त्र एव ज्ञेयः तथा च ऋग्वेदस्थमन्त्रान्तरं "यमुनाह्रदे हि सो जातो यो नारायणवाहनः । यदि कालिकदूतस्य यदि काः कालिकाद्भयं । जन्यभूमिपरिक्रान्तो निर्विषो याति कालिकः" इति ॥ ६१ ॥ जलैस्तर्पयेदिति विषा-

---

[1] योऽस्यां स्नात्वा महानद्यां देवा-गो. प्रे. टी. । [2] ममाक्रीडे-विज.; ह्रदे मर्त्यो-च. पु. टी. । [3] मुपाश्रितः-श्रीधर. वंशी. वीर. विज. । [4] लाञ्छनं-वीर. विज. । [5] ऋषिरुवाच-गो. प्रे. टी. । [6] एवमुक्तो भगवता कृष्णे-श्रीधर. वंशी.; एवमुक्तो भगवता राजन्नद्भुतकर्मणा-इति कस्यचित् । [7] तदा-वीर. । [8] नागः पत्नीभिरादरम्-च. पु. टी. ।

पगमः सूचितः उपोष्य तीर्थोपवासं कृत्वा मां चिन्तयन् अर्चयेत् स सर्वैस्त्रिविधैः पापैः प्रकर्षेण वासनाराहित्येन मुच्यते ॥ ६२ ॥ रमयतीति रमणं संज्ञायां कन् इति सुखकारित्वं एतच्च तत्प्रोत्साहनार्थम् एतं किञ्चिदधिकयोजनमात्रं तद्द्वीपात् प्रमाणेन स्वल्पतरमित्यर्थः। उपाश्रित इति नित्यावासत्वं निरस्तं नाद्यात् नात्तुं शक्नुयात् यतः मत्पादेति तच्च पूर्वमेव नृत्यगतिविलासेन किम्वाऽधुनैव प्रसादीकृतम् ॥ ६३ ॥ मुक्त इति विससर्जेत्यस्यानुवादमात्रं एवमुक्तो भगवतेति वा पाठः अद्भुतकर्मणेति निजपूर्वसुखवसतिस्थानं प्राप यद्भूयात् तत्स्थानं तत्याज तस्यात्तदपगं विशेषतश्च श्रीवैष्णवाग्रस्य तस्य सख्यं सम्मान्यत्वं च श्रीभगवत्पादाब्जचिह्नतो जातं ब्रह्मादिसेव्यलक्ष्मीं प्रार्थ्यतत्पादाब्जरेणुभिस्तादृशनृत्यलीलया च पर्याचिताः सर्वे मूर्द्धानः सफला बभूवुः श्रीब्रह्माद्यपेक्ष्यं श्रीभगवदनुशासनं लब्धं तेन च साक्षात्तन्मधुरवचनामृतं पीतं पश्चात् परमभक्तवत्पूजादिकं च कृतमितीत्थं बाहुदृष्ट्या निग्रहस्याप्यनुग्रहविशेषत्वे क्रोधस्यापि परमप्रसादत्व एव पर्यवसानात् अपि च तादृशापराधिनोऽपि तत्र दमितस्यैव सता हृदा शरणागतिमात्रेण तादृशानुग्रहात् "चलसि यद्व्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ते पदम्" इत्यादिगीयमानपरमसौकुमार्यश्रीपादाब्जस्पर्शेन रत्ननिकराचिततन्मूर्द्धवर्गचूर्णनात् तादृशैश्वर्यप्रकटनसमये मुनिसिद्धादिश्रीगोपादिसाक्षादेव महानृत्यकौतुकात् तत्रापि परिभ्रमद्विलोलत्फणगणेषु गतिकलारक्षणाच्चेति दिक्। एतच्च तस्य भगवत्ताविशेषप्रकटनमित्याह भगवतेति। इदं चाशेषं सर्वज्ञत्वात् श्रीशुकदेवोऽवददिति श्रीऋषिः सर्वदर्शी उवाचेति सूतोक्तिः राजन् हे बुद्ध्यादिना प्रकाशमानेति एतदद्भुतकर्मत्वं सहेतुकं त्वया अवबुध्यत एवेति भावः। नागः कालियः मुदेति श्रीभगवत्तत्तदनुग्रहानुसन्धानात् सादरं सप्रेम अतस्तासां हस्तैरेव गन्धानुलेपनादिकं ज्ञेयम् ॥ ६४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्याकर्ण्येति--मया यदादिश्यते तदनेनावश्यं कार्य्यमिति तदभिप्रायं ज्ञात्वेत्यर्थः। यद्वा, इति ईदृशं दैन्याद्यनुगृहीतं वचः कार्य्यं जगद्धितं तदर्थं मानुषरूपेण प्रकटो यो भगवान्; यद्वा, कार्य्या निजप्रेमभक्तिविस्तारणेन सम्पाद्या मानुषा येन, मनुष्यत्वं हि श्रीभगवत्प्रेमभक्त्यैव सम्पद्यते, अतएव देवानामपि तद्दुर्लभं प्रार्थ्यञ्च पूर्व्वं प्रायः प्रेमभक्त्यभावेन मनुष्यत्वं न वृतमिव; अधुना च श्रीभगवता तत् सम्पाद्यमित्यर्थः। अतस्तस्य मूलस्थाने श्रीवृन्दावने सर्पाणां स्थितिरनुचितेति भावः। यद्वा कात् ब्रह्मणोऽपि आर्य्याः पूज्यतमा मानुषाः श्रीनन्दादयो यस्य सः। एवं तेषां सुखार्थमिति भावः। हे सर्प! इति तत्र स्थित्ययोग्यतां याने शक्तिञ्च दर्शयति। अतएव स्वस्य ज्ञात्यादिभिर्युक्त इति स्वशब्देन तेषां तादृशं दुर्व्विषमयत्वं तदधीनत्वञ्च सूचितम्। त्वमिति पाठेऽपि तस्य महादुष्टत्वादिसूचनेन स एवार्थोऽभिप्रेतः। नदी प्रवाहवती श्रीयमुनेति त्वदवस्थित्या लोकानामपकारः स्यादिति भावः ॥ ६१ ॥ त्वां प्रति मम अनुशासनं 'नात्र स्थेयम्' इत्यादिलक्षणमपि, अस्तु तावदत्र क्रीडादिकं सन्ध्योः सन्ध्ययोः कीर्त्तयन् यः संस्मरेत् कीर्त्तयन् यो भवतीति वा। यद्वा, ग्रीष्मवर्षासन्धौ विलतः प्रथमनिर्गमसमये वर्षाशीतसन्धौ च तत्र प्रवेशसमये क्षुधार्त्त्या क्रुद्धेभ्यः सर्पेभ्यो भयविशेषो भवतीति तदपेक्षया तयोरपि न भयमाप्नुयादित्युक्तम् ॥ ६२ ॥ ननु दुष्टानामस्माकं संगदोषेण ह्रदोऽयं दुष्टतामिव गतोऽस्ति कथं गोनृभिर्भुज्यतामित्याशंक्य तच्छोधनाय वरं तस्मै प्रदत्ते— य इति। जलैस्तर्पयेदिति विषादिदोषापगमः सूचितः। उपोष्य एकादश्यादावुपवासं कृत्वा मां चिन्तयन् अर्च्चयेत् स सर्व्वैस्त्रिविधैः पापैः प्रकर्षेण वासनाराहित्येन मुच्यते, यद्वा स सर्व्वैः पापैर्मद्विमुखजनैः प्रमुच्यते, अवैष्णवदर्शनादिकं तस्य न स्यादित्यर्थः ॥ ६३ ॥ द्वीपमिति बृहत्त्वं बोधयति, रमयतीति रमणम् संज्ञायां कः इति सुखकारित्वं; एतच्च तत्प्रोत्साहनार्थम्। एतं किञ्चिदधिकयोजनमात्रम्, तद्द्वीपात् प्रमाणेन स्वल्पतरमित्यर्थः। उपाश्रित इति नित्यावासत्वं निरस्तम्। नाद्यात् न भक्षयिष्यतीत्यर्थः, सम्भावनायां वा सप्तमी, स्वयमेव न खादेदित्यर्थः। कुतः? मत्पादेन लाञ्छितं मूर्द्धसु चक्रचिह्नैः शोभितमित्यर्थः। तच्च पूर्व्वमेव नृत्यगतिविलासेन किवाऽधुनैव प्रसादीकृतम् ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तुभ्यं मत्कर्तृकदण्डनात्मकम् एतच्चरित्रं यः पुमानुभयोस्सन्ध्ययोः संस्मरन् कीर्तयंश्च स्यात् स युष्मत्तो भयं सर्पेभ्यो मृत्युभयं नाप्नुयादित्याज्ञान्तरम् ॥ ६१ ॥ मद्विहारस्थानेऽस्मिन् ह्रदे यः पुमान् स्नात्वा जलैर्देवानादिशब्दात् पितॄनृषींश्च तर्पयेदुपोष्य मां स्मरन्नर्चेच्च स सर्वैः पापैर्मुच्यते इत्याज्ञान्तरम् ॥ ६२ ॥ ननु, गरुडभयाद्रमणकाख्यं सामुद्रद्वीपं हित्वाऽस्मिन् ह्रदे प्रविष्टः पुनरितस्तत्र गतं मां गरुडोऽद्यात् तत्राह—द्वीपमिति। यस्य सुपर्णस्य भयादेनं ह्रदं त्वमाश्रितः स सुपर्णस्त्वां नाद्यात् तत्र हेतुः मत्पादलाञ्छनमिति ॥ ६३ ॥ हे राजन्! इत्थमुक्तो नागस्तं कृष्णं पूजयामास तथा नागस्य पत्न्यश्च सादरम् ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सन्ध्योः सन्ध्ययोः ॥ ६१ ॥ ममाक्रीडे क्रीडास्थाने ॥ ६२ ॥ त्वं पूर्वं यस्य सुपर्णस्य भयात् नाम्ना रमणकं द्वीपं हित्वा एतत् ह्रदमुपाश्रितः। अथ सुपर्णो मत्पादलक्षणं मत्पादलाञ्छनमिव लाञ्छनं यस्य स तथा तञ्च त्वां नाद्यात् न भक्षयेत् ॥ ६३-६४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तव मत्पादस्पर्शं मम च त्वद्दण्ड इत्यावयोः कीर्त्तिराचन्द्रार्कं स्थास्यतीत्याह य इति । न युष्मत्तो भयमाप्नुयादिति तेन पद्यद्वयमिदं सर्पोच्चाटने मन्त्र एव ज्ञेयः । तथा च ऋग्वेदस्य मन्त्रान्तरं "यमुनाह्रदे हि सो यातो यो नारायणवाहनः । यदि कालिकदन्तस्य यदि काकलिकाद्भयम् । जन्मभूमिपरित्रातो निर्विषो याति कालिकः" इति ॥ ६१ ॥ इतोऽपि हेतोस्त्वया निर्गन्तव्यमेवेत्याह—योऽस्मिन्निति । त्वयि स्थिते तन्न सम्भवतीति भावः ॥ ६२ ॥ न च ते गरुडाद्भयं भावीत्याह—द्वीपमिति ॥ ६३ ॥ अद्भुतकर्मणेति कालियाद् व्रजस्थजीवस्य त्राणं कालियस्यापि गरुडात्त्राणमिति हिंस्यहिंसकयोरुभयोरपि कल्याणमित्यद्भुतं कर्म कृष्णेनेति स्वभक्तगरुडापराधस्य स्वप्रियव्रजस्थजीवापराधस्य च च कर्षणं परमभक्तकालियपत्नीप्रीत्यनुरोधात् कृतमिति भावः ॥६४॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

यतो गोमिनृभिश्च नदी भुज्यते तटप्रवाहगततृणफलजलानां भोगौचित्यात् ॥ ६१ ॥ तव सच्चरणस्पर्शो मम च त्वद्दण्ड इत्यावयोर्यशः सदा स्थास्यतीत्याह य इति । न युष्मदिति तेनेदं पद्यद्वयं सर्पोच्चाटने मन्त्ररूपं बोध्यम् ॥ ६२ ॥ इतोऽपि हेतोस्त्वया निर्यातव्यमित्याह योऽस्मिन्निति । त्वयि स्थिते तन्न सम्भवेदिति भावः ॥ ६३ ॥ न च गरुड़ात् तव भयं भावीत्याह-द्वीपमिति ॥६४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नैकल इत्यप्याह ॥ सज्ञात्यपत्यदाराद्या इति । गावश्च नराश्चेति तैर्लभ्यं यन्मदनुशासनं मर्त्यः संस्मरेत्सन्ध्योः सन्ध्ययोर्यश्च कीर्तयन्स युष्माद्भयं नाप्नुयात् ॥ ६१ ॥ आक्रीडे एवंविधे क्रीडास्थाने ॥ ६२ ॥ सुपर्णभयादिहायातस्य पुनस्तत्र गच्छेति वचनं युक्तं नेति वाच्यमित्याह । द्वीपमिति । यद्भयाद्रमणकं द्वीपं हित्वैतं ह्रदमुपाश्रितः । एतदिति पाठेऽव्ययम् । स सुपर्णस्त्वां नाद्यान्न भक्षयेत् । तत्र तन्त्रं मत्पादलाञ्छनमिति । मम पादयोर्लाञ्छनं चिह्नं यस्मिस्तं त्वामिति ॥ ६३ ॥ एवमुक्तो मुदा स्वोदवसितवितरणजया तं पूजयामास नागपत्न्यश्च पूजयामासुः ॥ ६४ ॥

श्रीसुबोधिनी

"सर्पजात्युरुमन्यव" इतिवाक्यात् कदाचिद् वैष्णवान् पीडयिष्यतीति भगवानाज्ञानन्तरमाह **य एतत् संस्मरेदिति**, **वैष्णवः सर्पेण न भक्षणीय एव यः** पुनरेतावन्मात्रमपि **स्मरेत्** सोपि न **युष्मत्तो भयमाप्नुयात्**, एतत् तव निग्रहलक्षणं चरित्रमित्याह **तुभ्यं मदनुशासन**मिति, **तुभ्यं** त्वदर्थं **मदीयं यदनुशासन**माज्ञा एतावन्मात्रं वा **सम्यक् स्मरणं** ध्यानपूर्वकं, अथवा **कीर्तयन्नुभयोः सन्ध्योः**, सायं प्रातरेतच्चरित्रं पठनीयं, उभयं वा कर्तव्यं, **न प्राप्नुया**दितिविध्यर्थोयम् ॥ ६१ ॥ ननु सर्पभक्षणनिमित्तपापे विद्यमाने कथं न सर्पो भक्षयेत् ? तत्राह, **अस्मिन् स्नात्वे**ति, **योस्मिन्नि**ति वा, **अस्मिन्** कालीयह्रदे, स्थानान्तरापेक्षया विशेषमाह **मदाक्रिड** इति, **ममाक्रीडा**, यत्र स्नानमात्रेणैव तस्य देह**सम्बन्धि** पापं गच्छति, **उपोष्य मां स्मरन्नर्चे**दित्यत्रोपवासे प्राण**सम्बन्धि** पापं **गच्छति** मत्स्मरणेनान्तःकरणपापं, अर्चनेनेन्द्रियपापं, पापकरणदशायां यद् देवानां चक्षुष्यागो जातं तत्र देवा बहुविधा देशकालकर्मसाक्षिणोभिमानिनश्च **पितरश्च** वंश्याः क्रुद्धा भवन्त्यृषयश्च वेदोल्लङ्घनात्, अतो **देवादीन् जलैस्तर्पयेत्** **मत्क्रीडया चरित्रामृतपूर्णं जलं पीत्वा तृप्ताः सन्तः प्रत्यताशिषमेव प्रदास्यन्ति न तु क्रोधं करिष्यन्ती**तिभावः, अनेन पूर्वदिवसेऽपि स्नानतर्पणे विहिते, द्वितीयदिवसेपि, काम्यं वैतत् स्नानं भिन्नमेव ॥ ६२ ॥ नन्वन्यत्र गते गरुडो भक्षयिष्यतीति चेत् तत्राह **द्वीपमिति रमणके स** पूर्वं स्थितः, ततो गरुडभयादत्रागतः, **यद्भयात्** त्वमेतद्ध्रदमुपाश्रितः **स सुपर्ण**स्त्वां नाद्यादित्याज्ञा, यद्यप्याज्ञयैव निर्धारो भवति तथापि तस्य विश्वासार्थं हेतवन्तरमाह **मत्पादलाञ्छित**मिति ॥ ६३ ॥ एवमुक्तो **भगवता** स भयात् **मुक्तो** जातः, भगवान**द्भुतकर्मा** निग्रहं कुर्वन्ननुग्रहं कृतवान्, अन्यथास्य **सञ्चार** एव क्वापि नास्ति, कदाचिद् वा **गरुडो** भक्षयेत्, अनेन **यथाकथञ्चिद् भगवत्सम्बन्धः सर्वथा मोचक** इत्युक्तं, **राजन्नि**तिसम्बोधनं सर्पभयाभावार्थं, ततो भगवन्तं **पूजयामास**, दिव्यानि पुष्पाणि वस्त्रचन्दनादीनि न जलेन क्लिन्नानि भवन्ति **गरुडभयं** निवर्तितमिति महान् प्रमोदो जात इति **मुदे**त्युक्तं, **नागपत्न्यश्च सादरं** पूजयामासुः, रमणके तु न प्रेषितः पुनः पूर्वदोषसम्भवात् ॥ ६४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

य एतदित्यत्र यः पुनरित्यवैष्णवोपीत्यर्थः ॥ ६१ ॥ अस्मिन् स्नात्वेत्यत्र योस्मिन्निति वेतिपाठान्तरे मूलस्थमुक्तं, अनेनेत्युपोषणात् पूर्वं स्नानादिकथनेन, उपोषणानन्तरं चार्चादिकथनेनेत्यर्थः, एतदिति सर्पजनितभयनिवर्तकं, यत्र ह्रदः सर्वपापनाशकस्तत्र तावन्मात्रपापनाशने कः सन्देह इतिभावः ॥ ६२ ॥ द्वीपमित्यत्र नन्वनुग्रहोत्र कः कृत इत्यत्राहुरन्यथेत्याद्यनुग्रहाभावे, तथा च सर्वत्र सञ्चारो गरुडभयाभावश्चानुग्रह इत्यर्थः ॥ ६३ ॥ मुक्त इत्यत्र सर्पभयाभावार्थमित्ययमर्थो मृत्योर्नित्यत्वात् सर्पद्वारापि मरणे न भयं, किन्तु तया मरणस्य दुर्गतिहेतुत्वाद् भयत्वं तथा च तथा सत्यपि तस्य तथात्वाभावान् न तथेति, पूर्वदोष इति स चाग्रिमाध्याये स्पष्टः ॥ ६४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

य एतदित्यत्र ननु दीर्घमन्युपदतात्पर्यार्थत्वेन वैष्णवपीडाया उक्तत्वात् तत्समाधानार्थमत्र वैष्णवपीडाभाव एव वक्तव्यो न तु स्मरणमात्रेण सर्वेषां तद्भयाभाव इत्याशङ्क्याहुः वैष्णव इति तत्र हेतुः यः पुनरिति, तथा च कैमुतिकन्यायेन वैष्णवपीडाभाव एव समर्थितः, दीर्घमन्युपदे तात्पर्यार्थत्वेन वैष्णवपीडोक्तेत्यत्रापि वाक्यतात्पर्यार्थत्वेन तदभाव उक्त इतिभावः, परीक्षितस्तु न सर्पाद् भयं किन्तु ब्राह्मणाज् जातमितिभावः, प्रथमपक्षे मदनुशासनमित्यत्रानुशासनं निग्रह इत्यर्थः, आज्ञयैव पीडाभावो भविष्यतीति तावत्कथनमनतिप्रयोजनमित्याशयेन पक्षान्तरमाहुस्तुभ्यं त्वदर्थमिति ॥ ६१ ॥ (योस्मिन्नित्यस्याभासे नन्विति वैष्णवेपि यत्र भगवान् प्रारब्धं भोजयितुमिच्छति तत्र तद्भोगार्थं पीडा सम्भवत्यतः पापनिवृत्त्यर्थं वैष्णवेनाप्येतत् कर्तव्यं, "स्वपादमूलं भजत" इत्यत्र तु प्रमेयभक्तिमार्गीयस्य व्यवस्थोक्तेतिभावः), योस्मिन्नित्यत्र अनेनेति पूर्वदिवसे तु तीर्थविधिनैव प्राप्तिरित्यनेन द्वितीयेपि दिवसे विहितमितिभावः, तद्युपवासोपि द्वितीयदिने प्राप्येतेत्यरुच्या पक्षान्तरमाहुः काम्यं वेति ॥ ६२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यच्च तत्पत्नीभिः प्रार्थितं 'विधेहि ते किङ्करीणामनुष्ठेयम्' इति तद्विदधाति-यदेतत् इत्यादि । तुभ्यं मन्मदनुशासनं ममाज्ञा तदुभयोः सन्ध्योः प्रातःकाले सायङ्काले च स्मरेत् कीर्तयञ्च भवति स युष्मत्तो भयं नाप्नुयात्, युष्माभिस्तस्य भयं नोत्पादनीयमित्यर्थः ॥ ६१ ॥ इतो निर्गमने हेत्वन्तरमाह-य इति । यः प्राणी उपोष्य तीर्थोपवासं कृत्वा अस्मिन् तीर्थवरे, तत्र हेतुः-मदाक्रीडे इति, मम आक्रीडा यस्मिंस्तस्मिन् स्नात्वा मां स्मरन् एतज्जलैर्देवादींस्तर्पयेत् मां चार्चेत् स सर्वैः कायिकवाचनिकमानसिकैः पापैः प्रकर्षेण वासनाराहित्येन मुच्यते मुच्येत् । अत्र त्वयि स्थिते तत् न स्यादिति भावः ॥ ६२ ॥ ननु "गरुडभयात् स्वस्थानं रमणकं हित्वा अत्रागतोऽस्मि, पुनस्तत्र गमने गरुडो मामद्यात्" इत्याशङ्क्याह-द्वीपमिति । यस्य भयात् स्वस्थानं रमणकाख्यं द्वीपं हित्वा एतं ह्लदं त्वमुपाश्रितोऽसि, स सुपर्णो गरुडस्त्वां नाद्यात् न खादेत् । तत्र हेतुमाह-मत्पादेति । व्रजाङ्कुशादियुक्तेन मत्पादेन लाञ्छितं चिह्नितमित्यर्थः ॥ ६३ ॥ कृष्णेनैवमुक्तः कालियस्तदनुग्रहानुसन्धानात् मुदा हर्षेण सादरं सप्रेम तं श्रीकृष्णं दिव्याम्बरादिभिः पूजयामास, तथा तत्पत्न्यश्च पूजयामासुः । लोकप्रतीत्या निग्रहं कुर्वन्नपि ब्रह्मादिदुर्लभचरणस्पर्शेन गरुडादपि निर्भयत्वसम्पादनेन चानुग्रहमेव कृतवानिति । तत्कर्मणोऽद्भुतत्वमाह-अद्भुतकर्मणेति । तत्र हेतुमाह-भगवतेति ॥ ६४ ॥

अन्वितार्थप्रकाशिका

य इति ॥ यदेतत् नात्र स्थेयमित्यादि तुभ्यं यन्मदनुशासनं ममाज्ञा तदुभयोः सन्ध्योः प्रातःकाले सायंकाले च स्मरेत् कीर्तयंश्च भवति । स युष्मद् युष्मत्तः भयं नाप्नुयात् । युष्माभिस्तस्य भयं नोत्पादनीयमिति आज्ञा । तेन पद्यद्वयमिदं सर्पोच्चाटने मन्त्र एव ज्ञेयः तथा ऋग्वेदस्य मन्त्रान्तरं "कालिको नाम सर्पो नवनागसहस्रबलः ॥ यमुनाह्लदे हि सो यातो यो नारायणवाहनः ॥ यदि कालिकदन्तस्य यदि वा कालिकाद्भयम् ॥ जन्मभूमिपरित्रातो निर्विषो याति कालिकः ॥" इति ॥ ६१ ॥ य इति ॥ यः प्राणी उपोष्य तीर्थोपवासं कृत्वा मम आक्रीडा यस्मिन् तस्मिन् अस्मिन् तीर्थवरे स्नात्वा मां स्मरन् एतज्जलैर्देवादींस्तर्पयेत् मां चार्चेत्स सर्वैः पापैः प्रमुच्यते । अत्र त्वयि स्थिते एतन्न स्यादतोऽपि गन्तव्यमिति भावः ॥ ६२ ॥ द्वीपमिति ॥ यस्य भयात्स्वस्थानं रमणकाख्यं द्वीपं हित्वा एतं ह्लदं त्वमुपाश्रितोऽसि । स सुपर्णो गरुडः मत्पादेन वज्रादियुक्तेन लाञ्छितं त्वां नाद्यात् न खादेत ॥ ६३ ॥ एवमिति द्वयम् ॥ कालियाद्व्रजस्थजीवानां त्राणं कालिस्यापि गरुडात्त्राणमिति हिंस्यहिंसकयोरुभयोरपि कल्याणम् । इत्यद्भुतकर्मणा भगवता कृष्णेनैवमुक्तः कालियो मुदा हर्षेण सादरं सप्रेम तं श्रीकृष्णं दिव्यैरम्बरैर्मणिभिः स्रग्भिश्च परार्ध्यैरमूल्यैर्भूषणैः दिव्यैर्गन्धैरनुलेपैश्च महत्या उत्पलानां मालया च पूजयामास । तथा नागपत्न्यश्च पूजयामासुः । प्रायस्तेषां संकल्पसिद्धमिदम् ।६४-६५।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्मिन्ममाक्रीडे नागदमनरूपक्रीडास्थाने ह्रदे उपोष्य उपवासं कृत्वा ॥ ६१ ॥ रमणकं नाम द्वीपं त्यक्त्वा यद्भयादेतं ह्रदं मत्पादेन लांछितमंकितं नाद्यात् न भक्षयिष्यति ॥ ६२ ॥ सादरं यथा तथा ॥ ६३ ॥ दिव्यांबरादिभिः पूजयित्वा स्रक्पुष्पमाला उत्पलं कमलं ॥ पराध्यैरमूल्यः गरुडः गरुडचक्रं ध्वजे ध्वजादंडे यस्य तं ॥ ६४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

य इति ॥ मदाक्रीडे मम विहारस्थाने, अस्मिन् ह्लदे, यः पुमान्, स्नात्वा, जलैः देवादीन् आदिशब्दात्पितॄनृषींश्च, तर्पयेत् उपोष्य उपवासं कृत्वा, मां स्मरन् अर्चेत्पूजयेच्च, सः सर्वपापैः, प्रमुच्यते ॥ ६२ ॥ ननु गरुडभयाद्रमणकाख्यं सामुद्रं द्वीपं हित्वा, अस्मिन् ह्लदे प्रविष्टोऽस्मि पुनरितस्तत्रगतं मां सोऽद्यात्तत्राह ॥ द्वीपमिति ॥ हे कालिय रमणकं रमणकाख्यं, द्वीपं हित्वा, यद्भयाद्यस्य सुपर्णस्य भीतितः, एतं ह्लदं उपाश्रितः, सः सुपर्णः, मत्पादलाञ्छितं त्वां न अद्यात् । मत्पादलाञ्छितत्वाद्धेतोः सुपर्णस्त्वां न खाद्यादित्यर्थः ॥ ६३ ॥ एवमिति अद्भुतकर्मणाऽत्याश्चर्यकक्रियेण, भगवता कृष्णेन, एवमुक्तप्रकारेण, उक्तोऽभिहितः कालियः, तं श्रीकृष्णं मुदा पूजयामास । नागपत्न्यश्चापि, सादरं यथा तथा, पूजयामासुः ॥ ६४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कीर्तयन्निति : १०.१६.६१.

इदं मदनुशासनं श्रवणकीर्तनादप्यहो भवेदहिभयापहं भुवि भवांस्तु तत्संश्रितः ।
अतः स्फुटमितः स्थितिस्तव विशेषतो निर्भया त्वमेवमनुबोधयन् स वरवाचमूचेऽच्युतः ॥ ९३ ॥
उक्तं वचस्तेऽनतिलङ्घ्यमेव तथापि याचे प्रणयेन किञ्चित् ।
भाव्या दयाब्धाविव ते दयालो स्थितिर्ममाब्धौ च विशेषनिर्भीः ॥ ९४ ॥

पूजयामासेति : १०.१६.६४.

श्रीनायकानुग्रहसौख्यभाजो लक्ष्मेदमेव स्फुटमित्यहीशः ।
संसूचयन्नर्जित सर्ववस्तुजातं हि कृष्णार्पणमेव चक्रे ॥ ९५ ॥

कृष्णप्रिया

दयालु भगवान् वैष्णव वैष्णवेतर सर्व के लिए अनुग्रह करके कहते हैं कि जो कोई भी मनुष्य, मैंने तुम्हें जो आज्ञा सुनाई है उन आज्ञाओंका प्रातः काल एवं सायं काल के सन्ध्याकाल में स्मरण करेगा या तो कीर्तन करेगा उस को तुम्हारा भय नहीं होगा ॥ ६१ ॥ भगवानने कहा कि -मेरे इस विहारस्थान कालीय कुण्ड में स्नान कर जो जन जलों से देव मनुष्य पितृ आदिका तर्पण करेगा तथा उपोषण व्रत कर मेरा स्मरण करते हुए मेरा समर्चन करेगा वह सर्व पापों से सर्वथा मुक्त हो जायगा ॥ ६२ ॥ कालीय पर अधिक कृपा वरसाते भगवान बोले कि हे कालीय ? जिस गरुडजी के भय से तुम रमणक द्वीप को छोडकर इस कालीय कुण्ड का तुमने आश्रय लिया है वे गरुडजी अब तेरा भक्षण नहीं करेंगे क्योंकि तुम मेरे चरणों के चिन्हों से चिन्हित हुए हो ॥ ६३ ॥ श्रीशुकाचार्यजीने कहा हे राजन् ! कल्पनातीत कर्म करने वाले भगवान् श्रीकृष्णने इस प्रकार के अभय वचन देकर जब कालीय को निर्भय बनाया, तब कालीय नाग एवं उसकी पत्नियोंने अत्यन्त भावपूर्वक प्रसन्न चित्त से भगवान का समर्चन किया ॥ ६४ ॥

दिव्याम्बरस्रङ्मणिभिः परार्ध्यैरपि भूषणैः । दिव्यगन्धानुलेपैश्च महत्योत्पलमालया ॥ ६५ ॥
पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्वजम् । [1]ततः प्रीतोऽभ्यनुज्ञातः [2]परिक्रम्याभिवन्द्य [3]च ॥ ६६ ॥
सकलत्रसुहृत्पुत्रो [4]द्वीपमध्ये जगाम ह । तदैव [5]सामृतजला यमुना निर्विषाभवत् ।
अनुग्रहाद् भगवतः [6]क्रीडामानुषरूपिणः ॥ ६७ ॥

इति श्रीमद्भागवते महापुराण पारमहंस्यां संहितायां दशमस्कन्धे [7]कालियमोक्षणं नाम [8]षोडशोऽध्यायः ॥ १६ ॥

कर्दमक्षमा

अन्वयः —दिव्याम्बरस्रङ्मणिभिः परार्ध्यैः अपि भूषणैः दिव्यगन्धानुलेपैः महत्या उत्पलमालया च गरुडध्वज जगन्नाथं पूजयित्वा प्रसाद्य च प्रीतः ततः अभ्यनुज्ञातः परिक्रम्य अभिवन्द्य च सकलत्रसुहृत्पुत्रः द्वीपमध्ये जगाम । तदा एव क्रीडामानुषरूपिणः भगवतः अनुग्रहात् सा यमुना अमृतजला निर्विषा अभवत् ॥ ६५-६७ ॥

इति षोडशोऽध्यायः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परार्ध्यैः बहुमूल्यैः । नागपत्न्यश्च जगन्नाथं श्रीकृष्णं पूजयामासुरिति वचनव्यत्यासेन योज्यम् । मणिभिरिति । कृष्णप्रादुर्भावकाले तद्वक्षस्स्थ एवासीद् यः कौस्तुभः स एव तस्य नरलीलत्वशोभाव्याघाताऽभावार्थं तदलक्षितं कालियकोशागारे प्रविष्टोऽभूत् । अत एव बहुरत्नालङ्कारप्रदानसमये कालियपत्नीभिरपरिचित एव स्वीयरत्नविशेषज्ञानेन कौस्तुभो दत्तः । तदुक्तम् "कौस्तुभाख्यो मणिर्येन प्रविश्य ह्रदमौरगम् । कालियप्रेयसीवृन्दहस्तैरात्मोपहारितम् ॥" इति गणोद्देशदीपिकायाम् ॥ ६५ ॥ ततः भगवत्पूजानंतरम् । अब्धेर्द्वीपं रमणकम् प्रसाद्येति । भगवानपि कालियमूर्द्धस्वमपादन्यासतलनिधानेन तदीयपर्वाङ्गार्तिमनाशयदिति

---

१. नागराजोऽभ्यनु-विज. । २. क्रम्याभिवाद्य तं-विर; क्रम्य प्रणम्य च-विज. । ३. तम्-श्रीधर.वंशी. वीर. विज. । ४ द्वीपमध्ये-विज.
५. मृष्टजला-इति कस्यचित् । ६. मनुज-विज. । ७. पारमहंस्यां संहितायां दशमस्कन्धे पूर्वार्धे-अन्यत्र अयं पाठो दृश्यते । ८. चतुर्दशोऽध्यायः-विज.

भावः । गरुडध्वजं प्रसाद्येति । भो गरुडवाहन प्रभो सम्प्रत्यहं गरुडस्य ज्येष्ठभ्रातृर्दासोऽभूवमतः कदाचिद्दूरदेशगमनेऽहमपि वाहनत्वेन स्मर्त्तव्यः, निमेषमात्रेणैव शतकोटियोजनगामी दासाऽनुदास इति तद्भक्तिर्गम्यते । अतः कालियाऽऽरूढ एव कंसनिर्दिष्टः कृष्णो मथुरां जगामेति पुराणान्तरे कथा क्वचिच्छ्रूयत इति ॥ ६६ ॥ तदैव कालियनिर्गमनावसरे सा यमुना अमृतमिव स्वादु जलं यस्याः सा। तत्र हेतुः—निर्विषेति । यद्वा अमृतं मोक्षकरं जलं यस्याः सा निर्गतं विषं विषवद्दुःखहेतुः संसारो यया सा। तथा अमृतस्य विषनाशकत्वप्रसिद्धेः "न जलं यमुनावारि साक्षाद्ब्रह्मैव केवलम्" इत्यादिपुराणाद्ब्रह्मज्ञानवन्मोक्षदायिनीति भावः । क्रीडामानुषरूपिण इति । क्रीडोपयोगिमनुष्यनाट्यवत इति विश्वनाथः ॥ ६७ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे षोडशोऽध्यायः

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

दिव्येति सार्द्धद्वयम् । दिव्येत्यादिविशेषणैर्मर्त्यलौकिकतो वैशिष्ट्यम् अत एव माल्यादीनां विषदोषास्पर्शादिकं च ज्ञेयं प्रायस्तेषां सङ्कल्पसिद्धत्वं च जगतां नाथं पूजयित्वेति तत्पूजयैवेह लोके परत्र च जगति सर्वत्रैव स्वतो मङ्गलं वृत्तमिति गरुडध्वजं प्रसाद्येति श्रीगरुडादपि भयं निवृत्तमिति भावः । प्रीतः सन्तुष्टमनाः यद्वा तस्मिन् प्रीतः जातप्रीतः यद्यपि तस्य गमनेन कलत्रादिसहितस्यैव तस्य गमनं स्वत एवायाति तथापि सकलत्रेति ज्ञात्यपत्यदाराढ्य इति श्रीभगवन्निदेशानुवर्त्तित्वं ज्ञापितं ह स्फूटमेव सा सर्वोपघातकदुर्विषमयजलापि तत्र ह्रदविशिष्टे प्रदेशे निर्विषतापत्त्यैव तस्या निर्विषत्वमुक्तं न केवलं निर्विषा अमृतजला परममिष्टतोया च श्रीभगवच्चरणसंसर्गेण परमानन्दप्रदजलापि वाऽभवत् तादृशं च सामर्थ्यं तस्य न किञ्चिदपीत्याह, भगवत इति । तत्र प्रयोजनं क्रीडेति क्रीडायुक्तश्चासौ प्रसिद्धमानुषस्येव यद्रूपमाकारस्तद्विद्यते यस्य स च तस्य तया च सा स्वमानुष्यलीलौपयिको स्यादिति भावेनेत्यर्थः ॥ ६५–६७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां षोडशोऽध्यायः ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मुक्तो मूर्द्धतोऽवतरेण परित्यक्तः, यद्वा, विससर्ज्जेति पूर्व्वमेव मुक्तोऽस्ति, तदनुवादमात्रम् । अद्भुतकर्म्मणेति निर्व्वासनदमनादिना निगृहीततया प्रसिद्धोऽप्यासौ निजपूर्व्वसुखवसतिस्थानं प्राप । यद्भयात् स्थानं तत्याज तदपगतम्, विशेषतश्च श्रीवैष्णवाग्रयस्य तस्य सख्यं सम्मान्यत्वञ्च श्रीभगवत्पादाब्जचिह्नितो जातम्, किञ्च, ब्रह्मादिसेव्य-लक्ष्मीप्रार्थ्य-तत्पादाब्जरेणुभिस्तादृश-नृत्यलीलया पर्य्यचिताः सर्व्वे मूर्द्धानः सफला बभूवुः, तत्र च सर्व्वे फणास्तन्नृत्यरंगस्थलाः प्रत्येकं वृत्ताः । श्रीब्रह्माद्यपेक्ष्य-श्रीभगवदनुशासनं लब्धम्, तेन च साक्षात्तन्मधुरवचनामृतं पीतम्, पश्चात् परमभक्तवत् पूजादिकञ्च कृतम्, इत्थं बहिर्दृष्ट्या निग्रहस्याप्यनुग्रहविशेषे क्रोधस्यापि परमप्रसाद एव पर्य्यवसानात् । अपि च तादृशापराधिनोऽपि तत्र च दमितस्यैव सतो हृदा शरणागतिमात्रेण तादृशानुग्रहात्, किञ्च, श्रीवृन्दावने यमुनातीरे सर्व्वत्र व्रजजनैः सह स्वच्छन्दसुखक्रीडार्थं ततो निःसार्य्यस्यापि तस्य श्रीवृन्दावनाश्रितस्य निःसारणं साधुनामसम्मतमिति तस्य सहजदुष्टताप्रदर्शनाय गोगोपादीनां तद्विषजलपानेन तादृशावस्थायाः स्वस्यैव तादृशतायाः साधुवर्गमूर्द्धन्यतरेषु श्रीनन्दादिषु प्रदर्शनात्, किञ्च तदर्थं श्रीनन्दयशोदादीनां तादृशशोकादिविस्तरणात्, तथा परदुःखकातरस्यापि तस्य मुहूर्त्तं साक्षात्तद्व्रजजनतादृशदुःखसहनात्, किञ्च, (भा. १०।३१।११) "चलसि यद्व्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ते पदम्" इत्यादिगीयमानपरमसौकुमार्य्यपादाब्जस्पर्शेन रत्ननिकराचिततन्मूर्द्धवर्ग-चूर्णनात्, तथा तादृशैश्वर्य्यप्रकटनसमये मुनिसिद्धादिसाक्षादेव महानृत्यकौतुकात्, तथापि परिभ्रमद्विलोलत्क्षणगणेषु गतिकलारक्षणमित्यादिकमपि तस्यैवाद्भुतकर्म्मत्वमेवेति दिक् । अलमतिविस्तरेण । एतदेव तस्य भगवत्त्वाविशेषप्रकटनमित्याह—भगवतेति । इदञ्चाशेषं सर्व्वज्ञत्वाच्छ्रीशुकदेवोऽवददिति श्रीऋषिः सर्व्वदर्शी । उवाचेति सूतोक्तिः । राजन् हे बुद्ध्यादिना प्रकाशमानेति, एतदद्भुतकर्म्मत्व सहेतुकतया बुद्ध्यत एवेति भावः । यद्वा, राजन् श्रीभगवदनुग्रहेण सद्यो रुधिरस्रावपीड़ादिनिवृत्त्या तत्पादाब्जस्पर्शविशेषेण देहशोभाभवसम्पत्त्या च द्योतमानः सन्नित्यर्थः । पूजयामास कालियः 'नागपत्न्यश्च' इति पाठः स्पष्टः । मुदेति श्रीभगवत्तत्तदनुग्रहानुसन्धानात् पूजास्वभावाद्वा, सादरं सप्रेमेति तासां भावविशेषोत्पत्तेः । अतस्तासां हस्तैरेवाम्बरादिपरिधापनं गन्धानुलेपनञ्च ज्ञेयम् ॥ ६५ ॥ दिव्येत्यादि सार्द्धद्वयकम् । दिव्येत्यादिविशेषणैर्मर्त्यलोकीयतो वैशिष्ट्यम्, किंवा तस्य सर्व्वस्वसारार्पणमभिप्रेतम् । पूजयित्वेत्यनुवादः, यद्वा, प्रस्थानार्थं पुनः पुनः पूजयित्वा, जगतो नाथं पूजयित्वेति तत्पूजयैवेह लोके परत्र च जगति सर्व्वत्रैव स्वतो मंगलं वृत्तमिति, तथा गरुड़ध्वजं प्रसाद्येति तत् श्रीगरुड़ादपि भयं समयङ्निवृत्तम्, तत्प्रसादोऽपि सुतरामभूद्रमणकद्वीपे च शीघ्रं शुभगमनमिति भावः । ततः पूजानन्तरमेव, प्रीतः सन्तुष्टमनाः, यद्वा, तस्मिन् प्रीतो जगन्नाथे जातप्रेमेत्यर्थः । यद्यपि तस्य गमनेन कलत्रादिसहितस्यैव तस्य गमनं स्वत एवायाति, तथापि सकलत्रेति कलत्राणां श्रीभगवति भावविशेषमालक्ष्य तासां तत्सम्बन्धेन पुत्रादीनामपि तत्रावस्थितिमाशंक्य तैः सहितः संहत्यैव जगाम, (भा. १०।१६।६१)—'ज्ञात्यपत्यदाराढ्यः' इति श्रीभगवन्निदेशात् । ह स्फुटमेव, श्रीकालिन्दीतः कालियो नदी-वर्त्मना गंगया तत्समुद्रगमनस्य सर्व्वैरेव साक्षाद्दर्शनात् ॥ ६६–६७ ॥ तदैव तस्मिन्नेव क्षणे सा सर्व्वोपघातकदुर्विषमय-

जलापि तत्र ह्रदविशिष्टे प्रदेशे निर्विषतापर्य्यव तरया निर्विषत्वमुक्तम्, न केवलं निर्विषा, अमृतजला परममिष्टतोया च संसारदुखःनिवर्त्तकजलापि वा अभवत्, भगवतो निजभगवत्तां प्रकटयत इत्यर्थः। अतः क्रीड़ायुक्तं क्रीड़ार्थं वा यन्मानुषरूपं तद्वतः, अतस्तद्विचित्रक्रीड़ासौभाग्यं सा प्राप्स्यतीति भावः। यद्वा, रूपं सौन्दर्य्यं क्रीड़ायुक्तमनुष्यसौन्दर्य्यवत इत्यर्थः, अतो यमुनापि तदनुरूपैव युक्तेति भावः। यद्वा, क्रीड़ामानुषा व्रजजनास्तानेव रूपयितुं सुखयितुं शीलमस्येति तदेकप्रियता तस्य बोधिता, अतस्तेषां सुखक्रीड़ार्थमिति भावः ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीशीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषिण्यां
श्रीदशम-टिप्पण्यां षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दिव्याम्बरादिभिः पूजयामासुः परार्घ्यैरनर्घैः ततस्तं परिक्रम्य प्रदक्षिणीकृत्याभिवाद्य च ॥ ६५-६६ ॥ कलत्रादिभिः सहितः अब्धेः द्वीपं रमणकाख्यं जगाम क्रीडनार्थं न तु कर्मफलभोगार्थं मानुषं रूपमस्यास्तीति तथा तस्य भगवतोऽनुग्रहात्तदैव सा यमुना निर्विषा अमृतजला चाभवत् ॥ ६७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां षोडशोऽध्यायः ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

परार्ध्यैरनर्घ्यत्वेनोत्तमैः ॥ ६५-६७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां षोडशोऽध्यायः ॥ ५२ ॥

(विजयध्वजरीत्या त्रयोदशः)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सादरमिति पूर्वश्लोकोक्तेर्हे प्रभो ! दुष्टतायाः परमावधिरूपे मयि कृपायाः परमावधिरर्पितं त्वया यदहो प्राकृताप्राकृतलोकेषु मदन्यः कोऽपि ध्वजवज्राङ्कुशादिचिह्नानि स्वमूर्द्धिन न धत्ते तदहं साम्प्रतं श्रीमदङ्गानि मद्दन्तदंशोत्पन्नविषदाहतप्तानि सुगन्धसुशीतलचन्दनरसेन सस्त्रीक एव पाणिभिः स्पृशन्ननुलिम्पानि शृङ्गारजानि चेत्यतः क्षणमत्रैव दिव्यासने उपविशेत्युपवेश्य स्ववाञ्छितं पूरयित्वा लब्धभगवत्प्रसादस्ततो निर्जगामेत्याह दिव्येति सार्द्धद्वयेन। मणिभिरिति कृष्णप्रादुर्भावकाले तद्वक्षःस्थल एवासीत् यः कौस्तुभः स एव तस्य नरलीलत्वशोभाव्यघाताभावार्थं तदैवालक्षितं कालियकोषागारमध्ये प्रविष्टोऽभूत् अत एव बहुरत्नालङ्कारप्रदानसमये कालियपत्नीभिरपरिचित एव स्वीयरत्नविशेषज्ञानेन कौस्तुभो दत्तः यदुक्तम्।

"कौस्तुभाख्यो मणिर्येन प्रविश्य ह्रदमौरगम्। कालियप्रेयसीवृन्दहस्तैरात्मोपहारितः" ॥ इति

गणोद्देशदीपिकायां प्रसाद्येति भगवानपि कालिमूर्द्धस्वभयहस्ततलनिधानेन तदीयसर्वाङ्गव्यथामुपशमयामासेति भावः। गरुडध्वज प्रसाद्येति भो गरुडवाहन ! प्रभो ! सम्प्रत्यहं गरुडस्य ज्येष्ठभ्रातुर्दासोऽभूवम् अतः कदाचिद्दूरदेशस्य गन्तव्यत्वे सत्यहमपि स्ववाहनत्वेन स्मर्तव्यो निमेषमात्रेणैव शतकोटियोजनगामी दासानुदास इति तदुक्तिर्गम्यते अतः कालियारूढ एवं कंसनिर्दिष्टः कृष्णो मथुरां जगामेति पौराणिकी कथा क्वचित् श्रूयते इति क्रीडामानुषरूपिण इति नित्ययोगे इनिः ॥ ६५-६७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। दशमेऽस्मिन् षोडशः सङ्गतः सङ्गतः सताम् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

क्रीडार्थं मानुषेषु यदाविष्कृतमप्राकृतरूपं तदस्यास्तीति। क्रीडामानुषरूपी तस्य ॥ ६७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षोडशाध्यायार्थप्रकाशः ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अद्भुतकर्मणेति कुसुमसुकुमारयोः पादयोः स्पर्शेन रत्ननिकराचितानां मूर्द्ध्नां चूर्णनात् परिभ्रमविलोलेषु तेषु गतिकलाभिरक्षणाच्च कालियाद्व्रजस्य गरुडात् कालियस्य च परित्राणेन हिंस्यहिंसकयोरुभयोरपि मङ्गलविधानाच्च ॥ ६५ ॥ सादरमिति पूर्वोक्तेः, हे भगवन् अतिदयालो ! चेद् ब्रह्मादिदुर्लभानि स्वपादचिह्नानि मन्मूर्द्धस्वर्पितानि तर्ह्यस्मतकरैर्मण्डनं स्वीकुर्विति दिव्यासने प्रभुमुपवेश्यालङ्कृत्य लब्धतत्प्रसादो ह्रदान्निर्जगामेत्याह—दिव्येति सार्द्धाभ्याम्। परार्द्धैरपि भूषणैरिति जन्मवेलायां यः कौस्तुभो वक्षस्यासीत् स एव कालियकोषे प्रवेश्यास्थात्, स च तत्पत्नीभिः स्वरत्नसंसर्गेण प्रभवे निवेदित इत्याहुः—प्रसाद्येति

प्रसादवेलायां तन्मूर्द्धस्वभयहस्तप्रदानेन तद्व्यथायाः क्षतिरासीत् । गरुडध्वजमिति गरुडाद्भयञ्च न्यवर्त्ततेति भावः ॥ ६६ ॥ यमुना निर्विषेति यद्यपि ह्रदो निर्विषस्तथापि तस्य यामुनत्वात्तद्धर्मस्तस्यामुच्यते इति बोध्यं क्रीडाप्रधानो मानुषरूपीति नित्ययोगे मतुत्वर्थीयः मानुषस्येव रूपमङ्गसंस्थानसौष्ठवलक्षणं सौन्दर्यं यस्यास्ति तस्य ॥ ६७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतश्रीवैष्णवानन्दिन्यां षोडशोऽध्यायः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पराध्यैर्महामूल्यैर्गन्धाः सुगन्धिद्रव्यनुलेपा मल्लिकातैलाद्यास्तैः ॥ ६५ ॥ गरुडध्वजमित्यनेन तन्निश्चिन्ततां ध्वनयति ॥ ६६ ॥ पूर्वं दाराणामुदारस्नेहपात्रत्वेऽपि कृष्णेन ज्ञात्यपत्यानन्तरमुक्तिस्तत्पक्षपातान्मोचनमिति न प्रकाशयितुमत्र सकलत्रेति तत्पुरस्कृतिस्तुतस्तस्य सर्वापेक्षया मूलस्वादिदानीं स्तुतितः स्वमुक्तिकर्त्रिति निमित्तत इति ज्ञेयम् ॥ ६७ ॥ प्राङ्निर्विषा नितरां विषरहिता यमुना तदैवामृतजला तत्तलसलिलाऽभवत् । क्रीडामनुजरूपिणो भगवतोऽनुग्रहादिति हेतूक्तिः ॥ ६८ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे चतुर्दशोऽध्यायः ॥ १६ ॥

श्रीसुबोधिनी

पूजासाधनान्याह **दिव्येति दिव्यान्यम्बराणि स्रजो** माला **मणयश्च** सर्पशिरोरत्नानि **पराध्यर्ण्य**मूल्यानि **भूषणा**नि मुकुटकटककेयूरादीनि, **दिव्यो गन्धो** येषां एतादृशा **अनुलेपाश्च** चतुःसमादयो **महतो** चोत्पलानां **माला** एवमलङ्कारचतुष्टयमपि कृतवान् ॥ ६५ ॥ **ततः पूजयित्वा प्रसाद्याब्धेर्द्वीपं जगामे**तिसम्बन्धः, ननु पीडितः कथं पूजां कृतवान् ? तत्राह **जगन्नाथ**मिति स हि सर्वस्वामी तत्रापि रक्षकः स एवेति युक्तमेव तदाज्ञाकरणं, ततः प्रार्थितवान् प्रसन्नो भवेति, तत्र हेतुमप्याह **गरुडध्वज**मिति गरुडो ध्वजे यस्य, कोट्यंशेनापि भगवान् न प्रसन्न इति यदि गरुडो जानीयात् तं भक्षयेदेव, अतः प्रसादः करणीय एव **ततो** भगवत्प्रसादानन्तरं **प्रीतः** सन्तुष्टो भगवता चा**भ्यनुज्ञातः** प्रथमतस्तु क्रोधेनाज्ञातेन बुद्ध्या ततोप्यनुज्ञातः **परिक्रम्य** प्रदक्षिणीकृत्या**भिवन्द्य** च सम्भूतिं कृत्वा सर्वसहायोब्धेर्द्वीपं सर्वेषामगम्यं **जगामेति,** हेत्याश्चर्यम् ॥ ६६ ॥ तस्मिन्निर्गत एव **तदैव** भगवत्कृपया **सा यमुना** मिष्टोदकाभ**वत् निर्विषा** च, न केवलमत्रामृतत्वं मिष्टतामात्रपरं किन्तु मरणनिवर्तकमपि, सहजोपि यमुनायां यो दोषो विषादिः स्थितः सोपि गतः, तत्र **हेतुरनुग्रहाद् भगवत** इति, न केवलं कालीयगमनेन निर्विषा जाता किन्त्वनुग्रहाद् भगवतः क्रीडायाः करिष्यमाणत्वात् तस्यामनुग्रहः, ज्ञानादिकं तु सूचयति **भगवत** इति, ननु किमिति क्रीडा तस्यां कर्तव्या ? तदाह **क्रीडामानुषरूपिण** इति, क्रीडार्थमेव मानुषरूपवान्, अतोवश्यं यमुनायां क्रीडा विधातव्यातः **प्रसाद** इति, अनेन यमुनायाः सर्वदोषनिवृत्तिः सूचिता ॥ ६७ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे त्रयोदशाध्यायविवरणम् ॥ १२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

पूजयित्वेत्यत्र ततः प्रीत इति क्रोधे नाज्ञानेन बुद्ध्येति क्रोधेज्ञानेन कृतापराधस्ततो भगवति सद्बुद्ध्या प्रीत इत्यर्थः ॥ ६६ ॥ **तदैवेत्यत्र प्रसाद** इति स्वधर्माविष्करण, अनेनेत्यादिप्रसादस्य करिष्यमाणत्वकथनेन निरोधरूपा सर्वदोषनिवृत्तिः सूचितेति ज्ञेयं, पाद्मोत्तरखण्डे तु कालीयदूरीकरणस्य दिनमप्युक्तं "निदाघान्ते तु पञ्चम्यां कालीयं निरयापय' दिति अयं वीर्याध्यायः स्पष्टः ॥ ६७ ॥

इति श्रीमद्वलभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धश्रीसुबोधिनीटिप्पण्योः प्रकाशे त्रयोदशाऽध्यायविवरणम् ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

जगन्नाथमित्यत्र सर्वस्वामित्वेपि प्रकृते न कोपि विशेष इत्यत आहुस्तत्रापीति, "स वै पतिः स्या" दितिलक्षणकं नाथत्वमभिप्रेतमिति ज्ञेयम् ॥ ६६ ॥

इति त्रयोदशोऽध्यायः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दिव्यत्वमलौकिकत्वम्, सङ्कल्पसिद्धत्वात् ॥ ६५ ॥ एवं कलत्रादिभिः सहितः कालियस्तं जगन्नाथं जगतः स्वामिनं कृष्णं पूजयित्वा प्रसाद्य प्रसन्नं च कृत्वा तेनाभ्यनुज्ञातः 'सुखं गच्छ' इति दत्ताज्ञः स्वयमपि प्रीतस्तं परिक्रम्याभिवन्द्य च ततः स्थानात् अब्धेः समुद्रस्य मध्यस्थं रमणकं द्वीपं जगामेति सार्धान्वयः । भगवच्चरितस्य आश्चर्यं सूचयन्नाह–हेति । "यदि तमप्रसन्नं कृत्वा गच्छेत्तदा 'मत्स्वामिद्रोहमप्ययं कृतवान्' इति कृत्वा क्रुद्धः पूर्ववैरी गरुडो हठादेव तं भक्षयेत्" इति सूचयन्नाह–गरुडध्वजमिति ॥ ६६ ॥ तदैव तत्क्षणमेव क्रीडामानुषरूपिणः जनोद्धारोपयोगिक्रीडाकरणार्थं मनुष्यरूपेणावतीर्णस्य भगवतः कृष्णस्यानुग्रहात् विषधरस्य कालियस्य निःसारणात् तत्र क्रीडनाच्च सा यमुना निर्विषा विषसम्बन्धरहिता अमृतजला अमृतवत् स्वादु जलं यस्याः सा, यद्वा अमृतं स्नानाचमनपानादिमात्रेणापि जन्मादिहेतुदोषनिरासेन मरणनिवर्तकं मोक्षप्रदं जलं यस्यास्तादृशी चाभवत् ॥ ६७ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोषवर्णने ॥ षोडशो विवृतोऽध्यायः कालियोद्वासबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

पूजयित्वेति सार्द्धम् ।। एवं कलत्रसुहृत्पुत्रसहितः कालियो गरुडध्वजं जगतां नाथं कृष्णं पूजयित्वा प्रसाद्य प्रसन्नं च कृत्वा तेनाभ्यनुज्ञातः सुखं गच्छेति दत्ताज्ञः स्वयमपि प्रीतस्तं परिक्रम्याभिवन्द्य च ततः स्थानात् अब्धेः समुद्रस्य मध्यस्थं रमणकं द्वीपं जगाम ।। ६६ ।। तदैवेति ।। तदैव तत्क्षणमेव क्रीडार्थं मानुषरूपिणः भगवतः कृष्णस्यानुग्रहात् सा यमुना निर्विषा विषसंबन्धरहिता अमृतजला अमृतवत्स्वादु जलं यस्या तादृशी अभवत् । हृददेशाभिप्रायमिदम् ।। ६७ ।।

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ।। गङ्गासहायो निरमाद्दशमस्कंधषोडशे ।।

इति श्रीभागवते महापुराणे दशमेऽन्वितार्थप्रकाशिकायां षोडशोऽध्यायः ।। १६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तं श्रीकृष्णमभिवंद्य नत्वा स्वपत्न्यादिसहितः अब्धेः समुद्रस्य द्वीपं रमणकम् ।। ६५ ।। क्रीडायै असंख्यजीवकल्याणजनकं मानुषं मनुष्यभावयुक्तं रूपमस्ति यस्य तस्य क्रीडामानुषरूपिणः ।। ६६ ।।

इति श्रीशुद्धैकांतधर्मप्रवर्तकगुरुराजेंद्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढाऽर्थप्रकाशके श्रीमद्भागवतस्य

दशमस्कंधव्याखयाने कालियदमनं नाम षोडशोऽध्यायः ।। १६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यैः पूजां चक्रुस्तद्द्रव्याणि प्राह ।। दिव्येति ।। दिव्याम्बरस्रङ्मणिभिः, परार्ध्यैरनर्घ्यैः, भूषणैराभरणैः अपि, महत्या उत्पलमालया सह, दिव्यगन्धानुलेपैश्च, पूजयामासेति पूर्वेण संवन्धः ।। ६५ ।। पूजयित्वेति ।। एवं जगन्नाथं पूजयित्वा, गरुडध्वजं प्रसाद्य च, ततः प्रीतः गरुडभयनिवर्त्तनश्रवणेन प्रसन्नतां प्राप्तः, अभ्यनुज्ञातः श्रीकृष्णेन गमने दत्ताज्ञः, सकलत्रसुहृत्पुत्रः स्त्रीभिः सुहृद्भिः पुत्रैश्च सहितः, स कालियः नागः, तं श्रीकृष्णं, परिक्रम्य प्रदक्षिणीकृत्य, अभिवाद्याभिवादनं कृत्वा, अब्धेः समुद्रस्य, द्वीपं प्रति, जगाम हेति हर्षे ।। ६६ ।। तदैवेति ।। क्रीडार्थं न तु कर्मफलभोगार्थं मानुषं रूपमस्यास्तीति तस्य, भगवतः अनुग्रहात्, तदैवास्मिन् क्षणे कालियेन त्यक्ता तत्क्षणत एवेत्यर्थः । सा यमुना, निर्विषा सती, अमृतप्रायं जलं यस्यास्तथाभूता अभवत्, ।। ६७ ।।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां

भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे षोडशोऽध्यायः ।। १६ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सकलत्रेति : १०.१६.६७

जाते श्रीशानुग्रहे निर्भयः स्यात्प्राणी संसृत्यब्धिवेलास्थितोऽपि । मुक्तिर्भोग्याद्दृष्टभोगं विना नेत्यासीद् व्यक्तं तत्र तत्प्रेषणेन ।। ९६।।

श्रीमान् प्रभो सदय तावदनुग्रहोऽयं कार्योऽस्ति ते मनसि यत्र जने भवाब्धौ ।
यत्नं विधाय भगवन् स्वयमेव तत्र गच्छन् प्रसादसुमुखो भवसीत्यगूढम् ।। ९७ ।।

भगवत्पदपद्मचिह्नितो यः स हि लोकेष्वकुतोभयः सदैव । स्फुटतादृशकालियप्रमाणादपरं मानमपेक्ष्यते न किञ्चित् ।। ९८।।

जडजातमिदं विशोधितं तत् परमं भुव्यभृतं तदेव भूयात् । निगमान्तरहस्यमेवमस्मिन् यमुनावार्यमृतोक्तितः स्फुटार्थम् ।। ९९।।
श्रीशकल्पतरुक्रीडा० ।।

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने षोडशोऽध्यायः ।। १६ ।।

कृष्णप्रिया

कालीय नाग ने अलौकिक दुकूल-अम्वर वस्त्र, दिव्य वनमाला, मस्तक के मणि रत्न, अत्यन्त अमूल्य आभूषण, केसर-कस्तूरी-चन्दन-अरगजा ये चारों जिसमें समान है वैसे दिव्य चन्दन का लेपन एवं कमलों की आपादलम्बिनी दिव्य मालाओं से गरुडध्वज जगन्नाथ भगवान का समर्चन किया तब कालीय नाग की भक्ति से भगवान प्रसन्न हुए और कालीय नाग ने आनन्द प्राप्त किया, तदन्तर भगवान की अनुज्ञा प्राप्तकर प्रदक्षिणा की, प्रभु के चरणों में प्रणाम किया पुनः अपनी पत्नियों, पुत्रों ज्ञातिबन्धुजन को साथ लेकर समुद्र के भीतर जो रमणक द्वीप था वहाँ चला गया ।। ६५-६६ ।। कीड़ा के लिए मनुष्याकृति धारण करने वाले भगवान श्रीकृष्ण के अनुग्रह से उसी समय (जब कालीय ने निरसन किया) भगवती श्रीयमुनाजी का जल पूर्व की भांति निर्विष एवं अमृतमय यथापूर्व बन गया ।। ६७ ।।

इति श्रीमद्भागवत दशमस्कन्ध निरोधलीला तामस प्रकरण के प्रमेय प्रकरण का वीर्य निरूपक नाम का सोलहवाँ अध्याय समाप्त ।। १६ ।।

अथ सप्तदशोऽध्यायः

इलोकाः	अनु.	मि. उ.	उ.	इलो. अ.	उ. अ.	अ. अ.	सं. इलो. अ.	सं. इलो.	अ.
२५	२३	२	२	८३२	१०	४०	८८२	२७॥	२

राजोवाच

नागालयं रमणकं कस्मात्तत्याज कालियः। कृतं किं वा सुपर्णस्य तेनैकेनासमञ्जसम् ॥ १ ॥

श्रीशुक[1] उवाच

उपहार्यैः [2]सर्पजनैर्मासि मासीह यो बलिः। वानस्पत्यो महाबाहो नागानां प्राङ् निरूपितः ॥ २ ॥
स्वं स्वं भागं प्रयच्छन्ति नागाः [3]पर्वणि पर्वणि। गोपीथायात्मनः[4] [5]सर्वे सुपर्णाय महात्मने ॥ ३ ॥
विषवीर्यमदाविष्टः काद्रवेयस्तु कालीयः। कदर्थीकृत्य गरुडं स्वयं तं बुभुजे[6] [7]बली ॥ ४ ॥

कर्दमक्षमा

अन्वयः—राजा उवाच—कालियः रमणकं नागालयं कस्मात् तत्याज, वा तेन एकेन किं सुपर्णस्य असमञ्जसं कृतम् ॥ १ ॥ श्रीशुक उवाच–हे महाबाहो उपहार्यैः सर्पजनैः इह मासि मासि नागानां यः वानस्पत्यः बलिः प्राङ् निरूपितः ॥ २ ॥ सर्वे नागाः आत्मनः गोपीथाय पर्वणि पर्वणि महात्मने सुपर्णाय स्वं स्वं भागं प्रयच्छन्ति ॥ ३ ॥ काद्रवेयः विषवीर्यमदाविष्टः बली कालियः गरुडं कदर्थीकृत्य स्वयं तं बुभुजे ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नागं सप्तदशे नागालयं तं निरयापयत् ॥ बंधूंस्वदुःखतः श्रांतान्सुप्तांस्तत्र दवादपात् ॥ १ ॥

असमंजसमप्रियम् ॥ १ ॥ उपहार्यैर्भक्ष्यैः सर्पजनैः सर्पायत्तैर्जनैः। वानस्पत्यो वनस्पतेर्मूले देयो नागानां तद्बाधापरिहाराय यो बलिः प्राक् निरूपित उपकल्पितः ॥ २ ॥ ते च नागाः स्वं स्वं भागं जनैर्दत्तं सुपर्णाय प्रयच्छंति ततो भीतः गोपीथाय रक्षणाय ॥ ३ ॥ विषवीर्याभ्यां यो मदस्तेनाविष्टः काद्रवेयः कद्रूपुत्रः। गरुडं कदर्थीकृत्याविगणय्य। यद्वा उपहार्यैः सुपर्णभक्ष्यैः सर्पा एव जनास्तैर्नागानां संबंधि यस्मिन्नेकैको नागो दीयते तथाभूतो यो बलिः सुपर्णाय निरूपितस्तत्र स्वं स्वं भागं सर्वे नागाः प्रयच्छंति कालियस्तु न प्रयच्छति किं त्वन्यैर्दत्तमपि तं बलिं स्वयमेव बुभुजे ॥ ४–५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं नागं कालियम्। निरयापयत् निष्कासितवान्। तत्र कालिंदीतटे। दवात् वनाग्नेः (१)। समञ्जसम् प्रियम् 'प्रिये योग्ये समंजसम्' इति कोशात्। तद्भिन्नम् असमंजसम् ॥ १ ॥ बलिरुपहारः 'बलिः पूजोपहारयोः' इति विश्वः। हे महाबाहो इति। यथा महाराजस्य पराक्रमेण वैरिणोऽपि राजानो बलिं हरंतीति भावः। सर्पायत्ता जनाः सर्पजनाः। शाकपार्थिवादिरयम्। तद्बाधा नागबाधा तन्निवृत्तये। यद्वा—वानस्पत्येऽमायां प्रतिमासं सर्पभीनिवृत्त्यर्थं सर्वे लोकास्तेभ्यो बलिं ददतीत्यर्थः। वनस्पतिं गतः सोमो यत्र स वानस्पत्यो दर्शः "अमायामुडुराजो हि सदा याति वनस्पतिम्। वानस्पत्यं ततस्तस्या नाम वै प्रोच्यते बुधैः ॥" इति कोशात्। उपहार्यैः सर्पभक्ष्यभूतैस्तत्पूजकैर्वा ॥ २ ॥ पर्वणिपर्वणि दर्शेदर्शेऽवसरेऽवसरे वा "पर्व क्लीबे महे ग्रंथौ प्रस्तावे लक्षणांतरे। दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपि ॥" इति मेदिनी। ततः सुपर्णात्। महात्मने बलवत्तराय ॥ ३ ॥ शास्त्रांतरसंमत्या क्लिष्टकल्पनया च पूर्वव्याख्यानमसंमतमिव मत्वाह–यद्वेति। पुराणांतरे—"एकैकं हि ददुर्नागं नागास्तार्क्ष्याय रक्षया" इत्युक्तेः तत्र तेषु ॥ ४ ॥

---

१. बादरायणिरुवाच–गो. प्रे. टी.। २. सर्वजनै–वीर.। ३. पर्वणि कल्पिते–वीर.। ४. त्मनां–वीर.। ५. भीता–इति कस्यचित्। ६. स्वयं तां–विज.। बलिम्–श्रीधर. वंशी. वीर. विज.।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अभीष्टलीलासिद्धया श्रीभगवतस्तदभ्युदयदर्शनेन श्रीव्रजस्य च स्वस्थतामाकर्ण्य स्वस्थः प्रीतमनाः सन् कथामध्य एव कथासौष्ठवाय तत्पूर्ववृत्तं पृच्छति—नागेति । नागानामालयं स्वभावतः सर्पवर्गस्य वसतिस्थानं नतु गरुडस्येत्यर्थः । अतो बहवो नागास्तत्रान्ये निवसन्त्येवेति भावः । ननु यद्भयादिति तत्सूचितमेव तत्राह कृतं किमिति वाशब्दः कटाक्षे ॥ १ ॥ उपेति त्रिकम् । हे महाबाहो ! इति यथा भवतो महाराजस्य पराक्रमेण वैरिणोऽपि राजानो बलिमुपहरन्तीति भावः ॥ २ ॥ पर्वणि पर्वणि प्रति पञ्चदश्यन्तं महात्मने अपरिच्छिन्नशक्तय इत्यर्थः । अयं भागप्रदाने हेतुः ॥ ३ ॥ पश्चात् विषवीर्य्याभ्यां मदाविष्टः सन् काद्रवेय इति भ्रातृत्वं च मदे हेत्वन्तरं ज्ञेयं कदर्थीकृत्य तदनादरेण तच्छ्रुत्वेति वक्ष्यमाणात् तदीयेभ्यो बलाद्ग्रहणेनैव वा कदर्थीकृत्य स्वयं तु स्वयमेव ॥ ४ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीभगवतः स्वस्थतां महादुष्टेऽपि कारुण्यविस्तारणञ्चाकर्ण्य स्वस्थः प्रीतमनाः सन् श्रीवृन्दावनयमुनाश्रयेण कालियस्य तस्मिन् ह्रदे श्रीगरुड़ाद्भयमपगतम्, अन्येन वा केनापि हेतुमिति तथा तादृशमहातीर्थे तस्य दुष्टस्य निवासे को हेतुरिति च विज्ञातुं कथान्तरे चौत्सुक्येन तत् पूर्व्ववृत्तं पृच्छति—नागेति । नागानामालयं स्वभावतः सदा सर्पवर्गवसतिस्थानम, न तु गरुड़स्येत्यर्थः। अतो बहवो नागास्तत्र निवसन्त्येवेति भावः । तत् कस्मात् कारणादिति, श्रीवृन्दावनयमुनाश्रयणार्थं किंवान्येन केनापि हेतुनेत्यर्थः। ननु यद्भयादिति तत् सूचितमेव, तर्हि श्रीगरुड़ात् सर्व्वेषामेव नागानां साधारण्येन स्वतो भये वर्त्तमानेऽपि विशेषतस्तस्यैकस्य भये किं कारणमिति पृच्छति कृतमिति। वाशब्दः कटाक्षे, तत् कथयेति शेषः ॥ १ ॥ उपेति त्रिकम् । उपहार्य्यैरिति तैर्व्यञ्जितम् । यद्वा, उपहार्य्यैर्बलिदानयोग्यैः सर्पाणां जनैः सेवकैः कृत्वा तद्वरेत्यर्थः । इह नागालये वानस्पत्यः फलमूलादिनिर्म्मितो यो बलिर्नागानां नागैः कर्त्तृभिः प्राक् प्रथमं निरूपितो दातुं निश्चितः । हे महाबाहो, इति यथा भवतो महाराजस्य पराक्रमेण वैरिणोऽपि राजानो बलिमुपहरन्तीति भावः ॥ २ ॥ पर्व्वणि पर्व्वणि प्रतिदर्शम्, महात्मने अपरिच्छिन्नशक्तय इत्यर्थः, अयं भागप्रदाने हेतुः । यद्वा महाशयाय फलादिबलिप्रदानमात्रेणैव सहजवैरिष्वपि सन्तुष्टायेत्यर्थः ॥ ३ ॥ पश्चाद्विषवीर्य्याभ्यां मदाविष्टः सन्, काद्रवेय इति भ्रातृत्वञ्च मदे हेत्वन्तरं ज्ञेयम्, कदर्थीकृत्य तदनादरेण तदीयेभ्यो बलाद्ग्रहणेनैव वा ॥ ४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उपहार्यैः निवेद्यभूतैः सर्पजनैर्यो बलिः सर्परूपबलिरित्यर्थः । यो बलिस्तस्य स्थाने निरूपित इत्यर्थः । वानस्पत्यः वनस्पतिरपुष्पफलवृक्षः वृक्षविशेषमूले कल्पितः यद्वा, वनस्पतिगते चन्द्रे अमावास्यायां प्रवर्त्तमान इत्यर्थः ॥ २ ॥ गोपीथाय रक्षणाय ॥ ३-६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यदुक्तं "द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः । यद्भयात्" इति, तत्र कालियस्य द्वीपत्यागनिमित्तस्य सुपर्णाद्भयस्य निमित्तं बुभुत्सुः पृच्छति राजा—नागालयमिति । नागालयमित्यनेन तद्द्वीपस्थानां नागानां सुपर्णाद्भयमस्तीति सूचितम् । अत एव पृच्छति कृतमिति । तेनैकेन कालियेन स्वस्य भयनिमित्तं सुपर्णस्यासमञ्जसमप्रियं किं कृतम् अन्येषु निर्भयेषु सत्स्वप्यनेन स्वभयनिमित्तं किमप्रियं कृतम् अन्येषां वा भयाभावनिमित्तं च किमिति प्रश्नार्थः ॥ १ ॥ तावत्तत्रत्यानां नागानां सुपर्णाद्भयाभावनिमित्तमाह—उपहार्य्यैरिति । हे महाबाहो ! प्राक् पुरा काले सर्पजनैः सर्पा नो मा दंशन्त्विति तेषां यो बलिरूपहार्यैर्भक्ष्यैर्मासि मासि वानस्पत्यः वनस्पतिरपुष्पफलवृक्षः तन्मूले देवो वानस्पत्यः वनस्पतिगते चन्द्रे अमावस्यायां प्रवर्त्तमानो वा निरूपितः कल्पितः ॥२॥ तत्र सर्वे नागाः जनैः पर्वणि कल्पिते बलौ स्वं स्वं भागमात्मानं गोपीथाय रक्षणार्थं महात्मने सुपर्णाय प्रयच्छन्ति अतस्तत्रत्यानां न गरुडाद्भयमस्तीत्युक्तम् ॥ ३ ॥ एवं सर्वेषु नागेषु प्रयच्छत्सु एष काद्रवेयः कद्रोस्सुतः कालियस्तु विषवीर्याभ्यां यो मदस्तेनाविष्टः सुपर्णं कदर्थीकृत्य तुच्छीकृत्याविगणय्येति यावत् तं गरुडाय देयं बलिं भागं स्वयमेव बुभुजे ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

असमञ्जसं अपराधम् ॥ १ ॥ उपहार्यैः उपहारकैः गरुडादीनां पूजकैरन्यजनेन पूज्यैर्वा सर्पजनैरिह यो बलिः मासि प्रतिमासं क्रियत इति शेषः । कीदृशः वानस्पत्यः सोमे वनस्पतिं गते क्रियमाणः अमावास्यायां क्रियमाण इत्यर्थः । यद्वा, वनस्पतौ क्रियमाणः स बलिः प्राङ्नागानामैकमत्येनात्मरक्षणार्थं निरूपित इत्यन्वयः ॥ २ ॥ आत्मनः गोपीथाय गोपनाय आत्मरक्षणाय ॥३॥ कद्रोरपत्यं काद्रवेयः जातिज्ञानार्थमिदमुक्तं कदर्थीकृत्य धिक्कृत्य तां बलिं पूजां बलिशब्दः पूजार्थः स्त्रीलिङ्गः पूजायां स्त्रीबलिर्दैत्यभेदेनाकर एव चेति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रीभगवतो व्रजस्य च स्वस्थतामाकर्ण्य स्वस्थः कथामध्यतः एव तत्सौष्ठवाय पृच्छति–नागेति ।। १–५ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ताक्ष्यद्भीतिः कालियस्य ताक्ष्ये सौभरिशापवाक् । कृष्णाप्तिर्गोदुहान्दावात्त्राणं सप्तदशोऽभवत् ।।

उपहार्य्यैः भक्ष्यत्वेनोपहारीक्रियमाणैः सर्परूपैर्जनैः वानस्पत्यः वनस्पतेर्मुले देयः नागानां नागैर्गरुडात्स्वबाधापरिहाराय निरूपितः उपकल्पितः ।। २ ।। तत्र सर्वे नागास्तं स्वंस्वम्भागं प्रयच्छन्ति पर्वणि पर्वणि प्रतिपश्चदश्यन्तं गोपीथाय रक्षणाय किन्तु कालियस्तु तं न प्रयच्छति प्रत्युतान्यैर्दत्तमपि स्वयमेव बुभुजे ।। ३ ।। कदर्थीकृत्य अनादृत्य ।। ४ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सप्तदशेऽध्याये श्रीयमुनाह्रदे कालीयवासकरणं वनाग्नितो बन्धुत्राणं च निरूप्यते—नागालयमिति । असमञ्जसमहितम् ।। १ ।। हे महाबाहो ! उपहार्यैर्गरुडभक्ष्यैः सर्पजनैः सर्पजनमय इत्यर्थः । वानस्पत्यो वनस्पतेर्मूले देयः नागानां सम्बन्धी यो बलिर्निरूपितः ।। २ ।। ते बलिं नागजनमयं स्वं स्वं भागं स्वकुलात् सङ्गृहीतं ते च नागाः आत्मनो गोपीथाय रक्षणाय प्रयच्छन्ति ।। ३ ।। कालियस्तु स्वयं बुभुजे ।। ४–५ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कालियस्य भयं ताक्ष्याच्छापोक्तिस्तत्र सौभरेः । हर्याप्तिर्गोदुहां दावाद्रक्षा सप्तदशेऽभवत् ।।

असमञ्जसं अप्रियम् ।। १ ।। उपहार्यैर्गरुड़स्य भक्ष्यैः सर्परूपैर्जनै कर्तृभिर्योबलिर्नागानां गरुड़ाद्बाधापरिहाराय प्राक् निरूपित आसीत् । वानस्पत्यो वनस्पतेर्मूले देयः ।। २ ।। तत्र सर्वे नागाः पर्वणि पर्वणि प्रतिपक्षदश्यन्तं, गरुड़ाय स्वं स्वं भागं प्रयच्छन्ति किमर्थम् ? आत्मनो गोपीथाय रक्षणाय ।। ३ ।। कालियस्तु न प्रयच्छति प्रत्युत अन्यैर्दत्तं बलिं भुङ्क्ते कदर्थीकृत्य अवज्ञाय ।। ४ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

।। हरिः ॐ ।। श्रुतरमणकवासविरमणककालियो राजा निमित्तं विविच्य वदेति पृच्छति ।। राजेति । नागालयमित्यनेकेषां तद्द्वीप ओकः सर्पाणामिति सूच्यते उत्तरोक्तिस्वारस्यात् । असमञ्जसमपराधः ।। १ ।। सर्पजनैरुपहार्यैरुपायनत्वेन देयैः पदार्थैः सह मासिमासि प्रतिमासं पदमेकं प्राङ्नागानां रक्षणार्थमिति शेषः । वानस्पत्यो बलिर्वृक्षमूले देय इति केचित् । सोमे वनस्पतिं गत इत्यमावास्यायां क्रियमाण इत्यर्थः । निरूपितः कृतसङ्कल्पित ऐकमत्येनात्मरक्षणाय बलिकल्पनं कृतवन्त इत्यर्थः ।। २ ।। तदेवाह ।। स्वं स्वमिति । नागाः स्वं स्वं भागं यथा गृहमायातं पर्वणि पर्वणि पदमेकं महात्मने सुपर्णायात्मनो गोपीथाय रक्षणाय । निपातितः शब्दः । प्रयच्छन्ति ददति ।। ३ ।। काद्रवेयः । कद्रुकमण्डल्वोः संज्ञायामित्यङ् स्त्रियाः कद्र्वा अपत्यं काद्रवेयः स्त्रीभ्यो ढगिति ढक् एयादेशो भानुना देवयोनयोऽमीत्युक्तेर्देवयोनिताऽनेनास्य ज्ञाप्यत इति ज्ञेयम् । कदर्थीकृत्य धिक्कृत्य । तमिति तामित्यपि पाठौ । पूजाकररूपयोरर्थयोर्बलिशब्दस्योभयलिङ्गत्वादुपपन्नौ । पूजायां स्त्री बलिर्दैत्यभेदे ना कर एव चेति यादवः । स्वयं बुभुजे ।। ४ ।।

श्रीसुबोधिनी

चतुर्दशे भगवतो दर्शनान्निवृत्तौ व्रजः । अग्नेः संरक्षितः पश्चात् प्रासङ्गिकमिहोच्यते ।। १ ।।
इन्द्रियप्राणयोर्दोषो निवार्यस्तु सहैव हि । अतः कालीयकथया दाहाभावो निरूप्यते ।। २ ।।
प्रासङ्गिककथा त्वत्र हरेरद्भुतकर्मताम् । वक्तुं युक्ता सर्वदोषा नान्यथा यान्ति हीति च ।। ३ ।।

प्रथमं प्रासङ्गिकं पृच्छति **नागालय**मिति, 'द्वीपं रमणकं हित्वे'ति यद् भगवतोक्तं तस्य परित्यागे हेतुर्वक्तव्यः, नापि तत् स्थानं गरुडस्येति शङ्कनीयं, यतः सहजं नागानामेव, तदाह **नागालय**मिति, **कस्माद्** धेतोरिति, यद्यपि भयं पूर्वमुक्तं तथापि तद् भयं साधारणं वासाधारणं ? साधारणं चेत् कथमन्यैर्न त्यक्तमनेन त्यक्तमिति भवति विशेषजिज्ञासा, विशेषभयं चेत् तत्र हेतुं पृच्छति कृतमिति, **तेनैवैकेन सुपर्णस्य किं वासमञ्जसं कृतम्** ? **सुपर्ण**त्वादक्लिष्टकर्मा, **एको** वा कथमपराधी ।। १ ।। तत्रोपाख्यानमाह, उपहरन्तीत्यु**पहाराः**, उपहाराः समर्प्यन्त यैस्त **उपहार्या** उपहारसमर्पका इत्यर्थः, ते सर्वे एव **सर्पजना**ः साधारणसर्पाः **सर्पाणां वा जना**ः सेवका अतलादिवासिनस्तैः **सर्वैरेवेह** रमणके **मासि मासि बलिः** कलृप्तः, **य** इति प्रसिद्धः, एवं **ह्याख्यायिका**, गरुडः सर्वानेव सर्पान् भक्षयति सर्वदा मारयति च कांश्चिद् वृथैव मातुर्वैरमनुस्मरन्, ततो **वासुकिप्रमुखा** गरुडाद् भीता ब्रह्माणं शरणं गताः, ततो **ब्रह्मा** गरुडं समाहूय सन्धिं कृत्वा दण्डरूपं बलिं कल्पितवान्, अमावास्यायां वृक्षमूले 'नागलोकेषु यद् भवेद् एकस्मिन् दिवसे तावदेकत्र स्थापयन्तु हि ततो हि गरुडस्तस्मिस्तद् भुक्त्वा नैव पीडये' दितिव्यवस्थयानया सर्पा मासि मासि बलिं **ददुः**," **तदाह**

मासि मासीह यो बलिरिति, वानस्पत्यो वनस्पतेर्मूले देयः, महाबाहो इतिसम्बोधनं यथा त्वया सर्वेभ्यः करो गृह्यत एवं गरुडोपि गृह्णातीतिसूचनार्थं, **अरयो न केवलं वध्याः किन्तु दण्ड्या अपि**, ततः किम् ? अत आह **नागानां** सम्बन्धी **प्राग्** दण्ड एवंविधो **निरूपितः** ।। २ ।। ततः **स्वं स्वं भागं सर्व** एव **नागा** अष्टकुलपरिमिता **सर्वं** एव काद्रवेयाः **पर्वण्य**मावास्यायां, वीप्सा नित्यार्थं **आत्मनो गोपीथाय** रक्षार्थं ननु वैरी कथं दण्डे दत्तेपि विमुञ्चतीत्याशङ्क्याह **सुपर्णाय महात्मन** इति ।। ३ ।। तत्रायं कालियः स्वदेवोपासको जातः, ततो **विषवीर्यं** जातं, तस्य **मदेनाविष्टः काद्रवेयः** कद्रूदोषोप्यस्मिल्लग्नः कालाधिभौतिकरूपोपि **कालियः कदर्थीकृत्य** दूषयित्वा **गरुडसेवकान्** मारयित्वा **तं बलिं स्वयं बुभुजे,** यतोयं महा**बलो बलिष्ठः** ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

चतुर्दशाध्याये प्रकरणतात्पर्योक्तौ, इन्द्रियप्राणयोर्दोष इत्यादि । क्षुद्रूपाग्नेः प्राणधर्मत्वेनात्र चाग्नेः निवृत्त्युक्त्या प्राणदोषनिवृत्तिरेवोच्यते । कालीयकथया सह कथने हेतुः सहैव हीति । अन्यतरदोषसत्त्वेप्युभयकार्यावश्यंभावेन तथा । महतो गरुडस्यापि प्राणदोषादेव शापप्राप्तिर्यतोतः सर्वथा निवर्तनीय इति ज्ञापनाय पूर्वं प्रासाङ्गकी कथेति भावः । कालस्याप्यगम्यस्थलकर्ता, तद्भयरहितस्यापि भयहेतुश्चेत्यद्भुतकर्ता, मत्स्यरक्षार्थं भक्तापराधे कृते भगवता स तत्रानीतो येन तत्सर्वनाशोऽभूदित्यप्यद्भुतं कर्म। किञ्च, गरुडस्य प्रभुविहारस्थानत्वेनैव तत्रत्यजीवमात्रापीडनेन शापप्रयुक्तखादनाद्यभावात्सौभरेरपि भक्तापराधदोषनिवृत्तिः। सर्पास्थितितद्विषकार्यादिषु शापस्यैव मूलत्वात् तदुद्वासनादिनापि तथा। यमुनाया अपि दोषनिवृत्तिरनयैव लीलयेति ज्ञापनाय प्रासङ्गिकी कथेत्यर्थः।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

चतुर्दशाध्यायतात्पर्यं निरूपयन्तः कालीयदूरीकरणोत्तरं भगवान् किं कृतवानित्याकाङ्क्षायामग्रिममवसरसङ्गत्या निरूपयतीति वदन्तः प्रासङ्गिकमप्युक्तवानित्याहुश्चतुर्दश इत्यादि, निर्दुष्टैरिन्द्रियैर्भगवतो दर्शनान् निवृतो व्रजः पश्चात् तत आगमनानन्तरमग्नेः संरक्षित इत्युच्यते, एष भगवल्लीलाध्यायार्थ इत्यर्थः, अयं च "व्रजे वसन् किमकरो" दितिप्रश्नोत्तरस्यैव प्रपञ्चो ज्ञेयः, इहास्मिन्नध्याये कालीयोपाख्यानं तु विशेषप्रश्नात् प्रासङ्गिकमुच्यते न तु सोध्यायार्थ इत्यर्थः, ननु पूर्वाध्याय इन्द्रियदोषनिवृत्तिः सिद्धा कालीयस्येन्द्रियत्वकथनात्, एवं सत्यत्र तदनुरोधि किमुच्यत इत्याकाङ्क्षायामाहुरिन्द्रियेत्यादि, तदर्थं टिपण्यामाहुः क्षुद्रूपेत्यादि, तथा च प्राणाध्यासनिवृत्तिरत्रोच्यत इत्यर्थः, सहकथनतात्पर्यमाहुरन्यतरेत्यादि, अरोचकस्य मुखविकारत्वेन वैद्यक उक्तत्वाद् रुचेरपि रसनधर्मत्वं, तेन तस्य क्षुत्कार्यत्वमिति स्पष्टं, क्षुधा च रसास्वाद इति तथा, एवं बलस्य प्राणधर्मत्वेन्द्रियकार्यत्व 'मिन्द्रयैर्विषयाकृष्टैश्च तत्कार्य' मित्यादि च तथेत्यूहनीयं, तथा चेन्द्रियप्राणान्यतरदोषसत्त्वेत्युभयकार्यावश्यम्भाव इत्यतो द्वयोः सहैव कथा निरूप्यत इत्यर्थः, पूर्वं कालीयकथानिरूपणस्यापि तात्पर्यमाहुर्महतो गरुडस्यापीत्यादि, एतेन कालीयस्येन्द्रियदोषरूपत्वमपि स्फुटीकृतं बोध्यं, यथा प्रथमस्य तृतीये पादे पशूद्राधिकरणे जानश्रुतेः क्षत्रियत्वनिश्चायनार्थं द्वितीयसूत्र उत्तरत्र ,चैत्ररथेन लिङ्गा' दित्यनेनांशे 'नाथ ह शौनकश्च कापेयमभिप्रतारणं च काक्षसेनि' मित्युत्तरग्रन्थोक्तलिङ्गं हेतुत्वेनोक्तं तथात्र गरुडक्षुधा व्रजस्थक्षुधा च प्राणदोषरूपोत्तरग्रन्थे निर्दिष्टा तत्समभिव्याहारात् तेन लिङ्गेन कालीयस्यापि तथात्वमित्यपि बोधितं, प्रासङ्गिककथायाः प्रयोजनान्तरमप्यस्तीति सुबोधिन्याशयं विवरितुं कारिकांशस्यार्थमाहुः कालस्येत्यादि, अद्भुतकर्तेति सौभरिस्तेनेतिशेषः, तथा च तादृशीमद्भुतकर्मतां वक्तुं तया सहाध्यायार्थकथाकथनमित्यर्थः, सर्वदोषा इत्यादेस्तात्पर्यमाहुः किञ्चेत्यादि, तथा च सर्वदोषा इत्यत्र सर्वेषां दोषा इतिसमासो ज्ञेयः ॥ १ ॥ उपहार्यैरित्यत्रोपहरन्तीत्युप समीप आगताः सन्तोनुयोगिनश्चित्तं क्रोधादिभ्यो निवर्तयन्तीत्यर्थः ॥ २ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

चतुर्दशेध्याये कारिकायां प्रासङ्गिकमिति निर्वृत्यनन्तरमग्नेः संरक्षित इति प्रासङ्गिकमिहोच्यत इत्यर्थः, संरक्षणस्य प्रासङ्गिकत्वं विशदयन्ति इन्द्रियेति, नान्यथेति एतल्लीलाभावे सर्वेषां सौभर्यादीनां दोषा न यान्ति इति च वक्तुं "अवात्सीद् गरुडाद् भीत" इत्यन्ता प्रासङ्गिकी कथोक्तेत्यर्थः, दोषाष्टिप्पण्यां विवृताः, तथा चाध्यायप्रतिपाद्यं संरवणमेव, अन्यत् तु तदङ्गत्वेनोक्तम् । ॥ १ ॥ उपहार्यैरित्यत्र उपहरन्तीति यानितिशेषः, यानुपहरन्ति ते पदार्था उपहाराः, कर्मणि घञ्, समर्प्यन्त इति त्वर्थकथनं उपहारेषु साधव उपहार्या इति विग्रहः वानस्पत्य इति सम्बन्धार्थे पत्यन्तत्वाद् दित्यदित्येतिण्यः ॥ २ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

चतुर्दशाध्यायार्थकथने इन्द्रियप्राणयोर्दोष इत्यादिकालीयदमनेन निरोध्यभक्तानामिन्द्रियदोषो नाशितः, एवं निशीथसमये समागतो दावाग्निर्भगवता दूरिकृतः, स प्राणदोषात्मेति तस्य निवारणमावश्यकमेव, तस्य दवाग्नेर्निरोध्यभक्तदोषरूपता तु "लोभक्रोधादयो दैत्या" इतिकृष्णोपनिषत्सु कृष्णावतारनाश्यानां लोभादिदोषात्मकत्वोक्तेर्युक्ता, तत्र प्राणदोषरूपत्वं तु तत्सदृशधर्ममादायेति बोध्यं, एतस्याग्नेरपि दैत्यत्वं भक्तनाशार्थं प्रवृत्तेः, न हि स्वाभाविकदैत्यत्वमावेशदैत्यत्वं वा विना कोपि भक्तनाशार्थं प्रवर्ततेतस्तथा, अतः कालीयकथयेति सहार्थे तृतीया, कालीयकथया सह दाहाभावो निरूप्यत इत्यर्थः ।। १ ।।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

चतुर्दशाध्याये भगवत इति का.१४७$\frac{३}{४}$-१४९$\frac{३}{४}$। अत्राध्याये भगवतो दर्शनान् निर्वृत आनन्दितो व्रजः पश्चादग्नेः संरक्षितः प्रासङ्गिकं सौभर्युपाख्यानमित्यर्थः, अस्मिन्नध्याये कालीयकथया सह दावाग्निनिवृत्तिकथने हेतुमाहुः इन्द्रियप्राणयोर्दोष इत्यादि, इन्द्रियप्राणयोर्मध्ये एकस्यापि सदोषत्वे द्वितीयस्य निर्दोषत्वमप्रयोजकमिति तयोर्दोषः सहैव निवार्यः अत इन्द्रियदोषात्मककालीयकथया सह प्राणदोषात्मकदावाग्निजनितदाहाभावो निरूप्यत इत्यर्थः, प्रासङ्गिककथेत्यादि, प्रासङ्गिककथा तु हरेरद्भुतकर्मतां वक्तुमुक्ता मत्स्यरक्षार्थं भक्तस्य गरुडस्यापराधे कृते भगवता कालीयस्तत्रानीतो येन सर्वमत्स्यनाशाभूदित्यद्भुतकर्मत्वं, अन्यथैतल्लीलाभावे सर्वदोषाः सर्वेषां सौभर्यादीनां यमुनायाश्च दोषा न यान्तीति ज्ञापनाय प्रासाङ्गिकी कथेत्यर्थः, सौभर्यादिदोषनिवृत्तिप्रकार उक्तष्टिप्पण्याम्। उपहार्यैः सर्पजनैरित्यत्र अमावास्यायां वृक्षमूले नागलोकेषु यद् भवेत्। एकस्मिन् दिवसे तावत् एकत्र स्थापयन्तु हि ॥ १ ॥ ततो हि गरुडस्तस्मिस्तद्भुक्त्वा नव पीडयेत्। इतिव्यवस्थया सर्पा मासि मासि बलिं ददुः ॥ २ ॥ स्पष्टम्।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ सप्तदशे सर्प-स्थानत्यागस्य कारणम् ॥ गोपीगोपीगवां रक्षा दावाग्नेश्च निरूप्यते ॥ १ ॥

स्वस्थानं त्यक्त्वाऽत्रागमनस्य कारणं पृच्छति–नागेति। कालियो नागालयं स्थानं रमणकं कस्माद्धेतोस्तत्याज। ननु 'द्वीपं रमणकं हित्वा' इत्यादिना 'गरुडभयस्य तत्कारणत्वमुक्तमेव' इत्याशङ्क्याह–कृतमिति। तेन कालियेनैकेन सुपर्णस्य गरुडस्यासमञ्जसमप्रियं किं कृतम् ?' 'एकेनैव तेन कृतम्' इत्यपि सामान्यतो जानामि, अन्यथा अन्योऽपि कश्चिदत्रागच्छेत् ॥ १ ॥ एवं पृष्टः शुकः कालियकृतमपराधं वर्णयति–उपहार्यैरिति त्रिभिः। उपहार्यैः गरुडभक्ष्यैः सर्पजनैर्मासि मासि वानस्पत्यः पुष्पं विनैव यः फलति स वृक्षो वनस्पतिः अश्वत्थादिः, तस्य मूले देयो यो बलिः भक्ष्यविशेषः नागानां बाधापरिहाराय इह रमणकद्वीपे प्राक् पूर्वं निरूपितः उपकल्पितः। अत्रैवं ह्याख्यायिका–"गरुडः सर्वानेव सर्पान् सर्वदा भक्षयति, मातृवैरमनुस्मरन् वृथैव कांश्चिन्मारयति च। ततो वासुकिप्रमुखा गरुडाद्भीता ब्रह्माणं शरणं गताः। ततो ब्रह्मा गरुडं समाहूय सन्धिं कारयित्वा नियमेन बलिं कल्पितवान्"। तथोक्तम्–"अमावास्यायां वृक्षमूले नागलोकेषु यो भवेत्। एकस्मिन् दिवसे तावदेकत्र स्थापयेत्तु हि ॥ ततो हि गरुडस्तस्मिस्तद्भुक्त्वा नैव पीडयेत्। इति व्यवस्थया सर्पा मासि मासि बलिं ददुः" इति ॥ 'यथा त्वया सर्वेभ्यः करो गृह्यते, एवं गरुडोऽपि सर्पेभ्य' इति सूचयन् सम्बोधयति–महाबाहो इति ॥ २ ॥ ततःप्रभृति ते नागाः स्वं स्वं देयतया स्वीकृतं भागमात्मनो गोपीथाय संरक्षणाय पर्वणि पर्वणि मासि मासि प्रत्येकामावास्यायां सुपर्णाय प्रयच्छन्ति। अनन्तशक्तित्वेऽपि तदाप्रभृति तन्नियमानुल्लङ्घनात् भगवद्भक्तत्वाच्च तस्य महत्त्वमाह–महात्मन इति ॥ ३ ॥ कालियस्तु गरुडं कदर्थीकृत्य तुच्छीकृत्य अविगणय्य स्वय तस्मै बलिं न प्रायच्छत्, प्रत्युत अन्यदत्तमपि तं बलिं बुभुजे इत्यन्वयः। तुच्छीकरणे हेतुमाह–वीषवीर्याभ्यां यो मदस्तेनाविष्टो व्याप्त इति। 'मातृप्रयुक्तं वैरमपि तत्र हेतुः' इत्याशयेनाह–काद्रवेय इति। कद्रूपुत्रः ॥ ४ ॥

अन्वितार्थप्रकाशिका

नागनिःसारणं बन्धुमेलनं रक्षणं दवात् ॥ प्रोक्तं सप्तदशे तत्र श्लोकाः पञ्चाढ्यविंशतिः (२५) ॥

द्वे उवाचेति (२)वाक्ये च षड्विंशतिरनुष्टुभः (२६) ॥ १७ ॥

नागालयमिति ॥ कालियो नागानामालयं स्थानं रमणकं कस्मात् हेतोः तत्याज। तेन कालियेनैकेन सुपर्णस्य गरुडस्यासमञ्जसमप्रियं किं कृतम् ॥ १ ॥ उपहार्यैरिति ॥ हे महाबाहो ! उपहार्यैः गरुडस्य भक्ष्यत्वेनोपहारीक्रियमाणैः सर्पजनैः सर्पायत्तैर्जनैः सर्परूपैर्जनैर्वा मासि मासि वानस्पत्यः वनस्पतेर्मूले देयः। पत्युत्तरपदलक्षणो ण्यः। यो बलिः भक्ष्यविशेषः नागैः स्वबाधापरिहाराय कल्पितत्वात् नागानां सबन्धी यस्मिन्नेकैको नागो भागो दीयते स बलिरिति वा। इह रमणकद्वीपे प्राक् पूर्वं निरूपितः उपकल्पितः। अत्रैवं ह्याख्यायिका। गरुडः सर्वानेव सर्पान् सर्वदा भक्षयति मातृवैरमनुस्मरन् वृथैव कांश्चिन्मारयति च। ततो वासुकिप्रमुखा नागाः गरुडाद्भीता ब्रह्माणं शरणं गताः समाहूय सन्धिं कारयित्वा मासि मासि प्रत्येकामावास्यायां महात्मने महाशरीराय मर्यादानुल्लङ्घकाय वा सुपर्णाय प्रयच्छन्ति ॥ ३ ॥ विषेति विषवीर्याभ्यां यो मदस्तेनाविष्टो व्याप्तः काद्रवेयः कद्रूपुत्रः मातृवैरप्रयुक्तश्चेत्याशयः। कालियस्तु गरुडं कदर्थीकृत्य तुच्छीकृत्य अविगणय्य स्वयं तस्मै बलिं न प्रायच्छत्। प्रत्युतान्यदत्तमपि तं बलिं बुभुजे ॥ ३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं सप्तदशेध्याये कालियस्य यमुनागमनादिप्रसंगो वर्ण्यते नागालयं नागनिवासस्थानं तेन एकेन कालियेनाममंजसं अहितं किं कृतं ॥ १ ॥ इह रद्वीपे उपहार्यैः गरुडभक्ष्यैः सर्परूपैः जनैः स्वपीडापरिहाराय यो नागानां संबंधी बलिर्गरुडभक्ष्य मासिमासि वानस्पत्यो वनस्पतेः मूले देयः प्राक् गरुडाय निरूपितः ॥ २ ॥ पर्वणि पर्वणि मासि मासि नागाः आत्मनः स्वस्य

गोपीथाय रक्षणाय स्वं स्वं भागं गरुडाय प्रयछंति ददति ।। ३ ।। विषेति । विषवीर्याभ्यां मदाविष्टः मदव्याप्तः काद्रवेयः कद्रुसुतः गरुडं कदर्थीकृत्य तिरस्कृत्य तं नागैर्दत्तमपि बलिं गरुडभोज्यं पदार्थं स्वयं बुभुजे नागसंकेतानुसारेण सर्वे नागाः स्वं स्वं भागं गरुडाय प्रयछंति कालियस्तु न प्रयछति अन्यैर्दत्तं स्वयं भुक्तवानित्यर्थः ।। ४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्राह सप्तदशे हेतुं सोऽहेरात्मालयत्यजेः । दवादावच्च बन्धून् स्वान् सुप्तान् स्वशरणं गतान् ।। १ ।।

यदुक्तं 'द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः । यद्भयात्' इति तत्र कालियस्य द्वीपत्यागनिमित्तबुभुत्सुः पृच्छति राजा नागालयमित्यनेन ।। नागालयमिति ।। कालियः, रमणकं रमणकसंज्ञं, नागालयं सर्वेषां नागानां निवासस्थानभूतं तं द्वीपं, कस्मात् तत्याज । किं च तेन एकेन कालियेन, स्वस्य भयनिमित्तमिति शेषः । सुपर्णस्य गरुडस्य, असमञ्जसमप्रियं, किं वा किं नु कृतम् अन्येषु निर्भयेषु सत्सु स्वभयहेतुकमनेनैकेन किमप्रियं कृतमन्येषां भयाभावनिमित्तं च किमिति प्रश्नाशयः ॥ १ ।। तत्र तावत्तत्रत्यानां नागानां सुपर्णाद्भयाभावनिमित्तमाह ॥ उपहार्यैरिति ॥ हे महाबाहो, प्राक् पुराकाले, सर्वजनैः, सर्पाः नो मा दशन्तु इति धियेति शेषः । उपहार्यैर्भक्ष्यैः कृत्वा, यः बलिः, इह लोके, मासि मासि, वानस्पत्यो वनस्पतिमूले देयः, यद्वा वनस्पतिं गते चन्द्रेऽमावास्यायां प्रवर्त्तमानः, नागानां निरूपितः कल्पितः ।। २ ।। सर्पजनैरपि सः स्वरक्षणाय सुपर्णायार्पित इत्याह ।। स्वं स्वमिति ॥ सर्वे नागाः अपि, तं स्वं स्वं स्वकीयं स्वकीयं, भागं, आत्मनः गोपीथाय रक्षणाय, पर्वणि पर्वणि, सर्वास्वमावास्यास्वित्यर्थः । महात्मने महानुभावाय, सुपर्णाय गरुत्मते, प्रयच्छन्ति अर्पयांचक्रुरित्यर्थः । अतस्तत्रत्यानां गरुडाद्भयं नास्तीत्युक्तम् ॥ ३ ।। विषवीर्येति । एवं सर्वेषु नागेषु स्वं स्वं जनार्पितं भागं गरुडाय प्रत्यमावास्यं प्रयच्छत्सु सत्सु इति शेषः । काद्रवेयः कद्र्वाः पुत्रः, कालियस्तु, विषवीर्याभ्यां यो मदस्तेनाविष्टः सन्, गरुडं सुपर्णं, कदर्थीकृत्य तुच्छीकृत्य अविगणय्येति यावत् । तं गरुडाय देयं बलिं स्वयं बुभूजे ॥ ४॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नागालयमिति : १०.१७.१.

स्वीयावासतया भयं न रमणस्थित्या न चासौष्ठवं कान्तासङ्गितया न चोत्तरवयःक्रोधान्न वैराग्यधीः ।
द्वेषः पक्ष्यधिपेन चेत् स हि समः सर्वोरगैस्तत्कुतस्त्यक्त्वा स्वाश्रममभ्यगादहिरिहेत्येवं नृपस्याशयः ॥ १ ॥

कदर्थीकृत्येति : १०.१७.४.

विनयः सकलेष्टकृज्जनेषु विनयाद्वैर्युपयाति मित्रभावम् ।
स हि येन तिरस्कृतः प्रमादान्नियतं तद्गतिरीदृगेव भूयात् ।। २ ।।

कृष्णप्रिया

राजा परीक्षितजी ने प्रश्न किया कि—भगवन् ? कालीय नाग ने नाग लोगों का निवास-स्थल रमणक द्वीप का क्यों त्याग किया ? एवं इस अकेले कालीग नाग ने श्रीगरुडजी का कौन सा अपराध-अनुचित वर्तन किया था ? ।। १ ।। श्रीशुकाचार्यजी ने कहा कि—राजन् ! उपहार-भेट-बलिदान कर देने वाले वासुकि प्रभृति सर्पजनों ने पूर्व में सन्धि के समयपर प्रस्ताव निश्चित किया था कि प्रत्येक महिने के अन्त में अमावस्या के दिन गरुड जी के निमित्त वृक्ष के मूल में बलि रख आने का करार किया था । श्रीब्रह्माजी इस प्रस्ताव के माध्यम थे ।। २ ।। इस प्रस्ताव के बाद, सभी नाग अपनी रक्षा के लिए प्रत्येक मास की अमावस्या के पर्व दिन अपना-अपना "भाग-बलि" महात्मा सुपर्ण श्रीगरुडजी को देते थे ।। ३ ।। कद्रू का पुत्र काद्रवेय कालीय को अपने भयंकर विष नाम के बल का घमण्ड था, जिससे वह कालीय श्रीगरुडजी को सामान्य मानकर बलि के रक्षक को मारकर बलि का स्वयं उपभोग करने लगा ।। ४ ।।

तच्छ्रुत्वा कुपितो राजन् [1]भगवान् भगवत्प्रियः । विजिघांसुर्महावेगः [2]कालियं समुपाद्रवत् ॥ ५ ॥
तमापतन्तं तरसा [3]नखायुधं प्रत्यभ्ययादुत्थि[4]तनैकमस्तकः ।
दद्भिः सुपर्णं व्यदशद् ददायुधः करालजिह्वोच्छ्वसितोग्रलोचनः ॥ ६ ॥
तं तार्क्ष्यपुत्रः स निरस्य [5]मन्युना प्रचण्डवेगो मधुसूदनासनः ।
पक्षेण सव्येन हिरण्यरोचिषा जघान कद्रुसुतमुग्रविक्रमः ॥ ७ ॥
सुपर्णपक्षाभिहतः कालियोऽतीव विह्वलः । ह्रदं विवेश कालिन्द्यास्तदगम्यं दुरासदम् ॥ ८ ॥

---

१. गरुत्मान् च. पु. टी. २. महावीर्य–विज. ३. विषायुधः–श्रीधर. वंशी वीर. विज. जीव. विश्व. शुक. । ४. दुच्छ्रि–श्रीधर. वंशी वीर.; दुदधूत–विज ! ५ मन्युमान्–श्रीधर. वंशी वीर. विज.

कर्दमक्षमा

अन्वयः–राजन् ! तत् श्रुत्वा भगवत्प्रियः कुपितः भगवान् (गरुडः) जिघांसुः महावेगः कालियम् समुपाद्रवत् ॥ ५ ॥ उत्थितनैकमस्तकः करालजिह्वः उच्छ्वसितोग्रलोचनः ददायुधः नखायुधं तरसा आपतन्तम् तम् प्रत्यभ्ययात् (च) सुपर्णं दद्भिः व्यदशत् ॥ ६ ॥ उग्रविक्रमः मधुसूदनासनः प्रचण्डवेगः सः तार्क्ष्यपुत्रः तम् निरस्य हिरण्यरोचिषा सव्येन पक्षेण कद्रूसुतम् जघान ॥ ७ ॥ सुपर्णपक्षाभिहतः अतीवविह्वलः कालियः तदगम्यम् दुरासदम् कालिन्द्याः ह्रदम् विवेश ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विषमेवायुधं यस्य सः प्रत्यभ्ययाद्योद्धुं प्रतिजगाम । उच्छ्रितनैकमस्तकः उन्नमितानेकफणः ददायुधो दंतायुधः करालजिह्वश्चासावुच्छ्वसितोग्रलोचनश्च उच्छसितान्युज्जृंभितान्युग्राणि लोचनानि यस्य सः ॥ ६ ॥ तार्क्ष्यपुत्रो गरुडः मधुसूदनस्यासनं यस्मिन्सः ॥ ७ ॥ तस्य गरुडस्यागम्यमगाधतया च दुरासदम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् निजबलिभक्षणम् । भगवत्प्रियः गरुडः । विजिघांसुः हंतुकामः । हे राजन्निति । बलिप्रदराजविप्रतिपत्त्या भवदादिवदिति भावः ॥ ५ ॥ तम् गरुडम् ॥ ६ ॥ 'तार्क्ष्यौ गरुडकश्यपौ' इत्यमरः । तम् कालियम् । सव्येन दक्षिणेन वामेन वा 'सव्यं दक्षिणवामयोः' इति वैजयंति ॥ ७ ॥ अगम्यम् गंतुमशक्यम् । दुरासदम् अन्येषां नरादीनामित्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हे राजन्निति बलिप्रदराजविप्रतिपत्त्या भवदादिवदिति भावः । यतो भगवान् सर्वशक्तियुक्तः भगवतः प्रियश्च पार्षदप्रवर इत्यर्थः । अतो भगवद्वद्दुष्टनिग्रहपरतया महावेगः सन् सम्यक् मारणोद्यततया समीप एवागच्छत् तस्य तुच्छत्वेऽपि धाष्टर्यात् तामसत्वेन भगवदनादरस्वभावत्वाच्चेति भावः ॥ ५ ॥ विषायुधः दूरादेव फूत्कारादिना तन्मोचकः सन् प्रत्यभ्ययात् निकटे तु ददायुधस्सन् व्यदशत् कराला दुर्विषमतया स्पर्शमात्रेण हिंसिका जिह्वा यस्य उच्छ्वसितानि प्रसारितानि उग्राणि दृष्टिमात्रेण भस्मीकराणि लोचनानि यस्य स च स च ॥ ६ ॥ तृक्षो मरीचिः ततः शिवादित्वाददन्तादण्यण् ततस्तदनन्तरापत्त्यस्य तार्क्ष्यस्य श्रीकश्यपस्य महामुनेः पुत्रजन्मना तत्प्रभावसञ्चारः सूचितः तार्क्षीति वा पाठे गर्गादिभ्योयञिति गोत्रापत्यविवक्षया गरुत्मान् गरुडस्तार्क्ष्य इत्यप्युच्यते सच कालीयस्तु कियानिति स्वाभाविकविशेषान्तरप्याह मध्विति । कालिये तु तादृशस्वभावे मातुरेव गुणसञ्चार इत्याह कद्रूसुतमिति श्रीगरुडस्य सौन्दर्य्यमप्याह हिरण्येति सव्येनेति अवहेलां बोधयति ॥ ७ ॥ अन्यैरपि दुरासदं दुष्प्रवेशम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे राजन्निति चक्रवर्तिनो बलिप्रदराजविप्रतिपत्त्या कोपो भवतीति भवता ज्ञायत एवेति भावः । यद्वा, राजमानः कोपेन तेजोभरप्राकट्यात् स्वतो वा विद्योतमानः यतो भगवान् सर्व्वशक्तियुक्तः भगवतः प्रियश्च पार्षदप्रवर इत्यर्थः । सम्यङ्मारणोद्यततया समीप एव वेगेनागच्छत् । तत्र हेतुः—महावेगोऽपरिच्छिन्नजव इति ॥ ५ ॥ विषायुध इति शस्त्रान्तरराहित्यं परममारकत्वं चोक्तम् । दन्ता विषमयत्वेनायुधानि प्रहरणानि यस्य, कराला दुर्विषमयतया स्पर्शमात्रेण हिंसिका जिह्वा यस्य, उच्छ्वसितानि प्रसारितानि उग्राणि दृष्टिमात्रेण भस्मीकराणि लोचनानि यस्य स च स च । एभिर्विशेषणैः परमदुर्ज्जयत्वं तथा श्रीगरुड़े विषस्य दन्ताघातादीनामप्यकिञ्चित्करत्वाद् विषवीर्य्यमदस्य व्यर्थत्वं च सूचितम् ॥ ६ ॥ तार्क्ष्यस्य श्रीकश्यपस्य महामुनेः पुत्र इति महाप्रभावः सूचितः । कालियस्यापि तत्पुत्रत्वे श्रीमधुसूदनाभक्तत्वात्तादृशप्रभावाभावेन तदपुत्रत्वमेवेति भावः । स महाबलवीर्य्यत्वादिना श्रीभगवत्पार्षदाग्रयत्वेन वा प्रसिद्धः, तत्रापि मन्युमान् तदपराधेन जातमन्युः, अतः प्रचण्डः परमदुःसहो वेगो जवोऽपि यस्य, यद्वा, स्वभावत एव प्रचण्डवेगः, अतएव मधुनाम प्रसिद्धादिदैत्यहन्तुरासनं यस्मिन् सः, अतएव उग्रः असह्यो विक्रमः पराक्रमो यस्य सः, यथेष्टं वा विशेषणानामेषां हेतुहेतुमदभाव इति, इति महागुणा उक्ताः, सौन्दर्य्यमयी हिरणावद्रोचिः कान्तिर्यस्य तेन, अनेन महाकाठिन्यञ्च सूचितम् । यद्वा अग्निप्रभाभीतानां सर्पाणामग्नितुल्यवर्णस्वर्णरोचिषा भयप्रदत्वमेवोक्तम् । सव्येनेति अवहेलां बोधयति । कद्रुसुतमिति सहजपूर्व्ववैरं दर्शितम्, अतस्तं निरस्य पराजित्यापि सुदूरे क्षिप्त्वापि वा, जघान प्राहरत् । यद्वा, पक्षेण जघानैव, न तु मारयामासेत्यत्र हेतुः—कद्रुसुतमिति, भ्रातृत्वेन कद्रुमान्यतापेक्ष्यता वेति भावः ॥ ७ ॥ अतीवविह्वलोऽत्यन्तवेदनातुरः सन् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तार्क्ष्यपुत्रो गरुडः ॥ ७ ॥ तदगम्यं गरुडेनागम्यं ब्रह्मणो वाक्यस्य माननीयत्वात् परमपुरुषेणैव गरुत्मतापि प्रतिघातशक्तिमतापि तदनुरोध उपपद्यते ॥ ८–१३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे राजन् ! तत्कालियस्य कर्माऽऽकर्ण्य भगवतः प्रियो भगवान् गरुडः कालियं हन्तुम् इच्छुर्महावेगः समुपाद्रवत् ॥ ५ ॥ तमापतन्तं गरुडं विषमेवायुधं यस्य स कालियस्तरसा बलेन प्रत्यभ्यपतत् दद्भिर्दन्तैर्व्यदशत् दष्टवांश्च, कथम्भूतः ? उच्छ्रितानि उद्धृतानि नैकान्यनेकानि मस्तकानि फणा येन दन्ता एवायुधानि यस्य कराला जिह्वा यस्य उच्छ्वसितान्युदस्तानि उग्राणि लोचनानि यस्य सः ॥ ६ ॥ मधुसुदनस्यासनमुपवेशनं यस्मिन् सः उग्रः विक्रमो यस्य प्रचण्डः वेगो यस्य सः तार्क्ष्यपुत्रो गरुडः क्रोधवांस्तं कद्रूसुतं निरस्येतस्ततः प्रक्षिप्य हिरण्यरोचिषा सव्येन वामेन पक्षेण जघान ताडितवान् ॥ ७ ॥ सुपर्णस्य पक्षेणाभिहतः कालियोऽतीव विह्वलः उद्विग्नस्तेन सुपर्णेनागम्यं गन्तुमशक्य दुरासदमगाधतया अन्यैश्च दुष्प्रवेशं यमुनाया ह्रदं विवेश प्रविष्टवान् ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विजिघांसुः हन्तुकामः ॥ ५ ॥ विषमेवायुधं यस्य स तथा उद्धृतनैकमस्तकः उद्धृतानेकफणः दद्भिः दन्तैः व्यदशत् दंशितवान् दन्ता एवायुधं यस्य स तथा करालजिह्वश्च उच्छ्वसितोग्रलोचनश्च तथा तथा उच्छ्वसिताः दीर्घश्वासोपेतः उग्रे लोचने यस्य स तथा ॥ ६ ॥ जघान अहनत् आत्मपादैस्ताडितवानित्यर्थः ॥ ७ ॥ कालिन्द्याः यमुनायाः तेन गरुडेन अगम्यं दुरासदं पश्वादीनामिति शेषः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विषायुधः फूत्कारादिना दूरात् ददायुधो निकटात् ॥ ६-७ ॥ अन्यैर्दुरासदम् दुष्प्रवेशम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्रत्यकर्णे जपसर्पमुखात्तत् श्रुत्वा ॥ ५ ॥ विषायुधः दूरात् फूत्कारेण तन्मोचकः निकटे तु ददायुधो व्यदशत् कराला जिह्वा यस्य उद्भूतं श्वसितं यस्य उग्राणि लोचनानि यस्य स च सच सच सः ॥ ६ ॥ तार्क्ष्यस्य कश्यपस्य पुत्रः मधुसूदनस्यासनं यस्मिन् सः ॥ ७ ॥ दुरासदम् अगाधजलत्वेनान्यैरपि दुष्प्रवेशम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विषमेवायुधं यस्य स कालियः तं गरुडं योद्धुं प्रत्यभ्ययात् प्रतिजगाम ॥ ६ ॥ तार्क्ष्यस्य कश्यपस्य पुत्रः मधुसूदनस्य आसनं यस्मिन् स गरुडः तं कालियम् कद्रूसुतमित्यनेन काद्रवेयैः सह गरुडस्य अतिविरोधः सूच्यते समुद्रमथने उच्चैःश्रवाः कृष्णवर्णः। शुक्लवर्णो वेति कद्रूप्रष्टा तथ्यभाषिणी विनतोवाच शुक्लवर्णः पुनः कद्रूर्यदि शुक्लवर्णस्तर्हि तव दासी अहम्, यदा कृष्णवर्णस्तदा मम दासी त्वमिति समयं कृत्वा स्वपुत्रैः कृष्णवालभूतैः तमश्वं कृष्णवर्णं कारयित्वा विनतां दास्येनायोजयत् तदा काद्रवेयैर्वैनतेयो बहुधा क्लेशितोऽमृताहरणेन दासीभावगर्ते पतितां स्वमातरमुद्धारेति महाभारते द्रष्टव्यम् ॥ ७ ॥ तस्य गरुडस्यागम्यम् ॥ ८।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तच्छ्रुत्वा सूचकात् सर्पात् ॥ ५ ॥ विषायुधो दूराद्विषाणि फूत्कारेण वर्षत् अन्तिके तु ददायुधो व्यदशत्। कराला जिह्वा यस्य उद्भूतं स्वसितं यस्य उग्राणि लोचनानि यस्य सच सच सच सः ॥ ६ ॥ तार्क्ष्यस्य कश्यपस्य पुत्रः मधुसूदनस्यासनं यस्मिन् सः ॥ ७ ॥ तस्य गरुड़स्यागमां दूरासदमगाधाम्बुनान्यैर्दुष्प्रवेशम् ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विजिघांसुर्हन्तुकामः कालियं समुपाद्रवत् ॥ ५ ॥ विषमेवायुधं यस्य स तथाऽभ्यधात्सम्मुखमाययौ। उद्धृतानि नैकान्यनेकानि मस्तकानि यस्य स दद्भिर्दन्तैर्ददायुधो दन्ता एवायुधं यस्य सः। गतं। करालजिह्वश्चासावुदुच्चानि श्वसितानि यस्य स चासावुग्राणि लोचनानि यस्य स च ॥ ६ ॥ मधुमूदनासनो भगवत आसनमुपवेशोऽत्रेति हिरण्यरोचिषा सुवर्णकान्तिमता सव्येन वामेन पक्षेण। यद्यपि सव्यं दक्षिणवामयोरिति विश्वस्तथाऽपि तदलक्ष्यतां द्योतयितुं वामेनेति व्याकरणं युक्तमिति मन्तव्यम्। एतदुपोद्बलकं तु पक्षेणेत्येकवचनम्। कद्रूसुतं जघान। वामं शरीरं सव्यं स्यादित्यमरः ॥ ७ ॥ सुपर्णपक्षेणाभिहतः कालिय इतरैर्दुरासदं मत्वेति शेषः। अतीवविह्वलः संस्तदगम्यं गरुडागम्यं कालिन्द्या ह्रदं विवेश ॥ ८ ॥

श्रीसुबोधिनी

तत् सेवकैर्निवेदितो गरुडः **श्रुत्वा कुपितो** जातः, **राजन्निति** राज्यस्थितिरेतादृशीति ज्ञापयति, असामर्थ्यं तु तस्य नास्तीत्याह **भगवानिति**, भगवत्कृपया **भगवान्**, यतो **भगवतोयं प्रियो** वाहनरूपः, अतस्तस्य दण्डमप्यस्वीकृत्य **विशेषेण जिघांसुरेव कालियं** प्रति **सम्यङ् महाघोषपूर्वमुप** समीप एव **शीघ्रमाद्रवत्** ॥ ५ ॥ आराधितो विषात्मा हृदये प्रविष्ट इति तस्यापि सम्मुखो जात इत्याह **तमापतन्त**मिति, नन्वशस्त्रं कथं योधयतीत्याशङ्क्याह **नखायुध**मिति, **तं प्रति**कूलतया**भ्ययात्** सम्मुखं

गतः, **उत्थितान्यनेकानि मस्तकानि** यस्य, अयमेकोहं बहुरूप इति ज्ञापयितुं, ततः **सुपर्णं दद्भिर्दन्तै**राशीरूपैर्यतोयं **ददायुधो ददा** दन्ता **आयुधानि** यस्य, न केवलं दशमात्रेण तं त्यक्तमिच्छति किन्तु भक्षयिष्यतीत्याह **करालजिह्व** इति, **कराला जिह्वा** यस्य' **कराला** ग्रसनसमर्था क्रूरा, **उच्छ्वसितान्युग्राणि लोचनानि** यस्य, अनेन तस्य ज्ञानशक्तिः कुण्ठितेति सूचितं, **उच्छ्वसितत्वान्**मर्यादाभङ्गः, **उग्रत्वाद्** विपरीतत्वम् ॥ ६ ॥ एतादृशमपि **गरुडो** मारितवानित्याह **तमिति, तं** प्रसिद्धं, तुल्यतायामवश्यमारकत्वे च हेतुमाह **तार्क्ष्यपुत्र** इति, **तार्क्ष्यः** कश्यपो भावान्तरमापन्नः, रूपान्तरेण चतसृणां विवाहः कृत इत्ययमपि काद्रवेय इति तुल्यता, **स** इति पूर्वशत्रुः कोपितश्च, **निरस्य** नितरा **'मसु** क्षेपणे,' दूरादेव क्षिप्त्वा तिरस्कृत्येत्यर्थः, नन्वाधिदैविकबलेन समागच्छन्तं कथं तिरस्कृतवान् ? तत्राह **मन्युने**ति, क्रोधेन तिरस्कारं कृतवान्, **प्रचण्डो वेगो** यस्य, तदपेक्षयाप्यस्य क्रियाशक्तिरधिकोक्ता, तत्र हेतु**र्मधुसूदनस्यासन**भूत इति, **गमने** भगवत आसनं तदर्थं भगवद्दत्ता 'क्रियाशक्तिरस्मिन् वर्तत इति' अतः **सव्येन पक्षेण** बृहद्रूपेण, तद् ब्रह्मात्मकं भवति तेन, **स** निरस्तः, तस्य वक्षस्य ब्रह्मत्वाभिव्यक्तिर्जातेत्याह **हिरण्यरोचिषे**ति **हिरण्य**रूपत्वं भगवद्धर्मः, ननु सोपि **कश्यप**पुत्रः कथं तं मारितवानित्याशङ्क्याह **कद्रुसुत**मिति, मातृदोषेण **दुष्ट**, मातृप्राधान्यान्नात्र बीजमुख्यता ननु दंशापेक्षया प्रहारोल्पीयानिति कथमस्य जयः ? तत्राहो**ग्रो विक्रमो** यस्येति, बाह्योप्ययं विक्रम **उग्रो** मरणपर्यवसायी ॥ ७ ॥ ततो यज् जातं तदाह **सुपर्णपक्षाभिहत** इति, **सुपर्ण**स्य गरुडस्य **पक्षेणाभिहत**स्ताडितः **कालियो विह्वलो** जातस्ततः **कालिन्द्या ह्रदं विवेश, तत्** त्वगम्यं गरुडस्य ॥ ८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तं तार्क्ष्यपुत्र इत्यत्र बृहद्रूपेणेति " छन्दांसि वै सोपर्णेया" इतिश्रुत्या बृहत्सामरूपेणाक्षररूपेण वा ॥ ७ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

करालजिह्वोच्छ्वसितोग्रलोचन इत्यत्र उच्छ्वसितत्वान् मर्यादाभङ्ग इति उच्छ्वसितयुक्तत्वाद् दर्शनशक्तेर्मन्दत्वं सूचितं ज्ञानशक्तिमान्द्ये मर्यादाभङ्गो युक्त इति गरुडबलिभोगरूपो मर्यादाभङ्गः कालीयेन कृत इत्यर्थः, विपरीतत्वमिति स्वमारकस्य गरुडस्य मारणार्थं प्रवृत्तिरित्यर्थः ॥ ६ ॥ पक्षेण सव्येनेत्यस्य विवृतौ ब्रह्मात्मकं भवतीति वेदात्मकमित्यर्थः, हिरण्यरूपत्वं भगवद्धर्म इति य "एषोन्तरादित्ये हिरण्मयः पुरुष" इतिश्रुतेः ॥ ७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'राजा अपमानं न सहते, इति तु तव विदितमेव' इत्याशयेन सम्बोधयति–राजन्निति। तत् कालियकृतं बलिभक्षणं श्रुत्वा गरुडः कालियं विजिघांसुः हन्तुमिच्छुः समुपाद्रवत् महाघोषपूर्वकं समीपमाजगामेत्यन्वयः। तत्र हेतुः–कुपित इति। तत्र सामर्थ्यमाह— महावेग इति। तत्र हेतुमाह– भगवानिति, भगवद्दत्तसामर्थ्यः। तत्रापि हेतुमाह– भगवत्प्रिय इति, भगवद्वाहन इत्यर्थः ॥ ५ ॥ तं सुपर्णं आपतन्तं वेगेनागच्छन्तं कालियोऽपि तरसा वेगेन प्रत्यभ्ययात् योद्धुं सन्मुखं गतवान्। तं विशिनष्टि विषमायुधं यस्य सः, उत्थितनैकमस्तकः उन्नमितानेकफणः, दन्ता आयुधं यस्य सः, कराला जिह्वा यस्य स चासौ उच्छ्वसितानि उज्जृम्भितानि उग्राणि लोचनानि यस्य सः समीपं गत्वा च दद्भिर्व्यदशत् ॥ ६ ॥ तं कद्रूसुतं कालियं स प्रसिद्धः शत्रुः तार्क्ष्यपुत्रो गरुडो निरस्य तिरस्कृत्य क्षिप्त्वा सव्येन पक्षेण जघानेत्यन्वयः। तत्र हेतुमाह–मन्युमान् सङ्क्रुद्धः। सामर्थ्यमाह–प्रचण्डोऽसह्यो वेगो यस्य सः। प्रभावातिशयमाह– उग्रविक्रम इति। तत्र हेतुमाह मधुं सूदयतीति तथा तस्यासनं यस्मिन् स इति। 'वेगेन गमनार्थं भगवतैव दत्तशक्तिः' इत्याशयः। 'सव्येन' इत्यनायासत्वं सूचितं, दक्षिणपक्षस्य ततोऽप्यधिकबलत्वात् ॥ ७ ॥ सुपर्णस्य पक्षेणाभिहतः, अत एवातीव विह्वलः व्याकुलः कालियस्तदगम्यं तेन गरुडेन गन्तुमशक्यं दुरासदमगाधजलतया दुस्प्रवेशं च कालिन्द्या ह्रदं विवेशेत्यन्वयः ॥ ८ ॥

अन्वितार्थप्रकाशिका

तदिति ॥ हे राजन् ! तत् कालियकृतं बलिभक्षणं तत्रत्यकर्णेजपसर्पमुखात् श्रुत्वा कुपितः भगवान् समर्थः भगवतः प्रियः महावेगः स गरुडः कालियं विजिघांसुः सन् उपाद्रवत् वेगेन आययौ ॥ ५ ॥ तमिति ॥ विषमायुधं यस्य सः दूरात्फूत्कारेण विषं मुञ्चन् उत्थितनैकमस्तकः उन्नमितानेकफणः। उच्छ्रितेत्यपि पाठः। निकटात्तुदतः दन्ता आयुधं यस्य सः दन्तैर्दशन्नित्यर्थः। कराला जिह्वा यस्य स चासौ उच्छ्वसितानि उज्जृम्भितानि उग्राणि लोचनानि यस्य स कालियोऽपि तं सुपर्णम् आपतन्तं वेगेनागच्छन्तं तरसा वेगेन प्रत्यभ्ययात् योद्धुं सम्मुखं गतवान् दद्भिर्व्यदशच्च ॥ ६ ॥ तमिति ॥ मन्युमान् प्रचण्डवेगः मधुमदनस्य हरेरासनमुपवेशनं यस्मिन् स उग्रविक्रमः तृक्षो मरीचिः। ततोऽपत्ये शिवाद्यण्। तार्क्षस्य कश्यपस्य पुत्रः गरुडः। सयकारपाठे तु गर्गादिगोत्रापत्यविवक्षया "गरुत्मान् गरुडस्तार्क्ष्य" इति। तं कद्रूसुतं कालियं निरस्य क्षिप्त्वा हिरण्यस्येव रोचिः कान्तिर्यस्य तेन सव्येन वामेन पक्षेण जघान ॥ ७ ॥ सुपर्णेति ॥ सुपर्णस्य पक्षेणाभिहतः अत एवातीवविह्वलः व्याकुलः कालियस्तदगम्यं तेन गरुडेन गन्तुमशक्यं दुरासदमगाधजलतया दुष्प्रवेशं च कालिन्द्या ह्रदं विवेश ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जिघांसुः हंतुमिच्छुः गरुडः कालियं उपाधावत् ॥ ५ ॥ तरसा आपतंतं आयांतं गरुडं विषायुधः विषमेव शस्त्रं यस्य प्रत्यभ्ययात् युधाय आययौ ददायुधः दतायुधः सः दद्भिः दतैः सुपर्णं व्यदशत् ददंश कथभूतः उच्छ्रितनकमस्तकः उच्छ्रितानि उत्थितानि अनेकानि मस्तकानि फणा यस्य सः कराला भयानका जिह्वा यस्य सः उच्छ्वसितानि बहिर्निःसृतानि उग्राणि लोचनानि यस्य सः स चासौ स च ॥ ६ ॥ तमिति तार्क्ष्यपुत्रः स गरुडः तं नागं निरस्य मधुसूदनस्यासनं यस्मिन्सः हिरण्यरोचिषा सुवर्णकांतिना सव्येन पक्षेण कद्रुसुतं जघान ॥ ७ ॥ कालिंद्या यमुनायाः तेन गरुडेनागम्यं गंतुमशक्यं दुरासदं अगाधजलत्वान्मनुष्यैर्दुःप्राप्यं ह्रदम् ॥ ८-९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति ॥ हे राजन्, तत्कालियस्य कर्म श्रुत्वा आकर्ण्य, भगवत्प्रियो भगवतः प्रेमास्पदीभूतः भगवान् गरुडः, कुपितः। अत एव कालियं विजिघांसुः कालियं विहन्तुं समिच्छुरित्यर्थः। अत एव, महावेगः सन्, समुपाद्रवत् । तत्पश्चाददधावदित्यर्थः ॥ २॥ तमिति ॥ विषमेवायुधं यस्य सः, उत्थितनैकमस्तकः उन्नमितानेकफणः, पाठान्तरेऽप्ययमेवार्थः। दन्ता एवायुधानि यस्य सः, कराला भयंकरा जिह्वा यस्य सः उच्छ्वसितान्युज्जृम्भितानि उग्राणि लोचनानि यस्य स चासौ स च, कालियः, आपतन्तमभ्यागच्छन्तं, तं सुपर्णं गरुडं, तरसा बलेन, प्रत्यभ्ययात्सन्मुखमयात् । दद्भिर्दन्तैः, व्यदशत् दष्टवांश्च ॥ ६ ॥ तमिति ॥ मधुसूदनस्यासनमुपवेशो यस्मिन् सः, उग्रः विक्रमो यस्य सः, प्रचण्डोऽतितीव्रो वेगो यस्य सः, तार्क्ष्यपुत्रः स गरुडः, मन्युमान् क्रोधवान् सन्, तं कद्रूसुतं, निरस्य इतस्ततः प्रक्षिप्य, हिरण्यरोचिषा सुवर्णसमानकान्तिमता, सव्येन वामेन रक्षेण, जघान ताडितवान् ॥ ७ ॥ सुपर्णेति ॥ सुपर्णस्य गरुडस्य पक्षो गरुत्तेनाभिहतः, सुपर्नेन पक्षेण ताडित इत्यर्थः। कालियः, अतीव विह्वलः अत्यन्तमुद्विग्नः सन्, तेन सुपर्णेनागम्यस्तं, दुरासदमगाधतयाऽन्यैर्दुष्प्रवेशं, कालिन्द्या यमुनायाः, ह्रदं विवेश प्रविष्टवान् ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तच्छ्रुत्वेति : १०.१७.५.

नाहिस्मयं विषहते क्वचिदपि भुवनेषु विष्णुपक्षीयः। विनतोद्भवोऽपि कुपितः समभूद्युक्तं निरीक्ष्य तादृगहिम् ॥ ३ ॥

तं तार्क्ष्यपुत्र इति : १०.१७.७.

शत्रोः स्वात्मतिरस्कृतिं विदधतोऽप्युन्मत्तवृत्तेरपि यच्छ्रेयः करणं सतां हि सहजश्रीशाङ्घ्रिभाजां व्रतम् ।
जानन्नेवमुदारधीः स गरुडः सव्वेन तेजस्विना पक्षेणामृतरूपिणैव हतवांस्तच्छं तदा चिन्तयन् ॥ ४ ॥
पक्षपातो न चेदेवं सद्व्रतस्य स कालियः। सत्यप्यस्मिन् पक्षपाते जीवन्मुक्तः स्थितः कथम् ॥ ५ ॥ (युग्मम्)
विशेषवृद्धं रचितो विभागस्तं भङ्क्तुकामः स्मयतो य एकः। विशेषवैरी तत एव स स्यान् स्थानच्युतो भात्यहिरत्र मानम् ॥ ६ ॥

ह्रदं विवेशेति : १०.१७. ८.

शत्रुच्छिद्रान्वेषणे योऽपनिद्रः सद्राक् तस्माज्जायते यातभीतिः। तार्क्ष्यगम्यं यत्पदं वीक्ष्य मङ्क्षु तत्रागत्य स्वास्थ्यमापोरगेशः ॥ ७ ॥

कृष्णप्रिया

हे राजन् परीक्षित् ! श्रीगरुडजी भगवान् श्रीकृष्ण के लाडले प्रिय भक्त थे, स्वयं भगवान् के अनुग्रह से भगवान् समान बलशाली थे, उन्होंने रक्षक के मुँह से यह बात सुनी कालीय की धृष्टता से उग्र रोष उत्पन्न हुआ और कालीय को मारने की इच्छा से अत्यंत तेज गति से अपराधी एवं उद्दण्ड उस कालीय के समीप धस आए ॥५॥ तीक्ष्ण नखों के आयुध वाले तेज गति से उड़कर समीप आते गरुडजी को देखकर अनेक मस्तकों को ऊँचा उठाकर खल कालीय सामने आया। विकराल जीभ, ऊंचा उच्छ्वास उग्र नेत्र, दांत के आयुध वाले कालीय ने श्रीगरुड जी को दातों से डसा और गरुडजी को वह ग्रसने को चाहने लगा ॥ ६॥ खल कालीय ने जब जोर से गरुड जी को दंश किया, तब मधुमूदन भगवान् के वाहक प्रचण्ड वेग वाले तार्क्ष्य कुमार श्रीगरुड जी अतिशय रोष में आ गए और कालीय को पकड़ कर दूर फेंक दिया, पुनः वेगपूर्वक दौड़े और स्वर्ण सी चमकिली अपनी सव्य पाँख से कद्रू के पुत्र कालीय पर प्रहार किया ॥७॥ दिव्य पंख वाले श्रीगरुड जी के पंख से ताडित कालीय नाग अत्यंत विह्वल बन गया और स्वरक्षण के लिए कालीय ने गरुड जी जहाँ जा नही सकते थे और अगाध जल के कारण प्रवेश भी अशक्य था वैसे कालिन्दी जी के ह्रद में प्रवेश किया ॥ ८ ॥

तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितम् । निवारितः सौभरिणा प्रसह्य क्षुधितोऽहरत् ॥ ९ ॥
मीनान् सुदःखितान् दृष्ट्वा दीनान् मीनपतौ [1]हृते । कृपया सौभरिः प्राह[2] तत्रत्यक्षेममाचरन् ॥ १० ॥
अत्र प्रविश्य गरुडो यदि मत्स्यान् स खादति । सद्यः प्राणैर्वियुज्येत[3] सत्यमेतद् ब्रवीम्यहम् ॥ ११ ॥
[4]तं कालीयः परं वेद नान्यः [5]कश्चन लेलिहः । अवात्सीद् गरुडाद् भीतः कृष्णेन च विवासितः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—तत्र एकदा क्षुधितः गरुडः ईप्सितम् भक्ष्यम् जलचरं सौभरिणा निवारितः (अपि) प्रसह्य अहरत् ॥ ९ ॥ मीनपतौ हृते दुःखितान् मीनान् दृष्ट्वा सौभरिः तत्रत्यम् क्षेमम् आचरन् कृपया प्राह ॥ १० ॥ अत्र प्रविश्य सः गरुडः यदि मत्स्यान् खादति (तदा) सद्यः प्राणैः वियुज्येत अहम् एतत् सत्यम् ब्रवीमि ॥ ११ ॥ तम् कालियः परम् (केवलम्) वेद, अन्यः कश्चन लेलिहः न वेद (अतः) गरुडात् भीतः अवात्सीत् च कृष्णेन विवासितः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदगम्यत्वे कारणमाह तत्रेति निवारितोऽपि ॥ ९–११ ॥ लेलिहः सर्पः अतस्तत्रावात्सीत् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र ह्लदे। जलचरं मत्स्यमहरदिति संबधः ॥ ९ ॥ तत्रत्यानां क्षेमं कल्याणम् ॥ १० ॥ अत्र ह्लदे। ननु सौभरेः शापान्मत्स्याशनार्थं गरुडो मा गच्छतु तत्र कालियभक्षणार्थं गमने को बाध इति चेत्तर्हि मत्स्यशब्दार्थस्त्वित्थं विधेयः—सीयते बध्यंते मांशासिभिरिति स्या जीवाः 'षिञ्-बंधने' अतो घञर्थे कः, आर्षत्वादियङभावः माद्यन्तीति मदोऽसावधानाः 'मदी–हर्षे' अतः क्विप् । मदश्च ते स्याश्चेति मत्स्यास्तान् । तथा चासावधानजीवान्यदि खादतीत्यर्थः । यद्वा—माद्यंत्याहितुंडिकवाद्यैरिति मदः सर्पाः, स्यंति मारयंति स्वज्ञातिमिति स्याः यादोजीवाः 'यादोभ्यो ज्ञातिघातिभ्यो दीनां माम्' इत्युक्तेः । "जलौकसां जले यद्वन्महांतोऽदत्यणीयसः" इत्युक्तेश्च । स्य इति 'षो—अन्तकर्मणि' धातोः आर्षः खश् । मदश्च स्याश्च मत्स्यास्तान्, तथा च सर्पान्मत्स्यांश्च यदा खादति तदेति संबंधः । यद्वा—मम कोऽर्थो मत्संबंधिनो ये स्या जीवास्ते मत्स्याः । इह समासावस्थायामस्मदो मदादेशो बोध्यः । तथा च—मत्तपःस्थलीभूतयमुनाह्लदे ये तिष्ठति ते मत्संबंधिन एव 'संबंधमाभाषणपूर्वमाहुः' इति न्यायेनाभाषणे यदि संबधस्स्यात्तर्हि किमु सहवासादौ, तथा च—तान्यदि स खादतीति योज्यम् । एतेन मदाश्रमवासिजीवभक्षणे तस्य प्राणवियोग इति सिद्धमिति भावः । यद्वा—हे मत्स्य अनति चेष्टंते जीवा एभिरित्यानि जलानि 'अन–प्राणने' अतः क्विप् । "जलं जीवने हेतुर्हि जगतामथ तस्थुषाम् । अतो जीवनमित्युक्तं तेनेदं चेष्टते जगत् ॥" इति कौशिकसंहितोक्तेः । तानि सनति भजतीत्यन्सः 'षण–संभक्तौ' अत्रापि स एव प्रत्ययः । जलचरप्राणिमात्रं मत्स्यशब्देन ग्राह्यम् । क्लीबे नांतोऽयं शब्दो नान्तृत्वादेव नलोपोऽत्र तेनात्र यदि प्राणिमात्र खादति तदा मृतो भावीति भाव. । सर्पस्य जलचरता स्थलचरता च द्वये प्रसिद्धे न काप्यत्रानुपपत्तिरिति । यद्वा मस्त्यपदं काकदधिरक्षणन्यायेनोपलक्षणं जीवमात्रस्येति । वस्तुतस्तु—सोभरेः शापस्तत्र गरुडाप्रवेशतात्पर्यकः 'तं कालियः पर वेद' इति वक्ष्यमाणत्वात् । तम् गरुडागम्यत्वरूपम् शापमित्यर्थः । "ह्लद विवेश कालिंद्यास्तदगम्य दुरासदम्" इति पूर्वमुक्तत्वाच्च । गरुडस्तु सर्वज्ञत्वादेव तत्र नायातः कालियस्तु तत्रत्यात्मीयसर्पमुखाच्छेषमुखाद्वा गरुडगम्यं ज्ञात्वा तत्रायर्यौ । सौभरेस्तु गरुडाय कुप्यतो यस्मिन्मीने कृपाऽजनिष्ट तस्यैव मीनस्य संगादुत्थिता दुर्वासनैवापराधफलम्, यतश्च विप्लुतब्रह्मानंदः स चिरसंचिततपःसृष्टयौवनेनैव मूल्येन कामिनीवृंदं क्रीत्वा तत्रैव नरकतुल्ये विषयानदे न्यमज्जत् । अपराधभोगांते श्रीवृंदावनयमुनाश्रयमाहात्म्येनैव पश्चान्निस्ततारेति नवमस्कंधकथात्रानुसंधेया ॥ ११ ॥ तम् गरुडागम्यं ह्लदम् । परम् केवलम् । ननु समर्थेन गरुडेन शापः कथं स्वीकृत इति शंका तु "विष्णुना विष्णुभक्तैश्च ब्रह्मशापोऽनुवर्त्यंते । ब्राह्मणानामपीडायै बलिभिरपरैः सदा ॥" इति ब्रह्मांडोक्त्या नोदेति विज्ञानाम् । विवासितः प्रस्थापितः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एकदेति चतुर्विंशचतुर्युगादपि पूर्वत्र श्रीरघुनाथपूर्वजमान्धातृमहाराजे पृथ्वीं शासतीति ज्ञेयं जलचरमिति सर्वेषामेव सत्त्वे साधारणमित्यर्थः । तत्र च भक्ष्यं पक्षिजात्युचितलोलस्य तस्याहारत्वेन प्राप्तम् अत एवेप्सितं तथापि मुनिवाक्यमादरणीयमिति चेत्तत्राह, क्षुधित इति । भगवद्वदेव लीलयाऽङ्गीकृतक्षुदपि क्षुधार्त्तानां भक्षणानर्हस्यापि भक्षणं दोषास्मृतेः एवं श्रीगरुडस्यापराधः परिहृतः किन्तु तस्य मुनेरेवापराध इति भावः । क्षुधितस्य महत्तमस्य भक्ष्यभक्षणविघ्नाचरणात् ॥ ९ ॥ अन्यमपि महापराधं

---

१. हृते–गो. प्रे. टी. जीव. ; हृते–श्रीधर वंशी. वीर. विज. । २. तत्र तत्क्षेम–विज. । ३. विमुच्येत–वीर. । ४. तद्–इति कस्यचित् । ५. कश्चिन्स लेलिह–विज. ।

तस्याह—मीनानिति द्वाभ्याम्। दीनान् स्वभावत एव जलचरत्वेन किञ्चिदपि कर्त्तुमशक्तेः मीनपतौ सर्वमत्स्यरक्षके हृते सुष्ठु दुःखितान् दृष्ट्वा अत्र एतेन तस्यान्यमत्स्यविलक्षणं सज्ञानत्वं ज्ञापयति—दीन इति। सप्तम्यन्तपाठे सदैव गरुडभयेनार्त्त इत्यर्थः। प्रथमान्तपाठो वा महापार्षदे धाष्टर्यादिना विवेकरहित इत्यर्थः ।। १० ।। अत्र ह्रदे मत्स्यानिति जलचरोपलक्षणं सः मद्वाक्यावमन्ता श्रीभगवत्पार्षदवरोऽपीति वा अहमिति तपोबलाद्यभिमानात् एतेनैव किल श्रीवैष्णवापराधेन तस्य तपो भङ्गादिपरमानर्थः फलितः तच्च नवमस्कन्धे वर्णितं किञ्च तत्रत्यक्षेमार्थसङ्कल्पोपि विपरीत एवाभवत् तत्रास्तु तावज्जलचराणां वार्त्ता कालियनिवासेन तीरवर्तिनां वृक्षादीनामपि तथोपरि गच्छतां खगादीनामपि मरणं प्राप्तमिति केवलं श्रीवृन्दावनयमुनाश्रयमाहात्म्येन श्रीभगवत्कृपयाऽनतिचिरेण तदपराधस्सद्यः फलमिव विवेकिनां नरकतुल्यमेव विषयभोगं कृत्वा तेन पश्चात् निस्तारणमिति ।। ११ ।। तत्प्रोक्तवृत्तं कालिय एव परं केवलं वेदेति श्रीगरुडद्वेषेण तद्भीत्या सर्वत्र निर्भयस्थानान्वेषणात् पूर्वजन्मशतकृतभाग्यविशेषाच्च कृष्णेन सर्वानन्दकरेणेति भावः ।। १२ ।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एकदेति चतुर्व्विंशचतुर्युगादपि पूर्व्वत्र श्रीरघुनाथपूर्व्वजश्रीमान्धातृमहाराजे पृथ्वीं शासतीति ज्ञेयम्। जलचरमिति कस्यापि स्वभावेन सर्व्वेषामेव सत्त्वे साधारणमित्यर्थः, तत्र च भक्ष्यं भक्षणयोग्यम्, किंवा तदाहारत्वेन विधात्रा विहितमित्यर्थः, तत्रापि ईप्सितं बृहत्त्वात् परिपुष्टत्वाच्च प्रियम्, यद्वा, चिरं भक्षयितुमिष्टम्, तथापि मुनिवाक्यमादरणीयमिति चेत्तत्राह–क्षुधित इति। क्षुधार्त्तानां भक्षणानर्हस्यापि भक्षणे दोषास्मृतेः। एवं श्रीगरुड़स्याप्यपराधः परिहृतः, किन्तु तस्य मुनेरेवापराध इति भावः—क्षुधितस्य महत्तमस्य भक्ष्यभक्षणविघ्नाचरणात् ।। ९ ।। अन्यमपि महापराधं तस्याह–मीनानिति द्वाभ्याम्। दीनान् स्वभावत एव जलचरत्वेन किञ्चिदपि कर्त्तुमशक्तेः। मीनपतौ मत्स्यश्रेष्ठे सर्व्वमत्स्यरक्षके वा हृते च सुष्ठु दुःखितान् दृष्ट्वा। 'दिने' इति सप्तमान्तपाठे सदैव श्रीगरुड़भयेनार्त्त इत्यर्थः। प्रथमान्तपाठो वा, एवमविवेकेनैव तेष्वासक्तिस्तस्य सूचिता, न तु वृन्दावनकालिन्दीजीवतया कृपया स्नेहेनेत्यर्थः। तत्रत्यानां तद्ह्रदवर्त्तिनां मत्स्यकूर्म्मादीनाम्, यद्वा, मीनासक्तत्वान्मीनानामेव क्षेममाचरन् कर्त्तुम्, हेतौ शतृङ् ।। १० ।। अत्र ह्रदे स मद्वाक्यावमन्ता श्रीभगवत्पार्षदवरोऽपीति वा। अहमिति तपोबलाद्यभिमानात्, एतेनैव श्रीवैष्णवापराधेन तस्य तपोभंगादिपरमानर्थः फलितः, तच्च नवमस्कन्धे वर्णितमेव। किञ्च, तत्रत्यक्षेमार्थे संकल्पोऽपि विपरीत एवाभवत्। तत्र कालियनिवासेन अस्तु तावज्जलचराणाम्, तीर्थवर्त्तिनां वृक्षादीनामपि तथोपरि गच्छतां खगादीनामपि मरणप्राप्तेः, केवलं श्रीवृन्दावनयमुनाश्रयमाहात्म्येन श्रीभगवत्कृपयाऽनतिचिरेण तदपराधः सद्यःफलमिवविवेकिनां नरकतुल्यमेव विषयभोगं कृत्वा तेन पश्चान्निस्तीर्णमिति ।।११।। तत् प्रोक्तवृत्तं कालीय एव परं केवलं वेदेति श्रीगरुड़द्वेषेण तद्भीत्या सर्व्वत्र निर्भयस्थानान्वेषणात् पूर्व्वजन्मशतभाग्यविशेषाद्वा, कृष्णेन सर्व्वानन्दकरेणेति भावः ।। १२ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कुतस्तदगम्यमित्यत्र तत्कारणमाह–तत्रेत्यादिभिस्त्रिभिः। तत्र ह्रदे कदाचित् गरुडः स्वाभीष्टं भक्ष्यं जलचरं मीनपतिं क्षुधितः प्रसह्य बलादहरज्जहार, कथम्भूतः ? सौभरिणा निवारितोऽपि ।। ९ ।। एवं मीनपतौ गरुडेन हृते सति सुतरां दुःखितान् मीनान् दृष्ट्वा सौभरिः कृपया तत्रत्यानां जन्तूनां क्षेमं भयाभावरूपमाचरन् कुर्वन् प्राह ।। १० ।। किम् अत्र ह्रदे प्रविश्य यदि गरुडो मत्स्यान् खादति तर्हि स गरुडः सद्य एव प्राणैर्वियुज्येत एतदहं सत्यं ब्रवीमीति ब्राह्मणवाक्यस्य माननीयत्वात् परमपुरुषेणेव गरुत्मता तत्प्रतिघातशक्तिमताऽपि तस्यानुरोध उपपद्यते ।। ११ ।। तच्छापात्मकं सौभरेर्वचः केवलं कालीय एव वेद तदन्यः कोऽपि लेलिहानः सर्पः न वेद अतोऽयं गरुडाद्भीतः तत्र ह्रदे अवात्सीत् ततः कृष्णेन विवासितः निष्कासितश्चेति कालियदमनात्मकवृत्तान्तोपसंहारः ।। १२ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गरुडस्याऽगम्यत्वे निमित्तमाह- तत्रेति। भक्ष्यत इति भक्ष्यम् ।। ९ ।। तत्क्षेमं तेषां शिष्टानां क्षेमं योग्यरक्षाम् ।। १० ।। खादति भक्षति प्राणवियोगं मरणमाप्नोतु ।। ११ ।। लेलिहा लेलिहानः सर्पः छन्दोभङ्गभयादेवमुक्तं गरुडाद्भीत्यैवावात्सीत् सौभरेः शापातिक्रमणसमर्थेन तेन किमर्थं ह्रदं प्रविश्य हननं नाकारीतीयमाशङ्का—

"विष्णुना विष्णुभक्तैश्च ब्रह्मशापोऽनुवर्त्यते। ब्राह्मणानामपीडायै बलिभिः क्षत्रियादिभिः" ।।

इत्यादिब्रह्माण्डवचनेन निस्तुषीकर्तव्या एतद्विवक्षया वा लेलिहेत्युक्तम् ।। १२ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

भक्ष्यं पक्षिजात्युचितलीलस्य आहारत्वेन प्राप्तम्। अत एव ईप्सितम् अत एव लीलया भगवद्वदेव क्षुधितः ।। ९ ।। मत्स्यानिति जलचरोपलक्षणम् ।। १०–११ ।। वेदेति श्रीनारदद्वारेति ज्ञेयम् ।। १२ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गरुडागम्यत्वे कारणमाह–तत्रेति । मा भुङ्क्ष्वेति निवारितोपीति तस्मिन् परममहति गरुडे आज्ञाप्रदानं तदिष्टप्रातिकूल्यं चेति सौभरेरपराधद्वयं तदाज्ञालङ्घनं प्राणिहिंसनं चेत्यपराधद्वयं गरुडस्य नाभूत् ततः सकाशादतितेजस्वित्वादिति ज्ञेयम् ।। ९ ।। तत्र तृतीयमपराधं तस्याह–मीनानीति । कृपयेति मीनान् प्रति यथा तस्य कृपा तथा गरुडं प्रति कोपश्च गम्य तत्रत्यानां जीवमात्राणामेव क्षेमं कर्त्तुमिति ततश्च कालियागमनेन तेषां सर्वेषामक्षेममेवाभूदिति महदपराधिनः कृपापि विपरीतफलव भवेदिति द्योतितम् ।। १० ।। अत्र यदीत्यनेन पक्षान्तरमपि लभ्यते ततश्चायमर्थः अत्र प्रविश्य यदि मत्स्यान् खादति तदा सद्यस्तत्क्षणमेव प्राणैर्वियुज्येत यदि च मत्स्यान्न खादति तदा त्वसद्यः किञ्चिद्विलम्ब एवेति ह्रदप्रवेशमात्र एव शापः मत्स्यखादने तु शापातिशयः अत्रत्याभिशापं गरुडः सर्वज्ञत्वादेव ज्ञात्वा नागतः कालियस्त्वात्मीयतत्रत्यसर्पमुखाज्ज्ञात्वैवागतः सौभरेस्तु गरुडाय कुप्यतो यस्मिन् कृपा अजनिष्ठ तस्य मीनस्यैव सङ्गादुत्थिता दुर्वासनैवापराधफलं यतश्च विलूनब्रह्मानन्दः सचिरसञ्चिततपस्सृष्टस्वयौवनेनैव मूल्येन कामिनीवृन्दं क्रीत्वा तत्रैव नरकतुल्ये विषयानन्दे निमज्जन्नपराधभोगान्ते श्रीवृन्दावनयमुनाश्रयमाहात्म्येनैव पश्चान्निस्ततारेति नवमे कथा ।। ११-१२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदगम्यत्वे कारणमाह–तत्रेत्यादिना ।। ९-११ ।। तन्मुनिशाप परं केवलं कालियो वेद नान्यो लेलिहः सर्पः ।। १२ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तदगम्यत्वे हेतुमाह तत्रेति । एकदा चतुर्विंश चतुर्युगादपि प्राक् श्रीरामपूर्वजे मान्धातरि महीं शासतीति ज्ञेयम् । मा भुंक्ष्वेति सौभरिणा निवारितोऽपि जलचरं भक्ष्यमहरत् । प्रहस्य हठात् ।। ९ ।। मीनानां पतौ पालके ह्रदे तत्रत्यानां प्राणिनां क्षेमं कल्याणम् ।। १० ।। अत्रेति ह्रदे प्रविश्य यदि मत्स्यान् खादति तदा सद्यः प्राणैर्वियुज्यते, यदि च मत्स्यान्न खादति तदा त्वसद्यः किञ्चिद्विलम्बेनेति तत्प्रवेशमात्रे शापस्तत्खादने तु तदतिशयः इत्यर्थः । ब्रवीम्यहमिति तपोबलाभिमानं सूचयति । अत्र भगवन्नित्यपार्षदे गरुड़े सोभरेराज्ञाप्रदानं तदभीष्टप्रातिकूल्यञ्च मीनदयया तत्र कोपश्चेत्यपराधत्रय, तस्मादेव दयनीयमीनसङ्गोत्थैतद्दुर्वासनया विराजिततपः सक्षयो विषयानन्दानुभववपुरभूत् महदपराधिनस्तस्य तत्रत्यक्षेम चिकीर्षा रूपा दयापि विपरीतफला तत्र कालियागमनेन जलतत्तटवर्तिनां तदुपरिगच्छतां विहगानाञ्च विनाशात् विषयभोगान्ते तस्य निस्तारस्तु श्रीवृन्दावनयमुनोपसेवनमाहात्म्यादेव, गरुडस्य तु यदाज्ञालङ्घनं प्राणिहिंसनं चेत्यपराधद्वयं नाभूत्ततोऽप्यतितेजस्वित्वात् तथापि ह्रदाप्रवेशो विप्रर्षिवाक् प्रतिपालनाय हरेरिवेति ।। ११ ।। लेलिहः सर्पः ।। १२ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कुतस्तद्गरुडागम्यमित्यत आह ।। तत्रेति । ईप्सितमपेक्षितं सौभरिणा तपस्यता प्रसह्य बलात् ।। ९ ।। मीनपतौ हते सति मीनांस्तज्ज्ञातीन्सुदुःखितान्दृष्ट्वा तत्र यमुनाह्रदे तत्क्षेमं मीनानामुत्तरत्रोर्वरितानां क्षेममाचरन्कुर्वाणः कृपया प्राह । मीनमिथुनरमणदर्शनजनितकामिनोकामनोपात्तमहामाहात्म्यावहदेहव्यूहग्रहणानुबन्धेनौचितौ रचितः सौभरिणा शापो विपत्तेरिति ज्ञेयं ।। १० ।। कृपयेत्यारभ्य सार्धश्लोकद्विके सौभरिशापतो विपत्तेर्भीतता प्रतीयते । सा चोच्चतां विनाऽनुपपद्यमानतामाक्षिपति । सा च प्रमाणबाधितेत्यत एतद्व्याजेन सर्वत्रैतत्सजातीये गतिं व्यवस्थापयन्मानमेवाह ।। विष्णुनेति । ब्रह्मणां ब्राह्मणानामुत्तङ्कभृग्वादीनां शापो हरिणेत्याद्यनभिधानेनाभिधानेन च विष्णुनेति विनाप्णौति गच्छतीति व्युत्पत्त्या यत्स्वाम्यपि ब्राह्मणाननुसरति का कथा गरुडस्येति ध्वनयति । विष्णुभक्तैरप्यनुवर्त्यते तत्फलानुभूत्या बलिभिर्निन्दनं बलस्येनिनाऽऽह । दुष्टबलवद्भिः क्षत्रियादिभिर्ब्राह्मणानामपीडायै अनुपद्रवार्थमुत्तमशापप्रदानेनाधमानां किमित्यत आह ।। विष्णोरिति । विष्णोर्विष्णुभक्तानां स्वोत्तमानां तत्कर्मकाच्छापादधमस्याखिलं तपो व्येति नश्यति । ऋष्यादिज्ञानिनः कुत आत्मतपोहानिद कुरुते कार्यमित्यत आह ।। तथाऽपीति । तपः क्षयहेतुत्वेऽपि हरिमपि शपेयुः । तत्र तन्त्रं ।। असुरावेशादिति । अहो तदासुरं माहात्म्यमद्भुतमित्यर्थः । प्रस्तुतोक्त्योपसंहरति ।। अत इति । एतद्धेतोः सौभरेः शापं खगेश्वरो नात्यवर्तत । देवभूदेवादितरतमभावो मानसिद्ध इति नोचयोनावप्रयोजनानि रिक्तफलकानीति वक्ति । अन्यथा ब्राह्मणपीडापीडार्थमित्यनङ्गीकारे । अधमैः शाप उत्तमानां तर्नेप्येत नाङ्गीक्रियेतात उक्तमेव प्रयोजनं । न निष्प्रयोजन स्वीकार इति सम्भवति । अप्रेक्षावत्त्वप्राप्तेः । एवं शापे गतिं विचिन्त्य प्रसङ्गसङ्गत्योत्तमैरधमं प्रति प्रत्तो वरोऽप्येतादृश इति शंसति ।। वरोऽपीति । उत्तमैर्दत्तोऽधमेभ्योऽधमस्याधिक्यं प्रति कारणं न भवति । ननु भवत्वितरेषामुत्तमानां वरो न वरताकरो हरेरवन्ध्यसङ्कल्पत्वान्न तद्दत्तो विफलं भवितुं योग्य इत्यत आह ।। विष्णोरपीति । तस्मात्स्वोत्तमात्क्रमशः क्रमाच्छ्रीविरिञ्चादेर्विष्णोर्वरश्चेदप्याधिक्यं न सम्प्रयच्छति न ददाति । कथञ्चित्केनापि प्रकारेण केनचिद्धेतुना क्वचित्काले देशे वा । कुत इत्यतोऽपीदमुत्तरं । तेभ्यस्तेषामधमानां चित् उत मतोययोगिज्ञानं ववेतीति । हरिस्तादृक्योग्यतामतिक्रम्य विद्यमानं वरं न दद्यात् । वेति यदर्थे । यदि दद्यात्तद्बलादिकं बाह्यमेव । अर्जुनादीनां वैरिजयनादिविषयकमेवेति बाह्यं न स्वरूपमित्यर्थः । स गरुडोऽत्र प्रविश्य

यदि मत्स्यान्खादति सद्यः प्राणैर्वियुज्येत मृतो भवेदिति यावत् । अहमेतत्सत्यं यथार्थं ब्रवीमि ॥ ११ ॥ तत्तत्र पतत्रिराडायातश्चेन्मरिष्यतीत्येतत्परं रहस्यं कालियो वेदान्यः कश्चिल्लेलिहा लेलिहानः सर्पो न वेदातः स गरुडाद्भीतस्तत्रावात्सीत्कृष्णेन विवासितो निष्कासितः ॥ १२ ॥

श्रीसुबोधिनी

तत्र हेतुं वक्तुमुपाख्यानमाह **तत्रैकदेति**, यदास्य न भगवद्भावः, **सौभर्युपाख्याने** सर्वत्र मीनसङ्गः प्रसिद्धः, स हि मीनहितकारी भवति, पुन**र्गरुडो** दैवागत्या तस्यैव समीप **ईप्सितं भक्ष्यं जलचर**विशेषं रोहितादिरूपं **निवारितोपि सौभरिणा क्षुद्**वशाद् बहिर्मुखावस्थां प्राप्तस्तं गृहीत्वान्यत्र गतः, तत्र भक्षण आज्ञोल्लङ्घनाद् विशेषतः खेदजननाच्च मरणमेव भवेत्, जीवन्तमेवान्यत्र हृतवानिति तत्र तस्याप्रवेश एवोच्यते ॥ ९ ॥ ननु भगवन्निर्मितेर्थे कथं मुनेराग्रहः? तत्राह **मीनान् सुदुःखितान्** दृष्ट्वेति **यथा भगवता मर्यादाशास्त्रं कृतं लौकिकमेवं वैदिकमपि, ततः परदुःखं दृष्ट्वा दुःखितः कारुणिकस्तदुपायं कुर्यादिति दीनोपेक्षायां दोषस्य श्रवणात् 'स्रवते ब्रह्म तस्यापि भिन्नभाण्डात् पयो यथे'त्यादिवाक्यात्**, अतो **दयया लोकमर्यादोल्लङ्घनं कृतवान्** तदाह **सुदुःखितान्** दृष्ट्वेति, नन्वज्ञानादेव तेषां दुःखं कथं प्रतीकारार्थं यत्नः? तत्राह दीनानिति, विचार्यमाणेपि ते **दीना** रक्षकाभावात्, अत एव तत्र हेतु**र्मीनपतौ हृत** इति, स हि **मीनानां पतिः** अन्यथा गोत्रघातिनस्ते स्वात्मीयानपि भक्षयेयुः, अतः केवलं **कृपया सौभरि**र्वक्ष्यमाणं **प्राह तत्रत्य**मीनानां **क्षेममाचरन्**, वस्तुतस्त्वनर्थ एव कृतः, मीनाः सर्व एव तत्रत्या विषेण दग्धाः, तत्प्रसङ्गादन्येपि जीवाः, अतो**न्येन यत् क्रियते तेनानर्थ एव सम्पद्यत** इति फलितम् ॥ १० ॥ शापवाक्यमाहात्र **प्रविश्येति**, **अत्र ह्रदे प्रविश्य**, जलं तथा भवेदित्येकः शापः, तत्रापि **यदि मत्स्यान्**, तत्रापि **स** एव **गरुडो** न त्वन्यः पक्षी, ततः **सद्य** एव **प्राणैर्वियुज्ये**तेत्यपरः, तेनान्याहृतस्याप्यत्रत्यमत्स्यस्य भक्षणं निषिद्धं, तथा च न विशिष्टशापः, अत एव कालीयस्य रक्षा, अन्यथा मत्स्यखादने शापाभावान्न सा स्यादितिभावः, अत एव **स** इति पुनरुक्तं, ब्रह्मवाक्यमाज्ञारूपं, इदमनुवादं वाक्यमित्याशङ्क्याह **सत्यमेतद् ब्रवीम्यह**मितिप्रमाणं, **न हि ब्रह्मवादो मृषा भवति** ॥ ११ ॥ **तमर्थं कालिय एव परं वेद**, गरुडेन सह विरोधं चिकीर्षुस्तस्यागम्यं स्थानं विचारितवान्, अन्येषां त्वेवमध्यवसायाभावात्, **नान्यो** लेलिहः सर्पो जानाति, अतो **गरुडाद् भीतस्तत्रावात्सीत् कृष्णेन च विवासित**स्ततो दूरीकृतः ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अत्र प्रविश्येत्यत्र, इदमनुवादकमिति । सर्पप्रवेशे तीरगानां विषेण तथात्वं स्वत एव भविष्यतीति तदनुवादकत्वशङ्का। अन्यथा विषप्रवेश एव न स्यादिति भावः ॥ ११ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तत्रैकदेत्यत्र यदास्येति यदा सौभरेः, उच्यत इति शापवाक्य उच्यत इत्यर्थः ॥ ९ ॥ अत्र प्रविश्येत्यत्रात एवेति विशिष्टशापाभावादेव, ब्रह्मरूपमिति सत्यपदस्यार्थः, न स स्यादिति स कालीयो रक्षितो न स्यादित्यर्थः । इदमनुवादकमित्येतस्याः टिप्पण्यामाहुः सर्पेत्यादि, सुबोधिन्यां प्रमाणमिति गरुडे विषस्याकिञ्चित्करत्वाद् विषप्रवेशेपि नानुवादकत्वं तस्येत्यर्थः ॥ ११ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अत्र प्रविश्येत्यत्र तत्रापि ह्रदादन्यत्र स्वदेशेपीत्यर्थः ॥ ११ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

अत्र प्रविश्य गरुड इत्यत्र तथा भवेदित्येक इति अत्र श्रीयमुनाह्रदे प्रविश्य गरुडः सद्यः प्राणैर्वियुज्येतेत्यन्वयेन ह्रदप्रवेशमात्रेण गरुडप्राणनाशो भवेदित्येकः शापः, अत एव गरुडागम्यं तत्, 'तदगम्यं दुरासद'मितिवाक्यात्, यदि गरुडो मत्स्यानत्र खादति तदा प्राणैर्वियुज्येतेति द्वितीयः शापः ॥ ११ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु "भगवद्वाहनस्य महावेगस्य तस्य गतिः कुत्रापि न रुद्धा श्रूयते, तस्य तत्र गमनशक्तौ किं कारणम् ?" इत्यपेक्षायामाह—तत्रेति । तत्र यमुनायामेकदा सौभरिणा ऋषिणा निवारितोऽपि गरुडः ईप्सितं स्वाभीष्टं भक्ष्यं जलचरं मत्स्य प्रसह्य बलादाहरत्, तदा सौभरिः प्राहेत्युत्तरेणान्वयः । बलाद्धरणे हेतुमाह—क्षुधित इति ॥ ९ ॥ सौभरिशापप्रयोजनमाह—मीनानिति। मीनपतौ हृते सति तदधीनान् मीनान् सुदुःखितान्, अत एव दीनांश्च दृष्ट्वा कृपया तत्रत्यं क्षेमं निर्भयत्वमाचरन् कुर्वन् सौभरिः प्राहेत्यन्वयः ॥ १० ॥ तद्वचनमेव दर्शयति–अत्रेति । अत्र यमुनायां प्रविश्य स गरुडो यदि मत्स्यान् खादति भक्षयिष्यति, तदा सद्य एव प्राणैर्वियुज्येत म्रियेत, एतत् सत्यमेवाहं ब्रवीमीत्यन्वयः । 'मत्स्यान्' इत्युपलक्षणं जन्तुमात्रस्य, अन्यथा कालियग्रहणप्रतिबन्धो न स्यात् । 'मत्स्यांश्च' इति पाठे तु चकारादेव प्राण्यन्तरग्रहणम् । अत्र यद्यपि "ब्राह्मणः समदृक् शान्तो दीनानां

समुपेक्षकः। स्रवते ब्रह्म तस्यापि भिन्नभाण्डात् पयो यथा'' इति वाक्यमर्यादया तथाकरणं तस्योचितमेव, तथापि गरुडस्य भगवद्भक्तत्वात्तस्य क्षुधितस्य जात्युचितभक्ष्यनिवारणेन शापदानेन च मुनेरपराध एव जातः। अत एव तस्य महातपस्विनोऽपि विवाहादिना तपोविघ्नरूपानर्थः, तत्र कालियनिवासेन तत्रत्यानां जलचराणां तीरवर्तिनां वृक्षादीनामुपरिगच्छतां खगानां च मरणेन तत्रत्यक्षेमार्थसङ्कल्पवैपरीत्यं चासीदिति बोध्यम् ॥ ११ ॥ तं सौभरिशापं परं केवलं कालिय एव वेद, अन्यः, कश्चनापि लेलिहः सर्पो न वेद। यद्यन्योऽपि वेद, पूर्ववैरस्य सत्त्वात् सोऽपि तेन सह विरोधं कृत्वा तत्रागच्छेत्, अतः स एव गरुडाद्भीतः सन् तत्रावात्सीत्, कृष्णेन च विवासितो निष्कासितः ॥ १२ ॥

अन्वितार्थप्रकाशिका

गरुडागम्यत्वे हेतुमाह–तत्रेति ॥ तत्र यमुनायामेकदा मान्धातरि पृथिवीं शासति सौभरिणा ऋषिणा निवारितोऽपि गरुडः क्षुधितः सन् कश्चिज्जलचरं मत्स्यम् ईप्सितं भक्ष्यं प्रसह्य बलादाहरत् ॥ ९ ॥ मीनानिति ॥ मीनपतौ हृते सति तदधीनान्मीनान् सुदुःखितान् अत एव दीनांश्च दृष्ट्वा कृपया तत्रत्यं क्षेमं निर्भयत्वमाचरन् कुर्वन्सौभरिः प्राह स्म ॥ १० ॥ अत्रेति। अत्र यमुनायां प्रविश्य स गरुडो यदि मत्स्यान् खादति भक्षयिष्यति। तदा सद्य एव प्राणैर्वियुज्येत म्रियेत। एतत्सत्यमेवाहं ब्रवीमि। मत्स्यानिति जन्तुमात्रोपलक्षणम्। अन्यथा कालियग्रहणनिषेधो न स्यात् ॥ ११ ॥ तमिति ॥ तं सौभरिशापं परं केवलं कालिय एव वेद अन्यः कश्चनापि लेलिहः सर्पो न वेद स्म। यदि विद्यात्तदा सोऽपि तत्रागच्छेत्। अतः कालिय एव गरुडाद्भीतः तत्रावात्सीत्। स च कृष्णेन विवासितः निष्कासितः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्रत्यास्तस्मिन् हृदे स्थिता ये मत्स्यास्तेषां क्षेमं कुशलं ॥ १० ॥ प्रवेशे शापमाह अत्र हृदे स गरुडः ॥ ११ ॥ तं शापं कालिय एव परं केवलं वेद अन्यः कश्चन लेलिहः सर्पो न वेद अन्यः कश्चन लेलिहः सर्पो न वेद अतो गरुडाद्भीतः तत्रावात्सीत् विवासितो निष्कासितः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कुतस्तदगम्यमित्यत्र कारणमाह त्रिभिः ॥ तत्रेति ॥ एकदा कदाचित्, तत्र ह्रदे, गरुडः, ईप्सितं स्वाभीष्टं, भक्ष्यं भक्षणार्हं, जलचरं मीनपतिं, सौभरिणा मुनिना, निवारितः सन्नपि, यतः क्षुधितः, ततः प्रसह्य, अहरत्। बलाज्जहारेत्यर्थः ॥ ९ ॥ मीनानिति ॥ एवं गरुडेन, मीनपतौ हृते पाठान्तरेऽपि स एवार्थः। सुदुःखितान् दीनान्, मीनान् दृष्ट्वा, सौभरिः कृपया हेतुना; तत्रत्यक्षेमं ह्रदस्थानां जन्तूनां भयाभावरूपं क्षेमं, आचरन् सन्, प्राह ॥ १० ॥ किं प्राहेत्यत्राह ॥ अत्रेति ॥ अत्र ह्रदे, प्रविश्य, गरुडः यदि, मत्स्यान् खादति भक्षयतीतेत्यर्थः। चकारादन्यांश्च जलचरान् खादिष्यतीत्यर्थः। अत्र खादनं ग्रहणस्याप्युपलक्षणम्। तदा सद्यः, प्राणैर्वियुज्येत। एतत् अहं सत्यं ब्रवीमि। अत्र गरुड इति कर्तृपदे सत्यपि मत्स्यान् स खादतीति पठन्ति, तत्र स इत्यस्य प्रयोजनाभावात् सोऽपपाठ एव। अत्र केचन शङ्कते। मत्स्यपदोपादानात्सर्पग्रहणभक्षणयोर्गरुडस्य को वा बाध इति, तेषां तत्रत्यपदार्थानवबोधः स्फुट एव। किं च तत्रैकदा मीनपतिमिति पाठे वक्तुं युक्तेऽपि सामान्यतो जलचरोपादानां तत्रत्यसकलजलजन्तुमात्रबोधकमिति तोषणीसारटीकाकाराभिप्रायोऽपि तत्रत्यसकलजन्तुमात्रग्रहणभक्षणपरः प्रतिभाति। यदि मीनान् खादतीत्यनुक्त्वा यदि मत्स्यांश्च खादतीत्युक्तेरयं भावः। माद्यति जलेनेति मत्स्यः, मदेः स्यः इति तट्टीका इति। हैमे माद्यतीति मत्स्यः 'ऋतन्यञ्जि' इति स्यः, इति अमरव्याख्यासुधा। तेषां मादनं च जलेनैव प्रसिद्धम्। एवं कोशद्वयव्याख्येक्षयाऽत्र मत्स्यशब्दः सामान्यतो जलचरमात्रपरः इति ॥ ११ ॥ तमिति ॥ तं सौभरेः शापं, पाठान्तरे एतच्छापात्मकं सौभरेर्वचः इति, परं केवलं, कालियः एव वेद। अन्यः कश्चनापि, लेलिहः सर्पः, न वेद। अतोऽयं गरुडात् भीतः सन्, अत्र अवात्सीत्। ततः, कृष्णेन चैव विवासितः निष्कासितः। इति कालियदमनात्मकवृत्तान्तोपसंहारः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अत्रेति : १०.१७.११.

अयं स्वीयः परो वायमिति धीर्न दयावताम्। यत्तार्क्ष्यं स तिरस्कृत्य मुनिर्मीनेष्टधीरभूत् ॥ ८ ॥
श्रेयोऽन्यस्य विधेयमस्ति यदि तत्तादृग्विधेयं बुधैर्यत्स्यात् तत्परिणामसौख्यजनकं निर्दुःखलेशं भृशम्।
कार्यं सौभरिवाक्यवन्न सहसा तत्कालमीनेष्टदं सर्वेषां परिणामतस्तु समभूत् खेदार्थमम्भोजुषाम् ॥ ९ ॥
न चेत्तादृग्वचस्तस्य न तार्क्ष्यागम्यता ह्रदे। न स्थितिः कालिस्यापि न खेदो यादसां ततः ॥ १० ॥
अत एव शास्त्रकारैर्विविच्य भूयोऽपि फलितमुक्तमिदम्। स्थितमेव धर्मतत्त्वं गूढगुहायामितीह विशदमभूत् ॥ ११ ॥ (विशेषकम्)
अन्योन्यमशनं मीनधर्म इत्यभिजानता। यदुक्तं तदगम्यत्वं तत्कृपावशलक्षणम्।' १२ ॥
यत्यक्तं साधुजनैस्तत्त्यक्तं भवति युक्तमखिलजनैः। त्यक्तः सर्वैरपि यद्ध्रदो हि विनतात्मभूपरित्यक्तः ॥ १३ ॥

कृष्णप्रिया

राजन् ! वहाँ कालिन्दी दह में किसी एक दिन मत्स्य भक्षण के लिये श्रीगरुड़जी आये, वे बहुत क्षुधित थे, वहाँ सौभरिजी सन्ध्या कर रहे थे, गरुड़जी को मत्स्यहिंसा से रोकने लगे, लेकिन क्षुधावश गरुड़जी नहीं माने और अपने प्रिय ऐसे मत्स्य को बलात् खाने लगे ।। ९ ।। सौभरि महर्षि मना करते रहे और गरुड़जी, बड़े मीन को जो मत्स्यपति थे उनको ले गए इससे सर्व मत्स्यो को अतिशय दुःखित कर सौभरिजी के मन में दया आई पुनः वहाँ रहने वालों का हित चाहते स्वयं बोले ।। १० ।। महर्षिजी ने कहा कि –यदि यहाँ कालिन्दी दह में गरुड़ आयेंगे, और वे मत्स्य भक्षण करेंगे तब उसी समय उनके प्राण निकल जायेंगे, यह मेरा सत्य बचन है ।। ११ ।। श्री सौभरि मुनि के शाप को केवल कालीय ही जानता था, और किसी भी सर्प को इस शाप का ज्ञान नहीं था, इसलिए श्रीगरुड़जी के भय से कालीय यहाँ आ बसा, भगवान् श्रीकृष्णने इस नाग को यहाँ से निकाला ।। १२ ।।

कृष्णं ह्रदाद् [1]विनिष्क्रान्तं दिव्यस्रग्गन्धवाससम्[2] । महामणिगणाकीर्णं जाम्बूनदपरिष्कृतम् ॥ १३ ॥
उपलभ्योत्थिताः सर्वे लब्धप्राणा [3]इव प्रजाः । प्रमोदनिभृतात्मानो गोपाः प्रीत्याभिरेभिरे ॥ १४ ॥
यशोदा रोहिणी नन्दो गोप्यो गोपाश्च कौरव । कृष्णं समेत्य लब्धेहा [4]आसँल्लब्धमनोरथाः ॥ १५ ॥
रामश्चाच्युतमालिङ्ग्य जहासास्यानुभाववित्[5] । [6]नरा नार्यो वृषा वत्सा लेभिरे परमां मुदम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—दिव्य स्रग् गन्ध वाससम् महामणि गण आकीर्णम् जाम्बूनदपरिष्कृतम् ह्रदात् विनिष्क्रान्तम् कृष्णम् उपलभ्य लब्धप्राणाः सर्वे गोपाः प्रजाः (बालाः) इव उत्थिताः (ततः) प्रमोद निभृत आत्मानः प्रीत्या कृष्णम् अभिरेभिरे ।।१३–१४।। कौरव यशोदा रोहिणी नन्दः गोप्यः गावः च अवशिष्टाः कृष्णं समेत्य लब्धेहाः लब्धमनोरथाः आसन् ।। १५ ।। अस्य अनुभाववित् च रामः अच्युतम् आलिङ्ग्य जहास नराः नार्यः वृषाः वत्साः परमां मुदम् लेभिरे ।। १६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

जांबूनदं सुवर्णं तेनालंकृतम् ।। १३ ।। असव इंद्रियाणि । प्रमोदनिभृतात्मान आनंदपूर्णमनसः ।। १४ ।। लब्धेहा लब्धचेष्टाः ।। १५ ।। नगा वृक्षा अपि पूर्वं शुष्काः संतः सद्य एव विरूढा इत्यर्थः ।। १६ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विनिष्क्रान्तम् बहिरागतम् ।। १३ ।। अभिरेभिरे शिश्लिषुः ।। १४ ।। लब्धचेष्टाः पूर्वं तु मृतप्राया इत्यर्थः । कौरवेति। शुद्धवंशोद्भूतत्वात्तव श्रीकृष्णलीलामृतपाने रुचिरिति संबुद्धचभिप्रायः । यद्वा–कौ भूमौ रवः श्लाध्यशब्दो यस्य तत्संबुद्धौ तथा, भगवद्भक्तानां यशःशब्दो भूमंडलं व्याप्नोतीति तात्पर्यम् । यद्वा–त्वयि ब्रह्मास्त्रतो रक्षणाज्जीविते कौरवा युधिष्ठिरादयो लब्धचेष्टा आसंस्तद्वदिति भावः ।। १५ ।। इत्यर्थ इति । भगवदमृतदृष्टिपातेन विषांबुपानमृतगोपानामिव वृक्षा अपि जीवनमापुः । तीरे वृक्षाभावाद्वृंदावनस्था दूरस्था अपि कृष्णमदृष्ट्वा शोकाच्छुष्यंतः पुनर्दृष्ट्वा लब्धेहा अंकुरपल्लवपुष्पाद्युद्गमवंतो बभूवुरिति भावः। रामश्चाच्युतं सर्वदा च्युतिवर्जितं जहास–धन्योस्येवं कर्त्तुं युज्यत इत्युपालंभपूर्वं जहासेति कालियनिग्रहेण कच्चित्क्षतश्च नाभूदिति नाभ्यलपदिति ।। १६ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमुपोद्घातं समाप्य प्रस्तुतमाह—कृष्णमित्यादिना । तत्र कृष्णमिति युग्मकम् । जाम्बूनदं दिव्यस्वर्णं भवत्या नागवृन्दपरिवृतत्वात् तस्माद्ध्रदात् विशेषेणैव निष्क्रान्तं सन्तमुपलभ्य दृष्ट्वा तावदपि शङ्कया स्तब्धत्वात् निष्क्रमणमपि गतिलाघवेन जलोपर्य्युपरि क्रान्त्वैवेति ज्ञेयम् ।। १३ ।। सर्वे वक्ष्यमाणाः अचेतनानामिव स्तब्धानामपि तेषामेकदोत्थाने हेतुमाह—लब्धप्राणा इति । तत्र मेलने क्रमः प्रमोदेति सार्द्धेन गोपाः सखायः पूर्वत्र एव तीराग्रमवलम्ब्य स्थितत्वात् अभिरेभिरे परिरेभिरे ।। १४।। ततः श्रीयशोदादयः स्नेहक्रमेणाग्रतोग्रत आगत्य तत्रैव स्थितत्वात् तत्र श्रीयशोदा व्रजात् प्रस्थितानां सर्वेषामग्रगामिनी तस्या

---

१. बहि; क्रान्तम्–इति कस्यचित् । २. मण्डितं–विज. । ३. इवासवः–श्रीधर. वंशी. वीर. विश्व. ; इव प्रध.:–विज. । ४. आसन्मुक्ता नगा अपि–इति कस्यचित् । ५. प्रेम्णा तमङ्कमारोप्य पुनः पुनरुदैक्षत–इदमर्धमधिकं वीर. पाठे । ६. गावो वृषा सवत्साश्च–गो. प्रे. टी. ; नरा नार्यो विज. ; नगा गावो वृषा–श्रीधर. वंशी वीर. ।

एवासमोर्द्धवात्सल्यात् ततः श्रीरोहिणी तया सख्येन सवासनत्वेन च तत्सहयोगात् ततः श्रीनन्दस्तदनुगवात्सल्यात् गोप्यो गोपाश्च क्रमेण दम्पत्योर्निकटस्था ज्ञेयाः केषाञ्चित् सवासनत्वात् केषाञ्चिदनुयायित्वाच्च समेत्येति पूर्ववत् तावत् स्तब्धीभूय केवलं द्रष्टार एवासन् पश्चात् सम्भ्रमणोत्थितमात्राः नतु धावितुं शक्ताः समेत्य तु आलिङ्गनादिचेष्टावन्तो बभूवुरित्यर्थः। किंबहुनेत्याह–शुष्का इति। निकटे तावद्वृक्षोत्पत्तिरेव नास्ति दूरतस्तु ये वायुगत्या शुष्काः तदानीमेव तादृशश्रीकृष्णलीलया वाहुःशकुनान्तरवत् शुष्कास्तेपि अङ्कुरादिविकासचेष्टावन्तो बभूवुरित्यर्थः। लब्धमनोरथा इति पाठस्तु स्वाम्यसम्मतः ।। १५ ।। अथ तादृशदुःखिव्रजजनसङ्गमाय दत्तावसरेण श्रीरामेण सङ्गमं वर्णयति—रामश्चेति। चकारात्पूर्वं व्रजवासिशोकेन रामश्चान्तः शुष्कः पश्चात् लब्धेहस्तमालिङ्ग्य जहासेत्यर्थः। अच्युतं न कथञ्चिदपि माहात्म्यात् च्युतं कुतो जहास तदाह अस्य अच्युतस्य अनुभावान् इच्छामात्रेण सर्वं सामर्थ्यं वेत्तीति तथा सः अतो निजव्रजदुःखमयमिदं भद्रं कृतमित्युपालम्भनपूर्वकमेवेत्यर्थः। नगाः अन्येपि सर्वे गावो वृषा वत्सतरा इति पाठः क्वचित् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमुपोद्घातं समाप्य प्रस्तुतमाह—कृष्णमिति, श्यामसुन्दरमित्यर्थः, व्रजजनजीवनमिति वा। विशेषेण निष्क्रान्तं तमेव विशेषमाह—दिव्येति पादैस्त्रिभिः, जाम्बुनदं दिव्यस्वर्णम् ॥ १३ ॥ उपलभ्य निकटागतं प्राप्य, उत्थिताः पूर्वं मोहने भूवि निपतिता नासिकान्तः प्रविष्टतत्सौरभ्येण सञ्जातसंज्ञाः, सद्य एव भूमेरुत्थिता मोहादुदुत्थिता इति वा, इति पूर्वं मोहादेव तादृशदिव्यगीतवाद्यादिना श्रीकृष्णनृत्यादिकञ्च किमपि तैर्नावकलितमिति बोद्धव्यम्। अतएवाग्रे तेषां तत् किञ्चिदनुवादादिकं न श्रूयत इति दिक्। ननु मृतानामेव तेषां तदुपलब्ध्यैव कथं सर्वेषामेकदैवोत्थानं सम्भवेदित्याशंक्य दृष्टान्तेन साधयति,—लब्धेति। गोपाः सामान्यतः सर्वे वृद्धादयस्तेषां श्रीयशोदादिभ्यः प्रागुत्थानात्, तं बहुधालिंगितवन्तः ॥ १४ ॥ स्नेहविशेषाक्रान्तानां श्रीयशोदादीनां गोपेभ्यो दुःखविशेषेण मोहाधिक्यात्तेभ्यः पश्चादुत्थितानां श्रीकृष्णसंगमेनापि केवलमादौ सचेष्टत्वमात्रमाह—यशोदेति, गोपाः पितृव्यतादिदेहसम्बन्धिन उपनन्दादयः, सखायः श्रीदामादयश्च प्रथमं लब्धचेष्टा आसन्, पश्चात् समेत्याभिरेभिरे चेत्यर्थः, श्रीभगवतः कालियह्रद-प्रवेशेन तद्दुःखेन शुष्का ये नगास्तेऽपि। हे कौरवेति कुरुकुलरक्षाहेतुभूतस्य द्रौण्यस्त्रग्रस्तस्य तव प्राप्त्या श्रीयुधिष्ठिरादयः कौरवा इवेति भावः ॥ १५ ॥ एवं स्नेहान्धानां चेष्टितमुक्त्वा तदैश्वर्यज्ञानसम्वलितस्नेहभरस्य श्रीबलदेवस्य समागमादिसुखमाह—रामश्चेति, चकारात् रामश्च पूर्वं शोकेन शुष्कः पश्चाल्लब्धेहस्तमालिंग्य जहासेत्यर्थः। अच्युतं केशादावपि च्युतिरहितम् यद्वा, न कदाचित् कथञ्चिदपि माहात्म्याच्युत इत्यच्युतस्तम्। ननु कुतो जहास? तत्राह—अस्य अच्युतस्य अनुभावं विचित्रैश्वर्य्यं वेत्तीति तथा सः, स्वस्य कालाग्निरुद्रजनकस्यापि तत्राकिञ्चित्करत्वात्, अतस्तादृशानुभाववतः क्षुद्रकालियभोगवेष्टनादिस्मरणादिति भावः। यद्वा अनुभावं कालियनिःसारणार्थचातुर्य्यविशेषमनुसन्दधानः सन्नित्यर्थः। 'नरा' अन्येऽपि सर्व्वे मनुष्याः, यद्वा, श्रीनन्दानुवर्तिनो गृहदासादयः पुलिन्दादयश्च, 'मृगाः' इति पाठे तेषामादौ निर्देशो गवादिभ्यः प्रागुत्थानाभिप्रायेण। ततश्च सर्वेषामेव परमानन्दो जात इत्याह—नराः श्रीनन्दादयः एवमयमेव पाठः सम्यक्, तादृशस्य तस्य प्राप्त्यावश्यं तेषां परनानन्दोद्भवोक्तेरपेक्ष्यत्वात् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अभिरेभिरे परिरेभिरे ॥ १४–२५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ तत उपरितनवृत्तान्तमाह—कृष्णमिति यावदध्यायसमाप्ति दिव्यानि स्रग्गन्धवासांसि नागपत्नीभिः समर्पितानि यस्य तं महतामनर्घाणां मणीनां गणैराकीर्णं सर्वतः समलङ्कृतं जाम्बूनदेन सुवर्णेनालङ्कृतं ह्रदाद्विनिर्गच्छन्तं कृष्णमुपलभ्यालक्ष्य-लब्धप्राणा असव इन्द्रियाणीव सर्वे गोपादयः उत्थितास्ततः प्रमोदेन निभृताः पूर्णा आत्मानो देहा मनांसि येषां तथाभूताः गोपाः प्रीत्या कृष्णमभिरेभिरे आलिङ्गितवन्तः ॥ १३–१४ ॥ यशोदादयो गोप्यो नन्दादयो गोपाश्च हे कौरव ! कृष्णम् समेत्य सङ्गत्य लब्धचेष्टा लब्धमनोरथाश्च बभुवुः ॥ १५ ॥ रामस्तु कृष्णमालिङ्ग्याऽस्य कृष्णस्य प्रभावं जानन् केवलं जहास हसितवांस्ततस्तं कृष्णमङ्कमारोप्य पुनः पुनः प्रीत्यौदैक्षत समवैक्षत नन्दादयः परमां मुदं लेभिरे तत्र नगा वृक्षा अपि पूर्वं शुष्काः सन्तः पुनः फलपुष्पादिभिर्विरूढा इत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उपलभ्य दृष्ट्वा प्रमोदनिभृतात्मानः आनन्दपूर्णात्मानः अभिरेभिरे आलिङ्गनश्चक्रुः अभीत्युपसर्गात् मुख्यामुख्यभेदो ग्राह्यः ॥ १४ ॥ लब्धेहाः लब्धचेष्टा पूर्वं शवप्राया इत्यर्थः ॥ १५–१७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विशेषेणैव निष्क्रान्तम् ॥ १३ ॥ उपलभ्य दृष्ट्वा तावदपि शङ्कया स्तब्धत्वात् पूर्वे ईक्षमाणाः सर्वे गोपाः सखायोऽपरे नानाविधाः ॥ १४ ॥ समेत्यैवालिङ्गने चेष्टावन्ता बभूवुरित्यर्थः। तदानीं व्रजवासिसधर्मताप्राप्त्या नगा अपि पूर्वं शुष्काः पश्चाल्लब्धेहा अङ्कुरोद्गमनादिचेष्टावन्त आसन् तद्विषशुष्काणामतिप्राचीनत्वाच्चिह्नान्यपि तदा नासन्निति जहासेत्यत्र हेतुरस्येति अतो निजव्रजदुःखमयमिदं भद्रं कृतमित्युपालम्भनपूर्वकयेवेत्यर्थः। गवादिषु तत्रैव विद्यमानेष्वपि क्षुधादिकर्षितत्वं तेषां विषसम्पर्कशङ्कया श्रीः कृष्णायानुप्रयोजनात् ॥ १५—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उपोद्घातं समाप्य प्रस्तुतमाह—कृष्णमिति द्वाभ्याम्। विशेषेण निष्क्रान्तमिति जलोपर्य्युपर्य्येव चरणाभ्यामेव सन्तरणलाघवेनैव कालियादिष्टं कमपि सर्पमलक्षितमारुह्य वेति ज्ञेयम् अन्यथाऽङ्गानां जलाप्लुतत्वे दिव्यस्रग्गन्धवाससमिति विशेषणं साधु नोपपद्यते ॥ १३ ॥ असव इन्द्रियाणि प्रमोदनिभृतात्मानः आनन्दपूर्णमनसः गोपाः सखायः तेषामेव तारल्येन प्राथमौचित्यात् ॥ १४ ॥ ततो हा पुत्र जीवसीति गद्गदस्वरा गुरुलज्जाभयप्रसूयादिनिरपेक्षा अतिविह्वला श्रीयशोदा ततस्तत्सखीच्छति निबिडतया तदभितः प्राप्तासु मध्ये मुख्या रोहिणी ततः प्रेमौत्कण्ठ्य चुलुकितगाम्भीर्य्यो विलम्बासहिष्णुः स्त्रीसम्मर्द्द मध्य एव प्रविश्य नन्दः ततोऽन्या गोप्यो वत्सला गोपाश्चोपनन्दादयः चकारेणानुरागिण्यः पूर्वरागवत्यो गोप्यश्च दूरतो लोचनाञ्चलीभिरेव समेत्य परिष्वङ्गादिभिः सङ्गतीभूय लब्धचेष्टा लब्धवाञ्छिता मृता इव जीवन्त्यो बभूवुः किं बहुना नगास्तीरे वृक्षाभावाद्दूरे वृन्दावनस्था वृक्षा अपि तत्साधर्म्यप्राप्त्या कृष्णमदृष्ट्वा शोकात् शुष्कास्तं पुनर्दृष्ट्वा लब्धेहा अङ्कुरपल्लवपुष्पाद्युद्गमवन्तः ॥ १५ ॥ जहासेति धन्याऽस्यैवं कर्तुं युज्यतेत्युक्ता तत्प्रभावज्ञोपि प्रेम्णा पुनः पुनरुत्कर्षेणैक्षतेति कालियहृतकेन क्वचित् क्षतन्तु नाभूरिति न्यभालयत् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

जाम्बूनदपरिष्कृतं सुवर्णालङ्कृतम् ॥ १ ॥ असव इन्द्रियाणि यथा लब्धप्राणाः उत्तिष्ठन्ति तथोत्थिताः प्रमोदेन निभृतः पूर्ण आत्मा मनो येषां ते ॥ १४ ॥ लब्धेहाः प्राप्तचेष्टाः आसन् नगाः वृक्षा अपि लब्धचेष्टा आसन् ॥ १५—१६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

उपोद्घातं समाप्य प्रस्तुतमाह—कृष्णमिति युग्मकम्। विशेषेण निष्क्रान्तं चरणाभ्यामेव सन्तरणलाघवेन जलोपर्युपर्यवागतं कालियादिष्टं कमपि नागमलक्षितमारुह्य वेतिकेचित् अन्यथाङ्गानां जलाप्लुतत्वे दिव्यस्रग्गन्धवाससमिति विशेषणं सुश्लिष्टं न स्यात्। असत्र इन्द्रियाणि गोप्यः सखायः तेषामेव तारल्येन प्रथमाचित्यात् ॥ १३–१४ ॥ ततो वत्स ! दावविप्लुष्टां लतामिव त्वद्विच्छेदातिक्लिष्टां मां जीवयन्नम्बुद इव स्वागतोऽसीति गदगदवाक् हरिमाता यशोदा ततस्तत्सखीषु परितः प्राप्तासु मध्ये तथाभूता रोहिणी च तत्संमर्द एव प्रेमवैवश्या परित्यक्तगाम्भीर्यस्तत्पिता नन्दश्च ततोऽन्या गोप्यश्चोपनन्दपत्न्यादयो वत्सला गोपाश्चोपनन्दादयः कृष्णं समेत्यालिङ्ग्येत्यन्वयः। च शब्दादनुरागिण्यः किशोर्यश्च दूरान्नेत्राञ्जलीभिरेव समेत्य लब्धेहाः प्राप्तवाञ्छिता आसन्, वृन्दाटवीस्था नगा वृक्षाः गिरयश्च गोवर्द्धनादयः कृष्णादर्शनाच्छुष्कास्ते पुनस्तत् दृष्ट्वोद्गताङ्कुरपत्रपुष्पनिर्झरा आसन्निति ॥ १६ ॥ जहासेति—हे विचित्रलीलानिधे स्वामिन् ! विधान्तरनागनिर्वासनातिनिपुणस्यापि परिज्ञातव्रजजनभाव परिपाकस्यापि ते स्वजनमहार्तिकरण्यामस्यां लीलायां तदुभयफलायां कथ वृत्तिस्तत्फणाङ्गधरत्वं तु परं मनोज्ञमित्यर्थः। अनुभावविदपि प्रेम्णः स्वभावात् पुनः पुनरुदैक्षत दुष्टेन नागेन श्रीमदम्बे वाध्ये नाभूदिति तदङ्गान्यपश्यदित्यर्थः ॥ नागा इत्यर्द्धकम् ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्रजो माला गन्धाद्याश्च तैर्मण्डितं जाम्बूनदं सुवर्णं तेन परिष्कृतं तन्मयभूषणोपेतं ॥ १३ ॥ लब्धाः प्राणा यासां ताः प्रमोदेन सन्तोषेण निभृतः पूर्ण आत्मा मनो येषां ते तथाऽभिरेभिर आलिलिङ्गतुः ॥ १४ ॥ प्राङ्निश्चेष्ट इदानीं लब्धेहा चेष्टा याभिस्ता लब्धमनोरथा आसन् ॥ १५ ॥ अस्य कृष्णस्य। परमुदमिति पदमेकं परमा च साऽमुच्चतामिति च ॥ १६ ॥

श्रीसुबोधिनी

एवं प्रासङ्गिकं परिहृत्य प्रस्तुतमाह **कृष्णं ह्रदा**दिति, **निःक्रान्तं** भगवन्तं **दृष्ट्वोत्थिताः सर्वेभिरेभि**र इति द्वयोः सम्बन्धः, **ह्रदाद्** ध्रदमध्यात्, विशेषेण **निःक्रमण**मकस्मादाविर्भावः, पूर्वस्माद् वैलक्षण्यार्थ रूपं वर्णयन्ति, **दिव्या**नि **स्रग्गन्धवा**सांसि यस्येति, अनेन सामान्यतः पूजा निरूपिता, **महामणिगणैराकीर्ण**मिति विशेषपूजा, **जाम्बूनदेन** च **परिष्कृतं**, अनेन लोकत्रयपदार्थैः पूजित उक्तः, तत्र **दिव्या**नि स्पष्टानि, **मणयः** पातालस्थाः, सुवर्णं भूमिष्ठं, **अकस्मादुपलभ्य**, भगवत्सन्निधिमात्रेणैव **लब्धप्राणा** जाताः

प्रजा बालका **इवोत्थिता:**, यथा बालका उत्तिष्ठन्त्येवं **लब्धप्राणा** एते महान्तोप्युत्थिताः, परस्परज्ञानरहिताः **प्रजा** लौकिका वा यथा प्राणेष्वागतेषूत्तिष्ठन्त्येवमेते कृष्णे समागत **उत्थिताः**, ततोपि भगवत्सान्निध्ये **प्रमोदेन निभृतः** पूर्णं **आत्मा**न्तःकरणं येषां, आदौ पुरुषास्तरुणाः पुरुषोत्तममपि **प्रीत्या**लिङ्गितवन्तः ॥ १३-१४ ॥ ततो **यशोदा रोहिणी**, स्त्रियो ह्यत्युत्सुकाः, ततो **नन्दो** रोहिणीस्पर्शभयात्, ततो **गोप्यो** नन्दभयात्, ततो **गावोपि**, हे **कौरवे**तिसम्बोधन विश्वासार्थं सर्व एव **कृष्णं समेत्य लब्धचेष्टा** जाताः, **लब्धो मनोरथो** यैस्तादृश **अप्यासन्**, क्रियाज्ञानशक्त्योः सम्बन्ध उक्तः ॥ १५ ॥ **राम**श्चाप्येवंविधो जातः, विशेषमप्याह, **अच्युतमालिङ्ग्य जहासेति, पूर्वं भगवदंशो भगवत्येव स्थितस्तदा सर्वसमानमेव कृतवान्, ततो भगवत्यालिङ्गिते तदीयोत्र समागत इति पश्चाज् जहास**, तुल्यता, सम्पादित्ता, परीक्षा सम्यक् कृतेति, कालीयनिष्कासनं तु नाश्चर्याय, यतोयमस्या**नुभाववित्**, विश्वमेवान्यथा क्षणेन करोति तस्य किमिदमाश्चर्यमिति, दुःखसुखयोर्मिश्रणप्रतिषेधार्थमाह **नरा नार्य** इति, चतुर्विधा अप्येते **परमामेव मुदमापुः** ॥ १६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

कृष्णमित्यत्रानेनेति पादत्रयेण ॥ १३ ॥ यशोदेत्यत्र तत इति वारत्रयं योज्यं, अत एवेत्यन्यस्याशप्यत्वात् ॥ १५ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

कृष्णं ह्लदादित्यत्र दिव्यानि स्पष्टानीति 'दिव्यस्रग्गन्धवाससा'मितिवाक्यात् स्रग्गन्धवाससां' दिव्यता स्पष्टैवेत्यर्थः ॥१३॥ यशोदा रोहिणीनन्द इत्यत्र ततो नन्दः रोहिणीस्पर्शभयादिति ततः रोहिणीकृतभगवदालिङ्गनाद्यनन्तर नन्दः कृतवान्, तत्र हेतुः रोहिणोस्पर्शभयादिति, रोहिण्या ज्येष्ठभ्रातृपत्नीत्वेन पूज्यत्वान् नमस्कारार्थं चरणस्पर्श उचितः, तदतिरिक्तसमये पूज्यस्पर्शस्यानुचितत्वाद् भयं, अन्यथा रोहिण्यपेक्षया श्रीनन्दस्य भगवति प्रीत्यतिशयात् श्रीयशोदानन्तरं नन्दमेव वदेत् न तु रोहिण्यनन्तरमतस्तथेत्यर्थः ॥ १५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं प्रासङ्गिकमुक्त्वा प्रस्तुतमाह—कृष्णमिति 'कालियकृतया पूजया पूर्वतोऽप्यधिका शोभा जाता' इत्याशयेन तं वर्णयति-दिव्येति । दिव्यानि स्रगादीनि यस्य तम्, महतामनर्घ्याणां मणीनां गणैराकीर्णम्, सर्वतः समलङ्कृतम्, तथा जाम्बूनदेन सुवर्णेन परिष्कृतमलङ्कृतम्, ह्लदाद्विनिष्क्रान्तं निर्गच्छन्त कृष्णम् ॥ १३ ॥ उपलभ्य दृष्ट्वा उत्थिताः प्रमोदेन आनन्देन निभृताः आत्मानो मनांसि येषां ते सर्वे गोपाः प्रीत्या अभिरेभिरे सर्वत आलिङ्गितवन्त इति द्वयोरन्वयः । तत्र दृष्टान्तमाह-लब्धप्राणा इवासव इति । यथा प्राणं विना असव इन्द्रियाणि करचरणादीनि मूर्च्छितानि कार्याक्षमाणि भवन्ति, पुनश्च प्राण प्रतिलभ्य स्वस्वकार्यसमर्थानि भवन्ति तथेत्यर्थः ॥ १४ ॥ यशोदादयश्च कृष्ण समेत्य सङ्गत्य लब्धेहा लब्धमनोरथाश्चासन् । हे 'कौरव!' इति सम्बोधनेन 'कुरुतन्तोस्तव ब्रह्मास्त्रतो रक्षणेन यथा पाण्डवानां सुख जात तथा श्रीकृष्णदर्शनेन नन्दादीनामपि' इति साम्यं द्योतितम् ॥ १५ ॥ रामश्चाच्युत कृष्णमालिङ्ग्य जहास । 'तस्य तु तद्वियोगदुःखं नाभूत्' इत्याशयेनाह-अस्यानुभावविदिति । नगादयोऽपि कृष्णं दृष्ट्वा परमां मुदं लेभिरे । तत्र नगा वृक्षाः, तेषां मोदः पूर्वं शुष्काणां सद्य एव प्ररोहः ॥ १६ ॥

अन्वितार्थप्रकाशिका

कृष्णमिति द्वयम् ॥ दिव्यानि स्रजः गन्धाः वासांसि च यस्य तं महतामनर्घ्याणां मणीनां गणैराकीर्णं सर्वतः समलङ्कृतं तथा जाम्बूनदेन सुवर्णेन परिष्कृतमलङ्कृतं ह्लदाद्विनिष्क्रान्तं निर्गच्छन्तं तद्दत्तवस्त्रगन्धाद्यक्लेदाय जलोपरि पादव्रज्ययेत्यर्थः । कृष्णम् उपलभ्य दृष्ट्वा लब्धाः प्राणा यैस्ते असवः इन्द्रियाणीव उत्थिताः प्रमोदेन निभृताः पूर्णा आत्मानो मनांसि येषां ते सर्वे गोपाः प्रीत्या अभिरेभिरे सर्वत आलिङ्गितवन्तः ॥ १३-१४ ॥ यशोदेति ॥ हे कौरव ! यशोदादयः कृष्णं समेत्य संगत्य लब्धेहा लब्धचेष्टा लब्धमनोरथाः आसन् ॥ १५ ॥ राम इति ॥ अस्य अच्युतस्यानुभाववित् रामश्चाच्युतं कृष्णमालिङ्ग्य जहास । नगा गावो वृषाः वत्साश्च परमां मुद लेभिरे । तत्र नगा वृक्षाः पूर्वं शुष्काः अपि सद्य एव प्ररोहमापुरित्यर्थः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विनिष्क्रांतं बहिरागतं जांबूनदेन सुवर्णेन परिष्कृतं सुवर्णाभरणेन भूषितमित्यर्थः ॥ १३ ॥ उपलभ्य श्रीकृष्णं प्राप्य प्रमोदेन आनंदेन निभृताः परिपूर्णा आत्मानो मनांसि येषां ते सर्वे गोपाः लब्धप्राणाः असव इन्द्रियाणीव उत्थिताः संतः अभिरेभिरे मुहुर्मुहुरालिंगनं चक्रुः ॥ १४ ॥ यशोदाद्या गोप्यः नंदाद्या गोपाश्च सर्वे लब्धचेष्टा आसन् विषेण शुष्का नगाः तरवोऽपि सद्य एवांकुरिता आसन्नित्यर्थः ॥ १५-१६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ तत उपरितनं वृत्तान्तमाह कृष्णमित्यारभ्य यावदध्यायसमाप्ति ॥ कृष्णमिति ॥ उपलभ्येति ॥ दिव्यानि स्रग्गन्धवासांसि नागपत्नीभिः समर्पितानि यस्य तं, महतामनर्घ्याणां मणीनां गणैराकीर्णो वृतस्तं, सर्वतः समलंकृतमित्यर्थः। जाम्बूनदेन सुवर्णेन परिष्कृतोऽलङ्कृतस्तं, ह्रदात्, विनिष्क्रांतं, कृष्णं उपलभ्यालक्ष्य, लब्धः प्राणो यैस्ते, इन्द्रियाणि इव, सर्वे गोपाः, उत्थिताः अभ्युत्थिताः, प्रमोदेन निभृताः पूर्णा आत्मानो देहा मनांसि वा येषां तथाभूताः सन्तः, प्रीत्या अभिरेभिरे कृष्णमालिङ्गितवन्तः। द्वयोरेकान्वयः ॥ १३–१४ ॥ यशोदेति ॥ हे कौरव, यशोदा, रोहिणी, नन्दः, गोपाः, गोप्यश्च, कृष्णं समेत्य संगत्य, लब्धेहा लब्धचेष्टाः, लब्धः मनोरथो यैस्तथाभूताः, आसन्। अस्य कृष्णस्य, अनुभाववित् महिमाभिज्ञः, रामश्च बलस्तु, अच्युतं आलिङ्ग्य, जहास ॥ नगा इति ॥ नगा वृक्षाः, गावो धेनवः, वृषा वृषभाः, वत्साः, परमां मुदं, लेभिरे। तत्र वृक्षाः पूर्वं शुष्काः सन्तोऽपि पुनः फलपुष्पादिभिर्विरूढा आसन्नित्यर्थः। सकलत्रकाः सभार्याः, गुरवः ते प्रसिद्धाः, विप्राः, नन्दं समागत्य, हे नन्द, तव आत्मजः, कालियग्रस्तः सन्नपि, ततः मुक्तः। दिष्ट्याऽस्माकं तेन महानानन्दो जात इत्यर्थः। इति ऊचुः ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृष्णं ह्रदादिति : १०.१७.१३.

यातारिभीतिमनसः किल गोकुलस्य संपश्यतोऽमृतमयं जडजातरूपम्।
गोविन्ददर्शन–मनन्तसुखोदयश्च सिद्धं भुवीति विशदं किल तच्चरित्रात् ॥ १४ ॥
अक्षीणकान्तिमभयं बहुहेमरत्नस्रग्गन्ध–वस्त्रललितं भुजगात्तपूजम्।
दृष्ट्वाऽपि कृष्णमभवन् यदहृष्टनिष्ठाः शिष्टाः स गोपतिरपीति तु मोहचेष्टा ॥ १५ ॥

रामश्चेति १०.१७.१६.

यत्कार्यमच्युतकृतं भवता तदेतदावश्यकं किल ममापि विधेयमासीत्।
तत्र प्रतारणपरत्वमधारि कस्मादित्याशयेन सरसं स जहास रामः ॥ १७ ॥
एतत्कौतुकतस्त्वयेश विहितं ज्ञातं च तत्तत्त्वत स्त्वद्वृत्तं मनसा मया न विशदं कृत्वा बहिर्दर्शितम्।
तेनैतैरखिलैस्तदा व्रजजनैर्योऽवारि कोलाहलो वाच्योऽसाविति सुप्रसन्नवदनं रामः सहासोऽब्रवीत् ॥ १७ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण कालिन्दी जी के दह से बाहर पधारे। भगवान के श्रीअङ्ग दिव्य वनमाला दिव्यवन्ध, दिव्य पीताम्वर, से अलंकृत थे। पाताल लोक के महामूल्य मणियों की भूमि लाक के जाम्बूनद नाम के सुवर्ण जडित मालाओं को विभूषित करते श्रीकृष्ण जी जव जल से बाहर पधारे तब प्रभु को पाकर सारे गोप गौ आदि भूतल पर गिरे थे वे खड़े हो गए, और जैसे इन्द्रियाँ प्राण पाकर सचेत बन जाय वैसे सारी प्रजा आनन्द परिपूर्ण चित्त होकर अति अनुराग से भगवान श्रीकृष्ण को समालिङ्गन करने लगी ॥ १३–१४ ॥ हे कौरव ! परीक्षित ! श्री यशोदा माता, रोहिणी माता नन्द बाबा, गोप गोपी जन, गौओं वछरे वगैरे भगवान श्रीकृष्ण को पाकर सचेत एवं सचेष्ट बने और इनके मनोरथ पूर्ण बने ॥ १५ ॥ श्रीबलदाऊ भैया जी ने अच्युत श्रीकृष्ण का आलिङ्गन किया। श्रीबलभद्र भगवान की महिमा को अच्छी तरह जानते थे इसलिए हंसने लगे। इधर सारे नर, नारी, बैल बछड़े आदि अत्यंत प्रसन्न हुए ॥ १६ ॥

नन्दं विप्राः [1]समागत्य गुरवः सकलत्रकाः। ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्तवात्मजः ॥ १७ ॥
[2]देहि दानं द्विजातीनां कृष्णनिर्मुक्तिहेतवे। नन्दः प्रीतमना राजन् गाः सुवर्णं तदादिशत् ॥ १८ ॥
[3]यशोदा च महाभागा नष्टलब्धप्रजा सती। [4]परिष्वज्याङ्कमारोप्य मुमोचाश्रुकलां[5] मुहुः ॥ १९ ॥[6]
तां रात्रिं तत्र राजेन्द्र क्षुत्तृड्भ्यां श्रमकर्शिताः। ऊषुर्व्रजौकसो गावः कालिन्द्या उपकूलतः ॥ २० ॥

---

१. समासाद्य–वीर; समागम्य–विज.। २. अयं श्लोको नास्ति–वीर. विज.। ३. यशोदापि–श्रीधर. वंशी. वीर विज.। ४. प्ररि-ह लि. टी.। ५. कणान्बहून्–वीर. विज.।

६. ततश्चास्तंगते भानौ कृष्णो वासमकल्पयत्। सरामः सह गोपालैर्मात्रा पित्रा सगोजनैः ॥

वीर. विज. पाठे अयं श्लोकोऽधिको दृश्यते।

कर्दमक्षमा

अन्वयः—सकलत्रकाः- गुरवः से विप्रा समागत्य नन्दम् ऊचुः कालियग्रस्तः तव आत्मजः मुक्तः दिष्ट्या ॥ १७ ॥ कृष्णनिर्मुक्तिहेतवे द्विजातीनाम् दानम् देहि, हे राजन् ? तदा प्रीतमनाः नन्दः गाः सुवर्णम् अदिशत् ॥ १८ ॥ सती महाभागा यशोदा लब्धप्रजा कृष्णम् परिष्वज्य च अङ्कम् आरोप्य मुहुः अश्रुकलाम् मुमोच ॥ १९ ॥ राजेन्द्र व्रजौकसः च गावः क्षुत्तृड्भ्याम् श्रमकर्शिताः अतः ताम् रात्रिम् तत्र कालिन्द्याः उपकूलतः ऊषुः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ते विप्रा ऊचुः ॥ १७-१८ ॥ नष्टलब्धप्रजा नष्टप्राया पुनर्लब्धा प्रजा यया सा ॥ १९ ॥ श्रमेण च कर्षिताः । उपकुलतः कूलप्रांते ॥ २०-२३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गुरवः सर्वपूज्याः भागुर्यादिपुरोहिता वा "गुरुस्तु गीष्मतौ श्रेष्ठे पितरि दुर्भरे हरे । सर्वपूज्ये हितवदे ज्ञानदेऽपि गुरुः स्मृतः ॥" इत्यनेकार्थवाग्विलासे ॥ १७ ॥ द्विजातोनामिति चतुर्थ्यर्थे षष्ठो, द्विजातिभ्यः । कृष्णस्य निर्मुक्तिः प्रीतिस्तस्याहेतवे 'निर्मुक्तिः प्रीतिमोक्षयोः' इति धरणिः ॥ १८ ॥ यशोदा च गाः सुवर्णं च ददावित्यपि ज्ञेयम् । नष्टा चासौ लब्धा नष्टलब्धा, सा प्रजा संततिर्यस्याः सेति वा ॥ १९ ॥ यस्या रात्र्यागमे कालियो निष्कासितस्तामित्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्रैव विशेषतो ब्राह्मणानां हर्षभरेण वाक्यमाह—नन्दमिति । गुरवः पुरोहिताः अन्ये च विप्राः समागत्येति प्रागेव तेन सह व्रजात् निर्गताः अधुना तन्निकटमागत्येत्यर्थः । ते परमवैष्णवत्वादिना प्रसिद्धाः दिष्ट्या भद्रम् अहो तवास्माकं च भाग्यमित्यर्थः । अतोऽतिहृष्टो भूत्वा सुमहोत्सवं विधेहीति भावः ॥ १७-१८ ॥ महाप्रेम्णा पुनः श्रीयशोदया मिलितमित्याह । यशोदेति त्वर्थे चकारः श्रीनन्दतोऽपि विशेषात् महाभागत्वमाह—नष्टेति । यतः सतीति तस्याः कथमन्यथा स्यात् इति भावविशेषणाभिप्रेतम् यद्वा, स्वभावतः श्रीकृष्णस्नेहादिना सर्वोत्कृष्टा यद्वा तादृशीभवन्ती कलां धारां मुहुरिति कदाचित् पूर्ववृत्तस्मृत्या दुखोदयेन कदाचिच्च प्राप्तानन्देनाश्रुधारामोचनस्य विरामेऽपि उष्णशीतताभेदेन पौनःपुन्यात् ॥ १९ ॥ कथाक्रमेणान्यामप्यद्भुतलीलामाह—तामित्यादिना । रात्रिमिति श्रीकृष्णस्य कालियदमनादिना तेन सह व्रजजनानां प्रत्येकमेलनेन च दिनावसानतः तां तद्दिनसम्बन्धिनीं तादृशपरमानन्दमयीं वा यत्र कृष्णेन सह सङ्गमस्तस्मिन् प्रदेश एवोषुः तत्रैव हेतुः क्षुत्तृड्भ्यां रोदनादिश्रमेण च यद्वा क्षुत्तृड्भ्यां यः श्रमस्तेन कृशीकृताः दौर्बल्यं प्रापिता इत्यर्थः । तत्र धेन्वादिषु तत्रैव विद्यमानास्वपि क्षुधादिकर्शितत्वं तासां विषसम्पर्कशङ्कया श्रीकृष्णायानुपयोजनात् ततः स्वयमप्यनुपयोगात् कालिन्द्या उपकूलतः विषजलादिभयेन तद्ध्रदस्य जलान्तिकं परित्यज्येत्यर्थः । अन्यथा दावाग्निना सर्वत आवरणासिद्धेः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्रैव विशेषतः श्रीनन्दसन्तोषार्थं ब्राह्मणानां हर्षभरेण वाक्यमाह—नन्दमिति । गुरवः पुरोहिताः, अन्ये च विप्राः, यद्वा, गुरव इति तेषामेव विशेषणं तादृशोक्तौ योग्यत्वात् । समागत्येति प्रागेव तेन सह व्रजान्निर्गताः, अधुना तन्निकटमागत्येत्यर्थः । सकलत्रका इति ब्राह्मणीनामपि तत्रैवागमनेन स्वत एव तत्साहित्यात्ते परमवैष्णवत्वादिना प्रसिद्धाः । दिष्ट्या—अहो भवास्माकञ्च भाग्यमित्यर्थः, अतोऽतिहृष्टो भूत्वा आशु महोत्सवं विधेहीति भावः । एवं ब्राह्मणानामपि श्रीनन्द-सन्तोषणैकपरता दर्शिता, तद्वाक्यादरेण श्रीनन्दस्यापि तथैव सम्यक् स्वसुतप्रीतिश्च नितरां जातेति ज्ञेयम् ॥ १७ ॥ त्वर्थे चकारः । श्रीनन्दतो विशेषान्महाभागत्वमाह—नष्टेति, यतः सती पतिव्रता; पातिव्रत्याभिप्रायः पूर्वमपि सूचितः । यद्वा, स्वस्वभावतः श्रीकृष्णस्नेहादिना सर्वोत्कृष्टा, अन्यत्तैर्व्याख्यातमेव; यद्वा, नष्टा अदर्शनं गता मृता वा प्रजा यस्याः सेव सती भवन्ती; यद्वा नष्टया अदृष्टया पुनर्लब्धया च प्रजया सती वर्त्तमानेत्यर्थः । यद्वा, नष्टापि लब्धा हस्तादिग्रहणेन प्राप्ता प्रजा यया, तथाभूतैव सती; कलां धाराम्, मुहुरिति कदाचित् पूर्ववृत्तस्मृत्या दुःखोदयेन कदाचिच्च प्राप्तानन्देनाश्रुधारामोचनस्याविरामात् ॥ १९ ॥ अद्भुतलीलाप्रसंगे कथाक्रमेणैवान्यामद्भुतलीलामाह—तामित्यादिना; रात्रिमिति श्रीकृष्णस्य कालियदमनादिना तेन सह व्रजजनानां प्रत्येकमिलनेन च दिनावसानतस्तां तद्दिनसम्बन्धिनीं तादृशपरमानन्दमयीं वा, यत्र श्रीकृष्णेन संगस्तस्मिन् प्रदेश एवोषुः, तदानीं नन्दीश्वरान्तिके व्रजस्य वृत्तेर्दूरतरत्वेन रात्रौ तत्र गमनाशक्तेः । तत्रैव हेतुः—क्षुत्तृड्भ्यां रोदनादिश्रमेण च; यद्वा, क्षुत्तृड्भ्यां यः श्रमस्तेन कर्षिता व्याप्ताः तालव्यमध्यपाठे दौर्बल्यं प्रापिता इत्यर्थः । तत्र गवादिषु तत्रैव विद्यमानेष्वपि क्षुत्कर्षितत्वम्, क्षुधार्त्तैर्वत्सैः कृष्णसगत्यनन्तरं लब्धपरमानन्दैर्निःशेषेण पीतस्तन्यत्वाद्दोहनपात्राद्यभावाद्वा, तृट्कर्षितत्वञ्च विषजलभयात्, जलपानाद्यभावात्, स्नानाद्यकरणाद्वा । राजेन्द्रेति

परमाश्चर्य्येण सम्बोधनम्, किम्वा मृगयादिना सम्राजो भवादृशोऽपि तत् सम्भवेदित्यभिप्रायेण कालिन्द्या उपकूलतो विषजलादिभयेन तद्ध्रदस्य जलान्तिकं परित्यज्य ततः किञ्चिद्दूरे श्रीयमुनातीरप्रान्त इत्यर्थः, अन्यथा दावाग्निना सर्वत आवरणासिद्धिः ॥२०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सभार्या विप्रा नन्दं समेत्य कालियेन ग्रस्तस्तवात्मजः मुक्तः तस्माद्विमुक्तः किल दिष्टद्या अयं महानानन्द इत्यूचुः ॥ १७-१८ ॥ नष्टप्राया पुनर्लब्धा प्रजा पुत्रो यया सा सती यशोदा सुतं परिष्वज्याङ्कमारोप्य च बहूनानन्दाश्रुकणान् मुमोच ॥ १९ ॥ ततस्तां रात्रिं तत्र यमुनायास्तीर एव व्रजौकसो गावश्च ऊषुरुषितवन्तः, कथम्भूताः ? क्षुत्तृड्भ्यां श्रमेण च कर्शिताः ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नष्टा च लब्धा च प्रजा यस्याः सा तथा अश्रुकणान् बाष्पबिन्दून् ॥ १९ ॥ क्षुत्तृड्भ्यामुत्पन्नश्रमेण कर्शिताः अभिभवं प्राप्ताः उपकूलतः कूलसमीपे ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

उपकूलतः किञ्चित् कूलं परित्यज्येत्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गुरवो भागुर्यादिपुरोहिताः ॥ १७–१८ ॥ आदौ नष्टप्राया पश्चाल्लब्धा प्रजा यया सा अङ्कमारोप्य परिष्वज्येति पूर्वं बहुलोकापेक्षावशात् तादृशपरिष्वङ्गालाभादिति भावः ॥ १९ ॥ अतः परमद्य रात्रौ वयं कृष्णं निर्निमेषं पश्यन्त एव स्यामः भाग्यादगतोऽपि कालियः पुनर्यदि वैरं सिषाधयिषुरायाति तदा मिलितीभूय लकुटैर्वारयामः । नतु दर्शनव्यवधायकं स्वस्वगृहं याम इति सर्वेषां मनोरथमालक्ष्य नन्दाद्या व्रजौकसः उपकूलतः विषजलादिभयात् कूलसमीपं परित्यज्य ऊषुः अन्यथा दावाग्निना सर्वत आवरणासिद्धेः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ते विप्रा ऊचुः ॥ १७–१८ ॥ नष्टप्राया पुनर्लब्धा प्रजा यया सा ॥ १९ ॥ क्षुत्तृड्भ्यां श्रमेण च कर्शिताः कालिन्द्याः उपकूलतः कूलप्रान्ते ॥ २० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

नन्दमिति सार्द्धकम् । गुरवो भागुर्यादयः पुरोहिताः ॥ १७–१८ ॥ आदौ नष्टा मूर्च्छितप्राणा पश्चाल्लब्धप्रजा परिष्वज्याङ्कमारोप्येति पूर्वं बहुजनसंमर्देभीष्टपरिष्वङ्गालाभेन तृप्तेरनुदयात् ॥ १९ ॥ कथाक्रमादन्यां चाद्भुतां लीलामाह–तामिति । व्रजौकसां कृष्णेन सह प्रत्येकमिलने दिवसावसानात् प्राप्तो रात्रिं ते तत्रैवोषुः गतोऽपि कालियश्चेद्वैरं स्मरन्नागच्छेत्तदा तं सर्वे दण्डादिभिर्निवारयामो न तु कृष्णवीक्षणव्यवधायकान् स्वस्वनिलयान् गच्छाम इति भावेन तत्रैवावतस्थुरित्यर्थः । उपकूलत इति विषजलादिभयात्तस्य ह्रदस्य कूलसमीपं परित्यज्येत्यर्थः अन्यथा दावाग्निना सर्वत आवरणसिद्धेः । क्षुतृड्भ्यामिति वृन्दाटवी दिव्यफलानि वृन्दादेव्या सङ्कल्पेनाहृतान्याहुः गावश्च तृणानि चेरुरिति बोध्यम् ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ते विप्रा इत्यन्वयः ॥ १७ ॥ नष्टाऽदर्शनं गता सा लब्धा प्रजापत्यं यस्याः सा सती ॥ १८ ॥ सगोधनैर्गोपालैरित्यन्वयः । भानावस्तंगते मित्रः स्वामित्रवंशभवेन तनुजनिनैर्मल्यं जातमिति लज्जया सुखप्रदर्शनेन वातोपभरेण समुद्रपातेन वा जामातरं प्रति तव योषा विषा जातेति वक्तुं वेत्यस्तंगमनमित्यौत्प्रेक्षिका उत्प्रेक्षयन्ति ॥ १९ ॥ क्षुत्तृड्भ्यां ताभ्यामुत्पन्नो यः श्रमस्तेन कर्शिताः कूलतः कूलस्योप समीपे ऊषुः ॥ २० ॥

श्रीसुबोधिनी

नन्वेतावत्कालं ब्राह्मणैः कथमेते नोपदिष्टा इदानीं ब्राह्मणाः कथं तत्सान्त्वनं कृतवन्त इत्याशङ्क्याह **नन्दमि**ति, **विप्रास्त्वत्यन्तमेव महापुरुषाः केवलं कर्मजडा वैश्यगुरवो जीवनार्थं स्थितास्तत्सम्बन्धिनोपि तथा**, अतः **सकलत्रा** एते **समागत्य नन्दमूचुः**, **कालियेन** सम्बद्धो भगवां**स्तवात्मजो दिष्ट्या**स्मदादिभाग्यै**र्मुक्तः**, एतावतोत्सवे **देय**मिति सूचितं भवति ॥ १७ ॥ [अतो **द्विजातिभ्यो दानं देहो**ति **कृष्णा**गमननिमित्तं, ततो **नन्दो गाः सुवर्णं** च दत्तवान् ॥ १७अ ॥] **यशोदा**या विशेषमाह **यशोदा च** तैरुक्ता, **महाभागे**ति, तेभ्यो बहु दित्सितवतीति, विशेषकरणाद् वा तस्या भाग्यमभिनन्दति, **नष्टाद्या** पुनर्लब्धा प्राप्ता **प्रजा** यया, तथात्वे हेतुर्धर्मः **सती**ति, अतो भाग्योदये जाते **परिष्वज्य** पश्चा**दङ्कमारोप्याश्रुकलां मुमोच** ॥ १८ ॥

एतावतार्धरात्रिर्जाता, तस्मिन् दिवसे न केनापि भुक्तं, गावः पूर्वं शुष्कस्तना एवाधुना तु स्तन्यसहिता अपि दोहसाधनाभावान्न दुग्धदा जाताः, भगवदागमनप्रमोदेनैव **च** निर्वृतास्तत्रैव स्थिता इत्याह **तां रात्रिमिति, श्रम** आगमन**श्रम**श्चित्त**श्रमो** वा मध्ये वा मरणाय **श्रमः**, तेनापि **कर्शिताः, क्षुत्तृड्भ्यां** सहिताः, श्रमस्य कार्यं कृत्वा गतत्वात् कार्यमेव निरूपितं **क्षुत्तृषोः** स्वरूपं च, **व्रजौकस** इत्यव्युत्पन्नाः, **कालिन्द्याः कूल**समीपे कियद्दूरे **कूलं** विहाय वनमध्ये शयनं कृतवन्तः ॥ १९ ॥ तदा कालीयाविष्टो दैत्यो दोषाभिमानी सर्वभक्षणार्थं स्थितो मृत्युश्चैकीभूय वह्निर्भूत्वा गोकुलवासिनां दाहार्थमुद्गत इत्याह **तदेति, आशु** प्रतीक्रियायाः करणार्थं **विपिने** स्वयमेवो**द्भूतो** दारुघर्षणजन्यो वा **दावा**नलशब्दवाच्यो जातः, सर्वपदार्थानेकीकृत्य ज्वालनात्, **सर्वत** एव व्रजं **सुप्तमावृ**त्यार्धरात्रसमये **प्रदग्धुमुपक्रान्तवान्, पूर्वं हि ते स्नेहे परीक्षितास्तं स्नेहं स्थापयंस्तद्देहसम्बन्धित्वं दूरीकरिष्यन् माहात्म्यं प्रदर्शयति, अन्यथा लौकिक एव स स्नेहः स्यात्, भगवदर्थं च क्लिष्टा एते न तु गतदेहाभिमाना इति च ज्ञापयितुमिदमुच्यते,** अन्यथा **ज्ञानाधिकारिण एव स्युः शरीराभिमानस्य गतत्वात्** ॥ २० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

नन्दमित्यत्र **महापुरुषत्व**मेव विवृतं **न केवल**मित्यादिना ॥ १७ ॥ **तां** रात्रिमित्यत्र **क्षुत्तृषोः स्वरूपं चे**ति कर्षकत्वेन भ्रातृव्यत्वलक्षणं स्वरूपमप्युक्तमित्यर्थः, "क्षुत् खलु वै मनुष्यस्य भ्रातृव्य" इति श्रुते "उभे तीर्त्वाशनायापिपासे" इति श्रुतेश्च ॥१९॥ **तदा**श्वित्यस्याभासे **मृत्युश्चे**ति, अशनाया **मृत्यु**रूपत्वात् सा तथेति ज्ञेयम् ॥ २० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तदाशु विपिनोद्भत इत्यस्याभासे **सर्वभक्षणार्थं स्थितो मृत्यु**श्चेति प्राणधर्मस्वरूपो क्षुद्रूपोग्निः **सर्वभक्षणार्थं स्थितो** मृत्युरित्यर्थः, क्षुद्रूपाग्नेर्मृत्युरूपत्वं "क्षुत् खलु वै मनुष्यस्य भ्रातृव्य" इतिश्रुतेः, "अशनया मृत्युरेवे"तिश्रुतौ स्फुटमेव मृत्युरूपत्वोक्तेश्च, **तद्देहसम्बन्धित्वं दूरीकरिष्य**न्निति तस्य भगवद्विषयकव्रजवासिस्नेहस्य देहसम्बन्धित्वं दूरीकरिष्यन्नित्यर्थः, दावानलपानेन भगवता स्वस्मिन् देहाभावः प्रदर्शितः, न हि देहवानेवं वह्निं पिबति, तथा च व्रजजनानां गोपदेहप्रयुक्तस्नेहोपि गतः किन्तु वस्तुतो भगवत आत्मत्वादात्मत्वज्ञानाभावेपि प्रमेयबलेन निरुपाधिकः स्नेह उत्पन्न इत्यर्थः ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भगवन्मायामोहितानां विप्राणां चेष्टामाह—नन्दमिति सार्धेन। ये सकलत्रकाः स्त्रीसहिताः गुरवः पुरोहिताश्च विप्रास्ते समागत्य नन्दं प्रत्यूचुः। तदाहुः—कालियेन ग्रस्तस्तवात्मजोऽयं दिष्ट्या भाग्येनैव मुक्तः ॥ १७ ॥ अतः कृष्णस्य कालियाद्या निर्मुक्तिस्तत्र हेतुर्निमित्तं ब्राह्मणसन्तोषः, तस्मै तदथ द्विजातीनां ब्राह्मणानामस्माकं दानं देहीति। तदा प्रीतमना नन्दो हे राजन्! ब्राह्मणेभ्यो गाः सुवर्णं च आदिशत् ददौ ॥ १८ ॥ यशोदा च महाभागा दानानि ददौ। महाभाग्यमेव स्पष्टयति—नष्टा अदर्शनं गता पुनर्लब्धा प्रजा यया तथाभूता सती तं परिष्वज्य अङ्कमारोप्य अश्रुकलामानन्दाश्रुं मुहुर्मुमोच ॥ १९ ॥ अद्भुतं लीलान्तरमाह—तामिति। तां यस्मिन् दिवसे कालियो विवासितस्तद्दिनसम्बन्धिनीं रात्रिं हे राजेन्द्र! तत्रैव कालिन्द्या उपकूलतः कूलप्रान्ते व्रजौकसो गोपाः गावश्च ऊषुः वासं चक्रुः। तत्र हेतुमाह—क्षुत्तृड्भ्यां रोदनपरिधावनादिजनितेन श्रमेण च कर्शिता इति ॥ २० ॥

अन्वितार्थप्रकाशिका

नन्दमिति द्वयम् ॥ हे राजन्! ये सकलत्रकाः स्त्रीसहिताः गुरवः भागुर्यादयः पुरोहिताश्च विप्रास्ते समागत्य नन्दं प्रत्यूचुः तदाहुः। कालियेन ग्रस्तस्तवात्मजोऽयं दिष्ट्या भाग्येनैव मुक्तः। अतः कृष्णस्य कालियाद्या निर्मुक्तिस्तत्र हेतुर्ब्राह्मणसन्तोषस्तस्मै द्विजातीनां दानं देहि। तदा प्रीतमना नन्दो ब्राह्मणेभ्यो गाः सुवर्णं च अदिशत् ददौ ॥ १७–१८ ॥ यशोदेति ॥ महाभागा नष्टा अदर्शनं गता पुनर्लब्धा प्रजा यया तथाभूता सती यशोदा च तं कृष्णं परिष्वज्याङ्कमारोप्याश्रुकलामानन्दाश्रुकलां मुहुर्मुमोच ॥ १९ ॥ तामिति ॥ हे राजेन्द्र! क्षुत्तृड्भ्यां रोदनपरिधावनादिजनितेन श्रमेण च कर्शिताः व्रजौकसो गावश्च तां कालियविवासनादिसंबन्धिनीं रात्रिं तत्रैव कालिन्द्या उपकूलतः कूलप्रान्ते यद्वा उपकूलतः विषजलादिभयात्कूलसमीपं परित्यज्येति "ल्यब्लोपे पञ्चमी"। अन्यथा दावाग्निना सर्वत आवरणासिद्धेः। ऊषुः वासं चक्रुः। धेन्वादीनां सत्त्वेऽपि तासां विषसम्पर्कशङ्कया क्षीराद्यग्रहणात् क्षुदादि ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विप्राः नंदमूचुः ॥ १७ ॥ आदौ नष्टा पश्चाल्लब्धा प्रजापुत्रो यया सा यशोदा परिष्वज्य आलिंग्य ॥ १८ ॥ क्षुत्तृड्भ्यां श्रमेण रोदनायासेनकर्षिताः पीडिताः उपकूलतस्तटसमीपे ॥ १९ ॥ तदा तस्मिन् काले शुचिवनात् शुष्कात् ग्रीष्मारण्यात् उद्भूत उत्थितः दावाग्निर्वनानलः निशीथे मध्यरात्रौ सुप्तं व्रजं आवृत्य दग्धुं उपचक्रमे आरंभं कृतवानित्यर्थः ॥ २०–२१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यशोदापीति ।। नष्टा नष्टप्राया लब्धा पुनः संप्राप्ता प्रजा पुत्रो यया सा, अत एव महाभागा, सती साध्वी, यशोदा स्वयं यशोदापि, कृष्णं परिष्वज्य, अङ्कं आरोप्य, मुहुः अश्रुकलां, मुमोच । क्वचित्त्वत्र मुमोचाश्रुकणान् बहूनित्यपि पाठस्तत्र बहून् अश्रुकणानानन्दाश्रुबिन्दूनित्यर्थः ।। १७ ।। तामिति ।। हे राजेन्द्र, ततः तां रात्रिं तत्र वने एव, क्षुत्तृड्भ्यां श्रमेण च कर्षिताः, श्रमशब्देन समस्यमानमपि कर्षितेति पदं क्षुत्तृड्भ्यामित्यनेनान्वयमार्षत्वात् प्राप्तमिति वोध्यम् । व्रजौकसः गावश्च, कालिन्द्याः उपकूलतः, यमुनातीर एवेत्यर्थः । ऊषुरुषितवन्तः ।। १८ ।। तदेति ।। तदा रात्रौ, शुचिर्ग्रीष्मर्त्तुस्तत्संबन्धि यद्वनं तदुद्भूतः, 'शुचिर्ग्रीष्माग्निश्रृङ्गारे' इति मेदिनी । ग्रीष्माग्निश्रृङ्गारे इति समाहारद्वन्द्वान्तं, दवाग्निः, सर्वतो व्रजं व्रजस्य परित इत्यर्थः । निशीथेऽर्द्धरात्रसमये, सुप्तं व्रजं आवृत्य, प्रदग्धुं, उपचक्रमे ।। १९ ।। तत इति ।। ततः, दह्यमाना अग्नेर्दाहमनुभूयमानाः, ते व्रजौकसः उत्थाय, संभ्रान्ता व्याकुलचित्ताः सन्तः, मायामनुजमात्मीयसंकल्पेन नृभावं दर्शयन्तं, ईश्वरं प्रत्यक्षपरमेश्वरं, कृष्णं शरणं, ययुः रक्षणोपायत्वेनाध्यासितवन्तः ।। २० ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नन्दं विप्रा इति : १०.१७.१७.

आस्तां कीदृगपि प्रसङ्गवशतश्चेत् प्राप्तमप्रार्थिता विप्रास्तच्छुभकार्यमाशु च पुरस्कृत्य प्रलोभान्विताः ।
कुर्वन्ति प्रसभं धनाढ्यमसकृद्दानोद्यतं श्रीपते तन्नैषोऽभिनवः प्रचार इति न त्वं क्रुध्य मय्याश्रिते ।। १८ ।।

तां रात्रिमिति : १०.१७.२०.

पूर्णान्नैव वसुन्धरा वयमपि प्रायस्तदाकाङ्क्षिणः सत्येवं यदलभ्यमद्य समभूदन्नं लघीयोऽप्यहो ।
तत्प्राग्जन्मनि नार्पितं द्विजमुखेष्वस्मिन् दिने चेत्यभूत् सत्यं रामवचोऽन्यथा सति विभौ तेषां तथात्वं कुतः।। १९ ।।

कृष्णप्रिया

अब श्रीनन्द बाबा के समीप तेजस्वी विप्रों ने आशीर्वाद दिए, एवं जो गुरुजन थे और नित्य वैदिकादि संस्कारादि कर्म कराते थे वे उनकी पत्नियाँ भी साथ आकर जोर और प्यार से कहने लगे बाबा बाबा "वधाई" "बधाई" बड़ी प्रसन्नता की बात है कि कालीय ग्रसित आपके सुपुत्र श्रीकृष्ण चन्द्र जी छूटकर क्षेमकुशल आ गए ।। १७ ।। सती यशोदा मा एवं रोहिणी बड़भागिनी है क्योंकि अपने हाथों से गए हुए और पुनः प्राप्ति की संभावना नथी ऐसे लाडिले निज पुत्र को पुनः प्राप्त किया। माँ यशोदा जी ने पहिले तो नन्दलाल का आलिङ्गन किया, पुनः गोद पधराया, तब तो यशोदा माता के नेत्रों से प्रेम विवश अश्रधारा बहने लगी ।। १८ ।। राजेन्द्र परीक्षित् ? व्रजनिवासीजन एवं गोधनवृन्द भूख, प्यास, एवं आयास से क्षीण शक्ति बन चुके थे इसलिए सब वहाँ ही श्री कालिन्दीजी के तट निकट ही सो गए ।। १९ ।। तब विपिन में प्रकट दावानल ने, निद्राधीन व्रज को त्वरित गति से चारों ओर घेर कर मध्य रात्रि में सबको जलाना शुरू किया ।। २० ।।

तदा[1]ऽऽशुविपिनोद्भूतो दावाग्निः [2]सर्वतो [3]व्रजम् । [4]सुप्तं निशीथ [5]आवृत्य प्रदग्धुमुपचक्रमे ।। २१ ।।
तत उत्थाय सम्भ्रान्ता दह्यमाना व्रजौकसः । कृष्णं ययुस्ते शरणं माया [6]मानुषमीश्वरम् ।। २२ ।।
कृष्ण कृष्ण महाभाग हे रामामितविक्रम । एष [7]घोरतमो वह्निस्तावकान् ग्रसते हि नः ।। २३ ।।
सुदुस्तरान्नः स्वान् पाहि कालाग्नेः सुहृदः प्रभो । न शक्नुमस्त्वच्चरणं संत्यक्तुमकुतोभयम् ।। २४ ।।
इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः । तमग्निमपिबच्छीघ्र[8]मनन्तोऽनन्तशक्तिधृक् ।। २५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे [9]दावाग्निमोचनं नाम सप्तदशोऽध्यायः ।। १७ ।।

---

१. तदा शुचिवनोद्भूतो–श्रीधर. वंशी. ; तदाऽऽशु विपिनोद्भूतो–वीर ; घोरः शुचिबलोद्भूतो–विज. । २. परितो–वीर. । ३. वृतः-विज. । ४. सुप्तान्निशीथ–वीर. विज. । ५. आसाद्य–इति कस्यचित् । ६. मनुज–श्रीधर.–वंशी. वीर. विज. विश्व. शुक. । ७ घोरतरो–गो. प्रे. टी. । ८. तीव्र–श्रीधर. वंशी. विज. जीव. विश्व ; च्छीघ्र–वीर. । ९. बालक्रीडायां दावाग्निमोक्षणं गो. प्रे. टी. ; पारमहंस्यां संहितायां दशमस्कन्धे पूर्वार्धे–अन्यप्रत्यां दृश्यते ।

कर्दमक्षमा

अन्वयः—तदा विपिनोद्भूतः दावाग्निः निशीथे सुप्तम् व्रजम् सर्वतः आवृत्य प्रदग्धुम् उप चक्रमे।। २१ ॥ ततः दह्यमानाः सम्भ्रान्ताः व्रजौकसः उत्थाय ते मायामानुषम् ईश्वरं कृष्णम् शरणम् ययुः ॥ २२ ॥ हे कृष्ण हे कृष्ण ! हे महाभाग ! हे अमित विक्रम ! राम ! एषः घोरतमः वह्निः तावकान् नः हि ग्रसते ।। २३ ॥ हे प्रभो ! सुदुस्तरात् कालाग्नेः नः स्वान् सुहृदः पाहि, अकुतोभयम् त्वत् चरणम् सन्त्यक्तुम् न शक्नुमः ॥ २४ ॥ जगदीश्वरः इत्थम् स्वजनवैक्लव्यम् निरीक्ष्य अनन्तशक्तिधृक् अनन्तः तम् अग्निम् शीघ्रम् अपिवत् ।। २५ ॥

इति दशमस्कन्ध निरोधलीलायाः तामसप्रकरणावान्तरप्रमेयप्रकरणे सप्तदशोऽध्यायः समाप्तः ॥ १७ ॥

श्रीधरस्वामिविरचिता भावार्थदोपिका

कालाग्नेर्मृत्युरूपादग्नेः। न मृत्योर्बिभीमः किं तु त्वच्चरणवियोगादित्याहुः। न शक्नुम इति ॥ २४–२५ ॥

विमोहानहिदंडेन ततः स्वं शरणागतान्। गोपानपादनंतोऽसावनं तद्वनवह्नितः ।। १ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायां सप्तदशोऽध्यायः ॥ १७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

शुचौ ज्येष्ठे ग्रीष्मे वा आषाढे वनोद्भूतः। यद्वा—शुचिना पवनेन वनोद्भूतः शुचिपवनशब्दयोरेकार्थत्वात्पर्यायत्वम् 'पवनः पवतामस्मि' इत्युक्तेः। यद्वा—मया कश्चिच्छुचिनामापि मरुदस्ति तेन। 'शुचिवलोद्भूतः' इति पाठो विजयध्वजसंमतः, स सुगमः। पुराणेतिहासादौ पुनरुक्तिर्दोषाय न इति, तस्याः काव्यदोषत्वादिति। दाव इत्युक्तेः पुनरग्निपदोपादानं शुचिवनोद्भूत विशेषणं च। "दावो वनानले चाथ दवश्च विपिनेऽपि च" इति धरणिः। "शुचिर्ग्रीष्माग्निशृङ्गारेष्वाषाढे शुद्धमंत्रिणि। ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु ॥" इति मेदिनी। आवृत्य परिवार्य दावाग्निरयं कंसानुचरः कालियसखः कश्चिदसुर इति केचिदाहुः ॥ २१ ॥ ततः अग्निप्रवृत्तेः व्रजौकसः व्रजस्थकृषोवलाद्याः। मायया स्वरूपेणैव मनुजम् "स्वरूपभूतया निजशक्त्या मायाख्यया" इति श्रुतेः। यद्वा - मायया कापट्येनैव मनुजम्। वस्तुतस्तु—नराकृतिपरब्रह्मत्वेन तद्रूपेणवेश्वरम्। यद्वा—माया कृपा तद्युक्तं मनुजं द्विभुजत्वादिसाम्येन। यद्वा—मायाः लक्ष्म्या ईश्वरं स्वामिनमपि मनुजं मनुष्यलीलं कृष्णं व्रजजनदुःखकर्षकं कालियदमनादिना दृष्टत्वात्। शरणं यः अस्माकं प्राणसंकटेऽस्मिन्नेव बालके स्वप्रसादादुद्भूते नारायण आविश्यास्मान्पालयति। 'अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ' इति गर्गोक्तेस्तमिमं सप्रति नारायणाविष्टं कृष्णमेव नारायणपरत्वेन विस्रभ्य विपत्तरणार्थं शरणं मम इति भावः ।। २२ ॥ हे रामेति। अस्यापि तद्दिने सर्वज्ञत्वदर्शनेनायमपि कृष्णभ्राता देवाविष्ट इत्यनुमानात्। तावकानित्युक्तिर्दयोत्पादनार्था ॥ २३ ॥ मृत्योर्नित्यत्वात्ततो न भयमित्याहुः—नेति। तर्हि कुतस्तत्राहुः—किं त्विति। प्रभो हे सर्वं कर्त्तुं समर्थ। न कुतोऽपि भयं यस्मात्तम्। अतो निजचरणपरित्यागभयमस्माकमाशु विनाशयेति भावः ॥ २४ ॥ तम् वनोद्भूतम्। अनंतशक्तिधृगितिवह्निपानशक्तिरपि श्रीकृष्णेऽस्तीत्याह। ननु परमसुकुमारः कथं तीव्रमग्निमपिबत्तत्राह—अनंतेति। तस्य संहारिका शक्तिरेवापिबत्, तस्मिन् शक्तिमति तत्पानोपचारमात्रमिति भावः। 'धृजु–गतौ' भ्वादिः, ततः क्विपि धृगितिरूपम् ॥ २५ ॥ विमोहान् ज्ञातभगवत्तत्त्वान्। अहो येन महाविषः कालियो निरस्तस्सोय साक्षादीश एवेति। तत ईशत्वादेव। अनंतश्चासौ वनवह्निश्चेति (१) ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदा तद्रात्र्यामेव शुचिर्ग्रीष्मसमयः तत्सम्बन्धि वनं शुष्कारण्यमित्यर्थः। तत्र उद्भूतः अयं च दावाग्निरूपः कालियसखः कंसानुचरः कश्चिदसुर इति केचिदाहुः ॥ २१ ॥ सम्भ्रान्ताः सद्यस्तत्प्रतिकाराद्यज्ञानात् यद्वा निस्सारणार्थमितस्ततः कृतपरिभ्रमणा इत्यर्थः। यतो दह्यमानाः दग्धुमुपक्रम्यमाणाः मायया कापट्येनैव मनुजत्वेन प्राकृतमनुष्यत्वेन स्फुरन्तं वस्तुतस्तु नराकृतिपरब्रह्मत्वेन तद्रूपेणैवेश्वरं किम्बा माया कृपा तदुक्तं मनुजं द्विभुजत्वादिसाम्येन ! यद्वा, माया लक्ष्म्या ईश्वरं स्वामिनमपि मनुजं मानुष्यलीलम् इति कारुण्याद्यतिशयः सूचितः तत्रापि कृष्णं तत्र व्रजजनप्राणनाथम् अतः शरणं ययुः ।। २२ ॥ तत्प्रकारमेवाह—कृष्णेति। वीक्षासम्भ्रमेण स्नेहभरस्वभावेन वा महान् भागो भाग्यमस्मादृशानां यस्मादिति त्वत्साक्षादस्माकं दुःखं नोपयुक्तमिति भावः। अमितः अनन्तो विक्रमः शौर्यं यस्येति बलदेवं प्रति सम्बोधनं तव वीर्येण दावाग्निरपि निर्वातीति भावः एवं तदापि तेषां महाप्रभावत्वज्ञानमेव जातं नत्वैश्वर्यज्ञानमिति भावः। एष इति प्रत्यक्षत्वं शीघ्रत्वं वा बोधयति घोरतमः अप्रतिकार्यत्वात् युष्मदन्तिकप्राप्तत्वाद्वा ग्रसते निश्शेषेण संहरतीत्यर्थः। तावकानिति कृपाजननार्थं ग्रसनायोग्यत्वबोधनार्थं वा तव "कममकावेकवचनम्" इति तद्धित निमित्तकादादेशसूत्राद्यदत्रैकस्यैव सम्बन्धः प्रतिपाद्यते हि निश्चयं तत्खलु द्वयोरभेदप्रतिपादनार्थमिति ज्ञेयम् ॥ २३ ॥

स्वान् ज्ञातीन् आत्मीयान् वा सुशोभनं हृत् येषां तान् सद्भावेन तदेकनिष्ठानित्यर्थः । प्रभो हे सर्वं कर्त्तुं समर्थ ! न कुतोपि भयं यस्मात्तम् अतो निजचरणपरित्यागभयमस्माकमाशु विनाशयेति भावः । अतः सम्यक् क्षणमपि वियुक्ततया त्यक्तुं न शक्नुम इति ।। २४ ।। इत्थं स्वप्रेमैकमूलकानेककाकूक्त्यादिप्रकारकं निरीक्ष्य अनुभूय तं तादृशं अतस्तीव्रं दुस्सहं तथाभूतमपि अपिबत् कारुण्यमयप्रेमावेशेनेति भावः । ननु, भवतु तदावेशस्तेन कथं तत्पानं स्यादित्याशङ्क्य गूढमपि तदैश्वर्यं स्वसमये स्वयमेव व्यक्तीभवतीत्यभिप्रेत्य सिद्धान्तयति–जगतामपीश्वरः सर्वेषु तत्तच्छक्तिप्रद इत्यर्थः । तस्मादेवाग्नेरपि शक्तेः को नाम विस्मय इति भावः । ननु, गोपबालकरूपः समन्ताद्भवमग्निं कथमपिबत् तत्राह, अनन्तः तादृशस्यैव विग्रहस्य विभुत्वेन स्वयमपि समन्तात् प्रकाशमान इत्यर्थः, न च तन्मात्रशक्तित्वमप्याश्चर्य्यमित्याह अनन्तशक्तिधृगिति अत एव श्रीगोपा अपि निवारयितुं नावसरं लब्धवन्त इत्यर्थः ।। २५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामीकृतवैष्णवतोषिण्यां सप्तदशोऽध्यायः ।। १७ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तदा तद्रात्र्यामेव, शुचिग्रीष्मसमयस्तत्सम्बन्धि वनं शुष्कारण्यमित्यर्थः, तत्र तस्माद्वा उद्भूतोऽयञ्च दावग्निरूपः कालिय-सखः, कंसानुचरः कश्चिदसुर इति केचिदाहुः ।। २१ ।। सम्भ्रान्ताः, सद्यस्तत्प्रतिकाराद्यज्ञानात्, यद्वा, निःसरणार्थमितस्ततः कृतपरिभ्रमणा इत्यर्थः, यतो दह्यमाना दग्धुमुपक्रम्यमाणाः, पश्चादीषदग्नितापं लभमाना वा, माया कापट्यम् — यथा रासारम्भेऽपि धर्म्मानुशासनम्, किंवा, माया कृपा तद्युक्तं मनुजं द्विभुजत्वादिसाम्येन; यद्वा, मायाया लक्ष्म्या ईश्वरं स्वामिनमपि मनुजं मानुष्यलीलमिति कारुण्याद्यतिशयः सूचितः, तत्रापि कृष्णं व्रजजनप्राणनाथम्, अतः शरणं ययुः ।। २२ ।। तत्प्रकारमेवाह—कृष्णेति। वीप्सा संभ्रमेण, स्नेहभरस्वभावेन वा महद्भागम्, 'समूहार्थे अण्' भगशब्दवाच्यमैश्वर्य्यवृन्दं यस्य तत्सम्बोधनम्, अतस्तवाशक्यं किञ्चिदपि नास्तीति भावः; यद्वा, महान् भागो भाग्यमस्मादृशानां यस्मादिति त्वत्साक्षादस्माकं दुःखं नोपयुक्तमिति भावः। अमितोऽनन्तो विक्रमः शौर्य्यं यस्येति बलदेवं प्रति सम्बोधनम्; तव वीर्य्येण दावाग्निरपि निर्वातीति भावः, यद्वा, श्रीबलभद्रं परित्यज्य कथं मामेव शरणं याथेत्याशंक्याहुः—रामादपि रामेणापि वा, अमितो मातुमशक्यो विक्रमो यस्य; यद्वा, रमयतीति रामोऽमितो विक्रमो यस्य सः । एष इति प्रत्यक्षत्वं शीघ्रत्वं वा बोधयति, घोरतमः, अप्रतिकार्य्यत्वात् त्वदन्तिकप्राप्तत्वाद्वा ग्रसते निःशेषेण संहरतीत्यर्थः । तावकानिति कृपाजननार्थं ग्रसनायोग्यत्वबोधनार्थं वा, हि निश्चितम् ।। २३ ।। स्वान् ज्ञातीन् आत्मीयान् वा, सुशोभनं हृद्येषां तान्, सद्भावेन तदेकनिष्ठान्नित्यर्थः । प्रभो हे सर्वं कर्त्तुं समर्थं ! न कुतोऽपि भयं यस्मात्तमतो निजरक्षयास्माकं भयमाशु विनाशयेति भावः, यद्वा, ननु ममाप्ययं भयंकर इति चेत्तत्राहुः—न कुतोऽपि भयं यस्येति, साक्षादधुनैव दर्शनादिति भावः, अतः सम्यक् मरणेनात्यन्तवियुक्ततया न त्यक्तुं शक्नुम इति ।। २४ ।। इत्थमनेन काकूक्त्यादिप्रकारेण, निरीक्ष्य साक्षादनुभूयेव; यद्वा, इत्थमीदृशदावाग्निकृतमित्यर्थः । तेषां विज्ञापनात् पूर्वमेवालोच्य तं शुष्कवनोद्भूतं सर्वतो व्यापकमतिवृद्धं चेत्यर्थः, अतस्तीव्रं दुःसहमित्यप्रतिकार्य्यत्वमुक्तम्, तथाभूतमपिवदिव निःशेषेण पानाभिनयादिना नाशयामासेत्यर्थः । तत्र च युक्तिर्नानुसन्धेयेत्याह—जगतां जगत्स्रष्टृब्रह्मादीनामपीश्वरः सर्वशक्तिप्रद इत्यर्थः, तस्मादेवाग्नेरपि शक्तिः, यद्वा, परमेश्वरत्वेन दुर्वितर्क्यलीलत्वादिति भावः, यद्वा, देवतानामग्निमुखाग्न्योरभेदेन स्वस्थाने श्रीमुखमध्ये स्थापितवानित्यर्थः । एवमग्नेरपि सुखमकरोदिति ज्ञेयम्, यतो जगदीश्वरः सर्वदेवसुखप्रदश्चेत्यर्थः । ननु तर्हि श्रीमुखान्तरग्नेर्वर्तमानत्वेनास्मादृशां मनसि सन्तोषो न स्यादित्याशंक्याह– अनन्तोऽपरिच्छिन्नः, कस्मिन् श्रीमुखान्तर्भागेऽग्निर्गतः, तमपि लक्षयितुं कश्चिदपि न शक्त इत्यर्थः । ननु परमस्निग्धतरैः श्रीनन्दयशोदादिभिः साक्षात्तदग्निपानं कथं सोढम्, कथं वा प्रसह्य न निवारितम् ? तत्राह—अनन्तशक्तिधृक्, तथा तत्पानं चक्रे, यथा तैः कथञ्चिल्लक्षयितुं न शक्तमित्यर्थः ।। २५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां सप्तदशोऽध्यायः ।। १७ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा रात्रावरण्यप्रभवो दवाग्निर्निशीथे सुप्तं व्रजं व्रजस्य परितः आवृत्य प्रदग्धुमुपक्रान्तवान् ।। २१ ।। ततो दवाग्निना दह्यमाना व्रजौकस उत्थाय सम्भ्रान्ताः व्याकुलचित्ताः मायया आत्मीयसङ्कल्पेन मनुजं साक्षादीश्वरं कृष्णं शरणं ययुः रक्षणोपायलेनाध्यवसितवन्तः ।। २२ ।। शरणयानप्रकारमेवाह—कृष्णेति द्वाभ्याम् । तावकान् त्वेदक रक्षान्नोऽस्मानेष वह्निर्ग्रसते ।।२३।। स्वान् स्वान् सुहृदो नोऽस्मान् सुदुस्तरात् कालाग्नेः प्रलयाग्नितुल्याद्दवाग्नेः पाहि, हे प्रभो ! नास्ति कुतोऽपि भयं यस्मात्तं तव चरणं सन्त्यक्तुं न शक्नुमः न वयं मृत्योर्बिभीमः अपि तु त्वच्चरणवियोगादिति भावः ।। २४ ।। स्वजनानां वैक्लव्यं निरीक्ष्यानन्तशक्तिधृक् हेतुगर्भमिदं तत्त्वात् जगदीश्वरः कृष्णः शीघ्रं तमग्निमपिबत् ।। २५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां सप्तदशोऽध्यायः ।। १७ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

शुचिः पवनः तस्य बलेनोद्भूतः शुचिनाम्नो मरुतो बलेन वा यतः परिवेष्टितः निशीथे अर्धरात्रे ।। २१–२४ ।। अनन्तशक्तिधृक् अनियतशक्तिधृक् ।। २५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां सप्तदशोऽध्यायः ।। १७ ।।

(विजयध्वजरीत्या चतुर्दशः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अकुतोभयमिति त्वच्छरणप्राप्तिं विना अन्यत् सर्वमेवास्माकं भयहेतुरित्यर्थः। अपिबत् कृपावेशेन पानाभिनयेनैव संहृतवान् तत्र हेतुः जगदीश्वरः अग्न्यादीनां सर्वेषामेव तत्तच्छक्तिप्रवर्त्तकनिवर्त्तकः समन्तादुगताग्निपाने युक्तिः ।। २४ ।। अनन्तः सर्वत्र प्रकाशमानस्वविग्रहः तादृशशक्त्यावनद्भूतत्वम् अनन्तशक्तिधृगिति ।। २५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे सप्तदशोऽध्यायः ।। १७ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ कालियविषाग्निनिर्जयानन्तरं दावाग्निनिर्जय-प्रस्तावे तस्य योगमायावैभवमाह—कृष्णं ययुस्तेश्रवणं मायामनुजमीश्वरम्। माया योगमाया तया अमनुजम्, मनुजाकृतित्वेऽप्यमनुजधर्माणम्। यद्वा, मायया योगमायया अमनुजम्, आकृत्यैव मनुजमित्यर्थः। वस्तुतस्तु श्रीकृष्णविग्रहस्यात्मत्वात्। तथा च—(गी० २।२४) अच्छेद्योऽयमदाह्योऽयम्' इत्यादि। तेन तदविग्रह एवात्मा ।। (२३–२५) ।।

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे सप्तदशोऽध्यायः ।। १७ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कृष्णं ययुस्ते श्रवणं मायामनुजं माया योगमाया तया सर्वे परिजना अमनुजा यस्य तम् ।। २३–२५ ।।

इति सप्तदशः ।। १७ ।।

एवमष्टादशोनविंशौ ।। १८–१९ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शुचिर्ग्रीष्मः दावाग्निरयं कंसानुचरः कालियसखः कश्चिदसुर इति केचिदाहुः ।। २१ ।। व्रजौकसः व्रजस्थकृषीवलाद्याः मायया स्वरूपेणैव मनुजं स्वरूपभूतया नित्यशक्त्या मायाख्ययेति श्रुतेः। शरणं ययुरित्यहो अस्माकं प्राणसङ्कटसमये अस्मिन्नेव बालके स्वप्रसादोद्भूते नारायण आविश्यास्मान् पालयति "अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ" इति गर्गोक्तेस्तमिम सम्प्रति श्रीनारायणाविष्टं कृष्णमेव नारायणत्वेन विस्रभ्य विपत्तरणार्थं शरणं याम इति त्वमृश्येति भावः ।। २२ ।। हे रामेति तस्यापि तद्दिने सर्वज्ञत्वदर्शनादयमपि कृष्णभ्राता देवाविष्ट इत्यनुमानात् ।। २३ ।। कालो मृत्युस्तद्रूपादग्नेः मृत्यौ सति त्वच्चरणेन सह वियोगो भवेत् सतु दुःसह इत्याहुः—न शक्नुम इति ।। २४ ।। स्वजनवैक्लव्यं दृष्ट्वेति स्वजनविषयकस्तत्प्रेमैव तेषां रक्षणार्थं तमैश्वर्यमनुसन्धापयामासेति भावः। ननु, परमसुकुमारः कथं तीव्रमग्निमपिबत्तत्राह—अनन्तशक्तिधृक् तस्य संहारिका शक्तिरेवापिबत् तस्मिन् शक्तिमति तत्पानोपचारमात्रमिति भाव. ।। २५ ।।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। दशमेऽस्मिन् सप्तदशः सङ्गतः सङ्गतः सताम् ।। १७ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु, श्रमकर्शितानां सुप्तानामुत्थाने को हेतुरत्राह मायामिति। मायां योगमायां प्रति यो मनुजस्तं शरणं ययुः योगमायया स्वलीलासौष्ठवसिद्धये भगवता प्रवर्तितया प्रबोधिता इति भावः ।। २१–२३ ।। कालाग्नेः मृत्युरूपादग्नेः ।। २४–२५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तदशाध्यायार्थप्रकाशः ।। १७ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तदा रात्र्यामेव शुचिर्ग्रीष्मस्तत्सम्बन्धि वन शुष्कमित्यर्थः। तत्रोद्भूतोऽग्निः कश्चित् कालियसखः कंसानुचरो दैत्यो बोध्यः ।। २१ ।। सम्भ्रान्तास्ततो निःसतुमितस्ततो भ्रमतः "अनेन सर्वदुर्गाणि यूयमञ्जतरिष्यथे"ति गर्गोक्तिस्मरणात् कृष्णमेव श्रवणं ययुः। कीदृशं मायया स्वरूपशक्त्यैव मनुजं नराकारं "स्वरूपभूतया नित्यशक्त्या मायाख्यया युत" इत्यादि श्रुतेः "परं

ब्रह्म नराकृती''ति स्मृतेश्च ॥ २२ ॥ हे रामेति ! धेनुकवधेन तस्यातिविक्रमावगमात् ॥ २३ ॥ कालाग्नेरिति मृत्युरूपाद्वह्नेरित्यर्थः भूतो सति त्वच्चरणाभ्यां सह वियोगः स्यात् सच दुसह इत्याह—न शक्नुम इति ॥ २४ ॥ ननु परमसुकुमारः कथं तीव्रमग्निमपिबत्तत्राह—अनन्तशक्ति धृगिति तमयति तीषौ सति तस्य दुष्टसंहारिणी शक्तिरेव तमपि बदित्यर्थः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां सप्तदशोऽध्यायः ॥ १७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शुचिबलोद्धूतः शुचिर्ग्रीष्मस्तस्य यद्बलं सामर्थ्यम् । शुचि शुद्धेऽनुपहते श्रृङ्गाराषाढयोः सिते । ग्रीष्मे हुतवहे स्यादुपधांशुककर्मणोरिति विश्वः । ग्रीष्मो नामतुंरभवदित्युतरत्रोक्तेः । सन्निहितत्वाच्छुचिर्ग्रीष्म इत्युचितं । अथवा शुचिर्वायुर्दावाग्निर्वनानलः । दवदावौ वनानलावित्यमरः । सर्वतः परितो वृतो वेष्टितः ॥ २१ ॥ निशीथे निपातितः शब्दो रात्रिसामान्यस्य तथाऽर्धरात्रं स्यादित्युक्तेरर्धरात्रस्य च वाचकः । उपचक्रमे उपपराभ्यामिति क्रमेरात्मनेपदता । आरेभे ॥ २२ ॥ ते गोपाः ॥ २३ ॥ तावकान्नस्तीव्रपदस्वारस्येनाक्षिपक्ष्मनिमीलनमध्य एवापिबदिति द्योत्यते । अत एवोत्तरत्रेवात्र लोचनानि निमीलयतेत्युक्तिः । ग्रसते ग्रसति पाहि । रामं प्रत्यप्याहुः ॥ अःस्वान्पाहीति । ततोऽतावकान्स्वतावकान्स्तोतॄनिति वा । स्वानिति विषयभेदान्न पुनरुक्तिः ॥ २४ ॥ अकुतोभयं त्वच्चरणं सन्त्यक्तुं न शक्नुमः । एतेन मरण भविष्यतीति चिन्ताऽपि न कृष्णविरहभीत्या वदन्निति भावः सूचितो भवति ॥ २५ ॥ अनन्तशक्तिधृक् अपरिमितबलवांस्तीव्रं यथा भवति तथाऽपिबत्पपौ । अथ तत्पानानन्तरं ॥ २६ ॥ अनुगीयमानोऽनुगैरिति शेषः । गोकुलमण्डितं व्रजं न्यशित् ॥ २७ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे पञ्चदशोऽध्यायः ॥ १०–१५ ॥

श्रीसुबोधिनी

अतस्तेषां व्याकुलतां प्रार्थनां चाह **तत उत्थाये**ति, **सम्यग् भ्रान्ता** जाता अतिनिद्रया दिग्देशकालज्ञानरहिता अपि स्वभावतोपि **व्रजौकसः** कालियेन पूजितं भगवन्तं दृष्ट्वा **कृष्णमेव** ते **शरणं ययुः** ॥ २१ ॥ न तु कृष्णरक्षार्थं यत्नं कृतवन्तः प्रत्युत स्वरक्षामेव कृष्णं प्रार्थितवन्त इत्याह **कृष्ण कृष्णे**ति, भयाद् वीप्सा, **महाभागे**ति तव शरण्यत्वेस्माकं शरणगमने च हेतुः, **साधारणाः सर्व इति राममप्याहुर्हे रामे**ति, **अमितः पराक्रमो** यस्येति, तालवने ज्ञातं, एकवदेवाहुरेष **घोरतमः** शीघ्रभक्षक**स्तावकान्** वैष्णवान् **नोस्मान् ग्रसते**, ग्रासे सन्देहाभावाद् हिशब्दः, नातःपरमाशा जीवनस्येति ॥ २२ ॥ तर्हि किं कर्तव्यमित्याकाङ्क्षायामाहु **सुदुस्तरा**दिति, अयं **कालाग्निः** प्रलयाग्निरेव, अत एव **सुदुस्तरः**, अतः **स्वान्** भक्तान् **सुहृदो** हृदयशुद्धान् सम्बन्धिनो वा भगवच्छात्र लौकिकं वा विचार्य **पाहि**, यतस्त्वं **प्रभुः**, ननु भगवद्भक्तानां किं देहरक्षणेन ? प्रत्युत भगवत्समीपे मरणमेव समीचीनमित्याशङ्क्याहु**र्न शक्नुमस्त्वच्चरण**मिति, **न हि मरणेस्माकं चिन्ता किन्तु तव चरणवियोगो भविष्यती**ति, दाहस्तु सोढुं **शक्यो न तु चरणवियोगः**, ननु विरोधि कथमङ्गीक्रियते ? दाहो बलिष्ठश्चरणान् दूरीकरिष्यत्येवेति तत्राहा**कुतोभय**मिति, न विद्यते **कुत**श्चिद् **भयं** यस्मात्, अने**नेदानीमपि नास्माकं भयं निश्चितं किन्तु शङ्कामात्रेण प्रार्थ्यत** इतिभावः ॥ २३ ॥ एवं एवं प्रार्थनायां यत् कर्तव्यं तत् कृतवानित्या**हेत्थ**मिति, समागतस्य वह्नेर्निर्वापण एतषां वान्यत्र नयने तावदपि विलम्ब न सहत इत्यन्तःकालीयसम्बन्धकृतदुष्टानां दाहार्थ **तमग्निमपिबत्, मुखमप्यग्नि**रिति "नाग्नेर्हि तापः", ननु किमित्येवं कृतवान् ? तत्राह **स्वजनवैक्लव्यं निरीक्ष्ये**ति, स हि सर्वनियन्ता दुष्टश्चाग्निर्बहिर्न स्थापनीयोन्यथा कालान्तरेप्युपद्रवं कुर्यात्, कालकूटभक्षणेन जातगर्वस्य महादेवस्य गर्वनिवारणार्थं दहनधारणजनितगर्वनिवारणार्थं च दहनं तम**पिबत्**, **शीघ्र**मिति, तेषां प्रतीतिजनितभयाभावाय, स्वतस्तु भयाभावः, **अनन्त** इति प्रकारविशेषेप्यप्रश्नः, उत्तरमाहा**नन्तशक्तिधृ**गिति, **अनन्ता** एव **शक्ती**र्बिभर्ति, यदि वायुरूपो भवेत् तथापि पिबेद् यदि जलरूपो भवेत् तथापि शामयेद् यदि मुखं वा मुद्रयेत् तथापि पिबेत् सर्वमुखत्वात् तत्रैव वा मुखं प्रसारयेत् तथापि पिबेदिति नात्र किमप्याश्चर्यमित्यर्थः ॥ २४ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे चतुर्दशाध्यायविवरणम् ॥ १४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तत उत्थायेत्यस्याभासे **तद्देहसम्बन्धित्व**मिति तस्य स्नेहस्य **देहसम्बन्धित्वं** स्वस्य **तद्देहसम्बन्धित्वं** वा एते न **त्वित्यत्रैत** इति भिन्नं पदम् ॥ २१ ॥ **कृष्ण** कृष्णेत्यत्र **साधारणाः सर्व** इति तथा चासाधारणास्तु नवं किन्तु भगवद्रक्षार्थमेव प्रयत्नं कृतवन्त इति ध्वन्यते ॥ २२ ॥ **इत्थ**मित्यत्र **यदि वायुरूप** इति "वायोरग्नि"रितिश्रुतेरुत्पत्तिप्रलययोरेकाधिकरणत्वस्योचितत्वात् तथेत्यर्थः, अयं यशोध्याय इति यशोर्थमेवङ्करणमिति प्रतिभाति, एते विकल्पा एतदर्थमेवोक्ता इति च, यद्यपि यशो वीर्यं विना न भवति वीर्यं च यशः प्रकटयत्येवेत्येकत्रोभयमप्यायाति तथापि यत्र यस्य प्राधान्यं तत्र तदेव निर्दिश्यत इति न काचिदनुपपत्तिः ॥ २४ ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाशे चतुर्दशाध्यायविवरणम् ॥ १४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

इत्थं स्वजनेत्यत्र अन्तःकालीयेति **"तं प्रेक्षणीयसुकुमारे"त्यनेनोक्तप्रकारे भग**वतोपहतपात्मत्वादन्तःस्थिते जगति तद्दोषो जातः, तथा **चान्तःस्थिते** जगति **कालीयसम्बन्धकृतो** यो दोषस्तेन ये दुष्टाः पदार्थास्तेषां दाहेन सुवर्णस्येव दोषनिवृत्त्यर्थमित्यर्थः ॥ २४ ॥

इति चतुर्दशोध्यायः ॥ १४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

इत्थं स्वजनेत्यस्य विवृतौ **मुखमप्यग्निरिति** "अग्निर्मुखं यस्य च जातवेदा" इति वाक्यात् ॥ २४ ॥

इति चतुर्दशोध्यायः ॥ १४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा तस्यां रात्रौ तत्रापि निशीथे अर्धरात्रिसमये शुचिः ग्रीष्मस्तत्सम्बन्धि यद्वनं तत उद्भूतो दावाग्निः सुप्तं व्रजं गवादिसहितं व्रजवासिजनं सर्वत आवृत्य प्रदग्धुमुपचक्रमे प्रक्रान्तवान् इत्यन्वयः ॥ २१ ॥ ततो दह्यमाना व्रजौकसः उत्थाय सम्भ्रान्ता दिग्देशकालादिज्ञानरहिता अन्यदुपायमपश्यन्तस्तन्मनस्कत्वादनेकत्र प्रभावस्य दृष्टत्वाच्च मायया स्वेच्छया मानुषतया प्रतीयमानमपि वस्तुतस्तु ईश्वरं श्रीकृष्णमेव ते शरणं ययुरित्यन्वयः ॥ २२ ॥ शरणगमनप्रकारमाह—कृष्णकृष्णेति द्वाभ्याम् । अतिसम्भ्रमेण वीप्सा । हे कृष्ण सदानन्दरूप ! महद्भाग्यं भक्तानां यस्मात्तत्सम्बोधनं हे महाभागेति । हे राम सर्वतो दुःखनिवारणेन रतिजनक ! दुःखनिवारणे सामर्थ्यं सूचयन्तः सम्बोधयन्ति—हे अमितविक्रमेति । एष घोरतमो भयङ्करो वह्निस्तावकान् नोऽस्मान् ग्रसते प्रदहति, भवदग्रे भवदीयानां दुःखं न युक्तमित्याशयः ॥ २३ ॥ हे प्रभो सर्वप्रकारेण समर्थ ! सुदुस्तरात् कालाग्नेर्मृत्युरूपादग्नेः स्वान् स्वकीयान् सुहृदः शोभनं हृत् येषां तान् भक्तान् नोऽस्मान् पाहि । मृत्योर्न बिभीमः, किन्तु त्वच्चरणं सन्त्यक्तुं न शक्नुमः । तत्र हेतुमाह—अकुतोभयमिति । नास्ति भक्तानां कुतोऽपि भयं यस्मात्, सर्वभयनिवर्तकमित्यर्थः । नच 'तर्हि चरणाश्रितानामग्नितोऽपि भयं नैव स्यात्. किमर्थेयं प्रार्थना ? इति शङ्क्यम्, भगवदिच्छायाः प्रबलत्वाद्व्याकुलतावशाच्च प्रार्थना सङ्गच्छते ॥ २४ ॥ इत्थं स्वजनानां वैक्लव्यं व्याकुलतां निरीक्ष्य तमतितीव्रं सुदुःसहमप्यग्निमापिबत् । ननु 'कथमल्पेन तेन सर्वत आच्छादयतो महतो वह्नेः पानं सम्भवति ?' तत्राह—अनन्त इति । वस्तुतोऽपरिच्छिन्न इत्यर्थः ॥ ननु 'तथापि प्रज्वलतस्तस्य पानं कथं सम्भवति ?' तत्राह—अनन्तशक्तिधृगिति । अग्नेरपि शक्तिस्तस्यैव, "यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ॥ यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" इति वचनात् । तेन तत्पानं नासम्भावितम् । नहि स्वशक्तिः स्वप्रतिकूला भवतीति भावः ॥ अनन्तशक्तित्वे हेतुमाह—जगदीश्वर इति ॥ २५ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने ॥ सप्तदशो गतो वृत्ति वह्निपाननिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

तदेति ॥ तस्यां रात्रौ तत्रापि निशीथे अर्धरात्रिसमये शुचिः ग्रीष्मस्तत्संबन्धि यद्वनं शुष्कं तत उद्भूतो दावाग्निः सुप्तं व्रजं गवादिसहितं व्रजजनं सर्वतः आवृत्य प्रदग्धुमुपचक्रमे प्रक्रान्तवान् । दावाग्निरयं कंसानुचरः कालियसखः कश्चिदसुर इति केचिदाहुः ॥ २१ ॥ तत इति ॥ ततो दह्यमाना व्रजौकस उत्थाय संभ्रान्ता दिग्देशकालादिज्ञानरहिताः सन्तः कालियविषनिष्फलीकरणशक्तिदर्शनेन कृष्णे नारायणावेशमवगच्छन्तो मायया मनुष्याकारमपि ईश्वरं कृष्णं शरणं ययुः ॥ २२ ॥ कृष्णेति ॥ रामकृष्णयोरभेदारोपेण एकत्वे तवकादेशात्तावकानिति स्पष्टं शेषम् ॥ २३ ॥ सुदुस्तरादिति ॥ हे प्रभो ! सुदुस्तरात् दुर्निवारात् कालाग्नेर्मृत्युरूपादग्नेः स्वान् स्वकीयान् सुहृदः नोऽस्मान्पाहि मृत्योर्न बिभीमः । किन्तु अकुतोभयं सर्वभयनिवर्त्तकं त्वच्चरणं सन्त्यक्तुं न शक्नुमः । भक्तानामग्निभयाभावेऽपि व्याकुलत्वात्प्रार्थना सङ्गच्छते ॥ २४ ॥ इत्थमिति ॥ अनन्ताभिः शक्तिभिर्धृष्णोति इति अनन्तशक्तिधृक् अनन्तो भगवान् इत्थं स्वजनानां वैक्लव्यं व्याकुलतां निरीक्ष्य तमतितीव्रं सुदुःसहमप्यग्निमपिबत् ॥ २५ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमस्यामूं सप्तदशे व्यबधात् ॥

इति श्रीमद्भागवते महापुराणे दशमेऽन्वितार्थप्रकाशिकायां सप्तदशोऽध्यायः ॥ १७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नोस्मान् तवकादेश आर्षः ॥ २२ ॥ दुस्तरात् कालाग्नेः अकुतोभयंत्वच्चरणं ॥ २३ ॥ स्वजनानां वैक्लव्यं भयविह्वलत्वं अनंतः अविनाशिमूर्त्तिः श्रीकृष्णः ॥ २४ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचितेनिगूढार्थप्रकाशकेश्रीमद्भागवतस्य दशमस्कंधव्याख्यानेकालियनिर्यापणंनामा सप्तदशोऽध्यायः ॥ १७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शरणयानप्रकारमेवाह कृष्णेति द्वाभ्याम् ॥ हे महाभाग, हे कृष्ण, हे कृष्ण, हे अमितविक्रम, हे राम, घोरतमः, एषः वह्निः, तावकान् त्वदेकरक्ष्यान्, नोऽस्मान् ग्रसते दाहयतीत्यर्थः हि ॥ २१ ॥ सुदुस्तरादिति ॥ हे प्रभो, स्वान् स्वकान्, सुहृदः नोऽस्मान्, सुदुस्तरान् कालाग्नेः प्रलयाग्नितुल्यात् दवाग्नेः, पाहि । नास्ति कुतोऽपि भयं यस्मात् तत्, यत् प्राप्य कुतश्चिदपि भयं न तथाभूतमित्यर्थः । त्वच्चरणं संत्यक्तुं, वयं न शक्नुमः । न वयं मृत्योर्बिभीमः किं तु त्वच्चरणवियोगादिति भावः ॥ २२ ॥ इत्थमिति ॥ इत्थमेवंभूतं, स्वजनवैक्लव्यं स्वजनानां व्याकुलतोपेतं वचनं, निरीक्ष्य श्रुत्वेत्यर्थः अनन्तशक्तिधृत्, हेतुगर्भमिदम् । तत्त्वात् जगदीश्वरः सकलजदेकनाथः, अनन्तः श्रीकृष्णः, तीव्रं तं अग्निं, अपिबत् । दण्डेनाहेर्विमोहान् स्वान् शरणं स्वं ततो गतान् । अनन्तोऽपादसौ गोपान्वनवह्नेरनन्ततः ॥ २३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे सप्तदशोऽध्यायः ॥ १७ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दावाग्निरिति : १०.१७.२१

या एतास्तृणजातयः क्वचिदिहस्थाः कालियास्योद्गतक्ष्वेडार्द्र-श्वसनाभिमृष्ट-ततयस्तद्भक्षणं चेत्कृतम् ।
गोभिस्तद्भविताऽत्यनिष्टमिति ता दग्धुं किमाज्ञापयद् वह्निं गोकुलभव्यकृत् प्रभुरसौ दिग्देवतावन्दितः ॥ २० ॥
स्वात्मोद्यच्छक्तिलोलीकृतसकलजलं तद्गतं तत्तटस्थं श्रीगोविन्दं दयाम्भोनिधिमिह हि सदानन्दकन्दाद्यभूमिम् ।
लब्ध्वाऽप्येते विमूढा भुवि पशुपतयः स्वात्मसौख्यं भजन्ते क्षुद्रक्षुद्राभिसेव्यं कथमिति समगादग्निरुद्बोधनाय ॥ २१ ॥
त्वत्पादप्रतिमावभासविशदे यत्कृष्णवर्त्मन्यभूद् दुःखं तद्वचसामगोचर इति श्रुत्वा गिरं गोपतेः ।
मद्दुःखं विनिवेदयत्ययमहो दान्तः प्रभोरग्रतस्तज्जातोऽस्मि सुखीति संभ्रमगतिः किं कृष्णवर्त्माऽगमत् ॥ २२ ॥
यस्तेजोमयमूर्तिरत्र कुरुते तेजस्विनं मां निजैस्तेजोभिः किल तस्य वेदवपुषः सूर्यस्य पुत्रीमिमाम् ।
निर्दोषामनुकम्पयाऽतनुत यः श्रीशस्य तस्यार्हणा मे युक्तेति हि संविचिन्त्य किमगान्मित्रप्रियः सोऽनलः ॥ २३ ॥
यद्रक्षणे नरहरिः किल जागरूकः कः शक्नुयात्तदपकारमहो विधातुम् ।
स्पष्टस्तथापि परतापकृतः स्वभावो यत्तापदानमतिरित्यनले स्फुटं तत् ॥ २४ ॥

तत इति : १०.१७.२२.

सदाऽहिमुक्तं जडजातमस्मिन् कृतं हि कृष्णेन कृपार्णवेन । निरीक्ष्य विश्वस्तधियस्तदा ते तमार्थयन्त क्षममात्ममुक्त्यै ॥ २५ ॥
सन्तं भवन्तमपि सन्निधिभुव्युपेक्ष्य सुप्तो वनेऽहमिह केवल एव नास्मि ।
तादृग्व्रजोऽपि यदसावुदितेहिदुःखे प्रातः पदं तव विभो तमिवाव मां च ॥ २६ ॥
सर्वदाऽहं निराकर्तुं सर्वदाऽहंरसाश्रितः । सत्कथं तन्न चेत्कुर्वे सत्कथं स्याद्यशो मम ॥ २७ ॥
स्वपदाम्भोजशरणत्राणदीक्षो दयानिधिः । ईदृशस्वयशःस्थित्यै मन्ये श्रीशस्तथा व्यधात् ॥ २८ ॥ (युग्मम्)
प्रातश्चेदुपकारकृन्निजगृहे तेजःप्रतापाधिकस्तत्तत्प्रत्युपकारतुल्यसुखदां कुर्वीत तत्सत्कृतिम् ।
स्वप्रेयस्यवनातिमकामुपकृतिं रक्षोगृहेऽर्वाक् समुत्कुर्वाणं तमवेक्ष्य स प्रभुरभूत् तन्मुख्यसत्कारधीः ॥ २९ ॥
यस्मादुत्पद्यते यत्र स्थितिस्तत्रैव तद्गतिः । इति श्रुत्यर्थयोः श्रीशस्तमग्निं मुखतोऽपिबत् ॥ ३० ॥
भवानलं शान्तयितुं न चालं शूद्रादयः क्षुद्रजना जनेऽस्मिन् । किन्तु प्रभुर्ब्राह्मण एक एवेत्यबोधि कृष्णेन मुखाग्निशान्त्या ॥ ३१ ॥
अतिकालजलावगाहजातं परिहर्तुं ननु शैत्यमन्तरस्थम् । अपिबद् बलतोऽनलं सदुष्णं नहि चेच्छान्तिमवापितो न कस्मात् ॥ ३२ ॥
दुरन्तं ज्वलन्तं भवैकानलं तं ग्रसिष्येऽत्र तेषामशेषेण ये तु । मदङ्घ्र्येकनिष्ठा इतीशाभ्यधायि निशायां विधात्रा त्वया दावपानम् ॥ ३३ ॥
ज्ञात्वा तादृशशक्तिकं नलमलं कृत्वा स्वमुख्यं पुरा तद्द्वारा जडतारणं कृतमतो माहात्म्यमत्रास्ति किम् ।
इत्यल्पोक्त्यपवादलाघवपरीहाराय मुख्यं प्रभुः कृत्वा भुव्यनलं जडाशयजुषो गोपान् वनेऽतारयत् ॥ ३४ ॥

अहं रामश्च दावोपशान्त्यै सम्प्रति याचितः। अपिबच्चिन्तयन्नेवं तमीशोऽनन्तशक्तिभाक् ॥ ३५ ॥
काननं द्विजहितागमाञ्चितं माधवोऽस्मि कृतवानहं पुरा। यत्करोमि न तथाऽधुना भवेत्तन्मृषेत्यकृत तापनाशनात् ॥ ३६ ॥

तापं निवार्य यदहं न वनस्य कुर्यां संरक्षणं सततमत्पदकञ्जभाजः।
श्रद्धा सतां मयि ततो भविता न जातु पातर्यपीत्यकृत तद्विपिनावनं सः ॥ ३७ ॥

ऋणमग्निरशेषेण नेयः शान्तिमिति स्मृतम्। स्मरंस्तमग्निं श्रीजानिरशेषमपिबत् स्वयम् ॥ ३८ ॥

दाना श्रियोऽयमहमस्मि च तद्ग्रहीना जानन्निति प्रभुरतात्स्वमुखासनं तत्।
युक्तं च युक्तमभवत्स बलोऽपि तूष्णीं श्रीजानिरेष हि जनेष्वहमस्मि तद्घृत् ॥ ३९ ॥

मायैकाऽमा त्रियामा प्रसृतघनमहामोहजालान्धकारव्रातोदञ्चत्–प्रपञ्चोत्कट–विकटवने स्वैरतः शेरते ये।
तेषामेषा हि सिद्धाऽपरिमितविषय प्रज्वलत्पावकान्तःसंस्थाऽस्त्यस्याश्च शान्तिर्मदनुगततयेतीश्वरेणाऽन्वबोधि ॥ ४० ॥

वनस्थितो दाहकृदास योऽनलः स शीतलस्त्वद्वदनस्थितो–ऽजान।
तद्युक्तमीशाखिलशान्तिदा यतः श्रुतादर्मध्या सरसा स्थितिः शुचेः ॥ ४१ ॥

शूरप्रभावपुषि दीप्तिमति प्रतापशालिन्यलं तु विजिते जगति प्रधाने।
अर्थात्तदेकशरणाः शरणीभवन्तीत्यग्निर्जितो निखिलतन्मुखसज्जयाय ॥ ४२ ॥

कृतविषाग्निजरस्य पुरो हरेरयमितोऽपि कियान् विषयानलः। इति विभाव्य बलो बलवानपि स्वयमभून्न पुरोऽनलशान्तये ॥ ४३ ॥

प्रलयानलोऽतिपिहितोऽस्ति मे मुखे यदयं मया तु गिलनादनायि तत्।
भृशमुद्विग्नः स भविता निजक्षणात्तदनिष्टमेतदधिकं परं भवेत् ॥ ४४ ॥

इत्यालोच्याच्युतन्यस्तभारः सङ्कर्षणस्तदा। स्थितिक्षणं स विज्ञाय स्वयमासीत्स्थितिक्षणः ॥ ४५ ॥

श्रीशकल्पतरु० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने सप्तदशोऽध्यायः ॥ १७ ॥

कृष्णप्रिया

तब दावानल से जलते हुए ब्रजजन उठ पड़े और घबड़ाकर माया से मनुष्य जैसे देखने में आने वाले भगवान श्रीकृष्ण-चन्द्रजी की शरण आए ॥ २१ ॥ करबद्ध निवेदन करने लगे हे कृष्ण ! हे कृष्ण ! हे बडभागी कृष्ण ! हे पूर्ण पराक्रमी दाऊ भैया यह खतरनाक अग्नि आपके सेवक हम सब को जलाती है ॥ २२ ॥ हे नाथ ! हे प्रभो ! हे दयालो ! इस खतरनाक भयानक कालरूप अग्नि से रक्षा कीजिये, हे नाथ ! हम आपके मित्र एवं भक्तजन हैं। भगवन् आप तो सर्वविधि भय से परे हैं, ऐसे निर्भय पुरुषोत्तम के श्रीचरणों का त्याग करने में हम असमर्थ हैं ॥ २३ ॥ इस तरह अपने भक्तों की विकलता को देख अनन्त शक्ति जगदीश्वर भगवान् श्रीकृष्ण चन्द्रजी ने इस अग्नि का शीघ्र ही पान किया ॥ २४ ॥

इति श्रीमद्भागवत दशमस्कन्ध निरोधलीला तामस प्रकरण के प्रमेय प्रकरण में दावाग्नि पान निरूपक सतरहवाँ अध्याय समाप्त ॥ १७ ॥

❖

अथाष्टादशोऽध्यायः

श्लोकाः	अनु.	वंश.	मि. उ.	रुचि.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
३२	२६	१	१	४	१	११३६	६	३७	११७९	३६।।	३

श्रीशुक उवाच

अथ कृष्णः परिवृतो [1]बन्धुभिर्मुदितात्मभिः । अनुगीयमानो न्यविशद् व्रजं गोकुलमण्डितम् ॥ १ ॥
व्रजे विक्रीडतोरेवं गोपालच्छद्म [2]रूपिणोः । ग्रीष्मो नामर्तुरभवन्नातिप्रेयाञ्छरीरिणाम्[3] ॥ २ ॥
स च वृन्दावनगुणैर्वसन्त इव लक्षितः । यत्रास्ते भगवान् साक्षाद् रामेण सह केशवः ॥ ३ ॥
यत्र निर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकम् । शश्वत्तच्छी[4]करर्जीषद्रुममण्डलमण्डितम् ॥ ४ ॥

कर्वमक्षमा

अन्वयः—अथ मुदितात्मभिः बन्धुभिः परिवृतः च अनुगीयमानः कृष्णः गोकुलमण्डितम् व्रजम् न्यविशत् ॥ १ ॥ एवं गोपालच्छद्मरूपिणोः व्रजे विक्रीडतः शरीरिणाम् न अतिप्रेयान् ग्रीष्मः नाम ऋतुः अभवत् ॥ २ ॥ यत्र रामेण सह साक्षात् भगवान् केशवः आस्ते (तेन) सः (ग्रीष्मः) वृन्दावनगुणैः वसन्त इव लक्षितः ॥ ३ ॥ यत्र निर्झर-निह्राद-निवृत्त-स्वन-झिल्लिकं शश्वत् तत् शीकरऋजीष-द्रुम-मण्डलमण्डितम् (विराजते) ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अष्टादशे ततो ग्रीष्मे वसंतगुणलक्षिते । अघातयद्बलेनालं प्रलंबं लीलया हरिः ॥ १ ॥
कृत्वा नृत्यं फणाग्रेषु कालियस्य सकौतुकम् । बलं प्रलंबस्तु गांसमारोहयदरातिहा ॥ २ ॥ १ ॥

गोपालच्छद्ममायया गोपालनमेव छद्म यस्यां तया मायया ॥ २–३ ॥ वसंतसाम्यमाह चतुर्भिः । यत्र ग्रीष्मेऽपि निर्झराणां निर्ह्रादेन घोषेण निवृत्तस्वनाच्छन्नध्वनयो झिल्लिकाः कठोरध्वनिसूक्ष्मकीटा यस्मिंस्तथाभूतं वृंदावनं भवति । किं च शश्वत्तेषां निर्झराणां शीकरैरंबुकणैर्ऋजीषाः स्निग्धा ये द्रुमास्तेषां मंडलैर्मंडितम् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः सप्तदशानंतरम् (१) । सकौतुकम् साश्चर्यम् (२) । अथ दावाग्निपानोत्तरम् । ज्ञातिभिः गोपैः । केचिदिमं श्लोकं पूर्वाध्यायांते पठंति ॥ १ ॥ शरीरिणाम् देहिमात्रस्येत्यर्थः । नातिप्रेयान् अभितस्तापजनकत्वात् । गोपालनं छद्म वनगननाय मिषं यस्यां तथाभूता या माया प्रच्छन्नकामनामयी जनवंचना तया विक्रीडतोर्व्रजबालाभिस्सह विहरतोरिति बलदेवस्यापि पृथक् कांता गोप्य आनंदवृंदावने द्रष्टा मूलेऽप्युपरिष्टाद्व्यक्तीभविष्यति । अत्रातिशब्देन जलकेल्यादीनां किंचित्प्रियतापेक्षया ज्ञेय इति चक्रवर्त्तीतोषिण्यौ ॥ २ ॥ स च ग्रीष्मः । यत्र वृंदावने ॥ ३ ॥ पाठान्तरे मंडपैर्जनस्थितियोग्यस्थलैः 'मंडपोऽस्त्री जनाश्रयः' इत्यमरः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ प्रातः ज्ञातिभिरिति तदापि तद्भावमाधुर्य्यापरित्यागो दर्शितः परितो वृतः स्नेहातिरेकेण सर्वत आवरणतया वेष्टितोऽनुगीयमानश्च गोकुलमण्डितमिति प्राक् गवां प्रवेशात् क्रियाविशेषणं वा प्रातरेव गोप्रवेशनन्तदुपद्रवस्फोरकत्वेन दवदग्धत्वेन च तत्प्रदेशं त्यक्त्वा क्रोशमात्रस्थितस्य व्रजस्य परतश्चारणेच्छयेति ज्ञेयं तादृशकुसमयगततद्यात्रा रिवर्त्तनेच्छयेति वा विशेषतस्तु कारणं मनुष्या इव पशवोऽपि तं व्रजं प्रविशन्तं त्यक्तुं नाशक्नुवन्निति ॥ १ ॥ गोपालनं छद्मति या माया तस्य छद्मतावादिनां वञ्चनं तया क्रीडतोः तान् वञ्चयित्वा विहरतोरित्यर्थः । यद्वा गोपालनमपि छद्मक्रीडान्तराभिप्रायशालि यत्र तादृशी या माया जनवञ्चनं तया क्रीडतोर्विचित्रक्रीडाविशेषानपि कुर्वतोः नामप्रकाश्ये ग्रीष्म इति ग्रीष्मान्तरअभवदित्यर्थः । नातिप्रेया-

---

१. ज्ञाति–श्रीधर. वशी. वीर. विज. । २. मायया–श्रीधर. वंशी. विश्व. शुक. ; रूपिणोः–विज. । ३. शरीरिणः–विज. । ४. च्छीकरैर्जुष्टं–वीर. ; च्छीकरैर्जुष्टं द्रुमपिप्पल–विज. ।

नित्यतिशब्दो जलकेल्यादीनां किञ्चित् प्रियतापेक्षया ॥ २ ॥ सच सोपि तद्गुणानां नित्यवसन्तसान्निध्यकरत्वं कियद्वा माहात्म्य-
मित्यभिप्रेत्याह–यत्रेति । "यस्मात् त्वयैष दुष्टात्मा हतः केशी जनार्दन ! तस्मात्केशवनामा त्वं लोके गेयोभविष्यसि" इति
श्रीविष्णुपुराणोक्तरीत्या केशवोऽत्र श्रीकृष्ण एव अत एव भगवान् परिपूर्णसर्वभगः आस्ते नित्यमेव विहरति वर्त्तमानप्रयोगस्तु
श्रीशुकस्य स्वस्फूर्त्यनुसारेण ॥ ३ ॥ यत्रेति पञ्चकं तद्वनमाविशदिति पञ्चमेनान्वयात् तथापि पृथगङ्कयिष्यते वैशद्याय यत्र
वृन्दावने सामान्येन सर्वमेव स्थानं निझरेत्यादिलक्षणं शश्वदित्यादिलक्षणं च यद्वा निर्झरनिर्ह्रादेन वर्षाभ्रमजनकेन निवृत्तस्वना
ये झिल्लयः तैः कं सुख दुःखाभाव इति यावत् तादृशद्रुममण्डलैर्मण्डनं च यत्र भवति भावे निष्ठा अत्र टीकायां तेषामिति षष्ठी-
निर्देशान्मण्डलैरित्येव बुद्ध्यते मण्डपैरिति पाठे तु कथञ्चिदेव सा योज्या ॥ ४ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ तद्रात्र्यनन्तरं प्रातर्गोचारणक्रमेणापराह्ण वा, अन्यथा गोभिः सह तेषां सर्वेषां व्रजागमनासम्भवः, ततश्च श्रीयशोदा-
दिभिरादौ त्वरया गृहं गत्वाऽन्नादिकं प्रेषितमिति ज्ञेयम्, परितो वृतः स्नेहातिरेकेण सर्वत आवरणतया वेष्टितोऽनुगीयमानश्च,
गोकुलमण्डितमिति प्राक् गवां प्रवेशात्, क्रियाविशेषणं वा ॥ १ ॥ गोपालने गोपालेषु वा छद्म पुरा निजैश्वर्य्याच्छादनेन यत्
कारट्यं तस्य माया सम्प्रति साक्षादात्मैश्वर्य्यप्रकटनेन मिथ्यात्वम्, तया निजभगवत्ताप्रकटनेनेत्यर्थः, यद्वा, गोपालच्छद्मना गोपालन-
व्याजेन या माया स्वीयेषु कृपा तया, विशेषेण क्रीडतोः सतोः, शुचिवनोद्भूत इत्यादिना ग्रीष्मर्त्तोः पूर्वमुद्दिष्टेऽप्युद्भवेऽधुना
सोऽभवदिति विस्तरतस्तस्य वर्णनार्थमनुवादो ज्ञेयः, नाम प्राकाश्ये, किं वा नाम्नैव ग्रीष्मः, न तु गुणादिनेत्यर्थः । तच्चाग्रेव्यक्तं
भावि । नातिप्रेयान्–अनतिप्रियोऽपि तापमयत्वात्, अति-शब्दो जलकेलिस्वच्छन्दवासादिना किञ्चित् प्रियतापेक्षया, तत्र बहुलग्रीष्म-
वर्षादिष्वपि तेष्वधुना विशेषत एतद्वर्णनमेषु क्रीडाविशेषाभिप्रायेण ॥ २ ॥ च अपि, सोऽपि, कश्च अश्च ईशश्च केशाः, ब्रह्मा विष्णु-
रुद्राः, तान् वयते स्वत आविर्भावयतीति, केशौ ब्रह्मरुद्रौ वा सेवकतया यस्य स्तः, स केशवः श्रीकृष्णः, अतएव भगवान् निजा-
शेषैश्वर्य्यप्रकटनपर इत्यर्थः, यद्वा, (वि० पु० ५।१६।२३) 'यस्मात् त्वयैष दुष्टात्मा हतः केशी जनार्द्दनः । तस्मात् केशवनामा
त्वं लोके गेयो भविष्यसि ।' इति श्रीविष्णु-पुराणोक्तनिरुक्त्या केशिसूदनः श्रीकृष्ण एव, अत एव भगवान् श्रीवृन्दावनाविष्कृत-मधु-
रैश्वर्य्यः । तत्र च साक्षात् प्रकट एव स्वयं यत्र वृन्दावने आस्ते, तथापि बहुधा तं रमयतीति रामस्तेन सहेति साहाय्यसम्पत्त्या
विचित्रक्रीडापरताभिप्रेता ॥ ३ ॥ एवं वृन्दावनगुणेषु हेतुरुक्तः । किंवा यत्र येभ्यो हेतुभ्यः, यत्रेति तैर्व्याख्यातम्, यद्वा, यत्र वृन्दावने
सामान्येन सर्वमेव स्थानं तादृशं भवति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

शीकरैः जुष्टं द्रुमपिप्पलमण्डितं शीकरजुष्टद्रुमावृतपिप्पलद्रुममण्डितं पिप्पलमश्वत्थः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ बलदेवकृतं श्रीकृष्णकारितं प्रलम्बासुरवधात्मकं कर्माऽनुवर्णयत्यष्टादशेन तावत्तदुपोद्घातत्वेन काञ्चित्पौगण्डक्रीडा-
स्तदुपयुक्तं वनं कालञ्चानुवर्णयितुं तावद्वृत्तेन सङ्गमयितुं वृत्तशेषमाह—अथेति । अथ तद्रात्रिव्यतिक्रमानन्तरं मुदिता आत्मानो
मनांसि येषां तैर्ज्ञातिभिर्गोपैरुपगीयमानो भगवान् गवां समूहेन मण्डितं ब्रजं प्राविशत् ॥ १ ॥ गोपालच्छद्मगोपाल इति व्याजो
यतस्तया मायया आत्मसङ्कल्पेन इत्थं ब्रजे सम्यक् क्रीडतोः सतोः रामकृष्णयोरिति शेषः ग्रीष्माख्यः ऋतुः प्रवृत्तः अनेनोक्ताः क्रीडाः
वासन्तिका इति सूचितम् ॥ २ ॥ स च यद्यपि शरीरिणां नातीव सुखकरः तथापि वृन्दावनस्य गुणैर्वसन्ततुल्यो बभूव, के ते
गुणाः ? यैर्वसन्त इव लक्षितः ऋतुधर्ममतिक्रम्यापि कुतस्तस्य ते गुणाः इत्यत्राह—यत्रेति । यत्र साक्षाद्भगवान् केशवः रामेण
सहाऽऽस्ते भगवदावासप्रभावेन गुणव्यत्यय इति भावः । वृन्दावने भगवानवसत्तस्य गुणैरित्यन्वयः ॥ ३ ॥ ग्रीष्मस्य वसन्ततुल्यतां
स्थापयितुं वृन्दावनगुणाननुवर्णयति— यत्रेति । यत्र शब्दानां वृन्दावनसहचरिते ग्रीष्मर्त्तावित्यर्थः । निर्झराणां घोषेण निवृत्तस्वनाः
छत्रध्वनयः झिल्लिकाः कठोरध्वनयः सूक्ष्मकीटविशेषः यस्मिस्तथाभूतं वृन्दावनमभवदित्यर्थः । किञ्च, शश्वत् सदा तेषां निर्झराणां
शीकरैरम्बुकणैः जुष्टाः स्निग्धाः ये द्रूमास्तेषां मण्डलैर्मण्डितम् ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हरेर्भूभारहरणस्य यदन्तरङ्गं कर्त्तुमवतीर्णं शेषेण तद्वक्तुमुपक्रमते–ब्रज इत्यादिना । गोपालच्छद्मरूपिणोः गोपालाविति
कपटशब्दिनोः "रूपं शब्दे पशौ ग्रन्थे शोके वृत्तौ हितादिषु । सौन्दर्ये च स्वभावे च" इति यादवः । नातिप्रेयान्नातिप्रियतरः धर्म-
हेतुत्वात् ॥ २–३ ॥ वसन्ततुल्यत्वे निमित्तमाह—यत्रेति । यत्र वृन्दावने निर्झरस्य निह्लादेन शब्देन निवृत्तस्वनाः प्रतिष्टब्धस्वराः
झिल्लिकाः कीटविशेषाः यस्मिन् तत्तथा तस्य निर्झरस्य शीकरैः वायुशीर्णवारिबिन्दुभिः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ प्रातर्गोकुलेन गोसमूहेन मण्डितं यथा स्यात् ॥ १ ॥ तद्दिने तत्प्रदेशस्य दाहात् व्रजात् परतश्चारणार्थं गोपालनं छद्मेति या माया तस्य छद्मतावादीनां वञ्चनं तया क्रीडतोः तान् वञ्चयित्वा विहरतोरित्यर्थः । तद्गुणानां नित्यवसन्तसान्निध्यकर-माहात्म्यमित्यभिप्रेत्याह—यत्रास्त इति । नित्यमेव विहरति ॥ २-३ ॥ यत्र वृन्दावने तद्वनमविशदिति पञ्चभिरन्वयः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ग्रीष्मर्तु वर्णनं केलौ कृष्णः श्रीदामवाडभूत् । रामः प्रलम्बमारुह्याऽहन्नित्यष्टादशे कथा ॥

अथ प्रातः ॥१॥ गोपालनं छद्मवनगमनाय मिषं यस्यां तथाभूता या माया प्रच्छन्नकामतामयीजनवञ्चना तया विक्रीडतो-र्व्रजबालाभिः सह विहरतोरिति बलदेवस्यापि पृथक्कान्ता गोप्य आनन्दवृन्दावने दृष्टाः मूलेऽप्युपरिष्टाद्व्यक्तीभविष्यन्ति ॥ २-३ ॥ वसन्तसाम्यमाह चतुर्भिः । यत्र बृन्दावने ग्रीष्मेपि निर्झराणां निर्ह्लादेन घोषेण निवृत्तस्वना आच्छन्नध्वनयो झिल्लिकाः कठोर-भाषिसूक्ष्मकीटा यस्मिन् तथाभूतं स्थलं भवतीति शेषः । शश्वत्तेषां शीकरैरम्बुकणैः ऋजीषाः स्निग्धा ये द्रुमास्तेषां मण्डलै-र्मण्डितम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथाष्टादशेऽध्याये वृन्दावनयोगात् ग्रीष्मस्य वसन्तसाम्यं द्वन्द्वविहारपूर्वकप्रलम्बवधादिकं च निरूप्यते—अर्थेति ॥ १ ॥ गोपालशब्देनात्र गोपालनं गृह्यते गोपालनं छद्म व्याजो यस्यां सङ्कल्पात्मिकायां मायायां तया ॥ २ ॥ ननु, वृन्दावने एवंभूताः गुणाः कुतोऽत आह—यत्र भगवानास्ते इति । ननु, स अन्यत्रापि प्रादुर्भवति अत्राह—साक्षादिति स्वयमित्यर्थः । अस्मिन् महापुराणे साक्षादित्याद्यभ्यासः श्रीकृष्ण एव परन्तत्त्वं ततः परतरं नेति द्योतयति "मत्तः परतरं नान्यत्" इति स्मृतेः "श्रीकृष्ण एव परो देवस्तं ध्यायेत्" इति श्रुतेश्च साक्षाद्भगवत्त्वं स्पष्टयति - केश इति । कश्च ईशश्च केशौ तौ वशयते स तथा ॥ ३ ॥ ग्रीष्मस्य वसन्त-साम्यापादकान् श्रीवृन्दावनगुणानाह—यत्रेत्यादिना । यत्र ग्रीष्मेऽपि निर्झरनिर्ह्रादैः निवृत्तस्वनाश्छन्नध्वनयो झिल्लिकाः कठोर-ध्वनयः सूक्ष्मकीटाः यस्मिन् वने तत् श्रीकृष्णोऽविशदिति पञ्चमेनान्वयः । कथम्भूतम् ? शश्वत्तेषां निर्झराणां शीकरैरम्बुकणैः ऋजीषाणां स्निग्धानां द्रुमाणां मण्डलैर्मण्डितम् ॥ ४ ।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अष्टादशेऽवहत् कृष्णः श्रीदामानं जितः प्रभुः । बलः प्रलम्बमारुह्य मुष्टिना तममारयत् ॥

अथ प्रभाते मति गोकुलमण्डितमिति प्रागगवां प्रवेशात् प्रातरेव गोप्रवेशनं कुसमययात्रापरिवर्तनेच्छयेति ज्ञेयम् ॥ १ ॥ गोपालनमपि छद्म क्रीडान्तराभिप्रायशालि यस्यां तया मायया प्रच्छन्नकामुकतया वने विक्रीडतो व्रजकिशोरीभिः सह विहरतोरिति बलदेवस्यापि कान्ताः सन्तीति वासन्तिकरासे व्यक्तीभाविनातिप्रेयानिति जलकेल्यादिना किञ्चित् प्रियात्वादति शब्दः ॥ २ ॥ स च सोऽपि तद्गुणानां नित्यवसन्तसान्निध्यकरत्वं कियद्वा माहात्म्यमिति भावेनाह यत्रेति ॥ ३ ॥ वसन्तसाम्यमाह—यत्रेति चतुर्भिः । यत्र वृन्दावने गिरिनिर्झराणां निर्ह्लादेन शब्देन निवृत्तस्वनाः वर्षाभ्रमेण तूष्णीम्भूतझिल्लिकाः यत्र तादृशं स्थूलं भवतीति शेषः । कठोरभाषिसूक्ष्मकीटा झिल्यः कथ्यन्ते वृन्दावने खलु गिरिजादान्येऽपि हरिक्रीडाहेतवो लघुवृहद्वपुषो रत्नगिरयः सन्तीति बोध्यम् । शश्वत् सदा तेषां निर्झराणां शीकरैरम्बुकणैः ऋजीषाणां स्निग्धानां द्रुमाणां मण्डलैर्मण्डितम् ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ रूपमाकारस्तद्वतोः । रूपं स्वभावे सौन्दर्ये चालोके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारश्लोक-योरपीति विश्वः । नातिप्रेयांस्तापोपपातात् ॥ १ ॥ स चेतरत्र तेषां तादृशोऽपि वृन्दावनगुणैर्वसन्त इव लक्षितः । अमुख्यं भूगुणं तद्धेतुमभिधाय मुख्यं हेतुमाह । यत्रास्त इति ॥ २ ॥ वसन्तं कृष्णं सेवितुं । वसन्तं चकारेव तदभिमानी देव इति तत्साम्राज्यं वक्ति । यत्रेति । निर्झराणां झराणां निर्ह्लादो ध्वनिस्तेन निवृत्त आच्छादित इति यावत्स्वनो यासां ताः झल्लिकाश्चीर्यः । भृङ्गारी चीरुका चीरी झल्लिका च समा इमा इत्यमरः । तच्छकिरैः सरिन्नीरबिन्दुभिर्जुष्टं सेवितं द्रुमैरितरैः पिप्पलैरपि मण्डितं द्रूणां मा येभ्यस्तैः पिप्पलैरिति वा मा च शोभा ॥ ३ ॥ सरिच्च नदी सरो देवखातः प्रस्रवणं निर्झर एतेषामूर्मयस्तरङ्गास्तद्वायुना कल्हाराणि सौगन्धिकानि कञ्जानि कमलान्युत्पलानि रक्तानि नीलानि च तेषां रेणवः परागास्तान्हरति तच्छील इति हारी तेन निदाघवह्न्यर्कभवो निदाघसम्बन्धिनौ वन्ह्यर्कौ ताभ्यां भवतीति भवो दवो वनहुताशनो वनौकसां यत्र न विद्यते तत्रेदमपि किञ्चित्कपिवद्रामस्य दावतापापनोदे सहकारीतीरयति । अतिशाद्वल इति । नडशादाद्वलजिति वलच् । शाद्वलं स्यादहरितो-रित्यमरः । अतिशायितं शाद्वलं यस्मिस्तस्मिन् ॥ ४ ॥

श्रीसुबोधिनी

उक्तः पञ्चदशेध्याये प्रलम्बस्य वधो महान् । आवेशिचरितं वाच्यं बलभद्रकृतं ततः ॥ १ ॥
व्रजे गतस्य क्रीडा च सर्वथा वनगोष्ठयोः । अन्तःकरणदोषश्च महानत्र निवर्त्यते ॥ २ ॥

एवं पूर्वाध्यायान्ते दावाग्नेर्मोचिता इत्युक्तं, ततः स्वस्थाने कृत्यमहार्थेति भिन्नप्रक्रमेण, प्रातःकाले जाते सर्वैः सह भगवान् क्रीडार्थमेवाविर्भूतः सर्वैरेव **बन्धुभिश्च** वेष्टितः सन्तुष्टैस्तैरेवोप**गीयमानश्च गोकुलेन मण्डितं व्रजमाविशत्**, तस्मिन् दिवसे गावोपि गोकुल एव समानीता न तु कश्चिच् चारणार्थं गतः, एतेन पूर्वं गाः स्वस्थानस्थिताः कारयित्वा पश्चात् स्वय प्रविष्ट इति ज्ञायते, एवमेकेन **प्रत्यापत्ति**रुक्ता, अन्यथा दोषाभावे दोषाणां नियतधर्मत्वाद् धर्म्यपि गच्छेत् ॥ १ ॥ अयं सर्वोपि दोषः कालकृत इति ज्ञापयितुं ग्रीष्मोपद्रवं वर्णयति भूमिगुणेन च स्वसान्निध्यकृतेन तद्दोषपरिहार इति कालकृतोन्तः करणदोषः स्वसन्निधिसहितपदार्थैस्तन्निवृत्तिर्भविष्यतीति सूचयति **व्रजे विक्रीडितोरेव**मिति, **व्रजे** गोपगवादीनां निवेशस्थाने प्रसिद्धेपि **क्रीडतोः** सतोः **ग्रीष्मो नामर्तु रभवदिति**सम्बन्धः, ननु भगवति विद्यमाने कथमनभिप्रेतो ग्रीष्मस्तत्रागत इत्यत आह **गोपाले**ति, गोपाल इतिच्छद्म कपटभूतं **रूपं** ययोः, अन्यतरज्ञानेपि नागच्छेदितिद्विवचनं, **छद्मरूप**मनयोर्वर्तत इति**च्छद्मरूपिणौ**, भगवतो गुप्तत्वाद् ग्रीष्मप्रवृत्तिः, ग्रीष्मस्य दुष्टत्वमाह **नातिप्रेयाञ् छरीरिणामिति**, शरीरमात्रपरिग्रहवतां **नातिप्रेयान्** केषांचिच् छातभीतानां प्रिय इत्यतिरदम् ॥ २ ॥ तर्हि तन्निवृत्त्यर्थं भगवानाविर्भावं कुर्यादित्याशङ्क्य तस्य दोषस्यान्यथैव निवृत्तिमाह **स चे**ति, चकारादन्येपि दोषा बातादयो **वृन्दावनस्य ये गुणा** वक्ष्यमाणास्तैः कृत्वा **वसन्त इव** तत्रत्यै**र्लक्षितो** ज्ञातः, **वसन्ते शीतोष्णयोः समता, मीनादिषु शीताधिक्यं ग्रीष्मादिषु तापाधिक्यं च, सरसो देश शीतजनकः सवातश्च,** तदुष्णकाले शीतजनको देशः समतामापादयति, अतो **स्वाभाविका एव** वृन्दावनगुणा आधिभौतिकवसन्तत्वं सम्पादयन्ति रामसहिता आध्यात्मिकवसन्तत्वं भगवत्सहिता आधिदैविकवसन्तत्वमिति, अतः सर्वथैव वसन्तत्वं वृत्तं, तदाह **वृन्दावनगुणैर्वसन्त इव लक्षित** इति, देशापेक्षया कालस्य प्रबलत्वादिवेत्युक्तं, अन्यथा पृथग् ग्रीष्मप्रवृत्तिर्वक्तव्या स्यात् कालबाधो वा तदा ग्रीष्मर्तुगुणा न भवेयुर्यवादयश्च, **यत्र** वृन्दावने ग्रीष्मर्तौ वा **साक्षाद् भगवानास्ते**, षड्गुणान् प्रकटीकुर्वन्, ईश्वरस्थितावेव सर्वकालीना गुणा लोके भवन्ति, वीर्ये सत्यन्यदीया अन्यस्य सम्भवत्तीसि स्पष्टं, यशसि सर्वेषामागमनात् तथा श्रियां च, ज्ञाने सर्वात्मकतायां सर्वं स्पष्टं, वैराग्ये च निरपेक्षत्वात् तुल्यता, यत्र साक्षादेव सर्वैर्गुणैः सह **भगवांस्तत्र** कः सन्देहः ? **केशव** इति ग्रीष्माधिपतेर्महादेवस्य ग्रीष्मवरदातुर्ब्रह्मणश्च भगवानुपजीव्य इति तयोः पक्षपातः परिहृतः ॥ ३ ॥

वृन्दावनगुणानाह **यत्रे**ति **त्रिभिः** ।

राजसः सात्विकश्चैव तामसश्चापि कीर्त्यते ॥

तत्र राजसगुणानाह, **यत्र** वृन्दावने **निर्भरनिह्लादैर्झरणा**शब्दै**र्निवृत्तस्वना ग**तशब्दा **झिल्लिका** यत्र तादृशवनं **शश्वत्** सर्वदा **तच्छीकरैर्झरणाकणै**ऋ**जीषयुक्ता** ये द्रुमास्तेषां **मण्डलैर्मण्डितं च** ग्रीष्मर्तौ सर्वे वृक्षा ऋजीषप्राया भवन्ति, ऋजीषं त्वङ्मात्रं निःसारं, **शश्वत् तच्छीकरैः** सहितमृजीषं तद्युक्ता **द्रुमा** भवन्ति तेषां **मण्डलानि** च भवन्ति, सजातीयविजातीयप्रचययुक्तानि **मण्डलानि, तैर्मण्डितं**, अनिष्टशब्दस्य सुशब्दो बाधको रसहारकस्य रसदायक इति ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

प्रकरणसन्दर्भे, अन्तःकरणदोषश्चेति । तिष्ठतु स्नेहवार्ता दूरे, लोके लौकिकानामपि क्रीडादिष्वप्यारोहणादेर्निमित्ते जातेपि प्रभुपुत्रादौ न तत् कर्तुमन्तःकरणप्रवृत्तिः सम्भवति । इह तु स्नेहवतामप्यनेवंभाव उच्यत इत्यवश्यमन्तःकरणे तादृशो हेतुरस्तीति मन्तव्यम् । प्रलम्बे हते भगवत्यलौकिकत्वबुद्धिः पूर्वस्मात् स्नेहातिशयश्च जातो येन आशीर्दानं विह्वलचेतस्त्वं चाभूदतः सुष्ठूक्त**मन्तःकरणे**त्यादि ॥ १–४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

पञ्चदशाध्यायतात्पर्यं निरूपयन्तोवसरः प्रसङ्गो वा कथासङ्गतिरित्याशयेनाहुरुक्त इत्यादि, ननु चरित्रान्तरेषु सत्स्वपि तस्यैव कथने किं बीजमित्यत आहुर्महानिति, तथा च महत्त्वाद् कथनमित्यर्थः, ननु राज्ञा तु "व्रजे वसन् किमकरो"दिति भगवच्चरित्रमेव पृष्टं तत्र बलभद्रचरित्रकथने किं बीजमत आहुरावेशीत्यादि, तथा चाविष्टचरित्रमपि मूलचरित्रमेवेति तस्यापि वक्तव्यत्वादिदमुक्तमित्यर्थः, ननु यद्याविष्टचरित्रमेवात्र वाच्यं महत्त्वात् तदा व्रजे प्रत्यापत्तिकथनस्य किं प्रयोजनमत आहुर्व्रजेत्यादि, तथा च कथाशेषपूरणार्थं तत्कथनमित्यर्थः, तथा च प्रसङ्गोवसरश्च कथासङ्गतिरित्यर्थो, ननु भवत्वेवं तथापि स्कन्धप्रकरणार्थाभ्यां कथमस्य सङ्गतिरित्यत आहुरन्तःकरणेत्यादि, अन्तःकरणदोषश्च श्रीहस्ताक्षरेषु विवृतस्तथा ह्यन्तःकरणदोषश्चेति तिष्ठतु स्नेहवार्ता दूरे लोके लौकिकानामपि क्रीडादिष्वप्यारोहणादेर्निमित्ते जातेपि प्रभुपुत्रादौ न तत् कर्तुमन्तःकरणप्रवृत्तिः सम्भवतीह तु स्नेहवतामप्यनेवम्भाव

उच्यत इत्यवश्यमन्तःकरणे तादृशो हेतुरस्तीति मन्तव्यं, प्रलम्बे हते भगवत्यलौकिकत्वबुद्धिः पूर्वस्मात् स्नेहातिशयश्च जातो येनाशीर्दानं विह्वलचेतस्त्वं चाभूदतः सुष्ठूक्तमन्तःकरणेत्यादि, इदमेवात्र महत्त्वं, अत्रेत्येतदध्यायोक्तलीलामात्रे, इदं ‘चैवं तौ लोकसिद्धे"तिश्लोके स्पष्टीभविष्यति । अथेत्यत्र भक्तानां मुदितात्मत्वं भगवन्मोदोत्तरकालीनमेवेति तदभिप्रायेण सन्तुष्ट इत्युक्तं, प्रत्यापत्यकथने वाधकमाहुरन्यथेत्यादि, व्रजगमनानुक्तौ दोषाणां क्षुधादीनां नियतप्राणधर्मत्वात् तेषामभावे जाते सति धर्मिभूतं शरीरमपि गच्छेदतस्तदभावाय प्रत्यापत्तिकथनमावश्यकमित्यर्थः ॥ १ ॥ व्रज इत्यस्याभासेयमिति पूर्वाध्यायद्वयोक्तः, भूमिगुणेन चेति चकारो वक्ष्यमाणेनेतिशब्देन योज्यस्तथा चेति च वर्णयतीत्यर्थः **सम्पद्यते**, तदुभयवर्णनव्यञ्जितमर्थमाहुः कालेत्यादि, तेनेत्येतावदुन्नेयं, अप्रसिद्ध इति लोकेषु भगवत्क्रीडास्थानत्वेनाप्रसिद्धे, अपेर्भगवत्स्वरूपज्ञानेयं हेतुरित्यर्थः, नन्वित्यादि ननु स्थानेनाज्ञानेपि तेजसा ज्ञानं भवेदेवेति कथं तत्प्रवृत्तिरित्यर्थः ॥२॥ स चेत्यत्र तदुष्णकाल इत्यत्र तदिति भिन्नं पदं तस्मादित्यर्थकं प्रबलत्वादिति व्यापकत्वेन प्रबलत्वात्, यस्य वृन्दावन एव तथात्व उपपत्तिमाहुरन्यथेत्यादि, तत्र तथात्वं न स्यात् तदा तथेत्यर्थः, ननु बाधे को दोष इत्यत आहुस्तदा ग्रीष्मर्तुगुणा न भवेयुरिति, तथा सत्यग्रे वर्षावैयर्थ्यं तद्रसाभावश्चेतिभावः, कैमुतिकं प्रदर्शयन्तीश्वरस्थितावित्यादि सन्देह इत्यन्तम् ॥ ३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

पञ्चदशेध्याये कारिकादौ **उक्त** इति अन्तःकरणदोषनिवृत्तिर्भगवदाविष्टेन भगवदीयेन भवतीति ज्ञापयितुमत्रावेशिचरितं **वाच्यं, ततो** हेतोर्**बलभद्रकृतः प्रलम्बस्य वधः** पञ्चदशेध्याये शुकेनोक्त इत्यर्थः, सर्वथेति सर्वप्रकारेण व्रजे गतस्येत्यर्थः । यावन्तो वनस्थितास्तैः सर्वैः सहेतियावत्, दोषाणां नियतधर्मत्वात् तन्निवृत्तौ केषाञ्चिद् धर्मिणामपि निवृत्तिमाशङ्क्यैतदुक्तं वनगोष्ठयोरिति, तदनन्तरमिति शेषः गोष्ठलीला द्वितीयाध्यायान्ते "गाः सन्निवर्त्ये"त्यनेन (१०–१६–१५) उक्तेतिज्ञेयं, द्वयमप्येकदिनकृत्यमिति सहैवोक्तम् । **अथ कृष्ण** इत्यत्र **अन्यथेति** प्रत्यापत्तिकथनाभावे **दोषाणाम**ध्यासानां **नियतधर्मत्वान्** नित्यसहचरितधर्मत्वाद् **धर्मी** इन्द्रियप्राणादिरपि **गच्छेत्**, सम्भावनायां लिङ्, श्रोतुरितिशङ्का स्यादित्यर्थः, प्रत्यापत्तिकथने तु निर्दुष्टेन्द्रियप्राणादियुक्ता एते इति ज्ञानं भवेत्, लीलासाधकोध्यासस्तु न दोषरूप इति भावः ॥ १ ॥ **व्रजे विक्रीडतो**रित्यस्याभासे पूर्वलीलापि निदाधकालीनेत्यधुना ग्रीष्मप्रवृत्तिः कथमुच्यत इत्याशङ्क्य वर्षान्तरसम्बन्धिग्रीष्मः किञ्चिद्ज्ञापनार्थमुच्यत इत्याहुः **अयं सर्वोपी**ति, स्कन्धारोहणादनिमित्तभूतो वक्ष्यमाणस्तादृशः पूर्वोक्तश्चावतारकालकृत इति ज्ञापयितुं ग्रीष्मोपद्रवस्यावतारकालिकत्वात् तद्वर्णनमित्यर्थः, अवतीर्णो हि भगवाँल्लीलासिद्ध्यै प्राकृतं भावं स्थापयित्वा क्रमेण तं निवर्तयतीति निरूपणात्, तथा च भगवदिच्छयैव मानुषभावस्वीकारात् स्थितोयं **दोष** इति भावः, एतेनैवंविधस्यैवतारलीलेति ज्ञेयमिति सूचितं, **स्वसन्निधी**ति शुकज्ञापितो **दोष** एवं **सूचयती**त्यन्वयः, इति सूचनार्थं **कालकृत**त्वं ज्ञापितमितियावत्, भगवत्स्थापि दोषो भगवत्सन्निहितैरेव बलतुल्यैर्गच्छतीति बलेन प्रलम्बमारणमिति भावः ॥ २ ॥ **स** चेत्यस्याभासे **आविर्भाव**मिति मानुषभावाच्छादनं त्यक्त्वा बहिराविर्भावमित्यर्थः, तत्स्वीकारादेव ग्रीष्मप्रवृत्तेः व्याख्याने, **मीनादि**ष्वति मीनादिषु राशिपञ्चकेषु न तु मीने इत्यर्थः, **ग्रीष्मादि**ष्विति ग्रीष्मो वृषस्तदादिपञ्चसु तापाधिक्यं मीनमेषयोस्तु समत्वमित्यर्थः, **वृन्दावनगुणा** इति सरसदेशसरित्सरःप्रभृतय इत्यर्थः, **आधिभौति**केत्यादि भौतिकस्य शरीरस्य तापाजनकत्वरूपमाद्यं, ग्रीष्मे छायाद्यर्थं क्रीडास्थाने प्रतिबन्धकाऽऽगमनशङ्कया योन्तःकरणे सम्भावितस्तापस्तदजनकत्वरूपं द्वितीयं प्रतिबन्धकनिरासके रामे विद्यमाने स तापो न भवतीत्यर्थः, विरहतापाजनकत्वरूपं तृतीयं, ग्रीष्मे दिनानां महत्त्वाद् विशेषतः स सम्भाव्येत, भगवति विद्यमाने स न भवतीत्यर्थः, यवादय इति भवेयुरित्यर्थः, पूर्वोक्ता न भवेयुः एते च भवेयुरिति, साक्षादिति न तु प्रियव्रतादिष्विव धर्मद्वारेत्यर्थः ॥ ३ ॥ **यत्रे**त्यत्र अनिष्टेति झिल्लिकशब्दस्येत्यर्थः, सुशब्दो निर्झरशब्द इत्यर्थः, उभयोस्तथात्वे हेतुः **रसे**ति, जलरूपो रसः सर्वतो झिल्लिके गच्छति, अतो रसहारकस्य झिल्लिकस्य जलरूपरसदायको निर्झरः, अतस्तौ शब्दौ तत्तत्सम्बन्धात् तथेत्यर्थः ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

पञ्चदशाध्यायार्थोक्तौ **अन्तःकरणदोषश्च महानत्र निवर्त्यते** इति अस्मिन् अध्याये प्रलम्बनाशो वर्णनीयः, स प्रलम्बो निरोध्यभक्तानामन्तःकरणदोषरूपः "लोभक्रोधादयो दैत्या" इति कृष्णोपनिषद्भ्यः, कृष्णावतारे नाश्यानां दैत्यानां दोषरूपत्वोक्तेः **प्रत्यापत्तिरुक्ते**ति दवाग्निपानानन्तरं "अथ कृष्णः परिवृतो ज्ञातिभि र्मुदितात्मभि"रित्यनेन भगवता सह सर्वेषां व्रजे समागमनमुक्तमित्यर्थः । तस्य प्रयोजनमाहुः **अन्यथे**त्यादिना, कालीयदमनदावाग्निपानाभ्यामिन्द्रियप्राणदोषनिराकृतिरुक्तेति तेषां **दोषाणामभावे** दोषयुक्तानां भक्तानामप्यभावः स्यात्, इन्द्रियप्राण**दोषाणां नियतधर्मरूपत्वात्**, नियतधर्मास्तु धर्मिणं विहाय न तिष्ठन्तीति धर्मनाशे धर्मिनाशोपि सम्भाव्येत ततश्च गोकुलस्थानामिन्द्रियप्राणदोषनिराकृतौ कस्यचिद् धर्मिणो गोकुलवासिनोपि निवृत्तिर्जातेत्याशङ्का स्यात् तच्छङ्कानिवृत्त्यर्थं गोकुलवासिन सर्वेपि श्रीकृष्णेन सह व्रजं समागता इत्युक्तं शुकेनेति भावः ॥ १ । **वसन्त इव लक्षित** इत्यस्य विवृतौ **ईश्वरस्थितावेव सर्वे**ति श्रीकृष्णस्य ईश्वरत्वात् तत्स्थितौ ग्रीष्मेपि वसन्तगुणा आयाताः, **वीर्ये सत्यन्य-**

दीया इत्यादि वीर्यवान् हि अन्यस्य वस्त्वपहृत्यान्यस्मै प्रयच्छति, प्रकृतेपि वसन्तगुणा ग्रीष्माय दत्ता वीर्यवता प्रभुणेति ग्रीष्मो
वसन्ततुल्यो जात इत्यर्थः, **यशसी**ति यत्र यशस्तत्र, यशस्विनि सर्वे गुणा आयान्तीति यशस्विनि श्रीकृष्णे विराजमाने ग्रीष्मर्तावपि
वसन्तगुणाना**मागमनं** युक्तमेव, **श्रियां चे**ति यत्र श्रीस्तत्र सर्वे उत्तमा आयान्तीति साक्षाच्छ्रीमति कृष्णे वसन्तगुणा आगच्छेयुरेव,
ज्ञाने सर्वात्मकतायामिति "स सर्वमभव"इतिश्रुत्या ज्ञाने सर्वात्मकता निरूपिता, प्रकृते ज्ञानवान् श्रीकृष्णः सर्वात्मकतयाविर्भूत
इति ग्रीष्मस्यापि वसन्तत्वं, **वैराग्ये चे**ति यो विरागी स उष्णमपि शीतं मनुते, प्रकृते वैराग्यवान् कृष्णो ग्रीष्ममपि वसन्तमेव
मनुते, यतो विरक्तस्य सर्वत्र तौल्यं, अतो श्रीकृष्णेन यदा ग्रीष्मो वसन्तत्वेन मतस्तदा वसन्तरूपेणैवाविर्भूतः, श्रीकृष्णस्य सत्य-
सङ्कल्पत्वात्, एवं **यत्रास्ते भगवान् साक्षा**दित्यत्रोक्तस्य भगवत्पदस्य सर्वेर्था निरूपिता इति ज्ञेयम् ॥ ३ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

पञ्चदशाध्याये उक्त इत्यादि का०१५०$\frac{३}{४}$, १५१$\frac{३}{४}$। **अशांशिनोरभेदादावेशिचरितमपि** मूलचरितमेवेति तदपि **वाच्यं**
वक्तुं योग्यं, अतो **बलभद्रकृतः** प्रलम्बबधोत्राध्याये उक्त इत्यर्थः, **व्रजे गतस्ये**त्यादि, **सर्व**थेत्स्य व्रजे गतस्येति पूर्वेणान्वयः, यावन्तो
वनक्रीडायां स्थितास्तैः सर्वैः सह न तु कमपि वने स्थापयित्वा व्रजं गत इत्यर्थः, तदनन्तर वनगोष्ठयोर्लीला, वनलीलात्रैवाध्याये,
पुनर्गोष्ठलीला तु षोडशाध्यायान्ते "गाः सन्निवर्त्य"त्यनेनोक्तेति ज्ञेयं, द्वयमेकदिनवृत्यमिति हेतोः कारिकायां सहैवोक्तं, **अन्तःकरणे**-
त्यादि अत्र प्रलम्बवधलीलायां महानन्तःकरणदोषो निवर्तते, तथा च प्रलम्बस्यान्तःकरणदोषात्मकत्वं बोधितम् ॥ ० ॥ **यत्र**
निर्झरनिर्ह्रादित्यत्र **राजस** इति का० १५२$\frac{३}{४}$। यत्र 'निझरे'त्यादिश्लोकत्रयेण **राजससात्त्विकस्तामसश्च** वृन्दावनगुण उच्यत
इत्यर्थः ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ग्रीष्मे तु वनलीलायां दैत्यस्य रामतो वधः । अष्टादशे प्रलम्बस्य गोपरूपस्य वर्ण्यते ॥ १ ॥

अथ वह्निपानानन्तरं प्रातःकाले कालियदमनेन दावाग्नितः परिरक्षणेन च मुदिता आत्मानो मनांसि येषां तैर्ज्ञातिभिर्गोपैः
परिवृतस्तैरेवानुगीयमानः कृष्णः गोकुलेन गवां समूहेन मण्डितं व्रजं न्यविशत् ॥ १ ॥ गोपालनमेव च्छद्म व्याजमात्रं यया तया
मायया इच्छया एवं व्रजे विक्रीडतोः सतोः रामकृष्णयोः ग्रीष्माख्य ऋतुरभवत्, स च शरीरिणां नातिप्रेयान् । 'जलविहारत्वरादौ
प्रियोऽपि भवति' इत्यभिप्रायेण अतिपदप्रयोगः ॥ २ ॥ स च प्राण्यप्रियोपि ग्रीष्मो वक्ष्यमाणैर्वृन्दावनगुणैर्वसन्त इव लक्षितस्तत्रत्यै-
र्जनैर्दृष्टः । 'कथं तत्र तथा गुणा जाता' इत्यत आह—यत्रेति । यत्र वृन्दावने रमन्ते योगिनो यत्र सच्चिदानन्दविग्रहे स रामः, तेन
सह केशवो 'ब्रह्मरुद्रयोरपि सुखदाता' भगवान् आविर्भूतषडैश्वर्यः श्रीकृष्णः साक्षादास्ते । अतस्तद्वासमहिम्ना तथा गुणा जाता इति
भावः ॥ ३ ॥ वसन्तसाम्यं दर्शयन् वृन्दावनगुणानाह—यत्रेति चतुर्भिः । यत्र ग्रीष्मेऽपि निर्झराणां निर्ह्रादेन घोषेण निवृत्तरवनाः
प्रच्छन्नध्वनयो झिल्लिकाः कठोरध्वनयः सूक्ष्माः कीटविशेषा यस्मिंस्तद्वनमविशदिति पञ्चमेनान्वयः । किं च शश्वत्तेषां निर्झराणां
शीकरैः अम्बुकणैः ऋजीषाः स्निग्धा ये द्रुमास्तेषां मण्डलैः समूहैर्मण्डितम् ॥ ४ ॥

अन्वितार्थप्रकाशिका

ग्रीष्मोऽप्यष्टादशे जातो वसन्तगुणलक्षितः । जघ्ने प्रलम्बो रामेण श्लोकास्तत्र द्विवह्नयः (३२) ॥
उवाचेत्येकमर्द्धाढ्याः पञ्चत्रिंशदनुष्टुभः (३५॥) ॥ १८ ॥

अथेति ॥ अथ प्रातः मुदितात्मभिः ज्ञातिभिर्गोपैः परिवृतस्तैरेवानुगीयमानः कृष्णः गोकुलेन गवां समूहेन मण्डितं व्रजं
न्यविशत् । तङभाव आर्षः । प्रथमं गोगणप्रवेशात् गोकुलमण्डितं क्रियाविशेषणं वा ॥ १ ॥ व्रजे इति ॥ गोपालनमेव छद्म व्याजमात्रं
यस्यां तया मायया एवं व्रजे विक्रीडतोः सतोः रामकृष्णयोः ग्रीष्माख्यः ऋतुरभवत् । स च शरीरिणां नातिप्रेयान् जलकेल्यादिना
किञ्चित्प्रियत्वान्नातिप्रेयानिति ॥ २ ॥ स चेति ॥ स च प्राणिनामनतिप्रियोऽपि ग्रीष्मो वक्ष्यमाणवृन्दावनगुणैर्वसन्त इव लक्षित-
स्तत्रत्यैर्जनैर्दृष्टः । यत्र वृन्दावने रामेण सह केशवो भगवान् साक्षादास्ते ॥ ३ ॥ वसन्तसाम्यमाह—यत्रेति ॥ यत्र ग्रीष्मे वृन्दावनेऽपि
निर्ह्रादेन घोषेण निवृत्तस्वनाः प्रच्छन्नध्वनयो झिल्लिकाः कठोरध्वनयः सूक्ष्माः कीटविशेषा यस्मिन् शश्वत्तेषां निर्झराणां शीकरैः
अम्बुकणैः ऋजीषाः स्निग्धा ये द्रुमास्तेषां मण्डलैः समूहैर्मण्डितं स्थलं भवतीति शेषः । मण्डितं मण्डनं भवतीति भावे क्तो वा ॥४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीमष्टादशेऽध्याये निदाघस्य वसंतसादृश्येन निरूपणं वने गोपैः सहनानाविधकृष्णक्रीडनं च बलदेवकृतप्रलंबहननं च
कथ्यते गोकुलेन गवां कलापेन मंडितं भूषितम् ॥ १ ॥ गोपालस्य छद्म मिषं यस्यां सा चासौ माया स्वेच्छा च तया क्रीडतो
रममाणस्य ॥ २ ॥ यत्र वृंदावने ॥ ३ ॥ चतुःश्लोकैर्वसंत सादृश्यमाह यत्रेति यत्र निदाघेपि निर्झराणां जलप्रवाहाणां निर्ह्रादेन

रवेण निवृत्तस्वनाः आवृतघोषाः झिल्लयः कठोरशब्दवंतोल्पकीटा यस्मिस्तत् एवंभूतं वृंदावनमस्ति पुनः कथंभूतं शश्वत्सदा तेषां जलप्रवाहाणां शीकरैस्तुषारैर्जलकणैरिति यावत् ऋजीषाः किंचिदार्द्राः द्रुमास्तेषां मंडलैर्वृंदैर्मंडितं अलंकृतं भवति ॥ ४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गुणैर्वासन्तिकैर्ग्रीष्मे लक्षितेऽष्टादशे ततः। प्रलम्बं बलभद्रेणाघातयल्लीलया हरिः ॥ १ ॥
कालियाहेः फणाग्रेषु कृत्वा नृत्यं सकौतुकम। तुङ्गे स्कन्धे प्रलम्बस्याऽरातिहाऽऽरोहयद्बलम् ॥ २ ॥

अथ बलदेवकृतं श्रीकृष्णेन कारितं प्रलम्बासुरवधात्मकं कर्मानुवर्णयंस्तावदुपोद्घातत्वेन काश्चित् पौगण्डक्रीडास्तदुपयुक्तं कालं चानुवर्णयितुं तच्च वृत्तेन संगमयितुं वृत्तशेषमाह ॥ अथेति ॥ अथ तद्रात्रिव्यतिक्रमानन्तरं, मुदिता आत्मानो मनांसि येषां तैः, ज्ञातिभिर्गोत्रैः 'ज्ञातिस्तातसगोत्रयोः पुमान्' इति मेदिनी। अनुगीयमानः तैरेव, परिवृतः कृष्णः, गोकुलमण्डितं धेनूनां वृन्दैः शोभमानं, व्रजं, न्यविशत् ॥ १ ॥ व्रज इति ॥ गवां पालः पालनं छद्म यस्यां सा चासौ माया च तया, यद्वा गोपालः छद्म यस्यां सा चासौ मायात्मकसंकल्पस्तया, एवमुक्तप्रकारेण, व्रजे विक्रीडतोः सम्यक् क्रीडामाचरतोः सतोः, रामकृष्णयोरिति शेषः। शरीरिणां नातिप्रेयाननतिप्रियः, ग्रीष्मः नाम ऋतुः, अभवत् संप्रवृत्तोऽभूत् ॥ २ ॥ स चेति ॥ यत्र वृन्दावने, रामेण सह, केशवः भगवान्, साक्षात् प्रत्यक्षः, आस्ते। अतः, वृन्दावनगुणैः, स च स ग्रीष्मर्तुरपीत्यर्थः। यद्यपि शरीरिणां नातीव सुखकरस्तथापीति शेषः। वसन्तः इव, लक्षितः वसन्तर्तुतुल्यतया शरीरिणां सुखकरो बभूवेत्यर्थः ॥ ३ ॥ ग्रीष्मस्य वसन्ततुल्यतां ख्यापयितुं वृन्दावनगुणाननुवर्णयति ॥ यत्रेति ॥ यत्र वृन्दावने, ग्रीष्मोऽपीति शेषः। निर्झराणां यो निर्ह्लादो घोषस्तेन निवृत्तस्वनाश्छन्नध्वनयः झिल्लिकाः कठोरध्वनयः सूक्ष्मकीटविशेषा यस्मिन् कर्मणि यथा तथाभूतं, किं च शश्वत्सदा तेषां निर्झराणां शीकरैरम्बुकणैः ऋजीषाः स्निग्धा ये द्रुमास्तेषां मण्डलानि तैर्मण्डितं यथा भवति तथा, वसन्तवदलक्षतेति शेषः ॥ ४ ॥

श्रीहरिसूरिरचितं श्रीभक्तिरसायनम्

दुर्दान्तं भुवनप्रसारिणमहिं नानामुखोद्भासिनं चित्ताख्यं दमयंस्ततश्च शमयन् सन्तापदावानलम्।
यः स्याद् गोकुलमण्डितोऽस्य भजति प्रारब्धतापोऽप्यलं शान्ति सौख्यमसाविति स्फुटमभूद्ग्रीष्मर्तुंताद्दृक्स्थितेः ॥ १ ॥
स चेति : १०.१८.३.

पिबतोऽनलमद्धाऽस्य पुरः का योग्यता मम। ह्रियाऽनयैव किमभूदृतुः शैत्यगुणान्वितः ॥ २ ॥
निसर्गतापकृदपि ग्रीष्मोऽभूद्यदतापकः। स्फुटमेव फलं साधुवृन्दावनगुणस्य तत् ॥ ३ ॥
नितान्तं तदा तं त्रितापं हरन्तं वनान्ते वसन्तं समालक्ष्य सन्तः।
तपन्तं निदाघं पुरः संसरन्तं वसन्तं लसन्तं वदन्ति स्म युक्तम् ॥ ४ ॥
यत्र क्रीडति नित्यमेव भगवांस्तत्रत्यतार्णाग्रमप्याक्रष्टुं न च वा प्रदग्धुमवनावीशा दिगीशा अपि।
एतत् स्पष्टमभूत्तदा तृणजलाद्याकर्षणे शक्तिमान् न ग्रीष्मो न च तिग्मरश्मिरनिलो नाग्निर्न चान्योऽपि वा ॥ ५ ॥

कृष्णप्रिया

प्रलम्बासुर उद्धार

श्रीशुकदेवजी कहते हैं—परीक्षित्! अब आनन्दित स्वजन सम्बन्धियों से घिरे हुए एवं उनके मुख से अपनी कीर्ति का गान सुनते हुए श्रीकृष्ण ने गोकुलमण्डित गोष्ठ में प्रवेश किया ॥ १ ॥ इस प्रकार अपनी योगमाया से ग्वाल का सा वेष बनाकर राम और श्याम ब्रज में क्रीडा कर रहे थे। उन दिनों ग्रीष्म ऋतु थी। यह शरीरधारियों को बहुत प्रिय नहीं है ॥ २ ॥ परन्तु वृन्दावन के स्वाभाविक गुणों से वहाँ वसन्त की ही छटा छिटक रही थी। इसका कारण था, वृन्दाबन में परम मधुर भगवान् श्यामसुन्दर श्रीकृष्ण और बलरामजी निवास जो करते थे ॥ ३ ॥ झींगुरों की तीखा झंकार झरनों के मधुर झर-झर में छिप गयी थी। उन झरनों से सदा सर्वदा बहुत ही ठंडी जल की फुदियाँ उड़ा करती थी, जिनसे वहाँ के वृक्षों की हरियाली देखते ही बनती थी ॥ ४ ॥

सरित्सरःप्रस्रवणोर्मिवायुना कह्लारकञ्जोत्पलरेणुहारिणा ।
न विद्यते यत्र वनौकसां दवो निदाघवह्न्यर्कभवोऽतिशाड्वले[1] ॥ ५ ॥
अगाधतोया ह्रदिनीतटोर्मिभि[2][3]र्द्रवत्पुरीष्याः पुलिनैः समन्ततः ।
न यत्र चण्डांशुकरा विषोल्बणा भुवो रसं [4]शाड्वलितं च गृह्णते ॥ ६ ॥
वनं कुसुमितं श्रीमन्नदच्चित्रमृगद्विजम् । गायन्मयूरभ्रमरं कूजत्कोकिलसारसम् ॥ ७ ॥
क्रीडिष्यमाणस्तत् कृष्णो भगवान् बलसंयुतः । वेणुं विरणयन् गोपैर्गोधनैः संवृतोऽविशत् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—सरित् सरः प्रस्रवणऊर्मिवायुना कह्लारकञ्जउत्पलरेणुहारिणा, यत्र अतिशाद्वले वनौकसाम् निदाघवह्नि अर्कभवः दवः न विद्यते ॥ ५ ॥ यत्र अगाधतोया ह्रदिनी तट ऊर्मिभिः पुलिनैः समन्ततः द्रवत् पुरीष्याः भुवः शाद्वलितं च रसम् विषउल्बणाः चण्ड अंशुकराः न गृह्यते ॥ ६ ॥ कुसुमितम् श्रीमत् नदत्चित्रमृगद्विजम् गायत् मयूरभ्रमरम् कूजत् कोकिल सारसम् तत् वनम् क्रीडिष्यमाणः भगवान् कृष्णः वेणुं विरणयन् गोपैः गोधनैः संवृतः बलसंयुतः अविशत् ॥ ७–८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत्र ग्रीष्मे वने वा । निदाघो ग्रीष्मस्तेन तत्कालीनवह्न्यर्काभ्यां च भवति यो दवस्तापः । अतिशाद्वलेऽतिहरिततृणाकीर्णे । यद्वा अतिक्रांतशाद्वलेऽपि स्थाने ॥५॥ ननु शाद्वलमेव कुतस्त्यं तत्राह । अगाधेति । अगाधानि तोयानि यासां तासां ह्रदिनीनां तटस्पर्शिभिरूर्मिभिः पुलिनैः सह द्रवत्पुरीषं पंको यस्यास्तस्मा भुवः रसं शाद्वलित शाद्वलरूपतां च विषवदुल्बणा अपि सूर्यरश्मयो न गृह्णते न हरंति ॥ ६ ॥ तद्वनमविशदित्युत्तरेणान्वयः । नदंतश्चित्रा मृगा द्विजाश्च यस्मिन् । गायंतो मयूरा भ्रमराश्च यस्मिन् । कूजंतः कोकिलाः सारसाश्च यस्मिस्तदविशत् ॥ ७–११ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सरित्सरसां प्रस्रवणेषु ये ऊर्मयस्तरंगास्तत्संबंधिना वायुना 'भंगस्तरंग ऊर्मिर्वा स्त्रियां वीचिः' इत्यमरः । बहुशाद्वले तु सर्वत्रैव तापाभावस्तत्र किं वृंदावनाधिक्यमित्यरुच्याह-यद्वेति । अतिक्रांतशाद्वले शाद्वलशून्ये ॥ ५ ॥ शाद्वलत्वे शंकते—नन्विति । कुतस्त्यम् कुतो जातम् । तत्र आक्षेपे । अगाधानि गंभीराणि ह्लदिनीनां नदीनाम् 'तटिनी ह्लादिनी नदी' इत्यमरः । ऊर्मिभिस्सहितैः पुलिनैस्तात्कालीनजलोत्थितस्थलैः । 'तोयोत्थितं तत्पुलिनम्' इत्यमरः । द्रवत्किञ्चिच्चलनवदार्द्रम् 'पुरीषं मलपंकयोः' इति शाश्वतः । उल्बणाश्चण्डाः 'उल्बणं भयदे चडे संवृते पुंनपुंसकम्' इति धरणिः । यत्र वृंदावने । शाद्वलितमित्याचारार्थक्विबंताद्भावे निष्ठेति रूपगोस्वामिजीवगोस्वामिनौ । विश्वनाथस्तु–शाद्वलयुक्तीकृतम् "विन्मतोर्लुक्" इति मतुपो लुगित्याह ॥ ६ ॥ तद्वनमविशदिति द्वयोः संबंधः । कुसुमानि संजातानि यत्रेति तथा श्रीमत्त्वं स्वतः विशेषतश्चाह–कुसुमितं प्रफुल्लाशेषपुष्पव्याप्तमिति ग्रीष्मे वसंतगुण उक्तः । द्विजशब्देन गृहीतानामपि मयूरादीनां पृथगुक्तिरन्यत्तु श्रीणामपि संवलनं बोधयति ॥ ७ ॥ कृष्णो जगच्चित्ताकर्षकलीलः । अत एव भगवान् विरणयन् विविधस्वरैर्ध्वनयन् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यत्र च वृन्दावने सरिदित्यादिना वायोः सुशैत्यादिकमुक्तं अयमेको दवाभावे हेतुः अतिशाद्वल इत्यन्वयः । तथा च श्रीविष्णुपुराणे—

"ततस्तत्रातिरूक्षेऽपि धर्मकाले द्विजोत्तम ! । प्रावृट्काल इवोद्भूतं नवशष्पं समन्ततः" ॥ इति ।

शाद्वल इति दकारमध्य एव पाठः नडशाद्वलजिति स्मृतेः ॥५॥ कुतस्तदाह–अगाधेति । अगाधतोयत्वेन सदोर्मीणामुद्भवः स्थौल्यं च सूचितम् ऊर्मिभिरिति निमित्तं पुलिनैरित्युपादानं तत्तन्मयत्वात्तद्रवत् सदार्द्रं पुरीषं मृद्यस्यास्तस्या इत्यर्थः ङीषर्थं गौरादौ पठनीयं शाद्वलितमित्याचारार्थक्विबन्ताभावे निष्ठा अन्यत्तैः । यद्वा, अगाधेत्यादिकं पुलिनविशेषणं समन्तत इत्यस्य परेणान्वयः यत्र च श्रीवृन्दावने सर्वत्रापीत्यर्थः । ह्लदिनीनां बाहुल्यात् ॥ ६ ॥ पञ्चकान्तरेव वनमिति युग्मकम् श्रीमत्त्वं स्वतः विशेषतश्चाह—कुसुमितमित्यादिना । कुसुमितं प्रफुल्लाशेषपुष्पव्याप्तमित्यर्थः । ग्रीष्मेपि वसन्तगुणैः एवं द्विजशब्देन गृहीतानामपि मयूरादीनां

---

१. द्वले–श्रीधर. वंशी. वीर. विज. विश्व. शुक. । २. तोयह्रदि–श्रीधर वंशी. वीर. विज. जीव. शुक. ; तोयाह्रदि–विश्व. । ३. द्रवत्पुरीषः–वीर. ; द्रवत्पुलिन्याः–विज. । ४. शाद्वलितं–श्रीधर. वंशी. वीर. विज. विश्व. शुक. ।

पृथगुक्तिरन्यत्तु श्रीणामपि सम्वलनं वोधयति क्रीडिष्यमाणः क्रीडिष्यन्निति क्रीडाविशेषापेक्षया यतः कृष्णः जगच्चित्ताकर्षकलीलः अत एव भगवान् बलदेवेन सम्यग्युत इति विशेषेणोक्तिरग्रे तेन प्रयोजनविशेषार्थं विरणयन् चिक्रीडिषानन्देन तदुत्साहनेच्छाया च विशेषतो वादयन् अत एव गोपैः गाव एव धनानि तैश्च सम्यग्वृत्तः गोधनानामपि गोपक्रीडायामपि युक्तत्वात् ॥ ७-८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तद्वनमविशदिति पञ्चभिरन्वयः; सरिदित्यादिना वायोः सुशैत्यादिकमुक्तम्, अयमेको दवाभावे हेतुः, अतिशाद्वल इत्यन्वयः, तथा च श्रीविष्णुपुराणे (५।६।३०)—'ततस्तत्रातिरूक्षेऽपि धर्म्मकाले द्विजोत्तम। प्रावृट्काल इवोद्भूतं नवं शस्यं समन्ततः ॥' इति ॥५॥ कुतः ? तदाह—अगाधेति। अगाधतोयत्वेन सदैवोर्मीणामुद्भवः स्थौलाश्च सूचितम्, द्रवं इतस्ततः प्रसरत्, पुरीषमिव पुरीषः पंकः, किंवा, द्रवत् सदार्द्रं पुरीषं मृद्यस्यास्तस्याः, ईदन्तत्वमार्षम्, समन्ततो वर्तमानैः पुलिनैश्च हेतुभिः, सहार्थे वा, तैः सहिताया भुवस्तस्यास्तेषाञ्चेत्यर्थः। यद्वा, समन्तत इत्यस्य परेणान्वयः, यत्र सर्वत्रापीत्यर्थः, ह्रदिनीनां बाहुल्यात् ॥ ६ ॥ हे श्रीमन्निति, यथा श्रीकृष्णप्रभावेण भवतो विविधा शोभा, तथा तद्वनस्यापीति भावः। यद्वा, श्रीमदिति वनविशेषणम्, श्रीमत्त्वमेव दर्शयति—कुसुमितमित्यादिविशेषणैः किंवानुक्तामन्यामपि विविधशोभां संगृह्णाति, कुसुमितं प्रफुल्लाशेषपुष्पव्याप्तमित्यर्थः। ग्रीष्मेऽपि वसन्तगुणैः, द्विजशब्देन गृहीतानामपि मयूरादीनां पृथगुक्तिः,—तापाभावेन सुखमधुरगानविशेषात् ॥ ७ ॥ क्रीडिष्यन्निति क्रीडाविशेषापेक्षया, यतः कृष्णो जगच्चित्ताकर्षकलीलः, अतएव भगवान् बलदेवेन सम्यग् युत इति विशेषेणोक्तिः; अग्रे तेन प्रयोजनविशेषार्थम्, विरणयन् कार्य्यक्रीडानन्देन क्रीडाया उत्साहार्थं वा विशेषतो वारयन्; अतएव गोपैः—गाव एव धनानि तैश्च, किंवा तेषां तैः सम्यग् वृतः, अन्येषां पशूनां सत्त्वेऽपि गवामेवोक्तिस्तासां मुख्यत्वात्, धन-शब्देन तासामवश्यपाल्यत्वं सूचितम्। अतोऽयमपि वनप्रवेशे हेतुः, किञ्च क्रीडिष्यमाण इति तत्र क्रीडाया मुख्यत्वमुक्तमेव ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

दवः वनान्ताग्निः ॥५॥ द्रवत्पुरीष्याः आर्द्रशैवलायाः नद्या इत्यध्याहारः ॥६-७॥ विरणयन् विशेषेण रणयन् ॥८-११॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सरिदिति। सरितां सरसां प्रस्रवणानां निर्झराणां च ये ऊर्मयस्तेषां सम्बन्धिना वायुना कह्लारादीनां रेणून् हरतीति तथाभूतेन यत्रातिशाद्वले अतिहरिततृणाकीर्णे अतिक्रान्तशाद्वलेऽपि वा निदाघो ग्रीष्मस्तेन तात्कालिकवह्न्यर्काभ्यां च भवति यो दवस्तापः स वनौकसां न विद्यते ॥ ५ ॥ ननु, शाद्वलमेव कुतस्तत्राह—अगाधेति। अगाधानि तोयानि यासां तासां ह्रदिनीनां तटस्पर्शिभिरूर्मिभिः हेतुभिः पुलिनैः सह द्रवत्पुरीषं पङ्को यस्यास्तस्या भुवो रसं शाद्वलितं शाद्वलरूपतां च विषवदुल्बणा अति सूर्यस्य रश्मयो यत्र न विगृह्णते न हन्ति आशुतरव्याप्तौ विषदृष्टान्तः तद्वनमाविशदित्युत्तरेणान्वयः ॥ ६ ॥ श्रीमत्फलकिसलयादिसमृद्धिमद्भगवदावासत्वात् लक्ष्मीवद्व नदन्तश्चित्रा मृगा द्विजाः पक्षिणश्च यस्मिन् गायन्तो मयूराः भ्रमराश्च यस्मिन् कूजन्त कोकिलाः सारसाश्च यस्मिन् तत् ॥ ७ ॥ एवम्भूतं वनं भगवान् श्रीकृष्णः क्रीडिष्यमाणो बलदेवेन संयुतः वेणुं विशेषेण रणयन् नादयन् गोपैर्गोधनैश्च संवृतः प्राविशत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सरित् नदी सरो देवखातः एतयोः प्रस्रवणं निर्झरम् ऊर्मिस्तरङ्गः एतत्सम्बन्धि वायुना च कह्लारं सौगन्धिकं कञ्ज पद्मम् नीलोत्पलम् उत्पलम् एषां रेणुभिः परागैः हारिणा मनोहरेण। यद्वा, रेणूनां हारो हरणम् अस्यास्तीति हारी तेन निदाघवह्न्यर्केभ्यो भव उत्पत्तिर्यस्य स तथा दवस्तापः "दव परितापे" इति धातुः। अच्प्रत्यये एतत्सिद्ध्यति वनाग्निरित्यर्थाङ्गीकारे वह्नीत्येतद्व्यर्थं भवति अति शाद्वले कोमलतरतृणोपेते ॥ ५ ॥ विषवदुल्बणाः चण्डांशुकराः सूर्यरश्मयः यत्र शाद्वलितं बालतृणनिबिडं भुवो गतं रसं जलं न निगृह्णते किं कारणमत्राह—अगाधेति। अगाधं तोयं यस्याः सा अगाधतोया सा च ह्रदिनी नदी तत्तस्यास्तटे रुहैः तीरजातैर्वृक्षैः समन्ततः द्रवन्त्याः स्यन्दमानायाः पुलिन्याः विभक्तनद्याः शाखानद्या इत्यर्थः। पुलिनैर्निमित्तैः सर्वदा द्रवीभूतस्थलत्वादित्यर्थः ॥ ६-७ ॥ विरणयन् विविधैः स्वरैर्ध्वनयन् कृष्णः तद्वनमविशदित्यन्वयः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ऊर्मिभिरिति निमित्तम् ॥ ५ ॥ पुलिनैरित्युपादानं द्रवत् सदार्द्रं पुरीषं मृद्यस्यास्तस्याः शाद्वलितमित्याचारार्थक्विबन्ताद्भावे निष्ठा ॥ ६-१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सरिदादीनामूर्मयो यतस्तेनेति शैत्यं कह्लारादीनां रेणून् हर्तुं निःशब्दत्वेनालक्ष्यतया चोरयितुं शीलं यस्येति सौगन्ध्यमान्द्ये दवस्तापः अन्यत्र निदाघे दावानलभवस्तापो भवति सोऽत्र नास्तीत्याह—अतिशाद्वले अतिकोमलहरिततृणाकीर्णे ॥ ५ ॥

अर्कभवतापाभावे पूर्वोक्तद्रुममण्डलमण्डितत्वमेव हेतुरस्ति हेत्वन्तरमप्याह–अगाधतोया ह्लदिन्यस्तासां तटस्पर्शिभिरूर्मिभिर्द्रवत् सदैवार्द्रं पुरीषं पङ्कं यस्यास्तथाभूताया भुवो रसं न गृह्णतीत्यन्वयः। गौरादित्वात् ङीष् रसं कीदृशं समन्ततः पङ्किलैः पुलिनैः शाद्वलितं शाद्वलयुक्तीकृत "त्रिन्मतोलुक् [५।३।६५] इति मतुपो लुक् ॥ ६–८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यत्र अतिशाद्वले अतिहरिततृणाकीर्णे वने सरित्सरःप्रस्रवणानां ये ऊर्मयस्तत्सम्बन्धिवायुना कह्लारादिरेणून् आहरतीति तथा तेन निदाघस्य ग्रीष्मस्य वह्न्यर्काभ्यां भवति यो दवस्तापः स न विद्यते ॥ ५ ॥ यत्र वने अगाधतोयह्लदिनीतटोर्मिभिर्हेतुभिः पुलिनैः सह द्रवत्पुरीषं पङ्को यस्यास्तस्या भुवः रसं शाद्वलितं शाद्वलरूपतां च विषोल्बणाः विषवदत्यहिताः अपि चण्डांशुकराः न गृह्णते न हरन्ति ॥ ६ ॥ नदन्तश्चित्रा मृगा द्विजाश्च यस्मिन् गायन्तो मयूराः भ्रमराश्च यस्मिन् कूजन्तः कोकिलाः सारसाश्च यस्मिन् ॥ ७–११ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

सरिदादीनामूर्मयो यस्मात्तेन वायुनेति शैत्यं कह्लारादीनां रेणून् परागान् हतुं निःशब्दतया चोरयितुं शीलं यस्य तेनेति सौगन्ध्यमान्द्यो दवस्तापः अन्यत्र निदाघे दावाग्नितापः स्यात् सोऽत्र नेत्याह अतिशाद्वले अतिकोमलहरिततृणपूर्णे इत्यर्थः ॥ ५ ॥ अर्कतापाभावे हेत्वन्तरमाह–अगाधतोयानां ह्लदिनीनां तटस्पर्शिभिरूर्मिभिर्द्रवत् सर्वदैवार्द्रं पुरीषं पङ्कं यस्यास्तादृश्या भुवो रसं यत्र चण्डांशुकरा न गृह्णते इत्यन्वयः गौरादित्वात् ङीष् रसं कीदृशं समन्ततः पङ्किलैः पुलिनैः शाद्वलितं शाद्वलयुतं तत् करोतीति णिजन्तात्भावे निष्ठा ॥ ६–८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अगाधं तोयं यस्याः सा च ह्लदिनी महानदी तस्यास्तटे रुहैस्तीरोत्पन्नैर्वृक्षैः। वैवक्षिकसंज्ञात्वमङ्गी हलदन्तात्संज्ञायामिति सप्तम्या अलुगिति केचित्। केचिच्च पदभेदं वदन्तो रुहेः कप्रत्ययमाचक्षणाः रुहन्तीति रुहा इत्याचक्षते। अन्ये तु मन्यन्ते तटे स्वप्रसरेण तरणेः ई कोपो यैस्ते सन्तश्च ते रुहाश्चेति। ई दुःखभावने कोप इति विश्वात्तदुपपत्तिमेकपद्ये। किरणाप्रसरणात्तरणेः कोप इति भावस्तत्र। अत एव न यत्र चण्डांशुकरा विषोल्बणा इत्याद्यनुपदं वक्ष्यतीत्युपपत्तिमाहुः। द्रवत्पुलिन्याः स्वप्रविष्टावान्तरनद्याः पुलिनैः। नलिगुलिभ्यामितीनच्। सिकताभिर्विषवदुल्बणाः क्रूराश्चण्डांशोः सूर्यस्य कराः किरणाः शाद्वलितं सञ्जातशाद्वलमिति। भुवो रसं जलं न निगृह्णते न गृह्णन्ति। स्वरितेत्त्वात्कर्तृगामिनि क्रियाफले आत्मनेपदता ॥ ५ ॥ कुसुमितं। तारकादीतच्। नदच्चित्रमृगद्विजं चित्रं नदन्तो नदच्चित्राः। चैत्र्यं नादे विशेषणे ज्ञेयं। ते च ते मृगाश्च द्विजाश्च यस्मिन्तत्। तद्विशेषमाह॥ गायन्तो मयूरभ्रमरा यस्मिंस्तदिति। कूजन्तः कोकिलाः सारसाश्च यस्मिंस्तत् ॥ ६ ॥ तद्वनं कृष्णोऽविशदित्यन्वयः ॥ ७ ॥ प्रबालाः किसलया बर्हाणि पिच्छानि स्तबका गुच्छाः स्रजश्च मालाश्च धातवो गैरिकादयश्च तैः कृतं भूषणं येषां ते ॥ ८ ॥

श्रीसुबोधिनी

तापनिवारकं वायुमाह **सरिदिति**, **सरितो नद्यः सरांसि** सरोवराणि **प्रस्रवा** झरणा राजससात्त्विकतामसास्त्रिविधाना**मूर्मिभि**र्यं उत्पाद्यते **वायुः**, अनेन मान्द्यं शैत्यं चोक्तं, सौरभ्यमाह, **कह्लार**पुष्पाणि सन्ध्याविकासीनि **कञ्जानि** कमलानि दिनविकासयुक्तान्युत्**पलानि** रात्रिविकासीनि, त्रिविधैरप्येतैः सर्वदा वायुः सुगन्ध एव भवति, तदाह तेषां **रेणुहारिणे**ति, अत एव **वनौकसां दवो**ऽरण्याग्निजनितस्तापः, दावस्यारण्यार्थता दवतापयोगादेव, दवदावशब्दावरण्यवाचकाविति**कोशः**, तापवाचकोऽत्र प्रयुक्तः, क्वचिद् दावोऽग्निवाचकः प्रयुक्तोऽतोऽनेकार्थौ दवदावशब्दौ, तापस्त्वन्तः पित्तादिनापि भवतीति तन्निवृत्त्यर्थमाह **निदाघवह्न्यर्कभव** इति, **निदाघे** यौ **वह्न्यर्कौ** ताभ्यां **भवो यस्य**, ननु भूमिकृतस्तापो भवेत् तत्राहा**तिशाड्वल** इति, **शाड्बलं** हरिततृणभूखण्डो दूर्वायुक्तः, अत्यन्तं शाड्वलं यत्र ॥ ५ ॥ शिष्टानपि गुणानाहा**गाधं तोयं यत्र**, एतादृशीनां **ह्लदिनीनां तट**सम्बन्धिनीनां य **ऊर्मय**स्तीरे जायमानास्तैः कृत्वा **द्रवत् पुरीषं** मृत्तिका यस्याः सा **द्रवत्पुरीषी**, **गौरादित्वान्** ङीष्, तादृश्या **भुवः समन्ततो**ऽपि **रसं शाड्वलितं च यत्र** वृन्दावने **विषादप्युल्बणाश्चण्डांशुकरा न गृह्णते**, **वृन्दावनभूमिः सर्वदा सरसैव तिष्ठति सर्वतश्च पुलिनानि भवन्ति**, तानि च पुलिनान्य**गाधह्लदिनीतटोर्मि**युक्तानि भवन्ति, **भुव** एव वा स्थानविशेषास्तेषां शीतलत्वा**योर्मिभिर्द्रवत्पुरीषत्वं** निरूप्यते, मध्ये शीतलतानिरूपणाय **द्रवत्पुरीषता** निरूपिता, बहिःशीतलतायै **पुलिनानि**, अतो मूलादुपरिभागाच्च **रसाधिक्या**च् छोषाभावेन भूरसशाड्वलितयोर्नाभावः, एवं सरसता निरूपिता ॥ ६ ॥ अन्यान् वनधर्मानाह **वन**मिति, आदौ **कुसुमितं**, **ग्रीष्मे हि प्रायेण कुसुमानि न भवन्ति**, शोभायुक्तं च, कुसुमानि राजसानि, **नदन्तश्चित्रा मृगा द्विजाः** पक्षिणश्च यत्र, **सात्त्विका** एते **गायन्तो मयूरा भ्रमरा**श्च यत्र, कूजन्तः **कोकिलाः सारसा**श्च यत्र, **आदौ नादस्तदनु गानं तत उद्रिक्ते रसे कूजितानी**ति त्रयमुक्तं, मिथुनत्वाय **द्वौ द्वौ**, नादे हि श्रुतिपूरकोपेक्ष्यत इति **मृगाः** सह निरूपिताः, गाने नृत्यमपेक्ष्यत इति **मयूराः**,

कूजिते परपुष्टोपेक्षित इति **कोकिला** ॥ ७ ॥ एवं वनगुणानुक्त्वा तत्र भगवतः क्रीडां वक्तुमादौ भगवतः प्रवेशमाह **क्रीडिष्यमाण** इति, क्रीडार्थमेव भगवता तत्र गुणाः सम्पादिताः, **तत्** तस्मात्कारणात् **कृष्णः** क्रीडार्थमाविर्भूतो **भगवान् बलसंयुतो** जातः, षड् गुणाः स्वस्य बलं च तस्य, अतः **सप्तभिः** क्रीडां वक्ष्यति पूर्ववत्, तत्रत्यानां देवानामुद्बोधनार्थं **वेणुं विरणयन्**, **गोपा गोधनानि सेवार्थं** धर्मार्थमर्थार्थं, **संवृतो** जातः, एतादृशो**विश**दिति तद्रसप्रारम्भ उक्तः ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कूजत्कोकिलसारसमित्यत्र, **कूजिते परपुष्ट** इति । पूर्णे रसे हि कूजितोद्गमः । स च न विवाहिते पुंसि भवति किन्तु **परस्मिन्नेवे**ति कूजिते परपुष्टो भावोपेक्ष्यते । कोकिलश्च पूर्वं काकपोषित इत्येतत्साम्येन कोकिलोक्त्योक्तोर्थो व्यज्यत इत्यर्थः ॥ ७ ॥

इति पञ्चदशोऽध्यायः ॥ १५ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

सरिदित्यत्र **दव**शब्दस्य तादृशतापवाचकत्वं न प्रसिद्धमतोव्युत्पादयन्ति **दावस्ये**त्यादि, रूढेरत्र बलिष्ठत्वाभावायाहु**स्तापे**त्यादि, तथा च **वनौकसा**मितिशब्दसान्निध्येनारण्यस्य ग्रहीतुमशक्यत्वात् तत्तापवाचक एवेत्यर्थः ॥ ५ ॥ **वनं कुसुमित**मित्यत्र **कूजिते परपुष्ट** इत्यस्य तात्पर्यं टिप्पण्यामाहुः **पूर्णे**त्यादि ॥ ७ ॥ **क्रीडिष्यमाण** इत्यत्र **पूर्ववदि**त्येकादशाध्याय इवेत्यर्थः, 'द्वादशाध्याय इवे'त्यर्थस्तु केवलमेतत्पद्ये प्रतिपाद्यो न तु सर्वेष्विति सम्भवन्नपि न निरूपयितुं शक्यः ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अगाधेत्यस्याभासे **शिष्टानपी**ति श्लोकद्वयार्थः, वक्ष्यमाणा गुणा न वसन्तत्वे हेतवः किन्तु रसोद्बोधायोक्ता इति तेषां **प्रासङ्गिकत्वबोधनायापिशब्दः** ॥ ६ ॥ **वन**मित्यत्र मिथुनत्वं विवृण्वन्ति **नादे ही**ति, **परपुष्ट** इति पोषकात् पत्युः परेण जारेण पुष्टो **भाव** इत्यर्थः, श्रुतिपूरकपदेपि तादृशो भाव इत्यर्थः, **तथा** च श्रुतिपूरकभावनृत्यपरपुष्टदेहयुक्तास्त्रयो मृगबर्हिकोकिला उक्ता इति ज्ञेयम् ॥ ७ ॥ **क्रीडिष्यमाण** इत्यत्र **बलं चे**ति क्रियाशक्तिरित्यर्थः, **पूर्वव**दिति एकादशेध्याये "अविदूरे व्रजभुव" इति श्लोकत्रयोक्तवदित्यर्थः, **सेवार्थ**मिति गोपसाहित्यं तेषां सेवासिद्ध्यर्थं, **वेणुनादोर्थार्थं**, द्वादशाध्यायेर्थलीलायां गानस्य निरूपितत्वात् ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यत्र वृन्दावने अतिशाद्वले अतिहरिततृणाकीर्णे निदाघो ग्रीष्मस्तेन तत्कालीनवह्न्यर्काभ्यां च भवतीति तथाभूतो यो दवस्तापः स वनौकसां न विद्यते । 'तत् केन हेतुना' इत्यपेक्षायामाह—सरिदिति । सरितो नद्यः, सरांसि सरोवराणि, प्रस्रवाः निर्झराः, तेषामूर्मिसम्बन्धेन शीतलेन वायुना । तथा कह्लारकञ्जोत्पलानि यथाक्रमेण सन्ध्यादिनरात्रिविकाशीनि तेषां रेणुहारिणा सुगन्धिना वायुना ॥ ५ ॥ ननु 'ग्रीष्मेऽतिशाद्वलत्वमेव कुत' इत्यपेक्षायामाह—अगाधेति । अगाधानि तोयानि यासां तासां ह्रदिनीनां तटस्पर्शिभिरूर्मिभिः पुलिनैः सह समन्ततः सर्वतो द्रवत् पुरीषं पङ्के यस्यास्तस्या भुवो रसं शाद्वलितं शाद्वलतां च यत्र वृन्दावने ग्रीष्मकालीना विषवदुल्बणा अतितीक्ष्णा अपि चण्डांशुकराः सूर्यरश्मयो न गृह्णते न हरन्ति, अतः शाद्वलत्वमित्याशयः ॥ ६ ॥ कुसुमितं पुष्पितवृक्षव्याप्तम्, श्रीमत् बहुशोभायुक्तम्, नदन्तः चित्रा मृगा द्विजाश्च यस्मिंस्तत्, गायन्तो मयूरा भ्रमराश्च यस्मिंस्तत्, कूजन्तः कोकिलाः सारसाश्च यस्मिंस्तत् ॥ ७ ॥ तदेवंभूतं वनं क्रीडिष्यमाणो बलेन संयुतो गोपैर्गोधनैश्च संवृतो वेणुं विशेषेण रणयन् वादयन् भगवान् कृष्णोऽविशत् ॥ ८ ॥

अन्वितार्थप्रकाशिका

सरिदिति ॥ अतिशाद्वले अतिहरिततृणाकीर्णे यत्र गीष्मे वृन्दावने वा कह्लारकञ्जोत्पलानि यथाक्रमेण सन्ध्यादिनरात्रिविकासीनि तेषां रेणून् चौरवच्छनैर्हरति तेन सुगन्धिना मन्देन च सरितो नद्यः सरांसि सरोवराणि प्रस्रवाः निर्झराः तेषामूर्मिसंबन्धेन शीतलेन वायुना हेतुना निदाघो ग्रीष्मस्तेन तत्कालिकवह्न्यर्काभ्यां च भवतीति तथाभूतो यो दवस्तापः स वनौकसां न विद्यते ॥ ५ ॥ ननु ग्रीष्मे शाद्वलमेव कुतस्तत्राह–अगाधेति ॥ यत्र वृन्दावने अगाधानि तोयानि यासां तासां ह्रदिनीनां नदीनां तटस्पर्शिभिरूर्मिभिः पुलिनैः सह समततः सर्वतोद्रवत् । आर्द्रं पुरोष पङ्को यस्यास्तस्याः गौरादित्वात् ङीष् इत्याहुः वस्तुतो ङीषार्षः। भुवो रसं शाद्वलितं शाद्वलयुक्तीकृतम् । शाद्वलवच्छब्दात्तत्करोतीति णिजन्तात् क्तः । इष्ठवद्भावात् "विन्मतोर्लुक्" इति मतुपो लुक्। ग्रीष्मकालीना विषमिवोल्बणा अतितीक्ष्णा अपि चपि चण्डांशुकराः सूर्यरश्मयो न गृह्णते न हरन्ति ॥ ६ ॥ वनमिति ॥ यत्र पुनर्वनं कुसुमितं पुष्पितवृक्षव्याप्तं श्रीमत् बहुशोभायुक्तं नदन्तः चित्रा मृगा द्विजाः पक्षिणश्च यस्मिंस्तत् गायन्तो मयूरा भ्रमराश्च यस्मिन् कूजन्तः कोकिलाः सारसाश्च यस्मिंस्तादृशमस्ति ॥ ७ ॥ क्रीडिष्यमाण इति ॥ क्रीडिष्यमाणः क्रीडां करिष्यमाणः कर्मव्यतिहारविवक्षया शानच् । बलेन संयुतो गोपैर्गोधनैश्च संवृतो वेणुं विशेषेण रणयन् वादयन् भगवान् कृष्णस्तद्वनमविशत् ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अतिशाद्वले अतिहरिततृणव्याप्ते यद्वा अतिक्रांतशाद्वलेऽपि प्रदेशे यत्र ग्रीष्मसेवितवृंदावने कह्लाराणां सुगंधिपद्मानां कंजानां कमलानां उत्पलानां कुमुदिनीनां रेणुं हारिणापरागहारिणा प्रस्रवणानां निर्झराणां सबंधवता सरिता नंदीनां सरसां तडागानां च ये ऊर्मयस्तैः सह संश्लिष्टे न च वायुना वनौकसां निदाघस्य ग्रीष्मस्य वह्न्यर्काभ्यां भव उद्भवो यस्य सः दवस्तापो न विद्यते ।। ५ ।। अगाधानि बहूनि तोयानि यासां तासां हृदिनीनां नदीनां तटस्पर्शिभिः ऊर्मिभिः समंततः द्रव्यत्पुरीषं पंकायस्या सा द्रवत्पुरीषी तस्याः द्रवपुरीषेति गौरादिगणे पाठात् ङीष्पुलिनैर्नदी तटैः सह भुवोभूमेः शाद्वलितं हरिततृणवत्त्वं रसं आर्द्रतां च यत्र वने विषवदुल्वणादुःसहा अपि चंडांशोस्तिग्मरश्मेः सूर्यस्य कराः किरणाः न गृह्णते ।। ६ ।। कुसुमितं पुष्पितं श्रीमत्शोभमानं नदंतः चित्रा अनेकविधाः मृगावनपशवोद्विजाः पक्षिणश्च यस्मिंस्तत् ।। ७ ।। एवंभूतं तत् वृंदावनं कृष्णोऽविशत् ।। ८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सरिदिति ।। कह्लारः सौगन्धिकपद्मविशेषश्च कञ्जं सामान्यपद्मं च उत्पलं नीलकमलं च तेषां रेणवः परागास्तान् हरतीति तेन, सरितो नद्यश्च सरांसि सरोवराणि च प्रस्रवणान्युत्साश्च तेषां ये ऊर्मयस्तेषां संबन्धी यो वायुस्तेन, 'उत्सः प्रस्रवणम्' इत्यमरः । यत्र पानीयं निपत्य बहुलीभवति तथाभृतं स्थानं प्रस्रवणं, युक्ते इति शेषः । अतिशाद्वलेऽतिशयितहरिततृणाकीर्णे, यत्र वृन्दावने, दिवागीति शेषः । निदाघो ग्रीष्मस्तात्कालिकौ यौ वह्न्यर्कौ ताभ्यां भवः, दवः तापः, वनौकसां वनवासिनां, न विद्यते ।। ५ ।। ननु ग्रीष्मे शाद्वलमेव कुतस्त्यं तत्राह ।। अगाधेति ।। अगाधानि अतलस्पर्शानि यानि तोयानि जलानि यासां ताश्च या ह्रदिन्यस्तरङ्गिण्यस्तासां तटोर्मयस्तटस्पर्शिनस्तरङ्गास्तैर्हेतुभिः, 'तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी इत्यमरः । पुलिनैस्तोयोत्थितस्थानविशेषैः सह, समन्ततः परितः, द्रवत्पुरीषं पङ्को यस्यास्तस्याः, भुवः रसं द्रवं शाद्वलितं शाद्वलरूपतां च, यत्र वृन्दावने, विषोल्बणा विषवदतिक्रूराः चण्डांशुकराः सूर्यरश्मयः अपि, न गृह्णते । यत्रत्यां भुव आर्द्रतां शाद्वलरूपतां च चण्डांशुतीव्रभानवोऽपि न हरन्तीत्यर्थः । आशुतरत्याती विषदृष्टान्तः ।। ६ ।। वनमिति ।। वनमित्यस्याग्रेऽन्वयः । श्रीमत् फलकिसलयादिसमृद्धिमत्, भगवदावासत्वाल्लक्ष्मीवद्वा, कुसुमितंकुसुमितद्रुमं, वृक्षाणां कुसुमिततां वने उपचर्योक्तं, नदन्तः चित्राः मृगा आरण्याः पशवः द्विजाः पक्षिणश्च यस्मिन्, गायन्तः मयुराः भ्रमराश्च यस्मिन्, कूजन्तः कोकिलाः सारसाश्च यस्मिन् ।। ७ ।। क्रीडिष्यमाण इति ।। तत् उक्तविधं वनं, वलसंयुतः बलभद्रेण सहितः, भगवान् कृष्णः, क्रीडिष्यमाणः, वेणुं वंशीं विरणयन्, गोपैः, गोधनैश्च, संवृतः सन्, अविशत् द्वयोरेकसंबन्धः ।। ८ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

क्रीडिष्यमाण इति : १०.१८.८.

यत्तापकारि भुवि सिद्धमतापकारि तच्चेदसंशयमनेन मनीषिणाऽस्मिन् ।
स्वैरं भवे विहरणीयमिति व्यबोधि रन्त्रा तथर्तुमभिवीक्ष्य रमाधवेन ।। ६ ।।

कृष्णप्रिया

जिधर देखिये, हरी-हरी दूब से पृथ्वी हरी-हरी हो रही है। नदी, सरोवर एवं झरनों की लहरों का स्पर्श करके जो वायु चलती थी उसमें लाल-पीले-नीले तुरन्त खिले हुए, देर के खिले हुए कह्लार, उत्पल, आदि अनेकों प्रकार के कमलों का पराग मिला हुआ होता था। इस शीतल, मन्द और सुगन्ध वायु के कारण वनवासियों को गर्मी के किसी प्रकार का क्लेश नहीं सहना पड़ता था। न दावाग्नि का ताप लगता था और न तो सूर्य का घाम ही ॥ ५ ।। नदियों में अगाध जल भरा हुआ था। बड़ी-बड़ी लहरें उनके तटों को चूम जाया करती थीं। वे उनके पुलिनों से टकरातीं और उन्हें स्वच्छ बना जाती थी। उनके कारण आस-पास की भूमि गीली बनी रहती और सूर्य की अत्यन्त उग्र तथा तीखी किरणें भी वहाँ की पृथ्वी और हरी भरी घास को नहीं सुखा सकती थीं, चारों ओर हरियाली छा रही थी ।। ६ ।। उस वन में वृक्षों की पाँत की पाँत फूलों से लद रही थी। जहाँ देखिये वहाँ से सुन्दरता फूट पड़ती थी। कहीं रंग बिरंगे पक्षी चहक रहे हैं, तो कहीं तरह तरह के हरिन चौकड़ी भर रहे हैं। कहीं मोर कूक रहे हैं, तो कहीं भौरे गुंजार कर रहे हैं। कहीं कोयलें कुहक रही हैं, तो कहीं सारस अलग ही अपना अलाप छेड़े हुए हैं ।। ७ ।। ऐसे सुन्दरवन देखकर श्यामसुन्दर श्रीकृष्ण और गौरसुन्दर बलरामजी ने उसमें विहार करने की इच्छा की। आगे-आगे गौएँ चली, पीछे-पीछे ग्वाल-बाल और बीच में अपने बड़े भाई के साथ बाँसुरी बजाते हुए श्रीकृष्ण ।। ८ ।।

प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः । [1]कृष्णरामादयो गोपा ननृतुर्युयुधुर्जगुः ॥ ९ ॥
कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन् । [2]वेणुपाणिदलैः[3] शृङ्गैः प्रशशंसुरथापरे[4] ॥१०॥
गोपजातिप्रतिच्छन्ना[5] देवा गोपालरूपिणः । ईडिरे कृष्णरामौ च नटा इव नटं नृप ॥११॥
भ्रामणैर्लङ्घनैः क्षेपैरास्फोटनविकर्षणैः । चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित्[6] ॥१२॥

कर्दमक्षमा

अन्वयः—प्रवाल-बर्ह-स्तबक-स्रक्-धातु कृतभूषणाः कृष्णराम आदयः गोपाः ननृतुः-युयुधुः जगुः ॥ ९ ॥ कृष्णस्य नृत्यतः केचित् जगुः केचित् वेणुपाणिदलैः शृङ्गैः अवादयन् अथ अपरे प्रशशंसुः ॥ १० ॥ हे नृप नटाः नृपम् इव, गोपजातिप्रतिच्छन्नाः गोपालरूपिणः देवाः कृष्णरामौ ईडिरे च सिषेविरे ॥ ११ ॥ क्वचित् काकपक्षधरौ भ्रामणैः लङ्घनैः क्षेपैः आस्फोटनविकर्षणैः च नियुद्धेन चिक्रीडतुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

काकपक्षाश्चूडाकरणात्प्राक्तनकेशाः । भ्रामणादिप्रकारैर्नियुद्धेन बाहुयुद्धेन एवं क्रीडाभेदैश्चिक्रीडतुः ॥ १२–१३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

धातवो गैरिकादयः स्वर्णादयो वा ॥ ९ ॥ प्रशशंसुः श्लाघयामासुः—अहो ते नृत्यकौशलमिति ॥ १० ॥ देवाः इन्द्रवस्वाद्यंशैरवतीर्णत्वात्तेषाम् । यद्वा—गोपजातिकृष्णसखेषु प्रतिच्छन्ना एव नारदादयो भक्तास्तल्लीलास्वादार्थमिति । यद्वा—श्रीकृष्णोपासनपटलादौ तद्वदुपास्यत्वेन प्रसिद्धा श्रीदामवसुदामादय इति समानमहित्वं व्यंजितम् । गोपालरूपिणमिति नित्ययोगे इनिः ॥ ११ ॥ त्रिवृत्कृतवेणीधारिणौ कर्णाग्रलं बिवकालकाधरौ वा "काकपक्षस्त्रिवृद्वेण्यां मध्यमुंडितकेशके" इति शब्दरत्नाकरे । भ्रामणैः मंडलाकारेण चलनैः । लंघनैः राशीकृतवालुकापुंजोपरि बहूनुल्लंघ्य पतनैः । एकं प्रसारितपादं बालं कराच्छादितनेत्रं कृत्वा तदुपरि लंघनं कृत्वा गच्छति स च को गत इति पृच्छचते यत्र तैर्वा । क्षेपैः आक्षेपवाक्यैः पाषाणगोलकादिप्रक्षेपणैर्वा । आस्फोटनैः एकं हस्तं द्विगुणीकृत्येतरेण पाणिना स्फालनरूपैः, करतलेन भुजमूलाघातैर्वा । नियुद्धेन मल्लयुद्धेन च ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गोपा इति गोपक्रीडाया निजाभीष्टत्वं स्पष्टयन् तत्र च रामकृष्णादय इति परमविदुषोऽपि स्वस्य तदानीमन्यनिर्विशेषतया श्रीरामकृष्णयोर्गोपत्वस्फूर्त्या तयोरपि तदावेशाभिमानौ सम्मन्यमानस्तादृशक्रीडायां परमात्परमानन्दमयत्वं व्यञ्जितवान् अथ तल्लीलावेशादिकमेव व्यञ्जयति—ननृतुरित्यादिना ॥ ९ ॥ तत्र वैदेशिकयोरिव नटवेषेण श्रीदामसभायां सगणमागतयोः श्रीकृष्णरामयोर्मुख्यत्वेन प्रथमतः श्रीकृष्णस्य नृत्यं वर्णयति—कृष्णेति द्वाभ्याम् । अपरे श्रीदामादयः सभापतयः अथ कार्त्स्न्येन साधुसाध्विति प्रशशंसुः एवमन्यतो विशिष्टन्तरस्य नृत्यकौशलमुक्तम् ॥ १० ॥ अथ तत्र श्रीदामादीनां सभापतितया निविष्टानामग्रतः समुत्थाय स्थितानन्यान्नटवेषान् प्रशंसकानपि गोपान् प्रशंसनीयश्रीकृष्णादिवैशिष्टचाय प्रशंसति—गोपेति । देवाः श्रीकृष्णोपासनपटलादौ तद्वदुपास्यत्वेन प्रसिद्धाः इति समानमहिमत्वं व्यञ्जितम् । तर्हि कथं ते तादृशमहिमत्वेन न कैश्चित् प्रतीयन्ते कथं वा भवद्भिः प्रतीयन्ते तत्राह—देवा अपि गोपजात्यैव प्रतिच्छन्नाः गुणादिभिस्तु स्पष्टाः अविवेकिनां यत्किञ्चित् साधारण्येन भ्रान्तिर्भवति नतु विवेकिनां प्रत्युत तादृशेन तादृशलीलौपयिकेन परमगुणाविष्कारेण च चमत्कारातिशय एव स्यादिति भावः । ननु, तेषां गोपजातित्वमेव कुतः ? तत्राह—गोपालरूपिणमिति नित्ययोगे मत्वर्थीयः ततस्तदत्यन्ताभीष्टत्वं तस्य रूपस्य दर्शयित्वा तेषां तदनुरूपत्वमेवानुरूपमिति ध्वनितं एवं समानरूपवेषत्वं च व्यक्तं समानगुणत्वं व्यनक्ति नटा इवेति एवमन्येष्वपि गुणेषु ज्ञेयम् अतः सर्वथा तद्योग्यत्वात् देवयन्ति क्रीडयन्ति देवा इति च श्लेषोक्तिः हे नृपेति नरोत्तमत्वेन भवतैवेदं ज्ञायत एवेति भावः ॥ ११ ॥ अथ नृत्यकौतुकानन्तरं कृतं युद्धकौतुकं वर्णयति—अन्योन्यं हस्तग्रहणादिना भ्रामणैर्लङ्घनैरधो निपात्यारोहणैः क्षेपैः प्रतिविनोदनैः आस्फोटनैः करतलेन भुजमूलाघातैः विकर्षणैः आकर्षणैः नियुद्धेन बाहुयुद्धेन काकपक्षः केशगुम्फितवेणीत्रयमिति केचित् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गोपा इति गोपक्रीडापेक्षया । यद्वा, स्वत एव सदा परमहृष्टत्व वन्यभूषणत्व-नृत्यादि-कौशलयोग्यत्वादिना, तत्र च रामकृष्णादय इति तयोर्गोपक्रीडाभिनिवेशेन केवलगोपत्वाभिमानस्य, किंवा यथा रामकृष्णैः तथान्येऽपीत्यविशेषस्याभिप्रायेण ।

---

[1] रामकृष्णादयो–श्रीधर. वंशी. वीर. विज. । [2] वेणु–विज. । [3] तलैः–श्रीधर. वंशी. वीर. विज. । [4] तथापरे–इति कस्यचित् । [5] प्रतिच्छन्नौ–वीर. ; प्रतिच्छन्ना–श्रीधर. वंशी. विज. जीव. विश्व. ; परिच्छन्नौ–इति कस्यचित् । [6] धरावुभौ–विज. ।

तत्र च रामकृष्णशब्दप्रयोगो नृत्यादिना सर्वेषां रमणचित्ताकर्षणाद्यभिप्रायेण, एवमग्रेऽपि प्राक् ननृतः, हर्षभरेण वाद्यानपेक्षया नर्त्तनाद्वादकानामनुक्तिः, पश्चान्मदोद्रेकेण युयुधुः युयुधिरे, बाहुयुद्धं चक्रुः। तत्र च सर्वेषां बलादिना साम्यात्, किंवा जयिन एव परमहर्षाज्जगुश्च, यद्वा केचिन्ननृतुः, केचिद्युयुधुः, केचिज्जगुः,—वक्ष्यमाणस्य केचिदित्यस्य परामर्शात्, केचिद्वादयंश्चेत्यत्रापि ज्ञेयम्, नृत्ये वाद्यस्यापेक्ष्यत्वात्। एवमादौ नृत्यादिकमेवोक्तम्, परमहृष्टानां तेषां स्वभावत एव प्राक् तत्र प्रवृत्तेः ॥ ९ ॥ तत्र श्रीकृष्णस्य विशेषेण तेषां तत्सन्तोषनैकपरतामाह—कृष्णस्येति । अथ कार्त्स्न्येे, 'साधु साध्विति प्रशशंसुः' इति सम्पूर्णस्य नृत्यस्यात्यन्तसाधुत्वमभिप्रेतम्। एवमन्यतो विशिष्टं तस्य नृत्यकौशलमप्युक्तम् ॥ १० ॥ ननु किंस्वरूपा अमी गोपाः ? इत्यपेक्षायामाह—गोपेति। देवाः श्रीगरुड़ादयः, पार्षदाः केवलं गोपजात्यैव, न तु गुणलीलादिभिः प्रतिच्छन्नाः, यद्वा, गो जातौ प्रतिच्छन्ना लीनाः, अत्यन्तगोपत्वं प्राप्ता इत्यर्थः, इति भगवत इव तेषां माधुर्य्यादिविशेषप्रकटनमभिप्रेतम् । ईड़िरे स्तुत्यादिना क्रीड़यामासुरित्यर्थः, अतएव देवयन्ति क्रीड़यन्तीति देवा इत्युक्तम्, चकारेण रामस्य तत्र गौणता बोध्यते। अतएव पृथक् पश्चात्तस्य निर्द्देशः, नटा नटमेवेति क्रीड़ायां सर्व्वथा तेषां तत्सदृशत्वं सूचितम्। हे नृपेति तच्च भवता नटादिद्वारा ज्ञायत एवेति भावः। यद्वा, तादृशक्रीड़ाकौतुकं दृष्ट्वा भगवदीया देवविशेषा अपि गोपरूपा भूत्वा नभःस्था भूमिष्ठा वा प्रहर्षेण स्तुवन्ति स्मेत्याह—गोपेति। ततश्च रंगे नटानामिव गोपरूपिणं स्तवार्थं तत्र गोपतया साम्याभिप्रायेण नटदृष्टान्तः ॥ ११ ॥ भ्रामणानि यंत्रादीनाम्, अन्योऽन्यं वा हस्तग्रहणादिना, अन्येषां केषाञ्चिद् वा गोपानां तैः क्षेपैः क्षेपणैः कन्दुकादीनां भ्रामणवद्वा, आस्फोटनैः करतलाघातादिभिः, विकर्षणैराकर्षणैः पाशादीनां तद्वद्वा, नियुद्धेन मल्लवद्वाहुयुद्धेन, काकपक्षः केशगुम्फितवेणीत्रयमिति केचिदाहुः, क्वचिदित्यस्य भ्रामणादिभिः सह प्रत्येकमन्वयः। यद्वा, शक्तिविशेषेण युगपदेवान्यालक्षितं तैस्तैश्चिक्रीड़तुरिति पूर्व्ववदैश्वर्य्यं ज्ञेयम्, यद्वा, तैस्तैर्यन्नियुद्धं ततश्च तत्तदर्थोऽग्रे रंगस्थल्यां मल्लयुद्धे व्यक्तो भावि ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः प्रवालादिभिः कृतानि भूषणानि यैः तथाभूताः रामकृष्णादयो गोपा ननृतुर्युयुधुर्मिथो बाहुभिर्जगुश्च ॥ ९ ॥ तत्र कृष्णस्य नृत्यतः सतः केचिद्गोपाः जगुः केचिच्च वेण्वादिभिरवादयन् केचिच्च प्रशशंसुः ॥ १० । गोपजातिप्रतिच्छन्नौ साक्षादीश्वरावतारभूतौ रामकृष्णौ गोपालरूपिणो देवा ईडिरे तुष्टुवुः हे नृप ! नट नटा इव ॥ ११ ॥ भ्रामणादिर्भिर्नियुद्धेन बाहुयुद्धेन काकपक्षधरौ रामकृष्णौ क्वचिच्चिक्रीडतुः काकपक्षाश्चूडाकर्मणः प्राक्तनकेशाः तत्र भ्रामण नाम जिघृक्षतः प्रतिद्वन्द्विजनादात्मानं कौशलेन वञ्चयता परितस्तत्सञ्चारणं लङ्घनमासन्नस्य प्राप्तस्य ग्रहणस्य वञ्चनार्थं लाघवेनेतस्ततो वल्गनं स्वगृहीतस्य भूमौ पातनं क्षेपः करतलमुष्टिभ्यांघातः आस्फोटनं बलपरीक्षार्थमन्योन्यमाकर्षणं विकर्षणम् ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

धातुर्गैरिकः ॥ ९–११ ॥ भ्रामणैः मण्डलाकारेण तित्तिरैर्लङ्घनैर्दशपदान्युत्पतनैः क्षेपैः आक्षेपवचनैः पाषाणक्षेपणैर्वा आस्फोटनैः एकं हस्तं द्विगुणीकृत्येतरेण पाणिना स्फालनानि आस्फोटनानि तैः परस्परैः पाणिना पाणिमवलम्ब्याकर्षणं विकर्षणं नियुद्धेन मल्लयुद्धेन काकपक्षधरौ अकृतचौलकेशधारिणौ त्रिवृत्कृतवेणीधारिणावित्यर्थः ॥ १२–१३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रशंसनीयमहिमद्योतनाय प्रशंसकान् प्रशंसति—गोपेति। गोपाः श्रीकृष्णोपासनपटलादौ तद्वदुपास्यत्वेन प्रसिद्धाः श्रीदामसुदामवसुदामादयः इति समानमहिमत्वं व्यञ्जितं तर्हि कथं कैश्चित्तादृशमहिमत्वेन न ते प्रतीयन्ते, कथं वा भवद्भिः प्रतीयन्ते ? तत्राह—देवा अपि गोपजात्यैव प्रतिच्छन्ना गुणादिभिस्तु स्पष्टाः ननु, तेषां गोपजातित्वं कुतस्तत्राह गोपालरूपिणमिति नित्ययोगे मत्वर्थीयः ततस्तदत्यन्ताभीष्टत्वं तस्य रूपस्य दर्शयित्वा तेषां त्वदनुरूपत्वं दर्शितम् ॥ ११–१५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गोपा इति रामस्यापि गोपाभिमानत्वात् ॥ ९ ॥ कृष्णस्य नृत्यतः कृष्णे नृत्यति सतीत्यर्थः कृष्णोपासकैः भक्तैरुपास्यत्वादागमादिषु तथा प्रसिद्ध्या च देवाः किन्तु गोपजात्या प्रतिच्छन्ना इति तेषां देवानामपि गोपजातित्वमित्यर्थः। यद्वा, गोपजातिषु कृष्णसखेषु मध्ये एव प्रतिच्छन्ना नरवेषेण भवनारदादयो भक्तास्तल्लीलास्वादार्थमित्यर्थः गोपालरूपिणमिति नित्ययोगे इति ॥ १०–११ ॥ आस्फोटनैः करतलेन भुजमूलाघातैः नियुद्धेन बाहुयुद्धेन काकपक्षाश्चूडाकरणात् प्राक्तनाः केशा इति स्वामिचरणाः केशगुम्फितवेणीत्रयमिति केचित् कर्णाग्रलम्बिवक्रालका इत्यन्ये ॥ १२–१३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काकपक्षधरौ चूडाकरणात्प्राक्तनाः केशाः लोके काकपक्षाः प्रसिद्धाः तदाकारतां नीताः "हिरण्यकेशः" इत्यादिश्रुतिप्रसिद्धाः सनातनाः ये केशास्तद्धरौ ॥ १२–१३ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

गोपा इति रामस्यापि गोपत्वाभिमानात् ॥ ९ ॥ तत्र वैदेशिकयोरिव नटवेषेण श्रीदामसदसि सगणमागतयोः श्रीकृष्णरामयोः प्राधान्यादादौ श्रीकृष्णस्य नृत्यमाह—कृष्णस्येति । कृष्णे नृत्यति सतीत्यर्थः । रामेऽपीति च बोध्यम् । वेणुभिः पाणितलैश्च अपरे श्रीदामादयः सदस्पतयः अथ कार्त्स्न्ये प्रशशंसुः कुसुमावतंसादिपारितोषिकञ्च दद्युरिति बोध्यम् ॥ १० ॥ तन्नृत्यदर्शनार्थं शिवनारदादयश्च तत्रागत्य इत्याह—गोपजातिषु कृष्णसखेषु तद्दिवसानागतगोपाकृतिवेषैः प्रतिच्छन्नाः पिहिता देवा गोपालरूपिणं श्रृङ्गवेणुधरं कृष्णं रामञ्च ईडिरे तुष्टुवुः नित्ययोगे इनिः ॥ ११ ॥ अथ युद्धकौतुकमाह—भ्रामणैरिति । मिथो हस्तग्रहादिना भ्रामणैः लङ्घनैरधोनिपात्यारोहणैः क्षेपैः प्रतिलोमविनोदनैः आस्फोटनैः करतलेन भूजमूलाघातैः विकर्षणैराकर्षणैः नियुद्धेन भुजयुद्धेन काकपक्षः केशगुम्फितवेणीत्रयीत्येके कर्णाग्रलम्बिवक्रालका इत्यपरे ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

केचिदवादयन्वेणुं पाणितलैः श्रृङ्गैरवादन्नपरे प्रशशंसुस्तव वादनं समीचीनमित्यस्तुवन् ॥ ९ ॥ नटानटमिव कृष्णरामावीडिरे । नटमित्येकवचनेन बल्के कर्मत एतद्घटनं विघटनं च कृष्ण इति सूचयति ॥ १० ॥ भ्राम्णैरेकस्य हस्तं गृहीत्वैकेन मण्डलाकारेण परिवर्तनानि तैः लङ्घनैः पादनियतोत्प्लवनैः क्षेपैर्गृहीत्वैकं पिण्डीकृत्य प्रक्षेपैरास्फोटनैर्भुजोर्वादिहस्तताडनैर्विकर्षणैराकर्षणैर्नियुद्धेन बाहुयुद्धेन चिक्रीडतुः । उभौ काकपक्षधरौ धरत इति धरौ काकपक्षस्य धरौ । काकपक्षः शिखण्डक इत्यमरः । शिरःपार्श्वद्वयतः कर्णपर्यन्तं धार्यः केशसंवेश इत्यर्थः ॥ ११ ॥ स्वयं रामकृष्णौ ॥ १२ ॥

श्रीसुबोधिनी

सामान्यतः प्रथमतः क्रीडामाह सर्वेषां **प्रवालेति, प्रवाला**नि पल्लवानि **बर्हस्तब**कानि पुष्पगुच्छानि **स्रजः** पुष्पमाला **धातवो** गैरिकादयस्तैः **कृतानि भूषणा**नि यैः, पञ्च**धा हि वनभूषणानी**ति गणितानि, साधारणक्रीडात्वात् **कृष्णरामौ** रामकृष्णौ वादिर्येषां ते **गोपा ननृतुर्म**नोविलासं कृतवन्तः, **ययुधुर्दे**हविलासं **जगुर्वा**ग्विलासम् ॥ ९ ॥ भगवतो लीलामाह **कृष्णस्ये**ति, शिक्षार्थं लोके नृत्यप्रसिद्ध्यर्थं च भगवतो **नृत्यतः** सतो नृत्याङ्गभूते गीतवाद्ये अन्ये कृतवन्तः, **केचिज् जगुः केचिदवादय**न्निति, **वेणुः** श्रुतिपूरकः, **पाणिः** शङ्खवन्नाद करोति, **दला**न्यश्वत्थपत्रादीनि गोमुखवच्छब्दं कुर्वन्ति, **श्रृङ्गाणि** चावादयन्, **अथापरे प्रशशंसु**र्भिन्नप्रकारेण, नृत्यसम्बन्धप्रशंसातः स्वतन्त्रप्रशंसा भिन्ना ॥ १० ॥ नन्वेते कथं प्रशंसादिकं कृतवन्तो ज्ञाने प्रशंसासम्भवाज् ज्ञाने महतो लीलायां प्रशंसानुपपत्तिरित्याशङ्क्याह **गोपजातिप्रतिचछन्ना** इति, यथा भगवान् प्रतिच्छन्न एवं भगवत्सेवका अपि गोपजात्या प्रतिच्छन्ना जाताः, इदानीमेव गोपवेषं कृत्वा समागता इत्याशङ्कां व्यावर्तयति **गोपालरूपिण** इति गोपरूपयुक्तास्तथैवोत्पन्नास्तेष्वाविष्टाश्चातः **कृष्णरामावीडिरे**, तथापि सेवकानां कथमेवं धाष्ट्र्यमत आह **नटा इव नटं नृपेति नटा** हि **स्वामिसेवकभावं परित्यज्यान्योन्यं प्रशंसन्ति** तद्वदित्यर्थः ॥ ११ ॥ पुनर्भगवतो नानाविधक्रीडामाह **भ्रामणै**रिति, **मल्लयुद्धे** ह्येते प्रकाराः, अन्योन्यहस्तस्पर्शनेन भ्रमन्ति हस्तद्वयं धृत्वा वा भ्रामयन्ति, एतद् बालानामपि भवति, **तथोल्लङ्घनानि**, उच्चैर्भूमौ गर्तादिषु च मल्लानां वोलङ्घनं, **क्षेपः** प्रक्षेपः, तिरस्कारादिर्वा, **आस्फोटनं** बाहुस्फोटनं **विकर्षणं** नियमस्थाने बलान्नयनं, एवं **पञ्च**विधा लीला, **चिक्रीडतुः** क्रीडां कृतवन्तौ बाहुयुद्धे, **क्वचित् काकपक्षधरौ** कृतचूडाकरणौ, कियत्कालमेव हि चूडाकरणानन्तरं केशाँस्तत्तद्देशेषु क्वचित्क्वचित् स्थापयन्ति ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

प्रवालेत्यत्र ते सर्वे इति अतद्गुणसंविज्ञानमादाय गोपा एव न तु भगवानित्यर्थः, भगवल्लीला त्वग्रिमश्लोके वक्ष्यत इति भावः ॥ ९ ॥ **कृष्णस्ये**त्यस्याभासे **भगवत** इति ज्ञानस्य प्रशंसायाश्च वाग्विलासमिति पूर्वोक्तत्वेन वादनस्य च देहविलासमिति पूर्वोक्तत्वेन न ते वाक्यार्थभूते किन्तु कृष्णनृत्यमेव वाक्यार्थः, गानवादने तु तदङ्गत्वेन निरूपिते दध्ना जुहोतीतिवदितिभावः, व्याख्याने, **शिक्षार्थ**मिति गोपान् शिक्षयितुमित्यर्थः, **लोके** इति भगवदीयेष्वित्यर्थः, भगवदीया अन्यत्रापि नृत्यं दृष्ट्वा भगवन्तमेव स्मरन्तीतिभावः, **दलैः श्रृङ्गै**रिति तृतीया द्वितीयार्थे व्यत्ययेनेत्याशयेनाहुः **श्रृङ्गाणि चे**ति ॥ १० ॥ **गोपजाती**त्यत्र देवपदेन नित्यलीलास्था गोपा इत्याशयेनाहु**र्भगवत्सेवका** इति, **तेष्वाविष्टा** इति **प्रतिच्छन्ना आविष्टा** इत्यर्थः । **तथापी**ति नित्यलीलास्थत्वेपीत्यर्थः ॥ ११ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधनी

सुवर्णरत्नादिभिर्मातृभिर्भूषिता अपि प्रवालादिभिः कृतानि भूषणानि यैस्तथाभूता रामकृष्णादयो गोपाः ननृतुः, मिथो युयुधुः, जगुश्च ॥ ९ ॥ तत्र श्रीकृष्णस्य मुख्यत्वं सूचयन्नाह–कृष्णस्येति । कृष्णस्य नृत्यतः सतः केचिद्गोपा जगुः । केचिद्वेण्वादीनि

अवादयन् । अपरे च प्रशशंसुः ॥ १० ॥ गोपजातिप्रतिच्छन्ना भगवल्लीलामाधुर्यास्वादनार्थं गोपजातिषु तस्य सखिषु तद्वेषेणावतीर्णा अत एव गोपालरूपिणः देवाः कृष्णरामौ च गोपालरूपिणौ ईडिरे । तत्र दृष्टान्तमाह–नटा इव नटमिति । 'भवता बहुशः स्तुतिप्रस्तावोऽनुभूत एव' इति सम्मतिं सूचयन् सम्बोधयति–नृपेति ॥ ११ ॥ एवं नृत्यं वर्णयित्वा युद्धं वर्णयति–भ्रामणैरिति । काकपक्षाः कर्णाग्रलम्बिवक्रालकास्तद्धरौ क्वचित् । भ्रामणादिभिः नियुद्धेन बाहुयुद्धेन च चिक्रीडतुरित्यन्वयः । परस्परकरग्रहणेन भ्रामणैर्गर्तादिलङ्घनैः, क्षेपैः प्रतिलोमप्रेरणैः, आस्फोटनैः करतलेन भुजमूलाघातैः ॥ १२ ॥

अन्वितार्थप्रकाशिका

प्रवालेति ॥ सुवर्णरत्नादिभिर्मातृभिर्भूषिता अपि प्रवालबर्हस्तबकस्रग्धातुभिः कृतानि भूषणानि यैस्तथाभूता रामकृष्णादयो गोपाः रामस्यापि गोपालनात् गोपत्वाभिमानाद्वा गोपत्वं ननृतुः मिथो युयुधुः । तङभाव आर्षः । जगुश्च ॥ ९ ॥ कृष्णस्येति । नृत्यतः कृष्णस्य अग्रे केचिद्वेणुपाणितलैः शृङ्गैश्च अवादयन् । कर्मणः करणत्वविवक्षा । अथ अपरे च प्रशशंसुः ॥ १० ॥ गोपेति ॥ हे नृपते ! गोपजातिषु भगवता लक्षितेषु प्रतिच्छन्नाः तद्वेषेणावतीर्णाः गोपालरूपिणः देवा नटाः नटमिव कृष्णरामौ गोपालरूपौ कर्मभूतौ ईडिरे । आमभाव आर्षः ॥ ११ ॥ भ्रामणैरिति ॥ काकपक्षाश्चूडाकरणात्प्राक्तनकेशाः कर्णालम्बिवक्रालका वा केशगुम्फितवेणीत्रयमिति केचित् तद्धरौ तौ क्वचित् परस्परकरग्रहणेन भ्रामणैर्गर्तादिलङ्घनैः क्षेपैः आस्फोटनैः करतलेन भूजमूलाघातैः विकर्षणैः नियुद्धेन बाहुयुद्धेन च चिक्रीडतुः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रवालादिभिः कृतभूषणाः ॥ ९ ॥ ताडितैः पाणितलैः शृंगैः शब्दमकुर्वन् ॥ १० ॥ प्रतिच्छन्ना आच्छादिता ॥ ११ ॥ भ्रामणैरन्योन्यं हस्तग्रहादिभिः लंघनैरधोनिपात्यारोहैः क्षेपैः दूरे प्रक्षेपणैः आस्फोटनैः करतलेन बाहु ताडनैश्च काकपक्षधरौ कर्णसमीपे दीर्घकेशधरौ यद्वा चूडाकरणात्प्राक्केशाः काकपक्षाः ॥ १२–१३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रवालेति । प्रवालानि किसलयाश्च बर्हाणि मयूरपिच्छानि च स्तबका गुच्छाश्च स्रजश्च धातवो गैरिकादयश्च तैः कृतानि भूषणानि यैस्तथाभूताः, रामकृष्णादयः गोपाः, ननृतुर्नैकधा नृत्यान्याचरन् । युयुधुः बाहुभिर्मिथोऽयुद्ध्यन्त । जगुर्नानाविधतया गानं चक्रुः ॥९॥ कृष्णस्येति ॥ तत्र कृष्णस्य, नृत्यतः सतः, केचिद्गोपाः जगुरगायन् । केचित् वेणुपाणितलैः, शृङ्गैश्च, अवादयन् । अथ अपरे, प्रशशंसुश्च ॥ १० ॥ गोपेति ॥ गोपजातिप्रतिच्छन्नाः, गोपालरूपिणः, देवाः, हे नृप, नटाः नटम् इव, कृष्णरामौ, ईडिरे तुष्टुवुः । क्वचित्तु गोपजातिप्रतिच्छन्नाविति पाठस्तदैतद्रामकृष्णयोर्विशेषणम् । अयमेव पाठः साधीयानिति प्रतिभाति । कुतः गोपजातिप्रतिच्छन्ना इत्यनेनैव गोपालरूपिण इत्यर्थबोधात् कृष्णरामविशेषणस्यैव युक्तत्वात् ॥ ११ ॥ भ्रामणैरिति ॥ काकपक्षधरौ रामकृष्णौ, क्वचित् भ्रामणैः, लङ्घनैः, क्षेपैः, आस्फोटनानि च विकर्षणानि च तैः, नियुद्धेन च, चिक्रीडतुः । तत्र भ्रामणं नाम प्रतिद्वन्द्विजनादात्मानं कौशलेन वञ्चयता परितस्तत्संचारणं, लङ्घनमासन्नस्यात्मग्रहणस्य वञ्चनार्थं लाघवेनेतस्ततो वल्गनं, क्षेपो नाम गृहीतस्य भूमौ पातन, स्फोटनं नाम करतलैर्भुजयोराघातः, विकर्षणं नाम वल्गनपरीक्षार्थमन्योन्याकर्षणं, केचित्तु भ्रामणैर्मण्डलाकारेण परिभ्रामणैः, लङ्घनैर्दशपदान्युत्पतनैः, क्षेपैराक्षेपवचनैः, पाषाणक्षेपैर्वा । आस्फोटनैः एकं हस्तं द्विगुणीकृत्येतरेण पाणिना स्फालनैः, विकर्षणानि परस्परपाण्यवलम्बनपूर्वं समाकर्षणानि तैरित्याहुः । गोपालानन्दस्वामिचरणास्तु भ्रामणैरन्योन्यं हस्तग्राहादिभिः, लङ्घनैरधो निपात्यारोहैः, क्षेपैर्दूरे प्रक्षेपणैः, आस्फोटनैः करतलेन बाहुताडनैः, विकर्षणैराकर्षणैरित्याहुः ॥१२॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

काकपक्षधराविति १०.१८.१२.

हंसपक्षाश्रितेनापि काकपक्षावलम्बनात् । व्यक्तीकृतमिहेशेन सर्वेषु समदर्शनम् ॥ ७ ॥

कृष्णप्रिया

राम, श्याम और ग्वालबालों ने नव पल्लवों, मोरपंख के गुच्छों, सुन्दर सुन्दर पुष्पों के हारों और गेरु आदि रंगीन धातुओं से अपने को भाँति-भाँति से सजा लिया। फिर कोई आनन्द में मग्न होकर नाचने लगा, तो कोई ताल ठोंककर कुश्ती लड़ने लगा और किसी-किसी ने राग अलापना शुरू कर दिया ॥ ९ ॥ जिस समय श्रीकृष्ण नाचने लगते, उस समय कुछ ग्वालबाल गाने लगते और कुछ बाँसुरी तथा सींग बजाने लगते । कुछ हथेली से ही ताल देते, तो कुछ 'वाह–वाह' करने लगते ॥ १० ॥ परीक्षित्, उस समय नट जैसे अपने नायक की प्रशंसा करते हैं, वैसे ही देवतालोग ग्वालबालों का रूप धारण करके वहाँ आते

और गोपजाति में जन्म लेकर छिपे हुए बलराम और श्रीकृष्ण की स्तुति करने लगते ॥ ११ ॥ घुँघराली अलकों वाले श्याम और बलराम कभी एक दूसरे का हाथ पकड़कर कुम्हार के चाक की तरह चक्कर काटते घुमरी-परेता खेलते कभी एक दूसरे से अधिक फाँद जाने की इच्छा से कूदते कूँड़ी डाकते, कभी कहीं होड़ लगाकर ढेले फेंकते तो कभी ताल ठोंक ठोंककर रस्साकसी करते एक दल दूसरे दलके विपरीत रस्सी पकड़कर खींचता और कभी कहीं एक दूसरे से कुश्ती लड़ते लड़ाते । इस प्रकार तरह-तरह के खेल खेलते ॥ १२ ॥

क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्वयम् । शशंसतुर्महाराज साधु साध्विति वादिनौ ॥ १३ ॥
क्वचिद् बिल्वैः क्वचित् कुम्भैः क्व चामलकमुष्टिभिः[1] । [2]अस्पृश्यनेत्रबन्धाद्यैः क्वचिन्मृगखगेहया ॥ १४ ॥
क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः । [3]कदाचित् स्पन्दोलिकया कर्हिचिन्नृपचेष्टया ॥ १५ ॥
एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने । नद्यद्रिद्रोणिकुञ्जेषु काननेषु [4]सरित्सु च ॥ १६ ॥

कर्दमक्षमा

अन्वयः—महाराज क्वचित् अन्येषु नृत्यत्सु स्वयम् गायकौ वादकौ च साधु साधु इति वादिनौ प्रशंसतुः ॥ १३ ॥ क्वचित् बिल्वैः, क्वचित् कुम्भैः, च क्व च आमलकमुष्टिभिः, क्व च अस्पृश्य क्वच नेत्रबन्धाद्यैः क्वचित् मृगखगेहया चिक्रीडतुः ।१४। क्वचित् दर्दुरप्लावैः, च विविधैः उपहासकैः, कदाचित् स्पन्दोलिकया, क्वचित् नृपचेष्टया चिक्रीडतुः ॥ १५ ॥ एवम् तौ लोकसिद्धाभिः क्रीडाभिः नदी अद्रि द्रोणि कुञ्जेषु काननेषु च सरित्सु वने चेरतुः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कुंभैः कुंभवृक्षफलैः । अस्पृश्यत्वं नेत्रबंधश्च तदाद्यैः । मृगाणां खगानां च चेष्टया ॥ ४० ॥ दर्दुरप्लावैर्मंडूकप्लुतिभिः । स्पंदोलिकया दोलालंबनेन नृपाणामिव लीलया ॥ १५ ॥ नद्योऽद्रिद्रोणयः कुंजानि च एतेषु ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वयम् रामकृष्णाविवत्यर्थः ॥ १३ ॥ "कुंभोलूखलके क्लीबे कौशिको गुग्गुलुः पुमान्" इत्यमरः । वर्तुलं कुंभफलम् । पृष्ठतो धावनात्स्प्रष्टुमप्यशक्यं त्वं मां स्पृशेत्युक्त्वा पुरतो लीलया धावति यत्र तद् स्पृश्यक्रीडनम् । वस्त्रेण नेत्रमाच्छाद्य मां स्पृशेति निगद्य तं मुक्त्वा पुरतो भ्रमणं नेत्रबंधलीला । दूरांतरप्रदेशे स्थितं वृक्षं लक्ष्यीकृत्योभाभ्यां प्राग्वृक्षस्पर्शी विजयी स्यादिति क्रीडा धावनसंज्ञेत्याद्यपदाद्ग्राह्या । स्पर्शस्यादित्सा चिकीर्षाभ्यां या क्रीडा, तत्र स्प्रष्टुर्जयोऽस्प्रष्टुः पराजयः, अलक्षितमेव पृष्ठदेशमासाद्य पाणिभ्यां नेत्रबंधकम्, परिचेतुर्जयोऽन्यथा पराजयः । सर्वत्र जयपराययोर्मुरलीवेत्रादिरेव ग्लहः ॥ १४ ॥ कदाचित् श्रावणशुक्लतृतीयामारभ्येत्यर्थः । नृपचेष्टया दानघट्टे नृपस्येव चेष्टा घट्टकरजिवृक्षया व्रजबालानिरोधस्तया । उपहासकैः—शृणु भो अहं ते पितास्मि त्वं श्यालोसीत्येवमाकारकैर्हास्यजनकैर्वचनैः ॥ १५ ॥ एवम् उक्तविधया । तौ रामकृष्णौ । द्रोणी निम्नसानुस्थलम् । यद्वा द्रोण्योऽद्रिसंधयः "काष्ठागारेंबुवाहिन्यां शैलसंधौ च योषिति । द्रोणी न स्त्री मानभेदे द्रोणः काके कृपापतौ ॥" इति त्रिकांडशेषात् । अंतर्लतानिबद्धो मंडपः कुंजः "निकुंज कुंजौ वा क्लीबे लतादिपिहितोदरे" इत्यमरः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ नियुद्धश्रमानन्तरं कौतुकेन स्वयं नाट्यगुरूपमाणाभ्यां गानादिकमपि कुर्वद्भ्यां श्रीरामकृष्णाभ्यां प्रशस्यमानानामन्येषामपि नृत्यमाह—क्वचिति । चकारः पूर्वोक्तश्रीकृष्णनृत्यापेक्षया साधुसाध्विति वादिनौ सन्तौ शशंसतुः तत्तद्गतिविशेषं विशिष्य श्लाघां चक्रतुः एवं निर्भरक्रीडारसो दर्शितः महाराज ! हे राजवर्गमध्ये श्रीकृष्णभक्तिविशेषेण परमश्रेष्ठेति भवानेवेदं श्रोतुमर्हतीति भावः । एवं नृत्यमिश्रगानानुमारेण क्रमप्राप्तं तदमिश्रगानमप्यूह्यमिति प्रकरणाभिप्रायः ॥ १३ ॥ अन्या अपि युद्धादिविचित्रलीलाः सङ्गृह्णाति–क्वचिदिति त्रिकेण । बिल्वादिभिः कृत्वा याः क्रीडास्ताभिश्चेरतुः एवं लोकसिद्धाभिरन्याभिश्च क्रीडाभिश्चेरतुरित्यन्वयः ॥ १४ ॥ उपहासकैर्हास्यजनकैः विचित्रानुकरणादिभिः क्वचिदिति द्विरावर्त्तनीयं नृपचेष्टया गिरिशिलासिंहासनासनकौसुमच्छत्रचामरादिपरिच्छदत्वपात्रपुरःसरत्वादिमय्या ॥१५॥ नद्यः अद्रयः द्रोण्यश्चाद्रिसन्धयः "काष्ठागारेऽम्बुवाहिन्यां शैलसन्धौ च योषिति । द्रोणी न स्त्रीमानभेदे द्रोणः काके कृपीपतौ" इति त्रिकाण्डशेषात् वने श्रीवृन्दावने काननेषु तदन्तर्गतेषु काम्यकवनादिषु तत्र तयोर्विहारो वेषविशेषश्चोक्तः श्रीहरिवंशे—

---

[1] शुक्तिभिः–वीर. । [2] आस्पृश्य–इति कस्यचित् । [3] क्वचित्तथान्दो-विज. ; कदाचिदान्दो–वीर. । [4] सरस्सु–श्रीधर, वंशी, वीर, विज. ।

"चारयन्तौ विवृद्धानि गोधनानि शुभाननौ । स्फीतशष्पप्ररूढानि वीक्ष्यमाणौ वनानि च ॥
क्ष्वेडयन्तौ प्रगायन्त्यौ विचिन्वन्तौ च पादपान् । नामभिर्व्याहरन्तौ च सवत्सा गाः परन्तपौ ॥
निर्योगपाशैरासक्तैः स्कन्धाभ्यां शुभलक्षणौ । वनमालाकुलोरस्कौ बालशृङ्गाविवर्षभौ ॥
सुवर्णाञ्जनवर्णाभ्यामन्योन्यसदृशाम्बरौ । महेन्द्रायुधसंसक्तौ कृष्णशुक्लाविवाम्बुदौ ॥
कुशाग्रकुसुमानां च कर्णपूरं मनोहरम् । वनमार्गेषु कुर्वाणौ वन्यवेषधरावुभौ" ॥ इति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पूर्व्वं गोपानां श्रीकृष्णसन्तोषणपरतोक्ता, इदानीं तयोस्तत्सन्तोषणपरतामाह—क्वचिदिति; स्वयं स्वेच्छयैवेत्यर्थः । एवं निर्भरक्रीडारसो दर्शितः । महाराज हे राजवर्गमध्ये श्रीकृष्णभक्तिविशेषेण परमश्रेष्ठेत्यर्थः । अतः परमाद्भुतं तस्य दृशं भक्तवात्सल्यं भवानेव श्रोतुमर्हतीति भावः ॥१३॥ आद्यशब्दात् निलायनसेतुबन्धादयो द्युतकुक्कुटयुद्धादयश्च, तथा मध्याह्ने श्रीभगवतो विश्राम-समये गोरसविक्रयणादिच्छालेनानतिदूरे सगीतं व्रजन्तीनां श्रीवल्लवीनां वर्त्मराधनदध्यादिकहरणं नौकयोत्तारणादिकञ्चेत्यादि-लोकप्रसिद्धा ज्ञेयाः ॥ १४ ॥ उपहासकैर्हास्यजनकैर्विचित्रबहुरूपधारणविविधानुकरणादिभिर्लोकेषु प्रसिद्धाभिर्वर्त्तमानाभिर्वा, यावत्यो लोकेषु सन्ति, ताभिरेव सर्वाभिरित्यतः किं तत्तत्सज्ज्ञादिविशेषवर्णनेनेति भावः । वने श्रीवृन्दावने, काननेषु तदितरेषु तदन्तर्गतेषु वा काम्यकरनादिषु, तत्र तयोर्विहारवेशविशेषश्चोक्तः श्रीहरिवंशे (विष्णु० प० १४।२–६)—

"चारयन्तौ विवृद्धानि गोधनानि शुभानि च । स्फीतशस्यप्ररूढानि वीक्षमाणौ वनानि च ॥
क्ष्वेडयन्तौ प्रगायन्तौ प्रचिन्वन्तौ च पादपान् । नामभिर्व्याहरन्तौ च सवत्सा गाः परन्तपौ ॥
निर्योगपाशैरासक्तैः स्कन्धाभ्यां शुभलक्षणौ । वनमालाकुलोरस्कौ बालशृंगाविवर्षभौ ॥
सुवर्णाञ्जनचूर्णाभावन्योन्यसदृशाम्बरौ । महेन्द्रायुधसंसक्तौ कृष्णशुक्लादिवाम्बुदौ ॥
कुशाग्रकुसुमानाञ्च कर्णपूरौ मनोरमौ । बनमार्गेषु कुर्वाणौ वन्यवेशधरावुभौ ॥ इति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

क्वचिदन्येषु गोपेषु नृत्यत्सु सत्सु स्वयं गायकौ वादकौ च भूत्वा हे महाराज ! साधुसाध्विति वदन्तौ सन्तौ प्रशशंसतुः ॥ १३ ॥ क्वचिद्बिल्वादिभिरित्येवं लोकप्रसिद्धाभिर्बालक्रीडाभिः रामकृष्णौ विचेरतुः सञ्चरितवन्तौ इति त्रयाणामन्वयः । कुम्भो नाम वृक्षविशेषस्तस्य फलैः गुच्छैरिति पाठान्तरम् आमलकैः शुक्तिभिः कालिन्दीपुलिनगतमुक्तास्फोटैश्च अस्पृश्यम् आवां मिथो न स्पृश्यौ इति भाषाबन्धनेन तदनुकूलं कर्म नेत्रबन्ध आगमिष्यतो नामकथनार्थं पाणिभ्यां कस्यचिन्नेत्रप्रच्छादनं मृगाणां खगानां चेहया तत्सजातीयचेष्टया ॥ १४ ॥ दर्दुरप्लावैः मण्डूकप्लुतिभिरुपहासकैः परिहासकवाक्यैः आन्दोलिकया तदाकारदाला-लम्बनेन नृपाणामिव लीलया च ॥ १५ ॥ नद्यादिषु रामकृष्णयोर्गोपैः सह पशूंश्चारयतोः गोपरूपी प्रलम्बो ऽगादित्युत्तरेणान्वयः । द्रोणः पर्वतसन्धिप्रदेशः तज्जिघांसया रामकृष्णहननेच्छया ॥ १६–१७ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कुम्भैः कुम्भफलैः वर्तुलाकारैः "कुम्भोलूखलके क्लीबे कौशिको गुग्गुलः पुमान्" इत्यमरः । पृष्ठतो धावनात्स्प्रष्टुमशक्यं त्वं मां स्पृशेत्युक्त्वा पुरतो लोलया धावतीति यत्तादिदमस्पृश्यक्रीडनं वस्त्रेण नेत्रमाच्छाद्य मां स्पृशेति निगद्य तं मुक्त्वा पुरतो भ्रमणं नेत्रबन्धलीला दूरान्तरप्रदेशे स्थितं वृक्षं लक्षीकृत्योभाभ्यां प्राग्वृक्षस्य स्पर्शी विजयी स्यादितीयं क्रीडा धावनसंज्ञेत्यादिकमादिपद-गृहीतम् ॥ १४ ॥ दर्दुरप्लावैः मण्डूकवदुत्पतनैः ॥ १५ ॥ द्रोणो निम्नसानुस्थलं अन्तर्लतानिविडो ह्रस्वादिकुञ्चः "निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे" इत्यमरः ॥ १६–१८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

द्रोण्यश्चाद्रिसन्धयः ह्रस्वान्तत्वं विचार्य काननेषु अन्तर्वनेषु ॥ १६–२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

क्वचिद्बिल्वैरिति निःक्षिप्यमाणयोर्बिल्वफलयोः परस्पराघातः एवं कुम्भैः कुम्भवृक्षफलैः अस्पृश्येति स्पर्शस्य अदित्साचिकीर्षाभ्यां क्रीडा तत्र स्पर्शकर्तुर्जयः स्पर्शकर्मणः पराजयः अलक्षितमेव पृष्टदेशमासाद्य पाणितलाभ्यां नेत्रबन्धकं परिचिनोति चेत् पराजयः सर्वत्र जयपराजययोर्मुरलीवेत्रादिरेव ग्लहः खगमृगेहयेति खगाद्याकृतिमतां मिथो युद्धकूजितादिकं कदाचित् श्रावणशुक्ल-तृतीयामारभ्य स्पन्दोलिकया दोलान्दोलनेन नृपचेष्टया दानघट्टप्रदेशे नृपस्येव चेष्टाघट्टकरजिघृक्षया व्रजबालानिरोधस्तया द्रोण्य-श्चाद्रिसन्धयः ॥ १४–१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कुम्भैः कुम्भवृक्षफलैः ॥ १४–१६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अथ नियुद्धानन्तरमुपविष्टाभ्यां कौतुकेन स्वयं नाट्याचार्यायमाणाभ्यां गानादिकञ्च कुर्वद्भ्यां श्रीरामकृष्णाभ्यां प्रवेश्यमानानां श्रीदामादीनां नृत्यमाह—क्वचिदिति । शशंशतुरिति रत्नहारादिकञ्च ददतुरिति बोध्यम् ॥ १३ ॥ अन्याश्च युद्धादिलीला संगृह्णाति क्वचिदिति त्रिभिः । क्षिप्यमाणयोर्बिल्वफलयोरन्योन्याघातोऽयमाहवः एवं कुम्भैः कुम्भतरुफलैः अस्पृश्येति स्पर्शादित्साचिकीर्षाभ्यां क्रीडैकास्पर्शकर्त्तुं कर्मणोः क्रमेण जयपराजयौ नेत्रबन्धेति अलक्षितमेव पृष्ठदेशमासाद्य करतलाभ्यां नेत्रपिधानमेका क्रीड़ा पिधानकर्त्तुः परिचये पराजयः सर्वत्र जयपराजययोर्वेणुवेत्रादिरेव ग्रहः क्वचित् खगेति खगाद्याकृतिमतां मिथो युद्धकूजितादिरूपैका क्रीड़ा चिक्रीड़तुरिति सम्बन्धः एवं परत्र ॥ १४ ॥ दर्दुराणामिव प्लावैर्निर्झराणां कूर्दनैः उपहासकैर्हास्यजनकैः विचित्रानुकरणादिभिः कदाचित् श्रावणशुक्लतृतीयामारभ्य स्पन्दोलिकया दोलान्दोलनेन नृपचेष्टया गिरिशिलासिंहासनाधिष्ठानकौसुमच्छत्रचामरादिपरिच्छदत्वं पात्रपुरःसरत्वादिरूपया ॥ १५ ॥ अद्रीणां द्रोण्यः सन्धयः एषा लीला सर्वेश्वरस्य हरेः स्वसमानगुणैर्भक्तैः सह माधुर्यप्रधानायां वृन्दाटव्यां प्रादुर्भवन्ती परितोषैकहेतुर्वैकुण्ठादिधामस्वैश्वर्यप्रधानेषु तु दुर्लभा निखिलोर्वीपतेरुग्रशासनस्यापि क्वचिदतिरम्ये विजने पञ्चषैर्मित्रै सहोच्चावचाक्रीड़ातिसुखैकहेतुर्दृश्यते अन्यथाङ्गेषु जीर्यमाणाः कला वैमनस्याय स्युः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कुम्भैर्वर्तुलाकारफलवान् गुग्गुलवृक्षः । कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलः पुमानित्यमरः । कुम्भेति सङ्घातविगृहीतकार्मुके वारतार्यां च कुम्भः । क्लीबं तु गुग्गुलाविति रभसः । उलूखले गुग्गुलौ च क्लीबं कुम्भमुलूखलमिति रुद्रः । कुम्भोलूखलकं कुम्भकुम्भोलूखलकं वरमिति वाचस्पतिः । क्वच क्वाप्यामलकमुष्टिभिरामलकपूर्णषष्टिभिरस्पृश्यनेत्रबन्धाद्यैः पृष्ठतोऽनुगतोऽस्पृश्यं मां स्पृशेति समयबन्धं कृत्वा पुरोगमनक्रीडया स्पृश्येत्येकदेशोक्त्या ग्राह्यः । नेत्राच्छादनादिपदेन हस्तप्रतित्याजनादिकं ग्राह्यम् । क्वापि मृगखगेहया तच्चेष्टया ॥१३॥ दर्दुरप्लावैर्मण्डूकप्लवनैर्मर्कटमुखवन्मुखविकसनादिभिरान्दोलिकया परस्परं द्वयोर्बाह्वोः प्रसरणकृतान्दोलिकया नृपचेष्टयाऽहं नृपो भवानि त्वं ममात्यो भवेत्यादिव्यापारेण ययातिशापेन भूपतित्वाभावादिदमपदेशेन किञ्चित्तत्सुखमनुभविष्याव इति लीलामेलतां लालयामासुरिति भावः ॥ १४ ॥ लोकसिद्धाभिः क्रीडाभिर्नद्यश्चाद्रयश्च द्रोणयः काष्ठाम्बुवाहिन्यः । द्रोणी काष्ठाम्बुवाहिनीति विश्वः । ङ्यापोः संज्ञाछन्दसोरिति ह्रस्वः । कुञ्जो गुल्मविशेषो लतापिहितस्थानं । निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदर इत्यमरः । चेरतुः ॥ १५ ॥ इदानीं शेषोऽशेषबलत्वे जातः । किञ्चिच्चकार स्मृतहरिचरणः परिचरमिति वक्तुमुपक्रमते ॥ पशूनिति । तज्जिघांसया तयोर्जिघांसा हननेच्छा तया ॥ १६ ॥

श्रीसुबोधिनी

एवं भगवतो नृत्यमुक्त्वा भगवत्सन्निधानेन्येषां नृत्यमाह **क्वचिन्नृत्यत्स्विति, अन्येषु नृत्यत्सु** सत्सु **स्वयं गायकौ वादकौ च, च**कारादन्येषु गायकेषु स्वयं वादकावन्येषु वादकेषु स्वयं गायकाविति, किञ्च स्वयमेव **शशंसतु**र्यदान्यप्रेरणयापि **साधुसाध्विति वादिनौ** क्वचिद् भवतः क्वचिद् **विशेषेण** शंसतः स्तोत्रं कुरुतः क्वचिद् विशेषेणानुशासनं वा ॥ १३ ॥ **एवं** शास्त्रानुसारिलीलामुक्त्वा केवलबालकसम्प्रदायप्रसिद्धां लीलामाह **क्वचिद् बिल्वैरि**ति, **बिल्वफलानां** क्रीडा कन्दुकवत् क्षेपणरूपा, **कुम्भ**फलानि सूक्ष्माणि, ततस्तैः क्रीडा लाक्षासूमपिण्डवत् सूक्ष्माण्या**मलका**नि. **मुष्टि**भ्रामणक्रीडया **क्रीडनं, अस्पृश्य** क्रीडा, कपर्दिकेति प्रसिद्धा वरवर्तिकेति च, **नेत्रबन्ध**क्रीडाक्षिमुद्रिकेति प्रसिद्धा, आदिशब्देन निलायनक्रीडामग्रे वक्ष्यति, आरोहक्रीडैकपदक्रीडा च, तथा काष्ठखण्डैस्तथाकपालैर्जलस्थलयो **क्वचिद्ध**रिणक्रीडा हरिणाकृति विधाय नृत्यं कुर्वन्ति, **खगवन्** मयूरादिकवदिहानेकविधा ॥ १४ ॥ एवं स्थललीलामुक्त्वा जले प्रकारविशेषलीलामाह **क्वचिच्चे**ति, क्वचित् **दर्दु**रवद् भेकवत् प्लवनं कुर्वन्ति मध्ये ह्रदस्य प्लवस्य, "निगृह्य चतुरः पद" इतिश्रुतेः, निरन्तरमुत्प्लुत्य गमनं, तच्चातिकठिनं नेदानीं बालकेषु प्रसिद्धं, उत्प्लवाश्चोल्लङ्घनानि च, अतो **विविधै**रित्युभयत्र सम्बध्यते, **उपहास**कान्युपहासवचनानि चेष्टाश्च, **कदाचिद्** भगवान् राजा भवति तदा **दोला**मारुह्य गच्छति केचन वाहकाः केचन दोलारूपा एव भवन्ति, **स्पन्दोलिका** दोला **स्पन्द**नरूपा **दोलिका** वा, वृषभाविवाग्रे द्वौ भवतः प्रसारितबाहुपरो मध्ये बद्धहस्ताश्चत्वारः पश्चात् सर्वे सम्बद्धा भगवन्तं नयन्ति सा **स्पन्दोलिका कदाचित्** पुनर्नृ**पचेष्टया** क्रीडति, क्वचिदुपविश्य सिंहासनेक्षादिभिश्च क्रीडत्याज्ञापयति बध्नाति दण्डयति वा ॥ १५ ॥ एवं क्रीडामुक्त्वोपसंह**रत्येवं ता**विति, अत्र प्रमाणं **लोक** एव, एताः **क्रीडा वन** एव काश्चन क्रीडा **नद्यामद्रावद्रिद्रोणीषु**, उभयतः पर्वता मध्ये निम्ना भूमि**र्द्रोणी**, तथा **नद्या**मपि भवति, **कुञ्जा**नि तृणसहितानि गह्वरस्थानानि **कानना**नि निबिडवनानि, **सरितः** क्षुद्रनद्यः, चकारात् सरस्सु **च**, एवं सर्वलौकिकभावान् बालकानां निवारयन्नन्तःकरणदोषान् निवारितवान्, यावत् तासु स्वयं न प्रविशति तावत् ताः केवला एव स्मृता भवन्ति न भगवद्विशिष्टा भगवत्स्मारिका वा, अतो **बालकानां प्रपञ्चविस्मरणार्थं सर्वकर्मसु स्वयं प्रविष्टः** ॥ १६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

एवं तावित्यत्र तथा नद्यामपीत्यस्मिन् पक्षे **नद्यद्रोर्द्रोणी**ष्वित्येवं समासः, **तस्वा**ति क्रीडासु, **संस्काररूपा**निति **येभंग**वदतिरिक्तं स्मार्यंते तान् ।। १६ ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एवं तावित्यत्र **अत्र प्रमाण**मिति एतावल्लीलाज्ञानजनका लोका एवेत्यर्थः ।। १६ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

क्वचिदन्येषु गोपेषु नृत्यत्सु सत्सु स्वयं गायकौ वादकौ च भूत्वा हे महाराज ! 'साधु साधु' इति वादिनौ सन्तौ प्रशशंसतुः ।।१३।। क्वचिद्विल्वैर्बिल्वफलैः, कुम्भैः कुम्भवृक्षफलैः, आमलकफलपूर्णैर्मुष्टिभिः । एषां फलानां यंत्र मुष्ट्यादिना प्रक्षेपणक्रीडा बोध्या । तृतीयान्तैः पदैः 'सर्वत्र चिक्रीडतुः' इत्यस्यानुषङ्गेण सम्बन्धो बोध्यः ।। अस्पृश्यनेत्रबन्धाद्यैः इति । स्वयं द्वौ मुख्यौ अन्यस्य नेत्रपिधानकर्तारौ, ततोऽन्ये निलीयस्थिता भवन्तु । तत्रोद्घाटितनेत्रेणास्पृष्टा एव ये रामं कृष्णं वा मुख्यं स्पृशन्ति तेषां न पराजयः, यस्तु तेन स्पृष्टस्तस्य पराजयः, यः स्पृशति तस्य जय एवंविधाभिरित्यर्थः । मृगाणां खगानां चेहया चेष्टया ।। १४ ।। दर्दुरप्लावैर्मण्डूकप्लुतिभिः । विविधैरुपहासकैः उपहासजनकविचित्रानुकरणैः । स्पन्दोलिकया दोलायामारोहणेन । नृपचेष्टया सिंहासने उपविश्य राजवद्दण्डाद्याज्ञापनलीलया ।। १५ ।। लीलान्तरं वक्तुमुक्तां लीलामुपसंहरति—एवमिति । एवं लोकसिद्धाभिः क्रीडाभिस्तौ रामकृष्णौ वनादिषु चेरतुरित्यन्वयः । द्रोणी उभयतः पर्वतमध्ये निम्ना भूमिः । कुञ्जानि लतापिहितगह्वरस्थानानि । यद्येवं वनादिषु सर्वत्र भगवान् क्रीडा न कुर्यात्तदा तेषां भगवत्स्मारकत्व न स्यात् । अतः स्मरणार्थं सर्वत्र क्रीडाः कृताः । तत्स्मरणस्य परमपुरुषार्थहेतुत्वात् ।। अत एव पुनः स्मारयन्ति । 'नन्दगोपसुतं बत' इत्यादौ स्मारकत्वमुक्तम् ।। १६ ।।

अन्वितार्थप्रकाशिका

क्वचिदिति ।। हे महाराज ! क्वचिदन्येषु गोपेषु नृत्यत्सु सत्सु स्वयं गायकौ वादकौ च भूत्वा साधु साध्विति वादिनौ सन्तौ शशंसतुः ।। १३ ।। क्वचिदिति ।। क्वचिद्बिल्वैर्बिल्वफलैः क्वचित् कुम्भैः कुम्भवृक्षफलैः क्व च क्वचित् आमलकफलपूर्णमुष्टिभिश्चिक्रीडतुः । एषां फलानां यन्त्र मुष्ट्यादिना प्रक्षेपेण क्रीडा । प्रक्षिप्यमाणफलयोर्मिथ आघातश्च अस्पृश्यनेत्रबन्धाद्यैरिति स्पर्शस्य अदित्साचिकीर्षभ्यां क्रीडा । तत्र स्पर्शकर्तुर्जयः स्पृष्टस्य पराजयः इत्यस्पृश्यत्वक्रीडा । अलक्षितमेव पृष्ठदेशमासाद्य पाणितलाभ्यां नेत्रबन्धकं परिचिनोति चेत् परिचितस्य पराजयः इति नेत्रबन्धकक्रीडा । केचित्तु स्वयं द्वौ मुख्यौ अन्यस्य नेत्रपिधानकर्तारौ ततोऽन्ये निलीय स्थिता भवन्ति । तत्रोद्घाटितनेत्रेणास्पृष्टा एव ये रामं कृष्णं वा मुख्यं स्पृशन्ति तेषां न पराजयः । यस्तु तेन स्पृष्टस्तस्य पराजयः यः स्पृशति तस्य जय इत्याहुः । एवंविधाभिः क्रीडाभिश्चिक्रीडतुः सर्वत्र जयपराजये मुरलीवेत्रादिग्लहैः क्वचिन्मृगाणां खगानां च ईहया चेष्टया चिक्रीडतुः ।। १४ ।। क्वचिच्चेति ।। क्वचिच्च दर्दुरप्लावैर्मण्डूकप्लुतिभिः विविधैरुपहासकैः उपहासजनकविचित्रानुकरणैः कदाचित् स्पन्दोलिकया दोलायामारोहणेन कर्हिचित् नृपलीलया चेष्टयेत्यपि पाठः । सिंहासने उपविश्य राजवद्दण्डाद्याज्ञापनलीलया चिक्रीडतुः ।। १५ ।। एवमिति ।। एवं तौ रामकृष्णौ लोकसिद्धाभिः क्रीडाभिः नद्यद्रिद्रोणिकुञ्जेषु काननेषु सरःसु च वने च चेरतुः । द्रोणी उभयतः पर्वतमध्ये निम्ना भूमिः । पर्वतसन्धिरित्यप्याहुः । कुञ्जानि लतापिहितगह्वरस्थानानि ।। १६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कुंभैः कुंभतरुफलैः अस्पृश्यत्वं नेत्रबंधश्च तत्प्रभृतिभिः ।। १४ ।। दर्दुराणां मंडुकानां प्लावैरुत्प्लवनैः उपहासकैर्हास्यजनकवाक्यादिभिः स्पंदोलिकया दोलालंबनेन भाषाया हिंदोलेति प्रसिद्धिः नृपचेष्टया नृपसेव्यानां सिंहासनछत्रचामरादीनां ग्रहणेन नृपवच्चेष्टया चेरतुरिति सर्वत्रान्वेति ।। १५ ।। लोके सिद्धाभिः प्रसिद्धाभिः नद्यां अद्रौ द्रोणिषु तद्गुहासु कुंजेषु लतागृहेषु च काननेषु वृंदावनांतर्गतकुशकाशनाधवनेषु ।। १६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

क्वचिदिति ।। क्वचित् अन्येषु गोपेषु नृत्यत्सु सत्सु, स्वयं गायकौ, वादकौ च भूत्वा, हे महाराज, साधु साधु, इत्येवं, वादिनौ वदन्तौ सन्तौ, शशंसतुः तत्प्रशंसां चक्रतुः ।। १३ ।। क्वचिदिति ।। क्वचित् विल्वैः, क्वचित् कुम्भैः गुग्गुलुद्रुमफलैः, 'कार्मुके वारनार्यां च कुम्भः क्लीबे तु गुग्गुलौ' इति रभसः । क्व च कुत्रचित्, आमलकमुष्टिभिः मुष्ट्याभृदामलकीफलैः, त्वं मां क्वचित्तु क्व चामलकशुक्तिभिरिति पाठस्तत्पक्ष आमलकैर्धात्रीफलैः शुक्तिभिः कालिन्दीपुलिनगतमुक्तास्फोटैश्चेत्यर्थः । क्वचित् अस्पृश्यनेत्रबन्धाद्यैः,

त्वं मां स्पृशेत्युक्त्वा पुरतो लीलया धावतीति यत्तदिदमस्पृश्यक्रीडनम् । वस्त्रेण नेत्रे आच्छाद्य मां स्पृशेति निगद्य तं मुक्त्वा पुरतो भ्रमणं नेत्रबन्धलीला, दूरान्तरप्रदेशे स्थितं वृक्षं लक्ष्यीकृत्योभाभ्यां मध्ये प्राक् वृक्षस्पर्शी विजयी स्यादितीयं क्रीडा धावनसंज्ञेत्याद्यपदेन ग्राह्यम् । क्वचित् खगानां पक्षिणां मृगाणां हरिणादीनां च या ईहा चेष्टा तया, पक्षिसमानचेष्टया मृगसमानचेष्टया चेत्यर्थः। चिक्रीडतुः ॥ १४ ॥ क्वचिदिति ॥ क्वचित् दर्दुरप्लावैर्मण्डूकसामनप्लुतिभिः, क्वचित् विविधैर्नानाविधैः, उपहासकैः परिहासवाक्यैः, कदाचित् स्पन्दोलिकया दोलाबन्धनेन, कर्हिचित्, नृपचेष्टया नृपाणामिव लीलया च, चिक्रीडतुः ॥ १५ ॥ एवमिति ॥ एवमनुना प्रकारेण, व्रजे वसन्ताविति शेषः । तौ रामकृष्णौ, नद्यद्रिद्रोणिकुञ्जेषु, काननेषु, सरस्सु च, लोकसिद्धाभिः क्रीडाभिः, क्रिडन्तौ सन्ताविति शेषः, चेरतुः । नद्यो यमुनादयः, अद्रिर्गोवर्द्धनः, द्रोण्यो निम्नसानुस्थलानि, कुञ्जा लतापिहितोदरस्थानानि, पुलिनानीति पाठे तोयोत्थितस्थानानि सरांसि प्रसिद्धानि ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवमिति ः १०.१८.१६.

लोकसिद्धाभिरेवाहं क्रीडन् क्रीडाभिरन्वहम् । सद्व्रजनमसन्नाशं करोमीति समीरितम् ॥ ८ ॥

कृष्णप्रिया

कहीं-कहीं जब दूसरे ग्वाल-बाल नाचने लगते तो श्रीकृष्ण और बलरामजी गाते या बाँसुरी, सींग आदि बजाते और महराज ! कभी-कभी वे 'वाह-वाह कहकर उनकी प्रशंसा करने लगते ॥ १३ ॥ कभी एक दूसरे पर बेल, जायफल या आँवला के फल हाथ में लेकर फेंकते । कभी एक-दूसरे की आँख बंद करके छिप जाते और वह पीछे से ढूँढ़ता । इस प्रकार आँख-मिचौनी खेलते । कभी एक दूसरे को छूने के लिये बहुत दूर-दूर तक दौड़ते रहते और कभी पशु-पक्षियों की चेष्टाओं का अनुकरण करते ॥ १४ ॥ कहीं मेढकों की तरह फुदक-फुदककर चलते, तो कभी मुँह बना बनाकर एक-दूसरे की हँसी उड़ाते । कहीं रस्सियों से वृक्षों पर झूला डालकर झूलते, तो कभी दो बालकों को खड़ा कराकर उनकी बाँहों के बल पर ही लटकने लगते । कभी किसी राजा की नकल करने लगते ॥ १५ ॥ इस प्रकार राम और श्याम वृन्दावन की नदी, पर्वत, घाटी, कुञ्ज, वन और सरोवरों में वे सभी खेल खेलते जो साधारण बच्चे संसार में खेला करते हैं ।

पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः । गोपरूपी प्रलम्बोऽगादसुरस्तज्जिघांसया[1] ॥ १७ ॥
तं विद्वानपि दाशार्हो भगवान् सर्वदर्शनः । अन्वमोदत तत्सख्यं वधं तस्य विचिन्तयन् ॥ १८ ॥
तत्रोपाहूय गोपालान् कृष्णः प्राह विहारवित् । हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम् ॥ १९ ॥
तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ । कृष्णसंघट्टिनः केचिदासन् [2]रामस्य चापरे ॥ २० ॥
आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः । [3]यत्रारोहन्ति जेतारो वहन्ति च पराजिताः ॥ २१ ॥
वहन्तो [4]वाह्यमानाश्च चारयन्तश्च गोधनम् । भाण्डीरकं नाम वटं जग्मुः कृष्णपुरोगमाः ॥ २२ ॥
रामसङ्घट्टिनो ये हि[5] श्रीदामवृषभादयः । क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप ॥ २३ ॥
उवाह कृष्णो भगवान् श्रीदामानं पराजितः । वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—तद् वने गोपैः (सह) पशून् चारयतोः रामकृष्णयोः तत् जिघांसया प्रलम्बः असुरः गोपरूपी अगात् ॥ १७॥ सर्वदर्शनः भगवान् दाशार्हः तम् विद्वान् अपि तस्य वधम् विचिन्तयन् अन्वमोदत ॥ १८ ॥ विहारवित् कृष्णः तत्र गोपालान् आहूय प्र आह हे गोपाः ? यथायथम् द्वन्द्वीभूय विहरिष्यामः ॥ १९ ॥ तत्र गोपाः रामजनार्दनौ परिवृढौ चक्रुः, तत्र केचन कृष्णसंङ्घट्टिनः आसन्, अपरे च रामस्य सङ्घट्टिनः आसन् ॥ २० ॥ यत्र जेतारः आरोहन्ति च यत्र पराजिताः वहन्ति (इति) वाह्यवाहकलक्षणाः विविधाः क्रीडाः आचेरुः ॥ २१ ॥ कृष्ण पुरोगमाः एसे एवम् वहन्तः च वाह्यमानाः गोधनम् चारयन्तः भाण्डीरकम् नाम वटम् जग्मुः ॥ २२ ॥ हे नृप ? रामसङ्घट्टिनः हि ये श्रीदामवृषभादयः क्रीडायाम् जयिनः जाताः तदा तान् कृष्ण आदयः ऊहुः ॥ २३ ॥ पराजितः भगवान् कृष्णः श्रीदामानम् उवाह, भद्रसेनः तु वृषभम् उवाह प्रलम्बः रोहिणीसुतम् उवाह ॥ २४ ॥

---

१. हीर्षया–श्रीधर. वंशी. विश्व. ; घांसया–वीर. विज. । २. केचिद्गोपा रामस्य–विज. । ३. तत्रारोहन्ति–विज. । ४. गर्जमानाश् इति कस्यचित् । ५. यर्हि–श्रीधर. वशी. वीर. ; ये तु–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

चारयतोः सतोः । तद्वने तस्मिन्वने । तयोर्जिहीर्षया ॥ १७-१८ ॥ यथायथं वयोबलाद्यनुरूपं द्वंद्वीभूय ॥ १९ ॥ परिवृढौ नायकौ । तत्र केचन कृष्णसंघट्टिनः कृष्णपक्षीयाः ॥ २०-२१ ॥ वाह्यमानाः पृष्ठेनोह्यमानाः ॥ २२-२४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गोपरूपी यः कश्चिद्गोपस्तद्दिने किञ्चित्कृत्यार्थं गृहे स्थितस्तद्रूपधारी । तयोः रामकृष्णयोः ॥ १७ ॥ तम् प्रलंबम् । तत्सख्यम प्रलंबसख्यम् । अन्वमोदत स्वीचकार । तस्य प्रलंबस्य । दाशार्ह इति । 'प्रलंबबकचाणूर' इत्यादिना यदुकुलकदने मुख्यतया निर्दिष्टस्य प्रलंबस्य वधेन यदुकुलहितापेक्षया । तद्वदने हेतुः सर्वदर्शनः सर्वज्ञः । चिंतयन् अनेन प्रकारेण घातयिष्यामीति चिंतयन् ॥ १८ ॥ तत्र तदा ॥ १९ ॥ तत्र बिहारे । 'प्रभुः परिवृढोऽधिपः' इत्यमरः ॥ २० ॥ यत्र यस्यां क्रीडायाम् । जेतारः पिहितफलादिज्ञानवंत आरोहंति निजप्रतिद्वंद्विगोपं वाहनत्वे कल्पयंति । पराजिताः पिहितफलाद्यज्ञानवंतो वहंति वाहनानि भवंतीत्यर्थः ॥ २१ ॥ वहंतः धारयंतः । भांडरीवटोऽवरोहणस्थानत्वेन कल्पित इत्यर्थः । तथाऽऽरोहणस्थानमपि तत्समीपवर्त्येव ज्ञेयम् । स च वटो हरिवंशे वर्णितः "ददर्श विपुलोदग्रशाखिनं शाखिनां वरम् । स्थितं धरण्यां मेघाभं निबिडं दलसंचयैः ॥ गगनार्द्धोत्थिकारं पवनाभोगकारिणम् । नीलं चित्राङ्गवर्णैश्च सेवितुं बहुभिः खगैः ॥ फलैः प्र ालैश्च घनैः सेंद्रचापघनोपमम् । भवनाकारविटपं लतापुष्पसुमंडितम् ॥ विशालमूलावनतं पवनांभोदधारिणम् । आधिपत्यमिवान्येषां तस्य देशस्य शाखिनाम् ॥ कुर्वाणं शुभकर्माणं तिरोवर्षमनातपम् । न्यग्रोधं पर्वताग्राभं भांडीरं नाम नामतः ॥" इति ॥ २२ ॥ तांस्तान् श्रीदामादीन् ॥ २३ ॥ उवाह कृष्ण इह व्यत्ययो ज्ञेयः 'उवाह कृष्णं श्रीदामा' इत्यादिहरिवंशादिविरोधात् । व्यत्ययाभावे का हानिरत आह—"बहुमानविरोधे तु व्यत्यासः शब्दतोर्थतः" इति शिष्टोक्तेः । शब्दस्यार्थस्य च विरोधे व्यत्यासो न दोषायेत्यर्थः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

परमैश्वर्यविशेषगर्भां मधुरमधुरां लौकिकलीलामुक्त्वाऽधुना श्रीबलदेवद्वारा विहितां प्रकटैश्वर्यामलौकिकीमाह—पशूनित्यादिना । यः कोपि गोपस्तद्दिने गृहे तिष्ठन् तद्रूपीत्यर्थः ॥ १७ ॥ दाशार्ह इति प्रलम्बबकचाणूरेत्यादिना यदुकुलकदने मुख्यतयाऽऽदौ निर्दिष्टस्य प्रलम्बस्य बधेन यदुकुलहितविशेषापेक्षया तद्वदने हेतुः सर्वदर्शनः सर्वज्ञः यतो भगवान् विचिन्तयन् वक्ष्यमाणप्रकारेण विचारयन् तस्य सख्यं सख्युः कर्म चेष्टामिति यावत् ॥ १८ ॥ तत्र तद्वधे निमित्ते प्रकर्षेणाह—प्रलम्बस्यापि मनोरमत्वात् विहारवित् यतः स एव तत्र सर्वज्ञोऽभिज्ञ इत्यर्थः ॥ १९ ॥ गोपा इति सत्यपि सख्यसामान्ये वर्गभेदेन तयोः पृथक्पृथक् तद्विशेषवतां तेषामसङ्कोचातिशयवत् क्रीडारसाय वैपरीत्येन परिवृढौ चक्रुः एवमेव च तयोर्मिथः प्रणयोपि विवृतः स्यात् यथा हरिवंशोक्तजलक्रीडायां स्वसुता श्रीबलरामपक्षे तत्सुताश्चात्मपक्षे तेन कृताः अतः श्रीदामादयो रामसङ्घट्टिनो जाताः रामेति रमणाभिप्रायेण जनार्दनेति तत्तत्क्रीडाभिः स्वमनोरथपूरकतया सर्वैर्याच्यमानत्वाभिप्रायेण ॥ २० ॥ विविधाः हरिणा क्रीडनाख्यादयः तथा च श्रीविष्णुपुराणे—

"हरिणा क्रीडनं नाम बालक्रीडनकं ततः । प्रक्रीडिता हि ते सर्वे द्वौ द्वौ युगपदुत्पतन्" ॥ इति ॥ २१ ॥

वाह्यमाना ऊह्यमानाः स्कन्धारूढाः भाण्डीरकमिति संज्ञायां कन् नाम प्रसिद्धौ सच वर्णितः श्रीहरिवंशे—

"ददर्श विपुलोदग्रशाखिनं शाखिनाम्बरम् । स्थितं धरण्यां मेघाभं निबिडं दलसञ्चयैः ॥
गगनार्द्धोत्थिताकारं पवनाभोगकारिणम् । नीलचित्राङ्गवर्णैश्च सेवितं बहुभिः खगैः ॥
फलैः प्रबालैश्च घनैः सेन्द्रचापघनोपमम् । भवनाकारविटपं लतापुष्पसुमण्डितम् ॥
विशालमूलावनतपवनाम्भोदधारिणम् । आधिपत्यमिवान्येषां तस्य देशस्य शाखिनाम् ॥
कुर्वाणं शुभकर्माणं तिरोवर्षमनातपम् । न्यग्रोधं पर्वताग्राभं भाण्डीरं नाम नामतः" ॥ इति ।

तत्र गमनं निदाघक्रीडौचित्यात् ॥ २२ ॥ यर्हि ये ये श्रीदामवृषभादयः क्रीडायां जयिनो बभूवुस्तर्हि तांस्तान् कृष्णादय ऊहुरित्यन्वयः ॥२३॥ भगवानिति युष्माकं यो भगवान् सोऽस्माकं व्रजवासिभिः पराजित इति नर्म च व्यञ्जितं रोहिण्याः सुतमिति तेन तत्प्रभावाज्ञानस्यापेक्षया ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

परमैश्वर्य्य विशेषगर्भां मधुरमधुरां लौकिकीं लीलामुक्त्वा अधुना श्रीबलरामद्वारा विहितां प्रकटैश्वर्य्यामलौकिकीमाह—पशूनित्यादिना । गोपैः सह तद्वने श्रीवृन्दावने, कृष्णस्यादौ निर्देशः, सर्वत्र तस्यैव प्राधान्यात्, विशेषतश्चात्र प्रलम्बवधे तस्यैव प्रयोजकत्वात् ॥ १७ ॥ दाशार्हः श्रीयदुकुलाब्धिचन्द्र इति भ्रातृतया श्रीबलदेवस्य कीर्त्तिविस्तारणे हेतुरुद्दिष्टः, यद्वा (भा० १०।२।१) 'प्रलम्बबकचाणुर' इत्यादिना यदुकुलकदने मुख्यतयादौ निर्द्दिष्टस्य प्रलम्बस्य वधेन यदुकुलहितविशेषापेक्षया सर्वं पश्यति

साक्षात् करोतीति; किंवा सर्वेषां दर्शनं ज्ञान यस्मात्, यद्वा, सर्वाणि दर्शनानि शास्त्राणि वैशेषिकादीनि वा षट् यस्मिन् तात्पर्य्यतो वर्त्तन्त इति सः। यतो भगवान् साक्षात्परमेश्वरः, अतस्तं विद्वान् जानन्नपि विशेषेण चिन्तयन् अग्रजस्य कीर्त्तिविस्तारणाय तमस्य स्कन्धमारुह्य तेनायं घातयितव्यः, तदर्थञ्च वाह्य-वाहकक्रीडायां कार्य्यायामिममात्मपक्षे कृत्वा स्वयमहं पराजितो भूत्वैनमपि पराजितं कारयिष्यामीत्यादिकं भावयन्, एवं सर्वदर्शन इत्यस्यात्रैव वान्वयः, यत एवं कृते एवं भविष्यतीत्यादिकं सर्वमेव जानातीत्यर्थः। अतस्तेन आगन्तुकेन दुर्बुद्धिनापि दैत्येन सख्यमन्वमोदत—अन्यथा श्रीबलदेवस्य सुखादुत्तुंगस्कन्धाधिरोहणासिद्धेः॥ १८॥ तत्र तद्वधे निमित्ते तद्वने वा, प्रकर्षेणाह—प्रलम्बस्यापि मनोरमत्वात्, विहारवित्—द्वन्द्वक्रीडयैवाग्रजस्य सुखं प्रलम्बस्कन्धाधिरोहणं भवतीति क्रीडाप्रकारं वेत्तीत्यर्थः, यद्वा, वाह्य-वाहकलक्षणविविधक्रीडाप्रकाराभिज्ञः॥ १९॥ तत्र द्वन्द्वविहारे गोपाश्चक्रुरिति सहजविनयादिसाद्गुण्येन स्वयं ताभ्यां तदभवनात्, जनार्द्दन इति जनं दुष्टमर्द्दयतीति प्रलम्बघातनस्य, किंवा जनैः सेवकैरर्द्यते याच्यत इति परिवृढतार्थं गोपानां प्रार्थनस्याभिप्रायेण, कृष्णसखीनामादौ निर्द्देशः, कृष्णप्रियत्वेन सर्वेषां प्राक् तत्पक्षे भवनात्, अपरे श्रीकृष्णेंगिताभिज्ञास्तत्प्रीत्येकपरास्तत्प्रियतमाः श्रीदामवृषमादयः, यथा श्रीहरिवंशोक्तजलक्रीडायां स्वसुताः श्रीबलरामपक्षे तत्सुताश्चात्मपक्षे तेन कृता इति॥ २०॥ विविधा हरिणाक्रीडनाख्यादयः, तथा च श्रीविष्णुपुराणे (५।९।१२) 'हरिणाक्रीडनं नाम बालक्रीडनकं ततः। प्रक्रीडिता हि ते सर्वे द्वौ द्वौ युगपदुत्पतन्॥' इति; बाह्यवाहकलक्षणत्वमेवाह—यत्रेति॥२१॥ वाह्यमाना ऊह्यमानाः पृष्ठाद्यारूढाश्च अपि गोधनमपि चारयन्तः, संज्ञायां कः, भाण्डोरं नाम भाण्डीराख्यमित्यर्थः। यद्वा। नाम्नैव वटं तत्त्वतस्तु सर्ववृक्षधर्मश्रेष्ठं कल्पद्रुममित्यर्थः। स च वर्णितं श्रीहरिवंशे (विष्णु पु० ११।१८।२२)

'ददर्श विपुलोदग्रशाखिनं शाखिनां वरम्। स्थितं धरण्यां मेघाभं निविडं दलसञ्चयैः॥
गगनार्द्धोच्छ्रिताकारं पर्वताभोगधारिणम्। नीलचित्रांगवर्णैश्च सेवितं बहुभिः खगैः॥
फलैः प्रवालैश्च घनैः सेन्द्रचापघनोपमम्। भवनाकारविटपं लतापुष्पसुमण्डितम्॥
विशालमूलावनतं पवनाम्भोदधारिणाम्। आधिपत्यमिवान्येषां तस्य देशस्य शाखिनाम्॥
कुर्व्वाणं शुभकर्म्माणं निरावर्षमनातपम्। न्यग्रोधं सर्व्वताग्रामं भाण्डीरं नाम नामतः॥'

तत्र गमनं सुप्रसिद्धं तत्स्थानेऽग्रजकीर्त्तिविस्तारणाय, किंवा निदाघे तद्विस्तीर्णशीतलच्छायायां सुखक्रीडार्थम्; यद्वा, स्वप्रियस्य भाण्डीरस्यैव माहात्म्यार्थम्, अतएव कृष्णः सर्व्वाकर्षको भगवान् पुरोगमोऽग्रगामी येषां ते॥ २२॥ वहन्तो बाह्यमानाश्चेति पूर्व्वं सर्व्वेषां मिथो जयपराजयावुद्दिष्टौ, अधुना च भाण्डीरे श्रीबलदेवस्य प्रलम्बस्कन्धारोहणार्थं श्रीकृष्णेच्छया तत्पक्षीयाणां पराजयं वदन् रामपक्षीयाणामेव जयमाह,—द्वाभ्याम्। आदि-शब्दात् सुबलादयोऽर्भका इति बाल्यक्रीडायाः स्वभाव एवासाविति भावः। नृपेति पाठे भक्तवश्यतातिशयेन परमविस्मयात्तत्सम्बोधनम्॥ २३॥ भगवान् भक्तवश्यतादिगुणप्रदर्शक इत्यर्थः। यद्वा, ननु श्रीदामा कुतस्तदसहत? तत्राह - भगवान् परमकौतुकोत्यर्थः। किञ्च, कृष्णो निजप्राणेश्वरः, तत्कौतुकसिद्धये तत्प्रीत्येकापेक्षयेति भावः। रोहिण्याः सुतमिति तत्सुतत्वेन तस्य श्रीकृष्णेन सह भेदं मत्वा तयोरन्योन्यस्नेहाद्यविमर्षेण हर्त्तुमवहदिति भावः॥ २४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सङ्घट्टिनः संसर्गिणः॥ २०-२४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सर्वदर्शनः हेतुगर्भमिदं सर्वज्ञत्वात् तं जिघांसुमागतं गोपरूपिणं प्रलम्बासुरं विद्वानपि सद्यो न ते जघानेति वाक्यशेषः किन्तु उपायान्तरेण तस्य वधं विचिन्तयन् तेन सह सख्यमेवान्वमोदत अन्वमन्यत॥ १८॥ तत्र गोपानाहूय तद्वधोचितविहारक्रमाभिज्ञः प्राह, उक्तिमेवाह—हे गोपा इति। यथायथमाकृतिवयोबलानुरूपं द्वन्द्वीभूय सङ्घद्वयं भूत्वा विहरिष्याम इति॥ १९॥ तत्रैवं भगवतोक्ते सति गोपाः रामकृष्णौ परिवृढौ सङ्घयोः नायकौ चक्रुः ततः केचिद्गोपाः कृष्णपक्षीया बभूवुरपरे तु रामस्य सङ्घट्टिनः॥ २०॥ एवं भूत्वा बाह्यबाहकेतिभावप्रधानो निर्देशः बाह्यत्ववाहकत्वे लक्षणे फले यासु ताः वाह्यबाहकाश्च जयपराजयकृता यास्विति तथाभूता विविधाः क्रीडाश्चेरुः, वाह्यवाहकलक्षणा इत्येतदेव विशदयति—यत्रेति। यत्र यासु क्रीडासु जेतार आरोहन्ति पराजितास्तु वहन्ति इति॥ २१॥ एवं क्रीडायां जयेन हेतुना बाह्यमानाः पराजयेन हेतुना वहन्तश्च गोधनं चारयन्तश्च कृष्णप्रभृतयो गोपाः शनैः भाण्डीराख्यं वटं वृक्षं जग्मुः॥ २२॥ तत्र यर्हि यदा श्रीदामादयो रामसङ्घट्टिनः क्रीडायां जिग्युस्तदा तान् हे नृप! कृष्णादयः ऊहुरूढवन्तः॥ २३॥ तत्र भगवान् श्रीकृष्णः पराजितः श्रीदामानमुवाह चन्द्रसेनस्तु वृषभं तथा श्रीकृष्णसङ्घट्टी प्रलम्बासुरः रोहिणीसुतं बलदेवम् उवाह॥ २४॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यस्य यो विहारस्तं वेत्तीति ॥१९॥ परिवृढौ नायकौ कृष्णसङ्घट्टिनः कृष्णपक्षीयाः ॥२०॥ वाह्यवाहकत्वं विशदयति–तत्रेति । उवाह कृष्णो भगवानित्यत्र व्यत्ययेन नेतव्यः श्रीदामा कृष्णमुवाहेति कुत एवं विकल्प्यते ? हरिवंशादिवचनात् तथाप्ययं दुराग्रह इति न वक्तव्यम् "बाहुमानविरोधे तु व्यत्यासः शब्दतोर्थतः" इत्यादिनिर्णयवचनात् ॥ २१–२४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वाह्यमाना ऊह्यमानाः ॥ २२–३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

उवाह कृष्णो भगवान् श्रीदामानं पराजितः । भक्तवात्सल्यलीलेयं यद्भक्तेषु स्वयमपराजितोऽपि पराजितो भवति। अथवा, अभगवान् कृष्णः स्तोककृष्णः तस्य भगवत्सखित्वमेव, न तु भगवत्त्वम् ॥ २५–३२ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे अष्टादशोऽध्यायः ॥ १८ ॥ एवमूनर्विशश्च ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चारयतोः सतोः गोपरूपी यः कोपि गोपस्तद्दिने किञ्चित् कृत्यार्थं गृहे स्थितस्तद्रूपधारी तयोर्जिहीर्षया ॥ १७ ॥ विचिन्तयन् अनेनैव प्रकारेण सङ्घातयिष्यामीति चिन्तया निश्चिन्वन् ॥ १८–१९ ॥ परिवृढौ नायकौ कृष्णस्य सङ्घट्टो यूथस्तद्गताः ॥ २० ॥ किन्तु वाह्यवाहकलक्षणाः अस्यार्थं विवृणोति–यत्रेति । तेन स्पर्शखेलायां रामसङ्घट्टिनां मध्ये कोऽपि कृष्णसङ्घट्टिनां कमपि यदि स्पृशति तदा रामसङ्घट्टितः सर्व एव पराजिताः यथायथं वहन्ति एवं जयन्ति चेत् कृष्णसङ्घट्टिनस्तान् रामसंङ्घट्टिनो वहन्ति एवमेव नेत्रबन्धादिखेलायामपि ॥ २१ ॥ भाण्डीरकं वटं जग्मुरिति स एव वटो अवरोहणं स्थानं कल्पितः इत्यर्थः । तथैवारोहस्थलमपि तत्समीपवर्ति ज्ञेयम् ॥ २२–२४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णस्वभावं दृष्ट्वा हनिष्यामीत्याशयेन गोपरूपी अगात् ॥ १७ ॥ तत्सख्यमन्वमोदतेति निजस्वभावो दर्शितः तथापि कौटिल्यापरित्यागे वधं तस्य विचिन्तयन् ॥ १८ ॥ यथायथं यथायोग्यम् ॥ १९ ॥ परिवृढौ यूथनाथौ ॥ २०–२४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

चारयतोः सतोः गोपरूपीति तद्वासरे यः कश्चिद्गोपः किञ्चित् कार्यानुरोधात् वेश्मनि स्थितस्तस्य रूपं बिभ्रत् तयोर्जिहीर्षया ॥ १७ ॥ दाशार्हः कृष्णः तस्य वधं विचिन्तयन्निति अनेन विधिनैनं घातयिष्यामीति चिन्तया निश्चिन्वन् ॥ १८–१९ ॥ परिवृढौ नायकौ कृष्णस्य सङ्घट्ये यूथस्तद्वर्तिनः ॥ २० ॥ वाह्यवाहकक्रीडार्थं विवृणोति–यत्रेति । स्पर्शवेलायां रामसङ्घट्टिनां मध्ये चेत् कोऽपि कृष्णसङ्घट्टिनां कमपि स्पृशति तदा रामसङ्घट्टिनः सर्वेऽपि जयिनः आरोहन्ति तान् कृष्णसङ्घट्टिनः सर्वेऽपि पराजिता यथायथं वहन्ति कृष्णसङ्घट्टिनश्चेज्जयन्ति तान् रामसङ्घट्टिनो वहन्तीति ॥ २१ ॥ भाण्डीरकमिति संज्ञाया कन् स एवावरोहणस्थानं कल्पितः आरोहणस्थानन्तु तदन्तिकवर्त्ति बोध्यम् ॥ २२–२३ ॥ भगवानिति भवतां भगवानस्माकं व्रजवासिभिः पराजित इति नर्म व्यज्यते ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सर्वदर्शनः सर्वज्ञस्तस्य वधस्तत्सङ्ख्यावधिरिति तदन्वमोदताभिमतमतनोत् ॥ १७ ॥ द्वन्द्वीभूयैतस्य प्रतिभटोऽयं तस्यायमिति द्वयोर्मेलनं कृत्वा विहरिष्यामः ॥ १८ ॥ परिवृढौ नायकौ कृष्णसङ्घट्टिनस्तत्पक्षस्थाः । सङ्घट्टिन इति विघटितं रामस्य च सङ्घट्टिन इत्यन्वेति ॥ १९ ॥ वाह्या वाहका इति लक्षणं चिह्नं यासां ता जेतारो ये ते पराजितमारोहन्ति पराजिता जयवन्तं वहन्ति ॥ २० ॥ वहन्तः स्वयमन्यानन्यैर्वाह्यमानाश्च नाम प्रसिद्धम् ॥ २१ ॥ श्रीदामा च वृषभश्चादी येषां ते तथा । तथा कृष्णाद्यश्चान्येतद्यगमध्ये ये ये क्रीडायां जयिनस्तांस्तान्पराजयिन इति शेषः । ऊहुः । उत्तरस्थतात्पर्यस्वारस्यादेवमन्वयः संलग्नः ॥ २२ ॥ उवाह कृष्णो भगवानिति श्लोके लोकेशस्य कृष्णस्य पराभवः प्रतीयते स च बहुमानावमानित इत्यतः किञ्चिन्माननामग्रहणपूर्वकं विरोधं प्रदर्श्य विभक्तिव्यत्ययेन चान्वयं लापयित्वा तस्थेम्ने ब्रह्मतर्कवचनमुदाहरति ॥ श्रीदामेति । श्रीदामा । अनेन द्वितीया प्रथमार्थं इव प्रथमा कृष्णमिति द्वितीयार्थ इत्युक्तं भवति । हरिवंश आदिर्यस्य तद्धरिवंशादिपुराणं तद्विरोधात्स चाविषह्यं तथा मत्वा कृष्णमद्भुतविक्रमं । रौहिणेयवधे यत्नमकरोद्दानवोत्तमः । हरिणा क्रीडनं नाम बालक्रीडनमेव हि । क्रीडिताश्चैव ते सर्वे द्वौ द्वौ युगपदुत्पतन् । कृष्णः श्रीदामसहितः पुप्लुवे गोपसूनुना । सङ्कर्षणस्तु प्लुतवान्प्रलम्बेन सहानघः । गोपालास्त्वपरे द्वन्द्वं गोपालैरपरैः

सह । प्रद्रुता लङ्घयन्तो वै तेऽन्योन्यं लघुविक्रमाः । श्रीदामजयस्कृष्णः प्रलम्बं रोहिणीसुतः । गोपालैः कृष्णपक्षीयैर्गोपालास्त्वपरे जिता इत्यादि । न च भागवतस्यानन्तरोक्ततया व्याख्यारूपतया प्राबल्याद्भारतात्बाधनं कुतो न स्यादिति वाच्यं । श्रीपरमेश्वरपराजयस्यामरपामरमनोऽनङ्गीकरणीयस्य बहुमानविरुद्धस्य चास्वीकार्यत्वात् । यथा भागवते तूक्तमित्यारभ्य विनेव सर्वमुन्नेयमित्यन्तपश्चमतात्पर्यानुकुल्यं च तत्रैव योजनाभेदत इत्युक्तेश्च । वचनार्थादिव्यत्यासस्य मानाननतोऽनुपपत्तौ कर्तव्यताश्रावकब्रह्मतर्कवचनाद्भागवतार्थो वचनाद्व्यस्यासनैवावसेय इत्याह ॥ बहुमानेति । तत्रापि नैकलहरिवंशकलहः किन्तु बहूनि मानानि विरोधकानि सन्तीति बलवन्निमित्तं बलवत्त्वं बह्वीत्यनेनोक्तमिति ज्ञेयं । तुरवधारणे बहुमानविरोध एवेति सम्बध्यते । विरोध एव व्यत्यासः प्रस्तुतस्तु शब्दतोऽर्थतो दुःखीत्यादौ कार्यः । केचित्कर्षणः कर्तृत्वं कर्तुस्तु कर्मत्वमित्यर्थव्यत्यासमाहुः । अन्यथा विरोधाभावे। अनेन विरोधोपरोध एवैवमिति न किन्तु फललाभोऽप्यस्तीति लपति । अनिरुक्तदेवानां गुणसिद्ध्या इति च चः समुच्चये । ते चानिरुक्ताः किमाकारा इत्यत आह ॥ विष्णुरिति । विष्णुर्ब्रह्मा वायुश्चानिरुक्तास्तथा तेषां त्रयाणां पत्न्यो योषितश्चानिरुक्ता इति सम्बन्धः । परशुक्लत्रयं स्मृतमित्यादेः । तेष्वनिरुक्तेष्वितरेषां शिवादीनां गुणाः पराजयादयः प्रतीता वचनादितस्ते व्यत्यस्या व्यत्यासयितव्या अत्रासंशयः संशयाभावो रक्षोहागमलध्वसन्देहा इति निर्देशादसंशयः सिद्धो नितरां वक्तुमशक्या अनिरुक्त इति विग्रहः ॥ ततश्चायं मूलार्थः ॥ श्रीदामानं श्रीदामा पराजितः सन् कृष्णः कृष्णमुवाह वृषभं भद्रसेनो गोप उवाह प्रलम्बो रोहिणीसुतमुवाहेत्यन्वयः । अत्रायं विवेकः वृष्णो रामश्चेति द्वौ नायकौ तत्र प्रलम्बो भद्रसेनश्च कृष्णपक्षगौ बभूवतुः श्रीदामा वृषभश्चेत्युभौ बलपक्षगौ बभूवतुस्तत्र श्रीदामा श्रीदामोदरस्य प्रतिभटः प्रतिभटश्च प्रलम्बो बलस्य वृषभस्य भद्रसेनस्तत्र श्रीदामा पराजितः कृष्णं प्रलम्बस्तथा समबलं भद्रसेनस्तु वृषभमुवाहेति । न च कृष्णस्य पक्षिषु जयस्त्विति महाभारततात्पर्यनिर्णये कृष्णपक्षस्य सर्वजयोक्तेः कथमिदमिति शङ्क्यं । सर्वेष्विति सर्वविदभाषणात् । द्वित्राणामत्र पराजयस्यैवान्यत्र द्वित्राणां जयस्यापि सम्भवात् । अगत्या प्रलम्बकृतबलोद्वाहनेनेत्थमेव वक्तव्यत्वाच्च । बलबालमेलने प्रलम्बेन बलोद्वाहनं न सम्भवति स्वव्यूहस्थवाहनानौचित्यात्। अत एव व्याचक्रिरे जनार्दनभट्टाः । अत्रायमाशयः कृष्णपक्षिभिः सर्वैर्जितं तत्पक्षस्थैः प्रलम्बभद्रसेनाद्यैर्द्वित्रैरेव पराजितं। रामपक्षीयैः श्रीदामाद्यैः सर्वैः पराजितं वृषभाद्यैर्द्वित्रैर्जितमिति । ननु रावणसमबलः प्रलम्बः प्राक् लक्ष्मणं क्षितौ पतितमुद्धर्तुं न शशाकेति सर्वजनोऽनन्ततनुमेवेमं कथमुन्नीयायं गत इति चेन्न । निद्रितस्त्वं तत्त्वतो यत्प्राक् तृणावर्तेन कृष्णनायकनयने नाप्राक्षीरिति । तत्राचिन्त्याद्भुतशक्तिरिति नानुयोक्ताऽहं निद्रित इति वदसि चेद्धन्त तर्ह्यत्र ससमार रूपं निजमेव लक्षण इत्युक्तेस्तत्रैव स्वस्वरूपस्मरणस्याभावाल्लाघवतः प्रलम्बबलोन्नीतिर्नीतिमतीति भवान्भवतु वेदिता ॥ २३ ॥ ननु कृष्णो मुख्यद्विट् तं विहाय विहायोन्नीतिरलक्ष्यस्य बलस्य कुत इत्यत आह ॥ अविषह्यमिति । दानवपुङ्गवः कृष्णमविषह्यं मन्यमानो द्रुततरमतिशीघ्रमवरोहणतोऽवरुह्यते जनोऽत्रेत्यवरोहणं । अद आसाद्यावतारयितव्योऽयमिति क्लृप्तस्थानतः परं परतस्तदतिगति दूरमिति यावत्प्रागात् ॥ २४ ॥

श्रीसुबोधिनी

एवं क्रियामयान् संस्कारभूपांश्च दोषान् निवर्त्यान्तःकरणदोषाभिमानिनीं दैत्यभूतां निवारयितुमुपाख्यानमारभते **पशूंश्चारयतो**रिति, गोपैः सह **पशूंश्चारयतोः** सतोः **प्रलम्बोगात**, अन्तःकरणमेव रूपसमर्पकमिति **गोपरूपा** स प्रकर्षेण **लम्बो** मुक्तिपर्यन्तमनुवर्तमान**स्तज्जिघांसया भगवांस्तं विद्वानपि तत्सख्यमन्वमोद**तेति**सम्बन्धः**, गत्वा मारणीयः स तत्र स्वयमागते क सन्देहः ? अतः प्रथमत एव **जिघांसये**त्युक्तं, **सम्भवत्यविरोधव्याख्याने विरुद्धं न व्याख्येयं,** तं प्रलम्बं दुष्टं **भगवान्** ज्ञात्वा तत्प्रवेशेनैव तद्वध इति सञ्चिन्त्य तथैव लीलायाः प्रारब्धत्वाद् भगवतः सर्वसख्यस्य सर्वात्मकस्य दोषत्वेन दैत्यहननावश्यकत्वात् सख्यं कृतवान्, अत एव **भगवता न मारितः**, **देहोत्पन्नाश्च स्वतो न मार्यन्ते** यथौषधं तथा बलभद्रो व्यवहारे च स कृष्णसम्बन्धी गोपालानां मध्ये कृष्णस्यार्थे तस्य प्रवेशात्, अनेनैव प्रकारेणाक्लिष्टतया वधो भवतीति **विचारयं**स्तथा कृतवान् ॥ १७-१८ ॥ ततः सख्यकरणानन्तरं वधप्रकारं कृत**वा**नित्याह **तत्रोपाहूये**ति, सर्वानेव **गोपाला**नुपाहूय नानाविधक्रीडायां प्रवृत्तान् क्रीडाविशेषमुपदेष्टुं **प्राह, तत्रोपाहूये**ति,, यत्र समभूमौ तादृशलीला भवति **तत्र** सर्वा**नुपाहू**याग्रे वक्ष्यमाणं **प्राहे**तिसम्बन्धः, यतो भगवानक्लिष्टकर्मा प्रकर्षेण स्पष्टमे**वाह**, गोपालानां विश्वासार्थे स्वज्ञातक्रीडापरित्यागार्थं च विशेषणं **विहारवि**दिति, सर्वानेव विहारान् वेत्ति, भगवद्वाक्यमेवाह **हे गोपा विहरिष्याम** इति, अद्वन्द्वभूता अपि **द्वन्द्वीभूय** यथा येन सह यो सह यो द्वन्द्वं प्राप्तस्तथा तेनैव सह स जयं पराजयं वा प्राप्नोतीति यथा तथा **यथायथं** वा यथासुखमित्यर्थः, **यथातथ**मितिपाठेपि क्रियाविशेषणमात्रत्वं विशेषः ॥ १९ ॥ भगवदुक्तास्तथैव कृतवन्त इत्याह **तत्र चक्रु**रिति, उभौ तत्र क्रीडायां मुख्यौ क्रियेते पश्चाद् द्वौ द्वौ समागच्छतः कृत्रिमसङ्केतं कृत्वा तत्र य एव यमर्थं वृणीते तेन सङ्केतितस्तदीयो भवति, एवं सर्वे गोपालाः प्रकारद्वयेन द्विविधा भवन्ति, तदाह **कृष्ण सङ्घट्टिनः केचिदासन् रामस्य चापर** इति ॥ २० ॥ तत्रापि प्रथममागतौ मुख्यकार्यं कुरुतः **श्रीदामा प्रलम्बश्चो**भौ समागतौ द्वन्द्वीभूय, तत्रापि **श्रीदामा बल**भद्रेण गृहीतो **बल**कार्यं करोति **प्रलम्बो** भगवत्कार्यं, एतौ मन्त्रिणाविव, अन्यथा जयपराजययोः कृष्णरामयोरेवान्योन्यं वाहकौ स्यातां तुल्यत्वात्, नाप्यव्यवस्थिततया वहनं, तया सत्यतिप्रसङ्गात् कलहसम्भवाच्च, नाप्यत्र मुख्यो वाहकत्व-

पक्षः, अन्यथा भगवतोपि वाहकत्वं न स्यात्, मुख्ययोरेकः क्रीडत्येको वहति, अथवा क्रीडाविशेषे सर्वं एव सर्वान् वहन्तीति, तत्रैकपादगमने क्रीडान्तरे वा मध्ये द्वितीयपादस्य भूस्पर्शे पराजितो भवति, तत्र प्रतियोगिनस्तान् भ्रामयन्ति यथा स्खलनं भवति, येन प्रतियोगिना भ्रामितः स्पृशति भूमिं तं वहति, तदाहा**चेरुर्विविधाः क्रीडा** इति, **वाह्यवाहकत्वे** निमित्तमाह **यत्रारोहन्तीति, जेतार आरोहन्ति पराजिता वहन्ति** ॥ २१ ॥ नापि निसर्गतः पराजितः पराजित एव भवति, अतः कदाचित् कश्चिद् वहति वाह्यते च, तदाह **वहन्तो वाह्यमानाश्चे**ति, मध्ये सर्वेषामेव क्रीडायां प्रविष्टत्वाद् गवां चारणाभावे चतुर्विधपुरुषार्थहानिः स्यादित्याशङ्क्याह **चारयन्तश्च**श्च **गोधन**मिति, गाव एव धनं, चकारात् रक्षामपि कुर्वन्तो **भाण्डीरके** वने मुख्या वटोस्ति तदाख्यातिकरस्तत्र समा च भूमिः प्रलम्बस्य सहायान्तरस्यापि पश्चादागतस्यानागमनं भवत्यतो **भाण्डीरकं नाम वटं** सर्वं एव **जग्मुः**, इममर्थं भगवानेव जानातीति **कृष्णपुरोगमाः**, कृष्ण एव पुरोगमो येषां, तत्र मध्येपि क्रीडां कुर्वाणा एव गताः ॥ २२ ॥ ततो यदा पराजयस्तदा वहनं तदाह **रामसङ्घट्टिनो ये** हीति, त्रयोत्र निरूपिता अन्तःकरणगुणानां त्रैविध्यज्ञापनाय, **रामो** यथा तथा **श्रीदामा वृषभश्च**, रामो **राजसः** श्रीदामा **सात्त्विको वृषभस्तामसः**, यत्र यदा ते **क्रीडायां जयिनस्तांस्तान् कृष्णादय ऊहुः** ।२३।

अक्लिष्टकर्मतासिद्ध्यै हीनत्वं कुरुते क्वचित् । धर्मप्रधानो भगवानिति ज्ञापयितु तथा ॥ १ ॥

यथा बलभद्रः प्रलम्बारूढो भवेत् तदर्थं **भगवाञ् श्रीदामानमुवाह**, नाम्ना लक्ष्मीवनमालारूपत्वं तस्यातोलङ्कारार्थं वहनमुचितं, **पराजितो** इतिनिमित्तमन्यस्यापि वहनार्थं, तदाह **वृषभं भद्रसेनस्त्वि**ति, **तुशब्दस्तृतीयस्य** तत्पूर्ववद् वहनमिति ज्ञापयति, **प्रलम्बस्तु रोहिणीसुतं**, मातृनाम्ना व्यपदेशस्तदज्ञानज्ञापनाय ॥ २४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

पशूनित्यत्रान्तःकरणरूपमेवेति प्रतिपादितं चैतद् **'यतो यतो धावति दवनोदितं मन'** इत्यत्र ॥ १७ ॥ **तं विद्वानित्यत्र** ननु वधोपायचिन्तनं लौकिककार्यमिति कथमत्रैतदित्यत आहुस्तथैवेति लोकवदित्यर्थः ॥ १८ ॥ **रामसङ्घट्टिन** इत्यत्र ननु परवहने स्वस्य हीनत्वं भवतीति भगवान् श्रीदामानं किमित्युवाहेत्यत आहु**रक्लिष्टे**त्यादि तथा च यद्येव न कुर्यात् क्रीडा क्लिष्टा स्यादिति तदभावार्थं तथेत्यर्थः, ननु तथाप्येवङ्करणे हीनत्वं कथं निवर्तत इत्यत आहु**र्धर्मे**त्यादि **धर्मा एव प्रधाना** मुख्यकार्यकरा यस्य बाह्यधर्मो वा तथा यस्य तथा चैतादृशस्थले धर्मा एव तथा कुर्वन्तीति न दोष इत्यर्थः, पद्यं तु यतो **भगवान्** स्वयं **धर्मप्रधान इति ज्ञापयितुं तथा कुरुत** इत्येवं योज्य, तथा चान्यत्रापीदृग्विधा भगवत्कृतिरेवंरूपा ज्ञातव्येतिभावः, बाह्यधर्मस्तु **नाम्ने**त्यादिना श्रीमदाचार्यैरेव विवृतो ज्ञेयः ॥ २३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

पशूनित्यस्याभासे **क्रियामया**निति भगवन्तं विना केवलक्रीडाप्रचुरानित्यर्थः, **संस्काररूपा**निति केवलक्रीडास्मरणजनको यः संस्कारस्तद्रूपानित्यर्थः, तासु भगवत्प्रवेशे भगवता सह क्रिया भवन्ति संस्कारोपि भगवत्सहितानामेव भवतीतिभावः, (**उपाख्यान**मिति बाहुलकात् कर्मणि ल्युट्, लीलाप्रकारमित्यर्थः, भगवत्कृतमितिशेषः, तथा च तान् निवर्त्य तां निवारयितुं भगवता कृतं लीलाप्रकारं वक्तुं शुक **आरभत** इत्यन्वयः), व्याख्याने, **अन्तःकरणमेवे**ति अन्तःकरणं स्मर्तरि स्मर्यमाणस्व**रूपसमर्पक**मित्यन्तःकरणे विषयतासम्बन्धेन स्पर्यमाणस्वरूपं वर्तते, **अतस्त**दभिमानिनस्तादृशं रूपमुचितं यस्मिन्नन्तःकरणे क्रीडानुभवजनितसंस्कारास्तो विषयतासम्बन्धेन **गोपा** एव न तु **भगवांस्तद्रूपः** प्रलम्बः, अतस्तस्य तादृशमेव रूपमितिभावः, साधनचिन्तनहेतुस्तथैवेति ॥ १७ ॥ **तत्रोपाहूये**त्यस्याभासे **वधप्रकार**मिति तादृशविहारोपदेशमित्यर्थः ॥ १९ ॥ **तत्र** चक्रुरित्यत्र **प्रतियोगिन** इति स्वसङ्घट्टिनो योगिनः परसंघट्टिनः प्रतियोगिन इत्यर्थः, **नापि निसर्गत** इत्यनेन "वहन्तो बाह्यमानाश्चे"तिपदार्थं उक्तः, वाक्यार्थस्तु "जग्मु"रित्यन्तेनोपसंहारे वक्ष्यते ॥ २२ ॥ अग्रिमश्लोकान्ते **ज्ञापयितु**मिति गोपेष्वितिशेषः, एवं ज्ञाने केनापि कस्यचित् पक्षो न कर्तव्यस्तेन लीला सम्यक् सिध्यतीतिभावः, **लक्ष्मीवनमालारूप**त्वमिति लक्ष्म्या स्वसमर्पणीयवनमालाग्रथनाधिकारोस्मै दत्त इति सततं तद्भावनया तद्रूपत्वमेवास्य सम्पन्नं परं तत्स्वरूपगोपनाय लोकेभ्यस्तथा न प्रदर्शयति, भगवांस्तु जानातीति तद्व्याजेन तदाधिदैविकरूपं मालानुवाह, लोकानां त्वाधिभौतिकरूपप्रतीतिरितिभावः, तथा च श्रियो दाम श्रीदामा, पुंस्त्वं तु परोक्षवादाय लोकप्रतीतिमनुसृत्येति ज्ञेयम्, अत्र श्लोके वहनानुवादेन तत्प्रकारो वाक्यार्थः, अत एवास्याभासः पृथङ् नोक्तः, प्रकारकं वहनं श्लोकद्वयार्थो ज्ञेयः ॥ २३ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

रामसङ्घट्टिनो ये हीत्यस्य विवरणे कारिकायां **धर्मप्रधानो भगवा**निति अक्लिष्टकर्मत्वलक्षणः स्वधर्मः प्रधानं यस्येत्यर्थः ॥ २३ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

रामसङ्घट्टिनो यर्हीत्यत्र अक्लिष्टेति का० १५३४ । ननु परवहने स्वस्य हीनत्वं भवतीति भगवान् श्रीदामानं किमित्युवाहेत्यत आहुर**क्लिष्टे**त्यादि, केनापि कस्यचित् पक्षपातो न कर्तव्य इति गोपेषु ज्ञापयितुमित्यर्थः । २३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधनी

लीलान्तरमाह—पशूनिति । तस्मिन् वने गोपैः सह पशून् चारयतोः सतोः रामकृष्णयोस्तयोर्जिहीर्षया हर्तुमिच्छया गोपरूपी कश्चिद्गोपस्तद्दिने वनं नागतस्तद्रूपी सन् प्रलम्बाख्योऽसुरोऽगादित्यन्वयः ॥ १७ ॥ दाशार्हकुलोत्पन्नः श्रीकृष्णस्तं प्रलम्बासुरं विद्वानपि जानन्नपि तेन सह सख्यमन्वमोदत् । सख्यानुमोदने हेतुमाह—वधमिति । तेन सह क्रीडयैव तस्य वधं विचिन्तयन्नित्यर्थः । एवं ज्ञाने हेतुमाह—सर्वदर्शन इति । सर्वज्ञ इत्यर्थः । सर्वज्ञत्वे वधसामर्थ्येन च हेतुमाह—भगवानिति ॥१८॥ तत्रेति । यत्र समभूमौ तद्वधयोग्या क्रीडा भवेत्तत्र गोपान् उपाहूय 'हे गोपा ! यथायथं वयोबलाद्यनुरूपं द्वन्द्वीभूय वयं विहरिष्याम' इति कृष्णः प्राहेत्यन्वयः। ननु 'तेषां स्वरुच्या नानाविधक्रीडासु प्रसक्तानां तदाह्वानात्तत्त्यागेनागत्य तद्वाक्याङ्गीकारे को हेतुः ?' इत्यपेक्षायामाह—विहारविदिति । यतोऽभिनवचमत्कृतनानाविहाराभिज्ञ स एवेत्यर्थः । अनेन क्रीडायामपि भगवदधीनता प्रदर्शिता ॥ १९ ॥ तत्रैवं कृष्णेनोक्ते सति गोपा रामजनार्दनावेव परिवृढौ नायकौ चक्रुः । तत्र सङ्घट्टो यूथः । केचित् कृष्णस्य संघट्टिनः यूथगताः पक्षीया आसन् । तथा अपरे रामस्य सङ्घट्टिन आसन् ॥ २० ॥ वाह्यवाहकेति भावप्रधानो निर्देशः । वाह्यत्वं वाहकत्वं च लक्षण फलं यासु तथा विविधाः क्रीडा आचेरुः । वाह्यवाहकलक्षणा इत्येतदेव विवृणोति—यत्रेति । अस्पृश्यलीलायां यदि रामसङ्घट्टिनां मध्ये कोपि कृष्णसङ्घट्टिनं कमपि स्पृशति तदा रामसङ्घट्टिनः सर्वे एव जेतारः सन्तस्तान् कृष्णसङ्घट्टिन आरोहन्ति । ते च कृष्णसङ्घट्टिनः सर्वे एव पराजिताः सन्तस्तान् रामसङ्घट्टिनो यथायथं वहन्ति । एवं यदा कृष्णसङ्घट्टिनां मध्ये कोपि रामसङ्घट्टिनं कमपि स्पृशति तदा कृष्णसङ्घट्टिनः सर्वे जेतारः सन्तस्तानारोहन्ति, ते च तान् हन्तीत्यर्थः ॥ २१ ॥ एवं वहन्तो वाह्यमानाश्च गोधनं चारयन्तश्च कृष्णादयो गोपा भाण्डीरक नाम वटं जग्मुः । यतः स एव वटोऽवरोहणस्थानत्वेन कल्पितः तदुक्तं विष्णुपुराणे—"ते वाहयन्तस्त्वन्योऽन्यं भाण्डीरस्कन्धमेत्य वै । पुनर्निर्वर्तिताः सर्वे ये ये पूर्वं पराजिता" इति ॥ एवमारोहणस्थलमपि तत्समीपे क्वचित् कल्पितं ज्ञेयम् ॥ २२ ॥ यर्हि क्रीडायां रामसङ्घट्टिनः श्रीरामादयो जयिनो जातास्तदा तान् कृष्णादय ऊहुः । 'इयमपि लीला आश्चर्यजनिका, यत्र सर्वेश्वरोऽपि भगवान् पराजितः सन् गोपमुवाह' इति सूचयन् सम्बोधयति—नृपेति ॥ २३–२४ ॥

अन्वितार्थप्रकाशिका

पशूनिति ॥ तस्मिन्वने गोपैः सह पशून् चारयतोः सतोः रामकृष्णयोस्तयोर्जिहीर्षया हर्तुमिच्छया गोपरूपी कश्चिद्गोपस्तद्दिने वनं नागतस्तद्रूपी सन् प्रलम्बाख्योऽसुरोऽगात् ॥ १७ ॥ तमिति ॥ भगवान् सर्वदर्शनः दाशार्हः श्रीकृष्णस्तं प्रलम्बासुरं विद्वानपि जानन्नपि क्रीडयैव तस्य वधं विचिन्तयन् तेन सह सख्यमन्वमोदत ॥ १८ ॥ तत्रेति ॥ विहारवित् क्रीडाभिज्ञः कृष्णः तत्र गोपान् उपाहूय हे गोपाः ! यथायथं वयोबलाद्यनुरूपं द्वन्द्वीभूय वयं विहरिष्याम इति प्राह स्म ॥१९॥ तत्रेति ॥ तत्र एवं कृष्णेनोक्ते सति गोपा रामजनार्दनावेव परिवृढौ नायकौ चक्रुः । तत्र संघट्टो यूथः केचित्कृष्णस्य संघट्टिनः यूथगताः आसन् तथा अपरे रामस्य संघट्टिन आसन् ॥ २० ॥ आचेरुरिति ॥ यत्र यासु क्रीडासु जेतारः आरोहन्ति पराजिताश्च तान् वहन्ति ताः बाह्यवाहकेति भावप्रधानो निर्देशः । बाह्यत्वं बाहकत्वं च लक्षणं फलं यासु तथा विविधाः क्रीडा आचेरुः ॥ २१ ॥ वहन्त इति ॥ एवं वहन्तो बाह्यमानाः पृष्ठेनोह्यमानाश्च । स्वार्थे णिच् । गोधनं चारयन्तश्च कृष्णपुरोगमाः कृष्णादयो गोपाः भाण्डीरकं नाम वटं जग्मुः । यतः स एव वटोऽवरोहणस्थानत्वेन कल्पितः । तत्समीपवर्त्येवारोहणस्थानमपि ज्ञेयम् ॥ २२ ॥ रामेति ॥ हे नृप ! यर्हि क्रीडायां रामसंघट्टिनः श्रीदामवृषभादयः जयिनो जातास्तदा तान् कृष्णादय ऊहुः ॥ २३ ॥ उवाहेति ॥ पराजितो भगवान् कृष्णः श्रीदामानम् उवाह । भद्रसेनस्तु वृषभनामानम् उवाह । प्रलम्बो रोहिणीसुतमुवाह ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्मिन् वने चारयतोः सतोः तौ हन्तुमिच्छया ॥ १७ ॥ तस्य सख्यमन्वमोदत कृतवान् ॥ १८ ॥ यथायथमवस्थाबलादियोग्यं द्वंद्वीभूय ॥ १९ ॥ परिवृढौ यूथमुख्यौ कृष्णस्य संघट्टिनः पक्षगाः ॥ २० ॥ वाह्याः स्कंधैर्वोढुं योग्यास्तेषां वाहकाश्चैतेषामुभयविधानां लक्षणं सूचनं यासु ता वाह्यवाहकलक्षणाः ॥ २१ ॥ अभ्यानुह्यमानान् वहंतो गोपाः तैर्वाह्यमानाः स्कंधैरुह्यमानाः ते द्विविधा गोपाः गोधनं चारयंतः ॥ २२ ॥ जयिनो जेतारः भवंति हि तान् ऊहुर्वहंति स्म ॥ २३–२४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पशूनिति ॥ तद्वने, गोपैः सह, पशून् चारयतोः रामकृष्णयोः, समीपे इति शेषः । तज्जिहीर्षया रामकृष्णयोर्हरणेच्छया, जिघांसयेति पाठे रामकृष्णयोर्हननेच्छयेत्यर्थः । गोपानामिव रूपमस्यास्ति तथाविधः सन्, प्रलम्बः नाम असुरः, अगात् ॥ १७ ॥

तमिति ॥ सर्वदर्शनः हेतुगर्भमिदं विशेषणम् । सर्वज्ञत्वात्, तं जिघांसुं समागतं गोपरूपिणं प्रलम्बासुरमित्यर्थः । विद्वान् जानन्नपि, दाशार्हः भगवान् श्रीकृष्णः सद्यः न तं जघानेति वाक्यशेषः । किं तु तस्य वधं, चिन्तयन् उपायान्तरेणेति शेषः । तत्सख्यं तेन सह सखिभावं एव, अन्वमोदतारोचयत् ॥ १८ ॥ तत्रेति ॥ विहारवित् तद्वयोचितविहारक्रमाभिज्ञः, कृष्णः गोपालान्, तत्र यत्र स्वयमुपविष्टस्तस्मिन् स्थाने, उपहूय, स्वसमीपे समाहूय, हे गोपाः, यथायथमाकृतिवयोबलानुरूपं द्वन्द्वीभूय संघद्वयं भूत्वा, विहरिष्यामः, इति प्राह ॥ १९ ॥ तत्रेति ॥ एवं भगवतोक्ते सतीति शेषः । गोपाः, तत्र तस्यां क्रीडायां, रामजनार्दनो रामकृष्णौ, परिवृढौ संघनायकौ, चक्रुः । तत्र केचिद्गोपाः, कृष्णसंघट्टिनः श्रीकृष्णपक्षीयाः, आसन् बभूवुः । अपरे गोपाः, रामस्य संघट्टिनश्च, आसन् ॥२०॥ आचेरुरिति ॥ एवभूताः भूत्वा, वाह्यवाहकेति भावप्रधानो निर्देशः । वाह्यत्ववाहकत्वे लक्षणे फले यासु ताः, विविधाः क्रीडा आचेरुः चक्रुः । ताः क्रिडा विशदयति । यत्र यासु क्रीडासु, जेतारः आरोहन्ति, पराजिताश्च वहन्ति ॥२१॥ वहन्त इति ॥ एवंभूतासु क्रीडासु प्रवर्त्तमानासु सतीष्विति शेषः । वाह्यमानाः जयेन हेतुना पृष्ठेनोह्यमानाः, वहन्तः पराजयेन हेतुना पृष्ठेन वहन्तश्च, गोधनं चारयन्तश्च सन्तः, कृष्णः पुरोगमोऽग्रेसरो येषां ते गोपाः, भाण्डीरकं नाम भाण्डीरकेति नाम्ना प्रसिद्धमित्यर्थः । वटं न्यग्रोधतरुं, जग्मुः ॥ २२ ॥ रामेति ॥ तत्र यर्हि यदा, श्रीदामवृषभादयः, रामसंघट्टिनः, क्रीडायां जयिनः जेतारः भवन्ति, तदा हे नृप, तान् तान्, कृष्णादयः ऊहुर्वहन्ति ॥ २३ ॥ उवाहेति ॥ अविषह्यमिति ॥ तत्र पराजितः पराजयं प्राप्तः, भगवान् कृष्णः, श्रीदामानं उवाह । पराजितः भद्रसेनः, वृषभं उवाह । प्रलम्बः रामसंघट्टो किं न बभूवेतीमां शङ्कां निराकुर्वंस्तं विशिनष्टि । कृष्णं अविषह्यं मन्यमानः, दानवपुङ्गवः दैत्यश्रेष्ठः, प्रलम्बोऽसुरः, पराजितः अत एव, रोहिणीसुतं बलभद्रं, वहन् सन्, द्रुततरमतिशीघ्रं, अवरुह्यतेऽस्मिन्नित्यवरोहणं मर्यादास्थानं तस्मादिति ततः, परं, प्रागात् । दूरतरमिति पाठे, अवरोहणतः परं दूरतरं, प्रागादित्यन्वयः । यदाहं रामसंघट्टी भवेयं तदा कृष्णेन पराजितस्तं वहेयं, तर्हि व्योमासुरवत् म्रियेयमित्यभिप्रायेण श्रीकृष्णसंघट्टी बभूवेति भावः । उभयोरेकान्वयः ॥ २४–२५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गोपरूपीति : १०.१८.१७.

अज्ञातो यदि तदयत्नमिष्टसिद्धिर्ज्ञातश्चेच्छरणगिरैव शं लभेय ।
इत्यन्तर्निहितविनिश्चयः स दैत्यस्तत्रागात्किमु कृतकात्तगोपरूपः ॥ ९ ॥
योषा बकी पशुमतिर्बत वत्सकोऽपि प्रौढो बकोऽपि सततं जडजातवृत्तिः ।
तस्मात्तथा न गणयत्वयमत्र किन्तु गोपानुरूपमिति किं स तदा तथाऽगात् ॥ १० ॥
अतित्वरा नेष्टकरी यदस्या योगात्फलं तादृगवापुरर्वाक् । बकादयस्तन्नहि तां श्रयामीत्यगात्स तादृक्किमु वस्तुकामः ॥११॥
युक्त्याऽनयैव बहुकालकृतावहित्थः स्थाता भवेयमिह तत्र यथावकाशम् ।
कंसार्थसाधनमदुःशकमेव भूयादित्याशयेन किमु वा स बभूव गोपः ॥ १२ ॥
यदुपतिसहक्रीडासौख्यं समग्रजनेहितं भवति जगतीत्यस्मिन्नर्थे न मानमपेक्ष्यते ।
सहजरिपुरप्यल्पप्रज्ञोऽप्यभक्तमतानुगोऽप्यभवदसुरो यत्प्राप्त्यर्थं स गोपसरूपकः ॥ १३ ॥

तं विद्वानपीति : १०.१८.१८

ज्ञाताऽप्यहं समदृगस्मि शरण्यधामा गोपास्त्विमेऽतिसरलाः खलकैतवाज्ञाः ।
तत्कार्यमत्र कथमित्यनुचिन्त्य कृष्णस्तत्सख्यतः स्वविरुदं प्रथनं ररक्ष ॥ १४ ॥
अकुर्वाणः सख्यं यदि खलमिमं गोपवमिपं गोपवपुषं निहन्यां तद्भूयाद्भृशममीषामृजुधियाम् ।
ग्रहो गोपलघ्नोऽयमिति भुवनेऽप्यत्र वितथः स मा भूदित्यद्धा किमुविभुरसौ सख्यमकरोत् ॥ १५ ॥
स्नेहं विना न भविताऽस्य खलस्य भावो व्यक्तो निजेष्वखिल-गोपसुवेषभाजः ।
युक्त्यन्तरस्तिमितधीः किमु साधु गर्ह्यमप्यन्वमोदत विभुः खलमुख्यसख्यम् ॥ १६ ॥
दृष्ट्वा गोपसमाकृतिं निरुपमो योऽदर्शि तत्सौहृदेदुष्टो घातकबुद्धिरित्थमवगत्याऽप्यच्युतेऽनादरः ।
तेनेदं विशदीकृतं यदवनौ सर्वेश्वरस्यापि मे भक्तस्नेहसुखान्न किञ्चिदपरं सौख्यं मनोमोहकम् ॥ १७ ॥

तत्रेति : १०.१८.१९.

अनेन खलु दुर्हृदा कितवसौहृदं सम्प्रति प्रदर्श्य निखिलेष्वमीष्वपि ममत्वमुत्पादितम् ।
अतोऽत्र न मनागितः समुचिता ह्युदासीनतेत्यचिन्त्यचरितः प्रभुः कृतककेलिमारब्धवान् ॥ १८ ॥
ममत्वोच्छेदकार्येको द्वन्द्वीभावः परस्परम् । इत्यालोच्याच्युतः क्रीडां तादृशीं किमु दिष्टवान् ॥ १९ ॥

अद्वैतकेलिवदलं न युवां विनाऽन्यो द्वन्द्वेऽपि केलिकुतुकेऽर्हति गौरवं नः ।
इत्युक्तिमात्मनिहिता-मनुयुक्तियुक्तां तेषां निशम्य स च सोऽप्युररीचकार ॥ २० ॥

तत्र चक्रुरिति : १०.१८.२०

शत्रुश्चेच्छलवर्त्म जाङ्घिकमनास्तत्तज्जयो धीमता तत्कालं कृतकं निजेषु कलहं निर्माय कार्यो ध्रुवम् ।
मन्ये नीतिमिमां विभाव्य भगवान् स्वात्तोत्तमे निर्ममे रामे तत्परिभूतये प्रथमतः स्वस्य प्रतिद्वन्द्विताम् ॥ २१ ॥
अनेन धरणीधरो धरणिभारभूतेन यद् व्यखेदि बहुधा ततः प्रतिकृति विधास्येऽधुना ।
बलं तदुपरि स्थितं बत विधाय शेषात्मक तथा निजविभागतोऽध्वति किमुच्युतेनाशयः ॥ २२ ॥
कश्चिद् दुर्वृत्तबुद्धिः शरणमुपगतस्तस्य सख्यं विधास्याम्येवाहं तादृगेतत् क्वचिदपि न यथा भग्नभावं भजेत् ।
विस्पष्टद्वन्द्वभावेऽप्यसुरमपिहितं तं तदा केलिकाण्डे स्वीयत्वेनाच्युतेनाध्यवनि गणयताऽकार्यगूढः स्वभावः ॥ २३ ॥
यन्मुख्याक्षरमेकमप्यसुलभं श्रोतुं विरञ्चेरपि युद्धस्ताङ्गुलिपल्लवोऽप्यसुलभस्पर्शो मुनीनामपि ।
यद्वक्षः परिरम्भमिच्छति सदा पद्माऽपि तस्मिन् प्रभौ मैत्र्योपस्थितकृत्स्नकेलिकृदभूद्धन्यो जघन्योऽप्यसौ ॥ २४ ॥

वहन्त इति : १०.१८.२२

प्रारब्धात्कौतुकाद्वाऽप्यधिगतविषयां व्यापृतिं व्यापृतात्मा निम्नां वा चोन्नतां वा हितविहितमनास्तादृशी संविदध्यात् ।
न स्याद् भ्रंशा यथाऽस्मिन्निखिलनिजगवां तस्य सत्सीमदृष्टेर्न स्याज्जात्वप्यनिष्टं तत इति विभुना तादृशेनाभ्यधायि ॥ २५ ॥
विधतविहितसीमन्यत्र मित्रे च शत्रौ व्यरचि यदि च दण्डो नैष नीतावधर्मः ।
इति मनसि विचिन्त्यारम्भि तादृक् सुसीमं विहरणमपि कृष्णेनाऽऽर्यधर्मानुगेन ॥ २६ ॥

रामसङ्घट्टिन इति : १०.१८.२३.

एतद्भारयुतावनीधृतिनमन्मौलिः स शेषोऽधुनाऽपि स्याद् भारभृदेव मे यदि जयः संपादितः सर्वदा ।
आलोच्यवमुरीकृतोऽतिकृपया मन्ये जगज्जिष्णुना श्रीकृष्णेन पराजितत्वमधरीभावश्च केलीविधौ ॥ २७ ॥
क्षणार्धमपि कौतुकात् खलसमागमश्चेत्कृतः स चाच्युतविभूतिमप्यधरतां नयत्याश्वतः ।
न जातु खलसङ्गतिर्हिततदृशा विधेयेति किं स्वमेव तदुदाहृतिं भुवि विवक्तमाधात्प्रभुः ॥ २८ ॥

उवाहेति : १०.१८.२४

श्रीमन्नाम सुदाम धारयति यस्तं च क्वचिद् द्वन्द्वितां प्राप्तं चाप्यहमुद्वहामि सहसा सर्वोत्तमश्रीरपि ।
इत्थं स्वीयजनैकपालन-समुत्साहं तदाद्बोधयन् मन्ये गोपमुवाह तादृशपदं श्रीशः स्वहर्षप्रदः ॥ २९ ॥
अपराजितोऽप्यहमलं पराजितस्तैर्मदुक्तकेलिकृतः । ये श्रीमत्पदलासता भवेयुरिति तादृशैरितं हरिणा ॥ ३० ॥
परिवृढौ न पराजयशालिनावपि मिथो वहतः खलु किन्तु तौ । विदधताऽपजयार्थकमभकं कमपि युक्तमिदं कथमन्यथा ॥ ३१ ॥

कृष्णप्रिया

एक दिन जब बलराम और श्रीकृष्ण ग्वालबालों के साथ उस वन में गौएँ चरा रहे थे, तब ग्वाल के वेष में प्रलम्ब नामक एक असुर आया। उसकी इच्छा थी कि मैं श्रीकृष्ण और बलराम को हर ले जाऊँ ॥ १७ ॥ भगवान् श्रीकृष्ण सर्वज्ञ हैं। वह उसे देखते ही पहचान गये। फिर भी उन्होंने उसका मित्रता का प्रस्ताव स्वीकार कर लिया। वे मन-ही-मन यह सोच रहे थे कि किस युक्ति से इसका वध करना चाहिये ॥ १८ ॥ ग्वालबालों में सबसे बड़े खिलाड़ी, खेलों के आचार्य श्रीकृष्ण ही थे। उन्होंने सब ग्वालबालों को बुलाकर कहा—'मेरे प्यारे मित्रों! आज हमलोग अपने को उचित रीति से दो दलों में बाँट लें। और फिर आनन्द से खेलें ॥ १९ ॥ उस खेल में ग्वालबालों ने बलराम और श्रीकृष्ण को नायक बनाया। कुछ श्रीकृष्ण के साथी बन गये और कुछ बलराम के ॥ २० ॥ फिर उन लोगों ने तरह-तरह से ऐसे बहुत से खेल खेले, जिनमें एक दल के लोग दूसरे दल के लोगों को अपनी पीठ पर चढ़ाकर एक निर्दिष्ट स्थान पर ले जाते थे। जीतने वाला दल चढ़ता था और हारने वाला दल ढोता था ॥ २१ ॥ इस प्रकार एक दूसरे की पीठपर चढ़ते-चढ़ाते श्रीकृष्ण आदि ग्वालबाल गौएँ चराते हुए भाण्डीर नामक वट के पास पहुँच गये ॥ २२ ॥ परीक्षित्! एक बार बलराम जी के दल वाले श्रीदामा वृषभ आदि ग्वालबालों ने खेल में बाजी मार ली। तब श्रीकृष्ण आदि उन्हें अपनी पीठपर चढ़ाकर ढोने लगे ॥ २३ ॥ हारे हुए श्रीकृष्ण ने श्रीदामा को अपनी पीठपर चढ़ाया, भद्रसेन ने वृषभ को और प्रलम्ब ने बलरामजी को ॥ २४ ॥

अविषह्यं मन्यमानः कृष्णं दानवपुङ्गवः । वहन् द्रुततरं [1]प्रागादवरोहणतः परम् ॥ २५ ॥
तमुद्वहन् धरणिधरेन्द्रगौरवं महासुरो विगतरयो निजं वपुः ।
स आस्थितः पुरटपरिच्छदो बभौ तडिद्द्युमानुडुपति[2]मानिवाम्बुदः ॥ २६ ॥
निरीक्ष्य तद्वपुरलमम्बरे चरन्[3] प्रदीप्तदृग् भ्रुकुटितटोग्रदंष्ट्रकम् ।
ज्वलच्छिखं कटककिरीटकुण्डलत्विषाद्भुतं हलधर ईषदत्रसत् ॥ २७ ॥
अथागतस्मृतिरभयो रिपुं बलो विहाय[4]सार्थमिव हरन्तमात्मनः ।
रुषाहनच्छिरसि दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा ॥ २८ ॥

कर्दमक्षमा

अन्वयः—दानवपुङ्गवः कृष्णम् अविषह्यम् मन्यमानः बलम् वहन् द्रुततरम् अवरोहणतः परम् प्रागात् ॥ २५ ॥ धरणिधरेन्द्रगौरवम् तम् उद्वहन् विगतरयः स महासुरः (यदा) निजम् वपुः आस्थितः (तदा) पुरटपरिच्छदः सः तडिद् द्युमान् उडुपतिमान् अम्बुद इव बभौ ॥ २६ ॥ अम्बरे अलम् चरन् हलधरः, प्रदीप्तदृक् भ्रुकुटि तट उग्रदंष्ट्रकम् ज्वलत्शिखम् कटककुण्डलत्विषा अत्यद्भुतम् तत् वपुः निरीक्ष्य ईषत् अत्रसत् ॥ २७ ॥ अथ आगतस्मृतिः अभयः बलः, अर्थम् (पदार्थम्) इव आत्मनः विहाय सा हरन्तम् रिपुम्, सुराधिपः वज्ररहंसा गिरिम् इव, रुषा दृढेन मुष्टिना शिरसि अहनत् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृष्णदृष्टिवंचनाय अवरुह्यतेऽस्मिन्नित्यवरोहणं मर्यादा ततः परं दूरमगात् ॥ २५ ॥ धरणिधरेंद्रवद्गौरवं यस्य तं निजमासुरं वपुरास्थितः । पुरटपरिच्छदः सुवर्णालंकारः । तडिद्द्युमान्विद्युद्दीप्तिमानित्यलंकारोपमा । उडुपतिवाडिति रामोपमा । उडुपतिं वहतीत्युडुपतिवाट् । यदि यथोचितस्थानेषु स्थिता विद्युतो भवंत्युपरि चोडुपतिस्तदा सोम्बुदो यथा भाति तद्वद्बभावित्यर्थः ॥ २६ ॥ अलमतिवेगेन । प्रदीप्ते दृशौ यस्मिन्वपुषि तत् । भ्रुकुटितटसंलग्ना उग्रा दंष्ट्रा यस्मिंस्तत् प्रदीप्तदृक् प्रदीप्तनेत्रं भ्रुकुटितटं यस्मिन् उग्रा दंष्ट्रा यस्मिंस्तच्च तच्चेति वा । ज्वलंत्यः शिखाः केशा यस्मिंस्तत् ॥२७॥ आगतस्मृतिरभय इवात्मनः सार्थं गोपसमूहं विहाय हरंतं रिपुमहनत् । यद्वा विहायसाऽऽकाशमार्गेणात्मनः प्राप्तमर्थमिव हरंतमिति वज्ररंहसा वज्रवेगेन मुष्टिना ॥२८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अविषह्यम् योद्धुमशक्यम् । यद्वा—कृष्णमविषह्यं वोढुमशक्यं मत्वा रामं वहन्नगादिति संबंधः ॥ २५ ॥ धरणिधरेंद्रः सुमेरुः । "पुरटो नगराटे स्यात्क्लीबं हेम्न्यग्रगे शुनि" इति धरणिः । द्युमता सूर्येण वाऽत्र पक्षेऽभूतोपमा ज्ञेया ॥ २६ ॥ पूर्वसमासे दंष्ट्राणां भ्रुकुटिसंलग्नत्वासंभवात्समासांतरमाह–प्रदीप्तेत्यादि । "भ्रुवोर्मध्ये तु कुटिभ्रुकुटिभ्रुकुटिः स्त्रियाम्" इति शब्दरत्ने । अत्रसत् उद्विविजे ॥ २७ ॥ अथ श्रीकृष्णकृतबोधानंतरम् । आगतस्मृतिः ज्ञातनिजवैभवः । बलं गृहीत्वा, प्रलंबधावने बलदेवेन कृष्णः प्रार्थितः स च तं न त्वं प्राकृतो बालः किं तु साक्षादनंतोऽसीति बोधितवानिति हरिवंशादवसेयम् । अभयशब्देनेवशब्दसंबंधे श्रीकृष्णबोधितस्याप्यनीशतैवाविर्भवत्यतः प्रकारांतरेण योजयन्नाह–यद्वेति । "मुष्टिर्द्वयोः स्यात्सांगुष्ठे करे संकुचितांगुलौ" इति धरणिधरः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, तथापि कंसस्य मुख्यारिं श्रीकृष्णं हर्तुं कथमयं नाचेष्टतेत्याह - अविषह्यमिति । श्रीरामद्वारा मारयितुं श्रीकृष्णेन तत्तेज आवृत्य स्वतेजस आविष्कृतेः अत एव कृष्णपक्षियो भूत्वा बलदेवं वहन् सन् यतो दानवेषु पुङ्गवः बलादिना श्रेष्ठः अवरोहणतः भाण्डीरस्कंधात् तथा च श्रीविष्णुपुराणे—

"ते वाहयन्तस्त्वन्योन्यं भाण्डीरस्कन्धमेत्य वै । पुनर्निवर्त्तिता सर्वे ये ये पूर्वं पराजिताः ॥
सङ्कर्षणं तु स्कन्धेन शीघ्रमुत्क्षिप्य दानवः । न तस्थौ प्रजगामैव स चन्द्रः इव वारिदः ॥ इति ॥ २५ ॥

धरणिधरेन्द्रः सुमेरुस्तस्मादपि गौरवं भारो यस्य सीमातिक्रमे जाते विहस्य विस्मित्य विशङ्क्य च क्रमेण भारातिरेकप्रकटनात् उत् उच्चैः स्कन्धे वहन्नित्यर्थः । स महासुरोपि अत एव निजमासुरं वपुरास्थितः तथा च तत्रैव—

---

[1] प्रायाद–गो. प्रे. टी. । [2] वाडि–श्रीधर. वंशी. ; मानि–वीर. विज. । [3] चरत्–श्रीधर. वंशी. वीर शुक. ; चरम्–विज. ।
[4] सार्थमपहरन्त–वीर. ; सोर्ध्वं च हरन्त–विज. ।

"असहन् रौहिणेयस्य स भारं दानवोत्तमः । ववृधे सुमहाकायः प्रावृषीव बलाहकः" ॥ इति ॥ २६ ॥

ईषदत्रसत् बाल्यक्रीडावेशेनेति पूर्वपूर्ववत् ॥ २७ ॥ अथानन्तरमिति—

"किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते । सर्वात्मन् सर्वगुह्यानां गुह्यगुह्यात्मना त्वया" ॥

इत्यादिकात् श्रीविष्णुपुराणाद्युक्तात्तं प्रति श्रीकृष्णस्य वचनात् सद्य एवागता स्मृतिः दैत्यवधार्थंनिजावतारप्रयोजनं यस्य सः बलो मुष्टिना रिपुमहनत् अहन् कः केन कमिव मुराधिपो वज्ररंहसा गिरिमिव ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तथापि कंसमुख्यारिं श्रीकृष्णं हन्तुं कथमयं नाचेष्टत इत्याशंक्याह—अविसह्यमिति । अतएव कृष्णपक्षीयो भूत्वा बलदेवं वहन् सन, यतो मानवेषु पुंगवो बलादिनातिश्रेष्ठः; यद्वा, श्रीबलदेवकरणकः तद्वधार्थं श्रीकृष्णेच्छयैव बलदेवं वहन्, अवरोहणतोऽवतारणसीमातः परं परतः प्रकर्षेणावैकल्यादिना गतः; तथा च विष्णुपुराणे (५।८८।१५-१६)—

'ते वाहयन्तस्त्वन्योन्यं भाण्डीरस्कन्धमेत्य वै । पुनर्निवर्तिताः सर्व्वे ये ये पूर्व्वं पराजिताः ॥
संकर्षणं तु स्कन्धेन शीघ्रमुत्क्षिप्य दानवः । न तस्थौ प्रजगामैव सचन्द्र इव वारिदः ॥' इति ।

तत्र हेतुः - अविषह्यमिति, श्रीकृष्णस्य दृष्टिगोचरे किञ्चिदस्य कर्त्तुं न पक्ष्यामीति चिन्तयन्नित्यर्थः । दानवोपुंगवोऽपि, तथापि द्वयोर्ज्जिहीर्षया गतस्यापि तस्य केवलश्रीबलदेवहरणे स एव हेतुरनुसन्धेयः ॥ २५ ॥ धरणीधरेन्द्रः सुमेरुस्तस्मादपि गौरवं भारो यस्य, तादृशत्वं स्वभावतो दैत्यज्ञानेन तदानीं तत्प्रकटनाद्वा, उद्वहन् किञ्चिदुच्छ्वासार्थं पृष्ठात् स्कन्धमारोप्योच्चैर्वहन्, किंवा आकाशमार्गेण वहन् स प्रलम्बमहासुरोऽपि विगतो नष्टो रयो वेगो यस्य सः, अतएव निजं सहजमासुरं वपुरास्थितः, तथा च तत्रैव (विष्णुपुराणे ५।९।१७)—

'असहन् रोहिणेयस्य स भारं दानवोत्तमः । ववृधे सुमहाकायः प्रावृषीव बलाहकः ॥'

इत्यम्बुदोपमया तस्य श्यामो वर्णो ध्वनितः ॥ २६ ॥ कटकादीनां पुरटमयानां त्विया अद्भुतं देदीप्यमानमित्यर्थः । यद्वा, कटकादित्विषा विशिष्टमद्भुतं विस्मयावहमलोकिकत्वात; सहसा तथाभूतत्वाच्च ईषदत्रसत्, बाल्यक्रीड़ाकौतुकात्, यद्वा, महादैत्यवपुस्तं निरीक्ष्यापि श्रीकृष्णात् किञ्चिच्छंकामवाप, दैत्यस्यापि गोपरूपत्वेन वधायोग्यत्वादित्यर्थः; यद्वा, एतादृशं सखिवृन्दे अपरं दानवमाशंक्य स्नेहेन कृष्णं प्रत्यनिष्टशंकया ॥ २७ ॥ अथानन्तरमिति (वि. प. ५।९।२३)—किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते ? सर्व्वात्मन् सर्व्वगुह्यानां गुह्यगुह्यात्मना त्वया ॥' इत्यादिकात् श्रीविष्णुपुराणाद्युक्तात् तं प्रति श्रीकृष्णस्य वचनात् सद्य एवागता स्मृतिर्दैत्यवधार्थं निजावतारप्रयोजनस्मरणं यस्य सः, यद्वा, पश्चादागता स्मृतिः श्रीकृष्णस्य पूतना-वत्सासुर-वधानुसन्धानं यस्य, तथा तेन स्त्रीवधो वत्सवधश्च दैत्यादविहितः, तथायं गोपवेशोऽपि मया हन्तुं योग्य एवेति विचारयन्नित्यर्थः । पक्षद्वये क्रमेणैवं ज्ञेयम् । तृतीये च आगता स्मृतिर्मत्कीर्त्त्यर्थमेव मद्धस्तेनैतद्वधार्थं तेनैवमनुष्ठितमस्तीत्यादि ज्ञानं यस्येति; अतोऽभयोऽपगतशंकः सन्नथवा निरीक्ष्यापि ईषदप्यत्रसत् किम् ? काक्वा, नैवेत्यर्थः । तत्र हेतुमाह - आगतस्मृतिरतिरोहितज्ञानः, अथ अतोऽभयः। अन्यत् समानम् । दृष्टान्तो मुष्टेर्दार्ढ्येऽवैयर्थ्ये च गिरिणा सह दैत्यस्योपमा, पुरा पक्षसद्भावेन गिरीणामम्बरोत्पतनकठिनतरांगत्वाद्यपेक्षया ॥ २८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अविषह्यं कृष्णम् अविष्टभ्यं मन्यमानो बलभद्रं वहन् द्रुततरं प्रागादित्यन्वयः ॥ २५ ॥ विहतरयः नष्टवेगः दूरं गतेन साशङ्कत्वात् अवरोहणतः परत्वं तडिद्द्युमान् विद्युद्दीप्तिमान् उडुपतिवाडम्बुद इव बभावित्यन्वयः ॥ २६-२८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तावद्रामसङ्घट्टी किं न बभूव प्रलम्ब इतीमां शङ्कां निराकुर्वंस्तं विशिनष्टि—कृष्णमविषह्यं सोढुमशक्यं व्योमासुरवृत्तान्तस्मरणेन दुर्वहं मन्यमानः श्रीकृष्णसङ्घट्टी भूत्वा रामेण पराजितस्तमेवोवाहेत्यर्थः । यद्यहं रामसङ्घट्टी भवेयं तर्हि यदा कृष्णेन पराजितस्तं वहेयं तर्हि व्योमासुरवन्म्रियेयेत्यभिप्रायेण कृष्णसङ्घट्टी बभूवेत्यभिप्रायः । रोहिणीसुतं वहन् अवरुह्यतेऽस्मिन्नित्यवरोहणं मर्यादास्थानं ततः परं दूरं द्रुततरं यथा तथा प्रागात् ॥ २५ ॥ धरणिधरेन्द्रवत्पर्वतवद्गौरवं यस्य तं बलदेवं वहन् स महासुरः प्रलम्बः निहतरयः नष्टवेगः निजं स्वसाधारणं वपुरास्थितः सन् स्वर्णालङ्कारः बभौ तडिद्द्युमानित्यलङ्कारोपमा उडुपतिमानिवेति रामोपमा यदि यथोचितस्थानेषु विद्युतो भान्ति उपरिचोडुपतिस्तदा सोम्बुदो यथा भवति तद्वद्बभावित्यर्थः ॥ २६ ॥ निरीक्ष्येति हलधरः बलदेवस्तु तद्वपुर्निरीक्ष्य किञ्चदभिभेत्, कथम्भूतम् ? अम्बरेचरदाकाशस्पर्शी अत्युन्नतमित्यर्थः । अलमतिवेगेन

प्रदीप्ते दृशौ यस्मिन् भृकुटितटलग्ना उग्रदंष्ट्रा यस्मिन् तच्च तच्चेति वा ज्वलन्त्यः शिखाः केशाः यस्मिन् कटकादीनां त्विषा अद्भुतं चित्रम् ॥ २७ ॥ अथागतस्मृतिर्लब्धासुरस्वशक्त्यादिज्ञानोऽत एवाभयः बलदेवः आत्मनः सार्थं सहायं गोपसमूहं विहाय दूरतो हरन्तं रिपुं रुषा शिरसि दृढेन मुष्टिना जघान यथा सुराधिप इन्द्रो वज्ररंहसा वज्रवेगेन गिरिं तद्वत् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रलम्बः कृष्णं विहाय राममवहत्तत्र किं कारणमत्राह—अविषह्यमिति ॥ २५ ॥ धरणिधरेन्द्रः पर्वतराजस्तद्वद्गौरवम् अतिभारवत्त्वं यस्य स तथा तं पुरटपरिच्छदः स्वर्णालङ्कारः तडिता द्युमता आदित्येन च संयुक्तः तडिद्युमान् उडुपतिश्चन्द्रः तद्वानम्बुद इतीयमाशङ्का अभूतापमा यद्वा, तडिद्द्युमान् तडिता युक्तो मेघस्थाने प्रलम्बः तडित्स्थाने पुरटपरिच्छदः चन्द्रस्थानीयो रामः ॥ २६ ॥ अम्बरेचरमित्यलुक् ॥ २७ ॥ अथ कृष्णस्तवानन्तरम् आगतस्मृतिः उपात्तमूलस्मरणः वज्ररंहसा वज्रवेगेन ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृष्णमविषह्यं मन्यमान इत्यत एव रामं हर्तुमनाः कृष्णपक्षीयोऽभूदिति भावः । अवरुह्यतेऽस्मिन्नित्यवरोहणं मर्य्यादास्थानं कृष्णदृष्टिवञ्चनाय ततः परमपि प्रागात् ॥ २५ ॥ तमुत्कटबलतयैव वहन् यतो धरणिधरेन्द्रः सुमेरुस्तद्वद्गौरवं यस्य तं तस्य सीमातिरिक्तगमनदर्शनेन विस्मित्य स्वभाराधिक्यप्रकटनात् ततश्च वोढुमसामर्थ्यादेव विगतवेगः ततश्च तेन वपुषा स्वमहापराक्रमम् अमितमालक्ष्य स निजं वपुरास्थितः बभौ पुरटपरिच्छदः सुवर्णालङ्कारवान् अम्बुदस्तडितद्युतिमान् उडुपतिं वहतीति सः अत्रासुरस्याम्बुद उपमा स्वर्णालङ्कारस्य तडिद्द्युतिः बलदेवस्योडुपतिः ॥ २६ ॥ अलमतिवेगेन प्रदीप्ते दृशौ यस्मिन् भ्रूकुटितटसँल्लग्ना उग्रा दंष्ट्रा यस्मिंस्तच्च तच्च तत् वपुर्निरीक्ष्य ईषदत्रसदिति साक्षात् परमात्मनोऽपि तस्य त्रासोऽयं तदैश्वर्यज्ञानस्य कृष्णेनैव स्वयोगमायया आवरणात् तत्राम्बुदाकारमसुरवपुरेतत्तथा वर्द्धतां यथा मदग्रजवपुश्चन्द्रप्रदेश एवोत्तिष्ठेदिति कृष्णस्य कौतुकदिदृक्षैव कारणं तदैश्वर्यज्ञानानावरणे तु असुरवपुःप्राकट्यारम्भ एव नायं गोपः किन्त्वसुर एवेति विदुषा बलदेवेन सद्यस्तद्वधे तत्कौतुकं न सिद्ध्येदिति ज्ञेयम् ॥२७॥ लब्धाभीष्टः कृष्णः साग्रजे बिभ्यति सति तत्र पुनरैश्वर्य्यज्ञानं सहसैवार्पयामासेत्याह अथागतस्मृतिरिति—

किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते । सर्वात्मन् सर्वगुह्यानां गुह्यगुह्यात्मना त्वया ॥

इति विष्णुपुराणोक्तकृष्णवाक्याल्लब्धनिजैश्वर्य्यज्ञानः विहायसा आकाशमार्गेण आत्मनः प्राप्तमर्थं धनं हरन्तमिव रिपुं मुष्टिना अहनत् कः केन कमिव सुराधिपो वज्ररंहसा गिरिमिव ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अवरुह्यतेऽस्मिन्नित्यवरोहणं मर्य्यादास्थानम् ॥ २५ ॥ धरणिधरेन्द्रवद्गौरवं गुरुत्वं यस्य तं बलमुद्वहन् विगतवेगः निजमासुरं वपुरास्थितः पुरटपरिच्छदः कनकाभरणः तडित् द्युमानुडुपतिवाडम्बुद इव बभौ तडिद्द्युमान् तडिद्दीप्तिमान् इत्याभरणोपमा उडुपतिवाडिति बलोपमा ॥ २६ ॥ अलमतिवेगेनाम्बरेचरत् आकाशगतम् प्रदीप्तदृक् भ्रुकुटितटं यस्मिन् उग्रा द्ंष्ट्रा तच्च तच्च तत् ॥ २७ ॥ विहायसा आकाशमार्गेण आत्मनोऽर्थं हरन्तमिव वज्ररंहसा वज्रवेगेन मुष्टिना यद्वा वज्रस्य रंहसा गिरिमिवेत्यन्वयः ॥ २८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कृष्णमविषह्यं मन्यमान इति रामं हर्त्तुकामः कृष्णसङ्घट्टी बभूवेति भावः । रामं वहन्नवरोहणतः परं प्रागात् अवरुह्यतेऽत्रेत्यवरोहणं भाण्डीरपिण्डीका ततः परं गमनं कृष्णदृष्टिवञ्चनार्थम् ॥२५॥ स महासुरः प्रलम्बः प्रौढ़बलतयैव तं वहन् अवरोहणतः परगमने सति धरणिधरेन्द्रस्य सुमेरोरिव गौरवत् यस्य तं प्रकाशितैश्वर्यं वोढुं असामर्थ्यादेव विगतरयः क्षीणवेगः ततश्च तेन वपुषा तत्पराक्रममहान्तमाज्ञाय निजमासुरं वपुरास्थितो बभौ पुरटपरिच्छदः कनकभूषणधरः अम्बुदस्तड्दिद्युतिमान् उडूपतिं चन्द्रं वहतीति सः अत्र प्रलम्बस्याम्बुदः पुरटपरिच्छदस्य तड़्दिद्युतिः बलदेवस्योडुपतिरुपमानम् ॥ २६ ॥ प्रदीप्ते दृशौ नेत्रे यत्र भ्रुकुटितटसंलग्नाः उग्रा दंष्ट्रा यत्र तच्च तच्च तद्वपुर्निरीक्ष्य हलधरो बल ईषदत्रसत् बाल्यक्रीड़ावेषादेव त्रासाभासत्वमकरोत् धरणिधरेन्द्रगौरवमिति प्रागुक्तेः ॥ २७ ॥ अथानन्तरं जगता लुप्ता स्मृतिर्यस्य सोऽगतस्मृतिः वैष्णवे तु कृष्णवाक्यादागतस्मृतिरित्युक्तः स बलभद्रो दुष्टवधार्थं स्वाविर्भावं विजानन्नित्यर्थः । मुष्टिना रिपुमहन्, कः केन कमिव ? तत्राह सुराधिपो वज्ररंहसा गिरिमिवेति रिपुं कीदृशं विहायसा नभोमार्गेणात्मनः प्राप्तमर्थं धनं हरन्तमिव ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विगतरयो विगतो रयो वेगो यस्य स महासुरो धरणिधराः पर्वतास्तेषामिन्द्रो मेर्वादिस्तस्य गौरवं यस्य स तमुद्वहत् । अनेन गतरयतायां हेतुरुक्तो भवति । निजं वपुरसुरशरीरमास्थितः । अनेन च मायिकता प्राक्तनस्यैच्छिकीति द्योत्यते । पुरटपरि-

च्छदोऽलङ्कारादिर्यस्य सः । अत्राम्बुदः प्रलम्ब उडुपती रामः परिच्छदास्तटित इति रूपं । तटितो द्यौः प्रकाशस्तद्वान् उडुपतिवाट् उडुपतिं चन्द्रं वहतीति स तथा । उडुपतिमानिति पाठेऽपि स एवार्थः । वाहयतेः क्विप् । अथवा वहेश्चेति । अम्बुद इव बभावित्यभूतोपमा ।। २५ ।। तदम्बरे चरं । अलुक् । प्रदीप्ते दृश्यौ यस्य तत् उग्रेति भृकुटितटदंष्ट्रोभयविशेषणं । उग्रं भृकुटितटमुग्रा दंष्ट्रा च यस्य तत् । समासान्तः कप् । आपोऽन्यतरस्यामिति ह्रस्वः । ज्वलन्ती शिखा यस्य तत् कटककिरीटकुण्डलत्विषा चाद्भुतमाश्चर्यवहं निरीक्ष्य हलधर ईषत्कृष्णप्रवोधात्प्राक् किञ्चिदत्र सन्त्रीतोऽभूत् । यथोक्तं हरिवंशे । स सन्दिग्धमिवात्मानं मेने सङ्कर्षणस्तदा । दैत्यस्कन्धगतः श्रीमान्कृष्णं चेदमुवाच ह । ह्रियेऽहं कृष्ण दैत्येन पर्वतोदग्रवर्ष्मणा । तमाह सम्मितं कृष्णः साम्ना हर्षकलेन वै । अभिज्ञो रौहिणेयस्य वृत्तस्य च बलस्य च । अहोऽयं मानुषो भावो व्यक्तमेवानुपाल्यते । यस्तं जगन्मयं गुह्य गुह्याद्गुह्यतरं गतः । स्मर नारायणात्मानं लोकानां त्वं विपर्यय इत्यारभ्य संस्मारितस्तु कृष्णेन रौहिणेयः पुरातनं । बलेनापूर्य तदा त्रैलोक्यान्तरचारिण इत्यन्तेन ग्रन्थेन ।। २६ ।। आगता स्मृतिर्यस्य स तथा । सस्मार रूपं निजमेव लक्ष्मण इत्यादेर्लक्ष्मणवत् । अभयो बलो विहायसोर्ध्वमात्मन आत्मानं हरन्तं रिपुमात्मनो दृढेन मुष्टिना वज्ररंहसा वज्रवेगेन सुराधिप इन्द्रो गिरिमिव रुषाऽहनदहन् । सबहुव्रीहिः सद्वत्तरंहसेति मुष्टिविशेषणं च । अथेन निरन्नेन । अन्नन्यमिति हि श्रुतिः । अनशनन्नन्यः । अन्नो निरन्नोऽपि बलेन भूयानित्यादेः । कृष्णेनागता तद्बोधनेनेति यावत् स्मृतिर्यस्य स इति वा । अथ येनागता स्मृतिर्यस्य इति वा । अकारो वासुदेवः स्यादित्यादेः ।।२७।। सपद्याहतो विशीर्णं शीर्षं यस्य स मुखाद्रुधिरं वमन्नुद्गिरन्नपस्मृतोऽपगतं स्मृतं स्मृतिः । भावे क्तः । यस्य स महारवमन्तकालिकं समीरयन्त्यन्र्धावत इन्द्रस्यायुधं वज्रं तेनाहतो गिरिर्यथा तथाऽपतत् ।। २८ ।।

श्रीसुबोधिनी

ततो यज् जातं तदाहा**विषह्य**मिति, प्रलम्बेन हि ज्ञातं भगवता सख्यकरणाद् भगवान**विषह्यो न** केनापि सोढुं शक्यः, अतोन्यतरस्याप्युपद्रवः स्वकार्यफलसाधक इति **दानवपुङ्गवो** दानवानां मध्ये श्रेष्ठो दानवारिं भगवन्तं **कृष्णं** परित्यज्य रोहिणीसुतं **वहन्नवरोहणतः परमपि द्रुततरं प्रागात्,** शनैर्गमने सर्वैः सह गमनसम्भवात् पश्चान्नयनं न सम्भवेत्, **अवरोहण**पर्यन्तं मर्यादैवेति ततः **परं** गतः ।। २५ ।। स्वार्थसिद्धिं मत्वोपास्यां मायां परित्यज्य तत्कृतं भगवति सख्यं चाहङ्कारदेवतायामपहृतायां दोषो दृढो भवतीति विचिन्त्य दैत्यरूपेणैव हृतवानित्याह **तमुद्वहन्निति, बलभद्रोपि मर्यादातिक्रमे भगवदाविष्टो जात**स्ततो **धरणिधरेन्द्रव**न् मेर्वादिपर्वतवद् **गौरवं** यस्य, तस्य वहने सामर्थ्यं **महासुर** इति, **प्रलम्बो** हि मुख्यस्तथापि **विगतरयो** जातस्ततः कृत्रिमवपुषा नयनमशक्यमिति मत्वा **निजं** वपुरासुरं **वपुरास्थितः**, तस्य वपुर्वर्णयति **पुरटपरिच्छदो बभा**विति, **पुरटं** सुवर्णं तदेव **परिच्छदो** भूषणादिकं यस्य तादृशः सन् **बभौ**, स्कन्धे बलभद्रः, बलभद्रस्यापि मुकुटादिकं, शीघ्रगमने स्वमुकुटं **तडिद्वद्** भाति बलभद्रमुकुटं **द्युमानिव, द्युमान्** सूर्यः, तडिद् द्युमांश्च यस्य, उडुपश्चन्द्रः, बलभद्रोपि श्वेतश्चन्द्रतुल्यः, तद्वा**नुडुपतिमानम्बुद** इव, स्वयं श्यामो वेगवांश्च, अभूतोपमेयं तडित्सूर्यचन्द्रा एकदैकस्य सम्बन्धिनो न भवन्तीति ।। २६ ।। ततो बलभद्रकृत्यमाह **निरीक्ष्येति तस्य वपुरत्यर्थं निरीक्ष्य** स्वयमाकाशे **चरन्** गच्छन्**नोषदत्रस**दितिसम्बन्धः, तस्य रूपं वर्णयति **प्रदीप्ता दृग्** यस्य, **भ्रुकुटितट उग्रा दंष्ट्रा** यस्य, आविष्टक्रोधमुखविकारयुक्त इत्यर्थः, **ज्वलन्ती शिखा** यस्येत्यारक्तदीप्तशिखायुक्तं, **कटककिरीटकुण्डलानां त्विषाद्भुतमेतादृशमपूर्वं दृष्ट्वा हलधरोपि** गृहीतहलायुधोप्य**त्रसत्,** त्रासे वा हेतुश्छलाद्**,** अत्र कल्पान्तरे भगवता ज्ञापित इति ।। २७ ।। प्रकृते तु भगवदाविष्टो यत् कृतवांस्तदाह, **आगता स्मृतिर्यस्येति, अथे**ति केवलव्युदासार्थः, अत एवा**भयो** भयरहितो जातो **विहायसा**काशमार्गेण **हरन्तं रिपुमात्मनो रिपुत्वात् स्वभावतो वध्यं शिरसि दृढेन मुष्टिना रुषाहनन्** मुष्टिप्रहारं कृतवान्, ननु नयनमात्रेण कथं हननं तत्राह **सुराधिपो गिरिमि**वेति, सर्वलोकापकारित्वाद् **वज्र**वेगेन यथेन्द्रेण गिरिर्हतस्तथायमपि लोकापकारित्वादेव हतः, **रंह**सेति प्रतीकाराकरणार्थः, तावन्मात्रेण तस्याहननशङ्कापि निवारिता ।। २८ ।।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तमुद्वहन्नित्यस्याभासे **सख्यं चे**ति **परित्यज्ये**त्यनेनैव **सम्बन्धः, अहङ्कारदेवताया**मिति **स**ङ्कर्षणरूपायां, **दोष** इत्यसुरत्वम् ।। २६ ।। **निरीक्ष्येत्यत्रच्छलादि**ति नयनमितिशेषः ।। २७ ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अविषह्यमित्यत्र **स्वकार्ये**ति स्वस्य कार्यमुपद्रवस्तस्य फलं भगवदीयानां क्लेशस्तत्साधक इत्यर्थः ।।२५।। **तमुद्वहन्नि**त्यत्र **वपुरास्थितो** जात इति वाक्यार्थः, भानस्य प्रकृते नोपयोग इति मुख्यत्वाभावाद् वपुर्वर्णनाय तदङ्गत्वेनोक्तं, तथा च पदार्थत्वमेव पर्यवसन्नमतो दैत्यरूपग्रहणमेव वाक्यार्थ आभासे हरणमनूद्योक्तः, **तडिद् द्युमांश्च** यस्येति विग्रहे तडिता सह द्युमान् यस्येति बहुव्रीहिः ।। २६ ।। **निरीक्ष्येत्यत्र** केवलकृत्यं त्रासरूपं वाक्यार्थः, भगवदाविष्टकृत्यमग्रिमश्लोके ।। २७ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तमुद्वहन्नित्यस्याभासे अहङ्कारदेवतायामपहृतायां दोषो दृढ इति अहङ्कारस्य देवता सङ्कर्षणः अतो बलदेवहरणं, यावदहङ्कारस्तिष्ठति तावत् केवलं प्रकृत्यधीनो न भवति पुरुषः, अहमेतादृशः कथमेवं कुर्यामितिबुद्ध्या दोषेभ्यो वैमुख्यबुद्धेरुदयात्, गते त्वहङ्कारे प्रकृतिपरवशो भवति, अहङ्काराभावस्तु अहङ्कारदेवतापहारे भवतीतिहेतोरहङ्कारदेवतारूपस्य श्रीबलदेवस्य हरणमित्यर्थः ।। २६ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दानवेषु पुङ्गवः श्रेष्ठः प्रलम्बः कृष्णमविषह्यं प्रबलत्वेन सोढुमशक्यं मन्यमानस्तद्दृष्टिपथवञ्चनाय रामं वहन् अरुह्यतेऽस्मिन्नित्यवरोहणं स वट एव, ततः परं दूरं द्रुततरं शीघ्रमेव प्रागादित्यन्वयः ।। २५ ।। ततः स महासुरस्तं राममुद्वहन् शीघ्रतया नयन् यदा विगतरयो वेगरहितो जातस्तदा तेन वपुषा तद्वहनं दुर्घटं मन्यमानो निजमासुरं वपुरास्थितः सन् पुरटस्य सुवर्णस्य परिच्छदा अलङ्कारा यस्य तथाभूतः तडिद्युमानुडुपतिवाड् अम्बुद इव बभावित्यन्वयः । तस्य वेगराहित्ये रामगौरवे हेतुमाह—धरणिधरो मेरुः, तद्वद्गौरवं यस्य तमिति । तडिद्द्युमानिति । विद्युद्दीप्तिमानित्यर्थः । 'तडित्' इत्यलङ्कारोपमा । उडुपतिं चन्द्रं वहतीत्युडुपतिवाट्, उडुपतिरिति रामोऽयम् । महासुर इति मेघोपमा । यदि यथोचितस्थानेषु स्थिता विद्युतो भवन्ति, उपरि चोडुपतिर्भवति तदा सोऽम्बुदो यथा भाति, तद्वद्बभावित्यर्थः ।। २६ ।। तद्वपुर्निरीक्ष्य हलधर ईषदत्रसदित्यन्वयः । भयङ्करत्वेन तद्वपुर्वर्णयति—निरीक्ष्येति । अलमतिवेगेनाम्बरे आकाशे चरत्, प्रदीप्ते दृशौ नेत्रे यस्मिंस्तत्, भ्रुकुटितटे संलग्ना उग्रा दंष्ट्रा यस्मिंस्तत्, ज्वलन्त्य इव रक्ताः शिखाः केशा यस्मिंस्तत्, कटककिरीटकुण्डलत्विषाऽद्भुतम् ।। २७ ।। अथानन्तरमेव आगता स्मृतिः श्रीकृष्णवाक्येन स्वरूपस्मृतिर्यस्य सः, "किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते ।। सर्वात्मन् सर्वगुह्यानां गुह्यगुह्यात्मना त्वया" इति विष्णुपुराणे भगवद्वाक्येनैव स्वरूपस्मरणस्योक्तत्वात् । अत एव अभयो भयरहितः सन् बल आत्मनः सार्थं गोपसमूहं विहाय हरंतमग्रे नयन्तं, यद्वा विहायसा आकाशमार्गेण आत्मनः अर्थं प्राप्तमिव हरन्तं रिपुं स्वशत्रुं प्रलम्बं रुषा क्रोधेन दृढेन मुष्टिना शिरस्यहनत् अहन् । तत्र दृष्टान्तमाह—सुराधिप इन्द्रो वज्रवेगेन गिरिमिव ।। २८ ।।

अन्वितार्थप्रकाशिका

अविषह्यमिति ।। तदा दानवेषु पुङ्गवः श्रेष्ठः प्रलम्बः कृष्णमविषह्यं प्रबलत्वेन सोढुमशक्यं मन्यमानः अत एव रामं हर्तुं कृष्णपक्षेऽभूत् । ततश्च कृष्णदृष्टिपथवञ्चनाय रामं वहन् अवरुह्यतेऽस्मिन्नित्यवरोहणं स वट एव ततः परं दूरं द्रुततरं शीघ्रमेव प्रागात् ।। २५ ।। तमिति ।। पुरटस्य सुवर्णस्य परिच्छदा अलङ्कारा यस्य तथाभूतः स महासुरः धरणिधरेन्द्रो मेरुस्तद्वद्गौरवं यस्य तं राममुद्वहन् शीघ्रतया नयन् रामभारं वोढुमशक्नुवन् यदा विगतरयो वेगरहितो जातस्तदा गोपवपुषा रामवहनं दुर्घटं मन्यमानो निजमासुरं वपुरास्थितः सन् तडिद्द्युमान् विद्युत्तुल्यदीप्तिमान् इत्यलङ्काराणामुपमा । उडुपतिं चन्द्रं वहति इति उडुपतिवाट् अम्बुद इव बभौ । यदि यथोचितस्थानेषु स्थिता विद्युतो भवन्ति उपरि चोडुपतिर्भवति तदा सोऽम्बुदो यथा भाति तद्वद्बभौ ।। २६ ।। निरीक्ष्येति ।। अलमतिवेगेनाम्बरे आकाशे चरत् प्रदीप्ते दृशौ नेत्रे यस्मिंस्तत् भृकुटितटे संलग्ना उग्रा दंष्ट्रा यस्मिंस्तत् प्रदीप्तदृक् प्रदीप्तनेत्रं भृकुटितटे यस्मिंस्तत् उग्रा दंष्ट्रा यस्मिंस्तच्च तच्चेति वा । ज्वलन्त्य इव रक्ताः शिखाः केशा यस्मिंस्तत् कटककिरीटकुण्डलत्विषाऽद्भुतं तद्वपुर्निरीक्ष्य हलधर ईषदत्रसत् ।। २७ ।। अथेति ।। अथानन्तरमेवागता स्मृतिः "किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते ।। सर्वात्मन् सर्वगुह्यानां गुह्यगुह्यात्मना त्वया ।।" इति विष्णुपुराणोक्तकृष्णवाक्याल्लब्धं निजैश्वर्यज्ञानं यस्य सः अत एवाभयो भयरहितः सन् स बल आत्मनः सार्थं गोपसमूहं विहाय हरन्तमग्रे नयन्तम् । यद्वा । विहायसा आकाशमार्गेण आत्मनः अर्थं प्राप्तमिव हरन्तं रिपुं स्वशत्रुं प्रलम्बं सुराधिप इन्द्रो गिरिमिव रुषा क्रोधेन दृढेन वज्रस्येव रंहो वेगो यस्य तेन मुष्टिना शिरस्यहनत् अहन् । शब्लुगभाव आर्षः । मुष्टिर्द्विलिङ्गः । इन्द्रो वज्रस्य रंहसा गिरिमिवेति वाऽन्वयः ।। २८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इत्थं मधुरश्रीकृष्णस्य मधुरमधुरदिव्यलीलामुक्त्वा सांप्रतं रामकृतलीलामाह दानवपुंगवो दैत्यश्रेष्ठः अविषह्यं सोढुमशक्यं मन्यमानो रोहिणीसुतं वहन्सन् अवरोहणतः कृष्णनेत्रप्रसार दूरीकरणाय अवरुह्यते अस्मिन्नित्यवरोहणं मर्यादातत्स्थानीयो भांडीरवटस्ततः परं दूरे ।। २५ ।। तमिति धरणीधराः पर्वतास्तेषामिंद्रो महापर्वतस्तद्वत् गौरवं भारवत्त्वं यस्य तं बलदेवमुद्वहन् विगतरयः शांतवेगः सन् निजं स्वकीयमासुरं वपुः शरीरं समास्थितः पुरटस्य सुवर्णस्य परिच्छदा अलंकारा यस्य सः कनकभूषणवानित्यर्थः । असुरः प्रलंबः बभौ क इव तडिद्द्युमान् विद्युत्कांतिमानिति भूषणोपमा रामसदृशं उडुपतिं वहतीति उडुपतिं वोढुं अंबुदो मेघो यथा बभौ यदि कस्मिंश्चित्स्थाने स्थिरा तडिद्भवेत्तदुपरिचंद्रो भवेत्तदाऽसौ मेघो यथा शोभते तथा बभावित्यर्थः अभूतोपमेयम् ।। २६ ।। निरीक्ष्येति अलं अतिवेगेन अंबरे गगने चरत् गच्छत् प्रदीप्ते दृशौ नेत्रे यस्मिंस्तत् प्रदीप्तदृक् द्वे भृकुटीतटे नदीतीर-

तुल्ये यस्मिस्तत् भृकुटितटं उग्रा कराला दंष्ट्रा यस्मिस्तत् उग्रदंष्ट्रकं तच्च तच्च भृकुटितटोग्रदंष्ट्रकं ज्वलंत्यः प्रदीप्ताः शिखाः केशा यस्मिस्तत् एवंभूतं तस्य असुरस्य वपुः निरीक्ष्य हलधरो रामः ईषत् किंचित् अत्रसत् त्रासं प्राप्तवान् ।। २७ ।। अथेति आगता स्मृतिः अहं संकर्षणोस्मीतिज्ञानं यस्य अतएव अभयः बलो रामः आत्मनः स्वस्य सार्थं गोपसमुदायं विहाय त्यक्त्वा हरंतं रिपुं प्राप्तया रुषा हेतुना वज्ररंहसा वज्रवत् वेगेन मुष्टिना शिरसि अहनत् क इव सुराधिप इन्द्रो वज्रेण गिरिमिव यद्वा विहाय सा गगनवर्त्मना आत्मनः स्वस्य प्राप्तमर्थमिव हरंतं रिपुम् अहनत् शेषं पूर्ववत् आद्यपक्षे इव शब्दः पादपूरणे ।। २८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ।। धरणीधरेन्द्रवत् पर्वतराजवद्गौरवं यस्य तं, तं रामं, उद्वहन्, महासुरः प्रलम्बः, विगतरयः नष्टवेगः सन्, निजं स्वासाधारणं वपुः समास्थितः, पुरटपरिच्छदः स्वर्णालंकारः सन्, तडिद्द्युमान् विद्युद्दीप्तिमान्, उडुपतिवाट् चन्द्रबिम्बवाहः, अम्बुदः मेघः इव, बभौ । अत्र तडिद्द्युमानित्यलंकारोपमा । उडुपतिवाडिति रामोपमा । यदि यथोचितस्थानेषु विद्युतो भवेयुः उपरि च उडुपतिः तदा सोऽम्बुदो यथा भाति तद्वद्बभावित्यर्थः ।।२६।। निरीक्ष्येति । अम्बरे चरत् आकाशस्पर्शि, अत्युन्नतमित्यर्थः । अलमतिवेगेन, प्रदीप्ते दृशौ यस्मिस्तत्, भृकुटितटे संलग्ना उग्रा दंष्ट्रा यस्मिस्तत्, प्रदीप्तदृक् भृकुटितटं यस्मिन्नुग्रा दंष्ट्रा यस्मिस्तच्च तच्चेति वा, ज्वलन्त्यः शिखाः केशा यस्मिस्तत्, कटककिरीटकुण्डलानां या त्विट् तया, अद्भुतं चित्रकृतं, तद्वपुरसुरशरीरं, निरीक्ष्य दृष्ट्वा, हलधरो बलदेवः, ईषत् किंचित् अत्रसत् अबिभेत् ।। २७ ।। अथेति ।। अथ कृष्णकारितस्तवद्वारकस्वरूपैश्वर्याद्यवबोधनानन्तरं, आगतस्मृतिः । तथा च विष्णुपुराणे पञ्चमेंऽशे नवमेऽध्याये 'इति संस्मारितो विप्र कृष्णेन सुमहात्मना । विहस्य पीडयामास प्रलम्बं बलवान् बलः' इत्यादिनोक्तम् । अत एव अभयः इवावधारणे । बलो रामः, आत्मनः सार्थं सहायभूतं गोपसमूहं विहाय, दूरतः हरन्तं रिपुं, सुराधिप इन्द्रः, वज्ररंहसा वज्रवेगेन, गिरिं पर्वतं इव, रुषा क्रोधेन, शिरसि दृढेन मुष्टिना, अहनत् जघान ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अविषह्यमिति । १०.१८.२५

सकलाभयदः श्रीशः कमपि न जन्तुं निहन्ति न द्वेष्टि । किन्त्वात्मगर्ह्यकृतितः स्वतो बिभेतीति मानमसुर इह ॥ ३२ ॥

तमिति । १०.१८.२६

वपुः सार्थकं स्वामिकृत्येऽस्तु मा वा स्वनाम त्विहान्वर्थकं संविधेयम् ।
इति भ्रान्तबुद्धिः प्रलम्बः प्रलम्बः प्रकामं बभूवाऽऽत्मदेहावलम्बात् ।। ३३ ।।
महत्सङ्गात् स्वरूपाप्तिरेतद् युक्तमकृत्रिमे । कृत्रिमेऽकृतिमप्राकृस्थ-रूपाप्तिरिति तत्क्षमम् ॥ ३४ ॥

अत्रसदिति । १०.१८.२७.

गोपश्चेत् कथमीदृगद्भुततनुर्दैत्यो यदि स्यात्कथं श्रीशस्नेहपदं न तद्विदितमप्यज्ञानिताऽस्मिन् कथम् ।
ज्ञात्वा वा कथमात्मसेवनपरे मय्यप्यनाख्यानमित्यन्तः संभ्रमसंभृतो हलधरो युक्तं मनागत्रसत् ॥ ३५ ॥
वेलोल्लङ्घनदोषाच्छिक्ष्योऽसौ यदि मयाऽधुना तर्हि । नासौ भागवतानामिति स क्षणमात्रमास वित्रस्तः ।। ३६ ।।

अथागतस्मृतिरिति । १०.१८.२८.

एतावन्नतकन्धरस्त्वमसि यद् भारात् स ते वाहनं जातः संप्रति तद्ध्रुवं प्रतिकृतिं भो राम संपादयः ।
सामान्योक्तिरियं बलाय हरिणा प्रोक्तेति मन्ये यतः श्रीरामो विजहौ भयं तमसुरं ज्ञात्वा स्मरंस्तद्गिरम् ॥ ३७ ॥

मद्योगादेव सबलः खलोऽयमधुनाऽजनि । मत्पुरोऽस्य कियद्वीर्यमिति मुष्ट्याऽभ्यताडयत् ॥ ३८ ॥
मत्पक्षीयमहिं वनस्थितममर्यादं विदित्वा मदप्रत्यक्षं प्रभुणा नमद्बहुशिरो दण्डं पुरा प्रापितः ।
तत्पक्षीयमिमं तथास्थितिमहं चापीह तादृक्पदं नेष्यामीत्यहिपेन रामवपुषा नीतः स तादृग्दशाम् ॥ ३९ ॥

यस्मादुदेति दुरहङ्कृतिरत्र जन्तोस्तद्ध्वस्तिकृद्भवति हन्त तदेव लोके ।
यत्स्पष्टमेतदसुरस्य हि तस्य गर्वस्तद्ध्वस्तिरप्यनुपदं बलतस्तदाऽऽसीत् ।। ४० ।।
निरस्य दुःखं सुखयाम्यहं त्वामिति प्रतिज्ञातमपीह केनचित् । तत्र स्वयं चापि यतेत तादृग्योगेष्वदोऽबोधि तदा बलेन ।। ४१ ॥
अशेषकार्यं भुवि चेन्मयैव कृतं धराभारहरं तदाऽयम् । खिद्येत मत्वा वितथं स्वजन्मेत्यधात्प्रभुस्तद्धतिमस्य हस्तात् ।। ४२ ॥
यः स्वत्वेन महद्भिर्गणितस्तं ते न जातुचिद् घ्नन्ति । सर्वविदेवं प्रभुणा युक्ता नाकारि तद्धतिस्तत्र ।। ४३ ॥
कृत्वा सौख्यमसौ निजाग्रजकराद् व्यापदितः श्रीधरेणैवं नापि तु राम एव हतवानुन्मार्गगं वीक्ष्य तम् ।
इत्थं सर्वजनेषु स प्रथयितुं निर्दुष्टतामात्मनो वृक्षं साक्षिणमास्थिरं च जटिनं प्रायोऽच्युतोऽकल्पयत् ॥ ४४ ॥

कृष्णप्रिया

दानवपुङ्गव प्रलम्ब ने देखा कि श्रीकृष्ण तो बड़े बलवान् हैं, उन्हें मैं नहीं हरा सकूँगा। अतः वह उन्हीं के पक्ष में हो गया और बलरामजी को लेकर स्फुर्ती से भाग चला, और पीठपर से उतारने के लिये जो स्थान नियत था, उससे आगे निकल गया ॥ २५ ॥ बलरामजी बड़े भारी पर्वत के समान बोझवाले थे उनको लेकर प्रलम्बासुर दूरतक न जा सका, उसकी चाल रूक गयी। तब उसने अपना स्वाभाविक दैत्यरूप धारण कर लिया। उसके काले शरीरपर सोने के गहने चमक रहे थे और गौर सुन्दर बलरामजी को धारण करने के कारण उसकी ऐसी शोभा हो रही थी, मानो बिजली से युक्त काला बादल चन्द्रमा को धारण किये हुए हो ॥ २६ ॥ उसकी आँखें आग की तरह धधक रही थी और ढाढें भौहोंतक पहुँची हुई बड़ी भयावनी थी। उसके लाल लाल बाल इस तरह बिखर रहे थे, मानो आग की लपटें उठ रही हो। उसके हाथ और पाँवों में कड़े सिरपर मुकुट और कानों में कुण्डल थे। उनकी कान्ति से वह बड़ा उद्भुत लग रहा था। उस भयानक दैत्य को बड़े वेग से आकाश में जाते देख पहले तो बलराम जी कुछ घबड़ा से गये ॥ २७ ॥ परन्तु दूसरे ही क्षण अपने स्वरूप की याद आते ही उनका भय जाता रहा। बलरामजी ने देखा कि जैसे चोर किसी का धन चुराकर ले जाय वैसे ही यह शत्रु मुझे चुराकर आकाश मार्ग से लिये जा रहा है। उस समय जैसे इन्द्रने पर्वतों पर वज्र चलाया था, वैसे ही उन्होंने क्रोध करके उसके सिर एक घूँसा कसकर जमाया ॥ २८ ॥

[1]स आहतः सपदि विशीर्णमस्तको[2] मुखाद् वमन् रुधिरमपस्मृतोऽसुरः।
महारवं व्यसुरपतत् समीरयन् गिरिर्यथा मघवत आयुधाहतः ॥ २९ ॥
दृष्ट्वा प्रलम्बं निहतं बलेन बलशालिना। गोपाः सुविस्मिता [3]आसन् साधु साध्विति वादिनः[4] ॥ ३० ॥
आशिषोऽभिगृणन्तश्च[5] प्रशशंसुस्तदर्हणम्। प्रेत्यागतमिवालिङ्ग्य प्रेमविह्वलचेतसः ॥ ३१ ॥
पापे प्रलम्बे निहते देवाः परमनिर्वृताः। अभ्यवर्षन् बलं माल्यैः शशंसुः साधु साध्विति ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे [6]प्रलम्बवधो [7]नामाष्टादशोऽध्यायः ॥ १८ ॥

कर्दमक्षमा

अन्वयः—आहतः सपदि विशीर्णमस्तकः, मुखात् रुधिरम् वमन् महारवम् समीरयन्, अपस्मृतः व्यसुः सः असुरः, मघवतः आयुधा हतः गिरिः यथा अपतत् ॥ २९ ॥ बलशालिना बलेन प्रलम्बम् निहतम् दृष्ट्वा, गोपाः सुविस्मिताः आसन् साधु, साधु इति, वादिनः अभवन् ॥ ३० ॥ प्रेमविह्वलचेतसः (गोपाः) प्रेत्य आगतम् इव आलिङ्ग्य तद् अर्हणम् च आशिषम् अभिगृणन्तः प्रशशंसुः ॥ ३१ ॥ पापे प्रलम्बे निहते, परम-निर्वृताः देवाः, माल्यैः बलम् अभ्यवर्षन् साधु साधु इति शशंसुः ॥ ३२ ॥

इति दशमस्कन्धे निरोधलीलायाः तामसप्रकरणावान्तरप्रमेयप्रकरणेऽष्टादशोऽध्यायः समाप्तः ॥ १८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपस्मृतो गतस्मृतिः। महारवं समीरयन् ॥ २९-३० ॥ तदर्हणं प्रशंसार्हम् ॥ ३१-३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायामष्टादशोऽध्यायः ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सः प्रलंबः। आयुधाहतो वज्राहतः ॥ २९ ॥ बलेन शालते दीव्यतीति बलशाली बलदेवः। एकार्थकौ बलशालिबलदेवशब्दौ पर्यायौ। बलेनौजसा 'कालिंदीभेदनो बलः' इत्यमरोक्तेर्बलशब्दस्तु साक्षादेव तद्वाचकोस्ति, यदीत्थं तदा बलशालीति विशेषणम् ॥ ३० ॥ तं बलम् ॥ ३१ ॥ माल्यैः पुष्पैः (३२) अत्र श्रुतिः—"विष्टंभो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य। असत उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इंद्रियाय ॥" इति। अर्थः—हे सोम ते तव मध्वो ब्रह्मस्वरूपिणः अंशुरिवांशुः अंशः पृथिव्या धरुणः भूमेर्धर्त्ता रामरूपधारीति शेषः। ते त्वया असतः अंतर्यामिणा प्रबोधितो दीप्यमानोऽत एव उत्सस्त्वदाज्ञाकरणे उत्कंठितः। नियुत्वान् जगतः प्राणरूपी सूत्रात्मा सन् गृणते आत्मनः स्वरूपं त्वद्वाक्यादवगतं भावयति। अहं परमेश्वरादनन्योऽस्मि देवकार्यार्थमवतीर्णोस्मीत्यालोचयतीत्यर्थः। ततो हेतोर्दिवः द्युलोकमंडपस्य विष्टंभः स्तंभा इव भवंति ते। विष्टंभः क्विबंतस्येदं

---

[1] प्राचीनप्रत्यां "स आहत ... इत्यारभ्य ... तोऽसुरः" पर्यन्त "स एव दैव्योऽथ विशीर्णशीर्षो मुखाद्वमन् रुधिरमवध्यातासुरः" इति पाठो दृश्यते। [2] शीर्षको–वीर. विज.। [3] सन्न साधु साधुरूपिणम्–गो. प्रे. टी.। [4] राविणः–विज.। [5] स्तं–श्रीधर. वंशी. वीर. विज.। [6] बालक्रीडायामष्टादशोध्यायः–गो. प्रे. टी. ; पारमहंस्यां संहितायां दशमस्कन्धे पूर्वार्धे–इति कस्यचित्। [7] षोडशोऽध्यायः–विज.।

द्वितीयाबहुवचनम् । अत्युच्छ्रितान् प्रलंबादीन् बहुत्वं विभूत्यर्थे । इंद्रियाय तद्वधेन स्वीयं वीर्यं प्रदर्शयितुं पवते गच्छति । किमस्यायुधं तदाह–विश्वा इति । सर्वाः क्षितयः नाशसाधनानि आयुधानि अस्य हस्ते एव संति अतो मुष्टिमात्रेण तं जघानेत्यर्थः । विष्णोः सर्वदेवतामयत्वादत्र सोमरूपेणैवास्य स्तुतिर्ज्ञेया एवमन्यत्रापीति ॥ ३२ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धेऽष्टादशोऽध्यायः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अपस्मृत इति अपस्मारव्याधिनेवातिव्याकुलः सन्नित्यर्थः ॥ २९ ॥ बलशालिनेति तत्प्रभृतिबलविशेषाभिव्यक्तेः तथा च श्रीहरिवंशे—

"बलं तु बलदेवस्य तदा भुवि जना विदुः । प्रलम्बे निहिते दैत्ये देवैरपि दुरासदे" ॥ इति

सुविस्मिताः सन्तः तत्कपटगोपवेषादिना ॥ ३० ॥ आशिष इत्थं चिरं सानुजः सुखं विहरन्नस्मान् पाहीत्यादिप्रकाराः अभि अभितः तत्र तत्र सर्वत्रैव हेतुः प्रेमेति ॥ ३१ ॥ न केवलं त एव सन्तुष्टा बभूवुः देवा अपि परमानन्दं प्राप्ता इत्याह–पाप इति । परमदुष्टे जगदुपद्रावक इत्यर्थः । नितरां हते अपुनरावृतिमुक्तिप्राप्तेः तथा च द्वितीयस्कन्धे––

ये च प्रलम्बखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः ।
अन्ये च साल्वकपिवल्वलदन्तवक्त्रसप्तोक्षसम्बरविदूरथरुक्मिमुख्याः ॥
ये वा मृधे समितिशालिन आत्तचापाःकाम्बोजमत्स्यकुरुसृञ्जयकैकयाद्याः ।
यास्यन्त्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयम् ॥ इति ।

तत्र केचिदमलदर्शनो ब्रह्मसायुज्यादि केचित्तन्निलयमिति विवेचनीयम् ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अपस्मृतो मोहितः, किंवा अपस्मारव्याधिनेवातिव्याकुलः सन्नित्यर्थः । महाकायस्य तस्य सद्यो गगनात् पतनादौ दृष्टान्तःगिरिर्यथेति । आयुधेन वज्रेणाहतः प्रहतः ॥२९॥ बलशालिना बलवतेति तन्महाबलिष्ठदैत्यश्रेष्ठवधेन लोकेषु तत्बलविशेषाभिव्यक्तेः, तथा च श्रीहरिवंशे (विष्णु पु. १४।५८)—'बलं तु बलदेवस्य तदा भुवि जना विदुः । प्रलम्बे निहिते दैत्ये देवैरपि दुरासदे ॥' इति । सुविस्मिताः सन्तः, तत्कपटगोपवेषादिना; यद्वा, श्रीकृष्णस्य शक्त्यैवायं मया हत इत्येवं तस्य बलं शालितुं श्लाघितुं शीलमस्येति तथा तेन; एवं तस्य भक्तिभरेण सुविस्मिताः ॥ ३० ॥ आशिष इत्थं द्वयोर्भ्रात्रोर्युवयोर्मिथः प्रीतिरास्ताम्, चिरं व्रजे सानुजः सुखं विहरन्नस्मान् पाहि, सर्व्वत्र विजयी भव, नित्यं धनवान् पुत्रादिमान् सुखी सपरिवारो भवेत्यादिप्रकाराः, अभितो गृणन्तः प्रयोजयन्त इत्यर्थः । तदर्हणमाशीरादियोग्यम्; यद्वा, तेषां तस्यार्हणमुचितं यथा स्यात्, तत्र तत्र सर्व्वत्रैव हेतुः— प्रेमेति ॥ ३१ ॥ न केवलं त एव सन्तुष्टा बभूवुः, देवा अपि सर्व्वे परमानन्दं प्राप्ता इत्याह–पाप इति परमदुष्टे जगदुपद्रावक इत्यर्थः; नितरां हते अपुनरावृत्तिमुक्तिप्राप्ते; तथा च द्वितीयस्कन्धे (२।७।३४-३५)––

'ये च प्रलम्बखर-दर्दुरकेश्यरिष्ट-मल्लेभ-कंसयवनाः कुज-पौण्ड्रकाद्याः ।
अन्ये च शाल्वकपिवल्वलदन्तवक्त्र-सप्तोक्ष-शम्बरविदूरथ-रुक्मिमुख्याः ॥
ये वा मृधे समितिशालिन आत्तचापाः काम्बोजमत्स्य-कुरुसृञ्जयकैकयाद्याः ।
यास्यन्त्यदर्शनमलं वलपार्थभीम-व्याजाह्वयेन हरिणा निलयं तदीयम् ॥ इति ।

अनयोरर्थः,––ये प्रलम्बादयस्ते सर्व्वे हरिणा प्राणहरेण हेतुभूतेन, तदीयं तेषां हितं योग्यं वा, अलमदर्शनमपुनरावृत्तिलक्षणम्, अतएव निलयमत्यन्ताभावरूपं मोक्षं प्राप्स्यन्ति, तत्र जन्मत्रयेण मुनिशापान्ते प्राप्तवैकुण्ठलोको दैत्यत्वापेक्षया तथा श्रीभूम्यां श्रीभगवज्जातो नरकः, श्रीरुक्मिणीभ्राता रुक्मी, पाण्डवमित्र-मत्स्यराज-विराटादयश्च, तत्तत्सम्बन्धेन प्राप्तवैकुण्ठलोका अपि संसारदुःखध्वंसमात्रापेक्षयैकत्रोक्ताः । यद्वा, प्रलम्बादयोऽलमदर्शनमपुनरावृत्तिमोक्षं दन्तवक्त्रादयश्च ते तदीयं निलयं श्रीवैकुण्ठलोकं यास्यन्तीति विवेचनीयमिति ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्याम् अष्टादशोऽध्यायः ॥ १८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अपस्मृतः अपगतस्मृतिः व्यसुः निष्प्राणः ॥ २९–३२ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सोऽसुरः प्रलम्बः आहतस्ताडितः सपद्येव भग्नशिराः मुखाद्रुधिरं वमन्नुद्गिरन्नपस्मृतः अपगतं स्मृतं स्मृतिर्यस्य सः महारवम् उच्चैः स्वरमीरयन् व्यसुर्गतप्राणो न्यपतत् यथा मघवत इन्द्रस्यायुधेन आहतो गिरिस्तद्वत् ॥ २९ ॥ बलशालिना बलदेवेन हतमसुरं दृष्ट्वा विस्मिता बभूवुः ॥ ३० ॥ आशिषः प्रयुञ्जानाः प्रशंसार्हं तं बलदेवं प्रशशंसुः मृतिं प्राप्य पुनरागतमिवालिङ्ग्य प्रेम्णा विक्लवान्यधृष्टानि चेतांसि येषां ते प्रशशंसुरित्यन्वयः ॥ ३१ ॥ परमनिर्वृताः नितरां हृष्टाः देवाश्च माल्यैः पुष्पैर्बलदेवं पापं सर्वदुःखकरं प्रलम्बे निहते सति अभ्यवर्षन् साधुसाध्विति प्रशशंसुश्च ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् अष्टादशोऽध्यायः ॥ १८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

महारवं समीरयन् व्यसुः गतप्राणः ॥ २९ ॥ बलशालिना रामेण राविणः वादिनः ॥ ३०–३१ ॥ माल्यैः पुष्पैः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् अष्टादशोऽध्यायः ॥ १८ ॥

[विजयध्वजरीत्या पञ्चदशः [

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अपस्मृतः गतस्मृतिः अपस्मारव्याधिग्रस्त इवेत्यर्थः । महारवं समीरयन् ॥ २९–३० ॥ तदर्हणं प्रशंसार्हम् ॥ ३१–३२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमेऽष्टादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अपस्मृतः गतस्मृतिः ॥ २९–३० ॥ तदर्हणं प्रशंसार्हम् ॥ ३१–३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टादशाऽध्यायार्थप्रकाशः ॥ १८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

सोऽसुरोऽस्मृतोऽपस्मार रोगग्रस्तवत् स्मृतिशून्यः महारवं घोरशब्दं समीरयन् व्यसुर्निष्प्राणः सन् अपतत् ॥ २९ ॥ विस्मितास्तच्छद्मगोपवेशादिना ॥ ३० ॥ आशिषोऽभिगृणन्त इति एवमेव सानुजः सुखं विक्रीडन्नस्मान् पाहीत्येव प्रकाराः प्रकाशयन्त इत्यर्थः । तदर्हणं प्रशंसायोग्यम् ॥ ३१ ॥ देवाश्च तं तुष्टुवुरित्याह—पापे इति । अतिदुष्टे जगदुद्वेजके इत्यर्थः ॥ ३२ ॥

नागमूर्द्धसु तुङ्गेषु नर्त्तित्वा मधुसूदनः । प्रलम्बस्कन्धमत्युच्चं बलमारोहयत् प्रभुः ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्याम् अष्टादशोऽध्यायः ॥ १८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

रावो येषामस्तीति ते तथा ॥ २९ ॥ तदर्हणं तद्योग्यं प्रेम्णाऽऽलिङ्ग्याशिषोऽभिगृणन्तः प्रशशंसुस्तुष्टुवुः प्रेत्य गत्वा गतमिवेति ॥ ३० ॥ यद्भयात्प्राक् परमनिर्वृतास्ते देवा इदानीं परमनिर्वृता इत्यावृत्त्याऽन्वयः । माल्यैः प्रसूनैः ॥ ३१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे षोडशोऽध्यायः ॥ १०–१६ ॥

श्रीसुबोधिनी

ततो यज् जातं तदाह **स आहत** इति आ समन्ताद् **हतः** **सपद्येव** **शीर्णमस्तको** जातः ततो **मुखाद् रुधिरं वमन्**नन्तर्गतमपि दूरीकुर्वन् **स्मृति**रहितोपि जातः, एवं देहेन्द्रियमनसां वैकल्पं निरूपितं, तथाप्य**सुर**त्वात् स्वस्य **राजसं** भावं कृतवान्, तदाह **महारवं समीरयन् व्यसुः** सन्न**पत**दिति, प्राणास्त्वन्तरिक्ष एव **गताः**, पश्चाद् भूमौ **पतितः**, पुनरुत्थानं पतितस्य नाभूदित्येतदर्थं दृष्टान्तमाह **गिरिर्यथे**ति, **मघवत आयुधेन** वज्रेण **हतो** **गिरिर्यथे**ति, न कदाचिदप्युद्गतो नापि प्रवृद्धः, तथैवास्थिसमूहो जात इत्यर्थः ॥ २९ ॥ ततो यज् जातं तदाह **दृष्ट्वा प्रलम्बं निहत**मिति, **बलभद्रः** प्रलम्बं मारयतीति नाश्चर्यं यतो **बलशाली**, तथापि कथं ज्ञातवान् कथं वा शीघ्रमुपायस्फूर्तिः कथं वा सकृत्प्रहारेणैव मृत इति **गोपालत्वाद्** वा सुष्ठु **विस्मिता** आश्चर्ययुक्ता **आसन्**, आदौ

चिन्ताकुला जाता इति हननमात्रेणैव **साधुसाध्वितिवादिनो** जाताः ।।३०।। ततो देवास्त एव देवभावं प्राप्ता **आशिषोभिर्गृणन्तश्च** जाताश्चिरञ्जीवास्मान् पालयेत्यादि **तस्यार्हणं** यथा भवति तथा **प्रशशंसुश्च** पूजां कृत्वा स्तोत्रमपि कृतवन्तः, उत्तमानां हीनानामुत्तमाधमभावौ वा निरूपितौ, समभावकृत्यमाह **प्रेत्यागतमिवालिङ्ग्य प्रेम्णा विह्वलचेतसो**पि जाता इति ।। ३१ ॥ न केवलं प्रलम्बवधो भूमिष्ठानामेव हितार्थः किन्तु देवानामपीत्याह **पाप** इति, पापरूपेस्मिन् **निहते देवाः** शुद्धसत्त्वात्मकाः **परमनिर्वृता** जाताः कंसादेरपि निर्भयाश्च जाताः, अतो **माल्यैर्बलमभ्यवर्षन्**पुष्पवृष्टिं कृतवन्तः, **शशंसुः** स्तोत्रं च कृतवन्तः **साधुसाध्विति**प्रशंसां कृतवन्तः, अन्यथाकाशे **गच्छतस्तदारूढेन मारणं स्वरक्षां** भावयताशक्यमन्यश्च न तत्र प्रकारोतो महासाहसेन कृतमिपि **साधुसाध्विति**कथनं, प्रशंसा देवत्वज्ञापिका पुष्पवृष्टिर्हर्षज्ञापिका दोषापगतिस्तदभिमानिनामपि सुखदायिनीति ज्ञापितं, एवमन्तःकरणदोषः परिहृतः, तैश्चानुमोदितो देवैश्च ॥ ३२ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे पञ्चदशाध्यायविवरणम् ॥ १५ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

दृष्ट्वेत्यत्र **गोपाः सुविस्मिताः आसन्नि**तिपादे **गोपाः सुविस्मिता देवा** इति पाठान्तरं प्रतिभाति तदङ्गीकृत्याहु**स्ततो देवा** इत्यादि, यद्वाग्रिमश्लोक **'आशिषोभिगृणन्त'** इत्याशीः प्रयोगः स्वहितकर्तृत्वज्ञानानन्तरमेव भवतीति तत्प्रयोगात् तज्ज्ञानवत्त्वं ज्ञाप्यते, स्वहितं चात्रान्तःकरणदोषनिवृत्तिरूपं तत्कर्तृत्वज्ञानं च प्रलम्बस्यान्तःकरणदोषरूपत्वज्ञानं विना न सम्भवतीति तदपि ध्वन्यते, तथा चैवं ज्ञानेन्द्रियादीनामलौकिकभावो भवतीति दोषनिवृत्तौ देवत्वं तेषां जातमिति तथा ज्ञानवन्त इत्यभिप्रायेणाहु**स्ततो देवा** इत्यादि, ननु दोषनिवृत्तिमात्रेण कथं देवत्वं तत्राहु**स्तत एव** निवृत्तदोषा **एव** प्राणादयो यतो **देवभाव**माधिदैविक**भावं प्राप्ता** "आसन्यस्य हरेर्वापि सेवये"तिशेषः, अतस्तथेत्यर्थः, एतेषामासन्योपासकत्वमग्रिमाध्याये स्फुटीकरिष्यते ॥३०॥ **आशिष** इत्यत्रो**त्तमानां हीनाना**मित्यु**त्तमा** भगवदवेक्षका **हीनाः** स्वावेक्षका मध्यमा भावद्वयमिश्राः, उत्तमो भावः सम्यगयमसुरो नाशितोन्यभावः स्पष्ट एव, अयं **श्री**प्रधानोध्याय इति **वृ**न्दावनस्य गुणैः शोभारूपा **श्रीस्तया** तत्र क्रीडा च षोडशश्लोकैः पूर्वमुक्तेति ज्ञेयम् ॥ ३१ ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाशे पंचदशाध्यायविवरणम् ॥ १५ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

स आहत इत्यत्र **अन्तर्गतमपी**ति मस्तकविशरणेन बाह्यदोषनिवृत्तिः, अनेनान्तरस्येत्यर्थः, तेन मुक्तियोग्यता सूचितेतिभावः **अपस्मृ**त इत्यत्र अपस्मृतिशब्दादर्शआद्यजित्यभिप्रेत्याहुः **स्मृतिरहितोपी**ति, न कदाचिदपि **उद्गतो नापि** प्रवृद्ध इति, कदाचिदसुरा आगत्य मृतसञ्जीवन्या जीवयेयुरिति तथा सम्भावना ॥ २९ ॥ **आशिष** इत्यत्र **ततो देवा** इति अग्रिमश्लोकस्य 'देव' पदमत्रान्वेति, अत्र भूमिष्ठा उक्ता अग्रे दिविष्ठा इति विभागः, देवभावमन्तःकरणदोषनिवर्तनेन शुद्धसत्त्वात्मकत्वं प्राप्ता इत्यर्थः ॥३०॥ **पाप** इत्यत्र **अन्यथे**ति साधुत्वाभावे इत्यर्थः ॥ ३१ ॥ **तदभिमानिनामपीति** अन्तःकरणाभिमानिनालौकिके प्रवृत्तिहेतुनामित्यर्थः ॥ ३२॥

इति पञ्चदशोध्यायः ॥ १५ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

आशिषोभिगृणन्तश्चेत्यत्र **उत्तमानां हीनानां उत्तमान्यभावौ वे**ति, **उत्तमानां** वृद्धानां आशिषोभिगृणनमुत्तमभावः, **हीनानां** बालानां पूजाकरणानन्तरं स्तोत्राकरणं हीनभाव इत्यर्थः ॥ ३१ ॥ **पापे प्रलम्बे निहत** इत्यत्र **तैश्चानुमोदित** इति गतदोषैर्गोपैरित्यर्थः, "साधु साध्वि"तिवादिन इतिवाक्यात् ॥ ३२ ॥

इति पञ्चदशोध्यायः ॥ १४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवमाहतः अतः सपदि शीघ्रमेव विशीर्णं मस्तकं यस्य सः, अतएवागता स्मृतिर्यस्य सः, मुखाद्रुधिरं वमन्, महारवमीरयन् महान्तं शब्दं विमुञ्चन्, व्यसुः प्राणरहितः सोऽसुरः प्रलम्बोऽपतदित्यन्वयः। तत्र दृष्टान्तमाह – मघवत इन्द्रस्य आयुधेन व्रजेण आहतो गिरिरिवेति ॥ २९ ॥ बलेन प्रलम्बं निहतं दृष्ट्वा 'साधु कृतं साधु कृतम्' इति वादिनो गोपाः सुविस्मिताः 'कथं सोऽलक्षित एव गोपवेषेणागतः, कथमेनमयं ज्ञातवान्, कथं वा सकृन्मुष्टिप्रहारेणैव मृत' इत्याद्याश्चर्ययुक्ता आसन्। 'ततःप्रभृत्येव रामबलस्य प्रसिद्धिर्जाता' इति सूचयन्नाह–बलशालिनेति। यथोक्तं हरिवंशे—"बलं तु बलदेवस्य तदा भुवि जना विदुः। प्रलम्बे निहते दैत्ये देवैरपि दुरासदे" इति ॥ ३० ॥ तं रामं प्रेत्य प्रकर्षेण एत्य परलोकं गत्वाऽऽगतमिवालिङ्ग्य प्रेम्णा विह्वलानि चेतांसि

येषां ते आशिषः 'चिरं जीव, एवमेवास्मान् सर्वदा पाहि' शत्रून् जहि' इत्याद्याकाराः गृणन्तः प्रयुञ्जानाः तदर्हणं प्रशंसायोग्यं प्रशशंसुरित्यन्वयः ॥ ३१ ॥ पापे सर्वोपद्रवकारिण्यपि प्रलम्बे निहते ये च प्रलम्बेत्यादिद्वितीयस्कन्धोक्तेर्नितरां पुनरावृत्तिराहित्येन मुक्तिं प्रापिते सति देवाः परमनिर्वृताः परमानन्दं प्राप्ताः सन्तो माल्यैर्बलमभ्यवर्षन् 'साधु साधु' इति प्रशशंसुश्च ॥ ३२ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने । अष्टादशो गतो वृत्तिं प्रलम्बवधबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

स इति ॥ एवमाहतः अतः सपदि शीघ्रमेव विशीर्णं मस्तकं यस्य सः अत एवापगतं स्मृतं स्मृतिर्यस्य सः । अपस्मारग्रस्त इवेत्याशयः । मुखाद्रुधिरं वमन् महारवमीरयन् महान्तं शब्दं विमुञ्चन् व्यसुः प्राणरहितः सोऽसुरः प्रलम्बः मघवत इन्द्रस्य आयुधेन वज्रेण आहतो गिरिरिव अपतत् ॥ २९ ॥ दृष्ट्वेति ॥ बलशालिना बलेन रामेण प्रलम्बं निहतं दृष्ट्वा साधु कृतं साधु कृतमिति वादिनो गोपाः सुविस्मिताः आसन् ॥ ३० ॥ आशिष इति ॥ तं रामं प्रेत्य परलोकं गत्वा गतमिवालिङ्ग्य प्रेम्णा विह्वलानि चेतांसि येषां ते आशिषः अभिगृणन्तः प्रयुञ्जानाः तदर्हणं प्रशंसायोग्यं तं प्रशशंसुः ॥ ३१ ॥ पाप इति ॥ पापे सर्वोपद्रवकारिणि प्रलम्बे निहते सति देवाः परमनिर्वृताः परमानन्दं प्राप्ताः सन्तो माल्यैः कुसुमैर्बलमभ्यवर्षन् साधु साध्विति प्रशशंसुश्च ॥ ३२ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमाष्टादशे व्यदधादिमाम् ॥
इति श्रीमद्भागवते महापुराणे दशमेऽन्वितार्थप्रकाशिकायामष्टादशोऽध्यायः ॥ १८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तेनाऽऽहतः सन् सपदि विशीर्णं भग्नं मस्तकं यस्य सः विशीर्णमस्तकः अपस्मृतो गतस्मृतिः सः असुरः महारवमीरयन् अपतत् क इव मघवत इन्द्रस्य वज्रेण आहतो गिरिर्यथा तथा ॥२९–३०॥ आशिषः सानुजस्त्वं चिरं सुखं विहरन्सन् नः पाहीत्यादिकानाशीर्वादान् अभिगृह्णतो ददतो गोपाः तदर्हणं प्रशंसार्हतं बलदेवं ॥ ३१ ॥ परमनिर्वृताः परममुत्कृष्टं निर्वृतं सुखं येषां ते माल्यैः पुष्पैर्ववृषुः ॥ ३२ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कंधव्याख्याने प्रलंबवधो नामाष्टादशोऽध्यायः ॥ १८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति ॥ सः प्रलम्बः, असुरः, आहतो रामेण मुष्ट्या संताडितः सन् सपदि तत्क्षणमेव, विशीर्णमस्तकः भग्नशिराः, मुखात्, रुधिरं वमन् उद्गिरन्, अपगतं स्मृतं स्मृतिर्यस्य सः, महारवमुच्चैः स्वनं, समीरयन् उच्चारयन्, व्यसुर्गतप्राणः संश्च, मघवत इन्द्रस्य, आयुधाहत आयुधेन ताडितः, गिरिः पर्वतः, यथा तथा अपतत् ॥२९॥ दृष्ट्वेति ॥ बलशालिना बलेन बलभद्रेण, निहतं प्रलम्बं दृष्ट्वा, सुविस्मिताः सुतरां विस्मयं प्राप्ताः सन्तः, गोपाः, साधु साधु समीचीनं कृतं इत्येवं, वादिनो वक्तारः, आसन् संबभूवुः ॥ ३० ॥ आशिष इति ॥ आशिषः जय जीवेत्याशीर्वचनानि, अभिगृणन्तः उच्चारयन्तः, प्रेम्णा स्नेहेन विह्वलानि चेतांसि येषां तथाभूताः सन्तः, प्रेत्य आगतमिव मृतिं प्राप्य पुनरागतमिव, आलिङ्ग्याश्लिष्य, तदर्हणं प्रशंसार्हं, तं बलदेवं, प्रशशंसु, गोपाः इति शेषः ॥ ३१ ॥ पाप इति ॥ पापे सर्वदुःखकरत्वात् केवलाघमूर्त्तौ, प्रलम्बेऽसुरे, निहिते सति, परमनिर्वृता अतिसुखिनो जाताः, देवाः, बलं रामं, माल्यैर्नन्दनाद्यारामसुमनोभिः, अभ्यवर्षन् । साधु साधु इति, शशंसुः प्रशशंसुश्च ॥ ३२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे अष्टादशोऽध्यायः ॥ १८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अभ्यवर्षन्निति : १०. १८. ३२.

बलारातित्वमेतेन पापिना स्वीकृतं बलात् । तत्खण्डितं बलेनेति युक्तं पुष्पमुचः सुराः ॥ ४५ ॥
सबलं त्वा विलोक्योचुर्यद्देवाः साधु साध्विति । युक्तमेतद्यतस्त्वत्तः कल्याणं सततं सताम् ॥ ४६ ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने अष्टादशोऽध्यायः ॥ १८ ॥

कृष्णप्रिया

घूँसा लगना था कि उसका सिर चूर-चूर हो गया। वह मुँह से खून उगलने लगा, चेतना जाती रही और बड़ा भयङ्कर शब्द करता हुआ, इन्द्र के द्वारा वज्र से मारे हुए पर्वत के समान वह उसी समय प्राण-हीन होकर पृथ्वी पर गिर पड़ा ॥ २९॥ बलरामजी परम बलशाली थे। जब ग्वाल-बालों ने देखा कि उन्होंने प्रलम्बासुर को मार डाला, तब उनके आश्चर्य की सीमा न रही। वे बार-बार 'वाह-वाह' करने लगे ॥ ३० ॥ ग्वाल-बालों का चित्त प्रेम से विह्वल हो गया। वे उनके लिये शुभ-कामनाओं की वर्षा करने लगे और मानो मरकर लौट आये हों, इस भाव से आलिङ्गन करके प्रशंसा करने लगे। वस्तुतः बलरामजी इसके योग्य ही थे ॥ ३१ ॥ प्रलम्बासुर मूर्तिमान् पाप था। उसकी मृत्यु से देवताओं को बड़ा सुख मिला। वे बलरामजी पर फूल बरसाने लगे और 'बहुत अच्छा किया, बहुत अच्छा किया' इस प्रकार कहकर उनकी प्रशंसा करने लगे ॥ ३२ ॥

इति श्रीमद्भागवत दशमस्कन्ध का अठारवाँ अध्याय समाप्त ॥ १८ ॥

* * *

अथैकोनविंशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
१६	१४	२	२	५४०	१२	३६	५६१	१८।	७

श्रीशुक उवाच

क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः । स्वैरं चरन्त्यो विविशुस्तृणलोभेन गह्वरम् ॥ १ ॥
अजा गावो महिष्यश्च निर्विशन्त्यो वनाद् वनम् । [1]इषीकाटवीं [2]विविशुः क्रन्दन्त्यो [3]दावतर्पिताः ॥ २ ॥
तेऽपश्यन्तः पशून् गोपाः कृष्णरामादयस्तदा[4] । [5]जातानुतापा [6]न विदुर्विचिन्वन्तो गवां गतिम् ॥ ३ ॥
तृणैस्तत्खुर[7]दच्छिन्नैर्गोष्पदैरङ्कितैर्गवाम् । मार्गमन्वगमन् सर्वे [8]नष्टाजीव्या विचेतसः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच —गोपेषु क्रीडासक्तेषु दूर-चारिणीः मद् गावः स्वैरम् चरन्त्यः तृणलोभेन गह्वरम् विविशुः ।१। अजाः गावः च महिष्यः वनात् वनम् निविशन्त्यः दावकर्शिताः क्रन्दन्त्यः इषीकाटवीम् विविशुः ॥ २ ॥ कृष्णरामादयः ते गोपाः पशून् अपश्यन्तः जातानुतापाः विचिन्वन्तः गवाम् गतिम् न विदुः ॥ ३ ॥ नष्टाजीव्याः विचेतसः सर्वे तत् खुरदच्छिन्नैः तृणैः गवाम् गोष्पदैः अङ्कितैः मार्गम् अन्वगमन् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ऊनविंशे निविष्टं तु गोपगोकुलमच्युतः । मुंजारण्यमरण्याग्ने ररक्ष तन्निपातः ॥ १ ॥

दूरचारिणीर्दूरचारिण्यः ॥ १ ॥ वनाद्वनांतरं निर्विशंत्यो दावेन तर्षितास्तृषिताः क्रंदंत्य इषीकाटवीमत्युच्छ्रितघनतृणविशेषारण्यं निर्विविशुः ॥ २ ॥ कृष्णरामावादी येषां ते न तु तौ ॥ ३ ॥ तासां गवां खुरैर्दद्भिश्च छिन्नैस्तृणैर्गोष्पदैरंकितैश्च भूप्रदेशैस्तृणैर्वा गवां मार्गमन्वगमन् । नष्टाजीव्या गत जीविकासाधनाः ॥ (४) ॥ मुंजाटव्यपि सैव या इषीकाटवी ॥ ४–६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तान्नपानतः अग्निपानतः (१) । दूरचारिणीः दूरचारिण्यः । गह्वरम् यमुनातीरकक्षम् "गुहागहनदंभेषु निकुंजेपि च गह्वरे इति मेदिनी । तद्गावः तेषां गोपानां गावः ॥ १ ॥ इषीकाटवीम् मुंजारण्यम् "इषीका तु शलाकायां मुंजे लक्ष्मीस्त्रियोस्तथा" इति धरणिः । अजा बर्कर्यः, अजादिचारणे गोपालवदजापालादि तस्य नाम कथं नोच्यते, तासामल्पत्वेन गवां प्रचुरत्वाद्गोपालेति नाम। यद्वा–'यशः पुण्यैरवाप्यते' इति न्यायात्तन्नेति । 'गोछागोमहिषीदुग्धादन्यद्दुग्धं तु चामिषम्" इति पाद्मादजामहिष्योः पेयदुग्धत्वात्तद्रक्षणादौ न दोषोऽस्ति । यत्तु, "आजं च माहिषं क्षीरं हंति श्राद्धं न संशयः" इति तत्तत्रैव दुष्टं न त्वत्रेति । किञ्चाज्यं वस्तुतोऽजोद्भवनेवान्यत्र तु सादृश्यात्तत्प्रयोग इति ज्ञेयम् । अथ वा "अजा स्यादप्रसूता गौः सकृत्सूता महिष्यपि । अन्या गाव इह प्रोक्ता इति शब्दार्थवेदिनः ॥" इति शब्दरत्नात् ॥ २ ॥ ते गोपाः । अतद्गुणसंविज्ञानो बहुव्रीहिः कृष्णरामादय इति ॥ ३ ॥ विचेतसः इतो गता वात्र गता इत्येवं नानाबुद्धयः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रसङ्गाल्लौकिकत्वेऽप्यलौकिकीमेवान्यां लीलां क्रमप्राप्तामेवाह–क्रीडेत्यादिना । तेषां वा ता असङ्ख्या गावः समासान्ताभाव आर्षः गह्वरं दुर्गमवनं तृणलोभेनेति श्रीगोकुलानन्दकर्त्तृकचारणानन्दाच्चरणावेशः ततस्तल्लोभस्तेनेति ज्ञेयं "यज्जीवितं तु निखिलं भगवान् मुकुन्दः" इत्यादौ तथा प्रसिद्धेः श्रीवृन्दावने यत्र कुत्रापि मुहूर्त्तमात्रेणोदरपूरणस्य शक्यत्वाच्च ॥ १ ॥ न केवलं गाव एवान्येऽपि सर्वे पशव इत्युक्तपोषन्यायेनाह—अजा इति । अजादीनां गमने यथापूर्वं शैघ्र्यापेक्षया तत्क्रमेण निर्देशः इषिकाटवीं प्रायो यमुनातीरपरित्यक्ततद्दूरवर्त्ति रुक्षसैकतजाम् अत एव दावेन अग्निसदृशेन ग्रीष्मकालीनतापेन तर्षिताः तृषं प्रापिताः अत एव

---

१. मुञ्जाटवीं–विज. । २. निर्विविशु । ३. दावतापिताः–गो. प्रे. टी. । ४. स्ततः–गो. प्रे. टी. । ५. जातानुकंपा–वीर. । ६. विविशु–र. पु. टी. । ७. रविच्छिन्नैर्गोष्पदैरङ्कितं गवाम्–गो. प्रे. टी. । ८ नष्टजीवा–विज. ।

क्रन्दन्त्यो बभूवुः ॥ २ ॥ कृष्णात तैर्व्याख्यातमेव तथापि तयोः साक्षाद्वर्त्तमानयोरपि गोपानां पश्वदर्शनादिकं तयोः कौतुकपरतयेति ज्ञेयं यद्वा, कृष्णरामौ आदी आदौ वर्त्तेते येषामिति "उभावपि वने कृष्णो विचिकाय समन्ततः" इतिवद्गवादिस्नेहमयलीलावेशपक्षे तद्गुणसम्विज्ञानः ॥ ३ ॥ गोष्पदैर्गोभिः सेवितैर्मार्गैः यतोऽङ्कितैः तत्खुरादिभिर्लिखितैः गोष्पदं सेवितासेवितप्रमाणेष्विति शब्दस्मृतेः अन्यत्र सुरभावात् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रसंगाल्लौकिकत्वेऽप्यलौकिकीमेवान्यां लीलां क्रमप्राप्तामेवाह क्रीडेत्यादिना । तेषां ता वा अनन्ता गावः, गह्वरं दुर्गमवनम्, लोभेनेति—श्रीभगवता रक्ष्यमाणा अपि भोगलोभेन ततो दूरनिपतिताः स्वेच्छाचाराद्दुःखमनुविन्दन्त्येवेति श्लेषार्थो ज्ञेयः। तथापि तस्य कारुण्यमहिम्नाऽचिरात् क्षेमं स्यादेवेत्यग्रे व्यक्तं भावि । एवमन्यत्रापि सर्वत्र निजभावानुसारेण तात्पर्य्यमुह्यम् ॥ १॥ न केवलं गाव एव, अन्येऽपि सर्वे पशव इत्युक्तपोषण्यायेनाह—अजा इति । अजादीनां गमने यथापूर्वं शैघ्र्यापेक्षया तत्क्रमेण निर्देशः, दावेन दावाग्निना, यद्वा अग्निसदृशेन ग्रीष्मकालीनतापेन तर्षितास्तृषां प्रापिता अत एव क्रन्दन्त्यः ॥ २ ॥ कृष्णेति तैर्व्याख्यातमेव, तथापि तयोः साक्षाद्वर्त्तमानयोरपि गोपानां पश्वदर्शनादिकं तयोः कौतुकपरतयेति ज्ञेयम् । अत एव श्रीकृष्णस्य महाकौतुकित्वापेक्षया आदौ श्रीबलरामस्य च तदनुवर्त्तित्वेन पश्चान्निर्देशः, यद्वा, श्रीकृष्णरामौ आदौ वर्तेते येषाम्, ततश्च तयोरपि पश्वदर्शनादिकं महाकौतुकिस्वभावादेव, विशेषतश्च तल्लीलामनुसन्दधतां श्रीशुकदेवादीनां कौतुकविशेषजननाय, यद्वा, गवादिषु तेषु स्नेहभरेण विचारान्तर्द्धानात् ॥ ३ ॥ ततश्च नष्टाजीव्या इत्यादिकं तल्लीलास्वभावेन तादृशत्वापत्तेः, किंवा नष्टाजीव्याश्च विचेतसश्च जना इव, यद्वा, अकारप्रश्लेषेणानष्टाजीव्याश्च ते विचेतसश्च, तथापि यमुनापुलिनादावंकितैरुदितैर्गोष्पदैश्च ॥ ४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

खुरदच्छिन्नैः खुरैः दद्भिश्च छिन्नैः ॥ १-६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ दवाग्निपानानन्तरं श्रीकृष्णकर्मानुवर्णितुं तावत्प्राक्तनं वृत्तान्तमाह—क्रीडेति । प्रलम्बवधानन्तरमपीत्यादिः गोपेषु क्रीडासक्तेषु सत्सु तेषां गावो दूरचारिण्यो यथेच्छं चरन्त्यस्तृणलोभेन गह्वरं विविशुः ॥ १ ॥ तदेव प्रपञ्चयति—अजा इति। अजादयो वनाद्वनं विशन्त्यः दावेन तापेन तर्षिताः तृषिता आक्रोशन्त्यः इषीकाटवीमत्युच्छ्रितसान्द्रतृणविशेषारण्यं विविशुः इषीकाख्ये वने पूर्वत्र गहनशब्दविवक्षिता ॥ २ ॥ ततस्ते क्रीडासक्ताः कृष्णादयो गोपास्तदा पशून् अपश्यन्तोऽत एव जाता अनुकम्पा येषां तथाभूताः गवां गतिं गतिकृतं खुरविन्यासात्मकं चिह्नं विचिन्वन्तोऽपि न विदुः न लक्षितवन्तः ॥ ३ ॥ ततः कथञ्चिल्लब्धे तासां गवां खुरैर्दद्भिर्दन्तैश्च छिन्नैस्तृणैर्गोष्पदैश्चाङ्कितं गवां मार्गमन्वगमन्ननुसृत्य जग्मुः ततः पुनरपि नष्टाजीव्या नष्टो लीनः आजीव्यः जीवनसाधनमार्गो येषां ते अत एव विचेतसः विचाराक्रान्तचित्ताः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

स्वभक्तजनसंसारविनाशनं हरेरेव सुशकं नान्यस्येति निदर्शनाय दावाग्निपानप्रकटितमाहात्म्यमस्य वक्तुमुपक्रमतेऽस्मिन्नध्याये–तेषां गोपानां गावः दूरचारिणीः दूरगामिन्यः स्वैरं स्वेच्छया गह्वरं गम्भीरकक्षम् ॥१॥ मुञ्जाटव्याम् इषिकाटवीं शराटवीं वा उभयं च प्रचुरं तत्रेत्यर्थः । "शरो मुञ्ज इतीरितः" इति हलायुधः । दावेन तापेन तर्षिताः जलं पातुकामाः ॥ २ ॥ अपश्यन्तः अनुतापः पश्चात्तापः विचिन्वन्तः अन्वेषमाणाः ॥ ३ ॥ तासां गवां खुरैः दद्भिः दन्तैश्छिन्नैरङ्कितैः भूतलैः नष्टजीवाः जीवन्मृताः विचेतसः इतो गताः अत्र गता इति विविधबुद्धयः वौ दैवे गतं चेतो येषां ते तथा ये दैवमेव चेतसा वचसा च शरणं गच्छन्त इत्यर्थः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कृष्णरामादय इति तद्गुणसंविज्ञानत्वेन लीलावेशः ॥ १-९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ऊनविंशे मुद्रिताक्षान् मुञ्जाटव्यां दवानलात् । रक्षन् भाण्डीरमापय्य स्वान् मुक्ताक्षान् व्यधाद्धरिः ॥

तत्तदनन्तरं दूरचारिणीः दूरचारिण्यः ॥ १ ॥ इषीकाणां शराख्यतृणविशेषाणामटवीं दावेन ग्रीष्मसूर्यातपोत्थतापेन तर्षिताः तृष्णां प्रापिताः ॥ २ ॥ जातानुतापा न विदुर्न विविदुः गोविषयकप्रेम्णैवावृतज्ञानाः ॥ ३ ॥ तासां गवां खुरैर्दद्भिश्च छिन्नैस्तृणैर्गोष्पदैरङ्कितैर्भूप्रदेशैश्च लक्षितं गवां मार्गं नष्टाजीव्या विगतजीविकासाधनाः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ऊनविंशे मुञ्जाटव्यां प्रज्वलितादग्नेर्गोपगोकुलमरक्षद्धरिरित्याह—क्रीडासक्तेष्विति । दूरचारिणीः दूरचारिण्यः स्वैरं यथेच्छं चरन्त्यः गह्वरं गहनं तृणलोभेन विविशुः ॥ १ ॥ तदेव प्रपञ्चयति—अजेत्यादिना । दावेन तापेन तर्षिताः इषीकाटवी-मुच्छ्रितघनतृणविशेषाटवीं मुञ्जाटवीमित्यर्थः ॥ २ ॥ कृष्णरामावादी येषां ते इत्यतद्गुणसंविज्ञानो बहुव्रीहिः ॥ ३ ॥ नष्टाजीव्या गतजीविकासाधनाः अत एव विचेतसः तत्खुरदच्छिन्नैः तासामजादीनां खुरैर्दद्भिश्च छिन्नैस्तृणैः गोष्पदैरङ्कितैः भूप्रदेशैश्च गवां मार्गमन्वगमन् ॥ ४–६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

दावान्मुञ्जवने रक्षन् पिहिताक्षान् सखीन् हरिः । व्यधाद्‌माण्डीरमानीय मुक्ताक्षानूनविंशके ॥

तद् तदनन्तरं दूरचारिणीरिति प्रथमार्थे द्वितीया ॥ १ ॥ अजा गुर्जराणां गावो गोपानां महिष्य उभयेषां बोध्या ईषीकाणां शराख्यानां तृणानामटवीं दावेन ग्रीष्मसूर्यतापेन तर्षिताः पिपासां गमिताः ॥ २ ॥ कृष्णरामादय इत्यतद्गुणसंविज्ञानो बहुब्रीहिः । ते गोपाः कृष्णरामेतरे पशून् पश्यन्तो जातानुतापा बभूवुः गवां गतिं न विविदुः गोविषयकेन स्नेहेन परिवृद्धेन ज्ञान-स्यान्तर्निगीर्णत्वात् तद्गुणसंविज्ञानो वाहस्तु ॥ ३ ॥ तेषां पशूनां, खुरैर्दद्भिश्च छिन्नैस्तृणैः गोष्पदैरङ्कितैर्भूमिप्रदेशैश्च लक्षितं गवां मार्गमन्वगमन् नष्टमदर्शनं प्राप्तमाजीव्यं जीविकासाधनं येषां ते ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ तद्गावस्तदित्यव्ययं दूरचारिणीर्दूरचारिण्यो गह्वरमरण्यानीम् ॥ १ ॥ वनाद्वनं परम्परा अजा गावो महिष्यश्च निर्विशन्त्यो मुञ्जाटवीमीषिकाकाननं दावतर्षिता दावेन तापेन तर्षिवास्तृष्णायुताः क्रन्दन्त्यो निविविशुर्निविशिरे । निर्विविशुरिति पाठस्त्वक्लेशिष्ठः । शरो मुञ्ज इतीरित इति हलः ॥ २ ॥ कृष्णरामादयो गोपास्ते पशूनपश्यन्तोऽनवलोकमाना गावश्च गावश्च गावस्तासाम् । ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्रीति स्त्र्येकशेषः । गवां गतिं तत्स्थानं विचिन्वन्तो न विदुर्यदा तदा जातानुतापा जातोऽनुतापो किं लीलालसैरुपेक्षिताः पशव इति तापो येषां ते तथा बभूवुः ॥ ३ ॥ तासां खुरैर्दद्भिर्दन्तैश्छिन्नै-स्तृणैरङ्कितैर्गोष्पदैः । गोष्पदं सेवितासेवितप्रमाणेष्विति निपातितः शब्दः । सर्वेऽपि गवां मार्गेऽन्वगमन् । नष्टाजीव्या इति पाङ्क्तः पाठः । आजीव्यं जीविका तन्नष्टं येषां ते तथा नष्टस्वजीवनोपाया इति यावत् । नष्टजीवा इति पक्षे मृतकप्रतीका इत्यर्थः । विचेतसो विमनस्काः ॥ ४ ॥

श्रीसुबोधिनी

अज्ञानात्मा ह्यात्मदोषो दवाग्निस्तन्निवारणम् । षोडशे प्रोच्यते सम्यङ्‌निरोधः सेत्स्यते ततः ॥ १ ॥
ततो दासैर्मुदा लीला स्वच्छन्दाग्रे भविष्यति । स्त्रीणां चैव मनःप्रीतिस्तदासक्तिः फलिष्यति ॥ २ ॥

एवं प्रलम्बवधप्रसङ्गेन क्रीडासक्तानां गोपानां विस्मृतपशुधनानां सम्बन्धिन्यो **गावो** यतः कुतश्चिद् गताः, अन्तःकरणदोषे परिह्रियमाणे जीवस्यासदवस्था भवतीत्यज्ञानं बलिष्ठमिव भवति, उपाधेर्देहस्यासदर्थनिवेशात् तत्प्रसङ्गे आत्मापि तद्दोषसहितो भवति तदा गवां दाहे गोपाला अपि दग्धा उच्यन्ते, एवं **सर्वनाशे समुपस्थिते हरिरेव रक्षकः, तदुपेक्षायां तु सर्वनाश एव भवेत्, शरणागतौ च रक्षा,** अतः **सर्वोपाधिविनिर्मुक्तोपि हरिं शरणमाव्रजे**दिति, **क्रीडायामासक्तेषु गोपेषु** सत्सु तत्स-म्बन्धिन्यो **गावो** रक्षकाभावाद् **दूरचारिण्यो** जाताः, ततः **स्वैरं चरन्त्यस्तृणलोभेन** गह्वरमत्यगम्यस्थानं **विविशुः, एवमेव देह उपेक्षितोत्यशक्यस्थाने विशेत्** ॥ १ ॥ देहानां त्रैविध्यमिव वक्तुं तस्मिन् दिवसे **अजा** राजस्यो **गावः सात्त्विक्यो महिष्य**-स्तामस्यश्च पूर्वं धर्मरक्षायां निरूपितत्वान् न राजसतामसानां निरूपणं, **चकारा**दन्ये हरिणादयश्च लीलार्थं गृहीताः श्वानो वा, एकं **वनं** परित्यज्य वनान्तरं **नितरां विविशुः**, पूर्वोक्तवने हि देवतासान्निध्यं निरुपद्रवश्च, अतस्तद् **वनं** परित्यज्य **वनान्तरं** गताः, तत्रापि रक्षकाभावादि**षीकाटवीं विविशु**र्यत्र प्रवेशनिर्गमौ कठिनौ, ते हि वर्षवृद्धा आसन्नमरणाः स्वयमेव म्रियमाणाः कथमन्यरक्षां कुर्युः ? तत्र प्रविष्टाः **क्रन्दन्त्यो** जाता औष्ण्येन च कृत्वा **तर्षिता**स्तृषायुक्ताश्च जाताः, एवं गवां स्वतः स्वसम्बन्धाभावोनिष्टसम्बन्धश्च कथितः ॥ २ ॥ तादृशीषु निवृत्तान्तःकरणदोषाणां स्मृतिमाह **तेपश्यन्त** इति, **ते गोपालाः पशूनपश्यन्तः कृष्णरामादयो** गत-स्थानपरिज्ञानार्थं भगवत्प्रधानाः सन्तो **मार्गमन्वगम**न्नित्यग्रेण **सम्बन्धः**, प्रथमं **तदा** क्रीडाव्यवहितदशायां स्मरणानन्तरं **जातानुतापा** जाताः, कृतापि लीलाऽकृता भाविता, अत एव **न विदुर्गवां गतिं विचिन्वन्तो**पि, **धर्मपरिपालने तु गाव एव मुख्याः** ॥ ३ ॥ ततोनुमानेन ज्ञातवन्त इत्याह **तृणै**रिति, **तासां** गवां **खुरैः दद्भिश्च छिन्नैस्तृणैः** कृत्वा **मार्गमन्वगमन्,** आरण्यवैलक्षण्यं खुरैर्ज्ञातं रदच्छेदेन सामान्यतो ज्ञातं, अतः सामान्यविशेषज्ञापकै**स्तृणैर्गवां** सम्बन्धिभि**र्गोष्पदै**श्चाङ्कितैश्चिह्नितैस्तृणैरेव, त्रिविधानि तृणानि

जातानि मूलतश्छिन्नानि मध्यतश्छिन्नानि पीडितानि च गोमयखुरघातैः, अतस्त्रिविधानामपि ज्ञापकत्वान् नात्र भ्रमशङ्का, ततः **सर्व एव मार्गमन्वगमन्** गवां मार्गेण गताः, यतः सर्व एव **नष्टाजीव्याः**, ननु चेतना अचेतनप्रायाणां मार्गे कथं गताः ? तत्राह **विचेतस** इति, विवेकरहिता व्याकुला वा ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

षोडशेध्याये, अजा गावो महिष्यश्चेत्यत्र, ते हि वर्षवृद्धा इत्यादि । 'ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री'त्यनुशासनादत्र स्त्रीप्रयोगादतरुणत्वं ज्ञाप्यत इति तथा ॥ २ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अथ षोडशाध्यायतात्पर्यं निरूपयन्तः कथासङ्गतिः पूर्ववदेव ज्ञातव्येति तामनुक्त्वा स्कन्धार्थसङ्गतिमेवाहुर**ज्ञानात्मे**त्यादि, **हि** यतो हे**तोरज्ञानात्मा** स्वरूपाज्ञा**नात्मकः** पञ्चम **आत्मदोषो दवाग्निरा**"त्मानं चेद् विजानीयादयमस्मीति पूरुषः किमिच्छन् कस्य वा हेतोः शरीरमनुसञ्ज्वरे"दितिश्रुतावात्माज्ञानेनैव शरीरार्थं 'ज्वर'स्योक्तत्वात् स एवैकीभूतोयम**ग्निस्तन्निवारणं षोडशाध्याये प्रोच्यत** इतरपूर्वमूलभूतैतन्नाशरूप **उच्यते**तस्तन्निवृत्तेः साधारणानां **निरोधः सेत्स्यते** भगवल्लीलाया योग्यायोग्यश्रवणाश्रवणकृतिपूर्वको दोषदृष्टिरहितश्च सम्पत्स्यते, तथा च स्वरूपयोग्यतासम्पादनार्थमेतावन् निरूपणमित्यर्थः, नन्वेवं साधारणनिरोधे कृतेपि तस्य मुख्यलीलायां कुत्रोपयोगस्तदभावे चैतत्करणस्य किं प्रयोजनमत आहुस्ततो **दासै**रित्यादि, **तत** आसक्तिलक्षणनिरोधात् तैः सहैवं **लीला भविष्यति, एव**कारोप्यर्थे **च पुनः स्त्रीणाम**पि भगव**दासक्तिः फलिष्यति,** तथा चैतदर्थं तत्करणमित्यर्थः, एतेन वक्ष्यमाणोपोद्घातरूपत्वं पूर्वाध्यायपञ्चकस्य बोधितं, एवं सङ्गतिमुक्त्वाध्यायार्थनिष्कर्षं वदन्तः **पाद्मे** प्रलम्बवधस्य फाल्गुन उक्तत्वादत्र च पूर्वाध्याये ग्रीष्मर्तोर्वर्णितत्वादत्र च तस्यैवर्तोः प्रत्यभिज्ञायमानत्वात् प्रलम्बवधदावाग्निनिवृत्त्योरेकदव व्रजे गोपैः कथनस्य वक्ष्यमाणत्वाच्च नात्र पाद्मोत्तरखण्डोक्तः पक्षः किन्तु तस्मिन्नेव दिने प्रलम्बवधो दवाग्निसम्बन्धश्चेति बोधयितुं कथासङ्गतिमाहुरे**वं प्रलम्बे**त्यादि **गता** इत्यन्तं, ननु भवेत्त्वेवं तथापि पूर्वाध्यायोक्तलीलया निवृत्तान्तःकरणदोषाणां कथमेवम्भावो येन गोधनास्मरणादिरित्यत आहुर**न्तःकरणे**त्यादि, **असदवस्थे**ति वैकल्यं, **इति**र्हेतौ, **तत्प्रसङ्ग** इति देह**प्रसङ्गे**, तथा चैवमात्मदोषोद्बोधात् तथेत्यर्थः, अत्र च **गवादि**पदानि 'निगीर्याध्यवसाने'न रूपकातिशयोक्तिविधया देहादिलक्षकाणि प्रथमस्य चतुर्थारम्भ आनुगानिकसूत्रे प्रकरणबलेन 'मह'दादिपदवत् प्रकृते निरोधे तदङ्गभूताध्यासादिनिवृत्तेरेव विवक्षितत्वादित्याशयेनाहुस्त**दे**त्यादि, एतावान् पर विशेषस्तत्र कथाभावाल् लक्ष्या एव मुख्या अत्र तु कथायाः सद्भावाद् वाच्या अपि तेन यथाधिकारस्तेषां तेषां बोधयतीति न कोपि शङ्कालेशः, एवं दोषोत्पत्तिप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाहुरे**वं सर्वे**त्यादि । **क्रीडासक्तेष्वि**त्यत्राध्यायतात्पर्येण सङ्गमयितुं गवामुपेक्षया गह्वरप्रवेशस्य तात्पर्यमाहुरे**व**मित्यादि ॥ १ ॥ **अजा गाव** इत्यत्र ननु पूर्वाध्यायेष्वजादीनां कुतो न निरूपणमित्यत आहु**र्देहाना**मित्यादि, **तामस्यश्चे**ति निरूपिता इतिशेषः, **पूर्वोक्तवन** इति **वृन्दावने, ते हो**ति मुञ्जाः ॥ २ ॥ **ते पश्यन्त** इत्यत्र **त**देति मूलप्रतीकं, **कृतापि लीले**त्यन्तःकरणदोषनिवृत्तिरूपा, **गाव एव मुख्या** इति तेन धर्मोपि गत इति सूचितम् ॥ ३ ॥ **तृणै**रित्यत्रा**चेतनप्रायाणा**मिति कथापक्षे गवां द्वितीयपक्षे शरीराणां, **विवेकरहिता व्याकुला वा** द्वितीयपक्षे **विवेकरहिता** गोपक्षे **व्याकुला** इति बोध्यम् ॥ ४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

षोडशेध्याये **अज्ञानात्मे**ति भगवदज्ञानरूपो जीवस्य **दोषो दवाग्नि**रित्यर्थः, तत्रार्थापत्ति प्रमाणयन्ति **सम्यग्**ित्यारभ्य **फलिष्यती**त्यन्तेन, तन्निवारणानन्तरं "मेनिरे देवप्रवरा"वित्यनेन ज्ञानमुक्तमतोस्य तथात्वमिति युक्तिसूचनाय हिशब्दः, **स्त्रीणां चैवे**ति एतासामपि लीलां "मार्गा बभूवु"रित्यादिना वक्ष्यतीति चकारः, **प्रीत्यासक्ति**रूपं फलं त्वेतासामेवेत्येवकारः, यद्यपि तदध्यायकारिकायां गोपानामपि तत्फलमुक्तं तथापि सूचितत्वेन, एतासां तु स्फुटमेवोक्तमेतज्ज्ञापनायैव तत्कारिकायां 'स्फुटे'त्युक्तम् । **असदवस्थे**ति निश्चितस्वसत्ताकस्य देहादिभावस्याभावाद् वास्तवस्वरूपस्य चाज्ञानादित्यर्थः, **बलिष्ठमिवे**ति चतुर्विधाध्यासरूपान्यथाज्ञानस्य निवृत्तत्वादित्यर्थः, तथापि भगवान्निवर्तक इति इवेत्युक्तं, उपाधेरिति अन्यथाज्ञानोपाधिभूतस्य देहस्यासत्पदार्थेषु निवेशाद् देहो नाहमित्याकारकात् तत्सङ्घातनिविष्टस्यात्मनोपि किञ्चिद्दोषसम्बन्धो युक्त इत्यर्थः, **सर्वोपाधी**ति चतुर्विधाध्यासरहितोपीत्यर्थः ॥ १ ॥ **अजा गावो महिष्य**श्चेत्यत्र **निरुपद्रव** इति तादृशो देशः पूर्वोक्तवने वर्तते इत्यर्थः, **म्रियमाणा** इति ग्रीष्मतापेनेतिशेषः, एतादृशा **अन्य**स्मादिषीकावनाद् भयहेतोः स्वस्य **रक्षां** स्वयमेव **कथं कुर्युः** किन्तु छायाभ्रमेण तत्र गच्छेयुरेव गोपाश्च रक्षका न सन्ति अतस्तत्र निविष्टा इत्यर्थः, **स्वसम्बन्धाभाव** इति स्वेषु गोपेषु सम्बन्धस्याभावः, स्वतो गोपेषु न सम्बद्धा इति **क्रन्दन्त्य** इत्यनेनोक्तं, अनिष्टस्य दावस्य सम्बन्धो **दावतर्षिता** इत्यनेनोक्त इत्यर्थः ॥ २ ॥ **तेपश्यन्त** इत्यस्याभासे **स्मृतिमाहे**ति श्लोकद्वयेनेतिशेषः, अयं वाक्ययोस्तात्पर्यार्थः, एकस्मिन्नपि पर्वणि विद्यमाने पर्वान्तरमुद्गच्छेदिति सूचनाय पुनर्देहादि

स्मरणमेव वाच्यं, अनुतापोऽज्ञानं गतिविचयनमनुगमनं च तत्कार्यत्वेनोक्तमितिभावः, व्याख्याने, स्मृतिं विशदयन्ति **स्मरणानन्तरमिति** स्मरणं विना अनुतापादिकं न सम्भवतीति तेन स्मरणं ज्ञापितमितिभावः ॥ ३ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

षोडशाध्यायार्थोक्तौ **अज्ञानात्मा ह्यात्मदोषो दावाग्निरिति** ''लोभक्रोधादयो दैत्या'' इति कृष्णोपनिषद्भ्यः कृष्णावतारे नाश्यानां दोषरूपत्वं, तत्राविद्यायाः पञ्च पर्वाण्यपि नाश्यानि, तेषु देहाध्यासरूपो धेनुको नाशितः, इन्द्रियदोषो दूरीकृतः कालीयदमनेन, प्रथमदवाग्निः प्राणदोषरूपो नाशितः, अन्तःकरणदोषः प्रलम्बो नाशितः, स्वरूपाज्ञानरूपो द्वितीयो दावाग्निस्तन्नाशोऽस्मिन्नध्याये उच्यते, एवं चतुर्धाध्यासः स्वरूपविस्मरणं चेति पञ्चाप्यविद्यायाः पर्वाणि मूर्तिमन्ति निवर्तितानि, ततो **दासैर्मुदा लीलेति** ततः पञ्चपर्वाविद्यानिवृत्त्यनन्तरं **दासैः** गतदोषत्वेन स्वरूपं ज्ञात्वा सेवां कुर्वद्भिः सह **लीला** भवति, सा सप्तदशाध्याये निरूप्या, **स्त्रीणां चैवेति** वेणुनादश्रवणेन **मनसः प्रीतिं** व्रजस्त्रीणां कृतवान्, सा लीला अष्टादशाध्याये निरूपयिष्यते । **अन्तःकरणदोषे परिह्रियमाणे जीवस्य असदवस्था भवतीति** अन्तःकरणाध्यासेन अहमिदमनुभवामि स्मरामीत्याद्यन्यथाज्ञानपरतन्त्रो जीवः सत्त्वेन भाति, अन्तःकरणदोषे परिह्रियमाणे अन्यथाज्ञानाभवादहंवित्तौ आत्मा न सम्यक्तया भातीति ज्ञानाभाव एव बलिष्ठो भवति, तदेतत् ''**तेऽपश्यन्तः पशून् गोपा**'' इत्यस्य पञ्चज्ञानस्याध्यात्मिकपक्षेण तात्पर्यमुक्तं, यत् तु **तेऽपश्यन्तःपशून् गोपा** इत्यस्याभासे **निवृत्तान्तःकरणदोषाणां स्मृतिमाहे**त्युक्तं तत्तु ''विचिन्वन्तो गवां गति''मित्यस्य हार्दार्थ उक्तः, **देहानां त्रैविध्यमिवेति** इह अजागोमहिषीणां राजससात्त्विकतामसीनां देहतौल्यं निरूपितं तत्तु यत्र यस्याधिका प्रीतिस्तत्रैव देहदृष्टान्तः सुगमो भवति, अज्ञानां देहस्यैव परमप्रीतिविषयत्वात् ॥ १–३ ॥

(५) भगदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

अध्यायार्थमाहुरज्ञानात्मेत्यादि का० १५४६, स्वरूपाज्ञानात्मक इत्यर्थः, स्कन्धार्थसङ्गितमाहुर्निरोध इत्यादि, एवं तत्तद्दोषात्मकतत्तद्दैत्यवधादेस्तत्तद्दोषनिवृत्तिद्वारा निरोधसाधकत्वेनाङ्गाङ्गिभावसङ्गत्या निरोधस्कन्धे निरूपणं ज्ञेयं, तत इत्यादि का० १५५४, ततः आसक्तिरूपनिरोधाद् दासैर्गोपैः सह स्वच्छन्दा लीला सप्तदशाध्यायोक्ता भविष्यति, **स्त्रीणां चेति स्त्रीणां च** अष्टादशाध्यायोक्ता भगवदासक्तिः फलिष्यतीत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ऊनविंशे दह्यमानं मुञ्जारण्ये स्वगोकुलम् । अरक्षद्भगवान् कृष्णो गोपांश्चेति निरूप्यते ॥ १ ॥

लीलान्तरमाह—क्रीडासक्तेष्वित्यादिना । गोपेषु क्रीडायामासक्तेषु सत्सु तेषां गावो दूरचारिणीः दूरचारिण्यः स्वैरं यथेष्टं चरन्त्यस्तृणलोभेन गह्वरं दुःप्रवेशं वनं विविशुरित्यन्वयः ॥ १ ॥ 'न केवलं गाव एव, किन्त्वन्येऽपि पशव' इत्याह—अजेति । अजादयोऽपि वनाद्वनान्तरं निर्विशन्त्यो दावेन ग्रीष्मतापेन धर्षिता अभिभूताः तृषिता अत एव क्रन्दन्त्यः इषीकाटवीमत्युच्छ्रितघनतृणविशेषारण्यं विविशुः ॥ २ ॥ कृष्णरामौ आदिर्येषां ते, ननु तौ । तयोः सर्वज्ञत्वादाप्तकामत्वाच्च । ते गोपाः पशून् अपश्यन्तः जातानुतापा गवां गतिं पदवीं विचिन्वन्तोऽपि न विदुरित्यन्वयः ॥ ३ ॥ नष्टाजीव्या गतजीविकासाधनानि येषां ते, अत एव विचेतसः व्याकुलचित्ताः तासां गवां खुरैर्दद्भिश्चाच्छिन्नैस्तृणैः गोपदैरङ्कितैश्च भूप्रदेशैस्तृणैर्वा गवां मार्गमन्वगमन् ॥ ४ ॥

अन्वितार्थप्रकाशिका

मुञ्जाटव्यामूनविंशे निविष्टं गोपगोकुलम् ॥ तद्वह्निं पीत्वा जुगोप तत्र श्लोकास्तु षोडश (१६) ॥
द्वे (२) उवाचेति पादोना (१६।।।) दशसप्तेत्यनुष्टुभः ॥ १९ ॥

क्रीडेति ॥ गोपेषु क्रीडायामासक्तेषु सत्सु तेषां गावः । टजभाव आर्षः । दूरचारिणीः दूरचारिण्यः । पूर्वसवर्णदीर्घ आर्षः । स्वैरं यथेष्टं चरन्त्यस्तृणलोभेन गह्वरं दुष्प्रवेशं वनं विविशुः ॥ १ ॥ अजा इति ॥ अजा गावः महिष्यश्च वनाद्वनान्तरं निर्विशन्त्यो दावेन ग्रीष्मतापेन तर्षिताः तृष्णां प्रापिताः । तृषेर्णिजन्तात् क्तः । अत एव क्रन्दन्त्यः इषीकाटवीमत्युच्छ्रितघनतृणविशेषारण्यं विविशुः ॥ २ ॥ ते इति ॥ तदा कृष्णरामौ आदी येषां ते ननु तौ अतद्गुणसंविज्ञानात् गोपाः पशून् अपश्यन्तः जातानुतापा गवां गवादीनां गतिं पदवीं विचिन्वन्तोऽपि न विदुः न विविदुः । सामीप्यविवक्षया लट् ॥ ३ ॥ तृणैरिति ॥ नष्टा आजीव्याः जीविकासाधनानि येषां ते अत एव विचेतसः व्याकुलचित्ताः सर्वे गोपाः तासां गवादीनां खुरैर्दद्भिश्च छिन्नैस्तृणैः गोष्पदैः गोसेवितैः । गोष्पदं सेवितेति सुट् । खुरादिभिरङ्कितैश्च भूप्रदेशैस्तृणैर्वा गवां मार्गमन्वगमन् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीमेकोनविंशेऽध्याये गोपानां दावाग्नेर्मोक्षणमुच्यते तेषां गावः गोरतद्धितलुकीति प्राप्तस्य समासांतप्रत्ययस्याभावस्तु तद्विधेरनित्यत्वाद्बोध्यः दूरचारिणीः दूरचारिण्यः गह्वरमतिघनं वनं ॥ १ ॥ वनात् वनं वनांतरं निर्विशंत्यः दावेन ग्रीष्मतापेन

तर्षिताः तृषिताः क्रंदंत्यः इषीकाटवीं घनतृणविशेषारण्यं विविशुः ॥ २ ॥ कृष्णरामादयः पशून् अपश्यंतः विचिन्वंतो मार्गयंतः गवांगतिं गमनं न विदुः ॥ ३ ॥ नष्टाजीव्या नष्टमाजीव्यं जीविकासाधनं येषां ते अतएव विचेतसो नष्टज्ञानाः तासां गवां खुरैः दंतैश्च च्छिन्नैस्तृणैः गोष्पदैः गोसेवितैः प्रदेशैः कृत्वा अंकितैश्चिह्नितैस्तृणैर्वा गवां मार्गं पंथानमन्वगमन् प्रापुः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मुञ्जारण्यं निविष्टं तु कृष्णो गोगोपवृन्दकम् । ऊर्नविशे दवीयाग्नेः पानेनापात् द्रुतं प्रभुः ॥ १ ॥

अथ दावाग्निपानात्मकं श्रीकृष्णचरित्रमनुवर्णयितुं तावत् प्राक्तनं वृत्तान्तमाह ॥ क्रीडेति ॥ प्रलम्बासुरवधानन्तरमपीति शेषः । गोपेषु क्रीडासक्तेषु सत्सु, स्वैरं चरन्त्यः, दूरचारिणीः दूरचारिण्यः, तद्गावस्तेषां गोपानां धेनवः, तृणलोभेन गह्वरं स्थानं, विविशुः ॥ १ ॥ अजा इति ॥ अजा गावः अप्रसूता धेनवः, महिष्यो गावः प्रसूता धेनवश्च वनात् वनं निर्विशन्त्यः, दावेन तापेन तर्षितास्तृषिताः अत एव, क्रन्दन्त्यः सत्यः, इषीकाटवीमत्युच्छ्रितसान्द्रतृणविशेषारण्यं, विविशुः इषीकाटव्येव पूर्वत्र गह्वरशब्देन विविक्षिता ॥ २ ॥ त इति ॥ ततः ते क्रीडासक्ताः, कृष्णरामादयः गोपाः, पशून् अपश्यन्तः, अत एव, जातानुतापाः, विचिन्वन्तः पशून् गवेषयन्तः, सन्तोऽपि, तदा गवां गतिं, नविदुर्न लक्षितवन्तः ॥ ३ ॥ तृणैरिति ॥ ततः नष्टाजीव्याः गतजीविकासाधनाः, विचेतसः विचाराक्रान्तचिताः, सर्वे गोपालाः, तासां गवां खुरैः दद्भिर्दन्तैश्च छिन्नानि तैः, तृणैः, गोष्पदैश्च, अङ्कितैर्भूप्रदेशैः, कथंचिल्लब्धमिति शेषः । गवां मार्गं, अन्वगमन् अनुसृत्य जग्मुः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यत्पादाब्जरजोऽप्यजो गतरजोलेशो मुनीशव्रजो नाकेशः शिरसा समुद्वहति यो विद्वद्वरिष्ठार्चितः ।
तस्यानन्तपतेरनन्तचरितस्यांसे स गोपो यदाऽतिष्ठद्धृष्टपदं तदा तदघदं नासीममासीत् कथम् ॥ १ ॥
इत्थं प्राक्कृततादृगर्थकहरिक्रीडाश्रुतिप्रस्रवत्प्रेमप्रश्नतरङ्गितं स नृपतेर्ज्ञात्वाऽन्तरङ्गं मुनिः ।
आमौञ्जीव्रतमस्य कापि विहृतिर्नाघाय पुण्याय वा स्यादेतत्कथनाय गोवनकथां प्राहोक्तमुख्याश्रमाम् ॥ २ ॥
(युग्मम्)

यद्वा तत्केल्यघेनैव तद्गावस्तेऽपि तापिताः । ततोऽनुतप्ताः सद्यस्ते शरणीभूय माधवम् ॥ ३ ॥
निःसीमं सौख्यमेवापुरेवं तापापनुत्तये । सर्वैर्हितेच्छुभिः कार्यमित्यूचे तत्कथोक्तितः ॥ ४ ॥ (युग्मम्)
प्रारब्धोपात्तकेलिर्भवति भववने योऽस्य बाल्येऽक्षजातं भीशून्यं वैधदण्डादतिचरति यथा काममेवोपभोगे ।
पश्चान्मौञ्जीवृतं सत्प्रचलति सभयं तर्षितं सर्वतोऽसौ पश्चात्संतापभाक् संस्तदनु विचिनुते तद्गतीस्तत्पदार्थैः ॥ ५ ॥
दृष्ट्वा तत्र च खिन्नमाशु च ततः कृत्वा समावर्तनं मत्वा सत्पथ इत्ययोजयदसौ पश्चाद् गृहस्थाश्रमे ।
तत्राप्युग्रभवानलावृतिमलं संवीक्ष्य संभ्रान्तधीः श्रीनाथं शरणं गतोऽथ समभूत् सद्यो महानन्दभाक् ॥ ६ ॥
एवं बाल्यं ब्रह्मचर्यं गार्हस्थ्यमनु भुञ्जतः । सुखं श्रीशाश्रयादेव नान्यथेत्युक्तमूह्यताम् ॥ ७ ॥
(विशेषकम्)
प्रारब्धात् कौतुकाद्वाऽप्यधिगतविषयां केलिमव्याजरूपां निम्नामत्युन्नतां वा सुखनिभृतमनास्तादृशीं यः करोति ।
अध्वभ्रान्तिर्यथास्मिन्नहि भवति गवां तस्य सत्सीमदृष्टेनैव स्यात्क्वाप्यनिष्टं प्रकटमनुपदं ताप एवाऽन्यथा तु ॥ ८ ॥

क्रीडासक्तेष्विति : १०.१९.१.

दुर्मार्गाश्रयणेऽक्षाणां प्रवृत्तिस्तत्र कारणम् । न जीवो नापि भगवान् किन्तु लोभ इति स्फुटम् ॥ ९ ॥
श्रीशोपदेशकजुषामपि तार्णलोभः प्रासूत गोपतिगवां भगवद्वियोगम् ।
किं तत्र वाच्यमवलोकनकादिलोभस्तस्माज्जयोऽस्य कृतिना प्रथमं विधेयः ॥ १० ॥
लोभेन यो वशं नीतः क्लेशोऽनुपदमस्य हि । स्पष्टमेतदभूदस्मिस्तादृग् गोवृत्तितो वने ॥ ११ ॥

तेऽपश्यन्त इति : १०.१९.३.

यद्बलादेव निखिलव्यवहारोपजीवनम् । तस्मिन् वृन्दे गवां भ्रष्टपथे खेदो न चित्रकृत् ॥ १२ ॥

कृष्णप्रिया

श्री शुकदेवजी कहते हैं—परीक्षित् उस समय जब ग्वालबाल खेलकूद में लग गये, तब उनकी गौएँ बेरोकटोक चरती हुई बहुत दूर निकल गयी और हरी हरी घास के लोभ से एक गहन वन में घुस गयी ॥ १ ॥ उनकी बकरियाँ, गायें और भैंसें एक वन से दूसरे वन में होती हुई आगे बढ़ गयीं तथा गर्मी के ताप से व्याकुल हो गयीं, वे वेसुध सी होकर अन्त में डकराती

हुई मुञ्जाटवी (सरकंडों के वन) में घुस गयीं ॥ २ ॥ जब श्रीकृष्ण बलराम आदि ग्वालबालों ने देखा कि हमारे पशुओं का तो कहीं पता ठिकाना ही नहीं है। तब उन्हें अपने खेल-कूद पर बड़ा पछतावा हुआ और वे बहुत कुछ खोजबीन करने पर भी अपनी गौओं का पता न लगा सके ॥ ३ ॥ गौएँ ही तो व्रजवासियों की जीविका का साधन थीं, उनके न मिलने से वे अचेत से हो रहे थे अब वे गौओं के खुर और दाँतों से कटी हुई घास तथा पृथ्वी पर बने हुए खुरों के चिन्हों से उनका पता लगाते हुए आगे बढ़े ॥ ४ ॥

मुञ्जाटव्यां भ्रष्टमार्गं क्रन्दमानं [1]च गोधनम् । [2]सम्प्राप्य तृषिताः [3]श्रान्तास्ततस्ते संन्यवर्तयन्[4] ॥ ५ ॥
ता आहुता भगवता मेघगम्भीरया गिरा । स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः ॥ ६ ॥
ततः समन्ताद् वनधूमकेतुर्यदृच्छयाभूत् क्षयकृद् वनौकसाम् ।
समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थिरजङ्गमान्[5] महान् ॥ ७ ॥
तमापतन्तं परितो दवाग्निं गोपाश्च[6] गावः प्रसमीक्ष्य भीताः ।
[7]ऊचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं मृत्युभयार्दिता जनाः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—मुञ्जाटव्याम् भ्रष्टमार्गम् च क्रन्दमानम् गोधनम् सम्प्राप्य, श्रान्ताः तृषिताः ते ततः सन्न्यवर्तयन् ॥ ५ ॥ मेघगम्भीरया गिरा आहूताः ताः स्वनाम्नाम् निनदम् श्रुत्वा प्रहर्षिताः प्रतिनेदुः ॥ ६ ॥ ततः यदृच्छया समन्तात् वनौकसाम् क्षयकृत् सारथिना समीरितः उल्बणोल्मुकैः स्थिरजङ्गमान् विलेलिहानः महान् वनधूमकेतुः अभूत् ॥ ७ ॥ परितः आपतन्तम् तम् दवाग्निम् प्रसमीक्ष्य भीताः गोपाः च गावः यथा मृत्युभयार्दिताः जनाः यथा हरिम् तथा सबलम् कृष्णम् प्रपन्नाः च ऊचुः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वनौकसां गोगोपानां नाशहेतुर्वनवह्निः सर्वतः प्रादुरभूत् । सारथिना वायुना ॥ ७–११ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ते गोपाः । ततः मुंजाटवीतः । भ्रष्टमार्गम् इतस्ततो गतम् । संन्यवर्त्तयन् गतमार्गमेवागंतुकामा अभवन्नित्यर्थः ॥ ५ ॥ 'दुःखादनंतरं दुःखम्' इति संसारिणां ता गावः । स्वनाम्नां गंगादिरूपाणां स्वनाम्नाम् । प्रतिनेदुः प्रत्याक्रोशं चक्रुः ॥ ६ ॥ बोधयन्नाह–तत इति । ततः गोदर्शनानंतरम् । धूमकेतुः अग्निः । उल्बणोल्मुकैः चंडालातैः । लेलिहानः अतिशयेनास्वादयन् ॥ ७ ॥ तम् आविर्भूतम् । प्रपन्नाः शरणं प्राप्ताः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्यक् सर्वमङ्गलत्वादिनैकत्रैव प्राप्य सम्यक् त्वया एकीकरणादिना न्यवर्त्तयन् ततस्तृषिताः श्रान्ताश्च बहुलपरिभ्रमणात् अभवन् ॥ ५ ॥ सम्प्राप्येत्युक्तं तत्प्रकारं वदन् श्रीगोपचूडामणिना गोगोपसन्तोषणमाह–ता इति । मेघगम्भीरयेत्यत्र मेघशब्देन मेघगर्जितं लभ्यते, सर्वत्र तु गम्भीरशब्दः खलु दूरदृश्यतलस्य गर्त्तस्य विशेषणं भवति लक्षणया तु तत्रस्थजलमपि विशिनष्टि–तस्मादुत्थितो नादश्च प्रायो गुरुर्भवन् गम्भीरतयोपचर्य्यते मेघस्य नादस्तु तद्वद्गुरुः स्यात् तत् भगवतो गोश्च स्वरतस्तादृशी स्यादित्यभिप्रेत्याह–मेघगम्भीरया गिरेति । ततश्च मेघगम्भीरया गिरा यत् स्वस्वनाम तदुच्चारणं तेनाहूताः सत्यस्तत्सम्बन्धिनं निनदं मधुरतारस्वरविशेषं श्रुत्वा प्रहर्षिताः प्रहृष्टाः सत्यः प्रतिनेदुः प्रत्युत्तरतया शब्दं चक्रुः ॥ ६ ॥ ततस्तस्मिन्नेव समयेऽभूत् उद्भूतः यदृच्छया अकस्मात् अयमपि प्रलम्बसखः कश्चिद्दैत्य इति केचिदाहुः वृन्दावने दवनिषेधात् उल्बणैः उल्मुकैः उल्कासदृशविस्फुलिङ्गैः विलेलिहानः विशेषिणः लेलिहन् दन्दह्यमान इत्यर्थः । यतो महान् व्यापकः ॥ ७ ॥ आपतन्तं वेगेनागच्छन्तं प्रसमीक्ष्य अत्युद्भटं सुदुस्तरं च विचार्येत्यर्थः । अत्र गोपा गोपालनाय नियुक्ताः साधारणा एव श्रीदामादीनां तु तदङ्गसङ्गित्वान्निवेदनापेक्षा नास्तीति

---

१. स्वगोधनम् । २. अप्राप्य–वीर. विज. । ३. याता–विज. ।
४. कृष्णः प्रोत्तुङ्गमारुह्य वृक्षं मेघनिभच्छविम् । आर्तास्ता आह्वयामास दर्शयन्गाः स्वनामभिः ॥
इत्यमधिकः श्लोकश्चक्रवर्तिसंमतः ; वीर. पाठे अयं श्लोकोऽधिकः ।

५. जङ्गमं–वीर. । ६. गोपाः सगावः–गो. प्रे. टी. । ७. ऊचुः स्म–विज. ।

अतः प्रपन्ना दवसमीपादागत्य शरणमागताः भीतत्वे हेतुः सगावः गोभिः सहिता इति "गोस्त्रियोरुपसर्जनस्य" (१।२।४८) ह्रस्वत्वाभाव आर्षः गोपाश्च गावश्च इति पाठे गावश्चोचुरित्यायाति तत्र व्यग्रतयारम्भणात् ता अप्यूचुरित्यर्थः। गोपाः स्म गाव इति पाठे स्म प्रसिद्धौ हरिमिति तस्यैवैश्वर्यांशे दृष्टान्तः मृत्योर्मरणपरम्परालक्षणसंसारात् भयेनार्दिता जना इति सभयेत्युक्तौ दृष्टान्तो नतु मरणमात्रत्राणांशे अतश्च केवलं श्रीभगवद्वियोगात् एव भीता इति पूर्ववद्बोद्धव्यं तच्चाग्रे व्यक्तं भावि ।। ८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततो मुञ्जाटवीतः सम्यक् सर्व्वमंगलत्वादिनैकत्रैव प्राप्य सम्यक् त्वरयैकीकरणादिना न्यवर्त्तयन्, यतस्तृषिताः श्रान्ताश्च, बहुलपरिभ्रमणात् ।। ५ ।। सम्प्राप्येत्युक्तम्, तत्प्रकारं वदन्, ततश्च श्रीगोपचूडामणेर्गोसन्तोषणमाह— ता इति तत्तन्नामभिराहूताः; निनदं संकीर्त्तनं तेनैव प्रकर्षेण हर्षिताः ।। ६ ।। ततस्तदनन्तरः पूर्व्वमेव जातो दावाग्निरिदानीं समन्तादष्टासु दिक्षु अभूद् व्याप्त इत्यर्थः। यद्वा, ततस्तस्मिन्नेव समये स्थाने वा अभूदुद्भूतः, यदृच्छया अकस्मात्, यद्वा, तदग्नेरेव केनापि भाग्योदयेन। अयमपि प्रलम्बसखः कश्चिद्दैत्य इति केचिदाहुः; व्रजौकसां क्षयकृदिव, यद्वा, व्रजौकसां मध्ये निवासचिकीर्षु रिवेत्यर्थः, श्रीभगवन्मुखे प्रविष्टत्वात्। वनौकसामिति पाठे तदग्निस्वभावनिर्द्देशः। उल्बणोल्मुकैरुल्कासदृशालातैः स्थिरान् वृक्षादीन्, जंगमांश्च पशुपक्ष्यादीन्, विलेलिहानः संहर्त्तु मित्यर्थः; यतो महान् व्यापकः ।। ७ ।। आपतन्तं वेगेनागच्छन्तं प्रसमीक्ष्यात्युद्भटं सुदुस्तरञ्च विचार्य्येत्यर्थः। भीतत्वे हेतुः—सगावो गोभिः सहिता इति, हरिं सर्व्वदुःखहरं कृष्णं परमानन्दकरञ्च प्रपन्ना रक्ष रक्षेति शरणं गताः सन्त ऊचुः बलेन निजशक्त्या सहितं यथा स्यात्तथा ऊचुरुच्चैश्चुक्रुशुरित्यर्थः। यद्वा, श्रीबलदेवेन सहितं श्रीकृष्णं प्रति विज्ञापने स्वसाहाय्यार्थञ्च। स्म प्रसिद्धौ। यथा मृत्योर्मरणलक्षणसंसारादन्तकाद्वा भयेनार्द्दिता जना इति सभयात्युक्तौ दृष्टान्तः। तेन च गोपानां मृत्युभयाभावो ध्वन्यते, ततश्च केवलं श्रीभगवद्वियोगत एव भीता इति पूर्व्ववद् बोद्धव्यम्, तच्चाग्रेऽपि व्यक्तं भावि ।। ८ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सारथिना वायुना ।। ७-११ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मुञ्जाटव्यां भ्रष्टो लीनः मार्गो यस्य तत्क्रन्दमानं गोरूपधनमप्राप्य तृषिता अत एव श्रान्तास्ते गोपाः संन्यवर्त्तयन् प्रत्याजग्मुरन्वेषणाद्विरेमिरे ।। ५ ।। तदा भगवता कर्त्रा मेघस्येव गम्भीरया गिरा आहूतास्ता गावः स्वस्वनाम्नां ध्वनिमाकर्ण्य प्रहर्षिताः प्रतिदध्वनुः ततः प्रतिनादेन गोधनानि सञ्जग्मुरित्यर्थंतोऽत्र विवक्षितम् ।। ६ ।। ततस्तदा यदृच्छया महान् वनधूमकेतुर्दवाग्निरभूत् उदभवत् कथम्भूतः वनौकसां क्षयं नाशं करोतीति तथा सारथिना वायुना समीरितः उद्दीपितः उल्बणैरुल्मुकैर्ज्वालायुक्तैस्तृणकाष्ठादिभिः स्थावरजङ्गमात्मकं भूतजातं विलेलिहानः पुरः पुरः संस्पृशन् ।। ७ ।। परित आपतन्तं व्याप्यागच्छन्तं दवाग्निमवलोक्य भीताः सगावो गोपाः सरामं कृष्णं प्रपन्नाः शरणं गताः ऊचुर्यथा मृत्युभयेन संसारभयेनार्द्दितः पीडिता जनाः हरिमाश्रितबन्धहरं भगवन्तं प्रपन्नाः स्वदैन्यं विज्ञापयन्ति तद्वत् ।। ८ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भ्रष्टमार्गं मार्गं हित्वेतस्ततो गतं ततो मुञ्जाटव्याः संन्यवर्त्तयन् गतमार्गमेवागन्तुकामा अभवन्नित्यर्थः ।।५।। ततः कृष्णेन किमकारीति तत्राह—ता इति। प्रतिनेदुः प्रत्याक्रोशं चक्रुः ।। ६ ।। संसारस्तु सदा दुःखाकर इति दर्शनार्थम् एकदुःखशमनानन्तरं दुःखान्तरं वदति–तत इति। ततः गोदर्शनानन्तरं धूमकेतुः अग्निः सारथिना वायुना समीरितः प्रेरितो वर्धितः उल्बणोल्मुकैः क्रूरतरज्वालाभिः स्थिरजङ्गमान् विलेलिहानः विशेषेणास्वादयन् ।। ७ ।। प्रपन्नाः शरणमिति शेषः ।। ८-९ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मुञ्जाटव्यां तत्रैव शरवणे सम्प्राप्य ता गवाद्याः न्यवर्त्तयन्। परावर्तयामासुः ।। ५ ।। सम्प्राप्येत्युक्तं तत्केन प्रकारेणेत्याकाङ्क्षायामाह–कृष्ण इति आत्मानं दर्शयन् गा आह्वयामास ता गवादयः ।। ६ ।। तदेवं गोभिः सङ्गतीभूय यदैव तद्वनान्निष्क्रमितुमैच्छंस्तदैव ते दावानलेनाव्रियन्तेत्याह–तत इति। दवो वनं तत्सम्बन्धी धूमकेतुरग्निः यदृच्छया आकस्मिक इत्ययमपि प्रलम्बसखः कश्चिद्दैत्य इत्याहुः सारथिना वायुना उल्बणैरतितीव्रैरुल्मुकैः ।। ७ ।। ऊचुश्चेति "अनेन सर्वदुर्गाणि" इति गर्गोक्तिमनुस्मृत्येत्यर्थः गोपाश्च गाव इति गोपास्म गाव इति गोपाः सगावः इति त्रयः पाठाः तत्र सगाव इति "गोस्त्रियोः" (१।२।४८) इत्यादिना ह्रस्वत्वाभावः आर्षः ।। ८-९ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सारथिना वातेन ।। ७-१२ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

मुञ्जाटव्यां तस्मिन्नेव शरवणे भ्रष्टमार्गं विस्मृतपथं स्वगोधनं गवादिसम्प्राप्य न्यवर्त्तयन् परावर्त्तयाञ्चक्रुः ॥ ५ ॥ कथं संप्राप्येत्यपेक्षायामाह—कृष्ण आत्मानं दर्शयन् गा आह्वयामासेति । ता गवादयः प्रतिनेदुः तामिति प्रत्युत्तरं ददुः ॥ ६ ॥ ततस्तस्मिन्नेव समये दवधूमकेतुर्वनवह्निर्यदृच्छयाऽकस्मादेवोद्भूदुद्भूतः प्रलम्बसखोयमसुरः कश्चिदित्याहुः सारथिना मरुता समीरितः प्रवर्द्धितः ऊल्बणैरतितीव्रैरुल्मुकैस्तत् समैर्विस्फुलिङ्गैर्विलेलिहानो दन्दह्यमान इत्यर्थः । यतो महान् व्यापी ॥ ७ ॥ ऊचुश्चेति “अनेन सर्वदुर्गाणि” इत्यादि गर्गोक्तिस्मरणादित्यर्थः । गावश्चेति व्यग्रतया अम्बारावस्तासामुक्तिः हरिं विष्णुम् ॥ ८–९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भ्रष्टोऽज्ञातो मार्गो यस्य तद्गोधनम् । मुञ्जाटवीत्यनेन मुञ्जपुञ्जिता महीति खुराद्यनङ्किततता तस्य द्योत्यते । अप्राप्य श्रान्तास्ततो गतमार्गत एव सन्न्वर्तयन्प्रत्यागन्तुकामा अभवन्नित्यर्थः । मनः सन्न्वर्तयन्निति वा ॥ ५ ॥ आहूतास्ता गावो भगवता कर्त्रा मेघगम्भीरया गिरा करणेन स्वनाम्ना श्रीनिकेतनसङ्केतितस्वनाम्ना निनदन् । वैशिष्ट्यं तृतीयार्थः । नामसमेतं निनदं श्रुत्वा प्रहर्षिताः प्रतिनेदुर्हुम्भावं चक्रुः ॥ ६ ॥ वनौकसां पक्षिवृक्षादीनां क्षयकृन्नाशकरो यदृच्छया वनधूमकेतुर्वनानलो यस्ततस्तेन गतं सारथिना वायुना समीरितः प्रेरितो वर्धित इति यावत् । अत्रोल्मुकशब्दो ज्वालापरः । उल्बणैरुल्मुकैर्ज्वालाभिः स्थिरजङ्गमान्विलेलिहान आस्वादयन्निवाभूत् प्रसर्पेति भावः ॥ ७ ॥ गोपाश्च गावश्च परित आपतन्तं तं दावाग्निं प्रसमीक्ष्य भीता भयं तूभयेषां सबलं कृष्णं प्रपन्ना अतिप्रह्वा ऊचुः । मृत्युभयार्दिता जना हरिं यथोचुरिति गोपमात्रान्वयि ॥ ८ ॥

श्रीसुबोधिनी

ततः प्राप्य न्यवर्तन्तेत्याह **मुञ्जाटव्यामिति**, यदि मध्ये मुञ्जाटवी न स्यादग्रेपि गच्छेयुः, अतो **मुञ्जाटव्यां भ्रष्टमार्गा** अत एव **क्रन्दमाना** इति कर्तव्यतामौढ्यात् सुतरां मुञ्जस्पर्शेन सुदुःखिता गावो जाताः, ततस्तादृशं **गोधनं सम्प्राप्य** स्वयमपि **तृषिताः श्रान्ताः** गोभिः समानधर्माः क्षणं विश्रम्य तृषां दूरीकृत्य ततस्तदनन्तरं सम्यङ् **न्यवर्तयन्** निवर्तितवन्तः ॥५॥ सर्वे निवर्तिता न निवर्तिता इति सन्देहे **भगवता** सामान्यतो विशेषतश्च वनमध्यं **प्रविष्टास्ता आहूताः**, शब्देनैव तासामन्तस्तापबहिस्तापौ गताविति ज्ञापयति **मेघगम्भीरयेति**, ततो गततापाः **स्वनाम्नां निनदं** शब्दं **श्रुत्वा प्रतिनेदुः** तत्रैव स्थित्वा प्रतिशब्दं कृतवत्यः **प्रहर्षिताश्च** जाताः, निकटे समागताश्चेति ज्ञातव्यं, असमागताश्च काश्चन ॥ ६ ॥ एतस्मिन्नवसरे दैत्याभिमानिनी देवतोपासिता लौकिक्यश्चान्तःकरणदेवताः क्रुद्धा एकीभूय दवानलरूपा जाताः स दवानलस्तस्मिन्नवसरे पलायनासमर्थे **समन्तात्** प्रादुर्भूतो जात इत्याह **तत** इति, **वनसम्बन्धी धूमकेतुरग्निरनिष्टहेतुरिति धूमकेतुपदेनोक्तस्तेषां** माहात्म्यज्ञापनार्थं **यदृच्छयैवा**भूदकस्मात् कालकर्मस्वभावभगवदिच्छाभिर्वा उद्भवे हेतुमाह **क्षयकृद् वनौकसामिति**, वनसम्बन्धमात्रेणैव सोग्निः पीडयति, सुतरामेव वने स्थानं येषां, तादृशस्य सहायोप्यन्यो जात इत्याह, **समीरितः सारथिनेति, वायुरग्नेः सारथी रथप्रवर्तकः**, रथो ज्वाला, अत **एवोल्बणोन्मुकैर्विलेलिहानो** जातः, सर्प इव ग्रसन्नागतस्ततो बहुभक्षणेन पुष्टः सन् महान् जातः ॥ ७ ॥ तादृशो भगवदीयानामपि स्थाने समागत इत्याह **तमापतन्तमिति**, **परित आपतन्त**मुपर्यागच्छन्तं **दवाग्नि**मपरिहार्यं सहजदोषरूपं गोपाः प्रतिक्रियानभिज्ञा **गावश्च** मूढाः प्रकर्षेण **समीक्ष्य भीता** जाताः, ततो ज्ञातभगवन्माहात्म्या भगवन्तं प्रार्थितवन्त इत्याहोचुश्चेति, बलभद्रसहितमिति प्रकृतोपयोगात् क्रियाशक्तिसाहित्यमुक्तं, **कृष्णं** सदानन्दं प्रकृते लीलाकर्तारं शरणापन्नाः सन्त **ऊचुः**, तत्र दैन्यार्थं दृष्टान्तमाह **यथा हरिमिति**, **मृत्युभयेनाप्रतीकार्येणार्दितो यथा** कश्चित् कृतपुण्यपुञ्जो जनो गजेन्द्र इव **हरिं** शरणं गच्छति तथात्यन्तं दीनाः सर्वं एव शरणं गताः ॥ ८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

तत इत्यस्याभास **एतस्मिन्नवसर** इत्यादि, यदा भगवता गोपानामात्मदोषो निवारयितुं विचारितस्तस्मिन् समये दैत्यस्य हतस्य प्रलम्बस्या**भिमानिनी देवता** तल्लिङ्गदेहविशिष्टजीवात्मिको**पासिता मोचयितुं** भगवता ध्याता **लौकिक्याश्चान्तः**करणदेवता ‘‘द्वया ह प्राजापत्या’’ इत्यत्राप्रतिरूपसङ्कल्पजनकपाप्मवेधकर्तृतया सिद्धास्ता उभयविधा अपि दैत्यनाशनेनान्तःकरणदोषनाशनेन चतुर्धैकीभूय **दावानलरूपा जाता** भगवता द्वयं कृतमित्युभयविधानां क्रोधस्तेन द्वयोरेकीभावः, भगवद्रक्षितान् दोषरहितान् क्षपयितुं तदा **दावानलस्तथा जात** इत्यर्थः, न च मोचने सन्देहः कार्यः, द्वितीयस्कन्धे ‘‘ये च प्रलम्बे’त्यत्र पञ्चाध्याय्यां ‘‘यत एतद् विमुच्यत’’ इत्यत्र च मुक्तेरुक्तत्वादिति सा चात्र दावाग्नेरन्तःप्रवेशनेन बोध्या, दावाग्निश्चात्मदोषसाहित्येन त्रितयरूपो बोध्यः ॥ ७ ॥ **तमापन्तमित्यत्र** चतुर्थपादस्याभासे तत्र **दैन्यार्थमिति** शरणागतौ दैन्यस्याङ्गत्वात् **तदर्थमित्यर्थः**, **प्राणाप्रतीकार्ये** इति ‘‘सप्राणयोश्चित्रममंसतामरा’’ इति गजेन्द्रमोक्षस्थवाक्यात् **तदप्रतीकार्ये** ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तत इत्यस्याभासे एतस्मिन्निति अत्र भगवता द्वयं सम्पादितं दैत्यवधोन्तःकरणदोषनिवृत्तिश्च, तद्द्वयापकारं विवृण्वन्ति उपासितेति, प्रलम्बेनेतिशेषः, **लौकिक्य** इति लौकिकप्रवृत्तिहेतव इत्यर्थः, अलौकिकप्रवृत्तिहेतूनां तु पूर्वाध्यायेनुमोदनमेवोक्तमिति भावः, **दवानलरूपा** इति अज्ञानात्मकस्य दवानलस्य निरूपका उद्दीपका इत्यर्थः ॥ ७ ॥ **तमापतन्तमित्यस्याभास** इत्याहेति इति-हेतोस्तेषां भयं तत्कृतप्रार्थनारम्भं चाहेत्यर्थः ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मुञ्जाटव्यपि इषीकाटव्येव। तस्यां स्वगोधनं सम्प्राप्य ततस्ते संन्यवर्त्तयन्। तत्र प्राप्तौ हेतुमाह—भ्रष्टमार्गमिति। भ्रष्टो विच्छिन्नस्ततोऽग्रे प्रवेष्टुमशक्यो मार्गो यस्य तत्। अत एव क्रन्दमानं स्वयमपि ग्रीष्मातपेन धावनेन च तृषिताः श्रान्ताश्च ।५। ता गवादयो भगवता आहूताः स्वनाम्नां निनदं ध्वनिं श्रुत्वा प्रहर्षिताः सत्यः प्रतिनेदुः उत्तरदानवत् प्रतिशब्दं कृतवत्य इत्यन्वयः। 'यथा तथा जना मेघागमे तन्नादं श्रुत्वा हृष्टा भवन्ति, तथा भगवतो गिरं श्रुत्वा ताः प्रहर्षिता' इति सूचयन्नाह—मेघगम्भीरया गिरेति ॥ ६ ॥ ततो यदा ते गाः सन्निवर्त्य निवृत्तास्तस्मिन्नेव समये महान् समन्तात् सर्वतो यदृच्छया केनापि प्राणिदुर्भाग्येन वनधूमकेतुः दावानलः प्रादूरभूत्। महत्त्वे हेतुमाह—समीरित इति। सारथिना वायुना समीरितः प्रेरितः, अत एव उल्बणोल्मुकैः तीक्ष्णविस्फुलिङ्गैः स्थिरजङ्गमैर्विलेलिहानः ग्रसन् वनौकसां गोपालानां च क्षयकृन्नाशकः ॥ ७ ॥ तं दावाग्निं परितः सर्वतः आप-तन्तमागच्छन्तं प्रसमीक्ष्य गोपा गावश्च भीताः सबलबलेन सहितं श्रीकृष्णं प्रपन्नाः शरणंगताः सन्तः ऊचुश्च रक्षां प्रार्थयामासुरित्य-न्वयः। अत्र दृष्टान्तमाह—यथेति। अप्रतीकार्येण मृत्युभयेनार्दिताः पीडिता जनाः हरिं शरणागता यथा प्रार्थयन्ति, तथेत्यर्थः ॥ ८ ॥

अन्वितार्थप्रकाशिका

मुञ्जेति ॥ मुञ्जाटव्यामिषीकाटव्यां तत्रैव शरवणे भ्रष्टो विच्छिन्नस्ततोऽग्रे प्रवेष्टुमशक्यो मार्गो यस्य तत् अत एव क्रन्दमानम्। शानजार्षः। स्वगोधनं संप्राप्य स्वयमपि ग्रीष्मातपेन धावनेन च तृषिताः श्रान्ताश्च ते ततः गाः संन्यवर्त्तयन् परावर्त्त-यामासुः ॥ ५ ॥ ता इति ॥ कृष्णस्तु आत्मानं दर्शयन् ता आहूतवान्। ततः ता गवादयो भगवता मेघगम्भीरया गिरा आहूताः स्वनाम्नां निनदं ध्वनिं श्रुत्वा प्रहर्षिताः सत्यः प्रतिनेदुः उत्तरदानवत्प्रतिशब्दं कृतवत्यः ॥६॥ तत इति ॥ ततः अनन्तरं सारथिना वायुना समीरितः प्रेरितः अत एव उल्बणैरतितीव्रैरुल्मुकैः स्थिरजङ्गमान् विलेलिहानः ग्रसमानः वनौकसां गोपालानां च क्षयकृन्ना-शकः महान्समन्तात् सर्वतो यदृच्छया केनापि प्राणिदुर्भाग्येन वनधूमकेतुः दावानलः प्रादुरभूत्। अयं दवाग्निरपि कश्चित्प्रलम्बसखो दैत्य इत्याहुः ॥ ७ ॥ तमिति ॥ तं दवाग्निं परितः सर्वतः आपतन्तमागच्छन्तं प्रसमीक्ष्य गोपा गावश्च। अत्र गोपाश्च गाव इति पाठो। गोपाः सगाव इति पाठे तु गोस्त्रियोरिति ह्रस्वाभाव आर्षः। भीताः सबलं बलेन सहितं श्रीकृष्णं प्रपन्नाः शरणं गताः सन्तः मृत्युभयेनार्दिताः पीडिता जनाः हरिं शरणागता यथा प्रार्थयन्ते तथा ऊचुश्च रक्षां प्रार्थयामासुः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अतिशाद्वले अतिहरिततृणव्याप्ते यद्वा अमुंजाटव्यां अत्युच्छ्रितघनतृणविशेषाऽरण्यरूपायामिषीकाटव्यां स्वगोधनं संप्राप्य ततो वनात् ॥ ५ ॥ ताः गावः प्रतिनेदुः प्रतिनादं कृतवत्यः ॥ ६ ॥ वनौकसां गोपानां क्षयकृत् नाशकर्त्ता वनधूमकेतुर्वनाग्निः सारथिना वा तेन समीरितवृद्धिं प्रापितः समं ततः प्रादुरभूतं कथभूतः उल्बणैरुग्रैः उल्मुकै ज्वालाभिर्विलेलिहानोग्रसमानः ॥ ७-८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मुञ्जाटव्यामिति ॥ मुञ्जाटव्यां, भ्रष्टो लीनो मार्गो यस्य तत्, क्रन्दमानं स्वगोधनं अप्राप्य, तृषिताः श्रान्ताः, ते गोपाः, ततः स्थानात्, संन्यवर्त्तयन् गतमार्गमेवागन्तुकामाः, अभवन्नित्यर्थः ॥ ५ ॥ ता इति ॥ तदा भगवता कर्त्रा, मेघगम्भीरया मेघस्येव गभीरया, गिरा वाचा, आहूताः हे कृष्णे, हे गौरि, हे धवले, हे शबले, इत्येवं तन्नामान्युच्चार्याकारिताः, ताः गावः, स्वनाम्ना निनदं कृष्णोच्चारितस्वनामध्वनिं श्रुत्वा, प्रहर्षिताः सत्यः, प्रतिनेदुः प्रतिदध्वनुः। ततस्तासां प्रतिनादं श्रुत्वा तं लक्ष्यीकृत्य तदन्तिके जगामेत्यर्थतो विवक्षितम् ॥ ६ ॥ तत इति ॥ ततस्तदा, यदृच्छया दैववशतः, महानतिवृद्धिमान्, वनौकसामरण्यस्थानां, क्षयकृत्, सारथिना वायुना, समीरितः उद्दीपितः, उल्बणानि च तान्युमुल्कानि तैः, ज्वालायुक्तैस्तृणकाष्ठादिभिरित्यर्थः। स्थिरजङ्गमान् स्थावरजङ्गमात्मकं भूतजातमित्यर्थः। विलेलिहानः विशेषेणास्वादयन्, वनधूमकेतुर्दवाग्निः, समन्तात्, अभूत् ॥ ७ ॥ तमिति ॥ परितः समन्ततः, आपतन्तं सर्वतो व्याप्यागच्छन्तमित्यर्थः। तमुक्तविधं दवाग्निं, प्रसमीक्ष्यालोक्य, भीता भयं प्राप्ताः, गोपाः गावश्च सबलं सरामं, कृष्णं प्रपन्नाः शरणं गताः सन्तः, मृत्युभयेन संसारभयेनार्द्दिताः पीडिताः जनाः, हरिमाश्रितबन्धहरं भगवन्तं, प्रपन्नाः शरणं गताः सन्तः, यथा स्वदैन्यमावेदयन्ति तद्वत्, उचुः च ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सम्प्राप्येति : १०.१९.५.

विषयान्वेषणेनैव कृतमिन्द्रियशोधनम् । धीमता लभते तस्मात्तत्स्थितिं स इति स्फुटम् ॥ १३ ॥

ता आहूता इति : १०.१९.६.

गावो मदेकशरणाः प्रभवन्ति ताभ्यो नाम्नैव दर्शितपदः सुखदो भवामि ।
मह्यं यथा मदनुगो जन इत्युपेन्द्रः प्रोच्चार्य तत्तदभिधानमधात् सहर्षम् ॥ १४ ॥

साधूनामिह वासुदेवसदयप्रेमर्धिभाजामपि तापः संसृतिकाननस्थितिवशादुत्पद्यते भीतिकृत् ।
अन्येभ्यश्च विशेष एष शरणीभूता भवन्त्येव ते तत्कालं न परा इति प्रमुदितास्ते स्युर्व्यपतार्तयः ॥ १५ ॥

तत इति : १०.१९.७.

कालिन्दीपुलिनानुभूतभगवच्छक्तिस्वरूपोऽपि यद्भूयस्तद्ग्रसनात्तधीः समभवद् वन्यानलो निस्त्रपः ।
तत्प्रायः प्रतिभात्यहंमतिजुषः पुंसः स्वभावस्फुटीभावायेशमुखामृतैकरसत स्तन्मुख्यवासाय वा ॥ १६ ॥

वने निदाघे भवता दवाग्ने स्थेयं सदेति श्रुतिधृष्टमर्वाक् ।
त्वयेश तत्त्वद्वचनानुवृत्तिरस्मीति शंसन् स किमुल्ललास ॥ १७ ॥

जातं जलं तदमृतीकरणात् कृतार्थं त्वं चापि तन्मुखरसोपगमादिहाग्ने ।
त्वत्सारथेर्मम तु का गतिरेवमग्निरागात्पुनः किमिह वायुसमीरितः सन् ॥ १८ ॥

मुहूर्ते कस्मिंश्चिद्यदि निजपराभूतिरजनि तदन्यस्मिंस्तस्मिन् स हि निजजयार्थी प्रयतते ।
स्थितिं तेजोभाजामिति समवधार्यागमदसौ द्विवारं दावाग्निः समयभिदया शौरिपुरतः ॥ १९ ॥

तेजःप्रदोऽपि मिहिरो न पुराऽऽस नापि मद्वृद्धिकृत् पवन इत्ययमादधे माम् ।
मुख्याप्रतिष्ठितपदं त्वधुना लसन्तौ तौ द्वावपीति पुनरग्निरगात् किमह्नि ॥ २० ॥

ये चाश्रितश्रीशपदा येषां सोऽस्ति च रक्षकः । कीदृशानपि तान् द्रोग्धुमिच्छेद्यस्त्वनरो हि सः ॥ २१ ॥

कृष्णप्रिया

अन्त में उन्होंने देखा कि उनकी गौएँ मुञ्जाटवी में रास्ता भूलकर डकरा रही हैं। उन्हें पाकर वे लौटाने की चेष्टा करने लगे, उस समय वे एकदम थक गये थे, और उन्हें प्यास भी बड़े जोर से लगी हुई थी, इससे वे व्याकुल हो रहे थे ॥ ५ ॥ उनकी यह दशा देखकर भगवान श्रीकृष्ण अपनी मेघ के समान गम्भीर वाणी से नाम ले-लेकर गौओं को पुकारने लगे, गौएँ अपने नाम की ध्वनि सुनकर बहुत हर्षित हुई, वे भी उत्तर में हुंकारने और रंभाने लगी ॥ ६ ॥ परीक्षित् ! उन गायों को पुकार ही रहे थे कि उस वन में सब ओर अकस्मात् दावाग्नि लग गयी जो वनवासी जीवों का काल ही होती है, साथ ही बड़े जोर की आँधी भी चलकर उस अग्नि के बहने में सहायता देने लगी इससे सब ओर फैली हुई वह प्रचण्ड अग्नि अपनी भयङ्कर लपटों से समस्त चराचर जीवों को भस्मसात् करने लगी ॥ ७ ॥ जब ग्वालों और गौंओ ने देखा कि दावानल चारों ओर से हमारी ही ओर बढ़ता आ रहा है तब वे अत्यन्त भयभीत हो गये और मृत्यु के भय से डरे हुए जीव जिस प्रकार भगवान की शरण में आते हैं वैसे ही वे श्रीकृष्ण और बलरामजी के शरणापन्न होकर उन्हें पुकारते हुए बोले ॥ ८ ॥

[1]कृष्ण कृष्ण [2]महावीर्य हे [3]रामामितविक्रम । दावाग्निना दह्यमानान् प्रपन्नांस्त्रातुमर्हथः ॥ ९ ॥
नूनं त्वद्बान्धवाः कृष्ण न चार्हन्त्यव[4]सीदितुम् । वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः ॥ १० ॥

श्रीशुक उवाच

वचो निशम्य कृपणं बन्धूनां भगवान् हरिः । निमीलयत मा भैष्ट लोचनानीत्यभाषत ॥ ११ ॥
[5]तथा मीलिताक्षेषु भगवानग्निमुल्बणम् । पीत्वा मुखेन तान् कृच्छ्राद् योगाधीशो व्यमोचयत ॥ १२ ॥

---

१. गोपाः–च. पु. टी. । २. महावीर ; महावीर्य–बीर. विज. । ३. रामामोध–विज. । ४. अवसादितुम्–वीर. । ५. तथेति–श्रीधर. वंशी. वीर. विज. ।

कर्दमक्षमा

अन्वयः—महावीर्य ! हे कृष्ण ! हे कृष्ण !, अमितविक्रम हे राम ? दावाग्निना दह्यमानान् प्रपन्नान् त्रातुम् अर्हथः ।।९।। हे कृष्ण ! नूनम् वयम् त्वन्नाथाः च हे सर्वधर्मज्ञ ! वयम् त्वद्बान्धवाः त्वत् परायणाः अवसीदितुम् हि न अर्हन्ति ।। १०।। बन्धूनाम् कृपणम् वचः निशम्य भगवान् हरिः मा भैष्ट, लोचनानि निमीलयत इति अभाषत ।।११।। तथा निमीलिताक्षेषु योगाधीशः भगवान् मुखेन उल्बणम् अग्निम् पीत्वा तान् कृच्छ्रात् व्यमोचयत् ।। १२ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृच्छ्राद्गह्वरप्रवेशक्षुत्तृट्छ्रमादिजनितात् ।। १२ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

संभ्रमे वीप्सा कृष्णकृष्णेति ।। ९ ।। नूनम् इदानीम् । अवसीदितुम् क्लेशमाप्तुम् । शरणागतरक्षणे महान्धर्मो भवतीति संबुद्ध्यभिप्रायः ।। १० ।। कृपणम् दीनम् । निमीळयतेति तेषामग्निपानदर्शनानौचित्यम् । ततः स्थानात्तेषामतिश्रांतानामलक्षितमेव शीतलसच्छायभांडीरतरुतलप्रापणौचित्यं च परामृश्येति भावः । नन्वहो कौतुकिन् लोचनमीलिने कथमग्निपरिहारस्तत्राह–मा भैष्टेति । अतोऽन्यथा न त्राणहेतुरस्तीति भावः ।। ११ ।। भो वयस्याः वह्निविषाद्युपशमकं मणिमंत्रौषधादिकमयं कृष्णो बहु जानातीति तच्च विविक्तं विना न सिध्येदतोत्र जनसंघट्टे नेत्रनिमीलनमेव विविक्तमित्यभिप्रेत्यैवायं ब्रूते तद्वयं दूरतरं स्वनेत्रे मीलयाम इत्युक्त्वा ते न्यमीलयन्नित्याह–तथेति । भगवान्महदैश्वर्ययुतः । तीव्रमपि तं पीत्वेति तत्पिपासाया जातायास्तदिच्छाप्रातिकूल्यमाचरितुमसमर्थोग्निर्भयात्परमशीतलसुगंधमधुररसपानकीभूय । तदीयकरतले सद्य एव गंडूषमात्रो बभूव । तदैव योगाधीशो मुखेन पीत्वेत्यनेन तदीया योगमाया शक्तिरेव प्रकटीभूय तदप्येतत्स्मरतामनुरागार्द्रचित्तभक्तानां दुःसहदुःखप्रदमित्युक्त्वा तत्करतलादाछिद्य सैव मुखेन पपाविति लभ्यते । योगो योगमाया तस्या अधीशत्वात्तस्मिन्नेव तत्पानोपचारोऽभूदिति भावः । तान् गोगोपान् । यद्वा–मुखेनोपायेन पीत्वा । क उपायस्तत्राह–योगाधीश इति । योगैश्वर्यशक्तिरेवेति भावः । "मुखं प्रसरणे वक्त्रे प्रारंभयोपाययोरपि" इति मेदिनी । कृच्छ्रात् गह्वरप्रवेशतृट्श्रमादिजनितादिति । योगाधीश इति । योगिनां परक्लेशशमने सामर्थ्यमस्ति, किमुत योगाधीशस्येति तात्पर्यम् ।। १२ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महत् वीर्यं प्रभावो यस्येति "अविषह्यं मन्यमानः कृष्णं दानवपुङ्गवः" इति दृष्टरीत्या कृष्णं प्रतिसम्बोधनम् अमोघविक्रमेति श्रीबलदेवं प्रति महादैत्यस्य मुष्टिनैकेनैव वधात् अमितेति पाठोऽपि तथाभिप्रागात् एवं त्राणसामर्थ्यमुक्तं प्रपन्नान् शरणागतानिति महाभयस्वभावेन ।। ९ ।। एवं तत्कालौचित्यात् प्रथमं द्वावेव प्रार्थ्य स्नेहविशेषेण प्रभावविशेषानुभवेन च श्रीकृष्णमेव विज्ञापयन्ति — नूनमिति निश्चये त्वद्बान्धवास्त्वत्सम्बन्धमात्रवन्तोऽपि चकारोऽप्यर्थे अवसादितुं अवसमन्तात्सादो येषां तेऽवसादाः तद्वदाचरन्तीति क्विप् ततस्तुमुन् दुःखितजनवदाचरितुमपि नार्हन्ति कुतस्तु दावाग्निदाहमित्यर्थः । हि विशेषे वयं तु त्वन्नाथाः त्वदेकाश्रया इत्यर्थः । हि पादपूरणे हेतौ विशेषेऽप्यवधारणे इति विश्वः किञ्च, त्वमेव परमयनमाश्रयो येषां ते त्वदेकनिष्ठा इत्यर्थः । अतस्त्वत्पादाब्जं त्यक्तुं न शक्नुम इति भावः । दावाग्निभयेन गोभिः सममेवात्र वयमागताः आसां जीवनमेव चास्माकं जीवनमित्येव न स्वरक्षार्थं प्रार्थयामह इति स्वानुभवेन स्वयं नो जानासि ततो यथायथं विधास्यसीत्यभिप्रेत्याह—सर्वधर्मज्ञेति । हे स्वस्य चास्माकं च धर्माभिज्ञ इत्यर्थः ।। १० ।। स्वभावत एव हरिः सर्वदुःखहर्त्ता तत्र च भगवान् भक्तवात्सल्यादिनिजाविशेषगुणप्रकटनपरः तत्रापि बन्धूनां "यन्मित्रं परमानन्दम्" इति न्यायेनात्मैकमित्राणां कृपणं कातर्ययुक्तं वचः लोचनानि निमीलयतेति क्रीडाकौतुकस्वभावेन, वस्तुतस्त्वयं भावः एते मदेकस्नेहाक्रान्तचित्ताः निजक्षेमानपेक्षयापि मत्क्षेममेव निजजीवनतोऽप्यपेक्षन्ते अतो ममाग्निपानं निरीक्ष्य मदनिष्टशङ्कया सहसा दावाग्निमप्येतं किल प्रविशेयुः अतोऽमुमेषामलक्षितमेव पास्यामीति किञ्चालक्षितं क्रीडार्थं भाण्डीरं तान् शीघ्रं नेतुं तथोक्तम् ननु, अहो परमकौतुकिन् ! लोचननिमीलनेन कथमग्निपरिहारः तत्राह–माभैष्ट रक्षितास्मीति भावः ।।११।। तथा एवमस्त्वित्यर्थः इति एतदुक्त्वेत्यर्थः । ननु, तादृशाग्निः श्रीमुखेनाहो बत कथं पीतः ? तत्राह–योगाधीशः दुर्वितर्कैश्वर्यविशेषैकस्वामी तच्छक्त्यापानकगण्डूषतामिव गतमिति भावः । विशेषेणामोचयत् भाण्डीरप्रापणात् मुखेन पानाभिप्रायः प्रागेवोद्दिष्टः ।। १२।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

महद्वीर्य्यं प्रभावो यस्येति श्रीकृष्णं प्रति सम्बोधनम्, तादृशचातुर्य्या अग्रजहस्तेन साक्षात्प्रलम्बघातनात् । अमोघविक्रमेति श्रीबलदेवं प्रति च महादैत्यस्य मुष्टिनैकेनैव वधात्, अमितेति पाठेऽपि स एवार्थः । एवं त्राणसामर्थ्यमुक्तम् । प्रपन्नाम् शरणागतामिति महाभयस्वभावेन विनयभरेण वा ।। ९ ।। एवं सख्यस्वभावेन तत्कालौचित्याद्भयव्याकुलत्वाद्वा प्रथमं द्वावेव प्रार्थ्य

स्नेहविशेषेण प्रभावविशेषानुभवेन च श्रीकृष्णमेव विज्ञापयति––नूनमिति वितर्के निश्चये वा, त्वमेव बान्धवो येषां तव बान्धवा वा, चकार एवार्थे, नैव, यद्वा, अप्यर्थे, अवसादितुं अवसत्तुं किञ्चिद्दुःखं प्राप्तुमपि नार्हन्ति, कुतस्तु दावाग्निदाहमित्यर्थः । अतो वयमेतद्दुःखं नैवार्हाम इति भावः । तद्बान्धवत्वमेव साधयन्ति––वयमिति, हि यस्मात्, त्वदीयाः त्वया स्वीकृता इत्यर्थः । पाठान्तरे त्वमेव नाथ सर्वापत्सु रक्षको येषां ते; किञ्च त्वमेव परमयनमाश्रयो येषां त्वदेकनिष्ठा इत्यर्थः । हे सर्वधर्मज्ञेति आर्त्तत्राणस्यावश्यकता त्वयैव ज्ञायत इति भावः । यद्वा, त्वर्थे हि शब्दः, पूर्वतो विशेषाय यथाकथञ्चित् त्वत्सम्बन्धमात्रवन्तोऽपि अवसादितुं नार्हन्ति, वयन्तु त्वदीया इत्यादि । अन्यत् समानम् । अतस्त्वत्पदाब्जं त्यक्तुं न शक्नुम इति भावः । तच्च त्वया ज्ञायत एवेत्याहुः–सर्वेषां धर्म्मं स्वभावं जानासीति ।। १० ।। स्वभावत एव हरिः सर्वदुःखहर्त्ता, तत्र च भगवान् भक्तवात्सल्यादि-निजाशेषगुणप्रकटनपरः, तत्रापि बन्धूनां कृपणं कातर्य्ययुक्तं वचः, लोचनानि निमीलयतेति क्रीडाकौतुकस्वभावेन । वस्तुतस्त्वयं भावः–एते मदेकस्नेहाक्रान्तचित्ता निजक्षेमानपेक्षयापि मत्क्षेममेव निजजीवनतोऽप्यपेक्षन्ते, अतो ममाग्निपानं निरीक्ष्य मदनिष्टशंकया सहसा दावाग्निमप्येतं किल प्रविशेयुः, अतोऽमुमेषामलक्षितमेव पश्यामीति । पूर्वं च श्रीनन्दादीन् प्रति गौरवेण नैवमुक्तम्, एते तु सखायः, एतैः सहेदृशी क्रीडा युक्तैवेति दिक् । किंवा, आलक्षितं क्रीडार्थं भाण्डीरं तान् शीघ्रं नेतुं तथोक्तम् । ननु अहो परमकौतुकिन् ! लोचननिमीलनेन कथमग्निपरिहारः ? तत्राह–मा भैष्ट रक्षितास्मीति भावः ।। ११ ।। तथा एवमस्त्वित्यर्थः । इति एवमुक्तमित्यर्थः । ननु तादृशाग्निं श्रीमुखेनाहो बत कथं पीतम् ? तत्राह- योगाधीशो दुर्वितर्क्यैश्वर्य्यविशेषैकस्वामी, तच्छक्त्या पानकगण्डूषतामिव गतमिति भावः, विशेषेणामोचयत् भाण्डीरप्रापणात् मुखेन पानाभिप्रायः प्रागेवोद्दिष्टः, यद्वा, एषां स्नेहेन मम किमप्यकर्त्तव्यं नास्तीति सखिषु स्नेहं ब्रह्मादीन् प्रति दर्शयितुं पानानुकरणं कृतमिति ।। १२ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पीत्वेति उत्पत्तिस्थाने लीनं कृत्वेत्यर्थः । "मुखादग्निश्चेन्द्रश्च" इति हि श्रुतिः ।। १२–१३ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह—कृष्णेति द्वाभ्याम् ।। ९ ।। त्वमेव बान्धवो येषां ते अवसादितुं दुःखितुं नार्हन्त्येव नूनं ध्रुवं हे धर्मज्ञ प्रपन्नपरिपालनात्मकधर्मज्ञ ! वयं त्वमेव नाथो रक्षको येषां त्वमेव परमयनं रक्षणोपायो येषां तथाभूताश्च ।। १० ।। हरिराश्रितार्त्तिहरः भगवान् कृपणं बन्धूनां वचो निशम्य आकर्ण्य मा भैष्ट भयं मा कुरुत लोचनानि निमीलयत पिहितानि कुरुतेत्युवाच ।। ११ ।। तथेत्यङ्गीकृत्य सर्वेषु गोपेषु मीलितान्यक्षीणि यस्तथाभूतेषु सत्सु भगवानुल्बणमुत्कटमग्निं मुखेन पीत्वा तत्र हेतुर्योगाधीशः आश्चर्यशक्त्यात्मकयोगवतामधीशः मुखेन पीत्वेत्यस्य उत्पत्तिस्थाने लीनं कृत्वेत्यर्थः । "मुखादिन्द्रश्चाग्निश्च" इति श्रुतिः । कृच्छ्राद्दवाग्निजात् दुःखात् सगोधनान् गोपान् अमोचयत् ।। १२ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नूनमिदानीम् ।। १०–१३ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

त्वद्बान्धवाः त्वत्सम्बन्धमात्रवन्तोऽपि चकारोऽप्यर्थे अवसादितुम् अव समन्तात् सादो येषां तद्वदाचरितुमपि ततश्चेति विशेषेण निशाम्य निशाम्य योगस्य दुर्घटनाया वीर्यमाहात्म्यं दावाग्नेः सकाशादात्मनः क्षेमं रक्षाहेतुं वीक्ष्य तद्वीर्यस्यागन्तुकत्वं निरस्यति योगमायया स्वाभाविक्या चिच्छक्त्याऽनुभावितम् ।। १०–१६ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोनविंशोऽध्यायः ।। १९ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अवसादितुम् अव समन्तात् सादो येषां तेऽवसादास्तद्वदाचरितुमपि नार्हन्तीत्याचारक्विबन्तात्तुमुन् ।। १० ।। निमीलयतेति तेषामग्निपानदर्शनानौचित्यं तथैवालक्षितं ततः स्थानात्तेषामतिश्रान्तानामतिसन्तप्तानामलक्षितमेवातिसुशीतलसुच्छायभाण्डीरतरुतलप्रापणौचित्यं च परामृश्येति भावः । नन्वहो कौतुकिन् लोचननिमीलने कथमग्निपरिहारस्तत्राह— मा भैष्टेति । ततोऽन्यथाऽद्य न त्राणहेतुरस्तीति भावः ।। ११ ।। भो वयस्या वह्निविषादीनामुपशमकं मणिमन्त्रमहौषधादिकमयं कृष्णो बहुतरं जानातीति तच्च विविक्तं विना न सिद्ध्येदतोऽत्र जनसङ्घट्टे अस्माकं लोचननिमीलनमेव विविक्तमित्यभिप्रेत्यैवं ब्रूते तद्वयं दृढतरमेव स्वस्वनेत्रे निमीलयाम इत्युक्त्वा ते निमीलयन्नित्याह—तथेति । भगवान् महैश्वर्य्यशक्तियुक्तः तीव्रमपि तं पीत्वेति तत्र पिपासायां जातायां तदिच्छाप्रतिकूलमाचरितुमसमर्थः सोऽग्निरेव महाबिभ्यत् सद्य एव परमसुशीतलसुगन्धमधुररसपानकीभूय तदीयकरकमलतले

यदैव गण्डूषमात्री बभूव तदैव योगाधीशो मुखेन पीत्वेत्यनेन तदीया योगमायैव शक्तिः प्रकटीभूय तदग्ये तत् स्मरतामनुरागार्द्रचित्तभक्तानां दुःसहदुःखप्रदमित्युक्त्वा तत्करतलादाच्छिद्य सैव मुखेन पपाविति लभ्यते योगा योगमाया तस्या अधीशत्वात् तस्मिन्नेव तत्पानोपचारो ऽभूदिति भावः यद्वा, मुखेन उपायेन पीत्वा कः स उपायस्तत्राह योगाधीश इति योगैश्वर्य्यंशक्तिरेवेति भावः। "मुखं प्रसरणे वक्त्रे प्रारम्भोपाययोरपि" इति मेदिनी कृच्छ्रात् गह्वरप्रवेशतृट्श्रमादिजनिता तत्क्षणमेव भाण्डीरं नीत्वा तानमोचयदित्यर्थः। ततश्च भोः सखायो महाग्नेः प्रतीकारो मया कृतः साम्प्रतमक्षीण्युन्मीलयतेति कृष्णेनोक्तास्ते पुनरक्षीण्युन्मील्य आत्मानं मोचितं गाश्च मोचिता निशम्य ज्ञात्वा विस्मिता आसनित्यन्वयः। कीदृशाः भाण्डीरमापिताः तेनैवेति सर्वत्र योज्यम्। १२-१३ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

नूनं निश्चये हे कृष्ण! त्वद्बान्धवा अवसादितुं दुःखितजनवदाचरितुमपि नार्हन्ति कुतो दावाग्निदाहमनुभवेयुरित्यर्थः। अव समन्ताद् सादो येषां तेऽवसादाः। तद्वदाचारन्तीति क्विप् ततस्तुमुद् गाश्च पाहीत्याहुः सर्वधर्मज्ञेति ॥ १० ॥ नीमिलयतेति भक्तहितार्थिना मया वह्निरपि निपेयः किन्तु तन्निपानमेषामसह्यत्वादलक्ष्यमेव विधेयं परिश्रान्तानां परितप्तानां चातिशीतलभाण्डीरपिण्डिकायां प्रापणञ्च तथैव कुरुतेत्यवदत् ननु विनोदीचूड़ामने लोचनमुदनेनैव कथं वह्निविनाशस्तत्राह मा भैष्टेति नेतोन्यस्द्विनाशोपायोऽस्तीति भावः ॥ ११ ॥ भोः सखायः! महापुरुषोऽयं हविर्वह्निविषादेरुपशामकमुपायं वेत्ति स च विजनेन विना न भवेदतोत्रजनतायां लोचननिमीलनमेव विजनमिति तेषु दृढ़तरं निमीलिताक्षेषु सत्सु योगाधीशो भगवांस्तमुल्वणमप्यग्निं मुखेन योगमायांशेन उपायेन पीत्वा तान् सखीन् कृच्छ्राद्व्यमोचयत् "मुखं प्रसारणे वक्त्रे प्रारम्भोपाययोरपी"ति मेदीनि तस्मिंस्तं पातुमिच्छति योगमायया प्रवर्तिता दुष्टसंहारिणी तच्छक्तिरेव तमविवदित्यर्थः ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रपन्नान् शरणागतान् ॥ ९ ॥ समान्याग्रज इति सह कृष्णो न बलमिदं दवकवलनमेकसाध्यमिति कृष्णमेकं प्रति वदन्ति॥ नूनमिति। त्वं बान्धवो येषां ते तथा त्वन्नाथास्त्वद्याचकास्त्वत्परायणास्त्वद्रूपमुख्यगतिकाः ॥ १० ॥ कृपणं दीनं वचनं निशम्य लोचनानि निमोलयत मा भीष्ट चेत्यभाषत ॥ ११ ॥ तथैत्युक्त्वा मीलिताक्षेषु सत्सु गोपेषु भगवानुल्बणमग्निं मुखेन पीत्वा तान्कृच्छ्राद्यमोचयत्। मुखे पीत्वा नतान्व्यमोचयदिति वा। करादिना शमनं मनसोऽविधाय मुखपानं कुर्वञ्जनकजन्ययोर्मेलनेन स्वस्यैव तयोरपि तोपविशेषं ध्वनयामासेति ज्ञेयम्। मुखादिन्द्रश्चाग्निश्च। स्तुवन्तु सर्वे वनवह्निपानकृतानुभावं न वयं मुरारेः। स्वजन्मभूमिं शिखिनि प्रविष्टे क ईशितुस्तेन कृतोऽनुभाव इत्यादेः। एतत्सम्भावकमाह ॥ योगधीश इति ॥ १२ ॥

श्रीसुबोधिनी

तेषां विज्ञापनामाह **कृष्णकृष्णे**ति द्वाभ्याम्।

प्रार्थनामुपपत्तिं च क्रमेणाह निराकृतौ ॥ $\frac{1}{2}$ ॥

कृष्णकृष्णेतिसम्बोधनमादरेण वैकल्याच, **महावीर्ये**ति प्रकृतोपयोगिसामर्थ्यं, द्विविधा हि त इति **रामम**प्याहुः परं न द्विरुक्तिः, प्रलम्बादिवधात् प्रकृतोपयोगि सामर्थ्य**ममितविक्रमे**तिसम्बोधनेनोक्तं, विज्ञापनामाहु**र्दावाग्निना दह्यमाना**निति, रक्षायां हेतुः **प्रपन्ना**निति, **समर्थ एव प्रपन्नरक्षायामधिकारी**, अतस्त्रातुमर्हथः ॥ ९ ॥ एवं मर्यादाविचारेणापि स्वरक्षाया आवश्यकत्वं निरूप्य पुष्टिमार्गेणापि स्वरक्षायास्तथात्वमाहुर्नूनमिति, भगवद्विचारेणोक्त्वा स्वविचारेणाहुर्वा कृष्णेति, **सदानन्दसम्बोधनं सेवकानां** दुःखित्वानौचित्याय, त्वद्बान्धवास्त्वमेव **बन्धुर्येषां** बन्धुत्वसम्बन्धज्ञानवन्तस्तेवसीदितुमवसादं प्राप्तुं **नार्हन्ति**, चकारादल्पमपि खेदं प्राप्तुं **नार्हन्त्येव, अवसादितु**मिति वा **पाठः**, एवकारेण कादाचित्कोप्यवसादो निषिद्धः, भगवद्बान्धवत्वं समर्थयन्ति **वयं हीति, धर्मा अनेकविधा लौकिकवैदिकानन्तप्रकारभिन्नाः** सर्वे त्वयैव ज्ञायन्ते तेषां बाध्यबाधकता च, अतो येनकेनापि प्रकारेणास्मत्प्रपत्तिः क्वचिद्धर्मे **प्रवेशमर्हति**, अन्यथा **वयं** कथं त्वन्नाथस्त्वमेव नाथो येषां तादृशा भवेम? न हि **धर्मव्यतिरेकेण विशेषाकारेण** त्वं **नाथो भवसि**, किञ्च वयं त्वत्**परायणा**स्त्वमेव परमयनं स्थानं येषां, **नाथत्वेपि** तदेक**निष्ठतातिदुर्लभा** यथा गावस्त्वन्नाथास्त्वन्निश्राः, वयं **तूभयविधाः, गवां** वा वचनमाद्यं **गोपानामग्रिमम्** ॥ १० ॥ भगवांस्तु तेषां प्राथितं कृतवानित्याह **वचो निशम्येति, कृपणं** दीनतरं **बन्धूनामुभयविधानां भगवानुपायाभिज्ञः** समर्थश्च **हरिः** सर्वदुःखहर्ता स्वाभाविकोयं धर्मो **देवगुह्यं भगवत्कर्माज्ञानां भयजनकं** च, रात्रौ तु सम्यग्दर्शनाभावान्न चक्षुर्निमीलनोपदेशो ज्ञानशक्तिप्राकट्यादेवैतज् जातं, अज्ञाने तु हितमेवैतद् भवेद् यथाग्नौ पतङ्गाः पतन्ति, अन्यत्र वैते नेयाः, तथाप्येतेषां भयं स्यात्, अत सर्वप्रकारेण भयाभावायाह **निमीलयतेति** चक्षुर्निमीलनं कुरुत, न च शङ्कनीयमग्निर्धक्ष्यतीत्यत आह **मा भैष्टेति**, अग्निमयं न कर्तव्यम् ॥ ११ ॥ ईश्वरवाक्यादुपायत्वेनाज्ञातमपि कृतवन्त इत्याह **तथेति, निमीलिताक्षेषु** सत्सू**ल्बणमप्यग्निं भगवान् मुखेनैव**

पीत्वा पूर्ववत् **तान् व्यमोचयत्**, **उल्बणत्वं** दुष्टावेशात्, सख्यसम्बन्धेन प्राप्तदोषदाहार्थं पानं तेषामग्निरूपदोषाणां दाहार्थं वा ते ह्याधिदैविका एव **दग्धा भवन्तीति**, ननु कथं स्वान्तर्गतानामग्निगतानां वा धर्माणां प्रकटीकरणं ? तदाह **योगाधीश** इति, योगानामधीशः स्वामी, अतो **विशेषेणामोचयद्** यथा तत्संस्कारोपि न तिष्ठतीति ॥ १२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

कृष्ण कृष्णेत्यत्र **निराकृताविति** निमित्तसप्तमी, **द्विविधा** इत्युभयपक्षपातिनः साधारणा असाधारणा इति वा ॥ ९ ॥ **वचो निशम्ये**त्यत्र ननु समर्थेन भगवता नेत्रनिमीलनोपदेशः कुतः कृत इत्यत आहुर्**देवगुह्य**मित्यादि **तत्** करिष्यमाणं कर्म, द्वितीयस्कन्धे "तत् कर्म दिव्य"मिवेति ब्रह्मवाक्याद् **देवगुह्यमज्ञानां भयजनकं च सम्यग्** ज्ञानाभावाद् भयं स्यादिति तथेत्यर्थः, तर्हि पूर्वदावाग्निपानस्यापि तथात्वात् तत्र तत् **कुतो** नोक्तमित्यत आहू **रात्रावि**त्यादि, इह तु ज्ञानेन लीला ज्ञानाध्यायत्वादत्रोक्तज्ञानशक्तिर्भगवता प्रकटिता, यदा **भयजनको**ऽज्ञानज्वरस्तेभ्यो बर्हिर्निगतस्तदैव चैतेषां 'वयं च सर्वधर्मज्ञ' 'त्वन्नाथास्त्वत्परायणा' एतद्व्याख्यानाकारकं ज्ञानं जातं, यद्येषामज्ञानमात्रं तिष्ठेत् तदा दोषान्तराणां निवृत्तत्वाद् दावाग्निपतनं **हितमेव भवेद्** विदेहकैवल्यजनकत्वात् **पतङ्गवत्**, अतस्तत् तु नाभिप्रेतमेतैः सह लीलायाः कर्ष्यमाणत्वात्, यदि च दृश्यमानेपि दावाग्नावेतेन्यत्र **नेयास्तथापि दवाग्निदर्शनजं भयं स्यादेव** संस्कारस्यानिवर्तितत्वादत एतत् सर्वं विचार्य सर्वथा **भयाभावाय तथाहे**त्यर्थः ॥ ११ ॥ तथेत्यत्र ननु महावृष्टिप्राकट्यकरणेनाप्यग्निनाशसम्भवे किमिति पानमित्यत आहुः **सख्ये**त्यादि, सख्यदशायां प्राप्तो योवज्ञादिरूपो दोषस्तद्दाहार्थं तेषां जलनाश्यत्वासम्भवात् पानमित्यर्थः, नाप्ययं वह्निर्जलेन नश्यत्याध्यात्मिकदोषरूपत्वादतोपि तथेत्यभिप्राहेणाहुस्तेषामित्यादि, **दाहार्थमिति** निःशेषनाशार्थं **वा**शब्दः समुच्चये, पानव्यतिरेकेण तेषां दाहाभावे हेतुमाहुस्**ते ही**त्यादि, **नन्वि**त्यादि ननु कथं केन प्रकारेण **स्वान्तर्गतानां स्वे** स्वकीयास्तदन्तर्गता ये **धर्मा** दोषरूपा **अग्निगता** ये आसुरत्वादयस्तेषां **धर्माणां कथं प्रकटीकरणं** भिन्नतया स्थापनमित्यर्थः ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

वचो निशम्येत्यस्याभासे **भगवांस्त्विति**, उभौ प्रार्थितौ तत्र रामस्तूष्णीमास **भगवांस्तु कृतवानिति** रामव्यावृत्त्यर्थं तु शब्दः, श्लोकद्वयस्य वाक्यार्थोयं, व्याख्याने, **उभयविधानामिति** रामसङ्घट्टिनां **स्वसङ्घट्टिनां** चेति **प्रथमपक्षे**, **स्वनाथानां गवां** त्वत्परायणानां गोपानामिति द्वितीयपक्षेर्थः, **एतज्जातमिति** स्वदोषरूपदावाग्निदर्शनजभयमित्यर्थः, ज्ञानस्य पूर्वावस्था यत् स्वदोषस्फुरणमतो ज्ञानजनकशक्तिप्राकट्यादेवं जातमित्यर्थः, **अज्ञाने** त्विति तस्मिन् स्थापनीये तु दावाग्निप्रकटनं हितमेव मानयेयुस्तत्र दृष्टान्तः यथेति, अग्निं हितं मत्वा ते तत्र **पतन्ति** तथैतेपि पतेयुरेव न तु त्राणं प्रार्थयेयुरित्यर्थः, तथा च ज्ञानपूर्वावस्थासूचनाय दर्शयित्वा **चक्षुर्निमीलनं** कारितवानन्यथा पूर्वमेव दर्शनं न सम्पादयेदिति भावः, **ईश्वरवाक्यत्वादिति** आद्यचरणस्यार्थोयं, विशिष्टवाक्यार्थस्तु पूर्वश्लोकाभास एवोक्तः **सख्यसम्बन्धेनेति** सख्याधिकरणयोः समानशीलत्वनियमात् स **दोषो** भगवत्यपि प्राप्तस्तस्यापहतपाप्मत्वात् तत्रासम्बद्धस्तदन्तः स्थितजगति पर्यवस्यति **तद्दाहार्थमि**त्यर्थः, **तेषामिति** लौकिकानामन्तःकरणदेवानां स्वरूपाज्ञानरूपस्य चेत्यर्थः, एते संसारतापजनकत्वाल् लौकिकाग्निरूपाः भगवन्मुखमाधिदैविकाग्निरूपं अतस्तत्र गता एते **दग्धा** भवन्तीत्यर्थः, **संस्कारोपीति** औष्ण्य**मपी**त्यर्थः ॥ ११ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

नूनं त्वद्बान्धवाः कृष्णेत्यस्याभासे **पुष्टिमार्गेणापि स्वरक्षा** इति पुष्टिमार्गे देहसम्बन्धस्यापि साधकत्वं "सम्बन्धाद् वृष्णयः स्नेहाद् **यूयं** भक्त्या वयं विभो" इति सप्तमस्कन्धे नारदवाक्ये वृष्णीनां देहसम्बन्धेन, भगवत्प्राप्तिकथनात्, प्रकृतेपि श्रीकृष्णस्य नन्दराजकुमारत्वाद् गोपानां देहसम्बन्धोस्तीति **पुष्टिमार्गेणापी**त्युक्तं सुबोधिन्यां, मूले "त्वद्बान्धवा" इत्यनेन देहसम्बन्धस्य रक्षायां हेतुत्वोक्तेः पुष्टिमार्गोक्तिरितिहार्दम् ॥१०॥ **तथा निमीलिताक्षे**ष्वित्यत्र **सख्यसम्बन्धेन प्राप्तदोषदाहार्थमिति** भगवता सह सख्ये साम्यस्फूर्तेर्हरिदासत्वलक्षणस्वस्वरूपविस्मरणरूपो दोषः प्राप्तस्तस्य दोषस्य दाहार्थं दावाग्निपानं दावाग्निर्हि निरोध्यभक्तानां स्वरूपविस्मरणरूपो दोषः, 'अज्ञानात्मा ह्यात्मदोषो दवाग्निस्तन्निवारण'मितिपूर्वमध्यायार्थकारिकासूक्तत्वात्, अतस्तस्य दोषस्य दाहार्थं पानं, सख्यस्य परमपुरुषार्थत्वेन लीलायां चिकीर्षितत्वाद् भगवतोभिप्रेतत्वाच्च, तस्य दोषत्वं वक्तुमयोग्यत्वादरुचिं मत्वा पक्षान्तरेण व्याचक्षते, **तेषामग्निरूपदोषाणां दाहार्थं** वेति दवाग्निरूपा ये **दोषा** आत्मविस्मरणरूपा अविद्याकार्यभूतास्तेषां दाहार्थमित्यर्थः, दावाग्निमूर्तिमानात्मदोषो ह्यज्ञानात्मा 'लोभक्रोधादयो दैत्या' इति कृष्णोपनिषद्भ्यः, "अज्ञानात्मा ह्यात्मदोषो दवाग्नि"रितिपूर्वमुक्तत्वाच् च, अतो दोषस्याग्निरूपस्य आधिदैविकाग्निरेव नाशक इत्याधिदैविकाग्निरूपे मुखे दाहः कर्तव्य इति हेतोः पानं ते **ह्याधिदैविक एवेति** ते सर्वेषामात्मदोषा अग्निरूपत्वादाधिदैविकाग्नावेव **दग्धा भवन्ती**त्यर्थः ॥ १२ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

कृष्ण कृष्णेत्यादि श्लोकद्वयवाक्यार्थावाहुः प्रार्थनामुपपत्तिं च क्रमेणाह निराकृतावित्यर्धेन, निराकृतौ दावाग्निनिराकरणनिमित्तमित्यर्थः ॥ ९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

रक्षायां सामर्थ्यं द्योतयन्तो रक्षां प्रार्थयन्ति–हे कृष्ण हे कृष्ण हे महावीर्य हे राम हे अमितविक्रम दावाग्निना दह्यमानान्, अत एव प्रपन्नान् भवच्छरणमागतान् अस्मान् त्रातुं रक्षितुमर्हथः ॥ ९ ॥ एवं साधारण्येन रक्षायोग्यत्वमुक्त्वा विशेषतोऽपि स्वरक्षाया आवश्यकत्वमाहुः–नूनमिति । हे कृष्ण ! नूनं निश्चितमेतत् । त्वद्बान्धवास्त्वत्सम्बन्धिनोऽप्यवसीदितुं दुःखमनुभवितुं नार्हन्ति । वयं हीति निश्चयेन, त्वन्नाथाः त्वमेव नाथो रक्षको येषां तथाभूताः । तत्र हेतुः–त्वमेव परायणमाश्रयो येषां ते, 'अतः कथमवसीदितुमर्हाम' इति शेषः । 'शरणागतरक्षायाः परमधर्मत्वं तु त्वया ज्ञायते' इति सूचयन् सम्बोधयति–सर्वधर्मज्ञ इति ॥१०॥ हरिः स्वभावतः सर्वदुःखहर्ता भगवान् सर्वथा समर्थः, कृष्णो गोपालानां कृपणं दीनतरं वचो निशम्य श्रुत्वा 'मा भैष्ट, अयमग्निर्धक्ष्यतीति भयं न कुरुत, किन्तु लोचनानि सम्मीलयत' इत्यभाषत ॥११॥ 'तथास्तु' इत्युक्त्वा तेषु मीलिताक्षेषु सत्सु भगवान् उल्बणमप्यग्निं मुखेन पीत्वा तान् भाण्डीरं नीत्वा कृच्छ्रात् अग्निभयात् व्यमोचयत् । तत्र सामर्थ्यमाह –योगः माया, तस्या अधीशः नियन्तेति ॥ १२ ॥

अन्वितार्थप्रकाशिका

कृष्णेति ॥ स्पष्टम् ॥ ९ ॥ नूनमिति ॥ हे कृष्ण ! हे सर्वधर्मज्ञ ! नूनं निश्चितमेतत् त्वद्बान्धवास्त्वत्संबन्धिनोऽस्मदादय अवसीदितुं दुःखमनुभवितुं नार्हन्ति । इट्सीदौ आर्षौ । सादितुमिति पाठे अव समन्तात्सादो येषां तेऽवसादास्तद्वदाचरितुमपि नार्हन्ति । आचारक्विबन्तात्तुमुन् । वयं हि त्वन्नाथाः त्वमेव नाथो रक्षको येषां तथाभूताः । तत्र हेतुः त्वमेव परायणमाश्रयो येषां ते अतः कथमवसीदितुमर्हाम इति ॥ १० ॥ वच इति ॥ भगवान् हरिः बन्धूनां गोपानां कृपणं दीनतरं वचो निशम्य श्रुत्वा मा भैष्ट अयमग्निर्धक्ष्यतीति भयं न कुरुत । किंतु लोचनानि संभीलयतेत्यभाषत । यद्येषां प्रत्यक्षेऽग्निं पास्यामि तर्हि एते मां बलान्निवार्याग्निमेव प्रवेक्ष्यन्तीति नेत्रनिमीलनोक्तिः ॥ ११ ॥ तथेति ॥ अयं कृष्णो मन्त्रादिना वह्निं शमयिष्यति । तत्र रहः संपादनमुचितम् । मत्वा तथास्त्वित्युक्त्वा तेषु मीलिताक्षेषु सत्सु योगस्य योगमायाया अधीशः भगवानुल्बणमप्यग्निं मुखेन पीत्वा तान् भाण्डीरं नीत्वा कृच्छ्रात् अग्निभयात् व्यमोचयत् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अमितविक्रम हे अप्रमेय पराक्रमदावाऽग्निना वनवह्निना ॥ ९ ॥ अवसादितुं दुःखं प्राप्तुं त्वमेव नाथो येषां ते त्वन्नाथाः त्वमेव परं श्रेष्ठं अयनं प्राप्यो येषां ते ॥१०॥ मा भैष्ट यूयं लोचनानि संमीलयत इत्थमभाषत ॥ ११ ॥ कृच्छ्राद्दवाऽग्निप्राप्तमरणात् योगाधीशो योगानां यौगैश्वर्याणामधिपतिः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह कृष्णेति द्वाभ्याम् ॥ हे कृष्णेति ॥ हे कृष्ण, हे कृष्ण, हे महावीर्य, हे अमितविक्रमापरिमितपराक्रम, हे राम, दावाग्निना दह्यमानान्, प्रपन्नान् युवयोः शरणं प्राप्तान्, अस्मान् त्रातुं रक्षितुं, अर्हथः ॥ ९ ॥ नूनमिति ॥ हे कृष्ण, हे सर्वधर्मज्ञ त्वं बान्धवो येषां ते, वयं हि वयमपि, त्वमेव नाथो येषां ते, त्वमेव परममयनं रक्षणोपायो येषां तथाभूताश्च, भवाम, अत एव, अवसीदितुं दुःखीभवितुं, न अर्हन्ति । योग्या न भवाम इत्यर्थः । नूनम् ॥ १० ॥ वच इति ॥ हरिराश्रितार्त्तिहरः, भगवान् कृष्णः बन्धूनां कृपणं वचः, निशम्याकर्ण्य, मा भैष्ट भयं मा कुरुत । लोचनानि, निमिलयत पिहितानि कुरुत । इति, अभाषतोवाच ॥ ११ ॥ तथेतीति ॥ तथेति अङ्गीकृत्य, सर्वेषु गोपेष्विति शेषः । मीलितान्यक्षीणि यैस्तथाभूतेषु सत्सु, योगाधीशः आश्चर्यशक्त्यात्मकयोगवतामधिपतिः, भगवान् श्रीकृष्णः, उल्बणमुत्कटं अग्निं, मुखेन पीत्वा, तान् गोपादीन्, कृच्छ्राद्दवाग्निजात् दुःखात्, व्यमोचयत् ॥१२॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृष्ण कृष्णेति : १०.१९.९

कृष्णवर्त्माश्रयादस्मात् कृष्णवर्त्माऽयमुत्थितः । कृष्णवर्त्मानुगानस्मान् पाहि तत्कृष्णवर्त्मतः ॥ २२ ॥
सकृदपि तव नाम्नि श्रीधरोदीरिते सत्यनुभवति जनोऽस्मिन् सर्वतस्तापशान्तिम् ।
त्वयि सति सदयास्मच्चक्षुरालीढरूपे यदि न शममुपेयादेष चित्रं किमस्मात् ॥ २३ ॥

इमा गावो वयं गोपास्त्वं गो गोपालपालकः । तत्कृतं पूर्वमस्माभिस्त्वं द्वयोस्त्राणकृद्भव ॥ २४ ॥

त्वद्बान्धवा इति : १०.१९.१०.

लौकिका अपि न सन्निधाविह स्वाप्तमातृपितृबान्धवादयः । तत्त्वमेव सकलोदयोदधे सम्प्रतीत्यमनन्तभाषितैः ॥ २५ ॥

प्रवर्तते यत्र तु कर्मणीशः साक्षात्स्वशस्तिष्ठति तत्र तूष्णीम् ।
तद्ध्रीहरोद्योगमवेक्ष्य कृष्णं तूष्णीं स्थितो राम इतीह युक्तम् ॥ २६ ॥

वचो निशम्येति : १०.१९.११

एते स्थूलदृशोऽखिला अपि गवां पालाः सभीत्यन्तरा वह्निश्चैष दुरन्तकीलकलितस्तन्नात्र योगं विना ।
एतच्छान्तिरसाध्वसं भृशममीषां चेत्यलं चिन्तयन् युक्तं मीलितलोचनं ह्यकथयत् सर्वान्तरात्मा प्रभुः ॥ २७ ॥
यद्गावो विषयोपभोगसतृषो मुञ्जौघकोशभ्रमं प्राप्तास्तास्वपि तेषु च स्फुटतमं वन्यानलावेष्टनम् ।
तद्भोगापगतस्पृहा यदि तदा त्वानन्दिनः स्युः क्षणादेतत् व्यक्तमभूद् द्वयं तदनलात् तन्नेत्रसम्मीलनात् ॥ २८ ॥

भवाटवीयं विकटस्वरूपा तपोऽपि तस्यां विषयाग्निजातः ।
स्वदृग्गृहीतो न च वास्तवोऽस्तीत्यभूत्स्फुटं नेत्रनिमीलनोक्त्या ॥ २९ ॥
एते च त्रिदशाः सुगोपवपुषो मुख्येन्द्रियाधिष्ठितो वह्निर्यद्विहितस्तथाप्यसुमतां सन्तापदस्तेष्वयम् ।
तस्मान्मत्कृतशासनं भृशमसावर्हत्यथापि ह्रिये स्यादस्यान्यसमक्षमित्यखिलसद्भव्यस्तथाऽज्ञप्तवान् ॥ ३० ॥

दुरत्ययभवोद्भटप्रसरकीलजालानलप्रशान्तिकृदशेषतो भवति योग एवावनौ ।
जनांस्तदनुतापितानिति तदक्षिसम्मीलनच्छलादतुलवैभवो ध्रुवमबोधयद्वा प्रभुः ॥ ३१ ॥
विधायैव नेत्रापिधानं हि तेषां यदैषीत्तदीयं प्रियं कर्तुमीशः ।
दुरन्तार्तिदाग्निप्रशान्त्या तदस्मात् परोक्षाप्रियत्वं स्वमाविश्चकार॥ ३२ ॥
घस्मरस्य बहुविस्मयाकुलद्रष्टृदृग्जनितभीर्यथा तथा । नान्यतः प्रभुरतोऽक्षिमीलनं वह्निभुक्तिकृदुवाच तत्क्षमम् ॥ ३३ ॥
येऽनन्यभावशरणीकृतमत्पदाब्जास्तत्तापभीत्यपहृतावहमस्म्यसुप्तः ।
तत्र स्वयं ध्रुवमनेत्रपिधानभाजा कारुण्यशालिमनसेदमबोधि बीजम् ॥ ३४ ॥

तथेतीति : १०.१९.१२.

निःशङ्कमग्निं विधुपादभाजः क्षुद्राश्चकोरा अपि भक्षयन्ति ।
अद्धा तु तद्वंशभवोऽस्मि तन्मे का नाम भीरित्यपिबन् मुखेन ॥ ३५ ॥
सख्युर्ममैष हि दधाति धनञ्जयस्य नामेति तद्वदयमप्यतुलप्रियो मे ।
इत्याशयात् स्वजनभक्तिवशंवदात्मा तत्प्राशनात्किमकरोत्तमिह स्वमुख्यम् ॥ ३६ ॥

स्वकारणे कार्यलयस्तु लोके प्रसिद्ध एवेत्यलमाविचारात् ।
लयं निनायेति दयाघनोऽसौ कृपोटयोनिं वदनाम्बुजाते ॥ ३७ ॥
अग्निमुखा वै देवास्तन्नाथोऽहं तथा कथं नास्मि । इति किं तत्पानमिषादग्निमुखत्वं सविशदमेवमधात् ॥ ३८ ॥
उष्णेन याति शममुष्णमिति प्रसिद्धशास्त्रानुभूतिकुतुकी धृतचित्रकार्यः ।
प्राक्प्राशितानलभवत् तनुदाहशान्त्यै भूयोऽग्निपानमकरोत्किमु वासुदेवः ॥ ३९ ॥
यतो ह्युदयमेति यद्विलयमेति तत्रैव तच्छ्रुतीरितमिति प्रभुः परममर्थमालोचयन् ।
यतो वत दघोऽधुना भवति काननोत्थः स्वकानने तदुचितोलयस्तदिति किं तथा सन्दधे ॥ ४० ॥

भक्तार्पितप्रेमभक्तिसुधारसभुजो विभोः । अग्निरेवाविशद् वक्त्रं तद्रसास्वादलिप्सया ॥ ४१ ॥
सर्वाशितोऽप्यपार्थोऽसावनरत्वादिति प्रभुः । त्यजन् दाहभयं भूयः पपौ जलमिवानलम् ॥ ४२ ॥
सर्वाशाप्रतिरोधिवृत्ति विभयो यः कृष्णवर्त्मा वनस्थायी विष्णुपदाभिमर्शनशिखो भुङ्क्ते यदृच्छागतम् ।
नारीवज्जडसङ्गतिं विषहते नित्यं शुचिः पावको लोकाधीश्वरसम्मुखस्थितिरलं युक्तैव तस्यान्वहम् ॥ ४३ ॥
य आश्रयाशः खलु मां प्रसर्पति महातपश्रीर्मरुदुज्वलस्थितिः ।
तमाश्रितं मुख्यतया करोम्यहमिति प्रभुर्वाञ्छितदस्तथाऽदधे ॥ ४४ ॥
विषग्निरेको वनवह्निरन्यो दावाग्निरेषोऽपि शमं प्रणीतः ।
इति त्रिवह्निप्रशमात्त्रितापहृतावसुप्तोऽस्मि सतामबोधि ॥ ४५ ॥

यदा यदा तापजनिः सतां स्यात्तदैव तच्छान्तिमहं करिष्ये ।
न तत्र नक्तंदिनभेदवार्तेत्यबोधि कर्त्रोभयतोऽग्निपानम् ॥ ४६ ॥
त्वां पश्यतां प्रखरतापद-दावपानं तेषामकारि भवता यदपश्यतां च ।
तेन त्वया सदयबोधितमात्मभक्तिभाजां परोक्षमपरोक्षमहं हितार्थी ॥ ४७ ॥
त्वत्पादप्रवणैस्त्वदेकशरणैर्गोपैस्त्वदाज्ञानुगैर्यत्स्वाक्षीणि निमील्य चाशु पुनरप्युन्मील्य संवीक्षिते ।
नैव प्रागवलोकितो हुतवहो नार्तिस्तदीयाङ्गकेऽप्येयं चित्रचरित्रतोऽध्वनि ददो नैषां निमेषश्रमम्॥ ४८ ॥
वृत्या कयाऽप्यजनि साधुसमागमश्चेत् सद्यस्तनोति विषयानलतापशान्तिम् ।
गोगोपसङ्गतिजुषः पशुपक्षिवृक्षाः सौख्यं महद्धुतवहापगमादवापुः ॥ ४९ ॥
सतां यत्नः स्वार्थोऽप्युपकृतिकृदन्यत्र भवति परार्थश्चेद्वाच्यं किमु स हि तथेति स्फुटमिदम् ।
भृशं गोपैः स्वार्थार्थितमनलतापोपशमनं तदत्यन्तं सौख्यप्रदमभवदारण्यजनुषाम् ॥ ५० ॥

कृष्णप्रिया

हे महाबीर श्रीकृष्ण ! प्यारे श्रीकृष्ण ! परम बलशाली बलराम हम तुम्हारे शरणागत हैं, देखो इस समय हम दावानल से जलना ही चाहते हैं, तुम दोनो हमें इससे बचाओ ॥ ९ ॥ श्रीकृष्ण, जिनके तुम्हीं भाई वन्धु और सब कुछ हो उन्हें तो किसी प्रकार का कष्ट नहीं होना चाहिये । सब धर्मों के ज्ञाता श्यामसुन्दर, तुम्ही हमारे एकमात्र रक्षक एवं स्वामी हो हमे केवल तुम्हारा ही भरोसा है ॥ १० ॥ **श्री शुकदेवजी कहते हैं**—अपने सखा ग्वालबालों के ये दीनता से भरे वचन सुनकर भगवान श्रीकृष्ण ने कहा 'डरो मत' तुम अपनी आखें बन्द करलो ॥ ११ ॥ भगवान की आज्ञा सुनकर उन ग्वालबालों ने कहा बहुत अच्छा और अपनी आखें मूँद लीं, तब योगेश्वर भगवान श्रीकृष्ण ने उस भयङ्कर आग को अपने मुँह से पी लिया, और इस प्रकार उन्हें उस घोर सङ्कट से छुड़ा दिया ॥ १२ ॥

ततश्च तेऽक्षीण्युन्मील्य पुनर्भाण्डीरमापिताः[1] । [2]निशम्य विस्मिता आसन्नात्मानं गाश्च मोचिताः ॥ १३ ॥
कृष्णस्य योगवीर्यं तद् योगमायानुभावितम्[3] । दावाग्नेरात्मनः क्षेमं वीक्ष्य तं [4]मेनिरेऽमरम् ॥ १४ ॥
गाः [5]सन्निवर्त्य सायाह्ने सहरामो जनार्दनः । वेणुं विरणयन् गोष्ठमगाद् गोपैरभिष्टुतः ॥ १५ ॥
गोपीनां परमानन्द आसीद् गोविन्ददर्शने । क्षणं [6]युगशतमिव यासां येन विनाभवत् ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे[7] दावाग्निपानं नामैकोनविंशोऽध्यायः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—ततः ते नेत्राणि उन्मील्य पुनः भाण्डीरम् आपिताः च आत्मानं च गाः मोचिताः निशम्य विस्मिताः आसन् ॥ १३ ॥ योगमायानुभावितम् आत्मनः दावाग्नेः क्षेमम् कृष्णस्य तत् योगवीर्यम् वीक्ष्य तम् अमरम् मेनिरे ॥ १४ ॥ सहरामः जनार्दनः गोपैः अभिष्टुतः सायाह्ने गाः सन्निवर्त्य वेणुम् विरणयन् गोष्ठम् अगात् ॥ १५ ॥ गोविन्ददर्शने गोपीनाम् परमानन्दः आसीत् यासाम् येन विना क्षणम् युगशतम् इव आसीत् ॥ १६ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां तामसप्रकरणान्तर्गतप्रमेयप्रकरणे एकोनविंशोऽध्यायः समाप्तः ॥ १९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

क्षणेनैव भांडीरं प्रापिताः ततोऽक्षीण्युन्मील्य विस्मिताः ॥ १३–१८ ॥

श्रीदामादिस्वगोपानां स्वांगमारुह्य हृष्यताम् । स्वैश्वर्यमाविरकरोद्वनवह्निनिपानतः ॥ १ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायां दावाग्निपानं नामैकोनविंशोऽध्यायः ॥ १९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः भांडीरागमनानंतरम् । ते गोपाः । भो वयस्याः महाग्नेः प्रतीकारो मया कृतः सांप्रतमक्षीण्युन्मीलयतेति कृष्णेनोक्तास्ते पुनरक्षीण्युन्मील्यात्मानं मोचितं गाश्च मोचिता निशम्य ज्ञात्वा विस्मिता आसन्नित्यन्वयः । किंभूताः—भांडीरमापिताः प्रापिताः

---

१. मागताः–वीर. ; माश्रिता–विज. । २. निशाम्य–श्रीधर. वंशी. वीर. विज. । ३. भाविता–वीर. । ४. ते मेनिरे ; तं मेनिरे ; तं मेनिरे–वीर. । ५. संनिपत्य–वीर. । ६. युगशतानीव–वीर. ; यथा युगशतं–विज. । ७. बालक्रीडायां दावानलविमोक्षणमेको–अन्यत्र अयं पाठो दृश्यते ; पारमहंस्यां संहितायां दशमस्कन्धे पूर्वार्धे–गो. प्र. मूलम् ।

तेनैवेति सर्वत्र योज्यम् । तत्र श्रीयमुनादक्षिणकूले श्रीवृंदावनमध्ये । स्यारो इति प्रसिद्धशिवालयग्रामतो वायव्यदिशि भांडीर इति यः प्रसिद्धोऽस्माभिर्दृष्टचरो यदंशो यत्संबंधेनाद्यापि तन्नाम्ना ख्यातस्तत्प्रदेशो यमुनाघट्टश्च विस्पष्टः स एव भांडीरनामेति ।। १३ ।। योगमायानुभावितं स्वसामर्थ्यकृतम् । तत् दावाग्न्याक्रांतमुंजारण्यतो भांडीरागमनरूपं तत्पानरूपं च । योगवीर्यमपूर्वसामर्थ्यम् 'योगोऽपूर्वार्थसंपत्तौ' इति मेदिनी । तम् श्रीकृष्णम् । अमरम् जरामरणहीनं परमेशम् ।। १४ ।। सायाह्ने सन्ध्याकाले ।। १५ ।। यासाम् गोपीनाम् । येन कृष्णेन ।। १६ ।। तयोः रामकृष्णयोः । तत् श्लोके वक्ष्यमाणम् ।। १७ ।। तत् प्रलंबवधादि (१८) वयं कृष्णांगमारूढा इत्येव हृष्यताम् । स्वैश्वर्यम् निजवैभवम् (१) ।। १८ ।।

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे एकोनविंशोऽध्यायः ।। १९ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततः पानानन्तरं च नूनं श्रीभगवदुक्त्यैवाक्षीण्युन्मील्यात्मानं मोचितं गाश्च मोचिता निशम्य निशाम्य दृष्ट्वा विस्मिता आसन् न केवलं मोचिताः पुनर्भाण्डीरमापिताश्च निशाम्येत्येव पाठः क्वचित् मोचिता इत्यर्थवशाद्विभक्तिविपरिणामेनोभयोरन्वयः । तत्र श्रीयमुनादक्षिणकूले श्रीवृन्दावनमध्ये स्यारो इति प्रसिद्धशिवालयग्रामतो वायव्यदिशि भाण्डीर इति यः प्रसिद्धोऽस्माभिर्दृष्टचरो यदंशो यत्सम्बन्धेनाद्यापि तन्नाम्ना ख्यातस्तत्प्रदेशो यमुनाघट्टश्च विस्पष्टः स एव भाण्डीरवटो ज्ञेयः तद्दक्षिणतः क्रोशपञ्चकं यावन्मुञ्जाटवी च तन्निकटत अग्निवारेति प्रसिद्धग्रामान्ते ग्राह्या तथा मध्ये चास्य महाशाखो न्यग्रोध इत्यादिना श्रीहरिवंशे वृन्दावन एव भाण्डीरस्य वर्णनं भविष्योत्तरे च मल्लद्वादशीप्रसङ्गे भाण्डीरे यो मल्लरूपी श्रीकृष्णो निरूपितस्तस्य तत्रैव महामल्ल इति प्रसिद्धः अतो वासुदेवेति प्रसिद्धा तद्देवता च सैव ज्ञेया एवमेव "वहन्तो वाह्यमानाश्च चारयन्तश्च गोधनम्" इत्युक्तं श्रीवृन्दावनत आरब्धायाः क्रीडायाः अविच्छेदे सङ्गच्छेत अनन्तगवादीनामुत्तारणादिना तदसिद्धेः एवं किं विश्राम्यसि कृष्णभोगिभवने भाण्डीरभूमीरुहि इत्यादिप्राचीनवैष्णवकवीनामपि मतमव्याकुलं स्यात् ततश्च श्रीवराहोक्तं लोके भाण्डहरेति ख्यातं भाण्डह्लदाख्यं तीर्थमेव यमुनाया उत्तरकूले ज्ञेयम् ।। १३ ।। अथापि तेषाम् "इत्थं सतां ब्रह्मसुखानुभूत्या" इत्यादिषु सर्वोर्द्धश्लाघितशुद्धमैत्रीमतां तदाच्छादकमैश्वर्यज्ञानं न बभूव किन्तु कथञ्चित् प्रभावज्ञानमेवाजायतेत्याह—कृष्णस्य योगमायया स्वाभाविकाचिन्त्यशक्त्या अनुभावितं व्यञ्जितं "योगो पूर्वार्थसम्प्राप्तौ" इति विश्वप्रकाशादपूर्वार्थसम्प्राप्तिसम्पादकं यद्वीर्यं प्रभावस्तद्वीक्ष्य मत्वा तममरं देवविशेषं मेनिरे कीदृशं वीर्यं दावाग्नेः सकाशादात्मनः क्षेमं मङ्गलहेतुमिति यद्वा, न विद्यते मरो मरणं यस्मात् तम् एतदाश्रयेण मरणादपि न विरहं प्राप्स्याम इति भावः । जनार्दन इति व्रजजनैः सदा द्रष्टुं याच्यत इत्यभिप्रायेण ।। १४–१५ ।। श्रीगोपानां दावाग्नितो मोचनपूर्वकं स्वप्राप्तिपरमानन्दं यथा ददौ तथा श्रीगोपीनामपि विरहाग्नितस्तत्पूर्वकं तं ददाविति नित्यमपि प्रस्तावसादृश्येन तद्दिनलीलान्त एवाह—गोपीनामिति परमः परां काष्ठामापन्न आनन्द एवासीत् कासां गोपीनां तत्राह क्षणमिति "कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशाम्" इति "त्रुटिर्युगायते त्वामपश्यताम्" इति च, तासामेव तादृशवचनश्रवणात् "यद्दर्शने दृशिषु पक्ष्मकृतं शपन्ति" इति ता एवोद्दिश्य श्रीमन्मुनीन्द्रेणापि सर्वातिशयप्रेमदर्शनाय वर्णितत्वात् तत्प्रेयसीरूपाणामित्यर्थः । कीदृशं तस्यानन्दस्य परमत्वं तत्राप्याह, क्षणमिति । अस्मद्वाङ्मनसागोचरत्वात् स्वरूपेण निर्देष्टुं न शक्यते किन्तु कथञ्चित् प्रतियोगिमुखेनैवेति भावः । गोविन्ददर्शन इति सप्तमीनिर्देशस्तथापि तासां निमेषादिव्यवधाने पूर्ववद्विरहावस्थैव दर्शिता क्षणमिति नपुंसकत्वमार्षम् एवमयमासां भावप्रेमप्रणयमानरागानुरागमहाभावाख्यतया सप्तमकक्षामारूढाया रतेः परिपाकः श्रीमन्मदनुजवरैर्विरचितोज्ज्वलनीलमणाववलोकनीयः ।। १६ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकोनविंशोऽध्यायः ।। १९ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततः पानानन्तरञ्च पुनर्भाण्डीरमापिताः पूर्व्वस्थानास्थिता इवालक्षितं नीताः सन्तः श्रीभगवदुक्त्या स्वयमेव वा सपद्यक्षीणि उन्मील्य श्रीयमुनापश्चिमकुले श्रीवृन्दावनान्तः शिवालयतो वायव्यदिशि भाण्डीरो नाम वटो लोके प्रसिद्ध एव, तद्दक्षिणतश्च क्रोशपञ्चकं यावन्मुञ्जाटवी तावेवात्र ग्राह्यौ । तत्र श्रीपराशर-वैशम्पायनयोरपि सम्मतिर्लक्ष्यते, एकस्मिन्नेवाहनि तालवनभाण्डीरादिक्रीड़ोक्तेः; तथा 'मध्ये चास्य महाशाखोन्यग्रोधः' इत्यादि, श्रीहरिवंशे (विष्णु प. ८।३६) श्रीवृन्दावनमध्य एव भाण्डीरस्य वर्णनाच्च. अन्यथा तस्मिन्नेव दिने अनन्तानां गोपानां गवादीनाञ्च मुहुर्यमुनोत्तरणापत्तेः, सा चासम्भाव्यैवेति दिक् । ततश्च श्रीवाराहोक्तं लोके भाण्डहरेति ख्यातं भाण्डह्लदाख्यतीर्थमेव श्रीयमुनायाः पूर्व्वकूले ज्ञेयम्, श्रीवराहपुराणादिषु भाण्डीरस्य पारावरवर्त्तित्वानिर्द्धारणात्; अत्र लोकप्रसिद्धिरेव गतिरिति निशम्य अन्योन्यवार्त्तया श्रुत्वा दृष्ट्वेति वार्थः, निशाम्येत्येव वा पाठः ॥ १३ ॥ योगस्य ऐश्वर्य्यस्य वीर्य्यं प्रभावं माहात्म्यमित्यर्थः । तच्च मायिकमपि सम्भवेदित्याशंक्य तन्निरस्यति–योगमायया सच्चिदानन्द-शक्तिविशेषेणानुभावितं सम्पादितम्; अन्यथा सच्चिदानन्दविग्रहेषु तत्प्रियसखेषु तेषु मायाशक्तेरकिञ्चित्करत्वात् ।

योगवीर्य्यमेवाह–दावाग्नेरिति। क्षेममिति–श्रीकृष्णेन सह चिरं श्रीवृन्दावनादौ साक्षाद्विहारसिद्धेः। न विद्यते मरो मरणं यस्मात्तम्; एतदाश्रयेण कदाचिदपि विरहादिना न मरिष्याम इति भावः ॥ १४ ॥ सहरामो रामसहितो जनार्द्दन इति, व्रजजनैः सदा द्रष्टुं याच्यत इत्यभिप्रायेण वेणुं विशेषतो रणयन् वादयन् ॥ १५ ॥ गोपानां दावाग्निशमनमिव श्रीगोपीनां विरहाग्निमोचनमाह–गोपीनामिति। परमः पराकाष्ठां प्राप्तः, गोविन्दस्य गवामिन्द्रत्वेन गोगोपकुलवृतस्यापि, यद्वा, दावाग्नितो गोपगोकुलरक्षया साक्षात्प्रदर्शितगोकुलेन्द्रत्वस्य दर्शनादेव आसीदाविर्भूत इति; तद्दर्शनमात्रेणापि तासामानन्दविशेषः सम्पन्नः, सम्भाषणादिना च य आनन्दः स कथं निर्व्वाच्य इत्यर्थः। सप्तम्यन्तपाठे दर्शने सति विषये वा, तथापि स एवार्थः। विषय-सप्तमी-पक्षे तु दर्शनस्यैव परमानन्दात्मकताभिप्रेता स्यात्। तच्चौचितमेवेत्याह–क्षणमिति, नपुंसकत्वमार्षम्। इवेति क्षणस्य युगशतत्वाभावेऽपि केवलं विरहदुःखोत्कथनेन तासां तथा-भानात्, तन्निर्द्धारमेव गमयति–यासामल्पतरकालविरहेणेदृशं दुःखं स्यात्, तासां तत्किञ्चिद्दर्शनतोऽपि परमानन्दो घटत एवेत्यर्थः। महाग्निमोचनप्रसंगेऽत्रेदमुक्तम्, किन्तु नित्यमेवैवं बोद्धव्यम् ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्याम् एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

योगवीर्यं योगमायानुभावितमाश्चर्यशक्तियोगज्ञापितं विरणयन् नितरां रणयन् ॥ १५–१६ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततस्ते गोपाः लोचनान्युन्मील्य पुनर्भाण्डीरं प्रत्यागता आत्मानम् आत्मनः प्रत्येकाभिप्रायकमेकवचनं तथा मोचिताः गाश्चालोक्य विस्मिता आसन् ॥ १३ ॥ ततस्तस्य कृष्णस्य योगमाययाऽऽश्चर्यशक्तिरूपया अनुभावितास्तत् प्रभावविषयीकृताः तस्य कृष्णस्य योगात्मकं वीर्यं दवाग्नेरात्मनां क्षेमं च वीक्ष्य तं कृष्णममरं दैवतं मेनिरे ॥ १४ ॥ ततः सायाह्ने गाः सन्निपत्य सङ्घीकृत्य सरामः कृष्णो वेणुं विरणयन्वादयन् गोपैरभिष्टुतो गोष्ठं प्रागात् ॥ १५ ॥ तदा गोविन्दस्य दर्शनं गोपीनां यशोदादीनां परमानन्दकरमासीत् तत्र हेतुं वदन् दर्शनं विशिनष्टि–आसां गोपीनां येन श्रीकृष्णेन विना क्षणमपि युगशतमिव अभवत् अतस्तद्दर्शनं परमानन्दकरं बभूवेत्यर्थः ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

योगमायानुभावितं स्वरूपसामर्थ्येन प्रभावितम् अमरं जरामरणशून्यं नारायणं मेनिरे ॥१४॥ सायाह्ने सन्ध्याकाले ॥१५॥ यथा यावान्युगशतं कालः यासां गोपीनां येन गोविन्ददर्शनेन विना क्षणः कालस्तावानभवत् ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् एकोनविंशोऽध्यायः ॥ १९ ॥

[विजयध्वजरीत्या षोडशोऽध्यायः]

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तादृशैश्वर्यदर्शनेऽपि तेषां विशुद्धप्रेममैत्रीमतां तदाच्छादकमैश्वर्य्यज्ञानम् अर्जुनादीनामिव न बभूवेत्याह–कृष्णस्य योगमायाशक्त्या अनुभावितुं ज्ञापितयोगवीर्य्यम् "योगोऽपूर्वार्थसम्प्राप्तौ" इति विश्वकोशादपूर्वार्थसम्प्रापकं वीर्य्यं प्रभावं तत् आत्मक्षेमं वीक्ष्य तं कृष्णम् अमरं देवविशेषं मेनिरे नतु तदपि एषां स्वसम्बन्धस्य शैथिल्यगन्धोऽपि ज्ञेयो यतः खल्वयमस्माकं सखा मनुष्याशक्यकर्मणाद्देव एव न मानुषः इति ततश्चैतत्सखात्वाद्वयमपि देवा एवेत्यतुल्यत्वे सख्यासम्भवादित्यनुमायानन्दमत्तास्ते बभूवुरिति भावः ॥ १४ ॥ जनान् वनस्थस्थावरजङ्गमलोकान् स्वविरहं दित्सुः पीडयति व्रजस्थजनांस्तु स्वसंगम दित्सुस्तं याचयतीति सः ॥ १५ ॥ गोष्ठप्रवेशसमये व्रजस्थानां सर्वेषामेव तत्सङ्गमादानन्दे सत्यपि व्रजेश्वर्य्यादीनां परमवत्सलानामानन्दाधिक्यं चतुर्दशाध्याये बर्हप्रसूनेत्यादिना "गोपीदृगुत्सवदृशिः प्रविवेश गोष्ठम्" इति पद्येन वर्णितमेवात इदानीं प्रेयसीनां गोपीनामिति परमानन्द इति मुक्तप्रग्रहया वृत्या आनन्दजातिप्रमाणाभ्यामाधिक्यमात्यन्तिकमेव नत्वापेक्षिकं ज्ञेयम्, ननु, कास्ता गोप्यस्तदसाधारणलक्षणेन परिचाययेत्यत आह— क्षणमिति। क्लीबत्वमार्षं येन श्रीकृष्णेन विना युगशतमिवेति क्षणस्य युगशतायमानत्वं रतिप्रेमस्नेहमानप्रणयरागानुरागमहाभावानामुत्तरोत्तरप्रेमभूमिकानामन्तिमस्य महाभावस्य लक्षणमित्युज्ज्वलनीलमणौ दृष्टमतस्ता महाभाववत्यो वृषभानुनन्दिनीप्रभृतय एव ज्ञेयाः ॥ १६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। एकोनविंशो दशमे सङ्गतः सङ्गतः सताम् ॥ १९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ततो मीलिताक्षा एव क्षणमात्रेण भाण्डीरमापिता अक्षीण्युन्मील्य गाः मोचिताः आत्मानं च मोचितं निशाम्य विस्मिता आसन्नित्यन्वयः ।। १३–१६ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकोनविंशाऽध्यायार्थप्रकाशः ।। १९ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ततश्च हरिणा भाण्डीरमापितास्ते भो मित्राणि कृतो मया दावाग्नेः प्रतीकारो यूयमक्षीण्युन्मीलयतेति तेनोक्तास्तथा भूत्वा आत्मानं मोचितं गाश्च मोचिताः निशाम्य दृष्ट्वा विस्मिता आसन् अतकर्याऽस्मिन् कृष्णे अस्मत्सखे शक्तिरित्यनुभूय चित्रलिखिता इवाभवन्नित्यर्थः ।। १३ ।। तादृशं प्रभावं वीक्ष्यापि तेषां सख्यं स्थिरमेवाभूदित्याह–कृष्णस्येति । कृष्णस्य योगमायया अनुभावितं योगवीर्यमपूर्वार्थसम्प्रापकं प्रभावं ततो दावाग्नेरात्मनः क्षेमं च वीक्ष्य ते सखायः तममरं मेनिरे "योगो पूर्वार्थसम्प्राप्तौ" इति विश्वः । न विद्यते मरो मरणं यस्मादाश्रितानां तादृशमित्यर्थः । साक्षादीश्वरोऽयमस्मत्सखो भजतां भुक्तिहेतुरित्यमन्यन्तेत्यर्थः ।। १४–१५ ।। व्रज प्रवेशवेलायां सर्वेषामानन्दे सत्यपि वत्सलानामानन्दाधिक्यं "गोपीदृगुत्सवदृशि"रिति प्राग् वर्णितं अधुना प्रेयसीनां तदाह गोपीनामिति परमोऽतिशोभनो जात्या परिमाणेन च सर्वतोऽधिक इत्यर्थः । आनन्द आसीदभवत् ननु तासां परिचायकमसाधारणं लक्षणं ब्रूहिति चेत्तत्राह क्षणमिति क्लीबत्वमार्षं, येन नन्दसूनुना गोविन्देन विनेत्यर्थः । क्षणस्य युगशतायमानत्वं महाभावेनैव भवेत् तद्वतीनां श्रीमत्यादीनामित्यर्थः "कुटिलकुन्तलं श्रीमुखञ्च ते जड़ उदीक्ष्यतां पक्ष्मकृद्दृशा"मिति त्रुटियुगायते त्वामपश्यताम्" इति च तासामेव तादृशव्यावहारात् "यद्दर्शने दृशिषु पक्ष्मकृतं शपन्ती"ति श्रीमुनीन्द्रेणापि तां एवोद्दिश्य सर्वाधिकप्रेमप्रदर्शनायोक्तेश्च ।। १६ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्याम एकोनविंशोऽध्यायः ।। १९ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्र निमीलिताक्षाः पुनस्तदुन्मील्य विलोकमाना भाण्डीरं वटमाश्रिता आत्मानं मोचितं गाश्च मोचिता निशाम्य विस्मिता आसन् ।। १३ ।। तस्य योगवीर्यं योगसामर्थ्यं वीक्ष्य दवाग्नेरात्मनो गवां च क्षेमं वीक्ष्य तं कृष्णं योगमायानुभावितं योगमायायाः स्वरूपसामर्थ्यस्यानुभावोऽस्य सञ्जात इति स तथा तममरं श्रीनारायणं मेनिरे । उन्मील्य विस्मिता इति वाऽन्वयः ।। १४ ।। सायाह्ने सायंसमय आसन्ने ।। १५ ।। येन विना येषां क्षणम् । क्षणलिङ्गमशिष्यमिति भाष्यात् । यथा युगसतं तथाऽभवत् । विना विः पक्षिपरमात्मनोरिति तेन सहितानां यासां युगशतं यथा क्षणस्तथाऽभवदिति वाऽन्वयः ।। १६ ।। मोक्षं तद्रूपं गोपा एव स्त्रीभ्यः स्वस्वयोषिद्भ्यः समाचख्युरपृष्टाः स्वयमित्येवार्थः ।। १७ ।। रामकृष्णौ देवप्रवरौ मेनिरे । प्रेपरतोवलघुताद्वन्द्वेऽप्रथमोद्दिष्टस्य सावधिकप्रवरतां ध्वनयति । प्रह्वे इति पिङ्गलनागोक्तेः । तन्मुख्यं ज्ञानशब्दयोरितिवद्वा ज्ञेया ।। १८ ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे सप्तदशोऽध्यायः ।। १०–१७ ।।

श्रीसुबोधिनी

ततो भीताः पीतेऽप्यग्नौ निमीलिताक्षा एव स्थितास्ततो भगवतेतैवोन्मीलयतेत्युक्तास्तेक्षीण्युन्मील्य पुनरलौकिकेनैव प्रकारेण **भाण्डीरवनमापिताः** पुनर्गमने तेषां ज्ञानाभावादागतमार्गस्य विस्मृतत्वाज् ज्ञापकानां नूतनैर्नाशनादतिजिज्ञासायां विलम्बाच्च, अतो भगवतैव **भाण्डीरमापिताः**, निमीलिताक्षा एव समागता इतिविमर्शः, यतो भगवान् हरिः, अतो **निशम्य** ज्ञात्वा श्रुत्वा वा **विस्मिता आसन्**, **आत्मानं गाश्च मोचिता निशम्य**, **आत्मानं गा** इत्यवयुज्यानुवादः, चक्षुर्निमीलनेन पूर्वसर्वविस्मरणं, पश्चाद् भगवन्मुखाद् बलभद्रमुखाद् वा श्रवणं, तदाह **निशम्येति** ।। १३ ।। ततस्तेषां गताविद्यानां या बुद्धिर्जाता तामाह **कृष्णस्य योगवीर्यं** तदिति, **योगमाययानुभावितं**, विस्मारणपुनःस्मारणाभ्यां सहितं **तद्** भगवद्वीर्यमलौकिकमात्मनो दवाग्नेः सकाशात् **क्षेमं वीक्ष्य तं** भगवन्त**ममरं** मरणनिवर्तकं कालातीतं वा पुरुषोत्तमं **मेनिरे**, तेषां देवा एवोत्तमा इत्यनौपचारिकं देवत्वं वा **मेनिरे**, दावाग्निर्हि लब्धनाशकः, ततः परिपालनं क्षेमो भवत्येव ।। १४ ।। एव तान् सर्वथा निर्दुष्टान् कृत्वाग्रे निवर्त्यदोषाभावादत्रैव **प्रत्यापत्तिः** क्रियते **गाः सन्निवर्त्येति**, न हि भीतानामेव **गमनं** किन्तु यथासुखं **सायाह्न** एव, जनाविद्यानाशितेति **जनार्दनः**, न केवलं दोषं दूरीकृतवान् किन्त्विष्टमपि कृतवानित्याह **सहराम** इति, **वेणुं विरणयन्निति** सर्वसद्गुणोद्बोधनं, **गोष्ठमगादिति** स्थानस्य पवित्रता निरूपिता, **गोपैरभिष्टुत** इति गोष्ठसमागमनेपि तेषां माहात्म्यज्ञानं दृढमिति ज्ञापितम् ।। १५ ।। एवं वनगमने गोपानां सौख्यमुक्त्वा गोष्ठगमने गोपीनां सौख्यमाह **गोपीनामिति** **गोविन्ददर्शने** तेषामानन्दविभा-

वादज्ञाननिवृत्तिरर्थादेवोक्ता, प्रपञ्चविस्मृतिमाह **क्षणं युगशतमिवेति**, **यासां** गोपिकानां **येन** भगवता **विना क्षणं युगशतमिवाभवदेकस्मिन्** क्षणेनन्तवारमुत्पद्यन्ते म्रियन्ते चेति, एवमानिवृत्त्या संसाराभावो ज्ञापितः ॥ १६ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे षोडशाध्यायविवरणम् ॥ १६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

ततश्चेत्यत्र ननु भवतु दोषनिवृत्त्यर्थं पानं तथापि पुनर्भाण्डीरप्रापणस्य किं प्रयोजनमत आहुः **पुनरित्यादि**, **तथा च** हरित्वात् तथाकरणमित्यर्थः, **अवयुज्यानुवाद** इति स्वस्य गोत्वेपि गवांशं पृथक्कृत्यानुवाद इत्यर्थः ॥ १३ ॥ **गाः सन्निवर्त्येत्यत्रात्रेति** दिवसपञ्चमभाग एव, **सर्वसद्गुणोद्बोधनमिति सर्वासु सतः** सदंशस्य यो **गुणः** सात्त्विकः स्तम्भादिरूपस्तमुद्बोधयन् **यद्वा सतो** विद्यमानस्योद्बोधनं **स्ववियोगाभिभवनिवारणमित्यर्थः** ॥ १५ ॥ **गोपीनामित्यत्र** ननु पूर्वपञ्चाध्यायोक्ता लीला मुख्यलीलाङ्गभूतेति कारिकासूक्तं **तथा सति** यासु मुख्यलीला तास्वविद्यानिवृत्तिरवश्यमत्र वाच्या सा कुतो नोक्तेत्यत आहुरज्ञानेत्यादि, **तथा न** न्यूनतेत्यर्थः, अयं **ज्ञानाध्यायः** पूर्वमुक्त एव ॥ १६ ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाशे षोडशाध्यायविवरणम् ॥ १६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

उन्मील्येति अन्तर्भावितणिजर्थोयं **नेत्राण्युन्मीलन्ति** गोपा भगवांस्तैस्तान्युन्मीलयति, तथा चोन्मीलय्य भाण्डीरमापिता इत्यर्थः, **यतो** भगवानिति पूर्वं निमीलनोपदेशे हरिपदमुक्तं, विमर्शार्थं तत् स्मारयन्ति, दुःखाभावार्थं हि निमीलनोपदेशः, तत्रैवोन्मीलने दग्धवनदर्शने दुःखं स्यादेवेति भावः ॥ १३ ॥

इति षोडशोध्यायः ॥ १६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

वीक्ष्य तं मेनिरेमरमित्यस्य विवृतौ अमरं **मरणनिवर्तकमिति** न मरो मरणं यस्मात् स **अमर** इति व्युत्पत्त्या यस्माद्धेतोः अन्यस्य मरणं नास्तीतिफलितं, तदेतदुक्तं **मरणनिवर्तकमिति**, **कालातीतं वा पुरुषोत्तममिति** न मरो मरणं यस्येति "नैवेशितुं प्रभुर्भूम्न ईश्वरो धाममानिना"मिति वाक्यात् पुरुषोत्तमस्य कालातीतत्वमतस्तथेत्यर्थः ॥ १४ ॥ **क्षणं युगशतमिवेत्यस्य** व्याख्याने **एकक्षणे अनन्तवारमुत्पद्यन्ते म्रियन्ते** चेति 'मृत्युरत्यन्तविस्मृति'रिति वाक्यात् सर्वथा विस्मरणं मृत्युपदवाच्यं, पुनर्देहादिस्मृतिरुत्पत्तिः, तदेतासामत्युग्रविरहवशाद् भूयो भूयो जायते इति तथोक्तं, एकस्मिन् क्षणे अनन्तवारमुत्पत्तिमरणे देहस्मृतितदभावरूपे भगवद्विरहस्याचिन्त्यप्रभावात् भवत इति ज्ञातव्यं, तथा चानेकोत्पत्त्यनेकमरणाधिकरणत्वाद् भगवद्विरहक्षणस्य युगशतत्वं **युक्तमेवेति** भावः ॥ १६ ॥

इति षोडशोऽध्यायः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च ते गोपाः पुनर्भाण्डीरमापिताः अक्षीण्युन्मील्य आत्मानं प्रत्येकाभिप्रायेणैकवचनम्, गाश्च दावाग्नेर्मोचिताः निशाम्य दृष्ट्वा विस्मिता आसन्नित्यन्वयः ॥ १३ ॥ योगमायानुभावितं सम्पादितं तत् कृष्णस्य योगवीर्यमपूर्वं प्रभावं 'योगो पूर्वार्थसम्प्राप्तौ' इति विश्वप्रकाशात्। वीक्ष्य ते गोपास्तं श्रीकृष्णममरं मरणधर्मनिवर्तकं परमेश्वर मेनिरे इत्यन्वयः। 'किं तद्वीर्यम् ?, तत्राह–दावाग्नेः सकाशादात्मनः क्षेमं मोक्षणमिति ॥ १४ ॥ सहरामो रामेण सहितो गोपैरेवमभिष्टुतो जनार्दनः कृष्णः गाः सन्निवर्त्य सायाह्ने सायङ्काले वेणुं विरणयन् गोष्ठं व्रजमगादित्यन्वयः ॥ १५ ॥ यथा गोपानां दावाग्नितो मोचनपूर्वकं स्वप्राप्तिजपरमानन्दं ददौ, तथा गोपीनामपि विरहजाग्नितप्तानां तद्विमोचनपूर्वकं सायङ्काले तं नित्यमेव ददातीति सूचयन् तद्दिनवृत्तमाह–गोपीनामिति। गोविन्ददर्शने सति गोपीनां यशोदादीनां परमानन्द आसीत्। 'कीदृशमानन्दस्य परमत्वम् ?' इत्यपेक्षायाम् 'अस्मद्वाङ्मनसयोरगोचरत्वान्न साक्षान्निर्देष्टुं शक्यते' इति सूचयन् प्रतियोगिनिर्देशमुखेनाह–क्षणमिति। स्पष्टम् ॥ १६ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने। ऊनविंशो गतो वृत्तिं दावाग्निमोक्षबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

ततश्चेति ॥ ततश्च ते गोपाः पुनर्भाण्डीरमापिताः भगवदाज्ञया अक्षीण्युन्मील्य आत्मानं प्रत्येकाभिप्रायेणैकवचनम् । गाश्च दावाग्नेर्मोचिताः निशाम्य दृष्ट्वा विस्मिता आसन् । अयं भाण्डीरो मुञ्जाटव्याः क्रोशपञ्चके स्थितो ज्ञेयः ॥१३॥ कृष्णस्येति ॥ योगमाययाऽनुभावितं संपादितं दावाग्नेः आत्मनः क्षेमं क्षेमकरं क्षेमशब्दात्तत्करोतीति णिजन्तादच् । तत् कृष्णस्य योगवीर्यं वीक्ष्य ते गोपाः तं श्रीकृष्णममरं देवं मेनिरे ॥ १४ ॥ गा इति । सहरामो रामेण सहितो गोपैरेवमभिष्टुतो जनार्दनः कृष्णः गाः सन्निवर्त्य सायाह्ने सायंकाले वेणुं विरणयन् गोष्ठं व्रजमगात् ॥ १५ ॥ गोपीनामिति ॥ यासां गोपीनां येन श्रीकृष्णेन विना क्षणमपि । क्लैब्यमार्षम् । युगशतमिव अभवत् । तासां गोपीनां गोविन्ददर्शने सति परम आनन्द आसीत् ॥ १६ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो निरमाद्दशमस्योनविंशके ॥

इति श्रीमद्भागवते महापुराणे दशमेऽन्वितार्थप्रकाशिकायामेकोनविंशोऽध्यायः ॥ १९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ततो मोचनानंतरं पुनर्भांडीरं वटं प्रापिताः ते गोपाः अक्षीणि उन्मील्य मोचितं आत्मानं मोचिता गाश्च निशाम्य दृष्ट्वा विस्मिता आसन् स च भांडीरो मुंजाटव्या उत्तरतः क्रोशपंचके स्थितो ज्ञेयः ॥ १३ ॥ तेन श्रीकृष्णेन योगमायया योगः स्वेप्सितसंकल्पसिद्धिः स एव माया सामर्थ्यतयानुभावितं प्रकाशितं आत्मनः स्वस्य क्षेमं क्षेमकरं कृष्णस्य यत् योगवीर्यं योगो नित्यमैश्वर्यं स योगस्तस्य वीर्यं पराक्रमः तद्वीक्ष्य तं हरिं अमरं मेनिरे ॥ १४ ॥ सायाह्ने सायंकाले गाः सन्निवर्त्त्य प्रत्याहृत्य ॥ १५ ॥ यासां गोपीनां येन कृष्णेन विनाक्षणं पलदशकं युगशतमिव ॥ १६ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कंधव्याख्याने दावाऽग्निमोक्षो नामैकोनविंशोऽध्यायः ॥ १९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततश्च पुनः, भाण्डीरं आपिताः भगवद्योगशक्त्या पुनर्भाण्डीरं प्रापिताः सन्तः, ते गोपादयः, भगवदाज्ञयेति शेषः । अक्षीणि उन्मील्य, आत्मानमात्मन इत्यर्थः । गाश्च मोचिताः वनवह्नेर्भगवतैव सर्वे वयं विमोक्षं कारिताः इति, निशम्य बुद्ध्वा दृष्ट्वा वा, विस्मिताः आसन् ॥ १३ ॥ कृष्णस्येति ॥ तस्य श्रीकृष्णस्य योगमायाश्चर्यशक्तिस्तयाऽनुभावितं प्रकाशतां नीतं, कृष्णस्य योगवीर्यं, योगसामर्थ्यं दावाग्नेः आत्मनः क्षेमं च वीक्ष्य, ते गोपाः, श्रीकृष्णमिति शेषः । अमरं कंचिद्देवं, मेनिरे । केचित्तु तद्योगमायानुभाविता इति ते इत्यस्य विशेषणं कुर्वन्ति, तस्य श्रीकृष्णस्य योगमाययाश्चर्यशक्तिरूपयाऽनुभावितास्तत्प्रभावविषयीकृताः इति समासं च कुर्वन्ति ॥ १४ ॥ गा इति । ततः सहरामो रामेण सहितः, जनार्द्दनः कृष्णः, सायाह्ने संध्याकाले, गाः धेनूः, संनिवर्त्य प्रत्यावृत्य, वेणुं विरणयन्, गोपैः अभिष्टुतः संश्च, गोष्ठं अगात् आगमत् । पाठान्तरे संघीकृत्येत्यर्थः ॥ १५ ॥ गोपीनामिति ॥ यासां गोपीनां, येन श्रीकृष्णेन विना, क्षणमपि क्षणपरिमितः कालोऽपि, युगशतमिव युगशतप्रायः, अभवत् । तथाविधानां गोपीनां, गोविन्ददर्शने परमानन्दः, आसीत् । दर्शनमिति पाठान्तरे गोविन्ददर्शनं गोपीनां यशोदादीनां, परमानन्दः परमानन्दकरं, आसीत् ॥ १६ ॥

गोपानां हृष्यतां स्वाङ्गमारुह्य सुहृदां हरिः । वनाग्नेः पानतः स्वीयैश्वर्यमाविश्चकार सः ॥ १ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततश्चेति : १०.१९.१३.

दिग्भ्रान्तिभाजो विकटाध्ववर्तिनः पुंसः पुनः स्वास्थ्यकृदेकमेव यत् ।
प्रागीक्षितं वस्त्विति तानपीश्वरस्तदर्थमेवाऽनयदाद्यभूरुहम् ॥ ५१ ॥

मःक्ष्युत्तमोऽयमिति यो गुरुणा निरुक्तः शिष्यैः स एव समये सति माननीयः ।
साक्षीकृतं दितिसुतासुहृतौ बलेनेत्यागात्तमेव सगणोऽप्यपदानशंसी ॥ ५२ ॥
आगन्तुकानलजतापहृतिः कृतैषां स्वाभाविकर्तुंजनितोऽपि न चास्तु तापः ।
इत्यानयद्वटपदं स हितान् हितार्थी तस्मिन् स शैत्यगुणभागिति शास्त्रसिद्धम् ॥ ५३ ॥

गाः सन्निवर्त्येति ः १०.१९.१५.

सरलोत्तमवंशजस्य वाणी भवतीहोग्रभवाग्नितापहन्त्री।
श्रुतिसद्गुणशालिनीत्यबोधि प्रभुणा वादयता तदा स्ववेणुम् ॥ ५४ ॥
ज्वलदनलकीलजालप्रभूतनिखिलाङ्गतापशान्तिकृते। स्रवदतुलामृतसारं स युक्तमस्मिन्नवादयद् वेणुम् ॥ ५५ ॥
येषां कृपारसजुषा स्वदृशा दवाग्निर्नीतः प्रकाममुपशान्तिमिहाच्युतेन।
सानन्दवृत्तिरतुला किल गोकुलेऽपि सिद्धैव तेष्विति तदा विशदार्थमासीत् ॥ ५६ ॥

गोपीनामिति ः १०.१९.१६.

अतिलङ्घयन्ति युगशतमपि मुनयो यत्प्रसादवासनया। तच्छ्रीमच्छ्रीपतिमुखदर्शनतः सुखमसीम सिद्धमिदम् ॥ ५७ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने एकोनविंशोऽध्यायः ॥ १९ ॥

कृष्णप्रिया

इसके बाद जब ग्वालबालों ने अपनी अपनी आँखें खोलकर देखा, तब अपने को भाण्डीर वट के पास पाया, इस प्रकार अपने आप को और गौओं को दावानल से बचा देख वे ग्वालबाल बहुत ही विस्मित हुए ॥ १३ ॥ श्रीकृष्ण की इस योगसिद्धि तथा योगमाया के प्रभाव को एवं दावानल से अपनी रक्षा को देखकर उन्होंने यही समझा कि श्रीकृष्ण कोई देवता हैं ॥ १४ ॥ परीक्षित ! सायङ्काल होनेपर बलरामजी के साथ भगवान श्रीकृष्ण ने गौएँ लौटायीं और वंशी बजाते हुए उनके पीछे पीछे व्रज की यात्रा की उस समय ग्वालबाल उनकी स्तुति करते आ रहे थे ॥ १५ ॥ इधर व्रज में गोपियों को श्रीकृष्ण के बिना एक-एक क्षण सौ सौ युग के समान हो रहा था, जब भगवान श्रीकृष्ण लौटे तब उनका दर्शन करके वे परमानन्द में मग्न हो गयीं ॥ १६ ॥

इति श्रीमद्भागवत दशमस्कन्ध का उन्नीसवाँ अध्याय समाप्त ॥ १९ ॥

* * *

अथ विंशोऽध्यायः

श्लोकाः	अनु.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४९	४९	१	१५६८	६	३७	१६११	५०।	३

श्रीशुक उवाच

[1]तयोस्तदद्भुतं कर्म दावाग्नेर्मोक्षमात्मनः । गोपाः स्त्रीभ्यः समाचक्षुः[2] प्रलम्बवधमेव च ॥ १ ॥
गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः । मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ ॥ २ ॥
ततः प्रावर्तत प्रावृट् सर्वसत्त्वसमुद्भवा । विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ॥ ३ ॥
सान्द्रनीलाम्बुदैर्व्योम सविद्युत्स्तनयित्नुभिः । अस्पष्टज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ ॥ ४ ॥

कर्दमक्षमा

अन्वयः—गोपाः दावाग्नेः आत्मनः मोक्षम् तयोः अद्भुतम् तत् कर्म च एव प्रलम्बवधम् कर्म स्त्रीभ्यः समाचक्षुः ॥ १ ॥ गोपवृद्धाः च गोप्यः च जनाः तद् उपाकर्ण्य रामकृष्णौ व्रजंगतौ देवप्रवरौ मेनिरे ॥ २ ॥ ततः विद्योतमानपरिधिः विस्फूर्जितनभस्तला सर्वसत्वसमुद्भवा प्रावृट् प्रावर्तत ॥ ३ ॥ सविद्युत् स्तनयित्नुभिः सान्द्रनीलाम्बुदैः आच्छन्नम् व्योम, सगुणम् ब्रह्म इव बभौ ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विंशे प्रावृट्छरच्छोभावर्णनेन वनोचिताः ॥ प्रावृट्क्रीडा निरूप्यंते गोपरामयुजो हरेः ॥ १ ॥
हेयादेयोपमानेन प्रावृट्छरदृतुश्रियोः ॥ वर्णनं त्वद्भुतैश्वर्यकृष्णलीलाविवक्षया ॥ २ ॥

तत्र प्रावृड्वर्णनं तत इत्यादिद्वाविंशत्या । सर्वेषां प्राणिनां समुद्भव उत्पत्तितो जीवनतश्च यस्यां सा प्रावृट् । विद्योतमानाः परिधयः परिवेषा दिशो वा यस्यां सा । विस्फूर्जितं संक्षुभितं नभस्तलं यस्यां सा ॥ १ ॥ सांद्रैर्निबिडैर्नीलांबुदैर्विद्युद्गर्जितसहितैराच्छन्नम् । सगुणं गुणैराच्छन्नं जीवाख्यम् । विद्युद्गर्जितांबुदानां सत्त्वरजस्तमोभिरुपमा ॥ २ ॥ पर्जन्यः सूर्यः । स्वगोभिर्निजरश्मिभिः । काले यथोचितसमये । अत्र राजोपमा समये करादानतः समये पुनर्दानतश्च सूचिता ॥ ३ ॥ अस्य विश्वस्य प्रीणनमाप्यायनकरं जीवनमुदकं मुमुचुः कृपालवो यथा तप्तं जनं निरीक्ष्यानुकंपमानास्तदाप्यायनाय स्वजीवनमपि त्यजंति तद्वत् महांतो मेघास्तडिन्नेत्रैर्विश्वं तप्तं निरीक्ष्य वायुभिर्वेपिता जीवनं मुमुचुरिति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गोपरामैर्युज्यत इति गोपरामयुक् तस्य तथा (१) । हेयान्युपमानानि पाखंडादीनि, आदेयानि भक्ताचरितादीनि (२) । तत्र तयोर्द्वयोर्मध्ये । उत्पत्तितो दंशमशकचित्रितपृष्ठबहुपादादीनाम्, जीवनतो जीवनहेतुजलवृष्टेः । "सत्त्वं द्रव्ये प्राणिमात्रे सत्त्वं सत्तास्वभावयोः" इति यादवः । "परिधिः परिखाकाष्ठोपसूर्यशशिमंडले" इति धरणिः ॥ १ ॥ न स्पष्टानि दृश्यानि ज्योतींषि सूर्यादीनि यत्र तत् । गुणैर्गुणकार्यैरिंद्रियादिभिः । प्रकाशकत्वात्सत्त्वसाम्यं विद्युतः, अभिमान्येव गर्जत्यतोऽभिमानस्य रजःकार्यत्वात्तत्कार्यस्य गर्जनस्यापि रजस्त्वमेवेति, अंबुदानामाच्छादकत्वेन तमः साम्यमूह्यम् ॥ २ ॥ वर्षतीति पर्जन्यः 'पृषु–सेचने' पृषेः षस्य जोन्यप्रत्ययश्चौणादिकः । रविकरा एव मेघाकारेण परिणता वर्षंतीति निरूपितं हरिवंशे । 'आदित्याज्जायते वृष्टिः' इति मनूक्तेश्च । स्वगोभिः मेघाकारेण परिणतैः । अष्टौ मासानिति "कालाध्वनोरत्यंतसंयोगे" इति द्वितीया । वसु द्रव्यम् । उदमयम् जलरूपम् । अत्र स्वरूपे मयट् ॥ ३ ॥ आप्यायनकरम् तृप्तिकरम् "आप्यायनं पालने च समुद्रे वरुणे तथा । रवौ चंद्रे वारिजीवे पावने प्रियदर्शने ॥" इति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तयोः श्रीकृष्णरामयोर्दावाग्निमोक्षणरूपं प्रलम्बवधरूपं च यथा स्वं तत्कर्म सामयिकच्युतक्रमनिर्देशः प्राधान्यापेक्षया स्त्रीभ्यः स्वमात्रादिभ्यः असङ्कोचात् ता एव श्रावयितुमित्यर्थः । सम्यक् तत्तत् विशेषत आचख्युः ॥१॥ तत एव सर्वेषामपि श्रुतवतां

---

[1] इमौ द्वौ श्लोकौ १–२ पूर्वाऽध्यायान्ते वर्तते–विज. । [2] चख्युः–श्रीधर. वंशीं. वीर. विज. ।

भावमाह–गोपेति । सत्स्वपि युवसु गोपवृद्धा इति तेषामपि चमत्कारातिशयेन रसाधिक्यापेक्षया अतो गोप्योपि तादृश्यो ज्ञेयाः देवेषु प्रवरौ कावपि बन्धुजनोचितप्रेमाक्रान्तचित्ततया निश्चयाभावात् ॥ २ ॥ क्रमप्राप्तां श्रीभगवतः प्रावृट्शरत्क्रीडां वर्णयितुं श्रीवृन्दावनसम्बन्धेनात्यन्तमुल्लसन्ती तदुद्दीपनरूपां ग्रीष्मवत्त्वात्तदृतुश्रियमेवादौ वर्णयति—वर्णनालङ्कारायानुषङ्गिकत्वेन सतां हेयोपादेयतां च दर्शयति–तत इत्यादिना यावत्समाप्ति । तत्र तयोरारम्भादिक्रमेणैव वर्णनं ज्ञेयम् अन्यत्तैः तत्र दिश इति पक्षे वर्षारम्भे ईषद्वृष्ट्या मरीचिकाहिमधूल्याद्याच्छादनेन दूरतो दृष्टिप्रसरणात् विस्फूर्जितं गर्जितम् ॥ ३ ॥ अस्पष्टं ज्योतिश्चन्द्रसूर्यादिकं यत्र तादृशं सत् व्योम बभौ तद्द्वारा स्वप्रकाशान्तरं व्यञ्जयामास अस्पष्टज्योतिष्ट्वे हेतुः सान्द्रनीलाम्बुदैराच्छन्नमिति कीदृशैः तैः विद्युद्भिःस्तनयित्नुभिश्च सहितैः स्तनयित्नवोऽत्र कथञ्चिच्छब्दपरत्वाद्गर्जितमेवोच्यते किमिव बभौ तत्राह ब्रह्मेव जीवाख्यब्रह्मांश इव तच्च कीदृशं सगुणं सत्त्वरजस्तमोभिस्तत्कार्यैश्च आवृतस्वरूपज्योतिरित्यर्थः । सत्त्वादिस्थानीयांशास्त्वत्र यथायथं विवेचनीयाः ॥ ४ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तयोः श्रीरामकृष्णयोः प्रथक्त्वेन कृतमपि तयोरन्योन्यं साहाय्यादिनैक्याभिप्रायेणैकत्रैव निर्दिष्टम्, यद्वा दावाग्निमोक्षं कृष्णस्य प्रलम्बवधश्च रामस्येति क्रमेण विवेचनीयम् । अद्भुतमलौकिकत्वात्, स्त्रीभ्यः श्रीयशोदादिभ्य इति तासां स्नेहादिविशेषात्, चकाराच्छ्रीनन्दादिभ्यश्च सम्यक् तत्तद्विशेषत आचख्युः, अप्यर्थे एव शब्दः, प्रलम्बवधस्य श्रीबलदेवकृतत्वेन गौणतयाख्यानात्, अत एव पूर्ववृतस्यापि तस्य पश्चान्निर्द्देशः, यद्वा, दावाग्निमोक्षकर्मणो महत्त्वाद्विशेषतश्च ततः स्वरक्षणाद्वाख्यानम्, ततश्चैव शब्द उक्तसमुच्चये ज्ञेयः ॥ १ ॥ उप तयोः समीप एव, उपांशुत्वेन वा, आकर्ण्य देवेषु प्रवरौ परमश्रेष्ठौ श्रीविष्णुशिवौ व्रजं गतौ प्राप्तौ, जन्मामननश्चभक्तिविशेषोत्पत्त्या जीववज्जन्मानच बोधात्, किन्तु कृपया स्वयमेव साक्षाद्भूताविति, किन्तु निजबन्धुत्वादिना प्रेम्णा भजनीयावेवेति भावः । यद्वा, हे देव हे परीक्षित् ! व्रजं गतौ प्रवरौ व्रजजनश्रेष्ठतराविर्थः । यद्वा, देवप्रवराविव, अतोऽस्मान् सदा परिपालयिष्यत इति भावः । गोपेषु वृद्धाः श्रीनन्दोपनन्दादय इति युवभ्यो भगवतो बालोऽपि तारुण्य इव क्रीड़ारसाकृष्टस्तत्संगत्या वने विहर्त्तुं यास्तीति बोधयति । यद्वा, तरुणानां गोपानां गोपीनाञ्च रसविशेषयुक्तानां सदा भगवन्माहात्म्यविशेषपरिस्फूर्त्या विस्मयाद्यभावात्ते ताश्चात्र नोक्ताः, अतो वृद्धानां गोपानां साहचर्य्येण गोप्योऽपि वृद्धा एव ग्राह्याः । अत एव चकारद्वयं प्रियतमानां तन्माहात्म्यपरिस्फुर्त्यापि न प्रेम्णा हानिरथच वृद्धिरेवेति पूर्वमुद्दिष्टमेव ॥ २ ॥ क्रमप्राप्तां श्रीभगवतः प्रावृट्शरत्क्रीडां वक्तुं श्रीवृन्दावनस्य प्रावृट्शरदोः शोभा विशेषाविर्भावेन तयोः श्रीभगवतोः क्रीड़ाविशेषापेक्षया ते वर्णयति—तत इत्यादिना यावत्समाप्ति तत्र तयोरारम्भादन्तावधि क्रमेणैव वर्णनं ज्ञेयम् । विशेषेण द्योतमानाः प्रकाशमानाः परिधयो दिशो यस्याम्, वर्षारम्भे उद्यद्भिर्मेघैः सूर्य्याच्छादनेन दूरतो दृष्टिप्रसरणात्, किञ्च, विस्फूर्ज्जितं सूर्य्यतेजः क्षोमहान्या परिस्फुरितं नभस्थलं यस्याम्, यद्वा, विशब्दौ विहीनार्थौ, वर्षारम्भे वायुवेगप्रवृत्त्या धूलिप्रसरतोऽप्रकाशमाना दिशो यस्यामित्यर्थः, तथा विस्फुर्ज्जितं धूलिभिः संक्षुभितं नभस्स्थलं यस्यामिति ॥ ३ ॥ सान्द्रनीलाम्बुदैराच्छन्नम्, अतोऽस्पष्टं ज्योतिः सहजप्रकाशः सूर्यतेजो वा यस्मिन् । अन्यत्तैर्व्याख्यातम् तत्रास्पष्टज्योतिष्ट्वादिना जीवाख्यमिति, ततश्च नीलाम्बुदादिसदृशैस्तामसादिकर्म्मभिराच्छन्नम् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विद्योतमानपरिधिः विद्युद्भिर्द्योतमानपरिधिः विस्फूर्जिता नभस्तला च ॥ ३ ॥ अस्पष्टत्वहेतुमाह–आच्छन्नं प्रकृत्या तिरोहितं ज्योतिः ज्ञान रूपं ब्रह्मेव ॥ ४–६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं वसन्तग्रीष्मयोर्भगवतः क्रीडा अनुवर्णिताः अथ प्रावृट्शरदोस्ता अनुवर्णयितुं दृष्टान्तैस्तैस्तावद्धेयोपादेयविभागं प्रदर्शयन्नेव प्रावृडृतुं तात्कालिकान् कांश्चिद्विहारांश्चानुवर्णयति विंशेनाध्यायेन–तावत्प्रथमं भगवत्क्रीडावृत्तशेषमाह–तयोरिति द्वाभ्याम् । आत्मनः आत्मनां दवाग्नेर्मोक्षणात्मकं तद्रामकृष्णयोरद्भुतं कर्म प्रलम्बवधञ्च गोपाः स्त्रीभ्यो यशोदादिभ्यः कथयामासुः ॥ १ ॥ तद्गोपबालैरुक्तमाकर्ण्य विस्मिताः गोपवृद्धा नन्दादयः गोप्यश्च रामकृष्णौ व्रजं गतौ देवश्रेष्ठौ मेनिरे देवश्रेष्ठावेव रामकृष्णरूपेण व्रजे जातावित्यमन्यन्तेत्यर्थः ॥ २ ॥ ततः प्रावृट् वर्षर्त्तुं तं प्रावृषं विशिनष्टि–सर्वेषां प्राणिनां समुद्भव उत्पत्तितो जीवनतश्च यस्यां विद्योतमानाः विद्युद्भिर्द्योतमानाः परिधयो दिशो यस्यां विस्फूर्जितं वज्रनिर्घुष्टं नभस्तलं यस्यां सा प्रावृट् प्रावर्त्ततेत्यन्वयः ॥ ३ ॥ सान्द्रैरिति । सान्द्रैर्निविडैर्नीलाम्बुदैर्विद्युद्गर्जितसहितैराच्छन्नम् अत एवास्पृष्टानि ज्योतींषि सूर्यचन्द्रादीनि यस्मिंस्तद्व्योम सगुणं ब्रह्मेव बभौ, यथा प्रकृत्या तिरोहितं ज्योतिर्ज्ञानरूपत्वाद्विषयप्रकाशकधर्मभूतज्ञानं यस्य तत् सगुणं ब्रह्म गुणत्रयवश्यं ब्रह्म गुणतो बृहत्त्वार्हं जीवस्वरूपं भाति तद्वदित्यर्थः । अनेनाकाशस्य यावच्छरदं नीलाम्बुदविद्युत्स्तनयित्नुसम्बन्धवज्जीवस्य यावन्मुक्तिगुणवश्यत्वं सूर्यादिज्योतिस्स्थानीयधर्मभूतस्य सङ्कोचेन प्रसराभावः व्योमवत्स्वतो निर्मलस्यागन्तुकमालिन्यं चेति तदपनोदकमोक्षोपाये यतितव्यमित्यभिप्रेतं ब्रह्मशब्देन मुक्तिदशायां ज्ञानद्वारा बृहत्वमस्तीति सूचितम् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किं तत्कर्मेति तत्राह—दावाग्नेरिति । चशब्दः समुच्चये दावाग्निमोक्षं प्रलम्बवधं चेति द्वयमेवेत्यर्थः ॥ १ ॥ एकश्चशब्दः समाहारे "चोन्वाचये समाहारः" इति यादवः व्रजं गतौ कृष्णरामौ देवप्रवरौ मेनिरे इत्यन्वयः ॥ २ ॥ नारायणभक्तिवैशद्यावैशद्यदृष्टान्तत्वेन प्रावृड्तुं वर्णयत्वस्मिन्नध्याये ततः ग्रीष्मर्त्वनन्तरं सर्वेषां सत्त्वानां स्थावरजङ्गमलक्षणानां पदार्थानां समुद्भवो यस्यां सा तथा "सत्त्वं द्रव्ये सत्ता स्वभावयोः" इति यादवः विद्योतमानाः तडिदन्तरे प्रकाशमानाः परिधयः परिवेषा यस्यां सा तथा विस्फूर्जितम् अशनिगर्जनोपेतं नभस्तलं यस्याम् एवंविधा प्रावृट् प्रावर्त्तत इत्यन्वयः ॥ ३ ॥ प्रावृड्गुणान्तरं दर्शयति—सान्द्रेति । जलेन सान्द्रनीलाम्बुदैराच्छन्नं व्योम नभो बभौ विद्युता स्तनयित्नुना गर्जितेन सहितैः अत एवास्पष्टसूर्यज्योतिः "परायणं ज्योतिरेकं तपन्तम्" इति श्रुतिः । कथमिव सगुणं चतुर्मुखाख्यं ब्रह्मेव ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विस्फूर्जितं गर्ज्जितम् ॥ १–४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उपमानेन वस्तूनामुपादेयत्वहेयत्वे । विंशे प्रावृट्शरच्छोभा वर्णनेऽद्योतयन्मुनिः ॥

देवप्रवराविति प्रेमप्राबल्येन स्वसम्बन्धस्य दाढ्र्यात् पूर्ववन्माधुर्य्यस्यैव पोषणं नत्वेषामैश्वर्य्यज्ञानं ज्ञेयं तत् कार्य्यस्य स्वसम्बन्धशैथिल्यस्य तत्संयोगे कुत्राप्यश्रवणात् ॥ २ ॥ ततो ग्रीष्मानन्तरं सर्वेषां सत्त्वानां प्राणिनां समुद्भव उत्पत्तितो जीवनतश्च यस्यां सा प्रावृट् वर्षा परिधिश्चन्द्रार्कयोर्मण्डलं विस्फूर्जितं गर्जितं तद्युक्तं नभस्तलं यस्यां सा ॥३॥ सान्द्रैर्निबिडैर्नीलाम्बार्दैर्विद्युद्गर्जितसहितैराच्छन्नमाच्छन्नत्वेन प्रतीतं सगुणं ब्रह्मसमष्टिविराडात्मा विद्युद्गर्जिताम्बूदानां सत्त्वरजस्तमोभिरुपमा अत्र व्योम्नो निर्लेपत्वेन वस्तुतस्त्वनाच्छन्नत्वेनाम्बुदाद्यधिष्ठानमात्रत्वाद्ब्रह्मणा सहोपमेयं योगिभिः स्वीयोपास्यदृष्ट्या उपादेया ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विंशे गोपगोपीभ्यः प्रलम्बवधादिप्रभुकर्मनिवेदनं प्रावृट् शरच्छोभा सखस्य हरेः प्रावृट् क्रीडा च निरूप्यते—तयोः इति ॥ १–२ ॥ सर्वेषां सत्त्वानां सम्यगुद्भवः उत्पत्तितो जीवनतश्च यस्मात् विद्योतमानाः परिधयः दिशो यस्याम् विस्फूर्जितं संक्षुभितं नभस्तलं यस्यां सा ॥ ३ ॥ तदानीं सान्द्रैर्निबिडैर्विद्युद्गर्जितसहितैर्नीलाम्बुदैराच्छन्नं व्योम सगुणं गुणवश्यं ब्रह्म बृहद्ज्ञानगुणं जीवतत्त्वमिव अस्पष्टज्योतिः आभाति यथा वृतज्ञानो जीवस्तथावृतसूर्यादिज्योतिराकाशो बभावित्यर्थः । विद्युद्गर्जिताम्बुदानां सत्त्वादिभिरुपमा ॥ ४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

उपादेयत्वहेयत्वे वस्तूनामुपमानतः । बोधयन् विंशके ब्रूते प्रावृट्शरदृतुश्रियम् ॥

गोपास्तस्य सखायः स्त्रीभ्यः स्वस्वमातृभ्यः ॥ १ ॥ गोपाश्च तासां श्वश्रूः देवप्रवरौ निखिलदेवश्रेष्ठौ साक्षात् प्रभुं मेनिरे न च तत्र वात्सल्यशैथिल्यं किन्तु तत्पुष्टिरेव स्वात्मजे निखिलक्षितीशे सति तन्मात्रादीनां तत्र वात्सल्यपुष्टेरेव प्रतीतेरित्युक्तम् ॥२॥ तत्र तावद् वर्षावर्णनं द्वाविंशत्या, ततो ग्रीष्मानन्तरं प्रावृट् वर्षा प्रावर्त्तत सर्वेषां सत्त्वानां प्राणिनां समुद्भव उत्पत्तितो जीवनश्च वृद्धिर्यस्यां सा परिधिश्चन्द्रार्कयोर्मण्डलं विस्फूर्जितं संक्षुमितं नभस्तलं वियद्यस्यां सा ॥ ३ ॥ विद्युद्गर्जितसहितैः सान्द्रैर्नीलाम्बुदैराच्छन्नं व्योम वभौ अस्पष्टानि ज्योतींषि यत्र तत् सगुणं ब्रह्मेव समष्टिजीवचैतन्यमिवेति विद्युद्गर्जिताम्बुदानां सत्त्वरजस्तमोभिरुपमा हिरण्यगर्भोपासकैरुपादेया अम्बुदादिभिर्व्योम्न इव गुणैर्हिरण्यगर्भस्यालेप इति तद्भावः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ व्यासोच्छिष्टमिदं जगदित्यादेरेतदध्याये वैदिकावैदिकनिदर्शनप्रदर्शनेन प्रावृट्ऋतुवर्णनोपदेशेन कवीनां सरससरणीं करुणातो दर्शयति व्यास इति शुको वक्ति ॥ श्रीशुक इति । ततो ग्रीष्मर्तुगमनानन्तरं सर्वसत्त्वानां नानाविधस्थावरजङ्गमानां समुद्भव उत्पत्तिर्यस्यां सा विद्योतमानाः प्रकाशमानाः परिधयः परिवेषा यस्यां सा विशेषेण स्फूर्जितमशनिध्वनिर्यस्मिन्स्मस्तनभस्स्थलं यस्यां सा प्रावृट् वर्षर्तुः प्रावर्तत ॥ १ ॥ सविद्युत्स्तनयित्नुभिः । अत्र विद्युतश्च स्तनयित्नुः शब्दश्च तत्सहितैः । स्तेनयित्नुः पयोवाहे तद्ध्वनाविति विश्वः । सान्द्रा जलेन नीलाम्बुदा नीलमेघास्तैराच्छन्नं नभोऽत एवास्पष्टं ज्योतिर्यस्मिन्सूर्यादिस्तत्सत् । सूर्यो ज्योतिरुत्तरमित्यादेः । व्योम सगुणं ब्रह्म नारायणाख्यं दुर्मदजलदैराच्छन्नस्पष्टज्योतिरनाभिव्यञ्जितत्वज्ञानं तथा बभौ । कार्यब्रह्म चतुर्मुखाख्यमिति वेति पूर्वे । हरिस्तु निर्गुणं ब्रह्म श्रीब्रह्म सगुणं स्मृतेति तृतीयतात्पर्योक्ते रमा च ॥ २ ॥ यद्भूम्यास्तद्गतमुदयम् ।

स्वतन्त्रोऽयमुदकवाच्युदशब्दः । तदात्मकं वसु धनं स्वगोभिरार्जनविसर्जनकरणमित्युभयान्वयि । स्वगोभिः स्वकिरणैरष्टौ मासान्निपीतम् कालाध्वनोरत्यन्तसंयोग इति द्वितीया । पर्जन्यः परस्य सस्यादेर्जननाद्यथायोग्यतममत्र सूर्यः । काल आगते सति तद्वस्तु मोक्तुमारेभे आरब्धवान् । आदित्याज्जायते वृष्टिरित्यादेः । अत्र पर्जन्यः परैः शत्रुभिर्जन्यं युद्धं येन सोऽथवा परे जन्योत्तरत्रोत्पत्स्यमाना येन सः । अनेनेदानीं मृधे मारिता येनेति यावत् काले ज्ञानवत्यागते सत्यष्टौ मासान्निपीतं नाम सङ्गृहीतं वसु धनं मोक्तुं दातुं यथाऽऽरभते तथेति शत्रुजिद्राजातिदर्शनमत्रेति ज्ञेयम् । पूर्वत्रोत्तरत्र च निदर्शनप्रदर्शनानुगुण्यात् । अन्यथा ततः प्रावर्तत प्रावृडित्यनेनैवाष्टौ मासान्निपीतमित्यनेन च काललाभात्काल आगत इत्यवक्तव्यं स्यात् । वसुशब्दस्वारस्याच्च । जननात्परसस्यादेः पर्जन्यो मेघसन्ततिरिति गीतातात्पर्योक्तेः । पृषोदरादित्वाद्रेफाकारलोपः । पर्जन्य इत्युणादिनिपातितः । पर्जन्य इवेन्द्र इवेति वा रवेर्वासवनिदर्शनमिति वा । पर्जन्यो वासवे गर्जदभ्रे जीमूतनिःस्वन इति शब्दरत्नाकरोक्तेरुक्तेः पर्जन्यो मेघनिर्घोषे वासवे गर्जदम्बुद इति नानार्थरत्नमालायां च । पर्जन्यो मेघशब्दे स्याद्ध्वनदम्बुदशक्रयोरिति विश्वः ।। ३ ।। तटित्वन्तस्तटितो येषां सन्तीति सौदामिनीयुक्ततामात्रबोधकः । झञ् इति मो यत्वं तसाविति भसंज्ञेति न जश्त्वम् । चण्डश्वसनेन वेपिताः कम्पिता महामेघाः प्राणिनामम्बु मुमुक्षुः । करुणाः करुणयन्तीति करुणाः कृपावन्तः प्राणिनां कृच्छ्रजीविनां जीवनं जोवयन्तीति जीवनं ज्ञानमिव पर्जन्य इवेति वा सोऽपि दातोदकस्य करुणा अम्बु भक्तिमिवेत्यम्बुवदग्रहणादिति व्याख्यायां तत्त्वप्रदीपकाख्यायां स्नेहात्मकत्वादम्बुदस्तेन मानसं स्नेहं लक्षयतीत्युक्तेरम्बुपदं स्नेहपदलक्षकं तेन च भक्तिर्लभ्यते मानसिकस्नेहरूपिणीति युक्तमम्बुदपदेन भक्तिग्रहणम् । जीवनं भुवनं वनमित्युक्तेरेतत्पक्षे जीवनमुदकम् ।। ४ ।।

श्रीसुबोधिनी

लीला सप्तदशेध्याये निरुद्धैः सहितोच्यते । वर्षाशरत्कालयोगात् सर्वतत्त्वं निरूप्यते ।। १ ।।
दोषापगमन एव सर्वतत्त्वस्य बोधनम् । ज्ञाते च तत्त्वे सक्रीडा प्राजापत्ये निरूप्यते ।। २ ।।
माहात्म्यज्ञानपूर्वस्तु स्नेहः कृष्णे हि युज्यते । तादृशैश्च मुदा क्रीडा तच्चाप्यत्र निरूप्यते ।। ३ ।।

पूर्वाध्याये गोष्ठे समागता इत्युक्तं, ततः पूर्वापेक्षया यो विशेषः स वक्तव्यः, तमाह द्वाभ्यां, **तयोरिति** रामकृष्णयोः प्रलम्ववधाग्निविमोचनलक्षण**मद्भुतं** सर्वलोकोत्तममश्रुतमदृष्टं च **कर्म स्त्रीभ्यः समाचक्षुः**, तत् कर्म निर्दिशति, **दवाग्नेरात्ममोक्षः प्रलम्बस्य च वधः**, यथा यथा माहात्म्यं भगवतो ज्ञायते तथा तथा शान्ततया कथ्यत इति **गोपालाः** शनैः स्वगृहे समागत्य **स्त्रीभ्य** एवोक्तवन्तः, तासामपि सर्वथा भगवत्परत्वाय, तथा सति तत्सङ्गदोषो न भवेदिति तेषां विमर्शः, प्रसङ्गाद् वृद्धानामपि श्रवणम् ।। १ ।। ततः सर्व एव गोकुलवासिनो भगवन्माहात्म्यं ज्ञातवन्त इत्याह **गोपवृद्धाश्चेति** चकारादतिमूढा बालाश्च गोप्यश्चकारादन्याः सर्वास्तदुपाकर्ण्य भगवन्माहात्म्यं श्रुत्वा **विस्मिता** जाताः, तस्मिन् कर्मणि श्रुते भगवति यज् ज्ञानं जातं तदाह **मेनिरे देवप्रवराविति, देवानामपि** प्रकृष्टा **वरा** वरणीया **देवानां** मध्ये **प्रकृष्टा** इन्द्रादयस्तेषामपि **वरणीयौ** पुरुषोत्तमरूपावनुचारादित्येतदर्थं **कृष्णरामाविति**नामग्रहणं, दृष्टानुपपत्ति परिहरति **व्रजं गताविति, व्रजं** समागतौ यथा महाराजः कदाचित् क्वचिद् गच्छत्येवं भगवानपि व्रजमागत इति ।। २ ।। एवं तेषां ज्ञानानन्तरं भगवत्क्रीडार्थं प्रावृट् समागतेत्याह **तत** इति द्वाविंशत्या, आदौ स्वयं **प्रावृट्** समागता, ननु प्रावृष्यागतायां का भगवल्लीला भविष्यतीत्याशङ्क्याह **सर्वसत्त्वसमुद्भवेति, सर्वे**षामेव सत्त्वानां **सम्यगुद्भवो** यत्रेति, सर्वजीवेष्वेव हि भगवत्क्रीडा तदर्थं वा सर्वसत्त्वगुणोद्बोधाद् वा, तदा भगवान् सत्त्वेन सात्त्विकैः सह क्रीडिष्यतीति कार्यतस्तस्या भगवत्क्रीडौपयिकत्वमुक्त्वा स्वरूपतोपि क्रीडौपयिकत्वमाह **विद्योतमानाः परिधयो** यत्रेति, **परिधयः** परितो वेष्टनदिशस्ताः सर्वा एवान्यदाप्रकाशमाना अपि वर्षास्वागतास्वेव **विद्योतमाना** विशेषेण प्रकाशमाना भवन्ति, **विस्फूर्जितं नभस्तलं** च भवति, अनेन भगवत इयं सम्भृतिरूपा निरूपिता यस्यामागतायामुपयर्धः सर्वतश्च सर्वे गुणा उद्बुद्धा भवन्तीति यथा महाराजसम्भृतौ समागतायां सर्वो ग्राम उद्बुद्धो भवति, भूमेगुणाः सर्वे जीवा दिशो विद्युद् गर्जितान्याकाशस्य, एतान्येव तम सत्त्वरजांस्यपि ।। ३ ।। तस्यामागतायां सर्वा भगवच्छक्तयः क्रीडौपयिक्यः समागता इति ज्ञापयितुं दिव्यानेकाविंशतिधर्मानाह **सान्द्रे**त्यादितावद्भिः श्लोकैः, "एकविंशो वा इतः स्वर्गो लोक" इतिश्रुते "रेकविंशतिर्वै देवलोका" इति च एतेष्वेव सर्वप्रतिष्ठा "द्वादश मासा पञ्चर्तवस्त्रय इमे लोका आसावादित्य एकविंश" इति च, तत्र प्रथममादित्यवत् प्रकाशमानं **सगुणं ब्रह्म** दृष्टान्तेन प्रावृट् स्पष्टयतीति प्रावृट्कृतं ब्रह्मदृष्टान्तमाह **सान्द्रे**ति, "आकाशशरीरं ब्रह्मे"तिश्रुतावाकाशस्य शरीरत्वं निरूप्यते । तत् प्रसिद्धकृष्णस्वरूपतुल्यं न भवतीति श्रुतिबाधायां प्रावृट्कालेन तत्समर्थनं क्रियते, सत्यमियं श्रुतिराकाशोभगवद्रूपतुल्य इति, तत् **लोकाः प्रत्यक्षविरुद्धं नाङ्गीकुर्वन्तीति** विद्यमानानेव गुणान् समयान्तरे गुणान् प्रकटीकरोति, तान् गुणानाह **सान्द्राश्चिक्कणाः किर्मीरिता ये नीलाम्बुदाः** सजलजलदा अवयवप्रायास्तैः **सहितं व्योम**, तथापि न शरीरतुल्यत्वं वर्णमात्रेणैव साम्यादिति विशेषमाह **सविद्युत्स्तनयित्नुभिरिति, विद्युत्** पीताम्बरस्थानीया आभरणस्थानीया च, नानाभूषणगीतवेणुनादादिरूपशब्दसिद्ध्यर्थं **स्तनयित्नु**सहिताः, गर्जितानि नानाविधानि भवन्ति तेना"काशशरीरं ब्रह्म" भवति, ननु शरीरं ह्यन्तस्तेजोमयं बहिराच्छन्नतेजो भवति यथा भगवाँल्लोकव्यामोहनार्थं जात इव दृश्यते तदभावात् कथमाकाशस्य भगवद्रूपतुल्यतेत्याशङ्क्याह-

स्पष्टज्योतिरिति, न स्पष्टानि ज्योतींषि सूर्यादीनि यत्र, तथाप्यनेकविधवस्त्रगृहगोपिकाभिर्वेष्टितो भगवान् भवति तदभावात् कथं तुल्यतेत्याशङ्क्याहाच्छन्नमिति, तदप्यवान्तरमेघैराच्छन्नं भवति, अतः **सगुण**मनन्तगुणपरिपूर्णं **ब्रह्म** भगवद्रूपं यथा तथा **व्योम बभौ,** अतः श्रुतिः प्रमाणमितिभावः, सत्त्वरजस्तमोगुणपक्षेप्याकाशेप्यभ्रमतःप्रकाशा भवन्ति भगवत्यपि लोकव्यामोहनं गोपिकालीला प्रवोधनञ्चेति ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सप्तदशाध्यायार्थकथनं, **लीला सप्तदशेध्याय** इत्यादिना । ननु सर्वा लीला निरुद्धभक्तसहितेत्यत्र को विशेष इति चेत् । उच्यते । प्रलम्बवधदवाग्निमोचनाभ्यां वयस्यानां तदुक्ततच्छ्रवणेन व्रजस्थानां च पूर्वस्माद्विशिष्टा भगवदासक्तिरेव विशेष इति । अपरञ्च । निरुद्धभक्तसाहित्यं प्रभोरनुक्त्वा लीलाया यदुक्तं तेन दिवा स्वामिनीनामिव रात्रौ वयस्यानामाधुनिक्याप्यासक्त्या मिथो भगवल्लीलागानेन तद्भावापत्तिरेव जाता । एवं सति प्रभुर्यां यां लीलां करोति, सा सा गोपानां हृदये तिष्ठतीति ज्ञाप्यते । **सर्वतत्त्वमि**ति । लीलामध्यपातिनां सर्वेषामित्यर्थः । नन्वितः पूर्वमपि तयोर्भूतत्वादस्माद् ग्रीष्मात्पूर्वमेवैतयोः कथं न निरूपणं, तत्राहुः **दोषापगमन** इति । **सत्क्रीडे**ति । मारणार्थमपि दैत्यासम्बन्धिनीत्वात्केबलानन्दरूपत्वमेव **क्रीडायाः** सत्त्वम् । **प्राजापत्य** इति । 'यो वै सप्तदशं प्रजापतिं यज्ञमन्वायत्तं वेदे'तिश्रुतौ यज्ञात्मकप्रजापतेः सप्तदशत्वमुक्तमिति तत्समानसंख्याकेध्याय इत्यर्थः । **तत्संगदोषो न भवेदि**ति । गोपालानां प्रभावत्यासक्त्या रात्रावपि निरन्तरं गुणगान एव क्रियमाणे मात्रादयः स्नेहाज्जागरणस्य दुःखत्वं ज्ञात्वा कदाचिन्निवारयेयुस्तासां प्रभावनासक्तिश्चेत्स्यात् । एतल्लीलाद्वयश्रवणेन माहात्म्यज्ञानपूर्वकः सुदृढस्नेहो जातस्तासामपीति तासामप्येतदेव रोचत इति न प्रतिबन्धकत्वं स्यादित्यर्थः ॥ १ ॥ **सर्वसत्त्वगुणोद्बोधाद्वे**ति । अप्राकृते भगवद्धर्मात्मके सत्त्वे यथा भगवदाविर्भावोंशावतारे तथा सच्चिदानन्दात्मकतल्लीलाया अपि तत्रैवाविर्भावः । एवं सति सर्वेषां लीलापदार्थानां सम्बन्धी यः सत्त्वगुणस्तस्याविर्भावे यदधिष्ठेयानामपि तत्राविर्भावाल्लीला सम्यक् सम्पद्यत इति कार्यतो लीलोपयोगित्वं प्रावृषः । सत्त्वव्यवधानेन जीवानां साक्षात्प्रभुसम्बन्धाभावमाशङ्क्याहुः **तदा भगवानि**ति । धर्मेण साक्षाद्धर्मिभिरपि क्रीडिष्यतीत्यर्थः । **एतान्येवे**ति । अप्राकृतानि भगवद्धर्मरूपाणीति ज्ञेयम् ॥ ३ ॥ **दिव्यानि**ति । अस्याः पूर्वं संभृतिरूपत्वमुक्तम् । सा न लौकिकी, किन्तु लोकेप्यलौकिको यः स्वर्गो लोकस्ततोप्यलौकिकी सच्चिदानन्दरूपत्वादिति ज्ञापयितुं स्वर्लोकं ज्ञापयितुं स्वर्लोकसमसंख्यैः श्लोकैरुच्यत इत्यर्थः । तेनेतरलीलातोपि वैलक्षण्यमायाति । **सान्द्रे**त्यादि श्लोकसंख्यातात्पर्योक्तौ, **एकविंशो** वा इत इत्यारभ्य **एकविंश** इति चेत्यन्तम् । यथास्माल्लोकाद्विलक्षणः सुखरूपो वेदैकसमधिगम्योऽत एव अलौकिकश्च स तथा अयमपीति ज्ञापनाय तत्संख्यासमानसंख्याकैः श्लोकैरुच्यत इति भावः ॥ ४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

सप्तदशाध्यायतात्पर्यं निरूपयन्तोत्र विशेषरूपां प्रकरणसङ्गतिं बोधयन्ति **लीले**त्यादि, ननु विशेषरूपा सङ्गतिः कथमवगन्तव्येत्याकाङ्क्षायां **टिप्पण्यां** स्फुटीकुर्वन्ति **नन्वि**त्यादि, **अत्रे**ति पुनः प्रतिज्ञायां, लीलाया भक्तसाहित्यं व्युत्पादयन्त्य**परं** चेत्यादि, **तद्भावापत्तिरि**ति स्वामिनीभावापत्तिः तदेव स्फुटीकुर्वन्त्य**ेवमि**त्यादि, एवमत्र स्कन्धार्थसङ्गतिरूपं विशेषद्वयमुक्तं, ननु लीलैव चेन् निरूप्या तर्हि तावन्मात्रमस्तु वर्षादिवर्णनस्य किं प्रयोजनमत आहु**र्वर्षे**त्यादि, तथा च सर्वतत्त्वनिरूपणार्थं तद्वर्णनमित्यर्थः, किं सर्वतत्त्वमित्याकाङ्क्षायां **तदर्थं टिप्पण्यामा**हु**र्लीले**त्यादि, **सर्वेषा**मित्यृतुवर्णन उक्तानां **सर्वेषां** प्रकरणसङ्गतिरूपमुपजीवकत्वं व्युत्पादयन्ति **नन्वितः पूर्व**मित्यादि, तथा चाध्यायपञ्चकोक्तलीलाभिः साधारणानां दोषापगमे सति लीलास्थसर्वपदार्थतत्त्वबोधनं, शेषं स्पष्टं, **प्राजापत्य** इत्येतस्यार्थं **टिप्पण्यामा**हु**र्यो वै सप्तदश**मित्यादि, तथा चात्राध्याये वर्षाशरदोर्नूतनसृष्टेर्वक्तव्यत्वादस्य तथात्वमित्यर्थः, **सुबोधिन्यां** ननु तथापि मुख्यलीलायां कुत्रोपयोग इत्याकाङ्क्षयामाहु**र्माहात्म्ये**त्यादि, **तच्चाप्यत्रे**ति तदिति पञ्चम्यन्तमव्ययं चोवधारणे तथा च तस्यामपि लीलायामानन्देनोपयोग इति सोप्यत्र द्वाभ्यामुक्त इत्यर्थः । **तयोरि**त्यत्र विशेष इत्यादि लीलायां **यो विशेषः स वक्तव्य** इति तं **द्वाभ्यामा**हेत्यर्थः, तथा सति पुरुषोत्तमत्वेन ज्ञापनं **विशेषत्वेन** फलिष्यति, तत्सङ्गेत्यादेरर्थं **टिप्पण्यामा**हु**र्गोपालाना**मित्यादि ॥ १ ॥ **तत** इत्यत्र **सर्वसत्त्वसमुद्भवे**त्यस्य तृतीयेर्धे **सत्त्वगुणोद्बोध**स्योक्तलात् तस्मिन् सति वार्षिक्या लीलायाः प्राकृतीत्वशङ्का स्यादिति तन्निवारणयात्रत्यसत्त्वगुणस्वरूपं **टिप्पण्यामा**हु**रप्राकृते**त्यादि, इदं ब्रह्मसूत्रभाष्ये तृतीयाध्याये प्रपञ्चितं, जन्मप्रकरणे **'चात्मा कार्यं चे'**तिकारिकायां च, अप्राकृतगुणेषु बन्धकत्वरहितं कार्यतो लीलोपयोगित्वं स्फुटीकर्तुं लक्षणं ज्ञेयं तेन न शङ्कालेशः, **गीतोक्तमेव तदा भगवानि**त्यादेरर्थं **टिप्पण्यामा**हु**र्धर्मे**णेत्यादि, अयं सत्त्वेन सात्त्विकैरित्यस्यार्थः, **सुबोधिन्यां वेष्टनदिश** इति क्षितिजेन या प्रतीयन्ते ता इत्यर्थः, **आगतास्वि**ति सति सप्तमी, विस्फूर्जितमिति गर्जायुक्तं, टु ओ **स्फूर्जा** वज्रनिर्घोषे, **एतानि**त्यस्यार्थ**ष्टिप्पण्यां** स्फुटः ॥ ३ ॥ **सान्द्रे**त्यस्याभासे **दिव्यानि**ति तस्यार्थं टिप्पण्यामाहु**रस्या** इत्यादि, **उच्यत** इति ''स्वर्गः सत्त्वगुणोदय'' इति वाक्येन सत्त्वस्य सच्चिदानन्दात्मकलीलाप्रकाशकलात् तथा, **सुबोधिन्यां ननु** सङ्ख्यया कथं दिव्यत्वसूचनमित्यतः श्रुति आहु**रेकविंशे**त्यादि, तथा **च** सङ्ख्यया सङ्ख्येयसूचनाद् दिव्यत्वसूचनमित्यर्थः, अत्र प्रथमश्रुतावेकस्यैव **स्वर्गस्यैकविंशत्व**मायाति न त्वेकविंशतित्वमित्यतो द्वितीयश्रुतिः **सर्वप्रतिष्ठेति**

'सर्व'स्य सत्त्वधर्मस्य **प्रतिष्ठे**त्यर्थः, **देवलोकानां** तावत्त्वेप्येकस्या वर्षायास्तावद्धर्मसम्पादकत्वं नायातीत्यतः कालत्वेन रूपेण तस्यास्तथात्वबोधनाय तृतीया श्रुतिरिति ज्ञेयं, **एकविंशो वा'** इत्यस्य **टिप्पण्यामय**मिति वर्षतु'रित्यर्थः, **सान्द्रे**त्यत्र **सुबोधिन्यामादित्यव**दिति सप्तम्यर्थे वतिः, **सगुण**मिति साकारं **स्पष्टयती**ति, व्योम्नि **स्पष्टयति, आहे**ति व्योम्न्याहुः **गुणत्रयसहितं च प्रकटीकरोती**ति भगवानिव कदाचित् प्रावृट् **प्रकटीकरोति,** मूलरूपाभिप्रायेण दृष्टान्तार्थमुक्त्वावताररूपाभिप्रायेणाप्याहुः **सत्त्वरज** इत्यादि, **एवमनेन** पद्येनास्याः श्रुतेस्तात्पर्यकथने द्युलोकाधाराकाशस्य तत्त्वं निरूपितं, तेन तस्य वर्षासु सर्वदा भगवत्स्मारकत्वज्ञानं **क्रीडोपयोगी**ति ॥ ४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

सप्तदशेध्याये कारिकासु **दोषापगमन** इति दोषनिवर्तकलीलाश्रवणेन श्रोतॄणां तत्तद्दोषापगमने इत्यर्थः, अग्रेपि ये भविष्यन्ति कीर्तनात् तेऽपि तादृशा' इति वाक्यादिति भावः, **माहात्म्ये**ति लौकिकस्नेहव्यावृत्त्यर्थं तुशब्दः, **कृष्णे ही**ति हि यतो **निर्दोषानन्दे** तादृश एव स्नेहो युज्यते तादृशस्नेहयुक्तैरेव च क्रीडा युज्यते, अतो हेतोस्तच्चापि देवप्रवरत्वरूपमाहात्म्यज्ञानमपि निरूप्यत इत्यर्थः । **गोपवृद्धाश्चे**त्यत्र **देवानामपी**ति मध्य इति शेषः, तेषामपि मध्ये ये प्रकृष्टा वरणीयाः ते के इत्यत आहुर्**देवाना**मिति, **प्रकृष्टा** इति वरा इति शेषः, एतदन्तेन तदेवानूद्य ते **इन्द्रादय** इत्युक्तं, इदमर्थकथनं ज्ञेयं, विग्रहस्तु देवेषु प्रवरा देवप्रवरास्तेषां सम्बन्धिवरौ देवप्रवरौ एकस्य वरशब्दस्य छान्दसत्वात् पृषोदरादित्वाद् वा लोपः ॥ २ ॥ **तत** इत्यत्र ननु प्रावृडागमनं प्रथमश्लोके उक्तं तथा च द्वाविंशतिश्लोकानां तथाभासोनुपपन्न इत्यत आहुः आदाविति, द्वाविंशतिश्लोकेष्वादावित्यर्थः, स्वयमिति धर्मिरूपेत्यर्थः तथा च प्रमश्लोके धर्मिरूपेणागमनमग्रिमश्लोकेषु तु धर्मरूपेणेतिविभागेन द्वाविंशतिश्लोकैरागमनमेवोक्तमित्यर्थः, **सर्वजीवेष्वे**वेति आत्मरतौ क्रीडा न सम्पद्यते अतः स्वरूपव्यावर्तनायैवकारः, हरिलीलायाः शास्त्रार्थत्वेन दुःखनिवारणार्थं क्रीडा, दुखित्वं तु जीवधर्म इति तेष्वेव लीलेतियुक्तिबोधनार्थं हिशब्दः, मण्डूकादिषु विशेषतो लीलाया असम्भवात् पक्षान्तरमाहुः **तदर्थं** वेति, तदुद्धारार्थमित्यर्थः, द्वाविंशतिश्लोकेषु सर्वत्रजीवोद्धारो नोक्त इत्यरुच्या पक्षान्तरमाहुः **सर्वसत्त्वगुणोद्बोधाद्वे**ति, यथा सर्वेषामंशानां समागमनादत्र भगवतः पूर्णत्वं तथा या या अंशरूपा लीलास्तदुपयोगिनश्चांशरूपाः पदार्थास्तासां तेषां च तदधिष्ठानसत्त्वाविर्भावादस्या लीलायाः पूर्णत्वमितिभावः, अंशावतारे सत्त्वस्य तत्तदाकारतया आवरकत्वेन स्थितिः, अत्रास्तरणवदधिष्ठानत्वमिति विभेदः, अत एव **सर्व**पदं, सर्वेषां ये सत्त्वगुणाः भगवल्लीलाधिष्ठानयोग्या अग्रिमश्लोकोक्तव्योमादिषु तत्सम्पादकत्वं प्रावृष इति तत्सत्त्वमधिष्ठानत्वादिना **धर्मो** येषां भक्तानां ते सात्त्विका इति ज्ञेयं, दिक्प्रकाशेन स्थलज्ञानाल् लीलाविषयाणामागमनं भवति, **गर्जितेन** भयात् प्रतिबन्धकानां व्रजाद् बहिरनागमनं च भवति, एवं **स्वरूपतः क्रीडोपयोगित्वं** ज्ञेयं, **अनेने**ति पदत्रयेणेत्यर्थः, लीलापदार्थत्वेन सच्चिदानन्दात्मप्रावृषो निरूपणे तत्तद्धर्मनिरूपणार्थं श्लोकान्तरं वक्तव्यं भवेदित्याशङ्क्याहुः **एतान्येवे**ति, जीवेष्वानन्दाविर्भावात् तद्धर्मत्वं, विद्युतां सत्ताज्ञापकत्वात् तद्धर्मत्वं, गर्जनस्य चित्कार्यत्वात् तद्धर्मत्वं, अन्योन्यमन्योन्यधर्मत्वमपि वर्तत इति अपिशब्दः ॥ ३ ॥ **एतेष्वेवे**ति एकविंशतिधर्मेष्वेव सर्वेषां भगवद्धर्माणां प्रतिष्ठेत्यर्थः, **प्रकाशमान**मिति सर्वपदार्थेष्विति शेषः, प्रकाशते सर्वत्र परन्तु स्पष्टं दृष्टान्तेनैव भवतीत्यर्थः, **ब्रह्मदृष्टान्त**मिति भावप्रधानं, आकाशे ब्रह्मदृष्टान्तत्वमाहेत्यर्थः ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

सप्तदशाध्यायार्थोक्तौ **प्राजापत्ये निरूप्यते** इति ''सप्तदशो वै प्रजापति''रिति श्रुतेः प्रजापतिशब्देन सप्तदश सङ्ख्योच्यते, तथा च सप्तदशाध्याये निरूप्यत इत्यर्थः ॥ **मेनिरे देवप्रवरा**वित्यस्य विवृतौ देवानां मध्ये प्रकृष्टा इन्द्रादयस्तेषामपि वरणीयाविति, **देवप्रवरा**वित्यत्र प्रशब्दमात्रस्य प्रकृष्टवाचकत्वं, निरुक्तव्युत्पत्तौ तथैव व्यवहारात्, ''अप्यक्षरसाम्येन निब्रूयात् न संस्कारमाद्रिये''दित्यनुशासनात्, अत एव ''**भाति** सर्वेषु वेदेषु **र**तिः सर्वेषु जन्तुषु **त**रणं सर्वभूतानां तेन भारतमुच्यत'' इति भारतनिरुक्तौ एकाक्षरनिर्देशेन सकलशब्दार्थो बोध्यते, तथा च देवानां मध्ये ये प्रशब्देन प्रकृष्टा इन्द्रादयस्तेषां वरणीयौ कृष्णरामावित्यर्थो भवति ॥ २ ॥ **सान्द्रनीलाम्बुदै**रित्यस्याभासे **दिव्यानेकविंशतिधर्माना**हेति ''एकविंशो वा इतः स्वर्गो लोक'' ''एकविंशतिर्वैदेवलोका'' इति श्रुतेरेकविंशतिविधत्वं स्वर्गलोकस्य तत्समानश्लोकसङ्ख्यया भगवदीयस्वर्गत्वं व्रजस्थप्रावृषः सूच्यते, तथा च स्वर्गे यथा परमोत्कृष्टभोगाः सुकृतिनां तथा शुद्धपुष्टिभक्तानां व्रजस्थप्रावृषीति परमभोगाधिकरणत्वं निरूपितं, **अस्पष्टज्योति**रित्यस्याभासे **शरीरं ह्यन्तस्तेजोमय**मिति भगवतः आनन्दात्मकशरीरं **अन्तस्तेजोमयं** मायाजवनिकाच्छन्नत्वात्, अत एव **बहिराच्छन्नतेजो भवति** आकाशोप्यन्तस्तेजोमयो बहिराच्छन्नतेजस्को यदि भवेत् तदा ब्रह्मशरीरतुल्यो भवेदित्यर्थः, **न स्पष्टानि** ज्योतींषि **रूपादीनि यत्रे**ति तथा च भगवद्रूपं यथा मायाजवनिकाच्छन्नत्वादस्पष्टतेजस्कं तथाकाशोपि नीलाम्बुदैराच्छन्नत्वादस्पष्टसूर्यादितेजस्को भवतीत्याकाशस्य तौल्यं युक्तमेव, **भगवत्यपि लोकव्यामोहनं गोपिकालीलाप्रबोधनं चेती**ति प्रबोधनं सत्त्वगुणकार्यं गोपिकालीला रजोगुणकार्यं लोकव्यामोहनं तमोगुणकार्यं, **अयमर्थो** ''ब्रह्मेव सगुणं बभा''वित्यत्र गुणशब्दस्य सत्त्वादिगुणवाचकतामादायोक्तः ॥ ४ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

सप्तदशाध्याये का० १५६$\frac{३}{४}$–१५८$\frac{३}{४}$ । अध्यायार्थमाहुर्लीलेत्यादि सर्वतत्त्वमिति लीलामध्यपातिनां सर्वेषामित्यर्थः, दोषापगमन इत्यादि दोषाणां देहाद्यध्यासादीनामपगमे सत्येव सर्वतत्त्वस्य लीलामध्यपातिनां सर्वेषां तत्त्वस्य बोधनं, तत्त्वे ज्ञाते सति सत्क्रीडा आनन्दरूपा क्रीडेत्यर्थः, मारणार्थमपि दैत्यासम्बन्धिनीत्वात् केवलानन्दरूपत्वमेव क्रीडायाः सत्त्वं प्राजापत्ये इति सप्तदशेध्याये इत्यर्थः, 'मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गता'विति माहात्म्यज्ञानप्रयोजनमाहुर्माहात्म्येत्यादि, निर्दोषानन्दरूपे कृष्णे निर्दोष एव स्नेहो युज्यते युक्तो भवति, तच्चापीति माहात्म्यज्ञानमपीत्यर्थः ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

विंशे प्रावृट्शरच्छोभावर्णनं तत्र चाद्भुता ॥ गोपारामयुजो लीला कृष्णस्य विनिरूप्यते ॥ १ ॥

ततो यज्जातं तदाह–तयोरिति । रामकृष्णयोस्तदद्भुतं कर्म गोपाः स्त्रीभ्यः स्वस्वमातृभ्यो यशोदादिगोपीभ्यः सम्यगसङ्कोचेन आ सर्वतो विस्तृतं चख्युः कथयामासुः । 'किं तत् ?' तत्राह–दावाग्नेरात्मनो मोक्षणं कृष्णस्य कर्म प्रलम्बवधं च रामस्य कर्मेति ॥ १ ॥ तत् गोपैर्वर्णितं तयोः कर्म उपाकर्ण्य श्रुत्वा विस्मिताः गोपवृद्धा गोप्यश्च व्रजंगतौ व्रजे अवतीर्णौ कृष्णरामौ देवप्रवरौ 'देवा ब्रह्मादयः, तेषां प्रवरौ श्रेष्ठौ पूज्यौ' भगवन्तौ मेनिरे । अनेन 'ज्ञातिभिर्मुदितात्मभिः । अनुगीयमान' इत्यादिना भगवत्सखीनां गोपानां तत्प्रभावदर्शनेन अत्यासक्त्या अहर्निशं निरन्तरं तद्गुणगानं सूचितम् । तत्र यदि तत्पित्रादीनां तत्प्रभावज्ञानाभावेन तत्रानासक्तिः स्यात्तदा तैस्तद्गानं विहितं स्यादिति शङ्का निरस्ता । तेषामपि तत्प्रभावश्रवणदर्शनादिना माहात्म्यज्ञानपूर्वकसुदृढसर्वतोऽधिकस्नेहरूपभक्तेः सिद्धत्वात्तद्गुणगानमेव रोचते, अतस्तत्र केषामपि न कोऽपि प्रतिबन्धक इति भावः ॥ २ ॥ तदेवं ग्रीष्मक्रीडां निरूप्य क्रमप्राप्तां प्रावृट्क्रीडां निरूपयितुं तदुद्दीपनरूपां प्रावृट्शोभामादौ वर्णयति–'तत' इति द्वाविंशत्या । ततो ग्रीष्मानन्तरं प्रावृट् प्रावर्तत । सर्वेषां सत्त्वानां प्राणिनां समुद्भवः उत्पत्तितो जीवनसाधनतश्च यस्यां सा । विद्योतमानाः परिधयः परिवेषाश्चन्द्रसूर्यमण्डलानि यस्यां सा, यद्वा विद्युद्भिर्विद्योतमानाः परिधयो दिशो यस्यां सा । विस्फूर्जितं क्षुभितं नभस्तलं यस्यां सा ॥ ३ ॥ तदा सविद्युद्भिः स्तनयित्नुभिः गर्जितैश्च सहितैः सान्द्रैः निबिडैर्नीलाम्बुदैर्मेघैराच्छन्नम्, अतएवास्पष्टं ज्योतिश्चन्द्रसूर्यादिरूपं यत्र तादृशं सद्व्योम सगुणं ब्रह्म जीवाख्यं यथा सत्त्वादिभिराच्छन्नमस्पष्टज्योतिर्भाति तथा बभौ । तत्र तमसा मेघानां, सत्त्वेन विद्युतां, रजसा गर्जितानां सादृश्यं ज्ञेयम् । यद्वा सगुणं ब्रह्म श्रीकृष्णो यथा अस्पष्टज्योतिर्भाति तथा तत्र श्यामरूपेण मेघानां, पीताम्बरेण भूषणैश्च विद्युतां, वेणुनादेन मधुरया गिरा च गर्जितानां सादृश्यं ज्ञेयम् । स जीवः श्रीकृष्णो वा सर्वसम्बन्धित्वेन प्रतीयमानोऽप्याकाशवत् सर्वदोषनिर्लेपतयैवोपासनीय इत्यादेयोपमा ॥ ४ ॥

अन्वितार्थप्रकाशिका

विंशे प्रावृट्शरच्छोभा दृष्टान्तैश्चानुवर्णिता । प्रावृट्क्रीडोच्यते तत्र श्लोका नवपयोधयः (४२) ॥
एकमेवास्युवाचेति श्लोकतुल्या (४९) अनुष्टुभः ॥ २० ॥

तयोरिति ॥ दावाग्नेरात्मनो मोक्षं कृष्णस्य कर्म प्रलम्बवधं च रामस्य कर्म इति तयोः तत् अद्भुतं कर्म गोपाः स्त्रीभ्यः स्वस्य मातृभ्यो यशोदादिगोपीभ्यश्च ताः श्रावयितुं गोपवृद्धान् समाचख्युः उत्तरश्लोकस्वारस्यात् ॥ १ ॥ गोपेति ॥ तद्गोपैर्वर्णितं तयोः कर्म उपाकर्ण्य श्रुत्वा विस्मिताः गोपवृद्धा गोप्यश्च व्रजं गतौ व्रजेऽवतीर्णौ कृष्णरामौ देवप्रवरौ मेनिरे ॥ २ ॥ तत इति ॥ ततो ग्रीष्मानन्तरं सर्वेषां सत्त्वानां प्राणिनां समुद्भवो वृद्धिः उत्पत्तितो जीवनसाधनतश्च यस्यां विद्योतमानाः परिधयः परिवेषा दिशो वा यस्यां विस्फूर्जितं विक्षुभितं गर्जनयुक्तं वा नभस्तलं यस्यां सा प्रावृट् प्रावर्त्तत ॥३॥ सान्द्रेति ॥ तदा विद्युद्भिः स्तनयित्नुभिः गर्जितैश्च सहितैः सान्द्रैः निबिडैर्नीलैश्चाम्बुदैर्मेघैराच्छन्नमत एवास्पष्टं ज्योतिश्चन्द्रसूर्यादिरूपं यत्र तादृशं सद्व्योम सगुणं ब्रह्मजीवाख्यं यथा सत्त्वादिभिराच्छन्नमस्पष्टज्योतिर्भाति तथा बभौ । विद्युद्गर्जिताम्बुदानां सत्त्वादिभिः सादृश्यम् । अत्राध्याये बह्व्य उपमास्तत्र काश्चिदुपादेयविषयाः काश्चिद्धेयविषयाश्च । यथा सान्द्रेत्युपमा ध्येयविषयतया उपादेयविषया अष्टावित्यादिका राजभिरुपादेयविषया ॥ आसन्नुत्पथवाहिन्य इत्यादिका हेयविषया इत्याद्युह्यम् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं विंशेऽध्याये वर्षाशरच्छोभावर्णनपूर्विकां श्रीकृष्णचंद्रस्य मधुरमधुरदिव्यलीलां वर्णयति तयोः रामकृष्णयोः यं मोक्षं स्त्रीभ्यः स्त्रियः श्रावयितुमित्यर्थः क्रियार्थोपपदस्य च कर्मणि स्थानिन इति कर्मणि चतुर्थी ॥ १ ॥ गोपेषु वृद्धा जरठाः उपाकर्ण्य श्रुत्वा ॥ २ ॥ द्वाविंशतिश्लोकैर्वर्षर्तुं वर्णनमाह तत इत्यादिभिः । ततोग्रीष्मर्त्त्वनंतरं सर्वेषां सत्वानां स्थावरजंगमानां समुद्भवो यस्यां सा वृट्वर्षाऋतुः सा कथंभूता विद्योतमानाः प्रकाशमानाः परिधयः सूर्यचंद्रयोः परितो जलवलयानि ककुभो वा यस्यां सा

विस्फुर्जितं अभ्रविद्युद्गर्जनैः क्षुभितं नभस्तलं यस्यां सा ।। ३ ।। सांद्रेति विद्युतः ये स्तनयित्नवो गर्जितानि तैः सहितास्तैः सांद्रैः निबिडैः नीलैः अंबुदैः मेघैः आच्छन्नं आवृतं अस्पष्टं अदृश्यं सूर्यचंद्रादिज्योतिर्वृंदं यस्मिन् तत् व्योमगगनं स गुणं सत्वां दत्रिगुणकार्यैः सहितं ब्रह्म विराट्पुरुषो यथा बभौ विद्युद्गर्जितयुतनीलांबुदानां सत्त्वादित्रिगुणैरुपमा ।। ४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रावृषः शरदो विशे शोभासंवर्णनादरैः । क्रीडाः प्रावृट्कृता रामगोपयुक्तस्य कथ्यते ।। १ ।।
प्रावृट्शरच्छ्रियोर्हेयोपादेयप्रतिमानतः । कृष्णलीलाविवक्षार्थमैश्वर्यं वर्णितं महत् ।। २ ।।

एवं वसन्तवल्लक्षितग्रीष्मर्त्तौ भगवतः क्रीडा अनुवर्णिताः, अथ प्रावृट्शरदोस्ता अनुवर्णयंस्तावत् प्रथमं भगवत्क्रीडावृत्तशेषमाह द्वाभ्याम् ।। तयोरिति ।। आत्मनः आत्मनामित्यर्थः । दावाग्नेः मोक्षं मोक्षविधानात्मकं, तत् रामकृष्णयोः अद्भुतं कर्म, प्रलम्बवधं च, गोपाः व्रजे, स्त्रीभ्यो यशोदारोहिण्याद्यङ्गनानां पुरत इत्यर्थः । समाचख्युः कथयामासुः एव ।। १ ।। गोपेति । तद्गोपालैरुक्तं, उपाकर्ण्य, विस्मिताः, गोपवृद्धाश्च, गोप्यश्च, कृष्णरामौ व्रजं गतौ, देवप्रवरौ मेनिरे ।। २ ।। तत इत्यारभ्य द्वाविंशत्या प्रावृड्वर्णनम् । तत इति । ततः ग्रीष्मर्त्वनन्तरं, सर्वेषां सत्त्वानां प्राणिनां समुद्भव उत्पत्तितो जीवनतश्चोदयो यस्यां सा, विद्योतमाना विद्युद्भिर्द्योतमानाः परिधयः दिशः परिवेषा वा यस्यां सा, विस्फूर्जितं वज्रनिर्घोषं नभस्तलं यस्यां सा, इत्थंभूता प्रावृट् वर्षाऋतुः, प्रावर्त्तत संप्रवृत्ता ।। ३ ।। सान्द्रेति । सविद्युत्स्तनयित्नुभिः विद्युद्भिर्गर्जितैश्च सहितैः, सान्द्रा निबिडाश्च नीलाः श्यामवर्णाश्च येऽम्बुदा मेघास्तैः, आच्छन्नं अत एव, अस्पष्टानि ज्योतींषि सूर्यचन्द्रादीनि यस्मिंस्तत्, व्योमाकाशं, सगुणं गुणत्रयवश्यं, अनादिकालसंपृक्ताज्ञानात्मकप्रकृतिकार्यगुणत्रयवशवर्त्तीत्यर्थः । अत एव, अस्पष्टं प्रकृतितिरोहितं ज्योतिर्धर्मभूतज्ञानं यस्य तत्, ब्रह्म मुक्त्यवस्थायां बृहत्त्वार्हं जीवस्वरूपं इव, बभौ । अनेनाकाशस्य यावच्छरदं नीलाम्बुदविद्युत्स्तनयित्नुसंबन्धवत्त्वं, जीवस्य यावन्मुक्ति तमोरजःसत्त्वात्मकगुणत्रयवश्यत्वं सूर्यादिज्योतिःस्थानीयधर्मभूतज्ञानस्य संकोचेन प्रसराभावः व्योमवत् स्वरूपतो निर्मलस्य धर्मभूतज्ञानावृत्तिरूपमालिन्यं चास्त्येवातस्तदपनोदार्थकमोक्षोपाये यतितव्यमित्यभिप्रेतम् । ब्रह्मशब्देन मुक्तिदशायां ज्ञानद्वारा बृहत्त्वमस्तीति च सूचितम् । विद्युद्गर्जिताम्बुदानां सत्त्वरजस्तमोभिरुपमा । गोपालानन्दस्वामिचरणास्तु सगुणं सत्त्वादित्रिगुणकार्यैः सहितं, ब्रह्म विराट्पुरुषो यथेत्याहुः । प्रावृषीति पदमध्याहार्योत्तरत्रापि योजनीयम् ।। ४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

उक्त्वाश्रमाच्छ्रुतिविधेय-निषिद्धधर्मा धर्माद्भवत्सुख तदन्यफलप्रसूतीन् ।
कस्मिन् युगे कथमिहाचरणीयमेवं ज्ञातुं युगस्थिततदुक्तविवक्तधर्मान् ।। १ ।।
ब्रूयाद्यदि स्फुटमशेषविदेष योगी स्यादेव साध्विति नृपाशयमावितर्क्य ।
वर्षा शरत् समयवर्णनकैतवेन तत्तयुगस्थितिमबोधयदिङ्गितज्ञः ।। २ ।। (युग्मम्)
यद्दावाग्न्युपसंहृतिर्वटपदोल्लेखोऽथ नादोदयः सानन्दं व्रजवासिभिः सहचरैर्भूयः प्रवेशो व्रजे ।
यावत्सत्त्वसमुद्भवेति सगुणब्रह्मेति विस्फूर्जिताकाशेत्यादि पदार्थकर्तुकथनाद् व्यक्ता युगाद्यस्थितिः।।३।।
ततश्चतुर्युगोद्भूतिस्तत्तत्कार्यानुमानिका । विज्ञेयेत्यखिलज्ञप्त्यै निदर्शनबहूक्तयः ।। ४ ।। (युग्मम्)
तत्तन्निदर्शनार्थानुसारादेव युगस्थितिः । ज्ञेया नात्र क्रमापेक्षा तथा लक्ष्यानुरोधतः ।। ५ ।।
अथवा प्रत्यहं लोके चतुर्युगगतिस्थितिः । तत्तादृगाशयात्तद्वा युगसम्मिश्रवर्णनम् ।। ६ ।।

तत इति : १०.२०.३.

दावानलोपशमनं मम कार्यमेव लोके तदद्य विभुना कृतमादरेण ।
हर्षेण कैतवरुषाऽप्यथवा ह्रियेव प्रावर्तताम्बरधरा किमु प्रावृडेषा ।। ७ ।।
मधुर्ग्रीष्मोऽप्यलं दृष्टः श्रीशकीर्तिहरौ हि तौ कीर्तिकृत्त्वहमस्म्येके त्यागात्तद्व्यक्तयेऽच्युतम् ।। ८ ।।

सान्द्रेति : १०.२०.४.

सर्वप्राण्युपजीवनाय सगुणः सन्नेव वृन्दावनक्रीडामत्र करोमि सन्ततमिति त्वं स्वाशयं व्यञ्जयन् ।
श्रीशाङ्गींकुरुषे वपुः श्रितगुणं व्योमेव गूढप्रभं स्पष्टं कार्यविधावसीममभवद् दावाग्निपानात्मके ।। ९ ।।

कृष्णप्रिया

वर्षा और शरदृतु का वर्णन

श्री शुकदेवजी कहते हैं—परीक्षित ! ग्वालबालों ने घर पहुँच कर अपनी मा बहिन आदि स्त्रियों को श्रीकृष्ण और बलराम ने जो कुछ अद्भुत कर्म किये थे, दावानल से उनको बचाना, प्रलम्ब को मारना इत्यादि सबका वर्णन किया ।। १ ।।

बड़े-बड़े बूढ़े गोप और गोपियाँ भी राम और श्याम की अलौकिक लीलाएँ सुनकर विस्मित हो गयीं वे सब ऐसा मानने लगे कि श्रीकृष्ण और बलराम के वेष में कोई बहुत बड़े देवता ही व्रज में पधारे हैं ।। २ ।। इसके बाद वर्षा ऋतु का शुभागमन हुआ इस ऋतु में सभी प्रकार के प्राणियों की बढ़ती हो जाती है, उस समय सूर्य और चन्द्रमा पर बार-बार प्रकाशमय मण्डल बैठने लगे, बादल, वायु चमक कड़क आदि से आकाश क्षुब्ध सा दीखने लगा ॥ ३ ।। आकाश में नीले और घने बादल घिर आते, विजली कौंधने लगती, बार-बार गड़गड़ाहट सुनायी पड़ती, सूर्य चन्द्रमा और तारे ढके रहते, इससे आकाश की ऐसी शोभा होती जैसे ब्रह्मस्वरूप होनेपर भी गुणों से ढक जाने पर जीव की होती है ॥ ४ ।।

अष्टौ मासान् निपीतं यद् [1]भूम्याश्चोदमयं वसु । स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते ॥ ५ ॥
तडित्वन्तो महामेघाश्चण्डश्वसनवेपिताः । [2]प्रीणनं जीवनं ह्यस्य मुमुचुः करुणा इव ॥ ६ ॥
तपःकृशा देवमीढा आसीद् वर्षीयसी मही । यथैव काम्यतपसस्तनूः [3]सम्प्राप्य तत्फलम् ॥ ७ ॥
निशामुखेषु खद्योतास्तमसा भान्ति न ग्रहाः । यथा पापेन पाषण्डा[4] न हि वेदाः कलौ युगे ॥ ८ ॥

कर्दमक्षमा

अन्वयः—पर्जन्यः अष्टौ मासान् भूम्याः यत् उद्मयम् वसु स्वगोभिः निपीतम् तत् च काले आगते मोक्तुम् आरेभे ॥५॥ चण्डश्वसनवेपिताः तडिद्वन्तः महामेघाः, करुणा इव अस्य, हि प्रीणनम् जीवनम् मुमुचुः ॥६॥ तपःकृशा देवमीढा मही, काम्यतपसः तनूः यथा तत् फलम् सम्प्राप्य तथा इव वर्षीयसी आसीत् ॥ ७ ॥ यथा कलौ युगे पापेन पाषण्डाः भान्ति न वेदाः तथा निशामुखेषु तमसा खद्योता भान्ति ग्रहाः न भान्ति ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तपसा ग्रीष्मेण कृशा । देवमीढा पर्जन्यसिक्ता । वर्षीयसी उच्छूना पुष्टा । काम्यं तपो यस्य तस्य तनुः कामान्संप्राप्य । यथेति । सापि देवैः फलदानेन सिक्ता ॥ ५–६ ॥ नित्यकर्मावसाने आचार्यनिनदं श्रुत्वा तच्छिष्या यथाऽधीयते तद्वदिति ॥ ७ ॥ अनुशुष्यतीरनुशुष्यंत्यः । अस्वतंत्रस्येंद्रियपरतंत्रस्य । स्वतंत्रस्य निरंकुशस्येति वा ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'उष्ण उष्णागमस्तपः' इत्यमरः । काम्यं कामनाप्रधानम् तपो यस्य । तत्फलम् तपःफलं प्राप्य यथा पुष्टिमायाति तथेति योज्यम् ॥ ५ ॥ निशामुखेषु संध्यासु । 'खद्योतो ज्योतिरिङ्गणः' इत्यमरः । पाखंडा वेदविरुद्धमार्गाः । पापेन जनानां जन्मांतरीयकुत्सितादृष्टेन । एतेन दुर्जनवृद्ध्या सज्जनाभिभवोऽपि सूचितः ॥ ६ ॥ नित्यकर्मावसाने संध्याजपादिकर्मणोंते । मंडूका भेकाः "भेके मंडूकवर्षाभूशालूरप्लवदर्दुराः" इत्यमरः । एतेन भगवदनुग्रहमिच्छद्भिः कालो वंध्यो न कार्य इति ध्वनितम् ॥ ७ ॥ क्षुद्रनद्यः फल्गुजलाः । उत्पथवाहिन्यः तोयाधिक्यात्तटमुद्रिच्य यांत्यः । अनु वर्षानंतरं शुष्यंतः । इंद्रियवशवर्त्तिनो देहो हि व्यभिचारादिनोत्पथगामी, द्रविणमपि तदर्थंव्ययेन तादृशमेव, संपदोऽत्र गवाश्वादिरूपाः ता अपि तदर्थमुपयोगात्तादृश एव, तथा नश्यंत्यपि शीघ्रमेव । पूर्वव्याख्याने इंद्रियपदमक्षरार्थालभ्यमतोऽकारप्रश्लिष्यैवाह–स्वतंत्रस्येति । स्वतंत्रस्यापि निरंकुशगजवद्देहादय उत्पथगा नद्यश्च भवंतीति भावः । अनेन रजोगुणस्वभावः सूचितः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सत्त्वादि वसुरूपकमुदकस्य करत्वं व्यञ्जयति, तच्च पर्जन्यस्य राजत्वम् अत एव निपीतमाहृतमित्यर्थः ॥५॥ तडित्वन्त इति तैर्व्याख्यातं तत्र कृपालव इति करुणा इत्यस्य व्याख्यानेन स्वभावकथनम् अनुकम्पमानाः इत्यनुकम्पया तत्कालमुदितया वेपिताः सन्त इत्यर्थः । स्वजीवनमपीति तस्मिंस्त्यक्ते यदि तत्प्राणानामाप्यायनं स्यात् तदा तदपि त्यजन्तीत्यर्थः । वायुभिरिति बहुत्वं चण्डशब्देन लभ्यते हि निश्चये । यद्वा, तडित्वन्त इति स्वरूपातिशयद्योतनार्थं करुणा इवेत्युत्प्रेक्षा तस्या घटना तु श्लेषेण चण्डश्वासकम्पयुक्ताः सन्तो रन्तिदेवादिवज्जीवनहेतुजलमपि मुमुचुरिति ॥ ६ ॥ तप इति सान्तत्वमार्षम् ॥ ७ ॥ ग्रहास्तु न भान्ति पाषण्डाः तच्छास्त्राणि ॥ ८ ॥

---

१. भूम्या मुदमयं–वीर. विज. । २. प्राणनम्–इति कस्यचित् ; प्राणिनां जीवनं ह्यंबु वीर. विज. । ३. स्तनुः–श्रीधर. वंशी, वीर विज. शुक. । ४.–पाखण्डा–श्रीधर. वंशी. वीर. विज. ; पाषण्डा–विश्व.

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उदमयं वस्वित्यनेन राजोपमात्र ध्वनिता आरेभे वृष्टिलक्षणोष्मतादिकं प्राक् प्रवर्तयामासेत्यर्थः ॥ ५ ॥ दार्ष्टान्तिके चण्डेति तैर्व्याख्यातमेव, अनुकम्पमाना इति; यद्वा, जीवितमोचनस्वाभाविकचण्डश्वासः कम्पश्च, यद्वा, करुणत्वेन सात्त्विकभावादिकमिदमुक्तम् हि निश्चये, हेतौ वा, यतोऽस्य प्रीणनम् ॥ ६ ॥ तप इति सान्तत्वमार्षम्, तपेन ग्रीष्मेण कृशा ॥ ७ ॥ ग्रहास्तु न भान्ति, यथा कलौ पाषण्डा नास्तिका जनाः, तच्छास्त्राणि वा, वेदाश्च न भान्ति ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तपःकृशा सूर्यरश्मितापकृशा देवेन वर्षसिक्ता वर्षीयसी माननीया ॥ ७–९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यदष्टौ मासान् अत्यन्तसंयोगे द्वितीया कार्तिकादारभ्य यावज्ज्येष्ठं स्वगोभिः स्वकिरणैर्नितरां पीतं गृहीतम् उदकात्मकं वसु धनं तत्स्वगोभिरेव पुनरुचितकाले आगते प्राप्ते सति मोक्तुं पर्जन्यो वर्षाधिदेवः सूर्यः प्रारेभे अनेन राज्याधिकृतः शिक्षितः पर्जन्यवद्यथोचितं कालेषु प्रजाभ्यो धनानि गृहीत्वा पुनरर्थिभ्यो दद्यादिति, यावज्ज्ञानोदयं गृहीतान् कामान् सति ज्ञानोदये जह्यादिति मुमुक्षुशिक्षा वा ॥ ५ ॥ तडित्वन्त इति । चण्डश्वसनेन तीव्रवायुना कम्पिताः मेघाः प्राणिनां जीवनं जीवनसाधनमम्बुजलं करुणा इत्यर्थं आद्यजन्तः करुणावन्त इव मुमुचुः प्राणसञ्जीवनं ह्यस्येति पाठान्तरं तदाऽस्य विश्वस्य प्राणसञ्जीवनकरं जीवनं जलं करुणा इव मुमुचुरित्यर्थः । अनेन दुःखितं जनमवलोक्य मेघवत् श्वासेन कम्पित (गात्राः) तान्तःकरणाः करुणावन्तश्च स्वजीवनपर्यन्तदानेनोपकुर्युरिति शिक्षा कृता ॥ ६ ॥ तपःकृशेति । तपसा ग्रीष्मेण कृशा शुष्का देवेन पर्जन्येन मीढा सिक्ता भूमिर्वर्षीयसी प्रवृद्धा बभूव सस्यादिसम्पन्ना बभूवेत्यर्थः । यथा काम्यं तपो यस्य तस्य पुंसः तनुस्तावत्तपोदशायां कृशा सती तत्फलं काम्यतपःफलं प्राप्य परिपुष्टा भवति तद्वदनेन काम्यतपसः केवलं देहसुखसाधनत्वमेव न त्वात्मसुखसाधनत्वमिति शिक्षितम् ॥ ७ ॥ निशामुखेष्विति । निशामुखेषु सायङ्कालेषु खद्योता तेजोविशिष्टाः कीटविशेषा एव भान्ति तत्र हेतुः तमसेति एतेन दिवसे तेषां शोभा नास्तीति भावः । न तु ग्रहाश्चन्द्रशुक्रादयः मेघकृततमोवृतत्वाद्गगनस्येत्यर्थः । यथा कलौ युगे पापेन पापप्रचुरेण पाषण्डाः वेदविरुद्धाः आगमा एव भान्ति नतु वेदा भान्ति तद्वदनेन वैदिकधर्माभासरुचिः पापहेतुकेति सूचितम् ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अष्टौ मासानिति द्वितीया सप्तम्यर्थे कालाध्वनोरत्यन्तसंयोग (२।३।५) इति सूत्रात् सम्वत्सरमधीते क्रोशं कुटिला नदीति प्रयोगः उदमयं जलात्मकं वसु वस्तु भूम्यां विद्यमानं स्वगोभिः स्वरश्मिभिः पीतं ताभिरेव मोक्तुं प्रारब्धवान् पर्जन्यो गर्जन्मेघः अभिमन्यमानेनाभिमानी सविता लक्ष्यते पर्जन्यो गर्जदभ्रेऽभ्रध्वनिशक्रे स्त्रयंयत्रिक इति स्वगोभिरित्युक्त्या सवितेति गम्यते–

"अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥

इति च ॥ ५ ॥ प्रचण्डश्वसनवेपिताः कम्पिताः जीवनं जीवनसाधनं करुणवन्तीति करुणाः । यद्वा, कृष्णस्य करुणा इव अनेन भक्तिसामग्रीमतां ज्ञानाम्बु वर्षन्ति कृष्णकटाक्षा इति सूचितं भवति ॥ ६ ॥ ग्रीष्मे तपःकृशा सूर्यतपनेन कार्श्यं गता देवेन सवित्रा मीढा सेचिता वर्षीयसी वृद्धा अपि वृद्धिं गता का इव काम्यतपसः पुंसः तनुस्तत्फलं काम्यतपःफलं प्राप्य सम्पदा वर्धते अनेन प्रवृत्तिप्रकारमार्गो दर्शितः ॥ ७ ॥ निशामुखेषु सन्ध्यासु सूर्यादिग्रहाः न भान्ति पापेन कर्मणा अनेन दुर्जनवृद्ध्या सज्जनाभिभवो दर्शितः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वस्विति करादानं तेन च राजोपम्यं ध्वनितम् अत एव पीतमाहृतमित्यर्थः ॥ ५–६ ॥ तप इति सान्तत्वमपि "तपस्तु तपसा सह" इति द्विरुपकोशात् ॥ ७–११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पर्जन्यः सूर्यः स्वगोभिः स्वरश्मिभिः काले समये अत्र पर्जन्यस्य राजत्वम् उदकस्य करत्वं निपानस्य ग्रहणत्वं मोचनस्य दानत्वं सूचितमिति वस्तुनः स्वप्रजाभ्य आदानतः समये पुनः प्रदानतश्च राजोपमेयं नीतिदृष्टया राजभिरुपादेया ॥ ५ ॥ श्वसनो वायुः अस्य विश्वस्य सन्तप्तस्य प्रीणनम् आप्यायनकरम् अत एव जीवनं जीवनतुल्यं जलं करुणाः कृपालवो दातार इव तत् पक्षे श्वासवेपावनुभावौ जीवनं जीवितमपि तप्तं जनं वीक्ष्य ते त्यजन्ति रन्तिदेवादयो जीवनं स्वमात्राप्यायकं जलमपीतीयमुपमा तत्तद्दृष्टया दयावीरदानवीरैरुपादेया ॥ ६ ॥ तपसा पक्षे ग्रीष्मेण कृशा ततो देवैरुद्रादिभिः पर्ज्जन्येन च मीढा कामितवस्तुप्रदानेन जलवृष्टया च सिक्ता वर्षीयसी पुष्टाङ्गा उच्छूभा च काम्यं तपो यस्य तस्य पुंसस्तनुः कामान् प्राप्य यथेत्युपमेया परिणामदर्शिभिः सद्भिर्हेया । ७ ॥ पाषण्डाः पाषण्डशास्त्राणि हेयैवेयमुपमा ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पर्जन्यो रविः भूप इवेत्युपमा ज्ञेया ॥ ५ ॥ अस्य लोकस्य प्राणनमाप्यायनम् ॥ ६ ॥ तपःकृशाः ग्रीष्मेण शुष्का देवमीढा देवेन पर्जन्येन मीढा सिक्ता वर्षीयसी प्रवृद्धा बभौ काम्यतपसः पुंसस्तनुः यथा ॥ ७–८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

पर्जन्यो रविः स्वगोभिः स्वकिरणैः काले यथोचितसमये प्रथमातिशतोक्त्या नृपेणोपमा सूच्यते तेनेयमुपादेया सहि प्रजातः करं गृहीत्वा समये तस्यै दद्यादिति ॥ ५ ॥ श्वसनो वायुः तडित्वन्तो विद्युन्नेत्रामेघा जगत् तप्तं वीक्ष्यास्य प्रीडनमाप्यायकं जीवनं जलं मुमुचुः कारुणिका दयालवो यथा तत्पक्षे श्वासवेपावनुभावौ ते हि तप्तं जनं वीक्ष्य जीवनं जीवितञ्च त्यजन्ति यथा रन्तिदेवः स्वमात्राप्यायकं जलं, यथा च दधीचिर्जीवितमत्यजत् इयं दानवीर दयावीरैरुपापादेया ॥ ६ ॥ तपसा ग्रीष्मेण कृशा ततो देवेनेन्द्रेण मीडा जलेन सिक्ता मही वर्षीयसी पुष्टा आसीत् काम्यं तपो यस्य तस्य पुंसस्तनुर्यथा तपःफलं भोग्यं प्राप्येति परिणामदर्शिभिः सद्भिर्हेयेयम् ॥ ७ ॥ पाषण्डा वेदविरुद्धाः सौगतादिपन्थाः हेयैवेयमुपमा ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तपःकृशा ग्रीष्मोष्मकृशा देवमीढा देवेन्द्रेण सवित्रा मीढा सिक्ता महो वर्षीयस्यतिवृद्धियुताऽऽसीत् । इदमस्थिरमित्यनुरूपं निदर्शनं निरूपयति ॥ यथैवेति । काम्यतपसः पुंसः फलमुद्दिश्य तपः कुर्वतस्तनुस्तत्फलं तत्कर्मफलं सम्प्राप्य वर्षीयसी भवति तथेति ॥ ५ ॥ निशामुखेषु प्रदोषेषु सन्ध्यास्विति यावत् तमसा कारणेन ग्रहा आदित्यादयो न भान्ति । तर्हि के भान्तीत्यत आह ॥ खद्योता इति । खद्योतो ज्योतिरिङ्गण इत्यमरः । यथा पापेनानुष्ठितदुष्कर्मणा कलौ युगे वेदा न हि भान्ति भान्ति च पाखण्डाः पाषण्डिनस्ते च चतुर्थस्कन्धे भृगुः प्रत्यसृजच्छापं ब्रह्मदण्डं दुरत्ययमित्यारभ्य सेतुविदारणं पुंसामतः पाखण्डमाश्रिता इत्यन्तेन कथिताः । तानि पापस्य खण्डानि लिङ्गम् । लिङ्गं खण्डमित्युक्तेश्च । वर्णस्य लोप इत्युक्तेश्च नामैकदेशग्रहणेन वा । पानां पापानां खण्डानि लिङ्गानि येषामिति निरुक्तिर्ज्ञेया ॥ ६ ॥ पर्जन्यानां निनादं श्रुत्वा मण्डुका भेका गिरो नानाविध्वनीन्व्यसृजन् । तेषामनिमिषानुग्रजाच्छब्दवैचित्र्यम् । यथोक्तं शान्तिपर्वण्यग्निमार्गणप्रस्तावे । अग्निशापादिजिह्वापि रसज्ञाने बहिष्कृताः । सरस्वतीं बहुविधां यूयमुच्चारयिष्यथ । देवास्त्वनुग्रहं चक्रुर्मण्डूकानां भृगूत्तमेति । प्राक् ते कथम्भूता इत्यत आह ॥ तूष्णीं शयाना इति । क इवेत्यतोऽप्याह ॥ शयानाः शूद्रा यद्वदिति । ते यथा तूष्णीकास्तथेति । यथोक्तामेकादशतात्पर्ये । त्रैवर्णिकः सञ्चरस्तु वेदमार्गप्रवर्तनात् । अतत्प्रवर्तनादेव शयानः शूद्र उच्यत इति । यथा प्राक् गुर्वाज्ञाकरणात्पूर्वं शयानाः शिष्या नियमात्यये गुर्वाज्ञायां छात्रेण वर्तितव्यमिति नियमस्यात्यये प्रसक्ते अकारणे कृतेनुत्थाने नियमात्ययः प्रसक्तस्तस्मिन्सति गिरो विसृजन्ति स्वामिन्नायास्याम इति तथेति । एवमन्वये निनदं श्रुत्वा गिरो व्यसृजन्नित्येतद्दार्ष्टान्तिकसमग्रानुरूपता दृष्टान्तस्य भवतीति मन्तव्यम् । नियमात्यये गुरुमौनातिक्रमे तन्निनदं श्रुत्वा ब्राह्मणा वेदेध्ययनशीलाः शिष्या गिरा वेदवाणीर्विसृजन्ति तथेति वा ॥ ७ ॥ अनुशुष्यन्त्यो ग्रीष्मे क्षुद्रनद्यः स्वल्पजलाः क्षुद्रस्रोतसोऽनु ग्रीष्मानन्तरमुत्पथवाहिन्यः स्वतीरमुल्लङ्घ्य वहन्त्य आसन् । शुष्यन्तीर्महानदीरन्वनुसृत्य स्वयं शुष्यन्त्य इति वा । यथास्वतन्त्रस्य स्व धनं तन्त्रमधीनं यस्य स नेत्यस्वतन्त्रस्य दरिद्रस्य पुंसो देहो द्रविणसम्पदा यथा पुष्टो भवति तथेति । अस्वतन्त्रस्यास्वाधीनेन्द्रियादिमतो वा पुंस इति रजःप्रवृत्तिमदधिकारिपरं ज्ञेयम् ॥ ८ ॥

श्रीसुबोधिनी

एवं वर्षाकृतमाकाशं निरूप्य तत्सम्बन्धिनं सूर्यं निरूपयत्य**ष्टौ मासानिति**, **अयमेव सूर्यः पर्जन्यो** "याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षती"ति श्रुतेः सूर्यस्याध्यात्मिकं रूपं पर्जन्य आधिभौतिकं आदित्य आधिदैविकः संवत्सरः स प्रजापतिः, अतोयं सूर्य एव **पर्जन्यः स्वरश्मिभिरेवाष्टौ मासान्** निरन्तरं मासाष्टकपर्यन्तं नितरां **पीतं यदुदमयं** जलमयं **वसु** धनं सार्द्रा हि **भूमिः सर्वमन्नादिकमुत्पादयति**, अतो जलं **वस्वेव वसु**प्रधानं वा, **जलेनैव सस्यादिना धनोत्पत्तिः**, अतो **दत्तं** ग्राह्यमिति पक्वं कृत्वा तदेव प्रयच्छति, तस्य किरणा एव मेघा अतो **मोक्तुमारेभे** प्रावृष्यागतायां, अन्यथा स कालस्तस्याप्युपद्रवहेतुः स्यादत आह **काले समागत** इति, अतो यथा ब्रह्मशरीरत्वं सम्पादयति तथा सूर्यस्यापि जगत्कर्तृत्वरूपं सवितृत्वं सम्पादयति ॥ ५ ॥ एवमाकाशसूर्ययोः स्वरूपसम्पादकत्वमुक्त्वा 'सूर्योपरिलोकयोर्मध्यमलोकस्याप्यन्तरिक्षस्य स्वरूपसम्पादिका प्रावृड् जातेत्याह **तडित्त्वन्त** इति, अन्तरिक्षदैवत्या मेघा वाय्वाधीनाः, बलकार्यं स एवं तद्भेदा एव सर्वं इन्द्रादय इति त्रिदेवतापक्षेः निर्णयः, अतो मेघानां वाय्वधीनत्वमिन्द्राधीनत्वमिति न विरुध्यते, इन्द्रो देवता वायुरात्मा मेघा भूतानीति त्रयाणामेकरूपत्वं वा, यथा पुरुषप्रयत्नेन शरीरचेष्टा तथा वायुप्रेरणया मेघानां कार्ये स्थितिः, ते हि मेघाः सर्वस्वं लोकेभ्यो जलरूपं प्रयच्छन्तोपि नावैदिकन्यायेन प्रयच्छन्ति, तथा सति फलं न स्यात्, न हि वृष्टिमात्रं फलं किन्तु ततोन्नोत्पत्तिस्तदग्नौ होमव्यतिरेकेण फलजनकं न भवतीत्यग्निर्होमार्थं विद्युद्रूपो गृहीत इत्याह **तडित्त्वन्त** इति, "विद्युदग्निर्वर्षं हविः स्तनयित्नुर्वषट्कारो यदवस्फूर्जति सोनुवषट्-

कार" इति श्रुतेः, **महामेघा** इति, सम्यक्शास्त्रार्थकर्तारः, **चण्डश्वसनेन च वेपिताः** कम्पिताः, **प्रचण्डो हि पवनो देहमर्यादां न मन्यते**, अतस्तेन **कम्पिताः**, **प्रीणन**माप्यायनजनकं तापनिर्वर्तकं च **जीवनम**ग्रेन्नाद्युत्पत्त्या प्राणधारकं, तदपगमे तेपि रिक्ता भवन्तीति कथमात्मविरोधि दानमित्याशङ्क्याह **करुणा इवे**ति, दध्यङ्शिबिप्रभृतयः परार्थं स्वप्राणानपि ददुः, न चैते करुणया प्रयच्छन्ति किन्तु कालवायुप्रेरिता इति **करुणा इवे**त्युक्तम् ॥ ६ ॥ क्रमप्राप्तां प्रावृट्कृतां भूमिं वर्णयति **तपःकृशे**ति, पूर्वं **तपसा** सन्तापेन सर्वजलहरणाच् छुष्का **कृशा** जाता **देवेनेन्द्रेण मीढा** 'मिह सेचने' सिक्ता, **वर्षीयसी** स्थूलोच्छूना वर्षाकालसम्बन्धिनी च क्षुद्, भोजने हि **पुष्टो भवति**, नन्वस्य देवस्य किं प्रयोजनं ? ग्रहणत्यागाभ्यां भूम्यर्थमिति चेद् भूम्या अपि न किञ्चित् फलं पश्याम इत्याशङ्क्याह **यथै**वेति, तपसा शोषिते देहे तत्तपसा या विशेषसम्पत्तिः फलत्वेनायाति तेन सुखं पुष्टिश्च भवति; **प्रथमपुष्टिस्तुन सुखं जनयति**, अतस्तस्या दूरीकरणं पुनःकरणमिति युक्तमेव भूमेस्तथात्वं, तदाह, **काम्यतपसः** सम्बन्धिन्य**स्तनूस्तत्फलं सम्प्राप्य यथा वर्षीयस्यो** भवन्ति, **तनु**रिति वा पाठः, **प्रथमार्थे द्वितीया** वा, अथवा तपस्वी तपसः सम्बन्धिनी**स्तनूः** स्वर्गादिदेहान् **प्राप्य** तत्फलं **प्राप्नोति** तद्वत् पृथिवी फलमपि सस्यादिकं प्राप्तवतीत्यर्थः, ननु "न यत्र चण्डांशुकरा विषोल्बणा भुवो रसं गृह्णन्त" इति पूर्वमुक्तमिति **तपःकृश**त्वोक्तिस्त**द्विरुद्धे**ति चेन्न, दृष्टान्तेनैव तन्निरासात्, तथा हि **यथाग्रिमफलार्थमसहजमपि तपः करोति** कामी तेन विना तदसम्भवात् तथाग्रिमसस्यार्थं तदुत्पत्तिस्थले रसंगृह्णन्ति नान्यत्र पूर्वं सारस्यवति देश उप्तस्य बीजस्यापि नाशात् तत्र रसग्रहणस्यावश्यकत्वात्, अत एव जलादिपदं हित्वा **रसपदमुक्तं**, सस्योत्पादनाशक्ते रसपदार्थत्वादत्र विषादप्युल्बणत्वेन तामपि ज्वालयितुं सामर्थ्यमप्यस्तीति ज्ञापितं, जीवितविरोधित्वाद् विषस्य तादृशैरपि रसाग्रहणं यत् तद् **वृन्दावनमाहात्म्यं**, एतेन **कालादयोपि व्रजवासिविरुद्धं कर्तुं न शक्नुवन्ती**ति ज्ञापितं अत्र काम्यतपःफलस्य दृष्टान्तीकरणेनात्रत्यसस्यादेस्तद्भिन्नत्वं ज्ञाप्यते, तदेतत्पूर्वमेवोक्तं "तत आरभ्ये"तिश्लोके ॥ ७ ॥ एवं लोकत्रयस्यादित्यसहितस्य स्वरूपमुक्त्वा शिष्टानां स्वरूपं वक्तुमृतवो धर्मे प्रतिष्ठिता मासा धर्मिष्विति प्रथममृतुवर्णनायां धर्मप्रतिष्ठामाह **निशामुखेष्वि**त्यादिपञ्चभिः।

अर्थः शब्दः फलं चापि त्रिविधं परिकीर्तितम्। अन्तर्बहिस्तथा चाङ्गमान्तरश्चेतिभेदतः ॥ १ ॥
पुष्टिमार्गे हि मर्यादामार्गस्तत्र न शोभते। अतः पञ्चविधस्यापि हानिरत्र निरूप्यते ॥ २ ॥

तत्र प्रथमतो वेदार्थहानिमाह, वसन्ते हि ब्राह्मणानामुपनयनाग्न्याधानादि तस्याभावे वसन्तव्यवस्थोक्ता भवति, ब्राह्मणानामन्यशेषत्व उपनयनानन्तरं यदध्ययनादि ग्रीष्मर्तौ तदन्यार्थमिति तत्स्वरूपमप्युक्तं भवति, ततः कर्मफलं यद् वर्षाकार्यं तदपसङ्गतमिति तस्यापि स्वरूपं विवृतं भवति, अल्पफलं बाह्यं क्लेशसाध्यं शरत्फलमिति दोषदुष्टत्वात् तस्यापि स्वरूपमुक्तं भवति, ततोल्पसन्तोषस्तदभावश्चेत्यवशिष्टस्य द्विरूपस्य, **प्रावृषि निशामुखेषु खद्योताः** कीटविशेषा लोकानां प्रकाशका इव भवन्ति स्वयमपि प्रकाशन्ते तत्र हेतु**स्तमसे**ति, कालकृतं यत् तमो मेघवृष्ट्यादिकृतं तेनैव तेषां प्रकाशस्तदपि प्रथममेव, अग्रे वृष्ट्या तेषामेव मरणसम्भवात् कस्य प्रकाशका भवेयुः ? **ग्रहा ये** नित्यप्रकाशास्ते **न भान्ति** एवम्भावे यो हेतुस्तं दृष्टान्तेन स्पष्टयति **यथा पापेने**ति **यथा यथा पापाधिक्यं तथा तथा वेदविरुद्धमार्गे रुचिः**,

वेदमार्गविरोधेन येषां करणमण्वपि। ते हि पाषण्डिनो ज्ञेयाः शास्त्रार्थत्वेन वेषिणः ॥ १ ॥

धर्मे पुष्टे तु तत्र रुचिर्न भवत्येव न ह्युपनयनादिसंस्कृतः पूर्ववद्व्यवस्थां कर्तुं वाञ्छत्यतोत्रापि **पापेनैव पाषण्डाः**, ननु विद्यमाने वेदे जागरूके कथं पाषण्डप्रवृत्तिः ? तत्राह **न हि वेदाः कलौ युग** इति, **त्रियुगो धर्मस्तत्प्रतिपादको वेदोपि** तावत्काल **एव भवितुमर्हति**, तदाह हीति, **वेदान्तः कलिर्यतः**, **युगपदप्रयोगादनुल्लङ्घ्यत्वम्** ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अष्टौ मासान्, तडित्वन्तो **महामेघा** इति श्लोकद्वयेपि वृष्टिनिरूपणेऽन्यतरवैयर्थ्यमिति शङ्काभावाय तद्भेदकं रूपमाहुराभासाभ्याम्। **तत्संबन्धिनं सूर्यं निरूपयतीति**, **सूर्योपरिलोकयोरित्यादि** च ॥ ६ ॥ **तपःकृशे**त्यत्र। ननु 'न यत्र चण्डांशुकरा विषोल्बणा भुवो रसं शाद्वलितं च गृह्णत' इति वाक्यविरुद्धं भूमेस्तपःकृशत्वकथनमिति चेत्। मैवम्। दृष्टान्तेनैवेतन्निरासात्। तथा हि। पूर्वमप्राप्ततापोपि कामितफलप्राप्त्यर्थं विहितं स्वयमुद्यम्य हि तपः करोति पुरुषस्तद्विना तदसम्भवात्। तथा तरणितापाभावेऽत्यार्द्रायां वृष्टिजलाप्लुतायां भुव्युप्तं बीजमपि नश्यत्यतो येषु क्षेत्रेषु तापापेक्षा तेषां क्षेत्राणां रसं रविकरा गृह्णन्त्येव। तदपि न स्वस्वभाववशात् किन्तूक्तदृष्टान्तन्यायेन गोपालानां विशेषतस्तथेच्छयेति मन्तव्यम्। अत एव ग्रीष्मवर्णने भुवो रसस्यैव ग्रहणमुक्तम्, न तु जलस्यापि। रसशब्देन चान्नोत्पत्तिहेतुभूताद्रतोच्यते। एतेन व्रजजनेच्छानुरूपमेव कार्यं भवति, नान्यदिति ज्ञापितं भवति। एतदेव हृदि कृत्वा **तपसा शोषितदेह** इत्याद्युक्तमाचार्यैः ॥ ७ ॥ **निशामुखेष्वि**त्यादिश्लोकपञ्चकाभासोक्तौ, एवं लोकत्रयस्येत्यादि। द्वादशमासा इति श्रुत्युक्तैकविंशतिपदार्थेपूक्तचतुष्टयं निरूप्येत्यर्थः। अग्रे च पञ्चर्तव इति श्रुत्युक्तपञ्चर्तुरूपतोच्यते। द्वादशसु मासेषु प्रत्येकं मासद्वयात्मकत्वेनर्तूनां षोढात्वे सम्भवति पञ्चत्वनिरूपणं यत् तत्तात्पर्यमाहुः **ऋतवो धर्म** इति। अग्निहोत्रदर्शपौर्णमासचातुर्मास्यपशुसोमा वैदिका धर्माः पञ्च। ते च 'वसन्तेऽग्नीनादधीते'त्यादिश्रुतिभिरृतूनेवाधिकृत्य विहिताः। तथा चोक्त

धर्मार्थमेवर्तु विभाग इति ज्ञापनाय तत्समानसंख्याका एव ते निरूप्यन्त इत्याशयेनाहुः **ऋतवो धर्मं प्रतिष्ठिता** इति । प्रतिष्ठितत्वं तत्रोपयुक्तत्वं तन्निमित्तत्वमिति यावत् । वसन्तादिषूपनयनाग्न्याधानज्योतिष्टोमादीनां वर्णभेदेन यागभेदेनापि विधानात्तथा । मासानां द्वादशत्वे हेतुमाहुः **मासा धर्मिष्विति** । धर्मिणो वैदिकधर्मकर्तारः पुरुषास्ते चोक्तधर्मसमुच्चिताः षष्ठा भवन्ति । सकामनिष्कामभेदेन तेपि द्विविधा इति द्वादशविधत्वम्, द्वादशांगत्वेनापि तथा । तेषां चायुः कर्मानुष्ठाने साधनम् । तच्च संवत्सरैर्मितमिति तेषामपि द्वादशमासात्मकत्वमित्याशयेनोक्तं **मासा धर्मिष्विति** । अग्रे जलस्थलौकस इत्यादिद्वादशसु श्लोकेषु जीवादयो द्वादशधर्मिणो ये वाच्यास्तेपि धर्मिपदेन संगृह्यन्ते । निशामुखेष्वित्यादिश्लोकप्रतिपाद्यानर्थान् क्रमेणाहुः **अर्थः शब्द** इत्यादिना । वेदो हि धर्ममूलम् । तत्र वर्णाश्रमधर्मा अर्थः, तत्प्रतिपाद्यत्वात् । अध्ययनं शब्दः, शब्दग्रहणात्मके तस्मिंस्तस्यैव मुख्यत्वात् । निषिद्धं कर्मफलम् । निषिद्धफलप्राप्तौ बाह्या सम्पत्तिस्तज्जो मदश्चांगे । अत्र पञ्चस्वपि श्लोकेषु हीनदृष्टान्तोक्तितात्पर्यमाहुः **पुष्टिमार्ग** इति । पुष्टिमार्गे मर्यादामार्गाद्वैलक्षण्यं ज्ञापयितुं तथोक्तिरित्यर्थः । तर्हि धर्मप्रतिष्ठामाहेत्याभासः कथं संगच्छते । इत्थम् । लौकिक्यां सृष्टौ पापेन यथा पाषण्डधर्माणां प्रकाशो, न वैदिकधर्माणाम्, तथात्र प्रावृट्सहजधर्मरूपं यत्तमस्तदन्यत्पापम् । खद्योतप्रकाशातिरिक्तः पाषण्डधर्मप्रकाशश्च, चन्द्राद्यप्रकाशातिरिक्तो वैदिकधर्माप्रकाशश्च नास्तीत्यर्थः । इदं च प्रावृषः शोभाकरं, तेन पूर्णो वैदिको धर्मोऽत्रास्तीति ज्ञापितं भवति । एतेन लीलासृष्टिस्वरूपज्ञापिकेयं प्रावृडित्युक्तं भवति । अत्रत्यानां क्षुद्राणामपि प्रकाशोऽधुना लीलानुपयोगिनां महतामप्यप्रकाश आवरकस्य प्रकाशकत्वं चेति वैलक्षण्यं च । किञ्च । परोक्षवादेन मर्यादामार्गादन्यदपि वैलक्षण्यमत्र ज्ञाप्यते । तथा हि । खे आकाशे द्योतः प्रकाशो येषां ते तथा । गतिमतामेव च तेषां द्योतः । सोपि न दिवा, किन्तु तमस्येव । एवं सत्येतत्समानधर्मवत्यो भगवदर्थमभिसारवत्यः स्वामिन्यो लक्ष्यन्ते । तासां भानं शोभा निष्प्रत्यूहं भगवत्प्राप्तिरेव । अत एव निशामुखेष्वित्युक्तम् । प्रियप्राप्त्यनन्तरमलौकिकचन्द्रस्यैव प्रकाशनात् । अन्यथा तमसा भान्तीत्येतावदेव वदेत् । ग्रहो ग्रहणं पाणिग्रहणं यासां तास्तथा । परोक्षवादत्वान्न पाणिपदोक्तिः । नहि तादृशं प्रत्यभिसारः सम्भवति । अत एव न भान्ति । गृह्णन्तीति ग्रहास्तदन्वेषणेन तन्निवारकास्तत्पुरुषा इति वा । एवं सति यथा मर्यादामार्गे निषिद्धेनाभिसारेण तानि पापस्य खण्डानि, 'लिङ्गं खण्डमिहोच्यत' इति वाक्यात् । तज्ज्ञापकमत्युग्रं दुःखं प्राप्नुवन्ति, न तु सुखम् । तथात्र । तेन मुक्तानामपि दुर्लभं सर्वश्रुतिमृग्यं भगवत्संगं प्राप्नुवन्तीति महदेव वैलक्षण्यमिति भावः । इदमत्राकूतम् । 'स वै पतिः स्यादकुतोभयः स्वयमि'ति 'त्वक्श्मश्रुरोमनखकेशपिनद्धे'त्यादिवाक्यैः स्त्रीणां भगवानेव पतिर्न तु जीवः । एवं सति यथा वैदिकेषु कर्मसु विष्णुयाग आसुरा यथा न जानन्ति, तथोपांशुरेव क्रियते, उपसदोपि तथा । यद्वा, 'इदमुच्चैर्यज्ञेन चरामः तन्नोसुराः पाप्मानुविन्दन्ति । उपांशूपसदा चराम तथा नोऽसुराः पाप्मानानुवेत्स्यन्ती'ति श्रुतेः । तेषां ज्ञानमेव तद्धर्मरूपपाप्मयोजकत्वेन फलप्रतिबन्धकम् । तथा प्रकटं प्रभुसमीपगमन एतन्मार्गानधिकृताः स्वधर्मेण फलप्रतिबन्धकरणेन योजयिष्यन्तीति तथा गमनमेव तासां स्वधर्म इति मुख्यो धर्मो ज्ञापितो भवत्यत्रेति । यद्वा, सर्वत्र धर्मविरोधदृष्टान्तोक्तितात्पर्यमाहुः **पुष्टिमार्गे हीति** । इदमत्राकूतम् । सर्वसामर्थ्यानि प्रकटीकृत्य स्वयं प्रकटे फलरूपे प्रभावितरसाधनानुष्ठानस्याप्रयोजकत्वेपि व्रजे यद्वेदाध्ययनादिकं तन्न मर्यादामार्गीयम्, किन्तु 'मन्नाथं मत्परिग्रह'मिति प्रभुवाक्यात् तेषां मर्यादामार्गीयत्वासम्भवात् पुष्टिमार्गीयम् । स्वस्त्ययनाशीर्दानादिभिस्तज्जनितसामर्थ्यस्य भगवति विनियोगात् लीलोपयोगित्वाच्च तथा । 'विप्रा मन्त्रविद' इति वाक्यात् तादृशानामेवाशिषामनिष्फलत्वात् तेषां स्वस्मिन् विनियोगस्य चिकीर्षितत्वात् तदिच्छात एव तत्करणात् पुष्टिमार्गीयत्वम् । तेन मर्यादामार्गीयो धर्मोत्र नास्तीति ज्ञापनाय तादृग्दृष्टान्तोक्तिरिति । अथवा, ऋतवो धर्म इति । यस्यर्तौर्यो धर्मः पुष्पधर्ममेघादिस्तस्मिन् प्रवृत्ते सम्यगयमृतुः प्रवृत्त इति सर्वैः स्तुतो भवतीतीयमेवर्तु प्रतिष्ठा । तथा च तमोविशेषः खद्योतप्रकाशो ग्रहाभानं च वर्षर्तु धर्मः शोभाहेतुश्चेति स उच्यते । प्रकाशस्य ग्रहाणां च मर्यादामार्गीयत्वात्तदशोभोच्यते । मर्यादामार्गविरोधांशे च दृष्टान्तः । मण्डूकशब्दोपि वर्षर्तु शोभाकरः । ब्राह्मणास्तु मेघगर्जितं श्रुत्वानध्यायज्ञानेन वेदाध्ययनलक्षणनियमभंगे तदन्या वाचः सृजन्ति, कर्मानुपयोगित्वमुभयोस्तुल्यम् । तेन वेदाध्ययनात्मकमर्यादाशोभाभाव उक्तो भवति । क्षुद्रनदीनां तथात्वमपि (तदा) तथा अविहितप्रकारेण दानभोगाभ्यां मर्यादाभाव उक्तः । अग्रिमश्लोकोक्तधर्मा अपि तदा शोभायै । नृणामिति साधारणवचनात् क्षुद्रार्थजनिता लौकिकी शोभोक्तेति न मर्यादामार्गीयत्वम् । क्षेत्राण्यपि पूर्ववत् । उत्तरार्धे स्पष्टं पूर्ववत् । **यथा पापेने**त्याभासे, **एवं भावे यो हेतु**रित्यादि । मर्यादामार्गतिरोधानमेव हेतुरिति भावः । **श्रुत्वा पर्जन्यनिनद**मित्यनेनापि कलिस्थब्राह्मणतुल्या अत्र मण्डूका एव, न तेपीति ज्ञाप्यते । तेनात्र ब्राह्मणानां स्वधर्मनिष्ठत्वं ज्ञापितं भवति । **आसन्नुत्पथवाहिन्य** इत्यनेनापि क्षुद्रनदीव्यतिरिक्त उत्तरार्धोक्तधर्मविशिष्टः पुरुषोत्र नास्तीति ज्ञाप्यते । एतेनेन्द्रियपरवशत्वाभावेनान्तरमङ्गमुक्तं भवति । **हरिता हरिभि**रित्यनेनापि नृणां क्षुद्राशयानां क्षुद्रार्थसम्पदो मदजनिका यथा, तथात्रोक्तधर्मत्रयातिरिक्ताः क्षुद्रार्था न सन्तीति ज्ञाप्यते । न ह्येते मदजनकाः । तथा च 'तत आरभ्य नन्दस्ये'ति वाक्यादलौकिकी सर्वार्थसम्पदस्ति, न तु मदजनिकेति ज्ञाप्यते । अपरञ्च । लौकिकमहाराज्यश्रीतुल्यात्र भुवो वर्णादिशोभैव । सापि बाह्यैव । प्रभुपदाम्बुजचिह्नलीलानन्दादिरूपबाह्याभ्यन्तरशोभायास्तु दृष्टान्त एव नास्तीति भावः । क्षेत्राणीत्यनेनापि सर्वजीवनहेतुभूतान्नोत्पत्त्यनुकूलप्रयत्नवतां मुदं स्वदोषेण वस्तुतत्त्वाज्ञानेन च परद्रोहकर्तॄणां

तत्प्रतिबन्धकरणेन दुःखं च क्षेत्राणि जडानि यत्र ददुस्तत्र किमु वक्तव्यं गोकुले चेतनानां सर्वहितकर्तृत्वमन्येनापि परद्रोहचिन्तने तत्प्रतिबन्धकत्वमिति ज्ञाप्यते । तेनात्र पूर्णो धर्मो निरूपितो भवति । अतः सुष्ठूक्तं **धर्मप्रतिष्ठामाह पञ्चभिरि**ति ॥ ८ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

अष्टौ मासानित्यस्याभास **आकाशमि**त्य**स्पष्टज्योतिरि**तिपदाज् ज्योतिरधिष्ठानभूतं द्युलोकात्मक**माकाश**मित्यर्थः, अत्र टिप्पण्यां किञ्चिदाशङ्क्य परिहरन्त्यष्टावित्यादि, अत्र **सान्द्रनीलाम्बुदै**रितिप्रतीकस्थले **तडिद्वन्तो महामेघा** इतिप्रतीकं विवक्षितं ज्ञेयं, **सुबोधिन्यां प्रजापतिरि**ति जगत्कारणीभूतकालः "संवत्सरो वै प्रजापति"रितिश्रुत्यन्तराज् ज्ञेयः; ननु भूमौ **जलेनैव** सर्वं भवतीति ततो जलग्रहणस्य पुनर्दानस्य किं प्रयोजनमत **आहुरतो दत्त**मित्यादि, अतः प्रजापतिरूपात् कालात् सूर्येण **दत्तं** भूम्या ग्राह्यं तदैव **सस्योत्पत्तिरि**ति स पक्वं कृत्वा तदेव प्रयच्छतीति पाक एव प्रयोजनमित्यर्थः, इदं च **तपःकृशे**त्यत्र स्पष्टं भविष्यति, दानस्यावश्यकत्वे हेतुमाहुर**न्यथे**त्यादि, "भीषास्मा"दितिश्रुतेस्तन्नियमातिक्रमे भगवांस्तमुपद्रावयेदित्यर्थः, अतो **यथे**त्याकाशस्येतिशेषः, अस्मिन्नपि पद्ये सूर्यसवितृत्वज्ञाने स्वयमेव लीलार्थं नूतनमुत्पादयतीतिज्ञानं तथेति बोध्यम् ॥ ५ ॥ **तडिद्वन्त** इत्यस्याभासे **सूर्योपरिलोकयो**रित्यादि, **सूर्यश्चोपरिलोकश्च सूर्योपरिलोकौ** तयोर्निरूपणानन्तरं द्युभुयोर्**मध्यमलोकस्य** मेघानां वाय्वधीनत्व इन्द्राधीनत्वं कथमित्याङ्काक्षायामाहुर्**बलकार्य**मित्यादि "ज्ञानबलक्रिया चे"तिश्रुत्युक्तबलशक्ति**कार्यं**, स एव वायुरेव **त्रिदेवतापक्ष** इति बृहदारण्यके शाकल्यब्राह्मणे "कतमे त्रय" इति प्रश्ने "इम एव त्रयो लोका एषु ह्येमे सर्वे देवा" इत्युत्तरेग्निवाय्वादित्याधिष्ठितलोकत्रयस्य **देवतात्वपक्षे** सर्वेषां देवानां तेष्वेवान्तर्भावादयं **निर्णय** इत्यर्थः, अस्मिन् पक्षे लोकानामेव देवतात्वादग्न्यादीनां तथाकल्पनमरुच्यमित्यतः पक्षान्तरमाहु**रिन्द्रो देवते**त्यादि तथा चाधिदैविकादिभेदादेषोपपत्तिः, एतदुपपादयन्ति यथेत्यादि **स्थितिरि**त्यन्तं, तडिद्वत्त्वकथनप्रयोजनमाहु**स्ते ही**त्यादि, एतेन पद्येनान्तरिक्षस्य वाय्वधिष्ठेयत्वात् तद्दीपितमेघद्वारा **जगत्प्राणनजीवन**सम्पादनेन तत्स्थितिकर्तृत्वरूपं स्वरूपं प्रावृट् सम्पादयतीति तेन मेघा **वैदिक**प्रकारेण **फलदा** भवन्तीतिज्ञानं तथेतिभाव उक्तो ज्ञेयः, अत्र **चण्डश्वसनवेपित**पदादन्तरिक्षज्ञानं "वायुरन्तरिक्षस्ये"तिश्रुतेरिति ज्ञेयम् ॥ ६ ॥ **तपःकृशे**त्यत्र यद्यप्यमरे "स्त्रियां मूर्तिस्तनुस्तनूरि"त्यूङन्तस्तनूशब्दो देहवाचकः उक्तस्तथापि न जीवदेहवाचकः शक्यवचनः, 'अप्राणिजातेश्चारज्ज्वादीनामुपसङ्ख्यान'मितिवार्तिकेप्राणिजातेरित्यनेन प्राणजातिपर्युदासतः **कृकवाकु**शब्दतुल्यत्वात् **क्रमवाक्वादि**शब्दानां देहप्राधान्येनैव प्रवृत्तेः, मृतः कृकवाकुरित्यादिप्रयोगात्, **हैमविश्वमेदिनीषु** तनुशब्दमात्रस्यैव कथनाच्चात्र मूले **तनू**शब्दो न घटत इत्याशङ्क्य तत्प्रयोगमुपपादयन्ति **काम्ये**त्यादि, अस्मिन् पक्षे तन्व इति वक्तव्ये तनूरिति जसो रूपं न सङ्गच्छत इत्यतः प्रकारान्तरमाहुस्**तनुरि**त्यादि, सर्वत्र **दीर्घान्त**पाठदर्शनात् पूर्वमेव पक्षमुपष्टभ्नन्ति **प्रथमार्थ** इत्यादि, तथा चा'नुशुष्यती'रितिवदयमपि प्रयोगः, अस्मिन् पक्षेपि कल्पनाबाहुल्यादरुच्या पक्षान्तरमाहु**रथ वे**त्यादि, **अत्रत्यसस्यादेस्तद्भिन्नत्वमिति** व्रजस्थ**सस्या**देलौकिकसस्यादिभिन्नत्वमित्यर्थः, **इदं चाग्नि**स्थानप्रकारकं रेतोमात्रजनकं **भगवद्भक्तिजनकत्वेने**तिभिन्नत्वं भाति, **न यत्रे**त्यारभ्य **ज्ञाप्यत** इत्यन्तेन यदुक्तं तत्तात्पर्यं **टिप्पण्यामाहुर्ननु ने**त्यादि, एतेन पद्येन च टिप्पण्युक्तदिशा ब्रजजनेच्छानुरूपार्द्रत्वशुष्कत्वादिवैशिष्ट्यात् स्थितिफलजनकत्वरूपं भुवस्तत्त्वं निरूपितं तथात्वज्ञानस्य लीलोपयोगित्वायेति ज्ञेयम् ॥ ७ ॥ **निशामुखेष्वि**त्यत्रैवं **लोकत्रयस्थे**त्यादेः सर्वस्याभासस्यार्थं **टिप्पण्यामाहुर्द्वादशे**त्यादि, **निरूप्येत्युक्त्वे**त्यस्यार्थः, **सुबोधिनीस्थां** कारिकां विवृण्वन्ति **निशामुखेष्वित्यादिना, कर्मफल**मिति सकामकर्तॄणां देहेन्द्रियसम्पत्तीनां प्राप्त्युत्पथवाहित्वानुशोषणभेदेन त्रिप्रकारं ज्ञेयमित्यभिप्रेत्य कारिकायां त्रैविध्यमुक्तं, **आन्तरं चेतिभेदत** इति तु न व्याख्यातं, **आन्तरमेतदुक्त**दृष्टान्तव्यङ्ग्यं व्रजसम्बन्धि, **भेदतोस्माद्भिन्नतयोत्तमं च परिकीर्तित**मित्यनेनान्वयः, तदपि दृष्टान्ततात्पर्यबोधकस्य **पुष्टिमार्गं** इत्यादिग्रन्थस्य व्याख्याने टिप्पण्यां स्फुटीभविष्यतीत्थमित्यादीत्यर्थ इत्यन्तं, तदेव व्युत्पादयन्तीदं **चे**त्यादिना **अभिसारेणे**त्स्यान्वयोत्युग्रं दुःखमित्यादिना बोध्यस्तेनेत्यस्य **भगवत्सङ्ग**मित्यनेन, **यद्**'वेद'मित्स्याः श्रुतेरर्थस्तु प्रागाख्यातः, एवमत्र **पुष्टिमार्गे ही**त्यादिग्रन्थव्याख्यानेन कारिकास्थस्यान्तरपदस्यार्थो व्युत्पादितो ज्ञेयः, तेन **श्लोकपञ्चकोक्त**हीनदृष्टान्तस्य तद्विपरित उत्तमे तात्पर्यमिति ज्ञापितं, अस्मिन् प्रकारेतिपरोक्षवाद इति न सर्वेषां बोधसौकर्यमतः प्रकारान्तरेण व्याकुर्वन्ति **यद्वे**त्यादि, **सर्वत्रे**ति पञ्चसु श्लोकेषु, **आदिक**मितिपदेनाग्निहोत्रादिकं, एवं सामान्यतः कथनेपि प्रतिश्लोकार्थो विवक्षितपरत्वे स्फुटो न भवतीति तदर्थं प्रतिश्लोकतात्पर्यं व्यक्तीकर्तुं प्रकारान्तरमाहुरथ वेत्यारभ्य **पूर्ववदि**त्यन्तं, इदं च कलिपदात् स्फुटति, न हि भगवत्सद्भावे कलिः शक्त इति "तदाहरेवाप्रतिबुद्धचेतसामधर्महेतुः कलिरन्ववर्त्त"तेतिवाक्यात्, **सुबोधिन्यां वेदार्थहानिमाहे**ति ब्रजे तस्य प्रतिष्ठां वक्तुमन्यत्र तद्धानिं दृष्टान्तमुखेनाहेत्यर्थः, एतदेव चात्रोक्तानामर्थानां तत्त्वं, एवम्भावेन ज्ञानस्य च लीलोपयोगित्वं बोध्यं, तं व्युत्पादयन्ति **वसन्ते**त्यादि, **अन्यशेषत्व** इत्याद्यपुरुषशेषत्वे, **अन्यार्थ**मिति आढ्यकृतसन्माननार्थं, तत् वर्षाकार्यमिति द्रव्यप्राप्त्युत्सेकद्रव्यनिवृत्तिरूपं, **तस्यापी**ति वर्षतो, **दोषदुष्टत्वादि**त्यल्पकालपरिमितत्वात्, **द्विरूपस्ये**ति हेमन्तशिशिररूपस्य, एवं श्लोकपञ्चकोक्तदृष्टान्ततात्पर्यं पुरःस्फूर्तिकमुक्तं, एतदेव व्यङ्ग्यार्थबोधनसहितं टिप्पण्यां व्युत्पादितं, ज्ञेयं, **एवम्भावे यो हेतुरि**त्यस्यार्थं टिप्पण्यामाहुर्**मर्यादि**त्यादि, **सुबोधिन्यां वेदान्तः कलिरि**ति **वेदस्यान्तो येन यत्रेति वा समासो ज्ञेयः** ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तडित्वन्त इत्यस्याभासे **सूर्योपरीति सूर्य उपरिलोकश्च** अनयोः सम्बन्धी तदधःस्थितो यो मध्यमोन्तरिक्षलोकस्तस्येत्यर्थः, 'अन्तरेणान्तरिक्षं तदुभयसन्धित'मिति वाक्यात्, व्याख्याने, अत्र मध्यमलोकनिरूपणं साधयन्ति **अन्तरिक्षेति**, तत्र हेतुः **वाय्वधीना** इति, अन्तरिक्षवाय्वोरभेदादिति भावः, तथा च मेघानामन्तरिक्षदेवताकत्वात् प्राणनजीवनमोचकत्वरूपमेघस्वरूपनिरूपणेनान्तरिक्षलोकस्वरूपं निरूपितं जातमितिभावः, **बलकार्य**मिति बलरूपं कार्यं स एव करोतीति शेषः, न तु तत्कार्यार्थं पृथगिन्द्रापेक्षेत्येवकारः, **तद्भेदा** इति अन्तरिक्षभेदा इत्यर्थः ॥ ६ ॥ **निशामुखे**ष्वित्यत्र **त्रिविध**मिति **अर्थशब्दफलभेदेन त्रिविधं** हीनं वस्तु अन्तः **परिकीर्तितं** त्रिभिः श्लोकैरिति शेषः, तस्य फलस्य **बहिरङ्गमान्तरं चाङ्गं** तथा च **परिकीर्तित**मित्यर्थः, श्लोकद्वयेनेति शेषः, **इति भेदतः पञ्चभिः** श्लोकैर्**धर्मप्रतिष्ठामाहे**ति पूर्वेणान्वयः, **अन्यशेषत्वे** इति अग्न्यन्वाधानादिव्यतिरेकेण केवलं दानसम्प्रदानत्वे इत्यर्थः ॥ ८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तडित्वन्त इत्यत्र **इन्द्रो देवता वायुरात्मा मेघा भूतानीति त्रयाणामेकरूपत्व**मिति इन्द्रस्याधिदैविकत्वं वायोराध्यात्मिकत्वं मेघानामाधिभौतिकत्वमिति त्रयाणामभेद इत्यर्थः ॥ ६ ॥ **वसन्तव्यवस्थोक्ता भवतीति** "न हि वेदाः कलौ युगे" इत्यनेन वेदाभावकथनादुपनयनाग्न्याधानादीनामभाव उक्तः, अतो वसन्ते यत् कर्तव्यं तन् नास्तीति धर्मरहिता वसन्तव्यवस्थोक्ता 'निशामुख' इति श्लोकेन, **ब्राह्मणानामन्यशेषत्वे** इत्यारभ्य **भवतीत्यन्तं** वेदाध्ययनं ग्रीष्मे तत्प्रयोजनं वसन्ते कृताधानस्य यागनिर्वाहः, इह त्वध्ययनं द्रव्यलाभार्थमुक्तमतो ग्रीष्मेपि धर्मराहित्यं "श्रुत्वा पर्जन्यनिनद"मिति श्लोकेनोक्तं, **ततः कर्मफलं यद् वर्षाकार्य**मित्यारभ्य **भवतीत्यन्तं** 'आसन्नुत्पथवाहिन्य' इति श्लोके वर्षाकार्यमुत्पथवाहित्वमुक्तं, अतो वर्षायामपि धर्मराहित्यं, **अल्पफल**मित्यारभ्य **भवतीत्यन्तं**, "हरिता हरिभिः शष्पै"रित्यनेन अल्पफलमुक्तमिति शरद्यपि धर्माभावः, **अल्पसन्तोषस्तदभावश्चेत्यवशिष्टस्य द्विरूपस्ये**ति "क्षेत्राणि सस्यसम्पद्भि" रित्यनेन कर्षुकाणामल्पसन्तोष उक्तः, अल्पेन सन्तोषः अल्पसन्तोष इति तृतीयातत्पुरुषः, 'मानिनामुपतापं च दैवाधीनमजानता' मित्यनेन सन्तोषाभावो निरूपितः, एकस्मिन्नेव श्लोके द्वयं निरूपितं, यतो हेमन्तशिशिरयोरप्येकत्वं, अतस्तत्सूचनायैकत्रोक्तिः, अत एव पञ्चसु प्रयाजेषु "वसन्तमृतूनां प्रीणामी"त्यत्र ऋतुचतुष्टयं पृथगुक्त्वा "हेमन्तशिशिरावृतूनां प्रीणामी"त्यनेन हेमन्तशिशिरयोरैक्यमुक्तं, अत एव "द्वादश मासाः पञ्चर्तव" इति श्रुतौ ऋतूनां पञ्चत्वोक्तिर्युज्यते, तत्राप्यल्पसन्तोषतदभावाभ्यां हीनत्वोक्त्या धर्माभाव उक्तः, एवं पञ्चसु धर्माभावो निरूपितस्तस्य प्रयोजनं त्वन्यत्र धर्माभावेपि इह व्रजे तु धर्मोस्त्येवेति "खद्योतप्रकाशातिरिक्तः पाषण्डधर्मप्रकाशश्चन्द्राद्यप्रकाशातिरिक्तो वैदिकधर्माप्रकाशश्च नास्तीत्यर्थः" इत्यादिना टिप्पण्यां श्रीमत्प्रभुचरणैर्निरूपितं, अत एव सुबोधिन्यां ऋतुवर्णनायां **धर्मप्रतिष्ठामाहे**त्युक्तं, **"न हि वेदाः कलौ युगे"** इत्यस्य व्याख्याने **युगपदादनुल्लङ्घ्यत्व**मिति, "गृह्णतोनुयुगं तनू"रित्यस्य सुबोधिन्यां **"भगवान् जगच्चे"**तियुगपदार्थं उक्तः, अतो युगस्य भगवद्रूपत्वादनुल्लङ्घ्यत्वमित्यर्थः ॥ ८ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

निशामुखेष्वित्यादिश्लोकप्रतिपाद्यानर्थान् क्रमेणाहुः **अर्थः शब्द** इत्यादिना का० १५९$\frac{३}{४}$–१६१$\frac{३}{४}$। 'निशामुखे'ष्विति श्लोके वेदप्रतिपाद्यवर्णाश्रमधर्मरूपोर्थः, "श्रुत्वा पर्जन्यनिनद"मिति श्लोके शब्दात्मकमध्ययनं, 'आसन्नुत्पथवाहिन्य'' इति श्लोके उत्पथवाहित्वरूपं निषिद्धं फलं, एवमर्थशब्दफलभेदेन त्रिविधं वस्तु त्रिभिः श्लोकैर्निरूपितं, निषिद्धफलप्राप्तौ बाह्या सम्पत्तिः तज्जो मदश्चाङ्गं, तत्र 'हरिता हरिभिः शष्पै'रिति श्लोके बाह्यसम्पत्तेः स्वरूपमुक्तं, "क्षेत्राणी"ति श्लोके आन्तरमुक्तम् ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पर्जन्यः सूर्यः स्वगोभिः स्वकिरणैः अष्टौ मासान् कार्तिकमारभ्य ज्येष्ठपर्यन्तं यद्भूम्याः उदमयं जलरूपं वसु धनं निपीतं तत् पुनर्वर्षाकाले आगते सति मोक्तुमारेभे। एवमेव "राजभिः सुभिक्षकाले प्रजाभ्यः करादिकं ग्राह्यम्, दुर्भिक्षकाले च ताभ्यो यथोचितं धनादिकं देयमेव" इत्यादेयोपमा ॥ ५ ॥ यथा करुणाः कृपालवो जनाः क्षुदादिना तप्तं जनं नेत्रैर्वीक्ष्य कृपया कम्पितचित्तास्तस्याप्यायनाय स्वजीवनं जीवसाधनमप्यन्नादिकं ददति, तथा महामेघा अपि तडित्वन्तस्ताभिर्नेत्रस्थानीयाभिस्तडिद्भिस्तप्तं विश्वं निरीक्ष्य चण्डश्वसनेन खरतरपवनेन वेपिताः कम्पिता अस्य विश्वस्य प्राणनमाप्यायनकरं जीवनसाधनभूतं जलं मुमुचुरिति दानशूरैरियमादेयोपमा ॥ ६ ॥ तपःकृशा तपसा ग्रीष्मतापेन कृशा सर्वजलाहरणात् शुष्का, पुनर्देवेन पर्ज्यन्येन मीढा सिक्ता सती मही वर्षीयसी पुष्टाङ्गासीत्। यथा काम्यं काम्यप्राप्त्यर्थं तपो यस्य तस्य तपस्विनस्तनुः प्रथमं तपसा शुष्का भवति, पश्चात्तस्य तपसः फलं प्राप्य यथेष्टभोजनपानादिना पुष्टा भवति तथैवेति। तथा च पुष्ट्यादेरनियतत्वाद्देहादेरपि नश्वरत्वात्तद्भोगाद्यर्थं तपसा वृथा आयुर्व्ययो विवेकिभिर्न कर्तव्य इति हेयोपमा। ननु "न यत्र चण्डांशुकरा विषोल्बणा भुवो रसं शाद्वलितं च गृह्णते इति, पूर्वोक्तं विरुद्धं भूमेस्तपः कृशत्वकथनम्" इति चेन्न, पूर्वमार्द्रत्वकथनस्य भगवद्विहारोपयुक्तवृन्दावनभूमिविषयत्वात्। इदानीं कृशत्वकथनं तु

कृष्याद्युपयुक्तसर्वभूमिसाधारणम्, अन्यथा सर्वदा आर्द्रायां पुनर्वृष्टिजलेन चाप्लुतायां मह्यां व्युप्तमपि बीजं नश्येत् सस्याद्युत्पत्तिर्न स्यात्। अतः कृष्याद्युपयुक्तक्षेत्राणां रसं रविकरा गृह्णन्त्येवेति। सर्वभूमिसाधारणत्वादेव वृन्दावने विद्यमानानां नदीसिन्ध्वादीनां वर्णनमपि सङ्गच्छते इति न कोऽपि विरोध इति ॥ ७ ॥ निशामुखेषु रात्रिषु प्रकाशकग्रहाद्याच्छादकमेघजनितेन तमसा खद्योताः कीटविशेषाः भान्ति प्रकाशन्ते, नित्यसिद्धा ग्रहाश्चन्द्रगुरुशुक्रादयस्तु न भान्ति। यथा कलौ युगे विवेकावरकाज्ञानजनितेन पापेन पाखण्डा वेदविरुद्धपाखण्डशास्त्राणि भान्ति, नित्यसिद्धा वेदास्तु नैव भान्ति, तथाच सावधानतया विचार्य विवेकिभिः पाखण्डशास्त्र हित्वा वेदानुसारेणैव वर्तितव्यमिति हेयोपादेयोभयोपमा ॥ ८ ॥

अन्वितार्थप्रकाशिका

अष्टाविति ॥ पर्जन्यः सूर्यः स्वस्य गोभिः किरणैः। टजभाव आर्षः। अष्टौ मासान् कार्तिकमारभ्य ज्येष्ठपर्यन्तं यद्भूम्याः उदमयं जलरूपं वसु धनं निपीतं तत्पुनर्वर्षाकाले आगते सति मोक्तुमारेभे। अत्र करमादाय समये पुनः प्रतिदानाद्राजोपमा सूचिता ॥ ५ ॥ तडित्वन्त इति ॥ यथा करुणा दयालवो दुःखितं जनं वीक्ष्य तत्सुखाय स्वजीवनमपि त्यजन्ति तथा महामेघा अपि तडित्वन्तस्ताभिर्नेत्रस्थानीयाभिस्तडिद्भिस्तप्तं विश्वं निरीक्ष्य चण्डश्वसनेन खरतरपवनेन वेपिताः कम्पिताः अस्य विश्वस्य प्राणनमाप्यायनकरम्। प्रीणनमित्यपि पाठः। जीवनसाधनभूतं जलं मुमुचुः ॥ ६ ॥ तप इति ॥ तपसा ग्रीष्मतापेन। सान्तलमार्षमिति तोषणी। "तपः कृच्छ्रादिकर्मणि धर्मे लोकप्रभेदे च" इति हेमाद्रौ। सान्तोऽपि तपःशब्दो धर्मवाची मेदिन्यां दृश्यते। कृशा सर्वजलाहरणात् शुष्का पुनर्देवेन पर्जन्येन मीढा सिक्ता सती मही वर्षीयसी पुष्टाङ्गाऽऽसीत्। यथा काम्यं कामप्राप्त्यर्थं तपो यस्य तस्य तपस्विनस्तनुः प्रथमं तपसा शुष्का भवति पश्चात्तस्य तपसः फलं प्राप्य यथेष्टभोजनपानादिना पुष्टा भवति तथैवेति ॥७॥ निशेति ॥ निशामुखेषु रात्रिषु प्रकाशग्रहाद्याच्छादकमेघजनितेन तमसा खद्योताः कीटविशेषाः भान्ति प्रकाशन्ते। नित्यसिद्धा ग्रहाश्चन्द्रगुरुशुक्रादयस्तु न भान्ति। यथा कलौ युगे विवेकावरकाज्ञानजनितेन पापेन पाखण्डा वेदविरुद्धपाखण्डशास्त्राणि भान्ति। नित्यसिद्धा वेदास्तु नैव भान्ति ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अष्टौमासान् अष्टमासपर्यंतं निपीतं भूम्याः यत् उदमयं जलमयं वसुधनं तज्जलं पर्जन्यो रविः गोभिः किरणैः काले प्रावृषि ॥ ५ ॥ चंडेन महावेगेन श्वसनेन वायुना वेपिताः कंपिताः अस्य जनवृंदस्य प्रीणनं तृप्तिकरं जीवनं जलं करुणः दयालवो रंतिदेवादयः स्वजीवनं अन्नजलादि इव मुमुचुः ॥६॥ तप इति । तपसा ग्रीष्मतापेन कृशा शुष्कादेव मीढा मेघसिक्तावर्षीयसी प्रफुल्ला पुष्टेति यावत् मही आसीत् अत्र दृष्टांतः काम्यं विषयकामनायुक्तं तपो यस्य तस्य तनूदेहः तस्य तपसः फलं विषयान् संप्राप्य यथा वर्त्तते तद्वत् सा ॥ ७ ॥ व्याप्तेन तमसा पाषंडाः भाति वेदा न ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अष्टाविति ॥ यत् अष्टौ मासान् कार्त्तिकादारभ्य यावज्ज्येष्ठं, अत्यन्तसंयोगे द्वितीया। स्वगोभिः स्वकिरणैः, निपीतं नितरां गृहीतं, भूम्याः यत् उदमयमुदकात्मकं वसु धनं, तत्, काले आगते पुनरुचितकाले प्राप्ते सति, पर्जन्यो वर्षाधिदेवः सूर्यः स्वगोभिरेव, मोक्तुं आरेभे। अनेन राज्याधिकृतः शिक्षितो राजा पर्जन्यवद्यथोचितं कालेषु प्रजाभ्यो धनानि गृहीत्वा पुनरर्थिभ्यो दद्यादिति सूचितम् ॥ ५ ॥ तडित्वन्त इति ॥ तडित्वन्तो विद्युद्युक्ताः चण्डस्तीव्रश्चासौ श्वसनो वायुश्च तेन वेपिताः कम्पिताः, महामेघाः, प्राणिनां जीवनं जीवनसाधनं, अम्बु जलं, करुणाः इव, करुणावन्त इवेत्यर्थः। करुणा इत्यर्शआद्यजन्तः। मुमुचुः हि। प्राणनं जीवनं ह्यस्येति पाठे, अस्य विश्वस्य, प्राणनं जीवनकरं जीवनं जलं, 'जीवनं वर्त्तने नीरप्राणधारणयोरपि' इति मेदिनी॥ अनेन दुःखितं जनमवलोक्य मेघवत् श्वासेन कम्पिताग्राः करुणावन्तः स्वजीवनदानेनोपकुर्युरिति शिक्षा कृता। यद्वा। कृपालवो यथा क्षुधादिभिः पीड्यमानतयाऽतिप्रतप्तं जनं निरीक्ष्यानुकम्पमानास्तदाप्यायनाय स्वजीवनभूतमप्यन्नादिकं रन्तिदेववत्त्यजन्ति यथा, तद्वन्महान्तो मेघास्तडिन्नेत्रैर्विश्वं प्रतप्तं निरीक्ष्य, वायुभिर्वेपिता लोकजीवनहेतु जलं मुमुचुरिति ॥ ६ ॥ तप इति ॥ तपसि ग्रीष्मेण वा कृशा शुष्का, देवेन, पर्जन्येन मीढा सिक्ता, मही भूः, वर्षीप्रसी प्रवृद्धा उच्छूना इति यावत्। आसीद्बभूव सस्यादिसंपन्ना वा बभूवेत्यर्थः। का इव। काम्यं कामनाविषयं तपो यस्य पुंसः, तनुः, तत्फलं काम्यतपःफलं, संप्राप्य, यथा एव परिपुष्टा भवति तद्वत्, काम्यमर्थं लक्ष्यीकृत्य तत्प्राप्तये तपश्चरतस्तनुस्तपोदशायां कृशा सत्यपि तत्फलोपलब्धौ सत्यां यथा हृष्टपुष्टा भवति तद्वद्ग्रीष्मातितप्ता भूमिरपि वर्षोदकसेकमुपलभ्य परिपुष्टा बभूवेति भावः। अनेन काम्यतपसस्तपः केवलं देहसुखसाधनमेव, न तु संसृतिबन्धननिवृत्तिकरमिति शिक्षितम् ॥७॥ निशेति ॥ निशामुखेषु, सायंकालेषु खद्योता ज्योतिरिङ्गणास्तेजोविशिष्टाः कीटविशेषा इति यावत्। त एव तमसा हेतुना, भान्ति। एतेन दिवसे तेषां शोभा नैवास्तीति सूचितम्। न तु ग्रहाश्चन्द्रशुक्रादयः, गगनस्य मेघकृततमोवृतत्वादित्यर्थः। यथा कलौ युगे, पापेन पापप्राचुर्येण हेतुना, पाषण्डाः वेदविरुद्धा आगमाः, हि एव, भान्ति। न तु वेदा भान्ति न तु वेदा भान्ति तद्वत्। अनेनावैदिकधर्माभासरुचिः पापहेतुकैवेति सूचितम् ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अष्टौ इति ः १०.२०.५.

सन्तापशान्तिमवगत्य तदा स्वगोभिरानन्दबाष्पमयवृष्टिमसौ ततान।
गोपीजनो भुवि यथा स सुराशनश्रीः सूर्योऽपि खे त्विति सुखं निखिले तदाऽऽसीत् ॥ १० ॥

तडित्वन्त इति ः १०.२०.६.

आश्रित्यैव सवादि-साधनमसौ यद्वासवो वर्षति मेघा वा करुणा इवेति वचसा तत्रापि तत्तुल्यता।
त्वं तु श्रीधर नैव साधनलवं पश्यस्यवश्याश्रितांस्तन्निर्व्याजदयापदं त्वमभवद् यद्व्यक्तमग्न्यादने ॥ ११ ॥

वर्षीयसीति ः १०.२०.७.

तनुरपि पृथ्वी भवति हि काम्यतपःफलमवाप्य मह्येषा। पृथ्वी निसर्गतस्तद्युक्तं वर्षीयसी तदाऽऽसेति ॥ १२ ॥
काम्यतपःफलमुक्तं तनुभृत्तनुपुष्टिदं प्रभो मुनिना। त्वत्पदसदातपस्थित्यर्पणमजनि त्रितापहरमर्थात् ॥ १३ ॥

निशामुखेष्विति ः १०.२०.८.

यावन्मायाविलासः प्रसरति जगति स्पष्टपाखण्डवादस्तावत्स्वोत्कृष्टभावं श्रयति नहि तदा क्वापि गर्वैकलब्धिः।
एवं वृत्तौ युगेऽन्त्ये कथमिह भविता तापशान्तिर्जनानामित्यालोच्याऽच्युत त्वं शरणमिति वचोमात्रतस्त्राणकर्ता ॥ १४ ॥

कृष्णप्रिया

सूर्य ने राजा की तरह पृथ्वीरूप प्रजा से आठ महीने तक जल का कर ग्रहण किया था अब समय आने पर वे अपने किरण करों से फिर उसे बांटने लगे ॥ ५ ॥ जैसे दयालु पुरुष जब देखते हैं कि प्रजा बहुत पीड़ित हो रही है तब वे दयापरवश होकर अपने जीवन-प्राणतक निछावर कर देते हैं वैसे ही विजली की चमक से शोभायमान घनघोर बादल तेज हवा की प्रेरणा से प्राणियों के कल्याण के लिये अपने जीवनस्वरूप जल को बरसाने लगे ॥ ६ ॥ जेठ आषाढ़ की गर्मी से पृथ्वी सूख गयी थी अब वर्षा के जल से सिंचकर वह फिर हरी-भरी हो गयी जैसे सकामभाव से तपस्या करते समय पहले तो शरीर दुर्बल हो जाता है परन्तु जब उसका फल मिलता है तब हृष्टपुष्ट हो जाता है ॥ ७ ॥ वर्षा के सायङ्काल में बादलों से घना अन्धेरा छा जानेपर ग्रह और तारों का प्रकाश तो नहीं दिखायी पड़ता परन्तु जुगनू चमकने लगते हैं, जैसे कलियुग में पाप की प्रबलता हो जाने से पाखण्ड मतों का प्रचार हो जाता है और वैदिक सम्प्रदाय लुप्त हो जाते हैं ॥ ८ ॥

श्रुत्वा पर्जन्यनिनदं मण्डूका व्यसृजन् गिरः। तूष्णीं शयानाः प्राग् यद्वद् ब्राह्मणा नियमात्यये ॥ ९ ॥
आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनुशुष्यतीः[1]। पुंसो यथास्वतन्त्रस्य [2]देहद्रविणसम्पदः ॥ १० ॥
हरिता हरिभिः शष्पैरिन्द्रगोपैश्च लोहिताः[3]। उच्छिलीन्ध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ॥ ११ ॥
क्षेत्राणि [4]सस्यसम्पद्भिः [5]कर्षुकाणां मुदं ददुः। [6]मानिनामुपतापं च दैवाधीन[7]मजानताम् ॥ १२ ॥

कर्दमक्षमा

अन्वयः—यथा प्राग् तूष्णीम् शयानाः ब्राह्मणाः नियमात्यये यद् वत् गिरः व्यसृजन् तद्वत् पर्जन्यनिनदम् श्रुत्वा मण्डूकाः गिरः व्यसृजन् ॥ ९ ॥ यथा अस्वतन्त्रस्य पुंसः देहद्रविणसम्पदः उत्पथवाहिन्यः आसन् तथा अनुशुष्यतीः क्षुद्रनद्यः उत्पथवाहिन्यः आसन् ॥ १० ॥ हरिभिः शष्पैः हरिता, इन्द्रगोपैः लोहिता, च उच्छीन्ध्रकृतच्छा भूः नृणाम् श्रीः इव अभूत् ॥ ११ ॥ क्षेत्राणि सस्यसम्पद्भिः कर्षुकाणां मुदं ददुः, च दैवाधीनम् अजानताम् मानिनाम् उपतापं ददुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हरिभिर्नीलैः शष्पैर्बालतृणैर्नीलवर्णा क्वचिदिंद्रगोपैः लोहितवर्णकीटविशेषैर्लोहिता तत्रतत्रोच्छिलींध्रैश्छत्राकारैरुद्भिदैः कृतच्छाया भूर्नृणां राज्ञां श्रीः सेनारूपा संपदिव ॥९॥ क्षेत्राणीति। तदा हि वृष्टे रविच्छेदे लसंतः प्रियंग्वादयो मुदं ददति विच्छेदे शुष्यंतोऽनुतापं चेति ॥ १० ॥ अबिभ्रदविभरुः। यथा हरिनिषेवयेति। हरिसेवायां प्रवृत्ता हि सद्य एव सर्वे रुचिरा भवंति तथा परमधर्मत्वात्परमसुखत्वाच्च तद्वदिति ॥ ११ ॥ कामाक्तं कामवासनायुक्तमिति श्वसनोर्मिसाम्यम्। गुणैर्विषयैर्युज्यत इति सरित्संगतिसाम्यम् ॥ १२ ॥

---

१. नद्योंबुपूरिताः—वीर.। २. देहो द्रविणसंपदा—विज.। ३. लोहिता—श्रीधर. वीर. विज. विश्व. शुक.; लोहिताः—वंशी.। ४. सस्यवृद्धानि—गो. प्रे. टी। ५. कर्षकाणां—श्रीधर. वंशी. वीर. विज. शुक.। ६. धनिनामुपतापं—श्रीधर. वंशी.; मानिनामुपतापं—श्रीधर. वंशी.; मानिनामनुतापं—वीर. विज. विश्व.। ७. विपत्ति तदजानतां—विज.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कीटविशेषैः प्रथमवर्षणोद्भूतैर्जपापुष्पप्रभैः । लोहिता रक्ता। तत्रतत्र स्थले । यथा राज्ञां सेनायां केचिन्नीलवसनाः केचिद्रक्तांबराः केचिच्छ्वेतांबराः संत्येवमत्रापीति बोध्यम्। एतेन भूमिवदेक एव चेतनो गुणसंगेन नानास्वभावः प्रतीयतेऽतो नानात्वस्वरूपसंसारस्यासारत्वाद्धेयत्वेन हरिभक्तिरेव कार्येति ध्वनितम् ॥ ९ ॥ क्षेत्राणि केदाराः । संपद्भिः फलोद्रेकैः । दैवाधीनम् वर्षणावर्षणञ्चेत्यजानताम् । यद्वा—धनिनां क्रीतबह्वन्नानां क्षेत्राणि बहुसस्यैरुपतापम्–अहो दैवेन किं कृतं किमर्थमस्माभिरेतावदन्नं गृहीतमधुना तु मूलमपि नष्टं कुतो लाभ इत्यनुतापो भवतीति भावः । एतेन विषयादिद्रियकर्षणशीलानां ज्ञानसमुद्रेकैः क्षेत्राणि शरीराणि मुदं ददति, धनिनां रजोमत्तानामनुतापमहो अस्माभिः कुतो न त्यक्तविषयैर्हरिसेवा कृतेति भावः। 'मानिनाम्' इति पाठे कृषिर्निकृष्टं कर्म, वयं प्रतिष्ठिता न कुर्महे इति गर्ववतामनुतापम् । हंतहंत यदि कृषिं वयमकरिष्याम तदेतादृशीः सस्यसंपदः प्राप्स्यामेति पश्चात्तापं ददुर्मानिभ्य एवेत्यर्थः । यतस्ते मुदनुतापादिकं दैवाधीनं न जानंतीत्यर्थः । यथा निवृत्तिकर्मपरान्ब्रह्मलोकं गच्छतो दृष्ट्वा प्रवृत्तिपराः स्वर्गस्था अनुनयंतीति गम्योपमा भक्तैर्हेया ॥ १० ॥ यद्वा–जलौकसः पातालस्थाः, स्थलौकसो भूमिष्ठाः। सर्वे अंतरिक्षादिवासिनः । सर्वेषां दुःखं वारयतीति वारि ज्ञानम्, नवं निर्दोषं च तद्वारि नववारि तस्यातितरां सेवयाऽभ्यासलक्षणया। रुचिरं निर्दोषं ब्रह्मरूपमबिभ्रद्बिभ्रति । किंभूतया––यथावद्धरिसेवया जातयेति शेषः । यथाश्रुतास्तु स्वामिनैव स्फुटितः ॥ ११ ॥ श्वसनेन वायुना 'श्वसनः स्पर्शनो वायुः' इत्यमरः । एतेन हरिभक्तैर्बिषययोगो हेय इति सूचितम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

व्यसृजन् विविधं विस्तारयामासुः प्राक् तूष्णीं शयानाः निद्राणवन्निश्चेष्टत्वेन वृत्ताः मण्डूकाः ब्राह्मणाश्च नित्यध्यानजपाद्यर्थकृतमौनत्वेनेति ॥ ९ ॥ कदाचिदुत्पथवाहिन्य एवासन् कदाचिदनुशुष्यन्त्य एव चासन् नतु सत्पथगामिन्यो नतु वैकल्यरहिताः यथा स्वतन्त्रस्य शास्त्रमनुसरतः पुंसो देहसम्पदो द्रविणसम्पदश्चेति ॥ १० ॥ इन्द्रगोपैः श्रीवृन्दावनेऽत्र इन्द्रचूडेति ख्यातैः कीटविशेषैः हरितादिकत्वं चेदं पटगृहादीनाम् ॥ ११ ॥ समुच्चये वैशब्दः सस्यसम्पद्भिस्तद्भावाभावैरित्यर्थः । मुदनुतापयोर्हेतुः मानिनां तदभिमानवतां दैवाधीनं सर्वमित्यजानतां यथाऽन्येषामपि क्षेत्राणि देहाः अन्याभिः सम्पद्भिरिति ज्ञेयम् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

व्यसृजन् विविधं विस्तारयामासुः, ससृजुरिति पाठे पाठान्तरेऽपि गिरां, बहुत्वेन तथैवार्थः । प्राक् तूष्णीं शयाना निद्राणवन्निश्चेष्टत्वेन वृत्ता मण्डूकाः, ब्राह्मणास्तूष्णीं सुप्ता इव ॥ ९ ॥ पूर्व्वमनुशुष्यन्त्यः, देहाद्द्वयोऽपि प्राक् क्षुद्रव्यथादिना क्षीणाः पश्चाद्भोगवाणिज्यादिना सम्पन्नाः सत्यो यथा विकर्म्मपरा भवन्ति, तत्र हेतुः—स्वतन्त्रस्य स्वैरवर्त्तिन इति, अतएव क्षुद्रत्वात्तद्देहादीनामपि तादृशत्वेन क्षुद्रनदीभिरुपमा ॥ १० ॥ इन्द्रगोपैः प्रथमवृष्टितो जायमानैरतिरिक्तैः श्रीवृन्दावनेऽत्र वूडेतिख्यातैः कीटविशेषैः, नृणामिति तैर्व्व्याख्यातम् । यद्वा, ईश्वराणां परिच्छदसम्पदिव तत्र यथा वस्त्रभूषणादि, हरितत्वादिना हरितत्वादि ॥११॥ समुच्चये वै-शब्दः । अनुतापञ्च शोकं ददुः । तत्र दृष्टान्तः–मानिनां देहाभिमानवतां धनादिना गर्व्ववतां वा, अतएव दैवाधीनं देहादीत्यजानताम्, यथा शरीराणि गेहानि वा धनादिसम्पद्भिर्मुदं तदभावे चानुतापं ददति तथेत्यर्थः। यद्वा, त्वर्थे वै, मानिनां देशान्तरयात्रामात्रेणास्माकं दिग्विजयादिकं भावीत्येवमभिमानवतान्तु क्षेत्राणि शस्यसम्पद्भिः कृत्वा दिग्विजयप्रतिबन्धानुतापं ददुः । कुतः ? दिग्विजयादिकं शस्यसम्पदादिकञ्च ईश्वराधीनमित्यजानतां ततश्च यथा शस्यानि तत्तदर्थैर्विदुषां मुदं ददति विद्वन्मानिनां मूर्खाणाञ्च तत्तद्विरुद्धाचारत्वाद् दुःखमेवेति दृष्टान्तोऽत्र द्रष्टव्यः । यद्वा, यथा दैवाधीनमजानतां मानिनामित्येष एव दृष्टान्तः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अनुशुष्यती शोषरहिताअनुशुष्यतीति पाठे आसन्नशोषा इत्यर्थः ॥ १०–११ ॥ मानिनां परसमृद्धिद्वेषिणाम् अभिमानवताम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

श्रुत्वेति । पर्जन्यस्य निनदं गर्जितमाकर्ण्य मण्डूकाः भेकाः गिरं व्यसृजन् ध्वनिं चक्रुः यथा ब्राह्मणाः शिष्याः आचार्यस्य नित्यकर्मणः प्राक् तूष्णीं शयानाः तस्य नियमात्यये नित्यकर्मावसाने तस्य ध्वनिं श्रुत्वा अधीयन्ते तद्वत् अनेनाचार्यसन्निधावध्ययनावसरं प्रतीक्षमाणः तूष्णीमासीतेति सूचितम् ॥ ९ ॥ आसन्निति । अम्बुभिर्वर्षजलैः पूरिताः क्षुद्रनद्यः उत्पथवाहिन्य आसन् क्षुद्रनद्यो न शुष्यतीरिति पाठे शोषरहिताः सत्यः उत्पथवाहिन्य आसन्नित्यर्थः । अनुशुष्यतीरित्यपि पाठस्तदा आसन्नशोषा इत्यर्थः। उभयत्रापि विभक्तिव्यत्यय आर्षः, यथा अस्वतन्त्रस्येन्द्रियपरवशस्य पुंसो गेहद्रव्यसमृद्धयो न शुष्यन्त्यः दानभोगयोरभावात् यद्वानुशुष्यन्त्यः धर्मानुपयुक्तत्वेनेति भावः । जितेन्द्रियस्य तु दानभोगाभ्यां शुष्यन्त्यः धर्मोपयोगद्वारा आसन्नशोषाश्च द्रव्यसम्पदां शोषो

नाम तद्वयय एव अम्बुपूरिता इति पाठे तु अजितेन्द्रियस्य यथा द्रव्यसम्पदः वराटिकापर्यन्तैरप्यार्जनैः पूरितास्ततः पुनर्बुद्ध्यादिभिर्निन्दितैर्वर्द्धन्त एव अपात्रगामिन्यो वा तद्वदित्यर्थः। अनेनैवास्वतन्त्रेन्द्रियसम्पदश्चला व्यर्थाश्चेति सूचितम् ।। १० ।। हरितेति । भूमिर्हरिभिर्हरितवर्णैः शष्पैर्बालतृणैर्हरितवर्णाः इन्द्रकोपैः कीटविशेषैर्लोहिताः उद्गतैः शिलीन्ध्रकुसुमैः कृतच्छाया लोहितपीतवर्णा च बभूव नृणां श्रीरिव यथा नृणां राज्ञां श्रीः सेनासम्पत् हरितलोहितपीतवर्णपटैर्विचित्रवर्णा भवति तद्वत् इदं वास्तवार्थकथनं, यद्वा, नृणां स्वदेहालङ्कारमात्रपराणां श्रीर्वस्त्राभरणादिसम्पत्तथेत्यर्थः । अनेन मूर्खाणां सम्पत्स्वोपकारमात्रपर्यवसान्ना न तु परोपकारार्थेति सूचितम् ॥ ११ ॥ क्षेत्राणीति । क्षेत्राणि सस्यसमृद्धिभिः कृषीवलानां मुदं फलमदृष्टाधीनमित्यजानतां मानिनां फलसमृद्धिद्वेषिणामनुतापं च ददुः अनेन परसमृद्धिं दृष्ट्वा हर्षवता भवितव्यमिति शिक्षितम् ।। १२ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पर्जन्यनिनदं मन्दगर्जन्मेघनादं प्राक् पूर्वं तूष्णीं शयानाः मण्डूकाः नियमो नाम मौनेन जपादिकस्तस्यात्यये अवसाने वेदाध्ययनशीला भवन्ति अनेन विष्ण्वनुग्रहमाकाङ्क्षमाणैः कालो वन्ध्यो न कर्तव्य इति दर्शितम् ।। ९ ।। ग्रीष्मे शुष्यतीः शोषं गच्छन्त्यः क्षुद्रनद्यः फल्गुनलाः अनु ग्रीष्मानन्तरं वर्षासु उत्पथवाहिन्यः जलाभिवृद्ध्या तीरमुद्रिच्य स्पन्दमाना बभूवुः अस्वतन्त्रस्य विषयरागादिवशङ्गतस्य पुंसो देहो वनितादिभोगेन वर्धते अनेन रजोगुणस्वभावः सूचितः ।। १० ।। हरिभिः श्यामैः शष्पैः बालतृणैः हरिता श्यामला इन्द्रगोपैः आषाढसमये उत्पद्यमानैः जपाकुसुमवर्णैः कृमिविशेषैर्लोहिता रक्ता च उत्कृष्टैः उत्पलैः शिलीन्ध्रैः गुल्मविशेषपुष्पैः छत्राकैर्वा कृतच्छाया कृतशोभा भूर्नृणां श्रीरिव सम्पदिव बहुविधाऽभूदित्यन्वयः । अनेन भूमिवदेक एव चेतनो गुणविकारेण नानास्वभावमापन्न इव प्रतीयत इति संसारस्यासारत्वज्ञानेन हेयत्वेन हरौ भक्तिः कर्तव्येति सूच्यते ॥ ११ ।। कर्षकाणामुल्लेखनादिक्रियया वर्त्तमानानां क्षेत्राणि केदाराः सस्यानां सम्पद्भिः फलोद्रेकाऽभिमुखलक्षणाभिर्मुदं ददुः वाशब्दश्चार्थे तदजानतां कृषिक्रियाविशेषमजानतां मानिनां कृष्याद्यभिमानवतां पुंसां तान्येव क्षेत्राणि अतिवृष्ट्यनावृष्टिमेदुरसामर्थ्याद्यभावादिना सस्यनाशेन विपत्तिमनुतापं च ददुः पुनरुत्पत्तिनाशेन बीजं नष्टमित्यनुतापम् इन्द्रियाणि विषयजलादाकृष्य हरिचरणारविन्द एव मनो निदधात क्षेत्राणि पुण्यस्थानानि सस्यसम्पद्भिः ज्ञानसमुद्रेकैः मुदं ददति तान्येव पुण्यस्थानानि तदजानतां स्नानादिक्रियाविशेषमबुध्यमानानां मानिनामहङ्कारिणां पुंसां अयोग्यानां विपत्तिं दुःखलक्षणां बहुलवित्तव्ययेन न किमपि फलं प्राप्तम् इत्यनुतापं च ददतीत्यतो मुमुक्षुणा स्वयं विचक्षणेभ्यो वा श्रुत्वा ज्ञात्वा हरिचरणसरोजे भक्तिः कर्तव्येति सूचितम् ॥ १२ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

दैवाधीनमजानतामत एव मानिनाम् अहम्ममतापराणां कर्षकाणां सस्यसम्पद्भिः तत्सद्भावात्तावद्वा मुदमनुतापञ्ज ददुः ॥ १२–१९ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नित्यकर्मावसाने आचार्याह्वानशब्दं श्रुत्वा तच्छिष्या यथा अधीयन्ते तद्वदिति ब्रह्मचारिभिरुपादेया ।। ९ ।। अनुशुष्यतीः अनुशुष्यन्त्यः वृष्यमाणैरल्पैरपि जलैरुत्पथगामिन्यः । स्वतन्त्रस्य शास्त्रशासनममानयतः देहस्य सम्पदो यौवनसामर्थ्यविद्याद्याद्रविणसम्पदः पञ्चषग्रामाधिपत्यंता यथा निकृष्टस्य कुमतेः परोद्वेजिकास्तथेति हेयैवेयम् ।। १० ।। हरिभिर्नीलवर्णैः शष्पैः कोमलैः क्वचिन्नीलवर्णा इन्द्रगोपैररुणवर्णकीटविशेषैः क्वचित् लोहिता उच्छिलीन्ध्रैश्छत्राकारैरुद्भिजैः कृतच्छाया कृतश्वेतकान्तिः नृणां राज्ञां श्रीस्सेनासम्पत् हरितादिवर्णपटगेहयुक्ता इयं राज्ञामुपादेया ।। ११ ।। मानिनामिति कृषिं निकृष्टं कर्म वयं प्रतिष्ठिता न कुर्महे इति गर्ववताम् अनुतापं हन्तहन्त यदि कृषिं वयमप्यकरिष्याम तदैतादृशी सस्यसम्पदः प्राप्स्याम इति पश्चात्तापं ददुर्मानिभ्य एवेत्यर्थः । यतो यदनुतापादिकं दैवाधीनं ते न जानन्तीत्यर्थः । यथा निवृत्तिकर्मपरान् ब्रह्मलोकं गच्छतो दृष्ट्वा प्रवृत्तिकर्मपराः स्वर्गस्था अनुतपन्तीति गम्योपमा भक्तैर्हेया ।। १२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नियमात्यये जपादिसमाप्तौ गुरुशब्दं श्रुत्वा शिष्या यथाऽधीयन्ते तद्वत् ।। ९ ।। अनुशुष्यतीः अनुशुष्यन्त्यः ।। १० ।। भूर्भूमिः क्वचित् हरिभिः हरितवर्णैः सस्यैर्बालतृणैर्हरिता क्वचिदिन्द्रगोपैः लोहितवर्णैः कीटविशेषैर्लोहिता तत्र तत्र उच्छिलीन्ध्रैश्छत्राकारैरुद्भिदैः कृतच्छाया अभूत् नृणां राज्ञां श्रीहरिः हरितलोहितवस्त्रच्छत्रादिसंयुक्ता सम्पदिव ।।११।। कर्षकाणां क्षेत्रस्वामिनां मुदं ददुः धनिनां धनवतां तत्क्षेत्रसस्यसम्पदसहिष्णूनामुपतापं च ददुः तत्र हेतुमाह—दैवाधीनमजानतामिति स्वसम्पद्दर्शनेन मोदमानः परसम्पद्दर्शनेनोपतप्यमानश्च मूर्खः इति भावः ।। १२ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

प्राक् तूष्णीं शयाना निद्राणावन्निश्चेष्टा मण्डूका गिरो व्यसृजन् विविधं व्यस्तरयन् **ब्राह्मणा यथा** नित्यकर्मान्ते ऋग्ध्यानार्थं कृतमौना आचार्याह्वानं श्रुत्वाधीयन्ते तद्वदिति वर्णिभिरियमुपादेया ॥ ९ ॥ ऋत्वन्तरे **अनुशुष्यन्त्यः** क्षुद्रनद्यो वृष्यमाणैरल्पैरपि जलैरुत्पथवाहिन्य आसन् स्वतन्त्रस्यातिक्रान्तशास्त्राङ्कुशस्य देहसम्पदो यौवनवलाद्याः द्रविणसम्पदः पञ्चषग्रामाधिपत्याद्याः परोद्वेजिका इति हेयैवेयम् ॥ १० ॥ हरिभिर्नीलैः शष्पैर्वालतृणैः भूः क्वचिद्धरिता नीलवर्णा इन्द्रगोपैररुणैः कीटविशेषैः क्वचिल्लोहिता उच्छीलीन्ध्रैःछत्राकारैरुद्भिजैः कृतच्छाया नृणां राज्ञां श्रीः सेनासम्पदिव हरितरक्तादि पटगेहयुक्तेवाभूदिति राज्ञामियमुपादेया ॥ ११ ॥ क्षेत्राणि मानिनां तदभिमानवतां कर्षकाणाम् वृष्टिसातत्ये लसद्भिः शष्पैर्मुदं तद्विच्छेदेतु शुष्यद्भिरनुतापं ददुः मुदादिकं दैवाधीनमजानतां यथा क्षेत्राणि शरीराणि सम्पद्भिः पुष्टानि सन्ति तदभिमानिनां मुदं सम्पद्विगमे तु कृशानि सन्ति तापमिति गम्योपमा सद्भिर्हेया ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिभिः श्यामैः शष्पैर्बालतृणैर्हरिता श्यामा स्वत एव कृष्णा चेदपि विलक्षणा कान्तिरभूदिति भावः । इन्द्रगोपैर्लोहितवर्णकृमिविशेषैः शकलातीत्यपभ्रष्टभाषया लोहिता रक्ता चोच्छिलीन्ध्रैश्छत्राकैरुत्कृष्टैः शिलींध्रैः कदलीपुष्पैः । कदल्यां तु शीलध्र स्यादिति शब्दार्णवः । कृता छाया शोभा यस्याः सा नृणां श्रीर्यथा नानाविधा तथेयं भूरभूत् । अनेन सम्पदि गुणानुगुणकार्यं ध्वन्यते ॥ ९ ॥ कर्षकाणां स्वयं भूलेखकानां कृषीवलानां क्षेत्राणि केदाराः सस्यसम्पद्भिर्भाविफलोन्नाहोहिकाभिर्मुदं ददुः । मानिनामहङ्कारेण स्वमपकर्षकाणां तत्प्रकारज्ञानां नास्माभिः कर्षणं कृतमतो न फलं तद्वदासीदिति पश्चात्तापं ददुः । तदजानतामेतत्प्रकारज्ञानहीनानां विपत्तिं बाधान्याद्यलाभजनितविपदं च ददुः । सस्यसारत्वात्स इत्युक्तेर्हरेः क्षेत्राणि नानावताराः कर्षकाणां भक्त्या ध्यात्वा मुदं ददुः । मानिनामभिमानिनामनुतापं तद्ध्यानादिसाधनमजानतामज्ञानिनां मिथ्याज्ञानिनां च विपत्तिं नरकतमआदिरूपां ददुरित्यान्तरङ्गिको भावोऽवसेयः ॥ १० ॥ जलौकसः स्थलौकसः सर्वे नववारिणो निषेवया स्नानपानादिरूपसेवया रुचिरं रूपं नैर्मल्येन भासुरं । अबिभ्रन्दध्रुः । जलौजसः स्थलौकसः सर्वे तपस्विनो हरिनिषेवया भगवत्सेवया यथा रुचिरं ज्ञानाद्यात्मकतया मनोहरं रूपं स्वस्वरूपं बिभ्रति तथेति ॥ ११ ॥ श्वसनोर्भिमान् । यद्यपि मादुपधाया इति ऊर्मिवानिति वक्तव्यं तथापि यवादिगणगणिततया वस्य मत्वं ज्ञेयं । सिन्धुः समुद्रः सरिद्भिर्नदीभिः सङ्गतो मिलितो यथाऽपक्वयोगिनोऽपक्वः फलपरिपाकमप्राप्तश्चासौ योगश्च सोऽस्यास्तीति स तस्य कामार्तं सरिद्भिरिति स्त्रीलिङ्गनिर्देशेन योषिन्निमित्तं मन्मथमथितं गुणयुग्गुणैर्विषयैर्युज्यत इति तत्तथा । यथा क्षोभं प्राप्नोति तथा चुक्षोभाचलत् ॥ १२ ॥

श्रीसुबोधिनी

एवमर्थतो वेदनिराकरणमुक्त्वा शब्दतोप्याह **श्रुत्वा पर्जन्यनिनदमिति**, मण्डूकाः सर्वप्राण्यनुपजीवनीया "एष वै पशूनामनुपजीवनीयो न वा एष ग्राम्येषु पशुषु हितो नारण्ये"ष्विति श्रुतेः, **तथा चेद् ब्राह्मणाः सर्वोपद्रवकारिणो भवन्ति** ततः **कथं वेदस्तत्र प्रतिष्ठितः स्यात्** ? तेषां च मण्डूकानां च वचनं सर्वोपद्रवकर्तृकालाधीनं, तदाह **पर्जन्यनिनदं श्रुत्वा मण्डूका गिरो व्यसृजन्निति**, पर्जन्यनादव्यतिरेकेण न तेषां सहजा प्रवृत्तिः, तदैव तेषामुद्गमात्, अनेनोत्तमा वाणी तस्मिन् काले लुप्ता गर्जनशब्दो वा मण्डूकशब्दो वा उपर्यधश्च ब्राह्मणानां विद्यमानत्वात् कथं नोत्तमशब्द इत्याशङ्क्य दृष्टान्ते ब्राह्मणान् निरूपयति **तूष्णीं शयाना** इति, पूर्वं **कलिस्था ब्राह्मणाः प्राक्शयाना एव भवन्ति** ततो **नियमस्याप्यत्यये** मर्यादायां गतायां प्रभोर्दानादिकं श्रुत्वा तदा **गिरो व्यसृजन्**, तथा चक्रुः, "ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम् अध्वर्यवो धर्मिणः शिश्विदाना आविर्भवन्ति गुह्या न केचित्", 'सोम'पानप्रवणा 'ब्राह्मणा' यथासुखं 'वाचमक्रत' कृतवन्तः, 'परिवत्सरीणं' संवत्सरसाध्यं 'ब्रह्मा'न्नादिकं 'कृण्वन्तः'कृष्यादिपरा यथासुखं वेदशब्दान् पठन्तीत्यर्थः, 'केचित्' पुन'रध्वर्यवो'ध्वरयाजका 'धर्मिणः' प्रवर्ग्यकर्तारः 'शिश्विदानाः' प्रकाशमाना 'गुह्याः' सन्तो 'नाविर्भवन्ति', **यज्ञा धर्माश्च न वर्षासु प्रभवन्ति**, अतो बहिर्मुखा एव कृष्यादिपरा यथासुखं 'वाचमक्रत', अस्यैवार्थस्य भूयसे निर्वचनायापरा ऋक्, "देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्रमिणन्त्येते संवत्सरे प्रावृष्यागतायां तप्ता धर्मा अश्नुवते विसर्गं", ये 'नरः' पुरुषा 'देवहितिं' भगवतः शब्दरूप'मृतुं जुगुपुर्द्वादशस्य' संवत्सरस्य सम्बन्धी ऋतुर्मुख्यो वसन्तस्तं 'न प्र मिणन्त्येते' न जानन्ति, अतोज्ञानात् तुष्णीमेव तदा स्थिताः 'संवत्सरे' संवत्सरमध्ये 'प्रावृष्यागतायां' पूर्वं 'तप्ता धर्माः' 'वि'विधमेव 'सर्गमश्नुवते', न तु मूलभूतां वाणीं वदन्ति, यत्किञ्चिद् बदन्तीत्यर्थः, यतो 'घर्मा' परतापकाः स्वयं च 'तप्ताः', तेषां यत्किञ्चिद्वचनान्याहापरा ऋक्, "गोमायुरदादजमायुरदात् पृश्निरदाद्धरितो नो वसूनि गवां मण्डूका ददतः शतानि ससस्रसावे प्र तिरन्त आयुः", वर्षायामुत्पन्नं फलं प्राप्य केनैतत् फलं दत्तमिति पृष्टा आहु'र्गोमायुरदात्' सृगालो दत्तवान्, 'अजमायु'र्वृकः 'पृश्नि'र्भूमि'र्हरितो' मेघां 'नो'स्मभ्यं 'वसूनि' दत्तवन्तः, किञ्च 'गवां शतानि मण्डूका ददतः

सहस्रसावे' सहस्रवर्षपर्यन्त'मायुश्च 'प्र तिरन्तः' प्रयच्छन्तो जाताः, किञ्च वृष्ट्यर्थं मण्डूकस्य पत्नीं च प्रार्थय "न्त्युप प्रवद मण्डूकि-वर्षमावदतादुरि मध्ये ह्रदस्य प्लवस्य विगृह्य चतुरः पदः", हे 'मण्डूकि' 'उप' समीपे 'वर्षं प्रवद', 'आ'समन्ता 'दुरि मण्डूको 'वदतात्', तस्यावस्थां चाह 'मध्य' इति, एवं ब्राह्मणा यथा तेषानुपजीव्या मण्डूकास्तथैव ये ब्राह्मणा मण्डूकोपजीविनस्तैः कथं वा वेदरक्षा भवेदिति शब्दतोपि वेदनिवृत्तिः सूचिता ।। ९ ।। तर्हि मास्तु वेदः पाषण्डैरेव कार्यं भवत्वित्याशङ्क्य महतां तु ते क्षोभका भवन्त्यल्पानां तु व्यामोहका भवन्तीत्याहासन्निति **उत्पथवाहिन्यः क्षुद्रनद्योः** वर्षासु जाता अकस्मादेव निषिद्धं फलं बह्वेव प्राप्नुवन्त्यमर्यादत्वात् तद्रक्षणाशक्ता **उत्पथवाहिन्यो** भवन्ति, ततोनु तत्क्षणमेव **शुष्यन्तीर्भवन्ति**, प्रकृतोपयोगाय दृष्टान्तमाह **यथा-स्वतन्त्रस्येन्द्रियपरवशस्य देहेन्द्रियसम्पदोमार्ग**वाहिन्योपि भवन्त्यनु**शुष्यती**श्च भवन्ति ।। १० ।। बाह्यसम्पत्त्याः स्वरूपमाह **हरिता** इति, इयं सर्वैव **भूस्त्रिगुणा** सती **नृणां यथा** राज्यसम्पत्तिर्धनसम्पत्तिर्वा भवति तथा जाता, **हरिभिर्हरिद्वर्णैः शष्पैर्घासैर्हरिता** श्यामवर्णा **भूरिन्द्रगोपैः** कीटविशेषैर्लोहितवर्णा **उच्छिलीन्ध्रै**श्छत्राकैः श्वेतवर्णा **कृतच्छाये**वैवं लोहितशुक्लकृष्णा, इन्द्रगोपो राजेव छत्रमिव छत्राकं सेनावच् छष्पाणि, अनेन भूमिरपि युद्धसामग्रीव वर्णिता. अतो **यथा खड्गजीविका मरणपर्यवसायिन्येवमियं कृष्यादिजीविकापि मरणपर्यवसायिनी** ।। ११ ।। शरत्कालो धर्मस्तथैव च भवत्यन्तस्तोषतदभावावाह **क्षेत्राणीति**, सस्यानां **सम्पत्तिभिः** कृत्वा **कर्षुकाणां** कृषीवलानां **क्षेत्राणि मुदं ददुः**, **मानिनाम**भिमानवतां शत्रुवधार्थं प्रवृत्तानां वर्षा-सस्यादिभिः प्रतिबन्धं ज्ञात्वा क्लिष्टानामुपतापं च **ददुः**, **जयादिकं सर्वं भगवदधीनं**, न हि वर्षाप्रतिबन्धाभावे सर्वथा तेषां जयो निश्चयाभावात्, तदाह **दैवाधीनमजानतामिति**, **जये पराजये च दैवमेव प्रयोजकम्** ।। १२ ।।

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

श्रुत्वेत्यत्र "एष वा" इति श्रुतिस्तु चयनप्रकरणे 'मण्डूकेन विकर्षती'ति पठिता, दृष्टान्तव्याख्याने **शयाना** इत्यध्यापनं विहाय तिष्ठन्तः, **प्रभोरि**त्याख्यस्य, उक्तमर्थे श्रुत्योपष्टम्भयितुं **ऋच आहुस्तथा** चेत्यादि, **यथासुख**मित्यध्ययनादिनियमं त्यक्त्वा, **वाचमक्रते**त्यत्र वाक्शब्दादमोलोपः, **वाचं कृतवन्त** इत्यर्थः, एवं पूर्वार्धेन कलिस्थकृषीबलब्राह्मणानां व्यवस्थोक्ता **अध्वर्यव** इत्यादिनोत्तरार्धेनोत्तमानामेकान्तवासित्वं तादृशकाले निरूप्यते, तदेतद् व्याकुर्वन्ति **यज्ञा** इत्यादि, उक्तश्रुतौ वर्षा न स्फुटा गीर्विसर्गश्च तदर्थं श्रुत्यन्तरमाहु**रस्यैवे**त्यादि, **भूयसे निर्वचनाये**ति विशेषकथनाय, **देवहिति**मित्यादि **हिर्गतौ** वृद्धौ च देवस्य भगवतो हितिर्गतिर्वृद्धिर्वा **येन** तादृशं शब्दनिरूपकमृतुं वक्ष्यमाणं जुगुपुर्गोपितवन्तः, तत्रोक्तं धर्मं न चक्रुरितियावत् **विविधमेव सर्गमश्नुवत** इति चित्रवाग्रूपं प्राप्नुवन्ति, ददत इति ददतीत्यर्थः, **सूचिते**त्येतेन यद् व्यञ्जितं तट् टिप्पण्यामाहुः श्रुत्वेत्यादि, ननु निरुक्त एतच्छ्रुत्युपन्यासात् पूर्वं 'वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव तं मण्डूका अन्वमोदन्त स मण्डूकांस्तुष्टावे'त्युक्तमतः कथमस्याः कलिस्थबहिर्मुखब्राह्मणबोधकत्वमिति चेदुच्यते, सृष्टिदशायां ब्रह्मणस्तत्तच्चिन्तावशादिव तदानीं वर्षकामस्य वसिष्ठस्यापि तत्सम्भवे बाधकाभावात् 'समाननामरूप'सूत्रे कल्पभेदेन भिन्नताया अपि सिद्धत्वात् तथोक्तावपि न कश्चिद् दोषः, एता ऋचः पर्जन्यसूक्तस्था वेदभाष्ये प्रकारान्तरेण व्याख्यातास्तथा निरुक्ते'प्यक्षरसामान्यान् निब्रूया'दित्यनुशासनात् पुराणोपबृंहणत्वाच्च न कोपि शङ्कालेश इति दिक्, भावमात्रमेव गम्यत इति तथा ।।९।। आसन्नित्यत्र **भवन्ती**त्येतत्पद्यव्यञ्जितमर्थं टिप्पण्यामाहुरासन्नित्यादि ।।१०।। हरिता इति पद्यव्यञ्जितमर्थं **टिप्पण्यामाहुर्हरिता** इत्यादि ।। ११ ।। **क्षेत्राणी**त्यत्र **तदभावाये**ति, कलिस्थानां कृष्यादिजीविकायां मरणपर्यवसायित्वज्ञानाभावायेत्यर्थः, **प्रयोजक**मित्येतत्पद्यव्यञ्जितमर्थं टिप्पण्यामाहुः **क्षेत्राणी**त्यादि ।। १२ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्राक् प्रथमं तुष्णीं शयानाः स्थिता मण्डूकाः पर्जन्यस्य मेघस्य निनदं श्रुत्वा गिरो व्यसृजन् । यथा प्रथमं तूष्णीं स्थिता ब्राह्मणाः शिष्या गुरोर्नियमात्यये नित्यकर्मपरिसमाप्तौ तदाज्ञावचनं श्रुत्वा गिरो विसृजन्ति अधीयन्ते तथा । तथा आचार्यस्य नित्यक्रियायां प्रवृत्तायां स्वाध्यायाध्ययनजनितविघ्ने स्वस्य दुरदृष्टन्तस्य दौर्मनस्यं च स्यात्, तत्परिहाराय प्रथमं तूष्णीं स्थातव्यं तत्क्रियापरिसमाप्त्यनन्तरं तदाज्ञयाध्ययनं कर्तव्यमित्यादेयोपमा ।। ९ ।। क्षुद्रनद्यः प्रथमं वृष्यमाणैर्जलैरुत्पथवाहिन्यः स्वस्थितिमर्यादां हित्वा तीरस्थवृक्षादीनुन्मूलयन्त्यो वहन्त्योऽपि पश्चाद्वृष्ट्यभावे अनन्तरमेव शुष्यतीः शुष्यन्त्यश्चासन् । तत्र दृष्टान्तो यथा—अस्वतन्त्रस्य इन्द्रियपरतन्त्रस्य यद्वा अस्वतन्त्रस्य शास्त्राज्ञातिवर्तिनः पुंसो देहसम्पदो यौवनेन्द्रियपाटवादयः, द्रविणसम्पदो धनगृहभूमिपश्वादयः केनचित् पुण्यलेशेन प्रथमं वर्धमाना अपि शास्त्रमर्यादोल्लङ्घनेन परपीडापरस्त्रीद्यूतानृतादिषु वर्तमाना धर्मादीनुन्मूलयन्त्यः स्वमूलपुण्यक्षये विनश्यन्ति तथा । एवं च न वर्तितव्यमिति हेयोपमा ।।१०।। हरिभिर्हरितैः श्यामैः कोमलतृणैः क्वचिद्धरिता, इन्द्रगोपैः लोहितवर्णकीटविशेषैः क्वचिल्लोहिता, उच्छिलीन्ध्रैः छत्राकारैरुद्भिज्जविशेषैः कृतच्छाया श्वेतवर्णा च भूः नृणां राज्ञां श्रीः सेनासम्पत् यथा नानावर्णवस्त्रादिना नानावर्णा भवति तथाभूदित्यन्वयः । तथा राज्ञ एवमेव स्वयशोवैभवविजयविस्तारार्थं सेना सम्पादनीया, अन्यथा वैमनस्ययुक्तया दुर्बलया सेनया तन्न स्यादित्यादेयोपमा ज्ञेया ।। ११ ।। वृष्टेरविच्छेदेन लसन्तीभिः शाल्यादि-

सस्यसम्पद्भिः क्षेत्राणि कर्षकाणां मुदं ददुः। पश्चात् वृष्टेर्विच्छेदेन शुष्यन्तीभिस्ताभिस्तेषामेवानुतापं ददुः। वैशब्दः प्रसिद्धिद्योतकः। उभयत्र हेतुमाह—मानिनामिति। अहंममाभिमानवतामित्यर्थः। 'धनिनाम्' इति पाठे तु धनाद्यभिमानवतामित्यर्थः। तत्र हेतुमाह—दैवाधीनं सर्वं लाभालाभादिकमित्यजानतामिति। तथा च सर्वं भगवदधीनमिति निश्चित्य लाभालाभयोर्हर्षविषादौ न कर्तव्याविति हेयोपमा ॥ १२ ॥

अन्वितार्थप्रकाशिका

श्रुत्वेति ॥ प्राक् प्रथमं तूष्णीं शयानाः स्थिता मण्डूकाः पर्जन्यस्य मेघस्य निनदं श्रुत्वा गिरो व्यसृजन्। यद्वत् यथा प्रथमं तूष्णीं स्थिता ब्राह्मणाः शिष्या गुरोर्नियमात्यये नित्यकर्मपरिसमाप्तौ तदाह्वानवचनं श्रुत्वा गिरो विसृजन्ति अधीयते ॥ ९॥ आसन्निति ॥ क्षुद्रनद्यः प्रथमं वृष्टिजलैरुत्पथे वहन्ति तच्छीला अपि अनु पश्चात् वृष्ट्यभावे शुष्यतीः शुष्यन्त्यः आसन्। पूर्वसवर्णदीर्घ आर्षः। यथा अस्वतन्त्रस्य इन्द्रियाधीनस्य। यद्वा। स्वतन्त्रस्य निरङ्कुशस्य शास्त्राज्ञोल्लङ्घिनः पुंसो देहद्रविणयोः सम्पदः यौवनादयः धनपशुगृहादयश्च पुण्यलेशेन वर्द्धमाना अपि पापाधिक्याद्विनश्यन्ति तथा ॥ १० ॥ हरिता इति ॥ हरिभिर्हरितैः शष्पैः कोमलतृणैः क्वचिद्धरिता इन्द्रगोपैः लोहितवर्णकीटविशेषैः क्वचिल्लोहिता उच्छिलीन्ध्रैः छत्राकरैरुद्भिज्जविशेषैः कृतच्छाया श्वेतवर्णा च भूः नृणां राज्ञां श्रीः सेना सम्पत् यथा नानावर्णा भवति तथाऽभूत् ॥ ११ ॥ क्षेत्राणीति ॥ क्षेत्राणि कर्तृणि सस्यसंपद्भिः कर्षकाणां मुदं ददुः। दैवाधीनं सर्वं लाभालाभादिकमित्यजानतां धनिनां धनाद्यभिमानवताम् उपतापं कष्टं ददौ। अत्र वृष्ट्या लसद्भिः सस्यैर्मोदः वृष्टेर्विच्छेदेन सस्यशोषणादुपताप इत्याशयमाहुः। परे तु कर्षकाणां सस्यसम्पत्त्या मोदः कृषिं निकृष्टं कर्म मत्वा पूर्वं ताम् अकुर्वाणानां मानिनां धनिनां वा चित्ते कृषित्यागात्स्वस्य तत् सम्पदलाभेनानुताप इत्याहुः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यथा नियमात्यये नित्यकर्मान्ते गुरुशब्दं श्रुत्वा तच्छिष्याः पठंति तद्वत्गिरः व्यसृजन् ॥ ९ ॥ प्रावृषीति पदं प्रतिश्लोकमावर्तनीयं अनुश्रुष्यतीः वृषेः पश्चात् शुष्यंत्यः उत्पथवाहिन्यः स्वपथं त्यक्त्वा गछंत्यः आसन् अस्वतंत्रस्य इंद्रियाधीनस्य स्वतंत्रस्येति पदछेदो वा तत्र पक्षे निरंकुशस्य त्यक्तशास्त्रमार्गस्येति यावत् नरस्य देहश्च द्रविणं धनं च संपदो धान्यादिसमृधयश्च उत्पथं गछंत्यो यथा तथा ॥ हरिभिः शष्पैः नीलैः बालतृणैः हरिता कुत्रचित् नीलवर्णा इंद्रगोपैः रक्तकीटैः लोहिता कुत्रचित् रक्ता यत्र तत्र उछिलिंध्रैः छत्राकृतिभिः श्वेतश्यामोद्भेदैः कृतछाया भूःधनाढ्यानां नृणां श्रीः अनेकविधा संपदिव यद्वा नृणां नृपाणां श्रीः पृतना संपदिव बभूव ॥ ११ ॥ सस्यसंपद्भिः नवीनोत्पन्नधान्यसमृधिभिः युक्तानि कृषिकर्तृणां धनिनां द्रव्यलोभेन धान्यसंग्राहिणां सर्वंदैवाधीनम् ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

श्रुत्वेति ॥ किं च पर्जन्यस्य निनदो गर्जितं श्रुत्वाऽऽकर्ण्य, प्राक् पूर्वं, तूष्णीं शयानाः मण्डूका भेकाः, गिरं व्यसृजन् ध्वनिं चक्रुः। यद्वद्यथा, ब्राह्मणाः शिष्याः, प्राक् तूष्णीं शयानाः सन्तोऽपि, नियमात्यये नित्यकर्मावसाने, आचार्यशब्दं श्रुत्वा, अधीयते तद्वत्। यथाऽऽचार्यसमीपेऽध्ययनार्थं गताः शिष्याः स्वाचार्यं नित्यकर्माचरन्तं वीक्ष्य तन्नित्यकर्माचरणपर्यन्तं जोषमासीना अवतिष्ठन्ते ततोऽध्ययनार्थमागच्छतेति तद्ध्वनिं श्रुत्वा तदन्तिकमुपेत्य यथा वेदमन्त्रानुच्चारयन्ति तद्वत्। अनेन 'आहूतश्चाप्यधीयीत' इति स्मृत्यर्थः सूचितः ॥ ९ ॥ आसन्निति ॥ ग्रीष्मे अनुशुष्यतीरनुशुष्यत्यः शोषं गच्छन्त्यः क्षुद्रनद्यः फल्गुजलास्तटिन्यः, वर्षासु उत्पथवाहिन्यः जलाभिवृद्ध्या तीरमुद्रिच्य स्यन्दमानाः, आसन् बभूवुः। कथमिव। अस्वतन्त्रस्य विषयरागादिवशंगतस्य, स्वतन्त्रस्येति विच्छेदे निरङ्कुशस्य, पुंसः देहश्च द्रविणं धनं च संपदो धान्यादिसमृद्धयश्च ताः, यथा उत्पथवाहिन्यः भवन्ति तद्वत्। देहः पराङ्गनोपभोगरूपोत्पथगः, द्रविणमपात्रार्पणरूपोत्पथगं, धान्यादिसंपदो नटचारणनर्त्तक्याद्याशनतयोत्पथगं बोध्यम्। अनेनाजितेन्द्रियस्य देहादिकममोक्षमार्गगत्वाद्व्यर्थमेवेति सूचितम् ॥ १० ॥ हरितेति ॥ भूर्भूमिः, हरिभिर्नीलवर्णैः, शष्पैस्तृणैः, हरिता नीलवर्णा, अभूत्। क्वचित् इन्द्रगोपैः आषाढसमयोत्पद्यमानजपाकुसुमवर्णकीटविशेषैः लोहिता रक्ता च, अभूत्। उच्छिलीन्ध्रैरुद्भिदैः छत्राकारैः कृतच्छाया सती, नृणां नृपाणां, श्रीः इव, अभूत्। यथा राज्ञां सेनासंपद्धरितलोहितपीतवर्णपटैर्विचित्रवर्णा भवति तद्वद्भूमिरपीति भावः। राज्ञामिति वक्तव्ये नृणामिति यदुक्तं तेन मूर्खत्वादन्यनृसमानानां राज्ञां संपत् स्वोपकारमात्रपर्यवसाना न तु परोपकारार्थेति सूचितम् ॥ ११ ॥ क्षेत्राणीति ॥ क्षेत्राणि सस्यसंपद्भिः वृष्टेरानुगुण्येन वर्द्धमानधान्यसंपद्भिः, लसन्ति सन्तीति शेषः। कर्षुकाणां कृषीवलानां, मुदं हर्षं, ददुः। फलं दैवाधीनं भवति इति, अजानतां, धनिनां धनवतां, उपतापं च, ददुः। भाविनि दुष्काले विक्रयेणाधिकधनलब्ध्यर्थं संगृहीतधान्यानां धनिनां स्वस्थधान्यातिशयप्रदर्शनेन परितापं कारयांचक्रुरित्यर्थः। अनेन परसमृद्धिं दृष्ट्वा हर्षवता भवितव्यं, न तु परितापवतेति शिक्षितम् ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

श्रुत्वेति ः १०.२०.९.

श्रुत्वा श्रौतगिरोऽध्वरौघजननीः पङ्कोद्भवाः पङ्किलाः कुर्मः कर्म किलेति केऽपि विफलं कुर्वन्ति कोलाहलम् ।
कुर्वन्तोऽपि च केऽपि यज्ञमफला हन्त स्युरापादिताऽनुष्ठानोक्तिगलत्सुकीर्तय इति त्राता त्वमेवेति सत् ॥ १५ ॥

आसन्निति: १०.२०.१०.

किं वा तद्वसु यन्निजाश्रयवशात् प्रोन्मादयत्याश्रितान् किं वासौ वसुमत्यलं च वसुमान् यौस्वाश्रितोन्मर्दकौ ।
किं तेऽप्याश्रयिणो भवन्ति च पुनस्तज्जीवनाकाङ्‌क्षिणः किं तज्जीवनमध्वगे सति समायाते सपङ्कस्थिति ॥ १६ ॥

धन्यं तद्वसु यद्भवत्यविरतं सर्वासुभृज्जीवनं धन्याऽसौ वसुमत्यलं च वसुमान् यौ स्वाश्रितौजःप्रदौ ।
धन्यास्ते तदुपाश्रिता अपि पुनः कुर्वन्ति तत्सेवनं धन्यं सेवनमप्यलं वितनुते सद्यो विपङ्कस्थितिम् ॥ १७ ॥

आद्योदाहरणं निदाघसरितस्तत्रान्त्यमन्वर्थसन्नामानौ वसुमत्यसौ स वसुमान् भूमी रविश्चेत्यमू ।
तत्रैका तु तवप्रियाऽऽश्रितसुखं स्थानं द्वितीयः प्रभो ज्ञात्वैवं सदसत्प्रकारमधुना त्वत्पादमेवाऽऽश्रये ॥ १८ ॥

(विशेषकम्)

चलगति वसुजातं कीदृशेऽपि स्वभावान्नरि भवति मदाय स्त्रीषु तत्र त्ववेलम् ।
इति गतिमवगत्य क्षुद्रनद्या प्रदिष्टां वरद तव दयाब्धे पादपद्मं श्रयेऽहम् ॥ १९ ॥

हरितेति ः १०.२०.११.

अगणितवसुसङ्ग्रहापि भूमिर्वहति यदन्यवसुश्रियैव शोभाम् ।
तदितरकथनैरलं दरिद्रैस्तदिह मुकुन्दमहं श्रयाम्युदारम् ॥ २० ॥

क्षेत्राणीति ः १०.२०.१२.

निर्यत्नादुपलब्धिमत्यपि वसुन्यद्धाऽर्जितं यत्नतस्त द्वक्तीत्यभिमानतः प्रतिपदं याते तु तस्मिन् पुनः ।
दैवाद्यातमिति प्रतप्तहृदयो ब्रूते परं त्वं ततस्तत्त्वं वेत्ति न साधनं तदुभयोरप्यत्र सैको विधिः ॥ २१ ॥

ज्यायानिहैकविधिरेव धनाप्त्यनात्त्योर्निर्णीय हेतुरिति यो हि वदान्यभर्तुः ।
तापापहारि वसुदं पदमेकमेव शुश्रूषते स लभते निखिलेष्टजातम् ॥ २२ ॥

कृष्णप्रिया

जो मेढक पहले चुपचाप सो रहे थे अब वे बादलों की गरज सुनकर टर्र टर्र करने लगे, जैसे नित्य-नियम से निवृत्त होने पर गुरु के आदेशानुसार ब्रह्मचारी लोग वेद-पाठ करने लगते हैं ॥ ९ ॥ छोटी-छोटी नदियाँ, जो जेठ आषाढ़ में बिल्कुल सूखने को आ गयी थी, वे अब उमड़-घुमड़ कर अपने घेरे से बाहर बहने लगी, जैसे अजितेन्द्रिय पुरुष के शरीर और धन-सम्पत्तियों का कुमार्ग में उपयोग होने लगता है ॥ १० ॥ पृथ्वी पर कहीं-कहीं हरीयाली थी तो कहीं-कहीं वीरबहूरियों की लालिमा और कहीं-कहीं बरसाती छत्तों (सफेद कुकुरमुत्तों) के कारण वह सफेद मालूम देती थी, इस प्रकार उसकी ऐसी शोभा हो रही थी मानों किसी राजा की रंग-बिरंगी सेना हो ॥ ११ ॥ सब खेत अनाजों से भरे-पूरे लहलहा रहे थे उन्हें देखकर किसान तो मारे आनन्द के फले न समाते थे, परन्तु सब कुछ प्रारब्ध के अधीन है । यह बात न जानने वाले धनियों के चित्त में बड़ी जलन हो रही थी कि अब हम इसे अपने पंजे में कैसे रख सकेंगे ॥ १२ ॥

जलस्थलौकसः सर्वे नववारिनिषेवया । [1]अबिभ्रद् रुचिरं रूपं यथा हरिनिषेवया ॥ १३ ॥
सरिद्भिः [2]सङ्गतः सिन्धुश्चुक्षोभ[3] श्वसनोर्मिमान् । अपक्वयोगिनश्चित्तं [4]कामाक्तं गुणयुग् यथा ॥ १४ ॥
गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः । अभिभूयमाना व्यसनैर्यथाधोक्षजचेतसः ॥ १५ ॥
मार्गा बभूवुः सन्दिग्धास्तृणैश्छन्ना ह्यसंस्कृताः[5] । नाभ्यस्यमानाः श्रुतयो द्विजैः [6]कालहता इव ॥ १६ ॥

---

१. अबिभ्रनृचिर–वीर. विज. । २. संश्रितः–विज. । ३. श्चुक्षुभे–श्रीधर. वंशी.; श्चुक्षोभ–वीर. विज. । ४. कामार्तं–विज. । असंस्कृताः–विज. । ६. कालेन वा हताः–गो. प्रे. टी.; कालेन चाहताः–वीर. ।

कर्दमक्षमा

अन्वयः—हरिनिषेवया यथा रुचिरम् रूपम् अबिभ्रत्, तथा नव वारिनिषेवया सर्वे जलस्थलौकसः रुचिरम् रूपम् ॥ १३ ॥ अपक्वयोगिनः कामाक्तम् गुणयुक् चित्तम् यथा क्षुब्धं भवति, तथा सरिद्भिः सङ्गतः श्वसनोर्मिमान् सिन्धुः चुक्षोभ ॥ १४ ॥ व्यसनैः अभिभूयमानाः अधोक्षजचेतसः यथा न क्षोभमनुभवन्ति तथा वर्षधाराभिः हन्यमानाः गिरयः न विव्यथुः ॥ १५ ॥ द्विजैः न अभ्यसमानाः, कालहताः श्रुतयः इव, तृणैश्छन्नाः हि असंस्कृताः मार्गा संदिग्धाः बभूवुः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अधोक्षज एव चेतो येषां ते ॥ १३ ॥ असंस्कृता अक्षुण्णा नाभ्यस्यमाना इत्यसंस्कृतसाम्यम्। कालेन चाहता इति तृणाच्छादनसाम्यम् ॥ १४ ॥ यथा कामिन्यः पुंश्चल्यः ॥ १५ ॥ निर्गुणं ज्यारहितमपि गुणिनि गर्जितशब्दवति अभादशोभत। गुणव्यतिकरात्मके व्यक्ते प्रपंचेऽगुणवान्निर्गुणः पुरुषो यथेति ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दिव्यथुः विलीना बभूवुः। गिरणोद्गिरणसमर्थवत्त्वाद्गिरीणां व्यथाभावमात्रे दृष्टांतः, न तु बुद्धिमत्त्वाबुद्धिमत्त्वसत्त्वे इति। न विव्यथुर्न विव्यथिरे प्रत्युत रजआद्यपगमादशोभंतैवेत्यर्थः। व्यसनैराध्यात्मिकादितापैः। अधोक्षजचेतस्त्वादेव न व्यथंते "तपंति विविधास्तापा नैतान्मद्गतचेतसः" इति श्रीकपिलोक्तेः। प्रत्युत दैन्यवृद्ध्या गर्वासूयादिमालिन्यरहिता एव भवंतीति सद्भिरुपादेयमिति ॥ १३ ॥ संदिग्धाः इतो यांतीतो वेति संदेहास्पदाः। असंस्कृताः तृणाद्यपनयनहीनाः। कालेन चिरकालेन हता अपठिता एव। अनेन सच्छास्त्रं ज्ञानोत्पत्तये सदैवाभ्यसनीयमिति दर्शितम् ॥ १४ ॥ लोकबंधुषु जलप्रदानेनोपकारिषु गुणिषु विद्वतोपशमादिगुणयुक्तेषु, अनेन विवेकिना हरौ स्थिरा भक्तिर्विधेया न विद्युद्वच्चलेति भावः ॥ १५ ॥ निर्गुणः अनुगतसच्चिदात्मता यथा भाति तद्वदित्यर्थः। एतेन कालेनाभ्यसतां सगुण एव निर्गुणतामापद्यत इति ध्वनितम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जलेति तैर्व्याख्यातं तत्र साधनावस्थायां परमधर्मत्वं प्रसिद्धमेव सुखरूपत्वं च—

"कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान्। आपाययति गोविन्दपादपद्मासवं मधु"।

इत्यनुसारेण साध्यावस्थायां तु परमसुखरूपत्वं प्रसिद्धमेवेति विवेचनीयम् ॥ १३ ॥ श्रीवृन्दावनेऽत्रावर्त्तमानस्यापि सिन्धोर्वर्णनं प्रावृट् स्वभाववर्णनात् किम्वा सिन्धुरिव सिन्धुः श्रीमथुरामण्डलपश्चिमसीमायां वर्त्तमानं मानसगङ्गाप्रभवकोटराख्यमहासरो ज्ञेयम् ॥ १४ ॥ वर्षधाराभिरिति गिरिषु वृष्टेराधिक्यात् अभिभूयमानाः अभिभवचेष्टाविषयीक्रियमाणा अपि न विव्यथु न विव्यथिरे न दुःखं प्रापुः किन्तु ते रज आद्यपगमात् अशोभन्तैवेत्यर्थः। व्यसनैः रोगादिविघ्नैः प्रारब्धस्यावश्यभोग्यत्वात् "त्वां सेवतां सुरकृता बहवोऽन्तरायाः" इति न्यायाच्चाभिभूयमाना अपि न व्यथयन्ते प्रत्युताशोभन्तैव दुष्कर्मापगमादिना भगवत्स्मरणविशेषसिद्धेः टीकायामेवकारस्तदव्यथायां हेतुः ॥ १५ ॥ नाभ्यस्यमाना अनभ्यस्यमानाः कालहताः कालेन कलियुगादिना हता श्रुतय इव एष एव पाठो बहुत्र तेषां व्याख्यादृष्ट्या केचित् कालेन चाहता इति पाठं कुर्वन्ति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

जलौकसो मीनमण्डूकादयः, स्थलौकसो गोमृगादयः, नववारीणां नितरां सेवया पानादिना रूचिरं रूपं वर्णं किं वा पुष्ट्यादिसम्पत्तेर्मालिन्याद्यपगमाच्च, उत्तमं सौन्दर्य्यं दधुरित्यर्थः। हरेर्महामनोहरस्य भगवतो निषेवया कथञ्चिद्भजनारम्भेणेत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, निषेवया प्रेमलक्षणभक्त्या रूपमश्रुपातादिना सौन्दर्य्यम्; यद्वा, नित्यपूजया महाप्रसादमालादिधारणादिना ॥ १३ ॥ श्री वृन्दावनेऽत्रावर्त्तमानस्यापि सिन्धोर्वर्णनं प्रावृट्स्वभाववर्णनात्, किंवा, सिन्धुरिव सिन्धुः श्रीमथुरामण्डलपश्चिमसीमायां वर्त्तमानं मानसगंगाप्रभवकोटराख्यमहासरो ज्ञेयम् ॥ १४ ॥ वर्षाधाराभिरिति गिरिषु वृष्टेराधिक्यान्न विव्यथुः, न विव्यथिरे, किन्तु रज आद्यपगमादशोभन्तैवेत्यर्थः। व्यसनै रोगादिविघ्नैः, प्रारब्धस्यावश्यभोग्यत्वात् (भा० ११।४।१०) 'त्वां सेवतां सुरकृता बहवोऽन्तरायाः' इति न्यायाच्चाभिभूयमाना अपि यथा न, निव्यथिरे, अथवाऽशोभन्तैव दुष्कर्म्मापगमादिनां भगवत्स्मरणविशेषसिद्धेः ॥ १५ ॥ नाभ्यस्यमाना अनभ्यस्यमानाः, कालेन कलिकालादिना, च इवार्थे ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

रुचिरं रूपमिति "वसति हृदि सनातने च तस्मिन् भवति पुमान् जगतोऽस्य सौम्यरूपः" इत्यर्थ उक्तः ॥ १३-१७॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

जलस्थलौकस इति । जलौकसः स्थलौकसश्च ते सर्वे नवस्य नूतनस्य वारिणो निषेवया रुचिरं रूपमबिभ्रन् अबिभरुः संज्ञापूर्वकविधेरनित्यत्वादार्षत्वाद्वाऽभ्यस्तलक्षणजुसभावः यथा हृदयकमलस्थहरिनिषेवया रुचिरं रूपं बिभ्रति तद्वत् "वसति हृदि सनातने च तस्मिन् भवति पुमान् जगतोऽस्य सौम्यरूपः" इति वचनार्थो ऽत्र उक्तः अनेन हरिसेवया विना न सौम्यतेति सूचितम् ॥ १३ ॥ सरिद्भिरिति । सिन्धु समुद्रः सरिद्भिः सङ्गतः वातोद्धूततरङ्गश्च चुक्षुभे सञ्चचाल यथा अपक्वयोगिनः अनिष्पन्नसमाधेः पुंसश्चित्तं विषयस्पृहायुक्तं गुणयुक् च गुणैर्विषयैर्युज्यत इति तथाभूतश्च सत् क्षुभ्यति तद्वत् कामासक्तमिति श्वसनोर्मिसाम्यं गुणयुगिति श्वसनोर्मिसरित्सङ्गसाम्यं चित्तचाञ्चल्यनिमित्तकामाञ्जनगुणयोगनिवर्त्तकभगवत्समाधिविपाकाय यतितव्यमिति सूचितम् ॥ १४ ॥ गिरय इति । वर्षधाराभिरभिहन्यमाना अपि गिरयो न विव्यथुः यथा अधोक्षज एव चेतांसि येषां ते व्यसनैराध्यात्मिकादितापैः पीड्यमाना अपि न व्यथन्ति तद्वद्भगवद्भक्तिरेव तापत्रयविघातिनीत्युक्तं भवति ॥ १५ ॥ मार्गा इति । तृणैश्छन्ना असंस्कृता अक्षुण्णाः वर्षासु पथिकानां प्रायशो गमनाभावादिति भावः । सन्दिग्धाः सन्देहजनका बभूवुः यथा श्रुतयो वेदाः द्विजैरनभ्यस्यमानाः अनावर्त्यमाना इत्यसंस्कृतं साम्यं यतः नाभ्यस्यमानाः अत एव कालेन केनचित्कालेन आहता विस्मृताश्च भवन्ति कालेन चाहता इति तृणाच्छादनसाम्यम् अनेनाधीतानां वेदानामावृत्तिं कुर्वतैव स्थेयमन्यथा तु प्रत्यवाय इति सूचितम्, तथा च स्मर्यते—

"आधीतमपि यद्वेदं नानुपालयति द्विजः । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ॥ इति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

जलौकसः पातालवासिनः स्थलौकसः भूलोकवासिनः किञ्च सर्वे अन्तरिक्षादिलोकवासिनां सर्वेषां संसारदुःखं निवारयतीति वारिज्ञानं नवं निर्दोषं वारि तस्य नितरां सेवयाऽभ्यासलक्षणया रुचिरं निर्दोषं रूपमबिभ्रन् बिभ्रति कथङ्कारं जातया यथा यथाबद्धरिनिषेवया जातया ॥ १३ ॥ अपक्वयोगिनः अपक्वः परिपाकमप्राप्तः योगोऽस्यास्तीत्यपक्वयोगी तस्य गुणयुक् रजोगुणयुक् यद्वा गुणेषु विषयेषु युक्त इति अत एव कामार्त्तम् ॥ १४ ॥ न विव्यथुः न विलीना बभूवुः, कुतः ? गिरयः गिरणोद्गिरणसमर्थत्वाद्व्यथाभावमात्रे निदर्शनं न तु बुद्धिमत्त्वाबुद्धिमत्त्वविवक्षायाम् अनेन सर्वसहनशक्तिर्हरिभक्तानामेवेति दर्शितम् ॥ १५ ॥ असंश्रिता जनैरनाक्रान्ताः अनेन सच्छास्त्रं निरन्तरमभ्यसनीयं ज्ञानोत्पत्तये इति व्यतिरेकनिदर्शनम् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अबिभ्रन् अबिभरुः यथेति हरिसेवायां प्रवृत्ता अपि सद्य एव सर्वे रुचिरा भवन्ति तस्याः परमधर्मत्वात् परमसुखदत्वाच्च तद्वदित्युपादेया ॥ १३ ॥ सिन्धुर्नदीविशेषः पाश्चात्यः विशेषणस्य पुंस्त्वमार्षं कामाक्तं कामवासनायुक्तम् इति श्वसनोर्मिसाम्यं गुणैर्विषयैर्युज्यते इति सरित् सङ्गतिसाम्यमिति ज्ञेया ॥ १४ ॥ न विव्यथुर्न विव्यथिरे प्रत्युत रज आद्यपगमादशोभन्तैवेत्यर्थः । व्यसनैराध्यात्मिकादिभिस्तापैरधोक्षजचेतस्त्वादेव न व्यथन्ते "तपन्ति विविधास्तापा नैतान्मद्गतचेतसः" इति भगवदुक्तेः प्रत्युत दैन्यवृद्ध्या गर्वासूयादिमालिन्यरहिता एव भवन्तीति सद्भिरुपादेया ॥ १५ ॥ नाभ्यस्यमाना इत्यसंस्कृतसाम्यं कालहता इति तृणाच्छादनसाम्यम् अत एव मार्गाः श्रुतयश्च सन्दिग्धा इतीयं वटुभिर्ज्ञेया ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नववारिनिषेवया सर्वे रुचिरं रूपमबिभ्रन् हरिभक्त्या यथा सर्वे वर्णाः आश्रमिणश्च रुचिरं रूपं बिभ्रन्ति तद्वदित्यन्वयः ॥ १३ ॥ कामेन विषयसङ्कल्पेनोक्तं गुणैर्विषयैर्युज्यते इति गुणयुक् चित्तं यथा क्षुभ्यति तद्वत् ॥ १४ ॥ व्यसनैस्त्रिभिराध्यात्मिकादितापैरधोक्षजचेतसो भगवद्ध्याननिष्ठा न व्यथन्ति तद्वत् ॥ १५-१७ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अविभ्रदबिभरुः यथेति हरिसेवायां प्रवृत्ताः सर्वे धृतैर्वैष्णवचिह्नैः रूपं मनोज्ञं लभन्ते तद्वदित्युपादेयेयम् ॥ १३ ॥ सिन्धुः पाश्चात्यो नदः कामाक्तं भोगवासनायुक्तमिति श्वसनोर्मिसाम्यं गुणैर्विषयैर्युज्यत इति सरित्संगतिसाम्यमिति हेयेयम् ॥ १४ ॥ गिरयो न विव्यथिरे प्रत्युत धूल्याद्यपगमाच्छुशुभिरे अधोक्षजचेतसो यथा ब्यसनैराध्यात्मिकादिदुःखैर्न व्यथन्ते "तपन्ति विविधास्तापानैतान्मदगतचेतसः" इति वचनात् प्रत्युत दैन्याभिवृद्धेर्गर्वासूयादिमालिन्यापगमाच्छोभतरा भवन्तीति रतिमतामुपादेयेयम् ।१५। मार्गास्तृणैश्छन्ना असंस्कृता अक्षुण्णाः सन्दिग्धा बभूवुः नाभ्यस्यमाना इत्यसंस्कृतसाम्यं कालहता इति तृणच्छादनसाम्यमिति वटुभिरियं हेया ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

व्यसनैः सांसारिकक्लेशैरभिभूयमानास्तिरस्क्रियमाणा अपि । अधोक्षजचेतसो हरिनिरतमनस्का यथा व्यथां नाप्नुवन्ति तथा वर्षधाराभिर्हन्यमाना गिरयः पर्वता न विव्यथुः ॥ १३ ॥ द्विजैरनभ्यस्यमानाः पक्षग्रन्थत्वात्तासां श्रुतयो वेदाः कालहता यथा

सन्दिग्धपाठा भवन्ति तथा मार्गास्तृणैश्छन्ना असंश्रिता जनैर्वृष्टिकष्टतो नाश्रिता इति केचित्। असंश्रिताः प्रागमिलिता इदानीं तृणैश्छन्ना इति सन्दिग्धा बभूवुः। नाभ्यस्यमाना इति नसमासः ॥ १४ ॥ गुणिषु सौन्दर्यादिगुणयुक्तेषु पुरुषेषु बलं सौहृदं यासां ताः कामिन्य इव यथा स्थैर्यं न कुर्वन्ति तथा लोकबन्धुष्वनिमित्तोपकारिषु मेघेषु विद्युतः स्थैर्यं न चक्रुः। विद्युच्चञ्चला चपलाऽपीति स्वनामानुयानं चक्रुरिति भावः ॥१५॥ गुणव्यतिकरे कार्योन्मुखतया गुणानां भवने व्यक्ते प्रवृत्त इति यावत् गुणवान्सत्त्वादिप्रवर्तकतया तद्वान्ज्ञानानन्दादिगुणपूर्ण इति वाऽप्रधानप्रकृत्यादिसंयुत इति वाऽगुणवान्सत्त्वादिभिर्वा स्वभिन्नगुणैर्वा हीन इति वा। एतेन दार्ष्टान्तिके निर्गुणमित्युक्तेरत्र गुणवानिति कथमिति परास्तमिति वदन्ति। यथा पुरुषो नारायणो भाति तथा गुणिनि शब्दगुणके आकाशो नीलिमोदेतीत्यादेर्नीलिमगुणयुते वा वियत्याकाशे निर्गुणं ज्याविकलं माहेन्द्रसम्बन्धि धनुश्चापं तथाभूत् ॥१६॥

श्रीसुबोधिनी

एवमृतुन्यायेन वर्णनामुक्त्वा **मासन्यायेन** द्वादशधा धर्मानाह **जलस्थलौकस** इति द्वादशभिः, मासा हि निमित्तं धर्मिणोत्र प्रधानगुणा वाच्याः।

जीवा नद्यः पर्वताश्च मार्गाः कामिन्य एव च। विद्यावांश्चन्द्रमा बर्ही भक्ता वा तापसास्तथा ॥ १ ॥
गृहिणो वैदिका मार्गा राजानश्चेति कीर्तिताः। त्रिविधाः सर्व एवैते मासभोग्याः प्रकीर्तिताः ॥ २ ॥
सर्वेप्येते वृष्टिकाले सुखं दुःखं च लेभिरे। पुष्टिमार्गस्थिताः सर्वे सुखं प्रापुर्न चापरे ॥ ३ ॥

तत्र क्रमेण सुखदुःखे निरूपयन्नादौ भगवदीयेयं प्रावृडिति ज्ञापयितुं सर्वेषामेव प्राणिनां सुखजनिका जातेत्याह **जलस्थलौकस** इति, जलं वा स्थलं वौको येषां, भूचरा जलचराश्च राजसास्तामसाश्च, सात्त्विकास्त्वनुक्तसिद्धाः सुखिनो दृष्टान्तार्थं भिन्नतया स्थापिताः, **सर्व एव नववारिसेवया** नवजलसेवया **रुचिरं** मनोहरं **रूपमबिभ्रत्**, दोषादपि रूपवैलक्षण्यं भवतीति तद्व्यावृत्त्यर्थं दृष्टान्तमाह **यथा हरिनिषेवया,** भगवत्सेवया **चतुर्भुजादि रूपं प्राप्नोति तेजोविशेषं वा, हरि**पदेन तदानीमेव गजेन्द्रस्य रूपान्तरसम्पत्तिः स्पष्टार्थं ज्ञापितेति प्रदर्शितम् ॥ १३ ॥ **अभिमानी तु महान् मोहं प्राप्नोती**ति समुद्रं निरूपयति, **सरितो हि तस्य स्त्रियः**, सर्वाभिरेव ताभिः **सङ्गतः सिन्धुः** समुद्रश्चुक्षोभ क्षोभं प्राप्तवान्, **वर्षाकालो हि कामिनां क्षोभकः** सुतरां **स्त्रीसङ्गिनां,** किञ्च **श्वसनेन कृत्वोर्मिमांश्च** जातः, तरङ्गाश्च गर्भस्थानीयाः, वायुश्च रजोगुणः, एवं तस्यानर्थो निरूपितः, महतः कथमनर्थ इत्याशङ्क्य दृष्टान्तेन परिहरत्य**पक्वयोगिन** इति, न पक्वो योगः फलपर्यवसायी यस्य, "चित्तवृत्तिनिरोधो" हि 'योगः' स चेत् पक्वो भवेत् कुर्याच् चित्तवृत्तिनिरोधं, अपक्वत्वान् निरोधो जात इव प्रतिभाति, परीक्षायां न सङ्गच्छते, तदाह **कामाक्त**मिति, स्वभावतो **गुणयुग्** गुणसम्बन्धी स चेत् कामेनाक्तो भवेद् विषयसम्बन्धी भवेत् तदा क्षोभं प्राप्नुयात्, कामलक्षणदोषयुक्तं वा **गुणयुग्** विषयसम्बन्धि, अतः **स्वभावदोषस्यानिवृत्तत्वान् महानपि क्षुभ्यति** ॥ १४ ॥ तत्रापि ये पुनर्महान्तो दृढा उच्चा भगवन्निष्ठा न तु ज्ञानिन इव सर्वसमाः समुद्रविलक्षणास्तेषां वर्षाकृतोपद्रवमाह **गिरय** इति, निरन्तरं **वर्षधाराभिर्हन्यमाना** अपि **गिरयो न विव्यथुर्व्य**थां न प्राप्तवन्तो यतस्तेन्तःसाराः, हेतुं दृष्टान्तेन स्पष्टयत्य**भिभूयमानाव्यसनैः**रिति, **यथा व्यसनैः** स्त्र्यादिभिरापद्भिर्वा**भिभूयमाना** वशीक्रियमाणा **अप्यधोक्षजचेतस** इन्द्रियातीते **भगवति स्थापितचिता न क्षोभं प्राप्नुवन्ति** तथा, तदा कन्दरादिष्वन्तर्भगवानस्तीति तत्र **वृष्टिधारास्पर्शनिवारकत्व स्वस्य सम्पद्यत इति** तदानन्देन च पूर्णा धाराकठिनस्पर्शमपि सुखत्वेन मानयामासुर्जलद इवातपस्पर्शमित्यर्थः, **अधोक्षज**पदेनान्याविषयत्वोक्त्या रहश्शयनं सूच्यते, यत्र जडाः कठिना अप्येतादृशास्तत्र चेतनाः किमु वाच्या इति भावः, समुद्रस्तद्धृतरत्नादिरित्यसारः ॥ १५ ॥ एवं राजसीं सात्त्विकीं व्यवस्थामुक्त्वा तामसीमाह **मार्गा बभूवु**रिति, सर्वं एव **मार्गाः सन्दिग्धा** जाता **यतस्तृणैराच्छन्नाः**, युक्तश्चायमर्थः प्रत्यक्षत एव सन्देहदर्शनात्, पूर्वं ये तेन मार्गेण सञ्चरन्ति तान् प्रति **सन्दिग्धा** अन्येषां तु ज्ञानमेव न **यतस्तृणैश्छन्नाः** तद्ध्यग्रे मार्गप्रवृत्तिः कथमित्याशङ्क्याहा**संस्कृता** इति, संस्कारपर्यन्तं सन्देह एव संस्काराभावे तु मार्गस्य लोप एव, बहुधा दृष्टस्य कथं सन्देहजनकत्वमितिशङ्कां दृष्टान्तेन वारयति **नाभ्यस्यमाना** इति, **यथानभ्यस्यमानाः श्रुतयस्तैरेव द्विजैः** पुनः स्मृताः **सन्दिग्धा** भवन्ति, आम्नायश्छन्दसां दण्डः, तदभावे सन्देहः सहजस्तस्य,**कालेन** महता **हताश्च** भवन्ति ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

जलस्थलौकस इत्यत्र, **मासा हि निमित्त**मित्यादि। 'द्वादश मासा' इत्यादिश्रुत्युक्तैकविंशतिप्रकारेण प्रावृडुच्यत इत्यादित्यत्रिलोकन्यायेनोक्त्वा ऋतुन्यायेन पञ्चभिः श्लोकैर्धर्मप्राधान्येन निरूपणं कृतम्। अधुना तु धर्मिप्राधान्येन मासमसंख्याकैः श्लोकैस्तत्क्रियते। मासा हि गर्भन्यायेन धर्मिस्वरूपविशेषसम्पत्तौ निमित्तभूताः, अतो वक्ष्यमाणजीवादयो धर्मिण एवात्र प्रधानभूता इत्यर्थः। साक्षाद्भगवत्सेवौपयिकदेहसाधनत्वं वारिमात्रस्य यत्र, तत्र किं वाच्यमन्यस्य वस्तुन इति भावः। एकेनालौकिकगुणाधायकत्वमुक्त्वात्र सदोषवस्तु निकटेपि नास्तीति ज्ञापयितुं दूरस्थं सिन्धुं निरूपितवान्। सिन्धुर्द्वीपमर्यादाहेतुत्वेन मर्यादामार्गीय इति तस्य क्षोभ उच्यते। एतल्लीलानुपयोगिनो महतोप्यनर्थपर्यवसानमेवेति च ज्ञाप्यते। अन्यथा सिन्धोरव्रजस्थस्य निरूपणमनर्थकं

स्यात् । निरूप्यते चात्र भगवदीयप्रावृष एव कार्यम् । तस्याश्चेतोन्यत्र प्राकट्ये प्रयोजनाभावः । एवं सति स्वाधिष्ठानत्वादाधिभौतिकप्रावृषस्तद्द्वारैव तथा कारितवतीयमित्यस्मिन्प्रकरणे व्रजस्थेतरस्यापि सिन्धोर्निरूपणम् । लीलारसामृतसमुद्रे जागरूकेन्यस्मिन् समुद्रत्वमसहमानया तया स्वप्रौढ्येदं कृतमिति ज्ञायते । तथा चास्थैर्यस्वभावा स्त्री, तादृश्याः पतिश्च गोकुले नास्तीति दोषाभावो व्यज्यते । दृष्टान्तेन चात्र भगवदेकनिष्ठत्वेनोभयेषां सिद्धचित्तवृत्तिनिरोधत्वादेकत्रस्थित्या स्वस्त्रीदर्शनादावपि न क्षोभ इति व्यज्यते, तेन ‘मन्यमानाः स्वपार्श्वस्था’निति न्यायः सार्वदिक इति सिद्धम् । अत्र पूर्वं वारिमात्रस्यापि मुख्यभक्तिकार्यकर्तृत्वेन भक्तिरूपत्वमुक्त्वा तदात्मिकानामेव सरितां यत् क्षोभकत्वमुक्तम्, तेन प्रावाहिकभक्तिमन्तो न लीलानिष्ठा भवन्ति, प्रभुस्वरूपनिष्ठाभावाद्यत्संगता भवन्ति तमपि क्षोभयन्तीति ज्ञापयति । ये तु प्रभुलीलौपयिकत्वेन स्वरूपैकनिष्ठया निश्चलत्वेनात्युच्चाधिकारं प्राप्तास्ते त्वभिभावकसम्बन्धेपि नाभिभूता भवन्तीति ज्ञापयितुं गिरीनग्रे निरूपितवान् । यथा यथा वर्षधारासम्बन्धस्तथा तथा स्वगुहाद्यन्तःस्थितप्रभौ तत्सम्बन्धा भावाः स्वेन भवन्तीति ज्ञानेनानन्दातिशय एव भवति, न तु तत्सम्वन्धजं दुःखमपीति दृष्टान्तेन ज्ञाप्यते । इदमेवोक्तं **यतस्तेन्तःसारा** इत्यनेनाचार्यैः ।। १३ ॥ अग्रिमश्लोकाभासे **तेषां वर्षकृतोपद्रवमाहे**ति । ननु भगवदीयप्रावृषो भक्तोपद्रवकर्तृत्वकथनमनुचितमिति चेत् । अत्रैवं ज्ञेयम् । उपद्रवो हि दुःखदः । वर्षधाराणामतादृशत्वे वक्ष्यमाणरीत्या सुखदत्वाभिमानहेतुत्वं न स्याद्यतः प्रभौ तन्निवारकत्वेनैव स्वस्मिन् कृतार्थताभिमानः । अत एव मूले हननमुक्तमतः सुष्ठूक्तमुपद्रवमाहेति ॥ १५ ।। ‘मार्गा बभूवु’रित्यनेनापि व्रजे लीलोपयोगिवर्षतौ मार्गाणामेव तथात्वम्, न तु कदाचिद्वेदानामिति ज्ञाप्यते । अत एव **कालहता** इति विशेषणं मूले । यथा भगवत्प्रापका वेदा अलौकिकरीत्या तथैवैकान्ते भक्तानां भगवत्प्रापका मार्गा इति द्वयोः साम्यम्, तेन सदा व्रजलोकयातायातं यत्र स मार्गो नात्र विवक्षित इति ज्ञायते । अत एव तादृशानामेव भक्तानां तमिस्रायां क्वचिद्दिवापि तत्सन्देहः । अन्येषां तु तदज्ञानमेव । इदमेवोक्तमाचार्यैः **पूर्वं ये तेने**त्यादिना । अत एव यावत्पर्यन्तं तद्विषयकसंस्कारानुत्पत्तिस्तावत्पर्यन्तमेव सन्देहस्तदुत्पत्तौ तु तमिस्रायामपि न सन्देह इत्याशयेनोक्तं मूले **असंस्कृता** इति । **मार्गलोप एवे**ति । स्यादिति शेषः । तेन संस्कारस्यावश्यकत्वमायाति । लोकबन्धुष्वित्यनेनापि व्रजे चलसौहृदा विद्युत एव दृष्टाः, न त्वन्याः स्त्रिय इति ज्ञायते । कदाचित्सत्त्वे हि चलत्वं सौहार्दस्य । अत्र तु प्रभ्वतिरिक्ते तदभावात्प्रभौ च तस्य सार्वदिकत्वात्सौहार्दस्य चलत्वाभाव एव यतः ॥ १६ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

जलस्थलौकसः इत्यत्र **मासा हि निमित्त**मित्यादेस्तात्पर्यं टिप्पण्यामाहुर्द्वादशेत्यादि, सुबोधिन्यां **गुणा** इति धर्मिणां गुणाः, द्वादशश्लोकोक्तान् **धर्मिणः कारिकया** सङ्गृह्णन्ति **जीवा** इत्यादि, शरीरद्वयविशिष्टास्ते गुणाः कथंवाच्या इत्यत आहुस्त्रिविधा इत्यादि, एते जीवादयः सर्वं एव **त्रिविधा** वक्ष्यमाणचतुष्करीत्या त्रिःप्रकारा, **मासैर्निमित्तैर्भोग्या** इत्यर्थः, ननु पूर्वं सुखिनोपि भगवदीयवर्षाकृतसुखाधिक्याय निरूपणीया एवेत्यत आहुर्दृष्टान्तार्थमिति तथा च हरिसेवायां सात्त्विका एव प्रवर्तन्ते ते **निषेवया** स्वतःपुरुषार्थरूपया तया **‘यथे’**तिदृष्टान्तमुखेन तेप्युक्तप्राया इत्यर्थः, **दोषादिति** चित्त**दोषात्** कामादेः, एतच्छ्लोकव्यङ्ग्यमर्थं टिप्पण्यामाहुः **साक्षादित्यादि** ।। १३ ।। **सरिद्भि**रित्यत्रैतच्छ्लोकव्यङ्ग्यमर्थं टिप्पण्यामाहुरेकेनेत्यारभ्य **ज्ञापयती**त्यन्तम् ॥ १४ ।। **गिरय** इत्यत्र **गिरिषु** किं समुद्राद् वैलक्षण्यं ? अत आहुः **समुद्र** इत्यादि, एतद्व्यङ्ग्यमर्थं टिप्पण्यामाहुर्यत्वित्यादि, सुबोधिन्यां **तेषां वर्षे**त्यादिकथने किञ्चिदाशङ्क्य टिप्पण्यां परिहरन्ति **नन्वित्याद्याहे**त्यन्तम् ।। १५ ।। **मार्गा** इत्यत्रैतत्पद्यव्यङ्ग्यमर्थं टिप्पण्यामाहुर्**मार्गा** इत्यादि ।। १६ ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

जलस्थलौकस इत्यत्र **प्रधान**मिति तात्पर्यार्थ इत्यर्थः, **गुणा** इति सत्त्वादयः शक्यार्था इत्यर्थः, निर्गुणेपि प्रतियोगित्वेन गुणा उक्ता एवेति भावः । **जीवा** इत्यत्र क्वचिद् दृष्टान्तनिरूपणं क्वचिद् दार्ष्टान्तिकनिरूपणं तात्पर्यार्थत्वेन, स च तत्र तत्र स्फुटः, विद्यावानिति भगवद्गुणवान् भगवदीय इत्यर्थः, **त्रिविधा** इति चतुर्विधाः सन्तस्त्रिविधाः, अतो द्वादशविधा इत्यर्थः, **मासभोग्या** इति मासन्यायेन धर्मिप्राधान्येन भगवतो भोग्या इत्यर्थः ।। १३ ।। **सरिद्भि**रित्यत्र अभिमानं विवृण्वन्ति **तरङ्गा** इति, रजसा गर्वो जात इतिभावः, **चित्ते**ति चित्तवृत्तीर्निरोधयतीति तज्जनको यमाद्यष्टाङ्गः इत्यर्थः, **स चेत् कामेने**ति चित्तरूपः पदार्थ इत्यर्थः ।। १४ ।। **गिरय** इत्यत्र **यत** इति स्वरूपयोग्यता एतेनोक्ता, **हेतुमिति** व्यथाभावहेतुमधोक्षजचेतस्त्वं दृष्टान्तेन गिरिषु स्पष्टयतीत्यर्थः, यथान्ये **भगवति स्थापितचित्ता**स्तथैतेपि तत्रैव सेवाभावनया स्थापितचित्ता इत्यर्थः, **तदानन्देन** चेति इति भावनया तदानन्देन चेति समुच्चयार्थश्चकारः, अन्तःसारत्वादेव **भगवति** चित्तस्थित्या व्यथाभावः, समुद्रस्त्विति **असारत्वान्** नाधोक्षजतेस्त्वमित्यर्थः ।। १५ ।। **एवमिति** गुणातीतव्यवस्था तु ‘‘जले’’तिश्लोकेनोक्तेतिज्ञेयम् ।। १६ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

जीवा नद्यः पर्वताश्चेत्यादि ‘‘जलस्थलौकस’’ इतिश्लोके **जीवाः**, ‘‘सरिद्भिः सङ्गत’’ इत्यत्र **नद्यः**, ‘‘गिरयो वर्षधाराभि’’रित्यत्र **पर्वताः**, ‘‘मार्गा बभूवुः सन्दिग्धा’’ इत्यत्र **मार्गाः**, ‘‘लोकबन्धु’’ष्वित्यत्र **कामिन्यः**, ‘‘धनुर्वियती’’त्यत्र **विद्या-**

वान्, "न रराजोडुपश्छन्न" इत्यत्र **चन्द्रमाः**, "मेघागमोत्सवा हृष्टा" इत्यत्र **बर्हो भक्ताश्चेति** द्वयं, "पीत्वापः पादपा" इत्यत्र **तापसाः**, "सरःस्वशान्तरोधःस्वि"त्यत्र गृहिणः, जलोघैर्निरभिद्यन्ते"त्यत्र **वैदिको मार्गः**, "व्यमुञ्चन्नि"त्यत्र **राजानः**, एवं **द्वादशधा, जलस्थलौकस** इत्यत्र सात्त्विकास्त्वित्यादि **यथा** हरिनिषेवयेतिदृष्टान्तार्थं भगवदीया उक्तास्ते **सात्त्विकाः, भूचरा राजसा जलचरास्तामसा** इति ज्ञेयम् ॥ १३ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

जलस्थलौकस इत्यादिद्वादशश्लोकप्रतिपाद्यानधिकारिण आहुर्जीवा इत्यादि का० १६२$\frac{३}{४}$–१६४$\frac{३}{४}$। **विद्यावानिति** "धनुर्वियति माहेन्द्र"मितिश्लोके **गुणवानि**तिपदोक्त इत्यर्थः, **बर्हो भक्ता** वेति मेघागमोत्सवान् दृष्ट्वा प्रत्यनन्दन् शिखण्डिनः गृहेषु तप्ता निर्विण्णा यथाच्युतजनागम" इतिश्लोके बर्हिणो वा **भक्ता वा** निरूपिता इत्यर्थः, दार्ष्टान्तिके मयूरा दृष्टान्ते भक्ता इतिभावः, त्रिविधा इति समुदायत्रयरूपा इत्यर्थः। चतुर्विधानां चतुर्विधानामेकैकः समुदायः, तादृशत्रिविधसमुदायरूपाः, अतो द्वादशविधा इत्यर्थः, तथा हि "जलस्थलौकस" इत्यादिषु चतुर्षु निर्गुणराजससात्त्विकतामसभेदा उक्ताः, यद्यपि "जलस्थलौकस" इतिश्लोकविवरणे भूचरा जलचराश्च "राजसास्तामसाश्चे"त्यादिग्रन्थेन सगुणभेदा उक्तास्ते व्याख्याताः, तत्र "हरिनिषेवये"तिपदेन सात्त्विकभेद उक्तस्तथापि "हरिनिषेवये"तिपदान् निर्गुणभेद एवास्मिन् श्लोके विवक्षाभेदेन ज्ञातव्यः, अत एव "मार्गा बभूवुः सन्दिग्धा" इति श्लोकव्याख्यानान्ते "एवं गुणातीतसगुणभेदेन चतुर्धा वर्षाकृता धर्मा" इत्युक्तं, अथ "लोकबन्धुषु मेघे"ष्वित्यादिद्वितीयचतुष्के राजससात्त्विकतामसनिर्गुणभेदाः, "पीत्वापः पादपाः पद्भि"रित्यादितृतीयचतुष्के सात्त्विकराजसतामसनिर्गुणभेदाः, एवं द्वादशभिर्मासैर्द्वादशभोग्या इत्यर्थः ॥ १३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जलौकसो मीनादयः, स्थलौकसो गोवृक्षादयश्च नववारिनिषेवणात् रुचिरं रूपमबिभ्रत् अबिभरुः। अत्र दृष्टान्तमाह—यथा हरिनिषेवया साधनदशायामपि रुचिरा भवन्ति, तत्र तपआदिवत् नखकेशमलादिधारणनियमाभावात् 'अशेषसङ्क्लेशशमं विधत्ते' इत्यादिवाक्येन तस्याः सर्वक्लेशनिवर्तकत्वात्सुखजनकत्वात्। सिद्धावस्थायां तु भगवत्समानरूपप्राप्तेः रुचिरा भवन्त्येव। 'अतः प्रयत्नेन हरिसेवायां प्रवृत्तिरेव युक्ता' इत्यादेयोपमा ॥ १३ ॥ श्वसनः पवनः, तेन जाता ये ऊर्मयस्तद्वान् सरिद्भिः सङ्गतश्च सिन्धुश्चुक्षुभे अतिचञ्चलतां प्राप्तः। तत्र दृष्टान्तमाह—अपक्वेति। गुणैर्विषयैर्युज्यते इति गुणयुक्। तत्र हेतुमाह—कामाक्तमिति। भोगवासनायुक्तमित्यर्थः। तत्र हेतुः—अपक्वेति। चित्तवृत्तिनिरोधो हि योगः, स चेत् पक्वो दृढः स्यात् तदा चित्तं कामाक्तं न स्यादित्याशयः। तच्चित्तं यथा क्षुभितं भवति तथेत्यर्थः। तत्र 'कामाक्तम्' इति श्वसनोर्मिसाम्यम्। 'गुणवत्' इति सरित्सङ्गतिसाम्यम्। 'अतः शिथिलयोगस्य केवलं क्लेशफलकत्वाच्छिथिलतया योगो नानुष्ठेयः' इति हेयोपमा ॥ १४ ॥ एवं सिन्धुदृष्टान्तेन भगवद्विमुखानां मर्यादायां स्थितानां महतामपि चित्तवृत्तिनिरोधाभावेन क्षोभो निरूपितः। तदेकनिष्ठानां तु यत्रकुत्रस्थितानामल्पानामपि चित्तवृत्तिनिरोधेन क्षोभा भवन्तीति दृष्टान्तेनाह—गिरय इति। वर्षधाराभिर्हन्यमाना अपि गिरयो न विव्यथुः पीडां न प्रापुः, किन्तु प्रत्युत रजआदिनिवृत्त्या हरिततृणाद्युत्पत्त्या चाशोभन्तैव। तत्र दृष्टान्तमाह—यथा अधोक्षजे भगवत्येव चेतो येषां ते व्यसनैराध्यात्मिकादिभिस्त्रिविधैस्तापैरभिभूयमानास्तिरस्क्रियमाणा अपि पीडां न प्राप्नुवन्ति, तदेकचेतस्त्वेन आत्मानुसन्धानाभावात्। प्रत्युत दुःखभोगेन दुरितनिवृत्त्या भगवद्भजनजनितशुभादृष्टोत्पत्त्या च इहामुत्र च शोभन्त एव। तथा च 'विवेकिभिर्भगवत्परत्वेनैव भाव्यम्' इत्यादेयोपमा ॥ १५ ॥ ये बहुशस्तैरेव मार्गैर्गता आगताश्च तेषामपि त एव मार्गाः वर्षाकाले सन्दिग्धाः 'तेषां ग्रामाणामेते एव मार्गा अन्ये वा' इति सन्देहविषया बभूवुः। हि यस्मात् असत्कृताः पादाघातैरक्षुण्णा तदा पथिकानां प्रायशो गमनाभावात्, अत एव तृणैराच्छन्नाश्च। तत्र दृष्टान्तमाह—यथा द्विजैः पठिता अपि श्रुतयो नाभ्यस्यमानाः लुप्तसंस्काराः कालहता विस्मृता अज्ञानावृता इति यावत् तेषामेव सन्दिग्धा भवन्ति तथा, तथाचाधीतानां वेदानामावृत्तिं कुर्वतैव स्थेयम्, अन्यथा तु प्रत्यवाय्येव स्यात्। तथा च स्मर्यते—"अधीतमपि यो वेदं नानुपालयति द्विजः॥ स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" इति ॥ १६ ॥

अन्वितार्थप्रकाशिका

जलेति ॥ यथा सर्वेऽपि हरिनिषेवणाद्रुचिरं रूपं बिभ्रति परमधर्मत्वात् परमसुखदत्वाच्च तथा जलौकसो मीनादयः स्थलौकसो गोवृक्षादयश्च नववारिनिषेवणात् रुचिरं रूपमबिभ्रन् अबिभरुः। जुसभाव आर्षः। निषेवयेति निषेवणादिति च पाठौ ॥ १३ ॥ सरिद्भिरिति ॥ यथा कामेन भोगवासनयाक्तं गुणयुक् विषयासक्तम् अपक्वयोगिनश्चित्तं क्षुभ्यति तथा श्वसनः पवनस्तेन जाता ये ऊर्मयस्तद्वान् सरिद्भिः सङ्गतश्च सिन्धुर्नदविशेषः समुद्रो वा चुक्षुभे अतिचञ्चलतां प्राप। अत्र सिन्धुर्नदीविशेषः पाश्चात्यः। विशेषणे पुंस्त्वमार्षम् इति चक्रवर्त्ती। तोषणी तु समुद्रपरतया व्याचष्टे ॥ १४ ॥ गिरय इति ॥ यथा अधोक्षजचेतसः

भगच्चित्ता जनाः व्यसनैः कष्टैः अभिभूयमाना बाध्यमाना अपि न व्यथन्ते तथा वर्षधाराभिर्हन्यमाना अपि गिरयो न विव्यथुः पीडां न प्रापुः। तङ्भाव आर्षः ॥ १५ ॥ मार्गा इति ॥ यथा द्विजैः पठिता अपि श्रुतयो नाभ्यस्यमानाः लुप्तसंस्काराः कालहता विस्मृताः सत्यः संदिग्धाः भवन्ति तृणैश्छन्नाः असंस्कृताश्च मार्गाः अयं मार्गोऽस्ति न वेति सन्दिग्धाः बभूवुः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जलस्थलौकसः तोयभूमिनिवासिनः यथा हरिनिषेवया नराः निष्कामनिर्लोभादि पंचगुणसहितं रुचिरं पार्षदत्वं बिभ्रति तथा सुंदरं रूपं अबिभ्रदबिभरुरिति संबंधः ।। १३ ।। श्वसनेन वायुना ऊर्मिमान् तरंगवान् सिंधुः कामाक्तं विषयवासनासहितं समुद्रोर्मितुल्यं चितं गुणयुक्नदी संगतसिंधुवत् विषयैर्युक्तं सत् यथा चुक्षुभे तथा ।। १४ ।। व्यसनैः नानाविधसंसारक्लेशैः अधोक्षजे नारायणे चेतोंऽतःकरणं येषां ते न विव्यथुः न विव्यथिरे ।। १५ ।। मार्गा इति तृणैः छन्ना आवृताः असंस्कृता नाखनिताः। तृणछन्नमार्गवत् कालेन हृताः असंस्कृतमार्गवत् नाभ्यस्य मानाः श्रुतयो यथा तश्च संदिग्धा बभूवुः ॥ १६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

जलेति। जलस्थले ओकसी येषां ते, जलौकसः स्थलौकसश्चेत्यर्थः। सर्वेऽपि प्राणिनः, नवं नूतनं च तद्वारि जलं तस्य नितरां सेवा तया, योगिनः हरिनिषेवया ध्यानातिशयसाक्षात्कृतहृत्पद्मस्थहरिनिषेवया, यथा रुचिरं रूपं बिभ्रति, तद्वत् रुचिरं रूपं, अबिभ्रदबिभरुः। संज्ञापूर्वकविधेरनित्यत्वादार्षत्वाद्वाऽभ्यस्तलक्षणजुषभावः। हरिनिषेवयेत्यनेन 'वसति हृदि सनातने च तस्मिन् भवति पुमान् जगतोऽस्य सौम्यरूपः' इति वचनार्थोऽत्रोक्तः अनेनैव हरिसेवया विना सौम्यता नेत्यपि सूचितं, तस्याः परमधर्मत्वात् परमसुखरूपत्वाच्च ।। १३ ॥ सरिद्भिरिति ॥ सिन्धुः समुद्रः, सरिद्भिर्नदीभिः, संगतः, श्वसनोर्मिमान् वातोद्धूततरङ्गश्च सन्, चुक्षुभे संचचाल। कथमिव। अपक्वयोगिनः अनिष्पन्नसमाधेः पुंसः, चित्तं कामाक्तं विषयस्पृहायुक्तं, गुणैर्विषयैर्युज्यते इति तथाभूतं च सत्, यथा क्षुभ्यते तद्वत्। कामाक्तमिति श्वसनोर्मिसाम्यम्। गुणयुगिति सरित्सङ्गसाम्यम्। चित्तचाञ्चल्यनिमित्तकामस्पृहानिवर्त्तकभगवत्समाधिविपाकार्थं यतितव्यमिति सूचितम् ।। १४ ।। गिरय इति। वर्षधाराभिः, हन्यमानाः पीड्यमानाः अपि, गिरयः न विव्यथुः। कथमिव। यथा अधोक्षजे एव चेतांसि येषां ते जनाः, व्यसनैराध्यात्मिकादितापैः अभिभूयमानाः पीड्यमानाः अपि, न व्यथयन्ति तद्वत्। अनेन भगवद्भक्तिरेव तापत्रयविघातिनीत्युक्तं भवति ॥ १५ ॥ मार्गा इति। मार्गाः, तृणैः छन्नाः सम्यगाच्छन्ना, असंस्कृताः अक्षुण्णाः, वर्षासु पथिकानां प्रायशो गमनाभावादिति भावः। अत एव, संदिग्धाः संदेहयुक्ताः, बभूवुः हि। यथा द्विजैः श्रुतयोऽधीता वेदाः, नाभ्यस्यमानाः नावर्त्यमानाः सत्यः, कालेन हताः इव, संदिग्धाः विस्मृतप्रायाः, भवन्ति तद्वदित्यर्थः। नाभ्यस्यमाना इत्यसंस्कृतसाम्यम्। कालहता इति तृणच्छादनसाम्यम् अनेनाऽधीतानां वेदानामामावृत्तिं कुर्वतैव स्थेयमन्यथा तु प्रत्यवाय इति सूचितम्। तथा च स्मर्यते। 'अधीतमपि यद्वेदं नानुपालयति द्विजः। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः' इति ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

जलेति : १०.२०.१३.

अनपेक्ष्य यदधिकारं जडमप्यविशेषतोऽत्र पोषयति। सच्चिद्रूपस्त्वयमिति निष्ठा यदि सुलभमिष्टमर्थकृतम् ॥ २३ ॥

सरिद्भिरिति : १०.२०.१४.

क्षमाभृदचलान्तरो भृशमसीमसत्त्वाश्रितो रमापतिपदोल्लसद्धृदयभूः सदैवामृतः।
स चाब्धिरपि चुक्षुभे जडमयाङ्गनासङ्गमैः परस्य तु कथाऽत्र केत्यलमसीम योषिद्बलम् ।। २४ ॥

गिरय इति : १०.२०.१५.

कर्माण्यनेकविधदुःखफलानि भूयः प्राप्तान्यपीशहृदयेष्वफलीभवन्ति।
वर्षाम्बुवद् गिरिवरेष्विति संविभाव्य सेव्यः सदैव हरिरात्मसुखार्थिनाऽस्मिन् ॥ २५ ॥

मार्गा इति : १०.२०.१६.

अस्त्वस्मिन् योगयुग्वा जपकृदपि तपःसाधको याज्ञिको वा तेष्वध्वैकोऽपि तादृङ् नहि नहि भविता यत्र पङ्कप्रसक्तिः।
जानन्नेवं युगेऽन्त्ये गहनभवपथोल्लङ्घनायैकमेव श्रेयोदं श्रीधराङ्घ्रेर्निखिलमलहरं लक्षयेद्भक्तिमार्गम् ।। २६ ॥

कृष्णप्रिया

नये बरसाती जल के सेवन से सभी जलचर और थलचर प्राणियों की सुन्दरता बढ़ गयी थी, जैसे भगवान की सेवा करने से बाहर और भीतर के दोनों ही रूप सुघड़ हो जाते हैं ॥ १३ ॥ वर्षा ऋतु में हवा के झोकों से समुद्र एक तो यों ही

उत्ताल तरङ्गों से युक्त हो रहा था, अब नदियों के संयोग से वह और भी क्षुब्ध हो उठा, ठीक वैसे ही जैसे वासनायुक्त योगी का चित्त विषयों का सम्पर्क होने पर कामनाओं के उभार से भर जाता है ।। १४ ।। मूसलाधार वर्षा की चोट खाते रहने पर भी पर्वतों को कोई व्यथा नहीं होती थी, जैसे दुःखों की भरमार होने पर भी उन पुरुषों को किसी प्रकार की व्यथा नहीं होती जिन्होंने अपना चित्त भगवान को ही समर्पित कर रक्खा है ॥ १५ ।। जो मार्ग कभी साफ नहीं किये जाते थे वे घास से ढक गये और उनको पहचानना कठिन हो गया जैसे जब द्विजाति वेदों का अभ्यास नहीं करते तब काल क्रम से वे उन्हे भूल जाते हैं ॥१६॥

लोकबन्धुषु मेघेषु विद्युतश्चलसौहृदाः । स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु [1]गुणिष्विव ॥ १७ ॥
धनुर्वियति माहेन्द्रं निर्गुणं च गुणिन्यभात् । व्यक्ते गुणव्यतिकरेऽगुणवान् पुरुषो यथा ॥ १८ ॥
न रराजोडुपश्छन्नः स्वज्योत्स्नाराजितैर्घनैः । अहंमत्या भासितया स्वभासा पुरुषो यथा ॥ १९ ॥
मेघागमोत्सवा हृष्टाः प्रत्यनन्दञ्छिखण्डिनः । गृहेषु तप्ता निर्विण्णा यथाच्युतजनागमे ॥ २० ॥

कर्दमक्षमा

अन्वयः—गुणिषु पुरुषेषु कामिन्यः इव, लोकबन्धुषु मेघेषु चलसौहृदाः विद्युतः स्थैर्यं न चक्रुः ।। १७ ।। गुणव्यतिकरे व्यक्ते यथा अगुणवान् पुरुषः भाति, तथा गुणिनि च वियति निर्गुणम् माहेन्द्रम् धनुः अभात् ।। १८ ।। स्वभासा भासितया अहम्मत्या पुरुषः यथा न राजते तथा, स्वज्योत्स्नाराजितैः घनैः छन्नः उडुपः न रराज ।। १९ ।। गृहेषु तप्ताः निर्विण्णाः अच्युतजनागमे हृष्टाः भवन्ति तथा, मेघागमोत्सवाः हृष्टाः शिखण्डिनः प्रत्यनन्दन् ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वभासभासितयाऽहंमत्येति स्वचैतन्येनैव प्रकाशितेनाहंकारेण छन्नो जीवो यथा । यद्वा अहं विद्वान् दाता वेत्ता शूर इति स्वप्रतीत्यैवारोपितया इति ॥ १७ ।। मेघागमेनोत्सवो येषा मतो हृष्टाः ।। १८ ॥ नानात्ममूर्तयः अनेकरूपदेहाः ॥ १९॥ अशांतानि पंककंटकादियुक्तानि रोधांसि तटानि येषां न्यषुर्नितरामवसन् । सारसाश्चक्रवाकाः । अशांतानि घोराण्यनुपरतानि वा कृत्यानि येषु तेष्वपि गृहेषु ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

जीवो यथा वस्त्वात्मना न भाति तद्वदिति । न हि परिछिन्नेनाहंकारेणापरिच्छिन्न आत्माच्छादितुं शक्यते इत्यरुच्याह-यद्वेति । यथाऽहं विद्वानित्यादिरूपेणेति एतेनाहंमतित्यागेन यथार्थात्मज्ञानं भवतीति भावः ॥ १७ ॥ शिखंडिनो मयूराः । कुटुंब-पालनादिक्लेशेन तप्ता अत एव निर्विण्णा अहो महाक्लेशदं गृहं हेयमिति निश्चिताः । अनेन स्वकल्याणार्थं हरिभक्ताऽऽगमने आनंद एव कार्य इति भावः ।। १८ ॥ पद्भिर्मूलैः । शाखोपशाखापत्रपुष्पफलैरनेकदेहाः । प्राक् ग्रीष्मे । तपसा तापेन । क्षामाः कृशाः। यथा प्राक् कुटुंबावस्थायां कामानामनुसेवया जातेन तपसा श्रमेण श्रांता इन्द्रियदौर्बल्यमाप्ताः पादपाः संतः पादेन हरिपादोपासनेन पांति रक्षंत्यात्मानमिति पादपास्तपस्विनः सद्गतिसाधनत्वात्पद्भिश्शास्त्रैः पद्यंते सर्वपुरुषार्था एभिरिति पदस्तैः । अपः पुरुषार्था-वाप्तिहेतून् ज्ञानरसान्पीत्वाऽऽस्वाद्य । नानात्मानो मूर्तयो विग्रहा येषां ते सर्वभूतात्मानो भवंतीति भावः । यद्वा—प्राग्वनिताद्यभावेन तपसा कामाग्निना श्रांताः कामानुसेवया पश्चात्स्त्र्याद्यवाप्त्या सततं कामभोगेन पुत्रतत्पुत्रादिरूपेण नानात्मानो भवंतीति भावः। एतेन विषयत्यागपूर्वकं शास्त्रविचारेण ज्ञानावाप्तिर्भवतीति सूचितम् ।। १९ ॥ अंग हे नृप । ग्राम्याः प्राकृतजनाः । एतेन संसारिणां स्वभावो ध्वनितः । किं च, सर्वकृत्यावसाने हरिस्मरणादिकं करिष्याम इति न ध्येयम्, किं तु कृत्यानामवसानाभावाद्यदोषरतिस्त-दैवेत्यपि सूचितम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गुणिषु वैदग्ध्यादिविविधगुणयुक्तेष्वपि ॥ १७ ।। अगुणवान् मायागुणातीतोपि पुरुषः ।। १८ ॥ स्वीयया तुषारमय्या ज्योत्स्नया राजितैः प्रकाशितैः सम्वर्धितैश्च ।। १९ ।। मेघागम एव उत्सवो येषां ते अत एव हृष्टाः प्रत्यनन्दन् मेघगर्जिताद्यनन्तर-मुच्चैर्नादादिकमकुर्वन् यथा वैष्णवगृहस्थाः समागतवैष्णवगीतानन्तरं नृत्यगीतादिकं कुर्वन्ति तथेत्यर्थः । एवं चातका अपि ज्ञेया इति भावः ॥ २० ।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गुणिषु वैदग्ध्यादिविविधगुणयुक्तेष्वपि ।। १७ ॥ अगुणवान् मायागुणातीतोऽपि पुरुषो मायाधिष्ठाता, सृष्ट्यादिना तत्तद्-गुणद्वाराभिव्यक्तेः, किंवा, परमात्मा चेतयितृत्वादिना प्रपञ्चे यथा, यद्वा, परमेश्वरः कारुण्यादिगुणव्यतिषंगे व्यक्ते प्रकटे सत्येव,

---

[1] गुणेश्वपि—गो. प्रे. टी. ।

यद्वा, पुरुषो जीवतत्त्वतो ब्रह्मत्वान्निर्गुणः भगवच्छ्रवणादिगुणवर्गे व्यक्ते सति, यद्वा, गुणानां सर्व्वसत्त्वादिसम्बन्धिनां व्यतिकरोऽन्योन्यमिश्रणं यस्मिंस्तस्मिन् व्यक्ते सुप्रसिद्धस्थाने श्रीवृन्दावनादौ श्रीकृष्णो यथा भाति, तद्वत् ॥ १८ ॥ स्वज्योत्स्नया राजितैरिति चन्द्राभावः परिहृतः, एवं स्वभासा भासितयेति नास्तिकानां प्राणमयजीवपक्षो निरस्तः, स्वकीयया तुषारमय्या ज्योत्स्नया राजितैः संवर्द्धितैरिति छन्नतायां हेतुविशेषः । एवमहम्मत्येत्यत्रापि अहंकारेणैव जीवतत्त्वास्फूर्त्तेः, तस्य च जीवचैतन्येनैव प्रकाश इति, यद्वा, स्वज्योत्स्नया राजितैरपि न रराज, तैश्छन्नत्वेन सम्यक्प्रकाशाभावात्, स्वभासा निजचैतन्येन भासितयापि अहम्मत्याच्छन्नो यथा जीवो न राजते, निजतत्त्वास्फूर्त्तेः ॥ १९ ॥ उत्सवो नृत्यादिपरिकरश्चित्तोल्लासो वा, हर्षश्च तद्विकारो ज्ञेयः, तत्प्रसादो वा, अतएव हृष्टाः प्रत्यनन्दन् मेघगर्जिताद्यनन्तरमुच्चैर्नादनृत्यादिकमकुर्व्वन्, यथा वैष्णवगृहस्थाः समागतवैष्णवगीतानन्तरं गीतनृत्यादिकं कुर्व्वन्ति तथेत्यर्थः । यद्वा, प्रतिक्षणमनन्दन् सुखिनो बभूवुः, शिखण्डिनां मेघागमोत्सवात्, तत्पानाच्च वैष्णवसमागमस्वभावात् । एवमुत्सवहर्षसुखानां यथोत्तरं हेतुत्वेन बाह्यान्तरत्वादिना भेदः कल्प्यः । चातकाश्च तादृशा अपि परमकरुणस्वरत्वाद्व्यक्तं नोक्ताः, तेषां स्मरणेऽपि दुःखविशेषोत्पत्तेः ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

गुणिनि शब्दगुणके निर्गुणः गुणत्रयरहितः ॥ १८ ॥ राजितैः प्रकाशितैः अहंमत्या स्वभासा भासितया स्वज्ञानमूलेन देहात्माभिमानेन ॥ १९–२० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

लोकबन्धुष्विति सर्वप्राणिजीवनभूतजलप्रदानेन महोपकर्तृत्वाल्लोकानां बन्धुषु मेघेषु विद्युतस्तडितश्चलं सौहृदं यासां तथाभूता बभूवुः अनियतदेशमल्पकालं च सङ्गं चक्रुरित्यर्थः । यद्वा स्थैर्यं न चक्रुरित्यपि दार्ष्टान्तिकान्वयि चलसौहृदाः सत्यः स्थैर्यं न चक्रुः यथा कामिन्यः पुंश्चल्यः गुणिषु सौन्दर्यसौशील्यादिगुणाश्रयेष्वपि निर्द्धनेषु पुरुषेषु चलसौहृदाः स्थैर्यं न कुर्वन्ति तद्वत् अनेन यत्नतः कामिनीनां सङ्गः परिहार्य इति सूचितं भवति ॥ १७ ॥ धनुरिति । गुणिनि शब्दगुणके वियत्याकाशे माहेन्द्रं धनुर्गुणं मौर्वीरहितमभाद्बभौ यथा गुणव्यतिकरे गुणत्रयपरिणामात्मके व्यक्ते देहे अगुणवान् गुणत्रयरहितः पुरुषो जीवो भाति तद्वत् वियद्धनुषोरिव देहात्मनोर्विलक्षणस्वरूपस्वभावत्वमुक्तम् ॥ १८ ॥ नेति ॥ उडुपश्चन्द्रः स्वज्योत्स्नया राजितैः प्रकाशितैर्घनैर्मेघैः छन्नो न रराज घनेभ्यो विलक्षणतया न रराजेत्यर्थः । यथा पुरुषः प्रत्यगात्मा स्वभासा स्वापृथक्सिद्धधर्मभूतज्ञानेन भासितया समुन्नतयाऽहंमत्या देहात्मभ्रान्त्या देहात् पृथङ्न प्राकाशते तद्वत् देहात्मभ्रान्तिरात्मस्वरूपाच्छादनहेतुरिति सापत्न्येन परिहार्येत्युक्तम् ॥१९॥ मेघेति मेघागमे उत्सवो येषामतो हृष्टाः शिखण्डिनो मयूराः प्रत्यनन्दन् यथा गृहेषु तत्तात्त्रिभिस्तापैरिति शेषः अत एव निर्विण्णा जनाः अच्युतभक्तानामागमने सति प्रतिनन्दन्ति तद्वत् तापत्रयतप्तैरवश्यमच्युतजनसङ्गतिः कार्येत्युक्तम् ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

चलसौहृदाश्चञ्चलस्वभावाः विद्युतः लोकोपकारित्वाल्लोकबन्धुषु मेघेषु स्थैर्यं स्थिरस्थितिं न चक्रुः नापुरित्यन्वयः । कामिन्यः गुणिषु विविधेषु पुरुषेषु इव यथा स्थैर्यं न कुर्वन्ति तथा विद्युद्वच्चञ्चलभक्तिर्न कर्त्तव्या किन्तु पूर्ववत्स्थिरा इति भावः । चलसौहृदाः चलस्नेहाः मानुषस्वभावो दर्शित इति वा ॥ १७ ॥ गुणिनि शब्दगुणोपेते नीलिमगुणयुक्ते वा वियति महेन्द्रस्य विद्यमानं निर्गुणं ज्यारहितं धनुः अभात् भाति कथमिव गुणव्यतिकरे जगत्सर्जने व्यक्ते प्रवृत्ते पुरुषो नारायणो यथा गुणवान् सत्त्वादिगुणैः प्रवर्त्तमानो भाति सृष्टेः पूर्वं निर्गुणः सत्त्वादिगुणप्रवृत्तिशून्यः गुणवान् प्रशस्तज्ञानानन्दादिगुणपूर्णो वा निर्गुणः देहरहितः गुणव्यतिकरे गुणवान् देहवान् पुरुषो हिरण्यगर्भो यथेति वा ॥ १८ ॥ स्वया ज्योत्स्नया राजितैः सन्ध्यारागं प्राप्तैर्घनैश्छन्न उडुपश्चन्द्रः न रराज स्वरूपाभिव्यक्तिं नाप स्वभासा स्वयंप्रकाशज्ञानेन भासितयाऽभिव्यक्तया अहम्मत्याऽहङ्काराख्यया पुरुषः संसारी यथाऽभिव्यक्तस्वरूपो न भवति भगवत्प्रसादानुगृहीतज्ञानलक्षणप्रकाशेनाभिव्यक्तरूपः पुरुषः स्याद्यथा तथा शरदादिलक्षणप्रकाशेन प्रकाशितमण्डलश्चन्द्र इति सूचितं भवति ॥ १९ ॥ शिखण्डिनो मयूराः मेघानामागम एवोत्सवः तेन हृष्टाः रोमाञ्चत्वं प्राप्ताः कुटुम्बभरणादिना तप्ताः सज्जनदर्शनाभावाग्निना वा अत एव निर्विण्णाः विरक्ताः संसारबुद्धियुक्ताः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मेघागमे एवासवो येषां अत एव हृष्टाः तान् मेघान् प्रत्यनन्दयन् ॥ २०–२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यथा कामिन्यः पुंश्चल्यः गुणिषु पुरुषेषु वैदग्ध्यादिगुणवत्स्वपीति हेयैव ॥ १७ ॥ निर्गुणं ज्यारहितं गुणिनी गर्जितशब्दवति व्यक्ते प्रपञ्चे गुणव्यतिकरात्मकेऽगुणवान् मायागुणातीतः पुरुषो भगवान् भाति विविधलीलाभिरिति भक्तैरुपादेयाः ॥ १८ ॥ उडुपतिश्चन्द्रः स्वज्योत्स्नाराजितैर्घनैस्तुषारमयैः कुहेडीकाख्यैर्मेघैश्छन्न आच्छन्नत्वाभावेऽप्याच्छन्नत्वेन प्रतीतो न रराज स्वभासा

स्वीयगुणमयच्छविरूपया अहंमत्या अविद्यया स्वशक्त्या कीदृश्या भासितया स्वेनैव प्रकाशितया पुरुषः परमेश्वरो यथा घनच्छन्नदृष्टिर्घनच्छन्नमर्कमितिवत् छन्नत्वेन प्रतीतिरित्यर्थः । ज्ञानिभिरयमुपादेया ॥ १९ ॥ मेघागमेनोत्सवो येषां ते प्रत्यनन्दन् मेघसमृद्धगर्जिताद्यनन्तरमुच्चैरानन्दादिकमकुर्वन् यथा वैष्णवगृहस्थाः समागतवैष्णवसप्रेमानन्दगीतानन्तरमानन्दगीतनृत्यादिकं कुर्वन्तीति । वैष्णवानामुपादेया ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निर्गुणं ज्यारहितमपि गुणिनि शब्दगुणयुक्ते अभादशोभत यथा गुणव्यतिकरे प्रकृतिगुणपरिणामात्मके व्यक्ते देहे अगुणवान् प्राकृतगुणरहितः पुरुषो ज्ञातत्त्वो जीवो भाति तद्वत् ॥ १८ ॥ स्वभासा धर्मभूतेन ज्ञानेनैव भासितया स्थूलोऽस्मि कृशोस्मीत्यादिरूपयाऽहम्मत्या यथा पुरुषो अनात्मको जीवो न राजते तद्वत् ॥ १९–२० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कामिन्यः पुंश्चल्यो यथा गुणिषु निखिलकलाविज्ञेष्वपि पुरुषेष्विति हेयैवेयम् ॥ १७ ॥ माहेन्द्रं धनुर्निर्गुणमज्यां गुणिनी गर्जितवति वियति खे अभात् पुरुषो विष्णुरगुणवान् मायागुणातीतो व्यक्ते प्रपञ्चे गुणव्यतिकरात्मके विविधलीलाभिर्भाति यथा तद्वदित्युपादेयेयं तत्स्वरूपविदाम् ॥ १८ ॥ उडुपश्चन्द्रः स्वीयया तुषारमय्या ज्योत्स्नया राजितैः प्रकाशितैः सम्वर्द्धितैश्च घनैश्छन्नो न रराज यथा स्वभासा स्वधर्मसम्विदा भासितया प्रकाशितया सम्वर्द्धितया च ब्राह्मणोहं स्थूलोहमित्यादिरूपया अहम्मत्या वृतः पुरुषो जीवो न राजते तद्वदिति ज्ञानिभिरयमुपादेया ॥ १९ ॥ मेघागमेनोत्सवो येषां ते शिखण्डिनः प्रत्यनन्दन् यथा निर्विण्णाः सत्प्रसङ्गिनो गृहस्था अच्युतजनानामागमेन हृष्टाः प्रतिनन्दन्ति तद्वदिति सत्सेविनामुपादेयेयम् ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वज्योत्स्नाराजितैः सन्ध्यारागमाप्तैर्घनैश्छन्न उडुपः स्वभासा स्वयंप्रकाशमानेन भासितया व्यक्तताऽहम्मत्याऽभिमत्या पुरुषो जीवो न राजति तथा न रराज । यद्वा स्वभासा स्वप्रकाशेन सहितोऽपि स्वरूपभूतेन पुरुषो जीवोऽहम्मत्याऽभिमत्या भासितया विकर्मविशेषात्तदभिभावकतयोज्वलया न ज्ञानादिस्वरूपत्वेन यथा भाति तयोडुपश्चन्द्रस्तैर्घनैश्छन्नः स्वज्योत्स्नाराजिस्वत्यन्तं न विद्यते ज्योत्स्नानां कौमुदीनां राजिः पङ्क्तिर्यस्मिन्कर्मणि तद्यथा भवति तथा न रराज न शुशुभे । आनुरूप्यं दृष्टान्तदार्ष्टान्तिकयोरेवमन्वयने लगति नान्यथेति विदांकुर्वन्तु विन्दवः । अखण्डं न रराजेत्यावर्तितं परीक्षित्सम्बोधनं च ॥ १७ ॥ गृहेषु भार्यादिषु तप्ताः कुटुम्बपोषणादिनाऽतो निर्विण्णा निर्वेदमाप्ता अच्युतजनागमे भगवदवगमकसज्जनसमासज्जने जाते यथा प्रतिनन्दन्ति तथा मेघागमे तन्निदाघकालिकतापापनोदोदित उत्सवो येषां ते हृष्टा रोमाञ्चनसहिताः शिखण्डिनो मयूराः प्रत्यनन्दंस्तुतुषुः । तप्ता निर्विण्णा अच्युतागमे तज्जनागमे च हृष्टा रोमाञ्चितगात्रा इति वा । उत्सवा हृष्टा इति पाठ उत्सवेनासम्यग्रोमाञ्चिता इति पदार्थाः । उत्सवे हृष्टा इति स्फुटार्थः पाठः । मयूरादिपदं विहाय शिखण्डिन इति वदता गृहेषु तप्तानां स्वतोऽनिर्वाहकत्वान्नपुंसकसमता च ध्वनितेति ज्ञेयं ॥ १८ ॥ यथा प्राक् कामानुसेवया विषयसेवनेनानम्रास्तपसा कृच्छ्रचान्द्रायणादिना क्षामाः कृशाः श्रान्ताश्च सन्तो नम्रात्ममूर्तयो भवन्ति तथा तपसा माघाद्यरभ्य ग्रीष्मपर्यन्तं क्षामाः । तपो माघे च शिशिर इति विश्वः । पादपाः पद्भिर्मूलैरप उदकं पीत्वा नम्रा आत्ममूर्तयः स्वगात्राणि येषां ते तथा सन् ॥ १९ ॥ यथायथं मध्यमोत्तमलक्षणानि तत्र तत्रानुसन्धेयानीति सूचयितुं स्पष्टं नित्यसंसारिसाधर्म्यमाह ॥ सरःस्विति । शेन सुखेनान्तःप्रान्तभागो गम्यो येषां तानि तानि न भवन्तीत्यशान्तानि रोधांसि येषां तेषु । कूलं रोधश्च तीरं चेत्यमरः । सरस्सु सारसाश्चक्रवाका ऊषुः । तेषां विस्तृतत्वाद्रसवत्कुसुमसमेतत्वात्तत्र सरसाः सारसा यथाऽशान्तकृत्येष्वसुस्वनिर्णयनकृन्ति कृत्यानि कर्माणि येषां तेषु गृहेषु दुराशया दुर्मनस्का नित्यसंसारिणो ग्राम्या मूर्खास्तथोषुरित्यन्वयः । अङ्ग हे राजन् अशान्तकृत्येषु कदाऽपि तत्कर्मापरिसमाप्तिमत्सु गृहेष्विति वा ॥ २० ॥

श्रीसुबोधिनी

एवं गुणातीतसगुणभेदेन चतुर्धा वर्षाकृता धर्मा उक्ताः पुनर्विपरीततया चतुर्धा निरूपयति, द्वितीये राजसाः प्रथमास्ततः सात्विकस्ततस्तामसो गुणातीतश्चेति तामसभावेन चतुर्धाग्रे निरूपयिष्यति, तत्र स्त्रियो राजस्यो मुख्यास्तासां राजसस्तामसो वा चेद् भर्ता तदा स्थिरता सात्त्विकत्वे तु **न स्थैर्यं**, विद्युतामस्थैर्ये हेतुरनेनोच्यते, **लोकबन्धुषु लोकानां सर्वेषां** बान्धवा मेघाः, यदि सर्वमेव जलं विद्युत्स्वेव प्रयच्छेयुस्तदा **विद्युतः** स्थिरा भवेयुस्ते तु **लोकहितैषिण** इति सर्वेभ्यो दाने तेषु **चलसौहृदा** जाताः, **सौहार्दं** तत्प्रकाशकत्वं तत्र शोभाजनकत्वं वा, यत एताः **कामिन्यः**, अतो लोकेपि **कामिन्यः** परोपकारनियतेषु स्थिरतां न प्राप्नुवन्ति, **कामिनीपदात्** कुलवधूव्युदासः, युक्तश्चायमर्थः, सर्वस्वे दत्ते किं ता भक्षयेयुरिति चेत् तत्राह **गुणिष्वपीति**, ते हि गुणवन्तस्ततोप्यधिकं सम्पादयिष्यन्ति, तथापि प्रत्यक्ष एव पर्यवसितमतित्वान् **न स्थैर्यं चक्रुः**, मेघा अपि गर्जनेन गुणवन्तः ॥ १७॥

विजातीया अपि विजातीयेषु शोभां प्राप्नुवन्तीति, प्रावृट्कृतधर्ममाह **धनुरिति**, **वियत्याकाशे माहेन्द्रं धनुर्निर्गुणमपि गुणिन्यपि**, विद्यावत्यपि **विषयाभावात्** प्रकाशं प्राप्तवत्, महेन्द्रोपि वृत्रवधान् 'महान् वा अयमभूद् यो वृत्रमवधीदिति तन् महेन्द्रत्वमिति'श्रुतेर्भगवत्सम्बन्धो महेन्द्रे निरूपितः, तस्य सम्बन्धाद् वज्रं **निर्गुणमपि सगुणे शोभां प्राप्नोति तथा भगवदीयोपि सर्वत्र शोभां प्राप्स्यतीति** फलितं, **जीवास्तु त्रिविधाः स्वभावतो भगवद्गुणवन्तो दोषवन्त उभयरहिताश्च**, तत्र देवा गुणवन्तो दैत्या दोषवन्तो मानुषास्तूभयरहिताः, तेपि **भगवत्कृपया देवा इव गुणवन्तो भवन्ति** तदभावेपि कर्मणा **व्यक्ते गुणव्यतिकरे** संसारे त्रिगुणयुक्ते **गुणवानपि पुरुषो** योनिबीजवर्णधर्मान् प्राप्य भासते, अगुणत्वाद् **गुणातीतो वा भगवत्सेवकः** भगवद्धर्मान् दृष्टान्तीकुर्वतेन्द्रधनुषो माहात्म्यं निरूपितं, **भगवदीयैव सम्पत्तिर्गुप्तं भगवदीयं प्रकटीकरोतीति**, **पुरुष** इति गुणातिरिक्तत्वख्यापनाय, प्रकृतिस्तु गुणमय्येव ॥ १८ ॥ गुणेष्ववशिष्टं चन्द्रमाह **न रराजेति**, **उडुपः** क्षुद्रपोषको नक्षत्राधिपतिः **स्वज्योत्स्नयैवाभासितैरपि घनैर्न रराज**, तत्र भगवदीयव्यतिरिक्तं पुरुषं साहङ्कारं दृष्टान्तीकरोत्यहम्मत्या **भासितया स्वभासा पुरुषो यथेति**, **अहम्मतिरहङ्कारोहमिति** या बुद्धिः सापि **स्वभासात्मभासैव** भाषिता तथापि तया **पुरुषो न शोभते** ॥ १९ ॥ एवं त्रिविधानुक्त्वा ये केवलं **भगवदीया यथा मेघोन्नत्यभिकाङ्क्षिणो** बर्हिणस्ते सुखिनो भवन्तीति वर्षाकृतं तेषु सुखमाह **मेघागमोत्सवानिति**, मेघानामागमे य उत्सवः स **येषां** सस्यवृक्षलतादीनां **तान् दृष्ट्वा मेघोत्सवान्** वा वृष्टिविद्युदादीन् **शिखण्डिनो** मयूरा **प्रत्यनन्दन्** भगवता **विचित्राः कृता एव भगवदीयोत्सवं मन्यन्त** इति, एतन्निरूपणं यदर्थं तदाह **गृहेषु तप्ता** इति, गृहेषु स्थिता गृहादिचिन्तया **तप्ता** दुःसङ्गरसदिन्द्रियैश्चात एव गृहा बहुविधा उक्ताः, तथाभूता अपि यदा **निर्विण्णास्तापेनैव** वा निर्विण्णा **अच्युतजना** जितेन्द्रियाः **परमहंसा त्रिदण्डिनो भगवज्जनास्ते** हि परिभ्रमन्तो वर्षासु गृहस्थस्य गृहे गच्छन्ति तदा तेषां समागमो भवति तेषु समागतेषु ये **निर्विण्णास्ते प्रतिनन्दनं** कुर्वन्ति न त्वनिर्विण्णाः, अतः प्रावृट् सर्वेषामेव तप्तानां सुखदायिनी ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

धनुर्वियतीत्यत्र, **चक्रं निगुणमपीति**। वृत्रवधाय भगवदावेशे जात एवेन्द्रे वज्रसम्बन्धो जातः। वज्रेपीन्द्राविष्टभगवदायुधस्य चक्रस्यावेशः। अत एवायुधानामहं वज्रमित्युक्तम्। तच्च गुणातीतं सगुण इन्द्रे शोभत इत्यर्थः। "वज्रं निगुणमपी"ति पाठे स्पष्टम् ॥ १८ ॥ **न रराजेत्यस्याभासे**, **गुणेष्ववशिष्टमिति**। तामसमित्यर्थः। अभगवदीयसाहंकारस्य दृष्टान्तत्वादस्य तामसत्वम्। अत एवात्रास्य न शोभेति भावः। न रराजोडुप इत्यनेनाप्युक्तरीत्या यथा प्राकृतः पुरुषो न राजते, तथात्र घनाच्छन्नो लौकिक इन्दुरेव तथा। न तु तदन्यः कोपि पुरुषोपीत्युच्यते। अत एव **भगवदीयव्यतिरिक्तमित्याचार्यै**रुक्तम् ॥ १९ ॥ **मेघागमोत्सवानित्यत्र**, पूर्वतापं दूरीकृत्य भगवदानन्ददायिभक्तजनागमदृष्टान्तोक्त्या यदा दिवा परिजननिरोधतश्चिरविरहतापे सति कथञ्चिद्व्याजेन श्रीनन्दगेहे **गमने** सम्पन्ने सति वनगमने वा प्रियसङ्गे सति मेघास्तादृशीं वृष्टिं चिरं कुर्वन्ति। यतोत्रातिविलम्बेपि स्वगृहीया नोपालभन्ते तदा तन्मेघागमस्य प्रतिनन्दनं भवत्यन्यदा तु न तथा वृष्टिं कुर्वन्तीति ज्ञाप्यते। **अयमेवार्थ उक्त एतन्निरूपणं तदर्थं तदाहेत्याभासेन**। ग्रीष्मे धर्मादिना गिरिशिखरादिष्वनावृतदेशेषु लीलाया असम्भवात् सर्वत्र भगवदानन्ददातृत्वेनैवं तदभिनन्दनम्, न तु वैषयिकसुखदत्वेनेति ज्ञापनाय निर्विण्णत्वमुक्तं दृष्टान्ते ॥ २० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

लोकबन्धुष्वित्यत्र **द्वितीय** इति चतुष्क इतिशेषः, **तामसभावेनेति** तत्प्राधान्येनेत्यर्थः, एतत्पद्यव्यङ्ग्यमर्थं **टिप्पण्या**माहुर्लोकेत्यादि ॥ १७ ॥ **धनुरित्यत्र** **विद्यावत्यपि वियतीति** "**सान्द्रनीलाम्बुदै**"रित्यत्र या ब्रह्मशरीरत्वरूपा विद्या प्रतिपादिता तद्वति वियतीत्यर्थः, **महेन्द्रे निरूपित** इति कौशितकीब्राह्मणे प्रतर्दनाख्यायिकायां **निरूपितः**, **वज्रमिति** "नन्वेष वज्रस्तव शक्रतेजसा हरेर्दधीचेस्तपसा च तेजित" इतिवृत्रवाक्यात् 'तेजस्तत्त्वं **सुदर्शन**'मिन्द्रे भगवदावेशाद् वज्रमाविष्टमतस्तथा, इदमेव टिप्पण्यां व्यङ्ग्यस्थले व्याख्यातं चक्रमित्यादिना, **तेपीति** मनुष्या आसुरानुगा अज्ञा अपि ॥ १८ ॥ **न रराजेत्यत्र** **गुणेष्वित्यादेरर्थं** टिप्पण्यामुक्त्वा पद्यव्यङ्ग्यमर्थमाहुरभगवदीयेत्यादि ॥ १९ ॥ **मेघागमोत्सवानित्यत्र** पद्यव्यञ्जितमर्थं **टिप्पण्यामाहुः पूर्वे**त्यादि ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

लोकबन्धुष्वित्यत्र **यत** इति व्रजे एतासामेव कामिनीत्वं न तु व्रजस्त्रीणामितिभावः, **अत** इति व्रजस्थानां विद्युद्रूपकामिनीनामस्थिरत्वदृष्टान्तादित्यर्थः, **गुणिष्वितिपदस्याभासमाहुः युक्तश्चेति**, गुणित्वादेवं न युक्तमिति समाधानम् ॥ १७ ॥ **धनुरित्यत्र गुणिन्यपीति** "वायुर्वाव गोतम तत्सूत्र"मिति श्रुतेर्वायुरूपसूत्रवतीत्यर्थः। अविद्या दोषरूपा विद्या गुणरूपेति सूत्रमेव विद्येति शेषं, तस्य सम्बन्धादिति इन्द्राविष्टभगवदायुधावेशादित्यर्थः। **फलितमित्यन्तेन** वाक्यस्य तात्पर्यार्थ उक्तः, ननु मूले तु प्रकृतिसम्बन्धरहितस्यागुणस्य शोभोक्ता न तु भगवद्गुणवतो भगवदीयस्य अतः कथमयं तात्पर्यार्थ इत्याशङ्क्याहुर्जीवास्त्वित्यारभ्य

भासत इत्यन्तं, **तदभावेपीति** तादृशगुणाभावेपि भासते तत्र तादृशगुणवतो भाने किं वाच्यमिति कैमुतिकन्यायेनायं तात्पर्यार्थः सिद्ध इतिभावः, **एतदरुच्यैव** पक्षान्तरमाहुरगुणत्वादिति, तथा च व्यक्त एवेति भावः, **दृष्टान्तीकुर्वतेति** दृष्टान्ततावच्छेदकीकुर्वतेत्यर्थः, **सम्पत्तिरिति** सम्भृतिरूपा प्रावृडित्यर्थः, **भगवदीयमिति** धनुरित्यर्थः, तथा च विद्यावत्पदेन दृष्टान्तं दार्ष्टान्तिकं चेत्युभयमपि ग्राह्यं भवति ॥ १८ ॥ **मेघागमेत्यस्याभासे केवलमिति** निर्गुणत्वाद् गुणसम्बन्धरहिता इत्यर्थः, परोक्षवादे शिखण्डिपदेन तद्दृष्टान्तककामभावयुक्ताः स्वामिन्य उच्यन्ते, तथा च कारिकास्वपि बर्हीतिपदेनैता एवोच्यन्ते, **भक्ता वेति** पक्षे तु स्पष्टमेव, **एतन्निरूपणमिति** मेघागमप्रतिनन्दननिरूपणमित्यर्थः, **यदर्थमिति** मेघागमस्य भगवदानन्ददायित्वबोधनार्थमित्यर्थः, तच्च टिप्पण्यां विवृतं **तदाहेति**, दृष्टान्तेन भगवदानन्ददायित्वमाहेत्यर्थः, इदमेवाग्रे सुखदायिनीत्यनेनोपसंहृतं, **जितेन्द्रियाः परमहंसास्त्रिदण्डिन** इति पदत्रयेण "यदनुचरिते"तिश्लोकोक्तद्वन्द्वधर्मत्यागविहङ्गत्वभिक्षुचर्यारूपधर्मत्रयमुक्तं, एतादृशा **भगवज्जना** अच्युतजना इत्यर्थः, तापो निर्वेदश्च गृहस्थबर्हिणोः साधारणधर्मः भगवदानन्ददायित्वमच्युतजनमेघयोरिति ज्ञेयम् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

लोकबन्धुषु जीवनहेतुजलप्रदानेन सर्वप्राण्युपकारिषु मेघेषु विद्युतः स्थैर्यं नियतदेशे चिरकालं सङ्गं न चक्रुः। तत्र दृष्टान्तमाह—चलमस्थिरं सौहृदं प्रेम यासां ताः स्त्रियो यथा गुणिषु परोपकारनिरतेषु दातृषु दत्तादप्यधिकसम्पादनसमर्थेष्वपि पुरुषेष्वपि तद्दातृत्वं दृष्ट्वा दारिद्र्यभयात् स्थैर्यं न कुर्वन्ति तथेति । चलसौहृदत्वे हेतुमाह—कामिन्य इति । यतस्ता धनकामभोगाद्यर्थमेव प्रवृत्ता, नतु पतिव्रतावत् पत्येकनिष्ठाः । पुंश्चल्य इत्यर्थः । तथाच चलसौहृदत्वात् "सङ्गं न कुर्यात् प्रमदासु जातु योगस्य पारम्पारमारुरुक्षुः" इति निषेधाच्च कामिनीसङ्गस्योभयलोकतो भ्रंशकत्वात् तत्सङ्गः प्रयत्नेन विवेकिभिर्वर्जनीय इति हेयोपमा ॥ १७ ॥ गुणिनि शब्दगुणवति वियति आकाशे निर्गुणं ज्यारहितं माहेन्द्रं धनुरभात् । तत्र दृष्टान्तमाह—अगुणवान् प्राकृतगुणरहितोऽपि पुरुषो जीवो गुणव्यतिकरो गुणकार्ये व्यक्ते प्रपञ्चे देहेन्द्रियादिसङ्घाते यथा भाति तथा । अतो विवेकिभिरादेयोपमा ॥ १८ ॥ स्वज्योत्स्नया राजितैः प्रकाशितैरपि मेघैराच्छन्न उडुपश्चन्द्रो न रराज न प्रकाशत । इयमपि ज्ञानिभिरादेयोपमा ॥१९ पूर्वं ग्रीष्मतापेन तप्ता निर्विण्णाः, अत एव मेघागमेनोत्सवो येषां ते हृष्टाः शिखण्डिनो मयूराः प्रत्यनन्दन् मेघानां नादं श्रुत्वा स्वयमपि नादपूर्वकमनृत्यन् । तत्र दृष्टान्तः—यथा गृहेषु स्थिताः, अतः तापत्रयेण तप्ता, अत एव निर्विण्णाः श्रान्ता विरक्ताश्च जना अच्युतजनस्य भगवद्भक्तस्यागमे सति प्रत्युत्थानपूजानमस्कारस्तुत्यादिपूर्वकं प्रतिनन्दन्ति तद्वत् । तप्ता अपि विषयासक्ताश्चेत्तदा तदागमने धनादिव्ययभयेन खिन्ना एव भवन्त्यवजानन्ति, चात उक्तं निर्विण्णा इति । अतस्तप्तैर्जनैस्तापनिरासार्थं भगवज्जनसङ्गतिः पूजानमस्कारादितत्सत्कृतिश्च प्रयत्नेन कार्या इत्युपादेयोपमा ॥ २० ॥

अन्वितार्थप्रकाशिका

लोकेति ॥ यथा चलमस्थिरं सौहृदं प्रेम यासां ताः कामिन्यः पुंश्चल्यः यथा गुणिषु रूपादिमत्स्वपि पुरुषेषु स्थैर्यं न कुर्वन्ति तथा लोकबन्धुषु जीवनहेतुजलप्रदानेन सर्वप्राण्युपकारिषु मेघेषु विद्युतः स्थैर्यं नियतदेशे चिरकालं सङ्गं न चक्रुः ॥ १७॥ धनुरिति ॥ यथा वस्तुतः अगुणवानपि पुरुषः गुणव्यतिकरे गुणकार्ये व्यक्ते प्रपञ्चे भाति तथा गुणिनि गर्जितशब्दगुणवति वियति आकाशे निर्गुणं ज्यारहितं माहेन्द्रं धनुरभात् ॥ १८ ॥ नेति ॥ यथा स्वभासा भासितया अहंमत्या स्वचैतन्येनैव प्रकाशितेनाहंकारेण छन्नः पुरुषो जीवो न राजते । यद्वा । अहं विद्वान् दाता शूर इति स्वप्रतीत्यैवारोपितया अहम्मत्येति तथा स्वज्योत्स्नया राजितैः प्रकाशितैरपि मेघैराच्छन्न इव प्रतीयमानः उडुपश्चन्द्रो न रराज न प्रचकाशे ॥ १९ ॥ मेघेति ॥ यथा गृहेषु स्थिताः अतः तापत्रयेण तप्ता अत एव निर्विण्णाः श्रान्ता विरक्ताश्च जना अच्युतजनस्य भगवद्भक्तस्यागमे सति प्रत्युत्थानादिभिः प्रतिनन्दन्ति तथा पूर्वं ग्रीष्मतापेन तप्ता निर्विण्णाः अत एव मेघागमेनोत्सवो येषां ते हृष्टाः शिखण्डिनो मयूराः प्रत्यनन्दन् । मेघानां नादं श्रुत्वा स्वयमपि नादपूर्वकमनृत्यन् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

लोकानां बंधुवत्सुखकरेषु चलसौहृदः अस्थिरस्नेहाः गुणिषु गुणयुक्तेष्वपि नरेषु यथा कामिन्यः पुंश्चल्यः स्थैर्यं न चक्रुः तथा ॥ १७ ॥ माहेंद्रं इंद्रस्य इदं धनुः निर्गुणं प्रत्यंचाहीनमपि गुणिनि मेघशब्दयुक्ते वियति गगने अभात् सुशोभक इव गुणक्षोभात्मके व्यक्ते चेतनाचेतनमिश्रे विश्वे अगुणवान् सत्त्वादिगुणवर्जितः पुरुषः लोकमनोहरः अप्राकृतदेहः श्रीकृष्णो यथा तथा ॥१८ एवमीश्वरदृष्टांतमुक्तमिदानीं जीवदृष्टांतमाह नरेति स्वज्योत्स्नाभिः किरणैः राजिताः शोभितास्तैर्घनैरभ्रैः छन्नः चंद्रो न रराज अत्र निदर्शनं स्वभासा स्वप्रकाशेन भासितया प्रकाशितया अहंमत्या स्थूलोऽहं कृशोऽहं वृद्धोऽहं युवाऽहं विद्वानहं मूर्खोऽहं इयं मम माता अयं च मम पिता इत्याद्यनेकविधाहं ममत्वरूपेण अहंकारेण छन्नः पुरुषो जीवो यथा तथा ॥ १९ ॥ मेघागमेन उत्सवो येषां ते अतो हृष्टाः मयूराः केकां स्ववाणीमकुर्वन् यथा गृहेषु तप्ता जना अच्युतजनसमागमे सति हृष्टाः संतः प्रश्नं कुर्वंति तथा ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

लोकबन्धुष्विति ॥ लोकबन्धुषु सर्वप्राणिनां जीवनभूतजलप्रदानेन महोपकर्त्तृत्वाल्लोकानां बन्धुभूतेष्वित्यर्थः । मेघेषु, विद्युतस्तडितः, चलं चञ्चलं सौहृदं यासां तास्तथाभूताः सत्यः, स्थैर्यं न चक्रुः । अनियतदेशमल्पकालं च सङ्गं चक्रुरित्यर्थः । कथमिव । गुणिषु सौन्दर्यशीलादिगुणाश्रयेष्वपि, निर्धनेष्विति शेषः । पुरुषेषु, कामिन्यः पुंश्चल्यः स्त्रियः इव, चलसौहृदाः कामिन्यो गुणिष्वपि पतिषु यथा स्थैर्यं न कुर्वन्ति तद्वदित्यर्थः । अनेन मतिमता पुंसा यत्नेन कामिनीनां सङ्गः सर्वथा परिहार्य इति सूचितम् ॥ १७ ॥ धनुरिति ॥ गुणिनि शब्दगुणकेऽपि, वियत्याकाशे, माहेन्द्रं धनुः, निर्गुणं मौर्वीरहितं सदपि, अभाद्बभौ । चोऽवधारणे । कथमिव । यथा गुणव्यतिकरे गुणत्रयपरिणामात्मके, व्यक्ते देहे, अगुणवान् गुणत्रयरहितः, पुरुषो जीवः, भाति, तद्वत् वियद्धनुषोरिव देहात्मनोर्विलक्षणस्वरूपस्वभावत्वमुक्तम् ॥ १८ ॥ नेति ॥ उडुपश्चन्द्रः, स्वज्योत्स्नाराजितैः स्वकान्तिप्रकाशितैः, घनैर्मेघैः, छन्नः पिधानं प्राप्तः सन्, न रराज । तेभ्यो विलक्षणतया नाशोभतेत्यर्थः । कथमिव । यथा पुरुषः प्रत्यगात्मा, स्वभासा स्वापृथक् सिद्धधर्मभूतज्ञानेन, भासितया समुन्नीतया, अहंमत्या देहात्मभ्रान्त्या, देहात् पृथक् न प्रकाशते तद्वत् । देहात्मभ्रान्तिरात्मस्वरूपावरणे हेतुरिति सा यत्नेन परिहार्येत्युक्तम् ॥ १९ ॥ मेघेति ॥ मेघागमेनोत्सवो येषां, अत एव हृष्टाः शिखण्डिनो मयूराः, प्रत्यनन्दन् । यथा गृहेषु तप्ताः, त्रिभिस्तापैरिति शेषः । अत एव निर्विण्णाः विरक्तिं प्राप्ताः जनाः, अच्युतजनागमे हरिभक्तस्य स्वगृहागमने सति, प्रतिनन्दन्ति तद्वत् । अनेन तापत्रयतप्तैरवश्यमेवाच्युतजनसंगतिः कार्येत्युक्तम् ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

लोकबन्धुष्विति : १०.२०.१७.

लोकोपकृत्यविरताश्रित-सद्गुणेषु स्थैर्यं प्रयाति पुरुषेषु न सम्पदेषा ।
मन्ये स्वबन्धचकिता चलतीह यादृङ् मेघ तडिद्गुणिनि पुंसि च वारयोषा ॥ २७ ॥

धनुरिति : १०.२०.१८

महतोऽप्यगुणस्य न प्रतिष्ठा गुणवत्सङ्गतिमन्तरा यदैन्द्रे । धनुषि स्फुटमेव तत्कथं मे भगवंस्त्वद्गुणसङ्गतिं विना स्यात् ॥ २८ ॥

न रराजेति : १०.२०.१९

द्रव्यैर्येन समर्पितैर्द्युतिभृतो लोकाः स्वकान्त्याऽचिरात् तत्तेजः प्रतिरोधिनो भुवि भवन्त्यब्देऽब्जशोभे स्फुटम् ।
चित्रं सोऽपि पुनः स्वकीयवसुभिस्तानेव संशोभयत्यद्धाऽहङ्कृतिजन्यमेव तदिदं हेतुर्न चान्यो मनाक् ॥ २९ ॥

मेघेति : १०.२०.२०.

आदेशो नेति नेति प्रभवति सुखदो भूरिवैराग्यभाजां कामं गार्हस्थ्यभाजामिह स च रिपुवत्त्रासकृत् सर्वदैव ।
तस्मात् किं तेन भूयो निखिलसुखकरोऽजातशत्रुः स एकः सन्तापत्रासहर्ता विलसति सुलभश्रीर्हि साध्वागमोऽत्र ॥ ३० ॥

कृष्णप्रिया

यद्यपि बादल बड़े लोकोपकारी हैं, फिर भी बिजलियां उनमें स्थिर नहीं रहती। ठीक वैसे ही जैसे चपल अनुराग वाली कामिनी स्त्रियां गुणी पुरुषों के पास भी स्थिर भाव से नहीं रहतीं ॥ १७ ॥ आकाश मेघों को गर्जन-तर्जन से भर रह था। उसमें निर्गुण बिना डोरी के इन्द्र-धनुष की वैसी ही शोभा हुई जैसे सत्व रज आदि गुणों के क्षोभ से होने वाले विश्व के बखेड़े में निर्गुण ब्रह्म की ॥ १८ ॥ यद्यपि चन्द्रमा की उज्ज्वल चाँदनी से बादलों का पता चलता था, फिर भी उन बादलों ने ही चन्द्रमा को ढककर शोभाहीन भी बना दिया था, ठीक वैसे ही जैसे पुरुष के आभास से आभासित होने वाला अहङ्कार ही उसे ढककर प्रकाशित नहीं होने देता ॥ १९ ॥ बादलों के शुभागमन से मोरों का रोम-रोम खिल रहा था। वे अपनी कुहक और नृत्य के द्वारा आनन्दोत्सव मना रहे थे। ठीक वैसे ही जैसे गृहस्थी के जंजाल में फंस हुए लोग, जो अधिकतर तीनों तापों से जलते और घबड़ाते रहते हैं। भगवान के भक्तों के शुभागमन से आनन्दमग्न हो जाते हैं ॥ २० ॥

पीत्वापः पादपाः पद्भिरासन्नानात्ममूर्तयः[1] । प्राक्[2] क्षामास्तपसा श्रान्ता यथा कामानुसेवया ॥ २१ ॥
सरस्स्वशान्तरोधस्तु[3] [4]न्यूषुरङ्गापि स रसाः । गृहेष्वशान्तकृत्येषु ग्राम्या इव दुराशयाः ॥ २२ ॥
जलौघैर्निरभिद्यन्त सेतवो वर्षतीश्वरे । [5]पाषण्डिनामसद्वादैर्वेदमार्गाः कलौ [6]यथा ॥ २३ ॥
व्यमुञ्चन् [7]वारिभिर्नुन्ना भूतेभ्योऽथामृतं घनाः । यथाऽऽशिषो [8]विश्पतयः काले काले द्विजेरिताः ॥ २४ ॥

---

३. सन्नस्रात्ममूर्तयः—विज. । २. क्षुत्क्षामा—च. पु. टी. । ३. तोयेषु—वीर. । ४. ह्यषु—विज. । ५. पाखण्डिनामसद्वाद—श्रीधर. वंशी. वीर.; पाखण्डवामशैवाद्यै—विज. । ६. युगे—विज. । ७. वायु—श्रीधर. वंशी. वीर. विज. । ८. विट्पतयः—विज. ।

कर्दमक्षमा

अन्वयः—तपसा प्राक् क्षामाः श्रान्ताः कामानुसेवया यथा, नाना आत्ममूर्तयः भवन्ति तथा, तथा प्राक् तपसा क्षामाः श्रान्ताः पादपाः पद्भिः आपः पीत्वा नानात्ममूर्तयः आसन् ॥ २१ ॥ हे अङ्ग दुराशयाः ग्राम्याः अशान्तकृत्येषु गृहेषु वसन्ति तथा अशान्तरोधस्सु सरस्सु सारसाः अपि न्युषुः ॥ २२ ॥ पाखण्डिनाम् असद्वादैः कलौ यथा वेदमार्गा भिद्यन्ते, तथा ईश्वरे वर्षति जलौघैः सेतवः निरभिद्यन्त ॥ २३ ॥ द्विजेरिताः विश्पतयः काले काले यथा आशिषः मुञ्चन्ति अथ वायुभिः नुन्नाः घनाः भूतेभ्यः अमृतम् व्यमुञ्चन् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ईश्वरे इंद्रे ॥ २१ ॥ नुन्नाः प्रेरिताः । आशिषः कामान् । विश्पतयो राजानः वणिजां पतयो वा । द्विजेरिताः पुरोहितैरुक्ताः ॥ २२ ॥ प्रावृषि कृताः क्रीडा वर्णयति एवं वनमिति सप्तभिः । वर्षिष्ठं समृद्धम् ॥ २३–२४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नरकहेतुत्वादसद्वादैः । एतेन पाखंडिसंगाद्विहितधर्मत्यागेन नरकावश्यंभावित्वमिति तात्पर्यम् ॥ २१ ॥ विशां प्रजानां पतयः । विट्पतय इति सम्यक्प्रतिभाति । छान्दसत्वाश्रयणे तु विश्पतय इत्यपि साध्वेव । अमृतम् जलम् "अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जले दुग्धे मोक्षेऽन्ने हेम्नि गोरसे ॥" इति यादवः ॥ २२ ॥ प्रावृषि वर्षर्त्तौ । तद्वनं वृंदावनम् । अतिशयेन वृद्धं वर्षिष्ठं समृद्धम् । वर्षं वृष्टिस्तद्विद्यतेऽस्येति वर्षम् । मत्वर्थीयोऽच् । अतिशयेन वर्षं वर्षिष्ठं प्रभूतवर्षोपेतमिति वा ॥२३॥ दुग्धाधारस्थलमूधस्तस्य भारेण । स्नुतस्तनीः क्षरितस्तन्यः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तपसा व्रतादिना क्षामाः कृशाङ्गाः श्रान्ताश्च निर्बलाः एवं ग्रीष्मेण पादपानामप्यूह्यम् ॥ २१ ॥ अशान्तानि तरङ्गातिशयेन मुहुः पतन्ति रोधांसि येषु सारसाः स्वनाम्नैव ख्याताः पुष्कराह्वयाः ग्राम्या अविवेकिजनाः तत्रापि दुराशयाः गृहमेव सर्वार्थप्रदमिति दुष्टाभिप्रायाः अत एव यथा नितरां वसन्तीति निशब्दार्थः अत एव आश्चर्येण खेदेन वा अङ्ग ! हे राजन्निति ॥ २२ ॥ ईश्वर इत्यतिवृष्ट्या स्वैरताभिप्रायण तदंशेनैव तस्य पाषण्डिस्थानीयता ॥ २३ ॥ च पुनः अनवच्छिन्नवर्षानन्तरम् अथेति पाठे स एवार्थः भूतेभ्यः काले काले योग्यं योग्यं कालं प्राप्य अमृतं जलं ददुरिति वर्षान्ते जलस्योपादेयत्वादमृतशब्दन्यासः एवं विशब्दो विशिष्टार्थो ज्ञेयः द्विजैः प्रेरिता विश्पतय इत्यन्वयः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तपसा व्रतादिना, क्षामाः कृशांगाः, श्रान्ताश्च निर्बलाः, एवं ग्रीष्मेण पादपानामप्यूह्यम् ॥ २१ ॥ सारसाश्चक्रवाकाः, स्वनाम्नैव ख्याता वा ग्राह्याः, तेषामपि प्रायो जलचरत्वात्, ग्राम्या अविवेकिजनास्तत्रापि दुराशयाः—गृहमेव सर्वार्थ-सिद्धिपदमिति दुष्टाभिप्रायाः, अतएव यथा नितरां वसन्तीति नि-शब्दार्थः । अतएवाश्चर्य्येण खेदेन वा, अंग हे राजन्निति ॥ २२ ॥ ईश्वर इत्यतिवृष्ट्या स्वैरवर्त्तिताभिप्रायेण; अतएव तस्य कलिस्थानीयता ॥ २३ ॥ भूतेभ्यः सर्व्वप्राणिहितार्थं सुशोभनममृतं जलमिति वर्षान्ते जलस्योपादेयत्वात्, एवं, वि-शब्दो विशिष्टार्थे ज्ञेयः, भूतेभ्यश्चामृतमिति पाठे पाठान्तरेऽप्यमृतमिति श्लेषेण स एवार्थः । च तु, भूतेभ्यस्तु, अत्रापि काले काल इति योज्यम्, अयं पूर्व्वतो विशेषः, वर्षान्तेऽविच्छिन्नवृष्ट्यपगमात् ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

रामानुसेवया परस्त्रीसेवया ॥ २१ ॥ अशान्तरोधस्सु सलिलाकुलतीरेषु अशान्ततोयेष्विति वा पाठः ॥ २२ ॥ वेदमार्गा वर्णाश्रमधर्माः ॥ २३ ॥ प्रेरिताः विशो वैश्याः तेषां पतयः दासदासीजनाध्यक्षाः ॥ २४–२५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पीत्वेति । पादपाः वृक्षाः पद्भिर्मूलैः अपो जलानि पीत्वा नानात्ममूर्त्तयः नानाविधा आत्मनां मूर्त्तयः शाखापल्लवपुष्पफलादिरूपाः येषां तथाभूता बभूवुः यथा प्राक्काम्यतपःफलरूपकामानुसेवातः प्राक् तपश्चर्यादशायां तपसा श्रान्ताः क्षामाः कृशाश्च जनाः कामानुसेवया नानात्ममूर्त्तयो भवन्ति कलत्रपुत्रपौत्रादिपरिजनरूपेणेति तद्वत् अनेन काम्यतपसः शरीरावयवपरिकरादिपुष्टिफलकत्वमात्रं सूचितं यद्वा फलाभिसन्धिरहितभगवदाराधनात्मकतपश्चर्यादशायां तपसा श्रान्ताः कृशाश्च तत्फलानुभवात्मकमुक्तिदशायां काम्यन्त इति कामाः भगवतः कल्याणगुणास्तेषामनुसेवया "स एकधा भवति द्विधा भवति त्रिधाभवति" इत्यादिश्रुत्युक्तरीत्या नानात्ममूर्त्तिमन्तो भवन्ति तद्वत् अनेन भगवदाराधनात्मकतपसः स्वेच्छानुरूपाप्राकृतानेकशरीरपरिग्रहेण भगवता भोगसाम्यसाधनत्वमुक्तम् ॥ २१ ॥ सरस्स्विति । अङ्ग हे राजन् ! अशान्तान्यनिर्मलानि कलुषितानीति यावत् तानि

तोयानि येषु तथाभूतेष्वपि सरस्सु सारसाः चक्रवाकाः गोनर्दकाख्यपक्षिविशेषो वा न्यूषुः नितरामुषितवन्तः अशान्तरोधस्सु इति पाठे अशान्तानि सलिलाकुलानि पङ्ककण्टकादियुक्तानि रोधांसि तटानि येषां तेष्वपि सरस्सु इत्यर्थः। आशान्तान्यनुपरतानि कृत्यानि येषु तेष्वपि गृहेषु दुराशयाः वैषयिकसुखाभासलेशलिप्सवो ग्राम्याः पामरा इव ते यथा निवसन्ति तद्वत् अनेन ग्राम्याणां विषया दुःखप्रचुरा अल्पसुखाश्चेत्युक्तं भवति ॥ २२ ॥ जलौघैरिति ईश्वरे पर्जन्ये वर्षति सति जलपूरैरुत्कटैः सेतवो जलनिरोधार्थं मृत्पाषणादिनिर्मिताः निरभिद्यन्त त्रुटिता बभूवुः यथा कलौ युगे प्रवृत्ते सति पाषण्डानां वेदबाह्यानामसद्वादैर्वेदमार्गा वर्णाश्रमधर्मा निर्भिद्यन्ते तद्वदनेन पाषण्डवादानामश्रोतव्यत्वमुक्तम् ॥ २३ ॥ व्यमुञ्चन्निति। वायुना नुन्नाः प्रेरिताः सन्तो घना मेघा भूतेभ्योऽमृतवज्जीवनहेतुं जलं व्यमुञ्चन् यथा द्विजैः पुरोहितादिभिरीरिताः प्रेरिताः विश्पतयो जनाध्यक्षा राजानः उचितकालेष्वाशिषः कामानर्थिभ्यो विमुञ्चन्ति तद्वत् राजभिरेवं भवितव्यमित्युक्तं भवति ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पद्भिर्मूलैः फलैः पुष्पैः नम्रात्ममूर्तयः शाखोपशाखाभिर्नतस्वरूपाः प्राग् ग्रीष्मे तपसा तपोमासोर्जिततापेन क्षामाः कृशाः यथा कामानामनुसेवया जातेन श्रमेण श्रान्ताः इन्द्रियदौर्बल्यमाप्ताः प्राक्कुटुम्बव्यवस्थायां क्षामाः पादेन ग्रासेन आत्मानं पान्ति रक्षन्तीति पादपाः तपस्विनः गतिसाधनत्वात् पद्भिः शास्त्रैः अपः पुरुषार्थावाप्तिहेतुत्वात् ज्ञानरसान् पीत्वा खाद्यनम्रावरुद्धा वशीकृतात्मनः परात्मानो मूर्तिविग्रहविशेषो यैस्ते तथेति भावः। यद्वा, प्राक् क्षामाः वनिताद्यभावेन तपसा कामाग्नितापेन श्रान्ता जनाः कामानुसेवया पश्चादेव वनितादिलाभेन निरन्तरकामभोगेन पुत्रतत्पुत्रपुष्पफलादिना नम्रात्ममूर्त्तयः परायणनिजशरीरा यथा भवन्ति तथेति ॥ २१ ॥ अङ्ग हे परीक्षित्! सारसाश्चक्रवाकाः अशान्तानि जलैः पूर्णानि रोधांसि तीराणि येषां तानि तथा तेषु सरस्स्वपि ऊषुर्हि जलप्रवाहाभिभूततीरवासस्याशक्यत्वेपि तत्रैवोषुरित्यर्थः। दुराशयाः ग्राम्याः प्राकृतजनाः अशान्तकृत्येषु अनुपरतकर्तव्येषु गृहेष्विव यथा वसन्ति अनेन नित्यसंसारिस्वभावो दर्शितः ॥ २२ ॥ पाषण्डादिमतज्ञानं नरकसाधकमिति ज्ञातव्यम् ॥ २३ ॥ वायुभिर्नुन्नाः प्रेरिताः अमृतं जलं द्विजैरीरिताः प्रेरिताः विट्पतयो राजानः विशः प्रजा उद्दिश्य काले काले कालगुणं ज्ञात्वा अमृतं हेमं विमुञ्चन्ति प्रयच्छन्ति—

"अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने। अयाचिते जले दुग्धे मोक्षेऽन्ने हेम्नि गोरसे" ॥

इति यादवः। यद्वा, षष्ठमंश इति ब्राह्मणोक्तं विशो वैश्या विश्पतिभ्यो राजभ्यः यथाकालममृतङ्करात्मकं धनं ददतीति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सारसाः पुष्कराह्वयाः अशान्तानि तरङ्गातिशयेन मुहुः पतन्ति रोधांसि येषु द्विजैः प्रेरिता विश्वत इत्यन्वयः ॥२२–३०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नानाविधा आत्मनः स्वस्य मूर्तयोऽङ्कुरपत्रपल्लवपुष्पपत्राद्या येषां ते पक्षे नाना आत्मानः पानभोजनरमणादिनाना स्वभाववन्त आत्मनो मूर्तयो देहा येषां ते निष्कामाणामियं हेया ॥ २१ ॥ अशान्तानि पङ्ककण्टकभङ्गुरत्वादिदोषयुक्तानि रोधांसि तटानि येषां तेष्वपि न्यूषुर्नितरामेवाऽऽसन् इयं हेयैव ॥ २२ ॥ ईश्वरे ईश्वरत्वाभिमानवशादतिवर्षोपद्रवं कुर्वति सति इन्द्रे इति कलिसाम्यमियं हेया ॥ २३ ॥ नुन्नाः प्रेरिताः आशिषः कामान् विश्पतयो राजानो वणिजां पतयो वा द्विजैर्विप्रैरीरिताः प्रेरिता इति राजभिरुपादेया ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पद्भिर्मूलैः नाना अनेकविधा आत्मनां शाखापत्रपुष्पादिरूपा मूर्तयो येषां ते तथाभूताः ॥ २१ ॥ सारसाः जलजीविनः पक्षिविशेषाः अशान्तानि अस्थिराणि पङ्ककण्टकादियुक्ततया क्लेशावहानि वा रोधांसि तटानि येषां तेष्वपि न्यूषः नितरामेवावसन् दुराशयाः दुष्टाभिप्रायाः शिश्नोदरतृषः अशान्तकृत्येषु अस्थिरफलबहुक्लेशोदर्ककृत्येषु गृहेषु यथा निवसन्ति तद्वत् ॥ २२–२३ ॥ नुन्नाः प्रेरिताः यथा विशां प्रजानां पतयः आशिषः कामान् अर्थिभ्यो विमुञ्चन्ति तद्वत् ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

पादपास्तरवः पद्भिरपः पीत्वा नानारूपा घनपलाशपुष्पादिमय्यः आत्ममूर्त्तयो येषां तथासन् यथा सकामतपसा प्राक्क्षामाः कृशाः श्रान्ताश्च पुरुषास्तपोऽन्ते कामानुसेवया तत्फलपानभोजनरमणजोषणेन नानास्वभाववन्तो भवन्ति तद्वदिति निष्कामैर्हेयेयम् ॥ २१ ॥ अशान्तानि पङ्कादिवन्ति रोधांसि येषां तेष्वपि सरस्सु सारसाः पक्षिवेदाः न्यूषुर्नितरामवसन् अशान्ता-

न्यनुपरतानि कृत्यानि येषु तादृशेष्वपि गृहेषु यथा ग्राम्या विवेकरहिताः दुराशया गृहमेव सर्वार्थदमिति दुष्टभावाः अङ्ग हे राजन् इयं हेयैव ॥ २२ ॥ ईश्वरे ईश्वरत्वाभिमानवशादतिवृष्टिकारिणीति कलिसाम्यं इयञ्च हेया ॥ २३ ॥ नुन्नाः प्रेरिताः आशिषः कामान् विश्पतयो राजानः द्विजैरीरिताः प्रवर्त्तिताः इति राज्ञामुपादेया ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ईश्वरे सूर्ये इन्द्रे वा वर्षति सति सेतवो जलौघैर्बलवत्तरजलप्रवाहैर्यथा पाखण्डागमशैवाद्यैरित्यत्रागमपदस्य शैवपदोत्तरं योग्यतयाऽन्वयो ज्ञेयः पाखण्डागमैः शैवागमाद्यैः पाशुपतागमाद्यैः। अथवा शैवपदेन पाशुपतागमो ग्राह्यः। पाखण्डागमाश्च शैवाश्चाद्या येषां तैः। पाखण्डवामशैवाद्यैरिति पाठो वामनः। ते वामा महावाममध्यवामाणुवामभेदभिन्नानाच्यं महावाममतं वामैरन्यैरुदीर्यते। अणुवामनतद्युक्तमित्याद्यनुव्याख्यासुधायां शाक्तास्त्रिविधा इत्यादिना सविस्तरमतन्मतमुक्तमनुसन्धेयं। वेदमार्गाः कलौ युगे भिन्ना भवन्ति तथा निरभिद्यन्त। इदं ज्ञानं नरकादिसाधनमिति बोध्यं ॥ २१ ॥ यथा विशः प्रजा उद्दिश्य विश्पतयो विशां प्रजानां पतयो राजानो द्विजेरिताः पुरोहितादिबोधिताः काले काले विहिते सर्वस्मिन्कालेऽमृतमन्नं विमुञ्चति ददति तथा वायुभिर्नुन्नाः प्रेरिता घना मेघा भूतेभ्योऽमृतं जलं व्यमुञ्चन्। अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने। अयाचिते जले दुग्धे मोक्षेऽन्ने हेम्नि गोरस इति यादवः। यथाशिषो विश्पतय इति पाठे भूतेभ्य इत्यावृत्त्याऽन्वयः। विश्पतिभ्य इति पाठे विशः प्रजा राजभ्योऽमृतं घनमिति वा ॥ २२ ॥ वर्षिष्ठं बहुवर्षवच्छ्रेष्ठं। वर्षशब्दादर्श आद्यचि तत इष्ठन्प्रत्यय इति ज्ञेयं। अथवा वर्षिष्ठमतिशयेन वृद्धं। वर्षिष्ठमूर्तये भर इत्यृव्याख्यावसरे वृद्धशब्दादतिशायने तमबिष्ठनावितीष्ठन् प्रियस्थिरेत्यादिना वृद्धाशब्दस्य वर्षादेश इत्युक्तेः। खर्जूरशब्दो निपातितः। पक्वेत्युभयविशेषणं। पक्वाः खर्जूराः पक्वानि जम्बूनि फलानि चास्य सन्तीति तत्तथा। जम्बुजाम्बवमित्यमरः। सबलः कृष्णः प्राविशत् ॥ २३ ॥ ऊधोभारेणोधसां भारस्तेन। ऊधस्तु क्लीबमापीनमित्यमरः। मन्दगामिन्य एतादृश्योऽपि स्नुतस्तनीः स्नुतस्तन्यः क्षरत्कुचा भगवताऽऽहूता द्रुतं ययुरित्यन्वयः ॥ २४ ॥

श्रीसुबोधिनी

प्रकारान्तरेण चातुर्विध्यमाह **पीत्वाप** इति, **पादपाः** सर्वे वृक्षास्तामसेषु सात्त्विकाः, **नानात्ममूर्तिर्येषां** तादृशा जाताः, पानमप्रत्यक्षसिद्धमिति **पद्भिरित्युक्तं पादप**शब्दो रूढो वा भवेदिति, तेषां **नीरस्यैव** जीवनत्वेन पदयोरेव तत्पानसाधनत्वेन स्वच्छाययैवोग्रतापशीतादिभ्यः स्वपादान् पान्तीति वा तथा, **नानामूर्तयस्तु** स्वभावत एवं भवन्ति वृक्षाणामनियतरूपस्योक्तत्वात्, तन्निराकरणार्थ**मात्म**पदं, यस्य ग्रीष्मर्त्तौ या मूर्त्तिः स्थिता ततो विलक्षणा **नानामूर्ति**र्जातेति, एतदपि निरूपणं यदर्थं तदाह **प्राक्क्षामा** इति, पूर्वं **क्षामा दुर्बलास्तपसा** न केवलं देहदौर्बल्यमपि तु **तपसा श्रान्ताः**, इन्द्रियशक्तिरपि कुण्ठिता भवति, ते यदा तपःफलरूपं **काममनुसेवन्ते** तदा प्रत्यहं **नानात्ममूर्तयो** भवन्ति, ते वर्षायामेव पुष्टा भवन्तीति प्रकृते निरूपितं, अन्यदा शोषकबाहुल्यान् न शीघ्रनुपचयः ॥ २१ ॥ तत्र राजसानामाह **सरस्स्विति, सारसा** हि सरस्येव रसवन्तः, तानि वर्षाकाले पूरितानि भवन्ति, उपरि बहुदूरे जलं गच्छति ततश्च नीडं कृत्वा, स्थिताः कूले, तत् कूलं जलेन प्लावितं भवति, तदुपरि कृते तदपि कदाचित् कूलं पतति, एवमनेकविधदोषदुष्टेष्वपि **सरस्सु सारसास्तद्रसाविष्टा व्यूषुः** समीपसप्तमीविशेषवशाद**शान्तरोधसि** तिष्ठन्तीति गम्यते, एतद् यदर्थमुक्तं तदाह **गृहेष्विति**, न शान्तं कदाचिदपि **कृत्यं** कर्तव्यं येषु, **न ह्यामरणं गृहचिन्ता कदाप्यपगच्छति**, तेपि **ग्राम्या** ग्राम एवोत्पन्ना रता इन्द्रिय**ग्राम**पोषका वा तादृशा अपि **दुराशया** अन्तःकरणदोषयुक्ता अपि, **बहिर्निर्गतानां खेदेन भगवत्स्मरणं तीर्थदर्शनं सत्सङ्गो वा भवेत् क्रियाव्यापृतौ चिन्ताभावो वा**, वर्षायां तु सर्वाभावः ॥ २२ ॥ एवं राजसानुक्त्वा तामसानाह **जलौघैरिति**, जलसमूहैः **सेतवो नितरामभिद्यन्त** भिन्ना जातास्तत्र च प्रतीकारो न शक्यः, **ईश्वरे वर्षति** पर्जन्य **ईश्वरः स हि सर्वसुखार्थं वर्षति**, ततोशक्यप्रतीकारात् सेतवो भिन्ना एव, एतदपि यदर्थं तदाह **पाषण्डिनामसद्वादैरिति**, कलौ बुद्धावतारे भगवति तेन प्रवर्धिताः पाषण्डाः तेषामसद्वादैः कुयुक्तिभिः सर्व एव **वेदमार्गाः** कर्मज्ञानमुक्त्युपासनादिप्रतिपादका सर्व एव **निरभिद्यन्त** कलौ तेषां प्रयोजनाभावात् ॥ २३ ॥ गुणातीतस्थानीयमाह **व्यमुञ्चन्निति, वायुभिः प्रेरिता घना भूतेभ्योमृतं** हस्तादिजलं मघादिजलं वा मुमुचुः, अन्यत् तु जलं गच्छति मघादिजलं बध्यत इति दृष्टान्ते कालपदवीप्सया यदा यत्र जलमपेक्षितं तत्रैव तदैव वृष्टिरिति ज्ञाप्यते **भूतेभ्य** इति चतुर्थी, एतदपि यदर्थं तदाह **यथेति, विश्पतयो** देशाधिपतयो ब्राह्मणैः **प्रेरिता आशिषो** घनादिकं प्रयच्छन्ति, **पुरोहितप्रेरिता हि ते दीनेभ्योन्नादिकं प्रयच्छन्ति** वर्षासु दीनानां स्वतःकार्यसामर्थ्याभावाद् **यस्तु वर्षासु दाता स दातेति** ब्राह्मणप्रेरणा प्रत्यक्षकृतोपयोगिता ॥ २४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पीत्वापः पादपा इत्यत्र **तेषां निरस्यैवे**त्यारभ्य **तथे**त्यन्तम्। अत्रायं भावः। नीरस्य जीवनत्वेपि तत्सम्पादने स्वयमशक्तास्तत्सम्बन्धघटकं ये पान्ति ते ह्यतिदीनास्तापतप्तास्तेभ्यो जीवसम्पादकोयमृतुस्तेन यदेकोपजीविनो ये तेषां तद्दातेति ये तादृशा भक्तास्तेषां भगवत्सम्बन्धजनकः, सर्वत्रैव निकुञ्जगह्वरप्रदेशजननादिति। अत एव नानात्ममूर्तित्वं कार्यमुक्तम्। अयमेवार्थं एतदपि

निरूपणमित्याभासेनोक्तः। सरःस्वित्यादिनापि दृष्टान्तीयधर्मसमानधर्मवन्तोत्र **सारसा न** त्वन्यः कोपीति ज्ञाप्यते। तत्रापि सारसानामेव निरूपणेन सरसा ये भक्तास्तैः सह जलविहारदेशे तद्रसावेशाद्दोषमप्यगणयन्तो भवन्तीति तथा। दोषागणनपूर्वेयमत्यासक्तिर्ग्राम्याणां गृहादिषु भवतीति ते दृष्टान्तीकृताः, तेनात्र गृहवन्तोपि भक्ता एव, न तु प्राकृताः कोप्यस्तीति ज्ञाप्यते। एतज्ज्ञापकोयमृतुरित्येतत्प्रस्ताव इदं निरूपितम्। अयमेवार्थ **एतदित्याभासेनोक्तः** ॥ २२ ॥ **जलौघैरित्यनेनापि** जलसेत्वतिरिक्तस्य सेतोर्न नाशो व्रजेस्तीति ज्ञाप्यते। तेन वेदसेतोः सातत्यं सूचितं भवति। इदमेवोक्तं **तदपीत्याभासेन** ॥ २३ ॥ **व्यमुञ्चन्नित्यत्र** जलमोकोक्तेः पुनरुक्तिशङ्कानिरासायामृतपदं मूले। तदर्थमाहुर्हस्तादीत्यादिना। अन्यथा पूर्ववृष्टेरपि वैयर्थ्यं स्यादन्नासम्पत्तेरित्यस्यामृतत्वम्। तद्धि क्षुत्कृतमृतिनिवर्तकमिति भावः। दृष्टान्तेनात्रत्यसाधारणजनानामपि सर्वसम्पत्तिरितरापेक्षाभावश्च ज्ञाप्यते। प्रभुणैव ह्यत्र सर्वेषां सर्वसम्पत्तिः। एवं सत्युक्तरीत्या भगवत्संभृतिरूपत्वं प्रावृषः सूचितं भवति। एतदेवोक्त**मेतदपीत्याभासेन**। अपरञ्च, यथान्यप्रेरणयैव विश्पतयो ददति, न स्वतोपि, तथात्र मेघा एव, न त्वन्येपि, यतः स्वत एव श्रीनन्दप्रभृतयः सर्वेभ्यः सर्वं ददतीत्यपि ज्ञाप्यते ॥ २४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

पीत्वेत्यत्र ननु **पादपशब्दयोगेनैव** पाने प्राप्ते पद्भिरित्यस्य किं प्रयोजनमत **आहुः पानमित्यादि**, तथा च रूढत्वशङ्कानिवृत्त्यर्थं तथेत्यर्थः, नन्वत्र **पीत्वेतिपदसमभिव्याहाराद्** योगस्य नापहार इत्यत **आहुस्तेषामित्यादि**, तथा च योगान्तरस्योपोद्बलनाय तदुक्तिरित्यर्थः, एतद्व्यङ्ग्यमर्थं टिप्पण्यामाहुरत्रायं भाव इत्यादि ॥ २१ ॥ **सरस्स्वत्यत्र** पद्यव्यङ्ग्यमर्थं टिप्पण्यामाहुः सरस्स्वत्यादि ज्ञाप्यत इत्यत्र यद्यपि **दुराशय**पदविवरणं नास्ति तथापि कामभावरूपोन्तःकरणदोषः प्रकरणादेव बोध्यः ॥ २२ ॥ जलौघैरित्यत्र व्यञ्जितमर्थं **टिप्पण्यामाहुर्जलौघैरित्यादि** ॥ २३ ॥ **व्यमुञ्चन्नित्यस्य** यद् व्यञ्जितं तद् टिप्पण्यामाहुर्व्यमुञ्चन्नित्यादि ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

पीत्वाप इत्यत्र **एतदपीति** वृक्षाणां नानामूर्तित्वं यस्य दृष्टान्तस्य नानामूर्तित्वबोधनार्थं तद्दृष्टान्तमाहेत्यर्थः, तथा चात्र दृष्टान्त एव तात्पर्यार्थं इति भावः, एवमग्रेपि ॥ २१ ॥ सरःस्वित्यत्र **अन्यगृहीवदत्र सारसा एव न त्वत्रत्या गृहिण** इति अत्रत्यगृहिस्वरूपनिरूपणमेव तात्पर्यार्थोत्र, सारसानां त्वयं गुण एवेति भावः, तदाहेति दृष्टान्तेनात्रत्यगृहिस्वरूपमाहेत्यर्थः, एवमग्रेपि ।२२।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

पीत्वाप **स्वपादान्** इत्यत्र **पान्तीति** वेति स्वपादान् पान्ति रक्षन्तीति पादपाः, स्वपादैः पिबन्तीतिविग्रहे पद्भिरिति व्यर्थं स्यात् ॥ २१ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्राक् प्रथमं ग्रीष्मतापेन क्षामाः शुष्काः पादपा वृक्षाः पद्भिर्मूलैरपः जलानि **पीत्वा नानात्ममूर्तयः** नवाङ्कुरपत्रपुष्पपल्लवफलादिना अनेका रूपदेहा आसन्। तत्र दृष्टान्तः–यथा पूर्वं दुरितवशात् यथेष्टभोजनाद्यभावेन तपसा क्षुधादिदुःखेन क्षामाः दुर्बलाः श्रान्ताः शिथिलेन्द्रियाः पुनः पुण्यवशात् कामान् विषयान् प्राप्य तदनुसेवया तेषां निरन्तरभोगेन नानात्ममूर्तयः स्थूलादिप्रकारकदेहा भवन्ति तद्वदिति। तथा च "विषयभोगदुःखसुखादेः प्रारब्धाधीनत्वेन अवश्यंभावित्वात् तथाग्रहं विहाय धैर्यमवलम्ब्य भगवद्भजनं कर्तव्यम्" इत्युपादेयोपमा ॥ २१ ॥ पङ्ककण्टकादियुक्तानि रोधांसि तटानि येषां तेष्वपि सरःसु सारसाश्चक्रवाका मत्स्याद्यासक्तमनसो न्यूषुः नितरामवसन्। तत्र दृष्टान्तमाह–यथा अशान्तानि दुःखोदर्काणि कृत्यानि कर्माणि येषु तेष्वपि गृहेषु दुराशया विषयाविष्टचित्ता ग्राम्याः गृहस्था निवसन्ति तथेति। 'विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः' इति विषयासक्तिनिषेधात् 'तदासक्त्या भक्तेन गृहे वासो न कर्तव्य' इति हेयोपमा। "हे राजन्! त्वं धन्योऽसि, यत् अस्मदादिवत्तदासक्तिं त्यक्त्वा गृहाद्विनिःसृत" इति सूचयन् सम्बोधयति–अङ्गेति ॥२२॥ ईश्वरे मेघस्वामिनि इन्द्रे वर्षति सति जलौघैर्जलप्रवाहैः सेतवो जलनिरोधार्थं पारगमनार्थं च नद्यादिषु पाषाणादिभिर्विनिर्मिता निरभिद्यन्त। तत्र दृष्टान्तमाह–यथा पाखंडिनां वेदविद्वेषिणामसद्वादैः कुतर्कैर्वेदमार्गा वेदप्रतिपादितवर्णाश्रमधर्माः कलौ युगे भिद्यन्ते तथेति। तथा च 'परमपुरुषार्थहेतुभगवद्गुणश्रवणकीर्तनादिकं विहाय कलौ दुर्जनकुतर्को न ग्राह्यः' इति हेयोपमा ॥ २३ ॥ वायुभिर्नुन्नाः प्रेरिता घना भूतेभ्यः दुखितेभ्यः प्राणिभ्यः अमृतं जीवनकारणं जलं काले काले यदा यदा अपेक्षितं तदा तदा व्यमुञ्चन्। यथा द्विजैः पुरोहितैरीरिताः प्रेरिताः विश्पतयो धनिनः काले काले तत्तदवसरे आशिषो विषयान् दुःखितेभ्यः प्रयच्छन्ति, तद्वदिति। तथाच 'एवमेव श्रेयोर्थिभिः परोपकारपरतया भाव्यम्' इत्युपादेयोपमा ॥ २४ ॥

अन्वितार्थप्रकाशिका

पीत्वेति ॥ प्राक् प्रथमं ग्रीष्मतापेन क्षामाः शुष्काः पादपा वृक्षाः पद्भिर्मूलैरपः जलानि **पीत्वा नानात्ममूर्तयः** नवाङ्कुरपत्रपुष्पपल्लवफलादिनानेकरूपदेहा आसन्। यथा पूर्वं तपसा क्षामा दुर्बलाः श्रान्ताः शिथिलेन्द्रियाः पश्चात्कामानामनुसेवया नानात्म-

मूर्त्तयः स्थूलादिदेहा भवन्ति तथा ॥ २१ ॥ सरःस्विति ॥ अङ्ग हे राजन् ! अशान्तानि पङ्ककण्टकादियुक्तानि मुहुः पतन्ति वा रोधांसि तटानि येषां तेष्वपि सरःसु सारसाः पक्षिणः न्यूषुः न्यवसन् । यथा अशान्तानि दुःखोदर्काणि कृत्यानि कर्माणि येषु तेष्वपि गृहेषु दुराशया विषयाविष्टचित्ता ग्राम्या गृहस्था निवसन्ति तथा ॥ २२ ॥ जलौघैरिति ॥ ईश्वरे इन्द्रे वर्षति वर्षोपद्रवं कुर्वति सति जलौघैर्जलप्रवाहैः सेतवो जलनिरोधार्थं पारगमनार्थं च क्षेत्रनद्यादिषु पाषाणादिभिर्विनिर्मिता निरभिद्यन्त । यथा पाखण्डिनां वेदविद्वेषिणामसद्वादैः कुतर्कैर्वेदमार्गा वेदप्रतिपादितवर्णाश्रमधर्माः कलौ युगे भिद्यन्ते तथा ॥ व्यमुञ्चन्निति ॥ वायुभिर्नुन्नाः प्रेरिता घना भूतेभ्यः दुःखितेभ्यो प्राणिभ्यः अमृतम् अमृतवज्जीवनहेतुं जलं व्यमुञ्चन् । यथा द्विजैः पुरोहितादिभिः ईरिताः प्रेरिताः विश्पतयः विशां प्रजानां पतयो राजानः । वणिजां पतयो वा । षत्वाद्यभाव आर्षः । काले काले दुःखितेभ्यः प्राणिभ्यः आशिषः कामान् प्रयच्छन्ति तथा ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पद्भिर्मूलैः अपो जलानि प्राक्क्षामाः ग्रीष्मेण कृशाः नानात्ममूर्त्तयः अनेकरूपदेहाः तपसा व्रतादिना कृशाः ततः श्रांताः पुनः कामानां अनुसेवनैः पुष्टाः यथा तथा आसन् ॥ २१ ॥ अंग हे राजन् अशांतानि गर्त्तपंकादिसहिता निरोधांसि पुलिनानि येषां तेषु तडागेषु सारसपक्षिणः अपि शब्दाद्बकादयो न्यूषुः निवासं चक्रुः अत्र दृष्टांतः अशांतानि क्रूराणि अविरतानि वा कृत्यानि येषु तेषु गृहेषु दुराशया मलिनांतःकरणाः ग्राम्या जना यथा न्यूषुरिति संबंधः ॥ २२ ॥ ईश्वरे अमरेंद्रे वर्षति सति असद्वादैरसद्भिः सच्छास्त्रविरुद्धैर्वादैः ॥ २३ ॥ नुन्नाः प्रेरिताः भूतेभ्यः अमृतं जलं व्यमुंचन् ददुः अत्र दृष्टांतः द्विजैरीरिता अवसरे दानार्थे प्रेरिताः विश्पतयो भूपाः अर्थिभूतेभ्यो द्विजादिभ्यः तदभिलषिताः आशिषो द्रव्यादीन् यथा ददति तद्वत् ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पीत्वेति । प्राक् वर्षर्त्त्वागमनात्पूर्वं, ग्रीष्मकाले इत्यर्थः । तपसा ग्रीष्मर्त्तुसंबन्धिना तापेनेत्यर्थः । क्षामाः शुष्कप्रायतां प्राप्ता इत्यर्थः । श्रान्ताः पत्रपतनादिना श्रान्ततां प्राप्ताः । येषां सर्वाण्यपि पत्राणि संपतितान्यभूवंस्तथाभूता इत्यर्थः । पादपाः शाकादयस्तरवः, पद्भिः स्वमूलप्रदेशैः, अपः जलानि पीत्वा, नाना अङ्कुरपत्रपुष्पफललब्ध्या चित्रवर्णाः आत्मनां मूर्त्तयो येषां तथाभूताः, आसन् । यथा प्राक् तपश्चर्याकाले इत्यर्थः । तपसा तपश्चरणेन, क्षामाः कृशतां प्राप्ताः, श्रान्ताः परिश्रमतां प्राप्ताः सन्तोऽपि, तपःफलं संप्राप्येत्यर्थः । कामानुसेवया नानाविधभोगसंसेवनेन, नाना हृष्टपुष्टगौरताद्याप्त्या विचित्रतावत्य आत्ममूर्त्तयः स्वदेहा येषां तथाभूताः, अभवंस्तद्वत् । अनेन सुतपस्तप्त्वा तद्देहादिपोषादौ न यतितव्यमिति मूढतया सूचितम् ।। २१ ॥ सरस्सु इति । अङ्ग हे राजन्, अशान्तान्यनिर्मलानि कलुषानीति यावत् । तानि तोयानि येषु तथाभूतेष्वपि, सरस्सु सरोवरेषु, अशान्तरोधस्स्वति पाठे अशान्तानि पङ्ककण्टकादियुक्तानि रोधांसि तटानि येषां तेष्वपि सरस्सु, सारसाः, न्यूषुः । केषु के इव । अशान्तान्यनुपरतानि कृत्यानि येषु तेष्वपि गृहेषु, दुराशयाः वैषयिकसुखाभासलेशलिप्सवः, ग्राम्याः पामराः इव, ते यथा निवसन्ति तद्वदित्यर्थः । अनेन ग्राम्यविषयाः दुःखप्रचुरा अल्पसुखाश्चेत्युक्तम् ॥ २२ ॥ जलौघैरिति । ईश्वरे पर्जन्ये, वर्षति सति, जलौघैः जलपूरैः, सेतवो जलनिरोधार्थं मृत्पाषाणादिनिर्मिता आलयः, निरभिद्यन्त त्रुटिता बभूवुः 'सेतुर्नाऽऽली कुमारके' इति मेदिनी। कैः के इव । यथा कलौ, पाषण्डिनां असद्वादैः, कलियुगे प्रवृत्ते सति वेदबाह्यानामसद्वादैरित्यर्थः । वेदमार्गाः वेदोदिता वर्णाश्रमधर्मा निर्भिद्यन्ते तद्वत् । अनेन पाषण्डवादानामश्रोतव्यत्वमुक्तम् ।। २३ ॥ व्यमुञ्चन्निति । वायुभिः नुन्नाः प्रेरिताः, घना मेघाः, भूतेभ्यः अमृतममृतवज्जीवनहेतु जलं, 'अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जले दुग्धे मोक्षेऽन्ने हेम्नि गोरसे' इति यादवः। अथ कात्स्न्र्येन, व्यमुञ्चन् । के केभ्य इव । यथा द्विजैः पुरोहितादिभिरीरिताः प्रेरिताः, विश्पतयो राजानः, काले काले उचितकालेषु, आशिषः कामान्, अर्थिभ्यः विमुञ्चन्ति, तद्वत् । अनेन राजभिरेवंविधैर्भवितव्यमित्युक्तं भवति ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पीत्वेति : १०.२०.२१.

वृत्तिं सम्पाद्य गुप्ताद्भुतनिजचरितैः प्राक्कृशाः श्रान्तचित्ताः पश्चात्तत्तद्विलासानुभवफलबलाद् विस्तृतस्वाप्तवर्गाः ।
जायन्ते वृक्षवद्यत् तदुचितमिह चेत्तद्वदौदार्यशीला नो चेत्किं तैर्विभोग्यैः सकलसुखकरः स्पष्ट एको द्विजाश्यः ॥ ३१ ॥

सरस्स्वति : १०.२०.२२.

वस्वृद्धिप्रसरातिलङ्घितबृहद्वेलं विलोक्यापि ये साशास्तस्य जडाशयस्य निकटे तिष्ठन्ति ते सालसाः ।
स्पष्टा एव सरःस्ववृद्धिषु तथा तत्सेविनः सारसास्तत्सेव्यं कृतिना निजेष्टफलदं गाङ्गं तदेकं पदम् ॥ ३२ ॥

जलौघैरिति : १०.२०.२३.

दाता दातुं प्रवृत्तो नयपथविलसद्वर्तनश्चेत्ततस्तं तन्मार्गाद्वाक्प्रजल्पैर्जडमतिकलितैर्भ्रंशयन्त्यप्रतिष्ठाः ।
दुर्वादैर्दुर्वितर्का इव विमतमुधाकल्पितैः श्रौतमार्गं तस्मादस्मिन्युगे सन्नयरसलसितः सेव्य एको दयाब्धिः ।। ३३ ॥

व्यमुञ्चन्निति : १०.२०.२४.

प्रारब्धतः स्याद्रस्वाप्तिर्वायुनुन्नाम्बुदाम्बुवत् । नान्यथेति विनिश्चिन्वन् धीरो यः स सुखी सदा ॥ ३४ ॥

कृष्णप्रिया

जो वृक्ष जेठ आषाढ़ में सूख गये थे वे अब अपनी जड़ों से जल पीकर पत्ते फूल तथा डालियों से खूब सज धज गये जैसे सकाम भाव से तपस्या करने वाले पहले तो दुर्बल हो जाते हैं, परन्तु कामना पूरी होने पर मोटे तगड़े हो जाते हैं ॥ २१ ॥ परीक्षित् ! तालाबों के तल कार्टे की जड़ और जल के बहाव के कारण प्रायः अशान्त ही रहते थे, परन्तु सारस एक क्षण के लिये भी उन्हें नहीं छोड़ते थे जैसे अशुद्ध हृदय वाले विषयी पुरुष काम-धन्धों की झंझट से कभी छुटकारा नहीं पाते फिर भी घरों में ही पड़े रहते हैं ॥ २२ ॥ वर्षा ऋतु में इन्द्र की प्रेरणा से मूसलधार वर्षा होती है इससे नदियों के बांध और खेतों की मेड़े टूट-फूट जाती है, जैसे कलियुग में पाखण्डियों को तरह तरह के मिथ्या मतवादों से वैदिक मार्ग की मर्यादा ढीली पड़ जाती है ॥ २३ ॥ वायु की प्रेरणा से घने बादल प्राणियों के लिये अमृतमय जल की वर्षा करने लगते हैं जैसे ब्राह्मणों की प्रेरणा से धनी लोग समय समय पर दान के द्वारा प्रजा की अभिलाषाएं पूर्ण करते ॥ २४ ॥

एवं वनं तद् वर्षिष्ठं पक्वखर्जूरजम्बुमत् । गोगोपालैर्वृतो[1] रन्तुं सबलः प्राविशद्धरिः ॥ २५ ॥
धेनवो मन्दगामिन्य ऊधोभारेण भूयसा । ययुर्भगवताऽऽहूता द्रुतं प्रीत्या स्नुतस्तनीः[2] ॥ २६ ॥
वनौकसः प्रमुदिता वनराजीर्मधुच्युतः । जलधारा गिरेर्नादादासन्ना ददृशे गुहाः ॥ २७ ॥
क्वचिद् वनस्पतिक्रोडे गुहायां चाभिवर्षति । निर्विशन्[3] भगवान् रेमे कन्दमूलफलाशनः[4] ॥ २८ ॥

कर्वमक्षमा

अन्वयः – एवम् गोपोपालैः वृतः सबलः हरिः, पक्व-खर्जूर-जम्बुमत् तद् वर्षिष्ठम् वनम् प्राविशत् ॥ २५ ॥ भूयसा ऊधोभारेण मन्दगामिन्यः धेनवः भगवता आहूताः प्रीत्या स्नुतस्तनीः द्रुतम् ययुः ॥ २६ ॥ वनौकसः प्रमुदिताः आसन् वनराजीः मधुच्युताः आसन् गिरेः जलधाराः आसन् आसन्नाः गुहाः आसन् (हरिः तत् सर्वम्) ददृशे ॥ २७ ॥ क्वचित् अभिवर्षति मेघे भगवान् वनस्पतिक्रोडे च गुहायाम् निर्विशन् कन्दमूलफलाशनः रेमे ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वनौकसः पुलिंदीः प्रमुदिता भगवान् ददृशे । तथा वनराजीर्मधुच्युतो मधुस्रवा ददृशे । गिरेः सकाशज्जलधाराश्च तासां नादानासन्ना निकटवर्तिनीर्गुहाश्च । यद्वा वनौकसः प्रमुदिता आसन् तथा वनराजीर्वनराजयो वनपरंपरा मधुच्युत आसन् गिरेर्जलधारा आसन् तानेवंभूतानादद्दृशे सर्वतो ददर्श भगवान् । तथा धाराणां नादान्गुहाश्चेति ॥ २५–२९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यद्वा–वनौकसो गावः मृगादयश्च । प्रमुदिताः प्रकृष्टानंदाः । आसन्निति क्रियापदं पृथक्कृत्वा सर्वेषां पदानां प्रथमांतता बोध्या । मधुच्युतश्चोतन्मकरंदाः । गोपक्षे मधु मधुरं क्षीरं च्योतंति स्रवंतीति मधुच्युतः ॥ २५ ॥ वनस्पतिक्रोडे वृक्षमूले । यद्वा–वनस्पतीनां क्रोडं सुखं येन स वनस्पतिक्रोडं इंद्रस्तस्मिन्नभिवर्षति सति "क्रोडः शनौ शूकरे ना रक्षोंकसुखसद्मसु" इति धरणिः । कंदानि शालूकादीनि, मूलानि मधुरमूलकादीनि, फलान्याम्रजंब्वादीनि ॥ २६ ॥ संभोजनीयैः श्रीदामादिभिर्गोपैः ॥ २७ ॥ वत्सतरान् अल्पवत्सान् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं वर्षाकालं वर्णयित्वा तत्फलं तत्र श्रीभगवतः क्रीडाविशेषं वक्ष्यन्नादौ वनप्रवेशमाह–एवमिति । उक्तप्रकारेण यथायथाहं वर्णितवांस्तथा वर्णयित्वेत्यर्थः । तदनुसारेणैवाहमवर्णयमिति भावः । वृतः श्रीमुखशोभालोभेन ॥ २५ ॥ क्रीडामाह–धेनव इति षड्भिः । मन्दगामिन्योऽपि प्रीत्याऽऽहूताः प्रीत्यैव द्रुतं ययुश्चेत्यन्वयः प्रीतौ । लिङ्गं स्नुतस्तना इति स्नुतस्तनीरिति पाठे स्नुतस्तन्यः प्रावृट्काले विशेषतो दुग्धादिसम्पत्त्या शोभाविशेषं तत्तद्भोगादिसम्पत्तावपि मिथः प्रेमविशेषश्च क्रीडापरिकरत्वेन दर्शितः ॥ २६ ॥

---

१. वस्तुं–वीर. । २. स्तनाः–जीव. तोष. । ३. निर्विश्य–श्रीधर. वंशी.; निर्विशन्–विज.; निविशन्–वीर. विश्व. । ४. फलाशनैः–विज. ।

वनौकसः पुलिन्द्यादीन् गुहानां दर्शने नादस्य हेतुता दूरवर्त्तिनीनामपि तृणादिभिराच्छन्नानामपि तासां प्रतिध्वन्युदयेनाभिव्यक्तेः ददृशे ददर्श ॥ २७ ॥ क्वचित् कस्मिंश्चित् कदाचिद्वा भगवानपीति अहो अस्या लीलायाः परममाधुर्य्यमिति भावः कन्दमूलयोर्वर्त्तुलदीर्घताभ्यां भेदो लोके प्रसिद्धः तयोः प्रावृषि कोमलत्वादिना उपादेयत्वात् फलतः प्राङ्निर्देशः ॥ २८ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं वर्षाकालं वर्णयित्वा तत्फलं तत्र श्रीभगवतः क्रीड़ाविशेषं वक्ष्यन्नादौ वनप्रवेशमाह–एवमिति । अनेन उक्तवृष्टिप्रकारेणेदृशं वा वर्षिष्ठं समृद्धं सश्रीकं शोभया सहितं वा । यद्यपि सर्व्वस्वाश्रये श्रीवृन्दावने सर्व्वदा सर्व्वपुष्पफलादिसम्पत्तिः, तथापि पक्वखर्ज्जुर-जम्बुमदिति तदानीं तद्बाहुल्याभिप्रायेण, वृत इति वृष्टिनिवारणार्थं छत्रादिधारणाकांक्षया अहमहमिकया सर्व्वैरेव गोपैर्गोभिश्च तृप्त्या स्नुतस्तनतया वत्सेभ्योऽप्यधिकवात्सल्येन स्तन्यं पाययितुमिव किंवा सदा सर्व्वेण श्रीमुखशोभालोभेन परिवेष्ट्यमानत्वादतएव सर्व्वमनोहरणाद्धरिः प्राविशत् प्रविशन्नासीदित्यर्थः । प्र-शब्दो वनादिशोभाविशेषापेक्षया, इति प्रावृषि प्रतिदिनक्रीड़ा सूचिता ॥ २५ ॥ क्रीड़ामाह–धेनव इति षड्भिः । मन्दगामिन्योऽपि श्रीकृष्णेन आहूताः सद्यो द्रुतं ययुः, प्रीत्येत्यस्य आहूता इत्यनेन ययुरित्यनेनैव वान्वयः । स्नुतस्तनीरिति पाठे स्नुतस्तन्य इति; प्रावृट्काले विशेषतो दुग्धादिसम्पत्त्या शोभाविशेषः वात्सल्यविशेषो भगवत्क्रीड़ापरिकरश्च दर्शितः; यद्वा, प्रावृट्कालीनभोगादिविशेषसम्पत्तावपि गवां श्रीभगवदेकप्रियता दर्शिता ।२६। गुहानां दर्शनेनानन्दस्य हेतुः, दूरवर्त्तिनीनामपि तृणादिभिराच्छन्नानामपि तासां प्रतिध्वन्युदयेनाभिव्यक्तेः ॥ २७ ॥ क्वचित् कस्मिंश्चित् कदाचिद्वा, चकारादस्योभयत्राप्यन्वयः । किंवा शक्तिविशेषेणैकदैवोभयत्रापि निर्विशन् प्रविशन् संविशन् वा, यतो भगवान् ततश्च क्वचिदभितो वर्षतीत्यन्वयः । अभि-शब्देन वृष्टेराधिक्यमुक्तम्; एवं लौकिकलीलायामप्यैश्वर्य्येण भगवत्ताविशेषप्रकटनं पूर्व्ववदूह्यम्; तथा क्रोड़स्य गुहायाश्च जातावेकत्वं सुविस्तीर्णत्वञ्च । सहचराश्च कुत्रापि केचित् कतिपये ज्ञेयाः; रेमे चिक्रीड़ सुखी बभूव वा । कथम् ? तदाह–कन्देति । कन्दमूलयोर्बाह्यान्तरत्वादिना भेदः; तयोः प्रावृषि बाहुल्येन कोमलत्वादिना चोपादेयत्वात्, फलतः प्राङ्निर्द्देशः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

ऊधः क्षीराधारस्थानम् ॥ २६ ॥ जलधारागिरेः निर्झरयुक्तगिरेः नादसमदानाः निर्झरनादेन समनादाः ॥ २७ ॥ क्रोडे मध्यभागे ॥ २८–३७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवं वर्षर्तुमनुवर्ण्याथ तदा कृतानि कानिचिद्भगवतश्चेष्टितानि वर्णयति–एवमित्यादिभिः सप्तभिः । इत्थं पक्वानि खर्जूरादिफलानि अस्मिन् सन्तीति तद्वत् तद्वर्षिष्ठं वृद्धं प्रभूतमिति यावत् वनं हरिः सबलदेवो गोपालैः सह रन्तुं प्राविशत् ॥२५॥ भूयसा ऊधसः पयःकोशस्य भारेण मन्दगामिन्योऽपि धेनवो भगवता आहूताः स्नुतस्तन्यः सत्यो द्रुतमेव ययुः ॥ २६ ॥ वनौकः प्रभृतीन् ददृशे इत्यन्वयः । प्रमुदिताः मधुच्युत इति च वनराजीरित्यस्य विशेषणं मधुच्युतः मधूनि स्रवन्त्यः प्रमुदिताः फलपुष्पसमृद्धिभिः मुदिताः इव स्थिताः प्रमुदिताः वनौकसः पुलिन्दीरिति वा गिरेः सकाशाज्जलधारास्तासां नादानासन्ना निकटवर्त्तिनीर्गुहाश्च ददृशुरित्यर्थः ॥ २७ ॥ कद्वाचित्पर्जन्ये अभितो वर्षति सति वनस्पतिक्रोडे वृक्षमूले गुहायां वा प्रविशन् भगवान् कन्दानि मूलानि फलान्येवाशनं यस्य तथाभूतो रेमे ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वर्षिष्ठं प्रभूतवर्षोपेतम् ॥ २५ ॥ स्नुतस्तनीः क्षरितस्तन्यः ॥ २६ ॥ वनौकसो गावः मृगादयो वा गुहाः ददृशुरित्यन्वयः । कथम्भूताः प्रमुदिताः प्रकृष्टानन्दाः वने राजी राजनं यासां ताः वनराज्यः मधुश्च्युतः मधुवन्मधुरं क्षीरं श्च्यवन्ती मधुश्च्युत गम्भीरश्चासौ सन्नादश्च गभीरसन्नादः तेन सन्नादेन सह वर्तमानाः । यद्वा, वृष्ट्यभावसमये मधुश्च्युतः वनराजीर्वनपङ्क्तीः ददृशु वृष्टौ सत्यां गुहा ददृशुरिति वनौकसः किराता वा गिरेर्हेतौ सन्नादा राक्षसाः सन्नादाः भावप्रधानो निर्देशः नष्टराक्षसत्वेन नादसहिताः ॥ २७ ॥ अभिवर्षति सति वनस्पतिक्रोडे गुहायां चैव निर्विशन् उपभुञ्जानः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वर्षां वर्णयित्वा तादात्विकीं लीलां वर्णयति–एवमिति सप्तभिः । वर्षिष्ठं समृद्धम् ॥ २५ ॥ स्नुतस्तनीः स्नुतस्तन्य इति प्रीतिचिह्नम् ॥ २६ ॥ तत्र च कृष्णो वनौकसः पुलिन्दीः प्रमुदिताः ददृशे ददर्श वनराजीर्मधुच्युतः मधूनां च्युत् क्षरणं यासु तथाभूता ददर्श गिरेः सकाशाज्जलधारादूरवर्तिनीरपि नादाद्धेतोरासन्ना निकटवर्तिनीः ददर्श गुहाश्च ददर्श ॥ २७ ॥ मेघे अभितो वर्षति सति वृक्षक्रोडे गुहायां वा निःशेषेण द्रुतमभिद्रुत्य विशन् प्रविशन् कन्दमूलयोर्वर्त्तुलत्वदीर्घत्वाभ्यां भेदो ज्ञेयः ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ सङ्क्षेपतो भगवल्लीलां प्रावृषिकृतां दर्शयति—एवमिति सप्तभिः। वर्षिष्ठं समृद्धम् ॥ २५ ॥ ऊधसः पयःकोशस्य भूयसा भारेण मन्दगामिन्योऽपि भगवताऽऽहूताः प्रीताः सत्यो द्रुतं ययुः ॥ २६ ॥ प्रमुदितशब्दस्य लिङ्गविपरिणामेन सर्वत्रान्वयः। तथा हि मधुच्युतः मधुश्रवाः वनराजीः प्रमुदिताः ददृशे गिरेः सकाशात् जलधाराः प्रमुदिताः ददृशे नादान् जलधाराणामन्येषां च शब्दान् प्रमुदितान् ददृशे आसन्नाः निकटवर्तीगुहाश्च प्रमुदिताः ददृशे–किं बहूना वनौकसः सर्वान् प्रमुदितान् ददृश इत्यर्थः ॥२७॥ वनस्पतेर्महावृक्षस्य क्रोडे मूलभागे विपुलस्थाने ॥ २८–२९ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

प्रावृषं वर्णयित्वा तदानीन्तनीं हरेर्लीलामाह—सप्तभिः—वर्षिष्ठं समृद्धम् ॥ २५ ॥ स्नुतस्तनीरिति प्रथमार्थे द्वितीया प्रीतिचिह्नमिदम् ॥ २६ ॥ वनौकसः पुलिन्दीः प्रमुदिताः मधूनां च्युत् क्षवनं यासु ता वनराजीः गिरेर्जलधाराश्च दूरवर्तिनोरपि नादाद्धेतोरासन्नाः समीपवर्त्तिनीर्ददर्श हरिः गुहाश्च ददर्श ॥ २७ ॥ मेघेऽभितो वर्षति सति वनस्पतेस्तरोः क्रोड़े गुहायाम्वा निर्विशन् धावित्वा विशन् रेमे कन्दमूलयोर्वर्तुलत्वदीर्घत्वाभ्यां भेदः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वनौकसो गोपा मधुश्चुतो वनराजीर्वनपङ्क्तीर्ददृशुस्तेन च प्रमुदिताः । किञ्च गिरेर्गम्भीरसन्नादे सन्नादा गिरेस्तत्सम्बन्धिनिर्झरादीनां सन्नादस्तज्जातस्सन्नादो यासां ता गुहा ददृशुः ॥ २५ ॥ वनस्पतिक्रोडे वनस्पतेर्वृक्षस्य क्रोडे कोटरेऽभिवर्षति मेघे गुहायां च निविशन्भगवान्कन्दमूलफलाशनै रेमे चिक्रीड ॥ २६ ॥ सम्भोजनीयैः समं भोजनीयं भोक्तव्यं येषां ते तैः । संशब्दस्य समार्थत्वं तु सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् । प्रोपाभ्यां समर्थाभ्यां व्यवहृपणोः समर्थयोरित्यत्रैकव्याख्याने दृष्टमित्यत्र समार्थता ज्ञेया। उपानीतं गृहाद्दध्योदनं सङ्कर्षणान्वितः सलिलान्तिके शिलायां सम्भोजनीयैस्सह भोज्यास्तैरिति वा बुभुजे। सलिलाः सलोला केचन। ते क्रीडासक्तां नायाता भुक्त्यै तेषामन्तिके समीप इति। एकदेशविकृतन्यायेन सलिला हि सलीलाः। यथोक्तं बृहद्भाष्ये। सलीलः सलिल इति वेति ॥ २७ ॥ प्राक् चर्वतो भक्षयतोऽनन्तरं शाद्वलोपरि संविश्य मीलितेक्षणान् तथा चर्वतोर्मीलितेक्षणा तृप्तांस्तृप्ता वृषान्वत्सतरानूधोभारेण श्रमो यासां ता गाश्च वीक्ष्येत्युत्तरेणान्वयः ॥ २८ ॥

श्रीसुबोधिनी

एवमेकविंशतिप्रकारेण स्वरूपेण च प्रावृड् वर्णिता, तस्यां प्रावृषि भगवतो गुणानां च रमणमाह सप्तभिः, तत्र प्रथमं रमणार्थं भगवतः प्रवेशमाहैवमिति, **एवं** पूर्वोक्तप्रकारेण सर्वगुणसम्पन्नं **वनं तत्** प्रसिद्धं **वर्षिष्ठं** सर्वोत्तमं जातं, नन्वत्र वने क्रीडायां शीघ्रं गृहागमनं न सम्भवति भुक्त्वा गमनेपि महद् दिनमिति मध्ये क्षुद भवेदाम्रादिफलानि तु निवृतानि ततः कथं रमणमित्याह **पक्वखर्जूरजम्बुमदिति**, **पक्वानि खर्जूरफलानि जम्बुफलानि** च यस्मिन् वने, **भगवान् गुणातीतः सत्त्वस्थानीयो बलो रजःस्थानीया गोपाला गावस्त्ववशिष्टाः**, तैः सर्वैरेव भगवदीयैरावृतः प्रकर्षेण क्रीडां कर्तुं स्वसम्पादितनिदुष्टैर्जीवैः सह वनं **प्राविशत्** ॥ २५ ॥ तत्र प्रथमं धेनूनां शोभामाह प्रवेशो वीर्यशक्तिरियं वैराग्यशक्तिर्वा, ऐश्वर्यशक्तिमाह **मन्दगामिन्यो** धेनवो जाताः, गर्भेणापि तथा भवन्तीति तद्व्यावृत्त्यर्थमाह**ोधोभारेण भूयसे**ति, क्षीराशयस्यैव महान् भारः तादृश्योपि **भगवताहूता** ऐश्वर्यवशाद् द्रुतमागताः, निर्बन्धेनाप्यागमनं सम्भवतीति तद्व्यावृत्त्यर्थमाह **प्रीत्ये**ति, प्रीत्याहूताः प्रीत्या च ययुः प्रीत्यैव च **स्नुता स्तना** यासां ङीप्टापौ व्यत्ययेन **भवतः** ॥ २६ ॥ गोपानां सुखमाह **वनौकसः प्रमुदिता** इति, वनवासिनां हि कालान्तरे तापो भवतीदानीं शीतलत्वात् सर्वे प्रमुदिताः, अनेन दोषाभाव उक्तः सहजं च सुखं, भक्ष्यसम्पत्तिमाह, **वनराजीर्वन**पङ्क्तयः सर्व एव वृक्षा नानाजातीया **मधुच्युतः** पूर्णे मधुनि ततोपि प्रवाहमधुयुक्ता जाताः, पेयसम्पत्तिमाह **जलधारा गिरेरा**सन्निति, **पर्वतसम्बन्धिन्यो जलधारा अकलुषिताः शीतलाः पानयोग्यधाराश्च भवन्ति**, वृष्टौ स्थातुं शयनं च कर्तुं स्थानमाहा**सन्ना ददृशे गुहा** इति, **आसन्ना** निकटस्था **गुहा** विश्रामस्थानानि, एतत् त्रिविधसामग्रीयुक्तान् वनौकसो गोपालानन्यांश्च ददृशे ॥ २७ ॥ बलभद्रस्य तत्र रमणमाह **क्वचिद् वनस्पतिक्रोड** इति, वृक्षस्य क्रोडे कोटरे **गुहायां** वाभिवर्षति देवे **निर्विश**न्ततोपविशन् **भगवान्** रामो **मूलकन्दफलान्येवाशनं** यस्य **वनस्थानि सर्वाणि दिव्यानि स्वादिष्टानि** च, **रेम** इति पदाद्रामो ज्ञायते, विशेषं च वक्ष्यति, भगवति क्रोडे पुनर्निर्लीयोपवेशनं फलाहारश्च न सम्यक् सम्पद्यते ॥ २८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

धेनवो मन्दगामिन्य इत्यस्याभासात्पूर्वं **वैराग्यशक्तिर्वे**ति। विरक्तो हि गृहं हित्वा वनं प्रविशतीति वनप्रवेशमात्रसाम्येनैवमुक्तम् ॥ २६ ॥ क्वचिद्वनस्पतिक्रोड इत्यस्य रामविषयकत्वोक्तौ स्वाशय उद्घाटितः **क्रोडे** पुनरित्यादिना। यद्यप्येवमप्येका बाललीला सम्भवति, तथापि प्रभुलीलायां सङ्कोचमसहमानैरेवमुक्तम्। उपपत्तिश्चोक्ता, विशेषं च वक्ष्यति भगवतीति ॥२८॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

एवं वनमित्यत्र स्वसम्पादितनिर्दुष्टैरिति स्वसम्पादिताश्च ते **निर्दुष्टाश्च** तादृशैः ॥ २५ ॥ **धेनव** इत्यत्र **प्रवेशो वीर्यशक्तिरिति** बलगोपालानां सहत्वावरणत्वबोधनात् **प्रवेशक्रियायाः वीर्यशक्तित्वं** बोध्यं, **वैराग्यशक्तिर्वेत्यस्यार्थं** टिप्पण्यामाहुः **विरक्त** इत्यादि ॥ २६ ॥ **वनौकस** इत्यत्र **ददृश** इति तत्पदाज् **ज्ञानशक्तिर्बोध्या,** अत्र च कर्ता भगवान् ज्ञेयः ॥ २७ ॥ **क्वचिद् वनस्पतीत्यत्र** रामलीलाङ्गीकारतात्पर्यं टिप्पण्यामाहुः **क्वचिदित्यादि,** अत्र कन्दाद्यशनस्योक्तत्वाद् रामस्य सत्त्वस्थानीयत्वाच्च **वैराग्यशक्तिर्ज्ञेया, एवमित्यत्र** वैराग्यशक्तिप्रक्षेत्र**वीर्यशक्तिर्बलचरित्रत्वाद्** भाति ॥ २८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एवं वनमित्यत्र **स्वसम्पादितेति** स्वसम्पादितैर्धेनुकवधादिभिर्निर्दुष्टा ये जीवास्तैरित्यर्थः ॥ २५ ॥ **वनौकस** इत्यत्र **एतत् त्रिविधेति** वनराजिजलधारागुहायुक्तान् देशानित्यर्थः, **आसन्नित्यस्यैव गुहास्वप्यन्वयः, ददृशे** इति तु भिन्नतयान्वेति, **अन्यांश्चेति** पुलिन्दादीनित्यर्थः ॥ २७ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

धेनवो मन्दगामिन्य इत्यस्याभासे **प्रवेशो वीर्यशक्तिरेवेति** "सबलः प्राविशद्धरि"रिति पूर्वश्लोकोक्तो वनप्रवेशो **वीर्यशक्तिः,** यतो वने वत्सासुरधेनुकादयोसुरा हताः प्रलम्बश्च हतो दावाग्निद्वयं निवारितं, तादृशे सम्भावितभीतिके वने प्रवेशो वीर्यवत एव कार्यमतः **प्रवेशो वीर्यशक्तिरित्युक्तं, वैराग्यशक्तिर्वेति** "निशामुखेषु खद्योता" इत्यादिषु परोक्षवादरीत्या निरूपिता या रहस्यलीलास्तत्रासक्तो भगवान् "गोगोपालैर्वृतो रन्तुं सबलः प्राविशद्धरि"रितिवाक्याद् गोपालबलदेवसाहित्येन बहिरङ्गलीलां कर्तुं वनप्रवेशं कथं कुर्यात्, अतो वैराग्यशक्त्यैव कृतवान्, अतो रहस्यलीलासक्तोपि वैराग्यशक्ति तत्राविर्भाव्य लीलान्तरं करोतीति ज्ञापनाय वैराग्यशक्तिर्वेत्युक्तं तत् सम्यगेव, एतदेव श्रीमत्प्रभुचरणैष्टिप्पण्यां गुप्ततयोक्तं **विरक्तो हि गृहं हित्वा** वनं प्रविशतीत्यादिना ॥ २६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं प्रावृट्श्रियं निरूप्य तत्कालिकीं भगवत्क्रीडां निरूपयति—एवमिति सप्तभिः। एवमुक्तप्रकारेण प्रावृट्श्रिया युक्तं तत् प्रसिद्धं वृन्दावनं गोगोपालैर्वृतः सबलो हरी रंतुं प्राविशदित्यन्वयः। तत्र विक्रीडतां रामकृष्णादीनां कदाचित् गृहाद्भोजनसामग्र्यागमनविलम्बे क्रीडासक्त्या गृहगमनविलम्बे वा क्षुत्तृड्भ्यां क्रीडायां विघ्नाभावं सूचयन् भोजनसम्पत्तिं च दर्शयन् वनं विशिनष्टि—वर्षिष्ठं समृद्धम्, पक्वखर्जूरजम्बुमत् ॥ २५ ॥ भूयसा महता ऊधोभारेण मन्दगामिन्योऽपि धेनवो भगवता आहूताः स्नुतस्तनोः स्नुतस्तन्यः सत्यः प्रीत्या द्रुतं शीघ्रं ययुरित्यन्वयः ॥ २६ ॥ तदा च तादृशीं भगवच्छोभां निरीक्ष्य वनौकसः पुलिन्दभृङ्गपक्ष्यादयः सर्वे प्रमुदिता आसन्। तथा गिरेः सकाशात् जलधारा आसन्। तदा श्रीकृष्णोऽपि वनराजीर्मधुच्युतो मधुस्रुवो आददृशे, गिरिगुहाश्च रम्या आददृशे। तथा धारायास्तज्जनितान् कीचकपक्ष्यादीनां चानेकविधान् नादान् मनोहरशब्दांश्च शुश्राव। अत्र यथोचितशेषेण सर्वत्रान्वयः ॥ २७ ॥ कन्दमूलानामशनं यस्य स भगवान् देवे वर्षति सति क्वचित् कदाचित् वनस्पतिक्रोडे कदाचिद्गिरिगुहायां वा निर्विशन् रेमे इत्यर्थः ॥ २८ ॥

अन्वितार्थप्रकाशिका

एवमिति। एवं वर्षिष्ठं समृद्धं पक्वखर्जूरजम्बुमत् तत् वृन्दावनं गोगोपालैर्वृतः सबलो हरिः रन्तुं प्राविशत् ॥ २५॥ धेनव इति ॥ भूयसा महता ऊधोभारेण मन्दगामिन्योऽपि धेनवो भगवता आहूताः स्नुतस्तनोः स्नुतस्तन्यः सत्यः। पूर्वसवर्णदीर्घ आर्षः। स्नुतस्तना इत्यपि पाठः। प्रीत्या द्रुतं ययुः ॥ २६ ॥ वनौकस इति ॥ तदा वनौकसः पुलिन्दमृगपक्ष्यादयः सर्वे प्रमुदिता आसन् तथा गिरेः सकाशात् जलधारा आसन्। तदा श्रीकृष्णोऽपि वनराजीर्मधुच्युतो मधुस्रुत आ सर्वतः ददृशे। तङार्षः। गिरिगुहाश्च रम्या आ ददृशे तथा धाराणां कीचकपक्ष्यादीनां चानेकविधान् नादान्मनोहरशब्दांश्च शुश्राव। अत्र यथोचितशेषेण सर्वत्रान्वयः। यद्वा। तत्र कृष्णो वनौकसः पुलिन्दीः प्रमुदिताः ददृशे। वनराजीर्मधुच्युतो ददृशे। गिरेः सकाशाज्जलधारा दूरवर्तिनीरपि नादाद्धेतोरासन्ना निकटवर्तिनीः ददृशे। गुहाश्च ददृशे। अयं च नादादिति पञ्चम्यन्तपाठेऽर्थः। नादानिति पाठे जलधाराः आसन्नाः गिरेर्गुहाश्च ददृशे। धाराणां गुहानां च नादान् शुश्रावेति शेषः ॥ २७ ॥ क्वचिदिति ॥ कन्दमूलफलाशनो भगवान् देवे वर्षति सति क्वचित्कदाचित् वनस्पतिक्रोडे कदाचिद्गिरिगुहायां वा निर्विशन्। निर्विश्येति च पाठः। रेमे। कन्दो वर्तुलो मूलं दीर्घम् ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं प्रावृड्वर्णनं कृत्वाऽधुना सप्तश्लोकी तत्र कृतां हरिलीलां निरूपयति एवमित्यादिभिः वर्षिष्टं वृष्टिना समृद्धं बलेन सहितः ॥ २५ ॥ भूयसा अति बहुना आहूताः संबोधिताः ॥ २६ ॥ वनौकसो वनवासिनः प्रमुदिताः आसन् वनराजीः वनराजयः वन्यः वृक्षाणां पंक्तयः मधुच्युतो मधुस्रवाः आसन् गिरेः पर्वतात् जलधारा आसन् नादात् जलधारा शब्दात् आसन्नाः समीपवर्त्तिन्यो गुहाश्चासन् एवंभूतानि एतानि सर्वाणि हरिर्ददृशे दृष्टवान् यद्वा वनौकसः पुलिंदीताः हृष्टाः ददृशे इति प्रतिवाक्य द्वितीयांतपदानां क्रियासंबंधः कार्यः ॥ २७ ॥ कस्मिंश्चित् समये मेघे अभिवर्षति सति निविडपत्राणां वृक्षाणां क्रोडे महाशाखाधःप्रदेशे भूमिगर्भेबत्तु ल-ग्रंथियः कंदाः अन्यनिदर्घाणि मूलानि ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवं वर्षर्त्तु मनुवर्ण्याथ तदा कृतानि कानिचिद्भगवतश्चेष्टितानि वर्णयति एवमित्यादिभिः सप्तभिः । एवमिति । एवमित्थं, पक्वानि पचेलिमानि पर्जू रजम्बूनि खर्जू रजम्ब्वोः फलानि अस्मिन् सन्ति इति तत् । वर्षिष्ठं समृद्धं, तत् वनं, हरिः श्रीकृष्णः सबलो बलभद्रेण सहितः, गोगोपालैः वृतश्च सन्, रन्तुं, प्राविशत् ॥ २५ ॥ धेनव इति ॥ भूयसा, ऊधसः पयःकोशस्य यो भारस्तेन, मन्दगामिन्यः धेनवः, भगवता कृष्णेन, आहूताः स्रुतस्तनीः स्रवत्स्तनाः सत्यः, प्रीत्या द्रुतं ययुः । भगवदन्तिके इति शेषः ॥ २६ ॥ वनौकस इति ॥ भगवान्, वनौकसः पुलिन्दीः, प्रमुदिताः सुप्रसन्नाः, ददृशे । वनराजीः मधुच्युतः मधुस्रवाः, ददृशे । गिरेः संबन्धिन्यः, जलधाराः आसन्ना निकटवर्त्तिनीः, गुहाश्च ददृशे । गिरेः सबन्ध्येतत् द्वयं ददर्शेत्यर्थः । नादान् जलधाराणां शब्दांश्च, शुश्रावेति शेषः । यद्वा तदा, वनौकसः प्रमुदिताः, आसन् । तथा वनराजीर्वनराजयः वनपरंपरा इति यावत् । मधुच्युतः, आसन् । गिरेः सकाशात्, जलधाराश्च, आसन् । भगवान् एवंभूतान्, वनौकसः प्रभृतीन् गुहाश्च आ सर्वतः ददृशे । तथा नादान् जलधाराशब्दान्, शुश्राव ॥ २७ ॥ क्वचिदिति ॥ क्वचित् कदाचित्, अभिवर्षति पर्जन्ये प्रवर्षति सति, भगवान्, वनस्पतिक्रोडे वृक्षमूले, सघनपत्रादिमद्वृक्षशाखाधःप्रदेशे वा । गुहायां च चकारो वार्थे । निर्विशन् प्रवेशं कुर्वन्, कन्दाः मूलानि फलानि चाप्यशनं यस्य तथाभूतः सन्, रेमे ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवमिति : १०.२२.२५.

एवं तद्भवकाननं बहुफलप्राग्भारभोग्यास्पदं वीक्ष्याऽसौ भगवांश्चतुर्युगगतं जीवैः सगोभिः प्रभुः ।
रन्तुं पातुमपि स्वकानथ खलान् हन्तुं च योगान्वितः स्वच्छन्दं प्रविशन् भ्रमत्युपविशत्यत्तीति सोऽबोधयत् ॥ ३५ ॥

धेनव इति : १०.२०.२६.

यदावलम्बते श्रीशः साधुवृन्दावनोत्सवम् । युक्तं कामदुघा गावः प्रसन्नास्तन्मुखस्थिताः ॥ ३६ ॥

वनौकस इति : १०.२०.२७.

यदर्थमच्युतः क्रीडासक्तोऽस्मिन् यांश्च वीक्षते । आसंस्ते सुखिनः सर्वे तदा युक्तं वनौकसः ॥ ३७ ॥

क्वचिदिति : १०.२०.२८.

केचित् प्रेमहृदः परे रसविदोऽन्ये भूरि शृङ्गारिणः केचित्तु प्रणवोक्तयो गिरिजडोद्गारप्रवाहाः परे ।
बुद्धिज्ञा अपि केचनेति निखिलान्जीवान् प्रपश्यन्प्रभुः सच्छारीरगुहां विशन्नमृतवत्कन्दानदन् क्रीडति ॥ ३८ ॥

कृष्णप्रिया

वर्षा ऋतु में वृन्दावन इसी प्रकार शोभायमान और पके हुए खजूर तथा जामुनों से भर रहा था, उसी वन में विहार करने के लिये श्याम और बलराम ने ग्वालबाल और गौओं के साथ प्रवेश किया ॥ २५ ॥ गौएं अपने स्थनों के भारी भार के कारण बहुत ही धीरे धीरे चल रही थीं, जब भगवान श्रीकृष्ण उनका नाम लेकर पुकारते तब वे प्रेम परवश होकर, जल्दी-जल्दी दौड़ने लगतीं, उस समय उनके स्थनों से दूध की धारा गिरती जाती थी ॥ २६ ॥ भगवान ने देखा कि वनवासी भील और भीलनियाँ आनन्दमग्न हैं, वृक्षों की पत्तियाँ मधुधारा उडेल रही हैं पर्वतों से झर झर करते हुए झरने झर रहे हैं उनकी आवाज बड़ी सुरिली जान पड़ती हैं और साथ ही वर्षा होने पर छिपने के लिये बहुत सी गुफाएं भी है ॥ २७ ॥ जब वर्षा होने लगती तब श्रीकृष्ण कभी किसी वृक्ष की गोद में या खोड़र में जा छिपते कभी-कभी किसी गुफा में ही जा बैठते और कभी कन्दमूल फल खाकर ग्वालबालों के साथ खेलते रहते ॥ २८ ॥

[1]दध्योदनमुपानीतं शिलायां सलिलान्तिके । सम्भोजनीयैर्बुभुजे गोपैः सङ्कर्षणान्वितः ॥ २९ ॥
शाद्वलोपरि संविश्य चर्वतो मीलितेक्षणान् । [2]तृप्तान् वृषान् वत्सतरान् गाश्च स्वो [3]धोभरश्रमाः ॥ ३० ॥
प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतसुखावहाम्[4] । भगवान् पूजयाञ्चक्र[5] आत्मशक्त्युपबृंहिताम् ॥ ३१ ॥
एवं निवसतोस्तस्मिन्[6] रामकेशवयोर्व्रजे । शरत् समभवद् व्यभ्रा स्वच्छाम्ब्वपरुषानिला ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—संकर्षणान्वितः श्रीकृष्णः सलिलान्तिके शिलायाम् सम्भोजनीयैः गोपैः उपानीतम् दध्योदनम् बुभुजे ॥ २९ ॥ भगवान् श्रीकृष्णः शाद्वलोपरि संविश्य मीलितेक्षणान् तृप्तान् चर्वतः वृषान् वत्सतरान् च स्वोधोभरश्रमाः गाः (वीक्ष्य) सर्वभूतसुखावहाम् आत्मशक्त्युपबृंहिताम् ताम् प्रावृट्श्रियम् पूजयांचक्रे ॥ ३०-३१ ॥ एवम् रामकृष्णयोः तस्मिन् निवसतोः स्वच्छाम्बु अपरुषानिला व्यभ्रा शरद् समभवत् ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अथ शरदं वर्णयति एवं निवसतोरित्यष्टादशभिः विगतान्यभ्राणि यस्यां सा । स्वच्छान्यंबूनि यस्यां सा अपरुषः शांतोऽनिलो यस्यां सा च सा च ॥३०॥ नीरजानामुत्पत्तिर्यया तया शरदा कृत्वा । नीरजानामुत्पत्त्या वा ॥३१॥ व्योम्नोब्दमिति । व्योमादीनां चतुर्णां चतुरो मलान् शरदहरत् । आश्रमिणां चतुर्णां कृष्णे जाता भक्तिर्यथाऽशुभमसुखं हरति । तथाहि । ब्रह्मचारिणो गुर्वर्थोदकाहरणादिकष्टं यथा भक्तिर्हरति तया पूर्णस्य तेनानुपयोगात् गुरुभिरपि कृतार्थस्य तस्यानियोगात् एवं व्योम्नोब्दं जलदं शरज्जहार । यथा च गृहिणोपत्यादिसांकर्यं भक्तिर्हरति विविक्तवासरुच्युत्पत्तेः । तथाभूतानां शाबल्यं सांकर्यं शरत् । वर्षासु वृष्टिभिया संकुलानि वसंति यथा च वनस्थस्य मलधारणक्लेशं भक्तिर्हरति एवं भुवः पंकं शरत् । यथा च यतीनां कामादिवासनामलं श्रीकृष्णभक्तिर्हरति एवमपां मलं शरदिति ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ताम् पूर्वोक्ताम् । आत्मशक्त्या माययोपबृंहिताम् ॥ २९ ॥ अपरुषोऽनिष्ठुरः ॥ ३० ॥ प्रकृतिम् स्वरूपं स्वाच्छ्यम् 'संसिद्धिप्रकृती त्विमे । स्वरूपं च स्वभावश्च निसर्गश्च' इत्यमरः ॥ ३१ ॥ शरत् ऋतुः 'अब्दर्त्तू शरदौ स्त्रियाम्' इति कोशात् । आश्रमिणाम् ब्रह्मचार्यादीनाम् । तया भक्त्या । तेन गुर्वर्थोदकाहरणेन । अनुपयोगात् उपयोगाभावात् । तस्य शिष्यस्य । अनियोगात् अनाज्ञापनात् । "यावन्मां न विजानीयात्तात्परिचरेद्गुरुम्" इत्याद्युक्तेः । "अकृतार्थं नियुंजीत कृतार्थं तु क्वचिन्मुनिः" इत्युक्तेश्च । अपो ददातीत्यशब्दो मेघस्तम् । अपत्यादिभिः सांकर्यं संपर्कम् । "शबलश्चित्रवर्णे ना गवि स्त्री संकरे त्रिषु" इति धरणिः । संकुला मिलिताः । मद्भक्तस्तु 'चरेदविधिगोचरः' इत्युक्तेर्भक्तस्य मलधारणादेरनावश्यकत्वात् । एवं भक्तिवत् । यतीनाम् । संन्यासिनाम् । एतेन हरिभक्तिशून्याः संन्यासिनोऽपि कामादिभिस्ताड्यन्त इति भावः । "तद्वन्न रिक्तमतयो यतयोऽपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवम्" इति पृथुं प्रति सनत्कुमारोक्तेः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उपानीतं स्वगृहजनैर्बान्धवजनैर्वा समीपं प्रापितं सम्भोजनीयैः सह भोजयितव्यैः सजातीयैः सह संवासादिशब्दवत् संशब्दोऽत्र सहार्थः सम्भुज्यते एभिरिति तैस्तेमनैः सहेति वा सङ्कर्षण इति तत्र सर्वमेलनाभिप्रायेण ॥ २९ ॥ शाद्वलेति युग्मकम् । चर्वतः रोमन्थायमानान् निरीक्ष्येति परेणान्वयः ॥ ३० ॥ तत्रापि स्वलीलायोग्यतापादनार्थमात्मशक्त्याह्लादिनी नाम्न्या उपबृंहिताम् अतः पूजयाञ्चक्रे साध्वमन्यत अन्यच्च तच्च क्रीडादिकम् उक्तं पराशरेण "उन्मत्तशिखिसारङ्गे तस्मिन् काले महावने । कृष्णरामौ मुदयुक्तौ गोपालैः सह चेरतुः ॥ क्वचिद्गोभिः समं रम्यं गेयतालरतावुभौ । चेरतुः क्वचिदत्यर्थं शीतवृक्षतलाश्रये । क्वचित्कदम्बस्रक्चित्रौ मायूरस्रगलङ्कृतौ । विचित्रौ क्वचिदासातां विविधैर्गिरिधातुभिः । पर्णशय्यासुषुप्तौ च क्वचिन्निद्रान्तरेषिणौ । क्वचिद्गर्जति जीमूते हाहाकाररवैषिणौ" इति ॥ ३१ ॥ एवमुक्तप्रावृट्क्रीडाविशेषेण तत्र व्रजे नितरां परमासक्त्या वसतोः सतोरिति तत्र शरच्छ्रीविशेषसम्पत्तिहेतुरुक्तः अतः सम्यक् अभवत् ॥ ३२ ॥

---

१. दध्योदनं समानीत ; दध्योदनमुपानीतं—वीर. विज. विश्व. । २. वृषा-वत्सान्वत्सतरान्—विज. ; दृप्तान्वृषान्वत्स—वीर. । ३. स्वोध्नो भर.—गो. प्रे. टी. । ४. मुदावहाम्—श्रीधर. वंशी. वीर. विज. । ५. श्चक्रे—श्रीधर. वंशी. वीर. विज. । ६. स्तत्र—विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दध्योदनमिति–तदानीं तस्य प्राचुर्य्यान्मिष्टत्वाच्च, उपानीतं श्रीयशोदान्यस्तं गोपैर्यथाकालमन्तिके प्रापितं निजनिजं वोपायनत्वेन समर्थितम्; तस्य च मासृण्यार्थंदधिप्राचुर्य्यात्, वृष्ट्या च शिलानैर्म्मल्यापादनेन सौन्दर्य्यात्, शिलायां पात्रे बुभुजे सलिलान्तिक इति। तदानीं यत्र तत्र जलसद्भावात्, किंवा जलपानापेक्षया सलिलान्तिके वर्त्तमानायामित्यर्थः। सम्भोजनीयैरेकत्रैव भोजनयोग्यैरिति एकस्यामेव शिलायां तैः सह भोजनात्, तांस्तु सर्व्वानेकत्रैवोपवेश्य श्रीरामोऽमेलयदित्यभिप्रायेणाह–गोपैः सहापृथक्त्वात्तान् सर्व्वानेवीकरोतीति संकर्षणस्तेनान्वित इति। यद्वा, शिलायामिति जातावेकत्वं शिलास्वित्यर्थः, बहूनामेकस्यामसमावेशात्; ततश्च सम्भोजनीयैरिति पूर्व्ववत्, परितः पङ्क्तिशस्तान् मध्ये च श्रीबलराममुपवेश्य स्वयं परिवेषयन् सम्यग्भोजयन् बुभुज इत्यर्थः॥ २९॥ चर्व्वतो रोमन्थायमानान् वीक्ष्येति परेणान्वयः। संवेशादौ हेतुः–तृप्तानिति। तदानीं सर्व्वत्रैव कोमलतृणप्राचुर्य्येनैकत्रैव क्षणेनोदरपरिपूर्त्तिसुखसिद्धेः। चकार उक्तसमुच्चये, तेन तासामपि संवेशादिकं ज्ञेयम्। विशेषतस्तासां संवेशे हेतुः–स्वेति। एवं वृषादीनां यथोत्तरं संवेशादावाधिक्यमूह्यम्, प्राधान्याद्वृषादयोऽत्रोक्ता महिष्याद्याश्च ज्ञेयाः॥ ३०॥ तामुक्तां प्रावृषः श्रिय वनादिशोभाम्, यद्वा, तामनिर्व्वचनीयां प्रावृषः श्रियम्, ततश्च वनादिश्रीः प्रावृण्युपचर्य्यते, इत्यनुक्ताप्यन्या मृगमहिष्या शोभा ग्राह्या, तत्र किञ्चच्छ्रीविष्णुपुराणे (५।६।४२)–‘मेघपृष्ठे बलाकानां रराज विमला ततिः। दुर्वृत्तेवृत्तचेष्टेव कुलीनस्यातिशोभना॥’ इत्यात्मनः श्रीभगवतः शक्तिः कालरूपा, तयोपबृंहितां सम्वर्द्धितामित्यन्तो विशिष्टतां तथा कालस्यापि तत्र श्रीभगवत्सेवापरतां बोधयति। यद्वा, स्वसामर्थ्येनोपबृंहितामपि पूजयाञ्चक्रे, प्रीत्याऽश्लाघत, साध्वमन्यतेति वा। यतः सर्व्वेषामेव भूतानां प्राणिनां मुदमावहति, अविच्छेदेन प्रापयतीति तथा ताम्। सुखेति पाठेऽपि स एवार्थः, यद्वा, हंसाजादीनां प्रावृषि दुःखमाशंक्य तत्परिहारार्थमाह–स्वसामर्थ्यविशेषेणोपबृंहितामिति। अतस्तेषामपि सुखमभूदिति भावः। अन्यच्च तत्तत्क्रीड़ादिकमुक्तं श्रीपराशरेण (५।६।४५-४८)––

‘उन्मत्तशिखिसारंगे तस्मिन् काले महावने। कृष्णरामौ मुदा युक्तौ गोपालैः सह चेरतुः॥
क्वचिद्गोपैः समं रम्यं ज्ञेयनृत्यरतावुभौ। चेरतुः क्वचिदत्यर्थं शीतवृक्षतलाश्रयौ॥
क्वचित् कदम्बस्रक्चित्रौ मायूरस्रगलंकृतौ। विचित्रौ क्वचिदासातां विविधैर्गिरिधातुभिः॥
पर्णशय्यासुषुप्तौ च क्वचिन्निद्रान्तरैषिणौ। क्वचिद्गर्ज्जति जीमूते हाहाकारवेषिणौ॥’ इत्यादि।

एवमुक्तप्रावृट्क्रीड़ाविशेषेण तत्र व्रजे नितरां परमासक्त्या वसतोरिति तत्र शरच्छ्रीविशेषसम्पत्तिहेतुरुक्तः, अतः सम्यगभवत्॥ ३२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कदाचित्गृहादानीतं दध्यन्नं सलिलसमीपे स्थितायां शिलायां पात्रभूतायां सह भोजनीयैः गोपैः सह बुभुजे॥ २९॥ क्वचित् शाद्वलोपरि हरिततृणाकीर्णप्रदेशे उपविश्य वृषादीन् वीक्ष्य भगवान् सर्वभूतानां मुदमावहतीति तथा तामात्मशक्त्या स्वसङ्कल्पात्मिकया उपबृंहितां प्रवर्द्धितां तां प्रावृट्श्रियं पूजयाञ्चक्रे बहुमन्यतेत्यन्वयः। चर्वतो मीलितेक्षणान् दृप्तानिति च वृषानित्यस्य विशेषणं चर्वतः तृणानि खादतः मीलितानीक्षणानि यैस्तान् दृप्तान् गर्वितान् स्वोधसां भरेण भारेण श्रमो यासां ता गाश्च॥ ३०-३१॥ अथ शरदागममाह–एवमिति। तस्मिन् व्रजे इत्थं निवसतोः रामकेशवयोः शरत्समभवत् सम्यक् प्रवर्त्तत, कथम्भूता? विगतान्यभ्राणि यस्यां स्वच्छान्यम्बूनि यस्यामपुरुषः सुखस्पर्शोऽनिलो वायुर्यस्यां ततस्त्रयाणां कर्मधारयः॥ ३२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सम्भोजनीयैः सह भोक्तव्यैः॥ २९-३०॥ आत्मशक्त्युपबृंहितां सम्वर्धिताम्॥ ३१॥ व्यभ्रा विगतमेघा स्वच्छाम्बु तस्य विप्लुषितेन विप्लुषा बिन्दुना युतः अनिलः स्वच्छाम्बुप्लुषितानिलः स यस्यां सा तथा॥ ३२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्रापि स्वलीलायोग्यायोग्यतापादनार्थमात्मशक्त्या ह्लादिनीनाम्न्या उपबृंहिताम्॥ ३१-३३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उपानीतं छाक इत्यख्यया प्रसिद्धं गृहजनैः प्रापितं शिलायां सलिलान्तिक इत्यद्यापि कुण्डतटे भोजनस्थाल्यो दृश्यात् सर्वैरपि जनैः॥ २९-३१॥ शरदं वर्णयति—एवं निवसतोरित्यष्टादशभिः। स्वच्छान्यम्बूनि यस्याम् अपरुषोऽनिलो यस्यां सा च ता च सा॥ ३२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मीलितेक्षणशब्दोऽपि लिङ्गविपरिणामेन योज्य वृषान् वत्सतरान् मीलितेक्षणान् गाश्च मीलितेक्षणाः वीक्ष्य प्रावृट्श्रियं पूजयाञ्चक्र इति द्वयोरन्वयः ॥ ३०-३१ ॥ अथाष्टदशभिः शरदं वर्णयति-एवमिति । शरत् समभवत् सम्यक् प्रावर्त्तत कथंभूता व्यभ्रा विगतान्यभ्राणि यस्यां सा स्वच्छानि निर्मलान्यम्बूनि यस्याम् अपरुषः मृदुस्पर्शोऽनिलो यस्यां सा च सा च सा च तथा ।३२।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

उपानीतं गृहजनैः प्रापितः सम्भोजनीयैः सहभोजयितव्यैर्जातिभिः सहः संवादशब्दवत् समिति सहार्थकं सलिलान्तिके शिलायामुपविश्य ॥ २९ ॥ चर्वतो रोमन्थायमानात् अत्र पश्यन्निति शेषः । बुभुजे इति पूर्वस्थेनानुषङ्गः ॥ ३० ॥ आत्मशक्त्या ह्लादिन्या उपबृंहितां योषितां पूजयाञ्चक्रे श्लाघितवान् ॥ ३१ ॥ अथ शरदृतुं वर्णयति—एवमित्याद्यष्टादशभिः स्वच्छान्यम्बूनि यस्यां अपरुषोऽनिलो यस्यां सा च सा च सा ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भगवानात्मशक्त्युपबृंहितां स्वसामर्थ्योत्तेजितां सर्वभूतमुदावहां प्रावृषः श्रियं च वीक्ष्य तां पूजयाञ्चक्रे पदद्वन्द्वं । परन्तु नियतोऽनुप्रयोगः । तं पातया प्रथमासुरित्यादयस्त्वपभ्रंशा इति शेखराद्याकराः । चकारो वीक्ष्येत्यतीतश्लोकेऽन्वेतव्यमिति सूचयति ॥ २९ ॥ व्रजे एवं निवसतो रामकेशवयोः सतोर्व्यभ्रा विगतान्यभ्राणि मेघा यस्यां सा स्वच्छानि निर्मलान्यम्बूनि जलानि तेषां विप्लुडभिर्बिन्दुभिरितो युतोऽनिलो वायुर्यस्याः सा विप्लुषाः सञ्जाता अस्येति विप्लुषितः । विप्लुडित इत्यत एव नेति ज्ञेयं । शरदृतुः समभवत्प्रादुरभूत् ॥ ३० ॥ भ्रष्टानां योगभ्रष्टानां चेतांसि मनांसि शुकर्मवशात्पुनर्योगनिषेवया योगाभ्यासेन प्रकृतिं यान्तीव । प्राग्वार्युपरि वीथीपथोभिः कश्मलानि जलानि नीरजानां कमलादीनामुत्पत्त्या शारद्या शरत्सम्बन्धिन्या प्रकृतिं नैर्मल्यं ययुः प्रापुः ॥ ३१ ॥ आश्रमिणां प्रशस्ताश्रमचतुष्टयवतां कृष्णभक्तिः कृष्णसम्बन्धिनो भक्तिरशुभममङ्गलं भाव्यन्तरापतितेन दुष्कर्मणा हरति तथा व्योम्नो गगनादब्दं मेघसङ्घमभ्राणां शाबल्यं चित्रतां भुवः पङ्कमपां मलं च शरज्जहार ॥ ३२ ॥

श्रीसुबोधिनी

भगवतो लीलामाह **दध्योदनमिति**, गोपैर्गोपिकाभिर्यशोदया रोहिण्या वा तदानीमुप**नीतं** **दध्योदनं** **शिलायां** पर्वतसानुनि स्थूल आच्छन्नमेघे वर्षति सति **सलिलसमीप** एव जलार्थमन्यत्र गमनाभावाय **सम्भोजनीयैः** सजातीयैर्गोपैः सङ्कर्षणचान्वितो **बुभुजे**, एतद् भोजनं प्रावृषि तस्याः स्वसम्पत्तित्वख्यापनार्थं, अन्ये च गोपाला भिन्नतया बुभुजुर्बलभद्रेण सह फलाहारो वा ॥ २९ ॥ ननु गोषु विद्यमानासु ताभ्योदत्वा कथं भगवान् बुभुज इतिशङ्कां वारयति **शाद्वलोपरीति**, शाद्बलं हरिततृणवद्देशस्तत्र **संविश्य** **चर्वतो** रोमन्थं कुर्वाणान् तृप्तान् **वृषान्** **वत्सतरान्** **गाश्च** **ददृश** इतिसम्बन्धः, रोमन्थसमये न तेभ्यो देयं, त्रिविधा गणिताः, तत्र गोग्रासो देय इत्यधिकशङ्कायामाह **स्वोधोभरश्रमा** इति, स्वस्योधसो **भरेण** **श्रमो** यासां, एव सर्वेषां भोजनपानशयनविहारा निरूपिताः ॥ ३० ॥ एतादृशस्य वनस्य भगवत्कृतमभिनन्दनमाह **प्रावृट्श्रियमिति**, आधिदैविकी **प्रावृट्श्रीः** स्वकीया तत्र समागता, आधिदैविकीमपि **तां** **वीक्ष्य** **भगवान्** **पूजयाञ्चक्रे**, पूजायां हेतुत्रयं, **सर्वभूतसुखावहत्वमात्मनो** यावत्यः शक्तयस्ताभिरुपबृंहितत्वं चकारसूचितामाधिदैविकरूपत्वञ्च, तस्यां क्रीडित्वा तस्या अभिनन्दनं कृतवान् ॥३१॥ इदानीं पूर्वलीलामुपसंहरन् लीलान्तरकथनार्थं शरद्वर्णनमाहैवमित्यष्टादशभिः, सामान्यतः शरत्प्रवृत्तिरेकेन सप्तदशभिश्च तत्कार्याणि, तत्र प्रथमं तस्याः प्रवृत्तिमाह, **एवं** लीलां कुर्वाणयोस्तस्मिन्नेवं वने **निवसतो** **रामकेशवयोः** सतोर्व्रजे च निवसतोः **शरत्** **समभवत्**, वर्षासु भगवान् रेम इति ज्ञात्वा शरदपि समागता मय्यपि रंस्यत इति, तस्या वर्षातो वैलक्षण्यमाह **व्यभ्रेति**, वर्षायां गुणत्रयमुक्तं "मेघा विद्युत् स्तनयित्नव" इति तथास्या अपि गुणत्रयमाहाभ्राभावो जलगतमलनिवृत्तिर्वायोः परुषस्पर्शनिवृत्तिश्चेति, अनेन तदपेक्षया अस्या उत्तमत्वमुच्यते, सा हि **प्रवृत्तिधर्मरूपेयं** **निवृत्तिधर्मरूपा**, उपर्याकाशनैर्मल्यमधो जलनैर्मल्यं परितो वायुनैर्मल्यमिति यथा प्रवृत्तावुत्पत्तिर्मुख्या तदपेक्षयोत्पत्त्या नैर्मल्यं मुख्यं **भूम्यपेक्षया** **जलं** **महत्** **परिध्यपेक्षया** **च** **वायुः** **अत** **एवास्यां** **भगवान्** **रतिं** **करिष्यतीति**, **स्त्रीणामानन्दस्तत्र** **प्रतिष्ठित** इति ॥ ३२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

शरद्वर्णने **सा** **हि** **प्रवृत्तिरूपे**त्यादि । प्रवृत्तौ मालिन्यं निवृत्तौ नैर्मल्यं भवतीत्येतद्धर्मसाम्यादेवमुक्तम् । व्रजेपि लीलारूपष्वेव गोचारणकृष्यादिषु सक्ताः केचन भक्ताः, सर्वनिवृत्तिपूर्वकं स्वरूपमात्रपराः केचन । तथा च विशेषस्तत्तदुपयोगित्वेनापि तथात्वमभिप्रेतम् । तेनात्र प्रवृत्तिनिवृत्ती लीलारूपे ज्ञेये । कारिकाप्रतिश्लोकार्थोक्तौ **जलानामित्यारभ्य** **गोपिकानामित्यन्तेन** दशवाक्यानामर्थमुक्त्वाप्यचित्तस्यापीत्यनेनैकस्यार्थमुक्त्वाग्रिमवाक्यानामर्था भगशब्दार्था इति सर्वानशोभयदित्यनेनोक्त्वा गुणरूपत्वनेनैव चन्द्रादयो निरूपिता इत्याहुश्चन्द्रमानवा इत्यादिना ॥ ३२ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

दध्योदनमित्यत्र **सजातीयै**रिति परोक्षवादे भक्तैरित्यर्थः, अत्र **श्रीशक्तिः स्वसम्पत्तित्वख्यापनार्थ**मितिसुबोधिन्युक्तेः ॥ २९ ॥ **शाद्वले**त्यत्र **यशःशक्ति**र्ज्ञेयोधोभारस्यात्यन्ततृप्तिकार्यत्वेन सूचितत्वाद् गोग्रासदानेप्यग्रहणान् न तद्दानमित्यपि ज्ञेयम् ॥ ३० ॥ **एवं निवसतो**रित्यनेनेति वर्षाविलक्षणगुणत्रयकथनेन, तदुपपादयन्ति सा हि **प्रवृत्तिधर्मरूपे**त्यादि, एतद्रूपत्वं टिप्पण्यां स्फुटीकुर्वन्ति **प्रवृत्ता**वित्यादि, **तथात्व**मिति प्रवृत्तिनिवृत्तिरूपत्व, **सुबोधिन्यामुत्पत्तिमुख्ये**ति भूमिगुणरूपा सर्वजीवोत्पत्तिर्वर्षासु लीलोपयोगिनी, **उत्पत्त्या नैर्मल्य**मिति स्वभावत आकाश**नैर्मल्यं** शरदि लीलोपयोगि, **जलं महदि**ति क्रीडोपयोगित्वात् **महत्**, **परिध्यपेक्षये**ति **परिधि**विद्योतने दृष्टिसुखमात्रं वायुनैर्मल्ये तु स्पर्शसुखमपीति क्रीडोपयोगित्वात् तथेत्यर्थः, अत्र गमकमाहुर**त एवे**त्यादि **त्रिविधनैर्मल्येन** क्रीडोपयोगित्वादेव **भगवा**नित्यादिनोक्तं सेत्स्यतीत्येतदेव तद्गमकमित्यर्थः, **जलानामि**त्यादिकारिकासु श्लोकान् विभज्य तात्पर्यं टिप्पण्यामाहुः **प्रतिश्लोके**त्यादि, **गुणरूपत्वेने**ति भगवद्गुणरूपत्वेन, **सुबोधिन्यां** कारिकासु **विमुक्तिना**मिति **विमुक्त**मस्यास्तीति **विमुक्ती** तेषां, **कार्यमेताव**दिति शुद्धिलक्षणं, तत्र हेतु**र्भगवा**नित्यादि ॥ ३२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

दध्योदनमित्यत्र भोजनक्रियायां गोपानां सहभाव उक्तः, सङ्कर्षणेन सह स्थितिमात्रमुक्तं तत्तात्पर्यं प्रथमपक्षे विशदं न जातमित्यरुच्या पक्षान्तरमाहु**रन्ये चेति**, **भिन्नतये**ति भिन्नपात्रे इत्यर्थः, सम्भोजनीयत्वस्य तावन्मात्रेणैव सिद्धेरितिभावः, **बलभद्रेण सह तु फलाहारः** पूर्वश्लोके उक्त एव, अतोत्र सहस्थितिमात्रमुक्तमित्यर्थः ॥ २९ ॥ **एवं निवसतो**रित्यत्र वर्षास्विति "**वर्षा** ऋतुना"मित्यादिवाक्येभ्यो बहुत्वं प्रमाणसिद्धमितिभावः, **उत्पत्तिर्मुख्ये**ति विस्फूर्जनस्य रजोरूपत्वं पूर्वमुक्तमतो विस्फूर्जनस्योत्पत्तित्वं, सर्वसत्त्वेत्यनेन पूर्वं भूमिरुक्तेति ज्ञेयं, **अत एवेति** उत्तमत्वादेवेत्यर्थः, उत्तमत्वाद् रतिकरणमतः स्त्र्यानन्दप्रतिष्ठा, तदाऽशुद्धिसम्भावनया शुद्धिर्बोधनीयेत्यतः सङ्ख्यातात्पर्येण सा बोधितेत्यर्थः, **प्रवृत्ति**रिति वक्तव्येतिशेषः, **षोडशेति मनसः** षोडशकलत्वात् तत्सहितस्येत्यर्थः, कारिकान्ते **एताव**दिति भगवत्कृता सर्वशोभेत्यर्थः, तत्र शरदः प्रयोजकत्वात् तत्कार्यत्वम् ॥ ३२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

दध्योदनमित्यस्य विवृत्तौ **गोपैर्गोपिकाभिर्यशोदया रोहिण्या वा तदानीमुपनीत**मिति णीञ् प्रापणे इत्यस्य धातोः प्रयोज्यकर्तृव्यापाररूपनयनार्थकत्वमादाय **गोपैर्गोपिकाभि**रित्युक्तं, प्रयोजककर्तृव्यापाररूपप्रेषणात्मकनयनार्थकत्वमादाय **यशोदया रोहिण्या** वेत्युक्त, तथा च प्रयोजककर्त्र्या श्रीयशोदया रोहिण्या वा प्रेषितं प्रयोज्यकर्तृभिर्गोपैः प्रयोज्यकर्त्रीभिर्गोपिकाभिर्वा तत्र भगवन्निकटे प्रापितमेतावानर्थ **उपानीत**पदस्येतिबोद्धव्यम् ॥ २९ ॥ **प्रावृट्श्रिय**मित्यस्य विवरणे **आत्मनो यावत्यः शक्तय** इति इह **शक्ति**पदेन परोक्षरीत्या व्रजस्त्रीरत्नान्येव ग्राह्याणि, "पुरुषः शक्तिभिर्यथे"ति शक्तिदृष्टान्तेन तासां भगवच्छक्तिरूपतायाः श्रीशुकैरुक्तत्वात्, अत एवाग्रिमेष्टादशाध्याये "अत्रापि पूर्ववदाधिदैविकीभिः शक्तिभिर्लीला वक्तव्ये"ति वक्ष्यन्ति "पूर्ववत्" वर्षर्तुवत् इत्यर्थः ॥ ३१ ॥ **शरत् समभवद् व्यभ्रे**त्यस्य व्याकृतौ **अत एव अस्यां भगवान् रति**मिति साधनसिद्धव्रजसुन्दरीणां फलप्रकरणोक्तां फलरूपां **रासक्रीडादिरूपां रति**मित्यर्थः, सामान्यतो रतिस्त्वत्राप्यस्तीतिभावः ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सङ्कर्षणेनान्वितः सहितः श्रीकृष्णः सम्भोजनीयैः सह भोजनयोग्यैः सखिभिर्गोपैः सह सलिलस्यान्तिके समीपे शिलायामुपविश्य गृहादुपानीतं दध्योदनं बुभुजे ॥ २९ ॥ शाद्वलं हरिततृणविशिष्टो देशः । तदुपरि संविश्य चर्वतो वृषादीन् तथा तां वृन्दावनस्थामत्यपूर्वां प्रावृट्श्रियं च वीक्ष्य भगवान् तां पूजयांचक्रे बह्वमन्यतेति द्वयोरन्वयः । तेषामुपवेशे हेतुमाह—तृप्तानिति यथेष्टचरणेन तृप्तान् । अत एव सुखेन मीलितेक्षणान् ॥ ३० ॥ श्रियोऽपूर्वत्वमेवाह—सर्वभूतमुदावहामिति । सर्वप्राणिनां परमानन्दजनिकामित्यर्थः । तत्र हेतुमाह—आत्मनः शक्त्या आह्लादनीनाम्न्या उपबृंहितां संवर्द्धितामित्यर्थः ॥ ३१ ॥ एवं प्रावृट्क्रीडां निरूप्य शरच्छ्रियमनुवर्णयति —एवमित्यष्टादशभिः । एवं क्रीडापरत्वेन तस्मिन् व्रजे रामकृष्णयोर्निवसतोः सतोः शरत् समभवत् । तां वर्णयति —विगतानि अभ्राणि यस्यां सा । स्वच्छानि अम्बूनि यस्याम्, अपरुषः शान्तोऽनिलो यस्यां सा च सा च ॥ ३२ ॥

अन्वितार्थप्रकाशिका

दधीति ॥ सङ्कर्षणेनान्वितः सहितः श्रीकृष्णः संभोजनीयैः सह भोजनयोग्यैः सखिभिर्गोपैः सलिलस्यान्तिके समीपे शिलायामुपविश्य गृहादुपानीतं दध्योदनं बुभुजे । अद्यापि कुण्डतटे भोजनस्थल्यो लोकैर्दृश्यन्ते ॥ २९ ॥ शाद्वलेति द्वयम् ॥ शाद्वलं हरिततृणविशिष्टो देशः तदुपरि संविश्य तृणं रोमन्थेन चर्वतः तृप्तान् मीलितेक्षणान् वृषान् वत्सतरान् दम्यान् स्वस्य ऊधसो भारेण श्रमो यासां ताः गाश्च वीक्ष्य तथा सर्वभूतानां मुदावहाम् आत्मनः शक्त्या आह्लादनीनाम्न्या उपबृंहितां संवर्द्धितां तां प्रावृट्श्रियं च वीक्ष्य भगवान् तां पूजयांचक्रे बह्वमन्यत ॥ ३०-३१ ॥ एवमिति ॥ एवं क्रीडापरत्वेन तस्मिन् व्रजे रामकेशवयोर्निवसतोः सतोः विगतानि अभ्राणि यस्यां स्वच्छानि अम्बूनि यस्याम् अपरुषः शान्तः अनिलो यस्यां सा च सा च शरत्समभवत् ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

संभोजनीयैः संभोजयितुमर्हैः ।। २९ ।। शारदाः हरिततृणानि विद्यंते यस्यां सा शाद्वला भूमिस्तस्या उपरि भक्षिततृणां पुनश्चर्वंतो वृषादीन् संविश्य स्थापयित्वा सम्यक् ऊधोसंभारेण श्रमो यासां भारेण श्रमो यासां ताः गाः ।। ३० ।। आत्मशक्त्या स्वकालशक्त्या उपबृंहितां बृंहिप्रापितां ।। ३१ ।। इदानीमध्यायशेषेण शरच्छोभां वर्णयन्नाह एवमिति व्यभ्रा अभ्रैर्वर्जिता स्वछांबुर्निर्मलजला चासौ अपुरुषानिलाशांतवाता च शरत् ।। ३२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दध्योदनमिति ।। कदाचिदिति शेषः । उपानीतं स्वगृहादानीतं, दध्योदनं दधिसहितं भक्त, सलिलान्तिके स्वच्छपानीयसमीपे, शिलायां पात्रभूतायां, संकर्षणान्वितः भगवान्, संभोजनीयैः सहभोक्तव्यैः, गोपैः सह, बुभुजे ॥ २९ ।। शाद्वलोपरीति ॥ प्रावृडिति च ।। क्वचित् शाद्वलोपरि हरिततृणाकीर्णप्रदेशे, संविश्य उपविश्य, चर्वंतो रोमन्थं कुर्वाणान्, मीलिते ईक्षणे येषां तान्, तृप्तान् वृषान्, वत्सतरान्, स्वोधोभरेण स्वापीनभारेण श्रमो यासां तास्ताः, गाश्च वीक्ष्य, भगवान्, सर्वेषां भूतानां मुदमावहतीति तां, आत्मशक्त्या स्वसंकल्पात्मिकया शक्त्या उपबृंहितां प्रवृद्धिं गतां तां, प्रावृट्श्रियं वर्षर्त्तुलक्ष्मीं च वीक्ष्य, पूजयांचक्रे बह्वमन्यत । इति द्वयोरेकान्वयः ।। ३०–३१ ।। अथ शरदागममाह ।। एवमिति ।। तस्मिन् प्रसिद्धे व्रजे, एवमित्थं, निवसतोः रामकेशवयोः, विगतान्यभ्राणि यस्यां सा, स्वच्छान्यम्बूनि यस्यां सा अपरुषः सुखस्पर्शः अनिलो वायुर्यस्यां सा च सा च, शरत् शरदृतुः, समभवत् प्रावर्त्तत ।। ३२ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दध्योदनमिति : १०.२०.२९.

क्वचित्स्वयं चापि सुयोगयुक् प्रभुर्जडेऽप्यतिस्वच्छरसेऽतिनिर्मले ।
सहाप जीवैरनुसारभोजिभिर्भुङ्क्ते स्वसत्त्वं त्विति स व्यबोधयत् ।। ३९ ।।
तत्त्वज्ञाद् योगिवर्यादपि भवविपिने प्रीतिदं भूरि मन्ये भक्तं प्रेमामृताक्तं जडमपि हृदयं भक्तिभाजां तवास्मिन् ।
स्पष्टं चैतद् गुहायां तरुवरविवरे कन्दमूलादिबाह्ये श्रीश त्वं भुक्तवानस्यभिलषितमलं चारुदध्योदनं यत् ।। ४० ।।

शाद्वलेति : १०.२०.३०.

युक्तमक्षीणि सम्मील्य योगिनोऽच्युतचिन्तकाः । चित्रमत्र तु संयुक्ता गावोऽप्यासंस्तथाविधाः ।। ४१ ।।

प्रावृट्श्रियमिति : १०.२०.३१.

सूर्यादिद्विजरोधिनीं जडमयीमत्यन्तपङ्कोद्भवां प्रायः पङ्किलजीवनां कलिमिव प्रावृट्श्रियं श्रीपतिः ।
अस्त्येषाऽपि समस्तमामकविभूत्यन्तर्गतेति प्रभुर्लीलालम्बित-चारुदेहवसितस्तां पूजितामादधे ।। ४२ ।।
भूयः सत्सुखहा निदाघसमयोऽप्यासीद्वसन्ताधिकश्रीः श्रीमाधवनीरदोदित-कृपासारामृतासारतः ।
एषा तु स्फुटमेव सत्सुखगतिर्नित्यामृतेड्याधरा गोपीवन्नयनोत्सवाय समभूत् प्रावृट् तदेतत्क्षमम् ।। ४३ ।।
कान्तोल्लासि भुजङ्गमञ्जुशयनो यः पल्लवालङ्कृतो राकोत्फुल्लतानुकूलगतिमत्सौगन्ध्यरम्यस्थितिः ।
यां सोऽपि प्रसमीक्ष्य सत्त्वविभवां चित्राम्बरां माधवः सर्वर्तुप्रभुरुत्सुको यदभवत्तत्प्रावृडीड्योचिता ।। ४४ ।।
श्रीगोविन्दहृद्गद्घनिः सृतकृपापीयूष-सिताङ्कुकाः पाला एव न केवलं सपशवोऽस्तापाश्च जातास्तदा ।
किन्त्वद्रिद्रुमवीरुदश्म-विपिनारामाभिरामाऽवनिः सर्वाऽऽसीत् सरसेत्यबोधि मुनिना प्रावृट्प्रशंसाकृता ।। ४५ ।।
कृत्वा कृष्णकृपामपारसुखदां दावाग्नितापापहां भक्तान् यत्सुर सार्थवृद्धिविभवैः पुष्णासि तृष्णाकुलान् ।
एतत् त्वद्व्रतपालनैक-निपुणप्रज्ञं स यज्ञोद्भवं पर्जन्यं यदवर्णयन् मुनिरिदं युक्तं न को वा वदेत् ।। ४६ ।।
मधुहाऽपि माधवोऽसौ श्रावणरसदो बभूव चित्रमिदम् । निर्मल-गोकुलभाजां चित्रान्तरमपि यदा स भाद्रपदः ।। ४७ ।।
पङ्को वा कीर्तिर्वा वसुविनियोगाद्यथा कलौ भवति । नान्ययुगेषु तथेति प्रायोऽन्तिमयुगमरूपि तन्मिषतः ।। ४८ ।।
एवं व्यङ्ग्यपथा चतुर्युगगतिं प्रादर्श्य भूयः कृताद्यारम्भं प्रविवक्षुणा च मुनिना प्रायः शरद्वर्णनम् ।
तत्तद्धर्मनिदर्शनार्थविलसद्-दृष्टान्तजातं समारब्धं भाति सुधीभिरप्यनुपदं द्रष्टव्यमीत्योज्झितम् ।। ४९ ।।

शरदिति : १०.२०.३२.

नास्त्यधुना मेघांशः पृथक् पृथग् वागुदेति निखिलमुखात् । स्पष्टं यदा तदैव कृतयुगसंस्थेत्यभूत् स्फुटं शरदि ।। ५० ।।
यदा विष्णुपदं भाति शुद्धं भूतगणस्तथा । तत एव स्फुटं ज्ञेया कृतादि-त्रियुगस्थितिः ।। ५१ ।।

कृष्णप्रिया

कभी जल के पास ही किसी चट्टान पर बैठ जाते और बलरामजी तथा ग्वाल-बालों के साथ मिलकर घर से लाया हुआ दही-भात आदि के साथ खाते ॥ २९ ॥ वर्षा ऋतु में बैल, बछड़े और थनों के भारी भार से थकी हुई गौएँ थोड़ी ही देर में भरपेट घास चर लेती और हरी-हरी घास पर जुगाली करती रहती, वर्षा ऋतु की सुन्दरता अपार थी वह सभी प्राणियों को सुख पहुँचा रही थी इसमें सन्देह नहीं कि वह ऋतु, गाय, बैल, बछड़े सब के सब भगवान की लीला के ही विलास थे फिर भी उन्हें देखकर भगवान बहुत प्रसन्न होते और बार-बार उनकी प्रशंसा करते ॥ ३०–३१ ॥ इस प्रकार श्याम और बलराम बड़े आनन्द से व्रज में निवास कर रहे थे । इसी समय वर्षा बीतने पर शरद ऋतु आ गई । अब आकाश में बादल नहीं रहे, जल निर्मल हो गया, वायु बड़ी धीमी गति से चलने लगी ॥ ३२ ॥

[1]शरदा नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः । [2]भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ॥ ३३ ॥
व्योम्नोऽब्दं [3]भूतशाबल्यं भुवः पङ्कमपां मलम् । शरज्जहाराश्रिणां [4]कृष्णेभक्तिर्यथाशुभम् ॥ ३४ ॥
सर्वस्वं जलदा हित्वा [5]विरेजुः शुभ्रवर्चसः । यथा त्यक्तैषणाः शान्ता मुनयो मुक्तकिल्बषाः[6] ॥ ३५ ॥
गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः [7]शिवम् । यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—नीरजोत्पत्त्या शरदा नीराणि, योगनिषेवया भ्रष्टानाम् चेतांसि इव पुनः प्रकृतिम् ययुः ।। ३३ ।। कृष्णे भक्तिः आश्रमिणाम् अशुभम् हरति, तथा शरद् व्योम्नः अब्दम् भूतशाबल्यम् भुवः पङ्कम्, अपाम् मलम् जहार ॥ ३४ ॥ त्यक्तैषणाः मुक्तकिल्बिषाः शान्ताः मुनयः यथा शुभ्रवर्चसः भवन्ति तथा जलदाः सर्वस्वम् हित्वा शुभ्रवर्चसः विरेजुः ॥ ३५ ॥ ज्ञानिनः ज्ञानामृतम् यथा काले ददते, न, वा ददते, तथा, गिरयः क्वचित् शिवम् तोयम् मुमुचुः क्वचित् न मुमुचुः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्यक्तैषणाः त्यक्ताः पुत्रवित्तलोकैषणा यैस्ते ॥ ३३ ॥ गिरय इति । अयं भावः । न ह्यु पाध्यायाः कर्मविद्यामिव ज्ञानिनो ज्ञानामृतं सर्वतो वितरंत्यपि तु कृपया क्वचिदेव । एवं गिरयः शिवं निर्मलं तोयं क्वचिन्मुमुचुः क्वचिन्न । न पुनः प्रावृषीव सर्वत इति ॥ ३४ ॥ गाधे क्षुद्रे जले चरंतीति तथा ते मीनादयः ॥ ३५ ॥ अविदन् लेभिरे ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सर्वस्वम् सर्वेषां स्वं धनं धनोत्पादकं जलम्, जलादेव सर्वधनोत्पत्तेः प्रसिद्धत्वात् । शुभ्रवर्चसः शुक्लवर्णाः 'शुक्लशुभ्रशुचिश्वेत –' इत्याद्यमरोक्तेः । "वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि । पुंसि चंद्रस्य तनये" इति मेदिनी । पुत्रैषणा तु–पुत्रा मे भवेयुस्ते च श्रुतशीलाचारयुक्ताश्चिरजीविनो धनिनो यशस्विनश्च भवेयुरित्येवंरूपा, वित्तैषणा तु–वित्तं मे बहु भवेद्व्ययश्चाल्पो भवेद्यथाकथं धनसमृद्धिर्मे भवत्वित्येवंरूपा, लोकैषणा तु–लोका मां सर्वे श्लाघयंतु कोऽपि मां न निंदेत्सुखं च मेऽत्र परत्र च स्यादित्येवंरूपा ज्ञेया । मुक्तकिल्बिषाः त्यक्तवासनाः ॥ ३३ ॥ ननु सर्वदा सर्वेभ्यः किमर्थं न ददतीत्याह–अयं भाव इति । उपाध्याया वेदांतातिरिक्तशास्त्राध्यापका यथा कर्मविद्यां सर्वेभ्यो ददति नैवं ज्ञानिनोपीत्याह–अपीति । प्रावृषीव वर्षताविव सर्वत्र नेति भावः ।३४। गाधजलेचराः अल्पांबुवासिनो मत्स्यादयः । क्षीयमाणम् शुष्यमाणम् । अविदन् प्रापुः । क्षय्यम् क्षेतुं शक्यं क्षीयमाणमिति यावत् ।३५। शरदर्कःशरदृतुसूर्यः, तज्जम् । एतेन कुटुंबिनो गृहक्लेशं सहंते न तु तत्त्यजंतीति भावः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तेषामुत्तरपक्षे नीरजोत्पत्त्या सहेति योज्यम् ॥ ३३ ॥ यथा कृष्णे जाता भक्तिरेका सर्वेषामेवाश्रमिणामशुभं महाकष्टमयं तत्तद्धर्मानुष्ठानं हरति —

"तावत्कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते" ॥ इत्यादेः ।

तथा शरदप्येका व्योमादेरावरकत्वात् कष्टमयमब्दादिकं जहार एवं कष्टमयत्वेनैव साम्यं क्रमरीत्या तत्तद्विशेषयोः साम्यव्याख्यायामपि लक्षणापरम्परया तत्तदनुष्ठानसामान्य एव पर्य्यवासानत् कामादिवासनानां गुरुसेवादिमदाश्रमान्तःपाताभावात्तद्वासनाक्षयार्थयमनियमाद्यनुष्ठान एव तात्पर्यात् किं बहुना यतीनामव्यक्तासक्तचित्तादित्त्वमपि कष्टमेव "क्लेशोऽधिकतरस्तेषाम-

---

१. शारदा–वीर, । २. यथा भ्रष्टानि चेतांसि–वीर. । ३. ब्दमभ्रमाशाबल्यं–विज. । ४. कृष्णभक्ति–वीर. विज. । ५. न रेजुः–च. पु. टी. । ६. मुक्तकल्मषाः–वीर. विज. । ७. स्वयम्–गो. प्रे. टो. ।

व्यक्तासक्तचेतसाम्" इति श्रीभगवद्गीताभ्यः अन्यत्तैः तत्र गुर्वर्थोदकाहरणकुम्भमिति गुर्वर्थमुदककुम्भाहरणासुखमित्यर्थः। कामादिवासनामलमिति तद्वासनारूपासुखमित्यर्थः । एवं साङ्कर्य्यमित्यर्थः । तज्जनिताऽसुखमित्यर्थः । किन्त्वाश्रमित्वं न हरतीति तस्मात् भ्रंशस्तु न विवक्षितः ॥ ३४ ॥ किल्बिषं संसारहेतुः कर्मतत्त्यागादेव त्यक्तैषणाः तस्मादेव शान्ता अक्षुभितचित्ताः ॥ ३५ ॥ गिरय इति तैर्व्याख्यातं तत्र कृपायां हेतुः पात्रसाद्गुण्यं ज्ञेयं गिरिपक्षेऽपि गङ्गायमुनादिखातरेखास्वेव न तु क्षुद्रखातरेखास्विति क्वचिद्ग्रहणार्थं मोचनविषयस्यैवोभयत्र विवक्षित्वं नतु तदाश्रयस्येति ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भ्रष्टानां केनचिद्विघ्नादिना योगात् स्खलितानामतोऽशुद्धतां गतानि चेतांसि यथा पुनः शुद्धतां यान्तीत्यर्थः। अब्जादीनां हरणाक्रमाद्यपेक्षया तथैवोक्तिः ॥ ३३ ॥ कृष्णे सर्व्वदुःखहरे भगवति, अन्यत्तैर्व्याख्यातम् । यद्वा, यथा कृष्णे जाता भक्तिरेका सर्व्वेषामेवाश्रमिणां ब्रह्मचार्य्यादीनामशुभं तत्तदाचारदुःखं हरति, (भा. ११।२०।९) 'तावत् कर्म्माणि कुर्व्वीत' इत्यादिवचनप्रामाण्यतस्तत्तत्कर्म्मपरित्यागेन तत्तदायासापगमात्, एतच्च श्रीभगवद्भक्तिविलासे एकान्तिलक्षणादौ विवृतमेवास्ति । एवमेकापि शरद् व्योमादीनां चतुर्णां नैर्म्मल्यमापादयदित्यर्थः ॥ ३४ ॥ त्यक्तैषणत्वादेव शान्ता रागादिरहिताः, मुक्तं किल्बिषं भक्ति-विघ्नत्वेन किल्बिषतुल्यं शुष्कं ज्ञानं यैः; कलमषा इति पाठान्तरेऽप्यर्थः स एव । एवं शुभ्रवच्चैः साम्यम्, अतएव विशेषेण पूर्व्वतोऽप्याधिक्येन राजन्ति शोभन्ते यथा ॥ ३५ ॥ गिरय इति तैर्व्याख्यातमेव, यद्वा, शिवं निर्म्मलं क्वचित् कदाचित् मुमूचुः, क्वचिच्च न निर्म्मलं मुमुचुः, किन्तु मलिनमेव, प्रायो वृष्टयभावेनाप्लवमात्रावशिष्टस्यैव रक्षणात्, यथा ज्ञानामृतमुत्तमज्ञानं भक्तिमाहात्म्यविषयकं तत्तत्त्ववेदिनः काले स्वस्य भक्तस्य वा प्रेमोद्रेकसमये तस्मै ददति, अन्यदा त्वात्मादिविषयमेव तुच्छज्ञानं ददतीत्यर्थः ॥३६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ मुमुक्षूणां हितं दर्शयन्निव समीचीनैर्दृष्टान्तैः शारदान् धर्माननुवर्णयति — शारदानित्यादिना यावदध्यायसमाप्ति। पूर्वं शारदानि शरत्सम्बन्धीनि नीराणि जलानि निर्मलान्येव स्थितानि अन्तरा प्रावृषि रजोत्पत्त्या पङ्कप्रादुर्भावेन भ्रष्टानीत्युत्तरस्मादध्याहर्त्तव्यं पुनः प्रकृतिं स्वस्वभावं ययुः यथा योगिनां चित्तानि निर्मलान्येव क्वचिद्योगाद्भ्रष्टान्यपि पुनरपि पुनर्योगनिषेवया प्रकृतिं यान्ति तद्वत् योगभ्रंशेन चित्तकालुष्ये सति पुनर्योगमेव सेवतेति शिक्षितं । शरदा नीरोजोत्पत्त्येति पाठान्तरं नीरजानामुत्पत्तिर्यस्यां तया शरदा हेतुभूतया नीराणि प्रकृतिं स्वच्छत्वाप्रकृतिविकारित्वशान्तत्वादिरूपां ययुः उत्तरार्द्धं तु पूर्ववत् ॥ ३३ ॥ व्योम्न इति । क्रमेण व्योमभूतपृथ्वीजलानां चतुर्णामभ्रशाबल्यपङ्कमलानि चत्वारि शरदहरत् यथा चतुर्णामाश्रमिणामशुभं कृष्णभक्तिर्हरति तद्वत् । तत्राब्दं मेघं भूतानां ज्योतिः सलिलमरुतां शाबल्यं सम्पर्कं वर्षासु तेषां मिथः सम्पर्कात् शरदि तन्निवृत्तेरितिभावः । यथा कृष्णभक्तिः ब्रह्मचारिणो गुरूपदिष्टार्थग्रहणप्रतिबन्धकमज्ञानात्मकमशुभं हरति यथा च गृहस्थस्य विषयसङ्गदोषं वनस्थस्य कदाचिदशक्त्या स्वाश्रमोचितधर्माननुष्ठानप्रयुक्तप्रत्यवायं यथा च यतिनः कृष्णप्राप्तिप्रतिबन्धकं पुण्यपापात्मकं सवासनं कामादिदोषरूपमशुभं हरति तथेत्यर्थः । अनेनावश्यं चतुर्भिरप्याश्रमिभिः कृष्णभक्तिः कार्येत्युक्तम् ॥ ३४ ॥ सर्वस्वमिति । जलदा मेघाः सर्वस्वत्वभूतं जलं हित्वा शुभ्रं वर्चो येषां तथाभूता विरेजिरे यथा मुनयो भगवन्मननशीलास्त्यक्ता दारधनपुत्राणां ईषणाः यैस्तथाभूताः निरस्तपापाः विराजन्ते तद्वत् अनेनावश्यं मुनिभिरीषणास्त्याज्या इत्युक्तम् ॥ ३५ ॥ गिरय इति । पर्वताः क्वचिन्निर्मलं जलं मुमुचुः क्वचित् न मुमुचुश्च ज्ञानिनो यथा क्वचित्तत्त्वत्रययाथात्म्यज्ञानात्मकममृतं केभ्यश्चिच्छूषुभ्यो ददते केभ्यश्च न ददते अनेन सर्वेभ्योपि प्रष्टृभ्यो नोपदेष्टव्यं ज्ञानिभिर्ज्ञानमित्युक्तं, तथैवोक्तं भगवता —

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥" इति ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

शारद्या शरत्सम्बन्धिन्या नीरजानां पद्मानाम् उत्पत्त्या प्रकृतिं स्वच्छतां योगभ्रष्टानां पुनर्योगनिषेवया योगाभ्यासेन ।३३। शरद्व्योम्नः अब्दम् अर्थिभ्यो जलस्य दातारं मेघं जहार वर्षाकालो विरत इत्यर्थः । ततोऽभ्रमशाबल्यम् अभ्रं जलं दधत् मेघः न तु वर्षणं कुर्वन् तन्निमित्तं शाबल्यं व्योम्नः निःस्रवणं जहार अभ्रच्छायाभावात् भुवः पङ्कं कर्दमम् अपां मलं कालुष्यं च अहरत् तत्तदाश्रमोक्तानुष्ठानं यथावत्स्थितिसूचनायाश्रमिणामित्युक्तम् अशुभं पातकम् ॥ ३४ ॥ सर्वस्वं जलं शुभ्रवर्चसः धवलवर्णाः त्यक्ताः पुत्रादिदुष्टैषणा यैस्ते तथा ॥ ३५ ॥ शिवं जलं जान्वाननूपानूपस्थलभेदाभिप्रायेण निरीक्षेणाञ्जनमोक्षामोक्षौ ज्ञानिनां ज्ञानदानादाने योग्यायोग्यमुहूर्त्तामुहूर्त्तकालभेदविवक्षयेति ज्ञातव्यम् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

व्योम्नोऽब्भ्रमिति साधनक्लेशेन तुल्यं क्लेशश्चात्र क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसामित्यत्र श्रीगीतासूक्तेः ।३४-४०।

नीरजानामुत्पत्तिर्यस्यां तया शरदा हेतुना अत्र भक्तियोगनिषेवया साम्यं शरदः भगवत्स्फुरणेन साम्यं नीरजस्येतीयमुपादेया ॥ ३३ ॥ व्योम्न इति । व्योमादीनां चतुर्णां चतुरो मलान् शरज्जहार यथा आश्रमिणां चतुर्णां सत्सङ्गप्रादुर्भूता भक्ति

अशुभम् आश्रमानुष्ठेयकृत्यरूपम् अमङ्गलं दुःखं यथा हरति भक्तिमतां वर्णाश्रमधर्मानधिकारादेव तत्तदकरणात् तथाहि ब्रह्मचारिणां कर्मिगुरुपसत्तिप्राप्तगोचारणादिक्लेशं भक्तिर्यथा हरति तथा शरत् व्योम्नोऽभ्रमावरकं मेघम् अभ्रमिति पाठः यथा च गृहिणः श्राद्धादिविधिप्राप्तकुटुम्बादिसाङ्कर्य्यक्लेशं भक्तिर्हरति तथा शरदि भूतानां शाबल्यं वर्षासु वृष्टिभयादेकत्र वसतां सम्मर्दं हरति शरदारम्भ एव तेषां पृथक् पृथक् स्थानगमनात् यथा च वनस्थस्य मलधारणक्लेशं भक्तिर्हरति एवं भुवः पङ्कं शरत् यथा च यतीनां ब्रह्मजीवैक्यभावनाक्लेशरूपं मालिन्यं भक्तिर्हरति "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" इति गीतोक्तेः एवमपां मलं शरदित्युपादेया ।। ३४ ।। त्यक्तैषणाः त्यक्ताः पुत्रवित्तलोकैषणाः यैस्ते इतीयमुपादेया ॥ ३५ ॥ ज्ञानामृतं भगवत्तत्त्वोपदेशं ज्ञानिनो नारदभरतप्रह्लादादयः व्याधरहूगणदैत्यबालकादिषु ददते अन्यत्र न ददते इति कृतार्थीबुभूषयैवोपादेया तेषां गिरिणां च स्वभाव एवायमचिन्त्यत्वान्नाऽत्र युक्तिर्योजनीया पात्रसाद्गुण्यादेर्हेतुत्वे तेषां तुल्यदर्शित्वं तत्कृपायाश्च निरुपाधित्वं व्याहतं स्यादित्यवधेयम् ।। ३६ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नीरजानामुत्पत्तिर्यया शरदा कृत्वा नीराणि प्रकृतिं प्रावृट्सङ्गजदोषपरित्यागपूर्वकं स्वकीयन्निर्मल स्वभावं ययुः भ्रष्टानां दुष्टसंसर्गेन मलिनचित्तानाम् ॥ ३३ ।। व्योम्ना इति मुमुक्षोर्ब्रह्मचारिणः समावर्तनमशुभमेव गृहाश्रमे महागर्ते पतितस्यैव प्रायः पुनर्निर्गमासम्भवात् वनितातनयादिवशीभूतस्य वैराग्यासम्भवात् अत एवोक्तं "कौमारे आचरेत् प्राज्ञः" इत्यादि जाता तु कृष्णे भक्तिस्तदशुभं हरति श्रीकृष्णस्वरूपगुणादियाथात्म्योपदेष्टृश्रीगुरुसेवानुरूपे नैष्ठिके ब्रह्मचर्ये श्रीकृष्णसाधने मुमुक्षुं स्थापयति "यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये" इति श्रीमुखवचनात् गृहस्थस्य वनितातनयादिसाङ्कर्यं परमात्मस्वरूपादिश्रवणमननादिप्रतिबन्धकतयाशुभमेव तत् सा हरति "मत्कृतेत्यक्तकर्मणः त्यक्तस्वजनबान्धवा" इत्युक्तत्वात् वनस्थस्य मलधारणक्लेशरूपमशुभं सा हरति कृष्णभक्तौ जातायां मालिन्यस्य दूरतो हेयत्वात् यतीनां च एकलत्वेन भ्रमणरूपमशुभं सा हरति बहुकृष्णदाससंयुते तीर्थे तं स्थापयति एवं चतुर्णामाश्रमिणां यथा कृष्णे भक्तिरशुभं हरति तथा व्योमादिनामब्दादीन् शरत् जहार अहरदित्यर्थ ।। ३४ ।। शुभ्रं शुभं वर्चो येषां त्यक्ता ऐहिकामुष्मिकभोगेषणा यैस्ते ।। ३५–३६ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

नीरजानामुत्पत्तिर्यस्यां तया शरदा हेतुना प्रकृतिं स्वच्छताम् उपादेयेयम् ।। ३३ ।। व्योमादीनां चतुर्णां चतुरो मलानब्दादिरूपान् शरज्जहार यथा ब्रह्मारिप्रभृतीनां चतुर्णामाश्रमिणां सत्प्रसङ्गाज्जाता कृष्णे भक्तिस्तत्तदाश्रमगतमशुभं कष्टरूपं मलं हरति तथाहि गुरौ निवसतो वर्णिनस्तदर्थोदकाहरणादिकं कष्टं भक्तिरिव व्योम्नोऽब्दं शरदहरत् गृहस्थस्य ऋणत्रयापनुत्तये कलत्रादिसाङ्कर्यं भक्तिरिव वृष्टिहेतुक भूतानां शाबल्यं शरदहरत् वनस्थस्य नखकेशमलादिक्लेशं भक्तिरिव भुवः पङ्कं शरदहरत् यतेः कामादिवासनां भक्तिरिवापां मलं शरदहरत् भक्तौ सत्यामाश्रमधर्मपरित्यागस्तस्यां सर्वानर्थविनाशकत्वात् स्वयं फलरूपात्वाच्चेति प्रसिद्धेरित्युपादेयेयम् ।। ३५ ।। त्यक्ताः पुत्रवित्तलोकैषणा यैस्ते इत्युपादेयेयम् ।। ३६ ।। गिरय इति आचार्याह्यधिकारिणि ब्रह्मविद्यामुपदिशन्ति न च यत्र क्वापि एवं गिरयः शिवं जलं क्वचिदेव मुमुचुः केचित्तु नेति एवमाह सूत्रकारः ''अनाविष्कुर्वन्नन्वयादि''ति कर्मविद्यान्तु सर्वत्रोपदिशन्ति प्रावृषीव वारीत्युपादेयेयम् ।। ३६ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यथा शान्ताः सशमा मुक्तकल्मपास्त्यक्ता ईषणाः पुत्रादित्रिकेषणा इच्छा यैस्ते मुनयो राजन्ते तथा जलदाः सर्वस्वं सवं स्वं धनरूपं जलं हित्वा त्यक्त्वा शुभ्रवर्चसः सन्तो विरेजुः ।। ३३ ।। यथा ज्ञानिनो ज्ञानामृतं ज्ञानरूपममृतं कालेऽधिकारानधिकारौ विलक्ष्य ददते न वा ददते तथा गिरयः पर्वतास्तोयं क्वचिन्मुमुचुः । यत्र निर्झरास्तत्र क्वचिच्छिवं जलं न मुमुचुरुन्नतप्रदेशे । शिवं मोक्षे सुखे भद्रे सलिलेऽथेति विश्वः ।। ३४ ।। अन्वहं क्षय्यं सत्कर्मभिः क्षेतुं शक्यमायुस्तथा मूढाः कुटुम्बिनो नरा न जानन्ति यथा तथा । गाधजले चरा अल्पजलचारिणः । चरेष्ट इति टः । हलदन्तादित्यलुक् । क्षीयमाणं जलं तत्क्षयप्रकारं नाविन्दन् न व्यजानन् । क्षय्यजय्यौ शक्यार्थ इति स्मरणात्क्षेतुं योग्यं क्षय्यं । पाठान्तरं तु क्वाचित्कमिति न धृतमव्याकृतं च ।। ३५ ।। यथा दरिद्रः कृपणो दीनोऽविजितानीन्द्रियाणि येन स कुटुम्बी अनेन तत्पोषणानिर्वाहात्तापं विन्दति तथा गाधवारिचरा अपजलकृतालया मत्स्याद्याः शरदर्कंजं शरत्सम्बन्धी योऽर्कः सूर्यस्तस्माज्जायत इति स तथा तं तापमविन्दन्नापुः ।। ३६ ।।

श्रीसुबोधिनी

शुद्ध्यर्थमस्याः प्रवृत्तिरिति षोडशकलासहितजीवस्य सप्तदशात्मकस्य शुद्धिस्थले ।
जलानां सर्वभूतानामभ्राणां ज्ञानिनां तथा । कुटुम्बिनां दरिद्राणां विरक्तानां विमुक्तिनाम् ।। १ ।।
योगिनां गोपिकानाञ्च शरत्सम्बन्धतो हरिः । दश दोषान् निवार्याथ चित्तस्यापि निवार्य च।। २ ।।
सर्वानशोभयद् देवः षड्गुणैश्चन्द्रमानवाः । गावः पद्मानि भूमिश्च वर्णाश्चैव विभाविताः ।। ३ ।।
शरदः कार्यमेतावद् भगवानविशद् यतः ।। ३१ ।।

तत्र प्रथमं जलानां दोषं निवर्तितवतीत्याह **शरदेति, अद्भिः सर्वशुद्धिस्ताश्चेन् निर्मलास्तदा सर्वमेव शुद्धं** भवेत्, **शुद्धौ** प्रकार उच्यते **शरदेति, कमलोत्पत्तिः शरदैव,** निर्गतं रजो यस्मादिति **नीरजं,** सर्वमेव जलरजो भौतिकं भूमौ विलाप्याध्यात्मिकं स्वरूपभूतं कृत्वाधिदैविकं शुद्धं मकरन्दात्मकं स्वस्मिन् कृत्वा **सर्वमेव** रजो दूरीकरोत्यतो **नीरजा**मित्युच्यते, तानि चेदुत्पन्नानि तदा दोषस्य निवृत्तत्वान्नीराणि **प्रकृतिं ययुः,** नीरे जातानीत्यपि व्युत्पत्तिरतः **पुत्रे जातेस्वयमपर्णो भवति तदा प्रकृतिं प्राप्नोत्यन्यथा ऋणेन पीडित एव स्यात्,** न केवलमेतद् भौतिकदोषनिवृत्त्यर्थं शरदेवं करोति किन्तु भगवत्क्रीडार्थमन्तरपि **हृदयकमलविकासेन हृदयं प्रुणातीतं भवति,** तत्र शरद् **योगमुत्पादयन्ती** तथा करोतीति योगो दृष्टान्तत्वेनोच्यते, **अथ वा शनैः शनैः शुद्धिर्योगे भवतीति** तदर्थं दृष्टान्तः, तदाह **भ्रष्टानामिव चेतांसीति, भ्रष्टा** योगस्रष्टास्तेषां **चेतांस्यपि** भ्रष्टानि भवन्ति, तानि **पुनर्योगसेवया** वृत्तिरूपस्य रजसो निरोधं प्राप्नुवन्ति ॥ ३३ ॥ एवं सर्वशुद्धिहेतुभूतस्यान्तःकरणस्य जलस्य च शुद्धिमुपपाद्य महाभूतानां शुद्धिं कथयन्नाश्रमाणां शुद्धिप्रकारमाह **महाभूतानि चेच्छुद्धानि तदा देहः शुद्धो भवेदाश्रमशुद्ध्या धर्मः शुद्धः,** तदर्थमाह **व्योम्नोब्दमिति व्योम्न** आकाशस्य मेघा एव **मलरूपा।, भूतशबलताग्निवाय्वोर्मलं** स्पर्शार्थिक्षुदर्थे तत्सम्भवाद् **भुवः पङ्क** एव **मलमपामपि पङ्क** एवेति, एवं पञ्चमहाभूतानां **शरज् जहार,** इयं च शरदाश्रमाणामपि मलं दूरीकरोति वर्षासु स्वधर्मस्य निरुद्धत्वान् न्यासिनामेकत्रान्नभोजनेन दोषोत्पत्तिसम्भवाद् ब्रह्मचारिणो गुरुसेवायां सङ्कोचसम्भवाद् गृहस्थस्य कालाज्ञानात् कर्मलोपसम्भवाद् वनस्थस्य च सङ्ग्रहादिना दोषसम्भवात् तत् सर्वं निवर्तयति शरत्, तस्या भगवत्सान्निध्यादाधिदैविकवद् दोषनिवर्तकत्वं जातमिति दृष्टान्तेनाह **कृष्णे भक्तिर्यथेति, भक्तिश्च हृदयाकाशशोकं दूरीकरोति** नेत्रजलजननादब्दो **भूतानां शबलता त्रिविधजीवानां किर्मीरितत्वं भक्तिर्दूरीकरोति,** तस्य प्रवर्तक आसन्यो वाग्निर्वेत्येको दूरीकरोत्यपरो ज्वालयति, भुवः पङ्कमपि प्रसाददानाद् दूरीकरोति **भक्त्या भावितौ चरणौ भक्तानां हृदये स्नेहेनार्द्रौ जलार्द्रतां दूरीकुरुतः,** तावेव हि भूः, अपां सर्वासामेव मलं भक्तो दूरीकरोतीति प्रसिद्धमेव, ब्रह्मचर्ये च गुरवे जलदानमस्ति भक्तिश्च तद् दूरीकरोत्यलौकिकदानसामर्थ्यात्, भूतैः सह शबलता गार्हस्थ्ये भवति **भक्त्या** तन्निवृत्तिः स्पष्टैव, भूस्थानीयो वनवासस्तत्र मलधारणं धर्मः, **भगवद्भक्तिस्तु भगवत्सेवार्थं तद् दूरीकरोति, अपां** बहूदकादीनां **मलं** परिभ्रमणादिक्लेशं भगवदायतने नित्यस्थितिसम्भवात्, किञ्चाशुभं पापमपि दूरीकरोति यदनिवार्यं तत्संस्कारार्थमुत्तरक्रिया ॥ ३४ ॥ एवमेषां दोषान् दूरीकृत्यान्नोत्पादकानां मेघानां दोषान् दूरीकृतवतीत्याह **सर्वस्वमिति,** यथा मरणकाले न कोपि किञ्चिन् नेतुं शक्नोत्येवं शरत्कालेपि मेघाः किञ्चित् स्थापयितुं न शक्ताः **सर्वस्वत्याग एव सर्वप्रायश्चित्तं स्वधर्मवदिति** स्वधर्ममाह **जलदा** इति, **हित्वा** ज्ञानपूर्वकं ततः **शुभ्रवर्चसो** भूत्वा **विरेजुः, पापस्य हि रूपं नीलिमा पुण्यस्य शुक्लमतो मेघानां** नीलं रूपं गतं शुभ्रं च जातं तदाह **शुभ्रेति, शुभ्रं वर्चस्**तेजो येषामिति, न केवलं शुभ्रत्वमात्रेण सम्यक्त्वं केशादिषु व्यभिचारादत आह **विरेजुरिति,** विशेषेण दीप्तियुक्ता जाताः कालवशादेवैवम्भूता जाता इति, तदा नापि रमणं नापि दीप्तिरित्याशङ्क्य दृष्टान्तेन तद्दोषनिवृत्तिपूर्वकं शास्त्रतो दीप्तिमाह **यथेति, अन्तःकरणं** हि चतुर्विधं तत्र **चतुर्विधोपि दोषश्चेद् गच्छति तदा बहिस्त्यागादिना दीप्तिमान् भवति,** तदभावे न **शोभते** तत्र **चित्तस्यैषणात्रयं दोषो बुद्धेर्घोरविमूढत्वं मनसो बहिर्विषयत्वमहङ्कारस्तु सन्निपातरूपो दोषात्मक** एव तदत्र क्रमेणैव तेषां निराकरणमाह **त्यक्ता ईषणा** यैः, ईषणात्रयं तत्र लोकेषणा द्विविधा भुवनजनभेदाद् **वित्तेषणा** सर्वविषयरूपा **अर्थेषणा नाम दारेषणा** पुत्रसहिता, अनेन धर्मार्थकामा उक्ताः, **त्रिवर्गपरित्याग** ईषणात्रयाभावः **शान्तिः** सत्त्वादपि भवति तथा सति गुणान्तरोद्भवे सा निवर्तते, अतः **शान्ताः** स्वरूपेणैव शुद्धसत्त्वरूपेण वा 'मनसैवैतदाप्तव्य'मिति श्रुतेः, आत्मप्रवणं मनो येषां ते **मुनयः, मुक्तं** किल्बिषमहङ्कारात्मकं यैः, एवं त्यक्तदोषा बहिः सर्वपरित्यागेन शुद्धा अपि भवन्ति प्रकाशमानाश्च, एतच्छरदैव भवति भगवत्सहितया, अत एवाग्रे वक्ष्यति, 'सर्वाः शरत्काव्यकथारसाश्रया' इति ॥ ३५ ॥ एवं शरत्कृतां दोषनिवृत्तिमुक्त्वा गुणानाह **गिरयो मुमुचुरिति,** ज्ञानं हि गुणोन्तःसारेष्वेवेति तच्च ज्ञानं शुद्धं सर्वदोषनाशकं तदत्र जलं निरूपयन् दृष्टान्तेन निरूपयति, पर्वताः **क्वचित् तोयं मुमुचुः क्वचिन् न यत्र झरणादिमार्गो भवति तत्र मुञ्चन्त्यन्तःस्थितं** जलं न तु वर्षोद्भूतं तदाह **शिवमिति,** शान्तं शीतलं सुस्वादु, **महतां ह्यन्तस्तापाभावान् न सूर्यादिनापि तेषां तापः शक्यते कर्तुं,** तेषामुभयरूपत्वं बुद्धिकृतमाहोस्वित् स्वाभाविकमिति विचिन्त्य स्वाभाविकत्वे शरदो न कापि प्रतिष्ठेति ज्ञानकृतत्वं वदन् शरदस्तत्र प्रयोजकतामाह **यथा ज्ञानामृतमिति, ज्ञानमेवामृतं** मरणनिवर्तकं **काले** शुद्धेवसरे पुरुषविशेषे स्वयं ज्ञानपूर्णा अपि देशकालाधिकारिणो दृष्ट्वा ज्ञानयोग्याश्चेदुत्तरत्र सम्प्रदायनिर्वाहका अमार्गरहिता विचार्यैव ज्ञानप्रदाश्चेत् तदा **ददतेन्यथा तु न ददत** इति, 'विद्यया सहितो विद्वान् म्रियेतैवाविचारयन्, न त्वयुक्ताय तद् दद्यात् कथञ्चिदिति निश्चयः', शुद्धिः सर्वा शरत्कृतेति शरदः प्रयोजकत्वम् ॥ ३६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

महाभूतशुद्ध्युक्तिप्रस्तावे तन्मध्यपातित्वेन द्वितीयेपि श्लोके अपां मलमित्युक्तमन्यथा पौनरुक्त्यं स्यादित्याशयेनाह **एवं पञ्चमहाभूतानामिति** ॥ ३४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

शरदेत्यत्र **नीरजपदव्युत्पत्तौ** सकारलोप'श्चक्षोः सूर्य'इतिवद् बोध्यश्छन्दस्त्वात्, **अन्तरपीत्यध्यात्मं**, अन्तःप्रकृतिभावप्रापणं व्युत्पादयन्ति हृदयेत्यादि तथा च दृष्टान्ते हृदयकमलस्य भगवद्गुणेन विकासे 'मन्निष्ठं निर्गुणं स्मृत'मितिवाक्यात् सर्वात्मभावे हृदयं गुणातीतं भवतीत्यर्थः, नन्वध्यात्ममेवङ्करणं कथं गम्यत इत्यत आहुस्तत्रेत्यादि तथा च जले **कमलयोगमुत्पादयन्ती** तथा करोतीत्यध्यात्मं 'योगश्चित्तवृत्तिनिरोधो'त्र दृष्टान्तीक्रियतेतो दृष्टान्तदार्ष्टान्तिकबलात् तथा गम्यत इत्यर्थः, अस्मिन् पक्षे भ्रष्टानामितिपदस्यानन्वयात् पक्षान्तरमाहुरथ वेत्यादि, **वृत्तिरूपरजस** इति **चेतोवृत्तिरूपस्य** वैकल्पिकज्ञानस्य ॥ ३३ ॥ **व्योम्नोब्द**मित्यत्र यथा पूर्वपद्ये शोधकद्वयमुक्तं तथात्र तच्छोध्यद्वयमेकत्रोच्यत इत्याशयेनाहुर्**महाभूताना**मित्यादि, **मेघा एव** मलरूपा इति निर्मेघ आकाश 'निर्मलमाकाश'मितिप्रयोगात् ते तथा, भूतावकाशदातृत्वरूपव्योमकार्यप्रतिरोधकत्वात् तथा, अत्र मलपदमब्दादिषु चतुर्षु विशेषणत्वेनान्वेति, मलत्वं च विविक्ततत्कार्यप्रतिरोधकत्वं न तु स्वसजातीयासारांशत्वमिति बोध्यं, व्योमादित्रयस्य कण्ठोक्तत्वाद् **भूतशाबल्यपदे भूत**पदमग्निवायू सङ्गृह्णत् तच्छाबल्यस्यैव तन्मलत्वं बोधयतीति तदुपपादयन्ति स्पर्शार्थमित्यादि, बहिःशुष्कस्य **स्पर्शार्थं** वर्षाकालेग्निवाय्वोः साक्षादपेक्षितत्वेन वर्षासु वातकोपेन क्षुदभावे तदर्थमग्निजनकौषधादेरपेक्षितत्वेनान्तरपि तच्छाबल्यस्य सम्भवात्, एवं **पञ्चे**त्यादेस्तात्पर्यं **टिप्पण्यामाहुर्महाभूते**त्यादि, **सुबोधिन्या**मध्यात्ममाश्रमाशुभहरणेपि शरदन्वयोस्तीत्यभिप्रायेणाहुरियं चेत्यादि, ननु शरद्दृष्टान्ते **भूताश्रमयोर्दोषहरणं** कथं तयोराध्यात्मिकत्वादित्याकाङ्क्षायां तदुपपादयन्ति **भक्तिश्चे**त्यादि, 'कोन्योर्थोस्यावशिष्यत' इत्यादिवाक्याद् **भक्तिस्तथाब्द** इति शोक इतिशेषः, **त्रिविधजीवानां किर्मीरितत्व**मिति देवमनुष्यासुराणां सात्त्विकराजसतामसानां परस्परसङ्ग, ननु स्वभावभेदे विद्यमाने कथं स भक्त्या च कथं तन्निवृत्तिरित्यत आहुस्तस्येत्यादि, **आसन्यो** हीन्द्रियबलजननेन लौकिककार्ये प्रवर्तकोग्निश्च वागधिष्ठाता तत्प्रेरणेन सङ्गजनकोतः सङ्गस्य तत्कृतत्वात् तद्दोषत्वं जातायां तु भक्तौ स एव लौकिके कार्ये बलं न जनयति प्रत्युत तत्सङ्गं दूरीकरोत्यग्निश्च तादृशसङ्गार्थं न वाचं प्रेरयति प्रत्युत तद्विरुद्धं वादयन् ज्वालयतीत्यतो भगवत्कृपया जाताया भक्तेः सहायभूतावेताविति तथेत्यर्थः, **भुवः पङ्क**मिति हृदयभुवः कामादिविकारं, **प्रसादस्य** तन्नाशकत्वं च 'त्वयोपभुक्तस्रग्गन्ध' इत्यादौ सिद्धं, ननु हृदयभुवो भौतिकत्वेन जलस्यापि सत्त्वात् तन्नाशाभावेवस्थाविशेषादिजनितपङ्कनाशेपि पुनः पङ्कः स्यादित्यत आहुर्**भक्त्ये**त्यादि, **जलार्द्रता**मिति शोकादिजन्यजलार्द्रतां, तत्रोपपत्तिमाहुस्**तावेव हि भू**रित्याधिदैविकभूरूपौ वैश्वानरविद्यायां 'पृथिव्येव पादा'वितिश्रुतेः, तथा च तयोः स्वाधिभौतिके पङ्कनिवर्तनमावश्यकमतो मृदाधिक्ये जलाभाववत् ताभ्यामेव तदार्द्रतानिवृत्तिरित्यर्थः, नन्वेवमाध्यात्मिकभूतशोधकत्वमेवायाति न त्वाधिभौतिकभूतशोधकत्वमित्याशङ्क्य भक्तेर्बहिर्जलदोषनिवर्तकत्वमप्याहुर्**अपा**मित्यादि, **प्रसिद्ध**मिति 'भवद्विधा महाभागास्तीर्थीभूताः स्वयं प्रभोः तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थितगदाभृते'तिवाक्यात् **प्रसिद्धं**, नन्वेवमप्शोधकत्वेपि कथमन्यभूतशोधकत्वमित्याकाङ्क्षायामाश्रमसम्बन्धि बहिर्भूतशोधकत्वमाहुर्**ब्रह्मे**त्यादि, **जलदानमस्ती**त्येके शाखिनो'ग्निमधीयाना उपाध्यायस्योदकुम्भमाहरन्तो'ति शाबरभाष्ये 'विद्यायां धर्मशास्त्र'मितिसूत्रेनुवादात्, **अलौकिकदानसामर्थ्या**दिति 'पत्रं पुष्प'मितिवाक्येन भगवत्प्रीतिजनका**र्थदानसामर्थ्यात्, तत्र मलधारणं धर्म** इति 'केशरोमनखश्मश्रुमलानि बिभृयाद् दतो न धावे'दितिवाक्याद् धर्मस्तं च 'दन्तकाष्ठमलादित्वाद् यस्तुमामुपसर्पति सर्वकालकृतं कर्म तेनैकेन च नश्यती'त्यादिष्वपराधत्वकथनाद् **भक्तिर्दूरीकरोति**, स्पष्टैवेत्युपपादितत्वात् तथा, **अपां बहूदकादीना**मिति कुटीचकस्य **परिभ्रमणाभावा**देवमुक्तमतस्तेषां **क्लेशात्मकं** पङ्कं सा **दूरीकरोति** तथा चैवमाश्रमसम्बन्धि बहिर्भूतशोधकमिति न दृष्टान्ते कश्चिद् दोष इत्यर्थः, संन्यासिक्लेशस्य पङ्कत्वं क्लिष्टमतस्तन्निवृत्त्यर्थमाहुः **किञ्चे**त्यादि, **अनिवार्य**मिति 'केचित् केवलया भक्त्या **वासुदेव**परायणाः अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्कर' इतिवाक्यादन्यथा**निवार्य**मप्यशुभाख्यं **पङ्कं दूरीकरोति**, नन्वेतत्कथनं किमर्थमत आहुस्तदित्यादि, आश्रमसंस्कारार्थं पापनिवारणक्रिया तथा **चैतदर्थं** तत्करणमित्यर्थः, यदिदं दृष्टान्तग्रन्थे व्याख्यातं तत् सर्वमशुभपदेनैव मूले बोधितं ज्ञेयं, पद्मोत्तरक्रियेति वक्ष्यमाणश्लोकोक्ता सर्वस्वदानक्रिया ॥ ३४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

शरदेत्यत्र दृष्टान्ते नीरजस्वरूपमाहुः **हृदयकमले**ति, गुणातीतमिति चित्तरूपमित्यर्थः, **तथा च यथा** नीरजोत्पत्त्या हृदयकमलविकासेन चेतांसि **प्रकृतिं** स्वरूपं चेतस्त्वं यान्तीत्यर्थः, अत्र शरदस्तथाहेतुत्वं नायातीत्यरुच्या पक्षान्तरमाहुर**थ वे**ति, तथा च शनैः शुद्धिमात्रे **दृष्टान्तः, तदाहे**ति तत्पक्षद्वयाद्धेतोराह, उत्तरार्धमितिशेषः, प्रथमपक्षमाश्रित्य जलान्तःकरणयोः शरत्कृतां शुद्धिमुपसंहरन्ति **एव**मिति, द्वितीयपक्षमाश्रित्य कारिकासु जलानामित्येवोक्तम् ॥ ३३ ॥ **व्योम्नोब्द**मित्यत्र **स्पर्शार्थ**मिति कामार्थमित्यर्थः, कामोग्निमलं, क्षुधः प्राणधर्मत्वात् क्षुद् वायुमलं, उभयार्थं भूतानां प्राणिनामन्योन्यं शबलता भवतीत्यर्थः, **इयं चे**ति चकारादाधिभौतिकी पूर्वार्धोक्तभूतशाबल्यहरणं त्वाध्यात्मिकया एवेतिभावः, "स्थास्यामश्चतुरो मासा"निति प्रतिज्ञायाषाढ्यामेव स्थितेः, प्रथमं न्यासिनामेव धर्मविरोधं प्रावृट् सम्पादयतीति प्रथमं तानेवाहुर्**न्यासिना**मिति, **आधिदैनिकव**दिति तत्सदृशीयं न

त्वियमाधिदैविकीति ज्ञेयं, **शोकं दूरीकरोतीति** केवलभावलभ्यरसस्यैव तन्निवर्तकत्वादिति प्रभूक्तमनुसन्धेयं, **त्रिविधे**ति सत्त्वरजस्तमोभेदेन **त्रिविधानां जीवानां किर्मीरितत्वं दूरीकरोति**, गुणातीतत्वं सम्पादयतीत्यर्थः, एतद्दूरीकरणस्य वाय्वग्निमलनिवृत्तिरूपत्वं विशदयन्ति तस्येति, किर्मीरितत्वस्येत्यर्थः, ब्रह्मवादे भगवतः सकाशाद् विमुक्तो जीव आनन्दार्थं यतमान आसन्यमाश्रितः सत्त्वादिभावान् प्राप्य प्रपञ्चे रममाणो जात इति निरूपितं, साङ्ख्ये कामाग्निना प्रकृतिमुपगूहमानस्तद्गुणानुरक्तो जात इति निरूपितं, तथा च मतभेदेन किर्मीरितत्वं वाय्वग्न्योर्मलं तद्दूरीकर्तृत्वं भक्तेः, एक इति भक्तौ जातायामासन्य इन्द्रियाणां देवतात्वं सम्पाद्य जीवस्य सगुणत्वं दूरीकरोति, कामश्चान्तर्गृहगतानामिव प्राकृतत्वं **ज्वालयति** देहान्तरमिव सम्पादयतीत्यर्थः, भक्तिकृतां भूमलनिवृत्तिं विवृण्वन्ति **भक्त्येति**, तया **भाविता चरणौ स्नेहार्द्रौ** भवतस्तदा स्वस्मिन् स्थितं **गङ्गाजलार्द्रतारूपं** पङ्कं स्वस्मात् **दूरीकुरुतो** भक्ते स्थापयत इत्यर्थः, स्नेहस्य चिक्कणत्वाद् तेनार्द्रयोर्जलार्द्रता न भवतीति लौकिको दृष्टान्तः, इदं च तदनन्तरभावित्वाद् भक्तिकार्यं, **तावेव हीति** अलौकिकदेहसम्पादकरजसस्तत्र विद्यमानत्वात् तयोर्भूरूपत्वं युक्तमिति हिशब्दः, अपां मलनिवृत्तिं विवृण्वन्ति अपामिति, तीर्थरूपाणामपीत्यर्थः, **प्रसिद्धमेवेति** "साधवो न्यासिनः शान्ता" इत्यादिवाक्येभ्य इतिशेषः, **ब्रह्मचर्ये** चेति भूतानां मलं निवर्तयति, आश्रमिणामपि निवर्तयतीति तेष्वेव पदेष्वर्थान्तरसमुच्चयार्थश्चकारः, आश्रमिणां मध्ये **व्योम्नो** ब्रह्मचर्यस्याब्दं जलदानं दूरीकरोतीत्यर्थः, ब्रह्मचर्ये व्योमवन्निर्लेपतास्तीति व्योमत्वं, **अलौकिकेति** कथाप्रश्नेन वासुदेवं स्मारयतीत्यर्थः, **बहूदकादीकामिति** बहूदका आदयो येषां हंसनिष्क्रियाणामिति तद्गुणसंविज्ञानः, कुटीचरस्य तु परिभ्रमणं नास्तीति बहूदकादीनामित्युक्तं, **यत्संस्कारार्थमिति** मशकार्ये धूम इतिवत् पापसंस्कारनिवृत्त्यर्थमुत्तरक्रिया, उत्तरकाण्डोक्तज्ञानसाधनानीत्यर्थः ॥ ३४ ॥ **सर्वस्वमित्यत्र शरत्कालेपीति मेघा अपीति** योज्यं, दृष्टान्तेनैतस्याः शरद आध्यात्मिकत्वं सूचितमित्याशयेनोत्तरार्धाभासमाहुः **कालवशादिति**, बुद्धेरिति शान्तघोरविमूढत्वमितिवाक्यादहङ्कारस्वरूपग्रहणमित्यर्थः, श्लोकान्ते शरन्निष्ठाध्यात्मिकत्वस्य स्वरूपमाहुः **भगवत्सहितयेति**, भगवत आत्मत्वात् तमधिकृत्य वर्तमानाध्यात्मिकीत्यर्थः, देवपदस्य क्रीडाकर्तृवाचकत्वात् तमधिकृत्य वर्तमानां फलप्रकरणीयलीलाधिकरणभूताधिदैविकीति ज्ञेयम् ॥ ३५ ॥ **गिरयो मुमुचुरित्यत्र निरूपयतीति** तज्ज्ञानं गिरिषु दृष्टान्तेन निरूपयतीत्यर्थः, **उभयरूपत्वमिति** मोक्तृत्वममोक्तृत्वं च ज्ञानकृतं, यत्र भगवतो जलापेक्षा तत्र मुञ्चन्ति यत्र नापेक्षा तत्र न मुञ्चन्ति एवं ज्ञानं त्वाध्यात्मिकशरदैव भवतीतिभावः, **बुद्धिः सर्वे**ति ज्ञानमित्यर्थः, पूर्वोक्तभूतशुद्ध्या ज्ञानं भवतीति तच्छुद्धिद्वारा **बुद्धिः शरत्कृ**तेत्यर्थः, **शुद्धि**रितिपाठे पूर्वोक्ता भूतशुद्धिरित्यर्थः ॥ ३६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

जलानां सर्वभूतानामित्यादिकारिकासु जलादयो गोपीकान्ता दशोक्तास्ते "शरदा नीरजोत्पत्त्ये"त्यारभ्य "मुकुन्दो व्रजयोषिता"मित्यन्तानां दशानां श्लोकानामर्था उक्ताः, **चित्तस्यापि निवार्य चेति** "खमशोभते"त्यस्यार्थः, "सत्त्वयुक्तं यथा चित्त"मितिवाक्यात्, "अखण्डमण्डल" इत्यादिषु षट्सु श्लोकेषु ऐश्वर्यादयो गुणा वर्ण्यन्त इति षट्श्लोकसङ्ख्यातात्पर्यमुक्तम् ॥ ३३॥ **व्योम्नोब्दमित्यस्य व्याख्यायां जीवानां किर्मीरितत्वं भक्तिर्दूरीकरोतीति किर्मीरितत्वं** सत्त्वादिगुणवैशिष्ट्यं भक्तिर्नाशयति, "तं भजन् निर्गुणो भवे"दितिवाक्यान् नैर्गुण्यं सम्पादयतीत्यर्थः, **तस्य प्रवर्तक** इति तस्य भक्तस्य नैर्गुण्ये **प्रवर्तक** आसन्य इन्द्रियाणां देवतात्वं सम्पाद्य ब्रह्मभावयोग्यतामापादयति, **अग्निर्वे**ति ज्ञानाग्निरित्यर्थः, **एको दूरीकरोतीति** आसन्यः दोषं दूरीकरोति **अपरो ज्वालयतीति** ज्ञानाग्निर्दोषं ज्वालयतीत्यर्थः, "भक्त्या मामभिजानाती"तिवाक्याद् भक्त्योत्पन्नज्ञानं सकलदोषं ज्वालयतीति भक्तेस्तत्र प्रयोजकता, अतो भक्तिरेव दोषं हरतीतिसिद्धं, **भुवः पङ्कमपीति** भुवः पङ्कं दोषमपि भक्तिर्दूरीकरोतीत्यर्थः, अयं भावः, यत्र श्रवणादिरूपा भक्तिर्जायते भगवन्मन्दिरादौ तत्र सा भक्तिर्दोषं प्राकृतभावमपहरति, "मन्निकेतं तु निर्गुण"मितिवाक्यात्, तदेतदुक्तं **प्रसाददानादिति**, तत्र भक्त्यधिकरणभूमौ सर्वेभ्यः प्रसादो भगवदनुग्रहः भगवता दीयते, अतः प्रसाददानात् भुवो दोषं प्राकृतत्वं भक्तिर्हरतीत्यर्थः, **जलार्द्रतां दूरीकुरुत** इति, अयमर्थः, भक्त्या चरणारविन्दयोर्भाविने हृदये जायमानेन चरणारविन्दविषयक**स्नेहेनार्द्रौ भगवच्चरणौ जलार्द्रतां** शोकाश्रुजलसम्बन्धिनामार्द्रतां **दूरीकुरुत** इत्यर्थः, **भक्तिश्च तद् दूरीकरोति अलौकिकजलदानसामर्थ्यादिति**, अयं ब्रह्मचर्ये गुरवे जलदानमस्ति, जलं यो न ददाति स ऋणी भवतीति सामान्यव्यवस्था, भक्तस्तु भगवत्सेवां कुर्वाणो जलदानमकुर्वन्नपि न ऋणी भवति, "देवर्षिभूताप्तनृणां पितॄणां न किङ्करो नायमृणी च राज"न्नितिवाक्यात्, अतो **भक्तिस्तद् दूरीकरोति**, ननु गुरवे चेज् जलदानं न कुर्यात् तदा फले न्यूनता स्यादित्याशङ्क्याहुः **अलौकिकदानसामर्थ्यादिति**, "सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसे"तिवाक्याद् **भक्तेरलौकिकदानसामर्थ्यात्** फलन्यूनता न भवतीति फलपूरणाज् जलदानं हरति, अनेन "व्योम्नोब्द"मित्यत्र यदब्दं शरद्धरतीत्युक्तं तदब्दं नाम जलदानं भक्तिरपि हरतीत्युक्तं, एवं ब्रह्मचर्ये अब्दहरणं गार्हस्थ्ये भूतशाबल्यं हरति वानप्रस्थे भुवः पङ्कं सन्न्यासे अपां मलं हरतीति चतुर्णामपि आश्रमिणां अब्दादिदोषं यथाक्रमं भक्तिर्हरति, तथा च "व्योम्नोब्दं भूतशाबल्यं भुवः पङ्कमपां मलं शरज् जहाराश्रमिणां कृष्णे भक्तिर्यथाशुभ"मितिमूले शरत् व्योम्नोब्दं भूतानां शाबल्यं भुवः पङ्कं अपां मलं यथेत्यन्वयः, कृष्णे भक्तिः अशुभं पापमपि दूरीकरोतीत्यादिना पृथगन्वयः, अत एव सुबोधिन्यां **किञ्च अशुभं पापमपि दूरीकरोतीत्यादिना** पृथग्व्याख्यातम् ॥ ३४ ॥ **सर्वस्वं जलदा हित्वे**त्यस्य विवृतौ

चित्तस्य ईषणात्रयं दोष इत्यादि **चित्तस्य** दोषः **ईषणात्रयं** बुद्धेर्दोषो **घोरविमूढत्वं** मनसो दोषो **बहिर्विषयत्वं**, अहङ्का
सर्वाणि किल्बिषाणि तेषां निवृत्तिर्विशेषणचतुष्टयेनोक्ता, तत्र "त्यक्तेषणा" इत्यनेन चित्तदोषनिवृत्तिरुक्ता, "शान्ता" इत्यनेन बु
दोषनिवृत्तिः, "मुनय" इत्यनेन मननशीलतया बहिर्विषयाग्रहणान् मनोदोषनिवृत्तिः, "मुक्तकिल्बिषा" इत्यनेनाहङ्कारद
निवृत्तिः ॥ ३५ ॥ **गिरयो मुमुचुस्तोय**मित्यत्र कारिका **विद्यया सहितो विद्वान् म्रियेतैवाविचारयन् न त्वयुक्ताय**
दद्या"दिति अयुक्ताय विद्यां न दद्यात् किन्तु म्रियेतैव, अयुक्ताय विद्यादानापेक्षया मरणमेव वरमिति भावः ॥ ३६ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

शरदा नीरजोत्पत्त्येत्यस्याभासे **जलाना**मित्यादि १६५$\frac{३}{४}$–१६८$\frac{१}{४}$ । **जलाना**मित्यारभ्य **गोपीकाना**मित्यन्तेन द
वाक्यानां प्रत्येकमर्था उक्ताः, **चित्तस्यापी**त्यनेन 'सत्त्वयुक्तं यथा चित्त'मित्यस्यार्थ उक्तः, "अखण्डमण्डला व्योम्नी"त्यादीनामग्रि
वाक्यानामर्था भगशब्दार्था इति **सर्वानशोभय**दित्यनेनोक्ताः, ऐश्वर्यादिगुणरूपत्वेनैव चन्द्रादयो निरूपिता इत्याहुश्**चन्द्रमान**
इत्यादिना, तथा च कृष्णः षड्गुणैः **सर्वानशोभय**दितियोजना, ते के इत्याकाङ्क्षायां षड्गुणरूपाश्चन्द्रमानवादय उक्ताः, एवं स
दशश्लोकानामर्था उक्ताः ॥ ३३ ॥ **यथा ज्ञानामृतं काले** इत्यत्र **विद्यया सहितो विद्वान् म्रियेतैवाविचारयन् न त्वयुक्त**
तद् दद्यात् कथञ्चिदितिनिश्चयः असत्पात्राय विद्या न दातव्येत्यर्थः ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नीरजानां कुमुदादीनामुत्पत्तिर्यया तया शरदा नीराणि प्रकृतिं स्वच्छतां मधुरतां च निजस्वभावं ययुः । तत्र दृष्टान्तमाह
यथा दुःसङ्गेन योगभ्रष्टानां चेतांसि पुनर्योगस्य प्राणायामाद्यष्टाङ्गस्य नितरां सेवया प्रकृतिं स्वच्छतां यान्ति, तद्वदिति । 'अ
योगिभिर्दुःसङ्गपरिवर्जनपूर्वं योगनिषेवयैव कर्तव्या' इत्युपादेयोपमा ॥ ३३ ॥ यथा चतुर्णामाश्रमिणामशुभं कष्टं श्रीकृष्णे जा
भक्तिः हरति, तथा व्योमादीनां चतुर्णां मेघादिचतुरो मलान् शरदहरदित्यन्वयः । तथा हि—यथा ब्रह्मचारिणो गुर्वर्थजलाहरणा
श्रमं भक्तिर्हरति, तथा परिपूर्णस्य कृतार्थस्य गुरुणा प्रयोजनाभावात् गुरुभिरपि तथाभूतस्यानियोगात् । एवं व्योम्नोऽब्दं मे
शरज्जहार ॥ तथाच गृहिणोऽपत्यादिसाङ्कर्यं भक्तिर्हरति, तत्साङ्कर्यस्य भजनविरोधित्वेन विविक्तवासरुच्युत्पत्तेः । तथा भूतान
शाबल्यं साङ्कर्यं शरदहरत् । वर्षाभयेन व्यवहर्तॄणां हिंसाभयेन भिक्षूणां चैकत्र स्थितानां शरदि यथेष्टगमनात् ॥ यथा च वनस्थस
मलं केशनखादिधारणक्लेशं भक्तिर्हरति, तद्रसिकस्य तत्राग्रहाभावात्, तथा भुवः पङ्कं शरदहरत् । यथा च यतीनां कामादि
वासनामलं तद्दूरीकरणार्थप्रयत्नं च भक्तिर्हरति, तथा शुद्धचित्तस्य विरक्तस्य कृतकृत्यस्य कर्तव्याभावात् ॥ तथाऽपां मलं शरद
हरत् ॥ 'अतश्चतुर्भिरप्याश्रमिभिः श्रीकृष्णे भक्तियोग एव कर्तव्य' इत्युपादेयोपमा ॥ ३४ ॥ जलदा मेघाः सर्वस्वं सर्वं जलं हित्व
शुभ्रं शुक्लं वर्चः कान्तिः येषां ते तथा सन्तो विरेजुर्विशेषेण दीप्तिमन्तो जाताः । यथा मुक्तं किल्बिषं कर्म वासनारूपं येषां ते
मुनयो मननशीलाः त्यक्ता पुत्रवित्तलोकैषणा यैस्ते, अत एव शान्ता अक्षुभितचित्ताः राजन्ते तथेति । तथाच 'मुमुक्षुणा सर्व
त्याज्याः, शुद्धता च सम्पादनीया' इति हेयोपादेयोभयोपमा ॥ ३५ ॥ गिरयः शिवं तोयं निर्मलं जलं क्वचिन्मुमुचुः, क्वचिच्च न
मुमुचुः । न पुनः प्रावृषीव सर्वतः । यथा ज्ञानिनो ज्ञानामृतं मोक्षसाधनं तत्त्वज्ञानं कस्मिंश्चिदेव काले कस्मैचिदधिकारिणे ददते
उपाध्यायाः कर्मविद्यामिव नहि सर्वेभ्यो ददते । तथाच "ज्ञानस्य दुर्लभत्वात् जिज्ञासुभिः 'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया
इत्याद्युक्तरीत्या ज्ञानं ग्राह्यम्, गुरुभिश्चोपदेष्टव्यम्" इत्युपादेयोपमा ॥ ३६ ॥

अन्वितार्थप्रकाशिका

शरदेति ॥ नीरजानां कुमुदादीनामुत्पत्तिर्यया तया शरदा हेतुना नीराणि प्रकृतिं स्वच्छतां मधुरतां च निजस्वभाव
ययुः । यथा दुःसङ्गेन योगभ्रष्टानां चेतांसि पुनर्योगस्य भक्तियोगस्य नितरां सेवया प्रकृतिं स्वच्छतां याति तद्वत् ॥ ३३ ॥ व्योम्न
इति ॥ यथा चतुर्णामाश्रमिणामशुभं कष्टं श्रीकृष्णे जाता भक्तिः हरति "तावत्कर्माणि कुर्वीत न निर्विद्येत यावता ॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥" इत्याद्युक्तेः । तथा व्योमादीनां चतुर्णां मेघादिचतुरो मलान् शरदहरदित्यन्वयः । तथा हि
यथा ब्रह्मचारिणो गुर्वर्थजलाहरणादिश्रमं भक्तिर्हरति तया परिपूर्णस्य कृतार्थस्य गुरुणा प्रयोजनाभावात् गुरुभिरपि तथाभूतस्यानियोगात् । एवं व्योम्नोऽब्दमावरकं मेघं शरज्जहार । अभ्रमित्यपि पाठः । यथा च गृहिणोऽपत्यादिसाङ्कर्यं श्राद्धादौ प्राप्तबन्धुसाङ्कर्यं च भक्तिर्हरति तत्साङ्कर्यस्य भजनविरोधित्वेन विविक्तवासरुच्युत्पत्तेः । तथाभूतानां शाबल्यं संमर्दं शरदहरत् । वर्षासु
वृष्टिभयेन सङ्कुला लोका वसन्ति । शरदि तु व्यवहर्तॄणां भिक्षूणां चैकत्रस्थितानां यथेष्टगमनात् । यथा च वनस्थस्य मलं केशनखादिधारणक्लेशं भक्तिर्हरति तद्रसिकस्य तत्राग्रहाभावात् तथा भुवः पङ्कं शरदहरत् । यथा च यतीनां कामादिवासनामलं
तद्दूरीकरणार्थप्रयत्नं च भक्तिर्हरति तथा शुद्धचित्तस्य विरक्तस्य कृतकृत्यस्य कर्तव्याभावात् तथाऽपां मलं शरदहरत् ॥ ३४ ॥
जलदा मेघाः सर्वस्वं सर्वं जलं हित्वा शुभ्रं शुक्लं वर्चः कान्तिः येषां ते तथा सन्तो विरेजुः । यथा मुक्तं किल्बिषं कर्मवासनारूपं
येषां ते मुनयः त्यक्ता पुत्रवित्तलोकैषणा यैस्ते अत एव शान्ता अक्षुभितचित्ताः राजन्ते तथा ॥ ३५ ॥ गिरय इति ॥ गिरयः

शिवं तोयं निर्मलं जलं क्वचिन्मुमुचुः क्वचिच्च न मुमुचुः न पुनः प्रावृषीव सर्वतः । तथा ज्ञानिनो ज्ञानामृतं मोक्षसाधनं तत्त्वज्ञानं कस्मिंश्चिदेव काले कस्मैचिदधिकारिणे ददते । उपाध्यायाः कर्मविद्यामिव नहि सर्वेभ्यो ददते ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नीरजानां पद्मानामुत्पत्तिर्यस्यां तया शरदा शरदृतुना प्रकृतिं स्वच्छस्वावं योगभ्रष्टानां ॥ ३३ ॥ चतुर्णां आश्रमिणां कृष्णे भक्तिः यथा अशुभं हरति तथा व्योमादीनां चतुर्णां अब्दादीन् शरज्जहार तथाहि वर्णिनः कृष्णे प्राप्ता भक्तिः अत्यंतस्नेहः गृहाश्रमः स्पृहारूपं अशुभं यया हरति तथा व्योम्नोऽब्दं आकाशस्य मेघं शरज्जहार गृहस्थस्य सा भक्तिः वैराग्योत्पत्त्या पुत्रादिसंकीर्णतारूपं अशुभं यथा हरति तथा भूतानां प्राणिनां शावल्यं वर्षास्वेकत्र निवासेन प्राप्तसंकीर्णतां शरज्जहार वनस्थस्य मलधारणरूपं अशुभवैष्णवदीक्षाप्राप्तौ सत्यां सा भक्तिः यथा हरति तथा भुवः पंकं शरज्जहार त्यागिनां असच्छास्त्राभ्यासेन जीवात्मपरमात्मनोरेकत्वावबोधनरूपं अशुभं श्रीकृष्णे प्राप्तैकांतिकी भक्तिर्यथा हरति तथा अपां जलानां मलं शरज्जहार ॥ ३४ ॥ सर्वस्वं समग्रजलं त्यक्त्वा श्वेतकांतयः त्यक्ताः सुतधनलोकानामेषणा यैस्ते अतो मुक्तं त्यक्तं किल्विषं सूक्ष्मवासनारूपं पापं यैस्ते ॥ ३५ ॥ शिवं निर्मलं क्वचित्स्थाने मुमुचुः क्वचिन्न मुमुचुः ज्ञानरूपममृतं काले मुमुक्षुसमागमसमये ददते अन्यत्र न ददते ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ मुमुक्षूणां हितं दर्शयन्निव समीचीनैर्दृष्टान्तैः शारदिकान् धर्माननुवर्णयति, शरदा नीरजोत्पत्त्येत्यादिना यावदध्यायसमाप्ति ॥ शरदेति ॥ नीरजानां कमलानामुत्पत्तिर्यस्यां सा तया, शरदा हेतुभूतया, नीराणि प्रावृट्कालाविलजलानि, प्रकृतिं स्वच्छत्वाविकारित्वशान्तत्वादिरूपस्वस्वभावं, ययुः । भ्रष्टानां योगभ्रष्टानां योगिनां, चेतांसि चित्तानि, पुनः योगनिषेवया इव, अयं भावः । महासरोवरादौ पूर्वगतशरदा जलानि निर्मलान्यासन्, ततः प्रावृषा तान्येवाविलानि जातान्यपि पुनरागतशरत्संगतः स्वप्रकृतिमाययुः । यथा पूर्वं योगसंशीलनतः शुद्धान्यपि योगभ्रष्टानां चेतांसि भूयोऽपि योगनिषेवया पूर्वप्रकृतिं यान्ति यद्वदिति । अनेन योगभ्रंशेन चित्तकालुष्ये सति पुनर्योगमेव सेवेतेति शिक्षितम् ॥ ३३ ॥ व्योम्न इति ॥ व्योम्न आकाशस्य संबन्धिनं, अभ्रं मेघमभ्रवृन्दमित्यर्थः । शबलस्य संकीर्णस्य भावः शाबल्यं संकीर्णत्वं भूतानां प्राणिनां शाबल्यमेकत्र स्थित्या संकीर्णत्वं तत् । यद्वा । भूतशाबल्यं ज्योतिःसलिलमरुतां शाबल्यं संपर्कं, वर्षासु तेषां मिथःसंपर्काच्छरदि तन्निवृत्तेः । भुवः पृथिव्याः संबन्धिनं, पङ्कं कर्दमं, अपां तडागादिगतजलानां, मलं कालुष्यं, शरद् जहार । व्योमभूतपृथ्वीजलानां क्रमेणाभ्रशाबल्यपङ्कमलानि चत्वारि शरदपाहरदित्यर्थः । कथमिव । यथा आश्रमिणां व्योमादिचतुरुपमानभूतानां चतुर्णामाश्रमिणां, अशुभमशुभानि, कृष्णे भक्तिः, हरति तद्वत् । यथा श्रीकृष्णभक्तिर्ब्रह्मचारिणः गुरूपदिष्टार्थग्रहणप्रतिबन्धकमज्ञानात्मकमशुभं हरति तद्वच्छरद्व्योम्नोऽभ्रं जहार । यथा कृष्णभक्ति गृहस्थस्य नानाविषयासक्तिदोषं हरति तद्वच्छरद्भूतशाबल्यं जहार । यथा श्रीकृष्णभक्तिः वनस्थस्य क्वचिदशक्त्या स्वाश्रमोचितकर्माननुष्ठानप्रयुक्तप्रत्यवायं हरति तद्वच्छरद्भुवः पङ्कं जहार । यथा श्रीकृष्णभक्तिः यतिनः श्रीकृष्णप्राप्तिप्रतिबन्धकं पुण्यपापात्मकमशुभं हरति तद्वच्छरदपां मलं जहार । अनेन चतुर्भिरप्याश्रमिभिरवश्यं श्रीकृष्णभक्तिः कार्येत्युक्तं भवति ॥ ३४ ॥ सर्वस्वमिति ॥ जलदा मेघाः, सर्वस्वं स्वेषां सर्वस्वतारूपं जलं, हित्वा त्यक्त्वा, शुभ्रं वर्चो येषां ते तथाभूताः सन्तः, विरेजुः । यथा मुनयो भगवन्मननशीलाः, त्यक्ताः एषणा दारपुत्रधनानां प्राप्तिवाञ्छा यैस्ते, नुक्तानि निरस्तानि किल्बषाणि पापानि यैस्तथाभूताः, अत एव शान्ता उपशमान्विता जनाः, राजन्ते तद्वत् । अनेन जनैः सर्वथा दुःखदा एषणास्त्याज्या इत्युक्तम् ॥ ३५ ॥ गिरय इति ॥ गिरय पर्वताः, क्वचित् शिवं निर्मलं, तोयं जलं, मुमुचुः । क्वचित् न मुमुचुश्च । यथा ज्ञानिनः, क्वचित् ज्ञानामृतं तत्त्वत्रययाथात्म्यज्ञानात्मकं पीयूषं, केभ्यश्चिच्छुश्रूषुभ्यः, काले ददते, केभ्यश्च न वा ददते तद्वत् । अनेन सर्वेभ्योऽपि प्रष्टृभ्यो ज्ञानिभिर्ज्ञानं नोपदेष्टव्यमित्युक्तं तथैवोक्तं भगवता । 'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' इति ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

शरदेति : १०.२०.३३.

भ्रष्टोऽपि योगकलनादुपयाति चेतशुद्धिं यथा हि शरदा विमलत्वमम्भः ।
यत्तत्त्वदङ्घ्रिजुषि सज्जनयोगभाजि भ्रष्टो जडस्त्वमिति वक्तुमनर्हमीश ॥ ५२ ॥

व्योम्न इति : १०.२०.३४.

सर्वेषामाश्रमिणामप्यशुभघ्नो तवेश पदभक्तिः । शरदिव गगनादेरिति सर्वस्पृह्या तु का कथैकस्य ॥ ५३ ॥

सर्वस्वमिति : १०.२०.३५.

वसुसङ्ग्रहादिहाब्दो लभते तव कृष्णरूपमथ शुद्धम् । त्यागाच्चेति न विद्मो ज्यायस्तव मतमिहास्ति कतरदलम् ॥ ५४ ॥

गिरय इति : १०.२०.३६.

न गिरो गिरयो वास्मिन् बह्वृचो बहवश्च तादृशो यत्र । ज्ञानामृतरसलाभस्तस्मात् सर्वेष्टदः प्रभुः सेव्यः ॥ ५५ ॥

कृष्णप्रिया

शरद् ऋतु में कमलों की उत्पत्ति से जलाशयों के जलने अपनी सहज स्वच्छता प्राप्त कर ली–ठीक वैसे ही जैसे योगभ्रष्ट पुरुषों का चित्त फिर से सेवन करने से निर्मल हो जाता है ॥ ३३ ॥ शरद् ऋतु ने आकाश के बादल वर्षाकाल के बड़े हुए जीव पृथ्वी को कीचड़ और जल के मटमैलेपन को नष्टकर दिया जैसे भगवान की भक्ति ब्रह्मचारी, गृहस्थ, वानप्रस्थ, और संन्यासियों के सब प्रकार के कष्टों और अशुओं का झटपट नाश कर देती है ॥ ३४ ॥ बादल अपने सर्वस्व जल का दान करके उज्ज्वल कान्ति से सुशोभित होने लगे ठीक वैसे ही जैसे–लोकपरलोक, स्त्री पुत्र, और धन-सम्पत्ति सम्बन्धि चिन्ता और कामनाओं का परित्याग कर देने पर संसार के बन्धन से छुटे हुए परमशान्त संन्यासी शोभायमान होते हैं ॥ ३५ ॥ अब पर्वतों से कहीं कहीं झरने झरते थे और कहीं कहीं वे अपने कल्याणकारी जल को नहीं भी बहाते थे, जैसे ज्ञानी पुरुष समय पर अपने अमृतमय ज्ञान का दान किसी अधिकारी को कर देते हैं, और किसी किसी को नहीं भी करते ॥ ३६ ॥

नैवाविदन्[1] क्षीयमाणं जलं गाधजलेचराः । यथाऽऽयुरन्वहं [2]क्षय्यं नरा मूढाः कुटुम्बिनः ॥ ३७ ॥
गाधवारिचरास्तापम[3]विन्दञ्छरदर्कजम् । यथा दरिद्रः कृपणः कुटुम्ब्यविजितेन्द्रियः ॥ ३८ ॥
शनैः शनैर्जहुः पङ्कं स्थलान्यामं[4] च वीरुधः । यथाहंममतां धीराः शरीरादिष्वनात्मसु ॥ ३९ ॥
निश्चलाम्बुरभूत्तूष्णीं समुद्रः शरदागमे । आत्मन्युपरते [5]सम्यङ्मुनिर्व्युपरतागमः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—मूढाः कुटुम्बिनः नराः यथा, अन्वहम् क्षय्यम् आशुः न विदन्ति, तथा गाधजलेचराः क्षीयमाणम् जलम् न एव अविदन् ॥ ३७ ॥ दरिद्रः आविजितेन्द्रियः कृपणः कुटुम्बी यथा तापम् विन्दते, तथा गाधवारिचराः तापम् अविन्दन् ॥ ३८ ॥ धीराः शनैः शनैः अनात्मसु शरीरादिषु अहम् ममताम् यथा जहति, तथा स्थलानि पङ्कम् च वीरुधः आमम् जहुः ॥ ३९ ॥ मुनिः आत्मनि सम्यग् उपरते यथा व्युपरतागमः भवति तथा शरदागमे समुद्रः निश्चलाम्बुः सम्यक् तूष्णीम् बभूव ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शनैःशनैरिति । तत्र ममतामिव पंकमहंतामिव आमतामपक्वतां जहुरिति ॥ ३७ ॥ आत्मन्युपरते त्यक्तक्रियो मुनिरिव निश्चलांबुः स एव व्युपरतागमो निवृत्तवेदघोष इव तूष्णीमभूदिति ॥ ३८ ॥ केदारेभ्यो बद्धसेतुशालिक्षेत्रेभ्यो दृढैः सेतुभिरपोऽगृह्णन् ततः परं वृष्ट्यभावात् । प्राणैरिंद्रियैः । तन्निरोधेनेंद्रियप्रत्याहारेण ॥ ३९ ॥ देहाभिमानजं बोध इव व्रजयोषितां तापं मुकुंद इव चेत्यर्थः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र तयोः । स्थलानि भूप्रदेशाः । वीरुधं तत्फलानि ॥ ३७ ॥ आत्मनि मनसि । यद्वा—उपे शर्वपाले हरौरते सति स इव मुनिरिव ॥ ३८ ॥ कर्षकाः कृषीवलाः ॥ ३९ ॥ देहोऽहमित्यभिमानेन जातं तापम् । बोध आत्मज्ञानम् । मुकुंदो व्रजयोषितां तापं यथेति दृष्टांतद्वयमत्र इवशब्दाध्याहारेण ज्ञेयम् ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गाधजलचरत्वेन जलक्षयज्ञानयोग्यतोक्ता तथापि नैवाविदन् दृष्टान्ते च कुटुम्बित्वेन कुटुम्बमरणादिदर्शनादायुःक्षयज्ञानं सम्भावितमेव ॥ ३७ ॥ न च तेषां जलक्षयज्ञानेन भयादिराहित्यात् सुखं किन्तु दुःखं महत्स्यादेवेत्याह—गाधेति । शरदर्कजमिति तापस्य तैक्ष्ण्यमुक्तं दरिद्रः निर्द्धनः तत्र च कृपणः धनार्थोद्यमक्लिष्टः तत्रापि कुटुम्बो स्त्रीपुत्रादिभरणार्थबहुलधनापेक्षक इत्यर्थः । तत्राप्यविजितेन्द्रियः लोभादिपर इत्यर्थः । अत एव तापं त्रिविधं लभ्यते ॥ ३८ ॥ ममताया बाह्यविषयत्वात् पङ्केन अहन्ताया आन्तरविषयत्वादामतया साम्यम् ॥ ३९ ॥ समुद्र इति पूर्वोक्तसिन्धुवत् सम्यगुपरते परित्यक्तक्रिये आत्मनि स्वस्मिन् अन्यत्तः तत्र स एव समुद्र एव तूष्णीं बभूवेत्यन्वयः । व्युपरतेत्यादिद्वयं मुनिविशेषणं ज्ञेयं यद्वा कामादिभ्यो विरते चित्ते यतो मुनिः आत्मारामः अत एव व्युपरतागमः गृहीतमौन इत्यर्थः ॥ ४० ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गाधजलचरत्वात् क्षुद्रा ज्ञेयाः, अतएवायुस्तुल्यं जलं क्षीयमाणमपि न ज्ञातवन्तः । मूढा अविवेकिनः स्त्रीपुत्राद्यासक्ता इति क्रमेण क्षुद्रत्व-गाधजलचरत्वाभ्यां साम्यं कुटुम्बित्वमेव, तथापि साक्षात् पित्रादिमरणानुमानेनापि नावकलयन्तीत्याशयेन जलचरोऽपि

---

१. विन्दन्क्षीय–वीर. विज. । २. क्षीणं–वीर. । ३. स्तापमविदन्–विज. । ४. न्यासंश्च–विज. । ५. यद्वन्मुनि–वीर. विज. ।

विशेषमाह—मूढ़ा इति। यद्वा, गाधजलचरत्वेन जलक्षयज्ञानयोग्यतोक्ता, तथापि नैवाविदन्, यतो मूढ़ा निर्बुद्धयः। एवमन्वहमित्यस्यापि पूर्व्वेणाप्यन्वयः। दृष्टान्ते च कुटुम्बित्वेन कुटुम्बमरणादिदर्शनादायुःक्षयज्ञानं सम्भावितमेव, अन्यत् समानम् ॥ ३७ ॥ न च तेषां जलक्षयाज्ञानेन भयादिराहित्यात् सुखं किन्तु दुःखं महत् स्यादेवेत्याह—गाधेति। पुनस्तदुक्तिस्तथा तेषामेव तापप्राप्तिदार्ढ्यार्थम्, अगाधजलचारिणां तादृशत्वाभावबोधनार्थञ्च। शरदर्कजमिति तापस्य तैक्ष्ण्यमुक्तम्; दरिद्रो निर्धनस्तत्र च कृपणो धनायोद्यमक्लिष्टः, तत्रापि कुटुम्बी स्त्रीपुत्रादिभरणार्थं बहुलधनापेक्षक इत्यर्थः तत्राप्यविजितेन्द्रियः शोभापर इत्यर्थः। अतएव तापं त्रिविधं दुःखातिशयं वा लभते ॥ ३८ ॥ स्थलानि वीरुधश्च क्रमेण पंकमामताञ्च जहुः, आदिशब्देन ममताविषयाः पुत्रादयः, अनात्मसु आत्मव्यतिरिक्तेष्विति त्यागे हेतुः, यतो धीरा विवेकिनः, तत्र ममताया बाह्यविषयकत्वात् पंकेन, अहन्तायाश्चान्तरविषयत्वादात्मतया साम्यम् ॥ ३९ ॥ समुद्र इति पूर्व्वोक्तसिन्धुवत्, सम्यगुपरते परित्यक्तक्रिये आत्मनि देहे स्वस्मिन् वा अन्यत्तैव्याख्यातम्। यद्वा, कामादिभ्यो विरते चित्ते, यतो मुनिः आत्मारामः, अतएव व्युपरतागमो गृहीतमौन इत्यर्थः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

गाधजलेचराः अल्पजलचारिणः ॥ ३७–३८ ॥ आमं जलजाड्यम् ॥ ३९ ॥ मनस्युपरते श्रीभगवद्व्याख्यानरते सति विशेषेण उपरतागमः शास्त्रव्याख्यानरहितो यथा भवतीति ॥ ४०–४२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नैवेति। गाधजलेचराः अल्पजलचारिणः क्षीयमाणं जलं नैवाविन्दन्नेव ज्ञातवन्तः यथा मूढाः अज्ञाः कुटुम्बपोषणरताः नरा अल्पायुषस्तथाप्यन्वहं क्षीयमाणमायुः न जानन्ति तद्वत् अनेन कुटुम्बिभिरपि देहात्मनोर्याथात्म्यं परिशीलयद्भिरन्वहमायुःक्षयानुसन्धाननिमित्तपरितापवद्भिश्च भवितव्यमित्युक्तं भवति ॥ ३७ ॥ गाधेति। गाधवारिचराः क्षुद्रजलचराः शरदि योऽर्कस्तज्जं तापमविन्दन् लेभिरे यथाऽजितेन्द्रियः इन्द्रियपारतन्त्रः कुटुम्बी दरिद्रः धनधान्यहीनः कृपणः दीनः क्षुत्प्रयुक्तं तापञ्जानाति तद्वत् जितेन्द्रियेण भवितव्यमिति सूचितम् ॥ ३८ ॥ शनैश्शनैरिति। स्थलानि शनैः शनैः पङ्कं जहुः वीरुधस्त्वाममपक्वतां जहुः यथा धीराः ज्ञानिनः शरीरादिषु देहेन्द्रियादिषु अनात्मस्वात्मव्यतिरिक्तेष्वहम्ममहन्तां ममतां च जहति तद्वत् तत्राहन्तासाम्यं पङ्कस्य ममतासाम्यमामस्येतिविवेकः अवश्यं ज्ञानिभिरहङ्कारममकारौ यत्नेन परिहर्त्तव्यावित्युक्तं भवति ॥ ३९ ॥ निश्चलेति शरदागमे शरदः प्रवृत्तौ सत्यां समुद्रो निश्चलाम्बुधस्तूष्णीं बभूव यथा मुनिः शुभाश्रयमननशीलः व्युपरतः आगमः अन्नपानाद्यागमो यस्य स अनुपनतान्नपानोऽपि आत्मनि शरीरे उपरतेऽपि आदिकर्मणिक्तः उपरन्तुमारब्धवत्यपि देहविपत्तिपर्यन्तं दशायामपि निश्चलस्तूष्णीमास्ते तद्वत् मुनिनैवं भवितव्यमिति शिक्षा ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गाधजलेचराः अल्पजलनिवासिनो मत्स्यादयः प्राणिनः क्षीयमाणं शुष्यमाणं जलं दृष्ट्वा सुखं नैवाऽविन्दन् अन्वहं क्षय्यं क्षीयमाणम् अन्तं गच्छदायुः अनेन संसारस्याऽनित्यत्वेन असारत्वं संसूचितवान् ॥ ३७ ॥ शरदर्कः शरदृतुसम्बन्धी सूर्यः तस्माज्जातः शरदर्क्कजं तं कुटुम्बसम्बद्धं तापम् ॥ ३८ ॥ वीरुधः आसन् अङ्कुरिताः अनात्मव्यतिरिक्तेषु जडेष्वित्यर्थः ॥ ३९ ॥ उपरते उपरतविषयव्यापारे आत्मनि मनसि। यद्वा, उपे सर्वाधिपे हरौ रते सति उपरतागमः निवृत्तशास्त्रश्रवणादिकः समाधिस्थ इत्यर्थः ॥४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गाधे अल्पप्रमाणे जले चरन्तीति मीनादय इतीयं हेया ॥ ३७ ॥ अविन्दन् लेभिरे यथा दरिद्र इत्यतः पूर्वश्लोके सम्पन्नाः कुटुम्बिनो ज्ञेयाः तेषामेव तत्तापं वर्णयति—गाधेति ॥ ३८ ॥ आत्मा भक्त्यनुकूलो जीवात्मा परमात्मा कृष्णश्च तद्व्यतिरिक्तेषु शरीरादिषु तत्र तत्र तु अहन्ताममते यत्नेन भावयित्वेति भावः इत्युपादेया ॥ ३९ ॥ आत्मन्युपरते त्यक्तक्रिये सति निश्चलचित्तो मुनिरिव निश्चलाम्बुः समुद्रः मथुरापश्चिमदिशि सातोयास इति ख्यातः व्युपरतागमो निवृत्तवेदघोषो मुनिरिव तूष्णीमितीयमुपादेया ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नवाविन्दन् नैव ज्ञातवन्तः ॥ ३८ ॥ आममपक्वभावम् ॥ ३९ ॥ आत्मनि मनसि उपरते ऐहिकामुष्मिकभोगेषणतो निर्विण्णे सति व्युपरतागमः त्यक्तप्रवृत्तिशास्त्रघोषः ॥ ४० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

गाधजले स्वल्पाम्बुनि चरन्तो मीनादयो नैवाविदन् कुटुम्बपोषणैकरताः सम्पन्नाः यथायुरिति हेयेयम् ॥ ३७ ॥ अविन्दन् लेभिरे कृपणो दीनः जितेन्द्रियस्य तु दारिद्र्यं भूषणमिति भावः ॥ ३८ ॥ स्थलानि पङ्कं शनैः शनैः जहुः वीरुधश्चाममपक्वतां

यथा धीरा हरिभक्ताः शरीरेष्वहन्तां गृहादिषु ममताञ्च जहति शरीरादीनामनात्मत्वेनानहमर्थत्वात् गृहादेः परेशस्याधीनत्वादित्युपादेयेयम् ॥ ३९ ॥ शरदागमे समुद्रो निश्चलाम्बुरभूत् यथात्मनि चित्ते भगवत्युपरते समाहिते मुनिस्तूष्णीं सन् व्युपरतागमो निवृत्तवेदघोषो भवति तद्वदित्युपादेयेयम् ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यथा शरीरादिष्वनात्मस्वस्वसम्बन्धिषु धीरा धैर्यवन्तो योगिनोऽहंममतां त्यजन्ति। वीरुध आसन्नित्यनुरूपमङ्कुरणं कस्येत्यतोऽप्याह ॥ धीरा इति। धियां रता इति। एतेन वीरुद्बीजवद्बुद्धिबीजे सति सुकर्मरूपे तत्प्ररोहणं ज्ञेयं। यथा स्थलानि पङ्कं शनैर्जहुस्तत्र वीरुधस्तृणानि चासन् ॥ ३७ ॥ यथाऽऽत्मनि मनस्युपरते विषयेभ्योऽस्पृहया मुनिरुपरतागम उप एव मनोनियामकरुद्रेन्द्रे हरौ रतास्तन्मात्रपरत्वेन योजितागमास्तदुपलक्षितसर्वे शब्दा अन्तरे च येन सः। व्युपरतागमो विर्भगवानेवोप इति रतागम इति वा। उपरतो निवृत्त आगम इतरत्र गमागमौ यस्येति वा समाधिस्थस्तत्काले वेदाध्ययनाध्यापनादिरहित इति वा। असम्प्रज्ञातसमाधिस्थोऽयं तथा शरदागमे समुद्रो निश्चलाम्बुर्निश्चलान्यम्बूनि जलानि यस्य स तूष्णीमभूत्। शरेण द्यति खण्डयतीति तदुद्योगवान्। शरदो रामस्तस्यागमे सति यथा समुद्रस्तूष्णीं निश्चलाम्बुरभूत्तथेति वा। प्रत्यक्षसिद्धमिदमेकान्तरामेश्वरे ॥ ३८ ॥ यथा तन्निरोधेन तेषामिन्द्रियाणां निरोधेऽप्रसरणमन्यत्र तेन प्राणैरिन्द्रियैर्योगिनः समाधिस्थाः स्वविज्ञानं स्वज्ञानं परमात्मज्ञानं चाप्नुवन्ति। तथा कर्षकाः कृषीवलाः केदारेभ्य इतरकृषिभ्यश्चतुर्थी च दृढसेतुभिर्मध्येमार्ग बद्धसेतुभिरपोऽगृह्णन् स्वकृषिं त्यक्त्वा यथा न गच्छेयुरापस्तथा चक्रुरित्यर्थः ॥ ३९ ॥ शरदर्कश्चांशुरंशुकं च ताभ्यां जात इति स तं तापं भूतानां व्रजयोषितां चोडुपश्चन्द्रो मुकुन्दश्च जहारेति पृथक् पृथगन्वयः। तत्र निदर्शनमाह ॥ बोध इति। सज्ज्ञानं देहाभिमानजं मिथ्याज्ञानमिव यथा तद्धरति तथेति। अंशुः सूत्रादिसूक्ष्मांशकिरणे चण्डदीधितौ। उपादानोपादेययोरभेदात्सूत्रसूक्ष्मांशवाच्यंशुपदेन वस्त्रग्रह इति ज्ञेयं। अथवा आ अंशवो यस्मिन्निति पाठो गृह्यते। तत्परिधानजनितधर्मस्य तन्मोचनेन कृष्णकृतं हरणं ज्ञेयं। रासोत्सवस्मरणलालसमानसानां नासह्यबन्धमिह मोचयतीत्यपूर्वं। यत्केशपक्षकुचकुङ्कमरम्यनीवीग्रन्थिं स विश्लथयति व्रजवल्लवीनामित्यादेः। दृष्टान्तद्वयमिति वा ॥४०॥

श्रीसुबोधिनी

एवं शरदो ज्ञानोपयोगित्वमुक्त्वा वैराग्योपयोगित्वमाह **नैवाविदन्निति**, जलस्य क्षयकर्त्री शरज् **जलं च गाधं परिमितं, जलचरा जल एव क्रियाशक्तियुक्ता भवन्ति,** जले गते गता एव तेन जलेन सह यद्यगाधे जले प्रविष्टा भवेयुस्तदा न कापि चिन्ता स्यात्, जलेपि स्थित्वा जलक्षयं न ज्ञातवन्तः, अत एव न प्रयत्नं कृतवन्तः, एतदपि स्वाभाविकं चेन् न शरदुपयोग इति शास्त्रीयत्वसमर्थनार्थं दृष्टान्तमाह **यथायुरिति, आयुषा हि पुरुषार्थाः सम्पादनीयास्तच्चायुः परिमितं तादृशेनाल्पायुषा वृथा व्ययस्थानं गृहं परित्यज्य निर्भयं भगवच्चरणं चेद् गच्छेत् तदा न काचित् क्षतिराधिदैविकायुषः पूर्णस्य तत्र विद्यमानत्वात् सर्वोपोष्टसाधने प्रवर्तत** इति प्रवृत्त्यभावे ज्ञानाभाव एव हेतुः, अतोज्ञानं निन्द्यत **आयुः क्षीयमाणं न विदुरिति**, क्षय्यपदेन शक्यता निरूपिता, यद्ययमक्षयं कर्तुं वाञ्छति तदाक्षयमपि भवति, **आयुः** प्राणविशेष इति पूर्वमुक्तं 'शतायुः पुरुष' इत्यपि सर्वत्र मृत्यवोप्युक्ताः प्रतीकाराश्च, अत **आयुः क्षय्यमित्युक्तं**, **अन्वहमिति** पश्चाज्ज्ञाने पश्चात्तापाभावाय, अज्ञाने हेतुत्रयं **नरत्वं मूढत्वं कुटुम्बित्वं** च स्वभावतः शास्त्रतः सङ्गतश्चेति ज्ञानाभावो निरूपितः ॥ ३७ ॥ ननु क्वचिदज्ञानमपि सुखकरं भवति तथा नरत्वादयोष्यतो वैराग्याभाव ऐहिकं सुखं भविष्यतीत्याशङ्क्याह **गाधवारिचरा** इति, **अल्पवारिचरा** विद्यमानेपि जले शरदा कृत्वा खेदं प्राप्तवन्तः, **अज्ञानं तदैवोपयोगि यदि कालेन कर्मणा वा न पीड्यते**, अतोत्र शरदा मेघा निवर्तिता इति जलशोषकस्य तापजनकस्य सूर्यस्य व्यवधायकाभावाज् जलतापे तथा भवन्ति, तत्रापि पूर्ववद् दोषपरिहारायाह **यथेति**, दोषचतुष्टयाभावे दुःखाभावः प्रत्येकसमुदायाभ्यां तारतम्येन, अन्तःकरणेन्द्रियशरीरविषयाः पुरुषस्य पोषकाः सुखदातारस्ते सर्वे स्वभावदोषसहिताः, तत्र दारिद्र्यं सर्वविषयनाशकं बहिर्मुखस्य दुःखदायि कार्पण्यमन्तःकरणदोषो लोभात्मकः, **दरिद्रोपि** भूत्वालुब्धो यदि भवति तदा न प्राप्नुयाद् दुःखं, तत्राप्येकाकी चेन् न काचित् क्षतिः प्रत्युत **कुटुम्बी**, देहदोषोयं, तथाभूतोपि यदि जितेन्द्रियः स्यान् न काचिच् चिन्ता, न विजितानि विशेषेणेन्द्रियाणि येन ॥ ३८ ॥ एवं शरत्कृतं दोषत्रयमुक्त्वा गुणसहितं केवलान् गुणानाह **शनैःशनैरित्येकादशभिः**, **शनैःशनैः** क्रमेणैव **स्थलानि पङ्कं जहुः**, तामसाः स्वतामसदोषं **जहुः**, **वीरुधो** लतागुल्मादय **आममपक्वतां जहुः**, चकाराद् वृक्षा अपि सात्त्विका **आममेव जहुः**, पूर्ववदेवाह **यथाहम्ममतामिति**, **ममता** पङ्कस्थानीया, अहन्तामस्थानीया, **अहन्ताममतात्यागे यद्यपि शास्त्रं हेतुस्तथापि धैर्याभावात् स्वाभाविकदोषेण पीडिताः शास्त्रीयं** न मन्यन्तेतो धैर्यमेव हेतुत्वेनाह महतां ममतैवान्येषामहन्ताप्यतो द्वयमप्युक्तमभेदश्च, केचिदत्रात्मतादात्म्यमात्मसम्बन्धश्चाहुः, अहङ्कारो ब्रह्मवादे नैयायिकादिसिद्धान्ते च नास्ति तत्रात्मबुद्धिरेवेति स्वयमात्मत्वमध्यस्यत इत्यपरे, तादात्म्यमित्यन्ये, सर्वथा त्याज्यमेव, गौणपक्षेपि त्यागमर्हति, करणपक्षे तु ममता कार्यार्थं इति न त्यागः, अत एव **धीरा इत्युक्तं** न तु भक्ताः, **आदि**शब्देन पुत्रादयः, तेष्वप्यहन्ता केषाञ्चिद् वैदिके त्वहन्तैव पुत्रे भार्यायां च **शनैस्त्यागस्त्यक्तांशस्य पुनरग्रहणार्थं** त्यागे भिन्नत्वं हेतुरिति तदुपपादयत्य**नात्म-**

स्विति ॥ ३९ ॥ एवं बहिर्दोषं परिहृत्य ततोन्तरङ्गदोषपरिहारार्थं समुद्रं निरूपयति निश्चलाम्बुरिति, **पृथिव्यपेक्षया जलमुत्तमं जले च समुद्रः**, तत्र चाञ्चल्यं दोषो रजःसम्बन्धस्तत्र स्वभावत एव नास्ति शब्दश्च दोषश्चलनेनैवोत्पद्यते, उभयमपि राजसं, तामसं पृथिव्यामेवोक्तं च, तदुभयाभावमाह **निश्चलाम्बुरिति**, **तूष्णीमभूदिति**, तत्र हेतुः **शरदेव**, पूर्ववद् दृष्टान्तमाह, **आत्मन्यन्तःकरणे सम्यगुपरते** लयविक्षेपरहिते जाते **मु**निर्मननशील **उपरतागमोपि** भवति निवृत्तवेदार्थानुसन्धानो भवति, यतोयं **सम्यङ् मुनि**र्निष्पन्नमननिदिध्यासनसाधनः, **आगमः** शब्दश्चाञ्चल्याभाव **उपरतिः**, सात्त्विकस्तु तथा दोषो न भवतीति पृथिवीजले एव निरूपिते ॥ ४० ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

नैवाविदन्नित्यत्र नन्वायुर्जीवितकालस्तस्य क्षीयमाणत्वं कालोपाधिभिर्नियतं तथा सति तस्य स्वकृत्या कथमक्षय्यत्वमित्याकाङ्क्षायामायुषः स्वरूपमाहुरायुरित्यादि, 'आयुः प्राण' इतिश्रुतेः स तथा, तथा च श्रुतावनेकमृत्युपक्षस्य तत्प्रतीकाराणां चोक्तत्वात् तत्करणे तस्याक्षय्यत्वं शास्त्रसिद्धमतस्तथेत्यर्थः ॥ ३७ ॥ **गाधवारीत्यात्राभासे क्वचिदित्यादि** विषयभोगादौ विषयस्वरूपयाथात्म्याज्ञानमेव **सुखकर**मित्यज्ञानहेतवो **नरत्वादयोपि** तथेति **वैराग्याभावे** तथेत्यर्थः, **पूर्ववदिति** वर्षावर्णन इव, तथा च व्रजे तापतप्ता **गाधवारिचरा** एव न तु दरिद्रादयस्तेषामेवाभावादित्यर्थः ॥ ३८ ॥ **शनैः शनैरित्यस्याभासे दोषत्रयमुक्त्वा गुणसहितमिति दोषत्रयं गुणसहित**मुक्त्वेति**सम्बन्धः**, ज्ञानिनां कदाचिद् दातृत्वं कुटुम्बिदरिद्रयोरायुरज्ञानं तापश्चेति**दोषत्रयं** ज्ञानोपयोगित्वं वैराग्योपयोगित्वं च **गुणाविति तत्सहितमित्यर्थः**, **पूर्ववदेवाहेति** वर्षावर्णन इव गुणबोधनाय शास्त्रीयं दृष्टान्तमाहेत्यर्थः, ननु यद्येवं तदा ज्ञानिन इति वक्तव्यं न तु धीरा इत्याकाङ्क्षायां धीरपदतात्पर्यमाहुः हं चेत्यादि, **स्वाभाविकदोषेणेति** गुणक्षोभेण सकार्येण, **शास्त्रीयमिति** ज्ञानरूपं साधनं, **अत इति** धैर्यस्यावश्यकत्वात् तथा चावश्यकत्वात् सहकारिणं **धैर्यमेव हेतुत्वेनाहेत्यर्थः**, **शरीरादिष्वित्यत्रादिपदेनेन्द्रियप्राणान्तःकरणान्युच्यन्त** इत्यहन्तात्याग एव वाच्य इत्युभयकथनस्य किं प्रयोजनमित्यतस्तत्तात्पर्यमाहु**र्महतामित्यादि**, **अभेदश्चेति** वक्ष्यमाणरीत्या गौणात्मबुद्धित्वेनाभेदादेकपदोक्तिरित्यर्थः, ननु तलो द्वन्द्वान्ते श्रूयमाणतायां भेदोपि सङ्गच्छत इति तदङ्गीकारे को दोष इत्यतस्तदुपपादनायाहन्ताममतयोः स्वरूपं विचारयन्ति **केचिदित्यादि**, तथा च ते सम्बन्धविशेषाविति पदार्थान्तरं तत्र **तादात्म्यस्याशक्यत्यागत्वादहन्तास्थले** तन्मतमयुक्तमित्याशयेन स्वमतमाहु**रहङ्कार** इत्यादि, **तत्रात्मबुद्धिरिति गौणी शरीरादिष्वात्मबुद्धिः**, मतान्तरमाहु**रात्मत्वमित्यादि**, अतोहन्तास्वरूपं मतभेदेन नाना ममतास्वरूपं तु सर्वत्रात्मसम्बन्धिबुद्धित्वमेवेति **बोध्यं**, अत्र यद्यप्यहन्तायां नाना मतान्युक्तानि तथापि बालस्य स्वशरीरेहम्बुद्धिदर्शनेन बाले च प्राचीनसंस्कारस्य नष्टतयाध्यासलक्षणस्य तत्राभावाच्छरीरात्मनोर्भेदेन तत्र तादात्म्यस्य वक्तुमशक्यत्वाच्चाध्यासादिविलक्षणा नटे रामादिबुद्धिवदियं त्यागानर्हा स्यादिति व्याख्येयग्रन्थविरोध इत्यत आहुः **सर्वथेत्यादि**, तथा च सानपकारित्वात् त्यागानर्हेयन्त्वपकारिणीत्यस्यास्त्यागो युज्यत इति न व्याख्येयविरोध इतिभावः, नन्वत्रायं दृष्टान्तो न युक्तो भक्तानां भगवति ममतादर्शनेन तस्याश्चाहन्तां विनासम्भवेन ममताद्वारा तस्या निरोधकरजत्वेनोपकारित्वादित्यत आहुः **करणपक्षे त्वित्यादि**, **त्यागाभावे गमकमाहुरत एवेत्यादि**, तथा चाधिकारिभेदान् न दोष इति **धीरपदमेव गमकमतो** दृष्टान्तस्य नायुक्तत्वमित्यर्थः, **नन्वादि**पदेन पुत्रादिग्रहणेहन्ताममतयोर्भेद एवायातीति तयोः कथमभेद इत्यत आहु**स्तेष्वित्यादि**, **केषाञ्चिदिति** प्राकृतानां, **वैदिके त्विति** तुरप्यर्थो ज्ञेय 'आत्मा वै पुत्रनामासी'रिति 'तदेतर्थवृगलमि'वेति श्रुतिभ्यां तस्मादहन्ताममतयोरभेद एव ॥ ३९ ॥ **निश्चलाम्बुरित्यत्र** जलदोषनिवृत्तेः पूर्वं 'नोराणि प्रकृति ययु'रित्यत्रोक्तत्वात् पुनरुक्तिरापतेदिति प्रकृते विशेषमाहुरन्तरङ्गेत्यादि, **रजःसम्बन्ध** इति **वेणुसम्बन्ध** इत्यर्थः, ननु व्रजाद् दूरस्थत्वेनात्र समुद्रनिरूपणं कुतस्तत्र लीलाभावादिति न शङ्कनीयमिह तत्र तदभावेपि द्वारकालीलायां तदुपयोगस्य वक्ष्यमाणत्वादत्र हि सार्वत्रिकीर्लीला अभिप्रेत्य तत्र तत्र निरूपणं क्वचिद् दृष्टान्तमुखेन व्यज्यते क्वचिद् दार्ष्टान्तिक उच्यत इति समुद्रनिरूपणस्यापि युक्तत्वादिति ॥ ४० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नैवाविदन्नित्यत्र गत एवेति नष्टा एव भवेयुरिति शेषः, **स्वाभाविकमिति** लोकसिद्धानुवादरूपमित्यर्थः, **शरदुपयोग** इति आध्यात्मिकया इत्यर्थः, **शास्त्रीयत्वेति** तात्पर्यरीत्याऽत्रत्यकुटुम्बिस्वरूपबोधनार्थमित्यर्थः, अत्र दृष्टान्तसधर्मा जलेचरा एव न तु तादृशा नरा अत्रेति भावः, तथा **च** शास्त्रीयत्वं शास्त्रोक्तलीलासृष्टिस्वरूपबोधकत्वमित्यर्थः, सामान्योक्त्या वैराग्यमपि सिद्धं भवति ॥ ३७ ॥ गाधवारीत्यत्र **न पीड्यते** इति पुरुष इति शेषः ॥ ३८ ॥ **शनैः शनैरित्यस्याभासे दोषत्रयमिति** विचार्य ज्ञानदानमप्यनिसुजनस्य न भवतीति सोपि दोष एवेत्यर्थः, अत्र तु गुण एवेत्याशयेनाहुः **गुणसहितमिति**, केवलानिति दृष्टान्तेपि दोषरहितानित्यर्थः, व्याख्याने, केचिदित्यारभ्याहुरित्यन्तं इदं द्वयमहन्तेत्यर्थः, तत्र हेतुं वदन्त इदमेव विवृण्वन्ति **अहङ्कार इति**, यतः पदार्थान्तरं नास्त्यत इत्यर्थः, साङ्ख्यमते एव तथेति भावः, केचित्पदव्यावर्त्यं स्वमतमाहुः **तत्रेति**, अहङ्कारस्य पदार्थान्तराभावे**नात्मत्वेन** ज्ञानमेवाहङ्कार इति **वयं** ब्रह्मवादिनो वदन्तीत्यर्थः, पूर्वोक्तः सम्बन्धोध्यासलक्षण इत्याहुः **अध्यस्यत** इति, एते

उभये केचित्पदेनोक्ता इति ज्ञेयं, **गौणपक्षेपीति** साङ्ख्यमते एवाहङ्कारः पदार्थान्तरं तत्पक्षेपीत्यर्थः, **करणपक्षे** त्विति लीलासिद्धयर्थं **ममता** कर्तव्येतिपक्षे इत्यर्थः, **वैदिके** त्विति "आत्मा वै पुत्रनामासि" "स पतिः पत्नी चाभवता"मित्यादि श्रुतिभ्य इत्यर्थः ॥ ३९ ॥ **निश्चलाम्बु**रित्यत्र **पृथिव्यामेवेति** उक्तं पङ्कामतारूपं राजसतामसमुभयमपि **पृथिव्यामेव**, अत्र तु चाञ्चल्यशब्दरूपं राजसतामसमुच्यत इत्यर्थः, वीरुधोपि पृथिव्येवेत्येवकारः, **तदुभयाभावमिति** चाञ्चल्यशब्दाभावमित्यर्थः, **उपरतागमोपीति** मुनिपदेन चाञ्चल्याभाव उक्त इत्यपिशब्दः ॥ ४० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गाधवारिचरा इत्यस्य व्याख्याने **अन्तःकरणेन्द्रियशरीरविषयाः पुरुषस्य पोषकाः सुखदातार** इति एतैरस्वस्थैः प्राणी दुःखी भवति, तत्र **दरिद्र** इतिपदेन विषयाभाव उक्तः, **कृपणपदेनान्तःकरणदोषः**, **कुटुम्बपदेन** शरीरदोषः, **अविजितेन्द्रियपदेनेन्द्रियदोषः**, एवं चतुर्भिः दोषैः प्राणी तापं प्राप्नोति ॥ ३८ ॥ **ममता पङ्कस्थानीयेति** स्त्रीपुत्रादौ या **ममता** सा **पङ्कस्थानीया** शीघ्रं निवर्तितुं शक्येत्यर्थः, **अहन्ता आमस्थानीयेति** शरीरादौ या अहन्ता सा आमस्थानीया चिरकालेन बहुभिरुपायैर्निवर्तितुं शक्येत्यर्थः, अत एव स्त्रीपुत्रादौ स्नेहं बहवस्त्यजन्ति, देहादौ तु स्नेहः केनचिदेव त्यज्यते इति तथा, **महतां ममतैवेति** शास्त्राद्युत्पन्नज्ञानानां तु देहादौ नाहम्बुद्धिः देहव्यतिरिक्तस्यात्मनो ज्ञानात्, किन्तु ममतैवेत्यर्थः, **अन्येषामहन्तापीति** ज्ञानरहितानां तु देहादावहम्बुद्धिरपीत्यर्थः, **अत एव धीरा** इत्युक्तं **न तु भक्ता** इति, भक्तानां तु **भगवत्समर्पितपदार्थेषु ममता** रक्षणीयेवेति ममताकरणपक्षो भक्तानामित्यर्थः, **धीराणां तु ममता** त्याज्यैवेति **न ममताकरणपक्षः किन्तु ममतात्यागपक्ष** एवेति भावः, **वैदिकेत्वहन्तैव पुत्रे भार्यायां** चेति, "आत्मा वै पुत्रनामासी"ति श्रुतेः पुत्रेऽहन्ता "आत्मनो वा एष अर्धो यत् पत्नी"तिश्रुत्या **भार्यायामहन्ता वैदिके मार्गे** इत्यर्थः ॥ ३९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गाधजलेचराः क्षुद्रजले वर्तमानाः अपि मत्स्यादयो जलचरत्वेन जलक्षयज्ञानयोग्याश्रयि जीवनहेतुभूतं जलमन्वहं क्षीयमाणं नैवाविदन् नैव ज्ञातवन्तः । यथा कुटुम्बिनो नराः कुटुम्बित्वेन कुटुम्बभरणादिदर्शनादायुःक्षयज्ञानयोग्या अपि आयुः अन्वहं क्षय्यं क्षीयमाणं न जानन्ति तथा । यदा अगाधजले समुद्रे वर्तमाना जलक्षयं न जानीयुः, यदा च महदायुष्मन्तो ब्रह्मादयो वा आयुःक्षयं न जानीयुः, तदा प्रलयपर्यन्तं न काचिच्चिन्ता । अतः 'गाधे' इति 'नरा' इति च पदद्वयम् ॥ अज्ञाने हेतुमाह—मूढा इति । मायामोहिता इत्यर्थः । 'तथाच मुमुक्षुभिः श्रेयोर्थिभिरेवं प्रमादो न कर्तव्य' इति हेयोपमा ॥ ३७ ॥ गाधे क्षुद्रे वारिणि चरन्तीति गाधवारिचरा मीनादयः शरदर्कजतापमविन्दन् लेभिरे । तत्र दृष्टान्तमाह—यथा दरिद्रः संसारतापं लभते तथेति । अगाधजलस्य बहुतापो न भवति, अतस्तत्रस्थानामपि तथा तापो न सम्भवत्यतो 'गाधे' इत्युक्तम् । तथा धनाढ्यानामपि भोजनाच्छादनादिक्लेशाभावात् तथा उत्कटतापो न भवत्यत उक्तं 'दरिद्र' इति । अत एव धनाद्यभावात् कृपणः दीनः । शरदि हि तापजनकस्य सूर्यस्य व्यवधायकानां मेघरेण्वादीनामभावात्तापाधिक्यसूचनायोक्तं—'शरदर्कजम्' इति । दरिद्रोऽपि यद्येकाकी स्यात्तदापि न तप्येत, अत आह–'कुटुम्बि' इति । तथापि यदि जितेन्द्रियो विवेकी स्यात्तदापि सर्वमीश्वराधीनं मत्वा न तप्येत, अत आह–अविजितेन्द्रिय इति । 'तथेन्द्रियपारवश्यस्य तापजनकत्वात् तदधीनतया न वर्तितव्यम्' इति हेयोपमा ॥ ३८ ॥ यथा धीराः पुरुषाः शनैः शनैः शरीरेऽहन्तां त्यजन्ति तथा **वीरुधः** आमतामपक्वतां जहुः । यथा च ते पुत्रादिषु ममतां त्यजन्ति, तथा स्थलानि पङ्कं जहुः । यद्यप्यहन्ताममतात्यागे शास्त्रमप्यस्ति हेतुः, तथापि धैर्याभावेन स्वाभाविकप्रवृत्त्या पीडिताः शास्त्रीयं प्रामाण्यं न मन्यन्तेऽतो मुख्यत्वाद्धैर्यमेव हेतुत्वेनोक्तम् । त्यागे हेतुमाह—अनात्मस्विति । तथाच 'सर्वस्य जगतः ईश्वरस्वामिकत्वं मत्वा तत्र सर्वथा अहन्ता ममता त्याज्यैव' इति हेयोपमा ॥ ३९ ॥ आत्मनि मनसि सम्यगुपरते विरक्ते सति मुनिर्यथा व्यपरतागमो निवृत्तवेदघोषो भवति, ततः परमध्ययनाभावात्, तथा शरदागमे सति निश्चलाम्बुः समुद्रस्तूष्णीमभूत् । तथाच 'परमविरक्त्या तूष्णीं भवितव्यम्' इत्युपादेयोपमा ॥ ४० ॥

अन्वितार्थप्रकाशिका

नेति ॥ गाधजलेचराः क्षुद्रजले वर्तमानाः अपि मत्स्यादयो जलमन्वहं क्षीयमाणं नैवाविदन् नैव ज्ञातवन्तः । "विद्लृ लाभे" लुङ् । औचित्यात् ज्ञाने वृत्तिः । वेत्तेर्लङि जुसोऽभाव आर्षो वा । यथा मूढाः कुटुम्बिनो नराः आयुः अन्वहं क्षय्यं क्षीयमाणं न जानन्ति तथा ॥ ३७ ॥ गाधेति ॥ गाधे क्षुद्रे वारिणि चरन्तीति गाधवारिचरा मीनादयः शरदर्कजं तापमविन्दन् लेभिरे । यथा पूर्वं सम्पन्नः पश्चात् दरिद्रः कृपणः दीनः कुटुम्बी अविजितेन्द्रियश्च जनः संसारतापं लभते तथा ॥ ३८ ॥ शनैरिति ॥ यथा धीराः पुरुषाः शनैः शनैः अनात्मसु शरीरादिषु अहन्तां त्यजन्ति तथा वीरुधः आमतामपक्वतां जहुः । यथा धीरा ममतां जहति तथा स्थलानि पङ्कं जहुः ॥ ३९ ॥ निश्चलेति । आत्मनि मनसि सम्यगुपरते विरक्ते सति मनिर्यथा व्युपरतागमो निवृत्तवेदघोषो भवति ततः परमध्ययनाभावात्तथा शरदागमे सति निश्चलाम्बुः समुद्रस्तूष्णीमभूत् ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गाधजलेऽल्पसलिलेचराः मीनादयः ॥ ३७ ॥ गाधवारिचराः अल्पजलस्थाः मत्स्यादयः शरदर्काज्जातं अविदन् प्रापुः कुटुंबी कुटंबयुक्तः ॥ ३८ ॥ शरीरादिषु देहदैहिकेषु अनात्मसुखजीवात्मभिन्नेषु ॥ ३९ ॥ आत्मनि मनसि उपरते विषयेभ्यो विरते हरिध्याने च प्राप्ते सति त्यक्तक्रियो मुनिरिव शरदि समुद्रः स्थिरजलोऽभूत् व्युपरतानि निवृत्तान्यागमा निवेदघोषा यस्य स व्युपरतागमो मुनिरिव समुद्रस्तूष्णीमभूत् ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नैवेति ॥ गाधजलेचराः अल्पजलसरश्चारिणः, क्षीयमाणं प्रतिदिनं क्षीणतामुपगच्छत्, जलं नैव, अविन्दन् नैव ज्ञातवन्तः । यथा मूढा अज्ञाः, कुटुम्बिनः कुटुम्बपोषणरताः नराः, अन्वहं प्रतिदिनं, क्षय्यं क्षीयमाणं, आयुः न जानन्ति तद्वत् । अनेन कुटुम्बिभिरपि देहात्मनोर्याथात्म्यं परिशीलयद्भिः सद्भिरन्वहमायुःक्षयानुसंधाननिमित्तपरितापवद्भिर्भवितव्यमित्युक्तं भवति ॥ ३७॥ गाधेति ॥ गाधवारिचराः क्षुद्रजलचराः, शरदर्कजं शरत्कालीनसूर्यजं, तापं अविन्दन् लेभिरे । यथा अविजितेन्द्रियः परतन्त्रः, कुटुम्बी, दरिद्रः धनधान्यहीनः, कृपणो दीनः, क्षुत्प्रयुक्तं तापं जानाति तद्वत् । अनेन जितेन्द्रियेणैव भवितव्यमिति सूचितम् ॥ ३८ ॥ शनैरिति ॥ स्थलानि शनैः शनैः, पङ्कं कर्द्दमं, जहुः । वीरुधः प्रतानिन्यः, आममपक्वतां च, जहुः । यथा धीरा ज्ञानिनः, अनात्मस्वात्मव्यतिरिक्तेषु, शरीरादिषु देहेन्द्रियादिषु, अहंममतामहंतां ममतां च, जहति तद्वत् । तत्राहंतासाम्यं पङ्कस्य ममतासाम्यमामस्येति विवेकः । ज्ञानिभिरहंकारममकारौ यत्नेनावश्यं परिहर्त्तव्यावित्युक्तम् ॥ ३९ ॥ निश्चलेति ॥ शरदागमे शरदः प्रवृत्तौ सत्यां, समुद्रः, निश्चलाम्बुः सन्, तूष्णीं अभूत् । यथा मुनिः शुभाश्रयभगवन्मूर्त्तिमननशीलः योगी, आत्मनि मनसि, उपरते उपरतविषयव्यापारे सति, सम्यक् व्युपरतागमः निवृत्तशास्त्रश्रवणादिकः, समाधिस्थः सन्नित्यर्थः । तूष्णीं आस्ते तद्वत् । मुनिनाऽऽत्मनि हरिं ध्यात्वा मनस्तन्मूर्त्तौ स्थिरं कृत्वा सर्वानन्यान् व्यापारांस्त्यक्त्वा तूष्णीभूतेन भवितव्यमिति सूचितम् ॥ ४० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नैवेति : १०.२०.३७.

अत्यल्पवस्वभिनिविष्टपदा न जातु जानन्ति मूढमतयोऽन्वहमीड्यमायुः ।
संक्षीयमाणमपि ये नृषु तेषु को वा पङ्काङ्क-गाधजलजन्तुचयाद् विशेषः ॥ ५६ ॥

गाधेति : १०.२०.३८.

प्रतिपदमपि तापं संसृतिव्यापृतिज्ञा विषयसुखमहाशा चण्डमार्तण्डजातम् ।
भृशमिह कलयन्तोऽप्यन्यतो वर्णयन्तोऽण्वपि हृदि न विरक्ताश्चित्रमस्मात् किमन्यत् ॥ ५७ ॥

निश्चलेति : १०.२०.४०.

प्राप्तायत्नसमस्तसद्वसुरपि स्वर्णश्रियाऽपि स्वतो युक्तो भव्यदरत्नशोभिहृदयो मुक्तौघराजत्तनुः ।
यः स्यात्सेतुविदुज्झितस्मयभरो विध्युक्तवेलाञ्चितो जागर्त्यन्तर एव तस्य हरिरित्यब्धौ स्फुटं शारदे ॥ ५८ ॥
सम्पाद्य वृत्तिं यो धीमान् वसुसङ्ग्रहकारिणीम् । तूष्णीं तिष्ठति तस्येड्या वार्धिवत् कृतकृत्यता ॥ ५९ ॥

कृष्णप्रिया

छोटे-छोटे गड्ढों में भरे हुए जल के जलचर यह नहीं जानते कि इस गड्ढे का जल दिन पर दिन सूखता जा रहा है, जैसे कुटुम्ब के भरण-पोषण में भूले हुए मूढ़ यह नहीं जानते कि हमारी आयु क्षण-क्षण क्षीण हो रही है ॥ ३७ ॥ थोड़े जल में रहने वाले प्राणियों को शरत्कालीन सूर्य की प्रखर किरणों से बड़ी पीड़ा होने लगी जैसे अपनी इन्द्रियों के वश में रहने वाले कृपण एवं दरिद्र कुटुम्बो को तरह-तरह के ताप सताते ही रहते हैं ॥ ३८ ॥ पृथ्वी धीरे-धीरे अपनी किचड़ छोड़ने लगी और घास-पात धीरे-धीरे शरीर आदि अनात्म पदार्थों से "यह मैं हूँ और यह मेरा है" यह अहंता और ममता छोड़ देते हैं ॥ ३९ ॥ शरद ऋतु में समुद्र का जल स्थिर, गम्भीर और शान्त हो गया जैसे मन के निःसङ्कल्प हो जाने पर आत्माराम पुरुष कर्मकाण्ड का झमेला छोड़कर शान्त हो जाता है ॥ ४० ॥

केदारेभ्यस्त्वपोऽगृह्णन् [1]कर्षुका दृढसेतुभिः । यथा प्राणैः [2]स्रवज्ज्ञानं तन्निरोधेन योगिनः ॥ ४१ ॥
शरदर्कांशु[3]जांस्तापान् भूतानामुडुपोऽहरत् । देहाभिमानजं [4]दुःखं मुकुन्दो व्रजयोषिताम् ॥ ४२ ॥
खमशोभत निर्मेघं शरद्विमलतारकम् । सत्त्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनम् ॥ ४३ ॥
अखण्डमण्डलो व्योम्नि रराजोडुगणैः शशी । यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो[5] भुवि ॥ ४४ ॥

---

१. कर्षका–श्रीधर. वंशी. वीर. विज. । २. स्वविज्ञानं-विज. । ३. दर्काशुजं तातं–वीर. विज. । ४. बोधो–श्रीधर. वंशी. वीर. विज. ।
५. चक्रं वृंतो–विज. ।

कर्दमक्षमा

अन्वयः योगिनः प्राणैः स्रवत् ज्ञानम् यथा तन्निरोधेन रक्षन्ति, तथा कर्षुकाः दृढसेतुभिः केदारेभ्यः अपः अगृह्णन् ।४१। मुकुन्दः व्रजयोषिताम् देहाभिमानजम् दुःखम् यथा हरति तथा उडुपः भूतानाम् शरदर्कांशुजान् तापान् अहरत् ॥४२॥ शब्द ब्रह्म अर्थ दर्शनम् सत्वयुक्तम् चित्तम् यथा शोभते तथा शरद् विमलतारकम् निर्मेघम् खम् अशोभत ॥ ४३ ॥ वृष्णिचक्र आवृतः यदुपतिः कृष्णः भुवि यथा राजते, तथा व्योम्नि अखण्डमण्डलः शशी उडुगणैः रराज ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शरदा विमलास्तारका यस्मिंस्तत् । शब्दब्रह्मणो वेदस्यार्थान्पूर्वोत्तरमीमांसानिर्णीतान्दर्शयतीति तथा तद्वत् ॥४१-४२॥ समोऽन्यूनाधिकः शीतश्चोष्णश्च तम् । न तु गोप्यः । कृष्णापहृतचेतस्त्वेन तासां संतापो दुःसह इति । यद्वा नकार उपमार्थः । तदा कृष्णहृतचेतस इति चेतसा कृष्णमाश्लिष्य यथेत्यर्थः ॥ ४३ ॥ पुष्पिण्यो गर्भिण्यः । अन्वीयमानाः स्ववृषैः स्वपतिभिरनिच्छन्त्योऽपि बलादनुगम्यमानाः । ईश्वराराधनार्थाः क्रिया बलात्फलैरनुगम्यमानाः समस्तभोगगर्भा यथेति ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सत्त्वेन व्यवसायेन गुणेन वा युक्तं यथा शोभते इति । पूर्वमीमांसानिर्णीतार्था विधिनिषेधार्थवादादिरूपाः, उत्तरमीमांसानिर्णीतार्थाः श्रवणादिसाधनैश्शास्त्रोपदिष्टपंचकोशादिविवेकेन वस्तुतत्त्वावधारणोपयोगिनस्तान् । शुद्धचित्ते एव श्रवणादिना ज्ञानं जायते नान्यथेति तात्पर्यम् ॥ ४१ ॥ अखंडमंडलः परिपूर्णकलः ॥ ४२ ॥ प्रसूनवनम् पुष्पवनम् । दार्ष्टांतिकाद्वैषम्यं दृष्टांते मत्वा तस्यार्थांतरमाह–तद्वेति । तदा शरदि । इत्यर्थ इति । कृष्णे हृतं प्रापितं चेतो याभिस्तास्तथा । कृष्णध्यानेन संजातानंदा इति तात्पर्यम् ॥ ४३ ॥ यद्वा–ईशक्रियाः सभाग्यकर्माणि यथायत्नेनैव फलंति तद्वदिति भावः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भग्नैः सेतुभिः केदारेभ्यः स्रवन्तीरपः दृढैः सेतुभिरगृह्णन् अरक्षन् प्राणैरिन्द्रियैः क्षुभितैर्द्वारभूतैः स्वेभ्यः स्रवज् ज्ञानं प्रत्याहारेण यथा रक्षन्तीत्यर्थः ॥ ४१ ॥ शरदिति लुप्तोपमेयं व्यवहारिकाणां तादृशतापहरणे उडुपो विशिष्टः पारमार्थिकानां बोध आत्मज्ञानं तदैकानुरक्तानां व्रजयोषितान्तु मुकुन्द एवेति तासां वैशिष्ट्यं बोधितम् आसां तापश्चानिर्वचनीयताविवक्षया प्रसिद्धतया चानुरक्तोऽपि क्षणं युगशतमिव यासां येन विनाऽभवदित्यनुसारेण ज्ञेयः वक्ष्यते च आश्लिष्य इत्यादौ गोप्योऽपि कृष्णहृतचेतस इति ॥ ४२ ॥ खमिति । खस्य स्थाने चित्तं ज्ञेयं निर्मेघतायाः सत्वयुक्तत्वं तेन मेघस्थानीयरजस्तमोनिषेधात् शरदः शब्दब्रह्म तारकाणां तदर्थाः तारकाशब्देन च चन्द्र एव मुख्यत्वेन गृह्यते तदीशत्वात् तदुक्तं "नक्षत्रेशः क्षपाकरः" इत्यादेः तत्र चन्द्रस्य भगवत्त्वम् अन्येषां त्वन्येऽर्था इति ॥ ४३ ॥ तथैवाह–अखण्डेति । चन्द्रस्य पूर्णिमापेक्षया श्रीकृष्णस्य च स्वयं भगवत्ताप्राकट्यापेक्षया तत्र यद्यपि वर्षास्वपि शशिनस्तादृशस्य सोडुगणस्य स्वतो राजमानत्वमस्त्येव किन्तु घनाच्छन्नतया न दृश्यते शरदि तु तद्भावात् दृश्यते तथा यदुपतेरप्यप्राकट्यसमयानुसारेण योज्यं यदुपतिरित्यधिकोक्त्या यदुभिः सह तस्य नित्यसम्बन्धो ज्ञाप्यते वृष्णिशब्दनिर्देशोऽत्र यदुषु तेषां प्राधान्यापेक्षया ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

केदारेभ्यो भग्नसेतुभिः स्रवन्तीरपः अगृह्णन् अरक्षन्, प्राणैरिन्द्रियैः क्षुभितैर्ज्वरीभूतैः स्वेभ्यः स्रवज्ज्ञानं ध्यानादिरूपं मननादि-लक्षणं वा; यद्वा केदारेभ्य इति चतुर्थी, केदारार्थम्, यथा कामलोभादिना स्रवज्ज्ञानमिन्द्रियैः श्रोत्रवागादिभिः कृतेन श्रवणनिरोधेन ज्ञानं गृह्णन्ति ॥ ४१ ॥ बोधयति उद्धवादिना तत्त्वं ज्ञापयतीति बोधः, मुकुन्दो व्रजयोषितां देहाभिमानजं तापमहरदिति यच्छ्रीस्वामिपादैर्न व्याख्यातम्, तेन श्रीगोपीमाहात्म्यविज्ञेभ्यस्तेभ्यस्तद्व्याख्यायै तद्भावाय च नमो नमः । एवमनेकशो महानुभावैरूह्यमेव तत्र देहाभिमानजतापस्य सदैव बोधेन हरणात् । पक्षान्तरं मुकुन्द इति दिवाविरहजं तापं रात्रौ यथा हरतीति; यद्वा, बोधयति संकेतवेणुनादादिना कुञ्जादिस्थितमात्मानं निजरसविशेषोद्यमं वा ज्ञापयतीति बोधो मुकुन्दः सुखविशेषदाता श्रीभगवान्, व्रजयोषितां देहेषु अभिमानोऽन्यदीयत्वकुलजातत्वादिरूपस्तस्माज्जायमानं तापं श्रीकृष्णप्रत्यादिदुःखविशेषं यथा मोहन-वेणुवाद्यादिना हरतीति ॥ ४२ ॥ मेघस्थाने रजस्तमोरूप आवरको ज्ञेयः, अतस्तदभावेन सत्त्वयुक्तम्; अन्यत्तैर्व्याख्यातम् । यद्वा, तारयति तमसो लोकान्, किंवा, निजोदयतो रासक्रीडाप्रवर्त्तनादिना तारयति संसारात् सर्व्वानेव गोपीर्वा विरहदुःखादिति तारकश्चन्द्रः, शरदा विमलः सुप्रसन्नोऽसौ यस्मिन् तत् शरदिति तस्यां तस्य स्वभावत एव प्रकाशाधिक्याभिप्रायेण, मेघतुल्यरजस्तमोऽपगमात् प्रकाशमयत्वेन सत्त्वगुणयुक्तम् । शब्दब्रह्मणो वेदस्यार्थः क्वचित् साक्षाद्वृत्त्या, क्वचिच्च तात्पर्य्यवृत्त्या अभिधेयः श्रीकृष्णे विमलचन्द्रोपमस्तस्य दर्शनं साक्षादिव परिस्फुर्त्तिर्यस्मिन् तत् ॥ ४३ ॥ अखण्डं सम्पूर्णं मण्डलं यस्येति, मेघानामपगमात्तै-

मंण्डलाच्छादनाभावेन पूर्णिमापेक्षया वा, श्रीवृन्दावने नित्यसम्पूर्णचन्द्रोदयाभिप्रायेण वा, तेन च यदुपतित्वसाम्यम्। तत्र साक्षाच्छ्रीगरुड़ारोहणादिना सम्पूर्णस्य बाह्यैश्वर्य्यस्य वा प्रकटनात्। एतच्च भाव्यपि श्रीशुकपरीक्षित्सम्वादात् प्राक्तनत्वेनात्र निर्दिष्टम्; यद्वा, यदुवृष्णि-शब्दाभ्यां पूर्व्वलिखित-श्रीस्कन्दपुराणोक्तानुसारेण गोपा एव बोद्धव्याः ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

प्राणैरिन्द्रियैः शब्दब्रह्म वेदः ॥ ४३-४५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

केदारेभ्य इति पञ्चमी कृषीवलाः शालिक्षेत्रेभ्यः प्रवहन्तीरपः जलानि दृढैः सेतुभिर्बन्धनैरगृह्णन्निरुद्धवन्तस्ततः परं वृष्ट्यभावादिति भावः। यथा योगिनः प्राणैरिन्द्रियैः तद्द्वारास्रवत् बाह्यविषयग्रहणप्रवणीभवत् ज्ञानं धर्मभूतज्ञानं तन्निरोधेन प्राणनिरोधेन आत्मस्वरूपगोचरं कुर्वन्ति तद्वत् इन्द्रियनिरोधपरेणात्मस्वरूपरिशीलनपरेण च भवितव्यमिति सूचितम् ॥४१॥ शरदिति। उडुपश्चन्द्रो भूतानां शरदि योऽर्कस्तस्यांशुभ्यो जातांस्तापान् जहार उत्तरार्द्धस्य यथेत्यादि यथा देहाभिमानेन जातं तापं परकृतनिन्दादिप्रयुक्तं देहयाथात्म्यगोचरो बोधो हरति यथा च व्रजयोषितां तापं मन्मथप्रयुक्तं मुकुन्दो जहार तद्वत् 'देहाभिमानजं तापं' इति पाठे बोध इति कर्तृपदमध्याहर्त्तव्यं यथोक्त एवार्थः अनेन हेयत्वज्ञानार्थं देहयाथात्म्यपरिशीलनमपि कर्त्तव्यमित्युक्तं भवति ॥ ४२ ॥ खमिति। निर्मेघं मेघरहितं शरदि विमलास्तारका यस्मिंस्तथाभूतं सन् खमशोभत यथा सत्त्वयुक्तं सत्त्वगुणयुक्तं सत्त्वप्रचुरमिति यावत्तच्चित्तं शब्दब्रह्मणो वेदस्य योर्थोर्थपञ्चकरूपस्तं पश्यतीति नन्द्यादित्वात्कर्तरिल्युः यद्वा शब्दब्रह्मार्थो लक्ष्यते अनेनेति तथा करणे ल्युट् सत्त्वप्रवणं चेतो रागाद्यकलुषितं सन्निर्मलमतीन्द्रियवेदार्थप्रकाशकं भवति तद्वदित्यर्थः। सत्त्वप्राचुर्याय आहारशुद्ध्या भवितव्यमिति सूचितम् अत्र तारकास्थानीयाः वेदार्थाः परमात्मतदाराधनराधकादिस्वरूपात्मकाः आकाशस्थानीयं विवेकः ॥ ४३ ॥ अखण्डमण्डलेति। शशी चन्द्रो व्योम्न्याकाशे निर्मेघेऽखण्डं पूर्णं मण्डलं यस्य तथाभूतो नक्षत्रसमूहैः सह रराज यथा चेतः मेघस्थानीयरजस्तमश्चेति यदुपतिः श्रीकृष्णो भुवि वृष्णीनां समूहेनावृतो रराज तद्वत् अनेन यदुपतेश्चन्द्रवत्सर्वलोकाह्लादकरत्वमभिप्रेतम् ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

केदारेभ्यः केदारार्थं प्राणैरिन्द्रियैः तेषामिन्द्रियाणां निरोधेन प्रत्याहारेण ॥ ४१ ॥ अहं देह इति देहाभिमानो देहविषयं ज्ञानं तस्माज्जातं देहाभिमानजं तापं बोध आत्मज्ञानं मुकुन्दो यथेति शेषः। दृष्टान्तद्वयम् ॥ ४२ ॥ खमाकाश शरदा विमलानि विशदानि तारकाणि यस्मिंस्तथा सत्त्वेन व्यवसायेन युक्तं सत्त्वगुणोपेतं वा शब्दात्मकं ब्रह्म वेदस्तस्य मुख्यवाच्यः श्रीनारायणस्तं दर्शयतीति शब्दब्रह्मार्थदर्शनं शब्दब्रह्म हिरण्यगर्भः तस्यार्थो हेतुः कारणमिति वा ॥ ४३ ॥ अखण्डमण्डलं पूर्णमण्डलम् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

काले प्राप्तसाद्गुण्ययात्रावसरे अन्यथा तदभावे केदारेभ्यः स्रवन्तीरिति लिङ्गविपरिणामेन अत्र प्रणालीभिरिति शेषः स्रवदित्यत्र चात्मन इति शेषः ॥ ४१ ॥ देहाभिमानजमिति शसः स्थाने अमादेशः व्रजयोषितामिति। सन्ध्यादिसमये दर्शनादिना विरहतापानिति ज्ञेयम् ॥ ४२-४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

केदारेभ्यः स्रवन्तीरपः दृढैः सेतुभिरगृह्णन् ररक्षुः यथा प्राणैरिन्द्रियैरिन्द्रियक्षोभैः स्रवत् ज्ञानं तेषामिन्द्रियाणां निरोधेन प्रत्याहारेणेत्युपादेया ॥ ४१ ॥ यथा देहाभिमानजं तापं बोधः यथा च व्रजयोषितां विरहतापं मुकुन्द इत्युपादेया ॥ ४२ ॥ शब्दब्रह्मणो वेदस्य अर्थाः निवृत्तकर्मज्ञानभक्तियोगास्तेषां दर्शनं ज्ञानं यत्र तत् चित्तं कीदृशं सत्त्वयुक्तं साधुत्वयुक्तं तत्र खस्य चित्तेन साम्यं निर्मेघत्वस्य सत्त्वयुक्तत्वेन शब्दब्रह्मणा शरदः निवृत्तकर्मज्ञानतपोयोगैस्ताराणां भक्तियोगेन तारापदगम्यस्य तारकेशस्येतीयमुपादेया ॥ ४३ ॥ सम्पूर्णमण्डलत्वस्य स्वयं भगवत्त्वेन साम्यं यदुपतित्वेन ओषधीशत्वस्य वृष्णिचक्रैः नन्दोपनन्दवसुदेवाक्रूरादिभिः दृश्यैर्द्दृश्यानामुडुगणानामितीयं ध्यानार्थमुपादेया ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

केदारेभ्य इति। तादर्थ्ये चतुर्थी तत् सिञ्चनार्थमित्यर्थः। अगृह्णन् विरुद्धवन्तः प्राणैरिन्द्रियैः विषयोन्मुखैः स्रवत् ज्ञानम् तन्निरोधेनीन्द्रयप्रत्याहारेण गृह्णन्ति ॥ ४१-४२ ॥ यथा शब्दब्रह्मार्थं "सर्वे वेदा यत्पदमामनन्ति" वेदैश्च सर्वैरहमेव वेद्यः" इति श्रुतिस्मृतिप्रोक्तं वेदैकवेद्यं श्रीकृष्णं दर्शयतीति तत् सत्त्वयुक्तं शोभते तथा शारदा विमला तारका यस्मिन् तत् खमशोभत ॥४३-४४॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

केदारेभ्यः स्रवन्तीरपः कर्षका दृढैः सेतुभिरगृह्णन् ररक्षुः यथा योगिनः प्राणैर्विषयक्षुभितैरिन्द्रियैः स्रवज्ज्ञानं तेषां निराधेन प्रत्याहारेणेतीयमुपादेया ॥ ४१ ॥ उडुपश्चन्द्रः शरदर्कांशुजं तापमहरत् बोध इव देहाभिमानजं तापं मुकुन्द इव व्रजयोषितां विरहः तमित्युपादेया ॥ ४२ ॥ शब्दब्रह्मणो वेदस्य येऽर्था निवृत्तकर्मज्ञानभक्तिरूपास्तेषां दर्शनं यत्र तच्चित्तं कीदृक् सत्वयुक्तं साधुत्वविशिष्टं तत्र स्वस्य चित्तेन साम्यं निर्मेघत्वस्य सत्वयुक्तत्वेन शरदः शब्दब्रह्मणा ताराणां निवृत्तकर्मज्ञानाभ्यां तारापदवाच्यस्य ताराधीशस्य भक्त्येतीयमुपादेया ॥ ४३ ॥ अखण्डमण्डलत्वस्य स्वयं भगवत्त्वेन तुल्यता ओषधीशत्वस्य यदुपतित्वेन उडुगणानां कृष्णचक्रैः नन्दोपनन्दवसुदेवाक्रूरादिभिरितिध्यानार्थमुपादेया ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शरदा विमलास्तारका यस्मिंस्तन्निर्मेघं निर्गता मेघा यस्मात्तत्खमशोभताभात् । सत्त्वेन व्यवसायेन गुणेन च युक्तं चित्तं यथा शब्दब्रह्म वेदस्तदर्थो भगवांस्तं दर्शयतीति तत्तथा । अर्थस्य दर्शनं येनेति वा ॥ ४१ ॥ यथा वृष्णिचक्रैर्यादवसमूहैर्वृतो यदुपतिः श्रीकृष्णो राजति तथा व्योम्नि उडुगणैरखण्डमण्डलं यथा तथा शशी रराज ॥ ४२ ॥ समशीतोष्णं समेऽन्यूनाधिके शीतोष्णे यस्य स तं समं शीतोष्णं यस्येति वा प्रसूनवनानां तत्सम्बन्धी मारुतो वातस्तं जना आश्लिष्य तापं तपनजं जहुः । एतन्मात्रस्य न तापापनोद इत्याह ॥ गोप्य इति । कृष्णेन हृतं चेतो यासां ता गोप्यस्तापं कामजं न जहुः । कृष्णाहृतचेतसः कृष्ण आहूतो यस्मिंस्तच्चेतो यासां ता गोप्यो न इवेति वा चक्रं न वृत्रमिति यथा ॥ ४३ ॥ गावो मृगाः खगा नार्यश्च पुष्पिण्यः पुष्पवत्यो गर्भिण्यः कान्तानकामयन्त्यः शरदा निमित्तेन वृषभैः स्वस्वपुरुषा एकत्रापरत्र विवेकविकलतया सर्वत्र विवेकविकलतयेति वा यथायथमन्वीयमाना अभवन् । क्वचित्प्राक्तनगर्भस्यानङ्कूरणं क्वचिन्नार्यादौ बलवद्बालाभवनमितीषताऽविहितकाल आहितरेतस्कत्वाज्ज्ञेया । ईषत्क्रिया न सम्यक्संसाधितहलमुखविलेखनादिक्रियाः कृपयः फलैरिव क्वचिदुप्तानां ततानामनुत्पत्तिर्बीजानां क्वचिदुत्पत्तावपि सम्पत्तिर्नाङ्गस्येतीषत्फलैर्धान्यादिभिर्यथा तथेति फलैर्न स्वरैः स्वर्गादिभिरीषत्क्रियाः प्रवृत्तकर्माणीवेति । ईशक्रिया इति पाठे ता यथा फलवत्यो न तथेत्यन्वयः ॥ ४४ ॥

श्रीसुबोधिनी

जलभेदान् निरूपयति केदारेभ्य इति, **केदारा** धान्योत्पत्तिक्षेत्राणि विभक्तानि तेभ्यो निःसरन्तीरपः **कर्षुका अगृह्णन्** गमनमार्गमुद्रणेन, तदाह दृढसेतुभिरिति, **जलेन सर्वमार्द्रमिति** जलगतिनिरोधार्थं दृढत्वमुक्तं, अस्यापि गुणस्य स्वभाविकत्वपरिहाराय दृष्टान्तमाह यथेति, शरदि वृष्टिर्दुर्लभेति जलार्थिनां तन्निरोध उचितस्तथाप्यस्य फलसाधकत्वं साधनीयं जलाभावे सर्वैव कृषिर्व्यर्था भवेदिति रक्षायां दार्ढ्यमपि निरूपणीयं, **प्राणादयो** वायवो यदा बहिर्निःसरन्ति तदा **ज्ञानसहिता** एव निःसरन्ति तथेन्द्रियाण्यपि, ज्ञानक्रियाशक्तियुक्तो हि भगवान् ज्ञानक्रिययोर्गतयोरपगच्छतीव प्राकट्यं तु निवर्तत एव, ज्ञानं हि प्रकटमुच्यते शास्त्रतो जातं 'स्रवतीन्द्रियलौल्येन ज्ञानं चैवावकीर्यत' इतिवाक्यात्, **ज्ञानार्थमेव हि योगशास्त्रं प्रवृत्तं,**

"उर्ध्वेन्द्रियैस्त विक्षेपे ज्ञानस्याधो विनाशनम् । विरोधे पुञ्जभावेन स्वकार्यं साधयेद् ध्रुवम् ॥"

प्राणेन्द्रियनिरोधेन स्रवज् ज्ञानमगृह्णन्, तत्र योगमार्गा दृढसेतव इति; **केदारेभ्य** इति चतुर्थी, तुशब्दग्रहणेपि सिद्धि व्यावर्तयति, अतः साधनदशायां योगो नित्यः, **आसनप्राणामादिस्थैर्ये ज्ञानं नावकीर्यंत एव** योगः शरदि सिध्यतीति च शुद्धिद्वारा च हेतुः ॥ ४१ ॥ एवमाधिभौतिकीमाध्यात्मिकीं च जलस्य शुद्धिमुक्त्वाधिदैविकप्रकारेण शुद्धिमाह शरदर्कांशुजानिति, शरत्कालीनो योऽर्कः सोत्यन्तं खरस्तस्यांशवोऽपि तथा तज्जनितास्तापा ज्वराद्युत्पादकत्वेनापि खराः, अतस्तापेषु बहुवचनं, भूतानां जातानां, **चन्द्रो हि जलाधिपतिर्जलप्रकृतिकस्तदात्मिकानि च भूतान्यतस्तत्तापनिवारकत्वं** तस्य युक्तं, **उडुप** इति, नक्षत्रद्वारापि तापहारकत्वमुक्तं, उभयत्रापि शरदो हेतुत्वं, पूर्ववद् दृष्टान्तः, यथा चन्द्र आधिभौतिकं तापं हृतवानेवं भगवानाध्यात्मिकं तापं हृतवान्, स तापो देहाभिमानरूपः स क्रमेण पुष्टिमार्गप्रवेशनाद् हृतो देहादीनां भगवति विनियोगाद् न केनाप्यंशेन तापः, **व्रजयोषितामिति,** तदा ता एव स्थिताः, चन्द्रसमानतया निवारणाद् रात्रावेव **देहाभिमानः** स्त्रीत्वाभिमानाज्ञानं कामस्तत्कृताश्च तापाः, ननु जात्यादिधर्मनाशकत्वात् कथं तापनिवारकत्वं ? तत्राह **मुकुन्द** इति, **मोक्षदानसमये पूर्वावस्था त्याजनीयैव,** अत उपयुक्त एव त्यागः, अन्यथा शरदि ता मृता एव स्युस्तत्र विद्यमाने भगवति मोक्षाभावश्च **सर्वभावेन ता गृहीता** इति तासां तापाभावः, शरदो विभावकत्वादुपयोगः, केदारदृष्टान्त एव वायोः शुद्धिरर्कचन्द्रमसोर्निरूपण एव तेजसः ॥ ४२ ॥ आकाशस्य शुद्धिपूर्वकं गुणमाह **खमशोभतेति, निर्मेघं खमशोभत, शरदा कृत्वा विमलास्तारका** यस्य,

मासाष्टकं तथाकाशे तमस्तापैः कृतं रजः । मेघैरपोह्यते सम्यगतः शरदि निर्मलाः ॥ १ ॥
सर्वं नभो दिशश्चैव तारकाश्चन्द्रः एव च ॥ १½ ॥

तदाह, **शरद्विमलेति**, मेघापगमो दोषाभाव आधिभौतिक विमलताध्यात्मिकी तारका गुणाः, आधिदैविकीयं शरदिति ज्ञापयितुं दृष्टान्तमाह **सत्त्वयुक्तमिति**, सत्त्वगुणेन **युक्तं चित्तं शब्दब्रह्मणो** वेदस्य **दर्शनं** यत्र तादृश**मशोभत**, **चित्तस्य रजस्तमसी दोषः सत्त्वसम्बन्धेपगच्छति**, **गुणस्तु सर्वपदार्थानां तत्त्वतो ज्ञानं, ते च पदार्थाः श्रुत्येकसमधिगम्याः शुद्धेन्तःकरणे वेदभावनया स्फुरन्ति**, शुद्धिहेतुत्वाच्छरदुपयोगः, मेघाभावस्थानीय **सत्त्वं** विमलस्थानीय **शब्दब्रह्म** तदर्थ**ज्ञानं** तारकास्थानीयं एतद्व्यावर्त्या दोषा आकाशो बाह्य आभ्यन्तरश्च शुद्धो निरूपितः ॥ ४३ ॥ तत्र हृदये भगवच्छोभां वक्तुं प्रथमत आकाशे चन्द्रशोभामाह महाभूतानन्तरं मनसः क्रमभावित्वाद्, **अखण्डमण्डल** इति, **अखण्डं मण्डलं** यस्य तादृशः पौर्णमासश्चन्द्रो भगवदीयो वोडुगणैः सह **रराज**, भगवदीयव्यावृत्त्यर्थं **शशी** निरूपितः, सोपि **चन्द्रो गोपिकादिभिर्दृश्यमान** एव तथा, अग्रे वा तस्य प्राकट्यं **यथा** हृदये, **यदुभिः** सह **यदुपतिः कृष्णो** भुव्य-**खण्डमण्डलो भुव्य** राजते यद्यपि **यदुपतिः** सर्वत्रैव राजते, कृष्ण एवावतारान्तरेष्वपि तथापि **वृष्णिचक्रेणावृतोवतीर्णः** साक्षाद्भगवानत्रैव शोभते ॥ ४४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अखण्डमण्डलो व्योम्नीत्यत्र, सोऽपि चन्द्रो गोपिकाभिरिति। भगवदीयचन्द्रस्योडुरूपाणि स्वामिनीमनांसीति ताभिर्दृश्यमानस्तन्मनः सहकृतो भवतीति शोभितो भवतीत्यर्थः। एवं सति मूले अखण्डमण्डलपदेन भगवदीयः स उच्यते। शशिपदेन लौकिक इति भावः ॥ ४४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

केदारेभ्य इत्यत्र कथं न स्वाभाविक इत्यत्र आहुः **शरदि वृष्टिरित्यादि**, तर्हि दृष्टान्तस्य किं प्रयोजनमत आहु**स्तथापी**त्यादि, **निरूपणीय** इत्यन्तं तथा चैतर्थः, **इन्द्रियाणीति प्राण**शब्दस्यैवेदं श्रौतमर्थान्तरं, किं ज्ञानस्रावेणेत्यत आहु**र्ज्ञानक्रिये**त्यादि, कथम**पगच्छतीवे**त्यत आहुः **प्राकट्यमित्यादि**, ननु मूले प्राकट्यनिवृत्तिर्नोक्तेति कथमेवमुच्यत इत्यत आहु**र्ज्ञानं ही**त्यादि, वस्तुतस्तु स्रावमुखेन प्राकट्यनिवृत्तिरप्युच्यत इत्यर्थः, तत्र युक्तिस्तदा ज्ञानशक्तीत्यादिनोक्तैवेति भावः, **इति चतुर्थी**ति तथा च केदारार्थमित्यर्थः ॥ ४१ ॥ **शरदर्कांश्वि**त्यस्याभास **आध्यात्मिकी**मित्यापोमयः प्राण' इति श्रुतेस्तथा, **शुद्धिमाहे**ति स्वकार्यक्षमत्वरूपां **शुद्धिमाहे**त्यर्थः, **उभयत्रापी**ति तापे निवृत्तौ चेत्यर्थः, पूर्ववदिति स्वाभाविकत्वपरिहाराय **मोक्षाभाव** इति तस्मादिति शेषः ॥४२॥ **अखण्डमण्डल** इत्यत्र **सुबोधिन्यां** पूर्ववत् तापत्याजनमात्रं न तापनिवर्तकमतो विशेषमाहु**र्भगवदीये**त्यादि, **यथा हृदय** इतीदानीमिति शेषः ॥ ४४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

केदारेभ्य इत्यत्र **तथापी**ति उचितत्वात् स्वाभाविकत्वं सम्भवति **तथाप्यस्य** व्रजस्थकर्षुकक्रृतग्रहणस्य भगवत्सम्बन्धिफलसाधकत्वं साधनीयं, अतो दृष्टान्त उक्त इतिशेषः, **प्राकट्यं त्विति** बहिर्दृष्टावन्तः प्राकट्यं निवर्तत इत्यर्थः ॥ ४१ ॥ **शरदर्कांशूजा**नित्यत्र **नक्षत्रद्वारापी**ति कृष्णपक्षे चन्द्राभावात् तथा, **उभयत्रापी**ति स्वतो नक्षत्रद्वारा च तापहरणे इत्यर्थः, **तदा ता एवे**ति यद्यपि मोक्षार्थं सर्वेषामेव तापं हरति तथापि चन्द्रोदयसामयिकलीलायां **ता एव** स्थिता अतो "व्रजयोषिता"मित्युक्तमित्यर्थः, अन्यदप्याहुः **चन्द्रे**ति, वयं स्त्रियो रात्रौ वनं कथं यास्याम इत्यभिमानो भगवत्स्थित्यज्ञानं कामलीलाभिलाषश्चेति त्रयं देहाभिमानस्तत्कृताश्च तापा अत्र विवक्षिता इतिशेषः, अतोपि "व्रजयोषिता"मित्युक्तमित्यर्थः, **अन्यथे**ति पूर्वावस्थास्थितावित्यर्थः, **तत्रे**ति कामेन स्वपतिभजने मरणाभावेपि तादृशे **भगवति** मोक्षो भजनानन्दरूपो न स्यादिति तदपि मरणतुल्यमेवेतिभावः, चकारोर्थविशेषे स्यादितिशेषः, अत्राभासेषु वाच्यार्थ उक्तः, सङ्ग्रहकारिकासु तात्पर्यार्थ उक्त इति ज्ञेयम् ॥ ४२ ॥ **खमशोभते**त्यत्र **सर्वं नभ** इति नभोदिकतारकाचन्द्रा निर्मला इत्यर्थः, **तदाहे**ति शरत्कृतं तारकानैर्मल्यमाहेत्यर्थः, **आधिदैविकी**ति 'कृष्णे भक्तिर्यथे'त्यस्याभासे उक्तमाधिदैविकसादृश्यमत्राप्युक्तमिति ज्ञेयं, तथा चाधिदैविकवद् दोषनिवर्तिकेत्यर्थः, **बाह्य आभ्यन्तरश्चे**ति दार्ष्टान्तिकदृष्टान्ताभ्यामितिशेषः, **प्रथमत** इति पूर्वार्ध इत्यर्थः, **मनस** इति चन्द्रस्य मनोधिष्ठातृत्वादितिभावः ॥ ४३ ॥ **अखण्डमण्डल** इत्यत्र **यथा हृदय** इति भगवत्पक्षे मूले व्योम्नि हृदयाकाशे उडुगणैर्यदुभिरित्यर्थः ॥ ४४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

देहाभिमानजं तापमित्यस्य विवृतौ **स क्रमेण पुष्टिमार्गप्रवेशनात्** इति, **क्रमेणे**ति प्रेमोत्पत्तेः पूर्वं प्रेमवतां सरणिमनुसरन् तत्प्रकारेण भजन् **क्रमेण** शुद्धपुष्टिभक्तौ प्रविशति, एवं शुद्धपुष्टौ प्रविष्टशुद्धपुष्टेः "शुद्धाः प्रेम्णातिदुर्लभा" इतिवाक्यात् प्रेमप्रधानत्वात् प्रेमवान् भवति, तथा सति प्रेम्णा देहादीनां भगवति विनियोगाद् भगवदीयत्वेन स्वदेहे देहाभिमानस्य विद्यमानत्वेपि न देहाभिमानजस्तापो भवति, तदेतदुक्तं **पुष्टिमार्गप्रवेशनात् हृत** इति, **तदा ता एव स्थिता** इति भूतानामुडुपोहरदित्युक्त्वा

मुकुन्दो व्रजयोषितामित्युक्तं, तथा चैककालत्वं चन्द्रकृततापहरणस्य भगवत्कृततापहरणस्य चायाति, एवं सति तदा चन्द्रोदयसमये सायङ्काले **ता एव** व्रजरमण्य एव भगवद्दर्शनार्थं भगवन्निकटे **स्थिता** इति तासां तापदूरीकरणं निरूपितमित्यर्थः ॥ ४२ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

केदारेभ्यस्त्वपो गृह्णन्नित्यत्र **ऊर्ध्वेन्द्रियै**रिति का० १६९$\frac{१}{४}$ । इन्द्रियाणि यदा बहिर्निःसरन्ति तदा ज्ञानसहितानि निःसरन्ति, तथा च ऊर्ध्वेन्द्रियैर्योगशास्त्रानुसारेणानिरुद्धैरिन्द्रियैर्ज्ञानस्याधो विनाशनं भवति, सच्छिद्रघटाज् जलस्येवेत्यर्थः, **निरोधे पुञ्जभावेने**त्यादि सतीन्द्रियनिरोधे ज्ञानस्य स्रवणाभावात् पुञ्जभावेन सञ्चयेन स्वकार्यं साधयेदित्यर्थः ॥ ४१ ॥ **खमशोभत निर्मेघ**''मित्यत्र **मासष्टक**मिति का १७०$\frac{१}{४}$–$\frac{२}{४}$ शरदि नभआदीनां नैर्मल्ये हेतुमाहु**र्मासाष्टक**मित्यादिना, वार्षिकमासचतुष्टयातिरिक्तमासाष्टकपर्यन्तं तापैः सूर्यसम्बन्धिभिस्तथा जलांशशोषणप्रकारेण कृतं रज **एवतमो मेघैरपोह्यते** दूरीक्रियते अतो हेतोः **शरदि नभोदिकतारकाचन्द्रा निर्मला** इत्यर्थः, मूले नभःशब्देन दिशामपि ग्रहणं, चन्द्रो द्वितीयश्लोकोक्तः ॥ ४३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

केदारेभ्यः शालिक्षेत्रेभ्यः क्षरन्तीः अपो दृढैः सेतुभिः तन्निर्गममार्गनिरोधेन कर्षका अगृह्णन् अरक्षन् । ततः परं वृष्ट्यभावात् रक्षाभावे ताः शुष्येरन् । तत्र दृष्टान्तमाह—यथा प्राणैरिन्द्रियैः क्षुभितैर्द्वारभूतैः स्वेभ्यः स्रवज्ज्ञानं तन्निरोधेन इन्द्रियप्रत्याहारेण योगिनो रक्षन्ति तथेति । तथा च 'इन्द्रियनिग्रहपूर्वकं विवेकरक्षा सर्वदैव कर्तव्या' इत्युपादेयोपमा ॥ ४१ ॥ यथा देहाभिमानजं तापमध्यात्मिकादित्रिविधं दुःखं बोधो देहादिभिन्नात्मयथार्थज्ञानं हरति, यथा च स्वविरहजं व्रजयोषितां तापं मुकुन्दो हरति, तथा शरदर्कांशुजांस्तापान् भूतानां कर्षकादीनामुडुपश्चन्द्रो हरति । तथा च 'संसारतापनिवृत्त्यर्थं ज्ञाने भक्तौ च प्रयत्नः कर्तव्य' इत्युपादेयोपमा ॥ ४२ ॥ शब्दब्रह्मणो वेदस्यार्थान् पूर्वोत्तरमीमांसानिर्णीतान् दर्शयतीति तथा तत्सत्त्वयुक्तं चित्तं यथा शोभते तथा शरदा विमलाः तारका यस्मिस्तत्, निर्गता मेघा यस्मिस्तत्, खमाकाशमशोभत । तत्र चित्तस्थानीयमाकाशम्, रजस्तमोनिवृत्तिस्थानीया मेघनिवृत्तिः, सात्त्विकसेवास्थानीया शरत्, सत्त्वगुणस्थानीया विमलाः तारकाः, शब्दब्रह्मस्थानीयं जगत्, तदर्थस्थानीयाः सर्वे पदार्थाः, सत्त्वाधिष्ठातृश्रीवासुदेवस्थानीयस्ताराधिष्ठाता चन्द्र इति । यतः "सात्त्विकान्येव सेवेत पुमान् सत्त्वविवृद्धये" 'सत्त्वात् सञ्जायते ज्ञानम्' इत्यादि प्रामाण्यात् 'वेदार्थज्ञानाय सात्त्विकसेवया सत्त्ववृद्धिरेव सम्पादनीया' इति उपादेयोपमा ॥४३॥ यथा वृष्णिचक्रेण यादवसमूहेन आवृतो यदुपतिः कृष्णो भूवि सुधर्मायां सभायां रराज, तथा अखण्डमण्डलः शशी पूर्णश्चन्द्रो व्योम्नि रराज । तथा च 'एवं सभायां विराजमानो भगवान् भक्तैरुपासनीय' इत्युपादेयोपमा ॥ ४४ ॥

अन्वितार्थप्रकाशिका

केदारेभ्य इति ॥ केदारेभ्यः मालिक्षेत्रेभ्यः क्षरन्तीः अपो दृढैः सेतुभिः तन्निर्गमनानिरोधेन कर्षका अगृह्णन् ततः परं वृष्ट्यभावात् अरक्षन् । यथा प्राणैरिन्द्रियैः क्षभितैर्द्वारभूतैः खेभ्यः स्रवज्ज्ञानं तन्निरोधेन इन्द्रियप्रत्याहारेण योगिनो रक्षन्ति तथा ॥ ४१ ॥ शरदिति ॥ यथा देहाभिमानजं तापमाध्यात्मिकादि त्रिविधं दुःखं बोधो हरति । यथा च स्वविरहजं योषितां तापं मुकुन्दो हरति तथा शरदर्कांशुजांस्तापान्भूतानां कर्षकादीनामुडुपश्चन्द्रोऽहरत् ॥ ४२ ॥ खमिति ॥ शब्दब्रह्मणो वेदस्यार्थात् पूर्वोत्तरमीमांसानिर्णीतान् दर्शयतीति तथा तत्सत्त्वयुक्तं चित्तं यथा शोभते तथा शरदा विमलाः तारका यस्मितत् निर्गता मेघा यस्मिस्तत् खमाकाशमशोभत ॥ ४३ ॥ अखण्डेति ॥ यथा वृष्णिचक्रेण यादवसमूहेनावृतो यदुपतिः कृष्णो भुवि सुधर्मायां सभायां रराज तथा उडुगणैः सह अखण्डमण्डलः शशी पूर्णश्चन्द्रो व्योम्नि रराज ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शालिक्षेत्राणां भग्नसेतुभ्यः स्रवज्जलेभ्यः केदारेभ्यः ततः अग्रेवृष्ट्या भावात् दृढैर्दृढबंधैः सेतुभिः जलं अगृह्णन् यथा अनवरुद्धैः प्राणैरिंद्रियैः स्रवत्क्षयं प्राप्नुवत् ज्ञानमिंद्रियनिरोधेन योगिनः स्थिरं कुर्वंति तथा कर्षुका इति संबंधः ॥ ४१ ॥ उडुपश्चंद्रः अंशुजान् शरद्भवो योऽर्कः सूर्यस्तस्य किरणोत्पन्नान् तापान् जहार अत्र दृष्टांतद्वयं यथा देहाभिमानजं तापं बोधो देहात्मविवेकः यथा च मुकुंदस्तद्वत् ॥ ४२ ॥ शरदि विमलाः स्वच्छास्तारका यस्मिस्तत् खं गगनं यथा शुद्धसत्वयुक्तत्वात् शब्दब्रह्मणां वेदपुराणानामर्थान् तत्र निर्णीतान् धर्मज्ञानवैराग्यभक्तिरूपान् दर्शयति शुद्धतया प्रकाशयतीति तथाभूतं चित्तं तद्वत् ॥ ४३ ॥ शरदीति पदं प्रतिश्लोकं योज्यं उडुगणैर्नक्षत्रवृंदैः वृतश्चंद्रः वृष्णिचक्रेण यादववृंदेन आवृतो भुवि श्रीकृष्णो यथा तथा रराज ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

केदारेभ्य इति । कर्षुकाः कृषीवलाः तु, अपः प्रवहन्ति जलानि, दृढसेतुभिः सुदृढपालीबन्धनैः केदारेष्वित्यर्थः । अगृह्णन् निरुद्धवन्तः । ततः परं वृष्ट्यभावादिति भावः । यथा योगिनः प्राणैरिन्द्रियैः, तद्द्वारेत्यर्थः । स्रवत् बाह्यविषयग्रहणप्रवणीभवत् ज्ञानं धर्मभूतज्ञानं, तन्निरोधेन, प्राणनिरोधेन आत्मस्वरूपगोचरं कुर्वन्ति तद्वत् । योगिना इन्द्रियनिरोधपरेण सता आत्मस्वरूपशीलनपरेण

भवितव्यमिति सूचितम् ।। ४१ ।। शरदिति ।। उडुपश्चन्द्रः, भूतानां शरदि योऽर्कस्तस्यांशुभ्यो जा जातास्तान्, तापान् अहरत् । यथा देहाभिमानजं देहाभिमानेन जातं, तापं परकृतदेहनिन्दादिप्रयुक्तं परितापं, बोधः देहयाथात्म्यगोचरोऽवबोधः हरति, यथा च, व्रजयोषितां तापं मन्मथप्रयुक्तं परितापं, मुकुन्दो भगवान् अहरत्तद्वत् । देहाभिमानजं तापमिति पाठे बोध इति कर्त्तृपदमध्याहर्त्तव्यम् । अतो यथोक्त एवार्थः । अनेन हेयत्वज्ञानार्थं देहयाथात्म्यपरिशीलनमपि कर्त्तव्यमित्युक्तं भवति ।। ४२ ।। खमिति ।। निर्मेघं मेघरहितं, शरदा विमलाः तारका यस्मिंस्तथाभूतं सत्, खमाकाशं, अशोभत । यथा सत्त्वयुक्तं सत्त्वगुणयुक्तं, सत्त्वप्रचुरमिति यावत् । चित्तं, शब्दब्रह्मणो वेदस्य योऽर्थः भगवदक्षरेश्वरजीवमायास्वरूपयाथार्थ्यप्रबोधकतारूपस्तं पश्यति जानातीति तथाभूतं सत् शोभते, तद्वत् नन्द्यादित्वात् कर्त्तरि ल्युः । यद्वा । शब्दब्रह्मार्थोऽर्थपश्चकरूपो दृश्यते लक्ष्यतेऽनेनेति करणे ल्युट् । सत्त्वप्रवणं चेतो रागाद्यकलुषितत्वान्निर्मलतयाऽतीन्द्रियवेदार्थप्रकाशकं सच्छोभते तद्वदित्यर्थः । अनेन सत्त्वप्राचुर्याहारशुद्धिमता भवितव्यमिति सूचितम् । अत्र तारकास्थानीया वेदार्थाः, आकाशस्थानीयं चेतः, मेघस्थानीयं रजस्तमश्चेति विवेकः ।। ४३ ।। अखण्डेति शशी चन्द्रः, व्योम्नि निर्मेघे आकाशे, अखण्डं पूर्णं मण्डलं यस्य तथाभूतः सन्, उडुगणैः नक्षत्रसमूहैः, रराज । यथा यदुपतिः कृष्णः, भुवि वृष्णीनां चक्रं समूहस्तेनावृतः सन्, रराज, तद्वत् । अनेन यदुपतेश्चन्द्रवत् सर्वलोकाह्लादकत्वमभिप्रेतम् ।। ४४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

केदारेभ्य इति : १०.२०.४१.

चित्तं नीचगति स्वभावतरलं यातुं प्रवृत्तं यदि क्षेत्राम्भोवदलं निरर्थविषये तन्निग्रहोपायधीः ।
युक्तं सेतुभिरागमेडितपदैः क्षेत्रज्ञचेतोहरैर्यः कुर्वीत सुधीरसस्य विभवस्तस्यार्थसिद्धिस्ततः ।। ६० ।।

खमशोभतेति : १०.२०.४३.

अनुज्जृम्भितापं सदा सत्त्वयुक्तं सुखाभिख्यमत्यच्छतारप्रचारम् ।
शरद्व्योमवद्यस्य चित्तं न तस्य जने दुर्लभः कीदृशोऽप्यर्थलाभः ।। ६१ ।।

अखण्डेति : १०.२०.४४.

यथा विधुः पूर्णकलो विराजते सुखे सहैवोडुगणैस्तथा भवान् ।
दयानिधे भक्तजनैस्ततस्तव भवेन् मदङ्गीकृतिरप्यलङ्कृतिः ।। ६२ ।।

कृष्णप्रिया

किसान खेतों की मेड़ मजबूत करके जल का बहना रोकने लगे जैसे योगी जन अपनी इन्द्रियों को विषयों की ओर जाने से रोककर प्रत्याहार करके उनके द्वारा क्षीण होते हुए ज्ञान की रक्षा करते हैं ।। ४१ ।। शरद ऋतु में दिन के समय बड़ी कड़ी धूप होती । लोगो को बहुत कष्ट होता परन्तु चन्द्रमा रात्रि के समय लोगों का सारा सन्ताप वैसे ही हर लेते है—जैसे देहाभिमान से होने वाले दुःख को ज्ञान और भगवद्विरह से होने वाले गोपियों के दुःख को श्रीकृष्ण नष्ट कर देते हैं ।। ४२ ।। जैसे वेदों के अर्थ को स्पष्ट रूप से जानने वाला सत्त्वगुणी चित्त अत्यन्त शोभायमान होता हैं वैसे ही शरद ऋतु में रात के समय मेघों से रहित निर्मल आकाश तारों की ज्योति से जगमगाने लगा ।। ४३ ।। परीक्षित् ! जैसे पृथ्वीतल में यदुवंशियों के बीच यदुपति भगवान श्रीकृष्ण की शोभा होती हैं, वैसे ही आकाश में तारों के बीच पूर्ण चन्द्रमा सुशोभित होने लगा ।। ४४ ।।

आश्लिष्य समशीतोष्णं प्रसूनवनमारुतम् । जनास्तापं जहुर्गोप्यो न [1]कृष्णहृतचेतसः ।। ४५ ।।
गावो मृगाः खगा नार्यः पुष्पिण्यः [2]शरदाभवन् । अन्वीयमानाः[3] स्ववृषैः फलैरीश[5]क्रिया इव ।। ४६ ।।
[6]उदहृष्यन् वारिजानि [7]सूर्योत्थाने कुमुद् विना । राज्ञा तु [8]निर्भया लोका [9]यथा दस्यून् विना नृप ।। ४७ ।।
[10]पुरग्रामेष्वाग्रयणैरैन्द्रियैश्च महोत्सवैः । बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ।। ४८ ।।
[11]वणिङ्मुनिनृपस्नाता निर्गम्यार्थान् प्रपेदिरे । वर्षरुद्धा यथा सिद्धाः स्वपिण्डान् काल आगते ।। ४९ ।।

इति श्रीमद्भागवते महापुराणे[12] दशमस्कन्धे प्रावृट्शरद्वर्णनं नाम [13]विंशोऽध्यायः ।। २० ।।

---

१. न कृष्णाहृत–विज । २. शरदागमे–वीर. । ३. मानो इति कस्यचित् । ४. ऋषभैः–विज. । ५. रीषत्क्रिया इव–विज. । ६. उपाहृष्यन्–च. पु. टी. । ७. सूर्येण कुमुदं विना–वीर. विज. । ८. निर्भयो लोको–विज. । ९. आसन्–गो. प्र. टी. । १०. स्वाश्रमिणामिन्द्रयागमहोत्सवैः–विज. । ११. वणिजो नगरात्स्वीयान्निर्गम्य–विज. । १२. पारमहंस्यां संहितायां दशमस्कन्धे पूर्वार्धे–गो. प्र. मूलम् । १३. अष्टादशोऽध्यायः–विज. ।

कर्दमक्षमा

अन्वयः—सुमशीतोष्णम् प्रसूनवनमारुतम् आश्लिष्य जनाः तापम् जहुः तथा कृष्णहृतचेतसः गोप्यः तापम् न जहुः ॥४५॥ गावः मृगाः खगाः नार्यः स्ववृषैः अन्वीयमानाः फलैः ईशक्रियाः इव शरदा पुष्पिण्यः अभवन् ॥ ४६ ॥ नृप ! दस्यून् विना लोकाः यथा राज्ञा निर्भयाः उदहृष्यन्, तथा सूर्योत्थाने कुमुद् विना वारिजानि उदहृष्यन् ॥ ४७ ॥ पुरग्रामेषु आग्रयणैः च ऐन्द्रियैः महोत्सवैः पक्वसस्याढ्या भूः हरेः कलाभ्याम् नितरां बभौ ॥ ४८ ॥ वर्षरुद्धाः वणिक्-मुनि-नृप-स्नाताः, यथा सिद्धाः, काले आगते अर्थान् प्राप्नुवन्ति तथा निर्गम्य अर्थान् प्रपेदिरे ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे निरोधलीलायां तामसप्रकरणान्तर्गतप्रमेयप्रकरणे विंशतितमोऽध्यायः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कुमुत्कुमुदम् । कुत्सिता मुद्यस्येति दस्युसाम्यम् ॥४५॥ आग्रयणैर्नवान्नप्राशनार्थैर्वैदिकैरैंद्रियैरिंद्रियार्थैर्लौकिकैश्च महोत्सवैः । कलाभ्यां रामकृष्णाभ्यां दर्शनादिमहोत्सवाभ्याम् ॥ ४६ ॥ वणिजो यतयो नृपाः स्नातकाश्च दृष्टादृष्टाभ्यां वर्षरुद्धाः संतो निर्गम्यार्थान्वाणिज्यस्वाच्छंद्यदिग्विजयविद्यादीन्प्रपेदिरे प्रापद्यंत । यथा मंत्रयोगादिसिद्धाः आयुषा रुद्धाः काले आगते स्वपिंडान्योगादिप्राप्यान्देवादिदेहानिति ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायां विंशतितमोऽध्यायः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कुमुदिति । द्वितीयाबहुत्वे प्रथमैकवचनम् । कुत्सिते चौरजाराद्यवकाशयोग्ये रात्रिकाले मुदानंदो यस्येति । दस्युसाम्यम् चौरतौल्यम् ॥ ४५ ॥ यद्यपि नवान्नानि बहूनि तथापि "गृहमेधी व्रीहियवाभ्यां शरद्वसंतयोर्यजेच्छयामाकर्वनीवर्षासु" इत्यादिश्रुतिवाक्यविहितैर्वैदिकैः पितृदेवार्चनरूपैः, लौकिकैः नानालोकैः संभूय संपादितै रावणादिवधलीलारूपैः । हरेः कलाभ्यामित्युक्तेः 'कृष्णस्तु भगवान्स्वयम्' इत्युक्तिव्याकोपः स्यादिति चेत्, अत्र व्याख्यांतरेण समाधत्ते–किंभूता भूः–हरेः परमेश्वरस्य कला तदेकदेशजातत्वात् "पद्भ्यां भूमिः" इति श्रुतेः । 'भूः पादौ' इति स्मृतेश्च । पुरेषु श्रीमथुरादिषु ग्रामेष्विव ग्रामेषु श्रीनंदावासादिषु । आग्रयणैरिति "नवान्नं नैव नंदायां न च सुप्ते जनार्दने । न कृष्णपक्षे धनुषि तुलायां नैव कारयेत् ॥" इति स्मृतेः । प्रबोधनांते वृश्चिक इति ज्ञेयम् । शरदंतत्वाच्छरद्व्यवहारः । इन्द्रियैरिंद्रदेवताकैः 'इन्द्रमिंद्रियकामस्तु' इत्युक्तेरिंद्रपूजामयैरित्यर्थः । कार्त्तिकमध्ये हि तत्पूजा व्रजादौ पूर्वमासीत्तां खंडयित्वैव श्रीभगवता गोवर्द्धनपूजा प्रवर्त्तितेति । इदं शरद्वर्णनमिंद्रमखभंगात्प्रागिति इंद्रपूजाया लोकपरंपरागतत्वं श्रीव्रजराजेन वर्णितमिति विश्वनाथादयः । आभ्याम् रामकृष्णाभ्याम्, नितरां बभाविति योज्यम् । त्यदादीनां बुद्धिस्थपरामर्शकत्वात् इदमा रामकृष्णौ परामृश्येते । यद्वा–बलभद्रस्य हरिकलात्वाल्लिंगसमवायेन कृष्णेऽपि तदुक्तिर्न विरुद्धा । बलस्य कला त्वं तु 'वासुदेवकलानंतः सहस्रवदनः स्वराट्' इत्युक्तेः, 'अहं भवो यस्य कला कलायाः' इति तदुक्तेश्च, 'दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोपनीतः इति द्वितीयाध्याये देवकृतस्तुतावुक्तत्वाच्च । यद्वा हरेश्चंद्रमसः कलाभ्यां शुक्लद्वितीयासायमुदिताभ्यामुत्सवै राजकीयपुरुषप्रभृतिकृतैरित्यर्थः । "हरिश्चन्द्रार्कवाताश्वे शुकभेकयमादिषु" इति मेदिनी ॥ ४६ ॥ स्वाच्छंद्यम् स्वेच्छया विचरणम् । काले देवादिदेहप्राप्तिसमये । वर्षेण वृष्ट्या "वर्षो स्त्री भारताद्यंबुवृष्ट्यब्दे प्रावृषि स्त्रियाम् इति यादवः ॥ ४७ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे विंशोऽध्यायः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु गोप्य इति विशेषोक्तिस्तत्र हेतुमाह–कृष्णेति । ततस्तेनोद्दीपनात् प्रत्युताधिकं तापं प्रापुरित्यर्थः । हृधातुप्रयोगगतमेव स्पष्टीकृतवान् योगिनां मनसि प्रविश्य सम्पदे कल्पितुं आसान्तु मनो हृत्वा विपदे कल्पितु युक्त एवेति भावः । मुकुन्दो व्रजयोषितामिति तासामुत्तरावस्था दृष्टान्तिता अनेन तु पूर्वावस्थेति ॥४५॥ मृगाः खगा इत्यार्षं मृग्यः खग्यः अन्यत्तैः । यद्वा, पुष्पम् ऋतुकारी धातुविशेषस्तद्वत्यः सत्यः स्ववृषैः प्रसवविशेषसम्पादकस्वस्वपुंभिः प्रार्थनां विनाप्यन्वीयमाना बभूवुः फलैः फलविशेषसम्पादकैरपूर्वकैरपूर्वैः ॥ ४६ ॥ वारिजशब्देनात्र वार्युद्भवपुष्पमात्रं गृह्यते ननु कमलमेव कुमुदनिषेधानुपपत्तेर्लोकशब्दवत् सामान्यमेव ग्राह्यमिति कुमुदानां रात्रिविकासित्वाद्दस्युसाम्यं राज्ञा तस्योत्थाने सिंहासनप्रथमारोहे उद्यमे वा लुप्तोपमेयं यथा दस्यूनिति वा पाठः नृपेति दृष्टान्तस्यापि दृष्टान्तसूचना ॥ ४७ ॥ पुरेषु श्रीमथुरादिषु ग्रामेष्विव ग्रामेषु श्रीनन्दावासादिषु आग्रयणैरिति "नवान्नं नैव नन्दायां न च सुप्ते जनार्द्दने । न कृष्णपक्षे धनुषि तुलायां नैव कारयेत्" इत्यनुसारेण वृश्चिके प्रबोधिन्यन्तरमेव इदं ज्ञेयं शरदन्तरत्वात्तु शरद्व्यवहारः ऐन्द्रियैश्च महोत्सवैरिति "इन्द्रमिन्द्रियकामस्तु" इत्युक्तत्वात् इन्द्रपूजामयैरित्यर्थः । कार्त्तिकमध्ये हि तत्पूजा व्रजादौ पूर्वमासीत् तां खण्डयित्वैन श्रीभगवता गोवर्द्धनपूजा प्रवर्त्तितेति इन्द्रपूजायास्तस्या लोकपरंपराप्राप्तत्वञ्च श्रीव्रजराजेन मंस्यते

कीदृशी भूर्हरेः कला शक्तिः आभ्यां रामकृष्णाभ्याम् ॥ ४८ ॥ वर्षशब्दः कालस्यापि वाचीति आयुरिति व्याख्या ततश्च जीवनार्थं-परिमितैर्वत्सरैरुद्धा इत्यर्थः स्नातकानामर्थास्तीर्थाटनादिरूपाः सिद्धाः भक्त्यादिसिद्धाः स्वपिण्डान् प्राप्तव्यपार्षददेहान् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां विंशोऽध्यायः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आश्लिष्य प्रीत्या निर्भरमनुभूय, सममिति मान्द्यमभिप्रेतम्, शीतश्चेति निदाघादिवदुष्णतातिशयः, उष्णश्चेति शरच्छेषे जायमानशैत्यातिशयश्च परिहृत इति सुशैत्यम्, मालत्यादिप्रसूनवनस्य मारुतमिति सौगन्ध्यश्च। एतच्च प्रायो वसन्तवच्छरदः स्वाभाविकमेव तापं शरदर्कजं दिवापि जहुः, न तु गोप्यो विरहजं प्रेमस्वभावजं वोत्तापं कृष्णहृतचेतसां तासां तत्स्मृतिविशेषजनकेन तेन भावविशेषोद्दीपनात, प्रत्युताधिकताप-प्राप्तेरित्यर्थः। इदं प्रसंगाद्भावविशेषोदयनैवात्रोक्तम्, असाधारणत्वाच्छास्त्रदृष्टान्तो नोक्तः, किंवा उत्तमपानकपानेन यथा सर्व्वेषां सुखं ज्वरो वा वर्द्धत एवेति वाक्यशेषो दृष्टान्तो द्रष्टव्यः ॥ ४५ ॥ मृगाः खगा इत्यार्षम्, मृग्यः खग्यः, अन्यत्तैर्व्याख्यातम्; यद्वा, पुष्पम् आर्त्तवं तद्वत्यः स्ववृषैरन्वीयमाना बभूवुः, ईश्वराराधनक्रिया यथा पुष्पसदृशमान्तरीयकं ज्ञानादिकं दर्शयन्त्यः प्रेमादिलक्षणैः फलैरनुगता भवन्ति ॥ ४६ ॥ दिवा विकसतां कमलानां रात्रिविकासिकुमुदैः सह प्रतियोगित्वेन वैरितयैव तैर्विना विकसनेन शोभाविशेषो ध्वनितः, अतएव उच्चैरतिशयेनाहृष्यन् सुखं विकसितानीत्यर्थः। राज्ञा हेतुना लोकानां दस्युभिर्लुण्ठकैः सह वैरं व्यक्तमेव, अतस्तान् विना निर्भयाः सन्तो यथोच्चैर्हृष्यन्ति, सूर्य्यस्योदये सत्येव राज्ञश्च सत्तामात्र एवेति, विशेषापेक्षया तु-शब्दः, यद्वा, चार्थे उक्तसमुच्चये; राज्ञि चोत्थिते न सन्तीत्यर्थः। पूर्व्वं राज्ञोऽसत्त्वेन भूता दस्यवस्तस्य वृत्तौ यथा निवर्त्तन्ते, यथा वेनमरणे जाताः, श्रीपृथुप्रादुर्भावे सति निवृत्ता इति; यद्वा, कुमुद्विनेति कुमुदानि च नोदहृष्यन्नित्यर्थः। दस्यून् विनेति—दस्यवस्तु सभया भवन्तीत्यर्थः। हे नृपेति ! भवादृशेनैव राज्ञा तद्भवतीति, किंवा भवता तद्विज्ञायत एवेति भावः ॥४७॥ पुरेषु श्रीयदुपुर्य्यादिषु श्रीनन्दवास-नन्दीश्वरादिषु वा, ग्रामेषु श्रीवृन्दावनवर्त्तिषु श्रीगोपराजपुरोहितशासनादिरूपेषु हरेर्भगवतः श्रीनारायणस्य कलाभ्यां निजाखिलभगवत्ताप्रकटनेन परमशोभारूपाभ्यां श्रीकृष्णरामाभ्याम्; यद्वा, भगवतोऽशरूपाभ्यां शोभारूपाभ्यामेव वा, कलयतः स्नेहभरेण परिपालयत इति मातापितृभ्यां श्रीयशोदानन्दाभ्यां तत्र तत्र तन्महोत्सवेषु निमंत्रणादिना तयोरेव प्राधान्यात्, कलिहली कामधेनू, अथवा हरेः कलाभ्यां प्रबोधनरथयात्रात्मकमहोत्सवाभ्यां नितरां विशेषतो बभौ ॥ ४८ ॥ वणिगिति तैर्व्यञ्जितार्थमेव। यद्वा, सिद्धा जीवन्मुक्ता भक्त्यर्काच्छादक-वृष्टितुल्याद्वै तज्ज्ञानेन रुद्धा आवृताः; यद्वा, वृष्टितुल्याविच्छिन्नसत्संगानन्देन वशीकृताः, श्रीभगवत्कृपया श्रीवैकुण्ठलोकप्राप्तेर्वा, काले प्राप्ते यथा स्वस्य योग्यान् पिण्डान् सच्चिदानन्दघनपार्षददेहान् प्राप्नुवन्ति ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां विंशतितमोऽध्यायः ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पुष्पिण्यः शोभायुक्ताः ऋतुयुक्ताश्च ॥ ४६–४७ ॥ हरेः कलाभ्यां नितरां सुखिताः ॥ ४८ ॥ यथा सिद्धाः स्वपिण्डान् काल आगते यथा तपःसिद्धाः अस्माल्लोकान्निर्गत्य फलकाले स्वपिण्डान् भोग्यजातं प्रतिपद्यन्ते तद्वत् ॥ ४९ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये विंशतितमोऽध्यायः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

आश्लिष्येति। जनाः समं मितं शीतम् उष्णञ्च यस्य तं प्रकृष्टानि सूनानि कुसुमानि यस्य तस्य वनस्य मारुतमाश्लिष्य अनुभाव्य तापं जहुः ग्रीष्मशैत्यप्रयुक्तं दुःखं जहुरित्यर्थः। गोप्यस्तु तापं मन्मथतापं न जहुः तत्र हेतुं वदन् विशिनष्टि कृष्णेन हृतानि चेतांसि यासां तथाभूताः अनेन कृष्णस्य यौवनावस्था गोपीचित्तसमाकृष्टिश्च सूचिता ॥ ४५ ॥ गाव इति। गवादयः स्ववृषैः स्वस्वप्रियैरन्वीयमानाः शरदा निमित्तभूतया पुष्पिण्यो गर्भिण्यो बभूवुः यथा ईश्वराराधकात्मिकाः क्रियाः स्वसाध्यैः फलैः धर्मादिपुरुषार्थैरन्वीयमानाः समस्तभोगगर्भा भवन्ति तद्वत् अनेनेश्वरक्रियाणां फलाविनाभावित्वमुक्तम् ॥ ४६ ॥ उदहृष्यन्निति। कुमुदमितिजात्यभिप्रायमेव वचनं कुमुदान्युत्पलानि विना सर्वाणि वारिजानि सूर्येणोदहृष्यन् विकासेन हृष्टा इव लक्षिता बभूवुः यथा हे नृप दस्यूंश्चोरव्याघ्रादीन् वीन इतरे सर्वे जनाः राज्ञा हेतुना निर्भया हृष्यन्ति तद्वत् अनेन राज्ञा दस्यूनुद्वेजयता भवितव्यमित्युक्तिम् ॥ ४७ ॥ पुरग्रामेष्विति। पुरेषु ग्रामेषु चाग्रयणैर्नूतनव्रीह्यादिभिर्भक्षणाभ्यनुज्ञार्थैराग्रयणाख्ययागरूपैरैन्द्रियैरिन्द्रियप्रीत्यर्थैरन्यैश्च महद्भिरुत्सवैः सर्वसस्याढ्या भूर्बभौ हरेः कलाभ्यां रामकृष्णाभ्यां तु नितरां बभौ छत्रिन्यायेन कलाभ्यामित्युक्तिः वणिगित्यादि वणिगादयस्तावद्वर्षेण रुद्धाः शरदि निर्गम्यार्थान् प्रयोजनानि प्रपेदिरे तत्र वणिजः क्रयविक्रयादिव्यापारिणः मुनयः

संन्यासिनः नृपाः जयिनः स्नातास्तीर्थयात्रापराः एते वाणिज्यस्वच्छन्दचारविजयतीर्थस्नानादिरूपानर्थान् प्रपेदिरे इत्यर्थः । यद्वा सिद्धाः तपःसिद्धाः फलकाले आगते सत्यस्मात् लोकान्निर्गत्य स्वपिण्डान् स्वस्य तपस्साध्यभोग्यजातं प्रतिपद्यन्ते तद्वत् अनेन तपसःफलाविनाभावित्वमुक्तम् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां विंशोऽध्यायः ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मारुतं शारदमिति शेषः । अर्कजनितं तापं गोप्यः कामार्कजनितं तापं न जहुः तत्र निमित्तं कृष्णाहृतचेतसः कृष्णेनाहृतं चेतो यासां तास्तथा ॥४५॥ पुष्पिण्यः गर्भिण्यः ऋषभैरिति पाठः । वृषभैरिति पाठे मातृसहोदरीविवेकज्ञानशून्यत्वात्तथोक्तमित्यर्थः । फलैर्बीजैरन्वीयमानाः उप्यमानाः ईषत् क्रियाः शनैः क्रियमाणाः कृषिक्रिया इव फलैः स्वर्गादिलक्षणैः अनुगता ईषत्क्रिया ऊनातिरेकपरिहारार्थाः विलम्बमानयागक्रिया इव लाभनिष्पत्तिभोगेषु बीजे फलधने फल इति वा ॥ ४६-४७ ॥ इन्द्रयागमहोत्सवैः इन्द्रदेवत्याग्रायणेष्टिलक्षणोत्सवैः हरेः कलाभ्यां नितरां बभौ आश्रमिणां अग्निवतां गृहस्थमात्राणां वा ॥ ४८ ॥ प्रावृषि वर्षेण रुद्धाः शरदि स्वीयान्नगरात्पत्तनान्निर्गत्यार्थान् देयादेयविषयान् प्रपेदिरे वर्षेणाब्देन तल्लक्षितकालेनेत्यर्थः । रुद्धाः साधनसामग्रीसम्पत्तिपर्यन्तकालेन प्रतिबद्धाः सिद्धा मन्त्रौषधतपस्सम्पन्नाः पुरुषाः काले फलदानाभिमुखलक्षणे आगते आसन्ने स्वीयान्नगरात्स्वत्वेनाभिमताद्देहान्निर्गत्य स्वपिण्डान् निजफलानुभावयोग्यान् देहान् यथा प्रपद्यन्त इत्यन्वयः "वर्षो स्त्री भारताद्यबुवृष्टिषु प्रावृषि स्त्रियाम्" इति यादवः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां विंशोऽध्यायः ॥ २० ॥

[विजयध्वजरीत्या अष्टादशोऽध्यायः]

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मृगाः मृग्यः खगाः खग्यः पुष्पिण्यः ऋतुमत्यः ताः स्ववृषैरवश्यमन्वीयमाना अभवन् फलैरीशक्रिया इव ॥ ४६-४७ ॥ हरेः कला पृथ्वी आभ्यां रामकृष्णाभ्याम् ॥ ४८-४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे विंशोऽध्यायः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ यद्यपि वृन्दावनं सर्वदा सर्वर्त्तुभिः सेव्यमानम्, तथापि भगवदिच्छावशात् क्रमिकसेवनमपि तेषां दर्शयन् निदाघ–वर्षाविहार वर्णनोपक्रमे ऋतुसन्धिज मारुतं वर्णयन्नाह—आश्लिष्य समशीतोष्णमित्यादि । समं यथा स्यात्तथा शीतश्च उष्णश्च, प्रत्यग्रागच्छन्मेघागमसम्बन्धाच्छीतम्, निर्गच्छन्निदाघसम्बन्धादुष्णमित्यर्थः । प्रसूनप्रधानं यद्वनं तत्सम्बन्धि मारुतम् । प्रसूनेति मल्लिकाकदम्बादि सन्धिजानि प्रसूनानि ज्ञेयानि । तथाभूतमाश्रित्य जनास्तापं जहुः, न तु गोप्यः । कुतः ? जनानां व्रजस्थानामेव समशीतोष्णत्वेन तापनाशकत्वम्, गोपीनां तु केवलोष्णत्वेन दाहकत्वमेवेत्यर्थः । कुतः ? कृष्णहृतचेतसः, कृष्णेन हृतं चेतो यासाम्; एतावन्तं कालम् कौमारदशया भावानुदयात्, सम्प्रति कैशोरावस्थायाम् 'निर्विकारात्मके चित्ते भावः प्रथम विक्रिया इत्यादि-दिशा तदुत्पत्तौ तथाविधमाह । तस्योद्दीपनविभावत्वाद् भगवदसंयोगे तापद एवासीदिति भावः ॥ ४५-४९ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे विंशोऽध्यायः ॥ २० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

आश्लिष्य समशीतोष्णमित्यादि । जना व्रजस्था जनास्तापं जहुः, न तु गोप्यः । कुतः ? कृष्णहृत्चेतसश्चेत् तेन मारुतेनोद्दीपनभावरूपेण समशीतोष्णत्वेऽपि तासां केवलमुष्ण एवाभवदित्यर्थः ॥ ४५-४७ ॥ बभौ भूः पक्वशस्याच्चेति । आभ्यां रामकृष्णाभ्यां नितरां बभौ, यत इयं भूः श्री-भू-लीला इत्यादिना भुवो पालितत्वात् ॥ ४९ ॥

इति विंशोऽध्यायः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

समः अन्यूनाधिकः शीतश्चोष्णश्च तं न तु गोप्यस्तापं जहुर्यतः कृष्णहृतचेतसो विरहिण्यः प्रत्युत तं मारुतमाश्लिष्य तापं प्रापुरिति भावः । अत्र प्रक्रमभङ्गाभावार्थं केचिदेवं व्याचक्षते गोप्य इत्यनन्तरं कृष्णमिवेति शेषो देयः कीदृश्यः न कृष्णहृतानि अपि तु हृतानि एव चेतांसि यासां ताः शिरश्चालनेन जनैककीर्तिर्नैकयशा इति वन्न लोपाभावः चेतश्चौरात्तस्माद्बलात्स्वस्व चेत

आदातुमिव तमाश्लिष्यन्त्योपि तास्तन्न प्रापुरिति भावः ॥ ४५ ॥ मृगा मृग्य खगाः खग्यः स्ववृषैः स्वस्वपाताभरन्वायमानाः अनिच्छन्त्योपि सम्भोगार्थमनुगम्यमानाः ईशक्रिया भगवदाराधनलक्षणाः क्रिया निष्कामा अपि फलैः सुखभोगादिभिः ॥ ४६ ॥ कुमुत् कुमुदं कुत्सितेषु मुत् यस्येति दस्युसाम्यम् ॥ ४७ ॥ आग्रयणैर्नवान्नपाशनार्थैर्वैदिकैः—

"नवान्नं नैव नन्दायां नच सुप्ते जनार्द्दने । न कृष्णपक्षे धनुषि तुलायां नैव कारयेत्" ॥ इति स्मृतेः ।

प्रबोधिन्यन्ते वृश्चिके इति ज्ञेयं शारदं तत्वत्तु शरद्व्यवहारः इन्द्रियैरिन्द्रदेवताकैः इन्द्रमखभङ्गात् पूर्वस्याः शरदो वर्णनमिदं कीदृशी भूः हरेः कलाशक्तिः आभ्यां रामकृष्णाभ्यां यद्वा हरेश्चन्द्रस्य कलाभ्यां शुक्लद्वितीयासायमुदिताभ्यामुत्सवै राजकीयपुरुषप्रभृति कृतैर्यथा सैव भूरिति व्याख्या यथेति पदस्य शेषत्वे प्रक्रमभङ्गाभावार्थमुपादेया "हरिश्चन्द्रार्कवाताश्वशुकभेकयमाहिषु, इति मेदिनो ॥ ४८ ॥ वणिजो यतयो नृपाः स्नातकाश्च ये वर्षेण वृष्ट्या रुद्धा आसंस्ते वर्षान्ते निष्क्रम्य अर्थात् वाणिज्यस्वाच्छन्द्यदिग्विजयविद्यादीन् प्रपेदिरे प्रपद्यन्त यथा सिद्धाः वर्षैः स्वायुर्घटकैर्वत्सरैरुद्धाः काले अन्तसमये आयाते स्वपिण्डात् पार्षदादिदेहान् इयमुपादेया ॥ ४९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । विंशोऽध्यायोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

समे तुल्ये गुणभूते शीतोष्णे यस्य तमाश्लिष्य जनास्तापं जहुः गोप्यस्तु तमाश्लिष्यापि न जहुः तत्र हेतुगर्भं विशेषणं कृष्णहृतचेतस इति तासां तापापनोदकः श्रीकृष्ण एवेति फलितोर्थः ॥ ४५ ॥ शरदा निमित्तभूतया स्ववृषैः स्वपतिभिरन्वीयमानाः पुष्पिण्यो गर्भिण्यः अभवन् बभूवुः यथा ईश्वराराधनार्थाः क्रियाः फलैरनुगम्यमानाः समस्तभोगगर्भा भवन्ति तद्वत् ईश्वराराधनार्थं कर्म कदाचिदपि निष्फलं न भवतीति भावः ॥ ४६-४७ ॥ आग्रयणैर्नवान्नप्राशनार्थैर्वैदिकैः ऐन्द्रियैरिन्द्रियप्रोत्यर्थैर्लौकिकैश्च महोत्सवैः हरेः कला भूः बभौ आभ्यां राममाधवाभ्यां तु नितरां बभौ यद्वा हरेः कलाभ्यां सोमसूर्याभ्यां यद्वा छत्रिणो यान्तीतिवत् हरेः कलाभ्यां राममाधवाभ्यां हरिणा माधवेन तत्कलया रामेणेत्यर्थः ॥ ४८ ॥ वणिगादयो वर्षेण रुद्धाः शरदि निर्गम्य अर्थात् वाणिज्यस्वाच्छन्द्यदिग्विजयदद्यादीन् प्रपेदिरे प्रापद्यन्त यथा सिद्धाः मन्त्रजपादिसिद्धाः प्रारब्धकर्मणा रुद्धाः काले आगते स्वपिण्डात् स्वकीयमन्त्रजपादिसाध्यान् भुक्तिमुक्तिरूपाणि फलानि प्रतिपद्यन्ते तद्वत् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे विंशोऽध्यायार्थप्रकाशः ॥ २० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

समोऽन्यूनाधिकः शीतश्चोष्णश्च तं प्रसूनवनमारुतमाश्लिष्य गोप्यस्तु तापं न जहुः यतः कृष्णेति विरहिण्य इत्यर्थः किन्तु तापं प्रापुरित्यर्थः ॥ ४५ ॥ मृगाः खगाः इत्यार्षं मृग्य खग्य इत्यर्थः । स्ववृषैः स्वपतिभिरनिच्छन्त्योऽपि बलादनुगम्यमानाः पुष्पिण्यः सगर्भाः अभवन् यथेशक्रिया भगवदर्चनलक्षणा निष्कामा अपि फलैः सुखभोगैरनुगम्यमानास्तद्गर्भा इत्यर्थः । इयमुपादेया ॥ ४६ ॥ सूर्यस्थानेन वारिजानि पद्मान्युदहृष्यन् कुमुद्विनेति विभक्तिलोप आर्षः । "कुमुदेपि कुमुत् स्मृत"मिति विश्वः कैरवाणि विनेत्यर्थः । कुत्सिता मुद्येषां जानीति दस्युभिः सादृश्यं यथा सिंहासनाधिष्ठितेन राज्ञा लोका निर्भरा भवन्ति दस्यून् विनेति राज्ञामुपादेयेयम् ॥ ४७ ॥ आग्रयणैर्नवान्नप्राशनाद्यैर्वैदिकैर्महोत्सवैर्भूर्बभौ –

नवान्नं नैव नन्दायां न च सुप्ते जनार्दने । न कृष्णपक्षे धनुषि तुलायां नैव कारयेत् ॥

इति स्मरणात् बोधिन्यन्ते वृश्चिके इति बोध्यं शरदं तत्वात्तु शरद्व्यवहारः इन्द्रियैरिन्द्रियार्थैः लौकिकैश्च भूः कीदृशी हरेः कला शक्तिः आभ्यां श्रीरामकृष्णाभ्यां नितरां बभौ ॥ ४८ ॥ वणिजो मुनयो नृपाः स्नातकाश्च ये वर्षेण वृष्ट्या रुद्धा आसन् ते वर्षान्ते निष्क्रम्यार्थान् वाणिज्यस्वच्छन्दादिग्विजय-विद्यादीन् प्रपेदिरे प्राप्ताः यथा सिद्धा वर्षैः स्वायुर्घटकैः सम्वत्सरैरुद्धाः कालेऽन्तसमये आगते स्वपिण्डान् पार्षदविग्रहानित्युपादेयेयम् ॥ ४९ ॥

वर्षा शरदयोः क्रीड़न् प्रजहर्ष जनार्दनः । तयोस्तद्वर्णनं विद्वान् विदधौ विविधोपमम् ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां विंशोऽध्यायः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

राज्ञा सूर्येण च लोकः सर्वो निर्भयो भवति दस्यून्विना यथा तथा सूर्येण कुमुदं विना वारिजान्युदहृष्यन्विकसितान्यभवन् । राज्ञा चन्द्रेण वारिजानि विना कुमुदमुदहृष्यत् ॥ ४५ ॥ आश्रमिणां गृहस्थानामिन्द्रयोगमहोत्सवैरिन्द्रोद्देश्येन क्रियमाणा योगा अग्रहायण्येष्ट्यादिलक्षणा ये महोत्सवास्तैः पुरग्रामेषु पक्वसस्याढ्या भूर्हरेः कलाभ्यामाविष्टानाविष्टभ्यां रामकृष्णाभ्यां नितरां बभौ । नितरामिन्द्रयागमहोत्सवैः पक्वसस्याढ्येति च हरेः कलाभ्यामिव बभाविति वा । अन्तिमश्लोकेऽपि निदर्शनप्रदर्शन-

स्वारस्यात् ॥ ४६ ॥ यथाकाले आगते समाधिनिवृत्तौ स्वपिण्डानभिमानिसहिततया स्वान्देहान्प्रपद्यन्ते भोज्यान्नानि वा प्राक् प्राणायामादिनिरोधेनानङ्गस्मरणानन्तरं सिद्धास्तत्सम्पन्ना यथा तथा वर्षरुद्धा वृष्टिप्रतिबद्धा वणिजो वर्षेऽतीते स्वीयात्स्वहितात्तस्मै हितमित्यर्थे प्राक्क्रीताच्छ इति छः आर्थिकं स्वत्वमनुसन्धेयं । निर्गम्य नगरान्नगरान्तरं प्राप्यार्थान्प्रपेदिरे ॥ ४७ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धेऽष्टादशोऽध्यायः ॥ १०-१७ ॥

श्रीसुबोधिनी

शरदो मासान्तरकृत्यमाहाश्लिष्येति, **समं शीतमुष्णं** च यत्र **प्रसूनयुक्ते वने मारुतो** यस्य तादृशं **शीतोष्ण**भावमाश्रित्य **तापं** जहुः, **वनमारुतं** वा समत्वान्मान्द्यमपि प्रसूनसम्बन्धात् सौगन्ध्यं, एवं सर्वगुणमपि वायु**माश्लिष्य जनास्तापं** जहुः अस्य सहजत्वाभावान्न दृष्टान्तः, परं हीनतामाह **गोप्यो नेति**, तत्र हेतुः **कृष्णहृतचेतस** इति, **कृष्णेनैव हृतं** चित्तं यासां, **चित्ते हि सुखं भवति तत् कृष्णसम्बन्ध एव देहे तिष्ठति**, आश्लेषोपि न कृतः, सामान्यनिषेधात् कृष्णाश्लेषोप्यनेनैव निषिद्धो हरणशब्दाच्च, अत आध्यात्मिकीयं शरन्न सुखदायिनी वृत्ता, आधिदैविकीं तु वक्ष्यति ॥ ४५ ॥ आध्यात्मिक्याः प्रसङ्गादुपयोगान्तरमप्याह **गाव** इति गर्भाधानकालोयं वर्षाभिर्बीजोत्पत्तेः, **गावो मृगाः खगा**स्तामसादिभेदास्त्रय एव **नार्यः** स्त्रियोपि स्पष्टार्थं वा ता एव **शरदा** कृत्वा **पुष्पिण्यः**, अन्तःप्रविष्टा शरद् रजोविकासं कृतवती तासामृतुकालो जात इत्यर्थः, **अभिव्यञ्जकं तु नारीणामेव नैमित्तिकं, स्ववृषैः** स्वपतिभि**रन्वीयमानाः फलैरप्यन्वीयमाना अभवन्नितियो**जना, फलस्यामोघत्वप्रतिपादनाय दृष्टान्तमाहेशसम्बन्धिन्यः **क्रिया इव**, ईशसंयोगात् फलयुक्ता अपि भवन्ति, **ईशः** पतिस्थानीयः, ता अपि फलैरन्विताः फलमभिलषितं सहजं वा दृष्टान्तस्त्वभिलषितसिद्ध्यर्थः, **भगवत्सम्बन्धाच् छरद** एते गुणाः ॥ ४६ ॥ जङ्गमानामुक्त्वा स्थावराणामाहोद**हृष्यन्निति, सूर्योत्थाने** कमलान्युदहृष्यन्, **कुमुत्** कुमुदं तु चन्द्रमसा **विना** कालेन उदहृष्यत्, कुमुदं विना वा, सुब्लोपः, **अनेन सात्त्विकाः सात्त्विकाधिपतावुद्गच्छन्तीत्युक्तं न त्वन्ये**, सात्त्विकस्य सर्वसुखदातृत्वेपि न सात्त्विकव्यतिरिक्तानां सुखं यतस्तेषां **कुत्सिता मुद्**, केवलभौतिकव्यावृत्त्यर्थं दृष्टान्तमाह, **राज्ञा सर्व एव लोका निर्भया** न तु दस्यवः, ते **कुमुदाः, नृपे**तिसम्बोधनं तत्सम्मत्यर्थं, **लोका** भुवनान्यपि, शरदि चौर्याभावश्च सूचितः ॥ ४७ ॥ एवं लौकिकं सर्वमुक्त्वा वैदिकमाह **पुरग्रामेष्वि**ति, पुराणि सात्त्विकानि ग्रामा राजसा आग्रयणानि श्रौतानीन्द्रसम्बन्धीनि स्मार्तानि **महोत्सवा** लौकिकाः, चकारात् कुलधर्माश्च, **पुरग्रामेष्वि**तिबहुवचनात् त्रिविधा अपि गृहीताः, सर्वैः कृत्वा **भूरेव बभौ**, तस्या आधिभौतिकीं शोभामाह **पक्वसस्याढ्ये**ति, **पक्वैः सस्यैराढ्या**, आधिदैविकीमाह **कला**भ्यामिति, रामकृष्णाभ्यां सङ्कर्षणकृष्णाभ्यां, भारहरणार्थं हि तावेवागतौ, विशेषमप्याह **नितरां हरेरि**ति, हरेः सम्बन्धिनी भूर्नितरां **बभौ** पदैरनुभावैर्लीलाभिश्च, अस्मिन् वाक्ये भूप्रस्तावाद्धरिपदात् तस्या एव दुःखहर्तोच्यते, स च पुरुषोत्तम एव, भारहरणद्वारा सङ्कर्षणोपीति तत्**कला**रूपत्वं च, **केशयो**रिति, भूमेर्वा दुःखहर्तुः **केशाभ्यां नित**रामित्यन्तःकरणसन्तोषाच् चिदानन्दाभ्यां वा, सत् सिद्धैव ॥ ४८ ॥ उपसंहारार्थं शरदः सर्वसाधुकत्वमाह **वणिगिति, वणिङ्मुनिनृपा** वैश्यब्राह्मणक्षत्रियश्रेष्ठास्ते **निर्गम्य** पण्यात् प्रदेशान् प्राप्तवन्तः, तदाहा**र्थान् प्रपेदिर** इति, **अर्थ**शब्दो हि लोके प्रसिद्धो वक्तव्यस्ततो वैदिकस्ततः स्मार्त इति, अर्थे तमः प्रधानं ततः सत्त्वं ततो रजः, अनेन स्थितानां न सिद्धिरुक्ता लौकिकोपकारी वैदिकोपकारी चोपकार्ये पूर्वमुक्तौ, **स्नाताः** स्नातकास्ते हि तीर्थवासिनस्ते **यथाभिलषितान्** धर्मार्थकामान् **प्रपेदिरे**, प्रत्येकसमुदायाभ्यां वा धर्मार्थकामा उक्ताः, अत्रापि पूर्ववद् दृष्टान्तमाह **वर्षरुद्धा** इति, वर्षैर्बहुभिरेव **रुद्धा** निरुद्धाः सिद्धाः पश्चात् प्राप्तफलाः **स्वपिण्डान्** पूर्वंस्थितानेव **काल आगते प्रपेदिरे**, योगादिना बहुकालं स्वनिरोधं कृत्वा ततः सिद्धाः सन्तः तत्फलमनुभूय पुनः **काले** प्रलये समागते मोक्षसाधकत्वात् पुनस्तानेव देवदेहान् गृह्णन्ति स्वपिण्डान् फलरूपान् वा, **कालः** फलकालः पूर्वकालस्य साधकत्वमस्य फलत्वमित्याधिभौतिकाध्यात्मिकभेदेन निरूपितं कालप्राधान्यार्थमागत इति, एवं सलीला शरद् वर्णिता ॥ ४९ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे सप्तदशाध्यायविवरणम् ॥ १७ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

आश्लिष्येत्यत्र ननु पूर्वश्लोके 'मुकुन्दो व्रजयोषिता'मित्यनेन तापनिवृत्तिरुक्तेति कथं 'न जहु'रित्यत आहुर्देहेत्यादि, देहस्य प्रयोजनं **भगवदाश्लेष** इति प्रथममासे सम्बन्धेपि मासान्तरे ताप उचित एवेतिभावः, ननु मूले भगवदाश्लेषनामाभावात् कथमयमर्थो लब्ध इत्यत आहुः **सामान्येत्यादि** ॥ ४५ ॥ **गाव** इत्यत्र गवादिजातीयाः **स्त्रिय** एवात्रोच्यन्त इत्यत्र बीजमाहु**स्ता** एवेति, ननु गवादीनां पुष्पाभिव्यञ्जकाभावात् कथं पुष्पावगम इत्यत आहु**रभिव्यञ्जक**मिति, तथा चान्यासां **वृषान्वीयमान**त्वमेव गमकमित्यर्थः ॥ ४६ ॥ **उदहृष्यन्नित्यत्र विनेत्यस्यार्थमाहुश्चन्द्रमसा कालेनेति चन्द्रयुक्तेन कालेन**, पक्षान्तरमाहुः **सुब्लोप** इति ॥ ४७ ॥ **वणिगित्यत्र** वणिजादित्रयाणां नैकोर्थ इति तान् विवृण्वन्त्य**र्थशब्द** इत्यादि, **लौकिकोपकारीत्यादि, उपकार्ये** नृपे वक्तव्ये तस्य **लौकिकवैदिकोपकारिणौ वणिङ्मुनी पूर्वमुक्ता**वित्यर्थः ॥ ४९ ॥ अयं **वैराग्याध्याय**स्तत्र च वर्षावर्णनेन

'निशामुखे'ष्वित्यादिश्लोकेषु दृष्टान्तमुखेन कलिस्थव्यवस्थाबोधनाद् भगवद्भक्तानां वैदिकानां सतां तत्र वैराग्यं स्फुटमेव शरद्वर्णने चा -'श्लिष्योत्पत्ति'श्लोके स्वामिनीनां तापजनकत्वकथनादितरत्र वैराग्यं स्फुटमेवेति बोध्यम् ॥

इति श्रीमद्वल्लभनन्दनचरणैकतानश्रीयदुपतितनुजपीताम्बरविरचिते दशमस्कन्धसुबोधिनीटिप्पण्योः प्रकाशे सप्तदशाध्यायविवरणम् ॥ १७ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

आश्लिष्येत्यत्र समं शीतमिति पक्षद्वयभेदेनोभयत्रापि बहुव्रीहिरुक्तः, प्रथमपक्षे द्वितीयविशेषणे बहुव्रीहिः, आद्यं विशेष्यं द्वितीयपक्षे विपरीतमितिज्ञेयं. **सर्वगुणमपीति** यद्यप्येतादृशस्तथापि **जना एव तापं जहुर्न तु गोप्य** इत्यर्थः, **कृष्णाश्लेषोपीति** कृष्णकृत आश्लेष इत्यर्थः, पूर्वं भक्तकृत उक्तः, **हरणेति** आश्लेषे चित्तं स्वस्थाने एव तिष्ठेदिति हरणं नोक्तं स्यादित्यर्थः ॥ ४५ ॥ **गाव** इत्यत्र **अभिव्यञ्जकमिति** ऋतुकालाभिव्यञ्जकरजोदर्शनं नैमित्तिकं पित्ताद्युद्रेकजं **नीरागाणामेव** न तत्र शरन्नियम इत्यर्थः ।४६। **बभौ भूरित्यत्र हरेः कलाभ्यामि**त्यन्वयमभिप्रेत्य पक्षान्तरमाहुः **भारहरणेति**, तदा हरेः सङ्कर्षणस्येत्यर्थः, अस्मिन् पक्षे नितरामित्यस्यार्थमाहुः **नितरामिति, सत्सिद्धैवेति** "पक्वसस्याढ्य"त्यनेन सत्कला **सिद्धैव** स्वस्मिन् चिदानन्दसम्पत्त्या नितरां बभावित्यर्थः ॥ ४८ ॥ **वणिङ्मुनीत्यत्र लौकीकोपकारीति** उपकार्ये नृपे पूर्वमुक्तौ वाणिङ्मुनि लौकिकं वैदिकं चोपकारं क्रमेण कुरुत इत्यर्थः, **पुनः काल** इति दैनंदिनाः प्रलयाः प्रतिब्रह्मादिनं जायन्ते तादृशे **प्रलये पुनः समागते** इत्यर्थः, **कालप्राधान्यार्थमिति** तत्तद्वस्तुस्वभावस्थापनपूर्वकं लीलाया रसशास्त्रसिद्धत्वाद् रसार्थमत्र तथाकरणात् कालप्राधान्यस्थापनार्थमागतो भगवानतः कालो निरूप्यत उद्दीपकत्वेनेत्यर्थः, **सलीलेति** 'देहाभिमानजं तापं मुकुन्दो व्रजयोषिता'मित्यादिना लीलापि सूचितैवेतिभावः ॥ ४९ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

आश्लिष्य समशीतोष्णमित्यस्य व्याख्याने **आश्लेषोपि न कृत** इति प्रसूनवनमारुतमाश्लिष्य **जनास्तापं जहु**रित्युक्त्या तापत्यागे मारुतश्लेषकारणमितिसिद्धं, अग्रे **गोप्यो ने**त्युक्तं गोपिकानां तापस्तिष्ठत्येव, अतो ज्ञायते तापत्यागे कारणीभूतवनमारुताश्लेषोपि व्रजरत्नवधूभिर्न कृत इत्यर्थः, युक्तं चैतत्, भगवद्विरहव्याकुलानां मारुताश्लेषे दुःसहखेदजननात् तद्भीत्या न कृत इत्यर्थः, अत एव विरहिणा केनचिद् गीतं "चन्दनं चन्द्रिकामोदो गन्धवाहश्च दक्षिणः सेयमग्निमयी सृष्टिः शीता किल परान् प्रती"ति, **सामान्यनिषेधादित्यादि** "गोप्यो ने"त्यनेन सामान्यनिषेधात् तापत्यागनिषेधवत् कृष्णाश्लेषनिषेधोप्यायाति, अत उक्त **कृष्णाश्लेषोप्यनेनैव निषिद्ध** इति ॥ ४५ ॥ **उदहृष्यन् वारिजानी**त्यस्य व्याख्यायां **कुमुत् कुमुदं तु चन्द्रमसा** विना कालेनेति इह कुमुदशब्दः प्रथमान्तः, **विनेति विशब्दः** कालवाची तृतीयान्तः, तथा च कुमुदनाम कुमुदं तु कालरूपेण चन्द्रमसा उदहृष्यदित्यर्थो भवति, **कुमुदं विना वेति** अस्मिन् पक्षे कुमुदशब्दो द्वितीयान्तः, तथा च वारिजानि उदहृष्यन् कुमुद्विना कुमुदविनेत्यर्थः, **वारिजत्वेपि** कुमुदस्य सूर्योदये हर्षो नाभूत् ॥ ४७ ॥ **पुरग्राम** इत्यस्य विवृतौ **सत्सिद्धैवेति** कलाभ्या"मिति द्विवचनेन कलाद्वयनिर्देशात् **कलाभ्यां** चिदानन्दाभ्यां **हरेः** सम्बन्धिनी **भूर्बभौ,** तथा च सच्चिदानन्दरूपासु तिसृषु कलासु द्वयोः कलयोरधुना प्रावट्यं, सद्रूपा कला तु सिद्धैव सर्वदा विद्यमानत्वात्, सदंशः सर्वदा स्फुटोस्ति, चिदानन्दयोस्तिरोभावः, तावपि लीलां कर्तुमुद्यतयोश्चरणसम्बन्धादधुना प्रकटीभूतावित्यर्थो भवति, अत्र श्लोके **हरेः कलाभ्यां भूर्बभा**वित्युक्ते रामकृष्णयोः कलात्वमायाति, तच्च "कृष्णस्तु भगवान् स्वय" "वसुदेवगृहे साक्षाद् भगवान् पुरुषः पर" इत्यादिवचः सहस्रैर्बाधितमस्त्यतः केचिदत्रैवं मूलग्रन्थं लापयन्ति कलाभ्यामित्यत्र कलाभ्यामितिपदद्वयं कृत्वा कलेति प्रथमान्तं व्याख्याय आभ्यामितितृतीयाद्विवचनं व्याचक्षते, तथा च आभ्यां रामकृष्णाभ्यां **हरेः कला भूर्बभा**वित्यर्थो भवति, "श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जये"तिदशमस्कन्धोयाक्रूरभगवद्दर्शनप्रसङ्गवाक्यादिलाशब्दवाच्यया भुवः शक्तिरूपत्वात् कलारूपत्वं, अतः कलारूपा भूः आभ्यां रामकृष्णाभ्यां बभाविति सम्यगेव ।४८। **वणिङ्मुनिनृपस्नाता** इत्यत्र उपकार्ये **पूर्वमुक्ताविति, उपकार्ये** इति सप्तमी, नृपविशेषणं, उपकार्ये नृपे वणिङ्मुनि, लौकिकवैदिकोपकारकर्तारौ **पूर्वक्ताविर्थः** ॥ ४९ ॥

इति सप्तदशोऽध्यायः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

समः अन्यूनाधिकः शीतश्चोष्णश्च यस्तं प्रसूनपरिपूरितस्य वनस्य मारुतमाश्लिष्य जना धर्मजनितं तापं जहुः, गोप्यस्तु तमाश्लिष्यापि तापं न जहुः । तत्र हेतुमाह—कृष्णहृतचेतस इति । कृष्णेन हृतानि चेतांसि यासां ताः । तासां तापस्य कृष्णविरहजत्वात्तथाभूतो मारुतः प्रत्युत दुःसह एवासीदिति । तथा च 'भगवद्भक्तानां सुखं न विषयजनितम्, किन्तु तद्भजनजनितमेव' इति सूचितम् ॥ ४५ ॥ गावो, मृगा मृग्यः, खगाः खग्यो, नार्यश्च शरदा निमित्तेन स्ववृषैः स्वपतिभिरन्वीयमाना बलादनुगम्यमानाः पुष्पिण्यो गर्भिण्योऽभवन् । तत्र दृष्टान्तमाह—यथा ईश्वराराधनार्थाः क्रियाः पतिस्थानीयेश्वरसम्बन्धात् फलैः पुष्पिण्यो भवन्ति धर्मादिसर्वपुरुषार्थजनिका भवन्ति । अत एवोक्तम्—'अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भक्तियोगेन भजेत

पुरुषं परम्' इति ॥ तथा च 'सर्वथा सर्वपुरुषार्थलाभाय परमेश्वराराधनमेव कर्तव्यम्' इत्युपादेयोपमा ॥ ४६ ॥ वारिजानि कमलादीनि सूर्योत्थाने सूर्य उदिते सति उदहृष्यन् प्रफुल्लितानि जातानि, परन्तु कुमुत् कुमुदं विना। यथा धर्मात्मना राज्ञा सर्वे लोका जनाः निर्भया हृष्टा भवन्ति, परन्तु दस्यून्विना। रात्रिविकाशित्वात् कुत्सिता मुद् हर्षो यस्य तत् इति दस्युसाम्यम्। नृपेति सम्बोधनं सम्मतिसूचनार्थम्। राज्ञा त्वेवमेव वर्तनीयमित्युपादेयोपमा ॥ ४७ ॥ पुरेषु ग्रामेषु च आग्रयणैर्नवान्नप्राशनार्थैर्वैदिकैर्मन्त्रैः इन्द्रियैरिन्द्रियार्थैर्लौकिकैश्च महोत्सवैः हरेः कलाभ्यामवताराभ्यां रामकृष्णाभ्यां च पक्वसस्यैराढ्या सम्पन्ना भूः नितरामतिशयेन बभौ अशोभतेत्यन्वयः ॥ ४८ ॥ वणिजो, मुनयो, नृपाः, स्नातका ब्रह्मचारिणश्च वर्षाकाले रुद्धाः सस्यादिना मार्गप्रतिरोधेन हिंसाबाहुल्येन प्रवृत्तौ प्रतिबद्धाः सन्तः शरत्काले आगते सति स्वस्थानान्निर्गम्य अर्थान् यथाक्रमेण वाणिज्यस्वाच्छन्द्यदिग्विजयविद्यादीन् प्रपेदिरे प्राप्नुवन्त। तथा दृष्टान्तमाह–यथा यज्ञयोगमन्त्रभक्त्यादिसिद्धाः प्रारब्धैः प्रतिरुद्धास्तत्समाप्तिकाले आगते स्वपिण्डान् स्वयोग्यान् देवभगवत्पार्षदादिदेहान् प्राप्नुवन्ति तथेति। अनेन 'प्रारब्धस्य प्रतिबन्धकत्वात्तत्समातावनुष्ठितक्रियाफलं भविष्वत्येवेति निश्चेतव्यम्' इत्युपादेयोपमा ॥ ४९ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसुनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने। विंशोऽपि विवृतः प्रावृट्कालक्रीडानिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

आश्लिष्येति ॥ समः अन्यूनाधिकः यस्तं प्रसूनपरिपूरितस्य वनस्य मारुतमाश्लिष्य जना धर्मजनितं तापं जहुः। गोप्यस्तु कृष्णेन हृतानि चेतांसि यासां तादृश्यः अतस्तं मारुतमाश्लिष्य तापं न जहुः। यद्वा नकार उपमार्थः। "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ॥ अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥" इत्युक्तेः। तदा कृष्णहृतचेतसः चेतसा कृष्णमाश्लिष्य गोप्य इवेत्यर्थः। नेति काकुर्वा जहुरेवेत्यर्थः ॥ ४५ ॥ गाव इति ॥ गावो मृगाः मृग्यः। पुंस्त्वमार्षम्। खगाः खग्यो नार्यश्च अनिच्छन्त्योऽपि शरदा निमित्तेन स्ववृषैः स्वपतिभिरन्वीयमाना संभोगार्थं बलादनुगम्यमानाः पुष्पिण्यो गर्भिण्योऽभवन्। यथा ईश्वराराधनार्थाः क्रियाः पतिस्थानीयेश्वरसंबन्धात् फलैः भोगादिभिः पुष्पिण्यो भवन्ति धर्मादिसर्वपुरुषार्थजनिका भवन्ति ॥ ४६ ॥ उदहृष्यन्निति ॥ हे नृप! वारिजानि कमलानि सूर्योत्थाने सूर्य उदिते सति उदहृष्यन् प्रफुल्लितानि जातानि परंतु कुमुत् कुमुदं विना यथा धर्मात्मना राज्ञा सर्वे लोका जनाः निर्भया हृष्टा भवन्ति परंतु दस्यून् विना कुत्सिते मुद्यस्येति व्युत्पत्त्या रात्रौ विकासेन वा दस्युसाम्यम् ॥ ४७ ॥ पुरेति ॥ पुरेषु ग्रामेषु च आग्रयणैर्नवान्नप्राशनार्थैर्वैदिकैर्यज्ञैः। अत्र "नवान्नं नैव नन्दायां न प्रसुप्ते जनार्दने ॥ न कृष्णपक्षे धनुषि तुलायां नैव कारयेत् ॥" इति निषेधात् प्रबोधिन्यन्तरवृश्चिके ज्ञेयम्। शरदनन्तरत्वात् शरद्व्यवहारः इन्द्रियैरिन्द्रियार्थैर्लौकिकैश्च महोत्सवैः हरेः कलाभ्यामवताराभ्यां रामकृष्णाभ्यां च दर्शनादिमहोत्सवैः पक्वसस्यैराढ्या संपन्ना भूः नितरामतिशयेन बभौ अशोभत। यद्वा। इन्द्रियैः इन्द्रदेवताकैः इन्द्रमखभङ्गात्पूर्वस्याः शरदो वर्णनमिदम्। कीदृशी भूः हरेः कला शक्तिः आभ्यां रामकृष्णाभ्यां हरेश्चन्द्रस्य शुक्लद्वितीया सायमुदिताभ्याम् उत्सवैः लोककृतैः यथा सेव भूरिति यथा शेषेण व्याख्याप्रक्रमस्वारस्यात्। "हरिश्चन्द्रार्कवाताश्च" इत्यादि मेदिनी ॥ ४८ ॥ वणिगिति ॥ वणिजो मुनयो नृपाः स्नातका वेदव्रतानुष्ठानोत्तरं कृतसमावर्त्तनाश्च वर्षेण वर्षाकालेन रुद्धाः सस्यादिना मार्गप्रतिरोधेन हिंसाबाहुल्येन च प्रवृत्तौ प्रतिबद्धाः शरत्काले आगते सति स्वस्थानान्निर्गम्यार्थान् यथाक्रमेण वाणिज्यस्वाच्छन्द्यदिग्विजयविवाहोद्यमादीन् प्रपेदिरे प्रापद्यन्त। यथा मन्त्रयोगादिसिद्धाः आयुधा प्रतिरुद्धा अन्तकाले आगते स्वपिण्डान् स्वयोग्यान् देवादिदेहान् प्राप्नुवन्ति तथेति। वर्षशब्दः कालस्यापि वाची ॥ ४९ ॥

इति श्रीभागवते महापुराणेऽन्वितार्थप्रकाशिकायां दशमस्कन्धे विंशोऽध्यायः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

समेऽन्यूनाऽधिके शीतोष्णे यस्मिंस्तं प्रसूनयुक्तानां वनवृक्षाणां मारुतं स्पृष्ट्वा जना यथा तापं जहुः तथा कृष्णेन हृतमाकृष्टं चेतो यासां ता गोप्यः तद्वा तत्स्पर्शेन विरहजं तापं न जहुः श्रीकृष्णस्पर्शेनैव तासां तापहानिरिति भावः अत्र वैधर्म्येण दृष्टांतः ॥४५॥ मृग्यः खग्य इति वक्तव्ये मृगाः खगा इत्युच्चारणमार्षं मृगाः मृगपत्न्यः खगाः खगपत्न्यः शरदापुष्पिण्यो रजस्वलाः अभवन् अतः स्ववृषैः स्वपतिभिः अन्वीयमाना अनुगम्यमाना बभूवुः यथा ईशक्रियाः परमेश्वराराधनरूपाः श्रवणाद्यानवविधभक्तयः फलैरन्वीयमानाः स्वेप्सित चतुर्वर्गफलसंपादिका भवन्ति तद्वत् ॥ ४६ ॥ सूर्योत्थाने भानूदये कुमुदं विना पद्मानि उदहृष्यन् प्रफुल्लानि बभूवुः दस्यून् चौरान् ॥ ४७ ॥ आग्रयणैः नवीनान्नभोजनार्थैर्वेदोक्तैर्यज्ञैः इन्द्रियैः इन्द्रियप्रयोजनैः मनुष्यलोकरोचकैश्च महोत्सवैः पक्वैर्निष्पन्नैः सस्यैर्धान्यैः आढ्यायुक्ताभूः बभौ आभ्यां रामकृष्णाभ्यां तु नितरामत्यंतं सा च कीदृशी हरेः कलाशक्तिः ॥ ४९ ॥ वणिजः मुनयः नृपाः स्नातकाः वर्षासु चांद्रायणादि व्रतकारकाश्च वृष्ट्यारुद्धाः संतः ततोनिर्गम्य अर्थान् वाणिज्य स्वतंत्रगमनशत्रुपराजय

सच्छास्त्राध्ययनादीनि स्वप्रयोजनानि प्रपेदिरे यथासिद्धाः योगसिद्धाः आयुषारुद्धाः संतः काले आगते आयुषोऽवसाने प्राप्ते सति स्वदेहेभ्यो निर्गम्य स्वपिंडान् स्वप्राप्यदिव्यहेहान् प्रपेदिरे तद्वत् ।। ४९ ।।

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कंधव्याख्याने ऋतुद्वयवर्णनो नाम विंशोऽध्यायः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आश्लिष्येति ।। जनाः समं मितं शीतमुष्णं च यस्य तं, प्रकृष्टानि सूनानि कुसुमानि यस्य तच्च तद्वनं च तस्य यो मारुतस्तं, आश्लिष्य, नापं जहुः । ग्रैष्मशैत्यप्रयुक्तं दुःखं जहुरित्यर्थः । गोप्यस्तु, यतः श्रीकृष्णेन हृतानि चेतांसि यासां तथाभूताः, अतः तापं, न जहुः मन्मथजतापं न जहुरित्यर्थः । अनेन श्रीकृष्णस्य प्रायो वनावस्थितिः गोपीचित्तसमाकृष्टिश्च सूचिता ।।४५।। गाव इति । गावः, मृगाः, खगाः पक्षिणः, नार्यश्च, स्ववृषैः स्वप्रियैः, अन्वीयमानाः सत्यः, शरदा निमितभूतया पुष्पिण्यो गर्भिण्यः अभवन् बभूवुः । इव यथा ईशक्रिया ईश्वरराधनात्मिकाः क्रियाः फलैः साहयैर्धर्मादिपुरुषार्थैः अन्वीयमानाः सत्यः समस्तभोगगर्भाः, भवन्ति तद्वत् । अनेनेश्वर संबन्धिनीनां क्रियाणां फलाविनाभावत्वं सूचितम् ।।४६ । उदहृष्यन्निति ॥ सूर्योत्थाने सूर्योदये सति तु, कुमुद्विना कुमुदानि विना, वारिजानि पद्मादीनि, उदयहृष्यन् । यथा हे नृप, राज्ञा धर्मिष्ठनृपेण, दस्यूंस्तस्करान्विना, लोकाः इतरे सर्वे जनाः, निर्भयाः सन्तः, जहृषुः तद्वत् । अनेन राज्ञा दस्यून् उद्वेजयता भाव्यमिति सूचितम् ।। ४७ ॥ पुरेति ॥ पुरग्रामेषु पुरेषु ग्रामेषु चेत्यर्थः । आग्रयणैर्नवान्नप्राशनार्थकैर्वैदिकैर्यागैः, इन्द्रियैरिन्द्रियार्थकैर्लौकिकैश्च, महोत्सवैः, पक्वानि च तानि सस्यानि च तैराढ्या, हरेः भूः हरेः सर्वाधारतारूपशक्तिमती पृथ्वीत्यर्थः । बभौ । कलाभ्यां सकलशिल्पयुक्ताभ्यां रामकृष्णाभ्यां तु, नितरां बभौ । यद्वा । कलाः षोडशापि सन्त्यस्मिन्निति कलः षोडशकलायुक्तः कलाः अंशः, 'कला स्यादंशशिल्पयोः' इति हैमः । कलश्च कला च कलौ ताभ्यां, 'पुंमान् स्त्रिया' इत्येकशेषः । कृष्णरामाभ्यामित्यर्थः । यद्वा । पक्वसस्याढ्या हरेः कला शक्तिभूता भूः, आभ्यां रामकृष्णाभ्यां, बभाविति ॥ ४८ ॥ वणिगिति ।। वर्षरुद्धा वर्षेण रोधं प्राप्ताः, वणिजश्च मुनयश्च नृपाश्च स्नाताः स्नातकाश्च ते, शरदि निर्गम्य, अर्थान् प्रयोजनानि, प्रपेदिरे । तत्र वणिजः क्रयविक्रयादिव्यापारिणः, मुनयः संन्यासिनः, नृपा विजयार्थिनो राजानः, स्नातास्तीर्थयात्रापराः, एते यथाक्रमं वाणिज्यस्वच्छन्दचारत्वविजयितातीर्थस्नानादिरूपान् अर्थान् प्रपेदिरे इत्यर्थः । यथा सिद्धास्तपःसिद्धाः, काले फलप्राप्त्यवसरे, आगते सति, अस्मात् लोकात्, निर्गत्य स्वपिण्डान् स्वस्वतपःसाध्यभोगान्, प्रतिपद्यन्ते, तद्वत् । अनेन तपसः फलाविनाभावित्वमुक्तम् । यद्वा स्नाता विद्यार्थिनः विद्यादीनर्थान्, यथा मन्त्रयोगादिसिद्धाः, आयुषा रुद्धाः, काले आगते, देहात् निर्गत्य, स्वपिण्डान् योगादिप्राप्यान् देवादिदेहान्, प्रपद्यन्ते तद्वत् ॥ ४९ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे विंशोऽध्यायः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

आश्लिष्येति ः १०.२०.४५.

शीतोष्णद्वन्द्वतुल्यस्थितिरमलगतिः सर्वशाखाग्रभागोल्लासी नित्यप्रवासी भववनभुवि यः कौसुमेयो जितात्मा ।
तत्सङ्गस्तापहास्याच्छरदुदितमरुद्वन् मुमुक्षोर्न जातुभक्तानां श्रीशपादाम्बुजरतमनसामत्र गोप्यः प्रमाणम् ॥ ६३ ॥

गाव इति ः १०.२०.४६.

वृषाभिरतिमन्तरा नहि भगवन्त्यवन्ध्या अपि समुल्लसितसत्फलाः सुरगणाश्च गावोऽपि च ।
अतः सुफलाकाङ्क्षिभिः श्रुतिविधेयसत्कर्मवत् सदैव सुकृतान्विता भुवि बुधैर्विधेयाऽऽत्मगौः ।। ६४ ।।
जायापदार्थकृत-निवर्चनात् ितैव पुत्रात्मना भवति भूय इति श्रुतिस्थः ।
अर्थोऽभवत् स्फुटमदो जनताश्च गावो जाता वृषाभिरतितो वृषहेतवो यत् ।। ६५ ॥
योषिद्वोपनिषद्वा स्ववृषरतैवेह भवति सुफलवती । तस्मात् त्रेता जलता युक्तं निखिलाऽपि मखद्गवासीत् ।। ६६ ॥
वृषभानुसेवनं यद् वृषयोगं जगति भानुयोगं च । जनयत्यलमिति युक्तं गावो वृषभानुसेवना आसन् ॥ ६७ ॥
वृषाचलपदाश्रयाच्छरदि सर्वं एवाभवन्नभीप्सितफलागमाः स्वगमृगादयो गोकुले ।
इति स्फुटमिहर्षिणा कथयतेदमाबोधि यत् कलौ सकलसौख्यदो भवति वेङ्कटेशाश्रयः ॥ ६८ ॥
तस्करार्तिकरः साधुरक्षको मुनिनेरितः । अवतारोऽयमित्यर्थो निरुक्तो युक्तमीक्ष्यताम् ॥ ६९ ।। (युग्मम्)

उदहृष्यन्निति ः १०.२०.४७.

निशाचरपदानुगो भवति योऽह्नि सुप्तिप्रियो विचारविधुरश्च यः स्फुटसावसूर्याश्रितः ।
श्रियाश्रितपदः सदा तदपरस्तु नित्यं भवत्यभूच्च कुमुदे स्फुटं प्रथममत्र पद्मे परन् ।। ७० ॥

पुरस्कृत्य विध्युक्तकर्माणि सूर्यादरे जागरूको दिने योऽपनिद्रः ।
स राज्ञः प्रियोऽन्यो नहि स्वाश्रितोऽपीत्यभूद् व्यक्तमस्माद्युगं तद्द्वितीयम् ॥ ७१ ॥

सध्यानं यजनं च पूजनमुपाख्यानाभिधाकीर्तनं श्रेशं सर्वयुगेष्वपीह कथितं तुल्यं निशेषस्त्वयम् ।
एकं मुख्यममुख्यकानि च पराण्येवं क्रमोऽध्यायतः पद्येष्वप्यवबोधितोऽत्र च तथोदाहृत्यभिव्यक्तितः ॥ ७२ ॥

अथवा भूतगुणवत् संक्रमो ह्युत्तरोत्तरम् । तेन सर्वगुणैरेव कलिः खल्वखिलर्धिभूः ॥ ७३ ॥

एतावता पद्यचयेन सर्वयुगस्थिती रूपकतो न्यरूपि । पद्यद्वयेऽन्त्येऽन्त्ययुगद्वयस्य प्राधान्यतोऽबोधि तदर्थं एव ॥ ७४ ॥

आद्ये कार्तार्थ्यमेतु प्रणवपरिचितिर्यज्ञसन्तानयोगस्त्रेतायां द्वापरे चापचितिरपि हरेस्तत्त्रिकेऽपि त्रयं वा ।
तेषां तद्दासभाजामपि तदनुकृतध्यानयज्ञार्चनानां स्पृह्या रम्येष्टदात्री जयति कलियुगे श्रीपतेर्नामभक्तिः ॥ ७५ ॥

एवं कृतादियुगवृत्तपरम्परानुवृत्तिः पुनः पुनरपीति च तत्र तत्र ।
तादृक्तयाऽऽचरणमित्यपि बोधितं सद्-वर्षा-शरत्स्तुतिमिषान्मुनिनेशभक्त्यै ॥ ७६ ॥

वर्षा-शरद्-विशदवर्णन-निर्णयेन यद्वा प्रवर्तन-निवर्तन-धर्ममार्गौ ।
तत्तन्निदर्शित-निदर्शन-योजनेन-स्पष्टौ कृताविति मतं किल वल्लभस्य ॥ ७७ ॥

प्रभोः प्रियतमानङ्ग-रङ्ग-सङ्गमकारिणी याऽग्रे भूयाद्युक्तमृषिस्तच्छतस्तुतिकामुकः ॥ ७८ ॥

योऽखिलनिजवसु सकलान्वितीर्य पुष्णाति सोऽत्र विमलतनुः । मज्जति सुखे ह्यनन्ते बोधितमेतच्छरद्घन-स्तुत्या ॥ ७९ ॥

वर्षं शरत्समययोरकरोः सपङ्का-पङ्कात्मनोरपि समानदृशा प्रसादम् ।
तत्प्रार्थयेऽन्यतरशालिनि मय्यपीश दृष्टिं प्रसादफलदां कुरु दीनबन्धो ॥ ८० ॥

श्रीशकल्पतरुक्रीडा॰ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने विंशोऽध्यायः ॥ २० ॥

कृष्णप्रिया

फूलों से लदे हुए वृक्ष और लताओं से होकर बड़ी ही सुन्दर वायु बहती, वह न अधिक ठंडी होती और न अधिक गरम उस वायु के स्पर्श से सब लोगों की जलन तो मिट जाती परन्तु गोपियों की जलन और भी बढ़ जाती, क्योंकि उनका चित्त उनके हाथ में नहीं था श्रीकृष्ण ने उसे चुरा लिया था ॥ ४५ ॥ शरद् ऋतु में गौएँ हरिनियाँ चिड़ियाँ और नारियाँ ऋतुमती सन्तानोत्पत्ति की कामना से युक्त हो गयी तथा साँड़ हरिन पक्षी और पुरुष उनका अनुसरण करने लगे ठीक वैसे ही जैसे समर्थ पुरुष के द्वारा की हुई क्रियाओं का अनुसरण उनके फल करते हैं ॥ ४६ ॥ परीक्षित जैसे राजा के शुभागमन से डाकूचोरों के सिवा और सब लोग निर्भय हो जाते हैं वैसे ही सूर्योदय के कारण कुमुदिनी कुई या कोई के अतिरिक्त और सभी प्रकार के कमल खिल गये ॥ ४७ ॥ उस समय बड़े-बड़े शहरों और गाँव में नवान्नप्राशन और इन्द्रसम्बन्धी उत्सव होने लगे खेतों में अनाज पक गये और पृथ्वी भगवान श्रीकृष्ण तथा बलरामजी की उपस्थिति से अत्यन्त सुशोभित होने लगी ॥ ४८ ॥ साधना करके सिद्ध हुए पुरुष जैसे समय आने पर अपने देव आदि शरीरों को प्राप्त होते हैं वैसे ही वैश्य, संन्यासी राजा और स्नातक वर्षा के कारण एक स्थान पर रुके हुए थे वहाँ से चलकर अपने-अपने अभीष्ट कामकाज में लग गये ॥ ४९ ॥

इति श्रीमद्भागवत दशमस्कन्ध का बीसवाँ अध्याय समाप्त ॥ २० ॥

◆

अथैकविंशोऽध्यायः

श्लोकाः	अनु.	पुष्पि.	मंदाक्रान्ता	वसंत	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
२०	५	१	१	१३	२	१००६	१०	४९	१०६५	३३।	१

श्रीशुक उवाच

इत्थं शरत्स्वच्छजलं पद्माकरसुगन्धिना । न्यविशद् वायुना [1]वातं [2]सगोगोपालकोऽच्युतः ॥ १ ॥
[3]कुसुमितवनराजिशुष्मिभृङ्गद्विजकुलजुष्ट[4]सरःसरिन्महीध्रम् ।
[5]मधुपतिरवगाह्य चारयन् गाः सहपशुपालबलश्चुकूज वेणुम् ॥ २ ॥

कर्वमक्षमा

अन्वयः—इत्थम्, शरत्स्वच्छजलं पद्माकरसुगन्धिना वायुना वातं सगोगोपालकः अच्युतः न्यविशत् ॥ १ ॥ कुसुमितवनराजिशुष्मिभृङ्गद्विजकुल (कल) घुष्टसरः सरिन्महीध्रम्, सहपशुपालबलः मधुपतिः अवगाह्य गाः चारयन् वेणुं चुकूज ॥ २ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एकविंशे शरद्रम्यवृंदावनगते हरौ । तद्वेणुस्वनमाकर्ण्य गोपीभिर्गीतमीर्यते ॥ १ ॥

इत्थमेवंभूतं वनम् । तदेवाह । शरदा स्वच्छानि जलानि यस्मिंस्तत् । वायुना वातमनुगतं वनं तदेकव्याप्तमित्यर्थः ॥१॥ ततश्च कुसुमितवनराजिषु शुष्मिणो मत्ता भृंगा द्विजाः खगाश्च तेषां कुलानि तैर्घुष्टाः सरांसि सरितो महीध्राश्च यस्मिंस्तद्वनं कृष्णोऽवगाह्य प्रविश्य वेणुमवादयत् ॥ २ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

शरदा रम्यं शरद्रम्यम् । तद्वेणुस्वरम् कृष्णवेणुनादम् (१) । तदेव इत्थंभूतत्वमेव । इत्यर्थ इति । मंदसुगंधिशीतलमिति भावः । "नेर्विशः" इत्यात्मनेपदं तु नार्षत्वात् । अच्युत इति । विनापि वनादिक्रीडां सुखस्थितिं वक्ति ॥ १ ॥ घुष्टा घोषिणः। सरांसि कासाराः, सरितः स्यंदमाना यमुनाद्याः, महीध्रा गोवर्द्धनाद्याः । वेणुकूजनस्य कामोद्दीपकत्वेन गोप्याकर्षणार्थत्वमत्र ज्ञेयम् ॥ २ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं शरदं वर्णयित्वा वर्षावत् तत्र श्रीभगवत्क्रीडाविशेषमाह— इत्थमित्यादिना यावत्समाप्ति । तत्र तदुपकरणत्वेनादौ मनोहरजलवायुसमाश्रयत्वेन स्वतश्च मनोहरतया वनमनुवदति सार्द्धेन । तत्रेत्थमिति यथाऽहं वर्णितवान् प्रायस्तथा वर्णनप्रकारेणेत्यर्थः । सगोगोपालको मधुपतिरित्यन्वयः । यद्वा, हृत्प्राप्तवर्णनीयरूपलीलादिना भावविशेषाविर्भावतो विशेष्यस्यानुच्चारणादुच्चारणाशक्तेर्वा श्रीकृष्ण इति वाक्यशेषो ज्ञेयः एवमग्रे बर्हापीडमित्यादावपि अच्युत इति पाठः चित्सुखस्य सम्मतः अत्र तु वनमिति शेषः ॥ १ ॥ यादवत्वाद्गोपाश्च मधवः तेषां पतिरिति क्रीडायां सामग्र्यं विवक्षितं श्लेषेण मधोर्ऋतुराजस्यापि पतिरिति तत्प्रवेशे सर्वापि वनशोभासमधिकैव दर्शिता अवगाह्य अन्तः प्रविश्येति वनस्य सर्वतः प्रवेशेन तत्त्वज्ञानं ध्वनितं सहपशुपालबल इत्यस्य गाश्चारयन्नित्यनेनैवान्वयो योग्यः नतु चुकूज वेणुमित्यनेन च "तद्व्रजस्त्रिय आश्रुत्य इत्युत्तरवाक्ये पूर्वत्रैव सामञ्जस्यप्रतिपत्तेः चुकूजेत्यन्तर्भूतण्यर्थः ॥ २ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं शरदं वर्णयित्वा वर्षावत्तत्र श्रीभगवत्क्रीडाविशेषमाह—इत्थमित्यादिना यावत्समाप्ति । तत्र तदुपकरणत्वेनादौ मनोहरजलवायुसमाश्रयत्वेन, स्वतश्च मनोहरतया वनमनुवदति सार्द्धेन । तत्र जलस्य मनोहरत्वं स्वच्छत्वेन स्पष्टमेव, निर्म्मलत्वेनैव सहजगुणाभिव्यक्तेः। वायोश्च—पद्मानामाकरः प्रस्फुटत्पद्ममयः सरोवरादिस्तेन सुगन्धिनेति शैत्येन सौरभ्येण च, वातमिति मान्द्येन वनस्य च ॥१॥ कुसुमितेति—इदञ्च सर्व्वं कामोद्दीपनत्वेनोक्तम्, वनं न्यविशदिति प्रविशन्नासीदिति पूर्व्ववदेव नित्यमीदृशी क्रीडा ज्ञेया, एवं चुकूजेति अन्ववर्णयन्नित्यादिकमग्रेऽप्यूह्यम् । सगोगोपालको मधुपतिरित्यन्वयः । यद्वा, हृत्प्राप्तवर्णनीयरूपलीलादिना भावविशेषाविर्भावतो विशेषस्योच्चारणाशक्तेर्वा श्रीकृष्ण इति वाक्यशेषो ज्ञेयः । एवमग्रे बर्हापीडमित्यादावपि । अच्युत इति पाठ

---

१. वीतं–विज. । २. सहगोपालको-वीर. । ३. शुष्म ; शुष्मि–वीर. बिज. । ४. घुष्ट–श्रीधर. वंशी. वीर. विज. । ५. यदुपति–वीर.।

श्रीचित्सुखस्यैव सम्मतः। मधवो यादवास्तेषां पतिरीश्वर इति गोचारणाद्यसम्भवेऽपि गोचारणादिना भक्तवात्सल्यादिरसविशेषमभिप्रैति; मधु मादकरसविशेषस्तस्य स्वामीति, श्लेषेण तदानीं समदत्वं मादकत्वञ्च सूचितम्। अवगाह्य अन्तःप्रविश्येति वनस्य सर्व्वतः प्रवेशेन तत्त्वज्ञानं ध्वनितम्। पशुपालैर्बलेन च सहित इति तेऽपि सर्व्वे वेणुं वादयामासुरित्यर्थः। यद्वा, सहपशुपालबलो गाश्चारयन्नित्यन्वयः॥ २॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वायुना वातं "वागतिगन्धनयोः" व्याप्तं वनमिति शेषः॥ १॥ शुष्मिभृङ्गा मत्तभ्रमराः॥ २–४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं शरदमनुवर्ण्याथ तदा वृन्दावने क्रीडतो वेणुं क्वणयतो भगवतो गोपीचित्तापहारिणः कांश्चिद्विहारान् स्ववेणुगीतान् गोपीभिर्मिथोऽनुवर्णितानाहैकविंशेन —इत्थमिति। इत्थमेवम्भूतं शारद्गुणसम्पन्नं वनमिति विशेष्यमध्याहर्त्तव्यम् इत्थमित्यनेनाभिप्रेतं प्रकाशयन्विशिनष्टि–शरदा स्वच्छानि जलानि यस्मिन् पद्माकरैः शोभनो गन्धो यस्य तेन वातेन वातं व्याप्तं वनं गोभिर्गोपालैश्च सहितोऽच्युतो न्यविशत्॥ १॥ ततश्च कुसुमितवनराजिषु शुष्मिणां मत्तानां भृङ्गाणां द्विजानां पक्षिणां च कुलैः घुष्टाः शब्दिताः सरांसि सरितः महीध्राः पर्वताश्च यस्मिन् तद्वनं विगाह्य प्रविश्य यदुपतिः कृष्णः पशुपालैः बलदेवेन च सहितः गाश्चारयन् वेणुं चुकूज अवादयत्॥ २॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

स्वयोग्यतानुसारेण हरौ ज्ञानसाधनं भक्तिः कर्तव्येत्यभिप्रेत्यस्मिन्नध्याये, तत्र गोपस्त्रीणां कृष्णे स्नेहातिशयम्वक्तुमुपक्रमते –इत्थं शरत् स्वच्छजलमित्यादिना। पद्माकराणां सुगन्धोऽस्यास्तीति पद्माकरसुगन्धी तेन वायुना वीतम्परिवृतम् इत्थमुक्तविधिना शरदा स्वच्छं निर्मलञ्जलं यस्मिंस्तत्तथा अनेन वायोः शैत्यं सूचितं न्यविशत् वनमिति शेषः "नेर्विशः" (१।३।१७) इति सूत्रेण लौकिकस्यात्मनेपदविधानं नतु छान्दसस्य अच्युत इत्यनेन वनक्रीडाद्यभावेपि सुखच्युतिर्नास्तीति सूचयति॥ १॥ अत्र वनशब्देन वृक्षसमुच्चय उच्यते कुसुमिताः पुष्पितोपेताः वनराजयः वृक्षपङ्क्तयो यस्मिंस्तत्तथा शुष्मिभिर्मत्तैः स्वजातिश्रेष्ठैर्वा भृङ्गद्विजगणैः पक्षिगणैश्च घुष्टानि शब्दितानि सरांसि अखाततटाकाः सरितः स्यन्दमाना नद्यः महीध्राः पर्वता यस्मिंस्तत्तथा मधुपतिर्माधवः एवम्विधं वनमवगाह्य वेणुञ्चुकूजेत्यन्वयः। कूजनं सुरतमन्त्रणकामवर्धनं सीत्कारोद्भवं श्रोत्रीणां गोपीनां कर्षणार्थमेव मुक्तम्॥ २॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रवेशे सर्वापि वनशोभा समाधिकैव दर्शिता इत्थमित्यादि॥ १–२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एकविंशे वेणुगीतस्मरार्त्ता गोपिका मुहुः। वेणुवृन्दावनमृगी देव्यादीनां यशो जगुः॥
यद्यद्वनं गतः कृष्णः चरितं मधुरं व्यवधात्। प्रेमनेत्रेक्षितं गोप्यो गोष्ठस्थास्तदवर्णयन्॥

शरदं वर्णयित्वा तादात्विकीं वेणुगानलीलां वर्णयिष्यंस्तन्मधुरिममण्डिते वृन्दावने प्रथमं कृष्णस्य प्रवेशमाह–इत्थमिति पद्माकरसुगन्धिनेति पद्माकरसम्बन्धात्सौगन्ध्यं शैत्यं च ज्ञेयं वायुभिरित्यनुक्तेर्वायुनेत्येकवचनेन वा तस्य मान्द्यं च गोगोपालकसहितोऽत्र मधुपतिरिति विशेष्यपदेनोत्तरश्लोकस्तेनान्वयः॥ १॥ कुसुमितवनराजिषु शुष्मिणो मत्ता भृङ्गा द्विजाश्च तेषां कुलैर्घुष्टानि सरांसि सरितो महीध्राश्च यस्मिन् तत् वनमधुपतिः कृष्णः अवगाह्येति यस्यावगाहनेन वनं शोभते तस्य मधोर्वसन्तस्यापि पतिरित्यतिशोभाश्लेषेण ध्वनिता चुकूज कूजयामास सह पशुपालबल इति वनावगाहने गोचारणे च साहित्यं न तु वेणुकूजने उत्तरश्लोके कृष्णस्य वेगुगीतमित्युक्तेः॥ २॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एकविंशाध्याये शरद्रम्यं वनं गतस्य श्रीकृष्णस्य वेणुगीतं श्रुत्वा तदेव गोपीभिर्मिथोऽनुवर्णितमित्याह —इत्थमिति। शरदा स्वच्छानि जलानि यस्मिन् तत्पद्माकरसुगन्धिना वायुना वातं व्याप्तम् इत्थमेवम्भूतं वनमिति विशेष्यमध्याहर्त्तव्यम् अच्युतः न्यविशत्॥ १॥ ततश्च मधुपतिः श्रीकृष्णः कुसुमितवनराजिषु शुष्मिणां मत्तानां भृङ्गाणां द्विजानां पक्षिणां च कुलैः घुष्टाः सरः सरिन्महीध्राः यस्मिन् तद्वनमवगाह्य प्रविश्य गाश्चारयन् वेणुं चुकूज अवादयत्॥ २॥

श्रीमत्कृष्णदासकृता श्रीगणदीपिका

श्रीकृष्णाय नमः ।।

श्रीमद्भागवते एकविंशतितमाध्याये श्रीवेणुगीतव्याख्या, श्रीयुक्तः शुक इति भावसमुल्लासेन शोभातिशयाद्वस्तुतस्तु श्रिया शुक इति श्लेषेण पद्मया महालक्ष्म्याः करो हस्तः तेन पुष्पावचयात् संक्रान्तसुगन्धिनेति परमोद्दीपकत्वम् । "राधायमाना सा पद्मा पद्मोद्भवसुधिष्ठिता" इति ब्रह्माण्डोक्तेः ।। १ ।। अत्र वेणुं वादितिवानिति वक्तव्ये चुकूजेति सङ्केतव्यक्तिः कूजनं हि कोकिलादिध्वनौ रूढ कोकिलकूजितसदृशं वेणुवाद्यमनुचक्रे तच्चानुकरणं सङ्केतसूचनायेति भावः ।। २ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एकविंशे वेणुनादमत्ता गोप्यः स्मरार्दिताः । वृन्दाटव्यां जगु कीर्तिं मृग्यादीनां मुहुर्मुहुः ।।

शरदं निर्वर्ण्य तत्रत्यां वेणुनादलीलां वर्णयिष्यंस्तद्विभूषितायां वृन्दाटव्यां हरेः प्रवेशस्तावदाह इत्थमिति । पद्मेति सौगन्ध्यशैत्ये वायुनेत्येकवचनात् मान्द्यञ्च वातमनुगतं वनं वनं न्यविशन्मधुपतिरित्युत्तरपद्यस्थेनानुषङ्गः ।। १ ।। कुसुमितासु वनराजिषु शुष्मिणो मत्ता भृङ्गा द्विजाश्च तेषां कुलैर्घुष्टानि सरांसि सरितो महीध्रो गिरयश्च यश्च तद्वनं मधुपतिं गोपानामपि यादवत्वेन माधवत्वात्तेषां स्वामी नन्दसूनुरवगाह्य प्रविश्य वेणुं चुकुज वादयामास श्लेषेण मधोर्वसन्तस्यापि पतिरिति तत्प्रवेशेन वनशोभायाः कार्त्स्न्यं सह पशुपालेति वन-प्रवेशे गोचारणे च तैः साहित्यं न तु वेणुवादने उत्तरत्र कृष्णस्य वेणुगीतमित्युक्तेः ।। २ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

।। हरिः ॐ ।। हरौ रतिमात्रं कण्ठमणिर्वैकुण्ठाप्तौ मतिमनतिहायेति निरूप्यतेऽत्राध्याये । तत्रादौ गोपीनां नाथे प्रेमप्रवाहं वक्तुमुपक्रमते इत्थमिति । शरदा स्वच्छजलं निर्मलं जलं यस्मिन् शोभनश्चासौ गन्धश्च सुगन्धः पद्माकराणां तटाकानां सुगन्धोऽस्तीति पद्माकरसुगन्धि तेन वायुनाऽवीतं परिवृतं वनमिति शेषः । सगोगोपालको गावश्च गोपालकाश्च तैः सहितः सगोगोपालकोऽच्युतो न मारव्यापारपारवश्येन प्रवेशोऽपि तु स चैच्छिक इति ध्वनयत्यच्युत इत्युच्चरन्निति ज्ञेयम् । न्यविशन्न्यविशत ।। १ ।। कुसुमितानि सञ्जातपुष्पाणि । तारकादिः । वनानां वृक्षाणाम् । वनं काननतोयोः । प्रवासे निलये चापि वनं प्रस्रवणेऽपि च । बहुवृक्षे नले रौद्रे शुभ्रे काष्ठान्तकीटके । अपक्वमृण्मये पात्रे वनशब्दं प्रचक्षत इति विश्वः । अवान्तरवनानां वा राजयः पङ्क्तयस्ता यस्मिंस्तत् शुष्मिणो बलिनः । यथोक्तमृग्भाष्यटीकाटिप्पणेषु । संयन्मदाय शुष्मिणे बलिनेऽस्मै शुष्मिणे बलिने ओजो वाजः शव इत्याद्यष्टाविंशतिः सङ्ख्याकेषु बलनामसु पठितस्य शुष्मशब्दस्य बलमर्थं इति भाव इति । भृङ्गा द्विजा इतरे तेषां कुलेन घुष्टानि गतमष्टमे । शब्दितानि सरांसि सरितो नाड्यश्च महीध्राः पर्वताश्च यस्मिंस्तत् मधुपतिरेवंविधं वनमवगाह्य विलोड्य सहपशुपालबलो गोपालबलरामसहितो गाश्चारयन्वेणुं चुकूज ध्वनयामास ।। २ ।।

श्रीसुबोधिनी

अष्टादशे गोपिकानामासक्तिर्वर्ण्यते स्फुटा । वर्ण्यवर्णकभेदेन गोपानामपि सोच्यते ।। १ ।।
प्रवेशकूजने तासामुद्बोधाय निरूपिते । तदगुणेषु प्रसक्ता हि तदासक्ता भवन्ति हि ।। २ ।।
आसक्तिः प्रेमपूर्वैव प्रेमापि हरिणा कृतम् । उद्बोधकं च हरिणा कृतं नान्येन केनचित् ।। ३ ।।
आसक्त्या वर्णनं तस्माद् विद्यान्ते वर्ण्यते स्फुटम् । कालाधिको हरिश्चात्र पुरुषोत्तम एव च ।। ४ ।।
त्रयोदशविधा लीला तत उक्ता पृथक् पृथक् ।। ४$\frac{१}{२}$ ।।

भगवल्लीलार्थं पूर्वाध्यायान्ते शरद् वर्णिता ततोत्र लीलार्थं भगवतो वृन्दावनप्रवेश उच्यत **इत्थमिति**, इत्थम्भूता या शरत् तया **स्वच्छं जलं** यस्मिन् वृन्दावने तादृशम**च्युतो न्यविशदि**तिसम्बन्धः, अत्रापि पूर्ववदाधिदैविकोभिः शक्तिभिर्लीला वक्तव्या, तत्र नायकोत्कर्षार्थम**च्युत** इत्याह, तत्रापि **गावो**नुभाविका **गोपालाः** सेवकाः, शक्तीनां निर्भयत्वायैते देवाः साक्षिणः, रमणं जलस्थलभेदेन द्विविधं निर्भररमणे च **वायो**रपेक्षा जलक्रीडायां तु नैर्मल्यं शीताभावश्च, **शरदा** नैर्मल्यं शीताभावश्चोक्तः, शरत्स्वच्छजलमिति, **शरदा स्वच्छानि जलानि** यत्र विशेषतः कर्मानिर्देशात् क्रीडार्थं जलप्रवेशश्चोक्तः, **पद्माकराणां सुष्ठु** यो गन्धः शैत्यसहितस्तद्वान् सुगन्धी, एतादृश**वायुना वातं** वनं **न्यविशत्**, गन्धवत्त्वेनैव मान्द्यमुक्तं, एतावदेव क्रीडायामपेक्षितं, विशेषणधर्माणामेव प्राधान्यान्न विशेष्यनिर्देशः, नितरां **प्रवेश** आधिदैविकपर्यन्तः ।। १ ।। प्रवेशमुक्त्वा देवतोद्बोधनमाह **कुसुमितेति**, **मधुपतिर्गाश्चारयन् वेणुं चुकूज**, वसन्ताधिपतिः सरस। शृङ्गारात्मा **धर्मं** कुर्वन् क्रियाज्ञानशक्तिसहितो देवतोद्बोधनाय वेणुनादं कृतवान्, उद्बुद्धा देवताः सामर्थ्यभावान्न रता भवन्तीति भगवतो **मधुपति**त्वं निरूपितं, विभावादीन् निरूपयति, **कुसुमिता** या वनराजयस्ताभिर्वे **शुष्मणो** मत्ता जाता **भृङ्गाः** पक्षिणश्च तेषां **कुलान्य**वान्तरजातिभेदास्तैर्**जुष्टानि सरितः सरांसि महीध्राः** पर्वताश्च यस्मिंस्तानेव वा, **एकवद्भावः**, एवंविध**मवगाह्य** तत्रत्यानपि त्रिविधानुद्बोधयितुं केवलं शृङ्गारार्थमेव **कूजनं** कृतवान् ।। २ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अष्टादशेध्याये गोपानामपि सोच्यत इत्यत्र । बालका हि यत्किञ्चिदद्भुतमनुभूय स्वबाल्यस्वाभाव्यादेवोत्साहवशात्सर्वेषामग्रे तद्वदन्ति, तथा नैतैरुक्तं, किन्तु प्रभ्वासक्त्या । तस्यास्त्वयं स्वभावो यत्स्वसमानशीलेष्वेव स्वसर्वस्वतया ज्ञातं प्रभुचरित्रं व्यक्ततया वादयति । तादृक्त्वमेतास्वेवेति गोपाः स्वस्वगृहे ताभ्य एवाचख्युः । इदमेव सम्यक्त्वं चक्षणे । एतेन यथा दिवैतासां गुणगानं तथैतेषां निशीति ज्ञापितं भवति । एतच्च प्रकरणादौ ज्ञापितमिति तदन्ते च ज्ञापितमन्तरङ्गक्रीडार्थं वनप्रवेशे गोपालसाहित्यकथनेन । अन्यथा व्रतवरदानार्थं गच्छन्यथैतान्सङ्गे न नीतवांस्तत्कार्यं कृत्वैभिः सहितो जातस्तद्वक्ष्य'त्यथ गोपैः परिवृत' इत्यनेन तथात्रापि कुर्यात्तदेतद्धृदि कृत्वोक्तं **गोपानामपि सोच्यत इत्याचार्यैः** । यथा स्वामिन्यो गृहेषु स्थिता अपि वने दिवाकृतां लीलां भगवद्भावानुभावेन स्वहृदयेष्वनुभूय गायन्ति, तथैतेपि निशिकृतां लीलामासक्तिभरानुभावेन स्वस्वहृदयेष्वनुभूय गायन्ति, सा चातिगोप्येति शुकैः स्फुटतया नोक्ता, एतद्गानकथनेनैवोक्ता भवति, गानहेतुभूतासक्तेस्तुल्यत्वात्सा च ज्ञापितैवेति तत्कार्यमपि सुतरां ज्ञापितं भवति । तदेतदुक्तं **वर्ण्यवर्णकभेदेने**त्यनेन । वर्ण्यं वर्णनीयं रात्रिचरित्रं, वर्णका वर्णनकर्तारो गोपाः । तत्र दिवा चरित्रं स्वामिन्यश्चेति भेदः । आसक्तिनिरूपणमुपपादयन्ति **तद्गुणे**ष्वित्यादिना । अत्रैतज्ज्ञेयम् । गुणासक्तिलक्षणकार्येण भगवदासक्तिर्ज्ञाप्यते । आसक्तिः प्रेमोत्तरभाविनीति तन्निरूपणेन प्रेमापि निरूपितो भवति, स चाद्यश्लोकेन निरूप्यते । स तूद्बुद्ध एवासक्तिं जनयत्ययं तु लौकिकवत्कोकिलादिकूजनेन नोद्बुद्धो भगवत्यलौकिकत्वादतः **प्रभुकृतमेव** तदुच्यते । फलितमाहुरासक्त्या **वर्णन**मिति । आसक्तौ सत्यामपि यावद् भगवान् स्वयं न ज्ञापयति तावत्स्वरूपगुणलीला न ज्ञातुं शक्यन्ते यतस्तस्माद्धेतोरेकेन श्लोकेन **बर्हापीड**मित्यनेन गानोपक्रमान्ते विद्यारूपं सपरिकरं ब्रह्मस्वरूपज्ञानं स्फुटं यथा भवति तथा वर्ण्यत इत्यर्थः । पूर्वं नारदब्रह्मात्मकामूर्तविद्यामन्तरे चानुभावयित्वान्तरेव तत्फलभूतं गानेन स्वरूपानुभवं कारितवान्, अग्रे तु स्वलोकात्मकव्यापिवैकुण्ठस्य बहिरनुभवात्मकविद्यया तत्फलभूतं बहिरङ्गसङ्गेन स्वरूपानन्दानुभवं कारयिष्यतीति ज्ञापनायाप्यत्र विद्यात्वनिरूपणमिति ज्ञेयम् । यद्वा । श्लोकपञ्चकानन्तरं गानारम्भोक्तिव्यञ्जितमर्थमाहु**र्विद्यान्त** इति । विद्याया अन्त इत्यर्थः । सा हि पञ्चपर्वात्मिका । तथा च गानोक्तेः पूर्वश्लोकेषु तत्समानसंख्योक्त्या तेषु तत्त्वं लक्ष्यते । तथा च ब्रह्मविद्यातोप्याधिक्यं, तस्या अपीदं फलमिति ज्ञाप्यत इत्याशयः । श्लोकसंख्यातात्पर्यमाहुः **कालाधिक** इत्यादिना । द्वादशमासात्मकः कालो, द्वादशाङ्गः पुरुषश्च इह तदधिकसंख्यया गेये तदधिकत्वं ज्ञाप्यत इत्यर्थः ॥ ० ॥ **इत्थं शरत्स्वच्छजल**मित्यत्र, **शक्तीनां निर्भयत्वाये**त्यादि । अलौकिकत्वनित्यत्वस्वाभाविकधर्मत्वज्ञापनायैतदनभिज्ञेषु गोपनाय भगवद्भोग्यसीमन्तिनीषु शक्तिपदप्रयोगः स्वार्थं तदपेक्षारहितः फलभोगसमर्पको यथाधिकारं तत्र प्रवर्तकश्च साक्षी भवति यथा परमात्मा । तादृशत्वमन्तरङ्गत्वाद् गोपेष्वस्तीति साक्षित्वमुक्तम् ॥ १ ॥ **कुसुमितेत्यत्र, धर्मं कुर्वन्नि**त्यादि । धर्मो हि साक्षात्परम्पराभेदेन चतुर्वर्गस्यापि साधकः । अवगाहनं च तत्र तत्र तथा लीलाकरणार्थम् । एवं सति लोकसिद्धं कार्यान्तरं विना तत्र गमनं चिरस्थित्यादिकं च लोकविरुद्धम् । लोके चिकीर्षितलीलाज्ञानं च रसविरुद्धमिति सर्वसमाधानपूर्वकं सम्पादकं **गोचारण**मिति भावेन धर्मत्वोक्तिः ॥ २ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अष्टादशेध्याये **तद्गुणे**ष्विति भगवदासक्ता एव गुणासक्ता भवन्त्यतोत्र गुणासक्त्या भगवदासक्तिर्ज्ञापितेत्यर्थः ॥ ० ॥ इत्थंशरदित्यत्र **आधिदैविके**ति यत्रागत्य देवा मिलिताः स्वस्वकृतं कार्यं नयनभ्रवादिभिर्निवेदितवन्तस्तावत्पर्यन्तमित्यर्थः ॥१॥ कुसुमितेत्यत्र **स रस** इति यतः शृङ्गारात्मा रसः स अतो मधोर्वसन्तस्याधिपतिरित्यर्थः, **क्रियाज्ञाने**ति **क्रिया**शक्तिरूपा **गोपाः** अन्तरङ्गकार्यार्थं तत्र तत्र **क्रियाशक्तेः** स्थापितत्वात् ज्ञानशक्तिरूपो बलः प्रतिबन्धकनिवृत्त्यर्थं तत्र **लीलाज्ञानस्य** स्थापितत्वात्, अन्यत्र क्रियाशक्तिस्थापनेप्यन्तरङ्गलीलायां तथाधिकाराभावाज्ज्ञानमात्रस्थापनमितिभावः, **सामग्र्यभावा**दिति नायकस्य **सरस**लाभावे रतिर्न सम्पद्यत इत्यर्थः, **त्रिविधा**निति सरित्सरोमहीध्रस्थानित्यर्थः, **शृङ्गारार्थ**मिति **शृङ्गारो** रतिः प्रेमेतियावत् तदुद्बोधनार्थमित्यर्थः, **मधुपति**पदतात्पर्यार्थोयम्, 'बर्हापीडे'तिश्लोकोक्तयावद्गुणलीलाविशिष्टस्वरूपानुभावकं न भवतीति केवलपदमेवकारश्च, **उद्बोधनमुक्त्वे**ति इत्याहेत्यनेनैतस्य समानकर्तृत्वम्, **उद्बुद्धकामा** इति **कामो**भिलाषो रतिः प्रेमेतियावत्, प्रेमैवोद्बुद्धं सदा**सक्ति**पदवाच्यं भवति, तथा **चोद्बुद्धकामा** आसक्तिमत्य इत्यर्थः, एतेन कूजनेन वनस्थानां शृङ्गारोद्बोधनं मुख्यं व्रजस्थानाञ्च प्रासङ्गिकं सम्पादितवानित्यर्थः, **भगवदुद्बोधार्थ**मिति 'अन्तःप्रविष्टो भगवान्' इत्यत्रैव हृदिस्थितस्य वर्णनेन बहिरुद्बोधनार्थमित्यर्थः ॥ २ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

अष्टादशाध्याये कारिकासु तद्गुणेषु **प्रसक्ता हीति**, नन्वत्राष्टादशाध्याये **गोपिकानामामासक्ति**र्निरूप्यत इत्युक्तं तत् कथं सम्भवत्यासक्तेः स्फुटमकथनादित्याशङ्क्य गुणासक्तिरूपकार्येण भगवदासक्तिरनुमीयत इत्याहुस्त**द्गुणेषु प्रसक्ता हि तदासक्ता** भवन्ति हीति, हि यतस्तस्मिन् भगवति य **आसक्तास्त एव गुणासक्ता भवन्ती**त्यतो गुणासक्त्या भगवदासक्तिर्ज्ञाप्यत इतिभावः,

नन्वासक्तेरुद्बोधस्तु कोकिलकूजनादिना भवति तत् स्वयं भगवता किमर्थं कृत इत्याशङ्क्य नात्रोद्बोधनमात्रं भगवता कृतमपि तु सर्वापि सामग्री केवलं प्रभुणा कृतेत्यासक्त्युद्बोधोपि हरिणा कृत इत्याहुर**आसक्तिः** प्रेमपूर्वेवेत्यारभ्य न केनचिदित्यन्तेन, आसक्तेः पूर्वावस्था **प्रेम,** तदपि प्रभुणैव स्वस्मिन् व्रजभक्तानां कृतं प्रमाणप्रकरणे, ततोस्मिन् प्रमेयप्रकरण आसक्तिः कृता, ततो वेणूकूजनेन तदुद्**बोधोपि हरिणैव** कृत इति युक्तमेव, यतोङ्गीकारेणैव प्रभुः सर्वं साधयति, तथा च **साधनानि स्वयमेव सम्पाद्य फलं प्रयच्छतीति पुष्टिमार्गे प्रभुप्राप्तौ प्रभुरेव साधनम्,** "यमेवैष वृणुते तेन लभ्य" इति श्रुतेः, **विद्यान्ते वर्ण्यत** इति "विद्ययामृतमश्नुत" इतिश्रुतेर्विद्यां विना न भगवत्प्राप्तिस्ततोत्र व्रजजनेष्वपि सा निरूपणीयातो "बर्हापीडे"त्यन्तश्लोकपञ्चकसङ्ख्यया पञ्चपर्वा विद्या सिद्धेति ज्ञायते, एवं पञ्चपर्वात्मकविद्यासिद्धौ गुणवर्णनलक्षणा भगवत्प्राप्तिरभूदितिभावः, विद्यायाः पञ्च पर्वाणि, "वैराग्यं साङ्ख्ययोगौ च तपो भक्तिश्च केशवे पञ्चपर्वेति विद्येयं **यया** विद्वान् हरिं विशे"दितिवाक्यात्, इदं त्ववधेयम्, लीलास्थजीवानां विद्याप्यलौकिकी, सा घोषसुन्दरीणामपि सम्पन्ना, तथा हि भगवदतिरिक्तेषु रागाभावो वैराग्यम्, रसात्मकत्वेन पुरुषोत्तमज्ञानं साङ्ख्यम्, चित्तस्य भगवदेकपरत्वं योगः, भगवद्विरहे परमक्लेशानुभवस्तपः, मुक्त्यन्तपुमर्थाकाङ्क्षारहिता भगवदासक्तिर्भक्तिरिति पञ्चपर्वा पुष्टिमार्गीयविद्या व्रजसुन्दरीणां सिद्धा, तत्र पञ्चममासक्तिरूपं पर्व, तदत्राध्यायार्थत्वेन निरूपित "मष्टादशे गोपिकानामासक्तिर्वर्ण्यते स्फुटे"त्यनेन, **कालाधिक** इति "अक्षण्वता"मित्यादित्रयोदशश्लोकैर्निरूप्यमाणो भगवान् कालातीत इति सूचयितुं कालस्य द्वादशात्मकत्वात् तदधिकत्रयोदशसङ्ख्यया कालातीतत्वं सूच्यते, एवं सति कालातीतत्वे तत्र त्रयोदशश्लोकेषु निरूप्यमाणानां स्वरूपगुणलीलादीनां नित्यत्वं सिद्धमेव, **पुरुषोत्तम** इति पुरुषस्य द्वादशाङ्गत्वात् तदधिकत्रयोदशसङ्ख्यया त्रयोदशश्लोकेषु प्रतिपाद्यस्य पुरुषोत्तमत्वं सूच्यत इतिभावः ॥ ० ॥ **इत्थं शरदित्यत्र आधिदैविकपर्यन्तमिति आधिदैविकशब्दोत्र** परोक्षवादरीत्या निकुञ्जादिप्रदेशवाचकः ॥१॥ **कुसुमितेत्यत्र कुसुमिता ये वनराजयस्ताभिरिति** इह **ये वनराजय** इतिपुल्लिङ्गमुक्त्वा **ताभिरिति** स्त्रीलिङ्गनिर्देशाद् वनस्थितवृक्षादीनां स्त्रीभाववत्त्वं ध्वनितम्, तेन चिद्रूपता युक्ता, **मधुपतिरवगाह्येत्यत्र मधुपतिर्गाश्चारयन्निति** इह **मधुशब्दो** यादवजातिपरत्वेन कैश्चिद् व्याख्यातः, तथा सति तात्पर्यशून्यत्वं स्यादतस्तात्पर्यविशेषलाभाय **मधुपतिपदं** प्रकारान्तरेण व्याचक्षते **वसन्ताधिपतिः सरसः शृङ्गारात्मेति, क्रियाज्ञानशक्तिसहित** इति "यः सर्वज्ञः सर्वशक्ति"रिति श्रुतेः परब्रह्मणः क्रियाशक्तिज्ञानशक्तिसाहित्यं सर्वदापेक्षितम्, तदत्र क्रियाशक्तिरूपा गोपास्तैर्गोचारणादिक्रिया सम्पाद्यते, अत एव "प्रेमप्रवृद्धमुदित" इत्यस्य **सुबोधिन्यां** वक्ष्यते "गोपैर्गोचारण"मिति, ज्ञानशक्तिरूपो **बलदेवस्तेन** लीलाप्रतिबन्धकीभूतानां दैत्यानां मायिकवत्सादिरूपाच्छादितानां **यथार्थज्ञानं** तन्मारणं भक्त "रक्षा" च, तदेतत् "प्रेमप्रवृद्धमुदित" इत्यस्य विवृतौ वक्ष्यते "बलभद्रेण रक्षे"ति, फलप्रकरणेपि वक्ष्यते "यथा प्रमाणे रक्षायां च बलभद्रोपयोग" इति, एवं प्रतिबन्धनिवृत्तौ भक्तैः सह भगवान् स्वच्छन्दं क्रीडति, एवमुभयशक्तिसाहित्यप्रयोजनं ज्ञेयम्, **देवतोद्बोधनायेति देवताशब्देनात्र** सरित्सरोवरमहीध्रनिकटवर्तिन्यो व्रजसुन्दर्यो ज्ञेयाः ॥ २ ॥

(५) भगवदीयनिर्भयराम‍निर्मिता श्रीसुबोधिनीकारिकाव्याख्या

अष्टादशाध्यायारम्भे सार्धचतस्रः कारिकाः **अष्टादशेति** का० १७१३/४–१७५१/४ । **वर्ण्यवर्णकभेदेनेति** 'वर्ण्यं वर्णनीयं रात्रिचरित्रं **वर्णका** वर्णनकर्तारो गोपाः, तत्र दिवाचरित्रं स्वामिन्यश्चेति भेद' इति विवृतं टिप्पण्यां, **प्रवेश** इति प्रथमश्लोकोक्तो वृन्दावनप्रवेशः द्वितीयश्लोकोक्तं वेणुकूजनं रूपबोधनं च तासामासक्त्युद्बोधनाय निरूपिते, नन्वत्राध्याये भगवद्गुणासक्तिरेव स्फुटा न तु भगवदासक्तिरित्याशङ्क्याहुस्तद्गुणेष्वित्यादि, भगवद्गुणासक्तिलक्षणकार्येण भगवदासक्तिरनुमीयत इत्यर्थः, भगवद्विषयकप्रेमोद्बोधकयोरलौकिकत्वं बोधयितुं भगवत्कृतत्वमाहुः **प्रेमापि हरिणा कृतं उद्बोधकं च हरिणेति,** फलितमाहुर**आसक्त्या वर्णन**मिति, आसक्तौ सत्यामपि यावद् भगवान् स्वयं न ज्ञापयति तावत् स्वरूपगुणलीला न ज्ञातुं शक्यन्ते यतः तस्माद्धेतोरेकेन श्लोकेन "बर्हापीड"मित्यनेन **गानोपक्रमान्ते** विद्यारूपं सपरिकरं ब्रह्मस्वरूपज्ञानं स्फुटं यथा भवति तथा वर्ण्यते इत्यर्थः, यद्वा श्लोकपञ्चकानन्तरं गानारम्भोक्तिव्यञ्जितमर्थमाहु**र्विद्यान्त** इति, विद्याया अन्त इत्यर्थः, सा हि पञ्चपर्वात्मिका, तथा च गानारम्भोक्तेः पूर्वश्लोकेषु विद्यासमानसङ्ख्योक्त्या तेषु श्लोकेषु विद्यात्वं लक्ष्यते, 'तथा च ब्रह्मविद्यातोप्याधिक्यं विद्याया अपि गुणवर्णनं फलमिति ज्ञाप्यत इत्याशय' इति विवृतं टिप्पण्यां, तत्र प्रथमव्याख्यानपक्षे कारिकायोजना **यस्माद्धेतोर्वर्णनं** "तद् वर्णयितुमारब्धा" इति श्लोकारब्धं **वर्णनमासक्त्या** केवलया न तु विद्यासहितया तस्माद्धेतो**र्विद्या** ब्रह्मस्वरूपज्ञानं, **अन्ते** 'तद् वर्णयितुमारब्धा' इति श्लोकोक्तगानोपक्रमान्ते **वर्ण्यते** "बर्हापीडे"त्येकेन श्लोकेन वर्ण्यत इति, द्वितीयव्याख्याने तु वर्णनं "अक्षण्वतां फल"मिदमिति श्लोकोक्तं यद् वर्णनं तद् **यस्माद्धेतोरासक्त्या** क्रियमाणं फलरूपमेव न तु साधनरूपं तस्माद्धेतोर्विद्यान्ते श्लोकपञ्चकात्मकविद्याया अन्ते **वर्ण्यत** इति, त्रयोदश श्लोकसङ्ख्यातात्पर्यमाहुः **कालाधिक** इत्यादिना, अत्र वर्ण्यमानो हरिर्द्वादशमासात्मककालादधिको द्वादशाङ्गात् लौकिकपुरुषाच्च उत्तमः पुरुषोत्तम उच्यते इति सङ्ख्यातात्पर्यं, अत एव त्रयोदशविधा लीला उक्ताः ॥ ० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एकविंशे विहर्तुं वै वृन्दारण्यं गतो हरिः। तद्वंशीरवलीलादि गोपीभिर्वर्णितं व्रजे ॥ १ ॥

एवं सामान्यतः शरदं निरूप्य श्रीवृन्दावनशोभां वर्णयन् तत्र प्रविश्य श्रीकृष्णो वेणुवादनं कृतवानित्याह—इत्थमिति द्वाभ्याम्। इत्थमेवंभूतं वनं गोगोपास्तत्सहितोऽअच्युतो न्यविशदित्यन्वयः। इत्थंशब्दार्थमेव विवृणोति—शरदा स्वच्छानि जलानि यस्य तत् यस्मिन्निति वा। पद्माकरसुगन्धिना वायुना वातं व्याप्तम् ॥ १ ॥ कुसुमितासु वनराजिषु ये शुष्मिणो मत्ताः भृङ्गाः, द्विजाः पक्षिणश्च तेषां कुलैर्घुष्टा नादिताः सरांसि सरितो महीध्राः पर्वताश्च यस्मिंस्तद्वनं पशुपालैर्बलेन च सहितो मधुपतिः श्रीकृष्णोऽवगाह्य प्रविश्य वेणुं चुकूज अवादयत् ॥ २ ॥

अन्वितार्थप्रकाशिका

एकविंशे हरेर्वेणुगीतं श्रुत्वा च गोपिकाः। गीतेन तत्स्तुतिं चक्रुस्तत्र श्लोकास्तु विंशतिः (२०) ॥
उवाचेति द्वयं (२) सार्द्धा एकत्रिंशदनुष्टुभः (३१॥) ॥ २१ ॥

इत्थमिति ॥ इत्थमेवंभूतं शरदा स्वच्छानि जलानि यस्मिन् तत् पद्माकरस्य तडागस्य सुगन्धिना वायुना वातं व्याप्तं वनं गावः गोपालकाश्च तत्सहितोऽच्युतो न्यविशत्। तङभाव आर्षः ॥ १ ॥ कुसुमितेति ॥ कुसुमितासु वनराजिषु ये शुष्मिणो मत्ताः भृङ्गाः द्विजाः पक्षिणश्च तेषां कलैर्मधुरध्वनिभिः। कुलेति च पाठः समूहार्थः। घुष्टा नादिताः सरांसि सरितो महीध्राः पर्वताश्च यस्मिंस्तद्वनं पशुपालैर्बलेन च सहितो मधुपतिः श्रीकृष्णोऽवगाह्य प्रविश्य गाः चारयन् वेणुं चुकूज। अन्तर्भावितण्यर्थतया अवादयत्। वनावगाहे गोचारणे च पशुपालादिसाहित्यं नतु वेणुकूजने उत्तरपद्ये कृष्णस्य वेणुगीतमित्युक्तेः ॥ २ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीमेकविंशेऽध्याये हरेर्वेणुगीतं निगद्यते पद्मानां आकराः समूहास्तेषां सुगंधोऽस्ति यस्मिंस्तेन वायुना वातं अनुस्यूतं व्याप्तमित्यर्थः वनं वृंदावनं अच्युत इति पाठे वनमितिशेषः ॥ १ ॥ कुसुमितेति कुसुमिताः पुष्पितायाः वनराजयो वनवृक्षपङ्क्तयो यस्मिंस्तत् शुष्मिणो मत्ताः भृंगाः द्विजाः पक्षिणश्च तेषां कुलैः कलापैर्घुष्टाः शब्दिताः सरांसि सरितो नद्यश्च महीध्राः पर्वताश्च यस्मिंस्तद् वृंदावनं मधुपतिः वासंतिकशोभाजनकत्वाद्वसंतपतिः मधुपुरपतिर्वा पशुपैः बलेन च सहितो हरिः अवगाह्य प्रविश्य गाश्चारयन् वेणुं वंशीं मुरलीमिति यावत् चुकूज वादयामास ॥ २ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एकविंशे हरौ याते शरद्रम्यं वनं क्वचित्। तद्वेणोः सुस्वरं श्रुत्वा गीतं गोपीभिरीर्यते ॥ १ ॥

इत्थं शरदमनुवर्ण्याथ तदा वृन्दावने क्रीडतः वेणुं क्वणयतः भगवतः गोपीचित्तापहारिणः कांश्चिद्विहारान् वेणुगीतसहितान् गोपीभिर्मिथो वर्णितान् प्राह ॥ इत्थमिति ॥ शरदा स्वच्छानि जलानि यस्मिंस्तत्, पद्माकराणां कमलसमूहानां सु शोभनो गन्धो यस्य तेन, वायुना वातं व्याप्तं, इत्थमेवंभूतं, शारदिकगुणसंपन्नमित्यर्थः। वनमिति शेषः। गावश्च गोपालाश्च तैः सह वर्त्तमानः सगोगोपालकः, अच्युतः श्रीकृष्णः, न्यविशत् प्रविवेश ॥ १ ॥ कुसुमितेति ॥ ततश्च कुसुमितानि च तानि वनानि च तेषां राजयः पङ्क्तयः यस्मिंस्तत्, अत्र वनशब्देन वृक्षसमुच्चय उच्यते। ततः प्रचुरकुसुमतरुश्रेण्युपेतमित्यर्थः। शुष्मिणो मत्ताश्च ते भृङ्गा भ्रमरा द्विजाः पक्षिगश्च तेषां कुलानि गणास्तैर्घुष्टानि शब्दितानि सरांसि अखाततटाकाः सरितः स्यन्दमाना नद्यः महीध्राः पर्वताश्च यस्मिंस्तत्, यद्वा। कुसुमितेत्यादिमहीध्रान्तमेकं पदं, तदा कुसुमितवनराजिषु शुष्मिणो मत्ता ये भृङ्गा द्विजाश्च तेषां कुलैर्घुष्टाः सरआदयो यस्मिंस्तत्, घुष्टेत्यत्र जुष्टेत्यपि पाठः। एवंभूतं वनमिति शेषः। मधुपतिः श्रीकृष्णः, अवगाह्य प्रविश्य, पशुपालैर्गोपैर्बलेन बलभद्रेण च सहेति सहपशुपालबलः, गाः धेनूः, चारयन् सन्, वेणुं, चुकूज अवादयत् ॥ २ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वर्षादिवर्णनमिषेण चतुर्युगानामावर्तनक्रममुदीर्य यथाश्रुतार्थम्।
जिज्ञासुमुक्तयुगधर्ममृषिः क्षमेशं श्रीवेणुगीतमिषतः कृतधर्ममूचे ॥ १ ॥
लसद्वार्दवायौ समुद्भूतनादः सदानन्दभूर्नन्दिने सुप्रदेशे।
युगे त्वादिमे क्रीडति स्वैरलीलः परात्मेति गूढोऽयमर्थोऽवधेयः ॥ २ ॥
श्रुत्वा विश्रुतवेणुनादमबलाः प्रोद्भूतकामाङ्कुरा यद्घोषे हि परोक्षमेव कमलाधीशं समावर्णयन्।
तेनेदं प्रतिबोधितं सदमलाः सत्यं परं संस्तुवंत्येवं हि श्रुतयोऽपि चिन्मयतनुं सन्नादलक्ष्यार्थकाः ॥ ३ ॥
नादेन लक्ष्यो भगवान्नादः श्रुतिगतः सदा। घोष एवोपलब्धार्थस्तत्रात्रैवं समन्वयः ॥ ४ ॥

चुकूज वेणुमिति ः १०.२१.२.

बहिरन्तर्यः सरलः श्रुत्यनुकूलध्वनिः स मे प्रेयान् । लोकदृशा जड़पिशुनोऽप्येतद व्यक्तीकृतं सुवेणुभृता ॥ ५ ॥
यस्मिन् मुक्ता जाता वंशोऽसौ कीदृशोऽपि मम मान्यः । इत्याशयेन हरिणा कराद्वलम्बादसौ समुदधारि ॥ ६ ॥
यस्मादनेकयुक्ता जाताः स त्वं जडः कथं शिष्टः । प्रष्टुमिदं स्वोपमुखं नीतोऽसौ विस्मितेन हरिणा किम् ॥ ७ ॥

मुक्तोदयोऽजनि यतः स जडः कुवंशोऽस्त्येतन्न युक्तमिति दीनदयाकरेण ।
कृत्वा च तन्मुखमुतोपमुखं व्यबोधि सोपांश्वनादिगुरुणा निजमुख्यमन्त्रः ॥ ८ ॥
अस्मादविद्यैकनिधेः कुवंशान्मुक्तोदयः स्यात् कथमित्युदीताम् ।
भ्रान्ति जनानामपनेतुकामःश्रुत्यर्थमाधात् स्फुटमस्य वक्त्रात् ॥ ९ ॥

स्यात्कामोद्दीपकोऽपि श्रुतिसुखजनकः सर्वदा यन्निनादो जीवन्मुक्तः स चैको युगपदुभयसत्सौख्यभोक्ता जनेषु ।
इत्यर्थं ख्यापयित्रा जगति भगवताऽधारि तादृक् स वेणुः स्पष्टं यच्छ्रीशमुख्यामृतभुगपि बभावङ्गुलीस्त्रीसमेतः ॥ १० ॥
यां यां यः सप्तभूमिष्वधिचरति शनैरेकवृत्तिर्मुमुक्षुस्तस्यां तस्यां प्रकामं प्रभवति स तथोच्चैस्तरश्रुत्यभिज्ञः ।
एवं व्याख्यातुमर्थं जगदधिगुरुणा वेणुरन्ध्रेषु सप्तस्वारोहाच्छ्रौतमार्गे स्फुटमुपगमितोऽस्त्युच्चतां मुख्यवर्णः ॥ ११ ॥

धराश्रितोऽसावधराश्रितोऽजनि रसोद्भिदप्यास्यरसानुयोगिकः ।
कूत्पत्तिरप्युत्तमवंशपूजितो हेतुस्तदीशैक-कराश्रयस्तव ॥ १२ ॥

गीतोपदेशेन धनञ्जयस्य कार्तार्थ्यमग्रेऽति मया विधेयम् । ज्ञात्वा तदभ्यासविधानमन्तश्चिन्तावहन्नारभतेव कृष्णः ॥ १३ ॥

कृष्णप्रिया

श्रीशुकदेवजी कहते हैं—परीक्षित ! शरद् ऋतु के कारण वह वन बड़ा सुन्दर लग रहा था, जल निर्मल था और जलाशयों में खिले हुए कमलों की सुगन्ध से सनकर वायु मन्द मन्द चल रही थी भगवान श्रीकृष्ण ने गौओं और ग्वालबालों के साथ उस वन में प्रवेश किया ॥ १ ॥ सुन्दर सुन्दर पुष्पों से परिपूर्ण हरी हरी वृक्ष पंक्तियों में मतवाले भौंरे स्थान स्थान पर गुनगुना रहे थे और तरह-तरह के पक्षी झुण्ड के झुण्ड अलग अलग कलरव कर रहे थे जिससे उस वन के सरोवर नदियाँ और पर्वत सब के सब गूंजते रहते थे, मधुपति श्रीकृष्ण ने बलरामजी और ग्वालबालों के साथ उसके भीतर घुसकर गौओंको चराते हुए अपनी बांसुरी पर बड़ी मधुर तान छेड़ी ॥ २ ॥

तद् व्रजस्त्रिय आश्रुत्य वेणुगीतं [1]स्मरोदयम् । काश्चित् परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन्[2] ॥ ३ ॥
तद् वर्णयितुमारब्धाः स्मरन्त्यः कृष्णचेष्टितम् । नाशकन् स्मरवेगेन विक्षिप्तमनसो नृप ॥ ४ ॥

कर्दमक्षमा

अन्वयः -स्मरोदयं तत् वेणुगीतम् व्रजस्त्रियः आश्रुत्य काश्चित् परोक्षं (यथा भवति तथा) स्वसखीभ्यः अन्ववर्णयन् ॥३॥ नृप, स्मरवेगेन विक्षिप्तमनसः कृष्णचेष्टितं स्मरन्त्यः (ताः) तत् कृष्णचेष्टितं वर्णयितुम् आरब्धाः न अशकन् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्कृष्णवेणुगीतं स्मरस्योदयो यस्मात्तदाश्रुत्य श्रुत्वा परोक्षं यथा भवति तथा व्रजे स्थितत्वात् ॥ ३ ॥ विक्षिप्तमनसो व्याकुलचित्ताः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्मरस्य कामस्य 'कामः पंचशरः स्मरः' इत्यमरः । यद्वा-कासांचिददृष्टश्रुतम् ॥ ३ ॥ आरप्सतेत्यारब्धाः अकर्मकत्वात्कर्त्तरि क्तः कृतारंभाः । तद् वेणुगीतम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्तत्र तदेव वा कृष्णस्य वेणुगीतम् अनुगीतानन्तरं निरन्तरं वा अवर्णयन् तत्र हेतुः स्मरस्य उदयः प्राकट्यं यत्र तादृशं यथा स्यात्तथाऽऽश्रुत्य यद्यपि सदा तस्य वेणुवादनविनोदो वर्त्तत एव तथापि तदानीं वयोऽतिशयेन शरल्लक्ष्मीविलासावलोकनेन च दीप्तभावस्य ताः समाक्रष्टुं वेणुविद्यामभ्यसतस्तया तासां तादृशत्वं जातम् अत एव तदानीमेव ताभिस्तदनुवर्णनं च आश्रुत्य दूरतोपि सम्यक् श्रुत्वा कलत्वेपि सर्वव्यापिस्वभावत्वात् ईषदपि श्रुत्वेति वा काश्चिद्भावविशेषयुक्ताः श्रीराधादेव्याद्याः इति

---

[1] महोदयं–विज. । [2] ऽन्ववेदयन्–विज. ।

सर्वासामेव व्रजस्त्रीणां तच्छ्रवणेपि सर्वभूतमनोहरमिति वक्ष्यमाणान्मात्रादीनां वात्सल्यादेरेवोदयो नतु स्मरस्येति ताः परिहृताः अतः स्वीयाभ्यः सखीभ्यः श्रीललितादिभ्यः निजमनोबाष्पोद्गिरणाय ता अपि श्रावयितुमित्यर्थः। स्वशब्देन सख्याः सख्योपि व्यावर्त्यन्ते इति तासां परमशालीनत्वं दर्शितं किं बहुना तत्रापि परोक्षम् अर्थान्तराच्छृण्वन् सावहितं यथास्यात्तथेत्यर्थः ॥ ३ ॥ स्मरोदयस्य क्रममेवाह—तदिति। तत्तादृशं परोक्षं यथा स्यात् तथा वर्णयितुम् आरब्धाः आरब्धवत्योपि नाशकन् तथा वर्णयितुं नापारयन्नित्यर्थः। तत्र हेतुः स्मरेति, कुतः ? कृष्णस्य सर्वचित्ताकर्षकस्य चेष्टितं तद्वेणुवादनमयं स्मरन्त्यः अनुसन्दधानाः हे नृपेति तत्कथनेन स्वयमेव भावविशेषप्राप्त्या कातर्येण सम्बोधनम् ॥ ४ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्तत्र कृष्णस्य वेणुगीतम्, अनु गीतानन्तरं निरन्तरं वा अवर्णयन्। तत्र हेतुः। तादृशजलादिदर्शनात्तस्यैव स्मरेण कामेन गोपीस्मरणेन वा उदयो यस्य; यद्वा, स्मरस्य उदयो यस्मात्तत्। यद्यपि सदा तस्य तादृश एव स्वभावस्तथापि तदानीं भावविशेषोत्पत्त्या वादनविशेषेण तादृशत्वमुक्तम्। अतएव तदानीमेव ताभिस्तदनुवर्णनञ्च; यद्वा, तदिति कृष्णभावविशेषसूचकं परममोहनमिति वा; यतः स्मरोदयम्। अन्यत् समानम्। व्रजस्य व्रजे वा वर्त्तमाना याः स्त्रियस्ता आश्रुत्य दूरतोऽपि सम्यक् श्रुत्वा कृष्णेच्छाविशेषेण तासां भावबलेनैव वा निवेशितत्वात् 'आ' ईषत् श्रुत्वेति वा, वेणुना गीतं वेणोर्वा गीतं श्रीकृष्णाधरस्पर्शमात्रेण स्वत एव तत्कूजनस्यैव भंगीविशेषेण गीतत्वेनैव परिस्फूर्त्तेः, कूजनेन गीतमेवाभिप्रेतम्। काश्चिद्भावविशेषयुक्ताः श्रीराधादेव्याद्या इति। सर्व्वासामेव व्रजस्त्रीणां तच्छ्रवणेऽपि मान्यानां वात्सल्यप्रसरस्यैवोदयः, न तु स्मरस्येरिताः परिहृताः। परोक्षं तासामेवासाक्षात् निभृतमित्यर्थः, अत स्वीयाभ्यः सखीभ्यः श्रीललितादिभ्य एव, ताः प्रतीत्यर्थः। यद्वा, तादर्थ्ये चतुर्थी, तासां सुखार्थमित्यर्थः, तासां सुखेनैवात्मसुखविशेषात् ॥ ३ ॥ आरब्धा आरब्धवत्यः, इत्यवश्यमारब्धपरिसमाप्तिरपेक्ष्यत इति भावः, तथापि न शेकुः। तत्र हेतुः-स्मरस्य श्रीकृष्णस्मृतिविशेषस्य तद्विषयककामस्य सर्व्वचित्ताकर्षकस्य चेष्टितं तद्वेणुवादनात्मकम्, अग्रे वर्णनीयं ना स्मरन्त्यो अनुसन्दधानाः; यद्वा, काश्चिदन्ववर्णयन् काश्चिद्वर्णयितुमारब्धा अपि न शेकुः। हे नृपेति तत्कथनेन स्वयमेव भावविशेषप्राप्त्या कातर्य्येण किंवा तस्यैव भावविशेषोदयमालक्ष्य तत्सम्वरणार्थं सम्बोधनम् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स्मरस्योदयो यस्मात्तत् कृष्णस्य वेणुगीतमाकर्ण्य काश्चिद्व्रजस्त्रियः तस्य कृष्णस्य परोक्षमसमक्षं स्वसखीभ्योऽन्ववर्णयन् ॥ ३ ॥ तत्कृष्णस्य वेणुगीतं चेष्टितं वर्णयितुमारब्धाः आरब्धवत्यः तत्स्मरन्त्यो हे नृप स्मरवेगेन व्याकुलितचित्तास्तावद्वर्णयितुमेव ना शक्नुवन् शक्ता न बभूवुः कृष्णश्च तच्चेष्टितं च तयोः समाहारः कृष्णचेष्टितं यादृशस्तदा कृष्णः चेष्टितं च तदुभयं स्मरन्त्यो नाशक्नुवन्नित्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

महः कामः तस्योदयः अङ्कुरीभावः यस्मात्तन्महोदयं स्मरोदयमिति केचित्पठन्ति तद्वेणु गीतमाश्रित्य काश्चिद्व्रजस्त्रियः परोक्षं कासाञ्चिददृष्टश्रुतं कृष्णस्य चरितं स्वसखीभ्यो न्यवेदयन्नित्यन्वयः ॥ ३ ॥ वर्णयितुं कीर्तयितुम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

काश्चित् प्रेयसीरूपास्ता एव इत्यर्थः। सर्वास्तास्वेव सर्वभेदाः ॥ ३-६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत् कृष्णस्य वेणुगीतम् आश्रुत्य परोक्षं यथा स्यात्तथा तासां व्रजे स्थितत्वात् ॥ ३ ॥ तद्वेणुगीतं वर्णयितुमारब्धा आरब्धवत्योपि वर्णयितुं नाशकन् तत्र हेतुः स्मरवेगेनेत्यादि ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णस्य तद्वेणुगीतमाश्रुत्य तदेव काश्चित् परोक्षं यथा भवति तथा स्वसखिभ्यः अन्ववर्णयन् ॥ ३ ॥ तदेव वेणुगीतं वर्णयितुमारब्धा अपि कृष्णचेष्टितं स्मरन्त्यः स्मरवेगेन विक्षिप्तमनसः नाशकन् ॥ ४ ॥

श्रीमत्कृष्णदासकृता श्रीगणदीपिका

तत्पूर्वोक्तप्रकारं सङ्केतसूचकमित्यर्थः। यद्वा, तस्य व्रजे वर्तमानायाः स्त्रियः स्वकान्तभावा न तु मातृभावास्तथा प्रौढाः न तु कुमार्य्य इत्यर्थः। स्मरोदयं स्मरस्य कामस्योदयो यस्मात् अत्र कामोऽनुकरणमात्रमेव न तु वास्तवोऽसौ प्रच्छन्नकामुकत्वादासां गोकुलेन्द्रस्य सौख्यादेरित्युक्तेः। यद्वा, प्रेमोदयं तदुक्तं संमोहनतन्त्रे "प्रेमैव गोपरामाणां काम इत्यगमत् प्रथाम्" इति तदेवानुकरणेन कोपि विरोधः, तदुक्तं ब्रह्मणा "प्रपञ्चं निष्प्रपञ्चोऽपि विडम्बयसि भूतले" इत्यादि काश्चिद्भाववशीभूताः परोक्षम्

अथान्तराच्छन्नं । यद्वा, लज्जया निजजनाधारणाय तदग्रजादिवर्णनसहयोगेनाच्छन्नं यथा स्यात्तथेति समुचितवर्णनं हि प्रीतिमात्रं बोधयति न तु कान्तभावमित्यभिप्रायात् । यद्वा, काश्चित्कृष्णस्य व्रजस्त्रिय इति सम्बन्धः यद्वा कृष्णस्य स्मरोदयं कृष्णस्य सम्बन्धिस्मरस्योदयो यस्मादिति ॥ ३-४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

कश्चिद्व्रजस्त्रियः श्रीमत्याद्याः प्रेयस्यः कृष्णस्य तद्वेणुगीतमाश्रुत्य स्वसखीभ्योऽन्ववर्णयन् सरस्यादयः प्राकट्यं यत्र तद्यथा स्यात्तथेति तदन्या व्यावर्त्यन्ते परोक्षमिति तासां व्रजे स्थितत्वात् ॥ ३ ॥ तद्वेणुगीतं वर्णयितुमारब्धा अपि वर्णयितुं नाशकन्नापारयन् कुतः स्मरवेगेन विक्षिप्तमनसो व्याकुलहृदयाः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

महोदयं महस्योत्सवस्योदयो येन तत् मह उत्सवस्य दया दानं येन तदिति वा वेणुगीतं तद्व्रजस्त्रियस्तद्व्रजस्त्रिय इति वाऽऽश्रुत्य काश्चित्परोक्षं दूरवर्तिनीभ्यः सखीभ्योऽन्ववर्णयन् ॥ ३ ॥ कृष्णचेष्टितं स्मरन्त्यस्तद्वर्णयितुमारब्धाः । कर्तरि क्तः । स्मरवेगेन विक्षिप्तमनसो नाशकन्न समर्था अभवन् ॥ ४ ॥

श्रीसुबोधिनी

एवमुद्बोधनमुक्त्वा ताभिः सह रमणे कामिनीकामोद्बोधकत्वात् कूजितस्य **व्रजस्त्रियोऽप्युद्बुद्धकामा** जातास्ततः कामवशाद् भगवदुद्बोधार्थं **स्वसखीभ्यः** स्वसमानशीलव्यसनाभ्यस्तद्गुणान् वर्णयितुमारेभिर इत्याह **तद् व्रजस्त्रिय** इति, आसमन्ताच्छ्रुत्वाधिदैविकत्वात्, अन्यथा कथं वनस्थितो वेणुनादो व्रजस्थिताभिर्गोपिकाभिरेव श्रूयते ? यथा सर्वे देवा उत्थिता एवं स्मरोपि, उद्दीपनभावत्वान्नादस्य, तन्मध्ये स्मरेण काश्चन **मूर्च्छिता** एव काश्चित् पुनः कृपया भगवत्सङ्गं प्राप्य **कृष्णस्य परोक्षे** विद्यमानाभ्यः **स्वसखीभ्योनु** भगवत्करणानन्तरमे**वावर्णयन्** वर्णितवत्यः ॥ ३ ॥ तासामपि पुनः कामोद्बोधे विशेषतो वर्णनाशक्तिर्जातेत्याह **तद् वर्णयितु**मिति, **तत्** स्वानुभूतं भगवद्रूपं वेणुगीतं वा **वर्णयितुं** कार्यतः कारणतः फलतः स्वरूपतश्च निरूपयितु**मारब्ध**वत्यस्ततो मध्ये वर्णनार्थं **कृष्णचेष्टितं स्मरन्त्य**स्तत्स्मरणजातेन **स्मरेण** यो जातो **वेगश्चि**त्तचाञ्चल्यं तेन विक्षिप्त**मनसो** जाताः, नृपेतिसम्बोधनं धर्मवत्त्वेन जितेन्द्रियत्वाय ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

तद्व्रजस्त्रिय आश्रुत्येत्यत्र, **गोपिकाभिरेव श्रूयेते**ति । एतदितरश्रवणाभावे प्रमाणापेक्षायामुच्यते । भगवान् हि सप्रयोजनकमेव कार्यं करोति, न त्वन्यथापि जीववत् । अत्र च रमणार्थं भावोद्दीपनमेव प्रयोजनम् । एवं सति यासु तदभावस्तासु तच्छ्रवणं निष्प्रयोजनकमिति प्रभुर्न करोत्येवेति मन्तव्यम् । एतेन श्रुतं सर्वैः, परन्तु स्थायिभावोत्रैवास्तीत्यत्रैव तदुद्दीपनं नान्यत्रेति निरस्तम् । सर्वज्ञस्य तादृक्कृत्यसम्भव इत्युक्तत्वात् । नादनिष्ठामृतस्य स्वप्रवेशमात्रेणैव भगवदीयत्वकरणलक्षणस्वभावहानिप्रसङ्गश्च । स्वस्वरूपातिरिक्तस्य वपुषोत्राभावात्तद्भरणोक्तिरसङ्गतेत्याशङ्क्य तत्तात्पर्यमाहुर्भगवांस्त्वित्यादिना । उक्तरीत्योद्बुद्धद्विविधरसात्मकं हि वपुः, रसश्च भावात्मकत्वात्स्वप्रियाव्यतिरिक्तेषु भक्तेषु तादृशत्वस्याप्रकटनाच्चामूर्तत्वेन लोके प्रसिद्धः । वपुर्बिभ्राणस्तु बहिः स्वस्वरूपं प्रकटयन् भवति । तथायमपि कुर्वन् वृन्दारण्यं प्राविशदिति । अत्रैवं ज्ञेयम् । शब्दात्मकत्वेनामूर्तत्वेन लोके प्रसिद्धा अपि 'वेदा यथा मूर्तिधरास्त्रिपृष्ठ' इति वाक्यात् सार्वदिकशब्दब्रह्मात्मकमूर्तिप्राकट्यवन्तो यथा, तथा ब्रह्मणः साकारत्वात्सार्वदिकमेव रसात्मकं वपुर्वृन्दारण्ये एव प्रकटितवान् । हृद्येव प्राकट्ये तु मनोमात्रभोग्यत्वम्, बाहिःप्राकट्ये सर्वेन्द्रियभोग्यत्वम् । एवं सति चक्षुराद्यविषयत्वे प्रियपदार्थस्य मनोमात्रविषयत्वं दुःखदमित्यनुभवसिद्धमतो भक्तार्थं तथेति । न त्विति । स एव भगवानेव तथा । आत्मभिन्नवपुषो भर्तेत्यर्थः ॥ ३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तद् व्रजस्त्रिय इत्यत्र **स्मरोपी**ति **स्मरस्य** लीलोपयोगित्वेन देवत्वादित्यर्थः, स्मरोद्बोधे हेत्वन्तरमप्याहुरुद्दीपनेति, मूले **काश्चि**त्पदसूचितं विभागमाहु**स्तन्मध्य** इति, **पुनरि**ति **गीत**श्रवणानन्तरमित्यर्थः, **भगवत्सङ्ग**मिति मूर्च्छितानां त्वज्ञानमेव, अन्यासां गीतश्रवणानन्तरमन्तःस्थितभगवत्सङ्गप्राप्तिरिति भावः । **तासाम**पीति मूर्च्छितानां समुच्चयार्थमपि शब्दः ॥ ३ ॥ **तद् वर्णयितु**मित्यत्र **स्वानुभूत**मिति स्वाभिर्लीलास्वनुभूतमित्यर्थः, **वेणुगीतञ्चे**ति ताभिर्लीलाः कुर्वद् वेणौ गीतं स्वरूपमित्यर्थः, **कार्यत** इत्यादि कार्यं देवतानां शृङ्गारोद्बोधः कारणं भगवतो भावोद्बोधः फलं तत्र तत्र लीला, **स्वरूपं** तत्तत्सङ्केतबोधनमिति ज्ञेयम्, (स्वरूपानन्दस्थापनम् **स्वरूपं** विवृतावयवत्वादीति ज्ञेयम्), **स्मरणजाते**नेति **स्मरणपदेन** व्यापारः, **स्मरपदेन** तज्जन्या स्मृतिरिति भेदः ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तद् व्रजस्त्रिय इत्यस्याभासे **भगवदुद्बोधार्थ**मिति यथा भगवता **वेणुनादेन व्रजस्त्रियः** उद्बोधिता एवं व्रजस्त्रीभिरपि गुणगानेन भगवानुद्बोधनीयः, उभयत्र शब्दस्यैवोद्बोधकत्वम्, **उद्बोधनं** नामोद्बोधकाभीष्टकार्यपरतया स्थापनम्, **तद् व्रजस्त्रिय** इत्यस्य विवरणे एवं **स्मरोपी**ति यथा सर्वे देवा लीलोपयोगिनो व्रजसीमन्तिनीप्रभृतयः उत्थिताः स्वस्वसेवासमयमवधार्य सावधाना जाता एवमाधिदैविकः **स्मरोपि** लीलासामग्रीमध्यपातित्वादुत्थितो व्रजभक्तानां मानापनोदनादिकार्यार्थं तन्मनसामौत्कण्ठ्यादिसम्पादनेन स्वसेवासमये सावधानोभूदित्यर्थः, **तन्मध्ये काश्चन स्मरेण मूर्छिता एवे**ति मूले **काश्चि**दितिपदद्वयोक्त्या वेणुनादश्रवणकर्त्रीष्वपि श्रवणानन्तरमनुवर्णनं काभिश्चिदेव कृतं न तु **सर्वाभि**रिति ज्ञापितम्, वर्णनाकरणे कारणमाहुः **स्मरेण मूर्च्छिता एवे**ति, तत्र कासाञ्चिन् मूर्छा न जाता तत्र किं कारणमित्याहुः काश्चित् **पुनः कृपया भगवत्सङ्गं प्राप्ये**ति, तथा च कृपाविशेष एव मूर्छाभावे **भगवत्सङ्गं** च कारणमित्यर्थः, सङ्गोत्रान्तरो ज्ञेयः, **तासामपि पुनः कामोद्बोध** इति वर्णनार्थं कृतेन कृष्णचेष्टितस्मरणेन जातो यः **कामोद्बोधस्तस्मिन्** सति वर्णनाशक्तिर्जातेत्यर्थः, पूर्वं वेणुकूजनं वेणुगीताभ्यां स्मरोदयो जातः कृष्णचेष्टितस्मरणेन च विशेषतो जात इति ज्ञापयितुं पुनःपदं सुबोधिन्यामुक्तम्, **अवर्णयन् वर्णितवत्य** इति, "अक्षण्वता"मित्यादित्रयोदशभिः श्लोकैरित्यर्थः अत एवा "क्षण्वता"मित्यस्याभासेनुवर्णनमेवाहेत्युक्तम्, इदमत्र बोध्यम्, "अन्वर्णय"न्नित्यनेन व्रजसुन्दरीकर्तृक 'मक्षण्वता'मित्यादित्रयोदशश्लोकोक्तं वर्णनमुक्तं श्रीशुकेन, ततः कथमवर्णयन्नितिप्रकारजिज्ञासायां "तद् वर्णयितुमारब्धा" इत्यनेनारम्भदशायां स्मरवेगकृतः प्रतिबन्ध उक्तस्ततो भगवता तासां गुणवर्णनशक्तिसम्पादनार्थं "नटवरे"ति पदद्वयवाच्यं विप्रयोगसंयोगरसात्मकं धृतबर्हापीडत्वेनोद्बुद्धरसस्वरूपं कर्णिकारस्थापनेनोच्छलितरसभावं पीताम्बरधारणेन गुप्ततया सम्पादितरसताकं वैजयन्तीमालावनमालोभयवैशिष्ट्येन शृङ्गाररसोपयोगियावद्रससम्बन्धियशोद्योतकं सुधाज्ञापितस्वीयभोग्यत्वसूचितं स्त्रीभावं स्त्रीभावसूचितभक्तपरतन्त्रताकं शुद्धपुष्टिमार्गीयरसस्वरूपं वेणुरवेण बोधितवान्, तदा श्रोत्रद्वारा नादप्रवेशे नादान्तर्वर्तिसुधासम्बन्धात् पूर्वोक्तप्रकारकं स्वरूपं श्रोत्रीणां देहेन्द्रियप्राणान्तःकरणजीवेषु पूर्णमाविरभूत्, तदेतद् "बर्हापीड"मिति श्लोके श्रीशुकेन वर्णितम्, "वृन्दारण्यं प्राविश"दित्युक्त्या व्रजसुन्दरीणां हृदयेपि प्रवेशकथनादेतासां हृदयस्य वृन्दावनरूपत्वाद् "वृन्दावनं सखि भुव" इत्यस्य सुबोधिन्यां तथा वक्ष्यमाणत्वात्, एवं सुधासंवलितनादद्वारा स्वरूपस्य हृदयप्रवेशे सुधाधिक्याद् गलनरूपवर्णनमभूत्, तदेत'दिति वेणुरवं राज"न्नितिश्लोकेन शुकेनोक्तम्, तथा च सिद्धमेतत्, "स्वसखीभ्योन्ववर्णय"न्नित्यनेन उद्देशत उक्तस्य अनुवर्णनस्य प्रकारजिज्ञासायां "तद् वर्णयितुमारब्धा" इत्यनेन वर्णनारम्भे प्रतिबन्धमुक्त्वा "बर्हापीड"मित्यनेन प्रतिबन्धाभावपूर्वकं वर्णनशक्तिहेतुमुक्त्वे"ति वेणुरव"मित्यनेनानुवर्णनं समर्थितमिति सर्वं सुस्थम् ॥ ३ ॥ **तद् वर्णयितुमारब्धा** इत्यस्य विवरणे **कार्यतः कारणतः स्वरूपतः फलतश्चे**ति वेणुगीतस्य चतुर्धा वर्णनम्, तत्र यद्यपि **वर्णनारम्भे** प्रतिबन्धोभूत् तथापि प्रतिबन्धनिवृत्तौ चतुर्धा वर्णनं जातमेव, तत्र **वेणुगीतस्य कार्यतो** निरूपणं "वृन्दावनं सखि भुव" इत्यादिश्लोकेषु, **कारणतो** निरूपण "मक्षण्वता"मितिश्लोके, वेणुगीतकारणस्य भगवन्मुखस्वरूपस्य निरूपणात्, **स्वरूपतो** निरूपणं "गोप्यः किमाचरदय"मिति श्लोके **फलतो** निरूपणं "गागोपकै"रिति श्लोके, **स्वरूपं नादेनुभूयमान एवानुभूतं भवति न तु पृथगिति** गानकर्तॄणां दूरस्थत्वेन भगवद्वियुक्तत्वान्नादद्वारैव स्वरूपानुभव इत्यर्थः ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्मरस्य कामस्योदयो यस्मात् तत् कृष्णस्य वेणुगीतमाश्रुत्य तत्समीपं गत्वा तत्रत्यं वृत्तमनुभूयागत्य काश्चित् स्त्रियः परोक्षं यथा भवति तथा स्वसखीभ्योऽन्ववर्णयन् । अन्यथा व्रजस्थाभिरननुभूतस्य वनवृत्तान्तस्य वर्णनासम्भवात् ॥ यद्वा निलयानि त्यक्त्वा कदाचिदनुभूतस्यैव तदानीं वेणुरवश्रवणेनोद्गतस्य वृत्तान्तस्य वर्णनमिति ज्ञेयम् । भगवद्वेणुनादस्यालौकिकत्वाद्व्रजस्थानामपि श्रवणं सङ्गच्छते । अन्यथा वने उद्भूतस्य व्रजे श्रवणं न स्यात् । तदपि श्रवणं यथाधिकारमेव कार्यं करोति । अतो मात्रादीनां वात्सल्योत्पादकम्, अन्यासां कामिनीनां स्मरोत्पादकम् । अन्येषामपि यथारुचि, 'सर्वभूतमनोहरम्' इति वक्ष्यमाणत्वात् ॥ ३ ॥ हे नृप ! तत् कृष्णचेष्टितं वर्णयितुमारब्धाः आरब्धवत्योऽपि वर्णनं कर्तुं नाशकन् समर्था न जाताः । तत्र हेतुमाह — स्मरस्य कामस्य वेगेन विक्षिप्तं व्याकुलं मनो यासां ताः इति । कामवेगे हेतुमाह—स्मरन्त्य इति ॥ ४ ॥

अन्वितार्थप्रकाशिका

तदिति । स्मरस्योदयो यस्मात् तत् कृष्णस्य वेणुगीतमाश्रुत्य तत्समीपं गत्वा तत्रत्यं वृत्तमनुभूयागत्य काश्चित् स्त्रियः परोक्षं यथा भवति तथा स्वसखीभ्योऽन्ववर्णयन् । यद्वा । परोक्षमिति तासां व्रजे स्थितत्वात् ॥ ३ ॥ तदिति ॥ हे नृप ! स्मरस्य वेगेन विक्षिप्तं व्याकुलं मनो यासां ताः कृष्णस्य चेष्टितं स्मरन्त्यः ता गोप्यः तत् कृष्णचेष्टितं वर्णयितुमारब्धाः आरब्धवत्योऽपि आदि कर्मणि क्तः । वर्णनं कर्तुं नाशकन् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्मरस्य हर्यालिंगनाभिलाषस्योदय उद्भवो यस्मात्तत् वेणुगीतं काश्चित् समाधिनिष्ठाः प्रत्यक्षमाश्रुत्य स्वसखीभ्यः परोक्षेयं यथा तथा ग्रामे स्थितत्वात् ।। ३ ।। विक्षिप्तमनसो विह्वलमानसाः ।। ४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति ।। स्मरस्य कामस्य उदयः अङ्कुरीभावः यस्मात्तत्, प्रसिद्धं, तत् कृष्णस्य वेणुगीतं, व्रजस्त्रियः आश्रुत्याकर्ण्य, काश्चिद्व्रजस्त्रियः, परोक्षं कृष्णस्यासमक्षं, कृष्णस्य वने तासां च वृन्दावने स्थितत्वात् परोक्षं, स्वसखीभ्यः, अन्ववर्णयन् । पूर्वं दृष्टश्रुतकृष्णचरिताः काश्चनाऽदृष्टश्रुतकृष्णचिरतानां पुरो निषद्य स्वदृष्टश्रुतं तत्ताभ्यो न्यवेदयन्नित्यर्थः ।।३।। तदिति ।। हे नृप, तच्छ्रीकृष्णस्य सवेणुगीतं चेष्टितं वर्णयितुं आरब्धा आरब्धवत्यः, कृष्णचेष्टितं स्मरन्त्यः कृष्णस्य तच्चेष्टितं च तयोः समाहारः कृष्णचेष्टितं यादृशस्तदा श्रीकृष्णस्तच्चेष्टितं च तदुभयमित्यर्थः । स्मरयन्त्य इति वा । अत एव स्मरवेगेन कामरंहसा, विक्षिप्तमनसः व्याकुलचित्ताः सत्यः, न अशकन् । तावद्वर्णयितुं शक्ता एव न बभूवुः ।। ४ ।।

कृष्णप्रिया

श्रीकृष्ण की वह वंशीध्वनि भगवान् के प्रति प्रेमभावको उनके मिलन की आकांक्षा को जमाने वाली थी उसे सुनकर गोपियों का हृदय प्रेम से परिपूर्ण हो गया । वे एकान्त में अपनी सखियों से उनके रूप गुण और वंशीध्वनि के प्रभाव का वर्णन करने लगीं ।। ३ ।। ब्रज की गोपियों ने वंशिध्वनि का माधुर्य आपस में वर्णन करना चाहा तो अवश्य परन्तु वंशी का स्मरण होते उन्हें श्रीकृष्ण की मधुर मुसकान आदि की याद हो आयी, उनकी भगवान से मिलने की आकाङ्क्षा और भी बढ़ गयी उनका मन हाथ से निकल गया वे मन ही मन वहाँ पहुँच गयी जहाँ श्रीकृष्ण थे अव उनकी वाणी बोले कैसे ? वे उसके वर्णन में असमर्थ हो गयी ।। ४।।

बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रद् वासः कनककपिशं वैजयन्तीं च मालाम् ।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दैर्वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्तिः[1] ॥ ५ ॥
इति वेणुरवं राजन् सर्वभूतमनोहरम्[2] । श्रुत्वा व्रजस्त्रियः सर्वा वर्णयन्त्योऽभिरेभिरे ॥ ६ ॥

कर्दमक्षमा

अन्वयः—बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं कनककपिशं वासः वैजयन्तीं च मालां बिभ्रत् अधरसुधया वेणोः रन्ध्रान् पूरयन् गोपवृन्दैः गीतकीर्तिः स्वपदरमणं वृन्दारण्यं प्राविशत् ।। ५ ।। हे राजन् इति सर्वभूतमनोहरम् वेणुरवं सर्वाः व्रजस्त्रियः श्रुत्वा वर्णयन्त्यः अभिरेभिरे ।। ६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

यादृशं कृष्णस्मरणं तासां मनसः क्षोभकं जातं तदाह । बर्हापीडमिति । नटवद्वरं वपुर्बिभ्रद्वृंदावनं प्राविशत् । कथंभूतं वनम् । स्वपदैरंकितं रमणं रतिजनकम् । गोपवृंदैर्गीतकीर्तिः तथा बर्हमयमापीडं शिरोभूषणं बिभ्रत् । बर्हमापीडो यस्मिन्निति वपुषो विशेषणं वा । वेणुवादनमुत्प्रेक्षते । रंध्रान्वेणोरिति । अतो नूनमधरसुधैव पूर्णाद्वेणोरुच्चलंती गीतवत्प्रसर्पितुमर्हतीति भावः ।। ५ ।। अभिरेभिरे वर्णयंत्यः पदेपदे परमानंदमूर्तिं कृष्णं परिरब्धवत्यः ।। ६ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यादृशम् यत्प्रकारकम् । तासाम् गोपीनाम् । क्षोभकम् संचालकम् । तत् स्मरणम् । वरम् शोभनम् । 'आपीडं मुकुटे स्रजि' इति शाश्वतः । संभवत्वाद्वपुर्विशेषणमपि बर्हेत्यादि । कर्णिकारं हयमारपुष्पं तदाकारं चतुर्दलं भूषणं वा "कर्णिकारः पुमानारग्वधद्रौ च द्रुमोत्पले" इति मेदिनी । "कर्णिकारो हयारातिपुष्पे कर्णविभूषणे । चंडातपुष्पसदृशे हैरण्ये च द्रुमोत्पले ।। पारिव्याधतरौ बाणे मोहकारे कलादके" इति धरणिः । वैजयंतीमिति । "वैदूर्यमुक्ताफलनीलवज्रैः समाणिकैः संग्रथिता हि माला । वायोरपां भूमिरवेर्जसां हि तत्त्वैः प्रदिष्टा खलु वैजयंती ।।" केचित्तु श्वेतैः पीतैस्तथारक्तैर्हरितैर्नीलवर्णकैः । पुष्पैरेभिः सुगंधैश्च वैजयंत्यस्ति मालिका ।।" इति भक्तिसुधार्णवे । क्वचित्तु–"वैजयंती भवेन्मालाष्टधामौक्तिकनिर्मिता" इति । "जीमूतकरिमत्स्याहिवेणुशंखवराहकाः । शुक्तयश्चैव विज्ञेया अष्टौ मौक्तिकयोनयः ।।" इति मल्लिनाथः । उत्प्रेक्षते तदलंकारेण वदति । अन्यनिमित्तिके वस्तुन्यन्यनिमित्तिकत्वारोप उत्प्रेक्षालंकारः । इति भाव इति । अधरनिमित्तकसुधायां वेणुनिमित्तिकगीतत्वारोपोऽत्रोत्प्रेक्ष्यते इति तात्पर्यम् ।। ५ ।। इति बर्हापीडमित्यादिवर्णयंत्यः । वेणुरवं श्रुत्वा सर्वभूतानां मनोहरं प्रियं श्रीकृष्णं व्रजस्त्रियोऽभिरेभिर इति संबंधः ।। ६ ।।

---

[1] बर्हापिच्छो वनचरवपुः कर्णयोः कर्णिकारः सव्ये बाहौ निहितवदनः सञ्जमन्यत्र हस्ते ।
भ्रूविन्यासाङ्गुलिभिरणयन्गापयन्गोपवृन्दान्भूतग्रामं तर्हि रमयन्ब्रह्म गान्धर्वमेव ।।
अयं श्लोकोधिकः विज.।

[2] मनोरमम्–गो. प्रे. टी. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्तद्भावविशेषात्तदेव विवृणोति—बर्हेति युग्मकेन। नटवरवपुरिति बहुव्रीहिरभेदेपि भेदोपचारात् यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं विस्मापनं स्वस्य च सौभगर्द्धेः परम्पदं भूषणभूषणाङ्गमिति तस्यापि विस्मापकतानिर्णयेन स्वभावत एव तावत्तन्नटवरवपुः सर्वतदीयरूपवृन्दवरिष्ठं तत्रापि तदानीं नटवेषमित्यर्थः। यद्वा, तादृशवपुर्बिभ्रत् शश्वच्छोभाविभावनेन पुष्णन् नरवरेति पाठोपि क्वचित् दृश्यते कर्णिकारं पीतवर्णमुत्पलाकारं पुष्पं वैजयन्तीनामपञ्चवर्णपुष्पैर्ग्रथिता माला तां वेणोः रन्ध्राणि अधरसुधया पूरयन्निति तस्या इव तन्नादस्यापि परममोहनत्वं सूचितं वृन्दाया अरण्यमिति तदधिष्ठात्र्या तया श्रीभगवतः क्रीडाविशेषोत्सुकतामभिप्रेत्य विशेषतः संस्कृतमित्यर्थः। अतः स्वैः असाधारणैः पदैः सर्वत्राङ्कितैरमणं तस्याः सर्वेषाञ्च सुखकरं यद्वा स्वपादयोः रमणं स्वतः प्रियत्वेन रम्यकोमलधूलीपुष्पपरागपत्रादिमयत्वेन च रतिजनकं व्रजस्यापि वृन्दावनान्तर्वर्त्तित्वेन तद्बहिरेव वनत्वव्यत्यपेक्षया विशेषतस्तत्पदोपादानं गोपवृन्दैर्गीता कीर्तिः विचित्रसौन्दर्यवैदग्ध्यादिप्रशंसारूपा यस्य यद्वा तस्य भावविशेषमालक्ष्य गीता कीर्त्तिः गोपीनां यस्मिन् तासां साक्षादनुक्तिर्ल्लज्जया मौक्तिकहारस्वर्णाङ्गदाद्यलङ्कारस्यावर्णनं स्वत एव तस्य नित्यसिद्धत्वात्। यद्वा, वन्यवेषस्यैव मोहनत्वात् किंवा शरत्प्रथमदिने वन्यविहारवेषार्थं वनप्रान्तमागत्य कृतेन केवलवन्यवेषेणैव वने प्रवेशात् अत्र गोपवृन्दैरपि बलदेवोपि गृहीतः तस्य युगलत्वेनानुक्तिः श्रीगोपीनां श्रीकृष्णैकनिष्ठत्वं तत्परिकरतयैव तु तत्साहित्येन वर्णनमिति व्यञ्जयति ॥ ५ ॥ इति उक्तप्रकारेण सर्वास्तास्वेव प्रौढबालादिभेदेन वर्तमानाः अभिरेभिरे हृदाक्रान्तं श्रीकृष्णं भावनया किंवा भावविशेषोदयसम्मोहेनान्योन्यं तं मत्वा किंवा भावविशेषोदयस्वभावेनैव परस्परं सर्वा एव परिरब्धवत्यः सर्वत्रैव हेतुः सर्वेषामपि भूतानां प्राणिनां मनोहरं किमुत तासामिति अभिरेभिरे इति पाठस्तु चित्सुखसम्मत एव अभितो रतिं प्रापुरित्यर्थः। हे राजन्निति पूर्वोक्तनृपेतिवत् ॥ ६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं भावविशेषाविर्भावेन श्रीव्यासनन्दिनीः श्रीनन्दनन्दनाय तदानीन्तनवेषादिकं स्मरन् तासां तद्वर्णनान्तरमेव स्वयं तद्वर्णयति—बर्हेति। तदभिप्रायो यादृगित्यादिना तैर्व्यञ्जित एव, अथवा तच्चेष्टितस्मरणेन हृदाक्रान्त-तद्वन्यवेषविशेषतो विक्षिप्तमनस्तत्वाच्च न शेकुरित्याभिप्रायेण हेत्वन्तरमपि वदन् तद्रूपमेव वर्णयति; यद्वा, पश्चात् कथञ्चित् प्रयत्नेन तास्तदन्वर्णयन्ते वेत्याह—बर्हेति। इतीति निरन्तरश्लोके तथैव श्रीबादरायणिना वेणुरवोक्तेः। नटश्चासौ नरश्चेति तद्विचित्रवेषं वपुः, देवानां सदैव विचित्रवेषत्वेन नराणां च मध्ये नटस्य कालविशेषं एव नृत्यार्थविचित्रवेषग्रहणापेक्षया नरशब्दप्रयोगः। तदेव दर्शयति—बर्हापीडमित्यादिभिः। यद्वा, नटन्ति हर्षभरेण नृत्यन्तीति नटा नरा जीवाः सर्व्वे यस्मात् तद्वपुर्बिभ्रत् प्रकटयन्; यद्वा, तद्वपुर्यस्य सः। नटवरेति पाठोऽपि क्वचिद्दृश्यते। कर्णिकारमित्येकत्वेऽपि कर्णयोर्द्वित्वाद्द्वित्वमेव ज्ञेयम्, तथा वाससश्च, कर्णिकारं पीतवर्णमुत्पलाकारं पुष्पम्, तस्य धारणम्, शरदि वसन्ते च विशेषतः सम्पत्तेः शोभाविशेषापत्तेश्च। वैजयन्ती नाम पञ्चवर्णपुष्पैर्ग्रथिता माला ताम्, वेणोरन्ध्राणि अधरसुधया पूरयन्निति भावविशेषेण वेणुवादनम्, तथा तस्या इव तस्य परममोहनत्वं च सूचितम्। वृन्दाया अरण्यमिति तदधिष्ठात्र्या तया श्रीभगवत्क्रीडाविशेषोत्सुकतामभिप्रेत्य विशेषतः संस्कृतमित्यर्थः। अतः स्वैरसाधारणैः पदैः सर्वत्रांकितै रमणं तस्याः सर्वेषां वा सुखकरम्, यद्वा, स्वपादयोः रमणं रम्यकोमलधूली पुण्यपरागपत्रादिमयत्वेन रतिजनकम्, गोपवृन्दैर्गीता कीर्त्तिर्विचित्रसौन्दर्य्यवैदग्ध्यादिरूपा यस्य, यद्वा, तस्य भावविशेषमालक्ष्य गीता कीर्त्तिर्गोपीनां यस्मिन्, तासां साक्षादनुक्तिर्लज्जया मौक्तिकहारस्वर्णांगदाद्यलंकारावर्णनं स्वत एव तस्य नित्यसिद्धत्वात्। किंवा शरत्प्रथमदिने वनविहारविशेषार्थं केवलवन्यवेषेण तथैव वने प्रवेशात्, पूर्वमुक्तस्याग्रेऽपि वक्ष्यमाणस्य श्रीबलदेवसाहित्यस्यात्रानुक्तिर्भावविशेषेण गुरुं दृष्ट्वा लज्जाद्युत्पत्तेः। किं वा, वर्णस्य श्रीकृष्णचेष्टितस्यैव परममोहनत्वेन तद्वर्णने चात्र तदपेक्षाधिक्याभावात्, किंवा गोपवृन्दैरिति सोऽपि गृहीत एव, तत्र तस्य गौणत्वेन न स्पष्टो निर्देशः ॥ ५ ॥ इति ईदृशम्, अनेन प्रकारेण वा, सर्वा दूरेऽन्तिके वा स्थिताः, यद्वा, प्रौढ-बालादिभेदेन वर्त्तमानाः, यद्वा, सर्व्वा एव संघशो वर्णयन्त्यः सत्यः, वेणुरवमेवान्ववर्णयन्निति पूर्व्वमपि तस्यैव प्रस्तुतत्वात्, अतो यत्रासौ व्यक्तो नास्ति, तत्रापूह्य एव। यच्चाग्रे रूपवेषादिवर्णनम्, तच्च तत्साहचर्य्येण प्रसक्तादिति ज्ञेयम्। यद्वा, कृष्णचेष्टितमिति पूर्व्वोक्तमाकर्षणीयं (भा. १०।२१।२०) 'वर्णयन्त्या मिथो गोप्यः क्रीड़ा' इति सर्व्वान्तोक्तेः। 'अभिरेभिरे' हृदाक्रान्तं श्रीकृष्णं भावनया, किंवा भावविशेषोदयस्वभावेन परस्परं सर्व्वा एव परिरब्धवत्यः, किम्वा वेणुनादमेव वा प्रीत्या हृदयसंलग्नं चक्रुरित्यर्थः। सर्व्वत्रैव हेतुः—सर्व्वेषामपि भूतानां मनोहरम्, किमुत तासामिति। 'अभिरेभिरे' इति पाठस्तु श्रीचित्सुखसम्मत एव, अभि अभितो रतिं प्रापुरित्यर्थः। हे राजन्निति पूर्व्वोक्तनृपेतिवत्, यद्वा, हे भावविशेषेण प्रकाशमानेति सम्बोधयन् हस्तग्रहणादिना तमसावुत्थाप्यालिंगितवानिति ज्ञेयम् ॥६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

स्वपदरमणं स्वपदेन प्रीतिकरम् ॥ ५–६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कीदृशं कृष्णचेष्टितमित्यत्राह – बर्हेति। बर्हात्मकमापीडं शिरोभूषणं द्वितीयान्तानां बिभ्रदित्यनेनान्वयः। कर्णयोः श्रोत्रसन्ध्योः कर्णिकारं लाङ्गलीकुसुमात्मकं कर्णपूरं च तथा कनकवत् कपिशं पिशङ्गं वासः वैजयन्तीं मालां नटात्मकवरस्येव वपुश्च बिभ्रत् नटवरवपुरिति बहुव्रीहिणा कृष्णविशेषणं वा तस्य तत्पुरुषपक्षे तद्विशेषणत्वमपि बर्हापीडमित्यस्य बहुव्रीहिणा सम्भवति अधरस्य सुधया वेणोः रन्ध्रान् पूरयन् साधरसुधेन मुखवायुना वेणुं नादयन्नित्यर्थः। गोपानां वृन्दैः गीता कीर्तिर्यस्य तथाभूतः सन् स्वपदैरङ्कितैः रमणं रतिजनकं वृन्दावनं प्राविशत् उक्तवेषं कृष्णं बर्हापीडादिधारणवेणुरन्ध्रपूरणवृन्दारण्यप्रवेशनात्मकं चेष्टितं च स्मरन्त्यो नाशक्नुवन्निति (भावः) पूर्वेणान्वयः॥ ५॥ एवं तावद्वर्णयितुमशक्तास्ततः शनैर्लब्धाश्वासा वर्णयामासुरित्याह– इतीति। हे राजन्! इतीत्थं तावदेवम्भूताः व्रजस्त्रियः सर्वभूतानां मनोहरं वेणुशब्दमाकर्ण्य तमेव चेष्टितं वर्णयन्त्यः तद्वर्णनात्मकं विहारं चक्रुः अभिरेभिरे इति पाठे वर्णितुं बुद्धौ सन्निधापितं मन्मथमन्मथं भगवन्तं बुद्ध्या परिरेभिर इत्यर्थः॥ ६॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हरेस्तदाकारदर्शनं च सुखहेतुरिति भावेन तस्य स्वरूपप्रकारं वक्ति–बर्हापीडमित्यादिना। बर्हं पिच्छमेवापीडं शेखरोत्तंसं यस्मिन् तत् नटवत् वरवपुः शुभाकारं बिभ्रदिति प्रत्येकं सम्बन्धयितव्यं स्वपदेन स्वपादेन रमत इति रमणं रमयत् रन्ध्रान् सुषिराणि॥ ५॥ बर्हमेवापिच्छो यस्य स तथा वनचरवपुः किराताकार इवाकारो यस्य स तथा शुभाकारे तनौ वपुरिति च वनचरा गोपा वा कर्णयोः कर्णिकार इत्येकं पदं कण्ठेकाल इतिवत् भ्रूवोर्विन्यासः भ्रूभङ्गविशेषः तेन सहाङ्गुलीभिः अन्यत्र हस्ते सज्जं सक्तं रणयन् वेणुमिति शेषः। अङ्गुलीभीरणयन्निति वक्तव्ये ह्रस्वत्वं छन्दोभङ्गभयात्कृतं गान्धर्वं ब्रह्मैव भरतशास्त्रोक्तप्रकारमेव गोपवृन्दान् गापयन्निति द्विकर्मकोऽयं धातुः भूतग्रामं प्राणिसमूहं रमयन् वृन्दावनं प्राविशदिति पूर्वेणान्वयः॥ ५॥ अभिरेभिरे इत्यत्र या रतिः सा मुख्यतः श्रिय एव तद्गीतरसविशेषज्ञत्वात्तदन्यासां तदभावात्तस्मादौपचारिकमभिरमणं तदुक्तं "श्रीदेवी वेणुमाश्रित्य रेमे कृष्णमुखाम्बुजे" इत्यादि सुरा इतरभाण्डगा इत्यत्र इतरभाण्डानि वेणुमन्तरेणान्यभूषणानि गता आविष्टा इत्यर्थः। इतरेषां रामादीनां वा "वेणुमूले धने पात्रे भाण्डं भूषाश्वभूषयोः" इति यादवः वनचरा गोपः वा॥ ६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

(१–४) अथ शरदागमे वृन्दावनभुवं वर्णयन्नाह–(भा० १०।२०।४८) बभौ भूः पक्व" इत्यादि हरेः कला पत्नीरूपा, धरण्या च दूर्वादलश्यामलाङ्ग्योत्यभियुक्ताः, श्री भूलीला इत्यादि वा आगमान्तरम्, सा तु भुवोऽधिष्ठात्री, तत्सम्बन्धा भूरपि तथा, आभ्यां श्रीकृष्ण–रामाभ्यां हेतु भूताभ्यां बभौ। पक्वशस्याढ्य ति जात्युक्तिः, नितरामतिशयेन, एवं शरद्वर्णनमुपक्रम्य तत्रैव शरदि पूर्णं विहारमाह–बर्हापीडमित्यादि। नटवद् वरवद्वपुर्यस्य, वरो विवाहप्रवृत्तः, नटेभ्योऽपि वरमिति वा नटवरवदिति वा। नटनरेतिपाठे नटवत् नरवत् द्विभुजत्वे तात्पर्यम्। यद्वा नटनमानन्दोल्लासविकारस्तद्राति ददातीति नटनरं वपुर्यस्य यद्दृष्ट्वा सर्वेषामेव नटनं जायत इति भावः। कर्णयोः कर्णिकारः सप्तम्या अलुक्, यद्वा कर्णयोः कर्णिकारं बिभ्रत्, बिभ्रदित्युभयत्र योज्यम्। लीलावशादेकमेव कर्णिकारं कदाचिद् वामे कर्णे कदाचिद् दक्षिणे च बिभ्रदिति भावः। जातावेकवचनं वा। वैजयन्ती नाना पुष्प-पत्र रचनामयी माला। वृन्दारण्यं कीदृशम्? स्वपदैः स्वपदचिह्नैः रमणीयम्; यद्वा स्वपदं स्वयोगाधिष्ठानं परमवैकुण्ठं तेन रमणीयं स्वतोऽपि भौमवैकुण्ठत्वाद्रमणम्, भगवत्प्रादुर्भावे प्रादुर्भूतादुक्तप्रकारवैभवादस्या भौम–वैकुण्ठत्वेन च रमणम्। वैकुण्ठस्य च त्रैविध्यं प्रागुक्तम्, तद्युक्तिश्च। अथवा, स्वपदादपि वैकुण्ठादपि रमणीयम्। किं कुर्वन्? अधरसुधया वेणोरन्ध्रान् पूरयन्; पुंस्त्वमार्षम्। यद्यपि अधरसुधया वेणोरेकमेव रन्ध्रं पूर्यते, तथाप्यतिशयतया एकं रन्ध्रं प्रविश्य उच्छलद्रूपतया सर्वाण्येव रन्ध्राणि पूरितानीति भावः। वस्तुतस्तु अधरबिम्बस्य शोणं महरेकमेव रन्ध्रं प्रविवेश, तत्रैव बहुलीभूय रन्ध्रान्तर-विवरेभ्य उद्गच्छन्तीत्रैवामृतत्वरूपेण ध्वनेश्च परगतमाधुर्यतया श्रवणयोरमृतत्वादानन्दप्रदत्वं व्यङ्ग्यम्॥ ५॥ तदेव वेणुरवस्य माधुर्यं वर्णयति–इतीत्यादि। इति उक्तप्रकारम्। राजन्निति विस्मये सम्बोधनम्। एक एव वेणुरवः श्रोतॄणामधिकारभेदेनानन्दवर्धक इत्याह–सर्वभूतमनोहरम्। सर्वशब्दः स्थिरजङ्गमादिपरः मनोहरशब्दो विकारकारिपरः, तेन स्थिराणां चाञ्चल्यम्, जङ्गमानां स्थैर्यं यत इति भावः। सर्वभूतमनोहरत्वं प्रतिपाद्य सर्वभूतबहिर्भूतानां गोपीनां विशेषमाह–श्रुत्वेत्यादि। व्रजस्त्रिय इति सामान्योक्तबहुत्वेनैव सर्वा-सिद्धेः। सर्वा इति तासामेव विविधत्वं वर्णयन्त्यः सत्यः परस्परमभिरेभिरे आलिङ्गितवत्यः। सर्वभूतमनोहरं यथा स्यात्तथा वर्णयन्त्य इति वा। सर्वा इत्यस्य गणवैविध्यपरत्वम्। गण्यश्च तासां बहव एव; तथाहि—

> नित्यसिद्धेति सिद्धेति प्रथमं भिद्यते द्विधा। नित्यस्वरूपसिद्धत्वादवतीर्णा सहादिमा॥
> उपासनाभिर्बह्वीभिर्बहुभिश्च मनोरथैः। कृष्णप्रसादतः सिद्धा या सा सिद्धा निगद्यते॥
> नित्य-सिद्धा भवेद्द्वेधा अनूढोढ़ा-भेद-दर्शनात्। ऊढा पत्युर्ममत्वैकपात्री नैवास्य सङ्गभाक्॥

अनूढा कन्यकैवात्र भेदो नानाविधोऽनयोः विलासिनः श्रीकृष्णस्य तथैवेच्छावशेन हि ॥
नित्यसिद्धाप्यूढताभाक् जाता रसविशेषतः। कन्याः स्वरूपसिद्धाश्च पुनः कात्यायनीव्रतात् ॥
कृष्णलीलाविशेषार्थं साधकत्वमुपागताः। श्रुतिरूपतया काश्चिन्मुनिरूपतया पराः ॥
पूर्वं स्थिता व्रजे पश्चाज्जाता गोपकुले तथा। कृष्णप्रसादतो यासु सिद्धास्ताश्च द्विधोदिताः ॥
सुरस्त्रियो यावतीर्णास्ताश्च तासां प्रसङ्गतः। सिद्धा एव भविष्यन्ति न तासां पूर्वरूपता ॥
एषु भेदेषु मुनितां या विहायाभवंस्तथा। भौमवैकुण्ठजत्वात्ता भौमा एव प्रिया हरेः ॥
अन्यास्त्वभौमवैकुण्ठप्रियाः सह महीं गताः। एवं भौमाभौमतया तासां भेदाश्च भूरिशः ॥
अपत्यवत्यो याः काश्चिद् भौमास्ता अपि तत्स्पृहाः। तत्तद्वपुर्विहायैव सिद्धास्तं प्रापुरञ्जसा ॥
अतः सिद्धा अपि द्वेधा प्राचीनाधुनिकत्वतः। मुग्धा मध्यादिभेदेन धीराधीरादिभेदतः ॥
अवस्थाभिस्तथाष्टाभिस्तासामानन्त्यमिष्यते। मुख्य-गौण-प्रभेदेऽपि पुनरानन्त्यमेव च ॥
शतकोटितया तासां संख्यां कः कर्त्तुमर्हति। अथात्र नित्य-सिद्धानां नित्यं वृन्दावनस्थितिः ॥
अनुरक्ता इमाः सर्वा वत्सलाः सखिमातरः। रसभेदेन संप्राप्ताः कृष्णस्योत्तमभक्तताम् ॥
किं पल्लवेन बहुनाह्यपराश्च तदा स्त्रियः। कृष्णेक्षणपथं प्राप्य रत्या तं प्रापुरञ्जसा ॥

एवं स्थिते व्रजदेवीनां गणभेदे सजातीयाऽसजातीयाभिः सह वर्णयन्त्यः परस्परमभिरेभिर इति प्रकृतस्थितिः। वर्णनोपक्रमे प्रायः प्रतिश्लोकमेव वेणुवादनलीला दृश्यत इति प्रकृतिवैचित्र्याद् विविधानां वक्तॄणामुक्तिर्मन्तव्या। तेनार्थस्यापि वैविध्यमवगन्तव्यमिति, प्रथमश्लोके विविधोऽर्थो बोद्धव्यः। तत्र "सर्वभूतमनोहरम्" इति सर्वेषां चेतनानां भूतानां पृथिव्यादीनामचेतनानामिति द्वन्द्वगर्भो मनोहर-शब्दो विकारकत्वे लाक्षणिकः। तेन सर्वशब्दो वत्सलतापरोऽपि बोद्धव्यः। तेन 'अभिरेभिरे' इत्यन्तं तत्परं वाक्यं 'तन्वर्णयितुमारब्धाः' इत्यारभ्य 'विक्षितमनसो नृप' इत्यन्तमनुरक्तपरम्, अतः स्मरवेगेन विक्षिप्तमनसः सत्यो वर्णयितुं नाशकन्। अयं भावः—अवहित्थादिवैदग्धीपूर्वकं वर्णनं कर्त्तुं नाशकन्, वस्तुतस्तु वर्णनां चक्रुरेव तेन प्रथमं वात्सल्यरसानुगुणं व्याख्यायते ॥ ६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

(१–४) बर्हापीडमित्यादि। नटवत् नरवद् द्विभुजं वपुर्यस्य, यद्वा, नटनमानन्दोल्लासो विकारस्तं रातीति नटनरं यद्दृष्ट्वा प्राणिमात्रमेव नृत्यति, विशेषतो बर्हिणो मेघभ्रमान्निजबर्ह-स्वीकाराद्वा। नटवर इति पाठं नटेभ्योऽपि वरम्, यद्वा, नटवत् वरवत्; वरो विवाहः प्रवृत्तः। कर्णयोः कर्णिकारमित्येकमेव कर्णिकारं कदाचिद्दक्षिणे कदाचिद् वामेकर्णे करोतीति विलासविशेष इति केचित्। वृन्दारण्यं प्राविशत्। कीदृशम् ? स्वपद-रमणं स्वपदानां स्वस्थलानां वैकुण्ठादीनामपि रमणं रतिप्रदम्। रन्ध्रानिति पुंस्त्वमार्षम्। अधरसुधयैव पूरयन् न तु मुखमारुतेन यद्यप्येकमेव वेणुरन्ध्रमधुरसुधया पूर्यते, तथाप्यतिशयामृतपूरणेन सर्वाण्येव रन्ध्राण्युच्छालिततया पूर्यन्त इति भावः ॥ ५ ॥ इति वेणुरवमिति। एक एव वेणुरवः श्रोतॄणामधिकारभेदेनानन्दभेद–वर्धकः, अतएवाह–सर्वभूतमनोहरम्; इति वक्ष्यमाणं वर्णयन्त्योऽभिरेभिरे, परस्परमालिङ्गितवत्यः। सर्वभूतमनोहरं यथास्यात्तथा वर्णयन्त इति वा। व्रजस्त्रिय इति बहुत्वेनैव सर्वलब्धेः पुन सर्वग्रहणं गणसूचनार्थम्। गणश्च तासां वहुधा–तथा हि वत्सला अनुरक्ताश्चेति प्रथमं द्वेधा वत्सलाश्च पुनर्द्वेधा, श्रीयशोदासहचर्यः, सखि मातरश्च; अनुरक्ताश्च द्वेधा–ऊढ़ा, अनूढाश्च। ऊढाश्च द्वेधा—वालाः सापत्याश्च द्वेधा पुरवधवः, केवलगोपाश्च। ऊढमात्राश्च द्वेधा–श्रुतिरूपाः, केवलाश्च। गोप्यः पुनरिमाः प्रौढ़ा मध्या मुख्याश्चेति त्रिधा। अनुढ़ाश्च द्वेधा—सिद्धाः साधिकाश्च। सिद्धाश्च द्वेधा–स्वभावसिद्धास्तत्कालभगवत्प्रसादसिद्धाश्च। साधिकाश्च त्रिधा उत्तममध्यमकनिष्ठभेदात्। पुनरेताः प्रधानकल्पाः, तत्सहचरीरूपाश्चेति द्वेधा। पुनरेता अवस्थाभेदादष्टधा, पुनरेता धीरादिभेदात् त्रिधा इति बहव एव गणाः, बाहुल्यभयान्नोदाह्रियन्ते उक्तान्युदाहरणानि। अतः समानवासनाः समानवासनाभिः सहान्योन्य-परिरम्भणपूर्वकं वर्णनमारब्धवत्य इत्यर्थः। किन्त्वनुरक्तानां सर्वासां मध्ये काश्चित् परस्परावलोकादिमात्रयोग्याः, काश्चित् भोग्याश्च, सर्वं रासविलासे व्यक्तीभविष्यति ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदेव तासां मनोविक्षेपकस्मरवेगजनकं कृष्णचेष्टितं किमित्यपेक्षायां श्रीशुक एव सर्वज्ञत्वाद्वर्णयति–बर्हमापीडः शिरोभूषणं यत्र तथाभूतं नटवरवपुर्बिभ्रत् कर्णिकारमेकमेव कर्णयोः कदाचिद्वामे कदाचिद्दक्षिण इति स्वस्य यौवनमत्ततामभिव्यञ्जयितुं बिभ्रदिति तु कृष्णचेष्टितं तासामतिशयेन स्मरवेगजनकं भवति वैजयन्तीं पञ्चवर्णपुष्पग्रथितां वेणुवादनमुत्प्रेक्षते—रन्ध्रानिति। तेन स्ववेणुं स्वाधरसुधयैव निश्छिद्रीकरोमीति कृष्णस्येच्छा अधरसुधा तु वेणुं निष्प्राणमपि स्वस्पर्शेन चेतयित्वा सप्राणीकृत्य तेन त्रिजगदप्युन्माद्य पश्चात्तं कठोरमचेतनस्वभावमनधिकारिणं ज्ञात्वा तदीयछिद्रेभ्यो निःसृत्य व्रजबालानां कर्णद्वारेण तन्मनःप्रविश्य

स्वं सफलीकृत्य तत्रैव स्वसर्वविक्रमान् दर्शयामासेति द्योतितं स्वपदयोरासलास्यकूर्दनादिभीरमणं यत्र तदिति व्रजाद्वैशिष्ट्य प्राविशदित्युक्तपोषन्यायेनैव न पुनरुक्तिः ॥ ५ ॥ ततश्च कतिचित्क्षणानन्तरं कृष्णचेष्टितस्मरणोत्थस्मरवेगवैयग्र्यस्योपशमे वृत्ते सति वेणुगीतं वर्णयितु सम्यगशकन्नपीत्याह इतीति । समाप्त्यर्थकं स्मरवेगविक्षेपे समाप्ते सतीत्यर्थः । "इति हेतुप्रकरणप्रकारादिसमाप्तिषु" इत्यमरः । सर्वभूतमनोहरं ननु रासारम्भसमयगतमिव गोपिमात्रमनोहरं वर्णयन्त्यो ऽभिरेभिरे सखि ! त्वं मन्मनः प्रविश्यैवैवं ब्रूषे यतोऽहमप्येवं विवक्ष्ये इति प्रत्येकमनुभवसाम्योपलब्ध्या परस्परालिङ्गनं तासाम् ॥ ६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तासां यच्चेष्टितस्मरणमात्रेणैव मनःक्षोभो जातस्तत्कृष्णचेष्टितं वर्णयति – बर्हापीडमिति । गोपवृन्दैर्गीतकीर्तिः नटस्येव संयत्तं वरं वपुर्यस्य सः । यद्वा, नटस्य नृत्यप्रियस्य श्रीशिवस्य यद्वरमुपास्यं तद्वपुर्यस्य सः श्रीकृष्णः बर्हापीडं बर्हमयमापीडं शिरोभूषणं बिभ्रत् कर्णिकारादिकं च बिभ्रत् अधरसुधया वेणोरन्ध्रान्पूरयन्वेणु वादयन् स्वपदैर्विन्यस्तैः रमणं प्राविशत् ॥ ५ ॥ तदनन्तरं पुनर्लब्धधैर्याः स्वस्वसखिभ्यः अन्ववर्णयन्नित्याह इतीति । वक्ष्यमाणेन प्रकारेण वेणुरवं वेणुगीतं वर्णयन्त्यः अभिरेभिरे परिरब्धवन्त्यः मनसि स्फुरन्तं श्रीकृष्णमिति शेषः ॥ ६ ॥

श्रीरामकृष्णकृता प्रेममञ्जरी

श्रीराधावल्लभो जयति

बर्हापीडमिति । अथ तद्भावावेशेन मुनीन्द्रः स्वयमेव तद्विवृणोति–बर्हेति युग्मकेन । हे सखि ! वृन्दावनं प्राविशत् भावविवशत्वात्कर्तृपदानुपादानम् सखीति राजानं प्रति वा तद्भावावेशादेवात्मनि गोपीभावाच्च अभिनिवेशाच्च किङ्कुर्वद्बर्हापीडं बिभ्रत् कृष्णस्यापि तदेतद्भात्रावेशेनैव चेष्टितं यथा स्थानमूह्यम् तदुक्तं कृष्णयामले "राधाप्रियमयूरस्य पत्रं राधेक्षणप्रभम् बिभर्ति शिरसा कृष्णस्तस्याश्चूडानिभं यतः" इति श्रीराधिकाया ईक्षणं मम शिरोभूषणं स्यादिति भावनया नष्टोपि सामाजिकरञ्जनार्थैव तत्तद्वेषं दधाति तद्वदयमपि स्वेषां विनोदायेति भावः । कर्णिकारं पीतवर्णमुत्पलाकारं पुष्पम् । "कर्णिकारस्तु लकुचे पीतवर्णे तथाम्बुजे" इति हेमः । तदिदं यत्र यत्र सूर्यो भ्रमति तत्र तत्र तत्सम्मुखं भवति मित्राशक्तत्वात्तथा साऽपि मय्यनुरक्ता स्यादिति भावनया पञ्चवर्णपुष्पग्रथितमालां वैजयन्तीम् "तुलसीकुन्दमन्दारपारिजातसरोरुहैः । पञ्चभिः पुष्पैरेतैर्वनमालाप्रकीर्तिता" ॥ अधरसुधया पूरयन् तस्या माधुर्यस्यापरिमितत्वमुक्तम् । यद्वा, अधरा नीचीना सुधा यस्याः सति परमालौकिकत्वेनाऽसाधारणत्वं पूरयन्नित्वौदार्य्यम् इदं चातिमधुरस्वरोद्गारादनुमितं सचायं वेणुरपि वाद्यविशेषरूपेण वंशीप्रियसखीति ब्रह्मसंहितोक्तेन नित्यसहचरीरूपेण चानवरतं प्रेमपरतन्त्रस्तमेवानुसरतीति तथा सति तद्रन्ध्राणां मधुरसुधया पूरणमपि भाववशेनैवेति वृन्देति वृन्दाख्या निजसखी स्वयं प्रियतमा वा तस्या अरण्यं स्वैः असाधारणैर्ध्वजादिचिह्नितः रमणं रतिजनकं यद्वा स्वैरसाधारणैर्निकुञ्जप्रदेशैरमणं रतिप्रदम् यद्वा स्वस्याः आत्मभूतायास्तस्याः पदैः क्रीडाविशेषसूचकैः स्थानैरमणमुद्दीपकम् कथम्भूतः ? गोपवृन्दैर्गीता कीर्त्तिर्विचित्रसौन्दर्य्यवैदग्ध्यादिरूपा यस्य सः गोपेति तदभिप्रायानभिज्ञत्वम् अभिज्ञत्वेप्यतिगोपकत्वं चाभिप्रेतमिति ॥५॥ इतीति । उक्तप्रकारेण सर्वाः कान्तभावास्सख्यभावाश्च आद्याः परकीयाभिमानिन्यः स्वकीयाभिमानिन्यश्चेति द्विविधाः तत्राप्याद्याः प्रौढाः पराश्च दुर्गाव्रतपराः धन्या याः कन्याः सर्वा व्रजस्त्रियः वेणुरवं श्रुत्वा तमेव वर्णयन्त्यः भावलब्धं सर्वभूतमनोहर तद्वादकमेवाभिभिरे, यद्वा, भावसमाहितः परस्परं तमेव मत्वा परिरब्धवत्यः भावाक्रान्तत्वादेवात्र कर्मपदानुपादानं यद्वा वेगुरवस्यैव विशेषणं सर्वत्र निजप्रियतमा स्फुरणात् तावन्मात्रेणैव सर्वासां तासां मनोहरणमिति ताभ्योपि निजभावगोपनमभिप्रेतं वर्णनमात्रेणैवाभितो रतिं प्रापुरित्यर्थः । आनन्दमूर्त्तेर्गुणा अप्यानन्दरूपा इति तत्स्वाभाव्यादभेदस्फूर्त्तेरिति ज्ञेयम् ॥ ६ ॥

श्रीमत्कृष्णदासकृता श्रीगणदीपिका

रन्ध्रान्वेणोरिति पुंस्त्वनिर्देशात् पुंव्यक्तेरप्यधरसुधापूरणादिनाचिन्त्यं वंशीप्रेमसखी तथेति ब्रह्मसंहितोक्तेर्नित्यसहचारिणीयमात्मनो गोपनायेवात्मानं पुंस्त्वेन ख्यापयति तेन च तस्या अधरपूरणं प्रियतमाभावनया अविरुद्धमेवेतिज्ञेयम् अत्राख्यायिका कृष्णयामले कदाचिच्छ्रीराधिकागुणनामगानव्यग्रस्य स्वयं भगवतो वदनारविन्दाद्भारती देवी समुद्भूता कन्दर्पकोटिलावण्यं तमेवावलोक्य रन्तुं मनश्चक्रे ततश्च मम देहात्समुत्पन्ना मामेव कामितवतीति तेनानादृता जडतामवाप्ता श्रीवृन्दावनतृणराजाख्यवंशरूपतामवाप तथा तद्रन्ध्राणामधरसुधया पूरणं भावावेशेनैवेति सर्वमनवद्यमित्यर्थः । तथा हि श्रीराधानामगानैकव्यग्रगोविन्दवक्त्रतः सरस्वता समुद्भूता पुनः सा वंशिकामतेति संक्षेपः ॥ ५-७ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु किं तत् कृष्णचेष्टितं येन तासां मनोविक्षेपकः स्मरवेग इत्यपेक्षायामाह—बर्हेति । कृष्णो गोपवृन्दैः सह वृन्दारण्यं प्राविशदित्यन्वयः । कीदृशः बर्हमापीडः शिशेभूषणं यत्र तादृशं नटवरवपुर्बिभ्रत् कर्णिकारमेकमेव कर्णयोः कदाचिद् वामे कदाचिद्

दक्षिणे च विभ्रदिति तारुण्यमत्तता सूच्यते कनक कपिशं स्वर्णगौरवाससी वैजयन्तीं पञ्चवर्णैः कुसुमैर्ग्रथितां मालाञ्च बिभ्रत् शश्वच्छोभाविभवेन पुष्णन्नित्यर्थः। वधरसुधया तारमन्द्रकलध्वनिरूपया निःसरन्मोहनमन्त्राक्षरया विविधरागतालगानमूर्च्छनानिभूतया अधरपुटनिर्गतया स्वरसम्पदा वेणोरन्ध्रान् पूरयन्निति सा तदधरसुधा वेणुमापूर्य्य तद्रन्ध्रोर्निगम्य व्रजाङ्गनानां करैस्तन्मनांसि प्रविश्य येष्वेव स्वविक्रमान् प्रदर्शयामासेतिभावः। वृन्दारण्यं कीदृक् स्वपदयो रमणं मृदुलधूली पुष्पपरागादिमयत्वेन रासलास्यादिना वा रतिकरमिति व्रजाद्वैशिष्ट्यं सुरैर्गीतकीर्तिः प्राविशदिति पुनरुक्तिरुक्तपोषन्यायात् ॥ ५ ॥ इतीति समाप्त्यर्थकं कतिभिश्चित् क्षणैः कृष्णचेष्टित स्मरणहेतुकेस्मरवेगे निवृत्ते सतीत्यर्थः वेणुगीतं वर्णयन्त्यः सर्वा अभिरेभिरे स्व स्व मनोगतं कर्णेषु वदन्त्यः परस्परमालिलिङ्गुः कृष्णं वा मनसेत्यर्थः। तत् कीदृशमित्याह–सर्वभूतेति। न तु रासारम्भसमयगतमिव प्रेयसीमात्रचित्तचोरमित्यर्थः॥ ६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

बर्हमेवापीडं शेखरोत्तमं यस्य तत् नटवरस्य वपुः कर्णयोः कर्णिकारं कल्हारं कनककपिशं वासो वैजन्तीं मालां च बिभ्रद्व णो रन्ध्रान्रन्ध्राणि छिद्राणि सन्ति येषु ते प्रदेशा रन्ध्रास्तान्। रन्ध्रं श्वभ्रं वपा सुषिरित्यमरः। अधरसुधया पूरयन्गोपवृन्दैः सह। बृद्धो यूनेत्यादिवत्। गीतकीर्तिर्देवादिभिः स्वपदरमणं स्वपदैस्तदङ्के रमयति जनानिति तत् वृन्दारण्यं वृन्दावनं गोपवृन्दैर्गीतकीर्तिरिति वा प्राविशत्। स्वामिन्पुरतः पङ्कादिकं जागृहीति गीता कीर्तिः पङ्कादिर्यस्य स इति वा। कीर्तिः प्रसादयशसोर्विस्तारे कर्दमेऽपि चेति विश्वः॥ ५ ॥ बर्हैर्मयूरगरुद्भिरापिच्छा वेष्टनं यस्य सः। पिच्छा तु शाल्मले वेष्टे मण्डे चेति विश्वः। तेषां पङ्क्तिर्वा समूहो वा वा यस्य पङ्क्तौ। छटापूगेत्यादिः। एव वनचरवपुर्गोपालकलेवरः। आन्तरङ्गिको भावस्तु नारायणतनुरिति। कर्णिकारो द्रुमोत्पलं सोऽस्यास्तीत्यर्श आद्यच्। कर्णिकारस्तु शम्याके कर्णिकारे द्रुमोत्पल इति विश्वः। तत्स्थलमाह॥ कर्णयोरिति। अलुक्त्वेनैकपदं वा सव्ये दक्षिणे बाहौ निहितं वदनं यस्य येन वा स अन्यत्रान्यस्मिन्वामे सज्जं सम्बद्धं वेणुं स्वयं रणयन् भ्रूविन्यासश्चाङ्गुलयश्च भ्रूविन्यास-सहिताश्च ता अङ्गुलयश्च ताभ्यो भीर्यथा भवति तथा गान्धर्वं ब्रह्म भरतशास्त्रं गोपवृन्दान्गोपानां वृन्दं येषु ताञ्जनान्। अथ वृन्दं निकुरम्बं कदम्बकमित्यमरः। गापयन् भ्रूविक्षेपाङ्गुलिसूचनभीत्या गोपा अस्वरतालव्यत्यासं गायन्तीति भावः। द्विकर्मकोऽयं धातुः। भूतग्रामं जनसङ्घं तर्हि तदा रमयन्वृन्दारण्यं प्राविशदित्यन्वयः। अङ्गुलिभी रणयन्नित्यत्र रोरि ढ्लोप इति दीर्घाभावश्छान्दस इति वा। गान्धर्वं ब्रह्म भ्रूविन्याङ्गुलिभिः अणयन्नुत्तानानुत्तानस्वरान्गमयन्ज्ञापयन्निति यावदिति वा। अणतीत्यणः पचाद्यजन्तः। अणं कारयतीत्यणयन्। प्रातिपदिकाद्धात्वर्थ इति णिच् इष्टवद्भावश्च टिस्थानिवद्भावान्नोपधावृद्धिः। गैशब्दे अस्मदादेच इत्यात्वेति होति पुगागमे गायन्निति भवति शतरीति मन्तव्यम्। ये भीतवद्विद्यमाना भिन्नं गानं कुर्वन्तिकै तान्प्रेरयन्गापयन्नित्युच्यते॥ ६ ॥

श्रीसुबोधिनी

ताभिर्वर्णयितुमशक्यं स्वयं वर्णयति तथात्वज्ञापनाय **बर्हापीडमिति**, वाक्यार्थोत्र वर्णनीयो न तु रूपमात्रं, तथा सति रूपं वेणुनादः क्रीडा चेतित्रयं वर्णितं स्यादन्योन्यसम्बन्धे प्रकारविशेषश्च, एतादृशं **वपुर्बिभ्रद् वेणो रन्ध्रान् पूरयन् वृन्दारण्यं** प्राविशदितिसम्बन्धः, स्वरूपगुणलीला उक्ताः क्रमेणैव, **बर्हो** मयूरपिच्छं स एवापीडः शिरोभूषणं यस्य **वपुषः**, नृत्यन्मयूरानुकरणञ्चैतत्, स चोद्बुद्ध रस एव तथेति भगवतोप्युद्बुद्धरसात्मकत्वं सूचितं भवत्यनेन, अतो युक्तैवाशक्तिरितिभावः, **नटवद्** वरवच्च **वपुः**, **रसो हि द्विविधो 'धर्मसहितः केवलश्च, केवलो नाट्ये प्रसिद्धो धर्मसहितः सम्भोगे**, भगवतो वपुरुभयविधमप्यत उक्तं **नटवद् वरवदिति**, **वरः** प्रत्यग्रभोक्ता, भगवांस्तु हृदयेपि वर्तते तावतापि ज्ञानिनामिव न तासां सुखमिति ज्ञापयितुं वपुषो भरणं निरूप्यते, न तु स एव तथा, **कर्णयोः कर्णिकार**कुसुमं यस्य, अलुक्सप्तमी, **बिभ्रदिति** वा **सम्बन्धः**, **कर्णिकारस्तु** शृङ्गारोद्बोधकः **शृङ्गारस्तु संयोगविप्रयोगभेदेन द्विविधः**, श्रोत्रे तदुभयप्रतिपादके, तयोः **कर्णिकार**सम्बन्धेन पूर्वं निरूपितो स उच्छलितो भवति, **तादृशस्तु रसो गुप्त एव रसत्वमापद्यत** इति पीताम्बरं वर्णयति **कनककपिशं वासो बिभ्रदिति**, उद्बुद्धे रसे गोपिका वासो न गणयेयुरिति व्यामोहककनकतुल्यता निरूपिता, **कनकवत् कपिशं** पीतमिति, माया हि सा, अतो यत्र वसनाकृतिरपि न सम्यगवलोकिता तत्र तेन वसनेनाच्छन्नं रसं कथमुद्घाटयेयुः? ततोप्याच्छादिकामाह कीर्तिमयीं वनमालां वैजयन्तीञ्च **मालां बिभ्रदिति**, **वै** निश्चयेन सर्व**जय**प्रकाशिका **वैजयन्ती**, एवं रसद्वयं तदुद्बोध आच्छादकं विक्षेपकं च रूपे निरूपितं, नामलीलारूपं वेणुनादं निरूपयति **रन्ध्रान् वेणोरिति**, **रन्ध्रा वेणोः** सप्त, **सुधा त्रिविधा, देवभोग्या भगवद्भोग्या** सर्वभोग्या **च**, तत्र हेतुर्लोभात्मकेधरे स्थापिता, तस्याः साक्षादनुभवो नोच्छिष्टेन सम्भवति, अतः **श्रोत्रपेयैव सा, सा हि सर्वेषां** भगवदीयत्वं **सम्पादयति, आनन्द एव सा प्रकटा द्रवीभूता, ब्रह्मानन्दादप्यधिका, आनन्दसारभूता, सा न कथञ्चित्** साधनतामापद्यते **स्वतः**, अतो नादब्रह्मणि तां योजयितुं नादोत्पत्तिस्थाने वेणौ तत्रापि तद्रन्ध्रेष्वमूर्तत्वात् पूरिता, न हि सा साक्षाद् वेणुमपि स्पृशति, **वेणोरित्यसमासाद्** वेणुमध्येपि सा न, अतो यदा नादस्तद्द्वारा **गच्छति** तदा तेन सम्बद्धा गच्छति, ततः तद्द्वारा हृदये प्रविष्टा वर्णनायां मुखे समागच्छन्ती मुखमपि स्वभोगयोग्यं करोति यावच्च रसपूरेण सोप्यंशो नान्तः प्रविशति तावदपि साक्षात् तद्भोगयोग्यता न भवति, एतदर्थमेव वर्णनं, तद्रसप्रवेशे निरोधः सिद्धः, अतः स्वल्पतरो गोपेषु भोग्यगोपीव्यति-

रिक्तासु सर्वेषु च, अत एव निरोधो भक्त्यनन्तरं निरूपितः, **सृष्ट्युत्पन्नानां भोग एतत्पर्यवसायी**, ततो विमोचनं स्वाश्रयप्रापणं च प्रत्यापत्तिः, अन्यथा **सृष्टिर्व्यर्था** स्यात्, अयं पुनर्ब्रह्मानन्दभावे जाते तत्राप्याधिदैविकरूपे सम्पन्ने लक्ष्म्या इव मुख्यो रसभोगः सम्भवति तदंशानाञ्च क्रमेण, अतो **निरोधो महाफलः**, अतोत्र स्त्रियः प्रकरणान्ते निरूप्यन्ते, **भगवद्भोगानन्तरमेव भगवान् भोग्यो भवति,** अतोत्र **शुको**पि मुख्यतया **स्त्रिय** एव वर्णयति, अग्निकुमाराणामप्यत एव **स्त्रीत्वं, न** हि पुरुषोन्योपभोग्यो भवति स्वोपभोग्यो वा, परं **ज्ञात्वा पाने महान्** रस इति भगवतोग्रे ज्ञानोपदेशनिर्बन्धः, मुख्यप्रापणार्थं वा, दुःखदूरीकरणार्थं च, अत एवाग्र आधिदैविकीं स्त्रियं प्रार्थयिष्यन्ति, अतो रूपेण **वशीकृत्याधरामृतं पाययन् स्वच्छन्दतां सम्पादयति,** स्वच्छन्दतामाह **गोपवृन्दै**रिति, वृन्दायाः स्त्रिया **अरण्यं प्राविशत्, सर्वं कार्यं कृत्वा स्वच्छन्दतां सम्पादितवान्,** ननु जगति भक्तिर्न स्थापितेति कथं कृतकार्यता ? तत्राह **स्वपदरमण**मिति, **स्वपदानां** स्वचरणानां **रमणं** यत्र, धर्मस्थापनमाह **गोपवृन्दैः** सहेति, अवशिष्टसर्वपुरुषार्थस्थापनार्थमाह **गीतकीर्तिरि**ति, **गीता कीर्ति**र्यस्येति, **स्त्रीभावो गूढः पुष्टिमार्गे तत्त्वमितिकृष्णपदार्थः क्वचिद् विवृतः** ॥ ५ ॥ अतः **सर्वमेवोपसर्जनीभूतं वेणुनाद एव मुख्य** इति तमेव वर्णयितुमारेभिरे गोप्य इत्याहेति **वेणुरव**मिति, इतिहेतो**र्वेणुरव**मेव **वर्णयितुं** वेणुरवमाकर्ण्य वर्णयितुमारेभिर इतिसम्बन्धः, तत्र **प्रथमश्रवणे वर्णनार्थं श्रवणे च सादरं** श्रवणं **भवति,** अमुना प्रकारेणोद्गतं **वेणुरवं** न तु केवलं; राजन्निति सम्बोधनं तद्रसानभिज्ञत्वज्ञापनाय, अनेनापि स्पष्टोर्थो नोक्त इति ज्ञापितं, तर्हि तत्र कथं **प्रवृत्ति**रित्याशङ्क्य प्रमेयबलादेव भविष्यतीत्यभिप्रायेणाह **सर्वभूतमनोहर**मिति, **सर्वभूतानां मनोहरं** स्वत एव मनोवशीकरणसमर्थं, अतः सम्यक् **श्रुत्वाभिरेभिरे, व्रजस्त्रिय** इति कार्यान्तराभावः सूचितः, **न हि व्रजस्त्रीणां** पुरुषेषु **वनं गतेषु सन्ध्यापर्यन्तमागमनसम्भावनारहितेषु प्रातरेव निवृत्तावश्यकेष किञ्चित् कार्यमस्ति,** अतः सर्वा एव वर्णयन्त्यः पौर्वापर्येणा**भितो रेमिरे,** दुःखात्मकं प्रपञ्चं विस्मृत्य परमानन्दविलासं कृतवत्यः, पूर्वं प्रथमश्रवणमात्रेण कामोद्दीपने चित्तविक्षेपादशक्तिरुक्ता, तत उक्तसुधायामन्तःपूर्णायामत्याधिक्येन परितो **गलनरूपं** वर्णनमिति पश्चात् तदुक्तम् ॥ ६ ॥

बर्हापीडेत्यत्र–नन्वयं श्लोकः पूर्वोत्तरश्लोकानन्वितः, तथा हि पूर्वं **वर्णयितुं नाशकन्नि**त्युक्त्वा **वृन्दारण्यं प्राविश**दित्युक्तेरग्रे चेति**वेणुरवं श्रुत्वा वर्णयन्त्योभिरेभिर** इत्युच्यते, एवं सति स्पष्टैवासङ्गतिर्वा मध्यस्थस्यास्य श्लोकयेति चेदत्रेदं प्रतिभाति, आद्ये प्रवेशमात्रमुक्तं न तु विशेषतः कर्मोक्तं, द्वितीये च पूर्वं **वेणुं चुकूजे**त्युक्तं, ततस्तत्कूजित**माश्रुत्ये**त्युक्तं, तेन कूजनस्वभावादेव भावोद्दीपनं प्राप्तं, पश्चादग्रिमकार्यार्थं लीलाविशिष्टं स्वरूपं वेणुद्वारा प्रियेण **गीतमाश्रुत्ये**त्युक्तं, एवं सत्याश्रुत्येस्यावृत्तिर्ज्ञेया, **गीतं हि स्पष्टार्थकं रसनिरूपकं च भवति,** तच्छ्रवणेन लीलाविशिष्टस्वरूपानुभवो हृद्यभूदत एव **कृष्णचेष्टितं स्मरन्त्य** इत्युक्तं, तदा तस्यानुभवात्, ततस्तद्विना स्थातुमशक्तास्तद्भावस्वभावादेव तदेवा**न्ववर्णय**न्नित्युक्तं, एतद्वर्णनं तदा स्याद् यदि गुणलीलाविशिष्टं स्वरूपं सर्वाशिनानुभूतं स्यात्, प्रकृते च **स्मरोदय**मेव गीतं प्रियेण कृतमिति न सर्वात्मना तदनुभवोतोशक्तिरभूत्, एव सति चिकीर्षितकार्यासम्पत्ति दृष्ट्वापूर्वं तादृशं नादं प्रकटितवान् यच्छ्रवणेन गुणलीलाविशिष्टमुद्बुद्धरसात्मकं स्वरूपं सर्वेन्द्रियप्राणान्तःकरणजीवेषु पूर्णमाविरभूत् तदा तद्वर्णनमभूदभितो रमणमपि, एवं सति पूर्वं वर्णनाशक्तिमुक्त्वाग्रे तच्छक्तिहेतुं चैकेन श्लोकेनोक्त्वा शुका आहुरिति**वेणुरव**मिति, एवम्भूत पूर्वोक्तश्लोकोक्तरूपं न तु पूर्ववत् केवलं वेणुरवमित्यर्थः, एवं सति तद् **व्रजस्त्रिय आश्रुत्य तद् वर्णयितुं नाशक**न्ननेवम्रूपत्वात् तस्य, **इति वेणुरवं** बर्हापीडेति श्लोकोक्तं वेणुरवमित्यर्थः, **श्रुत्वा वर्णयन्त्योभिरेभिरे** इति श्लोकसङ्गतिर्निःप्रत्यूहा सिद्धा, तारतम्येन रसानां क्रमेणाविर्भावे महान् रसानां क्रमेणाविर्भावे महान् रस इत्येवङ्करणं, दुर्लभत्वं चैतस्य रजस्य ज्ञापितं, परमकाष्ठापन्नस्वतन्त्रमहाफलदित्सयैव कृतवान् प्रभुरिति ज्ञेयं, अन्यथा शक्रशर्वादीनामज्ञानेप्युपेक्षावदत्रापि तथा भवेत्, अग्रे व्याख्याने स्फुटीभविष्यति ।

भावोद्दीपकत्वमात्रत्वं कूजनधर्मं इति तत्कार्ये सम्पन्ने तद्वर्णने जायमाने **स्मरवेगजश्चित्तविक्षेपः** प्रतिबन्धक उक्तः **कृष्णचेष्टितस्मरणं** चाशक्तौ स्मरवेगे च हेतुरुक्तस्तह्यग्रेप्यावश्यकत्वात् सार्वदिकत्वाच्च वर्णनं न स्यादेवेति शङ्कामपनुदन्नग्रे वर्णनायामुपपत्तिमाहैकेन **बर्हापीड**मित्यनेन, अत्रैवं ज्ञेयं, **सामोपनिषत्सु** 'स्मरो वा आकाशाद् भूयस्तस्माद् यद्यपि बहव आसीरन् न स्मरन्तो नैव कञ्चन शृणुयुर्न मन्वीरन् न विजानीरन् यदा वाव ते स्मरेयुरथ शृणुयु'रित्यादिना स्मरणस्यैव **स्मर**शब्दवाच्यत्वमुच्यते स्मरणं **स्मर** इति व्युत्पत्तेः, प्रकृते स्वामिनीनां मुखारविन्दे स्वाधरसुधासम्बन्धः प्रभुणाग्रिमप्रयोजनार्थमवश्य कारणीयः, स च वर्णनेनैव भवति, तच्च न सुधारसवलितनादान्तःप्रवेशं विना भवितुमर्हति, तत्प्रवेशेपि पूर्ववत् **कृष्णचेष्टितस्मृ**तौ न तत् सम्भवति, अत एव नदीवेगस्येवान्याप्रतिबध्यत्वं स्मरणस्य ज्ञापयितुं **स्वरवेगेने**त्यप्युक्तं, अन्यथा न वदेत्, **कृष्णचेष्टितं स्मरन्त्यो नाशकन्ने**तावतैव चारितार्थ्यात्, अतो नादप्राधान्येनैव नादस्मरणं तद्धेतुत्वेनैव **च** प्रभुस्मरणं न तु प्राधान्येन चेत् तदा **सर्वं** सम्पद्यत इति स्वयं विचार्य पूर्वमतथाकृत्वापि तदशक्ति दृष्ट्वोक्तकार्यार्थमुद्बुद्धपूर्णशृङ्गाररसात्मकमुद्बोधकाच्छादकविक्षेपकशक्तिमत्त्वेनाखिलाङ्गयुक्तमपि स्वरूपं नादेनुभूयमान एवानुभूतं भवति न तु पृथगित्येवम्भूतं नादं सम्पाद्य शुद्धपुष्टिस्थानं **प्राविशत्** पुष्टिमार्गाङ्गीकारं प्रकटीकृतवान्, तथा सति ह्येतासां साक्षाद्भोगः सम्भवति, अन्यथैतावत्करणं निःप्रयोजकं स्यात्, यथा **वृन्दा**ङ्गीकारेण दुष्टनिवारणं कृतवानेवमेतदङ्गीकारेणापि **कीर्ति**द्वारा विश्वस्य **सर्वस्यैव** दोषं दूरीकरिष्यतीति **निर्दोषत्वमप्यस्या** लीलायाः ख्यापयितुमन्ते **विशेषणं,** एवं सति निःप्रत्यूहं स्ववर्णनमभूत्, अतो वर्णनाशक्तिमुक्त्वा तत्साधनं मध्ये निरूप्यास्याग्रे तदुक्तं, **एतेन वेणुरवस्वरूपमेव** वर्णितं भवति, अत **एवेतिवेणुरव**मित्येवाग्र उक्तं, तेन पूर्वस्माद् विलक्षणत्वं नादस्य ज्ञापितं भवति ।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

वैजयन्तीं च मालामित्यस्याभासे, ततोप्याच्छादिकामिति । विक्षेपस्यापि वस्तुयाथात्म्यज्ञानाच्छादकत्वमस्तीत्याशयेनेदमुक्तम्, अन्यथाग्रे विक्षेपकं च रूपे निरूपितमिति न वदेयुः । **रन्ध्रान्वेणो**रित्यत्र गूढाभिसन्धिना हेत्वन्तरमप्याहु**र्यावच्चेति** । नादो हि रसात्मको धारावत्कर्णद्वारा हृदि प्रविष्टः स एव भगवदीयसर्वेन्द्रियविषयकविविधरसभावैर्निर्झरैः पाथःप्रवाह इव पुष्टो रसपूररूपो जातो, येन समानशीलव्यसनानां परस्परं तद्वर्णनरूपो बहिः प्रकटोभूत् । **स च सार्वत्रिक** इति तत्र हृदयस्थितोधररसो मुख्याधररसस्यांश एवेति । स सर्वासां हृदि स्थितः पर्यायेण सर्वासां हृदि प्रविष्टः । तदानिर्वचनीयोत्कटभावोदयेन साक्षात्तदनुभवयोग्यता भवतीत्यर्थः । **एवं सति** यावदुक्तरीत्या सोंशो नान्तःप्रविशति तावदपि साक्षात्तद्भोगयोग्यता न भवतीति शेषग्रन्थो ज्ञेयः । **एतदर्थमेवेति** । रसपूरेण तदंशप्रवेशार्थमेवेत्यर्थः । अत्रैवाग्रे **अत एवेति** । यतो विहितभक्तिमतामप्ययं रसः फलत्वेन प्रार्थनीय एव तिष्ठति, न तु तत्प्राप्त्यैवायं प्राप्तो भवत्यतो वंशद्वयसम्बन्धिभक्तनिरूपणानन्तरं निरोधो निरूपित इत्यर्थः । एतस्यैव तात्पर्यान्तरमप्याहुः **सृष्ट्युत्पन्नाना**मिति भक्तानामिति शेषः । भोगो भक्तिरसभोग इत्यर्थः । **एतत्पर्यवसायीति** । एतदप्राप्तौ तेषामपि सृष्ट्युत्पत्तिर्व्यर्थेत्यर्थः । एतेनान्येषां कैमुतिकन्यायेनैव जन्मवैयर्थ्यं ज्ञापितं भवति । 'नैष्कर्म्यमप्यच्युतभावे'त्यादिवाक्यैः । तर्ह्येवं फलस्य सिद्धत्वादग्रिमलीलाद्वयं व्यर्थमित्याशङ्क्य तत्तात्पर्यमाहुः **ततो विमोचन**मित्यादि । ये मुक्ताः स्वान्तःस्थिता एव जीवा लीलार्थं सृष्टास्तेषां परमानुग्रहतो नित्यलीलामध्यपातिभक्तैः सहैतद्रसानुभवं कारयित्वा पुनः पूर्वभावं सम्पादयतीति स्कन्धद्वयेन निरूप्यत इत्यर्थः । पुन पूर्वभावसम्पत्तेरेव प्रत्यापत्तिपदार्थत्वात् । लोक एतद्रसप्रकटनस्य तात्पर्यंवदन्तः आवश्यकतां चाहुः **अन्यथेति** । अस्यैव परमपुरुषार्थत्वेन सृष्टिमध्ये यत्र कुत्रापि प्रकटनेनैव सृष्टेः सार्थकत्वम् । अन्यथा प्राणसम्बन्धरहितदेहसृष्टिवत्सा व्यर्था स्यादित्यर्थः । **तदंशानामिति** । महिष्यादीनामित्यर्थः । **मुख्यप्रापणार्थं वेति**, मुख्यः पुरुषोत्तमः । एतासां च स एवापेक्षित इति तस्यात्मत्वेन कथने स एव प्रापितो भवतीति तथा ।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

बर्हापीडमित्यत्र **पूर्वोत्तरेति** पूर्वश्लोकार्थे वर्णनाशक्तावुत्तरश्लोकार्थे वर्णने वा वृन्दारण्यप्रवेशस्य हेतुत्वं नास्त्यतो मध्येयं श्लोकोनन्वित इत्यर्थः, **कर्मोक्त**मिति प्रवेशानन्तरं भगवता कृतं कर्म किञ्चिनोक्तमित्यर्थः, चुकूजेति पूर्वमुक्तं न तु जगावित्यतो 'वेणुगीतमाश्रुत्ये'तिकथनमनुपपन्नमित्याशङ्क्यावृत्तिः कृतेति ज्ञेयम्, 'तत्कूजितमाश्रुत्ये'त्यनेन पूर्वोक्तकूजितानुवादः, तदनन्तरं 'वेणुगीतमाश्रुत्ये'त्यनेन द्वितीया गानक्रियाक्षिप्यते, तथा च तत्कूजितमाश्रुत्य ततो **वेणुगीत**माश्रुत्येत्यन्वयः, **स्मरोदय**मिति उभयोर्विशेषणम्, तत्पदवाच्यकूजितस्य वेणुगीतस्य च पूर्वत्र **स्मरोदयः** प्रासङ्गिको द्वितीय उद्देश्य इतिविभागः, कूजितगीतयोर्भेदं विवृण्वन्ति **गीतं हीति**, **स्मरन्त्य** इति कञ्चित्कालमाविर्भूय तिरोहितोऽतः स्मरणमित्यर्थः, **स्वरूपानुभव** इति शब्द इतिशेषः, तदनन्तरं तस्य **स्मरण**मित्यर्थः, **तत** इति लीलाविशिष्टस्वरूपानुभवान्तरमित्यर्थः, **तद्विनेति** तादृशस्वरूपं विनेत्यर्थः, **स्मरोदयमेवेति** स्मरणसिद्ध्यर्थं शाब्द एवानुभवः कारितो न त्वनुभावने तात्पर्यमित्यर्थः, **सर्वात्मनेति** सर्वांशेनेत्यर्थः, **सर्वेन्द्रियेति** आन्तररमणे इन्द्रियादिष्वेवाविर्भावो न तु देहे इतिभावः, पूर्वं हृद्येवाविर्भाव उक्तः अधुना इन्द्रियादिष्वपीतिविशेषः, **पूर्ववत् केवलमिति** पूर्वत्र श्रवणं स्वस्यैव तेन हृदि स्वरूपानुभवः, अधुना त्वर्थविशिष्टस्य श्रवणं तेन श्रोत्रेन्द्रियेपि तदाविर्भावः, तथा **च गीतं हि** स्पष्टार्थकं इत्यत्र स्पष्टोर्थो यस्मादिति पञ्चमीबहुव्रीहिर्ज्ञेयः, **वर्णयितुमशक्य**मिति इन्द्रियादिषु पूर्णाविर्भावं विनेतिशेषः, **तथात्वज्ञापनायेति** तादृशस्वरूपे वर्णनाशक्तेरुचितत्वज्ञापनायेत्यर्थः, शुकस्य त्वेतल्लीलास्यत्वाभावात् वर्णनं सम्भवत्येव, **भावोद्दीपकत्वेति** **स्मरोदय**पदस्यार्थोनेनानूदितः, **मात्रपदेन** 'बर्हापीडे'तिश्लाकोक्त इन्द्रियादिषु स्वरूपाविर्भावो व्यावर्तितः, कूजनपदेनात्र गीतमपि ज्ञेयम्, तस्यापि स्मरोदयत्वोक्तेः, **स्मरवेगज** इति स्मरकृतचित्तचाञ्चल्यजनितचित्तविक्षेप इत्यर्थः, **स्मरवेगे चेति** स्मरकृतचित्तचाञ्चल्य इत्यर्थः, व्याख्याने **अग्रिमेति** मुखेषु भगवद्भोग्यसुधाभोगयोग्यतासिद्ध्यर्थमित्यर्थः, **नादेनुभूयमान** इति इदं 'बिभ्रद्वेणो **रन्ध्रान् पूरय**'न्निति समभिव्याहारादेतस्य नादे पूरणमुक्तमिति ज्ञेयम्, तदानुभव एव न स्मरणमतः **स्मरवेगा**भाव इतिभावः, स्मरपदस्य कामवाचकत्वे तदापि तद्वेगः स्यादतः स्मरणवाचकत्वं व्युत्पादितम्; **न पृथगिति** पृथगनुभवे बाह्यरमणमेव स्यादितिभावः, **साक्षाद्भोग** इति न त्वंशावतारेष्विव सत्त्वव्यवधानेनेत्यर्थः, अत एव हि शब्दः, **अन्यथेति** योग्यतां विनैव भोग इत्यर्थः, **एतदङ्गीकारेणेति** गोपीकाङ्गीकारेणेत्यर्थः, 'विक्रीडितं व्रजवधूभि'रितिवाक्यादितिभावः, एवं **सतीति** स्मरणाभावे सतीत्यर्थः, पूर्वोक्तो नादः स्मरोदयोयमनुभावक इति निर्गलितो विभेदः, **वाक्यार्थ** इति अग्रे वर्णनीयो रूपलीलासहितो वेणुरवोत्र वाक्यार्थ इत्यर्थः, वृन्दारण्यप्रवेशस्याद्यश्लोकेन प्राप्तत्वादत्र तदनुवादेनायमेव **वाक्यार्थ** इतिभावः, **प्रकारविशेषश्चे**ति वर्णितः स्यादितिशेषः, नादस्य रूपक्रीडयोश्च वाच्यवाचकभावसम्बन्धः, नादे वाच्यतासम्बन्धेनैतदुभयं वर्तत इत्यनयोरन्योन्यं सामानाधिकरण्यसम्बन्धः, नादेन सह रूपक्रीडयोरप्यनुभवकथनात् त्रयाणामपि सामानाधिकरण्यं च वेण्वाधारत्वमित्यर्थः, **स्वरूपगुणलीला** इति अग्रे वेणोः षोढा वर्णनीयत्वात् तेन गुणा उक्ता इति ज्ञेयम्, **चैतदिति** भूषणार्थं धारणमेतत्सूचनार्थं च धारणमिति समुच्चयार्थं-

श्चकारः, आभासे **तथात्वज्ञापनायेत्युक्तमुपसंहरन्त्यतो युक्त** **वेति**, एतादृशस्य सर्वांशेनानुभवाभावेनुबुभूषाया विद्यमानत्वाद्वर्णनाशक्तिर्युक्तैवेत्यर्थः, **बिभ्रदित्यस्य** बहिःप्रकटं कुर्वन्नित्यर्थः, प्राकट्यस्य **बिभ्रत्पदार्थत्वं** विशदयन्ति **यथेति**, पात्रभरणेन कारणेन कार्यं **रसदानमनुमीयते तथात्र** वपुःप्राकट्येन **कारणेन** भक्तेभ्यो रसदानं कार्यमनुमीयते तथा च रसदानकारणत्वधर्मसाम्येन प्राकट्यं भरणपदार्थ इत्यर्थः, **पात्रस्थानीयो धर्मिरूपो** भगवान्, तत्स्थरसस्थानीयस्तासु स्थापनीयो धर्मरूपः (भावात्मकभगवद्रूपः 'स्त्रीभावो गूढ' इति वक्ष्यमाणः) आनन्दः, भरणस्थानीयं धर्मिरूपस्य वपुःप्राकट्यम्, दृष्टान्ते धारणस्य भरणपदार्थत्वात् कर्तृभिन्नत्वं कर्मणः, दार्ष्टान्तिके प्राकट्यस्य भरणपदार्थत्वात् 'तदात्मानं स्वयमकुरुते'तिवत् स्वरूपस्यैव कर्मत्वं कर्तृत्वञ्चेति, पूर्वं हृद्येव प्राकट्यं तेन **वर्णनाशक्तिरुक्ता**, अधुनेन्द्रियप्राणान्तःकरणजीवेषु प्राकट्यमिति विभ्रत्पदेनोक्तमितिभावः, **श्रोत्रे** इति संयोगे प्रियावचनश्रवणेन विप्रयोगे तद्गुणश्रवणेन चोभयविधश्रृङ्गारानुभावके इत्यर्थः, **तयोरिति** श्रृङ्गारानुभावके तदुद्बोधकस्थापनेन भगवतो रसोद्बोधात् पूर्वं निरूपितः स्वरूपात्मको रस उच्छलितोवयवविकारादिरूपो भवतीत्यर्थः, **तादृशस्त्विति** आलम्बनरूप इत्यर्थः, कटाक्षाद्यनुभावरूपस्त्वगुप्तोपि तथेति तद्व्यावृत्त्यर्थं तुशब्दः, **गुप्त एवेति** प्रकटस्तु रसाभासजनकत्वेन रसपोषको भवेदपि न तु रसत्वमापद्येतेत्येवकारः, **पीताम्बरं** कटिस्थं ज्ञेयम्, **उद्बुद्धे रस** इति ज्ञाते इतिशेषः, तथाज्ञाने समयविशेषे तथा जातत्वादधुनापि रसत्वसाधकं वासोविणय्य तमेवालम्बनं **रसाभासं** वर्णयेयुर्न तु श्लोकद्वयेन रसद्वयमित्यर्थः, **माया हीति हिशब्देन** सन्मतिः, धने मदजनकत्वस्य शास्त्रसिद्धत्वात् तत्सादृश्यकथनेन रूपेपि पीते मदजनकत्वं सूचितम्, तेन सम्यगवलोशनाभावः सूचित इत्यर्थः, आच्छन्नं रसमिति आलम्बनमित्यर्थः, **उद्घाटयेयुरिति** जानीयुरित्यर्थः, नादद्वारा पीताम्बरानुभवे भगवदिच्छया तादृशो मदः समजनि येन तदन्तःस्थितालम्बनादिविचारो न जात इति निर्गलितोर्थः, **कीर्तिमयीमिति** मूले मालापदेन वनमाला ज्ञेया, तथा च **वैजयन्तीं वनमालाञ्च बिभ्रदित्यर्थः, वैजयन्त्याः** कीर्तिरूपत्वं योगेन व्युत्पादयन्ति **वै निश्चयेनेति**, सप्तेति नादे गुणसहितस्वरूपस्थापनं सङ्ख्यातात्पर्येणापि ज्ञाप्यत इत्याशयः, मूले **सुधयेत्येकवचने** प्रसङ्गेनान्ययोरपि स्वरूपं निरूपणीयमतस्त्रैविध्यं विवृण्वन्ति सुधेति, दीव्यन्तीति **देवास्तद्भोग्या** सारिदादिषु स्थापिता मुख्यांशभूतेत्यर्थः, मुख्यलीलायां **भगवतो भोग्या** भगवल्लोभतल्लोभस्थितेत्यर्थः, सर्वैरपि साक्षादभोग्या **परम्परया नादमार्गेणैव भोग्येत्यर्थः, तत्रेति** त्रैविध्ये इत्यर्थः, **अधरो हि लोभात्मकत्वाद्यथायोग्यं** विविच्य सर्वेभ्यो ददाति, अतस्त्रैविध्यमित्यर्थः, ननु सर्वाभोग्याया अप्यधरे एव विद्यमानत्वाल् लीलायां कुतो न तद्भोग इत्यत आहुः **तस्या इति**, वर्णनात् पूर्वं तु अयोग्यतैव, तदनन्तरं तु सा पूर्वं वर्णनायां मुखे समागतेति **गमनागमने** तस्याः प्राधान्यात् मुखं तदुच्छिष्टं तच्छेषभूतं जातमतः साक्षात् तादृशेन **मुखेन** तस्या **अनुभवो न भवतीत्यर्थः**, नादद्वारानुभवस्तु परम्परयेति भावः । (मुखद्वाराऽभोगे हेतुमाहुस्तस्या इति, उत्तरदलात्मकस्वरूपं श्रोत्रद्वारा हृदि प्रविष्टं सदनुभूतं भवति, ततो वर्णने मुखद्वारा निर्गच्छतीति रसमर्यादेत्यर्थः, **उच्छिष्टेनेति** ततो निर्गमनादुच्छिष्टं मुखं तेनेत्यर्थः, अन्यमुखतो निर्गतस्य श्रवणेपि **तन्मुखस्य** परम्परया हेतुत्वम्, साक्षात्करणत्वन्तु स्वश्रोत्रयोरेवेति साक्षादित्युक्तम्, अत इति सोत्तरदलात्मिका **श्रोत्रपेयैव**, मुखद्वारा पाने पूर्वदलत्वमेव स्यादिति भावः, अत **एव न सम्भवतीत्युक्तमेवकारश्चात्रोक्तः**), वेणौ स्थापने भगवतस्तात्पर्यमाहुः **सा हीति**, सर्वाभोग्या देवभोग्या चेत्यर्थः, **सर्वेषामिति** भोग्यदेहेन्द्रियादीनां देवानाञ्चेत्यर्थः, **आनन्दः एवेति द्रवीभूता** सर्वांशसम्बन्धार्थं विरलावयवा सर्वांशेन प्रकटा, आनन्दरूपैवेत्यर्थः, **आनन्दसारेति आनन्दस्य** भगवतोपि **सारभूतेत्यर्थः, स्वत** इति लोभस्थत्वात् **स्वतो न** कुत्रापि याति अतो **भगवानेव** योजितवानित्यर्थः, वेणुं वादयन्नित्येतावतैव **चारितार्थ्येपि** मूले सुधापूरणकर्तृत्वोक्तेस्तात्पर्यमिदमिति ज्ञेयम्, अमूर्तत्वादिति विरलावयवत्वादित्यर्थः, न हीति **रन्ध्रस्तदन्तर्वर्ती** अवकाशस्तस्येप्सिततमत्वोक्त्या **रन्ध्रद्वारा परम्परया** वेणुस्पर्शसम्भवेपि साक्षात् तं न स्पृशतीत्यर्थः, **स्वभोगयोग्यमिति स्वस्य** भगवद्भोग्यसुधारूपं यत् स्वरूपं तत्कर्मकभोगयोग्यमित्यर्थः, **यावच्चेति तत्रैव** विशेषबोधनाय **चकारात् निरोधः सिद्ध** इति निबन्धे आसक्तेः प्रमेयप्रकरणसाध्यत्वोक्तेस्तद्रूपनिरोधसिद्धिः प्रकरणान्ते वक्तव्येत्याशयः, अत इति यतो यत्किञ्चिदपि तद्रस**प्रवेशं** विना निरोधासिद्धिरत इत्यर्थः, देवानाहुर्गोपिष्वित्यादिना, एते त्रयो देवपदवाच्या इत्यर्थः, तत इति निरोधानन्तरं **लीलाद्वयं** पूर्वभावसम्पादनरूपं **स्कन्धद्वयेनोच्यते**, फलं तु निरोध एवेति भावः, **अयमिति** निरोधफलरूपो मुख्यो रसभोगः, एकोनविंशाध्यायोक्तवसनदानेन पूर्वं **ब्रह्मानन्दभावे** जातेपि पुनः पञ्चविंशाध्यायोक्तब्रह्मानन्दभावे जाते तदनन्तरं शब्दब्रह्मकृतपूर्वभावसम्पादनेनाधिदेवक्रीडायोग्ये पूर्वसिद्धप्रसादरूपशक्तिप्रवेशकृतस्त्रीत्वे पुनः **सम्पन्ने** सति **सम्भवतीत्यर्थः, लक्ष्म्या इवे लक्ष्मीर्हि** ब्रह्मानन्दरूपा सती नायिकारूपा, अत्रापि धर्मद्वयसम्पादनेन लक्ष्म्या साम्यसम्पादनाद्रसभोगेपि साम्यमितिभावः, **लक्ष्मीपदमत्र** साक्षात्पुरुषोत्तमस्य स्वकीयारूपालम्बनपरं **न** त्वत्रत्यमुख्यापारं, टिप्पण्यां **तदंशानामित्यस्य** 'महिष्यादीना'मिति व्याख्यानात्, एतासां पतित्वेन प्रार्थनात् तत्साम्यमेव वक्तव्यमिति तदाशयः, अत एव 'विवाहितान्यायेन रमणं भविष्यतीत्यग्रिमाध्याये वक्ष्यते अत इति यतो **लीलाद्वयं प्रत्यापत्तिरूपमतो निरोधो महत्** स्वरूपात्मकं फलं यस्य तादृश इत्यर्थः, **अतोत्रेति** यतो **निरोध एव महाफलस्तच्च** फलं स्त्रीष्वेव सिद्धमतस्ता **एव** तामसप्रकरणान्ते तदन्तर्गतप्रमेयप्रकरणान्ते च निरूप्यन्त इत्यर्थः, **अत** इति यतो भगवत्कर्मकभोगरूपं स्त्रीणाम्माहात्म्यमत इत्यर्थः, न हीति पुरुषो भोग्यो **न भवतीति** तत्र भगवत्कर्तृकभोगासम्भवादनुपदोक्तमर्यादया भगवत्कर्मकोपि भोगो न भवेदत एवाग्निकुमाराणामपि

स्त्रीत्वमित्यर्थः, **अन्योपभोग्य** इति स्त्रीभोग्य इत्यर्थः, इदं तृतीयस्कन्धनिबन्धे विचारितम्, तत्सम्मतिसूचनाय हि शब्दः, **स्वोपभोग्य** इति **पुरुषान्तरोपभोग्य** इत्यर्थः, तर्ह्येवं मुख्यरसभोगे समग्रे ज्ञानोपदेशप्रयासः किमर्थ इत्याशङ्क्याहु परमिति, **अत एवेति** यतोत्र स्त्रिय एव **योग्या** अत एवाग्रेऽधिदेवस्य **भगवतः** सम्बन्धिनीं प्रसादरूपां स्वाधिदैविकरूपां वा **स्त्रियं प्रार्थयिष्यन्तीत्यर्थः** अत इति यतो मुख्यो रसो दित्सितोत इत्यर्थः, वृन्दारण्यप्रवेशेन स्वाच्छन्द्यं 'श्लिष्यति कामपी'त्यादिप्रकारकं स्वस्य **सम्पादितवानित्यर्थः**, **नन्विति जगति** नायिकासु **भक्तिर्भावोद्बोधो** न कारितोतः कथं तादृशी लीलेत्यर्थः, **स्वपदेति** तथाचिह्नदर्शनेन स्मृतपूर्वसम्भोगा **उद्बुद्धभावा भविष्यन्तीति** प्रत्यक्षेर्थः, परोक्षवादेन स्त्रिया अरण्यं वनं स्त्रीसङ्घमित्यर्थः, **स्त्रिया** इति जात्यपेक्षयैकवचनम्, तत्रावेशेन **भगवत्कर्मकभोगकर्तृ**त्वरूपं **स्वाच्छन्द्य** भवतीति भावः, पूर्वं **गोपवृन्दैः** सह स्थितः पश्चात् तत्र **प्राविशत्**, स्वाच्छन्द्यं **मूले** उपसर्गस्यार्थं इति ज्ञेयम्, **नन्विति जगति** स्त्रीसङ्घे **भक्तिर्भावोद्बोधो** न कारित **इति** कथं तत्कार्यतेत्यर्थः, **स्वपदेति** स्वकर्तृकभोगे तासु विविधप्रकारैश्चरणस्थापनेन भावोद्बोधं कारयित्वा स्वाच्छन्द्यं तत्कर्तृकभोगरूपं **सम्पादितवान्**, चरणे नानाप्रकारबोधार्थं व्याख्याने **स्वपदानामिति** बहुवचनम्, तथा च 'गोपवृन्दैः सह स्थितः स'न्नित्यन्तेन पूर्वस्थितिरुक्ता, पश्चात् स्वपदानां **रमणं** यत्र तादृशं तत्सङ्घं कृत्वा तत्र प्रकर्षेण स्वाच्छन्द्यसम्पिपादयिषया **आविशत्** स्वावेशेन तासु स्वाच्छन्द्यं सम्पादितवानित्यर्थो **ज्ञेयः**, अत एव नायिकानां पुम्भावावेशे तथा भवतीति रसशास्त्रम्, एतदाशयेनैव वृन्दारण्यप्रवेशस्व लीलात्वं **पूर्वमुक्तम्**, एवं पूर्णरसानुभवानन्तरं ताभिर्गीतकीर्तिर्जात इति **गानेन** रसस्थैर्यं निरूपितम्, **अवशिष्टेति** वेणुनादेन **व्रजस्थितासु** सर्वाभोग्यसुधानुभवरूपमोक्षस्थापनम्. गोपसाहित्येन तेषु दास्यरूपधर्मस्थापनम्, **वृन्दारण्य**प्रवेशेन **वनस्थितासु** स्वाच्छन्द्यरूपकामस्थापनम्, **स्वपदरमणेन** तासूद्बुद्धभावरूपभक्तिस्थापनमवशिष्टोर्थः, गानरूपत्स्थापनमपि तास्वेवेति वनस्थितासु त्रयमुक्तम्, व्रजस्थितास्वेकम्, **गोपेष्वेकम्**, एवं विभागेन पुरुषार्थपञ्चकस्थापनं ज्ञेयम्, अस्मिन् श्लोके सर्वाभोग्यसुधापूरितत्वरूपवेणुरवस्वरूपनिरूपणं **वाक्यार्थ** इत्युपसंहारे बोधयन्ति **स्त्रीभाव** इति,**स्त्रीणां** हृदये नादद्वारा पूरितो भावः सुधारूपो गूढः **सर्वाभोग्यः पुष्टिमार्गेनुग्रहमार्गे तत्त्वममनारोपितं** मुख्यं फलमितिरूपः **कृष्णपदार्थः** कृष्णस्वरूपं सर्वत्र किम्बहुना रमणेपि संवृत एव किन्तु क्वचिदेव स्थाने हृदयरूपे वेणुनादश्रवणे सति श्रोत्रद्वारा **विवृतः** प्रकट इत्यस्मिन् श्लोके निरूपितम्, सर्वाभोग्यसुधारूपं भगवत्स्वरूपं वेणुद्वारैव प्रकटमुक्तमित्यर्थः, अतो नादस्य मुख्यफलानुभावकत्वाद् **रूपं वेणु नादः क्रीडा** चेति त्रयाणां मध्ये रूपं क्रीडा चेति **सर्वमेवोपसर्जनीभूतं गौणमुभयापेक्षया वेणुनाद एव मुख्य** इतिहेतोस्त्रयानुभवेपि तद् द्वयं गौणं कृत्वा तं वेणुनादमेव मुख्यतया **वर्णयितुमारेभिरे** गोप्य इति हेतोस्तद्वर्णनेनाभिरमणमाहेत्यर्थः ॥ ५ ॥ **इतिवेणुरवमित्यत्र** श्रवणस्य वर्णनस्य च **वेणुरवमित्येव** कर्मेत्याहुर्**वेणुरवं वर्णयितुमिति**, एतस्यैव विवरणं **वेणुरवमाकर्ण्य वर्णयितुमिति**, तमेव श्रुत्वा तमेव **वर्णयितुमारेभिरे** इतिहेतोः श्रवणस्य वर्णनस्य चैकनैव कर्मणा सम्बन्ध इत्यर्थः, श्लोकद्वये श्रवणोक्तेस्तात्पर्यमाहुस्तत्रेति, उभयोर्विभेदं वक्तुमाहुरमुनेति, पूर्वश्लोकोक्तं तु केवलमितिभावः, **अनेनापीति अर्थः स्वरूपं स्पष्टो** नादात् पृथक्कृत्य भगवता व्रजस्थासु **नोक्तो** न बोधित इति वनस्थासु स्वाच्छन्द्यसम्पादनसूचकेन प्रशब्देन पूर्वश्लोके **ज्ञापितम्**, अत्र राजन्निति सम्बोधनेनापि तज् ज्ञापितम्, राजानो हि गुप्तकार्यकर्तारो भवन्ति, श्रोतुस्तथासम्बोधनेन श्रवणविषयेपि स धर्मो ज्ञापित इत्यर्थः, तर्हीति स्पष्टम्, स्वरूपानुभवाभाव इत्यर्थः, तत्रेति वेणुरवश्रवणे इत्यर्थः, **कामोद्दीपने** इति पूर्वं व्याख्यानात् स्मरणरूपभावोद्दीपने इत्यर्थः, **अन्तःपूर्णायामिति** तथा च मुख्यरसानुभवान्न चेष्टितस्मरणमिति भावः ॥ ६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

बर्हापीडमित्यस्याभासे स्वयं **वर्णयतीति शुको** वर्णयतीत्यर्थः, **तथात्वज्ञापनायेति** गोपिकानां वर्णनाशक्तत्वज्ञापनायेत्यर्थः, **बर्हापीडमित्यत्र वाक्यार्थो वर्णनीय** इति गोपिकाभिर्वर्णनीयो वेणुरवोत्र "बर्हापीडे"तिश्लोके **वाक्यार्थो** मुख्यत्वेन भवतीत्यर्थः, **तथा सतीति** वेणुरवस्य वाक्यार्थत्वे वेणुरवप्रतिपाद्यस्वरूपस्य वेणुनादस्य क्रीडायाश्च प्रतिपाद्यत्वं स्यादित्यर्थः, स्वरूपेत्यादि "वपुर्बिभ्र"दित्यनेन स्वरूपं "रन्ध्रान् वेणोः पूरय"न्नित्यनेन गुणः "वृन्दारण्यं प्राविश"दित्यनेन च लीला उक्ता इति ज्ञेयं, **नृत्यन्मयूरानुकरणं** चेति मुकुटधारणं शोभाधायकं उद्बुद्धपूर्णरसात्मकतासूचनाय नृत्यन्मयूरानुकरणं चेति चकारार्थः, **केवलो** नाट्य इति **केवल** इति उद्दीपनादिसामग्रीरहितो विप्रलम्भ इत्यर्थः, अभिनये तथैवोपलभ्यमानत्वात्, अभिनेतारो हि पुष्पादिसामग्रीं हस्ताभिनयेनैव प्रदर्शयन्ति, न हि तत्र पुष्पाणि सन्त्यतो विप्रलम्भरसस्य सामग्रीराहित्यात् केवलत्वं, यद्यपि भगवद्विप्रलम्भस्यालौकिकत्वान्मनसा भाव्यमानापि सामग्री सत्यरूपैव तथापि सामग्र्या अनाविर्भावितत्वात् केवलत्वं, तथा चाविर्भूतसर्वसामग्रीविशिष्टत्वं संयोगरसत्वमनाविर्भूतसामग्र्यभिन्नरूपत्वं विप्रयोगरसत्वमितिविवेकः, **भगवतो वपुरुभयविधमिति**, अत्रेदं ज्ञेयं, लौकिके हि पुरुषाधिकरणो रसो न तु पुरुषो रसरूपः, भगवति त्वलौकिकत्वाद् "रसो वै स" इति श्रुते रसरूपत्वं, अतो भगवद्वपुष एव संयोगविप्रयोगात्मकत्वमुक्तं, युगवद्रसद्वयात्मकतायाः श्रुतिसिद्धत्वेपि युक्त्यगोचरत्वं यद्यपि प्राप्तं तथापि वनस्थितभक्तैस्सह संयोगात् संयोगरसात्मकत्वं व्रजस्थितभक्तैः सह वियोगाद् विप्रयोगरसात्मकत्वमिति युक्तिविरोधो न शङ्कनीयः, रसस्य भगवदभेदाद् भगवद्वपुषोपि भगवदभेदाद् भगवतो **वपुरुभयविधमित्युक्तं, नटवरवपूरूप** इति नटवद् वरवद् वपुर्यस्येत्युक्ते वपुषः स्वरूपात् पार्थक्य-

मायातीति पार्थक्यनिराकरणाय **वपूरूप** इत्युक्तं, **गोपिका वासो न गणयेयुरिति** रसोद्बोधेनैवात्यार्त्या **भगवद्वाससः** पीताम्बरस्य गणनामकृत्वावलोकनं कुर्युस्तथात्वे रसस्य प्राकट्याद रसाभासः स्यादतो **गोपनार्थं** पीताम्बरस्य **मायारूपत्वं** निरूपितं माया हि भगवत्साक्षात्कारे जवनिकेव तिष्ठति, प्रकृतेपि रसाच्छादिका जातेतिसूचनार्थं व्यामोहककनकतुल्यता निरूपिता, पीताम्बरस्य भगवत्स्वरूपगोपनान्मायत्वं, **वै निश्चयेन सर्वजयप्रकाशिकेति** "साक्षान्मन्मथमन्मथ" इतिवाक्यादाधिदैविकमन्मथजेतृत्वं स्वरूपलावण्यस्य कमलादिजेतृत्वं नयनयोरेवं सर्वजयप्रकाशिका वैजयन्तीति ज्ञेयं, **वै निश्चयेनेति** व्युत्पत्तिस्तु नैरुक्ती ज्ञेया, तस्याः **साक्षादनुभवो नोच्छिष्टेनेति** भगवत्कर्तृकं भोगं विना न सम्भवतीत्यर्थः, तथा च यदा फलप्रकरणे भक्तनिष्ठसुधां भगवान् भोक्ष्यते तदनन्तरं रसाधिक्ये भक्ताः साक्षादुच्छिष्टेन भगवत्सुधां भोक्ष्यन्त इतिहृदयं, **अतः श्रोत्रपेयैवेति** प्रकृते फलप्रकरणाभावाद् व्रजस्त्रीणां भगवन्निकटस्थित्यभावाद् वेणुद्वारैवाधरसुधाप्राप्तिः, सुधाया वेणुनादसम्बद्धत्वान्नादस्य श्रोत्रमात्रग्राह्यत्वात् तत्सम्बद्धसुधाया अपि श्रोत्रमात्रपेयत्वमितिभावः, तथा च संयोगावस्थायां साक्षात्पेयत्वेपि वियोगावस्थायां तु **श्रोत्रपेयत्वमेवेति** विशेषः, किञ्च भगवद्भोग्याधिदैविकस्त्रीविग्रहप्राप्तानामेवैतस्याः सुधायाः साक्षाद्भोगोन्येषां सरित्सरोलतावृक्षमृगीगोपमेघादीनां तु तादृशविग्रहाभावाद् वेणुनादद्वारा श्रोत्रेणैव पानमतः **सर्वेषां श्रोत्रपेयैव**, अतः सर्वेषां साक्षात्पानाभावात् सुधायास्त्रैविध्यनिरूपणे यत् सर्वाभोग्यत्वं निरूपितं तत् समर्थितं, **आनन्द एव सा प्रकटेति** साम्प्रतं वियोगावस्थायामित्यर्थः, इदमत्र ज्ञेयं, "आनन्दो ब्रह्मेति व्यजानात्" "तस्माद् वा तस्माद् विज्ञानमयादन्योन्तर आत्मानन्दमय" इत्याद्यनेकश्रुतिषु पुरुषोत्तमस्यानन्दरूपत्वमानन्दमयत्वं चास्ति, तत्रायं विशेषः, संयोगवस्थायां सर्वसामग्रीसाहित्यात् सामग्र्याश्चानन्दरूपत्वादानन्दमयत्वं भगवतः, वियोगावस्थायां सर्वसामग्र्या भगवदभेदेन स्थितत्वादानन्दरूपत्वं, तथा च सम्प्रति व्रजस्थितगोपिकानां भगवद्वियुक्तत्वात् तद्वियोगात्मकरसात्मको भगवानानन्दपदवाच्यः, तत्रैव सा **सुधा प्रकटेति**, दूरस्थितत्वेन वेणुनादद्वारैव प्राप्या न तु साक्षादितिभावः, **आनन्दसारभूतेति** आनन्दरूपेषु भगवदवयवसम्बन्धिभोग्यपदार्थेषु सारभूता, ननु भगवदवयवसम्बन्धिभोग्यपदार्थेषु सर्वस्यैव सारत्वात् तत्र सारासारविवेकस्य वक्तुमयोग्यत्वात् कथं सारत्वमित्याशङ्क्य स्वोक्तं सारत्वं स्वयमेव व्याचक्षते **सा न कथञ्चिदित्यादिना**, अन्येषु भगवत्सम्बन्धिषु भोग्यपदार्थेषु साधनत्वं फलत्वं चास्ति, तथा हि यथा भगवद्धस्तो भक्ताह्वाने आनन्दसाधनं स्पर्शे तु फलरूपस्तथाधरसुधायाः साधनत्वं नास्ति किन्तु केवलं फलरूपत्वमेव, न ह्यधरसुधा कस्यापि साधनमस्ति, यद्यपि "मुखमपि स्वभोगयोग्यं करोती"त्युक्त्या साक्षाद्भोगयोग्यतायां साधनत्वमस्ति तथापि श्रोत्रपेयाया एव साधनत्वं, तत्रापि स्वप्राप्तावेव साधनत्वं न त्वितरत्र, साक्षादुच्छिष्टरीत्या भोग्यायास्तु केवलफलत्वं, **इदमेव सारत्वं नाम**, भगवतो भोग्यावस्थायामेव भोक्त्रीभिर्लभ्यमानत्वात्, **वेणोरित्यसमासादिति** असमासे ऐकपद्याभावात् पदानां पार्थक्यं, तेन पार्थक्यमेव सूच्यते तद्वाच्यानां, अतो **वेणुमध्ये सा सुधा नेत्युक्तं, ततः कर्णद्वारेत्यारभ्य करोतीत्यन्तं** सुधायाः शब्दसम्बद्धत्वाच्छब्दस्य श्रोत्रमात्रग्राह्यत्वात् कर्णद्वारा प्रवेशः, तथैव वर्णनसमये शब्दसम्बद्धाया एव मुखे समागमनं, **तत्राप्याधिदैविकरूप** इति लक्ष्मीसमानस्त्रीविग्रहप्राप्तावित्यर्थः, **मुख्यो रस भोग इति** उच्छिष्टरीत्या भोग इत्यर्थः, **भगवद्भोगानन्तरमेवेति** भगवत्कर्तृकभोगानन्तरमित्यर्थः, **भगवान् भोग्य** इति रसाधिक्यवशात् स्त्रीभावे जाते सुधाभोगात् ताभिर्भोग्यो भवतीत्यर्थः, **आधिदैविकीं स्त्रियमिति** कात्यायनीमित्यर्थः, **स्वच्छन्दतामिति** भोग्यभक्तानां भोक्तृत्वमित्यर्थः, **स्वच्छन्दतामाहेति** गोपवृन्दसाहित्येन निर्भयत्वसम्पादनात् स्वच्छन्दता सम्पद्यत इत्यर्थः, अत एवोक्तं "शक्तीनां निर्भयत्वायैते देवाः साक्षिण" इति, ननु जगति भक्तिर्न स्थापितेति कथं कृतकार्यता ? तत्राह **स्वपदरमणमिति**, अत्र स्थलत्रये प्रवेशः, "वृन्दारण्यं प्राविश" दित्युक्त्या वृन्दावने वनस्थितभक्तगणे व्रजस्थितव्रजसुन्दरीमनसि च प्रवेशात्, तत्र वृन्दावनभूमेर्भगवच्चरणसम्बन्धेनार्द्रत्वाच्चरणाङ्कितत्वेन **स्वपदरमणत्वं**, वनस्थितभक्तगणस्य रमणसमये हृदये चरणस्थित्या तथात्वं, व्रजस्थितभक्तानां मनस्याविर्भावे चरणानामाविर्भावात् तथात्वं, **धर्मस्थापनमाह गोपवृन्दैः सहेति** वृन्दावनप्रवेशपक्षे गोचारणरूपो धर्मो गोपवृन्दसाहित्येन स्थापितः, वनस्थितभक्तगणप्रवेशपक्षे वनस्थितभक्तानां लज्जाजन्यगोपनादिधर्मो भगवतो गोपवृन्दसाहित्याद् भवति गोपवृन्दस्यान्तरङ्गत्वात्, "एते देवाः साक्षिण" इति पूर्वमुक्तत्वात्, **अवशिष्टेत्यादि** 'स्वपदरमण" मित्यनेन भक्तेरुक्तत्वाद् **गोपवृन्दैरित्यनेन** धर्मस्योक्तत्वादर्थकाममोक्षाणामवशिष्टत्वं, तच्च "गीतकीर्ति"रितिपदेनोच्यत इत्याहुः **गीतकीर्तिरितीति**, व्रजस्थितसुन्दरीभिर्गीता **कीर्तिर्यस्येत्युक्तौ** गुणगानमेव तासामर्थरूपः पुरुषार्थः, वनस्थितस्त्रीभिर्गीता **कीर्तिर्यस्येतिपक्षे** आसक्तिमतीभिस्तादृशरसरूपस्य भगवतो गुणगानेऽनासक्तानामपि गुणश्रवणात् कामरूपः पुरुषार्थः सिध्यति, शुकादिभिर्गीता **कीर्तिर्यस्येतिपक्षे** तादृक्कीर्तिश्रवणादस्मदादीनां मोक्षः सिध्यति, एवं "गीतकीर्ति"रित्यनेनार्थकाममोक्षस्थापनमुक्तम् ॥ ५ ॥ **इति वेणुरवमित्यस्याभासे स्त्रीभावो गूढः पुष्टिमार्गे तत्त्वमित्यादि** भगवतः **स्त्रीभावो** लक्ष्मीसमानत्वं रसोद्रेके भोग्यत्वमितियावत् स **स्त्रीभावः पुष्टिमार्गे तत्त्वं**, भगवतो भोग्यत्वेन भक्ताधीनत्वाद् भक्तानां भोक्तृतया स्वाधीनत्वात्, "कृष्णाधीना तु मर्यादा स्वाधीना पुष्टिरुच्यत" इति पञ्चमस्कन्धनिबन्धे पुष्टिमार्गलक्षणात्, **इति कृष्णपदार्थ** इति स्त्रीभावापन्नो भगवान् कृष्णपदवाच्य इत्यर्थः, तादृशभावापन्नस्य भगवतः परमानन्दरूपत्वात्, रसशास्त्रे तथोक्तत्वात्, "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकस्तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत" इतिश्रुतौ परमानन्दरूपतया कृष्णपदनिर्वचनात्, क्वचिद् विवृत इति

वेणुनादस्य बहुवारं जायमानत्वेपि नैतादृशसुधासंवलितो जायतेतः क्वचिद् वेणुनादेधरसुधासंवलिते **कृष्णपदार्थो विवृत** इत्यर्थः, सुधासंवलितत्वकथनात् **सुधासार्थक्याय भगवतः स्त्रीभावोपेक्षितः**, स एव **कृष्णपदार्थः**, सोस्मिन् वेणुनादे **विवृतः**, "अधरसुधया पूरय" न्नित्युक्तेः, स्त्रीभावाभावे **भगवदधरसुधाया** वैफल्यं स्यादतोधरसुधासाहित्योक्तेः **"स्त्रीभावो विवृत"** इति ज्ञेयं, अतो वेणुनादस्यैव प्राधान्यात् **"तमेव वर्णयितुमारेभिर** इत्युक्तं, **राजन्निते**ति "राजर्षिसत्तम" त्यादिपदान्यनुक्त्वा "राज" पदमात्रमुक्तं, **राजपदं** तु प्रजापालानादिस्वधर्मनिष्ठतावाचकं, तेन धर्मनिष्ठतामात्रस्यात्र सूचनाद् **रसानभिज्ञत्वं** सूचितं, तद् **व्रजस्त्रिय** इत्यादेः सङ्गतिं प्रदर्शयन्ति **पूर्वं प्रथमश्रवणमात्रेणे**त्यादिना, "तद् व्रजस्त्रिय आश्रुत्ये" त्यनेन प्रथमश्रवणे वर्णनार्थमुद्योग उक्तः, "तद् वर्णयितु"मित्यनेन स्मरवेगेन चित्तविक्षेपादशक्तिरुक्ता, ततो "बर्हापीड"मित्यनेन वर्णनशक्तिहेतुः सुधाप्रवेश उक्तः, तत "इति-वेणुरव" मित्यनेन परितः सुधागलनरूपं वर्णनमुक्तं, **व्रजस्त्रिय इति कार्यान्तराभावः** सूचित इति, व्रजसम्बन्धित्वेनाङ्गीकृतत्वाद् गुणगानातिरिक्तकार्याव इत्यर्थ; तथा च सेवासमये सैव क्रियते, वियोगावस्थायां तु गुणगानमितिविवेकः ॥ ६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'कीदृशस्य कृष्णस्य स्मरणं तासां मनसः क्षोभकं जातम् ?' इत्यपेक्षायां तत्स्वरूपमाह—बर्हापीडमिति । द्वितीयान्तानां पदानां 'बिभ्रत्' इत्यनेन सम्बन्धः । बर्हाणां मयूरपिच्छानां आपीडं शिरोभूषणं, नटवरवद्वपुः, कर्णयोः कर्णिकारं कर्णिकारपुष्पं, कनकवत् कपिशंपीतं वासः, वैजयन्तीं पञ्चवर्णपुष्वग्रथितां मालां च । अधरसुधया मुखवायुना वेणो रन्ध्रान् वंशीच्छिद्राणि पूरयन् वेणुं वादयन्नित्यर्थः । 'अधरसुधा' इत्यनेन नूनमधरसुधैव पूर्णाद्वेणोरुच्चलन्ती गीतवत् प्रसर्पितुमर्हतीति गीतस्यालौकिकत्वादित्युत्प्रेक्षासूचनम् । गोपानां वृन्दैः समूहैर्गीता कीर्तिर्यशो दैत्यवधस्वरक्षादिरूपा यस्य सः कृष्णः स्वपदैस्तत्रतत्राङ्कितैः रमणं रतिजनकं वृन्दारण्यं प्राविशत्।।५।।एवंभूतं कृष्णं तच्चरितं च स्मरन्त्यः स्मरवेगेन तं वर्णयितुमशक्ता अपि कतिचित्क्षणानन्तरं स्मरवेग उपशान्ते सति पुनर्लब्धाश्वासा वर्णयामासुरित्याशयेनाह—इतीति । 'त्वयापीदं वक्ष्यमाणं सावधानतया श्रोतव्यम्' इति सूचयन् सम्बोधयति—राजन्निति । एवंभूतं सुधारूपेणोत्प्रेक्षितमलौकिकम्, अत एव सर्वभूतानां मनोहरं वेणुरवं व्रजे स्थिताः स्त्रियः श्रुत्वा ताः सर्वा एव पर्यायेण यथासम्भवं श्रीकृष्णस्वरूपमाधुर्यचरितादिकं वर्णयन्त्यो अभिरेभिरे पदे पदे परमानन्दमूर्तिं तं मनसा परिरब्धवत्यः ॥ ६ ॥

अन्वितार्थप्रकाशिका

मनःक्षोभहेतुं कृष्णं वर्णयति–बर्हापीडमिति ॥ द्वितीयान्तानां पदानां बिभ्रदित्यनेन संबन्धः । बर्हाणां मयूरपिच्छानाम् आपीडं शिरोभूषणं बिभ्रत् । बर्हस्यापीडं यत्रेति वतुर्विशेषणं वा । नटवर इव वपुः बिभ्रत् कर्णयोः कर्णिकारं पद्माभं पीतपुष्पं बिभ्रत् । एवमेव कदाचिद्दक्षिणे इति यौवनमत्ततोक्ता । कनकमिव कपिशं पीतं वासः बिभ्रत् वैजयन्तीं पञ्चवर्णपुष्पग्रथितां मालां च बिभ्रत् अधरसुधया मुखवायुना वेणोः रन्ध्रान् वंशीच्छिद्राणि पूरयन् वेणुं वादयन्नित्यर्थः । नूनमधरसुधा एव पूर्णाद्वेणोरुच्चलन्ती गीतवद्भाति इत्युत्प्रेक्षा सुधाशब्देन व्यज्यते । गोपानां वृन्दैः समूहैर्गीता कीर्तिर्यशो दैत्यवधस्वरक्षादिरूपा यस्य सः कृष्णः स्वपदैस्तत्र तत्राङ्कितैः रमणं रम्यं वृन्दारण्यं प्राविशत् ॥ ५ ॥ इतीति ॥ हे राजन् ! ततः स्वरवैयग्र्ये किंचिच्छान्ते एवंभूतं सर्वभूतानां मनोहरं वेणुरवं व्रजे स्थिताः सर्वाः स्त्रियः श्रुत्वा श्रीकृष्णगुणान्वर्णयन्त्यः अभिरेभिरे । पदे पदे परमानन्दमूर्तिं तं मनसा परिरब्धवत्यः । यद्वा । भगवद्ध्यानानन्दव्याप्ताः मिथः परिरेभिरे तन्मयतयाऽन्योन्यं कृष्णं मत्वा वा ॥ ६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वमनसि स्मरणेन गोपीभिः प्रत्यक्षं दृष्टं कृष्णं वर्णयन् शुकः प्राह बर्होतिबर्हः मयूरपिच्छमय आपीडः शिरोभूषणं यस्मिस्तत् । नटोनर्त्तकस्तद्वत्वरं श्रेष्ठं वपुर्विभ्रत् बर्हमयं मयूरपिच्छमयमापीडं बिभ्रदिति वा बिभ्रदिति प्रतिवाक्यं योज्यं कर्णिकारं कर्णिकापुष्पगुच्छं कनकवत्कपिशं पीतवस्त्रं वैजयंतीं पंचवर्णपुष्परचितां । अधरसुधया अधराऽमृतेन वेणोः रंध्रान् रंध्राणि छिद्राणि पूरयन् गोपवृंदैः गीतकीर्त्तिः निक्षिप्तैः स्वपदैः रमणां प्रीतिप्रदं वृंदावनं प्राविशत् ॥ ५ ॥ अथ चित्तं समाधाय वर्णनं कुर्वंत्य इत्याहुः इतीति दिव्यदृष्टिं प्राप्ताः व्रजस्त्रियः श्रुत्वा परस्परं वर्णयंत्यः अनवधिकातिशयानंदजनकं कृष्णमभिरेभिरे मनसा आलिंगयंत्यः ॥६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कीदृशं कृष्णचेष्टितमित्यत्राह ॥ बर्हेति ॥ नटेषु वरः तस्य वपुरिव वपुर्यस्य स कृष्णः, स्वशिरसीति शेषः । बर्हाणि मयूरपिच्छानि तन्मय आपीडः शिरोभूषणं तं, बिभ्रत्, कर्णयोः श्रवणयोः, कर्णिकारं द्रुमोत्पलकुसुमं, 'अथ द्रुमोत्पलः कर्णिकारः' इत्यमरः । कर्णिकारकुसुमावतंसमित्यर्थः । बिभ्रत्, धन्वन्तरिनिघण्टौ आरग्वधपर्यायः कर्णिकार उक्तः । केचित्तु कर्णिकारं लाङ्गलीकुसुममित्याहुः । कनककपिशं सुवर्णसमपीतवर्णं, वासः पीताम्बरमित्यर्थः । बिभ्रत्, वैजयन्तीं श्वेतरक्तपीतनीलकृष्णवर्णकुसुमरचितां मालां च बिभ्रत्, 'आपादलम्बिनी माला वैजयन्ती प्रकीर्त्तिता' इत्यन्ये । पञ्चवर्णरत्नरचिता माला वैजयन्तीत्यपरे । वेणोर्वंश्या,

रन्ध्रान् अधरसुधया पूरयन्, अधरोपरि वेणुं निधाय वायुपूरणेन तं निनादयन्नित्यर्थः। रन्ध्रशब्दस्य कोशेषु क्लीबत्वेन प्रतीयमानत्वेऽपि ना ननाऽस्त्रियामित्यादिविशेषानुपादानात्तस्य प्रायिकत्वतोऽन्यलिङ्गेऽपि सत्त्वेक्षयात्र पुंस्त्वमुक्तम्। गोपवृन्दैः, गीता कीर्त्तिर्यस्य सः, एवंविधः सन्, स्वपादरमणमूर्द्ध्वरेखादिषोडशलक्ष्मयुतस्वपादन्यासरमणीयतोपेतं, वृन्दारण्यं वृन्दावनं, प्राविशत्। उक्तवेषं श्रीकृष्णं बर्हापीडादिधारणवेणुरन्ध्रपूरणवृन्दावनप्रवेशात्मकं तच्चेष्टितं च स्मरन्त्यः सत्यः गोप्यः वर्णयितुं नाशकन्निति पूर्वेणान्वयः॥ ५॥ एवं तावद्वर्णयितुमशक्तास्ततः शनैर्लब्धाश्वासा वर्णयामासुरित्याह॥ इतीति॥ हे राजन्, इतीत्थं, सर्वभूतमनोहरं वेणुरवं श्रुत्वा, सर्वाः व्रजस्त्रियः, वर्णयन्त्यः कृष्णं तच्चेष्टितं च वर्णयन्त्यः सत्यः, अभिरेभिरे रमितवत्यः। पाठान्तरे पदे पदे परमानन्दमूर्त्तिं श्रीकृष्णं परिरब्धवत्यः। वर्णयितुं बुद्धौ संनिधापितं मन्मथं भगवन्तं बुद्धया आलिङ्गितवत्य इत्यर्थः॥ ६॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

बर्हापीडमिति : १०.२१.५.

सच्चित्सुखात्मकमनन्तमगाधसारं रूपं विभोस्तदवगत्य सदैव चित्ते।
ध्यानार्थमाकृतिविशेषमशेषसौख्यप्रेमास्पदं कलयते कृतगः क्षमं तत्॥ १४॥

कृष्णप्रिया

वे मन ही मन देखने लगी कि श्रीकृष्ण ग्वालबालों के साथ वृन्दावन में प्रवेश कर रहे हैं उनके सिरपर मयूर पिच्छ है और कानों पर कनेर के पीले पीले पुष्प शरीर पर सुनहरा पीताम्बर और गले में पांच प्रकार के सुगन्धित पुष्पों की बनी वैजयन्ती माला है. रंगमञ्चपर अभिनय करते हुए श्रेष्ठ नटकासा स्याही सुन्दर वेष है, वासुरी के छिद्रों को वे अपने अधरामृत से भर रहे हैं, उनके पीछे-पीछे ग्वालबाल उनकी लोकपावन कीर्ति का गान कर रहे हैं, इस प्रकार वैकुण्ठ से भी श्रेष्ठ वह वृन्दावन धाम उनके चरण चिह्नों से और भी रमणीय बन गया है॥ ५॥ परीक्षित! वह वंशीध्वनि जड़-चेतन समस्त भूतों का मन चुरा लेती है, गोपियों ने उसे सुना और सुनकर उसका वर्णन करने लगीं वर्णन करते-करते वे तन्मय हो गयीं और श्रीकृष्ण को पाकर आलिङ्गन करने लगी॥ ६॥

गोप्य ऊचुः

अक्षण्वतां फलमिदं न परं विदामः सख्यः [1]पशूननु विवेशयतोर्वयस्यैः।
वक्त्रं व्रजेशसुतयोरनुवेणु जुष्टं [2]यैर्वा निपीतमनुरक्तकटाक्षमोक्षम्॥ ७॥
चूतप्रवालबर्हस्तबकोत्पलाब्ज[3]मालानुपृक्तपरिधानविचित्रवेषौ।
मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रङ्गे यथा नटवरौ क्व च गायमानौ॥ ८॥

कर्दमक्षमा

अन्वयः—हे सख्यः अनुवेणु अनुरक्तकटाक्षमोक्षम् वयस्यैः पशून् अनुविवेशयतोः व्रजेशसुतयोः वक्त्रं यैः निपीतम् वा इदम् अक्षण्वतां फलं परं न विदामः॥ ७॥ चूतप्रवालबर्हस्तबकोत्पलाब्जमालाऽनुपृक्तपरिधानविचित्रवेषौ पशुपालगोष्ठ्यां मध्ये गायमानौ अलंविरेजतुः यथा रङ्गे गायमानौ नटवरौ (राजेते)॥ ८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनुवर्णनमेवाह अक्षण्वतामिति त्रयोदशभिः। अक्षण्वतां चक्षुष्मतां तावदिदमेव फलं प्रियदर्शनं परमन्यन्न विदाम्नो न विद्म इत्यर्थः। तच्च फलं सखिभिः सह पशून्वनं प्रवेशयतो रामकृष्णोर्वक्त्रं यैर्निपीतं सादरं दृष्टं तैरेव जुष्टं सेवितं नान्यैरित्यर्थः। कथंभूतं वक्त्रम्। अनुवेणु वेणुमनुवर्तमानं तं वादयत्। तथाऽनुरक्तकटाक्षमोक्षं स्निग्धकटाक्षविसर्गम्। अथ वा यैर्निपीतं तयोर्वक्त्रं तैर्यज्जुष्टमिदमेवाक्षण्वतामक्ष्णोः फलमिति॥ ७॥ अन्या आहुः। चूतेति। चूतप्रवालादीनां चित्राभिर्मालाभिरनुपृक्ते ईषदंतरांतरसंयुक्ते परिधाने नीलपीतांबरे ताभ्यां विचित्रो वेषो ययोस्तौ क्व च कदाचित्पशुपालगोष्ठ्यां गोपालसभायां मध्ये अलमत्यर्थं विरेजतुः। अहो गोपलानां पुण्यमिति भावः॥ ८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तावत् मुख्यम्। इत्यर्थ इति। वेत्तेरादादिकत्वादार्षः शबादिरित्यर्थः। वक्त्रम् मुखम्। यैः पुरुषैः। तैरेव जुष्टम् नेत्रफलं प्राप्तमिति। इत्यर्थ इति। अन्येषां निष्फलनेत्रत्वमिति भावः। "बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो ये"

---

१. पशूनभि–विज.। २. यैस्थैनिपीत–वीर.; यैर्यैर्निपीत–विज.। ३. युक्त–वीर.; रक्त–विज.।

इत्युक्तेः । ननु मनुष्यास्तु भगवद्गुणश्रवणादिद्वारा कर्णाद्यंगैरपि कृतार्था भवंति किमेकेन चक्षुषेति चेत्तदा प्रकारांतरमाह—अथ वेति । यैश्चक्षुर्भिर्निपीतं तैरेव चक्षुर्भिर्यद्दर्शनं जुष्टं प्राप्तम् । इदमेव कृष्णदर्शनमेव । नेत्रवतां नेत्रयोः साफल्यं न तु प्रियपुत्रादिदर्शनमपि नेत्रयोः साफल्यकरमिति भावः । व्रजेशसुतयोरिति । 'तातं भवंतं मन्वानः' इति वसुदेवोक्तेः "रामोभिवाद्य पितरौ" इति श्रीशुकोक्तेश्च बलदेवस्यापि व्रजेशसुतत्व व्रजे प्रसिद्धमेव । अभीप्सितोर्थस्त्वयम्—व्रजेशसुतयोर्मध्येऽनुपश्चाद्वर्त्तिनो यस्य वक्त्रं वेणुजुष्टं तत् यैर्वेति । वाशब्देन यैर्जुष्टं दृष्टं श्रुतमाघ्रातं यैर्वा नितरामतिशयेन पीतम् । 'वै' इति पाठे वै निश्चितमेव लज्जाधैर्य्ये अपि त्यक्त्वा निपोतं तेषामेवाक्षवतां जनानां चक्षुरादींद्रियाणां साफल्यं नान्येषाम्—तदद्य दीयतां कुलधर्मभयलज्जादिभ्यो जलांजलिरिति भावः । ननु दर्शनश्रवणमस्माकं कुलवतीनां संभवतु नाम वक्त्रकर्मकं निपानं तु ह्रीमतीनां कथं संभवेत्तत्राहुः—अनुरक्तेषु जनेषु कटाक्षस्य मोक्षो येन तत्तथा संधाय, कटाक्षरो मुच्यते यथा तदाघातेन विह्वलीभूय लज्जाधैर्यादिकमपि विस्मृत्य तत्रास्यथेति भावः ॥ ७ ॥ अन्याः भगवत्तत्त्वज्ञाः । चूतप्रवालम् आम्रपत्रम्, बर्हम् मयूरपिच्छम्, स्तबकः पुष्पगुच्छः, उत्पलाब्जा प्रसिद्धौ । रङ्गे नटादीनां नर्तनस्थले "रंगं स्थले नाट्यादियोग्यभूमिके । सीसके चापि कार्पासे पुंभूम्नि नीवृदंतरे ॥" इति धरणिः । गाये गाने मानः सर्वैर्दत्त आदरो ययोस्तौ । यद्वा—गाये गाने मानो गर्वो ययोस्तौ, स चास्मत्तुल्यस्त्रिलोक्यामपि गायको नास्ति के यूयं वराका गोपा इति प्रकारः । इति भाव इति । यो योगिनां ध्यानपथेनाप्नोति स सर्वेश्वरः । गोपेषु तदानुकूल्येनास्त इत्यद्भुतं गोपादृष्टमिति तात्पर्यम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीगोप्य ऊचुरिति तेषामसम्मतं लक्ष्यते अनुवर्णनमेवाहेति लिखितत्वात् पुनरुक्तत्वेन एकत्वायोग्यत्वेन च तदनर्हात् किन्तु सपाठः सर्वत्रैव दृश्यते "यासां बुद्ध्येत वागर्थो यासामेव प्रसादतः । गोपीः प्रपद्ये ताः याभिः सगम्भीराशयोजितः" अथ पूर्वोक्तानुसारेणाऽवहित्थया रामसहितमेव वर्णयन्त्योपि स्वभावव्यञ्जिजनार्थविशेषेण तथा न शेकुरिति दर्शयति—अक्षण्वतामिति । अत्र तेषां व्याख्या सङ्गतिः क्रियते चक्षुष्मतां तावदिदमेव फलं विद्मः परमन्यत् प्रियदर्शनमपि फलं न विद्मः नन्विदमिति किन्तत्राह–तच्चेत्यादि । निपीतमनुभूतं जुष्टमास्वादितम् अथवेति यैर्निपीतं तयोर्वक्त्रं तैर्यज्जुष्टं तदिदमेव तेषामक्ष्णोः फलमित्यर्थः । उभयत्र तेषामेनास्वादविषयस्तदिति कथमन्ये बोधयितुं शक्यन्त इति भावः । किञ्च, विशेषतया निर्देशमकृत्वा प्रथममिदं तथैव निर्देशः सुगोप्यत्वेन सहसा नामप्रकाशनायोग्यत्वात् । यद्वा, प्रेमभरोदयवैवश्येन सद्यस्तद्विशेषनिर्देशाशक्तेः परमन्यत् सर्वं पशूनित्यादिना तथा तस्य चान्यैः सहितस्य अन्यदा अन्यथा वा दर्शनमपीति विवक्षितं नच्चाक्ष्णोः फलं न विद्म वयमिति अन्ये जनास्त्वन्यत् जानन्तु नामेत्यर्थः । एषासोल्लुण्ठोक्तिः अतोऽस्माकं चक्षुस्साफल्यं न किमपि वृत्तं तदानीं तथा तद्दर्शनाभावादित्यर्थः । यद्यपि यत्र तत्र यदा तदा येन तेन प्रकारेण तद्वक्त्रजोषणमेव चक्षुःफलं व्रजान्तस्तु तासां तत् सुष्ठुफलत्येव तथापि वनविहारे तथा तद्दर्शनौत्सुक्येन तथोक्तम् अयमेव हि निर्भरप्रेम्णोऽतृप्त्यार्त्तिविशेषलक्षणः स्वभावः हे सख्यः ! इति युष्माभिरेतन्नितरां ज्ञायत एवेति भावः । अनु पश्चात् स्थित्वा वनाद्वनान्तरं वा विशेषेण प्रवेशेन सङ्केतमधुरशब्दादिना प्रवेशयतोः व्रजेशौ श्रीनन्दवसुदेवौ "वसुदेव इति ख्यातौ गोषु तिष्ठति भूतले" इत्यादि श्रीहरिवंशोक्तानुसारेण वसुदेवस्यामि बहुलगोपसमृद्धे व्रजेशो गोपराजः श्रीनन्द एव तस्य सुतयोः श्रीबलदेवस्यापि तत्सुतत्वव्यवहारो दर्शित एव "भ्रातर्मम सुत" इत्यादौ "तातं भवन्तं मन्वानः" इति श्रीवसुदेवोक्तेः अत एव तस्य पुनर्व्रजागमने "रामोऽभिवाद्य पितरावाशीर्भिरभिनन्दितः" इति वक्ष्यते अथ "स्मरन्त्यः कृष्णचेष्टितम्" इति दर्शितम् स्वभावव्यञ्जितार्थो यथा व्रजेशसुतयोर्मध्ये अनुपश्चात् वेणुजुष्टं वक्त्रं यैर्निपीतं श्रीकृष्णस्य वक्त्रमेव वेणुजुष्टतया पश्चात् भावेन कनिष्ठतया च प्रसिद्धम् अत एवैकत्वं नितरां पीतमित्यनेन वक्त्रस्य सुधामयचन्द्ररूपकत्वं ध्वन्यते वै प्रसिद्धं यद्वा छन्दसि "व्यवहिताश्च" (१।४।८२) इति न्यायेन अनुनिरन्तरं वेणुना जुष्ठु सेवितमिति अथवा वै शब्दः समुच्चये "मानिनामनुतापं वै" इति वत् वेति पाठोपि क्वचित् यैर्निपीतं सादरं सम्यक् दृष्टं तथा स्निग्धकटाक्षमोक्षं यथा स्यात् तथा जुष्टं च, यद्वा, अनुरक्तजनानां युष्माकं कटाक्षमोक्षो यस्मिन् (किवा अनुरक्तजनेषु कटाक्षमोक्षो यस्मिन्) किंवा अनुरक्तजनेषु कटाक्षमोक्षो यस्य तदिति सेवायां सुखविशेषसम्पत्तिहेतुः तेषां अक्षण्वताम् इन्द्रियवताम् इदं निपानं जोषणं चैव फलं सर्वेन्द्रियसाफल्यं विद्मः नचान्यत् किमपि तन्निपानादिरूपस्य परमफलरूपतया सर्वेन्द्रियकर्मसाफल्यसिद्धेः अयमपि निगूढोऽभिप्रायः इदमेव परं केवलं फलं न विद्मः किन्तत् जुष्टं प्रीत्या दृष्टं यत् तर्हि किमन्यत् फलं तदाहुः यैरधरामृतपानद्वारा निपीतं तेषां यन्निपानरूपं फलम् इदमेवेति । यद्वा, वक्त्रञ्जुष्टं निपीतं यत् इदमेव चक्षष्मतां चक्षुः, फलं त्वर्थ वैशब्दः यैस्तु जनैः रसनेन्द्रियैर्वा निपीतं तेषां फलं किं वक्तव्यमिति शेषः । तत्स्मरणमात्रेण बाष्परुद्धकण्ठतया व्यक्तं वक्तुमशक्तेः किंवा विदग्धजनवर्गपूज्यपादानां तासां प्रेमोक्तिगाम्भीर्यस्यैव तादृशस्वभावात् अन्यत् समानम् ॥ ७ ॥ तदेवमप्यर्थान्तरेण निजभावव्यक्ति वितर्क्य पुनर्बाढावधानेन द्वितीयपद्ये तामपलेपुः पुनस्तु परमस्मरवेगेन तृतीयेन शेकुः चतुर्थादौ न किञ्चिदपि शेकुरित्याह—पञ्चभिः । चूतस्य प्रवालो नवपल्लवः स्तबकः पुष्पगुच्छः तत्र चूतपल्लवो बर्हं स्तबकश्च शीर्षिण उत्पलं तदन्तःकोशः कर्णयोः अब्ज लीलाकमलं दक्षिणकरे एतानि च मालानुपृक्तपरिधानानि च यानि तैर्विचित्रवेषौ पशुपालानां गोष्ठ्यां मण्डल्यां तत्रापि मध्ये अतो विशेषेण तेषु पृथक् पृथक् तत्तच्छोभाप्रकटनेन किंवा विविधं रेजतुः शुशुभाते

यथा नटवरौ रङ्गे विराजेते इत्यादिदृष्टान्तेन तयोर्नृत्यादिकं स्वाच्छन्द्यसुखादिकञ्च गोपानामपि तादृशवेषवैदग्ध्यादिकं वाद्यादिपरत्वं च ध्वन्यते अन्यथा नृत्यादिशोभाया असम्पत्तेः क्वच कदाचित इति क्रीडावशेन सदामध्येऽनवस्थानात् अलमिति व्रजमध्ये तु विविधसङ्कोचेन तादृशगानाद्यभावाद्विराजमानतासम्पत्तेः। अथवा अत्र पद्यपञ्चके सर्वासामेव तासां वाक्यत्वेन क्रमतः सर्वश्लोकानां मिथः सम्बन्धः कार्यः तथा हि अतो गोपानामेव तेषां चक्षुःसाफल्यं तदानीं तथा तद्वक्त्रदर्शनादिति पूर्वश्लोकाभिप्रायः न केवलं तेषां तद्दर्शनमात्र वनमध्ये वन्यविचित्रवेषयोस्तयोर्निजमण्डलीमध्ये स्वाच्छन्द्येन नृत्यगीताद्यनुभवश्च सुखं स्यादित्याहुः—चूतेति। गायमानौ गायन्तौ यद्वा गायेन गानेन मानः पूजा ययोः सर्वतो विशिष्टगानात् क्वचिदित्यस्यात्रैव वान्वयः। नृत्याद्यावेशेन सदा गानाऽकरणात् यद्वा कदाचिद्गायमाने मानः आवाभ्यां समो युष्मासु को गायकोऽस्ति अत्रागत्य हन्त गायत्वित्यादिप्रकारो गर्वो ययोस्तौ अयं च क्रीडामाधुरीविशेषः अतो गोपा एव धन्याः वयं तु नितरामधन्या एव तेन प्रकारेण तयोरस्मन्मध्येऽत्र लोकभयादिना स्वच्छन्दावस्थानाद्यसिद्धेः एवमग्रेपि वाक्यशेष ऊह्यः तद्धेतुर्लिखित एव ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीगोप्य ऊचुरिति तेषां सम्मतं लक्ष्यते, 'अनुवर्णनमेवाह' इति लिखितत्वात्, अन्यथा गोप्य ऊचुरित्यनन्तं वर्त्तमानस्य अक्षण्वतामित्यादेराभाषलिखने आहेति लेखायोग्यत्वात्, किन्तु तत् पाठः सर्वत्रैव दृश्यते।

यासां बुद्धयेत वागर्थो यासामेव प्रसादतः। गोपीः प्रपद्ये ता याभिः सगम्भीराशयोजितः॥

इदमित्यस्यादौ निर्द्देशो वक्ष्यमाणार्थस्य परमफलरूप सुगोप्यत्वेन सहसा प्राक् प्रकाशनायोग्यत्वात् यद्वा हृदयमाक्रान्ते तस्मिन् प्रेमभरोदयवैवश्येन सद्यस्तस्य विशेषनिर्देशाशक्तेः परं श्रीवृन्दावनादिपरमाश्चर्य्यदर्शनं तस्य चान्यैः सहितस्यान्यदान्यथा वा दर्शनमक्ष्णोः फलं न विद्मो वयम्, अन्ये जनास्त्वन्यज् जानन्तु नामेत्यर्थः। एषां सोल्लुण्ठोक्तिः—अतोऽस्माकं चक्षुसाफल्यं न किमपि वृत्तम्, तदानीं तथा दर्शनाभावादिति भावः। यद्यपि यत्र तत्र यदा तदा येन तेन प्रकारेण तद्वक्त्रनिपानमेव चक्षुः फलम्, व्रजान्तस्तु तासां दद्दर्शनं सुष्ठु फलत्येव, तथापि वनविहारे तथा तद्दर्शनोत्सुक्येन तथोक्तम्। अयमेव हि निर्भर-प्रेम्णाऽतृप्त्यार्त्तिविशेषलक्षणस्वभावः, हे सख्यः! इति युष्माभिरेतन्नितरां ज्ञायत एवेति भावः। अनु पश्चात् स्थित्वा, यद्वा, वनात् वनान्तरं विशेषेण प्रवेशन संकेतमधुरशब्दादिना प्रवेशयतोः, व्रजेशौ श्रीनन्द-वसुदेवौ 'वसुदेव इति ख्यातो गोषु तिष्ठति भूतले' इत्यादि श्रीहरिवंशोक्तानुसारेण श्रीबलदेवस्यापि तत्सुतत्वम्, श्रीकृष्णसाहचर्य्यतः पुष्टपुत्रत्वाद्वा। यद्यपि श्रीकृष्णस्यैव वेणुगीतादिवर्णनप्रसंगेऽत्राग्रजस्योपयोगो न स्यात्, तथापि तत्साहित्येन श्रीकृष्णस्य शोभाविशेषविवक्षया, किंवा श्रीकृष्णविषयकनिजभावविशेषस्य स्वाभाविक-स्वलज्जयाच्छादनाय साधारण्येन द्वयोरप्युक्तिः। एवमग्रेऽपि तयोर्द्वित्वेनापि वक्त्रस्यैकत्वं नित्ययुगलत्वादिना वर्त्तमानानामप्यगानां जात्याद्यपेक्षया एकत्वादिनापि स्वत एव युगलत्वादिप्राप्तेः। इदञ्च पूर्व्वमपि विवृतमस्ति 'प्रपिबतोः स्म मुखम्' इत्यत्र; यद्वा, व्रजेशसुतयोर्मध्ये वेणुजुष्टं वक्त्रं यैर्निपीतम्, श्रीकृष्णस्य वक्त्रमेव वेणुजुष्टतया प्रसिद्धम्, नितरां पीतमित्यनेन वक्त्रस्य सुधामयचन्द्ररूपकत्वं ध्वन्यते। वै प्रसिद्धम्। अन्यत्तैर्व्याख्यातम्। यद्वा, छन्दसि (पाणिनि-सू. १।४।८२) 'व्यवहिताश्च' इति न्यायेन 'परि ये चरन्ति' इत्यादिवत् अनु निरन्तरं वेणुना जुष्टं सेवितमिति, अनुरूपेण वेणुना जुष्टमिति वा, अथवा वै-शब्दः समुच्चये, 'मानिनामनुतापं वै' इतिवत्; वेति पाठोऽपि क्वचित्। यैर्निपीतं सादरं सम्यक् जुष्टं तत् स्निग्धकटाक्षमोक्षं यथा स्यात्तथा जुष्टं च चामरादिबीजनांगसम्मार्ज्जनादिना च सेवितम्। यद्वा अनुरक्तजनानां युष्माकं कटाक्षमोक्षो यस्मिन्, किंवा, अनुरक्तः कटाक्षमोक्षो यस्य तदिति सेवायां सुखविशेषसम्पत्तिहेतुः। तेषामक्षण्वतामिन्द्रियवतामिदं निपानं जोषणं चैव फलं सर्व्वेन्द्रियसाफल्यं विद्मः, न चान्यत् किमपि। तन्निपानेन दृष्टेः साफल्येन साक्षात्कारस्य च परमफलरूपतया सर्व्वेन्द्रियकर्म्मसाफल्यसिद्धेः। विशेषतश्च वीजनस्पर्शनादिसेवया त्वगादिनामपि नितरां साफल्यसुसिद्धेः सर्व्वेन्द्रियाणामिव साफल्यं सिद्धम्। अथवा, इदमेव परं परमं केवलं वा फलं न विद्मः; किं तत् ? जुष्टं प्रीत्या दृष्टं यत्। तर्हि किं परं फलम् ? तदाहुः—यैरधरामृतपानरूपं फलम्; इदमेब परं फलं विद्म इत्यर्थः, (भा. ११। ८।२१) 'जितं सर्व्वं जिते रसे' इत्यादिन्यायेन मुख्यस्य रसनेन्द्रियस्य तन्निपानेन साफल्यसिद्ध्या, विशेषतश्च सर्व्वफलवर्गपूज्यतदधारामृतपान-सम्पत्त्या सर्व्वेन्द्रियाणामेव साफल्यस्य स्वतः सुसिद्धेः। अतस्तदानीमस्माकं तदप्राप्त्या सर्व्वमेव व्यर्थमिति भावः। एतच्चात्यन्तोत्कण्ठयोक्तम्। यद्वा, वक्त्रं जुष्टं यत्, इदमेव चक्षुष्मतां चक्षुःफलम्। त्वर्थे वै-शब्दः, यैस्तु जन रसनेन्द्रियैर्वा निपीतं तेषां फलं किं वक्तव्यमिति शेषः,—तत्स्मरणमात्रेण बाष्परुद्धकण्ठतया व्यक्तं वक्तुमशक्तेः, किंवा, विदग्धजनवर्गपूज्यपादानां तासां प्रेमोक्तिगाम्भीर्य्यस्यैव तादृशस्वभावात्। अन्यत् समानम् ॥८॥ चूतस्य प्रवालो नवपल्लवः, स्तबकः पुष्पगुच्छः, पशुपालानां गोष्ठ्यां मण्डल्यां तत्रापि मध्ये, अतो विशेषेण तेषु पृथक् पृथक् तत्तच्छोभाप्रकटनेन, किंवा विविधं रेजतुः शुशुभाते; यथा नटवरौ रंगे विराजेते इति दृष्टान्तेन तयोर्नृत्यादिकं स्वाच्छन्द्यसुखादिपरत्वञ्च ध्वन्यते; अन्यथा नृत्यादिशोभाया असम्पत्तेः। क्व च कदाचिदिति क्रीड़ावशेन सदा मध्येऽनवस्थानात्; अलमिति कदाचित् पित्रोरस्माकमपि वा अन्तिके तस्यावस्थितावपि विविध-संकोचेन तादृशगानाद्यभावाद्विराजमानसम्पत्तेः। अन्यत्तैर्व्यञ्जितम्; यद्वा, प्रतिश्लोकं वक्त्रीभेदमकल्पयित्वा गोष्ठीभेदेन श्लोकानां संगतिः,

क्रियते, तत्राद्यैः षड्भिरेकस्या गोष्ठया वाक्यम्, अन्यथा सप्तमश्लोके वर्ण्याभ्यो गोभ्यः षष्ठश्लोकोक्तदेवीनां महात्म्यापत्त्या विवक्षितासिद्धिः। यद्वा, गोष्ठीभेदमप्यकल्पयित्वा सर्व्वासामेव तासां वाक्यत्वेनाक्रमतः सर्व्वश्लोकानां मिथः सम्बन्धः कार्य्यः। तथा हि, अतो गोपानामेव तेषां चक्षुःसाफल्यं तदानीं तथा तद्वक्त्रदर्शनादिति पूर्व्वश्लोकाभिप्रायः। न केवलं तेषां तद्दर्शनमात्रम्, वनमध्ये वन्यविचित्रवेषयोस्तयोर्निजमण्डलीमध्ये स्वाच्छन्द्येन नृत्यगीताद्यनुभवश्च सुखं स्यादित्याहुः–चूतेति। गायमानो वेणुनैव गायन्तौ यद्वा, गायेन गानेन मानः पूजा ययोः, सर्व्वतो विशिष्टगानात्, क्वचिदित्यस्यात्रैव वान्वयः। नृत्यादिश्रमेण सदा गानाकरणात्, यद्वा, कदाचिद् गाये गाने मानः, 'अवाभ्यां समो युष्मासु को गायकोऽस्ति, अत्रागत्य हन्त गायतु' इत्यादिप्रकारो गर्व्वो ययोस्तौ; अयं च क्रीड़ामाधुरीविशेषः। अतो गोपा एव धन्या वयन्तु नितरामधन्या एव, तेन प्रकारेण तयोरस्मन्मध्येऽत्र लोकभयादिनाऽसंकोचतोऽवस्थानाद्यसिद्धेः। एवमग्रेऽपि वाक्यशेष ऊह्यः तद्धेतुर्लिखित एव॥ ८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अक्षण्वतां चक्षुष्मताम्॥ ७–८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

वर्णनामेवाह—अक्षण्वतामित्यादिना यावदध्यायसमाप्ति। इतीत्यस्य वक्ष्यमाणप्रकारेणेतिवाऽर्थः तदा तमेव प्रकारमक्षण्वतामित्यादिना दर्शयति; हे सख्यः चक्षुष्मतां जनानां चक्षुषामिदमेव फलमन्यत्तु न विद्मः, किं तत्? व्रजेशस्य नन्दस्य सुतयोरामकृष्णयोर्वक्त्रं मुखं यैर्नितरां पीतमनुभूतं दृष्टमिति यावत् तदेतत् यैर्वा निपीतमिति पाठः यैस्तैर्निपीतमिति च पाठो दृश्यते तदा यैश्चक्षुर्भिः साधनैस्तैरक्षण्वद्भिः कर्तृभिर्निपीतमित्येतदर्थः। कथम्भूतयोर्वयस्यैः समानवयस्कैः गोपैः सह पशूननुविवेशयतोः वनं प्रतिप्रवेशयतोः कथम्भूतं वक्त्रम्? अनुवेणु वेणुमनुवर्त्तमानं वेणुं वादयदित्यर्थः जुष्टं पश्यतां निरतिशयप्रीतिविषयमनुरक्तानां स्निग्धानां कटाक्षाणां मोक्षो विसर्गो यस्मिंस्तथाभूतम्॥ ७॥ अन्यास्त्वाहुः—चूतेति। एवमुत्तरत्रापि अत एव सर्वत्र वक्तृभेदान्नातीव सङ्गतिरपेक्षिता चूतपल्लवादीनां मालाभिरनुयुक्ते ईषदन्तरान्तरासंयुक्ते अनुपृक्तेति पाठे स एवार्थः परिधाने नीलपीताम्बरे ताभ्यां विचित्रौ वेषौ ययोस्तौ क्वच कदाचिद्गायमानौ गोपसभायां मध्ये नितरां विरेजतुः यथा रङ्गे नटश्रेष्ठौ तथा अहो पश्यतां गोपानां महद्भाग्यमिति भावः॥ ८॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गोपस्त्रीणां वर्णनप्रकारं दर्शयति—अक्षण्वतामित्यादिना। यैर्व्रजेशसुतयोः रामकृष्णयोर्वक्त्रं नितरां पीतं दृष्टिभिरिति शेषः। तेषां तेषामक्षण्वतां चक्षुष्मतां चक्षुषामिदं फल लाभं विदामो न परं नान्यत् फलम् अन्यस्य नरकदुःखफलहेतुत्वात् हे सख्यः! कीदृशयोर्वयस्यैः पशूनभिनिवेशयतोः अनुसन्ध्यं गाष्ठे इति शेषः अनुवेणोः पश्चाद्भागे जुष्टं चुम्बितम् अनुरक्तः स्निग्धः कटाक्षमोक्षो यस्मिस्तत्तथा॥ ७॥ चूतस्य प्रवालादिभिः अनुरक्तपरिधानेन विचित्रः नानाविधः वेषो ययोस्तौ तथा अनुरक्तम् अनुरागोपेतं पशुपालगोष्ठ्यां गोपगोष्ठ्यां मध्ये गवां समष्टिः संवार्ता गोष्ठ्यशाला च कथ्यत इत्युत्पलमाला क्वच क्वचित्स्थले गायमानौ तिष्ठत इति शेषः॥ ८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गोप्य ऊचुरिति न टीकासम्मतम् अनुवर्णनमाहेत्यत्र पुनरुक्त्यापातात् एकत्वायोग्यत्वाच्च॥ ७–८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

व्रजस्त्रियः सर्वा इति सर्वशब्दस्य सामान्यवचनत्वान्नात्र विरोधः; तदेव किमित्याह—अक्षण्वतामित्यादि। हे सख्य! इति समानवासनाः प्रति सम्बोधनम्। अक्षण्वतां चक्षुष्मतामिदं फलमिदमेव फलमिति भावः। न परं नान्यत्। कुतः विदामः? सर्वानुभव एव प्रमाणम्। किं तदित्याह—पशूनित्यादि। वयस्यैः सह पशूननुविविवेशयतोर्व्रजेशसुतयोर्वक्तुं यैर्निपीतम्, तयोरक्षिकरणकं वक्तुपानमेवाक्षिमतां फलमिति वाक्यार्थः। कीदृशम्? अनु अनुक्षणं वेणुना जुष्टं सेवितमिति। रामकृष्णयोरेव वात्सल्याद्द्विवचनेनोपपादनमिति। श्रीकृष्णे वनं गते सखिमातरोऽपि पुत्रादिकं विस्मृता बात्सल्यात्तावेव वेणुनादलीलापूर्वकं गाश्चारयन्तावनुस्मरन्त्या ऊचिरे। एवमनुरक्ताश्चानुवर्णयन्ति। तथाहि हे सख्यः! स्वजातीयाः प्रति सम्बोधनम्। व्रजेशसुतयोर्मध्ये अनुवेणुजुष्टं वक्तुं यैर्निपीतम्, तेषामक्षण्वतामिदं वेणुजुष्टवक्तुपानमेव फलम्। तासां रामे रत्यभावान्निर्धारणेन श्रीकृष्णविषयमात्ररतिमत्त्वं दर्शितम्। अनुगतवेणुजुष्टत्वेन कृष्णवक्त्रस्यैव प्रसिद्धः। एवमनुरक्तानां मध्ये ज्येष्ठ कनिष्ठभेदाद्या द्विधा अन्यांस्तासामेव मध्ये सखीभावेन कनिष्ठाभिमानित्यो राधानुचर्य एव सजातीयाभिरन्याभितीतोभयसंयोगलीलां वनगते कृष्णे तद्गतचित्ततया वर्णयन्ति उभयोः सख्यः। ननु विचित्रमिदमेव अक्षण्वतां फलमिति पूर्ववदेव। किं तदित्याह–व्रजेशसुतयोः, व्रजेशो नन्दः, व्रजेशो वृषभानुः व्रजेशश्च व्रजेशश्च व्रजेशावित्ये-

कशेषः, पुनः सुतश्च सुताच सुतौ पुनः षष्ठीतत्पुरुषः, यथासंख्यतया व्रजेशसुतयोरिति कृष्णराधयोर्वक्तुं यैर्निपीतम्; एकत्वं जातिविवक्षया। कीदृशम् ? अनुवेणु अनुगतोवेणुर्यत्रेति श्रीकृष्णमुखविशेषणम्; जुष्टं सेवितमर्थात् श्रीकृष्णेनैवेति श्रीराधावक्तृविशेषणमनुरक्तानां कटाक्षाणां मोक्षो यस्माद्द्वयोरेव विशेषणम्। कीदृशयोः ? पशुविवेशयतोः अन्योन्यवेषं प्रापयतोः, 'चादयोऽसत्त्वे' इति चादिमध्ये पशुशव्दपाठादसत्त्व इति पश्वादि व्यावर्च्य वेषमेवाभिधत्ते। पशुशब्दोऽव्ययो वेषरचनायां 'पशुर्नरगोमहिष्यादिषु' इत्यादि कोषान्तरम्, प्रयोगश्च 'क्रीडा यत्र प्रकरमकरी पाशुपाल्यं हि वृत्तिः' इति। लोके च पशुपालो वेषकारीति, वयसि भवं वयस्यं यशस्यादिवत्, लावण्यमिति यावत्; अनुरागविकार प्रतिवातैः करणे विशेषणे वा तृतीया ॥ ७ ॥ अन्या वत्सला एवोचुः—चूतप्रवालेत्यादि पशुपाल-गोष्ठ्यां तौ रामकृष्णौ विरेजतुरिति तच्छब्दोऽध्याहार्यः। कस्मिन् काविव ? रङ्गे नृत्यस्थले नटवराविव। कीदृशौ ? चूतेत्यादितुल्यम्, अलमत्यर्थम् ; यद्वा, पूर्ववद्राधा सहचर्यं एव तौ व्रजेशसुतौ, पूर्ववत् समासः कुत्र ? पशुपालगोष्ठ्यां पशुपाः पशुपाल्यो वेषकर्त्र्यः सहचर्यस्ता लातीति तथा, सा चासौ गोष्ठी चेति पुंवद्भावे पशुपालगोष्ठी तस्याम्। कस्मिन्। काविव ? नठवरौ नटनं नटः, नटे नृत्ये वरो नटवरः, नटवरा च नटवरश्च नटवरौ, ताविव, तुल्यमन्यत्। इदं तु राधायाः परोक्षमेव मन्तव्यम् ॥ ८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तत्र प्रथममेव श्री यशोदासहचर्यं एवाहु-अक्षण्वतामित्यादि द्वाभ्याम्। हे सख्यः ! अक्षण्वतां चक्षुष्मतामित्यर्थेच्छान्दसम्, अक्षिमतामिदमेव फलं विदामः नापरमित्यर्थः। तत् किम् ? तत्राह—वयस्यैः सह पशूननु विवेशयतोर्व्रजेशसुतयोः श्रीरामकृष्णयोः, रामस्यापि रोहिणी-सुतत्वे प्रसिद्धावपि नन्दसुतत्वं स्नेहतौल्योपचारात्। यैर्निपीतमित्यन्वयः। वक्त्रं विशिनष्टि—अनुवेणुजुष्टं वेणु लक्षीकृत्य पीतम्, अनुरक्तकटाक्षमोक्षमनुरक्तानां कटाक्षाणां मोक्षो यत्र अनुरक्तानां प्रियजनानां कटाक्षस्य मोक्षो यत्रेति वा। यद्वा, अनुरक्ताः प्रौढ़ा एवाहुः—हे सख्यः ! इदमेव अक्षण्वतां फलमिति पूर्ववत्। व्रजेश-सुतयोर्मध्ये अनुवेणु यद्वक्त्रं तद् यैर्निपीतम्, उभयन्तु दृश्यमेव, किन्तु वेणुयुक्तं मुखमेव पीयते, तत्रैवान्यास्तत्समानवासना आहुः—हे सख्यः ! सम्यगेवोक्तम्, किन्तु जुष्टं प्रियया सेवितम्, तथाविधा एवान्या आहुः—हे सख्यो युष्माभिरप्यतिसाधूक्तम्, किन्त्विदमप्युच्यताम्—अनुरक्तकटाक्षमोक्षम्, एवञ्चेत् सर्वं सम्पन्नमेव भवतीति भावः। अथवा श्रीराधायाः सहचर्य एव प्रथममाहुः—हे सख्यः। व्रजेशसुतयोर्वक्त्रं यैः पीतम् तदेव तेषामक्षिफलम्। व्रजेशश्च व्रजेशश्च व्रजेशौ श्रीकृष्ण-राधा-पितरौ स्थले स्थले दर्शनीयौ तयोः सुतश्च सुता च व्रजेश सुतौ श्रीकृष्णराधे, यथासंख्यबलादेकैकस्य सुतश्च सुता चेति नाशङ्कनीयम्, उभयोरेव उभयं वक्त्रं यैः पीतम् वक्त्रं पृथक् पृथक् विशिनष्टि—अनुवेणु अनुगतो वेणुर्यत्र तत्तया जुष्टं श्रीकृष्णेन स्वहस्त—लिखितपत्राङ्कुरादिना सेवितम्। तयोः कीदृशयोः ? वयसि भवैर्वयस्यैर्लावण्यैः पशून् पत्रावली-मकराङ्कुरान् अनु अन्योन्यं विशेषेणवेशयतोः प्रापयतोः। "पशुः पत्राङ्कुरे पुंसि पशुर्भूत गणेऽपि च। वेश्ममात्रेऽपि च पशु तथा चतुष्पदेऽपि च ॥" इति हारावली। तथा च—"क्रीड़ापत्रप्रकरमकरीपाशुपाला हि वृत्तिः।" लोकेऽपि पशुपाला वेशकर्त्तार इति श्रूयन्ते ॥ ७ ॥ ॥ चूतप्रवालेत्यादि। यथायोग्यं विचित्रवेशो ययोः। कुत्र ? पशुपाली या गोष्ठी सखिसभा तस्याम्, पशुरत्रापि वेशपर्यायः पुंवद्भावः स्तुल्याधिकरणत्वात्, क्व च गायमानौ गायन्तावित्यर्थः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वेणुनादमुधावृष्ट्या निष्क्रमय्योक्तिमाधुरीम्। यासां नः पाययामास कृष्णस्ता एव नो गतिः ॥

भोः सख्यो ! यूयमिह गृहनिगडे स्थित्वा विधात्रा दत्तानि चक्षुरादीन्द्रियाणि केवलं विफलीकुरुध्वे एव तदितोऽद्य वनं द्रुतमेव गत्वा किमप्यद्भुतं वस्तुदर्शनाद्यैरनुभवगोचरीकृत्य सफलजन्मानो भवतेत्याहुः, अक्षण्वतामित्यार्षम् अक्षिमतामक्ष्णामिदमेव फलं नतु परं विदामः विद्म इति अन्यमते अन्यद्भवतु नाम अस्मन्मते तु नान्यत्, किन्तत् ? व्रजेशसुतयोः रामकृष्णयोर्वक्त्रम् अनुकूलवेणुसेवितं यैर्निपीतमिति प्रकटोऽर्थः स्वीयभावगोपनार्थं एव यद्यस्मद्वचसि श्वश्रु ननान्दृप्रतिवेशिजनाः कर्णौ ददति तर्हि ददतु नाम का तत्र चिन्ता सर्वं एव व्रजवासिस्त्रीपुंसजनाः रामकृष्णयोर्वक्त्रमाधुर्य्यं यथा वर्णयन्ति तथा वयमपि वर्णयाम इति स्वाभिप्रायज्ञापनात् अत्र पशुपक्षिपर्य्यन्तानां सर्वप्राणिनामेव तद्वक्त्रमानन्दप्रदं केवलं दवीयसीनां युष्माकमेवं नेति व्यञ्जितं व्रजेशसुतयोरिति "तातं भवन्तं मन्वानः" इति वसुदेवोक्तेः "रामोऽभिवाद्य पितरौ" इति शुकोक्तेश्च बलदेवस्यापि व्रजेशसुतत्वं व्रजे प्रसिद्धमेव अभीप्सितोर्थस्त्वयं व्रजेशसुतयोर्मध्ये अनुपश्चाद्वर्तिनो यस्य वक्त्रं वेणुजुष्टं तत् यैर्वेति वाशब्देन यैर्दृष्टं स्पृष्टं श्रुतमाघ्रातं यैर्वा नितरामतिशयेन पीतं वै इति पाठे निश्चितमेव यैर्लज्जाधैर्य्ये अपि त्यक्त्वा निपीतं तेषामेवाक्षिमतां जनानां चक्षुरादीन्द्रियाणां साफल्यं नान्येषां तदद्य दीयतां कुलधर्मलज्जाभयधैर्य्यादिभ्यो जलाञ्जलिरिति भावः ननु, दर्शनश्रवणादिकमस्माकं कुलवतीनां सम्भवतु नाम वक्त्रकर्मकं निपानं तु ह्रीमतीनां कथं सम्भवेत्तत्राहुः, अनुरक्तेषु जनेषु कटाक्षस्य मोक्षो येन तद् तेन तथा सन्धाय कटाक्षशरो मुच्यते यथा तदाघातेन विह्वलीभूय लज्जाधैर्यादिकमपि विस्मृत्य तत्पास्यथेति भावः ॥ ७ ॥ एतादृशं विडम्बनं स्वस्य

कथं कुर्मस्तस्मात्तत्र न याम इति चेन्मैवम्, बलदेवसाहित्ये सति तत्रास्मज्जिगमिषाया अभावात् तन्न भविष्यत्यतो दूरतो वल्लिपल्लवरन्ध्रेणैव तस्य स्वरमणस्य सौन्दर्य्यामृतं गानामृतं चास्वाद्य नृत्यादिकं च दृष्ट्वा द्रुतमायास्याम इत्याहुः चूतस्य प्रवालो नवपल्लवं बर्हं च स्तबकः पुष्पगुच्छश्च चूडायाम् उत्पले तदन्तःकोषो कर्णयोः अब्जं लीलाकमलं दक्षिणकरे मालाश्च गले तथा अनुगुणतया पृक्तानि गात्रसंलग्नानि परिधानानि नाट्योचितरक्तपीतसितवासांसि च तैर्विचित्रो वेषो ययोस्तौ नटवराविति सखिषु गायकेषु वादकेषु नृत्यन्तौ क्वच कदाचिच्च गायमानौ ताच्छोल्ये शानच्। यद्वा, गाये गाने मानः सर्वैर्दत्त आदरो ययोस्तौ। यद्वा, गाये गाने मानो गर्वो ययोः स चास्मत्तुल्यस्त्रिलोक्यामपि गायको नास्ति के यूयं वराका इति प्रकारः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अनुवर्णनं दर्शयति–अक्षण्वतामित्यादिना। हे सख्यः! व्रजेशसुतयोः वयस्यैः सह पशून् वनमनुविवेशयतोः अनुवेणु वेणुमनुवर्तमानं वक्त्रं यैर्निपीतं तैरेव जुष्टं सेवितमिवमेवाक्षण्वतां चक्षुष्मतामक्ष्णोः फलम् परमन्यन्न विदामो न विद्मः कथम्भूतं वक्त्रम्? अनुरक्तकटाक्षमोक्षम् अनुरक्तानां स्निग्धानां कटाक्षाणां मोक्षो विसर्गो यस्मिन् तत् ॥ ७ ॥ अन्या आहुः—आम्रपल्लवादिनिर्मिताभिर्विचित्राभिर्मालाभिरनुपृक्ताभ्यामीषदन्तरान्तरतोयुक्ताभ्यां परिधानाभ्यां नीलपीतपटाभ्यां विचित्रो वेषो ययोस्तौ क्व च कदाचिद्गायमानौ वेणुनेति शेषः। पशुपालानां गोपालानां गोष्ठ्यां सभायां मध्ये अलमत्यर्थं विरेजतुः अहो पशुपालानां महद्भाग्यमित्यभिप्रायः ॥ ८ ॥

श्रीरामकृष्णकृता प्रेममञ्जरी

गोप्य ऊचुः—ताश्चैतास्तावद्द्विविधाः कान्तभावाः सख्यश्च आद्याश्च काश्चित्स्वीयाभिमानिन्यः काश्चित्परकीयाभिमानिन्यश्च ता अपि वामा दक्षिणाश्च पराः सख्याभिमानिन्यो दास्याभिमानिन्यश्च तत्रास्मिंस्त्रयोदशश्लोकात्मके महावाक्ये आद्यं श्लोकद्वयं द्वीतीयानां ततः परं पद्यद्वयं परकीयानाम् तत्रापि श्रुतिमुनिरूपा सुधन्याः स्मेति पद्यद्वयं मुनिरूपाणां ततः परं पद्यत्रयं श्रुतिरूपाणामिति अथ दृष्ट्वेत्यादिद्वयं सखीनां तदनन्तरं श्लोकद्वयं दास्याभिमानिनीनामिति विवेकः ॥ अथ वेणुगीतं व्याख्यायते ॥ अथ एव तामिति श्रीकृष्णस्य वनप्रस्थानानन्तरं निजनिजोदवसतिं प्राप्ताः कस्मिंश्चिद्विजनप्रदेशे समुपविष्टाः प्रियसखीपरिवेष्टिता विचेष्टिता इव स्थिताः तस्मिन्नेवावसरे वेणुध्वनिमाकर्ण्य प्रिया ध्वनिदत्तचित्ताः किञ्चिदुन्मिषितनयनाः पुरतः स्वैकधनान्परिजनानवलोक्य सानुशयमाहुः—हे सख्यः! चक्षुष्मतां तावदिदमेव फलं विद्मः सुगोप्यत्वात्प्रथममिदन्तया निर्देशप्रेमवैवश्याद्वा यैः वक्त्रं निपीतं जुष्टं वा पानस्यैकवारमप्यलं बुद्धिजनकत्वात्सेवनस्य पौनःपुन्यधर्मत्वात् जुष्टमिति यतिभावाक्रान्तत्वान्नन्दसुतयोरिति नोक्तं खेदातिआदरातिशयाद्वा अर्वाहृत्थायां द्विवचनम् यद्वा यत्तयोर्मध्येप्यनुवेणुवक्त्रं परं केवलं विद्मः यद्वा वयं तु विदाम एव नत्वस्माभिः पीतमिति दैन्यम् अल्पभाग्यत्वादस्माभिरनुभूतं यद्वा इदम् एतावदेव विद्मो वयस्यैश्चावृतयोस्तयोर्मध्ये चानुवेणुजुष्टं यद्वक्त्रं न परम् अन्यथा वक्त्रे इत्युच्येत कटाक्षमोक्षम् अनुरक्तेषु स्निग्धेषु तदैकपरेषु कटाक्षमात्रमपि मोक्षाधिकसुखप्रदं यस्य यस्मिन् वा तन्महति संघट्टेऽपि तत्पानेनातिचातुर्यम् कटाक्षस्वकर्त्तृकस्तत्कर्त्तृको वा तत्राद्यसाध्वसमान्विहाय चिरं वने स्थितमित्यादिरूपः द्वितीयसूचितेपि वेणुना सङ्केतेन प्रस्थिता गृह एव स्थिता इत्यादि यद्वा ननु भवतीभिर्व्याजान्तर्मुहुर्मुहुर्निपीयते किमेतावता अस्माकं चक्षुस्साफल्यमपि न वृत्तमिति भावः इदमक्ष्णोः फलं वयं न विदामः गुरुजनावरोधात् अन्ये जानन्तु नाम सामर्थ्यदैन्यं यद्वा अक्षाणीन्द्रियाणि इन्द्रियवतामिदं सुगोप्यमेव फलं यदलं वक्त्रमनुकटाक्षमोक्षं यथातथा निपीतं यद्वा साहङ्कारमाहुः इदमेव फलं यत्परमन्यत्तदतिरिक्तं सर्वमपि न विदामः तदेकावेशाद्द्वैधान्तरास्फूर्तेः यद्वा ज्ञानकर्मभेदेनेन्द्रियाणां द्वैविध्याज्ज्ञानेन्द्रियैर्निपानं रूपादेः कर्मेन्द्रियैश्च पोषणं तत्तदङ्ग सेवनमिति अस्माकं तु प्रथममपि यथावन्न सम्पद्यते विघ्नबाहुल्यात् विघ्नाश्च पशुवयस्यसम्मर्द्दादयः अत एव गा इति वक्तव्ये पशूनित्युक्तं परदुःखानभिज्ञत्वेन यद्वा सजातीयेनैव सजातीयहृदयज्ञता प्रसिद्धा कटाक्षमोक्षव्यापारः स चाक्षुषमात्रवेद्यः इत्येतदर्थमेवास्माभिरक्ष्णोः रक्षा क्रियत इति भावः। किमिति मुद्रितनेत्राभिः स्थीयत इति पृष्टे किं पश्यामः तदवलोकलब्धावरा उद्घाटयिष्यामः खञ्जनचेष्टितनेत्रे निर्जने बुभुक्षितृखञ्जनाविवपालितौ तद्दर्शने सति निर्मुक्तबन्धनौ तत्कटाक्षसुखमनुभवेतामिति यद्वा निपानमात्रेणैव सकलेन्द्रियानन्दलाभात्परं किं तत् विदामः तूष्णीं स्थेयमितिसोल्लुण्ठम् तत्तु वक्तुं न युक्तं चुम्बनाधरपानयोः साक्षादिति किमिति कृशा इति सखीभिः पृष्टा आहुः अक्षण्वतामिदं फलं यदि चक्षुषी न स्यातां तदा तद्वक्त्रदर्शनमपि न स्याद्येन तां तां दशामनुभवाम इति साभ्यसूयमिति ॥ ७ ॥ चूतेति। तदेव अर्थान्तराच्छन्नमपि सूक्ष्मदृशां व्यक्तं स्यात् प्रवालो नवपल्लवः वन्यवेषस्यैव धारणं तत्तदङ्गस्पर्शसुखायेति सानुरागत्वम् पशुपालेति तदभिप्रायानभिज्ञत्वं तद्द्वेषश्च गौरश्यामयुग्मशोभानुभवाय न चेदमसम्भावितं विपरीतरतौ राधाकृष्णयोरसरूपिणोः जातावेतौ महात्मानौ दुर्गारामौ जगत्प्रभू या दुर्गा सैव गोविन्दो राधासङ्कर्षणस्त्वसाविति कृष्णयामलात अंशेन अंशिनस्स्मरणम् गाये गाने मानश्चित्तसमुन्नतिः ययोस्ताविति लीलाख्योऽनुभावो व्यञ्जितः प्रियानुकरणं लीलेत्युक्तेः ॥ ८ ॥

श्रीमत्कृष्णदासकृता श्रीगणदीपिका

चन्द्रावती चन्द्रमालां प्रत्याह—चूतप्रवालेति ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

काश्चिदाहुः अक्षण्वतामिति । अक्षिमतां प्राणिनामिदमेव फलं नत्वितः परमस्तीति वयं विद्मः किं तत् व्रजेशसुतयोः बलदेवकृष्णयोर्वक्तुमनुकूलेन वेणुना जुष्टं यैर्निपीतं सतृष्णं वीक्षितमित्यर्थः । "तातं भवन्तं मन्वानः" इति वसुदेववाक्यात् "रामोभिवाद्यपितरा" वितिशुकवाक्याच्च बलदेवस्यापि व्रजेशसुतत्वं व्रजे ख्यातमेव वक्तुं कीदृक् अनुरक्तेषु स्वजनेषु कटाक्षाणां मोक्षो यस्य तत् कीदृशयोः वयस्यैः सह पशून् अनुविवेशयतोश्चारयतोरिति बलदेवसाहित्येन तद्वर्णनं स्वभावगोपनार्थं विवक्षितोर्थस्त्वयं हे सख्यः व्रजेशसुतयोर्मध्ये अनु पश्चाद्वर्त्तिनो यस्य वक्तुं वेणुजुष्टं तदयैर्वा निपीतमिति ननु दर्शनश्रवणे भवेतां वक्तुकर्मकं निपीतं नः कुलाङ्गनानां कथं स्यात्तत्राह अनुरक्तेति । तेन तथानुसन्धाय कटाक्षबाणो मुच्यते यथा तेन विह्वलास्त्रपाद्यैर्यै विहाय तत्पास्यर्थेति भावः ॥ ७ ॥ ताः सख्यस्तस्य बलदेवेन साहित्यादन्तिके गमनं कर्तुं न पारयामः किन्तु लतापल्लवरन्ध्रैरेव तस्य सौन्दर्यगाननाटयाद्यमृतादतिस्वादून्यनुभूय त्वरयैवागमिष्याम इत्यन्याः काचिदाहुः—चूतेति चूतस्याम्रस्य प्रवालो नवपल्लवः बर्हं च स्तवकः कुसुमगुच्छः चूड़ायां उत्पले तत्कर्णिसकर्णयोः अजं लीलाकमलं दक्षिणकरे माला पुष्पस्रक् कण्ठे तथानुगुणतया पृक्तान्यङ्गसंलग्नानि नाटयोचितानि नानावर्णानि परिधानानि च वासांसि तैर्विचित्रो विस्मयकरो वेषो ययोस्तौ पशुपालानां स्वतुल्यगुणानां गोष्ठ्या तत्रापि मध्ये विरेजतुः रङ्गे यथा नटवराविति सखिषु गायकेषु वादकेषु च नृत्यन्तौ क्वचन गायमानौ गायन्तौ यद्वा गाये गाने मानः सर्वैर्दत्तः सत्कारो ययोस्तौ जलं विरेजतुरिति व्रजे सङ्कोचात्तादृशगानाद्यभावेन विराजनासम्भवात् ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इति वेणुरवं राजन्निति श्लोके व्रजयोषितामेव वेणुरवश्रवणमुख्याधिकारः प्रतीयते तथा गोप्यः किमचरदयं कुशलं स्म वेणुरिति श्लोके च केवलं जडवेणोरव माधवाधरोष्ठामृतपानभ्रान्तिश्च भविष्यत्यत एतदुभयनिरासाय तन्त्रभागवतवाक्यं पठन्ति । श्रीदेवीति ॥ श्रीदेवी रमा वेणुमाविश्य कृष्णमुखाम्बुजे रेमे तद्गतं गीतं तद्रूपममृतं पपौ च । अत्र मुख्याधिकारिणी वेणुतनुः श्रीरेवेति भावः । सुरा इतराभाण्डगा इतरदधरसुधानास्पदं साक्षाद्यद्भाण्डं वेणुमूलं तद्गच्छन्तीति तद्गाः सुरा देवा इत्यर्थः । वेणुमूले धने पात्रे भाण्डं भूषाश्वभूषयोरिति यादवः । इतरालङ्कारगा इति वा । इतरेषां बलादीनां भाण्डानि वेणुमूलानीति वा ॥ ततश्चायं श्लोकार्थः ॥ हे राजन् सर्वभूतमनोहरं वेणुरवं श्रुत्वा सर्वा व्रजस्त्रियो वर्णयन्त्योऽभिरेभिरे । औपचारिकं ब्रजनारिणामभिरमणमुक्तप्रमाणादिति ज्ञेयम् ॥ ७ ॥ व्रजगजगामिनीनां वर्णनप्रकारं वर्णयति ॥ अक्षण्वतामिति । यैर्यैर्जनैर्दृष्टिभिर्वयस्यैः सखिभिः सह पशून्गोष्ठेऽनुवेशयतोः प्रवेशयतोर्व्रजेशसुतयो रामकृष्णयोरेकस्य कृष्णस्यैव ग्रहणे कलङ्कमावहेयुरिति तालाङ्कस्यापि ग्रहणमिति ज्ञेयम् । अनुवेणुजुष्टमनुरक्तः स्निग्धः कटाक्षमोक्षो यस्मिस्तत् वक्त्रं निपीतं तेषां हे सख्योऽक्षण्वताम् । श्रौतपदानुकृतिः । अष्टमाष्टकद्वितीयाध्यायत्रयोविंशतिवर्गीयैवमृग्विधृत्राज्ञानपादानुव्याख्यानेऽक्षण्वन्तः कर्णयन्त इत्यादिना व्याख्याता चानोनुडिति सुधायाम् । साऽपि व्याकृता वाक्यार्थचन्द्रिकायाम् । तथा हि । तैजसत्वादन्येभ्योऽङ्गेभ्यो व्यक्ततरं दृश्यत इति तथा च श्रूयते तस्मादेते व्यक्ततरे इवेति । तादृशाक्षियुक्ता अक्षण्वतन्तस्तेषामिदं पानमेव फलं परमेतदितरन्नेति विदामः । न परं न विद्यते परं यस्मादित्यनुत्तमं वा विदामः । हे सख्य इत्यप्रतारणीयतां ध्वनयति । तेन चादोऽर्थस्य यथार्थता च ध्वन्यते । अक्षण्वतामिति विलक्षणपदनिधानेनाक्षण्वन्तः कर्णवन्त इति श्रुत्युक्तमुक्तसमतामेतेषां च सूचयामास व्यास इति मन्तव्यम् ॥ ८ ॥

श्रीसुबोधिनी

अनुवर्णनमेवाहाक्षण्वतामिति त्रयोदशभिः ।

रसद्वयार्थं द्वितयं वेणुपूरणमेकतः । स्वच्छन्दपादगमने हैतुश्चापि तथापरः ॥ १ ॥
चतुर्भिः पीठिकैवं स्यात् षड्भिर्वेणोस्तु वादनम् । द्वाभ्यां भक्तेः प्रतिष्ठा च दोषः स्याद् वर्णनेव्यथा ॥ २ ॥
वैपरीत्यात् समाधानमन्यथा स्यात् तु दूषणम् ॥ २½ ॥

तत्र प्रथमं यद् वर्णयितुमारब्धं तत्राशक्तौ शुकेन यद् वर्णितं चतुर्भिस्तद् वर्णयन्ति, तत्र प्रथमं स्वरूपतो रसात्मकं भगवन्तं वर्णयन्त्यक्षण्वतामिति, अक्षण्वतामिन्द्रियवता चक्षुष्मतां वा, इदमिति स्वहृदये मनोरथप्रकारेण प्रतिभातं,

भगवता सह संलापो दर्शनं मिलितस्य च ॥ ३ ॥
आश्लेषः सेवनं चापि स्पर्शश्चापि तथाविधः । अधरामृतपानं च भोगा रोमोद्गमस्तथा ॥ ४ ॥
तत्कूजिता श्रवणमाघ्राणं चापि सर्वतः । तदन्तिकगतिर्नित्यमेवं तद्भावनं सदा ॥ ५ ॥
इदमेवेन्द्रियवतां फलं मोक्षोपि नान्यथा । यथान्धकारे नियता स्थितिर्नाक्ष्णोः फलं भवेत् ॥ ६ ॥
एवं मोक्षोपीन्द्रियादियुक्तानां सर्वथा न हि । बाधकानां परित्यागे साधकानां न तद् भवेत् ॥ ७ ॥

तदाह न **परं विदाम** इति, **परो** मोक्षः सायुज्यादिः, नन्वा"त्मलाभान्न परं विद्यत" इतिश्रुतेः कथं न **परस्य** पुरुषार्थत्वम्? तदाहुर्**विदाम** इति, वयमप्युपनिषद्रूपा अतो वयमेव जानीमः, **न ह्यनुभवविरुद्धमनुभवापर्यवसायि फलं श्रुत्युक्तं भवति**, ततः केवलानां तदेव **फलमिन्द्रियवतां** त्वेतदितिव्यवस्थितविकल्पः अस्मिन्नर्थे श्रुत्यन्तररूपाणां गोपिकानां सम्मतिमाहुर्हे **सख्य** इति, समानशीलव्यसन एव **सख्य**पदप्रयोगात्, अतः श्रुत्यन्तरसम्मतिरप्युक्ता, एतत् कासाञ्चिद् गोपिकानामेव भवतीति सर्वेषां साधारणं पक्षमाहुश्चक्षुष्मतामिति, **अस्मिन्** पक्षेक्षण्वत्पदं चक्षुष्मत्पदपरं ज्ञेयं, तेनास्यावृत्तिर्वा ज्ञेया, **पशूननु** पशूनां पश्चाद्भागे **वयस्यैः** सह **वनं पशून् निवेशयतो रामकृष्णयोर्वक्त्रमेकं यैर्वा निपीतमिति**, वेत्यनादरे मुख्यापेक्षयेदं **गौणमिति**, ये तु कालेन तुल्यास्तैः सह **पशूनेतद्रसानभिज्ञान्** वनं **प्रवेशयति** भगवान् निर्गुणावस्थाधिकाराभावे सात्त्विकावस्थाया युक्तत्वात्, **भगवतो** लीलायां कालो निमित्तं गोपानां लीलायाश्च तदाधारत्वे निमित्तमिति **वयस्यता**, तदा तैः पशूनां वने निवेशनं तैः सह **वा समान**कालैर्वने निवेशनार्थं, **आविष्टस्य मुखारविन्दं न स्पष्ट**मिति भगवत एव **मुख**मुभयरूपस्यापि **मुखं** चक्षुर्द्वारा यैस्तदन्तःप्रवेशितं "तत् सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेन्नान्यानि चिन्तयेद् भूयः सुस्मितं भावयेन् मुख" मितिवाक्यात्, किञ्चैता हि स्वहृदि भावितं निरूपयन्ति **तथा च** साधारणपक्षत्वेन सामान्यतो **बलभद्रस्य** निरूपणेपि **मुखनिरूपणप्रस्तावेन्यमुखमेतासां हृदि नायातीत्येकमेव तन् निरूपितम्**, मुखस्यैकत्व प्रतिपादयन्त्य ईश्वरत्वेनाराधनबुद्ध्यानुरोधबुद्ध्या वा येषां पानं तत् सापेक्षमित्यनादरे हेतुमाहुर्**व्रजेशसुतयोरि**ति, **न हि बलभद्रो व्रजेशस्य पुत्रः**, आवेशपक्षे तु कृष्ण एवाविशतीति युक्तमेव तयोर्**व्रजेशसुत**त्वं, अनादरे लौकिकसापेक्षदर्शनं हेतुः, अन्ये पुनर्गीतरसाभिज्ञा वेणुनादश्रवणार्थं भगवन्मुखारविन्दं पश्यन्ति तदाहा**नुवेणु जुष्ट**मिति, **वेणुमनु** लक्ष्यीकृत्य यद् वर्तते त**दनुवेणु** वेणुवादनपरं तद् **यैर्जुष्टं यैर्वा निपीत**मिति, सेवनं निदर्शनं पानमन्तःप्रवेशनं, केवलं शब्दग्रहणं मनोहरत्वाच् छिद्रार्थं वेतिविकल्पः, अनादरस्तु स्वरादेवायाति, एवं मनोहरत्वान्नादाविष्टत्वाद् वा भजनमुक्तं, कामसम्बन्धादपि भजनं पाक्षिकमिति विशेषणान्तरमाहा**नुरक्तकटाक्षमोक्ष**मिति, **अनुरक्तानां कटाक्षाणां मोक्षो** यत्र, एतच् चक्षुष्मतां **फल**मिति निर्गुणसगुणभेदा **निरूपिताः** ॥ ७ ॥ केवलं रसरूपमाह **चूते**ति, **चूतानामाम्राणां प्रवालाः** कर्णयो**र्बर्हस्तबका** बर्हगुच्छानि शिरस्युत्पलाब्जानां **माला** कण्ठे तै**रनुपृक्तं** मिलितं **परिधानं** पीताम्बरादिवस्त्राणि **तैर्विचित्रो वेषो** ययोरेतादृशावुभावपि **पशुपालगोष्ठ्यां मध्ये विरेजतुः**, रसाभिनयेवतारवदेवावेशस्याप्युपयोगाद् द्विवचनम् ।

गुणा माया च वेषार्थमुपयुक्ता भवन्ति हि । अतो रसस्याभिनये चत्वारोर्था निरूपिताः ॥ १ ॥
रसरूपसुगन्धानां प्रतिष्ठा त्रिषु निश्चिता । धर्म्याच्छादनबोधाय मायाप्यत्र निरूप्यते ॥ २ ॥
वस्तुनिर्देशमात्रेण श्रोतॄणां काव्यवद् रसः । रसवत्फलबोधाय प्रथम पल्लवो मतः ॥ ३ ॥
शास्त्रार्थस्य परिज्ञानाद् भावस्य कलिका भवेत् । ततस्तस्य च वैचित्र्यं पुष्पस्थानमिहोच्यते ॥ ४ ॥
अहोरात्रं वासना स्यात् तत आच्छादनं स्मृतम् । रसोत्पत्त्यर्थमेतावन् निरूपितमितिस्थितिः ॥ ५ ॥
आविर्भावे रसास्वादान्नृत्यं शोभा ततो भवेत् । अतोतिगुप्तो भगवान् रसत्वं प्रतिपद्यते ॥ ६ ॥

विचित्रवेषाविति सर्वरसाभिनिवेशनार्थं, **त्रयाणामन्योन्यगुणप्रधानभावे नव रसा भवन्ति**, एवं रसरूपं भगवन्तं निरूप्य तद्रसपोषकौ समाजे वाद्यगीतविशेषौ निरूपयति **मध्ये विरेज**तुरिति, **पशुपालानां गोष्ठी नात्यन्तं गूढा** तेन रसस्य सुलभत्वं निरूपितं, **मध्ये गीतवाद्ययोः**, त्रयाणां समानतैव सर्वोत्तमा, नृत्यस्य तु विशेषः प्रायिक एवेति तदेवोक्तं, कादाचित्कनिषेधार्थमलमिति, शास्त्रमत्र नियामकं न भविष्यतीत्याशङ्क्याह दृष्टान्तं **रङ्गे यथा नटवरा**विति, रङ्गं शास्त्राधारभूतं स्थानं, रङ्गमण्डपे **यथा नटौ** शास्त्रार्थानुसारिणौ भवतः, अलौकिकनाट्यार्थं **वर**पदं, एवं राजसभावनृत्यमुक्त्वा सात्त्विकभावनृत्यमाह **क्व च गायमाना**विति, देशविशेषे हस्ताभिनयमात्रपूर्वकं श्रमरहितं गानं कुरुतः, एतदपि लोकप्रसिद्धम् ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अक्षण्वतामित्यत्र, प्रकरणार्थविभागे **द्वाभ्यां भक्ते**रिति । लोके हीननामपि चरणारविन्दसम्बन्धिकुङ्कुमसम्बन्धमात्रेण लक्ष्मीसमानभाग्यवत्त्वं **चरणमाहात्म्य**मेव । स्पर्शमात्रेण प्रकृष्टमोदजनकत्वं च । चरणश्च भक्तिमार्गरूप इति तद्धर्मप्रकटनं भक्तिस्थापनरूपमित्यर्थः । एवं तत्तात्पर्यानुक्तौ बाधकमाहुः **अन्यथे**ति । प्रकारान्तरेण तात्पर्योक्तावित्यर्थः । पुरुषोत्तमस्य लोकेपि हीनायाः स्त्रियाः सम्बन्धोक्त्या हीननायकत्वमापद्येत । श्रीपतेः कन्दाद्युपयोगश्च तथा । अतस्तत्रैव तात्पर्यमिति भावः । तथापि लोकरीत्या दूषणत्वं तस्य भवत्येवेत्यत आहुः **वैपरीत्यात्समाधान**मिति । प्रमेयमार्गः प्रमाणमार्गाद्विपरीतो बलिष्ठश्च । अधुना च स एव प्रकटीकृत इति वस्तुस्वाभाव्यादेव तथात्वमिति न दूषणमिति भावः । अत्र मर्यादावैपरीत्यं भूषणमिति सारम् । मर्यादामार्गीयपरमोत्कर्षवद्भ्योप्युत्कर्षसिद्धेः सर्वमवदातम् । अन्यथा वैपरीत्यमात्रेण मार्गोत्कर्षो न सिध्येत् । सेन्द्रियाणामपि तदफलने हेतुमाहुः **बाधकाना**मिति । भगवदतिरिक्तस्य सर्वस्य बाधकत्वात्तत्त्यागे सति प्रतिबन्धकाभावेन मोक्षलक्षणं फलं न भवेदित्यर्थः । मुमुक्षूणां तथात्वेपि न तथात्वमित्याशङ्क्य तत्साधनमाहुः **साधकाना**मिति । सर्वात्मभावेन भजनं साधकत्वम् । यद्यपि सर्वात्मभावेन

सर्वत्यागोप्यन्तर्भवति, तथाप्याधुनिकानां स्वतस्तद्भावरहितानां पूर्वं बुद्धिपूर्वकस्तत्त्याग एतद्भावनं चोपदिश्यत इति पृथगुक्तिः। अत्रैव **वयस्यैरि**त्यत्र, **तदाधारत्वे निमित्तमितीति**। गोपलीलयोरेककालाधारत्वे प्रभुप्राकट्यं निमित्तमिति तथेत्यर्थः ॥ ७ ॥ **चूतप्रवाले**त्यत्र, **त्रयाणामन्योन्यगुणप्रधानभाव** इति। स्थायिभावव्यभिचारिभावविगाढभावानामित्यर्थः ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अग्रे त्रयोदशश्लोकार्थोक्तौ **रसद्वयार्थ**मिति रसद्वयनिरूपणार्थं श्लोकद्वितयम्, एकस्माच्छ्लोकाद् **वेणुपूरणं** निरूपितम्, **स्वच्छन्दलीलासिद्ध्यर्थं पादानां** चरणारविन्दानां यद् गमनं रमण तत्र हेतुर्भूमेः कीर्तिविस्तारोपरश्लोकोक्तः, **एवं चतुर्भिः पीठिका**, सामान्यतः पदार्थत्रयनिरूपणं स्यात्, ततो विशेषतो निरूपणम्, तत्र **षड्भिर्वेणोर्वादनं** निरूपितं, स्वरूपलीलाव्यावृत्त्यर्थं तुशब्दः, ततो द्वाभ्यां **भक्तिप्रतिष्ठा**रूपपादगमननिरूपणं, तत एकेन तत्र **प्राप्तदोषसमाधानं**, लीलायां प्रतिबन्धाभावेपि दूषणं तु स्यादिति तुशब्दः, स्वरूपस्य तु स्पष्टमननुभवस्य सूचितत्वान् न विशेषतो निरूपणमितिभावः, श्लोकाभासे **स्वरूपत** इति रसस्य **स्वरूपं** विभावादयस्तत्प्रकारेण रसात्मकमित्यर्थः, द्वितीये तु केवलरसात्मको वक्ष्यते, अग्रे कारिकासु **इन्द्रियवतां फल**मिति, भक्तिफलत्वेनाभिलषितमित्यर्थः, **संलापादिकमेवेन्द्रियवतां** तत्तदिन्द्रियप्रकारकरसानुभावकत्वेनेन्द्रियसाफल्यापादकत्वात् फलत्वेनाभिलषितं न तु मोक्षः, तत्र हेतु**रन्यथे**ति, यता निःप्रकारकरसानुभावकत्वेनेन्द्रियवैफल्यापादकस्तस्मादित्यर्थः, भगवांश्चेत् सेवोपयोगिदेहमात्रमेव फलं ददाति तदेदं न भवति परन्त्वभिलषितमिदमेवेतिभावः, पुरुषोत्तमे प्रवेशरूपे मोक्षे इन्द्रियवैफल्यं दृष्टान्तेन विशदयन्ति **यथे**ति, **अन्धकारे स्थितिरि**ति चेद् भवेदितिशेषः, **तदाक्ष्णोः फलं चाक्षुषं** ज्ञानं न भवेत्, अतः स्पर्शादिना ज्ञानजननेपि चक्षुर्वैफल्यमेव भवेत्, तथेन्द्रियप्राणान्तःकरणयुक्तानां मोक्षोपि चेद् भवेत् तदेन्द्रियाणां फलं तत्तत्प्रकारकरसानुभवो न भवेदतः स्वरूपतोनुभवेपि संलापाद्यभावेनेन्द्रियवैफल्यमेव भवेत्, अतः **साधकानां** सर्वात्मभाववतां **बाधकानां** भगवदतिरिक्तसर्वविषयाणां **त्यागे** सति **तन्** मोक्षलक्षणं वस्तु फलत्वेनाभिलषितं **न भवे**दित्यर्थः, तथा चेन्द्रियवैफल्यापादकत्वेनोभयोरुपमानोपमेयभावः, कदाचिदन्धकारस्थितौ कदाचिद् भावोद्रेकेण देहाद्यस्फूर्त्यां भगवद्रूपत्वरूपमोक्षे च वैफल्यं न भवतीति **स्थितेर्नियतत्वमुक्तं** मोक्षे **सर्वथे**ति च, **सायुज्यादि**रिति सहयोगः पुरुषोत्तमे प्रवेशस्तदादिरित्यर्थः, **उपनिषद्रूपा** इति मोक्षस्य विचार्यत्वादुपनिषत्त्वमेवोक्तं, **न ह्यनुभवे**ति **श्रुत्युक्तं फल**मुपनिषद्रूपाणामस्माकमनुभवेन **विरुद्धं** विचारेपि कृतेस्मदनुभवे **न** पर्यवस्यति तादृशं **न भवति**, इदं त्वनुभवापर्यवसायि दृश्यते, अतो व्यवस्थोच्यत इतिभावः, श्रुतेराप्तत्वादन्यथाकथनं न युक्तमिति हिशब्दः, **केवलानामि**ति 'वाङ् मनसि दर्शनाद्' इतिसूत्रचतुष्टयोक्तप्रकारेण सञ्जातलये **सेवोपयोगिदेहो येभ्यो भगवता न** दत्तस्तेषामित्यर्थः, **एतेषां मोक्षः** पुरुषोत्तमे स्थितिरेव फलमित्येवकारः, प्राप्ततादृशदेहानां त्वनुग्रहतारतम्येन त्रयमपि भवतीति भावः, **यैर्वा निपीत**मिति अनादरान्मुख्यपक्षोन्य आक्षिप्तः सोयमुक्त इति ज्ञेयं, **गोपिकानामेवे**ति, गोपिकानामेव तत्रापि कासाञ्चित् तथाभाववतीनामिदं फलं भवति, एवकारेण गोपव्यावृत्तिः, **चक्षुष्मत्पदपर**मिति **चक्षुष्मत्पदं** पिपर्ति स्वार्थेन पूरयतीति **परं** तेन सहैकार्थमित्यर्थः, **तेनास्येति सख्य** इत्यन्तस्य वाक्यस्येत्यर्थः, **पशूनन्वि**ति अन्वित्युपसर्गस्य सार्थकत्वाय **पशू**नित्यस्याप्यावृत्तिः, तथा च पशून् गवादीननु पशूनेतद्रसानभिज्ञान् बहिरङ्गगोपान् वनं **निवेशयतो**रित्यर्थः, **निवेशा**न्यथानुपपत्त्या **वनपदार्थो**र्थापत्तिलभ्यो न त्वध्याहारः, तथा च **निवेशपदार्थाकाङ्क्षापूरणाय निवे**शपदार्थान्तर्गत एव वनपदार्थ इति ज्ञेयं, **ये तु कालेन तुल्या** इति भगवज्जन्मकालीना इत्यर्थः, **बहिरङ्गानामेतेषाञ्च** वनप्रवेशनहेतु**र्निर्गुणे**ति, अन्तरङ्गलीलाधिकाराभावे सहस्थापने दोषारोपसम्भवोतो वनप्रवेशनमेव युक्तमित्यर्थः, **तदेति** एककालाधारत्वे सतीत्यर्थः, तादृशलीलाकाले वयस्येष्वपि वनमागतेषु सत्सु इतियावत्, (**वयस्य**पदस्यार्थान्तरमाहु**र्भगवत** इति, **तदाधारत्व** इति **तत्** प्राकट्यं गोपलीलयोरेककालाधारत्वे निमित्तं, प्राकट्येन हेतुना तादृशलीलाकाले वनमागता इतिभावः), तथा च **वयसा** भगवत्प्राकट्येन हेतुना लीलया **तुल्या** लीलाकालाधारा इत्यर्थः, मुख्यवयस्यानां व्रतप्रसङ्गे वाच्यानां भगवता सह स्थितिनियमादत्र चैतेषां वननिवेशनस्योक्तत्वादेवं व्याख्यानं, सप्तदशाध्यायारम्भे एत एवोक्ताः, भगवज्जन्मकालीनास्तु व्रतप्रसङ्गीया इतिज्ञेयम्, (तेभ्यो भिन्ना इत्याशयः पक्षद्वयेपि, **तदेति** वयस्य**पदस्यैवं** व्याख्याने सतीत्यर्थः, प्रथमपक्षमुपसंहरन्ति **तैः सह चे**ति), **तथा सतीति** रसानभिज्ञत्वेन **पशूनां** बहिरङ्गानामपि **गोपानां श्रमे सती**तस्ततः पर्यटनासामर्थ्ये सति 'गता गावो दूरं प्रखरखुरचिह्नान्यपि वने न लक्ष्यन्ते हन्त द्रुततरमिहागच्छत तत' इति प्रकारेण भगवते निवेदने कृते सति श्रान्तगोपस्थाने वयस्यानां निवेशनार्थं वयस्यसहभाव इत्यर्थः, **आविष्टस्येति रामाविष्टांशस्य मुखं** पृथक् स्पष्टं न किन्त्वावेशाधिकरणसङ्कर्षणमुखसंवलितमेवातो मुख्यप्रकटस्य भगवतः कृष्णस्यैव मुखमुभयरूपस्याविष्टस्य कृष्णस्य च मुखमुक्तमितिशेषः, मुखस्य प्रधानत्वे प्रमाणसम्मतिमप्याहु**र्नान्यानी**ति, **अन्यन्मुख**मिति राममुखसंवलितं मुखमित्यर्थः, अवयवान्तरस्य दृश्यत्वेनोपस्थितिर्भवति, मुखस्य तु भोग्यरसवत्त्वाद् भोग्यत्वेनैवोपस्थितिः, ततस्तु रामाविष्टमुखे केवलभगवदुपासकानां न सम्भवतीत्यतोपि न पृथङ् निरूपितमितिभावः, **मुखस्यैकत्व**मिति आविष्टभगवन्मुखे एव यत्रैवं तत्र सापेक्षपाने किं वक्तव्यमितिभावः, **ईश्वरत्वेने**ति व्रजराजत्वेनाराधनमनुरोधो वा कर्तव्य इतिबुद्ध्येत्यर्थः, सर्वेषां दर्शनकर्तृणां साधारणपक्षत्वादेवमुक्तम्, वर्णिकास्तु नैवंविधा इति

ज्ञेयम्, पूर्वपक्षमाहु**र्नहीति**, समाधानमाहु**रावेशेति**, **अनावेशपक्षे इयमाशङ्का भवेदिति** तद्व्यावृत्त्यर्थं तुशब्दः, **लौकिकेति** लौकिको भावः, पूर्वोक्ता बुद्धिस्तत्सापेक्षमित्यर्थः, **वेणुमन्विति** इदमर्थकथनम्, विग्रहस्तु अनुगतो **वेणुर्यस्येति** ज्ञेयः, **जुष्टं निपीतमित्येतयो**र्भेदमाहुः सेवनं **निदर्शनमिति**, केवलं शब्दश्रवणमित्यर्थः, तत्र हेतुमाहु**र्मनोहरत्वादिति**, पाने हेतुमाहुः **शिक्षार्थमिति**, स्वस्य तादृशवेणुवाद्यशिक्षणार्थं मूले वेतिविकल्पेन पानमुक्तमित्यर्थः, विशेषणस्य वेणोः प्राधान्याच् छब्दकर्मकमेव क्रियाद्वयमुक्तम्, मूले वापदं केश्चिज् जुष्टं कैश्चिन्निपीतमितिविकल्पबोधनार्थं न त्वनादरमात्रबोधनार्थम्, स तु स्वरादेवायातीत्यर्थः, **अनुरक्तानामिति** अनुरक्ता भक्तास्तेषां ये **कटाक्षास्तेषां मोक्षो** यत्र भगवन्मुखे इत्यर्थः ॥ ७ ॥

चूतेत्यत्र **कर्णयोरिति उपरिभाग** इति ज्ञेयम्, तथा सति मुकुटे बद्धः पीताम्बरखण्डः प्रवालेन बर्हस्तबकेन चानुपृक्तो भवति, परिधानीयमुत्तरीयं च मालयानुपृक्तं भवति, परिधीयते ध्रियत इति व्युत्पत्त्या त्रयमपि **परिधानम्**, तैस्त्रिभिरपि विचित्रो वेषो ययोरित्यर्थः, **पीताम्बरादीति आदिपदेन** रामस्य नीलाम्बराणि, कारिकासु गुणा इत्यादि अग्रे **त्रयाणामित्यनुवादस्य** टिप्पण्यां **विगाढभावपदस्य विगाढो** विलोडितः कटाक्षादिरूपो **भावोनुभाव** इत्यर्थः, तथा च स्थायिभावव्यभिचारिभावानुभावा गुणाः क्रमेण प्रवालस्तबकमालारूपाः, **माया** च परिधानरूपा, एते चत्वारोपि पदार्था वेषार्थमुपयुक्ता भवन्ति, स्थायिभावात्मकस्य स्वरूपस्यैवात्रालम्बनविभावत्वात् स्थायिभावो विभावश्चात्रैक एव ज्ञेयः, तथा च स्वरूपस्य धर्मिरूपस्यालम्बनविभावात्मकस्य वैचित्र्यं धर्मरूपस्थायिभावेन व्यभिचारिभावानुभावाभ्याञ्च भवतीत्यर्थः, गुणानां मायायाश्च तत्तद्रूपत्वं व्युत्पादयन्ति **रसेति**, आम्रे मुख्यतया रसस्य प्रतिष्ठितत्वात् तत्प्रवालानां स्थायिभावत्वम्, **रसपदं** श्लिष्टार्थकं ज्ञेयम्, बर्हे रूपमात्रस्य प्रतिष्ठितत्वाद् रसव्यभिचारात् तत्स्तबकानां व्यभिचारिभावत्वम्, उत्पले सुगन्धस्य प्रतिष्ठितत्वात् तस्य (तत्सौरभाघ्राणजनितचुम्बनस्य) च रसानुभावभावकत्वात् तन्मालाया अनुभावत्वम्, धर्मिणः स्वरूपस्याच्छादनं तद्बोधाय मायापि निरूप्यते, अतो माया परिधानरूपेत्यर्थः, वैचित्र्यसम्पादकास्तु गुणा एव, परं सम्यग्वैचित्र्यार्थं धर्म्याच्छादनमप्यपेक्षितमिति **मायापी**त्यपिशब्दः, नन्वत्र शब्दतः सर्वं निर्दिष्टं तावता रसानुभवः कथं भवेत् ? न हि 'शर्करा मधुरे'ति वाक्येन माधुर्यानुभवो भवतीत्याशङ्क्याहुर्वस्त्विति वस्तुनो **निर्देशमात्रेणापि** रसो जायते, तत्र दृष्टान्तः **श्रोतॄणां काव्यवदिति**, यथा काव्यस्य "रसवद् वाक्यं काव्य"मित्युक्तत्वेन रसवत्त्वात् तच्छ्रवणे सति तन्निष्ठो रसः श्रोतृभिश्चर्वणयास्वाद्यते तथैतद्वाक्यस्य परितः सुधागलनरूपं वर्णनमित्युक्तत्वे रसवत्त्वादन्योन्यं तच्छ्रवणे सति तन्निष्ठो रसः श्रोत्रीभिरन्योन्यं चर्वणयास्वाद्यतेतो वस्तुनिर्देशमात्रेण रस इत्यर्थः, एवं क्रमेण पदार्थचतुष्टयस्य निरूपणे हेतुमाहू रसवदिति, **रसवत्त्वेन** फलस्य **बोधनाय पल्लव उक्तः**, पल्लवदर्शने फलस्य स्वरूपस्य रसत्वेन ज्ञानं भवति तेन कलिकाहेतुः प्राथमिकभावोदयो भवत्यतः प्राथमिकभावहेतुत्वात् **प्रथमं पल्लवो मतः**, द्वितीयमाहुः **शास्त्रेति**, रस**शास्त्रस्यार्थः** फलं तस्य परितो रसवत्त्वेन ज्ञानाद् बोधात् तदनु जातस्य भावस्य **कलिका**ऽविलम्बेन पुष्पत्वद्वारा रसानुभवज्ञापिका भवेदतस्तदनन्तरं कलिकासदृशा बर्हस्तबका उक्ताः, तृतीयमाहु**स्तत** इति, तदनन्तरं **तस्य** कलिकारूपभावस्य चकाराद् **वेषस्य वैचित्र्यं** भवेदतः पुष्पाणामुत्पलानां स्थानं **माला** तदनन्तरमिहोच्यते, चतुर्थमाहु**रहोरात्रमिति**, सर्वदा **वासना** तदनुभवः स्यात् तदाऽभवत्वाद् रसत्वमेव न स्यात् ततो हेतोस्तदनन्तर**माच्छादनं** परिधानं स्मृतम्, पूर्वं पुष्पाण्युक्तान्यतो **वासना**पदम्, नन्वेवंनिरूपणे धर्मसहितनिरूपणमेव जातमतः "केवलरसरूपमाहे"त्याभासेन **विरोध** इत्याशङ्क्याहू **रसोत्पत्त्यर्थमिति**, एतावत् सर्वमेतासु रसस्वरूपाविर्भावार्थं निरूपितं न तु **धर्मसहिताविर्भावार्थम्**, नन्वेतावद् विनैव **रसाविर्भावः** कुतो नोक्त इत्यत आहु**रितिस्थितिरिति**, "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति"रिति वाक्यादियं **रसमर्यादा आविर्भावे** इत्यग्रिमेणान्वयः, तासु **रसाविर्भावक्रम** एवमुक्तः, भगवत्येवंक्रमे प्रकारमाहू **रसास्वादादिति**, **रसास्वादादनन्तरं** नृत्यं **तदनन्तरं शोभा भवेत्**, अत एतदनन्तरं गुप्तो भगवान् रसत्वं **प्रतिपद्यते**, एवमुद्बुद्धस्यागोपने रसाभासत्वं स्यादत एव **क्रमेण** तत्तत्सूचकपदार्थनिरूपणम्, बर्हस्तबकस्य नृत्यमयूरानुकरणत्वात् तत्सूचकत्वं ज्ञेयम्, एतादृशपरिधानकृतवेषावेतावतैव वैचित्र्यप्राप्तावपि, **विचित्रपदोक्तितात्पर्यमाहुः सर्वेति**, तर्हि साधनान्यपि न वक्तव्यानीत्यत **आहुस्त्रयाणामिति**, हासः **प्रधानं** रतिर्गौणी **चेद्धास्यरसः**, हासो **गौणो** रतिः प्रधानं चेच्छृङ्गारः, एवं नवस्वपि, एवम्प्रकारेण त्रय एव **नवानामपि** साधका भवन्ति, शोभाया धर्म्यन्तर्गतत्वेन तादृशशोभाविशिष्टधर्मिरसनिरूपणं वाक्यार्थः, रसपोषकत्वं तु **गीतवाद्ययोरेवे**त्याशयेनोत्तरार्धाभासस्तथोक्तः, **सुलभत्वमिति** गोपिकान्तरगोष्ठ्यां स्थितावस्मद्धृदये नागच्छेदिति भावः, मध्येपदस्याकाङ्क्षापूरणायाहु**र्गीतवाद्ययोरिति**, **गीतवाद्ययोर्मध्ये** तत्समय इत्यर्थः, नटदृष्टान्तेन वाद्यमुक्तं नृत्यमपि सूचितम्, **गायमानाविति**पदेन गानमुक्तं नृत्यमपि सूचितम्, एवं पदद्वयेन पदार्थत्रयमुक्तमित्याशयेना**हुस्त्रयाणामिति**, **समानतेति** यादृशेन निपुणेन गानं क्रियते तादृशेनैव वाद्यं तादृशेनैव नृत्यमेवं नैपुण्येन **समानता** सैव सर्वोत्तमा न तु न्यूनाधिकता, अतः शोभाकथनेन साम्यं सूचितमिति भावः, नटवरपदस्य नृत्यं वाच्यार्थो **वाद्यं** सूचितार्थं इत्येव कुतो न भवेदित्यग्रत आहुर्नृत्यस्य **त्विति**, **गीतवाद्ये** बहुकालं, नृत्यं तु रसोद्रेके कदाचिज् जायते, अतोस्माभिर्वाद्यमेव वाच्यार्थत्वेनोक्तम्, वरपदेन धर्मसहितरसनिरूपणाशङ्काव्यावृत्त्यर्थमाहु**रलौकिकेति**, बर्हस्तबकधारणसूचितं तामसभावनृत्यम्, तस्य तादृशसामयिकत्वात् **नटवर**-

पदसूचितं राजसभावनृत्यम्, गानसूचितं सात्त्विकभावनृत्यम्, उपविश्य गाने नृत्यं कथं सम्भवतीत्यत आहुर्हंस्तेति, सात्त्विकत्वे हेतुमाहुः **श्रमरहित**मिति ॥ ८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एवं सङ्गतिं विधाय "स्वसखीभ्योन्ववर्णय"न्नित्यत्रोक्तमनुवर्णनं श्रीगोपिकाभि"रक्षण्वता"मित्यादिभिः कृतमित्याहुरनु**वर्णंनमेवा**हेति, अक्षण्वतामित्यस्याभासे **तत्र प्रथमं स्वरूपतो रसात्मक**मिति संयोगरसात्मकमित्यर्थः, अनेन "नटवरवपु"रित्यत्रोक्तो "वर"पदार्थ उक्तः, "**अक्षण्वता**"मित्यादि "अक्षण्वतामधिपतिस्ताभ्यां याति करोति चे"ति पुरञ्जनोपाख्याने **नारदवाक्या-दक्षण्वत्पद**मिन्द्रियवद्वाचकं तथा चेन्द्रियवता**मिदमेव** पुरुषोत्तमस्वरूपं फलमित्यन्वयः, फलत्वं विवृण्वन्ति **भगवता सह** संलाप इत्यादिभिः, अत्र सर्वेन्द्रियभोग्यत्वं निरूपितमिति **फलत्वं** स्वरूपस्य तत्राश्**लेषो** बाहुकार्यं **सेवनं** करकार्यमित्येकस्यैव दोरोन्द्रियस्य कार्यद्वयं ज्ञेयं, **रोमोद्गमः** पायुकार्यं, "सर्वेषां विसर्गाणां पायुरेकायन"मितिश्रुते रोमोद्गमस्यापि विसर्गत्वात्, अत एव **प्रक्षिप्ता**ध्याय**सुबोधिन्यां** "रोमाञ्चः स्वेदश्च दशमकार्य"मित्युक्तं, द्वितीयपक्षे चक्षुष्मता**मिदं** स्वरूपमेव **फल**मित्यर्थः, सम्पूर्णस्वरूपस्यापि दृग्गोचरत्वात्, एवं पक्षद्वये स्वरूपमेव फलमित्युक्तं, **रामकृष्णयोर्वक्त्र**मिति रामकृष्णयो**र्वक्त्रं यैर्वा निपीतं तेषामिदमेव** फलं वक्त्रमित्यर्थः, अस्मिन् पक्षे मुखमात्रस्य फलत्वं ज्ञेयम्, तत्रापी**श्वरत्वेनाराधनबुद्ध्या स्वस्वामिपुत्रत्वेनानुरोधबुद्ध्या** वेति पक्षद्वयं, कथम्भूतं वक्त्रमित्यपेक्षाया**मनुवेणु, अनुवेणु** नाम वेणुवादनपरं, एवं सति वेणुनादप्राधान्येन मुखावलोकनकर्तार उक्तास्तेपि द्विविधाः, मनोहरत्वाद् ग्रहीतार एके, अपरे तु भगवत्तुल्यं वयमपि वादयिष्याम इतिशिक्षार्थं वेणुनादं शृण्वन्तो मुखमवलोकयन्ति, एवं मुखमात्रावलोकने आराधनबुद्ध्या अनुरोधबुद्ध्या इतिभेदद्वयं, वेणुनादस्य मनोहरतया शिक्षार्थं वा इति शब्दोपसर्जनं मुखावलोकनमित्येतद् द्वयं, एवं चत्वारो भेदा मुखमात्रावलोकने, **अनुरक्तकटाक्षमोक्ष**मिति कामसम्बन्धादपि भजनार्थं मुखावलोकनमिति पञ्च भेदा भगवन्मुखमात्रावलोकने ज्ञेयाः ॥ ७ ॥ **चूतप्रवाले**त्यस्याभासे **केवलं रसरूप**मिति केवलपदेन विप्रलम्भशृङ्गारो ग्राह्यः, स "बर्हापीडे"तिश्लोके "नट"पदेनोक्तः, इह **चूतप्रवालबर्हयोः** पीताम्बरेण सम्बन्धकथनं शिरोबद्धपीताम्बरखण्डाभिप्रायेण, **रसाभिनयेवतारव**दित्यादि, **बलदेवे** यः पुरुषोत्तमावेशस्तस्य रसरूपत्वेन रसाभिनये स्कन्धबाहुधारणादिना स्वामिनीरमणसमयाभिनयकरणाद्यर्थं बलदेवोपयोगादित्यर्थः, **गुणा माया** चेत्यादि **चूतप्रवालबर्हस्तबकोत्पलाब्जमाला** रजस्तमस्सत्त्वस्वरूपाः, ते च रसे उपयुज्यन्ते, यतो रजोगुणेन विविधभावोत्पत्तिः, तमसा त्वेकत्र भगवदवयवे प्रीत्याधिक्येन मनसो लयः सत्त्वगुणेन सर्वेषां भगवदीयपदार्थानां रसोपयोगित्वेन ज्ञानं, ननु प्रवालादीनां स्थापने किं प्रयोजनमित्याकाङ्क्षायामिह स्वरूपे **रसरूपसुगन्धानां** तादृशभक्तैकभोग्यानां रसगोपनसूचनार्थं **प्रवालबर्हस्तबकोत्पलाब्जमाला**पीताम्बरस्थापनमित्याहू **रसरूपसुगन्धाना**मित्यादि, तत्राम्रस्य रसप्रधानत्वाद् लोभात्मकस्थररसस्य सूचनार्थमाम्रपल्लवाः, **बर्हस्तबकस्य** सुन्दरत्वाद् रूपसौन्दर्यसूचनाय धारणं, **उत्पलाब्जानां** सुगन्धबाहुल्यादानन्दमयविग्रहे सहजः सुगन्धः सूच्यते, रसस्य गोप्यत्वं पीताम्बरधारणेन ज्ञाप्यते, नन्वभिनयकरणे आम्रपल्लवादिभी **रसादिसूचने कथं** रसानुभवस्तत्राहु**र्वस्तुनिर्देशमात्रे**णेत्यादि, **काव्य**पदवाच्यस्य "रसवद्वाक्य"स्य श्रवणे **श्रोतॄणां रसानुभवो** भवति, एवमाम्रपल्लवादिदर्शने तत्सूचितरसस्याप्यनुभवो भवति, व्रजस्थितसुन्दरीणां तु तादृशस्वरूपवर्णने परस्परश्रवणात् तन्निष्ठरसानुभवो भवति, ननु प्रथममाम्रपल्लवधारणमुक्तं तत्र को हेतुरित्याकाङ्क्षायामाहू **रसवत्फलबोधायेत्यादि,** अग्रे **रसवतः फलस्य** स्वरूपानन्दसारभूतसुधानुभवस्य बोधनार्थं पल्लवधारणमित्यर्थः, **शास्त्रार्थ**स्येति **रसशास्त्रस्यार्थः** प्रयोजनं सुधाभोगस्तस्य पल्लवदर्शनेन भाव्यत्वेन परिज्ञानाद् भावस्य भगवद्विषयस्नेहस्य **कलिका**सक्तिरूपो **भावो भवे**दित्यर्थः, प्रेमानन्तरभावित्वादासक्तेः, उचितं चैतत्, **प्रमाणप्रकरण**लीलया प्रेमात्मकभावस्योत्पादितत्वात् प्रमेयप्रकरणलीलयासक्तिरूपो भाव उत्पाद्यत इति, कलिकायां हि रसरूपसुगन्धादयः सर्वे विद्यमाना अप्यव्यक्ता किञ्चिद्व्यक्ताश्च, तथाऽऽसक्तौ भावकार्यभूताः कटाक्षस्मितालापादयोप्यव्यक्ताः किञ्चिद्व्यक्ता भवन्तीति कलिकासादृश्यमासक्तेः, अतस्तादृशासक्तिसूचनार्थं कलिकातुल्य**बर्हस्तबक**धारणमितिभावः, **ततस्तस्ये**त्यादि **तस्य** भावस्य वैचित्र्यं **व्यसनरूपतया** फलितस्यालिङ्गनादिकार्यरूपेण विविधविलासरूपत्वं भवेत्, तदेव पुष्पस्थानीयं, पुष्पे हि रसरूपसुगन्धादयो व्यक्ता भवन्ति तथा व्यसनेपि **स्फुटा** भवन्तीतिभावः, तादृशव्यसनसूचनार्थ**मुत्पलाब्जमाला**धारणमितिभावः, **अहोरात्र**मिति, पुष्पे जाते **वासना** स्फुटा भवति तथा व्यसने जाते तत्कार्याणां दर्शनाश्लेषरहोभाषणादीनां प्रत्यहं जायमानत्वाद् **वासना** लोके ज्ञानं स्यात्, तथा च प्रकटत्वाद् रसाभास एव स्यान्न रसत्वमिति रसत्वसाधनार्थमाच्छादनमपेक्षितं, तदाच्छादनसूचनाय **माया**रूपपीताम्बरधारणं, तथा चेदं तात्पर्यमत्राकलनीयं, दर्शनाश्लेषादीनां गोपनार्थं चातुर्यविशेषरूपं कापट्यमपेक्षितं, तदत्र **माया**शब्दवाच्यं, तेनैव रसगोपनं भवतीति बोध्यं, एवङ्करणे फलं भवतीत्याहू **रसोत्पत्त्यर्थ**मित्यादि, एवं प्रक्रियया **रसोत्पत्तिः** स्यादतो निरूपणमितिभावः, **आविर्भावे रसास्वादान्नृत्य**मिति एवमभिनयकरणेभिनयकर्तुर्भगवतो रसास्वादान्नृत्यमभूदिति **नट** इत्यस्यार्थं उक्तः, **शोभा ततो भवे**दिति **विरेजतु**रित्यस्यार्थ उक्तः, **रसत्वं प्रतिपद्यत** इति "गुप्तो हि रसो रसत्वमापद्यत" इतिरसशास्त्रात्, अनेन "रसो वै स" इतिश्रुत्युक्ता रसरूपता समर्थिता ॥ ८ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

अक्षण्वतामित्यत्र रसद्वयार्थमिति का० १७६$\frac{१}{४}$–१७७$\frac{३}{४}$। रसो हि द्विविधः, धर्मसहितः केवलश्च, धर्मसहितः सम्भोगे केवलो **नाट्ये**, तत्र '**अक्षण्वता**'मिति श्लोके धर्मसहितः 'चूतप्रवाले'त्यत्र केवलः, **एवं रसद्वय**निरूपणार्थं श्लोकद्वयं, ततो "गोप्य" इत्येकेन वेणुकूजनं, 'वृन्दावनं सखिभुव" इति श्लोकेन स्वच्छन्दलीलासिद्ध्यर्थं पादानां चरणारविन्दानां यद्गमनं रमणं तत्र हेतुभूमेः कीर्तिविस्तारो निरूपितः, एवं **चतुर्भिः पीठिका** ततः षड्भिः श्लोकै**र्वेणोर्वादनं** निरूपितं, **द्वाभ्या**मिति 'पूर्णाः पुलिन्द्य' इति 'हन्तायमद्रि'रिति च **द्वाभ्यां** श्लोकाभ्यां चरणमाहात्म्यप्रकटनं भक्तिस्थापनरूपं चरणस्य भक्तिमार्गरूपत्वादित्यर्थः, एवं तात्पर्यानुक्तौ बाधकमाहु**रन्यथेति**, **भक्तिस्थापनातिरिक्ततात्पर्योक्तौ** दूषणं स्यादित्यर्थः, पुरुषोत्तमस्य हीनायाः स्त्रियाः सम्बन्धोक्त्या हीननायकत्वमापद्येत, श्रीपतेः कन्दाद्युपयोगश्च हीनत्वापादकः, अतो भक्तिस्थापन एव तात्पर्यमिति भावः, तथापि लोकरीत्या तस्य दूषणत्वं भवत्येवेत्यत आहु**र्वैपरीत्यात् समाधान**मिति, प्रमेयमार्गः प्रमाणमार्गाद् विपरीतो बलिष्ठश्चेति हेतोर्न दूषणमिति भावः, तथाचोक्तं 'गा गोपकै'रिति श्लोकविवरणे 'विपरीतं हि भगवच्चरित्र'मित्यारभ्य 'गतिमतामस्पन्दनं भवति तरूणां च पुलकः तथास्माकं योग्यानामयोग्यत्वमयोग्यानां पुलिन्दीनां तथात्व'मिति, अत्रैवाग्रे **भगवता सह संलाप** इत्यादि सार्धचतस्रः, १७८$\frac{३}{४}$–१८२$\frac{१}{४}$। अत्र भगवतः सर्वेन्द्रियोपभोग्यत्वं निरूपितं, आश्लेषो बाहुकार्यं सेवनं करकार्यमित्येकस्यैव हस्तेन्द्रियस्य कार्यद्वयं ज्ञेयं, स्पर्शस्त्वगिन्द्रियकार्यं स्फुटं, अधरामृतपानं रसनेन्द्रियकार्यं, पूर्वोक्तः संलापस्तु वाक्कार्यं, भोगा गुह्यकार्यं, पुरुषाणां तु सेवोपयोगिपुत्राद्युत्पादनद्वारा तदुपयोगः, रोमोद्गमः पायुकार्यं, इतरेन्द्रियोपयोगः स्पष्टः, तदुक्तं सुबोधिन्यां दशमस्कन्धे प्रक्षिप्ततृतीयाध्याये 'एषां तु भाग्यमहिमाच्युत तावदास्ता'मिति श्लोकविवरणे रोमाञ्चः स्वेदश्च दशमकार्यमन्येषामुपयोगः स्पष्ट एवेति, दशमः पायुः, **इदमेवेन्द्रियवता**मित्यादि, इन्द्रियवतामिदमेव फलमन्यथा मोक्षोपि न फलमित्यर्थः, इन्द्रियवतामपि तादृशफलाभावे हेतुमाहु**र्बाधकाना**मिति, मुख्यफलप्राप्तौ **बाधकानां** भगवद्व्यतिरिक्तपदार्थानां परित्यागे सति **साधकानां सर्वात्मभावात्मक**साधनवतां मोक्षलक्षणं फलं न **भवेत्** किन्तु पुरुषोत्तमदर्शनाद्यात्मकं **मुख्यफलमेव भवे**दित्यर्थः, तथा च **मुख्यफलप्राप्तौ** बाधकत्यागविशिष्टसर्वात्मभावः साधनं, मुमुक्षूणां बाधकत्यागेपि सर्वात्मभावात्मकसाधनाभावान् न **मुख्यफलं किन्तु मोक्ष एवेति** ॥ ७ ॥

चूतप्रवालेत्यत्र गुणा माया च वेषार्थमित्याद्याः षट् का० १८३$\frac{१}{४}$–१८८$\frac{१}{४}$। **गुणा माया** चेति प्रवालः स्तबको माला चेति त्रयं टिप्पण्युक्तप्रकारेण स्थायिभावव्यभिचारिभावविगाढभावात्मकगुणत्रयरूपं पीताम्बरं च मायारूपं, एवं चत्वारोपि **वेषार्थमुपयुक्ता** भवन्तीत्यर्थः, अत्र श्रीवल्लभगोस्वामिनः "अत्र टिप्पण्यां विगाढभावपदस्य कटाक्षादिरूपोनुभावोर्थः, स्थायिभावात्मकस्वरूपस्यैवात्र आलम्बनविभावत्वात् स्थायिभावो विभावश्चात्र एक एव, तथा च स्वरूपस्य धर्मिरूपस्यालम्बनविभावात्मकस्य वैचित्र्यं धर्मरूपस्थायिभावेन व्यभिचारिभावानुभावाभ्यां च भवतीत्यर्थः, गुणानां मायायाश्च तत्तद्रूपत्वं व्युत्पादयन्ति **रसरूपसुगन्धाना**मिति, आम्रे मुख्यतया रसस्य प्रतिष्ठितत्वात् तत्प्रवालानां स्थायिभावत्वं, बर्हे रूपमात्रस्य प्रतिष्ठितत्वाद् रसव्यभिचारात् तत्स्तबकानां व्यभिचारिभावत्वं, उत्पले सुगन्धस्य प्रतिष्ठितत्वात् तस्य च रसानुभावकत्वात् तन्मालाया अनुभावत्वं, धर्मिणः स्वरूपस्याच्छादनबोधाय मायापि निरूप्यते" इति व्याचख्युः, ननु साक्षादनुभवाभावे वस्तुनिर्देशमात्रेण कथं रसानुभव इत्याशङ्क्याहुर्वस्त्विति, तत्र दृष्टान्तः श्रोतॄणां काव्यवदिति, एवं क्रमेण पदार्थचतुष्टयनिरूपणे हेतुमाहू **रसवत्फलबोधायेति**, रसयुक्तफलबोधार्थं प्रथमं पल्लव उक्तः, पल्लवदर्शने फलस्य स्वरूपस्य रसवत्त्वेन ज्ञानं भवति, तेन कलिकाहेतुप्राथमिकभावोदयो भवति, अतः प्राथमिकभावहेतुत्वात् प्रथमं पल्लवो मतः, द्वितीयमाहुः **शास्त्रेति**, रसशास्त्रस्यार्थः फलं तस्य **परिज्ञानात् भावस्य कलिका** रसानुभवज्ञापिका **भवेत्**, अतः पल्लवानन्तरं कलिकासदृशाः बर्हस्तबका उक्ताः, तृतीयमाहु**स्ततस्तस्येति**, तदनन्तरं **तस्य** कलिकारूपभावस्य **वैचित्र्यं** भवेद्, अतः **पुष्पस्थानं** पुष्पाणामुत्पलादीनां स्थानं माला तदनन्तर**मिहोच्यते**, चतुर्थमाहु**रहोरात्र**मिति, परिधानाभावे सर्वदा **वामना** तदनुभवः **स्यात्**, तदाऽगुप्तत्वाद् रसत्वमेव न स्यात्, **ततो** हेतोस्तदनन्तरमाच्छादनं परिधानं **स्मृतं**, एतावन्निरूपणप्रयोजनमाहू **रसोत्पत्त्यर्थ**मिति, **इति स्थितिरिति स्थिति**र्मर्यादा, यद्यप्येतत्प्रणालिकां विनापि भगवान् रसोत्पादनसमर्थस्तथापि रसमर्यादास्थापनाय तथेति भावः, **नृत्यं शोभा ततो भवे**दिति नटवरावितिपदोक्तं नृत्यं विरेजतुरितिपदोक्ता **शोभा** ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदनुवर्णनमेवाह—अक्षण्वतामिति त्रयोदशभिः। 'युष्माकमपीदं संमतमेव' इति सूचयन्त्यः सम्बोधयन्ति—हे सख्यः ? अक्षण्वतां चक्षुष्मतां चक्षुषः फलमिदमेव मुख्यम्, अतः परमन्यदुत्कृष्टं फलं वयं न विदामः न विद्म इत्यर्थः। 'किं तत् फलम्' इत्यपेक्षायामाह—वयस्यैः सखिभिः सह पशूननुविवेशयतोः वनाद्वनान्तरं प्रवेशयतोर्व्रजेशस्य नन्दस्य सुतयो रामकृष्णयोर्वक्त्रं मुखं यैर्निपीतं अक्षिभृङ्गैस्तन्माधुर्यमनुभूतं तैर्यज्जुष्टं सेवितं प्राप्तं तदेवेत्यन्वयः। तच्छोभातिशयं सूचयन्त्यो मुखं विशिषन्ति—अनुवेणु वेणुमनुवर्तमानं तं अवादयत्। तथा अनुरक्तकटाक्षमोक्षमिति स्निग्धकटाक्षविसर्गम् ॥ ७ ॥ अन्या आहुः—चूतेति। अत्र सर्वत्र वक्तृभेदात् पूर्वापरसङ्गतिर्नापेक्षिता। चूतस्याम्रस्य प्रवालाः कर्णयोः, बर्हस्तवका मयूरपिच्छगुच्छानि शिरसि, उत्पलाब्जानां माला कण्ठे,

तैरनुपृक्ते मिलिते सहिते परिधाने नीलपीतांबरे ताभ्यां विचित्रो वेषो ययोस्तौ समकृष्णौ क्व च कदाचित् पशुपालानां गोष्ठ्यां सभायां मध्ये गायमानौ अलमत्यर्थं विरेजतुरित्यन्वयः । तत्र दृष्टान्तमाहुः – रङ्गे इति । रङ्गे मल्लयुद्धस्थानविशेषे, नटसभायां यथा गायमानौ नटवरौ राजेते तथा । अनेन गोपानामपि तथा वेषः सूचितः । अहो ईदृक् स्वरूपं पश्यतां भाग्यमित्याशयः ॥ ८ ॥

अन्वितार्थप्रकाशिका

अत्र गोप्य ऊचुरिति स्वामिपादानां न सम्मतम् । भावगोपनाय रामसहितं वर्णयन्ति–अक्षण्वतामिति ॥ हे सख्यः! अनुवेणु वेणुमनुवर्तमानं वेणुं वादयत् इत्यर्थः । तथा अनुरक्तेषु कटाक्षाणां मोक्षो यस्मात् तत् वयस्यैः सखिभिः सह पशूननुनिवेशयतोर्व्रजेशस्य नन्दस्य सुतयो रामकृष्णयोर्वक्त्रं मुखं यैर्निपीतम् अक्षिभृङ्गैस्तन्माधुर्यमनुभूतं वाऽवधारणे तैर्यज्जुष्टं सेवितं प्राप्तं यत् इदमेव अक्षण्वतां चक्षुषो मुख्यं फलम् । छन्दस्यपीति टाद्यचं विनापि । अक्षणोऽनङ् अनो नुडिति नुट् । अतः परमन्यदुत्कृष्टं फलं वयं न विदामः । न विद्म इत्यर्थः । शबलुगभाव आर्षः । 'तातं भवन्तं मन्वानः' इति वसुदेवोक्तेः । 'रामोऽभिवाद्य पितरौ' इति शुकोक्तेश्च द्वयोरेव व्रजेशसुतत्वं तयोः प्रसिद्धमासीत् । व्रजेशसुतयोर्मध्येऽनु पश्चाद्वर्तिनः कृष्णस्येति वार्थः ॥ ७ ॥ अन्या आहुः-चूतेति ॥ अत्र सर्वत्र वक्त्रीणां भेदात् पूर्वापरसङ्गतिर्नापेक्षिता । चूतस्याम्रस्य प्रवालाः बर्हं पिच्छं स्तबकाः पुष्पगुच्छाः एतानि शिरसि उत्पले तदन्तःकोषौ कर्णयोः अब्जं लीलाकमलं दक्षिणकरे माला कण्ठे तैरनुपृक्ते ईषदन्तरान्तरतः मिलिते परिधाने नीलपीताम्बरे ताभ्यां विचित्रो वेषो ययोस्तौ रामकृष्णौ क्व च कदाचित् पशुपालानां गोष्ठ्यां सभायां मध्ये गायमानौ । आर्षः शानच् चानश् वा । अथवा गाये गाने मानः गर्वो ययोः अलमत्यर्थं विरेजतुः । यथा रङ्गे मल्लयुद्धस्थानविशेषे नटसभायां यथा गायमानौ नटवरौ राजेते तथा अहो गोपानां पुण्यमिति भावः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

त्रयोदशश्लोकैर्हरिं वर्णयंत्य आहुः अक्षण्वतामिति हे सख्यः वयस्यैः समानवयोभिः गोपैः सह पशूनवनं प्रतिप्रवेशयतोः व्रजेशसुतयोः नंदपुत्रयोः वक्त्रं यैः निपीतं नेत्रैर्हृदिनितरां आनीतं तैरेवजुष्टं दर्शनद्वारासेवितं नान्यैः किं च अक्षण्वतां नेत्रवतामपीदमेव नेत्रयोः फलं परमन्यत् न विदामः अक्षिशब्दपर्यायोऽक्षन् शब्दोप्यस्ति तस्मात्परस्य मतुप्प्रत्ययस्य अनोनुडिति सूत्रेण नुटिकृतेऽक्षण्वतामिति सिद्धं तद्वक्त्रं किं लक्षणं अनुवेणुं वेणुनादयत् अनुरक्ता भक्तोपरिप्रेमयुक्ताः कटाक्षमोक्षा यस्मिंस्तत् यद्वा अनु निरंतरं वेणुना जुष्टं अनुरक्तकटाक्षमोक्षं वक्त्रं यैः निपीतं प्रेमणादृष्टं तेषामक्षण्वतामिदं वक्त्रदर्शनमेव फलं परं न विदाम तस्य दर्शनं विनाचक्षुः साफल्यं न स्यादिति भावः ॥ ७ ॥ अन्यास्तयोः शोभावर्णनमाहुः चूतेति चूतप्रवालादीनां मालाभिः अनुपृक्ते संलग्ने परिधाने नीलपीतवस्त्रे ताभ्यां विचित्रो वेषः शृंगारो ययोस्तौ क्वच कदाचित् पशुपालानां गोष्ट्यां सभायां मध्ये गीयमानौ रंगे नटरमणस्थाने नटवरौ यथा तथा अलं विरेजतुः अहो अधुना गोपानां महद्भाग्यमस्माकं तु न्यूनमित्यभिप्रायः उत्पलकुमुदिनी अब्जं पद्मं च ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बर्णनमेवाहाक्षण्वतामित्यादिना यावदध्यायसमाप्ति ॥ अक्षण्वतामिति ॥ हे सख्यः, वयस्यैः स्वसमानवयस्कैर्गोपैः सह, पशून् गाः, अनुविवेशयतोः वनं प्रति प्रविवेशयतोः, व्रजेशसुतयोर्नन्दस्य सुतयो रामकृष्णयोः, अनुवेणु वेणुमनुवर्त्तमानं, वेणुं वादयदित्यर्थः जुष्टं पश्यतां निरतिशयप्रीतिविषयं, 'जुषी प्रीतिसेवनयोः' इति धातोर्जुष्टमिति । अनुरक्तानां स्निग्धानां कटाक्षाणां मोक्षो विसर्गो यस्मिंस्तथाभूतं वक्त्रं मुखं, यैर्वा यैरेवेत्यर्थः । निपीतं नितरामनुभूतं दृष्टमिति यावत् । इदमेतदेव, अक्षण्वतां चक्षुष्मतां, तेषां फलं चक्षुःप्राप्तिफलं, परं तदतिरिक्तं न इति विदामः विद्मः । यद्वा ! व्रजेशसुतयोर्वक्त्रं यैर्निपीतं, चक्षुष्मतां तेषां जनानां, चक्षुर्भिः इदमेव फलं जुष्टं सेवितम् । यद्वा अन्वनुवेलं वेणुजुष्टं वेणुना सेवितं, व्रजेशसुतयोः वक्त्रं यैः निपीतं, इदमेव अक्षण्वतां तेषां, अक्ष्णोः फलं, यद्वा । वक्त्रं यैर्जनैः, निपीतं तैर्जनैरेव, चक्षुःफलं जुष्टं, नान्यैः ॥ ७ ॥ अन्या आहुः ॥ चूतेति ॥ एवमुत्तरत्रापि । सर्वत्र वक्तृभेदान्नातीव संगतिरपेक्षिता । चूतप्रवाला आम्रकिसलयाश्च बर्हाणि मयूरपिच्छानि च स्तबका गुच्छाश्च उत्पलानि चन्द्रविकाशिजलजानि च अब्जानि सूर्यविकाशिपद्मानि च तेषां मालाभिरनुपृक्ते ईषदन्तरान्तरतः संयुक्ते परिधाने नीलपीताम्बरे ताभ्यां विचित्रो वेषो ययोस्तौ, क्व च कदाचित्, गायमानौ रामकृष्णौ, रङ्गे नृत्यस्थाने, नटवरौ नटश्रेष्ठौ, यथा तथा, पशुपालगोष्ठ्यां गोपसभायां, मध्ये मध्यप्रदेशे, अलं नितरां, विरेजतुः । अहो पश्यतां गोपानां महद्भाग्यमिति भावः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अक्षण्वतामिति : १०.२१.७.

यस्मिन् दृष्टे दृष्टमेवाखिलं स्याद्यस्मिंश्चक्षुस्तिष्ठति स्वेष्टदातृ ।
तच्चेद्वक्त्रं श्रेशमैक्षीह येन तस्मादक्षणः किं भवेद्धन्यमन्यत् ॥ १५ ॥

चूतप्रवालेति : १०.२१.८.

रङ्गे भवन्ति सुनटा अपि रङ्गभाजामस्मत्स्वभावविशदीकरणेन भूयः ।
चेतोहरा ध्रुवमयं तु नटाधिकश्रीरस्माकमेव सखि मोहनमातनोति ॥ १६ ॥

कृष्णप्रिया

गोपियाँ आपस में बातचीत करने लगी–अरी सखी ! हमने आँखवालों के जीवन की और उनकी आँखों से वस, यही इतनी ही सफलता समझी है, और तो हमें कुछ मालूम ही नहीं है, वह कौन सा लाभ है ? वह यही है कि जब श्यामसुन्दर श्रीकृष्ण और गोरे सुन्दर बलराम ग्वालबालों के साथ गायोंको हाँककर वन में ले जा रहे हों या लौटाकर व्रज में ला रहे हो, उन्होंने अपने अधरोपर मुरली धर रक्खी हो और प्रेमभरी तिरछी चितवन से हमारी ओर देख रहे हों उस समय हम उनकी मुखमाधुरी का पान करती रहे ॥ ७ ॥ अरी सखी जब वे आम की नयी कोपलें मोरों के पंख, फूलों के गुच्छे रंगविरंगे कमल और कुमुद की मालाएँ धारण कर लेते हैं श्रीकृष्ण के साँवरे शरीर पर पीताम्बर और बलराम के गोरे शरीर पर नीलाम्बर फहराने लगता है तब उनका वेष बड़ा विचित्र बन जाता है । ग्वालबालों की गोष्ठी में वे दोनों बीचोबीच बैठ जाते हैं और मधुर सङ्गीत की तान छेड़ देते हैं, मेरी प्यारी सखी उस समय ऐसा जान पड़ता है मानो दो चतुर नट रंगमञ्चपर अभिनय कर रहे हों मैं क्या बताऊँ कि उस समय उनकी कितनी शोभा होती है ॥ ८ ॥

गोप्यः किमाचरदयं कुशलं स्म वेणु[1]र्दामोदराधरसुधामपि गोपिकानाम् ।
भुङ्क्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु[2]मुमुचुस्तरवो यथाऽऽर्याः ॥ ९ ॥
वृन्दावनं सखि भुवो वितनोति कीर्तिं यद् देवकीसुतपदाम्बुजलब्धलक्ष्मि ।
गोविन्दवेणुमनु मत्तमयूरनृत्यं [4]प्रेक्ष्याद्रिसान्ववरतान्यसमस्तसत्त्वम् ॥ १० ॥

कर्दमक्षमा

अन्वयः—गोप्यः, अयं वेणुः किं कुशलम् आचरत् यत् गोपीकानाम् अपि दुर्लभां दामोदराधरसुधां स्वयं अवशिष्टरसं यथेष्टं भुङ्क्ते ह्रदिन्यः हृष्यत्वचः तरवः अश्रु मुमुचुः यथा आर्याः ॥ ९ ॥ सखि वृन्दावनं भुवः कीर्तिं वितनोति यत् देवकीसुतपदाम्बुजलब्धलक्ष्मि गोविन्दवेणुम् अनुमत्तमयूरनृत्यं प्रेक्ष्य अद्रिसान्वपरतान्यसमस्तसत्त्वम् ॥ १० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अन्या ऊचुः । हे गोप्यः अयं वेणुः किं स्म पुण्यमाचरत्कृतवान् । कथम् । यद्यस्माद्गोपिकानामेव भोग्यां सतीमपि दामोदराधरसुधां स्वयं स्वातंत्र्येण यथेष्टं भुंक्ते । कथम् । अवशिष्टरसं केवलमवशिष्टं रसमात्रं यथा भवति तथा । यतो यासां ह्रदिनीनां पयसा पुष्टस्ता मातृतुल्या ह्रदिन्यो हृष्यत्त्वचो विकसितकमलवनमिषेण रोमांचिता लक्ष्यंते । येषां वंशे जातस्ते तरवो मधुधारामिषेणानंदाश्रु मुमुचुः । यथा आर्याः कुलवृद्धाः स्ववंशे भगवत्सेवकं दृष्ट्वा हृष्यत्त्वचोऽश्रु मुंचंति तद्वदिति ॥ ९ ॥ काश्चिदाहुः । हे सखि वृंदावनं भुवः कीर्तिं स्वर्गादपि विशेषेण वितनोति । कथंभूतम् । यद्देवकीसुतस्य पदांबुजाभ्यां लब्धा लक्ष्मीः शोभा संपद्येन तत् । किं च गोविंदस्य वेणुमनु वेणुनिनादं श्रुत्वाऽनंतरं मंदं गर्जितं नीलमेघं तं मत्वा मत्ता ये मयूरास्तैराचरितं नृत्यं प्रेक्ष्य संघशस्तत्रतत्राद्रिसानुष्वपरतान्युपरतक्रियाण्यन्यानि समस्तानि सत्त्वानि यस्मिंस्तत् । नैतदन्येषु लोकेषु विद्यतेऽतो लोकांतरापेक्षया भुवः कीर्तिं वितनोतीत्यर्थः ॥ १० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्याः अनुरागिण्यः । किम् अनिर्वाच्यम् । कथं ज्ञातमिति शेषः । यतो हेतोः । ह्रदिन्यो नद्यः सरस्यो वा । वृक्षाद्या अपि तत्र भगवदनुरागिणस्तत्र किं चेत्तनानुरागवार्त्तेति भावः । हे गोप्यो वेणुर्मुरली किं स्वित्कुशलं मंगलमाचरत् अपि तु न किमपि, स्थावरजातित्वेनैव लक्ष्यते इति भावः । तदपि दामोदराधरसुधां भुंक्त इति कथं वयं सोढुं प्रभवाम इति भावः । तत्र हेतुः-गोपिकानामिति । अधरसुधायां हि गोपिकानामस्माकमेव स्वत्वं कृष्णस्य गोपजातित्वान्नित्यं रात्रावस्माभिः संभुज्यमानत्वात् । वेणुस्तु विजातीयः तत्रापि कृष्णरमितत्वमात्मनो मत्वा कृष्णप्रेयसीत्वाभिमानं धत्ते, तत्रापि धाष्ट्र्येन न पुनः पौरुषमाविष्कृत्य स भुंक्ते, तत्रापि परकीयं धनं, तत्रापि स्वयमेव न त्वन्यं जनं कमपि संगिनं करोति, तत्रापि चौर्येण किं तु धनं स्वामिनोरस्मान्

---

१. सुधासरसाग्र्यगेयं–विज. । २. रसौधमार्गे हृष्टत्वचो–विज. । ३. स्तरवस्सदर्भाः– विज. । ४. प्रेक्ष्याद्दतानुचरितान्य–विज. ।

फूत्कारेण ज्ञापयित्वैव, किं चायं न फूत्कारः किं तु संभोगोत्थमणितमेव, तच्चास्मान् श्रावयित्वैव, तत्रापि न वशिष्टो नावशिष्टो रसः किञ्चिन्मात्रोपि यत्र तद्यथा स्यात्तथा भुंक्ते । 'वष्टिभागुरिः' इत्यल्लोपः । धन स्वामिनीनामस्माकं कृते स्वभुक्तावशिष्टमपि किञ्चिन्न रक्षतीत्यहो धाष्टर्यमिति भावः किं च, अकुशलवर्त्तिनः सर्वे जनास्तादृशा एवेत्याहुः । यद्यतोऽधरसुधाभोगान्नद्योपि हृष्यत्त्वच उत्फुल्लकमलादिमिषेण पुलकवत्यो बभूवुस्तरवोपि मकरंदमिषेणाश्रु मुमुचुर्यथाऽऽर्या भगवद्गुणान् श्रुत्वाश्रुपुलकादिमंतो भवंति तथैव ते वेणोर्मणितं श्रुत्वेति । ह्रदिन्योऽस्य सख्यस्तरवश्च सखायो दूता एवेति सर्वेस्माकं वैरिण एवेति भावः । अतोऽयं गोप्यः निभृतं कुत्रापि रक्षणीयो यथा कृष्णाधरं न प्राप्नुयादित्यसूयाख्यः संचारी व्यंजितः ॥ ९ ॥ काश्चित् स्ववासभुवं श्लाघयंत्य आहुः-विपदेन स्वर्गलाभः । इह देवकीपदं यशोदावाचकम्, गोपीनां वसुदेवपत्नीजत्वस्याज्ञातत्वात् । न केवलं पादांकनसंपत्तिरेव किं त्वन्यदपि लोकांतरापेक्षया वैलक्षण्यमस्ति तदाह-किञ्चेति । गोविंदं नीलमेघं वेणुनादं च तद्ध्वनिं मत्वा तत्र तत्र मयूरा नृत्यंतीति । तत्र तत्र स्थले । समस्तानि गोवत्सपक्षिभुजंगादीनि । एतत् गोविंदपादांकनवेणुनादाकर्णनोत्तरमयूरनृत्यादि । अन्येषु स्वर्गादिषु । इत्यर्थ इति । पृथिव्यामपि वृंदावनमेव कुलकीर्त्तिकरपुत्रवद्वरमिति भावः । 'द्वे नाम्नी नंदभार्याया यशोदा देवकीति च' इति । लब्धा लक्ष्मीर्ध्वजवज्रादि चिह्नमयी शोभा येन तत् । लोके च पृथिवी धन्या तत्र जंबूद्वीपस्तत्र भारतं तत्रार्यावर्तं तत्र माथुरमंडलं तत्रापि श्रीवृंदावनादधिकं न किमपीति । अत्रास्मान्नर्त्तयेति मयूरैः प्रार्थितस्य गोविंदस्य वेणुवादनं तदीयतालगत्येव मंडलीभूय नृत्यतां तेषां मध्ये तस्यापि सनृत्यं वादनम्, ततस्तद्वाद्येन तुष्यतां पारितोषिकस्वीयदिव्यबर्हप्रदानं तस्मै, तेन च वादकलोकरीत्या साह्लादं तद्गृहीत्वा स्वशिरस्युष्णीषस्योपरिधारणमिति ॥ १० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो बताऽस्तुतरां गोपानां भाग्यं वेणोरपि भाग्यं किं वक्तव्यमिति महाभावस्फुरदुन्मादतया मिथ्याकल्पनापूर्वकं सेर्ष्याभिलाषमाहुः—गोप्य इति । अयमस्माभिर्दृश्यमान इव नीरसदारुमयो वेणुः अस्मिन् जन्मनि पूर्वस्मिन् वा किङ्कृतमत् पुण्यं कृतवान् तत्पुण्ये ज्ञाते वयमपि तदर्थं यतामह इति भावः । स्मेति विस्मये तल्लिङ्गमाहुः यद्यस्मात् दामोदरेत्यादिदामोदरशब्देन तस्याऽस्माकं च तादृशबाल्यमारभ्य जातेदृशभावाङ्कुरतया स्वाभाविकं सम्बन्धविशेषं सूचयन्ति अत एव गोपिकानामस्माकमेव भोग्याम् अयमिति पुंस्त्वनिर्देशेन तस्य तद्भागा योग्यता चोक्ता तथापि भुङ्क्ते तदेकोपभोग्यत्वेन सदा पिबति तस्य तदन्यभोगादर्शनात् । ननु, दामोदराधरस्तत्सङ्गानन्तरमपि सरस एव दृश्यते नतु शुष्कस्तस्मादसौ न किञ्चिदपि भुङ्क्ते तत्राहुः अवशिष्टो रसो रसमात्रं यत्र तद्यथा स्यात् सुधा भुङ्क्तैव केवलं द्रवमात्रमेवावशिष्येतेत्यर्थः । हे गोप्यः ! इति तस्माद्वेणुजन्मनैव सौभाग्यं नतु गोपीजन्मनेति कुतो यूयं गोप्यो जाता इति भावः । अस्माकमिति वक्तव्ये गोपिकानामित्युक्तिर्गोकुलवासित्वेनास्मत्कोटिप्रवेशेऽपि गोपिकाविशेषत्वाभावान्न तद्विधस्याधिकार इति निजाभिमानविशेषात् वैदग्धीरसविशेषाच्च श्लेषेण तदेकाशयैव देहादिरक्षिकाणामिति किञ्च तस्य युष्मदीयकान्तस्य करे हृदये वदने च सदा वर्त्ततां नाम अधरसुधामपि स्वयं युष्मत् सम्मतिं विनैव भुङ्क्तं इति भावान्तरम् अथवा तच्च कथं भुङ्क्ते तत्राहुः अवेति वशिष्टं अवशिष्टं वष्टिभागुरिरल्लोपमित्यादेः न वशिष्टम् अवशिष्टम् अनवशिष्टमित्यर्थः । तादृशो रसो यत्र तथाभूतं यथा स्यात् रसमात्रमपि नावशेषयतीत्यर्थः । यद्वा अवशिष्टो रसो रागो यत्र तद्यथा स्यात् रागस्यावशिष्टत्वात् न कदाचिदपि विरमेत् किन्तु मुहुर्भोक्ष्यत एवेत्यर्थः । यद्वा सुधां कथम्भूतामपि गोपिकानामवशिष्टो यो रसः तदेकापेक्षया तदितराशेषरसपरित्यागात् तद्रूपामपि अथवा कुशलाचरणे लक्षणान्तरमप्याहुः ह्रदिन्यो हृष्यत्त्वच इति तस्य तादृशं भोगे दृष्ट्वा परमपुण्या ह्रदिन्योपि लोभाद्विकसितकमलमिषेण हृष्वत्त्वचो जातरोमहर्षा बभूवुः इत्यर्थः अथवा यदवशिष्ट उच्छिष्टो यो रसो नादरूपन्तं ह्रदिन्योपि भुञ्जते आस्वादयन्ति यतश्च हृष्यत्त्वचो भवन्तीत्यर्थः । किञ्च यस्य स्वजातिसम्भवस्य वेणोस्तादृशं सौभाग्यं दृष्ट्वा सर्वे स्थावरजातयोपि मधुमिषेणाश्रु मुमूचुः तत्र दृष्टान्तः यथाऽऽर्याः पितरः स्वकुलसम्भवस्य तादृशं सौभाग्यमनुभूयाश्रु मुञ्चन्तीत्यर्थः । ईर्ष्यापक्षे तस्मात् समाज एव तादृशस्तस्यैकस्य वा को दोषः अतोऽयं गोप्यः निभृतं कुत्रापि सङ्गोप्यरक्षणीय इत्यर्थः ॥ ९ ॥ अहो किं वक्तव्यं श्रीहस्तादौ वर्तमानस्य वेणोर्माहात्म्यं वृन्दावनस्य सौभाग्यं कियद्वर्ण्यतामित्याहुः-वृन्देति । हे सखि । वितनोति वैकुण्ठेभ्योपि विशेषेण विस्तारयति यद्यस्मात् यद्वृन्दावनमिति या देवकीसुतस्य श्रीकृष्णस्य पदाम्बुजाभ्यां कृत्वा लब्धा लक्ष्म्यः सर्वशोभामहिम्नोः सम्पदो येन तत् तस्यैवासनोर्द्धरूपत्वात् तत्र च साक्षात्पदाम्बुजाभ्यामेव नतु पादुकाभ्यामित्यनेन श्रीवृन्दावनभूमेः परमसौभाग्यं सूचितं तासां देवकीसुतेत्युक्ति प्रागयं वसुदेवस्येत्यादि गर्गवाक्यानुसारात् तथा चोक्तिर्गोपनाय एवं गोविन्दशब्दोपि गवाध्यक्षेपि गोविन्द इति कोशकारमतमाश्रित्य तस्मिन् सङ्केतितः श्रीगोविन्दाभिषेकानन्तरमेव तन्नाम्नो व्रजे प्रसिद्धेः उत्तरत्र नन्दनन्दनमिति तु गोपनाशक्तेः यद्वा देवकीव्रजेश्वर्येवनाम —

"द्वेनाम्नी नन्दभार्याया यशोदादेवकीत्यपि । अतः सख्यमभूत्तस्या देवक्या शौरिजायया" ॥ इति ।

बृहद्विष्णुपुराणवचनात् विशब्दोक्तं वैशिष्ट्यमाहुः—गोविन्देति । गवामिन्द्रो गोविन्द इति गोपवर्गचूडामणिगोर्गोपालपरिवृतो वन्यभूषणो विचित्रक्रीडारसिकः श्रीयशोदानन्दनो लक्षितः अतो वृन्दावनस्यापि भाग्यमस्माभिरभिलषणीयमेवेति भावः ।

अन्यत्तैः तत्र मन्दगर्जितं नीलमेघं तं मत्वेति मयूराणां मत्तत्वे नृत्ये च हेतुः अन्यथाऽन्येषामिव तेषामप्यवरतत्वमेव स्यात् तथाप्यलौकिकत्वं त्वधिकमस्त्येवेति अथवा तादृशश्रीकृष्णे स्वाभाविकप्रीत्यतिशयवतां श्रीवृन्दावनमयूराणां सम्बन्धेन सर्वस्यामपि तज्जातो भगवत्प्रसादादन्यत्रत्या अपि एतत्सादृश्येनैव मेघे प्रीतिमन्तो ज्ञेयाः ततश्च गोविन्दस्य वेणुमनु तन्नादश्रवणान्तरमित्यग्रेपि सर्वत्रानुवर्तनीयं यद्वा, गोविन्दस्य वेणोर्मनुः नादात्मकपरममोहनमन्त्रस्तेनैव मत्तानां मयूराणां नृत्यं यस्मिन् यद्यपि तद्वेणुनाद एव यथा मयूराणां नृत्ये हेतुस्तथान्येषामवतारत्वेपि तथापि नृत्यरीतिमुत्प्रेक्षितुमेवान्येषां सभासदत्वनिरूपणयोग्यं प्रेक्ष्येत्युक्तं किंवा मुहुः श्रीभगवदासनताप्राप्त्या सर्वेषां परमावलोकनीया अद्रिसानवो ये यद्वा प्रेक्ष्यनृत्येक्षणे वृद्धाविति विश्वप्रकाशात् प्रेक्षाम् अर्हन्ति ये तेषु उच्चेषु तद्दर्शनस्थानेषु अवरतानि स्तब्धतां प्राप्तानि अन्यानि मयूरव्यतिरिक्तानि समस्तानि सत्त्वानि प्राणिनो यस्मिन् यद्वा मत्तमयूरनृत्यं प्रेक्ष्य गोविन्दवेणुमन्विति व्युत्क्रमेण योज्यम् अत्रेदं विवक्षितं बर्हावतंसस्य मयूरप्रियस्य तस्य वनागमनसन्दर्शनमात्रेण प्रीत्या मत्तानां मयूराणां नृत्यं तत्प्रेक्षया हर्षेण गोविन्दस्य वेणुः तेन तद्वादनमित्यर्थः । तमनु अद्रिसानुषु अवरतानि विरतानि अन्यानि श्रीभगवद्दर्शनादिव्यतिरिक्ताशेषप्रयोजनानि येषां तथाभूतानि समस्तसत्त्वानि यस्मिन् ईदृशं श्रीवैकुण्ठेपि नास्तीति तथा ततोऽपि कीर्त्तिविशेषोऽस्याः सिद्ध एव अहो बतास्माकं तत्र तथा तादृश्यवस्था न सिद्ध्येदति वयमधन्या एवेति भावः तच्च तासां प्रेमविशेषस्वाभाविकाऽतृप्त्यार्त्तिलक्षणमेवेति सर्वत्रोह्यम् ॥ १० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो वतास्तु तत्संगि गोपानां भाग्यं किं वक्तव्यमित्याहुः–गोप्य इति । अयं नीरसदारुमयो वेणुः किं कतमत् पुण्यं कृतवानस्मिन् जन्मनि पूर्वस्मिन् वा. तत्पुण्ये ज्ञाते वयमपि तदर्थं यतामह इति भावः । स्मेति विस्मये, तल्लिंगमाहुः–दामोदरेत्यादिना दामोदर-शब्देन निजयूथेश्वर्य्याः प्रेमविशेषेणात्मवश्यतां बोधयन्ति, राधादामोदरयोर्द्वन्द्वत्वात्, अत एव गोपिकानां भोग्यम् । अयमिति पुंस्त्वनिर्द्देशेन तस्य तद्भोगायोग्यतोक्ता. तथापि भुङ्क्ते तदेकोपभोग्यकत्वेन सदा पिबति, तस्य तदन्यभोगादर्शनात् । ननु दामोदराधरस्तद्भोगानन्तरमपि सरस एव दृश्यते, न तु शुष्कस्तत्राहुः–यदिति । सुधां भुक्त्वैव केवलं द्रवमात्रमवशिष्येतेत्यर्थः । हे गोप्यः ! इति तस्माद्वेणुजन्मनैव सौभाग्यम्, न तु गोपीजन्मनेति, कुतो युयं गोप्यो भूता इति भावः । अस्माकमिति वक्तव्ये गोपिकानामिति गोपीजात्यैव तद्भोग्यत्वसिद्धेः, निजाभिमानविशेषात् वैदग्धीरसविशेषाच्च, श्लेषेण तदेकाशयैव देहादिरक्षिकाणामिति । अन्यत्तैर्व्यञ्जितम् । अथवा गोपिकानामेव वश्यः स्वामी वा यो दामोदरस्तस्य करे हृदये वदने च सदा वर्त्ततां नाम, अधरसुधामपि स्वयं युष्मत्सम्मतिं विनैव भुङ्क्ते । अवेति, अवरतादिवद्धीनार्थे, अव हीनं शिष्टं यस्य रसस्य तथाभूतं यथा स्यात्, रसमात्रमपि नावशेषयतीत्यर्थः । यद्वा, अवशिष्टो रसो रागो यथा स्यात्, रागस्यावशिष्टत्वान्न कदाचिदपि विरमेदिति, किन्तु मुहुर्भोक्ष्यत एवेत्यर्थः । यद्वा, सुधां कथम्भूताम् ? गोपिकानामवशिष्टो यो रसस्तदेकापेक्षया तदितराशेष-रसपरित्यागात्तद्रूपामपि, तामप्ययं भुङ्क्ते । तत्र रक्षो नाम प्रीत्याख्यरसविषयत्वेऽपि तादात्म्यापेक्षयोपचारेण सुधैव रसः, किंवा रसनीयमधुरद्रव्यविशेष इति । अथवा कुशलाचरणलक्षणान्तरमप्याहुः–यस्य अवशिष्टमुच्छिष्टमेव, तथापि रक्षं द्रवमात्रम्, न तु सुधाम्, ह्रदिन्यः स्नानपानादिना जगतां पावन्यः सर्वार्थदाश्च श्रीयमुनाद्या नद्योऽपि भुञ्जते, जलविहारादिनाधररागापगमान्नद्यादयोऽधरामृतं पिबन्तीति (साहित्यदर्पणः २।२३) 'निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः' इत्यादिवचनतः काव्येष्वनुमानद्वारा प्रसिद्धमेव, तासां तद्भोगे लिंगं 'हृष्यत्त्वचः' इति, तरवश्च मुनय इव तत्तीरवर्त्तिनो जगदुपकारपरा भगवत्स्तुतमाहात्म्या भुञ्जते, पादैस्तन्नदीजलपानतः, तत्र लिंगम्–अश्रु मुमुचुरिति. अन्यथा तादृशहृष्यत्त्वक्त्वाश्रुमोचकत्वानुपपत्तेः । तत्र दृष्टान्तः—आर्य्या महान्तो यथा श्रीभगवत्प्रसादानुभवेनैव हर्षाद्रोमाञ्चिता गलदश्रुमुचश्च भवन्ति, नान्यथेति । यद्वा, हृष्यत्त्वचः सत्य इति परमदुर्ल्लभलाभेनानन्दभरः सूचितः, अतो यस्योच्छिष्टद्रवमात्रपानेनापि तासामीदृशो हर्षः, तस्य पुण्यमाहात्म्यं कथं वर्ण्यमिति भावः । तरवस्तु अश्रु मुमुचुः, तस्याप्यलाभेन शोकादरुदन्नित्यर्थः । किम्भूताः ? आर्य्याः, छायादिना जगदुपकारान्महान्तोऽपि, यद्वा, ननु तरूणां तद्भोगे कथमपि सम्भावनापि नास्ति, कथं तदप्राप्त्या रोदनं सम्भवेत् ? न हि रंको राज्याप्राप्त्यारोदिति । किं तर्हि क्षुधादिनाऽन्नाद्यर्थमेवेत्याशंक्याहुः–यथा आर्य्याः परमार्य्याः सुधियस्तदधरामृतपानहीना अपि तदप्राप्त्या शोकेनाश्रु मुञ्चन्ति, तद्वदिति । यद्वा, यथा यथावत् तरव आर्य्याः सरलबुद्धयः । अन्यत् समानम् । अतोऽयं गोप्यः, निभृतं कुत्रापि संगोप्य रक्षणीय इत्यर्थः ॥ ९ ॥ अहो किं वक्तव्यं श्रीहस्तादौ वर्त्तमानस्य वेणोर्माहात्म्यम् ? श्रीवृन्दावनस्यैव भाग्यं किं वर्ण्यमित्याहुः वृन्देति । सखि, हे श्रीराधे ! वितनोति स्वर्गादिभ्योऽपि विशेषेण विस्तारयति, यत् यस्मात्, यदवृन्दावनमिति वा, देवकीसुतस्य श्रीकृष्णस्य पदाम्बुजाभ्यां कृत्वा लब्धा लक्ष्म्यो जगद्विलक्षणवज्रांकुशादि सुलक्षणैः सर्वाः शोभासम्पदो वा, सर्वेषां तत्रत्यानां जनानां सर्वार्थमूलमहानिधिप्रकाशनरूपा येन तत् । तत्र च साक्षात् पादाम्बुजाभ्यामेव, न तु पादुकाभ्यामित्यनेन तथाम्बुजरूपकध्वनित परमसौकुमार्य्य-शीतलत्वादि सहजगुणयुक्तपादस्पर्शेन श्रीवृन्दावनभूमेः परमसौभाग्यं सूचितम्, अलभ्यलाभात्, पदाम्बुजशब्देन च स्वर्गादिषु सपादुक-श्रीविष्णवादिभ्यः स्वत एव माहात्म्येन तत्पदाम्बुजाभ्यां लक्ष्मीविशेषसम्पत्तेः । तासां देवकीसुतेत्युक्तिः (भा० १०।८।१४) 'प्रागयं वसुदेवस्य' इत्यादि गर्गवाक्यानुसारेण, किंवा, स्वत एव, तासु सर्वपरिस्फुर्त्तेः, तत्र च सुतशब्देन केवलं तया प्रसूत एव, पुत्रस्तु श्रीयशोदाया एवेति

भावः । यद्वा, देवकी व्रजेश्वर्य्येव, 'द्वे नाम्नी नन्दभार्य्याया यशोदा देवकीत्यपि । अतः सख्यमभुत्तस्या देवक्या शौरिजायया ॥' इति बृहद्विष्णुपुराणवचनात् । अतोऽस्मत्तो वृन्दावनमपि परमधन्यमिति भावः । अहो किं वक्तव्यम्, स्वर्गादिभ्यः श्रीवैकुण्ठलोकादपि विस्तारयतीति विशब्दोक्तं वैशिष्ट्यमाहुः—गोविन्देति, गवामिन्द्रो गोविन्द इति गोपवर्गचूडामणिर्गोगोपगणपरिवृतो वन्यभूषणो विचित्रक्रीडारसिकः श्रीयशोदानन्दनो लक्षितः । हे सखीति—श्रीकृष्णप्रदत्ततदाधिपत्येन तव तु परमधन्यतैवेति, पूर्वश्लोकेन स्वयं वर्णिताद्वेणुभाग्याज्जातशोकां भगवतीं श्रीराधां प्रति ललितादि-तदीयसखीवर्गकृतसान्त्वनमिदं ज्ञेयम् । अन्यत्तैर्व्याख्यातम् । तत्र मन्दगर्ज्जितं नीलमेघं तं मत्वेति, मयूराणां मत्तत्वे नृत्ये च हेतुः, अन्यथाऽन्येषामिव तेषामप्यवरतत्वमेव स्यात्, (भा० १०।४३।१७) 'मल्लानामशनिः' इत्यादिवत् तत्तद्भावानुरूपमेकोऽपि श्रीभगवान् तथा तथैव तेषु तेषु परिस्फुरतीत्यैश्वर्य्यं सुमिध्येदेव । इत्थं कोकिलादिष्वपि वसन्तादिरूपेणास्फुरदित्यप्यूह्यम्, किन्तु श्रीभगवतो मेघविशेषादिरूपेण मयूरादिषु परिस्फूर्त्या तेषां प्राकृतमेघादिभ्यो जायमानभावतोऽधिकाधिकभावश्च ज्ञेय इति दिक् । अथवा, गोविन्दस्य वेणुमनु तन्नादश्रवणानन्तरमित्यग्रेऽपि सर्वत्रानुवर्त्तनीयम्, यद्वा, गोविन्दवेणोर्मनुः—नादात्मकपरममोहनमन्त्रस्तेनैव मत्तानां मयूराणां नृत्यं यस्मिन्, किञ्च, तेनैव प्रेक्ष्यास्तत् प्रतिध्वनिना परमरमणीयाः, किंवा, वनेषु चरतां पशूनां दर्शनाद्यर्थं श्रीभगवदासन्नताप्राप्त्या सर्वेषां परमावलोकनीया अद्रिसानवो यस्मिन्, तत् । किञ्च, तेनैव अवरतानि स्तब्धतां प्राप्तानि अन्यानि मयूरव्यतिरिक्तानि समस्तानि सत्त्वानि प्राणिनो यस्मिन् । यद्वा, प्रेक्ष्यः परमसुन्दरः प्रीत्या व्रजजनैः सदा दृश्यो वा, अद्रेः श्रीगोवर्द्धनस्य सानुः शिखरप्रदेशो यस्मिन्, श्रीगोवर्द्धनपूजायां (भा० १०।२४।३५) 'शैलोऽस्मि' इति वदता श्रीभगवता तद्बलिकुलं भक्षयता लीलाविशेषेणोपविश्याक्रम्यमाणत्वात् । किञ्च, अवरते निवृत्ते अन्ये रजस्तमसी यस्मात्, तथाभूतसमस्तसत्त्वं सम्पूर्णसत्त्वं विशुद्धसत्त्वगुणे यस्मिन् तत्, (भा० १०।३५।९) 'वनलतास्तरवः' इत्यादिवक्ष्यमाणत्वेन तरूलतादीनामपि सात्त्विकभावोत्पत्तेः । अनेन च (भा० २।९।१०) 'प्रवर्त्तते यत्र रजस्तमस्तयोः, सत्त्वञ्च मिश्रं न च' इत्यादिनोक्तायाः साम्येन स्वर्गादिभ्यो भूकीर्त्तिविस्तारणं सिद्धमेव, तत्र च तदनन्तरमेव (भा० २।९।१०) 'न यत्र माया किमुतापरे' इत्युक्त्या प्राकृतसत्वगुणाभावेऽपि शुद्धसत्त्वप्रवृत्तेरुक्तिगुणातीतस्य सच्चिदानन्दविलासरूपस्य सत्त्वस्याभिप्रायेण, तच्च श्रीभागवतामृते बहुशो विवृतमेव, अत्रापि तथैवोह्यमिति दिक् । वैकुण्ठतोऽपि कीर्तिवितानपक्षे चावरतान्युपरतानि अन्यानि गोविन्दवेणुश्रवणतद्दर्शनेतराणि चेष्टितानि येषां भूतानि; यद्वा, अवरतान्यन्यानि समस्तानि सत्त्वानि यस्मिन् । यद्वा, प्रेक्ष्या अद्रयः श्रीगोवर्द्धनाद्या यस्मिन् तत्, सानुषु अवरतानि मयूरेतरसमस्तसत्त्वानि यस्मिन् । यद्वा, मत्तमयूरनृत्यं प्रेक्ष्य गोविन्दवेणुमिति व्युत्क्रमेण योज्यम् । अयमर्थः बर्हावतंसस्य तस्य वनागमनसन्दर्शमात्रेण प्रीत्या मत्तानां मयूराणां नृत्यं तत्प्रेक्षया हर्षेण गोविन्दस्य वेणुस्तेन तद्वादनमित्यर्थः । तमनु अद्रिसानुषु अवरतानि विरतानि श्रीभगवद्दर्शनादिव्यतिरिक्ताशेषप्रयोजनानि येषां तथाभूतानि समस्तसत्त्वानि यस्मिन्, समस्त-शब्देन मयूरा अपि गृहीताः, ततश्च तेषामादौ श्रीभगवद्दर्शनानन्देन मत्ततया नृत्यम्, पश्चाच्च वेणुनादेनान्येषामिव तद्वेणुनादश्रवणतद्दर्शनेतराखिलोपरामलक्षणा प्रेममूर्च्छा जातेत्यर्थः । ईदृशं श्रीवैकुण्ठेऽपि नास्तीति ततोऽपि कीर्त्तिविशेषोऽस्य सिद्ध एव । अहो बतास्माकं तत्र तथा तादृश्यवस्था न सिध्येदिति वयमधन्या एवेति भावः । एतच्च तासां प्रेमविशेषस्वाभाविकातृप्त्यार्त्तिलक्षणमेव सर्वत्र ऊह्यम् ॥ १० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

हृष्टत्वक् मुकुलितत्वचः अश्रु अश्रुकल्पं पुष्परसम् अस्मद्वंश्योऽयं ध्वन्यत इति धिया तरवोऽप्यश्रु मुमुचुरित्यर्थः ॥ ९ ॥ गोविन्दवेणुमनु प्रेक्ष्य मत्तमयूरनृत्यञ्चानुप्रेक्ष्येत्यन्वयः । अद्रिसानुषु अवरतान्यसमस्तसत्त्वं शब्दादुपरतमनुष्यव्यतिरिक्तसमस्तप्राणिजातम् ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गोप्य इति । हे गोप्यः ! अयं कृष्णकरस्थो वेणुः किं स्म कुशलं पुण्यमाचरच्चकार कुतः यद्यस्माद्गोपिकानामपि अपिशब्दो दौर्लभ्यद्योतकः गोपिकानामस्माकमपि दुर्लभां दामोदरस्याधरसुधां स्वयं भुङ्क्ते अनेकोपभोग्यां स्वयमेक एव भुङ्क्ते अवशिष्टरसन्तु ह्लदिन्यो नद्यः तरवश्च भुञ्जते कृत्स्नायामधरसुधायां वेणुनैकेन पीयमानायां यद्गलितमधुरसुधात्मकरसकणजालं ह्लदिन्यस्तरवश्च भुञ्जते अश्रु इति जात्यभिप्रायकमेकवचनम् अवशिष्टरसभोगप्रयुक्तहर्षाश्रूणि मुमुचुर्हृष्यत्त्वचश्च तत्र ह्लदिन्यो विकसितकमलव्याजेन हृष्यत्त्वचः उदञ्चितरोमाण इव लक्ष्यन्ते तरवस्तु मधुमिषेणानन्दाश्रूणि मुमुचुरिवेति भावः । यथा आर्या भागवतशेषरसाभिज्ञास्तद्भुक्तावशिष्टमुपभुज्य हृष्यत्त्वचोऽश्रूणि भुञ्जन्तश्च भवन्ति तद्वदित्यर्थः ॥ ९ ॥ वृन्दावनमिति । हे सखि ! वृन्दावनं भुवः कीर्तिं वितनोत्यनितरलोकसाधारणीं कीर्तिं जनयतीत्यर्थः । अत्र हेतुं वदन्त्यो विशिषन्ति यद्वृन्दावनं देवकीसुतस्य पदाम्बुजाभ्यां लब्धा लक्ष्मीः सौन्दर्यसम्पद्येन किञ्च गोविन्दस्य वेणुमनु वेणुगीतमनुसृत्य मन्दगर्जितनीलमेघभ्रान्त्या मत्ता ये मयूरास्तेषां नृत्तमवलोक्य अद्रिसानुषु उपरतानि वेणुगीततदनुरूपमयूरनृत्तदिदृक्षया निवृत्तस्वस्वव्यापाराणि अन्यानि मयूरव्यतिरिक्तानि समस्तानि सत्त्वानि जन्तवो यस्मिंस्तथाभूतं न ह्यन्योऽस्त्येवंविधो लोक इति भावः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हे गोप्यः ! अयं वेणुः किं कुशलं तपोलक्षणम् आचरत् स्म स्मरणं कर्त्तव्यं किमप्यस्तीति वृत्तं पूर्वजन्मनि चीर्णं वा "स्मृतौ वृत्ते निषेधेस्म" इति च यो वेणुः दामोदरस्याधरोष्ठः स एव सुधा तया सरसं सरागमग्र्यं गेयं यस्मिन् सः सरागमग्र्यगेयः तं रसं भुङ्क्ते आस्वादयति सदर्भाः दर्भाङ्कुरैः सहिताः तरवः हृष्टत्वचः अस्मद्वंश्योयमिति रोमाञ्चितसर्वगात्रा येन वेणुना पीतोऽवशिष्टो यो रसः तस्यौघः प्रवाहो यस्मिन् स यदवशिष्टरसौघः तस्मिन् मार्गे कृष्णेन सञ्चरितेऽध्वनि अश्रु आनन्दजलं मुमुचुरित्यन्वयः । सदर्भाः सकुशा वा ॥ ९ ॥ भुवो भूमेः हे सखि ! यद्वृन्दावनं देवकीसुतस्य पादाम्बुजाभ्यां लब्धा लक्ष्मीः श्रीर्येन तत् देवकीसुतपदाम्बुजलब्धलक्ष्मि लक्ष्मेति केचित् लक्ष्म चिह्नं गोविन्दस्य वेणुमनु वेणुस्वरानुकूलमेघनादशङ्कया वेणुस्वरानुकारेण वा मत्तानां मयूराणां नृत्यं दृष्ट्वा आदृताः सादराश्च अनुकूलं चरितं येषां ते तथा कृष्णचरितानुकूलचरिताश्चान्ये मनुष्यविजातीयाः समस्ताः सत्वा जन्तवो यस्मिस्तदादृतानुचरितान्यसमस्तसत्वं सत्वोऽस्त्रीति वचनात् पुल्लिङ्गोप्ययं शब्दः आदृतौ सादरार्चिताविति च ॥१०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यस्य वेणोरवशिष्ट उच्छिष्टो रसो नादरूपस्तं स्नानपानादौ ह्लदिन्यो जगत्पावन्यो भुञ्जते अहो तद्दर्शनात्तरवोऽपि हृष्यत्त्वचः अङ्कुरादिमिषेण रोमाञ्चिताः सन्तो मधुमिषेणाश्रु मुमुचुः कीदृशा अपि यथाऽऽर्य्या मुनयस्तद्गुणैस्तथाभूता अपीत्यर्थः ॥ ९ ॥ तस्यां समाज इत्युक्तानुसारेण तयाचोक्तिर्गोपनीया ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

मुग्धा मुग्धाभिः सहोचुः—गोप्य इत्यादि । हे गोप्यः ! गोपयतीति गोपी, जानन्त्योऽपि भवत्यो न कथयन्ति; कथयत, अयं वेणुः किं कुशलमाचरत् ? स्मेति वितर्के; यतो यतो दामोदराधरसुधां भुङ्क्ते, भोग्यत्वेनोपपन्नां सुधां पिबतु नाम किं तत्रास्माकमसूयतेत्याशङ्क्याहुः गोपिकानामप्यस्माकमपि भोग्यैषा, तथाप्येष एव पिबतीति परकीयभोग्यभोगो विना तादृशकुशलाचरणे न स्यात् । तत्रास्मदनुज्ञयैव तु नापि तथेत्याह—यदित्यादि । एवमेव मात्रातिरेकेण पिबति, यया यदवशिष्टरसं ह्लदिन्योऽपि भुञ्जत इत्यर्थः । तदेव कथं ज्ञातम् ? तत्राह—हृष्यत्त्वचः फुल्लत्कमलादिरूपास्त्वचो यासाम्, ता अपि यथेष्ठं स्वविकारं गोपयितुं न शक्नुवन्तीति भावः । न केवलं ह्लदिन्य एव भुञ्जते, तरवश्चेत्यर्थः । अतिवाहुल्यात् कथमवगतम् ? तत्राहुः—अश्रु मुमुचुः । एषामप्यतिमात्रता जातेत्यर्थः । क इवाश्रु मुमुचुः ? यथार्याः प्रधानभूता राधादयः, अधरपानसम्बन्धस्यान्येषामसंम्भवात्, सामान्याश्रुपात् विवक्षायां भक्ता वा । यद्वा तस्मादयं वेणुर्गोप्यश्चारयितव्यः । अत्र मौग्ध्य-गर्व-दैन्यानि ॥ ९ ॥ मध्या ऊचुः—वृन्दावनमित्यादि । हे सखि ! वृन्दावनं भुवः कीर्तिं तनोति । आत्मकीर्तिस्तु स्वत एव–आनन्त्याद्विस्तारयितुं न शक्यत इति भावः । एतेन भुवः पृथक्त्वेनाभौमत्वमपि प्रतिपादितम् । तत्र हेतुः—यद् देवकीत्यादि । देवकीसुतेति ज्ञायमानेऽपि यशोदासुतत्वे व्यवहारसम्बन्धस्थापनार्थं तथा चाधुनिककविप्रयोगः—'वङ्चन्ते मह्हु-महने सम्बन्धानि ह्लू विज्जन्ति' इति । अथवा, देवकीति यशोदाया एव नामान्तरम्, तस्य पदा चरणेनाम्बुजैरिव लब्धा लक्ष्मीर्येन सर्वतः फुल्लारविन्दमिवेप्यद्भुतोपमा गर्भस्था प्रकृतार्थो वा । वस्तुतस्तु भूरेव तथा, वनन्तु वृन्दावनसम्बन्धादेव भुवस्तादृशत्वमिति समुचितमेव भुवः कीर्ति-तननम् । कीदृशम् ? पुनर्गोविन्दवेणुमनु लक्ष्यीकृत्य मत्तानां मयूरीणां नृत्यं यत्र; अथवा गोविन्दवेणुरेव वेणुध्वनिः, स एव मन्त्रस्तेन मत्तानामिति पूर्ववत्; यद्वा 'गोविन्दवेणुमनु' इति छेदः । गोविन्दवेणुरेव मनुर्धर्मोपदेष्टा यत्र, यस्योक्त्या वयं सकलमेव कुल-शीलादिकमत्यजाम; 'न दोषो मनुरब्रवीत्' इत्यादिवदस्यापि वचसि प्रामाण्यम् तदा मत्तानां मयूराणां नृत्यं यत्र । पुनः कीदृशम् ? क्षेप्याणि दर्शनीयानि अद्रेर्गोवर्द्धनस्य यानि सानूनि तेषु आरतास्तूष्णीम्भूताः अन्यसमस्ताः सत्त्वाः प्राणिनो यस्य; पूर्वसंकेतितस्थलस्मरणं व्यङ्ग्यम्; अथवा मत्तमयूरनृत्यं प्रेक्ष्य दृष्ट्वा अदिसानुषु अपरतान्यसमस्तसत्त्वमिति बहुपदसापेक्षसमासः, मयूराणां नृत्यं प्रेक्ष्य अहो अमी भागवता एव भगवदावेशेन यदेवं नृत्यन्तीति तेषां नृत्यामोदेनान्येषां तत्र स्थितानां पशुपक्षि–मृगादीनामपि सामाजिकत्वेन रसावेशात्तूष्णीकत्वमिति भावः । अहो अतिरम्यं तदासीत् संकेतस्थानमिति स्मृतिभावः ॥ १० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मुग्धा मुग्धाभिः सहाहुः—गोपा इत्यादि । सख्यः ! अयं वेणुः किं कुशलमाचरदाचरितवान्, यतो दामोदराधरसुधां भुक्तियोग्यत्वेनोपसन्नां भुङ्क्तां नाम, किं तेन ? तत्राह गोपिकानामेवेयं भोग्या, स्वयमिति गोपिकानामननुमतावपि, वस्तुतस्तु गोपिकानामिति गोपिकाज्ञयैव भोक्तुं योज्यते, तन्न कृत्वा स्वयमेव भुङ्क्ते इत्यर्थः । तत्रापि परिमिता एव भुङ्क्ताम्, न च तथा मात्राधिक्येन भोक्तुमारभते परकीयत्वाद् यथेष्टमेव भुङ्क्ते । तथा च लोकोक्तिः–"परान्नं प्राप्य दुर्बुद्धे ! मा शरीरे दयां कुरु ।' यथेष्टं भोजनं कथं ज्ञातम् ? तत्राह—यदवशिष्टरसमित्यादि । यद्भोजनावशिष्टरसं ह्लदिन्यो भुञ्जते, तदेव कथं ज्ञातम् ? हृष्यत्वचः फुल्लत् कमलादिरूपास्त्वचो यासां विकारैरेव ज्ञायते । न केवलं ह्लदिन्यस्तरवश्च भुञ्जते । बाहुल्यादवशिष्टरसस्य ह्लदिन्योऽपि भोक्तुं न शक्नुवन्ति

तदवशिष्टं भुञ्जते कथमवगतम् ? तत्राहुः–अश्रु मुमुचुः क्रन्दन्ति, वर्त्तमानेऽतीतः; यथा आर्या भवत्योऽश्रु मुञ्चन्ति, आर्या भक्ता वा। अथवा, 'तस्मादयं वेणुर्गोपाश्चोरयितव्यः, यथा अपरमेवं न करोतीति भावः। अस्माभिस्तु पातुं न शक्यते, अहो ! धिङ्नः' इति मौग्ध्यदैन्ययोः साङ्कर्यम् ॥ ९ ॥ मध्या आहुः—वृन्दावनमित्यादि। हे सखि ! वृन्दावनं भुवि कीर्तिं तनोति, विशेषेणेत्यर्थः। भुव इत्यस्यायं भावः—वृन्दावनस्तु ब्रह्माण्डातीतं व्यापकञ्च, संप्रति भुव्यवतीर्णत्वाद् भुव एव कीर्तिं तनोति। आत्मकीर्तेः स्वत एवानन्त्याद्विस्तारयितुमशक्यम्। तत्र हेतुः—यद्देवकीसुतपदाम्बुजलब्धलक्ष्म देवकीसुतेति सम्बन्धस्थगनपरम्, पदाम्बुजलब्धलक्ष्मीकत्वं हि भुव एव, तेनैव वृन्दावनस्यापीताहो परस्परप्रीतिमत्वम्। यद्वा, देवकीसुतपदाम्बुज–लब्धलक्ष्मी देवकीसुतचरणेन हेतुनाऽम्बुजैरिव सर्वतो लब्धा लक्ष्मी येन वने सर्वतोऽम्बुजवस्त्वमतिशय–चमत्कारकारि। पुनः कीदृशम् गोविन्दवेणुरेव मनुर्धर्मोपदेष्टा यत्र यस्य निरुक्त्या वयं कुल-शीलादि सकलमत्यजाम, मत्तानां मयूराणां नृत्यं यत्र, मेघनादानुलासित्वाद्गर्जतो मेघस्येव वेणुं वादयतः कृष्णस्य दर्शनान्मयूरा यत्र नृत्यन्ति। मनुशब्दस्यायं भावः—"न दोषो मनुरब्रवीत्" इत्यादिवत् मनुवचसः प्रामाण्यवदस्यापि वेणोरत्वे प्रामाण्यमस्माकमित्यसौ यदा यद्वदति तदैव कुर्म इत्यर्थः। गोविन्दवेणुमनु लक्ष्यीकृत्य मत्तानामिति वा। प्रेक्ष्याणि दर्शनीयान्याद्रिसानूनि तेष्वपरतानि विरत–विषयाण्यान्यानि मयूरातिरिक्तानि समस्तानि सत्त्वानि यत्र। अथवा, मयूरनृत्यं प्रेक्ष्याद्रिसानुष्वपरतानि समस्तसत्त्वानि यत्र। अहो ! अमी भागवता भगवदावेशेनैवं नृत्यन्तीति सर्व एव तन्नृत्यामोदनेन विरत-व्यापारा बभूवुरित्यर्थः। अथवा, यैतद्वेति, सैव यत्र सङ्केतस्थं कृष्णमभजत, तं देशमुद्दिश्यैव वदति–अस्मद्विलम्बं दृष्ट्वा वेणुं वादितवान्। तेन मेघभ्रमान्मत्ताः शान्ता मयूरा नृत्यं चक्रुः, तद् दृष्ट्वा अद्रिसानुष्वपरतान्यन्यानि समस्त–सत्त्वानि च तत्र आसन्। अहो अतिरम्यमासीत् तत् सङ्केतस्थानमिति स्मृति-भावः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्चास्मान् विडम्बनाब्धौ निक्षिपन्नयं वेणुरेवानर्थकारीत्याह–हे गोप्यः ! वेणुः मुरली किंस्वित् कुशलं पुण्यमाचरत् वंशीमुरल्यादिशब्दानां स्त्रीलिङ्गत्वेपि तत्पर्य्यायस्य वेणुशब्दस्य पुंस्त्वं दारशब्दवज्ज्ञेयम् यद्वा, किं मङ्गलमाचरत् अपितु न किमपि स्थावरजातित्वेनैव लक्ष्यत इति भावः। तदपि दामोदरस्याधरसुधां भुङ्क्ते इति कथं वयं सोढुं प्रभवाम इति भावः तत्र हेतुर्गोपिकानामिति अधरसुधायां हि गोपिकानामस्माकमेव स्वत्वं कृष्णस्य गोपजातित्वादस्माकं गोपजातिस्त्रीत्वादिति न्यायप्राप्तेः नित्यं रात्रावस्माभिः सम्भुज्यमानत्वाच्च वेणुस्तु विजातीयस्तत्रापि कृष्णरमितत्वमात्मनो मत्वा कृष्णप्रेयसीत्वाभिमानं धत्ते तत्रापि धाष्टर्येन पुनः पौरुषमाविष्कृत्य सम्भुङ्क्ते तत्रापि परकीयं धनं तत्रापि स्वयमेव न त्वन्यं जनमेकपि सङ्गिनं करोति तत्रापि न तत्रापि न चौर्य्येण किन्तु धनस्वामिनोरस्मान् फूत्कारेण ज्ञापयित्वैव किञ्च नायं फूत्कारः किन्तु स्वसम्भोगोत्थं मणितमेव तच्चास्मान् श्रावयित्वैव तत्रापि नवशिष्टः न अवशिष्टो रसः किञ्चिन्मात्रोपि यत्र तद्यथास्यात्तथा भुङ्क्ते "वष्टिभागुरिवल्लोपम्" इत्यादिना अकारलोपः धनस्वामिनीनामस्माकं कृते स्वभुक्तविशिष्टमपि किञ्चिन्न रक्षतीत्यहो धाष्टर्यमिति भावः। किञ्च, तद्देशवर्त्तिनः सर्व एव जनास्तादृशा एवेत्याहुः—यत् यतो अधरसुधाभोगात् तं वीक्ष्येत्यर्थः। ह्रदिन्यो नद्यो हृष्यत्त्वचः उत्फुल्लकमलादिमिषेण उत्फुल्लकवत्यो बभूवुः तरवो मकरन्दमिषेणाश्रु मुमुचुर्यथा आर्य्याः भगवद्गुणान् श्रुत्वा अश्रुपुलकादिमन्तो भवन्ति, तथैव ते वेणोर्मणितं श्रुत्वेति ह्रदिन्योऽस्य सख्यस्तरवोऽस्य सखायो दूता एवेति वेणुह्रदिनीतरवः सर्वं एवास्माकं वैरिण एवेति भावः। अतोऽयं गोप्यः निभृतं कुत्रापि रक्षणोयो यथा कृष्णाधरं न प्राप्नोतीत्यसूबाध्यः सञ्चारीव्यञ्जितः ॥ ९ ॥ तदोयतादृशविलासास्वादस्य वृन्दावनस्य सम्प्रति माधुर्य्यमधिकमुल्लसन्त्यतस्तदेव दिदृक्षमाणास्तत्र गच्छामो वयं नात्र कोपि दोष इत्यन्या आहुः–वृन्दावनमिति। भुवः कीर्तिं स्वर्गादिभ्यो विशेषेण तनोति यद्यतो देवकीसुतस्य यशोदानन्दनस्य पदाम्बुजाभ्यां लब्धा लक्ष्मीः ध्वजवज्रादिचिह्नमयी शोभा सम्पत् येन तत् न ह्येवम्भूतं वैकुण्ठवनमपि सम्भवेदिति भावः—

> "द्वे नाम्नी नन्दभार्य्याया यशोदादेवकीति च। अतः सख्यमभूत्तस्या देवक्या शौरिजायया" ॥

इति बृहद्विष्णुपुराणम् एवम्भूतं गोष्ठस्थलमपि सम्भवेदिति चेदत आहुः–गोविन्दस्य वेणुं वेणुवाद्यं लक्ष्यीकृत्य यन्मत्तानां मयूराणां नृत्यं तत् प्रेक्ष्य अद्रिसानुषु अवरतानि उपरतक्रियाणि अन्यानि समस्तानि सत्त्वानि यत्र तत् अत्रास्मान्नर्तयेति मयूरैः प्रार्थितस्य गोविन्दस्य वेणुवादनं तदीयतालगत्यैव मण्डलीभूय नृत्यतां तेषां मध्य एव तस्यापि सनृत्यं वादनं ततस्तद्वाद्येन सन्तुष्यतां तेषां पारितोषिकस्वीयदिव्यबर्हप्रदानं तस्मै तेन च वादकलोकरीत्या साह्लादं तद्गृहीत्वा स्वशिरस्युष्णीषस्योपरि तद्धारणं तत्तौर्य्यत्रिकमास्वादयतामद्रिसानुषूपविष्टानां सभ्यानां कृष्णसारकपोतादिमृगपक्षिणामानन्दजाड्यमित्यादिकं सर्वं दिदृक्षामहे इति भावः ॥ १० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या आहुः। हे गोप्यः ! अयं श्रीकृष्णकरपद्मस्थो वेणुः किं स्म कुशलं तपोदानव्रतादि आचरन् कृतवान् तत्र हेतुमाहु–गोपिकानामस्माकं भोग्यां सतीं दामोदराधरसुधामपि स्वयं स्वातन्त्र्येण यथेष्टं भुङ्क्त इति दामोदरस्य जठरपटयोर्मध्ये हस्तप

च वसन् तत्स्पर्शानन्दं प्राप्य तदधरसुधामपि सेवते इत्यर्थः । किं च यत् यस्य वेणोः जलद्वारोत्पादकतया सम्बन्धिन्यः मातृतुल्याः ह्रदिन्यः अपि अवशिष्टरसस्तानाद्यर्थं प्राप्तस्य दामोदरस्याधरसुधाशेषं भुञ्जते यतः हृष्यत्त्वचः विकसितपद्मनिकरव्याजेन रोमाञ्चिता इव लक्ष्यन्ते पुत्रं वेणुमात्मानं च कृतार्थं मत्वा हृष्यत्त्वचो भवन्ति तद्वत् किं चाऽस्य पितृतुल्यास्तरवोऽपि तदधरसुधाशेषं तत्र तत्र विहारवेलायां भुञ्जते यतस्ते मधुधाराव्याजेनानन्दाश्रु अश्रूणि मुमुचुः अश्विति जातावेकवचनम् यथा आर्य्याः स्वपुत्रमात्मानं कृतार्थं ज्ञात्वा आनन्दाश्रूणि विमुञ्चन्ति तद्वदित्यर्थः ।। ९ ।। अन्याः आहुः–हे सखि ! वृन्दावनं भुवः कीर्तिम्बितनोति यत् यतः देवकीसुतपदाम्बुजाभ्यां लब्धा लक्ष्मीः शोभा सम्पद्येन तत् किं च गोविन्दवेणुमनु गोविन्दस्य वेणुनिनादमनुसृत्य मन्दगर्जितश्यामघनभ्रान्त्या मत्ता ये मयूरास्तन्नृत्यं प्रेक्ष्य अवलोक्य अद्रिसानुषु अवरता निवृत्तस्वव्यापाराणि अन्यानि समस्तानि सत्त्वानि यस्मिंस्तत् नान्योस्त्येवम्विधो देश इति भावः ।। १० ।।

श्रीरामकृष्णकृता प्रेममञ्जरी

गोप्यः किमाचरदयमिति एता दक्षिणा अधीराश्च । हे गोप्यः ! गोपनशीलाः सख्यः गोपनीयमिदं रहस्यमित्यभिप्रायः । अयं प्रसिद्धः श्रूयमाणो वेणुः किं कुशलमाचरत् जानीमश्चेद्वयमपि तदेवाचरामः । स्मेति विस्मये ज्ञातं यत्सवंशे जातः शिरसा धृतश्च तत्सर्वमपि विहाय प्रागुत्तरशुभाशुभसंपर्कमुत्सृज्य शिरोग्रन्थिमात्रशेषः एषोग्निमात्रसाक्षिकं नव छिद्राणि संशोध्यानुरागयोग्यमात्मानं विधाय कृष्णमनुसृतोऽधरामृतैकजीवनस्तेनाप्यतीव नवनवानुरागेण कक्षकटिशय्यादिष्वनुशायितः समये चाधरामृतेनाप्यायितश्च विलसतीति गूढं तद्रहस्यं न कस्यापि प्रकाशनीयं वयमपि तथा चरामस्तर्हि तथैव भवामः दामोदराधरसुधां भुंक्ते न तु पिबतीति तस्माद्यत्वम् स्वयमिति धनिनामनुमतिमपि नाकांक्षते पीतामृतगर्जितेन जितेन चक्षते लवणयिवातपयति त्वक्सारोऽयमन्तसारशून्योऽपि दारुखण्डः किं कुर्म्मः ? दामोदरेति बाल्यमारभ्य सुधासञ्चयोऽभिप्रेतः । यद्वा, बाल्यचापलेनैव पुंस्त्वेनीयोग्यमपि पाययतीति साभ्यसूयम् यद्वा, दाम्ना निःपीड्योदरमशेषामेव सुधां पाययति नवशिष्टम् अवशिष्टम् अनवशिष्टमित्यर्थः । रसमात्रमपि नावशिष्यते । ननु, स्वरचातुर्य्येण सुषिरं वादयति भवतीभिः कुतो ज्ञातं सुधां पाययति तत्राहुः मातृभावा गम्भीराशयाः ह्रदिन्योपि हृष्यदिति तत्त्वो आर्य्या अपि यथा पित्रादयो हि राजमान्यत्वेन स्वपुत्रस्योदयमालक्ष्य विलक्षणसुखमनुभवन्ति प्राग्भवीनं पुण्यजातमस्य तिष्ठत् सम्प्रत्येवायमतिपुण्यवानिति सदाचारवर्य्यैश्वर्यलाघ्यश्चेतीति ।।९।। वृन्दावनमिति । हे सखि ! आस्तां श्रीहस्तादौ नित्यं क्रीडतो वेणुराजस्य भाग्यं तत्पदाम्बुजस्पर्शलब्धपरभागभारतान्तर्गतवृन्दावनाख्यभूमागस्य भाग्यं तावदनुभूयतामित्याहुः यत्सम्बन्धेन कल्पायुषां स्थानजदित्यादिना कल्पवासिभिरपि स्तूयते तत्साध्यमेव पूर्णं ब्रह्म निजचरणाङ्कैर्निखिलधामभ्योपि विशिष्टं सौभाग्यमातनोति राजमुद्राङ्कितवस्तु सर्वतः श्रैष्ठ्यभाग्भवेदिति न्यायात् ।। १० ।।

श्रीमत्कृष्णदासकृता श्रीगणदोपिका

चम्पावती चम्पकाङ्गीं प्रत्याह–गोप्य इति । वहुवचनं गौरवादिति । यद्वा, गोपनशीलाः सख्य इत्यर्थः । गोपनीयमिदं रहस्यमित्यभिप्रायोक्तम् अयमनर्थकारी वेणुः किं कुशलमाचरत् पूर्वजन्मनि किमनिर्वचनीयपुण्यविशेषं कृतवान् इत्यर्थः यत् सुवंशे जातः श्रीराधावल्लभे प्रेमपात्रमात्मानं विधाय तमेवानुसृतश्चाधरामृतैकजीवनश्च तेन राधावल्लभेन अतिनवनवानुरागेण कक्षकटिस्थानयोः शायितश्च अधरामृतेन पायितश्च श्रीवृषभानुकुमारीवल्लभस्य प्राणतोऽप्यधिकप्रियश्च ततः किं पुण्यविशेष इति भावः । जानीमश्चेत्तद्वयमाचरामस्तथैव भवाम इति भावः । अवशिष्टमित्यत्र नञ्समासस्याकारः नतूपसर्गस्य । यद्वा, स्वयमिति धनस्वामिनीनामस्माकमनुमतिमपि न काङ्क्षते पीतामृतगर्वितक्षते लवणविवार्पयतीति भावः ।। ९ ।।

चम्पा लतानाम्नीं सखीं प्रत्याह—वृन्दावनमिति—

अलमलमिह योषिद्गर्द्भीसङ्गरङ्गैरलमलमिहवित्तापत्यविद्यायशोभिः ।।
अलमलमिह नाना साधनायासजालैर्भवत भवत वृन्दारण्यमाश्रित्य धन्याः ।।
सा मे न माता स च मे पिता न । स मे न बन्धुः स च मे सुहृन्न ।।
स मे न मित्रं स च मे गुरुर्न । यो मे न वृन्दावनवासमादिशेत् ।।
तच्छास्त्रं मम कर्णमूलमपि च स्वप्नेऽपि यायादहो । श्रीवृन्दाविपिनस्य यत्र महिम्न नात्यद्भुतः श्रूयते ।।
ते मे दृष्टिपथं न यान्तु नितरां सम्भाव्वतां वै तथा । ये वृन्दावनवैभवस्य श्रवणेऽप्युल्लासिनो नोऽखिलाः ।।
रक्षति संसारभयाद्दोषाकरप्यशेषनृद्वन्द्वम् । वृन्दावनमिति तेन प्रथितं तन्नौमि काननं किमपि ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अपराः प्राहुर्गोप्य इति । हे गोप्यः ! अयं वेणुः किं कुशलं मङ्गलमाचरत् तस्मिन् ज्ञाते वयमपि तदर्थं यतामहे इति भावः । यतो हेतोर्गोपिकानां धनमपि दामोदराधरसुधां भुङ्क्ते स्त्रीचेदत्यनुरागेणापरासां पत्युरधरसुधां भुङ्क्तां नाम अयं खलु वेणुः

पुरुषः कथं तां भुङ्क्ते इति वेणुशब्दाभिप्रायात्तत्रोपहासः तत्र च स्वयमात्मनैवेति कस्याश्चिदपि गोपिकायास्तल्लेशप्राप्तेरभावस्तत्राप्याश्चर्यमिति भावः । अन्यच्चान्यायं शृणुतेत्याहुः यस्य वेणोरवशिष्टौ भुक्तमुक्तौ यो रसन्तं ह्रदिन्योऽपि पवित्रा यमुनाद्या भुञ्जते भुक्त्वा च विकचारविन्दवनमिषेण फुल्ला दृश्यन्त इति भावः किञ्च वेणोस्तस्य तादृशमहिमवीक्षणेन तद्गोत्रप्रायास्तरवोऽप्यङ्कुरोदगमादिमिषेण हृष्यत्त्वचो रोमाञ्चिता मधुधारामिषेणानन्दाश्रु मुमुचुरिति तस्यान्यायमपि न गणयन्तीति भावः । यथार्थाः केचिदात्मगोत्रमहिमदर्शनात्तत्तद्भावं धारयन्तीति तेषामप्यनार्यत्वं सूच्यते अत्र गोपिकानामिति षष्ठीपदांशः स च स्वस्वामिभावसम्बन्धेन जातत्वादधरसुधायां गोपीस्वत्वं व्यञ्जयति ॥ ९ ॥ वृन्दारण्यं तद्विलासास्पदं सदति चारुविभाति तद्दिदृक्षया तत्र गताभिरस्माभिः स प्रेयान् आराद्द्रष्टव्यश्चेन्न कापि शङ्केति भावेन पराः प्राहुः वृन्दावनमिति । हे सखि वृन्दावनं स्वर्गादिभ्योऽपि सकाशाद्भुवः कीर्तिं विशेषेण तनोति यद्यतो देवकीसुतस्य यशोदानन्दनस्य पदाम्बुजाभ्यां लब्ध्वा लक्ष्मीर्ध्वजवज्राङ्कुशादिचिह्नमयी शोभा येन तदिति नह्येतं तेष्वस्तीतिभावः । न त्वादृक् सौष्ठवमपि सम्भवेत्तत्राहुः गोविन्दस्य वेणुं तद्रणितमनु लक्ष्यीकृत्य मत्तानां मयूराणां नृत्यं प्रेक्ष्य अद्रीणां सानुषु कूर्मपृष्ठसमासु उद्धवभूमिषु अवरतान्युपरतक्रियाणि अन्यानि समस्तानि सत्वानि कृष्णसारकपोतादीनि यत्र तत् तत्र गत्वैतत् सर्वमाश्चर्यं द्रक्ष्यामः इति भावः ॥ १० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

चूतानां प्रवालाः पल्लवास्तैर्बर्हस्तबकैः पिच्छगुच्छैः । छन्दोच्छेदाय रेफः पृथगुच्चार्यः । उत्पलानि चाब्जानि च तेषां मालाभिश्चानुरक्तं संसक्तं यत्परिधानं पीतनीलवसनं तेन विचित्रौ वेषौ ययोस्तौ पशुपालगोष्ठ्यां गोपालकसभायाम् । समज्जा परिषद्गोष्ठी सभासमिति संसद इत्यमरः । गावो वाचो वा तिष्ठन्त्यस्यामिति घञर्थे कः । अम्बाम्बेति षत्वम् । गौरादिङीप् । तत्रापि मध्येक्वापि गायमानौ गायन्तौ रङ्गे नटवरौ यथा तथा यौ विरेजतुस्तयोर्वक्त्रमित्यतीतेनान्वयः । मध्येवीत्येकं पदं वीनां पक्षिणां मध्ये मध्ये वि पारे मध्ये षष्ठ्या वेत्यव्ययीभावः । पशुपालगोष्ठ्यां रेजतुरित्यन्वयः । तेऽपि पक्षिणस्तत्र स्वत एवायाता इति वा क्रीडार्थं सङ्गृहीता इति वा तन्मध्य इत्युपपन्नम् । एतेन गोष्ठ्यामिति गोष्ठ्यैव तन्मध्य इति सम्भवत्यर्थे मध्ये इत्यतिरिक्तमिति निरस्तम् ॥ ९ ॥ हे गोप्य इति काश्चित्सम्बोध्य काचिद्वक्ति । अयं वेणुः किं कुशलं सुकृतमाचरत् चचार स्मातीते जन्मनि । स्मातीत इति विश्वः । प्राक् । कुशलं शिक्षिते क्षेमपर्याप्तसुकृतेषु चेति विश्वः । केनेत्थमूहयसि मोहनदेह इत्यत आह ॥ दामोदरेति । दामोदरस्य यावधरावोष्ठौ तयोः सुधयाऽमृतेन स समो रसः सुधासरसोऽर्थ्यैः श्रेष्ठैर्ब्रह्माद्यैर्गेयो गातुमर्हश्च तमोष्ठसम्बन्धिसुधासमग्रयगेयं भुङ्क्ते स्वयं पिबतीत्यर्थः । सशब्दस्य समार्थकत्वं कथमिति सखाऽपि सपत्नः सन्नावकाशं दिशेत् तव प्रष्टुं हृष्टत्वचः सन्त इव सदर्भास्तेषामेव रोमाञ्चरूपता ज्ञेया । ते यथाऽश्रु आनन्दोदकं मुञ्चन्ति तथा तरवो वृक्षा यदेवशिष्टरसौघमार्ग्रे येन वेणुनावशिष्टस्तत्पूरणोर्वरितो यो रसौघो रसप्रवाहस्तद्वान्यो मार्गः पन्थास्तास्मिन्नश्रुरसविशेषं मुमुचुः । अभिमानिनमानन्दोदमोचनं मोचनं च जडानां रसविशेषस्येति विशेषोऽवसेयः । स्वयं बहुशुभावह इति शोभनीयोर्दैवं यस्य तत्कुशलमिति वाऽन्वयः ॥ १० ॥

श्रीसुबोधिनी

एवं रसं निरूप्य तस्याधिदैविकरूपतासम्पादकं वेणुनादं निरूपयन्ति **गोप्य** इति, **गोप्य** इतिसम्बोधनं पूर्वरसाभिज्ञापकं, नात्र बोधनीयं वचनीयं वा किञ्चिदस्ति, यद्यपि तेन रसो न पीतस्तथापि मुखे सन्दर्शनादन्यार्थत्वेति भोजनं करोतीति लक्ष्यते, पुरुषस्य तद्भोजनं सर्वथासम्भावितमन्यथा भगवतैव भुक्तं स्यादतः स्त्रीणामेतद् भोग्यं, तदाह **गोपिकानाम्** इति, **अधरसुधा गोपिकानां** सम्बन्धिनी, बहुवचनेन समुदायरूपा लक्ष्मीरप्यनेन सूचिता तदंशाश्च तयैव समागताः, नान्यत्र तद्भोगो लोके प्रसिद्धः, तादृशस्य वस्तुनो भोक्ता पुरुष एव न भवति किम्पुनर्योन्यन्तर्गतो जीवस्तत्रापि वेणुः ? आधिदैविकस्य चेतनत्वं सूचयन्त्य आहुः सर्वा एव आधिदैविक्य इति स्वगोष्ठ्यां तस्यापि विचारो घटते, **सर्वं धर्मफलमितिवैदिकसिद्धान्तो**तः कारणभूतं धर्मं विचारयन्ति **किमाचरदिति**, **धर्मः सर्वोपि वेदसिद्धो वेदरूपाश्च वयमतोस्मदज्ञातः कथं धर्मो भवति** येन धर्मेण वयं जाताः ? परं तत्रापि मर्यादान्यायेन साधनविरोधाभावस्ततोस्मासु स्त्रीत्वं वेणौ तु तदभावस्ततः सन्देहः फलस्य दृष्टत्वाच्च, सम्मत्यर्थं च गोपिकासम्बोधनं, **अयमितिपुल्लिङ्गनिर्देशश्च** बाधकः **स्मेतिप्रसिद्धिश्च**, वस्तुतस्तु [१]न तस्य फलं, तदुपपादितं, तह्यन्तराबाधे कर्तव्ये साधनबलनिश्चयेन फलाभावः पूर्वपक्षः फलबलविचारेण साधनाभावाभावः सिद्धान्तः, तदाह **वेणुपदेन**, **वश्च इश्च वयौ** तावणूकृतौ **येनेति**, लोकेभ्यस्तथासुखदानाद् धर्मोस्तीति निश्चीयते, अधरसम्बन्धादेव तथात्वमित्यनिश्चयोपि, तथापि साधनं स्वयमेवेतिनिश्चयः, **पुष्टिबलमाश्रित्य तस्य सिद्धिरिति** ज्ञापयितुं मर्यादायां हीनतामाह **दामोदरेति**, **दामोदरे** यस्येति भगवतो गोपिकाधीनत्वं सूचितं, लोभात्मकश्चा**धरः**, अतः स्वतः परतश्च तस्य साधनाभावः सूचितः, **सुधापदेन** च रसविवक्षायां रसनेन्द्रियाभावश्च बाधकत्वेन सूचितः, नादं भुङ्क्त इत्यविवादं **सुधामपि भुङ्क्त** इति विवादास्पदं "सा वनस्पतीन् प्राविश"दितिश्रुतेः, सुधानधिकारः पूर्वमुपपादितः, किञ्च भगवांश्चेद् दद्यात् कदाचित् सम्भवेदपि व्यभिचारे स्त्रीसिद्धान्तवत्, **गोपिकावत् स्वयं भुङ्क्त** इत्याश्चर्यं, अधरमुखसम्बन्धे पानमस्माकं सिद्धमस्ति तस्यापि मन्यामहे, किञ्चास्मदपेक्षयापि तस्मिन् विशेषो यस्मिन् भोजनेवशिष्टं रसं

---

१. लुप्तम् ।

ह्लदिन्यस्तरवश्च भुञ्जते, **बालत्वान्मातरपितरावेव पालयति,** उभयत्र हेतुमाह यतो **ह्लदिन्यो हृष्यत्त्वचो** जाता [1]अन्तःपूर्णानन्दास्ततोप्यानन्दाधिक्ये रोमाञ्चयुक्ता भवन्ति, तत्रायं निर्णयः, रोमाञ्चोत्र कमलरूपः, स च जगति सर्वोत्तमः, अतो हेत्वन्तरानन्दरोमाञ्चो न भवति तथा सति शैवालानामेवोद्गमः स्यान् न कमलादीनां, अतो ज्ञायतेधरामृतमेव **ह्लदिनीभिः** पीतमिति, अन्यथा तेषु लक्ष्म्या उद्गमो न स्यात्, "यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घना"दितिन्यायात्, लक्ष्म्यास्तदेकभोगित्वमुपपादितं[2], उपलक्षणमेतत, **अश्रु च मुमुचुः न हि मकरन्दोन्यस्य रसो भवति, तरवश्च** तथा, तेषां रोमाञ्चः फलान्यश्रु च **मधुधाराः,** एतच्चोभयविधं नान्यथा सम्भवति, न चैतद् द्वयं तयोः स्वाभाविकमिति मन्तव्यं, कादाचित्कत्वाद् वेणुनादान्तरमेव तथात्वात् स्वाभाविकवैलक्षण्याच्च, तदाह **यथार्या** इति, **सन्तो हि भगवद्धर्मान्तःप्रवेश एव तथा भवन्तीति,** तस्माद् ध्रदिन्यो मातृरूपास्तरवः पितृरूपाश्च तद्भुक्तावशिष्टरसपातारः ॥ ९ ॥ वृन्दावनविहारे **चरणानां** स्वरूपमाह **वृन्दावनमिति,** देवानां पादा भूमिं न स्पृशन्ति सुतरां देवोत्तमस्य तत्रापि पुरुषोत्तमस्य, पुरुषोत्तमांशस्य पुरुषस्य मह्याधिभौतिकौ पादावाध्यात्मिकावतीन्द्रियावाधिदैविकावानन्दरूपौ तयोरपि न भूमिसम्बन्धः, भूमावपि दैत्यभूमिरधमा तत्रापि स्त्रीसम्बन्धिनी तद् **वृन्दावनं** तस्मिन् भगवतः पादा वर्तन्त इति **तस्या भाग्याभिनन्दनं** स्वस्यौत्कण्ठ्यख्यापकं स्वस्यापि हृदयदेशो भूमिर्भवति स्त्रीणां च हृदयं कठिनमपि भवति पर्वता अपि सन्त्यन्तःप्रवाहा नद्यश्च सन्ति रसपूरा रोमपङ्क्तिर्वनमपि भवति स्त्रीसम्बन्धि च, एवं तुल्यतायामप्यत्र चरणौ न स्थाप्येते तत्र स्थाप्येते इतीर्ष्यया वर्णनं, गुणत्रयेण पूर्वं वर्णनं निर्गुणगोपिका त्वेषेति नात्रासूयेति केचित्, **सखीति** सम्मत्यर्थं, तादृश्यो न बह्व्य इत्येकवचनं, असूयापक्षेपि तथा, ननु भगवत्पदानि यथा व्यापिवैकुण्ठे भवन्त्येवं वृन्दावनेपि जातानीति किमाश्चर्यम् ? तत्राह **भुवो वितनोति कीर्तिमिति,** यदि वृन्दावनं व्यापिवैकुण्ठ एव स्यात् तदा न काचिच्चिन्ता, भूमौ तद् वर्तत इति केवलं भूमेः **कीर्तिमेव तनोति धन्या भूर्यत्र वृन्दावनमस्तीति** भगवतो नित्यस्थितिममान्यमानाया वचनं, पदानि त्वाधिदविके नित्यान्येव स्थास्यन्ति प्रदर्शयिष्यति च क्वचिद् भगवांस्त्वपराधीन इति न तत्प्रदर्शने वृन्दावनस्य सामर्थ्यं, भक्तेः सर्वत्रैव तथात्वान् न वृन्दावनप्रतिष्ठा भवतीति प्रतिष्ठाया निमित्तमाह **यद् देवकीसुतपदाम्बुजलब्धलक्ष्मीति, यद्** यस्मात् तद् वनं **देवक्याः** पुत्रस्य **पदाम्बुजानां** लक्ष्माणि चिह्नानि ध्वजवज्रादीनि **तैर्लब्धा लक्ष्मीर्येन, स्वस्य स्वच्छन्दसम्बन्धार्थं देवकीसुतपदप्रयोगः,** नन्दगोपसम्बन्धिनी सा, **देवक्याः प्रसूतिमात्रं न त्वन्यदिति सुतपदं, स्त्रीप्राधान्यात् स्त्रीषु कृपापि सूचिता, पुष्टिमार्गे तासां प्राधान्यमित्यवोचाम, भक्तिमार्गे चरणौ प्रधानभूतौ,** तत्राप्यम्बुजं जलोद्भूतं **स्त्रीणामेव हृदये तापहारकत्वेन शोभते,** तादृशस्यापि या ध्वजवज्राङ्कुशादिशोभा सा नान्यत्र फलति **वृन्दावने** सा प्रतिफलितेति 'पाद'त्वमेव सम्पन्नमतो **लक्ष्मीरपि** तत्र नियतातः **पदाम्बुजैर्लब्धा लक्ष्मीर्येनेति,** भूमिर्यदि सार्द्रा तदैवं भवतीति भूमिकृतैव सा **लक्ष्मीप्राप्तिरतो** युक्तं च भूमेः **कीर्तिं** ख्यापयतीति, किञ्च न केवलं **लक्ष्मीरेव** प्राप्ता किन्तु **भक्तिज्ञाने** अपि प्राप्ते इत्याह **गोबिन्देति,** यदा भगवान् वेणुनादं करोति तदा नीलमेघो गर्जतीव भाति ततो **मयूरा मत्ताश्च** भवन्ति ततो नृत्यन्ति, **यदैव भगवता वेणुनादः क्रियते तदैव देहविस्मरणं नृत्यं च जायत इति** भक्त्युद्रेक उक्तः, **मयूरा** वनमेवेति **वृन्दावनप्रशंसा,** तादृशं **नृत्यं प्रेक्ष्याद्रिसानुष्ववरतानि** तूष्णीं स्थितान्यन्यानि सर्वाण्येव **सत्त्वानि** यत्र, सभगवद्भक्तिज्ञानात् तेषां तूष्णीम्भावलक्षणं ज्ञानमुक्त, एको भक्तोन्ये सर्वे ज्ञानिनः, नन्वधोबिलेशयाः स्वभावतः कथंज्ञानिनो

---

[1] अतः । मागि । [2] अत्रेदं विचार्यते, पूर्वं "रन्ध्रान् वेणोरधरसुधया पूरयन्त्रि"त्युक्तं, तस्य रन्ध्रा एव मुखरूपा इति तत्र पूरिता चेत् सा तदानायासेनैव प्रभुकारित एव तद्भोगो भवत्यतः **स्वयं भुङ्क्त** इत्यनुपपन्नं यद्यपि तथापि स्वप्रियाणां साक्षत्सुधाभोगाधिकारसम्पत्त्यर्थमुक्तरीत्या सुधापूरणं वेण्वर्थं नात एव **गोपिकाना**मित्युक्तं, एवं सति यदस्य तद्भोकनं तत् स्वत एवेति सुष्ठूक्तं **स्वयं भुङ्क्त** इति, नन्वेवमेतद्भुक्तावशिष्टस्यैव रसस्य पानं प्रभुप्रियाणामप्यायाति रन्ध्रसम्बन्धस्य प्राथमिकत्वात् किञ्चित्कालमभोजने हेत्वभावादिति चेदत्रैवं प्रतिभाति, अत्रत्यं सर्वमलौकिकमतो लौकिकयुक्त्या निर्णेतुं नोचितमन्यथा 'सरःसरिन्महीध्रेषु' कृतं वेणुकूजितं व्रजस्थिताः स्वामिन्य एव कथं शृणुयुर्नान्ये ? एतच्चोपपादितं "तद् व्रजस्त्रिय" इत्यत्र, एवं सति भगवदिच्छाया बलिष्ठत्वात् प्रयोजनस्यातिगुरुत्वाच्चादौ व्रजदेवीकर्णहृदयेष्वेव सा प्रविष्टा, अपरञ्च यथोच्छ्वासदशायामास्यपतितमप्युद्गीर्णमेव वस्तु भवति न निगीर्णं तथा भगवता व्यवहितदेशस्थस्वप्रियाकर्ण हृदयपूरणैकचित्तेन निजास्याम्बुजाविर्भवच्छ्वासो नादब्रह्माविर्भावहेतुस्तादृशः कृतो यो मार्गत्वेन प्रसङ्गतो रन्ध्रेष्वायातस्तत्र च सुधां पूरितामभीष्टदेशेनयदतो न तामितरो भोक्तुं शक्तः, एवं सत्यपि साक्षादधरसम्बन्धो मुखे वेणोस्तीति सम्भाव्यते तत्पानं वेणुत्वेन निश्चयोप्यतोस्य तद्भोगो व्रजदेवीनां तूक्तरीत्या साक्षाद्भोगस्तस्मान्नैतदवशिष्टं रसस्य, अन्यथा ह्लदिन्यादिषु यथावशिष्टरसपानमुक्तं तथात्रापि वदेयुर्न तु **गोपिकाना**मितिपदेन तासामेवात्र स्वत्वं वदेयुः, अपरञ्च वेणोः स्वातन्त्र्येण सुधाभोगो भगवतो मनीषितोन्यथा ह्लदिन्यादिषु सुधासम्बन्धो न स्यात्, तथा सति तेषु लीला न स्यात्, यत एतत्सुधासम्बन्धिष्वेव सा चिकीर्षितातो जलस्थलरमणसम्बन्धिषु तत्सम्बन्धः कार्यते, स च वेणुभुक्तसुधांशो यो नादद्वारा निर्गतस्तेनैवेति सर्वमवदातं, एवं सति व्रजदेवीनां वेणोश्च युगपत्सुधाभोग उपपद्यते, किञ्च **दामोदर**त्वेन व्रजदेव्यधीनस्तदुपभोगोपयोगिसर्वंमवशः सम्पादयतीति किमितोधिकं वदामः ? **न हि जलधिरुद्वेलः केनापि निरोद्धुं शक्य** इति दिक्, इदं वेणुवादनं "रन्ध्रात् वेणोरधरसुधये"ति वाक्येन यदुक्तं तदिति जानीमः, यतोग्रदापि गवामाह्वाने "नुचरै"रित्यत्र "मा गोपकै"रित्यादिषु "नद्यस्तदे"त्यादिषु च लतादीनाञ्चैतत्कार्यमुच्यते, तेनादावेवात्राधिकारसम्पत्त्यर्थं वेणुरन्ध्रेषु यत् सुधापूरणं तत्सामयिकमवेदमुच्यत इति ज्ञापनयापि **गोपिकाना**मित्युक्तम् ॥ ९ ॥

भविष्यन्ति ज्ञानस्य फलमूर्ध्वंगमनमित्याशङ्क्याहाद्रिसानुष्विति, यत्र क्वापि स्थितास्तत्रैव गत्वापश्यन्तस्तिष्ठन्तीति दोषाभावः स्वस्थानत्याग ऊर्ध्वंगमनं चोक्तम् ।। १० ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गोप्यः किमाचरदित्यस्याभासे, तस्याधिदैविकरूपतासम्पादकमिति । कामरसो हि सहजः, वेगुनादेन सह सुधान्तःप्रविष्टा सहजं पूर्वकामं दूरीकृत्य भगवदीयं तं प्रकटितं करोतीति तथा । **दामोदरेत्यस्याभासे, मर्यादायां हीनतामिति** । हीनतां साधनहीनतां, न्यूनतामिति यावत् । नादं भुङ्क्त इत्यत्र प्रमाणमाहुः **सा वनस्पतीनि**त्यादि । 'वाग्वै देवेभ्योपाक्रामद्यज्ञायातिष्ठमाना सा वनस्पतीन्प्राविश'दिति श्रुतिः । सुधाभोगविवादे हेतुः **सुधानधिकार** इति ।। ९ ।। **वृन्दावनं सखीत्यस्याभासः । चरणानां स्वरूपमाहे**ति । अत्रेदमाकूतमिति मे भाति । भगवच्चरणमाहात्म्यं सर्वश्रुतिप्रतिपादितम् । 'तदेव देवानां पादा' इत्युपक्रम्य 'तस्या भाग्याभिनन्दन'मित्यन्तेनोक्तम् । तथा चैतादृक्पदसम्बन्धात् वृन्दावनस्वरूपमुत्तमत्वेन निरूपितं भवति । तत् कथमुक्तमत्र विहारनिरूपणेन चरणानां तथेति । अत्रेदमाकूतम् । लोके वेदातीतशुद्धपुष्टिमार्गीयलीलासामग्री हि नान्यत्र प्रसिद्धा । एवं सति तत्कर्तापि तथेति सिध्यति । अत एव "वृन्दावनाद् गतो दूर"मित्यग्रे वक्ष्यति । यतस्तत्र पुष्टिलीलानङ्गीकारो वक्ष्यते । एवं सत्यन्वयव्यतिरेकाभ्यामियं लीलात्रैवेति फलिष्यति । एवं सति यत्रैव शुद्धपुष्ट्यङ्गीकारस्तत्रैतच्चरणलीलेति ज्ञेयम् । अत एव बृहद्वनेपि 'प्रेक्ष्यन्त्य उज्झितगृहा जगृहुः' 'सहरामो व्रजस्त्रीणां चिक्रीडे जनयन् मुदम्' 'कृष्णस्य गोप्य' इत्यादिनेयमेवोक्ता । कालीयशिरोनृत्ये नैतच्चरणप्राकट्यम् । तत्र पुष्टिलीलायामनङ्गीकारात् । अत एव तत्स्तुतिरपि तादृशी । अतो यत्र पुष्टिमार्गीयभक्तिमार्गप्रकटनं लीलायां, तत्रैतच्चरणारविन्दाविर्भाव इति ज्ञेयम् । अतः सुष्ठूक्तं **(त्वच्) चरणानां स्वरूपमाहे**ति । असाधारणधर्मनिरूपणे धर्मिनिरूपणसम्पत्तिवत् । यतो लीलैव तत्परिचायिका । एवं सति 'देवानां पादा' इत्यारभ्य 'आधिदैविकावानन्दरूपा'वित्यन्तेन यावन्ति चरणरूपाण्युक्तानि तदतीतत्वमेतच्चरणयोर्ज्ञापितं भवति । उक्तेषु पुरुषोत्तमो लोकवेदप्रथितो ज्ञेयः, अयं तदतीत इति ज्ञेयः ।। १० ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गोप्य इत्यस्याभासे **तस्ये**ति स्वहृदये सहजकामत्वेनाविर्भूतस्येति शेषः, **वेणुनादमिति सुधामपी**त्यपि शब्दस्य "नादं भुङ्क्त" इत्यविवादमित्यर्थं वक्ष्यन्ति, तथा च सुधाया **अपि**शब्देन **गौणत्वसूचनान्नादस्यैव** मुख्यत्वेन तन्निरूपणमेव वाक्यार्थ इति भावः, तथा **चाधिदैविकतासम्पादकं सुधासहितमित्यर्थः, गोप्य** इत्यत्र **पूर्वरसे**ति कामरसस्येत्यर्थः, अत्रेति आधिदैविकतासम्पादकसुधासाहित्ये इत्यर्थः, सर्वानुभवसाक्षिकत्वादिति भावः, तादृशकुशलाचरणे किमित्यनेनाश्चर्यकथने हेतुमाहुः **पुरुषस्ये**ति, **गोपिकापदकथने** लक्ष्म्याः सम्बन्धित्वं न स्यात् तस्यां **गोपभार्यात्वाभावादित्यत** आहुर्बहुवचनेनेति, अनेन बहुवचनेन सापि सम्बन्धित्वेन सूचिता, तत्र हेतुः **समुदायरूपे**ति, समुदाये रूपं स्वरूपं यस्याः, आवेशेनेति भावः, नन्वेमपि **गौणत्वं** स्यादित्यत आहुस्**तदंशाश्चे**ति चस्त्वर्थे, तदंशा एतास्तु तयैव हेतुभूतया सुधासम्बन्धे समागतास्तद्योग्या जाताः, अतस्तस्यास्तु कैमुत्येन मुख्य एव सम्बन्धः सूचित इति भावः, **तत्रापी**ति स्थावरत्वेपि वेणुर्नीरसो न त्वाम्रादिवत् **सरस** इत्यर्थः, **आधिदैविकस्ये**ति अधरसम्बद्धस्येत्यर्थः, **आधिदैविक्य** इति अधरसम्बन्धिन्य इत्यर्थः, **सर्व**मिति साधनानां सर्वेषां मनोनिग्रहपर्यवसायित्वस्योक्तत्वाद् धर्मस्य च चित्तशोधकत्वादित्यर्थः, साधनविचारे एवमेव, अनुग्रहविचारस्तु भिन्न इति **वैदिक** इत्युक्तम्, **वयं जाता** इति तादृशो धर्मः सम्भवेदिति शेषः, **तत्रापी**ति अस्मास्वपीत्यर्थः, विरोधाभावं विवृण्वन्ति तत इति, धर्मादित्यर्थः, **पुल्लिङ्गनिर्देशश्चे**ति स्थावरत्वात् स्त्रीत्वाभावो बाधक उक्तः पुंस्त्वं च **बाधक**मिति चकारः, **प्रसिद्धिश्चे**ति अधरसुधाभोगो रहस्येवानुभवसिद्धोतः प्रसिद्धिरपि भोगे बाधिकेत्यर्थः, **रसविवक्षाया**मिति रसभोगविवक्षायामित्यर्थः, बाधकत्वेनेति **रसभोग**कथनेच्छा रसनेन्द्रियाभावज्ञानेन बाधिता भवतीत्यर्थः, तथा च बाधकस्य विद्यमानत्वात् साधनेन रसभोगो वक्तुमशक्य इति भावः, **सम्भवेदपी**ति अनधिकारिण इति शेषः, तत्र दृष्टान्तो **व्यभिचारे** इति, रसः स्त्रीनिष्ठः, तत्राधिकारी पतिः, स स्वतोपि भुङ्क्ते, अनधिकारी परकीयस्तु तया दत्तमेव प्राप्नोति न तु स्वतः, तथात्राप्यनधिकारी वेणुः पुष्टिबलेनापि भगवद्दत्तमेव **प्राप्नुयात्**, स्वतोभोजनं त्वाश्चर्यमेव, तथा च रसस्य **व्यभिचारे**नधिकारिणि **गमने स्त्रीषु सिद्धो** योन्तः फलं रसरूपं **तद्वत्** सम्भवेदपि परं भगवांश्चेद् दद्यात्, स्वतस्त्वाश्चर्यमेवेत्यर्थः, ननु पानं कथं निर्धारितं तत्राहुरधरेति, किञ्चेति हृदिनीतरुकृतपानान्यथानुपपत्त्यापि पानं मन्यामहे इत्यर्थः, **उभयत्रे**ति हृदिनीनां तरूणां च पानकथने साधकं हेतुमाहेत्यर्थः, **अन्यथा तेष्वि**ति कमलानां हेत्वन्तरानन्दरोमाञ्चत्वे तेषु कमलेषु प्रकटेषु सत्सु तस्या उद्गमो न स्यात्, तेषां रसोद्दीपकत्वात् तेषूद्गतेषु लक्ष्मीरायातीति भावः, विचारान्ते इदं **वेणुवादन**मिति **ननु** तत् सर्वाभोग्यसुधाया रन्ध्रेषु पूरणरूपमिदं तु देवभोग्यसुधाया वेणुकृतभोगरूपमतः कथं तदित्यत **आहुर्यत** इति, अन्यदाप्युभयरूपं वेणुवादनं जायते, अत इदं द्वयमप्युभयरूपमिति भावः, तत्र स्वामिनीनामधिकारसम्पत्त्यर्थं सर्वाभोग्यसुधापूरणं, अत्र वेणुर्देवभोग्यांशं भुङ्क्ते इति विवेकः, **तेने**ति उभयरूपत्वेन हेतुनेत्यर्थः, **अत्रे**ति स्वामिनीष्वित्यर्थः, अत्रापि 'गोपिकाना'मिति पदादुभयरूपत्वं ज्ञापितं तथा चोभयमुभयरूपमिति भावः ।। ९ ।। **वृन्दावन**मित्यत्र 'बर्हापीडे'ति श्लोके वृन्दावनप्रवेशस्य **प्रथमश्लोकोक्तस्यैवानुवादाद्विशेषणधर्माणामेव**

प्राधान्येन **स्वपदरमण**मिति वृन्दावनविशेषणव्याख्यानरूपत्वादस्य तात्पर्यार्थश्चरणस्वरूपनिरूणमेव वक्तुमुचित इत्याशयेनाभासस्तथोक्तः, तन्निरूपणमुपपादयन्ति **देवाना**मित्यादिना, **पुरुषोत्तमस्ये**ति लोकवेदप्रसिद्धस्येत्यर्थः, (**आध्यात्मिका**विति इन्द्रियरूपावित्यर्थः, विराजो गतिर्न दृश्यते, **आधिदैविकौ** 'भूर्लोकः कल्पितः पद्भ्या'मित्यत्र 'पद्भ्या'मितिपदेनोक्तावित्यर्थः), **तयोर**पीति आधिदैविकयोः **पुरुषचरणयोरपी**त्यर्थः, कुतस्तरां पुरुषोत्तमचरणयोरिति भावः, '**द्रक्ष्याम गां द्यां च** तवानुकम्पिता'मिति ब्रह्मप्रार्थनया पदस्थापनेपि शुद्धभूमावेव पदस्थापनमुचितमित्याशयेन वृन्दावनस्यातथात्वमाहुर्**भूमावपी**ति, एवं सर्वथाऽयोग्येपि **देवकीसुतपदाम्बुजलब्धलक्ष्मी**त्यनेन लक्ष्मीलाभहेतुपदाम्बुजधारणोक्त्या निःसाधनफलात्मत्वेन लोकवेदातीतत्वमेतच्चरणयोर्ज्ञापितं भवति, **भगवत** इति एतैर्लक्ष्मीलाभोक्त्या **लोकवेदातीत**स्येत्यर्थः, ननु तत्र लीलोपयोगिस्थानसद्भावात् पदधारणमुचितमतः स्वस्य कथमभिलाष इत्याशङ्क्य स्वस्यापि तत्तुल्यत्वमाहुः **स्वस्यापी**ति, **अन्तःप्रवाहा** इति सरस्वत्यादिनदीनामिव बहिरप्रकटः **प्रवाहो** यासां रसस्य पूरो यासु तादृश्यो नद्य इत्यर्थः, भगवद्रसस्यान्तर्विद्यमानत्वादिति भावः, केचिदिति स्वमतं तु निर्गुणत्वेऽपि तद्रसस्वभावात् कदाचिदसूया सम्भवत्येवेति भावः, **व्यापिवैकुण्ठे** इति अप्रकटितं स्थानं **व्यापिवै**कुण्ठं भूमौ प्रकटं वृन्दावनमिति भेदः, **केवल**मिति न तु पदाम्बुजेनास्माकमिव तस्य रसानुभव इत्यर्थः, ननु वृन्दावने भगवान् नित्यं तिष्ठत्यतो भगवता लब्धलक्ष्मीत्येव वक्तुमुचितं भवतीत्यत आहुर्**भगवत** इति, नित्यं **स्थिति** प्रकटस्थितिमित्यर्थः, तिष्ठन्नपि प्रकटो न तिष्ठति, पदचिह्नानि तु नित्यान्येव प्रकटान्येव स्थास्यन्तीति तुशब्दः, आधिदैविके तादृशलीलाधारे स्थास्यन्ति, प्राकट्ये तत्र हेतुमाहुर्**वृन्दावनं** कर्तृ, स्वभूमेः सार्द्रताकरणे क्वचित् **प्रदर्शयिष्यति** चेति, आधारस्यापि वृन्दावनस्य 'स्वव्यापारे ही'तिन्यायेन कर्तृत्वम्, ननु भगवन्तमेव कुतो न प्रदर्शयति तत्राहुर्**भगवांस्त्व**ति, स्वतन्त्रत्वान्न तत्र सामर्थ्यम्, ननु स्वतन्त्रत्वेपि भक्तवश्यत्वाद् भक्त्यैव प्रदर्शनीय इत्यत आहुर्**भक्ते**रिति, तया तु सर्वत्रैव भविष्यति वृन्दावने को विशेषः ? चिह्नदर्शनं त्वाधुनिकानामपि जायत इति न भक्तिसापेक्षमिति भावः, (**लक्ष्माणी**ति तथा च **मूले पद**स्थितं **यदम्बुजं चिह्न**मुपलक्षणेन ध्वजादीन्यपि तैर्लब्धलक्ष्मीत्यर्थो ज्ञेयः) **पादत्वमेव सम्पन्न**मिति ध्वजादिविशिष्टत्वमेव **पाद**त्वमिति भावः, **युक्तश्चे**ति भूम्योपकृतस्तामुपकरोतीति युक्तं, प्रतिष्ठाया निमित्तं पूर्वमुक्तं, इदमपि निमित्तमिति चकारः, अस्मिन् पक्षे मूले **यद्** यस्माद् भूमेः सकाशादित्यर्थः, **मत्तानां मयूराणां** नृत्यं यत्र तादृशं वृन्दावनं **गोविन्दवेणुमनु जात**मिति भक्तिप्राप्तिरुक्ता, नन्विदं तु मयूराणामतो **वृन्दावन**स्य भक्तिज्ञानप्राप्तिराभासे कथमुक्तेत्यत आहुर्**मयूरा** इति, सततस्थित्याऽसाधारणधर्मतापत्तेर्वनभावापन्नाः, अतो वृन्दावनस्यैव स्वासाधारणधर्मे भक्तिप्राप्त्या प्रशंसोक्तेत्यर्थः, प्रेक्ष्येत्याद्येकं समस्तं पदम्, तादृशं नृत्यमितिसमभिव्याहारात् कर्म, **तूष्णीम्भावे**ति तूष्णीम्भावः कार्यलक्षणं यस्य तादृशं भगवल्लीलाज्ञानमित्यर्थः, एक इति मयूर इत्यर्थः, जात्यपेक्षयैकवचनम्, **अन्ये सर्व** इति नानाजातीया इत्यर्थः, तूष्णीम्भावेन दोषाभाव उक्तः, **सानुस्थित्या** अन्यद् द्वयमुक्तम् ॥ १० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गोप्यः किमाचरदित्यत्र **येन धर्मे**णेत्यादि योस्माभिर्धर्मः कृतः स **एव वेणुना** कृत इति ज्ञायते सुधारूपैकफललाभादित्यर्थः, तर्हि कः सन्देह इति चेत् तत्राहुः **परं तत्रापी**त्यादि, अस्मत्कृते साधने विरोधो नास्ति, आधिदैविकस्त्रीरूपप्राप्तेः, वेणौ तु विरोधोस्ति तादृशविग्रहाप्राप्तेरित्याहुस्ततोस्मास्वित्यादिना, **स च जगति सर्वोत्तम** इति सर्वेषु जलसम्बन्धिषु कमलपदार्थ उत्तम इत्यर्थः ॥ ९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्या आहुः—गोप्य इति । 'स्म' इत्याश्चर्यम् । अपिशब्दो दुर्लभताद्योतकः । हे गोप्यः ! अयं वेणुः किं कुशलं पुण्यमाचरत् कृतवान् ? । 'तत् कथं ज्ञायते ?' इत्यपेक्षायामाहुः—यत् यस्मात् गोपिकानामपि दुर्लभां दामोदरस्याधरसुधां स्वयं स्वातन्त्र्येण अवशिष्टरसं केवलं रसमात्रं यथा भवति तथा यथेष्टं भुङ्क्ते । तत्रापि ज्ञापकमाहुः—यासां पयसा पुष्टस्ता मातृतुल्या ह्रदिन्यः हृष्यत्त्वचो विकसितकमलवदनमिषेण रोमाञ्चिता इव लक्ष्यन्ते । तथा येषां वंशे जातस्ते तरवोऽपि मधुधारामिषेण आनन्दाश्रु मुञ्चत इव दृश्यन्ते । तत्र दृष्टान्तमाहुः—यथाऽऽर्या इति । आर्याः कुलवृद्धाः स्ववंशे भगवत्सेवकं लब्धतत्प्रसादं दृष्ट्वा यथा हृष्यत्त्वचोऽश्रु मुञ्चन्ति तथेत्यर्थः ॥ ९ ॥ अन्या आहुः—वृन्दावनमिति । हे सखि ! वृन्दावनं भुवः कीर्तिं यशः स्वर्गादिभ्योऽपि विशेषतः आधिक्येन तनोति विस्तारयति । तत्र हेतुं सूचयन्त्यः विशिषन्ति—यत् यस्मात् देवकीसुतस्य पदाम्बुजैस्तत्रतत्राङ्कितैर्लब्धा लक्ष्मीः शोभा येन तत् । किञ्च गोविन्दस्य वेणुमनु वेणुनिनादं श्रुत्वाऽनन्तरं मन्दगर्जितं नीलमेघं तं मत्वा मत्ता ये मयूरास्तेषां नृत्यं प्रेक्ष्य सङ्घशस्तत्राद्रिसानुष्वपरनानि उपरतव्यापाराणि अन्यानि समस्तानि सत्त्वानि जन्तवो यस्मिंस्तत् । नैतदन्येषु लोकेषु विद्यते, अतो भुवः कीर्तिं वितनोतीत्याशयः ॥ १० ॥

अन्वितार्थप्रकाशिका

गोप्य इति ॥ हे गोप्यः ! अयं वेणुः किं कुशलं पुण्यमाचरत् कृतवान् । यत् यस्मात् गोपिकानामपि दुर्लभां दामोदरस्याधरसुधां स्वयं स्वातन्त्र्येण अवशिष्टरसं सुधाभुक्त्वैव केवलं रसमात्रमार्द्रत्वमवशिष्टं यथा भवति तथा । यद्वा । न वशिष्टो रसोऽपि यत्र

भागुरिमतेऽवस्याल्लोपः। यथेष्टं भुङ्क्ते। यासां पयसा पुष्टस्त मातृतुल्या ह्रदिन्यः हृष्यत्त्वचो विकसितकमलवदनमिषेण रोमाञ्चिता इव लक्ष्यन्ते। यद्वा। यस्य वेणोरवशिष्टरसं ह्रदिन्योऽपि भुञ्जते अतो हृष्यत्त्वचः तथा येषां वंशे जातस्ते तरवोऽपि मधुधारामिषेण आनन्दाश्रु मुमुचुः मुञ्चन्त इव दृश्यन्ते। यथा आर्याः कुलवृद्धाः स्ववंशे भगवत्सेवकं लब्धतत्प्रसादं दृष्ट्वा यथा हृष्यत्त्वचोऽश्रु मुञ्चन्ति तथेत्यर्थः ॥ ९ ॥ वृन्दावनमिति ॥ हे सखि ! वृन्दावनं भुवः कीर्ति यशः स्वर्गादिभ्योऽपि विशेषतः आधिक्येन तनोति विस्तारयति। यत् यस्मात् देवकोसुतस्य पदाम्बुजैस्तत्र तत्राङ्कितैर्लब्धा लक्ष्म्यः शोभाः येन तत्। बहुवचने उरआदित्वाभावान्न कप्। अत्र यशोदैव देवकीनाम्ना गृह्यते ! "द्वे नाम्नी नन्दजायाया यशोदा देवकीत्यपि।" इति बृहद्विष्णुपुराणात्। किंच। गोविन्दस्य वेणुमनु वेणुनिनादं श्रुत्वाऽनन्तरं मन्दगर्जितं नीलमेघं तं मत्वा मत्ता ये मयूरास्तेषां नृत्यं प्रेक्ष्य सङ्घशस्तत्र तत्राद्रिसानुष्वपरतानि उपरतव्यापाराणि अन्यानि समस्तानि सत्त्वानि जन्तवो यस्मिंस्तादृशं भवति। नैतदन्यत्र विद्यतेऽतो भुवः कीर्ति वितनोति ॥ १० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अपराः प्रेमलतां दर्शयंत्य आहुः गोप्य इति हे गोप्यः अयं वेणुः किं कुशलं शुभमाचरत् चक्रे यः गोपिकानामस्माकं योग्यां दामोदराधरसुधामपि स्वयमेक एव भुंक्ते यस्य वेणोः अविशिष्टं रसं ह्रदिन्यो नद्यः श्रीकृष्णस्नानकाले भुंक्त्वा हृष्यत्त्वचः। प्रफुल्लपद्मना रोमांचिता दृश्यंते तरवः येषां वंशे वेणुरुत्पन्नस्ते वृक्षाः मधुधारामिषेण हर्षाश्रु मुमुचुः अत्र दृष्टांतः यथा आर्याः स्वकुटुंबवृद्धाः स्वान्वये हरिभक्तं दृष्ट्वा आनंदाश्रु स्रवंति तद्वत् यद्वा ह्रदिन्यो यासां पयसा वेणुः पुष्टः तामातृसमा नद्यः हृष्यत्त्वचः विकसितपद्ममिषेण हृष्टरोमा अस्माभिर्लक्ष्यंते अतः सकुलो वेणुर्धन्य इत्यभिप्रायः ॥९॥ इदानीं काश्चिद्गोप्यः सर्वक्षेत्रेभ्यो वृंदावनस्य श्रेष्ठत्वं वदंति वृंदेति हे सखि देवकीसुतेन निक्षिप्तपादपद्माभ्यां लब्धालक्ष्मीः शोभा समृद्धिर्येन तद्वृंदावनं भुवः कीर्त्तिं सत्यलोकादपि विशेषेण तनोति तद्विशिनष्टि गोविंदस्य वेणुं अनुवंशीशब्दमाश्रुत्य स गर्जितं नीलांबुदं मत्वा मत्तानां मयुराणां नृत्यं प्रेक्ष्यवृंदशः यत्र अद्रिसानुषु पर्वतशिखरेष्ववरतानि उपरतक्रियाकलापानि अन्यानि मयूरभिन्नानि समस्तसत्वानि सकलप्राणिनो यस्मिंस्तत् एवं परमानंदजनकत्वे नान्यत्र प्राणिनां चित्ताकर्षणं नास्ति अतो वृंदावनं धन्यमिति भावः ॥ १० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गोप्य इति ॥ हे गोप्यः, अयं कृष्णकरस्थः वेणुः, किं स्म कुशलं किं नु सुकृतमित्यर्थः। आचरत् चकार। कुतः। यद्यस्मात्, गोपिकानामस्माकमेव भोग्यामपि, दामोदराधरसुधां श्रीकृष्णाधरामृतं, स्वयं स्वातन्त्र्येण, यथेष्टमित्यर्थः। अवशिष्टरसं केवलमत्रशिष्टरसमात्रं यथा भवति तथा, भुङ्क्ते। यासां जलपानेनानुपुष्टोऽयं वेणुः ता मातृतुल्या इति शेषः। ह्रदिन्यो नद्यः, हृष्यत्त्वचः विकसितकमलवनमिषेण रोमाञ्चिताः, लक्ष्यन्ते। येषां वंशेऽयं वेणुर्जातस्ते इति शेषः। तरवो वृक्षाः, मधुधारामिषेणेति शेषः। अश्रु आनन्दजनेत्रजलानि, आर्याः कुलवृद्धाः, यथा तथा, मुमुचुः। कुलवृद्धाः यथा स्ववंशे जातं भगवत्सेवकं दृष्ट्वा हृष्यत्त्वचः सन्तोऽश्रूणि मुञ्चन्ति तद्वदित्यर्थः। यद्वा हे गोप्यः, अयं भगवतः पाणिसंस्थः वेणुः, किं स्म किं वेत्यर्थः। कुशलं पुण्यं, आचरत् कृतवान्। यद्यस्मात्, गोपिकानां अपि, अपिशब्दो दुर्लभताद्योतकः। गोपिकानामस्माकमपि दुर्लभामित्यर्थः। दामोदरस्य श्रीकृष्णस्य योऽधरसुधाऽधरामृतं तां स्वयमेकाकी एव, भुङ्क्ते। अनेकोपभोज्यां स्वयमेकल एव भुनक्तीत्यर्थः। अवशिष्टरसं तु तत्कृततत्त्यागावशिष्टो योऽधरसुधारसस्तं त्वित्यर्थः। ह्रदिन्यो नद्यः, तरवो वृक्षाश्च, भुञ्जते। कृत्स्नायामधरसुधायां वेणुनैकेनैव पीयमानायां सत्यां यद्गलितमधरसुधात्मकरसकणजालं तु ह्रदिन्यस्तरवश्च भुञ्जते इत्यर्थः। ननु कथमेतल्लक्षितं तत्राहुः। तरव एते वृक्षाः, अश्रु मुमुचुः। मुञ्चन्तीत्यर्थः। अश्रु इति जात्यभिप्रायमेकवचनम्। अवशिष्टरसभोगप्रयुक्तहर्षाश्रूणि मुञ्चन्ति। इमाः ह्रदिन्यो नद्यः, हृष्यत्त्वचः जाताः, दृश्यन्ते। तत्र ह्रदिन्यो विकसितकमलव्याजेन उदञ्चितरोमाण इव लक्ष्यन्ते। तरवस्तु मधुस्रवणमिषेणानन्दाश्रूणि मुञ्चन्तो लक्ष्यन्ते। कथमिव। यथा आर्या भागवताधरसुधाशेषरसाभिज्ञा भगवद्भक्ताः तद्भुक्तावशिष्टमुपभुज्य हृष्यत्त्वचः, अश्रूणि मुञ्चन्तश्च भवन्ति तद्वदित्यर्थः ॥ ९ ॥ वृन्दावनमिति। हे सखि, वृन्दावनं, भुवः पृथिव्याः, कीर्त्तिं, वितनोति जनयतीत्यर्थः। कुतः यद्यस्मात्, देवकीसुतस्य ये पदाम्बुजे ताभ्यां लब्धा लक्ष्मीः सौन्दर्यसंपद्येन तत्, गोविन्दस्य यो वेणुस्तं, अनु वेणुगीतमनुसृत्य, मत्ताः मन्दगर्जितयुक्तनीलमेघभ्रान्त्या मत्ततां प्राप्ता ये मयूरास्तेषां नृत्यं, प्रेक्ष्यावलोक्य, अद्रिसानुष्वपरतानि वेणुगीततदनुरूपमयूरनृत्यदिदृक्षया निवृत्त स्वस्वव्यापाराणि अन्यानि मयूरव्यतिरिक्तानि समस्तानि सत्त्वानि जन्तवो यस्मिंस्तथाभूतं, भवति। नैतदन्येषु लोकेषु विद्यतेऽतो भुवः कीर्त्तिं वितनोति, तत उक्तविधवृन्दावनवानयं लोको धन्य इति भावः ॥ १० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गोप्य इति : १०.२१.९.

न भवेज्जडजन्म पुण्यभाजः सुलभोऽपुण्यवतो रसो न चैषः। तदिदं परमद्भुतं जडोऽपि यदयं मुख्यरसं प्रभोर्भुनक्ति ॥ १७ ॥

कस्यापि किञ्चिदपि केनचिदाहृतं चेत् तं स्वीकरोति न परस्तदघावलिप्तम्।
ईशाधरस्थममृतं हरतेऽस्मदीयं योऽस्मै कथं प्रभुरदात् स्वकरावलम्बनम् ॥ १८ ॥

वृन्दावनमिति : १०.२१.१०.

भालं यस्य यथा कथञ्चिदपि चेत्साध्वर्थवर्णावलिप्रान्तं तद्धि करोत्यलं क्षितितले तं कीर्तिमन्तं नरम् ।
साक्षाच्छ्रीपतिसत्पदावलि-लसत्कायं तु वृन्दावनं यद्भूमिं बहुकीर्तिपात्रमकरोत् किं तत्र चित्रं सखि ॥ १९ ॥
वृन्दावनमिदं मन्ये भालमेव धराश्रियः । सौभाग्यभूमिः श्रीकृष्णतिलको यत्र राजते ॥ २० ॥
सार्के सोमवति प्रकामविलसत्तारे च वृन्दावनाकाशे कृष्णनवाम्बुदं समुदितं प्रोद्यत्सुवेणुध्वनिम् ।
दृष्ट्वा हर्षितचेतसो हि शिखिनोऽकालेऽपि केकाकृतः प्रापुर्नृत्यसुखं परे त्वसमयं ज्ञात्वा तटस्थाः सखि ॥ २१ ॥

कृष्णप्रिया

अरी गोपियों यह वेणु पुरुष जाति का होने पर भी पूर्व जन्म में न जाने ऐसा कौन सा साधन भजन कर चुका है कि हम गोपियों की अपनी सम्पत्ति दामोदर के अधरों की सुधा स्वयं ही इस प्रकार पिये जा रहा है कि हम लोगों के लिये थोड़ा सा भी रस शेष नहीं रहेगा, इस वेणु को अपने रस से सीचने वाली ह्लदिनियाँ आज कमलों के सिस रोमाञ्चित हो रही हैं और अपने दश में भगवत्प्रेमी सन्तानों को देखकर श्रेष्ठ पुरुषों को समान वृक्ष भी इसके साथ अपना सम्बन्ध जोड़कर आँखों से आनन्दाश्रु बहा रहे हैं ॥ ९ ॥ अरी सखी यह वृन्दावन वैकुण्ठ लोक तक पृथ्वीकि कीर्तिका विस्तार कर रहा है, क्योंकि यशोदा-नन्दन श्रीकृष्ण के चरण कमलों के चिह्नो से यह चिम्हित हो रहा है, सखि जब श्रीकृष्ण अपनी मुनिजन मोहिनी मुरली बजाते हैं तब मोर मतवाले होकर उसकी ताल पर नाचने लगते हैं, यह देखकर पर्वत की चोटियों पर विचरने वाले सभी पशु-पक्षी चुपचाप शान्त होकर खड़े रह जाते हैं, अरी सखी जब प्राणवल्लभ श्रीकृष्ण विचित्र वेष धारण करके वासुरी बजाते हैं तब मूढ़ बुद्धिवाली ये हरिनियाँ भी वंशी की तान सुनकर अपने पति कृष्णसार मृगों के साथ नन्दनन्दन के पास चली आती हैं और अपनी प्रेमभरी बड़ी-बड़ी आँखों से उन्हें निरखने लगती है । निरखती क्या हैं अपनी कमल के समान बड़ी बड़ी आखें श्रीकृष्ण के चरणों पर निछावर कर देती हैं और श्रीकृष्ण की प्रेमभरी चितवन के द्वारा किया हुआ अपना सत्कार स्वीकार करती हैं वास्तव में उनका जीवन धन्य है, हम वृन्दावन की गोपी होने पर भी इस प्रकार उन पर अपने को निछावर नहीं करपाती हमारे घरवाले कुढ़ने लगते हैं, कितनोविडम्बना है ॥ १० ॥

[1]धन्यास्तु मूढमतयोऽपि हरिण्य एता [2]या नन्दनन्दनमुपात्तविचित्रवेषम् ।
[3]आकर्ण्य वेणुरणितं [4]सहकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलोकैः ॥ ११ ॥
कृष्णं निरीक्ष्य वनितोत्सवचारुवेषं[5] श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् ।
देव्यो विमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—मूढमतयः अपि एताः हरिण्यः धन्याः याः वेणुरणितं आकर्ण्य उपात्तविचित्रवेषं नन्दनन्दनम् प्रणयावलोकैः विरचितां पूजां सहकृष्णसाराः दधुः ॥ ११ ॥ वनितोत्सवचारुवेषं कृष्णं निरीक्ष्य तत्क्वणितवेणुविचित्रगीतम् च श्रुत्वा विमानगतयः देव्यः स्मरनुन्नसाराः भ्रश्यत्प्रसूनकबराः विनीव्यः मुमुहुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपरा आहुः । हे सखि मुढमतयस्तिर्यग्जातयोऽप्येता हरिण्यो धन्याः कृतार्थाः या वेणुरणितं वेणुनादमाकर्ण्य नदनंदनं प्रति प्रणयसहितैरवलोकनैर्विरचितां पूजां समानं दधुः कृतवत्यः । किं च कृष्णसारैः स्वपतिभिः सहिता एव दधुः । अस्मत्पतयस्तु गोपाः क्षुद्राः समक्षं तन्न सहंत इति भावः ॥ ११ ॥ अन्या ऊचुः । हे गोप्यः आश्चर्यं शृणुत वनितानामुत्सवो यस्मात्तद्रूपं शीलं च यस्य तं कृष्णं निराक्ष्य तेन वादितदेणीरसंकीर्णं गीतं च श्रुत्वा विमानैर्गच्छंत्यो देव्यो देवानामंकेषु स्थिता अपि स्मरेण नुन्नसाराः परिक्षिप्तधैर्या मुमुहुः । मोहे लिंगमाहुः । भ्रश्यत्प्रसूनाः कबराश्चूडा यासां ताः । विगता नीव्यो यासां ताः । अत्र सर्वत्र वक्तृभेदाभातीव संगतिर्वक्तव्या ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अपराः प्रेमवत्यः । उपात्तः बर्हादिभिर्विचित्रो वेषो येन तम् । अस्मत्तस्ता धन्याः स्वानुकूलपतित्वेनेत्याहुः–किं चेति । इति भाव इति । गोपानां प्रायो बुद्धिहीनतास्तीति तात्पर्यम् । यद्वा–कृष्ण एव प्रीतिविषयत्वेन सारो येषां ते यथार्थनामानस्तासां पतयस्त्व-

---

[1] धन्याश्च–वीर. ; धन्यास्तु–विज. । [2] यन्नन्द–विज. । [3] आपीय–विज. । [4] कृष्णसारैः–वीर. । [5] चारुशीलं–वीर. ; स्मसारं–विज. ।

पत्नीः कृष्णानुरागिणीरालक्ष्य स्वगार्हस्थ्यमेव धन्यं मन्यंते स्मेति ।। ।। ११ ।। अन्याः कामिन्यः । असंकीर्णम् पृथक्पृथक्परिज्ञातश्रीभैरवादिस्वरम् । परिक्षितं च्युतं धैर्यं मनोधारणसामर्थ्यं यासां ताः । भ्रस्यंति च्यवंति प्रसूनानि कुसुमानि याभ्यस्तास्तथा । 'प्रसूनं कुसुमं सुमम्' इत्यमरः । 'प्रसूनं तु प्रसूते फलपुष्पयोः' इति हैमः । 'नीवी वस्त्रांशुकग्रंथ्योः' इति यादवः । नीव्यः कटिबंधग्रंथ्यः। मुमुहुः विचित्ता बभूवुः । माट्टायितमिदं तदुक्तम् —"कांतस्मरणवार्त्तादौ हृदि तद्भावभावतः । प्राकट्यमभिलाषस्य मोट्टायितमिदं स्मृतम् ।।" इति । अत्र एषु । सर्वत्र सर्वेत्र श्लोकेषु । नातिशयेन संगतिः प्रसंगादिरूपा ।। १२ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो अस्तुतरां हरिप्रियसर्वजीवाश्रयस्य श्रीवृन्दावनस्य माहात्म्यं तदाश्रयिकाणां पशुजातीनामपि भाग्यं किं वर्ण्यतामित्याहुः—धन्या इति । मूढाः विवेकहीना गतिर्ज्ञानं यासां तथाभूता अपि मतय इति पाठे तथैवार्थः हरिण्य इति वनचारिण्योऽपि एता दृश्यमाना इव नन्दस्य श्रीवल्लवेन्द्रस्य नन्दनमिति धात्वर्थबलादखिलगुणमहिष्ठत्वं सूचितम् एवं गुरोरपि तस्य नामग्रहणमतिक्षोभवैवश्येन विक्षिप्तमनस इत्युक्तत्वात् उपात्ताः स्वीकृताः विचित्रवेषा वनमाला बर्हापीडगुञ्जावतंसादिरूपा येन तं वेणुविरुतमिति रागत्वेनापर्यवसितं प्रथमफूत्कारमात्रमुक्तम् अनुकरणशब्दो ह्ययं रणितमिति पाठोऽपि क्वचित् अत्र टीका पुनरुक्ता स्यात् कृष्ण एव सारः परमोपादेयो येषामिति श्लेषेण च स्वपतयो निन्दिताः पूजामिति तावतव सर्वोपचारणपूर्णत्वं जातमिति ध्वनितम् अत एव दधुः पुपुषुः सर्वपूजाभ्योऽधिकं चक्रुरित्यर्थः । अतः क्रियातोऽपि वैशिष्ट्यं विशेषेण रचितानीति तत्र सर्वत्र हेतुः प्रणयावलोकैरिति भावमात्रग्राहिणस्तस्य तैरेव पूजासम्पत्तः बहुत्वं परम्पराविवक्षया स्मेति विस्मये खेदे वा अहो बतास्माकमीदृशं भाग्यं नास्तीति भावः । अन्यत्तैः अथवा वेणोरिफितं यत्र तादृशं सन्तम् आकर्ण्य श्रवणद्वारा ज्ञात्वा उपात्तवेषं सन्तं प्रणयावलोकैर्बधुः वशीकृतवत्यः तैरेव प्रीतिसेवामपि विदधुरित्यर्थः "अभाबि भूमिपतिभिः" इत्यारभ्य दधत् दशनचुचुरशब्दमश्वः" इति माघकाव्यवत् "संश्रृण्वन् वदमानांस्तान् रावणस्य गुणान् जनान्" इति भट्टिकाव्यवच्च श्रीमन्नन्दनन्दनस्य श्रवणक्रियाकर्मकत्वं ज्ञेयम् अन्यत्समानम् ।। ११ ।। अहो आस्तां श्रीवृन्दावनवर्त्तिनीनां श्रीकृष्णान्तिके चरन्तीनामासां माहात्म्यं खेचरीणामपि भाग्यं किं वर्ण्यमित्याहुः, कृष्णमिति चित्ताकर्षकं वनिताः तदनुरागयोग्याः स्त्रीजातयः शीलं सुस्वभावः तेन क्वणितस्य वेणोः विविक्तं प्रतिकूलरागामिश्रणेन शुद्धं किम्वा श्रृङ्गारादिरसलब्धविभागं गीतं विमानगतय इति स्वपति साहित्यं वैमानिकत्वेनाकस्मादागमनं श्रीकृष्णसङ्गमायोग्यत्वं चोक्तं तथापि कामहतधैर्याः सत्यो मुमुहुः अत्र रूपादेर्निरीक्षणोक्तिः ताभिस्तस्या दृष्टचरत्वात् अत एव तद्दर्शनेन विशेषतो वेणुगीतश्रवणेन च तादृशमोहो युक्त एव किं वा यदा यदैव रूपाद्यनुभवस्तदा तदैव मोह इति निरीक्ष्य श्रुत्वा चेति द्वयोरपि मोहे कारणत्वमुक्त्वा तयोर्वैपरीत्यमपि जन्मनि मतं यदैव खलु क्रमप्राप्तं भवतीति मोहेनैव विमानतोऽवतीर्य श्रीकृष्णान्तिकमपि गन्तुं न शक्ता इति भावः मोट्टायिताख्यानुभावोयं यथोक्तम्—

कान्तस्मरणवार्तादौ हृदि तद्भावभावतः । प्राकट्यमभिलाषस्य मोट्टायितमितीर्यते ।। इति

अहो बत परममूढानां हरिणीनां परमविदग्धानां सुरसुन्दरीणामपि सम्मोहनस्यैवम्भूतस्य सर्वसौभाग्यामृतसिन्धोरस्य दर्शनमप्यनाप्नुवतीरस्मान् धिगिति किम्वा वनविहारिणः तस्य तत्र तथा दर्शनाद्यभावाद्वयमधन्या इति भावः ।। १२ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो अस्तुतरां हरिप्रियसर्वजीवाश्रयस्य श्रीवृन्दावनस्य माहात्म्यम्, पशुजातीनामारण्यानां हरिणीनामपि भाग्यं किं वर्ण्यताभित्याहुः —धन्या इति । मूढा विवेकहीना गतिर्ज्ञातं यासां ताः, पशुजातित्वात्, मतय इति पाठेऽपि तथैवार्थः । ता वक्ष्ये एता इति प्रत्यक्षत्वाद्यभिप्रायेण, एताः श्रीवृन्दावनवर्त्तिन्यो वनचर्य्या वा, नन्दस्य श्रीवल्लवेन्द्रस्य नन्दनं कुमारमिति परमसुन्दरवेषरसिकत्वादिकं सूचितम्, श्लेषेण नन्दं साक्षादानन्दमप्यानन्दयतीति परमानन्दघनमूर्त्तिमित्यर्थः । उपात्ताः स्वीकृता विचित्रवेषाः सखिभिरुपायनतया समर्पिता वनमाला बर्हापीडगुञ्जावतंसादिभूषणानि येन, तं प्रति प्रणयावलोकैरेव विरचितां विशेषेण कल्पितामिति, तासां तदतिरिक्ततत्पूजाद्रव्याभावात्, रसिकशिरोमणेश्च तस्य तैरेव पूजा सम्पतेः, बहुत्वं गौरवेण दृष्टिपरम्पराविवक्षया वा, स्मेति विस्मये खेदे वा, अहो वतास्माकमीदृशं भाग्यं नास्तीति भावः । अन्यत्तैर्व्याख्यितमेव, अथवा वेणुनादमाकर्ण्य मूढा श्रीवृन्दावनविषयक जन्मादिमाहात्म्येन सर्वज्ञानां परमविदग्धानामपि विवेकहीनतां प्राप्ता गतिर्बाह्यान्तरेन्द्रियवृत्तिः किंवा मूढानां जडानामिव गतिः स्थितिर्गमनमेव वा, इतस्ततः स्खलनादिलक्षणं स्तब्धतालक्षणं वा यासाम्, हरिण्यः सदा वनान्तश्चारिण्योऽपि प्रणयावलोकैर्विरचितामेव पूजां दधुः, काममोहिततया किञ्चिदन्यत् कर्त्तुं विवेक्तुञ्चाशक्ताः, केवलं सादरं पूजयन्त्य इव प्रेम्णा निरीक्षन्त्य इत्यर्थः । अस्मत्सपत्न्यः, अपीत्यस्य कृष्णसारैरन्वयः । कृष्णसारा अपि सह एकदैव तथा चक्रुरित्यर्थः, कृष्ण एव सारः श्रेष्ठः परमोपादेयो येषामिति, श्लेषेण गोपा निन्दिताः, तेषां साक्षात् स्वच्छन्देनात्मनस्तादृश श्रीकृष्णसेवाचरणाशक्तेः। अन्यत् समानम् ।। ११ ।। अहो आस्तां श्रीवृन्दावनवर्त्तिनीनां गोसंगत्या श्रीकृष्णान्तिके चरन्तीनां तासां माहात्म्यम्, खेचरीणामपि भाग्यं किं वर्ण्यमित्याहुः—कृष्णमिति चित्ताकर्षकम्, वनिता विदग्धाः सर्वा वा स्त्रीजातयः, शीलं विचित्रक्रीडादिपरस्वभावः, वेष

मिति क्वचित् पाठः । तेन क्वणितस्य वादितस्य वेणोर्विविक्तं शुद्धं मनोज्ञं वा, किंवा, शृंगारादिरसलब्धविभागं गीतम्, विमानगतय इति स्वपतिसाहित्यम्, वैमानिकत्वेनाकस्मादागमनं श्रीकृष्णसंगमायोग्यत्वं चोक्तम्, तथापि कामहृतधैर्य्याः सत्यो मुमुहुः, अत्र रूपादेर्निरीक्षणोक्तिः, ताभिस्तस्यादृष्टत्वात्, अत एव तद्दर्शनेन विशेषतो वेणुगीतश्रवणेन च तादृशमोहो युक्त एव; किंवा, यदा यदा रूपाद्यनुभवस्तदा तदैव मोह इति, अन्यत्र च व्यक्ततया तदनुक्तिः, श्रीवृन्दावनवर्त्तिनां महाभागानां तेषां स्वतस्तत्सिद्धेः, मोहेनैव विमानतोऽवतीर्य्य श्रीकृष्णान्तिकमागन्तुं न शक्ता इति भावः। अहो बत सुरसुन्दरीणामपि सम्मोहनस्यैवम्भूतस्य सर्वसौभाग्यामृतसिन्धोरस्य दर्शनमप्यनाप्नुवतीरस्मान् धिगिति । किंवा, वनविहारिणस्तस्य तत्र तथा दर्शनाद्यभावद्वयमधन्या एव, तास्तु धन्या इति भावः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वेणुरणितं शब्दितं दधुः आदधुः ॥ ११ ॥ स्मरनुन्नसाराः स्मरनुन्नधैर्याः व्यनीव्यः शिथलनीवीबन्धाः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

धन्या इति । मूढगतयस्तिर्यग्गतयोऽपि मतय इति पाठे सुन्दरा सुन्दरवस्तुविवेकरहिता अपि गतय इति पाठेऽप्ययमर्थसम्भवति "गत्यर्था बुद्ध्यर्थाः" इति न्यायात् एता हरिण्यो धन्याः कृतार्थाः एवं कुत इत्यत्र विशिषन्ति याः हरिण्यो वेणुगीतमाकर्ण्य उपात्तः स्वीकृतो बर्हादिभिर्विचित्रो वेषो येन तं नन्दस्य नन्दनं प्रति प्रणयसहितैरवलोकैः पूजां सम्मानं दधुः कृतवत्यः किञ्च कृष्णसारैः स्वपतिभिः सहिताः एव दधुरस्मत्पतयस्तु गोपाः क्षुद्राः तन्न सहन्ते न समक्षमिति भावः ॥ ११ ॥ अन्यास्तु हे गोप्यः इदमप्यद्भुतं शृणुतेत्याहुः —कृष्णमिति । वनितानामुत्सवो यस्मात्तच्चारु शीलं यस्य तं कृष्णं निरीक्ष्य तेन वादितस्य वेणोरसङ्कीर्णं गीतं च श्रुत्वा विमानैर्गच्छन्त्यो देवानामङ्केषु स्थिता स्मरापहृतधैर्या मुमुहुः मोहे लिङ्गमाहुः भ्रश्यत्प्रसूनाः कबराश्चूडाः यासां ताः विगता नीव्यो यासां ताः शिथिलनीवीबन्धनाः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सुष्ठु मूढा विवेकरहिता मतिर्यासां तास्तथा कृष्णसारानुसारेण पुम्मृगेण कान्तमृगेण वा सहिताः नन्दस्य नन्दनं वेणोरचितं निःसृतं स्वरं चापीयास्वाद्यप्रणयेन सहितैः अवलोकनैः दर्शनैः उन्नतमस्तकत्वाद्दधुरिति ॥ ११ ॥ वनितानामुत्सवभूतं रूपसारं स्थिरसौन्दर्यं यस्य स तथा तं तत्सौन्दर्ये च स्वभावे चेति "सारो बले स्थिरांशे च" इति यादवः तेन क्वणितात् वा तेन शब्दिताद्वेणोर्वितं निर्गतं चित्रं सप्तस्वरमिश्रगीतं "वीगतौ" इति धातुः "चित्रमाश्चर्यलेखयोः" इति यादवः देव्यो देवस्त्रियः स्मरणे नुन्नं नष्टं सारो धैर्यं यासां तास्तथा भ्रश्यत्प्रसूनकवराः विगलितपुष्पकेशभराः विगताः स्रस्ताः नीव्यः वस्त्राणि वस्त्रग्रन्थयो वा यासां तास्तथा "नीवो वस्त्रांशुकग्रन्थ्योः" इति च ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

उत्तरत्र श्रीनन्दनन्दनमिति तु गोपनाशक्तेः वेणारणितं यत्र तथाभूतम् आकर्ण्य श्रोत्रविषयीकृत्य विचित्रवेषं सन्तं प्रणयावलोकैर्दधुर्वशीकृतवत्यः तैरेव पूजाञ्च दधुः कृतवत्यः ॥ ११-१२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

प्रौढ़ा ऊचुः—धन्या इत्यादिद्वाभ्याम् ॥ ११ ॥ स्मेति विस्मये । हरिण्योऽपि मूढ़गतयः सत्यः प्रणयावलोकैर्या नन्दनन्दनमेताः प्राप्ताः सत्यः पूजाः दधुः । कीदृशीम् ? विरचितां विशेषेण रचिताम् प्रणयावलोकैर्विरचितां वा । किं कृत्वा ? वेणुरणितमाकर्ण्य, तत्रापि पतिसहिता इत्याहुः-सहकृष्णसाराः, अतो धन्याः, वयन्तु वेणुरणितमाकर्ण्यापि प्रणयावलोकैः पूजयितुं न शक्नुमः । अस्माक पतयो यतोऽस्य नाम्नापि कुप्यन्तीति तद्वयमधन्या एवेति ऊढ़ानामिदं दैन्यमिति मन्तव्यम् ॥ तथैव ऊढ़प्रौढा ऊचुः-कृष्णं निरीक्ष्येत्यादि । हे सख्य इति बोद्धव्यम् । सन्तु हरिण्यः देवीनामपि वैवश्यं पश्यतेत्याशयः । विमानगतय इत्यनेन भर्तुर्संहितत्वं द्योत्यते, स्त्रीणां स्वातन्त्र्येणापि विमानकरणकागमनासम्भवात् । तेन देवोऽपि प्रकृष्टज्ञानादिमत्योऽपि कृष्णं निरीक्ष्य मुमुहुः । मोहे लिङ्गमाह—विनीव्यो भ्रश्यत् प्रसूनाः कवराद्यासाम । दूरस्थानां तासां वनस्थत्वेनास्य कदाचित् कासाञ्चन दर्शनं न सङ्गच्छते, तदाशङ्क्याहुः—श्रुत्वा चेति । या न पश्यन्ति, ता वेणुरवं श्रुत्वैव मुह्यन्तीत्यर्थः । स्वरूपमाह— स्मरनुन्नसाराः, स्मरेण नुन्नः क्षिप्तः सारो धैर्यं यासाम् । कृष्णं कीदृशम् ? वनितोत्सवरूप-शीलम् 'वनिता जनितात्यर्थानुरागायाञ्च योषिति' तासामुत्सववत् रूपञ्च शीलञ्च यस्य विविक्तगीतमिति विविक्तं रागान्तरेणामिश्रितं विरलं वा, स्वकल्पितत्वात् सङ्केतवहुलं वा, यत् सर्वैर्नावगम्यते, अस्माभिरेव ज्ञायत इति भावः । एवम्बिध-वैवश्येऽप्यासां पतयो नाभ्यसूयन्ति । अस्माकं निश्वसितेऽप्यसूयन्ति पतयः । अतो वेणुविविक्तगीतं श्रुत्वापि न शृणुम इत्यहो नः काठिन्यं पामरता चेति पूर्ववद्दैन्यम् ॥ १२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पुनश्चोढ़ा ऊचुः धन्या इति द्वाभ्याम्। मूढ़गतयोऽपि हरिण्योऽपि मूढ़गतयो मन्दगतयः सत्यः प्रणयावलोकैः पूजां दधुः, स्वच्छन्दमीक्षन्ते स्म, तथा न वयमित्यहो धिगस्मान्। अस्माभिराकर्ण्यत एव वेणुरणितम्, न त्वाकर्णनानन्तरं हरिण्य इव प्रणयावलोकैः पूजां कर्तुं शक्यते, तत्रापि ताः सहकृष्णसाराः पति-सहिताः एवमस्माकन्तु पतयोऽस्य गन्धमात्रेणापि कुप्यन्तीति दैन्यम्॥ ११॥ हे सखि! सन्तु हरिण्यः उपरि देव्योऽपि धन्याः न पुनर्वयमित्याहुः—कृष्णमित्यादि। 'वनिताजनितात्यर्थानुरागायाञ्च योषिति'' इत्यमरः। तासामुत्सववत् रूपं शीलञ्च यस्य, तं निरीक्ष्य तत्क्वणित–वेणुविविक्तगीतञ्च श्रुत्वा विविक्तं रागान्तरेणामिश्रितं विरलं वा विविक्तं सङ्केतवहुलं तदस्माभिरेव बुध्यते, नान्यैरिति वा। विमानगतय इति सभर्त्तृकत्वं व्यज्यते, भर्त्तुः समीपेऽपि स्मरनुन्नसाराः, तल्लिङ्गमाह—भ्रश्यन्ति प्रसूनानि येभ्यस्तथाविधाः कवरा यासां विनीव्यश्च मुमुहुः, तथापि तत्पतयस्ताभ्यो नाभ्यसूयन्ति, वयन्तु स्वनिमित्तकविविक्तवेणुगीतं श्रुत्वापि पतिभिया न शृणुम इत्यहो नः पतिवत्त्वमिति दैन्यग्लानी॥१२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहो स्वरमणं तमनभिसृत्य वयं बुद्धिमत्योऽपि स्वजन्म विफली कुर्महे यतो मूढा अपि सफलीभवन्तीति दर्शयन्त्य आहुः धान्या इति। स्मेति विस्मये खेदे वा एतादृशं भाग्यम् अस्माकं नाभूदिति भावः या वेणुरणितं वेणुरिफितमिति पाठद्वयं तुल्यार्थं वेणुनादम् आकर्ण्य नन्दनन्दनं प्रति प्रणयपूर्वकावलोकैरेव पूजां दधुः पुपुषुः तासां तैरपि यः आत्मनः पूजां पुष्टां मन्यते स नन्दनन्दनोऽस्माकं तैः पुनः किमुतेति भावः। किञ्च, ताः सह कृष्णसाराः पतिभिः सहिता एव। अयमर्थः कृष्ण एव प्रीतिविषयत्वेन सारो येषां ते यथार्थनामानः तासां पतयः स्वपत्नीः कृष्णानुरागिणीरालक्ष्य स्वगार्हस्थ्यमेव धन्यं मानयन्तोऽतिहृष्यन्तो अन्वनुगच्छन्तस्ताः कृष्णमसारयन्ति अस्मत्पतयस्तु कृष्णगन्धायापि द्रुह्यन्ति धिगस्मज्जीवितमिति॥ ११॥ किञ्चास्माकं गोपीनां गापे कृष्णे रतिर्नितीवानुचिता यतो देव्योऽपि मानुषे तत्रापि गोपे कृष्णे रतिमत्यः सत्य एव स्वदेवत्वमपि सफलयन्तीत्याश्चर्य्यमित्याहुः कृष्णमिति वनितानां स्त्रीमात्राणामेवानुरागिणीनामुत्सवो यस्मात्तथाभूतं रूपं शीलं च यस्य तं देव्यो देवानामङ्के स्थिता अपि विमानगतयो विमानचारिण्यः स्मरेणनुन्नश्चालितः सारो धैर्य्यं यासां ताः मुमुहुः मोहे लिङ्गमाहुर्भ्रश्यत्प्रसूनाः कबरा यासां विगता नीव्योऽपि यासां ताः मोट्टायितमिदं यदुक्तं "कान्तस्मरणवार्तादौ हृदि तद्भावभावतः। प्राकट्यमभिलाषस्य मोट्टायितमितीर्य्यते" इति परमविदग्धाः सूक्ष्मधियो देवास्तज्ज्ञात्वापि स्त्रीभ्यो न द्रुह्यन्ति प्रत्युत स्वीयं भाग्यं मानयन्तो नित्यमेव ताः कृष्णं दर्शयितुं विमानमारोह्य आनयन्ति अस्मत्पतयस्तु द्रुह्यन्त्येवेत्यतो निकृष्टामृग्य उत्कृष्टा देव्योऽपि धन्या मध्यस्था मानुष्य एव वयमधन्या इति भावः॥ १२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या आहुः—ते सखि! याः कृष्णसारैः स्वस्वपतिभिः सहिताः वेणोः रणितं निनादम् आकर्ण्य उपात्तविचित्रवेषं नन्दनन्दनम् प्रति प्रणयसहितैरलोकैर्विरचितां पूजां दधुः कृतवत्यः अत एता मूढमतयोऽपि हरिण्यः धन्याः कृतार्थाः कृष्णविमुखाः सुमतयोऽपि अधन्या इति भावः। तथाऽऽहुः प्राप्य जन्म यदि मानुषं नरः सेवते न तव पादपङ्कजम्। धिक् च जन्म कुलमादिदेव! तद्यौवनादिसकलन्न शोभते इति॥ ११॥ अन्या आहुः। हे सखि! वनितोत्सवं रूपं शीलं च यस्य तं कृष्णं निरीक्ष्य तेन कृष्णेन क्वणितस्य वादितस्य वेणोर्विविक्तमसङ्कीर्णं गीतं च श्रुत्वा बिमानगतयः विमानैर्गतिर्यासां ताः देव्यः देवाङ्गनाः स्मरेण उक्तप्रकाराभ्यां दर्शनश्रवणाभ्यामुत्पन्नेन कामेन नुन्नः परिक्षिप्तः सारः धैर्य्यं यासां ताः मुमुहुः तत्र चिह्नमाहुः भ्रश्यत्प्रसूनाः कामाग्निना विभ्रष्टपुष्पाः कवराः चूडाश्च यासां ताः श्रीकृष्णसंयोगदौर्लभ्यात्सद्यः कार्श्यभावेन शिथिलनीव्यः इति॥ १२॥

श्रीरामकृष्णकृता प्रेममञ्जरी

धन्या इति एता हिरण्यः जात्यैव हरिसम्बन्धिन्यः वयं तु गोप्यः गोपसामान्यस्त्रिय इति ततोऽपि निकृष्टा इति भावः मूढमतयोऽपीति ततोपहत्यै इति तत्प्रतीत्यभिप्रायेण धन्याः श्लोघनीयाः स्मेति विस्मये एता इति मानससाक्षात्कारेण अहोभाग्यमेतासाम् एता हरिण्यो यदि वयं स्म तर्हि धन्या एताः काः? या नन्दनन्दनं नन्दमानन्दं नन्दयत्यानन्दयन्तीति आनन्दस्याप्यानन्दमिति साक्षान्मन्मथमन्मथ इति तं पश्यतीति गुरोरपि नामग्रहणं भाववैवश्याद्वा नास्माकं कश्चित्सम्बन्धेति सूचनयेतीर्ष्ययाऽकारगुप्त्यैवाहरिणी यूथं दृष्ट्वा तल्लोचनादिसाम्यस्फूर्त्या तस्यापि भावोदयेन स्वभावविनिमयो जातस्तेन वेषपरिवर्त्तनं कृतमिति गृहस्थिताभिरेवैताभिर्भावनाप्रभावादनुभूतम् ननु, हरिण्यो जातिभीरवः कथं तत्र विश्वस्ता इति तत्राहुः–वेणुरणितमाकर्ण्येति। रणितमनुकरणशब्दः स च नूपुरशिञ्जितभावनयेति ध्वनितं तत्रागताः सत्यः कृष्णसारैः सह वर्त्तमाना इति तेषामप्राधान्यं तासां ध्वनिमात्रमोहितानां तादृशमवलोकनमपि प्रणयावलोकनत्वेन पूजा सम्भाविता निजभावसाजात्यात् यतः भावमात्रग्राहिण्या "जगद्धनमयंलुब्धाः कामुकाः कामिनीमयम्" इति न्यायादिति॥ ११॥ आस्तां वृन्दावनवर्त्तिनीनां कृष्णमनोहारिणीनां वार्ता

खेचरीणामपि देवसहचरीणां वृत्तान्तः श्रूयतामित्याहुः—कृष्णमिति। अविशेषेण सर्वचित्ताकर्षकं निरीक्ष्य वनितानां जनितात्यर्थानुरागानामुत्सवश्चित्तसमुल्लासो यस्मात्तादृशं रूपं शीलं च यस्य तं स च स्वभावो रागिजनानुवर्त्तित्वादिः तेन श्रीकृष्णेनैव क्वणितो वीणावादनभङ्ग्या वादितो यो वेणुस्तस्मिन्नक्षरावलीप्रकाशनवैचित्र्येण नानास्वरजात्यादिप्रस्तारविचित्रं गीतं श्रुत्वा च देवाङ्गना विमानगतयः विमानयानाः अकस्मादागताः श्लेषेण विगतमानगतय इति तत्पूर्वं मानवत्य आसन्निति सूचितम् अत्र हेतुः—स्मरेण मुन्नः सारो धैर्येण मानस्थितिर्यासां ताः मुमुहुर्मोहेनैव कृष्णान्तिकमागन्तुं न शक्ताः अहो वेणुगीतस्याचिन्त्यः प्रभावः यतो देवानां सविधे वर्त्तमाना अपि स्मरेण मूर्च्छिता अपि प्रत्युत मानापगमात्प्रीत्या समालिङ्गिता इति मोहे लिङ्गं भ्रंशादिति एवं श्लोकद्वयेनातिमूढानां हरिणरमणीनाम् अतिविदग्धानां देवीनां मोहं सम्भाव्यात्मनि तदभावमालक्ष्य दैन्यं सूचितं सञ्चार्यमोट्टायिताख्योऽनुभावः तदुक्तम्—

“कान्तस्मरणवार्त्तादौ हृदि तद्भावभावतः। प्राकट्यमभिलाषस्य मोट्टायितमितीर्य्यते” ॥

भावस्य सजातीयतया वाक्यार्थसङ्गतिः सा चयं प्रेमप्रत्यासत्तिर्योगजप्रत्यासत्तिरिव सर्वविलक्षणेति ॥ १२ ॥

श्रीमत्कृष्णदासकृता श्रीगणदीपिका

सौदामिनी सखी खण्डितां प्रत्याह—धन्या इति। हे सखीति योज्यं “स्वसखिभ्योऽन्ववर्णयन्” इत्युक्तेः, एता हरिण्यो जात्यैव (धन्या) हरिसम्बधिन्यो वयं तु गोप्य इति ततोऽतिनिकृष्टाः गोपसामान्यस्त्रीत्वविशिष्टा इति भावः। मूढमतयोऽपीति तमोहत्यै इति वत् प्रतीत्यभिप्रायेण सुराङ्गनानामिव वर्गगतत्वेन सर्वज्ञत्वात् धन्याः श्लाघनीयाः स्मेति विस्मये आश्चर्य्यमिदं वेणुगीतमिति भावः। खेदेवाऽहा भाग्यमेतासामिति। यद्वा, यतो हरिण्यो यदि वयं स्म तर्हि धन्या इति। एताः का ? तत्राहुः—या इति। एता इति मानससाक्षात्कारेण यद्वा, एताः काः ? या नन्दनन्दनमुपात्तविचित्रवेषमित्यावेशाद् गृहातप्रियतमावेषामित्यर्थः। पश्यन्तीति दधुरिति भावमात्रग्राहस्तस्य तैरेव पूजा मुख्येति अत एव दधुः पुपुषुरित्यर्थः। इत्युक्तं न तु चक्रुरिति तासां ध्वनिमात्रमोहितानां स्वाभाविकावलोकनमपि प्रणयावलोकत्वेन सम्भावितं निजभावसायुज्यात् “जगद्धनमयं लुब्धाः कामुकाः कामिनीमयम्” इति न्यायात् सङ्क्षेपः। भाववैवश्येनोक्तं गुरोरपि नाम ग्रहणं तत एव किं वा प्रियतमाकारगुप्तेन स्म किं कश्चित्सम्बन्ध इति सूचनाय प्रियावेषानुकरणमिति “मुहुरवलोकितमण्डनलीला मधुरिपुरहमिति भावनशीला” इति वज्ज्ञेयम् ॥ ११ ॥ आस्तां वृन्दावनवर्त्तिनीनां अस्मन्मनोहारिणीनां वार्ता खेचरीणामपि देवसहचरीणां वृत्तान्तः श्रूयतामिति वल्लवीसखी मधुमती प्रत्याह—कृष्णमिति ॥ १२–१३ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

सुमतयोऽपि वयं त्रपाधर्मभयात् कान्तमनभिसरन्त्यः स्वजन्म विफलयामस्त्रपादिहीनास्तु मूढमतयोऽपि जन्म सफलयन्तीत्यस्याः प्राहुः—धन्या इति। स्मेति विस्मये खेदे च एता हरिण्यो मूढमतयोऽपि धन्या भवन्ति या वेणुरणितमाकर्ण्य नन्दनन्दनं प्रति प्रणयपूर्वकैरवलोकनैर्विरचितां पूजा मधुः पुपुषुः तासामवलोकैरेवं स स्वपूजां पुष्टां मन्यते किम्पुनरस्माकं तैरिति भावः किञ्च ताः कृष्णसारैः स्वपतिभिः सहिताः पूजांमधुरिति तासां धन्यत्वं अस्माकन्तु एवम्भावाभावाद् वयमधन्या इति भावः ॥ ११ ॥ पराः काश्चिदाहुः कृष्णमिति। विमानगतयो देवयानैर्नभसि चरन्त्यो देवानामङ्केषु स्थिता इत्यर्थः। देव्यः कृष्णं निरीक्ष्य तेन क्वणितस्य वादितस्य वेणोर्विविक्तममिश्रं गीतञ्च श्रुत्वा स्मरेण नुन्नश्चालितः सारो धैर्यं यासां तादृश्यः सत्यो मुमुहुः कीदृशं कृष्णं वनितानां जात्यनुरागाणां योषितामुत्सवो यस्मात् तादृशं रूपं शीलञ्च यस्य तं मोहे लिङ्गमाहुः भ्रश्यत् प्रसूनाः कवराः केशवेशाः यासां विगता नीव्योऽपि यासां ता इति विजातीया देव्योऽपि चेत् तत्पतिभिरनिवार्य्यमाणाः कृष्णे अनुरज्यस्ति तर्हि तत्सजातीया वयं कुतो नानुरज्याम इत्युत्साहोब्यज्यते ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

काश्चित्काश्चित्प्रति कथयन्ति। अथ का त्वं चिकीर्षसि च किं मुनिवर्येतिवदनङ्गबाधयाऽनङ्गस्मरणेन बह्वः प्रत्यप्येका प्राहैवमित्याह ॥ सखीति। हे सखि वृन्दावनं यद्यतो देवकीसुतपदाम्बुजलब्धलक्ष्मि देवकीसुतस्य पदाम्बुजे ताभ्यां लब्धा लक्ष्मीर्येन तत्। लक्ष्मेत्यपि लक्षणं लब्धसम्पल्लब्धचिह्नमित्युभयत्रार्थः। गोविन्दवेणुं तत्स्वरमन्वनुसारेण मत्ताः। अनेन गोविन्दस्य मेघसमतासमता तत्स्वरेणैतत्स्वरस्य सूच्यते। ते च ते मयूरास्तेषां नृत्यं च प्रेक्ष्यादृतान्यनुचरितमेतदनुसारीणि चरितानि येषां तान्यन्यानि सत्त्वानि प्राणिनो यस्मिंस्तत्। सत्त्वं प्राणिष्विति विश्वः। आदृतौ सादरार्चितावित्यमरः। अतो भुवः कीर्तिं वितनोति विस्तारयति। क्व च गायमानाविति पर्यन्तं किञ्चिन्मर्यादयोक्तवत्योऽत्र उत्तरं निर्लज्जा जनाः किंवा वदन्तु न इत्येकं प्रकृत्य स्तुवन्तीति तात्पर्यमवधेयम्। वनत्वेन पदाम्बुजलब्धसम्पत्कत्वं युक्तं गोविन्देति वदत्सुदतीनां किञ्चिदेप्यज्ञत्वं च सूचितमिति ज्ञेयम्। तन्नाम्न उत्तरत्र शचीशवितार्यत्वाल्लोकदृष्ट्येति ॥ ११ ॥ एताः हरिण्यः कुरङ्ग्यः सुमूढमतयः पशुत्वात्सुमूढा कार्याकार्यविचारातिमन्दा मतिर्यासां

ताः सत्योऽपि यद्यत उपात्तविचित्रवेषं नन्दनन्दनं वेणुरिफितं रफितं रसितमिति समार्थाः पाठाः स्वरसाः । आपीय कर्णपुटैरास्वाद्य सकृष्णसाराः सस्वपतयः । अनेन स्वपतीननागतानागतांश्चेदपि तद्वत्सहेयुरिति च कटाक्षयन्ति ता इति ध्वनयति । प्रणयावलोकैः सस्नेहनिरीक्षणैर्विरचितां निर्मितां पूजां सपर्यामिदं पर्यायतो दधुः । उद्धृतोत्तमाङ्गतया दधुरित्युक्तिः । अतो धन्याः । धन्या इत्यनेन कृष्णमतित्वेऽपि किन्न हरिमतयस्ता इति शङ्का आतङ्कः । धन्यो हरिर्यासामस्तीत्यर्थ आद्याच कृष्णस्य हर्यात्मकत्वात्तन्मतिमत्त्वे तन्मतिमत्त्वमिति सूच्यते । अनपेक्षो गुणैः पूर्णो धन्य इत्युच्यते बुधैरिति शब्दनिर्णय इति चतुर्थतात्पर्योक्तिः । त्व धन्यस्त्वमाश्चर्य इत्यादेः । ये नैवमस्मन्नायकादयो धन्या इति परिदृश्यमानाः सुमूढमतय इत्यप्यान्तरङ्गिको भावो भामिनीनां बोध्यः ॥ १२ ॥

श्रीसुबोधिनी

एवं रूपवर्णनामुक्त्वा **षोढा** वेणुं वर्णयन्ति **धन्यास्त्वि**तिषड्भिः ।

हरिण्योप्सरसो गावः पक्षिणो नद्य एव च । मेघाश्चेतिक्रमेणैव कृष्णैश्वर्यादिबोधकाः ॥ १ ॥
ईश्वरः पूज्यते लोके मूढैरपि यदा तदा । निरूपाधिकमैश्वर्यं वर्णयन्ति मनीषिणः ॥ २ ॥
वीर्यं देवेषु तत्रापि स्त्रीषु तत्रापि कामतः । सान्निध्ये पुरुषाणां च मूर्च्छा तेन ततो महत् ॥ ३ ॥
यशो यदि विमूढानां प्रत्यक्षासक्तिवारणात् । स्वधर्मं योजयेत् तेषु तदा भवति नान्यथा ॥ ४ ॥
तामसा राजसाश्चान्ये गुणातीताश्च रूप्यते । वृन्दावनं गुणातीतं मुनयश्चापि पक्षिणः ॥ ५ ॥
गोवर्धनश्च त्रितयं गुणातीतमिह स्थितम् । तद्गताश्चापि लोकेस्मिन् गुणातीता भवन्ति हि ॥ ६ ॥

''यदा खलु वै पुरुषः श्रियमश्नुते वीणास्मै वाद्यत'' इति श्रुतिन्यायेन सर्व एव विहगा भगवदिया अपि परमां श्रियं प्राप्नुवन्ति,

श्रियो हि परमा काष्ठा सेवकास्तादृशा यदि । ज्ञानोत्कर्षस्तदैव स्यात् स्वभावविजयो यदि ॥ ७ ॥
हरेश्चरणयोः प्रीतिः स्वसर्वस्वनिवेदनात् । उत्कर्षश्चापि वैराग्ये हरेरपि हरिर्यदा ॥ ८ ॥
भक्त्या च तादृशत्वं च सा सेवा सेवकोचिता ॥ ८ ॥

तत्र प्रथमं हरिणीनां भाग्यमभिनन्दन्ति **धन्या** इति, **ज्ञानं हि क्रियाविशेषणीभूतं क्रियोत्कर्षः पूजायां** सापि चेज् **ज्ञानमयैर्द्रव्यैर्भगवद्विषयिणी भवति**, भगवज्ज्ञानं स्वज्ञानं च तस्या अप्यङ्गं तदभावे सर्वं व्यर्थं यद्यन्यत्रापि तद् भवेत् तदा तदेवोत्तममितिपक्षमाश्रित्य पूर्वपक्षं व्यावर्तयन्ति **धन्यास्त्विति, तु**शब्देन स दोषो न ज्ञायत इत्याशङ्कां परिहरन्त्य आहु**र्मूढमतयो**पीति, स्त्रीणामेवाभिनन्दनं प्रकरणाद्धरिणानां स्त्रियोत्र विवक्षिता **हरिण्यः**, सर्वत्रान्या एव वर्णयन्तीति ज्ञातव्यं, **स्वस्याकृतार्थता-भावनया दैन्याविर्भावे भगवान् कृपया वर्ण्यमानसर्वसामग्रीसहितः प्रकटीभूत** इति ज्ञापयितु**मेता** इत्युक्तं, तासां भाग्ये हेतु-**माहुर्या नन्दनन्दनं** निरीक्ष्य **वेणुरणितमाकर्ण्य** भगवत्कृतैः **प्रणयावलोकैर्विरचितां पूजां** स्वस्मिन् **दधु**रिति, **या** इति, पूर्वं भगवदुक्ताः प्रसिद्धाः, **नन्दमप्यानन्दयतीति नन्दनन्दनः**, **भक्तोद्धारार्थमेव** ब्रह्मवाक्यात् प्रवृत्त उद्धारप्रकरणात् ता अप्युद्धरिष्यती-**त्युपात्तः** स्वीकृतो **विचित्रो वेषो** येन, अनेन रसाभिनयार्थं प्रवृत्तो भगवानुक्तः, एवं स्वरूपतस्तत्कार्यकर्तृत्वं साधनतश्च फलमुखं कर्तृत्वमुक्तं, **विचित्रपदेन** सर्वं एव रसाः परिगृहीताः, समीपे स्वीकारो ब्रह्मानन्दस्य तत्र प्रवेशनार्थः, **आकर्ण्ये**त्येव क्रिया वेणुरणिते **भगवति चार्थतः** शब्दतश्च, पशुदृष्टिर्विशेषं न गृह्णातीति शास्त्रदृष्टिरुक्ता, पश्चाज् जायमानापि प्रत्यक्षदृष्टिरन्यानुरोधिनीति विद्य-मानापि सा न गणिता, तदहा**कर्ण्ये**ति, **वेणो रणितं** सर्वरससाधारणं, यथा रसो बाह्यतो न गच्छति तथा शब्दविशेषो रणितं तादृशमपि निकटे गत्वा श्रुतवत्यः, अनेन **दैहिका धर्मा निर्वतिताः, सहकृष्णसाराः** स्वभर्तृसहिताः, अनेन भर्तृनिरोधोपि **परिहृतः, सापत्न्याभावश्च कृष्णसारा** इत्यनेन, **कृष्ण एव सारो** येषामिति **कृष्णसाराः**, अनेन **गोपा**स्तथा न भवन्तीति स्वस्या-तथात्वं सूचितमन्यथास्माभिरपि सह **गोचारणं** कुर्युः, **अत एतेभिमानसारा एव धन्यास्ते कृष्णसाराः**, स्नेहपूर्वकावलोकनै-**र्विरचितां** भगवति **पूजां** धारयामासुः, नेत्राण्येव कमलानि ज्ञानवासितानि ज्ञानोद्भवस्थानानि तैः **पूजा** सर्वोत्तमा तस्याश्च धारणं ततोपि, कृतिरर्थादेवोक्ता. भगवता च प्रतिपूजितमात्मनि वा **दधुः, सदयावलोकै**रिति वा पाठः, **एतावदेव कर्तव्यं प्राणिनां भगवतश्च** ॥ ११ ॥ अप्सरसामवस्थामाह **कृष्णं निरीक्ष्ये**ति, **कृष्ण**पदार्थात् **स्त्रीणां निरोधः सूचितः, आनन्दे** दृष्ट आनन्द-**साधन आसक्त्यभावो युक्त एव, तत्रापि सदानन्दे, नितरामीक्षणं** दिव्यदृष्ट्या, स्वजातीयोद्धारार्थमागत इतिविशेषः, तदाहु-**र्वनितोत्सवचारुवेष**मिति, **वनितानामेवोत्सवार्थे चारुर्वेषो** यस्य, स उत्सवो ह्यनेकविध**स्तत्तदुत्सवे ते ते भूषिता** भवन्त्युत्सव-**रसानुभवार्थं** केवलं **वनितानामेवोत्सवो** यत्र, **वनं यौवनमिताः** प्राप्ताः प्राप्तवत्यः, **वनं** सञ्जातमिति वा **इतच्**प्रत्ययः, न हि तत्र प्रविष्टः पुनरावर्तते, **यौवनमि**त्यत्रापि 'यु' मिश्रणार्थे **'वन'**मिति तासामेवोत्सवो भवत्विति भगवता **वेषः** कृतः, **सर्वाभरणभूषिताः सर्वा एव वनिता यथावेषरसं पुरुषार्थमनुभवन्ति**, अनेनास्मिन्नुत्सवे यासामलङ्कारादिनोत्सवो न जातस्तासां **वनितात्वं** व्यर्थ-**मेव** यथा रण्डानां तत्रापि **चारु** मनोहरमन्तरप्यलङ्कारहेतुस्तत्र प्रेमज्ञानादिकमलङ्कारा बहिरिवान्तरपि रसानुभवश्च, अनेनाप्सरसां

भगवदर्थागमने सर्वोप्युपाय उक्तोनुभावकं ततो विलम्बेन प्रस्थापकमाह **श्रुत्वा चे**ति, निकटे समागत्य पूर्ववदेव **क्वणितस्य श्रवणं**, अत्र वेण्वतिरिक्तकूजितादिक्वणितातां सङ्ग्रहार्थं तस्य भगवतः **क्वणित**मित्युक्तं, **क्वणितश्चवेणुः** तादृशवेणावाविर्भावं प्राप्तानि विचित्राणि **गीताण्याकर्ण्ये**तिसम्बन्धः, **एकेनैव गीतेन मूर्च्छिता जाता** इत्येकवचनं, **विचित्राणि** सर्वरसार्थानि, **शृङ्गार एव सर्वे रसा इति नाट्यशास्त्रसिद्धान्तः, अन्यस्य रसत्वमेव न मन्यन्ते** यथा महान्तः सुवर्णाभरणान्येवोपकरणानि च कुर्वन्ति तथा शृङ्गार एव सर्वरसा अन्यथा रसिकानां रुचिर्नोत्पद्येत, अत एव **विचित्रं गीतं**, यद्यपि ता **देव्यो** देवतारूपा पूज्या एव तत्रापि **विमानेनैव गतिर्यासां** नापि भोग्या नापि दुःखसहनशीलास्तथापि **स्मरेणैव नुन्नः सारो** यासां, शरीरेन्द्रियापेक्षया मनो बलिष्ठमिति **स्मरेण सारो** विवेकः सर्वोप्यपहृतः, भूमावनागमने पद्भ्यामनागमने स्वतोप्यनागमने हेतव उक्ताः, ततो यज् जातं तदाहुर् **मुहुरि**ति, न केवलमन्तरेव हृदयप्रदेशे मोहः किन्तूपर्यधश्चेति, **भ्रश्यत्प्रसूनानि कबरे** यासां **विगता नीवी च** यासामिति केशनीवीबन्धयोर्विश्लेष आमुष्मिकैहिकफलपरित्यागज्ञापकः, देवतात्वान्न मरणं **विमानगति**त्वान्नाधःपतनं विवेकाभावान्नोपायेनागमनं, **भगवदनुपयोगेन्यस्यापि रसो नोत्पद्यताभिति रसाभासो** वर्णितः, देवसहितानामपि प्रायेणात्रावतीर्णानां केवलानां स्त्रियस्ताः स्वपत्यन्वेषणार्थमागता भगवन्तं दृष्ट्वा पूर्वावस्थां सर्वामेव विस्मृतवत्यो भगवानेव पतिर्भवत्विति, तदास्माकं तथात्वं युक्तमेवेत्यर्थः ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

धन्यास्त्वित्यत्र, **स दोषो न ज्ञायत** इति । दोषस्वरूपमाहुः **न ज्ञायत** इति । **मृगीभिर्भ**गवत्स्वरूपं श्रुत्यादिप्रतिपाद्यत्वेन न ज्ञायत इतिलक्षणो दोष इत्यर्थः । **पूजां दधुरि**त्यत्र, **तस्याश्च धारणं ततोपी**ति । सर्वोत्तममिति शेषः ॥ ११ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

रूपवर्णनमिति **वेणोरि**ति शेषः, वेणुं स्वरूपतो वर्णयित्वा धर्मतो वर्णयन्तीत्यर्थः, वपुर्युक्तत्वं वेणोः स्वरूपमिति "बर्हापीडे"ति श्लोके 'नादेनुभूयमान एवानुभूतं भवति न तु पृथगि'त्यादिना निरूपितमेव, तथा च रसद्वयनिरूपणं **चरण**निरूपणमपि वेणुस्वरूपवर्णनमेवेति भावः, **षोढे**ति ऐश्वर्यादिबोधनहेतुत्वप्रकारेणेत्यर्थः, **धन्यास्त्वि**त्यत्र **वीर्य**मिति **'देवेष्वि'**त्यारभ्यैवं **मूर्छा जाता** तेन कारणेन ततो देवस्त्रीभ्यो हेतुभ्यो महद् वीर्यं बोधितं जातमिति शेषः, **वारणादि**ति ल्यब्लोपे पञ्चमी, प्रत्यक्षे तृणादौ या **आसक्तिस्ततो वारणं** सम्पाद्येत्यर्थः, **योजयेदि**ति पीयूषरूपं **स्वधर्मं योजयेद्** भगवानिति शेषः, **नान्यथे**ति मर्यादामार्गीयमत्रोपयुक्तं न भवतीत्यर्थः, पीयूषयोजनं **गोष्वेव न तु** शावेष्विति, यशोबोधकत्व**कथनेत्र** गाव एवोक्ताः, **अन्य** इति सात्त्विका इत्यर्थः, इह **स्थित**मिति **निरूप्येष्वित्यर्थः, निरूप**काणां स्वरूपमाहुस्तद्व्रताश्चेति उपलक्षणेन तत्तन्निरूपका**स्तथा** तथेति भावः, तामसराजससात्त्विकनिर्गुणाः **प्रथमपर्याये**, राजससात्त्विकतामसनिर्गुणाः द्वितीये, एवमेव तृतीयेपि **क्रमः, लोकेस्मि**न्निति भक्तलक्षणे इत्यर्थः, 'यो यच्छ्रद्धः स एव स' इति वाक्यसम्मत्या **हि** शब्दः, **भगववीया अपी**ति धर्मिसम्बन्धात् सामान्यतः श्रीप्रातावपि पूर्वोक्तन्यायेन **परमां** प्राप्नुवन्तीत्यर्थः, नन्वेवं पक्षिणां श्रीप्राप्त्या भगवद्गुणबोधनं कथं सम्पन्नमित्यत आहुः **श्रियो हीति**, सेवके तत्सिद्ध्या स्वामिनि कैमुत्येनैव सिद्धेति भावः, अयं न्यायस्त्रिष्वपि ज्ञेयः **हरेश्चरणयोरि**ति अत्रैवं विभागः, सर्वत्रानासक्तिः सामान्यवैराग्यम्, सैव त्यागविशिष्टा **वैराग्ये** उत्कर्षः, तत्रापि हरिचरणरतिर्भक्तिमार्गीयं वैराग्यम्, सैव सर्वस्वनिवेदन**विशिष्टा तद्वै**राग्ये उत्कर्षः, यत्रापि हरेः शीतादिनिवारणरूपा सेवा पुष्टिमार्गीयं **वैराग्यम्**, सैव भक्तिविशिष्टा तद्वैराग्ये उत्कर्ष इति, तथा **चैवमन्वयः**, **हरेश्चरणयोः प्रीति स्वसर्वस्वनिवेदन**विशिष्टा सती **वैराग्ये** भक्तिमार्गीये **उत्कर्षः**, पूर्वोक्तसामान्यवैराग्यतदुत्कर्षावप्यत्र सम्पन्नावित्यपिशब्दचकारौ, पुष्टिमार्गीयमाहुर्**यदि हरेरपि हरिर्भवेत् तादृशत्वं च भक्त्या** भवेत् **सा सेवकोचिता सेवा** पुष्टिमार्गीयमुत्कृष्टं वैराग्यमित्यर्थः, अत्रापि पूर्वोक्तवैराग्यतदुत्कर्षसमुच्चयार्थं **चकारद्वयम्**, एवं षण्णां तात्पर्यार्था उक्ताः, आभासेषु तु वाच्यार्था वक्ष्यन्त इति विभागः, **तत्रे**ति हरिण्यदिष्वित्यर्थः, **तु** शब्देन स्वव्यावर्तने हेतुमाहुर्**ज्ञानं हीति**, जानातीच्छतियतते इति क्रमादेवं युक्तमिति हि शब्दः, **आकर्ण्ये**तिल्यपा आकर्णनरूपज्ञानस्य पूजाविषयविषयकस्य **गौणत्वमुक्तम्, पूजापदे**नोत्कृष्टा क्रियोक्ता, **प्रणावलोकै**रित्यनेन ज्ञानमयद्रव्याण्युक्तानि, व्यापारेण व्यापारवानाक्षिप्तः, अवलोकनस्य व्यापारत्वात्, करणत्वं तु नेत्राणामेवेति विभागः, स्वावलोकनरचितत्वपक्षे स्वस्य भगवज्ज्ञानमुक्तम्, **भगवता प्रतिपूजितमात्मनि** दधुरिति भगवदवलोकनरचितत्वपक्षे भगवतो हरिणीज्ञानमुक्तम्, एतेन व्यापारोपि ज्ञानरूप एवोक्तः, एवमस्मासूनास्त्थत **स्वव्यावृत्तिः** (स्वासामेवोत्तमत्वमितिपक्षाव्यावृत्तिः), **तदेवोत्तम**मिति तदुत्तममेवेत्यर्थः, **पूर्वपक्ष**मिति सुधाभागित्वाद् गोपिकानामेवोत्तमत्वमितिपक्षमित्यर्थः, **हरिणा**नामिति **कृष्णसार**साहित्योक्तेरत्र पुंयोगे ङीष् न तु जातिलक्षमिति भावः, **सर्वत्रे**ति **गो**निरूपणान्तं केवलाभ्योन्या अन्यपूर्वा वर्णयन्ति, अतस्तासामेव प्रकरणात् **सहकृष्णसारा** इत्यनेन हरिणसहिताः स्त्रिय उक्ता न तु केवला इति भावः, **निरीक्ष्ये**ति अर्थत आकर्णनमेवानेन विवृतं न तु पदान्तराध्याहारः, अग्रे निषेधात्, **ब्रह्मवाक्यादि**ति "अस्त्वित्युक्त" इति श्लोकोक्तादित्यर्थः, **उद्धारप्रकरणादि**ति "प्रकरणं देशकाला"विति निबन्धे लक्षणमुक्तम्, तथा चोद्धारकालादित्यर्थः, **अनेने**ति वेशे वैचित्र्यकथनान्नृत्यसामायिकत्वसूचनेनेत्यर्थः, **एवमिति नन्दनन्दनपदेन** स्वरूपतस्तदुक्तम्, **वेशस्वीकारकथनेन** साधनत उक्तम्, **समीप** इति **उप** समीप

आत्त इत्यनेन हरिणीनां समीपे वेशस्वीकारो हरिणीषु स्वरूपानन्दस्य प्रवेशनार्थः, वेशसमये निरावृतस्वरूपदर्शनेन तथा भवति, वेशानन्तरदर्शनेत्वाच्छादकादिविशिष्टत्वाद् धर्मसहितानन्दानुभवो भवेत्, अत एवात्यनुगृहीतस्यैव समक्षं भगवतः शृङ्गारादिकं कर्तव्यमितिमार्गमर्यादा, आकर्ण्येतिवन्निरीक्ष्येत्येव कुतो नोक्तम् ? तस्यापि द्विधा व्याख्यानसम्भवादित्यत आहुः **पशुदृष्टि**रिति, **सर्वरसे**ति सर्वे रसा असाधारणा यत्र, **सर्वरससाधारणे**तिपाठे सर्वे रसाः साधारणा यत्र न त्वेकः कश्चिन्मुख्य इत्यर्थः, **अनेने**ति भयस्वभावानामपि भगवन्निकटगमनेनेत्यर्थः, अर्थत आकर्णनरूपस्य निरीक्षणस्य गमने एव सम्भवान्निकटे गत्वेत्युक्तम्, **निरधोपी**ति "ज्ञानं ही"त्यादिना स्वव्यावर्तने हेतुः पूर्वमुक्तः अत्रापि हेतुरुच्यते इत्यपि शब्दः, बहुवचनेन सापत्न्याभाव उक्तः, **भगव**ति पूजामिति स्वकृतावलोकैः प्रियासप्रणयावलोकस्मारणेन भगवतस्तोषणमत्र **पूजा**, ततः (तासु तथा भावजनकं) तादृग्भावेन भगवत्कृतमवलोकनं **प्रतिपूजनं** ज्ञेयं **कृति**रिति अस्मिन् पक्षे प्रतिपूजितरूपा कृतिरर्थादुक्तेत्यर्थः, तोषणस्य धारणं स्थिरता, तथा सति प्रतिपूजितं भवत्येवेति भावः, तु शब्दकृतपूर्वपक्षव्यावर्तनमुपसंहारेपि बोधयन्त्ये**तावदेवे**ति, सुधाभोगादिकं त्वधिकम्, आवश्यकमेतावदेवेत्येवकारः, अत एतस्मिन् पक्षे एतासां धन्यत्वमिति भावः ॥ ११ ॥ **कृष्णमि**त्यत्र **आनन्दसाधनेः** इति आमुष्मिकैहिकफले इत्यर्थः, **दिव्यदृष्ट्ये**ति मानुषभावराहित्येनेत्यर्थः, अन्यथा वक्ष्यमाणावस्था न स्यादिति भावः, **विशेष** इति उद्धारविषयसजातीयत्वं हरिणीभ्यो विशेषः, अप्सरःस्विति शेषः, तदाहुरिति **तत्** तस्मादेतासु तत्सजातीयत्वबोधनार्थं चारुवेशनिमित्तभूतोत्सववतीनां वनितात्वमाहुरित्यर्थः, तथा चायमवान्तरपदस्याभासोज्ञेयः, केवलमिति यत्र वेशे कृते सति केवलं वनितानामेवोत्सवो भवत्येतादृशो वेश इत्यर्थकथनं न तु विग्रहः, **वनितोत्सवाय** वनिताभूषणार्थं चारुर्वेशो यस्येतिविग्रहः, उत्सवस्य भूषणहेतुत्वा**दुत्सव**पदेन भूषणमुक्तमिति भावः, **कृताभरणे**ति, अत्र कृतपदं नूतनवाचकम्, भगवतो वेशान्तरस्वीकारे स्वयमपि नूतनाभरणानि परिहितानीत्यर्थः, **यथावेशे**ति, भगवतः पीताम्बरपरिधाने स्वयं नीलाम्बरपरिधानमिति वेशानतिक्रमेण शृङ्गारादिषु मध्ये यं रसं भगवान् प्रकटयति तदनति क्रमेण चेत्यर्थः, **अस्मिन्नुत्सवे** इति अस्मिन् वेशे कृते सतीत्यर्थः, **सर्वोप्युपाय** इति दिव्यदृष्ट्या दर्शनं प्रेम ज्ञानादिरन्तर्भगवदनुभवश्चेति, **अनुभावक**मिति उद्दीपनेन रसानुभावकम्, क्वणितगीतयोः श्रवणमविलम्बेन शीघ्रमेव ततो विमानाद् भगवति प्रस्थापकमित्यर्थः, **क्वणित**पदस्यावृत्तिमभिप्रेत्य क्वणितश्चेति चकारः, तथा च तत् क्वणितं क्वणितवेणुविचित्रगीतञ्चेति समासः, गीतस्य शृङ्गारोद्बोधकत्वेपि सर्वरसार्थत्वनुपपादयन्ति शृङ्गार एवेति, **अन्यस्ये**ति शृङ्गाराङ्गत्वभावापन्नस्येत्यर्थः, **यथे**ति उपकरणानि चकाराद् भूषणानि सुवर्णस्य आ समन्ताद् भरणं येषु तादृशानि न तु मध्यावकाशे लाक्षायुक्तानि कुर्वन्ति तथा सुवर्णमयोपकरणवच्छृङ्गाराङ्गभूता एव रसा इत्यर्थः, **नापी**ति एतादृशेषु समस्तत्कृतविवेकापहारश्च न भवति तथापि प्रमेयबलात् तथा जातमित्यर्थः, तृतीयचरणीयविशेषणत्रयतात्पर्यमाहु**र्भूमा**विति, मृत्वा भूमाववतारे इत्यर्थः, देवीनां मरणासम्भवादिति भावः, **पद्भ्यामि**ति, अन्यभयाद् विमानं त्यक्त्वा गुप्ततया पद्भ्यामित्यर्थः, विमानगतीनां भूस्पर्शासम्भवादिति भावः **स्वत** इति उपायचातुर्येण विमानमेव तत्र नीत्वेत्यर्थः, विवेकापहारादिति भावः, अग्रे विवरणादेवमर्थो ज्ञेयः, असावधानता **मोह**पदार्थो ज्ञेयाः **देवसहिता अपी**ति 'देवानां मरणं नास्ती'ति प्रथमाध्याये 'गिरं समाधा'विति श्लोके 'अमरा' इति सम्बोधनेनोक्तमिति व्याख्यातम्, अत एकेन रूपेण योगिन इवात्राप्यवतीर्णाः, पूर्वं रूपं तु तत्र तिष्ठत्येवेति भावः, तथा च देवपदेन तत्र स्थिता ज्ञेयाः, द्वितीयगीते "सहसिद्धै"रिति वक्ष्यते तन्न्यायेनात्रापि **देवसाहित्य**मुक्तम्, **केवलाना**मिति स्त्रियो विहाय स्वयमेवावतीर्णानामित्यर्थः, देवलोकस्थाः सर्वा एव स्त्रियोप्सरस इत्याशयेनाभासे **अप्सरसा**मित्युक्तम्, **स्वपत्यन्वेषणार्थ**मिति स्वपत्युरत्रावतीर्णं यद् रूपं **तदन्वेषणार्थ**मित्यर्थः; भगवदर्थमागमनं तु भयान् न सम्भवत्यतः प्रायेणैवमित्यर्थः, निर्भयतया भगवदर्शनार्थमागमनं त्विन्द्राभिषेकानन्तरं वक्ष्यते अत एव द्वितीयगीते तथेति भावः ॥ १२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

धन्यास्त्वित्यादिश्लोकार्थविवृतौ "हरिण्योप्सरसो गाव" इत्यादिकारिकाः, तत्रेश्वरः **पूज्यत** इति अनीश्वरेषु प्रविष्ट ईश्वरत्वसूचकसामग्रीमनाविर्भावयन्नपि **यदा मूढैः पूज्यते तदा निरुपाधिकमैश्वर्यं** सिध्यति, युक्तं चैतत्, ऐश्वर्यसामग्रीसाहित्ये त्वनीश्वरोपि पूज्यो भवेत्, सामग्र्यभावे पूजा तु स्वाभाविकैश्वर्ये एव भवति, किञ्च सामग्रीराहित्येपि बुधः पूजयेदपि स्वरूपज्ञानात्, मूढकृतपूजा तु परमैश्वर्यमेव बोधयति, इदमैश्वर्यं भगवन्निष्ठं भगवत्येव बोध्यते, वीर्ययशसी अपि तथा, **वीर्यं देवेष्वि**त्यादि अप्सरसो हि देवताः, भगवांश्च मनुष्यवत् प्रतीयमानोतो भगवति कामस्तासामसम्भावितः, न हि देवाङ्गनावाञ्छितो रसो मनुष्ये भवति, नापि तासामर्थे भगवता स्वस्यालौकिकः प्रभावः प्रदर्शितः, किन्तु वनितोत्सवचारुवेषवेणुक्वणिताभ्यामेव साधारणस्त्रीणामिव तासां मोहोभूत्, अत इदं भगवद्वीर्यमिति **वीर्यं देवेष्वि**त्यादिना वीर्यं निरूपितं, **श्रियो हि परमा काष्ठे**त्यादि यदि सेवकाः परमं भोगं कुर्युस्तदा स्वामिनः एव परमं सौभाग्यं स्फुटीभवतीति लोके प्रसिद्धं. पक्षिणो भगवत्कृतं वेणुनादं शृण्वन्ति तत्रापि भगवान् नीचैः स्थितो वेणुं वादयति, ते तु द्रुमभुजानारुह्योपरि स्थिता नादामृतमनुभवन्तीति श्रियो भोगः पक्षिणां सिद्धः, ("यदा खलु वै पुरुषः श्रियमश्नुते वीणास्मै वाद्यत" इतिश्रुतौ **वीणा**पदं मधुरनादानां वेण्वादीनामुपलक्षकमतो वेणुनादश्रवणे श्रियो भोगः पक्षिणां सिद्धः), इह भगवन्निष्ठा श्रीः पक्षिषु समागता भगवच्छ्रियः कार्यभूता, तथा च कार्यभूतया श्रिया कारणीभूता भगवच्छ्रीर्बोध्यते, तथा

ज्ञानमपि नदीषु समागतं कारणभूतं भगवज्ज्ञानं सूचयति, एवं वैराग्यमपि भगवद्धर्मो मेघे कार्यरूपेण समागतः स्वकारणभूतं भगवदधिकरणकं वैराग्यं बोधयति, **उत्कर्षश्चापि वैराग्ये हरेरपि हरिर्यदि भक्त्या च तादृशत्वं च सा सेवा सेवकोचितेति** हरेः सर्वदुःखहर्तुरपि **यदि हरिः** स्याद् दुःखहर्ता स्यात् तदा तस्मिन् **वैराग्योत्कर्ष** इति ज्ञेयं, यतो हरिदुःखहरणं वैराग्यकार्यं, मोक्षान्तफलेषु **रागाभावे** प्रभुसुखैकाकाङ्क्षायामेव तादृग्भावोदयात्, स भावः कथं स्यादित्याकाङ्क्षायामाहुर्**भक्त्या चे**त्यादि, **भक्त्या** स्नेहेन **तादृशत्वं** भगवद्दुःखहर्तृत्वभावः स्यादित्यर्थः, एवं वैराग्यस्वरूपं स्नेहेन तत्सिद्धिं च निरूप्योपदिशन्ति **सा सेवे**त्यादि, सा मेघकर्तृका **सेवा** भगवद्दुःखहरणरूपा **सेवकस्य पुष्टिस्थस्योचिता** नाम कर्तव्येत्यर्थः, यथा मेघेन स्नेहवशात् प्रेरणमन्तरेणैवातपनिवारणरूपा **सेवा** भगवतः **कृता तथा शास्त्रप्रेरणंविनैव देशकालानुरूपा भगवत्सौख्यसम्पादिका सेवा पुष्टिमार्गीयैः कर्तव्या,** सेयं सख्यभक्तिरूपा, "सख्युर्व्यधात् स्ववपुषाम्बुद आतपत्र"मित्यत्र "सखि"पदात्, एतद्यथा तथा मया **सेवाकौमुद्यां** प्रथमप्रकरणे निरूपितमिति ततोवधेयं, **धन्यास्त्वि**त्यस्य विवरणे **ज्ञानं हि क्रियाविशेषणीभूत**मित्यादि ननु हरिणीनां भगवत्स्वरूपज्ञानाभावाद् भगवदवलोकनात्मकपूजामात्रेण कथं धन्यत्वं भविष्यतीत्याशङ्क्य पूर्वपक्षं व्यावर्तयन्ति **धन्यास्त्विति तुशब्देन,** इह हरिणीनां धन्यत्वकथनात् स्वस्याधन्यत्वसूचनेन न ज्ञानमात्रं धन्यत्वसाधकं किन्तु भगवद्विषयकपूजनक्रिया धन्यत्वसाधिका, ज्ञानसाहित्ये सा सुतरां धन्यत्वसाधिकेत्याहुर्**ज्ञानं ही**त्यादिना, ज्ञात्वा तदनुरूपं चेत् करोति तदा ज्ञानस्य सार्थक्यमतो ज्ञानस्य क्रियाविशेषणीभूतत्वं, क्रियास्वपि भगवत्पूजात्मिकैव क्रियोत्कृष्टेत्याहुः **क्रियोत्कर्षः पूजाया**मिति, "तत् कर्म हरितोषं यत्" इति चतुर्थस्कन्धवाक्यात्, सा पूजारूपा क्रिया हरिणीभिः कृतेति तासां धन्यत्वं, तत्रापि ज्ञानेन्द्रियाधारत्वेन ज्ञानप्रचुरैर्नेत्रात्मकद्रव्यैः कृतेति सुतरां धन्यत्वमित्याहुः **सापि** चेदित्यादिना, **ज्ञानमयै**रिति ज्ञानप्रचुरैर्ज्ञानम्वरूपैर्निवेद्यद्रव्यैरित्यर्थः, अयमर्थः, निवेद्यपदार्थानां स्वरूपं भगवत्प्रियत्वं देशकालानुगुणत्वं च ज्ञात्वा समर्प्यन्ते तदा ते पदार्था ज्ञानमया उच्यन्ते, तथेह हरिणीभिः स्वनेत्राणां सौन्दर्यं भगवत्प्रियानेत्रस्मारकत्वेन प्रभुप्रियत्वं च बुद्ध्वा नेत्रैर्भगवान् पूजित इति युक्तं धन्यत्वं, **भगवज्ज्ञान**मित्यादि यादृशदेशकालवैशिष्ट्याद् यादृशवस्त्वपेक्षा भगवतोस्ति तादृग्देशकालानुरूपसेवनं मया विधेयमिति सम्प्रति देशकालानुरोधादिदमपेक्षितं भगवत इतिज्ञानं **भगवज्ज्ञान**मित्यर्थः, मदीयपदार्थेष्वेतस्य वस्तुनः सम्यक्त्वाद् भगवद्विनियोगयोग्यतेतिज्ञानं **स्वज्ञान**मित्यर्थः, एवमुभयज्ञानस्य पूजाङ्गत्वं, **हरिणीभि**स्तथैव कृतं यतो भगवते शृङ्गाररसात्मकाय स्वनेत्रसौन्दर्यप्रदर्शनेन प्रियत्वं सम्पादितं, एवं **पुष्टिजीवैर्यथोचितं प्रियत्वं सम्पाद्यमितिशिक्षा ह्येतस्य ग्रन्थस्य हार्दं,** **भगवज्ज्ञान**मपीत्यन्वयः, तस्य भगवत्पूजारूपक्रियोत्कर्षस्य भगवज्ज्ञान**मप्यङ्ग**मित्यर्थः, **तदभावे** इति तस्याः पूजाया अभावे इत्यर्थः, **सर्व**मिति ज्ञानादिकमित्यर्थः, अङ्गीभूतायाः पूजाया अभावे अङ्गानां ज्ञानादीनां वैयर्थ्यमितिभावः, **समीपे स्वीकार** इति, "उपात्तविचित्रवेष"मित्यत्रोपशब्देन सामीप्यकथनाद्धरिणीसमीपे प्रभुणा वेषो धृतः, तथा च वेषधारणसमये भगवदवयवानां हरिणीदृग्विषयत्वाद् भावविशेषोत्पत्तिर्मृगीगणस्याभूत्, तेन भावेन तादृशरससम्बन्धिनी भगवत्प्राप्तिर्भवित्रीतिभावः, **ब्रह्मानन्दस्ये**त्यादि भगवदवयवावलोकनजन्यभावबलेन **पूर्वं ब्रह्मानन्द**प्रवेशो हरिणीषु तत आधिदैविकस्त्रीविग्रहप्राप्तिस्ततः स्वरूपानन्दस्य हरिणीषु प्रवेशार्थं हरिणीनां निकटे भगवता वेषधारणं कृतमिति फलितं, तथा चा "यं पुनर्ब्रह्मानन्दे जाते तत्राप्याधिदैविकरूपे सम्पन्ने" इतिपूर्वफक्किकानिरूपितफलप्राप्तिर्भविष्यतीत्युक्तं भवति, फक्किकास्मारकं **ब्रह्मानन्दपद**मिति ज्ञेयम् ॥ ११ ॥ **कृष्णं निरीक्ष्ये**त्यत्र **वनं यौवनं इताः प्राप्ताः प्राप्तवत्य** इति इह वनिताशब्दान्तर्गतवनशब्देन विपिनं यौवनं च ग्राह्यं, तत्र विपिनपक्षे **वनं** विपिन**मिताः** प्राप्ताः पुरुषा **वनिताः,** भगवदर्थं सकलत्यागं विधाय केवलं वनं प्रविष्टा **भगवदीयास्तेषामुत्सवा चारुर्वेषो** भगवता धृतः, तथा च कोटिकन्दर्पलावण्याधिकसुन्दरं तादृशवेषधारिणं श्रीकृष्णमवलोक्य जातस्त्रीभावाः पुरुषोत्तमं मां प्राप्स्यन्तीत्यभिप्रायकं **वेषधारणं भगवता** कृतमिति विभावनीयं, **यौवन**पक्षे वनं यौवन**मिताः** प्राप्तवत्यो मृगीदृशस्तासामुत्सवार्थं भावोद्दीपनार्थं वेषधारणं **वनितानां पुंसां वनिता** सुन्दरीणां च सूचनार्थं प्राप्ताः प्राप्तवत्य इति वारद्वयमुल्लेखः **सुबोधिन्यां,** अन्यथा "प्राप्ता" इत्युक्ते "प्राप्तवत्य" इत्युक्तिर्व्यर्था स्यात्, धातूपसर्गप्रत्ययार्थानामैक्यात्, यद्यपि 'प्राप्ता' इत्युक्त्याप्युभयग्रहणं सम्भवति तथापि प्रकरणवशात् स्त्रीणामेव ग्रहणं स्यान्न तूभयोरत उभयग्रहणार्थं प्राप्ताः प्राप्तवत्य इत्युक्तं, तथा च **प्राप्ता** इत्युक्त्या **वनिताः** पुरुषा गृहीताः प्राप्तवत्य इत्यनेन **वनिताः** स्त्रिय उक्ता इति ज्ञेयं, एवं सति पुंसां भावोत्पादनार्थं स्त्रीणां च भावोद्दीपनार्थं वेषधारणमिति प्रयोजनद्वयं फलितं, **न हि तत्र प्रविष्ट** इति इदं वनिताशब्दान्तर्गतवनशब्दस्य विपिनवाचकत्वमादाय पुरुषपक्षे ज्ञेयं, **तत्र वने प्रविष्टः** सर्वत्यागवान् नावर्तत इत्यर्थः, **वनशब्देन** कथं यौवनग्रहणमित्याकाङ्क्षायामाहु**र्यौवनमित्यत्रापि 'यु' मिश्रणार्थे वन**मिति, 'यौवन' शब्दे **या**विति सप्तमी निमित्तार्थे युशब्दो मिश्रणार्थक उकारान्तः, तस्य सप्तम्यां यौ इति रूपं भानौ विष्णावितिवत्, **मिश्रणं** नायकेन सह विवक्षितं, एवं **यौ** मिश्रणार्थं वनं यौवनमित्यर्थो भवति, **यौवनमेव हि** नायकेन सह नायिकां सङ्गमयति, तथा च यौवनत्वस्यापि वनत्वव्याप्यत्वाद् वनविशेषो यौवनमतो वनशब्देन यौवनग्रहणं सुवचं; यौवनस्य वनत्वं तु शृङ्गाररसोपयोगिसामग्रीमत्त्वधर्मसाम्येन ज्ञेयं; **यौवनशब्दस्यै**तादृशी व्युत्पत्तिस्तु निरुक्तपद्धत्या ज्ञेया, "अप्यक्षरवर्णसाम्येन निर्ब्रूयान्न संस्कारमाद्रियेते"त्यनुशासनात्, **यथावेषरस**मिति भगवत्कृतवेषं भावदभिप्रेतरसं चानतिक्रम्येत्यर्थः, अयमत्राभिप्रायः, भगवता वनितानामत्युत्सवार्थे यथा वेषः कृतस्तथा वनिताभिरपि भगवदु-

त्सवार्थे भगवदभिप्रेतवसनभूषणादिकं ध्रियते, भगवदभिप्रायस्तु भगवद्धृतपीताम्बरादिद्युतिजनकनीलवसनरक्तकञ्चुक्यादिधारणे, तथैवैताभिः कृतमिति वेषानतिक्रमो ज्ञेयः, एवं प्रभुचिकीर्षितशृङ्गारादिरसेष्यानुगुण्याद् **रसानतिक्रमः** ॥ १२ ॥

(५) भगवदीयनिर्भयराममनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

धन्यास्तु मूढमतय इत्यादि श्लोकषट्कोक्तान् हरिण्यादीनाहुर्हरिण्य इति का० १८१६ । **षट्सु** श्लोकेष्वैश्वर्यादिनिरूपणमुपपादयितुमैश्वर्यादिलक्षणान्याहुरी**श्वर** इति, का० १९०६–१९६६ । **ईश्वरः पूज्यत** इति **मूढै**र्हरिण्यादिभिरपि पूजनादैश्वर्यं, **वीर्यं देवे**ष्वित्यादि "कृष्णं निरीक्ष्ये"तिश्लोके मनुष्यत्वेन प्रतीयमानस्यापि भगवतो देवाङ्गनास्वपि पुरुषाणां सान्निध्येपि कामेन मूर्छाजननान् महद्वीर्यं, **यशो यदीति** "गावश्चे"तिश्लोके **विमूढानां** गवां प्रत्यक्षे तृणादौ या आसक्तिस्ततो वारणं कृत्वा पीयूषरूपं **स्वधर्मं** यदि योजयेत् भगवान् तदा यशो भवति नान्यथेत्यर्थः, "अक्षण्वता"मित्यारभ्य "हन्तायमद्रि"रित्यन्तद्वादशश्लोकोक्तेषु सगुणनिर्गुणभेदानाहु**स्तामसा राजसाश्चे**ति, **अन्ये** इति सात्त्विका इत्यर्थः, गुणातीतान् विवेचयन्ति **वृन्दावन**मित्यादि, "अक्षण्वता"मित्यादि श्लोकत्रये क्रमेण तामसराजससात्त्विकाः, "**वृन्दावनं** सखी"तिश्लोके **गुणातीतं वृन्दावनं** निरूप्यते, ततो "धन्या"स्त्वित्यादिषु त्रिषु हरिण्यादयः सगुणाः, "प्रायो बताम्बे"तिश्लोके पक्षिरूपा मुनयो गुणातीताः, ततो "नद्यस्तदे"त्यादिषु त्रिषु सगुणाः, "हन्तायमद्रि"रित्यत्र गुणातीतो गोवर्धनः, एतदेवाभिप्रेत्योक्तं **वृन्दावन**मित्यादि, वृन्दावनं पक्षिरूपा मुनयः गोवर्धनश्चेति त्रयं गुणातीतं, एवं वर्णनीयभेदानुक्त्वा वर्णनकर्त्रीणामपि तद्वदेव सगुणनिर्गुणभेदानाहु**स्तद्रताश्चापी**त्यादिना, **अस्मिन्** लीलासृष्टिरूपे **लोके तद्रता**स्तेषु वृन्दावनादिषु गुणातीतेषु **रता**स्तद्वर्णनकर्त्र्योपि **गुणातीता भवन्ति**, उपलक्षणमेतत्, तेन तत्तन्निरूपकास्तथाविधा इति भावः, एवमैश्वर्यादिस्वरूपमुक्त्वा "प्रायो बताम्बे"तिश्लोकोक्तश्रीलक्षणमाहुः **श्रियो हि परमा काष्ठे**ति, यथा भगवान् "यदा खलु वै पुरुषः **श्रियमश्नुते वीणास्मै वाद्यते**" इतिश्रुत्युक्तश्रीलक्षणवीणादिशब्दं शृणोति तथा भगवत्सेवकाः पक्ष्यादयोपि वेणुनादं शृण्वन्तीति भगवति श्रियः परमा काष्ठा निरूपिता, **ज्ञानोत्कर्ष** इति सर्वदा वेगवतीनां नदीनां **वेगभङ्गेन** स्वभावविजयलक्षणं ज्ञानं सेवकेषु निरूपितं, तथा च सेवकानामपि तादृशत्वे भगवति ज्ञानोत्कर्षः कैमुतिकन्यायसिद्धः, वैराग्यं निरूपयन्ति **हरेश्चरणयो**रिति स्वसर्वस्वनिवेदनसहिता हरिचरण**प्रीतिर्वैराग्यं** अन्यत्र वैराग्ये सत्येव हरौ प्रीतिसम्भवात्, तत्रापि वैराग्ये उत्कर्षस्तदा स्याद् **यदि हरेः सर्वदुःखहर्तुरपि हरिर्भवेत्** सेवको वस्त्राद्युपचारैः सेवया हरेरपि शीतोष्णादिनिवारणेन दुःखहर्ता भवेदित्यर्थः, 'भगवतः श्रमो नास्तीति केचित्, अस्तीतिसिद्धान्तः,' तदुपपादितं सुबोधिन्यां दशमस्कन्धे युगलगीताध्याये, श्रमवच् छीताद्यपि ज्ञेयं, किञ्च "अनश्नन्नन्योभिचाकशीती"तिश्रुत्या भगवतो मर्यादामार्गे भोजनाद्यभावेपि पुष्टिमार्गे भोजनादिकमस्त्येवेत्युपपादितमष्टमाध्यायटिप्पण्यां, पूतनामोक्षाध्यायटिप्पण्यां च, भगवति स्नेहहेतुककार्याणां स्वामिनीकर्तृकरक्षाप्रभृतीनां श्रमहेतुकत्वशङ्कापरिहारेण सर्वमुपपादितमिति सुष्ठूक्तं **हरेरपि हरिर्यदी**ति, तथा च "दृष्ट्वातपे व्रजपशू"निति श्लोके मेघस्य स्वसर्वस्वजलवर्षणेन स्ववपुषा छायाविधानेन च सेवाकरणात् वैराग्यं सिद्धं, एवं सेवके वैराग्यसिद्धौ भगवति किं वक्तव्यमितिभावः, एवं श्लोकषट्कतात्पर्यार्थनिरूपणेनैश्वर्यादिषड्धर्मोपपादनाद् भगवत्त्वं समर्थितम् ॥ ११ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अपरा आहुः—हे सखि ! मूढमतयः तिर्यक्जातित्वेन विवेकहीना अप्येता हरिण्यो धन्याः कृतार्था **एव** । तत्र हेतुं सूचयन्त्यो विशिषन्ति—या वेणुरणितं वेणुनादमाकर्ण्य श्रुत्वा उपात्तः बर्हापीडादिना विचित्रो वेषो येन तं नन्दनन्दनं प्रति प्रणयसहितैरवलोकैर्विरचितां पूजां सन्मानं दधुः कृतवत्यः । किञ्च कृष्णसारैः स्वपतिभिः सहिता एव पूजां दधुः, अस्मत्पतयस्तु गोपाः क्षुद्राः तथा पूजां न कुर्वन्ति इति आशयः ॥ ११ ॥ अन्या आहुः—हे गोप्यः ! वनितानामुत्सवो यस्मात्तथाभूतं रूपं शीलं च यस्य तं श्रीकृष्णं निरीक्ष्य तेन क्वणितस्य वादितस्य वेणोर्विचित्रं गीतं च श्रुत्वा विमानगतयो विमानैर्गच्छन्त्यो देव्यो देवाङ्गना अर्थात् पतिसहचरा अपि स्मरेण नुन्नः परिक्षिप्तः सारो धैर्यं यासां ताः तथा सत्यो मुमुहुः । मोहे लिङ्गमाहुः—भ्रश्यत्प्रसूनाः कबराश्चूडा यासां ताः। निगता नीव्यो वासांसि यासां ताः, विगलद्वस्त्रानुसन्धानरहिता इत्यर्थः॥ १२ ॥

अन्वितार्थप्रकाशिका

धन्या इति ॥ हे सखि ! मूढमतयः तिर्यग्जातित्वेन विवेकहीना अप्येता हरिण्यो धन्याः कृतार्था एव । या वेणुरणितं वेणुनादमाकर्ण्य श्रुत्वा । रिफितमित्यपि पाठः । उपात्तः बर्हापीडादिना विचित्रो वेषो येन तं नन्दनन्दनं प्रति प्रणयसहितैरवलोकैर्विरचितां पूजां सम्मानं कृष्णसारैः स्वपतिभिः सहैव दधुः । अस्मत्पतयस्तु गोपाः क्षुद्राः तथा पूजां समक्षं न सहन्ते इत्याशयः ॥११॥ कृष्णमिति ॥ वनितानामुत्सवो यस्मात्तथाभूतं रूपं शीलं च यस्य तं श्रीकृष्णं निरीक्ष्य तेन क्वणितस्य वादितस्य वेणोर्विचित्रं गीतं च श्रुत्वा विमानगतयो विमानैर्गच्छन्त्यो देवाङ्गना अर्थात्पतिसहचरा अपि स्मरेण नुन्नः परिक्षिप्तः सारो धैर्यं यासां ताः भ्रश्यत्प्रसूना गलत्पुष्पाः कवराश्चूडा यासां ताः विगता नीव्यो वासांसि यासां ताः विगलद्वस्त्रानुसन्धानरहिताः सत्यः । कबभाव आर्षः। मुमुहुः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं श्रीकृष्णसंबंधेन तत्स्थपशूनामपि धन्यत्वं प्राहुः धन्या इति हे सखि एताः मूढमतयो विवेकहीनबुद्धयोपि हरिण्यः धन्याः कृतार्थाः एवं कुत इति चेत्तत्राहुः याः वेणुना रणितमुच्चारितं शब्दं आकर्ण्य श्रुत्वा उपात्तविचित्रवेषं गृहीतविचित्रशृंगारं नंदनंदनं प्रतिकृष्णसारैः मृगैः स्वस्वामिभिः सहिता एवं सत्यः प्राणयः प्रेमतद्युक्तैरेवावलोकनैः विरचितां कृतां पूजां यथा सामर्थ्यं सन्मानं दधुः चक्रुः कृष्णसारमृगसदृशा अप्यस्मत्पतयो न संति यतः कृष्णेऽस्माकं प्रणयावलोकं न सहंत इत्यभिप्रायः ॥११॥ काश्चिदन्याः कौतुकांतरं शृणुत इत्याहुः कृष्णमिति हे सख्यः वनितानामुत्सवः परमानंदस्तत्संपादकं रूपं अनवधिकातिशयसौंदर्यं सौकुमार्यं सौगंध्यलावण्यादियुक्तं स्वरूपं च शीलं अपारकारुण्यवात्सल्यौदार्यादिस्वभाववृंदं यस्य तं कृष्णं निरीक्ष्य तेन वादित वेणोः विचित्रं शृंगारादिरसयुक्ततया नानाविधं गीतं गानं च श्रुत्वा विमानगतयो विमानैर्यांत्यो देव्यः मुमुहुः मोहचिह्नान्याहुः स्मरेणनुन्नसाराः विक्षिप्तधैर्याः अत एव भश्यंति अधः पतंति प्रसूनानि येभ्यस्तथाभूताः कबराः केशपाशा यासां ताः अत एव विगतानीव्योवस्त्रग्रंथयो यासां तथाभूता बभूवुः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

धन्या इति ॥ मूढमतयः सुन्दरासुन्दरविवेकरहिताः अपि, एताः हरिण्यः, धन्याः स्म कृतार्थाः एव । कुत एता एवंविधा इत्यत्राह । या हरिण्यः, वेणुरणितं कृष्णकृतं वेणुगीतं, आकर्ण्य, उपात्तः स्वीकृतः विचित्रः बर्हादिधारणैर्विचित्रतायुक्तः वेषो येन तं, नन्दनन्दनं नन्दसुतं प्रति, प्रणयावलोकः प्रणयसहितैरवलोकनैः, विरचितां कृतां, पूजां सन्मानं कृष्णसारैः स्वपतिभिः सहेति सहकृष्णसाराः सत्यः, दधुः कृतवत्यः स्म । क्षुद्रा अस्मत्पतयस्तु गोपा एतत्समक्षं न सहन्ते इति भावः ॥ ११ ॥ अन्यास्तु हे गोप्यः इदमन्यदद्भुतं शृणुतेत्याहुः ॥ कृष्णमिति ॥ वनितानामुत्सवो यस्मात्तच्चारु शीलं यस्य तं, वनितोत्सवरूपशीलमिति पाठे, वनितानामुत्सवो याभ्यांते रूपं शीलं च यस्य तं, कृष्णं निरीक्ष्य, तेन कृष्णेन क्वणितो वादितो यो वेणुस्तस्य विचित्रमसंकीर्णं यद्गीतं तच्च श्रुत्वा, विमानगतयो विमानैर्गच्छन्त्यः, देव्यो देवानामङ्केषु स्थिताः स्त्रियः, स्मरणेन कामेन नुन्न आहृतः सारो धैर्यं यासां ताः, भ्रश्यन्ति प्रसूनानि येभ्यस्तथाभूताः कबराश्चूडा यासां ताः, विनीव्यः शिथिलनीवीबन्धनाश्च सत्यः, मुमुहुः भ्रश्यत्प्रसूनकबरत्वं विनीवीत्वं च मोहलिङ्गम् ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

धन्या इति : १०.२१.११.

दुःसाध्यो विदुषामपि क्रतुविधौ यः कृष्णसारः क्षणं तैरेतास्तु सहोपभोगकुशलाः श्रुत्युल्लसद्गीतयः ।
तद्धन्यत्वमनन्यगं स्फुटमिहैवासां मृगीणामहो किं चास्मन्नयनोपमानपदवी सार्थाऽद्य तद्वीक्षणात् ॥ २२ ॥

कृष्णमिति : १०.२१.१२.

देव्योऽपि सुखवासिन्यो यं दृष्ट्वा मुमुहुर्मुहुः । अदृष्टसुखभोगानां तत्रास्माकं तु का कथा ॥ २३ ॥

कृष्णप्रिया

अरी प्यारी सखियाँ देखो तो सही जरा सा आकाश की ओर, कि ये स्वर्ग की देवियाँ, जब वनिताओं का आनन्दित करने वाले वेष को धारण किये हुए भगवान श्रीकृष्ण को देखती है, और सौन्दर्य निधान श्रीकृष्ण ने बाँसुरी पर गाया हुआ मधुर एवं विचित्र संगीत का श्रवण करती है तब विमान में बैठकर जाती हुई ये देवाङ्गनाओं का काम विवशता के कारण इस तरह विवेक नष्ट हो गया है कि वो उतनी सुध-बुध विसर रही है कि उनके गुंथे हुए केशकलाप से कुसुम समूह विखर रहा है और वस्त्रनीवी भी शिथिल हो सरक रही है। देखो सखो प्यारे श्रीकृष्ण की बंसरी तानने कैसा देह गेहानुसंधान विसराया और परमानन्द का अनुभव कराया ॥ १२ ॥

गावश्च कृष्णमुखनिर्गतवेणु[1]गीतपीयूषमुत्तभितकर्णपुटैः पिबन्त्यः ।
[2]शावाः स्नुतस्तनपयःकवलाः स्म तस्थुर्गोविन्दमात्मनि [3]दृशाश्रुकलाः स्पृशन्त्यः ॥ १३ ॥

कर्दमक्षमा

अन्वयः—आत्मनि दृशा गोविन्दम् साशन्त्यः "अतएव" अश्रुकलाः, कृष्णमुखनिर्गतवेणुणीतपीयूषम् उत्तभितकर्णपुटैः पिबन्त्यः गावः च स्नुतस्तनपयःकवलाः शावाः, तस्थुः स्म ॥ १३ ॥

---

१. वेणुगीतं—विज. । २. सानन्दनम्रतनवः—विज. ; स्तनस्नुत—इति कस्यचित् ; स्नुतस्तन—च. पु. । ३. दृशाऽश्रुकणान्स्पृशन्त्यः—विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

क्षरणशंकयैवोत्तभितैरुन्नमितैः कर्णपुटैः पिबंत्यः सत्यः तथा शावाश्च वत्साश्च स्तनपाने प्रवृत्ताः समनंतरमेव गीतं श्रुत्वा तदेव पीयूषमुत्तंभितकर्णपुटैः पिबंतः स्नुतस्तनपयःकवलाः केवलं स्तनेभ्यः क्षरितक्षीरग्रासा मुखेषु येषां ते तस्थुर्विस्मृतक्रिया बभूवुरित्यर्थः। तत्र हेतुः। गोविंदं दृशा मार्गेणात्मनि मनसि स्पृशंत्य आलिंगंत्यः अत एवाश्रूणां कला लेषा लोचनेषु यासां ता गावस्ते च शावाः ॥ १३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेव गीतमेव। पीयूषम् अमृतम्। इत्यर्थ इति। बालवत्सानामपि महानंदो भवति किमुत विशेषविदामिति भावः। तत्र क्रियाविस्मृतौ। अत एव मनसाऽऽलिंगनादेव ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथान्यस्या गोष्ठ्या वाक्यमाह—गाव इति त्रिभिः। तत्र प्रथमतो निजभावविरोधिमातृभावादीनां गवां वर्णनं पूर्ववदवहित्यार्थं प्रीतिसामान्यांशे विरोधाभावाद्विवक्षितोपयोगार्थं च अप्यर्थे चकारः लोके सारासारविवेकहीनत्वेन ख्याता गावोऽपि पीयूषरूपकेण मुखस्य चन्द्रत्वम् अतिकोटिचन्द्रताव्यञ्जकेन कृष्णमुखशब्देन पीयूषस्य वैशिष्ट्यं सूच्यते कृष्णः खलु परमानन्दघनमूर्तिरुच्यते स्मेति विस्मये तस्थुः स्तब्धतालक्षणं सात्त्विकविकारं प्राप्ता इत्यर्थः। गोविन्दं निजप्रभुमिति प्रीत्या स्पर्शनं बोधयति अन्यत्तैः तदसम्मते स्नुतस्तनपय इति पाठे स्नुतं केषाञ्चिदभिनवानां मुखात् क्षरितं स्तनपयः मातृस्तनक्षीरं केषाञ्चित्तु तृणचराणां पूरितकण्ठाद्यश्रूणामत एव सद्रवतया क्षरितः कवलश्च तृणग्रासो येषां ते। यद्वा, आत्मनि मनसि गोविन्दं स्पृशन्त्यः अर्पयन्त्यः पश्चात् सम्यक् दर्शनाशक्तेः तत्र हेतुमाह—दृशा नेत्रेण अश्रूणि कलयन्ति वर्षन्तीति तथा ताः अश्रुधारया दृष्ट्याच्छादनात् मनसैव पश्यन्त इत्यर्थः। अतस्तद्दर्शनमात्राभावेन वयमधन्या एवेति भावः ॥ १३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथान्यस्या गोप्या वाक्यमाह—गाव इति चतुर्भिः। यद्वा, पूर्वलिखितानुसारेणैव वाक्यतया व्याख्या, तत्र सर्वश्लोकेष्वेषु पूर्वपूर्वस्मिन् वर्णितात् पदार्थादुत्तरात्तरस्मिन् वर्ण्यस्य न्यूनत्वं कथ्यते। अतो यद्यपि देवीभ्यः परमार्थतो वा न्यूनत्वं न सम्भवेत्, तथापि प्रेमोल्लासस्य विचित्रगतित्वात् क्वापि किञ्चिद्विशेषमाश्रित्य तत्पदं करोति, तथापि अस्तु तावत् परमविदग्धानां देवीनां भाग्यम्, पशुजातीनां मनुष्याधीनानामपि गवादीनां किं भाग्यं वर्ण्यमित्याहुः—गावश्चेति। त्वर्थे चकारः, पूर्वतो वैशिष्ठ्याय पीयूषरूपकेण मुखस्य चन्दत्वं कृष्णमुखशब्देन पीयूषस्य वैशिष्ठ्यं सूच्यते; कृष्णः परमानन्दघनमूर्त्तिः, अतस्तस्य मुखचन्द्रान्निर्गतं वेणुगीतमेव पीयूषम्। स्मेति विस्मये निश्चये वा, तस्थुः स्तन्धतालक्षणं सात्त्विकविकारं प्राप्ता इत्यर्थः। गोविन्दं निजप्रभुमिति प्रीत्या स्पर्शनं बोधयति, अन्यतैर्व्याख्यातम्। यद्वा, शावेषु कथञ्चिन्मिलितेष्वपि न स्तनेभ्यः स्नुतोऽस्तनस्नुतः पयसः कवल एकग्रासोऽपि याभ्यस्ताः, पाठोऽयं तेषामपि सम्मतो लक्ष्यते, वैपरीत्यपाठे सविसर्गपृथक्पदत्वे च 'शावाः' स्नुतं भगवति जातवात्सल्यभरेण क्षरितं स्तनेभ्यः पयः कवलश्च मुखात् तृणग्रासो यासां ताः। शावा वत्सा इति, पक्षे स्नुतं केषाञ्चिदपि नवानां मुखात् क्षरितं स्तनपयो मातृस्तनक्षीरं कवलश्च केषाञ्चित् तृणचराणां तृणग्रासो येषां ते, आत्मनि मनसि गोविन्दं स्पृशन्त्यः साक्षात् सम्यग् दर्शनाशक्तेः, तत्र हेतुमाहुः—दृशा नेत्रेण अश्रूणि कलयन्ति वर्षयन्तीति तथा ताः, अश्रुधारया दृष्ट्याच्छदनान्मनसैव पश्यन्त इत्यर्थः। यद्वा, गोविन्दं लेहनादिना स्पृशन्त्यस्तस्थुः, कथम्भूतम्? आत्मनीति जातावेकत्वम्, गोषु विषये दृशा लक्षितं गवां तादृशभावदृष्ट्या ता निरीक्षमाणमित्यर्थः। अन्यत् समानम्, अतस्तत्स्पर्शनाद्यभावेन वयमधन्या एवेति भावः। हरिणीनां देवीनाञ्च तद्रूपदर्शन—वेणुश्रवणे उक्ते, गवाञ्च वेणुगीतश्रवणमात्रेणैव तादृशभाव इति ताभ्यस्ताभ्यश्चाविशेषः अत एव चकारः ॥ १३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आत्मनि ये गोविन्दं ध्यात्वेति शेषः ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गाव इति। कृष्णमुखान्निर्गतं वेणुगीतमेव पीयूषममृतम् उत्तम्भितैरवनमनेक्षरणशङ्कयेवोन्नमितैः कर्णपुटैः पिबन्त्यः तस्थुस्तथा शावा वत्साश्च स्तन्यपानप्रवृत्ता गीतं श्रुत्वा तदेव पीयूषमुत्तम्भितकर्णपुटैः पिबन्तः स्नुतपयःकबलाः केवलं स्तनेभ्यः गलितक्षीरग्रासाः मुखेषु येषां ते तस्थुः विस्मृतव्यापारा बभूवुरित्यर्थः। अत्र हेतुः गोविंददृशा दृष्टिमार्गेण आत्मनि चित्ते स्पृशन्त्यः आलिङ्गन्त्य अत एवाश्रूणां कला लेशाः लोचनयोर्यासां ता गावस्ते च शावाः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उत्तंभितकर्णपुटैः निश्चलकर्णरन्ध्रभागैः कवलाः कवलसहिताः गोविन्दमात्मनि हृदि स्मरन्त्यः दृशा नेत्रेण अश्रुबिन्दून् स्रवन्त्यः शावस्नुतस्तनपयःकवला इति केचित् शावा वत्साः तेषां स्मरणेन स्नुताः संस्रवाः क्षीराणि कवलाः शष्पग्रासाः यासां तास्तथा तस्थुरित्यन्वयः। कवलाः आसां सन्तीति कवलाः अर्श आद्यच् "अजाद्यतष्टाप्" (४।१४) इति टाप्प्रत्यये कृते कवलेति रूपं सिद्धं भवति जावाशब्दवदिति वा ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गाव इत्यादित्रयं गोष्ठान्तरस्य ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

हे सख्यः! देव्यः सुवैदग्ध्यवशादेवं भवितुमर्हन्त्येव। न केवलमस्य स्त्रीणामेव मोहकरो वेणुरवः, अपि तु प्राणिमात्रस्यैवेत्यपरा आहुः—गावश्चेत्यादि। उत्तभितैरुत्तम्भितैः कर्णपुटैः पिबन्त्य इति शत्रन्तनिर्देशेनातृप्तत्वम्; तस्थुरिति निवृत्तगतयो बभूवुरिति ध्वनितम्। कीदृश्यः? गोविन्दमात्मनि स्पृशन्त्यो दृष्ट्या दृष्टिरन्ध्रेणात्मनि कृत्वा। न केवलं गावः, शावा अपि, सद्यो जातो वत्सा अपि, वस्तुतो वेणुरवेणैव पयः प्रस्नुतम् नतु वत्सवात्सल्येन,—अनन्यमनस्त्वात्। तत्र स्नुते पयसि कवल एव येषामभ्यासवशान्मुखसंपर्क एव, न तु पानम्। अश्रुभिः कला शोभा यासां येषां चेत्युभयविशेषणम्, तदासां पशुत्वेऽपि स्वदेहविस्मृतिः, न त्वस्माकं गेहस्यापि। अहो नः प्रेम! तदस्मान् धिगिति पूर्ववत् दैन्यम् ॥ १३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मध्या ऊचुः—गावश्चेति। गावस्तद्वत्साश्च कृष्णमुखनिर्गतवेणुपीयूषं पिबन्त्यः पिबन्तश्च दृशा आत्मनि स्पृशन्त्यः स्पृशन्तश्च तस्थुः निष्पन्दा एव बभूवुः वयन्तु पशुभ्योऽप्यधमाः यतस्तत् पिबन्त्योऽपि गेहाद्यपि न विस्मराम इति दैन्यम् ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

न च स्त्रीजातीनां सर्वासामेतत् कामविजृम्भितमेवैतन्मोहनमिति वाच्यं यतो वत्सलानां गवामपि मोहं पश्यतेत्याहुः, गावश्चेति। क्षरणशङ्कयेवोत्तभितैरुन्नमितैः कर्णपुटैः पिबन्त्य एव तस्थुः नच तत्रापि वात्सल्यभाव एव तस्थुः नच तत्रापि वात्सल्यभाव एव मोहने हेतुरस्तीति वाच्यं यतो भावशून्यानामपि तदीयशाबानां मोहनं पश्यतेत्याहुः, शाबा वत्साः स्तनपाने प्रवृत्ताः समानन्तरमेव गीतं श्रुत्वा तदेव पीयूषमुत्तभितकर्णपुटैः पिबन्तः स्तनपानासामर्थ्यात् स्तनेभ्यः स्नुतानां पयसां कवल एव मुखेन तु निमिलनं येषां ते तस्थुः जाड्योदयेन स्तब्धा बभूवुरित्यर्थः ततश्च तन्मातरः गोविन्दं दृशा दृष्ट्यैवाकृष्यानीय नेत्ररन्ध्रद्वारेणैवान्तःप्रवेश्य आत्मनि मनसि पृशन्त्यः स्वमनसः क्रोडे एव वात्सल्यात् स्थापयन्त्यस्तस्थुः तथा अश्रूण्यानन्दात् कलयन्ति धारयन्तीति एवं च सर्वप्राणिनां कृष्णे निरुपाधिरेव प्रेमा किन्तु ते संयोगात् धन्या वयं तु विच्छेदादधन्या एवेत्येतावनिव विशेष इति भावः ॥१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या आहुः—हे सख्यः! न केवलं नार्य्यो देव्यो वा श्रीकृष्णवादितवेणुगीतेन मोहिताः अपि तु गावश्च उत्तभितैः तच्छ्रवणानुकूलीकृतैः कर्णपुटैः कृष्णमुखनिर्गतवेगुगीतपीयूषं पिबन्त्यः गोविन्दमात्मनि हृदि दशोऽन्तर्दृष्ट्याप्रशन्त्यः अश्रुकलाः आनन्दाश्रूणां कला मुखेषु यासां ता तस्थुः त्यक्ततदितरसकलव्यापारा बभूवुरित्यर्थः। तथैव शाबा वत्साः स्नुतस्तनपर्यास्ता एव कवलाः ग्रासा येषां ते तस्थुः तद्वेणुगीतपीयूषपानाशक्तत्वादित्यर्थः ॥ १३ ॥

श्रीरामकृष्णकृता प्रेममञ्जरी

इदं पशुत्वेनातिमूढानामपि सङ्ग्रहवाक्यं केवलं भावौत्कण्ठ्याभिव्यञ्जकमेव अहो किं वक्तव्यं देवाङ्गनानां यतो एवमपि सारासारविवेकविधुराणां सर्वविलक्षणं भावमनुभवामि इत्याहुः—गाव। इति पीयूषसम्बधान्मुखस्य चन्द्रत्वम् उपमासहत्वाभावात्साक्षान्नोक्तं निर्गतत्वेन प्रभृतत्वं वेणुगीतत्वेन विलक्षणत्वं उताभितेति साश्चर्यं सोत्ककठञ्च पिबन्त्य सादरमास्वादयन्त्यः सत्यः स्नुतस्तनपयः कवलाः पीयूषपूरितान्तरावशिष्टं पयोरूपेण बहिर्निस्सृतमिति भावः कवला घासग्रासाः तस्थुर्विरतव्यापारा जाताः एतेनस्तम्भाख्यः सात्त्विकभावः सूचितः ॥ १३ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

न च कामहेतुके एवायमनुरागः किन्तु स्वरूपहेतुक एवेति पराः काश्चन आहुः गावश्चेति। कृष्णमुखाच्चन्द्रान्निर्गतं वेणुगीतपीयूषं क्षरणशङ्कयोत्तभितैरुन्नमितैः कर्णपुटैः पिबन्तो जाड्योदयेन स्तनपानासामर्थ्यात् स्तनस्नुतपयःकवलाः स्तनेभ्यः

स्नुतानां पयसां कवलो मुखेषु येषां तादृशास्तस्थुः गावः कीदृश्यः गोविन्दं दृष्ट्वैवानीय आत्मनि मनसि स्पृशन्त्योऽश्रुकला मुमुचुरेवं शावाश्च तथा च सर्वेषां प्राणिनां कृष्णे प्रेमा तत्स्वरूपहेतुक एव तथास्माकञ्च किन्तु तत्संयोगात्ते धन्याः वयन्तु तद्विच्छेदादधन्या इति भावः ॥ १३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वनितोत्सवरूपसारं वनितानामुत्सवो येन तद्रूपं येषां तेषु सारं श्रेष्ठ कृष्णं निरीक्ष्य दृष्ट्वा तेन क्वणितः शब्दितो यो वेणुस्तस्य विचित्रं नानाविधं स्वरोत्तरतानुत्तरतायापनेनाद्भुतं गीतं श्रुत्वा विमानगतयो विमानस्थाः स्मरनुन्नो मन्मथमथितः सारो धृतिर्यासां ता भ्रंश्यन्ति प्रसूनानि येभ्यस्ते कबराः केशपाशा यासां ताः । कबरः केशपाशः स्यात्कबरं लवणाम्लयोः । कबरी केशविन्यासशाकयोरिति हैमः । विनीव्यो विगता नीव्यो वस्त्राणि तद्ग्रन्थयो वा यासां ताः सत्यो मुमुहुः । नीवी वस्त्रेंऽशुकग्रन्थयोरिति यादवः । नारीणां पारवश्यान्न परस्परश्लोकसङ्गमने मनः खेदनीयमिति केचित् । धन्या इति चान्वय इति केऽपि ॥ १३ ॥

श्रीसुबोधिनी

गवां वत्सानां च चरित्रमाह **गाव** इति, **चकाराद् गावोपि** तथा जाताः, उत्तमाधमयोर्मध्यमाभिलाषो निरूप्यते, असम्भावितत्वान्मोहः, ता हि वेणुमात्र आसक्तास्तथा कुर्वन्तीतिशङ्कां परिहर्तुमाहः **कृष्णमुखे**ति, **कृष्णमुखान्निर्गतं** यद् **वेणुगीतं**, ननु बहूनां वादने मुखादर्शन इतरवैलक्षण्यानवधाने वा कथं **भगवन्मुखवेणुगीत**मिति ज्ञायते ? तत्राह **पीयूषे**ति, अमृत हि तत्, तेन व्यञ्जकान्तराभावेपि स्वत एव ज्ञायते, सदानन्दो वाच्यो **मुखं** वागधिपतिर्**निर्गमनं** वाग् **वेणु**रितरविस्मारको **गीतं** षड्गुणात्मकमतः सर्वां सामग्रीं वक्तुमेतावदुक्तं, अन्यथा 'कृष्णगीतपीयूष'मित्येव वदेयुः, इतरगीतपीयूषनिवृत्त्यर्थं **कर्णानामुत्तम्भन**, प्रतिक्षणं नूतनकर्णत्वात् प्रत्येकपक्षेपि बहुवचनं सङ्गच्छते, **पुट**शब्देन तदर्थमेव कर्णसम्पादनामेति ज्ञापितं न हि पर्णपुटे पुनः कार्यान्तरं भवति चषकादिकं तु बह्वर्यं भवेत्, पुटानां बहुत्वं प्रतिक्षणं नूतनरसतां बोधयति, व्यवस्था तु पूर्वोक्तैव, **शावा** बालका हरिणादीनामन्यजीवानां वा गवामेव वा, अतिबालका घोषे वा, **स्नुतं स्तनात् पयः कवल**रूपं येषां, न तस्य पयसोन्तःप्रवेशः, इदं सन्दिग्धमिति प्रमाणमाहः **स्मे**ति, **तस्थुर्गावः शावाश्च**, उभयेषामपि तथात्वे हेतुमाह**गोविन्दमात्मनि दृशाश्रुकलाः स्पृश्यन्त्य** इति, तासां न बहिःसंवेदनं यतोन्तर्भगवन्तं **स्पृशन्ति**, तत्रापि दृशावृत्तचक्षुषा भगवन्तं **स्पृशन्त्य** इति न भावनामात्रं किन्त्वापि भू त इति ज्ञापितं, अन्यथा कथं तुल्यता स्फुरति ? बहिरदर्शने हेतुरश्रुकला इति, **अश्रूणां कला** यासां, **गोविन्दपदं** गवां हृदय आविर्भावे दोषाभावार्थं यतोयं तेषामेवेन्द्रः ॥ १३ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कृष्णमुखनिर्गतेत्यत्र, मुखं वागधिपतिरित्यादि । अत्रायं भावः । पूर्वश्लोके देवस्त्रीणां मोह एवोक्तो, वस्तुसामर्थ्यात्, न तु रसपानमपि । गवां भगवदीयत्वात् भगवत्सङ्गतत्वात् प्रियत्वाच्च रसपानमुच्यते । तत्र सुरस्त्रीणां यत्र तथात्वं तत्रैतासां पशुजातीयत्वेन तदसम्भावितमित्याशङ्कानिरासाय नेदं साधारण्येन गानं, किन्तु यथैव तासामपि रसानुभवो भवति तथा सर्वसामग्रीप्रकटनपूर्वकमिति ज्ञापनायेति । अत एवाग्रे हृदि प्राकट्यं स्पर्शश्चोक्तः । आधिदैविकसम्बन्धमात्रेण यत्राध्यात्मिकाधिभौतिकयोरपि कार्यकरणसामर्थ्यं, तत्र साक्षादाधिदैविकस्यैव करणत्वे किं वाच्यं कार्यसम्पत्ताविति वागधिपत्तित्वाद्युक्तेस्तात्पर्यम् । एतेन शब्दनिष्ठरसप्राप्तौ साधनसम्पत्तिरुक्ता भवति । किञ्च । वाच्यार्थाज्ञाने रसस्वरूपाज्ञानात्तत्कार्यासम्भव इति शङ्का कृष्णपदार्थोक्त्या निरस्ता। स्वरूपात्मकत्वादर्थस्य स्वत एव प्रकटत्वाज्ज्ञानसाधनानामनपेक्षणाद् बलवत्त्वाच्च न पशुत्वादिकं प्रतिबन्धकमतः सर्वंभवदातम्। अपरञ्च । कृष्णमुखान्निर्गतस्य तत्रापि परम्परासम्बद्धस्य पीयूषस्य यत्रैतादृशत्वं, तत्रापि पशुषु, तत्र साक्षान्मुखपानकर्त्रीषु किं वाच्यमित्युत्कण्ठाज्ञापनायापि निर्गमनाद्युक्तिरिति ज्ञेयम् । अन्यच्च, मुखस्याग्नित्वेन साक्षात् तत्पानकर्त्रीणां कदाचित्तत्पीयूषं तापमप्युत्कटं जनयति । इदं तु तस्मान्निर्गतत्वेन सदैवानन्दजनकमेव, न तु तथा । तस्माद्भिन्नत्वेन परम्परासम्बन्धाच्च तद्धर्मासम्भवात् । अत एव साक्षात्सम्बन्धानन्तरं यादृशस्तापस्तादृशो न पूर्वम्, किन्तु सहजसम्बन्धात्तद्धर्मवत्त्वस्यापि सहजत्वात्कञ्चन तापं जनयतीति ज्ञापनाय तावदुक्तमिति । **प्रतिक्षणं नूतनकर्णत्वा**दिति । पुटत्वोक्त्या तत्र यथैकेन रसेन पूर्णे द्वितीयरसावकाशो न सम्भवति तथैकैकक्षणसम्बन्धिनादरसस्यापि तत्त्वात् तेन पूर्णे पुटे द्वितीयादिक्षणसम्बन्धिनां तेषां प्रवेशासम्भवात्तत्पानार्थं द्वितीयादिपुटापेक्षावश्यकीति तथात्वम् । अन्यथा करणाभावेन नादग्रहणासम्भवाद् द्वितीयादिपानमेव न भवेत् । अत्रैवं ज्ञेयम् । भगवत्सम्बन्ध्यर्थो न लौकिकेन्द्रियग्राह्यः, किन्त्वलौकिकैरेव तैः । प्रभुदित्सा च तत्र हेतुः । तथा च तयैव तावत्साधनसम्पत्तिर्भवतीति नानुपपत्तिः काचित् ॥ १३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गाव इत्यत्र **तथा जाता** इति, अभिलषिताप्राप्त्या मुमुहुरित्यर्थः, **उत्तमाधमयो**रिति, सात्त्विकत्वादुत्तमानां तामसत्वादधमानां देवस्त्रीणां गवां च यथोचितं सायुज्यलक्षणस्य **मध्यमस्य सेवाफलस्याभिलाष** इत्यर्थः, सायुज्यस्वरूपं सेवाफलविवृतेरव-

धार्यम्, देवस्त्रीणामागमनस्याशक्यत्वान् मोह उक्तः, **गवां मोहे** हेतुमाहु**रसम्भावितत्वा**दिति, स्वाभिलषितसायुज्यस्येतिशेषः, **ता**हीति गावोन्यकृतवेणुनादेप्यासक्ताः कर्णोत्तम्भनं कुर्वन्तीतिशङ्कां परिहर्तुं कर्णोत्तम्भनहेतुवेणुनादस्य कृष्णकृतत्वमाहुरित्यर्थः, पशूनां तावद्विशेषज्ञानाभावः प्रसिद्ध इति हिशब्दः, एतेन कृष्णकृतनादे एव कर्णोत्तम्भनं कुर्वन्ति नान्यनादे इति सूचितम्, **व्यञ्जकान्तरे**ति स्वरूपमेव स्वव्यञ्जकमित्यर्थः, एतन्नादे विशेषं वक्तुं **पीयूषपदस्यार्थमाहुः सदानन्दो वाच्य** इति, अन्यगीतस्य स्ववक्तृवाचकत्वनियमाभावेपि भगवतोधिकस्य कस्यचिदभावात् भगवत्कृतं **गीतं सदानन्दवाचक**मेव भवति, अतः सदानन्दकृतगीतस्य **सदानन्द एव वाच्यः**, अयमस्मिन्नादे विशेषः, अन्यकृतनादस्तु सरिगमादिरूपः स्वरमात्ररूप इतिभावः, तस्मान्नादनिष्ठरसानुभवार्थमत्रैव नादे कर्णोत्तम्भनं नान्यनादे इत्यर्थः, ननु भगवद्गीतस्य सर्वस्यैव सदानन्दवाचकत्वात् पूर्वश्लोकोक्तदेवस्त्रीणां कथं न रसानुभव इत्यत आहुर्मुखमित्यादि, तत्र सामग्री गुप्तैव स्थापितात्र प्रकटितेति पदत्रयेण सूचितमित्यर्थः, "द्वया ह प्राजापत्या" इत्यत्राधिदैविकसहितेन्द्रियस्य कल्याणत्वकथनेन तादृशशब्दस्यैव प्रमितिजनकत्वाद् देवता वागिन्द्रियं च शब्दनिष्ठरसप्राप्तौ सामग्री, इतरविस्मृतौ निःप्रत्यूहं रसानुभवो भवतीति सापि सामग्रीति ज्ञेयम्, **शाब्दबोधे शब्दः करणमतस्तत्सम्बन्धिनो धर्माः सामग्री**तिभावः, टिप्पण्यां **वागधिपतित्वाद्युक्ते**रित्यादिपदात् त्रिष्वपि कैमुत्यमुक्तम्, तथा च यत्राधिदैविकस्य करणत्वं वाङ्निर्गमनरूपविषयस्येन्द्रियत्वमितरविस्मारकश्च द्वारम्, तादृशशब्दाद् रसानुभवे किं वाच्यमितिकैमुत्येन रसपानं सूचितं भवति, भगवति देवतानां गोलकत्वं विषयाणां चेन्द्रियत्वमिति द्वितीयस्कन्धे व्यवस्थापितम्, अतो **मुख**पदं देवतावाचकं **निर्गम**पदं चेन्द्रियवाचकमितिभावः, एवं सामग्रीतो विशेष**मुक्त्वा** स्वरूपतोप्याहु**र्गीत**मिति, पूर्वोक्तं गीतं विचित्रं **सर्वरसार्थ**मित्युक्तम्, इदं तु पीयूषत्वकथनात् षड्गुणा आत्मनि यस्य तादृशं भगवद्रूपमित्यर्थः, **अधरपीयूषस्य** षड्गुणत्वमग्रे व्युत्पाद्यम्, **अत** इति सामग्र्या अपेक्षितत्वात् तां वक्तुं **मुखे**त्यादिपदत्रयमुक्तमित्यर्थः, **अन्यथे**ति पदत्रयस्य सामग्रीप्रकटनतात्पर्यकत्वाभावे इत्यर्थः, ननु तथाप्युत्तम्भनं किमर्थमित्यत आहुरितरेति, **अतिबालका** इति किञ्चित्प्रौढा वत्सास्तु गोष्ठ एव तिष्ठन्तीति तेषां तादृशत्वमसम्भावितमित्यतिपदम्, **घोषे वे**ति सायं गवां घोषे समागमनानन्तरं वा वत्सानामेवम्भावः, तदा प्रौढवत्सानामपि तथा सम्भवतीत्यतिपदं **न देय**मितिभावः, **स्तनादि**ति गृहीतमितिशेषः, तथा च स्तनगृहीतं पयःकवलं **स्तनपयःकवलं** मध्यमपदलोपी समासः, स्रुतं तद् येषामितिविग्रहः मातॄणां स्तनाद् गृहीतं पयःकवलं येषां मुखात् स्रुतं बहिर्निर्गतं भवतीत्यर्थः, स्रावे हेतु**र्न तस्ये**ति, यत इति शेषः, ग्रहणे इव नादश्रवणे गिलनक्रियाया निवृत्तत्वात् तस्य पयसो नान्तः प्रवेशो यतोतः स्राव इत्यर्थः, **सन्दिग्ध**मिति, ग्रहणगिलनयोर्मध्ये कालस्य दुर्लक्ष्यत्वादितिभावः, **प्रमाणमाहु**रिति स्मपदस्य प्रसिद्ध्यर्थकत्वात् प्रसिद्धिहेतुभूतं प्रत्यक्षं प्रमाणं स्मपदेन सूचितमित्यर्थः, **तस्थुर्गाव** इति मोहो गवामेव, पयःस्रावश्च शावानामेव, क्रियानिवृत्तिस्तूभयेषामपीत्यर्थः, **तथात्वे** इति क्रियानिवृत्तौ, दृशात्मनि गोविन्दस्पर्शो हेतुरित्यर्थः, **स्पृशन्त्य** इतिस्त्रीलिङ्गप्रयोगेपि वत्सानामपि क्रियानिवृत्त्युक्त्या तद्धेतुः किञ्चित्स्पर्शः समभिव्याहारात् प्राप्त एव, गवां तु पूर्वार्धोक्तरसपानत्वात् सर्वथा तथेतिभावः, **तुल्यते**ति हीनजातीयानां ब्रह्माविर्भावे तुल्यतास्फूर्त्या स्पर्शः सम्भवतीत्यर्थः **दोषाभावार्थ**मिति, हीननिष्ठत्वेन भावाभासत्वाभावार्थमित्यर्थः, **तेषामेवे**ति गवादीनामित्यर्थः, **इन्द्रः** परमैश्वर्यं प्राप्तः, पुष्टिमार्गीयं, तत्र मर्यादातिक्रमो भवतीतिभावः ।। १३ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गावश्च कृष्णेत्यस्य विवृतौ **उत्तमाधमयोर्मध्यमाभिलाषो निरूप्यत** इति **उत्तम**शब्देनात्र हरिण्यः, नेत्रदर्शनेन घोषसीमन्तिनीनेत्रस्मारकत्वेन भगवत्प्रियतया धन्यत्वोक्तेः, **अधम**पदेन गावः, शृङ्गाररसानुपयुक्तत्वात्, अत एवोक्त**मसम्भावितत्वान्मोह** इति, **मध्यमाभिलाष** इति हरिणीनां भगवद्दर्शनमात्राभिलाषः, गवामन्तर्दर्शनस्पर्शमात्राभिलाषः, अप्सरसां पूर्वप्रकारेण रमणाभिलाषः सर्वोत्तम इति तदपेक्षया मृगीणां गवां **चाभिलाषो मध्यम** इतिभावः, **मुखं वागधिपति**रिति भगवन्मुखमग्निरित्यर्थः, अग्नेर्वाग्देवतात्वाद्, भगवन्मुखस्याग्निरूपत्वाद् **वागधिपतित्वं**, तादृश**मुख**पदोक्त्या तापजनकत्वं सूचितं, तेन **भगवन्मुखवेणुगीतपीयूषं** पिबतोपि तत्पीयूषस्यातिरसालत्वेन तद्विषयकपरमार्त्या बहु पानं सम्भवतीतिप्रयोजनं सिद्धम् ।। १३ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गाश्च कृष्णमुखान्निर्गतं वेणुगीतमेव पीयूषममृतं क्षरणशङ्कया उत्तभितैरुन्नमितैः कर्णरूपैः पुटैः पानपात्रैः पिबन्त्यस्तस्थुः । तथा स्तन्यपाने प्रवृत्ताः शावा वत्साश्च तद्गीतामृतमुत्तभितकर्णपुटैः पिबन्तः स्नुतस्तनपयःकवलाः स्तनेभ्यः क्षरितदुग्धग्रासमुखा एव तस्थुः, विस्मृतपानक्रिया बभूवुरित्यर्थः । तत्र हेतुं सूचयन्त्य आहुः—गोविन्दं दृशा नेत्रमार्गेण आत्मनि मनसि स्पृशन्त्यः आलिङ्गन्त्य इति, अत एव अश्रूणां कला लेशा लोचनयोर्यासां ता गावस्ते शावाश्चेति ।। १३ ।।

अन्वितार्थप्रकाशिका

गावश्चेति ।। गोविन्दं दृशा नेत्रमार्गेण आत्मनि मनसि स्पृशन्त्यः आलिगन्त्य इति अत एव अश्रूणां कला बिन्दवो लोचनयोर्यासां ताः गावश्च । चकारादिदं विशेषणद्वयं वत्सानामपि लिङ्गविपरिणामेन कृष्णमुखान्निर्गतं वेणुगीतमेव पीयूषममृतं क्षरण-

शङ्कया इव उत्तभितैरुन्नमितैः कर्णरूपैः पुटैः पानपात्रैः पिबन्त्यस्तस्थुः । तथा स्तन्यपाने प्रवृत्ताः शावा वत्साश्च तद्गीतामृतमुत्तभितकर्णपुटैः पिबन्तः स्नुतपयःकवलाः स्तनेभ्यः क्षरितदुग्धग्रासमुखा एव तस्थुः विस्मृतपानक्रिया बभूवुः ।। १३ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अन्याऊचुः गाव इति गावः अधः पतनशंकयैवोत्तभितैरुन्नमितैः कर्णपुटैः कृष्णमुखनिर्गतं यद्वेणुगोतं तदेव पीयूष पिबंत्यतस्थुः तथा शावावसाश्चस्तनपानार्थं प्रवृताः उन्नतकर्णपुटैः तदेवपीयूषं पिबंतःस्नुतानिमुखेभ्यः स्त्रवितानि स्तनपयांसि एवकवलाः ग्रासाः येषां एवंभूतास्तस्थुः विस्मृतव्यापारा बभूवुः अतो हेतोः गावः वसाश्च गोविंद दृशा दृष्टिमार्गेण आत्मनि स्वमनसिस्पृशंत्यः आश्लिष्यंत्यःवसपक्षे विभक्तिविपरिणामेन स्पृशंतश्च अश्रूणां प्रेमबिंदूनां कलाऽमुमुचुः ।। १३ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गाव इति ।। कृष्णमुखान्निर्गतं यद्वेणुगीतं तदेव पीयूषममृतम् तत् उत्तभिताः क्षरणशङ्कयैवोन्नमिताश्च ते कर्णपुटाश्च तैः, पिबन्त्यः सत्यः, गावो धेनवः, तस्थुः । तथा शावाः मातृस्तन्यप्रवृत्ता वत्साश्च, समनन्तरप्रवृत्त गीतं श्रुत्वा, तदेव पीयूषमुत्तभितकर्णपुटैः पिबन्तः सन्त इति शेषः । स्नुतस्तनपयः कवलाः केवलं स्तनेभ्यः क्षरितक्षीरग्रासाः मुखेषु येषां ते, तस्थुः । विस्मृतव्यापारा बभूवुरित्यर्थः । गवां वत्सानां चैवंभूतत्वे हेतुमाह । गोविन्दं कृष्णं, दृशा दृष्टिमार्गेण, आत्मनि चित्ते, स्पृशन्त्य आलिङ्गन्त्य, अत एव अश्रूणां कला लेशाः लोचनयोर्यासां ताः गावः, ते शावाश्च, उक्तविधतया तस्थुः स्म ।। १३ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गाव इति ः १०.२१.१३.

त एव धन्या धरणौ स्त्रियोऽपि शिशवोऽपि वा । कृष्णगीतामृतभिज्ञा ये च गोविन्दचिन्तकाः ।। २४ ।।

कृष्णप्रिया

सखी देवाङ्गनाओं की बात जाने दो लेकिन इन व्रजगौओं की गाथा सुनो ! जब प्यारे श्रीनन्दकुमार अपने मुख कमल से मुरली में–वंशी में स्वर भरते हैं और सारी गौएँ उस वंशी का नाद सुनती है तव ये अपने कानों के दोनें खड़े कर लेती है और तन्मय होकर रसपान करती है तब ये समाधिमग्न लगती है । उनके नन्हे-नन्हे बछड़े और बछड़ियों की दशा तो देखो ? वेणुपान करती हुई गाएँ जब उन वत्सों को स्तनपान कराने लगो तब उनके स्तनों से टपकते हुए दूध के कवल को मुख में धारण किए हुए बछड़े भी रस समाधि मग्न बन गए और उनके नेत्रों में से स्नेहाश्रु टपकने लगे क्योंकि गौओं के और बछड़ों के अन्तःकरण में श्रीगोविन्द भगवान का समालिङ्गन का आनन्द पा रहें हैं, सखो उस आनन्द के सामने और सुख की कैसे लालसा हो सकती है ।। १३ ।।

प्रायो बताम्ब [1]विहगा मुनयो वनेऽस्मिन् [2]कृष्णेक्षितं तदुदितं कलवेणुगीतम् ।
आरुह्य ये द्रुमभुजान् रुचिरप्रवालान् [3]शृण्वन्ति मीलितदृशो विगतान्यवाचः ।। १४ ।।

कर्दमक्षमा

अन्वयः—अम्ब ? अस्मिन् वने ये अमीलित दृशः विगत अन्य वाचः रुचिर प्रवालान् द्रुम भुजान् आरुह्य कृष्ण ईक्षितम्, तद् उदितम् कलवेणुगीतं शृण्वन्ति वत ते विहगाः प्रायः मुनयः "सन्ति" ।। १४ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

भो अंब मातरस्मिन्वने ये विहगाः पक्षिणस्ते प्रायेण मुनयो भवितुमर्हन्ति । कतः । कृष्णेक्षितं कृष्णदर्शनं पुष्पफलाद्यंतरं विना यथा भवति तथा रुचिराः प्रवाला येषां तान्द्रुमभुजान्वृक्षाणां शाखा आरुह्य तेन श्रीकृष्णेनोदितं प्रकटितं कलवेणुगोतं केनापि सुखेनामीलितदृशस्त्यक्तान्यवाचश्च संतो ये शृण्वंतीति । तथाहि । मुनयः श्रीकृष्णदर्शनं यथा भवति तथा वेदोक्तकर्मफलपरित्यागेन वेदद्रुमशाखारूढा रुचिरप्रवालस्थानीयानि कर्माण्येवोपाददानाः सुखिनः संतः श्रीकृष्णगीतमेव शृण्वंति । अतस्त एवैते भवितुमर्हंतीति भावः ।। १४ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

काचित्किचिद्योगज्ञा स्वमातरं वदति । यद्वा–अम्बति सखीं प्रति संबुद्धिः, भावाविष्टप्रमदास्वभावत्वात् । हेतुं शंकते- कुत इति । केनापि वक्तुमशक्येनेत्यर्थः ? उपाददानाः स्वीकुर्वाणाः । यतः श्रीकृष्णगोतं शृण्वंति अतो हेतोः । जन्मातराभ्यासवशा·

---

१. मुनयो विहगाः-गो. प्रे. टी. । २. कृष्णेक्षणा–विज. । ३. न्त्य–श्रीधर. वंशी. वीर. विज. ; न्ति–विश्य. शुक. ।

दित्यर्थः। त एव मुनय एव एते पक्षिणः। इति भाव इति। न हि जन्मांतराभ्यासं विना भगवद्गीतश्रवणे प्रवृत्तिर्भवति "पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः" इति गीतासूक्तेः॥ १४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो अस्तुतरां श्रीकृष्णपाल्यमानानां गवां धन्यत्वं वन्यानां विहगानामपि भाग्यं किं वर्ण्यमित्याहुः—प्राय इति। बाहुल्ये मयूरादीनां केषाञ्चित् प्रेमनृत्यादिना परभक्तसाम्यात् वर्तते विस्मये हे अम्बेति अयं भावाविष्टप्रमदाजनकथास्वभावः यत्खलु तच्छून्ये तत्सम्बोधनं स्वसखीभ्योन्ववर्णयन्नित्युक्तत्वात् कृष्णेक्षितं स्वकर्तृकं कृष्णस्य दर्शनं तत्कर्तृकं वा स्वदर्शनं यत्र तत् यथा स्यात् तथा द्रुमभुजानारुह्य रुचिरप्रवालानिति तेषामप्यङ्कुरादिविकारो दर्शितः विहगानामपि तद्दर्शने व्यवधानं सुखभोगसाधनं च दर्शितं तथापि कृष्णक्षितं यथा स्यात्तथा शृण्वन्ति मीलितदृशः अर्द्धमुद्रितदृशः महाप्रेमसम्पत्याऽक्षसदृष्टय इत्यर्थः। विगता मनःश्रवणवागिन्द्रियेभ्यो निर्गता अन्या मुरलीवाग्व्यतिरिक्ता वाचो येषां अतस्त एव धन्या इति भावः। अन्यत्तैः तत्र भावार्थे रुचिरशब्दाद्भगवदर्पितकर्माणोति बोद्धव्यमिति अथवा प्राय इति वितर्के मुनयः आत्मारामाः श्रीसनकादयोऽस्मिन् वने विहगा एव बभूवुरित्यर्थः। तत्र प्रयोजनमाहुः—कृष्णेत्यादिना कृष्णेन ईक्षितं स्वयमेवोत्प्रेक्षितं कल्पितं पूर्वं तादृशाभावात् तेनेव उदितम् उत्तरोत्तरप्रकटितगुणं इति वेणुगीतस्य ब्रह्मसमाधितोप्याकर्षकता दर्शिता कलयति जगच्चित्तमाकर्षतीति कलं वेणोर्गीतं तादृशमुनित्वे लिङ्गमाहुः—रुचिरप्रवालान् विचित्रोपशाखामयान् द्रुमभुजान् वेदशाखारूपान् आरुह्यातिक्रम्य तदभिनिवेशमपि परित्यज्य मीलिता आवृता दृक् देहादिज्ञानं यैस्तथाभूता अपि विगता अन्येषां कृष्णव्यतिरिक्तानां वाक् कथापि किं पुनर्विचारादिकं येभ्यः॥ १४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो अस्तुतरां श्रीकृष्णपाल्यमानानां गवां धन्यत्वम्, वन्यानां विहंगमानामपि भाग्यं किं वर्ण्यमित्याहुः—प्राय इति बाहुल्ये, मयूरादीनां केषाञ्चित् प्रेमनृत्यादिना परमभक्तसाम्यात्। बतेति विस्मये, हे अम्बेति प्रेमवैवश्येन स्वसखीं प्रत्येव मातृतया सम्बोधनम्, काञ्चिद्वृद्धां प्रति वा, किंवा, अयं भावाविष्टप्रमदाजनकथास्वभावः, यद्विस्मयादौ मातरित्युक्तिः, कृष्णेक्षितं स्वकर्त्तृकं कृष्णस्य दर्शनं तत्कर्त्तृकं वा स्वदर्शनं यथा स्यात्तथा द्रुमभुजानारुह्य तदुपरि स्थित्वा, रुचिरप्रवालानिति तद्दर्शनेत्यवधानं सुखभोगसाधनञ्च दर्शितम्, तथापि कृष्णेक्षितं यथा तथा शृण्वन्ति, मीलितदृशोऽर्द्धमुद्रितदृशो महाप्रेमसम्पत्त्या अलसदृष्टय इत्यर्थः। विगता अन्याः कृष्ण कृष्णेति व्यतिरिक्ता वाचो येषाम्, अतस्त एव धन्या इति भावः। अन्यत्तैर्व्यञ्जितम्, तत्र भावार्थेरुचिरशब्दाद्भगवत्कर्म्माणोति बोद्धव्यमिति, अथवा, प्राय इति वितर्के, मुनय आत्मारामाः श्रीसनकादयोऽस्मिन् वने विहगा एव बभूवुरित्यर्थः। तत्र प्रयोजनमाहुः – कृष्णेत्यादिना। कृष्णेन ईक्षितं स्वयमेवोत्प्रेक्षितं पूर्वं तादृशाभावात्, तदनिर्वचनीयमुदितं स्वयमेबाविर्भूतम्, इति वेणुगीतस्य सच्चिदानन्दरूपताभिप्रेता, किंवा स कृष्ण उदितः प्रकटो भवति यस्मात्, वृक्षलताद्यावृतस्यापि तस्य विज्ञापकमित्यर्थः। कलयति जगच्चित्तमाकर्षतीति कलं वेणोर्गीतम्, द्रुमस्य भुजान् उच्चदीर्घपृथुशाखास्तत्रापि तदुपरि स्थितान् कोमलत्वादिना रुचिरान् प्रवालानारुह्येति सम्यक् श्रवणासिद्धयर्थं प्रेमवैवश्येन पातपरिहाराय च मीलिता मुद्रिता आच्छन्ना दृक् आत्मतत्त्वादिज्ञानं येषां तथाभूताः सन्तः, विगता अन्येषां कृष्णव्यतिरिक्तानां वाक्, तथापि किं पुनर्विचारादिकं येभ्यः, पूर्ववदेव वा, अन्यत् समानम्॥ १४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

द्रुमभुजान् द्रुमशाखाः॥ १४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अम्ब इति। अम्ब हे मातः अमातरमपि पूजार्थं सम्बोधयन्ति अस्मिन् वने विहगाः पक्षिणः प्रायशो मुनयो भवितुमर्हन्ति कुतः ये विहगा रुचिराः प्रवालाः पल्लवाः येषां तान् द्रुमभुजान् तरुशाखाः आरुह्य स्वभोज्यं फलादिकं विहाय केवलं कृष्णस्येक्षितं दर्शनं यस्मिंस्तद्यथा भवति तथा तेनोदितं प्रकटितं मधुरं वेणुगीतं केनापि सुखेन मीलितदृशः त्यक्तान्यवाचः सन्तः शृण्वन्ति तथा हि मुनयः वेदद्रुमशाखाश्रिताः कृष्णदर्शनं यथा भवति तथा वेदोक्तकाम्यकर्मफलत्यागेन भगवदैकदृष्टयः सुखिनस्तन्महिमानमेव शृण्वन्ति अत एवैते भवितुमर्हन्तीति॥ १४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

विगतास्त्यक्ताः स्वजातिसिद्धा वाचो यैस्ते विगतान्यवाचो धृतमौना इत्यर्थः। बत आश्चर्य्यमिदं हे अम्ब! पक्षिणां मुनिनां च मौनत्वसामान्यादेवमुच्यते॥ १४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कृष्णेक्षितं तेनैव प्रथममवगतं तस्मादुदितं व्यक्तञ्च रुचिरेति द्रुमाणामपि विकारः सूचितः॥ १४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

पुनर्मुग्धा ऊचुः-प्रायो बतेत्यादि। बत खेदे। अद्य आश्चर्ये; अस्मिन् वने प्रायः साकल्येन विहगा मुनयो मननशीला विगतरजस्तमस्काः, यतः कृष्णेक्षितं यथा भवति यत्र स्थिते कृष्णेन दृश्यन्ते, कृष्णो वा दृश्यते, तत्र द्रुमभुजान् शाखा आरुह्य तदुदितं तद्वचः कलवेणुगीतञ्च शृण्वन्ति। कीदृशाः ? विगता अन्याः कृष्ण कृष्णेति वागतिरिक्ता वाचो येषाम्; समये यदा तदुदितं कलवेणुगीतं वा न शृण्वन्ति, तदा कृष्ण कृष्णेत्येवं भाषन्त इत्यन्यशब्दरहिताः। द्रुमभुजानारुह्येति आसनम्, मुनय इति ध्यानम्, कृष्णेक्षितमिति दर्शनम्, शृण्वन्तीति श्रवणम्, विगतान्यवाच इति मौनं कीर्तनञ्चेति मुनिधर्मैरेभिरमी मुनय एव। कदा वयमेवं वनस्था भूयास्म हेतौत्सुक्यविषादाद्भुतानां शावल्यम् ॥ १४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मुग्धा ऊचुः-प्रायोवतेत्यादि। वतेति खेदे, अस्माभिरेवं भवितुं न शक्यत इति खेदः। अस्मिन् वने विहगाः प्रायो मुनयः, यतः कृष्णेक्षितं यथा भवति तथा स्थितेः कृष्णेन कृष्णे वा दृश्यते, तथा द्रुमभुजानारुह्यासनं कृत्वा मीलितदृश आनन्दातिशयेन चमत्कारातिशयात् मध्ये मध्ये कृष्ण कृष्णेति मात्रं वदन्ति अन्यदा तु मौनिन एव, अतो मुनयः, आसनध्यानमौनादयो हि मुनिधर्मः कदा वयमेवं भविष्याम इत्यभिलाष स्मयविषादानम् शावल्यम् ।। १४ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वत्सा अपि विषयग्राहिण्यो विषयरस एव तत्रोपाधिरस्तीत्यत आत्मारामा मुनयो ज्ञानेन सर्वानेव भावांस्त्यक्तवन्तो निर्विकाराः कृष्णेन क्षोभयितुं न शक्या इत्यपि न वाच्यं यतस्तानपि स्वमाधुर्य्येणाकृष्य सम्मोहयतीत्याहुः-प्राय इति। बतेति विस्मये अम्बेति सखीन् प्रत्यपि सम्बोधनं भावाविष्टप्रमदानां स्वभाव एवैषः विहगा मुनय एव भवेयुरित्यर्थः। वनवासदृङ्निमीलनमौननैश्चल्याद्यसाधारणधर्मदर्शनात् यद्द्रुमभुजान् आरुह्य वेणुगीतं शृण्वन्ति रुचिरप्रवालानिति द्रुमभूजानामपि वेणुगीतानन्दात् मुनिजनस्पर्शानन्दाच्चाङ्कुरादिविकारो दर्शितः कलयति जगच्चित्तं क्षोभयतीति कलवेणुगीतं कीदृशं कृष्णेक्षितं कृष्णे एव ईक्षितं ननु शक्रपरमेष्ठिरुद्रविष्णुषु गानस्रष्टृष्वपि दृष्टं मुनीनामेषामतिप्राचीनत्वात् तत्र तत्र सर्वत्रावारितगतित्वात् बहुशोऽवकलिततत्तद्गीतत्वाच्च तत्कृतसङ्गीतशास्त्राभिज्ञत्वाच्चेति भावः। न चास्य गानस्य कोऽप्यन्यः स्रष्टा सम्भवेदित्याहुः, तदुदितं तस्मात् कृष्णादेव उदितम् आविर्भूतं कृष्ण एवास्य स्रष्टेति गीतस्यानन्यवेद्यत्वं व्यञ्जितम् अत एव ब्रह्मारुद्रादिभिरिव कृष्णेन स्वसङ्गीतशास्त्रमपि ग्राहकासम्भवादेव न कृतमिति ज्ञेयम् अत एवात्यपूर्वगीतरसास्वादवशान्मीलितदृशः विगता अन्यस्य ब्रह्मानन्दानुभवस्यापि वाक्परस्परकथनं येषां ते इति सम्प्रति तमपि परित्यज्याऽमी कृष्णानन्दमत्ता एवाभूवन्निति भावः ।। १४ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या आहुः—प्राय इति। हे अम्ब, मातः ! अस्मिन् वने विहगाः पक्षिणो मुनयः सन्ति यतः कृष्णस्येक्षितं दर्शनं यथा स्यात्तथा द्रुमभुजान् आरुह्य रुचिरप्रवालानिति विशेषणेनात्र श्रीकृष्णश्चिरं स्थास्यतीति तेषामाशयः सूच्यते मीलितदृशः त्यक्तान्यदर्शना विगतान्यवाचः त्यक्तान्यकथाः तदुदितं वेणुगीतं शृण्वन्ति ।। १४ ।।

श्रीरामकृष्णकृता प्रेममञ्जरी

अहो आस्तां तत्पाल्यमानानां गवां वार्त्ता वन्यविहगानामपि वेणुगानामृतास्वादः समाकर्ण्यतामित्याहुः—प्राय इति। बाहुल्ये मयूरादीनां प्रेमभक्तत्वात् बत विस्मये हे अम्बेति भावाविष्टप्रमदाजनालापस्वभावः हे सखीत्यर्थः। स्वसखीत्यर्थः। स्वसखीभ्योन्वर्णयन्निर्युक्तेः तत्रैव सहसाऽऽगतां व्रजेश्वरीं प्रति वा सम्बोधनम् अस्मिन्निति बुद्धिस्थं स्वकर्तृकं तत् कर्तृकं कृष्णेक्षितं यथा स्यात्तथा द्रुमशाखा आरुह्य अर्द्धमुद्रितदृष्टयः सन्तः शृण्वन्ति अन्येऽपि मननशीला विहगा आकाशचारिणो व्रजाः "आकाशस्तल्लिङ्गात्" (१।१।२३) इति वेदशाखाशिरोभागम् आरूढाः "वर्णाश्रमविहीनस्तु वर्त्तते श्रुतिमूर्द्धनि" इत्यभियुक्तोक्तेः सकामास्तु वेदशाखासमाश्रिता भवन्ति परतन्त्रत्वात् रुचिरप्रवालान् रुचिप्रदनवनवक्रियाकला।प्रतिपादकान्वेदमार्गान् ते मुनयस्तानाक्रम्य स्थिताः कलं मधुरास्फुटम् "सदेव सौम्येदम्" इति मधुरम् अतन्निरसनाच्चास्फुटं वेणुगीतमिव श्रुतिसुखं तदुदितं "तस्य महतो भूतस्य निश्वसितम्" इति। सच्चिदानन्दपरब्रह्मकृष्णसाक्षात्कारो यथा भवति तथा शृण्वन्ति मुनय इति मननं मीलितदृश इति निदिध्यासनमुक्तम्। यद्वा, मीलिता व्यावृता देहदैहिकादिभ्यो दृक् दृष्टिर्यैस्ते विगतान्यवाच इति तदेकपरत्वं "नानुध्यायाद्बहून् शब्दान्" इति एवं वेगुगीतस्य ब्रह्मसमाधितोप्याकर्षकत्वमुक्तम् अत एव कलयति चित्तमाकर्षयतीति कलं तद्वेणुगीतमिति ॥१४॥

श्रीमत्कृष्णदासकृता श्रीगणदीपिका

ऋतुमतीं कान्तिमतीं प्रत्याह—प्राय इति। अम्बेति सम्बोधनं प्रेमवैवश्यादिति भावः ।। १४ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तत्स्वरूपहेतुकत्वं तत्प्रेम्णो द्रढयन्त्योऽन्याः प्राहुः—प्राय इति । बतेति विस्मये अन्वेति सखीं प्रति सम्बोधनं हे सखि ! अस्मिन् वने विहगाः पक्षिणस्ते प्रायेण मुनय एव भवेयुः ये कृष्ण एव नतु ब्रह्मरुद्रादावीक्षितं दृष्टं तस्मात् कृष्णादेवोदितं प्रादुर्भूतं कलवेणुगीतं शृण्वन्ति रुचिराः प्रवाला येषां तान् द्रुमभुजानारुह्यालम्ब्य तत्सुखेन मीलितदृशः विगता अन्यवाचो येषां ते तूष्णींस्तुत्वा इत्यर्थः । मुनयः खलु वेदोक्तकर्मफलपरित्यागेन वेदद्रुमशाखारूढास्तदुक्तानि निष्कामकर्मण्येव रुचिरप्रवालस्थानीयानि कथञ्चिदुपाददानाः श्रीकृष्णगीतमेव शृण्वन्तीति तल्लक्षणाक्रान्तत्वान्मुनय एव स्युः श्रुतिश्च “तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैव सेतुः” इति तथा च स्वरूपहेतुकस्तेषां प्रेमेति ॥ १४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गावः शावाः स्ववत्सास्तत्स्मरणेन स्रुतं स्तनपयःस्रुतां कबलाः मुखस्थापितयवसग्रासा यासां ताः । ग्रासस्तु कबलः पुमानित्यमरः । गोविन्दमात्मनि स्वमनसि प्रस्थाप्य दृशा अश्रुणी स्रवन्त्य उत्तभितकर्णपुटैरुत्तभितानि स्तब्धीकृतानि कर्णपुटानि तद्रूपत्राणि तैः । ग्रसितस्तभित्तोतभितेति निपातनादिडागमो वैदिके तत्प्रायत्वादत्रानुवादस्तस्यैवेति ज्ञेयः । पिबन्त्यः सत्यस्तस्थुः कर्तव्यमूढा अवतस्थिर इति भावः स्म स्मरन्त्य इति वा । शावा इति पाठे तेऽपि पिबन्तोऽश्रुकणान्दृशा स्रवन्तो गोविन्दमात्मनि स्म स्मरन्तस्तस्थुरिति योजना ॥ १४ ॥

श्रीसुबोधिनी

पक्षिणां श्रवणं सङ्गाभावाज् ज्ञानाभावाच्चासम्भावितं मत्वा सम्भावनानिरूपणपूर्वकमुपपादयन्ति **प्राय** इति, एतानिर्गुणा अत एव यशोदया सह स्नेहस्तद्गृहकन्यका वा, **यथा गवां धनस्य रत्नानां सङ्ग्रह एवमेवोत्तमकन्यकानामपि, द्रव्येण क्रीतास्ता गृहे परिपाल्यन्त राज्ञां दानार्थे**, ता यशोदनिन्दगोपकुमारिका **अम्बे**त्याहुः सिद्धवन्निरूपणे का एना इतिसन्देहो भवेदत प्रायः इत्याहुः. **प्रायः** प्रायेण, **वत** इति खेदे कथमेतादृशी योनिं प्राप्ता इति, हर्षे वा साधु तैरयमुपायः कृतइति, **अम्बे**तिसम्बोधनं दयार्थं, भगवदाविर्भावादिति केचित्, अतस्तासां वाक्याद् **विहगा मुनय** एव बाहुल्येन, ते हि **मुनयो** मननशीला जानन्त्यत्र भगवानाविर्भविष्यतीति, अत **एवास्मिन् वने कृष्णेक्षणाः कृष्णार्थमेव क्षणो** येषां कृष्ण एव **वेक्षणं येषां**, भगवन्तं पश्यन्त एव **तदुदितं कलवेणुगीतं द्रुमभुजानारुह्य शृण्वन्ति** यावद् भगवतो वेणुनादो न श्रुतस्तावद् रूपमेव पश्यन्त स्थिता यदा पुनर्वेणुनादमारब्धवांस्तदोभयं कृतवन्तो यदा पुनस्ततो **भगवान्** दूरे गतस्तदोड्डीयान्यत्रगमने वेणुनादरसो गमिष्यतीति तत्रैव स्थिताः कदाचित् स रसो रसान्तरमुत्पादयिष्यति रसान्तरेण वा प्रतिवन्धो भविष्यतीति नाशङ्कनीयं यतः **कल**मव्यक्तमधुरं **वेणुगीतं**, ततो भगवतः सकाशादुदितं नादब्रह्मात्मकं वेणरप्यव्यक्तमधुरस्ततो मधुर **एव** रस उत्पद्यत इति, **गीतं** वा भगवदुक्तपरमार्थप्रतिपादकं तदा **तदुदित**मितिविशेष्यं, वेदशाखा इव **द्रुमभुजानारुह्य** पतनमारणादिशङ्काभावात् निश्चिन्ताः **शृण्वन्ति**, मनसो विषयान्तरसञ्चाराभावाय भगवति दूरे गते दर्शनाभावान् मननाभ्यासाच्च **मीलितदृशो** जाताः, विशेषेण **गता या** अन्यविषयिका **वाचो** येभ्यः, भगवदुपयोगिवागत्यागज्ञापनायान्यपदं, एतच्च सार्वदिकमिति ज्ञेयं, अन्यथा श्रवणकाले वाचस्तत्प्रतिबन्धकत्वेनैवाभावः सिद्ध इति तदुक्तिनिरर्था स्यात्, तथा च सदैतद्रसानुभवो हृदीति ज्ञापितं भवति एतेनास्य **नादस्यालौकिकत्वं दुर्लभत्वं चोच्यते, न हि मुनीनामतादृशेर्थे आसक्तिः सम्भवति,** तेषां शरादिभयाभावार्थमाह **रुचिरप्रवाला**निति, पल्लवा उत्तमाः कोमलपत्राण्याम्रादिस्थितानि दृष्टिमुद्रणेपि हेतुरन्यथा प्रवालदर्शनं स्यात् मुखमुद्रणेपि हेतुरन्यथा तेषां भक्षणं स्यात्, कोलाहलश्च सम्भवति शकुनभाषणमन्योन्यं पदार्थनिरूपणं वा ॥ १४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

प्रायो बताम्बेत्यत्र, सम्बोधनं दयार्थमिति । दयया भगवान्निकट एव स्थापयेदिति भावः । तेषां शरेति । पल्लवैरेवावृताङ्गत्वेनान्यदर्शनाभावाच्छरादिभयाभाव इति केचित् ॥ १४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

प्राय इत्यस्याभासे **श्रवण**मिति नादनिष्ठरसानुभवः शक्तितात्पर्यनिर्धार इत्यर्थः, अत एवानुवादे ‘सर्वं तत्त्वं ज्ञातवन्त’ इति वक्ष्यते, सङ्गेति मृगीणामिव कृष्णसारसङ्गाद् गवामिव कृपया स्वत एव ज्ञानसामग्रीप्रकटनेन ज्ञानसम्पादनाद् वा तथा भवतीति भावः, **सम्भावने**ति मुनित्वनिरूपणपूर्वकमित्यर्थः, **व्याख्याने, भगवदाविर्भावा**दिति सर्वात्मकस्य भगवतो माता सर्वेषामेव मातेत्यताप्यम्बेत्युक्तवत्य इत्यर्थः, एतद्विषकपतित्वस्य वक्ष्यमाणत्वादेवंव्याख्यानमसमञ्जसमिति **केचि**दित्युक्तम्, स्वयं तु गृहकन्यकापक्षे तत्त्वेनाम्बेतिव्यवहारो भिन्नपक्षेपि “**दयार्थं तथे**”त्युक्तमेव, मुनित्वं श्रोतॄन् प्रति स्वयमुपपादयन्ति **अत** इति, वक्त्रीणां कुमारि-

कात्वेन ऋषित्वादित्यर्थः, **ते हीति** ये विहगास्त इत्यर्थः, **मूले ये** इति पदस्य ये **विहगास्ते मुनयोऽत एवं** एवतीति पूर्वत्रान्वयो ज्ञेयः, उत्तरत्रान्वये श्रवणं मुनित्वे हेतुः स्यान्न तु मुनित्वं श्रवणे **तथा** चाभासो **विरुध्येत**, **अत्रे**ति **अत्र** नादे सुधारूपो भगवानाविर्भविष्यतीत्यर्थः, **अत एवे**ति मुनित्वादेव पूर्वोक्तं ज्ञात्वैवं शृण्वन्तीत्यन्वयः, **कृष्णार्थमेवे**ति येषां क्षणः कृष्णार्थमेव भगवद्भावनयैव यातीत्यर्थः, **यावदित्यादि** द्रुमभुजानारुह्य पूर्वं **कृष्णेक्षणा**स्ततस्तादृशा **एव** शृण्वन्ति, ततो मीलितदृशः शृण्वन्ति कृष्णेक्षणत्वे मीलितदृक्त्वं न सम्भवतीत्येवंविभागेन व्याख्यानम्, **तत्रैव स्थिता** इति **मीलितदृश** इतिशेषः, **रसान्तरमि**ति नादः स्वनिष्ठस्वरूपदिदृक्षामव्यक्तत्वान्नोत्पादयिष्यतीत्यर्थः, तथा सत्युड्डीय **गमनं** स्यादितिभावः, **रसान्तरेण वेति** पूर्वानुभूतेन कृष्णेक्षणरसेनोड्डीय गमनं नादस्य मधुरत्वान्न भविष्यतीत्यर्थः, वेणोः कलरवं व्युत्पादयन्ति **तत** इति, **गीतं वेति** मधुरमेवोत्पद्यत इति पूर्वेणान्वयः, गीतनिष्ठं **माधुर्यमाहुर्भगवदुक्ते**ति, गीतस्य विशेष्यत्वपक्षे **उदितमुदतं** प्राप्तमित्यर्थः, द्वितीये **उदितं** कथितमित्यर्थः, मुखमुद्रणे हेत्वन्तरमपि स्वयमाहुः **कोलाहलँ**श्चेति, स्यादितिशेषः ॥ १४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

प्रायोबताम्ब विहगा इत्यस्य विवृतौ **तदा तदुदितमितिविशेष्य**मिति **प्रथमपक्षे** तु द्रुमभुजानारुह्य कलवेणुगीतं शृण्वन्तीत्यर्थः, कथम्भूतं **कलगीतम्** ? **तदुदितं** तेन **भगवतोदितं** बोधितं, एवं "कलवेणुगीत"मितिविशेष्यं **अस्मिन्** पक्षे तु द्रुमभुजानारुह्य तदुदितं शृण्वन्तीत्यन्वयः, कथम्भूतं **तदुदितं कलवेणुगीत**मिति विपरीतो विशेष्यविशेषणभावः इत्यर्थः ॥ १४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्या आहुः—हे अम्ब मातः ! अस्मिन् वने ये विहगाः पक्षिणस्ते प्रायेण मुनय एव भवितुमर्हन्ति । तत्र हेतुमाहुः—ये विहगाः रुचिराः प्रवालाः पल्लवा येषां तान् द्रुमभुजान् तरुशाखा आरुह्य स्वभोग्यफलादावनासक्ताः कृष्णस्येक्षितं दर्शनं यथा भवति तथान्यदर्शनवर्जनार्थं मीलितदृशः सङ्कुचितनेत्राः त्यक्तान्यवाचश्च सन्तस्तेनोदितं प्रकटितं मधुरं वेणुगीतमेव शृण्वन्ति । मुनयोऽपि वेदद्रुमशाखामारुह्य तदुक्तकर्मफलपरित्यागेन रुचिरप्रवालस्थानि यानि कर्माणि तान्येव उपाददानाः श्रीकृष्णदर्शनं यथा भवति तथा मीलितदृशश्च सन्तः श्रीकृष्णगीतमेव शृण्वन्ति । अत एते त एव भवितुमर्हन्ति इति भावः ॥ १४ ॥

अन्वितार्थप्रकाशिका

प्राय इति ॥ हे अम्ब मातः ! इदं सखीः प्रत्यपि संबोधनम् । भावाविष्टप्रमदानां स्वभाव एवैषः अस्मिन्वने ये विहगाः पक्षिणस्ते प्रायेण मुनय एव भवितुमर्हन्ति । ये विहगा रुचिराः प्रवालाः पल्लवा येषां तान् द्रुमभुजान् तरुशाखा आरुह्य स्वभोग्यफलादावनासक्ताः कृष्णस्येक्षितं दर्शनं यथा भवति तथाऽन्यदर्शनवर्जनार्थं मीलितदृशः सङ्कुचितनेत्राः त्यक्तान्यवाचश्च सन्तस्तेनोदितं मधुरं वेणुगीतमेव शृण्वन्ति । मुनयोऽपि वेदद्रुमशाखामारुह्य तदुक्तकर्मफलपरित्यागेन रुचिरप्रवालस्थानीयानि कर्माणि एवोपाददानाः श्रीकृष्णदर्शनं यथा भवति तथा मीलितदृशश्च सन्तः श्रीकृष्णगीतमेव शृण्वन्ति । अत एते त एव भवितुमर्हन्ति ॥ १४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अत्र ऋक्भेदाच्छ्लोकानां परस्परमर्थसंगतिर्नास्ति प्राय इति हे अंबमातः अस्मिन् वने विहगाः पतत्रिणः प्रायो मुनयो भवेयुः यतः ये रुचिरा मनोहराः प्रवाला येषां तान् द्रुमाणां भुजान् शाखा आरुह्य अमिलितदृशः मुरलीश्रवणसुखेन विगतात्यक्ता अन्यावाक्यैः एवंभूताः संतऽतेन श्रीकृष्णेन उदितं उच्चारितं कलं ब्रह्मभूतानामपि मनोहरं वेणुगीतं कृष्णेक्षितं यथा भवति तथा शृण्वंति पुनस्तदेवदर्शयंति मुनयः रुचिरप्रवालस्थानीयकर्मयुक्तानां वेदानां शाखारूढाः अखंडभगवत्स्मृतिमंतः स्वर्गादिफलजनकवाणी वर्जिताः सन्तः कृष्णोदितं धर्मज्ञानवैराग्यसहितैकांतिकभक्तिरूपं गीतं स्वस्मिन् कृष्णेक्षितं यथा स्यात्तथा शृण्वंति अतः पक्षिणोपि धन्या इति भावः ॥ १४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्राय इति ॥ बतेति हर्षे । अम्ब हे मातः, अमातरमपि पूजार्थं संबोधयन्त्यम्बेति । अस्मिन् वने, विहगाः पक्षिणः, प्रायः प्रायशः, मुनयः भवितुं अर्हन्ति । कुतः । ये विहगाः रुचिराः प्रवालाः पल्लवा येषां तान्, द्रुमभुजांस्तरुशाखाः, आरुह्य, स्वभोग्यं फलादिकं विहाय केवलमिति शेषः । कृष्णस्येक्षितं स्वहृदि दर्शनं यथा भवति तथा, तदुदितं तेन कृष्णेन प्रकटितं, कलवेणुगीतं मधुरवेणुगीतं, मीलितदृशः केनापि सुखोदयेन मीलितलोचनाः, विगतान्यवाचः त्यक्तान्यवाचः सन्तः, शृण्वन्ति । तथाहि मुनयो वेदद्रुमशाखावस्थिताः सन्तः श्रीकृष्णदर्शनं यथा भवति तथा काम्यकर्मफलत्यागेन भगवदेकदृष्टयः सुखिनः तन्महिमानमेव शृण्वन्ति, अत एव त एवैते भवितुमर्हन्तीति भावः ॥ १४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

प्राय इति : १०.२१.१४.

अनेकशाखानवलम्ब्य चागमान् निमीलिताक्षा लसदात्मसद्गिरः ।
तद्युक्तमेते मुनयो विहङ्गमाः पिबन्ति गीतामृतमीशदृष्टयः ॥ २५ ॥

कृष्णप्रिया

अब श्रीनन्द नन्द की सेवा रत नन्दालय की कन्यकाएं और निर्गुण गोपियों जो नित्य महतारी श्रीयशोदा जी की निकटवर्तिनी थी वे कह रही है अरी यशोदा भैया ? इस वृन्दावन में जो पक्षीवृन्द है वह तो प्रायः सब मुनिवृन्द ही है क्योंकि माता ? उन्होंने आपके दुलारे प्यारे लालन के दर्शन किए और आनन्द रस में निमग्न होते ही नेत्र बंध हो गए पुनः तन्मय बनकर कोमल कोंपलो से सुरम्य तरुवरों की डालियों रूप भुजाओं पर आसन लगाकर मौनी होकर श्रीनन्दनन्दजी के हृदयंगम वेणु के सुगीत सुन रहे है । माता ऐसा लगता है कि ये तरुवर सारे निगम है शाखाएँ वेदों की शाखा है, पर्ण वेदों के मन्त्र है और पक्षीगण मुनिगण है । उनको वेदों की माधुरी से भी अधिक माधुर्य वेणुगीत में मिला ॥ १४ ॥

नद्यस्तदा तदुपधार्य मुकुन्दगीतमावर्तलक्षितमनोभवभग्नवेगाः ।
आलिङ्गनस्थ[1]गितमूर्मिभुजैर्मुरारेर्गृह्णन्ति पादयुगलं कमलोपहाराः ॥ १५ ॥
दृष्ट्वाऽऽतपे व्रजपशून् सह रामगोपैः सञ्चारयन्तमनु वेणुमुदीरयन्तम् ।
प्रेमप्रवृद्ध[2] उदितः कुसुमावलीभिः सख्युर्व्यधात् स्ववपुषाम्बुद आतपत्रम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—"यदा भगवता वेणुनादद्वारा मुनयोऽनुगृहीताः" तदा नद्यः तत् मुकुन्दगीतम् उपधार्य आवर्त लक्षित मनोभव भग्नवेगाः आलिङ्गन स्थगितम् ऊर्मिभुजैः कमलउपहाराः मुरारेः पादयुगलम् गृह्णन्ति ॥ १५ ॥ सहरामगोपैः आतपे व्रजपशून् संचारयन्तम् "च" वेणुम् उदीरयन्तम् "कृष्णम्" दृष्ट्वा प्रेमप्रवृद्धः उदितः अम्बुदः कुसुमावलीभिः च स्ववपुषा सख्युः आतपत्रम् व्यधात् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आस्तां चेतनानां कथा नद्योऽप्यावर्तैः परिभ्रमैर्लक्षितेन सूचितेन मनोभवेन कामेन भग्नो वेगो यासां ता आलिंगनेन स्थगितमाच्छादितं यथा भवति तथा ऊर्मय एव भुजास्तैः कमलोपहाराः कमलान्युपहरंत्यो मुरारेः पादयुगलं गृह्णंति धारयंति ॥१५॥ लोकार्तिहरणशीलत्वादिसाम्यात्सख्युः श्रीकृष्णस्यांबुदस्तदुपर्युदितः पुनः प्रेम्णा प्रवृद्धः सन्कुसुमावलीभिः पुष्पसमूहैस्तत्तुल्यैस्तुषारैर्वा सह स्ववपुषा छत्रं विहितवान् ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदा वेणुवादनकाले । तत् वेणुगीतम् । उपधार्य प्राप्य । यद्यप्यचेतनेषु कामवेगो वक्तुमशक्यस्तथापि तदधिष्ठातॄणां देवानां चेतनतैव गंगादिभ्यो भीष्माद्युत्पत्तिश्रुतेः । अत एवोक्तम्—मनोभवभग्नवेगा इति । 'स्थगे–आच्छादने' धातुः । यदंगमालिंग्यते तदालिंगकांगेनाच्छादितं भवतीति प्रसिद्धमेव । उपहरंत्यः समर्पयंत्यः । तदांबुकमलादर्शनादर्थांतरमाह—'सलिलं कमलं जलम्' इत्यमरोक्तेः कमलस्य जलस्योपहारः पादादिप्रक्षालनार्थं यासां ताः इति ॥१५॥ कुसुमसमूहैः तदंतर्गतवाय्वानीतनंदनवनाद्युत्थपुष्पैः । मेघकर्तृकपुष्पवर्षणासंभवादर्थांतरमाह—तत्तुल्यैरिति । मेघच्युतजलकणेष्वपि 'मेघपुष्पं घनरसः' इति पुष्पशब्दप्रयोगान्मेघोऽपि चेतनाहीनस्तं सुखयति, वयं सचेतना अपि तं सुखयितुं न प्राप्ता अतो धिगस्मानिति भावः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं पूर्ववदवहित्थामपि कर्तुमशक्नुवत्यः स्वरसानुरूपमेवानुवर्णयन्त्यो रागौत्कण्ठ्येन स्वम्भावमचेतनेष्युत्प्रेक्षन्ते–नद्य इति । श्रीकालिन्दीमानसगङ्गाद्याः तदा तत्क्षण एव तत्तादृशपरममोहनम् उपधार्य स्वत एव निकटायातं सावधानं श्रुत्वेत्यर्थः । सर्वानन्दशिरोमणिना निजसङ्गमेन सर्वदुःखात् मुक्तिं ददातीति मुकुन्दस्तस्य गीतं परमानन्दजनकं रागम् आवर्तैत्यतिक्षोभो दर्शितः ऊर्मिभुजैः कमलोपहाराः सत्यस्तैरेवालिङ्गनेन स्थगितमानृतं यथा स्यात तथा तैरेव मुरारेः पादयुगलं गृह्णन्तीत्यन्वयः । तत्र चायं

---

[1] प्रमुदितोर्मि–विज. । [2] हृषितः–विज. ।

क्रमः प्रथमं तावदावर्त्तैश्छिन्नानि कमलान्युपहरन्ति तत्पश्चात्पादयुगलं गृह्णन्ति तदनन्तरं च प्रवृद्धतया वक्षःस्थलपर्यन्तमपि वेष्टयित्वाऽऽलिङ्गयन्तीति । एतदुक्तं भवति नद्यो मोहनवेणुगीतं श्रुत्वा सहजां स्वपतिसमुद्राभिगमनत्वरां विसृज्य जात्यैव श्रीकृष्णप्रियाणि विशेषतश्च श्रीवृन्दावनजातानि कमलान्येवोपहारो यासां तथाभूताः सत्य ऊर्मिभिरेव दीर्घैर्बहुभिर्भुजैः मुरारेः पादयुगलं ग्रहणालिङ्गनाभ्यां स्वस्मिन् सुस्थिरो कुर्वन्तोति तत्र च मुरारेरिति वामनपुराणोक्तस्य प्राचीनस्य दैत्यविशेषस्य मुरस्य हन्त्रा नारायणेन समोऽयमिति नाऽस्य भजने पातिव्रत्यभ्रंश इति विभावयन्तीति च अतस्ता एव परमधन्याः वयं तु दुर्भगा एव यतो न तद्वेणुगीतश्रवणं सिद्धयेत् न च स्वपतिगृहकृत्यप्रवाहोपरमः नाप्यस्माकं बहवो भुजा दीर्घा वा यैः तत्पादपद्ममेकमपि सुस्थिरीकृत्य स्तनादिषु गाढमालिङ्गामः । इतीदमत्र तत्त्वं यदा श्रीकृष्णचन्द्रस्तादृशं वेणुगानमाचरति तदा शुष्कशाखाङ्कुरशिलाद्रवप्रवाहस्तम्भादयो भवन्ति ततो जलस्तम्भेन प्रवृद्धजला नद्यस्तस्मिन् उच्चप्रदेशेऽपि सकमलतरङ्गाः समागत्य तत्पादकमलं स्पृशन्ति तच्च दृष्ट्वा ताः सचेतनादित्वेन प्रतियन्तीति ॥ १५ ॥ अथ दृष्ट्वेत्यादिद्वयेन पूर्ववदवहित्थातदशक्तिभ्यां गोष्ठ्यन्तरं तत्र पूर्ववदचेतने भाव कल्पयन्त्योऽपि सख्यमयरसवर्णनयानिजरसमाच्छादयन्त्य इवाहुः—दृष्ट्वेति । विद्युन्नयचक्षुषेति शेषः । आतप इति तापाधिक्यं व्रजपशूनिति तद्बहुल्यात् तृणबाहुल्यात् तृणबाहुल्यापेक्षयाऽवश्यं तत्र स्थितिः सहेति बहुलच्छायापेक्षा अनु पश्चात् मेघाकर्षणार्थमुच्चरीरयन्तं ततः एव प्रेमप्रेमाणं व्याप्य उदितः प्रवृद्धश्च उत्फुल्लतनुत्वात् कुसुमं मेघपुष्पं जलम् "मेघपुष्पं घनरसम्" इत्यभिधानात् तस्यावलीभिः बिन्दुनिकरैः सहितेनेत्यर्थः । सख्युरिति वर्णादिसाम्यात् स्वस्य वपुषा सजलदेहेनैव अम्बुदेत्युक्तेः स्ववपुरेव छत्रं कृतवान् इत्यर्थः। छत्रमपि कुसुमावलोयुक्तं भवत्येव एवं सख्येन निजं देहं धनं चार्पितवानित्यर्थः । अतोऽसौ परमधन्योऽस्माकं च तदानीं दर्शनस्याप्यसम्पत्तेर्भाग्यहीनतैवेति भावः । अत्र चेदं तत्त्वं यदाऽऽतपे गाश्चारयन्तः सखायः खिन्ना भवन्ति गावश्च विक्षिप्तगतयो भवन्ति तदा तासां मेघानां चाकर्षणाय तत्तन्नाम्ना मल्लारराग वादयति ततस्तादृशलीलास्फूर्त्या काश्चिदेवमुत्प्रेक्षन्त इति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो अस्तुतरां सचेतनानां माहात्म्यम्, अचेतनजलमयोनामपि नदोनां भाग्यं किं वर्ण्यतामित्याहुः—नद्य इति । श्रीकालिन्दीमानसगंगाद्याः, तत्परममोहनमुपधार्य्य स्वत एव निकटायातं सावधानं श्रुत्वेत्यर्थः । तदा तत्क्षण एवेत्यस्य आवर्त्तेतिपदेन गृह्णन्तोत्यनेन वान्वयः । मुरारेरिति मुरो नाम महादैत्यः श्रीशिववरतो वक्षसि हस्तार्पणमात्रेण सर्वप्राणहरो देववर्गभयंकरः श्रीवामनपुराणे प्रसिद्धः, तस्यारिर्नारायणः; (भा० १०।८।१९) 'तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः' इति गर्गोक्तेस्तन्नामभिन्नंजे कृष्णस्य व्यपदिश्यमानत्वाद्गुणसाम्याच्च । मुरो यथा तेन पूर्वं लीलया हतस्तथास्माकं वधोद्यतो मारोऽपि त्वया निरस्यतामित्यभिप्रायेण तस्य पादाब्जयोर्युगलमेव परमार्त्त्या गृह्णन्ती, कमलान्यपहरन्त्यस्तत्प्रियपुष्पाणि बलित्वेनार्पयन्त इत्यर्थः । अतस्तदभावाद्वयमधन्या एवेति भावः । अन्यत्तैर्व्याख्यातम्; यद्वा, तद्वेणुनादामृतमयं मुरारेर्मुकुन्दं परमसुखप्रदं मोहनत्वादिना तत्सदृशं वा गीतम्; आवर्त्ताः कामविकारभंगास्तेषां लक्षम्, तारकादित्वादितच्, तद्युक्तो यो मनोभवस्तेन; यद्वा, मुकुन्दगीतस्य मा लक्ष्मीः सम्पत्तस्या आवर्त्तः परिवृत्तिः परम्परा वा, तेन लक्षितो दर्शितोऽभिव्यञ्जितो यो मनोभवस्तेन भग्नस्रोतवेगाः सत्यः, भगवद्विषयकगाढ़भावेन तत्रैव परिभ्रमन्त्यः, न तु परतो गन्तुं शक्नुवत्य इत्यर्थः । ततश्च तदित्यनेन कलवेणुगीतमेव परामृष्टम्, व्यक्तञ्च तन्मोहशंकया नोक्तम्; आलिगने स्थगितं स्तब्धमादररहितमपि; यद्वा, सदा विचित्रगत्या चञ्चलमपि आलिगनेन तदर्थं वा स्थगितं सुस्थितम् । इत्थं कमलया लक्ष्म्यापि उपहारः बल्यर्पण यासु तस्या अपि पूज्या इत्यर्थः । उक्तप्रकारेण ततोऽपि सौभाग्याधिक्यात्, अन्यत् समानम्; उपहारादिशब्देन श्लेषत इदमपि सूच्यते नद्यो मोहनवेणुगीतं श्रुत्वा सहजां स्वपतिसमुद्राभिगमनत्वरां विसृज्य मूर्त्तिमत्यो भूत्वा मणिमौक्तिकादिदिव्यहारवत्योऽपि जात्यैव श्रीकृष्णप्रियाणां विशेषतश्च श्रीवृन्दावनजातानां कमलानामुपहारैः, उपरि विन्यस्तैर्हारैर्भूषिताः सत्य ऊर्म्मिसदृशैर्दीर्घैर्बहुभिर्भुजैर्मुरारेः पादयुगलं सुस्थिरीकृत्य सम्यगालिगन्तीति । अतस्ता एव परमधन्याः, वयन्तु दुर्भगा एव, यतो न तद्वेणुगीतश्रवणं सिध्येत्, न च स्वपतिसेवादिगृहकृत्यप्रवाहोपरमः, नापि प्राकट्येन तत्तोषणार्थं भूषादिधारणम्, नाप्यस्माकं बहवो भुजा यैस्तत्पादमेकमपि सुस्थिरीकृत्य वक्षःस्तनादिषु गाढ़मालिगाम इति ॥ १५ ॥ आस्तां तावच्छ्रीकृष्णस्य विचित्रविहारप्राप्तायाः श्रीवृन्दावनवर्त्तिन्याः श्रीकालिन्द्याः श्रीमानसगंगायाश्च तथा तत्साहचर्य्येणान्यासामपि जगत्पावनीनामन्यकालीनानां नदीनां तादृशं भाग्यम्; धूमोद्भवस्याचेतनप्रायस्याकाशवर्त्तिनो मेघस्यापि भाग्यं किं वर्ण्यमित्याहुः—दृष्ट्वेति । आतपे शरत्कालीनेऽपि व्रजस्य पशून् सर्व्वानेव गोमहिषादीन् सर्व्वैरेव गोपैः सहैकत्र तच्चारणात् सम्यक् तत्तदिच्छानुसारेण इतस्ततश्चारयन्तं तेषामनन्तानां बहुलदूरप्रदेशं व्याप्य चरतां सम्मेलनार्थं प्रहर्षार्थश्च वेणुम् अनु बारम्बारम् उत् उच्चैः ईरयन्तं वादयन्तं श्रीकृष्णमिति शेषः । इति श्रमविशेषः सूचितः । छान्दसत्वाद्व्यवधानमदुष्टम् । यद्वा, वेणुमनु तद्वादनानन्तरमित्यर्थः । उदीरयन्तमनुवेणुमित्यस्यात्रैव वान्वयः, वेणुनादेनैवोदीरयन्तमित्यर्थः । प्रेम्णा प्रवृद्धः सन् सहचराणामपि तापनिवारणाय, कुसुमं मेघपुष्पं जलं 'मेघपुष्प घनरसम्' इत्यभिधानात्, तस्य आवलीभिर्बिन्दुनिकरैः सहितेनेत्यर्थः । विशेषणे वा तृतीया, ताभिर्विशिष्टमातपत्रं स्वस्य वपुषा सजलदेहेनैव अम्बुदेत्युक्तेः । स्ववपुरेव छत्रं कृतवानित्यर्थः । छत्रमपि कुसुमावलीयुक्तं भवत्येव; एवं सख्येन निजदेहं धनं चार्पितवानित्यर्थः । अन्यत्तैर्व्यञ्जितम् । यद्वा, प्रवृद्धे आतपे अस्माकं सख्युः प्रियस्य स्वस्य वपुषा आतपत्रं

व्यधात्, कुसुमावलीभिश्च प्रेम प्रीतिं व्यधात्, इति अम्बुदत्वेन प्राप्तं वृष्ट्यादिदुःखं निरस्तम्, अतोऽसौ परमधन्योऽस्माकञ्च तदानीं दर्शनाद्यसम्पत्तेर्भाग्यहीनतैवेति भावः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

आवर्त्तलक्षितो ज्ञापितो मनोभवेन भग्नो वेगो यासां ताः ॥ १५ ॥ सख्युः कृष्णस्य तुल्यवर्णत्वात्सखित्वम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अस्तां चेतनानां कथा इत्यभिप्रायेण काश्चिदाहुः–नद्य इति । तथा यथा चेतनास्तद्वदचेतना नद्योऽपि तन्मुकुन्दस्य गीतं वेणुगीतम् उपधार्य श्रुत्वा उत्प्रेक्षामात्राभिप्रायकमिदम् आवर्त्तैः परिभ्रमैः लक्षितेन सूचितेन मनोभवेन मन्मथेन भग्नो वेगो यासां ताः आलिङ्गनेन स्थगितमाच्छादितं यथा भवति तया ऊर्मय एव भुजास्तैः कमलान्युपहरन्त्यः मुरारेः पादयुगलं गृह्णन्ति धारयन्ति ॥ १५ ॥ दृष्ट्वेति । तीरे यमुनातीरे आतपे इतिपाठान्तरं तदा तस्मिन् रामेण गोपैश्च सह व्रजपशून् सञ्चारयन्तम् अनुगवां पश्चाद्भागे वेणुम् उदीरयन्तम् वादयन्तं श्रीकृष्णं दृष्ट्वा अम्बुदो मेघः उदितः पुनः प्रेम्णा प्रवृद्धः सख्युः श्रीकृष्णस्य लोकार्त्तिहरत्वनीलवर्णत्वादिसाम्यात्सखित्वव्यपदेशः उपरि इति शेषः कुसुमसमूहतुल्यैस्तुषारैः सह स्ववपुषा आतपत्रं व्यधात् चकार ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यद्यदा मुकुन्देन गीतं तदा तदुपधार्य हृद्यवधार्य आवर्त्तेनाम्भसाम्भ्रमेण लक्षितेन मनोभवेन कामेन भग्नो वेगो यासां तास्तथा ऊर्मय एव भुजाः आलिङ्गनेन स्पर्शलक्षणेन प्रमुदिता ऊर्मिभुजाः आलिङ्गनप्रमुदितोर्मिभुजाः तैः कमलमेवोपहारा यासां तास्तथा ॥ १५ ॥ अम्बुदः श्यामवर्णसाम्यात्सख्युः मुरारेः स्ववपुषाऽऽतपत्रं व्यधात् कुसुमावलीभिः नन्दनवनपुष्पराजिभिः सह । यद्वा, जलकणनिकरैः सह पुष्पं मेघपुष्पमित्यभिधानात् प्रेम्णा प्रवृद्धं समुद्रिक्तं हृषितं हर्षणं रोमाञ्चलक्षणं यस्य स तथा अभिमान्यपेक्षयैतत् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नद्य इति वेणुवाद्यमाधुर्येण जलस्तम्भोदेर्जलवृद्ध्या तच्चरणपीठपर्यन्तागमनात् एवमम्बुदागमनमपि ॥ १५–१६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

हे सखि ! नदीनां प्रवाहो हि स्वभावेन वेगवानेव । सोऽपि कृष्णवेणुगीतं श्रुत्वा स्तब्धो भवति; वयन्तु न तथेत्यात्मनोऽतिकाठिन्यं मन्यमानाः प्रौढ़ा एवाहुः –नद्यस्तदेत्यादि । तदा तस्मिन्नेव समये यदा वेणुं वादयत इत्यर्थः । तन्मुकुन्दगीतं तन्मुकुन्दस्य गानमुपधार्य ऊर्मिभुजैः कमलोपहाराः सत्यः पादकमलं गृह्णन्ति कमलान्युपहारीकृत्य कमलैः पूजयित्वेत्यर्थः । कीदृश्यः ? आवर्तेन पयसां भ्रमेण लक्षितोऽनुमितो मनोभवस्तेन भग्नो वेगो यासां ताः । कीदृशम् ? आलिङ्गनेन नदीनामूर्मिभुजाश्लेषेण स्थगितं पुलिनेषु केवलानयः समीपे व्रजत ऊर्मिभुजाश्लेषणं यज्जायते, तत्सुखानुभवेन स्थगितमिति भावः । अतः स्वभावमपि नद्योदूरीकुर्वन्ति, वयन्तु कुल-शीलादिस्वभावमद्यापि न त्यजाम इति विषादग्लानिदैन्यानि ॥ १५ ॥ हे सखि ! अस्माकं हृदयमश्मसारम्, यतो वने गाश्चारयन्तमातपेन क्लिश्यन्तं स्मृत्वापि न विदीर्यति तदनुकूलसेवां कर्तुं न शक्नुमः । मेघैः सह तस्य कः स्नेहानुबन्धः ? तथापि ते तत्कालोचितां सेवां कुर्वन्ति, न पुनर्वयं मन्दभाग्या इति मध्यमा ऊचुः—दृष्ट्वेत्यादि । आतपे धर्मे व्रजपशून् सञ्चारयन्तं दृष्ट्वा स्ववपुषा आतपत्रमम्बुदो मेघो व्यधाद् विदधे, गाश्चारयन् यत्र यत्र याति तत्र तत्र तदुपरि गच्छन्नातपत्रायते स्म । कीदृशः ? प्रेम्णा प्रवृद्धोऽत एवोदितः प्रफुल्लः पुलकितः । सख्युर्मित्रस्य श्यामत्वात् सह रामगोपैः । न केवलमेकस्यैव, तस्य तत्सम्बन्धात् रामादीनामपि छत्रायते स्मेत्यर्थः । कुसुमावलीभिर्जलकणैरुपलालितमित्यातपत्र विशेषणं मुक्ता-प्रालम्बशोभितं छत्रमिव । उदित उर्ध्व गतो वा, निकटश्चेत्तदा उपरिस्थितानां विमानचारिणां देवानां दर्शनबाधात् । कीदृशम् ? अनुमेघगर्जितसदृशं वेणुमुदीरयन्तम्; हर्षेण मेघो यथा मन्दं मन्दं गर्जति, तत्समानं वेणुं वादयन्तमित्यर्थः । अनु सदृशार्थः, तदस्य प्रेमैव प्रेमा यत् स्वदेहमेवातपत्रीकरोति । अस्माकं प्रेमाणं तु धिगिति निर्वेदः ॥ १६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

हे सखि ! नदीनां प्रवाहः स्वभावेन वेगवानेव, तमपि नद्यो विष्टम्भयन्ति, स्वभावमपि दूरीकुर्वन्ति, अस्माकं धैर्यलज्जादित्यागे का शङ्केति सोदाहरणं पुनः प्रौढा ऊचुः-नद्यस्तदेति । तदिति सर्वनाम्नो बुद्धिस्थवृत्तित्वेऽस्मद्विधार्थं यत्शङ्केति तमित्यर्थः । आवर्त्तलक्षितो यो मनोभवो मनोरथः कामो वा तेन भग्ना वेगा यासाम्, ऊर्मय एव भुजा उत्कण्ठातिशयाद्भुजानां बाहुल्यमुचितमेव । पादकमलं विशिनष्टि–आलिङ्गन–स्थगितम्, कृष्णोऽपि तदभिप्रायं ज्ञात्वा पादपद्मं स्थगितं करोति । कमलान्येवोपहारा

उपायनानि यासाम् तस्माद्वयमतिप्रवाहरूपगेहाद्यावेशं स्थगयित्वा निःसङ्कोचमेवास्य चरणमर्चयाम इति वस्तुमत्यभिलाषौत्सुक्यानां साङ्कर्यम् ॥ १५ ॥ हे सखि ! अस्माकं हृदयमतिकठिनम् वने गोश्चारयन्तमातपे क्लिश्यन्तं स्मरन्त्योऽपि न दीर्याम इति मध्या ऊचुः—दृष्ट्वातप इत्यादि । मेघानामनेन सह कः सम्बन्धः, केवलं वर्णसाम्येन सौहृदम्, तथापि स्ववपुषेवातपत्रायते; अस्माकन्तु विविध एव सम्बन्धः तथापि स्ववपुरस्य सेवौपयिकं नाकारीत्यहो दौरात्म्यमस्माकम् । ननु कथमेव तथा न क्रियते ? तत्राह—सहरामगोपैर्गुरुगौरवं त्यक्त्वैव वा सहैव वनं गत्वा सेवामहे, तदपि लयं गच्छति, यतो रामश्च गोपश्च सङ्गे तिष्ठन्तीति भावः। कुसुमप्रायैः शीकरैर्जलस्य मेघपुष्पत्वात् । स्ववपुषेत्यस्य हेतुः—प्रेम्णा प्रवृद्ध उदित उत्फुल्लः पुलकित इत्यर्थः । सख्युरिति केवलस्य तस्यैवं प्रेम्ण एकनिष्ठत्वात्; अथवा तत्सम्बत्धात् सहरामगोपैरित्यनुषङ्गः । तदस्माकमनुरागमपि धिक् यदत्र सति गुर्वादिगौरवमिति निर्वेद·ग्लान्यभिलाषौत्कण्ठ्यानां शावल्यम् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च, कृष्णस्य सर्वमोहनत्वेपि नारोजातिमात्रमोहनत्वमत्यधिकमित्याहुः—नद्य इति । आवर्त्तैः परिभ्रमैर्लक्षितेन । मनोभवेन कामेन भग्नो वेगो यासां ताः अत एव धैर्य्यलज्जाद्यपगमनात् समुद्रं स्वपतिं प्रत्यगमनाज्जलातिवृद्धया ऊर्मय एव भुजास्तैर्यदालिङ्गनं तेन स्थगितं सम्वृतं निश्चलीभूतं कूलस्थितस्य मुरारेः पादयुगलं गृह्णन्ति स्वाङ्गेषु धारयन्ति कमलं पद्ममुपहरन्त्यः। यद्वा, सुशीतलं सुगन्धजलं "सलिलं कमलं जलम्" इत्यमरः स्वीयजलेन क्षालनार्थं पाद्योपहारं प्रददत्य इवेत्यर्थः । किम्वा कमला स्वसर्वसम्पत्तिस्तामर्पयन्त्यःस्वमरणं प्रीणयितुमिति भावः । तासां पतिः समुद्रोऽपि तानेव द्वेष्टि यथाऽस्मत्पतयोऽस्मानित्यहो वयमेवाधन्या इतिभावः ।। १५ ॥ हन्तहन्त सख्यभाववन्त्योऽप्यात्मानं कृतार्थयन्तीत्याहुः—दृष्ट्वेति । प्रेम्णैव प्रवृद्धः यावत्या स्ववृद्धया गोगोपालसहितस्य तस्य तापनिवारणं भवेत्तावतीवृद्धि प्राप्त इत्यर्थः । कुसुमावलीभिरिति "मेघपुष्पं घनरस" इत्यभिधानात् जलकणावलीभिः सह वपुषा सख्युः कृष्णस्येति रसवृष्ट्या च सन्तापहारित्वेन सवर्णत्वेन स्वीमविद्युद्गर्ज्जनाभ्यां पीतवस्त्रवेणुनादयोः साम्यदृष्ट्या च सखिभावमभिमन्यमानः आतपत्रं तुषारवर्तिच्छत्रं व्यधादित्याकाशस्थो मेघोपि सुखयति केवलं वयमेव तं सुखयितु न प्राप्नुम इति धिगस्मानिति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या आहुः—हे सख्यः ! नद्यस्तदाभिमानिन्यो देवताः यदा तासांतीरे श्रीकृष्णो वेणुना गायति तदा वेणुनिस्मृतं मुकुन्दगीतमुपधार्य्य श्रुत्वा आवर्तलक्षितेन भ्रमणद्योतितेन मनोभावेन भग्नो वेगो यासां ताः आलिङ्गनेन स्थगितमाच्छादितं यथा भवति तथाऊर्भिरूपैर्भुजैः कमलोपहाराः कमलान्युपहरन्त्यः मुरारेः पादयुगलं गृह्णन्ति अहो ता धन्या इति भावः ॥ १५ ॥ अन्या आहुः—रामेण गोपैश्च सह व्रजपशून् सञ्चारयन्तं व्रजात् पशून् वने निवेशयन्तम् वेणुमुदीरयन्तम् अत एव आतपे दृष्ट्वा उदितोऽम्बुदः प्रेम्णा प्रवृद्धः सन् मौक्तिकादिविलम्बस्थानीयाभिः कुसुमावलीभिः सह स्ववपुषा सख्युः श्रीकृष्णस्य घनश्यामत्वेन सोपमस्य स्वतनुरूपमातपत्रम् व्यधात् ॥ १६ ॥

श्रीरामकृष्णकृता प्रेममञ्जरी

एवं वर्णयन्त्यो रागौत्कण्ठ्येन विवशा स्वकीयमेव भावमचेतनेष्वपि समारोपयन्त्य आहुः—नद्य इति । अथ तृतीये यामे वयस्यानां सुखविशेषं जलक्रीडां विधाय वन्यपुष्पैः शृङ्गाररचनाः निर्माय व्रजगमनोन्मुख उत्थाय तत्रैव स्थितो गवां सङ्कलनाय निजरूपावलोकजीवनानां परमासक्तानां नानाविनोदजननाय तत्तन्नामग्राहं निजवेणुं वादयति—

हिही गङ्गे यमुने ! सरस्वति शुभे कालिन्दि सन्नर्मदे हिही । रोहिणी मोहिनी सदयिते ही धर्मदे शर्मदे ! ॥

कालिन्दीमानसगङ्गाद्याः तदा वादनसमकालमेव परममोहनता उक्ता इति सर्वा अपि लोकवेदमर्य्यादा मोचयतीति मुक्ता ददातीति तादृशं वेणुगीतं वैवश्याद्वेणुपदानुपादानम् उपधार्य सावधानं श्रुत्वा आलिङ्गने स्वेषामयोग्यतामनात्स्थगितत्वम् । यद्वा, तटगतस्य प्रतिबिम्बमात्मगनमालिङ्ग्य स्थगितत्वम् यद्वा, म्रियते विधुरजनोऽनेनेति मुरः कामस्तस्यारिःकोटिकन्दर्पजयी साक्षान्मन्मथमन्मथः श्रीकृष्णः नायं च कामवतीनां वशवर्त्ती किन्तु प्रेमवतीनां नद्योहि मोहनगीतमाकर्ण्य स्वभावेन समुद्रपतिसम्मुखं धावन्त्योऽपि ततः परावृत्य आवर्त्तेन अम्भसां चक्रेण भ्रमेण लक्षितं मनोभवेन भग्नो वेगो यासां ताः सकामा इव स्वकीयानि हृदयकमलान्येव उपहरन्त्य आलिङ्गनोन्मुखाः सत्यः मुरारितया तस्यौदासीन्यमालक्ष्य विलज्जिताः पादयुगलं गृह्णन्ति इयं सिद्धविषयोत्प्रेक्षा अयम्भावः श्रीकृष्णवेणुगतिप्रभावान्नीरसास्तरुलतादयः सरसा भवन्ति सरसाश्च मधु स्रवन्ति शिला अपि द्रवन्ति नद्यश्च स्तम्भमनुभवन्ति आवर्त्तेन द्विगुणं प्रवाहमभिवर्द्धयन्तीति ।। १५ ।। अथ पूर्वोक्ताभ्यो विशिष्टा सख्यरसाविष्टा गोष्ठी सङ्गृह्यते तत्र श्रीकृष्णविषयं सख्यं प्रशंसन्ति—दृष्ट्वेति । अथातीते तृतीये यामे यामेव रीतिमुद्दिश्य सासा क्रीडा विरचिता तद्भाववैवश्यतया

चावश्यकतया च गवां सङ्कलनमपि कर्त्तुमुचितं मत्वा वन्यकुसुमादिभिः कृतानल्पाकल्पो गिरिशिखरमारुह्याधित्यकायां वा कदम्बस्कन्धशाखामवलम्ब्य त्रिभङ्गभङ्ग्याऽवस्थितव्रजाभिमुखो वनशोभां निभालयति—तदेकजीवना निमेषासहाः सहचराश्च तद्रूपमाधुरीमास्वादयन्तोऽप्यतृप्ततया तदग्रेऽवस्थिता दिवातप्तशिलातापमपि न गणयन्ति स्म तदसहमानतदेकप्राणः श्रीकृष्णो दिवाकरतापोपशमनाय ससुखं व्रजगमनाय नित्यदा कृतसाचिव्यं सुहृद्विशेषं वारिदमाकारयन्नुच्चैर्मेघमल्लारमालापयन्वेणुं वादयति तेनाकृष्टो वारिवाहस्तावदेवाभिवर्षति यावता गिरिशिलाशैत्यं भवेदिति व्रजपशूनिति चारणावश्यकत्वं तदनुरोधेन शनैर्गमनं तापभूयस्त्वञ्च दृष्ट्वा विद्युन्नेत्रैः रामेण गोपैस्सहेति बहुतरच्छायापेक्षा अहोभाग्यमम्बुदस्य येन वर्णोऽपि तादृश एव लब्धः समये साहाय्यमप्याचरति, अयमपि घनश्यामः सोऽपीत्यादि साम्यात्सख्युरिति ॥ १६ ॥

श्रीमत्कृष्णदासकृता श्रीगणदीपिका

सुखदा हंसानिकामाह—नद्य इति । म्रियते मधुरजनोऽनेनेति मुरः कामः तस्यारिः "साक्षान्मन्मथमन्मथः" इति वक्ष्यमाणत्वात् कन्दर्पदर्पहेति स्वामिनाऽपि वक्ष्यते एवं च नायं कामवतीनां वशवर्त्ती किन्तु प्रेमवतीनामिति सूचितम् आलिङ्गनायोत्थापितभुजानां तासां कामकृतं स्थगितत्वमध्यवस्यारिपदोपादानमनादरात् इदमत्र कृतं नद्यो हि स्वभावेन समुद्राख्यपतिमभिधावन्त्यो मोहनगीतमाकर्ण्य ततः परावृत्य स्वकीयानि हृदयानि एव रागवन्ति कमलानि उपहृत्य आलिङ्गनोन्मुखाः सत्यः मुरारितया तस्यौदासीन्यमालक्ष्य लज्जितास्तदा पतिं त्यक्त्वा न वयं कामवत्यः किन्तु प्रेमवत्य इति सूचयन्त्यः पादयुगलं गृह्णन्तीति सिद्धविषयोत्प्रेक्षा । यद्वा, मुरारेरिति "नारायणसमो गुणैः" इति गर्गोक्तेः । यद्वा, मुरो नामाऽसुरः सदाशिवं समाराध्य यस्य यस्योरसि हस्तं विदध्यात् स म्रियेतेति लब्धवरो लोकभयङ्करो यदासीत् तदा छद्मवेषेण श्रीभगवता पृष्टः तेन स्वहृदये हस्तं निधाय मुरोऽहमिति तेनैव हत इति वामनपुराणे प्रसिद्धम् तद्वामनयोक्तम् —

"मुरः क्लेशे च सन्तापे कामभोगे च कर्मणाम् । दैत्यभेदे ह्यरिस्तेषां मुरारिस्तेन कीर्त्त्यते" ॥

इति ब्रह्मवैवर्तोक्तवासनयोक्तं मुरारिः कामजन्यसन्तापनाशकस्य पादयुगलमिति सम्बन्धः—

"मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम् । यः स्वं ददाति भक्तेभ्यो मुकुन्दः सो हि कीर्त्तितः" ॥

तदा तत्क्षणमेव वादनसमकालमेवेति परममोहनतोक्ता उपधार्य्य सावधानं श्रुत्वा वैवश्याद्वेणु पदानु पादानमिति यावत् यद्वा, आलिङ्गनेन आश्लेषाभिलाषेण स्थगितं यथा स्यात्तथा यद्वा, तटगतस्य तस्य प्रतिबिम्बमात्मगतमालिङ्ग्य स्थगितत्वं यद्वा, आलिङ्गनाद्धेतोः स्थगितं पादयुगलमिति सम्बन्धः यद्वा, एवं वर्णयन्त्यो रागौत्कण्ठ्यात् विवशाः स्वकीयमेव भावमचेतनेष्वपि समारोपयन्त्य आहुः-नद्य इति । अयं भावः श्रीकृष्णवेणुगीतप्रभावात् नीरसास्तरुलतादयः सरसा भवन्ति सरसाश्च मधु स्रवन्ति शिला अपि द्रवन्ति नद्यश्च स्तम्भमनुभवन्ति परिवर्त्तनेन द्विगुणप्रवाहमभिवर्द्धयन्ति तदा तद्गतकमलान्यपि तद्गतपादयुगलं स्पृशन्ति तत्रेदमवसितम् ॥ १५ ॥ तिलोत्तमा विचित्रवसनामाह–दृष्ट्वेति ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

पराः प्राहुः—नद्य इति । आस्तां ज्ञानवतां कथा नद्योऽप्यम्बुप्रवाहात्मानस्तदा मुकुन्दगीतं तदुपधार्य श्रुत्वा आवर्तैरम्बुपरिभ्रमैर्लक्षितेन मनोभवेन स्मरेण भग्नो वेगो यासां ताः अत एव धैर्यलज्जादिविगमात् स्वपतिमर्णवं प्रत्यगमनाज्जलाभिवृद्ध्या ऊर्मय एव भुजास्तैर्यदालिङ्गनं तेन स्थगितं निश्चलीभूतं तटस्थितस्य मुरारेः पादयुगलं गृह्णन्ति स्वदेहेषु धारयन्ति कमलानि उपहारो यासां तान्युपायनानि ददत्य इत्यर्थः । तथा च लज्जादियोगात्तद्दुःखिता वयं मन्दभाग्या इति ॥ १५ ॥ अन्याश्चाहुः दृष्ट्वेति, अम्बुदो मेघोऽप्यातपे रामेण गोपैश्च सह व्रजपशून् सञ्चारयन्तं कृष्णं दृष्ट्वा तदुपर्युदितः प्रेम्णैव प्रवृद्धो यावत्या तदातपनिवृत्तिः स्यात्तावतीं वृद्धिं प्राप्तः सन् रसवर्षित्वेन तापहारित्वेन सवर्णत्वेन च सख्युर्मित्रस्य कृष्णस्य स्ववपुषा आतपत्रं छत्रं व्यधात् कीदृशं कुसुमावलीभिः "मेघपुष्पं घनरस" इत्यभिधानात् सूक्ष्माभिरम्बुकणाभिर्विशिष्टमित्यर्थः । तथा चाकाशस्थो मेघोऽपि तमनुकूलयति वयन्तु तदानुकूल्यहीना निर्भाग्या इति ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे अम्ब मातरस्मिन्वने ये कृष्णेक्षणा विहगाः । विहायसो विह चेति विहादेशो गमेर्डच् । विहायसो विहादेशो वक्तव्य इति विहगो रुचिरप्रवालान्मनोहरपल्लववतो द्रुमभुजान्वृक्षस्कन्धानारुह्य मीलितदृशो विगतान्यवाचो विगतास्त्यक्ता अन्या वाचो वाण्यो यैस्ते तथा तदुदितं कृष्णोद्भूतं कलं मधुरं वेणुगीतं शृण्वन्तीति प्रायो मुनयो बताश्चर्यं । कृष्णेक्षणत्वविगतान्यवचस्त्वादिभिः साम्यात्तत्वोत्प्रेक्षणं युक्तमिति भावः ॥ १४ ॥ यदा मुकुन्देन गीतमिति मुकुन्दगीतं तत्तदा नद्य उपधार्यावर्तेनाम्भसां भ्रमेण लक्षितः सूचितो मनोभवस्तेन भग्नो वेगः प्रवाहो यासां ता आलिङ्गनप्रमुदितोर्मिभुजैः । आलिङ्गनमत्र स्पर्शनमात्रं । तेन प्रमुदिता ऊर्मय

एव भुजास्तैर्मुरारेः पादयुगलं कमलोपहाराः कमलान्येवात्मोत्थान्युपहाराः पूजासाधनानि यासां ता गृह्णन्ति भक्ता अप्येवमिति तथा नद्यो व्यदृश्यन्तेति भावः ॥ १५ ॥ अम्बुदो मेघः सख्युः कृष्णस्य सावर्ण्यस्वरादेरातपे रामश्च गोपास्तदितरे च तैः सह व्रजपशूंश्चारयन्तं दृष्ट्वा वेणुरवाकर्णनमपि भाविकार्यहेतुरिति ज्ञेयं । प्रेमप्रवृद्धं हृषितं यस्य स समञ्चितरोमाञ्चो हृषेर्लोमस्वितीट् । कुसुमावलीभिः स्वेन सह नभस्वदानीतपुष्पपङ्क्तिभिः सह स्ववपुषा पूषाच्छादकेनातपत्रं व्यधाच्चकार ॥ १६ ॥

श्रीसुबोधिनी

भगवद्वेणुनादेन नद्यादिषु जातमाह **नद्यस्तदेति, यदा मुनयो** भगवतानुगृहीता वेणुद्वारा **सर्वं** तत्त्वं ज्ञातवन्तस्**तदा नद्योपि** वयमपि **कृतार्था भविष्याम** इति **तदुपधार्य** मुनीनां ज्ञानोपदेशं निश्चित्य तत् प्रसिद्धं **मोक्षदातुर्गीतं** श्रुत्वावर्तेन भ्रमणेन मूर्च्छया **लक्षितो** योयं **मनोभवस्तेन** स्तम्भजनकेन **भग्नो वेगो** यासां, स्वाभाविकी **गतिः** कुण्ठिता, **मनोभवोत्र** विवेकः, अचेतनप्रायाणामपि भगवत्सम्बन्धाकाङ्क्षेत्याह, न स्थितिमात्रेण तदासक्तिर्भवत्यौषधादिनापि तथा सम्भवादत आहालिङ्गनार्थं **स्थगितं** स्थिरीभूतं भगवतः **पादयुगलं कमलोपहाराः** सत्य ऊर्मिरूपैर्भुजैर्**गृह्णन्ति, स्वहृदयकमलं भगवच्चरणारविन्दे दत्वा तत् स्वयं गृह्णन्ति** नदीनामपि देवतात्वात् ताभिः सह नान्या लीला सम्भवत्यत आलिङ्गनार्थमेव स्थितिः, प्रयोजनार्थमुक्तं **मुरारेरिति, मुरो** हि जलदोषात्मकाविद्यारूपस्तस्यारित्वादवश्यं चरणसम्बन्धे नदीगतामविद्यां नाशयिष्यति ॥ १५ ॥ मेघानामाहुर्**दृष्ट्वेति आतपे** शरत्कालसम्बन्धिनि **व्रजपशून्** सर्वदा चाभ्यासयुक्तान् सर्वदा रक्षका **गोपा** अभितो रतिवर्धको **राम** एतैः सहितमेतैर्वा **सञ्चारयन्तं** सर्वसामग्रीसहितं देवतावेदसहितं धर्मसहितं **तदनु वेणुमुदीरयन्तं** सर्वेषामाधिदैविकानुद्दीपयन्तं, **सर्वशक्तिसहितो हि ताभिः सह क्रीडति** तदावश्यं **छायापेक्षितेति प्रेम्णा** भगवत्स्नेहेन सख्यपर्यन्तं गतेन तादृशेन **प्रवृद्धो** मेघः **स्ववपुषा सख्युरातपत्रं व्यधात् प्रवृद्धमुदित** इतिपाठे **प्रवृद्धश्चासौ मुदितश्च, प्रेम प्रवृद्धं** यथा भवति तथा **वोदितः,** अतः **कुसुमावलीभिः** सूक्ष्मस्वकणिकाभि"र्मेघपुष्पं घनरस" इतिकोशात्, पूर्वमनेन सख्यपर्यन्तं भक्तिः कृतेदानीमात्मनिवेदनं कृतवान्, प्रेम्णैव प्रवृद्धः श्रवणमारभ्य सख्यपर्यन्तमागतः स्नेहवशाद् वा स्थूलो जातः, **कामरूपिणस्ते यथाभिलषितं रूपं कुर्वन्ति,** प्रकृते भगवत्स्नेहाद यथाभिलषितं रूपं कृतवान् यावता सर्वेषां छाया भवति, ननु स्वस्यापि क्लेशो भवतीति किं दुःखेन तथा कृतवान् ? नेत्याह **मुदित** इति, **यावज्जन्म यो भक्त्यैव** वर्धते सोन्ते **कृतात्मनिवेदो भवति,** लोकोपकारित्वान् नोलत्वाज् जीवनदातृत्वाच्च सख्यमिति केचित्, सर्वस्वमपि दत्तवानिति ज्ञापयितुं **कुसुमावलीभिः सहे**त्युक्तं, अनेन साक्षाल्लक्ष्म्या सह भगवतः क्रीडा सूचिता, अत एवाग्रे पुलिन्दीनां स्तोत्रं भविष्यति, गोपैर्गोचारणं बलभद्रेण रक्षा वेणुनादेन प्रबोधनं पश्चाद् रमणमिति शेषवदस्यापि **सखित्वात्** तादृशेपि समये छायाकरणं युक्तमेव ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

नद्यस्तदेत्यत्र, सर्वतत्त्वं ज्ञातवन्त इति । भगवत्स्वरूपात्मकरसतत्त्वं ज्ञातवन्त इत्यर्थः ॥ १५ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नद्यस्तदेत्यत्र **तदुपधार्ये**त्येतावत आवृत्तिरित्याशयेनाहु**र्निश्चित्येति, श्रुत्वेति** अत्रत्यकामस्वरूपमाहु**र्मनोभवोत्र विवेक** इति, विवेकसहितोत्र, मनोभवो न तु देवस्त्रीणामिव नुन्नसारत्वजनकः, तथा सति तासामिव **नदीनामपि** भगवत्यनागमनं स्यादितिभावः, **विवेक** इति "अर्श आद्य"जन्तम्, विवेकसहित इत्यर्थः, **नदीनामपि देवतात्वादि**ति स्वीकृतमानुषभावस्य तासामपि मानुषत्वेनावतारं विना भोग्यत्वाभावादित्यर्थः, अप्सरसामपि देवीत्वादेवानागमनमुक्तमित्यपिशब्दः **नदीगतामविद्यामि**ति भगवदनुपयोगिदेहसम्बन्धमित्यर्थः ॥ १५ ॥ दृष्ट्वेत्यत्र **सर्वशक्ती**ति ज्ञानक्रियाशक्तिसहित इत्यर्थः ॥ १६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

नद्यस्तदेत्यस्याभासे **भगवद्वेणुनादेन नद्यादिषु जातमाहे**ति **नद्यादिष्वि**त्यत्रादिपदेन सरोवरह्रदा गृह्यन्ते, यद्यपि मूले **नदीपदमात्रमस्ति तथापि व्रजे** नद्यन्तरस्याप्रकटत्वात् केवलं **श्रीयमुनाया** एव विराजमानत्वान् नद्य इतिबहुवचनेन सरोवरादीनां ग्रहणमिति ज्ञापयितुं **नद्यादिष्वि**त्युक्तम् ॥ १५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'आस्तां चेतनकथा, अचेतनवृत्तं शृणुत' इत्याशयेनान्या आहुः–नद्य इति । तदा नद्यः वेणुनादसमये मुकुन्दस्य वेणुगीतमुपधार्य श्रुत्वा आवर्तैः परिभ्रमैर्लक्षितेन सूचितेन मनोभवेन कामेन भग्नो वेगो यासां ताः, आलिङ्गनेन स्थगितमाच्छादितं यथा भवति तथा ऊर्मय एव भुजाः तैः कमलोपहाराः कमलान्यपहरन्त्यः, मुरारेः श्रीकृष्णस्य पादयुगलं गृह्णन्ति धारयन्ति ॥ १५ ॥ आतपे घर्मे रामेण गोपैश्च सह व्रजपशून् संचारयन्तमनु गवां पश्चाद्भागे वेणुमुदीरयन्तं श्रीकृष्णं दृष्ट्वा प्रथमं तदुपरि उदितः पुनः प्रेम्णा प्रवृद्धश्च अम्बुदो मेघः कुसुमावलोभिः पुष्पवृष्टिभिः सह सख्युस्तस्य वपुषा आतपत्रं व्यधात् छत्रं विहितवान् । लोकार्तिहरणशीलत्वश्यामत्वादिसाम्यात् मेघस्य कृष्णसखित्वं बोध्यम्, तथा देवैः कृता पुष्पवृष्टिर्मेघकृतत्वेनोक्तेति च बोध्यम् ॥ १६ ॥

अन्वितार्थप्रकाशिका

नद्य इति ॥ आस्तां चेतनानां कथा । नद्योऽपि तदा वेणुनादसमये मुकुन्दस्य वेणुगीतमुपधार्य श्रुत्वा आवर्त्तैः परिभ्रमैर्लक्षितेन सूचितेन मनोभवेन कामेन भग्नो वेगो यासां ताः आलिङ्गनेन स्थगितमाच्छादितं यथा भवति तथा ऊर्मय एव भुजाः तैः कमलोपहाराः कमलान्युपहरन्त्यः मुरारेः श्रीकृष्णस्य पादयुगलं गृह्णन्ति धारयन्ति । त्यक्तलज्जाधैर्यतया समुद्रं स्वं पतिं प्रत्यपि न गच्छन्ति ॥ १५ ॥ दृष्ट्वेति ॥ आतपे घर्मे रामेण गोपैश्च सह व्रजपशून् सञ्चारयन्तमनु गवां पश्चाद्भागे वेणुमुदीरयन्तं श्रीकृष्णं दृष्ट्वा विद्युन्नयनैरिति शेषः । प्रथमं तदुपरि उदितः पुनः प्रेम्णा प्रवृद्धश्च अम्बुदो मेघः कुसुमावलीभिः पुष्पवृष्टिभिः सह सख्युः कृष्णस्योपरि स्वस्य वपुषा आतपत्रं व्यधात् छत्रं विहितवान् । लोकतापहरणादिसाम्यात् मेघस्य कृष्णसखत्वम् । देवैः कृता पुष्पवृष्टिर्मेघकृतत्वेनोक्ता । यद्वा । "मेघपुष्पं घनरसः" इति जलस्य मेघपुष्पत्वकथनात् जलकणा एव पुष्पत्वेनोक्ताः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

संप्रति चेतनाचेतनानामपि परमचेतकेन श्रीकृष्णस्वरूपेण तच्छब्दस्पर्शादिना च स्थावराणामपि जंगमभावं सूचयंत्यः अन्याः प्राहुः नद्य इति नद्यः तन्मुकुंदगीतं उपधार्य आकर्ण्य तदा श्रवणसमये आवर्त्तैः जलभ्रमरैः लक्षितः सूचितो यो मनोभवः कंदर्पस्तेन भग्नो वेगः प्रवाहरंहो यासां ताः कमलोपहाराः कमलान्येवोपहारा उपायनानि यासां ताः उपहारान् अर्पयन्त्यः सत्यः ऊर्मयस्तरंगा एव भुजास्तैः मुरारेः पादयुगलं आलिंगनेन स्थगितं वेष्टितं यथा भवति तथा गृह्णंति बिभ्रति अतो नद्योपि पुरुषोत्तमस्संबंधेन धन्या इत्यभिप्रायः ॥ १५ ॥ श्रीकृष्णे मेघस्यापि प्रेमोद्गमं वर्णयंत्यः प्राहुः दृष्ट्वेति । आतपे रामगोपैः सह पशून् चारयंतं वेणुं वंशीं उदीरयंतं वादयंतं श्रीकृष्णं दृष्ट्वा अनु पश्चात् अतिसुकुमारमूर्तिं प्रात्यातपव्यथाऽसहनतया लोकपालनादिस्वभावसादृश्यात् सख्युः श्याममूर्त्तेर्वसुदेवनंदनस्योपरि उदितः प्रादुर्भूतः अंबुदो मेघः प्रेम्णा प्रवृद्धः सन् । कुसुमावलीभिः प्रसूनपंक्तिसदृशैर्जलबिंदुभिः सह स्ववपुषा अभ्रैः छत्रं व्यधात् कृतवान् अतो मेघस्यापि परमभाग्यमित्याशयः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आस्तां चेतनानां कथा इत्यभिप्रायेणाहुः ॥ नद्य इति ॥ तदा तस्मिन् समये, नद्योऽपि, यथा चेतनास्तद्वदचेतना ध्रुयोऽपीत्यर्थः । तन्मुकुन्दगीतं श्रीकृष्णसंबन्धि वेणुगीतं, उपधार्य श्रुत्वा, उत्प्रेक्षामात्राभिप्रायकमिदम् । आवर्त्तैः परिभ्रमैः लक्षितः सूचितो यो मनोभवः कामस्तेन भग्नो वेगो यासां ताः एवंभूताः सत्यः, आलिङ्गनेन स्थगितमाच्छादितं यथा भवति तथा, ऊर्मयस्तरङ्गा एव भुजास्तैः, कमलोपहारा कमलान्युपहरन्त्यः सत्यश्च, मुरारेः श्रीकृष्णस्य, पादयुगलं, गृह्णन्ति धारयन्ति ॥ १५ ॥ दृष्ट्वेति ॥ आतपे रामश्च गोपाश्च तैः सह, व्रजपशून् संचारयन्तं, अनु गवां पश्चाद्भागे, वेणुं उदीरयन्तं, कृष्णं दृष्ट्वा, अम्बुदो मेघः, उदित उदयं प्राप्तः, तदुपरीति शेषः । पश्चात् प्रेमप्रवृद्धः स्नेहेन वृद्धिं प्राप्तः, एवंभूतः सन्, सख्युः श्रीकृष्णस्य, लोकार्त्तिहरत्वनीलवर्णत्वव्यपदेशात्सख्युरिति कथनम् । कुसुमावलीभिः कुसुमसमूहतुल्यैस्तुषारैः सह, स्ववपुषा आतपत्रं छत्रं, व्यधाच्चकार ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नद्य इति : १०.२१.१५.

नद्यस्त्विमा बहुजडस्थितयोऽपि जाता अस्मन्मनोभिलषिताऽतुलभोगभाजः ।
याः श्रीशगीतमविगीतमगाधसारं ज्ञात्वैव तत्पदयुगं द्रुतमन्वगृह्णन् ॥ २६ ॥

दृष्ट्वेति : १०.२१.१६.

दृष्ट्वाऽऽतपस्थितमथाच्युतमात्मरूपं स्वात्मातपत्रमकरोदिति युक्तमब्दः ।
कामातपत्रमपि कृष्णघनं वयं तु प्राप्याप्यनातपजुषो न सखीति चित्रम् ॥ २७ ॥

कृष्णप्रिया

प्रिय सखी ! श्रीवृन्दावन के पक्षीवृन्द की महिमा सुनो ! अब सरिताओं की स्थिति को सुनिए । जब श्रीविहारी वंशी बजाते हैं और नदी संज्ञक गौओं को, अयि यमुने ! अयि सरस्वती ! अयि गङ्गे ! यह नाम लेकर बुलाते हैं तब समान संज्ञक नदियां, श्रीमुकुन्द भगवान के मुख कमल से निज निज नाम सुनकर और अति मधुर वेणुनाद सुनकर उनके हृदयों में उत्पन्न हुई कृष्णमिलन की एवं श्रीकृष्ण समालिङ्गन की उत्कट लालसा का दर्शन होता है, इसी वेगावेश के ही कारण उनका प्रवाह अटक गया, प्रवाह रूकने से उसमें होने वाले पानी के भँवर स्थिर हो गए । अब ये सरिताएँ अपनी तरङ्गो के हस्तो से प्रभुजी के चरणकमलों को पकड़कर कमल-पुष्पों की पूजा चढती है और श्रीठाकुरजी का आलिङ्गन कर रही है । सखी री ! मुझे तो ऐसा लगता

है कि प्रभु के श्रीचरणों में अपने हृदयों को ही निछावर करती है ।।१५।। चलो सखी ! और बात सुनो, कविवृन्द कहते हैं कि मेघ संत है, उनका सर्वथा सुयोग्य है, देखो ? जब श्रीमेघ ने देखा कि श्रीव्रजविहारीजी और श्रीबलरामजी ग्वाल-ब्रालों के साथ तेज धूप में गौएँ चरा रहें हैं और वंशी बजाते जा रहे हैं, तब उन बादलों के हृदय में प्रेम उमड़ आता है । वे मेघ मंडराने लगते हैं और वे श्यामल मेघ मेघश्याम श्यामसुन्दरजी के श्रीविग्रह पर अपने शरीर को ही छत्र बनाकर आकाश में तंबु की नाई तान देते हैं। सखी मैं मेघ की अधिक क्या स्तुति करूँ ! बलभद्रजी श्री श्याम सुन्दर जी के श्री अङ्गों की और गो-गोपबालों के शरीर की शीतलता के लिए नन्हो नन्ही फुहियों की वृष्टि करते हैं तब तो ऐसा मालुम हो रहा है कि उन सबके उपर बकुल कुन्द आदि श्वेत कुसुमों की वृष्टि हो रही है ।। १६ ।।

पूर्णाः पुलिन्द्य उरुगायपदाब्जरागश्रीकुङ्कुमेन दयितास्तनमण्डितेन ।
तद्दर्शनस्मररुजस्तृणरूषितेन लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥ १७ ॥

कर्दमक्षमा

अन्वयः—दयितास्तनमण्डितेन तृणरूषितेन उरुगायपदाब्जरागश्रीकुंकुमेन तद्दर्शनस्मररुजः पुलिंद्यः आननकुचेषु लिंपन्त्यः तद् आधि जहुः "तदा ताः" पूर्णाः ।। १७ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

साहंकारमाहुः । पूर्णा कृतार्थाः पुलिंद्यः शबरांगनाः । कथमित्यत आहुः । प्रथमं दयितानां स्तनेषु मंडितेनानुलिप्तेन पुनश्च रतिसमये उरुगायस्य श्रीकृष्णस्य पदाब्जयो रागेणारुण्येन श्रीः कांतिर्यस्य तेन कुंकुमेन । पुनस्तस्य वनस्थलीषु चंक्रमणेन तृणेषु रूषितेन लग्नेन तद्दर्शनेन तथाभूतस्य कुङ्कुमस्य दर्शनेन स्मरकृता रुकु तापो यासां तास्तेन कुंकुमेनाननेषु कचेषु च कामतप्तेषु लिंपंत्यस्तदाधि कामव्यथां जहुः । अतस्ताः कृतार्था धिगन्या मादृश्यो या एवंभूतमप्याधिशमनं न लभंत इति भावः ।। १७ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

साहंकारम् सेर्ष्यम् "परेश्वरे नाहंकार ईष्याहंक्रिययोः स्त्रियाम्" इति शाश्वतः । कथमस्याग्रे ज्ञातमिति योज्यम् । इत्यत इत्यत्र । आहुरित्यस्य प्रकारमिति शेषः । तस्य श्रीकृष्णस्य । चङ्क्रमणेन पुनःपुनर्गमनेन । तद्दर्शनेन तदाधिमित्यादिषु व्यवहितस्यापि स्मरपदस्य तच्छब्देन परामर्शः "दशैते राजमातंगास्तस्यैवामी तुरङ्गमाः" इतिवद्बोध्येयः । अतः कामव्यथात्यागात् । ताः पुलिंद्यः। कृतार्थाः कृतकृत्याः । एवम्भूतम् कामव्यथारूपम् आधिशमनं मनःपीडाशांतिम् । इति भाव इति । आधिनिवृत्त्यैव शांतिर्नान्यथेति तात्पर्यम् ।। १७ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ निजभावप्रकटनमयेन पद्येन निजरसवर्णनं सङ्गतिस्त्वेवम् आस्तां तावत्तत्सखस्य मेघस्य भाग्यम् अन्त्यजस्त्रीणामपि किम्वर्ण्यमित्याहुः—पूर्णा इति । तत्र पूर्णा इत्यनेन अहो वयमपि यथा कथञ्चित्तत्सम्बन्धेन तथा भवितुं पारयामः । किन्तु नास्ति तादृग्भाग्यमिति पुलिन्द्य इत्यनेन तादृशीभ्योपि शोच्या वयमिति उरुधा वेणुना गायतीत्युरुगाय इत्यनेन निजाधैर्ये तत्कर्तृककारण-विशेषोप्यस्तीति पादाब्जयोः रागरूपं यत्तत एव हेतोरस्मादृशैकगम्यकान्त्यामोदादि श्रीविशेषयुक्तं च यत् तेन कुङ्कुमेनेत्यनेन तादृशपदाब्जस्पर्शाय मनः स्पृहयतीति दयिता तादृशनागरस्य तादृशीं विना स्थितेरसम्भवात् या काचित् प्रेयसी निगूढं विद्यते तस्याः स्तनाभ्यां मण्डितं शोभाविशेषमानीतचरं यत्तेनेत्यनेन तस्यास्तु तत्तद्विलासात्मकं तादृशं भाग्यमस्माकमतिदूराद्दूरतरमेवेति तद्दर्शनेत्यनेन तत्सम्बन्धिनोपि झटिति तत्तल्लीलानुसन्धापनेन स्वभावेनैव वा तादृशमोहनत्वं किं पुनस्तस्येति तृणेत्यनेन तादृश-जन्माप्यस्माकं भवत्विति लिम्पन्त्य इत्यादिना अहो हर्षभरस्तासामिति च बोधयन्ति प्रथमं तादृशलोभनस्वभावाकृष्टतया घ्राण-दर्शनार्थं मुखसंनिहितं नीतं ततस्तत्र लिम्पन्त्यः पश्चात् स्मरवेगेन कुचेषु लिम्पन्त्य इत्यर्थः । श्रीकृष्णाङ्गसङ्गिवस्तुदर्शनेन तद्वस्तु-मात्रस्यापि प्रसङ्गो भवत्विति जातः स्मराधिस्तत्प्राप्त्या तदंशेन शान्तो भवत्येव ततस्तासामभवदस्माकं तु न तदंशेनापीत्यर्थः ततस्ता अप्यस्मदपेक्षया पूर्णा इत्यहो दुर्भाग्यमिति भावः । अत्र तदुक्तं भवति तदिदं तासामखिलं वचनं भावमात्रावगतमपि यथावदेव तादृशगाढभावस्य दूरतोपि स्वविषयसाक्षात्कारहेतुत्वात् "यस्यास्ति भक्तिर्भगवत्यकिञ्चना" इत्यादिभ्यः अतस्तदेतदनु-वदिष्यते पट्टमहिषीभिरपि "कामयामह एतस्य श्रीमत्पादरजः श्रियः । कुचकुङ्कुमगन्धाढ्यं मूद्र्ध्ना वोढुं गदाभृतः । व्रजस्त्रियो यद्वाञ्छन्ति पुलिन्द्यस्तृणवीरुधः" इति तत्र सत्युरुगायपदाब्जरागेत्यनेन सह दयितास्तनमण्डितेनेत्युक्त्या तत्कुङ्कुमं दयितास्तन-तस्तस्य पदे लग्नमिति गम्यते सा च दयिता श्रीपदेनानूदिता तदिदं वर्णयन्तीषु तास्वपि विशिष्टा "रुक्मिणी द्वारवत्यां तु

राधा वृन्दावने वने'' इति मात्स्यादिप्रसिद्धा श्रीराधैव लभ्यते ''श्रियः कान्ताः कान्तः परमपुरुषः'' इति ब्रह्मसंहितादर्शनात् व्रजदेवीमात्राणां श्रीत्वे प्राप्ते —

''देवो कृष्णमयी प्रोक्ता राधिका परदेवता। सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परा'' ॥

इति बृहद्गौतमीये तु तदाधिक्यं दृश्यते अन्यस्याः श्रियः ''कस्यानुभावोऽस्य न देव ! विद्महे'' इत्यादौ निरस्तत्वात् रुक्मिण्याश्च तदानोमसम्बन्धादिति सङ्गमश्चायं दिवस एवेति सम्भाव्यते तत्रैव पुलिन्दीनां भ्रमणात् कुङ्कुमानां लेपनकर्मणार्द्रत्वावगमाच्च द्वयोः सम्बन्धश्चायं न सम्भोगविशेषरूपः रासप्रसङ्गे ''भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः। वीक्ष्य रन्तुं मनश्चक्रे'' इति तत्रैव नवसङ्गमस्य प्रतीयमानत्वात् अन्यथा तत्र परीक्षार्थं पुनस्तेनोपेक्षावचनस्य असङ्गतत्वापत्तेः तदिदं वेणुप्रकरणे भणितत्वाद्वेणुसम्बन्धेनैव गम्यते उरुगायेत्यनेनैष एव हि सूचितः तस्मात् कदाचिद्वेणुकृताकर्षायास्तस्या लब्धमूर्च्छायाः मूर्च्छाशान्तये सकुङ्कुमे स्विन्ने वक्षसि सम्भ्रमतः केवलेन चरणसञ्जीवनीपल्लवेन स्पृशन्नेवाद्यापि सम्यक् सङ्कोचानपगमात् द्रुतमेव स तस्मात् निश्चक्रामेति बुध्यते ''काश्चित्परोक्षं कृष्णस्य'' इत्युक्तत्वात् यास्तु तदन्यास्तासामेव पूर्णाः पुलिन्द्य इति वचनं तासां च प्रायो जातपूर्वानुरागाणामीर्ष्यानवसरत्वादन्यसङ्गमस्फुरणेपि राग एव द्विगुणितः ''यह्य॑म्बुजाक्ष ! तव पादतलम्'' इत्याद्युक्तिस्तु कुमारीणां स्वस्मिस्तत् स्वीकृतत्वमेव ह्यत्र तत्स्पर्शतया निर्दिष्टम् अभिरमिता आनन्दिता इत्यर्थः ॥ १७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथापरस्या गोष्ठ्या वाक्यं त्रिभिः। यद्वा, पूर्ववदेकवाक्यतया व्याख्यानम्, तथा हि आस्तान्तावत् सर्वोपकारादिना सख्यप्राप्तस्य तादृशसेवाकारिणो मेघस्य भाग्यम्, अस्पृश्यत्वादिना दूरतो वर्ज्यानामप्यन्त्यजस्त्रीणां भाग्यं किं वर्ण्यमित्याहुः—पूर्णा इति। पुलिन्दीभिः सर्वा एव वनचर्य्या भिल्लाद्यन्त्यजस्त्रियः साहचर्य्येणोपलक्ष्याः, उरुधा गीयते गोपैः स्वयं वा गायति वेणुनेत्युरुगायः, दयितानां कासाञ्चित् स्तनेषु मण्डितेन भूषणतया गृहीतेन, तृणेत्युपलक्षणं शिलादिष्वपि रूषितेन, तत्तत्प्रकारश्च व्यक्तं लज्जया नाक्तं, श्रीस्वामिपादैर्व्यञ्जित एव। तदाधि कामव्यथाम्, यद्वा, तदा तस्मिन्नेव क्षणे आधिं मनोव्यथामर्थात् स्मरकृतामेव, यद्वा, तमनिर्वचनीयमाधिं श्रीकृष्णप्राप्तिमनोदुःखं जहुः। श्री शब्देन मण्डितशब्देन च श्लेषेणेदं ध्वन्यते, श्रीकृष्णवल्लभानां स्तनैरनुलेपनद्वारा भूषितेन सौन्दर्य्यातिशयं नीतेन, पुनः श्रीकृष्णपदाब्जसम्पर्केण कान्तिविशेषं प्राप्तेन, कुंकुमेन, तृणादिभ्यः, समुद्धृत्य स्वांगेषु लिप्यमानेन सता प्रायो भूषणहीनाः कान्त्यादिरहिताश्च काष्ठशाकाद्याहरणाय वनान्तर्भ्रमन्त्यः पुलिन्द्यस्तेनैव महाभूषादिसम्पत्तेर्योग्यतां प्राप्य सर्वविधमाधिं जहुः, अन्यत्तैर्व्यञ्जितमेव, यद्वा, अहो बत श्रीवृन्दावनेऽत्र वयमेव केवलं भाग्यहीना इत्याहुः—पूर्णा इति, उरुगायपदाब्जयो रागोऽनुरागो यस्यास्तस्याः श्रियः कुंकुमेन श्रीभगवद्विषयकप्रेम्णा तत्सन्तोषणार्थं तोषोत्पादितेन कुंकुमजातिविशेषेणेत्यर्थः। अतः स्वसन्तोषणार्थमेव दयितानां युष्मादृशीनामपि स्तनेषु प्रथममण्डनतयानुलिप्तेन, यद्वा, उरुगायपदाब्जरागवदरुणा श्रीर्यस्य कुंकुमस्य तेन, तत्पादाब्जराग-सादृश्येन प्रीत्या दयिताभिः स्वस्तनेषु मण्डनतया गृहीतेन, पश्चात्तस्योरुगायत्वेन विचित्रवेणुगीतेन वनान्तः समाकृष्टानामितस्ततो भ्रमन्तीनां तदप्राप्तिवैकल्येन वनेषु विलुठन्तीनां स्तनेभ्यस्तृणेषु रूषितेन पूर्णा भूतगात्रा अपि श्रीभगवता स्वयमेव वा ताभिस्तृणद्वारा स्तनमण्डनात्, तृणेषु रूषितेनेति केचित्, तस्य कुंकुमस्य दर्शनमात्रेण तादृशत्वविचारतस्तत्स्वभावतो वा स्मररुजो यासां तथाभूताः सत्यस्तृणेभ्यः समुद्धृतेन तृणसहितेनैव कुंकुमेन प्रथमं सौरभ्यग्रहणाद्यर्थमाननेषु पश्चात् स्मरवेगेन कुचेषु लिम्पन्त्यो लेपमात्रं कुर्वन्त्यः सत्यस्तत्कुंकुमं जहुः, कुतः ? आधिमाधिहेतुत्वादेवाधिरूपमित्यर्थः। प्रेमभरोत्पादनेन व्याकुलतया तद्दुःखपरिहाराय वाऽत्यजन्निति भावः। अहो बत कष्टम्, ईदृश्यो वयमधन्याः परमार्त्तिसिन्धुमग्नाः, यासामीदृशेनापि सम्बन्धेनान्येऽपि जना ईदृशीमार्त्तिं लभमाना अस्मद्गात्रगन्धसम्पृक्तद्रव्यमपि शंकया परित्यजन्तीति तात्पर्य्यम्, तत्कुंकुमसम्बन्धेन तासु महालक्ष्म्या आवेशाच्छ्रीभगवदनुग्रहविशेषेण तदाधिं ता जहुः। अत एव पूर्णाः कृतार्था इति श्रीवल्लभचरणाः। यद्वा, अब्जरागः, पद्मरागः, तस्य श्रीरिव श्रीः कान्तिर्यस्य तेन; यद्वा, अब्जस्य राग इव रागो यस्य तेन श्रीकुंकुमेन, कथम्भूतेन ? दयितास्तनमण्डितेन; पुनः कथम्भूतेन ? उरुगायपदा उरुगायं पद्यते प्राप्नोतीत्युरुगायपत् तेन। शेषं प्रथमार्थवदेव, श्लेषेणेदमप्युक्तं स्यात्, तादृशकुंकुमदर्शनेन श्रीभगवत्स्मरणतस्तदप्राप्त्या तादृशी पीडा अभूत्, यत्राशेषदुःखातिरेकोऽन्तर्भूतः, तत्कुंकुमस्पर्शेन च तादृशं सुखं जातं येनाशेषानन्दसम्पन्माधुर्य्यं तत्रान्तर्भूतम्, अत एवाशेषाधिं जहुः, भगवतस्तदीयानां वा तासां सम्बन्धेन पूर्णाश्च बभूवुरिति। एवं तासां निजाधिः शान्तः, अस्माकञ्च निजाधिर्वर्द्धत एव, अतस्ताभ्योऽप्यतिन्यूनत्वेन सर्वथा सर्वेभ्यो जीवेभ्यो भाग्यहीना वयमेवेति ॥ १७ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पूर्णाः कृतार्थाः पुलिन्द्यः वनचरस्त्रियः दयितास्तनमण्डितेन गोपीस्तनमण्डितत्वात् कृष्णपदाब्जसङ्गः ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

शबराङ्गनानामपि भाग्यं वयं न लेभिमहे इति ससीत्कारमाहुः—पूर्णा इति। पुलिन्द्यः शबराङ्गनाः पुण्याः कृतार्थाः कुतः ? तत्राहुः उर्वधिकं गीयते मुनिभिरित्युरुगायः कृष्णः तस्य पदाब्जयो रागेणारुण्येन श्रीरौज्वल्यं यस्य तेन श्रीकुङ्कुमेन कथम्भूतेन

दयितायाः महालक्ष्म्याः स्तनयोर्मण्डितेनालङ्कृतेन तथा क्रीडासमये उरुगायपदाब्जरागश्रीकुङ्कुमस्य भक्त्या स्तनयोर्निहितत्वादुरुगायपदाब्जयोः कुङ्कुमसंबन्धः उरुगायपदाब्जाभ्यां वनसञ्चारदशायां तृणेषु रूषितेन लिप्तेन आननेषु कुचेषु च लिम्पन्त्यः कथम्भूताः सत्यः तस्य कुङ्कुमस्य दर्शनेन स्मरकृता रुक् यासां तथाभूताः सत्यः आननेषु कुचेषु च लिम्पन्त्यस्तदाधि कामव्यथां जहुः अतस्ताः पूर्णा इति भावः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पुलिन्द्यः शबरस्त्रियः तस्मात्कामादुत्पन्नमाधिं मनोदुःखं जहुरित्यन्वयः । कीदृशाः पूर्णाः कृतकृत्याः तस्य कृष्णस्य दर्शनेन जातस्मर एव रुक् रोगो यासां ताः क्रीडासमये तृणेषु रूषितेन दिग्धेन दयितायाः प्रियतमायाः गोप्यास्तनमण्डितेन स्तनयोः घट्टितेन उरुगायस्य हरेः पादाब्जयोः स्वतः अरुणयोरपि रागजननार्थं लिप्तेन श्रीमता कुङ्कुमेनाननकुचेषु लिम्पन्त्यः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पूर्णाः पुलिन्द्य इति । अत्र दयिताः काश्चिद्वेणुनाकृष्टाः मूर्च्छिताश्च तासां मूर्च्छाशान्तये येन चरणपल्लवेन स्पर्शमात्रं कृतमिति विवेचनीयं स्वभावसङ्गोपनाशक्तिपक्षे रमणं रामः क्रीडा तद्युक्तस्य कृष्णस्य चरणयोः स्पर्शेन प्रमोदो यस्य तयोश्चरणयोः ॥ १७–१८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत् क्रमसन्दर्भः

हे सखि ! अस्मिन् पुलिन्द्योऽप्यतिधन्या इति पुनः प्रौढा एव, राधासख्य एवोचुः—पूर्णाः पुलिन्द्य इत्यादि । पुलिन्द्य इति भौमवैकुण्ठोपलक्षणम् अन्यथा अभौमे तासामसम्भवात् । एतेनोक्तप्रकाराणां व्रजे देवीनामतिरिक्ता अपि भौमस्त्रियोऽपि तत्र वर्तन्ते । ता अपि कृष्णे अनुरक्ता मन्तव्याः । अतो भाषागीतादौ जलाहरणदधिदुग्धादिविक्रयपराणामपि यदनुरागकथाः श्रूयन्ते, न ता अवधीरयितव्याः । सर्वमेव सम्भवत्यधिकारभेदात्, प्रेमैवास्वाद्यः । पुलिन्द्यः पूर्णाः कृतार्थाः । कुतः ? इत्याहुः - उरुगाय पदाब्जयोर्यो रागस्तत्र यत् श्रीकुङ्कुमं श्रीयुक्तं कुङ्कुमम्, अथवा उरुगाय–पदाब्जराग–जनकं यच्छ्रीकुङ्कुमं तेनाननकुचेषु लिम्पन्त्य आत्मनामित्यर्थः । तदाधिं स्मररुक्कृतमाधिं जहुः । अतः पूर्णाः । कीदृशेन ? दयितायाः श्रीराधायाः स्तनाभ्यां स्तनयोर्वा मण्डितेन, पक्षे–भावे क्तः, दयितेति वक्त्रीणां राधासखीत्वं स्पष्टम् । ननु ताभिस्तत् कुतो लब्धमित्याह–तृणरूषितेन तृणलग्नेन । अयं भावः—दयितास्तनकुङ्कुमं यच्चरणयोर्लग्नं तत्प्रेम्णा तन्न प्रक्षाल्यते चरणराग एवं तल्लीनं जनैश्च न लक्ष्यते; तत्तु वृन्दावने पादत्राणं विनैव व्रजतश्चरण-स्पर्शेन तृणान्यपि स्निह्यति, तेन तेषु लग्नं भवति । तदन्वेषणपराः पुलिन्द्यो हि तन्मर्यादां जानन्तीति, तथा वयन्त्वपूर्णा इति निर्वेदः ॥ १७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पुनर्मुग्धा ऊचुः—हे सख्यः ! अस्मभ्यः पुलिन्द्योऽपि धन्याः पूर्णाश्च, वयन्तु ताभ्योऽधमा इत्याहुः–पूर्णा इत्यादि । दयिता राधा तस्याः स्तनयोर्मण्डितेन मण्डनेन 'भावे क्तः', उरुगायपदाब्जयो रागस्तेन श्रीर्यस्य तेन कुङ्कुमेन आननकुचेषु लिपन्त्यः तद्दर्शनेन स्मररुक् यासां तास्तथाभूताः सत्यस्तदाधिं स्मररुजा य आधिस्तं जहुः । अतः पूर्णाः तासां तत्प्राप्तिः कुतः ? इत्याह–तृणरूषितेन तृणलग्नेन तथाविधान्याननेषु कुचेषु च कुर्वन्त्यः खेदेन, तेषु तेष्वेव तृणेषु कुङ्कुमस्य सञ्चार इत्यर्थः । तेनैव ताः श्रीकृष्णलिङ्गिता इति मन्यमानाः कृतार्थाः, वयन्तु तथा कर्त्तुमपि न शक्नुमः, स्वातन्त्र्याभावात्, तदस्मान् धिगिति निर्वेद-ग्लानिशङ्कादैन्यानि ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इदानीं सौन्दर्य्यादिवेणुगानादिरूपगुणावप्यनपेक्षमाणं किञ्चित् सम्बन्धमात्रेणैव तन्मोहनत्वं प्रतिपादयन्त्यः प्रेम्णः सप्तम्या भूमिकाया महाभावस्य मादनाख्यं महासारं भागमभिव्यञ्जयन्त्यः श्रीवृषभानुकुमारीचरणपङ्कजद्युतय आहुः - पूर्णा इति । पुलिन्द्यः शबराङ्गना एव पूर्णाः वयं त्वपूर्णा एवेत्यतस्तदीयं तयोर्जिज्ञासमानाश्चिकीर्षामि इत्यनुरागो ध्वनितः । ननु, केन पूर्णास्तत्राहुः उरुगायपदाब्जस्य रागो रञ्जनं यत्र तेन श्रीकुङ्कुमेन ननु तत्पदाब्जगतं तत्कुङ्कुमं कुतस्त्यन्तावत्तत्राहुः दयितास्तनमण्डितेन अतस्तदीयपरमसौभाग्यस्य स्तुतावभिलाषे च साहसं कर्तुमशक्नुवतीभिरस्माभिः पुलिन्द्य एव स्तूयन्त इति भावः । यद्यप्यत्र दयिता सैव स्वयं श्रीवृषभानुकुमार्य्यैव तदप्यनुरागाधिक्येनैव तदमाननम् ननु, तेन पुलिन्दीनां तासां किं तत्राहुः तृणेषु रूषितेन लग्नेन दयितासम्भोगानन्तरं कृष्णस्य वनविहारादिति भावः । ननु, ततोपि किं तत्राहुः तस्य तृणलग्नकुङ्कुमस्य दर्शनेन स्मररुक् कन्दर्पपीडा यासां ताः न जानीमहे कृष्णदर्शने तासां किमभविष्यदिति भावः । ततश्च कृष्णाङ्गसौरभ्यजिघृक्षया आननेषु तत्कृतसम्भोगलिप्सया कुचेषु लिम्पन्त्यः सत्यः कृष्णसम्भुक्तम्मन्यास्तदाधिं कन्दर्पपीडां जहुः अहो तत्कुङ्कुमस्याप्ययं कोपि शक्तिविशेष इति भावः। वयं तु तच्चापि जन्ममध्येपि सकृदपि न प्राप्नुम इति भावः । पद्यमिदं श्रीमदुज्वलनीलमणौ मादनमधिकृत्य सदा भोगेपि तद्गन्ध-

मात्राधारस्तुतिर्यथेत्यत्रोदाहृतम् । सदा भोगेपीति मादनस्य भावसमष्टित्वात् एव सम्भोगाः सर्वे विहाराश्च मादने वर्त्तन्त एव अत्र विहारोपि सम्भोगादीनां सहसैव कृष्णस्याविर्भावात् तेन सह ज्ञेयः अत एवात्र प्रकृते वर्णयन्त्योऽभिरेभिरे इत्यत्र सहसैवाविर्भूतं कृष्णमालिङ्गितवत्य इत्यप्यर्थमाहुः—

"सर्वभावोद्गमोल्लासी मादनोऽयं परात्परः । राजते ह्लादिनीसारो राधायामेव यः सदा" ॥ इति

तत्रैवोक्तेरन्यवक्तृकत्वेनापि नेदं व्याख्येयम् ॥ १७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या आहुः—हे सख्यः पुलिन्दानां शबराणां स्त्रियः पूर्णाः प्राप्तसर्वपुरुषार्थाः पूर्णत्वे हेतुमाहुः प्रथमं दयितानां प्रियाणां स्तनेषु मण्डितेनानुलिप्तेन पुनश्च स्तनपदाब्जसंयोगतः उरुगायस्य उर्वधिकं गायते यः श्रीकृष्णस्तस्य पादाब्जयोः रागेणारुण्येन श्रीः कान्तिर्यस्य तेन कुङ्कुमेन पुनस्तस्य वृन्दावने चङ्क्रमणेन स्तनेषु रूषितेन लग्नेन आननेषु कुचेषु च कामतप्तेषु लिम्पन्त्यस्तस्य कामस्याधि व्यथां जहुः, तादृशाध्युत्पत्तिस्तासां कुत इत्यत आहुः—तद्दर्शनस्मररुज इति । तस्य तृणरूषितस्य कुङ्कुमस्य दर्शनेन स्मररुक् कामतापो यासां ताः ॥ १७ ॥

श्रीरामकृष्णकृता प्रेममञ्जरी

श्रीभगवदवतारावसरे खलु श्रीवृन्दावनक्रीडा द्विविधा एका रहोविहारात्मिका द्वितीया गोपाललीलात्मिका च तदुक्तं कृष्णयामले—

"एकेन वपुषा गोपप्रेमबद्धो रसाम्बुधिः । अन्येन वपुषा वृन्दावने क्रीडति राधया ॥
गोपवेषधरो गोपैर्गोपीभी रसविग्रहः । शृङ्गारोचितवेषाढ्यः श्रीमान् गोपालनारतः ॥
एवं प्रकाशद्वैविध्ये स्थिते नित्यविहारिणाम्" ॥

प्रकटप्रकाशेन सहैकां गच्छता प्रकटप्रकाशेन स्वेच्छया परिजनेच्छया वा तत्तदभिमानेन सा सा क्रीडा सम्पाद्यते परिजना अपि तथाविधा एव नित्यसिद्धास्तां तां क्रीडां प्रकाशैक्येन प्रकाशभेदेन वा समास्वादयन्ति सम्पादयन्ति च कदाचित्साधकानुग्रहाय विप्रलम्भेनापि निजाभिलाषं वर्द्धयन्तस्तामेव पुष्णन्ति राधाकृष्णावपीति तथैव सुधानिधौ श्रीहितचरणैः "श्रीमद्राधे त्वमथ मधुरं श्रीयशोदाकुमारे प्राप्ते कैशोरकमतिरसमर्हती साधुयोगम् । इत्थं बाले महसि कथया नित्यलीलावयः श्रीर्जातावेशप्रकटसहजा किन्नु दृश्या किशोरी" ॥ इति भविष्ये कार्त्तिकप्रसङ्गे ।

बाल्येऽपि भगवान्कृष्णः कैशोरं रूपमाश्रितः । रेमे विहारैर्विविधैः प्रियया सह राधया ॥ इति ॥

पूर्णा इति पुलिन्द्यः "भृङ्गी मल्ली मतल्ली च पुलिन्दकलकन्यकाः" इति कृष्णयामलोक्तेः पूर्णाः पूर्वोक्तप्रेमसम्पन्नाः उरुधा वेणुना गायतीत्युरुगायः उरुर्गायो यस्येति वा वस्तुत उरुधा गीयतेऽस्माभिरिति यद्वा उरुरस्मद्धृदयङ्गमो गायो निजप्रियानुगतिरूपं यशो यस्येति काचिदियं नववधूः श्रीकृष्णेन प्रागपरिचिता श्वश्र्वादिभिः पतिमन्नादिकं दत्वैकाकिन्यैव वनं प्रेषिता न चानयापि कृष्णपरिचयः कृतः दूरतरा वा यान्ती तां निभाल्य काननान्तर्निकुञ्जे निलीय वेणुवादितः सचमत्कारं तथाऽवलोकितः ततः मूर्च्छिता सा तद्गतिगमनात्प्रागेव परमदयालुना तत्र समागत्य उरसि पदाब्जमर्पितं किमियं जीवति न वेति आयान्तं पतिं दृष्ट्वा द्रागन्तर्हितेन परमहितेन स्थितं तेन चैवं तर्हि तमियमत्र मूर्च्छिता कयापि वनदेवतयाक्रान्तेयमिति तदाराधनेन प्रसादनीया सा इति दधिभक्तबलिमादाय सङ्कल्पयति यद्वा इह यो वसति स तृप्यतु मम दयिता यद्विलोकने ज्वरिता इति बलिमुरुतिगोपे विहसिति विटपान्तरे कृष्णः ततः सेकादिना सा प्रबोधिता तदिदं पुलिन्दीभिर्दृष्टं यद्वा कस्मिंश्चिद्विहारे पुरुषायितकेलिमनुशीलयन्त्या श्रीराधया विहारश्चातस्य नायिकानुरूपमनुभवतः श्रीहरेः पुरुषायितत्वाभिमानेनैव तदनुकुर्वत्या तत्कर्त्तव्यमखिलमप्यनुष्ठितम् यथा तेन तस्याश्चरणपरिचरणं क्रियते तथा तया तस्यापि कृतम् अभिलाषश्चोभयोर्दर्शितं श्रीसुधानिधौ "त्वयि श्यामे नित्यप्रणयिनि विदग्धे रसनिधौ प्रिये भूयो भूयः सुदृढमनुरागो भवतु मे । इति प्रेष्ठेनोक्ता रमण मम चित्ते तव वचो वदन्ती सुस्मेरा मम मनसि राधा विलसतु" यद्वा सुरतश्रान्तं प्रियतमं दयते तदनुकरणेनानुगृह्णातीति दयिता एवं च तदनुकरणेन पादसंवाहनमप्यविरुद्धं, तदाह भरतः "प्रवृत्ते रतिचक्रे तु न वा शास्त्रं न वा क्रमः" इति, एवं च श्लिष्टैः पदैः पिशुनेन च रहस्यस्तित्यालङ्कारिकानुमतिमाश्रित्य वास्तवार्थोऽयम् उरुर्नानाप्रकारः कामबीजादिरूपेण श्रीराधेति साक्षान्नाम्ना वा गायो गानं वेण्वादौ यस्याः सा उरुगाया श्रीराधैव तस्याः पदाब्जयो रागस्य श्रीर्यस्मिंस्तत्कुङ्कुमं तेन तथा दयित एतद्दयिता रूपस्तस्य स्तनाभ्यां मण्डितेन इति दाम्पत्याख्योपि सूचितः तथा पट्टमहिषीणामभिलाषोपि यथा—

कामयामह एतस्य श्रीमत्पादरजः श्रियः । कुचकुङ्कुमगन्धाढ्यं मूर्द्ध्ना वोढुं गदाभृतः ॥
व्रजस्त्रियो यद्वाञ्छन्ति पुलिन्द्यस्तृणवीरुधः । गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥

अनयोरर्थः श्रीमत् नित्यं नवनवायमानसुषमावत् श्रिय इति श्रीरत्र परमरमा श्रीराधैव "आत्मना रमया रेमे" इति गोपालपटले तामुद्दिश्यैव रमादिशब्दप्रयोगात् सामान्यायाः श्रियो "यद्वाञ्छया श्रीर्ललनाचरत्तपो विहाय कामान् सुचिरं धृतव्रता" इत्यादिना साधककोटयनुप्रवेशात्तदलाभश्रवणात् रुक्मिण्याद्यास्तु तत्रैव वर्त्तमानाः व्रजस्त्रीभिरवाञ्छितत्वाच्चानुपयोगेन पारिशेष्यात् तत्सम्बन्धस्य ताभिः सापत्न्याभासेनेर्ष्योदयात् मूर्ध्नि धारणानर्हत्वाच्च गदेति व्यक्तं राधानाम गायतीति गदा वंशी तां बिभर्त्ति तस्य व्रजस्त्रियश्चैताः पुलिन्दीसहपाठात्पूर्वनिर्दिष्टा नित्यसख्य एव व्यञ्जिताः एवं च वक्रीणामपि तत्समानभावापन्नत्वात् सत्यमेवाभिमतं स्कान्दभागवतमाहात्म्यादौ श्रीकालिन्द्यपदेशेन तासां तल्लाभश्रवणाच्चेति ॥ १७ ॥

श्रीमत्कृष्णदासकृता श्रीगणदीपिका

रङ्गवल्ली सारङ्गी प्रत्याह — पूर्णा इति । "भृङ्गी मल्ली मतल्ली च पुलिन्दकुलकन्यकाः" इति कृष्णयामले उरुधा वेणुना गायतीति उरुगायः उरुर्गायो यस्येति वा । यद्वा, उरुः अस्मद्धृदयङ्गमो गायः प्रियानुगतिरूपं यशो यस्येति वा यद्वा उरुधा गीयतेऽस्माभिरिति वा तस्य पदाब्जयोः रागस्य श्रीः शोभा यस्मिन् तत् कुङ्कुमं तेन परिपूर्णा इति सम्बन्धः ॥ १७ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अथ मादनाख्यं महाभावमभिव्यञ्जयन्त्यः श्रीमत्याः सख्यः परस्परमाहुः — पूर्णा इति । हे सख्यः ! पुलिन्द्यः शबराङ्गना एव पूर्णा वयन्तु अपूर्णा इत्यर्थः । तथा च तदीयं तपश्चिकीर्षाम इति भावः । ननु केन ताः पूर्णा इत्यत्राहुः उरु बहुविधं वेणुना गायतीत्युरुगायो नन्दसूनुस्तत्पदाब्जयो रागो रञ्जनं यत्र तेन श्रीकुङ्कुमेन शोभनजा गुडेनेत्यर्थः । ननु तत्पदाब्जगतं तत्कुङ्कुमं कुतस्त्यं तत्त्राहुर्दयितेति अतस्तत्प्राप्तिरहिताभिरस्माभिस्ताः पुलिन्द्य एव स्तूयन्त इति भावः । ननु तेन पुलिन्दीनां किं तत्राहुः तृणेषु रूषितेन लग्नेनेति दयितासम्भोगोत्तरं कृष्णस्य वने विहारात् तेषु तल्लग्नता ननु ततोऽपि किं तत्राहुः तस्य तृणरूषितस्य कुंकुमस्य दर्शनेन स्मररुक् कन्दर्पपीडा यासां ताः कृष्णाङ्गसौगन्ध्यलिप्सया आननेषु तत्सम्भोगलिप्सया कुचेषु च लिम्पन्त्यस्तत् सम्भोगं मन्यमानास्तदाधि स्मरपीडां जहुरित्यहो तत्कुंकुमस्यापीयं काचिच्छक्तिरिति भावः । वयन्तु तन्मध्येऽपि सकृदपि तन्न लभामहे इति सर्वदा तत्सम्भोगेऽपि सति तदाभासमात्राधारस्तुतिर्मादनभावस्य कार्यम् ॥ १७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पुलिन्द्यः पुलिन्दानां शबराणामिमाः पुलिन्द्यः प्राग्रामफलार्पणेनास्मदार्यासपर्यां चचाराप च सतीं गतिमिति श्रुमः कथाः स एवायमिति वयमप्येतद्दृष्ट्या धन्यमूर्धन्याः स्यामेति ता आगता इति द्योतयितुं पुलिन्द्य इति ग्रन्थकृन्न्यभांत्सीदिति तात्पर्यमवधेयं । तद्दर्शनस्मररुजस्तस्य कुङ्कुमस्य यद्दर्शनं तेनाविर्भूतो यः स्मरस्तदुपद्रवरूपो रुग्रोगो यासां ताः स एव रुग्यासां ता दयितायाः कस्याश्चिद्गोपयोषितः स्तनयोर्मण्डितेन भूषणतया सम्बद्धेनोरुगायो महत्स्तुत्यस्तस्य पदाब्जाभ्यां रागोऽरुणिमा यस्य स चासौ श्रीमांश्चासौ कुङ्कुमश्च तेन । स क्व क्व चैता इत्यतो घटनप्रकारमाहुः ॥ तृणरूषितेनेति । तृणेषु मार्गगेषु रूषितेन सम्बद्धेनाननकुचेषु लिम्पन्त्यः सत्यस्तदाधिं तन्मनोभवभवमनोव्यथां यतो जहुस्तत एताः पूर्णाः कृतकृत्यास्तत्पदाब्जयो रामार्थं लितः श्रीमान्कुङ्कुमस्तेनेति वा क्रीडासमये रूषणं तृणानां मन्तव्यं । नन्वधुनाऽपि मधुनाथस्य विधुमुखीमुखानवलोकनाद्दयितास्तनमण्डिततताकथनं कथमिति चेत् । सत्यं । एकान्ततः कान्तासङ्गतिसम्भवात् । न चैतव्द्यापृतस्य बादरायणस्यैतदनुक्तौ कारणाभावादिदमनुपपन्नमेवेति वाच्यं । दयिता च योग्यतयावनिस्तस्याः स्तनाश्च पर्वता गिराववस्थाय गिरा गा आव्हयत उरुगायस्य पदाब्जरागश्रीमत्कुङ्कुमेन तत्र मण्डितेन तथा तृणरूषितेन च ता अपि पर्वतकृतनिकेता इति सम्भवीदं लेपनं । समुद्रे वसने देवि पर्वतस्तनमण्डिते । विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व म इत्यादेरिति समादधते ॥ १७ ॥

श्रीसुबोधिनी

वनवासिक्षुद्रजातीयाः पुलिन्दास्तेषां पत्न्यः **पुलिन्द्यः**, भगवन्नैकट्यात् तासामपि भक्तिर्जातेत्याह **पूर्णा** इति, सर्वापेक्षया **पुलिन्द्य एव पूर्णाः**, तासां साक्षाद्भगवच्चरणारविन्दरजस्सम्बन्धो वर्तत इति, **उरुभिर्गीयत इत्युरुगायो** भगवान् सर्वप्रमाणसिद्धः सर्वगुणपूर्णस्तस्य **पदाब्जं** चरणारविन्दद्वयं तत्र यो **राग**स्तत्सहिता **श्रीः**, महता विचारेण हि लक्ष्मीर्भगवन्तं वव्रे, तच्चरणारविन्दभक्ता या लक्ष्मीस्तस्या यत् **कुङ्कुमं** तयैव निष्पादितं दिव्यं कुङ्कुमं, अर्थात् तयैव भगवच्चरणारविन्दे दत्तं तत् पुनर्बन्धविशेषे लक्ष्म्या एव **दयिताया** रसदातृत्वेन प्रियायाः **स्तनयोर्मण्डितं** तया वा स्वहृदि स्थापितं, अथ वा लक्ष्म्या दत्तमाधिदैविकीषु शक्तिषु **स्तनेषु मण्डितं** ततश्चरणारविन्दे समागतं, अथ वा **तृणरूषितेन** तृणेन कृत्वा **कुङ्कुम**मेव मकरिकापत्रवद् **रूषितं** तदा तत् **कुङ्कुम**सहितं **तृणं** भगवद्धस्तस्थितं भूमौ पतति, **तृणेषु** वा **रूषितं** संलग्नं चरणारविन्दात्, तादृशस्य **कुङ्कुमस्य दर्शनेन** लक्ष्म्या ताभिर्वा सह भगवत्सम्भोगदर्शनेन वा **स्मर**कृता **रुग्** यासां **तास्तद्दर्शनस्मररुजः**, तदा तच्छान्त्यर्थम**ाननकुचेषु कुङ्कुमेन**

लिम्पन्त्यस्तदाधिं **जहुः** तत् कुङ्कुमं मुखे स्तनयोश्च दत्त्वा ता अपि यदोपस्थितास्तदा **तद्द्वारा** लक्ष्मीप्रवेशात् **ता अप्युपभुक्ता**स्तदाधिं जहुरतस्ताः **पूर्णाः**, इयमलौकिकी भगवत्कथा, **उरुगायेति**वचनात् ताभिरपि भगवाञ् श्रुत इति लक्ष्यते, एतद् वनगमने भवतीत्यस्माकं तदभावादपूर्णत्वमिति, कामस्तु वस्तुतो मनःपीडारूपः ॥ १७ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

पूर्णा इत्यत्र **साक्षादिति** अलौकिकदेहक्रमेण फलत्रयस्य सेवाफलोक्तस्य सम्पत्तिस्तु रजसैव भवतीति ता एव पूर्णाः, वृन्दावनस्य देवकीसुतपदाम्बुजत्वं पूर्वं व्युत्पादितम्, एतासां सततं तत्र स्थितिरतः साक्षाद्व्रजःसम्बन्धात् पूर्णा जाताः, पूर्णतास्वरूपं श्लोकान्ते निरूपयिष्यन्ति, **एतासां त्वाराधनेन** फलसिद्धिरतः साधनानुरूपमेव फलं, तद् वक्ष्यन्त्यग्रिमाध्याये "याताबला" इति श्लोके, **उरुगायेत्य**स्यावान्तरपदद्वयार्थमाहुः **सर्वेति**, **रागोनुराग** इत्यर्थः, **एतल्लक्ष्म्या** दाम्पत्याभावाद् दयितात्वं व्युत्पादयन्ति **रसदातृत्वेनेति**, **तया वेति** लक्ष्म्या स्वालङ्कारार्थमेव निर्माय स्वहृदये लिप्तमित्यर्थः, **अथवेति** शक्तिषु लक्ष्म्या प्रसादत्वेन दत्तं ताभिः स्वस्तनेषु मण्डितम्, तदा लक्ष्म्या **दयितानां** प्रियाणां शक्तीनां स्तनेषु **मण्डितेने**तिमूलार्थः, **तत इति** लक्ष्मीस्तनाच्छक्तिस्तनाद्वा बन्धविशेषे **भगवच्चरणारविन्दे** समागतमित्यर्थः, एतमेव पक्षमाश्रित्य **तृणेषु रूषित**मिति वक्ष्यते, आद्यपक्षेषु लक्ष्म्या शक्तिभिर्वा स्वस्तनस्थितं पुलिन्दीभ्यो दत्तं ताभिः स्वस्तने 'तृणेन रूषित'मिति **तृणरूषित**पदस्यार्थः, एतस्यैव पदस्यार्थान्तरमाहु**रथवेति**, अस्मिन् पक्षे भगवता **दयिताया** लक्ष्म्याः शक्तीनां वा स्तनेषु **मण्डितेने**त्यर्थः, 'कुङ्कुमेन कुचान् लिम्पन्त्य' इतिवक्तव्येपि क्वचिदप्यवयवेषु तल्लिम्पनमाधित्यागहेतुरिति कुचानामीप्सिततमत्वाभावात् कुचेष्वित्युक्तम्, आननकुचेषु स्वात्मानं लिम्पन्त्य इत्यर्थः, **लक्ष्मीप्रवेशादिति** लक्ष्म्यावेशादित्यर्थः, एतस्य कुङ्कुमस्य लक्ष्म्यसाधारणधर्मत्वात् तद्धारणे लक्ष्म्यावेशादयोगोलकन्यायेन लक्ष्मीत्वमेव सम्पन्नमितिभावः, **अत इति** रजसा योग्यतासिद्धौ कुङ्कुमधारणेन लक्ष्म्यावेशे जाते सत्युपभोगेन त्यक्ताधित्वादित्यर्थः, अस्माकं त्वाधिरस्तीतिभावः, **अलौकिकीति** अग्रिमश्लोके तथासूचनादुत्थापनभोगसामयिकीयं कथेति तत्समये तादृशकुङ्कुमप्राप्तिस्ततो लक्ष्म्यागमने सत्येताभिः सह रमणमित्येतद्रमणकथा लक्ष्म्याप्यज्ञातेत्यर्थः, **भगवान् श्रुत** इति तावत्पर्यन्तं लक्ष्मीसख्यः पुलिन्दीभिः सह **भगवत्कथां** कथयन्तीतिभावः, कामस्याधिजनकत्वं व्युत्पादयन्ति **कामो हीति**, पीडानिरूपकस्तज्जनक इत्यर्थः ॥ १७ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

पूर्णाः **पुलिन्द्य** इत्यस्य विवरणे **तद्द्वारा लक्ष्मीप्रवेशात् ता अप्युपभुक्ता** इति, इह पुलिन्दीभिः सह रमणं भगवतः "जहुस्तदाधि"मितिवाक्येनाधित्यागोक्तेः, अन्यथा श्रीसम्बन्धिकुङ्कुमस्याननकुचेषु सम्पर्के कामाधिसम्भव एव स्यान्न तु पीडानिवृत्तिः, अत आधित्यागकथनान्यथानुपपत्त्या रमणं ताभिः सह बोध्यं, रमणस्यैव कामाधिनिवर्तकत्वात्, ननु गोपिकानामपि भगवद्विषयककामवत्त्वेन धन्यत्वात् कथं **पुलिन्द्य एव पूर्ण**त्वेन स्तूयन्त इत्याशङ्कायां न कामस्य धन्यताहेतुत्वं, संयोगं विना कामस्य दुःखदत्वान् नास्माकं धन्यत्वमिति तासामाशयः, तं स्फुटयन्ति **कामस्तु वस्तुतो मनःपीडारूप** इति, वियोगावस्थायां भगवद्विषयकः कामः प्रचुरपीडामेव जनयतीति केवलं दुःखानुभवान् न धन्यत्वं, न हि क्षुत् सुखहेतुरपि तु क्षुधि सत्यामन्नभोगः सुखकरस्तद्वदितिभावः ॥ १७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्याः साहङ्कारमाहुः—पूर्णा इति । पुलिन्द्यः शबराङ्गनाः पूर्णाः कृतार्था एव । 'कथम् ?' इत्यपेक्षायामाहुः—उरुगायेत्यादिना । प्रथमं दयितानां प्रियाणां स्तनेषु मण्डितेन अनुलिप्तेन पुनश्च ताभिः क्रीडासमये उरुगायस्य 'उरुधा गीयत इति उरुगायः' श्रीकृष्णः, तस्य पदाब्जयो रागेण आरुण्येन श्रीः कान्तिर्यस्य तेन कुङ्कुमेन आननेषु स्वमुखेषु कुचेषु च कामतप्तेषु लिम्पंत्यस्तदाधिं कामव्यथां जहुरित्यन्वयः । 'कुङ्कुमं ताभिः कथं प्राप्तं ?' तत्राहुः—तृणेति । तस्य वनस्थलीषु चङ्क्रमणेन तृणेषु लग्नेन । 'तासां कामोद्दीपनं कथम् ?' तत्राहुः —तद्दर्शनेति । तस्य तृणलग्नस्य कुङ्कुमस्य दर्शनेन स्मरकृता रुक् पीडा तापो यासां ताः ॥ अतस्ताः कृतार्थाः, धिगन्या मादृशीर्या एवंभूतं मन्मथाधिशमनं न लभन्त इत्याशयः ॥ १७ ॥

अन्वितार्थप्रकाशिका

पूर्णा इति ॥ पुलिन्द्यः शबराङ्गनाः पूर्णाः कृतार्थाः । यतः प्रथमं दयितायाः प्रियाया गोप्याः स्तनयोर्मण्डितेन लिप्तेन ततश्च रतिसमये पादाभ्यां स्तनौ स्पृशतः । उरुगायस्य हरेः पदाब्जयो रागेणारुण्येन श्रीर्यस्य तादृशेन कुङ्कुमेन ततश्च हरेर्वनेषु चङ्क्रमणात् तृणरूषितेन तृणेषु लग्नेन तेन कुङ्कुमेन तस्य तृणलग्नकुङ्कुमस्य दर्शनेन स्मररुग् यासां ताः पुलिन्द्यः आननकुचेषु तत्कुङ्कुमं लिम्पन्त्यः तदाधिं तस्य स्मरस्याधिं व्यथां जहुः । अतः पुलिन्द्य एव कृतार्थाः । मादृश्यस्तु तादृशमाधिशमनमलभमानाः तदपेक्षयापि शोच्याः ॥ १७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अधुना शबरांगनानां कृतार्थत्वद्योतनेन स्वकृतार्थतां व्यंजयन्त्यः अन्याः प्राहुः पूर्णा इति पूर्वं दयितानामस्माकं गोपिकानां स्तनेषु मंडितेन लिप्तेन भूयश्च संभोगकाले उरुगायस्य पुण्यकीर्त्तेर्हरेः पादाब्जयोः रागेण रक्तत्वेन श्रीः शोभा यस्य तेन कुंकुमेन तदनंतरं वनस्थानेषु श्रीकृष्णपादन्यासात् तृणेषु रूषितेन संलग्नेन हेतुना तस्य कुंकुमस्य दर्शनेन स्मरजनिता रुक् पीडा यासां ताः पुलिंद्यः किरातयुवत्यः तत्कुंकुमं आननकुचेषु मुखेषु स्तनेषु च लिपंत्यः सत्यः आधिं स्मरपीडां जहुः अतस्ताः पूर्णाः कृतार्थाः संति एवं श्रीकृष्णपादस्पृष्टकुंकुमस्पर्शनेन तासां पूर्णत्वं तन्नित्यसंबंधवतीनामस्माकं तु किमु वक्तव्यमिति तद्गतोभिप्रायः ॥ १७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शबराङ्गनानामपि भाग्यं वयं न लेभिमहे इति ससीत्कारमाहुः ॥ पूर्णा इति ॥ पुलिन्द्यः शबराङ्गनाः, पूर्णाः कृतार्थाः । कुतः । दयिताया महालक्ष्म्याः स्तनयोर्मण्डितेनालंकृतेन, क्रीडासमये कृतकुङ्कुमावलेपनयोः स्तनयोः लक्ष्म्या भक्त्या उरुगायपदाब्जयोर्निहितत्वादुरुगायपदाब्जयोर्लक्ष्मीस्तनगतकुङ्कुमसंबन्धः तथाविधकुङ्कुमयुक्तपदाब्जाभ्यामुरुगायस्य या वनसंचारदशा तस्यां, तृणरूषितेन तृणेष्ववलेपं प्राप्तेन, उर्वधिकं गीयते मुनिभिरिति उरुगायः श्रीकृष्णः तस्य पदाब्जयोः सहजरक्तयोश्चरणकमलयोः राग आरुण्यं तेन श्रीरौज्ज्वल्यं यस्य तच्च तत् कुङ्कुमं च तेन, आननकुचेषु आननेषु कुचेषु चेत्यर्थः । तत्तृणरूषितकुङ्कुमं, लिम्पन्त्यः, तस्य कुङ्कुमस्य दर्शनेन स्मररुजः कामकृता व्यथा, यासां तथाभूताः सत्यः, आधिं मानसीं व्यथां, जहुस्तत्यजुः । अतस्ताः पूर्णा इति भावः । केचित्तु दयितानामस्माकं ये स्तनास्तेषु मण्डितेनालंकृतेनेत्याहुः । तत्पक्षे, उपभोगकाले शोभार्थं कृतकुङ्कुमावलेपनेषु स्तनेषु गोपीभिरत्युत्साहेनोरुगायपदाब्जयोर्गृहीतत्वाद्भगवत्पदपद्मयोर्गोपीस्तनगतकुङ्कुमसंबन्धः, ततो गोपीस्तनगतकुङ्कुमयुक्तपादाभ्यां सतृणवनगतभगवतः पादस्पृष्टतृणानि सकुङ्कुमानि जातानि तथाविधकुङ्कुमेक्षणसंजातमदनव्यथाः पुलिन्द्यस्तृणगतकुङ्कुमं मुखेषु स्तनेषु चालिप्य स्मरोद्भूताधिं तत्यजुरिति संकलितोऽर्थः ॥ १७ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पूर्णाः पुलिन्द्य इति : १०.२१.१७.

यल्लग्नेशपदाब्जरागघुसृणं प्रादाय याः स्वस्तने लिम्पन्ति स्वमुखे च ता अपि परां कोटिं पुलिन्द्यो गताः ।
साक्षाच्छ्रीपदपद्मसङ्गतिजुषः पुष्टस्य वृन्दावनस्थेम्नस्तस्य तृणस्य भाग्यमतुलं वर्ण्यं किमस्मात्परम् ॥ २८ ॥
यासां पुण्यविचारणेऽनिपुणधीर्ब्रह्माऽपि ताश्चेद्वयं यासां पुण्यमगण्यमित्यनुपदं ब्रूमः पुलिन्द्यस्तु ताः ।
निःसीमाधमकोटिगा अपि महानिःसीमकोटिं गतास्तद्बीजं सखि सिद्धमेव भगवत्पादाब्जरागस्थितिः ॥ २९ ॥

कृष्णप्रिया

प्यारी सखी ! सुनरी ! हम तो श्रीवृन्दावन की भीलनियों को बड़भागिनी एवं कृतार्थं मानती है । क्योंकि श्रीबिहारी जी का जब ये सब दर्शन करती है तब इनका श्रीप्यारे लाडिलेश जी से समालिङ्गन के मनोरथ जग जाते हैं, लेकिन यह सुलभ कहाँ ? । अन्ततो गत्वा इस कामना की पूर्ति के लिए वे श्री लक्ष्मीजी और व्रज की गोपियाँ निज वक्षःस्थल के भूषणरूप कुङ्कुम केशर का चन्दन लेप लगाती है, वह चन्दन लेप श्रीनन्दनन्दन जी के श्रीचरणों में लगा होता है, और श्रीकृष्णचन्द्र जी जब गोवृन्द चराने के लिए श्रीवृन्दावन के घास-पात पर विचरते हैं, तब वह गन्ध लेप तृणपुन्ज में लग जाता है। श्रीपुलिन्दोनियां उस चन्दन को उन तृण-पात में से उठाकर निज वक्षःस्थल में और वदनकमलों पर मल देती है और निज उरपीडन का निवारण कर लेती है ॥ १७ ॥

हन्तायमद्रिरबला हरिदासवर्यो यद् रामकृष्णचरणस्पर्शप्रमोदः ।
मानं तनोति सहगोगणयोस्तयोर्यत् पानीयसूयवसकन्दरकन्दमूलैः ॥ १८ ॥

कर्दमक्षमा

अन्वयः—हे अबलाः ! हन्त, अयम् अद्रिः यत् रामकृष्णचरणस्पर्शप्रमोदः पानीयसूयवसकन्दरकन्दमूलैः सहगोगणयोः तयोः यत् मानं तनोति "यतः अयं गोवर्द्धनः" हरिदासवर्यः "अस्ति" ॥ १८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हंतेति हर्षे । हे सख्यः अयमद्रिर्गोवर्धनो ध्रुवं हरिदासेषु श्रेष्ठः । कुत इत्यत आहुः । यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रमोदो यस्य सः । तृणाद्युद्गमनिभेन रोमहर्षदर्शनात् । किं च यद्यस्मान्मानं तनोति सह गोभिर्गणेन सखिसमूहेन च वर्तमानयोस्तयोः कैः पानीयैः सूयवसैः शोभनतृणैः कंदरैः कंदैरमूलैश्च यथोचितम् । अतोऽयमतिधन्य इत्यर्थः ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हरिभक्तपरा ऊचुः । "दासो भृत्ये च कैवर्ते भक्ते प्रक्षेपके परे" इति धरणिः । श्रेष्ठत्वे हेतुं शंकते—यस्मादिति । निभेन छद्मना 'निभः स्यात्तुल्यछद्मनोः' इति वारतांतविः । अस्य सत्यपि प्रमोदे नानवधानतेत्याह—किं चेति । यद् यतः । वैकल्पिकत्वान्न सहस्य सादेशः । तयोः रामकृष्णयोः । 'यवसं तृणमर्जुनम्' इत्यमरः । 'यवसं घासहोमयोः' इति धरणिः । कं जलं दीर्यंत एभीरिति कंदरास्तैस्तथा, पर्वतांतर्गतैरुभयतश्छिद्रैर्गृहैः । "कंदोऽस्त्री सूरणे सस्यमूले जलधरे पुमान्" इति मेदिनी । "मूलमाद्ये शिफायाञ्च समीपे मूलके च भे । तालमूल्यां गर्जरादौ बंधनच्छेदकारिणि ॥" इति धरणिः । यतो रामकृष्णयोर्मानदोऽतो हेतोरयं गिरिरतिधन्योतीव भागवतः । इत्यर्थ इति । दूरतोऽपि भगवन्नामश्रवणादिना जना धन्या भवंति साक्षात्तन्मूर्तिसेविनां तु धन्यतमत्वमुचितमेवेति भावः । हंत सख्यो महदाश्रयणं विना नैव मनोरथः फलति, महत्त्वं च हरिभक्तानामेव, तेषां मध्ये श्रीगोवर्द्धनो गिरींद्र एव मुख्य इति गार्गीमुखाच्छ्रुत तदस्य तत्रत्यमानसगंगायां स्नात्वा तदधिदैवतस्य श्रीहरिदेवनाम्नो नारायणस्य दर्शनार्थं याम इत्यत्र गुरुजनानामपि नैव विप्रतिपत्तिः, कृष्णोऽपि तत्रैव खेलतीति युक्तिं निश्चितवत्यः । स्वरमणं तमभिसिषर्षवः श्रीगोवर्द्धनमेव सगणकृष्णवांछितसाधकं स्ववांछितसिद्धयर्थं स्तुवंति–हंतेति विस्मये । हरिदासेषु नारदादिष्वपि मध्ये मुख्या ये त्रयो हरिदासा युधिष्ठिरोद्धवगोवर्द्धनास्तेष्वपि मध्येऽयमद्रिरेव हरिदासवर्य्यः, "हरिदासस्य राजर्षे राजसूयमहोदयम्" इति युधिष्ठिरे, 'कृष्णं संस्मारयन्रेमे हरिदासो व्रजौकसाम्' इत्युद्धवे, हंतायमद्रिरबला हरिदासवर्यः इत्यस्मिन्पर्वतेऽपि हरिदासपदप्रयोगात् । यद्रामकृष्णयोश्चरणस्पर्शेन शिलाद्रवादभिव्यंजितः प्रमोदो यस्य सः । चरणस्पर्शे सति शिलानां पंकसाधर्म्यप्राप्त्या ध्वजवज्रांकुशादिमच्चरणचिह्नं निर्झरतृणोद्गमादयोऽश्रुपुलकादयोऽपि प्रमोदव्यंजका ज्ञेयाः । अत्र रामपदप्रयोगो भावगोपनार्थः । श्लेषेण रामः "हये च पशुभेदे च त्रिषु चारौ सितेऽसिते" इति मेदिन्युक्ते रमणीयो यः कृष्णस्तस्य । हे अबला इति । पतिपारवश्यवतीनां युष्माकं तदाश्रयणमेव बलं बुध्यत इति भावः । यद्यतः प्रमोदादेव मानं तत्प्रसादनीं पूजां तनोति । सह गोभिर्गणेन सखिसमूहेन च वर्त्तमानयोस्तयोः पानीयानि पाद्याचमनीयपानार्थं सुगंधशीतलनिर्झरजलानि तथा नैवेद्यार्थं पानीयाः पेया मध्वाम्रपील्वादिरसाश्च सुयवसानि अर्घ्यार्थं दूर्वा गवां ग्रासार्थं सुगंधकोमलपुष्टिवर्द्धनदुग्धसंपादकतृणानि च । दीर्घस्त्वार्षः । यद्वा-पानीयं सुवत इति पानीयस्वो निर्झराश्च कंदरा उपवेशशय्याविलासाद्यर्थं शीतोष्णसमयसुखदा गुहाश्च, भक्षणार्थं कंदमूलानि च, तत्रत्यरत्नपर्यङ्कपीठप्रदीपादर्शादयोप्युपलक्षकास्तैः ॥१८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गोष्ठचन्तरवार्त्तापि तथैव रसान्तराच्छन्ना यत एवमाहुर्द्वाभ्याम् —हन्तेति । अयमिति तदानीं श्रीगोवर्द्धनान्तिक एव तासां निवासेन साक्षादङ्गुल्या दर्शनात् जगतोऽशेषं पापं दुःखं चित्तं च यथायथं हरतीति हरिः तदधिष्ठाता देवः शास्त्रे लोके च प्रसिद्धः तत्स्वभावकेषु तस्य दासेषु मध्ये श्रेष्ठः तद्वर्य्यत्वमेत्र फलाभिव्यक्तिद्वारा दर्शयति यद्रामेति प्रकृष्टो मोदो हर्षः रोमाञ्चस्वेदानन्दाश्रुवादिस्वरूपतृणाद्युद्गमार्द्रताजलबिन्दुस्रावादिलक्षणः तनोतीति सर्वैरन्यैरपि क्रियमाण मानमयं विस्तारेण करोतीत्यर्थः । पानीयानि पेयानि जलमध्वादीनि दीर्घत्वमार्षं छन्दोनुरोधात् सुयवसानि कोमलानि पुष्टिवर्द्धनानि दुग्धसम्पादकानि । यद्वा, पानीयं सुवते क्षरन्ति पानीयसुवो निर्झराः भू इति क्वचित् पाठः उपवेशाद्यर्थं सुन्दरस्थानमित्यर्थः । कन्दराः गुहाः तैश्च तत्रत्यरत्नपर्यङ्कपीठप्रदीपादर्शादयोप्युपलक्ष्याः यथासम्भवं च तैस्तेषां मानो ज्ञेयः हे अबलाः इति तत्र तत्र युष्माकं शक्त्यभावेन एतादृशसेवाभाग्यं न घटेत इत्यहो बताभाग्यवैभवमिति भावः । अन्यत्तैः अत्र चाक्षण्वतामितिवदवहित्थायामप्यर्थान्तरव्यक्तिर्यथा रामो "नीलचारुसिते त्रिषु" इत्यमरकोशात् रामो रमणीयो यः कृष्णस्तस्य चरणयोः स्पर्शेन प्रमोदो यस्य सः तयोश्चरणयोः यद्वा तादृशकृष्णचरणयोः स्पर्शप्रमोदो यस्मात् ऋत्वनुरूपशैत्यादिगुणकत्वेन स्वशिलानां विधानात् । यद्वा, रामं क्रीडारूपं यच्छ्रीकृष्णस्य चरणम् आचरणं तस्य स्पर्शेन स्पर्शनेन दानेन प्रमोदो यस्य सः "विश्राणनं वितरणं स्पर्शनम्" इत्यमरः । सर्वदा सदा तत्क्रीडासम्पादनोत्सुक इत्यर्थः । यद्वा, तेन प्रमोदयति तमस्मान् जगच्चेति तथा सः यद्वा तादृशकृष्णचरणयोरिव स्पर्शप्रमोदो यस्य एतत्स्पर्शनेन तत्स्पर्शानन्दस्यैव सिद्धेः निरन्तरविचित्रप्रेमविहारश्रेणीभिस्तच्चरणस्पर्शमयता इवास्मिन् सम्पत्तेः तस्येति वक्तव्ये तयोश्चरणयोरित्यादरेण ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो यत्र यत्र कृष्णः प्रयाति, तत्र तत्र प्रयाणसमर्थानां पुलिन्दीनामासां भाग्यं दूरेऽस्तु, स्थिरोऽप्ययं श्रीगोवर्द्धनः परमभाग्यवानित्याहुः—हन्तेति । अयमिति तदानीं श्रीगोवर्द्धनान्तिक एव तासां निवासेन साक्षादंगुल्या दर्शनात् । यद्वा, श्रीकृष्णप्रियतमत्वेन तस्य तासु सदा साक्षादिव परिस्फूर्त्तेः, किंवा परमादरेण तन्नामाग्रहणात्, जगतोऽशेषं पापं दुःखं चित्तञ्च यथायथं हरतीति हरिः, तत्स्वभावकेषु तस्य दासेषु मध्ये श्रेष्ठः, प्रकृष्टो मोदो हर्षो रोमाञ्चस्वेदानन्दाश्रुवादिस्वरूपतृणाद्युद्गमार्द्रताजलबिन्दुस्रावादिलक्षणः, तनोतीति सर्व्वैरन्यैरपि क्रियमाणं मानमयं विस्तारेण करोतीत्यर्थः । गोशब्देनान्येऽपि पशवस्तदुपलक्ष्याः, पानीयानि

पेयानि जलमध्वादीनि, सुयवसानि कोमलानि पुष्टिवर्द्धनानि दुग्धसम्पादकानि; दीर्घत्वमार्षम्, छन्दोऽनुरोधात्; यद्वा, पानीयं सुवते क्षरन्ति पानीयसूनि मृदूनि यवसानि, यद्वा, सूसवः प्रसवः पुष्पफलादि; 'भूः' इति क्वचित् पाठः। भूः—उपवेशार्थं सुन्दरस्थानमित्यर्थः। कन्दरा गुहाः, तैश्च तत्रत्यरत्नपर्य्यङ्कपीठप्रदीपादर्शादयोऽप्युपलक्ष्याः। कन्दमूलयोरवान्तरभेदः पूर्व्वं लिखित एव। यथासम्भवं तैस्तेषां मानो ज्ञेयः। तत्र पशूनां जलैः सूयवसैः सदा कन्दरैश्च कदाचित् कन्दमूलैरपि तेषां क्वचिद्भक्ष्यैः गोपानाञ्च सर्व्वदा सर्व्वैरेव तत्र जेमनोपवेशाद्यर्थं सूयवसानि ज्ञेयानि। हे अबलाः! इति तत्र तत्र युष्माकं शक्त्यभावेन कथञ्चिद्दास्यमात्रमपि न घटेतेत्यहो बताभाग्यवैभवमिति भावः। अन्यत्तैर्व्याख्यातम्, अथवा रमते सदा क्रीडतीति, रमयति सुखयतीति वा रामो यः कृष्णः; यद्वा, तथैव रामौ यौ कृष्णचरणौ निजस्पर्शेन पादाब्जविन्यासपदेषु सद्यो नवनीतीकृतशिलाभिः सुकोमलेन तत्र चोष्णकाले सुशीतलेन शीतकाले चोष्णेनेत्यादिबहुविधेन प्रकर्षेण मोदयतीति तथा सः। किञ्च, तयोरसङ्ख्येयत्वादिना सुप्रसिद्धयोः गोगणयोः, जातावेकत्वम्, गौश्च गणश्च श्रीबलरामश्रीदामादिसहचरवर्गस्तयोः सह तेन सहितयोः। किंवा, एकदैव यदा तं प्रति तदैव तौ प्रति चेत्यर्थः। यद्वा, रामं जगन्मनोरमं यत् कृष्णस्य चरणमाचरणं विहारस्तस्य स्पर्शेन स्पर्शनेन दानेन प्रमोदो यस्य सः,—'विश्राणनं वितरणं स्पर्शनम्' इत्यमरः; सर्व्वथा सदा तत्क्रीडासम्पादनोत्सुक इत्यर्थः। यद्वा, तेन प्रमोदयति तमस्मान् वा जगदेव वेति तथा सः; तत्क्रीडासम्पादनतस्तच्छ्रवणादिना सर्व्वदुःखहरणात् सेवाविस्तारणाच्च सर्व्वेषामेवानन्दभरसिद्धेः। यद्वा, रामयोः कृष्णचरणयोरिव स्पर्शप्रमोदो यस्य, एतत्स्पर्शेन तत्स्पर्शनानंदस्यैव सिद्धेः। हरिदासवर्य्यत्वेन निरन्तरविचित्रप्रेमविहारश्रेणीभिस्तच्चरणस्पर्शमयताया इवास्मिन् सम्पत्तेरिति दिक्; अलमतिविस्तरेण ॥ १८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

हरिदासवर्यः भागवतश्रेष्ठः सूयवसं सम्यग्यवसम् ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हन्तेति। हे अबलाः! अयमद्रिर्हरिदासश्रेष्ठः अहो अचराणामपि हरिदास्याभिरुचिरिति विस्मियते हन्तेति, कुतः? यद्यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रमोदो यस्य सः उदञ्चितैस्तृणैः रोमहर्षमालक्ष्य तेन रामकृष्णचरणस्पर्शप्रमोद आलक्ष्यते किञ्च गोभिः सखिगणैः सहितयोः रामकृष्णयोर्यः गोवर्द्धनाद्रिः पानीयादिभिर्यथोचितं मानं पूजामातिथ्यात्मकं करोति सुयवसानि शोभनानि तृणानि सुशब्दे दीर्घं आर्षः सम्यवसेति पाठान्तरं तदापि स एवार्थः कन्दरेषु कन्दानि मूलानि च तैः ॥ १८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हन्त आश्चर्यम् अयमद्रिर्गोवर्धनो हरिदासवर्यः भगवद्भक्तश्रेष्ठः कुतः? ययोः रामकृष्णयोश्चरणस्पर्शादाविर्भूतप्रमोदो योद्रिः सहगोगणयोस्तयोः पानीयादिभिः मानं पूजां तनोति यद्यस्मादिदमेव हि भक्तश्रेष्ठत्वं सुयवसं शोभनो ग्रासः दैर्घ्यं छान्दसं सूयवसाद्भगवतीहीति दर्शनात् कन्दरं गुहागृहं वृष्टौ स्थातुं योग्यं कन्दं सूरणं मूलम् अकण्डूयमानं दीर्घाकारं कन्दम् ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

हे सखि! कृष्णानुग्रहो विना महदनुग्रहं न स्यात्। महान् गोवर्द्धनादन्योऽपि नास्ति, तदस्माभिरयमेवाराध्य इत्याशयेनान्या ऊचुः—हन्तेत्यादि। हे अबलाः। हन्त हर्षे। अयमद्रिर्गोवर्द्धनो हरिदासानां मध्ये वर्यः श्रेष्ठः। कथमनुमितमित्याहुः—यदिति। यद् यस्मात् राम-कृष्ण-चरण-स्पर्शेन प्रमोदो यस्य तदेव कथमवगतम्? तत्राहुः—मानं तनोति। कयोः? तयोः, न केवलं तयोरेव, सहगोगणयोः। कैः? पानीयञ्च सूयवसाश्च सुतृणानि च, दीर्घ आर्षः; कन्दराणि कन्दाश्च मूलानि च कन्दमूलयोरवान्तरभेदः। कन्दाः कसेरुकादयः, मूलानि तदितराणि भक्षणयोग्यानि, अथवा तर्वादिमूलानि छायादानात्तैः। अत एवंविधसेवापरो हि महान् भवतीति ॥ १८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

हे सख्यः! कृष्णानुग्रहे तदनुग्रह एव हेतुः तदयं गोवर्धन एव परमभागवतस्तेनैवास्यानुग्रहो वाञ्छनीय इति तस्य भागवतत्वं निरूपयन्त्यः काश्चित् पुनः प्रौढा एवोचुः—हन्तेत्यादि। हन्त हर्षे! अयमद्रिर्हरिदासवर्यो हरिदासानां मध्ये श्रेष्ठः, यद् यतो रामकृष्णचरणस्पर्शप्रमोदः, तयोः सहगोगणयोः—गावश्च गणश्च गोपबालानां गणस्तैः सह वर्तमानयोः पानीयादिभिर्मानं पूजां तनोति। मत्युन्मादौ ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हन्त सख्यो महदाश्रयणं विना नैव मनोरथः फलति महत्त्वं च हरिभक्तानामेव तेषामपि मध्ये श्रीगोवर्द्धनो गिरीन्द्र एव मुख्य इति गार्गीमुखात् श्रुतं तदद्य तत्रत्यमानसगङ्गायां स्नात्वा तदधिदैवतस्य श्रीहरिदेवनाम्नो नारायणस्य दर्शनार्थं याम इत्यत्र गुरुजनानामपि नैव विप्रतिपत्तिः कृष्णोपि तत्रैव खेलतीति युक्ति निश्चितवत्यः स्वरमणं तमभिसिषीर्षवः श्रीगोवर्द्धनमेव सगणकृष्णवाञ्छितसाधकं स्ववाञ्छितसिद्धयर्थं स्तुवन्ति । हन्तेति, विस्मये हरिदासेषु नारदादिष्वपि मध्ये मुख्या ये त्रयो हरिदासा युधिष्ठिरोद्धवगोवर्द्धनास्तेष्वपि मध्ये अयमद्रिरेव हरिदासवर्य्यः "हरिदासस्य राजर्षे राजसूयं महोदयम्" इति युधिष्ठिरे "कृष्णं सस्मारयन् रेमे हरिदासो व्रजौकसाम्" इत्युद्धवे "हन्तायमद्रिरबला हरिदासवर्य्यः" इत्यस्मिन् पर्वतेऽपि हरिदासपदप्रयोगात् यस्माद्रामकृष्णयोश्चरणस्पर्शेन शिलाद्रवाद्यभिव्यञ्जितः प्रमोदो यस्य सः चरणस्पर्शे सति शिलानां पङ्कसाधर्म्यप्राप्त्या ध्वजवज्राङ्कुशादिमच्चरणचिह्नं निर्झरतृणोद्गमादयोऽश्रुपुलकादयोपि प्रमोदव्यञ्जका ज्ञेयाः अत्र रामपदप्रयोगो भावगोपनार्थः श्लेषेण रामो "नीलचारुसिते त्रिषु" इत्यमरकोशाद्रमणीयो यः कृष्णस्तस्य हे अबला इति पतिपारवश्यवतीनां युष्माकं तदाश्रयणमेव बलं बुद्धयते इति भावः । यत् यतः प्रमोदादेव हेतोः मानं तत्प्रसादनीं पूजां तनोति सह गोभिर्गणेन सखिसमूहेन च वर्तमानयोः तयोः कैः पानीयानि पाद्याचमनीयपानार्थं सुगन्धशीतलनिर्झरजलानि तथा नैवेद्यार्थं पानीयाः पेया मध्वाम्रपील्वादिरसाश्च सूयवसानि अर्घ्यार्थं दूर्वा गवां ग्रासार्थं सुगन्धसुकोमलपुष्टिवर्द्धनदुग्धसम्पादकानि तृणानि च दीर्घत्वमार्षम् यद्वा । पानीयं सुवते इति पानीयसुवो निर्झराश्च कन्दरा उपवेशशय्याविलासाद्यर्थं शीतोष्णसमयसुखदा गुहाश्च भक्षणार्थं कन्दमूलानि च तत्रत्यरत्नपर्य्यङ्कपीठप्रदीपादर्शादयोप्युपलक्ष्यास्तैः ॥ १८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या आहुः—हे अबलाः ! अयमद्रिः श्रीगोवर्द्धनाख्यः हरिदासवर्य्यः हरिदासेषु श्रेष्ठः स्वपरमप्रियदासश्रेष्ठे स्वप्रीतिं द्योतयितुमाहुः—हन्त इति । श्रीगोवर्द्धनस्य हरिदासवर्यत्वे हेतुमाहुः यत् यस्मात् रामकृष्णचरणस्पर्शेन प्रकृष्टो मोदो यस्य सः किं च यतः गोभिः गणेन सखिसमूहेन च सहितयोः रामकृष्णयोः पानीयादिभिर्मानं तनोति सूयवसैः शोभनैस्तृणैः सू इति दैर्घ्यमार्षम् ॥ १८ ॥

श्रीरामकृष्णकृता प्रेममञ्जरी

इदं देव्यशानां परिचारिकाभिर्मानिनीनां वाक्यं हन्तायमिति । हन्तेतिहर्षे अट्टालिकारूढा यूथेश्वरीभिरुद्दिश्योक्तम् अद्रिरिति नई द्रयत इति युवत्यास्वधर्मादविचलैः अभिभूयमाना व्यसनैरिति ईदृशं सेवाभाग्यमस्माकं स्यादिति अबलात्वाद्बहिर्गन्तुमशक्ताः कथवाद्रिवत्परिचरितुं शक्नुमः अयं परमोपकारी सख्यादिभिरानीतैर्वन्यफलादिभिः भोजनमण्डलीं कल्पयन् हरिदासवर्यत्वेन पानीयादिभिः पूजां तनोति तथाहि परमरमणीयशिलाभिः समासनं खगावलीकलितकालीभिः स्वागतं स्वागतं श्यामाकदूर्वाब्जविष्णुक्रान्तापर्य्यगाक्रान्ततिर्य्यङ्निर्झरीनिष्पन्नं पाद्यम् एवमर्घ्यं जाजीलवङ्गकङ्कोलसङ्गतपल्लवैराचमनीयम् शेखरशिलासरित्प्रस्रवधारापातैरम्बुकृतस्नपनं दुकूलवदनुकूलस्वर्णवर्णवृक्षविशेषवल्कलैः कलितसुखवसनं सुगन्धिहरिचन्दनादिभिस्तिलकं प्रफुल्लमालतीलताभिर्नन्दितसुमनसः गव्याखुरव्याहतिजातागरुदारुधूमैर्धूपं दिवापि विद्योतितमणिनिकरज्योतिभिः सर्वसम्पदुद्दीपं दीपं मञ्जुलगुञ्जापिच्छादिगुच्छनिर्म्माणैः कृतसुषमाभरणमाभरणम् अभिलाषानुकूलफलमूलैः सुखमाहारं पुष्पवासितशीतलजलैः पुनराचमनं परिमलातुलतुलसिकादिभिर्मुखवासनं मरुदुच्चलस्फुरत्पुष्पसम्पचम्पकदीपावल्या स्फुटमारात्रिकं यत्किसलयवलयसङ्कुलबकुलमुखशाखिनिकरैः शोभान्तरितमातपत्रं मलयमरुल्लवचलत्पल्लवविशालशालैः व्यजनम् निजस्वरविवेकिनां केकिनामनेकाङ्गकेकाभिः कलितलास्यं शय्याधमानपुष्पपातपर्य्यायैः कृतसर्वातिशयनं शयनं काकलीकलितकलकोकिलकुलैर्लब्धसङ्गानं गानमपीत्यादिकमूह्यम् हरिदासवर्य्यतां पर्यापयन्नास्त इति पानीयानि पेयानि जलमध्वादीनि । यद्वा, पानीयं सुवन्ते क्षरन्तीति पानीयसुवो निर्झराः कन्दरानिभृतगृहाः कन्दा मालित्याद्याः मूलानि च नानाप्रकारविरचनं भक्त्यनुभावः तदहं भक्त्युपहृतमिति यथालाभोपहरणमप्युक्तमिति ॥ १८ ॥

श्रीमत्कृष्णदासकृता श्रीगणदीपिका

सूर्य्यकान्तिका सखी चन्द्रकान्तिकां प्रत्याह—हन्तेति । अबला इति बहुत्वगौरवादिति भावः । हन्तेति हर्षे ईदृशं सेवाभाग्यमस्माकं स्यादिति अनुकम्पाया अयं परमोपकारी अधित्यकासु शिलास्वारोहयित्वा श्रीकृष्णभोजनमण्डलीं कल्पयन् हे अबला ! गृहादविचला दूरस्थिता अस्मान् युष्मान् वा प्रदर्शयति अत एवोच्चतरो न तु गर्वविशेषेण विद्यावत् रामे रमणसमयेऽपि कृष्णस्येति व्याख्या तयोरिति द्विवनेन पूर्णाः पुलिन्द्यश्च पूर्वोक्ता दयितास्तनमण्डितेन इत्यतो दयिता च परामृश्यते ॥ १८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

हन्त सख्यः सत्तमाश्रयणाद्विना स नन्दसूनुः सतां प्रेयान्नलभ्यते स च गिरिराज एवातस्तद्दर्शनाय गच्छामस्तत्रैव तं प्राप्नुम इति भावेन पराः काश्चिदाहुः —हन्तायमिति । अयमद्रिः गोवर्द्धनो हरिदासवर्यः "हरिदासस्य राजर्षे राजसूयं महोदयम्" इति युधिष्ठिरः "कृष्णं संस्मारयन् रेमे हरिदासो व्रजौकसा" मित्युद्धवश्च हरिदासः हन्तायमित्यत्र गोवर्द्धनो हरिदासवर्योऽभ्यधायीत्यर्थः। कुतस्तद्वर्यत्वं तत्राह यतो रामकृष्णयोश्चरणस्पर्शेन शिलाविद्रवादिसूचितः प्रमोदो हर्षो यस्य सः यद् यतः प्रमोदाद्धेतोः गोभिर्गणेन च सखिवृन्देन सहितयोस्तयोर्मानं पूजां तनोति कैरित्याहुः पानीयेति । पानीयानि पाद्याचमनपानार्थानि सुगन्धशीतलमधुराणि निर्झरजलानि नैवेद्यार्थाः पानीयाः पेया मध्वाम्रादिरसाश्च तैः सुयवसान्यर्घ्यार्थानि दूर्वाङ्कुराणि गोग्रासार्थानि पुष्टिकराणि दुग्धवर्द्धनानि च मृदूनि तृणानि तैः दैर्घ्यमार्षं कन्दराश्चोपवेशविलासार्थाः शीतोष्णसमयसुखदा गुहाश्च ताभिः भक्षणार्थानि चामृतस्वादूनि कन्दमूलानि तैरिति स्वतनुविभवैरेव स्वामिनः पूजाविधानादयं तद्वर्य इति भावः ॥ १८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पुनः सर्वाः सम्बोध्यैका कथयति ॥ हन्तेति । अबला अयमद्रिर्हरिदासवर्य इव दृश्यते हन्ताश्चर्यं । कुत इत्यत इत इत्यप्याह ॥ यद्रामेति । इत आयान्ता इति यन्तौ तौ च तौ रामकृष्णौ च तयोः रामकृष्णयोश्चरणानां स्पर्शाज्जातः प्रमोदो यस्य सः। किञ्च सह गोगणयोस्तयोर्मानं सत्कारं तनोति तत्सत्कारसाधनमभिधत्ते ॥ पानीयसूयवसकन्दरकन्दमूलैरिति । पानीयं निर्झरवारि। ऋग्वेदे द्वितीयाष्टके तृतीयाध्याये एकविंशतिमवर्गे । सूयवसाद्भगवतीति । तथा यजुर्वेदे प्रथमाष्टकसप्तमप्रपाठके सूयवसं सोदकमिति प्रयोगात्तदनुकृतिः । माधवेन च शोभनानि यवसानीति व्याख्यातत्वाच्च सूयवसमिति सम्भवति । यद्वा सु शोभनानि तथा उ ऊर्ध्वंप्ररोहाणि यवसानि तृणानि कन्दरो गुहागृहं कन्दमूलैः सूरणोशीराद्यैर्यत्तत इति हरिदासा अप्येवं सभाजयन्ति भगवन्तमिति तत्त्वमद्रेरिति मन्तव्यं । यद्रामकृष्णचरणस्पर्शप्रमोदो यन्मानं तनोतीति यच्छब्दद्विकान्वयो वा ॥ १८ ॥

श्रीसुबोधिनी

निर्गुणा आहुर्हन्तेति, कथं पुलिन्द्य एतादृश्यो जाता इत्याशङ्कायां भगवद्भक्तसङ्गात् तथात्वं जातमिति गोवर्धनस्य भगवद्भक्तत्वमाहुर्**हन्ते**ति खेदे, यद्यस्माभिरपि गोवर्धने स्थितं स्यात् तदास्माकमपि तथा भवेत् तदभावात् खेदः, अयमद्रिर्गोवर्धनो **हरिदासानां** मध्ये **वर्यः**, तत्र हेतुर्**यद्** यस्मात् कारणाद् **रामकृष्णचरणारविन्दस्पर्शे प्रकृष्टो मोदो** यस्येति, स एव भगवदीयेषु **श्रेष्ठो यो भक्तिमार्गस्य स्पर्शेप्यानन्दयुक्तो भवति**, किञ्च **सात्त्विकोयं गुणातीतो वातो निर्धनोथापि तयोर्मानं** करोति **सहगोगणयोः, गावश्च गणा** देवरूपा बालकाश्च, **तयोः पानीयसूयवसकन्दरकन्दमूलै**श्चतुर्भिरातिथ्यं करोति, पानीयसूयवसे गवां, **कन्दरा स्थानं, कन्दमूलानि** भक्ष्याणि, "तृणानि भूमिरुदक" मितिवाक्याच् चतुष्टयसम्पत्तिरुक्ता; तत्र कोमलदूर्वा गवां भक्षणार्थेन्येषामास्तरणार्थे चोपयुज्यन्ते, भूमिः कन्दरव, प्रायेणेदानीं वर्षतीति लक्ष्यते, वाक्स्थाने **कन्दमूलानि**, सर्वाभावे वाचो गणना, **सन्तोषो भक्तस्याधिकः, अबला इतिसम्बोधनं**, सर्वासामप्यस्माक तत्र गमने सामर्थ्याभाव उक्तः, **कन्दा** भर्जनसापेक्षा **मूला**नि तु तथैव भक्ष्याणि, एकरसाभावाय चोक्तमन्नव्यञ्जनभावार्थं वा, तत्राप्यवान्तरभेदा बहव इति बहुवचनं, अनेनाबलास्वाक्रोशोपि प्रदर्शितो या नवनीतादिभक्षणे विमनस्का जाताः, अतो युक्तमेवापूर्णत्वं, पूर्वोक्ताः पुलिन्द्य इति पर्वतप्रेरणया कन्दमूलादिकं ताभिः समानीयत इति लक्ष्यते ॥ १८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

हन्तेत्यत्र भगवद्भक्तसङ्गादिति पर्वतप्रेरणया कन्दमूलसमानयने कुङ्कुमप्राप्तिर्जातेति भावः, **तथा भवे**दिति त्यक्ताधित्वं भवेदित्यर्थः, **अथापी**ति दासो हि मानं तनोतीति यावता दासत्वं सिध्यति न तु तद्वर्यत्वमित्येवं व्याख्यानं, व्रजस्य सर्वसमृद्धिमत्त्वेप्ययं गुणातीतत्वान्निर्धनस्तादृशस्य पानीयकन्दादिकं स्वार्थं सङ्ग्राह्यमेव भवति तथापि प्रयच्छतीत्यर्थः, एवमपि धर्मिष्ठत्वं सिध्यति न दासत्वमित्याशङ्क्याद्यविशेषणसहितेन तत् सिध्यतीत्याहुः **सन्तोष** इति, अन्ते **पर्वतप्रेरणये**ति गोवर्धने कामरूपित्वस्य वक्ष्यमाणत्वात् केनचिद्रूपेण प्रेरयतीति भावः ॥ १८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

पानीयसूयवसकन्दरकन्दमूलैरित्यस्य व्याख्याने **तत्राप्यवान्तरभेदा बहव इति** बहुवचनमिति **कन्दमू**लेष्ववान्तरभेदानां बाहुल्यात् तेषां सर्वेषामेव भगवते निवेदनात् तेषां सङ्ग्रहार्थं, **कन्दमूल**पदयोः **कन्दानि च मूलानि** चेति बहुवचनेन विग्रहः कार्य इति भावः, तथा च नात्र समस्तपदगत"**कन्दमूलै**"रितिबहुवचनाभिप्राय उक्तः किन्तु लौकिकविग्रहे **कन्दमूल**पदयोर्बहुवचनान्तत्वेन विवक्षितार्थसिद्धिरिति बोधितं, तथा च नानाप्रकारककन्दमूलानां समर्पणं **हरिदासवर्येण** क्रियत इति सिद्धम् ॥१८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'हन्त' इति हर्षे। हे अबलाः! अयमद्रिर्गोवर्धनो ध्रुवं हरिदासेषु वर्यः श्रेष्ठः। तत्र हेतुमाहुः—यद्यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रमोदो यस्य सः, तृणाद्युद्गममिषेण रोमहर्षदर्शनात्। यस्माच्च गोभिर्गणेन सखिसमूहेन च सह वर्तमानयोस्तयो रामकृष्णयोः पानीयादिभिर्मानं सत्कारं तनोति। पानीयैर्जलैः, सुयवसैः शोभनतृणैः, कन्दरैः, कन्दैः, मूलैश्च ॥ १८ ॥

अन्वितार्थप्रकाशिका

हन्तेति ॥ हन्तेति हर्षे। हे अबलाः! अयमद्रिर्गोवर्धनो ध्रुवं हरिदासेषु श्रेष्ठः यद्यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रमोदो यस्य सः तृणाद्युद्गममिषेण रोमहर्षदर्शनात्। यस्माच्च गोभिर्गणेन सखिसमूहेन च सह वर्तमानयोस्तयो रामकृष्णयोः पानीयैः जलैः सूयवसैः शोभनतृणैः। सुशब्दे दैर्घ्यमार्षम्। यद्वा। पानीयं सूयन्ते पानीयस्वः निर्झराः तैः कन्दरैः कन्दैर्मूलैश्च मानं सत्कारं तनोति करोति ॥ १८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अद्रेर्हरिभक्तत्वं सूचयंत्यो जगदुः हंतेति हे अबलाः तत्कृतकृष्णसेवनसदृशसेवनानुपयोगित्वादबला इति संबोधनम् अयम् अद्रिर्गोवर्द्धनः हरिदासेषु वर्यः श्रेष्ठोस्ति कुतः यद्यस्मात् रामकृष्णयोः चरणस्पर्शेन प्रमोदः प्रकृष्टो मोदो हर्षो यस्य एवंभूतः सन् गोगणैः गोभिर्गणैः गोपसमूहैश्च सहितयोस्तयोः पानीयादिभिः मानं पूजया सत्कारं तनोति अतस्तस्यानवधिकातिशयभाग्यमिति भावः सूयवसं सुयवसं समोचोनतृणं निपातस्य चेत्यनेन सु इति निपातस्य दोर्घत्वं कंदरा गुहा ॥ १८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हन्तेति ॥ हे अबलाः, अयम् अद्रिः, हरिदासवर्यः भगवद्भक्तजनश्रेष्ठः। हन्तेति विस्मये। अहो अचराणामपि हरिदास्याभिरुचिरिति विस्मयन्ते। कुतः। यद्यस्मात्, रामकृष्णयोर्यश्चरणस्पर्शस्तेन प्रमोदो यस्य तथाविधो लक्ष्यते। उदञ्चिततृणच्छद्मना रामकृष्णचरणस्पर्शजः प्रमोद आलक्ष्यत इत्यर्थः, किं चायं गोवर्द्धनः, सहगोगणयोः गोभिः सखिगणैश्च सहितयोः, तयोः रामकृष्णयोः, पानीयं च सूयवसं च कन्दराश्च कन्दाश्च मूलानि च तैः, यद्यथोचितं, मानं पूजाम् आतिथ्यात्मकसन्मानमित्यर्थः। तनोति करोति। सूयवसानि शोभनतृणानि। सुशब्दे दीर्घत्वमार्षम्। संयवसेति पाठेऽपि स एवार्थः। अतोऽयमपि धन्य इत्यर्थः ॥ १८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

हन्तायमद्रिरिति । १०.२१.१८.

यो नित्यं रचयत्यनन्यविषयो भूभृत्सदभ्यर्चनं तस्यैवानिशमीशपादजलजस्पर्शोऽखिलार्थप्रदः।
निर्यत्नं धरणीतलेऽतिसुलभो निर्णीतमेतत्सखि प्राप्तेशाङ्घ्रिसुखोऽद्रिरेष कुरुते प्राप्तुं पुनः सत्कृतिम् ॥ ३० ॥

यः सर्वदाऽतिथिजनार्चनसक्तचित्तः पूर्णः स एव धरणौ हरिदासवर्यः।
आस्तां स कीदृगपि लोकदृशा जडोऽपि क्रीडापदं स हि हरेरिह मानमद्रिः ॥ ३१ ॥

कृष्णप्रिया

अब निर्गुण गोपीजन अन्य गोपीजन को कहती है कि हे अबलाओं! क्या करे? हम सब अबलाएँ है यह ही हमारे लिए संकोच की गाथा है। देखिए यह श्रीगिरिराज गोवर्द्धन जी परम भागवत है। वे कृतकृत्य है और बडभागी है। हमारे जीवन सर्वस्व नन्दकुमार श्रीकृष्ण जी और नयनाभिराम श्रीबलरामजी के श्रीचरणों का पावनस्पर्श प्राप्त करके कितने प्रमुदित रहते हैं। वह परम भागवत है कि जो भगवान के स्नेह पात्र भगवज्जनों की सेवा शूश्रुषा सराहना करते है, सत्कार एवं स्वागत करते हैं। श्रीगिरिराज महाराज का यह परम औदार्य है कि गोवृन्द और ग्वाल वालों के साथ श्रीनन्दनन्दन एवं श्रीबलभद्र भैयाजी की नित्य अनन्यभाव से सेवा सत्कार करते हैं। स्नान-पान के लिए मधुर शीतल सुवासित सुपेय जल, गोवृन्द के लिए सुकोमल हरी-हरी घास, शीतोष्णादि ऋतु में सुखावह कन्दराएँ सर्व के लिए खाने के लिए सुखद कन्द मूल फल फूल अंकुर आदि भक्ति से देते हैं। सखी री! वास्तविक में श्रीगिरि महाराज बहुत सन्मान भाजन है ॥ १८ ॥

गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु [1]सख्यः ।
[2]अस्पन्दनं गतिमतां [3]पुलकस्तरूणां निर्योगपाशकृतलक्षणयोर्विचित्रम् [4]॥ १९ ॥
एवंविधा भगवतो या वृन्दावनचारिणः । वर्णयन्त्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे[5] दशमस्कन्धे दावाग्निपानं [6]नामैकविंशोऽध्यायः ॥ २१ ॥

समाप्तं तामसप्रमेयप्रकरणम् ।

कर्दमक्षमा

अन्वयः—हे सख्यः ! गोपकैः—सह–अनुवनम्–गाः– नयतोः–निर्योगपाशकृत–लक्षणयोः–"तयोः" कलपदैः–उदारवेणुस्वनैः–तनुभृत्सु–गतिमताम्–अस्पन्दनम्, तरूणाम्–पुलकः–"जायते" "अहो"विचित्रम् ॥१९॥ वृन्दावनचारिणः–भगवतः–एवंविधाः याः–"लीलाः"–क्रीडाः—मिथः—वर्णयन्त्यः—गोप्यः—तन्मयताम्–ययुः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे निरोधलीलायां तामसप्रकरणान्तर्गतप्रमेयप्रकरणे एकविंशोऽध्यायः समाप्तः ॥ २१ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे सख्यः ! इदं त्वतिचित्रम् गोपैः सह वनेवने गाः संचारयतोस्तयो रामकृष्णयोर्मधुरपदैर्महावेणुनादैः शरीरिषु ये गतिमंतस्तेषामस्पंदनं स्थावरधर्मस्तरूणां पुलको रोमांचश्च जंगमधर्म इति । नियुंज्यंते गाव आभिरिति निर्योगाः पादबंधनरज्जवोऽधृष्यगवांकर्षणार्थाः पाशाश्च तैः कृतं लक्षणं चिह्नं ययोः। शिरसि निर्योगवेष्टनेन स्कंधस्थपाशेन च गोपपरिवृढश्रिया विराजमानयोरित्यर्थः ॥ १९–२० ॥

गोपीनां कामतः कृष्णे निःसीमप्रेमसंगमः । कात्यायन्यर्चनोद्भूततत्प्रसादमहोदयः ॥ १ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे वेणुगीतवर्णनं नामैकविंशोऽध्यायः ॥ २१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सकौतुका आहुः । अस्पंदनं चलनाद्यभावः । पुलकः रोमोद्गमः "रोमोद्गमस्तु पुलकः प्रेम्णि वृद्धेऽग्रगे तथा" इति शब्दरत्ने । अधृष्या अनम्रा या गावस्तासां कर्षणमेवार्थः प्रयोजनं येषां ते पाशाः पाशवद्रचिता रज्जवः । 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरः । गोपेषु परिवृढा अधिपास्तेषां श्रिया शोभया । इत्यर्थ इति । अतीव शक्ता ये गोपास्त एवाविशस्तगवाकर्षणे योग्या नान्य इति तात्पर्यम् । निर्योगाख्यः पाशो निर्योगपाशः । स च चपलस्वभावानां वत्सानां दोहनसमये गोवामजंघासंगता गलबंधनरज्जुस्तेन कृतलक्षणयोः सौन्दर्यविशेषलाभेन ख्यातयोः "गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ" इत्यमरः। ततश्चायं मुक्तास्तबकजुष्टाग्रद्वयः पीतपट्टमय उष्णीषबंधभूषणविशेष इव गोपालकत्वव्यंजको द्रष्टॄणां मनोमोहन एव ज्ञेय इति चक्रवर्त्तितोषिणीकाराः ॥ १९ (२०) कामतः स्मरात् । निस्सीमप्रेम्णोऽमर्यादस्नेहस्य संगमः संप्राप्तिः । किंभूतः सः–कात्यायन्यर्चनेनोद्भूतो यस्तत्प्रसादः कृष्णप्रसादस्स एव महोदयो महाफलं यत्र स तथा । वर्ण्यते–अग्रे इति शेषः (१) ॥ २० ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे एकविंशोऽध्यायः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो किं वक्तव्यो हरिदासवर्य्यत्वेन यथार्थनाम्नोऽस्याद्रिपतेर्महिमा किन्तु सर्वेप्यत्रत्याश्चराचराः परमधन्या इत्याहुः–गा इति । अनेन तासां गवामसङ्ख्येयत्वात् दूरगामित्वेन विस्तीर्णदेशगजीवगणसुखदातृत्वं विवक्षितम् अनुवनमिति तत्राप्यवान्तरभेदेन ततः स्वेषामेव तद्वश्चनेन सर्वतः पुण्यहीनत्वं गोपकैरिति दयायां कन् तत्परिवारत्वेन स्नेहविषयत्वात् अतो गोपायन्ति दुःखभयस्थानात् श्रीकृष्णं रक्षन्तीति श्लेषश्च अस्माकं तु न तादृशप्रेमसेवायोग्यतेति भावः । नयतोरिति तत्र तत्र गमने तयोः स्वाच्छन्द्यं घटते हा कष्टं न त्वस्मत् सन्निधावित्येतत् उदारेति तत्र तत्रत्येषु तु तस्य परमानन्ददातृत्वं वेण्विति तदीयस्वनेष्वपि वैशिष्ट्यं कलपदैरिति "ध्वनौ तु मधुरास्फुटे कले" इत्यभिधानात् माधुर्येणैव तावन्मनोहरत्वं तत्र चास्फुटत्वात् केयं सङ्केतोक्तिरिति नानाभावाक्रान्त्या तदतिशयित्वम् यद्वा, नूपुरकलशब्दयुक्तैः पदैः पादक्षेपैः इति तद्विलासस्मरणं बहुत्वं गौरवेण तनुभृत्स्विति एव कस्तनुभृत् यस्तद्वशेन पतेदित्येतत् सख्य इति इदं भवत्योपि जानन्तीत्येतत् अस्पन्दनं किञ्चित् चलनस्याप्यभावः गतिमतां प्रशस्ततच्छक्तियुक्तानामपि नित्यतत्स्वभावानां नद्यादीनामपि वा अतः किमुतास्माकं दूरगमनमित्येतत् पुलकस्तरूणामिति अरोमकाणा-

---

[1]. सख्यं–विज. । [2]. आस्पन्दनं–च. पु. टी. । [3]. पुलकं–विज. । [4]. श्री शुकः उवाच–च. पु. टी. । [5]. पारमहंस्यां संहितायां दशमस्कन्धे पूर्वार्धे–गो. प्रे. पु. । [6]. एकोनविंशोऽध्यायः–विज. ।

मप्यङ्कुरोद्भेदमिषेण रोमरोमाञ्चौ युगपदेव जायेत इत्येतत् अतः कम्पोपलक्षितस्तेन स्थावरजङ्गमयोर्द्धर्मवैपरीत्यमपि निर्योगेति सर्वासामेव गवां सुशीलत्वेन पाशान्तरानुपयोगात् निर्योगाख्यः पाशो निर्योगपाशः स च चपलस्वभावानां वत्सानां दोहनसमये गोवामजङ्घसङ्गता गलबन्धनरज्जुः तेन कृतलक्षणौ "गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ" इत्यमरकोषात् परमसौन्दर्यगुणेन प्रतीतौ ततश्चानेन मुक्तास्तबकजुष्टाग्रद्वयपट्टमयत्वं तस्य ध्वनितं सोऽयं चोष्णीषाद्युपरि शोभां दधानो गोपवेषः सर्वेषां मनोहर्त्तापि तासां श्रीगोपसुन्दरीणां तु विशेषतो ज्ञेयः। स्वदेशजातिवयस्सदृशं वेषादिकं हि सर्वेष्वतीव रोचकं स्यादिति विचित्रमिति तत्रतत्र स्वेषां विस्मयमोहः इदं यथायोग्यं बहुत्र योजनीयम् अथ पूर्ववत्केवलकृष्णैकविषयभावव्यञ्जकश्चायमर्थः। अहो सख्यः! स्फुटं गोचारणमिषेण सगणः सभ्रातृकोऽसौ वनं भ्रमन् कितव इव लक्ष्यते इत्याहुः—गा इति। निर्योगपाशाभ्यां कृतं सिद्धं लक्षणं कितवोचितपदबन्धनचिह्नं ययोस्तथाभूतयोः गोपकैस्तदधिपस्य स्तेयवस्तूनां च रक्षकैः पृष्ठपालाख्यैः सहानयोर्गा वनाद्वनं नयतोर्मध्ये य उदारः सर्ववरीयान् तस्य वेणुस्वनैर्जङ्गमानामस्पन्दनमभूद् स्थावराणां च पुलकोऽभूत् कीदृशैः मोहनमन्त्रवन्मनोहराव्यक्तपदैः अतो महावैणविक एवात्र कितवमुख्यः अन्ये तु तदनुयायिन एव तस्मादस्माभिरिव तस्य तु मोहनविद्यात्मको वेणुर्भवतीभिर्न श्रोतव्यः। अन्यथा ताभ्यां निर्योगपाशाभ्यामेव नूनं भवन्मनो बद्धं भविष्यतीति भावः एवं सर्वथा स्वमोहदुःखमेव विवक्षितमिति स्थितम् ।।१९।। एवं बहुलीला वर्णयामासिरे कति वा मया वर्णनीया इत्युपसंहरति—ईदृश्यो जगन्मोहिन्यो याः क्रीडाः एवंविविधत्वे हेतुः भगवतः निजाशेषमाधुर्यं प्रकटयतः तत्र वृन्दावनचारिण इति ताच्छील्येन तस्य नित्यतादृशलीलत्वं तासां च नित्यतादृशभावत्वं व्यञ्जितं व्यक्तं वृन्दावनविहारिण इति पाठे तु तद्वैशिष्ट्यं तस्य ताः सर्वा एव क्रीडाः वर्णयन्त्यस्सत्यः तन्मयतां क्रीडामयतां तदाविष्टतां ययुः ।। २० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकविंशोऽध्यायः ।। २१ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

किं वक्तव्यो हरिदासवर्य्यत्वेन यथार्थनाम्नोऽस्याद्रिपतेर्महिमा, अहो श्रीव्रजभूमौ श्रीवृन्दावने स्थिताः सर्व्वेऽप्यत्रत्याश्चराचराः परमधन्या इत्याहुः—गा इति। गोपकैरिति स्नेहविवक्षया क-प्रत्ययः; यद्वा, गोपयन्ति रक्षन्तीति गोपकाः गोपालाः, यद्वा, गोपानां कं सुखं येभ्यस्तैर्वेणुस्वनैरनुवनं प्रतिवनमिति श्रीमाधुराणि सर्वाण्येव वनानि गृहीतानि; उदारैर्महद्भिरुच्चैः सर्व्वानन्दप्रदैर्वा, कलानि मधुरस्वराणि पदानि गीतांगानि येषु, यद्वा, मधुरास्फुटध्वनियुक्तैः पदैश्च पादाब्जैः तेषां सनूपुरत्वात् कलयुक्तत्वम्; अस्पन्दनं स्तब्धतेति स्थावरधर्मः तरूणामित्युपलक्षणम्, सर्वेषामपि स्थावराणां पुलक इति चोपलक्षणम्, कम्पादि च ज्ञेयम्, तेन जंगमधर्म इति वैपरीत्यम्, अतो विचित्रमद्भुतम्; यद्वा, अस्पन्दनस्य विशेषणं जगद्विलक्षणमित्यर्थः। ततश्च लिंगव्यत्ययेन पुलकस्यापि विशेषणमूह्यम्, एवं सर्वेषामेव प्रेमविशेषोदयः सूचितः; निर्योगेत्यनेन च तदद्भुत-रम्यवेषदर्शनमप्येका हेतुरस्पन्दनादावूह्यः, वृक्षादीनामपि सूक्ष्मा दृष्टिरस्तीति 'तस्मात् पश्यन्ति पादपाः' इत्यादि महाभारततो ज्ञेयम्; यद्वा, न केवलमस्पन्दनादिकमेव, अन्यश्च विविधप्रेमविकारो भवतीतिव्यक्तमेवाहुः। निःशेषेण योगः संगमो यस्मात्, किंवा निर्गतो योगः प्रेमसम्पद्विरोधी निर्विकल्पकसमाधिर्यस्मात्; स चासौ पाशश्च प्रेमलक्षणः साक्षात् तदनुक्तिर्दुःखविशेषात्, तस्य कृतं लक्षणं मोहादिना निपातादिकं रोदनादिकञ्च याभ्याम्, तनुभृत्स्वित्यस्यात्रैव वान्वयः। एवं चराचराणां वैपरीत्येनैक्येन च विविधप्रेमलक्षणानि भवन्तीत्यर्थः; यद्वा, चराचराणां तेषामेव निर्योगपाशेन तादृशप्रेमोदयेन कृतं ज्ञापितं लक्षणं स्थितिगमनादिचिह्नं ययोस्तेषामस्पन्दनादिदर्शनेन ज्ञायेत; अत्र तौ तिष्ठतः, अनेन पथा वा गतौ स्त इत्यादिकमित्यर्थः। द्वयोरपि निर्द्देशः पूर्वोक्ताभिप्राय एव। हन्त चराचराणामेषां भाग्यं यन्निर्योगपाशादिमधुरवेषं तं पश्यन्त्यमी, मादृशीनान्तु तद्दर्शनमात्रमपि सुदुर्ल्लभमहो दौर्भाग्यमिति भावः ।। १९ ।। ईदृशान्यन्यान्यपि तच्चेष्टितानि बहुलानि वर्णयामासुः, तानि च कति मया वक्तुं शक्यानीत्युपसंहरति—एवमिति। ईदृश्यो जगन्मोहिन्यो याः क्रीडाः। एवंविधत्वे हेतुः—भगवतो निजाशेषैश्वर्य्यं विशेषेण प्रकटयत इत्यर्थः। तत्रापि वृन्दावनचारिणः स्वच्छन्दविहारिण इत्यर्थः। यद्वा, वृन्दावनचारिण इति तत्रत्य-क्रीडा एवावर्णयन्, न तु व्रजान्तश्चारिण इति तत्र भगवद्दर्शनादिना निजसौभाग्यस्याप्तेः, पाठान्तरेऽपि स एवार्थः। विहारिण इति वा पाठः, ताः सर्वा एव क्रीडा वर्णयन्त्यः सत्यः, तन्मयतां भगवन्मयतां सदा तत्कीर्त्तनश्रवणादिपरतामित्यर्थः, यद्वा, सन्ततमेव तदनुभवानन्दमिति; यद्वा क्रीडामयतां सदैव तेन सहाक्रीडन्नित्यर्थः; यद्वा तच्छब्देन प्रेमाग्निदाहदुःखविशेषोत्पत्तेः; साक्षात्तन्नामाग्रहणम् पूर्ववत् सदैव प्रेमभरोदयेन परमार्त्ता बभूवुरित्यर्थः। गोप्य इति तासां स एव स्वभावः, इति सर्वथैव तासां प्रेमसम्पद्वृद्ध्या सर्वातिशायि-सौभाग्यं वर्णितमिति ।। २० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्याम् एकविंशोऽध्यायः ।। २१ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

गतिमतामस्पन्दनं जङ्गमानां स्थावरधर्मभजनं तरूणां पुलकः स्थावराणां जङ्गमधर्मभजनञ्च विपरीतत्व विचित्रम् ॥१९-२०॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे गोप्यः ! इदन्त्वतिचित्रमिति काश्चिदाहुः—गा इति । हे सख्यः ! सह प्रतिवनं गाः चारयन्तो निर्योगो निर्युज्यन्ते गाव एभिरिति निर्योगाः दोहनवेलायां गवां पादबन्धनार्थं रज्जवः पाशास्तु दुष्टगवाकर्षणार्थाः तैः कृतं चिह्नं लक्षणं ययाः शिरसि निर्योगवेष्टनस्कन्धयोः पाशधरणेन च गोपश्रिया विराजमानयोरित्यर्थः । एवंभूतयोस्तयोः रामकृष्णयोः कलान्यव्यक्तमधुराणि पदानि शब्दाः येषु तैरुदारवेणुस्वनैर्महावेणुरवैर्हेतुभिः देहिनां मध्ये चराणामस्पन्दनम् ईषदप्यचलनं तरूणां स्थावराणां तु पुलको रोमाञ्चश्चेति चित्रं जङ्गमानां स्थावरधर्मः स्थावराणां जङ्गमधर्मश्चेत्येतदतिचित्रमित्यर्थः ॥ १९ ॥ क्रीडावर्णनमुपसंहरति—एवमिति । वृन्दावनचारिणो भगवत इत्थम्भूता अन्याश्च याः क्रीडास्ताश्च मिथो वर्णयन्त्यो गोप्यस्तन्मयतां कृष्णप्रचुरतां कृष्णविषयबुद्धिप्राचुर्यं ययुरित्यर्थः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकविंशोऽध्यायः ॥ २१ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गोपकैः सहानुवनं गा नयतोः सञ्चारयतो तनुभृत्सु शरीरिषु जन्तुषु सख्यं विचित्रमिदं चित्रमपि चित्रं किं तदिति कलपदैरुदारवेणुस्वनैः विवशानां गतिमतां जङ्गमानाम् अस्पन्दनं स्थावरधर्मभजनं तरूणां स्थावराणां पुलकं जङ्गमधर्मं रोमाञ्चभजनं विचित्रं पश्यतेति शेषः कथमेतद्युज्यत इति तत्राह निर्योगेति नितरां योगपाशेन योगशक्तिलक्षणपाशेन कृतं लक्षणम् अस्पन्दनस्पन्दमानाख्यं ययोस्तौ तयोः यद्वा निर्योगपाशः क्षेपणाख्यः तेन कृतं योगचिह्नं ययोः ॥ १९ ॥ वृन्दावनचारिणो हरेरेवंविधाः याः क्रीडास्तास्ताः मिथो वर्णयन्त्यो गोप्यः तन्मयतां तत्स्वामितां ययुरित्यन्वयः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् एकविंशोऽध्यायः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नयतोः ततः उदारेति विशेषणात् श्रीकृष्णस्यैव वेणुर्बोध्यते सर्वतोऽपि गुणगमत्त्वात्तस्य तन्मयतां क्रीडामयताम् ॥१९-२०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकविंशोऽध्यायः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

उपसंहारेऽपि वत्सला एवोचुः—गा गोपकैरित्यादि अहो विचित्रमिदं यत्तनुभृत्सु मध्ये गतिमतामस्पन्दनं स्थावराणां तरूणां पुलकः । कैः ? उदारवेणुस्वनैः । कयोः ? रामकृष्णयोरित्यर्थः । कीदृशयोः ? अनुवनं वृन्दावनादिवनमनु गोपकैर्गोपबालकैः, अनुकम्पायां कः, गायतोः । कीदृशैः ? कलपदैः । कीदृशयोः ? निर्योगपाशो गोच्छन्दनरज्जुस्तेन कृतं लक्षणं शोभा चिह्नं याभ्यां ययोर्वेति हर्षः ॥ १९ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे एकविंशोऽध्यायः ॥ २१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पुनर्वत्सला ऊचुः—गा इत्यादि । अनुवनं वनं वनं कदाचिद्वृन्दावने कदाचिद् भाण्डीरवन इत्यादि गोपकैःअनुकम्पायां कः, रामकृष्णयोर्मध्ये यस्योदारवेणुस्वनैः कलपदैस्तनुभृत्सु प्राणिमात्रेषु गतिमतामस्पन्दनं स्थावरत्वं तर्वादीनां पुलकस्तस्य किं विचित्रम्,—कर्त्तुमकर्त्तुमन्यथा कर्त्तुं समर्थत्वात् । वेणुस्वनः श्रीकृष्णस्येति प्रसिद्धिः । कीदृशयोः ? निर्योगपाशो गोच्छन्दनरज्जुस्तत्कृतं लक्षणं ययोः, वेशानां साम्येऽपि कृष्णस्यैवायमाकर्षकत्वम् परिपूर्णत्वात् । मतिः ॥ १९ ॥ एवंविधा इत्यादि । भगवतः श्रीकृष्णस्य न तु द्वयोः मिथो रहसि अन्योन्यं वा तन्मयतां तदेकमात्रस्फूर्त्या सान्द्रानन्दसम्भोगम् ॥ २० ॥

इति एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च तत्राभिसरणे विलम्बो न कार्य्यः तस्यानुगवीनस्य वनान्तरगमनसम्भवादित्याहुः—गा इति । गोपकैरित्यनुकम्पायां कन् अतो गोपायन्ति कृष्णं स्नेहात् पालयन्तीति श्लेषश्च प्रतिप्रातरेव श्रीयशोदया तथैव तन्नियोगात् वने वने गास्तयोर्नयतोः सतोरिदं विचित्रं भवतीत्यन्वयः । किं तत् हे सख्यः ! तनुभृत्सु शरीरिषु मध्ये ये गतिमन्तस्तेषां वेणुस्वनैरस्पन्दनं स्थावरधर्मः तरूणां

पुलको जङ्गमधर्म इति निर्योगाख्यः पाशो निर्योगपाशः सच चपलानां वत्सानां दोहनसमये गोवामजङ्घासङ्गतागलबन्धनरज्जुः तेन कृतलक्षणयोः सौन्दर्य्यविशेषलाभेन ख्यातयोः "गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ" इत्यमरः। ततश्चायं मुक्तास्तबकजुष्टाग्रद्वयः पीतपट्टमयः उष्णीषबन्धभूषणविशेष इव गोपालकत्वं व्यञ्जको द्रष्टॄणां मनमोहन एव ज्ञेयः ॥ १९ ॥ उपसंहरति —एवमिति वृन्दावनचारिणो भगवत एवंविधा अन्या अपि याः क्रीडाः वर्णयन्त्यो बभूवुस्तन्मयतां तत्प्रचुरतां क्रीडाप्राचुर्यं ययुः प्रापुः स्वकान्तमभिसृत्य तत्तत्क्रीडावत्यो बभूवुरित्यर्थः। यद्वा, अयन्ते अभिसरन्तीत्ययाः गोप्यः एवंविधाः भगवतः क्रीडाः भगवत्कर्तृकाः भगवत्कर्मकाश्च मिथो रहसि ययुः प्रापुः क्रीडयन्त्यः क्रीडयन्त्यश्च बभूवुरित्यर्थः। ततः परं तन्मयतां क्रीडाः तादात्म्यमानन्दमोह च प्रापुः व्याख्येयमवश्योपादेया अग्रिमग्रन्थे यह्यम्बुजाक्षेत्यत्र त्वयाभिरमिता इत्युक्तः ॥ २० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। एकविंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ २१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काश्चिदिदं चित्रं शृणुतेत्याहुः गा इति। हे सख्यः! गोपकैर्गोपैः सह गा अनुवनं प्रतिवनं नयतोः निर्युज्यन्ते दोहनवेलायां गावः आभिरिति निर्योगाः पादबन्धनार्थाः ताभिः शिरस्यवेष्टिताभिः पाशास्त्वधृष्यगवां कर्षणार्थास्तैश्च स्कन्धस्थैः कृतं लक्षणं गोपालचिह्नं ययोः कलानि मधुराणि पदानि येषां तैरुदारैर्वेणुस्वनैः शरीरिषु मध्ये गतिमतां जङ्गमानामस्पन्दनं स्थावरधर्मस्तरूणां स्थावराणां पुलको जङ्गमधर्मश्चेति विचित्रमित्यर्थः ॥ १९ ॥ एवंविधाः वेणुगीतादिक्रीडाः वर्णयन्त्यस्तन्मयतां तत्प्रचुरतां तत्तादात्म्यं श्रीकृष्णसाधर्म्यं ययुरित्यर्थः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकविंशोऽध्यायार्थप्रकाशः ॥ २१ ॥

श्रीरामकृष्णकृता प्रेममञ्जरी

गागोपकैरिति। अथातीतप्रायेऽह्निविरहवह्नितापितहृदयाः सख्यो दूरत एवावलोक्याट्टालकादौ स्थिताश्चानुवनं विचरतो रागमनुविलम्बमसहमानां परस्परमेवाहुः—हे सख्यः! गोपकैः प्रयोज्यकर्तृभिर्गाः अनुवनं नयतोः सेयं तेषां वञ्चनासङ्केतसूचनायैव उदारैर्विधुरजनसमुत्कण्ठासन्धानधुरन्धरः कलैर्मधुरास्फुटैः तत्र मधुरत्वेन सर्वमोहनता अस्फुटत्वेन च सङ्केतसूचना ज्ञेया निजप्रियतमाभिधानसमुदायैः कृत्वा तनुभृत्सु गतिमतां मृगपक्षिनद्यादीनाम् अस्पन्दनं जडीभावः स्थावराणां पुलकः अङ्कुराद्युद्गम इति विचित्रं परमाश्चर्यपदमिति भावः। निर्योगा दुष्टगवादिबन्धनरज्जुः तेन कृतं लक्षणं विभ्राजकचिह्नं याभ्यां तयोः यद्वा, नितरां योगसंयोगस्तत्सूचकः पाशः सङ्केतबन्धडोरकं तेन इति ॥१९॥ एवंविधा भगवत इति एवं विधा इति दिङ्मात्रं दर्शितं भगवतः श्रीमतः अत एव तस्य नित्यनिवासे वृन्दावने विचरितुं शीलं यस्य तस्य क्रीडाः बाह्या आभ्यन्तराश्च यास्स्वतन्त्रचेष्टा मिथः स्वस्वगोष्ठ्यां वर्णयन्त्यः गोप्यः तन्मयतां ययुः स्वरूपे मयट् यद्वा तदादीनां बुद्धिस्थे शक्तेस्तन्मयतां भगवन्मयतामित्यर्थः। तदेवं नित्यसिद्धानां तत्रापि प्रौढानां पूर्वानुरागो वर्णितः साधनसिद्धानां प्राग्भवीयभावनासमृद्धानां कन्यानां दुर्गाव्रतापदेशेनाच्छादितः सोऽयं प्रतिपादितः तदेवमत्र नयनप्रीतिप्रभृतयः स्मरदशाः प्राचीनैर्दर्शिताः यथानयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽयं सङ्कल्पः निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युरिति तासु यथास्थानं प्रदर्शितासु त्रपानाशस्य नायिकाकर्तृकस्यानौचित्यमवधार्य श्रीभगवता कृतमेव दृढ प्रलब्धा इत्यादिना मुनीन्द्रो दर्शयामास अन्यथा तद्वर्णनं रसाभासतां प्रकाशयतीति स्वयमवसेयम् ॥ २० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे मिश्रश्रीरामकृष्णविरचितायां प्रेममञ्जरीटीकायाम् एकविंशोऽध्यायः ॥ २१ ॥

श्रीमत्कृष्णदासकृता श्रीगणदीपिका

चन्द्रतिलका सखी विचित्रचरितां प्रत्याह–गा इति ॥ १९–२० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीकृष्णदासकृतश्रीगणदीपिकायाम् एकविंशोऽध्यायः ॥ २१ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तत्र गमने विलम्बो न युक्तस्तस्यानुगवीनस्य ततोऽन्यत्र गमनसम्भवादित्यन्याः काश्चनाहुः—गा इति। गोपकैरित्यनुकम्पायां कन् तत्कृपाभाजनैरित्यर्थः। पक्षे गोपायन्ति स्नेहात् पालयन्ति कृष्णमिति तैः सखिभिः सहानुवनं वने वने गा नयतोश्चारयतोः सतोरिदं विचित्रमाश्चर्यं भवतीत्यनुषङ्गः। किं तत्? कलपदैः मधुरालापैरुदारैर्यैदानन्ददातृभिर्वेणुगीतैस्तनुभृत्सु देहिषु ये गतिमन्तो मृगादयस्तेषामस्पन्दनं स्थावरधर्मः तरूणां गतिहीनानां पुलको जङ्गमधर्म इत्येतत् कीदृशयोरित्याह—निर्योगेति। निर्युज्यन्ते गावोऽनेनेति निर्योगः स च पाशश्चाधृष्यगवां पादबन्धनार्था रज्जुर्मुक्तागुच्छजुष्टाग्रद्वयी पीतपट्टमयी उष्णीषे बन्धभूषेव शोभाधायिनी तेन कृतं लक्षणं चिह्नं ययोरिति गोपपरिवृढश्रिया विराजमानयोरित्यर्थः ॥ १९ ॥ उपसंहरति एवमिति। वृन्दावनचारिणो भगवतो या एवंविधा क्रीडास्ता वर्णयन्त्यो गोप्यस्तन्मयतां तदावेशं ययुः। ननु नन्दनृपसूनोर्हरेर्गोपसुभ्रुवाञ्च

शास्त्रार्थविदामपि कुलाचारानुपयुक्ता मिथोऽनुरक्तिरियं दौःशील्यमेवेति चेन्मन्दमेतत् तथात्वे शास्त्राभावात् प्रत्युत तस्य "भक्तवत्सलता तासां परमाभक्ति"रिति शास्त्राच्च सिद्धान्तस्तु पञ्चाध्यायीमधि प्रदर्शयिष्यते ।। २० ।।

यद्यच्चकार गोविन्दो वृन्दारण्ये विचेष्टितम् । प्रेमनेत्रैस्तदालोक्य प्रोचुर्गोप्यो गृहस्थिताः ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्याम् एकविंशोऽध्यायः ।। २१ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गोपकैः सहानुवनं गा नयतोः कलपदैरुदारवेणुस्वनैर्नियोगपाशकृतलक्षणयोर्नियोगपाशः क्षेपणीरज्जुस्तेन कृतं लक्षणं चिह्नं ययोस्तयोः स्कन्धद्वन्द्वासज्जिततद्रज्ज्वोर्गतिमतां जङ्गमानामस्पन्दनं तत्परवशतया किञ्चिच्चलनाभावः । तथा तरूणां स्थावराणाम् । पुलक इति पाठः । "पुलकः कृमिभेदे स्यात्तल्पेऽश्ममणिदोषयोः । गजात्तपिण्डे रोमाञ्चे हरिताले शिलान्तरे" इति विश्वः । पुलको रोमाञ्चनमिति तनुभृत्सु सख्यं विचित्रं चेतनाचेतनीभवनं भवनमचेतनस्य चेतनधर्मंतयेति चित्रं सख्यं पश्यतेति सखीः प्रति सखी वदति ।। १९ ।। या वृन्दावनचारिणो भगवत एवंविधाः क्रीडा मिथः परस्परं वर्णयन्त्यो गोप्यस्तन्मयतां सो मयं प्रधानं येषां ते तथा तेषां भावस्तन्मयतां तां तत्स्वामिकतां ययुः । प्रधानमुद्दिष्टमिति बृहदारण्यकभाष्यतृतीयस्कन्धतात्पर्याद्युक्तेः । स मयं प्रधानं यासां ता इति वा तन्मयास्तासां भावः ।। २० ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे एकविंशोऽध्यायः ।। २१ ।।

श्रीसुबोधिनी

ननु तथापि वयं सजातीया योग्यास्ता विहाय तस्मिंस्तासु च कथं कृपेत्याशङ्‌क्याहुर्गा **गोपकैरिति**, विपरीतं हि **भगवच्चरित्रं साक्षाद् भगवान् न किञ्चित् करोति** किन्तु साक्षिमात्रेणैव **गतिमतामस्पन्दनं** भवति **तरूणां** च **पुलकं** तथास्माकं योग्यानामयोग्यत्वमयोग्यानां पुलिन्दीनां तथात्वमिति, विपरीतसम्पादने हेतुत्रयमाह **गोपकैः सहानुवनं गा नयतोः** सतोरित्येकः, **वेणुस्वनै**रित्यपरः, **कलानि पदानि** यत्रेतिविशेषणेन चापरः **पदै**श्चरणैर्वा, **गावो वने वने नीयन्ते सर्वेषामेव वनानां शुद्धिः सम्पाद्यते**तो वनानि निर्दुष्टानि भवन्ति, गवां गोपानां च तत्सम्बन्धो भवति, **एतदीया शुद्धिर्धर्मश्च** तत्र **गच्छतः**, तत **उदारो** यो **वेणुस्वनो वेणुर्वोदार**स्ततो वेणुमुक्तशेषं ते भुञ्जते, **अतस्तेषां पुलक** उचित एव, ये पुनर्गतिमन्तस्ते दोहार्थं भगवति समागते मनःपूर्वकं स्वामृतदानार्थं तत्र विघ्नाभावार्थं च सर्व एव तूष्णीं भवन्ति, शब्दशङ्कया चलन्त्यपि न, अत एव भगवतोऽव्यक्तमधुराणि पदाऽनि भवन्ति शनैर्गमनात्, दोहकालोऽयम्, **सख्य** इति सम्बोधनं तत्र गतानां दर्शनेन सम्मत्यर्थम्, अत**स्तनुभृत्सु** स्थावरजङ्गमेषु **चित्रं** भवति, तामवस्थां ज्ञापयति **निर्योगपाशकृतलक्षणयो**रिति, नितरां **योगो** याभ्यां गोवत्सयोस्तौ पाशौ **निर्योगपाशौ** निदाने ताभ्यां **कृतं लक्षणं** ययोः, हस्तेन तदुभयग्रहणं पादयोर्योजनं वा, अतो भीताः सर्वं एव जङ्गमा अस्मानपि बध्नीतेति, स्थावराणां तु भयात् स्वत एव मधुधाराः ।। १९ ।। उपसंहरत्ये**वंविधा** इति, अयमेकप्रकार उक्तः **एवंविधाः कोटिशः सन्ति लीलाः**, तत्र हेतु**र्भगवत** इति गुणानां भगवतश्च मिश्रणे कोटिशः प्रस्तारा भवन्ति, किञ्च **मर्यादायां परिमिता अपि भवन्ति या पुनर्वृन्दावनचारिणः** स्वेच्छागतिमतो **भगवतोऽतो मर्यादाभावादसङ्ख्याता एव**, अत एवं **वर्णयन्त्यो गोप्यस्तन्मयतां ययुः** क्रीडामय्य एव जाता जाग्रत्स्वप्नेषु क्रीडामेव पश्यन्त्य आसक्तिभ्रमन्यायेन, **ययु**रिति **न** पुनस्तेषां संसारे समागमनम् । एवं सप्तभिर्मध्यमो निरोधो निरूपितः पञ्चपर्वाविद्यानिवृत्तिपूर्वकमन्तर्भगवत्प्राप्तिरूपः ।। २० ।।

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणेऽष्टादशाध्यायविवरणम् ।। १८ ।।

---

१. इति तदा° । २. °कः । ३. येन । ४. °स्स पाशो निर्योगपाशो । ५. अथ वात्र विवक्षितलीलां गुप्ततया निरूपयन्ति **गोपकै**र्गवां **वने** निवशनेन प्रियस्य व्यासङ्गाभावः सूचितः, तत्र स्वच्छन्दरमणार्थं तादृग्भक्तागमनार्थं **वेणु**स्वनो दूरस्थागमनार्थमादौ तारस्ततो निर्गतानां प्रियस्थितिस्थानज्ञापको मध्यमस्ततो निकटे समागततदर्थं मन्द्रः, तत्तद्भक्तनामग्रहणेनापि **स्वनानां बहुत्वम्** अन्याज्ञापनादव्यक्तानि स्वनामत्वेन ज्ञापनान्**मधुराण्यतः कलानि** नामरूपाणि **पदानि** यत्र तादृशैः **स्वनैर्गतिमतामस्पन्दनं तरूणां** च **पुलक**मेतच् **चित्रम्**, एतदागमनं दिवसे, तत् तु सर्वसमक्षमशक्यं भवति, **वेणुस्वनैः** सर्वेषां तथात्वे निःप्रत्यूहं तद् भवति, उक्त**वेणु**स्वनै**स्तनु**भृत्सूक्तभक्तेषु सत्सूक्तस्वनै**रस्पन्दना**दिकं **चित्र**मित्यु**दारवेणु**स्वनैः **कलपदै**रितिपदयोरावृत्त्या पदसम्बन्धो ज्ञेयः, प्रियसङ्गमाभावदशायां तन्वनुसन्धानाभावात् तैरेव तदनुसन्धानात् तथात्वं, स्वगोष्ठ्यां सर्वा एतादृश्य एवेत्युक्तार्थसम्मत्यर्थं **सख्य** इतिसम्बोधनम्, **उदारो** हि पात्रापात्रविवेकराहित्येन ददात्यल्पेऽपि बहु चातस्स्थावरेभ्योऽपि दानेन वस्तुसामर्थ्यात् तेषां तत्त्वं युक्तमत**स्तरूणां** रसोपयोगिपुष्पमधुधारावत्त्वं, गवां वने निवेशनोक्त्या दिवासम्बन्ध्येतच् चरित्रमुक्तं, तत आगमनानन्तरं सन्ध्यासम्बन्धि निरूपयन्ति **निर्योगे**त्यादिना, **लक्षण**पदेन गोदोहनारूनुपस्तत्सामयिकस्सर्वोऽपि वेष उच्यते, एतादृशयोस्सतोरर्थाद्दर्शनेनैवोक्तकार्यद्वयं पूर्वस्मादपि विशिष्टं **चित्रम्**, औदार्येणोक्तरीत्या वेणुनादेनापि तेषां तथात्वं यद्यपि चित्रं तथापि परनिष्ठरसमादातुमुद्यतयोस्तेषां तथात्वं ततोऽपि विशिष्टं, स्वाभाविकस्यापि ज्ञानस्य तिरोधानसम्भवादत एवोपसर्ग उक्तः वेणुत्वेन ब्रह्मानन्दतुच्छकरणात् तनुरहितेभ्यो मुक्तेभ्योऽपि

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गा गोपकैरित्यत्र, सर्वेषामेव वनानामित्यारभ्य तत्र गच्छत इत्यन्तम् । शुद्धिपदेनाशुद्धिनिवृत्तिरुच्यते । वस्तुतत्त्वाज्ञानहेतुभूततरुत्वस्वभावोऽशुद्धिपदार्थोऽत्र विवक्षितः । पूर्वं 'कृष्णमुखनिर्गते'त्यादिना पशुत्वेपि सति तदुल्लङ्घ्यैतद्रसानुभाविका सामग्र्युक्तेति तत्फलवत्यो गाव इति तत्सम्बन्धे सति वनस्यापि तरुत्वादिस्वभावोल्लङ्घनपूर्विका रसप्राप्तिर्भवति । गोपेषु रसिकत्वं स्पष्टम् । तदेव धर्मपदेनोच्यते । तदेतदुक्तमेतदीया शुद्धिर्धर्मश्च तत्र गच्छत इत्यनेन । गोषु तस्थुरितिपदेन क्रियानिवृत्तेरप्युक्तत्वात्तत्सम्बन्धादत्रापि तथा । वेणुस्वनयोरौदार्योक्त्या प्रासङ्गिकमिदं नादकार्यं वस्तुस्वभावजम्, न त्वेतदुद्दिश्य भगवतायं नादः कृत इति ज्ञाप्यते । प्रासङ्गिककार्यकथनेन यत्रैतेष्वेवैतादृश्यं तत्रैतन्नादविषयेषु किं वाच्यमिति ज्ञाप्यते । अतो भीता इत्यादि । गोनिष्ठरसग्रहणार्थं बन्धनादिप्रयासं करोति तथास्मासु प्रयासं मा करोत्वित्याशयेन प्रभुप्रयासाद्भीताः स्वत एव समर्पयन्तीत्यर्थः । निदाने इति पाशनामोक्तिः ॥ १९ ॥

इति प्रमेयप्रकरणम् ॥ १८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गा गोपकैरित्यस्याभासे **तस्मिन् कथं कृपे**ति अस्मन्निष्ठरसं परित्यज्य तन्निष्ठकन्दादिभोग इत्यर्थः, व्याख्याने **विपरीतं ही**ति प्रमेयमर्यादानाशकमित्यर्थः, **नयतोः सतोरेवं स्वत एव भवती**त्युक्तेरर्थमाहुः **साक्षा**दित्यादि, तथा च यत्र गोवर्धने पुलिन्दीषु च साक्षात्कृतिस्तत्र वैपरीत्ये किं वक्तव्यमिति कैमुत्यपुरःसरं दृष्टान्तो ज्ञेयः, **हेतुत्रय**मिति कारणत्रयमित्यर्थः, गवां वने नयनं ज्ञानजननद्वारा परम्परया हेतुः पुलके, वेणुस्वनः साक्षाद्धेतुः, वेणुनिष्ठानि कलपदानि पक्षान्तरे भगवच्चरणानि च गतिमतामस्पन्दने हेतुरितिविभागः, **चरणैर्वे**ति अस्मिन् पक्षे कलपद"मर्श आद्यज"न्तं कलसिञ्जितनूपुरवत्त्वात् पदानां कलत्वं विवरिष्यन्ति **अत** इति वने गवां नयनादित्यर्थः, वनानां निर्दुष्टत्वे हेतुमाहुर्**गवा**मिति, **गोगोपसम्बन्धेन** तन्निष्ठशुद्धिधर्मौ वनेषु **गच्छत**स्तदा निर्दुष्टानि भवन्तीत्यर्थः, ततो वेणुभुक्तशेषभोगात् पुलको भवति पुष्पमधुधारारूपः, वेणुनिष्ठकलपदानां श्रवणार्थं गतिमतामस्पन्दनं सर्वानुभवसिद्धमिति तदनुक्त्वा भगवच्चरणानां हेतुत्वं साधयन्ति **ये पुन**रिति **अत एवे**ति चलनाभावाद्धेतोः, तत्सिद्ध्यर्थमित्यर्थः, **ताम**वस्थामिति कलचरणावस्थामित्यर्थः, **गा नयतोर्वेणुस्वनै**स्तरूणां पुलकः **निर्योगपाशकृतलक्षणयोः कलपदैर्गतिमतामस्पन्दनम्**, इदं **तनुभृत्सु विचित्रं भवती**त्यन्वयः, वेणुनिष्ठकलपदपक्षे वेणुस्वनैरित्यस्यावृत्तिविशेषणेन विशेष्यलाभो वा ज्ञेयः, **सर्वे** एवेति गोपिकादय इत्यर्थः, बध्नीत इति रामकृष्णौ बध्नीतस्तदा तयोः प्रयास इतिलक्षणकभययुक्ताः अस्पन्दनपूर्वकं रसं समर्पयन्तीतिशेषः, तरुषु विशेषमाहुः **स्थावराणां** त्विति, जङ्गमानामस्पन्दनेन प्रतिबन्धाभावमात्रं, रसप्राकट्यं तु भगवदुद्यमेनैव भवति स्थावराणां तु भगवति वनं गते प्रभुप्रयासभयात् स्वत एव भगवदुद्यमं विनैव मधुधारा भवन्तीत्यर्थः, द्वितीयव्याख्याने **तत्त्वं युक्तमिति** पुलकवत्त्वमित्यर्थः, **अत** इति पुलकस्य युक्तत्वादित्यर्थः, अन्ते तच्चेति दोहनसमये कलपदामृतवेणुगीताभावात् स्वरूपनिष्ठेन महिम्ना महत्त्वेन निर्योगपाशादिनैव रूपज्ञानमित्यर्थः, **सर्वं**मिति निर्योगपाशादिकमपीत्यर्थः निर्योगेत्यस्यार्थमाहुस्त**त्रापी**ति, रूपज्ञानेऽपि रसवद्भ्यः सकाशाद् रसजिघृक्षा प्रभोर्जातेति प्रभुमनोधर्मज्ञानमतिचित्रमित्यर्थः, एवं सतीति तादृशमनोधर्मज्ञाने सतीत्यर्थः, तृतीयव्याख्याने परित इति पदानां कादाचित्कं दर्शनमितिहेतोस्तेषां सिञ्जितानामव्यक्तता भगवदीयत्वनिश्चयाभाव इत्यर्थः, श्लोकव्याख्यानान्ते अत इति "बर्हापीडे"तिश्लोकस्यैव त्रयोदशश्लोकैर्विवरणकथनेन तादृशस्य भगवतो वृन्दारण्यप्रवेशकथनादित्यर्थः ॥ १९ ॥

इत्यष्टादशोऽध्यायः ॥ १८ ॥

तद् ददातीति ज्ञायते परन्तु तेषां तनुराहित्यान् नोक्तकार्यसम्भव इति **वेणु**पद**तनुभृ**त्पदसमभिव्याहारादवगम्यते, गविष्ठं भोग्यं रसमादातुमुद्यतं प्रभुं दृष्ट्वा ताभ्यः स्वप्रयत्नपूर्वकं **गृह्णाति** वयं तु प्रभुप्रयत्नं विनैव स्वयमेव स्वनिष्ठं **रसं समर्पयिष्याम** इति तथा कुर्वन्ति आदौ तरूणां रूपज्ञानं चित्रं "निरीक्ष्य रूपं यद् गोद्विजद्रुममृगा" इतिवाक्यात् **तेषां** रूपज्ञानं मन्तव्यं तच्च दोहनसमये रूपमहिम्नैव, एतेन **स्वरूपसम्बन्धि सर्वं प्रमेयमर्यादानाशकं स्वरूपानन्ददायकं** चेति **चित्र**मिति ज्ञाप्यते, तत्रापि रसवद्भ्यो रसजिघृक्षाज्ञानमति**चित्रम्**, एवं सति प्रभो रसवदपेक्षाज्ञानेन स्वस्यापि तथात्वेन स्वोपयोगज्ञानेनापि प्रमुदिताः स्वनिष्ठं प्रकटीकुर्वन्तीति ज्ञायते, अन्तःपूर्णरसस्याधिक्ये स्थानाभावेन प्रतिरोमकूपं बहिर्निस्सारणे रोम्णामपि तथात्वं बहिःपुलकस्सोऽत्र प्रत्यवयवं मधुधाराः पुष्पफलानि चेति ज्ञेयम् । ६ ततः ।

१. अतःपरं २. पुलक ए° । ३. तन् । ४° श । ५° योस्तयो° । ६. लुप्तम् । ७. गोनि° । ८. अथ वा **गा गोपकैरनुवनं नयतोर्वेणुस्वनैर्निर्योगपाशकृतलक्षणयोः कलपदै**रुक्तकार्य**द्वयं चित्र**मिति प्रत्येकं **सम्ब**न्धः, दोहनार्थमतिशनैश्चलनेन नूपुरसिञ्जितमप्यव्यक्तं मधुरं च भवतीति तद्वत्त्वं **पदानां कलत्वं** परितो **गोवृन्द**वेष्टनेन पदाम्बुजानां कादाचित्कं दर्शनमिति वा तेषामव्यक्तता, **लक्षण**पदेनोक्त**पाशा**भ्यां गोपादयोर्योजनेन तासां न गतिराहित्यं किन्तु **कलपदै**रेव, तत् तु गोदोहनचिह्नत्वेनैव कृतमिति ज्ञाप्यते, **पुलक**पदमावृत्त्या पूर्वापरसम्बन्धीति ज्ञेयम्, अतः **सर्वरसभोक्ता भगवान् वृन्दावने विजयत** इति निरूपितम् । इदं स्वतन्त्रद्वयं श्रीमत्प्रभुचरणकृतं श्रीसुबोधिन्यन्तःसंश्लिष्टमेव क्वचित् पुस्तकेषु दृश्यते ॥ १९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे सख्यः ! इदं तु विचित्रमित्यन्वयः । तत् स्पष्टयन्ति—गोपकैः सह प्रतिवनं गाः नयतोश्चारयतोर्नियुज्यन्ते गावः आभिरिति निर्योगा दोहनवेलायां गवां पादबन्धनार्था रज्जवः, पाशास्तु दुष्टगवामाकर्षणार्था रज्जवः, तैः । कृतं लक्षणं चिह्नं ययोः । शिरसि निर्योगवेष्टनेन, स्कन्धयोः पाशधारणेन च गोपपरिदृढश्रिया विराजमानयो रामकृष्णयोः कलानि मधुराणि पदानि येषु तैः । अत एव उदारैः श्रोतॄणां परमानन्दप्रदैर्वेणुस्वनैः तनुभृत्सु शरीरिषु ये गतिमन्तस्तेषाम् अस्पन्दनम् ईषदप्यचलनं स्थावरधर्मः, तथा तरूणां पुलको रोमाञ्चश्च जङ्गमधर्म इति ॥ १९ ॥ क्रीडावर्णनमुपसंहरति—एवमिति । एवंविधा अन्याश्च या भगवतः कृष्णस्य क्रीडास्ताश्च मिथः परस्परं वर्णयन्त्यो गोप्यस्तन्मयतां श्रीकृष्णैकानुसन्धानपरतां ययुरित्यन्वयः । लीलानां वैचित्र्यं बहुत्वं च सूचयन्नाह— वृन्दावनचारिण इति ॥ २० ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥

श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥

रचिता दशमे तत्र तामसरोधवर्णने । एकविंशो गतो वृत्तिं वेणुगीतनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

गा इति ॥ हे सख्यः ! गोपकैः सह प्रतिवनं गाः नयतोश्चारयतोः निर्युज्यन्ते गावः आभिरिति निर्योगा दोहनवेलाय गवां पादबन्धनार्था रज्जवः पाशास्तु दुष्टगवामाकर्षणार्था रज्जवः तैः कृतं लक्षणं चिह्नं ययोः शिरसि निर्योगवेष्टनेन स्कन्धयोः पाशधारणेन च गापपरिवृढश्रिया विराजमानयो रामकृष्णयोः कलानि मधुराणि पदानि येषु तैः अत एव उदारैः श्रोतॄणां परमानन्दप्रदैर्वेणुस्वनैः तनुभृत्सु शरीरिषु ये गतिमन्तस्तेषाम् आ अस्पन्दनम् ईषदप्यचलनं स्थावरधर्मः: । अस्पन्दनमित्यपि पाठः । तथा तरूणां पुलको रोमाञ्चश्च जङ्गमधर्म इति इदं विचित्रमाश्चर्यम् । चक्रवर्ती तु निर्योगाख्यः पाशो निर्योगपाशः स च चपलानां वत्सानां दोहसमये गोवामजङ्घासङ्गता गलबन्धनरज्जुः तत्सदृशत्वादुष्णीषबन्धवस्त्रमत्र निर्योगपाशः । स च मुक्तास्तबकजुष्टाग्रद्वयः पीतपटमयो गोपालधार्यः ॥ १९ ॥ एवमिति ॥ एवंविधा अन्याश्च वृन्दावनचारिणो भगवतः क्रोडास्ताश्च मिथः परस्पर वर्णयन्त्यो गोप्यस्तन्मयतां श्रीकृष्णैकानुसन्धानपरतां ययुः । यद्वा । क्रीडाः वर्णयन्त्यः क्रोडामयतां क्रीडाप्राचुर्यं प्रापुः रहसि भगवता रेमिरे । अस्यां व्याख्यायां मूलं तु अग्रिमग्रन्थे यर्ह्यम्बुजाक्षेति श्लोके त्वयाभिरमिता इत्युक्तिः ॥ २० ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमस्यैकविंशे व्यधादिमाम् ॥

इति श्रीभागवते महापुराणेऽन्वितार्थप्रकाशिकायां दशमस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्थावराणामपि वेणूनां जंगमधर्मं द्योतयन्त्योऽन्या आहुर्गा इति हे सख्यः ! गोपैः सह गाः अनुवनं प्रतिवनं नयतोः प्रापयतोर्निर्योगपाशकृतलक्षणयोः गोदोहनकाले निर्युज्यन्ते गाव आभिरिति निर्योगाः पादबंधनरज्जवश्च तिरस्कृत्य उन्मत्तानांगवामाकर्षणार्था रज्जवः पाशाश्च तैः कृतं लक्षणं चिह्नं ययोः शिरसि निर्योगवेष्टनेन स्कंधस्थापितपाशेन च गोपप्रधानश्रिया शोभनयोरित्यर्थः तयोः रामकृष्णयोः कलपदैर्मधुरोच्चारणयुक्तैरुदारैर्महद्भिर्वेणुस्वनैः यद्वा कलपदैर्मधुरपादनिक्षेपैश्च तनुभृत्सु देहिषु ये गतिमंतो जंगमास्तेषाम् अस्पदनं स्थावरजातिवृक्षाणां पुलकः रोमहर्षो जंगमस्वभाव इत्येतत्तयोर्विचित्रम् अत्याश्चर्यकमास्ति ॥१९॥ याः क्रीडाः मिथोवर्णयंत्यस्ताः तन्मयतां स श्रीकृष्ण एव प्रधानं यासां ताः तन्मयास्तत्तासां पार्षदतां ययुः प्रापुः ॥ २० ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य

दशमस्कन्धव्याख्याने वेणुगीतनामा एकविंशतितमोऽध्यायः ॥ २१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हे गोप्यः, ! इदं त्वतिचित्रमिति काश्चिदाहुः ॥ गा इति ॥ हे सख्यः ! गोपकैः सह, अनुवनं प्रतिवनं, गाः धेनूः, नयतोश्चारयतोः, निर्युज्यन्ते गाव एभिरिति निर्योगाः, दोहनवेलायां गवां पादबन्धनार्था रज्जवश्च पाशा अधृष्यगवां कर्षणार्था रज्जवश्च तैः कृतं लक्षणं चिह्नं याभ्यां तयोः शिरसि निर्योगवेष्टनेन स्कन्धयोः पाशधारणेन च गोपपरिवृढश्रिया विराजमानयोरित्यर्थः । एवंभूतयोः रामकृष्णयोः कलान्यव्यक्तमधुराणि पदानि शब्दा येषु तैः, उदारवेणुस्वनैर्हेतुभिः, तनुभृत्सु देहिषु मध्ये, गतिमतां जङ्गमानाम्, अस्पन्दनमीषदप्यचलनं स्थावरधर्मः, तरूणां स्थावराणां तु, पुलको रोमाञ्चः, इत्येतत्, विचित्रमाश्चर्यं, जङ्गमानां

स्थावरधर्मः, तस्थुषां जङ्गमधर्मश्चेत्येवंविधायाः क्वाप्यदृष्टपूर्वत्वादेतदतिचित्रमिति भावः ॥ १९ ॥ क्रीडावर्णनमुपसंहरति ॥ एवमिति ॥ वृन्दावनचारिणः भगवतः, एवंविधाः क्रीडाः, या अन्याश्च क्रीडाः, ताश्च, मिथः परस्परं, वर्णयन्त्यः गोप्यः, तन्मयतां श्रीकृष्णप्रचुरतां, श्रीकृष्णविषयबुद्धिप्राचुर्यमित्यर्थः । ययुः ॥ २० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे एकविंशतितमोऽध्यायः ॥ २१ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गा गोपकैरिति : १०.२१.१९.

वेणुस्वनोऽयमतनोदिह चेतनानामस्पन्दनं स्थितिमतां पुलकं तरूणाम् ।
नैतावदेव सखि चित्रमनङ्गरूपं साङ्गं सरूपमकरोत् स्मरमत्र चित्रम् ॥ ३२ ॥

एवंविधा इति : १०.२१.२०.

सवेणुगीतं तव चिन्तनं हरे सकृत् कृतं येन कृती स तत्पुरः ।
सवेऽणुगीतं फलमागमेन यद् भवत्यतः साधुगिरो व्रजस्त्रियः ॥ ३३ ॥
धर्मार्येणकुलस्य सर्ववयसामर्थाय च श्रीपते कामायामरयोषितां च यमुनादीनां नदीनामपि ।
अद्रिद्रुप्रमुखस्य जाड्यजनुषो ज्ञानाय चाभूदिति व्यासोक्तीरवगत्य गीतममलं श्रीवेणुगीतं प्रभो ॥ ३४ ॥
अनन्यभावेन रमेशचिन्तनं सुदुःशकं प्राक्सुलभं हि यस्य तत् ।
न दुर्घटास्तस्य तदात्मरूपतेत्यबोध्युदाहृत्य सुघोषयोषितः ॥ ३५ ॥
त्वमङ्गीकुरुषे यं तु स जडश्छिद्रभागपि । त्वद्रूपदो भवत्यत्र प्रमाणं वेणुरेव हि ॥ ३६ ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसुरिविरचिते भक्तिरसायने एकविंशोऽध्यायः ॥ २१ ॥

कृष्णप्रिया

प्यारी सखियाँ ! सुनिये श्याम राम दोनों की गति ही निराली है, मैं क्या कहूँ । जब ये दोनों अपने मस्तक पर निर्योग गोदहन वेला गाय के पैर से बछडे को बांधने की रस्सी जिसको 'नोचना' कहते है उसको सिरपर लपेट कर और पाश भागने वाली गौओं को पकडने की रस्सी फंदा को कंधो पर रखकर अथवा तो निर्योगपाश- गौओं के साथ बछडों को बांधने की रस्सी को हाथ में लेकर, एक वन से दूसरे वन में गौओंको हाँककर ले जाते हैं, साथ में गोपबाल भी हैं और सुरीली बंशी की तार छेड़ते हैं, तब चेतन मनुष्यों की बात तो छोडो, किन्तु देहधारियो में चलने वाले पशु–पक्षीयों और अचेतन जड सरिताएँ आदि तो स्थिर हो जाते है तथा तरुवरों को रोमाञ्च कर देते हैं। सखी इस अधिक नन्दलाल की क्या तारीफ करूँ ॥ १९ ॥ राजन् परीक्षित ! श्रीवृन्दावन में निर्बाध बिहार करने वाले श्रीबिहारीजी इस प्रकार की अनन्त लीलाओं का प्रतिदिन परस्पर वर्णन करती गोपियाँ तन्मय बन गयीं। गोपियाँ बड भागिनी थीं क्योंकि उनके हृदय में भगवल्लीलाओंका आविर्भाव होता था ॥ २० ॥

इति श्रीमद्भागवत दशमस्कन्ध का एकैसवाँ अध्याय समाप्त ॥ २१ ॥

अथ द्वाविंशोऽध्यायः

श्लोकाः	अनु.	इ. वं.	मंदाक्रान्ता	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
३८	३५	१	१	२	३	१२८०	१९	५१	१३५०	२४	६

श्रीशुक उवाच

हेमन्ते प्रथमे मासि [1]नन्दगोपकुमारिकाः । चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्चनव्रतम् ॥ १ ॥
आप्लुत्याम्भसि कालिन्द्या जलान्ते चोदितेऽरुणे । कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीम् ॥ २ ॥

कर्दमक्षमा

श्रीशुक उवाच– नन्दगोपकुमारिकाः– हविष्यम्–भुञ्जानाः हेमन्ते–प्रथमे मासि–कात्यायनी–अर्चन–व्रतम्–चेरुः ॥ १ ॥ हे नृप ! अरुणे–उदिते- कालिन्द्याः–अम्भसि–आप्लुत्य–च–जलान्ते-सैकतीम्–प्रतिकृतिम्–कृत्वा,देवीम्–आनर्चुः ॥ २ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

द्वाविंशे गोपकन्यानां वस्त्राहरणलीलया । वरं दत्त्वा गतः कृष्णो यज्ञशालामितीर्यते ॥ प्रथमे मासि मार्गशीर्षे ॥१-२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वस्त्राणामाहरणं स्वीकारस्स एव लीला तया (१) । मार्गशीर्षे "हेमंतः शिशिरश्चैव वसंतो ग्रीष्म एव च । वर्षा शरच्च ऋतवो मार्गाद्याः स्युर्द्विमासकाः" इति पंचांगदर्शने । "षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात्" इत्यमरोऽपि । कुमार्य एव कुमारिकाः । स्वार्थे कस्ततष्टाप् । "केऽणः" इति ह्रस्वः । 'कुमारी कन्यकानार्योः' इति धरणिः । अत्र कुमारिकाशब्देन प्राप्तयौवना नार्यो ज्ञेयाः, अन्यथा "याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः" इति वक्ष्यमाणविरोधः स्यात् । न हि कन्यानां रमणसंकल्पोऽस्ति, तासां संकल्पानुसारेणैव भगवता ताभ्यो वरदानं कृतम् 'संकल्पो विदितः साध्व्यो भवतीनाम्' इति वक्ष्यमाणत्वात् । स्वामिचरणा अपि 'श्यामसुंदर ते दास्यः' इत्यत्र तथैव व्याख्यास्यंतीति । हविष्यं यवाद्यन्नम् । हविष्यं तु सनत्कुमारसंहितायामुक्तम्—"हैमंतिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः । कलायकंगुनीवारवास्तूकहिलमोचिकाः ॥ षष्टिकाः कालशाकं च मूलकं केमुकेतरत् । कंदः सैंधवसामुद्रे गव्ये च दधिसर्पिषी ॥ पयोऽनुद्धृतसारं च पनसाम्रे हरीतकी । पिप्पली जीरकं चैव नागरंगं च तिन्तिणी ॥ कदलीलवलीधात्रीफलान्यगुडमैक्षवम् । अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते ॥" इति । सितमस्विन्नमनूष्मपक्वम् । धान्यम् तंडुलाः । प्राच्ये केमुआ इति केमुकस्य नाम । कलायः मटरीति । हेमाद्रौ तु —"हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः । माषकोद्रवगौरादीन्सर्वाभावे विसर्जयेत् ॥" आग्नेये तु—"व्रीहिषाष्टिकमुद्गाश्च कलायः सलिलं पयः । श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः ॥ कूष्मांडालाबुवार्त्ताकपालक्यज्योत्स्निकास्त्यजेत्" इत्युक्तम् । कात्यायन्यर्चनमेव व्रतं नियमम् । "व्रतं तु नियमे कृच्छ्रादौ संकल्पापवासयोः" इति धरणिः । चेरुः चक्रुः धातूनामनेकार्थत्वात्करणेऽपि चरिरस्तीति ॥ १ ॥ जलांते जलसमीपे । अरुण उदिते "उदयात्प्राक् चतस्रस्तु घटिका अरुणोदयः" इति माधवः । सैकतीं मृण्मयीम् । प्रतिकृतिम् प्रतिमाम् "प्रतिकृतिरथार्चायां प्रतिनिधिप्रतिकारयोश्च स्त्री" इति मेदिनी ॥ २ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं प्रायो व्रजान्तरादागतानां व्यूहानां पूर्वानुरागं शरत्प्रसङ्गे वर्णयित्वा हेमन्तप्रसङ्गे कुमारीणां पूर्वानुरागप्रक्रियामाह–हेमन्त इत्यादिना । तदिदं वर्गद्वयं श्रीहरिवंशे विविक्तं "युवतीर्गोपकन्याश्च रात्रौ सङ्काल्यकालवित्" इत्यनेन । ननु, तत आरभ्य नन्दस्येत्यादिना श्रीराधिकादीनां परमरमात्वं स्थापितं "यद्वाञ्छया श्रीर्ललनाचरत्तपः" इत्यनेन च श्रीव्रजेन्द्रनन्दनस्य तदेकप्रेयसीत्वं दर्शितं "नायं श्रियोऽङ्ग" इत्यादिना दर्शयिष्यते च "दामोदराधरसुधामपि गोपिकानाम्" इत्यनेन च तदेव दृढीकृतं रासप्रसङ्गे कृष्णवध्व इति वक्ष्यते आगमे चान्यास्पृष्टतन्नित्यप्रेयसीत्वेन च तदुपासना विधीयते श्रीमद्दशाक्षरस्य तन्नामव्याख्यासु गौतमीये श्रीनारदेन गोपिकानां पतिरेवेति पर्यापनं कृतं ब्रह्मसंहितायां "श्रियः कान्ता कान्तः परमपुरुषः" इत्यादिना तथैव निश्चीयते तापनीश्रुतौ च "स वो हि स्वामी भवति" इति तदेव साक्षात् श्रूयते तथा "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" इत्यादिना तत्पितृभिः श्रीकृष्णादन्यत्र तदेकयोग्यानां तासां दानं न श्रद्धीयते दाने च सति "जह्यामसून् व्रतकृशान् शतजन्मभिः स्यात्" इत्यादिश्रीरुक्मिणीवचनवत्तदेकालम्बनं जीवनमपि न सम्भाव्यते अन्यपुरुषसम्बन्धेन तु सुतरां तर्हि कथमुच्यते व्यूढानामिति अत्र समाधीयते तत्तच्छ्रुतार्थानुप-

---

[1] व्रज–श्रीधर. वंशी. वीर. विज. ; गोप–विश्व. ।

त्यार्थापत्तिप्रमाणेन लीलाशक्त्यैव मायादिद्वारा मिथ्यैव तत्प्रपञ्चितं यत्र तत्पितरश्च ताश्च सर्वे व्रजवासिनश्च तथाभूता भ्रान्ता तथापि स्वाभाविकवासनामय्या श्रीकृष्णैकप्रत्याशया ता अपि जीवनं ररक्षुः पुरुषान्तरसम्बन्धश्च तासां सद्दक्कल्पनया माययैव बभुवुः निवारित इति लभ्यते तथा च

"नासूयन् खलु कृष्णाय मोहितास्तस्य मायया। मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः" ॥

इत्युपलक्षणी करिष्यते तदेतदपि "यथाऽधनो लब्धधनो विनष्टे तच्चिन्तयान्यन्नमृतो न वेद" इति वत्तासामुत्कण्ठावर्धनार्थमेव अत्र च व्यूढाकुमारीभेदेन द्विधा स्थितिस्तु वैचित्री पोषार्थमेवेतिदिक् रासप्रमङ्गे तु विशेषतः स्थापयिष्यते अथ प्रस्तुतमनुसरामः श्रीनन्दस्य व्रजे याः कुमारिका इत्यौदासीन्येनैव निर्देशात् सगोत्रसपिण्डत्वादिसम्बन्धरहिता गृहीताः पाठान्तरे च श्रीमन्नन्दस्य ये गोपास्तेषां कुमारिका इति स एवार्थः तदुक्तं "युवतीर्गोपकन्याश्च" इति कन् प्रत्ययो बाल्पविवक्षयार्थे कात्यायनी वैष्णवीशक्तिः तस्या अर्चनरूपं व्रतम् ॥ १ ॥ तासां तादृशीं तदनुरागचेष्टां दर्शयन् तच्चिकीर्षुर्जनानपि बोधयन् तत्प्रकारमेवाहुः—आप्लुत्येति सार्द्धैस्त्रिभिः। तत्राप्लुत्येति युग्मकम् अम्भसीत्यादिना हेमन्तव्रते कृच्छ्रं दर्शितं कालिन्द्या एव जलान्ते अद्यापि घट्टवासिनीदेवीनाम्ना प्रसिद्धं व्रजघट्टे अरुणे सूर्यसारथौ देवीं कात्यायनीं सैकतीं प्रतिकृतिं कृत्वा तदभिन्नत्वेन प्रतिष्ठाप्येत्यर्थः। सैकतीमित्यचिरात् साध्यसाधनत्वेन हे नृपेति अप्राप्तयौवना अपीदृशेन रागेण भजन्तीति विचारय श्रीकृष्णमोहनतामिति भावः। सुरभिरिति यथापेक्षं सर्वैरपि योज्यं बहुत्वं तत्तद्बाहुल्यात् बलिभिः वस्त्रभूषणनैवेद्याद्युपचारैः उच्चावचैरन्यैश्च बहुविधैस्तैः तानेवाह—प्रवालेति। अत्र क्रमभङ्गः श्रीकृष्णहृतमनस्त्वात्तासां तद्विस्मृतेः श्रीबादरायणेरेव वा तद्वृत्तकथने सम्मोहात् ॥ २-३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं वर्षाशरत्क्रीडानुक्त्वाधुना क्रमप्राप्तां हेमन्तकालक्रीडामाह—हेमन्त इत्यादिना व्रजमित्यन्तेन। नन्दस्य गोपराजस्य व्रजे याः कुमारिकास्ता इति तेन साक्षात्सम्बन्धरहितास्ता गृहीताः श्रीकृष्णपतित्वायोग्यास्तत्पितृव्यकन्यादयस्तु परिहृताः; यद्वा, नन्दति हृष्यतीति नन्दो व्रजो याभ्यस्ताः कुमारिका इति सर्वथा श्रीभगवत्परिग्रहयोग्या इत्यर्थः। कप्रत्ययः प्रायो बाल्यविवक्षया अल्पार्थे; यद्वा, स्वार्थे श्रीभगवद्विवाहापेक्षयापि अन्यत्र विवाहसम्मत्या, स्वयञ्च व्रजेशं प्रति लज्जया तत्प्रसंगाकरणात् तास्तु, कासाञ्चित् प्रौढतास्तेः कुत्सितो मारः कामदेवः सौन्दर्य्येण याभ्य इति, श्लेषार्थेनापि श्रीभगवद्योग्यतैवोक्ता, हविष्यं हैमन्तिकसिन्धान्यादिसहितं गव्यदधिदुग्धादिकम् कात्यायनी परमवैष्णवी श्रीशिवप्रिया पार्वती, तस्या अर्चनव्रतं नियमम् अर्च्चनरूपं वा व्रतम्, तच्च मासमात्रसमाप्यमिति केचिदाहुः ॥ १ ॥ तत्प्रकारमेवाह—आप्लुत्येति सार्द्धैस्त्रिभिः। अम्भस्याप्लुत्येति–परमपावनशीतलजले विवस्त्रतया निमज्य स्नात्वेत्यर्थः। अनेन जलान्त इत्यादिनापि व्रते कृच्छ्रं दर्शितम् कालिन्द्या इत्यस्य पूर्वापराभ्यामेवान्वयः। अरुणे सूर्यसारथौ सूर्ये वा उदिते सतीति व्रतापेक्षया, ततः प्रागेवाप्लवनं ज्ञेयम्, सैकतीं वालुकामयीम्, प्रतिकृतिं प्रतिमां कृत्वेति, अचिरात् कामितविशेषसंसिद्धये। हे नृपेति जगत्पूज्याभिरपि ताभिः श्रीकृष्णार्थं सापि तथाच्चर्यत इति वैयग्र्यमाहात्म्यमहो पश्येति भावः ॥ २॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

हेमन्तप्रथमे मासि मार्गशीर्षे मासि हेमन्तपूर्वभाविनीकार्त्तिके कात्यायनी दुर्गा प्रतिकृतिं प्रतिमां सैकतीं वालुकामयीम् ॥ १—१० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं गोपीभिर्मिथोऽनुवर्णितानि शारत्कालिकानि कानिचिद्भगवच्चेष्टितानि उक्त्वाऽथ कानिचिद्विवक्षुस्तावदन्तरा सिंहावलोकितन्यायेन पौगण्डवयसो भगवतः कानिचिच्चेष्टितानि हैमन्तिककालिकान्युपवर्णयति सप्तभिरध्यायैः, तत्र किञ्चिच्चेष्टितं वक्तुम् उपोद्घातमाह—हेमन्त इति। हेमन्ते ऋतौ तत्रापि प्रथमे मासे मार्गशीर्षे मासि नन्दव्रजस्थाः गोपकुमारिकाः कात्यायन्याः दुर्गायाः अर्चनात्मकं व्रतं चेरुरनुष्ठितवत्यः, कथम्भूताः? हविष्यं भुञ्जानाः नियताहारा इति भावः ॥ १ ॥ कथं चेरुरित्यत्राह–आप्लुत्येति। अरुणे उदिते सत्यरुणोदयवेलायां यमुनायाः अम्भसि स्नात्वा जलान्ते तटे प्रतिकृतिं वालुकामयीं कात्यायनीं प्रतिमां विधाय हे नृप ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भक्तिरेव भगवत्प्रसादजननीति दर्शयितुं गोपकुमारीणां कृष्णे भक्तिं निरूपयत्यस्मिन्नध्याये, तत्र तासां हरेः सर्वकार्याणामन्तरङ्गं कात्यायनीति तदर्चनव्रतकरणेन श्रीकृष्णः प्रसन्नो भवतीति तदर्चनाविधिं कथयति—हेमन्त इति। कार्त्तिकमार्गशीर्षमासौ हेमन्तऋतुः तत्र प्रथमे मासि कार्त्तिकमासे व्रतं नियमम् ॥ १ ॥ कालिन्द्याः यमुनायाः जलान्ते जलसमीपे च शब्द एवार्थः उदिते अरुणे अरुणोदय एव सैकतीं सिकतानिर्मितां प्रतिमामानर्चुः पूजां चक्रुः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवं व्यूढानां पूर्वानुरागं शरत्प्रसङ्गे वर्णयित्वा हेमन्तप्रसङ्गे तद्व्रजकुमारीणां वर्णयति—हेमन्त इत्यादिना व्रजमित्यन्तेन ॥ १-३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथोढानामनुरागं वर्णयित्वाऽनूढानामरागचेष्टामाह—हेमन्ते प्रथमे मासीत्यादि । हेमन्ते ऋतौ प्रथमे मासि मार्गशीर्षे, अनयैव लीलया मासोऽप्यसौ तस्य प्रिय आसीत्, अतएव वक्ष्यति—(भा. ११ । १६ । २७) मासानां मार्गशीर्षोऽस्मि इत्यादि । कात्यायन्यर्चनव्रतमित्यस्यायं भावः । वयं कन्यकाः पितृ—मातृ—सङ्कोचात् दूत्यन्तरं कर्तुं न शक्यते । तादृश्यः प्रौढा वयस्या अपि न सन्ति, सन्तु वा तासु स्वानुरागं प्रकटयितुञ्च न शक्यते । ताश्च कन्यानामस्माकमनुरागः कृष्णविषयो जात इति च न विदन्ति । तदास्माकमनुरागः कात्यायन्यैव दूतीभावेन चेत् सफलीक्रियते, तदैव स्यादिति दूतीत्वेन त्वामाराधयितुं तद्व्रतमारब्धम्, न तु तत्प्रसादलिप्सया स्वतःसिद्धत्वात् । सिद्धत्वेनावतीर्णा अप्यग्रिमवयस्यतादृशस्वभावतया स्वतः प्राकट्ये ग्राम्यतापत्तेः परकृतसाहाय्यमौचित्येनैवोपरुन्धन्ति ॥ १-३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

इदानीमूढानामनुरागमुक्त्वा अनूढानामनुरागमाह हेमन्त इति । हेमन्ते प्रथमे मासि मार्गशीर्षे, अनया लीलयैव मासोऽप्यसौ तत्प्रिया बभूव; अतएव वक्ष्यति (भा. ११ । १६ । २७) "मासानां मार्गशीर्षोऽस्मि" इति ॥ १-३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

द्वाविंशे चण्डिकापूजा गोपिभिर्वाससां हृतिः । सन्तापो वरदानन्तु स्तुतिः कृष्णेन कीर्त्यते ॥

व्यूढानां शरदि कृष्णानुरागं वर्णयित्वाऽनूढानामपि गोपीनां तमनुवर्णयंस्तासां नित्यसिद्धकृष्णप्रेयसीभावानामपि कृष्णप्राप्तिकामनया लोकरीत्यैव हेमन्ते देवीपूजामाह—हेमन्त इति । प्रथमे मार्गशीर्षे तासां कृष्णकान्तानां भेदद्वयमिदं श्रीहरिवंशविष्णुपुराणब्रह्मपुराणादावपि दृष्टं "युवतीर्गोपकन्याश्च रात्रौ सङ्कल्पकालवित्" इत्यादिभिः ॥ १—२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

द्वाविंशे कन्यकावस्त्रहरणादिलीलां वर्णयति—हेमन्त इति । प्रथमे मार्गशीर्षे ॥ १ ॥ सैकतीं प्रतिकृतिं वालुकामयीं प्रतिमाम् ॥ २-४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

द्वाविंशेऽभ्यर्चिता दुर्गा कन्याभिर्वाससां हृतिः । कृष्णेन वरदानञ्च तत्स्तोत्रञ्च कथ्यते ॥

ऊढानां व्रजसुभ्रुवां शरदि कृष्णानुरागमुपवर्ण्यानूढानां तमाह हेमन्त इति । प्रथमे मार्गशीर्षे मासि यद्यप्येतास्तन्नित्यप्रियास्तथापि लोकरीत्यैव कात्यायनीपूजेयं नारदपञ्चरात्रे "जानात्येकापरा कान्त" मित्यादिना या पराशक्तिरुक्ता सैवेह कात्यायनी बोध्या ॥ १ ॥ सैकतीं प्रतिकृतिं प्रतिमां कृत्वा देवीमानर्चुः ॥ २ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ भगवद्भजनमेव तत्प्रसादजननं तदपि न वेदादिकवेदितृकृतमेवेति नियम इत्यावेदयितुं सुदत्यस्तत्कृत्वा प्रसादमापुरिति प्रतिपाद्यते । तत्रादौ मनोनियामिका भवानीति तत्स्थिरतायै पूर्वमनन्तरमनन्तप्राप्तिमङ्गलदा सर्वमङ्गलेति तदर्चनप्रकारमाह ॥ श्रीशुक इति । हेमन्ते मार्गशिरःपुष्यमासात्मके ऋतौ प्रथमे मार्गशीर्षमासि नन्दव्रजे विद्यमानाश्च ताः कुमारिकाश्च हविष्यं संयावाद्यन्नं होमशिष्टं भुञ्जानाः कात्यायन्या अर्चनव्रतं चेरुः । कतस्यापत्यं कतेति दक्षस्य नामान्तरं हिमवदाह्वयान्तरं वा गर्गादित्वाद्यञ् सर्वत्र लोहितादिकतन्तेभ्य इति ष्युषित्वाङ्ङीप् । उमा कात्यायनी गौरीत्यमरः । उमा कात्यायनी दुर्गा काली हैमवतीश्वरी । सती कालञ्जरी गोत्रेति वाचस्पतिः ॥ १ ॥ कालिन्द्या अम्भस्याप्लुत्य स्वयं स्नात्वा । अनेन सावर्ण्यादिव तत्कृतोपकारा सर्पासर्पणादियमपि कामितकृष्णलक्षणमतिदात्री स्यादिति भावो भामिनीनां सूच्यते । अरुणे उदिते तस्यैव सिद्धिसमयत्वात् । हे नृप कालिन्द्या जलान्ते स्वपुलिने लीला कल्पेद्भगवतेति सैकतीमित्युक्त्या ध्वन्यते । तटे सैकतीं सिकतामयीं प्रतिमां कृत्वा देवीं तदन्तरावाहितामानर्चुरपूजयन् ॥ २ ॥

श्रीसुबोधिनी

अतः सप्तभिरध्यायैर्निरोधोऽत्र निरूप्यते । उत्तमः फलपर्यन्तो विद्यानिर्णयपूर्वकः ॥
विद्यापञ्चकमत्रापि तस्मिन् जाते सुरेक्षणम् । इहैव गमनं चापि वैकुण्ठावधि वर्ण्यते ॥
ज्ञान कर्म च विद्यायां पञ्चात्मकमिति स्थितिः । अविद्याकार्यसम्बन्धो नात्रेति बिनिरूप्यते ॥

स्त्रीपुंसोः सह भावेन तुल्यत्वाच्च निरूपणम् । लोकानुसारिणी विद्याकर्मज्ञानात्मिका पुरा ॥
निरूप्यते गोपिकानां गोपानां च विभेदतः । एकोनविंशे भोग्यानां कुमारीणां व्रतं यथा ॥
अन्तःस्थानां कुमारीणां तथा ज्ञानमिहोच्यते ॥

पूर्वाध्याये स्त्रीणां गोपिकानां भगवत्क्रीडायां परमासक्तिर्निरूपिता ताश्च द्विविधाः अनन्यपूर्वाः अन्यपूर्वाश्च अन्यपूर्वास्त्वन्यथैव कृतसंस्काराः तासां त्यागोऽङ्गं तदुत्तरत्र वक्ष्यते अन्यासामसंस्कृतानां तत्संस्कार एव निरूप्यते विद्यायामयमेव त्यागात्यागनिर्णयः अत्यागस्त्यागादुत्तम इति निरूपयितुं परीक्षां नन्दगोपो मुख्य इति तत्रैव भोग्याः कन्यका भवन्ति ता दैवगत्या एकजातीया एव ऋषयः षोडशसहस्रमिति पुराणान्तरादवसीयते ता अप्यम्बेति सम्बोधनात्पूर्वं निरूपिताः तासाम् ऋषित्वादन्यत्र दानमन्यथाभोगं चाशङ्क्य व्रतार्थं प्रवृत्तिः पूर्वं शरदि तासां चित्तस्थितिर्निरूपितेति हेमन्ते व्रतप्रवृत्तिः तत्रापि "मासानां मार्गशीर्षोऽहम्" इति भगवद्वाक्यात् प्रथमे मासि व्रतारम्भः इदं व्रतमत्रैव प्रसिद्धं कात्यायनी आधिदैविकी तामसीशक्तिः दुर्गा पार्वती च राजसी ब्राह्मणाः सात्त्विकाः तेषां प्रसादरूपाशक्तिः स्त्री भवति भगवानेव वा गुणातीतः तदर्थं सेव्यत इति अतो हेमन्ते पञ्चम ऋतौ पञ्चमपुरुषार्थसिद्ध्यर्थं प्रथमे मासि मार्गशीर्षे नन्दगोपस्य कुमारिकाः सम्पादिताः संरक्षिताः हविष्यान्नमेव भुञ्जानाः कात्यायनीपूजालक्षणं मासं समाप्य व्रतं चेरुः नित्यं कात्ययनी पूजनीयेति नियमः ॥ १ ॥ तत्र पूजाप्रकारमाह—आप्लुत्याम्भसीति । कालिन्द्या अम्भसि स्नात्वा सा हि भगवत्पतित्वकामनया तपः करोति तेन चाग्रे फलं भाव्यतः सफलतपःसम्बन्धित्वेनेतदम्भोपि तादृशमिति व्रतानुकूलं सफलं च तत्र स्नानमिति ज्ञापनाय कालिन्दीपदं तस्याश्चिरेण फलं भाव्यत्र तु शीघ्रमिति ज्ञापनाय पदन्यासः जलान्ते जलसमीपे चकारादागत्य गृहेऽपि देवीं प्रतिमारूपां कृत्वा सिकतामयीम् अरुणे उदिते प्रातः सन्ध्यायां सर्वकामनाप्रदायां देवतां तामानर्चुः नृपेति सम्बोधनम् ॥ २ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

एकोनविंशाध्याये प्रकरणार्थनिरूपणे विद्यापञ्चकमत्रापीत्यादि । साक्षादसम्भवे परम्परयापि भगवानेव सेव्यः । देहेन्द्रियादिकं च तदर्थमेव विनियोक्तव्यं, न स्वार्थमपीति निर्णयरूपैका । देहनिर्वाहार्थं प्राणादिधर्मनिवृत्त्यर्थमपि स्वतः सम्भवेऽपि प्रभुरेव प्रार्थनीयः, न त्वन्योऽपि । प्रभुश्च लोके नालौकिकं करोति, भगवद्भावे चानुग्रह एव नियामकः, न तु साधनमपि शास्त्रीयमिति निर्णयरूपा द्वितीया । इतरभजनं न कार्यं पारम्पर्यागतमपि, धर्मं भगवदिच्छायां सत्यां विसृजेतेतिरूपा तृतीया । सर्वावस्थासु हरिरेव सेव्यः, भगवांश्चाक्लिष्टकर्मा रक्षत्येव स्वानिति च तुरीया । माहात्म्यज्ञानपूर्वकः परमस्नेहो भक्तेष्वाधिक्यज्ञानं चेति पञ्चमी । एतत्पञ्चकसम्पत्तौ पूर्णो निरोधः सिद्ध इति स्वकार्ये सम्पन्ने जाते पश्चादिन्द्रादिविषयिणीं दृष्टिं कृतवान् । अत एव पश्चान्निरूपितम् । व्रजेन्द्रस्य च भवदुत्कर्षज्ञानहेतुभूतवरुणदर्शनं कारितवान् । इदमेवोक्तं **तस्मिन् जाते सुरक्षणमित्यनेन** । एतन्निरूपणतात्पर्यमाहुः **अविद्याकार्येति** । अविद्या तत्कार्यं चेति ज्ञेयम् । स्त्रीपुंसेति । तयोस्तथानिरूपणे **हेतुस्तुल्यत्वादिति** । अविद्यासम्बन्धाभावस्य तुल्यत्वादित्यर्थः । **निरोधस्य वा** ॥ ० ॥ **एकोनविंशाध्यायार्थनिरूपणसन्दर्भे, अन्यपूर्वास्त्वन्यथैव कृतसंस्कारा** इति । अत्रेदं ज्ञेयम् । स्त्रीणां विवाह एव मुख्यः संस्कारः, समन्त्रकत्वात् । स च स्वर्गादिफलकाग्निहोत्रादावधिकारित्वसम्पादको लोके । प्रकृते चातथात्वाद्भगवत्सम्बन्धस्य च फलत्वेन वक्ष्यमाणत्वात् तत्र चास्याप्रयोजकत्वादेतत्कथनमत्राप्रयोजकं स्यादिति विवक्षितफलप्रयोजक एव कश्चन धर्मः संस्कारशब्दवाच्योऽत्र वाच्यः । स च विवाहजनितः तृतीयपुरुषार्थरसविशेषानुभवहेतुरेव । स दम्पत्योर्न सम्भवतीति यतस्तद्रसमर्यादा । अत एवान्यथैवेत्युक्तम् । भगवदीयानामन्यत्र विवाहस्यानुचितत्वात् । परन्तु तैः सह सम्बन्धाभावाद् भगवद्रसपोषकत्वाच्चास्य संस्कारत्वम् । एतेनायुक्तत्वमपि परिहृतम् । न ह्यनुचितः संस्कारो भवतीत्यनवद्यमखिलम् । किञ्च, 'लोकानुसारिणी विद्या कर्मज्ञानात्मिका पुरा निरूप्यत' इति वाक्याल्लोकानुसारेणात्र कर्म निरूप्यते, न तु भगवच्छास्त्रानुसारेण । भगवदर्थं भगवानेव सेव्य इति यतस्तत्र मर्यादा । लोके हि प्रियप्राप्त्यर्थं तदीया दूतिका प्रार्थ्यते, तथात्रापि कात्यायनी प्रार्थ्यते । लौकिकी सा यथा द्रव्यादिदानेन तोष्यते, तथेयमलौकिकीत्यलौकिकप्रकारेणेति । अन्यभजनदोषोपि नैवं सम्भवति भगवत्तोषहेतुस्ववपुर्मण्डनतुल्यकक्षत्वेन रसपोषकत्वात् । विवाहितानां तु प्रौढात्वेन जातभावाङ्कुराणामनुदिनमेधमानप्रेमार्द्रार्द्रप्रियेक्षणेक्षणप्ररूढतद्रसपूरमत्तत्वेनान्यस्फूर्तिरहितानां समयविशेषे समागम एवापेक्षितः । स च 'निशम्य गीत' मित्यारभ्य 'न न्यवर्तन्ते'त्यन्तेन निरूपयिष्यते । एतदेवाभिसन्धायोक्तं तासां त्यागोऽङ्गमिति । ननु कुमारीणां व्रतप्रसङ्गे प्रौढानां कथं प्रसङ्गः । इत्थम् । मूले 'कुमारिका व्रतं चेरु' रिति कथनेन तदितरासां व्यावृत्तिः सूच्यते । तत्र व्यावर्त्यानां स्वरूपं वाच्यम् । व्यावर्त्यत्वे हेतुश्चेति युक्तं तदुभयकथनमिति दिक् । एतदग्रे **अन्यासामसंस्कृतानामित्यादि** । आदौ भगवदर्थव्रतजक्लेशजभावविशेषलक्षणः संस्कारः । अनायासेन प्राप्तात् क्लेशेन प्राप्ते स्नेहातिशयस्यानुभवसाक्षिकत्वात् । ततः 'कृष्णचेतस' इति पदोक्तानवरतानेकविधसङ्गममनोरथरूपस्तज्जनितो भावविशेषश्च सः । येनाग्रे भगवत एव प्रार्थना । तत 'उपशी'त्यादिना वक्ष्यमाणप्रकारकः सः । ततः प्रियागमने

सति विविधरसभावगर्भपरस्परवाग्व्यवहारजप्रमोदविशेषजभावः सः। ततो 'यूयं विवस्त्रा' इति वाक्ये श्रुतेऽग्रिमवाक्यनिरूपितो भावविशेषः सः। ततो वसनदानतत्सामयिकभावोद्गारिदृष्टिविविधस्पर्शैर्जातो भावविशेषः सः। स एव 'दृढं प्रलब्धा' इति श्लोकेन शुकेनोक्तः। अत एवासूयाहेतुषु सत्स्वपि न तदुत्पत्तिः, संस्कारस्य दोषजनकत्वात्। ततोऽग्रिमवाक्यनिरूपितस्तद्विशेषः सः। ततोऽतितुष्टप्रियावलोकनवरदानवाक्यश्रवणजसङ्गमविशेषनिश्चयजः सः। ततो गृहगमनाज्ञानजनितदुःखभरेणेष्टप्राप्तिसुखभरेण च शबलो भावविशेषश्च सः तत एकैकस्य क्षणस्यानेककल्पतुल्यत्वभानं सर्वतः सङ्गोपनेन च स्वहृद्येव प्रवर्धमानभावरसपूरतया क्वचिदन्योन्यं तत्कथामृतोद्गिरणनिर्वृत्या सततमनोरथैश्चानुक्षणं साक्षादुपभोगमिव मन्यमाना भवन्तीत्यनेकविधसंस्कारः। अन्तःसाक्षात्सम्बन्धो बहिर्न तथेति च। एवं हि सत्यग्रिमभगवत्सङ्गे मुख्यरसास्वादयोग्यतेत्येषां संस्कारत्वम्। एतदेवाभिसन्धायोक्तं **संस्कार एव निरूप्यत** इति। यद्यपि भगवत्यस्ति सर्वं सामर्थ्यं तथापि तद्रसत्वरूपमेव तथेति तथोच्यत इति भावः। **विद्यायामयमेव त्यागात्यागनिर्णय** इति। अयं त्यागपदार्थः, अयमत्यागपदार्थः, स चैवं कार्यः, अन्यथा न कार्य इति निर्णयरूपः **अयमेव**। उक्तरूपसंस्कारनिरूपणलक्षण इत्यर्थः। तथाहि। 'यदहरेव विरजेत्तदहरेव प्रव्रजे'दिति श्रुत्या प्रावाहिकाश्रममर्यादायां रागाभावमात्र एव त्याग उपदिश्यते, भक्तिमार्गे न तथेति ज्ञापनाय **विद्यायामिति**। सात्र भक्तिमार्गीयोच्यते। अन्यत्र विद्यात्वमेव नाभिमतमिति सामान्यपदम्। एतासां विषयरागाभावेऽपि फलरूपो भगवान् गृह एवास्तीति बहिर्गमने प्रयोजनाभावात् बाह्यो न त्यागः, किन्तु गृह एव स्थित्वा तत्प्राप्त्यनुकूलो यत्नः। यथा यथा भगवद्भावप्राचुर्यं तथा तथा बहिरङ्गसाधनत्यागोऽन्तरङ्गतत्कृतिश्च। भगवत्सङ्गमभावस्वाभाव्येन यत्त्यक्तं भवति वैदिकमपि, तद् भवतु नाम, न तु स्वबुद्धिपूर्वकः कस्यचित्त्यागः। प्रियतोषार्थमशक्यत्यागा अपि दैहिकान्तःकरणधर्मास्त्याज्याः। फलप्राप्तावपि यदा भगवदिच्छा तदैव त्यागः कार्यः, नत्वन्यदापीति व्रतभगवत्प्रार्थनवसनत्यागाञ्जलिबन्धगृहगमनैर्निर्णीयत इति तथा। अत एवाग्रे त्याग उक्तः। उक्तरूपादन्यथा कृतस्त्यागस्त्याग एव न भवति, फलरसाननुभावकत्वादित्यत्यागवदस्य तात्पर्यं ज्ञेयम्। साधनदशायां तु त्यागो न युक्त इति निर्गलितोऽर्थः। एतासां फलप्राप्तावपि पूर्वोक्तसंस्काररीत्या साधनदशैव। वस्तुतस्तु फलप्राप्तिनिश्चय एवाधुना, प्राप्तिस्त्वग्रे। अतो युक्तं गृहगमनम्। ननु 'नीवीं प्रति प्रणिहिते च करे' इति न्यायेन तदा स्ववस्त्रमोकार्थमपि तदनुसन्धानं कथं घटते। इत्थम्। सङ्गमभाव एव स्वस्मिन्भगवतोऽतिप्रीत्या स्वान्तरायासहिष्णुत्वभावनयेति बुध्यस्व। अत एव प्रियेण 'बद्ध्वाञ्जलिं मूर्ध्नी'ति तद्भावपरीक्षैव कृता। उक्तभावेनैव चेदेवं कृतं भविष्यति, तदा दृष्टचन्तरायमपि दूरीकरिष्यन्तीति, देवहेलनहेतुकथनेन वसनत्यागे स्वारुचिः सूचिता। साक्षात्तथात्व एव तथाकरणं युक्तम्। न तु तथा भावनायामपीति यतो भगवदाशयः। एतदेवाभिसन्धायोक्तं—**अत्यागस्त्यागादुत्तम** इति ज्ञापयितुं परीक्षेति। अत एव मूले 'तत्पूर्तिकामा' इत्युक्तम्। पूर्णाङ्गदृष्ट्या पूर्तिं मन्वानस्यातथात्वे सति भवत्यपूर्तिरिति पूर्वोक्तरीत्या तत्पूर्तिकामा एव तथा कृतवत्य इत्यर्थः। वसनात्यागे शीघ्रमेव प्रियान्तिकागमनं स्यात्त्यागेन च विलम्बोऽभवदित्यप्युत्तमत्वे हेतुरिति ज्ञेयम्।

एतदग्रे 'ब्राह्मणा सात्त्विका' इत्यारभ्य सेव्यत इत्यन्तम्। पद्मपुराणे गीयते। दण्डकारण्यवासिनः षोडशसहस्रमृषयः स्वाश्रमान्तिकागतकोटिकन्दर्पाधिकलावण्यश्रीकोसलेन्द्रदर्शनजरिरंसाभावभरेण तं प्रार्थितवन्तस्तदीयस्त्रीत्वम्। तदा भगवानेकपत्नीव्रतधरोहमधुना, व्रजे वो मनोरथः सम्पत्स्यत इति प्रसादं कृतवान्। त एवैता इति हृदि कृत्वोक्तं ब्राह्मणा इत्यादि। आदिवाराहे 'कृष्णस्य रमणार्थं हि सहस्राणि च षोडश। गोप्यो रूपाणि चक्रुश्च तत्राक्रीडन्त केशवम्,। महाकौर्मे 'अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे। भर्तारं च जगद्योनिं वासुदेवमजं विभुम्॥' अत एवैकजातीया ऋषयः षोडशसहस्रमिति पुराणान्तरादवसीयत इत्याचार्यैरुक्तम्। अत्रैवं ज्ञेयम्। पुरुषशरीरे सति स्त्रीभावोत्पत्तिरसंभाविता, विरोधात्। एवं सत्येतानतिशुद्धान् कृतपुण्यपुञ्जान् दृष्ट्वा हरिस्तथा प्रसन्नोऽभवद्यनादेयतमसाक्षात्स्वरूपानन्ददित्साविरभूत्। तदनुभवस्तु न पुंस्त्वे केवलस्त्रीत्वे वा, मानाभावात्, द्विजस्त्रीषु तथा प्रपन्नास्वप्यदानात्, क्षुद्रास्वपि पुलिन्दीषु दानात्। किन्त्वचिन्त्यानन्तशक्तेर्भगवतः प्रसादरूपा अपि शक्तयो बह्वयः सन्ति। तत्राप्यन्तरङ्गतमा सैकाऽस्ति यत्सम्बन्धिजीवे भगवत्स्वरूपानन्दानुभवोऽवश्यंभावी। सा चोक्तरूपस्त्रीत्वलक्षणधर्मरूपैव। अतस्तामेतेषु स्थापितवानिति युक्तस्तदा तेषां स भावः, तदनुरूपो देहः परमधुना सम्पन्नस्तथा भगवदिच्छा यतः। एतदेवाहुः तेषां प्रसादरूपा शक्तिः स्त्री भवतीति। स्त्रीत्वलक्षणधर्मरूपापि स्त्रीरूपा कात्यायनीरूपेत्यर्थः। सैव तदर्थं फलपर्यवसानार्थं सेव्यत इत्यनेन सम्बध्यते। अथ तेषां स भावो भगवद्भाव इति निश्चितम्। दृष्टिद्वारा हृद्यागत एव भगवति तदुत्पत्तेः। 'रसो वै स' इत्यादिश्रुत्या च भावरूपत्वेनैव निरूपणान्न धर्मरूपत्वम्, किन्तु धर्मिरूपत्वमेवेत्याशयेन पक्षान्तरमाहुः भगवानेवेति। सेव्यो हि सेवके स्वं रूपं सम्पादयति। हृद्यागतेन भावरूपेणास्माकं देहादिकमेवं सम्पादितमिति तद्रूप एव भगवान्सेव्यते। बहिरस्मद्रमणार्थं प्रकटो भवत्वित्येतदर्थं नायिकाभावत्वेन स्त्रीत्वमुच्यते। नैतावता काचिन्न्यूनता सगुणत्वं वेत्येतदाशङ्कानिरासायैव गुणातीत इत्युक्तम्। यथाब्धिजामृतदायकं तद्रूपम्, तथा स्वीयलोभामृतदायकमिदमिति ज्ञेयम्। एतेन 'दिव्यं ददामि ते चक्षु'रिति वाक्याद् भगवदीयचक्षुषैव यथा भगवान् दृश्यः, तथा स्त्रीत्वेनापि तादृशेनैव भगवान् भोग्य इति ज्ञापितम्। अत्रैवाग्रे **चित्तदोषस्य गतत्वादिति**। भ्रमजनको हि दोष इत्युच्यते। एतासां तु पूर्वमपि केवलं भगवदीयत्वाद् व्रताचरणहेतुभूतसंशयहेतुद्वितीयकोटिस्फूर्तिस्तद्रूपैवेति ज्ञायते।

कृष्णचेतस्त्वे भगवत्पतित्वनिश्चयेनेतरकोटिस्फूर्तिरपि गतेत्येतदभिसन्धायेदमुक्तम् । दोषत्वमत्रानिश्चयस्यैव । तत्र च तादृक्स्नेहो हेतुः । तादृक्स्वभावत्वात्स्नेहस्य । अग्रे स्नेहसत्त्वेपि कृष्णचेतस्त्वहेतुकतत्प्रतियोग्युपत्त्या तन्नाश एवेति सर्वं सुस्थम् । सार्वदिकत्वेपि पुनः कृष्णचेतस्त्वोक्त्या कश्चन विशेषो वाच्यः । व्रतानन्तरमेवोक्तत्वेन तत्फलत्वमेव विशेष इत्याशयेन फलत्वमुक्तम् । अग्रे पुनः साधनोक्त्या चावान्तरफलत्वमिति विवेकः । तेन पूर्वस्माद्वैलक्षण्यं प्राप्यते ॥ १-४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एकोनविंशाध्याये अत इति एतदनन्तरमित्यर्थः, अत्र तामसप्रकरणे इत्यर्थः, **फलपर्यन्त** इति फलं वैकुण्ठे नयनलक्षणमात्मसमर्पणं तत् **पर्यन्ते** यस्येत्यर्थः, **अत्रापीति** साधनमार्गीयेषु **विद्यापञ्चकं** निरूपितमत्रापि लीलास्थभक्तेष्वपि निरूप्यत इतिपूर्वेणान्वयः, **तस्मिन् जाते** सति व्यसनान्तनिरोधसिद्ध्या भगवत्कर्तृकमिन्द्रदर्शनं भक्तकर्तृकवरुणदर्शनं च **सुरेक्षणं** वर्ण्यत इतिसम्बन्धः, एतेनैतन्निरोधपर्यन्तमन्यत् कार्यं किमपि न कृतवान् किन्तु तदनन्तरमिन्द्रविषयिणीं दृष्टिं कृतवानित्यस्यां लीलायामतिभरो ज्ञापितो भवति, तथा चास्य प्रेक्षणे प्रतिबन्धाभावत्वेन हेतुता भगवल्लोकदिदृक्षाजनकत्वाद् वरुणदर्शनस्य तत्र स्वरूपयोग्यतासम्पादकत्वेन हेतुतेतिज्ञेयं, इहैव वरुणदर्शनाध्याय एवेत्यर्थः, चकाराच् शब्दब्रह्मात्मकत्वं च एतद्विद्यायाः पञ्चत्वे हेतुमाहुः **ज्ञानमिति**, एतद्विद्यायां सत्यां टिप्पण्युक्तारम्भविधो निर्णयस्तदुत्तरं तथा कृतिश्च भवतीतिस्थितिर्मर्यादा विद्यायाः पञ्चत्वे हेतुरित्यर्थः, **अविद्येति अविद्याकार्यसम्बन्धोत्र नास्तीति**हेतोरितिज्ञापनार्थं विद्यानिरूपणानन्तरं **सुरेक्षणं विनिरूप्यत** इत्यर्थः, **तुल्यत्वाच् चेति** चकाराद् धर्मान्तरैरतुल्यत्वमपि, अन्तःस्थानामिति, अन्तरङ्गलीलास्थानामित्यर्थः, **यथा तथेति** लोकानुसारेणेत्यर्थः ॥ ० ॥ **अन्यथैवेति** विवाहेनैवेत्यर्थः, अत्र टिप्पण्यां विवाहस्य संस्कारत्वं कर्तर्यणमभिप्रेत्योक्तं **धर्मस्य** संस्कारत्वं भावे घञमभिप्रेत्योक्तमिति बोध्यं, **तासां त्यागोङ्गमिति** अत्र **किञ्चेति** शेषमभिप्रेत्य टिप्पण्यां किञ्चेत्युक्तं, तथा **चान्यपूर्वाणामन्यथैव कृतसंस्कारत्वात्** त्यागमात्रस्याङ्गत्वेन संस्कारानपेक्षणाच् चान्यासां संस्कारो निरूप्यत इत्यर्थः, **तत्संस्कार** इति भगवत्सम्बन्धप्रयोजकः संस्कार इत्यर्थः, अत्र संस्कारमात्रनिरूपणं सम्बन्धस्तूभयोरपि सहैव वक्ष्यत **इत्येवकारः**, टिप्पण्यामनुदिनमिति **अनुदिनमेधमानो यः प्रेमा** तेनार्द्रार्द्रं यत् **प्रियेक्षणं** तेन **यदुक्षणं** तेन **प्ररूढः** प्रवृद्धो योनङ्गवृक्षस्तस्य यो रसपूरस्तन्मत्तत्वेनेत्यर्थः, अत्र तत्पदेनानङ्गवृक्षो ज्ञेयः, सुबोधिन्यामाधिदैविकीति आधिदैविकप्रतिबन्धनाशिकेत्यर्थः, इदं मन्त्रव्याख्याने स्फुटं वक्ष्यते, **तामसीति** तामसानां भगवत्प्रापिकेत्यर्थः, **दुर्गेति** अत एव राजसप्रकरणे ततो भगवत्प्राप्तिः, पक्षान्तरमाहु**र्ब्राह्मणा** इति, ये इतिशेषः, येऽत्र **सात्त्विका ब्राह्मणाः** कुमारिकास्तेषां ब्राह्मणानामित्यन्वयः, विषयताषष्ठ्यर्थः, ब्राह्मणविषयकप्रसादनिरूपिकेत्यर्थः, **अत्र व्रतप्रसङ्गात्** सात्त्विकत्वमुक्तं, **गुणातीत** इति अस्यापि स्त्री **भवती**त्यनेनान्वयः, अत्र टिप्पण्यां स्त्रीत्वेत्याद्युक्तं तत्राकृतिः स्त्रीत्वं देहः स्त्रीतिविभेदः, तथा च देहं विना केवलाकृतेस्तादृशभावरूपभगवतश्च केवलस्य बाह्यपूजा न सम्भवत्यतः स्त्री **भवति प्रतिमाया**माविर्भवतीत्यर्थः, उभयविधापि सा तदर्थं सेव्यत इत्यर्थः ॥ १ ॥ आप्लुत्येत्यत्र **सफले**ति कालिन्द्या इतिशेषः, सा **सफलतपःसम्बन्धिनी सफलं** तपोस्या अस्ति सफलतपस्विनीत्यर्थः, **अम्भोपि** स्वस्नातस्य तपः स्नानादिरूपं सफलं करोतीति सफलतपःसम्बन्धीत्यर्थः ॥ २ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

साधनप्रकरणारम्भे प्रकरणार्थनिरूपणकारिकासु **उत्तमफलपर्यन्त** इति प्रमाणप्रकरणे प्रेमात्मको **निरोध** उक्तः स प्रथमः, प्रमेये आसक्त्यात्मकः स **मध्यमः**, साधनप्रकरणे व्यसनात्मकः स **उत्तमः**, अव्यवहितसाधनरूपत्वात्, "यदा स्याद् व्यसनं कृष्णे कृतार्थः स्यात् तदैव ही" तिशास्त्रात्, अतो व्यसनात्मकत्वादु**त्तमो निरोधोत्र** साधनप्रकरणे **निरूप्यत** इत्यर्थः, **फलपर्यन्त** इति ब्रह्मानन्दानुभवात्मकावान्तर**फलपर्यन्त** इत्यर्थः, **विद्यापञ्चकमत्रापीति विद्यापञ्चक**स्वरूपं टिप्पण्यामुक्तं श्रीमत्प्रभुचरणैः, **तस्मिन्** जाते सुरेक्षणमित्यस्याप्यर्थष्टिप्पण्यामुक्तः, ज्ञानं कर्म च **विद्यायामिति** पञ्चप्रकारकं टिप्पण्युक्तं ज्ञानं ततस्तदनुकूल कर्म चेति, कर्मणोपि पञ्चविधत्वं, तथा हि कात्यायनीव्रतार्चनादि कर्म भगवत्कामनया परम्परया भगवत्सेवनरूपमेव कृतमित्येकं कर्म, गोपैः क्षुत्पीडितैर्भगवानेव क्षुच्छान्त्यर्थं प्रार्थितः अतस्तादृक् प्रार्थनरूपं द्वितीयं कर्म, श्रीनन्दादिभिः परम्पराप्राप्त इन्द्रयागस्त्यक्त्वा गोवर्धनयागः कृत इति तृतीयं कर्म, वासववृष्टिव्याकुलैर्व्रजजनैर्हरिरेव सेवित इति शरणगमनाख्यं कर्म चतुर्थं, माहात्म्यज्ञानपूर्वकस्नेहयुक्तं कर्म पञ्चमं श्रीनन्दवाक्येभ्यो गतसन्देहैर्गोपैः कृतं, **स्त्रीपुंसोरिति** कुमारिकातत्पुम्भावरूपवयस्ययोरित्यर्थः, तुल्यत्वादिति रहस्यलीलानुभवो हि कुमारिकाणां तत्पुम्भावसहितानामेव फलप्रकरणे भाव्यतः फलानुभवस्य **तुल्यत्वात्** साधनेपि **सहभावेन** निरूपणं "वयस्यैरागतस्तत्रे" त्यादावित्यर्थः, **लोकानुसारिणी** विद्येत्यादि **विभेदत** इत्यन्तं **गोपिकानां कर्मात्मिका विद्या** कात्यायनीव्रतरूपा निरूप्यते **गोपानां ज्ञानात्मिका विद्या** "अहो एषां वरं जन्मे" त्यादिवाक्यैर्भगवदुपदिष्टा निरूप्यते इत्यर्थः, एवं गोपिकागोपभेदेन कर्मात्मिका ज्ञानात्मिका विद्या च निरूपिता, तदेतत् स्फुटमाहुरेकोनविंशे **भोग्यानां कुमारीणां व्रतं यथा** अन्तःस्थानां कुमाराणां तथा **ज्ञानमिहोच्यत** इति, **अन्तःस्थानां निरोध्यभक्ताना**मिन्द्रियेषु तदधिष्ठातृरूपेणान्तःस्थितानां

कृष्णस्तोकादीनामित्यर्थः ॥ ० ॥ **हेमन्ते प्रथमे मासीत्यस्य** विवृतौ **कात्यायन्याधिदैविकी तामसीशक्तिर्दुर्गा पार्वती च राजसी ब्राह्मणाः सात्त्विकाः तेषां प्रसादरूपा शक्तिः स्त्री भवतीति तेषां** पूर्वजन्मनि श्रीरामावतारे स्थितानामग्निकुमाराणामुपरि यो भगवत्प्रसादस्तद्रूपा कात्यायनी **शक्तिरि**त्यर्थः, अत एवाधिदैविकीत्युक्तं, न च कात्यायन्याः शिवपत्नीत्वेन शिवशक्तित्वेन प्रसिद्धत्वाद् भगवच्छक्तित्वस्य कुत्राप्यसिद्धत्वान् नेयं भगवच्छक्तिरिति वाच्यं, भौतिक्याः शिवशक्तित्वेप्याधिदैविक्याः भगवच्छक्तित्वात् "**श्रियं** लक्ष्मीमौपलामम्बिकां गां" **मित्युपनिषत्सु एतस्या भगवच्छक्तित्वनिर्धारात्,** औपलामुपलस्य पाषाणस्य सम्बन्धिनीं पार्वतीमित्यर्थः, "रासमण्डले पार्वती भगवता शिवाय दत्ते" ति ब्रह्मवैवर्ते **स्फुटमभिधानाच् च** "परास्य **शक्तिर्विविधैव** श्रूयते" इति श्रुतेः **शक्तीनां** बहुत्वात् तत्तत्कार्यार्थं तत्तच्छ**क्तीनामुपयोग** इति तामसानां व्रजस्थानां **भगवत्प्राप्तौ** कात्यायनी **तामसी** भगवच्छक्तिर्हेतुरिति **ज्ञेयम्**, "यदुद्दिश्य व्रतमिदं चेरुरार्याचनं सती" रितिवाक्यात्, राजसानां भगवत्प्राप्तौ दुर्गा पार्वती च राजसी भगवच्छक्तिः कारणं, "**नमस्ये त्वामम्बिकेऽभीक्ष्ण**" **मिति** श्रीरुक्मिणीप्रार्थनावाक्ये "भूयात् पतिर्मे **भगवान् कृष्ण**" इत्युक्तेः, **स्यमन्तकमणिप्रसङ्गे** "उपतस्थुर्महामायां दुर्गां कृष्णोपलब्धय" इतिवाक्याच् च **कात्यायनीदुर्गा**पार्वतीशब्दवाच्यास्तिस्त्रोपि शक्तयो भगवदीयाः परस्परभिन्ना धर्मविशेषभेदाद् भिद्यन्ते, तथा च कात्यायनीदुर्गापार्वतीभिस्तामसराजसभक्तानां भगवत्प्राप्तिरिति युक्तैव **भक्तिमार्गीया** पद्धतिः, एतेन **कात्यायनी** नाम शिवशक्तिः स्वतन्त्रा देवता स्वसेवनसंतुष्टा सेवकेभ्यः श्रीकृष्णमपि ददातीति वदन्तः प्रत्युक्ताः, श्रीकृष्णप्राप्तये **कुमारिकाभिरन्य**देवताश्रयणं कृतमिति वन्दतोपि निरस्ताः, कात्यायन्यादीनां पूर्वो**क्तोपनिषद्भिर्ब्र**ह्मवैवर्तपुराणवाक्यैश्च भगवच्छक्तित्वनिश्चयादिति दिक्, **भगवानेव वा गुणातीत इति** भगवच्छक्तिः कात्यायनीति पक्षे तामसीत्वं कात्यायन्या **उक्तं**, पक्षान्तरमाहुर्**भगवानेव वेति**, आधिदैविकस्त्रीविग्रहरूपो **भगवानेव** कात्यायनीत्यर्थः, तस्य रहस्यलीलौपयिकस्त्रीविग्रहरूपस्य भगवतः स्वरूपमाहुर्**गुणातीत** इति, अत एव सात्त्विकराजसतामसगुणातीतानां व्रजसुन्दरीणां लीलौपयिकविग्रहोनया साध्यते ॥ १ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एकोनविंशाध्यायारम्भे सार्धपञ्च अत इत्यादि १९७¾-२०२¼ । **उत्तम** इति प्रमाणप्रकरणोक्तो निरोधः प्रेमात्मकः प्रथमः, प्रमेयप्रकरणोक्त आसक्तिरूपो मध्यमः, एतस्मिन् साधनप्रकरणे उच्यमानो व्यसनात्मको निरोध **उत्तम** इत्यर्थः, **फलपर्यन्त** इति पञ्चविंशाध्यायोक्तब्रह्मानन्दानुभवात्मकफलपर्यन्त इत्यर्थः, **विद्यापञ्चकमत्रापीति** साधनमार्गे यथा वैराग्यसाङ्ख्ययोगतपोभक्तिरूपं विद्यापञ्चकं तथात्र लीलास्थभक्तेष्वपि विद्यापञ्च**कमित्यर्थः,** विद्यापञ्चकस्वरूपं च अध्यायपञ्चकतात्पर्यार्थभूतं टिप्पण्यामुक्तं स्फुटं, तद्यथा "साक्षादसम्भवेपि परम्परयापि भगवानेव सेव्यो देहेन्द्रियादिकं च तदर्थमेव विनियोक्तव्यं न स्वार्थमपीति निर्णयरूपैके" ति, एतेन एतदध्यायोक्तं **कात्यायनीद्वारा भगवद्भजनं वृक्षदृष्टान्तेन गोपेषु** परार्थतोपदेशश्च विवृतः, अथ विंशाध्यायतात्पर्यमभिप्रेत्य द्वितीयां विद्यामाहु"र्देहनिर्वाहार्थं **प्राणादिधर्मनिवृत्त्यर्थमपि** स्वतः सम्भवेऽपि परेएव प्रार्थनीयो न त्वन्योपि, **प्रभुश्च लोके** नालौकिकं करोति भगवद्भावे चानुग्रह **एव नियामको** न तु साधनमपि शास्त्रीयमिति निर्णयरूपा द्वितीये" ति, **एतेन गोपैः** क्षुधानिवृत्त्यर्थं भगवानेव प्रार्थितः भगवांश्च **लोकरीत्या** याचनमेवोपदिष्टवान् न तु अलौकिकोपायेन ज्ञानादिना क्षुधां निर्वर्तितवान्, निःसाधनास्वपि विप्रपत्नीषु भगवदनुग्रहो न तु **ससाधनेष्वपि** पुरुषेष्विति विंशाध्यायोक्तोर्थो व्याख्यातः, तृतीयां विद्यामाहु"रितरभजनं न कार्यं पारम्पर्यागतमपि धर्मं **भगवदिच्छायां** सत्यां विसृजेदितिरूपा तृतीये"ति, अनेन पारम्पर्यागतमपीन्द्रयागं नन्दादयस्त्यक्तवन्त इति एकविंशाध्यायतात्पर्यमादायोक्तं, चतुर्थविद्यामाहुः "सर्वावस्थासु हरिरेव सेव्यो भगवांश्चाक्लिष्टकर्मा रक्षत्येव स्वानितितुरीया," श्रीगोवर्धनधारणेन भगवान् रक्षितवानिति द्वाविंशाध्याये स्फुटमेव, पञ्चमविद्यामाहुः "माहात्म्यज्ञानपूर्वकः परमस्नेहो भक्तेष्वाधिक्यज्ञानं चेति पञ्चमी"ति, गर्गोक्तानुवादरूपैर्नन्दवाक्यैर्माहात्म्यज्ञानपूर्वकः स्नेहः, "मुदिता नन्दमानचु"रित्युक्त भक्तेष्वाधिक्यज्ञानं चेति त्रयोविंशाध्यायार्थमभिप्रेत्योक्तमिति अध्यायपञ्चकोक्त**विद्यापञ्चकं** विवृतं टिप्पण्यां, **तस्मिन् जाते सुरेक्षणमिति तस्मिन्** विद्यापञ्चके **सम्पन्ने** सत्येव **सुरेक्षणं** भगवत्कर्तृकमिन्द्रदर्शनं, **भक्तेषु** विद्यापञ्चकसम्पादनस्यावश्यकत्वात् तावत्पर्यन्तमिन्द्रादिविषयिणीं दृष्टिं न कृतवान् किन्तु विद्यापञ्चके सम्पन्ने पश्चादेव कृतवान्, किञ्च **तस्मिन् जाते सुरेक्षणमित्यस्य** श्रीनन्दकर्तृकं वरुणदर्शनमिति चार्थः, विद्यापञ्चके सम्पन्ने सति भगवदुत्कर्षज्ञानहेतुभूतवरुणदर्शनं कारितवान्, **इहैव गमनं चापीति** इह वरुणदर्शनाध्याये एव **गोपानां** वैकुण्ठ**गमनं वर्ण्यते,** एतद्विद्यायाः पञ्चत्वे हेतुमाहुः **ज्ञानं कर्म च विद्यायां पञ्चात्मकमिति स्थितिरिति**, पञ्चाग्निविद्यादौ अग्निहोत्रदर्शपूर्णमासादिषु च ज्ञानकर्मणोः पञ्चात्मकत्वं प्रसिद्धमिति प्रमाणमर्यादामाश्रित्य अत्रापि ज्ञानकर्मणोः पञ्चविधत्वोक्तिरित्यर्थः, भक्तेषु विद्यानिरूपणप्रयोजनमाहुरविद्याकार्येति, अविद्या च तत्कार्यं च तयोः सम्बन्धो लीलास्थभक्तेषु नास्तीतिभावः, अस्मिन्नध्याये स्त्रीणां पुरुषाणां च सहभावेन निरूपणे हेतुमाहुः **स्त्रीपुंसोरिति, स्त्रीणां** कुमारीणां पुंसां वृन्दावनतरुप्रशंसाप्रसङ्गे वक्ष्यमाणानां **गोपानां** च **सहभावेन** निरूपणे हेतुस्तुल्यत्वादिति, अविद्यासम्बन्धाभावस्य निरोधस्य वा तुल्यत्वादित्यर्थः, **लोकानुसारिणी** विद्येति लोकानुसारेणात्र कर्म निरूप्यते न तु **भगवच्छास्त्रानुसारेण**, भगवदर्थं भगवानेव सेव्य इति हि **भगवच्छास्त्रे मर्यादा**, लोके हि प्रियप्राप्त्यर्थं तदीया दूतिका प्रार्थ्यते, तथात्रापि

कात्यायनी प्रार्थ्यते, अत्राध्याये अवान्तरप्रकरणविभागमाहुरेकोनविंश इति, अत्राध्याये कर्मप्रकरणं ज्ञानप्रकरणं चेति द्वे प्रकरणे, तत्राद्ये कुमारीणां व्रतं द्वितीये अन्तःस्थानामन्तरङ्गलीलामध्यपातिनां कृष्णस्तोकादीनां गोपानां ज्ञानं वृक्षप्रशंसाप्रसङ्गे उच्यते इत्यर्थः, यद्यपि साक्षादसम्भवेपि परम्परयापि भगवानेव सेव्य इतिज्ञानं कुमारीणामपि तथापि तद् व्रतात्मककर्माङ्गमेव न तु प्रधानमिति तत् कर्मप्रकरणमेव, गोपानां तु वृक्षप्रशंसाप्रसङ्गे ज्ञानोपदेश एवोक्तो न तु परोपकारात्मकं गोपकर्तृकं कर्मोक्तमिति ज्ञानप्रकरणमेव तदित्यवधेयं, अत्र कर्मप्रकरणे कर्तृदेशद्रव्यमन्त्रकालात्मकानि पञ्च कर्माङ्गान्युक्तानि, ज्ञानप्रकरणे च पञ्च पर्वाणि भक्तिधर्मार्थकाममोक्षात्मकानि पञ्चभिः श्लोकैरुक्तानि, तत्र "हे कृष्ण स्तोके" तिश्लोके भक्तिरूपं महत्त्वोक्तं, चतुर्भिः श्लोकैर्धर्मादिमोक्षान्तानि चत्वारोतिस्पष्टं सुबोधिन्यामिति ॥ ० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कन्याभिरर्चनं देव्या वरदानं तथैव च । हरिणा च तरुस्तोत्रं द्वाविंशे विनिरूप्यते ॥ १ ॥

एवमूढानामनुरागं निरूप्य अथानूढानामनुरागचेष्टितमाह—हेमन्त इति । हेमन्ते ऋतौ तस्यापि मासद्वयात्मकत्वात् प्रथमे मार्गशीर्षे मासि नन्दस्य व्रजराजस्य ये वशवर्तिनो गोपास्तेषां कुमारिका हविष्यान्नं नीवारादि भुञ्जानाः स्वीकृताहारादिनियमाः सत्यः कात्यायन्या देव्या अर्चनं व्रतं चेरुः 'अद्यप्रभृति कृष्णप्राप्त्यर्थं कात्यायनी पूजनीया' इति नियमं चक्रुरित्यर्थः ॥ १ ॥ तत्पूजाप्रकारमाह—आप्लुत्येति । अरुणे उदिते अरुणोदयवेलायां कालिन्द्याः श्रीयमुनायाः अम्भसि आप्लुत्य स्नात्वा जलान्ते जलस्य तीरे सैकतीं वालुकामयीं प्रतिकृतिं कात्यायनीप्रतिमां कृत्वा तां देवीं गन्धपुष्पादिभिः आनर्चुः पूजयामासुः । 'इदमपि लीलारहस्यं त्वया सावधानेन श्रोतव्यम्' इति सूचयन् सम्बोधयति – नृपेति ॥ २ ॥

अन्वितार्थप्रकाशिका

द्वाविंशे गोपकन्यानां वासो हृत्वा वरप्रदः । यज्ञशालामगात्कृष्णः श्लोकाः सार्द्धा गजाग्नयः (३८) ॥
त्रीण्युवाचेति वाक्यानि चत्वारिंशदनुष्टुभः (४०) ॥

व्यूढानां गोपीनां कृष्णेऽनुरागमुक्त्वाऽनूढानामप्याह । वर्गद्वयं चेदम् "युवतीर्गोपकन्याश्च रात्रौ संकल्प्य कालवित्" । इत्यादिना हरिवंशे स्पष्टम् । हेमन्त इति । हेमन्ते ऋतौ तस्यापि मासद्वयात्मकत्वात् प्रथमे मार्गशीर्षे मासि नन्दस्य व्रजराजस्य ये वशवर्तिनो गोपास्तेषां कुमारिकाः सगोत्रत्वादिसंबन्धहीनाः कन्याः । नन्दव्रजेत्यपि पाठः । हविष्यान्नं नीवारान् भुञ्जानाः स्वीकृताहारादिनियमाः सत्यः कात्यायन्या देव्या अर्चनं व्रतं चेरुः ॥ १ ॥ आप्लुत्येति द्वयम् ॥ हे नृप ! अरुणे उदिते अरुणोदयवेलायां कालिन्द्याः अम्भसि आप्लुत्य स्नात्वा जलान्ते जलस्य तीरे सैकतीं वालुकामयीं प्रतिकृतिं कात्यायनीप्रतिमां कृत्वा तां देवीं सुरभिभिरिति यथोचितं सर्वत्रान्वेति । गन्धैश्चन्दनादिभिः माल्यैः पुष्पैः बलिभिरिति यान् अग्रे निधाय प्रणामः क्रियते तैर्नालिकेरादिभिः धूपदीपकैश्च उच्चावचैरुत्तममध्यमैरन्यैश्च यथासम्भवप्राप्तैर्वस्त्राभरणादिभिः उपहारैर्नैवेद्यैः प्रवालैर्नवपल्लवैः फलैः तण्डुलैश्च आनर्चुः पूजयामासुः ॥ २–३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं द्वाविंशतितमेऽध्याये हरेः कुमारिकावस्त्राहरणलीलामाह हेमंते हेमंततौ प्राप्ते सति प्रथमे मासि मार्गशीर्षे नंदव्रजे याः कुमारिकाः कृष्णस्य वसुदेवोत्पन्नत्वात् सगोत्रसपिंडत्वादिसंबंधहीनाः कन्याः नंदगोपकुमारिका इति पाठे नंदस्य ये गोपास्तेषां कुमारिकाः कात्यायनीदेव्याः पूजनरूपं व्रतं चेरुः चक्रुः ॥ १ ॥ जलांते जलसमीपे अरुणे सूर्यसारथौ सैकतीं वालुकामयीं प्रतिकृतिं प्रतिमाम् ॥ २ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

लीला वस्त्राहृतेर्गोपकन्यानामीरिता वरम् । दत्त्वा कृष्णो गतो यज्ञशालां द्वाविंशके स्फुटम् ॥

इत्थं गोपीभिर्मिथोऽनुवर्णितानि शरत्कालिकानि कानिचिद्भगवतश्चेष्टितान्युक्त्वाथ कानिचित्तानि विवक्षुस्तावत् सिंहावलोकितन्यायेन पौगण्डवयस एव भगवतो हैमन्तिकानि चेष्टितान्युपवर्णयति, तत्र हैमन्तिकं किंचित्तस्य चेष्टितं वक्तुमुपोद्घातमाह ॥ हेमन्त इति ॥ हेमन्ते ऋतौ, तत्रापि प्रथमे मासि, मार्गशीर्षमासे इत्यर्थः । केचित्तु कार्त्तिकमार्गशीर्षौ हेमन्तः ऋतुस्तत्र प्रथमे मासि कार्तिके इत्याहुः । नन्दव्रजकुमारिकाः नन्दव्रजस्थानां गोपानां कुमारिकाः, कात्यायन्यर्चनव्रतं कात्यायन्या दुर्गाया अर्चनात्मकं व्रतमित्यर्थः । हविष्यं भुञ्जानाः नियताहाराः सत्य इत्यर्थः । चेरुरनुष्ठितवन्त्यः ॥ १ ॥ कथं चेरुरित्यत्राह ॥ आप्लुत्येति ॥ अरुणे उदिते सति, अरुणोदयवेलायामित्यर्थः । कालिन्द्या यमुनायाः, अम्भसि जले, आप्लुत्य स्नात्वा, हे नृप, जलान्ते तस्यास्तटे, सैकतीं वालुकामयीं, प्रतिकृतिं प्रतिमां कृत्वा च, देवीं तां कात्यायनीप्रतिमां, आनर्चुर्गन्धादिभिस्तां सम्यक् पूजयामासुः ॥ २ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नादप्रधानमीशस्य ध्यानमात्मस्वरूपदं । प्रोक्तं कृते तृतीये तु श्रीपदार्चनमुच्यते ॥ १ ॥

कुर्वन्तो विविधोपभोगमपि ये श्रीपादपद्मार्चनं कुर्वन्ति प्रविधाय साधुविहितं सत्कर्म नानागमैः।
तेषामत्र न दूर्लभा प्रभुपदप्राप्तिर्न न चान्यापि वा स्वेष्टप्राप्तिरितीयमुक्तमरणिः स्याद् द्वापरस्थाऽध्वनि ॥ २ ॥

हेमन्त इति : १०. २२.१.

स्वानिष्टकृत्-समयजन्य-फलाङ्कुरत्पत्त्यै सुखाय च सुधीः कुरुते व्रतादीन्।
हेमन्त एव तदिमा विदधुः क्षमं तद् यन्म्लानिकृत् स ऋतुरेव हि पद्मिनीनाम् ॥ ३ ॥

मासानां मार्गशीर्षोऽस्मीत्युक्तं तद्युगशालिना । कृष्णेनेति तदाप्त्यै तन्मासे युक्तं तदर्चनम् ॥ ४ ॥

बहुधान्यभावहृद्यं विविक्तसेव्यं स्वकायपुष्टिकरम् । ज्ञात्वा तमिव हविष्यं तद्भुञ्जानास्तदेति युक्तममूः ॥ ५ ॥

सङ्गः क्वापि परेण चेद्विधिवशाज्जातोऽप्यषट्कर्णकस्तत्कान्तानुमतिं विना न घटते निर्विघ्नमित्यङ्गनाः।
मायाधीश-समागमोत्सुकहृदो युक्तं तदार्चामिषान्मायामेव परेषु सत्स्वपि सुरेष्वभ्यार्थयन्तेष्टदाम् ॥ ६ ॥

भव्यप्रदा हि बहवो भुवि सन्ति यद्यप्यातास्तथापि कतमोऽपि न मातृतुल्यः।
जानन्त्य इत्थमपरानपहाय देवानानर्चुरिष्टवरदां जनमातरं वा ॥ ७ ॥

सैकतीमिति : १०.२२.२.

सन्त्वन्या अपि कनकप्रमुखाः प्रतिमाः प्रभूतफलदात्र्यः।
जडधृतिसुरुचिः सिकतैवेत्यबलास्तां हि तन्मयीं चक्रुः ॥ ८ ॥

कृष्णप्रिया

श्रीशुकाचार्यजी महाराजश्री ने कहा कि राजन् परीक्षित् ? हेमन्तऋतु के प्रथम मार्गशीर्ष मास में श्रीनन्दरायजी के व्रजकी कुमारिकाओं ने हविष्यान्न का ही भोजन करते हुए श्रीकात्यायनी देवीका अर्चन एवं व्रत करने लगी ॥ १ ॥ महाराज! पूर्व दिशाका भगवान् सूर्य लाल होते होते श्री कालिन्दीजी के जल में स्नान करके यमुनातट पर ही बालू रेतकी प्रतिमा बनाकर देवी की पूजा करने लगी ॥ २ ॥

गन्धैर्माल्यैः सुरभिभिर्बलिभिर्धूपदीपकैः । उच्चावचैश्चोपहारैः[1] प्रवालफलतण्डुलैः ॥ ३ ॥

कात्यायनि महाभागे[2] महायोगिन्यधीश्वरि । नन्दगोपसुतं देवि पतिं मे कुरु ते नमः ।
इति मन्त्रं जपन्त्यस्ताः पूजां चक्रुः कुमारिकाः ॥ ४ ॥

कर्दमक्षमा

सुरभिभिः-गन्धैः-माल्यैः-धूपदीपकैः-बलिभिः-च-उच्चावचैः-उपहारैः-च-प्रवालफलतण्डुलैः-"देवीम्-आनर्चुः" ॥ ३ ॥ हे कात्यायनि ! हे महामाये ! हे महायोगिनि ! हे अधीश्वरि ! हे देवि ! नन्दगोपसुतं मे-पतिम्-देहि,-ते-नमः इति-मन्त्रम्-जपन्त्यः-ताः-कुमारिकाः पूजाम्-चक्रुः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

महामाये इत्यादिसंबोधनैस्तव न किंचिदशक्यमिति सूचयंत्यः प्रत्येकं प्रार्थयंते ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बलिभिः परिवारदेवतापूजाभिः सह "बलिर्दैत्ये परीवारदेवतापूजने करे । जठरावयवे गेहदारुणि पूजने तथा ॥ उपहारे समर्थे च जरया श्लथचर्मणि ।" इति मेदिनीशाब्दनौ ॥ ३ ॥ देव्याः सर्वसामर्थ्यं समर्थयन्त्य आहुः—महामायेत्यादि । कं सुखं तन्वत इति कतानि मंगलानि तेषां समूहः कात्यं तस्यायनं स्थानं यस्यां सा तथा । महापूज्या माया सामर्थ्यं यस्यास्सा तथा । महान् योग उपायः परकार्यसाधने यस्याः सा तथा । ईश्वरैः शंकराद्यैरधिष्ठितेत्यधीश्वरीति । देवि देवयति द्योतयति सर्वं जगदिति देवीति । अत्र विश्वनाथः—हे कात्यायनि नंदगोपसुतं मे पतिं कुरु । ननु कुर्विति मय्येव किमिति स्वातंत्र्यमर्प्यतेऽहं तु तदर्थं त्वत्पितरौ प्रेरयिष्या-

---

१. श्चोपचारैः—विज. । २. मायेे-श्रीधर. वंशी. वीर. विज. विश्व. ।

स्यतः कारयेति प्रयुज्यतामित्याशंक्य सवैकल्यमाह—हे महायोगिनीति । तेन संयोगस्त्वयैव शीघ्रं संपाद्यतां न तु पित्रादिव्यवधानोपद्रवेण, परमोत्कंठावतीनामस्माकं कालविलंबस्यासह्यत्वात् कृष्णस्य संप्रत्यनुपनीतत्वेन विवाहायोग्यत्वात् । हे देवि मुख्यं विवाहं विनैव केवलगांधर्वविवाहेनैव मे पतिं कुर्वित्यर्थः । अधीश्वरीति । तत्र तव किमप्यशक्यं नास्तीति भावः । ननु तव कृष्णे पतिभावस्य त्वत्पितृभ्यामज्ञानत्वे त्वदभीष्टः कृष्णसंगमः कथं साधु सेत्स्यतीत्यत आह—महामाये । मायया मत्पितरौ तथा मोहय यथा कदाचिदपि गोपांतरेण मद्विवाहस्ताभ्यां न भाव्येत कृष्णांगसंगरहस्यं च न ज्ञातुं शक्येत । यद्वा—दीव्यति क्रीडति देवयति क्रीडयतीति देवी, स चासौ पतिश्चेति तं, तादृशं पतित्वं विवाहं विनैव सिध्यतीति मम गोपांतरव्यूढत्वेऽपि न कापि क्षतिरिति भावः । इत्येवं प्रत्येकं मंत्रार्थं पृथक्पृथग्विचिंतयेत्यर्थः । इयं ताभिरुपासिता चिच्छक्तिवृत्तिस्वरूपभूता योगमायैव न तु बहिरंगा माया । तदुक्तं नारदपंचरात्रे श्रुतिविद्यासंवादे–"जानात्येका परा कांतं सैव दुर्गा तदात्मिका । या परा परमा शक्तिर्महाविष्णुस्वरूपिणी ॥ यस्या विज्ञानमात्रेण पराणां परमात्मनः । मुहूर्त्ताद्देवदेवस्य प्राप्तिर्भवति नान्यथा ॥ एकेयं प्रेमसर्वस्य स्वभावा श्रीकुलेश्वरी । अनया सुलभो ज्ञेय आदिदेवोऽखिलेश्वरः ॥ अस्या आवरिका शक्तिर्महामायाऽखिलेश्वरी । यया मुग्धं जगत्सर्वं सर्वे देहाभिमानिनः ॥" इति । अतः "सर्वेषु कृष्णमंत्रेषु दुर्गाधिष्ठातृदेवता" इत्यागमे शुद्धसत्वस्वरूपा चिच्छक्तिवृत्तिः कृष्णभगिन्येकानंशाभिधाना योगमायैव मंत्राधिष्ठात्री सैव त्वाभिरुपासिता । दुर्गामहामायेत्यादिनामसाम्येनैव लोकानां भ्रमो भवतीति ज्ञेयम् । व्रजस्य लोकवल्लीलत्वान्मायोपासनेऽपि न दोषः । अत्र ये केचिदनन्यंमन्या यदन्यथा मन्यंते न ते तदीयप्रेमगंधसंबंधगंधवातमपि स्पृशंतीति वैष्णवतोषिणी । इति मंत्रं पूर्वोक्तं कात्यायनीत्यादिसंबोधनात्मकं मंत्रम् ॥ ४–५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कारयेति सार्द्धकं, कात्यायनीति तन्मुनिवंशप्रकाशकत्वात् महाधर्मदातृत्वं सूचितम् । हे महामाये ! हे श्रीभगवतो महाशक्तिरूपे ! इत्यभीष्टप्राप्तियोग्यां शक्तिमसम्भ्यमपि दातुं समर्थासीत्यर्थः । अत्र कापि दुर्घटता चेत्तत्राप्याहुः—हे महायोगिनि ! दुर्घटघटनासमर्थे ! नन्वन्यां काञ्चिद्देवतां भजध्वमिति स्वनिष्ठां परीक्षमाणां प्रत्याहुः—हे अधीश्वरि ! न त्वत्त ऊर्द्ध्वं काचिद्देवतेत्यर्थः । नन्दगोपसुतं श्रीमन्नन्दराजकुमारमिति निजभावानुरूपालम्बननिर्देशः तेन तस्यैव सर्वोपादेयत्वेन स्फुरणमपि सूचितम् । अत्र नन्देति साक्षान्महागुरुनामग्रहणं गोपेति विशेषणदानं च तत्तच्छब्दस्यान्यगतित्वशङ्कया ननु, मत्प्राप्तये तमेव राधयत् तत्राहुः हे देवि ! क्रीडारसाभिज्ञे ! तदर्थं साक्षात् तत्प्रार्थनं न रसावहमिति जानास्येवेत्यर्थः । मे इत्येकत्वः प्रतिस्वं पृथग्जपात् इति एतं मन्त्रम् अतः प्राक्सिद्ध एवासौ श्रीकृष्णलक्षणपतिप्रदो मन्त्रः ततश्चास्या देव्याः स्वरूपशक्तित्वमेव मन्तव्यं न बहिरङ्गजगत्कारणशक्तित्वं पूर्वस्याः "न विष्णुना विना लक्ष्मीर्न हरिः पद्मजां विना" इति भगवदैक्यात् उत्तरस्याः "यस्यांशांशांशभागेन" इत्यादिना तदपेक्षयाऽतितुच्छत्वात्—

"याऽतीतगोचरा वाचां मनसां च विशेषणा। ज्ञानिज्ञानापरिच्छेद्या वन्दे तामीश्वरी पराम् ॥
सर्वभूतेषु सर्वात्मा या शक्तिरपरा तव। गुणाश्रया नमस्तस्यै शाश्वतायै सुरेश्वर" ॥

इति विष्णुपुराणपद्याभ्यां तादृशभेदप्राप्तेः तथा च श्रीनारदपञ्चरात्रे श्रुतिविद्यासम्वादे—

"जानात्येका परा कान्तं सैव दुर्गा तदात्मिका । या परा परमा शक्तिर्महाविष्णुस्वरूपिणी ॥
यस्या विज्ञानमात्रेण पराणां परमात्मनः। मुहूर्त्ताद्देवदेवस्य प्राप्तिर्भवति नान्यथा ॥
एकेयं प्रेमसर्वस्वस्वभावा श्री (गो)कुलेश्वरी। अनया सुलभो ज्ञेय आदिदेवोऽखिलेश्वरः ॥
अस्या आवरिका शक्तिर्महामायाखिलेश्वरी । यया मुग्धं जगत्सर्वं सर्वे देहाभिमानिनः ॥" इति

अतः प्रथमैवाष्टादशाक्षराद्यधिष्ठात्रीति गम्यते दुर्गामहामायेत्यादिनामादिसामान्येनैव तु भ्रमो भवतीति ज्ञेयम् अथवा मन्त्रेऽस्मिस्तृतीयः पादो निजाभीष्टनाम्ना योज्य इत्येव विधिः स्यात् ततो व्रजस्य लोकवल्लीलत्वान्मायोपासनमेव लभ्यते तासां च परमप्रेमोल्लासविलसितमेव तथोपासनं प्रेम्णैव च तथा तत्प्राप्तिर्न तथोपासनेनेति विवेक्तव्यम् अत्र केचिदनन्यम्मन्या यदन्यथा मन्यन्ते ते तदीयप्रेमगन्धसम्बन्धगन्धवातमपि स्पृशन्ति सर्वत्र शुद्धभगवत्प्रेमैव हि पुरुषार्थः सर्वमनन्यदैवतोपासनादिकं तु तत्साधनमेवेति श्रीमद्भागवतसिद्धान्तः स च तासां सिद्धः सर्वं समुद्रिक्तश्चेति किं साधनविचारेण परमसाध्यस्वरूपप्रेमविचारे तु स च प्रेमा केवलमाधुर्यानुभावाविर्भावी अनन्यभक्तिप्रवृत्तिकारणेन पारमैश्वर्यानुभवेन तु सम्भ्रमात् सङ्कीर्य्यंत एव प्रेम्णैव च भगवानपि वशीक्रियते तु तेन तथैव "नेमं विरञ्च" इत्यादौ "इत्थं सता"मित्यादौ "नायं श्रियोऽङ्ग" इत्यादौ श्रीव्रजवासिन एव सर्वोपरि प्रशस्यन्ते तथैवात्रोक्तं नन्दगोपसुतमिति न तु श्रीभगवन्तमिति तस्मात्तासां शुद्धमधुरप्रेम्ण एव विलासोयं नान्यदिति सर्वोपर्य्येव स्थितमिदम् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सूरभिभिरिति यथापेक्षं सर्वैरपि योज्यम्, बहुत्वं गन्धादिबाहुल्यात्, बलिभिः–वस्त्रभूषणनैवेद्याद्युपचारैः, तानेवाह–प्रवालेति। अत्र **क्रमभंगः** श्रीकृष्णहृतमनस्त्वेन तासां क्रमविस्मृतेः, श्रीवादरायणेरेव वा तद्व्रतकथने परमौत्सुक्येन क्रमातीक्रमात्। यद्वा, बलिभिः पूजोपकरणैर्गन्धादिभिरिति तत्तत्संस्कारादिसाद्गुण्यमभिप्रेतम्; ततश्च उपहारैर्नैवेद्यादिभिः, अन्ते नीराजनार्थं प्रवालादिभिरिति, उच्चावचैरिति सर्वेषामेव विशेषणम् ॥३॥ हे महामाये ! श्रीभगवतः सच्चिदानन्दशक्तिरूप इति श्रीकृष्णप्राप्तियोग्यानामस्माकमपि सर्वशक्ति दातुं समर्थासीत्यर्थः। ननु, असावत्र पत्न्यनपेक्षश्चेत्तत्राहुः,—हे महायोगिनि ! दुर्घटमपि त्वया सुघटयितुं शक्यत इत्यर्थः। ननु, महालक्ष्मीतो विभेमि; तत्राहु—हे अधीश्वरि, अशेषैश्वर्य्यसम्पन्नत्वात् त्वं ततोऽप्यधिकतरा निर्भयासीत्यर्थः। ननु तर्हि यूयं तमेवाराधायतेति चेत्तत्राहुः—हे देवि ! तदेकभक्त्या द्योतमान इत्यर्थः। तत्साक्षादर्च्चनादपि तत्प्रियतमजनाराधनमेव वरमिति भावः। इति सर्वथाऽस्मन्मनोरथस्त्वया परिपूरयितुं शक्यत इति तात्पर्य्यम्। नन्दश्चासौ गोपश्चेति तस्य सुतं कुमारमिति गोपकन्यानामस्माकं तत्पत्नीत्वयोग्यतास्तीति सूचितम; यद्वा, गोपो भूपोऽस्माकं राजेत्यर्थ इति तस्य सुदुर्लभता सूचिता, तथापि पतिं स्वामिनं कुरु, तत्र शक्तिरुद्दिष्टैव, यद्वा, नन्दगोपसुतमिति तस्य गोपवेशक्रीडादीनां मनोहरतया पतित्वेन प्रार्थनायाः कारणम्, तथा सदैव तादृशत्वप्रकटनमप्यभीष्टम्; मे ममेति सापत्न्यभयेन तत्परिहारार्थं प्रत्येकं सर्वा एव स्वचित्तान्तः प्रार्थयन्त इत्यूह्यम्। यद्वा, महामुनिश्रीनारदादि-दृष्टोऽयं प्राचीनो मन्त्रस्तादृश एवेति तदर्थकल्पनाविशेषेणालम्, ताभिरेवायं मंत्रो दृष्टोऽस्तीति केचिदाहुः,—पद्मपुराणोक्तानुसारेण पूर्वजन्मनि श्रीरघुनाथावतारे तासामेव ऋषित्वादिति। एतं मन्त्रम्, ताः श्रीनन्दव्रजवर्त्तिन्यः श्रीकृष्णैकापेक्षिका वा पूजां चक्रुरित्यनुवादेन तत्रान्यमन्त्राद्यभावेनान्यकामादिकं निरस्तम्; एवमग्रेऽपि ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गन्धादिभिस्सम्यगानर्चुः सुरभिभिः गन्धैर्माल्यैः पुष्पैश्च धूपैर्दीपकैश्चान्यैर्नानाविधैर्बलिभिः पूजासाधनैर्नानाविधैरुपहारैर्नैवेद्यैः पल्लवादिभिश्च ॥ ३ ॥ तथा कात्यायनीत्यादिमन्त्रं जपन्त्यस्ताः कुमारिकाः पूजां चक्रुः हे महामाये अत्याश्चर्यशक्त्यधिष्ठात्रि महायोगिनि स्वाराधनात्मकमहायोगनिर्वाहिके अधीश्वरि ! आराधकसमीहितफलदानसमर्थे हे देवि ’ नन्दगोपसुतं मम पतिं कुरु तुभ्यं नमः इति प्रत्येकाभिप्रायकमेकवचनम् एवम्भूतायास्तव न किञ्चिदप्यशक्यमिति सम्बोधनानामभिप्रायः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

बलिभिः परिवारदेवताविषयपूजाभिः ॥ ३ ॥ कात्यायनि कृत्यानामुत्पादके ! महती माया माहात्म्यं यस्यां सा तथा तस्याः सम्बुद्धिः महामाये महान् योग उपायोऽस्या अस्तीति महायोगिनी तत्सम्बोधनं महायोगिनि ! अधीश्वरि अधिगतेश्वरि ते तुभ्यं नमोऽस्तु इति समाप्तम् एवं प्रकारं वा ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कात्यायनी वैष्णवीशक्तिः इत्येवं मन्त्रः अतः प्राक् सिद्ध एवासौ तत्र यदि तृतीयपादाभीष्टनाम्नो योजनीय इत्येव विधिः स्यात्तदा लोकवल्लीलया मायोपासनमेव यदि तु सोऽपि पूर्वसिद्धस्तदा स्वरूपशक्त्युपासनमेवेदम् ॥ ४–५ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

व्रताचरणे स्वकृतमेव मन्त्रं जपन्त्यः प्रार्थयन्ते कात्यायनीत्यादि। हे देवि कात्यायनि ! ते तुभ्यं नमः। ननु किमर्थोऽयं नमस्कारः ? तत्राह—नन्दगोपसुतं पतिं मे कुरु कारय। प्रत्येकमन्त्रपाठादेकवचनम्। अथवा, प्रीतिवशादभिन्नता वा ननु दुर्घटोऽयमर्थः, कथमस्मच्छक्त्या भवितुमर्हति ? तत्राह—महायोगिनि महायोगो भक्तियोगः स विद्यते यस्या इति तथा। सा त्वं परमवैष्णवी तथा च ‘धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्वति’ इति श्रीरुद्रवाक्यम्। तेन तत्प्रसादादेवायमर्थः सुघटः। एवं चेदनयैवोपासनया किमहं परितुष्टो भवानीत्याशङ्क्याह—हे अधीश्वरि ! ईश्वरीणामधिके, त्वं सर्वेश्वरी, तव किमस्मद्वृत्तबहुवित्तसाध्योपचारैः ॥ ४–५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कात्यायनीत्यादि। ते नमः, कति कति अयनानीति वा तेषां निवास इत्यर्थेऽण् सार्वभौमादिवत् उभयपदवृद्धिः। कात्यायनि सर्वत्र सुलभे,—व्यापकत्वादिति भावः। ननु किमर्थोऽयं नमस्कारः ? तत्राह—नन्दगोपसुतं देवि ! पतिं मे कुरु इत्येकवचनं समानवासनत्वादैक्यप्रतिपादनार्थम्। ननु दुर्घटोऽयमर्थः। कथमस्मदाराधनेन सम्पद्यताम् ? तत्राह–महामाये दुर्घट–घटना पटीयसी माया, महती माया यस्या सा त्वम्, नायं ते दुर्घटोऽर्थः ननु मायाबलेन किमयमर्थः संभावयितुम् शक्यते, विना तस्य वा तज्जनस्य वा प्रसादम् ? तत्राह–महायोगिनि ! महायोगो भक्तियोगः, स विद्यते यस्याः सा त्वं परमवैष्णवी, त्वत्प्रसादेनैवायमर्थः घटते॥ एवञ्चेदनयैवोपासनया परितुष्टोऽहमिमं दुर्घटमर्थं सम्पादयिष्ये ? तत्राह—हे अधीश्वरि ! त्वं सर्वेश्वरि ! तव किमस्मद्दत्तैर्बहुभिरुपचारैः ? ॥ ४–५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बलिभिः वस्त्रभूषणनैवेद्याद्युपचारैः ॥ ३ ॥ हे कात्यायनि ! नन्दगोपसुतं पतिं कुरु । ननु, कुर्वित्यनेन मय्येव किमिति तत्र स्वातन्त्र्यमर्प्यते अहं तु तदर्थं त्वत् पितरौ प्रेरयिष्यामि मात्रं तस्मात् कारयेति देहीति वा प्रयुज्यतामित्याशङ्क्य सर्वैकल्पयाह— हे महायोगनीति । तेन संयोगस्त्वयैव शीघ्रसम्पाद्यो ननु पित्रादिव्यवधानोपद्रवेण परमोत्कण्ठावतीभिरस्माभिः कालविलम्बस्यासह्यत्वात् कृष्णस्य सम्प्रत्यनुपनीतत्वेन विवाहायोग्यत्वात् हे देवि ! मुख्यं विवाहं विनैव केवलगान्धर्वविवाहेनैव मे पतिं कुर्वित्यर्थः । अधीश्वरीति तत्र तव किमप्यशक्यं नास्तीति भावः । ननु, तव कृष्णे पतिभावस्य त्वत्पितृभ्यामज्ञातत्वे त्वदभीष्टः कृष्णाङ्गसङ्गः कथं साधु सेत्स्यतीत्यत आह—महामाये मायया मत्पितरौ तथा मोहय यथा कदाचिदपि गोपान्तरेण मद्विवाहस्ताभ्यां न भाव्यते कृष्णाङ्गसङ्गरहस्यञ्च न च ज्ञातुं शक्यत इति यद्वा, दीव्यति क्रीडति देवयति क्रीडयतीति वा देवी सचासौ पतिश्चेति ते तादृशपतित्वं विवाहं विनैव सिद्ध्यतीति मम गोपान्तरव्यूढत्वेऽपि न कापि क्षतिरिति भावः । इत्येवं प्रत्येकं मन्त्रार्थं पृथक्पृथक् विचिन्त्येत्यर्थः, इयं ताभिरुपासिता चिच्छक्तिवृत्तिः स्वरूपभूता योगमायैव नतु बहिरङ्गमाया यदुक्तं नारदपञ्चरात्रे श्रुतिविद्यासम्वादे—

"जानत्येकापरा कास्तं सैव दुर्गा तदात्मिका । या परा परमा शक्तिर्महाविष्णुस्वरूपिणी ॥
यस्या विज्ञानमात्रेण पराणां परमात्मनः । मुहूर्त्ताद्देवदेवस्य प्राप्तिर्भवति नान्यथा ॥
एकेयं प्रेमसर्वस्वस्वभावा श्रीकुलेश्वरी । अनया सुलभो ज्ञेय आदिदेवोऽखिलेश्वरः ॥
अस्या आवरिका शक्तिर्महामायाऽखिलेश्वरी । यया मुग्धं जगत् सर्वं सर्वे देहाभिमानिनः" ॥ इति ।

अतः सर्वेषु कृष्णमन्त्रेषु दुर्गाधिष्ठातृदेवतेत्यागमे शुद्धसत्त्वस्वरूपा चिच्छक्तिवृत्तिः कृष्णभगिन्येकानंशाभिधाना योगमायैव मन्त्राधिष्ठात्री सैव खल्वाभिरुपासिता दुर्गा महामायेत्यादि नामादि साम्येनैव लोकानां भ्रमोभवतीति ज्ञेयं व्रजस्य लोकवल्लीलत्वान्मायोपासनेऽपि न दोषः अत्र केचिदनन्यम्मन्या यदन्यथा मन्यन्ते न ते तदीयप्रेमगन्धसम्बन्धगन्धवाहमपि स्पृशन्तीति श्रीवैष्णवतोषणी ॥४॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

उच्चावचैः नानाविधैर्वस्त्रादिभिः उपहारैर्नैवेद्यैः प्रवालैर्विद्रुमैः पल्लवैश्च "प्रवालोऽस्त्री किसलये वीणादण्डे च विद्रुमे" इति मेदिनी एभिरानर्चुरिति पूर्वेण सम्बन्धः ॥ ३ ॥ वृतिनीनां तासां जप्यं मन्त्रमाह—कात्यायनीति सार्द्धकम् । हे कात्यायनि ! तन्मुनिरंशप्रकाशिके ! परमधर्मदात्रि ! नन्दगोपस्य नन्दनाम्नो राज्ञः सुतं मे पतिं पाणिग्राहकं कुरु । ननु मत्प्रेरितौ तव पितरौ तथा करिष्यतस्तत्राह हे महायोगिनीति । स योगस्त्वयैव त्वरया विधेयो ननु पित्रादिव्यवधानेन कालविलम्बस्य दुःसहत्वात् ततो गन्धर्वेणैव विधिना तं मे पतिं कुर्विति भावः । न च तद्विधानेन तवासामर्थ्यमस्तीत्याह—अधीश्वरीति । ननु गुरुविप्राग्निसाक्षिकत्वेन विना तस्मिन् पतिभावः स्वच्छन्दतत्सङ्गाय न स्यात्तत्राह—हे महामाये इति । तथा मायां विस्ताराय यथा गोपकुमारेणान्येन सह मद्विवाहं मत्पित्रादयो न भावयेयुर्मेनन्दसुतेन सह सङ्गञ्च विद्युरिति भावः । हे देवीति इयमेका क्रीडा सम्पाद्यतामित्यर्थः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अर्चनर्चनमेतैरित्याह ॥ गन्धैरिति । माल्यैर्मालाभिः पृथक्कुसुमैश्च सुरभिभिरिति योग्यसर्वान्वयि । बलिभिः कात्यायनीभृत्यपूजाभिरेवमुच्चावचै रनेकप्रकारैः प्रवालाः किसलयाः फलानि तण्डुलाश्च तैरुपहारैरानर्चुरित्यतीतेनान्वयः ॥ ३ ॥ तत्र मन्त्रमिममिमा समाः उमामुद्दिश्य जेपुरित्याह ॥ कात्यायनीति । महामाये महती च साऽमायाऽकपटप्रवृत्तिर्यस्याः सा तत्सम्बुद्धिः । महाशक्तिमतीति वा श्रेष्ठोपायवतीति महायोगिनी स्वामिनीत्यधीश्वरे हे देवि नन्दगोपसुतं मे पतिं कुरु । मम युष्माभिः क्रियमाणोचितापचितिः केत्यत आहुः ॥ ते नम इति । म इति प्रतिस्विकमेकैकस्याः प्रार्थनेत्येकवचनोपपत्तिः । आन्तरङ्गिको भावश्चेतरस्या अस्तु वा माऽस्त्वित्येवानेन ध्वन्यते । सापत्न्यं स्नेहापवाहकमिति लोकप्रसिद्धेरिति केचित् । आन्तरङ्गिको भावश्च नैतन्मात्रप्रार्थना किन्तु रमामपि । हे मे इति सम्बोध्य प्रार्थयामासुरिति वाऽवसेयः । तदावेशं विना श्रीशसम्बन्धासम्भवात् । ऋते रमां जातु ममाङ्गसङ्गयोग्याङ्गना नैव सुरालयेऽपीत्याद्युतेः ते मः शिवो न इव पतिं नन्दगोपसुतं कुरु । मः शिवे मा रमायां च मा निषेधेऽव्ययं मतं । मासे च समये चन्द्रे यमे वेधसि मं विप इति विश्वः । यथा तव धवो भवस्तथा नन्दनन्दनं मे पतिं कुरु ते नमोऽस्तु ॥ ४ ॥

श्रीसुबोधिनी

एतावता क्लेशेन भगवान् प्रात इति ज्ञापयितुम् पूजासाधनान्याह–गन्धैरिति । माल्यानि पुष्पाणि सुरभिभिरित्युभयेषां विशेषणं बलिभिरर्हिस्रैः ऋषित्वात्तासां परिज्ञानं धूपो दीपावलयश्च पङ्क्तिरूपा दीपाः दीपकाः उच्चावचानि सर्वाण्येवानेकरूपाणि उपहारा नैवेद्यद्रव्याणि प्रवालाः पल्लवाः फलानि तन्दुलाश्च एवं नवविधा निरूपिताः एव कर्तृदेशद्रव्याणि निरू-

पितानि ॥ ३ ॥ मन्त्रमाह—कात्यायनीति । ऋषित्वान्मन्त्रदर्शनं मन्त्रे प्रसिद्धदेवतामन्त्रोपासनायां साक्षात्कृता अर्थस्यापि दृष्टत्वादतः कात्यायनीति परिज्ञानसम्बोधनं कार्यं त्याजयतीति कात्या संहारिका शक्तिः तस्या आधिदैविकं रूपं कात्यायनीफलिरूपं पूर्वं भगवान्न प्राप्तः तत्रावश्यं दुरदृष्टमेव प्रतिबन्धकमिति मन्तव्यं तपस्तु सिद्धमेव साधनम् अन्यथाऽग्रेपि न स्यात् अतः प्रतिबन्धस्याधिदैविकस्य नाशने इयमेव समर्था । ननु, प्रतिबन्धकमाधिदैविकं यदि भगवदिच्छयैव स्यात् तदा कथं निवर्त्तत इत्याशङ्क्याहमहाभाग इति । अल्पभाग्यत्वे भगवान्नाज्ञापयेत् यशोदायाञ्च जन्म न स्यात् भगवद्दास्यं च न प्राप्नुयात् त्वयाप्रार्थितः प्रियः स्वेच्छामप्येतदनुगुणां करिष्यति, अतो महाभाग्यं तव आभिमानिकसम्बन्धेन त्वं पुनर्भगिनी भवसि ज्येष्ठा अत उपकारोपि कर्त्तव्यः । न च मन्तव्यं तादृशदोषो न मया परिहर्तुं शक्यत इति यतस्त्वं महायोगिनी गर्भसङ्कर्षणादिकार्यकरणात् नन्वाधिदैविकं कथं परिहर्त्तव्यं कालादिभ्यो बलिष्ठाहि सा प्रतिबन्धकशक्तिः तत्राह, अधीश्वरीति । ईश्वरं भगवन्तमधिकृत्य वर्त्तसे अतोऽन्तरङ्गा त्वं शक्तिः कात्यायिन्या गुणत्रयं चोक्तं पदत्रयेण अतः सर्वप्रकारेण त्वं भगवदीया नन्दगोपसुतं मे पतिं कुरु प्रत्येकं भर्त्तारं कुरु भगवानशक्य इति न मन्तव्यं यथा नन्दगोपस्य पुत्रो जातः तथाऽस्मत्पतिरपि भविष्यति । किञ्च' त्वं देवतारूपा अलौकिकेनापि प्रकारेण भगवन्त पतिं करिष्यसि प्रत्युपकारस्तु तुभ्यं नमनम् अनङ्कारस्तुभ्यं दत्तः त्वदीय इति अन्यत्सर्वं भगददीयं प्रतिन्धके निवृत्ते स एव भविष्यति तथापि वक्तव्योऽपि स हि मायायवनिकामाच्छाद्य क्वचिदल्पोद्घाटनेन तिष्ठति अतोऽस्मदर्थं तत्रतत्रोद्घाटिका भवेत्यर्थः । अपराधस्तु न भविष्यति यतस्तं पतिं करिष्यसि कन्यावरयोर्विवाहे यवनिका दूरीक्रियत एव अयमर्थो नित्यः प्रत्यगाशीर्मन्त्रत्वात् जप एवास्य न कर्माङ्गकरणं प्रत्यगाशिषो मान्त्रान् जपत्यकरणानिति कल्पात् अतः परं तेषां प्रसादरूपा शक्तिस्त्रीभवति भगवानेव वा गुणातीत इति पक्षद्वये मन्त्रार्थं उच्यते भगवतः स्त्रियः कतीति प्रश्नविषयाः कात्याः अत एव परीक्षतो राज्ञः प्रश्ने "पत्न्यः कत्यभवन् प्रभोः" इति वचनं ता अयनं यस्याः सा कात्यायनी ङीबत्र छान्दसो ज्ञेयः नन्वेतस्या भगवद्भोग्यतासम्पादकत्वैकस्वभावायाः स्वस्मिंस्थितिं चेज्जानन्ति तदा भगवत्सम्बन्धस्यावश्यं भावित्वेन ज्ञानञ्च भविष्यत्येवेति कथं व्रतारम्भः न च विलम्बाभावार्थं इति वाच्यम् एतस्याः सर्वतोधिकत्वेनान्या प्रतिबाध्यसामर्थ्यत्वेन च स्वस्य रसयोग्यवयः सम्पत्तौ सा स्वत एव विलम्बासहिष्णुर्यतः न च तादृग्वयस्सम्पत्त्यर्थमेव व्रतारम्भः इति वाच्यं प्रमाणाभावात् पतित्वकरणस्यैव मन्त्रे श्रूयमाणत्वात् तस्य चैतच्छक्तेरेतद्रूपस्य भगवतो वा प्रवेशो नैव सिद्धत्वादेतत् प्रयोजनं न विद्मः । अथ स्वस्मिंस्तत्स्थितेरज्ञानाद्व्रतारम्भः इति वाच्यं तथापि वस्तुतस्तत्प्रयोजनं न सिद्ध्यतीति चेदुच्यते मन्त्रे पठ्यमानमेव फलं प्रयोजनं नचोक्तन्यायेन तत्सिद्धमिति वाच्यं तत्तात्पर्यानवगमात् तथा हि साक्षात्पुरुषोत्तमरमणे ह्येतासामिच्छामये मां रंस्यथ क्षपाः "यदुद्दिश्य व्रतमिदञ्चेरुरार्यार्चनं सतीः" इति भगवद्वचनात् एवञ्च सत्युक्तरूपशक्तेर्भगवतो वा प्रवेशस्य प्रयोजनमावेशरमणेनैवान्यथासिद्धं कदाचिद्भगवान्मन्येत सर्वं सर्वत्र योजयितुं शक्तो यतः तथाचावेशेनांशावतारेण वा सम्बन्धो माभूदिति तदर्थं व्रतलक्षणं तदाराधनमारब्धं यथान्यसम्बन्धराहित्येन पुरुषोत्तमसम्बन्धो भवेत् अत एव भगवता सतीत्वं विशेषणमुक्तमेतदभिप्रायेणैव नन्दगोपसुतपदमप्यत एव तत्रैव पुरुषोत्तमाविर्भावो यतः एतच्च यथा तथाद्य प्रकरणे निरूपितं यथा कंसादिभिया तदज्ञानार्थं गुप्तस्थाने स्थापितो नन्दपुत्रो भवत्तथात्वयैकान्तस्थलेऽन्या ज्ञाततया प्रापितोऽस्मद्रमणकर्त्ता भवत्वित्यप्यस्य यदस्य तात्पर्यं ज्ञेयम् अत एव बलदेवादिव्यावृत्तिरपि अत एव तथैवाग्रे करिष्यतीति भगवान् उद्देश्यपतित्वविधानप्रार्थनावाचकयोः पदयोर्मध्ये देवीति सम्बोधनेन मध्यस्थतया कदाचिद्दूतीन्यायेनापि तथाकरणं द्योत्यते एतदेव तव परमानन्दजनकं तव क्रीडैवेति देवीशब्देन द्योत्यते गावो हि स्वतः शुभाशुभयोः प्रवृत्तिनिवृत्तिरहिताः किं बहुना स्वभक्ष्येपि स्वरक्षकप्रेरणायां प्रवृत्तिनिरोधे तूष्णींभाव एव तासां तथा चैतादृशीनां पालकस्य सुत इत्यस्माकमप्येतादृशफलसम्बन्धे साधकबाधकज्ञानराहित्येन कदाचित्स्वतोऽन्यथा चिकीर्षायामपि स्वयमेव कृपया ततो निवर्त्तक इष्टसम्पादकश्च भविष्यतीति गोपपदेन ज्ञायते अपरञ्च गोपजातीया हि लोके न महत्त्वेन गण्यन्ते तथा च ब्रह्मवाक्सत्यत्वार्थं स्वयं तादृशस्य पुत्रत्वमङ्गीकृतवान् यः स स्ववाक्सत्यत्वार्थमस्मत्पतित्वमप्यङ्गीकरिष्यत्येव निमित्तमात्रत्वं भवेति ज्ञापनायापि गोपपदं तेनात्र तव नाधिकः प्रयासो भवितेति सूचितम् । स्वस्याभिमानाभावश्च एतादृक् फलसम्पादिकायास्तव प्रत्युपकारस्तु नास्माभिः कर्त्तुं शक्यः किन्तु यथा "किमासनं ते गरुडासनाय" इतिवाक्यात् नमोनम इत्येतावत्सदुपशिक्षितमिति वाक्याच्च भगवति जीवैर्नमनमेव कर्त्तव्यं भवति कर्त्तुं शक्यं च तथाऽस्माभिरपि तुभ्यं नमनमेव कर्त्तुं शक्यमित्याशयेनाहुः, ते नम इति नमनातिरिक्ताशक्यत्वे तन्महत्त्वं हेतुरिति तदुक्तं महाभाग इत्यादिना भगवता सह योगोऽस्यास्तीति योगी योगेन महत्त्वन्तु नायिका भावपूर्वकत्वं तथा च तादृशे पुरुषे अधीश्वरिअङ्गीकृतस्वामित्व इत्यर्थः । तेन साधारणाप्राप्यत्वेन महत्सम्बन्धित्वेन च महत्त्वमुक्तं भवति एतादृशस्येश्वरो हि भगवानेव भवति त्वन्त्वेतादृशी यदीश्वरोपि त्वदधीनस्तस्मै फलं ददातीत्युपसर्गः पक्षद्वयेप्येतस्माद्भगवत्स्वरूपात्मकत्वात्तदधीनत्वेपि नेश्वरे काचिन्न्यूनता शङ्कनीया महायोग वत्वे हेतुभूतं पुरुषे विशेषणमाहुः महाभाग इति । भक्तिमार्गेऽङ्गीकार एव भाग्यरूपः तत्रापि पुष्टिपुष्टावङ्गीकारो महत्त्वम् अतस्तं मन्त्रं जपन्त्यस्तूष्णी मेव पूजां चक्रुरित्याह, इतीति । इयमेव मन्त्रं जपन्त्यः ताः प्रसिद्धाः तूष्णीं पूजां चक्रूः यतः कुमारिकाः स्त्रीणां विवाहोत्तरमेव मन्त्रसम्बन्धः अयं तु मन्त्रः ताभिरेव दृष्ट इति युक्तं तासां जपकरणम् अनेन क्रियोक्ता ॥ ४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गन्धैरित्यत्र अर्हिस्र रिति बाहुलकात् कर्मण्यौणादिको रक ॥ ३ ॥ **कात्यायनी**त्यस्याभासे **एवं कत्रिति त्रिभिः** श्लोकैस्त्रयं निरूपितं, अनेन **मन्त्र** उच्यते अग्रिमेण कालो वक्तव्यः, **एवं** पञ्चभिः श्लोकैः पञ्चात्मकं **कर्म** निरूपितमिति ज्ञेयं, व्याख्याने, **साक्षात्कृते**ति मध्यम**पुरुषप्रयोगादितिभावः, परिज्ञानेति** त्वत्स्वरूपमस्माभिर्ज्ञायत इति **स्वपरिज्ञान**स्य सम्यग् **बोधन**मित्यर्थः, **तत्रे ति** भगवत्प्राप्तौ, **अदृष्टं** भगवदाच्छादनादिरूपाधिदैविकविसामग्रीहेतुत्वादाधिदैविकं **प्रतिबन्धकं**, तथा चायं भगवत्कृत इति **तन्नाशने नान्यः समर्थः**, किन्त्वियमेव, यतो भगवता लीलाप्रतिबन्धनिवारणसामर्थ्यमस्यै दत्तमिति भावः, अत्रादृष्टं न कर्मजन्यं किन्तु भगवदीयतत्तदवयवाच्छादका योगमायांश इतिज्ञेयं नन्विति **भगवदिच्छया** चेत् **स्यात्** तदा प्रबलत्वात् **कथं निवर्तत** इत्यर्थः, **महाभाग्ये** अर्थापत्ति **प्रमाणयन्ति** अल्पेत्यारभ्य न प्राप्नुयादित्यन्तेन भाग्यकार्यमुपक्रान्त**माहुस्त्वयेति**, अत इत्यस्य पूर्वेणान्वयः, नव महाभाग्यं हेतुत्रयेण निश्चितं यत इतिशेषः, **अतो** हेतोस्त्वया प्रार्थित एवं **करिष्यती**त्यर्थः, एवं प्रतिबन्धनिवारणं प्रार्थितं, अनेनैव फलदानमपि प्रार्थितमित्याहुः **आभिमानिकसम्बन्धेने**ति, भाग्यसाधनहेतुना **यशोदायां जन्मने**त्यर्थः, अयं भाग्यकार्यत्वेनोक्तः, अत्रोपकारकभगिनीत्वकारणत्वेनोच्यत इति पुनः पदं, दासीनां प्रभुपत्न्यां मातृत्वव्यवहारस्तत्पुत्र्यां **ज्येष्ठभगिनी**त्वव्यवहारो लोकसिद्धः, अत्रापि 'प्रायो बताम्बे'त्यनेन यशोदायां मातृत्वव्यवहार उक्त इति तत्पुत्र्यामपि **ज्येष्ठभगिनी**त्वव्यवहारः सिद्ध इतिभावः, **नन्वाधिदैविकं** कथमिति केन **प्रकारे**णेत्यर्थः, अन्तरङ्गत्वाद् भगवन्तं प्रार्थयित्वेत्युत्तरं, **कात्यायन्या गुणत्रयमिति** 'अधीश्वरि महायोगिनि महाभागे' इतिपदत्रयेणैश्वर्यवीर्ययशांस्युक्तानीत्यर्थः, **सर्वप्रकारेणेति** भगवद्धर्मवत्त्वेनापित्यर्थः, **वक्तव्योपीति** आज्ञां विना तथाकर्तुमशक्यत्वादितिभावः, प्रतिबन्धनिवर्तनं विशदयन्ति स होति, **अयमर्थ** इति रमणरूपोर्थो नित्यो न तु कादाचित्क इति पतिपदेन ज्ञाप्यत इत्यर्थः, पत्या सह रमणं सर्वदा भवति जारेण कदाचिदितिभावः, प्रत्य**गाशीरिति** ऋचस्त्रिविधाः प्रत्यक्षकृताः परोक्षकृता आध्यात्मिक्यश्च ताः क्रमात् मध्यमपुरुषप्रथमपुरुषोत्तमपुरुषप्रयोगयुक्ता इति निरुक्ते निरूपितं तथा चायं मन्त्रः प्रत्यक्षकृतरूप इत्यर्थः, **अवश्यं भावित्वेनेति** प्रकारता तृतीयार्थः, स्थितिज्ञाने एवं प्रकारकभगवत्सम्बन्धज्ञानमप्यासां भविष्यत्येवेतिनिर्धार इत्यर्थः, अन्यथा**सिद्धमिति** भवत्वितिशेषः, प्रयोजनं रमणमावेशरमणप्रकारेण **सिद्धं** भवत्वित्यर्थः, अंशावतारेणेति वामनादिनेत्यर्थः, **तत्रैवेति** अदितिरोहिणीव्यावृत्त्यर्थ**मेवकारः**, तत्राविर्भूते, बले तु पुरुषोत्तमस्यावेशः, तथा च बलदेवेन रमणं मा भवत्विति तदाशय इतिभावः उद्देश्येति **नन्दगोपसुत**मुद्दिश्य पतित्वं विधीयते, तथा चोद्देश्यवाचकं **नन्दगोपसुतपदं** पतित्वविधानस्य तत्प्रार्थनस्य वा बोधकं पतिपदं, तयोर्मध्य इत्यर्थः, गोपपदव्याख्यानान्तरे तेनेति गोपसुतस्य पतित्वकरणप्रार्थनेनेत्यर्थः, स्वस्येति प्रार्थनयैवं जातं न तु स्वसाधनबलेनेत्यभिमानाभाव इत्यर्थः, **अधीश्वरीति** अधिका चासावीश्वरी चेत्यर्थः, अत इति यतोस्य न कर्माङ्गं करणमत इत्यर्थः, पूर्वेणास्यैकवाक्यता मध्ये तु व्याख्यानान्तरम् ॥ ४ ॥ इतीत्यत्र यत इति अतस्तूष्णीं चक्रुरित्यर्थः, तर्ह्येतन्मन्त्रजपोपि न स्यादत आहुः **अयं** त्विति, अनेन मन्त्रेण पूजा तु प्रत्यगाशीर्मन्त्रत्वान् न भवतीत्युक्तमेव, **क्रियोक्ते**ति व्रताङ्गभूतं पूजालक्षणं कर्मोक्तमित्यर्थः, ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गन्धैरित्यत्रोच्चावचैश्चोपहारैरित्यस्य विवृतामुच्चावचानि **सर्वाण्येवानेकरूपाण्युप-हारा नैवेद्यद्रव्याणीति**, अत एव हेमन्ततौ **अनेकनैवेद्यद्रव्याणि भगवते** समर्प्यन्ते अस्मत्सम्प्रदाये **भगवानेव वा गुणातीत** इति पक्षे कात्यायन्या भगवद्रूपत्वात् ॥ ३ ॥ **कात्यायनी**त्यत्र **मन्त्रोपासनया साक्षात्कृतेति** 'पतिं मे कुरु ते नम' इति युष्मच्छब्दप्रयोगाद्देवतासाक्षात्कारो ज्ञायते, **भगिनी भवसि ज्येष्ठेति** यशोदायामुत्पन्नत्वादाभिमानिकसम्बन्धेन भगवतो **भगिनी भवसी**त्यर्थः' 'अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजे'तिवाक्यात्, **ज्येष्ठेति गुणैः** कृत्वा **ज्येष्ठा** सर्वतो महती भवसीत्यर्थः ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सुरभिभिरिति । यथापेक्षितं सर्वत्रान्वयः । गन्धैश्चन्दनादिभिः । वलिभिरिति । यान् अग्रे निधाय प्रणामः क्रियते तैर्नारिकेरादिभिर्द्रव्यैरित्यर्थः । उच्चावचैरुत्तममध्यमैरन्यैश्च यथासम्भवप्राप्तैर्वस्त्राभरणादिभिः । उपहारैर्नैवेद्यैः । स्पष्टमन्यत् ॥ ३ ॥ पूजामन्त्रमाह—कात्यायनीति । हे कात्यायनि । नन्दगोपसुतं मे मम पतिं कुरु, ते तुभ्यं नमः । इति एवं प्रार्थनापूर्वकनमस्कारात्मकं मन्त्रं जपन्त्यस्ताः कुमारिकाः पूजां चक्रुरिति सार्धान्वयः प्रत्येकं मन्त्रपठनात् 'नम' इत्येकवचनम् । ननु 'दुर्लभोऽयं मनोरथः कथं मया सम्पादनीय' इत्याशङ्क्य तत्र सामर्थ्यं सूचयन्त्यः सम्बोधयन्ति अधीश्वरीति । तत्रापि हेतुं सूचयन्त्य आहुः महामाये इति । भगवतोऽचिन्त्यकार्यसम्पादनशक्तिरूपे ! "एवमपि भगवदाज्ञया सर्वसम्पादनसमर्थापि तस्यैव युष्मत्पतित्वसम्पादने कथं समर्था ? तदधीनत्वात्" इत्याशङ्क्याहुः—महायोगिनीति । महायोगो भक्तियोगः स विद्यतेऽस्या इति तत्सम्बोधनम् । तद्भक्तत्वात्त्वत्प्रसादे सोऽपि प्रसन्न एव सन् मनोरथं पूरयेदित्याशयः । "महामाये" इत्यत्र 'महाभागे' इति पाठेऽपि 'भगवत्प्रसादात्मकं महद्भाग्यं तवास्तीति, अस्मन्मनोरथसम्पादने समर्थाऽसि' इति सूचितम् । तत्रापि हेतुर्भक्तिरेवेति 'महायोगिनि' इत्यनेनोक्तं ज्ञेयम् । 'क्रीडारहस्यं च तव विदितमेव' इति सूचयन्त्यः सम्बोधयन्ति—हे देवीति । 'तत्र प्रत्युपकारे चास्माकं सामर्थ्यं नास्त्येव' इति सूचनाय अन्ते नमस्कार प्रयोगः ॥ ४ ॥

अन्वितार्थप्रकाशिका

कात्यायनीति सार्धम् ।। हे कात्यायनि महामाये महायोगिनि अधीश्वरि देवि ! नन्दगोपसुतं मे मम पतिं कुरु ते तुभ्यं नमः । मे इति प्रत्येकं पाठाभिप्रायेणैकत्वम् । एभिर्विशेषणैस्त्वं कृष्णेन सह गान्धर्वं विवाहं कारय । पित्रादयो यथा न जानीयुस्तथा नित्यमङ्गसङ्गं च सम्पादयेति बोध्यते । इति एवं प्रार्थनापूर्वकनमस्कारात्मकं मन्त्रं जपन्त्यस्ताः कुमारिकाः पूजां चक्रुः ।। ४।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कात्यायनीत्यादिसंबुद्धिभिः स्वमनोरथः प्रार्थयते ।। ४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तास्तां यैरपूजयंस्तानाह ।। गन्धैरिति ।। सुरभिभिः गन्धैर्घृष्टचन्दनैः, माल्यैः पुष्पमालाभिः, धूपदीपकैर्धूपैर्दीपैश्च, बलिभिः पूजासाधनैः, उच्चावचैर्नानाविधैः, उपहारैर्नैवेद्यैः, प्रवालाः पल्लवाश्च फलानि च तण्डुलाश्च तैः च ।। ३ ।। कात्यायनीति ।। हे कात्यायनि, । हे महामाये हे आश्चर्यशक्त्यधिष्ठात्रि हे महायोगिनि स्वाराधनात्मकमहायोगनिर्वाहके, हे अधीश्वरि स्वाराधकसमीहितफलदानसमर्थे, हे देवि, नन्दगोपसुतं, मे मम पतिं कुरु ते तुभ्यं नमः । मे इति प्रत्येकाभिप्रायमेकवचनम् । इत्येवंभूतं मन्त्रं जपन्त्यः सत्यः; ताः कुमरिकाः, पूजामर्चनं कात्यायन्या इति शेषः । चक्रुः ।। ४ ।।

कृष्णप्रिया

सुन्दर गन्ध वाले चन्दन आदि द्रव्यों से सुवासित मालाओं से विविध प्रकार के बलि नैवेद्यों से, धूप और दीपावलियों से' नाना प्रकार के भोजन के पदार्थों से नव पल्लवों से, फलो से और चावलों से नव प्रकारकी सामग्रियों से श्री कात्यायनीजी का अर्चन किया।। ३ ।। हे कात्यायनि ! हे बडभागिनि ! हे अधीश्वरि ! हे देवि ! आप कृपया नन्दनन्दन श्रीकृष्णको हमारा पति बना दीजिए। हे भगवति ! आपके श्रीचरणों में हमारा प्रणाम है इस मंत्र का जप करती हुई वे सब कुमारिकायें कात्यायनी देवीका अर्चन करने लगी ।। ४ ।।

[1]एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः । भद्रकालीं समानर्चुर्भूयान्नन्दसुतः पतिः ।। ५ ।।
उषस्युथाय[2] गोत्रैः स्वैरन्योन्याबद्धबाहवः । कृष्णमुच्चैर्जगुर्यान्त्यः कालिन्द्यां स्नातुमन्वहम्[3] ।। ६ ।।
[4]नद्यां कदाचिदागत्य तीरे निक्षिप्य पूर्ववत् । वासांसि कृष्णं गायन्त्यो विजह्रुः सलिले मुदा ।। ७ ।।
भगवांस्तदभिप्रेत्य कृष्णो योगेश्वरेश्वरः । वयस्यैरागतस्तत्र[5] [6]व्रतस्तद्व्रतसिद्धये ।। ८ ।।

कर्दमक्षमा

अन्वयः–एवं-मासम्-व्रतम्-चेरुः,-"तेन"कुमार्य्यः–कृष्णचेतसः-"जाताः", "पुनः" भद्रकालीम्–समानर्चुः–"यत्" नन्दसुतः पतिः भूयात् ।। ५ ।। उषसि–उत्थाय–स्वैः गोत्रैः-"उत्थाय",अन्योन्य–आबदध–बाहवः–अन्वहम्–कालिन्द्ययाम्–स्नातुम्-यान्त्यः-उच्चैः कृष्णम्-जगुः ।। ६ ।। कदाचित्—नद्याम् –आगत्य—पूर्ववत् –तीरे वासांसि –निक्षिप्य—कृष्णम् गायन्त्यः—मुदा –सलिले –विजह्रुः ।। ७ ।। योगेश्वरेश्वरः | भगवान् – कृष्णः—तद्-अभिप्रेत्य –वयस्यैः-आवृतः-तत् कर्मसिद्धये—तत्र –गतः ।। ८ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृष्णचेतस्त्वमेवाह । भूयान्नंदसुतः पतिरित्यानर्चुरिति ।। ५ ।। व्रतस्य पूर्वांगमाह । उषसीति । गोत्रैर्नामभिः । अन्योन्याबद्धबाहवः परस्परं गृहीतपाणयः ।। ६ ।। ।। ७ ।। योगेश्वराणामीश्वर इति प्रत्येकं तादृङ्मनोरथपूरणसामर्थ्यं दर्शयति । तासां कर्मणः सिद्धये फलदानायेति ।। ८ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उषसि घटिकाचतुष्कावशिष्टरात्रौ । क्वचित्तु 'उषः कालोऽष्टपञ्चाशत्' इत्युक्तम् । तदत्र 'उदितेऽरुणे' इति पूर्वोक्तिविरोधादुपेक्ष्यम् । 'गोत्रं कुलाख्ययोः' इति मेदिनी । गोत्रैर्नामभिर्धन्ये कुत्रासि किमिति विलंबस इत्येवमाहूता इत्यर्थः ।। ६ ।। पूर्ववत् नित्यवत् । वासांसि निक्षिप्य संस्थाप्येति सार्द्धेनान्वयः । कदाचिदिति व्रतपूर्णदिने पूर्णिमायामेव 'एवं मासव्रतं चेरुः' इत्युक्तत्वात्,

---

१. अयं श्लोक उषसीति श्लोकानन्तरं वर्तते । २. उषस्युत्थाप्य ता गोत्रैः–वीर.; उपस्यभ्येत्य ताः स्वैर– विज. । ६ मुद्यताः–वीर. ।
४. नदीं-विज. । ५. वृतस्तत्र श्रीधर. वंशी. वीर. विज. । ६. गतस्तत्कर्म-श्रीधर. वंशी. वीर विज. ।

अत एवोत्सवार्थं कुमारीभिस्ताभिः समानवासनत्वेन प्रणयास्पदीभूता वृषभानुनंदिन्याद्या अपि निमंत्र्यानीताः, पूजासमाप्त्यनंतरं कृष्णं मुदा गायंत्यस्तद्गानानंदेन हेमंतजलेपि शीताद्यस्फूर्त्तेः ।। ७ ।। तत् 'भूयान्नंदसुतः पतिः' इत्येवंरूपं मतम् । अभिप्रेत्य ज्ञात्वा । तत्र कालिंदीतटे ।। ८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मासेति । स्वल्पेनैव कालेन तासां तादृश्यपि सिद्धिरिति भावः । कृष्णे चेतो यासामिति तस्याः समर्चनमपि कृष्णार्चनमेवेत्यभिप्रेतम् अत एवाग्रे च वरदानाय श्रीकृष्णस्यैवागमनं वक्ष्यति भूयादिति पूजादौ सङ्कल्पः ।। ५ ।। प्रेम्णा विस्मृतमपि पुनस्तासामनुरागपरिपाटीमयं व्रतपूर्बाङ्गं स्मरन्नाह–उषसीति । उषस्युत्थायेति तासामुत्कण्ठा गोत्रैर्नामभिः स्वैरिति परस्परकार्य्यसाधकत्वं हेतौ तृतीया मिथस्तत्तन्नामभिराहूता इत्यर्थः । स्वैर्वर्गैः सहेति वा अन्योन्या इति श्रीकृष्णरागमयैकमत्येन मिथः स्नेहविशेषः कृष्णमिति चेतोवद्वचनस्यापि तदेकनिष्ठता तत्राप्युच्चैरिति तदावेशः कालिन्द्यां स्नातुमन्वहमिति दूरगमनं नित्यमेकरसत्वं च दर्शितम् एवमनुरागवैशिष्ट्यमेव सर्वथापि वर्णितमिति ।। ६ ।। कदाचित् तन्मासान्ते पौर्णमास्यां पूर्ववदिति सदैव नग्नतया स्नानमित्यादिकं बोध्यते तच्च बाल्यभावादेव मुदा विहारे हेतुः कृष्णं गायन्त्य इति तद्गानानन्देन हेमन्तजलेऽपि शीताद्यस्फूर्त्तेः । यद्वा, मुदेति व्रतस्य तद्दिने पूर्णत्वात् अत एव कृष्णं गायन्त्यो विजह्रुः इति देहाननुसन्धानेन च कृष्णचेतस्त्वमेव विशेषितम् एवं मानसवाचिककायिकैकतानत्वं दर्शितम् ।। ७ ।। योगेश्वराणां लब्धसार्वज्ञादिसिद्धीनामाराध्यः अतएव भगवान् नित्यस्वाभाविकसार्वज्ञादिशक्तियुक्तोपि तत्तस्य व्रतस्यात्मैकार्थत्वम् अभिप्रेत्य निजगानादिरीतिविशेषेणानुमीयैवेति तस्य तादृशतत्प्रेममयलीलामाधुर्यविशो दर्शितः तथापि देवतान्तरोपासकेभ्योपि स्वयं फलदाने युगपदखिलवस्त्रं हरणे च शक्तिर्दर्शिता तत्र हेतुः कृष्णः तादृशत्वेनैव प्रसिद्ध इत्यर्थः । बालैरिति वक्ष्यमाणात् वयस्यैरिति बालकैरेव सखिभिरिति ज्ञेयं तैर्वृतः सन्नागत इति तेच परमान्तरङ्गा दामसुदामवसुदामकिङ्किणयो ज्ञेयाः यथोक्तं गौतमीतन्त्रे—

"दामसुदामवसुदामङ्किणीर्गन्धपुष्पकैः । अन्तःकरणरूपास्ते कृष्णस्य परिकीर्तिताः ॥

आत्माभेदेन ते पूज्या यथा कृष्णस्तथैव ते" । इति

अन्तः करणरूपा इति क्रमेण बुद्ध्यहङ्कारचित्तमनोरूपा इत्यर्थः । तैर्वृत इति हासादिविलासार्थं ज्ञेयम् ।। ८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वल्पेनैव कालेन तासां तत्फलं सुसिद्धमित्यभिप्रायेणाह—एवमिति । मासमेकं मार्गशीर्षं व्याप्या (गी. १०|३५) 'मासानां मार्गशीर्षोऽहम्' इति भगवद्विभूतित्वेन व्रते कालस्य साद्गुण्यं दर्शितम्, भद्रकालि मंगलचण्डी-अप्रसिद्धां कात्यायनीमेव श्लेषेण भद्रमुत्तमं कं सुखं तस्यालिः पङ्क्तिर्यस्याः सकाशादित्यर्च्यदेवतासाद्गुण्यं दर्शितम् । सम्यक नित्यं नियमरक्षापूर्वकं यथविधि आनचुः, कृष्णे साक्षात् सर्वेश्वरे चेतो यासामिति, तस्याः समर्च्चनेऽपि कृष्णार्च्चनमेवाभिप्रेतम् । तएवाग्रे वरदानाय श्रीकृष्णस्यैवागमनं वक्ष्यति । यद्वा, कृष्णचेतस्त्वेन परमशुद्धय्कत्या, किंवा, स्वत एव कृष्णचेतसस्ताः विशेषतश्च 'भूयान्नन्दसुतः पतिः इति 'भद्रकालीं समानर्च्चुः' इत्येवं व्रतस्य परमसाद्गुण्योक्त्या अचिरात् सम्यक् फलसिद्धिरभिप्रेता । यद्वा, नन्वीदृशे परमदुर्लभेऽर्थे अतिलालसा सुबुद्धीनामयुक्ता ? तत्राह कृष्णे सर्व्वचित्ताकर्षके चेतो बुद्धिर्यासामिति चेतसस्तद्गतत्वेन विचारानुदयादिति भावः । एषा प्रेमात्युक्तिस्तत्तद्दार्च्येन व्रतसन्निश्चताबोधनार्थम् ।। ५ ।। न केवलं कृष्णचेतस एव, किन्तु तत्संकीर्त्तनपरा अपीति अर्च्चनपरमसाद्गुण्यमेवाह । यद्वा, तदर्च्चनस्य समग्रप्रकारे विज्ञाते अन्यैरपि कैश्चिज्जनैस्तद्व्रतं क्रियेतेति निजकृपया श्रीपरीक्षिदभिप्रायं चालक्ष्य तद्व्रतस्य मुख्यांगमाह—उषसीति । प्रत्युष एवोत्थायेति दूरे श्रीयमुनायां सूर्य्योदयात् प्रागेव स्नानार्थं स्वैर्गोत्रैरन्योन्यं तत्तन्नामभिराहुयेत्यर्थः । अन्योन्यम् आसम्यक् बद्धा दृढं गृहीता बाहवो याभिस्ताः, रात्रिशेषेन्धकारे पथि स्खलनभयात्, कृष्णसंकीर्त्तनप्रेममोहनिपातशंकया वा, अन्योन्यस्नेहविशेषाद्वा । एवमन्योन्यस्नेहेन व्रतसम्यक्त्वमेव दर्शितम्, उच्चैरिति सर्वासामेकत्र सम्मेलनार्थं गानावेशविशेषेण वा, नित्यं कालिन्द्यां स्नातुमिति पुनरनुवादः, तत्स्नानस्य तत्र प्राशस्त्यबोधनार्थम् ।। ६ ।। नद्यां कालिन्द्यामेवेति नदीशब्देन प्रवाहोऽभिप्रेतः । कदाचित् मार्गान्ते द्वादश्यां पौर्णमास्यां वा; पूर्ववदित्यनेन सदैव नग्नतया स्नानादिकं बोध्यते । मुदा विजह्रुः । तत्र हेतुः—कृष्णं परमानन्दघनमूर्त्तिं परमचित्ताकर्षकं वा गायन्त्य इति तद्गानेन हेमन्तमध्ये सुशीतलोदके श्रीकालिन्दीप्रवाहेऽपि शीतादिबाधाभावात्; यद्वा, मुदेति समग्रमासं निर्विघ्नतया व्रताचरणात्, अतएव कृष्णं गायन्त्यो विजह्रुः ।। ७ ।। तत्पतित्वेनात्मप्राप्तये तासां कात्यायन्यर्च्चनव्रतमभिप्रेत्येति परमविदग्धावर्गपूज्यपादानां तासां भावस्य साक्षादनभिव्यक्तेः, कथञ्चित् कार्य्यद्वारानुमानेन ज्ञात्वेत्यर्थः । तथापि दुर्ज्ञेयस्य विज्ञाने तत्रैव हेतुः– भगवान् सर्व्वज्ञः सर्वैश्वर्य्ययुक्तो वेति, तत्रैवागतः, यतः कृष्णः रसिकशिरोमणिर्जगच्चित्ताकर्षकलील इति । वयस्यैर्वृत इति तासां बह्वीनां बहुलवस्त्रजातस्य सद्यः शीघ्रं युगपद्धरणार्थं येषां तासु मध्ये भगिन्यादयः स्युस्तद्व्यतिरिक्तैरिति ज्ञेयम् ।। ८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं मासं व्रतं कृष्णचित्ताः कुमार्यश्चेरुः चक्रुः मासमित्यत्यन्तसंयोगे द्वितीया कृष्णचेतस्त्वमेवाह भूयान्नन्दसुतः पतिरित्यानर्चुरिति ॥ ५ ॥ इत्थं मासं व्रतं चरित्वाऽथ कदाचिदुषसि नामभिर्गोत्रैश्च प्रबोध्य परस्परं गृहीताः पाणयो याभिस्ताः कालिन्द्यां स्नातुमुद्यताः ॥ ६ ॥ आगत्य पूर्ववन्नद्यास्तीरे वस्त्राणि निक्षिप्य कृष्णमेव गायन्त्यः सलिले मुदा विजह्रुः ॥ ७ ॥ तदा सर्वज्ञो भगवांस्तत्कर्म तासां विहरणं च ज्ञात्वा तासां कर्मणो व्रतस्य सिद्धये तत्कर्म सफलीकर्तुं वयस्यैः सह तत्र आगतस्सन् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उषसि ब्राह्मे मुहूर्त्ते नन्दस्नुषा भूयाः स्म इत्येवं सङ्कल्प्य नदीमागत्य नदीं प्राप्य भूयान्नन्दसुतः पतिरित्यपि पाठः ॥ ५–७ ॥ योगेश्वरेश्वर इत्यनेन दूरश्रवणदर्शनादिशक्तिः सूच्यते तासां कर्मसिद्धये सङ्क्लृतव्रतसिद्ध्यर्थम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

स्वैर्गोत्रैः वर्गैः सह ॥ ६—१७ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

व्रतक्रियायामानुपूर्व्येणाह–उषसीत्यादि । स्वैर्गोत्रैः सह यान्त्यः स्वकीयैर्गोत्रैः स्वगोत्रोद्भवैः कनीयोभिर्बालकैः सह, लोकेऽधुनापि तथा दर्शनात् । अतस्तेषां साक्षाद्देशाचारतो विवसनोभूय जलमवगाहमानानां ह्री ह्रासः । उच्चैरिति बालिकात्वेनास्माकं गुरुजनसङ्कोचो नास्तीति । स्फुटमेव कृष्णं गायन्त्यः । अन्वहं प्रतिदिवसम् ॥ ६–७ ॥ सिद्धानां तासां व्रताद्यपेक्षाभावादविलम्बेनैव मनोरथ–सिद्धिरासीत्, व्रतं तूपलक्षणमिति दर्शयति–भगवानित्यादि । योगेश्वरेश्वरत्वेन भगवत्त्वेन च हेतुना कथितेनापि तत्तासां व्रतमभिप्रेत्य तत्कर्मसिद्धयेवृत आसीदितिशेषः । वयस्यैर्गोपबालकैः' असम्यक् अवगतः एकोऽपि वयस्यः सङ्गे नानीत इत्यर्थः । समानलक्षणदीर्घः । तथा सति अनौचित्यापत्तेः । अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् । अथवा, वयस्यैर्वयसि भवैश्चापल्यकौतुकचिकीर्षादिभीरागतो हेतो रागादित्यर्थः ॥ तत्कर्मसिद्धयेवृतः । भगवानपि योगेश्वरेश्वरोऽपीति शेषः ॥ ८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

व्रतप्रकारमाह—उषस्युत्थायेत्यादि । स्वैर्गोत्रैः सह यान्त्यः स्वस्वगोत्रोद्भवैः कनीयाभिर्भ्रातृभिः स्तोकवयोभिः लोकेऽप्यधुना तथा तथा दर्शनात्, यतस्तेषां देशाचारतो विवसना भूत्वा जलावगाहने ह्री·ह्रासः । उच्चैरिति सङ्कोचाभावात् कृष्णं जगुः ॥ ६-७ ॥ भगवानित्यादि । तद्व्रत भगवान् श्रीकृष्णो योगेश्वराणामपि ईश्वरः, तस्य विशेषणद्वयस्य तात्पर्यं वयस्यैरागत्यापि तत्र तस्मिन् देशे वृतः संवृतो बभूवेत्यर्थः । कथम् ? तत्कर्मसिद्धये । यद्वा, वयस्यैर्वयसि भवैः कैशोरचेष्टितैर्विशिष्टैः 'विशेषणे तृतीया', तत्कर्मसिद्धये वृतः । यद्वा, वयस्यैः कैशोरचापलैर्वृतः, यद्वा, तत्र वयसि कौमारे अर्थात् तासां यत्तत्कर्म तत्सिद्धये । अस्यापत्यम् इः कामः 'आङ्मर्यादाभिविध्योः' आ एः एरिति पञ्चम्येकवचनम् 'आपाटलिपुत्राद् वृष्टो देवः' इतिवत् । आकामात् कामं त्यक्त्वा तत्कर्म-सिद्धये वृत इत्यर्थः । कुमारीणां कामाभावात् प्रेमैव, तेन तत्कर्मसिद्धये वृतः । अथवा वयस्यैः सहचरैः सह आ सम्यक् अवृत एकोऽपि वयस्यः सङ्गे नानीत इत्यर्थः । अकारः केवलो नञर्थोऽपि वर्त्तते । 'अभावे ह्य नो ना' इति । अथवा वयसि भवैर्लावण्यविशिष्टः रागतोऽनुरागतो हेतोस्तत्र वृतः । वयस्यैः सहागमने रसाभासो भवति, (ध्वन्यालोके तृतीये) "अनौचित्यादृतेनान्यद्रसभङ्गस्य कारणम्" इति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नन्दसुतः पतिर्भूयादिति सङ्कल्पेति शेषः ॥ ५ ॥ आप्लुत्याम्भसीत्युक्तं तत्पूर्वक्रममनुस्मृत्याह–उषसीति । स्वैः स्वैर्गोत्रैर्नामभिरपि धन्ये कुत्रासि किमिति बिलम्बसे इत्येवमाहूता इत्यर्थः । कदाचिदिति व्रतपूर्णदिने पौर्णमास्यामेव एवं मासं व्रतं चेरुरित्यनन्तरोक्तत्वात् अत एवोत्सवार्थं कुमारीभिस्ताभिः समानवासनत्वेन प्रणयास्पदीभूताः वृषभानुनन्दिन्या अपि निमन्त्र्यानीताः पूजासमाप्त्यनन्तरं ताभिः सहैवावभृतस्नानदेशोयं जलविहारो ज्ञेयः ॥ ६–७ ॥ योगेश्वराणामपीश्वरव इत्यनेन सार्वज्ञ तासां प्रत्येकं तादृङ्मनोरथपूर्णसामर्थ्यं ताभिः स्लेक्षणपथे एव स्थापितानामखिलानामपि वस्त्राणां चौर्य्यसामर्थ्यं प्राणत्यागादपि तादृशलज्जात्यागमधिकं निश्चिन्वतीनां तासां कुलकुमारीणां जलादुत्थापनस्वप्रणमनादिसामर्थ्यं दृष्टसर्वाङ्गानां रहः प्राप्तानां स्ववश्यानामपि तासां तादात्विकसम्भोगाभावसामर्थ्यं च द्योतितं वयस्यैव्रतं इति बालैरिति वक्ष्यमाणत्वात् द्वित्रीवर्षीयाः स्त्रीपुंसभेदविवेकशून्या दिग्वाससः पृथुकाः एव सस्वित्वेनाभिमताः गोचारणादावपि कृष्णसङ्गमन्यजन्तो ज्ञेयाः यदुक्तं क्रमदीपिकायां —

"जङ्घान्तपीवरकटीरतटीनिबद्धव्यालोलकिङ्किणिघटाघटितैरटद्भिः ।
मुग्धैस्तरक्षुनखकल्पितकण्ठभूषैरव्यक्तमञ्जुवचनैःपृथुकैःपरीतम्" ॥ इति

वैष्णवतोषिण्यां तु दामसुदामवसुदामकिङ्किण्यः कृष्णान्तःकरणरूपास्ते गोतमीयतन्त्रदृष्टा इत्युक्तम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उषसि प्रातः काले गोत्रैर्नामभिरन्योन्यतः उच्चारितैरुत्थाय अन्योन्यं परस्परमाबद्धा बाहवः पाणयो याभिस्ताः ॥ ५-६ ॥ कर्मसिद्धये तद्व्रतफलदानाय ॥ ७ ॥ नीपं कदम्बविशेषं बालैः सह सत्वरमारुह्य परिहासं परिहासवाक्यमाह ॥ ८-९ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

एवमिति नन्दसुतः पतिर्भूयादिति सङ्कल्प्य ॥ ५ ॥ आप्लुत्याम्भसीत्युक्तं तत्पूर्वक्रममनुस्मृत्याह—उषसीति । स्वैर्गोत्रैर्नामभिराहूय हे धन्य ! किं विलम्बसे त्वरयागच्छेत्येवमादिविधमाकार्य अन्योन्यम् आवद्धाः स्कन्धेष्वर्पिता वाहवो याभिस्ताः कालिन्द्यां स्नातुं यान्त्यस्त्रपां विहायोच्चैः कृष्णं जगुः ॥ ६ ॥ कदाचिदिति । एवं मासव्रतं चेरुरित्युक्तेः पूर्णिमायामित्यर्थः । तदानीं निमन्त्र्यानीताभिः स्वतुल्यवासनाभिः श्रीमत्यादिभि सह दुर्गार्चापूर्त्यनन्तरमवभृथस्नानदेश्योयं जलविहारो वोध्यः ॥ ७ ॥ भगवानैश्वर्यादिभिर्वैराग्यान्तैः षड्भिः समग्रैर्भगैर्विशिष्टः, नित्ययोगे मतुप्, तत् स्वफलकं तासां व्रताचरणमभिप्रेत्य विज्ञाय वयस्यैस्त्रिचतुर्वर्षीयैः स्त्रीपुंसभेददधीशून्यैः दिग्वसनैरिति वोध्यं वालैरित्यग्रिमात्—

जज्यान्तपीवरकटीरतहीनिबद्धव्यालोलकिङ्किणिघटाघटितैरटद्भिः । मुग्धैस्तरक्षुणखकल्पितकण्ठभूषैरव्यक्तमञ्जुवचनैः पृथुकैः परीतम् ॥

इति क्रमदीपिकोक्तेः अन्यथा रसाभावात् तैरावृतस्तत्रागतः तस्य कर्मणः सिद्धिः फलं तस्यैतत् प्रदातुमित्यर्थः । भगवत्त्वादेव योगेश्वराणामपीश्वरः तासां सर्वासां हृद्वृत्तिज्ञाने वाञ्छितपूर्त्यै दृष्टिपथस्थापितानां वाससां हरणे कुलवतीनां त्रपापनयने जलनिर्गमस्वप्रणामादिविधाने दृष्टसर्वावयवानां रहः प्राप्तानां स्ववश्यानां तदानीन्तनालिङ्गनविहाने च समर्थ इत्यर्थः ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कुमारीका इत्येवंरूपं मन्त्रं जपन्त्य उषसि प्रातः स्वैरं यथेच्छं । स्वादीरेरिणोरिति वृद्धिः । अन्योन्यमाबद्धा बाहवो यासां ता गतमन्योन्येत्यभ्येत्य कालिन्दीं तास्ता इव पूजाश्चक्रुः तासां ता एवोपमानरूपा इत्यन्वयः । तच्छब्दस्य यद्विभक्तिकवचनान्तं यत्पदं तदन्तं तल्लिङ्गविभक्तिकस्यैवार्थकता प्राक् प्रथमस्कन्धगततद्वै धनुस्त इषव इति श्लोकतात्पर्योदाहृतिपूर्वकमुपपादिताऽनुसन्धेया अन्यथा तच्छब्द एक एवालमतिरिच्यत एक इति स्यात् । यदा कदचिदुषस्यभ्येति कृष्ण इति स्वयमता गता इति वा ॥ ५ ॥ कालिन्द्यामन्वहं स्नातुं यान्त्य उच्चैः कृष्णं जगुः । अनेन निर्लज्जता द्योत्यते । उच्चैर्गुणयुतमिति वा । एवं मासव्रतं कृष्णचेतसः कुमार्यश्चक्रुः ॥ ३ ॥ नन्दसुतः पतिर्भूयादिति भद्रकालीं सामानर्चुः । भूयान्नन्दस्नुषा इतीति क्वचित्कः पाठः । तत्र नन्दस्नुषा नन्दनभार्या भूयाद् भूयस्मेत्यर्थः । पुरुषवचनव्यत्यासो बहिः स्नुषा इत्यन्तस्त्वेकाऽहमेव स्नुषा स्यामितीत्येकवचनबहुवचनोपपत्तिश्च ज्ञेया । कदाचिन्मासमध्य एव वासांसि तीरे निक्षिप्य कृष्णं मुदा गायन्त्यः सलिले विजह्रुः । पूर्ववदिति निक्षिप्येत्यत्र गायन्त्य इत्यनेन विजह्रुरित्यनेनाप्यन्वेति ॥ ७ ॥ भगवान्कृष्णस्तत्स्वपतित्वमुद्दिश्य व्रताचरणादिकमभिप्रेत्य ज्ञात्वा । को वाऽवादीद्वासुदेवं प्रतीत्यत आह । योगेश्वरेश्वर इति । योगेश्वरा ब्रह्माद्यास्तेषामीश्वरोऽतीतानागतवेदितृत्वात्स्वयमेवावेत्यायात आयताक्षीः प्रतीति भावः । वयस्यैर्वृतस्तत्रागतः । प्रयोजनमिदमित्याह ॥ तत्कर्मसिद्धय इति । तासां यत्कर्मोपास्त्यादिस्तस्य सिद्धिः साफल्यं तस्यै । अनेन न तत्सङ्गेन कृष्णस्योत्कृष्टता किन्तु तासामेवाभीष्टावाप्तिरिति ध्वन्यते । यदर्थं ताभिर्वृतस्तत्कर्मसिद्धय इति वा वयस्यैः सहेति वा ॥ ८ ॥

श्रीसुबोधिनी

एवमप्रत्यक्षप्रकारेण मासपर्यन्तं व्रतं कुमार्यश्चेरुः, अनेन कालोप्युक्त उपसंहृतश्च, एवं षडङ्गसहिता व्रतरूपा क्रिया निरूपिता, एतस्य व्रतस्य फलं जातमित्याह **कृष्णचेतस** इति, कृष्ण एव **चेतो** यासां तादृश्यो जाताः, तदा नान्या प्रार्थिता, अतोग्रे भगवन्तमेव प्रार्थयिष्यन्ति **चित्तदोषस्य गतत्वात्**, आरब्धस्यावान्तरफले जातेपि परमफलं न जातमिति पुनर्मासान्तरेपि व्रतं कृतवत्य इत्याह **भद्रकाला**मिति, कात्यायन्यामेवावस्थाविशेषो देवताविशेषो वा वर्तते यतो भगवत्सम्बन्धलक्षणो **भद्रः कालो** भवत्यतस्तामेव **भद्रकालीरूपां समानर्च**स्तत्रान्यो मन्त्रः पश्चात् दृष्टो भूयान् **नन्दसुतः पति**रिति, **नन्दसुतः** स्वयमेव **पतिर्भूयात्** निमित्तं काल इति कालाभिमानिनी पूज्यते कादाचित्कत्वात्, अतः कदाचित् सम्बन्धो न सर्वदा जातः, नन्दस्य पुत्रः कृपालुरिति भूयादितिप्रार्थना, भगवन्तमेव प्रार्थयन्ति, अत्र प्रत्येकं प्रार्थनाभावात् समुदायेनापि रमणं अतोग्रेपि वक्ष्यत "एकैकशः प्रतीच्छन्तु सहैवो"तेति, फलवाचकत्वात् पूजयामाशेषत्वादस्याङ्गत्वाभावाय स्वरूपेणैव कीर्तनं कृतं, इतिशब्दप्रयोगे गौणता स्यात् प्रार्थनया भगवान् स्वतो वृत इत्यन्तः-करणधर्मत्वाद् **भगवान् पति**र्जातः, परमन्तरेव **"ये यथा मां प्रपद्यन्त"** इतिवाक्यात् तदान्तःस्थितभगवद्रूपा निःशङ्का जाताः ॥ ५ ॥ ततः प्रकटतया पूजां परित्यज्य भगवद्गानं कुर्वन्त्यः कालिन्द्यां कामनास्नानार्थं गता इत्याहोषस्युत्थायेति, अधुना निःशङ्कतयारुणोदयात् पूर्वमेवोत्थाय **स्वैर्गोत्रैः** कृत्वा **कृष्णमुच्चैर्जगुः**' अत्र गोत्रशब्देन नामाप्युच्यते, ततः स्वस्वनामग्रहणेन बोधनं प्रथमतः प्रबुद्धा अन्यास्तद्गोत्रैः प्रबोधयन्तीति व्यावहारिकोर्थः, ते हि सर्वे गोत्रप्रवर्तका ऋषयो यज्ञे प्रवृत्ता अत

आर्षज्ञानेन स्वगोत्रैः कृत्वा निर्भयाः सत्यः कृष्णं सदानन्दं स्वतः पुरुषार्थरूपं जगुः, मध्ये भगवन्तं परिकल्प्यान्योन्याबद्धबाहवोऽभवन् यथा रासे, अतः प्रकटमेव तासां तथात्वं जातमतो जलक्रीडार्थं गोपिकाभिः परिवेष्टितं कृष्णं **गायन्त्य** एव कालिन्द्यां स्नातुं यान्त्यो जाताः, गानं मुख्यं स्नानगमने गौणे, अन्वहमेवं, अनेन हेमन्तनियमो गतः· अन्यान्यपि व्रतानि निवृत्तानि, सर्वमेव गाने प्रतिष्ठितं, कलिं द्यतीति कालिन्दस्तस्य पर्वतस्य कन्याकापि तद्विधा, अनेन दोषत्रयं परिहृतं भविष्यतीत्युक्तं, अन्योन्यं कलहो भगवता सह कलहः कलिकालदोषश्च, एतदर्थमेव कालिन्द्यां स्नानं पुनः शुद्धभावाय, **उषः** सर्वकार्येषु प्रशस्तमिति भगवत्क्रीडार्थं "मुषः प्रशंसते गर्ग" इतिवाक्याद् **गमनं अन्वहमिति नात्र** कालोपरिच्छिन्नः, अतो व्यक्ततया भगवत्स्थितिर्गानमन्योन्यस्पर्धाभावोसङ्ख्याताभावो दोषाभावश्च सर्वदैव जातो न कदाचिदपि कोऽप्यंशो निवृत्तः ॥ ६ ॥ एवं जाते स्वयमपि भगवान् प्रकटो जात इति वक्तुपुराख्यानमारभते **नद्यामिति, कदाचिदिति** यदा पुनर्भद्रः कालः, कालिन्द्याः प्रयोजनं वृत्तमिति **नदी** निरूपिता, पूर्ववदेव गानं कृत्वा तेन गानेन मत्तविस्मृतात्मानः स्वपरिहितानि **वासांसि तीरे निक्षिप्य** भगवता सह जलक्रीडार्थमेव प्रविष्टा **मुदा** सलिले विजह्रुः, स्नाने मौनवस्त्रपरित्यागौ दोषद्वयं क्रीडा च नियमस्थानां देहविस्मरणं च मुदेत्यनेन सूचितम् ॥ ७ ॥ एवं चत्वारो दोषा जाताः कर्ममार्गे भक्तौ तु गुणा अतस्तद्दोषपरिहारार्थं कर्मण्यपगते **भगवान् स्वयमागत** इत्याह **भगवांस्तदभिप्रेत्येति** तासामपराधं ज्ञात्वा तन्निवृत्त्यर्थं समागतः, किञ्च **कृष्णः** स्त्रीणां हितकारी, आनन्दस्तत्र प्रतिष्ठित इति, परं सदानन्द इति दोषो निवर्तनीयः, अन्तःस्थितदोषनिवृत्तौ सामर्थ्यमाह **योगेश्वरेश्वर** इति, योगेश्वरा हि योगबलेनान्तः प्रविश्य तत्र तत्र स्थितं दोषं दूरीकुर्वन्ति तस्याप्ययमीश्वर इति नास्य प्रवेशोपेक्ष्यते, एते हि बालकाः पूतनायां प्रविष्टाः पुनः स्वस्मिन्नागता एतासामाधिदैविकरूपाः, अत एव पुरुषरूपा एव, अनधिष्ठिताः पुनः स्वच्छन्दभोगयोग्या न भविष्यन्तीति दृष्टिद्वारा तेषामपि प्रवेशनं, तद्भोगार्थं च तैरपि वृतः प्रार्थितः, तत्रैव स्थाने ताभिरपि वृतो '**भूयान् नन्दसुत**' इति, एतदपि सर्वमभिप्रेत्य वयस्यैः सहागतस्तत्रैव वृतश्च, अतस्तस्य व्रतस्य **सिद्धिः** फलं तदर्थम् ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

भूयान्नन्दसुत इत्यत्र, **फलवाचकत्वादित्यारभ्य** कृतमित्यन्तम् । अत्रायं भावः । पूर्वं माससमाप्यव्रतोपसंहारस्य कृतत्वात्पुनः पूजापूज्यनामभेदभिन्नमन्त्रकालभेदानां कथनाद्धृतव्रता इति प्रभुवाक्याच्चेदं व्रतान्तरमिति गम्यते । अपि च भगवत्पतित्वमात्रार्थत्वाद् व्रतस्य कृष्णचेतस्त्वेन चान्तस्तन्निश्चयेन भगवदेकसाध्यत्वज्ञानाच्च तदर्थं तत्करणासंभवः । किन्त्वतः परं बहिरपि तथात्वमेवापेक्षितम् । तत्र च तादृक्कालस्यैव निमित्तत्वमिति तदभिमानिदेवता चेयमेवेति तथात्वेनैतस्या एवात्र पूजोच्यते । अत एव भगवतैव तस्याश्चतुर्दशनामस्विदं नामोक्तम् मन्त्रेपि बहिः प्रकटतया पतित्वभवनमेव प्रार्थ्यम्' अन्यथान्तस्तन्निश्चयसत्त्वेन तत्प्रार्थनानुपपन्ना स्यात् । अत एव न पूजाङ्गत्वमस्य, भिन्नविषयकत्वात् । अपरञ्च, पूर्वमन्यप्रार्थना हि कृता । तथा च तन्निर्बन्धेन तथात्वे स्वतोऽतथात्वे नीरसत्वं स्यादित्येवं प्रार्थना । अत एव न पृथग्भगवतः पूजा कृता, पतित्वेन भावनात् । न चैवं पूर्वमन्त्रस्याप्रयोजकत्वेन मन्त्रत्वानुपपत्तिः, भावक्रमस्य तथात्वेनोत्तरभावप्रयोजकत्वात् । अत एव व्रतफलत्वेन कृष्णचेतस्त्वमुक्तम् । एतच्च यथा तथोपपादितम् अस्मिन्मन्त्रेर्थभावनैव मुख्या, न तु जपोपि । अतः स नोक्तः । स्वेष्टप्रकारेण प्रियभावनमेवात्र पूजारूपम् । इदमेव भगवता 'मदर्चना'दित्येनेनोक्तमिति दिक् । किञ्च, **भगवानेव वा गुणातीत** इति पक्षे तु सर्वमवदातम् । अस्मिन्पक्षे उभयोरैक्येप्युत्तरस्या गुणविशिष्टत्वेन पूर्वस्याः सकाशाद् भेदः सिध्यति । तेन व्रतभेदोपि तथा । न **चाचार्योक्तावान्तरफलत्वपरमफलत्वानुपपत्तिः**, एककार्यत्व एव तत्सम्भवादिति वाच्यम् । स्वाभिन्युद्देश्यत्वेन फलस्य परमत्वस्य तन्नान्तरीयकफलत्वेनेतरत्वस्य च विवक्षितत्वात् । एवं सत्येककर्मसाध्यत्वमप्रयोजकमिति ज्ञेयम् अत एव पुरुषभेदेनावान्तरफलस्यैव परमफलत्वमपि भवति । अत एव ज्ञानमार्गीयमोक्षेच्छयोगेन दोषनिवर्तनं, च मोक्षसम्पादनं सङ्गच्छते ॥ ५-७ ॥ अत्रैवाग्रे **वयस्यैरागत** इत्यस्य विवरणे, **एते हि बालका** इत्यारभ्य **तद्भोगार्थं** चेत्यन्तम् । अत्रेदं ज्ञेयम् । भगवान्सृष्टिं कुर्वन् कांश्चन जीवान् पुंप्रकृतिकान् कांश्चन स्त्रीप्रकृतिकानसृजत् शरीरस्यातथात्वेपि तेषां तेषां प्रकृतिस्तथैव भवति । पुंप्रकृतिकास्तु हरिं भजन्ते, पुरुषांशप्रवेशात् । नेतरे, केवलप्रकृत्यंशवत्त्वात् । अत एव भगवद्भजनविधाने 'को नु राजन्निन्द्रियवा'नित्यादौ सर्वत्र पुंल्लिङ्गेनैवाधिकार्युक्तः । अन्यथा स्त्रीणां हरिभजनमकर्तव्यं स्यात्, अविहितत्वात् । तेन शरीरगतपुंस्त्वस्त्रीत्वे अविवक्षदुक्तरूपमेव विवक्षच्छास्त्रं भजनं विधत्त इति मन्तव्यम् तथा च जीवेष्वपि पुंस्त्वस्त्रीत्वे स्त इति ज्ञायते । एवं सति पूर्वोक्तर्षयोपि पुंस्त्ववन्तः स्थिताः । ते चात्यन्तं प्रिया इति तत्सम्बन्धि सर्वं प्रियमिति महानुग्रहेण तद्धर्माणामप्यङ्गीकाराच्च तत्सम्बन्धि यत् किञ्चित् तद्वैयर्थ्यं न युक्तमिति तदीयपुंस्त्वाख्यं धर्ममप्येतासु स्थापयितुं तत्र तत्रावतारितवान् । इदमेवाधिदैविकत्वम् । अत एवंविधत्वदशायामुक्तं वचनं सत्यं कृतमित्येते जानन्तीति तान् साक्षित्वेन वक्ष्यति । 'तदिमे विदु'रिति । स्त्रीप्रेक्षणादौ सति विकारवत्त्वं सहजस्तद्दोषः, तस्मिन्सत्यपराधः स्यात्' तेन चानर्थसम्बन्धः स्यादिति क्षारेण मलनिवृत्तिवदतिक्रूरायां स्त्रियां पूतनायां प्रथमं सम्बन्धं कारितवान् । एतेषां महापुरुषत्वेपि तदा साप्येयं भगवानयं वा भगवानिति भाववतीति तानन्तर्निनाय अत एव तदन्तः-स्थितावपि नासुरभावप्रवेशः तथा सति तत्सम्बन्धजक्लेशेन तपसेव तद्दोषनिवृत्तौ स्वकृते च तेषां भक्षणमिति स्वानन्ददानाय तत्प्राणैः सह तानप्यानीतवान् स्वस्मिन् । कुमारीषूक्तरीत्या प्रसादरूपायाः शक्तेर्भगवतो वा प्रवेशेन तादृग्भोगयोग्यता परं सम्पादिता सहजं पुरुषत्वं त्वेतासु स्थापितमेव । अन्यथा 'यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घना'दिति

न्यायेन कामभाव एव स्यात्, न तु सर्वात्मभावः, स्त्रीस्वभावस्यैव तादृशत्वात् । अत एव प्रौढभावोत्पत्तिः, येन लोकवेदनैरपेक्ष्येण भजनम् । भगवतोपि स्वच्छन्दभोग एतस्वेतासां च । यद्यपि भगवान् विनैव साधनं सर्वं कर्तुं समर्थ इति शक्यं वक्तुं तथापि तत्तद्वस्तु-मर्यादास्थापनपूर्वकं भोगे महान् रस इति भगवतैव सर्वरसभोक्त्रा तथा क्रियते । अन्यथा विनापि स्त्रीत्वं स्वानन्दं दातुं समर्थ इति तथैव कुर्यात् । अत एव वात्स्यायनीयानुसारेणैव रमते । 'भगवानपि रन्तुं मनश्चक्र' इति वक्ष्यते केति सर्वमवदातम् ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एवमित्यत्र एवमिदं चेरुस्ततः **कृष्णचेतसः** सत्योऽग्रिमं कृतवत्य इत्यन्वयः, **भद्रकालीमित्यत्र भगवत्सम्बन्धेति भगवत्सम्बन्धो लक्षणं** यस्य, यस्मिन् काले भगवत्सम्बन्धो भवत्येव तादृशः काल इत्यर्थः । निमित्तमिति पतित्वे इतिशेषः, तत्र हेतुः कादाचित्कत्वादिति, लक्ष्मीवत् सदा दाम्पत्येन स्थापनेच्छाभावादित्यर्थः, अत इति पतित्वस्य कालनिमित्तकत्वादित्यर्थः- **प्रार्थयन्तीति** 'पतिं मे कु'वित्यत्र पतित्वसाधको व्यापारोऽन्यनिष्ठो भवति, अत्र तादृशो व्यापारोपि भगवन्निष्ठ एवेतिभावः, **फलवाचकत्वादिति** पूर्वमन्त्रस्य 'पतिं मे कु'विति पतित्वफलस्य देवतां प्रति प्रार्थनात् पूजाशेषत्वं, अस्य तु स्वयमेव **पतिर्भूया-दिति** फलस्वरूपमात्रवाचकत्वान् न पूजाशेषत्वमित्यर्थाः, तथा च फलवाचकः फलस्वरूपवाचक इत्यर्थः, **मन्त्रवदिति** तथा च तच्चोदकेषु मन्त्राख्येतिलक्षणादेतस्य मन्त्रत्वमेव नास्तीतिभावः, अन्तःकरणधर्मत्वादिति प्रार्थनाया इतिशेषः ,अन्तरेव तथात्व-भवनेऽयं हेतुः ॥ ५ ॥ उषसीत्यत्र **अरुणोदयादिति** अरुणत्वेन प्रतीयमानः सूर्यस्तदुदयान् न तु षट्पञ्चाशन्नाडिकारूपादित्यर्थः, पूर्वत्र स्नानं प्रातःसन्ध्यायामुक्तं, अत्र ततः पूर्वमितिविभागः, (अरुणोदयादिति अरुणोदयात् पूर्वमेव उत्थाय **गानं** तत उषसि जाते स्नानार्थं गमनमितिविभागः), **गोत्रैः कृत्वेति** प्रबोधनमितिशेषः, तथात्वमिति भगवत्पतिकात्वमित्यर्थः, अत इति एतद-नन्तरं प्रातरित्यर्थः, मूले एवं जगुस्तत **अन्वहं स्नातुं यान्त्यो जाता** इत्यन्वयमभिप्रेत्याहुर्गायन्त्य **एवेति, गानं मुख्यमिति** काला-परिच्छिन्नमित्यर्थः, **स्नानगमने गौणे** इति कालपरिच्छिन्ने इत्यर्थः, **अनेनेति अन्वहमितिपदेनेत्यर्थः**, अन्यथा पूर्ववन् मासवतमिति वदेदितिभावः, **अन्योन्यं कलहः** सापत्न्यरूपः, **भगवता सह** कलहो मानादिरूपः, **कलिकाल**जनितश्चित्ताशुद्धया भगवत्येतावत्-कष्टेपि नागत इति क्रौर्यादिदोषारोपरूपः, **नात्रेति अन्वहमित्यस्य यान्त्य** इत्यनेनैवान्वयाद् **गमनेऽपरिच्छिन्नः कालो न** किन्तु दिनैः परिच्छिन्न एवेत्यर्थः, **अत** इति गमनस्यैव परिच्छिन्नत्वाद्, वक्ष्यमाणास्तु **सर्वदैव जाता** इत्यर्थः, अत एवाभासे गमनमेव परिच्छिन्नत्वेन विधेयत्वाद् वाक्यार्थ उक्तः, **असङ्गाभाव** इति **सङ्गः** समूहो भगवता सहस्थितिरितियावद्, न सङ्गो येन तादृशो भगवता सह कलहस्तद**भाव** इत्यर्थः ॥ ६½ ॥ **नद्यामित्यत्र मत्ता** इति वस्त्रत्यागो मत्तानामेव भवतीतिभावः, आभासेऽवान्तरप्रकर-णार्थ उक्तः, वाक्यार्थमाहुः स्नान इत्यारभ्य गुणा इत्यन्तेन ॥ ७½ ॥ **कर्मणीति** हेमन्तनियमादिरूपेत्यर्थः, तस्मिन्नपि विद्यमाने एतच्चतुष्टयसम्पत्तौ तु केवलकर्ममार्गीयत्वेन सर्वथा दोषत्वादुपेक्षामेव कुर्यादितिभावः, **स्वयमिति** पूर्वं भाव्यमानः **समागतोऽधुना** स्वयमित्यर्थः, भगवानित्यत्र **आनन्दस्तत्रेति** रसादीनामन्नादिष्विवोपस्थविषयस्यानन्दस्य स्त्रीसु **प्रतिष्ठे**त्यर्थः, भगवत्त्वात् **समा-गतः** कृष्णत्वाच् चेतिमूलवासनया किञ्चेत्युक्तं, पुनरिति नायिकारीत्या भोगे सिद्धेपि नायकरीत्या पुनर्भोगार्थमित्यर्थः, **दृष्टिद्वारेति**-'तास्तथावनता दृष्ट्वे'त्यत्रोक्ता या सर्वाङ्गविषयिणी दृष्टिस्तद्द्वारेत्यर्थः ॥ ८½ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एवं मासमित्यत्र भूयान् नन्दसुतः पतिरित्यस्य विवरणे **फलवाचकत्वादिति नन्दसुतः** स्वयमेव पतिर्भूयादित्यर्थाद स्य मन्त्रस्य फलवाचकत्वं पतिभवनस्य फलत्वात्, **पूजयामशेषत्वादिति** 'भूयान् नन्दसुतः पति'रितिवाक्ये देवतां प्रति प्रार्थना नास्ति किन्तु 'नन्दसुतः पतिर्भूया'दित्याशय **भद्रकालीं समानर्चु**रतः पूजाशेषत्वं नास्तीत्यर्थः, **मन्त्रवदिति** कात्यायनीमन्त्रवदस्य मन्त्रस्य पूजाङ्गत्वाभावायेत्यर्थः, स्वरूपेणैव कीर्तनमिति **पतिर्भूयादिति** पतिस्वरूपेणैव **भगवतः कीर्तनं न** तु भगवत्पतित्वकरणप्रार्थना देवतां प्रतीत्यर्थः, इतिशब्दप्रयोगे **गौणता** स्यादिति "भूयान् नन्दसुतः पति',रित्यस्याग्रे इत्युच्चार्येतिजप्त्वेत्यादिनेतिशब्दप्रयोगं कुर्युस्तदा मन्त्रद्वारा देवतां प्रति प्रार्थनाद् देवताप्रसादादेव भगवल्लाभे स्वकीयस्नेहात्मकभक्तेर्गौणता स्यादित्यर्थः, तदेवाग्रे स्फुटी-कुर्वन्ति **प्रार्थनयेत्यारभ्य** पतिर्जात इत्यन्तेन ॥ ५½ ॥ **नद्यां कदाचिदागत्येत्यत्र भक्तौ तु गुणा** इति तत्र **मौनपरित्यागो** भगव-त्कीर्तनार्थं कर्तव्य एव, शृण्वन् गृणन् संस्मरयंश्च चिन्तयन् नामानि रूपाणि च मङ्गलानि ते क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचित्तो न भवाय कल्पत' इतिदशमस्कन्धे **गर्भस्तुतिवाक्यात्** क्रियामात्रे भगवत्कीर्तनस्यावश्यकत्वमतो मौनत्यागो गुण एव ,**वस्त्र**परित्याग-स्तु भक्तिजन्यं मदं सूचयन् गुणो भवति 'परस्परं त्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्मा' इतिवाक्याद् परमभक्तौ देहधर्मा निवर्त-न्ते, प्रकृतेपि देहधर्मानिवृत्तिर्मदेन सूचिता, मदश्च वस्त्रत्यागेन सूचितः, अतो भक्तिजन्यमदाद् **वस्त्रत्यागो** गुण एव **विजह्रु**रितिप-देनोक्ता क्रीडापि गुणः, "तुष्यन्ति च रमन्ति चे"ति भक्त्युत्कर्षे क्रीडाकथनात्, **देहविस्मरणं च** गुणः, तन्मनस्कास्तदालापास्तद्वि-चेष्टास्तदात्मिकाः तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरु'रितिवाक्यात्, एवं **चत्वारोपि भक्तौ गुणाः** ॥ ७½ ॥ **भगवानि-**

त्यत्र वयस्यैरागत इत्यस्य विवृतावेते बालका इत्यारभ्य **तद्भोगार्थं चेत्यन्तमेतासामाधिदैविकरूपा** इति**एतासां** पुम्भावरूपा इत्यर्थः, अत्रोपपत्तिस्तु **मया** प्रमाणप्रकरणसुबोधिनीयोजनायां दृढतया निरूपितास्ति अनधिष्ठिता इत्यादि एताः कुमारिका एतैस्तत्पुम्भावरूपैरनधिष्ठिता विपरीतरसक्रीडायां यः स्वच्छन्दभोगस्तद्योग्या न भवन्तीति तद्रसानुभवार्थमेतास्वेते पुम्भावरूपाः स्थापिता इत्यर्थः ॥ ८३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'दुर्लभोऽपि तासां मनोरथो भगवदनुग्रहेण स्वल्पेनैव कालेन सिद्ध' इत्याशयेनाह— एवमिति । कृष्णे चेतांसि यासां ताः कुमार्यः एवमुक्तप्रकारेण मासपर्यन्तं व्रतमाहारादिनियमं चेरुः चक्रुः, भद्रकालीं कात्यायन्यपरनाम्नीमानर्चुश्च । कृष्णचेतस्त्वमेव स्पष्टयति—नन्दसुतोऽस्माकं पतिर्भूयादिति ॥ ५ ॥'आप्लुत्य' इति स्नानादिप्रकार उक्तः । ततः पूर्वं तत्रागमनप्रकारमाह—उषसीति। अन्वहं प्रतिदिनमुषसि प्रातःकाले उत्थाय स्वैः गोत्रैस्तत्तन्नामभिरन्याः 'प्रतिबोध्य' इति शेषः । यद्वा स्वैः गोत्रैर्वर्गैः सह अन्योन्याबद्धबाहवः परस्परं गृहीतहस्ताः कालिन्द्यां स्नातुं यान्त्यो गच्छन्त्यः उच्चैः कृष्णं जगुरित्यन्वयः ॥६॥ कदाचित् पूर्ववन्नद्यामागत्य तत्तीरे वासांसि निक्षिप्य संस्थाप्य मुदा हर्षेण कृष्णमेव गायन्त्यः सलिले विजह्रुरित्यन्वयः ॥ ७ ॥ कृष्णस्तत् तासां स्वप्राप्त्यर्थं व्रताचरणपूर्वकं देव्याराधनमभिप्रेत्य ज्ञात्वा तासां कर्मसिद्धये स्नानपूजादिक्रियाफलदानाय वयस्यैः सखिभिर्वृतस्तत्रागत इत्यन्वयः। तदाराधनज्ञाने प्रत्येकं तासां तादृङ्मनोरथपूरणे सामर्थ्ये च हेतुमाह—योगेश्वराणामपीश्वर इति । ननु "कात्यायन्याराधनफलं तयैव देयम्, कृष्णस्तत्कथं दातुं गत ?" इत्याशङ्क्याह—भगवानिति । 'नहि भगवान् देव्यधीनः, येन तया तस्य तासां पतित्वं सम्पादनीयम्, स्वतन्त्रत्वात्' । अतः "अर्चिष्यन्ति मनुष्यास्त्वां सर्वकामवरेश्वरीम्" इति स्वयमेव देव्यै वरप्रदानात् तस्य यथार्थत्वसम्पादनार्थं स्वयमेवागत इत्याशयः ॥ ८ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ कृष्णे चेतांसि यासां ताः कुमार्यः एवं मासपर्यन्तं व्रतमाहारादिनियमं चेरुः चक्रुः । नन्दसुतोऽस्माकं पतिर्भूयादिति वाञ्छन्त्यः इति संकल्प्येति शेषो वा । भद्रकालीं कात्यायन्यपरनाम्नीमानर्चुश्च ॥ ५ ॥ व्रतस्य पूर्वाङ्गमाह—उषसीति॥ अन्वहं प्रतिदिनमुषसि प्रातःकाले उत्थाय स्वैः गोत्रैस्तत्तन्नामभिरन्याः प्रतिबोध्येति शेषः । यद्वा । स्वैः गोत्रवर्गैः सह अन्योन्या बद्धबाहवः परस्परं गृहीतहस्ताः कालिन्द्यां स्नातुं यान्त्यो गच्छन्त्यः उच्चैः कृष्णं जगुः ॥ ६ ॥ नद्यामिति ॥ कदाचिदिति व्रतपूर्तिदिने पौर्णमास्यां पूजासमाप्त्यनन्तरमवभृथस्नानादिनस्यायं जलविहारः पूर्ववन्नद्यामागत्य तत्तीरे वासांसि निक्षिप्य मुदा कृष्णमेव गायन्त्यः सलिले विजह्रुः ॥ ७ ॥ भगवानिति ॥ योगेश्वरेश्वरो भगवान् कृष्णः तत् तासां स्वप्राप्त्यर्थं देव्याराधनमभिप्रेत्य ज्ञात्वा तासां कर्मणः सिद्धये फलदानाय वयस्यैर्वृतस्तत्रागतः । वयस्या अत्र हसद्भिः प्रहसन् बालैरित्युत्तरश्लोकोक्ता बाला एव द्वित्रिवर्षवयस्काः स्त्रीपुंसभेदविवेकशून्या दिग्वाससः गोचारणे प्रेम्णा कृष्णसङ्गमत्यजन्तो ज्ञेयाः । यदुक्तं कर्मदीपिकायाम्—"जङ्घान्तपीवरकटीरतटीनिबद्धव्यालोलकिङ्किणिघटाघटितै रटद्भिः ॥ मुग्धैस्तरक्षुनखकल्पितकण्ठभूषैरव्यक्तमञ्जुवचनैः पृथुकैः परीतम् ॥" इति । तोषण्यां तु श्रीकृष्णस्यान्तःकरणरूपा दामसुदामवसुदामकिङ्कणयो गौतमीयतन्त्रोक्ताः इत्युक्तम् ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्माकं नंदसुतः पतिर्भूयादस्तु इत्यभिप्राययुक्तप्रार्थनेन सहतां पूजयामास ॥ ५ ॥ व्रतस्य प्रथमांगं वदति उषसीति प्रातः काले गोत्रैः स्वनामभिः परस्परं संबोधनेनोत्थाय अन्योन्यगृहीतहस्ताः अन्वहं प्रतिदिनं यमुनायां स्नातुं यांत्यो गछन्त्यः ॥ ६ ॥ विजह्रुः विहारं चक्रुः ॥ ७ ॥ योगेश्वराणामपीश्वरः अतो गोपीनां प्रत्येकं मनोरथं पूरयितुं समर्थ इत्यर्थः, तासां कर्मसिद्धये कर्मणः फलार्पणाय ॥ ८-९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

॥ एवमिति ॥ एवमित्थं, कुमार्यः कृष्णचेतसः श्रीकृष्णैकसमासक्तचित्ताः सत्यः, मासं मासपर्यन्तं, व्रतं चेरुश्चक्रुः । मासमित्यत्यन्यसंयोगे द्वितीया । नन्दसुतः पतिः, अस्माकमिति शेषः । भूयात् । इति विनियोगं कृत्वेति शेषः । भद्रकालीं समानर्चुः ॥५॥ व्रतस्य पूर्वाङ्गमाह ॥ उषसीति ॥ उषसि उत्थाय स्वैः स्वैः, गोत्रैर्नामभिः, आहूय, अन्योन्यमाबद्धा गृहीता बाहवो हस्ता याभिस्ताः, एवंभूताः सत्यः, अन्वहं प्रतिदिनं, कालिन्द्यां यमुनायां, स्नातुं यान्त्यः गच्छन्त्यः कुमारिकाः, कृष्णं उच्चैरुच्चस्वरेण, जगुरगायन् ॥ ६ ॥ नद्यामिति ॥ कदाचिद् नद्यां आगत्य पूर्ववत् वासांसि, तीरे निक्षिप्य, कृष्णं गायन्त्यः सत्यः, मुदा सलिले, विजह्रुः ॥ ७ ॥ भगवानिति ॥ भगवान् योगेश्वरेश्वरः कृष्णः, तत्तासामभिप्रेतं, अभिप्रेत्य ज्ञात्वा, वयस्यैः स्वसवयोभिः, आवृतः सन् तत्कर्मसिद्धये तद्व्रतं सफलीकर्तुं, तत्र गतः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

भद्रकालीमिति : १०.२२.५.

देवो वा देवी वा पूज्यः कतमोऽपि तत्र न विशेषः । फलमेकमीशपादप्रसाद एवेति सर्वतो ध्येयम् ॥ ९ ॥

उषसीति : १०.२२.६.

देवीप्रसादादुदिते समिष्टे सापत्नभावं न मिथो वहामः । इतीशमुच्चैर्जगुरेकवृत्त्या चक्रुस्तथाऽन्योन्यभुजावलम्बम् ॥१०॥

वासांसीति : १०.२२.७.

नान्यः कोऽपि समेतु जातुचिदिह स्वेच्छाविहारोऽप्ययं कर्णं कस्यचिदप्युपस्पृशतु नेत्यव्याजवृत्ति नरम् ।
तद्भूप्रान्तभुवि प्रकामचतुराः संस्थापयन्त्यादरादेवं ता अपि गुह्यगोपनचणं वस्त्रौघमस्थापयन् ॥ ११ ॥
नैवान्यवसुविहारः कार्यः क्वचिदपि विना विनिक्षेपम् । इति किं तद्वसुविहृतौ चक्रुस्तत्र स्ववस्त्रनिक्षेपम् ॥ १२ ॥
तटे वासो जले वासः श्रीशस्येवात्मनामपि । दर्शयन्त्योऽधिकारार्थं चक्रुः स्नानविधिं तथा ॥ १३ ॥
यः क्रीडति जडे भूत्वा निरावरणकञ्चुकः । तस्य श्रीशाभिरचिरादिति ज्ञात्वा तथाऽऽचरन् ॥ १४ ॥
वृद्धाऽपि रात्रिर्द्विजराजपत्न्यपि वार्द्धौ विशत्यन्वहमुज्झिताम्बरा ।
सूर्यादयोऽपीति विधिस्तथा भवेदित्याशयात्ता अपि किं तथा व्यधुः ॥ १५ ॥

वयस्यैरावृत इति : १०.२२.८.

नग्निकाहितमिदं व्रतमद्धा लग्नकं मदुपभोगफलाप्त्यै ।
भग्नतां व्रजति चेज्जनभावो भुग्न एव स विचिन्त्य समागात् ॥ १६ ॥
अहं योगेश्वरस्त्वेताः सदा संयोगचिन्तकाः । तद्वश्येन मयाऽवश्यं भाव्यमित्याययो प्रभुः ॥ १७ ॥
यैः संसृत्युरगस्तिरस्कृतिपदं नीतः सुभक्तोत्तमैर्ब्रह्मानन्दरसः समाधिविधिना यैश्चानुभूतः पुरा ।
संलीनावरणं रसेषु परमं सद्धंसदीक्षासुखं तेऽर्हा द्रष्टुमिति श्रियःपतिरसौ तैः सार्धमेवाऽऽययौ ॥ १८ ॥
तादृक् तद्व्रतपूर्तिदिष्टमभितः संवीक्ष्य मन्येऽग्रजं श्रीकान्तः पशुपालकैः सह कयाप्युक्त्या वनेऽवञ्चयत् ।
गोपालैः सह धेनुपालनविधिः प्रोक्तः पुराऽग्रेऽपि च मध्ये एव सबालकः प्रभुरगादित्यन्यथैतत् कथम् ॥ १९ ॥
कृष्णैकामृत–मग्नकायरसनाश्चित्तेऽप्यनङ्गोन्मुखास्त्यक्तप्रावरणास्तिरस्कृतसदाक्षेपा मदेकस्पृहाः ।
मत्प्राप्तौ भुवि तादृशां न सुदृशां हंसस्थितीनां मनाग् योगोऽपेक्ष्यत इत्यरामसहितेनाबोधि विश्वात्मना ॥ २० ॥
ये यथा मामिति स्वोक्तिं स्मरन् प्रभुरुदारधीः । अबलानां प्रसादार्थं युक्तमेवाबलोऽभ्यगात् ॥ २१ ॥
भक्तानुरक्तिकरसङ्गमसौख्यदानात् क्षिप्रं कृतार्थय मदम्बरमीश्वरि त्वम् ।
ज्ञात्वा तदर्थितमिति प्रभुराशु पूर्वं चक्रे तदम्बरचयं करतः कृतार्थम् ॥ २२ ॥

कृष्णप्रिया

राजन् ! निर्दिष्ट विधि से उन कुमरिकाओं ने श्रीकृष्णमय चित्त बनकर भगवान ही पति मिले ऐसा संकल्प के साथ एक मास पर्यन्त श्री भद्रकालो भगवतीजी का अर्चन व्रत किया और "भूयान्नन्दसुतः पति" श्री नन्द कुमारजी हमारे पति हो इस मंत्र का जप एवं इस मन्त्र से अर्चन किया ॥ ५ ॥ वे सूर्योदय से पूर्व उठकर प्रतिदिन अपनी सखीओं का पृथक् पृथक् नाम लेकर पुकार लेती और एक एक का हाथ पकड़ कर श्रीयमुनाजी में नित्य स्नान करने जाती हुई, उँचे स्वर से भगवान् श्रीकृष्ण की लीलाओं एवं भगवन्नामों का गान् करती थी ॥ ६ ॥ किसी एक दिन वे कुमारिकाएँ, श्रीयमुनाजी के तटपर आकर नित्य की भाँति, अपने–अपने वस्त्रों को उतार कर श्रीकृष्ण के गुणों का गान करती हुई जल में आनन्द पूर्वक विहार करने लगी ॥ ७ ॥ राजन् परीक्षित् ! भगवान श्रीकृष्ण शुक-सनकादि योगियों के और भगवान् शङ्कर प्रभृति योगेश्वरों के भी ईश्वर है । उन्होंने उनके मनोरथों को जान लिया एवं विवस्त्र यमुना स्नान का दोष भी जान लिया, उन दोषों के निवाराणार्थ, पुनः उन्हे उस व्रत का फल देने के लिए अपने सखा ग्वालवालों के साथ स्वयं यमुना तट पर पधारे ॥ ८ ॥

तासां वासांस्युपादाय नीपमारुह्य सत्वरम्[1] । हसद्भिः प्रहसन् बालैः परिहासमुवाच ह ॥ ९ ॥
अत्रागत्याबलाः कामं स्वं स्वं वासः प्रगृह्यताम् । सत्यं[2] ब्रुवाणि नो नर्म यद् यूयं व्रतकर्शिताः ॥ १० ॥
न मयोदितपूर्वं वा अनृतं तदिमे विदुः । एकैकशः प्रतीच्छध्वं[3] सहैवोत सुमध्यमाः ॥ ११ ॥[4]
तस्य तत् क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः । व्रीडिताः प्रेक्ष्य चान्योन्यं जातहासा न निर्ययुः ॥ १२ ॥

कवंमक्षमा

तासाम्-वासांसि-उपादाय-सत्वरम्-नीरम्-आरुह्य-हसद्भिः बालैः-सह-प्रहसन्-परिहासम्-उवाच-ह ॥ ९ ॥ हे अबलाः-अत्र-आगत्य-कामम्-स्वं स्वम्-वासम् प्रगृह्यताम्,-सत्यं-ब्रवीमि नर्म-न यत् यूयम् व्रतकर्शिताः ॥ १० ॥ मया अनृतम् ऊदितपूर्वं-न वा-इमे-तद्-विदुः,-हे-सुमध्यमाः ? एकैकशः उत-'यूयम्' सहसा-प्रतीच्छध्वम् ॥ ११ ॥ तस्य तत्-क्ष्वेलितम्-दृष्ट्वा'-गोप्यः-प्रेमपरिप्लुताः च-व्रीडिताः,-अन्योऽन्यम्-प्रेक्ष्य-जातहासाः-न-निर्ययुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नीपं कदंबम् । बालैः सह ॥ ९ ॥ हे अबलाः नो नर्म न परिहासः यस्माद्यूयं व्रतकर्शिताः व्रतश्रांताः ॥ १० ॥ एकैकशो वा आगत्य वासांसि स्वीकुरुत सहैव वा । न तत्रास्माकमाग्रह इत्यर्थः ॥ ११ ॥ क्ष्वेलितं परिहासम् । प्रेमपरिप्लुताः प्रेमरसनिमग्नाः ॥ १२-१३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृष्णः परिहासवाक्यं वक्ष्यमाणमुवाच हेति । हसद्भिर्बालैरित्यतिबाल्यान्निष्कारणहासवद्भिः सह प्रकर्षेण हसन्निति परिहासमाह—भो व्रजबालिका अत्र कदंबशाखास्वेतावंति वस्त्राणि केन निबध्य स्थापितानि यूयं किं जानीथ न वा मया तु गाश्चारयता दूरादेव दृष्ट्वा किमयं मामकीनः कदंबोऽद्य विचित्रवासांस्येव पुष्पफलानि दधारेत्यद्भुतदर्शनोत्सुकेन द्रुतमागत्यारुह्यतेति । ननु भो अस्मदीयान्येवैतानि वासांसि, मैवम्, ताह कथमेतावदुच्चकदंबशाखास्वारूढानि । ननु भो त्वयैव चोरयित्वारोहितानि, सत्यम् । सत्यमेतावंतमपि परिवादं दातुं बलं दध्वे नंदस्य राज्ञः पुत्रोऽहं चौरस्तदद्य यूयं मथुरास्थकंसराजस्य पार्श्वं यियासथेत्यनुमीयते । ननु भो मा क्रुध्य वस्त्राण्येव निभाल्य विचारय किमेतानि स्त्रीवस्त्राणि पुंवस्त्राणि वा, सत्यम् । अयि धीमत्यो निभालितान्येतानि स्त्रीवस्त्राण्येव, तत्किं जगत्यस्मिन्यूयमेव स्त्रियः स्थ अन्या न सन्ति । ननु भोः संत्येव किं त्वस्मिन्निर्जने वनेऽस्मान्व्रजबाला विना काः खल्वन्या आयांति, अयि रहःसंचारिण्यः किं भवत्य एव नान्याः । ननु भो अन्यथा विद्वन्वयमत्र खेलितुं नैवागच्छामः किं तु कदंबदेवतां दुर्गां पूजयितुम् । किं भो दुर्गापूजिका यूयमेव नान्याः, सत्यम्, नान्या एव । अयि मुग्धाः प्रतिनिशीथमत्रागत्य वैमानिकीभिर्देवीमिदुर्गा पूज्यते । ननु भो पूजयंतु नाम देवीम्, ता वस्त्राणि त्यक्त्वा कथं गताः, अयि बालास्तत्त्वं न जानीथ अत्र रजन्यां पुनः पूजयिष्यंतीभिस्ताभिः स्नात्वा परिधातुं रक्षितानि । भोः कृष्ण त्वमेव तत्त्वं न जानासि अद्य दिन एव पूजयिष्यंतीभिरस्माभिरेव स्नात्वा परिधातुं वनदेवता द्वारोच्चशाखोपरि वस्त्राणि रक्षितानीति ॥ ९ ॥ अत्र कदंबाधोभागे । कामम् निश्चितम् 'कामो निश्चयवांछयोः' इति शाश्वतः ॥ १० ॥ पूर्वस्मिन्काले उदितमुदितपूर्वम् । आहिताग्न्यादिवत्समासः । तत् मत्कर्तृकसत्यभाषणरूपं वृत्तम् । इमे गोपाः । आग्रहो हठः । इत्यर्थं इति । मम तु भवतीनां शुद्धभावदर्शन एवाग्रह इति तात्पर्यम् । प्रतीच्छध्वमित्यत्रात्मनेपदमार्षम् । स्वीकारार्थश्चानेकार्थत्वात् ॥ ११ ॥ तस्य कृष्णस्य । तद् वचः । क्ष्वेलितम् "क्ष्वेलितं सिंहनादे च परिहासे विषप्लुते" इति पदरत्नाकरे । न निर्ययुः बहिर्नायाताः । जलादिति शेषः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

बालैः सह सत्वरं भीत इव त्वरायुक्तं परस्परं तूष्णीमासाद्य तासां वासांसि प्रयोजनविशेषाय उपादेयत्वेन गृहीत्वा नीपमारुह्य च स्वैरः सन् तैरेव हसद्भिः सह स्वयं च प्रहसन् तेन च हासेन कृतानुसन्धानाः सप्रणयेर्ष्यं ज्ञात्वैवाज्ञात्वेव चाब्रुवाणाः प्रति परिहासमिति कथ शीतलजले चिरं व्रत कम्पमानास्तिष्ठथ उत्थायार्द्रं परित्यज्य शुष्कमेव वासः परिधीयतामिति तदेवं कर्म तर्हि भवानेव भवानिवेति न्यायेन नायुक्तमित्यादिमिथः सम्वादपुरस्सरं सनर्मवाक्यमित्यर्थः । ह स्फुटमेवोवाचेत्यर्थः । बालैरिति तत्क्ष्वेलनार्थं पुरैव प्रौढानां तन्निकटसम्बन्धिनाञ्च परित्यागेन बालकैरेव सखिभिः ततो नावद्यम् ॥ ९ ॥ परिहासोक्तिमेवाह-अत्रेति द्वाभ्याम् । अत्रागत्येति निर्भरस्वदृष्टिविषयं दर्शयति अत्रैव वस्त्रपक्षे पर्याप्तिरिति व्याजेन कामं यथेष्टं प्रकर्षेण गृह्यतामिति

---

[1] सत्वरः—श्रीधर. वंशी. वीर. विज. । [2] ब्रवाणि—श्रीधर. वंशी. वीर. विज. ; ब्रुवाणि—विश्व. । [3] प्रतीच्छन्तु—विज. । [4] अत्र शुक उवाचेति क्वचित् ।

झटित्यागमनाय ताः प्रोत्साहयति तथा स्वस्यौदासीन्येन चौर्य्येऽप्यौदासीन्यमत्र चेमानि केनचित् चोरेणापहृत्यापहृत्य कदम्बेऽस्मिन् गोप्यमानानि मया दूरात् दृष्ट्वा समागतमिति सूचयति—स्वंस्वमिति । सर्वाभिरेवागत्य निजं निजं गृह्यतां न त्वेकया द्वित्राभिः कतिभिश्चिद्वा सर्वासामेव गृहीतव्यं कदाचिद्युष्मासु कपटयुवतीभिः परिवर्त्तितापीति भावः गूढो भावस्त्वन्य एवोह्यः । ननु, तवोक्तौ न प्रतीमस्तत्राह, सत्यमिति । ब्रुवाणीत्यार्षं ब्रवाणीत्यर्थः । ब्रवाणीत्येव क्वचित्पाठः ननु नर्मणा मिथ्यापि ब्रूयाः तत्राह, न नर्मेति । नन्वेतदपि तव नर्मैवेत्याशङ्क्याह—हे अबलाः ! यद्ययमिति अबलासु तारुण्याद्यप्राप्त्या बलमप्राप्तासु तत्रापि व्रतकृशासु तपस्विनीषु नर्मणोऽप्ययोग्यत्वादिति भावः । अनेन च स्वयं न चोरितं किन्त्वन्येनैवेति व्यज्य पुनरौदसीन्यव्यञ्जकनर्मणा तासां मनः क्षोभयति अधुना किं कर्त्तुं शक्नुयेति भीतिदर्शननर्मणा सान्त्वयति च यद्वा, यदि नर्म न भवति तर्ह्यम्बराणि कथं गृह्णीयादिति चेत्तत्राह, अबलाः यूयमबलाः तत्रापि व्रतकृशाः अतो यद्यत्र दुष्टो नरो वानरो वा आगत्य क्रीडारसपराणामनवहितानामंशुकान्यादद्यात् तदा मम राजपुत्रत्वात् महती लज्जा स्यादित्यभिप्रेत्य गृहीतानि तानि ननु नर्मणार्थमिति भावः ॥ १० ॥ ननु, सप्रहासोक्तेरसत्यतैवावगम्यते, तत्राह-नेति । उदितपूर्वं पूर्वपूर्वम् उक्तं यत् तदनृतं मिथ्या नैव भवति । यद्वा, अनृतं न मया उदितपूर्वं कदाचिदप्यनृतंपूर्वं नोदितमित्यर्थः । तच्च इमे मम सहचरा विदुः एषामेव मदीयाशेषवृत्तिज्ञानात् । ननु, त्वद्वयस्या अपि त्वत्सदृशा एवेति चेत्तत्राह—एकैकश आगत्य स्वीयं वस्त्रं गृह्णीत यदि पूर्वपूर्वस्यामन्यथा स्यात्तदैव उत्तरोत्तराभिर्मद्वचनं मिथ्या मत्वा नागन्तव्यमिति भावः । अहो प्रथमोत्थाने सर्वासामसम्मतिः स्यात् उत्थितायां च कस्याश्चिदन्यासां क्रमघटनादुर्घटा स्यादिति किमेवं विलम्बाचरणेन वा मम वचसि मनसि च कापि वक्रता नास्त्येवेति बोधयन् पक्षान्तरमाह, सहेति । उत वाशब्दार्थे हे सुमध्यमाः ! इति कृशमध्यानां युष्माकं शीताम्भसि चिरमूर्ध्वंस्थितिर्मां कृपयतीति भावः । युष्माकं मध्यभागादिसौन्दर्यमेव द्रष्टुमिष्यते न च वस्त्रैरेते मत्प्रयोजनमिति तु निगूढो भावः ।। ११ ॥ प्रेमपरिप्लुता इति गोपीविशेषत्वेन स्वभावत एव प्रेमविशेषवत्यः सम्प्रति तु तत् क्ष्वेलितं परिहासोक्तिं दृष्ट्वा ज्ञात्वा अधिकप्रेमरसे निमग्ना इत्यर्थः । तत्र च जातिस्वभावेन व्रीडिताः व्रीडया हर्षेण चान्योन्यं प्रेक्ष्य जातहासाश्च सत्यो न निर्ययुः ।। १२ ।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उपादाय समीपत एव गृहीत्वा, हसद्भिस्तच्चेष्टयोच्चैर्हासं तन्वद्भिर्बालैः सह त्वरयान्वितः सन् नीपमारुह्य चौर्य्येण ताभ्यो भयात्, तत्र तासामदर्शनं तदुच्छ्रायत्वाच्च, बालैरिति तत्क्ष्वेल्यर्थं पूर्ववत् प्रौढानां त्यागेन बालकैरेव वयस्यैर्वृत इति ज्ञेयम् । यद्वा, सप्तमाब्दवयोऽन्ते कृतश्रीगोवर्द्धनधारणात् प्रागस्या लीलायाः कथनेनाधुना प्रकटितषडब्दवयसः श्री भगवतः सवयस्त्वेन सर्वेऽपि ते बाला एव, तथापि प्रौढ़वल्लीलेयं श्रीभगवतो बाल्येऽपि तादृशत्वसम्भवात्, तच्च सर्व्वत्र प्रसिद्धं प्रागुक्तमेव, एवमग्रेऽपि श्रीयज्ञपत्न्यनुग्रहलीलापि ज्ञेया । ततश्च तेषां बाल्ये सर्वमनवद्यमेव! यद्वा, लीलाद्वयमिदं कैशोर एव । ततश्च श्रीगोवर्द्धनधारणात् प्रागेतदुक्तिः । शारदवेणुगीतवर्णनाभिव्यञ्जित श्रीगोपीभावविशेष-प्रसंगेऽस्या लीलायास्तथा तत्प्रसंगे श्रीयज्ञपत्न्यनुग्रहलीलाया अप्यनुषक्तत्वात् लीलाक्रमश्च श्रीबादरायणिना प्रायो नापेक्षित एव,—कुत्रापि प्रसंगानुसारात्, कुत्रापि स्वस्मात् क्वचिद्रसविशेषोदयात् । एतच्च प्राक् अग्रेऽपि व्यक्तमेव, परिहासं नर्म्मैवोवाच, तासां कर्षणार्थम्, अतएव प्रकर्षेण हसन्, ह हर्षे, स्फुटमिति वा ।। ९ ।। परिहासोक्तिमेवाह अत्रेति द्वाभ्याम् । अस्मिन् मन्निकटे नीपतले, हे अबला इत्यधुना युष्माकं शक्त्या किञ्चदपि न स्यादिति भावः । कामं यथेष्टं प्रकर्षेण गृह्यताम्, पुनर्मया तत्र कश्चिदन्तरायो न कार्य इत्यर्थः । स्वं स्वमिति सर्व्वाभिरेवागत्य निजनिजं प्रत्येकं गृह्यताम्, न त्वेकया द्वित्राभिः कतिभिश्चिद्वा आगत्य सर्व्वासामेव ग्रहीतव्यमित्यर्थः । ननु स्त्रीषु मिथ्योक्तेरदोषत्वाद्विशेषतश्च परिहासशीलत्वात् तवोक्तौ न प्रतीतिः ? तत्राह—सत्यमिति, ब्रुवाणीत्यार्षम्, ब्रवाणीत्यर्थः। करवाणीत्येव क्वचित् पाठः । नचैतदपि नर्म्मैवेत्याशंकनीयमित्याह-यद्यूयमिति । व्रतकृशासु तपस्विनीषु नर्म्मणोऽयोग्यत्वादिति भावः । एषा परमपरिहासोक्तिरेव भक्तिविशेषस्वभावेन,सदा परमहृष्टानां तासां व्रतकृशत्वाद्यदर्शनात् ॥ १० ।। ननु सप्रहासोक्तेरसत्यतैवावगमाते ! तत्राह—नेति । उदितपूर्वं पूर्वं पूर्वमुक्तं यत् तदनृतं मिथ्या नैव भवति; यद्वा, अनृतं न मया उदितपूर्वम्, कदाप्यनृतं पूर्व नोदितमित्यर्थः । वै प्रसिद्धौ तच्च इमे मत्सहचरा विदुः, सर्वत्र सदैकत्र चारित्वेनैषामेव मदीयाशेषवृत्ताभिज्ञानात् । ननु त्वद्वयस्या अपि त्वत्सदृशा एवेति चेत्तत्राह—एकैकश आगत्य स्वकीयवस्त्रं गृह्णीत, यद्येकयात्रागतया स्ववस्त्रं न प्राप्यते, तदा मद्वचनं मिथ्यैवेति मन्तव्यमिति भावः । अहो किमेव विलम्बाचरणेन वा, मम वचसः सत्यता हृदि च कलुषता काचिन्नास्त्येवेति बोधयन् पक्षान्तरमाह—सहेति । उत वा-शब्दार्थे, हे सुमध्यमाः ! इति युष्माकं मध्यभागादिसौन्दर्यमेव द्रष्टुमिष्यते, न च वस्त्रैरेतैर्मत्प्रयोजनमिति गूढोऽभिप्रायः ॥ १२ ।। क्ष्वेलितं परिहासोक्तिम्, प्रेमपरिप्लुता इति गोपीत्वेन स्वभावत एव तस्मिन् प्रेमवत्यः विशेषतश्च तत्क्ष्वेलितं श्रुत्वा अधिकं प्रेमरसे निमग्ना इत्यर्थः । जातहासाश्च सत्यो न निर्ययुः, यतोऽन्योन्यं प्रेक्ष्य व्रीडिताः यद्वा, प्रेमपरिप्लुतत्वादेव व्रीडिता जातहासाश्च जातस्मिताः, अनिर्याणे ऐकमत्यार्थमन्योन्यं प्रेक्ष्य, यद्वा, निर्यातुकामा अपि अन्योन्यं प्रेक्ष्य नग्नत्वेन व्रीडिताः, तेनैव अन्योन्यं प्रेक्ष्य जातहासाश्च न निर्ययुः ।। १२ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

क्ष्वेलितं क्रीडितम् ।। १२—१३ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तासां वासांसि गृहीत्वा सत्वरं नीपं कदम्बमारुह्य हसद्भिः बालैः सहितः प्रहसन् परिहासवाक्यमुवाच ॥ ९ ॥ तदेव दर्शयति– अत्रेति । हे अबलाः ! इदं सत्यमेव ब्रुवाणि नो नर्म न परिहासं यद्यस्माद्यूयं व्रतेन कर्शिताः श्रान्ताः ।। १० ॥ स्ववचनप्रामाण्यं ससाक्षिकमाह —नेति । मयानृतं नोदितपूर्वं नोक्तपूर्वं कदापि मयाऽनृपं नोक्तमित्यर्थः । तदनृतस्यानुक्तपूर्वत्वम् इमे गोपा विदुः अतो हे सुमध्यमाः ! एकैकशो वाऽऽगत्य स्वीकुरुत सह वा नास्माकमाग्रहः ।। ११ ॥ एवं कृष्णस्य क्ष्वेलितं परिहासं दृष्ट्वा प्रेक्ष्य व्रीडिताश्च हसन्त्यो न निर्ययुः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नोपमर्जुनं परितो हासो यस्मिन् तद्वचनं परिहासम् ।। ९-११ ॥ क्ष्वेलितं सिंहवन्नादितं परिहासेनोदितं वा न निर्ययुः जलादिति शेषः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तत्रागत्य यदकार्षीत्तदाह–तासां वासांसीत्यादि । पूर्वपूर्वदिनवत्तीरे निक्षिप्तानि वासांसि सत्वरः सन् उपादाय द्रक्ष्यन्तीति भिया त्वरया सर्वाणि वासांसि युगपदादायेत्यत्रापि योगैश्वर्यं प्रकटितम् । हसद्भिर्वासोरक्षकेः स्वैर्गोत्रैरित्युक्तप्रकारैः शिशुभिः सह हसन्, ते च वालका जहसुरेव;न तु कृष्णो वासांस्यपहरतीति वदन्ति स्म । प्रहसन्निति तेषां हास्येन स्वयमपि हसन्नेवाषीत् । तत्रायं भावः । एतेऽतिशिशवोऽपि मय्येवं विश्वस्ता यतोऽस्मिन् वासोहरणे कौतुकमेव ज्ञातवन्तः, न तु चौर्यम्, यतो जहसुरेव । न गदितवन्त इति स्वस्य च प्रहासः । नीपमारुह्य परिहासः परिहासपूर्वमुवाच । ह स्फुटम् ॥ ९ ॥ किं तदित्याह—अत्रागत्येत्यादि । हे अवलाः मया कौतुकेन वो वासांस्यपहृतानि, अत्रागत्य स्वं स्वं वासः प्रगृह्यताम् । ननु अपहृतानि चेत् कथं दास्यसि ? मृषैव भाषसे, तद्वयं न यास्याम इत्याह –सत्यं ब्रवाणि, न नर्म परिहासः । परिहासो नायमिति कथमवगन्तव्यम् ? तत्राह–यदिति । यद्यस्माद् यूयं व्रतकर्षिता व्रतस्थाः ॥ १० ।। प्रतिपरिहासो न क्रियते । यद्येवं तर्हि यत्रासन् वासांसि तत्रैव स्थापयित्वा भगवान् गच्छतु ? नेत्याह,—न मयेति । अहं तु सत्यवाक् मयोदितपूर्वम् (१० म-श्लो.) "अत्रागत्याबलाः कामं स्वं स्वं वासः प्रगृह्यताम्" इति यत् तन्नानृतम्, तत् सत्यमेव । तदन्यथा कर्तुं न शकयते । सत्यवागिति स्वमर्यादां कथं स्वयमेव दूरीकरिष्यते ? तन्मम सत्यवाक्त्वं इमे सर्वे लोका विदुर्जानन्ति, अन्यथा (१०म श्लो०) "सत्यं ब्रुवाणि नो नर्म" इत्यनेनैव सिद्धः । पुनःर्न मयोदितपूर्वमित्यादिना पौनरुक्त्या वक्तृदोषप्रसङ्गः । अतोऽयमेव पक्षः साधीयान् रसश्च । तत् तस्मादेकैकश एव वा प्रतीच्छध्वम् उत सहैव वा ॥ ११ ॥ तदाकर्ण्य तास्तदा यथासन् तद्दर्शयति–तस्येत्यादि । तस्य भगवतस्तत क्ष्वेलितं क्ष्वेलां लीलामिति यावत्, गोप्यो गोपकुमार्यः प्रेमपरिप्लुताः सत्यो न निर्ययुः । अन्योन्यं प्रेक्ष्य जातहासा व्रीडिताश्च । प्रीतिरसोऽत्र स्थायी, आलम्वनं श्रीकृष्णः, उद्दीपनं तस्य वासश्चौर्यक्ष्वेलितादि, अन्योन्यप्रेक्षणमनुभावः । जातहास इति हासः, व्रीडिता इति व्रीडा च व्यभिचारिणी प्रेमाख्योऽयं रसः, तेन प्रेमरस भक्ताः कुमारिका इत्यायातम् ॥ १२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तासां वासांस्युपादायेत्यादि । वासांसीति प्रत्येकं वाससां वहुत्वम्, अन्तरीय-कूर्पासकोत्तरीयादि-भेदात् । सर्वेषां ग्रहणे सत्वरः, हसद्भिरिति वासोरक्षकैः स्वैर्गोत्रबालकैर्वासोऽपहारं दृष्ट्वा ते नाचचक्षुः, किन्तु जहसुरेव । अतः स्वयञ्च प्रहसन् अमी वालकाश्च नोचुः अहञ्च नाभिदृष्टः, किन्तु वासांस्यदृष्ट्वा शङ्कां लप्स्यन्ते । किमनयासां शङ्कया ? अविलम्बतरमेवाहं निगदामित्याह परिहासमुवाच च; परिहासयुक्तं यथा स्यात् ॥ ९ ॥ परिहासमेवाह - यद् यूयं व्रत-कर्शिताः' इति व्रत-पराभिः सह परिहासो न युज्यते इत्येव परिहासः ॥ १० ॥ न मयोदितपूर्वमित्यादि । मयोदितपूर्वं वै न अनृतं मृषा, तदिमे तावका एव विदुः ॥ ११ ॥ तस्य तदित्यादि । क्ष्वेलितं खेलां दृष्ट्वा गोप्यो गोपकुमार्यः प्रेमपरिप्लुताः सत्यो न निर्ययुः सलिलान्नोत्तेरुः । अयं हि प्रेमाख्यो दशमो रसः, तथाहि ममकारोऽत्र स्थायी भावः, अलम्बनं श्रीकृष्णः, उद्दीपनं तत् क्ष्वेलितादि । अनुभावः अन्योन्यं प्रेक्षणादि व्यभिचारी व्रीड़िता इति वीड़ा । एभिः परिपुष्टो मनकार; स्थयी रसतामापन्न इति प्रेमाख्यो रसः । अतः कुमारीणां प्रेमाख्य एव रसः, न शृङ्गारः, यत्तु (भा. ७।१।३०) "गोप्यः कामाद्" इति तदन्यपरम्; (भा. ११।१२।८) "केवलेन हि भावेन" इति यत्तदेव कुमारिकापरम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हसद्भिर्बालैरित्यतिबाल्यान्निष्कारणहास्यवद्भिस्तैः सह प्रकर्षेण हसन्निति हास्यशब्देनैव ताः स्वमवधापयन्निति भावः परिहासमिति भो व्रजबालिकाः अत्र कदम्वशाखास्वेतावन्ति वस्त्राणि केन निबद्ध्य स्थापितानि यूयं किं जानीथ न वा ? मया तु गाश्चारयता दूरादेव दृष्ट्वा किमयमस्माकीनः कदम्वोद्य विचित्रवासांस्येव पुष्पफलानि दधारेत्याश्चर्य्यदर्शनोल्लसितेन द्रुतमागत्यारुह्य-

तेति। ननु, भो अस्मदीयान्येवैतानि वासांसि मैवं तर्हि कथमेतावदुच्चकदम्बशाखामारूढानि, ननु भोस्त्वयैव चोरयित्वा आरोहितानि सत्यं सत्यमेतावन्तमपि परिवादं दातुं बलं दद्ध्वे नन्दस्य राज्ञः पुत्रोऽहं चौरस्तदद्य यूयं मथुराजस्य कंसराजस्य पार्श्वं यियासथेत्यनुमीयते, ननु भो माक्रुध्य वस्त्राण्येव निभाल्य विचारय किमेतानि स्त्रीवस्त्राणि पुंवस्त्राणि वा सत्यमपि धीमत्यो निभालितान्येतानि स्त्रीवस्त्राण्येव तत् किं जगत्यस्मिन् यूयमेव स्त्रियः स्थः अन्याः स्त्रियो न सन्ति ननु भोः सन्त्येव किन्त्वत्र निर्जने घने अस्मान् व्रजबाला विना काः खल्वन्या आयान्ति अयि रहः सञ्चारिण्यः किम्भवत्य एव रहसि खेलन्ति नान्याः, ननु भो अन्यथा विद्वन् वयं खलितुमत्र नैवागच्छामः किन्तु कदम्बदेवतां दुर्गां पूजयितुं किं भोः दुर्गा पूजिका यूयमेव नान्याः सत्यं नान्या एव, अयि मुग्धाः प्रतिनिशीथमेव वैमानिकोभिर्देवीभिरत्रागत्य दुर्गादेवी पूज्यते ननु भोः पूजयन्तु नाम देवीं वस्त्राणि त्यक्त्वा ताः कथंगताः अयि बालाः ! तत्त्वं न जानीथ अद्य रजन्यां पुनःपूजयिष्यन्तीभिस्ताभिः स्नात्वा परिधातुं रक्षितानि भोः कृष्ण त्वमेव तत्त्वं न जानासि अद्य दिन एव पूजयिष्यन्तीभिरम्भाभिरेव स्नात्वा परिधातुं वनदेवता द्वारा उच्चशाखोपरि वस्त्राणि रक्षितानीति ।।९।। हशब्दोक्तं स्पष्टं परिहासमाह-अत्रेति । सत्यं युष्माकमेवैतानि वस्त्राणि चेत् कामं यथेष्टमेवात्रागत्य स्वं स्वं परिचित्य मत्प्रत्ययार्थं शपथं कृत्वा धनरक्षकाय मह्यं पारितोषिकमेकैकं हारं दत्वावासो गृह्यतां स्वं स्वमिति सर्वाभिरेवागत्य नत्वेकया द्वित्राभिर्वा आगत्य वस्त्रलोभवतीनां स्त्रीणामधिकग्रहणस्यापि सम्भविष्णुत्वात् ननु, गन्तुं न शक्नुमस्तत्र सहासमाह-हे अवलाः ! मन्ये व्रतकार्श्यादेवात्रागन्तुं न शक्नुथेति भावः । यद्वा तर्हि न दास्यामि प्रबलस्यं मम किं कर्तुं शक्नुथेति भावः । ननु कपटिनस्तवोक्तौ न प्रतमिस्तत्राह सत्यं तथ्यमेव ब्रुवाणी त्यार्षं ब्रवाणत्यपि क्वचित्पाठः यद्वा, सत्यं शपथे कृत्वा ब्रवीमि "सत्यं शपथतथ्ययोः" इत्यमरः । ननु नर्मयतो व्रतेन कृशीकृता यूयं तपस्विनीषु युष्मासु दयाभक्तिश्च धर्मभयं चोत्पद्यत इति भावः ।। १० ।। ननु, मिथ्यावादिनस्तव शपथेपि न विश्वसिम इति तत्र सरसनादंशमाह—नेति । उदितपूर्वमिति सुपसुपेति समासः अनृतं न पूर्वमुदितमिति एतज्जन्मनि एतावद्वयःपर्य्यन्तं तु अनृतं न परिचिनोमि अत्र किं प्रमाणमिति चेदिमे बाला एव बालानां यथा दृष्टग्राहित्वस्वभावादार्जवाच्चेति भावः । ननु दूरतोऽत्र जले वस्त्राणि क्षिप्यन्तां बालद्वारा वा दीयन्तां तत्र हन्त हन्त एतानि युष्मदीयान्यन्यदीयानि वा मया ज्ञातुमशक्यानि कथं दीयन्ताम् अस्मद्विधैर्धार्मिकैः परद्रव्याणि नखाग्रेणापि न स्पृश्यन्ते तस्मात् यूयमत्रागत्य प्रतीच्छत स्वं स्वं परिचित्य गृह्णीत यतः पारक्यं वस्तु न गृह्णामि न ददामि नापि स्पृश्यामीति मम नियमः । ननु त्वया धृष्टेन करिष्यमाणाद्विडम्बनाद्भीत्यैव कुलकुमार्यो वयं त्वत्समीपं न यामस्तत्राहुः—एकैकश इति प्रथमं युष्माकमवरा काचिदिहागच्छतु तस्यामविडम्बतायां सत्यामन्या अन्या यथायान्तु सहैवोतेति युगपद्बह्वीनामागमने स्त्रीणां विडम्बनासम्भवाच्चेति भावः । हे सुमध्यमाः ! इति शिरांसि खलूत्तमाङ्गशब्देनोच्यन्ते तान्यतिसुन्दराणि भवत्यः कृपया मां यदि दर्शयन्त्येव तदा मध्यमाङ्गान्यपि सुन्दराणि मां दर्शयितुं का लज्जेति भावः ।। ११ ।। क्ष्वेलितं रहस्यपरिहासं दृष्ट्वा प्रेमपरिप्लुता इति मन्यामहे इयमेकं कान्तं सुखयति तु अस्माकमहन्तास्पदान्यनुरूपाणि किं भविष्यन्तीति मनोनुलापानन्देन मग्ना बहिस्त्वन्योन्यं प्रेक्ष्याक्रीडिता इत्ययि कमलेक्षणे त्वामाह्वयत्ययं तथा हि अयि सुधामुखि त्वमेव याहि सुधां पाययन्तीत्यन्योन्यं जातहासाः परिजहसुरेव ननु निर्ययुः ।। १२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एकैकशो वाऽऽगत्य प्रतीच्छध्वं स्वीकुरुत ।। १० ।। क्ष्वेलितं परिहासं दृष्ट्वा प्रेमपरिप्लुताः प्रेम्णा परितो व्याप्ता ।। ११ ।। नर्मणा तत्क्ष्वेलितेनाक्षिप्तानि गृहीतानि चेतांसि यासां ताः ।। १२ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

सत्वरस्तद्दृष्टिवञ्चनाय शीघ्रं सन् हसद्भिरित्यतिबाल्यान्निर्निमित्त हास्यवद्भिस्तैर्बालैः सह प्रहसन्निति हासशब्देन ताः स्वयमवबोधयन्नित्यर्थः । परिहासमुवाच हेति भो भोः व्रजकुमारिकाः ! आसु नीपशाखास्वमूनि वासांसि केन निबद्धानि, किं यूयं वेत्थ न वा, मयि तु विदूरादेव विलोक्य किमयमस्माकं नीपतरुर्विचित्राणि वासांस्येव पुष्पफलानि दधानोऽस्तीत्याश्चर्यंदर्शनप्रहृष्टेन शीघ्रमासाद्यारुह्यतेति नन्वस्मदीयान्यमूनि वासांसि इति चेत् कथमत्युच्चासु शाखास्वरूढानि । ननु भोः क्रोधस्ते माभूदमूनि स्त्रीवासांस्येव किं न परिचिनोषीति चेत्, किमिह विश्वस्मिन् यूयमेव स्त्रियः स्थः नत्वपराः सन्ति । ननु व्रजकुमारीरस्मान् विनास्मिन्निर्जने काः स्त्रियो विहर्तुमागच्छेयुरिति चेत् युस्मान् विना किमन्या निर्जन विहारिण्यो न भवेयुः । नन्वत्र विहर्तुं वयं नागच्छामः किन्तु नीपदेवतां दुर्गामर्चितुमिति चेत् किं तदर्चिका नान्याः सन्तीति तस्मादप्सरोभिः प्रतिनिशीथं दुर्गार्चनीभिरद्यतने निशीथे तामर्चिष्यन्तीभिः स्नात्वा परिधातुममून्यासु शाखासु स्थापितानीति ।। ९ ।। ननुरसिकमौले ! अमून्यस्माकमेव वासांसि अस्मदभीष्टया दुर्गया सङ्कल्पेनैव नीपशाखस्वारोहितानि दिवसे तदर्चनीभिरस्माभिः पुनः परिधेयानीति चेत्तत्राह-अत्रेति । चेदमूनि तावकानि तर्हि अत्रागत्य स्वं स्वं वासः परिचित्य प्रगृह्यतां ननु मुद्रितनेत्रश्चेत्तानि दद्यास्तर्ह्यागच्छामः किन्तु कपटिनस्तवोक्तौ न प्रतीतिरिति चेत् तत्राह—सत्यं शपथं कृत्वा ब्रुवाणि नो नर्म्म करोमि तथैव दद्यामिति भावः । यद् यूयं व्रतेऽतितपस्विनीषु युष्मासु मे दयाभक्तिर्द्धर्मभयश्चोत्पद्यते इति भावः ।। १० ।। ननु मिथ्याभिशंसिनस्तवोक्तौ न विस्रम्भ इति चेत्तत्र सरसनादंशमाह—न मयेति । वै निश्चयेन मया अनृतं नोदितपूर्वं सुप्सुपेति समासः । अनृतं न पूर्वमुदितं अत्र किं मानमिति चेत्तत्राह—हे बाला यथादृष्टग्राहिणस्तद् विदुर्जा-

नन्ती एवमपि विवसनानां नस्त्वदन्तिके गमनं न युक्तं ततो दूरादेवास्मद्वासांसि प्रक्षेप्याणि बालैर्वादियानीति चेत्तत्राह—एकैकश इति । कस्याः कानीति मया परिचेतुं न शक्यन्ते ततो यूयमेवेहागत्य तानि प्रतीच्छध्वं नयत मया मुद्रितनत्रतयैव देयानीति भावः । मद्वचस्यनास्था चेदेकस्यांवस्त्राणि नीत्वा निर्वाह्य गतायां सञ्जातास्थाः सर्वाः सहैवागत्य नयन्त्वित्यर्थः । सुमध्यमा इति तन्मध्यवीक्षाभिलाषः सूच्यते ।। ११ ।। तस्य नन्दसुनोः स्वनाथस्य तत् क्ष्वेलितुं रहस्यपरिहासं दृष्ट्वा तत्प्रेम्णापरिप्लुता दिग्धास्तदर्थमनसस्था गोप्योऽन्योन्यं प्रेक्ष्य त्वमादौ याहि त्वय्येव निहितचित्तोऽसौ त्वमेवादौ याहीत्यन्योन्यं जातहासा एव तस्थुर्नतु जलान्निर्ययुः ।। १२ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तासां सलिलसलीलानां ललनानां दुकूलानि वासांसि नीरतीरस्थापितान्युपादाय । अनेन वसनापहारेण भवद्भवदज्ञानाच्छादनमप्येवं हरामीति हरिरसूचयदिति मन्तव्यं । सत्वरो नीपमर्जुनवृक्षमारुह्य हसद्भिर्बालैः सह स्वयमपि प्रहसन्परिहासं परितो हासो यस्मिस्तद्वचनं यथा भवति तथोवाचेति वा ।। ९ ।। हे अबला अत्रागत्य कामं यथेच्छं स्वं स्वं पदमेकं वासः प्रगृह्यतां यद्यस्माद्यूयं व्रतकर्शितास्तच्छ्रान्तास्तन्नो नर्म महाव्रतयुताः प्रति नर्म न धर्म इति भावः । सत्यं ब्रुवाणि वच्मि । ब्रूञ् व्यक्तायामस्माल्लोट्यानि गुणे सार्वधातुके वादेशे कुप्येति णत्वे ब्रवाणीति रूपं । ब्रुवाणीत्यपपाठः । अष्टमाष्टकीयपञ्चमाध्याये चोर्वशीवाक्ये प्रतिब्रवाणि वर्तय तेऽश्रु इत्युक्तेः ।।१०।। मयाऽनृतं नोदितपूर्वं पूर्वं नोदितं तत्र साक्षिणः सारसाक्षीः प्रति बोधयति ।। तदिति । ममाननृतवाक्त्वमिमे बाला विदुरेकैकशः पृथगुत हे सुमध्यमाः सहैव प्रतीच्छन्तु प्रतिगृह्णन्तु भवत्यो नोभयथापि ममा सम्मतिरिति भावः । सुमध्यमा इत्यनेन सु सार्वजनीनतया दृश्यमानो मध्ये मकरो यस्मिञ्छब्दे स शब्दः कुमार्य इति शब्दस्तेन तदर्थः स्वोकार्य इति हे कुमार्य इत्यपि सम्बुद्धिः । ननु कान्तैकान्तसङ्केतनिकेतं प्रति वयस्यनयनं न यस्यापनयनमित्यतोऽप्याह । ये सुमध्यमा इति । साक्षित्वेन दर्शितैरनृतोक्तौ कथमित्यतो वाऽऽह ।। सुमध्यमा इति । अत्यन्तं प्रोक्तकारिण इति न कार्यद्वयप्रतिबन्धकता तेषामिति ।। ११ ।। एवं गोविन्दे ब्रुवति सति तस्य तत्क्ष्वेडितमित्येकान्वयः श्लोकद्विकस्य ज्ञेयः । इति परिहासवचनं दृष्ट्वा श्रुत्वा तदर्थं चानुभूयेत्यर्थः । प्रेमपरिप्लुतास्तपः फलितमिति प्रेम्णा परिप्लुता अन्योन्यं प्रेक्ष्य जातहासा व्रीडिताश्च सत्यो न निर्ययुर्यमुनाजलादिति शेषः । किञ्चास्य नर्मणाक्षिप्तचेतसः शीतोदे आकण्ठमग्ना अत एव वेपमानास्तमब्रुवन्निति । तस्य यामुनजलस्य सकाशान्न निर्ययुरिति वा एवमन्वये तस्य तत्क्ष्वेलितं दृष्ट्वेत्यनन्तरमेवं ब्रुवति गोविन्द इत्यवक्तव्यत्वादसाङ्गत्यापत्तेः ।। १२-१३ ।।

श्रीसुबोधिनी

ततो भगवान् स्वस्य तासां च मध्ये यदन्तरा स्थितं तद् वस्त्रमिति तानि हृतवानित्याह **तासां वासांसीति**, उपादाय स्वसमीपे नीत्वा स्वान्तःस्थितजगतो महतोप्याच्छादनार्थं तैराच्छाद्य सत्वरं **भगवान् नीपमारूढः, नीपः कदम्बः**, अन्यथान्तःस्थितेष्वाच्छादितेषु दैत्यप्रवेशः स्यात्, 'वैष्णवा वनस्पतय' इति न प्रवेशः, अत एव **सत्वरं** यथा भवति तथारोहणं, तासामावरणमन्यत्र स्थापितमित्यर्थः, नितराम् इं कामं पीबतीति **नीपः**, पातीति वा, अनेन तासु कामः स्थापित एव, अन्यथा निष्कामा एव भवेयुः, कामरक्षकश्चेद् भगवता समारूढो नातः परं निष्कामता तत्रत्यानां शङ्कनीया, किञ्च **हसद्भिर्बालैः** सह **प्रहसंस्तासां** सहजं कामं दूरीकृत्य स्वस्याधिदैविकं कामं प्रहसन् रूपं तत्र योजितवान्, बालाः पुनर्भगवच्चातुर्यं शौर्यं च दृष्ट्वा स्वकृतार्थतां परिज्ञाय हसन्तो जाताः सन्तोषेण यतो बाला बलकार्यार्थमेव तत्र नीताः, अत एव पुनस्तेषु ज्ञानशक्ति दास्यति, तेषामपि मायाधिदैविकी तत्र प्रविष्टेति प्रथमाकारणेनागमनं एवं कृत्वा **परिहासं परितो** हास्यं यथा भवति तथा सर्वतोभिमाननिवृत्त्यर्थम**ुवाच**, भगवान् सर्वेश्वरः कथमेवं वदतीत्याश्चर्यमाह हेति ।। ९½ ।। भगवतो वाक्यमाहात्म्यागत्येति, अस्मदीयः कामस्तत्र न गच्छत्यतोत्रैवागत्य **कामं वास** आच्छादकं वस्त्ररूपं **काममयत्वाद्** यथेच्छमिति लोकप्रसिद्धिः, **सर्वस्यैव कामस्याधिदैविकमत्र** तिष्ठतीतिः अतो वस्त्रसम्बन्धात् पूर्वं निष्कामा एव ताः, पुनरपि पूर्वकामवत् वस्त्रवद् वा हरणे ग्रहणं व्यर्थमित्याशङ्क्याह प्रकर्षेण **गृह्यतामिति**, दाने प्रयोजनमबला इति, बलमस्मादेव भवतीति, अत एव निरिन्द्रियाः स्त्रियोबला इत्युच्यन्ते, बहुव्रीहावपि निमित्ततायां स्वार्थं कामदानं वस्त्रदानं च अन्यथा मर्यादाभङ्गः स्यात्, वासोपि मयि स्थितं **प्रगृह्यतामि**तिध्वनिः, अस्मादीयाभिरेव वापूर्वपरिग्रहः कर्तव्य इति, अन्यथानिष्टः स्यात्, बालकानां मायया च व्याप्ता इति स्ववाक्येप्रामाण्यं ज्ञास्यन्तीत्यत आह **सत्यं** ब्रुवाणीति, **सत्यं** वदामीत्यर्थः, अनेन स्त्रीष्वनृतं वक्तव्यमित्यपि निराकृतं, नन्वनृतं न भवति दास्यसि परं नग्नदर्शनेनोपहासार्थं वदसीत्याशङ्क्याह **नो नर्मे**ति, **नर्म नो** न भवति, यद्यपि लोकदृष्ट्या **नर्मवद्** भाति तथापि वस्तुतो न **नर्म**, युक्तिमप्याहानर्मत्वे यद् यस्माद् यूयं **व्रतेन कर्शिताः** न हि व्रतिभिः सह नर्मोचितं नापि क्लिष्टैः, अन्यथा **नर्म**, वैरजनकं भवेत् ।। १०½ ।। किञ्चास्मत्स्वरूपविचारेणापि नानृतमेतद् भवतीत्याह न **मयोदितपूर्व**मिति, वेत्यनादरे समुच्चयार्थं च, **मया वा** कदाचिदप्युदितपूर्वमनृतं न भवति उदितमुक्तं पूर्वमुदितपूर्वं **मया वा** जगत्कर्त्रा हेतुनोदितः पूर्वः स्वजातीयो यस्य मत्तः कदाचिदप्यनृतं नोत्पन्नमिति वै निश्चयेन वा, तत्रैत आधिदैविका ऋषयः **साक्षिणोत इमे विदुः**, त्यक्ताधिदैविकत्वात् तन्मायामोहितत्वाच्च परं भवतीनां सन्देहः, आगमने प्रकारमाहैकैकशः प्रतीच्छध्वमिति **एकैकश** एकैका समागत्य 'स्वं स्वं' वस्त्रं गृह्णातु तदा प्रत्येकं भोगः, अथ वा सर्वथा निर्मत्सराः अत्यन्तभक्ताश्चेत् तदा सहैव वीतापि

अयं पक्षः साधीयान्, नन्वकर्तव्यं भगवान् कथमुपदिशतीत्याशङ्क्याह सुमध्यमा इति, शोभनं मध्यमस्थानं यासां, सुमध्यमा इति शुद्धान्तःकरणाः सर्वबन्धनसिद्ध्यर्थं च पूर्णज्ञानदृष्ट्या दृष्टाः सर्वतो भद्रा भवन्तीति ॥ ११½ ॥ एवं भगवतोक्ता अपि **नागता** इत्याह तस्येति, तस्य निरोधकर्तुर्भगवतस्तत् प्रसिद्धं क्ष्वेलितं दृष्ट्वा, अनेन वाक्यार्थो न विचारितः किञ्च तस्य तमवसरं दृष्ट्वा तस्य क्ष्वेलितत्वं निश्चित्य रसमध्ये स्वप्रवेशं नत्वा गोप्यो विशेषविचाररहिताः केवलं प्रेम्णा परिप्लुता जाता प्रथमतः स्नेहेनैव निमग्नाः, ततो जातान्तःसम्बन्धा बहिःसंवेदने जाते **व्रीडिता** जाताः, तदा प्रत्यक्षतो भुक्ता इवात्मानं मन्यमानाः संवादार्थमन्योन्यप्रेक्षणं कृतवत्यः, तदान्योन्यसम्बन्धसंवेदनाभावात् कौतुकं तद्रसं विदित्वा **जातहासा** जाताः, लोकरीत्यापि जातहासाः, तदा न निर्ययुर्न निर्गता जलाद् बहिः ॥ १२½ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अत्रैवाग्रे तासां वासांस्युपादायेत्यस्य विवरणे, उपादायेत्यारभ्यान्यत्र स्थापितमित्यर्थ इत्यन्तम् । अत्रायमाशयः । वस्त्रग्रहणोक्तेरादायेत्येतावतैव सम्भवेपि गृहीतस्य ग्रहीतृसामीप्ये अन्यतः प्राप्तेपि सामीप्यवाच्युपसर्गकथनं तद्विशेषाभिप्रायकमिति मन्तव्यम् । स एव स्वान्तःस्थितेत्यादिना निरूप्यते । तच्चिन्त्यते । 'यः पृथिव्यां तिष्ठ'न्नित्यादिश्रुतिनिरूपितत्वेन तस्य नैसर्गिकब्रह्मधर्मत्वाद् वस्त्रैस्तदाच्छादनकथनं न युक्तिगम्यम् । भगवता सह व्यवधानासम्भवाच्च । अत एव तेषु दैत्यप्रवेशोपि तथा । प्रयोजनं चाच्छादनस्य न विद्मः । तदभावार्थं नीपारोहणोक्तिरपि तथा । तत्र हि स्वयमारूढः । स्वनिष्ठत्वेन स्वद्वारा जगतस्तत्सम्बन्धो वाच्यः । एवं च सति भगवन्निष्ठत्वेनैव तत्प्रवेशासम्भवे तदारोहणं किमर्थम् । उच्यते । एके हि शास्त्रार्थत्वेन हरिं ज्ञात्वा तन्माहात्म्यं च भजन्ते । तदपि न साक्षात्, किन्तु श्रवणादिधर्मद्वारा । वस्तुतस्तु धर्मानेव भजन्ते, तेन वैदिकास्ते । अन्ये च पुत्रत्वादि धर्मपुरःसरमिति लौकिकधर्मद्वारा । अतस्तदनुरूपमेव फलं तेभ्यो हरिर्ददाति । एता हि धर्मिमात्रे पर्यवसितमतयः, न तु तद्धर्मेष्वपि । न वा धर्मद्वारा । नारदादिवद् यशोदादिवच्च । अत एव भगवताग्रे वाच्य'मेवं मदर्थोज्झितलोकवेदस्वाना'मिति । अत एव स्वभाविकलज्जात्यागोपि । एवं सति **'ये यथा मां प्रपद्यन्त'** इति वाक्यादेतदनुरूपमेव भगवतापि कार्यम्, सर्वमर्यादात्यागपूर्वकमेतद् भजनमिति । भगवतापि स्वस्वरूपमर्यादाप्येतदर्थं त्यक्ता । अत एव 'आत्मारामोपी'ति वक्ष्यते। 'साधवो हृदयं मह्य'मित्यत्र 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी'त्यपि भगवतोक्तम् । अन्यथा अकुण्ठितज्ञानशक्तेस्तदन्याज्ञानकथनमनुपपन्नं स्यात् । एषा हि पुष्टिलीला । अत्र मर्यादामार्गवैपरीत्यं न दोषाय किन्तु गुणाय, मार्गस्यैव तथात्वात् । एवञ्च सत्येतावद्दर्शनं स्वातिरिक्तस्य यथा न भवति तथाच्छादनं कृतमिति बुध्यस्व । 'नाहं तेभ्य' इति वाक्याद्यथा ज्ञानं नान्यविषयकम्, तथा स्वरूपमप्येतदर्थं प्रकटीभूतमेतदितरासम्बद्धमिति भगवता सह व्यवधानमपि सम्भाव्यते । अलौकिकश्चायमर्थो वचनबलेन भक्तिभावितान्तर्हृदयेन चावगन्तव्यः । अतो न व्यापकत्वेन तदसम्भवः शङ्कनीयः । अन्यथा 'हृदिस्थं कुरु केशवम्' 'विसृजति हृदयं न यस्ये'त्यादिकमनुपपन्नं स्यात् । श्रुतिरपि 'तद्दूरे तदन्तिक' इत्येतदभिप्रायिकैव । धर्मिग्राहकमानसिद्धं वस्त्वेव तथेति नानुपपत्तिः काचित् । यत्तु 'नीपारोहणानुपपत्ति'रिति तत्रोच्यते । भगवान् हि लीलां कुर्वन् शास्त्रार्थमपि बोधयति । एतद्भाववतामिव साक्षात्पुरुषोत्तमसम्बन्धः, अन्येषां दूरतरः । तेष्वासुरधर्मप्रवेशश्चावश्यकः । स च भगवदधिष्ठितैर्वैष्णवैस्तदुक्तधर्मैः श्रवणादिभिश्च शीघ्रं निरस्य इति ज्ञापनार्थत्वमाच्छादनारोहणयोरित्येतत्तात्पर्यकोयं ग्रन्थ इति नोक्तानुपपत्तिः । ननु सेवकेषु सत्सु स्वयमीश्वरः कुतो वस्त्राणि जगृहे । अगृहीत्वैव तन्निकट एव वा कथं नाकारितवांस्तत्राह **तासामावरणमिति** । नह्यत्र वसनग्रहणमुच्यते । किन्त्वेतासां साक्षाद्भगवत्सम्बन्धेन्तरायस्य हरणम्, तच्च नान्यशक्यमिति वस्त्रव्याजेन तद्धृत्वान्यत्र पूर्वोक्ते स्थापितमित्यर्थः । भगवत्कृतिर्लौकिकवत् प्रतीयते, परं वस्तुतस्त्वलौकिकी । तत्त्वेन भानं च भगवद्दृशैव भवति, नान्यथेति भावः । एतदग्रे **हसद्भिः प्रहसन्बालैरित्यत्र, तेषामपि मायाधिदैविकीत्यादि** । यदि बालान् स्वसम्बन्धित्वेन जानीयुस्तदा पुरुषान्तरत्वज्ञानाभावेन तद्दृष्टिपातेपि भयाभावज्ञानाभावात् प्रथमाकारण एवागच्छेयुः । ते च तथा न ज्ञापयन्त्यन्यथा च ज्ञापयन्तीति तत्कापट्यं माया । तथा च पुरुषान्तरत्वज्ञानेन स्वस्य चानन्यत्वेन तच्छङ्कया नागता इति एतेषामधिदैविकत्वेन भगवदिच्छानुसारित्वेन च तत्राधिदैविकत्वम् । प्रभोरिच्छा तु रसविशेषार्थं परीक्षासम्पत्त्यर्थं चेति ॥ ९ ॥ **अस्मदीयः काम** इति । लोके हि क्रियाफलस्य स्वसामानाधिकरण्यवैयधिकरण्यविवक्षयैव गतिक्रियायामागमनगमनशब्दौ प्रयुज्येते वक्त्रा, तथा चागत्येत्येतावतैव स्वनिकटदेशप्राप्तावत्रेतिपदं किमर्थम् । न चाभिमुख्यस्यैवाङर्थत्वेन देशविशेषाकांक्षापूरकत्वेनात्रपदं सार्थकमिति वाच्यम् । 'स्वं स्वं वासः प्रगृह्यता'मिति वाक्यादागमनस्य तदर्थत्वादन्यत्र स्थितौ ग्रहणासम्भवात् तत एव तद्योग्यतत्प्राप्ते । दण्डेन घटं कुर्वित्यत्र दार्ढ्यस्येव । अपरञ्च । आभिमुख्यपदार्थोपि विचारणीयः । न च सांमुख्यमात्रं सः । सम्मुखं स्थित्वा पश्चाद्गच्छत्यप्यागच्छतीति प्रयोगापत्तेः । किन्तु वक्तृनिकटदेशसंयोगफलकक्रियाजनकप्रयत्नः सः । इतोपि नात्रपदं सार्थकम् । न च तत्रागत इतिप्रयोगान्न तथेति वाच्यम् । तत्र प्रयोगद्वयमपि लोके दृश्यते । उक्तरूपाभिप्रायवतस्तु नियमत आङ्प्रयोगो दृश्यत इत्याङोऽत्र शक्तिः । तत्रागत तु इत्यादौ तु वक्ष्यमाणदेशस्याभीष्टत्वेन तत्र स्वस्थितिमिवमन्यमानस्यौपचारिकः प्रयोग इति त्वयाप्युररीकर्तव्यमिति चेत् । उच्यते । एतावत्पर्यन्तं भावनयैवैताः सर्वं कृतवत्यः, न तु साक्षाद्भगवत्प्राकट्येन । तच्च साक्षादप्राप्तावेवोचितम्, न तु प्राप्तावपि, एतदतुल्यत्वात् । जातेपि प्राकट्ये पूर्वोक्तस्थितिर्नोचितेति भावितं तत्कार्यं

च त्यक्त्वा अत्र प्रकटे मय्यागत्य वासः प्रगृह्यतामित्यर्थः । किञ्च,, एतावत्कालपर्यन्तं भावनयैव कामपूर्तिरासीत् । स च न मुख्यः कामः, किन्तु तदाभासः । अतो मुख्यं काममेव ददामि वासोरूपेण लोके परिदृश्यमानं परं वस्तुतस्तु मदीयकामरूपमिति सामानाधिकरण्यमुक्तं **कामं वास** इति । अत एवाग्रेन भावनामात्रेण कामपूर्तिः साक्षात्सम्बन्धं विना । एतदेवाभिसन्धायोक्तमाचार्यैः, **रस्मदीय कामः**' इत्यादि । तत्र भावनायां मुख्यः कामभावो न भवतीत्यर्थः । **अन्यथेति** । ईश्वरत्वेन तन्निमित्तकबलाभावस्याभावे रसमर्यादाभङ्गः स्यादित्यर्थः दत्तस्यादानं ग्रहणम् । तत्र प्रियस्य रसवशात् स्वाधीनत्वे सति तदीयस्यादत्तस्यापि रसाधिक्येन बलाद्वाससो ग्रहणं प्रकर्षः प्रशब्देन ध्वन्यत इत्यभिप्रायेणाहुः **वासोपीत्यादि** । अत्र स्वं मदीय स्वं स्वकीयं यथा भवति तथा प्रगृह्यतामित्यर्थः । एतेन भवतीषु नादेयं किञ्चिदस्तीति सूचितम् । सम्बोधनेन पूर्वं बलरहिता अपि मन्निकटे समागत्योक्तरूपबलवत्यो भवत्यो भवन्त्वित्यप्यर्थः सूचितः । वाच्येर्थे वासासमेतदीयत्वस्यानुक्तिसिद्धत्वेन तदुक्तिवैयर्थ्यमाशंक्येत, तदपनोदनाय तद्ध्वनितमर्थं पक्षान्तरत्वेनाहुः अस्मदीयाभिरित्यादिना । अधुना ह्येता वस्त्रवत्कामभावमपि त्यक्त्वा विहरन्ति, मुदेति दाद्भावनयैव पूर्णमनोरथा इति ज्ञापनात् तथा च सम्बोधनेन स्वातन्त्र्याभावात् स्वानधीनत्वेन स्वकीयत्वं ध्वन्यते, तेन ग्रहणेधिकार उक्तो भवति स्वपदाभ्यां च पूर्वसिद्धं स्वत्वमनूद्यत इति ऋषित्वदशायां प्रार्थनाहेतुर्यः कामः पूर्वं इहैव वा पूर्वकालीनो यः स ध्वन्यते । एतदेवोक्तमस्मदीयाभिरेव **पूर्वपरिग्रहः कर्तव्य** इत्यनेन । पूर्वपरिग्रहस्त्यक्तार्थपरिग्रह इत्यर्थः । अन्यथेति । **अस्माभिर्न**तबलेनैतावत्साधितम् । तेनैव अन्यदपि साधयिष्यत इति भावे सति भगवदधीनत्वाभावेनोक्तरूपाधिकाराभावात् कर्मफलस्याल्पत्वेन तथाफलत्वेन दत्तवस्त्रपरिग्रहोऽनिष्टः स्यात् । सर्वभावप्रपत्त्यैकलभ्यो रसो हीष्टः । तदितरोऽनिष्ट स स्यादित्यर्थः । एतेन पूर्वं स्वं स्वकीयमेवाधुना त्यागात् पुनः स्वं यथा भवति तथा गृह्यतामित्यर्थो मूलस्य ध्वन्यते । पूर्ववत् प्रचुरभावयुक्ता भवन्त्विति भावः । भगवतो हि स एवेष्टः । अन्यथा रसाभासः स्यात् । एतदेवान्यथानिष्टः स्यादित्यनेनोच्यते । अथवा । वीप्सया नायिकाभेदेन यादृश्या यादृशो भावस्तादृशी तादृशमेव तं गृह्णातु, न विजातीयमित्यर्थो ज्ञाप्यते । विजातीयग्रहणे रसपोषो न स्यात् । एतदेवोक्तमन्यथेत्यादिना । उच्छलिते रसे त्वन्या व्यवस्थेति न काचिदनुपपत्तिः । तदर्थमेवैतत्करणं यतः । यद्वा । त्यागात्यागनिर्णयरूपत्वादेतत्प्रकरणस्य तन्निर्णयोप्यनेन ध्वन्यत इत्याहुः अस्मदीयाभिरित्यादि । अत्रायमाशयः । अधुनैतासां भाव्यवस्थान्तरस्फूर्तौ हि स्वत्वानुसन्धानपूर्वकं वसनस्थापनं तीरे स्यात्, किन्तु रसभरवशेनेयमेवावस्था मे सार्वदिकी कदाचित् तदपेक्षायां प्रियस्योत्तरीयमेव ग्रहिष्य इति प्रत्येकं भावोत्पत्ते र्वसनानां त्याग एव कृतः, न तु स्थापनमात्रम् एवं सति त्यक्तार्थपरिग्रहत्वेन तद्ग्रहणं न युक्तं स्यादिति । तन्निषेधकवाक्यस्य मर्यादामार्गीयपरत्वात् धर्मिपराणां वचनानधीनत्वेन केवलं तदधीनत्वात् तद्दत्तस्य त्यक्तस्यापि ग्रहणं युक्तमेवेति । अन्यथा मर्यादामार्गीयत्वमित्यर्थः । किञ्च, केवलवस्त्राणां त्यागोभूत्, भगवांस्त्वधुना स्वकीयकामरूपाणि तानि ददातीति त्यक्तार्थतापि नात्र । आचार्यैस्तु लोकदृष्टिमपेक्ष्य समाहितम्, त्यागनिर्णयकथनार्थं च । वा पूर्वपरिग्रह इत्यत्र नञ्प्रश्लेषो वा कार्यः । यद्वा । पूर्वपदेन पूर्वः पुंस्त्वाख्यो धर्म उच्यते । तदभावे सर्वभावप्रपत्तिनं स्यादित्युक्तम् । तेन पूर्वं दण्डकारण्ये पुरुषा एव गोकुले समागत्य स्त्रियो जाता इति पूर्वसम्बन्धं स्वस्य स्मारयन्नत्रागत्याबला इत्यनेन सम्बोध्य कर्तव्यमाह । सः तच्छब्दस्य पूर्वपरामर्शित्वेन पूर्वः पुंस्त्वाख्यो धर्मं प्रगृह्यतामिति । अत्र स्वशब्दस्याव्ययरूपस्य कथनात् तद्विशेषणत्वम् । ध्वनितेर्थे लिङ्गादेरविवक्षितत्वेनापि तथा । क्रियाविशेषणं वा । सर्वभावप्रपन्नाभ्य एव स्वानन्दं शृङ्गाररसरीत्यैव दास्यति । स च मानखण्डितादिभावैरेव पूर्णो भवति । सर्वात्मभावस्फूर्तौ च न तत्सम्भव इति कदाचित् तत्सम्भवः कदाचिन्नेति विकल्पेन गृह्यतामित्याह वाशब्देन । विसर्गलोपश्छान्दस इति मूले ध्वनितोर्थो ज्ञेयः ॥ १०–½ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अन्तरास्थितमिति प्रतिबन्धनिवृतेः प्रार्थितत्वात् कन्यावरयोर्विवाहे जवनिका दूरीक्रियते इतिविवृतत्वाच्च तदर्थं वस्त्राणि हृतवानिति ज्ञापयितुमेवमाभास **उक्तः**, **तासां वासांसी**त्यत्र किञ्चेति नीपारोहणेन निष्कामताशङ्काभाव उक्तः, प्रहसन्रूपकामयोजनेन च तदभाव इतिसमुच्चयः, **बलकार्यार्थमेवेति** तासु स्थापनेन पुंस्त्वप्रकारकरसानुभवार्थमित्यर्थः, **अत** एवेति दृष्टिद्वारा स्थापनेन यथोचितभोगानुकूलां ज्ञानशक्ति बालेषु दास्यतीत्यर्थः ॥ ९½ ॥ **अत्रागत्येत्यत्र काममयत्वाविति "सोमाय वास"** इत्यत्र 'क इदं कस्मा ददात् कामः कामाये' तिश्रुतेरित्यर्थः, **आधिदैविकमिति** स्वरूपमित्यर्थः, अत्र वस्त्रेष्वित्यर्थः, **निरिन्द्रिया** इति इन्द्रियं सामर्थ्यं तद्रहिता असमर्था इत्यर्थः, बहुव्रीहावपीति असमर्थानां भोगासम्भवाद् बलसम्पादनमपि मदर्थमेवेति स्वार्थमेवंतद्द्वयदानं षष्ठ्यन्तबहुव्रीहावपि सिद्धं न बलं याभ्यो यन्निमित्तकं बलं मम नास्त्यहं भवदधीनोऽतो ददामीत्यर्थः, एवं निमित्ततायां बहुव्रीहौ निमित्तताबोधनार्थंकचतुर्थ्यन्तबहुव्रीहावपि तथैव सिद्धमित्यर्थः, **मायया** चेति परिहासकथनं चकारार्थः ॥ १०½ ॥ **न मयोदितेत्यत्र मया** वेति मत्कर्तृकं जगन् नान्ततं किन्तु सत्यमेवेत्यर्थः ॥११½॥ तस्येत्यत्र **अनेनेति** क्ष्वेलितत्वकथनेनेत्यर्थ, तथा च विचाराभावात्, क्ष्वेलितत्वज्ञानं, हेत्वान्तरमप्याहुः किञ्चेति, **अन्योयेति** अन्योन्यं सम्बन्धसंवेदनाभावस्तस्मात् तस्याः सम्बन्धस्तया तस्याः सम्बन्धस्तया न ज्ञायत इत्यर्थः, **कौतुकमिति** स्वस्या एवान्तःसम्बन्धो नान्यासामिति मत्वेत्यर्थः ॥ १२½ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तासां वासांस्युपादायेत्यस्य विवृतौ **स्वान्तःस्थितेत्यारभ्य अन्यत्र स्थापित**मित्यादेरर्थष्टिप्पण्यां प्रपञ्चितोऽस्ति, उपपत्तिश्च नितेरां इं कामं पिबतीति **नीप** इति, इकारस्य कामबीजत्वं मन्त्रशास्त्रे सिद्धं, तथा **च** इं कामं पिबति कामभोगं करोतीतियावत्, **बलकार्यार्थंमेव तत्र नीता** इति पुम्भावरमणरूपबलकार्यार्थं **तत्र** वस्त्रग्रहणस्थले **नीता** इत्यर्थः, अस्मिन्नध्याये सुबोधिनीफक्किका बह्व्यो गूढार्था सन्ति ता यद्यपि व्याख्येयास्तथापि श्रीमत्प्रभुचरणैर्विस्तरेण टिप्पण्यां व्याख्याता इति ततोवधेयम् ॥ ९½ ॥ **अत्रागत्याबला इत्यस्य** विवृतौ बहुव्रीहावपि **निमित्ततायामिति** निमित्तत्तायां बहुव्रीहावपीत्यन्वयः, निमित्तताज्ञापकं बहुव्रीहौ न बलं याभ्य इतिविग्रहे **यन्निमित्त** मयि बलं नास्ति, सर्वेभ्यो मम बलं, **भवतीभ्यस्तु मयि बलं नास्ति,** "अहं भक्तपराधीन" इत्यारभ्य "वशे कुर्वन्ति मां भक्त्ये"तिवाक्याद् "**यथा** भक्तिमतामिहे"त्यादिवाक्याच् च भवदधीनोहं न भवतीषु मद्बलमितिभावः, **अन्यथेत्यादि** यदि कामं वस्त्रं वः न दद्यां तदा अबलात्वमेव तिष्ठेत् न बल, तथा सति मदीयकामं विना मया सह रमणे योग्यताया अभावाद् रसन्यूनतैव तिष्ठेत्, तथात्वे **रसमर्यादाभङ्गः स्यादित्यर्थः**, अथ वा ये मद्भक्तास्तादृशं मदानन्दानुभवायोग्यास्तेषु योग्यतामपि सम्पाद्यानन्दानुभवं चेन् न कारयेयं तदा 'ये यथा मां प्रपद्यन्त' इतिवाक्योक्तभक्ति**मार्गमर्यादाभङ्गः स्यादित्यर्थः, वासोपि मयि** स्थितमित्यादीनामर्थष्टिप्पण्यां स्फुट एव, **बालकानां माययेति** "हसद्भिः प्रहसन् बालै"रितिवाक्याद् बालकानां हास्यरूपया मायया व्याप्ताः, अस्माकं परिहासो भगवता बालैश्च क्रियते इतिज्ञानाद् भगवद्वाक्ये प्रामाण्यबुद्धिर्न भविष्यतीत्याशङ्क्य **सत्यं ब्रुवाणीत्युक्तं** भगवतेतिभावः ॥ १०½ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्रागत्य च तासां वासांस्युपादाय गृहीत्वा सत्वरः त्वरया सहितो नीपं कदम्बमारुह्य हसद्भिर्बालैः सह स्वयमपि प्रहसन् परिहासवचनमुवाच । भगवल्लीलाया आश्चर्यं सूचयति—हेति ॥ ९ ॥ तद्वचनमेव दर्शयति—अत्रेति । हे अबलाः ! अत्रागत्य कामं यथेष्टं स्वं स्वं वासः प्रगृह्यताम् । इदं सत्यमेव ब्रवाणि, नो नर्मं न परिहासम् । तत्र हेतुमाह—यत् यस्मात् यूयं व्रतेन कर्शिताः श्रान्ताः । एवंभूतासु नर्मवचनं नोचितमित्याशयः ॥ १० ॥ स्ववचने ससाक्षिकं प्रमाण्यमाह—नेति । मया अनृतं नोदितं पूर्वम्, मया पूर्वं कदाप्यनृतं नोक्तमित्यर्थः । तत् अनृतस्यानुक्तपूर्वत्वं इमे गोपा विदुर्जानन्ति । परिहासमेव सूचयन् सम्बोधयति—सुमध्यमा इति । अतः एकैकशोऽत्रागत्य, उत अथवा सहैवागत्य वासांसि प्रतीच्छध्वं स्वीकुरुत । अत्र नास्माकमाग्रहः ॥ ११ ॥ तदेवं वस्त्रहरणादिरूपं तस्य क्ष्वेलितं दृष्ट्वा प्रेम्णा परिप्लुता व्याताः अन्योन्यं वीक्ष्य व्रीडिताश्च, जातो हासो यासां ता गोप्यो जलाद्बहिर्न निर्ययुः ॥ १२ ॥

अन्वितार्थप्रकाशिका

तासामिति ॥ तत्रागत्य च तासां वासांस्युपादाय सत्वरः नीपं कदम्बमारुह्य हसद्भिः बाल्यान्निष्कारणहास्यवद्भिः बालैः सह स्वयमपि प्रहसन् परिहासवचनमुवाच ॥ ९ ॥ अत्रेति ॥ हे अबलाः ! अनेन मद्वचनाकरणे युष्माभिः किं कर्त्तुं शक्यमित्युक्तम् । अत्रागत्य कामं यथेष्टं स्वं स्वं वासः प्रगृह्यताम् । इदं सत्यमेव ब्रुवाणि । उकारस्वरवानार्षः पाठः । ब्रवाणीत्यपि पाठः । नो नर्मं नेदं परिहासवाक्यम् । यत् यस्मात् यूयं व्रतेन कर्शिताः श्रान्ताः एवंभूतासु नर्मवचनं नोचितमित्याशयः ॥ १० ॥ नेति ॥ हे सुमध्यमा ! मया अनृतं नोदितपूर्वं मया पूर्वं कदाप्यनृतं नोक्तमित्यर्थः । उदितपूर्वमित्यत्र सुप्सुपेति समासः । तत् अनृतस्यानुक्तपूर्वत्वम् । इमे गोपा विदुर्जानन्ति । बालानां यथा दृष्टग्राहिस्वभावत्वादेते पृच्छयन्ताम् । अतो यदि मत्तः शङ्कध्वे तर्हि एकैकशोऽत्रागत्य वासांसि प्रतीच्छध्वम् । तङार्षः । स्वीकुरुत । प्रथममवरा काचिदागच्छतु ततः क्रमेणान्य इति । यदिप्रथमायै न दद्यां तर्ह्यन्याभिर्नागन्तव्यमिति । उत अथवा सहैवागत्येति अत्र नास्माकमाग्रहः ॥ ११ ॥ तस्येति ॥ तत् वस्त्रहरणादिरूपं तस्य क्ष्वेलितं परिहासं दृष्ट्वा प्रेम्णा परिप्लुताः व्याप्ताः अन्योन्यं प्रेक्ष्य व्रीडिताश्च जातो हासो यासां ता गोप्यो जलाद्बहिर्न निर्ययुः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सत्वरः शीघ्रं नीपं कदंबं परिहासं उपहासवाक्यं ॥ ९ ॥ हे अबलाः कामं स्वेच्छया स्वं स्वं । स्वकीयं स्वकीयं वस्त्रं युष्माभिः प्रगृह्यतां नो नर्म नोमहासः यद्यतः यूयं व्रतेन कर्शिताः क्षमाः ॥१०॥ अनृतं उक्तपूर्वं नास्ति तत् सत्यस्वभावत्वं इमेगोपाः एकैकशः सहैव वा आगत्य प्रतीछध्वं गृह्णीध्वं ॥ ११ ॥ क्ष्वेलितं परिहासोक्ति प्रेमपरिप्लुताः प्रेमरसनिर्भताः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तासामिति ॥ तासां कुमारिकाणां, वासांसि उपादाय गृहीत्वा, सत्वरस्त्वरान्वितः सन्, नीपं कदम्बतरुं, आरुह्य, हसद्भिः बालैः सह, प्रहसन् सन्, ह स्फुटं यथा तथा, परिहासं परिहासवाक्यं, उवाच ॥ ९ ॥ तदेव दर्शयति ॥ अत्रेति ॥ हे अबलाः, अत्र आगत्य, स्वं स्वं वासः, कामं यथेष्टं, प्रगृह्यताम् । एतत् सत्यमेव, ब्रवाणि । नर्म परिहासं, नो नैव । यद्यस्मात्, यूयं व्रतकर्शिताः

व्रताचरणेन श्रान्ताः । व्रतिनां पुरोऽनृतभाषणस्यायुक्तत्वात् ॥ १० ॥ स्ववचनप्रामाण्यं ससाक्षिकमाह ॥ नेति ॥ मया अनृतं न वा नैव उदितपूर्वं नोक्तपूर्वं, कदापि मयाऽनृतं नोक्तमित्यर्थः । तदनृतस्यानुक्तपूर्वत्वं, इमे गोपाः, विदुः । अतः हे सुमध्यमाः, एकैकशः आगत्य, प्रतीच्छत्त्रं स्वीकुरुत । उताथवा, सहैव प्रतीच्छध्वम् । नास्माकं तत्राग्रहः ॥ ११ ॥ तस्येति ॥ एवं तस्य श्रीकृष्णस्य' तदुक्तविधं, क्ष्वेलितं परिहासं दृष्ट्वा, प्रेमपरिप्लुताः प्रेम्णा परितो व्याप्ताः, अन्योन्यं प्रेक्ष्य च व्रीडिताः, गोप्यः, जातहासा हसन्त्यः सत्यः, न निर्ययुः । जलादिति शेषः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वासांस्युपादायेति : १०.२२.९.

यन्मह्यमर्पणीयं तदनिशमभिरक्षितं किलामीभिः । इति तत्मूल्यमिवासौ करतः स्वानुग्रहं चकार विभुः ॥ २३ ॥
यन्मां भूतादिकरं वदति जनेष्वागमाखिलेषु भवान् । तत्पश्य पश्यतु जनस्त्वदविश्रम्भीति सोऽम्बरकरोऽभूत् ॥ २४ ॥
गच्छन्नेव स भगवांस्तत्पटनिचयं जहार युक्तमिदम् । यद् गोकुले विहरतः सिद्धाऽस्य विभोः सदाधिकपटरुचिः ॥ २५ ॥
यद्वस्तु स्ववशे विधेयमिति यश्चित्ते चिरं चिन्तयत्यारात् तेन तदीयरक्षकगणो दानेन भेदेन वा ।
नेयः पूर्वमधीनतां नयमिमं जानन् प्रभुस्तत्कृते चक्रे भूरि करार्पणं पटचये तद्रक्षके सक्षणम् ॥ २६ ॥
सत्यावरणे सुदृशामपि न मदीयप्रसादसौलभ्यम् । इति किं तदनुजिघृक्षुः पटहृतिमिषतोऽहरत्तदावरणम् ॥ २७ ॥
अस्मच्चेतो वासो विलसतु भगवति सदेति तत्कामम् । प्रभुणा पूरयता तन्मिषतः स्वस्मिन् न्यधायि तद्वासः ॥ २८ ॥
गुणिजनसङ्ग्रहकामो भवति गुणज्ञः स्वतश्च गुणवान् यः । तदुचितमनेकगुणवत्पटसङ्ग्रहमकृत सकलगुणकीर्तिः ॥ २९ ॥
अम्बरकरता सिद्धा तथाम्बरावरणमपि जगति । आगमशाखाविलसनमपीति विभुना न्यदर्शि निजरूपम् ॥ ३० ॥
परगुह्यगोपनचणा गुणिनः सद्रागरञ्जिता नितराम् । तानागमपदकलितांश्चकार करतः प्रभुर्हि तद्युक्तम् ॥ ३१ ॥
व्रतं वा जपो वा तपो वाऽध्वरो वा विना दानमस्मिन् वृथैवाखिलं तत् ।
अतस्तद्व्रतं पूरयन् प्रत्यगृह्णात् स्वयं तानि कृष्णार्पणं कल्पयन् सः ॥ ३२ ॥

हसद्भिरिति :

जडजातविहृतिसाधनमेकं स्मृतिजातसिद्धमावरणम् । तस्मिन् हृतेऽपि जडगतमतयोऽद्यापीति जहसुरखिलास्ते ॥ ३३ ॥
यावदवरणमस्ति दुर्लभं तावदेव मम दर्शनं भुवि । बोधयन्निति समुज्झिताम्बरा वीक्ष्य ताः प्रभुरदात्स्वदर्शनम् ॥ ३४ ॥
गूढार्थकोपदेशो यत्र विधेयोऽस्ति धीमता तत्र । बाह्यदृशा परिहासो यथाऽवभासेत तादृगिह वाच्यम् ॥ ३५ ॥
अम्बरं जितमिदं मम चेतो येन तुष्यति तदेव दिशत्वम् । सर्ववित्त्वमनुबोधयिताऽसौ प्राक् तदुक्तगिरमेवमवादीत् ॥ ३६ ॥
निःशेषावरणं गतं यदि तदा भूयस्तदासक्तिभिर्भाव्यं नैव जनैरिति श्रुतिगतः पक्षोऽस्ति मुख्यो मम ।
तत्सङ्ग्राहकवासना यदुदिता तत्क्षणे धीमता सन्त्याज्या जडजातसङ्गतिरिति श्रीशः सदेवाब्रवीत् ॥ ३७ ॥

सत्यमिति–१०.२२.१०.

न बुद्धिभेदं जनयेदितीरितं मयैव तस्मान्नहि नर्मभृद्वचः अवोचमेवं न पुरो वदामि वेत्यङ्कमायात जडाद्धृतव्रताः ॥ ३८ ॥
अवोचमनृतं पुरा क्वचिदपीति मे न स्मृतिर्लसत्स्मृतिभुवां च वो यदिह सास्ति तद्भण्यताम् ।
इमानपि च पृच्छत स्वागतसंशयोच्छित्तये यतः स्मृतिमदन्तरा इति भवत्प्रसिद्धा इमे ॥ ३९ ॥

एकैकश इति—१०.२२.११.

एकैकशश्च सह वाऽऽगमनेऽपि तुल्यं पक्षद्वयं मम तु चिन्तयताऽऽत्मभावम् ।
बुद्ध्वा परस्परमकृत्रिमहार्दधर्मं कामं यथेच्छत तथा कुरुतोत्तमाङ्गयः ॥ ४० ।
योऽनङ्गधीस्त्यक्तरसोऽप्यस्मिन् भूयाद्रसाश्रितः । स मत्प्रेमेक्षणार्हः स्यादित्युक्तं मन्मतं मया ॥ ४१ ॥
तद्व्रतफलदेनापि प्रभुणा ब्रुवता ससाक्षिकं तत्र । आबोधि स्वाचरणादैकान्तिकयुवतिभाषणनिषेधः ॥ ४२ ॥

व्रीडिता इति : १०.२२.१२.

प्रभुचरित्रमवाङ्मतिगोचरं समवलोक्य तदा श्रुतयोऽखिलाः । निजनिजात्मसमन्वयकामुका जडगता नितरामवतस्थिरे ॥ ४३ ॥
निजां जडात्रस्थितिमेष माधवो दयार्द्रदृष्ट्या परिहर्तुमागतः । ध्रुवं विदन्त्योऽपि ततो न निर्ययुर्बहिर्युवत्यो विरसत्वशङ्कया ॥ ४४ ॥
नैवालक्षि यदीयरूपममलैर्वेदैश्च यो नेक्षितो ब्रह्माद्यैरमरैरपीति कतमस्तादृक् परः पुण्यवान् ।
सोऽयं श्रीपतिरैक्षि यस्य बहुशोऽध्यासात्तमेतं रसं त्यक्तुं नाम यतेत का युवतिरित्यालोच्य तस्थू रसे ॥ ४५ ॥
यास्ते गिरो यदुपते वयमेव ताः स्मस्तन्नर्म वा सदिति वा किमु शोधनेन ।
वाग्वृत्तिदूरतरकेलिपदस्य तेऽमूर्वाचः कुतूहलकृता इति सिद्धमेव ॥ ४६ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण, स्वयं गोपकुमारिकाओं के वस्त्रों को अपने पास लेकर, उठाकर बडी फुर्ती से एक कदम्ब के पेड पर जा बैठे और कृष्ण के साथी ग्वाल बाल ठठ्ठा-ठठ्ठाकर हँसने लगे, श्रीकृष्ण भी स्वयं हँसने लगे और हँसते हुए यों हँसी के वचन बोले॥ ९॥ हे अबलाओं ! हे कुमारिकाओं ! आप यहाँ स्वयं आकर यदि चाहो तो अपने-अपने वस्त्र ले जाओ। मैं आप सब को सत्य बात ही कह रहा हूँ, हंसी नहीं करता, क्योंकि आप सब व्रत करते-करते निर्बल एवं कृश हो रही हो॥ १०॥ अरी कुमारियों! मेरे सब सखा साक्षी है, वे जानते है कि, मैंने अबतक, प्रथम जो कुछ कहा वह झुठ नहीं हैं। हे सुमध्यमाओं ! हे सुन्दरीओं ! आप एक एक करके आकर अपने अपने वस्त्र ले लीजिए अथवा सब एक ही साथ आओ और वस्त्र ले जाओ॥ ११॥ भगवान के उस हँसी भरे कार्य को देखकर गोपियाँ प्रेम में सराबोर हो गई एवं लज्जान्वित भी हो गई। पुनः वे एक दूसरी की ओर देखकर मुसकराने लगी और जल से बाहर नहीं निकली॥ १२॥

एवं ब्रुवति गोविन्दे नर्मणाऽऽक्षिप्तचेतसः। आकण्ठमग्नाः शीतोदे वेपमानास्तमब्रुवन्॥ १३॥
[1]मानयं भोः कृथास्त्वां तु नन्दगोपसुतं प्रियम्। जानीमोऽङ्गव्रजश्लाघ्यं देहि वासांसि वेपिताः॥ १४॥
[2]श्यामसुन्दर ते दास्यः करवाम तवोदितम्। देहि वासांसि धर्मज्ञ नो[3] चेद् राज्ञे ब्रुवामहे॥ १५॥

श्रीभगवानुवाच

भवत्यो यदि मे दास्यो मयोक्तं वा करिष्यथ। अत्रागत्य स्ववासांसि प्रतीच्छन्तु [4]शुचिस्मिताः॥ १६॥[5]

कर्दमक्षमा

अन्वयः-गोविन्दे एवम् ब्रुवति, नर्मणा आक्षिप्तचेतसः शीतोदे आकण्ठमग्नाः वेपमानाः तम् अब्रुवन्॥ १३॥ हे अङ्ग ! भोः! अनयम् मा कृथाः त्वाम् तु नन्दगोपसुतम् प्रियम् व्रजश्लाघ्यं "जानीमः", हे अङ्ग वेपिताः "वयम्" वासांसि देहि॥ १४॥ श्यामसुन्दर ! ते दास्यः, तव उदितम् करवाम, हे धर्मज्ञ ! वासांसि देहि, नो चेत् राज्ञे ब्रुवामहे॥ १५॥ भवत्यः यदि मे दास्यः, मया उक्तम् वा करिष्यथ, "तर्हि" हे शुचिस्मिताः अत्र आगत्य स्वस्व वासांसि प्रतीच्छन्तु॥ १६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र मुग्धा ऊचुः। अंग भोः श्रीकृष्ण अनयमन्याय्यं मा कृथाः॥ १४॥ प्रौढा ऊचुः। नो चेद्राज्ञे नंदाय कंसाय वा ब्रुवाम ब्रवाम हे कृष्णेति॥ १५-१६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवम् उक्तरीत्या। वेपमानाः कंपमानः। तम् श्रीकृष्णम्॥ १३॥ तत्र तासां मध्ये। मुग्धाः,-अंकुरीतयौवना मुग्धाः। अंकुरादेर्वृक्षधर्मत्वेन यावनबाधात्प्रत्यग्रत्वं लक्ष्यते, तेन शोभातिशयो व्यज्यते। एवं च पतिमात्रानुरागवत्त्वे सति प्रत्यग्रयौवनत्वमिति फलितं मुग्धा लक्षणम्, तेन सामान्यवनिताप्रतिपालितास्वंकुरितयौवनासु नातिव्याप्तिः॥ १४॥ प्रौढाः-पतिमात्रविषयकेलिकलापकोविदाः प्रौढाः। पत्यतिरिक्तकेलिकलाभाववत्त्वे सति केलिकलाप्रावीण्यमित्यर्थः। वेश्यायां कुलटायां च पतिमात्रविषयत्वाभावान्नातिव्याप्तिरिति। नंन्दस्य पितृत्वात्ततो न मे भयमित्यस्वारस्यादाह-कंसाय वेति। केचित्त्वत्र वर्णचतुष्टयजास्ता इत्यूचुः। दास्य इत्युक्तवंत्यः शूद्रजाः, करवामेत्यादिवचना वैश्यजाः, देहीत्यादिवचना विप्रजाः, नो चेदित्यादिवचनाः क्षत्रियजा इति। "न जारजातस्य ललाटश्रृंगं कुलप्रसूतस्य न पाणिपद्मम्। यथायथा मुंचति वाक्यजालं तथातथा तस्य कुले प्रमाणम्॥" इत्यभियुक्तोक्तेः परीक्षा सुलभैव। अत्र च जातिनिर्णयार्थं राजांतरप्रेषिततुल्यरूपविद्यादिगुणाः चतस्रः कन्यका यथा कालिदासेन तद्वचनानुसारेण भोजसभायां पृथक्पृथग्जात्या निर्णीताः सापि कथाऽनुसंधेया। लोकरंजनार्थं तद्वाक्यपद्यं च-"अभूत्प्राची पिंगा रसपतिरिव प्राश्य कनकं गतच्छायश्चंद्रो बुधजन इव ग्राम्यसदसि। क्षणात्क्षीणास्तारा नृपतय इवानुद्यमपरा न दीपा राजंते द्रविणरहितानामिव गुणाः॥" इति। अत्र क्रमेण शूद्रविप्रक्षत्रवैश्यजास्ता इति ध्येयम्। ब्रुवामेति भिन्नम्। हे इत्यनेन कृष्ण आक्षिप्यते 'यद्येन विनानुपपन्नं तत्तेनाक्षिप्यते' इति न्यायेन। कथनफलस्य दंडादेः कृष्णगामित्वात्परस्मै पदमेव युक्तमिति मत्वाह-ब्रुवामेति॥ १५॥ हे शुचिस्मिताः शोभनेषद्धासवत्यः॥ १६॥

---

[1] मानयन्त्यो वयं त्वां तु -विज.। [2] स्याम -विज.; चित्सुख०।

[3] **देहि वासांसि धर्मज्ञ 'वेपितानां महाबल''। "शीतार्दितानां" बालानां नोचेद्राज्ञे ब्रुवामहे॥**

इदं पादद्वयमधिकं विज.।

[4] सुमध्यमाः -विज.। **"नो चेन्नाहं प्रदास्ये किं क्रुद्धो राजा करिष्यति"-विज. पाठे इदमर्धमधिकं दृश्यते।**

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं ब्रुवतीति पुनः पुनस्तथैव नानाप्रकारं वदतीत्यर्थः । गां वाचं निजवश्यतया विन्दतीति गोविन्दस्तस्मिन्निति परमवाग्मिता अभिप्रेता नर्माकृष्टचेतस्त्वेनैवाब्रुवन् अन्यथा नावदिष्यन्नित्यर्थः । किञ्च, वेपमानाः तत्र हेतुः लज्जया शीतोदकेप्याकण्ठमग्नाः ॥१३॥ आदौ साम्नाऽऽहुः-मेति । प्रागेव माशब्दनिर्देशो व्यग्रतया अनयाऽकरणदार्ढ्यार्थं वा भो इति अङ्गेति च सप्रेमार्त्तिसम्बोधने अत एव द्विरुक्तिः नन्दगोपस्य सुतं जानीम इति त्वं गोपकुमारः वयञ्च गोपकन्यका इति अस्मान् प्रत्येतादृशमन्याय्यं कर्त्तुं नार्हसि श्लेषेण नन्दयति व्रजमिति नन्दो यो गोपः व्रजराजस्तस्य सुतमिति प्रजास्वस्मासु युवराजस्य तव न्याय एवोचितः नतु स्वपितृप्रतिकूलं दुःखदानादिकर्मेति । यद्वा, नन्दस्य गोपं सुतमिति सर्वव्रजजनाजीव्यरक्षकस्य तव विरुद्धाचरणं न युक्तमिति भावः । अत एव तन्नामग्रहणं संरभस्यौदासीन्यस्य च व्यञ्जनाय तच्च स्वभावव्यक्तो लज्जया तत्र च प्रियं प्रिय इति जानीमः अतोस्माकमप्रियाचरणमन्याय्यमेवेति भावः । किञ्च व्रजे व्रजमध्ये व्रजेन वा श्लाघ्यं च जानीमः अतो व्रजनिन्द्यैतत्कर्माचणमयुक्तमेवेति भावः । दाने हेतुः वेपिता वयं यद्वा वेपिताः प्रति इति कृपां जनयन्ति ॥ १४ ॥ अधुना दानं प्रदर्शयन्ति—स्यामेति । दास्यः स्याम भवेमेति चित्सुखसम्मतः पाठः एवं दास्येनात्मसमर्पणादिकमेव दानमूह्यं तत्रापि तवोदितं करवामेति विशेषोक्तिर्भावविशेषं व्यञ्जयति, श्यामेति तालव्यादिः क्वचित् तत्र दास्यः सत्य इति योज्यं किन्तु भगवान् पृथगेवानुवादं करिष्यति अधुना भेदं प्रयुञ्जते धर्मज्ञेत्यादिना अन्यथा नग्नस्त्रीसंदर्शनेन परस्वहरणादिना चाधर्मतो भयमिति भावः । अदृष्टात्तस्य भयमनालोच्य दृष्टभयमुत्पादयन्ति नोचेदिति इति द्विविधो भेदः राज्ञे गोपराजाय श्लेषेण नन्दगोपसुतम् अर्थात् तस्यैव प्रियमिति प्रियत्वेन न त्वं किञ्चिद्बलाच्छिक्षितोसि तथा अङ्गैरेव ब्रजे श्लाघ्यं नतु गुणैः धर्मज्ञेति सोल्लुण्ठोक्त्या धर्मपारित्याग इति अत्र तस्य तत् क्ष्वेलितमित्यारभ्यैतत्पर्यन्तेन किल किञ्चिताख्योऽनुभावोऽनुसन्धेयः यथोक्तम्—

> "गर्वाभिलाषरुदितस्मितासूयाभयक्रुधाम् । सङ्करीकरणं हर्षादुच्यते किलकिञ्चितम्" ॥ इति ॥ १५ ॥

तासां तथाङ्गीकारेणैव पराजयं करोति भवत्य इति आदर व्यञ्जकभवच्छब्दप्रयोगः ायं प्रोत्साहनार्थं स्वशब्देन च निजपरिधानमवश्यमाशुगृहीतुमुपयुज्यत इति भावः । हे शुचिस्मिताः ! इति ईदृशेन शुद्धस्मितेनावगम्यते शीतादिदुःखं नास्ति वेपनं च कपटेनैवेति। यद्वा, शुचिस्मिताः सत्यः प्रतीच्छत मुखम्लानौ च सत्यो न दास्याम इति भावः नोचेदित्यर्द्धं क्वाचित्कं न प्रदास्ये प्रकर्षेण न दास्यामीति यदि वा किञ्चिद्द्यां तदा खण्डशो विदार्य्य किञ्चित् किञ्चिदेव काञ्चित्प्रत्येव दास्यामीति सूच्यते राजा गोपराजः क्रुद्धोऽपि सन् किं करिष्यति अपि तु न किञ्चिदेवेत्यर्थः । पुत्रे मयि स्नेहविशेषात् इत्यूक्त्वा कानिचित्तासां वस्त्राणि स्वस्यासनानि कृत्वा कानिचित् शय्यां रचयित्वा कानिचिद्ध्वजपताकावितानादितयानीय शाखोपशाखादिषु बद्ध्वा कानिचिद्दोलां रचयित्वा दोलयन् कानिचिदितस्ततो रक्षितवानित्यूह्यं स्कन्धे निधायेति विचित्यैकत्र निधानस्य वक्ष्यमाणत्वात् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं ब्रुवतीति पुनः पुनस्तथैव वदतीत्यर्थः । गां वाचं निजवश्यतया विन्दतीति गोविन्दः, तस्मिन्निति परमवाग्मिताभिप्रेता, नर्मणा आक्षितान्याकृष्टानि चेतांसि यासां ताः, अतोऽब्रुवन्, अन्यथा व्रीडया नावदिष्यन्नित्यर्थः किञ्च, वेपमानाः, तत्र हेतुः शीतोदे शीतलजले आकण्ठमग्ना लज्जया वक्षःस्थलाच्छादनाय कण्ठपर्यन्तं चिरं प्रविष्टाः ॥ १३ ॥ आदौ साम्ना आहुः—मेति। प्रागेव मा-शब्दनिर्द्देशोव्यग्रतया अनयाकरवदार्ढ्यार्थं वा भो इति, अंगेति च प्रेमसम्बोधने, अतएव द्विरुक्तिः । नन्दगोपस्य सुतं जानीम इति त्वं गोपकुमारः, वयञ्च गोपकन्या इत्यस्मान् प्रत्येतादृशमन्याय्यं कर्तुं नार्हसीति । किंवा, नन्दयति व्रजमिति नन्दो यो गोपो व्रजराजस्तस्य सुतमिति प्रजास्वस्मासु युवराजस्य तव कृपैवोचिता, न तु स्वपितृप्रतिकूलं दुःखदानादिकर्मेति । यद्वा, नन्दगोपस्य सुतमिति सर्वव्रजजनाजीव्यरक्षकस्य तव विरुद्धाचरणं न युक्तमिति भावः । तत्र च प्रियं प्रिय इति जानीमः, अतोस्माकमप्रियाचरणमन्याय्यमेवेति भावः । किञ्च, व्रजे व्रजमध्ये व्रजेन वा श्लाघ्यञ्च जानीमः, अतो व्रजनिन्द्यैतत्कर्म्माचरणमयुक्तमेवेति भावः । यतो वेपिता वयम्, यद्वा' वेपिताः प्रति इति कृपां जनयन्ति; यद्वा, त्वां प्रियंव्रजश्लाघ्यञ्च जानीमः, यत् त्वया वस्त्रहरणाच्छीतोदे आकण्ठमग्नतया वेपिताः कम्पं प्रापिता इति सोत्प्रासनर्म्मोक्तिः ॥ १४ ॥ अधुना दानं प्रदर्शमन्ति—श्यामेति । श्यामश्चासौ सुन्दरश्चेति; यद्वा, श्यामेषु सुन्दरस्तस्य सम्बोधनम् अतएव तव दास्यो वयम्, विशेषतश्चेतत्–प्रभृति तव उदितं त्वदुक्तं करवाम; यद्वा, 'उदितम्' उदयमुत्कर्षं ख्यापयामेत्यर्थः । दास्यः सत्य इत्यत्रैव वा योज्यम्, दास्यः स्याम भवेमिति श्रीचित्सुखसम्मतमेव। एवं दास्येनात्मसमर्पणादिकमेव दानमूह्यम् । अधुना भेदं प्रयुञ्जते धर्मज्ञेत्यादिना, अन्यथा नग्नस्त्रीसन्दर्शनेन परस्वहरणादिना चाधर्मतो भयमिति भावः । अदृष्टात्तस्य भयमनालोच्य दृष्टभयमुत्पादयन्ति—नोचेदिति । इति द्विविधो भेदः, इदञ्च सर्वं पूर्वं श्लाघनीयगुण इत्यत्र विवृतमस्ति, राज्ञे गोपराजाय; श्लेषेण नन्दगोपस्य सुतं प्रियमिति प्रियत्वेन न त्वं किञ्चिद्बलाच्छिक्षितोऽसि, युवराजपक्षे तवेदृशी मत्ततोचितैवेति गोपसुतमिति,पक्षे गोपत्वेन गोसंगत्या तादृश एवेति । तथा अंगव्रजैः सर्वावयवैरेव, किंवा अंगैरेव व्रजे श्लाघ्यम् न तु गुणैः । धर्मज्ञेति च सोल्लुण्ठोक्त्या, धर्मपरित्याग इति तत्त्वतश्चायं गूढाऽभिप्रायः । नन्दगोपसुतमिति

विशेषणत्रयेण पतित्वयोग्यतया आत्मनः पतित्वेन कामनायां हेतुः। तथा श्यामसुन्दरेति च; दास्य इति वयमपि तव पत्नीत्वयोग्याः, तत्र च दासीशब्देन करवाम तवोदितमित्यनेन च भक्तिविशेषः। धर्मज्ञेति ईदृशाश्रितजनानामुपेक्षानुपयुक्ता, अन्यथा राज्ञे धर्मराजाय ब्रुवाम मरिष्याम इत्यर्थं इति ॥ १५ ॥ भवत्य इत्यादौ भक्ताद्यपेक्षयादरात्, अत्रागत्येति न तु मया प्रक्षिप्यमाणानि जलान्तः स्थित्वा ग्राह्याणीत्यर्थः। स्वशब्देन निजपरिधानमवश्यमाशु ग्रहीतुमुपयुज्यत इति भावः। हे शुचिस्मिता इति ईदृशेन शुद्धस्मितेनावगम्यते शीतादिदुःखं नास्ति, वेपनं कपटेनैव; किञ्चः मदुक्तमंगीकृत्यात्रागत्य युष्माभिर्वस्त्राणीमान्यधुनैव ग्राह्याणीति चातुर्यविशेषेण जलादाकर्षति। यद्वा, शुचिस्मिताः सत्यः प्रतीच्छत। मुखम्लानौ च सत्यां न दास्य इति भावः। एष रसिकताविशेषः; न प्रदास्य प्रकर्षेण न दास्य इति प्रशब्देन यदि वा कथञ्चिद्द्यां तदा खण्डशो विदार्य किञ्चित् किञ्चिदेव काञ्चित् प्रत्येव वा दास्यामीति सूच्यते। राजा गोपराजः क्रुद्धोऽपि सन् किं करिष्यति ? अपि तु न किञ्चिदेवेत्यर्थः पुत्रे मयिस्नेहविशेषात्। अत्र च प्रत्युत्तरत्वेन श्लेषार्थोऽयं ज्ञेयः। शुचिस्मिता इति परमसौन्दर्योक्त्या तासां निजपरिग्रहयोग्यता सूचिता। अतो विवाहं विनापि स्वीकारेण मयि युष्मासु च क्रुद्धोऽपि सन् धर्मराजः किं कर्तुं शक्नुयात्, इत्युक्त्वा कानिचित्तासां वस्त्राणि स्वस्यासनानि कृत्वा कानिचिच्छायां रचयित्वा कानिचिद्ध्वजपताकावितानादितया नीपशाखोपशाखादिषु बद्ध्वा कानिचिद्दोलां रचयित्वा आन्दोलयन् कानिचिदितस्ततस्तदुपरि चिक्षेपेत्युह्यम्, (१८ श. श्लो.) 'स्कन्धे निधाय' इति वक्ष्यमाणत्वात् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अनयमिति पदं वेपिताः कम्पिताः वयं जानीम इत्यन्वयः ॥ १४–१८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गोविन्दे एवं ब्रुवति सति नर्मणा परिहासेनाक्षिप्तं गृहीतं चेतो यासां ताः शीतोदके आकण्ठमग्नाः अत एव कम्पमानाः कृष्णमब्रुवन् ॥ १३ ॥ किमब्रुवन्नित्यपेक्षायां सामादिचतुर्विधोपायपूर्वकं भगवज्ज्ञानसम्पन्नं गोप्युक्तमाह–द्वाभ्याम्। भोः कृष्ण! अनयमन्यायं मा कृथाः त्वां नन्दराजस्य सुतमत एव तस्य प्रियं च जानीमः नन्दराजोऽपि प्रेम्णा त्वामनयकारिणमपि न शिक्षयतीति भावः। नवनीतचौर्यादिषु धौर्त्यं प्रसिद्धमवेत्यभिप्रायेण विशिषन्ति, श्लाघ्यमिति। यद्वा, अस्मदनुष्ठितव्रतेन नन्दराजसुतं त्वां श्लाघ्यं प्रियं भविष्यन्तं जानीम एव किन्त्वधुनैवानयं मा कृथाः वयं तु शीतोदकवेपिताः अतो वासांसि प्रयच्छ ॥ १४ ॥ हे श्यामसुन्दर! ते तव दास्यो वयं तवोदितं त्वयोक्तमन्यत् किञ्चित्करवाम भावगर्भमिदं निरतीशयत्वत्सौन्दर्यादिभिस्त्वद्दास्यः सत्यः त्वदभिप्रेतं करवामैवेत्याभिप्रायः। हे धर्मज्ञ! अनेनैकान्ते नग्नस्त्रीदर्शनाकरणरूपधर्मज्ञ! स्त्रीणां लज्जास्वभावरूपधर्मं जानातीति तथेति वा वासांसि प्रयच्छ मुग्धभावादनुपपन्नमपि त्रासयन्त्य इवाहुः नोचेन्न प्रयच्छसि नोचेद्राज्ञे नन्दाय कंसाय वा ब्रुवामहे ॥ १५ ॥ एवमुक्तो भगवान् यदुक्तं "नोचेद्राज्ञे ब्रुवामहे" इति तदिदमनुपपन्नं नहि जलान्निर्गत्य वासांसि गृहीतुमेव लज्जन्तीनां राज्ञे ब्रुवामहे इत्युक्तिरुपपन्ना नग्नानां राजसन्निधौ गमनासम्भवाच्च न चान्यप्रेषणया निवेदनसम्भवः प्रेषणीयजनस्यात्राभावादिति तदुक्तेरुत्तरं न देयमेवेत्याभिप्रेत्य "ते दास्यः करवाम तवोदितम्" इत्यस्योत्तरमाह—भवत्य इति। हे शुचिस्मिताः! नहि स्वामिनोक्तं किञ्चिदेव स्वसम्मतं दासीभिः कर्त्तव्यमिति नियमः किन्तु सर्वमपि तदभिमतं कर्त्तव्यमिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नर्मणा गर्हितस्नेहविनोदवचनेन ॥ १३ ॥ शीतजले स्थित्या वेपिताः वयम् ॥ १४ ॥ ते तव दास्यः श्याम भवाम राज्ञे नन्दगोपाय ॥ १५–१६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

(१२श श्लो०) "न निर्ययुः" इति यदुक्तम् तत्पश्चात् किं चक्रुरित्याशङ्क्याह—एवं ब्रुवतीत्यादि। एवं पुरा यद् भणितम् (१०म श्लो०) अत्रागत्य इत्यादि, तदेव पुनर्वदति सति गोविन्दे आकण्ठमग्नाः सत्य एव तमब्रुवन्, ऊचुः। पूर्वं नाभिदघ्ने जले आसन् अत्रागत्येति तस्य वचः श्रुत्वा पुनः कण्ठदघ्नः जलं गता इति भावः। शीतोद इति वेपमाना इत्यस्य हेतुः। वेपमानत्वमालोक्य करुणया वसनानि शीघ्रं दास्यतीत्याशयेन नोपात्तम्, स्वभावोक्तिर्वा, नर्मणा तत्परिहासोक्त्या आक्षिप्तमान्दोलितं चतो यासाम् ॥ १३ ॥ यदब्रुवंस्तदाह—माऽनयं भो इत्यादि। प्रथमतः सामपूर्वकमेव वक्तुमुचितमिति वचनपरिपाटी। तद् यथा, भो श्रीकृष्ण! मा अनयं कृथाः, त्वां तु जानीमः अनीतिकारी न भवसीति, यतो नन्दगोपसुतः व्रजराजसुतमिति ताभिरुक्तस्य तत् प्रतिशब्देन कवेरेवेयमुक्तिः। व्रजराजकुमारस्य त्वनयो मास्त्येव परन्तु अनयकारिणां निवारकर्त्तृत्वमेव। तत्रापि प्रियं सर्वोत्तमम्, यतो व्रजश्लाघ्यम्। अनयकारिणं हि न कोऽपि श्लाघते तस्मादनयं मा कृथाः ॥ १४ ॥ किं करिष्यामि, तदुच्यतामित्याशङ्क्याह—देहि वासांसि। क्षणं तिष्ठत, विलम्बेन दास्यामीत्याशङ्क्याह—वेपिताः, कम्पितास्म इत्यर्थः। तत्रैवान्यः सदैन्यमूचुः श्यामेत्यादि। हे सुन्दर! ते दास्यः स्याम भवाम, वससैव किं वा चरितेनेत्याशङ्क्याहुः—करवाम तवोदितम्, करिष्याम इत्येवास्माकमभिप्रायं

इत्यर्द्धोक्ते काश्चिदन्याः साममुद्रां परित्यज्य भयप्रदर्शनेन मुद्रान्तरमुद्भाव्याहुः –नो चेत् । एवं साम्ना विनयेनापि यदि वासांसि न ददासि, तदा राज्ञे व्रजराजाय ब्रुवामहे ज्ञापयिष्यामः। इत्यासां त्रैविध्यमुक्तं भवतिमध्या, मृद्वी, मुखरा चेति । तत्र मानयं भो इति मध्याः, श्यामसुन्दरेत्यत्र मृद्वयः नो चेदित्यादौ मुखराः । धर्मज्ञेति विपरोतलक्षणया परिहासश्च व्यङ्ग्यः । नहि धर्मज्ञो दासीनां वस्त्रमपहरति, वरन्तु ददात्येव तेन त्वमधर्मज्ञ एवेति चतुरा वा, न तु मृद्वयः ॥ १५ ॥ अथ (१५श श्लो०) “ते दास्यः करवाम तवोदितम्” इति तासां वचनेनैव ता जिगीषुर्भगवानाह–भवत्य इत्यादि सार्द्धेन । भवत्यो यदि मे मम दास्यः, मयोक्तमवश्यं करिष्यथ; तत्कथं न क्रियते ? तत् किमित्याह–अत्रागत्येत्यादि । हे सुमध्यमाः ! इदन्तु अस्माकमशक्यमिति चेद् भवतु, मयापि तर्हि न दातव्यमित्याह—नो चेदित्यादि । यद्यत्रागत्य न नयथ, तदाहं न दास्ये । तदा वयं राज्ञे निवेदयिष्याम इत्याशङ्क्याह--किमित्यादि। यदि राज्ञे निवेदयथ, तदासौ क्रुद्धो भविष्यति, क्रुद्धः सन् किं करिष्यति ?॥ १६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवं ब्रुवतीत्यादि । एवं पूर्वोक्तप्रकारम् । आकण्ठमग्ना इति पूर्वं वक्षोदघ्नजलस्था एवासन् श्रीकृष्णस्वरं श्रुत्वा आकण्ठमग्ना बभूवुरिति भावः । वेपमानाः शीतेन भावेन वा ॥ १३ ॥ प्रथमतः पूर्वसिद्धाः सामपूर्वकमाहुः – मानयं भोः कृथा इत्यादि । त्वां जानीमः, अद्य ज्ञातव्य इति न हि । अङ्ग सादर सम्बोधनेऽङ्गशब्दः । व्रजश्लाघ्यमङ्ग व्रजे श्लाघ्यमिति वा सर्वाङ्गसुन्दरमिति भावः। प्रियं प्रियाकारम् प्रीणातीति प्रीतं वा, तस्माद् वासांसि देहि, प्रियत्वेनास्माकं दुःखदः कथं भवसि ? पश्य वयं वेपिताः, अतः परं हि मोदे स्थातुं न शक्यते ॥ १४ ॥ अन्या ऊचुः—हे सुन्दर ! सुन्दरेति निजाभिलाषसम्बोधनम्, ते दास्यः स्याम, तवोदितंञ्च करवाम, तस्माद् वासांसि देहि, यस्माद् धर्मज्ञोऽसि, दासीनां वासांसि नापह्रियन्ते, अपितु दीयन्ते एव, इयं हि धर्मस्य रीतिः, धर्मज्ञ इति काकुक्तिर्वा । अन्यास्तत्र मुखरा ऊचुः—नो चेदित्यादि । यदि वासांसि न ददासि, तदा राज्ञे नन्दाय ब्रुवामहे । आशयस्य कोमलाकोमलादेः कुमारिका एव विविधाः तेनैवं काश्चिदूचुः । विवस्त्रतया जलेभ्य उत्थानशक्तेः कथं राज्ञे निवेदनम्, तर्हि भयप्रदर्शनमेतत् । अथवा, ब्रुवामहे इत्यन्तर्भूतण्यर्थः राज्ञेऽभीतिः स्वगोत्रवालकैः ज्ञापयिष्याम इति ॥ १५ ॥ अहं हि सत्यदृक् तत्तु (११ शश्लो.) “न भयोदितपूर्वं वा” इत्यादिना पूर्वमेवोक्तम्, भवत्योऽसत्यवाचः यतः (१५ श श्लो. ; श्यामसुन्दर ! ते दास्यः करवाम तवोदितम्” इत्युक्तं यत्, तदधुनैव न सङ्गच्छते । कथं न सङ्गच्छते इत्याह–भवत्यो यदि मे इत्यादि । नो चेदत्रागता वासांसि चेन्नयथ, तदाहं दास्ये; अहमिति स्वातन्त्र्यसूचकम्, धर्मज्ञ इति यद्भवतीभिरुक्तोऽस्मि, तन्ममायमिति धर्मः मदाज्ञां ये न प्रतिपालयन्ति, तदभीष्टमहं न करोमि । यद्वा, भवतीभिरुक्तम्–राज्ञे ब्रुवामहे इति, तत्रापि नाहं बिभेमि । अतो भवतीभिर्गत्वा स्वच्छन्दमुच्यतामित्याह–किं क्रुद्ध इत्यादि ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवं नानाप्रकारं नर्म ब्रुवति सति गोविन्दे गा नर्ममधुरवाचो विन्दतीति तस्मिन् तच्चेदं नर्म भोः खञ्जनाक्ष्यः ! यदि यूयं नागच्छत तदा एतैरेव वासोभिः शाखानिबद्धैर्हिन्दोलिकामुपधानादिकं च विरचय्य मया शय्यते रात्रावद्य कृतजागरं मां निद्रासम्प्रत्यायाति भो गोपाल ! तव गावः तृणलोभेन गह्वरं प्रविष्टास्ततस्ताः परावर्त्तयितुं द्रुतमितो याहि भो गोपबालाः ! द्रुतमितो गृहकृत्यार्थं व्रजं व्रजत पित्रादिगुरुजनान् मा समञ्जसमभ्यूहयथ भोः पिञ्छचूड ! वयमितो मासं व्याप्य गृहं न यामः पित्रादिगुरुजनादेशेनैव कात्यायनीव्रतं समाप्य मासमात्रमुदवासबृतं कुर्मः भोस्तपस्विन्यः ! अहमपि युष्मद्दर्शनप्रभावादुद्भूतगृहवासवैराग्य सम्प्रति मासं व्याप्य अत्रैव न भावासव्रतं चिकीर्षामि यदि चानुकम्पध्वे तदात्वितोऽवरुह्य युष्माभिः सममुदवासव्रतमेव कर्त्तुं प्रयामीति नर्म्मणा आक्षिप्तचेतसः शङ्कया ततोऽप्यधिकजले आकण्ठमग्नाः वेपमानाः शीतेन शङ्काहर्षोत्सुक्यादिभिश्च ॥ १३ ॥ प्रथमं साम्ना आहुः—अनयमन्याय्यं मा कृथाः । ननु मुग्धाः यूयं मां नैव परिचिनुथ यथो मय्यप्यनीतिकलङ्कं दातुं न शङ्कध्वे तत्राहुः–त्वन्त्विति अन्यान् व्रजस्थानपि न जानीम एव त्वां त्वतिप्रसिद्धं नन्दराजस्य सुतं जानीम एव “गोपोभूपेपि दृश्यते” इत्यभिधानात् तत्रापि व्रजस्थमात्रस्यापि श्लाघ्यं तत्रापि प्रियं ननु, भो निर्बुद्धयः ! यद्यहं राज्ञः पुत्रस्तर्हि कथं मय्यनीतिः राजपुत्र अपि क्वचिदनीतिमन्त इति चेत् कथमहं व्रजश्लाघ्यः प्रियश्च नह्यनीतिमत्सु श्लाघा प्रीतिर्वा सम्भवेदिति भावः । ननु, सत्यं स्त्रियो वयं वक्तुमनभिज्ञास्तस्मात् कृपयैवापराधं क्षान्त्वा वासांसि देहि वेपिता वयमिति कृपां जनयन्ति ॥ १४ ॥ पुनरपि साम्नैवाहुः–श्याम दास्यो भवामेति दन्त्यसकारपाठश्चित्सुखसम्मतः श्यामेति तालव्यशकारपाठे दास्यः सत्यस्तवोक्तं करवामेति राज्ञि त्वयि प्रजानामस्माकं दास्यं समुचितमेवेति भावः । वस्तुतस्तु तन्मिषेणैव स्वात्मानमर्पयामासुः सुन्दरस्य तवास्माभिर्यद्दास्यं सम्भवेत्तत्र तवोक्तं करवामेति काश्चित्प्रखराभेदं प्रयुञ्जते हे धर्मज्ञेति स्त्रीधनहरणात्तवाधर्मो भावीति भावः । तस्याधर्माद्भयमनालोच्य दृष्टं भयं दर्शयन्ति नोचेद्राज्ञे इति द्विविधो भेदः राज्ञे नन्दाय कंसाय वा ॥ १५ ॥ तासां वचोभिरेव ताः पराजित्य निर्वचनीकुर्वन्नाह–भवत्य इति । प्रथममतेनैव भवतीनां सत्यं परीक्षसत्यात् प्रच्युताभ्यस्त भवतीभ्यो नैव प्रदास्ये इति भावः । शुचिस्मिताः सत्य इति यद्यत्र धर्मपरीक्षायां मुखम्लानिः स्यात्तदपि नैव दास्ये इति भावः । वस्तुतस्तु शुचिः श्रृङ्गारस्तन्मयस्मिता इति स्वस्मिन्नुद्भूतं भावं ज्ञापयति । किञ्च, मयि प्रबले सामैव वः कार्य्यंसाधकं नतु भेद इत्याह नोचेदिति ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्रानुनयकोविदा आहुः–भोः अङ्ग ! नन्दगोपसुतं स्वज्ञातिप्रधानस्य श्रीनन्दगोपस्य सुतं व्रजश्लाघ्यञ्च किं बहुना प्रियं च त्वां जानीमः सर्वथा त्वय्यादरणीये स्नेहबद्धा वयमिति भावः। तुशब्दो अन्ययोगव्यवच्छेदार्थः त्वदन्यं कमपि न जानीम इत्यर्थः। अत आहुः अनयमनुचित्तं हास्यादिकं मा कृथाः ॥ १३ ॥ तास्वप्यतिस्निग्धाः आहुः–श्यामसुन्दरेति नो चेत् राज्ञे गोपराजाय श्रीनन्दाय ब्रुवामहे इत्यतिस्नेहगर्भं वाक्यम् ॥ १४ ॥ अनुनयकोविदाभिरनुनीतोऽतिस्नेहयुक्ताभिः प्रार्थितस्तासां स्वानन्यकिङ्करीत्वं प्रकटीकारयितुमाह भगवान्–भवन्त्य इति ॥ १५ ॥ तत आज्ञापनानन्तरं दारिकाः कुमारिकाः उत्तेरुर्निर्गताः ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

गा रुचिरनर्मवाचो विन्दतीति तस्मिन् गोविन्दे एवमीदृशं विविधं नर्म ब्रुवति तेन नर्मणा भाश्चन्द्रमुख्यः यदि भवत्यो नायान्ति तर्हि एतैर्वासोभिर्नीपशाखानि वद्धैः हिन्दोलां निर्माय तैरेव निर्मितशय्योपधानेन मया निशि जागरितेन सम्प्रति जातनिद्रेण सुप्यते भो गोपाल चूडामणे ! गावस्ते तृणलोभाद् गह्वर प्रविविशुस्ताः सम्भालय, भो गोपकुमार्यः ! स्व गृहं व्रजतातिविलम्वे पित्रादिभिर्विपरीतं सम्भाव्येत भो रसिकमौले ! पित्राद्यनुशासनारब्धव्रताभिरस्माभिर्मासमेकमुदवासः करिष्यते भो व्रतिन्यः ! युष्मद्दर्शन प्रभावात् सञ्जातस्वगृहविरागो निवृत्तक्षुत्पिपासोमासमेकमिहैव नभोवासव्रतं चिकीर्षामि कृपा चेदितोऽवरुह्य साकं भवतीभिरुदवासमित्येवम्विधेनाक्षिप्तानि चेतांसि यासां तादृश्यः सत्यस्ततोऽधिके आकण्ठमग्नाः शीतोदे तस्मिन् वेपमानाः शङ्काहर्षौत्सुक्यादिभिश्च सकम्पा इत्यर्थः ॥ १३ ॥ आदौ साम्नाहुः भोः अनयमनीतिं मा कृथाः। ननु मय्यनीतिकलङ्कमर्पयथ तत्राहुः त्वां नन्दाभिधानस्य गोपस्य राज्ञः सुतं ब्रजमात्रस्यापिश्लाघ्यं तत्रापि प्रियं जानीमः नन्वीदृशश्चेदहं तर्ह्यनीतिर्मयि कथमुक्ता तत्राह वेपिता वयमस्मदपराधं क्षान्त्वा वासांसि देहीति दयामजनयन् स्त्री प्रज्ञयाऽनयं माकुर्वित्युक्तिरिति भावः ॥ १४ ॥ दानं दर्शयन्ति श्यामेति। हे सुन्दर वयं ते दास्यः स्याम भवेन क्वचित्तालव्यादिपाठः। राजपुत्रे त्वत्प्रजानां नो दास्यमेव युक्तमिति भावः। वस्तुतस्तु ते दास्यस्त्वयि निवेदितात्मानः स्याम वयं सुन्दरस्य नेऽस्माकं यद्दास्यं स्यात्तत्र तवोक्तं करवामेति तासु प्रखराः काश्चिद्भेदं प्रयुञ्जानाः प्राहुः–हे धर्मज्ञेति ! स्त्रीस्वापहारादधर्मस्त्वयि भवेदिति भावः। यदि न विभेष्यधर्मात्तर्हि दृष्टं भयं भावीत्याहुः चेद् वासांसि नः दीयन्ते तदा राज्ञे त्वत्पित्रे नन्दाय ब्रुवामहे इति द्विविधो भेदः प्रियेऽयुक्तत्वाद्दण्डो नोद्दिष्टः इह तस्य तत् क्ष्वेलितमित्यारभ्यैतत्पर्यन्तेन किलकिञ्चिताख्योऽनुभावोनुचिन्त्यः—

"गर्वाभिलाषरुदित स्मितासूयाभयक्रुधाम्। सङ्करीकरणं हर्षादुच्यते किञ्चितम् ॥" इति तल्लक्षणः ॥ १५ ॥

तास्तद्वाचैव निर्जित्य निरुत्तराः कुर्वन्नाह–भवत्य इति। इयमेव भवतीनां धर्मपरीक्षा यदि सत्याद्विच्युतिर्नस्यात् शुचिस्मिता इति तत्परीक्षायां यदि मुखम्लानिश्च न स्यात् सत्याद् विच्युताभ्यो म्लानमुखीभ्यश्च न देयानीति भावः। वस्तुतस्तु "शृङ्गारः शुचिरुज्ज्वलः" इत्यभिधानात् शृङ्गारमयस्मिता इति स्वस्मिन्नुदितोभाः सूच्यते ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्र सहसा नान्तरं देयमित्यालोचनचतुराः सुलोचनावचनप्रसूनमालां मालाल्यचरणाय भक्तिसूत्रजटिलां बहिः किञ्चित्कुटिलामार्पयन्निति सार्धश्लोकद्विकेनाह ॥ मानयन्त्वं कृधा इति। अङ्ग हे कृष्णानयमन्याय कन्यानामपाणिगृहीतानां वसनापहाररूपं मा कृधा न कुरु ब्रजश्लाघ्यं नन्दराजस्य नन्दगोपभूपस्य सुतं प्रियं जानीमः। चेत्किमित्यत आहुः ॥ वेपिता इति नो वासांसि देहि। मानयं भोः कृधा इति पाठे भोः कृष्णानयं मा कृधाः। अङ्गव्रजश्लाघ्यमिति पदं। अङ्गं च शरीरं च व्रजस्य श्लाघ्यं यस्य व्रजेन श्लाघ्यं यस्य स तमिति वाऽर्थः। नो चेदङ्गेति वा भोरिति वाऽतिरिच्यत इति ज्ञेयं। मानयन्त्यो वयमिति न सरसः पाठः। प्रयोजनं वर्तते गृहं प्रति गच्छामीत्यतोऽप्याहुः। वासांसि देहि अनन्तरं ब्रज श्लाघ्यं सर्वश्लाघ्यं। एतेन सर्वसुपर्वश्लाघ्यस्य ब्रजमात्राश्लाघाविषयत्ववचनं कियदिति निरस्तं ॥ १४ ॥ अनयं मा कृधा इत्युक्तिमुखत आयातेत्यायताक्ष्यः क्षमापयन्ति तमित्याह ॥ स्यामेति। हे सुन्दर ते दास्यः स्याम। ननु सुन्दरेत्यस्यामन्त्रितत्वेनाविद्यमानवद्भावात्कथं त इत्यादेशः स्यादिति चेन्न। तस्यापरत्वेन पदात्परत्वाभावेऽपि गृणन्ति विप्र ते धिय इत्याद्यलौकिके लौकिके च सर्वदा रक्ष देव न इत्यादि दृष्टमिति स्यामेत्यस्य पदत्वात्तत्परताश्रयणेन त इत्यादेशसम्भवात्काऽत्र कथन्ता अव्ययतया समाधिस्तु मातर्म इत्यादिनिर्गतिकस्थल एवेति विजानीहि। दासीनां मध्य आसीना एवं ललना जले जलजलाचनं प्रति कृत्यं विज्ञापयन्ति ॥ करवामेति। तवोदितं त्वयोक्तं करवाम। त्वयोदितमिति वक्तव्ये तवोदितमिति बचनेन तवोदितमपत्याद्युत्पत्तिद्वारोदयं। भावे क्तः। करवामेत्यपि ध्वनयन्ति वध्व इति बोध्यं। हे महाबला धर्मज्ञवेपितानां शीतार्दितानां बालानामङ्गस्मरणाभावाद्वेपितानां शीतार्दितानामिति चोक्ती ज्ञेये नो वासांसि देहि नो चेन्न रासि चेद्राज्ञे नन्दाय शीतार्दितानां बालानां नो वसनानि न दत्तवांस्तव शावक इति ब्रुवामह इत्यन्वयो वा ॥ १५ ॥ कुमारीकोदीरितं श्रुत्वा किमकरोद्धरिरित्यत एवमसूच इति सुचेता आह ॥ श्रीभगवानुवाचेति। भवन्त्यो भवत्य इति भवतः पाठौ। पूर्वस्मिंश्छ-

त्रन्तता नमुचा परस्मिनुचतुप्रत्ययान्ततेति विवेकः । यदि मे दास्यो यदि वचो मयोक्तं करिष्यथ तर्ह्यत्रागत्य स्ववासांसि स्वस्ववासांसि प्रतीच्छन्त स्वीकुरुत ॥ १६ ॥

श्रीसुबोधिनी

भगवांस्तासामन्तर्भावं दृष्ट्वा पुनः पूर्ववदेवाह, तदा पुनरेवं ब्रुवति भगवति सति **नर्मणा** परिहासवचनेनापातत एव प्रतीतेन हास्यरसजनकेना**क्षिप्तचेतस** एव भूत्वार्थमविचार्य वहिर्निर्गते भगवान् कोपं करिष्यति निर्लज्जा इति वा **ज्ञास्यतीत्याकण्ठमग्ना जाता यथा न** कोप्यवयवो **दृष्टो** भवतीति, ततो लौकिकरसभयाभ्यामाविष्टचित्ता जाता जातबहिःसंवेदनत्वाच्छी**तोदे वेपमाना** जाताः, ततो देहभावस्य दृढत्वे विस्मृतपूर्वभावाः साक्षिभिश्च व्यमोहितास्तं **भगवन्तं प्रति किञ्चिदब्रुवन्** ॥ १३½ ॥ तासां वाक्यमाह **मानयं भो कृथा** इति, भर्तृत्वान् न नामग्रहणं, **भो** इति सम्बोधनं बालकव्यावृत्त्यर्थं च, **नयो** न्यायोन्यायं **मा** कार्षीः, वयमद्यापि कुलस्त्रियः पुरुषान्तरदृष्ट्या न **दृष्टाङ्गा** अतः साम्प्रतं बालानां दृष्ट्या न **द्रष्टव्यास्त्वद्वाक्येन चागन्तव्यं** तथा सति यद्यपिश्वरवाक्यकरणे**ना धर्मस्तथाप्यन्यायो भवति** नीतिलोकविरुद्धमित्यर्थः, **नैवं मन्तव्यं मःमेता न जानन्तीति तथा सत्यविचार्यकरणादेता** एव दुष्टा इति तत्राहुस्त्वां तु **जानीम** इति, परमार्थतो ज्ञानमस्माकं हितकारि न भवतीति तुशब्दस्तं पक्षं व्यवर्तयति किन्तु **नन्दगोपस्य सुतं जानीमः**, तेन प्रभुपुत्रत्वमुक्तं, न हि प्रभुपुत्रोनीतिं करोति, किञ्चास्माकं **प्रियो** भवान् परमप्रीतिविषयः, **अनेन** त्वद्दृष्ट्या न द्रष्टव्या इति नास्मकमभिप्रायः, **अङ्गेति**सम्बोधनं च स्वस्याङ्गतां ज्ञापयति, नन्वस्त्वन्याय इयि चेत् तत्राहुर्**व्रजश्लाघ्यमिति**, व्रजे सर्वत्र भवानेव **श्लाघ्य एवं** सत्यपकीर्तिः स्यात् केषाञ्चिच् चित्ते स्त्रियो धर्षयतीति केषाञ्चित् त्वयुक्तं प्रदर्शयतीति, अतःकारणान् निर्गमनात् पूर्वमेव **वासांसि** देहि, दयार्थमाहु**र्वेपिता** इति ॥ १४½ ॥ दण्डमप्यङ्गीकुर्वन्ति **श्यामसुन्दर** ते **दास्य** इति **सुन्दरे**तिसम्बोधनान् न प्रतारणा, अतुल्यत्वात् स्त्रीत्वं परित्यज्य दासीत्वमाहुस्ते न तु त्वत्सम्बन्धिन एतेषां वा, ननु दर्शनाकाङ्क्षा दास्येन निवर्तत इति चेत् तत्राहुः **करवाम तवोदितमिति,** दास्य एव यद् वक्ष्यसि केवलस्तत् करिष्याम इत्यर्थः, अतस्तवेत्येकवचनमिदानीमुक्तं तु बहूनां वाक्यमित्यभिप्रायः, तर्हि दास्योपि भवतेति चेत् तत्राहुर्देहि **वासांसीति**, दासीत्वसिद्धयर्थं वा **वासांसि देहि** दास्यसिद्ध्यर्थं वा, किञ्च **धर्मशास्त्रे** "कन्यायोनिं पशुक्रीडां नग्नस्त्रीं प्रकटस्तनीं उन्मत्तं पतितं क्रुद्धं यन्त्रस्थं नावलोकये"दिति नग्नाया दर्शननिषेधादत आहुर्धर्मज्ञेति, एवमप्यदानेतिक्लेशे सति निर्गता अप्यनिर्गता वा बहुकालमपि कष्टमनुभूय पश्चाद् **राज्ञे ब्रुवामहे** नन्दं ज्ञापयिष्यामः, नवविधा वा नवपदैरुक्ताः, राजसराजस्या **वचनंमानयं भो कृथा** इति, राजसतामस्या वा, राजसराजस्या **नन्नगोपसुत**मिति **प्रिय**मिति राजससात्त्विकयाः, व्रजश्लाघ्यमिति सात्त्विकराजस्याः, **वेपिता** इति सात्त्विकसात्त्विकयाः, **श्यामसुन्दर ते दास्य** इति सात्त्विकतामस्याः, **करवाम तवोदितमिति** तामससात्त्विकयाः, **धर्मज्ञेति तामसराजस्याः**, अतिरिक्तं शिष्टाया इति ॥ १५½ ॥ एवं तासां वचनानि श्रुत्वा दैविकमोहिता इति तदवगणय्य स्वेच्छया तथा जातेति लौकिकयुक्त्या ताः प्रबोधयति **भवत्य** इति यद्यस्मद्वाक्यानुसारेण न प्रवृत्तिस्तदा स्ववाक्यानुसारेण वा प्रवृत्तिरस्तु भवतीनामपि स्वात्मानं प्रति वाक्यद्वयं 'श्यामसुन्दर ते दास्यः करवाम तवादित'मिति दासीत्वे दास्ये वा न लोकानौचित्यं भावनीयं, तत्रैव चेद वाक्यं कर्तव्यं तर्ह्य**त्रागत्य स्ववासांसि प्रतीच्छन्तु**, उभयोरपि वाक्याकरणेसत्याभिनिवेशान् नाश एव, दासीत्व ईश्वरसुखमेव कर्तव्यं न तासां काचिद् मर्यादातोन्यदर्शनमपि न दोषाय, मनसि निष्ठैषा वाक्यकरणे तु वाङ्निष्ठान्यथा देहनिष्ठा तथा सति नाशः, 'पतिं मे कु'र्विति प्रभौ पतित्वस्य प्रार्थितत्वात् स्वस्य भार्यात्वमभिमतं पूर्वमित्यधुना यदित्युक्तम् ॥ १६½ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

माऽनयं भोः कृथा इति श्लोकस्य विवरणे उक्ता राजसादयो ये गुणास्ते स्वामिनीभावानामन्योन्यं वैजात्यं ज्ञापयितुं दृष्टान्तरीत्या, न तु प्राकृततद्वत्त्वाभिप्रायेण । अथवा 'न तदस्ति पृथिव्यां वा' इति वाक्याद् गुणरहितं वस्तु त्रिलोक्यां न सम्भवतीति ग्रहिलवादिनं प्रत्युच्यते । अत्रैते भावा एव तद्रूपाः, न तु प्राकृता अत्र सन्तीति । एतेनात्र प्रकृतिरपि भिन्नैवेति ज्ञाप्यते । सा च स्थायिभावरूपैवेति ज्ञेयम् । अत एव भगवता पृथिव्यादय उक्ताः, न तु सामान्यतः । लीलाया अलौकिकत्वेनाजन्यत्वेन च पृथिव्यादिमध्यपातित्वाभावाद् ब्रह्मवत् ! एतद्विद्वन्मण्डने प्रपञ्चितमस्माभिः ॥ १५ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

श्यामसुन्दरेत्यत्र तर्हीति **उक्तकरण** इत्यर्थः, **दास्योपीति** मत्सम्बन्धिनामपीतिशेषः, इदं तु न करिष्यामो वासांसि देहीत्युत्तरं, एवं सत्युक्तकारित्वं नायातीत्यरुच्या पक्षान्तरमाहुः **दासीत्वसिद्धयर्थं चेति,** वस्त्रपरिधाने द्वयमपि सेत्स्यतीतिभावः, दासीत्वं धर्मविशेषः, दासस्य कर्म दास्यं कर्मणि यक् उक्तकारित्वमित्यर्थः ॥ १५½ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एवं ब्रुवति गोविन्द इत्यत्र **साक्षिभिश्च व्यामोहिता** इति एतासां पुम्भावरूपा एते बाला एतासु सर्वापेक्षारहिता भगवत्येतासां स्वाच्छन्द्यसम्पादनेन भगवत्कार्यसाधका अतः **साक्षिशब्देन** व्यवह्रियन्ते, तैः साक्षिरूपबालैर्हास्यं कृत्वा **व्यामोहिता**

भगवान् बालाश्चास्मान् हसन्तीति ज्ञात्वा यथार्थज्ञानरहिता जाता इत्यर्थः ॥ १३½ ॥ **श्यामसुन्दरेत्यस्य** विवृतौ **दासीत्वसिद्ध्यर्थं** वेति भोग्यदासीत्वसिद्ध्यर्थं **वासांसि** देहि वस्त्रभूषणादियुक्तानामेव भोगौचित्यात्, इदं च महतोनुग्रहस्य कार्यं, एतावाननुग्रहश्चेदधुना न क्रियते तदा सामान्यानुग्रहः कर्तव्य इत्याशयः, तमुद्घाटयन्ति **दास्यसिद्ध्यर्थं वेत्यनेन**, परिचर्याकरणार्थं वा वस्त्राणि देयानि, न हि परिचारिका वस्त्ररहिताः शोभन्तेतो वस्त्रदानं कार्यमित्याशयोस्मिन् पक्षे ॥ १५½ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गोविन्दे श्रीकृष्णे एवं ब्रुवति सति नर्मणा तत्परिहासवाक्येन आक्षिप्तं आकृष्टं चेतो यासां ताः, शीतोदके आकण्ठं मग्नाः, अत एव वेपमानाः सञ्जातकम्पा गोप्यस्तं कृष्णमब्रुवन् ॥ १३ ॥ तासां वाक्यान्याह—माऽनयमिति द्वयेन । तेन स्वाभेदं सूचयन्त्यः सम्बोधयन्ति-भो अङ्गेति । अनयमन्याय्यं मा कृथाः । बहुभिर्गोपैः सह वर्तमानेन कुलस्त्रीणामङ्गदर्शनमन्याय्यमेवेत्याशयः । "यदि कश्चिदज्ञातः पुरुष एवमन्याय्यं कुर्यात्तदा तस्याज्ञातत्वादेव तथाऽपयशो न स्यात्, तव तु ज्ञातत्वात् तत् स्यादेव" इत्याशयेनाहुः-त्वां तु वयं जानीम इति । ज्ञाने हेतुमाह-व्रजश्लाघ्यमिति । तत्रापि हेतुमाहुः-नन्दगोपसुतमिति । राजपुत्रत्वादित्यर्थः ॥ "गोपानामग्रे एवं नग्नदर्शनादेतैर्व्रजे कथनेन तवापकीर्तिः स्यादेव, साचास्माकं दुःसहा, प्रियत्वात्" इति सूचयन्त्य आहुः-प्रियमिति । अतोऽस्मद्वासांसि देहि । दययाऽपि तद्दानं युक्तम्, यतो वयं शीतेन वेपिताः कम्पिता इति ॥ १४ ॥ अन्या आहुः-श्यामसुन्दरेति । सम्बोधनेन 'अस्मद्वाक्ये न त्वया प्रतारणतोद्भावनीय, तव सौन्दर्येण वशीकृतत्वात्' इति सूचयन्ति । वयं च तव दास्यः अतस्तवोदितं त्वदुक्तं सर्वं करवाम करिष्याम एव । वासांसि देहि 'वस्त्रदानं तव युक्तमेव, धर्मज्ञत्वात् । धर्मशास्त्रे च—"कन्यायोनिं पशुक्रीडां नग्नस्त्रीं प्रकटस्तनीम् ॥ उन्मत्तं पतितं क्रुद्धं यन्त्रस्थं नावलोकयेत्" इति नग्नदर्शननिषेधादित्यभिप्रेत्य सम्बोधयन्ति-धर्मज्ञेति । अन्या आहुः-नो चेदिति । हे कृष्ण ! यदि वासांसि न ददासि, तर्हि राज्ञे ब्रजराजाय नन्दायेदं वृत्तं ब्रुवामहे कथयिष्याम इत्यर्थः ॥ १५ ॥ 'मत्प्राप्त्यर्थं व्रतार्चनादिकं कृत्वा साक्षान्मत्प्राप्तौ सत्यां लज्जाप्रतिबन्धको न युक्त' इति सूचयन् सम्बोधयति—शुचिस्मिता इति । भवत्यो यदि मे दास्यो मदुक्तं च करिष्यथ तदा नहि स्वामिनोक्तं किञ्चित् कार्यं किञ्चिन्न कार्यमिति युक्तम्, किन्तु सर्वमेव कार्यम् । अतोऽत्रागत्य स्ववासांसि प्रतीच्छन्तु गृह्णन्तु ॥ १६ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ गोविन्दे श्रीकृष्णे एवं मुहुर्ब्रुवति सति नर्मणा तत्परिहासवाक्येन आक्षिप्तम् आकृष्टं चेतो यासां ताः शीतोदके आकण्ठं मग्नाः अत एव वेपमानाः गोप्यस्तं कृष्णमब्रुवन् ॥ १३ ॥ मा इति ॥ तत्र मुग्धाः प्राहुः स्म । यद्वा । प्रथमं साम्ना प्राहुः स्म । अङ्ग भोः कृष्ण ! अनयमन्याय्यं मा कृथाः । नन्दगोपसुतं प्रियं व्रजे श्लाघ्यं त्वां तु वयं जानीमः । अतोऽस्मद्वासांसि देहि यतो वयं शीतेन वेपिताः स्मः ॥ १४ ॥ श्यामेति ॥ हे श्यामसुन्दर ! वय ते दास्यः स्मः । दन्त्यसकारवान् पाठश्चित्सुखसम्मतस्तत्र हे सुन्दर ! ते दास्यः स्यामेति स्वात्मार्पणं कृतवत्यः अतः तवोदितं करवाम एव । अतो हे धर्मज्ञ ! स्त्रीधनहरणे तवाधर्मो भवितेत्याशयः । "न नग्नां स्त्रीयमीक्षेत" इति निषेधाच्चेति । अतः वासांसि देहि इति काशिचत्प्रौढा आहुः । यद्वा । भयं दर्शयन्ति हे इत्यव्ययम् । चेद्यदि वासांसि नो दास्यसि तर्हि राज्ञे कंसाय नन्दाय वा इदं वृत्तं ब्रुवाम कथयाम । उकारवान् पाठस्त्वार्ष एव ॥ १५ ॥ तदुक्त्यैव ता निरुत्तरयति – भवत्य इति ॥ हे शुचिस्मिताः ! भवत्यः यदि सत्यमेव मे दास्यः स्थ मदुक्तं च सत्यमेव करिष्यथ तदा अत्रागत्य स्ववासांसि प्रतीच्छन्तु गृह्णन्तु । एतेनैव भवतीनां सत्यपरीक्षा भविष्यति । सत्यं त्यजन्तीभ्यस्तु न दास्य इत्याशयः । शुचिस्मिताः भूत्वा प्रतीच्छन्तु मुखे म्लाने तु न दास्यामीति च ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नर्मणा परिहासेन क्षिप्तं श्रीकृष्णे आकृष्टं चेतो यासां ताः तं कृष्णं ॥ १३ ॥ मुग्धा ऊचुः हे अंग । अनयं अन्याय्यं वेपिताः शीतेन कंपिताः वयं स्म अतो वस्त्राणि देहि ॥ १४ ॥ प्रौढा ऊचुः ते दास्यः स्याम भवेमतालव्यादिपाठे संबोधनं न दद्याश्चेतर्हि राज्ञे नंदाय ते इति विभक्तिप्रतिरूपकमव्ययं व्याख्येयमिति तोषणीसारे ॥ १५ ॥ हे शुचिस्मिताः प्रतीछतगृह्णीध्वं ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ गोविन्दे श्रीकृष्णे, एवं पूर्वोक्तरीत्या, ब्रुवति वदति सति, नर्मणा परिहासेन आक्षिप्तं गृहीतं चेतश्चित्तं यासां ताः, शीतोदे शीतोदके आकण्ठमग्नाः, अत एव वेपमानाः कम्पमानाः सत्यः, तं श्रीकृष्णं, अब्रुवन् ॥ १३ ॥ किमब्रुवन्नित्यपेक्षायां सामादिचतुर्विधोपायपूर्वकभगवज्ज्ञानसंपन्नं गोप्युक्तमाह द्वाभ्याम् ॥ मेति ॥ भोः हे पूज्य, अङ्ग हे कृष्ण, अनयमन्याय्यं, मा कृथाः । त्वां तु नन्दगोपसुतं नन्दराजतनयं, तस्य प्रियं च, जानीमः व्रजश्लाघ्यं च जानीमः । अतः वासांसि, देहि । यतो वयं वेपिताः शीतकर्षिताः, भवामः । नन्दराजस्य प्रियं जानीमः इत्यस्यायं भावः । नन्दराजोऽपि त्वयि प्रेमातिशयहेतुना सर्वापकारिणमपि त्वां न

शिक्षयतीति तव धौर्त्यं च नवनीतचौर्यादिषु प्रसिद्धमेवेति ।। १४ ।। श्यामेति ।। श्यामश्चासौ सुन्दरश्च तत्संबुद्धिः वयं, ते तव, दास्यः तव उदितं, करवाम । त्वयोक्तमन्यद्यत्किंचित्तदपि करवामेत्यर्थः । भावगर्भमिदम् । निरतिशयसौन्दर्यादिभिस्त्वद्दास्यः सत्यस्त्वदभिप्रेतं करवामैवेत्यभिप्रायः । हे धर्मज्ञ अनेकान्ते नग्नस्त्रीदर्शनाकरणरूपधर्माभिज्ञ, स्त्रीणां लज्जास्वभावरूपधर्मं जानातीति वा । वासांसि, देहि प्रयच्छ । नो चेन्न प्रयच्छसि चेत्, राज्ञे नन्दाय कंसाय वा, ब्रुवामहे ।। १५ ।। एवमुक्तो भगवान् ताभिः 'नोचेद्राज्ञे ब्रुवामहे' इति यदुक्तं तदनुपपन्नं जलान्निर्गत्य वासांसि गृहीतुमेव लज्जन्तीनां नग्नानां राजसंनिधौ गमनासंभवात्, न चान्यप्रेषणया निवेदनसंभवः, प्रेषणीयजनस्याभावादिति तदुत्तरं न देयमित्यभिप्रेत्य 'ते दास्यः करवाव तवोदितम्' इति यदुक्तं तदुत्तरमाह ।। भवत्य इति ।। हे सुचिस्मिताः, भवत्यः यदि, मे मम दास्यः, मयोक्तं वा मदुक्तमेव, यदा करिष्यथ, तर्हि अत्र आगत्य, स्ववासांसि प्रतिच्छध्वम् । हि दासीभिः स्वामिनोक्तं किंचिदेव स्वसंमतं कर्त्तव्यमिति नियमोऽतः सर्वमपि तदभिमतं कर्त्तव्यमिति भावः ।। १६ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मानयमिति : १०.२२.१४.

आस्तां तदेतद् व्रजशोभनाय तवावतारः प्रथितः पृथिव्याम् ।
तन्नैव चार्वीश तवाऽधुनैतद्व्रजावमानोऽयमभूतपूर्वः ।। ४७ ।।
विनाम्बरालम्बनमम्बुजाक्ष यन्न कृष्णमेघोदयदर्शनं क्वचित् ।
प्रसिद्धमेतत् स्फुटमेतदप्यहो सदैव तस्मिन् सरसत्वमुज्ज्वलम् ।। ४८ ।।
सरसं जनमालोक्यस्वभावादप्रगल्भधीः । करोति विरसं तद्वन्न भव त्वं कुमार्गधीः ।। ४९ ।।
धर्मप्रवक्ता त्वमिति श्रुतिश्रुतः प्रत्यक्षतस्त्वेवमिहेश वक्षि नः ।
किं वाऽनयोर्धर्म्यमधर्म्यमन्ततो ज्ञस्त्वं तदस्मान्न वृथा विमोहय ।। ५० ।।

श्यामसुन्दरेति : १२.२२.१५.

सदास्यस्थितयो नित्यं स्म एव वमयच्युत । ज्ञातं कुर्मस्त्वदिष्टं तदलमेतद्बहिर्गिरा ।। ५१ ।।
एवमप्यर्थितेऽस्माभिर्न वासो यदि दीयते । ब्रूमस्तमस्ति यच्छास्ता राजाऽन्यायानुवर्तिनाम् ।। ५२ ।।
स्वमप्रगल्भत्वमिहाधुना मयि सदागमोल्लासिनि चाम्बरत्विषि ।
भृशं यदध्यासितमत्र विस्मयो न तादृशो हि प्रकृतेः प्रभोदयः ।। ५३ ।।
चन्द्रो राजा चेदयं मेऽन्वयाद्यो नन्दोऽसौ चेत् स त्वलं तात एव ।
कंसश्चेत् किं तद्भयं तद्रिपोर्मे क्रुद्धादाखोराख्वरेः का नु भीतिः ।। ५४ ।।

कृष्णप्रिया

भगवान गोविन्द ने फिर भी इसी प्रकार के वचन कहे तब प्रभुके परिहास पूर्ण मधुर वचनों से व्रज कुमारियों का मन और भी उनके प्रति अनुरक्त हो गये। ठंडे जल में कंठ तक डुवी हुई एवं कांपती हुई कन्यकाएँ भगवान को कहने लगी ।। १३।। हे श्री कृष्ण ! आप अनीति न करो। हम आप को जानती है ! आप हमारे नन्द बाबा के पुत्र एवं हमारे प्यारे हो। हे नाथ! हे अङ्ग। प्रियतम् ? सम्पूर्ण व्रजजन आप को सदा यशोगाथा गाते हैं। कृपया हमारे वस्त्र हमे दीजिए। देखिए ठंडके मारे हम सब कांप रहो है ।। १४ ।। हे श्याम सुन्दर ! हम तो आप की दासी है। आप की आज्ञा का पालन करने को तत्पर है। हे कृष्ण आप धर्म के मर्म को ठीक तरह जानते हो हमारे वस्त्र हमे दे दो। यदि आप नहीं दोगे तो हम नन्द बाबा के समीप जा कर फरियाद करेगी ।। १५ ।। भगवान् श्रीकृष्ण ने कहा, यदि आप मेरी दासी हो या मेरी बात सुनती हो मेरा कहां करती हो तो हे पवित्र मुस्कराहट वाली कुमारियों ! तो यहाँ आकर अपने अपने वस्त्र ले जाओ ।। १६ ।।

ततो जलाशयात् सर्वा दारिकाः शीतवेपिताः । पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुः [1]शीतकर्शिताः ॥ १७ ॥
भगवानाहता[2] वीक्ष्य [3]शुद्धभावप्रसादितः । स्कन्धे निधाय वासांसि प्रीतः प्रोवाच [4]सस्मितम् ॥ १८ ॥

यूयं विवस्त्रा यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनम् ।
बद्ध्वाञ्जलिं मूर्ध्न्यपनुत्तयेंऽहसः कृत्वा [5]नमो वो वसनं प्रगृह्यताम् ॥ १९ ॥
[6]इत्यच्युतेनाभिहिता[7] व्रजाबला मत्वा विवस्त्राप्लवनं व्रतच्युतिम् ।
तत्पूर्तिकामास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमृग्[8] यतः ॥ २० ॥

कर्वमक्षमा

अन्वयः—ततः शीतकर्षिताः शीतवेपिताः सर्वाः दारिकाः पाणिभ्याम् योनिम् आच्छाद्य जलाशयात् प्रोत्तेरुः ॥ १७ ॥ शुद्धभावप्रसादितः भगवान् स्कन्धे वासांसि निधाय प्रीतः आहता आ अहताः सर्वतः निर्दुष्टाः सस्मितम् प्रोवाचः ॥ १८ ॥ यूयम् धृतव्रताः विवस्त्राः यत् अपः व्यगाहत तत् उ एतत् देवहेलनम् "जातम् अतः" अंहसः अपनुत्तये मूर्ध्नि अंजलिम् बद्ध्वा अधः नमः कृत्वा वसनम् प्रगृह्यताम् ॥ १९ ॥ इति अच्युतेन अभिहितम् विवस्त्राप्लवनम् व्रतच्युतिम् मत्वा तत् पूर्तिकामाः व्रजाबलाः तद् अशेषकर्मणाम् साक्षात् कृतम् "श्रीकृष्णम्" नेमुः यतः अवद्यमृग् सर्वदोषनिवृत्तिः जाता ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रोत्तेरुर्निर्गताः ॥ १७ ॥ आहताः ईषदक्षतयोनीर्वीक्ष्य ॥ १८ ॥ धृतव्रताः सत्यो विवस्त्रा अपो व्यगाहताप्सु स्नाता इति यत्तदेतत् उ एव देवहेलनमपराध एवेत्यर्थः । व्रतवैगुण्यभीतानां प्रायश्चित्तमिवाह । अस्यांहसः पापस्य निवृत्तये मूर्ध्न्यंजलिं बद्ध्वाऽधो नमः प्रणामं कृत्वेति ॥ १९ ॥ इति दोषत्वेनाच्युतेनाभिहितं विवस्त्राप्लवनं व्रतस्य च्युतिहेतुं मत्वा तस्य पूर्तिकामास्तदशेषकर्मणां तस्य व्रतस्यान्येषामशेषकर्मणां च साक्षात्कृतं फलभूतं तमेव नेमुः । स एवावद्यमृक् पापमार्जकः ॥ २०–२१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः कृष्णोक्तिश्रवणोत्तरम् । दारिकाः दारा एव दारिकाः 'स्त्रियो दाराः पुंभूम्नि च स्त्रियाम्' इत्युक्तेर्दारशब्दात्स्वार्थिककांताट्टाप् । योनिम् स्मरमंदिरम् "योनिर्द्वयोः स्मरागारे जातावा करजन्मनोः" इति धरणिः ॥ १७ ॥ अक्षतयोनीः कृताल्पनिधुवनाः । शुद्धभावः परमप्रेमा तेन जातप्रसादः । आहता आगताः । यद्वा आहताः शीतपीडिताः । तथा च विश्वः—"आहतं गुणितेऽपि स्यात्ताडितेऽप्यानकेपि च" इति संदर्भः । विश्वनाथस्तु—आ सम्यक् प्रकारेण हता मृता इव वीक्ष्य कुलजानां मरणादप्यधिक ईदृशो लज्जात्यागः सोपि मदनुरोधेनैवाभिः कृत इति मनसैवाधिगतो यः शुद्धो निरुपाधिर्भावः प्रेमा तेन प्रसादितः । स्कंधे निधायेति—भवतीनामधोवस्त्राण्यपि मया स्वस्कंधे धार्यंत इति तासु स्वप्रणयादरौ दर्शितौ । प्रकर्षेण परामर्शपूर्वमुवाच । परामर्शश्च—स्त्रीजातिमात्रेणापि दुष्करमाभिर्मत्प्रेमोपरोधेन कृतम् । किञ्च, इतोप्यन्यदात्यन्तिकदुष्करं कृत्यमस्ति तदेताभिः शक्यमशक्यं वेति मद्विषयकप्रेम्णः शक्तेरियत्तां परीक्षे इति सस्मितमिति—भोः स्वमुखेनैवांगी कृतमद्दास्यः 'करवाम तवोदितम्' इति युष्मद्वचनस्याधुनाहं परीक्षां करिष्ये, ततो यद्युत्तीर्णा भवितुं शक्नुथ तदैव युष्मद्वसनानि मदीयात्ममनः प्राणशरीरैः सहितान्येव कृत्वा दास्यामीति भावः ॥ १८ ॥ देवहेलनम् देवस्य वरुणस्य हेलनमपराध एव । इत्यर्थ इति । उशब्दोत्रैवार्थक इति ध्येयमिति । यादवे तु 'उ तापेऽव्ययमीशे च' इत्युक्तम् । तथा च—उ कोर्थः तापकरं देवहेलनमिति योज्यम् । "प्रायः पापं समाख्यातं चित्तं तस्य विसर्जनम्" इति तत्त्वबोधिन्याम् । क्वचित्त्वेतच्छ्लोकद्वयं ग्रंथांतरीयमपि लिखितं दृश्यते तथाहि—"एकेन पाणिना नेमुरेकेनाच्छाद्य योनिकम् । ता वीक्ष्योवाच भगवान्भूयो धर्म्यमिदं वचः ॥ १ ॥ एकेन पाणिना यो वै प्रणमेद्देवमच्युतम् । तस्य दंडः करच्छेद इति धर्मविदो विदुः ॥" इति । शाता तपस्तु—"जन्मप्रभृति यत्किंचिच्चेतसा धर्ममाचरेत् । तत्सर्वं निष्फलं याति एकहस्ताभिवादनात् ॥" इति । एतच्चापयागत्वादत्रानुसधयमव ॥ १९ ॥ विवस्त्राप्लवनम् नग्नीभूय स्नानम् । "स्नानं दानं तथा होमं शयनं गमनं भुजिम् ।

---

१. तीरमङ्गनाः—वीर. विज. ; व्रतकर्शिता—इति पाठः । २. नथ ताः—विज. । ३. मुग्ध—विज. । ४. सस्मितः -विज. । ५. ऽधो—श्रीधर. वंशी. वीर. विज. ६. "इत्येतद्वचनं श्रुत्वा धर्मयुक्तं महात्मनः"—अयमर्धश्लोकोधिकः वीर. पाठे ।

"एकेन पाणिना नेमुरेकेनाच्छाद्य चाङ्गनाः । ता वीक्ष्योवाच भगवान्भूयो धर्म्यमिदं वचः ॥
एकेन पाणिना यो वै प्रणमेद्देवमच्युतम् । तस्य दण्डः करच्छेद इति वेदविदो विदुः ॥
तस्मादुभाभ्यां पाणिभ्यां प्रणमेत्स्वामिनं नरः । तथा च यूयं कुरुत तन्मे प्रियतरं भवेत् ॥"

इत्यधिकः पठ्यते वीर. विज. ।

७. भिहितं—श्रीधर. वंशी. वीर. विज. विश्व. । ८. मुग्धतः—वीर. ; मुज्झितुं—विज. ।

विवस्त्रो न प्रकुर्वीत कुर्वाणः पापकृद्भवेत् ॥" इति स्मृतेः सर्वफलस्वरूपे तस्मिन्नेव तुष्टे किं फलमवशिष्टं स्यादिति भावेन नेमुः। न हि तत्प्रसादविषयीभूतानां प्रत्यवायादिलक्षणः कोपि दोष इत्याह—अवद्यमृगिति। अवद्यानिर्माष्टीति तथा 'अवद्यं पापदोषयोः' इति शाश्वतः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तं तदाग्रहं दृष्ट्वेत्यर्थः। दारिका बालाः शीतेनैव वेपिताः कम्पितदेहा अपि पाणिभ्यामाच्छाद्य वेपनं च सात्त्विकमेव प्रेमस्वभावजं प्रोत्तरणे हेतुः शीतेन कृशीकृताहीनबलत्वमापादिता इत्यर्थः ॥ १७ ॥ शुद्धेन भावेन प्रेम्णा प्रसादितः पूर्वत एव अधुना च आहताः हन्तेर्गत्यर्थत्वादागता वीक्ष्य प्रीतः सन् वासांसि सर्वाण्येवावचित्य वृक्षस्य स्कन्धे निधाय प्रकर्षेण शिक्षणार्थमिव न्यायप्रदर्शनेनोवाच सस्मितमिति तासां चिरं तथा स्थापने वक्ष्यमाणेपि नर्मसंस्पर्शात् नन्वाहता इत्यत्रागता इत्यर्थो न युक्तः अप्रयुक्तत्वात् उच्यते काव्यकूपवर्त्तिनामिदं मतं ननु वेदादिशब्दमहोदधिवर्त्तिनां यथाह महाभाष्ये "सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या अनेकधा भिन्ना एकशतमध्वर्य्यशाखाः सहस्रवर्त्मा सामवेद एकविंशतिर्बाह्वृच्यं नवधाऽथर्वणो वेदा वाकोवाक्यमितिहासपुराणानि वैद्यकमित्येतावन्तं शब्दप्रयोगमनिशम्याप्रयुक्ताः शब्दाः" इति वचनं केवलं साहसमित्यादिकोषकारमतेप्याह–ता इत्यस्यान्यार्थो घटते यथा विश्वप्रकाशे "आहतं गुणितेऽपि स्यात्ताडितेऽप्यानकेऽपि च" इति गुणितत्वं चात्र द्वित्रादिगुणतया पूर्वस्याङ्कस्य डोरिकादेर्वा सङ्करीकरणं तद्वदत्रापि लज्जातः स्वयमात्मसु तादृशी करणमिति किञ्च आहतशब्दस्य व्याख्यायां क्षीरस्वामी आहतमुद्घोषितमिति प्राह, अत्र च तासां विख्यातत्वं गम्यते तच्च तासां तथा वीक्षणे चमत्कारातिशयद्योतकमित्यलमेतया कल्पनया ॥ १८ ॥ ननु बाल्ये न दोष इति चेत्तत्राह—धृतव्रता इति। यदेतदिति। साक्षान्मयाऽनुभूतत्वादत्र प्रतारणं न किञ्चित् सम्भवेदिति भावः। देवस्य जलाधिष्ठातुर्वरुणस्य नारायणस्य वा हेलनमवज्ञा अञ्जलिं बद्ध्वा तं च मूर्द्ध्नि नत्वन्यत्रेति भिन्नाभिप्रायं ततश्च नमः कृत्वेत्युक्ते एकपाणिना नमनोद्यममालक्ष्य एकहस्तप्रमाणश्चेत्यादिवचनपाठेनाञ्जलिं बद्ध्वेति तत्राप्यधोऽञ्जलिबन्धनमभिप्रेत्य मूर्द्ध्नीत्युक्तमित्यूह्यम् अधो वसनं परिधानवस्त्रमेव उत्तरीयवस्त्रं च तथापि न प्राप्तव्यमेवेत्यर्थः ॥ १९ ॥ अच्युतेनेति कदाचित् कथञ्चिदपि तद्वाक्यस्य सदर्थाच्युतिर्नास्तीति तासामभिप्रायः सूचितः यतो व्रजस्य अबलाः स्त्रियः तत्र च अबलाशब्देन कथञ्चिदपि तद्वाक्यमत्येतुमशक्ता इत्यर्थः ! प्रेमवशत्वादिति भावः। मत्वेति वस्तुतो देशाचारबाल्याचारप्राप्तत्वेनादोषात् अत एव प्रलब्धा इति वक्ष्यते साक्षात्कृतं पतिरूपं फलं तद्रूपत्वादेवावद्यमृगितितु तासामभिप्रायः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततस्तदनन्तरं तदाग्रहं दृष्ट्वेत्यर्थः। जलाशयात् जलमध्यतः। दारिका बालाः, प्रायः श्रीकृष्णेन समवयस्कत्वात् शीतेनैव वेपिताः कम्पितदेहा अपि पाणिभ्यां योनिमाच्छाद्य, वेपनञ्च सात्त्विकमेव प्रेमस्वभावजम्, प्रकर्षेण उत्तेरुर्निःसृताः। तत्र हेतुः—शीतेन कर्षिता बहिरस्तश्च व्याता इत्यर्थः ॥ १७ ॥ शुद्धेन भावेन प्रेम्णा पतित्वकामनया वा, प्रसारितः पूर्व्वत एव, अधुना च आहताः, हन्तर्गत्यर्थत्वादागता वीक्ष्य प्रीतः सन् वासांसि सर्व्वाण्येवावचित्य स्वस्कन्धे निधाय तासां सर्व्वासां प्रत्येकं प्रीतिसम्पत्तये प्रकर्षेण शिक्षणार्थमेव न्यायप्रदर्शनेनोवाच —सस्मितमिति, वक्ष्यमाणेऽपि नर्म्मसंस्पर्शात्। यद्वा, स्कन्धे निधायेत्यत्र हेतुः—शुद्धेति। सस्मितं प्रोवाचेत्यत्र हेतुः—प्रीत इति; प्रीत इत्यनेन नर्म्मोक्तिः सूचितैव, प्रीत्यैव तस्या अवश्यमुदयात्, एवमेकस्मिन्नेव स्कन्धे बहुतराणां तावतां वाससां निधानाल्लौकिकलीलायामपि पूर्व्ववदैश्वर्य्यं प्रदर्शितम्, अतएवादावुक्तम् (८ म० श्लो०)–'योगेश्वरेश्वरः' इति ॥ १८ ॥ ननु न बाल्ये दोष इति चेत्तत्राह–धृतव्रता इति। यदेतदिति साक्षान्मयानुभूतत्वादत्र प्रतारणं न किञ्चित् सम्भवेदिति भावः। देवेति देव्यर्च्चनेऽपि पुंस्त्वेन निर्द्देशः, सर्व्वदेवतास्वपि तदवहेलनस्य सामान्यविवक्षया दार्ढ्यापादनाय। यद्वा, देवस्य जलाधिष्ठातुर्वरुणस्य हेलनमवज्ञा; यद्वा, देवहेलनशब्देन पारिभाषिकतया व्रतच्छिद्ररूपोऽपराध एवाभिहितः। अञ्जलिं बद्ध्वा तच्च मूर्ध्नि, न त्वन्यत्रेति रसिकशिरोमणेस्तस्येष्टविशेषपरिपूर्त्तये, तत्र च नमः कृत्वेत्युक्ते एकपाणिना नमनोद्यममालोक्य (ह० भ० वि० ८।४०६ विष्णुस्मृतिवचनम्) 'एकहस्तप्रणामश्च' इत्यादिवचनपाठेन अञ्जलिं बद्ध्वेति तत्राप्यधोऽञ्जलिबन्धनमभिप्रेत्य मूर्द्ध्नीत्युक्तमित्यूह्यम्। अधः नीपतले स्थिताभिः सतीभिरिति निकटागमनेन सम्यग्दर्शनसिद्धेः। अस्य च नमस्कृत्वेत्यनेन प्रगृह्यतामित्यनेन वान्वयः। यद्वा, अधोवसनं परिधानवस्त्रमेव, उत्तरीयवस्त्रञ्च तथापि न प्राप्तव्यमेवेत्यर्थः। अतएव वसनमिति उत्तरीयाभावेन प्रत्येकमेकैकग्रहणविवक्षयैकत्वम् ॥ १९ ॥ अच्युतेनेति कदाचित् कथञ्चिदपि त्वद्वाक्यस्य सदर्थाच्च्युतिर्नास्तीति तासामभिप्रायः सूचितः। स्त्रियस्तत्र च अबलाशब्देन कथञ्चिदपि तद्वाक्यमत्येतुमशक्ता इत्यर्थः। अभिहितमुक्तं श्रुत्वेति शेषः। व्रतस्याच्युतिमपि च्युतिं छिद्रं मत्वेत्यर्थः। अच्युतिश्च तत्त्वतो बाल्ये विवस्त्रतया व्रतस्थानामपि स्थाने दोषाभावात्, एतच्च श्रीस्वामिपादैरग्रे व्यञ्जितमेव (२२ श० श्लो०)—'दृढमत्यर्थं प्रलब्धा वञ्चिता यूयं विवस्त्रा इत्यादिना' इति। अन्यत्तैर्व्याख्यातम्। यद्वा तदित्यस्य विवस्त्राप्लवनमित्यनेन परेण वान्वयः। तेषां स्वकृतानां देव्याराधनलक्षणानामशेषकर्म्मणां पूर्त्तिकामाः सत्यो नेमुः, यतोऽशेषकर्म्मणां स एवावद्यमृक् छिद्रपूर्त्तिकारकः ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

देवहेलनं देवस्यापराधः अञ्जलिं बद्ध्वेति युक्तकरछन्दं कृत्वा ॥ १९ ॥ साक्षात्कृच्छब्दो द्वितीया साक्षात्कृतमिति साक्षात्कर्त्तारम् अनवद्यमृग्यतः अवद्यमार्जनायनियताः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स्वाम्यभिमतकरणं दासीनामुचितमेवेत्यभिप्रेत्य शीतेन कम्पिताः कुमारिकाः कालिन्दीह्रदात् प्रोत्तेरुर्निर्जग्मुः ॥ १७ ॥ ततो भगवानाहताः ईषदप्यक्षतयोनीर्बाल्ययौवनसन्धिस्थाः ताः कुमारिकाः अवलोक्य शुद्धभावेन निष्कपटभावेन यथोक्तानतिक्रमशीलेन भावेन हेतुना प्रसादितः प्रसादोत्रानुग्रहः अस्य सञ्जात इति तथा अनुग्रहयुक्तः स्कन्धे वृक्षशाखायां वासांसि निधायारोप्य प्रीतः सस्मितश्च पुनरुवाच ॥ १८ ॥ तदेवाह–यूयमिति । धृतव्रताः सत्यो विवस्त्रा यूयमपो व्यगाहत अप्सु स्नाता इति यत्तदेतद्देवहेलनमुत अपराध एवेत्यर्थः । व्रतवैगुण्यभीतानां प्रायश्चित्तविधानमाह–अस्यांहसः पापस्य अपनुत्तये अपनोदाय मूर्द्ध्नि अञ्जलिं बद्ध्वा नमस्कृत्य वसनं प्रगृह्यताम् ॥ १९ ॥ इत्थमच्युतेनाभिहिताः अङ्गनाः एकेन वामेन पाणिना योनिमाच्छाद्य इतरेण पाणिना नेमुः । पुनरपि भगवांस्ता वीक्ष्येदं वक्ष्यमाणं धर्म्यं धर्मादनपेतं वाक्यमाह; तदेवाह–एकेनेति सार्द्धेन । एकेन पाणिना नेमुरित्यादिसार्द्धश्लोकद्वयं क्वचिन्न दृश्यते । तस्मादिति । हस्तद्वयसम्पुटस्यैवाञ्जलिशब्दार्थत्वादिति भावः । इत्थमच्युतेनाभिहिताः व्रजकुमारिकाः विवस्त्रस्नानप्रयुक्तां व्रतच्युतिं व्रतभ्रंशं मत्वा तस्य व्रतस्य पूर्त्तिमवैगुण्यं कामयमानास्तस्य व्रतस्यान्येषां कर्मणाञ्च साक्षात्कर्त्तारमच्युतं नेमुः हस्तद्वयेन मूर्ध्न्यञ्जलिं बद्ध्वा नेमुरित्यर्थः । कुतः ? यतः केवलमशेषकर्मणां न साक्षात्कृदेवापितु अवद्यमुक् अवद्यं कर्मवैगुण्याऽऽपादकं पापं तस्मान्मोचयतीति तथा ण्यर्थगर्भोऽत्र मुचिः अतः प्रणेमुरित्यर्थः ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

दारिकाः कुमार्यः ॥ १७ ॥ मुग्धभावेन मधुरस्वभावेन प्रसादितः प्रसादं गमितः ॥ १८ ॥ यूयं वस्त्रहीना अपो जलं व्यगाहतेति यत्तदेतत् उ तापकारणं देवहेलनं देवतापराधः अतस्तस्यांहसः अपराधस्य परिहाराय "उ तापेऽव्ययमीशे च" इति यादवः ॥ १९ ॥ विवस्त्राप्लवनं दिगम्बरस्नानं व्रतच्युतिं नियमभ्रंशं तत्पूर्त्तिकामाः तस्य व्रतस्य पूर्णतां कामयमानाः तासामशेषकर्मणां साक्षात्कृतं साक्षीभूतं कृष्णं नेमुः । अनेन किं प्रयोजनमत्राह अवद्यमिति । उज्झितुम् उन्मूलयितुम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आहता आगताः यद्वा आहता शीतपीडिताः तथाच विश्वः "आहतं गुणितेऽपि स्यात्ताडितेप्यानकेऽपि च" इति ॥ १८ ॥ अधोवसनं परिधानवस्त्रमेव नत्वन्यदिति काठिन्यमिव ॥ १९ ॥ साक्षात्कृतं पतिरूपं फलं तद्रूपत्वादेवावद्यमृगिति तु तासामभिप्रायः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

इति निर्बन्धं तस्य ज्ञात्वा अकर्तव्यमपि भगवदाज्ञया तत्प्रीतिहेतोश्च तथा कृतवत्य इत्याह–तत इत्यादि । ततस्तस्य तथा निर्बन्धज्ञानानन्तरं दारिकाः कन्यका जलाशयादुत्तेरुः । शीतेन वेपिताः कम्पिताः, शीता अलसाश्च कर्शिता; स्तब्धभूताः । पाणिभ्यामिति लज्जाधिक्येन द्विवचनम् ॥ १७ ॥ तथाभूतास्ता आगता वीक्ष्य यदुवाच तदाह–भगवानित्यादि । आहतास्तथाप्रकारेणागता वीक्ष्य, हन हिंसागत्योरित्यत्रायं गत्यर्थ एव । अप्रयुक्तदोषस्तु काव्यादावेव, नात्रार्षवाक्ये । यद्वा, आहताः–त्रपयोपहताः । यद्वा, आसम्यगाहताः, अतएव आसम्यग् वीक्ष्यो दर्शनीयः । अतएव शुद्धो निरुपाधिर्यो भावस्तेन प्रसादितः । प्रसादितः प्रसादं प्रापितः । किंवा भगवान् ता वीक्ष्याह, किं तदित्याह––शुद्धभावप्रसादितः । शुद्धभावेन यः प्रसादितोऽहमिति पुनः स्कन्धे वासांसि निधाय प्रकर्षेणोवाच वक्ष्यमाणमिति शेषः । स्कन्धे निधाय अंशे कृत्वा प्रथमं त्वरया सर्वाणि वासांसि चोरयित्वा नीपशाखाष्वेव स्थापितानि; सम्प्रति प्रेम्णो महिम्ना तासामङ्गसौरभसुरभीणि तानि स्कन्ध एव निहितानि । तत् स्पर्शात्तासामङ्गस्पर्शसुखानुभूतेः । अतः स्कन्धे निधाय प्रीत इति प्रीतेः पूर्वकाले ल्यप्, सस्मितं यथा स्यात्तथा प्रकर्षेणोवाच । स्वामि–व्याख्या तु चिन्त्या त्रपाकरत्वात् पाणिद्वयच्छोदनेन दर्शनाभावाच्च ॥ १८ ॥ किं तदित्याह––यूयमिति, महाकुलप्रसूता इत्यर्थः । युष्माकमिदं नोचितम् । किं तदित्याह–यदित्यादि । यद्धृतव्रता भूत्वा विवस्त्राः सत्योऽपो जलानि व्यवगाहत । नन्वस्माकं देशाचारोऽयमत्र किं दूषणमित्याशङ्क्याह––एतदित्यादि । भोः कुमार्यः ! एतद्देवहेलनम्, देवस्याधिष्ठातुर्वरुणस्य; अथवा देव्या यमुनायाः मयूराण्डमित्यादिवत् पुंवद्भावः । तर्हि अस्य पापस्य किं प्रायश्चित्तम् ? प्रायश्चित्तमनायाससाध्यम्, तदेव क्रियताम्, नो चेद् देवहेलनेन व्रतफलसिद्धिरपि दुर्लभेति प्रायश्चित्तं दर्शयन् स्मार्तत्वं प्रकटयति । बद्धाञ्जलिमित्यादि । नमः कृत्वा मां नमस्कृत्य वो युष्माकं वसनं प्रगृह्यताम् । एवं चेत् 'नमो नमस्ते' इति वाचनिकमेव नमस्कारं कुर्मः ? नैवम् प्रायश्चित्तादौ मुख्य एव कल्पः क्रियते, न तु गौणः । एवं चेच्छिरोनमनेनैव कायिकः कर्तव्यः । स्वापकर्षबोधानुकूलो व्यापारविशेष एव नमस्कार इत्यस्य नियमान्नैवं करशिरःसंयोगो हि मुख्यो नमस्कार

इत्याह—मूर्ध्नि अञ्जलिं बद्ध्वा । अधोवसनमिति पाठे तथापि अधोवसनान्येव दातव्यानि न तूत्तरीयाणीति प्रहास विशेषः ॥ १९ ॥ इति व्रतफलच्युतिभिया तथैव कर्त्तुमारब्धवत्य इत्याह इत्यच्युतेनेत्यादि । अथ यथोपदेशं कृतनमस्कारासु तासु स्वाज्ञाप्रतिपालनप्रीतः सन् भगवान् प्रससादेत्याह—तास्तथेत्यादि तथा यथा स्वयमुपदिष्टमित्यर्थः । तेन प्रणामेन तोषितः स्वभावत एव करुणः करुणावान् भगवानप्रतर्क्यैश्वर्यदेवकीसुत इति पूर्ववत् । यद्वा, करुणश्च स्तेनश्चौरश्च तोषितश्च, स्वार्थे णिच्, तुष्ट इति यावत् । यद्वा, स्तेनता चौरता-तयोषितः पश्चाद्वद्धः; वस्त्रापहारकत्वेन स्थितः तथा च गोपीवस्त्रापहारक इति ॥ भगवानपि देवकीसुतोऽपि करुणोऽपि स्तेनतोषितः वैकल्पिको विसर्गलोपः ॥ २०-२१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

शीतवेपिताः शीतेन कम्पिताः, शीतकर्शिताः, शीता अलसा अतएव कर्शितास्तनूभूता आनन्दजनितभावविशेषेणालसाः कर्शिताः 'शीतोऽलसः' इति पर्यायात् ॥ १७ ॥ भगवानिति । आहता आनन्दवेगेन सम्यक् हताः शीतादिना ग्लान्यादिना लज्जया वा; यद्वा, आहता आगता, 'हन् हिंसागत्योः' इति गत्यर्थात् । यद्वा, आ अहतः सम्यगक्षुण्णः, अतएव आसम्यक् वीक्ष्यः प्रेक्षणीयः, अतएव शुद्ध उपाधिशून्यो यो भावस्तेन प्रसादितः, सम्मितं यथा भवति तथा प्रोवाच । किं कृत्वा ? स्कन्धे वासांसि निधाय; स्कन्धे स्वांसे; अयमभिप्रायः-संप्रति साक्षात् स्पर्शो न जातः, परस्परास्पर्शो भवत्विति स्कन्धे निधापनमालिङ्गनं सुखाभिव्यञ्जकम् ॥ १८ ॥ यूयमित्यादि । यूयं समाजकुमारिकाः तत्रापि व्रजस्थाः सत्यो विवस्त्रा यत् अपो व्यगाहत तत् 'उ' सम्वोधने देवहेलनम् । 'उ' इति एवार्थे वा, देवहेलनमेवैतत् तत् तस्मादंहसः पापस्य नुत्तये मूर्ध्नि अञ्जलिं वद्ध्वा नमस्कृत्वा अधोवसनं प्रगृह्यताम् । अथवा आदौ मूर्ध्नि अञ्जलिं बद्ध्वा दण्डवन्नत्वा; अधोवसनमित्यस्यायं भावः-एवञ्चेन्नमस्कारं करोषि, तथाप्यधोवसनमेव दास्यामि, न तूत्तरीयादीनीति परिहासः । अधो नमस्कृत्वेति अधो भूमितल इति वा, यन्नमस्कारेणैव देवतान्तरहेलनमपि यास्यतीति । वस्तुतस्तु अधिष्ठातृवरुणदेवतायामेव वा हेलनमभूत्, तेन तत्रैवापराधोऽपि जातः, यन्नमस्कारात् मयि प्रीते सति सोऽप्यपयातीति भावः ॥ १९-२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च अयि सख्यः स्ववाचैव पराभूता वयमभूमैव यदि पुनरथापि विलम्बिष्यामहे एतन्मध्य एव कश्चिदन्यो मनुष्यश्चेदायाति तदा स्फुटमितोपि महाविडम्बनाम्बुधौ पतिष्यामः किञ्च, एतदङ्गस्पर्शप्राप्त्याशा महाबलवती दुर्वारा बभूव या खल्वत्रैव निमज्य मर्त्तुमपि न ददाति तदेतद्विधात्राऽस्माकं ललाटे लिखितमन्यथा न भवेदित्यतोऽस्य प्रियतमस्यैव हठं पुरस्कृत्य स्वहठं रसातले प्रस्थाप्य लज्जायै जलाञ्जलीर्दत्वा नेत्राणि मुद्रयित्वा प्रातैरन्धकारैरेव स्वस्वशरीराण्याच्छाद्य जलादस्मात्तटं गच्छाम इति मन्त्रणां मिथो दृढीकृत्य ताः कृष्णसमीपं जग्मुरित्याह, तत इति प्रोत्तेरुः निर्जग्मुः ॥ १७ ॥ आसम्यक् प्रकारेणैव हता मृता इव वीक्ष्य कुलजानां मरणादप्यधिक ईदृशो लज्जात्यागः सोऽपि मदनुरोधेनैवाभिः कृत इति मनसैवाधिगतो यः शुद्धो निरुपाधिर्भावः प्रेमा तेन प्रसादितः स्कन्धे निधायेति तासामङ्गसौरभ्यप्राप्तिलोभादेव अथ च भवतीनामधोवस्त्राण्यपि मया स्वस्कन्धे धार्य्यन्ते इति तासु स्वप्रणय आदरश्च दर्शितः प्रकर्षेणोवाच सपरामर्शमुवाचेत्यर्थः । तत्रायं परामर्शः स्त्रीजातिमात्रेणापि दुष्करं कृत्यमाभिर्मत्प्रेमोपराधेन कृतं किं चेतोऽप्यन्यदात्यन्तिकं दुष्करं कृत्यमस्ति तदेताभिः शक्यमशक्यं वेति मद्विषयकप्रेम्णः शक्तेरियत्तां दिदृक्षे इति सस्मितमिति भोः स्वमुखेनैवाङ्गीकृतमद्दास्यं करवाम तवोदितमिति युष्मद्वचनस्य परीक्षामधुनाहं करिष्ये ततो यद्युत्तीर्णा भवितुं शक्नुथ तदैव युष्मद्वसनानि मदीयात्ममनः प्राणशरीरैः सहितान्येव कृत्वा दास्यामीति भावः ॥ १८ ॥ हन्त हन्त गूढोऽयमपराधो युष्माकं व्यक्तोऽभूदित्याह, यूयं विवस्त्राः सत्यो यदपो व्यगाहत व्यगाहध्वं तदेतत् उ एवार्थे देवस्य जलाधिष्ठातुर्वरुणस्य नारायणस्य वा हेलनमपराधः । ननु, देशाचारोऽयं विशेषतो बालानां नापराधस्तत्राह, धृन्वता इति । अनुष्ठितस्यास्य व्रतस्य फलाभावस्त्ववश्यम्भावीति भीषयते हन्त हन्तैतादृशं विडम्बनमभूद्व्रतफलञ्च न भविष्यत्यतो मृता अपि वयं विशेषतः सुष्ठु मृतास्तदलं प्राणत्यागविलम्बेनेति मनोऽनुतापवतीः विशीर्णसर्वाङ्गीर्विवर्णा अतिविह्वला वीक्ष्य हन्तानां मा प्राणः प्रयान्त्विति सद्य एवातिकृपया स्वयमेव तस्य प्रायश्चित्तं वदन् भोः कृशाङ्ग्यः ! मा भैष्टेत्याश्वासयति, बद्ध्वेति स्त्रियो हि यस्य दास्यो भवन्ति स एव तासां सर्वदेवमयो नारायण इति शास्त्रादेशात् "नारायणसमो गुणैः" इति गर्गादेशाच्च सम्प्रत्यहमेव युष्माकं नारायणस्तन्मदभिमुखे एव स्थिताः अंहसोऽपराधस्यापनुत्तये निवृत्तये नमः कृत्वाऽधोवसनम् अन्तरीयवस्त्रं गृह्यतां स्त्रीणामन्तरीयवासोभिः पुंसो मम प्रयोजनाभावात्तान्येव दास्यामि उत्तरीयाणि तु स्वस्यैवोत्तरीयाणि करिष्यामीति भावः । ततश्च शिरोभिरेव प्रणामे क्रियमाणे हंहो केवलशिरः प्रणामो गौण एवेत्युक्तम् एकपाणिना नमनोद्यममालक्ष्य एकहस्तप्रणामश्चेति वचनपाठेन प्रत्यवायं दर्शयित्वा अञ्जलिं ताः कारयामासिरे तत्राप्यधोऽञ्जलिमभिप्रेत्य मूद्ध्नीत्युक्तमित्याद्यूह्यम् ॥ १९ ॥ ततश्च व्रतवैगुण्यं मा भवतु भवत्वस्माकं जातिकुलधर्मलज्जादिसर्वनाशोपीति निश्चयवतीभिस्ताभिर्यथा यथैव प्रेयान् प्राह तथैव कृतमित्याह-इति दोषत्वेन अच्युतेनाभिहितं विवस्त्राप्लवनं व्रतस्य च्युतिहेतुं मत्वा तस्य व्रतस्य पूर्त्तिकामास्तस्तदशेषकर्मणां तस्य व्रतस्यान्येषामशेषकर्मणां च साक्षात्कृतं साध्यफलस्वरूपमेव तं नेमुः सर्वफलस्वरूपे तस्मिन्नेव सन्तुष्टे किं फलमवशिष्टं स्यादिति भावः । ननु, फलप्राप्तिरस्तु दोषोऽपि भविष्यतीत्यत आह, यतोऽच्युतादेव अवद्यमृक् सर्वदोषनिवृत्तिरित्यर्थः । नहि तत् प्रसादविषयीभूतानां प्रत्यवायादिलक्षणः कापि दोष इति भावः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ताः आज्ञानुसारेण निर्गताः वीक्ष्य भगवानाह, भवतीनां शुद्धेन भावेन प्रसादितोऽस्मीति एवं प्रीतः सन् स्कन्धे नीपशाखायां वासांसि निधाय सस्मितं प्रोवाचेत्यन्वयः । यद्वा, "आहतं गुणितेपि स्यात्" इति विश्वप्रकाशादाहता गुणिताः सञ्जातभक्तिगुणा वीक्ष्य प्रोवाचेत्यन्वयः ॥ १७ ॥ यूयं धृतव्रताः सत्यो विवस्त्राः अपो व्यगाहत अप्सु स्नाता इति यत्तद्देवहेलनं देवापराधः अतः अस्यांहसः देवहेलनस्य अपनुत्तये निराकरणाय मूर्द्धन्यञ्जलिं बद्ध्वाऽधो नमः कृत्वा वसनं प्रगृह्यताम् ॥ १८ ॥ अच्युतेन प्रकृतिकालकर्मादिच्युतिरहितेन स्ववशेन सर्वेश्वरेण इतीत्थं देवहेलनहेतुत्वेनाभिहितं विवस्त्राप्लवनं व्रतच्युतिं व्रतस्य च्युतिहेतुं मत्वा तत्पूर्तिकामाः तस्य व्रतस्य पूर्णताकामा तदशेषकर्मणां तासाम् अशेषाणां ब्रह्मादिपिपीलिकापर्यन्तानां च यानि कर्माणि तेषां साक्षात्कृतं फलभूतं सर्वात्मानं तमेव श्रीकृष्णं नेमुः यतः स एव अवद्यमृक्दोषमार्जकः ॥ १९ ॥ तेन प्रणामेन ॥ २० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु सख्यः स्ववाचैव वयं निर्जिताः किं कुर्मः इह कस्मिन् चित् पुंसि समागते त्रपासिन्धौ निमंक्ष्यामः किञ्च यदर्थं व्रतमाचरितं तस्य प्रेष्ठस्यैव हठमभिरक्षन्त्यस्त्रपायै जलाञ्जलिं प्रदाय निमीलितनेत्रतयैव लब्धैस्तिमिरप्रच्छदैर्देहानावृत्य जलात् तीरमासादयाम इति मिथो निश्चित्य प्रियन्तिकमागता इत्याह—तत इति । प्रोत्तेरु निर्जग्मुः ॥ १७ ॥ आहृता आगतास्ता वीक्ष्य यद्वा लज्जात्यागेनाहताः सम्यक् ताड़िता इत्यर्थः । शुद्धेन स्वमात्रफलकेन भावेन प्रसादितो भगवान् वासांसि स्कन्धे निधायेति तदङ्गैः स्वाङ्गानामद्वैतं बोधयितुमित्यर्थः । तदङ्गसौरभ्यलाभेन इमा मदेकजीवातवो भवन्तीत्यवगमेन च प्रीतः सन् प्रोवाच–सस्मितमिति । स्वमुखस्वीकृतमद्दास्यानां "करवाम तवोदितम्" इत्युक्तवतीनामहं परीक्षां कुर्वे तदुत्तीर्णाभ्यस्तु स्वमनसा सहैव वासांसि दास्यामीति भावः ॥ १८ ॥ ननु स्वामिन् ! सापि परीक्षा क्रियतामिति चेत्तत्राह यूयमिति । विवस्त्रा यूयं यदपो व्यगाहत व्यगाहध्वं तदेतत् उ निश्चये देवस्य जलेशस्य वरुणस्य हेलनमपराधः । नन्वयं देशाचार इति चेत् तत्राह–धृतेति । व्रतफलं न स्यादिति भावः । अतिविमनस्का वीक्ष्य कारुणिकस्तस्य सद्य एव लघु प्रायश्चित्तं दर्शयति–अंहसो जलदेवतापराधस्य अपनुत्तये निवृत्तये नमः कृत्वाऽधोवसनमन्तरीयं प्रगृह्यतां तेन पुंसो मे प्रयोजनाभावात्तदेव देयमुत्तरीयस्तु मयैवधार्यमिति भावः । तत्र मूर्ध्नैकहस्तेन वा प्रणाममालक्ष्याद्यस्य गौणत्वात् द्वितीयस्य प्रत्यवायकरत्वान्मूर्द्ध्न्याञ्जलिमित्युक्तं अधोञ्जलि विधानन्तु मूर्ध्नि इत्यनेन निरस्तम् ॥ १९ ॥ अपयातु त्रपा व्रतवैगुण्यन्तु माभूदिति निश्चित्य स्वनाथस्याज्ञा ताभिः पालितेत्याह–इतीति । इति प्रत्यवायत्वेनाच्युतेनाभिहितं कर्मणां साक्षात् कृतं फलस्वरूपं तं स्वनाथमेव नेमुः ननु वरुणं तत्त्वविद्वरेण्यत्वात्तासां "किमलभ्य भगवति प्रसन्ने श्रीनिकेतने" इत्यादि स्मृतिभ्यः न च नमस्कारमात्रान्निःशेषनिवृत्तिर्न भवेदिति वाच्यं यतोऽच्युतनमस्कारादपराधानां सर्वेषां दोषाणां मृग निवृत्तिरित्यर्थः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इदमेकं विहाय हे यदुनाथ काऽन्यत्किञ्चिदाज्ञापय तत्परिज्ञाय कुर्म इत्यतः क्रोश एवाक्रोशेन बहुलं लुण्ठनमनन्तर रामराज्यमितिवत्प्रथमग्रासे मक्षिकापात इव च न वदत सुदत्य इत्याह । नो चेदिति । नो चेदधुनासमीपसमापतनं तर्हि नाहं दास्यामि न दास्योऽपि भवत्यः । नो चेदिति नाहं प्रदास्यामीति वचनादादौ संयोज्यस्य राज्ञे ब्रूवामह इत्यस्योत्तरमाह ॥ क्रुद्ध इति । क्रुद्धो युष्मद्भाषोद्भूतरोषो राजा नन्दः किं करिष्यति स्वप्रदर्शितदण्डे खण्डिते स्वानुकूलमेवेदमिति दुकुलानि वा लातुमनुकूलं कालिन्द्या आयाताः पुनर्भगवद्भारतीशुश्रूषा इमामेकां घाटीमटीकन्तकान्ता इत्याह ॥ तत इति । दारिकाः कुमारिका अङ्गना गतिमत्यः । अगेः कर्तरि युच् । अतो न दारिकातिरेकः । पाणिभ्यां स्वस्वहस्ताभ्यां गतम् । तीरं प्रति प्रोत्तेरुः । यद्यप्येकेन शयेन शक्यमाच्छादनं तथा चोद्द्वेः शय एकस्मिन्वसनं क्षिपेच्चोन्नास्मदभिलषितसम्पत्तिः स्यात्स्याच्चैतावान्यत्नः कृतो विफल इत्याशयेन शयद्वयमयूयुजंस्तनीयस्यपि कार्ये नार्यसु चातुर्यं इति भावः ॥ १७ ॥ मुग्धभावो मनोहरचेष्टाभिप्रायो वा तेन प्रसादितो लीला वा । भावः स्वभावाभिप्रायचेष्टासत्तात्मजन्तुषु । लीलापदार्थेष्विति विश्वः । तेन प्रसादितः प्रसादं प्रापितः स्कन्धे तरुशाखासु सस्मितः प्रीतस्तदुपरि प्रोवाच ॥ १८ ॥ स्वेन धर्ममवश्यं वाच्यमिति ताभिरेव कुमारीभिर्धर्मज्ञेति प्रागात्मानं बोधयित्रीभिर्व्रीजावापः कृतोऽतो मया तत्प्ररोहित्रा भाव्यमिति यथा तन्मनसे रुच्येत तथा धर्मपथं नर्मपूर्वकं दर्शयन्कान्ताः श्रीकान्तस्ता वशयति ॥ यूयमिति । यूयं धृतव्रता आमासान्तं सङ्कलितसतोप्रसत्तिजनकव्रतनिष्ठाः सत्यो विवस्त्रा वस्त्रहीना आपो व्यगाहतेति यत्तत् उ उत्कृष्टं दैवहेलनं देवतातिरस्क्रियोत्तापकं का कुत्सितमिति वा । उत्तापे व्ययमीशेना चेति यादवः । उ उत्कर्षे कुत्सायामिति रन्तिदेवः । उ वाच्ये चैव कुत्सायामम्बायां स्यादनव्ययमिति विश्वः । अस्मदोघव्रतं मोघं न भवेद्भवेच्चाघपरिहारस्तथा कथय स्वामिन्यामः कामिन्यस्तेन पथेति तदाशयं जानन् जगन्नाथः स्वयमाह । बद्ध्वेति । हे वध्वोऽञ्जलिं बद्ध्वैतदंहसोऽपनुत्तये परिहारार्थं नमःकृत्वा वो वसनं प्रगृह्यताम् । नीवीग्रन्थग्रन्थनस्य तच्छ्लथनस्य च शयद्वयहेतुकत्वात्तत्सम्पुटीकरणेन यदपराधस्तदुपरोधोऽनुरोद्धव्यो भवतीति बद्ध्वाञ्जलिमिति जजल्पानल्पमतिरिति तात्पर्यमवधेयम् ॥ १९ ॥ तदभिहितमेवाभितो हितं न तत्प्रच्यावयितुं शक्यमित्यच्युतेनेत्यभिहिता व्रजबाला विवस्त्राप्लवनं विवस्त्राभिः स्वाभिः कृतं यदाप्लवनं व्रतस्य च्युतिभ्रंशस्तां मत्वा

तत्पूर्तिकामा व्रतसाङ्गतां कामयमानास्तदवद्यं पापमुज्झितुं हातुमशेषकर्मणां साक्षात्कृतं साक्षात्करोतीति स तं नेमुः । कर्मसाक्षात्कृतः पुरतः । करौ च तत्कर्मकरावित्यादेः करसम्पुटीकरणं युक्ततरमित्यनेन ध्वन्यते । अभिहितम् । तथा व्रतच्युतीत्यपि पठन्ति । तत्र व्रतस्य च्युतिर्यस्मात्तद्व्रतच्युतीति द्विकमपि विवस्त्राप्लवनविशेषणमिति मन्तव्यम् ॥ २० ॥

श्रीसुबोधिनी

ईश्वरभावेन भगवतोक्तमिति वाक्यार्थापरिज्ञानेपि समागता इत्याह **तत** इति, जलानामाशयाज् जडानामाशयाज् जलानामभिप्रायो न गन्तव्यमित्यज्ञानां मर्यादायां यतो शुद्धिसम्भावना तदपेक्षया गर्भवद्वाक्यनिष्ठा श्रेष्ठाः, **सर्वा** इतोश्वरवाक्येन सर्वगुणतिरोभावः, **दारिका** इति शुको बालत्वं ज्ञापयितुं, अन्यथा सदसो राज्ञश्च भावोन्यथा भवेदिति, नन्वत्यन्ततामस्यः कथं वाक्यनिष्ठा जातास्तत्राह **शीतवेपिता** इति, बहिःकम्पोन्तः शीतेन कर्शिताश्च स्वभावाधीना एवोत्थिताः, अतो जातिर्वर्णिता परीक्षार्थं प्रमेयं निरूप्यमिति, अकथने शुकस्य मूर्धा विपतेत् ॥ १७½ ॥ ततो **भगवान** सर्वत आह **ता** न केनाप्यंशेन दुष्टा वीक्ष्य, **अभिविद्धो** सन्धिरार्षः, अन्यार्थं सङ्गृहीता इतीषद्धता वा ज्ञानदृष्टिः सर्वत्र न व्याप्तेत्यतस्त्याज्या इति मत्वापि शुद्धभावेन तासां **शुद्धान्तःकरणेन** प्रसादितो जातः, ततः पुनर्ज्ञानशक्तिमाविर्भाव्य वृक्षस्य स्कन्धे **वासांसि** स्थापयित्वा तासामावरणानि वैष्णवानि कृत्वा पश्चात् तासां निदानं श्रुत्वाल्पमोहं कृत्वा स्मितसहितोन्यथा मुक्ता एव भविष्यन्तीति प्रकर्षेणोवाच यथा वाक्यमङ्गीकुर्युः ॥१८½ ॥ भगवद्वाक्यमाह **यूयमिति**, "अप्स्वग्निर्देवताश्च तिष्ठन्त्यतो नाप्सु मूत्रपुरीषं कुर्यान् न निष्ठीवेन् न विवसनः स्नायाद् गुह्यो वा एषोग्निरेतस्याग्नेरनतिदाहाये"तिश्रुतेर्विवस्त्रस्नाने तत्र स्थिताग्नेर्देवताभ्यो वा व्रतादिसर्वनाशो भवेदिति तत् प्रतिविधातव्यं, भगवान् हि तत्कर्मसिद्धये समागत इति स्वतन्त्रतया फलदानात् कर्मसाद्गुण्यार्थमाह **यतो यूयं** धृतव्रतास्तथाभूता अपि **विवस्त्रा यदपो व्यवगाहत** विशेषेण विलोडितवत्यः क्षोभमुत्पादितवत्यः क्रीडया वस्त्राभावेन च दृष्टादृष्टाभ्यामेतदालोडनं तत् प्रसिद्धमेव **देवहेलनं**, उ इति निश्चये, एवं दोषं निरूप्य प्रायश्चित्तं निरूपयत्यञ्जलिं बद्ध्वा **मूर्ध्नि** स्थापयित्वा**ंहसोपनुत्तये** पापनाशाय **नमः** कृत्वा **वो** युष्माकमेतद् वसनं प्रगृह्यतामिति या क्रियाशक्तिरभिमानरक्षार्थं स्थापिता सापराधनिवृत्तये योजनीया तत्रापि ज्ञानसहिता; एतावतैव देवता तुष्यति क्रियामूलस्यापि ज्ञानशक्तिव्याप्तेः, एषैव प्रौढरूपा शक्तिरिति तद्विदः, सा चेज् ज्ञानेन व्याप्ता फलं सिद्धं कृतार्थोपि भवति ॥१९½॥ ताः पुनर्भगवदभिप्रायमपि ज्ञात्वोक्तादप्यधिकं कृतवत्य इत्याहेत्य**च्युतेनाभिहिता** इति केनाप्यंशेन च्युतिरहितेन पूर्णशक्तिमताभिहिता उक्ता वचनद्वारा प्राप्तज्ञाना **व्रजाबलाः** स्वभावतश्चातुर्यादिदोषरहिता **विवस्त्राप्लवनं व्रतच्युतिं मत्वा** हृदयेपि संवादं प्राप्य **तत्पूर्तिकामा** न तु देवतापराधनिवृत्तिमात्रपरास्तादृशेर्थे तस्य वा व्रतस्या**शेषकर्मणां च साक्षात् कृतं** कर्मभिरयं **साक्षात्** फलरूपेण सम्पादितः, फले जाते साधनन्यूनता व्यर्थेति फलदृष्टयस्तादृशं **भगवन्तं नेमुर्भगवते नमस्कारं** कृतवत्यः, साष्टाङ्गप्रणाममिति केचित्, तथा करणे हेतु**र्यतोवद्यमृगवद्य**मार्जनं **यतो** नमस्काराद् भवति, देवतापराधे शान्तेपि कर्मच्छिद्रस्य जातत्वात् फलं न भविष्यतीत्युभयमेकेन **यथा** भवेत् **तथा** कृतवत्यः, यद्वा तस्य भगवतः **पूर्तिकामा** इत्यर्थः, न च **व्रतच्युति**मितिपूर्वोक्तत्वेन तत्परामर्श एव तत्पदेनाकारीति वाच्यं, व्रततदन्या**शेषकर्म**फलत्वेन भगवन्निरूपणवैयर्थ्यापत्तेः, किञ्च 'दृढं प्रलब्धा' इत्याद्यसूयाहेतूक्त्यनुपपत्तिः, **व्रतपूर्ति**पक्षे तदर्थमेव सर्वमुक्तं भगवता कारितं चेत्यसूयाहेतुत्वाभावात् तेषां, न हि स्वहितवाचा कृत्या वा तदारोपः सम्भवति प्रत्युत तद्वैपरीत्यमिति, ननु **व्रतच्युतिं मत्वा** कथं तदुपेक्षां कृत्वा प्रियमेव नेमुः ? तत्राह **तदशेषेति** पूर्ववत्, न चैवं **व्रतच्युतिं मत्वे**तिकथनवैयर्थ्यमिति वाच्यं, तत्कालीनभावप्रौढिनिरूपणार्थत्वात्, अन्यथा विशेषणवैयर्थ्यापत्तिरित्युक्तमेव ॥ २०½ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अत्रैव **ततो जलाशयादित्यत्र** मूले **तत** इत्यानन्तर्यमात्रमुक्तम्, न तु श्रुत्वेत्यादिज्ञानवाचकम् । तत उक्तं **वाक्यार्थापरिज्ञानेपीति** । स चेश्वरवाक्यमेव कर्तव्यमित्यादिनोक्तः । **ईश्वरवाक्येनेत्यादि** । **माऽनयं भोः कृथा** इति श्लोकविवरणे ये राजसराजसादयो गुणा उक्तास्तद्भाववशात् तादृशवचनान्येवोक्तवत्यो, न त्वागताः, तदा प्रभुणा दासीत्वादेवागन्तव्यमित्यनुक्त्वा, यदीत्युक्तं यत्, तेनानागमने दासीत्वमपि न सेत्स्यतीति ज्ञापितम् । तच्चानिष्टमिति भयरस उत्पन्नः । सर्वान् भावांस्तिरोहितानकरोदितीश्वरवाक्येन तेषां तिरोभावे सर्वासामेकरूपत्वेनैकेनैव रूपेण सर्वा आगता इत्यर्थः । **नन्वत्यन्ततामस्य** इति । परपुरुषत्वादात्मनं बालेभ्यो न दर्शयिष्यामो; भगवदुक्ता अपीत्याग्रहस्तमश्शब्देनोच्यते, बालेषु स्वधर्मत्वेन पुरुषान्तरत्वाभावेपि तथात्वेनाज्ञानात् । एवं सति भगवद्वाक्यादागमनं न सम्भाव्यत इति कथमागता इत्यर्थः । एतत्समाधानेऽयमाशयः । स्वनिकटे समानेयाः, सर्वथा परीक्षार्थं बालकस्वरूपं च न ज्ञापनीयम् । एवं सति तदुभयसम्पत्त्यर्थं लीलोपयोग्याधिदैविकः कालो मुख्यः सेवकः स्वधर्मं शीतमन्तर्बहिश्चाविश्चकार जलान्तःस्थितौ बाधकम् । अत एवेतः पूर्वं जलविहारेपि न शीतमभूत् । तेन तत्र स्थातुमशक्ताः कर्शननीत्या पूर्वोक्ताग्रहस्यापि तिरोधानादागता इति । एतदेवोक्तं **स्वभावाधीना एवे**त्यनेन । नन्वेवं कालाधीनत्वं स्यान्न भगवदधीनत्वमिति चेत् । स्यादेवं यद्याज्ञया नागत स्यात् । नत्वेवम् । पूर्वं स्वोक्तयोः पश्चाद् भगवदनूदितयोर्दास्योक्तकारित्वयोः सिद्ध्यर्थमेवागमनात्, यतो

भगवता तथैवोक्तम्, यदि पदेनाधुनानागमने पूर्वोक्तं द्वयमपि न सेत्स्यतीति ज्ञापनात् । अतोऽग्रेऽपि भगवदुक्तकरणं सम्पद्यतामिति मत्वा यत्रागमनं तत्रैतत्सामयिकोक्तकरणं स्वतःसिद्धमिति बुध्यस्व । शीतोक्तिरुक्ताग्रहदार्ढ्यज्ञापनायेति ज्ञेयम् । एवंभूता अपि पूर्वं न निर्गता इति । ततः एवंभूतोक्त्यनन्तर त्वागता एवेत्यर्थः । यदीति पदं श्रुत्वा स्वाग्रहविपरीते प्रियाग्रहं ज्ञात्वा स्वेष्टप्रतिबन्धं च ज्ञात्वा तथा चक्रुः । तत्रापि स्वप्रधानाङ्गमाच्छाद्येति निगूढाशयः । तेन कश्चन स्वाग्रहमत्यक्त्वैवागता इति **स्वभावाधीना एवेत्युक्तमाचार्यैः** । भगवदनभिमतकरणे कालधर्मा बाधन्त इत्यपि ज्ञापनाय शीतोक्तिर्ज्ञेया । सम्भवदुक्तिकः पूर्वमस्माभिरुक्त आशय इति सर्वमवदातम् । **ज्ञानदृष्टिः सर्वत्र न व्याप्तेत्यादि** । अत्रेदं ज्ञेयम् । भगवत एतत्सर्वाङ्गदिदृक्षातिप्रचुरेऽपि तत्प्रतिघाते रोषोऽभवदिति तद्भाववर्णनं कृत**मतस्त्याज्या** इत्यनेन । मध्ये प्रसादितत्वोक्त्यायमर्थो लभ्यते । यत्र पाण्यन्तरायमपि न सहते, तत्र वस्त्राणि कथं ददातीतिशङ्काऽभावाय वृक्षस्कन्धनिधानतात्पर्यमाहुः **तासामावरणानीत्यादि** । अत्रायमाशयः । पूर्वं भगवदन्तरायत्वेनान्यत्र स्थापितमित्युक्तम् । अत परं **यथा वैष्णवसङ्गो भगवत्प्रापकस्तथैतद्वस्त्राणामपीति** वृक्षस्कन्धे निधानेन तादृग्धर्मयुक्तान् कृत्वेत्यर्थः । तेषां परार्थता भगवत्त्वेवानुपदं वक्ष्यते यत इति भावः । एतेषां तत्प्रापकत्वं रसोद्बोधकत्वेन । तेन तादृक्संस्थानविशेषकृतिरपि लक्ष्यते । तदानीं प्रीतियुक्तत्वे विशेषहेत्वपेक्षायां तमाहुः **तासां निदानं श्रुत्वेति** । वयस्यसहिते त्वयि सति वाक्यादनागमनमागमनं वा साध्वसाधु वेति वयं न विद्मः । केवलं त्वदीयाश्च वयम्, अतः किं कृते किं मनुते भवानिति शङ्कितहृदयासु यथोचिता रक्षा त्वयैव कार्येत्यादिरूपं श्रुत्वानन्यत्वं ज्ञात्वा तथा जात इत्यर्थः । यद्वा **निदानं** निजं स्वरूपमित्यर्थः । तथा च पद्मिनीनां नीवीषु पद्मगन्धो भवतीति यदा वृक्षस्कन्धे विविच्य स्थापितास्तास्तदा मधुपकुलाकुलतया तदीयझङ्कृतिश्रवणमेव निदानश्रवणम्, तेन स्वानुरूपनायिकोत्तमत्वज्ञानेन रसभावोद्बोधात्तासु प्रीतोऽभवदित्यर्थः । **बद्धवाञ्जलिमित्यत्र** । क्रियाशक्तिर्बाहू इत्यर्थ । **क्रियामूलस्यापीति** । बाहुमूलस्यापीत्यर्थः । वस्त्रदान लोके वेदे च मुक्तेरेव परमफलत्वप्रसिद्धिरिति तस्या भक्तिमार्गेऽल्पत्वं प्रकटीकर्तुमाहुः **ननु तर्हि मुक्तिमेव दद्यादित्यादि** । सर्वदुःखाभावरूपत्वेन मुक्तेरुक्तरूपकरणत्वस्य तदैवोपपत्तेरिति भावः । एतददाने हेतुत्वेन विशेषणव्याख्यानेन येषु नायं तोषस्तेभ्य एव मुक्तिदानम्, न त्वेवंभूतेष्वपीति भावः सूचितः । तथा च तदल्पत्वं स्पष्टमेव ॥ १९ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तत इत्यत्र **परीक्षार्थमिति परित ईक्षा** विचारस्तदर्थं, **प्रमेयं निरूप्यमिति** अतो हेतोर्जातिः स्वरूपं तथाच्छाद्येत्यनेन वर्णितमित्यर्थः, ननु तथापि स्वभावाधीनत्वविचारः प्रकारान्तरेण वक्तव्यो न तु सभायामेवं वक्तव्यमित्यत आहुः **अकथन** इति, "सर्वाभेदादन्यत्रेमे" इतिन्यायेन लीलास्था भगवद्रूपास्तेषु लौकिकत्वमानेन सङ्कोचेन सभायां तदकथनं स्यात् तथा सति ब्रह्मणो लौकिकत्वमानेन शाकल्यस्येव शुकस्यापि भवेदित्यर्थः ॥ १७½ ॥ **भगवानाहृता** इत्यत्र **अन्यार्थमिति बालदृष्टयर्थं** सङ्ग्रहज्ञानात् स्वभावाधीनत्वेन सर्वत्र **ज्ञानदृष्टिव्याप्त्यभावादीषद्दोषयुक्ता** इत्यर्थः, **ततः पुनरिति** पूर्वं पश्यन्नपि तथाच्छादनं दृष्ट्वा रोषेणापश्यन्निव जातस्ततः शोभनमध्यं दृष्ट्वा प्रसन्नः पुनः पश्यन् जात इत्यर्थः ॥ १८½ ॥ **यूयमित्यत्र तत्रापीति** योजनेऽपि मज्ज्ञानशक्तिसहिता कर्तव्या, मूर्धपर्यन्तं योजने तथा भवतीतिभावः, **एषैवेति** क्रियाशक्तिरेव प्रकृष्ट **ओघः** प्रवाहस्तद्रूपा प्रवाहिकी शक्तिरितियावत्, तद्विद इति कर्मणां बहुफलत्वस्य शास्त्रसिद्धत्वादितिभावः, ज्ञानशक्तिर्ब्रह्मैकफलेति तद्व्यावर्तनायैवकारः, **सा चेज् ज्ञानेन व्याप्ता** भवति तदा मोक्षरूपं मुख्यं **फलं सिद्ध भवति** 'ज्ञानिनस्तदभिव्यक्तौ कर्तुर्मोक्षः क्रमाद् भवे'दितिसिद्धान्तात्ः अत्रापि प्रवाहिकाभिमानरक्षिका क्रियाशक्तिर्मज्ज्ञानशक्त्या व्याता चेद् भवति तदा प्रवाहिकत्वत्यागेनानन्यत्वसिद्ध्या फलं भगवत्सम्बन्धलक्षणं **सिद्धं** भवति, कर्मसाद्गुण्यमपि भवतीत्याहुः **कृतार्थोपीति, कृतः** साधितः अर्थो व्रतरूपो येन तादृश इत्यर्थः, सामान्यविवक्षया पुंस्त्वम् ॥ १९½ ॥ **अभिप्रायमपीति** वाक्यश्रवणमपिशब्दार्थः, **उक्तादप्यधिकमिति** उक्तकरणं किञ्चित् सङ्कोचेनापि भवति तथा सति सर्वथा दर्शनं न स्यादतस्तथा दिदृक्षां ज्ञात्वा तत्पूर्तिकामा निःशङ्कतया तथा **कृतवत्य** इत्यर्थः, **साष्टाङ्गप्रणाम**पक्षे तदेवाधिकं ज्ञेयं, इत्यच्युतेनेत्यस्य व्याख्याने, तादृशेर्थे इति तथा च तत्पदं सत्तम्यन्तमव्ययमितिभावः, पक्षान्तरमाहुस्तस्य येति, अस्मिन् पक्षे तत्पदस्याग्रिमपदेन सह द्वन्द्वः, फले जाते इति भगवति समागत इत्यर्थः, एतस्य तादृशं नेमुरित्यनेनान्वयः, व्यर्थेति विरुद्धोर्थः फलं यतः पतित्वलक्षणे फले प्रतिबन्धिकेत्यर्थः, **तादृशमिति** तादृक्फलसम्पादकमित्यर्थः, **कर्मछिद्रस्येति** क्रीडया कर्मण्यन्तरायस्य जातत्वादित्यर्थः ॥ २०½ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

ततो जलाशयात् सर्वा इत्यस्य विवृतावकथने शुकस्येति, यदि लौकिकभावं तासु मत्वा रहस्यवर्णनं शुको न कुर्यात् तथा सति शुकस्य मूर्धा तथा भवेत्, शुकस्तु तासां साक्षात्पुरुषोत्तमात्मकत्वं ज्ञात्वा पुरुषोत्तमस्य सर्वाङ्गवर्णने दोषाभाववदेतासामपि गूढाङ्गवर्णनं कृतवानतो न दोषः, वस्तुत एताः साक्षात् श्रीकृष्णस्वरूपाः 'न स्त्रियो व्रजसुन्दर्यः पुत्र ताः श्रुतयः किले'ति भृगुं प्रति ब्रह्मवाक्यमनुसन्धाय श्रीशुकेन रहस्यवर्णनं कृतं, अन्यथा मूर्ध्नोन्यथाभावः स्यात् 'मूर्धा ते विपतिष्यती'तिश्रुतेः ॥ १७½ ॥ **भगवा-**

नाहता इत्यस्य विवृतौ **आ सर्वतः अहता न केनाप्यंशेन दुष्टा** इति **आ सर्वत** इति इह **अभिविधावाकारः**, स च ङित् आङ् इत्यर्थः, ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङितं विद्याद् वाक्यस्मरणयारङि'दितिमहाभाष्योक्तेरभिविधावाकारस्य ङित्वं, तथा च ङित्वान् 'निपात एकाजनाङ्' इतिसूत्रस्य प्राप्त्यभावान् न प्रगृह्यसञ्ज्ञा, ततश्च **आ अहता** इतिदीर्घः सुखेन भवतीति ज्ञेयं, **अभिविधौ सन्धिरार्ष** इति मर्यादाभिविधौ च यः एतमातं ङितं विद्या'दितिवाक्यात्, अभिविधावाकारस्य ङित्वान् 'निपात एकाजनाङ्' इतिसूत्रप्राप्तिनिषेधात् **सन्धिः**, स च **सन्धिरार्षः** ऋषिणा महाभाष्यकारेणाभिविधावाकारस्य ङित्वोक्तेः, प्रगृह्यसञ्ज्ञानिषेधादृषिप्रणीतत्वादार्ष इत्यर्थः, **ज्ञानदृष्टिः सर्वत्र न** व्याप्तेति एतदर्थष्टिप्पण्यां स्फुट एव, **तदावरणानि वैष्णवानि कृत्वा पश्चात् तासां** निदानं श्रुत्वेत्यादेरर्थष्टिप्पण्यां विस्तरेणोक्तः ॥ १७½ ॥ **यूयं विवस्त्रा** इत्यस्य विवृतौ **या क्रियाशक्तिरभिमानरक्षार्थं स्थापितेति** करयोः **क्रियाशक्तिरूपत्वाद्** यौ करौ लज्जारक्षार्थं **स्थापितौ** तौ नमस्कारकरणे मूर्ध्नि स्थापनेन विनियुज्यापराधनिवृत्तिः कर्तव्येतिभावः, **तत्रापि ज्ञानसहितेति** मज्ज्ञानसहितेत्यर्थः, मूर्ध्नि हस्तयोजने मज्ज्ञानविषयता भवतीतिभावः, **क्रियामूलस्यापीति** हस्तयोर्मूर्ध्नि स्थापने **क्रियामूलस्य** दोर्मूलस्यापि भगवज्ज्ञानशक्तिव्याप्तत्वं भवतीत्यर्थः, एवं सति सम्यङ्निरीक्षणाद् भावविशेषो भगवत्याविर्भवतीतिभावः, **एषैवेति एषा** लज्जारक्षार्थं स्थापिता पाणिरूपा क्रिया**शक्तिः प्रौघरूपा** प्रकृष्ट ओघः प्रवाहस्तद्रूपा भगवदनभिप्रेतकरणात् प्रवाहसम्बन्धिनो संसारमेव जनयेदिति हार्दं, **सा चेज् ज्ञानेन व्याप्तेति सा** क्रियाशक्तिः, इयं भगवत्सेवायामेव योजनीयेत्याकारकज्ञानेन युक्ता भवति तदा प्रवाहगतिं परित्यज्य भगवत्सम्बन्धादलौकिकी भवन्ती पुष्टिमार्गफलं साधयतीत्यर्थः ॥ १९½ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'सत्यं यदर्थो व्रतचर्यादिश्रमस्तदाज्ञोल्लङ्घनं न युक्तम्' इत्यभिप्रेत्य पाणिभ्यां योनिमाच्छाद्य बहिः शीतेन वेपिताः कम्पयुक्ता अन्तश्च शीतेन कर्शिताः विलष्टाः सर्वा दारिकास्ततो जलाशयात् कालिन्दीसलिलात् प्रोत्तेरुः निर्जग्मुः ॥ १७॥ ततस्तासां शुद्धभावेन परमया भक्त्या प्रसादितः, अत एव तासु प्रीतः प्रीतियुक्तो भगवान् आहताः हन्तेर्गत्यर्थकत्वात् आगताः कुमारिका वीक्ष्य वासांसि कदम्बस्कन्धे निधाय सस्मितं यथा तथा प्रोवाचेत्यन्वयः ॥ १८ ॥ भगवद्वचनमाह—यूयमिति । धृतव्रताः सत्योपि यूयं विवस्त्राः सत्यो यदपो व्यगाहत विशेषेण आलोडितवत्यः तदेतत् देवानां हेलनं व्रतवैगुण्यसम्पादकः अपराध एव । 'उ' इत्येवकारार्थः । "अप्स्वग्निर्देवताश्च तिष्ठन्ति अतो नाप्सु मूत्रपुरीषं कुर्यान्न ष्ठीवेन्न विवसनः स्नायात् गुह्यो वा एषोग्निः" इति श्रुतेः । अतः अंहसः पापस्यापनुत्तये निवृत्त्यर्थं मूर्धन्यञ्जलिं बद्ध्वा अधो नमः कृत्वा वसनं प्रगृह्यताम् ॥ १९ ॥ इत्येवमच्युतेन पूर्णगुणेन कृष्णेनाभिहितं कथितं श्रुत्वा विवस्त्राप्लवनं नग्नस्नानं व्रतस्य च्युतिं च्युतिहेतुं मत्वा तस्य व्रतस्य पूर्तिकामाः तस्य व्रतस्य अशेषाणामन्येषां च कर्मणां साक्षात्कृतं फलरूपं तं कृष्णमेव नेमुः । तत्प्रणामे हेतुमाह—अवद्यमृग्यत इति । यतः यस्मात् स एव अवद्यमृक् सर्वपापनिवर्तकः । 'इत्यच्युतेनाभिहिता' इति पाठान्तरम् ॥ २० ॥

अन्वितार्थप्रकाशिका

तत इति ॥ ततः कृष्णस्याग्रहं दृष्ट्वेत्यर्थः । मनुष्यान्तरागमनशङ्कयाऽपि चेति । बहिः शीतेन वेपिताः अन्तश्च शीतेन कर्शिताः क्लिष्टाः सर्वा दारिकाः स्वस्वपाणिभ्यां योनिमाच्छाद्य ततो जलाशयात् प्रोत्तेरुः निर्जग्मुः ॥१७॥ भगवानिति ॥ ततस्तासां शुद्धभावेन प्रसादितः अत एव तासु प्रीतो भगवान् आहताः । हन्तेर्गत्यर्थकत्वात् । आगताः कुमारिका वीक्ष्य वासांसि कदम्बादादाय स्वस्कन्धे निधाय भवतीनामधोवस्त्राण्यप्यहं स्कन्धे निदधामीति दर्शयन् सस्मितं यथा तथा न्यायनिष्ठुरमिव प्रोवाच । आहता लज्जात्यागेन आ सम्यक् मृता इव वीक्ष्येति परे । अर्थान्तरं त्वश्लीलम् ॥ १८ ॥ यूयमिति ॥ धृतव्रताः सत्योऽपि यूयं विवस्त्राः सत्यो यदपो व्यगाहत विशेषेण आलोडितवत्यः । तङभावः आर्षः । तदेतत् देवस्य हेलनं व्रतवैगुण्यसम्पादकः जलाधिष्ठातुर्वरुणस्य अपराध एव । उ एवार्थे । तस्य प्रायश्चित्तमिवाह । अतः अंहसः पापस्यापनुत्तये निवृत्त्यर्थं मूर्ध्न्यञ्जलिं बद्ध्वा अधो नमः प्रणामं कृत्वा वसनं प्रगृह्यताम् । यद्वा । नमः कृत्वा अधोवसनं प्रगृह्यताम् । उत्तरीयाणि तु स्वयं धारयिष्यामीति हासः । मूर्ध्नीति अञ्जलिमिति च एकहस्तमात्रेण केवलं मूर्ध्ना च प्रणामं निरस्यति । अधो नम इति लज्जाहानप्रह्वीकाराद्यर्थम् । यद्यपि देशाचाराद्बाल्याद्वा दोषाभावस्तथापि व्रतभङ्गदोषनिवृत्तिः कार्यैव ॥ १९ ॥ इतीति ॥ इत्येवं दोषत्वेन अच्युतेनाभिहितं कथितं विवस्त्राप्लवनं नग्नस्नानं व्रतस्य च्युतिं च्युतिहेतुं मत्वा व्रतस्य तस्य पूर्तिकामाः तस्य व्रतस्य अशेषाणामन्येषां च कर्मणां साक्षात्कृतं फलरूपं तं कृष्णमेव नेमुः । यतो यस्मात् अवद्यमृक् सर्वदोषमार्जनं भवति । भावे क्विप् । मृजेः षत्वाभाव आर्षः । स एवावद्यमृक् दोषमार्जक इति कर्त्तरि वा क्विप् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दारिकाः कुमारिकाः जलाशयात् जलस्थानात् योनिं गुह्यांगं प्रोत्तेरुर्बहिर्निर्गताः ॥ १७ ॥ शुद्धभावेन प्रसादितः प्रसन्नीकृतो हरिः आहताः बहिरागताः हंति धातोर्गत्यर्थे प्रयोगप्रवृत्त्यभावेस्यत्र गत्यर्थ प्रयोग आर्षः सस्मितं यथा प्रोवाच ॥१८॥ धृतव्रताः

यूयं विवस्त्राः सत्यः अपो जलानि व्यगाहत प्राविशत इति यत् तत् एतत्कर्म वरुणदेवस्य हेलनं अपराधोस्ति अस्य अंहसः पापस्य अपनुत्तये नाशाय मूर्द्धिन अंजलि बद्ध्वा अधो नमः कृत्वा वसनं स्वकीयं स्वकीयं वस्त्रं प्रगृह्यतां ॥ १९ ॥ अच्युतेन अभिहितं कथितं नग्नस्नानमेव व्रतस्य च्युतिं नाशहेतुं मत्वा तस्य व्रतस्य पूर्त्तिकामाः पूर्णतामिच्छंत्यः तस्य व्रतस्य इतरेषामशेषकर्मणां च साक्षात्कृतं फलरूपं हरिं नेमुः कुतो यतः स एवावद्यमृक्दोषनिर्वर्त्तकोस्ति ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः शीतवेपिताः, सर्वाः दारिकाः, शीतकर्शिताः सत्यः, योनिं पाणिभ्यां आच्छाद्य, जलाशयात् कालिन्दीहृदात्, प्रोत्तेरुर्निर्जग्मुः। स्वाम्यभिमतकरणं दासीनामुचितमेवेत्यभिप्रेत्य निर्गता इति भावः ॥ १७ ॥ भगवानिति ॥ भगवान् श्रीकृष्णः, ता दारिकाः, आ ईषदपि, अहता अक्षतयोनीः बाल्ययौवनसंधिस्था इति यावत्। वीक्ष्यावलोक्य, शुद्धभावप्रसादितः तासां निष्कपटभावप्रेक्षणेन प्रसन्नतां प्राप्तः, अत एव, वासांसि तासां वस्त्राणि, स्कन्धे अंसे शाखायां वा, निधाय, प्रीतः सस्मितश्च सन्, प्रोवाच ॥ १८ ॥ तदेवाह ॥ यूयमिति ॥ हे कुमारिकाः, यूयं धृतव्रताः सत्योऽपि, विवस्त्राः निर्वस्त्राः भूत्वा, अपः जलानि, व्यगाहत अप्सु स्नाताः, इति यत्, एतत् उत एतत्त्वित्यर्थः। देवहेलनं देवतापराध एव। व्रतवैगुण्यभीतानां प्रायश्चित्तमपि स्वयमेवाह। अंहसोऽस्य पापस्य, अपनुत्तयेऽपनोदार्थं, मूर्द्धिन स्वस्वमस्तके, अञ्जलिं बद्ध्वा, अधः नमः कृत्वा, वसनं स्वं स्वं वासः, प्रगृह्यताम् ॥ १९ ॥ इतीति ॥ इतीत्थं, अच्युतेन श्रीकृष्णेन, अभिहिताः कथिताः, व्रजाबला व्रजाङ्गनाः कुमारिका इति यावत्। विवस्त्राप्लवनं नग्नोभूत्वा स्नानविधानं, व्रतच्युतिं व्रतच्युतिहेतुभूतं मत्वा, तस्य व्रतस्य पूर्त्तिः पूर्णता तस्याः कामो यासां ताः, व्रतस्यावैगुण्यं कामयमानाः सत्य इत्यर्थः। तदशेषकर्मणां तस्य व्रतस्य अशेषकर्मणां तदितरेषां समस्तकर्मणां च, साक्षात्कृतं साक्षात् फलहेतुभूतं श्रीकृष्णमित्यर्थः। नेमुर्हस्तद्वयेन मूर्द्धिन अञ्जलिं बद्ध्वा नमश्चक्रुरित्यर्थः। यतः कृष्ण एव अवद्यमृक् पापमार्जकः भवति, अतः प्रणेमुः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तत इति : १०.२२.१७.

यज्जगत्कारणं तच्चाव्यक्तमित्यर्थदृष्टयः। युक्तं योनिं समाच्छाद्य तस्थुः फलवराशयाः ॥ ५५ ॥
व्रतमनङ्गनिशान्तपदं प्रभुर्भृशमवेक्ष्य फले यदि चालसः। तदिह सर्वमिदं भविता वृथेत्युपगता निखिला अपि तादृशः ॥५६॥

स्कन्धे निधायेति : १०.२२.१८.

एतावत्संशयेऽधारि वासः संशयितात्मनाम्। आसामितो निश्चितार्था जाता इत्यन्यतो दधे ॥ ५७ ॥
यौ वराभयदौ सद्भ्यस्तयोः प्रावरणस्थितिः। गोपीप्रसादवेलायां नोचितेत्यन्यतो न्यधात् ॥ ५८ ॥
अचिरादुपस्थितोऽस्ति पुरतोऽसमशरररणप्रसङ्ग इति। निजबाहुमूलमंसं वस्त्राभरणैरलञ्चकार हरिः ॥ ५९ ॥

यूयमिति : १०.२२.१९.

यद्यावृतः सुमनसामपि जात्वनङ्गभावः सदाशयवरैरपि तर्ह्यनङ्गः।
पूर्णोऽवनौ न भवतीत्यकृत स्फुटार्थं श्रीशः स्मरालयपिधाननिराकरिष्णुः ॥ ६० ॥

इत्यच्युतेनेति : १०.२२.२०.

कृष्णामृतजुषां का नः प्रसक्तिरधुनांहसः। विधिवन्द्यामीशवाचं मत्वा चक्रुस्तथैव ताः ॥ ६१ ॥
सर्वथाऽनङ्गमेवेदं व्रतमस्मत्कृतं प्रभो। तथापि कृपया तूर्णं पूर्णतां नय ते नमः ॥ ६२ ॥
वयं तथा स्थिता हि त्वां विभाव्यानाश्रिताम्बरम्। स्याच्चेदथापि दोषस्तं सूर्य मार्जय ते नमः ॥ ६३ ॥
दोषापनुत्तये कस्माद्याचध्वे मामिहेति मा। वदार्क यत्त्वमेवैको भुवि दोषापहारकः ॥ ६४ ॥

दोषाकरोऽपि द्विजराजतामगाद् यस्याश्रयात्तस्य रवे वयं तव।
पादान् वहामः शिरसेत्यपाहरेरघं यथाऽस्मासु भवेत् कृपा हरेः ॥ ६५ ॥

सर्वतोमुख सन्तोषप्रदामेतास्तु मत्सुताम्। आश्रिता इति सम्बन्धं ज्ञात्वा पाहि नमोस्तु ते ॥ ६६ ॥
श्रीमद्विष्णुपदप्रकाशकृदुपास्योऽप्यर्क एवावनौ हंसानामिति भाति बोधित इहाप्येतन्मिषात् तद्विधिः।
नो चेत्पापमवस्त्रकाप्लवनतः सञ्जातमित्यादराद् वक्त्रा तेन दयाब्धिनाऽर्कनतये युक्तास्तथाऽमूः कथम् ॥ ६७ ॥
एता गोपसुतास्त्वदभ्रसमयापेक्षिप्रपुष्पोद्गमा मत्संभोगफलप्रदं सुचरितं कात्यायनीसद्व्रतम्।
कंसध्वंसनहेतुनाऽहमचिराद् यातास्मि चेतस्ततः कर्त्तव्यः कतमोऽभ्युपाय इह वाऽऽनृण्यं यथा स्याद् व्रते ॥ ६८ ॥

इत्यालोच्य विभाव्य चार्ककिरणस्पर्शोम्बुजोल्लासकृन्मन्ये तेन तदा तदीयमदनावासाम्बुजोल्लासनम् ।
कर्तुं तत्फलदित्सुना हरिनतौ तास्तत्क्षणे योजिता नो चेद्धर्मविदग्रणीः कथमिदं कुर्यादनार्याश्रितम् ॥ ६९ ॥
(युग्मम्)

माया प्रावरणः सदागमलसद्रूपोऽहमस्मिञ्जगत्यन्तर्यामितयैवमेव चरिते प्राक् तत्सदिष्टप्रदः ।
वृत्तीर्गोकुलवर्तिनीरनुपदं व्यापारयामीति किं वृक्षस्थः पटभृत्प्रभुस्तदबला व्यापारतोऽदर्शयत् ॥ ७० ॥

कृष्णप्रिया

राजन् परीक्षित् ! कुमारियाँ अति ठंड से ठिठुरती और काँपती थी । लेकिन भगवान की आज्ञा का पालन करती, अपने गुह्य अङ्गों को अपने दोनों कर कमलों से आवृत करके वे श्रीयमुनाजी से बाहर निकली, उस समय कुमारिकाओं को ठंड बहुत सता रही थी ॥ १७ ॥ भगवान् उन कुमारीकाओं को सर्व प्रकार निर्दोष जानकर उनके विशुद्ध एवं निर्मल भाव से प्रसन्न हो गए और तरुवरों की शाखा पर वस्त्रों को रखकर प्रसन्नता पूर्वक स्मितहास्य करते हुए यों कहने लगे ॥ १८ ॥ हे कुमारियों ! आपने कात्यायनी व्रत अच्छी तरह पाला है इसमें कोई शक नहीं । लेकिन आपने व्रत के अवसर आपने श्रीयमुनाजी के जल में विना वस्त्र स्नान किया इससे श्रीयमुना महारानीजी का, वरुणदेव का, दिशाओं की देवताओं का एवं सूर्य भगवान का अनादर या अपराध हुआ है । उस अपराध निवृती के लिए आप अपने दोनों हाथों की शिरसाबन्ध अञ्जली बांध कर झुक कर प्रणाम करें, पुनः अपने अपने वस्त्र सुख से ले जाइये ॥ २० ॥ श्री अच्युत भगवान के द्वारा इस प्रकार कही गई, व्रत भङ्ग की बात जानकर, उन व्रज की अबलाओं ने वस्त्ररहित स्नान को व्रत भङ्ग का दोष मानकर, और भगवान को अपने हितदर्शक समझ कर भगवान की आज्ञा का पालन करने के लिए और व्रतापराध की विशुद्धि के लिए, सर्व कर्मों के साक्षात् फल स्वरूप प्यारे पुरुषोत्तम को नमस्कार किया, प्रभु के श्रीचरणों में प्रणाम सर्व प्रकार के पापों त्रुटियों और दोषों का विनाश करता है ॥ २० ॥

तास्तथावनता दृष्ट्वा भगवान् देवकीसुतः । वासांसि ताभ्यः प्रायच्छत् [1]करुणस्तेनः तोपितः ॥ २१ ॥
[2]दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः ।
वस्त्राणि चैवापहृतान्यथाप्यमु[3] ता नाभ्यसूयन् प्रियसङ्गनिर्वृताः ॥ २२ ॥
परिधाय स्ववासांसि प्रेष्ठसङ्गमसज्जिताः । गृहीतचित्ता नो चेलुस्तस्मिँल्ल[4]ज्जायितेक्षणाः ॥ २३ ॥
तासां विज्ञाय भगवान् स्वपादस्पर्शकाम्यया । धृतव्रतानां संकल्पमाह दामोदरोऽबलाः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—ताः तथा अवनताः दृष्ट्वा भगवान् देवकीसुतः तेन तोषितः करुणः ताभ्यः वासांसि प्रायच्छत् ॥ २१ ॥ दृढम् प्रलब्धाः, च त्रपया हापिताः, प्रस्तोभिताः क्रीडनवत् कारिताः च वस्त्राणि अपहृतानि, एव अथ अपि, प्रियसङ्गनिर्वृताः साः अमुम् न अभ्यसूयन् ॥ २२ ॥ स्ववासांसि परिधाय प्रेष्ठसङ्गमसज्जिताः, तस्मिन् गृहीत चित्ताः, लज्जायितेक्षणाः नो चेलुः ॥ २३ ॥ स्वपादस्पर्शकाम्यया धृतव्रतानाम् तासाम् सङ्कल्पम् विज्ञाय भगवान् दामोदरः आह हे अबलाः ! ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दृढमत्यर्थं प्रलब्धा वंचिता यूयं विवस्त्रा इत्यादिना । त्रपया लज्जया च हापितास्त्याजिता अत्रागत्य स्ववासांसीत्याग्रहेण । प्रस्तोभिता उपहसिताः सत्यं ब्रवाणि नो नर्मेत्यादिना । क्रीडनवत्कारिताश्च बद्धांजलिमित्यादिप्रायश्चित्तच्छलेन । एवमपराधेऽपि ता नाभ्यसूयन् दोषदृष्ट्या नापश्यन् ॥ २२ ॥ प्रेष्ठसंगमेन सज्जिताः वशीकृता अतो गृहीतचित्ताः सत्यो नो चेलुः। गृहीतचित्तत्वमाह । तस्मिन्कृष्णे लज्जायितेक्षणा लज्जाविलसितमीक्षणं यासां ता इत्यर्थः ॥ २३ ॥ दामोदर इति भक्तवात्सल्यं दर्शयति । अबलाः प्रति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ता व्रतपूर्त्तिकामाः । तथावनताः हस्तद्वयसंपुटं मूर्ध्नि धृत्वा कृतप्रणामाः । करुणः दयालुः । तेन मूर्द्धकृतांजलिप्रणामेन ॥ २१ ॥ अथापि तथापि अमुम् कृष्णम् । नाभ्यसूयन् प्रियत्वादेव, प्रियकृतं दुःखप्रदानमपि सुखत्वेनैवाऽनुभवंत्य इति भावः। क्रीडनवत् दारुयंत्रवत् । प्रियस्य श्रीकृष्णस्य संगेन संभाषणरूपेण निर्वृताः प्राप्ता नंदाः ॥ २२ ॥ इत्यर्थं इति लज्जितेक्षणानां

---

१. तरुणस्तेन-वीर.; करुणः स्नेह-विज. । २. इत्थं-वीर. । ३. प्यमूस्तं नाभ्य-वीर ; प्यमुं नैवाभ्य-विज. । ४ लज्जेषितेक्षणाः-विज. ।

चलनादिकमतिहठेनापि कर्तुमशक्यं भवतीति भावः। सज्जितास्तस्मिन्नेवात्यधिकमासक्तीकृताः। यथा कृष्णेन तासां वसनानि गृहीतानि तथा गृहीतं तस्यापि चित्तं याभिस्ता इति परस्परप्रेमाश्रयत्वमुक्तम्। अत्र मय्येताः परमासक्ता इति कृष्णेन यथा ज्ञातं तथैव कात्यायनीप्रसाददस्मास्वप्ययमासक्त इति ताभिरप्यवगम्य तस्मिन्कृष्णे लज्जायितं प्राप्तमीक्षणं यासां तथाभूताः सत्यो भावोत्थजाड्यादेव न चेलुः। या खलु कृष्णेन निष्कासिता ताभिरपि तिरस्कृता तदंगेभ्यो निस्सृत्य दूरंगताभूत्सा लज्जा पुनः परावृत्यापांगी नयनेन कृततत्साहाय्येन कृष्णसमीपं नीयमाना कृष्णाल्लब्धातिप्रसादा पुनस्तासामंगेषु पूर्वतोप्यधिकमधिकारं प्रापेत्युत्प्रेक्षा ध्वनिता ।। २३ ॥ तासाम् व्रजकुमारिकाणाम्। अवला इति। निर्बलानां कार्यं सबलेभ्यः श्रेष्ठं करोमीति संबुद्ध्यभिप्रायः। यद्वा—अः वासुदेवोऽहंमे बलं यासां तास्तथा भक्ता इत्यर्थः। बलमत्र सामर्थ्यमाच्छादनं वा। वासुदेववस्त्रवतां न हि प्राकृतवस्त्रे इच्छोदयतीति। अत एव यूयं मद्वाक्यात्त्यक्तवस्त्रा जाता इति भावः। दामोदर इति। भक्तोत्र नारदो नलकुबरावपि भविष्यभक्तौ यशोदादिर्गोपीजनोऽप्यत्र भक्तपदेन ग्राह्यः, तदनुग्रहार्थमुदरे दामबंधं स्वोचकारेति भावः। नारदे तु तद्वचःसत्यकरणमनुग्रहः, नलकुवरयोर्भक्तिदानमनुग्रहः, यशोदादीनामानंददानमनुग्रहः, 'प्रसादं लेभिरे गोप्यः' इत्याद्युक्तेः। विजयध्वजस्तु—पादस्पर्शः शरीरस्पर्श इत्याचष्ट "उत्तमानां शरीरं तु पादशब्देन भण्यते" इति शिष्टोक्तेः। अत एव भगवत्पूज्यपादविष्णुपाद इति व्यवहारो लोके शास्त्रे च दृश्यते। पादशब्देन पादपर्यायस्तेन स्वामिचरणतातचरण इत्यादयः प्रयोगा। श्रूयंते। 'अंगेनांगिग्रहणम्' इति न्यायो वाऽनुसंधेयः ।। २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथा तेन स्वोक्तेन प्रकारेण वासांसि सर्वाण्येव परिधानीयोत्तरीयादीनि प्रकर्षेण प्रेमसम्बोधनादिना नीपाग्रादवरूढः सन् इति ज्ञेयं यतः करुणाः स्वत एव सर्वत्र दयालुः विशेषतश्च तेन तोषितः यद्दर्शनोत्कण्ठया नागराजनोचितभावाविर्भावेपि प्रकृतबाल्यचाञ्चल्यमिवेदमाविष्कृतं तेन तासामभिमानलज्जाच्छेदकरूपेण पूर्वानुरागजेन परमार्त्तिभयेन दशाविशेषेण लब्धमनोरथ इत्यर्थः। देवकीसुत इति श्रीपरीक्षितं प्रति मुनीन्द्रोक्तिः साहि तत्रोचिता श्रीकुन्तीप्रपौत्रस्य श्रीसुभद्रापौत्रस्य तस्य तद्रूपालम्बनत्वेनैव सुखविशेषात् तथैव भवतां प्रपितामहीति श्रीशुकोक्तिः तथैव च दशमारम्भे तत्प्रश्न इति तस्मात् योऽसौ भवतामालम्बनीभूतः सोपि यासां प्रेम्णैवं चपलीकृतस्तासां महिमा विचार्यतामिति भावः। एवमन्यत्रापि ज्ञेयम् ॥ २१ ॥ तेनेत्युक्तमेव विवृणोति—दृढमिति। क्रीडनं क्रीडोपकरणं यन्त्रपुत्रिकादि प्रियस्य तस्य सङ्गेन सङ्गत्येव निर्वृताः। यद्वा, प्रियस्य सङ्गेन प्रत्युत निर्वृता बभूवुः अहो पश्य गाढप्रेममाहात्म्यमिति भावः ॥ २२ ॥ स्ववासांसि निजवस्त्राणि तेन परिवर्त्त्य दत्तान्यपि परिचित्यान्योन्यस्वीयस्वीयान्येव परिधायेत्यर्थः। अन्यत्तैः यद्वा प्रेष्ठस्य श्रीकृष्णस्य सङ्गमेन सज्जिताः तस्मिन्नेवासक्तीकृताः अत आकृष्टभगवच्चित्ताः अत एव मिथो भावविशेषोदयेनाश्वासवाक्यप्रसादेन च सलज्जदृष्टयः सत्यस्तस्मिन् स्थाने कृष्णे वा स्थिरा न चेलुस्तत एवेत्यर्थः। पञ्चम्यर्थे वा सप्तमी। यद्वा, वासः परिधानानन्तरं लज्जातिशयापगमे सति गृहीतचित्ता उदितभावाः अत एव प्रेष्ठसङ्गमाय तदैव रहः पाणिग्रहणाय सज्जिताः सज्जा इव वर्त्तमाना अत एव तस्मिन् लज्जायितेक्षणाः सत्यो न चेलुः लज्जते लज्ज इति पचाद्यजन्तं लज्जयितेति क्यन्तान्निष्ठायां रूपं विकृताख्योऽयमनुभावो ज्ञेयः यथोक्तम्—

> "ह्रीमानेर्ष्यादिभिर्यत्र नोच्यते स्वविवक्षितम्। व्यज्यते चेष्टयैवेदं विकृतं तद्विदुर्बुधाः ॥" इति ॥ २३ ॥

सङ्कल्पं विज्ञाय पूर्वोक्तभावाभिव्यक्त्या साक्षादनुभूय सङ्कल्पमेव दर्शयति, स्वस्य पादयोः स्पर्शः पत्नीत्वेन भक्त्यात्यन्तसान्निध्यमित्यर्थः। यद्वा, स्पर्शः स्पर्शनं पतित्वेन तासु स्वसमर्पणं तत् सत्वोपपादनं तस्य काम्यया धृतं नियमेनानुष्ठितं रक्षितं वा व्रतं याभिस्तासां स्वपादस्पर्शेच्छामयं सङ्कल्पं तत्र पादस्पर्शशब्देन प्रेमविशेषेण पतित्वं सूचितं दामोदर इति दामोदरत्वमारभ्यैव तासु प्रेमवानित्यर्थः अबलाः कन्यात्वादिना स्वातन्त्र्यहीनाः प्रति इत्यात्मैकसाध्याभीष्टत्वं वितर्क्य तासु तस्य तादृशी कृपा युक्तैवेति भावः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तथा तेन स्वोक्तेन प्रकारेणावनताः कृताञ्जलित्वेन प्रणताः वासांसि सर्व्वाण्येव परिधानोत्तरीयादीनि, प्रकर्षेण यथायथं सप्रेमसम्बोधनादिपूर्वकम्; यद्वा, कौतुकेन तासां प्रीत्यर्थमन्योन्यवस्त्रपरिवर्त्तनविनोदेनायच्छत्, नीवाग्रात् अवरूढ सन्निति ज्ञेयम्, यतः करुणः, स्वत एव प्रीतस्तत्रापि भगवान् निजाशेषगुणादिप्रकटनपरः, यतो देवक्याः सुतस्तदर्थमेव तस्यां जात इत्यर्थः। देवकीशब्दार्थः पूर्वमेवोक्तोऽस्ति, विशेषतश्च तेन तासां व्रतेन निजवचनप्रतिपालनेन वा तोषितः ॥ २१ ॥ अहो राजन्! पश्य गाढप्रेममाहात्म्यम्, किंवा श्रीकृष्णस्य मोहनत्वमिति वदन् ताः प्रति साभ्यसूयमिवाह-दृढमिति। क्रीडनं क्रीडोपकरणं यन्त्रपुत्रिकादि, यतः प्रियस्य तस्य संगेन संगत्यैव निर्वृताः यद्वा प्रिय संगेन निवृताश्च बभूवुः ॥ २२ ॥ स्ववासांसि निजनिजवस्त्राणि यथा स्वयमेव तेन परिवर्त्त्य दत्तान्यपि परिचितान्यन्योन्यं परिवर्तनेन स्वीयस्वीयान्येव परिधायेत्यर्थः। अन्यत्तैर्व्यञ्जितम्, यद्वा, प्रेष्ठस्य श्रीकृष्णस्य संगमेन आसज्जितास्तस्मिन्नेवासक्तीकृताः, अत आकृष्टभगवच्चित्ताः, अतएव मिथो भावविशेषोदयेनाश्वासवाक्प्रसादलाभेन वा सलज्जदृष्टयः सत्यः, तस्मिन् स्थाने कृष्णे वावस्थिता नो चेलुस्तत एवेत्यर्थः। पञ्चम्यर्थे वा सप्तमी ॥ २३ ॥ संकल्पं विज्ञाय भावविशेष-

दृष्ट्या साक्षादनुभूय संकल्पमेव दर्शयति-स्वस्य पादयोः स्पर्शः पत्नीत्वेन भक्त्यात्यन्तसान्निध्यमित्यर्थः। यद्वा, स्पर्शः स्पर्शनं पतित्वेन तासु समर्पणं तत्स्वत्वोपपादनं तस्य काम्यया धृतं नियमेन यत्नतोऽनुष्ठितं वा व्रतं याभिस्तासां स्वपादस्पर्शरूपमेव संकल्पमित्यर्थः। तत्र पादस्पर्शशब्देन प्रेमविशेषेण पतित्वविशेषः सूचितः अबलाः कन्यात्वादिना स्वातन्त्र्यहीनाः; (१८ श. श्लो.) 'प्रीतः' इति तासु तस्य तादृशी कृपा युक्तैवेति भावः। किंवा अनुत्तमादिवत् न बलमन्येषां याभ्यस्ता महाबलिष्ठा इत्यर्थः, श्रीभगवद्वशीकरणात् ॥२४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

करुणः करुणावान् ॥ २१ — २५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ भगवांस्तदा अवनतास्ता दृष्ट्वा तेन प्रणामेन तोषितः तरुणश्च करुण इति पाठे करुणावांस्ताभ्यः कुमारिकाभ्य वासांसि प्रददौ ॥ २१ ॥ इत्थमिति। यद्यपीत्थं प्रलब्धा "यूयं विवस्त्राः" इत्यादिना अधिक्षिप्ताः त्रपया लज्जया हापिताः बध्वाञ्जलीन् इत्यादिना प्रायश्चित्तव्याजेन यन्त्रपाञ्चालिकावत्प्रवर्तिताः वासांसि चापहृतानि तथाप्यमूः कुमारिकाः तं कृष्णं नाभ्यसूयन् गुणेषु सत्स्वप्युक्तान् दोषान्नाविश्चक्रुः तत्र हेतुः निरतिशयप्रियस्य कृष्णस्य सङ्गेन निर्वृताः सुखिताः तत्सङ्गनिर्वृत्या विस्मृतदोषा इति भावः। नाभ्यसूयन् ॥ २२ ॥ किन्तु स्ववासांसि परिधाय धृत्वा प्रेष्ठस्य सङ्गमेन वशीकृताः अत एव तदपहृतचित्ता नोच्चेलुर्न चलितवत्यः, गृहीतचित्तत्वमेवाह —तस्मिन् कृष्णे लज्जायितं लज्जाविलसितम् ईक्षणं यासां ताः ॥ २६ ॥ ततो भगवान् दामोदरः स्वपादस्पर्शकाम्यया स्वपादस्पर्शशब्देनात्र तात्पर्यतः स्वेन सह क्रीडा विवक्षिता तत्काम्यया धृतमनुष्ठितं व्रतं कात्यायन्यर्चनात्मकं याभिस्तासां सङ्कल्पमभिसन्धिविशेषं विज्ञाय प्राह ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

करुणः दयाशीलः ॥ २१ ॥ तासां कृष्णे भवत्यतिशयं कथयति–दृढमिति। प्रलब्धाः वञ्चितवत्कारिताः हापितास्त्याजिताः मुक्तलज्जाः कारिताः प्रस्तोभिताः चाटुवचनजालं प्रापिताः क्रीडनवद्दारुयन्त्रवत् अथापि तथापि अमुं कृष्णं प्रति गुणेषु दोषाविष्करणमसूया तत्र हेतुमाह, प्रियेति। प्रियेण कृष्णेन सह सङ्कथनलक्षणसङ्गेन निर्वृताः ॥ २२ ॥ प्रेष्ठस्य कृष्णस्य सङ्गमे सज्जिताः सन्नद्धाः न उच्चेलुः स्थितप्रदेशादिति शेषः। लज्जया ईषन्निमील्य प्रेषितानीक्षणानि यासां ताः यद्वा लज्जया इषितानि गतानीक्षणानि यासां तास्तथा "इषु गतौ" इति धातुः २३ ॥ पादं शरीरं "उत्तमानां शरीरं तु पादशब्देन भण्यते" इति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

देवकीसुत इति श्रीपरीक्षितं प्रति मुनीन्द्रोक्तिः मदालस्वपरूपात्तरूप्येण एवमन्यत्रापि दृढम् ॥ २१ — २८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं भगवता अकार्यमपि कृतं कारितश्च, तथापि तस्मै नासूयन्तीत्याह —दृढं प्रलब्धा इत्यादि। दृढं गाढं प्रलब्धा उपहसिताः त्रपयावहापितास्त्याजिताः, प्रस्तोभिता अपराद्धीकृता, क्रीडनवद् दारुपुत्रिकावत् कारिता नर्तिताः, वस्त्राणि चैवापहृतानि इति प्रागेवान्वेतव्यम्। न केवलं वस्त्राण्येवापहृतानि, दृढं प्रलब्धाश्चैवमेव योजना! तथापि ताः कुमारिका नाभ्यसूयन्। कुतः ? प्रियसङ्गनिर्वृताः प्रियोऽयं यथा तथा करोतु, अस्य सङ्ग एव नः काम्यः स तु भवन्नास्ते, किमेतस्याकार्यकल्पनयेति निर्वृताः सुखिताः ॥२२॥ अथ भगवतैव सर्वज्ञशिरोमणिना परिचीय परिचीय प्रत्येकमुन्नीय करतलेन दत्तानि वासांसि ताः परिदधुरित्याह–परिधाय स्ववासांसीत्यादि स्वस्ववासांसीत्यर्थः। नो चेलुः, वसनप्राप्तिरेव न पुरुषार्थः, तस्मिन् सति तदैव चलनं शोभते। न केवलं तेन वासांस्येवापहृतानि, अपि तु चित्तान्यपि, अत आह—गृहीतचित्ताः। गृहीतचेतत्वं दर्शयति—प्रेष्ठसङ्गमसज्जिताः, प्रेष्ठसङ्गमे धृताशाः। अतएव तस्मिन् श्रीकृष्णे लज्जायितेक्षणा जाताभिलाषतया व्रीडितलोचनाः लज्जयाऽयिते प्राप्ते ईक्षणे यासाम् ॥ २४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तास्तथावनता इत्यादि। तथा तदुक्तप्रकारेणावनताः कृतनमस्काराः पूर्वं मूर्ध्नि अञ्जलिं बद्ध्वा पश्चाद्भूमौ निपत्य नमस्कृत्वेति भावः। करुणः करुणावान् तेन तोषितः, करुणश्च स्तेनश्च तोषितश्चेत्येकमेव वा पदम्, स्तेनश्चौरः ॥ २१ ॥ क्रीड़नवच्च क्रीड़नं दारुपुत्रिकादिः, दारुपुत्रिकाः सूत्रग्रथिता यथा नर्त्यन्ते, तथा कारिताः, यतः प्रियसङ्गनिर्वृताः प्रियसङ्गमात्रं निर्वृतिहेतुर्यासां ताः ॥ २२-२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वासांसि सर्वाण्येव यतस्तेन प्रणामेन स्ववाञ्छितार्थसाधकेन तोषितः ॥ २१ ॥ तिरस्कुर्वतोपि स्वप्रियस्यानुकूल्यं ताभिः कृतमन्यैर्दुष्करत्वाद्विस्मयेनाभिनन्दति दृढमत्यर्थं प्रलब्धा वञ्चिता यूयं विवस्त्रा इत्यादिना त्रपया चावहापितास्त्याजिताः अत्रागत्य

स्ववासांसोत्याग्रहेण प्रस्तोभिता उपहसिताः "सत्यं ब्रुवाणि नो नर्म" इत्यादिना क्रीडनं क्रीडोपकरणं यन्त्रपुत्रिकादि तद्वत् कारिताः कृताः बद्ध्वाञ्जलिमित्यादि प्रायश्चित्तच्छलेन नाभ्यसूयन् दोषदृष्ट्या नापश्यन् प्रियस्य तथा कृतवतोपि सङ्गेन निर्वृताः प्रियत्वादेव प्रियकृतं दुःखप्रदानमपि सुखत्वेनैवानुभवन्त्य इति भावः ॥ २२ ॥ प्रेष्ठस्य सङ्गमेन सज्जितास्तस्मिन्नेवात्यधिकमासक्तीकृता यथा कृष्णेन तासां वसनानि गृहीतानि तथा गृहीतं तस्यापि चित्तं याभिस्ता इति परस्परप्रेमाश्रयत्वमुक्तम् अत्र मय्येताः परमासक्ता इति कृष्णेन यथा ज्ञातं तथैव कात्यायनीप्रसादादस्मास्वपि अयमासक्त इति ताभिरप्यवगम्य तस्मिन् श्रीकृष्णे लज्जायितं प्राप्तम् ईक्षणं यासां तथाभूताः सत्यो भावोत्थजाड्यादेव न चेलुः याः खलु कृष्णेन निष्कासिता ताभिरपि तिरस्कृता तदङ्गेभ्यो निस्सृत्य दूरं गताऽभूत् सा लज्जा पुनः परावृत्या यान्ती नयनेन कृततत्साहाय्येन कृष्णसमीपं नीयमाना कृष्णाल्लब्धातिप्रसादा पुनस्तासामङ्गेषु पूर्वतोप्यधिकमधिकारं प्राप्तेत्युत्प्रेक्षा ध्वनिता ॥ २६ ॥ भो रसिकशेखर ! अस्माभिर्व्रतफलं प्राप्तमेव यदसाधारणं विडम्बनं त्वया कृतं तेनापि प्राणा न निर्यापिताः प्रत्युत त्वदनुरोधेन सन्तोषिता एव । किञ्च, जलादस्मानुत्थाप्य नानाचातुर्य्यसृष्ट्या अस्मत्सर्वाङ्गानीक्षित्वा अस्मत् परिधानीयवासांसि स्वीयस्कन्धधृतानि कृत्वैवास्मभ्यं स्वमनोरत्वेन सार्द्धं दत्तवता त्वया यत्किञ्चिदुक्तं तस्य च प्रत्युत्तरतयाअस्माभिः सलज्जावलोकनमेव तुभ्यं दत्तम् अनेनास्माकं त्वय्यपराधो वा त्वत्प्रीणनं वेत्यजानतीरस्मान्मुग्धाः प्रति त्वद्विवक्षितं तत् खलु देश कालपात्राभिज्ञस्त्वं ब्रूहि तत् श्रुत्वैव गृहं याम इति तत्र प्रत्युत्तरयिष्यतो भगवतः सर्वाभिज्ञत्वमेकेन ततस्तत् प्रत्युत्तरं चाह, त्रिभिः तासामिति ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तासां श्रीकृष्णेत्यासक्तिं दर्शयति – दृढमिति द्वाभ्याम् । यद्यपि दृढमत्यर्थं प्रलब्धाः अधिक्षिप्ताः यूयं विवस्त्रा इत्यादिना त्रपया लज्जाया च हापितास्त्याजिताः अत्रागत्य स्ववासांसीत्यादिना प्रस्तोभिता उपहसिताश्च "सत्यं ब्रुवाणि नो नर्म" इत्यादिना क्रीडनवत्कारिताश्च बद्ध्वाञ्जलिमित्यादिप्रायश्चित्तव्याजेन वस्त्राणि चापहृतानि तथापि ताः कुमारिकाः अमुं श्रीकृष्णं नाभ्यसूयन् सर्वात्मानं सर्वलोलं सर्वदा स्वभावतोपास्तसमस्तदोषदृष्ट्या नापश्यमित्यर्थः । तत्र हेतुमाह प्रियसङ्गनिर्वृताः प्रियस्य निर्दोषतया प्रीतिविषयस्य स्वभक्तदोषनिराकरणार्थमधिक्षेपादिकर्तृत्वे प्रतीयमानस्य सङ्गेन निर्वृताः सुखिता इत्यर्थः । अस्मत् स्वभावानुसारेणास्मद्धितायैव पूर्णानन्दः सर्वदा स्वभावत एवावाप्तसमस्तदोषोयं चेष्टते इति विवेकेन श्रीकृष्णसङ्गजानन्दसमुद्रे निमग्ना बभूवुरिति भावः ॥ २१ ॥ परिधाय धृत्वा प्रेष्ठस्य श्रीकृष्णस्य सङ्गमेन सज्जिताः वशीकृताः गृहीतचित्ताः सत्यः नो चेलुः न चलितवत्यः तत् समीपे एव लज्जायितं लज्जाविलसितमीक्षणं यासां ताः तस्थुरित्यर्थः ॥ २२ ॥ अबलाः प्रत्याह ॥ २३ ॥ हे साध्व्यः ! भवतीनां मदर्चनं मत्सेवनं मया सह रमणं प्रति वः सङ्कल्पः मनोरथः स लज्जया युष्माभिरकथितोपि मया विदितो अनुमोदितश्चातः सत्यो भवितुमर्हति ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

देवकीसुतो यशोदात्मजस्तास्तथा स्वोक्तविधयैवावनता दृष्ट्वा ताभ्यः सर्वाणि वासांसि प्रायच्छत् शीतेन कम्पं वीक्ष्य करुणः तेन प्रणयेनैकान्तिकेन तोषितः ॥२१॥ विडम्वयतोपि प्रियस्यान्यैर्दुष्करां ताभिः कृतामनुवृत्तिमभिनन्दति – दृढमिति । दृढमत्यर्थं प्रलब्धाः प्रस्ताविता "यूयं विवस्त्राः" इत्यादिना त्रपया च हापितास्त्याजिताः "अत्रागत्य स्ववासांसि" इति हठेन प्रस्तोभिताः परिहसिताः "सत्यं ब्रुवाणि नो नर्म्मे" त्यादिना क्रीडनवत् यन्त्र प्रतिभावत् कारिताः कृताः स्वार्थे णिच् वद्ध्वाञ्जलिमित्यादिप्रायश्चित्तछद्मना तथाप्यमुं कृष्णं ता नाभ्यसूयन् दोषदृष्ट्या नापश्यन् किन्तु तथा कृतवतोपि तस्य प्रियस्य सङ्गेन निर्वृताः प्रहृष्टाः प्रियत्वादेव तत्कृतं सर्वं पुमर्थत्वेन मेनिरे इति भावः । इह पूर्णानन्दस्य हरेः स्त्रीरूपादि विषयानन्दापेक्षा जीववन्न सम्भवेदिति स्थूलधियां शङ्का तत्स्त्रीणां तत्स्वरूपशक्तित्वात् परास्ता तच्चानन्दं चिन्मयरस प्रतिभाविताभिस्ताभिर्य एव "निजरूपतया कलाभिः" इति ब्रह्म संहितोक्तेः कलाभिर्विधोः मूर्त्तिर्हि भवेत् ॥ २२ ॥ प्रेष्ठस्य सङ्गमेन सज्जिता आसक्तिं प्रापिताः गृहीतं तस्य चित्तं याभिस्ता इति मिथः प्रेमा सूचितः तस्मिन् प्रेष्ठे लज्जामापितानि प्राप्तानीक्षणानि यासां तादृश्यः सत्यो नो चेलुः स्तम्भोदयाच्चलितुं न शेकुः हरिरस्मास्वासक्तिमानिति प्रतीतेर्निर्गमितापि लज्जा पुतस्तदङ्गेष्वत्यर्थं प्रविष्टेतिभावः ॥ २३ ॥ अत्र दासिकाभ्योऽस्मभ्यम् दास्यमादिशयन्निशम्य गृहान् प्रयाम इति तासां वाचमालक्ष्य तत्सङ्कल्पं प्रकाशयामासेत्याह — तासामिति । स्वपादस्पर्शकाम्यया पत्नीभावस्पृहया सङ्कल्पं विज्ञायेति सम्बन्धः दामोदर इति तल्लीलात आरभ्य तासु प्रेमवानित्यर्थः ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भगवान्देवकीसुतस्तथा स्वोक्तवर्त्मनाऽमूर्नताः कृतनमना दृष्ट्वा स्नेहेन स्वभक्त्या तोषितः करुणः गतम् । ताभ्यो वासांसि प्रायच्छद्ददौ । भगवानित्यनेन स्वपार्श्ववर्तिवयस्यलोचननिभालनाकलनस्वमात्रदृष्टिविषयतायापनसामर्थ्यं द्योत्यते ॥२१॥ तद्भक्तिरेव व्यक्तीकृत्य वक्ति ॥ दृढमिति । दृढं यथा तथा प्रलब्धा वञ्चितास्त्रपयाऽपत्रपया हापितास्त्याजिताः । प्रस्तोभोऽत्र प्रस्तुतापहासपरः । तथा चापहसिताः क्रीडनं तत्साधनं पुत्तलिकादि तद्वत्कारिता वस्त्राणि चापहृतान्यथाऽप्यमुं श्रीकृष्णं नाभ्यसूयन्नासूयाञ्चक्रुः । तत्र

तन्त्रम् । प्रियसङ्गनिर्वृता इति । प्रियस्य कृष्णस्य सङ्गः सङ्कथननिभालनादिरूपस्तेनैव निर्वृताः सुखिता इति । मनसि वा न किञ्चित्कालुष्यं योषितामिति सूचयितुं न चतुर्थीति ज्ञेयम् । शब्दशक्तिप्रकाशिकायां शिष्यमोर्ष्यतोत्याद्युदाहृत्य द्वितीयाद्युपपद्यत इत्युक्तेर्द्वितीया वा ।। २२ ।। स्ववासांसि वस्त्राणि । स्वस्ववस्त्राणीत्युक्तौ तन्मार्गणे समयगमनं स्यात् । किञ्च सर्वासामेककान्तकामुकमनस्कत्वेनापि भाविकार्यगुरुतया च न देवयानीशर्मिष्ठावद्दुर्गोष्ठीभाविनीति यस्याः कस्याश्चिद्याचका च पर्यधादिति ध्वनयितुं स्वेत्येवोक्तिरिति ज्ञेयम् । नियमो नास्तीति सूचयितुं वा । प्रेष्ठस्य सर्वत ईष्टस्य सङ्गमे सज्जिताः सन्नद्धास्तेन गृहीतं चित्तं यासां तास्तस्मिन्नेव लज्जयेषितानि प्रेषितानीक्षणानि याभिस्ता लज्जा ईषिता प्रेषिता च येन स तस्मिन्कृष्णे क्षण उत्सवोऽस्ति यासां ताः । अर्शआद्यच् । ईकरः क्षणो यासामिति लज्जेषितेक्षणा इति पदमेकं वा । ई च सौभाग्यं येर्मन्मथस्येक्षणौ यासामिति वा। नोच्चेलुस्तद्देशान्नागच्छन् ।। २३ ।। स्वपादस्पर्शकाम्ययेति मर्यादावचनम् । स्वाङ्गसङ्गकामनया पादस्पर्शः पादसंवाहनं तच्च योषित्सु प्रायो भार्याकार्यमिति वैवं वचनम् । धृतव्रतानां तासां सङ्कल्पं विज्ञाय दामोदरोऽबलाः प्रत्याह ।। २४ ।।

श्रीसुबोधिनी

तदा भगवान् सन्तुष्टः प्रादादित्याह **तास्तथेति**, यदि चातुर्येणावनताः स्युस्तदा सन्तुष्ट एव भवेत् परं **तथावनता** न तु चातुर्यार्थमतस्तथा **दृष्ट्वा तथा** ज्ञाने हेतु**र्भगवानिति**, प्रसादे हेतु**र्देवकीसुत** इति, तदा **वासांसि ताभ्यः प्रायच्छत्**, चतुर्थ्या सम्प्रदानादपूर्वदानं सूचितं, [अत एवार्थविशेषेपि 'दाञ् दाणो'त्र दाण एव प्रयोगः कृतो यतास्य पूर्वनिवृत्तिरपूर्वयच्छादेशेनापूर्वरूपवत्त्वमेवमत्रापि देवेषु केवलवस्त्रत्वनिवृत्तिमपूर्वभगवद्भावात्मककामरूपतां च सम्पाद्यतानि दत्तवानिति ज्ञाप्यतेत एव 'प्रेष्ठसङ्गम' सज्जने वस्त्रदानमेव हेतुत्वेनोक्तं 'परिधाय स्ववासांसी'ति, अत एव 'स्व'पदमप्युक्तं नायिकानां प्रियविषयकोत्कटभावस्यैव स्वकीयत्वादन्यथा न वदेत् प्रयोजनाभावात्,] अर्थात् तासामेव प्रकर्षेण दत्तवान् यथा तासु पूर्वोक्तः कामः सिद्धो भवत्यत एव जलक्रीडादिषु वस्त्रोत्तारणपरिधाने नापेक्षिते, नन्वेवंविधवस्त्रदाने को हेतुः ? तत्राह **करुण** इति, परमकरुणया दुःखप्रहाणेच्छानन्दाविर्भावनरूपा तासूत्पन्ना, ननु तर्हि मुक्तिमेव दद्यात् कुतो वस्त्राणि दत्तवान् ? तत्राह **तेन तोषित** इति, **तेन** मुग्धभावेन साष्टाङ्गनमस्कारेण **तोषं** प्रापितः, अतस्तोषः सञ्जातः, ततो ब्रह्मभूतानामेव तासां भगवता सह रमणमपि भविष्यति, रसरक्षार्थमेव वस्त्रदानं, अनेनान्यादर्शनमपि सेत्स्यति ।। २१३ ।। ननु ता अनेकविधा वस्त्रपरिधानानन्तरं पूर्ववासनयाक्षिप्तो दोषः कथं नोत्पन्न इत्याशङ्क्याह दृढं **प्रलब्धा** इति, लौकिकदृष्टिस्तासां जाता न वेति विचार्यते भगवद्वचने च विश्वासो भगवति च स्नेहस्तस्य च परमाप्तत्वं स्वस्य च दोषस्फूर्तिस्तन्निवृत्तेरनन्योपायत्वं चान्यथा सर्वथा निरभिमानानां पुनर्जिज्ञासा नोपपद्येत, दृढमत्यन्तं **प्रलब्धा** 'यूयं विवस्त्रा यदप' इति, 'अत्रागत्य स्ववासांसी'तिवाक्यात्, **त्रपया च हापितास्त्याजिता** लज्जा हि तासां सर्वस्वं, दोषारोपो गुणाभावश्चोक्तः, चकारादपत्रपया च **हापितास्त्याजिताः**, 'भवत्यो यदि मे दास्य' इति तद्वाक्यमेव पुरस्कृत्य ता निर्जिता इति **प्रस्तोभिताः**, **स्तोभ**वाक्यं वृथावाक्यं, प्रकर्षस्तस्यापकारहेतुत्वं, अतः **प्रस्तोभिता** 'मूर्ध्नि बद्ध्वाञ्जलि'मिति **क्रीडनवच्च कारिता** यथा बालो यथैव कार्यते तथा कारिताः, तासां च पुन**र्वस्त्राण्यपहृता**न्येव, एवं पञ्चविधदोषैरपि **ता** भगवन्तं **नाभ्यसूयन्**, **अभ्यसूया ह्यन्तर्दुःखे भवति**, तानि च वाक्यानि महाग्नौ जलमिव, भगवता स्वरूपेणैवानन्दं प्रापितासु न तैर्दुःखमुत्पादयितुं शक्तं स्वानन्देनैव **निर्वृताः**, भगवदीयैरप्याधिदैविकैर्वाक्यैर्नापकारः कर्तुं शक्यः, तत्र हेतुः **प्रियस्य** भगवतः **सङ्गे**न वस्त्रद्वारा **प्रियस्य सङ्गस्तेन निर्वृताः**, प्रमेयबलेन प्रमाणं दुर्बलं जातमित्यर्थः, अनेन 'प्रायच्छदि'ति **'प्र'**शब्देन परिधापनमप्युक्तं 'करुणा'पदेन च तदानीन्तनोन्यो योग्योप्युपचारः सूचितोतो **निर्वृता** भगवति स्वस्मिन् दोषाभावाद् दोषं नारोपितवत्यः ।। २२३ ।। ततो यज् जातं तदाह **परिधायेति**, स्वस्व**वासांसि परिधाय प्रेष्ठस्य** सङ्गमे तृतीयपुरुषार्थे **सज्जिता** जाता रसाकरा जाता इत्यर्थः, अन्यथाश्रयभङ्गः क्षीणरसता वा स्यात्, एवं देहव्यवस्था निरूपिता, अन्तःकरणव्यवस्थामाह **गृहीतचित्ता** इति, **गृहीतं चित्तं** याभिर्यासामिति वा, सम्बन्धिनः कर्तुश्चापेक्षितत्वाद् भगवच्चित्तं ताभिर्गृहीतमभिप्रायो ज्ञातो वस्त्रपरिधानेनैव भगवता च तासां चित्तमपहृतं 'तोषित' इति, एवं चित्तव्यतिषङ्गेङ्कुर उत्पन्ने ततः क्रियाशक्तिः कुण्ठिता जातेत्याह **नो चेलुरिति**, अन्यत्र ज्ञानशक्तिरपि कुण्ठितेति वक्तुं **तस्मिन्** रस एव तस्या विनियोगमाह, **लज्जायितेक्षणा लज्जां** प्रातानीक्षणानि यासां भगवति लज्जयार्पितानि वा, पूर्वस्वदोषानुसन्धानादिति केचित्, वस्तुतस्तु तदेयं भावदृष्टिः, एवं तासां शरीरान्तःकरणेन्द्रियवृत्तय उक्ताः ।।२३३।। तदा यदुचितं तद् भगवान् कृतवानित्याह **तासां विज्ञायेति**, **तासां सङ्कल्पं विज्ञाया**हेतिसम्बन्धः, **भगवानिति** सर्वसामर्थ्यमुक्तं, तेन ज्ञात्वा यथोचितं तत् करिष्यतीति सिद्ध, उत्पत्त्या चोपपत्त्या च ज्ञातवानिति **विशब्दार्थः**, तत्र विषयनिर्धारमाह, न हि ता लौकिका इव विवाहार्थमागता नापि लोकविरोधेन नापि ज्ञानार्थं किन्तु सर्वथा विचारेण भक्त्यर्थमेवागतास्तदाह **स्वपादस्पर्शकाम्ययेति**, स्वस्य भगवत एव तत्रापि भक्तिरेव भक्तावपि स्पर्श एव न तु श्रवणादिसख्यपर्यन्ता तस्या एव कामना, न केवलं कामनामात्रं तदर्थं देहेन्द्रियादीनामपि विनियोगं कृतवत्य इत्याह **धृतव्रतानामिति**, **धृतं** कात्यायन्यर्चनव्रतं याभिः, धारणे व्रतनिवृत्तिर्निराक्रियतेन्यथा कृतव्रतानामित्येवोक्तं स्यात्, सङ्कल्पो मानसो नियमः, अनेन सर्वोपि सङ्घात एतासामुत्तमभक्त्यर्थमेवेति निश्चित्य पश्चादाह यथा भक्तिर्भवति तथोपायं, नन्वेवं निर्बन्धकथने को हेतुः ? तत्राह **दामोदर** इति, अनेन गोपिकावश्यता

निरूपित। यत्र तथा वश्यो जातस्तत्रैवमपि वश्यो भविष्यतीति, प्रथमतस्तासां सम्बोधनमाह**बला** इति, रससम्बोधनमेतदुभयोरन्योन्यवशत्वज्ञापकं भगवान् **दामोदरस्तास्त्वबला** इति ॥ २४½ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

दृढं प्रलब्धा इत्यत्र, लौकिकदृष्ट्यभावस्याविचार्यत्वे बाधकमाहुः **अन्यथेति** । असूयाहेतुत्वेन लोके ये धर्माः प्रसिद्धास्तेष्वनुभूयमानेष्वपि तदसम्भवश्चेत्- तदा सिद्धमलौकिकत्वं भावस्येति तात्पर्येण मूले ते निरूपिताः । न च स्नेहमात्रमेतेनोक्तमिति वाच्यम्, तद्वतीनामपि खण्डिताकलहान्तरितादीनामसूयासम्भवात्, ईश्वरेऽसूयानिष्टहेतुरिति शास्त्रज्ञानवतां स्नेहरहितानामपि तदसम्भवाच्च । न च खण्डितादीनां सङ्गाभावात्तथात्वमत एवात्राप्यन्ते विशेषणं तथेति वाच्यम् । यदा प्रलम्भनादिस्तदा वक्ष्यमाणसङ्गाभावात् तत्सम्भवात् खण्डितादीनां प्रियं प्रत्येव तथोक्तेः सङ्गाभावाभावश्च । न च पूर्वकालीनः स तथा, उत्तरेण सङ्गेन तद्बाधात् । न च पूर्वकालाधिकरणकसङ्गाभावस्तदाप्यस्ति, तस्यात्यन्ताभावरूपत्वाद्विशिष्टाप्रसिद्धावपि खण्डशः प्रसिद्धेरिति वाच्यम्, उत्तरकालीनातिरिक्तस्य सङ्गस्य प्रतियोगित्वे मानाभावात् गौरवाच्चात्यन्ताभावत्वाभावात् । न चैतेन दोषमात्राभाव उपलक्ष्यते एतास्विति वाच्यम्, दोषाणां हि मूलमभिमानस्तदभावश्चाञ्जलिबन्धपर्यन्ताज्ञाकरणेनैवोक्त इति पुनस्तदुक्तिवैयर्थ्यापत्तेः । तदेतदुक्तं **सर्वथा निरभिमानानामित्यनेन** एवं च सति सङ्गे सत्यपि लौकिकरीत्या भावे सत्यसूया भवतीति तदभावोक्त्या लौकिकदृष्ट्यभाव एवोक्तो भवति । स च न रूक्षः, किन्तु महारस इति ज्ञापनाय प्रत्येकविशेषणनिर्धारणीयार्थानाहु**र्भगवद्वचने** चेत्यादिना । एतासामेतादृशो विशुद्धभावो येन वसनद्वारापि सम्बन्धं साक्षादिवान्वभवन्निति प्रियसङ्गनिर्वृता इत्यनेनोक्तं तदभावहेतुभूतेन । अन्यथा हेतुत्वेनोक्तदृढप्रलम्भाद्यव्यवहितोत्तरक्षणेऽसूयोत्पत्तौ प्रतिबन्धकाभावादुक्तानुपपत्तिरिति भावः ॥ २२ ॥ **परिधायेत्यस्य** विवरणे, **रसाकारा जाता** इति । रसः श्रृङ्गारसः, स हि स्वयोग्येष्वेवाङ्गेषु प्रकटीभवतीति स्वशास्त्रे सिद्ध इत्यङ्गानामतादृक्त्वे रसाश्रयत्वमपि न स्यादिति तादृशत्वमत्र जातमिति ज्ञापनायैव धनुःकवचादिसम्पन्नाः रणार्थं सज्जिता वीरा प्रेष्ठसंगमसज्जिता जाता इत्युक्तमित्यर्थः । वाससां कामरूपत्वात् तदनन्तरं तथात्वमुक्तम् । ननु कुमारीणां तदैवोक्तरूपत्वमनुपपन्नमित्याशङ्क्य विपक्षे बाधकमाहुः **अन्यथेति** । तादृग्वयोऽङ्गादिसम्पत्त्यभावे कामशास्त्रोक्तनखदन्तताडनादिव्यापारोद्बोधनीयरसानामाश्रयाभावः स्यादित्यर्थः । तथाच मूलोक्तसंगमपदार्थबाधप्रसंग इति भावः । उक्ताभावेपि यथाकथञ्चित्संगमे पूर्णरसाभावेन क्षीणरसत्वं वा स्यादित्यर्थः । पूर्वं दारिकात्वकुमारीत्वोक्त्याधुना च रसाकरत्वनिरूपणेन भगवानेव गुणातीत इत्यादिनोक्तभगवत्स्वरूपात्मिकैवासां देहेन्द्रियान्तःकरणादिरूपा सामग्रीति ज्ञाप्यते । कालक्रमं विनैव तदैव तथात्वादिति । **लज्जायितेक्षणा** इत्यत्र, **पूर्वस्वदोषेति** । प्रथमाकारणेऽनागमनं दोषः । वस्तुतस्त्वधुना प्रियप्रकटितरसभरभरितत्वेन तदन्यानुसन्धानमसम्भावितमिति तत्समयोचितभावदृष्टिरेवैषेत्याहुः **तदेयं गावदृष्टिरिति** ॥ २३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तास्तथेत्यत्र तथा ज्ञाने इति मदभिप्रायं ज्ञात्वा मत्पूर्तिकामा एवं कृतवत्य इत्यान्तरभावज्ञाने इत्यर्थः, भगवत्त्वादेवं ज्ञात्वा **देवकीसुतत्वात्** तुष्टो जातः, अतस्तथा प्रादादित्यर्थः, **करुण** इत्यत्र अतिशायन मत्वर्थीयमभिप्रेत्याहुः **परमेति**, दुःखप्रहारणस्यानन्देषत्तिरोभावरूपत्वात् परमत्वेन **सर्वथानन्दाविर्भावार्थमाहुरानन्दाविर्भावनेति**, तन्निरूपिका तज्जनिकेत्यर्थः, **ततो ब्रह्मभूतानामिति** आविर्भूतानन्दानामित्यर्थः, एवंविधतोषाभावे **ब्रह्मभावमात्रसम्पादनेन** मुक्त्यैव तत् सम्पादयेत्, अत्र तु ततस्तोषाद्धेतोस्तासां रमणमपि भविष्यति, अतो **रमणोपयोग्यवयवादिसामग्रीसम्पादकैवंविधवस्त्रदानेन ब्रह्मभावं** सम्पादितवानित्यर्थः ॥ २१½ ॥ दृढमित्यस्याभासे**पूर्ववासनयेति** 'भवत्यो यदि मे दास्य' इतिवाक्यश्रवणात् **पूर्वं** तासामनेकविधत्वं भावैरुक्तं तद्वा**सनयेत्यर्थः**, व्याख्याने, **वस्त्राण्यपहृतानीति** परीक्षार्थं **क्रिडनवत्कृतिबोधकवाक्योक्त्यनन्तरमपि नमस्कारं विना न दत्तानीत्यर्थः**, अत एवैतद्विशेषणस्य **तन्निवृत्तेरनन्योपायत्वमित्यर्थ** उक्तः ॥ २२½ ॥ **परिधायेत्यत्र अङ्कुरे उत्पन्ने** इति स्मरस्य द्वितीयदशायां जातायामित्यर्थः, अग्रे सङ्कल्पादिदशासु क्रियानिवृत्त्यभिप्रायेणाहुः **क्रियेति** ॥ २३½ ॥ **तासामित्यत्र तत्रेति** उत्पत्त्युपपत्तिभ्यां ज्ञाने जाते इत्यर्थः, **लोकविरोधेनेति स्त्रीणां** पुरुषान्तरसख्ये **लोकविरोधो** भवति न तु **चरण**स्पर्श इत्यर्थः, एतत्कामनया **ज्ञानार्थत्वाभावो** ज्ञेयः, **सम्बोधनमाहेति** स्वरूपस्य **सम्यग्** बोधनं येन, **तासां** स्वरूपबोधक**मबला** इतिपदं भगवद्वाक्यात् प्रथमत **आहेत्यर्थः** ॥ २४½ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गृहीत**चित्ता** इत्यस्य विवृतौ **सम्बन्धिनः कर्तुश्चापेक्षितत्वादिति** कस्य चित्तं गृहीतमिति सम्बन्धिजिज्ञासायां गृहीतं **चित्तं यासा**मितिविग्रहेण सम्बन्धियो **गोपकुमार्यो** निरुपिताः, केन चितं गृहीतमिति कर्तृजिज्ञासायां **गृहीतं चित्तं** याभिरितिविग्रहेण चित्तग्रहणकर्त्र्यो गोपकुमारिका उक्ता इत्यर्थः, एवमुभयोश्चित्तग्रहणे उभयोः परस्परहेतुतेतिभावः, **तस्मिन्** लज्जायितेक्षणा इत्यस्य विवृतौ **भगवति लज्जयार्पितानि वेति** अस्मिन् पक्षे 'लज्जार्पितेक्षणा' इतिपाठो ज्ञेयः, **शरीरान्तःकरणे-**

न्द्रियवृत्तय उक्ता इति, परिधाय स्ववासांसी' त्यनेन **शरीरवृत्ति** 'गृहीतचित्ता' इत्यनेन अन्तःकरणवृत्तिः 'लज्जायितेक्षणा' इत्यनेनेन्द्रियवृत्तिरुक्ता ॥ २३½ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तथा स्वोक्तप्रकारेणावनतास्ताः कुमारिका दृष्ट्वा तेन प्रणामेन तोषितो भगवान् देवकीसुतः कृष्णस्ताभ्यो वासांसि प्रायच्छत् प्रददौ । 'कथं प्रणाममात्रेणैव सन्तोषः' तत्राह— करुण इति ॥ २१ ॥ गोपीनां शुद्धभावमेव स्पष्टयति—दृढमिति । यद्यपि दृढमत्यर्थं प्रलब्धाः ' यूयं विवस्त्रा' इत्यादिनाऽधिक्षिताः, त्रपया लज्जया अवहापिताः त्याजिताः, 'अत्रागत्य स्ववासांसि प्रतीच्छन्तु' इत्यादिना प्रस्तोभिताः, सत्यं ब्रवाणि नो नर्मं' इत्यादिना उपहसिताः, क्रीणनवच्च कारिताः 'बद्ध्वाञ्जलिम्' इत्यादिना, प्रायश्चित्तव्याजेन वासांसि च तासां अपहृतानि, तथापि ताः कुमारिका अमुं कृष्णं नाभ्यसूयन् उक्तदोषदृष्ट्या नापश्यन् । प्रत्युत प्रियस्य तस्य कृष्णस्य सङ्गेन निर्वृताः परमानन्दयुक्ता एव जाताः ॥ २२ ॥ ततः स्वस्ववासांसि परिधाय तस्मिन् श्रीकृष्णविषये लज्जायितं लज्जाविलसितमीक्षणं यासां तथाभूताः सत्यस्ततः स्थानान्नो चेलुरित्यन्वयः । तत्र हेतुमाह—गृहीतचित्ता इति । श्रीकृष्णमाधुर्येण गृहीतं वशीकृतं चित्तं यासां ताः । एतदेव स्पष्टयति—प्रेष्ठेति । प्रेष्ठस्य अतिशयप्रीतिविषयस्य तस्य सङ्गमेन सज्जिता वशीकृता इत्यर्थः ॥ २३ ॥ भूयान्नन्दसुतः पतिः, इत्युक्तत्वात् पतिभावेन स्वपादस्पर्शेच्छया धृतं व्रतमाहारादिनियमपूर्वकं देव्यर्चनं याभिस्तासां सङ्कल्पं स्वेन सह सम्भोगविषयकं भगवान् कृष्णो विज्ञाय ता अबलाः प्रत्याहेत्यन्वयः । 'अबला' इति पदेन तासां दीनता सूचिता । भक्तिस्तु व्रतकरणात् स्पष्टैव । भगवानपि भक्तप्रेमवश्यतया बन्धनमपि प्राप्तः, ततः किमधिकम् ?' इति तस्य भक्तवात्सल्यं सूचयन्नाह—दामोदर इति ॥ २४ ॥

अन्वितार्थप्रकाशिका

ता इति ॥ तथा स्वोक्तप्रकारेणावनतास्ताः कुमारिका दृष्ट्वा तेन प्रणामेन तोषितः करुणो दयालुर्भगवान् देवकीसुतः कृष्णो नीपादवरुह्य प्रेम्णा सम्बोध्य ताभ्यो वासांसि प्रायच्छत् प्रददौ ॥ २१ ॥ दृढमिति ॥ यद्यपि दृढमत्यर्थं प्रलब्धाः यूयं विवस्त्राः इत्यादिनाऽधिक्षिताः त्रपया लज्जया अवहापिताः त्याजिताः अत्रागत्य स्ववासांसि प्रतीच्छन्त्वित्यादिनाऽऽग्रहेण प्रस्तोभिताः सत्यं ब्रवाणि नो नर्मेत्यादिना उपहसिताः क्रीडनवच्च कारिताः बद्ध्वाञ्जलिमित्यादिना प्रायश्चित्तव्याजेन वासांसि च तासाम् अपहृतानि । तथापि प्रियस्य कृष्णस्य सङ्गेन निर्वृताः परमानन्दयुक्तास्ताः कुमारिकाः अमुं कृष्णं नाभ्यसूयन् उक्तदोषदृष्ट्या नापश्यन् । प्रियकृतं दुःखदानमपि सुखत्वेनैवानुभूयते ॥ २२ ॥ परिधायेति ॥ ततः स्वस्ववासांसि परिधाय तस्मिन् श्रीकृष्णविषये लज्जायितं लज्जाविलसितमीक्षणं यासां तथाभूता । लज्जायितमिति लज्जतेः पचाद्यजन्तात् क्यङ् क्तः । कृष्णेन गृहीतचित्ताः प्रेष्ठस्यातिप्रियस्य कृष्णस्य सङ्गमेन सज्जिता वशीकृतास्ताः ततः स्थानान्नो चेलुः । यथा कृष्णेन तासां स्वस्मिन्नासक्तिर्ज्ञाता तथा ताभिरपि आत्मसु कृष्णस्याप्यासक्तिः कात्यायनीप्रसादात् ज्ञातेति लज्जोत्पत्तिः ॥ २३ ॥ तासामिति ॥ दामोदरो भक्तवत्सलो भगवान् पतिभावेन स्वपादस्पर्शकाम्यया तदिच्छया धृतव्रतानां तासां सङ्कल्पमभीष्टं विज्ञाय ताः अबलाः प्रति प्राह स्म ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अवनताः नम्राः तेनस्ववचनाऽनुसारवर्त्तनेन तोषितः प्रसादितः वासांसि परिधानि योत्तरीयाणि सर्वाणि वसनानि ॥२१॥ दृढमत्यंतं प्रलब्धाः वंचिताः त्रपयालज्जया हापितास्त्याजिताः लज्जाहीना कृता इत्यर्थः । प्रस्तोभिताः परिहासिता क्रीडनवत्काष्ठपुत्रिकावत्कारिताः प्रायश्चित्तमिषेण वचनद्वारा कृताः अथापि प्रिये श्रीकृष्णे संगः आसक्तिस्तेन निर्वृताः शांति प्राप्ताः ताः अमुं हरिं नाभ्यसूयन् दोषदृष्ट्यानावलोकयन् ॥ २२ ॥ प्रेष्ठसंगमे सज्जितारताः अतो गृहीतचित्तानचेरुः न जग्मुः ॥ २३ ॥ स्वपादस्पर्शकाम्यया धृतव्रतानां तासां संकल्पं विज्ञाय अबलाः प्रति हरिराह ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ता इति ॥ देवकीसुतः करुणः भगवान् श्रीकृष्णः, ताः कुमारिकाः, तथा यथा स्वेनोक्तं तेन प्रकारेणैव, अवनताः कृतनमस्काराः दृष्ट्वा, तेन तत्कृततथाविधप्रणामेन, तोषितः प्रसन्नतां प्राप्तः सन्, ताभ्य कुमारिकाभ्यः वासांसि प्रायच्छत् प्रददौ ॥ २१ ॥ दृढमिति ॥ दृढमत्यर्थं, प्रलब्धाः 'यूयं विवस्त्राः' इत्यादिनाऽधिक्षिताः, त्रपया लज्जया च, हापिताः 'अत्रागत्य स्ववासांसि' इत्यादिना त्याजिताः, प्रस्तोभिताः 'सत्यं ब्रवाणि नो नर्म' इत्यादिनोपहसिताः, क्रीडनवच्च कारिताः 'बद्ध्वाञ्जलिं' इत्यादिना प्रायश्चित्तमिषेण यन्त्रपाञ्चालिकावत् प्रवर्त्तिताः, वस्त्राणि वासांसि च, अपहृतानि एव, अथापि तथापि, ताः कुमारिकाः, अमुं कृष्णं, प्रियसङ्गनिर्वृताः निरतीशयप्रीयश्रीकृष्णसङ्गेन सुखिताः सत्यः, न अभ्यसूयन् गुणेषु सत्स्वप्युक्तान् दोषान्नैवाविश्चक्रुः । श्रीकृष्णसंदर्शनभाषणादिसङ्गजातनिर्वृत्त्यतिशयतो विस्मृततद्दोषवत्त्वतः सर्वथाऽसूयां नाचरन्निति भावः ॥ २२ ॥ परिधायेति ॥ केवलं नाभ्यसूयन्नेवेति

न, किं तु, स्ववासांसि परिधाय, प्रेष्ठस्य श्रीकृष्णस्य संगमेन सज्जिता वशीकृताः गृहीतचित्ताः, तस्मिन् श्रीकृष्णे, लज्जायितं लज्जाविलसितमीक्षणं यासां ताः, एवंभूताः सत्यः, नो चेलुर्न चलितवत्यः ॥ २३ ॥ तासामिति ॥ ततः दामोदरः भगवान्, अनेन् भक्तवात्सल्यं सूचितम् । स्वपादस्पर्शकाम्यया, स्वपादस्पर्शेनात्र तात्पर्यतः स्वेन सह क्रीडा विवक्षिता, तत्काम्ययेत्यर्थः । धृतमनुष्ठितं व्रतं कात्यायन्यर्चनात्मकं याभिस्तासां, तासां कुमारिकाणां, संकल्पमपि संधिविशेषं विज्ञाय, अबलाः प्रति आह ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तास्तथेति : १०.२२.२१.

मदङ्गसौख्यं मदनङ्गसौख्यमर्थ्यं तदीयं मनसाऽवधार्य । ददौ गृहीत्वाऽऽवरणं दयालुस्तदेति मन्ये चतुरर्थदाता ।। ७१ ।।

कृष्णप्रिया

देवकी नन्दन भगवान् श्रीकृष्ण ने उन कुमारिकाओं को अपनी आज्ञानुकूल शिरसावन्द्य श्रद्धा से प्रणाम करती हुई देखकर अत्यंत सन्तुष्ट होकर, कुमारिकाओं को अपूर्व वस्त्रों का प्रदान किया ॥ २१ ॥ राजन् परीक्षित् ! भगवान् श्रीकृष्ण ने इन कुमारिकाओं के साथ ठीक ठीक छलपूर्ण वातें करी; उन सबको लज्जा त्याग के लिए विविश किया; "यदि तुम मेरी दासी हो" इत्यादि उनके ही वाक्यों को लेकर उनको निरुत्तर किया उनको मूक बनाया; उनके वस्त्र उठा लिए और उनको कठपुतली की तरह भाँति भाँति के नाच नचाए फिर भी उन गोपिकाओं के मन में भगवान् श्रीकृष्ण के प्रति असूया नहीं हुई, कुभाव नहीं आया, परन्तु प्यारे नन्दनन्दन के समागम से और भी प्रसन्न हुई ॥ २२ ॥ राजन् ! कुमारिकाओं ने अपने अपने वस्त्र परिधान किए और परम प्रिय भगवान् श्रीकृष्ण के समागम के लिए तत्पर हो गई । इनके चित्त प्रभु के श्रीचरणों में ऐसे संलग्न हो गये थे कि वे वहाँ से एक कदम भी न चल पाई । वे श्रीकृष्ण की ओर लजीली चितवन से निहारने लगी ॥ २३ ॥ अपने चरणों के स्पर्श करने को अभिलाषा से व्रत को धारण करने वाली गोपकुमारिकाओं के विशिष्ट मनोरथ को जानकर भगवान् दामोदर ने उन सबसे कहा ॥ २४ ॥

संकल्पो विदितः [1]साध्व्यो भवतीनां मदर्चनात् । मयानुमोदितः सोऽसौ सत्यो भवितुमर्हति ॥ २५ ॥
न मय्यावेशितधियां कामः कामाय कल्पते । [3]भर्जिताः क्वथिता [4]धाना प्रायो बीजाय [5]नेशते ॥ २६ ॥
[6]याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः । यदुद्दिश्य व्रतमिदं चेरुरार्यार्चनं सतीः ॥ २७ ॥

श्रीशुक उवाच

इत्यादिष्टा भगवता लब्धकामाः कुमारिकाः । ध्यायन्त्यस्तत्पदाम्भोजं कृच्छ्रान्निर्विविशुर्व्रजम् ॥ २८ ॥

कर्दमक्षमा

अन्वयः --हे साध्व्यः ! भवतीनाम् मदर्चनम् संकल्पः विदितः, असौ सः, मया अनुमोदितः सत्यः भवितुम् अर्हति ॥२५॥ मयि आवेशितधियाम् कामः कामाय न कल्पते, भर्जिताः क्वथिताः धानाः प्रायः बीजाय न इष्यते ॥ २६ ॥ हे अबलाः व्रजम् यात, सिद्धाः, सतीः, यद् उद्दिश्य आर्यार्चनम् इदम् व्रतम् चेरुः, "अतः" मया, इमाः क्षपाः रंस्यथ ॥ २७ ॥ इति भगवता आदिष्टाः, लब्धकामाः कुमारिकाः तत्पदाम्भोजम् ध्यायन्त्यः कृच्छ्रात् व्रजम् निर्विविशुः ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भोः साध्व्यो भवतीनां मदर्चनमेव संकल्पो मनोरथः स च लज्जया युष्माभिरकथितोऽपि मया विदितः स मयाऽनुमोदितश्चातः सत्यो भवितुमर्हति । अर्हतीति संभावनामात्रोक्त्या आत्यंतिको न भविष्यतीति सूचितम् ॥ २५ ॥ तत्कुत इत्यत आह । न मयीति । कामाय पुनः कामभोगाय । विषयमहिम्ना कामस्यापि शांतिहेतुत्वादिति भावः । कामाप्ररोहे दृष्टांतः । भर्जिता दग्धा क्वथिता पक्वा धाना यवादि । बीजायांकुरोद्गमाय । प्राय इति स्वेच्छया पुनः प्ररोहमपि सूचयति । ध्रुवादीनां तथा दर्शनात् ॥२६॥ सिद्धाः पूर्णमनोरथाः । तदाह । इमा आगामिनो रात्रीर्मया रस्यथेति । आर्या कात्यायनी । सतोः सत्यः । भक्त्याऽनुकंप्य कन्यास्तास्तद्विवर्जितयज्वनाम् ॥ पत्न्यनुग्रहतस्तेषामहन्कर्ममहामदम् ॥ १ ॥ २७—३१ ॥

---

१. सौम्याः—गो. प्र. टी. । २. मदर्चनम्—श्रीधर. वंशी. जीव. विश्व. ; मदर्चने—वीर. विज. । ३. भर्जिता—श्रीधर. वंशी. वीर. विज. ; भर्जिताः—विश्व. । ४. धानाः—विश्व. । ५. नेष्यते—वीर. विज. चित्सुख ; नेशते—श्रीधर. वंशी. विश्व. । ६. यात बाला—वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भवतीनाम् युष्माकम् । मदर्चनं पतिरूपेण पूजनम् । अनुमोदितः अनुज्ञातः । यतोऽनुमोदितोऽतो हेतोः । "संभावनाकल्पनायामनात्यंतिकसंभवे" इति निरुक्तिकारः । आत्यंतिकः सार्वकालिकः ॥ २५ ॥ तत् अनात्यंतिकम् । इत्यत इत्यत्र । विषयमहिम्ना आत्यंतिकविषयसंगेन । इति भाव इति । "विरज्येत तथा चित्तं कामनामतिसेवया" इत्युक्तेः । अपरोहः अनाविर्भावः । तथा दर्शनात् प्ररोहदर्शनात् । प्राय इति यथार्थे "प्रायश्चानशने मृत्यौ प्रायो बाहुल्यतुल्ययोः" इति । "धाना भृष्टयवे प्रोक्ता धान्याकेऽभिनवांकुरे" इति विश्वः । गवाः खलु पंकिलभुव्युप्ताः प्ररोहंति त एव सूर्यकांतरत्नभुव्युप्तास्तापेन भर्जिता भवंति ततो वृष्टयंबुसिक्ताः क्वथिता रंधिताः, बीजायांकुरोद्गमायेति विश्वनाथः । तोषिण्यां तु--धानाः स्वत एव भृष्टाः पुनः स्वादविशेषाय धृतादिना भर्जिता गुडादिना क्वथिता निष्पक्वाश्च बीजाय फलांतरोत्पादनाय न संपादनीया भवंति किं तु स्वयमवास्वाद्या भवंति, तथा भवतीनामपि कामनांतररहीतभावविशेषसंस्कृतमत्प्रेमसेवाकामोपीत्यर्थः । एतादृशी मम कापि माधुरीति भावः । तथा च ताभिरेवानुभूय वक्ष्यते च–'सुरतवर्द्धनं शोकनाशनम्' इति । 'वांछति यद्भवभियो मुनयो वयं च' इति न्यायेन परमशांतानां तेषां वांछादिषयस्यास्य कथं शांत्यंतरापेक्षा स्यात् । तस्मात्सत्यो भवितुमर्हतीत्येवेति निगमितम् । एषा स्वगुणविख्यापनमयी मोहिनी नागरचर्य्यापि भगवत्संबंधित्वेन पारमार्थिक्येव गम्या । कश्चिद्भर्जितेत्यादय एकवचनांता नेष्यते इति, स च पाठश्चित्सुखसंमतस्स्पष्टार्थश्च ॥ २६ ॥ तत् पूर्णमनोरथत्वम् । आगामिनीः शरत्संबंधिनीः । तदानीं हेमंतत्वासंवत्सरपूर्तेः प्रागित्यर्थः । "भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः" इति वक्ष्यमाणत्वात् । यत् मत्संगमम् । उद्दिश्य संकल्प्य 'भूयान्नंदसुतः पतिः' इत्युक्तेः । आर्यार्चनम् व्रतमिति योज्यम् । यातेति युष्मदभीष्टमंगीकृतमिति भावः । तच्च मयैव संपाद्यमित्याह—अबला इति । कुत्र यामेत्यत्राह—व्रजमिति । एवं चेत्कथमबलासु कारुण्यं, तत्स्फुटमेव संपादयति – सिद्धा इति । यथासंकल्पं मयांगीकृता एवेत्यर्थः । एवमंगीकारमयं विवाहमेव संपाद्य तदंगभूतं फलविशेषमपि संपादयति—मयेति । इमाः सन्निहिता एव तादृशप्राप्तावशक्यत्वप्रत्यायनार्थं साधनसाधुवादेनैवोपसंहरति–यन्मे तत्पत्नीत्वं चेरुर्भवत्य इति शेषः । सतीः हे सत्यः । अत एव ता अप्याग्रहेण पत्यंतरं नांगीकृतवत्य एवेति । तथापि रहोव्यूढत्वेनान्यव्यूढावद्गूढमेवात्रमंतेति च बुध्यते । एतदन्या एव हि परकीयायमाना इति, तदेवमुक्तं युवतीर्गोपकन्याश्चेति । ननु 'नग्नां नेक्षेत्परस्त्रियम्' इति स्मृतेर्भगवताप्यन्याय्यं कुतः कृतमितिचेत्–शृणु, न हि ताः परस्त्रियस्ताभिर्भगवते समर्पितदेहत्वात्पूर्वावतारेषु तथैव भगवानपि प्रतिज्ञातत्वाच्च । ताः कात्यायन्यर्चिकाः । तद्विवर्जिताः भक्तिविवर्जिताः । ये यज्वानः विधिना यज्ञकर्त्तारः 'यज्वा तु विधिनेष्टवान्' इत्यमरः । तेषाम् विप्राणाम् । कर्मसु महामदः–नास्मत्सदृशाः कर्मठा लोके संतीत्येवंरूपस्तम् (१) ॥ २७ ॥ इत्यादिष्टाः पूर्वोक्तरीत्याज्ञप्ताः । तत्पदांभोजम् कृष्णचरणारविंदम् । इति–व्रजं यातेत्यादिष्टाः । लब्धः कामो निजवांछितं याभिस्ताः, अत एव देवीं तद्व्रतोद्यापनादिकमपि परमानंदाद्विस्मृत्येति भावः । लब्धकामत्वेऽपि कृच्छ्राद्दुःखेनेव व्रजमाविशन्, कुतः—तत्पदांभोजं ध्यायंत्य एव न तु साक्षात्पश्यंत्यस्तद्विच्छेदादित्यर्थः । पदांभोजमिति विशेषनिर्देशः पतिभावेन गौरवात् तदानीं लज्जया नम्रीभूय स्थितानां तन्मात्रदर्शनेन तदनुस्मृतेरेव प्रकृतत्वाद्वा । निःशब्दः पुनर्व्रतार्थं व्रजाद्यमुनागमनाभिप्रायेणेति तोषिणी ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र तदभीष्टप्राप्तिं तथाप्यन्यवैलक्षण्यं च प्रतिपादयति, हे साध्व्यः ! परमप्रेमव्यवसायगुणरूपवत्यस्तेन च मदेकापेक्षिता इत्यर्थः यद्वा, साध्व्यो मदेकापेक्षिका भवतोनां मदर्चनं मद्विषयकपतिभावमयप्रेमसेवात्मकसङ्कल्पो मया विदितः ज्ञातस्सर्वार्थः सचानुमोदितः भद्रं कृतमिति स्वाभिलाषसिद्धया समास्वादितः अतो भवतीनां कामनान्तराभावात् मयानुमोदितत्वाच्च सचासौ सत्यः सदाप्यव्यभिचार्य्येव भवितुं युज्यत एव किन्तत्र ममान्यस्य वा वरादिप्रयासेनेत्यर्थः । सम्भावनं योग्यताध्यवसानम् अर्हत्वं योग्यत्वमिति काशिकायां सम्भावनेऽलमितीति अर्हे कृत्येति सूत्रयोर्भेदोविविक्तोऽस्ति अध्यवसानमारोपणं रूपकालङ्कारादौ प्रसिद्धमेवेति सम्भावनार्थत्वे च कल्पिते महतां सम्भावितं सत्यमेवेति तथा व्याख्यातम् ॥ २५ ॥ युक्तत्वमेवाह—न मयीति । मय्यावेशितधियां मनसापि तथा मां सेवमानानां तन्मात्राणां कामो राज्यस्वाराज्यादिविषयः कामाय कामत्वाय न कल्पते किन्तु निष्काममद्भक्तय एव कल्पते पर्यवस्यति "सत्यं दिशत्यर्थितमर्थितो नृणाम्" इत्यादौ श्रीकर्दमादौ च श्रीविष्णूपासनावत् किं पुनर्मत्प्रेमसेवैकपुरुषार्थानां भवतीनामित्यर्थः । कामत्वाकल्पने दृष्टान्तः भर्जिता इति प्रायो वितर्के धानाः भ्रष्टयवाः "धाना भ्रष्टयवे प्रोक्ता धन्याकेऽभिनवाङ्कुरे" इति विश्वः । ताः स्वरूपत एव भर्जिताः पुनः क्वथिता रन्धिताश्चेत्यतिशयविवक्षया बीजाय बीजत्वाय नेशते न कल्पते अथवा मय्यावेशितधियां मदेकपुरुषार्थमात्राणामित्यर्थः । तेषां यः कामः मत्प्रेमसेवैकविषयः स कामाय कामानान्तराय न कल्पते किन्तु स्वयमेवास्वाद्यो भवतीत्यर्थः ! किं पुनर्भवतीनामिति भावः । तत्र योग्यो दृष्टान्तः धानाः स्वत एव भ्रष्टाः पुनः स्वादविशेषाय घृतादिना भर्जिता गुडादिना क्वथिता निष्पक्वाश्च बीजाय नेशते फलान्तरोत्पादनाय न सम्पादनीया भवन्ति किन्तु स्वयमेवास्वाद्या भवन्ति तथा भवतीनामपि कामनान्तररहितभावविशेषसंस्कृतमत्प्रेमसेवाकामोपीत्यर्थः । एतादृशी मम कापि माधुरीति भावः तथा च ताभिरेवानुभूय वक्ष्यते—

"सुरतवर्द्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् । इतररागविस्मारणं नृणां वितर वीर ! नस्तेऽधरामृतम्" ॥ इति

एवमासां भावस्य परमपुरुषार्थशिरोमणित्वं श्रीभागवतामृते विवृतमस्ति श्रीभागवतसन्दर्भे च किञ्च "वाञ्छन्ति यद्भवभियो मुनयो वयं च" इति न्यायेन परमशान्तानां तेषां वाञ्छाविषयस्यास्य कथं शान्त्यन्तरापेक्षा स्यात् तस्मात् सत्यो भवितुमर्हत्येवेति निर्गमितम् एषा स्वगुणविख्यापनमयी मोहनीनागरचर्यापि भवत्सम्बन्धित्वेन पारमार्थिक्येव गम्या क्वचित् भजितेत्यादय एकवचनान्ता नेष्यत इति च स च चित्सुखसम्मतः स्पष्टार्थश्च ।। २६ ।। अभीष्टं सम्पादयति–यातेति । युष्मदभीष्टमङ्गीकृतमिति भावः । तच्च मयैव सम्पाद्यमित्यभिप्रायेणाह, हे अबला ! इति पूर्ववत् तर्हि कुत्र यामेत्यपेक्षायामाह–व्रजमिति । एवं चेत्तर्हि कथमबलास्वस्मासु कारुण्यम् इत्याशङ्क्य स्फुटमेव तत्सम्पादयति सिद्धा इति यथा सङ्कल्पं मयाङ्गीकृता एवेत्यर्थः । एवमङ्गीकारमयं विवाहमेव सम्पाद्य तदङ्गभूतं फलविशेषमपि सम्पादयति मयेति इमाः सन्निहिता एव तादृशप्राप्त्यावश्यकप्रत्यापनार्थं साधनसाधुवादेनैवोपसंहरति, यन्मत्पत्नीत्वं चेरुर्भवत्य इति शेषः ! सतीः हे सत्यः ! अत एव ता अप्याग्रहेण पत्यन्तरं नाङ्गीकृतवत्य एवेति तथापि रहोव्युढात्वेनान्यव्युढावद्गूढमेवा ऽवमन्तेति च बुध्यते एतदन्या एव हि परकीयायमाणां इति तदेवमुक्तं युवतिर्गोपकन्याश्चेति ।। २७ ।। इति व्रजं गातेत्यादिष्टाः लब्धः कामो निजवाञ्छितं याभिस्ताः अत एव देवीं तद्व्रतोद्यापनादिकमपि परमानन्दाद्विस्मृतवत्य इति भावः । लब्धकामत्वेपि कृच्छ्रात् दुःखेनैव व्रजं प्राविशन्, कुतः ? तस्य पादाम्भोजं ध्यायन्त्य एव न तु साक्षात् पश्यन्त्यः तद्विच्छेदादित्यर्थः पदाम्भोजमिति विशेषनिर्देशः पतिभावेन गौरवात् तदानींलज्जया नम्रीभूय स्थितानां तन्मात्रदर्शनेन तदनुस्मृतेरेव प्रकृतत्वाद्वा निःशब्दः पुनर्न्तार्थं व्रजात् यमुनागमनाभावाभिप्रायेण ।। २८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे साध्व्य इति परमोत्तमसंकल्पात्, श्लेषेण सर्व्वथा रूपगुणादिना साधुत्वेन यूयं मदपेक्ष्या एवेति भावः । संकल्पमेवाह–ममार्च्चनं पत्नीत्वेन भक्त्या सेवनम्, तद्रूपः सत्यः सुसिद्धफलः, अन्यत्तैर्व्यञ्जितम् ।। २५ ।। नेति च व्याख्यातं तत्र, वक्ष्यमाणानुसारेण वाक्यशेषोऽयं ज्ञेयः । यद्यप्येवं तथापि भवतीनामसौ सत्यो भविष्यति, तदतीतफलञ्च भाव्येव, व्रतविशेषात् ।। २६ ।। अतएवाह–यातेति । क्षपा व्याप्य रंस्यथ रासक्रीडादिना क्रीडिष्यथ, सुखविशेषं वा प्राप्स्यथ इति स्वप्रयोजनं तथा (भा०१०।४७।६०) 'नायं श्रियोऽङ्ग' इत्युद्धववचनप्रामाण्यतो लक्ष्मीतोऽपि प्रसादविशेषलब्ध्या तदधिकमपि दर्शितम् । तत्र च इमाः क्षपा इत्यनेनाचिरात्तत्सिद्धिश्च सूचितेति, अथवा अर्हतीति मयासौ किं साधयितव्यः, तस्यैव तत्राखण्डपरमानन्दप्राप्तौ स्वतएव योग्यतेति परमसद्गुणनिर्धेविनयोक्तिः । ननु कामसुखस्य कथमेवम्भूतत्वं तस्यामैकान्तिकत्वादित्याशंक्याह—नेति । मय्यावेशितधियामिति अन्यविषयकः कामस्तथा तस्मिन्नेव रसान्तरकामश्च निरस्तः, कामाय ग्राम्यकामसुखाय न योग्यो भवति, तस्य परमप्रेमसुखात्मकत्वेन सर्व्वपुरुषार्थशिरोमणित्वात्, यद्वा, काम्यत इति कामाय सम्भोगाय न कल्पते किम् ? काक्वा, कल्पत एवेत्यर्थः । तत्र हेतुः—मय्यावेशितधियामित्येव मदावेशितधीत्वेन तस्य कामस्यापि परमप्रेमपरिपाकविलासरूपत्वात्, तच्च श्रीभागवतामृते बहुधा विवृतमस्त्येव । यद्वा, प्राकृतः कामोऽपि तावत् कामाय न कल्पते, मद्विषयकत्वेन तस्यापि नैर्गुण्यसारत्वात्, किमुत भवादृशीनां प्रेमेति प्रकारमहिम्ना । तथासम्पत्तौ दृष्टान्तः—प्रायो भर्जिजताः सूर्य्यतापेन दग्धवच्छुष्कतां नीताः, पश्चात् क्वथिताश्च जलेन रन्धितवत् क्लेदितां, बीजाय अंकुरोद्गमाय नेशते किम् ? अपि तु समर्था भवन्त्येव । यद्वा, किं वक्तव्यम्, कामितफलमात्रं भवतीति मत्कामोऽधिकफलमपि ददातीत्याह—कामाय कामितफलमात्राय न कल्पते, किन्तु तदतिरिक्तफलयापि कल्पत इत्यर्थः, वाञ्छातीतफलप्रदत्वात्; अतः प्रतित्वादप्यधिकेनौपपत्यसुखेन मां प्राप्स्यथेति भावः । यतः प्रायो बाहुल्येन भर्जिजता दग्धाः क्वचिता रन्धिताश्चैव बीजाय नेशते, किन्तु सूर्य्यातपेन शुष्कीकृताः पश्चाद्वपनसमये जलेनार्द्रीकृता अंकुरोद्गमायाधिकं समर्था भवन्त्येवेत्यर्थः; यद्वा, कामाय विविधफलभोगायापि मय्यावेशितधियां कामो न कल्पते, कामिताकामिताखिलप्रदानाय समर्थो न भवति किम् ? –काक्वा, भवत्येवेत्यर्थः । किंवा योग्यो न भवति किम् ? अपि तु योग्यो भवत्येव, यथाकथञ्चिदपि मद्भजनेन मत्तो वाञ्छिततदतीतफलसिद्धेः । अतएवाग्रे वक्ष्यते (भा० १०।२९।१९) 'कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च । नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ।।' इति सप्तमस्कन्धे; तस्मात् चोक्तं (भा० ७।१।३१) 'येन केनाप्युपायेन मनः कृष्णे निवेशयेत्' इति । यच्च श्रीभगवता श्रीरुक्मिणीदेवीं प्रति वक्ष्यते (भा० १०।६०।५२)—'ये मां भजन्ति दाम्पत्ये तपसा व्रतचर्य्यया । कामात्मनोऽपवर्गेशं मायया मोहिता हि मे ।।' इति; अस्यार्थः – दाम्पत्ये दम्पत्युपभोग्यसुखार्थम्, स्त्री तु पत्युपभोगसुखार्थं पुरुषश्च जायोपभोगसुखार्थमिति कामात्मानोऽपवर्गेशम्, पञ्चमस्कन्धोक्तानुसारेण अपवर्गः प्रेमभक्तिस्तस्य दातारमपि मां ये भजन्ति, ते मम मायया मोहिता एव, यच्च क्वचित् सकामनिन्दनं तत् कृष्णविषयकव्यतिरिक्तस्य कामस्यान्तरायरूपत्वेन मुख्यफलासिद्ध्या भक्तिरसिकैः क्रियत इति इदमपि तत्रैव विवृतमस्ति, युष्माकन्तु मत्पतित्वकामः सर्व्वथाकल्पत एवेति भावः । अथवा, यः कोऽपि कामः कामान्तरभोगाय न कल्पते, किन्तु स्वयमेव मत्प्रेमरूपेण परिणमन् परमानन्दाय कल्पत इत्यर्थः । तथा च तां प्रत्येवायं वक्ष्यति (भा० १०।७।५०)—यान् यान् कामयसे कामान् मय्यकामाय कामिनि ! सन्ति ह्येकान्तभक्तायास्तव कल्याणि नित्यदा ।।' इति । अस्यार्थः—न विद्यते कामः फलान्तरवाञ्छा यस्मिन् सोऽकामः प्रेमा तस्मै, तव ते, कामाः सन्त्येव, तं विस्तारयिष्यन्तीति; यतः भर्जिजता दग्धाः पुनः

क्वथिताश्च रन्धिताः किंवा भर्जिताः क्वथिता वा बीजाय फलान्तरोत्पादनाय नेशते, किन्तु स्वयं भोग्यतापत्त्या सद्य एव परमसुखाय समर्था भवन्तीत्यर्थः। इति पतित्वेन प्रेमविशेषासिद्धेरुपपतित्वेनैव तत्संसिद्धेस्तथैव मां प्राप्स्यथेति भावः। तदेवाह—यातेति। हे अबला! इत्यतिबाल्यं सूचयति, अतोधुना रत्ययोग्या इति भावः। यद्वा, पूर्व्वोक्तन्यायेन सर्व्वतोऽधिकशक्तिमता इत्यर्थः। प्रकारविशेषेण मद्वशीकरणविशेषात्, यतः सिद्धाः सम्पन्नकामिततदतीतफला इत्यर्थः। इमाः निकट एवैव्यच्छरत्कालीना इति तासां विदुरवर्त्तित्वेऽपि इमा इति सन्निहिततयोक्तिः सान्त्वनार्था; अन्यत् समानम्। इमा हेमन्तस्योत्तरमासविवर्द्धिनीरागामिनीः क्षपा मया सह रमणं प्राप्स्यथ। ननु, अस्मत्संकल्पितं त्वयोद्वहनसुखं सिध्यतु, तेन रासक्रीडादिसुखञ्च घटताम्, तत्राह—यदिति। यदुद्दिश्य आर्य्याया अर्च्चनं व्रतं चेरुर्भवत्यः, तदिदं मयोक्तमौपपत्येन रासक्रीडादिसुखमेवेत्यर्थः। विवाहेन पतित्वे रासक्रीडादिसुखविशेषो न सम्पद्येतेति भावः। सतीः हे सत्य इति औपपत्येऽपि यूयं सर्व्वथा साध्व्य एवेति भावः,—तत्त्वतोऽनौपपत्यात्, विवाहिताभ्योऽप्यधिकप्रियत्वात् यद्वा, सतीरिति क्षपाविशेषणं उत्तमाः, रासानन्दाविर्भाविकाः, शारदाः शीतोष्णत्वादिरहिता ज्योत्स्नीश्चेत्यर्थः। यद्वा, तत्क्रीडामाहात्म्यमेवाह—यद्यस्मात् सत्यो लक्ष्मीधरण्यादय इदं रासक्रीडासुखमुद्दिश्यैव आर्य्यार्च्चनमार्य्यायाश्चिच्छक्तेरर्च्चनं व्रतं चेरुरेव, न तु तत्सुखं प्रापुरित्यर्थः। यद्वा, मद्रमणमिति इदं व्रतम्। अन्यत् समानम्॥ २७॥ इति व्रजं यातेत्यादिष्टाः, भगवतेति रासक्रीडासम्पत्यादेशेन भगवत्तासारसर्व्वस्वाभिव्यक्तेः। लब्धः कामो निजवाञ्छितं याभिस्ताः, प्रायस्तासां तादृशादेव भावात्। तत्र च सत्यप्रतिज्ञस्य तथादेशप्राप्तेः, तथापि कृच्छ्रात् दुःखेनैव व्रजं प्राविशन्। कुतः? तस्य पादाम्भोजं ध्यायन्त एव, न तु साक्षात् पश्यन्त्यः, तद्विच्छेदादित्यर्थः। निःशब्दात् पुनर्व्रतार्थं व्रजाद्यमुनागमनाभावाद्यभिप्रायेण यद्यप्यर्च्चितायाः श्रीकात्यायन्याः साक्षादभूतायाः सत्या वरणैव निजकामितसिद्धितां मन्तुमर्हन्ति, न तु तस्य विचित्रप्रभावानुभवेन तत्र तासां प्रतीतिर्जाता। अतएवोक्तं भगवतेति, तथापि तस्याः समाराधनं तस्मादपि तत्प्रियजनस्याराधनोत्कर्षादिवेति दिक्। यद्वा, अकारप्रश्लेषेण न लब्धः कामः सद्य एव तेन सह क्रीडाविशेषो याभिः, अतएव कृच्छ्रात्। अलब्धकामत्वे हेतुः—कुमारिका अत्यन्तबाल्येन तदानीं तत्क्रीडायामयोग्या इत्यर्थः। श्रीभगवत्कृतानुग्रहप्रभावेन व्रजस्त्रीस्वभावेन बाल्यकालेनैव तद्योग्या भविष्यन्त्येवेति दिक्। ननु तर्हि कथं निर्व्विविशुः? तत्राह—ध्यायन्त इति सर्व्वतापोपशमनपरमानन्दरसस्रावितच्छ्रीचरणद्वयध्यानेनैव हृत्तापोपशान्तेरित्यर्थः। यद्वा, तत्पदाम्भोजं तत्कार्य्यक्रीडादिकं प्राप्यं चिन्तयन्त्यः॥ २८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

धाना व्रीह्यादयः॥ २६॥ आर्या दुर्गा॥ २७—२८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह—अबला इत्यादिना। हे अबलाः हे साध्व्यः मदर्चनं मयासह क्रीडात्मके अर्चने निमित्ते यो भवतीनां सङ्कल्पः स मया विज्ञातः मोदितोऽश्यनुज्ञातश्चेत्यर्थः सोऽसौ सङ्कल्पः सत्य एव भवितुमर्हति॥ २५॥ केनापि व्याजमात्रेणानुजिघृक्षैकशीलत्वान्महोदारत्वच्च देहान्ते तासां मुक्तिमपि सङ्कल्पयति मय्यावेशिता धियोभिस्तासां भवतीनां कामः मद्विषयकोऽभिलाषः कामाय केवलं विषयभोगायैव न कल्पते न भवति किन्तु मुक्तयेऽपीत्यर्थतोत्र विवक्षितं विषयवैलक्षण्यमहिम्ना मद्विषयककामस्यापि संसृतिबीजभर्जनद्वारा मुक्तिहेतुत्वादिति भावः। यद्वा, मय्यावेशिताया धियो विषयवैलक्षण्यादविप्लुतत्वेन यावद्देहपातानुवर्तित्वात्तदा संसृतिबीजभर्जनद्वारा मुक्तिहेतुत्वान्मद्विषयकः कामः केवलं न कामायैव कल्पते इति भावः। निर्वीर्यं संसृतिबीजं न पुनः संसृतये भवतीत्यत्र दृष्टान्तमाह प्रायो भर्जिताः भ्राष्ट्रे निक्षिप्ता क्वथिताः निष्पक्वाश्च धाना बीजाय नेष्यते अङ्कुरोद्गमाय नेष्यते नेष्यन्ते वचनव्यत्यय आर्षः प्राय इत्यस्य भर्जिताः क्वाथिता इत्याभ्यामन्वयः॥ २६॥ यत एवमतो हे बालाः! यूयं सिद्धाः पूर्णमनोरथाः व्रजं यात गच्छत सिद्धत्वमेवाह—मया सहेमा आगामिनीः रात्रीः शारदीः रंस्यथ देवताराधनं न मुधा भवितुमर्हतीत्यभिप्रायेणाह यदिति। सतीः हे सत्यः! यन्मया सह क्रीडनात्मकं प्रयोजनमुद्दिश्य भवत्य इदमार्यायाः कात्यायन्या व्रतं चेरुश्चक्रुः॥ २७॥ इत्थं भगवता कृष्णेनादिष्टाः कुमारिकाः! लब्धप्रायाः कामाइष्टार्थाः याभिस्तथाभूतास्तस्य भगवतः पदाम्भोजं ध्यायन्त्यस्तमेवानुचिन्तयन्त्य इत्यर्थः कृच्छ्रात्कथंचिद्व्रजं निर्विविशुः तद्विश्लेषासहिष्णुत्वादिति भावः॥ २८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यन्मदर्चनं तस्मिन् कृतः नन्दसुतः पतिर्भूयादिति सङ्कल्पं अनुमोदितः अनुज्ञातः॥ २५॥ मत्सम्भोगलालसानां भवतीनां विषयौत्सुक्यं पुनः संसारवर्तनाय स्यात् अतोऽस्मत्सङ्कल्पो निन्द्य इति शङ्कमाभूदित्याशयेनाह—नेति, कामाय विषयेच्छाप्ररोहाय तत्र दृष्टान्तमाह, भर्जितेति। धाना बीजं बीजाय अङ्कुरोत्पादनशक्तिमते॥ २६॥ आर्यार्चनं कात्यायनीपूजां सतीः सत्यः॥ २७–२९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तासां तादृशमाशयं ज्ञात्वा भगवान् वदति—सङ्कल्प इत्यादि। हे साध्व्यः! इति योग्यसम्बोधनम्। यतो यूयं नित्यप्रियाः इत्यान्तरीणानां भवतीनां मदर्चनं मदर्चनरूपः संकल्पो विदितो मया ज्ञातः। अथवा, भवतीनां सङ्कल्पो विदितः यदर्थं मदर्चनम्,

स च मयानुमोदितः स्वीकृतः । अतः सत्यो भवितुमर्हति, नित्य एवेत्यर्थः, सत्योकृतत्वात् । किं वा भवतीनां सङ्कल्पो विदितः मयानुनमोदितो भवितुमर्हति; यतः मदर्चनरूपत्वात् । मदर्चनं प्रतित्वेन मत्पूजा ।। २५ ।। नन्वङ्गसङ्गरूपः सङ्कल्पः कथं भवतु ? तत्राह–न मयीत्यादि । मय्यावेशितधियां मयि निवेशितचित्तानां कामः सङ्कल्पः कामाय सङ्कल्पाय न कल्पते सङ्कल्पो न भवतोत्यर्थः । सङ्कल्पस्य मनोधर्मत्वादनित्यत्वमेव । स च मयि चेद् भवति, तदास्य नित्यत्वमेवेत्यर्थः । तत्र दृष्टान्तः । भर्जिता भ्रष्टाः, क्वथिताः स्विन्ना वा धाना यवादयः प्रायो बीजाय बोजत्वाय न कल्पते पुनर्न प्ररोहन्तीत्यर्थः । तथा मय्यावेशितधियां सङ्कल्पो मयि भवन् मय्येव विश्रान्तो भवति, न ततः पुनः प्ररोहति, अतएव नित्या भवति, अनित्यस्य हि विकारापत्तिः । अथवा, कामः कामाय न कल्पते, पुनः सङ्कल्पाय न भवति, कामः कृत एव सफलो भवतीत्यर्थः । अथला, कामाय पुनर्न भवति मय्यावेशितधीत्वेन परिपूर्णभावादिच्छान्तरप्ररोहो न भवति, नित्यतृप्तत्वात् । तेषां हृदये सङ्कल्पान्तरं न भवतीत्यस्मिन्नर्थे दृष्टान्तः ।।२६।। तदत्र संदेहो न कार्यः, सफल एव वो मनोरथः । तदधुना व्रजतेत्याह–यातावला इत्यादि । हे सिद्धाः ! व्रजं यात । अद्य व्रतादिना सिद्धा इति न पूर्वमेव स्वतः सिद्धा एव यूयमित्यर्थः । तथा न चलन्तीर्वीक्ष्य स्पष्टमाह–हे अबलाः कुमार्यः ! इमा अद्यतनीं क्षपामारभ्य यावतीः क्षपा मया रंस्यथ, यत्मया सह रमणमुद्दिश्येदं व्रतमार्यार्चनरूपं चेरुर्भवत्य इत्यर्थः । हे सतीः हे सत्यः ! अथवा, तीरणं तीः समाप्तिः, तया सह वर्तमानं ससमाप्तमिति यावत्, इति व्रतविशेषणम् । पारतीरसमाप्ताविति तीरेः क्विप्, अतः परं दोक्षातो बभूव ।। २७-२८ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

सङ्कल्पो विदित इत्यादि । हे साध्व्यः खलु भवत्य एव, यतः पतित्वेनाहं वृतः, अन्यपतित्वं हि व्यभिचारित्वम्, स्त्रीणां मदर्चनमङ्गमङ्गेन पूजनम् । स सङ्कल्पो मयानुमोदितः स्वीकृतः । कुतः ? सत्यः सत्ये मयि कृतत्वात् सत्यमेव मयानुमोदनार्हं भवति, यतः सत्य एव भवितुमर्हति । आरम्भ एव फलवान् भवितुमर्हति ।। २५ ।। कुतः ? तत्राह —मय्यावेशित-धियामित्यादि । कामः सङ्कल्पः कामाय पुनः कामाय कल्पते,–सकृतककरणेनैव सिद्धत्वात् । सिद्धत्वं हि पुनः पुनः प्ररोहाभाववत्त्वम् । तत्र दृष्टान्तः– र्भजिता क्वथिता इति प्रायो बाहुल्येन बोजाय बोजत्वाय । मयि कृतो हि कामः पुनः प्ररोहाय न भवतीत्यर्थः ।। २६ ।। तदा कथं तत्कालमेव सङ्कल्पसिद्धिर्नाभूदिति ? तत्राह–याताबला इत्यादि । कुमार्यश्च द्वेधा–पूर्वसिद्धा व्रतसिद्धाश्च । पूर्वसिद्धा अपि कौतुकवशादपराभिः सह व्रतं चेरुः । हे अबला हे सिद्धा हेत्वुभय-सम्बोधनम् । व्रजं यात, सङ्कल्पसिद्धिं विना कथं यास्याम इति मानसं ज्ञात्वाह–मयेमा इत्यादि । इमा अद्यतनीं रात्रिमारभ्य यावती रात्रिरित्यर्थः । इदानीन्तु यौष्माकीणां वाससां सङ्गे एवाङ्गसङ्ग इति मन्तव्यम् ।। १७-२८ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हे साध्व्यः ! भवतीनां मदर्च्चनं मदीयसुखोत्पादकमद्विषयकाराधनमेव सङ्कल्पो मनोरथः स च लज्जया युष्माभिरकथितोऽपि मया विदितोऽनुमोदितश्च निष्कैतवत्वात् सत्यश्च अतएव भवितुमर्हत्येव भवतीनां मत्सुखतात्पर्यात् ममापि प्रेमवश्यत्वात् कात्र खल्वसम्भावनेति भावः । अत्र कृपाशक्तिरेव तास्वधिकसमुद्भवितं तत्प्रेमवशमपि तत्तल्लीलाविष्टमपि भगवन्तमैश्वर्य्यं स्फोरयित्वा तत्प्राप्त्यर्थककात्यायन्यर्चनकृच्छ्रं ज्ञापयामास तत्फलं च प्रदापयामास तास्तु नारायणसम इति गर्गोक्त्यैवायं स्वं नारायणं मन्यते स्मेति जानन्ति स्मेति ज्ञेयम् ।। २५ ।। यच्च क्वाचित्कं मदर्च्चनं सकैतवत्वादसत्यमयथार्थं तदपि मया स्वसाद्गुण्यात् सत्यमेव भवितुमर्हमेवं कर्त्तुं शक्यते किं पुनः परमशुद्धमहोत्तमप्रेममयो भवतीनां मदाराधनमनोरथ इत्याह—नेति । कामः सकामत्वलक्षणं कैतवं कामाय तत्फलाय अयथार्थाय कामभोगाय न कल्पते किन्तु विषयमहिम्ना कामशान्तय एव अत्र दृष्टान्तः भर्जिता इति अत्र धानाशब्देन यवा एवोच्यन्ते ते च यवाः खलु पङ्किले भूमावुप्ताः प्ररोहन्ति त एव सूर्यकान्तरत्नभूमावुप्तास्तापेन भर्जिताः भवन्ति ततो वृष्टिजलेन सिक्ताः क्वथिता रन्धिता बीजाय अङ्कुरोद्गमाय नेशते न समर्थाः स्युः प्राय इति यथेत्यर्थः । यथाह, विश्वप्रकाशः "प्रायश्चानशने मृत्यौ प्रायो बाहुल्यतुल्ययोः" इति "प्रायो वरणानशने मृत्यौ बाहुल्यतुल्ययोः" इति मेदिनी च, नेष्यत इति पाठश्चित्सुखसम्मतस्तत्रैकत्वमार्षम् ।। २६ ।। प्राथमिकस्य रमणस्य शुभः समयो रात्रिरेवेत्यभिप्रेत्याह—यातेति । सिद्धा एव यूयं माधुर्यपोषकेण नरलोलत्वेनैव साधकत्वाभिमान इति भावः । इमाः सन्निहिताः रंस्यथ रंस्यध्वे यद्रमणम् आर्या दुर्गा सतीः सत्यो भवत्यः ।। २७ ।। कृच्छ्रादिति तेन तासां मनोनेत्राद्याहरणात् ।। २८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु, एकस्मिन् पदार्थे कृतः सङ्कल्पस्तदितरपदार्थविषयकान् बहून् सङ्कल्पान् जनयति अतो जीवः स्वसङ्कल्पप्रवाहेन तत्पदार्थसंयोगलक्षणे संसारे परिभ्रमत्येव त्वयि कृतस्य सङ्कल्पस्यापि त्वदितरपदार्थविषयकसङ्कल्पोत्पादकत्वं प्राप्नोतीत्यत आह, नेति । मय्यावेशितधियां यः कामः मयि कृतः सङ्कल्पः स कामाय मदितरपदार्थविषयकसङ्कल्पाय न कल्पते मत्कामो जनः संसारं न प्राप्नोति मामेव प्राप्नोतीत्यर्थः । तस्येतरसङ्कल्पानुत्पादकत्वे दृष्टान्तः भर्जिता क्वथिता धाना बीजायाङ्कुरोद्गमाय नेष्यते

दृष्टान्ते कदाचिद्वैपरीत्यं भवतु न तु दार्ष्टान्ते इति प्रायोग्रहणाभिप्रायः ॥ २५ ॥ हे अबलाः ! यन्मया सह रमणमुद्दिश्य सङ्कल्पः सतीः सत्यः भवत्यः आर्यायाः कात्यायिन्याः अर्चनरूपं व्रतं चेरुश्चक्रुः तस्मादेवोद्देशान्निमित्तात् इमाः आगामिनीः शारदीः रात्रीः मया सह रंस्यथेत्थं सिद्धाः पूर्णमनोरथाः व्रजं यात गच्छत सतीरिति क्षपाविशेषणं वा भगवत्प्रयुक्तविभक्तेरन्यथात्वासम्भवात् ॥ २६ ॥ कृच्छ्रात् श्रीकृष्णविश्लेषजात् ॥ २७–२८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

हे साध्व्यः ! भवतीनां मदर्चनं मत्सुखार्थकात्मार्पणलक्षणं सङ्कल्पो मनोरथस्त्रपयानुक्तोऽपि मया विदितोऽनुमोदितश्च कैतवाभावात् सत्यश्चातो भवितुमर्हति भवतीनां मत्सुखतात्पर्यान्मम भवत्प्रेमाधीनत्वाच्च नात्र सन्देह-गन्ध इति भावः ॥ २५ ॥ भवदुक्तिरेवफलं ननु तस्याः फलमन्यदस्तीत्याह— नेति मय्यावेशिता मामेव पुरुषार्थं विज्ञाय प्रसज्जिताधीर्यैस्तेषां कामो मत्प्रेमसेवैकविषयः सकामाय फलान्तराभिलाषाय न कल्पते किन्तु स्वयमेवास्वाद्यो भवतीत्यर्थः । किं पुनर्भवतीनामिति भावः । तत्र दृष्टान्तः—भर्जिता इत्यादि "धाना भ्रष्टयवे प्रोक्ता धन्याकेऽभिनवाङ्कुरे" इति विश्वः । ताः स्वरूपत एव भ्रष्टः पुनर्घृतादिना भर्जिताः क्वथिताः सिताक्वाथेन निष्पक्वास्ताः प्रायो यथा बीजाय फलान्तरोत्पादनाय नेष्यते एकवचनमार्षं "प्रायो बाहुल्यतुल्ययोः" इति विश्वः ॥ २६ ॥ वाञ्छितं सम्पादयति—याता इति । हे अबला ! यूयं व्रजं यात यूयं सिद्धा एव व्रताचरणन्तु लोकरीत्या लीलारूपं सिद्धिमाह, इमाः सन्निहिताः क्षपा रात्रीर्मया सह रंस्यथ रंस्यध्वे यत् पत्नीभावेन रमणमुद्दिश्य हे सत्यः आसां गन्धर्वविधिना विवाहो भूदिति बोध्यम् ॥ २७ ॥ कृच्छ्रादिति—तेन तासां मनोनयनाद्याहरणादिति भावः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे साध्व्यो भवद्भिर्लज्जया न प्रकाशितोऽपि मया भवतीनां सङ्कल्पो विदितः । न हि प्राज्ञज्ञानमात्रं प्रयोजकमित्यत आह ॥ मयेति । अनुमोदितः सम्मतीकृत इति सः सत्यो भवितुमर्हति । किञ्चासौ मदर्चनं मत्पूजेति सत्यो भवितुमर्हति । गृहे गृहिणी वर्तेत चेन्न परप्रणयिनीपरिणयनं सम्भवति भवतस्तु वक्षस्येव लक्ष्मीरास्ते कथमस्मन्मनोरथः स्यात्कथयेत्यतोऽप्याह । मया रमया चानुमोदितोऽतः सत्यो भवितुमर्हतीति । तव तु तदेकसङ्गित्वात्कथमनुमतः सङ्कल्प इति भगवन्वञ्चनवचनमित्यतो वाऽऽह । मया युष्मत्सन्निहितया निमितेनानुमत इति ॥ २५ ॥ अयं कामो नासारसंसारप्रापक इति हेयो हे योषित इत्याह । नेति । मय्यावेशिता धीर्धिषणा यासां तास्तासां कामः कामाय पुनः संसारसाधकविषयेच्छोत्पत्त्यै न कल्पते । अत्र दृष्टान्तमाचष्टे ॥ भर्जितेति । भर्जिता भ्राष्ट्रे क्वथिता पक्वीकृता धान्यं धाना बीजाय पुनरङ्कुरजननाय प्रायो नेष्यते । दावदग्धवेत्रबीजानां कदलीकाण्डाङ्कुरजनकता दृष्टेत्यतः प्रायः सदृशाङ्कुरजननायेति । प्रायश्चानशने मृत्यौ तुल्यवाहुल्ययोरपीति विश्वः । यथा तथेत्यध्याहारः । धाना भ्रष्टयवे प्रोक्तेति सत्यभिधानेऽत्र धानाशब्दोऽव्यय इवेमा धाना इति श्रुतेः सामान्यधान्यमात्रपरोऽवसेयः । प्रायो बीजाय नाशिष्यत इति वा ॥ २६ ॥ सतीः सत्यो बाला यदुद्देश्यार्याया दाक्षायण्या व्रतं चरथ मया सहेमा बुद्धिसन्निहिताः सद्यस्तनीः क्षपा रात्री रंस्यथेति सिद्धा व्रजं यात गच्छत ॥ २७ ॥ भगवतेत्येवमादिष्टा आज्ञप्ता आदिष्टं दैवं यासां ताः । सुदैवा इत्यावर्तिता इत्यादिष्टपदार्थः । लब्धकामा लब्धमनोरथाः कुमारिकास्तत्पदाम्भोजं ध्यायन्त्यः कृच्छ्राद्विरहसहिष्णुतायातकष्टाद्व्रजं निर्विविशुः ॥ २८ ॥

श्रीसुबोधिनी

तासां हृदये स्वाभिप्रायो ज्ञापनीय इति यदासीत् तत्राह **सङ्कल्पो विदित** इति, **भवतीना**मभिप्रायो विदितः, अनेन न वक्तव्य इति ज्ञापितं, अन्यथा रसस्त्वपुष्टः स्यादत एव भगवानपि नोच्चारयति तत्रायुक्तः **सङ्कल्प** इतिशङ्कां वारयति **साध्व्य** इति, **साध्वी** सर्वदोषविवर्जिता पतिव्रतेति यावत्, अतोधिकारिणा कृतः **सङ्कल्पः** सफलो भवति; अनेनान्यस्मै देयाः केनाप्यंशेन विनियोगान्तरं च निवारितं, **भवतीनां** च सर्वासामेव ज्ञातस्वरूपाणां, यद्यपि कात्यायन्यर्चनेनायमर्थः सिद्धस्तथापि **मदर्चनाद्** द्वितीयवारमहमेवार्चितः, प्रबुद्धा हि देवताच्यंत इति तदेव ज्ञानं पर**मर्चनं** मत्स्पर्शि न भवतीत्यसत्यो भवति देवताज्ञाव्यतिरेकेण च कृतेति फलदोपि न भवति, तदिदानीं सन्तोषाद् द्वयं पूर्यते, **मयानुमोदित** इति, तत्र **मयानुमोदित** इति **सङ्कल्पोनु**पश्चा**न्मोदित** इति मोदं प्रापितः **स प्रसिद्धः** पूजायामभिव्यक्तो भावपूर्वकदृष्टिपूर्वकपुष्पादिपदार्थानां भाविते भगवति समर्पणरूपः स त्ववस्तुसमुदायरूपा इत्यसत्य एव स्वरूपतो ज्ञापकः परं जातः, तज्ज्ञापितमाहासाविति, इदानीमहं प्रत्यक्षोन्तःकामश्च दत्तो भावोद्गारिणी दृष्टिश्चेयं, निवेद्यं तु सर्वमेवातः पूर्वाकृतितुल्यमेतत् साम्प्रतं जायमानं सर्वमेवासावित्युच्यते, **स स्वरूपतः** सत्योपि फलतोपि **सत्यो भवितुमर्हति**, सत्यात् सत्यं फलमुचितमिति, अतो योग्यतादेब फलं भविष्यति न चिन्ता कर्तव्येतिभावः, अनेन कार्याधीनत्वाद् गोपिकाधीनमेव फलमिति वाचनिकोपि सन्देहो निवारितः ॥ २५½ ॥ ननु कालान्तरेन्यां सामग्रीं प्राप्येयं सामग्री विशकलिता पूर्वावस्थामेव प्राप्स्यति न त्वेवम्रूपा स्थास्यतीत्याशङ्क्य सामान्यन्यायेन परिहरति **न मयी**ति, अयं सामग्र्याः संस्कारो यथा संस्कृतो ब्राह्मणोसंस्कृतैरपि सहितो नासंस्कृतो भवति नापि पुनःसंस्कारो भवत्यतो भगवति समर्पिता सर्वा सामग्री भगवदीया जाता, कोटिसूर्याधिकज्ञानाग्निरूपो भगवांस्तत्र सर्वं बुद्ध्यधीनमिति बुद्धिश्चेत् समर्पिता तदा सर्वमेव समर्पितमिति

बुद्धिसमर्पणमेवाह **मय्यावेगितधियामिति**, न केवलं समर्पिता किन्त्वा**वेशिता** तदुपर्येव स्थापिता बुद्ध्यधीनः **काम** इच्छा हि ज्ञानाधीनेति "कामः सङ्कल्प" इत्यादिश्रुतौ "**सर्वं मन एवे**"तिनिरूपणं मनोधर्मत्वात् "मनसस्तु परा बुद्धि"रतो बुद्ध्यधीनं सर्वं, यथा राजनि निगृहीते **राज्यमेव** तदधीनं भवत्येवं **बुद्धौ निवेदितायां** सर्वमेव निवेदितमतः पूर्वावस्थायां यद् रूपं तत् तेषां न भवति, कामो हि पुरुषात्मकः "काममय एवायं पुरुष" इतिश्रुतेः, यदि **कामः कामाय न** क्लृप्तस्ततोग्रे तस्मात् सङ्घातान् न सङ्घातान्तरमुत्पत्स्यते किन्तु स एवान्तिमः सङ्घातो भवति धिया सह कामस्यापि दग्धत्वात्, काममयश्च सङ्घातः, तत्र दृष्टान्तेनावेशनमात्रेण तस्याकार्यत्वं साधयति **भर्जिता** इति, यवादयो हि **भर्जिता धाना** भवन्ति धानास्तु भ्रष्टयवा इति, धनं हि धनोत्पादकं तथा यवा यवोत्पादका न तु धानावस्थायां, अतः पूर्वावस्थां परित्यज्य ये सम्बन्धमात्रेण तदीया भवन्ति ते न तत्कार्यं कुर्वन्ति, केषाञ्चिद् बीजानां केवलाग्निना बीजशक्तिर्न **गच्छति** तेषां जलाग्निसंयोगेन **गच्छती**ति **क्वथिता** इत्युक्तं, उपलक्षणमेतद् यावता यस्य बीजशक्तिर्गच्छति ततस्तदनन्तरं तत् कार्यक्षमं न भवतीत्यतो **धाना** जाता **भूयो बीजाय नेशते** न समर्था भवन्ति, "अथ वान्नं धानासु लीयते धाना भूमौ प्रलीयन्त" इत्यत्र 'धाना' शब्देन बीजात् तण्डुलानीत्यत्रापि तथैवेति ज्ञेयं, तेन 'भर्जिता' इत्युक्तिः, अतो **मयि** समर्पितः **कामः** पुनः कामान्तरं न जनयिष्यति, सुतरां पूर्वावस्थां न प्राप्स्यति, तथा सति जनयेदेवा'धकं तत्रानुप्रविष्ट'मिति ॥ २६½ ॥ यत्र क्वापि तिष्ठन्तु न प्राकृतत्वं भविष्यत्यतो गच्छतेत्याह **याताबला** इति, पुनः स्वकीयत्वेन सम्बोधनं स्नेहं सूचयति सह पर्यटनं तु **बल**कार्यं यथा **भूमिर्ना**न्यत्र नीयते भौमा एव च नीयन्ते तथापि संस्कारार्थं कर्षणवत् क्रियया व्याप्रियत इति भवानेव वा स्थित्वा तथा करोत्वित्याशङ्क्याह **सिद्धा** इति, न भवतीषु किञ्चित् साध्यमस्ति किन्तु **सिद्धा** एव भवत्यः, अतो **व्रजं यात** गच्छत, अलौकिकीं च दृष्टिं दत्वाह **मयेमा रंस्यथ क्षपा** इति, **इमाः** परिदृश्यमाना **क्षपा** मय्येव विद्यमानाः **क्षपा** रात्रि**र्मया सह रंस्यथ** रमणं करिष्यथ, अत्यन्तसंयोगे द्वितीया, रमणसहितास्ताः प्रदर्शिता इति न सन्देहः, नन्वेतदेव कथं फलं नित्यसम्बन्धोन्यो वाहोरात्रसम्बन्धः कथं नोच्यते इत्याशङ्क्याह **यदुद्दिश्ये**ति, रमणमेवोद्दिश्ये**दं व्रतं चेरुरार्या**याः कात्यायन्या अर्चनलक्षणं, स्वार्चनस्य तु सत्यत्वे विनियोगो रमणं तु तद्व्रतफलं तत्र तु मास एव नियामको रात्र्यन्ते च पूजनमतो रात्रावेव परिमितकाले रमणं न दिवसे नाप्यपरिमितकाले, किञ्च **सती**र्हि सतीरूपाः, पूर्वसवर्णोत्र, सतीनां न दिवसे रमण नापि सर्वदा यथेष्टमिति, अतो विवाहितान्यायेन रमणं भविष्यतीतिभावः, प्रथमवाक्यसमागमने तु भगवदाज्ञाकरणादक्षयमेव फलं भवेत् कर्मफलं तु क्षयिष्णु ॥ २७½ ॥ ततो भगवताज्ञता आज्ञोल्लङ्घनभीता व्रजं गता इत्याह **इत्यादिष्टा** इति, यद्यपि कामो महांस्तथापि भगवदिच्छया बाध्यते मनोरथश्च प्राप्तः परं साक्षाद्विवाहाभावात् **कुमारिका** एव, तासां रसान्तरव्यावृत्त्यर्थं भक्तिमाह **ध्यायन्त्यस्तत्पदाम्भोज**मिति, हृदि भगवच्चरणं कमलं **ध्यायन्त्यः**, **कृच्छ्रा**दिति कष्टं प्राप्य मध्ये गन्तुमशक्ताः कथञ्चिद् व्रजं निर्विविशुर्गृहगमनाज्ञया तादृशस्तापो वृत्तो येन जीवनमपि तत्कालीनं न सम्पद्येत यदि **पदाम्भोजध्यानं** न स्यात् तस्मिन् सति तद्विषयस्याम्भोजत्वेन तापहरणाज् जीवनसम्पत्तिरभूत् तथापि **कृच्छ्रा**दित्युक्तेस्तद्ध्यानं तापकार्यप्रतिबन्ध एवोपक्षीणं न तु तद्धरणेपीति ज्ञाप्यते, एवं साधिकैस्तत्त्वैस्तासामर्धभक्तिनिरूपिता तत्त्वातिक्रमश्च ॥ २८½ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सङ्कल्पो विदित इत्यत्र, भवतीनामित्यस्य विवृतिः **सर्वासामेवाज्ञातस्वरूपाणामिति** स्वरूपतो धर्मतश्चेति द्वेधा वेदनं सम्भवति, इह तु भवतीनां सङ्कल्प इति पदन्यासेन सङ्कल्पस्यैव वेदनम्, न तु स्वरूपस्यापीति ज्ञाप्यते । स्वरूपस्य रसात्मकत्वेनानुभवैकवेद्यत्वादग्रे वेदनं भावि । संप्रति तु सङ्कल्प एव विदित इति रसोक्तिः । 'लोकवत्तु लीलाकैवल्य'मिति न्यायाद्रसमर्यादयैव भगवानेतत्स्वरूपानुभवं करिष्यतीत्याशयेनेवमुक्तम् ॥ २५ ॥ **मयानुमोदित** इत्यत्र, **अनेन कार्याधीनत्वादित्यादि** । असाविति पदेनोक्तोऽर्थः कार्यपदेनोच्यते । फलं च भगवद्रमणम् । तच्चैतन्निवेदितदेहेन्द्रियादिभोगरूपमेव । तच्चोक्तकार्यमध्यपाति । कार्यं चैतत्कर्तृकत्वेनैतदधीनमिति तथा । असाविति पदोक्तपूजाया भगवति विविधरसभावजनकत्वेन तत्पूर्वकस्मितविलासेक्षणादिभिरेतद्भावः पूर्यते, नान्यथेति परस्परं भोग एवाद्भुतः सम्पद्यते । इदं चोक्तपूजामध्यपाति, पूज्यकर्तृकनिवेदितभोगस्य पूजामध्यपातित्वात् । एतस्या एव रसमर्यादाक्रमेण पुष्टाया अग्रिमफलसाधत्वमिति सुष्ठूक्तं **गोपिकाधीनमेव फल**मिति । अत एवाधुना न रमणम् । तेन कृष्णचेतस्त्वेन मानसनिश्चये सत्यपि 'यदि मे दास्य' इति वचनेन 'यूयं विवस्त्रा' इत्यादिवचनेन च जनितो या फले संशयः सोपि निवारित इत्यर्थः ॥ २६ ॥ अत्रैव **याताबला** इत्यस्य विवरणे, **यथा भूमिरित्यादि** । अस्य कामस्य कामान्तरानुत्पादकत्वेन दृष्टान्तीकृता धाना इति तद्व्यञ्जितोऽर्थोऽत्रोच्यते । ते हि पूर्वावस्थायां भूमावुप्ता अङ्कुरोत्पादकाः । तत्र न हि विजातीयाङ्कुरानुत्पत्त्यर्थं रक्षार्थं भूरन्यत्र नीयते, किन्तु तदुत्पादका भौमा दोषा एव निरस्यन्ते । प्रकृते तु भगवानस्मानतः परं यत्र कुत्रापि स्वसङ्ग एव नयत्विति स्वामिनीनां हृदयम् । तच्चाधुना रसपोषाय लौकिकविरोधाद्रसाभाससम्भवाच्च न कर्तव्यमत इयमाज्ञेति । यद्वा । भौमा एवं भूसम्बन्धिनो हलादय एव परं भूसमीपं नीयन्त इत्यर्थः । तेन यथासम्भवं भवतीरुद्दिश्य सन्ध्यादिष्वहमेव व्रजमागमिष्य इति भावः ॥ २७ ॥ **मयेमा रंस्यथे**त्यत्र, **रमणसहितास्ता** इति । आसां क्षपाणामेतन्मात्रभोगार्थमेवावि-

भावादेतज्ज्ञापको धर्मविशेषः क्षपासु वर्तत इति तद्दर्शनेन स्वरमणनिश्चयोऽभूदित्याशयेनेदमुक्तमिति ज्ञेयम् । अत्रैवोपसंहारे **तासामर्धभक्तिरिति** । अङ्गसङ्गाभावादर्धत्वम् ॥ २८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

सङ्कल्प इत्यत्र **तदैव ज्ञान**मिति प्रबुद्धाया एवार्चने देवतायाः पूजकसङ्कल्पज्ञानं भवतीत्यर्थः, **परमर्चन**मिति अर्चनस्य भावनासिद्धत्वात् साक्षात्स्पर्शाभावेन स सङ्कल्पोऽसत्यः स्वरूपतो भवेद् देवताज्ञां विनापि कृतेर्चने सति स सङ्कल्पोतिफलदोपि **न भवति** फलतोप्यसत्यो भवेत्, **द्वयं पूर्यत** इति सङ्कल्पस्य स्वरूपतः फलतश्च सत्यत्वम**सौ सत्य** इतिपदाभ्यामुच्यत इत्यर्थः, **तत्रे**ति श्लोकोत्तरार्धे इत्यर्थः, पूर्वमुक्तं प्रतीकमुत्तरार्धस्य ज्ञेयं, सङ्कल्पस्य फलदत्वं विवृण्वन्ति **स सङ्कल्प** इत्यारभ्येति**भाव** इत्यन्तेन, **स त्ववस्त्विति स तु** सङ्कल्पो भावनासिद्धत्वाद् वस्तुसमुदायो रूपे यस्य तादृशो न भवति अतः **स्वरूपतो**ऽसत्यः परंत्वधुना स्वरूपतः सत्यः सन् फलज्ञापको जात इत्यर्थः, **तद्ज्ञापित**मिति फलजननमित्यर्थः, **असाविति अर्हती**त्यन्तस्य प्रतीकमिदं न तु पदमात्रस्य, **कार्याधीनत्वादिति** फलस्येतिशेषः, फलं कार्याधीनं, कार्यं च गोपिकाधीनमतः फलस्यापि गोपिकाधीनत्वं सम्पन्नमित्यर्थः ॥ २५½ ॥ **नन्विति** भगवति निवेदितः सङ्घातोऽनिवेदिभिः सङ्गं प्राप्यानिवेदितो भविष्यतीत्यर्थः, **न मयी**त्यत्र अयमिति भगवति बुद्ध्याद्यावेश इत्यर्थः, **अत** इति बुद्ध्यावेशस्य संस्कारत्वादित्यर्थः, **जाते**त्यत्र तथाऽसंस्कृता न भवतीतिशेषो ज्ञेयः, **अकार्यत्व**मिति न कार्यं कामान्तरं यस्मात् तादृशत्वमित्यर्थः, धनस्यावस्थाविशेषो धानं तस्येदमित्यण् धनावस्थायां यवा यवोत्पादका न तु **भ्रष्टत्वेन धानावस्थायां**, तस्यामवस्थायां धनसम्बन्धिनो यवा न तु धनरूपा इत्याहुः सामान्येन **अत** इति, **सुतरा**मिति कदाचित् कामान्तरजननेपि मत्सम्बन्धिनमेव जनयिष्यति न तु पूर्वसिद्धमित्यर्थः ॥ २६½ ॥ **याताबला** इत्यत्र क्षपारमणयोरत्यन्तसंयोगस्यार्थमाहुः **रमणे**ति, अत्र करणे ल्युट् इतिहेतोः **सन्देहो न स्थित** इत्यर्थः, अक्षरार्थोयमितिज्ञेयं, **नित्यसम्बन्धः** सर्वदा **सम्बन्धो**न्तर्गृहगतानामिव, तथा सति तासामिवासामपि द्वितीयरसानुभवो न स्यादित्यरुच्याहुः **अहोरात्रे**ति, कदाचिदह्नि कदाचिद् रात्रावेवं प्रत्यहमित्यर्थः ॥ २७½ ॥ **इत्यादिष्टा** इत्यत्र यावत्कामस्याजातत्वाल्लब्धकामत्वं कथमित्यत आहुः **यद्यपी**ति, **मनोरथश्चे**ति पतित्वं च प्राप्तं **सिद्धा** इतिवचनादित्यर्थः ॥ २८½ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

याताबला इत्यस्य विवृतौ **तथापि संस्कारार्थं कर्षणवत् क्रियया व्याप्रियत इती**त्यादि यद्यपि **भौमा एवान्यत्र नीयन्ते भूमिस्तु नान्यत्र नीयते** तथापि भूमिः **कर्षणादिक्रियया व्याप्रियते** तथा वयमपि भजनोपयोग्यतासम्पादनेन संस्कार्या इत्यर्थः, **मयेमा रंस्यथ क्षपा** इत्यस्य विवृतौ **इमाः परिदृश्यमानाः क्षपा मय्येव विद्यमाना** इति, अत्रेदं ज्ञेयं, इयं वस्त्रहरणलीला हेमन्ततौं दिवा जाता तत्र **इमाः क्षपा** इत्युक्तिः कथं सङ्गच्छेत, रात्रौ चेद् रात्रिसाजात्याच् छरत्कालसम्बन्धिन्यो रात्रयो गृह्येरन्, शरदि ऋतौ चेद् दिवा कथनेपि शरत्सम्बन्धिनीनां रात्रीणां ग्रहणं स्यात्, प्रकृते तु हेमन्तर्तु दिनं चेती**माः क्षपा मया सह रंस्यथे**त्युक्तिर्विरुद्धा, शरत्कालसम्बन्धिरात्रिषु रमणस्य जायमानत्वाद्, **'भगवानपि ता रात्रीः** शरदोत्फुल्लमल्लिका' इतिवाक्यात्, एवं सती **'माः क्षपा'** इति कथं भगवतोक्तमित्याशङ्क्याहु**रिमाः परिदृश्यमानाः क्षपा मय्येव विद्यमाना** इति, **इमाः क्षपा** अलौकिक्यो भगवद्रमणैकाधिष्ठानभूता **रमणसहिता** नित्याः प्रापञ्चिकरात्रिभ्यो भिन्ना अलौकिकी या शरत् तत्सम्बन्धिन्यः अतो हेमन्ततौं दिवापि ता रात्रयः **प्रदर्शिता 'मयेमा रंस्यथ क्षपा'** इत्यत्रेदंशब्दप्रयोगात्, 'इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदोरूपं अदसस्तु विप्रकृष्टं तदतिपरोक्षे विजानीया'दितिवाक्यादिदंशब्दस्य सन्निकृष्टवाचकत्वात् ॥ २७½ ॥ **इत्यादिष्टा भगवतेत्यत्र साधिकैस्तत्त्वैरिति** सार्धैरष्टाविंशतिभिः श्लोकैरित्यर्थः, **तासामर्धभक्तिरिति** अङ्गसङ्गाभावादर्धत्वमिति भगवता टिप्पणीकारेणोक्तम् ॥ २८½ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मदर्चनं मत्प्राप्त्यर्थं कात्यायन्यर्चनं तथा भवतीनां सङ्कल्पः पतित्वेन मया सह रमणविषयको मनोरथश्च युष्माभिर्लज्जया अकथितोऽपि मया विदितः, मयाऽनुमोदितः, अङ्गीकृतश्च । अतः सोऽसो सङ्कल्पः सत्यो यथार्थः सफलो भवितुमर्हतीत्यन्वयः ॥२५॥ 'स च मोक्षपर्यवसायी भविष्यति' इत्याशयेनाह—न मयीति । मयि आवेशिता धीर्यैस्तेषां कामः विषयभोगसङ्कल्पः कामाय पुनः संसारविषयभोगाय न कल्पते । अन्येषां सङ्कल्पो यथा पुनः संसारविषयभोगहेतुर्भवति तथा तद्धेतुर्न भवतीत्यर्थः । तत्र दृष्टान्तमाह—भर्जितेति । भर्जिता दग्धा, क्वथिता रन्धिता वा धाना यवादिरूपा यथा प्रायो बीजाय पुनरङ्कुरोत्पादनाय नेष्यते नाङ्गीक्रियते, तथा मदावेशिताचित्तानामपि सकलमर्मवासनानां दग्धत्वान्न पुनः संसारागम इत्यर्थः । 'धानाः' इति बहुवचनान्तपाठः, तथा 'नेशते' इति पाठश्च दृश्यते, तत्र समर्था न भवन्तीत्यर्थः ॥ २६ ॥ हे अबलाः ! यूयं व्रजं यात गच्छत, यतः सिद्धा पूर्णमनोरथाः । ननु 'भवत्सम्बन्धस्य अजातत्वात् कथं सिद्धमनोरथत्वम् ?' अत आह—यदिति । 'पतिव्रतानां मनोरथः कथं न सिद्ध्येत् ?'

इति सूचयन् सम्बोधयति–सतीरिति । हे सत्यः ! यत् मया सह रमणमुद्दिश्य सङ्कल्प्य इदं व्रतमार्यायाः कात्यायन्याः अर्चनं च चेरुः कृतवत्यस्तत् इमाः आगामिनीः शरद्रात्रीर्मया सह रंस्यथ रमणं प्राप्स्यथेत्यन्वयः ।। २७ ।। इत्येवं भगवता आदिष्टा आज्ञप्ताः लब्धकामाः वरदानेन प्राप्तमनोरथाश्च कुमारिकाः तत्पार्श्वस्य दुस्त्यजत्वात् कृच्छ्रात् महता कष्टेन तस्य पदाम्बुजं ध्यायन्त्यो व्रजं निर्विविशुरित्यन्वयः ।। २८ ।।

अन्वितार्थप्रकाशिका

संकल्प इति ।। हे साध्व्यः ! मदर्चनं मदङ्गसङ्गरूपो भवतीनां सङ्कल्पः । युष्माभिर्लज्जया अकथितोऽपि मया विदितः मयाऽनुमोदितः अङ्गीकृतश्च । अतः सोऽसौ सङ्कल्पः सत्यः सफलो भवितुमर्हति । अर्हतीति सम्भावनोक्त्या आत्यन्तिको न भविष्यति इति सूचितम् ।। २५ ।। न मयीति ।। मयि आवेशिता धीर्यैस्तेषां कामः विषयभोगसङ्कल्पः कामाय पुनः संसारविषयभोगाय न कल्पते । विषयमहिम्ना कामस्यापि शान्तिहेतुत्वात् । यथा भर्जिता दग्धा क्वथिता रन्धिता वा पूर्वं भर्जिता ततो रन्धिता वा धाना यवादिरूपा यश्च प्रायो बीजाय पुनरङ्कुरोत्पादनाय नेष्यते नाङ्गीक्रियते किं त्वास्वादमात्रार्था भवति । धाना इत्येकत्वमार्षमाहुः । धाना इति नेशते इति च बहुवचनपाठे नेशते न समर्था भवन्ति । प्राय इति स्वेच्छया प्ररोहमपि सूचयति । ध्रुवादीनां तथा दर्शनात् इति स्वामिपादाः ।। २६ ।। यातेति ।। हे अबलाः ! हे सतीः सत्यः ! पूर्वसवर्णदीर्घ आर्षः । यूयं सिद्धाः पूर्णमनोरथाः स्थ । यत् मया सह रमणमुद्दिश्य संकल्प्य भवत्य इति शेषः । आर्यायाः कात्यायन्या अर्चनरूपम् इदं व्रतं चेरुः कृतवत्यस्तत इमा आगामिनीः शरद्रात्रीर्मया सह रंस्यथ रमणं प्राप्स्यथ । रासानन्तरमेव तासां सायुज्यं बोध्यम् ।। २७ ।। इतीति ।। इत्येवं भगवता आदिष्टा आज्ञप्ताः लब्धकामाः प्राप्तमनोरथाश्च कुमारिकाः तत्पार्श्वस्य दुस्त्यजत्वात् कृच्छ्रात् महता कष्टेन तस्य पदाम्भोजं ध्यायन्त्यो व्रजं निर्विविशुः ।। २८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे साध्व्यः युष्माकं मदर्चनं प्रतिसंकल्पो मनोरथः ह्रियानोक्तोऽपि मया विदितः अनुमोदितः संमतश्च अतः सत्यो भवितुमर्हति ।। २५ ।। युक्तत्वमेवाह मय्यावेशितचित्तानां मया सह कामो विषयभोगः कामाय पुनर्विषयभोगाय न कल्पते किं तु विषयांतरनाशाय भवतीत्यर्थः । भर्जीताः ईषदग्निनादग्धाः क्वथिता रंधिता धाना गोधुमचणकादयो बीजाय पुनरुद्भवकारणाय नेष्यते क्षुधा नाशाय भवतीत्यर्थः ।। २६ ।। हे अबलाः सिद्धाः प्राप्तमनोरथा व्रजं गच्छत इमाः आगामिनीः क्षपाः क्षपासु निशासु अकर्मकधातुभिर्योगे देशः कालो भावो गंतव्योऽध्वावाचककर्मसंज्ञक इति वाच्यमिति कर्मसंज्ञाया द्वितीया मया सह यूयं रंस्यथ विहरिष्यथ सतीः हे सत्यः आर्या कात्यायनी ।। २७–२९ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

संकल्प इति ।। हे साध्व्यः अबलाः, मदर्चने मया सह क्रीडाचरणात्मकेऽर्चने निमित्ते, यः भवतीनां संकल्पः, स मया विदितः । अनुमोदितोऽभ्यनुज्ञातश्च, अतोऽसो, सत्यः एव, भवितु अर्हति ।। २५ ।। केनापि व्याजमात्रेणानुजिघृक्षैकशीलत्वात् महोदरत्वाच्च देहान्ते तासां मुक्तिमपि संकल्पयति ।। नति ।। मयि आवेशिता धीर्याभिस्तासां, कामो मद्विषयकोऽभिलाषः; कामाय केवलं विषयभोगायैव, न कल्पते, किं तु मुक्तयेऽपीत्यर्थतो विवक्षितम् । विषयवैलक्षण्यमहिम्ना मद्विषयकामस्यापि संसृतिबीजभर्जनद्वारा मुक्तिहेतुत्वादिति भावः । निर्वीर्यं संसृतिबीजं न पुनः संसृतये भवतीत्यत्र दृष्टान्तमाह । प्रायः भर्जिता भ्राष्ट्रे क्षिप्त्वा भर्जिताः, क्वथिता जलपक्वाश्च, धाना यवादिबीजानि, बीजायाङ्कुरोद्गमाय, न इष्यते ।। २६ ।। यातेति ।। यत एवमतः, हे अबलाः, यूयं सिद्धाः, संपूर्णमनोरथाः, स्थ । व्रजं यात गच्छत । मया सह इमा आगामिनीः, क्षपा रात्रिः, शारदीनिशा इत्यर्थः । रंस्यथ । देवताराधनं न मुधा भवितुमर्हतीत्यभिप्रायेणाह । यदिति । सतीर्हे सत्यः, यत् मया सह क्रीडनात्मकं प्रयोजनं उद्दिश्य, भवत्यः इदं आर्यार्चनं कात्यायन्यर्चनात्मकं, व्रतं चेरुश्चक्रुः ।। २७ ।। इतीति ।। इतीत्थं, भगवता कृष्णेन, आदिष्टाः स्वस्वगृहगमनाय दत्ताज्ञाः, कुमारिकाः, लब्धकामाः संप्राप्ताभीष्टार्थाः, तत्पदाम्भोजं कृष्णपादपद्मं, ध्यायन्त्यः सत्यः, कृच्छ्रात् कथंचित्, व्रजं निर्विविशुः । तद्विश्लेषासहिष्णुत्वादिति भावः ।। २८ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सङ्कल्प इति : १०.२२.२५.

सर्वज्ञेन मया चित्तजातं वो जानतोच्यते । अत्रामुत्राप्यनङ्गाप्तिर्मत्प्रसादाद् भविष्यति ।। ७२ ।।

न मयीति : १०.२२.२६.

मां पश्यत्यत्र योऽद्धागमशिखरगतं वीक्षितो यो मयाऽपि मन्मात्रध्येयचेता मदनुमतिधृताऽज्ञानकार्यानुषङ्गः ।
न स्याज्जन्मान्तराप्त्यै सततमविकृता कीदृगप्यस्य केलिः प्रस्थातुर्गोकुलेऽपीत्यकृत यदुपतिः स्पष्टमुत्कृष्टवाचा ।। ७३ ।।

यातेति : १०.२२.२७

व्रतमेतदभूत् परीक्षितं तत्फलभाजोऽपि भविष्यथाद्य रात्रौ । इति देवगिराऽवदत्स कृष्णः फलितोऽब्दान्तरोऽर्थतस्तदर्थः ॥ ७४ ॥

अर्थिप्रार्थित-तत्क्षणार्पणसमर्थोऽपि प्रभुर्यत्तदा कामं तद्व्रततोषितोऽपि विदधे कालान्तरं तद्विधौ ।
तद्बीजं बहुधेदमेव भविता यत्ताभिरभ्यर्थितं तच्चाह्नि प्रतिषिद्धमात्मदिनमप्यालोचयद्दैवतम् ॥ ७५ ॥

कामोद्रेकः पद्मिनीनां तुरीये भागे रात्र्यास्तत्र तासां हि तृप्तिः ।
जानन्नित्थं श्रीपतिः शारदेऽसौ मासे मन्येऽकल्पयत् तत्प्रसादम् ॥ ७६ ॥

एवमीशाशयो युक्तो भाति गीरन्यथा क्षपाः । मयेमा रंस्यथ इति स्यात् सत्योभयतोऽपि न ॥ ७७ ॥

आभिः कामसुखं मदर्थितमहं तु ब्रह्मचारि ततः कर्तव्यं कथमत्र येन भविता स्वार्थो ममासामपि ।
आलोच्यैवमियेष तत्सुखकरीं राकारतिं तत्परित्यागे दोषमथाक्षतं व्रतगुणं सङ्गे किमीशः स्मरन् ॥ ७८ ॥

आगमदृश्यो भगवानयत्नतो भूद्यदीय-वाग्विषयः । किं किं न तस्य साङ्गं साङ्गोऽनङ्गोऽप्यभूत्पुरस्तासाम् ॥ ७९ ॥

इत्यादिष्टा : १०.२२.२८.

त्यक्त्वा लज्जां सर्वभूतादिसङ्गां कृष्णं गायन्त्यन्तरेऽनन्यभावाः ।
तेषां श्रीशप्राप्तिकृत् स्याज्जडेऽपि क्रीडेत्यत्रोदाहृति-गोंपकन्याः ॥ ८० ॥

कृष्णप्रिया

हे साध्वियों ! हे सदाचार सम्पन्न कुमारियों ! आपने अनन्य निष्ठा से, जिस मनोरथ से मेरा अर्चन और व्रत किया है उसको मैंने अच्छी तरह जान लिया है । हे कुमारियों, मैं उस मनोरथ का अनुमोदन करता हूँ, इसलिए वह पूर्ण होने योग्य है ॥ २५ ॥ हे कुमारियों ! जिन्होंने अपनी बुद्धि-प्राण इन्द्रियादि मुझे समर्पित किए हैं — मुझमें निर्विष्ट कर रक्खें हैं उनकी कामना अन्य कामना को उत्पन्न नहीं कर सकती है । भुवि उबाली हुई या पकी हुई धाणी फिर अङ्कुर को उत्पन्न नहीं कर सकती ॥ २६ ॥ हे अबलाओं ! अब आप सब व्रज में जाओ । आपका संकल्प-व्रत सिद्ध हो गया । हे सतियों ! हे शुद्धशीला कुमारियों ! जिस मनोरथ से आपने श्रीकात्यायनी व्रत अर्चन किया है वह अभिलाष आनेवाली शरद ऋतु की रात्रियों में रास रमण से पूर्ण होगा ।२७। श्रीशुकाचार्यजी ने कहा — भगवान श्रीकृष्णचन्द्र जी के वरदान वचनों से अपने मनोरथ को सिद्ध हुआ मानने वाली वे व्रज कुमारिकाएँ पुरुषोत्तम के श्रीचरणों का ध्यान करती हुई बड़े कष्ट से व्रज की ओर लौट गई ॥ २८ ॥

अथ गोपैः परिवृतो भगवान् देवकीसुतः । वृन्दावनाद् गतो दूरं चारयन् गाः सहाग्रजः ॥ २९ ॥

निदाघार्कातपे [1]तिग्मे छायाभिः स्वाभिरात्मनः । आतपत्रायितान् वीक्ष्य द्रुमानाह व्रजौकसः ॥ ३० ॥

हे [2]कृष्णस्तोक हे [3]अंसो श्रीदामन् सुबलार्जुन । [4]विशालर्षभ तेजस्विन् देवप्रस्थ वरूथप ॥ ३१ ॥

पश्यतैतान् महाभागान् परार्थैकान्तजीवनान्[5] । वातवर्षातपहिमान् सहन्तो वारयन्ति नः ॥ ३२ ॥

कर्दमक्षमा

अन्वयः — अथ गोपैः परिवृतः सहाग्रजः देवकीसुतः भगवान्, गाः चारयन् वृन्दावनात् दूरम् गतः ॥ २९ ॥ तिग्मे निदाघार्कातपे स्वाभिः छायाभिः आत्मनः आतपत्रायितान् द्रुमान् वीक्ष्य व्रजौकसः आह ॥ ३० ॥ हे कृष्ण ? हे स्तोक ? हे अंशो ? हे श्रीदामन् ? हे सुबल ? हे अर्जुन ? हे विशाल ? हे ऋषभ ? हे तेजस्विन् ? हे देवप्रस्थ ? हे वरुथप ? ॥ ३१ ॥ एतान् परार्थं एकान्तजीवनान्, महाभागान् पश्यत, वात वर्षा आतप हिमान् सहन्तः नः वारयन्ति ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विप्रभार्यानुग्रहाय यज्ञवाटं गच्छन्विप्राणां काठिन्यमभिप्रेत्य तेभ्योऽपि द्रुमाः श्रेष्ठा इति तानभिनंदति चतुर्भिः । पश्यतेति । हे स्तोककृष्णादयो गोपाः एतान् द्रुमान्पश्यत । परार्थमेवैकांतेन जीवितं येषां तान् । तदाह । वातवर्षादीन्स्वयं सहंतः सहमाना अस्माकं वारयंति ॥ ३२ ॥

---

१. तीक्ष्णे—वीर । २. स्तोक कृष्ण—श्रीधर. वंशी. वीर. विज. । ३. अंशो—श्रीधर. वंशी. वीर. विज. । ४. विशालवृषभौजस्विन्देवप्रष्ठ-वीर. । ५. जीवितान्=श्रीधर. वंशी. वीर. ; जीविनः—विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ तासां गमनानंतरम्। श्रीतोषिण्यां तु इदानीं गोपकन्यासु प्रसादमुक्त्वा तत्प्रस्तावसादृश्याद्यज्ञपत्नीषु प्रसादं वक्तुमारभते। अथ लीलांतरारंभे। स च निदाघसमय एवेति ज्ञेयम् 'निदाघार्कातपः' इति वक्ष्यमाणत्वात्। अत एव सहाग्रजः श्रीबलदेवसहितः। वस्त्राहरणदिने तत्साहित्याभावात्। गोपैः परिवृत इति प्रागुक्तिर्वक्ष्यमाणलीलायां तेषामपेक्षाविशेषात्। देवकीसुत इति। पूर्वस्मादेव हेतोः 'वृंदावनाद्गतो दूरम्' इति प्रथमं तावद्गिरिव्रजमयं काम्यकवनं गतः तत एवास्य धातुरागमयवेशो वर्णयिष्यते, पश्चान्निदाघतृष्णागमितधेनुजलपायनार्थं व्रजं दक्षिणे विधाय यमुनामागतः। तच्च व्रजादागच्छन्मध्याह्ने भोज्यवंचनार्थम्, तच्च श्रीयज्ञपत्नीष्वन्नप्रार्थनारूपकृपार्थमिति ज्ञेयम् ॥ २९ ॥ 'निदाघः उष्णोपगमः' इत्यमरान्निदाघो ग्रीष्मर्तुः तत्स्वीकारे 'हेमंते प्रथमे मासि' इत्युपक्रमो विरुध्येतातोत्र निदाघपदेन स्वेदाबु ज्ञेयम् ॥ "निदाघ ऋतुभेदे स्यादुष्णस्वेदांबुनोरपि" इति मेदिनी। निदाघ स्वेदांबु तत्करोऽर्को निदाघार्कः। मध्यपदलोपी समासः। तस्यातापो निदाघातपस्तस्मिन् तीव्रे मध्याह्ने सति। द्रुमान्वीक्ष्येत्यन्वयस्ततो न विरोध इति। आनपत्रमिवाचरंतीत्यापत्रायंते, आतपत्रायितास्तान्। आचारार्थक्यङंतात्कर्त्तरिक्तः। व्रजौकस इति द्रुमविशेषणम्। आत्मन इत्युपलक्षणं स्वस्य स्वेषां च ॥ ३० ॥ संबुद्ध्यात्मकपद्यम् हे स्तोकोऽल्पः कृष्णः कृष्णवर्णो यस्येति तथा सर्वेषां संबोधनानामग्रिमेण पश्यतेति क्रियापदेन संबंधः। गोपगणनाक्रमोयम् यथादृष्टिप्राप्तमेव ज्ञेयः। एते दश श्रीकृष्णस्य दशदिक्षु रक्षणार्थं प्रेम्णा वर्तंत इति केचित्संभावयंति दशसंख्याकत्वात्, तत्र स्तोककृष्णादयोऽष्टावष्टदिक्षु देवप्रस्थवरूथौ छत्रधारणवर्त्मशोधनादिनोर्द्ध्वाधोदेशयोर्ज्ञेयो एकादेशो भद्रसेनस्तु गोपसेनाध्यक्षः रामश्च सर्वापेक्षकस्तदानीं दूरे स्थित इति लभ्यते ॥ ३१ ॥ एकांतेन निश्चयेन "निश्चये च रहःस्थाने एकांतमेकनाशने" इति नैरुक्तः। वारयंति अपाकुर्वंति। महान् भागो भाग्यं येषां तान्। तल्लक्षणमाह—परेति। नोऽस्माकम् केचिद्वातादीन् स्वयं सहंते तपस्विनो न त्वन्येषां वारयंति स्निग्धाशया दयालवो वा केचित्परेषां वारयंति स्वयं तु न सहंते किं तु तत्प्रतीकारं कुर्वंते, एते च स्वयं सहमानाः परेषां वारयंतीति महाभागत्वम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अधुना श्रीगोपकन्यासु प्रसादमुक्त्वा ततः तत्प्रस्तावसादृश्यात् यज्ञपत्नीषु प्रसादं वक्तुमारभते, अथ लीलान्तरारम्भे सच निदाघसमय इति विज्ञेयं निदाघार्कातपे तिग्म इति वक्ष्यमाणात् अत एव सहाग्रजः श्रीबलदेवेन सहितः गोपकन्यावस्त्रहरणदिने तत्र तेन साहित्याभावात् गोपैः परितो वृत इति प्रागुक्तिर्वक्ष्यमाणलीलायां तेषामपेक्षाविशेषात् देवकीसुत इति पूर्वस्मादेव हेतोः वृन्दावनाद्गतो दूरमिति प्रथमं तावद्गिरिव्रजमयं काम्यकवनं गतः तत एवास्य धातुरागमनवेशो वर्णयिष्यते पश्चात् निदाघतृष्णागमितधेनुजलपायनार्थं व्रजं दक्षिणे विधाय यमुनामागतः तच्च व्रजादागच्छत् मध्याह्ने भोज्यवञ्चनार्थ तच्च श्रीयज्ञपत्नीष्वन्नप्रार्थनारूपकृपार्थमिति ज्ञेयम् ॥ २९ ॥ तत्र वृन्दावनक्रमणप्रकारमाह–निदाघेति सप्तभिः आत्मन इत्युपलक्षणं स्वस्य स्वेषां च छत्रायितान् व्रजौकसो व्रजजनवर्त्तिनो द्रुमान् वीक्ष्याह वक्ति स्म ॥ ३० ॥ अथ प्रार्थयितव्यान् याज्ञिकानप्यनादरणीयतयाऽवज्ञाय सखिमुख्यानभिमुखीकृत्य तान् द्रूमानस्तुवदित्याह—हे स्तोकेति युग्मकेन। सम्बोधनक्रमोयं यथा दृष्टिप्राप्तमेव ज्ञेयः एते दश श्रीकृष्णस्य दशदिक्ष्ववेक्षणार्थं प्रेम्णा वर्त्तन्त इति केचित् सम्भावयन्ति दशसङ्ख्याकत्वात् तत्र स्तोककृष्णादयोऽष्टावष्टदिक्षु देवप्रस्थवरूथपौ छत्रधारणवर्त्मशोधनादिनोर्द्ध्वाधोदेशयोः एकादशो भद्रसेनस्तु गोपसेनाध्यक्षः सर्वविक्षकस्तदानीं दूरे स्थित इति लक्ष्यते ॥ ३१ ॥ महान् भागो भाग्यं येषां तान् तल्लक्षणमाह–परेति। नोऽस्माकं केचिद्वातादीन् स्वयं सहन्ते तपस्विनः नत्वन्येषां वारयन्ति स्निग्धाश्च दयालवो वा केचित् परेषां वारयन्ति स्वयन्तु न सहन्ते किन्तु तत्प्रतीकारं कुर्वंते एते च स्वयं सहमानाः परेषां वारयन्तीति महाभागत्वम् ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना श्रीगोपकन्यासु प्रसादमिव यज्ञ-पत्नीषु प्रसादं प्रस्तावाद्वक्तुं तत्प्रसंगमारभते—अथेति। कालान्तरे कदाचित् ग्रीष्मसमय इत्यर्थः, (भा. १०।२२।३०) 'निदाघार्कातपे तिग्म' इति वक्ष्यमाणत्वात्, अतएव सहाग्रजः श्रीबलदेवेन सहितः, गोपकन्यावस्त्रापहरणदिने तत्र तेन साहित्याभावात्, गोपैः परितो वृत इति प्रागुक्तिर्वक्ष्यमाणलीलायां तेषामपेक्षाविशेषात्। देवक्याः सुत इति यज्ञपत्नीषु मातुरिषु तथैव प्रतीतेः; अतस्तासां भावेनाकर्षणात् तद्गृहान्तिके यातुं वृन्दावनाद् दूरं गत इत्यर्थः, यतो भगवान् परमदयालुः। यद्वा, देवकी श्रीयशोदेति व्याख्यातमेव, ततश्च दूरे गमनं श्रीयज्ञपत्न्यनुग्रहार्थमेव। श्रीस्वामिपादव्याख्यामते च तदानीं श्रीबलदेवस्य तत्रागमतस्यायोग्यत्वादसौ पश्चादागत्य मिलित इति पोषे कदाचिद्वृष्टोच्छया निदाघार्कस्येवण्तप इति ज्ञेयम् ॥ २९ ॥ कथं दूरं गतस्तदाह—निदाघेति सप्तभिः। आत्मनः श्रीभगवतो व्रजौकसो गोपानाह, प्रायो वन्यानां गोपानामेव वृक्षैर्हिताचरणात्, तथा सख्येन तेष्वेव प्रियाप्रिय-वृत्तस्य वर्ण्यत्वाच्च; यद्वा, आत्मनो ये व्रजौकसो गोपगवादयस्तान् प्रति आतपत्रायितान्; यद्वा, आत्मनः प्रति बहुत्वं परमप्रियतया भेदाभावेन स्वीकृतानां गोपानामात्मरूपत्वात् ॥ ३० ॥ तत्र मुख्यतमान्

प्रत्येकं प्रीत्या सम्बोधयति--हे स्तोकेति ! श्रीदाम्नो मुख्यत्वेऽपि स्तोककृष्णस्यादौ सम्बोधनं सनामत्वेन मित्रत्वात्, सम्मुखे वर्त्तमानत्वाच्च; एते दश श्रीकृष्णस्य दशदिक्ष्ववेक्षणार्थं श्रीयशोदया राज्ञ्या नियुक्ताः, श्रीभागवतामृतोत्तरखण्डोक्तानुसारेण ज्ञेयाः। तत्र स्तोककृष्णादयश्चत्वारः क्रमेण पूर्व्वादिचतुर्दिक्षु, अर्ज्जुनादय ऐशानादिकोणेषु, देवप्रस्थ-वरूथपौ छत्र-धारण-वर्त्मशोधनादिनोद्र्ध्वाधोदेशयोः, एकादशो भद्रसेनस्तु गोपसेनाध्यक्षोऽभितो बहिरवेक्षक इति तस्येतस्ततः सदा परिभ्रमणेन तदानीं तदन्तिकवृत्तेस्तदसम्बोधनम् ।। ३१ ।। महान् भागो भाग्यम्, यद्वा, सर्व्वजीवप्राप्येषु त्वंशो येषां तान्; तल्लक्षणमाह --परेति । नोऽस्माकं गोपानां सर्वप्राणिनां वा; केचित् वातादीन् स्वयं सहन्ते तपस्विनः, न त्वन्येषां वारयन्ति, स्निग्धाश्च दयालवो वा, केचित् परेषां वारयन्ति, स्वयन्तु न सहन्ते किन्तु तत्प्रतीकारं कुर्वन्ति, एते च स्वयं सहमानाः परेषां वारयन्तीति महाभागत्वम् ।। ३२ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

चरित्रान्तरमाह–अथेति । कदाचिद्वृन्दावनाद्दूरं गतः साग्रजो गाश्चारयन् ।। २९ ।। तीक्ष्णे निदाघार्कस्य ग्रैष्माकैस्यातपे आत्मनः स्वस्य स्वाभिः छायाभिरातपत्रवदाचरितान् द्रुमानवलोक्य व्रजौकसो गोपानाह ।। ३० ।। तदेवाह—हे स्तोककृष्णेत्यादिभिः पञ्चभिः । स्तोककृष्णाख्यः कश्चिद्गोपबालः ।। ३३ ।। एतान् द्रुमान् पश्यत कथम्भूतान् परार्थं परोपकारार्थमेवैकान्तं नियतं जीवितं येषां तान् तदेवाह–पश्यतेति । स्वयं वातादीन् सहमानाः नोऽस्माकं तान्वारयन्ति हिमानिति पुंस्त्वमार्षम् ।। ३२ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

व्रजौकसः आहेत्यन्वयः । तिग्मे तीव्रे ।। ३०–३१ ।। परार्थाय परोपकाराय एकान्तेन नियमेन जीवनं स्वायूरक्षणं येषां ते तान् नः वारयन्ति क्षुधितानस्मांस्तर्पयन्ति ।। ३२ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यथेति लीलान्तरारम्भे स च निदाघसमय एव ।। २९ ।। निदाघार्कातप इति वक्ष्यमाणात् ।। ३० ।। अथ गोपैः व्रजौकसो निजसहवासिन इत्यर्थः । अथ पूर्ववद्विनोदवाक्यमेवेदं श्रीभगदीयत्वेन परमार्थतामपि वहतीति भावः । अतो विनोदेनैव प्रत्येकमुख्यत्वात् सम्बोधयति हे स्तोकेति ।। ३१–३२ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ वस्त्रहरणलीलया कुमारीभ्यः प्रसादं कृत्वा पश्चाद्वयस्यैः सह सङ्गतो बभूवेति दर्शयति– अत्र गोपैः परिवृत इत्यादि। अथ वस्त्राहरणलीलानन्तरं वृन्दावनाद्दूरं गतः सन् गोपैः परिवृतः सहाग्रजश्च सन् गाश्चारयन् द्रुमान् वीक्ष्य आहेति परेणान्वयः। अतो (८ म. श्लो०) "वयस्यैरगतस्तत्र" इत्यत्र यथाश्रुतं व्याख्यानमसङ्गतम् । ननु गोपैः परिवृतो भगवान्, अत वस्त्राहरणानन्तरं गाश्चारयन्नित्येवान्वयः कार्यः ? मैवम् तदा महाग्रज इत्यसङ्गतम्, 'एकयोविनिर्द्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः' इति न्यायात् । तथा सत्यतीवानौचित्यम् । अत एकाकी सन् तत्रागत इत्येव मन्तव्यम् ।। २९ ।।

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे द्वाविंशोऽध्यायः ।। २२ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अथ गोपैरित्यादि । अथानन्तरं वृन्दावनात् दूरं गतः सन् गोपैः सह परिवृतः सहाग्रजो गाश्चारयन् द्रुमान् वीक्ष्य आहेति परेणान्वयः । एतेन गोप–परिवृतत्वं सहाग्रजत्वञ्च वस्त्राहरणात् पश्चात्तनमेव । ननु गोपैः परिवृतो भगवान् अथ गाश्चारयन्नित्यादिरन्वयः कार्यः नैवम्, सहाग्रज इत्यासङ्गः, तेन हि पूर्वं भवन्मतेऽप्यग्रज आसीत्, नाप्यधुना क्व आगतः । अतोऽग्रजेन वयस्यबालका गाश्चारयितुं गताः, भगवान् एक एव तत्कर्म सिद्धये गत इति मन्तव्यम् । अतएव (८ म. श्लो०) "वयस्यैरागतस्तत्र वृतस्तत्कर्मसिद्धये" इति पूर्वं तथा व्याख्यातम् ।। २९–३८ ।।

इति द्वाविंशोऽध्यायः ।। २२ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गोपकन्याप्रसादस्य प्रस्तुत्यारोहितः स्मृतौ । यज्ञपत्नीप्रसादोऽतस्तं विवक्षुरभून्मुनिः ।।

अथेति समयान्तरव्यञ्जकं कदाचिन्निदाघार्कावित्यर्थः ।। २९ ।। वरमुदारवृक्षयोनावपि जन्म सद्भिः प्रार्थ्यं न तु कृपणकर्भिविप्रजातावितमिमर्थं ज्ञापयितुं वृक्षान् स्तौति, सखीन् सम्बोध्य पश्यतेति चतुर्भिः । स्तोककृष्णादयोष्टावष्टदिक्षु कृष्णस्य रक्षणकर्मसु स्थिताः देवप्रस्थवरूथपौ छत्रधारकवर्त्मशोधकावित्यूद्र्ध्वाधो देशकृत्ययोः स्थितौ एकादशो भद्रसेनस्तु गोपसेनाध्यक्षः सर्वावेक्षकः ।। ३०–३१ ।। तदानीं दूरेस्थित इति लक्ष्यते ये वातवर्षादीन् स्वयं सहमानान् अस्माकं वारयन्ति ।। ३२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

॥ २९ ॥ व्रजौकसः तोककृष्णादीनाह ॥ ३० ॥ परहितकारिणो द्रुमा अपि धन्या इति तानभिनन्दति–हे स्तोककृष्णेति चतुर्भिः। परार्थमेवैकान्तं नियतं जीवितं येषां तान् एतान् द्रुमान् हे स्तोककृष्णादयः पश्यत परार्थैकान्तजीवितत्वमेवाह—वातादीन्स्वयं सहन्तो नोऽस्नाकं वारयन्ति ॥ ३१–३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

व्रजकन्या प्रसादप्रसङ्गेन हृद्यारोहितं यज्ञपत्नीप्रसादं विवक्षुर्मुनिराह अथेति समयान्तरे ग्रीष्मर्त्तावित्यर्थः ॥ २९–३० ॥ पशुघ्न कर्मठ विप्रेभ्यो अमी वृक्षाः परोपकारित्वाच्छ्रेष्ठा इति भावेन तान् स्तोतुं हे स्तोक कृष्णेत्यादिना सखीन् सम्बोधयति अष्टावमी महावीरा राजपुत्रस्य कृष्णस्य रक्षणायाष्टासु दिक्षु तिष्ठन्ति देवप्रस्थवरूथपौ तु छत्रधारणमार्गशोधनादिनोर्ध्वाधोदिशोः भद्रसेनस्त्वेकादशः सर्वगोपसेनापतिः सर्वविक्षी विदूरे स्थित इति बोध्यम् ॥३१॥ ये वातादीन् स्वयं सहन्तोऽस्माकं तान् वारयन्ति ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वृन्दावनात्तत्सन्त्यज्य ॥ २९ ॥ तिग्मे तीक्ष्णे आत्मनः स्वान् आतपत्रायितान् छत्रायितान्वीक्ष्य तान्द्रुमान्वीक्ष्य व्रजौकसो गोपान्प्रति आह ॥ ३० ॥ कृष्ण तन्नामन् ॥ ३१ ॥ परेषामर्था एवैकान्तं नियतं यथा तथा जीवितं शीलं येषां ते परार्थैकान्तजीविनः। णि-निरयम्। वातवर्षातपहिमानातपश्च हिमं च ते वर्षेण सहिते आतपहिमे येषां ते च ते वाताश्च वातवर्षातपहिमास्तान्। अनेन हिमशब्दस्य नपुंसकत्वाद्धिमानिति कथमिति शङ्कापरासोऽवसेयः। सहन्तः। धात्वन्तरस्य चुरादौ पठितस्य परस्मैपदत्वात्स एवायं नागः सहति कलमेभ्यः परिभवमित्यादेः। तान्वतादीन्नो वारयन्ति स्वयं साढ्वाऽस्मान्रक्षन्तीति भावः ॥ ३२ ॥

श्रीसुबोधिनी

अथ ज्ञानं निरूप्यतेन्यथा गोपालानामनर्थपर्यवसानं स्यात् तैर्यद्यन्यार्थता बुध्येत तदा क्रमेण भगवदर्थमेव सर्वमिति ज्ञातं भवेदतस्तेभ्यः परार्थतां विद्यां प्रथमपर्वरूपां **भगवान्** बोधयितुं स्थानान्तरे जगामेत्याहाथेतिदशभिः, **अथ** भिन्नप्रक्रमेण **गोपैर्वृतो भगवान्** भक्तोद्धारार्थं प्रवृत्तो **वृन्दावनाद् दूरं गतो** वृन्दावनं परित्यज्याग्रे **गतो वृन्दावनस्य** तु स्त्रीप्राधान्याज् ज्ञानं न भविष्यतीति, तत्र गतानां ज्ञानार्थं प्रथमतो धर्ममाह **चारयन् गा** इति, पूर्वं न तु गोभिः सहितो नापि गोपालसहितो नापि बलभद्रसहितः पश्चादेव च ते मिलितास्तस्मिन्नेवावसरे तदुक्त्वा ज्ञापितम**थ गोपै**रिति ॥ २९½ ॥ तदा कियद् दूरे गत्वा श्रान्तेषु सर्वेषु क्वचिच्छायामुपविष्टेषूपदेशार्थं किञ्चिदाहेत्याह **निदाघे**ति, **निदाघ**काले योर्कस्तस्यातपे **तिग्मे**पि **स्वाभिच्छायाभिरात्मनः** स्वस्यात**पत्रायितान्** श्वेतच्छत्राकारेण समागच्छतः पूर्ववर्णितान् वृक्षान् वीक्ष्य **व्रजौकसो** गोपान् प्रत्याह व्रजजातापेक्षया वनजाता एव वृक्षाः समीचीना इति, पञ्चपर्वां विद्यां बोधयिष्यति वृक्षदृष्टान्तेन, वृक्षेषु चतस्रो विद्याभेदा गोपेष्वेका, यथा ता अपि चतस्रो भवन्ति तदर्थमुपदेशः, यद्यपीदानीं न **निदाघ**कालो नाप्येत **आतपत्रायिताः** किन्तु तेषां पूर्वावस्थामेव स्मृत्वा साम्प्रतं तान् **द्रुमान्** दृष्ट्वाह ॥ ३०½ ॥ अत्रैकादशमुख्याधिकारिणो गोपा एकादशेन्द्रियाधिष्ठातृरूपास्ते चेत् परार्थास्तदा सर्वं सिद्धमिति तान् सम्बोधयति **हे कृष्णे**ति, भगवतो नामकरणे अन्या अपि गोपिकाः स्वपुत्रनाम तथा कृतवत्यः, **स्तोको** द्वितीयः, **अंसु**रपरः, **श्रीदामा सुबलोर्जुनो विशाल ऋषभस्तेजस्वी देवप्रस्थो वरुथपश्च, वरूथपो** मनसस्तन्निकटस्थानि निकटस्थस्यैव, **कृष्णो** वाचः, **स्तोको** रसस्य, एकत्रोभयसत्त्वात्, पूनरन्येषां भिन्नतया सम्बोधनं. **अंसु**र्घ्राणस्य, **श्रीदामा** चक्षुषः, **सुबलो** बाह्वोः, **अर्जुनः** श्रोत्रयोः, विशालस्त्वचः, **ऋषभः** पादयोः, **अवशिष्टस्तेजस्वी** पाकज्ञापकत्वात्, एतेषां भगवता सह संव्यवहार इति महत् पर्व सिद्धं तत् सम्बोधनेन निरूपितम् ॥ ३१½ ॥ द्वितीयमाह **पश्यते**ति, धर्मः **प्रथमं** सर्वपरित्यागेन परार्थता द्वितीयं सर्वत्र भगवद्बुद्धिस्तृतीयं तस्य ज्ञापिका सर्वसेवा, अकामश्चतुर्थो **भगवदीयानां चेदेतच्चतुष्टयं तदा कृतार्थता भवती**ति, प्रथमो यादृशो धर्मोपेक्ष्यते तादृशमाह **पश्यते**ति, आदौ **धर्मसन्देहे धर्मात्मानो द्रष्टव्या धर्मो हि भाग्यवतामेव फलति,** अन्यथा विघ्नः स्यात्, **भाग्यं** च महतः, तस्य ज्ञापकं यशः, सर्वैरुच्यमानं, तदाह **माहाभागा**निति, धर्मस्वरूपमाह **परार्थे**ति, **जीवनं** तदुपकरणं च स्वस्य तत्र **परार्थ**मेव चेज् जीवितं तदान्ते धर्मो निरूपितः स हि मुख्यो'न्ते या मतिः सा गति'रितिसामान्यपक्षं व्यावर्तयति, **परार्थमेवैकान्ततो जीवनं** वर्तते येषामिति, **एकान्तजीवनत्वान् न स्वार्थ**परार्थत्वरूपमध्यमत्वं, **स्वार्थं त्वधर्मं, एवं स्वरूप**तोन्ततो **धर्मं निरूप्य बाह्यधर्म**माह **वातवर्षे**ति, जीवनेन **विवर्धते शरीरं सा वृद्धिः** परेच्छयैव, **यदि च परो वृद्धि न मन्यते** तावतैव दारुणा कार्यमिच्छति, एवं जीवनं चेत् परार्थता भवति तथा धर्मोपि **यदि परार्थ एव भवेत्,** केवलश्चेदधर्मः, उभयार्थश्चेत् काम्यो मध्यमो यथोपवासाः, विद्यमानमन्नमन्येभ्यो दत्वा तदभावे **रन्तिदेवस्येव ते मोक्षहेतवः,** स्वतोप्यभावेन्यतः पोषणे तेषां दुःखाभावाय मध्यमः, तदुभयाभावे क्लेशात्मकः, निर्हेतुश्चेद्धर्मोपि महान्, सकामश्चेन् मध्यमः, अन्यापकारी त्वधमाधमः, तत्रोत्तममाह, **वातवर्षा आतपो हिमश्च** त्रयः कालगुणाः, आद्यश्चतुर्णां सहकारी, **एतान् सहन्तोन्येषामेतान् वारयन्ति** तत्रापि **नोस्माकं, अनेन प्रमाणं** प्रत्युपकाराभावश्चोक्तः, बाह्यमेतदेव तपः, अनशनादिकं तु प्रायश्चित्तमिति न धर्मत्वेन परिगणितं, अन्ये सर्वे भेदा हीनाः ॥ ३२½ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अत्रैवाग्रिमप्रकरणार्थनिरूपणे, अन्यथा गोपालानामनर्थपर्यवसानं स्यादिति । अत्राथ गोपैरित्यनेनोक्ता गोपाला उच्यन्ते, न तु पूर्वोक्ताः, विनियुक्तत्वात् । गोपपदेनैव च तद्व्यावृत्तिः, तेषु तदभावात् । अत एव मूले तेषु वयस्यत्वादिकमेवोक्तम्, न तु गोपत्वमपि । स्तोकादयो यदि व्रजस्थं वस्तुमात्रं न केवलं भगवदर्थं किन्त्वन्यार्थमपीति जानीयुस्तदा पूर्ववृत्तान्तं श्रुत्वा प्रभौ दोषारोपं कुर्युः । स एव चानर्थरूपः । यदि तदर्थमेव सर्वमिति जानीयुस्तदोक्तवैपरीत्यमित्यर्थः । अत्रैव **वृन्दावनाद् गतो दूरमि**त्यस्य विवरणे, **वृन्दावनस्य स्त्रीप्राधान्या**दित्यादि । अत्रोपक्रान्तत्वात् परार्थताज्ञानमेव ज्ञानपदेनोच्यते । भगवदीयव्रजस्त्रीणां तु रसभावभरेणास्मदर्थमेव प्रभुप्राकट्यमिति ज्ञानं दृढम् । अत एव वक्ष्यन्ति च 'व्यक्तं भवान् व्रजजनार्तिहरोऽभिजात' इति । एवं सति तद्वने तद्विपरीतज्ञानं न सम्भवतीत्यर्थः । भगवदतिरिक्ते वस्तुनि तूपेक्षेति तस्मिन् तदर्थत्वात्तदर्थत्वज्ञाने अपि न सम्भवत इति भावः ॥ २९ ॥ **निदाघार्कातप** इत्यत्र, **व्रजजातापेक्षये**ति । भगवदन्तिकागमने निवारकत्वाद् वृक्षाणां चैतद्रमणानुकूलत्वात्तथात्वमिति भावः । यद्वा, व्रजजाता वृक्षा एवात्रोच्यन्ते । तेषु लीलाविशेषानुपयोगात्तथात्वम् ॥ ३० ॥ **परार्थैकान्तजीवना**नित्यत्र, **परार्थजीवना**नित्येतावतैव चारितार्थ्येऽपि यदेकान्तपदयोः कथनं तत्तात्पर्यमाहुः **तदा अन्ते धर्म** इत्यादि । जीवनस्य परार्थसाधनत्वेन तत्पूर्वकालीनस्य तस्य तथात्वं वाच्यम् । तथाचोत्तररक्षणे जायमानः परार्थः पूर्वक्षणीयजीवनस्यान्ते भवति । स च न प्रासङ्गिकस्तथा, किन्तूद्देश्यत्वेन मुख्यः । एतदर्थमेकपदम् । एतदेवोक्त**मन्ते या मति**रित्यादिना । एवं सति परार्थ एवैको मुख्योऽन्ते यस्येति मूलार्थः सम्पद्यते । अस्मिन्नेव पक्षे योजनान्तरमप्याहुः **एकान्तत** इति । **यथोपवासा** इत्यादि । एतस्यैव विवरणं **विद्यमान**मित्यादिना क्रियते । तथाहि । तद्दत्वा स्थितस्य रन्तिदेवस्य तदभावे अन्नाभावे सति ये जाता उपवासास्ते तस्य मोक्षहेतवो जाता इत्यर्थः । तथा चैतादृशास्त उत्तमा इति भावः । **स्वत** इति । स्वत एवान्नाभावे सति न तु दानप्रयुक्त इत्यर्थः । ईदृशस्यान्यतोऽन्नप्राप्तिसम्भवेपि स्वस्यापेक्षासत्त्वेपि तत्पीडाभावाय तद्दत्तान्नाग्रहणेन य उपवासः स मध्यम इत्यर्थः । **तदुभयाभाव** इति । स्वतः परतश्चान्नाभावे सत्यन्नकामनायां सत्यां य उपवासः स तथेत्यर्थः । **निर्हेतुश्चे**दिति । ईदृशोऽपि चेदनेनोपवासेनास्येष्टं स्वस्य वा करिष्य इति संकल्पं न कुर्यात्तदा स उत्तमः । तस्मिन्सति मध्यमः । अग्रे स्पष्टम् ॥ **वातवर्षातपहिमा**नित्यत्र, **आद्यश्चतुर्णा**मिति । चतुर्णां मध्य आद्यस्त्रयाणां सहकारीत्यर्थः । यद्वा । मन्दोऽनिलः स्वसजातीयानेकसहकारेण महत्कार्यमपि करोतीत्याशयेनेदमुक्तम् । तथा च यथाश्रुत एव ग्रन्थो बोद्धव्यः ॥ ३२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अथेत्यस्याभासे **प्रथमपर्वरूपा**मिति 'विद्यापञ्चकमत्रापी'त्यत्र टिप्पण्यामुक्तं यत् **प्रथमं पर्व** तद्रूपामित्यर्थः ॥ २९½ ॥ **हे कृष्णे**त्यस्याभासे **इन्द्रियाधिष्ठातृरूपा** इति इन्द्रियाधिष्ठातारो रूपेषु येषामित्यर्थः, व्याख्याने, **पाकज्ञापकत्वा**दिति अश्रुआदयः पायुकार्यं तैरन्तः खेदपाको जायते तेजसाप्योदनादिपाको जायते इतिभावः ॥ ३१½ ॥ **पश्यते**त्यत्र **प्रथमं पर्वे**ति वृक्षेषु **चतुष्टयमध्ये प्रथम**मित्यर्थः, **वातवर्षे**त्यत्र पूर्वार्धे **आन्तरो धर्मो निरूपित** इत्यान्तरमेव जीवनं निरूपितं, अत्र **बाह्यो धर्मो** निरूप्यत इति जीवनमपि बाह्यं निरूपणीयमिति तमाहुः **जीवनेन ही**ति, वृद्धिर्बाह्यं जीवनमितिभावः, **न मन्यते** इत्यत्र तदेतिशेषः, **वृद्धि** तेषां वातादिसहनेन तद्वारणं **न मन्यते** तदा **तावतैव कार्यमिच्छति** तदा तथैव भवतीशेषः, **तथे**ति **यदी**त्यस्यानन्तरं "भवेत्" "तदे"तिपदद्वयं शेषः, यावदन्नदानादिकं परो मन्यते तावच् चेद् भवेत् तदा परार्थ एव भवेदित्यर्थः, **केवलश्चे**दिति स्वार्थ एव चेदित्यर्थः, **निर्हेतुश्चे**दित्यादिना अधर्मेपि त्रैविध्यं विवृतम् ॥ ३२½ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

अथ गोपैः परिवृत इत्यस्याभासे **विद्यां प्रथमपर्वरूपा**मिति "वैराग्यं सांङ्ख्ययोगौ च तपो भक्तिश्च केशवे पञ्चपर्वेतियया विद्वान् हरिं विशे'दितिवाक्ये **वैराग्यं प्रथममुक्तः प्रथमपर्वरूपा**मित्यस्य वैराग्यरूपामित्यर्थो ज्ञेयः, वैराग्ये जाते परोपकारार्थता फलिष्यति ॥ २९½ ॥ **निदाघार्कातप** इत्यत्र **व्रजजातापेक्षया वनजाता** एवेत्यस्यार्थष्टिप्पण्यां पक्षद्वयेन स्फुटमुक्तः ॥ ३०½ ॥ **हे कृष्ण स्तोके**त्यस्याभासे **अत्रैकादश मुख्याधिकारिणो गोपा** इति **कृष्ण**सञ्ज्ञकगोपादयो वरूथपान्ता एकादशेत्यर्थः, **इन्द्रियाधिष्ठातृरूपा** इति निरोध्यभक्तानामेकादशे**न्द्रियाणामधिष्ठातृरूपा** इत्यर्थः, 'भुमावुत्तारितं सर्वं वैकुण्ठ'मिति कृष्णोपनिषत्सु कृष्णावतारपरिकरस्य वैकुण्ठस्थत्वोक्तेरेते सखायो वैकुण्ठवासिनो व्रजस्थनिरोध्यभक्तानामेकादशेन्द्रियाधिष्ठातारो भगवता सहैवावतीर्णा इतिबोध्यं, व्रजस्थानामलौकिकत्वेन प्रपञ्चातीतत्वात् तदिन्द्रियाधिष्ठातृता प्रपञ्चातीतवैकुण्ठस्थपरिकरभूतानामेवोचितेति ।३१½। **परार्थैकान्तजीवना**नित्यत्र **अन्ते धर्म** इत्यादेरर्थष्टिप्पण्यां स्फुटः, वातवर्षेत्यत्र **सा वृद्धिः परेच्छयैव यदि च परो वृद्धि न मन्यते तावतैव दारुणा कार्यमिच्छती**ति **सा** वृक्षाणां **वृद्धिः परेच्छयैव परस्य** रथकारादे**रिच्छया** भवति, तदेव स्पष्टयन्ति यदीत्यादिना, **परः** काष्ठाद्याकाङ्क्षी **वृद्धिर्न मन्यते** नेच्छति किन्तु सूक्ष्मस्यैव वृक्षस्य छेदनमिच्छति तदा वृद्धिर्न भवत्यतो वृक्ष**वृद्धिः परेच्छयै**वेत्यर्थः, **उभयार्थश्चे**ति स्वार्थत्वपरार्थत्वोभयविशिष्टश्चेदित्यर्थः, **निर्हेतुश्चे**दिति एतस्यार्थष्टिप्पण्यां स्फुटः,

आद्यश्चतुर्णामिति चतुर्णां **मध्ये** इति टिप्पण्यां, चतुर्णां **वातवर्षातप**हिमानां मध्ये **आद्यो** वातः वर्षातपहिमानां **सहकारी** अतो वर्षापि वातेन सहकृता पीडयति, एवं ग्रीष्मे आतपः शीतकाले हिमं चेति वातस्य सहकारित्वम् ।। ३२½ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथेति कालान्तरं लीलान्तरं च ज्ञापयति । न चेयं तद्दिनलीला, 'निदाघार्कातपे तिग्मे' इति ज्ञापकात् पूर्वं हेमन्तस्योक्तत्वात् ।। गोपैः परिवृतः सहाग्रजश्च भगवान् देवकीसुतः कृष्णो गाश्चारयन् वृन्दावनाद्दूरं गत इत्यन्वयः ।। २९ ।। तिग्मे तीक्ष्णे निदाघार्कातपे स्वाभिः छायाभिरात्मनः स्वस्य आतपत्रायितान् छत्राकारेण स्थितान् वृक्षान् वीक्ष्य भगवान् व्रजौकसो गोपान् प्रत्याहेत्यन्वयः ।। ३० ।। तत्र गोपांस्तत्तन्नाम्ना सम्बोधयति—'हे स्तोक कृष्ण !' इत्यादिना ।। ३१ ।। एतान् महाभागान् वृक्षान् पश्यत । 'कथमेषां महाभागत्वम् ?' तत्राह—परार्थमेव निश्चयेन जीवितं येषां तान् । एतदेव स्पष्टयति—वातेति । स्वयं वातादीन् सहन्तः सहमाना अपि नोऽस्माकं वातादीन् वारयन्तीति ॥ ३२ ।।

अन्वितार्थप्रकाशिका

अथेति ।। अथ हेमन्तादिऋतुत्रयात्परं ग्रीष्मे आगते गोपैः परिवृतः सहाग्रजश्च भगवान् देवकीसुतः कृष्णो गाश्चारयन् वृन्दावनाद्दूरङ्गतः काम्यकवने गाश्चारयित्वा गाश्चारयित्वा गवां जलपानार्थं व्रजोत्तरभागे यमुनां गतः । तच्च मध्याह्ने व्रजादानेयभोज्यवञ्चनार्थम् तदपि यज्ञपत्नीनांमनुग्रहार्थम् ।। २९ ।। निदाघेति ।। तिग्मे अत्युष्णे निदाघार्कस्यातपे स्वाभिः छायाभिरात्मनः स्वस्य आतपत्रायितान् छत्राकारेण स्थितान् वृक्षान् वीक्ष्य भगवान् व्रजौकसो गोपान् प्रत्याह स्म ।। ३० ।। हे स्तोकेति ।। हे स्तोक कृष्ण इत्यादि दश संबोधनानि । अत्र स्तोककृष्णादयोऽष्टावष्टसु दिक्षु कृष्णरक्षणे स्थिताः । देवप्रस्थवरूथपौ छत्रधारकवर्त्मशोधकौ एकादशो भद्रसेनस्तु गोपसेनाध्यक्षः सर्वविक्षकस्तदा दूरे स्थित इति ।। ३१ ।। वक्ष्यमाणानां यज्ञस्थविप्राणां दौष्ट्यमभिप्रेत्य वृक्षान् स्तौति—पश्यतेति ।। परार्थमेवैकान्तेन निश्चयेन जीवितं येषां तान् एतान् महाभागान् वृक्षात् यूयं पश्यत एते स्वयं वातवर्षातपहिमान् । पुंस्त्वमार्षम् । सहन्तोऽपि नोऽस्माकं वातादीन् वारयन्ति ।। ३२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तिग्मे तीक्ष्णे निदाघस्य आगामिग्रीष्मसूर्यतापे आत्मनः स्वस्य छत्रवदाचरितान् वीक्ष्य गोपानाह ।।३०–३१।। वात्तवर्षातपहिमान् स्वयं सहंतो नोऽस्माकं वातादीन्निवारयंति तानेतान् परार्थमेव एकांतेनावश्यकतया जीवनं येषां तान् द्रुमान् ।। ३२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चरितान्तरमाह ।। अथेति ।। अथ कदाचित्, सहाग्रजो बलभद्रसहितः, गोपैः परिवृतः संवेष्टितः, देवकीसुतः भगवान् कृष्णः, गाः चारयन् सन्, वृन्दावनात् दूरं गतः ॥ २९ ॥ निदाघेति । तिग्मे तीक्ष्णे, निदाघार्कस्य ग्रैष्मार्कस्यातपस्तस्मिन्, आत्मनः स्वस्य, स्वाभिः छायाभिः, आतपत्रायितान् आतपत्रवदाचरितान्, द्रुमांस्तरून्, वीक्ष्यावलोक्य, व्रजौकसो गोपान् प्रति, कृष्णः आह ।। ३० ।। यदाह तदेवाह पञ्चभिः । हे स्तोककृष्णेति । हे स्तोककृष्ण, स्ताककृष्णाख्यः कश्चिद्गोपालबालकः । हे अंशो, हे श्रीदामन्, हे सुबल, हे अर्जुन, हे विशाल, हे ऋषभ, हे तेजस्विन्, हे देवप्रस्थ, हे वरूथप ।। ३१ ।। पश्यतेति । परार्थं परोपकारार्थमेवैकान्तं नियतं जीवितं येषां तान्, अत एव महाभागान् एतान्, द्रुमान् पश्यत । स्वयं वातास्तीव्रवायवश्च वर्षं धारासंपातेन मेघप्रवर्षणं च आतपश्च हिमश्च तान्, सहन्तः सन्तः, नोऽस्माकं, तान् वातादीन्, वारयन्ति । हिमानिति पुंस्त्वमार्षम् ।। ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अथ गोपैरिति : १०.२२.२९.

भवेयुर्ये येऽस्यां भुवि किल परानन्दफलदव्रतास्तेऽनुग्राह्या स्वयमभिमुखे नैव हि मया ।
इतीव श्रीजानिर्युवतिविहितानुग्रहविधिर्यमौ दूरं तादृक् तरुवरकृपानुग्रहकृते ।। ८१ ।।

कृष्णप्रिया

राजन् ! अब भगवान की और लीला सुनिए ! एक दिन श्रीदेवकीनन्दनजी, बड़े भैया श्रीबलराम और गोपवृन्द के साथ गौओं को चराते हुए श्रीवृन्दावन से दूर निकल गए ।। २९ ।। उष्णकाल था, सूर्य की किरण ज्यादातर तीव्र हो रही थी । उस अवसर सघन वनराजि राजीवलोचन भगवान श्रीकृष्ण के उपर शीतल छाया से शैत्य प्रदान कर रही थी । उन तरुवरों को देख भगवान् श्रीकृष्ण ने व्रजकुमारों से कहा ॥ ३० ॥ हे कृष्ण ! हे कृष्ण ! हे अंसु ! हे श्रीदामा ! हे सुबल ! हे अर्जुन ! हे विशाल !

हे ऋषभ ! हे तेजस्वी ! हे देवप्रस्थ ! हे वरूथप ! हे मित्रो ! सुनो !……भगवान् के ये ग्यारह सखा हैं। ये सब भगवान् के सेवक और इन्द्रियों के अधिष्ठाता है। कृष्ण वाणी का, स्तोक रस का, अंसु घ्राण का, श्रीदामा नेत्र का, सुबल भुजाओं का, अर्जुन कानो का, विशाल त्वचा का, ऋषभ पैरों का, तेजस्वी पचाने का, देवप्रस्थ उपस्थ का और वरूथप मन का, ये ग्यारह भगवान के सेवक थे ॥ ३१ ॥ प्रिय मित्रो ! इन परम भागवत बडभागी तरुवरों को देखो, इनका जीवन केवल परोपकार के लिए ही है। ये स्वयं आँधी, वर्षा, धूप, और पाला-हिम आदि सहकर उन आँधी आदि सब उपद्रवों से हम सबकी रक्षा करते हैं ॥ ३२ ॥

अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् । सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥ ३३ ॥
पत्रपुष्पफलच्छायामूलवल्कलदारुभिः । गन्धनिर्यासभस्मास्थितोक्मैः[1] कामान् वितन्वते ॥ ३४ ॥
एतावज्जन्मसाफल्यं[2] देहिनामिह देहिषु । प्राणैरर्थैर्धिया वाचा श्रेय[3] एवाचरेत् सदा ॥ ३५ ॥
इति प्रवालस्तबकफलपुष्पदलोत्करैः[4] । तरूणां [5]नम्रशाखानां मध्येन यमुनां गतः ॥ ३६ ॥

कर्वमक्षमा

अन्वयः—अहो ! एषाम्, सर्वप्राणिउपजीवनम् जन्म वरम्, येषाम् अर्थिनः सुजनस्य इव विमुखा न एव यान्ति ॥ ३३ ॥ पत्र-पुष्प-फल च्छाया मूल वल्कल दारुभिः, गन्ध निर्यास भस्म अस्थि तोक्मैः कामान् वितन्वते ॥ ३४ ॥ देहिषु प्राणैः अर्थैः धिया च वाचा सदा श्रेयः एव आचरेत्, एतावत् देहिनाम् जन्मसाफल्यम् इति ॥ ३५ ॥ इति प्रवाल स्तबक फल पुष्प दल उत्करैः, नम्रशाखानाम् तरूणाम् मध्येन यमुनाम् गतः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सुजनस्य कृपालोरर्थिन इव ॥ ३३ ॥ निर्यासो घनरसः । तोक्माः पल्लवाद्यंकुराः ॥ ३४–३५ ॥ इत्यभिनंदन् प्रवालादीनां समूहैर्नतशाखानां तरूणां मध्येन यमुनां प्राप्तः ॥ ३६–३७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अर्थिनः कार्यार्थिनः ॥ ३३ ॥ "तोक्मं कर्णमले पुंसि हरिते च यवे हये । स्वरेंकुरे" इति धरणिः ॥ ३४ ॥ यत्सदा देहिषु श्रेयआचरणमेतावदिति संबंधः । श्रेयः शुभं तस्याचरणम् "श्रेयो मुक्तौ शुभे धर्मेतिप्रशस्ते तु वाच्यवत्" इति मेदिनी । प्राणैरिति। प्राणानादरेण कर्मभिरित्यर्थः । धिया सदुपायचिंतनादिना, वाचा उपदेशादिरूपया एषां समुच्चयशक्त्यभावे परपरोपादानं च ज्ञेयम् ॥ ३५ ॥ उत्करः समूहः "समूहे ऊर्द्ध्वहस्ते च देशे करविवर्जिते । उत्करः शौर्यसंपन्न उदारे" इति धरणिः । स्तबकाः पुष्पगुच्छाः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न च केवलं वातादिदुःखात् रक्षन्ति सर्वार्थं च सम्पादयन्तीत्याह—अहो इति द्वाभ्याम् । अहो इति विस्मये हर्षे वा वरं सर्वतः श्रेष्ठं कुतः सर्वेषां प्राणिनाम् उपजीवनं जीविकाहेतुः जीविनामिति पाठे स एवार्थः हेतुणिजन्ताण्णिनिः तदेवाह—येषां येभ्यो विमुखा न यान्ति जनाः वै प्रसिद्धौ ॥ ३३ ॥ तदेवाह—पत्रेति । गन्धः रसादिभवः अस्थिसारांशः ॥ ३४ ॥ फलितमाह—एतावदिति । देहिनां विचित्रबहुलदेहभृतां कर्तृभूतानां प्राणादिभिः कृत्वा देहिषु जीवेषु श्रेय आचरणं यत् पाठान्तरे श्रेय एवाचरेत् सदेति यत् "एतावत् जन्मसाफल्यम्" इति तत्र प्राणैरिति प्राणानादरेण कर्मभिरित्यर्थः । धिया सदुपायचिन्तादिना वाचा उपदेशादिरूपया एषां समुच्चयः शक्त्यभावे परपरोपादानं च ज्ञेयम् ॥ ३५ ॥ स्तबकाः पुष्पाणां गुच्छकाः मध्येन मध्यवर्त्तिवर्त्मनेत्यर्थः । एवं तिग्मतापाऽप्राप्तिः ॥ ३६ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न च केवलं वातादिदुःखाद्रक्षन्ति, सर्व्वार्थंश्च सम्पादयन्तीत्याह – अहो इति द्वाभ्याम् । विस्मये हर्षे वा । वरं सर्व्वतः श्रेष्ठम् । कुतः ? सर्व्वेषां प्राणिनामुपजीवनं जीविका यस्मात्तत् । यद्वा, अत्यन्ताभेदविवक्षया उपजीवनमेव तद्रूपमित्यर्थः; जीविनामिति पाठेऽपि स एवार्थः । तदेवाह – येषां येभ्यो विमुखा न यान्ति जनाः, वै प्रसिद्धौ, सुजनस्य कृपालोरर्थिन इवेति याचकानामेवासौ कामं पूरयेत्, एते च अयाचकानामपीति ध्वनितम् ॥३३॥ तदेवाह—पत्रेति । कामान् इच्छाः, वितन्वते विस्तरेण

---

[1] स्थितोकैः—वीर. ; स्थिभोगैः—गो. प्रे. टी. । [2] सामग्र्यं—गो. प्रे टी. । [3] श्रेय आचरणं सदा—वीर. विज. । [4] मूल—विज. । [5] रम्य—वीर. ।

परिपूरयन्तीत्यर्थः। मूलमौषधाद्यर्थं जटा, न तु वृक्षाधारः, तं विना नाशापत्तेः; गन्धः रसादिभवः, भस्म दार्व्वादिजमंगारादि, अस्थि सारांशः; यद्वा, दारु इन्धनं स्वयंशुष्यदुपशाखादिभवं बाह्यम्, अस्थि च विदार्य्यमान्तरं काष्ठम्, किंवा स्तम्भाद्यर्थं वृहच्छाखादिकमिति भेदः। तत्र केषाञ्चित् पत्रैः, केषाञ्चित् पुष्पैः, केषाञ्चिदुभयैः, केषाञ्चन तैस्त्रिभिः, केषामपि बहुभिः, केषाञ्चिच्च सर्व्वैरेवेति विवेचनीयम्। यद्वा, पत्रादीनामेकतमेनैव कामान् सर्व्वान् वितन्वते, तेषां कस्मिंश्चित् प्राप्ते सति तत एव सर्व्वाभीष्टसिद्धेः। एवं कल्पद्रुमवन्माहात्म्यं दर्शितम् ॥ ३४ ॥ फलितमाह एतावदिति। देहिनां विचित्रबहुलदेहभूतां प्राणादिभिः कृत्वा देहिषु जीवेषु सदा श्रेयस आचरणं यत्, तत्र प्राणैरिति प्राणानादरेण कर्म्मभिरित्यर्थः। यद्वा, दधीच्यादिवत् प्राणार्पणैरपीत्यर्थः। ततश्च कर्म्मभिरिति स्वत एव सिध्येत्, धिया सदुपायचिन्तनादिना; वाचा उपदेशादिरूपया, एषां समुच्चयेन, किंवा, पूर्व्वपूर्व्वत्राशक्त्या परपरेणेति ज्ञेयम् ॥ ३५ ॥ स्तबकाः पुष्पाणां पत्राणाञ्च गुच्छाः, पुष्पाणि दलानि च केवलानि, मध्येन मध्यवर्त्तिवर्त्मनेत्यर्थः। एवं तिग्मतापप्राप्तिस्तादृशवृक्षवर्गतो दूरगतिश्च सूचिता, अतएव क्षुधार्त्ता इति वक्ष्यति; अन्यथा तेषां फलादिनैव क्षुच्छान्तिसम्भवात्, अतएवानुपभोज्यफलादिकैरशोकतरुभिर्मण्डित इति ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अहो सर्वप्राणिन उपजीवयतीति तथा तदेषां द्रुमाणां जन्म वरं मनुष्यजन्मनः श्रेष्ठं किञ्च सुजनस्य वदान्यस्येव येषामर्थिनो विमुखा न यान्ति किन्तु छायाफलादिभिः सत्कृता एव भवन्ति ॥ ३३ ॥ तदेवाह–पत्रेति। पत्रादिभिरर्थिनां कामान्वितन्वते विस्तरेण ददत इत्यर्थः। निर्यासः घनीभूतरसः अस्थीनि शान्ताग्नयोङ्गाराः तोकाः पल्लवाद्यङ्कुराः ॥ ३४ ॥ अनुपकारिणां जन्म वृथैवेत्यभिप्रयन्नाह—एतावदिति। इह लोके देहिषु मध्ये देहिनां जन्मनः साफल्यमेतावदेव कियत् प्राणादिभिः श्रेय आचरणं भूतहितकरणमित्येतावत् ॥३५॥ इतीत्थमभिनन्दन् प्रवालादीनामुत्करैः समूहैरम्याः शाखाः येषां तेषां तरूणां मध्येन यमुनां गतः ॥३६॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सुजनस्य जन्मनः साफल्यमेतावत् अर्थिनो येषां विमुखा न यान्तीति ये अस्थासारेण तोक्मैः अङ्कुरैः साफल्यमेतावत् ॥ ३३–३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् द्वाविंशोऽध्यायः ॥ २२ ॥
(विजयध्वजरीत्या विंशोऽध्यायः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अस्थि सारांशः ॥ ३५–३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सुजनस्य आतिथेयस्य अर्थिनो वाचकाः ॥ ३३ ॥ निर्यासो निबिडरसः अस्थिसारांशः तोक्माः पल्लवाद्यङ्कुराः ॥ ३४ ॥ जन्मनः साफल्यमेतावदेव ॥ ३५ ॥ प्रवालादिभिर्नतशाखानाम् ॥ ३६–३८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। द्वाविंशो दशमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ २२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वान् प्राणिनः उपजीवयतीति सर्वप्राण्युपजीवनम् परोपकारित्वेन शोभनो जनः सुजनस्तस्यार्थिन इव येषामर्थिनो विमुखा नैव यान्ति ॥ ३३ ॥ पत्रादिभिरर्थिनां कामान् वितन्वते तत्र निर्य्यासोघनरसः अस्थीनि शान्ताग्नयोङ्गारा तोक्माः पल्लवाद्यङ्कुराः ॥ ३४ ॥ प्राणादिभिः देहिषु श्रेयस्तद्धितं सदाचरेत् एतावद्देहिनां जन्मसाफल्यम् ॥ ३५ ॥ इत्येवं वदन् प्रवालाद्युत्करैः समूहैर्नम्रशाखानां मध्येन मध्यतः यमुनां गतः प्रातः ॥ ३६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

सुजनस्यातिथिभक्तस्य येषां येभ्यः अर्थिनो याचकाः ॥ ३३ ॥ निर्यासः सान्द्रो रसः अस्थिसारांशः तोक्मा पल्लवाद्यङ्कुराः ॥ ३४–३५ ॥ जन्मनः साफल्यमेतावदेव प्राणादिभिः कृत्वा देहिषु जीवेषु श्रेय आचरणं यत् स्यात् प्रवालादिभिर्नतशाखानाम् ॥ ३६–३७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एषां वृक्षाणां सर्वप्राण्युपजीवनमिति जन्म वरं सुजनस्य समीपे आगता अर्थिनो यथा न विमुखा यान्ति तथाऽर्थिनो विमुखा न यान्ति फलादिभिः प्रीणयन्तीति तात्पर्यम्। क्यः पक्षिणो मुखं येषां ते विमुखाः पक्ष्यादयोऽर्थिनो निवृत्तिमन्तो न यान्ति फलं विना न गच्छन्तीत्यर्थः। विमुखा इत्यस्यावृत्तिर्वा ॥ ३३ ॥ तदेव देवो विशदयति ॥ यत्रेत्यादिना। निर्यासो हि द्रढिमरसस्तोकमाण्यङ्कुराः

शष्पाणि च । तोक्मानि चेत्यष्टमपञ्चकाष्टमखण्डव्याकृतौ तोकमाण्यङ्कुरा इत्युक्तेः । कामानपेक्षिताम्वितन्वते कुर्वन्ति ददातीति यावत् ॥३४॥ देहिष्वितरेषु प्राणिषु प्राणैस्तद्व्ययेन । दध्यङादिवत् अर्थै रन्तिदेवादिवद्धिया वाचा विदुरादिवच्छ्रेय आचरणं श्रेयसः करणमिह नृलोके देहिनां जन्मसाफल्यम् ॥ ३५ ॥ इत्येतावदेवेति गोपान्प्रति तद्भाग्यं वदन्भगवान् । प्रबालस्तबकफलमूलदलोत्करैर्नम्रशाखानां तरूणां मध्येन यमुनां गतः सत् ॥ ३६ ॥

श्रीसुबोधिनी

एवं धर्मं निरूप्य परोपकारलक्षणमर्थरूपं निरूपयत्यहो इति, **एषामेव वरं जन्म** देहग्रहणानन्तरजीवितं येषां न स्वार्थापेक्षा, तदुपपादयति **सुजनस्येवे**तिदृष्टान्तेन, **अहो** इत्याश्चर्यं, एतादृशमपि **जन्म** जायत इति, यत्र स्वकार्यं नास्त्येव भगवतोप्यवतारे लीला भवति यद्यपि सा परार्था तथापि लोकप्रसिद्धचा स्वार्थापि भवत्यतो भगवतोप्याश्चर्यं, केवलं कर्मफलभोगे मण्डूकानामिव परार्थता न स्यादत **एषामेव जन्म वरं**, तत्र हेतुः **सर्वप्राणिनामुपजीवनं** यस्मिन्निति, **ये हि सर्वान् जीवयन्ति ते सफलजीवनाः**, तद् येन भवति तत् **सुजनेषु** प्रसिद्धं यथा **सतां गृहे समागतोर्थी याचको विद्यमानेर्थे विमुखो न गच्छति तादृशो दुर्लभ** इत्येकवचनं, **येषामिति** सर्वनाम्ना वृक्षाः सर्वे तद्विधा एवेत्यधिकं निरूपितं, **वै** निश्चयेन ग्रहीतुं योग्याः, तत्रार्थित्वे सम्पन्ने **विमुखा न** भवन्ति, अग्रेपि वीनां मुखे न प्रविशन्ति यदि दारूणि भवन्ति नापि कालमुखे पतन्ति यदि वृक्षभिक्षुका एव भवन्ति ।३३[१][२]॥ एवमर्थोत्तमतां निरूप्य कामोत्तमतां निरूपयन्नेतेषां कामजनितमपि सर्वं परार्थमेवेत्याह **पत्रे**ति, पत्राणि संयोगिद्रव्याणि यथा केशा दन्ताश्च तत्र पत्राणां सर्वोपयोगो न केशानां कथञ्चन, पुष्पाणि रजोरूपाणि तानि सर्वपुरुषार्थसाधकानि **स्त्रीणां** तु तासामप्यपकारजनकानि, फलानि पुत्रा इव, तेषामर्थे परमन्यान् घातयन्ति न तु तान् प्रयच्छन्ति, **छाया** गृहमिव न तत्र सर्वः प्रविशति प्रविष्टोपि तापयुक्तो भवति शीतवद् भयं च प्राप्नोति व्यसनानि च वृष्टिवत्, **मूलं** तेषां धर्म एव प्राणिनां धर्मे पशवो हन्यन्तेत्र तु मूलमन्येभ्यः, प्रयच्छन्त्यौषधार्थं, तथा **बल्कलानि** च परिच्छदा घटपटादय इव **दारूणि** काष्ठानि शुष्काणि, उपभुक्तशेषमपि नान्यस्मा उपकरोति स्त्रीशरीरादिषु तथा प्रसिद्धिः, **गन्धश्चन्दनादिषु** कीर्तिवत् प्रसिद्धनामानोपि नाम्नापि नोपकुर्वन्ति, **निर्यासस्तदन्तःसारो** वाक्यरूपः, **भस्म** तदभाववन् मृतोपि प्रेतवच् श्राद्धादिकारणाद् वापकरोत्येव, इदं तु क्षालनादावुपयुज्यते, **अस्थी**ङ्गालास्ते सर्वत्र तैजसेपूपकुर्वन्ति, एतेषां त्वस्थि न कस्याप्युपकरोति प्रत्युत दोषे निमित्ततामापाद्यते "नारं स्पष्ट्वे'त्यादौ, तोक्माः सूक्ष्मवृक्षाः शाखारूपा दासादिवत्, एवं सर्वैरेव सर्वेषां **कामान् वितन्वते** ॥ ३४[१][२] ॥ किञ्च न केवलं परार्थं कुर्वन्ति स्वार्थमपि किन्तु परार्थमेवातो मोक्षरूपा विरक्ता ज्ञानिनः पूर्णस्वार्था इति वक्तुमाहैतावदिति, **एतावद्धर्मवज् जन्म** तत् सफलमत **एतावदेव** वक्ष्यमाणरूपमेव **जन्मसाफल्यं, देहिनां** गृहीतदेहानां **देहिषु** गृहीतदेहेषु देहग्रहणं **भगवदिच्छया** स्वस्यान्येषामपि तत्र **न** स्वक्रिया काचित्, ततः संस्कारैः सिद्धे ज्ञाने यदि सर्वतुल्यता तदा न कोपि पुरुषार्थः, भगवान् पुनः सर्वार्थं सर्वं सृष्टवांस्ततः स्वयमपि सर्वं स्वकीयं सर्वार्थं कुर्यात् तदा भगवानिव भवेदित्यवतारतुल्यतया जन्म सफलं भवति नो चेत् प्रवाहतुल्य एव, परार्थमेव स्वमिति **स्वार्थता न** सम्भवत्येव, तदाह **प्राणैरर्थै**रिति, एते चत्वारः प्राणादयः सर्वपुरुषार्थोपयोगिनोपि धर्मादिषु प्रत्येकं स्वातन्त्र्येण क्लृप्ताः, अतः प्राणैर्यः, साध्यो धर्मस्तं परार्थमेव कुर्यात्, अर्थाः स्पष्टा एव, बुद्धिः कामरूपा सविषयत्वात्, वागुपदेशरूपा मोक्षदायिनी, एवं सर्वेषां चतुर्भिः सर्वपुरुषार्थाः साधनीयाः, एतदपि **सदा, इती**ति समाप्तिः, एवमुपदिश्येति नोक्तं पूर्ववत्, अन्यथैवं लीला न स्यात्, यथा भगवतः क्रिया वर्णितैवं वाक्यान्यप्युक्तानि ॥ ३५[१][२] ॥ ततो यत् कृतवांस्तदाह **इति प्रवाले**ति, तेषां परार्थत्वं यत् प्रसिद्धं तत् प्रदर्शयंस्तेषां **मध्येन** मार्गेण **यमुनां गत** इति**सम्बन्धः**, येषु वृक्षेषु पञ्चाङ्गानामुत्करा वर्तन्ते राशयः **प्रवालाः** कोमलपत्राणि **स्तबकाः** पुष्पाणां पत्राणां वा फलानि पुष्पाणि च **दलानि** च केवलानि तैः पञ्चविधैरपि समूहैर्नम्राः **शाखा** येषां, एतावदपि दत्वा विनीतास्तेषां मध्ये गमनं तद्धर्मसम्बन्धाय **यमुना**पि पुनरेतादृशधर्मवतीति तत्र **गतः** ॥ ३६[१][२] ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

विमुखा यान्ति नार्थिन इत्यत्र, **अग्रेपि वीना मुखे न प्रविशन्ती**त्यादि । अग्रेपि देहत्यागानन्तरमपीत्यर्थः । वीनां पक्षिणां गृध्रादीनां मुखानि भक्षणार्थं भवन्ति येषु ते विमुखास्तादृशाः सन्तो न यान्ति, दारुषु सत्सु देवस्य भस्मीभावत् । विशब्दस्य कालवाचकत्वेपि तथा । वृक्षमात्रभिक्षुकाः परमहंसाः ॥ ३३ ॥ **एतावज्जन्मेत्यत्र, यदि सर्वतुल्यतेति** । ज्ञाने जातेऽप्यज्ञवत्स्वार्थपरता चेत्तदा तथेत्यर्थः । अत्रैव एतावज्जन्मेत्यस्य विवरणे यथा पुमान् कुण्डलवान् कुण्डली भवति । न हि तत्र कुण्डलातिरिक्तं कुण्डलित्वमस्ति, तस्यैव विशेषणत्वात् तथात्रापीत्याशयेनाहुः **एतावदि**त्यादि ॥ ३५ ॥

इति एकोनविंशोऽध्यायः ॥ १९ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अहो इत्यत्र **तद्येनेति तत्** सफलजीवनत्वं **येन** सर्वोपजीवनेन भवतीत्यर्थः, **सर्वनाम्नेति** महासञ्ज्ञाकरणे अन्यर्थत्वाशयस्वीकारादितिभावः, **ग्रहीतुमिति** स्वसाधर्म्येणेतिशेषः ॥ ३३[१][२] ॥ **पत्रेत्यत्र शीतवदिति छाया** तापशीतवृष्टिनिवारिका भवति, गृहे

तु त्रयमपि जायते तत्र शीतस्थानीयं भयं वृष्टिस्थानीयानि व्यसनानि ॥ ३४½ ॥ **एतावदित्यत्र** सामान्यतो देहिनां मध्ये विशेषतो देहिषु गृहीतदेहेष्वित्यर्थः, विशेषं विवृण्वन्ति **देहग्रहणमिति**, **स्वस्यान्येषां** पुत्रादीनां च **देहग्रहणं** येषां **भगवदिच्छयैव** न तु स्वक्रियया स्वप्रारब्धेन तादृशेषु देहिविशेषेष्वेतावत्साफल्यमित्यर्थः, **तत इति** भगवदिच्छया देहग्रहणात् सिद्धेपि ज्ञाने जन्मसाफल्यं वक्ष्यमाणधर्मेणैव भवतीत्यर्थः, ॥ ३५½ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

विमुखा यान्ति नार्थिन इत्यत्र **अग्रेऽपि वीनां मुख** इत्यादेष्टिप्पण्यां स्फुटोर्थः ॥ ३३½ ॥ **इति प्रवालेत्यत्र पञ्चाङ्गाना**मिति प्रवालस्तबकफलपुष्पदलानामित्यर्थः ॥ ३६½ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

परोपकारिणां जन्म श्रेष्ठं भवति, तत्राप्येषां तु जन्म अहो आश्चर्यं वरं श्रेष्ठम् । तत्र हेतुमुपकारमाह–सर्वप्राणिनामुपजीवनं जीविकासाधनमिति । एतदेव सदृष्टान्तमाह—सुजनस्येति । यथा सुजनस्य कृपालोर्गृहे आगता अर्थिनो जना विमुखा निष्फला न यान्ति, तथा येषां वृक्षाणां स्थाने आगता अपि जना विमुखा नैव यान्तीत्यर्थः । 'वै' अवधारणे ॥ ३३ ॥ एतदेव स्पष्टयति–पत्रादिभिर्जनानां कामान् मनोरथान् वितन्वते पूरयन्ति । निर्यासो घनरसः, अस्थि काष्ठम्, तोक्माः पल्लवाङ्कुराः ॥ ३४ ॥ यत् सदा प्राणादिभिर्देहिषु श्रेय एवाचरेत् । एतावतैव इह संसारे देहिनां जन्मन साफल्यमित्यन्वयः ॥ प्राणैः प्राणानामादरणकर्मभिः । अर्थैर्धनादिभिः । धिया हितचिन्तनेन । वाचा हितोपायोपदेशेन ॥ ३५ ॥ इत्येवं वृक्षानभिनन्दन् भगवान् प्रवालादीनामुत्करैः समूहैर्नम्रा शाखा येषां तेषां तरूणां मध्येन मध्यवर्तिमार्गेण यमुनां गतः । तत्र प्रवालाः कोमलपत्राणि, स्तवकाः पुष्पगुच्छाः, दलानि पुष्पपत्राणि ॥ ३६ ॥

अन्वितार्थप्रकाशिका

अहो इति ॥ अहो सर्वप्राणिनामुपजीवनं जीवनसाधनमेषां जन्म वरम् । जीविनामिति पाठेण्यन्ताण्णिनिः । यथा सुजनस्य कृपालोर्गृहे आगताः अर्थिनो जना विमुखा निष्फला न यान्ति तथा एषां वृक्षाणां स्थाने आगता जना विमुखा नैव यान्ति ॥ ३३ ॥ पत्रेति ॥ एते वृक्षाः पत्रपुष्पादिभिर्जनानां कामान् मनोरथान् वितन्वते पूरयन्ति । निर्यासो घनीभूतो रसः अस्थिसारांशः तोक्माः पल्लवाद्यङ्कुराः ॥ ३४ ॥ एतावदिति ॥ यत्सदा प्राणैः अर्थैः धिया हितचिन्तनेन वाचा च देहिषु श्रेय एवाचरेत् । एतावत् एवेह संसारे देहिनां जन्मनः साफल्यम् ॥ ३५ ॥ इतीति ॥ इत्येवं वृक्षाभिनन्दन् भगवान् प्रवालादीनामुत्करैः समुहैर्नम्राः शाखा येषां तेषां तरूणां मध्येन । एतेन आतपाभावः सूचितः । यमुनां गतः तत्र प्रवालाः पल्लवाः स्तबकाः पुष्पादिगुच्छाः फलपुष्पाणि तथा दलानि पुष्पपत्राणि ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एषां वृक्षाणां उपजीवनं जीवनहेतुः येषामर्थिनः सुजनस्य याचका इव विमुखा अप्राप्तदाना न यांति ॥ ३३ ॥ पत्रादिभिर्जनानां कामानिष्टवसूनि तरवो वितन्वते निर्यासः शुष्करसोऽस्थीनि स्थूलकाष्ठानि अष्ठीति पाठे बीजानि तोक्मानवांकुराः ॥ ३४ ॥ देहिषु प्राणादिभिः श्रेयो हितमेव ॥ ३५ ॥ इति प्रशंसां कुर्वंस्तेषां मध्यगमनेन यमुनां प्राप्तः उत्करैः समूहैः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अहो इति ॥ अहो सर्वान् प्राणिनः उपजीवयतीति तत्, एषामेतेषां द्रुमाणां, जन्म वरं मनुष्यजन्मनः श्रेष्ठं, किं च सुजनस्य वदान्यस्य इव, येषां अर्थिनः विमुखाः, न यान्ति वै । किं तु छायाफलादिभिः सत्कृताः सन्त एव यान्ति ॥ ३३ ॥ तदेवाह ॥ पत्रेति ॥ पत्राणि च पुष्पाणि च फलानि च छाया च मूलानि च वल्कलानि च दारूणि काष्ठानि च तैः, गन्धश्च निर्यासो घनरसश्च भस्म च अष्टिर्बीजं च तोक्माः पल्लवाद्यङ्कुराश्च तैः, अर्थिनां कामान्, वितन्वते ॥ ३४ अनुपकारिणां जन्म वृथैवेति समभिप्रयन्नाह ॥ एतावदिति ॥ इह लोके, देहिषु मध्ये, देहिनां जन्मनः सफलत्वं एतावदेव । तत् कियत् । प्राणैः, अर्थैर्धनैः, धिया बुद्धया, वाचा वाण्या, सदा देहिनां श्रेयः एव चाचरेत्, एतावदेव ॥ ३५ ॥ इतीति ॥ इतीत्थं, अभिनन्दनकृष्णः, प्रवालानि च स्तबकाश्च फलानि च पुष्पाणि च दलानि च तेषामुत्कराः समूहाः तैः, नम्रशाखानां तरूणां मध्येन, यमुनां गतः ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अहो एषां वरं जन्मेतिः १०.२२.३३.

स्वतः सोढ्वा क्लेशानहरह-रनेकानुपगतान् भृशं येऽन्यत्राणुव्रत-विरचित-स्वाखिलप्रदाः ।
तदीयः संसारोऽप्यमृतमधुरस्तज्जनिरपि जगन्नाथस्यापि स्तुतिपदमिति व्यक्तमभवत् ॥ ८२ ॥

ये स्वैश्चर्मभिरम्बरं किसलयैः शय्यां सुमैरर्हणां छायाभिर्विततातपत्र-ममृतास्वादैः फलैर्भोजनम् ।
निस्तन्द्रं परिकल्प्य नित्यमतिथीनभ्यागतानध्वगान् सत्कुर्वन्ति सदागमप्रवचनं तेष्वच्युतस्योचितम् ॥ ८३ ॥

कर्णश्चर्म शिविः पलं बलिरलं कायं कलेशः कलामब्दोजीवनमर्थिनेऽस्थि सकलं प्रादाद् दधीचिः पुरा ।
जातास्ते भुवि तावतैव कविसद्वाग्वर्ण्यं-वादान्यकाः सर्वस्वार्पणकारिणस्तु तरवस्तद्युक्त-मीशस्तुताः ॥ ८४ ॥

अतिथिसत्कृति-तुल्यमिहापरं मम मुदावहमस्ति न साधनम् ।
विशदयन्निति वाऽऽस निजाशयं स सकृपः स्तुत-तरकृतसत्कृतिः ॥ ८५ ॥

यावत्स्वीयपदार्थजातमपि यैरन्योपकारव्रतैराकल्प्यार्थिकृते नराः कुजनुषोऽपि स्युः स्मृतौ ते मम ।
इत्थं श्रीजगदीश्वरो विशदयन्स्वान् स्वाशयं प्रायशश्चक्रेऽन्येष्वपि सत्सु वस्तुषु तरुद्विवर्णनं प्रेमतः ॥ ८६ ॥

दृष्टाश्चेददिदानशौण्डनिचया निस्तन्द्रदानोद्यताः स्तव्या भूरितरं परोपकृतये स्पृह्यामनाङ्गस्वतः ।
इत्थं निःस्पृहसज्जनानुचरणं श्रीशो निजान् व्यञ्जयंस्तुष्टाव द्रुमराजराजिमभितो जग्राह नैकं फलम् ॥ ८७ ॥
न तत्र प्रभुणाऽन्यैर्वाऽऽग्राहि भुक्तं च तत्फलम् । इत्यर्थो व्यक्त एवास्मिन्नग्रे क्षुद्बोधकोक्तितः ॥ ८८ ॥ (युग्मम्)

कृष्णप्रिया

अहो ! वृक्ष देह धारण किये हुवे इन वैष्णववरों का जन्म धन्य है सर्व श्रेष्ठ है । क्योंकि इनका जीवन सर्व प्राणियों को जीवन प्रदान के लिए ही है । देखो ! मेरे प्यारे मित्र ! सज्जन पुरुष के पास जाकर कोई भी व्यक्ति खाली हाथ नहीं लौटता कोई भी याचक विमुख नहीं लौटते, वैसे ही इनके पास जाकर कोई भी प्राणी कुछ न कुछ पाकर ही लौटता है यही वृक्षों की धन्यता है ॥ ३३ ॥ देखो ! प्यारे दोस्त ! ये तरुवर परमोदार दानी है । वे अपने बारह अङ्गों से सद्गृहस्थ की तरह परोपकार करते हैं । सुनो ? पत्र, पुष्प, फल, छाया, मूलजड़, छाल, काष्ठ, गन्ध, गोन्द, भस्म, कोयला और शाखा-अङ्कुर पल्लव आदि से सर्व के मनोरथों को पूर्ण करते हैं ॥ ३४ ॥ सुनो मेरे मित्र ! इस संसार में देह धारियों में उन ही देह धारियों की यही जीवन सफलता है कि जहां तक हो सके अपने प्राणों से, धन से पदार्थों से, बुद्धि से और वाणी विवेक व्यवहार से निरंतर दूसरों का कल्याण करते रहे ॥ ३५ ॥ राजन् ! भगवान् श्रीकृष्ण इस प्रकार वैष्णववर वृक्षों का यशोगान गाते गाते, नूतन पल्लवों के गुच्छ, फल, फूल और दलों के अपार ऐश्वर्यों से जिनकी शाखाएँ-डालियाँ भूमि पर्यन्त झुक रही थी, उन परोपकारी वृक्षों के नीचे नीचे चलते भगवान् यमुना तट पर पहुँचे ॥ ३६ ॥

तत्र गाः पाययित्वापः सुमृष्टाः शीतलाः शिवाः । ततो नृप स्वयं गोपा कामं स्वादु पपुर्जलम् ॥ ३७ ॥
तस्या उपवने कामं चारयन्तः पशून् नृप । कृष्णरामावुपागम्य[1] क्षुधार्ता इदमब्रुवन् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे[2] दशमस्कन्धे गोपीवस्त्रापहारो नाम [3]द्वाविंशोऽध्यायः ॥ २२ ॥

कर्दमक्षमा

अन्वयः—नृप !, तत्र गाः सुमृष्टाः शिवाः शीतलाः अपः पाययित्वा ततः च गोपाः स्वयम् स्वादु जलम् कामम् पपुः ।३७। हे नृप ! तस्याः उपवने पशून् कामं चारयन्तः क्षुधार्ताः कृष्णरामौ उपागम्य इदम् अब्रुवन् ॥ ३८ ॥

इति द्वाविंशोऽध्यायः समाप्तः ॥ २२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कुमारिकाभ्यः पूर्वमेव तन्नर्म कुलतया अगृहीतभोज्यानामेव निर्गमात्क्षुधार्ता इत्युक्तम् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायां द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र यमुनायाम् । ततः गोजलपानानंतरम् ॥ ३७ ॥ अत्र केचिदित्यादिश्लोकः क्वचिदधिकः । तस्याः कालिंद्याः । नित्यं तु गृहीतभोज्या एव वनमायांति तद्दिने कुमारिकाहास्यकरणार्थं विस्मृतभोज्या एवागता इति क्षुधार्त्ता इत्यस्य तात्पर्यम् ॥ ३८ ॥

इति श्रीमद्भागवतंभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे द्वाविंशोऽध्यायः ॥ २२ ॥

---

१. वुपामन्त्र्य—वीर. । २. पारमहंस्यां संहितायां दशमस्कन्धे पूर्वार्धे—गो. प्रे. पु. । ३. विंशोऽध्यायः—विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र तस्यां सुमृष्टा अतिस्वच्छाः शिवाः आरोग्यकरत्वेन पुण्यप्रदत्वेन च मङ्गलकराः ततस्तदनन्तरमेव यतो गोपाः तादृशधर्मा एव हे नृपेति तव प्रजापालनवत्तेषामपि गोपालनं धर्मं इति भावः स्वादु बहु पशुसङ्घैस्तत् क्षोभेऽपि सुमृष्टत्वादिगुणयुक्तमेवेत्यर्थः। इति जलमाहात्म्यमुक्तम् अतः कामं यथेष्टम् अत एव पुनर्जलपदं सार्थकम् ॥ ३७ ॥ उपवने प्रायोऽशोकतरुमण्डित इति ज्ञेयम्। अग्रे तथोक्तेः अतः फलाद्यभावोऽपि सूचितः कामं पशूनामिच्छानुसारेणेत्यर्थः। क्षुधार्त्ता इति श्रीरामकृष्णयोरपि क्षुदनुमानेन विशेषार्त्तिर्ज्ञेया निजतद्दुल्लेखस्तु प्रेमपरिपाटी याज्ञिकान् प्रति तु वक्ष्यते "रामाच्युतौ वो लषतो बुभुक्षितौ" इति दिनान्तरवत् तद्दिने दध्योदनाद्यनानयनं च केनचिन्मिषेण यज्ञपत्नीनामनुग्रहाय श्रीभगवतैव घटितं यासाम् उत्कर्षार्थमेव याज्ञिकानां निकर्षो दर्शयिष्यते तेषां तद्दर्शनार्थमेव वृक्षाः श्लाघिता इति ज्ञेयम्। उपसमीपे आगत्य वक्ष्यमाणार्थस्य गौरवाय इदं वक्ष्यमाणम् अत्रानवसरे ध्यायापातो वक्ष्माणलीलाविशेषस्मृत्या पूर्ववत् क्षणं श्रीबादरायणेः स्तब्धतया तत्कथाविच्छेदात् एवमन्यत्राप्यूह्यं हे नृपेति ! वक्ष्यमाणाश्चर्यलीलाश्रवणेऽप्यावधानार्थम् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वभावेन यमुनाया आपो मधुरा एव, तत्र च वृन्दावनसम्बन्धेन परममधुरा इत्यर्थः। शिवाः सुखकरीः मंगलरूपा वा, ततस्तदनन्तरमेव, यतो गोपाः स्वयमिति स्वसुखादपि तैर्गोसुखस्याधिकमननात्; यद्वा, स्वयं भगवान् गोपाश्च, यद्वा, स्वयमिति पात्रादिव्यवधानं विना अञ्जलिभिरित्यर्थः। ननु 'अपो नाञ्जलिना पिबेत्' इति निषेधः श्रूयते ? तत्राह—गोपा इति, तेषां तद्युज्यत एवेति भावः, विधिनिषेधानधीनत्वात्। हे नृपेति यथा तव प्रजापालनमेव मुख्यम्, तथा तेषां गोपालनमेव मुख्यमिति निजसुखानपेक्षया, पश्चात् तत्पानं युक्तमेवेति भावः। सुमृष्टा इत्याद्युक्त्या स्वादुत्वादौ सर्व्वस्मिन् गुणे सिद्धेऽपि पुनः स्वादुजलमित्युक्तिः। कामं यथेष्टं पपुरित्यत्र हेतुत्वेन; यद्वा, श्रीयमुनायां विदूरतो बहुलप्रदेशं व्याप्यादौ गवामनन्तानां चिरं क्रमशो जलपानेन जलक्षोभाच्छीतलत्वस्वच्छत्वयोस्तथा सुमृष्टत्वस्य चापगमनसम्भवेऽपि स्वाद्वेव पपुरिति जलमाहात्म्यमुक्तम् ॥ ३७ ॥ उपवने प्रायोऽशोकतरुमण्डित इति ज्ञेयम्, अग्रे तथोक्तेः। कामं पशूनामिच्छानुसारेणेत्यर्थः। अतः परिभ्रमणेन क्षुदुद्बोधयन् यामुनजलपानेन च तदुपवने च फलाद्यभावेन क्षुधा च, बुभुक्षया आर्त्ता दुःखिता व्यग्रा वा सन्तः, यद्यपि तया तत्र च श्रीभगवत्साक्षात् तेषामार्त्तता न सम्भवेत्, तथापि ओदनयाचनादिद्वारा यज्ञपत्न्यनुग्रहाय श्रीभगवतैव तथाचरितमिति ज्ञेयम्। तत्त्वतस्तु श्रीभगवत एव काले क्षुधामनुमाय तद्भोगार्थं व्याजेन तैरेव तथा कृतमिति। उप समीपे आगत्य, दूरोक्तौ लज्जापत्तेः। किंवा, वक्ष्यमाणार्थस्य गौरवाय इदं वक्ष्यमाणम्। अत्र मध्येऽध्यायापातो वक्ष्यमाणलीलाविशेषस्मृत्या पूर्व्ववत् क्षणं श्रीबादरायणेः स्तब्धतया तत्कथाविच्छेदात्; यद्वा, तस्य सुगोप्यताबोधनाय क्षणं मौनात्। एवमन्यत्राप्युह्यम्। हे नृपेति, वक्ष्यमाणाश्चर्य्यलीलाश्रवणाभ्यन्तावधनार्थम्। यद्वा, सद्यो वारम्बारं सम्बोधनस्य कारणमिति श्लोके पूर्व्वं विवृतमेव ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्र यमुनायां मधुराः शीतला निर्मलाश्चापः जलानि गाः पाययित्वा हे नृप ! गोपाः कृष्णादयः स्वयमपि शुद्धञ्जलम्पपुः ॥ ३७ ॥ ततस्तस्या यमुनायाः समीपे वने पशूंश्चारयन्तो गोपाः हे नृप कृष्णरामावुपामन्त्र्याहूय सम्बोध्य वा उपगम्येति पाठे समीपमेत्य इदं वक्ष्यमाणमब्रुवन् कथम्भूताः क्षुधाऽऽर्ताः प्रातर्भुक्तवन्तोऽपि विप्रपत्नीरनुजिघृक्षता भगवतोत्पादितया क्षुधा पीडिता इति भावः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

सुमृष्टाः अतिस्वच्छाः स्वादु पशुसङ्घैस्तल्लोभेऽपि सुमृष्टत्वादिगुणयुक्तमेवेत्यर्थः। अथ कामं यथेष्टम् अत एव पुनर्जलपदं सार्थकम् ॥ ३७ ॥ क्षुधार्त्ता इति श्रीकृष्णरामयोरपि क्षुदनुमानेन विशेषार्त्तिर्ज्ञेया निजतद्दुल्लेखस्तत्प्रेमघटित इति ज्ञेयम् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शिवाः श्रेयस्कराः ॥ ३७–३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्वाविंशोऽध्यायार्थप्रकाशः ॥ २२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तस्या यमुनाया उपवने प्रायोऽशोकतरुमण्डित इति बोध्यम् अग्रे तथैवोक्तेः अतः फलाद्यभावः क्षुधार्त्ता इति श्रीकृष्णरामयोरपि क्षुदनुमानेन विशेषार्त्तिर्ज्ञेया निजतदुक्तिस्तु प्रेमपरिपाटी याज्ञिकान् प्रति तु वक्ष्यते रामाच्युतौ वो लषतो बुभुक्षिताविति एषां हरेस्तन्मित्राणाञ्च क्षुदभक्त ब्राह्मणोच्छोदिता तदन्नरुचिरूपैव नान्या "विजिघत् सोपिपास इति प्रतिषेधात् तद्दिने गृहाद्दध्योदनाद्यानयनं केनचिन्मिषेण भगवतैव घटितं तदिच्छयैव वृन्दाश्रयि फलादिनार्पितं तच्च यज्ञपत्नीप्रसादफलकमिति बोध्यम् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सुमृष्टाः शीतलाः शिवा मङ्गलदा अपो गाः पाययित्वा स्वयं पपौ हे नृप गोपाश्च पपुः ॥३७॥ क्षुधार्ताः पदमेकमनेकं च। आद्ये पक्षे हलन्ततया टाबन्तः शब्दः ॥ ३८ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे विंशोऽध्यायः ॥ २० ॥

श्रीसुबोधिनी

तत्र गतस्य कृत्यमाह **तत्रे**ति तत्र **'यमुनायां गा अपः पाययित्वा ततो गोपाः स्वयमपि भगवान् कामं** यथेच्छं जलं **पपुः** प्रातरेव गृहान् निःसृता भोजनाभावात् क्षुधिता भगवदिच्छया च लब्धभक्षा अपि गृहगमनप्रत्याशारहिताश्च जलमेव **पपुः**, आपः स्त्रीप्रकृतिका अतः स्वजातीयाः पायिताः **सुमृष्टा** उज्ज्वलाः पङ्कादिदोषरहिताः **शीतला** गुणवत्यः **शिवाः** परिणामत आरोग्यकराः, जलं नपुंसकमपि **कामरूपं स्वादु** स्वादिष्टमनेनाधिकमपि पातुं शक्यत इत्युक्तम् ॥३७½॥ एवं जात आपातत एव क्षुन् निवृत्तेति विशेषं प्रार्थयितुं भगवन्तं विज्ञापयामासुरित्याह **तस्या** इति, कालिन्द्या **उपवने पशूंश्चारयन्त्य एव कृष्णरामावुपागम्य** तालफलन्यायेन किञ्चिद् वचनमब्रुवन्, **गोपा** इत्यविवेकिनः, सर्वत्र **राजन्निति**सम्बोधनं स्नेहेन कथायां रसोत्पादनार्थं, **राजन्निति**सम्बोधनेन महत्त्वं सूच्यत इति **सर्वार्थे भगवानेव वक्तव्य** इतिविद्याफलमन्ते सूचितम् ॥ ३८½ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तरसाधनप्रकरणे
प्रथमः स्कन्धादित एकोनविंशाध्यायस्य विवरणम् ॥ १९ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तत्र गाः पाययित्वाप इत्यस्य विवरणे **आपः स्त्रीप्रकृतिका** इत्यादि तत्र **हरिधना आहु**''र्यमुनायां वृक्षवत् परार्थतामात्रधर्मवत्त्वं निरूपितं, गवां तत्सम्बन्धेनापि तादृशज्ञानमुदेष्यति तच् चानुचितं, तासां स्वामिनीसजातीयभाववत्त्वात्, एतच् च 'गावश्च कृष्णमुखे'तिश्लोके तादृशसामग्रीविशेषप्रकटनेन प्रभुणा स्वबलेन तथाभावसम्पादनं स्पष्टमभिहितं, तद्रसस्य प्रभुयोग्यत्वात्, न हि तद्विजातीयभावानां सम्बन्धिरसं प्रभुर्भुङ्क्ते 'गन्धो रूप'मितिजन्मोत्सवाध्यायीयकारिकायां स्वामिनीष्वेव भगवद्भोग्यविषयपञ्चकरूपत्वनिरूपणात्, अत एव 'रसो नवनीतस्ये'त्युक्तमाचार्यैः, परार्थताज्ञानं तु स्वामिनीविजातीयभाववतामेव, तासां त्वस्मदर्थमेव प्रभुप्राकट्यमितिज्ञानेन तद्वस्तुषु स्वीयत्वबोधस्य दृढत्वादतः पानकर्मवाचकजलस्यैकत्वेपि तद्वाचकपदद्वयतात्पर्यमाचार्या निरूपयन्ति **स्त्रीप्रकृतिका** इति. यमुनाजले द्वैविध्यमस्ति स्वामिनीसहितक्रीडासम्बन्धित्वेन तद्भावजनकत्वं, अत एवे 'यं तव कथाधिके'त्युक्तं तत्स्तुतावाचार्यैः, दोषमात्रनिवर्तनेन सादृश्यात् स्वरूपेण भगवद्भावजनकत्वं, अत एवोक्तं 'स्मरपितुः श्रियं बिभ्रती'मिति, विवृतं च तथैव प्रभुचरणैः, अतो या आपः **स्त्रीप्रकृतिकाः** स्त्रीस्वभावाः स्वप्रवेशेन स्त्रीस्वभावसम्पादिकास्तास्तत्सजातीयभावा गाः

---

१. तत्र हरिधना आहुर्यमुनायां वृक्षवत् परार्थतामात्रधर्मवत्त्वं निरूपितं, गवां तत्सम्बन्धेनापि तादृशज्ञानमुदेष्यति तच्चानुचितं तासां स्वामिनीसजातीयभाववत्त्वादेतच्च "गावश्च कृष्णमुखे"तिश्लोके तादृशसामग्रीविशेषप्रकटनेन प्रभुणा स्वबलेन तथाभावसम्पादनं स्पष्टमभिहितं तद्रसस्य प्रभुयोग्यत्वात् न हि तद्विजातीयभावानां सम्बन्धिरसं प्रभुर्भुङ्क्ते "गन्धरूप"मिति जन्मोत्सवाध्यायीयकारिकायां स्वामिनीष्वेव भगवद्भोग्यविषयपञ्चकरूपत्वनिरूपणादत एव 'रसो नवनीतस्ये'त्युक्तमाचार्यैः परार्थज्ञानं तु स्वामिनीविजातीयभाववतामेव तासां त्वस्मदर्थमेव प्रभुप्राकट्यमितिज्ञानेन तद्वस्तुषु स्वीयत्वावबोधस्य दृढत्वादतः पानकर्मवाचकजलस्यैकत्वेपि तद्वाचकपदद्वायतात्पर्यमाचार्या निरूपयन्ति **स्त्रीप्रकृतिका** इति, यमुनाजले द्वैविध्यमस्ति स्वामिनीसहितक्रीडासम्बन्धित्वेन तद्भावजनकत्वमत एव 'तव कथाधिके' त्युक्तं तत्स्तुतावाचार्यैर्दोषमात्रनिवर्तनेन सादृश्यात् स्वरूपेण भगवद्भावजनकत्वमत एवोक्तं "स्मरपितुः श्रियं बिभ्रती"मिति विवृतं च तथैव प्रभुचरणैः, अतो या **आप स्त्रीप्रकृतिकाः** स्वीस्वभावाः स्वप्रवेशेन स्त्रीस्वभावसम्पादिकास्तास्तत्सजातीयभावा वा **गाः पायितवान्** यथा तासां स एव स्वीयत्वाभिमानरूपो भावः स्थिरीभवति, गोपेभ्यस्तु जलमात्रं कामरूपत्वाद् भगवद्भावजनकं नपुंसकत्वाद् भगवद्विषयकदोषारोपमूलभूतपुम्भावरूपदुःस्वभावविजयसाधकं **पायितवानिति** नात्र प्रभुविवृतौ बाधाभावेन चित्तमुन्मथयितव्यं सद्भिरितिसङ्क्षेप इति ।

पायितवान् यथा तासां स एव स्वीयत्वाभिमानरूपो भावः स्थिरीभवति, गोपेभ्यस्तु जलमात्रं कामरूपत्वाद् भगवद्भावजनकं नपुंसकत्वाद् भगवद्विषयकदोषारोपमूलभूतपुम्भावरूपदुःस्वभावविजयसाधकं पायितवानिति नात्र प्रभुविवृतौ बोधाभावेन चित्तमन्यथयितव्यं सद्भिरितिसङ्क्षेप" इति ॥ ३७½ ॥ **गोपा** इतीति 'विशेषतश्चेदाज्ञा स्या'दितिसिद्धान्तो दैहिकभिन्नकार्ये इतिविवेकाभावो गोपत्वादित्यर्थः ॥ ३८½ ॥

इति एकोनविंशोऽध्यायः ॥ १९ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तत्र गाः पाययित्वाप इत्यस्य विवृतावापः **स्त्रीप्रकृतिका** इति स्त्रीणां प्रकृतिर्याभिस्ताः **स्त्रीप्रकृतिका** इति बहुव्रीहिर्व्यधिकरणपदः स्त्रीशब्देन व्रजसुन्दर्यो ग्राह्याः, प्रकृतिपदं स्वभाववाचकं, तथा च व्रजरत्नरूपगोपनितम्बिन्यस्तासां प्रकृतिर्भगवद्विषयकपरमस्नेहजन्यो भावविशेषस्तत्सम्पादिका याः श्रीयमुनाया आपस्तास्तु गाः **पायितवान्**, तत्पानेन गवां भावविशेषो भगवति जातः, यच्छ्रीयमुनायां नपुंसकप्रकृतिकं जलं तद्गोपान् पायितवान् तत्पानेन गोपानां भगवदन्तरङ्गलीलावलोकनादौ पुम्भावरूपो दोषो न भवेत्, अयं विवेकस्तत्र **गाः पाययित्वाप** इत्यत्र स्त्रीलिङ्गेन सूच्यते, **कामं स्वादु पपुर्जलमिति** नपुंसकलिङ्गेन सूच्यते, अन्यथैकस्यैव जलस्य गवां गोपानां च पाने **पाययित्वापः पपुर्जल**मितिपर्यायपदद्वयं न ब्रूयात् ॥ ३७½ ॥

इति एकोनविंशोऽध्यायः ॥ १९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे नृप ! तत्र यमुनायां गोपा गाः अपः पाययित्वा ततस्तदनन्तरं स्वयमपि स्वादु जलं कामं यथेष्टं पपुः । सुमृष्टाः स्वच्छाः, शिवाः आरोग्यकराः ॥ ३७ ॥ तस्या यमुनाया उपवने कामं यथेच्छं पशून् चारयन्तः क्षुधार्ता गोपाः कृष्णरामावुपागम्य हे नृप ! इदं वक्ष्यमाणमब्रुवन् ॥ ३८ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने । द्वाविंशो विवृतचीरहरणस्य निरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

तत्रेति । हे नृप ! तव यमुनायां गोपाः सुमृष्टाः स्वच्छाः शीतलाः शिवाः आरोग्यकरीः अपः गाः पाययित्वा ततस्तदनन्तरं स्वयमपि स्वादु जलं कामं यथेष्टं पपुः । पुनर्विशेषयितुं जलस्य पुनरुक्तिर्न दोषः ॥ ३७ ॥ तस्या इति ॥ हे नृप ! तस्या यमुनाया उपवने कामं यथेच्छं पशून् चारयन्तः क्षुधार्ता गोपाः कृष्णरामावुपागम्य इदं वक्ष्यमाणमब्रुवन् । कुमारिकाभ्यः पूर्वमेवागृहीतभोज्यानामेव गृहान्निर्गमात् । अत्रानवसरेऽध्यायसमाप्तिः श्रीशुकस्योत्तरलीलास्मरणेन स्तब्धीभावात् । एवमन्यत्रापि ॥ ३८ ॥

इति श्रीभागवते महापुराणेऽन्वितार्थप्रकाशिकायां दशमस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शिवाः आरोग्यकराः सुमृष्टाः स्वच्छाः अपो जलानि कामं यथेच्छं ॥ ३७ ॥ तस्या यमुनायाः समीपवने कामं स्वेच्छया कुमारिकाणामभिलषितः संपादनाय ऋषिपत्नीनामनुग्रहाय च सत्वरनिर्गमनात् अगृहीतभोज्यानां गोपानां क्षुधार्त्तत्वमभूत् ॥३९॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने वस्त्रहरणनामा द्वाविंशोऽध्यायः ॥ २२ ॥

भगत्प्रसादाचार्यरचिता भक्तमनोरञ्जनी

तत्रेति ॥ तत्र यमुनायां, सुमृष्टाः मधुराः, शीतलाः शिवा निर्मलाश्च, अपो जलानि, गाः पाययित्वा, ततः हे नृप, गोपाः श्रीकृष्णादयः, स्वयं कामं स्वादु जलं, पपुः ॥ ३७ ॥ तस्या इति ॥ हे नृप, ततः तस्या यमुनायाः, उप समीपवर्त्तिनी वने, कामं पशून्, चारयन्तः गोपाः, क्षुधा आर्त्ताः पीडिताः सन्तः, कृष्णरामौ, उपागम्य समीपमेत्य, इदं वक्ष्यमाणं, अब्रुवन् । क्षुधार्त्ता इत्यस्यायं भावः । प्रातः कृतभोजना अपि विप्रपत्नीरनुजिघृक्षता भगवतोपादितबुभुक्षा अब्रुवन्निति ॥ ३८ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थवबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तत्र गा इति : १०.२२.३७

भक्तत्राणकृते भूयान् श्रमोऽस्मिन् सह्यते मया । किमिदं बोधयन्कृष्णः सतृष्णोऽम्बु पपौ स तैः ॥ ८९ ॥

क्षुधार्ता इति : १०.२२.३८

स्त्रीणामनुग्रहकृतेऽद्य गृहीतदीक्षो युष्मत्सखोऽस्त्ययमिहेति समग्रगोपाः ।
मत्तृप्तये कुरुत यत्नममुं निवेद्य सेत्याशयादुदरगाऽर्दयति स्म तान् क्षुत् ॥ ९० ॥
योगी वास्तु व्रतस्थो वा यो वा को वा भवत्विह । तृट्क्षुदार्तिस्तु सर्वेषामविशेषादिति स्फुटम् ॥ ९१ ॥
उदन्याहरणेऽपीश नावकाशोऽस्ति तेऽवितुः । भक्तानां यत्पयःपाने प्राप्तं क्षुद्धृतिचिन्तनम् ॥ ९२ ॥
यत्तस्मिन्नहनि प्रभुर्न जगृहे पाथेयमस्मादपि तत्ताद्दग्युवतिव्रताच्च विशदोऽभूद्धंसदीक्षाविधिः ।
यत्तस्मिस्तरुभूस्थितिर्निगदिता भिक्षापि तात्कालिकी नो चेन्नित्यविधिः कथं तदहनि प्रेष्टोऽखिलैर्विस्मृतः ॥ ९३ ॥
दृष्टा चेन् परकामिनी विवसनोपोष्यं तदैकं दिनमेवं स्मार्तगिरं स्मरन् व्रतजुषां तासां तथा दर्शनम् ।
जानन् भावि स सर्वविन्न जगृहे पाथेयमस्मिन् दिने यत्प्राप्तं हविषोऽदनं निरशनप्रायं प्रसिद्धं हि तत् ॥ ९४ ॥
यस्मिन् कृष्णमुदीरयन्त्युषसि ते तस्मिन् सपाथेयका निर्यान्ति स्म गृहाद्यदा तु भगवांस्तानाह्वयत्नाशु ते ।
निर्गच्छन्ति तदा तु सम्भ्रमवशाद् विस्मृत्य तच्छम्बलं भात्येवं निखिलैर्न गोपयुवभिः पाथेयमग्राहि यत् ॥ ९५ ॥
गोपीव्रतफलोद्बोधि दिष्टात् सम्भ्रमधीः प्रभुः । तदाह्वानाच्च तेऽपीति युक्ता पाथेयविस्मृतिः ॥ ९६ ॥
आकारितोऽप्यनिशमेष समग्रगोपैस्तस्मिन् दिने तु संकलानपि तान् स एव ।
आकारयद् ध्रुवमिदं क्षममेव यस्माद् गोपीव्रतेप्सित-फलार्पण-दत्तदृष्टिः ॥ ९७ ॥
ऋक्षाण्यनन्तान्यभितो वसन्तु लसन्तु वाऽनन्तपदे नितान्तम् ।
आह्लादसौख्यं न यथा विनेन्दुं तथान्तराऽन्नं विफलं फलादिकम् ॥ ९८ ॥
सर्वर्तुफलसन्दोहशोभने विपिनेऽपि तैः । क्षुच्छान्तिरर्थिता कृष्णं यत्तेनेदमभूत् स्फुटम् ॥ ९९ ॥ (युग्मम्)
गोपीनामभिलाषिताभिरर्चनेन वृक्षाणामतिथिसमर्हणप्रशंसा ।
यद्भूयोऽकृत भगवांस्तदित्यबोधि स्यादर्चाविधिरिह मे युगे प्रधानः ॥ १०० ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने द्वाविंशोऽध्यायः ॥ २१ ॥

कृष्णप्रिया

राजन् ! श्रीममुनाजी के तट पहुँच कर श्रीकृष्ण प्रभु ने और गोपों ने गौओं को स्वच्छ, शीतल और कल्याणकारी जल पिलाया और सर्व ने मधुर जल पिया ॥ ३७ ॥ अहो राजन् ! श्रीयमुनाजी के उपवन में गायों को चराते-चराते सर्व ग्वाल-बाल क्षुधा से व्याकुल हुए और श्रीकृष्ण एवं श्रीबलदाऊ जी के समीप इस प्रकार कहने लगे ॥ ३८ ॥

श्रीमद्भागवत दशमस्कन्ध का बाइसवाँ अध्याय समाप्त ॥ २१ ॥

* * *

अथ त्रयोविंशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	वसं.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
५२	४७	१	४	५	१७७६	२७	४१	१८४४	५७।	४

गोपा[1] ऊचुः

राम राम [2]महावीर्य कृष्ण दुष्टनिबर्हण । एषा वै बाधते क्षुन्नस्तच्छान्तिं कर्तुमर्हथ[3] ॥ १ ॥

श्रीशुक उवाच

इति विज्ञापितो गोपैर्भगवान् [4]देवकीसुतः । भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् ॥ २ ॥
प्रयात देवयजनं ब्राह्मणा ब्रह्मवादिनः । सत्रमाङ्गिरसं नाम ह्यासते स्वर्गकाम्यया ॥ ३ ॥
तत्र गत्वौदनं गोपा याचतास्मद्विसर्जिताः । कीर्तयन्तो भगवत आर्यस्य मम चाभिधाम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः –राम ! राम ! महावीर्य, दुष्ट निबर्हण हे कृष्ण ! एषा क्षुध् नः वै बाधते, तत् शान्तिम् कर्त्तुम् अर्हथः ॥ १ ॥ इति गोपैः विज्ञापितः भगवान् देवकीसुतः, भक्तायाः विप्रभार्यायाः प्रसीदन् इदम् अब्रवीत् ॥ २ ॥ देवयजनम् प्रयात स्वर्गकाम्यया ब्रह्मवादिनः ब्राह्मणाः आङ्गिरसम् नाम सत्रम् हि आसते ॥ ३ ॥ हे गोपाः तत्र गत्वा मम च आर्यस्य अभिधाम् कीर्तयतः अस्मद् विसर्जिताः ओदनम् याचत ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्रयोविंशे ततो गोपैरन्नयाच्ञापदेशतः ॥ तत्पत्न्यनुग्रहात्कृष्णो दीक्षितानन्वतापयत् ॥ १ ॥

भक्ताया इत्येकवचनं सद्यः सायुज्याभिप्रायेण ॥ १–३ ॥ अस्मद्विसर्जिता आवाभ्यां प्रहिताः संतो याचध्वम् । युष्माकं का तत्र लज्जा । ननु तथाऽप्यपात्रत्वादस्मभ्यं किमिति दास्यंतीति चेत्तत्राह । कीर्तयंत इति ॥ ४–६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः जलपानोत्तरम् । तत्पत्नीनां दीक्षितभार्याणामनुग्रहात् । अपदेशः छद्म (१)। दुष्टान्निबंर्हति हतीति तथा 'बर्हं–हिंसायाम्' अतो ल्युप्रत्ययः । क्षुत् भोक्तुमिच्छा । तस्याः क्षुधः शांतिं प्रशमम् 'शांतिः प्रशममंगले' इति यादवः । "क्षुत्खलु वै मनुष्यस्य भ्रातृव्यः" इति श्रुतेरस्माकं महाशत्रुमधुना क्षुद्रूपं चेद्धंतुं शकुथ, तदैव युवयोर्महाबलदुष्टहंतृत्वे सार्थके ज्ञास्येते इति नर्म व्यंजितम् ॥ १ ॥ अन्यासां कालांतरे मोक्षादेकत्वम् ॥ २ ॥ आंगिरसम् अंगिरसा बृहस्पतिनोक्तं बृहस्पतीसवमिति वा ॥ आसते कुर्वंते, आसत इति प्रथमे व्याख्यातम् ॥ ३ ॥ तत्र यज्ञशालायाम् । युष्माकं गोपानाम् । तत्र याचने । आर्यस्य श्रीरामस्य । आर्यस्य बलदेवस्य प्रथमामभिधां कीर्त्तयंत इति मत्तो वैश्यजातेः सकाशादार्यं क्षत्रियजातिं किंचिदभ्यर्हितत्वेन दानपात्रं मत्वापि यदि ते बहिर्दर्शितो वः किंचिद्दास्यंति तदपि भद्रमिति भावः । अभिधाम् नाम 'अभिधानं च नाम च' इत्यमरः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ ते क्षुधार्त्ता अपि सख्यस्वभावान्नर्मविशेषमवलम्ब्य तेन प्रस्तुतां वृक्षाणां सर्वार्थदतामनन्यमानाः सर्वार्थदानार्थं मनुष्याणां प्रचारं परित्यज्य यस्मानिहानीतमेवप्रार्थयन्ते, रामेति । अस्मानपि रमयेति भावः । वीप्सा क्षुधार्त्त्या हे महाबाहो इति सामर्थ्यमुक्तं महावीर्येति पाठेऽपि स एवार्थः कृष्ण ! परमानन्दघनमूर्त्ते ! अतस्त्वदीयानां क्षुद्दुःखमयुक्तमिति भावः । विशेषतश्च हे दुष्टनिबर्हणेति "क्षुत् खलु वै मनुष्यस्य भ्रातृव्यः" इति श्रुतेः । न अस्माकं दुःखप्रदमेतं क्षुदरिमपि नाशयेति भावः । स्नेहविशेषेण

---

[1] श्री शुकः—तत्र गत्वोपविष्टास्ते गोपाला यमुनातटे । ऊचुर्बुभुक्षिता राजन्कृष्णरामौ जगत्पती ॥
—इत्ययं श्लोकोऽधिकोऽन्यत्र दृश्यते ।

[2] महाबाहो–विज. । [3] महंथः । [4] जगदीश्वरः–वीर. विज. ।

तयोरभेदात् द्वौ प्रत्येव प्रार्थनं तत्रादौ रामसम्बोधनं तत्रैवाम्रेडितं च लोकमर्यादानुरूपेण तद्गौरवेणैव श्रीकृष्णस्य सुखात् स्वयं च वक्ष्यते कीर्त्तयन्त इत्यादि एषा दुस्सहत्वेनानुभूयमाना अर्हथः योग्यौ भवथः इत्यावश्यकत्वमपि सूचितं वस्तुत इयमप्येका क्रीडैव ।१। भगवान् सर्वशक्तिमानपि इदं वक्ष्यमाणमब्रवीत्, कुतः ? विप्रभार्य्याया इति । जातावेकत्वं सर्वासां तासामविशेषेणोपादानार्थं ताः प्रति प्रसीदन् अनुग्रहं कर्त्तुं तत्र हेतुः भक्तायाः चिरं भगवति जातरतेः तथाप्यादौ विप्रेषु वाचनं तासामेव माहात्म्यप्रदर्शनाय तच्चाग्रे व्यक्तं भावि । ननु, तासां भक्तत्वं कथं जातं तत्राह, जगदीश्वरः तदानीं जगत्यपि मधुरमैश्वर्यं प्रकाशयति तस्मिन् परमसुकोमलहृदयानां तासां भक्तिः कथं न जायतामिति भावः । देवकीसुत इति पाठे स एव भावः ॥ २ ॥ देवयजनं यज्ञवाटं ब्रह्मवादिनः वेदघोषणशीलाः नतु वेदार्थविद इति गूढोऽभिप्रायः अत एव स्वर्गकाम्यया सत्रं यज्ञमासते अनुतिष्ठन्तीत्युक्तं हि निश्चितम् ॥ ३ ॥ यदि तु सङ्कोचं मन्यध्वे तर्ह्यावयोरेव निदेशकारित्वेनात्मानं ख्यापयत नतु पित्रादिनाम्नेत्यभिप्रेत्याह—अस्मद्विसर्जिता इति । तत्र च विशेषमाह – कीर्त्तयन्त इति । भगवतो महाप्रभावस्येति तत्र युक्तिश्चोक्ता मम च तत्सम्बन्धेनेत्यर्थः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

रमयति सर्व्वानेव सुखयतीति रामस्तत्सम्बोधनम्, अस्मानपि सुखयेति भावः । वीप्सा क्षुधार्त्त्या, हे महाबाहो इति सामर्थ्यविशेषं तत्र सूचयन्ति, महावीर्येति पाठेऽपि स एवार्थः । कृष्ण हे परमानन्दघनमूर्त्ते ! अतस्त्वदीयानां क्षुद्दुःखमयुक्तमिति भावः । विशेषतश्च, हे दुष्टनिबर्हणेति 'क्षुत् खलु वै मनुष्यस्य भ्रातृव्य-शत्रुः' इति श्रुतेः । अस्माकं दुःखप्रदं क्षुदरिमपि नाशयेति भावः । एषा अधुना साक्षात्, किंवा मुखशोषादिलक्षणैः प्रत्यक्षा, वै निश्चितम्, अर्हथ इति विनयोक्त्या अवश्यकृत्यता बोध्यते। यद्वा, योग्यौ भवथः, योग्यता चान्वर्थसम्बोधनैरेव सूचिता । स्नेहविशेषेण तयोरभेदाद् द्वौ प्रत्येव प्रार्थनम्; तत्र लोकव्यवहाराद्यपेक्षयादौ ज्येष्ठस्य सम्बोधनम्; यद्वा, रामस्यानादरेण कृष्णप्रीत्यसम्पत्तेः, अतएव तं प्रति द्विसम्बोधनञ्च ॥ १ ॥ इत्यनेन प्रकारेणेदं वा पूर्व्वोक्तं विशेषेण स्तुत्यादिना क्षुधार्त्तिव्यञ्जनेन च ज्ञापितः सन्, जगदीश्वरः सर्व्वशक्तिमानपि इदं वक्ष्यमाणमब्रवीत्, कुतः ? विप्रभार्य्याया इति जातावेकत्वम्, ताः प्रति प्रसीदन् अनुग्रहं कर्त्तुमिच्छन्; तत्र हेतुः—भक्तायाश्चिरं भगवति श्रद्धादरादियुक्तायाः कृतभजनाया वा; तथाप्यादौ विप्रेषु याचनं तासामेव माहात्म्यप्रदर्शनाय, तच्चाग्रे व्यक्तं भावि । ननु तासां भक्तत्वं कथं जातम् ? तत्राह—भगवान् तस्य भगवत्ताविशेषप्रकटनेनेत्यर्थः । यद्वा, भक्तवत्सल इत्यनुयाचनादिद्वारेण प्रमादविशेषे हेतुः । अतो द्वौ प्रति प्रार्थनेऽपि तेनेवोत्तरितम्, सर्व्वथा तत्र तस्यैव योग्यत्वात् ॥ २ ॥ देवयजनं यज्ञवाटम्, ब्रह्मवादिनो वेदघोषणशीलाः, न तु वेदार्थविद इत्यर्थः । यद्वा, ब्रह्मणि वेदे ते न वादशीला न तु तत्सारं विदन्तीत्यर्थः, अतएव स्वर्गकामया सत्रं यज्ञमासते अनुतिष्ठन्तीत्यर्थः। हि निश्चितम्, कीर्त्तयन्त इत्यादुक्तिर्यद्यपि सर्व्वसद्गुणनिधेस्तस्य विनयादिस्वभावत एव, तथापि तेषां स्वर्गकाम्ययात्मख्यानादरमभिप्रेता; मम चेति गौणतया निर्दिष्टम् अन्यत्तैर्व्याख्यातम् ॥ ४ ॥ ननु तर्हि वैष्णवानामस्माकं तदोदनयाच्ञ्यालम्, तत्राह—अस्मद्विसर्जिता आवयोः प्रेरकत्वान्न तद्दोषो युष्मासु प्रसज्जेतेत्यर्थः । ननु अनुगेष्वपि दोष प्रसक्तः स्यादेव, तत्राह—कीर्त्तयन्त इति । अस्मन्नामकीर्त्तनेन तद्दोषो नङ्क्ष्यतीति भावः । कुतः ? भगवतः सर्व्वशक्तिमतः । एवं याचकान् प्रति भगवन्नामकीर्त्तनपूर्व्वकयाचनप्रकारश्च शिक्षितः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थमब्रुवन्नित्युक्तं किन्तदित्यत्राह—रामरामेति । नोऽस्मानेषा क्षुद्बाधते तस्याः क्षुधः शान्ति कर्तुमर्हथः ॥ १ ॥ विप्रभार्याया इत्येकवचनं जात्यभिप्रायकं विप्रभार्याणां प्रसीदन् ता अनुजिघृक्षुरिदमब्रवीत् ॥ २ ॥ तदेवाह—प्रयातेति । ब्रह्मवादिनो ब्राह्मणाः देवा इज्यन्तेऽस्मिन्निति देवयजनमाङ्गिरसाख्यं सत्रमासतेऽनुतिष्ठन्ति ॥ ३ ॥ हे गोपास्तत्र यज्ञवाटे गत्वाऽस्मद्विसर्जिताः आवाभ्यां प्रेषिताः वयमिति वदन्तोऽन्नं याचत याचध्वम् अस्मद्विसर्जिता इत्येतदेवोपपादयति भगवत आर्यस्याग्रजस्य रामस्य मम चाभिधां नामधेयं कथयन्तो याचतेत्यन्वयः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कृष्णभक्तौ योग्यतैव बलीयसी न शास्त्रज्ञानमित्येतत्कथयत्यस्मिन्नध्याये, तत्र गोपानां कृष्णस्य च प्रश्नप्रतिवचने कथयति–शुक इति । दुष्टनिबर्हण, दुष्टजनोन्मर्दन ! क्षुत् भोक्तुमिच्छा बाधते क्लिश्नाति अस्याः क्षुधः शान्ति प्रशमं "शान्तिः प्रशममङ्गले" इति यादवः ॥ १ ॥ विप्रभार्यायाः पतित्यक्तायाः जातावेकवचनं भक्ताः वा इति छेदो वा ॥ २ ॥ देवयजनं यज्ञवाटं सत्रं बहुकर्तृकम् आङ्गिरसम् अङ्गिरसा बृहस्पतिकथितं बृहस्पतिसवनमित्यर्थः । आसते कुर्वते अनेकार्थत्वाद्धातूनां हिशब्दो हेतौ यस्मात्सत्रे अन्नं देयं तस्मात्प्रयात ॥ ३ ॥ अस्मद्विसर्जिता नियुक्ताः निर्मुक्ता वा युष्माकं का वा तत्र लज्जा ननु, अस्माकं गोपालत्वेनापात्रत्वात्किमिति दास्यन्तीति तत्राह—कीर्तयन्त इति । आर्यस्य श्रेष्ठस्य रामस्याभिधां नाम ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥ १ ॥ भक्ताया इति जातावेकवचने स्वभावतः कृष्णप्रधानचेतस्त्येनाहुः ॥ २–५ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ यज्ञपत्नीजनानुकम्पालीलामवतारयितुं क्षुत्पीडितगोपबालोक्तिं प्रपञ्चयति—राम रामेत्यादि । एषेति दुःसहेत्यर्थः । यद्यपि भ्रातरावेव विज्ञापितौ गोपार्भकैस्तथापि रामस्तत्समाधानं चिन्तयितुं नाशकन् ; समर्थोऽपि भगवतः समीपे सामर्थ्यं न प्रकटयतीति । भगवांस्तु तत् समाधत्त इत्याह—इतीत्यादि । इति गोपैर्विज्ञापितो भगवानिदमब्रवीत् । जगदीश्वरोऽपि भक्ताया विप्रभार्यायाः प्रसीदन्, सर्वसमोऽपि भक्तप्रिय इत्यर्थः । भक्ताया इति जातावेकवचनम् अथवा, त्यक्ष्यमाणदेहां प्रति । यद्यपि तदन्याः साक्षाद्ददृशुः, तथापि तस्याः प्राकृतदेहत्यागेनाप्राकृतदेहमासाद्य गोपाङ्गनाभिः सह तत्कालाङ्ग-सङ्गभाजनत्वात् । तास्तु विलम्बेनैव प्राप्स्यन्तीति ताभ्योऽस्याः सौभाग्यातिशय इत्यर्थः ॥ १–२ ॥ किं तदित्याह—प्रयातेत्यादि द्वाभ्याम् । भगवत आर्यस्याग्रजस्य मम चाभिधां कीर्तयन्त इति द्वयोरभिधानं स-तात्पर्यकम् । तद्यथा, ममाभिधामित्युक्ते ज्यायसो गौरवहानिः, आर्यस्येत्युक्तेः कदाचिन्न प्रयच्छन्तीति यद्यपि ते न दास्यन्तीति स्वयमेव सार्वज्ञ्यज्जानाति, तथापि कर्मनिष्ठाः प्रायो बहिर्मुखा इति लोकान् प्रत्याययितुं तथाह । अतएवोक्तं स्वर्गकामायेति ॥ ३–४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

यद्यपि उभावेव गोपैर्विज्ञापितौ, तथापि भगवान् श्रीकृष्ण एवोवाच । कुतः ? तत्राह भक्ताया इत्यादि । भक्ताया विप्रभार्यायाः प्रसीदन् ॥ १–४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्रयोविंशेऽन्नयाच्ञानादृतैर्गोपैः पुनश्च सा । पत्नीनां प्रेम विप्राणामनुतापश्च वर्ण्यते ॥

क्षुन्न इति "क्षुत् खलु इति वै मनुष्यस्य भ्रातृव्यः" इति श्रुतेरस्माकं क्षुन्महाशत्रुमधुना हन्तुं चेत् शक्नुथस्तदैव युवयोर्महाबलदुष्टहन्तृत्वे सार्थके ज्ञास्येते इति नर्म व्यञ्जितम् ॥ १ ॥ विप्रभार्याया इति जातावेकत्वं भक्ताया इति तासां भक्तिमनुस्मृत्य सद्य एव प्रसीदन् किञ्च तास्वेकस्यास्तु भविष्यन्तीं दशमीं दशामनुस्मृत्य प्रकर्षेण सीदन् शोचमानश्चेत्यर्थद्वयलाभार्थमेकत्वमिति केचित् ॥ २ ॥ तपोविद्याधर्मादिमत्स्वपि विप्रेषु भक्त्यभावान्न मे प्रसादस्तप आदिरहितास्वपि तत्पत्नीषु भक्तिसद्भावान्मत्प्रसाद इत्यर्थद्वयमेकस्यां ब्राह्मणजातावेव क्रमेण ज्ञापयितुं प्रथमं गोपान् ब्राह्मणसन्निधौ प्रस्थापयन्नाह—प्रयातेति ॥ ३ ॥ याचत याचध्वं कीर्तयन्त इति आवाभ्यामपि स्वनाम्नापि प्रबोधयितुमशक्या ईदृशी तेषां विदुषां निद्रेति ज्ञापयितुमुक्तम् आर्य्यस्य बलदेवस्य प्रथममभिधां कीर्तयन्त इति मत्तो वैश्यजातेः सकाशादार्य्यं क्षत्रियजातिं किञ्चिदभ्यर्हितत्वेन दानपात्रं मत्वापि यदि ते बहिर्दर्शिनो वः किञ्चिद्दास्यन्ति तदपि भद्रमित्यभिप्रायेण ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

त्रयोविंशेऽध्याये कर्मफलाशक्ताः तदर्थकर्मानुष्ठानव्यग्राः न हरिभक्त्यधिकारिणो यद्यपि तथापि हरिभक्तिसङ्गस्तेपि हरिभक्ता भवन्तीति दीक्षितविप्रतत्पत्नीवृत्तान्तेन वर्णयति—रामरामेति ॥ १ ॥ विप्रभार्यायाः भक्तायाः प्रसीदन् जातावेकवचनम् या सद्यो मुभाभूत्तत्प्राधान्यविवक्षया वा ॥ २ ॥ देवयजनं देवाः ईज्यन्ते यत्र तत् यज्ञवाटं प्रयात तत्राङ्गिरसं नाम सत्रं बहुकर्तृकं यागं ब्राह्मणे आसते अनुतिष्ठन्ति ॥ ३ ॥ तत्र देवयजने ओदनं यूयं याचत याचध्वम् । ननु, अनधिकारिभिस्तत्रापि अकृतपूर्वा याच्ञाऽस्माभिः कथं कर्तुं शक्या इत्यत आह–अस्मद्विसर्जिताः आवाभ्यां प्रहिताः आर्य्यस्य बलस्य मम च अभिधां नामधेयं कीर्त्तयन्त इति ॥ ४-६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

त्रयोविंशेत्वन्नयाच्ञा गोपैर्विप्रान् प्रति प्रभोः । तत्पत्नीनां परां भक्तिस्तेषां तापश्च वर्ण्यते ॥

एषा क्षुन्नो बाधत इति अस्या विनाशे कृते युवयोस्तादृशत्वं विद्म इति नर्म व्यज्यते ॥ १ ॥ विप्रभार्याया इति जात्यैकत्वं सर्वासु तत्प्रसादात् ॥ २ ॥ उपवीतसंस्काराद्यैः केवलैर्धर्मैः प्रसादो न भवेत् किन्तु भक्त्यैवेत्येकस्यामेव ब्राह्मणजातौ क्रमाद्बोधनायादौ तद्विशिष्टान् विप्रान् प्रति गोपान् प्रेषयन्नाह प्रयातेति । देवयजनं यज्ञस्थानं ब्रह्म वेदस्तद्वादिनः ॥ ३ ॥ आवाभ्यां विसर्जिताः प्रेषिताः सन्तो याचध्वम् ननु गोपेभ्यः कथं ब्राह्मणा दद्युर्दत्तं वा कथं ग्रहीष्यामः प्रतिग्रहापात्रत्वात्तत्राह, आर्यस्य बलदेवस्य मम चाभिधां कीर्त्तयन्त इत्यावयोः पात्रत्वात्—

अतः पात्रतरः कोऽन्यस्त्रिषु लोकेषु विद्यते । कृष्णात् कमलपत्राक्षात् देवदेवाज्जनार्दनात् ॥

इति स्मृतेः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरि ॐ ॥ भगवद्भक्तिरेव मुक्तिसाधनं न तन्त्रं श्रुतिश्रवणादिकमिव पुंस्त्वमपीति प्रतिपादयत्यस्मिन्नध्याये। तत्रादौ गोपालगोविन्दकथां तदुपयोगिनीं कीर्तयति श्रीशुक इति वक्ति॥ श्रीशुक इति। तस्या क्षुधः शान्ति प्रशमम्। शान्तिः प्रशममंगल इति यादवः। शान्तिः शमेऽपि कल्याण इति विश्वः॥ १॥ भक्ताया विप्रभार्याया उपरीदं वक्ष्यमाणं। सैका प्रतिप्रविघृता पदमाप विष्णोरित्यादेस्तदैवैकस्याः कायत्यागे ससद्गतिवितरणमित्येमवचनं युक्तं। या विप्रभार्यास्तासु च प्रसीदन्नित्यप्यान्तरङ्गिकोऽपि भावो विभाव्यः॥ २॥ देवयजनं देवा इज्यन्ते यत्रेति देवानां यजनं यस्मिन्निति वा यज्ञवाटं प्रति यात। ब्रह्मवादिनो वेदवादिनो ब्राह्मणाः सत्रं बहुदिनसाध्यं बहुकर्तृकं च तन्नामानमाङ्गिरसं बृहस्पतिसवनमिति नामप्रसिद्धं स्वर्गकाम्यया तदिच्छयाऽऽसते कुर्वन्ति। धात्वनैकार्थ्यात्। हि यतस्तत्र प्रयात। तत्राभ्यागतेभ्योऽन्नवितरणं विहितं मयाऽभिहितमित्यभिहिते तु सुमिलं तदिति भावः। आवाभ्यां विसर्जिता नियुक्ता आर्यस्य मम चाभिधां च कीर्तयन्तस्तत्र गत्वौदनं याचत। तद्दिनमारभ्य यायावर्यचर्यै रामकृष्णाय नम इत्युच्चार्य याचना प्रववृत इति मन्तव्या। तत्र प्रथमत आर्यस्येति रामस्योक्तिश्च न तेऽन्नं दास्यन्ति किन्तु मत्सन्निधिमागत्य पुनर्गमनानन्तरं वरमन्तिरेणान्नलाभ इति द्योतयितुं मम चेत्यन्तरमनन्तेन स्वनामोक्तिश्चानुगुणेति निपुणता निस्सीमेति मन्तव्यम्॥ ३–४॥

श्रीसुबोधिनी

कर्मज्ञाने वैदिके तु विंशत्यध्याय उक्तवान्। उभयोर्निर्णयो यादृक् सोप्यत्र विनिरूप्यते॥ १॥
साक्षाद्भगवतोक्तं हि यथापूर्वं न भासते। परम्परोक्तमप्येवं स्त्रिया भावस्तथापरः॥ २॥

पूर्वाध्याये विद्या पञ्चपर्वोपदिष्टा तेन मोहः सर्वोऽप्यपगतो दैहिका धर्मास्तु नापगतास्तेपि चेदपगता भवेयुस्तदा कृतार्था भवन्तीति तद् विनिश्चित्य सर्वे गोपालाः परमाधिकारिणो विज्ञापयन्ति **राम रामेति**, आदरे **वीप्सा, नाम्ना** "रमन्ते योगिनोनन्ते सत्यानन्दे चिदात्मनि इति **राम**पदेनासौ परं ब्रह्माभिधीयते"तो यथात्मनि रतिर्भवति तथा कर्तव्यमितिप्रार्थना तत्र सामर्थ्यमाह **महावीर्ये**ति, **अयं हि ज्ञानात्मकः श्रुतिरूप आवेसी च**, भगवन्तं च प्रार्थयन्ति **कृष्ण दुष्टनिबर्हणे**ति 'क्षुत् खलु वै मनुष्यस्य भ्रातृव्य' इतिश्रुतेः सदानन्दतिरोभावरूपा सदानन्दादेव गच्छतीति **कृष्णे**तिसम्बोधनं, यदीयं क्षुद् बाधिका मृत्युरूपापि भवति तथापि निवारणीयेति ज्ञापयितुमाहुर्दुष्टानिवर्हणेति, सर्व एव **दुष्टास्त्वया** निवार्यन्त इति, स्त्रीनिवारणे नास्माकं सामर्थ्यं, न हि विद्यया स्त्रिया क्षुद्रूपा स्त्री निवर्तते, तदाहु**रेषा वै बाधते क्षुन् न** इति, ननु तदभावे सद्यः शरीरपातः स्यात् ततो लीला भगवता सह न स्यादित्याशङ्क्याहुस्**तच्छान्ति कर्तुमर्हथे**ति, तस्याः **शम** एव कर्तव्यो यथा **न बाधते** यथाज्ञानादिदोषनिवृत्तौ शास्त्रमुपायस्तथा क्षुन्निवृत्तावपि ज्ञानरूप एव कश्चनोपायो वक्तव्य इतिभावः॥ १॥ **भगवांस्तु** संसारस्याग्रिमश्चाद्भावेन **गमनं** स्यादिति विचिन्त्य सुतरां स्त्रीणामुपकारार्थं तत्रापि ब्राह्मणस्त्रीणां पुरुषाधिकाररहितानां **धर्ममार्ग**मपि स्थापयितुं प्राप्तज्ञानानां भिक्षाटनमेव मुख्यमिति विचिन्त्य प्रथमं पुरुषभिक्षामुक्तवान् द्रव्ये हि तेषां स्वाम्यमिति, अलौकिकैरुपायैः स्त्रीमुक्तिनं स्यात् सर्वेषां च सत्सङ्गो न स्यात् ततः सम्प्रदायोच्छेदश्च स्यादभिमानाभावाद् दीनता तु नास्त्येव भगवत्कृपया नापि लोकेतो भगवान् **याचन**मेवोपदेष्टुकाम उत्तरं दत्तवानित्याहेतीति एवं **गोपैर्विज्ञापितो**पि **भगवान्** सर्वसमर्थोपि **देवकीसुतः** परमकृपालुः सुतरां स्त्रोषु कृपावान् भक्तिमार्गप्रवर्तको **भक्ताया विप्रभार्यायाः प्रसीदं**स्तस्याः **प्रसादं** करिष्यन्निदं वक्ष्यमाणं याचनरूपमब्रवोत्॥ २॥ ज्ञानं हि ब्रह्मात्मकं बीजरूपं तद् ब्रह्मणैव चेत् परिपुष्यते तदा ब्रह्मयोग्यं भवति यथा बीजं ब्राह्मण्यामेव पुष्टं ब्राह्मणान्नेनैव वृद्धि गतं ब्रह्मसंस्कारैर्ब्रह्मणा वेदेन च व्याप्तं ब्रह्मभावाय कल्पते तथेदानीमपि जातं ज्ञानं ब्राह्मणान्नेनैव चेत् पुष्टिमेति तदा कार्यक्षमं भवति तत्रापि ब्राह्मणाः पूर्णज्ञानकर्मनिष्ठा न तु यादृशास्तादृशाः, अन्नमूलकमेव हि ज्ञान'मन्नेन प्राणा' इत्यादिपरम्पराश्रुतौ 'विज्ञानेनात्मानं वेदयती'त्यन्तभूतायां तथैव निरूपणात् "तस्मादन्नं ददत् सर्वाण्येतानि ददाती"ति च ब्राह्मणदत्तमेवान्नं भुक्तं सज् ज्ञानं जनयति तद्द्वारा सर्वदानाज् ज्ञानं ब्राह्मण एव प्रतिष्ठितमिति, अन्यान्ने तु ज्ञानादिकमन्योक्तमेव स्यात ततश्च न तद् ब्रह्मज्ञानं भवेदतो भगवान् प्रथमं ब्राह्मणस्वरूपमाह पश्चाद् याचनं वक्ष्यति **प्रयाते**ति, देवा इज्यन्तेस्मिन्निति **देवयजनं** यज्ञभूमिस्तेषां भेदाः श्रुतावनेके, अयथाभूते देशे यज्ञो न कर्तव्य इतिज्ञापनार्थाः, **ब्राह्मणा** एव सर्वे न तु याज्यः कश्चित् क्षत्रियस्ते च स्वधर्मैरवदाताः, तदाह **ब्रह्मवादिन** इति ब्रह्मवदनशीलाः, **ब्रह्म वेदो** वेदार्थश्च, तादृशा मुख्याधिकारिण **आङ्गिरसं सत्रं** चतुर्विंशतिरात्रं चत्वारः षडहा नामेति प्रसिद्धं, **स्वर्गकाम्यये**"त्यङ्गिरसो वै सत्रमासत ते सुवर्गं लोकमाय"न्नितिश्रुतेः **स्वर्गो भगवत आनन्दांशो भगवदवतारो** 'देवेभ्यो वै स्वर्गो लोकस्तिरोभव'दित्यत्र निर्णीतोतस्ये सर्वोत्तमाः सत्रिणः॥ ३॥ तत्र गत्वा याचनं कर्तव्यमित्याह **तत्र गत्वे**ति, **अस्मद्विसर्जिता** अस्मत्प्रेषिता न तु स्वतन्त्रतयान्यथा गमनेप्यपराधः स्यात्, स्वनाम्ना याचनीयं, तदाहार्यस्य बलभद्रस्य **मम चाभिधां** नाम **कीर्तयन्तो याचत**॥ ४॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

विंशतितमेऽध्यायेऽध्यायार्थसन्दर्भे, उभयोर्निर्णयो यादृगित्यादि । उभयोर्ज्ञानकर्मणोः । भगवत्सम्बन्धं विना कर्मापि न सत्त्वशोधकम् । अन्यथा गोपवाक्यैरेव भगवद्भावः स्याद्विप्राणाम् । तथापि कर्मणो वैदिकत्वात् तस्य च भगवत्येव तात्पर्यवत्त्वात् पर्यवसानं भक्तावेव । तदपि न स्वतः, किन्तु भक्तसङ्गादेव । भक्त्यभावे वैयर्थ्यं च । भक्ताया इति वचनादेकस्याः प्रसङ्गेनान्यासामप्यङ्गीकारः । तादृशीनामपि सङ्गेन पुंसां भक्तिः । 'गृह्णन्ति नो न पतय' इतिवाक्यं श्रुत्वा हि तत्समाधानपूर्वकं प्रभुर्गमनमेवोक्तवान् । सम्पन्नं च तदेव । तेनान्यशेषतया भजनं प्रभुर्न मनुते । तेन च भगवदन्तराय एव भवति । अतो न पुरुषार्थसिद्धिरिति ज्ञाप्यते । अन्यासामपि स्नेहवत्त्वेऽपि प्रसादविषय एव तद्धेतुत्वेन भक्तत्वोक्त्याऽन्यभावतो वैलक्षण्यमेतद्भावे ज्ञाप्यते । तच्च सर्वात्मभावत्वमेवेति ज्ञेयम् । पुष्टिलीलायामङ्गीकार एवात्र प्रसादः, न तु शीघ्रं मुक्तिः । पूतनादिसाधारण्येन प्रसादविशेषोक्तिरत्र विरुद्धा भवेत् । शरीरस्य मर्यादामार्गीयत्वेन तन्नाशपूर्वकं देयं दत्तवानिति हृदयम् । एवंरूपस्योर्निर्णयोऽप्युच्यत इत्यर्थः । ननु 'नन्वद्धा मयि कुर्वन्ती'ति प्राणबुद्धिमनःस्वात्मे'त्यादिना च स्वस्मिन्सहजप्रियत्वोक्त्या स्वेतरेषु प्रीतेरौपाधिकत्वेनापुरुषार्थत्वं स्फुटमेव भगवतोक्तमिति तच्छ्रुत्वापि कथं पत्न्यो गृहान् गता इत्यत आहुः **साक्षाद्भगवतोक्तं हीति** । यथा यथावत् तात्पर्यज्ञानपूर्वकं पूर्वमेव न भासत इत्यर्थः । गोपद्वारा ब्राह्मणेभ्यो यदुक्तं तत्परस्परोक्तम् । उत्तमाधिकाररहितानामिति शेषः । एतच्च 'प्रायःश्रुते'ति-श्लोकविवरणे स्फुटीभविष्यति । ननु देहत्यागोत्तरावधिकोत्कटभावोऽवश्यं पूर्वमप्यन्येषामपि ज्ञातः सम्भवतीति कथं प्रतिबन्धकरणमुपपद्यत इत्यत आहुः **स्त्रिया भाव** इति । परः सर्वासां पत्नीनां भावेभ्य उत्कृष्टः सर्वात्मभाव इति यावत् । स्त्रिया उत्तमनायिकाया भावस्तथा । यथापूर्वं न भासत इत्यर्थः । वस्तुन एव तथात्वादिति भावः । यद्वा । तर्हि पत्नीनां परम्परोक्तभानं कथमित्यत आहुः **स्त्रिया भाव** इति । यथा प्रभुवाक्यं दुर्बोधम्, तथा स्त्रीणां भाव एवोत्कृष्ट इत्यर्थः । तथा च प्रियसम्बन्धिवार्ताश्रवणजनितोत्कटभावेनैवागताः, न तु वचनतात्पर्यं ज्ञात्वेति भावः । जात्यभिप्रायेणैकवचनमुक्तम् । यद्वा । ननु 'प्रसीद'न्निति वाक्यात्प्रसादस्तस्यामवश्यं वाच्यः । स च देहत्यागः सद्योमुक्तिर्वेति न वक्तुमुचितम् । एतयोः पूतनादिसाधारणत्वादन्यस्य स्पष्टतयानुक्तत्वात् तत्कार्यं न किञ्चित्पश्याम इत्यत आहुः **स्त्रिया भाव** इति । यथा व्रजसीमन्तिनीनां तथास्या अपि भावः परः सर्वोत्कृष्टः सर्वात्मभावरूप इत्यर्थः । तथाच यथैतासु लीलां कृतवानेवमेवास्यामपीति । मर्यादामार्गीयत्वाद्देहो नाशितः । यदोयमत्रागता स्यान्न निवर्तेतैव, सर्वात्मभाववत्त्वात् । अतोत्र प्रतिबन्धकं मर्यादादेहं नाशयित्वा नीतवानित्ययमेव प्रसादः । अन्यथा 'ये यथा मा' मिति प्रतिज्ञा न संगच्छेतेति भावः । यद्वा । नन्वेकस्यामेव प्रसादे को हेतुरत आहुः **स्त्रिया** इति । परः सर्वासां भावेभ्य उत्कृष्टोऽस्या भावोऽतस्तथेत्यर्थः ॥ ० ॥ **भक्ताया विप्रभार्याया** इत्यस्य विवरणे, **ज्ञानं हि ब्रह्मात्मक**मित्यारभ्य **कार्यक्षमं भवती**त्यन्तम् । अत्रायमाशयः । पूर्वाध्याये हि सर्वमत्रत्यं भगवदर्थमिति ज्ञानमुपदिष्टम् । एवं सति स्वविनियोगानर्हत्वज्ञानेन वस्तुमात्रे तथाकरणे व्यवहारविरोधेन च लीलाविरोधः स्यात् । अत एव क्षुन्निवारणस्यावश्यकत्वेन भगवदीयवस्तूपयोगभिया नूतनप्रार्थनम् । अन्यथा फलादिभ्य एव तत्सम्भवेप्रार्थनं व्यर्थं स्यात् । तेन यदुपयोगकरणे प्रभोरिङ्गितमस्ति तस्य तथाकरणम् । यत्रातथात्वं, न तत्र तथेति ज्ञानमपेक्षितम् । तत्रापि यदेदं मयैव भोक्तव्यमित्याग्रहः स्यात्तदैव बाललीलायां रसः स्यात्, अन्यथा शान्तरसमध्यपातित्वेन रसाभासः स्यात् । इदं चोपदिष्टज्ञाने जाग्रति न सम्भवतीति प्रथमं लोकानुरूपं पर्यवसानतो भगवद्गामि यज्ज्ञानं तद्यतो भवति तदिदमन्नमिति तथोक्तवान् । अन्नस्वामिनां बहिर्मुखत्वात् समर्पणकर्त्रीणां च भक्तत्वादुभयत्वं तस्येति । अन्नस्य ज्ञानपोषकत्वं श्रुतिसिद्धम् ॥ २ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

विंशेध्याये कारिकायां **कर्मे**ति विप्रतत्पत्न्योर्मर्यादापुष्टिभेदेन द्विविधे कर्मज्ञाने उक्तवानित्यर्थः ॥ ० ॥ **राम रामे**त्यस्याभासे **कृतार्था भवन्तीति कृतः** साधितः सर्वं परार्थं कुर्यादिति भगवदुपदिष्टोर्थो यैस्तादृशा भवन्तीत्यर्थः, व्याख्याने, **अयं ही**ति प्रथमचरणीयपदत्रयस्यार्थत्रयमुक्तं, प्रथम**राम**पदेन योगिरमणस्थानत्वाद् **ज्ञानात्मक** उक्तः, द्वितीयेन सङ्कर्षणत्वाच् **श्रुतिरूपः**, **महावीर्ये**त्यनेनावेशयुक्तः महासामर्थ्यस्यावेशकार्यत्वात्, **सदानन्देति** भ्रातृव्यत्वेन दुष्टत्वात् सत्तिरोभावो दुःखस्वरूपत्वादानन्दतिरोभावः, अभावः प्रतियोगिनैव नाश्यो भवतीति एवकारः, अस्याः दुष्टत्वे प्रमाणत्वेन श्रुतिरुक्ता, एषेत्यत्र स्त्रीत्वमक्षरार्थस्तदाभासमाहुः **स्त्रीनिवारणे** इति, **विद्यया स्त्रियेति** सर्वं भगवदीयमितिज्ञानमुपदिष्टं, तथा च पारतन्त्र्यं तथेतरदितिवाक्याद् भगवदधीनत्वलक्षणस्त्रीत्वं ज्ञाने प्रकारतया वर्तते, तथा च ज्ञानस्य विषयाकारत्वात् स्त्रीत्यर्थः, **अग्रपश्चाद्भावेनेति** पूर्वस्य संसारस्य नाश उत्तरस्य चानुत्पादः स्यादित्यर्थः ॥ १ ॥ **इतीत्यत्र ज्ञानाद्युपायेन** शान्तिर्विज्ञापितत्वात् तदनुरूपं सामर्थ्याननुरूपं च याचनोपदेशनमिति तत्र विशेषणयोर्हेतुत्वं न सम्भवतीति अपिशब्दार्थपरतया व्याचक्षते **विज्ञापितोपीति**, विज्ञापनसामर्थ्ययोरननुरूपमपि याचनोपदेशं देवकीसुतत्वाद् भक्तायाः प्रसादार्थं कृतवानित्यर्थः ॥ २ ॥ **प्रयातेत्यत्र अतस्ते सर्वोत्तमा** इति, स्वर्गकामनायामपि तस्य भगवदानन्दांशत्वेन कर्मणो विकृतत्वाभावादित्यर्थः ॥ ३ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

विंशत्यध्यायार्थोक्तौ **कर्मज्ञाने वैदिके** त्विति 'इत्युक्ता यज्ञपत्न्यस्ता यज्ञवाटं पुनर्गताः ते चानसूयवः स्वाभिः स्त्रीभिः सत्रमपारय'न्नितिवाक्योक्तं **वैदिकं कर्म,** 'देशः कालः पृथग् द्रव्यं मन्त्रतन्त्रर्त्विजोऽग्नयः देवता यजमानश्च क्रतुधर्मश्च यन्मय' इतिवाक्योक्तं **वैदिकं ज्ञानं विंशत्यध्याये उक्तवानित्यर्थः । साक्षाद् भगवतोक्तं** हीति इदं स्फुटं टिप्पण्यां, **स्त्रिया भाव** इति एतत् बहुप्रकारेण स्फुटीकृतं टिप्पण्याम् ।। ० ।। **राम राम महावीर्ये**त्यत्र रामपदनिरुक्तौ 'रमन्ते योगिनोनन्ते' इतिश्रुतिरुपन्यस्ता, यद्यपीयं श्रुतिः रामतापनीये वर्तते इति रघुवरविषयकास्ति न बलरामविषयका तथापी'ति रामपदेनासौ परं ब्रह्माभिधीयत' इतिपरब्रह्मवाचकत्वमस्याः श्रुतेर्दृश्यते, प्रकृते बलरामे पूर्णपुरुषोत्तमावेशात् पुरुषोत्तमत्वमेवास्तीत्यस्याः श्रुतेर्बलदेवेप्युपन्यासो युक्त एवेत्याकलितव्यं, बलरामे पुरुषोत्तमावेशे किं प्रमाणमिति चेच्छ्रूयतां भगवता बलदेवं प्रति वृन्दावनस्य वृक्षपश्वादिस्वरूपं निरूपयता गोप्योन्तरेण भुजयोरपि यत्स्पृहा श्री'रितिभगवदेकभोग्यायाः श्रीलक्ष्म्याः स्पृहानिरूपणं मानं भगवदेकभोग्यानां श्रीगोपिकानां भुजान्तःसम्बन्धनिरूपणं च मानमितिबोद्धव्यं, **अतो यथात्मनि रतिरि**त्यादि आत्मनि स्वस्मिन् रामस्वरूपे यथास्माकं रतिर्भवति तथा कर्तव्यं, यतस्त्वयि रामे रतिर्योगिनामेव भवत्यतो वयमपि योगयुक्ताः कर्तव्याः, योगे हि क्षुत्पिपासापारतन्त्र्यं निवर्तिष्यत इतिभावः ।। १ ।। **संसारस्याग्रपश्चाद्भावेने**ति ज्ञानोपदेशेन संसारे निवर्तनीये **अग्रपश्चाद्भावेन** संसारगमनं भविष्यति न तु युगपदितिक्रमेण संसारधर्मा निवर्तनीया इतीच्छया ज्ञानोपदेशं न कृतवानपि तु पुरुषभिक्षानुपदिष्टवानित्याहुर्भगवांस्त्वित्यारभ्य **उक्तवानित्यन्तेन, ततः सम्प्रदायोच्छेदश्चे**ति सत्सङ्गाभावे भक्तिमार्गसम्प्रदायोच्छेदो भवेदित्यर्थः, 'सत्सङ्गेन विनोद्धवे'त्येकादशस्कन्धे उद्धवं प्रति भगवद्वाक्यात्, ननु भिक्षार्थगमने गोपानां दीनता भविष्यतीत्याशङ्क्याहु**रभिमानाभावाद् दीनता तु नास्त्येवे**ति, समानस्याग्रे याचने दीनता भवति अभिमानस्य विद्यमानत्वात्, एतेषां दीक्षितानां पूज्यत्वात् पूज्ये चाभिमानस्याभावाद् दीनता नास्तीत्यर्थः, ननु वस्तुतो दीनताया अभावेऽपि लोके तथा प्रसिद्ध्या दीनता स्यादित्याशङ्क्याहु**र्भगवत्कृपया नापि लोके** इति, **भक्ताया विप्रभार्याया** इत्यस्य विवरणे **ज्ञानं हि ब्रह्मात्मकमि**त्यारभ्य **कार्यक्षमं भव**तीत्यन्तं एतस्यार्थष्टिप्पण्यां स्फुटः ।। २-३ ।।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

विंशाध्यायारम्भे कर्मज्ञाने इति का० २०३४-२०४४ । **कर्मज्ञाने** इति विप्रतत्पत्न्योर्मर्यादापुष्टिभेदेनद्विविधे कर्मज्ञाने उक्तवानित्यर्थः, ननु "नन्वद्धा मयि कुर्वन्ती"त्यादि भगवद्वाक्यं श्रुत्वापि कथं पत्न्यो गृहान् गता इत्यत आहुः **साक्षाद्भगवतोक्तं हीति, यथा** यथावत् तात्पर्यज्ञानपूर्वकं **पूर्वमेव न भासते** इत्यर्थः, गोपद्वारा ब्राह्मणेभ्यो यदुक्तं तत् **परम्परोक्तं** तदपि उत्तमाधिकारहीनानां पूर्वं न भासते इत्यर्थः, ननु पत्नीनां भगवद्विषयकार्त्यतिशयं दृष्ट्वा देहत्यागसम्भावनायामपि कथं प्रतिबन्धकरणमुपपद्यते इत्यत आहुः **स्त्रियाभावस्तथापर** इति, **परः** सर्वासां पत्नीनां भावेभ्य उत्कृष्टः **स्त्रिया** उत्तमनायिकाया भावो यथा पूर्वं न भासत इत्यर्थः, वस्तुन एव तथात्वादितिभावः, एतच्च टिप्पण्यां प्रकारचतुष्टयेन व्याख्यातम् ।। ० ।। **राम राम महावीर्ये**त्यत्र **रमन्ते योगिनो ह्यस्मिन् चिदानन्दे परात्मनि इति रामपदेनासौ परंब्रह्माभिधीयते** यद्यपीत्थं श्रुतो रामतापनीस्था दाशरथिविषया तथापि बलदेवेपि पुरुषोत्तमावेशेन परब्रह्मत्वादुदाहृता, पञ्चमस्कन्धनिबन्धे 'रामः कदाचित् पुरुषोत्तम' इत्यादिना दाशरथेरपि पुरुषोत्तमत्वं निर्णीतं, नवमस्कन्धेपि "अथवा रघुनाथो हि पुरुषोत्तम उच्यत" इति ।। १ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्रयोविंशे स्वपूर्णस्य कृष्णस्य जगदीशितुः । कृपया विप्रपत्नीभ्यो ह्यन्नयाच्ञा निरूप्यते ।। १ ।।

गोपवाक्यमाह - रामरामेति । ज्येष्ठत्वात् प्रथमं रामसम्बोधनम् । वीप्सा आदरार्था । 'बाधानिवर्तने सामर्थ्यं तवास्ति' इत्याशयेन सम्बोधयन्ति —हे महावीर्येति । 'क्षुत् खलु वै मनुष्यस्य भ्रातृव्य' इति श्रुतेः 'क्षुधोऽपि शत्रुत्वात् सर्वशत्रुविनाशकस्य तव क्षुन्निवर्तकत्वमप्यावश्यकम्' इत्याशयेन कृष्णं सम्बोधयन्ति—हे कृष्ण ! हे दुष्टनिबर्हणेति । एषा क्षुत् नोऽस्मान् बाधते पीडयति, अतस्तस्याः शान्तिं निवृत्तिं कर्तुं युवामर्हथः ।। १ ।। इत्येवं गोपैर्विज्ञापितः क्षुन्निवृत्त्यर्थं प्रार्थितो भगवान् देवकीसुतः कृपालुः कृष्णः भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् । 'भक्ताया' इति प्रसादे हेतुः सूचितः । एकवचनं तु सद्यः सायुज्यं गता तदभिप्रायेण, जात्यभिप्रायेण वा ।। २ ।। भगवद्वचनमाह—प्रयातेति द्वयेन । हे गोपाः ! ब्रह्मवादिनः वेदार्थोपदेष्टारो ब्राह्मणाः स्वर्गकाम्यया स्वर्गप्राप्तीच्छया आङ्गिरसं नाम सत्रं यागमासते अनुतिष्ठन्ति, तद्देवयजनं यज्ञवाटं प्रयात गच्छत । तत्प्रसिद्धिं द्योतयति—हीति ।। ३ ।। तत्र गत्वा च तेभ्य ओदनं याचत । एवमुक्तेऽपि याचने विलज्जमानान् दृष्ट्वाऽऽह—अस्मद्विसर्जिता इति । आवाभ्यां प्रहिताः, अतो युष्माकं का तत्र लज्जेत्याशयः । ननु 'एवमपि युवां को वा जानाति ? याचनं तु साक्षादस्माकमेव, अतो लज्जा कुतो न ?" तत्राह—आर्यस्य रामस्य मम चाभिधां नाम कीर्तयन्त इति । 'तथाप्यपात्रत्वं मत्वा कथं दास्यन्ति' इत्याशङ्क्याह—भगवत इति ।। ४ ।।

अन्वितार्थप्रकाशिका

त्रयोविंशे यज्ञपत्न्यनुग्रहोऽन्नार्थनामिषात् । अनुतापस्तत्पतीनां तत्र श्लोका भुजेषवः (५२) ॥
उवाचपञ्चकं (५) सार्द्धाः शरबाणा (५५॥) अनुष्टुभः ॥ २३ ॥

रामेति ॥ हे रामेत्यादिसम्बुद्धयः । एषा क्षुत् नोऽस्मान् बाधते अतस्तस्याः शान्तिं कर्तुं युवामर्हथः ॥ १ ॥ इतीति ॥ इत्येवं गोपैर्विज्ञापितः प्रार्थितो भगवान् देवकीसुतः भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् । एकत्वं जात्यभिप्रायेण सद्यः सायुज्याभिप्रायेण वा । एकस्यास्तु भविष्यन्तीं दशमीं दशामनुस्मृत्य प्रकर्षेण सीदन्निति द्वितीयस्याप्यर्थस्य लाभाय एकत्वमिति केचित् ॥ २ ॥ प्रयातेति ॥ हे गोपाः ! यत्र ब्रह्मवादिनः ब्राह्मणाः स्वर्गकाम्यया स्वर्गप्राप्तीच्छया आङ्गिरसं नाम सत्रं यागमासते अनुतिष्ठन्ति तत् देवयजनं यज्ञवाटं प्रयात गच्छत ॥ ३ ॥ तत्रेति ॥ हे गोपाः ! आवाभ्यां विसर्जिताः प्रहिताः अतो युष्माकं का लज्जा । यूयं तत्र गत्वा भगवत आर्यस्य बलदेवस्य मम च अभिधां नाम कीर्तयन्तः सन्तः ओदनं याचत ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं त्रयोविंशाध्याये ऋषिपत्नीनामनुग्रहस्तत्पतीनां पश्चात्तापश्च प्रोच्यते । दुष्टानां निबर्हणनाशक क्षुत्क्षुधा रामेति वीप्स्या तु क्षुत्पीडनेन बोध्या ॥ १ ॥ विप्रभार्याया इत्येकवचनमार्षं ॥ २ ॥ देवानां यजनं यज्ञोऽस्त्यस्मिंस्तत् देवयजनं यज्ञस्थानं प्रयात यत्र ब्रह्मवादिनः ब्रह्मणि वेदे वादाः ये फलवादास्तद्वंतः वेदकर्मफलासक्ताः अतः स्वर्गस्य काम्यया इच्छया आंगिरसं नाम सत्रं यज्ञमासते कुर्वंतीत्यर्थः ॥ ३ ॥ आवाभ्यां विसर्जिताः प्रेषिताः आर्यस्य रामस्याभिधां माम् ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्नयाच्ञापदेशेन त्रयोविंशेऽथ गोपकैः । द्विजस्त्र्यनुग्रहात् कृष्णो दीक्षितांस्तानतापयत् ॥ ॥

इदमन्नं वन्निति यदुक्तं किं तदित्यत्राह । राम रामेति । हे महावीर्य, हे राम हे राम, हे दुष्टनिबर्हण दुष्टजनविनाशकारक, हे कृष्ण, नोऽस्मान्, एषा क्षुद् बाधते वै । तच्छान्तिं तस्याः क्षुधः शान्तिं कर्त्तुं, अर्हथः युवां समर्थौ भवथः ॥ १ ॥ इतीति । इतीत्थं, गोपैः विज्ञापितः विबोधितः, देवकीसुतः भगवान् कृष्णः, भक्तायाः विप्रभार्यायाः, विप्रभार्याया इत्येकवचनं जात्यभिप्रायम् । विप्रभार्याणां, प्रसीदन् ता अनुजिघृक्षुरित्यर्थः । इदं अब्रवीत् ॥ २ ॥ तदेवाह । प्रयातेति । ब्रह्मवादिनः ब्राह्मणाः, देवा इज्यन्ते पूज्यन्तेऽस्मिन्निति देवयजनं, आङ्गिरसं नाम आङ्गिरसाख्यं, आङ्गिरसेन बृहस्पतिना प्रोक्तं वा, सत्रं बृहस्पतिसवनाभिधं यागमित्यर्थः । स्वर्गकाम्यया स्वर्गप्राप्तीच्छया, आसते अनुतिष्ठन्ति हि । तत्र प्रयात गच्छत ॥ ३ ॥ तत्रेति । हे गोपाः, तत्र यज्ञवाटे गत्वा, अस्मद्विसर्जिता आवाभ्यां प्रेषिताः सन्तः, आर्यस्य बलस्य, भगवतः मम च, अभिधां नामधेयं, कीर्त्तयन्तः रामकृष्णाभ्यां वयं प्रेषिता भवाम इति कथयन्तः सन्तः, ओदनं भक्तं, याचत याचध्वम् ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

आद्ये ध्यानमबोधि भूरि यजनं त्रेता युगे द्वापरेऽर्हयर्चा चरमे प्रशस्तमनिशं श्रीशाभिधाकीर्तनम् ।
तेषामाद्यतृतीययोर्निगदितौ धर्मौ स्फुटं प्राक्तनेद्व्यध्यायेऽत्र कलिस्थसत्पथसमुल्लेखो बुधैर्बुध्यताम् ॥ १ ॥

राम रामेति ः १०.२३.१.

ये येऽस्मानपकर्तुमुद्गतधियो दुर्दानवा नाशतस्ते सर्वेऽपि विभो सपद्युपशमं नीता बलेन त्वया ।
भूयो नाशितयाऽनया तु बहुधा बाधा क्षुधा दीयते तत्तच्छान्तिकृतेऽपि चिन्तय तथोपायं विना नाशनम् ॥ २ ॥
यच्छान्तावस्ततन्द्रं भुवि सकलजनो यत्नवानप्यनीशो यां जेतुं मुग्धचित्तास्तृणजलपवनाभक्षिणस्तापसौघाः ।
तामेतां दुष्करान्तां क्षुधमतनुमपाकर्तुमेको न चालमित्यन्तश्चिन्तयन्तस्तदुभय-पुरतश्चक्रुरभ्यर्थनां ते ॥ ३ ॥
नैषा क्षुद्वैरिरूपा यदुदरगतया स्थीयतेऽस्मासु नित्यं यत्तुष्टौ पुष्टिभाजो वयमपि च सदा या जगद्वृत्तिहेतुः ।
मित्रीभूताऽपि साऽस्मिन् यददयहृदया पीडयत्यस्ततन्द्रं तत्तत्त्वज्ञो बलः स्याद् यदुपतिरथवेत्याशयात्तौ समूचुः ॥ ४ ॥

प्रसीदन्निति ः १०.२३.२.

क्षुधो निर्वाणार्थं कृतबहुलयत्ना ब्रजजनाः क्षुधार्तोऽपि श्रीशो द्विजवरवधूक्षमद्दृगभूत् ।
स्फुटं तद्वात्सल्यं स्वकमकृत भूमौ यदनिशं न मे क्षुद्वा तृड् वा निजजनपरित्राणसमये ॥ ५ ॥

प्रयातेति ः १०.२३.३.

कालिन्दीपुलिनोत्थितस्य च वनोद्भूतस्य वह्नेः पुरा नासीच्छान्तिरनाशनात्तदधिकक्रूरस्त्वयं जाठरः ।
शान्तः स्यान्न विनाशनं क्वचिदपीत्यालोच्य मन्ये प्रभुस्तच्छान्त्यै कृतवांस्तदा तदशनोद्योगं वयस्यैः सह ॥ ६ ॥

हृद्वासनाशनायैकः शक्तो भक्तसमागमः । स्फुटीकुर्वन् प्रभुर्भक्तप्राप्त्यैतान् विनियुक्तवान् ॥ ७ ॥
अस्मास्वियं रतिरिहास्य जघन्यभाक्षु विप्रेषु साऽस्य कियतीति न तर्कयामः ।
तद्भ्रान्तिमेवमपहर्तु-मचिन्त्यशक्तिस्तान् प्राहिणोत् कलयितुं स्वमिहात्मवश्यम् ॥ ८ ॥
जानन्नप्यन्तरात्मा द्विजवरकरतो लभ्यते नान्नमेभिर्यत्तत्र प्राहिणोत्तान् द्विजसदसि सखींस्तत्र भात्याशयोऽयम् ।
वक्तारो ब्रह्मवार्तां सदसदमतयो ये च यज्ञध्वजा ये तेषां श्रद्धा न कुस्मितफलमपि न मत्प्रीतिरित्यत्र बोधः ॥ ९ ॥

तत्र गत्वेति : १०.२३.४.

प्रणवाद्या दमध्यात्ता नान्तवर्णावलिर्द्विजैः । ज्ञाता न वेति विज्ञातुमूचे ह्योदनमेव तान् ॥ १० ॥
भोगिनश्चेद्रामनाम्नि भक्ताश्चेन्नाम्नि ते मम । श्रद्धालवो भविष्यन्तीत्यवोचन्नामनी द्वयोः ॥ ११ ॥
न मे ज्ञानं लोके कलियुगभवे व्यापकतया न वा सङ्गित्वेन स्फुटमपि न वै चित्सुखतया ।
कदाचिज्ज्ञाता चेत्कलयति स मामीशमभिधास्वरूपेणैवेति स्फुटमकृत विप्रेष्वपि हरिः ॥ १२ ॥

कृष्णप्रिया

ग्वालबाल कहने लगे--हे हमारे प्यारे बलराम ! आप तो महाबली हो, और प्यारे श्रीकृष्ण वड़े-बड़े दुष्ट दैत्यों के निकंदन करने वाले हो । हमको इस समय बड़ी भूख लगी है । कृपा करके इस भूख की शान्ति का कुछ उपाय कीजिए ॥ १ ॥ श्रीशुकदेवजी ने कहा—महाराज ! गोपों के यह प्रार्थना करन पर, देवकीनन्दन भगवान् श्रीकृष्ण ने अपनी भक्त विप्रभार्या पर अनुग्रह करने के लिए इस प्रकार कहा ॥ २ ॥ प्यारे मित्र ! यहाँ से थोड़ो ही दूरी पर वेद निपुण विप्रवर स्वर्ग की कामना से आङ्गिरस नाम का यज्ञ कर रहे हैं । तुम लोग उस देवयजन शाला में जाओ ॥ ३ ॥ हे प्यारे गोप ! हमारे द्वारा भेजे हुए आप उस यज्ञस्थान में जाकर, मेरे बड़े भैया श्रीबलभद्रजी का और मेरा नाम लेकर कुछ थोड़ा सा भात भोजन के लिए माँग लाओ ॥ ४ ॥

इत्यादिष्टा भगवता गत्वायाचन्त ते तथा । कृताञ्जलिपुटा विप्रान् दण्डवत् पतिता भुवि ॥ ५ ॥
हे भूमिदेवाः शृणुत कृष्णस्यादेशकारिणः । [1]आप्ताञ्जानीत भद्रं वो गोपान् नो रामचोदितान् ॥ ६ ॥
गाश्चारयन्तावविदूर[2] ओदनं रामाच्युतौ वो लषतो बुभुक्षितौ ।
तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो यच्छत धर्मवित्तमाः ॥ ७ ॥
दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः । अन्यत्र दीक्षितस्यापि नान्नमश्नन् हि दुष्यति ॥ ८ ॥

कर्दमक्षमा

अन्वयः—इति भगवता आदिष्टाः ते तत्र गत्वा भुवि दण्डवत् पतिताः कृताञ्जलिपुटाः विप्रान् अयाचत हे भूमिदेवाः शृणुत नः गोपान् कृष्णस्य आदेशकारिणः रामचोदितान् प्राप्तान् जानीत, वः भद्रम् अस्तु ॥ ५-६ ॥ हे धर्मवित्तमाः ! अविदूरे गाः चारयन्तौ बुभुक्षितौ रामाच्युतौ वः ओदनम् लषतः, हे द्विजाः ! यदि वः श्रद्धा न (स्वकीयश्चान्नं भवेत्) अर्थिनोः तयोः ओदनम् यच्छत ॥ ७ ॥ हे सत्तमाः पशुसंस्थायाः दीक्षायाः सौत्रामण्याः च दीक्षायाः अन्यत्र, दीक्षितस्य अपि अन्नम् न दुष्यति ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अविदूरे वर्तमानौ संतौ वो यदन्नं तल्लषतोऽभिलषतः । वः ओदनं श्रद्धा च यद्यस्ति तर्हि यच्छतेति ॥ ७ ॥ दीक्षिता वयमभोज्यान्ना इति वदिष्यंतीति स्वयमेवाशंक्याहुः । दीक्षाया आरभ्याग्नीषोमीयपश्वालंभनात्पूर्वं दोषः न ततोऽन्यत्र । तथा सौत्रामण्याश्चान्यत्रान्यदा ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ते गोपाः । यथा भगवतोक्तं तथा तेन प्रकारेण ॥ ५ ॥ 'भूमिदेवो द्विजोत्तमः' इति हलायुधः । आदेश आज्ञा ॥ ६ ॥ ननु तौ न ब्राह्मणौ कथं ब्राह्मणभोजनात्पूर्वं ताभ्यां दास्यामस्तत्राहुः—बुभुक्षितौ । 'अन्नस्य क्षुक्षितः पात्रम्' इति स्मृतिं जानीथैवेति भावः । किमप्यवदतस्तान्पुनराहुः—हे द्विजास्तयोरर्थिनोर्वो यदि श्रद्धा तर्हि यच्छत नो चेन्नेति ब्रूत, वयं परावृत्य याम इति भावः । धर्मवित्तमा अत्रान्वयव्यतिरेकयोर्धर्माधर्मौ वयं पुनः किं ब्रूम इति भावः । श्लेषेण ययोर्नाम्नैव सर्वं जगदप्यतिद्रुतीभूयानुरज्यति तौ रामकृष्णावतिक्षुधार्त्तावादिनावपि श्रुत्वा यत्तूष्णीं भवथ अतो यूयं द्विजाः पितृद्वयजाता एवेत्याक्षेपश्च । धर्म्मवित्तमा इति

---

[1] प्राप्ता-श्रीधर. वंशी. वीर. विज. । [2] न्तौ न विदु-गो. प्रे. टी. ।

विपरीतलक्षणया। यद्वा—'धर्मो धर्मविदुत्तमः' इति सहस्रनामसु धर्मविद्धरिस्तस्य तमोऽज्ञानं येषां ते तथा। सान्तानामदन्तत्वादाषत्वाद्वा रूपसिद्धेः हरिविमुखा इत्यर्थः। 'श्रद्धास्तिक्याभिलाषयोः' इति यादवः॥ ७॥ 'दीक्षितान्नं न भोक्तव्यम्' इति शास्त्रादभोज्यान्नाः। आरभ्य प्रारभ्य। ततोन्यत्र पश्वालंभात्परत्र कर्मांतरे। "आग्नीषोमीयं पशुमालभेत" इति विहिता पशुसंस्था, "सौत्रामण्यां सुराग्रहान् गृह्णाति" इति विहिता सौत्रामणिस्ताभ्यामन्यत्रेत्यर्थः। दीक्षानंतरं पशुसंस्थायाः आग्नीषोमीयपश्वालंभनात्पूर्वमेव दोषः न ततोन्यत्र "कर्मांतरे प्रवृत्तस्या अन्नमश्नन्न दुष्यति" इति। पशुसंस्था चेदानीं जातैवेति भावः। सौत्रामण्यां तु सर्वदैव दुष्यतीत्यर्थः॥ ८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्यादिष्टा इति तदादेशगौरवेणैवेत्यर्थः। याज्ञिकानां दौश्शील्यं विशेषयितुं तेषां सौशील्यमाह—कृतेति॥ ५॥ हे भूमिदेवाः! इति भक्त्या सम्बोधनं स्वभावतः कृष्णप्रधानचेतस्त्वेनाहुः-कृष्णस्येति। श्रीकृष्णोक्तिक्रमविस्मृतिमभिनीयाहुः रामेति। तत्र प्रेषणे तु रामादेश एव मुख्य इत्यर्थः। अत एव तत्सम्वरणार्थं मध्यं भद्रं व इति स सम्भ्रमादरोक्तिः॥ ६॥ किमर्थं प्राप्ताःस्थ तत्राह—गा इति। ननु, कथमविदूरे तौ तदाहुः गाश्चारयन्ताविति। मानरक्षायै तत्रान्नार्थाऽऽगमनं परिहृतं अन्नमिति स्वामिपाठः ओदनमिति पाठो बहुत्र अर्थस्तु समानः भिस्सास्त्री भक्तमन्धोन्नमोदनो स्त्री स दीदिविः" इत्यमरः यद्वा कुतो बुभुक्षितौ तत्राहुः गाश्चारयन्तौ गोचारणेन तत्र च दूरागमनेन परिश्रमादित्यर्थः। बुभुक्षिताविति तयोरेव बुभुक्षयान्नप्राप्तिसिद्धेः। यद्वा, तौ कुतोऽत्र नायातौ तत्राहुः, गा इति। तौ विना गवां रक्षा न भवेदिति भावः। ननु, सम्प्रति कुत्र तौ तिष्ठतः तत्राहुः अविदूरे प्रायो निकट एवेत्यर्थः। इदं निजवचनप्रामाण्याय तेषां सङ्कोचनाय च रामाच्युताविति ब्राह्मणेभ्यो भयेन ज्येष्ठक्रमेण निर्दिदष्टं लोकरमणात् रामः सर्वगुणात् च्युतिरहित इति माहात्म्यमन्नलब्धये ध्वनितं वो युष्माकमेवान्नमिति तदितरान्नं निरस्तम्। ननु, तथापि सत्रं परित्यज्य गन्तुं न शक्यते तत्राहुः यच्छत अस्मास्वेव समर्प्यतेति यद्यस्तीति विनयः अथ च सतोऽर्थिभ्योऽप्रदानमधर्मं इति गूढो भावः अत एवाहुः धर्मवित्तमा इति तमप्प्रत्ययः स्तुत्यर्थमेव नतु तत्त्वतः धर्मतत्त्वाज्ञानात् एवमग्रे सत्तमा इति च॥ ७॥ दीक्षाया इत्याद्युक्तिः तेषां स्वाभाविकपाण्डित्यं व्यनक्ति अतः पशुसंस्था च जातेति अनुष्ठानविशेषेण परिचितं हीति शास्त्रप्रसिद्धया निश्चिन्वन्ति स्म दीक्षामारभ्य पशुसंस्थातः पूर्वं दुष्यति ततोऽन्यत्र ततःपरं न दुष्यति सौत्रामण्याश्चान्यत्र न दुष्यति सौत्रामण्यां तु दुष्यतीत्यर्थः। तदेवमपरमपि समयासमयादिविचारं जानन्तं एव याचामह इति भावः॥ ८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इति भगवतादिष्टा इति तदाज्ञापालनस्यावश्यकत्वादित्यर्थः। तथेति यथा तेनादिष्टं तेनैव प्रकारेणेति गोपानां तेष्वनारमालक्ष्य ब्राह्मणान् प्रति भक्त्या प्रणामादिकमपि तेनैवादिष्टमिति बोधयति; यद्वा, श्रीवैष्णवप्रवराणां तेषां स्वभावतो विप्रेषु भक्तिरस्त्येव, ततश्च तथा तेन नामकीर्त्तनादिप्रकारेण अयाचन्तेति॥ ५॥ तदेवाह—हे भूमीति! हे भूमिदेवा इति भक्त्या विप्राणां सम्बोधनम्, यद्यपि आर्य्यस्येति श्रीकृष्णेनादौ निर्द्दिष्टं तथापि तेषां स्वभावतः कृष्णे भक्तिविशेषेण कृष्णस्यादेशकारिणः सेवकानिति प्रागुक्तिः, प्राप्तान् आगतान् तच्छ्रवणे आदरमनालक्ष्य तेषां महापराधं मत्वा कृपया क्षेममाशासते—वो भद्रमस्त्विति। यद्वा, भवत्युक्तिस्वभाव एव याचकरीत्यनुसाराद्वा। ननु कृष्णसेवका यूयं कथमत्रागताः? तत्राहुः—रामेति। कृष्णाज्ञया रामेण प्रेषणादित्यर्थः। एवमात्मनां श्रीकृष्णरामानुगत्वं तथा कृष्णे भक्त्याधिक्यं तथा कृष्णस्य माहात्म्यञ्च रामतोऽधिकं बोधितम्। यद्वा, कृष्णस्यादेशकारिण इति कृष्णादेशेन रामेण चोदिता इति रामप्रेरणया च प्राप्तानित्यर्थः। एवं द्वाभ्यामेव प्रेषणं ज्ञापितम्, तथापि कृष्णादिष्टक्रमातिक्रमस्तेषां कृष्णे भक्तिस्वभावादेव कृष्णरामनाम्नोरन्वर्थतया, किंवा, तत्तत्संज्ञयैव माहात्म्यभरेण सर्व्वत्र सुप्रसिद्धया तयोरैश्वर्यं सूचितम्। अतस्तत्सेवका वयं तदाज्ञयैवागताः स्मः, न तु स्वयमित्यर्थः॥ ६॥ किमर्थं प्राप्ताः स्थ? तत्राहुः—गा इति। ननु कथमविदूरे तौ? तत्राहुः—गाश्चारयन्ताविति। इति मानरक्षायै तत्रान्नार्थागमनं परिहृतम्, अन्नमित्यत्र ओदनमिति पाठः। क्वचित्। तथापि यदन्नमिति तेषां व्याख्यापि संगच्छेतैव, अन्नमात्रानुसारात्, ओदनशब्देन प्रायो भक्तमेवोच्यते, तस्यैव सुखभोज्यत्वात्। यद्वा, कुतो बुभुक्षितौ? तत्राहुः—गाश्चारयन्तौ गोचारणेन तत्र च दूरागमनेन श्रमादित्यर्थः। यद्यपि त एव बुभुक्षिताः न च तौ क्षुधार्तौ इत्युक्तेः, तथापि बुभुक्षिताविति तयोर्बुभुक्षयैवान्नप्राप्तिसिद्धेः। किंवा, स्नेहविशेषेण निजक्षुधया तयोरपि क्षुदनुमानादेव; यद्वा, तौ कुतोऽत्र नायातौ? तत्राहुः—गा इति। तौ विना गवां रक्षा न भवेदिति भावः। ननु सम्प्रति कुत्र तौ तिष्ठतः? तत्राह—अविदूरे प्रायो निकट एवेत्यर्थः। रामाच्युताविति द्वन्द्वसमासतो ब्राह्मणेभ्यो भयेन ज्येष्ठक्रमेण निर्दिष्टः, लोकरमणाद् रामः, सर्व्वगुणात् च्युतिरहितोऽच्युतऽच्युत इति माहात्म्यमन्नलब्धये ध्वनितम्। वो युष्माकमेवान्नमिति तदितरान्नं रिरस्तम्। ननु तथापि सत्रं परित्यज्य गन्तुं न शक्यते, तत्राहुः—यच्छत अस्मास्वेव समर्पयतेति। चकारादोदनश्च यद्यस्ति, सतोऽर्थिभ्योऽप्रदानमधर्म्म इति भावः। अतएवाहुः—हे धर्म्मवित्तमा इति। यद्वा, ननु दानस्य पात्रं विप्र एव, न त्वन्यः? तत्राहुः—'अन्नस्य क्षुधितः पात्रम्' इति धर्म्मो धर्म्मशास्त्रं वा भवद्भिर्नितरां ज्ञायत एव, अन्यथा त्वधर्म्म एवेत्यर्थः। तमप्रत्ययः स्तुत्यर्थमेव,

न तु तत्त्वतः, धर्मतत्त्वाज्ञानात् । एवमग्रे सत्तमा इति च ॥ ७ ॥ दीक्षाया इत्याद्युक्तिस्तेषां स्वतःपाण्डित्यादेव, तत्र सौत्रामण्याश्चेति दृष्टान्तत्वेनोक्तम्, हीति शास्त्रप्रसिद्धया निश्चिन्वन्ति स्म ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

लषतः अन्नमिच्छतः ॥ ७ ॥ दीक्षाया इति दीक्षापूर्विकायाः अग्निषोमीयपशुसंस्थायाः ऊर्ध्वं सौत्रामण्या अन्यत्र अनन्तरेषु दीक्षितस्य यजमानस्यान्नं न दुष्यतीत्यर्थः ॥ ८-९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

भगवतेत्थमादिष्टास्ते गोपास्तत्र गत्वा यथोक्तमयाचन्त, याच्ञाप्रकारमेव दर्शयति—कृताञ्जलिपुटाविति । तावद्विप्रानुदिश्य भुवि दण्डवत्पतिताः कृतान्यञ्जलिपुटानि यैस्ते तथाभूतास्ते गोपाः ॥ ५ ॥ हे भूमिदेवाः ! शृणुत किं कृष्णस्याज्ञाकारणशीलान् रामेण चोदितानिह प्राप्तानस्मान् गोपालान् जानीत वो युष्मभ्यं भद्रमस्तु ॥ ६ ॥ किमर्थं चोदिता इह प्राप्ताश्चेत्यत्राह—गाव इति । इतोऽविदूरे समीपे गाश्चारयन्तौ रामकृष्णौ बुभुक्षितौ क्षुधितौ वः युष्माकमोदनं लषतोभिलषत इच्छत इति यावत् यल्लषत इतिपाठे यद्यस्माल्लषतः अतो हे द्विजाः वः युष्माकं श्रद्धा वर्त्तते चेत्तर्ह्यर्थिनोस्तयोः ओदनं यच्छत दीक्षितानामस्माकमन्नं न भोज्यमिति इमां शङ्कां निराकुर्वन्तः सम्बोधयन्ति, हे धर्मवित्तमाः इति ॥ ७ ॥ तदेवोपपादयन्ति —दीक्षाया इति । हे सत्तमाः ! दीक्षायाः दीक्षापूर्विकाया अग्निष्टोमीयपशुसंस्थाया ऊर्ध्वं सौत्रामण्या अन्यत्रानन्तरे च दीक्षितस्य यजमानस्यान्नमश्नन्न दुष्यति बुभुक्षिरिति कर्तृपदमध्याहर्त्तव्यं दीक्षितशब्दोऽत्र यजमानपरः सौत्रामण्यां दीक्षणीयेष्टिपूर्वकसङ्कल्पाभावात् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

निराधारो दण्डो यथा पतति ॥ ५ ॥ हे भूमिदेवाः ब्राह्मणाः "भूमिदेवो द्विजोत्तमः" इति हलायुधः ॥ ६ ॥ लषतोऽभिलषत इच्छतः श्रद्धा आस्तिक्यम् अभिलाषो वा "श्रद्धास्तिक्याभिलाषयोः" इति यादवः ॥ ७ ॥ ननु, दीक्षितान्न न भोक्तव्यमिति शास्त्रविरोधं परिहरति दीक्षाया इति । दीक्षायाः व्रतसङ्ग्रहरूपायाः वर्त्तमानायाः सत्यः पशुसंस्थायाः अग्नीषोमीयपश्वालम्भादूर्ध्वं दीक्षितस्यान्नमश्नन् सौत्रामण्यास्तथा सौत्रामणीनाम्न्या इष्टेश्चान्यत्र कर्मान्तरे दीक्षितस्य चान्नं न दुष्यिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कृष्णस्येति श्रीकृष्णोक्तिः क्रमविस्मृतिमभिनीय तत्सस्मरणार्थं सादरं किञ्चिदाहुर्भद्रमिति श्रीकृष्णादेशवदाहुः रामेति ॥ ६-७ ॥ दीक्षामारभ्य पशुसंस्थानतः पूर्वं दुष्यति सौत्रामण्याश्च सर्वदेव दुष्यति ततोऽन्यत्र न दुष्यतीत्यर्थः ॥ ८-१० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं विश्वस्ताः सन्तो व्रजबालास्त्वरितमेव तत्र जग्मुरित्याह—इत्यादिष्टा इति द्वाभ्याम् । कृष्णस्यादेशकारिणस्तत्रापि रामप्रेरितान् नोऽस्मान् प्राप्तान् जानीत, स्वतो वयं प्राप्ता इति न जानीतेति भावः ॥ ५-१० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

यद्यपि (४ र्थ-श्लो०) "आर्यस्य मम चाभिधाम्" इति द्वयोर्नाम्ना याचतेति भगवतोक्तम्, तथापि 'हे भूमिदेवाः ! शृणुत कृष्णस्यादेशकारिणः' इति प्राधान्येन कृष्णस्यैव नामाभिदधुः, रामेण चोदितान् प्रेरितान् रामेण च उदितानिति वा रामस्य नाम पश्चादेवाभिदधुः—तेषां तं प्रति सिद्धसङ्कल्पतया शतशोऽनुभवात् ॥ ६-१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृताञ्जलिपुटा इति स्वेषां सौशील्यमभिव्यञ्जयितुं तच्च तदानीं भिक्षाप्राप्त्यर्थकमेव दण्डवत्पतिता इति स्वीयव्रजस्य विप्रेभ्योऽपि सकाशात्तानतितेजस्विनो मत्वेत्यर्थः ॥ ५ कृष्णस्यादेशकारिण इति तस्य नन्दराजपुत्रत्वेन रामतः सकाशादैश्वर्य्यात् रामचोदितानित्यस्मद्द्वारा राम एवान्नं प्रथमं भिक्षते इत्यभिप्रायेण ॥ ६ ॥ वो युष्मान् लषतः भिक्षेते ओदनम् अन्नं चेति पादद्वयं तुल्यार्थम् । ननु, तौ ब्राह्मणौ न भवत इति ब्राह्मणभोजनात् पूर्वं कथं दास्यामस्तत्राहुः-बुभुक्षितौ "अन्नस्य क्षुधितः पात्रम्" इति प्रमाणं जानीथैवेति भावः । किमप्यप्रतिवदतस्तानालक्ष्य पुनराहुः हे द्विजाः ! तयोरर्थिनोर्वो यदि श्रद्धा अस्ति तर्हि यच्छत नोचेन्नेति ब्रूत वयं परावृत्य याम इति भावः धर्मवित्तमा इति खल्वन्वयव्यतिरेकयोर्धर्माधर्मौ वयं पुनः किं ब्रूम इति भावः श्लेषेण ययोर्नाम्नैव सर्वजगदप्यतिद्रुतौ भूयानुरज्यति तौ रामकृष्णौ क्षुधार्त्तावर्थिनावपि श्रुत्वा यत्तूष्णीं भवथ अतो यूयं द्विजाः पितृद्वयजाता एवेत्याक्षेपक्ष धर्मवित्तमा इति विपरीतलक्षणया ॥ ७ ॥ "दीक्षितान्न न भुञ्जीत" इति वचनाद्दीक्षिता वयमभोज्यान्न इति वदिष्य-

तीति स्वयमेवाशङ्क्याहुः—दीक्षाया दीक्षानन्तरं पशुसंस्थायाः अग्नीषोमीयपश्वालम्भात् पूर्वं दोषः न ततोऽन्यत्र ततः परन्तु अन्नमश्नन्न दुष्यतीति पशुसंस्थाचेदानीं जातैवेति भावः तथा सौत्रामण्यां च अन्यत्र न दुष्यति सौत्रामण्यान्तु सर्वदैव दुष्यतीत्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इतोऽविदूरे गाश्चारयन्तो वः युष्माकमोदनं लषतोऽभिलषितः यदि वो युष्माकं श्रद्धा चेत्तर्हि तयोरर्थिनोः ओदनं यच्छत ॥ ७ ॥ ननु, दीक्षतावयमभाज्यान्ना इत्यत आहुः—दीक्षाया आरभ्याग्निष्टोमीयपश्वालम्भात्पूर्वं दोषः ततोऽन्यत्र तथा सौत्रामण्याश्चान्यत्रान्यदा दीक्षितस्य यजमानस्य अन्नमश्नुन्न दुष्यति भोक्तेति कर्तृपदमध्याह्रियते ॥ ८ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

भुवि दण्डवत् पतिता इति सौशील्यात् तेषु तेषां भक्तिभरः ॥ ५ ॥ हे भूमिदेवा ! विप्रा ! रामेण प्रेषितान् कृष्णस्याज्ञावहानस्मान् जानीत ॥ ६ ॥ वो युष्माकमोदनं लषतो वाञ्छतः भिक्षेते इत्यर्थः । यतो बुभुक्षितौ ब्राह्मणभोजनात् पूर्व्वं ताभ्यामोदनः कथं देय इति न वाच्यम् "अन्नस्य क्षुधितः पात्रम्" इति वाक्यादिति भावः । श्लेषेण हे द्विजाः निखिलानन्दकरौ तौ क्षुधार्त्तावर्थिनावपि निशम्य तूष्णीं भावाद् भवन्तो द्विपितृकाः प्रतीयन्ते इति व्यञ्जते **धर्मवित्तमा** इति जहत्स्वार्थया ॥ ७ ॥ ननु दीक्षिता वयमभोज्यान्ना "दीक्षितान्नं न भुञ्जीत" इति वाक्यादिति वदिष्यतो विभाव्याहुः—दीक्षाया इति । दीक्षानारभ्य पशुसंस्थाया अग्नीषोमीयपश्वालम्भात् पूर्वं दोषो न ततोऽन्यत्र ततः परन्तु अन्नमश्नन् न दूष्यतीति पशुसंस्था त्वभूदेवेतिभावः । तथा सौत्रामण्याश्चान्यत्र न दूष्यति तस्यान्तु सर्वदैव दूष्यतीत्यर्थः अत्रैषामनधीतशास्त्राणामपि भगवत् पार्षदत्वात् स्वयं प्रमातः शास्त्रत्वं सूच्यते ॥८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भुवि दण्डवद्दण्डा इव पतिताः । अनेन देहनिस्त्राणतेव भक्तिपरवशता च द्योत्यते ॥ ५ ॥ हे भूमिदेवाः शृणुत वाणीमस्माकमिति शेषः । वो भद्रमस्तु कृष्णस्यादेशकारिण आज्ञाधारकान् तथा रामचोदितान्प्राप्तान्गोपान्नो जानीत वित्त । हरिणाऽऽर्यस्य मम चाभिधामित्युक्तत्वात्तथाऽनुक्त्वा मुरहरपुरस्कृत्या वचनं तेषामभ्यासवशाद्ध्रुवदपि विप्राणां योग्यत्वाज्झटिति दुष्प्रतिपत्तिप्रत्यावृत्तिजनकं च भविष्यतीति मन्तव्यं । रामनामग्रहणे दिशन्ति वा नेति क्षुत्क्षान्ता विपर्यासं चक्रुरिति वाऽवसेयं ॥ ६ ॥ क्व वा कृष्णः क्व च वा रामः क्व यूयं वयं क्वेत्यतः सङ्गतिं वदन्ति । गा इति । अविदूरे समीपे गाश्चारयन्तौ बुभुक्षितौ रामाच्युतौ वो युष्मत्त ओदनमन्नं लषतः काङ्क्षतस्तयोरर्थिनोर्धर्मवित्तमा धर्मज्ञोत्तमा हे द्विजा यदि वः श्रद्धा तर्हि ओदनं यच्छत दिशत । तद्यच्छतेत्यनेन पूर्तावपि यत्पुनरोदनवचनं लोके लोकानामन्नमन्नमित्यायतास्या आयाता इत्याभाणकं समूलमिति ध्वनयितुमिति ज्ञेयं ॥ ७ ॥ दीक्षिता वयं न भक्ष्यान्ना इति वचनस्यावसरमददानाः प्रस्तुतमोदनादनानुमोदनं युक्तं मधुसूदनादेरिति सत्रिणः श्रावयन्ति । दीक्षाया इति । दीक्षायाः पशुसंस्थायाः पशूनां संस्थाऽऽलम्भनं यस्यां सा तस्या दीक्षाया अग्नीषोमीयदीक्षायाः पश्वालम्भनात्पूर्वं नोदनानन्तरं न दोषः । यद्यपि सौत्रामणीयागः स्वतन्त्रः कश्चित्सूत्रामदेवताकोऽन्यस्त्वङ्गभूत इति याज्ञिकास्तत्र नोदनादननिषेध इत्यभ्यधुस्तथाऽप्यत्र सौत्रामण्याश्चेति ग्रहणात्स्मृतिकृद्वचनं वर्तेतेति सम्प्रदायज्ञाः । पूर्वमेव यावत्सर्वोपयोगि पृथक् सङ्ग्राह्योर्वरितपदार्थे स्वत्वमदीक्षितस्य कारितं चेत्तन्न भुञ्जाना न दूष्यन्तीति च ज्ञेयं । तथा च धर्मसूत्रं । दीक्षितोक्रीतराजकोग्नीषोमीयसंस्थाया एव हुतायां वपायां दीक्षितस्य भोक्तव्यं । यज्ञार्थे वा निर्दिष्टे शेषाद्ब्राह्मणा भुञ्जीरन्निति ब्राह्मणमिति । एतदन्यत्र दीक्षितस्याप्यन्नमश्नन्हि यतो न दूष्यति ततश्चौदनं यच्छत । गोपाला अपि धर्मज्ञा इति जानन् जनार्दनः प्रागेवमाशङ्केरंस्त इदमुत्तरं देयमिति नान्वशादिति तात्पर्यमवधेयम् । तथा हि ब्राह्मणे द्वितीयश्चके खण्डे स वा एष पशुरित्यारभ्य सर्वाभिर्वा एष देवताभिरालब्धो भवति यो दीक्षितो भवति तस्मादाहुर्न दीक्षितस्याश्नीयादिति स यदग्नीषोमावमुचितं गृभीतानिति वपायै यजति सर्वाभ्य एव तद्देवताभ्यो यजमानं प्रमुञ्चन्ति तस्मादाहुरशितव्यं वपायां हुतायां यजमानो हि स तर्हि भवतीत्यन्तेनोक्तं ॥ ८ ॥

श्रीसुबोधिनी

तथैव कृतवन्त इत्याहेत्या**दिष्टा** इति, **भगवता**दिष्टा नान्यथा कर्तुं शक्ता अतस्तत्र **गत्वा** तथैव **ते याचितवन्तः**, तेषां याचने प्रकारमाह **कृताञ्जलिपुटा** इति, **कृतोञ्जलिपुटो** यैः, अगर्वार्थमेतत्, **दण्डवत् पतिता भुवि** ब्राह्मणानयाचन्तेतिसम्बन्धः ॥ ५ ॥ तेषां याचनवाक्यान्याह **त्रिभिर्हे भूमिदेवा** इति, **भूमौ प्रत्यक्षदेवा ब्राह्मणाः, श्रृणुते**ति श्रवणार्थं प्रार्थयन्ते, के भवन्त इत्याकाङ्क्षायामाहुः **कृष्णस्यादेशकारिण** इति सदानन्दस्य भगवतः फलरूपस्य **वयमाज्ञाकारिणः**, तथापि किं प्रमाणं भगवद्वाक्य इत्याकाङ्क्षायामाहु**राप्तान् जानीते**ति, आप्तवाक्यं शब्दः प्रमाणं, **यथादृष्टार्थवादिन आप्ताः**, किमुच्यत इत्याकाङ्क्षायामाहु**र्भद्रं व** इति, प्रथमत आशिषो याचकैर्वक्तव्या इति, अथ वा यदुच्यते तद् भवतां **भद्रमेव** वयं च जात्या **गोपा** रामेण बलभद्रेण च प्रस्थापिताः, **भगवान् सदानन्दो न हि भक्तान् याचने प्रवर्तयते**, यदपि भगवतोक्त **'मस्मद्विसर्जिता' इति** तदपि वाक्यत्वाद्

वेदमध्ये प्रविष्टं बलभद्र **एव** प्रविशत्यतो **रामचोदितानिति** युक्तम् ॥ ६ ॥ एवं पूर्वपीठिकामुक्त्वा याचनमाहुर्**गाश्चारयन्ताविति, गाश्चारयन्तौ** धर्मप्रवर्तकाव**विदूरे** निकट एव स्थितौ **रामाच्युतौ** ब्रह्मपरमानन्दौ **वो** युष्माकमन्नं **लषतः**, तत्र हेतुर्**बुभुक्षिताविति, अन्यथा न याचेयातां, न हि कश्चिद् याचकं याचते, बुभुक्षिता**वितिभगवद्वाक्यात् 'कीर्तयन्तो भगवत' इति भगवद्वचनात्, **अभिप्रायमज्ञात्वा** क्षुधामेव ज्ञातवन्तः, अभिप्रायस्तु तैर्भगवानेव याचत इति ज्ञातो यथा महान् प्रभुः सेवकं याचयित्वा ददाति तथा **ब्राह्मणयाचनं** कृत्वा देयमिति, अत उक्तं **बुभुक्षिताविति, द्विजा** इतिसम्बोधनमज्ञानाद् रूढ्या वा, **तयो** रामकृष्णयो**रोदनं यच्छत,** क्षुधैव पात्रता निरूपिता, अर्थित्वमपि द्वितीयमङ्गं, अन्यथैकादश्यामपि क्षुधितायान्नं देयं स्यात्, तत्रापि **यदि श्रद्धास्तिक्यबुद्धिस्तदा देयं,** एतयोर्दाने वयं कृतार्था भविष्याम इति, चकाराद् **यद्योदनोस्ति** यदि **वा वो** युष्माकमेव न त्वन्यस्य प्रसङ्गादागतः, **अत्र** सर्वत्र विधिनिषेधपरिज्ञानं भवतामेव वर्तत इत्याहुर्हे **धर्मवित्तमा धर्मविदां** मध्येतिशयिताः ॥ ७ ॥ ननु दीक्षितानामन्नमभोज्यं 'न दीक्षितवसनं परिदधीत नास्य पापं कीर्तयेन् नान्नमश्नीया'दिति तत्राहुर्**दीक्षाया** इति, दीक्षातः पूर्वं भोक्तुं शक्यते ततो **दीक्षा**दिवसेषु न भोक्तव्यं **पशुसंस्था**दिवसेषु **च** न भोक्तव्यं, **सौत्रामन्याश्च** सुत्येहनि न भोक्तव्यं यदा सुराग्रहाः, **अथ वा दीक्षाया दीक्षामारभ्य पशुसंस्थाया** अन्यत्र **पशुसंस्था**पर्यन्तं न भोक्तव्यं **सौत्रामण्यां च**, 'संस्थिते वाग्नीषोमीये हुतायां वा वपाया'मितिवाक्यात् **सौत्रामण्यां** तु सुराप्राधान्या'दन्नस्य वा एतच्छमलं यत् सुरे'ति शमलसम्बन्धान्न भोक्तव्यं, द्रव्यनिर्देशः कृतो न वेतिसन्देहात् स पक्षो नोक्तः, **अन्यत्र**ैतद्व्यतिरिक्तस्थले **दीक्षितस्याप्यन्नमश्नन् न दुष्यति, हि** युक्तश्चायमर्थः, तदुपपादितं श्रुतिप्रदर्शनेन ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गाश्चारयन्तावित्यत्र अत इति क्षुधाज्ञानादित्यर्थः ॥ ७ ॥ **दीक्षाया** इत्यत्र **पशुसंस्थाया अन्यत्रे**ति भोक्तव्यमितिशेषः, **अश्रवणमिति** ग्राह्यत्वेनाश्रवणमित्यर्थः ॥ ८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

'गाश्चारयन्ता'वित्यत्र **ब्रह्मपरमानन्दाविति ब्रह्मे**ति **राम**पदस्यार्थः, 'रमन्ते योगिनोनन्त' इति श्रुतेः, **परमानन्द** इति **अच्युतपदस्यार्थः, अच्युत**पदेन कृष्णाभिधानात्, कृष्णस्य परमानन्दत्वं 'कृषिभूवाचक' इति श्रुतेः ॥ ७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्येवं भगवता आदिष्टा आज्ञप्तास्ते गोपास्तत्र गत्वा कृताञ्जलिपुटा भूत्वा प्रथमं दण्डवत् भुवि पतितास्ततस्तथा भगवदुक्तप्रकारेण विप्रान् अयाचतेत्यन्वयः ॥ ५ ॥ तत्र प्रथमं तेषां महत्त्वं स्वदैन्यं च सूचयन्तस्तान् सावधानीकुर्वन्ति—हे भूमिदेवाः ! शृणुतेति । अस्मद्वाक्याङ्गीकारे वो युष्माकं भद्रं कल्याणमेव 'भविष्यति' इति शेषः । 'यूयं के' इत्यपेक्षायामाहुः—कृष्णस्यादेशः आज्ञा, तत्कारिणः रामेण चोदितान् युष्मत्सन्निधौ प्राप्तान् नोऽस्मान् गोपान् जानीतेत्यन्वयः ॥ ६ ॥ 'किमर्थं प्राप्तास्तत कथयत' आहुः–गा इति । इतोऽविदूरे निकट एव वर्तमानौ रामाच्युतौ वो युष्माकमोदनमन्नं लषतः अभिलषतः । अत्र हेतुमाहुः–बुभुक्षिताविति । समीपागमने हेतुमाहुः—गाश्चारयन्ताविति । 'क्षुधितेभ्योऽन्नप्रदानं धर्म, इति तु युष्माकं विदितमेव' इति सूचयन्तः सम्बोधयन्ति—धर्मवित्तमा इति । धर्मविदां मध्ये अतिशयिताः । तत्र हेतुत्वेन पुनः सम्बोधयन्ति–द्विजा इति । अतो वो युष्माकं यदि ओदनं श्रद्धा चास्ति तर्हि अन्नार्थिनोस्तयो रामकृष्णयोर्यच्छत ॥ ७ ॥ "दीक्षितान्नं न भुञ्जीत" इति वचनात् 'वयं दीक्षिता अभोज्यान्ना' इति वदिष्यन्ति इत्याशङ्क्य स्वयमेवाहुः—दीक्षाया इति । दीक्षानन्तरं पशुसंस्थायाः अग्नीषोमीयपश्वालम्भात् पूर्वमेव तदन्नभक्षणं निषिद्धम्, तथा सौत्रामण्यमिष्टयां चाश्नन् दुष्यति । अन्यत्र पशुसंस्थानन्तरं सौत्रामण्या अन्यदा च दीक्षितस्याप्यन्नमश्नन्न दुष्यति ॥ हीति शास्त्रं प्रमाणं सूचयन्ति । तथा च पश्वालम्भस्य जातत्वान्न यूयमभोज्यान्ना इति भावः ॥ ८ ॥

अन्वितार्थप्रकाशिका

इतीति ॥ इत्येवं भगवत आदिष्टा आज्ञप्तास्ते गोपास्तत्र गत्वा कृताञ्जलिपुटा भूत्वा प्रथमं दण्डवत् भुवि पतितास्ततस्तथा भगवदुक्तप्रकारेण विप्रान् अयाचन्त ॥५॥ हे इति ॥ हे भूमिदेवाः ! शृणुत वो युष्माकं भद्रं भूयात् । कृष्णस्यादेशः आज्ञा तत्कारिणः कृष्णस्य नन्दराजपुत्रत्वात् तदाज्ञाकारिणः ततोऽप्यभ्यर्हितेन रामेण चोदितान् युष्मत्सन्निधौ प्राप्तान् नोऽस्मान् गोपान् जानीत ॥ ६ ॥ गा इति ॥ धर्मवित्तमाः धर्मविदां श्रेष्ठाः हे द्विजाः ! इतः अविदूरे निकट एव वर्त्तमानौ बुभुक्षितौ "अन्नस्य क्षुधितः पात्रम्" इत्युक्तेर्ब्राह्मणापेक्षया प्रथमं दानेऽपि दोषाभाव इत्याशयः । गाश्चारयन्तौ वो युष्माकमोदनमन्नं लषतः अभिलषतः अतो युष्माकं यदि ओदनं श्रद्धा चास्ति तर्हि अन्नार्थिनोस्तयो रामकृष्णयोर्यच्छत । यदि क्षुधितयोरपि तयोरन्नं न दास्यथ तर्हि यूयं द्विजाः पितृद्वयजाता इत्याक्षेपः सूच्यते । तत्र धर्मवित्तमा इति विपरीतलक्षणा ॥ ७ ॥ ननु दीक्षितान्नं न भुञ्जीतेति निषेधात् दीक्षिता वयमभोज्यान्ना इति चेत्तत्राहुः—दीक्षाया इति । हे सत्तमाः ! दीक्षायाः दीक्षणीयेष्टिमारभ्य पशुसंस्थायाः अग्निषोमीयपश्वालम्भपर्यन्तम् अन्नमश्नन्

दुष्यति । अन्यत्र पशुसंस्थानन्तरं दीक्षितस्याप्यन्नमश्नन्न दुष्यति । पशुसंस्था च जातैवातो दोषाभावः । तथा सौत्रामण्याश्चान्यत्र दीक्षितस्याप्यन्नमश्नन्न दुष्यति । सोत्रामण्यास्तु सर्वथाऽन्नमश्नन्दुष्यतीत्यर्थः । अत्र सौत्रामण्यभावान्न दोषः इति अत्र शुष्कयाज्ञिकेभ्यो भियं दधाना अपि क्लिष्टकल्पनानिवृत्तये वयमित्थं व्याचिख्यासामः । हे सत्तमाः ! हिंसादिपराङ्मुखाः पशुसंस्थायाः दीक्षायाः यस्यां यज्ञदीक्षायां पशुर्हन्यते तस्याः अन्यत्र विषये दीक्षितस्याप्यन्नमश्नन्न दुष्यति एवं सौत्रामण्या अन्यत्रापि इति । पशुहिंसायुक्तयागानुष्ठातुः सौत्रामण्यनुष्ठातुश्च दीक्षितस्यान्नभक्षणे दोषः । युष्माकं सत्तमानां तु पशुहिंसा सौत्रामणी च नास्त्यतो न दोषः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र गत्वा तथा उक्तप्रकारेण विप्रान् अयाचत ॥ ५ ॥ आदेशकारिणः आज्ञाकारकान्नोऽस्मान् ॥ ६ ॥ अविदूरे समीपे बुभुक्षितौ क्षुधितौ वो युष्माकं ओदनं लषत इच्छातः वो युष्माकं यदि श्रद्धा चेत्तर्हि हे धर्मवित्तमाः द्विजाः अर्थिनोस्तयोर्भोज्यं ओदनं यछत ददीत ॥ ७ ॥ ननु यज्ञदीक्षितानामन्नमभोज्यमिति चेत्तत्राहुः दाक्षेति पशुसंस्थायाः पशूनां संस्थाहननं यस्यां तथाविधायाः । दीक्षायाः यज्ञदीक्षायाः सकाशादन्यत्र सौत्रामण्याः सुराघ्राणरूपायाः यज्ञदीक्षायाश्च सकाशादन्यत्राहिंस्रयज्ञेषु दीक्षितस्य दीक्षां प्राप्तस्य यजमानस्य अन्नं अश्नन्नपि जनो न दुष्यति ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ भगवता, इतीत्थं, आदिष्टाः ते गोपाः, तत्र गत्वा, तथा यथा शिक्षितं तेन प्रकारेणैव, अयाचन्त । याच्वाप्रकारमेव दर्शयति । तावत् विप्रान्, उद्दिश्येति शेषः । भुवि दण्डवद् पतिताः, ततः कृताञ्जलिपुटाः सन्तः, अयाचन्त ॥ ५ ॥ तत्र गत्वा ते यदूचुस्तदाह ॥ हे भूमिदेवाः, शृणुत । किमित्यत्राहुः । कृष्णस्य आदेशकारिण आज्ञाकरणशीलान्, रामचोदितान् इह प्राप्तान्, नोऽस्मान् गोपान्, जानीत । वो युष्मभ्यं युष्माकं वा, भद्रं मङ्गलं, अस्तु ॥ ६ ॥ किमर्थं नोदिता इह प्राप्तास्तत्राहुः ॥ गा इति ॥ इतः अविदूरे समापे गाः चारयन्तौ, रामाच्युतौ रामकृष्णौ, बुभुक्षितौ क्षुधितौ, भवतः । अतः, वो युष्माकं युष्मत्तो वा, ओदनं भक्तं लषतः । अतः, हे द्विजाः, हे धर्मवित्तमाः, यदि वो युष्माकं श्रद्धा वर्त्तते, तर्हि, अर्थिनोः केवलमोदनमात्रार्थिनोः, तयोः, ओदनं च भक्तमात्रमपि, यच्छत ॥ ७ ॥ ननु दीक्षितान्नं न भोक्तव्यमिति निषेधः पशूपालम्भवद्यागदीक्षितान्नविषयः, सुराग्रहवत् सौत्रामणीदीक्षावदन्नाशनविषयश्च । न च भवतामयं याग उक्तविधयाद्वयात्मकस्ततो दीक्षितानामपि भगवतामन्नमदूषितमेवास्तीति हृद्यवधायोचुः । दीक्षिया इति ॥ पशोः संस्था आलम्भनं यस्यां तस्याः, दोक्षायाः, सौत्रामण्याः सुराग्रहवत्सौत्रामणीयागतश्च, अन्यत्र उक्तविधयागद्वयं विहायान्येषु यागेष्वित्यर्थः । हे मत्तमाः, दीक्षितस्यापि, अन्नं अश्नन्, न दुष्यति हि ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृताञ्जलीति ः १०.२३.५.

दाता शठो भवतु वा भुवि वन्द्य एव विप्रः सदेति कृततन्नमनान् विविक्तम् ।
अर्थिस्वरूपमथवा निखिलानुभूतं दीनाक्षरं कृतनति प्रकृताञ्जलीति ॥ १३ ॥

हे भूमिदेवा इति ः १०.२२.६.

अभ्यर्थना प्रभुकृताऽपि चरैर्न वाच्या दातुः पुरो यदि च तेन न तत्प्रदत्तम् ।
स्यात्स्वामिनोऽतिलघुतेति विचिन्त्य नीतिं युक्तं तदोचुरिति रामगिराऽऽगताः स्म ॥ १४ ॥

रामः शेषावतारः स च धरणिधरेत्याख्ययाऽत्र प्रसिद्धो यस्यां देवेति नाम्ना व्यवहृतिविषयाः संवसामो वयं हि ।
सद्धर्मैकप्रतिष्ठापनधृतविरुदाः सोऽत्र सर्वेष्टकारात्यालोच्यापि प्रदद्युः क्वचिदिति पशुपा अब्रुवन् रामवाक्यम् ॥ १५ ॥
सत्यानृताभ्यां जीवेतेत्यर्थयाथार्थ्यहृष्टयः । अप्यरामप्रेरितास्ते प्रोचुर्यद्रामचोदनाम् ॥ १६ ॥
यद्वो गोपा वयं तस्माद्भवद्भद्रैकहेतवः । जानीतेदमितो वाच्यमस्ति किं धर्मवित्पुनः ॥ १७ ॥

गाश्चारयन्ताविति ः १०.२३.७.

यद्गो निग्रहतोऽस्ति तत्र भवतां मानो मयाऽसौ कृतस्ता गाः पालयति प्रभुः प्रतिपदं नित्यान्तरङ्गस्थिः ।
श्रद्धाऽस्मद्वचसीदृशी यदि तदा तत्प्रेरितानां हि नः स्वेष्टं पूरयतार्थिकं स्वकमपीत्येतन्न चेन्नोत्तरम् ॥ १८ ॥
अस्मद्दृग्ग्रहगोगणावनपरिश्रान्त्या बुक्षक्षाकुलो जातः स्यादिति वा विचिन्त्य कुरुत क्षिप्र प्रभोस्तोषणम् ।
यद्वा यज्ञियमण्डपाऽतिथिजनाभीष्टान्न दानोन्मुखीभावं यज्ञगुणं विलोकयत वा शं येन तच्चिन्त्यताम् ॥ १९ ॥
प्रणवप्रियो हि भगवान् प्रणवैकव्यापृताः सदा यूयम् । इत्यागताः समीपे भवतां प्रणवौदनप्राप्त्यै ॥ २० ॥

दीक्षाया इति ः १०.२३.८.

वयमपि नहि गोपाः प्राकृताः किन्तु साक्षात् प्रभुवचनरसज्ञा यज्ञजाताङ्गिनश्च ।
इति निजमहिमानं बोधयन्तस्तदा ते ग्रहणविधिमदोषं प्रोचुराम्नायगम्यम् ॥ २१ ॥

कृष्णप्रिया

भगवान की आज्ञा के अनुसार वे वहाँ गए और हाथ जोड़कर पृथ्वी पर दण्डवत् प्रणाम करके विप्रों से भोजन माँगने लगे ॥ ५ ॥ भूमि के साक्षात् मूर्तिमान् हे विप्र देवो ! हमारा निवेदन सुनिए, आपका कल्याण हो, हम व्रज के ग्वाले हैं । भगवान् श्रीकृष्ण एवं श्रीबलरामजी की आज्ञा से आप की सेवा में उपस्थित हुए हैं ॥ ६ ॥ भगवान् बलभद्रजी, एवं श्रीकृष्ण, गौएँ चराते हुए यहाँ से थोड़ी ही दूरी पर पधारे हैं । उन्हें इस समय बड़ी भूख लगी है और उनकी अभिलाषा है कि आप श्रद्धा से ओदन भोजन सामग्री देना चाहें और यदि निजी सामग्री हो तब हमें दीजिए । क्योंकि आप धर्मज्ञों में श्रेष्ठ जन है ॥ ७ ॥ भगवान ने कहा मुनिवर सुनिए कि यदि आप कहेंगे कि श्रुति में कहा कि "न दीक्षितस्य वसनं परिदधीत, नास्य पापं कीर्तयेत्, नान्नमश्नीयात्" जो दीक्षित बना उसका वस्त्र धारण न करें, उसका पाप का कीर्तन न करें, उसके अन्न का भोजन न करें ? ऐसी श्रुति आज्ञा होने पर भी आप अन्न की याचना क्यों करते हो तब समाधान सुनिए—दीक्षा के पहिले बलिप्रदान के दिन और सौत्रामण्य होम के दिनों में दीक्षितों का अन्न खाने का निषेध है । इन दिनों को छोड़ कर अन्य दिनों में दीक्षितों का अन्न खाने का शास्त्रों में निषेध नहीं है इसलिए हे सज्जनवर विप्रवर्यो ! आप को वर्तमान में अन्न देने में और हमें खाने में दोष नहीं है इसलिए हमें अन्न दीजिए ॥ ८ ॥

इति ते भगवद्याच्ञां शृण्वन्तोऽपि न शुश्रुवुः । क्षुद्राशा भूरिकर्माणो बालिशा वृद्धमानिनः ॥ ९ ॥
[1]देशः कालः पृथग् द्रव्यं मन्त्रतन्त्रद्विजाऽग्नयः[2] । देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ॥ १० ॥
[3]तद्ब्रह्म परमं साक्षाद् भगवन्तमधोक्षजम् । मनुष्यदृष्ट्या दुष्प्रज्ञा मर्त्यात्मानो न [4]मेनिरे ॥ ११ ॥
न ते यदोमिति प्रोचुर्न नेति च परंतप । गोपा निराशाः प्रत्येत्य तथोचुः कृष्णरामयोः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—क्षुद्राशाः भूरिकर्माणः बालिशाः वृद्धमानिनः ते इति भगवद् याच्ञाम् शृण्वन्तः अपि न शुश्रुवुः ॥ ९ ॥ देशः कालः पृथग् (भिन्नाभिन्ना सामग्री) द्रव्यम् मन्त्र तन्त्र द्विजातयः देवता च यजमानः क्रतुः च धर्मः यन्मयः ॥ १० ॥ तत् साक्षात् परमम् ब्रह्म अधोक्षजम् भगवन्तम्, दुष्प्रज्ञाः मर्त्यात्मानः मनुष्यदृष्ट्या पश्यन्तः) न मेनिरे ॥ ११ ॥ हे परन्तप ! ते (विप्राः) न यद् ओम् इति प्रोचुः न ते नेति (न इति) प्रोचुः, गोपाः निराशाः प्रत्येत्त्य कृष्णरामयोः तथा ऊचुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

क्षुद्रे स्वर्गादावाशामात्रं येषाम् । भूरीणि क्लेशाधिकानि कर्माणि येषाम् अतोऽज्ञा वृथाज्ञानाः वृद्धा इति मानवंतः ॥९॥ ननु कर्मक्रममुल्लंघ्यादेशकालेन्यार्थमन्नमन्यस्मै कथं देयं तत्राह । देश इति । पृथक् चरुपुरोडाशादि द्रव्यम् । तंत्रं प्रयोगः । धर्मोऽपूर्वम् ॥ १० ॥ मनुष्योऽयमिति दृष्ट्या मर्त्यात्मानो ब्राह्मणा वयं महांत इति मन्यमानाः ॥ ११-१२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ते विप्राः । इति गोपोक्तिप्रकारेण । बालिशाः मूर्खाः 'बालिशो बालमूर्खयोः' इति ॥ ९ ॥ देशः कृष्णसारसंचारविषयः । कालो वसंतादिः । मंत्रो देवताप्रसादजनकप्रणवादिः । ऋत्विजः षोडश । तथाहि—ब्रह्मा १, उद्गाता २, होता ३, अध्वर्युः ४, ब्राह्मणाच्छंसी ५, प्रस्तोता ६, मैत्रावरुणः ७, प्रतिप्रस्थाता ८, प्रतिहर्त्ता ९, पोता १०, अच्छावाकः ११, नेष्टा १२, आग्नीध्रः १३, सुब्रह्मण्यः १४, ग्रावस्तोता १५, उन्नेता १६ । एतेषां कर्माणि तु यज्ञविद्याज्ञोऽवसेयानि । अग्नयः—आहवनीयगार्हपत्यदाक्षिणात्यसभ्यावसथ्यादयः । देवताः इंद्रादयः । यजमानः यज्ञकर्त्ता । क्रतुर्यज्ञोंगी ॥ १० ॥ तम् श्रीकृष्णम् ॥ ११ ॥ ते विप्राः । ॐमिति अंगीकृतमिति 'ॐमित्यंगीकारे ब्रह्मणि च' नेति न दास्याम इति च । प्रत्येत्य प्रत्यागत्य । तथोभयम् ॐमिति नेति च ते न ब्रुवंतीत्यूचुः । ॐमिति न प्रोचुरिति—संप्रति ब्राह्मणभोजनात्पूर्वमेव गोपालकेभ्यः कथं दास्याम इति भावः । नेति च न प्रोचुरिति—ब्राह्मणभोजनोत्तरं यद्यन्नान्युर्वरितानि भविष्यंति तर्हि दास्याम इति भावः । क्षुधाया अपि 'प्राणप्रहारी क्षुधा' इत्युक्तेः शत्रुकार्यप्राणहरणकर्त्रीत्वेन शत्रुत्वम् । त्वं तु परंतपोसीति क्षुद्व्याकुलो न भवसीति संबुद्ध्यभिप्रायः । यद्वा—राज्ञः क्रोधाविर्भावमालक्ष्य श्रीशुकः—हे परंतपेति । तदानीं यदि त्वं राजा भविष्यस्तदा ब्रह्मण्यचूडामणिरपि तान्ब्राह्मणान् शत्रूनिवावश्यमदंडयिष्य इति भावः ॥ १२ ॥

---

[1] देशकालपृथग्द्रव्य—विज. । [2] त्विजोऽग्नयः—श्रीधर. वंशी. विज. ; त्विगग्नयः—वीर. । [3] तं ब्रह्म—श्रीधर. वंशी. वीर. विज. विश्व. । [4] न ते विदुः—वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इतीति श्रीशुकोक्तिः भगवतः सर्वैश्वर्यपरिपूर्णस्यापि कृपया याच्ञां तेनैवान्नार्थं प्रेषितत्वात् न शुश्रुवुः महाभिमानेन तां नादृतवन्त इत्यर्थः। तत्र श्रीभगवत्यनादरेण तान् विप्रान् सक्रोधं निन्दति, क्षुद्रेति सार्द्धद्वयेन। क्षुद्राशा अपि भूरिकर्माणः यतो बालिशाः अल्पबुद्धयः तथापि वृद्धमानिनः यद्वा स्वल्पश्रमेणापि भगवद्भक्त्या महार्थः सिद्धचेत् तदज्ञानाद्बालिशा एवेति। ननु, कथं तत्त्वं नान्विष्यन्ति तत्राह, वृद्धेति आत्मानं ज्ञानवृद्धं मन्यन्त इति ॥९॥ अथ तत्त्वदृष्टया तेषामज्ञत्वं ज्ञापयन्नाह—देश इति युग्मकेन। पृथग्बहुविधम् ॥ १० ॥ भगवतो देशादिमयत्वे हेतुः परमं ब्रह्मेति अतो भगवन्तं सर्वैश्वर्यपरिपूर्णम् अतोऽधोक्षजम् इन्द्रियागोचरमित्यर्थः। तथापि कृपया साक्षाद्भूतं तमपि मनुष्यदृष्टया मनुष्यबुद्धया न मेनिरे नादृतवन्त इत्यर्थः। कुतो दुष्प्रज्ञाः ? विचारहीनाः तदपि कुतः मर्त्यात्मानः ॥ ११ ॥ ओमिति स्वीकारे दास्याम इति न प्रोचुः न दास्याम इति च न प्रोचुः दुरभिमानग्रस्ततया अत्यन्तावज्ञानात् हे परन्तपेति परं मदलक्षणं शत्रुं भवादृगेव नियन्तुं शक्नोति न त्वन्य इति भावः तथेति निजोक्तादिकं विप्रचेष्टितं चोचुः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवतः षडैश्वर्य्यपरिपूर्णस्यापि कृपया याच्ञां तेनैवान्नार्थं प्रेषितत्वात्, न शुश्रुवुः—महाभिमानेन तं नादृतवन्त इत्यर्थः। श्रीभगवत्यनादरेण तान् विप्रान् सक्रोधं निन्दन्ति—क्षुद्रेति सार्द्धद्वयेन। क्षुद्राशा अपि भूरिकर्म्माणः, तथा बालिशा अल्पबुद्धयः, तथापि वृद्धमानिनः। यद्वा; स्वल्पप्रमेणापि भगवद्भक्त्या महार्थः सिध्येत्, तदज्ञानाद्बालिशा एवेति। ननु स्वर्गाद्यर्थं भावात् कर्म्म श्रुत्या विधीयत एव, तत्राह—वृद्धेति। आत्मानं ज्ञानवृद्धं मन्यन्ते, न तु तादृशा इत्यर्थः, तत्त्वार्थाज्ञानात् ॥ ९ ॥ तत्त्वार्थमेवोपदिशन्निव तेषामज्ञत्वं प्रदर्शयन् तान् शोचन्निवाह—देश इति द्वाभ्याम्। पृथक् बहुविधम्। (११) भगवतो द्रेषादिमयत्वे हेतुः—परमं ब्रह्मेति। अतो भगवन्तं सर्व्वैश्वर्य्यपूर्णम्, अतोऽधोक्षजमिन्द्रियागोचरमित्यर्थः। तत्रापि कृपया साक्षाद्भुतम्, यद्वा, ब्रह्मेत्यनेनैव द्रेषादिमयता दर्शिता, तत्र च परममिति सच्चिदानन्दघनमूर्त्ति श्रीनारायणम्, तत्र च साक्षात् स्वयमेव न त्ववतारादिरूपेण, तत्रापि भगवन्तं निजाशेषभगवत्ताप्रकटनपरं श्रीमथुरानाथमित्यर्थः। तत्राप्यधोक्षजं शकटाधस्तात् पतनशंकटात् पुनर्जातमिव, एतन्निरुक्तिविस्तरश्चतुर्द्दशाध्याये तन्निरूपणे (भा० १०।१४।१२) 'गर्भगतस्य' इत्यत्र प्रोक्त एव, श्रीगोकुलमहोत्सवमित्यर्थः। तमपि मनुष्यदृष्ट्या न मेनिरे नादृतवन्तः; कुतः ? दुष्प्रज्ञा विचारहीनाः, तदपि कुतः ? मर्त्यात्मनः, तैर्व्याख्यातमेव। यद्वा, मर्त्त्याऽनुभविष्यमाणमरणलक्षणसंसारक आत्मा स्वरूपं येषां ते, अन्यथा संसारमहाघोरदुःखभयापत्तिः। एतैरेव विप्रैरग्रे वक्ष्यमाणस्य पद्यस्यैव तथा प्रायस्तदग्रापद्यार्थस्य चात्रोक्तिस्तेषामेवोक्तानुवादेन प्रमाणविशेषसिद्धेः; यद्वा, यज्ञैकपराणां तेषां तत्तदपेक्षयैकवाक्यतापत्तेः ।११। ओमिति स्वीकारे, दास्याम इति न प्रोचुः, न प्रत्युत्तरं ददुः, न दास्याम इति च न प्रोचुः, दुर्म्मानग्रस्ततयात्यन्तावज्ञानां। हे परन्तपेति परं मदलक्षणं शत्रुं भवादृगेव नियन्तुं शक्नोति, न त्वन्य इति भावः। यद्वा, तादृशमवैष्णवरूपशत्रुं राज्यान्निःसारय दण्डय चेत्यर्थः। यद्वा, तान् प्रति राज्ञोऽन्तःक्रोधमालक्ष्य तदुपशमनार्थं सम्बोधयति—परमिति। क्रोधं संहरेत्यर्थः। प्रत्येत्य निवृत्य, तथेति निजोक्तादिकं विप्रचेष्टितं चोचुः। कृष्णरामयोरिति कृष्णेन प्रेषितत्वादादौ कृष्णं प्रति पश्चाद् रामं प्रति। यद्वा, कृष्णानादरेण रामस्य क्रोधशंकया तं प्रति गौणत्वेनोक्त्या तस्य पश्चान्निर्द्देशः; यद्वा, सर्व्वथा श्रीकृष्णस्यैव प्राधान्यात् ॥ १२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

दीक्षितशब्दो यजमानपरः सौत्रामण्या दीक्षणीयेष्टिपूर्वकसङ्कल्पाभावात् पृथक् द्रव्यं पुरोडाशादिद्रव्यम् ॥ १०-१८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं भगवतो याच्ञां ते ब्राह्मणाः शृण्वन्तोऽपि नाद्रियन्त तत्र हेतुं वदन्विशिनष्टि क्षुद्रे स्वर्गादावाशामात्रं तदर्थं येषां भूरीणि क्लेशावहानि कर्माणि येषां ते स्वयं बालिशा मूर्खा अपि वृद्धमानिनः वृद्धं ज्ञानाधिकमात्मानं मन्यन्त इति तथा ॥ ९ ॥ देशादिर्यन्मयः यत्प्रचुरः भवति तं कृष्णं साक्षात्परब्रह्मभूतं षाड्गुण्यपूर्णमधोक्षजं न मेनिरे किन्तु मनुष्यबुद्ध्या केवलं प्राकृत मनुष्यमेवामन्यन्त तत्र हेतुः दुष्प्रज्ञाः कर्ममीमांसोचितज्ञानाः मर्त्यात्मजमर्त्ये मरणशीले देहे आत्मा आत्मबुद्धिर्येषां ते तत्र देशः समे यजेतेत्याद्युक्तः कालो वसन्तादिः पृथग्द्रव्यं चरुपुरोडाशादिकं धर्मोऽपूर्वम् एतेषां भगवत्प्राचुर्यं तच्छरीरत्वेन तन्निर्वाह्यत्वेन चेति ज्ञेयम् ॥ १०-११ ॥ शृण्वन्तोपि न शुश्रुवुरित्येतदेव विशदयति-नेति। ते ब्राह्मणाः हे परन्तप। ओमिति न प्रोचुर्नापि नेति ओमित्यङ्गीकारद्योतकमव्ययं ततो गोपाः निराशाः प्रत्यागत्य तद्विप्राणामनादरणं रामकृष्णयोरूचुः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इति हेतुपूर्वी भगवद्याच्ञाम् अश्रवणे तेषां बुद्धिविशेषमाह, क्षुद्राशाः इति। क्षुद्राशाः तुच्छफलेच्छवः तदर्थं भूरिकर्माणः किमेते भ्रान्ता इति सत्यमित्याह, बालिशा इति बालिशा मूर्खाः "बालिशो बालमूर्खयोः" इति एतदेव दृढयति वृद्धेति वृद्धा

इत्यभिमानो येषामस्तीति ।। ९ ॥ देशः कृष्णसारसञ्चारविषयः कालः वसन्तादिः पृथग्द्रव्यं चरुपुरोशाडादि मन्त्रो देवताप्रसादप्रकाशकोङ्कारादिः तन्त्रमनुष्ठानविधिः ऋत्विजोऽध्वर्युप्रभृतयः अग्नयः आहवनीयादयः देवता इन्द्रादिशब्दवाच्याः क्रतुः सकल्पः यजमानोधिकारो धर्मोऽदृष्टं यन्मयः यत्प्रधानप्रतिपाद्यः ।। १० ॥ मर्त्यात्मानः देहोहमिति बुद्धियुक्ताः न मेनिरे न ज्ञातवन्तः ॥११॥ तथोभयं ओमिति न नेति च ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्राज्ञमित्येकदेशदृष्टान्तः ।। ११-३० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तेषां निवेदितं श्रुत्वापि ते न शुश्रुवुरिति तान् निन्दन्नाह—तं ब्रह्मेत्यादि । तं श्रीकृष्णं साक्षादपरोक्षं परमं ब्रह्म परममिति साकारपरम्, अन्यथा सर्वं ब्रह्मेति न सङ्गच्छते । ते मर्त्यात्मानो मर्त्या विप्रा न मेनिरे परमब्रह्मत्वेन न विदुः । कुतः ? मनुष्यदृष्ट्या मनुष्याकारदृष्ट्या; अत्रएव दुष्प्रज्ञा मूर्खाः, नराकृति परं ब्रह्मेत्यविद्वांसः । वस्तुतस्तु भगवदनुग्रहाभावान्न तत्तत्त्वज्ञाः,-तत्तत्त्वज्ञाने तदनुग्रहजन्यज्ञानस्यैव प्रमाणत्वे निर्णीतत्वात्, (भा० १०।१४।२९) तथापि ते देव पदाम्बुजद्वय,-प्रसादलेशानुगृहीत एव इत्यादेरुक्तत्वात् ।। १२ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तं ब्रह्म परमं साक्षादपरोक्षमनुपहितं भगवन्तं सर्वैश्वर्यशालिनमधोक्षजमधः कृतमक्षजमिन्द्रियज्ञानं यत्र, सानुकम्पान्यवत्तद्रूपं मर्त्यात्मानो मर्त्यधर्माणो मनुष्यदृष्ट्या अज्ञानेन न मेनिरे ।। १२-१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, ते शास्त्रज्ञा अपि कथं न शुश्रुवुस्तत्र वस्तुतः शास्त्रज्ञाः प्रत्युत शास्त्रमधीत्याध्याप्य च मूर्खा एवेति सक्रोधं तानाक्षिपति —सार्द्धद्वयेन क्षुद्रे स्वर्गादावाशामात्रं येषां ते वृद्धमानिन एव नतु ते ज्ञानवृद्धाः ।। ९ ।। ननु, शास्त्रविदितदेशकालपात्रादिक्रममुल्लङ्घ्य कथमन्यार्थमन्नमन्यस्मै देयं तत्राह–देश इति । पृथग्बहुविधं चरुपुरोडाशादिद्रव्यं तन्त्रं प्रयोगः धर्मोऽपूर्वं यन्मयः यदंशांशविभूतिरूपः तं परमं ब्रह्म अधोक्षजम् इन्द्रियागोचरमपि कृपया प्रत्यक्षीभूतमित्यर्थः । मनुष्यो जीवविशेषोयमिति दृष्ट्या मर्त्यात्मानो देहाभिमानिनः ।। १०-११ ।। ओमिति न प्रोचुरिति सम्प्रति ब्राह्मणभोजननिष्पत्तेः पूर्वमेव गोपालकेभ्यः कथं दास्याम इति भावः । नेति च न प्रोचुरिति यदि ब्राह्मणादिभोजननिष्पत्यनन्तरमन्नान्युर्वरितानि भविष्यन्ति तदा दास्यामोऽपीति भावः । तदा राज्ञोपि क्रोधमुद्भूतमालक्ष्य सम्बोधयति –हे परन्तपेति । तदानीं यदि त्वं राजा भविष्यः तदा ब्रह्मण्यचूडामणिरपि तान् ब्राह्मणान् शत्रूनिव अवश्यमदण्डयिष्य इति भावः ।। १२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ते इत्थं याचिता अपि भगवद्याच्ञां नाद्रियन्त बालिशत्वादित्याह—इतीति । इत्थं ते भगवतो याच्ञां शृण्वन्तोपि न शुश्रुवुः यतः क्षुद्रेऽनित्ये स्वर्गादौ कर्मफले एवाशा येषां ते तदर्थकानि भूरीणि कर्माणि येषां ते अतो वृद्धमानिनः ज्ञानवृद्धा वयमिति वृथा मानवन्तस्ते बालिशा एव अफलभूरिकर्मनिष्ठत्वात् महत्फलाल्पश्रमभगवदाराधनविमुखत्वादित्यर्थः ।। ९ ।। भगवदनादरे कारणभूतां परे ब्रह्मणि श्रीकृष्णे मनुष्यत्वभ्रान्तिमनात्मनि देहे आत्मभ्रान्तिम् आत्मन्यब्रह्मात्मकत्वभ्रान्तिं च वर्णयति—देश इति, द्वाभ्याम् । देशादिर्यन्मयः यत्प्रधानः यत्प्रचुरो वा तम् पृथक् द्रव्याणि चरुपुरोडाशादीनि ।। १० ।। ब्रह्म बृहत्स्वरूपगुणं परमं सर्वोपास्यं साक्षाद्भगवन्तमधोक्षजं सर्वकरणनिरपेक्षज्ञाननिधिं श्रीकृष्णं मनुष्योयमिति दृष्ट्या कुदृष्ट्या मर्त्यात्मानः मर्त्ये मरणधर्मके देहे आत्माभिमानो येषां ते ब्रह्मणः श्रीकृष्णस्य सर्वात्मनामात्मत्वमात्मनश्च ब्रह्मात्मकत्वमजनान्तो मूर्खाः दुष्टे तुच्छे स्वर्गादौ प्रज्ञा येषां ते न मेनिरे नादृतवन्त इत्यर्थः ।। ११ ।। शृण्वन्तोपि न शुश्रुवुरिति पूर्वोक्तं तत्प्रमादं प्रपञ्चयति–न ते इति ।। १२ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु ते वेदज्ञा अपि भगवद्-याच्ञां कुतो न शुश्रूवुस्तत्राह—अधीताध्यापितवेदा अपि मूर्खास्ते इति सक्रोधं तानाक्षिपति क्षुद्रेति । क्षुद्रे स्वर्गादावेवाशा येषां ते वृद्धमानिनो न तु ज्ञानवृद्धाः ।। ९ ।। ननु वेदविहितदेशकालपात्रादिक्रमनुल्लङ्घ्य कथमन्यार्थंमन्नमन्यस्मै दातव्यं तत्राह—पृथग् बहुविधं द्रव्यं चरु पुरोडाशादिः तन्त्रं प्रयोगः धर्मोऽपूर्वं यन्मयो यदिभूत्यंशांशः ।। १० ।। भगवतो देशादिमयत्वे हेतुः परमं ब्रह्मेति शक्तिमतस्तस्य तत्तद्रूपत्वात् तदायत्तवृत्तिकत्वतद्व्याप्यत्वाभ्यां वा देशादीनां भगवन्तं पूर्णषड़ैश्वर्यं अधोक्षाजमिन्द्रियागम्यमपि कृपया प्रत्यक्षमित्यर्थः । मनुष्यदृष्ट्या जीवविशेषबुद्ध्या मर्त्यात्मानो देहाभिमानिनः ।। ११ ।। ओमिति स्वीकारे "ओमित्यनुमतौ प्रोक्तम्" इति विश्वः । दास्याम इति न प्रोचुः न दास्याम इति च न प्रोचुः दुरभिमानग्रस्ततया अत्यन्तावज्ञानात् तथेति निजोक्त्यादिकं विप्रचेष्टां चोचुः ।। १२ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

क्षुद्राशाः स्वर्गादिनश्वरफलाभिलाषा भूरिकर्माणो वृथा कायक्लेशसम्पादककर्मयुता वृद्धमानिनस्तत्कार्यं तु महदप्रश्नो मूर्खा इति । एवं ते भगवद्याञ्चां गोपोपपादितां शृण्वन्तोऽपि न शुश्रुवुः । अतदनुष्ठानादश्रुतप्राया सेति भावः । बालिशौ वृद्धमानिन इति छेदः । वृद्धमानिनः सम्पन्नत्वेनाभिमानवन्तो बालिशौ रामकृष्णाविति तद्याञ्चां न शुश्रुवुरिति वा ॥ ९ ॥ ग्रन्थकृद्बालिशतां प्रकाशयति ॥ देशेति । गङ्गासिन्धुसङ्गमादिर्देशो वसन्तादिः कालः पृथग्द्रव्यं चक्षुर्भूत्यादिकामनानुकल्येन होम्यदध्यादिनानाद्रव्यं मन्त्रास्तत्तद्देवताप्रसादसाधकमंत्रास्तन्त्रंकरक्रिया ऋत्विजश्च यथासम्भवमध्वर्युप्रमुखा अग्नय आहवनीयादयो देवता इन्द्राद्या अमुख्या यजमानो दीक्षितः कर्ता क्रतुः सङ्कल्पो धर्मोऽपूर्वं यन्मयो यत्प्रधानकः । यन्मया इति वक्तव्य एतत्प्रधानभागवतरूपाणां भेदशङ्का स्यात्तदपनुत्यै यन्मय इत्येकवचनं । यन्माधवप्रधानकस्तस्मा अदनौनादानमेतन्निदानकमित्याह ॥ तमिति । परमं ब्रह्म साक्षाद्भगवन्तमधोक्षजं मर्त्यात्मानो मर्त्ये मरणशिरस्के शरीरे आत्मा स्वरूपमिति मतिर्यैस्ते मनुष्य इति दृष्टिधीस्तया । दृष्टिर्धीर्दर्शनाक्षिण्विति विश्वः । अत एव दुष्पज्ञास्तत्त्वेन न मेनिरे न व्यजानन ॥१०–११॥ का कथा प्रवृत्तोचरत्रेति परीक्षिन्मानसीं शङ्कां शुकः परिहर्तुं वक्ति ॥ नेति । ते विप्रा यद्यदा ॐमित्यन्नं दास्याम इति न प्रोचुर्नेति च न प्रोचुस्तदा निराशा इतः परं दपुरेत् इत्याशाशून्यास्तौ प्रत्येत्य यथा तैरुदितं तथैव रामकृष्णयोरूचुः । तौ प्रत्यूचुर्यत्रकुत्र वा स्वयं भुक्त्वा याता दूता इत्यपि नेत्याह ॥ निराशा इति । न विद्यते आशोऽशनं येषां ते तथा प्रातराशययाचित इतिवदुचितमिदं ॥ १२ ॥

श्रीसुबोधिनी

एवं सोपपत्तिके याचने कृतेपि ते न दत्तवन्तस्तत्र हेतुरश्रवणं तत्रापि हेतुर्बालकोक्तमिति, **'असंस्कृता न परिभाष्या'** इति **'न स्त्रिया न शूद्रेण सम्भाषे'**ति च, तथापि भगवन्नाम्ना याचितवन्त इत्यादाने तेषां दोष एवेति मन्यमानः शुक आहेतीति, **ते हि भगवद्याञ्चां शृण्वन्तोपि** सन्तो **न शुश्रुवुर्दत्तचित्ता न** जाताः, तत्र हेतवः **क्षुद्राशा** इत्यादिपदोक्ताश्चत्वारः, क्षुद्रेल्पेर्थं आशा येषां, स्वर्गानन्दो हि क्षुद्रः परमानन्दापेक्षया, 'अस्यैवानन्दस्यान्यानि मात्रामुपजीवन्ती'तिश्रुतेः, साङ्गादेव वैदिककर्मणः फलावश्यम्भावः, ते ह्येवं मन्यन्ते प्रमाणबलनिष्ठा भगवान् हि सर्वात्मकः सर्वत्रैव वर्तते विशेषेणाभिव्यक्तिपक्षेपि यज्ञोपि भगवान् सर्वस्यापि प्रारब्धमूर्तिरेव सन्तोषणीया ततो यथा यज्ञापराधो न पतति तथा विधेयमन्यथा विधिनिषेधौ न स्यातां, प्रायेणैतैर्द्रव्यनिर्देशः कृत 'आज्यं पशवः पुरोडाशीया एते मे यज्ञार्था यावद् यज्ञ उपयोक्ष्ये तावन् मे यज्ञार्थं शेषाद् ब्राह्मणा भुञ्जीर'न्निति, अतो 'ब्राह्मण'पदश्रवणाद् भगवतेपि न दत्तवन्तो रूपान्तरपरिज्ञानात्, एवं तेषां **क्षुद्राशा**, किञ्च **ते हि भूरिकर्माणः**, यद्यल्पे कर्मणि तावानपि स्वर्गः स्यात् तथापि न कुर्युरतो महतापि यज्ञेन यावान् स्वर्गो भवति तावान् भगवतेन्नदानेनापि भवत्यधिकोपि सर्वयज्ञात्मकत्वात् तथापि न कृतवन्तः कर्मतारतम्येन फलतारतम्यमितिन्यायादन्यथा पूर्णाहुत्या सर्वे लोकाः सिद्धा इति सत्रारम्भ एव व्यर्थः स्यादतो यथा समानफलान्यपि नाल्पानि कर्माणि क्रियन्ते तथैतदपि न कृतवन्तो 'न ददाति न पचत' इतिवाक्याच्चातो **भूरिकर्माणः** स्थूल एव कर्मण्यासक्तास्तत् कर्म नष्टं भवेदितिशङ्कया न दत्तवन्तो यतो **बालिशा** अज्ञाः, कर्म हि देवताप्रीतिहेतुस्ताश्च देवता आधिदैविकभूता भगवति सन्तुष्ट एव सन्तुष्यन्ति नान्यथा'तोर्के चेन् मधु विन्देते'तिन्यायेन सर्वफलरूपे भगवति सर्वदेवतारूपे चोपस्थितेल्पसाधनेनैव परितुष्यमाणा आदरमकृत्वा वस्तुज्ञानाभावेभिव्यक्त्यभावाद् यज्ञस्य च स्वरूपानभिज्ञानादन्यथा मूलेनादरासम्भवात् कर्मणो बह्वन्तरायत्वात् केवलं भ्रान्त्येदमेव कर्तव्यमिति प्रवृत्ता **बालिशा** एव, किञ्च यथैतत् सर्वं न जानन्ति तथा स्वदोषमपि न जानन्त्यन्यथान्यो वा बोधयेत्, स्वस्य मौढ्याज्ञाने हेतुर्**वृद्धमानिन** इति, वयमेव त्रयीवृद्धा वेदार्थं जानीम इत्यसदाग्रहाः ॥ ९ ॥ तेषामज्ञानं सर्ववस्तुयाथात्म्यनिरूपणेन प्रकटयति **देश** इति, **देशादय एकादश द्वादश वा कस्यापि** ते स्वरूपं न जानन्ति, **ज्ञात्वा हि कर्म कर्तव्यं**, तत्र **देशा** देवयजनानि, **कालो** वसन्तादिः, **पृथगिति** सर्वत्र भेदः पृथग् **द्रव्याणि** वा, **मन्त्र** ऋगादि, **तन्त्रमानुपूर्वी** क्रियासमुदायो वा, **द्विजा ब्राह्मणा** 'भार्गवो होता भवती'त्यादिभेदाश्च, **अग्नयो** बहुधा भिन्ना आहवनीयादयः, **देवता** अग्न्यादयः, **यजमानो ब्राह्मणादिः 'सिक्तरेता'** इत्यादिभेदाश्च, **ऋतुर्यज्ञाधिष्ठात्री** देवता, **धर्मो** यज्ञः, चकारात् तदङ्गादिकं सर्वमेव, आध्यात्मिकभेदेन वा **ऋतुर्यज्ञो धर्मस्तज्जनितमपूर्वमिति** ॥ १० ॥ नन्वेतत् सर्वं ब्रह्मात्मकमतः प्रकृते कथमुपालम्भः ? तत्राह **तद् ब्रह्मे**ति, यदेतत् सर्वं **तद् ब्रह्म** तत्रापि **परमं**, **ब्रह्म**शब्देन चत्वार उच्यन्ते वेदो ब्राह्मणजातिश्च चतुर्मुखः परब्रह्म च, अतोन्यव्यावृत्त्यर्थं **परम**शब्दः, स एवायं **साक्षात्**, औपचारिककार्यांशसगुणापक्षा व्यावर्तिताः, ततोप्याधिक्यमाह **भगवन्त**मिति, षड्गुणैश्वर्यसम्पन्नं पुरुषोत्तमं, **भगव**च्छब्दवाच्यस्य प्राकृतत्वव्युदासायाहा**धोक्षज**मिति, **अधोक्षजं** ज्ञानं यस्मात्, तर्ह्येतादृशे वस्तुनि प्रकटे स्वप्रकाशे कथं तेषामज्ञानम् ? तत्राह **मनुष्यदृष्ट्ये**ति, अन्यथाज्ञानादज्ञानं यद्यन्यभावस्फूर्तिर्न स्याद् विचारे ज्ञानोपाये च प्रवृत्तिः स्यात्, अन्यथाज्ञाने हेतुमाह **दुःप्रज्ञा** इति, दुष्टा **प्रज्ञा** येषां, बुद्धिदोषात् सर्वत्रैव तेषामन्यथाज्ञानं तथा प्रकृतेपि जातमित्यर्थः, नन्वत्रान्यथाज्ञानं भवितुं नार्हति समानधर्माभावात् विषयत्वाभावादारोपायोग्यत्वात् स्वप्रकाशत्वाद् विषयः सर्वथा शुद्ध इति कथं तत्रान्यथाबुद्धिरिति चेत् तत्राह **मर्त्यात्मान** इति, न ह्यत्र तेषां बुद्धिर्विषयं स्पृशति किन्तु मध्यममेवावलम्बते यथा भ्रमदृष्टभूम्यादयः, न

हि कदाचिदपि भूम्यादीनामावर्तोस्ति, अतोन्तरेव दृष्टिभ्रमणं स्वाधिकारादारोप्यते, विषयधर्माणां हेतुत्वे रजतभ्रमवदन्यः स्यात् तस्यापि कालान्तरे स्यात्, अत एव ते **मानुषभावेनैव** व्याप्ता **मनुष्या एव** वयमिति मन्यमाना भगवन्तमपि तथैव मन्यन्ते, यथा चौरः सर्वानेव चौरान् जानाति तथा मूर्खा देवमप्यागतं स्वसमानमेव मन्यन्ते, यथा व्याधस्तपस्विनं, इतरवैलक्षण्याज्ञानात्, तस्मात् **स्वदोषादेव निर्दुष्टे विषयेन्यथास्फूर्त्तिः**, अत एते **मर्त्यात्मान आत्मानमपि मर्त्यं कृतवन्तः** परमात्मनस्तथाकरणे कः प्रयासः? अतो भगवच्छास्त्रं दृष्ट्वापि **न मेनिरे** नाङ्गीकृतवन्तः ॥ ११ ॥ ततो यज् जातं तदाह **न ते यदोमिति प्रोचुरिति**, ओमित्यङ्गीकारे नेति निषेधे, निषेध उपायान्तर एव प्रवृत्तिः स्यात् तेषां धर्मेण **वा तुष्टा भवेयुः**, नेत्यसत्ये सत्यनिवृत्तेः सिद्धत्वात्, अतो **निराशाः**, **परन्तपे**तिसम्बोधनं स्वाधिदैविकशुकं प्रति कोपनिषेधार्थमागतं, राज्ञो वा, **महद्भाग्ययोगे ह्यतिथिर्विमुखो न गच्छतीति** तद्भाग्याभिनन्दनार्थं, प्रत्येत्य व्याघुट्य समागत्य कृष्णरामयोः पुरतस्तथोचुः ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

इति ते इत्यत्र **दत्तचित्ता** इति श्रवणेपि चित्ते **ग्राह्यत्वेन न** गृहीतवन्त इत्यर्थः ॥ ९ ॥ **तद्ब्रह्मे**त्यत्र अन्यथाज्ञानासम्भवे हेतुमाहुः **समाने**ति, समानः स्वाधिकरणवर्ती स्वसमानाधिकरणो धर्म इत्यर्थः, रजतत्वं स्वसमानाधिकरणधर्मस्य चाकचिक्यस्य शुक्तौ सत्त्वात् तत्रारोपयोग्यमतो बुद्धया रजतत्वारोपेण शुक्तेस्तत्प्रकारकज्ञानविषयत्वं, मनुष्यत्वं तु स्वसमानाधिकरणधर्मस्य भगवत्यभावान् न तत्रारोपयोग्यमतो बुद्धया मनुष्यत्वारोपासम्भवेन भगवतो मनुष्यत्वप्रकारकज्ञानविषयत्वाभावात् तदसम्भव इत्यर्थः, **अन्यथाज्ञान**कथनादन्यथाख्यातिपक्षेणैव व्याख्यातं, समानधर्माभावे हेतुमाहुः **स्वप्रकाशत्वा**दिति, स्वप्रकाशत्वाद्धेतोर्विषयो ब्रह्मरूपः **सर्वथा** सर्वप्रकारेण शुद्धः, न तत्र केनापि प्रकारेण मनुष्यत्वसमानधर्मः सम्भवतीतिभावः, **कथ**मिति तदेतिशेषः, असम्भवे सतीत्यर्थः, **विषयं स्पृशति** विषयौत्पत्तिकधर्मान् न विचारयतीत्यर्थः, तद्विचारे हि समानासमानधर्मविचारो भवतीतिभावः, **मध्य एवे**ति मध्यधर्मानेव विचारयतीत्यर्थः, **भूम्यादयः** प्रतीयन्त इतिशेषः, भूम्यौत्पत्तिकधर्मविचारो न जायत इत्यर्थः, स्थिरत्वस्य भूम्यौत्पत्तिकत्वमाहुः **विषये**ति, विषये चेदावर्तः स्यादित्यर्थः, **अन्यस्यापि** अभ्रमतोपीत्यर्थः, **तस्यापी**ति भ्रमतोपीत्यर्थः, **मनुष्या एवे**ति जीवं देहरूपं मन्यमाना इत्यर्थः, **मर्त्यं कृतवन्त** इति जीवं देहरूपं **मानितवन्त** इत्यर्थः, **अत** इति स्वधर्मस्यैव मानितस्य मर्त्यत्वस्य विचारका न तु भगवद्धर्मस्य स्वप्रकाशत्वस्य, अतो भगवति मनुष्यदृष्ट्या तद्वाक्यं **न मेनिरे** इत्यर्थः, **भगवच्छास्त्र**मिति वेदादिकं दृष्ट्वापि तत्तात्पर्याज्ञानान् **मर्त्यात्म**त्वमित्यर्थः, **मर्त्यो** मर्त्यत्वेन मानित **आत्मा** येषामितिविग्रहः ॥ ११ ॥ **न ते यदो**मित्यत्र निषेधाभावे निराशत्वं कथमित्याशङ्क्याहुर्**ने**तीति, असत्याभिनिवेशे वस्तुयाथात्म्यज्ञानाभावे नेतिवदेयुः, सा सत्यनिवृत्तिस्त्ववचनेपि सिद्धैव, तादृशज्ञाने अवचनं कथं स्यादिति, अतो नेतिवचनाभावेपि तेषामज्ञानं निश्चित्य निराशा जाता इत्यर्थः, **परन्तपे**ति इदं राज्ञः सम्बोधनं, निरोधलीलारम्भे स्वस्मिन्नागतं स्वाधिदैविकशुकं भगवन्तं प्रति कोपनिषेधार्थं, उक्तमितिशेषः, त्वं परन्तपत्वान् मदाविष्टं भगवन्तं पश्यसि, अतः प्रत्यक्षत एव तत्र कोपाभावं पश्येतिभावः, राज्ञः शुकाविष्टभगवद्दर्शनं स्फुटं कुत्रापि नोक्तमित्यरुच्या पक्षान्तरमाहुः **राज्ञो वे**ति, कोपनिषेधार्थमितिशेषः, तद् व्युत्पादयन्ति **महदि**ति, तव तादृशं भाग्यं वर्तते तेषां नास्तीतिभाग्याभावादेवं कृतवन्तः, अतो मूढेषु न कोप उचित इतिभावः ॥ १२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

मनुष्यदृष्ट्या दुःप्रज्ञा मर्त्यात्मानो न मेनिरे इत्यत्र **न ह्यत्र तेषां बुद्धिर्विषयं स्पृशतीति** इदमत्र ज्ञेयं, भ्रमो द्वेधा सोपाधिको निरुपाधिकश्च, तत्र सोपाधिको भ्रमो घटादौ शङ्खः पीतः सिता कट्वीत्यादौ, तत्र ह्यधिष्ठानस्य घटस्य चक्षुषा ग्रहणे भ्रमरिकोपाधि पुरस्कृत्य माया भगवतः शक्तिस्तत्र घटे मिथ्याभूतं भ्रमणमुत्पादयति, तन् मायिकं भ्रमणं सत्यो घटश्चेत्युभयं चक्षुषा गृह्यते, तदक्तं "ऋतेर्थं यत् प्रतीयेत" इत्यस्य सुबोधिन्यां 'विषयता मायाजन्या विषयो भगव"निति विषये घटे भ्रमणरूपो धर्मो विषयताशब्दवाच्यः, तदुक्तं तत्रैव सुबोधिन्यां "विषये विषयता काचित् स्वीकर्तव्ये"ति, सा विषयता भ्रमणरूपा मायाजन्या, विषयो घटो भगवानिति फक्किकार्थः तत्रायं घट इतिज्ञानं विषयजन्यं, भ्राम्यतीतिज्ञानं, तत्र चक्षुरिन्द्रियं विषयं विषयतां च स्पृशति, ततो घटो भ्राम्यतीतिप्रत्ययः, तत्र ये **बालास्तेषां** मनस्यस्माकं भ्रमरिकोपाधिवशान् मायाकल्पितं भ्रमणं प्रतीयते न स्वतो भ्रमणमस्तीतिज्ञानाभावः, तेषां बुद्धेस्तमोगुणाभिभूतत्वाद् वस्तुतोयं घटो भ्राम्यतीतिप्रतीतिरुत्पद्यते, भागवतसिद्धान्ते ज्ञानमात्रं प्रति बुद्धेः कारणत्वाद् बुद्धिदोपेण तथाप्रतीतिः, तथा च तमोगुणाभिभूता बुद्धिर्घटं भ्राम्यन्तमेव निर्धारयति, तथा सति तेषां बुद्धिः शुद्धं घटं न गृह्णाति किन्तु स्वकल्पितं भ्राम्यन्तमेव घटं गृह्णाति, चक्षुरिन्द्रियं तु शुद्धमेव घटं मायिकभ्रमणसहितं स्पृशति तत्सामान्यज्ञानं मनइन्द्रियन्यं, तत्र घटो भ्राम्यतीति अन्यथाप्रतीतिः, मनः सहितेनेन्द्रियेण घटो भ्राम्यतीतिप्रतीत्यनन्तरं तमोगुणविशिष्टा बुद्धिर्बालानां भ्राम्यन्तमेव घटं निश्चिनोति, स घटो बुद्धिकल्पितो बुद्धावेव तिष्ठति न तु बहिः, बहिस्तु शुद्ध एव घटो मायोत्पादितभ्रमणयुक्तोस्ति, स चक्षुषा गृह्यते न तु बुद्धया, अतो न चक्षुषा गृहीतस्य मिथ्यात्वं किन्तु बुद्धिकल्पितस्यैव मिथ्यात्वं, एवं सतीन्द्रियाणां शुद्धघट-

सम्बन्धेपि तमोगुणाभिभूताया बालबुद्धेर्न शुद्धघटसम्बन्धः, तदेतदुक्तं **न ह्यत्र तेषां बुद्धिर्विषयं स्पृश**तीत्यारभ्य स्वाधिकारादारोप्यत इत्यन्तेन, **तेषामज्ञानां बुद्धिर्विषयं** न स्पृशति इन्द्रियाणि तु विषयं स्पृशन्ति मन इन्द्रियेण संयुक्तं विषयं गृह्णदपि न संशयं भ्रमात्मकं निश्चयात्मकं वा ज्ञानमुत्पादयितुं शक्नोति अपि तु सामान्यज्ञानमुत्पादयति, विशेषज्ञानं तु बुद्धिरुत्पादयति 'संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथ'गिति तृतीयस्कन्धे कपिलवाक्ये संशयादिज्ञानानां बुद्धिवृत्तित्वकथनात् तत्र सत्त्वगुणसहिता बुद्धिर्निश्चयात्मकं ज्ञानं जनयति, रजःसहिता संशयात्मकं, तमःसहिता भ्रमात्मकमितिविवेकः, निरुपाधिके भ्रमे शुक्ताविदं रजतमित्यादौ तु न रजतं मायाजनितं किन्तु तमोगुणयुक्तबुद्धिकल्पितं, तद् रजतं बुद्ध्यैव गृह्यते अन्तरेव तिष्ठति न चक्षुषा गृह्यते मनःसंयुक्तचक्षुर्गृह्यमाणायां शुक्तौ सत्यां रजतसंस्कारप्राबल्यात् तमोगुणयुक्ता बुद्धी रजतं निर्माति, तद् बौद्धं रजतं बुद्ध्या गृह्यते, तदुक्तं वेदस्तुता'वन्तरा त्वयि विभाति मृषैकरस इत्यस्य सुबोधिन्यां 'रजतं तु तदनन्तरं बुद्ध्या जन्यते विषयीक्रियते चेति', अत इन्द्रियेण शुक्तिरेव गृह्यते, बुद्ध्या रजतं विषयीक्रियते, अत इन्द्रियेण संयुक्तायाः शुक्तेः सकाशादन्यस्य रजतस्य ख्यातिः अन्यख्यातिरितिसिद्धान्तः, सोपाधिकभ्रमे शङ्खः पीत इत्यादौ न विषयधर्माणां भ्रमहेतुत्वमपि तु काचकामलादिरूपोपाधिना भ्रमहेतुत्वमित्याहुर्**विषयधर्माणां हेतुत्व** इत्यादि, **रजतभ्रमवदन्यस्यापि स्या**दिति यथा रजतभ्रमो विषयनिष्ठचाकचक्यधर्ममादायोत्पद्यते न तथा शङ्खः पीत इत्यादौ विषयधर्मेण भ्रमः, तथा सति यथैकस्योत्पन्नो रजतधर्मोपरस्याप्युत्पद्यते, न तथैकस्योत्पन्नः शङ्खे पीतिमभ्रमोऽपरस्य कामलदोषरहितस्याप्युत्पद्यते, विषये पीतत्वाभावात्, तदेतदाहुः **रजतभ्रमवदन्यस्यापि स्या**दिति, किञ्च यस्य शङ्खः पीत इतिभानं जातं तस्यापि कामलोपाधिनिवृत्तौ न जायते, यदि विषयधर्माणां हेतुत्वं स्यात् तदा विषयधर्माणां सर्वेषां तुल्यत्वात् **कालान्तरेपि** कामलादिनिवृत्तावपि स्यादित्याहुस्**तस्यापि कालान्तरे स्या**दिति, स निरुपाधिकभ्रमोधिष्ठानज्ञाननाश्यः, सोपाधिकभ्रमः पीतः शङ्ख इत्यादिरूपस्त्वधिष्ठानस्य पीतरूपाभाववत्त्वज्ञाने सत्यपि जायमानत्वान् नाधिष्ठानज्ञाननाश्यः किन्तूपाधिनाशनाश्य इतिविभेदः, प्रकृते भगवदिच्छया प्रदर्शितानामवास्तवमनुष्यधर्माणां भक्तिराहित्येन बुद्धिदोषाद् भगवति प्रतीयमानत्वाद् भगवति मनुष्यबुद्धिः, तथा चायं सोपाधिकभ्रम इतिज्ञेयं, यदा भगवदिच्छया भगवद्भक्तिराहित्यरूपोपाधिनाशस्तदा अयं भ्रमो निवर्तिष्यते इतिबोध्यं, भ्रमस्वरूपस्य विशेषविचारस्तु मया प्रमेयरत्नार्णवे ख्यातिविवेके स्फुटीकृत इति विशेषजिज्ञासायां ततोवगन्तव्यः ॥ ११ ॥ **न ते यदोमिति प्रो**चुरित्यस्य विवृतौ नेत्यसत्ये **सत्यनिवृत्तेः सिद्धत्वा**दिति ब्राह्मणा यत् **ओमिति नोचु**स्तत्तु सत्ये तथैव ब्राह्मणानामभिप्रायात्, यत् **नेति नोचु**स्तत् तु असत्ये यतस्तेषामदानेभिप्रायस्ततो नेत्येव कथनस्य युक्तत्वं, तथापि नेति नोचुरतो निषेधकरणाभावस्य ज्ञापको यो नकारः स असत्ये इत्यर्थः, निषेधस्य ब्राह्मणाभिप्रेतत्वात्, तथा च नेतीतिनिषेधस्य निषेधबोधको नेत्यसत्य इतिभावः, एवं निषेधनिषेधो ब्राह्मणानां हृदये असत्याभिनिवेशं बोधयति, तथा सति सिद्धमाहुः **सत्यनिवृत्तेः सिद्धत्वा**दिति, असत्ये सति सत्यनिवृत्तिः सिद्धा, यत्र असत्यं तत्र सत्यावलम्बिना सत्यैव निवृत्तिः न तु तत्र स्थितिः, अतो गोपा **निराशाः** प्रत्यागता इत्यर्थः, **परन्तपेतिसम्बोधनं स्वाधिदैविकशुकं प्रति कोपनिषेधार्थमागत**मिति दशमस्कन्धीयलीलानिरूपणाय शुके भगवानाविष्टः "वैयासकिः सभगवानथ विष्णुरात"मितिवाक्यात्, भगवता सह वर्तमानः "सभगवा"निति विवरणात्, तथा च शुके आविष्टो भगवानाधिदैविक शुक उच्यते, **आधिदैविकं शुकं भगवन्तं प्रति परन्तपे**तिसम्बोधनमित्यर्थः, शुकेन **परन्तपे**तिसम्बोधनं स्वाविष्टं भगवन्तं प्रत्युक्तं, तत्र प्रयोजनमाहुः **कोपनिषेधार्थमागत**मिति, "गोपा निराशा आगता" इति शुकमुखात् श्रुत्वा शुकाविष्टो भगवान् क्रोधं कुर्यात् तस्य क्रोधस्य निषेधार्थमित्यर्थः, परं क्रोधात्मकं शत्रुं तापयतीति **परन्तपः**, तस्मात् परन्तपत्वात् **क्रोधो न** कर्तव्य इतिहार्दं, ननु स्वाविष्टं भगवन्तं प्रति सेवकः शुकः क्रोधो न विधेय इति कथमुपदिशेदित्याशङ्क्याहुः **आगत**मिति, शुकस्य तत्सामयिकलीलाभावनापारवश्यादागतं निःसृतं न तु शुकेन विचार्योक्तमित्यर्थः, **राज्ञो वेति राज्ञः** परीक्षितो वा **परन्तपे**तिसम्बोधनमित्यर्थः, प्रयोजनं तु कोपनिषेधार्थमागतमिति पूर्वोक्तमेव, राजा हि परमवैष्णवो गोपा निराशाः प्रत्यागता इतिश्रुत्वा क्रोधं कुर्यात्, तं निषेधति शुकः, यतस्त्वं परं शत्रुं क्रोधरूपं तापयसीति परन्तपोसि अतो ब्राह्मणानामनयेपि क्रोधो न कर्तव्यः ब्रह्मण्यदेवत्वात् श्रीकृष्णस्य तत्सेवकत्वात् तवेतिभावः ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्येवं गोपमुखेन भगवतो याच्ञां ते ब्राह्मणाः शृण्वन्तोऽपि न शुश्रुवुः दत्तचित्ता न जाताः । तत्र हेतुमाह—क्षुद्राशा इति । क्षुद्रे तुच्छे स्वर्गादावेवाशा मात्रं येषां ते । तथाप्यन्नमात्रप्रदानेन भगवतः सन्तोषे महत्फलं भवेत् 'तत् कुतो न कृतवन्तः ?' तत्राह—भूरिकर्माण इति । भूरिण्येव कर्माणि येषां ते । महत्सु कर्मस्वेव श्रद्धायुक्ताः ॥ तत्र हेतुमाह बालिशा अज्ञा इत्यर्थः । न च ते शिक्षायोग्याः, यतो वृद्धमानिनो 'वयं ज्ञानवृद्धा' इत्यभिमानवन्तः ॥ ९ ॥ ननु 'कर्मक्रममुल्लङ्घ्यादेशेऽकाले देवतार्थमन्नमन्यस्मै कथं देयम्' इत्याशङ्क्याह—देश इति । पृथक् चरुपुरोडाशादि द्रव्यम्, तन्त्रः प्रयोगः धर्मोऽपूर्वम् ॥ १० ॥ देशादिप्रत्येकं यन्मयः यद्विभूतिरूपस्तत्साक्षात् परमं ब्रह्म, अत एवाधोक्षजं इन्द्रियजन्यज्ञानागोचरमपि कृपयाविर्भूतं भगवन्तमैश्वर्यादिगुणपूर्वं ते ब्राह्मणा 'मनुष्योऽयम्' इति दृष्ट्या न मेनिरे, नादृतवन्त इति द्वयोरन्वयः । तत्र हेतुमाह—मर्त्यात्मान इति । मर्त्ये देहे आत्माभिमानिनो 'ब्राह्मणा

वयं महान्त' इति मन्यमाना इत्यर्थः। तत्र हेतुमाह-दुष्प्रज्ञा इति। दुर्बुद्ध्य इत्यर्थः ॥ ११ ॥ 'त्वमेव देहाद्यभिमानमदपरित्यागे समर्थोऽसि इति सूचयन् सम्बोधयति—परंतपेति। यदा ते ब्राह्मणाः 'सम्प्रति ब्राह्मणभोजननिष्पत्तेः पूर्वमेव गोपालकेभ्यः कथं दास्याम' इत्यभिमानेन 'ॐ दास्याम' इति नोचुः, तथा "यदि ब्राह्मणभोजननिष्पत्त्यनन्तरमन्नमुर्वरितं भविष्यति तदा दास्यामः, इदानीं तु न" इति भावेन 'न' इति च न प्रोचुस्तदा अन्नलाभे निराशा गोपा रामकृष्णौ प्रत्येत्य आगत्य तथा यथा तत्र वृत्तं तत् ऊचुरित्यन्वयः। षष्ठी द्वितीयार्थे ॥ १२ ॥

अन्वितार्थप्रकाशिका

इतीति ॥ क्षुद्रे स्वर्गादावेव आशामात्रं येषां भूरीणि क्लेशाधिकानि कर्माणि येषां ते बालिशा मूर्खा अपि आत्मानं वृद्धं मन्यन्ते। तादृशास्ते ब्राह्मणाः इत्येवं गोपमुखेन भगवद्याच्ञां शृण्वन्तोऽपि न शुश्रुवुः ॥ ९ ॥ ननु शास्त्रक्रममुल्लङ्घ्य अन्यस्मै देयमन्यस्मै कथं देयमत आह—देश इति द्वयम् ॥ देशः कालः पृथक् चरुपुरोडाशादि द्रव्यं मन्त्राः तन्त्रं प्रयोगः ऋत्विजः अग्नयः देवता यजमानः क्रतुर्धर्मः अपूर्वात्मकश्च प्रत्येकं यन्मयः यद्विभूतिरूपस्तं साक्षात् परमं ब्रह्म अधोक्षजं भगवन्तं दुष्प्रज्ञाः दुर्बुद्धयः मर्त्यात्मानः मर्त्ये शरीरे ब्राह्मणा वयमित्यात्माभिमानवन्तः ते ब्राह्मणा मनुष्योऽयमिति दृष्ट्या न मेनिरे नादृतवन्तः ॥ १०-११ ॥ नेति ॥ हे परन्तप ! यदा ते ब्राह्मणाः ओम् दास्याम इति नोचुः। तथा न दास्याम इत्यपि च नोचुः। "ओमाङोश्च" इति पररूपम्। तदा अन्नालाभे निराशा गोपा रामकृष्णयोः। शेषे कर्मणि षष्ठी। कृष्णरामयोरिति च पाठः। तौ प्रत्येत्य आगत्य तथा यथा तत्र वृत्तं तत् ऊचुः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

याच्ञां याचनां क्षुद्रे स्वर्गपुत्रादिसुखे एव आशा येषां ते ॥ भूरीणि क्लेशबहुलानि कर्माणि येषां ते अतोबालिशाः ज्ञानहीनाः वृद्धमानिनः वयं वृद्धा इति मानवंतः ॥९॥ नन्वग्निब्राह्मणादिभ्योऽदत्तमन्नं अन्येभ्यः कथं देयमिति चेत्तत्राहुः देश इति देशादिर्यन्मयो यस्य हरेरवयवोंगभूतः अत्र प्रमाणानि यस्य पृथिवी शरीरमिति यस्य सर्वाणि भूतानि शरीरमित्यादिश्रुतयः सर्वं समाप्नोषि ततोसि सर्वं इति स्मृतिश्चेत्यादीनि पृथक् चर्वादि द्रव्यं तंत्रं प्रयोगः धर्मस्तत्र नियमरूपेण धारीणियः एतत् सर्वं श्रीकृष्णस्य शरीरभूतं अतस्तस्मै अन्नदाने कृते सति परमधर्मः स्यादितिभावः ॥ १० ॥ अधोक्षजं अयं मनुष्य इति दृष्टिर्मनुष्यदृष्टितया। दुःप्रज्ञाः न मेनिरे कथंभूताः मर्त्येमरण धर्मेदेहे आत्मा वयं ब्राह्मणाः श्रेष्ठा इत्यभिमानो येषां ते ॥११॥ ॐ भवदुक्तं सत्यं वयं दास्याम इति यद्वचनं तन्न प्रोचुः न वयं दास्याम इति च न प्रोचुः रामकृष्णयोः समीपं प्रत्येत्य पुनर्गत्वा ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं, क्षुद्रे स्वर्गादावाशामात्रं येषां ते, तदर्थं भूरीणि कर्माणि येषां ते, बालिशा मूर्खाः सन्तोऽपि, वृद्धं ज्ञानाधिकमात्मानं मन्यन्ते तथाभूताः, ते ब्राह्मणाः, भगवतः याच्ञा तां, शृण्वन्तः सन्तोऽपि, न शुश्रुवुः नाद्रियन्तेत्यर्थः ॥ ९ ॥ ननु कर्मक्रममुल्लङ्घ्यादेशकाले अन्यार्थमन्नमन्यस्मै कथं देयं तत्राह ॥ देश इति ॥ देशः 'मये यजेत' इत्यादिनाऽभिहितः, कालो वसन्तादिः, पृथक् द्रव्यं चरुपुरोडाशादिकं, मन्त्रो देवताप्रसादप्रकाशक ओंकारादिः, तन्त्रमनुष्ठानविधिः, ऋत्विजोऽध्वर्यु प्रभृतयः, मन्त्रादीनां द्वन्द्वः। अग्नय आहवनीयादयः, देवता इन्द्रादिशब्दवाच्या देवाः, यजमानोऽधिकारी, क्रतुः संकल्पश्च धर्मोऽदृष्टं च अपूर्वं वा, यन्मयः यत्प्रधानप्रतिपाद्यः ॥ १० ॥ तमिति ॥ परमं ब्रह्म परब्रह्मभूतं, भगवन्तं षाड्गुण्यपूर्णं, अधोक्षजमन्तर्दृशा दृश्यं अपि साक्षात् निरवधिकातिशयकरुणया जननयनविषयतां गतं, तं श्रीकृष्णं, दुष्प्रज्ञाः मर्त्यात्मानः ब्राह्मणा वयं महान्त इति मन्यमाना विप्राः, मनुष्यदृष्ट्या हेतुना, न मेनिरे। किं तु केवलं मनुष्यमेवामन्यन्त, न तु परमेश्वरमिति भावः ॥ ११ ॥ 'शृण्वन्तोऽपि न शुश्रुवुः' इत्येतदेव विशदयति ॥ नेति ॥ हे परंतप राजन्, ते ब्राह्मणाः, केवलं कर्ममीमांसोदितज्ञानास्ते विप्रा इत्यर्थः। यदा ओमिति च न प्रोचुः, नेति च न प्रोचुः, ओमित्यङ्गीकारद्योतकमव्ययम्। तदा निराशाः गोपाः, प्रत्येत्य प्रत्यागत्य तद्विप्राणामनादरणं रामकृष्णयो पुनः ऊचुः तथेति पाठे यथा तत्र स्वानादरणं जातं तथेत्यर्थः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तं ब्रह्मेति ः १०.२३.११
मनुष्यदृष्ट्या स्वात्मानं पश्यन्तस्ते सदा द्विजाः। अपश्यन् कृष्णमप्येवं युक्तमैक्यं द्वयोर्यतः ॥ २२ ॥
स्वदृष्ट्या तत्स्वरूपेक्षा तद्दृशा वा स्ववीक्षणम्। आद्यमज्ञानमन्त्यं तु ज्ञानमाद्यं द्विजेषु हि ॥ २३ ॥
सन्ति सत्कर्मकर्तारो योगिनो ब्रह्मवादिनः। तत्सूक्ष्मतत्त्ववेत्ता तु नैकोऽपीत्यभवत् स्फुटम् ॥ २४ ॥

कृष्णप्रिया

हे राजन् ! क्या कहा जाये ? स्वर्गादि तुच्छ फलों की कामना करने वाले— इच्छा रखने वाले, और कष्टसाध्य यज्ञकर्म करने वाले, बडपन के और पांडित्य के अभिमान वाले, वैदिक ज्ञान की दृष्टि से सर्वथा अज्ञात, बेसमझ इन विप्रों में, गोपों के

माध्यम से की गई श्रीकृष्णचन्द्रजी को सुनकर भी अनसुनी कर उस याच्ञा पर तनिक भी ध्यान नहीं दिया ॥ ९ ॥ हे परीक्षित् ! महाराज ! यजनयोग्य देश, वसन्त आदि यज्ञीयकाल, भिन्नभिन्न यज्ञीय सामग्री, देवता और द्रव्यादि के मंत्र, तन्त्र आनुपूर्व कर्मपद्धति, ब्रह्मा-होता-अध्वर्यु उद्गाता आदि यज्ञीय ब्राह्मण, जिसमें "भार्गव होता" होता है, अग्नि-आहवनीय आदि अनेक प्रकार की होती है, देवता अग्नि इन्द्र आदि, यजमान, क्रतुयज्ञ की अधिष्ठात्री देवता, धर्म-यज्ञ, च अव्यय से यज्ञ के सर्व अङ्ग, ये बारह पदार्थ भगवन् मय है और भगवत् स्वरूप है ॥ १० ॥ उन साक्षात् नयन गोचर परब्रह्म इन्द्रियातीत सर्वशक्तिमान भगवान् श्रीकृष्ण को उन मन्दमति द्विजों ने मनुष्यरूप सामान्य ग्वालबाल मानकर सन्मान नहीं किया ॥ ११ ॥ अये परंतप परीक्षित् ! उन द्विजवरों ने जब हाँ, या, ना, कुछ भी उत्तर न दिया, तब वे ग्वालबालों की आशा नष्ट हो गई, वे निराश होकर वापस लौट गए और जो बात बनी वह सारी बात भगवान श्रीकृष्ण को एवं श्री बलराम जी को सुनाई ॥ १२ ॥

तदुपाकर्ण्य भगवान्[1] प्रहस्य जगदीश्वरः । व्याजहार पुनर्गोपान् दर्शयँल्लौकिकीं गतिम् ॥ १३ ॥
मां ज्ञापयत पत्नीभ्यः ससंकर्षणमागतम् । दास्यन्ति काममन्नं वः स्निग्धा मय्युषिता धिया ॥ १४ ॥
गत्वाथ पत्नीशालायां दृष्ट्वाऽऽसीनाः स्वलङ्कृताः । नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रुवन् ॥ १५ ॥
नमो वो विप्रपत्नीभ्यो निबोधत वचांसि नः । इतोऽविदूरे चरता कृष्णेन प्रेषिता[2] वयम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः–तद् उपाकर्ण्य प्रहस्य जगदीश्वरः भगवान् लौकिकीम् गतिम् दर्शयन् पुनः गोपान् व्याजहार ॥ १३ ॥ (हे मित्राणि) ससंकर्षणम् आगतम् माम् पत्नीभ्यः ज्ञापयत, (ताः) धिया मयि उषिताः वः कामम् अन्नम् दास्यन्ति ॥ १४ ॥ अथ गत्वा पत्नीशालायाम् स्वलङ्कृताः आसीनाः द्विजसतीः दृष्ट्वा च नत्वा प्रश्रिताः गोपाः इदम् अब्रुवन् ॥ १५ ॥ विप्रपत्नीभ्यः वः नमः न वचांसि निबोधत इत अविदूरे चरता कृष्णेन वयम् प्रेषिताः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

लौकिकीं गतिं न हि कार्यार्थिनो निर्विद्यंते को वा याचको न पराभूयत इत्यादिलोकस्थितिं दर्शयन् ॥ १३ ॥ केवलं देहेन गृहे वसंति धिया चा मय्येवोषिता यतो मयि स्निग्धा अतो दास्यंतीति ॥ १४–१५ ॥ ईषिताः प्रेषिताः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् गोपवचः । निर्विद्यंते विरज्यंते । पराभूयते तिरस्क्रियतेऽपि तु सर्व एवेति भावः । प्रहस्येति । अज्ञविप्रेषु कोपानौचित्यादिति भावः । लौकिकीं गतिमिति । यत्र पुरुषेषु याचितं न सिध्येत्तत्र तत्पत्न्यो याच्या इति शिक्षयन्निति भावः ॥ १३ ॥ उषिताः कृतनिवासाः । मां चितयंत्यः सदेत्यर्थः । मामागतमेव ज्ञापयत न तु विवक्षितं, बुभुक्षा लक्षणमद्दुःखश्रवणस्य सद्य एव तदतिसंतापकत्वात् । ननु त्वद्बुभुक्षाज्ञापनं विना कथमन्नं ता दास्यंति, तत्राह–वो युष्मभ्यं मत्संबंधेनैव युष्मद्बुभुक्षादर्शनेनैव दास्यंति । ननु तत्पतयो वारयिष्यंति, तत्राह–मयि स्निग्धाः स्नेहवत्यः पतिवारणं न मानयिष्यंति । यतो मय्येव धिया उशिताः केवलं देहेनैव पतिगृहे वसंतीत्यर्थ इति विश्वनाथः ॥ १४ ॥ अथ भगवत्प्रेषणोत्तरम् । द्विजसतीः ब्राह्मणपत्नीः प्रश्रिताः नम्राः संतः इदम् वक्ष्यमाणम् ॥ १५ ॥ ईष–प्रेरणेऽपि भौवादिक आत्मनेपदी ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यद्यपि द्वावेव प्रति गोपैरुक्तं तथापि श्रीरामः श्रीकृष्णाज्ञानादरजातक्रोधात् श्रीकृष्णाभिप्रायज्ञानाद्वा नैवावदत् श्रीकृष्ण एव प्रत्याहेत्याह तदिति । उपसमीप एवाकर्ण्य तदनादरदुःखेन गोपैः शनकैरेवोक्तेः प्रहस्य उच्चैर्हसित्वा तत्र हेतुः जगदीश्वरः सर्वनियन्ता भगवान् सर्वैश्वर्यपूर्णश्च अतः कौतुकमात्रार्थं तथा याचनं तन्निराशे च हास एवोचित इति भावः । अन्यत्तैः । यद्वा, यत्र पुरुषेषु याचितं न सिद्ध्येत्तत्र तत्पत्नीषु याचितव्यमिति याचकान् शिक्षयन्नित्यर्थः सेथमप्येका कौतुकमयी लीलैव वस्तुतस्तु पूर्वनिजोक्तरीत्या वृक्षेभ्यो मनुष्याणां निकर्षे ज्ञापिते विशेषोप्यत्रास्तीत्यभिप्रेत्य स्वस्मिन्नभक्तानां वेदपाठयागैकपरत्वादिकं दुरभिमानादिदोषाय दुःखायैव च कल्पते नच क्षेमाय अतस्तद्रहिता अपि मद्भक्ताः परमोत्तमा इति तद्विप्रतत्पत्नीव्यवहारेण लोके दर्शयितुमित्यर्थः ॥ १३ ॥ ममागतमेव ज्ञापयत नच बुभुक्षितं नापि अन्नयाचनादिकमपि कुरुत यतो मदागमनज्ञापनादेव दास्यन्तीत्यर्थः । पत्नीभ्यः तेषां यज्ञसम्बन्धिनीभ्यो भार्याभ्यः पत्युर्नो यज्ञसंयोग इति स्मरणात् अनेन धर्मसम्बन्ध एव तैः सह तासामवशिष्टोस्ति

---

१. प्रहसञ्जग–वीर. । २. कृष्णेन प्रेषिता–वीर. विज. विश्व. ; कृष्णेनेहेषिता–श्रीधर. वंशी. ।

नतु कामसम्बन्धः मयि गाढभावत्वादिति मतम् किञ्च, स्वस्मिन् तासां भावविशेषेण तत्र श्रीबलदेवस्य **गौणतया** सङ्कर्षणसहितमित्युक्तं सङ्कर्षणेति तस्य महिमनामत्वात् साक्षात् ग्रहणम्। ननु, पतीनामनुज्ञां विना कथं ता अपि दद्युः कथं चिद्दाना अपि पतिभिर्वारयितव्या एव तत्राह–स्निग्धा इति। मदपेक्षया तासां तेषु नादर इति भावः ॥ १४ ॥ अथ स्निग्धा इत्यादि श्रीभगवद्वचनानन्तरमेव अन्यथा पुनर्याचनार्थं यानमयुक्तं स्यात् तासां सदवसर एव च तेषां गमनं जातमित्याह–आसीना इति। सम्भाष्यत्वं खलु त्रिधा सुखाय स्यात् अव्यग्रचित्तत्वेन सुवेषत्वेन सद्व्यवहारवत्वेन च तत्रासीना इति पतिपारवश्येनावश्यकं पाकादिवैयग्र्यमुत्तीर्य स्नानादिपूर्वकं परस्परं श्रीभगवत्कथावेशेन निश्चलतया कृतोपवेशा इत्यर्थः। स्वलङ्कृता इति सधवार्हव्यवहारात् तावदलङ्कृता एव श्रीभगवत्प्रेमावेशमयपुलकादिभिस्तु सुष्ठ्वेवालङ्कृता इत्यर्थः। परमसत्तमायां द्विजजातावपि सतीरिति भगवद्भक्त्या जातेन सर्वगुणोदयेन परमसद्व्यवहारगुणयुक्ताश्चेत्यर्थः। प्रश्रितास्ते स्वभावत एव किं वा तासां श्रीकृष्णविषयकस्नेहविशेषश्रवणेन ॥ १५ ॥ स्निग्धा मय्युषिता धिया इति श्रीकृष्णवचनवदेव वीक्ष्य ताः समवधापयन्ति नमो वो युष्मभ्यमिति विप्रपत्नीभ्य इति नमस्कारयोग्यतोक्ता तथापि पूर्ववदेव नातिबहिश्चित्ताः प्रत्याहुः निबोधतेति वचांसीति बहुत्वमर्थगौरवेण अविदूरे निकट एव कृष्णेन युष्मच्चित्ताकर्षकेणेति भावः ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यद्यपि द्वावेव प्रतिगोपैरुक्तम्, तथापि कृष्णज्ञानादरेण रामः क्रोधान्नैवावदत्, श्रीकृष्ण एव प्रत्याहेत्याह—तदिति। उपसमीप एवाकर्ण्य तदनादरदुःखेन गोपैः शनैरेवोक्तेः। यद्वा, सहचराणां दुःखानुत्पत्तये उपहासतया श्रुत्वा प्रहस्य उच्चैर्हसित्वा तेषां दुष्प्रज्ञत्वं दुरभिमानत्वादिमहिम्ना गोपानां दुःखनिवृत्तये वा, जगदीश्वरोऽपीति तेषां विप्राणां नियन्तापि नापराधममन्यतेत्यर्थः, यतो भगवान् सर्व्वज्ञः, मम मायया मोहितानां तेषां को नाम दोष इति भावः। यद्वा, परमदयागुणयुक्त इति। अन्यत्तैर्व्याख्यातम्। यद्वा, यत्र पुरुषेषु याचितं न सिध्येत्तत्र तत्पत्नीषु याचितव्यमिति याचकान् शिक्षयन्नित्यर्थः; यद्वा, निजभक्तेष्टसिद्ध्यर्थं कथञ्चिदपि न निर्विण्णेन भाव्यमवश्यञ्च यतितव्यमिति लोकान् शिक्षयन्नित्यर्थः। अतएव पूर्व्वं गोपानां क्षुधार्त्युक्तिश्रवणमात्रेणैव व्यग्रतया दुष्प्रज्ञेषु तेषु तेष्वपि सर्वज्ञशिरोमणिनाप्यनुगानां प्रस्थापनं पश्चाच्च विचारोदयान्निजभक्तजनेषु। यद्वा, कामिनां वेदपाठयागैकपरत्वादिकं दुरभिमानादिदोषाय दुःखायैव च कल्पते, न च क्षेमाय, अतस्तद्रहिता एव परमोत्तमा इति तद्विप्रपत्नीव्यवहारेण लोके दर्शयित्वमित्यर्थः। यद्वा, प्रायो मयि योषितां तादृशभाववताञ्च जनानां यथा भावो न तथा पुंसामिति लौकिकतत्त्वं दर्शयितुम्, अतएव पूर्व्वं तेषु प्रस्थापनमिति ॥ १३ ॥ मामागतमेव ज्ञापयत, न च बुभुक्षितम्, नापि अन्नयाचनादिकमपि कुरुत, यतो मदागमनज्ञापनादेव दास्यन्तीत्यर्थः। पत्नीभ्यः, तेषां यज्ञस्य चेति च न निर्दिष्टम्, तेषां तासु तत्सम्बन्धायोग्यत्वात्। किञ्च, स्वस्मिन् तासां भावविशेषेण तत्र श्रीबलरामस्य गौणतया संकर्षणसहितमित्युक्तम्, संकर्षणशब्देन तासां तस्मिन् भक्त्यर्थमात्मना सह तस्यापृथग्भावोऽपि सूचितः। ननु पतीनामनुज्ञां विना कथं ता अपि ददुः, कथञ्चिद्ददाना अपि पतिभिर्वारयितव्या एव, तत्राह–स्निग्धा इति। मदपेक्षया तासां तेषु नादरः, विशेषतश्चाधुना तेषां दुर्व्यवहारेण तानुपेक्ष्य देहेनापि मयि समागमिष्यन्त्येवेति भावः। स्निग्धा इति यज्ञपत्नीनां मधुररतियुक्तत्वेऽपि सामान्यतयोक्तिः, श्रीरामादिलज्जातस्तासां स्वस्मिस्तादृशभावाप्रकाशनात्, किंवा स्वस्य तासु तादृशभावाभावात् ॥ १४ ॥ अथ श्रीभगवद्वचनानन्तरमेव, आसीना इति न पतिवत् कर्म्मव्यग्राः, किन्तु श्रीभगवद्भक्तेः सुखेन सुस्थतया वर्त्तमाना इत्यर्थः। स्वलंकृता इति तासां यज्ञपत्नीत्वलक्षणं सूचितम्; यद्वा, भगवन्मुद्रादिसदलंकारभूषिताः, द्विजानां विप्राणां तेषां सतीः पत्नीः, सती-शब्देन तेषां पत्नीत्वेऽप्यासां साध्वीत्वमेव सूचितम्, भगवद्भक्तेः; किंवा द्विजेभ्योऽपि तेभ्यः सर्व्वथा साध्वीरिति भावः। विनीताः स्वभावत एव, किंवा तासां श्रीकृष्णविषय-स्नेहविशेषश्रवणेन; प्रश्रिता इति पाठेऽपि न एवार्थः ॥ १५ ॥ नमो वो युष्मभ्यमिति वाचा प्रणामः, तासां भावपरीक्षणार्थं स्ववाक्यश्रवणेऽभिमुखीकरणार्थं वा। विप्रपत्नीभ्य इति नमस्कारयोग्यतोक्ता; पुनर्नमस्कारो भक्त्यतिशयेन निवेदनार्थं वा वचांसीति बहुत्वं **गौरवेण**, निबोधत शृणुतेति विनयभरस्वभावतः; किंवा सादरश्रवणार्थं प्रियवार्त्ताश्रवणहर्षेण वा अविदूरे निकट एव, कृष्णेन युष्मच्चित्ताकर्षकेणेति भावः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो भगवान् लौकिकीं गतिं नहि कार्यार्थिनो निर्विद्यन्ते "तृणादपि लघुस्तूलस्तूलादपि च याचकः" इत्युक्तरूपां लोकपरिपाटीं दर्शयन्निव पुनर्गोपान् व्याजहारोवाच ॥ १३ ॥ तदेवाह –मामिति। सङ्कर्षणसहितं मामागतं पत्नीभ्यः द्विजानामिति शेषः। ज्ञापयत ताश्च केवलं देहेन गृहे वसन्ति धिया तु मय्येवोषिताः मयि स्निग्धा अतः कामं यथेष्टमन्नं दास्यन्ति ॥ १४ ॥ अथ गोपाः पत्नीशालायां गत्वा स्वलङ्कृता आसीनाश्च द्विजसतीर्दृष्ट्वा प्रश्रिता नम्राः सन्तः इदं वक्ष्यमाणमब्रुवन् ॥ १५ ॥ विप्रपत्नीभ्यो वो युष्मभ्यं नमः नोऽस्माकं वचांसि निबोधत शृणुत किम्? इत समीपे सञ्चरता कृष्णेन प्रेषिताः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

लौकिकीं गतिं लोक सिद्धा रीतिम् ॥ १३ ॥ दाने कारणमाह मयीति । धिया मय्युषिता मामेव चिन्तयन्त्य इत्यर्थः । द्विजसतीः द्विजपत्नीः ॥ १४-१५ ॥ चरता बुभुक्षितेन ताच्छीलिकस्तृन्प्रत्ययः चर गतिभक्षणयोः इति धातोः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

इममेवार्थं व्यतिरेकेण दर्शयितुं निराशतया शुष्यन्मुखान् प्रत्यागतान् बालान् पुनर्भगवानाह तदुपाकर्ण्येत्यादि द्वाभ्याम् । प्रहस्येति तेषां द्विजानामज्ञत्वमाज्ञाया हास एवोचितः, भिक्षुकाणामियमेव रीतिः—सकृदसिद्धे कामे न हि निरध्यवसायैर्भवितव्यम् पुनरप्यध्यवसायः कार्यं इति लौकिकरीतिशिक्षा । ननु ते न दास्यन्त्येव, पुनः क्व गन्तव्यमित्याज्ञापयेत्याशङ्क्याह मां ज्ञापयेत्यादि । पत्नीभ्यो द्विजपत्नीभ्यः । अत्र प्राधान्येनात्मानमेव ख्यापयामास । कदाचित् समुचितमन्नं न ददतीत्याशङ्क्याह ससङ्कर्षणमागतमिति । सङ्कर्षणभोग्ययोग्यञ्च यथानयन्तीत्यर्थः । अथवा, सङ्कर्षणेन सह मयागतम्, अत्रागत्य समुचितमेव वक्तव्यमिति व तात्पर्यद्वयमेव । ननु ता एव दास्यतीति किं प्रमाणम् ? तत्राह स्निग्धा मयीति । तथैव कुतः ? धिया उषिता मयीति काकाक्षिन्यायेन ॥ १६-२२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मां ज्ञापयतेत्यत्र प्राधान्येनात्मानं निर्दिशति,—तासां तत्रैवानुरक्तत्वात् ॥ १५-२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रहस्येति अज्ञविप्रेषु कोपानौचित्यादिति भावः । लौकिकीं गतिमिति नहि कार्य्यार्थिनो निर्विद्यन्ते को वा याचको न पराभूयते इति लोकस्थितिं दर्शयन् ॥ १३ ॥ मामागतमेव ज्ञापयत न तु बुभूक्षितं बुभुक्षालक्षणमद्दुःखश्रवणस्य सद्य एव तदपि सन्तापकत्वात् । ननु, त्वद्बुभुक्षाज्ञापनं विना कथमन्नं ता दास्यन्ति तत्राह-वो युष्मभ्यं मत्सम्बन्धेनैव युष्मद्बुभुक्षा दर्शनेनैव दास्यन्ति । ननु, तत्पतयो वारयिष्यन्ति तत्राऽऽह—मयि स्निग्धा स्नेहवत्यः पतिवारणं न मानयिष्यन्ति यतो मय्येव धिया उषिताः केवलं देहेनैव पतिगृहे वसन्तीत्यर्थः ॥ १४-१५ ॥ ईषिताः प्रेषिताः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्तेषां विप्राणां गोपवाक्यैः स्वापमानमुपाकर्ण्य श्रुत्वा अत एव प्रहस्य—

"अपमानं पुरस्कृत्य कृत्वा मानं तु पृष्ठतः । स्वकार्यं साधयेद्धीमान् कार्यनाशे तु मूर्खता" ॥

इत्यादिरूपां लौकिकीं गतिं दर्शयन् पुनर्व्याजहारोवाच ॥ १३ ॥ पत्नीभ्यः विप्रपत्नीभ्यो मां ज्ञापयत ता केवलं शरीरैः पतिसमीपे वसन्तीति धिया मय्येवोषिताः यतो मयि स्निग्धा अतः कामं यथेष्टं वा युष्मभ्यमन्नं दास्यन्ति ॥१४॥ प्रश्रिताः नम्राः सन्तः ॥१५॥ वो युष्मभ्यं नमः नोऽस्माकं वचांसि निबोधत शृणुत ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

प्रहस्येति । अज्ञेषु विप्रेषु क्रोधायोग्यादिति भावः । दर्शयन्निति कार्यार्थिनां निर्वेदो न युक्तः याचकस्य क्वचित् पराभवः स्यादेवेति लोकस्थितिं शिक्षयन्नित्यर्थः ॥ १३ ॥ मामागतमेव ज्ञापयत न तु क्षुधित तच्छ्रवणे तासामतिसन्तापप्रसङ्गात् । ननु तद्विना कथं दद्युस्तत्राह मयि स्निग्धा मत्सम्बन्धेनैव वः कामं यथेष्टमन्नं दास्यन्ति ननु पतयो निवारयेयुस्तत्राह धिया मय्येवोषिताः केवलेन देहेनैव पतिगृहेषु निवसन्तीति तन्निवारणं न मन्येरन्निति भावः ॥ १४ ॥ प्रश्रिता विनीताः ॥ १५ ॥ उषिताः प्रेषिताः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

लौकिकीं गतिं स्वयमत्रैव वितरितुं शक्तोऽप्येकत्रालाभेऽन्यत्र गन्तव्यमिति लौकिकीं गतिं तदेतदुक्तमुपाकर्ण्य पुनर्गोपान्प्रति व्याजहार ॥ १३ ॥ हे गोपास्तत्पत्निभ्यः सङ्कर्षणमन्नप्राप्तिर्भवतीति स्वपुरस्कृतिरिव बलस्योपसर्जनतया ग्रहश्चेति ध्येयं । काममपेक्षितमन्नं दास्यन्ति ता मयि धियोषिता मद्बुद्धयः किञ्च मयि स्निग्धाश्च सहजस्नेहवत्य इति । सराममित्यनुक्त्वा ससङ्कर्षणमित्युक्त्या सम्यक् तत्कर्षणेन सहितं मां ज्ञापयतेत्यप्यूचे सुचेता इति ज्ञेयः ॥१४॥ अथ कृष्णोक्तिश्रवणसमनन्तरं गोपा गत्वा पत्नीशालायां तदुपवेशस्थले आसीनाः स्वलङ्कृता द्विजसतीर्नत्वा प्रश्रिता नम्रा इदमब्रुवन् ॥ १५ ॥ द्विजपत्नीभ्यो वो नमोऽस्तु नो वचांसि निबोधत । प्रातिस्विकतया सर्वाः प्रति सम्बोध्योक्तेर्वचांसीति बहुवचनं । इतो युष्मत्स्थलादविदूरे समीपे चरता सञ्चरता कृष्णेन वयं प्रेषिताः ॥ १६ ॥

श्रीसुबोधिनी

गोपानां खेदादिकं दृष्ट्वा भगवद्वैमुख्ये क्रोधं च तन्निवृत्त्यर्थं हास्यं कृतवान्, ननु क्रोधः कर्तव्य आज्ञोल्लङ्घनात् कथं हास्यं ? तत्राह **जगदीश्वर** इति, **जगतः स एवेश्वरः**, तथैव स ते प्रतिबोधिताः, तेषां पूर्वखेदस्य विस्मृतत्वात् पुनराह, तेषां गमनाङ्गीकारार्थं प्रबोधनं च कृतवान्, **लौकिकीं गतिरे**तादृशी क्वचित् प्राप्यते क्वचिन्न क्वचिदुत्तराभावश्च ।। १३ ।। भगवद्वाक्यमाह **मां ज्ञापयतेति**, यज्ञे यजमानपत्न्यः पत्न्य एवोच्यन्ते निर्दुष्टत्वज्ञापनाय 'तस्मात् स्त्रियो निरिन्द्रिया अदायादीरपि पापात् पुंस उपस्तितरं वदन्ती'तिश्रुतेः, अतो निर्दुष्टत्वान् **मां पत्नीभ्यो ज्ञापयत ससङ्कर्षण** बलभद्रसहितमागतं, याचनं तु न कर्तव्यमयाचिता एव दास्यन्तीत्याह **दास्यन्तीति कामं** यथेष्टं **तद् वो** युष्मभ्यं तस्मान्नदोषो निरूपितः **कामपदाद्** वइतिपदाच्च, दाने हेतुः **स्निग्धा** इति इति, **मयि ताः स्निग्धाः** प्रेमवत्योतो मदागमने ज्ञापिते परितुष्टा एव दास्यन्ति यथा प्रियवार्ताहर्त्रे दानं, किञ्च **धिया** पुनर्मय्येवोषितास्ताः सङ्घाते बुद्ध्या मयि तिष्ठन्ति शेषेण तत्र बुद्ध्येत्युपलक्षणं ज्ञानशक्त्यान्तःकरणेन चात्र तिष्ठन्ति बाह्यक्रियया देहेन च तत्र, अतो ज्ञानशक्तिर्मय्येव तिष्ठतीति **दास्यन्ति** ।। १४।। ते पुनर्बालाः पूर्ववदेव गत्वा तथैव याचितवन्त इत्याह **गत्वेति, अथ** भिन्नप्रक्रमेण **येन मार्गेण** यथा रीत्या पूर्वं गता न तथेति, **पत्नीशाला** भिन्नैव प्राग्वंशे सदसि वा भवति परं **प्राग्वंश** एव यत **आसीना** निश्चिन्ताः सुष्ठ्वलङ्कृताश्च, अनेन सौभाग्यसहितास्ता निरूपिताः पूर्ववेदनत्वात् **प्रश्रिता** विनीताः सन्त इदं वक्ष्यमाणमब्रुवन् ब्राह्मणसम्बन्धान्नमनं सतीत्वाद् विनयः ।। १५ ।। तेषां वाक्यमाह **द्वयेन, नम** इति, वैदिकार्थापरिज्ञानाद् **विप्रपत्नीभ्य** इत्युक्तं, तत्राप्यनवधानतानिवृत्त्यर्थं **निबोधते**त्याहुः, के भवन्त इत्याकाङ्क्षायामाहुरितो निकट एव **चरता** परिभ्रमता लीलाकर्त्रा **कृष्णेन** सदानन्देन **वयं प्रेषिता** इति कार्यनिवेदनं वा ।। १६ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

मां ज्ञाप्यतेत्यत्र, तस्यान्नदोषो निरूपित इति । पूर्वं यथेष्टमिति कामपदं व्याख्यातम्, अधुना तस्यान्नविशेषणत्वमभिप्रेत्य तत्तात्पर्यमुच्यते । दोषः स्वभोगे ज्ञेयः स कथं निरूपित इत्यत आहुः **कामपदा**दिति । अत्रेदमाकूतम् । अन्नं हि पुरुषस्वामिकं भवतीति तदन्नं तैः स्वर्गकामनया यज्ञसंबन्धिदेवतान्तरोद्देशेन सङ्कल्पपूर्वकं निष्पादितत्वात् सकाममपि कामप्राचुर्यात् कामरूपमेव जातमिति ज्ञापनाय तथा विशेषणम् । तेन तेषामभक्तत्वं सूचितम् । तथा चान्योद्देशेन कृतमभक्तसंबन्धि स्वभोगयोग्यं न भवतीति दोषोक्तिः । किञ्च, 'मां ज्ञापनाय पत्नीभ्यः' इत्युक्त्वा दानसमयेपि 'मह्यं दास्यन्ती'ति पात्रान्तरोक्त्या चोक्तदोष एवान्नस्य स्फुटीभवतीत्याशयेनोक्तं **व इति** पदाच्चेति । न च पूर्वोत्तरवाक्ययोः कथं संगतिरिति वाच्यम् । तासां भक्तत्वात् मदागमने ज्ञापिते मत्संबन्धित्वं ज्ञात्वा वो युष्मभ्यमपि दास्यन्तीति ज्ञापयितुमादौ स्वकथनम्, अग्रे दोषत्वमन्नस्य ज्ञापयितुं व इति कथनमित्युपपत्तेः । अन्यथा यथा भगवतोक्तं वो दास्यन्ति तथा ता अपि तेभ्य एव दद्युः, न तु स्वमत्रानयेयुः । तर्हि कथं तदन्नमेताभिरानीतं भगवानङ्गीकृतवानिति चेत् । अत्रैवं प्रतिभाति । पत्न्या आत्मनोऽर्धत्वात्तदन्ने तासामंशो भवितुमर्हति । स च तासां भक्तत्वादुक्तदोषरहित एवेति मन्तव्यम् । तथा सति तस्य पूर्वमपृथग्भावात् समुदिताभिप्रायेण दोषोक्तिः । ततस्ताभिर्भगवदर्थं स्वांशे पृथक्कृते तदङ्गीकरणमावश्यकं प्रभोः, 'भक्त्युपहृतमश्नामी'ति वचनात् । यद्वा । 'अन्नमादाय भाजनै'रिति । भाजनोक्त्या पृथग्भावासंभवेपि यथा तदन्ने पूर्वमन्योद्देशो दोषहेतुरभूत, एवं पश्चाद्भगवदुद्देशस्तस्मिन्निवृत्तिहेतुरभूत् । अतः सर्वमान्नमङ्गीकरणयोग्यमित्युपपद्यते । न च तासां भक्त्या पुमंशः कथमदुष्टो भवतीति शङ्कनीयम्, तत्संबन्धात्तेषामपि भक्तत्वस्य वक्ष्यमाणत्वात् । अथवा, कामं यथेष्टमिति पक्षेपि तत्तात्पर्योक्तिस्त**तस्यान्नस्य दोष** इति । अत्रायमर्थः । आधिदैविकं यज्ञं संपादयितुं पुंभिराधिदैविकयज्ञात्मकस्य भगवतस्तदाज्ञयाध्यात्मिकानां गोपानां याञ्चाभङ्गः कृतः । सोत्र दोषपदेनोच्यते । तथा सति कथमाधिभौतिकोपि स संपत्स्यत इति ज्ञात्वा साक्षादाधिदैविके दातुमशक्यत्वादाध्यात्मिकेभ्यो वो युष्यभ्यं यावता तृप्तिर्भविष्यति, तावद् दास्यन्ति तेन चाधिदैविकस्य तृप्तिर्भविष्यति, आधिभौतिकश्च संपत्स्यत इत्याशयेनोक्तं कामपदाद्व इति पदाच्चेति । अन्यथा यज्ञीयान्नस्य यथार्थमस्थापयित्वा यथेष्टदानकथनानुपपत्तेः । तास्तु 'यथा तरोर्मूलनिषेचनेने'ति ज्ञानेनाधिदैविकद्वारेणैव सर्वं तत्रैव भवत्विति **सर्वमन्नमानीतवत्य** इति सर्वमवदातम् ।। १४ ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

मां ज्ञापयतेत्यत्र निर्दुष्टत्वेति पत्युः स्त्रीं पत्नीतिपुंयोगेन पतिव्रतात्वज्ञापनायेत्यर्थः, **ताः सङ्घाते** इति निर्धारणे सप्तमी, सङ्घातमध्ये बुद्ध्या अन्तःकरणेन मयि तिष्ठन्ति, शेषेण देहेन्द्रियप्राणैस्तत्र तिष्ठन्तीत्यर्थः ।।१४।। **नमो व** इत्यत्र **वैदिकार्थेति** यज्ञे यजमानपत्न्यः पत्न्य एवोच्यन्त इतिज्ञाने पत्नीपदमात्रमेव वदेयुरित्यर्थः ।। १६ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत् गोपैर्वर्णितं ब्राह्मणदुश्चेष्टितमुपाकर्ण्य श्रुत्वा, भगवान् खिन्नान् गोपान् परिसान्त्वयन् प्रहस्य लौकिकीं "को वा याचको न पराभूयते ? तथापि कार्यार्थिनो न निर्विद्यन्ते, भक्तिहीनाः पण्डिता अपि मुह्यन्त्येव" इत्यादिलोकस्थितिं दर्शयन् गोपान्

प्रति पुनर्व्याजहार उक्तवानित्यन्वयः । ननु 'सामर्थ्यस्य विद्यमानत्वात् दुष्टेषु तेषु कोप एव युक्त' इत्याशङ्क्य 'जगत्पालकत्वेन धर्ममर्यादारक्षणार्थं तेन ब्राह्मणेषु क्षमैव कृता' इत्याशयेनाह—जगदीश्वर इति ॥ १३ ॥ तद्वाक्यमाह—मामिति । अत्रागतं ससङ्कर्षणं क्षुधितं मां ब्राह्मणपत्नीभ्यो ज्ञापयत, ता वो युष्मभ्यं कामं तथेष्टमन्नं दास्यन्ति । यतो देहमात्रेणैव गृहे वसन्ति, धिया तु मय्येवोषिताः । तत्र हेतुः–मयि स्निग्धा इति ॥ १४ ॥ अथ भगवदाज्ञानन्तरं ते गोपाः पुनर्यज्ञवाटं गत्वा तत्र पत्नीशालायामासीना उपविष्टाः स्वलङ्कृता द्विजसतीः ब्राह्मणपत्नीर्दृष्ट्वा नत्वा प्रश्रिता नम्रीभूताश्च सन्त इदं वचनमब्रुवन्नित्यन्वयः ॥ १५ ॥ तद्वाक्यमाह–नम इति । विप्रपत्नीभ्यो वो युष्मभ्यं नमः । नोऽस्माकं वचांसि निबोधत । एवं सावधानीकृत्याहुः–इतः अविदूरे समीपे विचरता कृष्णेन वयमिह युष्मन्निकटे ईषिताः प्रेषिताः स्म ॥ १६ ॥

अन्वितार्थप्रकाशिका

तदिति ॥ तत् रामकृष्णौ प्रति गोपैर्वर्णितं ब्राह्मणदुश्चेष्टितमुपाकर्ण्य रामे क्रोधात्तूष्णीं स्थिते जगदीश्वरः कृष्णः अज्ञविप्रेषु कोपानौचित्यात् प्रहस्य लौकिकीं गतिं को वा याचको न पराभूयते तथापि कार्यार्थिनो न निर्विद्यन्ते । विवेकहीनाः पंडिता अपि मुह्यन्तीत्येवमादिकां लोकस्थितिं दर्शयन् गोपान् प्रति पुनर्व्याजहार उक्तवान् ॥ १३ ॥ मामिति । अत्रागतं ससंकर्षणं मां ब्राह्मणपत्नीभ्यो ज्ञापयत । नतु तत्र क्षुदादिकथनमावश्यकम् । ताश्च मयि स्निग्धाः देहमात्रेण गृहे वसन्त्योऽपि धिया बुद्ध्या मय्येव उषिताः अतो वो युष्मभ्यं कामं यथेष्टमन्नं दास्यन्ति ॥ १४ ॥ गत्वेति ॥ अथ गोपाः पुनर्यज्ञवाटं गत्वा तत्र पत्नीशालायामासीना उपविष्टाः स्वलङ्कृता द्विजसतीः ब्राह्मणपत्नीर्दृष्ट्वा नत्वा प्रश्रिता नम्रीभूताश्च सन्त इदं वचनमब्रुवन् ॥ १५ ॥ नम इति ॥ विप्रपत्नीभ्यो वो युष्मभ्यं नमः । नोऽस्माकं वचांसि निबोधत शृणुत । इतः अविदूरे समीपे विचरता कृष्णेन वयमिह युष्मन्निकटे ईषिताः प्रेषिताः स्म ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

लौकिकीं गतिं के याचकानपराभूताः अतो निर्वेदो न प्राप्यः एवंरूपां लोकस्थितिं दर्शयन् पुनराह ॥१३॥ पत्नीभ्यस्तेषां स्त्रीभ्यः आगतं मां यूयं ज्ञापयत कथयत । मयिताः धिया उषिताः स्थिताः देहेनैव गेहिस्थिताः अतः वो युष्मभ्यं दास्यंति ॥ १४ ॥ प्रश्रिताः नम्राः ॥ १५ ॥ वो युष्मभ्यं यूयं निबोधत अत्र ईषिताः प्रेषिताः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति ॥ जगदीश्वरः भगवान् श्रीकृष्णः, तद्गोपवाक्यं, उपाकर्ण्य श्रुत्वा, प्रहस्य, लौकिकीं गतिं, 'न हि कार्यार्थिनो निर्विद्यन्ते' 'तृणादपि लघुस्तूलस्तूलादपि श्र याचकः' इति 'को वा याचको न पराभूयते' इत्यादिरूपां लोकपरिपाटीमित्यर्थः । दर्शयन् सन्, गोपान्, पुनः व्याजहारोवाच ॥ १३ ॥ तदेवाह ॥ मामिति ॥ हे गोपाः, ससंकर्षणं संकर्षणेन सहितं, आगतं समायातं, मां श्रीकृष्णं, पत्नीभ्यः द्विजानामिति शेषः । ज्ञापयत । ताश्च स्निग्धाः मयि गाढानुरागयुक्ताः, गृहे तु केवलं देहेनैव वसन्तीति शेषः । धिया बुद्ध्या तु, मयि एव उषिताः विहितावासाः, सन्ति । अतः, वो युष्मभ्यं कामं यथेष्टं अन्नं दास्यन्ति ॥ १४ ॥ गत्वेति ॥ अथ गोपाः, पत्नीशालायां गत्वा, स्वलंकृताः स्वाङ्गपरिधृताभरणाः, आसीनास्तत्रोपविष्टाः, द्विजसतीर्ब्राह्मणीः दृष्ट्वा, प्रश्रिता नम्राः सन्तः, नत्वा, इदं वक्ष्यमाणं, अब्रुवन् ॥ १५ ॥ नम इति ॥ विप्रपत्नीभ्यः वो युष्मभ्यं, नमः । हे सत्यः, नोऽस्माकं, वचांसि निबोधत शृणुत । किमित्यत्राहुः, इतोऽस्मात् स्थानात्, अविदूरे समीपे एव, चरता संचरता कृष्णेन, वयं, इह ईषिताः प्रेषिताः ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तदुपाकर्ण्येति : १०.२३.१३.

न मन्नाम्नि श्रद्धा न च हृदयतोषोऽतिथिजने न दानेहाऽन्नानामिह भवति येषां कुजनुषाम् ।
न तेषामाज्याद्यैर्हवनमनले मौनमनिशं फलाय स्याद् ब्रह्मध्वनिरपि विभोरध्वनि हसात् ॥ २५ ॥
यस्मिन्नभ्यासदार्ढ्यं वचसि तदवशादास्यतो निष्प्रयत्नं निर्गच्छत्येष सर्वानुभव इह यदोम्नेति वा नोचुरेते ।
तत्कीदृक् स्यादमीषां प्रणवपरिचितिर्नेति नेतीति वस्त्वादेशस्यालोचनं वेत्यकृत स सदयो विस्मयात्तत्र हास्यम् ॥ २६ ॥
देय चेन्मनसा यदर्थ्यभिहितं तद्देयमेवाचिरान्ना चेत्सत्वरमेव नोत्तरमियं लोकोक्तिरस्ति स्फुटा ।
तस्याः सम्प्रति बुद्धिमद्भिरिह यन्नैवोत्तरं देयमित्यर्थः । कल्पित इत्यहो सकलवित्त्वं तज्जहासाच्युतः ॥ २७ ॥
देयं वाऽदेयं वा सत्वरमेकं तदुत्तरं देयम् । यो न ब्रूयाद् द्वयमपि सद्युपहास्यः प्रभोरिति स्पष्टम् ॥ २८ ॥
सर्वांशता ये जनतः प्रतिष्ठां महान्त इत्युत्कलितां वहन्ति । अज्ञानमप्युच्छ्रितमस्ति तेषामहो इतीवाहसदच्युतः सः ॥ २९ ॥
योगज्ञैर्यज्ञज्ञैर्ब्रह्मज्ञैरपि मनागनाकलिता । भाविकजनहृदयगता मयि रतिरेवंविधेत्यलमकथयत् ॥ ३० ॥

मद्भक्तिमात्रमनसामितराधिकारशून्यात्मनामपि मदङ्घ्रिपराङ्मुखेभ्यः ।
स्वस्वाधिकृत्युपगताखिलकर्मकृद्भ्योप्येवं विशेष इति काममदर्शयत्तान् ।। ३१ ।।
वेदज्ञा अपि सर्वशास्त्रविशदप्रज्ञा अपि ख्यातिमत्संज्ञा अप्युरुसत्कृताखिलमहायज्ञाः कृतज्ञा अपि ।
मज्ज्ञातिप्रतिबोध्यमानसरणावज्ञा यदि स्युर्न तेऽभिज्ञा भक्तिसुखस्य विज्ञमुनयस्तत्र स्फुटोदाहृतिः ।। ३२ ।।
यावान्येष्वधिकारिताग्रह इह प्रध्मातमानोऽस्त्यलंतावांस्तेष्वधिकारिता ग्रह इति प्रायो ममाप्यस्ति हि ।
यावन्तोऽनधिकारिताऽऽग्रहजुषस्ते स्युर्हि मन्मित्रतापात्राणीह युगे स्फुटामिति चकारेशो गतिं लौकिकीम् ।। ३३ ।।
गुरव इति समाख्यां ये वहन्तोऽभिमानाद् गतिरियमनुभूता तादृशामीदृशी यत् ।
तदुचितमिह मानं पिङ्गलोऽस्त्येव वक्रो गुरुरिति स ऋजुः स्याद्यो लघुश्चेति वक्ता ।। ३४ ।।

मां ज्ञापयतेति ः १०.२३.१४.

तद्यात निःशङ्कमितोऽन्नलाभो भवेदभीष्टो भृशमङ्गनाभ्यः ।
तदङ्गनावीक्षणतो हि यूयं तीर्णाः क्षुधाब्धौ बहुधा भविष्यथ ।। ३५ ।।
यैर्नोत्तरं शुष्कगिरापि दत्तं तेषां स्त्रियस्तास्तदलं गतेन । तत्रेति तत्तर्कितमार्जनाय तत्प्रेम निःसीममवोचदीशः ।। ३६ ।।

गत्वेति ः १०.२३.१५.

न सर्वतन्त्राधिकृतः पुमान् रमापतेः प्रियः श्रीहरिरस्य वा प्रियः ।
किं त्वेकतद्भक्तिसुधार्द्रिताशयः स्फुटं त्विदं तद्गतिमात्रतोऽभवत् ।। ३७ ।।
स्वतोऽपि वन्द्या निजमातृतुल्याः सद्विप्रपत्न्यः सतताग्निहोत्र्यः । तत्रापि कृष्णप्रणुता इतीशानुगाः प्रणेमुर्निखिलाः क्षमं तत् ।। ३८ ।।
अनादृतेश चित्तानां दण्डोऽथाच्युतचेतसाम् । प्रणाम इति ते तादृक् कृत्योभयमबोधयन् ।। ३९ ।।

नमो व इति ः १०.२३.१६.

हठेनैवात्र कृष्णेन प्रेषिता इति का क्षतिः । तन्नामग्रहणेऽस्माकमित्यूचुस्तस्य चोदनाम् ।। ४० ।।
यद्वा भृशं मन्यमाना विफलां रामचोदनाम् । कृष्णसङ्कीर्तनं चक्रुस्तत्र भक्तोपलब्धये ।। ४१ ।।

कृष्णप्रिया

उन गोप वालकों की बात सुनकर जगदीश्वर भगवान श्रीकृष्ण ने मन्दस्मित किया। पुनः भगवान ने ग्वाल-बालकों को कहा कि यह लौकिक परिस्थिति है उसमें सफलता भी मिले एवं निष्फलता भी मिले। निराश होने का कोई कारण नहीं सुनो भैया ! ।। १३ ।। मेरे प्यारे मित्र ! अब तुम उन द्विजवरों की पत्नियों के पास जाओ, और अञ्जलिबद्ध उनसे निवेदन करो कि बलदाऊ भैया मैं उनके निवास के समीप आया हूँ। वे बिना माँगे ही तुम जितना चाहो उतना अन्न अवश्य देंगी। वे ऋषि-पत्नियाँ मुझसे अधिक स्नेह रखती हैं। उनका मन सदा मुझमें रहा है ।। १४ ।। राजन् ! भगवान की आज्ञा पाकर वे ग्वाल-बाल यजमान पत्नी शाला में गये। वहाँ दिव्यवस्त्रालंकार से विभूषित होकर सजी-धजी बैठी हुई विप्राङ्गनाओं का दर्शन किया और नमस्कार किया। पुनः नम्रतापूर्वक निवेदन करने लगे ।। १५ ।। हे माताओं ! हे ऋषि पत्नियों ! आपके चरणों में नमस्कार है। हमारे वचनों को सुनिए। यहाँ अत्यंत समीप में गौओं चराते परिभ्रमण एवं क्रीडा करते भगवान् श्रीकृष्ण ने हमे आपके समीप भेजे हैं ।। १६ ।।

गाश्चारयन् स गोपालैः सरामो दूरमागतः । बुभुक्षितस्य तस्यान्नं सानुगस्य प्रदीयताम् ।। १७ ।।
श्रुत्वाच्युतमुपायान्तं[1] नित्यं[2] तद्दर्शनोत्सुकाः । तत्कथाक्षिप्तमनसो बभूवुर्जातसम्भ्रमाः ।। १८ ।।
चतुर्विधं बहुगुणमन्नमादाय भाजनैः । अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः ।। १९ ।।
निषिध्यमानाः पतिभिर्भ्रातृभिर्बन्धुभिः [3]सुतैः । भगवत्युत्तमश्लोके दीर्घश्रुतधृताशयाः[4] ।। २० ।।

कर्दमक्षमा

अन्वयः —सः गोपालैः गाः चारयन् सरामः दूरम् आगतः सानुगस्य बुभुक्षितस्य तस्य अन्नम् प्रदीयताम् ।। १७ ।। नित्यम् तद्दर्शनोत्सुकाः अच्युतम् उपायान्तम् श्रुत्वा तत् कथाआक्षिप्तमनसः जातसम्भ्रमाः बभूवुः ।। १८ ।। सर्वाः (ताः) निम्नगाः समुद्रम् इव, प्रियम् भाजनैः चतुर्विधम् बहुगुणम् अन्नम् आदाय अभिसस्रुः ।। १९ ।। पतिभिः भ्रातृभिः बन्धुभिः सुतैः निषध्यमानाः उत्तमश्लोके भगवति दीर्घश्रुतधृत आशयाः ।। २० ।।

---

१. यातं—श्रीधर. वंशी. वीर. विज. । २. तास्तु—वीर. । ३. पितृभिः—विज. । ४. भूता—विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

स कृष्णो गोपालैः सह ॥ १७ ॥ तत्कथाक्षिप्तमनस्त्वात्तद्दर्शनोत्सुकाः अत एव तमुपागतं श्रुत्वा जातसंभ्रमा बभूवुरिति ॥ १८ ॥ भक्ष्यभोज्यलेह्यचोष्यभेदैश्चतुर्विधम् । बहुगुणं संस्कारविशेषैर्बहवो गुणा रससौरभ्यादयो यस्मिंस्तत् । भोजनैरमत्रैर्भाण्डैर्वा । पत्यादिभिर्वार्यमाणा अपि प्रियं श्रीकृष्णमभिसस्रुरभिजग्मुः । अप्रतिबंधे दृष्टांतः । समुद्रं निम्नगाः नद्य इवेति ॥ १९ ॥ अत्र हेतुः । भगवतीति । दीर्घं बहुकालं श्रुतेन श्रवणेन धृत आशयो याभिस्ताः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य श्रीकृष्णस्य ॥ १७ ॥ तच्छब्दोऽत्र कृष्णपरामर्शी, तस्य कथया बुभुक्षावार्त्तया आक्षिप्तानि–अरे पामर मनः कथं प्रियतमस्य बुभुक्षाश्रवणेनापि न मूर्छितं जागर्षि धिक्त्वामित्येवं तिरस्कृतानि स्वस्वमनांसि याभिस्ताः । यतस्तद्दर्शनोत्सुका अत एव हेतोः । तम् कृष्णम् जातसंभ्रमाः । जातादराः "संभ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि" इति मेदिनी ॥ १८ ॥ अमत्रैः पात्रैः 'भाजनं योग्यपात्रयोः' इति मेदिनी । भांडैस्तूदादिशाखावंशत्वगादिनिर्मितैर्वा । भक्ष्यादयः पूर्वं व्याख्याताः । संस्कारो जीरकैलादिभिर्घृतादिना क्रियत इति ॥ १९ ॥ आशयः कदा श्रीकृष्णं द्रक्ष्याम इत्यभिप्रायः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सदा श्रीकृष्णं रमयतीति तस्मात् सङ्कोचो निरस्तः स्वयं भगवता माहात्म्यख्यापनाय पूर्वं सङ्कर्षणनाम्नोक्तम् एभिस्त्वेतन्नाम्ना तदभिरुचितत्वख्यापनायेति यत्तद्युक्तमेव पूर्वत्र गौरवाधिक्यस्यैवौचित्यात् उत्तरत्र तु तथैव पत्नीनामभिरुचेः दूरं गृहादिति ततोऽन्नमाश्वानयितुं न शकुरिति भावः । यद्वा, अदूरमितः पुनरुक्तिः अतिनैकटघेन तासामागमनार्थं सानुगस्य श्रीरामगोपवर्गसहितस्य प्रकर्षेण सरसमिष्टान्नपानभृतपात्रादिद्वारा दीयतां पूर्वं तदादेशेन केवलं द्वयोरेवान्नप्रार्थनम् अधुना तु तदादेशं विनापि तत्रापि सानुगस्येति । तत्रापि प्रकर्षेणेति तासां भगवति भक्तिविशेषश्रवणादिः सनमैव त्वया अन्नत्यागेनाप्यागमनसम्भावनपूर्वकं च ॥ १७ ॥ हृदयात् कदाचिदपि न च्युतो भवतीत्यच्युतस्तम् उपायातं समीप एव साक्षादागतम् अन्यत्तैः । यद्वा, विशेषतश्च तत्कथया तस्य बुभुक्षावार्त्तयाऽऽक्षिप्तमनसः ॥ १८ ॥ चतुरिति युग्मकं भाजनैः भोजनपात्रैः पाकपात्रैर्वा कृत्वा अन्नोष्णतादिस्थित्यर्थं सम्भ्रमादेव वा अभिसस्रुरित्यादिना तदेकाभिमुख्यं सूचितं टीकायां भक्ष्यं चर्व्यं चोष्यं चूष्यमिति पतिभिरित्यादिकं यथा निकटं ज्ञेयं निषिध्यमाना इति तस्मै देयं चेदन्नं प्रस्थाप्यतां स्वयन्तु मा यातेति तासां गमनमेव वर्ज्यते स्मेत्यर्थः । श्रीभगवता तदन्नस्वीकारात् ॥ १९–२० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सदा कृष्णं रमयतीति राम इति तस्मात् संकोचो निरस्तः; दूरं गृहादिति ततोऽन्नमानेतुं न शक्यत इति भावः । यद्वा, अदूरमिति पुनरुक्तिरतिनैकट्येन तासामागमनार्थम्, सानुगस्य श्रीरामगोपवर्गसहितस्य प्रकर्षेण सरसमिष्टान्नपानभृतपात्रादिद्वारा दीयताम्, पूर्व्वं केवलं द्वयोरेवान्नप्रार्थनम् अधुना च सानुगस्य, तत्रापि प्रकर्षेणेति तासां श्रीभगवति भक्तिविशेषश्रवणात्; श्रीभगवदनादिष्टमप्यन्नयाचनं निजक्षधार्त्त्या अनुगानामपि भक्ष्यप्राप्त्यर्थं वा, अन्नलब्ध्यर्थमेव वा, अन्यथा तदागमनश्रवणमात्रेण त्वरयान्नपरित्यागेनाप्यागमनसम्भवात् ॥ १७ ॥ हृदयात् कदाचिदपि न च्युतो भवतीत्यच्युतस्तम्, उपायातं समीप एव साक्षादागतम्, अन्यत्तैर्व्यञ्जितम् । यद्वा, विशेषतश्च तत्कथया तद्बुभुक्षावार्त्तयाक्षिप्तमनसः ॥ १८ ॥ भाजनैः भोजनपात्रैः पाकपात्रैर्वा कृत्वा, सहितमिति वा, अभिसस्रुरित्यादिना तासां श्रीकृष्णे भावविशेषः श्लेषणोक्तः ॥ १९ ॥ प्राक् पतिभिस्तासां तद्वश्यत्वात् पश्चात्तेषां वचोऽनादरेण त्याज्यत्वशंकया पितृभिः, ततोऽप्यधिकस्निग्धत्वाद्भ्रातृभिः, ततोऽपि स्नेहादिनाधिकापेक्षकैः सुतैरिति विवेकः । मातॄणामनिर्द्देशः साहचर्य्येण पितृष्वेवान्तर्भावात्, किंवा, श्रीभगवति तादृशभावेनानिषेधनात्, अन्यत्तैर्व्याख्यातम् । यद्वा, दीर्घं बहुकालं श्रुतं श्रवणं शास्त्रं वा यस्येति श्रीपरीक्षित्सम्बोधनम्; दीर्घश्रुतत्वस्यायमेव व्यवहारो युक्त इति भावः । यद्वा, दीर्घश्रुतेनापि भवतेदृशी भक्तिः कुतोऽपि किं श्रुतास्ति, अपि तु नैवेति भावः । धृताशयान्यस्तचित्ताः, किंवा भावविशेषेण सदा कृतदृढमनोरथाः ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

चतुर्विधम् भक्ष्यभोज्यलेह्यपेयात्मकम् ॥ १९–२१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स तु सरामो गोपैः सह दूरमागतः व्रजादिति शेषः । अधुना बुभुक्षितस्य सानुगस्य गोपसमूहसहितस्य तस्य श्रीकृष्णस्य वो यदि श्रद्धा तर्ह्यन्नं प्रदीयतां प्रकर्षेण दीयतां न त्वस्माकमाशाभङ्गः कार्य इति भावः ॥ १७ ॥ पूर्वमेव तस्य कृष्णस्य कथया

आक्षिप्तान्याहृतानि मनांसि यासां ताः अत एव तद्दर्शनतत्पराः तदा तमागतं श्रुत्वा जातोत्सवा बभूवुः ॥ १८ ॥ चतुर्विधं भक्ष्यभोज्यलेह्यपेयात्मकं बहुगुणं रससौरभ्यादिबहुगुणकमन्नं पात्रैरादाय सर्वा द्विजपत्न्यः प्रियं निरतिशयप्रीतिविषयं भगवन्तमभिजग्मुः, कथम्भूताः ? पत्यादिभिर्निवार्यमाणा अपि भगवति दीर्घं बहुकालं श्रवणेन धृतः आशयो यासां ताः अत एव नद्यः समुद्रं प्रतीवाप्रतिबन्धाः प्रियं अभिसस्रुरित्यन्वयः ॥ १९-२० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

॥ १७-१८ ॥ चतुर्विधं भक्ष्यभोज्यलेह्यचोष्यपानात्मकं बहुगुणं मधुरादिगुणोपेतम् ॥ १९ ॥ दीर्घश्रुतेन बहुकालश्रवणेन भगवति भृत आशयो याभिस्ताः कदानु द्रक्ष्याम इत्यभिप्राय आशयः ॥ २०-२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहो हन्तैताः कृष्णनाम्नैवानन्दमूर्च्छिता अभूवंस्तदिमाः प्रबोधयितुं तद्वृत्तान्तमुक्तमेव तं किञ्चिद्विशिष्य पुनरुच्चैरुच्चारयाम इत्यभिप्रेत्याहुः—गा इति । अदूरे निकटमेवायातः तदपि सम्यगप्रबुद्ध्वा आलक्ष्य तस्यान्नाकांक्षां श्रावयित्वा अतिस्नेहवतीस्ताविह्वलयामासुरित्याह बुभुक्षितस्येति ॥ १७ ॥ तस्य कथया बुभुक्षावार्त्तया आक्षिप्तानि अरे पामर मनः कथं प्रियतमस्य बुभुक्षाश्रवणेनापि न मूर्च्छितो जागर्षि धिक् त्वामित्येवं तिरस्कृतानि स्वस्वमनांसि याभिस्ताः ॥ १८ ॥ भक्ष्यचर्व्यचूष्यलेह्यभेदैश्चतुर्विधं संस्कारविशेषैः बहवो गुणाः रससौरभ्यादयो यस्मिंस्तम् अभिसस्रुरिति तासां तदानीं कृष्णं प्रति सर्वासां नायिकात्वाभिमानमालक्ष्योक्तं तत्र प्रतिबन्धकागणने दृष्टान्तः समुद्रं निम्नगा नद्य इव तत्र हेतुः भगवति दीर्घं बहुकालं श्रुतेन श्रवणेन धृत आशयो याभिस्ताः ॥ १९-२१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गोपालैः सह सरामः सः श्रीकृष्णः ॥ १७ ॥ क्षिप्तान्याकृष्टानि मनांसि यासां ताः ॥ १८ ॥ चतुर्विधं भक्ष्यभोज्यलेह्यचोष्यम् संस्कारविशेषैर्बहवो रससौरभ्यादयो गुणा यस्मिन् तदादाय प्रियं श्रीकृष्णम् अभिसस्रुः अभिजग्मुः ॥१९॥ ताः विशिनष्टि-निषिध्यमाना इति । दीर्घं बहुकालं श्रुतेन श्रवणेन धृत आशयो याभिस्ताः ॥ २० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

श्रीकृष्णनामैव श्रुत्वानन्दमूर्च्छितास्ताः प्रबोधयितुं विशिष्याह—गा इति । अदूरं युष्मन्निकटम् ॥ १७ ॥ तत्कथया तत्क्षुद्वार्त्तया क्षिप्तुं प्रभोः क्षुधं श्रुत्वापि कथं मूर्च्छातो न जागर्षीति तिरस्कृतं मनो याभिस्ताः ॥ १८ ॥ चतुर्विधं भक्ष्यचर्व्यचूष्यलेह्यरूपं रसमयं बहवो गुणाः उष्ण्यशैत्यमार्दवसौरभ्यादयो यत्र तत् प्रियमभिसस्तुरिति कान्तभावोदयात् प्रतिबन्धकागणने दृष्टान्तः सपुद्रं निम्नगा नद्य इवेति ॥ १९ ॥ निषिध्येति । अभिसस्तुरिति सम्बन्धः । तत्र हेतुर्भगवति दीर्घं बहुकालं श्रुतेन धृत आशयो याभिस्ताः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स रामो गोपालैः सह गाश्चारयन्दूरं स्वव्रजादागतस्तस्यान्नं दीयतां । अवश्यमनालस्येन दाने कारणमाहुः ॥ बुभुक्षितस्येति । एकोदरपूर्तिमात्रममत्रेदिशेयुर्मृगदृशा इति भीता आहुः ॥ सानुगस्य सभृत्यस्येति । कदोदनमानयन्तीति स उन्नतस्थाने तिष्ठन्मार्गं निरीक्षत इत्यप्यवगमयन्ति ॥ सानुगस्येति । सानो गच्छनीति स तया प्रदीयतां ॥ १७ ॥ नित्यं तद्दर्शने उत्सुका इष्टार्थोद्युक्त उत्सुक इत्यमरः । तत्कथाभिराक्षिप्तं मनो यासां ता अच्युतमुपायान्तं श्रुत्वा जानः सम्भ्रम आदरो यासां ताः । सम्भ्रमस्त्वादरे भय इति वचनात् ॥ १८ ॥ निम्नगा नद्य समुद्रं यथा गच्छन्ति तथा सर्वा भाजनैः पात्रैश्चतुर्विधं भक्ष्यभोज्यलेह्यपेयात्मना बहुगुणं मधुरादिरसोपेतमन्नमादायाभिसस्रुः । अहं वैश्वानरो भूत्वेत्याद्यावेदितचतुर्विधं भुक्तभक्तपाकं कुर्वन्तं प्रति चतुर्विधान्धोनयनं सारसनयनानां युक्तमिति ज्ञेयं ॥ १९ ॥ उत्तमश्लोके भगवति दीर्घं बहुकालं श्रुतं तन्माहात्म्यश्रवणं तेन भृत आशयोऽन्तःकरणं यासां ता वा पतिभिर्भ्रातृभिर्बन्धुभिर्जामात्रादिभिः । वैष्णवे बन्धुसत्क्रियेति टीकायां बन्धुजमितित्युक्तेः । सुतैर्जातपुत्रः कृष्णकेशोऽग्नीनादधीतेति श्रुतेर्दीक्षापयोग्येकैकतोकैरुत्तरत्र भगवदङ्गसङ्गाशात एतदागमावगमाद्बहुप्रसवे तदसम्भवादेवमर्थे कृते तत्तारुण्यं सिध्यतीति ज्ञेयं । यद्वा जातपुत्रः कृष्णकेश इत्यादौ योग्यवयोमात्र लक्षयित्वाऽधिकारकथनात्सुताः पतिभ्रातृसुता इति वाऽर्थेति तारुण्यं द्योतितं भवतीति वा सुतैरित्युक्तिः । निषिध्यमाना अपीममभिसस्रुरित्यन्वयः ॥ २० ॥

श्रीसुबोधिनी

प्रयोजनमाहुर्गाश्चारयन्निति, ते त्वन्यान्नं न गृह्णन्त्यतो भगवतोक्तमपि स्त्रीभिर्दत्तमप्यन्नं स्वयं न गृहीतवन्तः किन्तु भगवदर्थमेव याचन्ते तेषां स एव धर्म इति, दोषकीर्तनं त्वज्ञानात्, गवां चारणमावश्यकमिति तदनुरोधेन तृणवति देशे समागतो

गोपालैश्च सहितः, अनेन स्वागमने सर्व एवागच्छेरन्निति बाधकमुक्तं **सराम इति** आदरार्थे कार्यान्तराभावार्थे च, अतो दोषकीर्तनं, अतो **बुभुक्षितस्य तस्य** ससेवकस्य तस्यैवान्नं तत्र गत्वा **दीयता**मिति **प्रकर्षो यथायोग्यम्** ॥ १७ ॥ ततो यज् जातं तदाह **श्रुत्वाच्युत**मिति, 'चरते'तिवचनात् सोपि पश्चादागच्छतीत्युक्तं, अत आहो**पायान्त**मिति, उप समीप आगच्छन्तं, पूर्वं तु तास्तत्र गता इदानीमत्र भगवान् समायाति मनोरथस्तु पूर्वशेष इति समागमन इतिकर्तव्यतानभिज्ञाः **ससम्भ्रमा जाताः**, किञ्च **नित्यं तद्दर्शनार्थ**मुत्सुका**ः**, अतः शीघ्रमपि गन्तव्यं, क्षुधित इति सामग्र्यपि नेयातोपि **सम्भ्रमः**, किञ्च **तस्य** भगवतः कथाभिराक्षिप्तं **मनो** यासां, यत्र क्वापि स्थितं **मनस्तत** आ समन्ताद् दूर एव **क्षिप्त**मतो भगवति गतमतो मनोरथबाहुल्यात् किं कर्तव्यमिति **ससम्भ्रमाः** ॥ १८ ॥ इदानीन्तनं बलिष्ठमिति विचार्य ससामग्रीका आगता इत्याह **चतुर्विध**मिति भक्ष्यं पेयं चोष्यं लेह्यमित्यन्यथा भोजनं न स्यात्, भक्ष्ये दन्तानां विनियोगोन्यद् गौणं चोष्ये परितः स्थितांशानां लेह्ये जिह्वाया, पेयेन्यःस्थितस्य वक्त्रस्यातश्चतुर्विधमेव सर्वं भोजनं भवति **गुणा** व्यञ्जनानि धर्मा वा, बहवो **गुणा यत्र, अन्न** साधारणं, अपेक्षितादप्यधिकं, **भाजनै**र्येष्वेव स्थितं न तूद्धृत्य, **अभिसस्रु**रभिसरणं कृतवत्य आभिमुख्येन गमनं, **समुदायशक्त्या सर्वथा गमनं** प्रतीयते, तत्र हेतुः **प्रियमिति प्रियं प्रति** हि **सर्वेषां गमनं**, अतः **सर्वा** एव, बह्वीनां कथमेकत्र गमनमेकदेत्याशङ्क्य दृष्टान्तेन परिहरन् प्रतिबन्धाभावमाह **समुद्रमिव निम्नगा** इति, **निम्नगा नद्यो मध्ये पर्वतादीनामपि प्रतिबन्धं न मन्यन्ते, न हि** तासां देवाः पतयो भवन्ति किन्तु **समुद्र** एव तथात्रापि, **निम्न** एव गच्छन्तीत्युच्चरहङ्कारे स्थिताः पतयो नाङ्गीकृताः ॥ १९ ॥ प्रतिबन्धाभावमाशङ्क्याह **निषिध्यमाना** इति उदासीनानां भाषणं निषिद्धमतः सम्बन्धिभिरेव **निषिद्धाः**, बलवद् बाधकं च तन्, पितरात्र नोक्ता अन्यथोत्पत्तिविरोधः स्यात्, उपपत्तिविरोधे तु शास्त्रं बलिष्ठं, तासां चतुर्विधपुरुषार्थाश्चतुर्भिर्देया **धर्मदः पतिरर्थदो भ्राताभिलषितार्थदातारो बान्धवाः सुता** मोक्षदाः, तेषां **निषेधे** तत्तत्पुरुषार्थहानिस्तथापि पञ्चममेव पुरुषार्थं मन्यमाना गता **एवे**त्याह **भगवतीति**, भगवांस्तु षड्गुणः स्वयं चैकोतः सर्वपुरुषार्थास्तत्र सिध्यन्ति, किञ्चो**त्तमश्लोक** इति, **उत्तमैः** सिद्धपुरुषार्थैरपि श्लोक्यतेतो **भक्तिरप्यष्टमः पुरुषार्थः**, किञ्च कामितो हि पुरुषार्थो भवति न त्वकामितोतो धर्मादीनामपुरुषार्थत्वैव किन्तु भगवानेव पुरुषार्थं इत्यभिप्रायेणाह **दीर्घश्रुतधृताशया** इति, **दीर्घ**कालपर्यन्तं यः **श्रुतो** यद्वा **श्रुतं** तस्मिन् तेन वा **धृत आशयो** याभिः, यथा फलश्रवणेन फले चित्तं भवति तथा भगवति चित्तं न त्वन्यत्र, निषेधोत्र वाचनिक ऋत्विजां कर्मवैयर्थ्यात्, न ह्यन्यभार्या अन्येन स्प्रष्टुं शक्या यागनाशश्च स्यादतो यजमानपत्नीव्यतिरिक्ताः सर्वा एव गता एकरूपाश्च ऋत्विजां मिश्रप्रतिषेधात् 'यूनः स्थविरान् वे'ति यजमानस्तु विसदृशोपि भवत्यतो गता एव ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गाश्चारयन्नित्यत्र **अन्यान्न**मिति भगवत्सम्बन्धरहितमित्यर्थः, **स्त्रीभिर्दत्तमपी**ति सम्भावनयामपिशब्दः, सम्भावितदानविषयीभूतमपीत्यर्थः, **दोषकीर्तन**मिति भगवतो बुभुक्षाकथनमित्यर्थः ॥ १७ ॥ **श्रुत्वाच्युत**मित्यत्र **मनोरथस्त्वि**ति अस्माभिस्तत्र गत्वैवमेवं कर्तव्यमितिमनोरथस्तु पूर्वं चिन्तितस्य स्वगमनस्य शेषभूतः, समागतस्तु भगवानतो मनोरथं विस्मृत्य **ससम्भ्रमा** एव **जाता** इत्यर्थः ॥ १८ ॥ **चतुर्विध**मित्यत्र **धर्मा** वेति मधुरत्वादय इत्यर्थः **साधारण**मिति सर्वासां साधारणं न तु पृथक्कृतमित्यर्थः, **समुदायेति** अभिसरणपदस्य समुदायार्थेनेत्यर्थः ॥ १९ ॥ **निषिद्ध्यमाना** इत्यास्यान्ते **यजमानस्त्वि**ति सर्वेषां यजमानत्वेप्यातिदेशिकं तत्, मुख्योत्र यजमानपदेनोच्यत इतिज्ञेयम् ॥ २० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गाश्चारयन्नित्यत्र **दोषकीर्त्तनं त्वज्ञाना**दिति "बुभुक्षितस्य तस्यान्न"मित्यनेन भगवति बुभुक्षितत्वदोषकथनं तु अज्ञानात्, "मायामनुष्यस्य वदस्व विद्वन्" "गूढः कपटमानुष" इत्यादिवाक्यैर्मनुष्यासाधारणधर्माणां भगवति मायया प्रतीतिर्न तु वस्तुतो भगवति मनुष्यधर्माः सन्त्यतः "क्षुत् खलु वै मनुष्यस्य भ्रातृव्य" इतिश्रुतेः क्षुधो मनुष्यासाधारणधर्मत्वान् न भगवति बुभुक्षितत्वमित्याकारकशास्त्रार्थस्याज्ञानादित्यर्थः ॥ १७ ॥ **श्रुत्वाच्युतमपायान्त**मित्यत्र **पूर्वं तु तास्तत्रागता** इति **ता** यज्ञपत्न्यः **पूर्वं** स्वमनोरथेन **तत्र** भगवत्समीपे **आगता** इत्यर्थः, **मनोरथस्तु पूर्वशेष** इति रमणमनोरथः पूर्वं विचारितस्य भगवन्निकटगमनस्य शेषभूतः, भगवन्निकटे यदा गमनं स्यात् तदा रमणमनोरथः सिध्येत्, भगवांस्त्वत्र आयात्यतः परं कथं मनोभिलाषः सेत्स्यतीतिससम्भ्रमा जाता इतिहार्दम् ॥ १८ ॥ **भगवत्युत्तमश्लोक** इत्यस्य विवृतौ **पञ्चममेव पुरुषार्थ**मिति स्वतन्त्रभक्तिरूपं पुष्टिमार्गभजनाख्यं पुरुषार्थमित्यर्थः ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'किमर्थम्' तत्राहुः–सः कृष्णः गोपालैः रामेण च सहितो गाश्चारयन् गृहात् दूरमत्रागतः, अतो बुभुक्षितश्च । अतः सानुगस्य अस्मदाद्यनुगैः सहितस्य बुभुक्षितस्य तस्यान्नं प्रदीयतामित्यन्वयः ॥ १७ ॥ ताश्च अच्युतं कृष्णमुपायातं समीपमागतं श्रुत्वा जातसम्भ्रमाः अनवस्थितिचित्ता बभूवुः । तत्र हेतुमाह–नित्यं तस्य दर्शने उत्सुकमुत्साहो यासां ता इति । तत्रापि हेतुमाह–तस्य

कथाश्रवणेन आक्षितमाकृष्टं मनो यासां ताः ॥ १८ ॥ बहुगुणं संस्कारविशेषैर्बहवो रससौरभ्यादयो गुणा यस्मिंस्तत् भक्ष्यादिभेदैश्चतुर्विधमन्नं भाजनैः पृथक्पात्रैरादाय पत्यादिभिर्वार्यमाणा अपि प्रियं श्रीकृष्णमभिसस्रुः अभिजग्मुः । प्रतिबन्धानुल्लङ्घ्य गमने दृष्टान्तमाह–समुद्रमिव निम्नगा नद्य इति । यत्र दन्तानां विनियोगोऽस्ति तत् भक्ष्यं चर्वणादि, यत्र दन्तविनियोगो नापेक्ष्यते तद्भोज्यमोदनानि, लेह्यं दध्यादि, चोष्यं इक्षुदाडिमाम्रादि ॥ १९ ॥ तथागमने हेतुः–भगवतीति । उत्तमश्लोके उत्तमयशसि दीर्घं बहुकालं श्रुतेन यशःश्रवणेन धृतः आशयश्चितं याभिस्ताः ॥ २० ॥

अन्वितार्थप्रकाशिका

गा इति ॥ स कृष्णः गोपालैः रामेण च सहितो गाश्चारयन् गृहात् दूरमागतः । अतः सानुगस्य अस्मदाद्यनुगैः सहितस्य बुभुक्षितस्य तस्यान्नं प्रदीयताम् ॥ १७ ॥ श्रुत्वेति । नित्यं तस्य हरेः दर्शने उत्सुकाः तस्य हरेः कथाश्रवणेनाक्षितमाकृष्टं मनो यासां ताः द्विजपत्न्यः अच्युतम् उपायातं समीपमागतं श्रुत्वा पूर्वमनुरक्ता एव बुभुक्षाश्रवणेन अधिकं जातसम्भ्रमाः अनवस्थितचित्ता बभूवुः ॥ १८ ॥ चतुर्विधमिति द्वयम् ॥ बहुगुणं संस्कारविशेषैर्बहवो रससौरभ्यादयो गुणा यस्मिंस्तत् भक्ष्यभोज्यलेह्यचूष्यभेदैश्चतुर्विधमन्नं भाजनैः पृथक् पात्रैरादाय पतिभिर्भ्रातृभिर्बन्धुभिः सुतैः निषिध्यमाना वार्यमाणा अपि उत्तमश्लोके भगवति दीर्घं बहुकाल श्रुतेन यशःश्रवणेन धृतः आशयश्चित्तं याभिस्ताः सर्वा द्विजपत्न्यः समुद्रं निम्नगा इवेति प्रतिबन्धकागणने दृष्टान्तः । प्रियं श्रीकृष्णम् अभिसस्रुः अभिजग्मुः । तदानीं सर्वासां कृष्णं प्रति नायिकात्वाभिमानमालक्ष्येदम् । यत्र दन्तानां विनियोगो नापेक्ष्यते तद्भोज्यमोदनादि शेषं भक्ष्यं लड्डुकादि लेह्यं दध्यादि चूष्यम् इक्षुदाडिमाम्रादि ॥ १९-२० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स हरिः गोपैः सहितः अदूरं चतुर्विधं बहुगुणमन्नमादाय भाजनैः अभिसस्रुः प्रियं सर्वाः समुद्रमिव समीपमागताः ॥१७॥ दध्यादि क्रीणनार्थमागताभिर्गोपीभिः ऋतया तस्य श्रीकृष्णस्य कथया आक्षितं कृष्णे आकृष्टं मनो यासां ताः अतएव तस्य दर्शनेनुत्सुकाः जाताऽभिलाषाः आगतं श्रुत्वा जातसंभ्रमाः प्राप्तानंदभरा बभुवुः ॥ १८ ॥ चतुर्विधं भक्ष्यभोजलेह्यचोष्यभेदैश्चतुःप्रकारं बहुगुणं बहवः संस्कारभेदैरनेके गुणाः स्वादुत्वसौगंध्यादयो यस्मिंस्तदन्नं भाजनैः पात्रैरादाय भर्त्रादिभिर्निवार्यमाणा अपि प्रियं हरिं अभिसस्रुः अभ्याययुः अप्रतिरोधे दृष्टांतः निम्नगाः नद्यः समुद्रमिवेति ॥ १९ ॥ कुत इति चेत्तत्राहरौ दीर्घंकाल श्रुतेन गोपीभ्यः श्रवणेन धृतांतःकरणाः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गा इति ॥ सरामः संकर्षणसहितः, सः कृष्णस्तु, गोपालैः समं, गाश्चारयन् सन्, दूरं आगतः । व्रजादिति शेषः । अधुना बुभुक्षितस्य, सानुगस्य गोपसमूहसहितस्य, तस्य श्रीकृष्णस्य, अन्नं प्रदीयताम् । यदि वः श्रद्धा, तर्हि प्रकर्षेणान्नं प्रदीयतां, न त्वस्माकमाशाभङ्गः कार्य इति भावः ॥ १७ ॥ श्रुत्वेति । तस्य श्रीकृष्णस्य कथया कथाश्रवणेन क्षिप्तान्याहृतानि मनांसि यासां ताः, प्रथमत एव श्रीकृष्णकथाश्रवणतस्तद्दर्शनाक्षिप्तमनस्तया वर्त्तमाना इत्यर्थः । अत एव, अच्युतं उपायातं समीपागतं श्रुत्वा, नित्यं तद्दर्शनोत्सुकाः ब्राह्मण्यः, जातसंभ्रमाः संजातोत्सवाः, बभूवुः ॥१८॥ चतुर्विधमिति । निषिध्यमाना इति च । भगवति, उत्तमश्लोके श्रीकृष्णे, दीर्घं दीर्घकालं श्रुतेन श्रवणेन धृत आशयोऽन्तःकरणं याभिस्ताः, सर्वाः द्विजपत्न्यः, पतिभिः स्वस्वामिभिः, भ्रातृभिः स्वसहोदरैः, बन्धुभिर्ज्येष्ठदेवरादिभिः, सुतैः पुत्रैः, निषिध्यमानाः अपि, भाजनैः स्थाल्यादिभिः, बहुगुणं रससौरभ्यादिबहुगुणकं, चतुर्विधं भक्ष्यभोज्यलेह्यचोष्यभेदेन चतुष्प्रकारं, अन्नं आदाय, निम्नगाः समुद्रं इव, प्रियं निरतिशयप्रीतिविषयं भगवन्तं, अभिसस्रुरभिजग्मुः । इति द्वयोरेकान्वयः ॥ १९-२० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अन्नमिति : १०.२३.१७.

स्त्रीत्वान्नासामधिकृतिः प्रणवे त्विति जानता । अन्नमित्युक्तमीशेन गोपा अपि तथाऽब्रुवन् ॥ ४२ ॥
पूर्णकामस्य तस्यास्मिन् वने चारयतस्तु गाः । नापेक्ष्यमन्यत् किं त्वेका भक्तेहा सैव पूर्यताम् ॥ ४३ ॥

श्रुत्वेति : १०.२३.१८.

यदेव पुरतोऽब्रुवन् सदसि यज्वनां धेनुपास्तदेव सवयोषितामपि पुरः समूचुर्वचः ।
न ते विदुरजं विदुः पुनरिमाः स्त्रियोऽप्यञ्जसेत्यलं बहुविशोधनैरजवशीकृतिर्भक्तितः ॥ ४४ ॥
भक्तानां मनसः संसृत्याक्षिप्तस्यापि माधवे । अलमावर्तनायास्य नाम्नः श्रुतिरिति स्फुटम् ॥ ४५ ॥
क्रतुः किमेतैः क्रियते क्रतुभुक् तु क्षुधाकुलः । पतिकल्याणमिच्छन्त्यस्तत्तृप्त्यैता धृतोत्सवाः ॥ ४६ ॥

चतुर्विधमिति : १०.२३.१९.

दात्रे चतुर्विधपुमर्थमयान्नराशेर्भक्ताल्लसद्रसपुषे भगवत्पदाय ।
अन्नं चतुर्विधमनन्तगुणं प्रदानयोग्यं सुभक्तरसमित्युचितं तथाऽगुः ॥ ४७ ॥
भक्तप्रियो हि भगवानिति भक्तियुक्ताः स्पष्टं वदन्ति निगमागमवेदिनोऽपि ।
तद्भक्तिलुब्धमनसामपि भक्तयुक्तायुक्ता गतिर्न इति ता निरगुः सभक्ताः ॥ ४८ ॥
आजन्मसम्बन्ध्यपि नामरूपं स्वभावगं दुस्त्यजमप्यमोचि ।
याभिर्न तासामतिदुस्त्यजोऽस्मिन्नाप्तादिवर्गस्त्विवति चोपमार्थः ॥ ४९ ॥

निषिध्यमाना इति : १०.२३.२०.

आप्तातिलङ्घनमघं हि तमस्तदेतत् कोटिद्युरत्नसमकृष्णकृपाप्रकाशे ।
नाम्नापि वस्तुमलमत्र न तास्तु साक्षात् तद्दृष्टिभाज इति पुण्यमसीम सिद्धम् ॥ ५० ॥
वृत्तिभिर्भगवान् ध्येयः सगुणश्चेत् तदेदृशः । एवं सम्बोधयन् विप्रपत्नीद्वाराऽवदन् मुनिः ॥ ५१ ॥

कृष्णप्रिया

सुनिये ! माताजी ! गौओं को चराते हुए श्रीकृष्ण जी हम सब ग्वाल-बाल एवं श्रीबलभद्र जी, यहाँ तक आ गये हैं। हम सब ही को बहुत भूख लगी है। इसलिए हम सेवक सहित उनके लिए भोजन दीजिये ॥ १७ ॥ राजन् ! ये सब ऋषि पत्नियाँ भगवान श्रीकृष्ण के दिव्य गुणों का श्रवणकर प्रभु के दर्शनों के लिये अत्यन्त उत्कंठित थी। आज श्रीकृष्णचन्द्र जी समीप आये हुए जानकर सबको श्रीकृष्ण दर्शन की चटपटी लगी ॥ १८ ॥ जैसे सरितायें समुद्र की ओर वेग से अभियान-अभिसरण कर देती है वैसे ही द्विजपत्नियाँ स्वादिष्ट एवं हितकर पथ्य भक्ष्य भोज्य-चोष्य-लेह्य चारों प्रकार के भोजन को बर्त्तनो में भरकर प्रियतम पुरुषोत्तम के दर्शन के लिये चल पड़ी ॥ १९ ॥ पतियों, भाईयों, बन्धुओं एवं पुत्रों ने उनको जाने से रोका, फिर भी वे नहीं रुकी। सुदीर्घ काल से द्विजगृहिणीओं ने भगवान श्रीकृष्ण के गुणों का श्रवण किया था, इससे द्विजपत्नियों के चित्त उत्तम श्लोक भगवान श्रीकृष्ण की ओर आकृष्ट था ॥ २० ॥

यमुनोपवनेऽशोकनवपल्लवमण्डिते । विचरन्तं वृतं गोपैः[1] साग्रजं ददृशुः स्त्रियः ॥ २१ ॥
श्यामं हिरण्यपरिधिं वनमालिबर्ह[2]धातुप्रवालनटवेषमनुव्रतांसे ।
विन्यस्तहस्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासम् ॥ २२ ॥
[3]प्रायः श्रुतप्रियतमोदयकर्णपूरैर्यस्मिन् निमग्नमनसस्तमथाक्षिरन्ध्रैः ।
अन्तः प्रवेश्य सुचिरं परिरभ्य तापं प्राज्ञं यथाभिमतयो विजहुर्नरेन्द्र ॥ २३ ॥
तास्तथा त्यक्तसर्वाशाः प्राप्ता आत्मदिदृक्षया । विज्ञायाखिलदृग्द्रष्टा[4] प्राह प्रहसिताननः ॥ २४ ॥[5]

कर्दमक्षमा

अन्वयः—मिथः (तत्र) नव पल्लवमण्डिते यमुनोपवने गोपैः वृतं विचरन्तम् साग्रजम् श्रीकृष्णं ददृशुः ॥ २१ ॥ अनुव्रतांसे विन्यस्तहस्तम् इतरेण अब्जम् धुनानम् कर्ण उत्पल अलक कपोल मुख अब्ज हासम् वनमालि बर्ह धातु प्रवाल नट वेषम् हिरण्यपरिधिम् श्यामम् ददृशुः ॥ २२ ॥ हे नरेन्द्र यस्मिन् निमग्नमनसः प्रायः श्रुत प्रियतत उदय कर्णपूरैः अक्षिरन्ध्रैः तम् अन्तः प्रवेश्य परिरभ्य सुचिरम् विरहजम् तापम्, अभिमतयः यथा प्राज्ञम् तथा विजहुः ॥ २३ ॥ आत्मदिदृक्षया प्राप्ताः त्यक्तसर्वाशाः ताः तथा विज्ञाय अखिलदृक् द्रष्टा प्रहसिताननः प्राह ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तथागताः सत्यो ददृशुः ॥ २१ ॥ हिरण्यवत्परिधिः परिधानं यस्य तं पीतांबरमित्यर्थः । वनमाल्यैर्बर्हैर्धातुभिः प्रवालैश्च नटवद्वेषो यस्य तम् । अनुव्रतस्य सख्युरंसे विन्यस्तो निहितो हस्तो येन तम् । इतरेण हस्तेन लीलयाऽब्जं धुनानं भ्रामयंतम् । कर्णयोरुत्पले यस्य अलकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य तं च तं च तं च ॥२२॥ वृत्तेरपि लयेन सामरस्यमाह । प्राय इति । बहुशः

---

१. गोपैः–श्रीधर. वंशी. वीर. विज. । २. माल्यबर्हं–श्रीधर. वंशी. वीर. विज. विश्व. शुक. । ३. दीर्घश्रुत–विज. । ४. दृष्ट्वा–वीर. ; दृष्ट्या–विज. । ५. प्राचीनप्रत्यां अत्र "श्री भगवानुवाच" पाठो वर्तते ।

श्रुता ये प्रियतमस्योदया उत्कर्षास्त एव कर्णपूराः कर्णौ पूरयंति कृतार्थौ कुर्वंतीति तथा तैः कर्णाभरणैरिति वा । यस्मिन्कृष्णे निमग्नमनस आविष्टचेतसस्तं लोचनद्वारैरंतः प्रवेश्य सुचिरमुपगुह्य तापं जहुः । अभिमतयोऽहंवृत्तयः प्राज्ञं सुषुप्तिसाक्षिणं परिरभ्य तस्मिन् लयं प्राप्य यथेति ॥ २३ ॥ अखिलदृशां द्रष्टा सर्वबुद्धिसाक्षी । तास्तथा प्राप्ता विज्ञायापि । तथेत्येतद्विवृणोति । त्यक्तसर्वाशास्त्यक्ताः सर्वा आशा याभिस्ताः केवलमात्मनः स्वस्यैव दिदृक्षयेति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अशोको वृक्षविशेषः ॥ २१ ॥ हिरण्यपरिधि नटवेशमिति वक्ष्यमाणत्वात् सुवर्णरसरंजितभक्तिच्छेदकुंचितकटिवेष्टनवस्त्रं नटोचितमेव । वनमाल्यं वन्यविविधपुष्पैरचितं दक्षिणवामस्कंधादारभ्य वैकक्षिकद्वयम् । बर्हाणि प्रवालश्च मौलिभूषणानि । धातवः सौगंधिकनाम्नः काम्यकवनपर्वतविशेषाल्लब्धाश्चित्रांगतया रचितास्तैर्नटवेशधरं कमलं धुनानं लीलाकमलघूर्णनमिषेण स्वहृदघूर्णीमेव दर्शयामीति निश्चिनुतेति भावः । "परिधिः परिधाने स्यात्कांचीपरिखयोस्तथा । मंडले द्रुमशाखायां भूषायां वाहनेऽपि च ॥" इति धरणिः ॥ २२ ॥ वृत्तिश्चेतोवृत्तिस्तत्सत्त्वे समक्षदर्शने यथा तापहानिस्तथा तल्लयेऽपि ध्यानावस्थायामपि तापहानिरिति । समरस्य भावः सामरस्यं सादृश्यम् । उत्कर्षा दुष्टदलनादिरूपयशःपुंजाः । यद्वा—प्रायः श्रुतप्रियतमोदयाश्च कर्णपूराः कर्णभूषाः ताश्च तैः । यद्वा—अभितो मतिर्येषां तेऽभिमतयो निपुणाः । प्राज्ञम् विद्वांसम् । "रिक्तमापूर्णतामेति मृत्युरत्यमृतायते । आपत्संपदिवाभाति विद्वज्जनसमागमात् ॥" इत्युक्तेः ॥ २३ ॥ ताः विप्रपत्नीः । तथा कथमित्याकांक्षायां—तथेति । तथाभूताः पुरोन्नस्थालीः स्थापयित्वैव मूर्च्छिता दृष्ट्वा । आशा अभिलाषाः 'आशादिगभिलाषयोः' इति यादवः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यमुनेति युग्मकम् ददृशुः कृष्णमिति शेषः । न तिष्ठति शोको यस्मात् इति श्लेषेण तस्य वनस्य तासां तदप्राप्तिशोकहारित्वं च ध्वनितं विचरन्तं क्रीडन्तं गोपैस्तत्रैव स्थितैरन्यैः वृतमिति शोभाविशेषः सूचितः किंवा वृतमपि ददृशुः तस्यैवाधिकं प्रकाशमानत्वात् साग्रजमिति सर्वसुन्दरात् ततोपि तस्य सौन्दर्य्यविशेषं ज्ञापयति, अग्रजेन सहेति । विग्रहे सहार्थयोगे तृतीयाया अप्रधाने विहितत्वात् स्त्रिय इति तत्रतीनामभाग्यं सूचितम् ॥ २१ ॥ हिरण्यपरिधि नटवेषमिति वक्ष्यमाणात् सुवर्णरसरञ्जितभक्तिच्छेदकुञ्चितकटिवेष्टनवस्त्रं नटोचितमेव वनमाल्यं वनसम्बन्धिमाल्यं वन्यविविधपुष्पैरचितं दक्षिणवामस्कन्धावारभ्य वैकक्षिकद्वयं बर्हाणि प्रवालाश्च मौलिभूषणानि धातवः सौगन्धिकनाम्नः काम्यकवनपर्वतविशेषाल्लब्धाश्चित्राङ्गरागतया रचिताः तैर्नटवेषधरम् अनुव्रतस्य निरन्तरपार्श्वस्थस्निग्धसखिविशेषस्य स्कन्धे विन्यस्तहस्तम् इतरेण दक्षिणहस्तेन लीलाकमलं भ्रामयन्तं कर्णोत्पलयोरलकानां कपोलयोर्मुखाब्जस्य च हासः प्रकाशो यत्र तमिति ॥ २२ ॥ अथानन्तरं सद्य एवाक्षिरन्ध्रैः रूपग्रहणे साधकतमनेत्ररन्ध्रेन्द्रियैर्द्वारभूतैरन्तर्मनसि प्रवेश्य तेनैव मनसा सुचिरं परिरभ्य लज्जया नेत्राणि तानि द्वाराणीवावृण्वानाः स्वाच्छन्द्येन तस्मिन्निलीयेत्यर्थः । तापं तदस्पर्शजं क्लेशं विजहुः विशब्देन पुनस्तदापातो निरस्तः हा न स्वप्नोऽसावित्यंशस्य ध्वंसात् अन्यत्तैः तत्र सामरस्यं यथापूर्वरसत्वमित्यर्थः । वृत्तेरपीति बहिर्वृत्तेरपीत्यर्थः । यद्वा, अभिमानाऽभिमुखी मतिर्येषां ते यथा प्राज्ञं परमभागवतं परिरभ्य नेत्रादिभिराश्लिष्य तापं सर्वं जहति तद्वत् ॥ २३ ॥ आत्मदिदृक्षयेति प्रथमं तन्मात्राभिलाषात् अखिलदृशां सर्वबुद्धानां द्रष्टा साक्षीति विज्ञायेत्यत्र हेतुः । यद्वा, अखिलदृशां बुद्ध्यादिद्रष्टॄणां जीवानामपि द्रष्टा प्रहसितानन इति माधुर्यमयवञ्चनचातुर्य्यम् ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्च यमुनोपवने ददृशुः, कृष्णमिति शेषः । न तिष्ठति शोको यस्मादिति, श्लेषेण तत्तरुदर्शनादपि तासां तद्विरहशोकोऽपगत इत्यर्थः । विचरन्तं परिभ्रमन्तं क्रीडन्तं वा गोपैरिति तेषामानन्त्येन केषाञ्चित् प्रथमतस्तत्संग एव सम्भवात्; यद्वा, तासामागमनविज्ञापनाय पूर्व्वं वेगेन तैरेव तत्र गतैरेव वृतमिति शोभाविशेषः सूचितः । किंवा, वृतमपि ददृशुः, तस्यैव स्वशोभाविशेषेण सर्व्वतोऽधिकं प्रकाशमानत्वात्, यथा नक्षत्रगणैर्वृतं चन्द्रमिति । साग्रजमिति तत्साहित्येन शोभाभरोदयात्, किंवा, तासामागमनेन तस्य संकोचावस्थित्या तासामेव तस्मिन् भावविशेषाभावेन वा गौणत्वात्; स्त्रिय इति सभावदर्शनं सूचितम् ॥ २१ ॥ हिरण्यशब्देन ईषद्रक्तपीतपट्टाम्बरं लक्ष्यते, तत्र चाच्छादनवाचकेन परिधिशब्देन परिधानोत्तरीयसम्वरणात्, परिधानमेवैकं वनमाल्यादीनां सन्निवेशो यथाशोभमूह्यः । तत्र वनमाल्यं वनमाला रक्षसि, बर्हं केशपाशे रत्नखचितसौवर्णमुकुटोपरि वा, तन्मयं वा मुकुटं शिरसि, गैरिकादिधातुस्तिलकादौ, प्रबालः केशपाशाग्रे मुकुटाग्रे च; यद्वा, (विष्णु० पु० ११। ०) 'एकेनामलपत्रेण कण्ठसूत्रावलम्बिना । रराज बर्हिपत्रेण मन्दमारुतकम्पिना ॥' इति श्रीहरिवंशोक्तानुसारेण बर्हं कण्ठाधो ज्ञेयम्, मुकुटश्च तन्मयं सदास्त्येव, किंवा पट्टपीतवस्त्रोष्णीषोपरि प्रबाल इत्येवं नटवद्वेशम्, अनुव्रतांसे विन्यस्तहस्तमिति लीलाविशेषेण स्वतोऽवस्थानात्; यद्वा, गोपैः सहात्मनोऽत्यन्तस्नेहभरात्; इतरेण दक्षिणहस्तेन अब्जं लीलाकमलं भ्रामयन्तमिति वैदग्धीविशेषस्वभावात्, किंवा तासामशेषतापापनोदबोधनम्; विशेषणानामेषां सौन्दर्य्ये यथोत्तरमाधिक्यमूह्यम् । वेणोः परममोहनत्वेन ब्राह्मणीषु तदयोग्या-

तदग्रहणमूह्यम् । अन्यत्तैर्व्याख्यातम् । तत्रालककपोलेति केनचिदभिप्रायेण, कयापि लीलया क्रीडाश्रमेण वा, अलकानां ललाटोपरि वर्त्तमानानामपि कपोलयोः पातादिति ॥ २२ ॥ अथानन्तरं सद्य एवेत्यर्थः । अस्य परेणान्वयः, विशब्देन पुनस्तापोदयो निरस्तः । दृष्टान्तश्चैकदेशे अक्षिरन्ध्रैरन्तः प्रवेश्य आसक्त्या साक्षान्निरीक्ष्य सुचिरं परिरभ्य प्रेम्णा तस्मिन् निलीयेत्यर्थः; मनसैव वा साक्षादिवालिग्य तापं सांसारिकं तद्विरहजं वा, विशेषेण सम्यक्तया जहुः । अन्यतैर्व्याख्यातम्; यद्वा, अभिमतयो मूर्त्तिमदभिमानाः, विद्यादिना महागर्व्ववन्त इत्यर्थः । ते यथा प्राज्ञं परमभागवतं तत्कृपया परिरभ्यैव तापं सर्व्वं विजहतिः, हे नरेन्द्रेति नरश्रेष्ठत्वात् त्वया तद्विज्ञायत एवेति भावः । यद्वा, तद्वार्तया प्रेमक्षुभितचित्तमालक्ष्य तमवधापयति, यद्वा, तासां तादृशभावेन विस्मयात् सम्बोधनम् ॥ २३ ॥ अखिलदृशां सर्व्वबुद्धीनां द्रष्टा साक्षीति विज्ञायेत्यत्र हेतुः, यद्वा, विज्ञापापि प्रकर्षेण युक्तिप्रदर्शनादिना प्राहेत्यत्र सर्व्वज्ञानाभिज्ञः, ब्राह्मणीनामासां दास्यादिस्वीकारो न मे युक्त इति, यद्वा, व्रजे वसतो ममान्यपरिग्रहो नैव युक्त इति विचारयन्नित्यर्थः । अतस्तासां परित्यागेनान्तस्तासां दुःखचिन्तया केवलं मुख एव हासात् प्रहसिताननाः; यद्वा, वक्ष्यमाणप्रकारेणैवासामेतत्पतीनाञ्च क्षेमं स्यादिति विचारयन्नित्यर्थः । ततश्च प्रहसिताननत्वं श्रीमुखप्रसक्तिस्वाभाविकमेवेति ॥ २४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अनुव्रतस्य कस्यचिदंसे कर्णोत्पलालकैर्जुष्टं कपोलं यस्य तत् कर्णोत्पलालककपोलं मुखाब्जं तस्मिन् हासो यस्य तमित्यर्थः ॥ २२ ॥ कर्णपूरैः शब्दैः अतिमतयः ज्ञानाधिकाः ॥ २३–२६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यमुनासमीपवने कथम्भूतेऽशोकानां तरूणां नवैः पल्लवैः मण्डिते विचरन्तमग्रजेन सहितं गोपैश्चावृतं कृष्णं स्त्रियः द्विजपत्न्यो ददृशुः ॥ २१ ॥ कीदृशं श्यामं हिरण्यवत्परिधिः परिधानं यस्य तं पीताम्बरमित्यर्थः वनमाल्यैः वन्यैः पुष्पैश्च बर्हैर्धातुभिः गैरिकादिभिः प्रबालैः पल्लवैश्च नटवद्वेषो यस्यानुव्रतस्य सख्युरंसे स्कन्धे विन्यस्तो हस्तो वामकरो येन इतरेण हस्तेनाब्जं धुनानः लीलया भ्रामयन्तं कर्णयोरुत्पले यस्यालकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य तं च तथाविधं ददृशुरित्यन्वयः ॥ २२ ॥ बहुशः आकर्णिताः प्रियतमस्योदया उत्कर्षास्त एव कर्णौ पूरयन्ति कृतार्थीकुर्वन्ति तथा तैः कर्णाभरणैरिति वा यस्मिन् कृष्णे निमग्नमनसः आविष्टचित्तास्तं कृष्णम् अथ दर्शनानन्तरमक्षिरन्ध्रैर्लोचनद्वारैरन्तः प्रवेश्य सुचिरं परिरभ्य उपगूह्य तापं तद्दर्शनाभावजं जहुः हे नरेन्द्र ! अभिमतयः भगवद्भक्तानां तद्दिदृक्षात्मिका बुद्धयः प्राज्ञं परमात्मानं "प्राज्ञेनात्मना सम्परिष्वक्तः प्राज्ञेनात्मनान्वारूढः" इति श्रुतेः । तं दृष्ट्वा यथा तद्दर्शनाभावजं जहुः तापमाध्यात्मिकादिकं वा जहति तद्वत् अतिमतय इति पाठे ज्ञानाधिकाः ॥ २३ ॥ तदा भगवानात्मनः स्वस्य दिदृक्षया प्राप्तास्ता दृष्ट्वा त्यक्ताः सर्वा आशाः पत्यादिविषयाः याभिस्तथाभूता विज्ञाय तत्र हेतुरखिलं पश्यतीति तथा प्रहसितमाननं यस्य सः प्राह ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

किं गुणविशिष्टं ददृशुरिति, तत्राह —श्यामं हिरण्यपरिधिं सुवर्णमेखलं सुवर्णवत्पीताम्बरं वा वनमाल्येन वनपुष्पेण बर्हेण मयूरपिच्छेन धातुना गैरिकेण प्रवालेन नटवेषवद्वेषो यस्यासौ तथा तम् अनुव्रतांसे कस्यचिद्वयस्यस्य स्कन्धे कर्णयोरुत्पले अलकः कुन्तलं कपोले च मुखाब्जे हासो यस्य स तथा तं धुनानं परिकम्पयन्तम् ॥ २२ ॥ दीर्घकालमारभ्य श्रुतः प्रियतमस्योदयो दीर्घश्रुतप्रियतमोदयः स एव कर्णपूराः कर्णालङ्करणानि तैः यस्मिन् कृष्णे निमग्नमनसः अवगाह्य दृढबद्धहृदयाः पूर्वं ताः स्त्रियोऽथ तं कृष्णम् अक्षिविवरैरन्तः प्रविश्य सुचिरं परिरभ्य आलिङ्ग्य तापं स्मरनिमित्तं ज्वरं जहुः कथमिव यथा प्राज्ञाः सुषुप्त्यवस्थासाक्षिणः प्राज्ञं प्राप्ताभिमतयः इन्द्रियवृत्तयः तापं त्यजन्ति "सता सौम्य तदा सम्पन्नो भवति" इति श्रुतेः । यद्वा, भगवत्तत्त्वज्ञाननिपुणाः प्राज्ञाः प्राज्ञमिति पाठे परिरभ्येति सम्बन्धः ॥२३॥ त्यक्तसर्वाशाः त्यक्तसर्वातितृष्णाः "आशादिगतितृष्णयोः" इति च दृष्ट्वा अपरोक्षज्ञानेन तासां भक्तिं विज्ञाय अखिलदृक् अखण्डज्ञानी ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तथैव तैस्तत्र गत्वा निवेदिते सति तासां कृतिमाह प्राय इत्यादि । प्रायो निरन्तरं श्रुत्वा ये प्रियतया उदया विहारास्त एव कर्णपूराः कर्णालिकारवत् कर्णसंयुक्तत्वात् । तैर्यस्मिन् श्रीकृष्णे निमग्नमनस आसन् । अथ तमेव श्रीकृष्णमक्षिरन्ध्रैरन्तः प्रवेश्य प्रविष्टं कारयित्वा परिरभ्यालिङ्ग्य तापं विजहुः । पुनः पुनः श्रवणेन कर्णयोः सौभाग्यमालोक्य तासामक्षिणी दुःखिनी एव स्थिते तयोर्दुःखमपनेतुं ताभ्यामेव तं प्रवेशयामासुरेव । भगवानपि एकोऽपि सर्वासां नयनरन्ध्रैरेव प्रविश्य चित्तेष्वपि बहिरिव प्रकट आसीत् । अतोऽन्तः स्फुरन्तमान्तरेणैवात्मना परिरेभिरे; बहिः स्फुरन्तं नयनैरेवेत्यन्तर्बहिरेकरूपमासीदिति भावः ॥ २३ ॥ तदनन्तरं भगवानाह यत्तदवधारयति —तास्तथेत्यादि । अखिलदृक् सर्वसाक्षी स श्रीकृष्णस्तास्तथा विज्ञाय अन्तर्गतं स्वं परिरभमाणा विज्ञाय

प्रहसिताननः सन् प्राह । कीदृशीः ? आत्मदिदृक्षया प्राप्ता अपि हृदये तथा आत्मानं परिरभन्त्य इति हास उचित एव । पुनः कीदृशीः! कृष्णातिरिक्तेषु त्यक्ताशा इत्यर्थः ॥ २४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तमथाक्षिरन्ध्रैरित्यादि । यथाभियमतिक्रम्य अभीता एव सत्यो मनयो मननशीला अक्षिरन्ध्रैरन्तः प्रवेश्य सुचिरं परिरभ्य तापं जहुः । तं कीदृशम् ? प्राज्ञं सर्वज्ञमालिङ्गितोऽहममूभिर्मनसेति तदा तदालिङ्गनसुरवज्ञमिति यावत् ॥ २३ ॥ एतमेवार्थमुत्तरश्लोकेन प्रपञ्चयति–तास्तथेत्यादि । अखिलदृक् तत्तन्मानसालिङ्कनादिवेत्ता, यतो द्रष्टा उदासीनश्च, अतः प्रहसिताज्ञन प्राह ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हिरण्यं हिरण्यरसाक्तं वस्त्रं परिधिः परिधानं यस्य तं वनमाल्येन पत्रपुष्पमयेन चरणपर्य्यन्तलम्बितेन बर्हेण चूडोपरिस्थेन धातुभिरङ्गरागत्वेन कल्पितैः प्रवालैः श्रवणचूडातुन्दबन्धान्तरस्थैर्नटस्येव वेषो यस्य किञ्च स्वामियोगमपि ता अनुभावयामासेत्याह अनुव्रतस्य प्रियसखस्यांसे स्कन्धे विन्यस्तः आश्लेषपरिपाट्या अर्पितो वामहस्तो येन तम् इतरेण दक्षिणहस्तेन अब्जं लीलाकमलं धुनानं घूर्णयन्तम् एतादृशदर्शनप्रदानेन भाववतीनां भवतीनां हृदयकमलं स्वहस्तगतं कृत्वा औत्सुक्येन घूर्णयामीति जानीतेति द्योतयन्तं यद्वा भवतीर्भाववतीः पश्यतो मम हृदयकमलमौत्सुक्येन घूर्णते इति लीलाकमलघूर्णनमिषेण स्वहृदयघूर्णामिव भवतीर्दर्शयामीति मत्कृतात् स्वाभियोगादेव निश्चिनुतेति व्यञ्जयन्तं कर्णोत्पलयोश्चञ्चला अलका यस्य कपोलयोः प्रसृतो मुखाम्बुजस्य हासो यस्य तं च तञ्च तम् ॥ २२ ॥ प्रायो बहुशः श्रुता ये प्रियतमस्य उदया उत्कर्षास्त एव कर्णपूराः कर्णालङ्कारः कर्णौ पूरयन्तो कृतार्थयन्तीति तथा तैर्यस्मिन् श्रीकृष्णे निमग्नमनस एव एतावद्दिनपर्य्यन्तं आसन् तं सम्प्रति नेत्रद्वारैरन्तःकरणकमलतल्पे प्रवेश्य सुचिर स्वच्छंदेनैव दृढं परिरभ्य परिरम्भदार्ढ्येनैवानन्दमूर्च्छास्तास्तेन सहैक्ये सति तापं तदङ्गस्पर्शाभावजनितं क्लेशं विजहुः तत्र दृष्टान्तः अभिमतयोऽहंवृत्तयः प्राज्ञं सुषुप्तिसाक्षिणं परिरभ्य तस्मिन् लयं प्राप्य यथा ॥ २३ ॥ तास्तथाभूता अन्नस्थालीः पुरः स्थापयित्वैव मूर्च्छिता भवन्तीर्दृष्ट्वा अखिलानामपि दृशां बुद्धीनां द्रष्टा ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ताः स्त्रियः साग्रजं सरामं श्रीकृष्णं ददृशुः ॥ २१ ॥ कथम्भूतम् ? श्याममिति । हिरण्यवत्परिधिः परिधानं यस्य तम् वनमाल्यैर्वनपुष्पैर्बर्हैर्मयूरपिच्छैर्धातुभिर्गैरिकादिभिः प्रबालैः पल्लवैश्च नटवद्वेषो यस्य तम् अनुव्रतांसे सख्युः स्कन्धे विन्यस्तो निहितो हस्तो येन तम् इत्युत्तरेण हस्तेनाब्जं धुनानं भ्रामयन्तम् कर्णयोरुत्पले यस्य अलकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य तञ्च तञ्च तन्ददृशुरित्यन्वयः ॥ २२ ॥ अथ दर्शनानन्तरं प्रायो बहुशः श्रुता ये प्रियतमस्य श्रीकृष्णस्योदया उत्कर्षाः त एव कर्णपूराः कर्णौ पूरयन्ति कृतार्थौ कुर्वन्तीति तथा तैः तस्मिन् श्रीकृष्णे निमग्नान्याविष्टानि चेतांसि यासां ताः तमक्षिरन्ध्रैर्लोचनद्वारैरन्तः प्रवेश्य सुचिरं परिरभ्योपगुह्य तापं जहुः "यथा प्राज्ञं प्राज्ञेनात्मना सम्परिष्वक्तः प्राज्ञेनात्मनान्वारूढः" इति श्रुतिप्रसिद्धं भगवन्तं प्राप्य अभिमतयो जीवबुद्धिवृत्तयस्तापं त्यजन्ति तद्वत् ॥ २३ ॥ त्यक्तसर्वाशाः श्रीकृष्णं विहाय क्वापि न गमिष्याम इत्येवं कृतनिश्चया इत्यर्थः । अखिलं दृग्द्रष्टा सर्वबुद्धिसाक्षीः ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

आगतास्ताः कृष्णं सद्यो ददृशुः ॥ २१ ॥ हिरण्यरसाक्तः परिधिः परिधानं यस्य तत् वनमाल्येन पत्रपुष्पमयेन पादलम्बिना वर्हेण चूडोर्ध्वगते धातुभिरतिसुगन्धिभिरङ्गरागत्वेन कल्पितैः प्रबालैश्च श्रवणगतैर्नवपल्लवैर्नटस्येव वेषो यस्य तं अनुव्रतस्य प्रियसखस्यांशे स्कन्धे विन्यस्तः परिरम्भपरिपाट्यार्पितो वामहस्तो येन तमित्यनुभावविशेषं ताः प्रत्यवबोधयन्तमित्यर्थः । इतरेण दक्षिणहस्तेनाब्ज लीलाकमलं धुनानं भवद्ध्यानेन मेऽपि घूर्णत इति ताः प्रति ज्ञापयन्तमित्यर्थः । कर्णोत्पलयोश्चपला अलका यस्य कपोलयोः प्रसृतो मुखाब्जस्य हासो यस्य तञ्च तञ्च तम् ॥ २२ ॥ प्रायो बहुधा श्रुता ये प्रियतमस्य नन्दसूनोरुदया महोत्कर्षास्त एव कर्णपूराः श्रोत्रभूषास्तैर्यस्मिन्निमग्नमनसोऽभूवन् तमथ सम्प्रत्यक्षिरन्ध्रैरन्तर्हृत्कमले प्रवेश्य सुचिरं गाढ़तया परिरभ्य तापं तद्विरहजातं जहुः तत्र दृष्टान्तः प्राज्ञमिति यथाभिमतयो देहगेहादिष्वहम्ममेत्यभिमानाः सुषुप्तौ प्राज्ञं परमात्मानं प्राप्य जागरतापं जहति तद्वत् ॥ २३ ॥ तास्तथाभूताः पुरोऽन्नस्थालीर्निधाय मूर्च्छन्तीर्विज्ञाय अखिलानां दृशां धियां द्रष्टा साक्षी प्रहसितेतिमाधुर्यमयवञ्चनचातुरी ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अशोकनवपल्लवमण्डिते यमुनोपवने यथा स्वाप्तां कृष्णापेक्षा न तथा कृष्णस्येत्याह ॥ यमुनेति । अमुना कृष्णेन सहैव वर्तत इति । गोपैर्वृतं सहितं साग्रजं प्रचरन्तं स्त्रियो ददृशुः । वृतमित्युक्तिः कदा द्रक्ष्याम इति स्ववृत्तमित्यपि स्फोरयत्यर्थः ॥ २१ ॥

किं रूपं ददृशुरित्यत आह ॥ श्याममिति । वर्णेन हिरण्यं हिरण्यवद्विद्यमानः परिधिर्वसनं पीतमिति यावत् सुवर्णमयमेखलमिति वा वनमाल्यं वनमाला बर्हाणि च धातवो गैरिकाद्याः प्रवालाः पल्लवा एतैर्नटवद्वेषो यस्य तमनुव्रतः कश्चिद्गोपस्तस्यांसे स्कन्धे विन्यस्तहस्तमितरेण हस्तेनाब्जं कमलं धुनानं कम्पयन्तं कर्णयोरुत्पले यस्य तथा । आ सम्यगलकाश्चूर्णकुन्तलाः समीचीनौ कपोलौ च यस्य । उत्पलं शुष्कमांसे स्यात्कुष्ठेन्दीवरयोरपीति विश्वः । अलकाश्चूर्णकुन्तला इत्यमरः । गण्डकपोलाविति च । तच्च तन्मुखाब्जं च तस्मिन्हासो यस्य स तं ॥ २२ ॥ दीर्घश्रुतः प्रियतमस्य कृष्णस्योदयः स एव कर्णपुरः कर्णालङ्कारास्तैर्यस्मिन्प्राङ्निमग्नमनसस्तमेव । अथ दर्शनान्तरमक्षिरन्ध्रैस्तद्द्वाराऽन्तः प्रवेश्य सुचिरं परिरभ्य तापं तदसहवाससमुद्भूतं जहुः । तत्र निदर्शनमाह ॥ प्राज्ञं यथेति । यथाऽभिमतयोऽभितो मतिरनुसन्धानं येषां ते विवेकिनः प्राज्ञं तन्नामकं भगवन्तं परिरभ्य । प्राज्ञेनात्मना सम्परिष्वक्तः सता सोम्य तदा सम्पन्नो भवतीत्यादेः । तापं जहाति तथेति ॥ २३ ॥ दृष्ट्या दर्शनमात्रेणाखिलदृग्सर्ववित्तास्त्यक्ताः सर्वेषामाशा भर्त्रादीनां यासां ता आत्मदिदृक्षया प्राप्तास्तथा तथैव विज्ञाय प्रहसिताननः प्राह ॥ २४ ॥

श्रीसुबोधिनी

गतानां समागमनप्रकारमाह **यमुनेति**, **यमुनोपवने विचरन्तं स्त्रियो ददृशु**रितिसम्बन्धः, जलस्थलक्रीडायोग्यभूमिः सूचिता, **उपवने पुष्पाणि फलानि च सर्वदा भवन्ति** तथाविधान्येवारोप्यन्त इति, **यमुना क्रू**रेत्युपवनरक्षा यमभागाभावश्च, गतानामुभयपरित्यागे शोकः स्यादिति तन्निवृत्त्यर्थमाहा**शोकानां नवपल्लवैर्मण्डित** इति, अनेन शय्या अपि निरूपिताः, तादृशे विभावादियुक्ते **गोपैर्मुग्धैर्वृतं** विशेषेण हंसगत्यादिना गच्छन्तं **साग्रजं** क्रियाशक्तिसहितं सर्वतो रक्षणसमर्थं **ददृशुः** स्वाभिलषितप्रकारेण दृष्टवत्यो यतः **स्त्रियः** ॥ २१ ॥ स्त्रीदृष्टं भगवन्तं वर्णयत्यन्यथा भगवच्चरित्रं न भवेदन्योपसर्जनत्वाद् वर्णिते तु भगवतैव तथा क्रियत इति तादृशरूपप्राकट्येन निश्चीयते, **श्याम**मिति, आदौ वर्णः श्रृङ्गाररसात्मको गौरो रजोरूप एव स्यात् तैजसश्च शुक्लो जलप्रकृतिकोव्यक्तरसोन्नमेव हि सर्वरसात्मकं भोग्यं च केवलं तद् रसजनकं न भविष्यतीति तयोरपि सम्बन्धो निरूप्यते, **हिरण्यपरिधिं वनमालिन**मिति, सुवर्णमेखलैव **परिधि**रूपा कुण्डलमुकुटकण्ठाभरणानि च पीताम्बरं कङ्कणाङ्गदादीनि च, अनेन परिधिसहितः सहस्रमूर्तिः **श्याम**श्चन्द्रो निरूपितः, **वनमाला** वर्ततेस्येति, सर्वपुष्पमयी सा शुभ्रा, अन्येपि सर्वे रसास्तत्र सन्तीति ज्ञापयितुं साधनत्रयमाह **बर्हधातुप्रवालेति**, त्रयाणामन्योन्यसम्बन्धात् सर्व एव रसाः, **बर्ह**श्चित्र एव **धात**वोनेकविधाः । शुभ्रादयो मिश्राः, **प्रवाला** आरक्ता एव, एतैरपि कृत्वा नटवेषो यस्य, केवल रसं धर्मिसहितमपि रसं दातुमुपस्थितः, किञ्च लीलामपि सामग्रीरूपां स्वयमेव करोतीत्याहा**नुव्रतांसे विन्यस्तहस्तमितरेण धुनानमब्ज**मिति, लीलायाः प्राधान्यख्यापनार्थं स्वस्य परवशत्वं बोध्यते, स्वातन्त्र्ये रसो गुप्तो भवतीत्यनुव्रतस्य **स्वसमानधर्मशीलास्यांसे स्कन्धे** हस्तं **विन्यस्य** युग्मरसं ख्यापयन् विश्वमेव कमलात्मकं भ्रामयति सर्वमेवान्यथा करिष्यामीति ज्ञापयन् निर्भयतां सम्पादयति, पर**मनुव्रत**त्व एवाणुमात्रान्यथाभावेपि **नैव**मयं रसः क्रियापर्यवसायीति स्कन्ध एव कृतिर्निरूपिता, उभयोरेकत्र व्यापृतौ रसो न स्यादितीत**रेणे**त्युक्तं कम्पने मकरन्दः स्रवतीति रसार्थमेव तथाकरणं, ज्ञानक्रिययोर्मर्यादायाः शास्त्राणामङ्गानां भक्तेर्विरोधमाशङ्क्य परिहरति **कर्णोत्पलालककपोलमुखाब्जहास**मिति, कर्णयोरुत्पले येलका नालसहितकमलस्थितभ्रमरा इव **कपोल**योर्मुखे **च हास्यं** यस्येति, तेष्वपि **हास**सम्बन्धः **कपोलयोर्मुखे** च, सर्वेषामेव कमलत्वं **कपोल**योर्मुखस्यैव वा, **कर्ण**योर्योगसाङ्ख्यत्वं प्रवृत्तिनिवृत्तिशास्त्रत्वं च, **उत्पला**नां मर्यादारूपत्वं, **अलकानां** शास्त्रत्वं विद्वत्त्वं वा, **कपोल**योर्भक्त्यङ्गत्वं मुखस्य भक्तित्वं, सर्वेषामेव सरसत्वायाब्जत्वं, तत्र **हासो** यस्येति सर्वव्यामोहात् सर्वविरोधः परिहृतो भवति ॥ २२ ॥ एवं भगवत्स्वरूपमुक्त्वा तत्र तासां स्वरूपमाह **प्राय इ**ति, प्राचुर्येण श्रुताः **प्रियतमस्याभ्युदय**रूपा गुणास्त एव कर्णपूराः कर्णाभरणानि तद्द्वारा भगवत्यन्तः प्रविष्टे **यस्मिन् निमग्नमनसो** जाता यथा गृहे गङ्गापूरे समागते गृहं **निमग्नं** भवति, **तमेव** भगवन्तमन्तःस्थितं पुनः प्रकारान्तरेणा**क्षिरन्ध्रैरन्तः प्रवेश्य तापं जहुः**, पूर्वं शब्दात्मकः प्रविष्टः कर्णद्वारा, इदानी**मक्षिद्वारा** रूपात्मकः प्रविशत्यतोथेतिभिन्नप्रक्रमः, तेन तु सांसारिका एव तापाः परिहृता न त्वलौकिका अनेन त्वलौकिकाः परिहियन्ते, तदाद **तापं जहु**रिति, ननु **ताप**ः सर्वाङ्गेषु प्रविष्टः कथमन्तःप्रवेशनमात्रेण शान्त इत्याशङ्क्याह **सुचिरं परिरभ्ये**ति, अन्तर्बहुकालमालिङ्गितवत्यस्ततः सर्व**ताप**परित्यागः, ननूपशान्ता एव तापा न तु नष्टा इति चेदित्याशङ्क्य तास्तत्रैव लीना इति वदन् स्वरूपतोपि तापनाशमाह दृष्टान्तेन **प्राज्ञं यथाभिमतय** इति, **प्राज्ञं** सुषुप्तिसाक्षिणं स्वात्मानमेव भगवद्रूपमहङ्कारवृत्तयः प्राप्य तत्रैव लीना भवन्त्येवमेता भगवत्येव सायुज्यं प्राप्तवत्यः परं संस्कारशेषा अतः पुनर्बहिर्गमनमन्यथा सायुज्यमेव स्यात्, **प्राय**ग्रहणेन सर्वे भगवदीया गुणा न श्रुता अन्यथा मोहयतीतिज्ञानेन मुग्धा भवेयुः, किञ्च **श्रुत** एव न दृष्टः कोप्यनुभावः, किञ्च **प्रियतम**त्वेनैव **श्रुतो** न तु साधनत्वेन, **उदय** इति कोमला एव भावाः श्रुताः, तेपि कर्ण एव प्रवाहत्वेन प्रविशन्ति न तु सर्वाङ्गे दृष्टानन्तर्याभावादतो **मन** एव **निमग्नं** न तु देहादिः, इदानीमप्येता ज्ञाननिष्ठाः अन्तरेव सत्कारं कृतवत्यः सायुज्यं च प्राप्तवत्यः, **ज्ञानं** हि तमोरूपं रजोरूपा भक्तिः सत्त्वरूपः सङ्गः इत्यतः सुषुप्तिदृष्टान्तः, तापनिवृत्तिः फलमन्यथा गततापा नेत्रपेयमेव भगवल्लावण्यामृतं पपुः, नरेन्द्रेतियम्बोधनं ध्यानार्थममोहार्थं च ॥ २३ ॥ ततो भगवता यत् कर्तव्यं तदाह **तास्तथे**ति, **तथा** पूर्वोक्तप्रकारेण **त्यक्ता** ऐहिकपारलौकि**काशा** याभिः, **आत्मनः** स्वस्य **दिदृक्षया प्राप्ताः** केवलं भगवान् **द्रष्टव्यः**, मर्यादायां ह्येतावदेव. श्रुतो हि

भगवान् मनोनिदिध्यासितव्यश्च साक्षात्कर्तव्य इति, तत् त्वेतासां जातमतो रूपप्रकारविलक्षणं वचनमाह **विज्ञायेति**, तासां स्वरूपं **विज्ञाय प्रहसिताननो** भूत्वा **प्राह** दर्शनानन्तरभावव्यामोहार्थं हासः प्रकर्षेण कथनमबाधितस्य, नन्वेवं कथनमयुक्तमिति चेत् तत्राहाखि**लदृग्द्रष्टेति, अखिल**दृशां सर्वबुद्धीनां **द्रष्टा** सधर्माणां धर्मिणां यत्र प्रवृत्तिः, केवलधर्मिणां प्रवाहवत् सर्वत्र गच्छतां धर्मिणां बाधकसहितानां सधर्माणां पश्चादेवोत्पन्नबाधवतां सर्वामेव प्रवृत्तिं जानाति, अत एता अन्तिमपक्षनिमग्ना इति तथोक्तवान् ॥ २४॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अत्रैव **श्यामं हिरण्यपरिधि**मित्यस्य विवरणे, **ज्ञानक्रिययो**रित्यारभ्य **सर्वविरोधः परिहृतो भवती**त्यन्तम् । ननु स्वरूपस्योक्तरूपत्वे तासां व्याघुट्य **गमनं** सर्वथा विरुद्धम् । तथाहि । ज्ञानं हि क्रियापर्यवसायि । तथा च बर्हधातुप्रवालेत्यादिविवरणे केवलधर्मसहितरसदानार्थोपस्थितिपरवशत्वयुग्मरसख्यापनादिक्रियया तदनुरूपमेव भगवज्ज्ञानमपीति ज्ञायते । तथा च व्याघट्य **गमनमे**तदुभयविरोधि । इत एव मर्यादाविरोधः । न हि भगवज्ज्ञानादि विरुद्धं भवितुमर्हति । ‘कृष्णाङ्घ्रिपद्ममधुलिण् न पुनर्विसृष्टगेहे’ष्वित्यादि **भागवतं** शास्त्रं रसशास्त्रं च तादृशमतस्तद्विरोधः । अङ्गानि भगवत्प्रेम्णः प्राचीनश्रवणादीनि विभावकानुभावकादीनि च । भगवत्सङ्गतानामन्यत्रापि पतित्वेन भजनमिति भक्तेर्विरोधः । व्यामोहेन समाधानस्यायमाशयः । यदि पूर्वोक्तरूपेष्वेकस्यापि स्फूर्तिः स्यात्, स्यात्तत्कार्यमेव । किन्तूक्तानां मूलरूपे मोहकसम्बन्धात् कस्यापि न स्फूर्तिरिति न तत्कार्यसम्भव इति । यद्वा । भगवतो ब्रह्मत्वेन तज्ज्ञानशक्तेरपि सर्वसमत्वेन विकाराजनकत्वादुक्तरीतेश्च तज्जनकत्वात् तथा । तत्क्रियाशक्तिरपि योगशास्त्रादिनिरूपिता मनःसमाधिहेतुत्वेनोक्तरूपैवेति तथा । ब्राह्मणेष्वेवंभावप्राकट्यं मर्यादाविरोधि । शास्त्राणि स्वस्वाधिकारानुसारेण भगवद्भजनं विदधते । तथा सति शुभं फलम्, विपरीते विपरीतमिति । एतासां विवाहितपुंभजनस्यैव तथात्वादुक्तरीतेश्चातथात्वहेतुत्वेन तथा । शास्त्रोक्तरीत्यैव भजनं भक्त्यङ्गमिति तद्वैपरीत्येन भावजनकरीतिप्राकट्यमङ्गविरोधि । जारत्वेन ह्यत्र भजनं स्यात्, तच्च भक्तिविरोधि । व्यामोहसमाधेरयमाशयः । लोके यो हि येन यदर्थं व्यामोहितः क्रियते सतदनुगुणमेव करोति, न तु स्वानुगुणम् । तथाच पूर्वोक्तानामेवंभावेन भजन एव तात्पर्यमधुना समाप्तमिति तेषां पुष्टिमार्गीयत्वकरणान्न विरोधगन्धोपीति । यद्वा । ननु स्वरूपस्योक्तरूपस्योक्तरूपत्व इत्यादिनास्मदुक्ताशङ्कानिरासायाहुः **सर्वव्यामोहा**दिति । सर्वासां पत्नीनां सर्वांशे वा तासामेव व्यामोहो भगवता कृत इति पूर्वोक्तभगवदीयज्ञानक्रियादेः कार्यासम्पत्तिरभवदेतासु, तेन गेहं गताः । अत्रेदमाकूतम् । तासां गृहगमनोक्त्या भगवदीयज्ञानक्रियादिकार्यासम्पत्तिः स्पष्टैवेति ज्ञानाद्युक्तिर्निरर्थ्येति शङ्कानिरासायावश्यं तत्प्रयोजनं वाच्यम् । तच्च मर्यादादेहं त्याजयित्वा पुष्टिमार्गीयं तं प्रापयित्वा समानीता या, तन्निमित्तं प्रभुणा तादृशा धर्माः प्रकटीकृता इति तस्यां तत्कार्यं सम्पन्नम् । एतदर्थमप्राकट्यादेतासु तत्कार्यासम्भवेऽपि न विरोधः । अत एवैतद्दर्शनमस्मिन् श्लोके नोक्तम्, किन्तु पूर्वस्मिन्नेव । परन्तूभयदृष्टं रूपमेकमेवेति पूर्वेणास्य श्लोकस्य संगतिः कृता । प्रतीयमानानामपि धर्माणामेतद्धृदयानारोहो व्यामोहादिति । पूर्वमप्रतीतिरेव धर्माणामुक्ता, संप्रति प्रतीतावपि हृदयाप्रवेश उच्यत इति विशेषः ।॥ २२॥ **प्रायःश्रुतेत्यत्र, कर्णपूरपद**तात्पर्योक्तौ, दृष्टानन्तर्याभावादिति । दृष्टं दर्शनम् । तदानन्तर्याभावादित्यर्थः । यद्युक्तानां भावानां तदनुरूपस्वीयभावैः साक्षादनुभवानन्तरं श्रवणं स्यात्, तदा पूर्वानुभवसंवादेन सर्वाङ्गे तद्रसाविर्भावः स्यात्, अत्र तु तथात्वाभावान्न तथेति भावः ॥ २३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

यमुनेत्यस्याभासे एतासां सर्वात्मभावाभावात् पूर्वोक्तमभिसरणमेव मुख्यं, दर्शनं तु तत्प्रकारत्वेन **गौण**मित्यभिप्रेत्य **प्रकार** एव वाक्यार्थ उक्तः, व्याख्याने, **क्रूरेति** तनुनवत्वोपलक्षणेन प्रतिबन्धकमात्रनिवर्तिकेत्यर्थः, अतस्तदुपवने **प्रति**बन्धका नायास्यन्तीतिभावः, तात्पर्यान्तरमाहुः **यमेति**, तद्दोषपरिहारार्थमेव यमुनोत्पादनात्, सामान्यतोपि भगिन्यां न भ्रातुर्भागः, अतस्तत्र **गतानां** भगवत्सम्बन्ध एव भवति न तु पुनः संसारे समागत्या यमसम्बन्ध इतिभावः, **उभयपरित्यागे** इति भगवद्प्राप्त्या बुद्ध्या यत्र स्थितास्तत्परित्यागः, गृहत्यागाच्छेषेण यत्र स्थितास्तत्परित्यागः, अप्राप्तावपि तादृगवस्थित्या प्राप्तिनिश्चयान् न शोक इतिभावः ॥ २१ ॥ **अन्योपसर्जनत्वा**दिति दर्शनस्याभिसरणाङ्गत्वादित्यर्थः, **तथा क्रियते** इति स्वरूपं तद्दर्शनविषयीभूतं क्रियत इत्यर्थः, **श्याममित्यत्र रजोरूप** इति रसोद्दीपिका सामग्री रजःपदेनोच्यते इति टिप्पण्यां पूर्वमुक्तं, तथा च रसोद्दीपको न तु रसरूप इत्येवकारः, गौरस्य शृङ्गारोद्दीपकत्वात् शृङ्गारस्य च श्यामत्वादितिभावः, **तैजसश्चेति** श्रुतौ तेजसो लोहितत्वादिति भावः, **केवलमिति** रसपक्षे उद्दीपकरहितं गुप्तरसरहितं च अन्यस्य रसजनकं न भवतीत्यर्थः, **केवलमिति** “बर्हे”त्यनेन नटवेषकथनात् केवलो रस उक्तः, पूर्वविशेषणत्रयेणेतरसम्बन्धविशिष्टशृङ्गाररसात्मकत्वकथनाद् **धर्मसहित** उक्तः, **सामग्रीरूपामिति** तादृशलीलां दृष्टवा रस उद्बुद्धो भवतीति रसोद्बोधे लीलासामग्री, **स्वातन्त्र्ये** इति रसस्य स्वातन्त्र्ये प्राधान्ये सति गुप्तो रक्षितो रसो भवतीत्यर्थः, उत्पलानामिति कमलस्य ब्रह्माण्डात्मकत्वेन रूपमर्यादाहेतुत्वादितिभावः ॥ २२ ॥ **प्रायःश्रुतेत्यत्र अलौकिका** इति भगवद्विरहजा इत्यर्थः, **ननूपशान्ता एवेति** । परिरम्भस्य भेदघटितत्वात् प्रियपरिरम्भे तद्विरहजतापशान्तिवदत्रापि

स्यादित्यर्थः, अत्रैतत्परिरम्भेभिमतीनां प्राज्ञप्राप्तिदृष्टान्तः, तथा च भेदाघटितपरिरम्भात् तापनाश इतिभावः, **प्रियतमत्वेनैवेति** तथा च कामभाव एव न तु भक्तिसाधनत्वज्ञानेन शुद्धभाव इत्यर्थः, **इदानीमपी**ति भक्तिनिष्ठायामपीत्यर्थः, **ज्ञानं हीति** एतासामितिशेषः, **मनोनिमज्जनं ज्ञानं** कामभाववत्त्वात् तमोरूपत्वं युक्तमिति हिशब्दः अत एवाभिमतिदृष्टान्त इतिभावः, सादरावलोकनं मुखविषयकत्वाद् **भक्तिः**, तत्र हाससम्बन्धाद् रजोरूपत्वं, **सुचिरं** परिरम्भः **सङ्गः** तस्य शान्तिरूपत्वात् सत्त्वरूपत्वं **अन्यथेति** ज्ञानभक्तिसङ्गैरित्यर्थः, **एतेनैतच्छ्लोकार्थं** उपसंहृतः, महावाक्यार्थमाहुः **नेत्रे**ति, तथा च "ददृशुः स्त्रिय" इत्यत्रोक्तस्याभिसाराङ्गदर्शनस्य भगवच्चरित्रत्वकथनायेदं श्लोकद्वयमितिभावः, **नरेन्द्रे**ति ध्याने नरस्य विशेषतोधिकारात् तच्छ्रेष्ठस्य च मोहाभावादित्यर्थः ॥ २३ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

यमुनोपवन इत्यस्य विवृत्तौ यमुनापदतात्पर्यमाहुः **यमुना क्रूरेति**, भगवत्सम्बन्धे यावन्ति प्रतिबन्धकानि तेषां विनाशिकेत्यर्थः, **तथा च स्वोपवनस्य** भगवदेकक्रीडौपयिकत्वात् तद्वनविनाशकस्य विनाशं कथं न कुर्यादित्यर्थः, **यमभागाभावश्चेति** यमस्य कालरूपत्वात् कालस्य सर्वभक्षकत्वादेतदुपवनमपि कदाचिदन्यथा कुर्यात् तदत्र यमुनासम्बन्धान् न करोत्येव भगिनीसम्बन्धेन तद्रक्षाकरणस्यैवोचितत्वादिति यमुनापदतात्पर्यम् ॥ २१ ॥ **श्यामं हिरण्यपरिधिमित्यस्य** विवृतौ **वर्णः** श्रृङ्गाररसात्मक इति श्रृङ्गारस्य श्यामरूपत्वात्, **गौरो रजोरूप** इति हिरण्यपरिधिमित्यनेनोक्तानां सुवर्णमेखलाद्याभरणानां गौरत्वात् तत्स्वरूपमाहुः **गौरो रजोरूप एव स्यात् तैजसश्चे**ति, **वनमालिबर्हे**त्यनेनोक्तायाः वनमालायाः स्वरूपमाहुः **शुक्लो जलप्रकृतिकः अव्यक्तरस** इति, सुवर्णमेखलादिरूपतैजसैः वनमालारूपजलप्रकृतिकैः सहितस्य श्यामवर्णस्य स्वरूपमाहुः **अन्नमेव हि सर्वरसात्मकं भोग्यं चेति**, "यदग्रे रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्ये"तिश्रुतावन्नस्य श्यामतोक्ता **अन्नशब्देन** पृथिव्युच्यते, **प्रकृते श्यामं हिरण्यपरिधिमि**त्यनेन स्वरूपस्य श्यामत्वोक्तेरन्नरूपतोक्ता, **अन्नशब्देन** पृथिवी, पृथिव्यां च सर्वे रसाः सर्वेषां भोग्यत्वं च, अतोत्रापि श्यामत्वकथनात् सर्वरसात्मकत्वं सर्वभोग्यत्वं च सिद्धं, तत्र स्वरूपस्य श्रृङ्गाररसात्मकत्वात् तद्भाववतीनामेव भोग्यमितिगूढाशयो बोध्यः, **अनेन परिधिसहितः सहस्रमूर्तिः श्यामश्चन्द्रो निरूपि** इति, **अनेनेति** श्यामं हिरण्यपरिधिमितिविशेषणविशिष्टश्यामस्वरूपकथनेनेत्यर्थः, **परिधिसहित** इति परिधिरूपसुवर्णमेखलामुकुटकण्ठाभरणपीताम्बरकङ्कणाङ्गदादिसहित इत्यर्थः, **सहस्रमूर्तिः श्यामश्चन्द्र** इति परिधिपदात् सूर्याचन्द्रमसोर्द्वयोः प्राप्तावपि श्यामवर्णत्वेन श्रृङ्गाररसरूपताया उक्तत्वात्, **श्रृङ्गाररसे च** चन्द्रस्यैव योग्यत्वाच्चन्द्रत्वमेवेति तथोक्तं, सहस्रमूर्तित्वं तु सुवर्णमेखलादीनां स्वरूपविचारेणोक्तं द्वितीयस्कन्धसुबोधिन्यां ये वराहादयोवतारास्ते सर्वे भगवतः प्रादेशमात्रत्वादिधर्माणामवताररूपा इत्युपपादितं, तत्र मेखलाया वामनावतारत्वं, पीताम्बरस्य पृथ्ववतारत्वं, एवं सर्वेषां आभरणानामवतारेष्वभिनिवेशः, **तथा च** मेखलादयो वामनादिमूर्तयस्ताभिः सहितः श्रीकृष्णश्चन्द्र इति फलितं, तत्र "अवतारा ह्यसङ्ख्येया हरेः सत्त्वनिधेर्द्विजा" इतिसूतवाक्यादवताराणामनन्तत्वं, अनन्तावताराणामाभरणादिमूर्तित्वं, एवं सहस्रमूर्तिसाहित्यं, **केवलं रसं धर्मसहितमपीति बर्हे**तिपदेन **नाट्यानुसारिवेषककथनात्** केवलरस उक्तः, "केवलो नाट्ये प्रसिद्ध" इतिवेणुगीताध्यायसुबोधिन्यां निर्धारितत्वात्, केवलशब्देन विप्रयोगश्रृङ्गाररसो ज्ञेयः, **श्यामं हिरण्यपरिधिं वनमाली**त्यैभिर्विशेषणैर्धर्मसहितो **रस** उक्तः, धर्मसहितस्तु संयोगश्रृङ्गाररसो बोध्यः, "धर्मसहितः सम्भोगे" इति वेणुगीतसुबोधिन्यामुक्तत्वात्, **ज्ञानक्रिययोरित्यारभ्य विरोधः परिहृतो भवतीत्यन्तग्रन्थस्यार्थष्टिप्पण्यां स्फुटः**, **कर्णयोरुत्पले ये अलका** इत्यादि नालस्थानापन्नौ कर्णौ तत्र ये उत्पले तत्र अलका भ्रमरस्थानीया इत्यर्थः ॥ २२ ॥ **प्रायःश्रुते**त्यस्य व्याख्याने **ज्ञानं हि तमोरूपमिति** यज्ञपत्नीनां **भगवज्ज्ञानं तमोरूपं** भगवति कामित्वेन बोधात्, **रजोरूपा भक्तिरिति** एतासां **भक्तिः रजोरूपा** राजसीत्यर्थः, **सत्त्वरूपः** सङ्ग इति **सुचिरं** परिरभ्येत्यनेनोक्तः परिरम्भरूपः सङ्गः सत्त्वरूपः सात्त्विक इत्यर्थः ॥ २३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अशोकवृक्षाणां नवपल्लवैर्मण्डिते शोभिते यमुनाया उपवने गोपैर्वृतं साग्रजं रामेण सहितं विचरन्तं कृष्णं ताः स्त्रियो ददृशुः ॥ २१ ॥ ताभिर्दृष्टं शोभातिशययुक्तं भगवन्तं वर्णयति—श्याममिति । मेघवच्छ्यामवर्णम् । हिरण्यवत् परिधिः परिधानं यस्य तं पीताम्बरम् । वनमाल्यैः कण्ठस्थितैः पुष्पमालाभिः, बर्हैः शिरसि धारितैः मयूरपिच्छैः, धातुभिः गैरिकादिभिः, प्रवालैः शिरस्येवोभयतो धारितैः कोमलपत्रैश्च नटवद्वेषो यस्य तम् । अनुव्रतस्य सख्युः अंसे स्कन्धे विन्यस्तः स्थापितो हस्तो येन तम् । इतरेण हस्तेन लीलया अब्जं धुनानं भ्रामयन्तम् । कर्णयोरुत्पले यस्य, अलकाः कपोलयोर्यस्य, मुखाब्जे हासो यस्य, तं च तं च ॥ २२ ॥ 'तस्य दर्शनेन तासामलौकिकव्यवस्था जाता, सा सावधानेन श्रोतव्या' इत्याशयेन सम्बोधयति—नरेन्द्रेति । प्रायः बहुशः श्रुता ये प्रियतमस्य कृष्णस्य उदया उत्कर्षास्त एव कर्णपूराः सतां कर्णाभरणभूतास्तैर्यास्मिन् श्रीकृष्णे निमग्नमनसः आविष्टचित्ताः विप्रभार्याः । अथ दर्शनानन्तरमक्षिरन्ध्रैः द्वारभूतैर्लोचनच्छिद्रैस्तं कृष्णमन्तःकरणे प्रवेश्य सुचिर परिरभ्य उपगूह्य संसारतापं

जहुस्त्यक्तवत्यः। तत्र दृष्टान्तमाह--अभिमतयोऽहंवृत्तयः प्राज्ञं सुषुप्तिसाक्षिणं परिरभ्य तस्मिन् लयं प्राप्य यथा तापं त्यजन्ति तथेति ॥ २३ ॥ ताः स्त्रियस्तथा प्राप्ता विज्ञाय प्रहसिताननो भगवानाहेत्यन्वयः। विज्ञाने हेतुमाह--अखिलदृग्द्रष्टेति, सर्वबुद्धिसाक्षी। 'तथा' इत्येतद्विवृणोति--त्यक्ताः सर्वा गृहापत्यपत्यादिविषया आशा याभिस्ताः, अतः केवलमात्मनः स्वस्य दिदृक्षयैव प्राप्ता इति ॥ २४ ॥

अन्वितार्थप्रकाशिका

यमुनेति ॥ अशोकवृक्षाणां नवपल्लवैर्मण्डिते शोभिते यमुनाया उपवने गोपैर्वृतं साग्रजं विचरन्तं कृष्णं ताः स्त्रियो ददृशुः ॥ २१ ॥ हरिं विशिनष्टि—श्याममिति ॥ मेघमिव श्यामवर्णं हिरण्यमिव हिरण्यरसाक्तो वा परिधिः परिधानं यस्य तं पीताम्बरं वनमाल्यैः पत्रपुष्पमयैरापादलम्बिभिः कण्ठस्थितैः बर्हैः शिरसि धारितैः मयूरपिच्छैः धातुभिरङ्गरागतया क्लृप्तैर्गैरिकादिभिः प्रवालैः शिरस्येवोभयतो धारितैः कोमलपत्रैश्च नटवद्वेषो यस्य तमनुव्रतस्य सख्युः अंसे स्कन्धे विन्यस्तः हस्तो येन तम्। इतरेण हस्तेन लीलया अब्जं धुनानं भ्रामयन्तं कर्णयोरुत्पले यस्य अलकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य तं च तं च ॥ २२ ॥ वृत्तेरपि लयेन सामरस्यमाह—प्राय इति ॥ हे नरेन्द्र ! प्रायः बहुशः श्रुता ये प्रियतमस्य कृष्णस्य उदया उत्कर्षास्त एव कर्णपूराः सतां कर्णाभरणभूतास्तैर्यस्मिन् श्रीकृष्णे निमग्नमनसः आविष्टचित्ताः विप्रभार्याः। अथ दर्शनानन्तरमक्षिरन्ध्रैः द्वारभूतैर्लोचनच्छिद्रैस्तं कृष्णमन्तःकरणे प्रवेश्य सुचिरं परिरभ्य उपगुह्य अभिमतयोऽहंवृत्तयः प्राज्ञं सुषुप्तिसाक्षिणं परिरभ्य तस्मिन् लयं प्राप्य यथा संसारतापं जहुस्त्यक्तवत्यः ॥ २३ ॥ ता इति ॥ त्यक्ताः सर्वा गृहापत्यपत्यादिविषया आशा याभिस्ताः स्त्रियः केवलमात्मनः स्वस्य दिदृक्षयैव प्राप्ताः तथा विज्ञाय अखिलदृग्द्रष्टा सर्वबुद्धिसाक्षी प्रहसिताननः भगवानाह स्म ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अशोकवृक्षाणां ये नवपल्लवास्तैर्मंडिते भूषिते ॥ २१ ॥ हरिशोभां वर्णयन्नाह श्याममिति हिरण्यतुल्यः परिधिः परिधानवस्त्रं यस्य तं वन्यविविधपुष्परचितमालादिभिर्नटतुल्यो वेषो यस्य तं अनुवृत्त्यस्य प्रियस्य मित्रस्य अंसे स्कंधे विन्यस्तो धृतो हस्तो येन तं इतरेण पाणिनाऽब्जपद्मं धुनानं कंपयंतं कर्णयोरुत्पल्ये यस्य अलकाः केशाः कपोलयोर्यस्य मुखपद्मे हासो यस्य तं च तं च तं च ददृशुः ॥ २२ ॥ तद्दर्शनेन तासां समाधिमाह प्राय इति प्रायो बहुशः श्रुताः प्रियतमस्य ये उदयाः अलौकिकैश्वर्यरूपा उत्कर्षाः त एव कर्णपूराः कर्णौ पूरयंति सफलौ कुर्वंतीति तथाभूतास्तैः कर्णाऽलंकारैः कृत्वा यस्मिन् हरौ निमग्नमनसः प्रविष्टांतःकरणाः सत्यः तं श्रीकृष्णं नेत्रद्वारैरंतः हृदि प्रवेश्य सुचिरं दीर्घकालं परिरभ्य आलिंग्य तापं विजह्रुः यथा अभिमतयः इन्द्रियांतःकरणवृत्तयः प्राज्ञं सुषुप्तौ प्रकर्षेणाज्ञं कारणदेहाऽभिमानिनं जीवं प्राप्य जाग्रद्भावोत्पन्नं दुःखं विजह्रुः तथा ॥२३॥ आत्मनः स्वस्य द्रष्टुमिच्छया प्राप्ताः आगताः त्यक्तसर्वाशाः ऋषिपत्न्यः अखिलदृक् द्रष्टा सर्वांतःकरणसाक्षी हरिः विज्ञाय प्राह ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यमुनेति ॥ अशोकानां वञ्जुलतरूणां ये नवपल्लवास्तैर्मण्डिते, यमुनोपवने यमुनायाः समीपवर्त्तिवने, विचरन्तं, साग्रजमग्रजेन सहितं, गोपैः वृत च कृष्णं, स्त्रियो द्विजाङ्गनाः ददृशुः ॥ २१ ॥ कीदृशं ददृशुरित्यत्राह ॥ श्याममिति ॥ श्यामं घनवन्मेचकं, हिरण्यवत्परिधिः परिधानं यस्य तं, सुवर्णमेखलमिति वा। वनमाल्यानि वनपुष्पाणि च बर्हाणि मयूरपिच्छानि च धावतो गैरिकादयश्च प्रवालाः पल्लवाश्च तैर्नटवद्वेषो यस्य तं, अनुव्रतांसे स्वसख्युः स्कन्धे, विन्यस्तो हस्तो वामकरो येन तं, इतरेण दक्षिणहस्तेन, अब्जं कमलं, धुनानं लीलया भ्रामयन्तं, कर्णयोः श्रवणयोः उत्पले पद्मे यस्य अलकाः कपोलयोर्यस्य मुखाब्जे मुखपद्मे हासो यस्य तं च तं च तं च, ददृशुरित्यन्वयः ॥ २२ ॥ प्राय इति ॥ प्रायो बहुशः, श्रुताः ये प्रियतमस्योदया उत्कर्षास्त एव कर्णपूराः कर्णौ पूरयन्ति कृतार्थौ कुर्वन्तीति तैः कर्णाभरणैरिति वा। यस्मिन् कृष्णे, निमग्नमनस आविष्टचित्ताः, आसन्। अथानन्तरं, अक्षिरन्ध्रैर्लोचनद्वारैः, तं कृष्णं, अन्तः प्रवेश्य, सुचिरं परिरभ्योपगुह्य, हे नरेन्द्र, अभिमतयः भगवद्भक्तानां तद्दिदृक्षात्मिका बुद्धयः, प्राज्ञं परमात्मानं, परिरभ्य, यथा तथा, तापं विजह्रुः। 'प्राज्ञेनात्मना संपरिष्वक्तः प्राज्ञेनात्मना रूढः' इत्यादिश्रुतिषु प्राज्ञशब्दः परमात्मगमकः प्रसिद्ध एव। भक्तजनभगवद्दिदृक्षामतयो भगवन्तं दृष्ट्वाऽध्यायात्मिकादिपरितापं यथा जहति, तद्ब्राह्मण्योऽपि भगवन्तं दृष्ट्वा तमुपगुह्य तद्दर्शनाभावजं परितापं जहुरित्यर्थः ॥ २३ ॥ ता इति ॥ तदा भगवान्, आत्मनः स्वस्य या दिदृक्षा तया, प्राप्ताः ता ब्राह्मणीः दृष्ट्वा, तथा त्यक्ताः सर्वाः आशाः पत्यादिविषया याभिस्तास्तथाः, विज्ञाय, अखिलं पश्यतीत्यखिलदृक्, हेतुगर्भमिदम्। अखिलदृक्त्वादित्यर्थः। प्रहसितमाननं यस्य तथाभूतः सन् प्राह ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

श्याममिति : १०.२३.२२.

वराभयकरस्थितिर्मम न दुर्लभामामनुव्रतस्य विशदं व्यधादिति निजां स राजत्कारः।
मदङ्घ्रिशरणागतेक्षणसुखोत्सवात् सौख्यदं रमागृहमपि स्फुटं न च ममेति तत्कम्पनात् ॥ ५२ ॥

प्राय इति : १०.२३.२३.

मनः स्पृष्टं वस्तु प्रियमखिलसाधारणमपि क्वचिच्चक्षुर्दृष्टं यदि तदतिसौख्याय भवति ।
प्रियेभ्योऽपि प्रेयानतुल-परमानन्दजनको ध्रुवं दृष्टो याभिस्तदुचितमतापा यदभवन् ॥ ५३ ॥
गोपालक-प्रणव-गोपविलासभाजो दृक्सौख्यमच्युतपदस्य मुनीन्द्रगम्यम् ।
स्त्रीत्वान्न नस्तदधिकार इति स्म तप्तास्तापं पुनस्तदनुभूय जहुः क्षमं तत् ॥ ५४ ॥
मास्त्वधिकारः प्रणवेऽस्मान् हीना इति वदन्तु वा लोकाः । तद्गतपदार्थदर्शनसुखमनुपधिकं तु लब्धमस्माभिः ॥ ५५ ॥
तापं जहति मुनीन्द्राः कृत्वैकप्रणवचिन्तनं चित्ते । युक्तमनन्तप्रणवप्रत्यक्षेक्षणाज् जहुस्तापम् ॥ ५६ ॥

कृष्णप्रिया

श्रीशुकदेवजी महाराज ने कहा—कि राजन् वहाँ उन ऋषि पत्नियों ने श्रीयमुनाजी के तट पर अशोक वृक्षों के नये नये कोपलों से सुशोभित निकुंज में विचरण-भ्रमण करते हुए गोपों के साथ बलभद्रजी और भगवान् श्रीकृष्ण के दर्शन किए ।।२१।। राजन् ! भगवान् श्रीकृष्ण सांवरे स्वरूप थे, उनके श्री अङ्ग पर सुनहला पीताम्बर झिलमिला रहा है। कृष्ण के कंठ में बैजयंती माला लटक रही थी। श्रीमस्तक पर मयूर पंख का मुकुट धारण किया है। गैरूकादि धातुओं के रंगबेरंगी रङ्गो से और नवीन कोपलों से सुसज्जित नटवर वेष से मनोहर थे। अपने एक सखा के कन्धे पर एक हस्त रखकर दूसरे हस्त में लिए हुए कमल को नचा रहे थे। कानों में कमल पुष्प के अथवा कमलाकृति कुण्डल धारण किया है, दोनों कपोलों पर श्याम घुंघराली अलक लटें लटक रही हैं और मुख सरोज मन्द मन्द मुसकान की रेखा से प्रफ्फुल्लित हो रहा हैं, ऐसे सुन्दर वर श्याम सुन्दर का दर्शन किया ॥ २२ ॥ राजन् परीक्षित्, पुनः पुनः श्रवण किये हुए प्रियतम श्रीकृष्ण के गुण-लीला रूप कर्णों के आभरण के रङ्ग से जिनका मन रञ्जित हो गया था, जिनका मन उनमें तल्लीन बना था, वे द्विज पत्नियाँ, भगवान् श्रीकृष्ण को समीप में उपस्थित देखकर निज नयन द्वार द्वारा हृदय में पधारकर, सुसुप्ति के साक्षी प्राज्ञपुरुष भगवत् स्वरूप का समालिङ्गन कर, जैसे अहंकार की समग्र वृत्तियाँ शान्त होकर आनन्दलीन हो जाती है, उसी तरह वे द्विज पत्नियाँ अपने ताप को दूर करके श्रीकृष्णचन्द्रजी के स्वरूप में लीन हो गई ॥ २३ ॥ राजन् ! श्रीश्याम सुन्दर भगवान् तो मर्मज्ञ धर्मज्ञ एव सर्वज्ञ है, वे जानते हैं कि श्रीद्विजाङ्गनाएँ निज परिवार एवं सर्वप्रकारकी आशाओं का त्यागकर केवल मेरे दर्शन की तीव्र लालसा से ही मेरे पास आयी है तब श्रीकृष्णजी ने उन द्विजपत्नियों से मुस्कराते हुए कहा कि ॥ २४ ॥

स्वागतं वो महाभागा आस्यतां करवाम किम् । यन्नो दिदृक्षया [1]प्राप्ता उपपन्नमिदं हि वः ॥२५॥
[2]नन्वद्धा मयि कुर्वन्ति कुशलाः स्वार्थदर्शनाः । अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा ॥२६॥
प्राणबुद्धिमनः[3]स्वात्मदारापत्यधनादयः । यत्सम्पर्कात् प्रिया आसंस्ततः कोन्वपरः प्रियः ॥२७॥
तद्[4] यात देवयजनं पतयो वो द्विजातयः । स्वसत्रं पारयिष्यन्ति युष्माभिर्गृहमेधिनः ॥२८॥

कर्दमक्षमा

अन्वयः—हे महाभागाः ? वः स्वागतम्, आस्यताम्, वः किम् करवाम, यत् नः दिदृक्षया प्राप्ताः (तत्) इदम् व हि उपपन्नम् ॥ २५ ॥ यथा स्वार्थदर्शनाः कुशलाः आत्मप्रिये यथा अहैतुकीम् अव्यवहिताम् भक्तिम् अद्धा ननु कुर्वन्ति ॥ २६ ॥ यत् सम्पर्कात् प्राणबुद्धिमनः स्व आत्मा दारागृह आदयः प्रियाः आसन् ततः कः नु अपरः प्रियः ॥ २७ ॥ हे ऋषिपत्न्यः ? तत् देवयजनम् यात, गृहमेधिनः द्विजातयः वः पतयः, युष्माभिः स्वसत्रम् पारयिष्यन्ति ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे महाभागाः व स्वागतं शुभमागमनम् । तदेवाह । यद्यस्मात्प्रतिबंधतिरस्कारेणास्माकं दिदृक्षया प्राप्ता इति । इदं व उत्पन्नं संपन्नं युक्तमिति वा ॥ २५ ॥ युक्तत्वमेवाह । नन्विति । आत्मप्रिये आत्मा चासौ प्रियश्च तस्मिन्मयि कुशला विवेकिनोऽत एव स्वस्यात्मनोर्थं पुरुषार्थं पश्यंति ये ते यथा यथावद्भक्तिं कुर्वन्ति । यथावत्त्वमाह । अद्धा साक्षात् । अत्र हेतुः । अहैतुक्यव्यवहितां फलाभिसंधिरहितामत एवाव्यवहितां निरंतराम् ॥ २६ ॥ आत्मनः सर्वतः श्रेष्ठत्वमुपपादयति । प्राणेति । स्वा ज्ञातयः आत्मा देहः एते सर्वे यत्संपर्काद्यस्याध्यासेनोपकरणत्वेन वा ॥ २७ ॥ तत्तस्मात्कृतार्था यूयं देवयजनं यज्ञवाटं यात गच्छत । ननु कृतार्थाः किमिति यास्याम इति चेत्तत्राह । पतय इति । पारयिष्यंति समापयिष्यंति । पतीनामनुग्रहायेत्यर्थः ॥ २८ ॥

---

१. याभ्येता–गो. प्रे. टी.; दिदृक्षयायाता–वीर.; दिदृक्षयाऽभ्येताविज. । २. न श्रद्धामधिकुर्वन्ति कुशलार्थंनिदर्शनाः–विज. । ३. स्वात्मदारा–विज. । ४. प्रयात साध्व्यो यजनं–विज ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

संपन्नम् शोभनम् । स्वरुच्यनुरोधादशोभनमपि कामुकस्य व्यभिचारवच्छोभनं प्रतीयतेऽत आह - युक्तं वेति । यद्यतः प्रतिबंधकोटीरपि तिरस्कृत्य मद्दर्शनार्थमागता अतो हे महाभागा एतद्व उपपन्नं, मम तु प्रत्युपकारासमर्थत्वान्न किमप्युपपन्नम् । किं करवाम ऋणी भवाम इति भावः ।। २५ ।। ननु निश्चये । अर्थम् परलोकहितम् । अत्र साक्षाद्भक्तौ । अत एव फलाभिसंधिरहितत्वादेव । फलाभिसंधौ तु यावत्फलं क्रियते न निरंतरमिति भावः । 'अहमात्मा गुडाकेश' इति स्मृतेः, "आत्मा तदेतत्प्रेयः" इत्यादिश्रुतेः प्रियश्चाहमेवेति ।। २६ ।। यस्य आत्मनः । अनात्मन्यात्मत्वारोप आत्माध्यासः । विचारेणाध्यासनिवृत्तावप्युपकरणत्वनिवृत्तिर्न देहापत्यकलत्रादिष्वात्मसैन्येष्वित्युक्तेर्देहादेरुपकरणत्वम् । "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुतिरत्रानुसंधेया ।। २७ ।। यतो मद्भक्तास्तत्तस्माद्धेतोः । विप्रपत्न्यः शंकंते—नन्विति । इत्यर्थं इति । अग्निसाध्ये कर्मणि सपत्नीकस्यैवाधिकारादन्यथा कृतमप्यकृतं स्यादिति भावः । सत्रादिकर्मापि वेदरूपेण मयैवोक्तमतो मत्कार्यानुरोधादेव यात, तत्रैवस्फुरंतं मां द्रक्ष्यथेति भावः ।। २८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथैव सादरमाह-स्वागतमिति । आस्यतां विश्राम्यतां ततश्च किं करवामेति आदिश्यतामित्यर्थः । तथाच करवामेति नोऽस्माकमिति च बहुत्वनिर्देशः साधारण्यापादनेन स्वैकनिष्ठताच्छादनार्थम् औदासीन्यार्थं च दिदृक्षयेति दर्शनाज्जातमिच्छान्तरं निरस्यति ।। २५ ।। तत्र तासां निजसङ्गतिप्राप्तीच्छां सम्प्रति वञ्चयन्नाह-नन्वद्धेति । अद्धा साक्षादेव विशुद्धामित्यर्थः । यतः अहैतुकीत्यादिना तत्र भक्तेर्यथावत्त्वमेवाह-अहैतुकीति । आत्मनः सकाशादपि प्रिये परमात्मत्वात् परमात्मत्वेन च मम निरन्तरयुष्मत्सङ्गित्वान्न सर्वप्रत्यक्षसङ्गायाग्रहः कर्त्तव्य इति भावः ।। २६ ।। परमात्मन एवात्मनः सकाशात् प्रियत्वं साधयति, प्राणेति । आत्माऽत्र जीवः यस्य मम परमात्मनः सम्पर्कात् आत्मनोपि मदंशत्वेनैव तथात्वादिति भावः ।।२७।। तद्यात देवयजनमिति पाठस्तेषां सम्मतो लक्ष्यते तथैव पाठधारणात् तद्यात साध्व्यो यजनमिति तु पाठः प्रायः सर्वत्र स्वसत्रं स्वीयत्वात् अवश्यसमापनीयं स्वीयं सत्रं यज्ञं पारयिष्यति आरब्धं समापयिष्यन्ति स्वशब्देन अन्यथा कथञ्चित् परकीयमेव कारयितुमर्हन्ति न त्वात्मन इत्यर्थः । यतो गृहमेधिनः युष्माभिर्विना गार्हस्थ्याभावेन यज्ञानुपपत्तेः अत एव तदपेक्षया देवयजनं यातेत्युक्तं न च गृहानिति अतः श्रीभगवदाज्ञयैव तासां बहिर्मुखपतिपार्श्वे गमनं तथा च तदाज्ञा च सर्वसुहृत्त्वात् गोब्राह्मणहितत्वात् तासां सम्बन्धेनानुजिघृक्षुत्वाच्चेति ज्ञेयम् ।। २८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आस्यतां मदन्तिके विश्रम्यताम्, ततश्च किं करवामेति आदिश्यतामित्यर्थः । एतच्च कृपालुतयैवेति ज्ञेयम्, तथा करवामेति नोऽस्माकमिति च बहुत्वनिर्द्देशः, स्वस्य साधारण्यापादनेन लज्जया स्वैकनिष्ठताच्छादनार्थमौदासीन्यार्थं वा । यद्यपि ता दास्यार्थमेवागताः, तच्चाग्रे व्यक्तमेव, तथापि दिदृक्षयेति ब्राह्मणीनां भावविशेषस्य सदसि लज्जया सम्वरणार्थम्, यद्वा, सदा तस्यैव दर्शनेच्छयेति स एव सूचितः । दिदृक्षयेति इच्छान्तरं निरस्यति, ब्राह्मणीत्वेनोपेक्ष्यत्वात्, यद्वा, दिदृक्षयापि, किं पुनः सर्व्वपरित्यागेन मदेकापेक्षया ।। २५ ।। ननु भूदेव्यः ! निश्चितमिति वा, अद्धा साक्षादेव विशुद्धामित्यर्थः, यतः अहैतुकी, यद्वा, साक्षान्मयि न च गुणावतारादिषु । भक्तेर्यथावत्त्वमेवाह—अहैतुकी आत्मनः सकाशादपि प्रिये, परमात्मत्वात् । यद्वा, स्वार्थं दर्शयितुं शीलमस्येति स्वार्थदर्शी गुरुः, तस्मात् तदुपदेशाद्धेतोरित्यर्थः । अतएव अहैतुकीति । यद्वा, स्वार्थदर्शिनो जना यथा कुशलाः पतिव्रताः स्त्रिय आत्मप्रिये । अन्यत् समानम् ।। २६ ।। परमात्मत्वेन परमप्रियत्वं साधयितुं प्रथममात्मन एव प्रियत्वमाह—प्राणेति । अन्यत्तैर्व्याख्यातम् । यद्वा, परमात्मन एवात्मनः सकाशात् प्रियत्वं साधयति—प्राणेति । यस्य मम सम्पकात् समर्पणादिसम्बन्धेनैव आसन् भवन्तीत्यर्थः । यद्वा, पूर्वेषां बभूवुः, आदिशब्दात् ज्ञातिबान्धवादयो गृहक्षेत्रपश्वादयश्च गृहीता एव ।। २७ ।। स्वकीयं सत्रं यज्ञं पारयिष्यन्ति, आरब्धं समापयिष्यन्ति । स्वशब्देन कथञ्चित् परकीयमेव कारयितुमर्हन्ति, न त्वात्मन इत्यर्थः । यतो गृहमेधिनः, युष्माभिर्विना गार्हस्थ्याभावेन यज्ञानुपपत्तेः । अतएव तदपेक्षया देवयजनं वातेत्युक्तम्, न च गृहमिति । 'तद्यात देवयजनम्' इति पाठस्तेषां सम्मतो लक्ष्यते, तथैव पाठधारणात् । ननु ते त्वदनादरादुपेक्ष्या एव, तत्राह—द्विजातयो ब्राह्मणा मद्भक्त्यातेऽवश्यम्मान्या इत्यर्थः । अतएव नृगोपाख्याने स्वयमेव वक्ष्यति (भा. १०।६४।४१)—विप्रं कृतागसमपि मैव दुह्यत मामकाः । घ्नन्तं बहु शपन्तं वा नमस्कुरुत नित्यशः ।। इत्यादि ।। २८ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्राणेति आत्मशब्दः शरीरपरः ।। २७ ।। सत्रं यागं पारयिष्यन्ति ।। २८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह–स्वागतमित्यादिभिः पञ्चभिः । हे महाभागाः ! अस्मदनुग्रहविषयतारूपमहाभाग्यशालिन्यः वः स्वागतं शोभनमागमनं भर्त्रादिभिरनिर्बंद्धाः कुशलमागताः किं, आस्यताम् उपविश्यतां वो युष्माकं किं कार्यमत्रागमनप्रयोजनं किमिति प्रश्नः यदि

किञ्चिदस्ति तदवश्यं वयं करवाम सर्वज्ञत्वात्तदभिप्रेतं विज्ञाय तस्यौचित्यमाविष्करोति यदिति नोऽस्माकं दिदृक्षयाऽभ्यागता इति यत्तदिदं वो युष्माकम् उपपन्नम् उचितमेव ॥ २५ ॥ औचित्यमेवोपपादयति —नन्विति । ननु हे द्विजपत्न्यः कुशलाः आत्महिताहितविवेकिनः स्वार्थदर्शनाः स्वप्रयोजनाभिज्ञा जना आत्मनः स्वस्मादपि प्रिये मय्यद्धा मय्येव अद्धेति स्फुटावधारणयोः अहैतुकीं फलाभिसन्धिरहितामव्यवहितामविच्छिन्नां भक्तिं विवेकिनो यथा मयि महानुभावा भक्तिं कुर्वन्ति तथा भवत्योपि कृतवत्य इति वार्थः कुर्वन्ति यथावत् कुर्वन्ति ॥ २६ ॥ आत्मप्रिय इत्येतदेव काक्वोपपादयति–प्राणेति । स्वात्मा स्वदेहः । स्वः जीवः आत्मा देहो वा प्राणादयो यत्सम्पर्कायत्सम्बन्धात्प्रिया भवन्ति ततः मत्तः प्रियोऽन्येष्ठः कोनु न कोपि निरतिशयप्रियोहमेवेतीत्थम्भूते मय्यहैतुक्यव्यवहिता भक्तिर्भवतीनानुचितैवेति तत्कारितामद्दिदृक्षोचितैवेति भावः । यत्सम्पर्कात्प्रिया इत्यनेन "न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय" इत्यादि श्रुत्यर्थो विवक्षितः तदर्थस्तूक्तः पुरस्तात् ॥ २७ ॥ तत्तस्मादागमनप्रयोजनस्य मद्दर्शनस्य जातत्वाद्देवयजनं सत्रवाटं गच्छत तं वो युष्माकं पतयो ब्राह्मणाः गृहमेधिनः गार्हस्थ्यधर्मपरायणाः युष्माभिरेव सहायभूताभिः स्वसत्रं पारियिष्यन्ति समापयिष्यन्ति दम्पत्योः सहाधिकारादिति भावः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अभ्येताः अभ्यागताः यद्यस्मादिदं वः उपपन्नं युक्तम् ॥ २५ ॥ एवं कुशलं पुण्यमेवार्थः कुशलार्थस्तस्य नितरां दर्शनं येषां ते कुशलार्थनिदर्शनाः "अर्थी समर्थो विद्वानधिक्रियते" इति वचनात् कुशला निपुणाश्च अर्थनिदर्शनाश्च ते तथा यद्वा, कुशलार्थो भगवान्निदर्शनमुदाहरणं येषां ते तथा कुशलाः स्वार्थदर्शना इति पाठः एते श्रद्धां विषयाभिलाषं न कुर्वन्ति किन्तु आत्मप्रिये भगवति अहैतुकीं निर्निमित्ताम् अव्यवहितां निरन्तरीभूतां भगवद्भक्तिमधिकुर्वन्ति अधिकाङ्कुर्वन्ति कथमिव यथात्मप्रिये स्वभर्तरि भगवतीति शेषः । तथाशास्त्रविहितप्रकारेण "तदेतत्प्रेष्ठ" इति श्रुतेः । देहादिभ्योऽतिप्रियत्वं हरेरेवेति प्रतिपादयति–यद्वा, स्वार्थदर्शनाः स्वर्गादिफलार्थदृष्टयः कुशलाः यज्ञविद्यानिपुणाः अहैतुक्यव्यवहितां श्रद्धामास्तिक्यबुद्धिम् अत्याधिके ईश्वरे न कुर्वन्ति व्यतिरेकदृष्टान्तमाह—अहैतुकीति । भक्ता आत्मप्रिये मयि यथा भक्तिं कुर्वन्ति न तथेति ॥२६॥ तव सर्वस्मादाधिक्यं कुत इत्यत्राह–प्राणेति ॥ २७ ॥ यस्मादखण्डेश्वरे मयि भक्तिं कुर्वन्ति नान्यत्र तस्मात् मदाज्ञां कुरुतेत्याह —तदिति । मन्तव्ये निमित्तमाह-- पतय इति' वः पतयः द्विजातय इति अतः कालक्षेपो नोचितः निमित्तान्तरमप्यस्तीत्याह— स्वसत्रमिति । पारयिष्यन्ति सम्पादयिष्यन्ति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

किं तदित्याह–स्वागतमित्यादि बहुभिः । सुखेनागतम्; यद्वा, सुष्ठु आगतं यत्, तत् साधु । ममापि दिदृक्षासीत्, सान्यथा न घटत इति सु-शब्दस्यार्थः । आस्यतामुपविश्यताम् भवतीभिरित्यर्थः । किं करवाम, करवाणीत्यर्थे आत्मानं प्रति गौरवादेकत्वेऽपि बहुवचनम् । भवतीनामनुरागानुरूपं कर्तुं न शक्यत इत्यर्थः । यद् यस्मात् नो मम, पूर्ववत्बहुवचनम्, बहिरवहित्थया सामान्यवन्निर्देशः । उपपन्नमिदं हि वः, युष्माकं तदुपपन्नमेव, सम्यग्दृष्ट एवाहम् ॥ २५ ॥ यद्दर्शनं तु भवतीनामुचितमेवेत्याह–नन्वित्यादि । ननु भो विप्रभार्याः ! कुशलाः साध्व्यः स्त्रियः स्वात्मदर्शिनः पुरुषाश्च मय्यहैतुक्यव्यवहितां भक्तिं कुर्वन्ति । कीदृशे ? आत्मप्रिये, यथा यथावत् । अहैतुकी च सा अव्यवहिता चेति कर्मधारयः पुंवद्भावाभाव आर्षः । अथवा, हैतुक्यां हेतुभावः, न तथा तत् तत्र व्यवहिता विशेषणावहिता; तदुचितैवेयं मयि वो भक्तिरिति भावः ॥ २६ ॥ इममेवार्थं विशदयति–प्राणबुद्धीत्यादि । यस्य मम सम्पर्काद्धेतोः प्राणादयः प्रिया आसन्, भवन्तीत्यर्थः । मत्सेवार्थमेव प्राणाः प्रिया भवन्ति । एवं बुद्ध्यः, एवं मनांसि, एवं स्वात्मानो देहाः, इति पुंसयोरेव दारापत्यादयः । पुंसां मत्सेवार्थममी दारा यदि भवन्ति, तदैव प्रियाः । अतो भवन्तीर्भर्तारो नाभ्यसूचयन्तीति भावः । एवमपत्यानि धनानि च । ततो मत्तः कोऽपरः स्त्रीणां वा पुंसां वा प्रियोऽस्ति ? न कोऽपि । प्राणादयो येऽमी सन्तीति वक्तव्यम्, ते मत्सम्पर्कादेवेत्युक्तमेव, तद्यदागतं तच्छोभनमेवेति पूर्वानुवादः ॥ २७ ॥ तस्माद्यदागतं तत् साध्वेव यदहश्च दृष्टस्तदति साधुतरम्, योऽयं मय्यनुरागः स च साधुतमम् एव । अतः परं यातेत्याह—तद्देवयजनमित्यादि । हे द्विजातयः ! द्विजातिस्त्रीत्वात् पुंयोगेऽपि प्रकृतिरेव, ब्राह्मण्य इति स्वाभिप्रायं सम्बोधनम् । वो युष्माकं पतयः स्वसत्रं युष्माभिरेव पारयिष्यन्ति समापयिष्यन्ति, यतो गृहमेधिनः ॥ २८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

स्वागतं सुष्ठु आगतम्, आगतं यत् तत् साधु; आस्यतामुपविश्यतामित्यर्थः । 'आस उपवेशने' इति प्रणयोक्तिः, किं करवाम, युष्माकमभीष्टं किमपि कर्तुं न शक्नुम इत्यर्थः । यद् यस्मात् नोऽस्मान् आत्मानं प्रति परमदुर्लभत्वेन बहुवचनं प्राप्ताः दिदृक्षया दर्शनेच्छयैव हेतुभूतया, न तु साधनान्तरैः, 'त्यक्त-सर्वाशाः' इति पूर्वश्लोकश्रुतत्वात् सर्वत्यागेनैव मां प्राप्ता इत्यर्थः । 'किं करवाम' इति यदुक्तम्, अस्यायं भावः—समुचितकरणाय न शक्नुम, यदिदानीं तन्नाभूदिति युष्माकमेवेदमुपपन्नं विदितम् । यद्वा,

वो युष्माकमिदमुपपन्नमिदं शरीरं ब्राह्मण-वंशे उपपन्नमुत्पन्नं, उपपन्नमुपपत्तिरिति वा भावेक्तः ।। २५ ।। भवतीभिर्यथा सर्वाशां परित्यज्य अहं प्राप्तः, तथा वयं वः प्राप्तुं न शक्नुमः, अतो मनसा यन्मां परिरब्धवत्यस्तदेव करणीयमित्याशयेनाह—नन्वद्धेत्यादि। ननु भोः कुशलाः स्त्रियः। आत्मप्रिये प्राणनाथे मयि भक्ति रतिः कुर्वन्ति, अद्धा साक्षात्, अपरोक्षेऽपि मयि यथा स्वार्थदर्शिनो जनाः परमार्थिनो भागवताः। भक्ति विशिनष्टि–अहैतुक्येत्यादि। हैतुक्ये सोपाधिकत्वे व्यवहिता सा न तथेति, अहैतुक्यव्यवहिता ताम्। एतेन भवत्यः कुशला अभिज्ञा मयि भक्तिमेव कुरुते, अङ्गसङ्गस्तु मनसैव कार्यं इत्यर्थः ।। २६ ।। आत्मन आत्मप्रियत्वं दर्शयति—प्राणबुद्धीत्यादि। अतो मत्तो प्रियो नास्त्येव, युष्माभिः साधुकृतमायातम्, दृष्टश्चाहं मनसा परिरब्धः, अतः परं कृतार्था एव यूयम् ।। २७ ।। अतः परमत्र स्थित्वा प्रयोजनाभाव इत्याह–तद् मातेत्यादि। वो युष्माकं पतयः, न तु प्रियाः, प्रियस्त्वहमेवेति भावः। स्वसत्रं पारयिष्यन्ति समापयिष्यन्ति 'पारतो समाप्तौ', इदमपि मयैवाम्नातम्, स्वाज्ञाभङ्गो मया न कार्यते ।। २८ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

रासाभिसारिणीर्गोपीरिव महाप्रेमवतीस्ता अप्याह—स्वागतमिति। वः शुभमेवागमनं यत् तस्मात् प्रतिबन्धकोटीरपि तिरस्कृतवत्या दिदृक्षया नः प्राप्ताः इदं व उपपन्नम् उपपद्यतेस्मैवेत्यर्थः। मम एतत् प्रत्युपकरणासामर्थ्यात् न किमप्युपपन्नमिति भावः। अतो वः किं करवाम केवलम् ऋणी भवामेत्यर्थः। अत एव महाभागाः मत्तोऽपि महाभागवत्यः आस्यतां क्षणमिहोपविश्यतां मद्दर्शनार्थमेवेत्यर्थः ।। २५ ।। परमप्रेमवतीनामपि तासां तदानीमेव मनोरथपूर्त्तिर्न रसपुष्टिं वहति रसपुष्ट्या च विना लीला न चमत्कर इत्यतो भगवतस्तत्प्रेमवश्यस्यापि तद्दर्शनोत्थया रत्या स्वाभियोगं कृतवतोपि मनस्यकस्मादेव लीलाशक्त्यैव स्फोरितमैश्वर्य्यं तासां स्वगृहं प्रति परावर्तने कारणमभूत् यद्यपि प्रायः प्रेमवज्जनसन्निधावैश्वर्य्यं नाविर्भवेिष्णु भवेत्तदपि लीलासौष्ठयार्थं विरहौत्कण्ठ्यवर्द्धनया तासां प्रेमवर्द्धनार्थं चाविर्भवेदेव तद्भगवतो रत्याख्यं भावं शमयित्वा विवेकमुत्पादयामासेत्यतो भगवांस्तदनुकूलमेवाह–नन्विति द्वाभ्याम्। न केवलं मयि भवस्य एवासज्जन्ते किन्तु बहवोऽन्येपि मयि परमेश्वरे भक्ति प्रीतिं कुर्वन्ति के ते कुशलाश्चतुराः चातुर्यमेवाह—स्वार्थदर्शिनः लोके हि स्वार्थसाधका एव चतुरा उच्यन्त इति भावः। अहैतुकीं स्वीयफलाभिसन्धिरहिताम् च अव्यवहिता प्रीतिव्यवधायकज्ञानकर्मादिस्त्वन्तरशून्या च ताम् यत्र दृष्टान्तः आत्मप्रिये देहापत्यादौ यथा ।। २६ ।। बुद्धिप्रवेशार्थमेव दृष्टान्तो दर्शितः वस्तुतस्तु दृष्टान्ताद्देहादेः सकाशादपि दार्ष्टान्तिकः परमात्माहमतिप्रिय एवेति युक्त्या संबोधयति—प्राणेति। स्वं देहः आत्मा जीवः यस्य परमात्मनः सम्पर्कात् सम्बन्धात् ततः परमात्मनः ।। २७ ।। यस्मात् स च परमात्मा अहमेव युष्माभिर्गर्गादिमुखात् श्रुत एव युष्मदङ्गान्याश्लिस्य सदा वर्त्त एव तत्तस्मात् देवयजनं यज्ञवाटं यात। ननु तदापि साक्षान्मूर्तं परमात्मानं त्वां हित्वा कथं गृहं यामस्तत्राह—पतय इति। पारयिष्यन्ति युष्माभिः सहैव समापयिष्यन्ति सत्रादिकर्मापि वेदरूपेण मयैवोक्तमिति मत्कार्यानुरोधादेव यात तत्रैव स्फुरन्तं मूर्तं मां द्रक्ष्यथेति भावः ।। २८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वः युष्माकं स्वागतं शुभमागमनं जातम् ।। २५ ।। उपपन्नमिदं हि व इत्युक्तं तदुपपादयति—ननु, हे सत्यः! आत्मनां प्रिये मयि ये यथावद्भक्तिं कुर्वन्ति ते एव कुशलाः स्वार्थदर्शिनश्च यथावत्त्वमाह—अद्धा स्फुटमिति। अहैतुक्यव्यवहितामिति च अहैतुकीं मत्प्रीतीतरप्रयोजनरहिताम् अव्यवहितामविच्छिन्नाम् ।। २६ ।। आत्मप्रियत्वयात्मनः प्रपञ्चयति—प्राणेति। स्वः स्वयं जीव आत्मा देहः यत् यस्य मम सम्पर्कात्प्रियाः आसन् ततो मत्तः परोऽन्यः को भवति न कोऽपीत्यर्थः ।। २७ ।। तत्तस्माद्भवतीनां कृतार्थत्वात् याम गच्छत पारयिष्यन्ति समापयिष्यन्ति ।। २८ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

गोपीरिव महाप्रेमवतीस्ता अप्याह—स्वागतमिति। हे महाभागाः वः स्वागतं शुभमागमनं यत् सुदुस्त्यजपत्यादितिरस्कारेण नो दिदृक्षयात्र प्राप्तास्तदिदं व उपपन्नं युक्तं इहास्यतामस्मद्दर्शनार्थं क्षणमुपविश्यतां वयं किं करवाम तदादिश्यतां इह करवामेति न इति च बहुत्वेन निर्द्देशः स्वैकनिष्ठाच्छादनार्थमौदासीन्यार्थञ्च दिदृक्षयेति दर्शनजामन्येच्छां निवारयितुम् ।। २५ ।। युक्तत्वं स्फुटयति—नन्विति। कुशला विवेकिवोऽत एव स्वार्थज्ञा मय्येवाद्धा साक्षाद्भक्तिं कुर्वन्ति अहैतुकीं फलानुसन्धिरहितामत एवाव्यवहितां निरन्तरां यथा रागिण आत्मप्रिये स्वातिवल्लभे विषयानन्दे प्रीतिं कुर्वन्ति तद्वत् ।। २६ ।। धीप्रवेशाय दृष्टान्तः स्थूलो दर्शितः वस्तुतस्तु ततोपि विशुद्धत्वादमितत्वाच्चानन्दमयोऽहमति प्रिय इति बोधयति—प्राणेति। स्वः देह आत्मा जीवः यस्य मे सम्पर्कादानुकूल्येनोपस्थापनात् सम्बन्धादित्यर्थः। प्राणादिषु प्रियत्व हेत्वानुकूल्य सम्पादकोऽहमेवाति प्रियइति भावः ।।२७।। तत् तस्मान्मदनुरागात् कृतार्था यूयं देवयजनं यज्ञस्थानं यात ननु कृतार्थाः किमिति यामस्तत्राहः वः पतयो गृहमेधिनो युष्माभिर्गार्हस्थ्यहेतुभिः सहैव सत्रं पारयिष्यन्ति समापयिष्यन्तीति पतीनुपकुरुत सत्रादीनां कर्मणां वेदवपुषामयैवाम्नातत्वान्मत्कार्यानुरोधात् यात तत्रैव स्फुरन्त मां द्रक्ष्यथेति भावः ।। २८ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे महाभागा व आगतं स्वागतमास्यतां किं करवाम यन्नो दिदृक्षयाऽभ्येता अभि आङ्। एतत्पूर्वं इण् धातुः। सम्मुखं सभ्यगायाता अभि भर्त्रादींस्तिरस्कृत्यादरेणायाता इति वा। **अभिप्रेयस** इति काठकविवृतावभिरवज्ञानार्थक इत्युक्तेः। इदं हि व उपपन्नं युक्तम् ॥ २५ ॥ **नन्वद्धा मयि कुर्वन्तीति** सरलः पाठः। कुशलार्थनिदर्शना नित्यक्षेमवानर्थो मोक्षस्तस्यापि निदर्शनं दर्शममनुसन्धानं भवत्विति तन्न विद्यते येषामधिकारिणां ते तथा मय्यद्धा सर्वत्यागेनेति सम्यगहैतुक्यव्यवहिताम्। विशेषणयोरेव समासः। हैतुकी फलादिनिमित्ता यत्ता सः नेत्यहैतुकी सा च सा व्यवहिताऽन्तरायसहस्रेणाप्यप्रतिबद्धेति निर्व्यवधाना तां भक्तिमात्मप्रिये स्वदेहादौ यथा तथा कुर्वन्ति। आन्तरङ्गिको भावस्तु पत्याविति। न श्रद्धामाधिकुर्वन्तीति पाठे श्रद्धां विषयेषु नाधिकुर्वन्ति व्यतिरेकनिदर्शनं वेति पूर्वे। कुशलाः स्वार्थदर्शना इति पाठः स्फुटार्थः। २६ ॥ आत्मप्रिय इत्युक्तं वितस्य वक्ति। तत्रापि न देहादिकं स्वतन्त्रं प्रीतिहेतुः किन्तु मत्सन्निधेरतः सर्वंप्रेयानहमितीदमुपपन्नमित्याह ॥ **प्राणबुद्धीति**। प्राणाः पञ्च बुद्धिर्मनः खानीतराणीन्द्रियाण्यात्मा स्वयं देहोऽपत्यानि च धनादयश्च यत्सम्पर्कात्प्रियास्ततो मत्तोऽपरः प्रियः को नु न कोऽपीति युक्तं कृतम् ॥ २७ ॥ यस्मान्मदाज्ञा नावज्ञेया तत्तस्मात् हे साध्व्यो यजनं यातः वः पतयो द्विजातयो गृहमेधिनस्तदादिकमेव प्रियमिति मेधावन्तो बहिर्मुखादिबहिर्मुखा न मन्निष्ठा अतोऽन्नं न ददुरिति कटाक्षयति हरिरनेनेति ज्ञेयम्। अन्यथा वः पतय इत्यनेन गृहस्थत्वलाभादिदमतिरिक्तं स्यादिति मन्तव्यम्। युष्माभिः सह स्वसत्रं पारयिष्यन्तीति यत्तद्यातेति वा ॥ २८ ॥

श्रीसुबोधिनी

भगवतो वाक्यमाह **स्वागत**मितिचतुर्भिः,

पूर्वानुवादस्तत्रैव उपपत्तिश्च तद्विधाम्। मर्यादायां प्रवेशश्च ततो गन्तव्यबोधनम् ॥ १ ॥

आदौ जातमनुवदति लौकिकन्यायेन **वो** युष्माकं **स्वागतं** सुष्ठ्वागमनं जातमितिकुशलप्रश्नः, बाह्यं तु देयं किमपि नावशिष्यत इत्याह **महाभागा** इति, **महत्त्वमात्मन्यपि भाग्यं** सूचयति तेन सर्वसमृद्धिः साक्षात्कारश्च सिद्धो निरूपितः, समागतानां खेदाभावायाह**आस्यता**मिति, उद्देश्यमर्थं पृच्छति **करवाम** किमिति अनेनासङ्ग्रहे सङ्ग्रहः कारणीयोऽन्ते च शुद्धा गतिः, तद् वक्ष्यति 'यज्ञपत्न्यस्तथापर' इति, वैष्णवैः सह सङ्गश्च, अतस्तेषां याज्ञिकानां ज्ञानं ततः शुद्धानां समागमने सर्वथैव प्रपत्तिः स्यात् तदा तद्द्वारा एता अप्यन्यथा भवेयुरतो यावद् युक्तं तावत् करिष्याम इत्याह, ननु नाधिकं किञ्चित् कर्तव्यं किन्तु द्रष्टुमेवागता इति चेत् तत्राह **यन् नोऽस्माकं दिदृक्षया** समागतास्तद् युक्तं व इति बहुवचनेन केवलो भावो निवारितः, अत आह **उपपन्नमिदं हि व** इति, सर्वसामग्रीसहितो भगवान् द्रष्टव्य इति ॥ २५ ॥ ननु मर्यादायां ज्ञानमार्गे चैतद् भवत्यस्माकं तु प्रेमाधिकमस्तीति कथमेतावन्मात्रत्वं युक्तं तत्राह **नन्वद्धे**ति, नन्विति कोमलसम्बोधनं स्नेहोऽपि मर्यादायामेव युक्तोऽत एवाद्धा साक्षात् न तु कामनार्थं भक्तिं **कुर्वन्ति, मयी**त्यनेनात्मना निरूपिता, एकवचनेनान्ये व्यावर्तिताः **कुर्वन्ती**ति नेदमपूर्वं किन्तु परम्परयैव तत् सिद्धं यतस्ते **कुशलाः** सर्वाणि साधनान्यनेन प्रकारेणानायासेन सिद्धानि भवन्ति फलं च, किञ्च **स्वार्थकुशला**स्तेन्यत् सर्वमिन्द्रियादिगामि भवतीदमेव परमात्मगामीति यावन् न भगवति प्रेम तावन् नात्मनि तत एव तत्रायातीति यावन् नात्मनि स्नेहस्तावदन्यरागो न गच्छत्यतस्ते **स्वार्थदर्शिनः**, अत एवा**हैतुकीमव्यवहितां** देहेन्द्रियादिभिर्व्यवधानमगतां **भक्तिं** प्रेमलक्षणां यथात्मनि प्रीतिविषये **कुर्वन्ति** तथैव **कुर्वन्ति** ज्ञानिनामात्मा दृष्टान्तस्तेनोग्रिमकक्षाभावाल् लोकेऽपि स्वस्य प्रीतिविषये भर्त्रादौ, लोके हि पदार्थो ज्ञानार्थं सिद्ध इति ।२६। एतदुपपादयति **प्राणे**ति, प्राणादयः सर्वे आत्मसम्बन्धात् **प्रिया** आत्मापि परमात्मसम्बन्धात् परमानन्दो ह्यात्मरूपः **प्रियो** न केवलमात्मनः प्रियत्वं नाप्यानन्दस्य परानन्दे दुःखत्वे रोगे च व्यभिचारादतः प्राणादिषु स्नेह औपाधिकः सहजो मयि, अतः **को वापरः प्रियो** भवेत् ? **प्राणा** इन्द्रियाणि प्राणाश्च **बुद्धिर्मनो**नियामिका **मन**श्च **स्वं** शरीरं धनादिकं **वात्मा** देह **आत्मैव** वा **दाराः** स्त्रियो**ऽपत्यानि** पुत्रा धनं पश्वादयो यावत्किञ्चिदात्मसम्बन्धि **यस्यात्मनो** मम सम्बन्धात् **प्रिया आसंस्ततो** मत्तो **न्विति** वितर्के **को** वा **प्रियः** स्यात् ? **अपरश्च** नियम्यस्त्वप्रियो भवति ॥ २७ ॥ अतः कार्यस्य सिद्धत्वाद् गृहं यातेत्याह **तद् याते**ति, यद्यप्यहमात्मा तथापि बहीरमणे बुद्धिरन्यथा भविष्यतीति न तत् कर्तव्यं यतो भवत्यः साध्व्यः पतिव्रताः संस्कारैश्च संस्कृता अतो **देवयजनं यात**, किञ्च **वो** युष्माकं **पतयो द्विजातयो** ब्राह्मणजातीया अतः संस्कारनाशे यज्ञो न सिध्येदतस्ते **स्वसत्रं युष्माभिः** कृत्वा **पारयिष्यन्ति** पारं नेष्यन्ति यतो **गृहमेधिनो** गृहस्था भार्यासहिता एव कर्माधिकारिणस्तस्मात् कार्यस्य सिद्धत्वात् स्वरक्षासम्भवात् परोपकारात् तेषां च जातियज्ञगार्हस्थ्यसम्पादकत्वाद् गन्तव्यमित्यर्थः ॥ २८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

नन्वद्धा मयीत्यत्र, यावन्न भगवति प्रेमेत्यादि। अत्रायं भावः। भक्तिमार्गे स्वतन्त्रपुरुषार्थत्वं भगवत एवेति निरुपधिस्नेहस्तद्विषयक एव भवति। तदुपयोगित्वेन स्वात्मादेः परं तथात्वमिति वस्तुस्थितिः। अत एव 'यह्यम्बुजाक्ष न लभेय भवत्प्रसादं

जह्यामसू'निति महिषीवचनं गीयते । एवं यथा विषयिणामात्माध्यासप्रयुक्तस्नेहविषयत्वेषु देहेन्द्रियादिषु स्वात्माज्ञानेपि परमस्नेहः, तथा भगवत्स्नेहरहितानामपि मुमुक्षूणां विषयवैराग्यमिति ज्ञेयम् ॥ २६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नन्वद्धेत्यस्य टिप्पण्यां एवं सतीति भक्तिमार्गे भगवति स्नेहात् तदुपहिते **आत्मनि** स्नेहः तेनान्यरागाभावः सम्भवति, मुमुक्षोस्तु भगवति स्नेहाभावात् तदुपहिते आत्मनि कथं स्नेहः **सेत्स्यति, तथा च वैराग्यमपि** कथं सेत्स्यतीत्याशङ्क्य **दृष्टान्तमाहुः यथेति**, यथा विषयिणामात्मनो अज्ञानेन तत्र स्नेहाभावेपि तदुपहिते देहादौ स्नेहः तथा मुमुक्षूणां भगवति स्नेहाभावेपि तदुपहिते आत्मनि स्नेहस्तेन विषयाणामात्मनाशकत्वात् तत्र वैराग्यं विषयिणां देहोपघातके द्वेषवदित्यर्थः, तथा चोपहितज्ञानमेव स्नेहे हेतुस्तथापि मूलास्पर्शात् तद् वैराग्यं दृढं न भवतीत्याशयेन सुबोधिन्यां तथोक्तमत **एव** भरतस्य पुनर्विषयासक्तिरितिभावः, सुबोधिन्यां, **भर्तादाविति** आत्मा दृष्टान्त इतिशेषः, **ज्ञानार्थमिति** दृष्टान्तेनालौकिकज्ञानार्थमित्यर्थः, अत एव "न वा अरे पत्युः कामाये"त्यादिना पत्यादिदृष्टान्तेनात्मा बोधित इति **लोके** हीति हिशब्दः ॥ २६ ॥ **अपरश्चेति परो** नियामकः न परो नियम्य इत्यर्थः, **अन्यस्त्वेतादृशः,** अतोऽप्रियो भवतीत्यर्थः ॥ २७ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

नन्वद्धा मयीत्यत्र मयीत्यनेनात्मतेति "अहमात्मात्मनां धातः प्रेष्ठः सन् प्रेयसामपि अतो मयि रतिं कुर्याद् देहादिर्यत्कृते प्रिय" इति तृतीयस्कन्धे ब्रह्माणं प्रति भगवद्वाक्यात्, **यावन् न भगवति प्रेमे**त्यादीनानर्थंष्टिप्पण्यां स्फुटः ॥ २७ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

स्वागतं वो महाभागा इत्यादि श्लोकचतुष्टयवाक्यार्थंनाहुः **पूर्वानुवाद** इति का० २०५ १/४ । एकेन पूर्वानुवादः, द्वाभ्यामुपपत्तिः, "तद्यात साध्व्यो यजन"मित्येकेन गन्तव्यबोधनं, अतो विप्रपत्नीनां **मर्यादायां प्रवेशो बोधितः** ॥ २५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भगवद्वचनमाह—**स्वागतमिति** चतुर्भिः । स्वभक्त्या तासां भाग्यमभिनन्दन् सम्बोधयति–**महाभागा** इति । वो युष्माकं स्वागतं शुभागमनम्, आस्यताम् अत्र क्षणं विश्राम्यताम्, अन्यच्च युष्माकं कार्यं वयं किं करवाम तदुच्यताम् । आगमनस्य शुभत्वे हेतुमाह–**यदिति** । हि यस्मात् यत् नोऽस्माकं दिदृक्षया प्राप्तास्तदिदं वो युष्माकमुपपन्नं युक्तमेव ॥ २५ ॥ युक्तत्वमेवोपपादयति–**नन्विति** । ननु निश्चितमेतत्, नात्र सन्देहः । कुशला निपुणा मयि अद्धा साक्षादेव भक्तिं प्रीतिं कुर्वन्तीत्यन्वयः । 'के ते कुशला' इत्यपेक्षायां तानाह–**स्वार्थदर्शना** इति । स्वस्यात्मनोऽर्थं फलं पश्यन्ति ते । लोकेऽप्येवंविधानामेव नैपुण्यं प्रसिद्धम् । भक्तेः साक्षात्त्वमेव स्पष्टयति–**अहैतुकव्यवहितामिति** । अहैतुकीं फलाभिसन्धिरहिताम्, अव्यवहितां निरन्तराम् । ननु "अन्यस्मिंस्त्वय्येवं निरुपाधिकी भक्तिः कथं स्यात्' इत्याशङ्क्य स्वस्य सर्वात्माभेदमभिप्रेत्य दृष्टान्तमाह–**आत्मा चासौ** प्रियश्च तस्मिन् **यथेति** ॥ २६ ॥ आत्मनः सर्वतः प्रेष्ठत्वमुपपादयति—**प्राणेति** । प्राणादयो यस्यात्मनः सम्पर्कात् सम्बन्धादेव प्रिया आसंस्ततः सकाशादपरः को नु प्रियः स्यादित्यन्वयः । स्वाः ज्ञातयः, आत्मा देहः ॥ २७ ॥ तत् **तस्मात्** मद्दर्शनं भक्त्यादिना कृतार्थत्वाद्यूयं देवयजनं यज्ञवाटं यात **गच्छत** । ननु 'कृतार्था वयं किमर्थं गच्छामः' इत्याशङ्क्याह **पतय** इति । वो युष्माकं पतयो युष्माभिस्तत्र गताभिः सह स्वसत्रं पारयिष्यन्ति समापयिष्यन्तीति पत्नीनामुपकाराय गच्छतेत्यर्थः । सहसत्रपारणे हेतुमाह–**द्विजातयो गृहमेधिन** इति । द्विजातीनां गृहस्थानां भार्यासाहित्येनैव कर्मस्वधिकारादित्याशयः ॥ २८ ॥

अन्वितार्थप्रकाशिका

स्वागतमिति ॥ हे महाभागाः ! वो युष्माकं स्वागतं शुभागमनम् । आस्यतामत्र क्षणं विश्रम्यताम् । अन्यच्च युष्माकं कार्यं वयं किं करवाम तदुच्यताम् । हि यस्मात् प्रतिबन्धतिरस्कारेण यत् नोऽस्माकं दिदृक्षया प्राप्तास्तदिदं वो युष्माकमुपपन्नं युक्तमेव ॥ २५ ॥ नन्विति ॥ ननु निश्चितम् ये स्वार्थं सम्यक् पश्यन्ति ते कुशला निपुणाः आत्मा चासौ प्रियश्च तस्मिन् मयि यथा यथोचितम् अद्धा साक्षादेव अहैतुकी चासावव्यवहिता चेति फलेच्छारहितामन्तररहितां च । "न कोपधायाः" इति पुंवद्भावाभावः । भक्तिं कुर्वन्ति । केचित्तु आत्मप्रिये पुत्रमित्रादौ यथेति दृष्टान्तत्वेन व्याचक्षते ॥ २६ ॥ आत्मनः सर्वतः श्रेष्ठत्वमुपपादयति–प्राणेति ॥ प्राणादयः यस्यात्मनः सम्पर्कात् अध्याससंबन्धादेव प्रिया आसंस्ततः सकाशादपरः को नु प्रियः स्यात् । स्वाः ज्ञातयः आत्मा देहः ॥ २७ ॥ तदिति ॥ तत् तस्माद्यूयं देवयजनं यज्ञवाटं यात गच्छत । द्विजातयः गृहमेधिनः वो युष्माकं पतयो युस्माभिस्तत्र गताभिः सह स्वसत्रं पारयिष्यन्ति समापयिष्यन्ति । अतस्तदनुग्रहाय मदनुरोधेनैव यात । युष्मान् विना तेषामधिकाराभावात् ।२८।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे महाभागाः वः स्वागतं शोभनमागमनं । कुतः यतोनोऽस्मान् दृष्टुमिच्छया प्राप्ताः इदमागमनं वो युष्माकं उपपन्नं उचितम् ॥२५॥ तदेव योग्यत्वमाह नन्विति स्वार्थदर्शनाः स्वस्याऽर्थमक्षरधामनि दिव्यविग्रहेण हरिसेवकत्वरूपं प्रयोजनं पश्यंतीति तथाभूताः विवेकिनः मयि परमेश्वरे अहैतुकीफलाऽनुसंधानहीना अतएव अव्यवहिता विघ्नेनापहता सा चासौ सा च तां कुर्वन्ति अत्र दृष्टांतः अज्ञा यथा आत्मनो मनसः प्रिये स्वस्य देहे दैहिके पुत्रधनकलत्रादौ च दृढां प्रीतिं कुर्वन्ति तथा ॥ २६ ॥ संप्रति स्वस्य सर्वश्रेष्ठत्वमाह प्राणेति स्वज्ञातिः आत्मा देहः एते प्राणादयः यत्संपर्कात् यस्यांतर्यामिशक्त्या सर्वत्र स्थितस्य श्रीकृष्णस्य संबंधात् जनानां प्रियाः आसन् बभूवुः । ततो मत्तः कृष्णादपरोऽन्यः प्रियः प्रेमास्पदः कोस्ति न कोपीत्यर्थः । अतो मय्येव स्नेहो विधेय इति भावः ॥ २७ ॥ तत्तस्मान्मद्दर्शनेन कृतार्थाः यूयं देवयजनं यज्ञस्थानं यात प्रयात पतीननादृत्यागता वयं किमर्थं तत्र गच्छाम इत्याशंकायामाह वः पतयः युष्माभिः कृत्वा स्वयज्ञं पारयिष्यंति समापयिष्यंति ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह पञ्चभिः ॥ स्वागतमिति ॥ हे महाभागाः अस्मदनुग्रहविषयतारूपमहाभाग्यशालिन्यः, वो युष्माकं, स्वागतं शोभनमागमनं, भर्त्रादिभिरनिबंद्धाः सत्यः कुशलमागताः किमित्यर्थः । आस्यतामुपविश्यताम् । वो युष्माकं, किं कार्यं अत्रागमनप्रयोजनं किमिति प्रश्नः । करवाम, यदि किंचित् कार्यमस्ति तद्वयमवश्यं करवामेत्यर्थः । सर्वज्ञत्वात्तदभिप्रेतं विज्ञाय तस्यौचित्यमाविष्करोति यदिति । नोऽस्माकं, दिदृक्षया प्राप्ताः अभ्यागताः यत्, तदिदं, वः उपपन्नं युष्माकमुचितमेव हि ॥ २५ ॥ औचित्यमेवोपपादयति ॥ नन्विति ॥ ननु हे द्विजपत्न्यः, कुशला आत्महिताहितविवेकिनः, स्वार्थदर्शनाः स्वप्रयोजनाभिज्ञाः, आत्मप्रिये स्वात्मनोऽप्यतिप्रिये, मयि अद्धा मय्येव, अद्धेति स्फुटावधारणयोः । अहैतुकी फलाभिसंधिरहिता सा चासाव्यवहिताऽविच्छिन्ना तां, भक्तिं यथा यथावदेव, कुर्वन्ति ॥ २६ ॥ आत्मप्रिये इत्येतदेव काक्वोपपादयति ॥ प्राणेति ॥ प्राणाश्च बुद्धिश्च मनश्च स्वा ज्ञातयश्च आत्मा देहश्च दाराः स्त्री च अपत्यानि च धनानि च आदयो येषां गृहक्षेत्रादीनां ते, यत्संपर्काद्यत्संबन्धात्, प्रियाः आसन्, ततो मत्तः, अपरोऽन्यः, को नु प्रियः, न कोऽपि यत्संपर्कादित्यनेन 'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय' इत्यादिश्रुतेरर्थोऽनेन विवक्षितः तदर्थस्तूक्तः प्राक् ॥ २७ ॥ तदिति ॥ हे साध्व्यः, तत्तस्मात्, आगमनप्रयोजनस्य मद्दर्शनस्य जातत्वादेवेत्यर्थः देवयजनं सत्रवाटं, यात गच्छत । वो युष्माकं पतयः, द्विजातयो ब्राह्मणाः, यतः गृहमेधिनः गार्हस्थ्यधर्मपरायणाः, सन्ति । अतः युष्माभिरेव सहायभूताभिः, स्वसत्रं पारयिष्यन्ति संपादयिष्यन्ति । दंपत्योः सहाधिकारात् पतीनामनुग्रहाय यातेति भावः ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स्वागतमिति : १०.२३.२५.

अहं भक्तप्रियो भक्ताभ्यर्थी भक्तैकवल्लभः । यूयमप्यतिभक्तास्तद् ब्रूतेष्टं किं ददामि वः ॥ ५७ ॥

नन्वद्धेति : १०.२३.२६.

उपदेष्टुं तदा तासां भक्तिमव्यभिचारिणीम् । तदीयेष्वात्मनो वासं वक्तुं चक्रे स्ववर्णनम् ॥ ५८ ॥

तद्यातेति : १०.२३.२८.

न बुद्धिभेदं जनयेदित्युक्तिं स्वां स्मरन् प्रभुः । तद्यज्ञपूर्तिमन्विच्छन्नवोचद् व्रजताध्वरम् ॥ ५९ ॥

कृष्णप्रिया

हे बड़भागिनियाँ, हे द्विजपत्नियाँ ! आप का हार्दिक स्वागत हो, आईए यहाँ विराजिए आप बताईए मैं आप का क्या सत्कार करूँ ? यदि आप सब मेरे दर्शन के लिये आयी हो तब तो आपने बहुत अच्छा किया । मेरे दर्शन के लिये आना सर्वथा समुचित ही है । आपने योग्य ही किया है ॥ २५ ॥ भगवान ने कहा कि हे विप्रपत्नियाँ ! इस विषय में सन्देह नहीं कि, इस जगत में अपने सच्चे स्वार्थ-हित को जानन वाले जो कुशल-विचक्षण पुरुष हैं वे अपने प्रेम के परम अधिष्ठान मुझमें निष्काम और देह इन्द्रियादि के आवरण-सम्बन्ध से रहित निर्विकार भाव से अनन्य भक्ति करते हैं ॥ २६ ॥ प्राण, बुद्धि, मन अपनी आत्मा देह, स्वजन, स्त्री, पुत्र और धन आदि सर्व पदार्थ मेरे नाते से प्रिय लगते हैं । इसलिए मुझसे अधिक कोई दूसरा प्यारा नही है ॥२७॥ आप यहाँ आयी वह योग्य किया । मेरा दर्शन हो गया । अब आप देवयजन स्थान में पधारिये । आपके पतिदेव द्विजवर वे गृहयज्ञ यानो आहिताग्नि है । वे आपके सान्निध्य से ही यज्ञ पूर्ण कर सकते हैं ॥ २८ ॥

पत्न्य ऊचुः

मैवं विभोऽर्हति भवान् गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलम् ।
प्राप्ता वयं तुलसिदाम पदावसृष्टं केशैर्निवोढुम[1]तिलङ्घ्य समस्तबन्धून् ॥ २९ ॥
गृह्णन्ति नो न पतयः पितरौ सुता वा न भ्रातृबन्धुसुहृदः कुत एव चान्ये ।
[2]तस्माद् भवत्प्रपदयोः पतितात्मनां नो नान्या भवेद् गतिररिन्दम तद् विधेहि ॥ ३० ॥

श्रीभगवानुवाच

पतयो [3]नाभ्यसूयेरन् पितृभ्रातृसुतादयः । लोकाश्च वो मयोपेता देवा अप्यनुमन्वते ॥ ३१ ॥
न प्रीतयेऽनुरागाय ह्यङ्गसङ्गो नृणामिह । तन्मनो मयि युञ्जाना अचिरान्मामवाप्स्यथ[4] ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—हे विभो ! भवान् ! एवम् नृशंसम् गदितुम् मा अर्हति, तव निगमम् सत्यम् कुरुष्व, समस्तबन्धून् अतिलङ्घ्य वयम् पदावसृष्टम् तुलसीदामकेशैः निवोढुम् प्राप्ताः ॥ २९ ॥ हे अरिन्दम !, नः पतयः, पितरौ, वा सुताः न गृह्णन्ति, भ्रातृबन्धुसुहृदः न गृह्णन्ति, च अन्ये कुत एव गृहिष्यन्ति, हे अरिन्दम ! तस्मात् भवत् प्रपदयोः, पतित आत्मनाम् अन्या गतिः न भवेत्, (अतः) तद् विधेहि ॥ ३० ॥ हे ऋषिपत्न्यः ?, पतयः पितृभ्रातृ सुत आदयः, च लोकाः, न अभ्यसूयेरन्, मया उपेताः, (वः भवतीः) देवाः अपि, अनुमन्वते ॥ ३१ ॥ इह, अङ्गसङ्गः, नृणाम् प्रीतये न, अनुरागाय न, (भवति) तत् मयि मनः युञ्जानाः माम् अचिरात् अवाप्स्यथ ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नृशंसं परुषम् । निगमं प्रतिज्ञां 'न मे भक्तः प्रणश्यति' इति वेदं वा 'न स पुनरावर्तते' इति । पदावसृष्टमवज्ञयाऽपि दत्तम् । बहुमानेन केशैर्निवोढुं दासीभवितुम् ॥ २९ ॥ किं च । न गृह्णंति नोऽस्मान् । हे अरिंदम कामलोभपापादिदमन भवतः प्रपदयोः पादाग्रयोः पतितदेहानामन्या स्वर्गादिमतिरपि न भवेन्मा भक्तत्तस्माद्दास्यमेव विधेहीति ॥ ३० ॥ मयोपेता अनुज्ञाताः । प्रत्यक्षं देवान्प्रदर्श्याह । देवा अपीति ॥ ३१ ॥ तथापि त्वां त्यक्तुं न शक्नुम इति चेत्तत्राह । नेति । प्रीतये सुखाय । अनुरागाय स्नेहवृद्धये । अंगसंगोंऽगाभ्यां संगः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"नृशंसः कठिने क्रूरे हिंसके नरशंसके" इति निरुक्तिकारः । 'निगमो वेदवैश्ययोः । प्रतिज्ञाने नागरे च' इति धरणिदेवः । न प्रणश्यति अदृश्यो न भवतीत्यर्थः । यः परमेशं प्राप्तः स पुनः संसारे नायातीत्यर्थः । दास्यो हि यथाकथंचिद्दत्तमप्यादरेण गृह्णंतीति भावः । ननु भवतीभिर्विप्रजात्यभिमानो दुस्त्यजस्तत्राहुः -तव गोपरूपस्यापि पादमूलं वयं प्राप्ताः, न हि विप्रजात्यभिमाने सत्येवं वक्तुं शक्यते । अस्मद्वाक्येनैव निश्चिनु, सत्यम् तदपि गोपस्य मम गोप्य एव दास्यो योग्या यूयं ब्राह्मण्यो वंद्या एव, तत्राहुः—यदि ब्राह्मणीदासीकर्तुं जिह्रेषि कथं तर्हि त्वां ह्रेपयामस्त्वत्पुरो नैव यामः, वृंदावन एव वनदेवता इव वर्त्तिष्यामहे त्वत्संबंधगंधेनैव कृतार्थीभविष्याम इत्याहुः—वयं तु दूरे स्थितास्त्वत्पदावसृष्ट त्वत्प्रेयसीपदसंसर्गात् त्रुटितं शय्याधःस्थितं त्वद्दासीदत्तं तुलसीदाम केशैर्धर्तुं प्राप्ताः, नास्माकं दुर्लभदास्येपीच्छेति भावः । निवोढुम् धर्त्तुम् । अतिलंघ्य त्यक्त्वा ॥ २९ ॥ताननादृत्येहागतास्ते पुनर्न स्वीकुर्वंतीत्याहुः—किञ्चेति । अन्ये संबंधीतरे । संबंधित्यक्तमितरे स्वत एव त्यजंतीति तात्पर्यम् । यतोऽस्माकमन्या गतिर्नाकांक्षिता तस्मात् । तत् दास्यम् । किं च, त्वन्नगरस्थमालिकतांबूलिकादिवनिताजनास्याच्छ्रुतत्वद्रूपगुणमाधुर्या यदवधि वयं वयस्संधिमारभ्यैवाभूम, तद्दिनत एव त्वत्प्रेमवतीर्गृहकर्मस्वप्युदासीना अस्मान्व्यभिचारिणीरिव दृष्ट्वा संदिहानाः पत्यादयो नैव प्रायो व्यवहरंतीत्याहुः गृह्णन्तीति । सुताः सपत्नीपुत्राः । अन्ये प्रतिवेश्यादयः । ततश्चातिवैयग्र्येण रुदत्यः पदाग्रे मूर्ध्ना प्रणमत्यस्सगद्गदमाहुः—तस्मादिति । अस्माकं यथान्यागतिर्न भवेत्तथा विधेहि । हे अरिंदम त्वत्प्राप्तिप्रतिबंधकीभूता दुरितादय एवार-

---

[1] निरोद्धुमभिलङ्घ्य—गो. प्र. टी. । [2] तस्मात्प्रसीदपदयोः—विज. । [3] न ह्यभ्य—गो. प्र. टी. ; नाभ्यसुयेरन्नित्यं भ्रा॰—विज. ।

[4] एतदग्रे —

"श्रवणाद्दर्शनाद्ध्यानान्मयि भावोऽनुकीर्तनात् । न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥ १ ॥

अयं श्लोकोऽधिकः वीर. पाठे ।

यस्तानन्दमय कृपया त्वमेवेति भावः ।।३०।। लोकाः संबंधिभिन्नाः । निजयोगेन प्रदर्श्य दर्शयित्वा । अनुमन्वते आदरं कुर्वंतीति मयि प्रेमवत्यो यूयं मत्सुखपरा एवातो मदनभिप्रेतं चेष्टितुं नार्हथ स्वहठं मा कुद्वं गृहान् गच्छतेत्युक्ते भो अभिज्ञशिरोमणे असूर्यंपश्याः कुलवत्यो वयं वचनोल्लंघनात् यांस्तृणीकृत्य पुराद्बहिर्भूय एतावद्दूरे स्थितस्य लंपटत्वेन व्रजे ख्यातस्य तव समीपमागताः स्म पुनस्तत्रैव गच्छंतीरस्मांस्ते पत्यादयः पुरेषु प्रवेष्टुमप्यददानाः कोपादद्य वधिष्यंत्येवेति जानीमस्तत्राह—पतय इति । वो युष्मभ्यं नाभ्यसूयेरन् दोषदृष्टिमपि न कुर्युः, किमुतानिष्टं शंकध्वे इति भावः । किमुत पुत्रादयः, अन्ये च लोकाः । कीदृशीः मया सहोपेताः संगता अपि किमुत संप्रत्ययसंगता एवेति भावः । अहमीश्वर इति तैरपि ज्ञातत्वादिति भावः । यतो देवा अपि यज्ञकर्मणि प्रत्यक्षीकृता अत्रार्थे पृष्टा भवतीरनुमन्वतेऽनुमंस्यंत एव, मां सर्वेश्वरं विदुषां देवानामप्यत्रार्थेऽनुमतिरेव न त्वननुमतिरित्यर्थ इति विश्वनाथः ।३१। यद्यपि तेस्मानंगीकरिष्यंति तथापीति । अंगाभ्याम् शरीराभ्याम् । मे प्रीतये नेति मे इति शेषः । भक्त्यैवाहं तुष्यामि न त्वन्योपायेनेति भावः । नन्वंगसंगोऽप्यस्तु, तत्राह—अहो ब्राह्मणजन्मनि भवतीनां मयांगसंगो नृणां प्रीतये सुखाय न भवति । अनुरागादयस्तु सुतरां नेत्यर्थः । "धर्मसंस्थापनार्थाय संभवामि युगेयुगे" इति 'ब्राह्मण्यो लोकमातरः' इत्युक्तेर्भवतीनां मयि यशोदादिवदनुराग एवोचित इति ।। ३२ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवम् ईदृशं विभो ! हे बहिरन्तर्व्यापकेति अस्माकं बाह्यमान्तरञ्च सर्वं त्वमेव वेत्सीति भावः । भवानिति अन्यो वदतु नाम कृपाकोमलचित्तो भवांस्तु वक्तुमपि योग्यो न भवतीत्यर्थः । यतो नृशंसं क्रूरम् । यद्वा, रसार्णवचन्द्रो भवान् नृशंसं कठिनं नीरसं वक्तुं नार्हत्येवेत्यर्थः । न च केवलमेवं तव वचसो नृशंसतामिथ्यात्वमपि स्यादित्याशयेनाहुः—सत्यमिति । करवाम किमित्येव वा निगमो ज्ञेयः । प्राग्भवानिति भक्त्याऽनुनयार्थं पश्चात् कुरुष्व त्वमिति प्रेम्णेति ज्ञेयम् । अत्र ताभिर्भगवतो ब्राह्मणानतिक्रमरूपा निगममर्यादा तूत्कण्ठया नावहितेति ज्ञेयम् । ननु, मदर्थं कथमिव कुटुम्बानि त्यक्ष्यन्ते तत्राहुः—अतिलङ्घ्येति । तत्तु जातमेवेति भावः । ननु, ब्राह्मणीनां युष्माकं पत्यादिपरित्यागो न युक्त इत्यत आहुः प्राप्ता इति । अत्यन्ततिरस्कृतवाच्यध्वनिरयं वाच्यार्थं परित्यज्य व्यङ्ग्यार्थमेव बोधयति, ततश्च सर्वं त्यक्त्वा दास्यमेवाङ्गीकृतवत्य इत्यर्थः । तत्र तुलसीदाम्नः पदावसृष्टत्वं तस्मिन्नैश्वर्यं निश्चित्य "सर्वधर्मान्परित्यज्य" इत्येतद्विधतद्वाक्यरीत्या स्वदोषः प्रत्याख्यातः ।। २९ ।। ननु, "साधवो दीनवत्सलाः" इति तेषां हितार्थं यात । यद्वा, मदाज्ञातोऽकृत्यमपि कर्त्तुमुपयुज्यते तत्राहुः—गृह्णन्तीति निजनिषेधोल्लङ्घनात् तत्र गता अप्यस्मान् त एव न स्वीकरिष्यन्तीत्यर्थः । अन्येतु प्रतिवेश्यादयः सम्भाषामपि न करिष्यन्तीत्यर्थः । तस्मात्पत्यादिभिरग्रहणात् प्रपदयोः पदाग्रसमीपे पतितात्मनामनन्यगतित्वेन त्वदकाश्रितानामित्यर्थः ।। ३० ।। वो युष्मानिति युष्यमभ्यमित्यर्थः । नाभ्यसूयेरन् दोषदृष्टिमपि न कुर्युः कथं न गृह्णीयुरित्यर्थः । अन्ये सर्वे लोकाश्च नाभ्यसूयेरन् किमुत स्निग्धास्तेपीत्यर्थः । कीदृशीः मया उपेता अनुज्ञाताः ममानुज्ञाप्रभावेनैवेति भावः अन्यत्तैः । तत्रानुज्ञाता इति सङ्गे दोषस्यैव भगवता स्वीकारात् तादृशस्यैव चार्थस्य युक्तेः प्रत्यक्षमपि सम्भावनामयप्रकृतिलिङ्परित्यागेन वर्त्तमानमय—लट् प्रयोगात् प्रत्यक्षमिवेत्यर्थः । यद्वा, मया सह उपेताः समीपं सङ्गता वो युष्मान् पत्यादयो नाभ्यसूयेरन् अहमीश्वर इति तैरपि ज्ञास्यमानत्वादिति भावः । यतो यज्ञकर्मणि तैः प्रत्यक्षीकृता देवा अपि अनुमन्वते पृष्टाः सन्तो मामीश्वरत्वेन मन्यन्त इत्यर्थः ।। ३१ ।। नन्वसमत्प्रार्थितस्य का वार्त्तेत्याशङ्क्य समाधत्ते—इह ब्राह्मणजन्मनि युष्माभिर्ममाङ्गसङ्गो युष्मदुद्दिष्टादास्यमयसान्निध्यं नृणां जीवमात्राणां प्रीतये सुखमात्राय न भवेत् नितरामनुरागायेत्यर्थः । तत् तस्मात् लोकविद्विष्टत्वात् मयि निजभावेन मन एव युञ्जानाः अचिराद्देहान्त एवेति अत्रेदं तु विवेक्तव्यं श्रीकृष्णस्य भक्ताः खलु द्विविधाः तटस्थाः लीलान्तःपातिनश्च तत्र तटस्थाः परोक्षस्यापि तस्य पारमैश्वर्यमालम्ब्य अष्टविधासु तत्प्रतिमास्वेकतरां सेवमाना जानन्तो वा जानन्तो वा च ते ब्राह्मणाद्यास्ते चरणसेवा चरणोदकग्रहणादिनिजभक्तिषु परोक्षमनुमोद्यन्ते लीलान्तःपातिनश्च द्विविधाः तत्र प्रथमास्तस्य पारमैश्वर्य्यमालम्बमाना देवाद्यास्तेन पारमैश्वर्येणैव व्यवह्रियन्ते अथ पारमैश्वर्यानुभवेऽपि तस्य नरलीलामवलम्बमाना ब्राह्मणाद्या नराः पित्राद्याश्च नरलीला यथा स्वस्वमर्यादां व्यवहरन्तस्तेन च तद्यवह्रियन्ते तस्मात् नरलीलाकृष्टचित्तानां ब्राह्मणीनामासां स्वयोग्यमेव तत्परिचरणं कर्त्तुं तत्सङ्गं प्राप्तुमिच्छूनां सम्प्रत्युपेक्षा युक्तैवेति ।। ३२ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

माशब्दस्यादौ निर्देशः, परमव्यग्रतया निषेधनात्; एवमीदृशं पतीनां यज्ञसमापनार्थं यज्ञस्थानं यातेति—लक्षणम्, विभो हे बहिरन्तर्व्यापकेति अस्माकं बाह्यमान्तरञ्च सर्व्वं त्वया विज्ञायत एवेति भावः । वच इति पाठः सुगम एव । भवानिति अन्यो वदतु नाम, कृपाकोमलचित्तो भवांस्तु वक्तुमपि योग्यो न भवतीत्यर्थः । यतो नृशंसं क्रूरम्; यद्वा, भवान् रसार्णवचन्द्रः कठिनं नीरसं वक्तुं नार्हत्येवेत्यर्थः । न च केवलमेवं तव वचसो नृशंसता, मिथ्यात्वमपि स्यादित्याशयेनाहुः—सत्यमिति । प्राक् भवानिति भक्त्या अनुनयार्थं पश्चात् कुरुष्व त्वमिति प्रेम्णेति ज्ञेयम् । यद्यपि तासां स्वीकारेण मर्य्यादोल्लङ्घनात् वेदसत्यता न सिध्येत्, तथापि

'न स पुनरावर्त्तते' इत्यादि श्रुतेः; (भा० ११।५।४१) 'देवर्षिभूताप्तनृणाम्' इत्यादिस्मृतेश्च, भक्तानां विधिनिषेधातीतत्वात्तस्य च साक्षाद्भगवत्त्वात् सा सम्पद्येतैव। ननु युष्माकं गोकुलान्तर्नयनाद्गोप्यो मामवज्ञास्यन्ति, युष्मासु च सापत्न्यमिव धास्यन्ति, तत्राहुः—भवेति। तुलसीति ह्रस्वत्वमार्षम्, तूलस्या दामेति प्रियत्वेन सदा त्वच्चरणाब्जयोः संलग्नत्वात् सापत्न्येन लक्ष्म्यादीनामपेक्ष्यत्वाच्च तदेव नितरां भक्तिविशेषेण नित्यं वोढुं तदेकनिवहनमात्रदास्येन तास्त्वां नावज्ञास्यन्ति, न चास्मासु सापत्न्यं धास्यन्तीति भावः। यद्वा, त्वद्दास्येन तासामपि दास्यं करिष्याम इति भावः। समस्तबन्धून् पतिपुत्रादीनतिलङ्घ्येति वान्ताशित्वम्, तेषां पुनः स्वीकारा न युक्तमिति भावः॥ २९॥ ननु 'साधवो दीनवत्सलाः' इति तेषां हितार्थं यात; यद्वा, मदाज्ञया अकृतामपि कर्त्तुमुपयुज्यते, तत्राहुः—गृह्णन्तीति। तत्र गता अप्यस्मान् त एव न स्वीकरिष्यन्तीत्यर्थः, यद्वा, त्वय्यस्माकं भावदर्शनात् प्रथमत एव न ते स्वीकुर्व्वन्त्येवेत्यर्थः। पितराविति कासाञ्चिन्मातुर्वृद्धत्वेन गमनाशक्त्या गृहेऽवस्थानां श्रीभगवति भावविशेषेण संगेऽगताया अपि तथा पूर्व्वमकृतनिषेधाया अप्यत्र मातुरुक्तिः, पित्रा अगृह्यमाणानां तद्भयेन मात्राप्यग्राह्यत्वात्; यद्वा, निजानन्यगतिकताबोधनाय तत्र धर्म्माद्यपेक्षया पतिभिरस्वीकृताः, स्नेहेन पित्रोर्गृहं यातास्तावपि न गृह्णीतः, लोकादिभयात्, ततोऽपि स्नेहाधिक्येन पुत्रान् प्रति गतास्तेऽपि न गृह्णन्त्येव, लोकलज्जादिना, अतो न भ्रात्रादयोऽपि गृह्णन्त्येव, अन्ये च प्रतिवेश्यादयः कुतो गृह्णन्त्विति विवेचनीयम्। तस्मात् पत्यादिभिरग्रहणात् प्रपदयोः श्रीचरणाब्जयोरग्रतोऽदूरत इत्यर्थः; इति परमदैन्यात् पतितात्मनामनन्यगतिकत्वेन तदेकाश्रितानामित्यर्थः। अन्यत्तैर्व्याख्यातमेव। यद्वा, तस्मादिति तद्विधाने हेतुरुक्तः,—तस्य दीनानाथैकशरणतया सर्व्वत्यक्तानां तदेकशरणत्वात्। किञ्च, पतितदेहानां दण्डवत् प्रणम्य पतित्वा प्रार्थयमानानामित्यर्थः; यद्वा, पतितानामिव आत्मा स्वभावो यासां तासामपीति दैन्योक्तिः। भवत्प्रपदयोस्तत् पूर्व्वोक्तं केशैस्तुलसीदामनिवहनम्, तस्य च दुर्ल्लभत्वात्, सुगोप्यत्वाच्च व्यक्तमनिर्द्देशः। यद्वा, तत्तथा, यत्तदोर्नित्यसम्बन्धात्, यथान्या त्वद्दास्येतरा गतिः फलं न भवेत्, तथा विधेहि। ननु तथापि श्रीगोपिकानां सापत्न्यादहं शंके, तत्राहुः—हे अरिन्दम! तासामीर्ष्यादिलक्षणं शत्रुं त्वमेव नाशयिष्यसीत्यर्थः। यद्वा, कंसाद्यरिमेव दमयसि, भक्तानान्तु दमनं कर्त्तुं नार्हसीति परित्यागेन मास्मान् मारयेत्यर्थः। यद्वा, पतितात्मनां मृतानां सतीनाम्, तयोरग्रे म्रियामहे, गतिश्चान्या न भवेदिति विधेहीत्यर्थः। ननु कामः संवरितुमेव युज्यते, तत्राहुः—हे अरिन्दमेति, कामलक्षणशत्रुमिमं त्वमेव नियन्तुं शक्तोऽसि, न तु वयं त्वत्काममोहिता इत्यर्थः॥ ३०॥ नाभ्यसूयेरन् दोषदृष्टिमपि करिष्यन्ति, किमुत न ग्रहीष्यन्तीत्यर्थः। अन्ये सर्व्वे लाकाश्च नाभ्यसूयेरन्, मद्भक्तिप्रभावात्. मया उपेता अनुज्ञाता अन्तर्य्यामिरूपेण साक्षाद् वाधुनादिष्टा इति सात्त्विकानां मद्भक्तिमतां देवानां मद्भक्तासु युष्मास्वसूया न भवेदेव। विशेषतश्च मद्भक्तिमेव इमे साक्षादभिश्लाघन्ते, तत्रापि मयादिष्टा इत्यर्थः, अन्यत्तैर्व्याख्यातम्। यद्वा, अहो किं वक्तव्यं पत्यादय इति, देवा अपि पुण्यदेहाः पुण्यापेक्षका यज्ञभागभुजः, पतियज्ञादित्यागेनापि नाभ्यसूयेरन्। अहो बत किं वाच्यं पत्यादयो नाभ्यसूयेरन्निति, अथ च अनुमन्वते, विशेषतोऽधुना आदरं करिष्यन्तीत्यर्थः। यद्वा, मया उपेताः संगता युष्मान् देवा अप्यनुमन्वते, किं पुनः पत्यादयोऽभ्यसूयेरन्निति॥ ३१॥ हि यतः, अंगसंगो मैथुनलक्षणः सदैकत्रावस्थितिर्वा। नृणामिति श्लेषेण मर्त्यदेहस्य जरामरणादिबाधया सम्यक् प्रीत्यनुरागासिद्धेः, तथापि इह कर्म्मक्षेत्रे भारतवर्षे कर्म्माधीनत्वादल्पयुष्काच्च तदसंसिद्धेः; श्रीवैकुण्ठलोके सच्चिदानन्दविग्रहतस्तत्सुसिद्धेस्तत्रैव युष्मन्मनोरथः सम्पत्स्यत इत्यर्थः। एतच्च तासां पञ्चनार्थमुक्तम्, न च तत्त्वतः, यथाकथञ्चिदपि तेन सह सम्बन्धतोऽपि कृतार्थतासिद्धेः। यद्वा, इह गोकुले नृणां गोकुलवासीतरमनुष्याणां युष्मदादीनां प्रीतये आनन्दानुभवाय योऽनुरागो मयि प्रेमा तस्मै न भवति, गोपगोप्यादिष्वेव ममासक्तेः। यद्वा, इह एषु ब्राह्मणीदेहेषु युष्माभिः सह ममांगसंगो नृणां गोपगोप्यादीनां प्रीतये सुखाय मयि युष्मासु वा अनुरागाय च न भविष्यति। इदमपि वञ्चनमेव, तत् तस्मात् मनो युञ्जाना मनसैव मया सह संगं कुर्व्वाणा इत्यर्थः। अवाप्स्यथ देहान्तररिति शेषः। यद्वा, अव अवसाने देहान्ते प्राप्स्यथेत्यर्थः। स्पष्टतया तथानुक्तिस्तासां दुःखानुत्पत्तये। अतएवाचिरादिति तच्चाश्वासनार्थमेव, वस्तुतः कालस्य महादीर्घत्वात् तज्जन्ममात्रानन्तरप्राप्त्याप्यविलम्बतासिद्धेः। एवं श्रीगोपीनामिव देहभावयोः सम्पत्या तास्विवानुग्रहविशेषसिद्ध्यर्थमासां ग्रहेषु प्रस्थापनम्, न तु ब्राह्मणीत्वेनोपेक्षणमिति तत्त्वार्थः। अन्यथा लोकधर्म्मोपेक्षया प्रेम्णा प्रपन्नेषु तस्य केवलं लोकधर्मापेक्षयोपेक्षणायोगात्॥ ३२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तव निगमम् "प्रियोहि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" "न मे भक्तः प्रणश्यति" इत्यादि वचनम्॥ २९॥ प्रपदयोः पादाग्रयोः॥ ३०–३१॥ नृणामङ्गसङ्गः शरीरयोगः न प्रीतये न वैषयिकसुखाय अपि तु मय्यनुरागाय जन्मनः फलं मद्भक्तिरित्यर्थः। नृणां चेतनानां मदङ्गसङ्गस्तदात्विकारागाय नतु कालान्तरप्रीतये विश्लेषस्तु कालान्तरेऽपि प्रीतिवर्धक इत्यभिप्रायः॥ ३२–३३॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स्वमनोरथानुगुणोक्तिश्रवणान्निर्विण्णा आहुः पत्न्यः—मैवमिति। हे विभो! भवानेवं तद्यात् देवयजनम् इत्येवं नृशंसं परुषं वचो वक्तुं नार्हति किन्तु वो निगमः "प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः" "न मे भक्तः प्रणश्यति" इत्यादिवचन-

रूपस्तं सत्यं कुरुष्व नित्यमितिपाठेऽपि स एवार्थः वयन्तु समस्तबन्धूनतिलङ्घ्य पदावसृष्टमवज्ञयापि दत्तमिति भावः तत्तुलसिदाम केशैर्बहुमानेन वोढुं प्राप्ताः दासीभवितुं प्राप्ताः इति भावः ॥ २९ ॥ किञ्चातिलङ्घितबन्धूरस्मान्न पत्यादय एव परिगृह्णन्ति कुतोऽपरे गृह्णीयुः तस्मात् हे अरिन्दम ! भवतः प्रपदयोः पदाग्रयोः पतिताः आत्माना देहा यासां ताः पतिताः समर्पिता आत्मानः प्रत्यगात्मानः याभिस्तासां वा नोऽस्माकं नान्या गतिरस्मत्समीहितोपायोऽन्यो नास्त्यतः त्वमेव तदस्मदभिमतं विधेहि यद्वा अन्या गतिः स्वर्गादिर्पि माभूत्किन्तु त्वदविश्लेषेण त्वद्दासीत्वमेवास्माकं सम्पादय ॥ ३० ॥ एवमुक्तो भगवान् तावद्यदुक्तं पत्यादयः केपि नास्मान् गृह्णन्तीति तत्रोत्तरमाह । पतय इति–वो युष्मान् पत्यादयोऽन्ये लोकाः जनाः किमुत मयोपेता मत्प्रभृतयो देवाश्च नाभ्यसूयेरन् न दोषदृष्ट्या द्रक्ष्यन्ति किन्त्वनुमन्वतेऽमोदन्ते ॥ ३१ ॥ यदुक्तं तद्विधेहेति तत्रोत्तरमाह–नेति । इह लोके नृणामङ्गसङ्गः देहयोगः न प्रीतये न वैषयिकसुखायापितु मय्यनुरागाय जन्मनः फलं मद्भक्तिरेवेत्यर्थः । यद्वा नृणां चेतनानामङ्गसङ्गस्तादात्मिकरागाय न तु कालान्तरप्रीतये विश्लेषस्तु कालान्तरेऽपि प्रीतिवर्द्धक इत्यभिप्रायः तस्मात्परोक्षमपि मयि मनो युञ्जाना अचिरादेव मामवाप्स्यथ संसृतिबन्धान्मुक्ताः नित्यं मद्दास्यं करिष्यथेति भावः । स्मरणादिना यथा मयि भावः तथासन्निकर्षेण न इति ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यातेति नृशंसं पुरुषं गदितुं निगमं "न मे भक्तः प्रणश्यति" इति वचनं सत्यं कुरु पदावसृष्टं श्रीपादच्युतं तेन दत्तं वा तुलसीदाम श्रीतुलसीमालां केशैर्नितरां वेति वोढुं पादमूलं प्राप्ताः ॥ २९ ॥ कालक्षेपात् द्विजातय अस्मान्न गृह्णन्तीति सूचितम् । तत्र तत्सहायाभावात् पुनर्गमने ते नैव गृह्णन्तीत्याहुः—गृह्णन्तीति । ततः शरणं विधेहि कुरु ॥ ३० ॥ कुत एव चान्य इत्यत्राह लोकाश्चेति ॥ ३१ ॥ तव पादमूलं प्राप्ता इत्यत्राङ्गसङ्गः सूचितस्तत्राह—नेति । नृणामङ्गसङ्गो मम प्रीतये न भवति ममानुरागाय च न तस्मान्मयि मनो युञ्जानाः यूयं क्षिप्रं मामवात्स्यथेत्यन्वय अनेनाहं भक्त्यैव तुष्टो भवामि नान्येनेति सूचितम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मया उपेता अनुज्ञाताः वा वो युष्मान् अहमीश्वर इति तैरपि ज्ञातत्वादिति भावः । यथा यज्ञकर्मणि तैः प्रत्यक्षीकृता देवा अपि अनुमन्वते पृष्टाः सन्तो मामीश्वरत्वेन मन्यन्त इत्यर्थः ॥ ३१ ॥ ननु, तह्यङ्गसङ्गोऽपि भवतु तत्राह—अहो ब्राह्मणजन्मनि भवतीनां मयाऽङ्गसङ्गो नृणां प्रीतये सुखाय न भवति अनुरागाय तु सुतरां नेत्यर्थः ॥ ३२-३३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ततस्तदाकर्ण्य द्विजपत्न्यो यदूचुस्तदाह—मैवं विभोऽर्हतीत्यादि । हे विभो ईश्वर ! भवान् सत्यप्रतिज्ञ एवं गदितुं नार्हति, न योग्यो भवति । यतः (भा० ९।४।६५) "ये दारागारपुत्राप्तप्राणान् वित्तमिमं परम् । हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥" (श्रीरामायणे) "सकृदेव प्रपन्नो यस्तवास्मीति च याचते । अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम ॥" इति तव प्रतिज्ञा । वयं तु सर्वं त्यक्त्वैव त्वां शरणं गताः, तत् कथमेवं वदसि ? एवमिति किं नृशंसं क्रूरं कठिनमित्यर्थः । अथवा, नृवत् शंसः कथनं मनुष्यवत् कथनम् । भवानीश्वर एव, अतः स्वनिगमं स्वप्रतिज्ञां सत्यं कुरु, निगमं सत्यं कुरुष्वेति वा । वयं तव पादमूलं प्राप्ताः । किं कृत्वा ? समस्तबन्धूनुल्लङ्घ्य । किमर्थम् ? पादावसृष्टं तुलसिदाम केशैर्निवोढुम्, दासीभवितुमित्यर्थः ॥ २९ ॥ एवं चेत्तदा युष्माकं पत्यादयो युष्मान्न ग्रहीष्यन्तीति चेत् न तावद्गृह्णन्तु इत्याहुः—गृह्णन्ति नो न पतय इत्यादि । पतयो नोऽस्मान्न गृह्णन्ति, न गृह्णन्त्वित्यर्थः । (पा० ३।४।८६) 'एरुः' इति उत्वाभाव आर्षः, विभक्तिव्यत्ययो वा लोडर्थे लडेव । एवं पितरौ सुता वा, एवं भ्रातृबन्धुसुहृदश्च, अस्माभिरेव सर्वे त्यक्तास्ते, कथं तेषां ग्रहणोपेक्षास्माकम् ? ततः किं कर्तव्यमित्याह—तस्मादित्यादि । तस्माद् भवत्प्रपदयोः पतितात्मनां नो नान्या गतिर्भवेत्, हे अरिन्दम विपक्षक्षयकारिन् ! तद् विधेहि; तदिति (२९ श० श्लो०) "तुलसिदाम पदावसृष्टं केशैर्निवोढुं" इति यदुक्तम् तदेव विधेहीत्यर्थः ॥ ३० ॥ (२९ श० श्लो०) "सत्यं कुरुष्व निगमम्" इति यदुक्तं भवतीभिस्तदेव कर्तव्यम्, किन्तु मद्वच एव निगमस्तस्मात् (२८ श–श्लो०) "तद्यात देवयजनम्" इति यदुक्तम् तदपि मद्वच एव, तच्चापि सत्यं कर्त्तुमर्हम् । तस्मान्ममाज्ञाप्रतिपालनमपि भवतु मम वचः सत्यं भवतु; भवत्योऽधुना देवयजनमेव यात, पतयोऽपि नासूयान् करिष्यन्तीत्याह—पतयो नाभ्यसूयेरन्, न च पितृभ्रातृसुतादयः । कुतः ? इत्याह—लोकाश्चेत्यादि मयोपेता मया सह कृतसम्भाषा भवतीर्लोका देवाश्चानुमन्वतेऽनुमोदयिष्यन्ति श्लाघिष्यन्त एव, किं पुनः पत्यादयः । अतो गृहं त्यक्त्वा स्वातन्त्र्येण समागताः, पुनर्गृहं गताः सतीरस्मानवमंस्यन्ते' इत्याशङ्का न कार्येति, साम्प्रतं गृहमेव यातेति वाक्यार्थः ॥ ३१ ॥ तथापि न गच्छन्तीः प्रति पुनराह न प्रीतय इत्यादि । यदि वा यदङ्गसङ्गार्थं कामयध्वे, स तु इह जन्मनि न भवति, प्रीतये चानुरागाय नेत्यर्थः । नृणां मानुषीणां भवतीनां हि जानीत । नृणामिति सामान्यत्वाज्जातिपरनिर्द्देशः, नृजातीनामिति भावः । तर्हि किमस्माकं भवतु ? तत्राह—तदिति । तस्मान्मयि मनो युञ्जाना, सत्योऽचिरादेव मामवाप्स्यथ । नृशरीरं त्यक्त्वा अप्राकृतशरीरमासाद्य मां प्राप्स्यथेत्यर्थः ॥ ३२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मैवमित्यादि । तद्देवयजनं यातेति नृशंसं क्रूरं गदितुं भवान् मार्हति; इदं नोक्त्वा किं कर्त्तव्यम् ? तत्राह—सत्यं कुरुथ निगमं प्रतिज्ञां सत्यं कुरुथ । स्वनिगमं स्वप्रतिज्ञामिति वा । तर्हि न सत्याभावः, 'सकृदेव प्रपन्नो यस्तवास्मीति च याचते । अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम ॥' इति या ते प्रतिज्ञा तां सत्यां सर्वभूतमयरूपे गृहे गन्तुं कथमुपदिशसि, गृहे न गत्वा किं कर्तव्यम् ? तत्राह—पदावसृष्टं तुलसी दाम केशैर्निवोढुं समस्तबन्धूनतिविलङ्घ्य तव पादमूलं प्राप्ताः, तव पादमूल एव स्थास्याम इत्यर्थः ॥ २९ ॥ अधुना चेद्भवतीभिर्देवयजनं न गम्यते, तदा विलम्बे सति पतयो नाङ्गीकरिष्यन्ति, एवञ्चेद् भवत्वेवमेवेत्याहुः—गृह्णन्ति नो न पतय इत्यादि । नोऽस्मान् पतयो नो न गृह्णन्त्वित्यर्थः, पञ्चम्यां वर्त्तमाना । यद्वा, पतयो नो न गृह्णन्ति, अपि तु गृह्णन्त्येव भविष्यति वर्त्तमानः । त्वदनुरक्तत्वादधिकमेवास्मासु आदर करिष्यन्ति, तथापि तस्मात् पतिपुत्रादेर्बहिर्भूय भवत्प्रपदयोः पतितात्मनां नोऽस्माकं नान्या गतिर्भवेत्, भवत्वित्यर्थः । नो न गृह्णन्तीति द्वौ नञौ प्रकृतार्थं गमयतः । एवं न भ्रातृबन्धुसुहृद इत्यादावपि नो इत्यनुवर्त्तनीयम् । अतस्तेषां ग्रहणाग्रहणयोः कोऽपेक्षा ? ॥ ३०-३१ ॥ ननु भवतीभिरुक्तम् (३० श-श्लो०) "गृह्णन्ति नो न पतयः" इत्यादि, तत्र (३१ श-श्लो०) "पतयो नाभ्यसूयेरन्" इत्यादिना मयैव समाधा कृता, तथापि भवत्यो न गच्छन्ति चेत्तच्छ्रूयतामित्याह—न प्रीतये इत्यादि । तत्र स्थितानां वो मदङ्गसङ्ग एवाभिलषितः, स तु नोचित एवेति वदति—इह देहे विप्रभार्यारूपे इति भावः, अङ्गसङ्गो नृणां श्रोष्यतां पश्यताञ्च न प्रीतये नानुरागाय च । अथवा, नृणामिह देहे नरभूतानां भवतीनां देहेऽङ्गसङ्गोऽङ्गैः सङ्गः, मनसा सङ्गस्तु प्रीतयेऽनुरागाय च । स च भवतीभिः कृतः करिष्यते च । यच्छ्रूयते गोपीसङ्गस्तास्तु नरभूता न भवन्ति, मया सह ता ह्यवतीर्णा इतीह-शब्दद्योत्यं वस्तु । किन्तु देहान्तरे भवत्योऽपि मामवाप्स्यथ इत्याह—अचिरादित्यादि ॥ ३२-३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

रासारम्भे महाप्रेमवत्यो गोप्य इवाहुः-मैवमिति । नृशंसं परुषं निगमं "न च पुनरावर्त्तते" इति वेदवाक्यं "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति निगमरूपं स्ववाक्यं च सत्यं कुरुष्व ननु, भवतीभिर्विप्रजात्यभिमानो दुस्त्यजस्तत्राहुः तव गोपस्यापि पादमूलं वयं दास्यार्थं प्राप्ताः न हि विप्रजात्यभिमाने सत्येवं कोऽपि जनो वक्तुं शक्नोत्यतोऽस्मद्वाक्येनैव निश्चीयत नास्त्यस्माकं जात्यभिमाना इति भावः । ननु गोपस्य मम गोप्य एव दास्यः प्रेयस्यश्च समुचिता भवन्ति ताश्च बह्व्यो वर्तन्ते तं मां सत्यं वर्त्तन्तां विराजन्तां नाम यदि त्वं ब्राह्मणीर्दासीः कर्त्तुं बन्धुभ्यो जिह्रेषि तर्हि कथं त्वाङ्गोप्यामस्त्वत्पुरं नैव यामो वृन्दावन एव वनदेवता इव वर्तिष्यामहे त्वत्सम्बन्धेनैव कृतार्थी भविष्णवो वयमित्याहुः-वयं तु दूरे स्थित्वा पदावसृष्टं त्वत्पदात् त्वदाश्लिष्टप्रेयसीनां पदसंसर्गाद्वा त्रुटिनीभूय अवसृष्टं पर्यङ्काधोविसृष्टं तुलसीदामत्वद्दासीभिरेव कृपया दत्तं केशैर्निवोढुं प्राप्ताः न तु तव प्रेयसीभावाय दासीभावाय वा दुर्लभावास्माकमाकाङ्क्षेति भावः । ननु, तर्हि भवद्बन्धवः किं वदिष्यन्ति ? तत्राहुः अतिलङ्घ्येति ॥ २९ ॥ किञ्च, त्वन्नगरस्थमालिकताम्बूलिकादिवनिताजनमुखादाकर्णितत्वद्रूपगुणमाधुर्याय यदवधि वयं वयःसन्धिमारभ्यैवाभूम तद्दिनत एव त्वयि भाववतीर्गृहकर्मण्यप्युदासीना अस्मान् व्यभिचारिणीव दृष्ट्वा सन्दिहानाः पत्यादयो नैव व्यवहरन्तीत्याहुः—गृह्णन्तीति । सुताः सपत्नीपुत्रा अन्ये प्रतिवेश्यादयः ततश्चातिवैयग्र्येण रुदत्यः पदाग्रे मूर्द्ध्ना प्रणमन्त्यः सगद्गदमाहुः—तस्मादिति अस्माकम् अन्या गतिर्यथा न भवेत्तथा विधेहि । हे अरिन्दम ! त्वत्प्राप्तिप्रतिबन्धकीभूता दुरितादय एवारयस्तान् त्वमेव कृपया दमय ॥ ३० ॥ मयि प्रेमवत्यो यूयं मत्सुखपरा एवातो मदनभिप्रेतं चेष्टितुं नार्हथ स्वहठं माकृद्ध्वं गृहान् गच्छतेत्युक्ते भो अभिज्ञशिरोमणे ! असूर्य्यंपश्याः कुलवत्यो वयं वचनोल्लङ्घनात् यांस्तृणीकृत्य पुराद्बहिर्भूय एतावद्दूरे स्थितस्य लम्पटत्वेन व्रजे ख्यातस्य भवता समीपमागच्छामः स्म पुनस्तत्रैव गच्छन्तीरस्मांस्ते पत्यादयः पुरेषु प्रवेष्टुमप्यददानाः कोपादेव वधिष्यंत्येवेति जानीमस्तत्राह-पतय इति । वो युष्मभ्यं नाभ्यसूयेरन् दोषदृष्टिमपि न कुर्य्युः किमित्यनिष्टं शङ्कध्वे इति भावः । किमुत पित्रादयः अन्ये च लोकाः कीदृशीर्मया सह उपेताः सङ्गता अपि किमुत सम्प्रत्यसङ्गता एवेत्यर्थः । अहमीश्वर इति तैरपि ज्ञातत्वादिति भावः । यतो देवा अपि यज्ञकर्मणि तैः प्रत्यक्षीकृता अत्रार्थे पृष्टा भवतीरनुमन्वते अनुसंस्यते एव मां सर्वेश्वरं विदुषां देवानामप्यत्रार्थे अनुमतिरेव नत्वननुमतिरित्यर्थः ॥ ३१ ॥ अस्मिन्मनो वाञ्छितं कदापि सेत्स्यति न वेति सास्रैरपाङ्गैर्यत्पृच्छथ तत्रोत्तरं शृणुतेत्याह-नेति । प्रीतये प्रीतिं सम्पादयितुं अनुरागं च सम्वर्द्धयितुमित्यर्थः । किन्तु मद्विरहोत्कण्ठ्यमेवानुरागातिशयवर्द्धकमिति भावः । तत्तस्मात् ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे विभो ! यातेति नृशंसं परुषं गदितुं भवान्नार्हति किन्तु "मां प्राप्य न निवर्त्तन्ते "इति" "न च पुनरावर्त्तते" इति वा निगमं सत्यं कुरुष्व वयन्तु समस्तबन्धूनतिलङ्घ्य पदावसृष्टं तुलसीदाम तुलसीमालां केशैर्निवोढुं प्राप्ताः नित्यं संनिहिता भवितुमागता

इति भावः ।। २९ ।। किञ्च, त्वत्समीपमागन्तुमुद्यताभिरतिलङ्घिताः पत्यादयो नोऽस्मान्न गृह्णन्ति अतः कुतो गृह्णीयुः तस्माद्भवत्पदयोः पतिता आत्मानो देहा यासां तासां नोऽस्माकमन्या स्वर्गादिरूपा गतिरपि न भवेन्माभूत् अतस्त्वद्दास्यमेव त्वदविश्लेषेण विधेहि ।। ३० ।। मयोपेता अनुज्ञाताः ये पत्यादयः अन्ये लोकाश्च किं बहुना देवाः ब्रह्मशिवादयोपि नाभ्यसूयेरन् दोषारोपं न कुर्वन्ति किन्त्वनुमन्वते अनुमोदन्त इत्यर्थः ।। ३१ ।। तत्र गत्वा च देहादिष्वासक्तिर्न कर्त्तव्या किन्तु मम ध्यानमेवेत्युपदिशति । नेति । नृणामङ्गसङ्गः अङ्गं शरीरं तत्सङ्गः तत्प्राप्तिः प्रीतये देहगेहादिक्षुद्रसुखाय न भवति किन्तु मयि अनुरागाय तत्तस्यान्मयि मनो युञ्जानाः अचिरात् मामवाप्स्यथ ।। ३२ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

गोप्य इवाहुर्मैवमिति । हे विभो ! भवानेवं नृशंसं कठोरं वचो गदितुं नार्हति स्वनिगमं "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति स्ववाक्यं सत्यं प्रमाणं कुरु । ननु भवत्यो ब्राह्मण्यः कथं मयि स्थास्यन्ति ? तत्राहुः वयं समस्त वन्धून् अतिलङ्घ्य तव पादमूलं प्राप्ता नहि अस्माकं कुलाभिमानोऽस्तीति भावः । ननु वः क्वोपयोगस्तत्राह पदावसृष्टं त्वत्पदा त्वदाश्लिष्टकान्तापदसंसर्गाद्वा त्रुटितं मदवसृष्टं त्वत्पर्यङ्कतले निक्षिप्तं तुलसिदाम ताभिः कृपया दत्तं केशैर्निबोढुमिति तद्धारणमेवास्माकं सेवेति तथा च माभूत्तवाङ्गसङ्गो बनदेवताभिः सह वृन्दारण्ये निवसन्तीनां नस्तावन्मात्रमस्तु पुलिन्दीनामिव श्रीकुङ्कुमधारणमिति भावः । इह पदावसृष्टं तुलसिदामेति तस्मिन् पारमैश्वर्यं व्यज्य त्वद्दास्यमेव नोऽभीप्सितमिति सूच्यते जीवस्वरूपञ्च त्वद्दास्यवदेव "दासभूतो हरेरेव" इति पाद्मे तल्लक्षणात् न च गार्हस्थ्यधर्मत्यागो नोचितः सर्वधर्मान् परित्यज्य" इत्यादित्वदुक्तेरेव ।। २९ ।। किञ्च वयःसन्धितस्त्वदतिरम्यगुणश्रवणेन त्वन्मनस्का वयमभूम तत्त्वादेव पतयोऽस्मानुपभोगाय न गृह्णन्तीति वयं यज्ञसिद्ध्यर्थास्तत्पन्यः आह यथा पाणिनिः "पत्युर्नोयज्ञसंयोगे" इति तत्कर्तृकस्य यज्ञस्य फलन्तु न भोक्ष्यामहे तत्रानभिलाषात् पित्रादयोऽपि सम्भाषणेऽपि न गृह्णन्ति वातूला इमा इत्याक्षिपन्ति सुताः सपत्नी पुत्राः अन्ये तटस्थाः कुतः 'तद्यात देवयजन'मित्यनुस्मृत्य व्यग्रा प्राहुः । तस्मात् पत्यादिपरित्यागात् तं विधाय भवतः प्रपदयोश्चरणाग्रयोः पतितात्मनां साष्टाङ्गप्रणमन्तीनां नो यथा त्वत्तोऽन्या गतिः श्रवणं न भवेत् तथा विधेहि अरिन्दम ! हे स्वप्राप्तिप्रतिकूलनिवासिन् ! कारुणिक ।। ३० ।। अथ पत्यादीनवज्ञाय त्वामागता नस्ते न स्वीकुर्युरपितु क्रुद्धास्तिरस्कुर्युरेवेति वदिष्यन्तीरालक्ष्याह-पतय इति । पत्यादयस्ते नाभ्यसूयेरन् मद्दर्शनसम्भाषणभोजनार्पणेषु गुणेषु दोषारोपं न कुर्वीरन् मयोपेता अनुज्ञाता युष्मान् देवाश्च यज्ञे तैः प्रत्यक्षीकृता अनुमन्वते साधु कृतमभिरित्यनुमोदिष्यन्त इत्यर्थः । मदुक्ता वः इन्द्रादयोऽपि सत्करिष्यन्ति का कथान्येषामित्यर्थः ।। ३१ ।। ननु त्वां विहातुं न शक्नुम इति चेत्तत्राह–इहास्मिन् ब्राह्मणीजन्मनि भवतीनां ममाङ्गसङ्गो नृणां प्रीतये सुखायानुरागाय च न भवेत् तत्तस्मान्मयि मनो युञ्जाना गृहान् यात अचिरादेव देहान्तरैर्मामवाप्स्यथेति मर्यादासेतुरहं मर्यादां नातिवर्त्ते यूयञ्च मदुक्ता मत्प्रतीपं नाचरत मत्प्राप्तिस्तु शीघ्रमेव गोपीरूपेण भाविनीति ।। ३२ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे विभो भवानेवं नृशंसमस्मद्धिंसासाधकमिति परुषं गदितुं नार्हसि निगमम् । न मे भक्तः प्रणश्यति । तांस्तथैव भजामि । न स पुनरावर्तत इत्याद्यागमम् । सत्यं कुरुष्वास्मत्प्रेषणे निगम उक्तोऽसत्यो भवतीति भावः । वयं समस्तबन्धूनतिलङ्घ्य लङ्घयित्वा पदावसृष्टं निर्माल्यतया पदत्यक्तं यत्तुलसिदाम । ङ्यापोः संज्ञा छन्दसोरिति ह्रस्वः । तुलस्यादाम मालां केशैर्निवोढुं धर्तुं तव पादमूलं प्राप्तास्ताः प्रति ।। २९ ।। स्वसत्रं युष्माभिः सह विप्राः पारयिष्यन्ति यातेत्युक्तं तत्रोत्तरमीरयन्ति ।। गृह्णन्ति न इति । न पतयः इतो गता नो न गृह्णन्ति तदाज्ञाऽवज्ञानात् । तर्हि मातृपितृलालितास्तदालये वर्तध्वमित्यत आहुः । न पितरौ पिता मात्रेत्येकशेषः । मातरपितरौ न च सुता भ्रातृबन्धुसुहृदश्च नान्ये कुत एव न गृह्णीयुरिति । भवत्पदयोरिति शुभवत्पतितात्मनां पतितः पातित आत्मा देहो याभिस्तासामुपरि प्रसीद प्रसादं कुरु । हे अरिन्दम अरिश्चक्राभिमानी कामो महतेश्चतुर्मुखादिवत् तं दमयतीति स यथा मत्वर्थे इकारप्रत्ययः । यथाऽन्या गतिरस्माकं मृत्यनन्तरं प्राप्यान्या गतिर्न भवेद्भवधस्तथा विधेहि स्वर्गादिकं न लभाम इति भावः । सर्वचेष्टके त्वयि दृष्टेन्याऽनितुं त्वया चेष्टयितुं योग्या विधिभवादिरूपिणी त्वांन्नयम्येति यावत् सा गतिर्न भवेद्यथा तथा विधेहीत्यान्तरङ्गिकः कुरङ्गनयनानां भावोऽवसेयः । ऋहलोर्ण्यदितिण्यत्प्रत्ययः ।। ३० ।। पतयो नो न गृह्णन्तीत्यादेरुत्तरमाह ।। पतय इति । नित्यमित्यनेनारुन्तुदवादराहित्यं द्योतयति । युष्मभ्यमिति शेषः । कुत एवान्य इत्युत्तरयति ।। लोकाश्चेति । नाभ्यसूयेरन्मयोपेताः । एवं सङ्गताश्चेद् वा अप्यनुमन्वते सम्मानयति का कथा भूदेवानामिति भावः ।। ३१ ।। पादमूलं प्राप्ता इत्यनेनाङ्गसङ्गाशा शशीमुखीभिः सुचिता । हृदयसङ्गम एव सुसङ्गमो न तनुसङ्गम एव सुसङ्गम इति तत्रोत्तरमाह ।। नेति । यद्यतो नृणां नार्यश्च नरश्च नरस्तेषां परस्परमङ्गसङ्गः प्रीतये सुखायानुरागाय स्नेहविवृद्ध्यै च नेह भवति । तर्हि कया सेवया न उद्धृतिर्भगवन्नित्यत आह ।। तदिति । मयि मनो युञ्जाना अचिरान्मामवाप्स्यथ । अनेन बालिशस्य बालस्य मनोजस्य न वशवर्तिन्यो न भवन्तु भवत्यः किन्तु तज्जनकं मन आश्रयं कृत्वा तस्य मयि योजने प्रयोजनं यौष्माकीणं सेत्स्यतीति ध्वनयामास श्रीश इति ज्ञेयम् ।। ३२ ।।

श्रीसुबोधिनी

पत्न्यस्तु सर्वपरित्यागेन समागताः कृतसाक्षात्कारा पुनः पूर्वावस्थां प्राप्तुमयुक्तमिति सञ्चिन्त्य गमनाभावं प्रार्थयन्ति मैवमिति, गृहगमनं त्वनुचितमेव कर्तव्यं च, तथापीश्वरवाक्यात् कर्तव्यं चेत् तदा कर्तव्यताया वान्ताशित्वेन महद् भयमाशङ्क्य विज्ञापयन्ति **विभो** हे समर्थ सर्वप्रकारेणापि सर्वं कर्तुं **समर्थैवं गदितुं भवान् नार्हति**, अनर्हे हेतुमाह **नृशंस**मिति, इदं हि क्रूरं वाक्यं स्वरूपतः फलतोऽर्थतश्च, **आदौ पुष्टिमार्गप्रवर्तनार्थं भगवानवतीर्णः कथं मर्यादां स्थापयति ?** नापीयं मर्यादात्यागानन्तरं पुनर्ग्रहणविधानात् , यद्यपि स्त्रीणां त्यागो नोक्तस्तथापि त्वय्यवतीर्णे उचितः, स्त्रीणामर्थ एवानन्दस्य प्रकटितत्वादतोऽन्यदा फलरूपानन्दाभावाद् भोग्यत्वेन तासामन्यगामित्वावश्यकत्वात् त्यागोऽनुचितो भवतु नाम प्रकृते तु तद्वैपरीत्यात् तस्यैव भोगपर्यवसानादुचित एव त्यागस्तथा सति पुनः परिग्रहः क्रूरो भवति, किञ्च दयाभावाच्च संसारदवानलान् निर्गतं पुनस्तत्र प्रवेशयतीति, अथ यदि तेनैव प्रकारेण पुरुषार्थसिद्धिस्तथापि न प्रेषणीया यतस्त्वं सर्वसमर्थः, अत्रैव तथाप्रकारं सम्पाद्य स्वयं तद्रूपो भूत्वा क्वचित् तिष्ठास्मान् वान्यथा प्रदर्शयात्मनि वा प्रवेशय वृक्षादिभावं वा प्रापयादृश्यान् वा कुरु, एवं सर्वोपायेषु विद्यमानेषु स एव कुतः क्रियते ? सिद्धत्वादिति चेत् तत्राहुः **सत्यं कुरुष्व निगम**मिति, **निगमो** वेदस्त्यागे न पुनर्ग्रहणमिति, "तस्मान् न्यासमेषां तपसामतिरिक्तमाहु""न च पुनरावर्तते" "न च पुनरावर्तत" इति, "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" एवमनेकविधो निगमोऽसत्यो भवेद् यदि त्यागानन्तरं त्वयैव चेद् ग्राहितः स्यादतः **स्वनिगमं सत्यं कुरुष्व**, ननु "मामुपेत्ये"तिवाक्याद् न भवतीनां परावृत्तौ दोषो भिन्नतया तिष्ठन्तीति चेत् तत्राहुस्तव **पादमूलं प्राप्ता वय**मिति, प्राणिनस्त्वेतावद्दूरे स्वप्रयत्नो यत् तव चरणयोर्मूलं प्रेम रजश्छाया चित्ते तदवलम्बिनि स्थितिर्वाधोभाग इति सेवानिवेशो वा, एवं कृते शिष्टं त्वयैव कर्तव्यं न त्वधः पातनीयं, ननु स्त्रियो भवत्यः कामयुक्तास्तथा सत्यमुचितं लोकशास्त्रावतारविरुद्धं कथं कुर्यामतो व्याघुट्यगमनमेवोचितमिति चेत् तत्राहुस्**तुलसिदाम पदावसृष्टं केशैर्निवोढु**मिति, न वयमनुचितकर्माभिलाषिण्यः किन्तु सम्पूर्णं दिनं सेवां विधाय स्वामिनो निद्रासमये निद्रिते वा पादसंवाहने क्रियमाणे पादयोः समर्पितं **तुलसीदाम** प्रसादत्वेन त्वया दत्तमस्पर्शे वा दूरादु**त्सृष्टं** परमपुरुषार्थत्वेन प्राप्यमहाप्रसादरूपं **केशैः** केशसम्बन्धिभिर्वेण्यापीडादिभिर्नितरां **वोढुं तव पादमूलं प्राप्ता** इतिसम्बन्धः, नन्वेतावदेव चेत् तत्रैव **तुलसिदाम प्रेषयिष्यामि** तत्राहु**रतिलङ्घ्य समस्तबन्धू**निति, सर्वे बान्धवाः पतिपुत्रादयस्त्यक्ता अतस्तद्विरोधादपि न तत्र स्थितिः सम्भवति ॥ २९ ॥ किञ्च तेषामुपकारार्थं गन्तव्यमिति यदुक्तं तदपि न सम्भवतीत्याहुर्गृह्णन्तीति, ते परिग्रहमेव न करिष्यन्ति तद्वाक्योल्लङ्घनेनागतत्वाद् भर्तुरग्रहणे पितृगृहे स्थातव्यमित्यपि पक्षो निराक्रियते **पितरा**विति **सुता वा** भिन्नतयान्नं दास्यन्तीति बान्धवा वा स्वमध्ये स्थापयिष्यन्तीति **सुहृदो** मित्राणि वोपकरिष्यन्तीति प्रत्यक्षं बन्धुसाहसस्य कृतत्वादन्ये सुतरामेव न ग्रहीष्यन्ति अथ यदि जातिपरित्यागेन यत्र क्वचित् स्थातव्यं तर्ह्यत्रैव स्थातव्यं, अत्र स्थितानां स्वर्गो न भविष्यतीति चेन् मास्त्वित्याहु**र्भवत्प्रपदयोः पतितात्मनां नान्या गतिर्भवे**दिति, पादाग्रे **पतितानां** पाद**गति**रेव **गति**र्यथोपानहः **प्रपदपतितवस्त्राणां** वा, तथास्माकमपन्या स्वर्गादिगतिर्मा भवतु भर्तृभिः सहितातः पाद**गति**मेव विधेहि दास्यो भूत्वा त्वत्सङ्गे सर्वत्र पर्यटनं, भर्त्रादिभयं तु तव नास्त्येव, तदाहुर्हे **अरिन्दम** शत्रुनाशक तद् गमनमेव **विधे**ह्याज्ञापय ॥ ३० ॥ एवम्प्रार्थनायां बाधकादेवं वदन्तीति सद्यः सञ्जातबाधकं प्रति समाधत्ते **पतय** इति, त्यागाग्रहणसम्भावनैव नास्त्यभ्यसूयामपि न करिष्यन्ति **पित्रादयोऽपि** पूर्वपूर्वोपाधिरहिताः, न हि पितुः कामोऽस्ति न हि भ्रातुर्लोभोऽस्ति, किञ्च **लोकाः** सर्व एव न दोषारोपं करिष्यन्ति तत्र हेतु**र्मयोपेता भवतीर्देवा अप्यनुमन्वते** सन्मानं करिष्यन्ति, अशास्त्रयुक्ते हि सर्वेषामसम्मतिर्न त्वात्मनि कस्याप्यसम्मतिः, अन्यथा स्वस्पर्शे स्वार्थगमनेऽपि त्यागः स्यात् ॥ ३१ ॥ नन्वेवं सति लोकवेदविरोधाभावात् सङ्गोऽप्यस्त्विति चेत् तत्राह **न प्रीतय** इति, **इहास्मिन्नवसरेऽङ्गसङ्गो नृणां प्रीतये न भवति**, **अङ्गेन सङ्ग** आत्मनैव सङ्ग उचितो मनसा वा न त्वङ्गेनाङ्गयोरिति न वक्तव्यं बाधितत्वादतो लोकविरुद्धत्वान्न कर्तव्यं, किञ्च तद्धि भक्त्यर्थं कर्तव्यं यथाधिकः स्नेहो भवतीति, तदपि न भविष्यतीत्याहा**नुरागाये**ति, भवतीनामप्येतदनुरागाय न भविष्यति **नृणा**मप्येतज्ज्ञाने, किञ्च **सङ्गः** परं प्रतिबन्धकः सायुज्येतो **मय्येव मनो युञ्जाना अचिरा**च्छीघ्रमेव **मामवाप्स्यथ**, अनेनान्या गतिरपि निवारिता, ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनमयुक्तमित्येवमुक्तम् ॥ ३२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पतयो नाभ्यसूयेरन्नित्यत्र, पित्रादयोऽपि पूर्वपूर्वोपाधीत्यादि । पतिपितृभ्रातृसुतादीनां मध्ये पूर्वस्यैतन्निषेधप्रयोजको यो धर्मः स उत्तरे नास्तीत्यर्थः । एतदेव विवृतं नहीत्यादिना । पितुस्तत्सुतदत्तपिण्डे लोभादेतन्निषेधः सम्भवति, स न भ्रातरि । भ्रातुः स्वसृसौभाग्येच्छा भवति तथा । सुते तु न सा । अस्य मातुर्निर्दोषत्वमपेक्ष्यम् । अन्येषां तदपि नेत्यर्थः । यद्यप्यन्यधर्माभावोऽनसूयायां न हेतुः, तथापि स्वनिष्ठतादृग्धर्माणामप्यधुना नाशात् तदुपलक्षकोऽयं ग्रन्थ इति ज्ञेयम् । एवं सत्यागमनसमये प्रतिबन्धकृतिहेतुभूतपत्यादिनिष्ठधर्मा एव पूर्वपूर्वोपाधिशब्देनोच्यन्त इत्यपि ज्ञेयम् ॥ ३१ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

मैवं विभोर्हतीत्यत्र आदाविति प्रकारत्रये **आदौ स्वरूपतः** क्रूरत्वे इत्यर्थः, **फलत** आहुः **नापीय**मिति, विरुद्धविधानात् फलतः क्रूरत्वमित्यर्थः, **अत** इति अवतीर्णे सत्युचितत्वादित्यर्थः, **अन्यदा फलरूपानन्दाभावेऽयं** हेतुः, **उचित एवे**ति फलानुभावकत्वादितिभावः, **अर्थतः** क्रूरत्वमाहुः **किञ्च दये**ति, दयाभावबोधकत्वादित्यर्थः, दयाभावं विवृण्वन्ति **संसारे**ति, **तद्रूप** इति पतिरूप इत्यर्थः, **अन्यथे**ति गोपिकादिरूपा अस्मानन्येभ्यः **प्रदर्शये**त्यर्थः, मूलपदार्थमाहुः **प्रेमे**ति, प्रेमप्राप्ता इत्यर्थः, **रजः** रजोधारितवत्य इत्यर्थः, **छाया** छायामाश्रित्य तदनुगा इत्यर्थः, त्रयमुक्तं, मूलप्राप्तिं प्रकारान्तरेण व्याकुर्वन्ति **चित्ते** इति, **चरणावलम्बिनि चित्ते** स्थितिस्तन्निष्ठतेत्यर्थः, **अध** इति चरणाधोभागे स्थितिं **स्वामिनो निद्रासमय** इत्यादिना विवरिष्यन्ति, **पादयोः समर्पित**मिति चरणाभरणस्थले पुष्पाभरणवत् बद्धमित्यर्थः, मुक्तेषु केशेषु तुलसिदाम स्थापनं न सम्भवतीत्याशयेन केशपदस्यार्थमाहुः **केशसम्बन्धिभिरि**ति, **न तत्र स्थिति**रिति तदा तुलसिदामप्रेषणे कुत्रेतिभावः ॥ २९ ॥ **गृह्णन्ती**त्यत्र **सर्वत्र पर्यटन**मिति कुर्वन्त्यो भवामेतिशेषः ॥ ३० ॥ **पतय** इत्यत्र **त्यागे**ति **नास्त्येवे**त्ययोगव्यवच्छेदक एवकारः ॥ ३१ ॥ **न प्रीतय** इत्यत्र **बाधितत्वा**दिति भगवत्यङ्गाङ्गिभावाभावादित्यर्थः ॥ ३२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गृह्णन्ति नो न पतय इत्यत्र **गमनमेव विधेही**ति भगवद्गमनेऽस्माभिरपि तत्रैव भगवत्सङ्गे गन्तव्यमितिभावः ॥ ३० ॥ **पतयो नाभ्यसूयेरन्नि**ति **त्यागाग्रहणसम्भावनैव** नास्तीति भवतीनां पतयोऽभ्यसूयामपि न करिष्यन्तीत्युक्तौ त्यागस्य अग्रहणस्य च सम्भावनैव नास्तीत्यर्थः, त्यागश्च अग्रहणं च त्यागाग्रहणे त्यागाग्रहणयोः सम्भावना त्यागाग्रहणसम्भावनेतिसमासः, **त्यागो** नाम पुनरस्वीकारः **अग्रहणं** तात्कालिकोऽस्वीकारः, **पूर्वपूर्वोपाधिरहिता** इत्यस्यार्थष्टिप्पण्यामुक्तः ॥ ३१ ॥ **न प्रीतयेनुरागाये**त्यत्र **अङ्गयोरि**ति **न वक्तव्य**मिति यज्ञपत्नीनामङ्गवत्त्वेपि भगवतोङ्गवत्त्वाभावात् सिद्धान्ते भगवदङ्गस्य भगवदभेदाङ्गीकारात् "केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृ"गितिवसुदेवस्तुतौ उक्तत्वात् ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवमुक्ता विप्रपत्न्य आहुः—मैवमिति द्वयेन । एवं नृशंसं परुषं वचो भवान् गदितुं मार्हति नैव योग्यो भवति, परमाप्तत्वात् । अतः स्वाज्ञारूपं निगमं न पुनरावर्तत इति वेदवाक्यं सत्यं कुरुष्व । ननु 'मद्दासानामेव अपुनरावृत्तिः श्रूयते, न संसारिणाम्' इत्याशङ्क्याहुः—तवेति । समस्तबन्धून् पतिपुत्रादीन् अतिलङ्घ्य तिरस्कृत्य त्वया यदवसृष्टमवज्ञाऽपि दत्तं तुलसिदाम बहुमानेन केशैर्निवोढुं दासीं भवितुं वयं तव पादमूलं प्राप्ता इत्यन्वयः । अतो न पुनर्गमनं युक्तमिति भावः ॥ २९ ॥ यदुक्तं 'पत्युपकाराय गच्छत' इति तत्राहुः—गृह्णन्तीति । नोऽस्मान् पत्यादयो न गृह्णन्ति, तानतिलङ्घ्यागतत्वान्नैव ग्रहीष्यन्तीत्यर्थः । बन्धवो ज्ञातयः, सुहृदो मित्राणि, अन्ये अपरिचिता जना गृहाद्विनिःसृता अस्मान् कुत एव गृह्णीयुः ? । प्रतिबन्धकदोषनिवर्तनेऽपि त्वं समर्थोऽसि' इति सूचयन्त्यः सम्बोधयन्ति—अरिन्दमेति । तस्मात् भवतः प्रपदयोः पादाग्रयोः पतितात्मनां पतितदेहानां नोऽस्माकं त्वत्तोऽन्या गतिर्न भवेत् नास्त्येव, अतस्तत् स्वदास्यमेव विधेहि सम्पादय ॥ ३० ॥ एवं सम्प्रार्थितो भगवानाह—पतय इति । मयोपेताः भक्ततयाङ्गीकृता युष्मान् पत्यादयो ये चान्ये लोका जनास्ते केऽपि नाभ्यसूयेरन् दोषारोपेण न पश्येयुः अज्ञभागिनो देवा अप्यनुमन्वते निर्दोषतयाङ्गीकरिष्यन्ति, अन्यस्य तु का वार्तेत्यर्थः ॥ ३१ ॥ यदास्य प्रार्थितं तत्राह—नेति । हि यस्मात् इह संसारे अङ्गसङ्गः देहानां निकटवर्तित्वं नृणां प्रीतये सुखाय अनुरागाय स्नेहवृद्धये च न भवति, अनादरहेतुत्वात् । तस्मादित्यादि स्पष्टम् ॥ ३२ ॥

अन्वितार्थप्रकाशिका

मैवमिति ॥ हे विभो ! एवं नृशंसं परुषं वचो भवान् गदितुं मार्हति परमाप्तत्वात् । अतः स्वाज्ञारूपं निगमं "न पुनरावर्त्तते" इति वेदवाक्यं सत्यं कुरुष्व । यतः समस्तबन्धून् पतिपुत्रादीन् अतिलङ्घ्य तिरस्कृत्य त्वया पदावसृष्टमवज्ञयाऽपि दत्तं तुलसीदाम बहुमानेन केशैर्निवोढुं दासीभवितुं वयं तव पादमूलं प्राप्ताः ॥ २९ ॥ गृह्णन्तीति ॥ हे अरिन्दम शत्रुनाशक ! नोऽस्मान्पतयः पितरौ सुता वा गृह्णन्ति न ग्रहीष्यन्ति तथा भ्रातृबन्धुसुहृदश्च न गृह्णन्ति । तदा अन्ये अपरिचिता जनाः गृहाद्विनिःसृता अस्मान् कुत एव गृह्णीयुः । तस्मात् भवतः प्रपदयोः पादाग्रयोः पतितात्मनां पतितदेहानां नोऽस्माकं त्वत्तोऽन्या स्वर्गादिरपि गतिर्न भवेत् मा भूत् नास्त्येव वा अतस्तत् स्वदास्यमेव विधेहि सम्पादय ॥ ३० ॥ पतय इति ॥ मयोपेताः भक्ततयाऽङ्गीकृताः वो युष्मान् पतयः पितृभ्रातृसुतादयश्च ये चान्ये लोकाः जनास्ते केऽपि नाभ्यसूयेरन् दोशारोपेण न पश्येयुः । प्रत्यक्षं देवान् प्रदर्श्याह । इमे यज्ञभागिनो देवा अप्यनुमन्वते निर्दोषतयाऽङ्गीकुर्वन्ति । अन्यस्य तु का वार्तेत्यर्थः । एवं हि लट्प्रयोगस्वारस्यम् ॥ ३१ ॥ अङ्गसङ्गाभिलाषं दृष्ट्वाऽऽह—नेति ॥ हि यस्मात् इह संसारे ब्राह्मणीभिर्युष्माभिः मम अङ्गसङ्गः नृणां प्रीतये सुखं सम्पादयितुं न स्यात् ।

नतराम् अनुरागाय स्नेहं बर्द्धयितुं च भवति। लोकविद्विष्टत्वेन अनादरहेतुत्वात्। तस्मान्मयि मन एव युञ्जानाः सत्यः अचिरात् मामवाप्स्यथ ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मैवमिति हे विभो भवान् एवं नृशंसं क्रूरं गदितुं मार्हति निगमं न मे भक्तः प्रणस्यतीति स्ववचनं न स पुनरावर्त्तत इति वेदवचनं वासत्यं कुरुष्व तव पदावसृष्टं तिरस्कारेणापि दत्तं तुलस्याः दाममालां केशैर्निर्योढंधारयितुं समस्तबंधूनअतिलंध्य अतिक्रम्य वयं तव पादमूलं प्राप्ताः ॥ २९ ॥ नोऽस्माकं यत्पादयो न गृह्णंति अन्ये तु कुतः हे अरिंदम कामक्रोधादिनाशनभवतः प्रपदयोः तवचरणसमीपे पतितदेहानां नोऽस्माकं अन्या त्वदन्या गतिर्न भवेत्। तथा तत्तवदास्यं विधेहि ॥ ३० ॥ मया उपेता अनुज्ञातः देवा अपि अनुमन्वते युष्माकं सत्कारं कुर्वंति ॥ ३१ ॥ तथापि त्वां त्यक्त्वा वयं गंतुमसमर्था इत्याशंकायामाह इह संसारे नृणां सर्वजनानां अंगसंगो निरंतरं मम सान्निध्यं यत्तत्प्रीतये सुखाय न भवति अनुरागाय मयि स्नेहायापि नास्ति अतिपरिचयादवज्ञा स्यादिति भावः तस्मात् हरे स्थिताः सत्यः मनो मयि युंजानाः गुणगानेन संलग्नं कुर्वाणाः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वमनोरथाननुगुणोक्तिश्रवणान्निर्विण्णा आहुः ॥ मैवमिति ॥ हे विभो श्रीकृष्ण, भवान् एवं 'तद्यात देवयजनम्' इत्येवं नृशंसं परुषं, वचो वचनं, गदितुं वक्तुं, मा अर्हति त्वमेवं वक्तुं योग्यो न भवसीत्यर्थः। निगमं प्रतिज्ञां, 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः'। 'न मे भक्तः प्रणश्यति' इत्यादिवचनरूपं प्रतिज्ञापरपर्यायं निगममित्यर्थः। यद्वा। 'न स पुनरावर्त्तते' इत्येवंरूपं निगमं वेदं, सत्यं कुरुष्व। वयं तु समस्तबन्धून् अतिलङ्घ्यातिक्रम्य, पदा पादेन, अवसृष्टमवज्ञया दत्तमपीत्यर्थः। तुलसिदाम तुलसिकामालिकां, केशैर्मूर्द्धजैः बहुमानेनेत्यर्थः। निवोढुं नितरां धत्तुं तव पादमूलं, प्राप्ताः। तव दासीभवितुमायाताः स्मेति भावः ॥ २९ ॥ गृह्णन्तीति ॥ किं च नोऽस्मान्, सांप्रतं, पतयः नो गृह्णन्ति, पितरौ न गृह्णीतः, सुता वा पुत्रा अपि, न गृह्णन्ति। भ्रातरश्च बन्धवश्च, न गृह्णन्ति, अन्ये चापरे तु, कुत एव गृह्णीयुः। तस्माद्धेतोः, हे अरिंदम, भवत्प्रपदयोस्त्वच्चरणारविन्दयोः, पतिता आत्मानो देहा यास तासां, यद्वा। पतिताः समर्पिता आत्मानः प्रत्यगात्मानो याभिस्तासां, नोऽस्माकं, अन्या गतिः, न भवेत्। अस्मत्समीहितोपायोऽन्यो नास्तीत्यर्थः। अतः, त्वमेव तदस्मदभिमतं, विधेहि। यद्वा। अन्या गतिः स्वर्गादिरपि, न भवेन्मा भूदित्यर्थः। किं तु तत् त्वदविश्लेषेण त्वद्दासीत्वमेव, विधेहि। त्वमेवास्माकं वाञ्छितं संपादयेत्यर्थः ॥ ३० ॥ एवमुक्तो भगवांस्तावदयदुक्तं 'पत्यादयः केऽपि नास्मान् गृह्णन्ति' इति तत्रोत्तरमाह ॥ पतय इति ॥ हे साध्व्यः, वो युष्मभ्यं, पतयः न अभ्यसूयेरन्। पितृभ्रातृसुतादयश्चापि, नाभ्यसूयेरन्, ये लोकाश्चान्ये जना अपि, नाभ्यसूयेरन्। यतः मयाऽन्तर्यामिणा, उपेता अनुज्ञाताः सन्तः, अनुमन्तारो भवेयुः। प्रत्ययार्थं ताभ्यो देवान् प्रत्यक्षं प्रदर्श्याह। इमे देवा अपि, अनुमन्वते ॥ ३१ ॥ यदुक्तं 'तद्विधेहि' इति तत्रोत्तरमाह ॥ नेति ॥ इह लोके, नृणां अङ्गसङ्गः देहयोगः, प्रीतये वैषयिकसुखोत्थप्रीत्यर्थं, न युक्तः। अपि तु अनुरागाय मयि प्रीत्युत्पादनाय, युक्तो हि। जन्मनः फलं मद्भक्तिरेवेत्यर्थः। यद्वा नृणां चेतनानां, अङ्गसङ्गः, अनुरागाय तादात्विकरागाय एव, न तु प्रीतये कालान्तरे प्रीतिकृन्नेत्यर्थः। विश्लेषस्तु कालान्तरेऽपि प्रीतिवर्द्धक इत्यभिप्रायः। तत्तस्मात्, परोक्षमपीति शेषः। मयि, मनः युञ्जाना नियोजयन्त्यः सत्यः, अचिरात् एव, मां अवाप्स्यथ। ससृतिबन्धाद्विमुक्ताः सत्यो नित्य यद्दास्यमेव करिष्यथेति भावः। अत्र श्रीगोपालानन्दस्वामिचरणास्तु अङ्गसङ्गो निरन्तर मम सांनिध्यं, यत्तत्, प्रीतये सुखाय, न भवति। अनुरागाय मयि स्नेहायापि, न भवति 'अतिपरिचयादवज्ञा' इति अभियुक्तोक्तेरित्याहुः ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मैवमिति : १०.२३.२९.

शिरस्याधायैव व्रजत पुनरित्युक्तिमिह ते व्रजामः स्वं गेहं स्वमतिसरलानन्यगतिकाः।
पदं ते प्राप्तानां भुवि न पुनरावृत्तिरिति या तया श्रुत्या क्वेतः सदय वद गन्तव्यमधुना ॥ ६० ॥

गृह्णन्ति न इति : १०.२३.३०.

स्त्रीत्वात् कृतापराधत्वादनन्याः सम्प्रति प्रभो। चिरमेवं समालोच्य ब्रूह्यच्युत यदच्युतम् ॥ ६१ ॥

पतय इति : १०.२३.३१.

क्रूरः कृतान्तोऽपि भवेन्न तस्मिन् यो मत्कृपानुग्रहपात्रभूतः।
तद्भ्रातृभर्त्राप्तजनः कुतः स्यात् तद्यात निःशङ्कहृदः स्वगेहम् ॥ ६२ ॥

न प्रीतय इति : १०.२३.३२

अनङ्गसङ्गोत्सुकमानसानां मदङ्गसङ्गः सुतरामयोग्यः। क्वचिन्मनोजातसुखस्पृहा चेत्तत्त्वं मनोजातमिहानुयुङ्क्त ॥ ३२ ॥

कृष्णप्रिया

ऋषि पत्नियों ने निवेदन किया कि हे समर्थ स्वामिन्! अब आप ऐसे कठोर स्नेहशुन्य वचन हमें कृपया न सुनावे। भगवन्! सर्वधर्मान् परित्यज्य यह आप की प्रतिज्ञा है, यद्गत्वा न निवर्तन्ते यह भी आप का वाक्य है, "यमेष वृणुते" यह निगम का निर्देश है। ये सर्व वचन आप के ही वचन है, वेदेतुल्य हैं अब आप आप इन वचनों को सत्य करें। हम सब आप के श्रीचरणों कमलोमें शरणागत बन कर आये हैं। हम हमारे पति पुत्र बन्धु आदि परिवार को छोडकर आपके चरणों में आये हैं हमारी कामना है कि आप के श्रीचरणों से निर्माल्य रूपमें विलग की गई (बडी की हुई) उच्छिष्ट श्री तुलसीजी की माला को प्रसादी रूपमें हमारे केशों में धारण करना चाहते हैं। इस लिये ही आप के चरण सरोज मूलमें आयें हैं॥ २९॥ अब भगवन् आप हमारी परिस्थिति को सुनिए, औरों की बात तो कौन लेकिन हमारे हैं वे हमारे पतिदेव, माता पिता, पुत्र भाई बन्धुजन और सुहृज्जन हमें स्वीकार नहीं करेंगे क्यों कि हमने उन सब की बाते टाल दी और यहां आये। अये शत्रु संतापक श्यामसुंदर अब तो आप हो हमारी गति है, आप हीं हमारे आश्रय हैं, आपके समीप ही हमें रख लीजिए॥ ३०॥ भगवान् श्रीकृष्णने कहा, हे द्विज पत्नियाँ! आप अपने घर जाइये आप चिन्ता न करे, तुम्हारे पति, पुत्र, भाई बन्धु आदि कोई भी तुम्हारा न तिरस्कार करेंगे न दोषारोपण करेंगे क्योंकि तुम मेरे पास आई हो अधिक क्या कहा जाय। मेरे पास आने से देवता भी आदर करेंगे, सच कहो तो जो मेरे पास आ जाते हैं उनका देवता भी सम्मान करते हैं॥ ३१॥ हे ऋषिपत्नियाँ इस संसारमें भगवत्स्नेह तो आत्मस्नेह है मनुष्यों को इस स्नेहमें अङ्गसङ्ग या अनुराग मुझमें स्नेह कभी उत्पन्न नहीं करेगा। इस लिए आप घर लौट जाईये। आप अपने घरमें ही रहकर मुझमें अपना मन निरुद्ध कीजिए। इसी से मुझे शीघ्र प्राप्त करेंगे॥ ३२॥

श्रीशुक उवाच

इत्युक्ता [1]द्विजपत्न्यस्ता यज्ञवाटं पुनर्गताः। ते चानसूयवः [2]स्वाभिः स्त्रीभिः सत्रमपारयन्॥ ३३॥
तत्रैका विधृता भर्त्रा भगवन्तं यथाश्रुतम्। हृदोपगुह्य विजहौ देहं कर्मानुबन्धनम्॥ ३४॥
[3]भगवानपि गोविन्दस्तेनैवान्नेन गोपकान्। चतुर्विधेनाशयित्वा स्वयं च बुभुजे प्रभुः॥ ३५॥
एवं लीलानरवपुर्नृलोकमनुशीलयन्। रेमे गोगोपगोपीनां रमयन् [4]रूपवाक्कृतैः॥ ३६॥

कर्दमक्षमा

अन्वयः—हे राजन् इति उक्ताः, ताः द्विजपत्न्यः पुनः यज्ञवाटम् गताः च ते अनसूयवः जाताः, ताभिः स्त्रीभिः सत्रम् अपारयन्॥ ३३॥ तत्र एका भर्त्रा विधृता, यथा श्रुतम् भगवन्तम् हृदा उपगुह्य, कर्म अनुबन्धनम् देहम् जहौ॥ ३४॥ भगवान् गोविन्दः अपि तेन एव चतुर्विधेन अन्नेन गोपान् आशयित्वा, प्रभुः स्वयम् च (बलभद्रः) बुभुजे॥ ३५॥ इत्थं लीलानरवपुः नृलोकम् अनुशीलयन् रूपवाक्कृतैः गोगोपगोपीनाम् रमयन् रेमे॥ ३६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनसूयवः तासु अदोषदृष्टयः॥ ३३॥ देहमिति। तदीयं देहं तत्र विहाय चैतन्येन भगवंतं प्रापेत्यर्थः॥ ३४–३५॥ अनुशीलयन्ननुकुर्वन्। गोगोपगोपीनामिति कर्मणि षष्ठी। रूपवाक्कृतैः रूपेण वाचा कृतैश्चरित्रैश्च रमयन्। तान् रमयितुं रेम इत्यर्थः॥ ३६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

याः समागतास्ताः। इतीत्थम्। ते विप्राः। अपारयन् समापयामासुः। 'पार–कर्मसमाप्तौ' चुरादि'॥ ३३॥ तत्र तासु विधृता रज्ज्वादिनाऽऽबध्य स्थापिता। तदीयम् भत्रा ममत्वेन स्वीकृतम्। तत्र तत्पार्श्वे। इत्यर्थ इति। देहे एव तस्य स्वत्वं न त्वात्मनीति तस्यगोचरत्वेन स्वत्वाविषयत्वात्। अतस्तत्स्वत्वाधिकरणं तत्रैव त्यक्त्वा तीव्राभिलाषेण भगवंतं प्राप्तेति। भगवद्ध्यानादिना कर्मणां क्षीणत्वादिति भावः॥ ३४॥ तेनैव विप्राभिरानीतेन। आशयित्वा भोजयित्वा॥ ३५॥ एवमुक्तप्रकारेण। लीलावरवपुरिति ब्राह्मणीगमने तु लीलावैगुण्यं स्यादिति भावः। तान् गोपादीन्। रमयन्निति तुमर्थे शतृप्रत्ययः। इत्यर्थ इति। तदर्थमेव भगवतो रमणं न स्वार्थमाप्तकामत्वादिति ध्वनितम्॥ ३६॥

---

[1] मुनि–श्रीधर. वंशी. वीर. विज.। [2] स्ताभिः–वीर. विज.। [3] भगवानथ–वीर.। [4] न्नृर–वीर.।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ताभिः श्रीभगवदनुगृहीताभिः इति सत्रस्य श्रीभगवदुपेक्षया दोषः परिहृतः साद्गुण्यविशेषश्चाभिप्रेतः स्वाभिरिति पाठे निजनिजाभिः ।। ३३ ।। अचिरान्मामवाप्स्यथेत्युक्तं तच्च केवलं नाश्वासनायैव किन्तु बाढमङ्गीकारायेति दृष्टान्तेनाह—तत्रेति । तत्र यज्ञवाटे एका सर्वासामिति पश्चात् स्थिता विशेषेण बालाद् धृता भगवन्तमिति सर्वातिशयगुणरूपादिकं सूचितं यथाश्रुतमिति तत्रापि श्रीकृष्णरूपत्वं हृदा प्रेममयसङ्कल्पसिद्धेन देहान्तरेणोपगुह्य भयार्त्ततया सङ्कोचपरित्यागेन शरणागतां मां रक्षरक्षेति गृहीत्वेत्यर्थः । तस्य च देहस्य भगवत्प्रेममयत्वेन भगवत्सम्बन्धिसिद्धस्तदनुयायित्वात् सिद्धत्वमपि ततः कर्मानुबन्धनमेवेदं देहं विजहाविति सविशेषणोक्तेर्नतु तदालिङ्गनसाधनं प्रेमानुबन्धनमपीत्यर्थः । विशब्दः पुनरावृत्तिं निषेधयति—अतः पतिसम्बन्धिनं देहं पत्य एव दत्वा श्रीभगवत्प्रेमसिद्धेन देहेन तं प्राप्तेति विवक्षितम् "यं यं चापि स्मरन् भावम्" इत्यादेः "ये यथा मां प्रपद्यन्ते" इत्यादेश्च श्रीगीतातः । प्राप्तिश्चेयं गोलोकाख्ये गोकुलस्यैव प्रकाशविशेषे ज्ञेया पूतनामोक्षे निरूपितत्वात् अग्रे च निरूपयितव्यत्वाच्चेति ।।३४।। इत्थं तासां भक्तिविशेषो व्यञ्जितः तासु श्रीभगवदनुग्रहविशेषं चाह—भगवानिति । तत्रैवं वृत्तं जातं श्रीभगवानप्येवमकरोदित्यपि शब्दार्थः गोविन्दः श्रीगोकुलेन्द्र इति गोपपालने युक्तता तेनैवेति गोपापेक्षया अन्नस्याल्पत्वं बोध्यते तथापि पूर्त्तौ हेतुर्भगवान् सर्वसम्पत्त्याश्रयः गोपकानिति तदनुकम्पितत्वं बोधयति तेषु श्रीरामोऽपि गृहीतः तेष्विव तस्मिन्नपि तदाग्रहसम्भवात् यतः प्रभुरलङ्घ्येच्छ इत्यर्थः । स्वयं च तान् प्रति परिवेष्य स्वयमपीति तासु तादृशप्रसादे श्रीमुनीन्द्रस्य चमत्कारः अत्राप्यर्थे हेतुः प्रभुः निरर्गलानुग्रह इत्यर्थः ।। ३५ ।। एतच्च यज्ञपत्न्यनुग्रहादिकं तस्याखिलचेष्टितं सौन्दर्य्यादिकं च श्रीव्रजजनप्रमोदनायैवेत्युपसंहरति—एवमिति । अनेनेदृशबहुललीलान्तरमप्यस्तीति सूचितं लीलामयनराकारवपुः अनुशीलयन् अनुशिक्षयन् मनुष्यलोके निजभक्तिं प्रवर्त्तयन् इत्यर्थः । यद्वा, नृलोकं तद्व्यवहारम् अनुशीलयन् सदाचरन्नित्यर्थः ।। ३६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ताभिः श्रीभगवदनुग्रहीताभिः, इति सत्रस्य साद्गुण्यविशेषोऽभिप्रेतः । स्वाभिरिति पाठे निजाभिः, अन्यथा यज्ञसमापनासिद्धेः । अनसूयव इति नाभ्यसूयेरन्निति श्रीभगवदुक्तिप्रसादेन, किंवा, श्रीभगवदनुगृहीतानां तासां समागमप्रभावेणैव ज्ञेयम् ।। ३३ ।। पूर्वमेव तासां श्रीभगवति भक्तिविशेषदर्शनेन तेषां तासु भक्तिरेव जातास्तीत्यासयेन तासां तामुपलक्षणेन दर्शयति, यद्वा (भा १०।२३।३२) 'अचिरान्मामवाप्स्यथ' इत्युक्तम् तच्च केवलं नाश्वासनायैव, किन्तु तत्त्वतोऽपि साक्षादेकत्यात्तथा सिद्धेरित्याह–तत्रेति यज्ञवाटे तासु मध्य इति वा, विशेषेण बलाद्धस्तग्रहणपादवन्दनाद्याग्रहेण धृता सती देहं विशेषेण पुनरतादृशजन्माभावप्रकारेण जहौ । कुतः ? कर्मभिरनुबध्यत इति तथा तत्, कर्माधीनदेहेन भगवदप्राप्तेः । अतो गुणातीतं सच्चिदानन्ददेहं तदानीमेव गोकुले प्रापेत्यर्थः । एतदभिप्रायेणैव तैर्व्याख्यातम्, भक्ताया इत्येकवचनं सद्यः सायुज्याभिप्रायेणेति, सायुज्यञ्च श्रीभगवता सह सच्चिदानन्ददेहेन नित्यसंयोगः, अत्रापि तदीयमित्यादि, तत्र तदीयमिति भर्त्तृसम्बन्धिनम्, चैतन्येनेति चिद्रूपेणेत्यर्थः । इत्थं तासां भक्तिविशेषोऽभिव्यञ्जितः ।। ३४ ।। तासु च श्रीभगवदनुग्रहविशेषमाह–भगवानिति । प्रकटसर्वैश्वर्य्यसम्पूर्णोऽपि, इति तस्यान्नाभावस्तथा तस्य तदीयानाञ्च क्षुद्बाधो निरस्तः । तथापि तेन यज्ञपत्न्यानीतेनैव, एवं तस्य चातुर्य्यमप्युक्तम् । गोपकानिति कप्रत्ययः, स्नेहाभिप्रायेण, आशयित्वा स्वयमेव परिवेषणपूर्वकं भोजयित्वा पश्चाद्बुभुजे तत् यतो गोविन्दो गोपचूडामणिर्गोपेषु परमवत्सल इत्यर्थः । चकारात् श्रीबलरामोऽपि, श्रीकृष्णापेक्षया तस्यादावभोजनात्; यद्वा गोपेष्विव श्रीबलदेवस्यान्तर्भावः । ततः श्रीकृष्णप्रीत्या पूर्ववत् पद्मपत्रालिवन्मण्डलिकयोपविष्टानां मध्ये कर्णिकावन्निविष्टस्य तस्यादौ तैः सह भोजनं ज्ञेयम् । अत्यर्थे चकारः । प्रभुः सर्वथा परिपूर्णोऽपि स्वयमपि बुभुजे, तास्वनुग्रहविशेषात् । यद्वा, ननु बहूनां भोजनमेकेनैव युगपदचिरात् कथं सिध्येत् ? तत्राह प्रभुः सर्वशक्तिमानित्यर्थः । अतस्तासु कृपया बहुलमप्यभुङ्क्तेति ज्ञेयम् ।। ३५ ।। एतच्च यज्ञपत्न्यनुग्रहादिकं तस्याखिलचेष्टितं सौन्दर्यादिकञ्च श्रीव्रजजनप्रमोदायैवेत्युपसंहरति एवमिति । अनेनेदृशं बहुलं लीलान्तरमप्यस्तीति सूचितम् । लीलामयनराकारवपुरनुशीलयन् अनुशिक्षयन् मनुष्यलोके निजभक्तिं प्रवर्त्तयन्नित्यर्थः । यद्वा, नृलोकव्यवहारमनु निरन्तरं शीलयन् स्वाभाविकत्वेनाचरन्नित्यर्थः, लौकिकलीलयैव प्रायो निजप्रेमसम्पत्तेः ।। ३६ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विधृताः अप्रेषिताः ।। ३४–३६ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं भगवतोक्तास्ता द्विजपत्न्यो यज्ञवाटं पुनर्जग्मुस्ततः ते द्विजाः अनसूयव एव ताभिः सह सत्रम् अपारयन् समापितवन्तः ।। ३३ ।। तत्र द्विजपत्नीनां मध्ये काचिद्भर्त्रा विधृता निवारिता सती यथाश्रुतं भगवन्तं हृदोपगूह्य संश्लिष्य कर्मानुबन्धनं कर्मायत्तं स्वदेहं तत्याज ।। ३४ ।। अथ भगवांस्तेनैव द्विजपत्नीसमर्पितेनैव अन्नेन गोपकान् भोजयित्वा तच्चतुर्विधमन्नं स्वयमपि

बुभुजे ।। ३५ ।। लीलया न तु कर्मणा नरस्येव वपुर्यस्य सः भगवानित्थं रूपादिभिः कृतानि चेष्टितानि तैश्च नृलोकमनुशीलयन् अनुकुर्वन् गोगोपगोपीनाम् इति कर्मणि षष्ठी गवादीन् रमयन् स्वयमपि रेमे । यद्वा नृलोकमनुशीलयन्ननुरञ्जयंश्च गोगोपगोपीनां मध्ये रेमे ।। ३६ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इति शब्दो हेतौ ।। ३३ ।। विधृता पृथक्कृता त्यक्तेत्यर्थः "विनिषेधे पृथग्भावे" इति यादवः कर्मानुबन्धनं कर्मानुगम् ।। ३४–३५ ।। वाग्भिः कृतैः कर्मभिश्च गोगोपगोपीनां मनांसि रमयन् ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यथाश्रुतं तादृशमेव तं प्रापेत्यर्थः । तच्चाप्रकटलीलायामेवेति ज्ञेयम् ।। ३४–३६ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवमासां साक्षादागत्यं पश्यन्तीनां कथामुपसंहृत्य पत्या धृतायाः कस्याचित् कथां प्रथयति––तत्रैकेत्यादि । तत्र देवयजने भर्त्रा पत्या विधृता अवरुद्धा निर्गन्तुमसमर्था यथाश्रुतं लोकमुखेन यथाकर्णितं भगवन्तं हृदोपगुह्य कर्मानुबन्धनं देहं जहौ । कर्म शुभाशुभं कर्म प्रारब्धम्, तदेवानुबन्धनं यस्य तथाभूतं देहं जहौ । अतथाभूतं देहमासाद्य तदङ्गसङ्गमङ्गलयोग्या बभूव । सद्य एव शुभाशुभकर्मक्षयादविलम्बाभावः । गोपाङ्गनानां मध्ये काचिद्भूत्वातदङ्गसङ्गिनी बभूवेत्यर्थः ।। ३४–३५ ।। उपसंहरति–एवमित्यादि । एवमनेन प्रकारेण सर्वप्रेमास्पदेन विलासेन नृलोकमनुशीलयन्ननुकुर्वन् रेमे । गोगोपगोपीनां रूपवाक्कृतै रमयन्नात्मानमिति शेषः । गवां रूपैर्गोपानां वाचा गोपीनां कृतैश्चरितैर्लीलानरवपुर्लीलाप्रधानं नरवद्वपुर्यस्य, लीलाया आननं आनः प्राण इति यावत् । 'अन प्राणने' इत्यतो लीलानरं रातीति लीलानरं वपुर्यस्येति वा ।। ३७–४० ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

देहं कर्मानुबन्धनमिति । तस्य ध्यानलब्धालिङ्गनेनैव सर्वकर्मनाशो जात इति भावः । नन्वेवं चेत् साक्षाद्भूतानां मनसा कृतालिङ्गनानां कथं कर्मनाशो नाजनीति नाशङ्कनीयम्––"अचिरान्मामवाप्स्यथ" इति स्वयमेवोक्तत्वात्, कर्मनाशे कथं तत्प्राप्तिः ? किन्तु दग्धपटवत्तासां देहः कियन्तमेव कालं स्थित इति भावः ।। ३५ ।। एवं लीलानरवपुः––लीलानामननम् आनः प्राणनमित्यर्थः । तम् रातीति आनरः प्राणप्रदस्तथाविधं वपुर्यस्य ।। ३७–४० ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इत्युक्तास्ताः कृष्णस्याभिप्रायं ज्ञात्वैव गताः रासारम्भे गोप्यस्तु तदभिप्रायं ज्ञात्वैव स्थिता इति प्रेम्णि न कापि कापि हानिरिति ज्ञेयम् ।। ३३ ।। तत्र यज्ञवाटे एका सर्वासामपि पश्चात् स्थिता अत एव विशेषेण बलात् धृता कर्मानुबन्धनमेव देहं जहौ नतु प्रेमानुबन्धनं देहं तदानीमेव महाविरहौत्कण्ठ्यप्रवृद्धमनोरथेनोद्भावित भगवता स्फूर्तिप्राप्तेनोपगृहितं च तस्मात्तेन देहेन चिन्मयेन सर्वजनालक्षितेन युक्ता सती सा शीघ्रमेव ततः स्थानादभिसृत्य श्रीभगवन्तं प्रापेति कर्मानुबन्धनमिति पदस्य वैयर्थ्यादेवं व्याख्यातम् । किञ्च, ममतास्पदान् पत्यादीस्त्यक्त्वेति किं चित्रम् अहन्तास्पदं देहमपि त्यक्त्वा काचित्त्वं प्रियं कृष्णमभिसंसारेति प्रेम्णः प्रभावज्ञापनार्थं भगवत्कृपा तामेकामभिसारसमये कर्मानुबन्धं देहं त्याजयित्वैव प्रेमानुबन्धं चिन्मयदेहं ग्राहयामास तदन्यासां सर्वासां तु कर्मानुबन्धानेव देहान् स्पर्शमणिन्यायेन प्रेमानुबन्धांश्चिन्मयानेव चकारेति तद्दिनतस्तासां न स्वस्वपत्याश्लेष इति किमशक्यं भगवत्कृपायाः तस्यामेकांशेनोत्कर्षस्तदन्यास्वप्यन्येनांशेनोत्कर्ष इति तासां तारतम्यं तु भक्तिशास्त्रेष्वनिर्णीतत्वान्न शक्यते वक्तुं सर्वासामेव तासां भगवत्कृपा सिद्धमेव यदुक्तं "कृपासिद्धा यज्ञपत्नीवैरोचनिशुकादयः" इति ।। ३४ ।। भगवानपीत्यपिकारात् सा देहं जहौ भगवानपि गोविन्दः तस्या गाः सर्वेन्द्रियाणि रमणार्थमलक्षितं तदैव विन्दति स्मेत्यर्थो व्याख्येयः । ततश्च तेनैवेत्येवकारेण गोपापेक्षया अन्यस्याल्पत्वं बोधितं प्रभुरिति तदपि तेनैव सर्वेषामुदराणि पूरयामासेत्यर्थः । गोपकानित्यनुकम्पायां कन् चकारेण स्वयं भोक्तुमनिच्छन्नपि बुभुजे इति लभ्यते अनिच्छा च प्रेमवतीनां तासां स्वकृतेन सङ्कल्पभङ्गे न पश्चात्तापोदयात् ।। ३५ ।। एवं याज्ञिकपत्नीर्न रमयामास गोपपत्नीस्तु रमयामासेत्याह, एवमिति लीलामयनरवपुरिति सर्वाभ्योपि सत्यसङ्कल्पतादि शक्तिभ्यो लीलाशक्तेरभ्यर्हितत्वाद्ब्राह्मणीजनरमणे लीलासौष्ठवाभाव एव हेतुरिति भावः । अनुशीलयन् अनुसरन् गोगोपगोपीनामिति कर्मणि षष्ठी वत्सलागोपीनामप्रासङ्गिकत्वादसामयिकत्वाच्च गोप्योऽत्र युवतय एव लभ्यन्ते रूपेण वाचा कृतैश्चेष्टितैश्च रमयन् रेमे इति रासात्पूर्वं व्रजदेवीभिः सह न रमणमिति मतं परास्तमित्येवंविधा बह्व्योऽन्या अपि व्रजलीलामयानुक्ता वर्तन्ते इति भावः ।। ३६ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्सन्निकर्षोऽस्माकं भवतु किं गृहैरित्यत्र साधनभूमौ मत्प्राप्तिसाधनं भक्तिः कर्त्तव्या सा तु स्मरणादिना भवतीत्याह—स्मरणादिति ॥०॥ अनसूयवः अदोषदृष्टयः ॥३३॥ कर्मानुबन्धनंदेहं विजहौ पाञ्चभौतिक देहं विहाय भगवन्तं प्राप्तेत्यर्थः ।३४–३५। लीलास्वपि अनरवपुः अचित्यानन्तानन्दस्वाभाविकविग्रहः नृलोकमनुशीलयन् अनुकुर्वन् रूपवाक्कृतः रूपेण वाचा कृतैश्चरितैश्च गवादीन् रमयन् स्वय रेमे कर्मणि षष्ठी ॥ ३६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

इत्युक्तास्ता भगवद्भावं ज्ञात्वैव यज्ञवाटं यागस्थलं गत "वाटो मार्गवृद्धिस्थाने" इति मेदिनी । गोप्यस्तु तद्भावं ज्ञात्वैव स्थास्यन्तीति प्रियचित्तानुवृत्तिरेव प्रेम्णः पद्धतिः ॥ ३३ ॥ तच्चाश्वासनमात्रं हरिणां तासां कृतमधितु स्वोऽर्पयिष्य त इत्यत्र दृष्टान्तत्वेनाह तत्रेति । तत्र यज्ञवाटे एका सर्वासां पश्चान्निर्गता तत एव भर्त्रा विधृता यथाश्रुतं भगवन्तं नन्दसूनुं हृदोपगुह्य आलिङ्ग्य तद्विरहवह्निना दग्धं कर्मानुबन्धनं प्रारब्धहेतुकं देहं जहौ सद्य एव गोपकिशोरी भूत्वा तं प्राप "ये यथा माम्" इति तदुक्तेः ॥ ३४ ॥ भगवानपि स्वयं बुभुजे इति अहोभाग्यं तासाम् ॥ ३५ ॥ लीलाप्रधानो नराकारवपुर्भगवान् गोगोपगोपीनामिति कर्मणि षष्ठी गोप्योऽत्र तरुण्यः ता एव रमयन् रेमे नतु ब्राह्मणीः तद्रमणे लीलासौष्ठवाभावादिति भावः । रूपेण नटवरवेषेण वाचा मधुरया कृतैश्च लौकिकैश्चरितैः नृलोकमनुशीलयन्ननुसारयन् तद्रीत्येत्यर्थः ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणो

इत्युक्ता भगवतेति शेषः । ते च द्विजास्तेऽप्यनसूयवस्ताभ्यस्ताभिः स्त्रीभिः सह सत्रमपारयन्समापयन् ॥ ३३ ॥ भर्त्रा पत्या विधृता यथा नागच्छेत्तथा बलात्स्थापिताबला यथाश्रुतं भगवन्तं हृदोपगूह्यालिङ्ग्य कर्मानुबन्धनं कर्मायातं देहं विजहौ तत्याज कर्म चानुबन्धो भक्तिः कर्मभिर्व्यक्तोऽनुबन्धस्तौ नौ नियामकौ स नो नियामको यस्य तं देहं तत्रैष्यति काले विधृतं विशेषेण धृतिर्धारणं यस्याः साऽभवत् ॥ ३४ ॥ आशयित्वा स्वयं च बुभुजे तत्रत्यमप्राकृतरसं बुभुजे । अवतारे स्थूलभोजनमपि जनार्दनस्य सम्भवति । यथोक्तं प्रमेयदीपिकायाम् । अवतारेषु स्थूलमपि भुङ्क्त इति । गीतातात्पर्यबृहदारण्यकऋग्भाष्याद्युदाहृत्य सत्तत्त्वरत्नमालोक्तमनुसन्धेयम् ॥ ३५ ॥ एवं लीलानरवपुर्नृलोकमनुशीलयन्ननुकुर्वन्गोगोपगोपीनाम् । कर्मणि षष्ठी गौश्च गोपाश्च तैः सहिताश्च ता गोप्यश्च ता रमयन्स्वयं रेमे । गवि गोपा गोगोपा दिवि तु देवा एव त गोगोपाश्च तथा गावश्च ताभिः पीनां पुष्टां प्रजां रमयन्निति वा रूपवाक्कृतै रूपं च वाक् च तानि कर्माणि च तै रमयन्रेमे । नृपवाक्कृतैरित्यपि पठन्ति ॥ ३६ ॥

श्रीसुबोधिनी

भगवतोनुल्लङ्घ्य वाक्यं तथैव कृतवत्य इत्याहेत्युक्ता इति, अयं यज्ञः प्राथमिक इति सर्वत्र **द्विज**ग्रहणमत एवाग्रे जन्मत्रयं वक्ष्यन्ति समाप्तिपर्यन्तं तु द्विजत्वमेव, ननु दीक्षितविमितादन्यत्रगमने यज्ञनाशश्रवणात् कथं प्रवासो 'गर्भो वा एष यद् दीक्षितो योनिदीक्षितविमितं यद् दीक्षितो दीक्षितविमितात् प्रवसेद् यथा योनेर्गर्भः स्कन्दति तादृगेव तद् यानि दीक्षितव्रतानि तानि पत्न्या' इतिश्रुतेः कथं यज्ञपूर्तिरिति चेत् सत्यं, मुख्या न गता नापि तेषामपि स्वर्गप्राप्तिः किन्तु 'पद'प्राप्तिरेवाग्रे तेषामपि भक्तत्वेन निरूपणात् संस्कारा एते फलोपकारिणो न तु यज्ञोपकारिणः, 'विवदमान आर्त्विज्यं बलीय' इतिन्यायेनापि न तासां मुख्यत्वं कर्मसमयेपि **ता** आगता एवेत्याह **यज्ञवाट पुनर्गता** इति, भगवदुक्तं तथैव जातमित्याह **ते चेति अनसूयव** एव **ताभिरेव** पत्नीभिः स्वस**त्रमपारयन्** समाप्तं कृतवन्तः ॥ ३३ ॥ मुख्या न गतेत्याह **तत्रैकेति**, तासु मध्य एका **घृता** स्व**भर्त्रा** यजमानेन ततोनर्थ एव जात इत्याह **यथाश्रुतं भगवन्तं हृदोपगुह्य देहं विजहा**विति, त्यागे हेतुः **कर्मानुबन्धन**मिति, **कर्माबन्धनं** यस्मात्, अपकारित्वात् त्याग आत्मनोधिकारार्थमेतत्परिग्रह उपकारस्त्वेतावानेव स चान्यथैव सिद्धो भगवानेवोपगूढ इति भगवदालिङ्गिताया न स्थानान्तरं मृग्यते तच्छनुक्तीनामिव, यदैव पुनः कर्मसम्बन्ध आत्मनस्तदैव तेन बध्यत इति कर्मार्थं तत्र न गन्तव्यमवसरस्तु कर्मण इति तस्मात् त्याग एव श्रेष्ठो यज्ञ इदानीं समारूढ इति कर्माधीनत्वाभावात् न कर्मभोगो वक्तव्यो गोपिकानामिव, देवतारूपायाः पत्न्या अधिष्ठानात् कालकर्मस्वभावानिवृत्ता भगवानालिङ्गित इति भगवानपि, अतस्तस्या मुक्तिः सिद्धा ॥ ३४ ॥ तस्यामन्तःसमागतायां तां बालकांश्च भोजितवानित्याह **भगवान**पीति, यद्यप्यन्यथापि सर्वसामर्थ्यमस्ति, आज्ञयापि क्षुन् निवर्तयितुं शक्या, तथापि गवां सर्वस्य धर्मस्यापीन्द्र इति धर्मरक्षार्थं भक्तिरक्षार्थं स्ववाक्यरक्षार्थं च **तेनैवान्नेन** भक्ष्यादि**चतुर्विधेन** सम्पूर्णरसात्मकेन **गोपकानाशयित्वा** भोजयित्वा स्वयं च **बुभुजे**, चकाराद् बलभद्रोपि, स्वस्य भोजनं पूर्ववत्, इदानीं पत्न्या भुक्तमतो 'च' इतिवचनं न विरुध्यते, नन्वेतदपूर्वं कथं कृतवान् ? तदाह **प्रभु**रिति ॥ ३५ ॥ वैदिके ज्ञानकर्मणी निरूप्योपसंहरत्येवमिति, **लीलार्थमेव नरवपुर्नृलोकं** सर्वमेव लौकिकं वैदिक**मनुशीलयन्** स्वधर्मैर्योजयन्नुभयविधानपि भगवच्छास्त्रानुसारिणः कुर्वन् **गोगोपगोपीनां** मध्ये **रेमे**, सम्बन्धी वा भूत्वा, द्वितीयार्थे वा षष्ठी ता **रमयन्** स्वयमपि **रेमे रूपेण** गा वचनेन **गोपान् कृतैर्गोपीः**, सर्वत्र सर्वं वा, सच्चिदानन्दास्त्रयो निरूपिता **रमणकरणरूपाः** स्वस्य रमण त्रयोपि सम्बन्धिनः ॥ ३६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

सत्रमपारयन्नित्यत्र एकस्याः **मरणेपि** सत्रे यजमानस्यापि मरणे तत्प्रतिनिधिः षष्ठस्य तृतीये व्यवस्थापित इति प्रतिनिधिस्थापनेन सत्रपूरणमिति भावः ॥ ३४ ॥ तत्रैकेत्यत्र **स्थानान्तरमिति** देहान्तरमित्यर्थः, **देवतारूपाया** इति दिवुधातोः क्रीडार्थत्वादन्तर्भगवदालिङ्गिताया इत्यर्थः, **भगवानपीति** अन्तर्यामिरूपोपि निवृत्त इतिशेषः, अतः कृष्णे मुक्तिः **सिद्धेति** भावः ॥ ३४ ॥ **भगवानपी**त्यत्र धर्मेति प्राप्तज्ञानानां भिक्षयैव निर्वाह इतिधर्मरक्षार्थमित्यर्थः, **भक्तेति भक्तायाः** प्रसादार्थमित्यर्थः, **स्ववाक्येति** आज्ञया क्षुन्निवारणे प्रेषणवाक्यमयथार्थं स्यादित्यर्थः ॥ ३५ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तत्रैका विधृतेत्यत्र **अपकारित्वात् त्याग** इति देहस्य पतिनिरोध्यत्वेन भगवत्सम्बन्धे प्रतिबन्धकत्वादपकारित्वमवगत्य त्यागः कृत इत्यर्थः, **आत्मनः अधिकारार्थं एतत्परिग्रह** इति, भगवदीयानां देहपरिग्रह **आत्मनो** जीवस्य भगवत्सेवाधिकारार्थं, न हि देहरहितेन केवलजीवेन हरिसेवां कर्तुं शक्यते अतो देहपरिग्रह इत्यर्थः, **उपकारस्त्वेतावानेवेति** जीवे देहकृत उपकारस्तु भगवत्सेवारूपः स उपकारः शरीरेण चेत् सिध्येत् तदा देहः समीचीनो यदि न सिध्येत् तदा तु देहः सर्वदोषनिधिः परमापकारकर्तेति, तदेवाहुरे**तावानेवेति, स चान्यथैव** सिद्ध इति अन्येन प्रकारेण मानसिकालिङ्गनेनैव सिद्धः "हृदोपगूह्य विजहौ" इतिवाक्यात्, तदेवाहुः **भगवानेवोपगूढ** इति, **स्थानान्तरमिति** भगवन्निकटस्थानेतरस्थानं भगवदालिङ्गिताया न भवितुमर्हति, यावद् देहास्तावत् पत्या सह कर्मसम्बन्ध आवश्यकः, कर्मणि कृते पुनर्बन्धसम्भावना, अतो देहत्याग एव श्रेष्ठ इति तं कृतवतीत्यर्थः, यज्ञ इदानीं **समारूढ** इत्यारभ्य **वक्तव्यः** इत्यन्तं, यज्ञे जायमाने मध्ये भगवतौदनयाचनाद् यजमानैरदत्ते यज्ञपत्नीभिः सर्वां सामग्रीं विधाय भगवन्निकटगमनाय प्रस्थिते भर्त्रा निरुद्धैका देहं जहौ, अतो यज्ञात्मककर्मणोऽसिद्धत्वादसिद्धस्य नियामकत्वाभावान् न कर्माधीनताः अतो न भोगो वक्तव्यः, तत्र विलक्षणो **दृष्टान्तः, गोपिकानामिव,** फलप्रकरणे वक्ष्यमाणानामन्तर्गृहगतगोपिकानां यथा भगवद्विरहजन्यदुःखानुभवेन पापक्षयो भगवदालिङ्गनजन्यपरमसुखानुभवेन पुण्यक्षयो निरूपितस्तथैतस्या न निरूपित इत्यर्थः **देवतारूपायाः पत्न्या** इत्यादि "यज्ञो वै यजमान" इतिश्रुतेराधिदैविकयज्ञस्याधिष्ठानं यजमानस्तथाधिदैविकयज्ञपत्न्या अधिष्ठानं यजमानपत्नी, अतो देवतारूपाया आधिदैविकयज्ञपत्न्या अधिष्ठानं यजमानपत्नीदेहस्तस्मात् कालकर्मस्वभावा निवृत्ता इत्यर्थः, तत्र हेतुर्भगवाना**लिङ्गित इतीति,** यज्ञात्मककर्मण असिद्धत्वात् तत्कृतप्रतिबन्धाभावं निरूप्य कालकर्मस्वभावानां निवृत्तिमुक्त्वा भक्तिमार्गीयत्वादन्तर्यामिणि लयासम्भवादन्तर्यामी भगवानपि निवृत इत्याहुः **भगवानपीति,** निवृत्तस्तिरोभूत इति यावत्, अतः सा परमभक्ता पुरुषोत्तमे मुक्तिं प्राप्तेतिसिद्धम् ॥ ३४ ॥ **रमयन्** रूपवाक्कृतैरित्यस्य विवृतौ **सच्चिदानन्दास्त्रयो निरूपिता इति** त्रयः पदार्थाः रूपवाक्कृतरूपाः **सच्चिदानन्दा** इत्यर्थः, त्रयोपि प्रत्येकं सच्चिदानन्दरूपा न तु रूपादिष्वेकैकमितिज्ञेयम् ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ते च ब्राह्मणाः अनसूयवः तासु स्वाज्ञोल्लङ्घनादिदोषदृष्टिरहिता एव, स्पष्टमन्यत् ॥३३॥ तत्र यज्ञवाटे पूर्वं गमनसमय एव एका ब्राह्मणी भर्त्रा विधृता गृहीता सती यथाश्रुतं भगवन्तं हृदा मनसा उपगूह्य कर्मानुबन्धनं यस्य तथाभूतं स्वदेहं विजहौ, विहाय च शुद्धस्वरूपेण भगवन्तं प्राप्तेति ज्ञेयम् ॥ ३४ ॥ भगवानपि ऐश्वर्यादिगुणवत्त्वेन सङ्कल्पमात्रेण अन्नादिसम्पादनसमर्थोऽपि तथा प्रभुरपि राजवदाज्ञयापि तत्सम्पादनसमर्थोऽपि गोविन्दः श्रीकृष्णस्तेनैव भक्तवात्सल्यप्रदर्शनाय विप्रभार्याभ्यो याचितेनैव चतुर्विधान्नेन गोपकान् आशयित्वा स्वयं च तदेव बुभुजे इत्यन्वयः ॥ ३५ ॥ 'एवंविधा अनेका भगवल्लीलाः स्वभक्तानां व्रजवासिनां प्रमोदायैव' इति वदन् उपसंहरति——एवमिति । लीलार्थं स्वीकृतनरवपुः श्रीकृष्णः एवं नृलोकमनुशीलयन् अनुकुर्वन् गोगोपगोपीनाम् इति कर्मणि षष्ठी । रूपवाक्कृतैः रूपसौन्दर्येण वाङ्माधुर्येण कृतैर्नानाविधचरितैश्च गोपादीन् रमयन् रमयितुं रेमे इत्यर्थः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

श्रवणादिति ॥ श्रवणादित्यसार्वत्रिकः श्लोकः । यथा श्रवणात् दर्शनात् ध्यानात् अनुकीर्त्तनात् च मयि भावः स्यात् तथा बहुकालं सन्निकर्षेण न स्यात् । ततो हेतोर्यूयं गृहान् प्रतियात ॥ ३३ ॥ इतीति इत्युक्तास्ता यज्ञपत्न्यः पुनर्यज्ञवाटं गताः । ते ब्राह्मणा अनसूयवः स्वाज्ञोल्लङ्घनादिदोषदृष्टिरहिता एव स्वाभिः स्त्रीभिः सह । ताभिरित्यपि पाठः । सत्रं यज्ञम् अपारयन् समापितवन्तः ॥ ३४ ॥ तत्रेति ॥ तत्र यज्ञवाटे एका ब्राह्मणी भर्त्रा विधृता बलाद् गृहीत्वा रुद्धा सती यथाश्रुतं भगवन्तं हृदा मनसोपगुह्य कर्मानुबन्धनं यस्य तथाभूतं पतिस्वभूतं देहं विजहौ । विहाय च श्रुतस्वरूपेण भगवन्तं प्राप्ता ॥ ३५ ॥ भगवानिति ॥ भगवान् प्रभुरपि गोविन्दः तेनैव द्विजपत्नीभिरानीतेनैव चतुर्विधेनान्नेन गोपकान् आशयित्वा स्वयं च तदेव बुभुजे ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृष्णेऽनन्यभक्त्या यज्ञस्य विष्णोरेव पत्न्याः न तु विप्राणामित्यर्थः। यज्ञवाटं यज्ञस्थानं अनसूयवः दोषारोपणरहिताः ताभिः यज्ञं समापयन् ॥ ३३ ॥ तत्र तासु एका विधृता गृहे रुद्धा हृदा मनसा उपगुह्य आलिंग्य कर्मणा अनुबंधनं संस्था यस्य तं देहं विजहौ ततो भागवतीं तनुं प्राप्ता इत्यर्थः ॥ ३४ ॥ ते ऋषिपत्नीदत्तेनान्नेन नाशयित्वा भोजयित्वा ॥ ३५ ॥ अनुशीलयन्ननुसरन् रूपवाक्कृतैः रूपेण देहेन वाचा च कृत्तैश्चरितैः गोगोपगोपीनामिति कर्मणि षष्ठी ताः रमयन् रमयितुं तत्सुखं कर्त्तुं रेमे। न तु स्वप्रयोजनायेत्यर्थः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्मरणादिति ॥ स्मरणात्, दर्शनात्, ध्यानात्, अनुकीर्त्तनात्, यथा मयि भावः तिष्ठति, तथा संनिकर्षेण न तिष्ठति। ततः, गृहान् प्रतियात ॥ ३३ ॥ इतीति ॥ इतीत्थं, उक्ता भगवताभिहिताः, ताः विप्रपत्न्यः द्विजपत्न्यः, पुनः पुनःशब्दोऽत्रत्यर्थः। यज्ञवाटं यज्ञपथं, गताः। ते यज्ञकर्त्तारो ब्राह्मणाश्चापि, अनसूयवोऽसूयावर्जिताः सन्तः, ताभिः स्त्रीभिः स्वस्वाङ्गनाभिः सहिताः भूत्वा, सत्रं यागं, अपारयन् समापितवन्तः ॥ ३४ ॥ विप्रपत्नीनां भगवदन्तिकागमनकाले कस्याचित् विप्रपत्न्या जातं वृत्तं संस्मृत्य मुनिराह ॥ तत्रेति ॥ तत्र द्विजपत्नीनां मध्ये, एका काचिद्ब्राह्मणी, भर्त्रा स्वस्वामिना, विधृता गृहाभ्यन्तरे निरुद्धा निवारिता वा। सा तु यथाश्रुतं, भगवन्तं हृदा स्वमनसा, उपगुह्याश्लिष्य, कर्मानुबन्धनं देहं, विजहौ ॥ ३५ ॥ भगवानिति ॥ अथ गोविन्दः भगवान् अपि, चतुर्विधेन तेन द्विजान्नसमर्पितेन एव अन्नेन, गोपकान् गोपालान्, आशयित्वा, प्रभुः श्रीकृष्णः स्वयं च स्वयमपि, बुभुजे ॥ ३६ ॥

श्रीहरिसूरिदविरचितं श्रीभक्तिरसायनम्

इत्युक्ता इति : १०.२३. ३३.

वन्द्याः साध्व्यः स्वभावाद् द्विजवरवनितास्तत्र तत्राग्निहोत्र्यस्तत्राप्यन्नप्रदात्र्योऽखिलजगति यशोदानदक्षा गरिष्ठाः।
इत्थं सन्मार्गशैलीं स सदयहृदयो दर्शयन् मातृतुल्यं कृत्वा तासु प्रसादं पतिपरिचरणेऽयोजयद् वेदवक्त्रा ॥ ६४ ॥

तत्रैकेति : १०.२३.३४.

भक्तप्रियो हि भगवानिति मत्सखीभिक्तं समर्प्य निजजन्मकृतं कृतार्थम्।
भक्तोत्तमं तदहमप्यचिरात् स्वमेव रुद्धापि सम्प्रति करोमि तदग्र एव ॥ ६५ ॥
इत्याशया समर्प्य स्वं रुद्धा काचिद् दयालुप्रः। सर्वबन्धविनिर्मुक्तिं प्रतिमूल्यमिवाऽऽददे ॥ ६६ ॥ (युग्मम्)
सदाशयालम्बितभक्तभावाः सखीर्मनोजातसुखेन याताः।
निरीक्ष्य साऽपीशपदाब्जमागात् तथैव तत्साधुविमुक्तबन्धा ॥ ६६ ॥
स्वान् भर्तॄनतिलङ्घ्य विप्रवनिता याताः परं पूरुषमित्याभासकलङ्कभाजनमपि स्यां नाहमित्याशयात्।
देहं भर्तृगृहीतपाणिमचिरादालोच्य भर्त्रे स्वकं दत्वा भागमदात् सुभक्तिचतुरा सांशं परस्मै परम् ॥ ६८ ॥

भगवानपीतिः १०.२३.३५.

यन्मुक्त्यर्थमियान् यत्नो यद्योगात् सत्कृताः स्त्रियः। सा क्षुत् स्थिता तथैवेति भुक्त्या निर्वाणमापिता ॥ ६९ ॥
विप्रपत्नी क्षुधा चापि भक्तभावार्थकाङ्क्षिणी। निर्वाणं द्वे अपि प्राप्ते युक्तं भोग्योपभुक्तितः ॥ ७० ॥
त्वत्पादम्बुजसेविनोऽतिलघवोऽप्यस्मिन् परानुग्रहे त्वत्तोऽपि प्रतिभान्त्यनामयसुखे निःसीमशक्त्याश्रिताः।
या क्षुत्क्लान्तिरपीश तत्र तु तवासाध्याऽऽस सैकक्षणाद्भक्तेन प्रकटीकृतातिलघुनाऽप्यस्माद् विनिश्चीयते ॥ ७१ ॥
न मन्त्रिणां वा न च तन्त्रिणां वा न सत्रिणां वा सुलभस्तथाऽहम्।
मद्भक्तिभाजां च यथेत्यदर्शि विज्ञेषु तत्स्त्रिषु च दीनबन्धो ॥ ७२ ॥
आम्नायाभ्यसनेन किं फलमलं कृच्छ्राद्यनुष्ठानतः किं योगेन जपेन वा सुतपसा त्यागेन यागेन च।
एकः शुद्धतरो न चेद्बत मनोभावो हरौ सोऽस्ति चेत् स्यात्तेनैव कृतार्थता किमपरैरत्र प्रमाणं हि ताः ॥ ७३ ॥
अन्नेन द्विजयोषितोऽध्यवनि यं कृत्वा सकृत्सत्कृतं प्रापुः सौख्यमलं बभुवुरपि ताः सद्वर्ण्यभाग्यान्विताः।
तस्मिन् श्रीयदुनायके विदधतां नित्यं सदिष्टार्पणं भाग्यं वक्तुमशेषतो व्रजजुषां तेषां न शेषोऽप्यलम् ॥ ७४ ॥

कृष्णप्रिया

श्रीशुकाचार्य महाराज ने कहा—राजन् परीक्षित्? भगवान् श्रीकृष्णजी के विवेकपूर्ण वचन सुनकर वे द्विजपत्नियाँ यज्ञशाला-यजमान पत्नीशाला की ओर लौट गयी। वहाँ जाने पर उन ऋषियों ने अपनी पत्नियों में लेशमात्र न असूया की न

तो दोषारोपण किया। उन पत्नियों के साथ मिलकर विधिपूर्वक यज्ञ समाप्त किया ॥ ३३ ॥ राजन् ! उन सब ऋषिपत्नियों में जो मुख्य यजमान पत्नी थी उसके पति ने उसको रोक लिया जिससे वह श्रीकृष्ण प्रभु के दर्शन के लिए न जा सकी। उसने जिस स्वरूप से भगवत्स्वरूप श्रवण किया था, भगवान का उस स्वरूप का मानसिक ध्यान करके हृदय से आलिङ्गन किया और कर्म का बन्धन करने वाले अपने शरीर को छोड़ दिया। भगवत्कृपा से वह ऋषिपत्नी सब पत्नियों से पहले भगवान को मिला ॥३४॥ प्यारे श्रीकृष्ण प्रभु गोविन्द ने, भक्ष्य-भोज्य-चोष्य और लेह्य चारों प्रकार के अन्न से सर्व ग्वालबालों को भोजन कराया और श्रीबलभद्रजी के साथ आपने भी भोजन किया ॥ ३५ ॥ भक्तजनों के निरोध के लिये विविध प्रकार की लीला करने वाले मनुष्य रूप धारण करने वाले भगवान् श्रीकृष्ण इस प्रकार नरलोक के सभी धर्मों का अनुशीलन करते हुए, अपने स्वरूप, वचन और कर्मों के माध्यम से गौओं गोपों एवं गोपीजन-सभा को रमण कराते थे और स्वयं भी रमण करते थे ॥ ३६ ॥

अथानुस्मृत्य विप्रास्ते अन्वतप्यन् कृतागसः। यद् विश्वेश्वरयोर्याच्ञामहन्म[1] नृविडम्बयोः ॥ ३७ ॥
दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिमलौकिकीम्। आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ॥ ३८ ॥
धिग्[2] जन्म नस्त्रिवृद् विद्यां धिग् व्रतं धिग् बहुज्ञताम्। धिक् कुलं धिक् क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ॥३९॥
नूनं भगवतो माया [3]मायिनामपि मोहिनी। यद् वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—अथ ते विप्राः, नृविडम्बयोः विश्वेश्वरयोः यत् याञ्चाम् अहन्म, इति अनुस्मृत्य कृतागसः अन्वतप्यन् ॥३७॥ भगवति कृष्णे स्त्रीणाम् अलौकिकीम् भक्तिम् दृष्ट्वा, च आत्मानम् तया हीनम् दृष्ट्वा अनुतप्ताः व्यगर्हयन् ॥ ३८ ॥ नः त्रिवृत् जन्म धिग्, नः विद्याम् धिक्, नः व्रतम् धिक्, नः बहुज्ञताम् धिक्, नः कुलम् धिक्, नः क्रिया दाक्ष्यम् धिक्, न तु अधोक्षजे विमुखाः ॥ ३९ ॥ नूनम् भगवतः माया मायिनाम्, अपि मोहिनी, यद् वयम् द्विजाः, नृणाम् गुरवः स्वार्थे मुह्यामहे ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनुस्मृतिप्रकारमाह। नरानुकरणवतोर्विश्वेश्वरयोर्याञ्चां यदहन्म हतवंतस्तत्कृतागसो वयमित्यनुस्मृत्येति ॥ ३७ ॥ तदा च भार्या गुरूनिव मानयंतो भगवद्भक्तिरहितमात्मानं व्यनिंदन्नित्याह। दृष्ट्वेति। अलौकिकीं लोकातीताम् ॥ ३८ ॥ त्रिवृत् शौक्लं सावित्रं दैक्षमिति त्रिगुणितं जन्म। व्रतं ब्रह्मचर्यम्। क्रियाः कर्माणि दाक्ष्यं च क्रियादाक्ष्यमित्येकं वा पदम्। धिगित्याधिक्षेपे। ये वयं त्वधोक्षजे विमुखास्तेषां जन्मादि तत्सर्वं धिगिति व्यगर्हन्नित्यर्थः ॥ ३९–४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नन्वेते विप्राः समीचीना न वा। अनुभवासत्त्वान्नाद्यः, हरिभक्तस्त्रीसंबंधान्न द्वितीय इति राज्ञो मानसाक्षेपं परिहरन्नाह अथेति। ते विप्राः। अथ कोऽर्थो मंगलाः। कुतो—यतोऽन्वतप्यन्, तदपि कुतः—यतः कृतागसः, तत्र किं मानमिति चेदाह—अनुस्मृत्येति। अनुस्मरणं मानम्। किमपराद्धं तत्राह—अहन्मेति। तिरस्कृतवंत इत्यर्थः। स्वामिव्याख्याने अनुकरणशब्दार्थः तद्भिन्नत्वे सति तत्तुल्यत्वमिति ॥ ३७ ॥ तदा चानुस्मरणावसरे। अलौकिकीं लोकमर्यादामपाकृत्य कृताम्। तया भक्त्या ॥ ३८ ॥ शौक्लं शुद्धमातापितृतः, सावित्रम् उपनेतुः, दैक्ष्यम् देवदीक्षारूपम्। पृथक्कृत्य व्याख्याने हरिसेवारूपकर्मणां तत्रैव दाक्ष्यस्य च बोधादशोभनतां मत्वाह—एकपदमिति। क्रियादाक्ष्यं व्यावहारिककर्मकौशलं यागादिक्रियाकौशलं वा। इत्यर्थ इति। "तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया। आयासायापरं कर्म विद्यान्या शिल्पनैपुणम् ॥" इत्युक्तेः ॥ ३९ ॥ शास्त्रज्ञानमपि फलावसरे फलाकरणादकिञ्चित्करमेव। भगवदनुग्रह एव ज्यायानित्याशयवंत आहुः—नूनमिति। योगिनाम् ज्ञानिनाम्। यद्यतः। द्विजा द्विजोत्तमाः। गुरुपदसान्निध्याद्द्विजपदेन ब्राह्मणग्रहः। गुरवः "वर्णानामाश्रमाणाञ्च मुख्योऽभूद्ब्राह्मणो गुरुः" इत्युक्तेः, "आचार्यत्व गुरुत्वञ्च विप्रस्यैव वरानने" इति स्कांदोक्तेः। स्वार्थ भगवत्प्राप्तिरूपे "स्वार्थः सर्वात्मना ज्ञेयो यद्धरेर्दर्शनादिकम्" इत्युक्तेः ॥४०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पतयो नाभ्यसूयेरन्नित्यादिना लब्धतादृशभगवत्प्रसादानां पत्नीनां सङ्गप्रभावेन तत्पतीनामपि सद्बुद्धिर्जातेति तासां माहात्म्यमेव दर्शयितुमाह—अथेत्यादिना यावत्समाप्ति। अथ तत्प्रवृत्त्यनन्तरं ते दुरभिमानग्रस्ता अपि अन्वतप्यन्। ननु, विश्वेश्वरयोर्याच्ञा कथं सम्भवेत्तत्राहुः नृविडम्बयोर्लौकिकलीलां विस्तारयतोरित्यर्थः। यद्वा, नृन् अस्मान् तद्भक्तिहीनान् विडम्बयत

---

[1] महन्मर्त्यविडं–विज.; महन्नृविडं–विज.। [2] धिग्जन्म नः सुहृद्व्रत–वीर.; धिग्जन्म नस्तु धिग्बुद्धि धिग्व्रत–विज.; धिग्जन्म नस्त्रिवृतम्–इति कस्यचित्। [3] योगिनामपि–श्रीधर. वशी. वीर. जीव. विश्व.; मायिनामपि–विज.।

उपहसत इति तथातयोः अस्मद्वाच्यप्रयोगस्तदानीमपि दुरभिमानगन्धानुवृत्तेर्लज्जातो वा ॥ ३७ ॥ भगवति साक्षात्परमेश्वरे तत्रापि श्रीकृष्णे निजाशेषैश्वर्यप्रकटनेन सर्वचित्ताकर्षके न केवलमन्वतप्यन् किन्त्वनुतप्ताः सन्तो विशेषेण निजाशेषाभिमानत्यागादिना अगर्हयंश्चेत्यर्थः अलौकिकीं लोकद्वयापेक्ष्यात्यागात् कृष्णाप्राप्त्या सद्यो देहत्यागाच्च ॥ ३८ ॥ ये अधोक्षजे प्रत्यावृत्तौ प्रादुर्भाविनि परमात्मन्यपि विमुखास्तेषां जन्मादीनि धिगिति शौक्लस्य जन्मनः "किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा" इति न्यायेन तद्भक्तौ उपयुक्ततमत्वेऽप्यनुयोजनात् सावित्रस्य तदभिधायित्वेन गायत्र्यज्ञानात् गायत्र्यास्तत्परत्वं च तदर्थविस्तररूपस्य श्रीमद्भागवतस्य तत्परत्वात् तदुक्तं गायत्रीं भगवत्परत्वेन व्याख्यायाग्निपुराणेऽपि "यत्राधिकृत्य गायत्रीं कीर्त्यते धर्मविस्तरः, इत्यादि दैक्षस्यापि—

"अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते" ॥ इति

तत्त्वाज्ञानात् एवं व्रतादीनामपि कुलं वंशपरम्परां अहो कष्टं मायामोहितानामयमेवेत्याहुः नूनमिति निश्चितं योगिनां कर्माष्टाङ्गज्ञानयोगनिष्ठानामपि इत्यात्मनो योगित्वाभिमानात् यद्वा योगिनामपि किमुत कर्मिणामस्माकमिति नृणां योगत्रयजिज्ञासूनां सर्वेषामपीत्यर्थः। तदुक्तं तानुद्दिश्य श्रीशुकेन "बालिशा वृद्धमानिनः" इति गुरवः श्रेष्ठा अपीत्यर्थः "वर्णानां ब्राह्मणो गुरुः" इति न्यायात् उपदेष्टारोपीति वा मुह्याम मोहं प्राप्नुम हे द्विजा इत्यनुतापेनान्योन्यं सम्बोधयन्ते यद्वा द्विजा वयं मुह्यामहे इत्यात्मनेपदमार्षम् ॥ ३९-४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पत्नीनां संगप्रभावेण तत्पतीनामपि सद्बुद्धिर्जातेति तासां माहात्म्यमेव दर्शयितुमाह—अथेत्यादिना यावत्समाप्ति। अथ तदनन्तरं तत्प्रघट्टकानन्तरमेव, पत्नीनां संगतो दुर्वासनाक्षयात्; यद्वा, यज्ञसमापनानन्तरं श्रीभगवद्भुक्तशेषेण यज्ञसमापनतो यज्ञस्य सत्फलोत्पत्त्या चित्तविशुद्धिसम्पत्तेः। यद्वा, श्रीभगवतो भोजनानन्तरं तेन तदन्नस्वीकारतस्तद्भक्त्युत्पत्तेः, किंवा तासां यज्ञस्थानगमनानन्तरमेव तासां सन्दर्शनप्रभावादिति दिक्। अनुस्मृत्य अनुसन्धाय, ते दुरभिमानग्रस्ताः, अन्वतप्यन् अशोचन्, विश्वेश्वरयोरिति न केवलं भगवदवतारस्य श्रीसंकर्षणस्य, अवतारिणः श्रीकृष्णस्यापीत्यर्थः। ननु तर्हि तयोर्याच्ञा कथं भवेत्? तत्राहुः—नृविडम्बयोर्लौकिकलीलां विस्तारयतोरित्यर्थः। यद्वा, नृन् तद्भक्तिहीनानस्मान् विडम्बयत उपहसत इति तथा तयोः, अस्मच्छब्दाप्रयोगस्तदानीमपि दुरभिमानगन्धानुवृत्तेः, लज्जातो वा। किंवा ब्राह्मणाभिमानत्यागेन केवलमात्मनो नृत्वमात्रदृष्टितः ॥ ३७ ॥ भगवति साक्षात् परमेश्वरे, तत्रापि कृष्णे निजाशेषैश्वर्य्यप्रकटनेन सर्व्वचित्ताकर्षके, विशेषेण निजाशेषाभिमानत्यागादिना गर्हयन्; अन्यत्तैर्व्यञ्जितम्; यद्वा, न केवलमन्वतप्यन् आत्मानमनिन्दंश्चेत्याह—दृष्ट्वेति। अलौकिकीं लोकद्वयापेक्षात्यागात् कृष्णाप्राप्त्या सद्यो देहत्यागाच्च; यद्वा, (भा० ११।२।४०) 'हसत्यथो रोदिति' इत्याद्युक्तलोकातीतप्रेमसम्पत्तिलक्षणोदयात् ॥३८॥ जन्मादीनामुत्तरोत्तरमुत्तमतामभिप्रेत्य क्रमेणाधिक्षिपन्ति–धिगिति। जन्म धिक् तत्र च विशुद्धमातापितृभ्यां शौक्ल्यं जन्म, सावित्रमुपनयनाख्यम्, दैक्ष्यं यज्ञादिदीक्षासम्बन्धि, अधोक्षजे श्रीयशोदानन्दनेऽपीत्यर्थः। एतन्निरुक्तिः पूर्व्वमेव लिखितास्ति ॥३९॥ अहो कष्टं मायामोहिता नाम वयमेवेत्याहुः। नूनमिति निश्चितम्, योगिनां ज्ञानयोगवतामित्यात्मनो योगित्वाभिमानात्; यद्वा, योगिनामपि किमुत कर्म्मिणामस्माकं गुरवः श्रेष्ठा अपीत्यर्थः। 'वर्णानां ब्राह्मणो गुरुः' इति न्यायात् उपदेष्टारोऽपीति वा; मुह्याम मोहं प्राप्नुम; हे द्विजा इत्यनुतापेनान्योन्यं सम्बोधयन्ति; यद्वा, द्विजा वयं मुह्यामह इत्यात्मनेपदत्वमार्षम् ॥ ४० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अहन्म वितथीकृतवन्तः ॥ ३७-३८ ॥ कुलं कुलपुरुषान् ॥ ३९-४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथेति। अथ विप्राः अनुस्मृत्य भगवान् यदुष्ववतीर्ण इति श्रुतत्वादनुस्मृत्येत्यर्थः। कृतागसो हेतुगर्भमिदं तत्त्वादन्वतप्यन् किं तदागः यतोऽन्वतप्यंस्तत्राह—यद्यस्मान्मर्त्त्यमनुकुर्वतोर्विश्वेश्वरयोर्याञ्चामहन् बभञ्जुः ततः कृतागसः अहन्निति यत्तदेवागः इति वा ॥ ३७ ॥ तदा भार्यामानयन्तो भगवद्भक्तिरहितमात्मानं व्यनिन्दन्नित्याह—दृष्ट्वेति। अलौकिकीम् अनितरजनसाधारणी तया कृष्णभक्त्या हीनं रहितम् ॥ ३८ ॥ गर्हाप्रकारमेवाह–धिगिति। नोऽस्माकं जन्मधिक् 'उभसर्वतोः कार्याधिक्' इत्यादिवचनेन शेषषष्ठ्यपवादकत्वेन जन्मादीनां द्वितीया धिक्शब्दो निन्दाद्योतकः। अस्माकं जन्मादयो निन्द्याः इत्यर्थः क्रियाः यज्ञादिरूपाः दाक्ष्यं तदनुष्ठानसामर्थ्यं तत्र हेतुं वदन्तो विशिंषन्ति ये वयमधोक्षजे विमुखाः त्रिवृदिति पाठे जन्मनो विशेषणं शौक्लं सावित्रं दैक्षमिति त्रिगुणीकृतं जन्मेत्यर्थः। नस्तु धिक् बुद्धिमिति पाठे स्पष्टोर्थः व्रतं ब्रह्मचर्यम् ॥ ३९ ॥ भगवन्मायातरणहेतुस्तद्भक्तिरेव

न तूक्तजन्मादयः इत्यभिप्रायेणाहुः –नूनमिति द्वाभ्याम्। नूनं मायिनामपि मोहिनी यद्यस्माद्वयं द्विजा अपि उक्तजन्मादिमन्तोपि तत्रापि नृणां गुरवोपि स्वार्थेव्वहिते विषये मुह्यामहे भगवन्मायया मोहिता एवेत्यर्थः ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नन्वेते विप्राः समीचीनाः ? उतासमीचीनाः ? नाद्यः अनुभवादर्शनात् न द्वितीयः कृष्णपरायणानां स्त्रीणां पाणिग्रहणसम्बन्धदर्शनात् अथ कथं निर्णय इति राज्ञो मानसीं शङ्कां परिहरति–अथेति। ते विप्रा अथ मङ्गलाः कुतोन्वतप्यन् यतः कृतागसः कृतापराधत्वात् अपराधसद्भावे किं प्रमाणमिति तत्राह–अनुस्मृत्यति अनुस्मरणं प्रमाणमित्यर्थः। कोसावपराधः ? इति तत्राह यदिति अहनन् हिंसितवन्तः तिरस्कृतवन्त इति यत्स इत्यर्थः। नृविडम्बयोः मनुष्यमनुकुर्वतोः ॥ ३७ ॥ तेषामनुतापः कथमभूदिति तत्राह दृष्ट्वेति ॥ ३८ ॥ किमाकारोसाविति तत्राह—धिगिति। ततो जन्मादिकं धिक् कुत्सितं "धिग्भर्त्सने कुत्सने" इति च ॥ ३९ ॥ शास्त्रज्ञानमप्रयोजकं प्राप्ते काले फलाभावादतो भगवदनुग्रह एव वरीयानित्याशयेनाहुः – नूनमिति। मायिनां ज्ञानिमपि अत्र हेतुमाह यद्वयमिति गुरवो द्विजातय इत्येतद्द्वयं मोहासम्भवे हेतुः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवं तस्य सर्वमपि श्रीगोकुलसौख्यायैवेत्याह –एवमिति। अथेति। पतयो नाभ्यसूयेरन्नित्यादिना लब्धभगवत्प्रसादेनानुस्मरणं ज्ञेयम् ॥ ३७–५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथानुस्मृत्येति तेषामनुस्मरणनिर्वेदादिकं तासां दर्शनभाग्यादिति ज्ञेयम्। तेषामनुतापप्रकारमाह–यद्यस्माद्विश्वेश्वरयोरपि याञ्चामहन्म हतवन्तो वयं तस्मात् कृतागसोऽभूम कीदृशयोः नृन् अस्मान् विडम्बेते इति तयोः अन्नप्रार्थनेनैवास्मान् वञ्चितवतोरित्यर्थः ॥ ३७ ॥ ततश्च स्वभार्य्या अपि गुरूनिव मानयन्तो भक्तिरहितमात्मानं व्यनिन्दन्नित्याह–दृष्ट्वेति। अलौकिकीं लोकेष्वसम्भवाम् ॥ ३८ ॥ त्रिवृत् शौक्लं सावित्रं दैक्षमिति त्रिगुणितं जन्मनोऽस्माकं यत्तत् धिक् व्रतं ब्रह्मचर्य्यं क्रियाः नित्यनैमित्तकादिकर्माणि ये वयमधोक्षजे श्रीकृष्णे तु विमुखा एव ॥ ३९ ॥ योगिनामष्टाङ्गयोगवतामपि किं पुनरस्माकं कर्मणां गुरवः परेषां नृणामर्थोपदेष्टारोऽपि स्वार्थे मायया मुह्यामहे ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नृविण्डबयोः क्षुधार्दितत्वादिनान्दन् अनुकुर्वतोः विश्वस्य सर्वेश्वरयोः याञ्चाम्म अहन्म हतवन्तः इत्यनुस्मृत्य अथानन्तरं कृतागसो वयमित्यन्वतप्यन् ॥ ३७–३८ ॥ आत्मगर्हामेवाविष्कुर्वन्त आहुः—धिगिति। ये अधोक्षजे विमुखास्तेषां नोऽस्माकं शौक्लं सावित्रं दैव्यमित्येवं त्रिवृत् त्रिगुणितमपि यज्जन्म तत् धिक् यद्व्रतादिकं तच्च धिक् ॥ ३९–४० ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

पत्नीनां दर्शनाद्विप्राणां निर्वेदोऽभूदित्याह—अथेति। यस्माद् विश्वेश्वरेऽपि याञ्चामहन्म अतः कृतागसोऽपराधिनो वयं कीदृशयोरित्याह नृन् अस्मान् विडम्बेते अन्नप्रार्थनेन प्रतारयत इति तयोरित्यनुस्मृत्य तेऽन्वतप्यन् पश्चात्तापमभजन् ॥ ३७ ॥ अतः स्वपत्नीः गुरूनिव सत्कुर्वन्तो भक्त्या हीनमात्मानं व्यनिन्दन्नित्याह—दृष्ट्वेति। अलौकिकीं लोकेष्वसम्भवाम् ॥ ३८ ॥ त्रिवृत् श्लोकं सावित्रं दैक्षञ्चेति त्रिगुणितं नो जन्म धिक् व्रतं ब्रह्मचर्यादि बहुज्ञतां वेदार्थव्युत्पत्तिं कुलं मातृतः पितृतश्च विशुद्धं क्रियायां नित्यनैमित्तिकलक्षणायां दाक्ष्यं तदनुष्ठानं चातुर्यमित्येतत् सर्वं शोच्यमभूत् ये वयमधोक्षजे विमुखाः येन हरिस्तुष्येत्तदेव सफलमन्यत्तु विफलमिति भावः ॥ ३९ ॥ नूनं निश्चितं हरेर्मायैवात्रहेतुः यतो वयं ब्राह्मणा नृपं गुरवस्तत्वोपदेष्टारोऽपि स्वयं स्वार्थं न विद्मः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अथ ते विप्रा नृविडम्बयोर्विश्वेश्वरयो रामकृष्णयोर्यद्यतो याञ्चाऽहन्म। अहनन्निति पाठे छन्दसो विकरणव्यत्यय इव पुरुषव्यत्ययोऽपीति स न सरलः। नाशितवन्तस्तस्मादनुसृत्य तदीश्वरतां स्मृत्वा कृतमागो यैस्ते तथेत्यन्वतप्यन्पश्चात्तापं प्राप्ताः। इदं दिनमादीकृत्य विप्राः पश्चिमबुद्धय इति प्रसृतमाभाणकमिति किंवदन्ती ॥ ३७ ॥ किं दृष्ट्वाऽनुतापो विप्राणामित्यत आह। भगवति कृष्णेऽलौकिकीं स्वादिविलक्षणां भक्तिं दृष्ट्वा तया तादृश्या हीनमात्मानं स्वमनुतप्ता व्यगर्हयन्नानिन्दन्निति ॥ ३८ ॥ तन्निन्दनमिव स्वनिन्दनमेवमिति तत्प्रकारं निरूपयन्ति ॥ धिग्जन्मेति। न इति सर्वान्वयि। येऽधोक्षजे विमुखास्तेषां नो जन्म धिक्

निधत्ता तस्येत्यर्थः बहुज्ञता समस्तसमयज्ञता कुलम्। पत्न्यस्तु कुलान्तरायाता इति स्वकुलं ग्राह्यम्। क्रिया दाक्ष्यं कर्म समर्थताः। तुः समुच्चये वर्तते ॥ ३९ ॥ मायिनां ज्ञानिनाममायिनामकुलचेतसामपि शिखादिर्माया मोहिनी मोहिका यद्यतो नृणां गुरवो द्विजा अपि वयं स्वार्थे मुह्यामहे। हे द्विजा इति कांश्चित्सम्बोध्य केचिद्वदन्तीति वा ॥ ४० ॥

श्रीसुबोधिनी

एवं ज्ञानकर्मणि द्विविधे निरूप्य तयोः फलं भक्तिं निरूपयत्यथेति, **एका हि भगवतः कृतिरनेककार्यसाधिका** तेषां द्विजानां प्रबोधनं बालकशिक्षार्थं पत्न्या मुक्त्यर्थं तेषां प्रबोधार्थं मर्यादास्थापनाद्यर्थं चातो वाक्येन प्रबोधितानां द्विजानां वाक्यान्याह भक्तिबोधकानि,

पश्चात्तापो विगर्हा च हेतुस्तस्य च रूप्यते। तथात्वे चापि हेतुर्हि स्वहीनत्वं च कर्मभिः ॥ १ ॥
संस्काराणामहेतुत्वं भक्तेरन्यच्च साधनम्। स्वभक्तेर्बोधनं हेतुरन्यथा नोपपद्यते ॥ २ ॥
तथात्वसाधनं तस्य कर्मवैयर्थ्यबोधनम्। द्वाभ्यां रूपद्वयोक्त्यैव स्त्रीसम्बन्धात् कृतार्थता ॥ ३ ॥
क्षमापनं नमस्कारैः प्रार्थनाभिर्निरूप्यते। अनागमनमिच्छातो भक्त्यैवेत्थम्मतिर्भवेत् ॥ ४ ॥

प्रथमतोनुतापमाहाथानुस्मृत्येति, भगवदीयानां वाक्यं स्मृत्वा तन्मूलभूतं भगवद्वाक्यं तद्द्वारानुस्मृत्य कर्मजडतां विहाय भक्त्यनुसारिणो भूत्वा **विप्राः** पश्चादेव जायमानज्ञानाः **कृतागसो** भूत्वा पत्नीनिरोधेन निषेधेनावाच्यकथनेन भक्तमारणेन जातापराधा अनुतापं कृतवन्तः, सर्वापराधापेक्षयेश्वरवाक्योल्लङ्घनं महान् दोष इति तं निरूपयन्ति यद् विश्वेश्वरयोरिति, विश्वेश्वरयोरितिद्विवचनं कालपुरुषोत्तमपरं शब्दब्रह्मपरब्रह्मपरं वा, याञ्चा बालद्वारौदनविषयिणी, वस्तुतो भगवतैवाज्ञाभङ्गः कारितः प्रथमतो भक्तकृपया तथोक्त्वापि बलिवाक्यात् परम्परयापि दूरीकृतवान् 'न पुमान् मामुपव्रज्य भूयो याचितुमर्हती'ति,

ब्राह्मणानामयं धर्मः स्नेहाच्चापि न बाध्यते। भिक्षारूपेण सा याञ्चा बाध्यते न तु लौकिकी ॥ १ ॥

'न्यासभूतौ प्रयच्छ मे' तथापि याचे तन्नः प्रयच्छे'ति 'तत्तन्निवेदये'दित्यादिवाक्यानि न विरुद्धानि भवन्ति न वा तेषामयुक्त वा किञ्चिद् गृहीत, नन्विमौ बालकौ कथमीश्वरौ तत्राहुर्नृविडम्बयोरिति, **नृणां** बिडम्ब विडम्बनं याभ्यां, केवल मनुष्यरसमभिनयेन प्रदर्शयतः, एवं स्वस्यापराधित्वं निरूपितम् ॥ ३७ ॥ तस्य दण्डं कुर्वन्तः स्वगर्हां कुर्वन्ति दृष्ट्वेति, **स्त्रीणां कृष्णेलौकिकीं भक्तिं दृष्ट्वा तया हीनमात्मान व्यगर्हयन्, पुष्टिभक्तेरेषैव स्थितिः भगवान्** षड्गुणैश्वर्योपि **कृष्णः** सदानन्द एव जातो **धर्मोपसर्जनत्वेन धर्म्यैव जात** फलरूपत्वात् **स्त्रीणां तत्र भक्तिः**, पुरुषास्तु धर्मपरा अतस्तया रहिताः, तदुभयमाह **स्त्रीणां कृष्णे भक्तिमिति**, दोषाभावायाहा**लौकिकीमिति, तारतम्यपरिज्ञानं पदार्थयाथात्म्यं भक्तिभावाभावौ च यो जानाति स भक्तः** अत एते तद्विधा इति निन्दैषा स्तुतिरेव, न केवलं ज्ञानं तेषां बाधकमुत्पन्नं किन्तु क्रियापि, तदाह **अनुतप्ता** इति ॥ ३८ ॥ ननु कथमात्मविगर्हात्मनि सत्पदार्थानां विद्यमानत्वादन्यथा सद्विरोधे तेषामनिष्टमेव स्यादित्याशङ्क्य स्वस्मिन् विद्यमानानां सत्त्वेन प्रतिभासमानानां बीजाभावादसत्त्वमेवेति ख्यापयन्ति **धिग् जन्मेति** धिक्कारो दह्यतामित्यर्थे प्राणगते शरीरं दह्यत एव तथा जन्मादीनां प्राणभूता भक्तिस्तदभावे दाह एवोचितः, **त्रिवृज् जन्म** शुक्लसावित्र्याज्ञिकरूपं **विद्यामपि धिक्** सापि **त्रिवृद् विद्या** वेदत्रयसहिता, व्रत 'न देय'मित्यादि तदपि धिक् **बहुज्ञतामिति** धर्मसूक्ष्मपरिज्ञाने ये बहुज्ञास्ते लोकविरुद्धमपि कुर्वन्ति तथैतत् कृतं तां च **बहुज्ञतां** धिक्, अथ कुलीना इति वंशे कलङ्कसम्बन्ध इति स्त्रीणां निवारण तत् **कुलमपि** धिक्, **क्रियादक्षतामपि** धिग् यया भगवत्यवहेला भवत्यन्यथा पुरुषार्थं साधयिष्यामोशक्तस्यैव हि भक्तिरिति यथान्धपङ्ग्वादयः क्रियायामसमर्था अन्यत्र युज्यन्ते तथा भक्तावपीति, एवं यत् **क्रियादाक्ष्य** तदपि धिक् तत्र बीजाभावं हेतुमाह ये वयमधोक्षजे **विमुखाः**, नन्वेतदेव कथं यज्ञोपि भगवानेवातो ये यज्ञपराः कथं भगवद्विमुखा इतीमं पक्षं **तुशब्दो** व्यावर्तयति, तत्र हेतुर**धोक्षज** इति, अधोक्षजं यस्मादिति, ज्ञानेप्यात्मसाक्षात्कारः कर्मणि च क्रियारूपेलौकिके च रूपे ज्ञानवतां भक्तौ तु न साक्षात्कारः फल जायमानमप्यज्ञतामापद्यते केवलरसभक्षका इक्षुभक्षकेभ्योपि सरसा अत एतादृशो भक्तिमार्गो भगवता प्रकटित इति रूपान्तरपुरःसरं ये पक्षास्ते सर्व एव पूर्वपक्षाः ॥ ३९ ॥ ननु वैमुख्ये ज्ञानवतां को हेतुस्तत्राह नूनं भगवत इति, मायया हि पूर्वस्थितं ज्ञानादिकमाच्छाद्यतेतो ये शिष्याः प्राकृतास्तेषां तज् ज्ञानमाच्छाद्य नूतनमुत्पादनीयमन्यथा पूर्वविरोधान्नोत्पद्यते ज्ञानं, अतो **गुरवः सर्व एव मायाविनः**, तदत्र विपरीतं भगवन्मायया कृतं, ते **स्वमायया** स्वबुद्धिमेवाच्छादितवन्तः प्राकृतीं च बुद्धिं गृहीतवन्तः, तदाह **नूनं निश्चयेन भगवतो माया मायिनामपि व्यामोहजनिका यद् वयं लोकानां गुरवः** प्राकृतां बुद्धिमाच्छाद्य स्वबुद्धिदातारस्ते स्वबुद्धिमेवाच्छाद्य प्राकृतीं बुद्धिमेव गृहीतवन्तः, भगवन्मायायाश्चैतत् कार्यं प्राकृतयामेव बुद्धौ तथात्वमाच्छाद्यातथात्वं ग्राह्यत इति, अन्यथा भगवान् भगवच्छास्त्रं वा किं ग्राहयेद् भक्तिं वा कथं ग्राहयेद् ज्ञानेन प्रतिरोधात्, सहजं प्राकृतं भक्तिर्नाशयितुमसमर्था सूक्ष्मा हि सातो गुरुमाययाच्छादिते लौकिके च ज्ञाने सम्पन्ने तस्मिन्नपि ज्ञाने लब्धपदे भगवन्मायया पश्चादाच्छादित आगतं प्राकृतत्वममूलकमिति भगवच्छास्त्रेण भक्त्या वा तन् निराकृत्य स्वकीयं तत्र स्थाप्यत इति **भगवन्माया मायिनां व्यामोहिकेति नूनं** नात्र पूर्वपक्षसम्भवः, द्विजा इतिसम्बोधनमस्य यज्ञस्याधिदैविकवैमुख्येनासम्पन्नत्वात् ॥ ४० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अथानुस्मृत्येत्यस्याभासे, **एवं ज्ञानकर्मणी द्विविधे** इति। विप्रतत्पत्न्योर्मर्यादापुष्टिभेदेन द्विविधे ते निरूप्यते इत्यर्थः। **यद्विश्वेश्वरयोर्याच्ञा**मित्यत्र, विश्वेश्वरपदतात्पर्यमाहुः **वस्तुतो भगवतैवे**त्यादि। विश्वस्यैवेश्वरो नियामकः प्रवर्तको निवर्तकश्च यत इति भावः। **बलिवाक्यात् परम्परयापी**त्यादि। यद्यपि भामितिपदात् बलिना स्वविषयकमेवोक्तमिति न भगवद्धर्मनिरूपकं तद्वाक्यमिति भाति, तथापीश्वरस्यैवेदृशं वाक्यं भवतीत्यैश्वर्यधर्मरूपत्वात् तस्य च भगवदीयस्यैव बलौ सत्त्वाद्भगवद्वाक्यमेव पर्यवस्यतीति भावः। ननु याच्ञाभङ्गश्चेद् भगवत्कर्तृक एव, तदा विप्रापराधत्वेनास्य कथनं कथम्। अपरञ्च। पत्नीनां दीक्षितविहितात् प्रवासं न ददातीति विध्युल्लङ्घनं च कारितवानिति, प्रत्युत विप्रापकारकृतिरापद्यत इत्याशङ्क्याहुः **ब्राह्मणानामय**मिति। अयं सत्रलक्षणो धर्मोऽन्नसमर्पणेन न बाध्यते। 'शेषाद् भुञ्जीर'न्निति विधेरन्नदानस्य विहितत्वाद्यज्ञार्थनिर्दिष्टाज्यादेः शेषभूतान्नातिरिक्तवस्तुदानस्यैव निषेधस्य कृतत्वा'दन्नहीनं दहेद्राष्ट्र'मितिवाक्यादावश्यकत्वाच्चेति भावः। किञ्च, अग्रे फलदर्शनादपि साधनवैगुण्यं न वक्तुं शक्यमित्याहुः **स्नेहाच्चापा**ति। यद्यपि तदीयान्नस्वीकारेण भक्तसङ्गेन च तेषां भक्तिर्जाता, तथाप्यग्रे तेषां कर्मफलासम्भवाद्वैदिककर्मणो वैयर्थ्यासम्भवादेतत्फलत्वेनापि भगवता भक्तिरेव सम्पादितेति ज्ञापनायापिशब्दः। यच्चोक्त याच्ञाभङ्गश्चेदित्यादि, तत्राहुः **भिक्षारूपेणे**ति। भगवता विहितैव सा बाध्यत इत्यर्थः। लौकिकी तु विप्रैरेवेति युक्तमपराधत्वेन कथनं याच्ञाभङ्गस्येति भावः। अतो याच्ञापराणि भगवद्वचनानि लौकिकतत्परत्वान्न विरुध्यन्त इत्याहुः **न्यासभूता**वित्यादि। यद्वा। ननु भक्तवाक्यपरिपालकत्वाद्भगवतः कथं बलिवाग्विरुद्धं स्त्रीषु याचनं कृतवानित्यत आहुः **ब्राह्मणाना**मिति। बलिवाक्येन वर्णाश्रमधर्मत्वेनोक्ता स्नेहप्रयुक्ता च या याच्ञा सा न बाध्यते, कन्यादिविषयिणी सा लौकिकी, सापि तथा। किन्तु दैन्यप्रयुक्तैव सा बाध्यत इत्यर्थः। प्रकृते च न दैन्यप्रयुक्ता सा, 'भक्तायाः प्रसाद'न्निति वाक्यादिति भावः। अत एव तादृग्वचनैरविरोध इत्याहुर्न्यासभूतावित्यादि ॥ ३८ ॥ **विमुखा ये त्वधोक्षज** इत्यत्र, **ज्ञानेप्यात्मसाक्षात्कार** इत्यादि। इन्द्रियजन्यज्ञानस्य पुरुषोत्तमाविषयत्वं प्रदर्शयन्ति **ज्ञानेपी**त्यादिना। मनोजन्यात्मसाक्षात्कारफलकज्ञानमार्गस्यात्ममात्रपर्यवसायित्वम्। कर्ममार्गस्याधिकारिभेदेन द्वैविध्यम्। बहिर्मुखानां तु क्रियारूपे भजनम्, तेनैवादृष्टद्वारा फलसिद्धिरिति यतस्तन्मतम्। श्रुतितात्पर्यज्ञानवतां त्वलौकिके यज्ञरूपे भजनमितीन्द्रियजज्ञानकृत्यविषयत्वेनाधोक्षजत्वं सिद्धमित्यर्थः। भक्तिमार्गे भगवत्साक्षात्कारो 'नाहं वेदै' 'र्न तु मां शक्यसे द्रष्टु'मित्यादिवाक्यैर्नेन्द्रियजन्य इति भावः। दृष्टेपि भगवति यावत्सर्वेन्द्रियैः साक्षान्नानुभूयते, न तावत्स्वास्थ्यमिति, न साक्षात्कारमात्रं फलम्। 'दर्शयन् मुहुर्मनसि स्मरं यच्छसी'ति वाक्याद् दर्शनस्याग्रेतनभोगोपयोगित्वेनाङ्गत्वम्। यथेक्षुदण्डस्य रससम्बन्धाद् भक्ष्यत्वम्, तथा भगवदानन्दलेशसम्बन्धेनान्येषां रूपाणां भजनीयत्वमित्याशयेनेक्षुदृष्टान्तः। केवलरसात्मकः स्वयमधुनैव प्रकट इतीति। पूर्वमेव ते पक्षाः कर्तव्यत्वेन स्थिताः, नत्वतः परमपीत्याहुः **अत एतादृश** इत्यादि ॥ ३९ ॥

इति विंशोऽध्यायः ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अथेत्यत्र **प्रबोधन**मिति वाक्यैः प्रबोधनरूपाकृतिरित्यर्थः, कारिकासु **तस्य चे**ति विगर्हणस्येत्यर्थः, **तथात्वे** इति वैमुख्ये इत्यर्थः, **स्वभक्तेरि**ति स्वस्य विप्राणां भक्तेर्बोधनमुद्बोधो भगवतो याचने हेतुरित्यर्थः, तथात्वेति **तस्य** भगवतो याचनार्हत्वं साधनमित्यर्थः, **कर्मे**ति **द्वाभ्यां** श्लोकाभ्यां देशादिभिः कर्मस्वरूपं भगवत्स्वरूपं चेति **रूपद्वयोक्त्या** स्वकृतकर्मणो वैयर्थ्यबोधनं, **मूढा न विद्मह** इत्यनेन ज्ञानरूपफलाजनकत्वबोधनमित्यर्थः, तर्हि भक्तिरपि कथं सिद्धेत्याशङ्क्य स्वयमेव समादधते **स्त्रीसम्बन्धा**दिति, भक्तिजनकत्वेन **कृतार्थता** भक्तसम्बन्धान् न तु केवलकर्मणस्तत्फलमित्यर्थः, ततो द्वाभ्यां **नमस्कारैः** प्रार्थनाभिश्च **अपराधक्षमापनं**, तत एकेनानागमनं, एवं चतुर्दशप्रकारापि **मतिर्भक्त्यैव भवेत्**, अत आभासे **भक्तिर**वान्तरप्रकरणार्थ उक्त इति भावः, **यद् विश्वेश्वरयो**रित्यत्र **तथोक्त्वापी**ति याचनवाक्यमुक्त्वापि भक्तकृपया हेतुभूतया पुनः प्रेषणेन भक्तायाः प्रसादार्थं प्रथमत **आज्ञाभङ्गः कारितः**, द्वितीयवारं पत्नीषु प्रेषणे त्वाज्ञा सिद्धैवेति भावः, **बलिवाक्या**दिति तथा च बलियाचनानन्तरं भगवतो याचनमनुचितमत इयमाज्ञैव न तु याचनमिति भावः, एतस्य टिप्पण्यां **न ददातीति विध्युल्लङ्घनं** चेति 'प्रवासं न ददाती'ति वाक्योल्लङ्घनं, 'न ददाति न पचत' इति अन्नादानविध्युल्लंङ्घनं च कारितवानित्यर्थः, द्वितीयविध्युल्लङ्घनस्य समाधानमाहुः **ब्राह्मणाना**मिति, अन्नदानविधिं व्यवस्थया स्थापयन्ति **अय**मित्यारभ्येति **भाव** इत्यन्तेन, प्रथमस्य समाधानमर्थापत्त्या निरूपयन्ति **किञ्चाग्रे** इति, यदि विध्युल्लङ्घनं स्यात् तदा भक्तिरूपं फलं नोत्पद्येतेत्यर्थः, द्वितीयस्यापीदं समाधानं सम्भवतीति किञ्चेति समुच्चयः, प्राप्तज्ञानानां भिक्षाटनमेव मुख्यमिति भिक्षारूपाया विहिताया याञ्चाया अयुक्तत्वात् तद्बाधो अदानसम्पादनेन भगवता सम्पादनीयो लौकिक्यास्त्वयुक्तत्वाभावाद् तद्बाधो विप्रैरेव कृत इत्याहुः **भगवते**ति, तथा च भिक्षांशो भगवता बाधितो लौकिकांशो विप्रैरिति भावः, सुबोधिन्यां न वेति मर्यादामार्गीयत्वेन स्वस्य ग्रहणे अयुक्तं तेषां सम्बन्धि देहादिकं स्वोपयुक्तं न कृतं किन्तु व्याघुट्य प्रेषिता एव, अतोपि **न बाध्यते** विध्युल्लङ्घनं न जातमित्यर्थः ॥ ३७ ॥ **दृष्ट्वे**त्यस्याभासे **गर्हा**

कुर्वन्तीति वयं दुष्टा इत्यादिरूपा गर्हा ग्रन्थाद् बहिरेवेति ज्ञातव्यं, अतोत्र श्लोके गर्हैव वाक्यार्थः, अग्रिमश्लोके गर्हाहेतुवाक्यार्थो न तु गर्हाविवरणं, तत्र तथैव व्याख्यास्यते, व्याख्याने **पुष्टीति** स्वदोषपरिज्ञानं भगवदनुग्रहाद् भवेदित्यर्थः, अयोगव्यवच्छेदक एवकारः, **षड्गुणैश्वर्य** इति षड्गुणेष्वैश्वर्यं यस्येत्यर्थः, **परिज्ञानमिति** करणव्युत्पत्त्या परिज्ञापकं धर्ममित्यर्थः, **बाधकमिति** स्वस्यैव कृतार्थताभिमाने बाधकमित्यर्थः, **क्रियापीति** अश्रुपातादिरूपेत्यर्थः ॥ ३८ ॥ **बीजाभावादिति** सत्त्वबीजस्य भगवत्साम्मुख्यस्याभावादित्यर्थ **अधोक्षजे** इत्यस्याभासे तत्रेति यज्ञपरायणामपि भगवद्वैमुख्ये इत्यर्थः ॥ ३९ ॥ **नूनमित्यत्र अतो ये** इति मायया मूलज्ञानाच्छादनाद्धेतोः **प्राकृता** लौकिकज्ञाना इत्यर्थः, **अन्यथा भगवानिति** प्राकृत्यां बुद्धौ प्राकृतत्वानाच्छादने इत्यर्थः, **ज्ञानेनेति** प्राकृतज्ञानेनेत्यर्थः ॥ ४० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

अथानुस्मृत्येत्यादीनामर्थनिरूपकासु कारिकासु पश्चात्तापो विगर्हा चेत्यादि ‘अथानुस्मृत्ये’तिश्लोके **पश्चात्तापः**, “दृष्ट्वा-स्त्रीणा” मित्यस्मिन् **विगर्हा**, तस्य विगर्हणस्य हेतु “धिग्जन्म न” इत्यस्मिन्, **तथात्वे** भगवद्वैमुख्ये **माया हेतुरिति** “नूनं भगवत” इत्यस्मिन् उक्तं, “अहो पश्यत नारीणा”मित्यनेन तासामुत्कर्षो भक्त्या बोधित इति, स्वस्य भक्त्यभावात् **हीनत्व कर्मभिरित्युक्तं**, “नासां द्विजातिसंस्कार” इत्यादिना संस्काराणां व्यतिरेकव्यभिचारदर्शनात् संस्काराणां भक्तिं प्रति न कारणतेति तदेवाहुः **संस्काराणामहेतुत्वमिति**, भक्तिं प्रत्यहेतुत्वमित्यर्थः, “अथापि ह्युत्तमश्लोके “इत्यनेन **भक्तेः साधनं अन्यत्** संस्कारादितरदित्यर्थः, तदाहुः **भक्तेरन्यच्च साधनमिति**, संस्कारादिभ्योन्यत् भगवदनुग्रहरूपमित्यर्थः, मूले संस्कारादिमतामप्यस्माकं न भक्तिरित्युक्त्वान्वयव्यभिचारो दर्शितः, अतोन्वयव्यतिरेकोभयव्यभिचारदर्शनान्न संस्कारादीनां भक्तिकारणत्वमिति सिद्धं, **स्वभक्तेबोंधन हेतुरिति स्वभक्तेर्बोधन** भगवत्कर्तृकयाचने **हेतुरित्यर्थः**, यजमानानां भगवद्विषया या भक्तिस्तस्या उद्बोधनमेव याञ्चाप्रयोजनमिति भावः, **अन्यथा नोपपद्यत** इति यदि भक्तेरुद्बोधनं न कर्तव्यं स्यात् तदा भगवान् न याचेत, तदुक्तं “अन्यथा पूर्णकामस्ये”ति श्लोकेन, **तथात्वसाधनं तस्येति तस्य** भगवत्कर्तृकयाचनानर्हत्वस्य साधनं उपपादनं “हित्वान्यान् भजते यं श्री”रिति श्लोकेनेत्यर्थः, **कर्मवैयर्थ्यबोधनमिति द्वाभ्यां कर्मवैयर्थ्यबोधनमित्यन्वयः**, **रूपद्वयोक्त्यैवेति** “देशः कालः पृथग् द्रव्य” मित्यनेन कर्मस्वरूपं, “स एष भगवान् साक्षादि”त्यनेन भगवत्स्वरूपमुक्तं, एवं **रूपद्वयोक्त्या** स्वकृतकर्मणो **वैयर्थ्यमुक्तं** “अपि मूढा न विद्महे” इत्यनेनेत्यर्थः, **स्त्रीसम्बन्धात् कृतार्थतेति** “अहो वयं धन्यतमा येषां नस्तादृशीः स्त्रिय” इति श्लोके **स्त्रीसम्बन्धात कृतार्थतोक्तेति** ज्ञेयं, **क्षमापनं नमस्कारैरिति** “नमस्तुभ्यं भगवते” इति श्लोके नमस्कारैः क्षमापनमुक्तं, प्रार्थनाभिरिति **प्रार्थनाभिः क्षमापनमित्यन्वयः**, “स वैष आद्यः पुरुष” इति श्लोके प्रार्थनाभिश्च क्षमापनमित्यर्थः, **अनागमनमिच्छात** इति यद्यपि भगवद्दर्शनार्थमिच्छास्ति तथाप्यनागमनं कंसभयादिति “इति स्वाघमनुस्मृत्ये”ति श्लोकेनोक्तमित्यर्थः **भक्त्यैवेत्थं मतिरिति** पश्चात्तापं कृत्वा भगवद्वैमुख्यनिन्दादिरूपा भगवद्भक्तस्वस्त्रीसङ्गसभाजनापराधक्षमापनादिरूपा **मतिर्भक्त्यैव भवेद्** यतः पूर्वमप्येते ब्राह्मणा भक्ताः स्थिता अतः एतादृशी सद्बुद्धिर्जातेत्यर्थः, **यद्विश्वेश्वरयोरित्यस्य** विघृतौ **वस्तुतो भगवतैवे**त्यारभ्य न **विरुद्धानि भवन्तीत्यन्तग्रन्थस्यार्थष्टिप्पण्यां** स्फुटः ॥ ३७ ॥ **दृष्ट्वा स्त्रीणामित्यस्य** सुबोधिन्यां **धर्मोपसर्जनेन धर्म्यैव जात** इति ऐश्वर्यादिधर्मान् गौणीकृत्य तेषामस्फुरणं कृत्वा यज्ञपत्नीनां हृदये धर्म्यैव “आनन्दो ब्रह्मेति व्यजाना”दिति श्रुतेरानन्दरूप एव स्फुरितः, कोटिकन्दर्पाधिकलावण्य एव तासां हृदये **स्फुरित** इति भावः, **स्त्रीणां तत्र भक्तिरिति** केवलधर्मिणि साक्षान्मदनमोहनस्वरूपे श्रीकृष्णचन्द्रे काकभावेन स्त्रीणां भक्तिरित्यर्थः ॥ ३८ ॥ **विमुखा ये त्वधोक्षज** इत्यस्य विवृतौ **ज्ञानेप्यात्मसाक्षात्कार** इत्यारभ्य **ते सर्वे पूर्वपक्षा** इत्यस्यार्थष्टिप्पण्यां स्फुटः ॥ ३९ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

अथानुस्मृत्य विप्रास्ते इत्यादीनामध्यायसमाप्तिपर्यन्तानां चतुर्दशानां श्लोकानां वाक्यार्थानाहुः **पश्चात्ताप** इत्यादिभिश्चतुर्भिः का० २०६४–२०९४ । **पश्चात्ताप** इत्यादि “अथानुस्मृत्य विप्रास्ते” इत्येकेन **पश्चात्तापः**, ‘दृष्ट्वा स्त्रीणां भगवती”त्यनेन स्वनिन्दा, धिग् जन्मे’त्यनेन **तस्य** विगर्हणस्य **हेतुः**, “नूनं भगवतो माये”त्यनेन **तथात्वे** वैमुख्ये मायामोहरूपो **हेतुः स्वहीनत्वं च कर्मभिरिति** स्वशब्दो विप्रपरः, तथा च भगवद्वैमुख्येन कर्मणामाधिदैविकत्वासम्पत्त्या कर्मरहितत्वमेव विप्राणामित्यर्थः, एतदपि “नूनं भगवतो माये”त्यस्मिन्नेव श्लोके बोधितं, तदुक्तमेतच्छ्लोकव्याख्याने सुबोधिन्यां “द्विजा इति सम्बोधनमस्य यज्ञस्याधिदैविकवैमुख्येन असम्पन्नत्वा”दिति, “अहो पश्यत नारीणा”मिति श्लोकस्तु प्रक्षिप्तः, सुबोधिन्यां व्याख्यानाभावात्, **संस्काराणामहेतुत्वमिति** ‘नासां द्विजातिसंस्कार’ इति “तथापि ह्युत्तमश्लोक” इति श्लोकद्वयेन संस्काराणां भक्तिहेतुत्वं नास्ति, किन्तु **भक्तेः** संस्कारेभ्योन्यदनुग्रह एव **साधनमित्युक्तं**, **स्वभक्तेर्बोधनमिति** “ननु स्वार्थविमूढाना”मिति श्लोके **स्वभक्तेर्विप्राणां** भक्तेर्बोधनमुद्बोधनं भगवतो याचने हेतुरित्युक्तं, “अन्यथा पूर्णकामस्ये”तिश्लोकार्थमाहुरन्यथेति, **अन्यथा** विप्राणां प्रबोधस्य याचनफलत्वाभावे याचनं **नोपपद्यत** इत्यर्थः ‘हित्वान्यान् भजते यं श्री’रिति श्लोकार्थमाहुः **तथात्वसाधनं तस्येति तस्य** भगवतो याचनानर्हत्व-

साधनमित्यर्थः, **कर्मवैयर्थ्य**मिति 'देशः कालः पृथग् द्रव्य'मिति श्लोकेन कर्मस्वरूपमुक्तं, 'स एष भगवान् साक्षा'दित्यनेन भगवत्स्वरूपमुक्तमित्येवं द्वाभ्यां श्लोकाभ्यां रूपद्वयोक्त्या स्वकृतकर्मणो वैयर्थ्यबोधनमित्यर्थः, तर्हि भक्तिरपि कथं सिद्धेत्याशङ्क्याहुः **स्त्रीसम्बन्धात् कृतार्थते**ति एतच्च 'अहो वयं धन्यतमा' इति श्लोकार्थकथनं ज्ञेयं, यद्यप्ययं श्लोको विगीतस्तथापि सुबोधिन्यां व्याख्यात इति तदर्थोऽपि कारिकायां सङ्गृहीतः, सहस्रनामादौ प्रक्षिप्ताध्यायार्थसङ्ग्रहवत्, तथा च **भक्तसङ्गादेव भक्तिर्न तु स्वकृतकर्मणे**ति कर्मणो वैयर्थ्यमेवेति भावः, **क्षमापन**मित्यादि 'नमस्तुभ्यं भगवत' इति श्लोकेन नमस्कारैः **क्षमापनं**, 'स वै ष आद्यः पुरुष' इत्यनेन **प्रार्थनाभिः क्षमापनमित्यर्थः**, **अनागमनमिच्छात** इति इच्छात इति ल्यब्लोपे पञ्चम्यर्थे तसिल् सप्तम्यर्थे वा, तथा च **भगवद्दर्श**नेच्छां प्राप्य वा इच्छायां सत्यामप्यपराधक्षमापनार्थं विप्राणां व्रजे **अनागमनं** कंसभयादेवेत्यर्थः, तदुक्त"मिति स्वाघमनुस्मृत्ये"ति श्लोकेन, कंसभयप्रकारश्च व्याख्यातः सुबोधिन्यां, एतच्छ्लोकविवरणे एव **ब्राह्मणाना**मिति का० २१०६। इदं टिप्पण्यां पक्षद्वयेन व्याख्यातं, तथा हि **ब्राह्मणाना**मिति अयं सत्रलक्षणो धर्मो अन्नसमर्पणेन न बाध्यते अन्नदानस्यावश्यकत्वादिति भावः, किञ्चाग्रे विप्राणां भगवद्विषयकस्नेहात्मकफलदर्शनादपि साधनवैगुण्यं न वक्तुं शक्यमित्याहुः **स्नेहाच्चापी**ति, "अथानुस्मृत्य विप्रास्ते" इत्यादिना भगवति स्नेहदर्शनादपि धर्मबाधो न जात इति ज्ञायत इत्यर्थः, अत्र "न पुमान् मामुपव्रज्य भूयो याचितुमर्हती"ति बलिवाक्यसत्यत्वार्थं भगवतैव आज्ञाभङ्गः कारित इत्युक्तं सुबोधिन्यां, एतट्टिप्पण्यां च, ननु याञ्चाभङ्गश्चेत् भगवत्कर्तृक एव तदा याञ्चाभङ्गस्य विप्रापराधत्वेन कथनं कथमित्याशङ्क्याहु**र्भिक्षारूपेणे**ति, भगवता विहितैव याञ्चा बाध्यत इत्यर्थः, बलिवाक्यसत्यत्वाय ब्राह्मणांस्तथा प्रेरयित्वा भगवतैवाज्ञाभङ्गः कारितो यद्यपि तथापि भिक्षारूपेण अदानेपि लोकरीत्या गोपेभ्यो दानमुचितमेवेति लोकरीत्याप्यदानाल्लौकिकी याञ्चा विप्रैरेव बाध्यत इति युक्तमपराधत्वेन कथनं याञ्चाभङ्गस्येति भावः, ननु सर्वापि जीवकृतिर्भगवत्प्रेरणाधीनैवेति को विशेष इति चेत्, सत्यं, भगवत्प्रेरणं हि द्विविधं, एकं जीवादृष्टानुरूपं अपरं स्वातन्त्र्येण विशेषेच्छयेति, प्रकृते भिक्षारूपेण याञ्चाभङ्गो भगवता स्वतन्त्रप्रेरणया कारित इति तस्मिन्नंशे न विप्रापराधः, लौकिकयाञ्चाभङ्गस्तु स्वादृष्टानुरूपप्रेरणया भगवता कारित इति विभेदः, अथ टिप्पण्युक्तद्वितीयव्याख्यानानुसारेण व्याख्यायते, ननु भक्तवाक्परिपालकत्वाद्भगवतः कथं बलिवाग्विरुद्धं स्त्रीषु याचनं कृतवानित्यत आहु' **ब्राह्मणाना**मिति, याञ्चा हि चतुर्विधा वर्णाश्रमधर्मरूपा स्नेहप्रयुक्ता लौकिकी दैन्यप्रयुक्ता चेति, तत्र बलिवाक्येन वर्णाश्रमधर्मरूपा स्नेहप्रयुक्ता च या याञ्चा सा न बाध्यते, कन्यादिविषयिणी लौकिकी याञ्चापि न बाध्यते, किन्तु दैन्यप्रयुक्तैव सा बाध्यत इत्यर्थः, प्रकृते च न दैन्यप्रयुक्ता सा "प्रसीदन्निदमब्रवीदिति वाक्यादिति भावः ॥ ३७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथानन्तरं यत् यस्मात् मर्त्यविडम्बयोः नरानुकरणवतोर्विश्वेश्वरयोर्याञ्जामहन् हतवन्तः, अतः 'कृतागसो वयम्' इत्यनुस्मृत्य ते विप्रा अन्वतप्यन्नित्यन्वयः ॥ ३७ ॥ स्त्रीणां भगवति कृष्णे अलौकिकीमत्युत्कटां भक्तिं दृष्ट्वा आत्मानं च तथाभक्त्या हीनं दृष्ट्वा अनुतप्ताः सन्तः आत्मानं व्यगर्हयन् अनिन्दन् ॥ ३८ ॥ निन्दाप्रकारमाह—धिगिति। धिगिति अधिक्षेपे। अधः अक्षजं ज्ञानं यस्मात् सः अधोक्षजः अतीन्द्रियः तथाभूतोऽपि कृपया प्रत्यक्षो जातः, तस्मिन् श्रीकृष्णे ये तु वयं विमुखास्तेषां नोऽस्माकं यज्जन्मादि तत् सर्वं धिक् अकिञ्चित्करम् अतितुच्छमित्यर्थः। जन्म विशिनष्टि—त्रिवृदिति। शौक्लं, सावित्रं, दैक्ष्यं चेति त्रिगुणितम्। विद्यां वेदविद्याम्। व्रतं ब्रह्मचर्यम्। बहुज्ञतां चातुर्यम्। कुलं प्रसिद्धम्। क्रियाया दाक्ष्यं चातुर्यम् ॥ ३९ ॥ "नूनं निश्चितमेतत् भगवतो माया योगिनां ज्ञानयोगचेष्टानामपि मोहिनी, कर्मनिष्ठानां शास्त्रमर्यादारहितानां च मोहिनी, इति तु किं वक्तव्यम्" इति सूचयितुमपिशब्दः। यत् यस्मात् वयं नृणां गुरवः उपदेशकर्तारोऽपि स्वार्थे स्वप्रयोजने मुह्यामहे मुह्यामः। गुरुत्वे हेतुमाहुः—द्विजा इति। "जन्मना ब्राह्मणो गुरुः" इति वाक्यात् ॥ ४० ॥

अन्वितार्थप्रकाशिका

एवमिति। लीलार्थं स्वीकृतनरवपुः श्रीकृष्णः एवं नृलोकमनुशीलयन् अनुकुर्वन् रूपवाक्कृतैः रूपसौन्दर्येण वाङ्माधुर्येण च कृतैर्नानाविधचरितैश्च गोगोपगोपीनामिति। कर्मणि शेषे षष्ठी। "नौ वयोधर्म" इति सूत्रे मूलमूलेति निर्देशादेकशेषशास्त्रमनित्यम्। गोपादीन् रमयन् रमयितुं रेमे। हेतौ शता। ब्राह्मणीरमणे लीलासौष्ठवाभावान्न रेमे। एतेन रासात्पूर्वमपि गोपीभिः रमणं सूचितम् ॥ ३७ ॥ अथेति। अथानन्तरं यत् यस्मात् नृविडम्बयोः नरानुकरणवतोर्विश्वेश्वरयोर्याच्ञामहन्म वयं हतवन्तः। अतः कृतागसो वयमित्यनुस्मृत्य ते विप्रा अन्वतप्यन् ॥ ३८ ॥ दृष्ट्वेति। स्त्रीणां भगवति कृष्णे अलौकिकीमत्युत्कटां भक्तिं दृष्ट्वा आत्मानं च तया भक्त्या हीनं दृष्ट्वा अनुतप्ताः सन्तः आत्मानं व्यगर्हयन् अनिन्दन् ॥ ३९ ॥ धिगिति। अधोक्षजे कृष्णे ये तु वयं विमुखास्तेषां नोऽस्माकं यत्त्रिवृत् शौक्लं सावित्रं दैक्ष्यं चेति त्रिगुणितं जन्म धिक्। विद्यां वेदविद्यां व्रतं ब्रह्मचर्यं बहुज्ञतां चातुर्यं कुलं प्रसिद्धं क्रियायां कर्मणि दाक्ष्यं चातुर्यं क्रियाः दाक्ष्यं चेति पदद्वयं वा तत्सर्वं धिक् ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नृविडंबयोर्नरानुसृतो याचनां यतः अहन्म हतवंतः ततो वयं कृतागसः कृताऽपराधाः अभवाम इत्यनुस्मृत्य ते अन्वतप्यन् मुहुरनुतापमकुर्वन् ॥ ३७ ॥ आत्मानं स्वजीवं तया भक्त्या व्यगर्हयन् निंदयामासुः ॥ ३८ ॥ नोऽस्माकं त्रिवृत् शौक्लं सावित्रं यज्ञदैक्षमिति त्रिविधं यज्जन्म तद्धिक् अतिगर्हितं व्रतं ब्रह्मचर्यादियमरूपं क्रियादाक्ष्यं यज्ञकर्मकौशल्यम् ॥ ३९–४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ लीलया न तु कर्मणा नरस्येव वपुर्यस्य स भगवान् एवममुना प्रकारेण, रूपं च वाक् च कृतानि चेष्टितानि च तैः, नृलोकं मानुष्यं, अनुशीलयन् अनुकुर्वन् सन्, गावश्च गोपाश्च गोप्यश्च तासां, कर्मणि षष्ठी । गवादीनित्यर्थः । रमयन् स्वयमपि, रेमे ॥ ३७ ॥ अथेति ॥ अथानन्तरं, ते पूर्वोक्ताः विप्राः अनुस्मृत्य भगवान् यदुष्ववतीर्ण इति संश्रुतं स्मृतिपथमानीयेत्यर्थः । कृतागसः, हेतुगर्भमिदम् । तत्त्वात् अन्वतप्यन् । किं तदागो यतोऽन्वतप्यंस्तत्राह । यद्यस्मात्, मर्त्यविडम्बयोः मर्त्यमनुकुर्वतोः, विश्वेश्वरयोः याञ्चां अहन् संबभञ्जुः । एतदेव तत्कृतागस्त्वमिति भावः । अहन्म नृविडम्बयोरिति पाठे अपि अहन्म इति क्रियापदमात्रे भेदः ॥ ३८ ॥ तथा भार्या मानयन्तस्ते भगवद्भक्तिरहितमात्मानं स्वयमेव व्यनिन्दन्नित्याह ॥ दृष्ट्वेति ॥ स्त्रीणां स्वस्वाङ्गनानां, भगवति कृष्णे, अलौकिकीमनितरसाधरणीं, लोकातीतामित्यर्थः । भक्तिं दृष्ट्वा, आत्मानं च, तया श्रीकृष्णभक्त्या, हीनं रहितं च दृष्ट्वा, अनुतप्ताः संजातान्तःपरितापाः सन्तः, व्यगर्हयन् । स्वकुत्सां चक्रुरित्यर्थः ॥ ३९ ॥ गर्हाप्रकारमेवाहुः ॥ धिगिति ॥ नोऽस्माकं, त्रिवृत् शौक्लं सावित्रं दैक्ष्यमिति त्रिगुणितं जन्म, धिक् । अस्माकं विद्यां धिक्, व्रतं ब्रह्मचर्यं, धिक्, बहुज्ञतां धिक्, कुलं धिक्, क्रिया यज्ञादिरूपा तत्र दाक्ष्यं तु तदनुष्ठानसामर्थ्यं च, धिक् ‘अभिसर्वतसोः कार्या धिक्’ इत्यादिवचनेन शेषषष्ठ्यपवादकत्वेन जन्मादीनां द्वितीया । धिक्शब्दो निन्दाद्योतकः । अस्माकं जन्मादयो निन्द्या इत्यर्थः । तत्र हेतुं वदन्तः स्वात्मानं विशिंषन्ति । ये वयं, अधोक्षजे भगवति विमुखाः । अत्र धिग्जन्म नस्त्रिवृदिति, धिग्जन्म नस्तु, धिग्बुद्धिमिति, धिग्जन्म नस्तत्त्रिवृतमित्यादयो बहवः पाठाः सन्ति । तत्र यो व्याख्यातः स एव साधीयान् ॥ ४० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अथानुस्मृत्येति : १०.२३.३७.

ज्ञानेनैव निवर्ततेऽमतिरिति स्यादाग्रहश्चेदसौ तेषामस्तु सुखेन मे त्वनुमतं श्रीशाङ्घ्रिभाजां सताम् ।
हेतुर्वीक्षणमेव यद्द्विजवरा वेदार्थविज्ञा अपि तादृक् तन्निजयोषिदीक्षणजुषः श्रीशस्वरूपं विदुः ॥ ७५ ॥
यदि नैवंविधं वाच्यमज्ञानज्ञानयोर्जनिः । प्रागुत्तरं च निर्हेतुकैव तेषामितीक्ष्यताम् ॥ ७६ ॥

दृष्ट्वेति : १०.२३.३८.

ज्ञातोपनिषदर्थानां द्विजानामात्मगर्हणम् । स्त्रियो भक्तिमतीर्वीक्ष्य तत एवोपयुज्यते ॥ ७७ ॥
यज्ञातिव्यपराङ्मुखीभवनजं यच्चाच्युताज्ञानजं यच्चाहं कृतिजं यदध्वरगतं स्याद्यच्च यच्चापरम् ।
तत्सर्वाघविनिष्कृतिर्विधिवशाज्जातानुतापेन नः प्रायश्चित्तमशेषकिल्बिषहरं नेदृग्विधं क्वापि यत् ॥ ७८ ॥

धिग्जन्मेति : १०.२३.३९.

शुद्धं जन्म बहुज्ञता निरवधिर्यज्ञक्रियापाटवं शङ्काशून्यमखण्डितो व्रतविधिर्वंशोऽपि सभ्येडितः ।
नैकेनापि निजाश्रिता ध्रुवममीत्युद्बुद्धभावेन यन्नीताः श्रीपतिसम्मुखं तदखिलान्वच्मो न धिग्धिक्कथम् ॥ ७९ ॥

नूनमिति : १०.२३.४०.

वक्तारो वयमेव सर्वविषये प्रज्ञाततत्त्वा अपि धर्माधर्मनिरूपणैकधिषणा लोकेषु निष्कल्मषाः ।
सम्पाद्यं प्रणिपाततोऽस्मदतनुज्ञानं जनैर्वागियं स्त्रीगोपप्रसृतोपहासलतिकावृद्ध्यै न भूयात्किमु ॥ ८० ॥

कृष्णप्रिया

राजन्, उधर वह ऋषिवृन्द, मनुष्यलोक का अनुकरण करने वाले जगदीश्वर भगवान श्रीकृष्ण और बलभद्रजी की याचना का अवहेलन का बार बार स्मरण कर, अपने किया हुआ असाधारण अपराध का परिताप करने लगे ॥ ३७ ॥ यज्ञादि सर्व कुशल कर्मों के फल स्वरूप भगवान् श्रीकृष्ण में अपनी पत्नियों की अलौकिक भक्ति को और अपने में कृष्णभक्ति के अभाव को देखकर परिताप करते हुए अपनी आत्मा की निन्दा करने लगे ॥ ३८ ॥ राजन्! वे ऋषिवर कहने लगे कि, हमारे शुक्ल–सावित्र और यज्ञ दीक्षित तीन जन्मों को, वेदों के ज्ञान को, हमारे चान्द्रायणादि व्रत को हमारा बहुज्ञता एवं तत्वज्ञान को उत्तम कुल को और अग्निहोत्रादि कर्मनिपुणता को भी धिक्कार हो क्योंकि हम अधोक्षज भगवान से विमुख है ॥ ३९ ॥ यह

बात निश्चित है कि, भगवान कि माया बड़े-बड़े मायावी पुरुषों को भी मुग्ध कर देती है, अहो खेद की एवं आश्चर्य की बात है कि हम ज्ञानी एवं लोकगुरु कहलाते और काफी गुरु पद से ख्यातनाम है, वे हम भगवत्सेवा भगवद् भक्ति नाम के हमारे परमहित से वञ्चित हुए और भगवद् भक्ति मार्ग को चूक गए ॥ ४० ॥

अहो पश्यत नारीणामपि कृष्णे जगद्गुरौ । [1]दुरतं भावं योऽविध्यन्मृत्युपाशान् गृहाभिधान् ॥ ४१ ॥
नासां द्विजातिसंस्कारो न निवासो गुरावपि । न तपो नात्ममीमांसा न शौच न क्रियाः शुभाः ॥ ४२ ॥
अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे । भक्तिर्दृढा न चास्माकं संस्कारादिमतामपि ॥ ४३ ॥
[3]ननु स्वार्थविमूढानां प्रमत्तानां गृहेहया । अहो नः स्मारयामास गोपवाक्यैः सतां गतिः ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—अहो कृष्णे जगद्गुरौ नारीणाम् अपि दुरन्तम् भावम् पश्यत, यः, गृहाभिधान् मृत्युपाशान् अविध्यत् ॥४१॥ आसाम् द्विजातिसंस्कारः न, गुरौ अपि निवासः न, तपः न, आत्ममीमांसा न, शौचम् न शुभाः क्रियाः न ॥ ४२ ॥ अथ अपि, हि योगेश्वरेश्वरे उत्तमश्लोके कृष्णे दृढा भक्तिः, च संस्कारादिमताम् अपि, अहो ? अस्माकम् कृष्णे भक्तिः न ॥ ४३ ॥ ननु स्वार्थविमूढानाम् गृहेहया प्रमत्तानाम् अहो सताम् गतिः (श्रीकृष्णः) गोपवाक्यैः नः स्मारयामास ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

योऽविध्यदच्छिनत्त दुरंतं भावं भक्तिं पश्यतेति ॥ ४१ ॥ द्विजातिसंस्कार उपनयनम् । क्रियाः ध्योपासनादयः ॥ ४२-४५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अहो अद्भुतम् । कृष्णे दुरंतभावमव्यवहितभक्तिम् । यः दुरंतभावः । अविध्यत् 'व्यध ताडने' छेदनमपि यथाकथंचित्ताडने पर्यवस्यति ॥ ४१ ॥ गुराविति । सामीपिकाधारे सप्तमी, वटे गाव इति वत् । विद्यावाप्तये गुरुकुलवासो न कृत इत्यर्थः । तपः ब्रह्मचर्यादि । आत्ममीमांसा ब्रह्मविचारः । शौचम् बाह्याभ्यंतरशुद्धिः । शुभाः क्रिया यागादिलक्षणाः ॥ ४२ ॥ यद्यप्यासां संस्कारादयो न संति तथापि कृष्णे भक्तिर्दृढा सत्यपि वारणकारणेऽवार्येत्यर्थः ॥ ४३ ॥ स्मारयामास अहो यूयं विद्वांसोऽपि किमिति मां न स्मरतेति विज्ञापयामास । तत्र हेतुः सतां गतिः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो बत स्त्रीभ्योऽपि वयं निकृष्टा इति शोचन्ति अहो इति त्रिभिः । अहो आश्चर्ये । ननु, स्त्रीणां पत्युरितरस्मिन् भावोऽनुचितः तत्राहुः जगद्गुरौ पतिभ्योऽप्यसौ परमापेक्ष्य इति भावः । दुरन्तं सर्वबाधकं भावं प्रेम अविध्यदिति अतीतनिर्देशस्तासां सद्य एव गृहाद्यासक्त्यपगमाऽभिप्रायेण ॥ ४१ ॥ आश्चर्यत्वमेव व्यनक्ति-तासामिति युग्मकेन । द्विजातिसंस्कार उपनयनादिस्तद्धर्मद्वारं तथा शौचं सामान्यधर्मः गुरुनिवासादयश्च क्रमेण ब्रह्मचारिवानप्रस्थयतिगृहधर्माः तत्र च शोकावेशेन क्रमातिक्रमः किंवा गार्हस्थ्यधर्मस्य बहुमानेन पश्चात् निर्देशः । अत एव शुभा इत्युक्तिः अथापि तत्तद्रहितत्वेऽपि कृष्णे दृढा भक्तिरासां जाता तस्य माहात्म्येन तद्भक्तेरपि माहात्म्यं बोधयितुं तं विशिषन्ति उत्तमश्लोके वैरिणामपि मोक्षादिदानात् परमसत्ख्यातिमिति योगानामीश्वराः भक्तियोगमन्तस्तेषामीश्वरे सेव्यत्वेन लभ्ये भक्तिर्दृढा कृतविरोधैरस्माभिरपि परिच्छेत्तुमशक्त्या पुनराश्चर्यमेव व्यतिरेकेण दृढयन्ति, नचेति अत्र । द्विजातिसंस्कारादयः स्वयं भक्तेः कारणानि म भवन्त्येव तद्गुणकसत्सङ्गस्त्वासां तत्कारणतया नामीभिरनुमातुं शक्त इति श्रीशुकदेवाभिप्रायः ॥ ४२-४२ ॥ उत्तमश्लोकत्वमेव दर्शयन्ति । नूनं, निश्चितं "सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम्" इति न्यायेन तद्भक्तिं विना सर्वस्याप्यर्थस्यासिद्धेः स्वार्थे विमूढानामत्यन्ताज्ञानां यतो गृहेहया गृहकृत्येन प्रमत्तानाम वहितानां नः अस्मान् स्मारयामास आत्मानं यतः सतां स्वस्वाधिकारप्राप्तवेदोक्ततत्पराणां गतिः यद्वा, सतां भक्तानां गतिरपि केवलकारुण्येनैवेत्यर्थः । यद्वा, सन्त एव तावत्परमदयालवः स तु तेषामपि गतिराश्रय इति अहो आश्चर्यम् उत्तमश्लोकत्वात् तेन बोधिता अपि वयमविवेकान्न बुद्धवन्त इति भावः ॥ ४४ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो बत स्त्रीभ्योऽपि वयं पुरुषा निकृष्टा इति शोचन्ति-अहो इति त्रिभिः खेदे । ननु स्त्रीणां पत्युरितरस्मिन् भावोऽनुचितः ? तत्राहुः—जगद्गुरौ पतिभ्योऽप्यसौ परमापेक्ष्य इति भावः । दुरन्तमपरिच्छिन्नं ह्रासशून्यं वा, भावं रतिं प्रेम वा,

---

१. दुरन्त—श्रीधर. वंशी. वीर. विज. । २. यच्छिन्द्यान्मृत्यु—विज. । ३. नूनं—गो. प्रे. टी. ।

अविध्यदिति अतीतनिर्देशस्तासां सद्य एव गृहाद्यासक्त्यपगमाद्यभिप्रायेण। एवम् 'अचिरान्मामवाप्स्यथ' इति भगवदुक्तञ्च सिद्धमिति सूचितम्, तत्साधनापत्तेः ! तथा तासां गृहस्थितिप्रकारश्च दर्शित इति ॥ ४१ ॥ नारीणामपीत्यपि शब्देन सूचितं पुरुषेभ्यो न्यूनत्वमभिव्यञ्जयन्ति तासामिति द्विजातिसंस्कारः सामान्यतो द्विजत्वमात्रविषयको धर्मः, तथा शौचं सामान्यधर्मः, गुरुनिवासादयश्च क्रमेण ब्रह्मचारि-वानप्रस्थ-यतिगृहिधर्माः। तत्र च शोकावेशेन क्रमातिक्रमः किंवा गार्हस्थ्यधर्मस्य बहुमानेन पश्चान्निर्देशः, अतएव शुभा इत्युक्तिः। यद्वा द्विजातेः संस्कारविशेषो विष्णुदीक्षादिः; तपः श्रीविष्णुस्मृतिः 'तत्तपो यद्धरिस्मृतिः' इति वचनात्, शौचं विशुद्धचित्तता, क्रियाः शुभा यज्ञे यज्ञेश्वरपूजाद्याः स्थण्डिलादौ वा हरिपूजादयः आत्ममीमांसा आत्मनो हरेर्विचारः ॥ ४२ ॥ तथापि तत्तद्रहितानासपि कृष्णे दृढा भक्तिर्ज्जाता, आसां तस्य माहात्म्येन तद्भक्तेरपि माहात्म्यं बोधयितुं तं विशिंषन्ति—उत्तमः सर्वतः श्रेष्ठः श्लोकः कीर्त्तिर्यस्य, अवतारित्वान्निजाशेषभगवत्ताप्रकटनाच्च। यद्वा, उद्गतं तमोऽज्ञानं संसारलक्षणं वा यस्मात् स श्लोको यस्य तस्मिन्, यतः कृष्णे किंवा तत्रापि कृष्णे उक्तार्थमेवेदम्। अतएव योगेश्वराणां सनकादीनामपि किमुतास्माकं ईश्वरसेव्ये। निश्चयार्थेन हि-शब्देन तत्र शास्त्रप्रामाण्यादिकं बोधयति दृढेति। अस्माकं चपलापि भक्तिर्नास्तीति सूचयन्ति ॥ ४३ ॥ ननु तर्हि कथमन्नयाचनादिकमस्मासु ? तत्राहुः नन्विति वितर्के ! यद्वा, उत्तमश्लोकत्वमेव दर्शयन्ति, ननु निश्चितं स्वार्थे तद्भक्तिलक्षणे विमूढानामत्यन्ताज्ञानाम्, यतो गृहकृत्येन प्रमत्तानामनवहितानाम्, यद्वा, गार्हस्थ्येन प्रकर्षण मत्तानां महागर्ववतामपि नोऽस्मान् स्मारयामासात्मानम्, यतः सतां धार्मिकाणां गतिः इत्यात्मनो यज्ञपरतया धार्मिकाभिमानाद्युक्तम्; यद्वा, सतां भक्तानां गतिरपि, अहो आश्चर्यम्, उत्तमश्लोकत्वात्तेन बोधिता अपि वयमविवेकान्न बुद्धवन्त इति भावः ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

दुरन्तभावं विश्लेशाऽसह भावबन्धनम् ॥ ४१ ॥ शौचम् अघमर्षणादिभिः शुद्धिः ॥ ४२–४५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अहो नारीणामप्युक्तजन्मादिमद्ध्ये केनापि रहितानामपीति भावः। कृष्णे दुरन्तभावमनवधिकभक्तिं पश्यत यो दुरन्तभावः गृहाभिधान् मृत्युपाशान् भगवन्मायाप्रयुक्तानविद्धयत् अच्छिनत् तं दुरन्तभावं पश्यतेत्यन्वयः ॥ ४१ ॥ द्विजा अपि नारीणामपीत्यनेनाभिप्रेतं स्पष्टयन्ति—नेति द्वाभ्याम्। आसां नारीणां न द्विजातिसंस्कारः गोपनयनान्तसंस्कारः न च गुरुकुलवासः नापि तप आदयः आत्ममीमांसा देहविलक्षणप्रत्यगात्मविचारः क्रियाः सन्ध्योपासनादिरूपाः ॥ ४२ ॥ अथाप्येषामभावेपि कृष्णे दृढा भक्तिर्भिद्यते द्विजातिसंस्कारादिमताप्यस्माकं सा न विद्यते ॥ ४३ ॥ अस्माकं विवेकोदयार्थमेव भगवतो याञ्चाऽन्यथा सा अवाप्तसमस्तकामस्यासङ्गतेत्याहुः—स इत्यादिभिस्त्रिभिः। गृहेहया गृहव्यापारेण प्रमत्तानामत एव स्वहितेषि विमूढानामप्यस्माकमहो सतां गतिर्हेतुगर्भमिदं सतां गतित्वाद्गोपवाक्यैः स्मारयामास साधुपरित्राणार्थमवतीर्णं निरतिशयपुरुषार्थस्वरूपमात्मानं याञ्चाव्याजेन स्मारयामासेत्यर्थः ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

दुरन्तभावम् अव्यवहितभक्तिं गृहाभिधानान्मृत्युपाशान् छिन्द्यात् छिनत्ति ॥ ४१ ॥ आसां स्त्रीणां द्विजातिसंस्कारः उपनयनलक्षणगुरौ गुरुकुलनिवासो विद्याध्ययनार्थमिति शेषः। आत्ममीमांसा ब्रह्मविचारः शौचं बाह्याभ्यन्तरशुद्धिः शुभाः क्रियाः यागादिलक्षणाः ॥ ४२–४४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ त्यक्तदेहाया द्विजपत्न्याः सौभाग्यमालोक्य द्विजानां विस्मयमाह—अहो इत्यादि बहुभिः। जगद्गुरौ कृष्णे नारीणां दुरन्तभावं पश्यतेत्यन्योन्यपरामर्शः। अपिशब्दः शास्त्राद्यनुशीलनरहितानाम्; बहुवचनं सर्वजनाभिप्रायेण। तस्या यथा देहत्यागो विस्मयकरस्तथान्यासाञ्च गुरुगौरवादित्यागः। यो दुरन्तभावो गृहाभिमान् मृत्युपापाशानविध्यत् चिच्छेद् तस्मादेता एव कृष्णानुग्रहयोग्या इत्यर्थः। यतः स्त्रियः खलु भावमात्रेणैव सद्य एव श्रीकृष्णं लभन्ते। अन्ये तु शमदमतितिक्षोपरतिभिश्चिरेणापि ज्ञातुमपि न समर्थाः भवन्तीत्यर्थः ॥ ४१–४२ ॥ इममर्थं स्वाचरितेन निर्णयन्ति अथापीत्यादि। अथापि एतद्दृष्ट्वापि संस्कारादिमतामपि अस्माकं कृष्णे भक्तिश्च न अस्तु भक्तिकार्यम्; यदि वा ईषदङ्कुरिताभूत् सापि न दृढा ॥ ४४–५२ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अहो ! पश्यत नारीणामित्यारभ्य अथापि ह्युत्तमश्लोके भक्तिर्नचास्माकमित्याद्यन्तं सतात्पर्यकञ्च। तथा हि स्त्रियस्तु तत्कालमेव भावमात्रेणैव तं तथा लभन्तेन तथा शमदमादिशीला मुनयो विवेकिनोऽन्ये—वेति बहुत्रैव दृश्यते इत्यादि ॥ ४१–५२ ॥

इति त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यासां पतिश्वशुरादिरूपेण वयं गुरवस्ता इमाः कृतार्था अभूवन् वयम् अन्धकूपे पतिता एवेत्याहुः—अहो इति। दुर्गमोऽस्माभिरनुभवितुमशक्योऽत इयत्ता यस्य तथाभूतं भावं हा प्राणरमण ! कृष्णेत्यादिगद्गदाक्षरवचनकम्पाश्रुपुलकवैवर्ण्याद्यनुभावज्ञापितं कृष्णे प्रेमाणं पश्यत। ननु, स्त्रीणां पत्युरितरस्मिन् भावोऽनुचितस्तत्राह, जगद्गुरौ यदारोपादेव पत्यौ स्त्रीणां गुरुत्वं विहितं साक्षाद्भूते तस्मिन् खलु को विचार इति भावः यो भावः मृत्युपाशान् अविध्यत् सद्यश्चिच्छेद गृहाभिधानिति गृहपत्यपत्यादिष्वसमासक्तिगन्धोपि सम्प्रति न दृश्यत इत्याद्यारभ्य एता एवास्माकं गुरव इति पतिभिरप्यद्यारभ्य कृष्णानुरागिण्य इमा आदरणीया एव न तु मनसा भार्या एव मन्तव्या इति भावः ॥ ४१ ॥ न त्वासां कृष्णानुरागे हेतुरस्मद्गम्य इत्याहुः – नासामिति। योगेश्वरे इति स एव स्वभक्तेर्हेतुं जानात्युपपादयति च नान्य इति भावः। तेन कृष्णरूपगुणप्रख्यापिव्रजस्थमालिकादिवनिताजनसत्सङ्गरूपो मूलहेतुस्तैरज्ञातत्वान्नोक्त इति शुकदेवाभिप्रायः ॥ ४२–४३ ॥ क्व भगवतः कारुण्यं क्व वाऽस्माकं दौरात्म्यमित्याहुः नन्विति ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

योऽविध्यत अच्छिनत तं दुरन्तमपारं भावं भक्तिं पश्यत ॥ ४१ ॥ क्रिया सन्ध्योपासनादयः ॥ ४२–४५ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अहो इत्याश्चर्ये नारीणामयोग्यानामपि हरौ दुरन्तं दुर्गममस्मद्दुर्बोधं भावं कृष्णेतिगदगदाक्षराश्रुपुलकादिलक्षितं भावं पश्यत ननु नारीणां पत्युरन्यत्र भावोऽनुचितस्तत्राह–जगद्गुराविति यदादेशात्तासां पतौ गुरुत्वं तस्मिन् साक्षाद्भूते को विमर्श इति भावः। यो भावो गृहाभिधान् मृत्युपाशानविद्यत् सद्यश्चिच्छेदेति गृहपत्यादिप्रीतिविगमादेता अस्मद् गुरव इति भावः ॥ ४१ ॥ न त्रासां कृष्णानुरागे हेतुर्ज्ञातुं शक्यते इत्याह नासामिति। द्विजातिसंस्कार उपनयनं गुरौ निवासस्तत्सेवा तपः शास्त्रालोचनम् आत्समीमांसा स्वात्मयाथात्म्यविचारः शौचं त्रिषवणस्नानादि क्रियाः सन्ध्योपासनादयः ॥ ४२ ॥ संस्कारादिमतामुपनयनादिविशिष्टानामपीति संस्कारादीनां तदुक्तिहेतुत्वमन्वयव्यतिरेकाभ्यां निराकृतं तासां तद्धेतुश्च नन्दीश्वरान्मथुरां प्रयान्तीनां मालिकादियोषितां तद्गृहबहिः प्रकोष्ठेषु विश्राम्यन्तीनां कृष्णगुणान् कीर्त्तयन्तीनां प्रसङ्ग एव दीर्घश्रुतेत्याद्युक्तेः स च तैरज्ञातत्वान्नोक्त इति बोध्यम् ॥ ४३ ॥ क्व हरेः कारुण्यं क्व च नो दौरात्म्यमित्याह —नन्विति गोपवाक्यैर्निजरूपं स्मारयामास ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अहो पश्यतेति स्वारस्यात्। अपिरुत्तरत्र वक्ष्यमाणेतद्दुर्मिलताहेतून्कटाक्षयति। जगद्गुरौ कृष्णे नारीणामपि दुरन्तोऽप्रतिबद्धो भावो भक्तिस्तं पश्यत। अहो यो गृहाभिधांस्तन्नाम्नो मृत्युपाशाश्छिन्द्यात्तम् ॥ ४१ ॥ तान्हेतूनाह ॥ नेति। आसां द्विजातिसंस्कारः साक्षादुपनीतिरतो न स्त्रीणां प्रदानकर्मैव यथोपनयनं तथेति विरोधः। गुरावपि न निवासो विद्यार्थमिति शेषः। न तपः स्वातन्त्र्येण तत्रानधिकारादात्ममीमांसा ब्रह्मविचारो न शौचमस्मद्वदन्तर्बहिःशुद्धिर्नः शुभाः क्रिया यागाद्याः ॥ ४२ ॥ एताश्चर्यं किं व्यलोकि भवद्भिरित्यत आहुः ॥ अथाऽपीति। संस्कारादिमतां संस्कारादिशुभक्रियादिसम्पन्नानामप्यस्माकं न दृढा भक्तिः ॥ ४३ ॥ उपदेशकाभावादियं दशाऽऽसीदित्यपि नास्मान्सूचयामास स तेनापि नास्माकं धीरुदियायेति वर्णयन्ति ॥ नन्विति स्वार्थविमूढानां गृहेहया प्रमत्तानां नो गोपवाक्यैः सतां गतिः स्मारयामास ॥ ४४ ॥

श्रीसुबोधिनी

किञ्चाहो इति, अहो इत्याश्चर्ये, नरेषु दुर्लभं नारीषु भवति **भावं** पश्यत, घुणाक्षरन्यायेन कादाचित्कं व्यावर्तयति **दुरन्तमिति,** ननु स्त्रीणां पुरुषेषु **भावो** भवत्येवेति किमाश्चर्यमित्याहुः **कृष्णे** जगद्गुराविति, सदानन्दो **जगद्गुरुश्च** तस्मिन् **नारीणां** भावो कामिष्वेव वर्तते न तु भगवत्यत आश्चर्य, ततः किमत आह **योविध्यदिति, यो भावो गृहसंज्ञकान् मृत्युपाशान-विध्यदच्छिनत्** तं **भावं भक्तिं पश्यतेति** ॥ नन्वस्य यज्ञस्य मुख्यफलाभावेप्युत्तरमीमांसान्यायेन चित्तशुद्धिपरत्वं भवत्वतो धिकारोनुचित इति चेत् तत्राहु**र्नासा**मिति, संस्काराणामहेतुत्वमन्वयव्यतिरेकव्यभिचात्, संस्काररहितासु स्त्रीषु भक्तिसम्भवात् संस्कारवत्स्वस्मासु तदभावात्, तदाहु**रासां स्त्रीणां द्विजातिसंस्कार** उपनयनं नास्ति **नापि गुरौ निवासो** वेदाध्ययनं **तपः** स्वधर्मः श्रौतस्मार्तकर्माणीन्द्रियनिग्रहो वा **स्नानादिना** क्लेशसहनं वा **नाप्यात्ममीमांसा**त्मविचारो **नापि शौचं नापि शुभाः क्रिया** अग्निहोत्रानयः ॥ ४१ ॥ एवं भक्त्यधिकरणे साधनाभावं निरूप्य भक्तिमाहु**रथापीति,** नन्वस्या भक्तेः संस्कारा न साधनभूता यथा जार इतीमामाशङ्कां व्यावर्त**यन्त्युत्तमश्लोक** इति, **उत्तमै**रपि व्यासवाल्मीकिपराशरादिभिः **श्लोक्यते** कीर्त्यत इत्यनेन प्रमाणोत्कर्ष उक्तः, प्रमेयोत्कर्षमाह कृष्ण इति, फलोत्कर्षोप्युक्तः, साधनोत्कर्षमाह **योगेश्वरेश्वर** इति, **योगेश्वराणामपीश्वरे**

नियन्तरि, सापि **भक्तिर्दृढा** पत्यादिभिः प्रतिबद्धापि न विहतेति तैलधारावदनवच्छिन्ना सर्वतोधिका, अन्वयव्यभिचारमाहुर्न **चास्माक**मित्यष्टचत्वारिंशत्संस्कारवतामपि ॥ ४२ ॥ ननु तासां जन्मान्तरे संस्काराः सिद्धाश्चर्षण्य एता अन्यथा भर्तृपरित्यागो न स्यादतः पुरुषा एवैते पूर्वजन्मनि गोपिका इव भवतां च 'जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिर्नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत' इत्यतो भवतां बहुजन्मसंस्कारा न जाता इत्याशङ्क्याश्चर्येण तस्य समाधानमाहुर्**नन्विति** कोमलसम्बोधने, ननु सत्यमेवमेव स्वार्थ**विमूढानां गृहेहया प्रमत्तानां** नास्माकं **गोपवाक्यैः** पूर्वस्थितिं **स्मारयामास**, वयमपि भगवदीया एव पूर्वं स्थितास्ततो दैत्यावेशाद् दैत्यप्रभुदेशे स्थित्या तैः पाल्यमानास्तदन्नभोजिनो विस्मृतस्वरूपा जातास्तच्च भगवान् **गोपवाक्य**मिषेण **स्मारयामासा**न्यथान्यान्नं किं भगवान् याचते? अस्मांश्च पुनः स्वकीयान् जानाति, **अहो** अत्याश्चर्यमेतत् कथं वाक्यमात्रेण प्रबोध इति, अलौकिकसामर्थ्यं हि भगवतः, अहो इति तस्यानुकरणं, अनेन पूर्वोक्तपक्षा निराकृताः, स्त्रियोप्येताः स्वस्यैव भगवतो दास्यो वयं च दासा नात्र सन्देहः, अन्यथा प्रतिकूलतर्कं वक्ष्यन्ति स्वार्थे भगवत्सेवायां विमूढा गृहेहया इति कृत्यचिन्ता गृहधर्माश्च तत्रापि **प्रमत्तास्तच्चिन्तया** भगवत्सेवायां वा **प्रमत्ता** अतः स्वसेवकान् स्मारितवान् साक्षादुपदेशेनाधिकारिणो मत्वा **गोपवाक्यैः**, तथाकरणे हेतुः **सतां गतिरिति सतामयमेव गतिः**, यद्येवं भगवानुपेक्षेत तदा सन्तो नष्टा एव भवेयुः ॥ ४३ ॥ एतत् सर्वं याचनान्यथानुपपत्त्या कल्प्यते तत्रान्यथोपपत्तिं कल्पयित्वा परिहरन्त्यन्यथेति, भगवतस्तु नापेक्षितं किञ्चिन् नापि दुःखनिवृत्तिस्तत्साधनं वा नापि सुखं तत्साधनं वा **पूर्णकाम**त्वात्, तस्य हि कामाः पूर्णा उत्पन्नाविपर्ययेन पूर्यन्ते लौकिकवत् किन्तु पूर्णा एवाविर्भवन्ति अतो नित्यविषयास्ते, तथा सति यान्नकामनाभगवत्याविर्भूता सान्नसहितैवेति सिद्धेर्थे याचनमनुपपन्नं परमुद्देशान्तरं चेत् तदा सिद्धमपि दूरीकृत्य साधनान्तरं करोति, असाधनं वा बोधयति, तस्मादात्मप्रबोध एव याचनफलं, किञ्च **कैवल्याद्याशिषां पतिर्भगवान्**, **कैवल्यं केवलता** सङ्घातनिवृत्त्या **केवलस्थितिः** प्रत्यापत्तिरूपं तत् प्रथमं फलं ततः पूर्वं दुःखमेवातः कैवल्ये प्राप्ते ततः स्वरूपेण भजनं तत आनन्दाविर्भावस्ततो भगवति प्रवेशो भक्तिर्वा तदनन्तरं धर्मा भगवदीया भगवदाज्ञापनरूपा अर्थाश्च तदीयाः कामाश्च, एवं **कैवल्याद्या या आशिषस्तासां पतिरयं** दाता नियामकः, तथा सति गोपानां क्षुदेव न स्यान् नापि तैः प्रार्थ्येत, लोकानामपि **कैवल्यादिदाता**, न हि तान् सङ्घाते स्थापयति येन क्षुद् भवेदतः क्षुधमप्युत्पाद्य विद्यमानेप्यन्ने तददत्वा बोधनार्थमेवात्र प्रेषितवान्, **किञ्चेशितव्यैरस्माभिः** किं स्यात्? **वयमीशितव्या** दासा न हि दासान्नं भुज्यते, तेभ्यो दीयत एव, न हि महाराजस्य दिनमात्रव्यवस्थामपि कश्चिद् दासः सम्पादयितुं शक्तः, नाप्यस्माभिस्तस्याग्रे कृत्यमत ईशस्यैतदनुकरणमात्रं न तु **याचन**, अनुकरणं तु रसोत्पत्त्यर्थमितिनिश्चयः, न हि नटस्य योगिभावप्रदर्शने किञ्चित् कृत्यमस्ति विना रसोत्पादनं तथा भगवद्याच्ञानुकरणमपि बोधनार्थमेव ॥ ४४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अथापीत्यत्र अष्टाचत्वारिंशदिति अधुना अपरसंस्काराभावेप्युत्तमदेहान्यथानुपपत्त्या पूर्वजन्मनि सिद्धा एवेत्यर्थः, **चर्षण्य** इति “यज्ञपत्न्यस्तथापरे” इति वाक्येन तादृशलीलाविषयत्वादेता अपि वक्ष्यमाणशक्तिमत्य इत्यर्थः ॥ ४२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

कैवल्याद्याशिषां पतेरित्यस्य विवरणे **ततो भगवति प्रवेशो भक्तिर्वेति** कैवल्यप्राप्त्यनन्तरं स्वरूपेण शुद्धजीवरूपेण भजनं, ततस्तिरोहितस्य स्वकीयानन्दस्याविर्भावः, ततः पक्षद्वयं मर्यादाभक्तानां भगवति प्रवेशः, पुष्टिमार्गीयाणां तु फलरूपा भक्तिरित्याहुः **भगवति प्रवेशो भक्तिर्वेति**, इदं त्ववधेयं, धर्मादयः कैवल्यान्ताः पुरुषार्था इति सर्वत्र प्रसिद्धिः, श्रीमद्भागवते तु “कैवल्याद्याशिषां पते”रिति वाक्यात् कैवल्यं प्रथमकक्षा, तत्स्वरूपं सुबोधिन्यां कैवल्यं **केवलता सङ्घातनिवृत्त्ये**त्यारभ्य **कामाश्चे**त्यन्तेन विवृतं, अत एव कैवल्यं ज्ञानादेव श्रुतौ निरूपितं “ज्ञानादेव हि कैवल्य”मिति, नैतावता भक्तेः काचित् क्षतिः, सङ्घातविवृत्त्या केवलस्थितिस्वरूपं कैवल्यं ज्ञानादेव भवति, अध्यासनिवर्तकत्वात् ज्ञानस्य, न हि कैवल्यमात्रं परमपुरुषार्थः, कैवल्यस्य प्रथमकक्षात्मकत्वात् “कैवल्याद्याशिषां पते”रिति वाक्यात्, परमपुरुषार्थस्तु पुरुषोत्तमनित्यलीलाधामप्रवेशः, स च पुरुषोत्तमानुग्रहजन्यपुष्टिभक्त्यैकलभ्यः, “मत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वत”मिति भगवद्गीतासूक्तत्वात्, “एको वशी सर्वगः कृष्ण ईड्य एकोपि सन् बहुधा यो विभाति तं पीठगं ये तु भजन्ति नित्यं तेषां सिद्धिः शाश्वती नेतरेषा”मित्याथर्वणिके गोपालतापनीयोपनिषद्भ्यश्च, “पीठगं” सिंहासनस्थमित्यर्थः, “भजन्ती”त्यनेन सेवा उक्ता भज सेवायामिति धात्वर्थात्, गीतासु “स्थानं प्राप्स्यसि शाश्वत”मित्यत्र शाश्वतपदात् गोपालतापिन्यां “सिद्धिः शाश्वती”त्युक्त्या नित्यलीलाधामप्रवेशो भक्तानां फलत्वेन निरूपितः, शाश्वतशब्दस्य नित्यशब्दपर्यायत्वात् ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अहो आश्चर्यमेतत्, नारीणामपि कृष्णे दुरन्तमस्माभिः प्रतिरोधे कृतेऽप्यप्रतिबद्धं भावं भक्तिं पश्यतेत्यन्वयः। अपिशब्देन तासां संस्कारादिराहित्येन हीनत्वं सूचयन्तस्तद्भक्तेः प्रत्यक्षसिद्धं माहात्म्यमाहुः— य इति। यो भावः गृहसंज्ञान् मृत्युपाशान्

अविध्यत् अच्छिनत्। एवंप्रभावे हेतुं सूचयन्नाहुः—जगद्गुराविति। ब्रह्मादिसर्वपूज्य इत्यर्थः ॥ ४१ ॥ तासां हीनत्वमेव स्पष्टयन्ति—नेति। द्विजातिसंस्कारः उपनयनं, शौचं शुद्धता चैतद्द्वयं सर्वद्विजातिसाधारणधर्मः। गुरौ निवासः गुरुगृहनिवासपूर्वकवेदाध्ययनं ब्रह्मचारिधर्मः। तपो वनस्थधर्मः। आत्ममीमांसा आत्मविचारो यतिधर्मः। शुभाः क्रियाः सन्ध्योपासनयज्ञादिरूपाः गृहस्थधर्मः। यद्यप्यासां संस्कारादयो न सन्ति ॥ ४२ ॥ अथापि तदभावेऽपि कृष्णे दृढा भक्तिरस्ति। अस्माकं सस्कारादिमतामपि सा नास्तीत्याश्चर्यम्। कृष्णभक्तेर्दुर्लभत्वं सूचयन् विशिंषन्ति—उत्तमश्लोके इति। अविद्यानिवर्तकयशसीत्यर्थः। तत्र हेतुमाह—योगेश्वरेश्वरे इति ॥ ४३ ॥ भगवद्याच्ञाप्रयोजनं निश्चिन्वन्त आहुः—नन्विति। ननु निश्चये निश्चितमेतत् स्वार्थेस्वपरमप्रयोजने विमूढानाम् अज्ञानाम्, अत एव गृहस्येहया व्यापारेण प्रमत्तानां विचारेऽप्यसमर्थानां नोऽस्माकं परमफलभूतमात्मानं गोपवाक्यैः स्मारयामासेत्यन्वयः। तदनुग्रहस्याश्चर्यं सूचयन्ति—अहो इति। तत्र हेतुमाहुः—सतां गतिरिति। सदाचाराणां फलभूत इत्यर्थः ॥४४॥

अन्वितार्थप्रकाशिका

नूनमिति ॥ हे इति मिथः संबोधयन्ति। नूनं भगवतो माया योगिनामपि मोहिनी। यत् यस्मात् वयं द्विजाः अत एव नृणां गुरवः उपदेशकर्तारोऽपि स्वार्थे स्वप्रयोजने मुह्यामः ॥ ४१ ॥ अहो इति ॥ अहो नारीणामपि जगद्गुरौ कृष्णे दुरन्तं सर्वबाधकं भावं भक्तिं पश्यत। यो भावः गृहाभिधान् गृहनाम्नः मृत्युपाशान् अविध्यत् अच्छिनत् ॥ ४२ ॥ नेति ॥ आसां द्विजातिसंस्कारः उपनयन न गुरौ निवासोऽपि न आत्ममीमांसा न शौचं शुभाः क्रियाः संध्योपासनादयश्च न। अत्र शौचं सामान्यधर्मः द्विजातिसंस्कारो धर्माधिकारहेतुः गुरुवासादयः क्रमाद्ब्रह्मचारिवनस्थयतिगृहस्थधर्माः ॥ ४३ ॥ अथापीति ॥ यद्यप्यासां संस्कारादयो न सन्ति तथापि उत्तमश्लोके योगेश्वराणामीश्वरे कृष्णे दृढा भक्तिरस्ति। अस्माकं तु संस्कारादिमतामपि भक्तिर्नास्ति ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अहो दुरंतं भावं भक्तिं पश्यत यो भावो भक्तिः अविध्यत् व्यदारयत् ॥४१॥ आसां स्त्रीणां द्विजातिसंस्कारो यज्ञोपवीतादिः गुरौ गुरुगेहे पठनार्थं आत्ममीमांसा देहात्मविचारो नाऽभूत् शौचं यथा शास्त्रोक्तं बाह्यमाभ्यंतरं चेति द्विविधं क्रियाः संध्यावंदनादयः ॥ ४२-४३ ॥ स्वस्यार्थे मोक्षमार्गे विमूढानां विपरीतज्ञानानां गृहेह यागेह कर्मकलापेन मोक्षयत्ने प्रमत्तानामसावधानानां नोऽस्माकं स्वरूपं स्मरयामास स्वस्वरूपस्मृतिं दत्तवानित्यर्थः ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवन्मायातरणहेतुस्तद्भक्तिरेव न तूक्ता जन्मादय इत्यभिप्रायेणाहुर्द्वाभ्याम्। नूनमिति। भगवतः माया मायिनां अपि, मोहिनी नूनम्। ज्ञानिनामपि निश्चयेनैव मोहोत्पादिकेत्यर्थः। 'माया वयुनं ज्ञानम्' इति निघण्टुः। यद्यस्मात्, नृणां गुरवः वयं द्विजाः अपि, उक्तविधजन्मादिमन्तोऽपि, स्वार्थे स्वहितविषये, मुह्यामहे। भगवन्मायया मोहमेव यायाम इत्यर्थः ॥ ४१ ॥ अहो इति। अहो नारीणामुक्तविधजन्मादिहीनानां स्त्रीणां अपि, जगद्गुरौ सर्वहितोपदेष्टरि कृष्णे, दुरन्तभावं अनवधिकभक्तिमित्यर्थः। पश्यत। य एतासां कृष्णे दुरन्तभावः, गृहाभिधान् मृत्युपाशान्, अविध्यत्। भगवन्मायाप्रयुक्तानपि पाशानच्छिनदित्यर्थः ॥४२॥ द्विजा अपि नारीणामपीत्यनेनाभिप्रेतं स्पष्टयन्ति नासामिति द्वाभ्याम्। नासामिति। आसां नारीणां, द्विजातिसंस्कार उपनयनसंस्कारः, न विद्यते। गुरौ अपि निवासः, न, गुरुकुलनिवासोऽप्यासां न भवतीत्यर्थः। तपः कृच्छ्रचान्द्रायणादिकं, न। आत्ममीमांसा देहविलक्षणप्रत्यगात्मविचारः न। शौचं न बाह्याभ्यन्तरेति द्विविधशौचमध्ये एकमपि यथार्थतया न विद्यते इत्यर्थः। शुभाः क्रियाः संध्योपासनादिरूपाः, न भवन्ति ॥ ४३ ॥ अथापीति। अथापि एतासां द्विजातिसंस्कारादीनामभावे सत्यपि, योगेश्वराणामपीश्वरस्तस्मिन्, उत्तमश्लोके श्रीकृष्णे, दृढा भक्तिः, जातास्ति हि। संस्कारादिमतां अपि, अस्माकं सा भक्तिः, न च नैव विद्यते ॥ ४४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अहो इति : १०.२३.४१.

नित्याम्नायविविक्तता स्मृतिचयाभ्यासः सदाचारदृक् श्रेयः श्रौतपरिश्रमश्च सदसद्वस्तुग्रहत्यागधीः।
प्रत्येकं भववार्धिं तारकमिति प्रोद्घुष्टमाद्यर्षिभिराश्चर्यं युगपत्कथं तदखिलं मग्नं प्रमादार्णवे ॥ ८१ ॥

नासामिति : १०.२३.४२.

गुरोर्गेहेवासः सुचिरपरिचर्या चरणयोर्व्रतेष्वत्यासक्तिः शमदमविधौ जागृतिरपि।
ततो विद्यावाप्तिर्भवति भगवत्प्राप्तिकृदिति कृतो घण्टाघोषः किमु न गतगर्वो युवतिभिः ॥ ८२ ॥

अथापीति : १०.२३.४३

अस्मत्सेवनमात्रकृद्भिरधुना स्त्रीभिः स सर्वेश्वरो दृष्टः स्पष्टमकाण्डताण्डवचणैर्नास्माभिरप्यंशतः ।
स्याद्वाऽस्मत्पदसेवनं किमखिलो हेतुः प्रभोरीक्षणे किं कर्तव्यमहो स्वसेवनविधिः कुत्रापि नोट्टङ्कितः ॥ ८३ ॥

नन्विति: १०.२३.४४.

युष्मद्भद्रकृदिन्द्रियावनचणो युष्मत्क्रतुप्रीतिमानत्रासौ समुपागतोऽस्तिभगवान्युष्मासु कर्तुं कृपाम् ।
तन्मान्धस्थितिवासना भवत भो भक्ताशया याचकानस्मान् पूजयतालमार्जयत तत्प्रीतिं प्रसङ्गोदिताम् ॥ ८४ ॥
इति भूरितरं गोपैर्व्यक्तमप्युक्तमुक्तिभिः । नार्थोऽग्राहि न चाश्रावि प्रमादोऽयं कियानहो ॥ ८५ ॥ (युग्मम्)
अस्मांल्लालयितुं स्खलत्पदगतीनत्यल्पबालान् स्वकानूर्वंशो हि पुरस्कृतो भगवता तत्प्रेषणच्छद्मना ।
वृद्धाहङ्कृतिभाग्भिरद्य तु तिरस्कुर्वद्भिरेतान् बलाद् बालादप्यलमल्पता किमिह वा नाकल्पमाकल्पिता ॥ ८६ ॥

कृष्णप्रिया

आश्चर्य की बात तो यह है कि, इन स्त्रियों की जगद्गुरु भगवान् श्रीकृष्ण में कैसी सुदृढ भक्ति है, इन्होने निरक्षर नारी होने पर गृहस्थों की ममता रूप कठिन मृत्युपाश को भी काट दिया ॥ ४१ ॥ आश्चर्य कहानी तो यह है कि, जैसे हम शिक्षा दीक्षा आदिसे संस्कृत है वैसे इन स्त्रियों का यज्ञोपवीत संस्कार नहीं हुआ न वेदाध्ययन के लिये इन्होंने गुरुकुलमें निवास किया, न कृच्छ्रचान्द्रायणादि तप किया, न आत्ममीमांसा व आत्मचिंतनादि किया, न ये शौच दृढ आचारों की पवित्रता से रहती है, और न इन्होंने त्रिकालसन्ध्या षट्कर्मानुष्ठान अग्निहोत्रादि आदि वेदोक्त कुशल कर्म किए है फिर भी श्रीउत्तमश्लोक समर्थ योगेश्वरों के नियामक भगवान् श्रीकृष्णमें इनकी सुदृढ भक्ति रही। परन्तु संस्कारसम्पन्न हमलोगों की भगवान श्रीकृष्णमें भक्ति नहीं बनी। सचमुच हम लोग भगवत्सेवा नाम के स्वार्थ परम पुरुषार्थ से विमूढ हैं और गृहस्थाश्रम के लौकिक सुखों में पूर्णमरत हैं। कितनी आश्चर्य की बात है कि कृपालु भगवान् श्रीकृष्ण ने गोप वाक्यों के माध्यम से हमें स्मरण कराया सज्जनों के रक्षक तो वे ही हैं ॥ ४२-४४ ॥

अन्यथा पूर्णकामस्य कैवल्याद्याशिषां पतेः । ईशितव्यैः किमस्माभिरीशस्यैतद् विडम्बनम् ॥ ४५ ॥
हित्वान्यान् भजते यं श्रीः पादस्पर्शाशया सकृत् । [1]आत्मदोषापवर्गेण तद्याच्ञा जनमोहिनी ॥ ४६ ॥
[2]देशः कालः पृथग्द्रव्यं मन्त्रतन्त्रर्त्विजोऽग्नयः । देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ॥ ४७ ॥
स [3]एष भगवान् साक्षाद् विष्णुर्योगेश्वरेश्वरः । जातो [4]यदुष्वित्यश्रृण्म ह्यपि मूढा न विद्महे ॥ ४८ ॥

कर्वमक्षमा

अन्वयः—अन्यथा पूर्णकामस्य, कैवल्य आदि आशिषाम् पतेः, ईशितव्यैः अस्माभिः किम् ? एतत् (वाचनम्) ईशस्य विडम्बनम् ॥ ४५ ॥ श्रीः आत्मदोष अपवर्गेण पादस्पर्श आशया अन्यान् हित्वा, यम् श्रीकृष्णम् भजते तत् याञ्चा, जनमोहिनी ॥ ४६ ॥ देशः कालः, पृथक् , द्रव्यम् ,मन्त्र तन्त्र ऋत्विजः, अग्नयः, देवता, यजमानः, क्रतुः, च धर्मः यन्मयः ॥ ४७ ॥ स एष योगेश्वरेश्वरः विष्णुः साक्षात् भगवान् , यदुषु जातः इति अश्रृण्म अपि मूढाः न विद्महे ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आत्मनो दोषापवर्गेण चांचल्यगर्वादित्यागेन ॥ ४६-४७ ॥ इत्यश्रृण्म एवं सर्वत्र श्रुतवंतो वयं हि तथाऽपीति॥४८-५१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यथा सतां गतित्वानंगीकारे । ईशितव्यैः अनीशैः, प्रेष्यैरिति यावत् । सहार्थे तृतीया । किम् स्मारणे । किं प्रयोजनम् न किमपीत्यर्थः । प्रयोजनाभावे किमर्थं स्मारणं कृतं तत्राह–ईशस्य एतत्स्मारणमस्मत्श्रीष्वनुकंपनं च विडंबनं कृपैव "विडंबनमतर्क्ये चानुकारकृपयोर्हसे" इति धरणिदेवः ॥ ४५ ॥ यम् श्रीकृष्णम् । श्रियाः भगवति त्यागकारणानां शौर्यौदार्यविद्वत्तानां सत्त्वे वासकारणस्य मौढ्यस्य चासत्त्वेपि न त्यजतीति भावः । "शूरं त्यजामि वैधव्यादुदारं मय्यनादरात् । विद्यावंतं च सापत्न्यान्मूढो मेऽतिप्रियस्ततः ॥" इति शिष्टोक्तेः । तस्य याञ्चा जनमोहिनी जनेषु निजैश्वर्याच्छादनकरीत्यर्थः ॥ ४६ ॥ पूर्वोक्तं स्मारयति –देशेति ॥ ४७ ॥ स एष कृष्णो यन्मयो देशादिरित्यर्थः ॥ ४८ ॥

---

[1]. स्वात्मदोषापवर्गेण–वीर. विज. । [2]. देशकालपृथग्द्रव्यमन्त्र–विज. । [3]. स एव–वीर. ; स एवै–इति कस्यचित् । [4]. यदुष्वित्याश्रुत्य अपि–वीर. ; भुवीति शृण्वाना ये विमूढा–विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, गोपवाक्यैरन्नमेवास्मास्वायाचत न च स्मारयामास तत्राहुः—अन्यथा अनुग्रहमयात्मस्मारणमन्तरेण। ननु, पूर्णकामत्वेन तस्यान्ने प्रयोजनं मास्तु क्षुधार्त्तगोपनिमित्तं युज्यत एव तत्राहुः—कैवल्येति। कैवल्यं मोक्षः प्रेम वा फलान्तरान्यसम्बन्धेन शुद्धभावरूपत्वात् तदादीनाम् आशिषाम् अर्थानां पतेः पत्युरीश्वरस्य तत्तत् प्रदाने समर्थस्येत्यर्थः। ईशितव्यैः नियम्यैः किञ्चित् कर्त्तुमप्यशक्तैः किं न किञ्चिदपि प्रयोजनमित्यर्थः। किन्त्वीशस्यापि एतत् विडम्बनं दयामात्रेणानुकरणमेव भवतीति ॥ ४५ ॥ ननु, यद्यसौ स्मारयामास तर्हि भवन्तः कथं न सस्मरुः तत्राहुः हित्वेति। अन्यान् हित्वेति क्षीरोदमथनान्ते तस्यानवमिवाविर्भूतायाः स्वयम्बरलीलानुकरणदृष्ट्या प्रोक्तम् असंकृत् भजते स्म स्वं स्वयमेवात्मा यस्यास्तस्यास्तदंशाभासभूताया जगल्लक्ष्म्या ये दोषास्तदस्पर्शेनेत्यर्थः। एवं कथमपि तद्याञ्चा न घटेतैवेति बोधितं तथापि तस्य याञ्चाजनानामस्मद्विधानां सर्वेषामेव जीवानां मोहिनी नायमीश्वर इति मोहमुत्पादयतीत्यर्थः ॥ ४६ ॥ स्वतोऽपि मोहं दर्शयन्ति देश इति, युग्मकेन। स एव साक्षात् भगवान् श्रीनारायणः तस्य देशादिमयत्वे हेतुः विष्णुः सर्वव्यापक इति तस्य च सर्वैरेवोपास्यत्वमाहुः योगेश्वराणां मुक्तानामपीश्वरः अतो यज्ञादिना अस्माकमपि स एव सेव्य इति भावः। यद्वा, स एव साक्षाद्भूत एव अत एव भगवान् सर्वैश्वर्य्यपूर्णः तत्राप्यशेषैश्वर्य्यप्रकटनेन विश्वव्यापकत्वाद्विष्णुः अतो योगेश्वराणामपीश्वरः सेव्य इत्यर्थः। यद्वा, किमर्थं जातस्तत्राहुः योगेश्वराः सुसिद्धभक्तियोगाः तेषामीश्वरः निजभक्तसुखार्थमित्यर्थः। हिशब्देन तत्र शास्त्रादिप्रामाण्यं सूचयन्ति—तच्च प्रसिद्धमेव मद्भक्तानां विनोदार्थमित्यादिवचनेभ्यः मूढाः शास्त्रार्थानभिज्ञाः आभ्यां वाक्याभ्यां यथा पूर्वमस्माभिर्निरूपितं तथा तैरपि बिचारितमिति श्रीशुकदेवाभिप्रायः ॥ ४७–४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु गोपवाक्यैरन्नमेवास्मास्वयाचत, न च स्मारयामास, तत्राहुः—अन्यथेति। ननु पूर्णकामत्वे तस्यान्नेन प्रयोजनं मास्तु, क्षुधार्त्तगोपनिमित्तं युज्यत एव, तत्राहुः—कैवल्येति। कैवल्यं मोक्षः प्रेमा वा, फलान्तराद्यसम्बन्धात्, तदादीनामाशियामर्थानां पतेः पत्युरीश्वरस्य तत्तत्प्रदानसमर्थस्य ईशितव्यैर्नियम्यैः किञ्चित् कर्त्तुमप्यशक्तैरित्यर्थः। ननु तर्हि कथमयाचत ? तत्राहुः—एतद् याचनादिकं विडम्बनं लौकिकलीलाप्रदर्शनमित्यर्थः। यद्वा, डलयोरेकत्वात् विलम्बनं लोकानां संसारतरणावलम्बनमित्यर्थः। यद्वा, अस्माकं विडम्बनमुपहसनम् ॥४५॥ ननु, इच्छामात्रेण संसारात्तारयितुं शक्तेन तेन किमर्थमनीश्वरवद्याचनादिकं क्रियते ? तत्राहुः—हित्वेति। सकृदपि पादयोः पादस्यैकस्यापि वा स्पर्शाशया; यद्वा, असकृद्भजते सेवते, एवं कथमपि तद्याचना न घटेतैवेति बोधितम्, तथापि तस्य याच्ञा जनानां सर्व्वेषामेव जीवानां मोहिनी मोहमुत्पादयतीत्यर्थः। को नाम तच्चेष्टितं बोद्धुं शक्नुयादिति भावः। यद्वा, अभक्तानां मोहार्थं भक्तानाञ्च भक्तिवृद्ध्यर्थमेवेत्याहुः—जना अभक्ता ये जीवा इत्यर्थः। किंवा, अकारप्रश्लेषेण अजनाः तद्भक्तेतरा अभक्ता इत्यर्थः, तेषां मोहिनी, भक्तानान्तु तया मोहो न स्यादेव, प्रत्युत भक्तिरेव विवर्द्धत इत्यर्थः, परमेश्वरस्य लौकिकलीलया भक्तिविशेषोत्पत्तेः। यद्वा, जनानां तद्दासानां मोहिनी चित्ताकर्षिकेत्यर्थः। अतएव श्रीमदुद्धवेन श्रीविदुराग्रे उदितम् (भा० ३।२।१६)—'मां खेदयतीतदजस्य जन्म, विडम्बनं यद्वसुदेवगेहे। व्रजे च वासोऽरिभयादिव स्वयं पुराद्व्यवात्सीद्यदनन्तवीर्य्यः ॥' इति; अस्यार्थः—जन्मनो विडम्बनं स्वीकारः, वसुदेवस्य बन्धनागारे अरेः कंसस्य भयादिव व्रजे वासश्च, स्वयमनन्तवीर्य्योऽपि पुरात् मथुरातः पलायतेति। अतएव तत् मां खेदयति, ईदृश्या लौकिकलीलयैव भक्तिविशेषवर्द्धनेन मादृशां हृदि पीडां जनयति, अन्यथा श्रीनृसिंहादिवत् साक्षान्निजैश्वर्य्यदर्शनेन भक्तिविशेषानुदयान्मादृशामेतादृशं दुःखं नाभविष्यदित्यर्थः। एवं (भा० ३।२।१७) 'दुनोति चेतः स्मरतो ममैतत्' इति, (भा० ३।२।२२) 'तत्तस्य कैंकर्य्यमलं भृतान् नो, विग्लापयत्येव यदुग्रसेनम्' इत्यादिकमपि तत्रैव तदुक्तं तथैव बोद्धव्यमिति ॥ ४६ ॥ जनमोहिनीत्वमेव दर्शयन्ति—देश इति द्वाभ्याम्। स एव साक्षात् भगवान् श्रीनारायणः, तस्य देशादिमयत्वे हेतुः—विष्णुः सर्व्वव्यापक इति। तस्य च सर्व्वैरेवोपास्यत्वमाहुः—योगेश्वराणां मुक्तानामपीश्वरः, अतो यज्ञादिनास्माकमपि स एव सेव्य इति भावः। यद्वा, स एव साक्षाद्भूतः, एव शब्देनांशत्वादिकं निरस्तम्, अतएव भगवान् सर्वैश्वर्य्यपूर्णः, तत्राप्यशेषैश्वर्य्यप्रकटनेन विश्वव्यापकत्वाद्विष्णुः, अतो योगेश्वराणामपीश्वरः सेव्य इत्यर्थः। एष इति पाठे एष प्रत्यक्षतां प्राप्तः साक्षात् स्वयं किंवा, एषोऽधुनैव जात इति कालाव्यवधानमुक्तम्; यद्वा, किमर्थं जातः ? तत्राह—योगेश्वराः सुसिद्धभक्तियोगास्तेषामीश्वरः, निजभक्तसुखार्थमित्यर्थः, हिशब्देन तत्र शास्त्रादिप्रामाण्यं सूचयन्ति, तच्च प्रसिद्धमेव, 'मद्भक्तानां विनोदार्थम्' इत्यादिवचनेभ्यः; मूढाः शास्त्रार्थानभिज्ञाः ॥ ४७–४८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

आत्मदोषोऽपवर्गेण चञ्चलरूपस्वदोषप्रहाणेन स्थिरतरेत्यर्थः ॥ ४६–५० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अन्यथा कैवल्यादीत्यादिशब्दो भोगमोक्षसंग्राहकः कैवल्यादिपुरुषार्थदस्येश्वरस्य सर्वनियन्तुरीशितव्यैरस्माभिः किं न किञ्चित् प्रयोजनमित्यर्थः। अत एव तद्याचनं विडम्बनमनुकरणमात्रं तात्पर्यन्त्वस्मदनुजिघृक्षायामिति भावः ॥ ४५ ॥ पूर्णकामात्वमेव व्यञ्जयितुमाहुः—हित्वेति। श्रीमहालक्ष्मीः अन्यान् ब्रह्मादीन् हित्वायं कृष्णं सकृदपि पादस्पर्शेच्छयास्वात्मदोषापवर्गेण चञ्चलत्वरूपस्वदोषप्रहाणेन भजते एवं श्रियाप्यनुवर्त्यस्य पूर्णकामत्वं किमु वक्तव्यमिति भावः। अतस्तस्यैवम्भूतस्य याञ्चा केवलं जनमोहिनी जनानामश्रुतावतारणामात्ममहिमाच्छादनी श्रुतावतारणामप्यस्माकन्तु तत्स्मारिणीति भावः ॥ ४६ ॥ श्रुतावतारणामप्यस्माकं तावद्विमोहिन्येवाभूत् किमुताश्रुतावतारणामित्यभिप्रायेणाहुः देश इति द्वाभ्याम्। देशादयो यन्मया स एव भगवान् साक्षाद्यदुषु जातोऽवतीर्ण इति आश्रुत्यापि तावन्न विद्महे न ज्ञातवन्तः स्मः ॥ ४७–४८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अन्यथा स्मारयितृत्वेनाऽपि तर्हि स्त्रीणां किमर्थं कृतमिति तत्राह—ईशस्येति ॥ ४५ ॥ स्वात्मदोषापवर्गेण अन्यत्र चञ्चलत्वादिस्वकीयदोषपरित्यागेन स्थैर्यस्वभावेनेत्यर्थः ॥ ४६–५१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अन्यथा निरुपाधिकारुण्यं विना पूर्णकामस्य अस्माभिः किं प्रयोजनं न किमपीत्यर्थः। ईशस्य एतत् अन्नप्रार्थनं खलु विडम्बनं लाघवमेव यस्मादित्यर्थः। यद्वा, तस्मादेतत् ईशस्य ईशकर्तृकम् अस्मत्कर्मकं विडम्बनं तिरस्कारः ॥ ४५ ॥ ननु, क्षुधार्तत्वादेवेदमन्नप्रार्थनं नतु कारुण्यं नापि पूर्णकामत्वादिकं गोचारणाद्यनुपपत्तेरतत्राहुः-हित्वेति। असकृत् मुहुः श्रीः सम्पल्लक्ष्मीः स्वात्मनो दोषस्य अञ्चल्यस्य अपर्वेण त्यागेन विशिष्टचाञ्चल्यं परित्यज्येत्यर्थः। तस्यापि याच्ञादिकं जनान् अस्मद्विधान् मोहयति नायमीश्वर इति प्रत्याययति ॥ ४६ ॥ मोहमेव विवृण्वन्ति, देश इति ॥ ४७–४९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीः महालक्ष्मीः अन्यान् ब्रह्मादीन् हित्वा यं श्रीकृष्णं सकृदपि पादस्पर्शाशया स्वात्मदोषापवर्गेण शोभनस्य सर्वगुणसम्पन्नस्यात्मनो मनसो ये दोषाः दूषकाः भजनवैमुख्यकराः आलस्यादयस्तेषामपवर्गेण त्यागेन भजते तस्य याच्ञा जनमोहिनीत्यर्थः ॥ ४६–४७ ॥ इत्येवम् आश्रृण्म सर्वत्र श्रुतवन्तो वयं हि तथाहि न विद्महे न ज्ञातवन्तः ॥ ४८–५१॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अन्यथा कारुण्यं न चेत् पूर्णकामस्य तस्यास्माभिः किं न किञ्चित् प्रयोजनं तस्मादीशस्यैतदन्नप्रार्थनं विडम्बनमस्मत्तिरस्करणमेव ॥ ४५ ॥ न च क्षुधार्त्ततयान्नयाचनं न तु कारुण्यं गोचरणादि सत्त्वात् पूर्णकामत्वञ्च नेति वाच्यमित्याह—हित्वेति। श्रीः सम्पद्रूपा यमसकृत् सर्वदा भजते अन्यानिन्द्रादीन् हित्वा स्वात्मदोषश्चापल्यं तस्यापवर्गेण त्यागेन स्थिरा सतीत्यर्थः। जन्मोत्सवादिषु धेनुनियुतद्वयादिदानादिति भावः। तस्य याञ्चा जनानस्मद्विधान् मोहयति नायं सर्वेश इति प्रत्याययतीत्यर्थः ॥ ४६ ॥ मोहं विवृण्वन्ति—देश इति। यन्मयो यद्व्याप्यो यदधीनवृत्तिको वा ॥ ४७ ॥ अश्रृण्म श्रुत्वापि मूढाः सन्तो न विद्मः ॥ ४८–४९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नन्वोदनार्थं गोपा न प्रेषयतस्त कथं तत्स्मारणं युष्माकमित्यत आह ॥ अन्यथेति। पूर्णकामस्य कैवल्याद्याशिषां मोक्षादिसकलकाम्यानां पतेरुक्ता गतिरनुसन्धेया। तत्काले यदभीप्सितमेषां तद्वितरणधुरीणस्येशितव्यैः सूत्रपुत्तलिकातुल्यैः स्वप्रेष्यैस्तस्य किमीशस्यैतद्विडम्बनं लोकानुकृतिः ॥ ४५ ॥ आत्मदोषापवर्गेणात्मनो दोषाश्चाञ्चल्यं तस्यापवर्गो वर्जनं त्यागस्तेन स्थैर्येणेत्यर्थः। पादस्पर्शाशया पादस्पर्शेनाशयोऽन्तः करणं यस्याः सा सती पादस्पर्शस्याशाऽभिलाषस्तया वा श्रीर्योऽन्यान्हित्वा। एष ब्रह्माऽतिवृद्ध इत्यादिप्रतिपादितदोषांश्चतुराननादीन्हित्वा भजते। तद्याञ्चाऽस्मदन्नयाचनं जनमोहिन्यस्मदादिपामरमोहिका ॥ ४६–४७ ॥ भुवि जात इति श्रृण्वाना ये वयम् ॥ ४८ ॥

श्रीसुबोधिनी

ननु पूर्णोऽप्यवतारं कृत्वा लीलया नट इव लौकिकं सम्पादयत्यतो याच्ञा युक्तेति चेत् तत्राहुर्**हित्वान्यान्**इति, यदि याचनीयं लक्ष्मीरेव वक्तव्या किं भिक्षुकैः ? न च मन्तव्यं लक्ष्मीः कार्यान्तरव्यापृतेति, यान्यान् सर्वानेव **हित्वासकृद् भजते** तत्रापि **पादस्पर्श आशा**मात्रं; सा चेदाज्ञां प्राप्नुयात् कृतार्थैव भवेत् तां विहायान्ययाचनमन्यार्थमेव, ननु लक्ष्म्यां चाञ्चल्यमस्त्य-

तस्तदा न स्थितेति चेत् तत्राहुर**ात्मदोषापवर्गे**णेति, **आत्मनो दोष**श्चाञ्चल्यं तस्यापवर्गो निवृत्तिः पुनरुत्पत्तिरहिता, **एवमेव हि भगवत्सेवकानां धर्मः**, ननु लोकाः पूर्वमप्याहुर्बलिर्याचितो भगवतेति तथेदानीमपि भविष्यतीति चेत् तत्राहुस्तद्याञ्चा **जनमोहि**नीति **जना**नेव **व्यामोह**यत्यन्यथा स्वस्मिन्नेव शरीरे त्रैलोक्यं प्रदर्शितं व्यर्थं स्यात् स्वस्यैव सिद्धत्वान् न याचनमिति स ज्ञापितो लोकास्तु व्यामोहिताः ॥ ४५ ॥ किञ्च देशादयः सर्वे तदात्मका एव तथा सति तत्रादानबुद्धिर्मोहनव्यतिरेकेण कथं भवेदत इदमपि याचनं मोहनार्थमेव, 'पुरुष एवेदं सर्व'मितिश्रुत्यनुसारेण सर्वे पदार्था भगवदात्मका इति ज्ञायन्ते तथापि यो मोहः स याच्ञयैव ॥ ४६ ॥ ननु स पुरुषो यदात्मकं जगदस्मिन्नप्येतस्मिन्नज्ञानाद् दानमुचितमेवेत्याशङ्क्याहुः **स एष** इति, स पुरुष एवायं **भगवां**स्ततोप्यधिकः पुरुषोत्तमः, किञ्च **साक्षा**दयं यज्ञ आधिदैविको **विष्णु**र्ब्राह्मणभोजनसङ्कल्पेपि **योगेश्वराणा**मप्ययमीश्वरः स्वामी, एतादृशो **यदुषु जात** इत्यश्रृण्म श्रुतवन्तो वयं तथापि पूर्वसंस्कारलोपाद् विशेषमौढ्याद् भगवन्तं **न विद्महे**, एवं स्वपराधः समर्थितः ॥ ४७ ॥ तस्यापराधस्य क्षमापनार्थं नमन्ति **नम** इति, **अत्रैकः श्लोको विगीतः** सोपि व्याख्यायते, **अहो** इत्याश्चर्ये, **वय**मिति श्लाघायां **धन्यतमाः** कृतार्था येषामस्माकं **तादृश्यः स्त्रियो यासां भक्त्या** स्मारकत्वेनोपस्थितयास्माकमपि हरौ **मतिर्निश्चला जा**तेति ॥ ४८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

स एव भगवानित्यस्य विवृतौ **साक्षादयं यज्ञ आधिदैविकविष्णुरिति** अयमर्थः, यदि यज्ञ एवास्माकं परमेश्वर इतिबुद्धिस्तदाप्ययं श्रीकृष्ण आराधनीयः, आधिदैविकयज्ञरूपत्वात्, आधिदैविकयज्ञस्य विष्णुरूपत्वात्, "यज्ञो वै विष्णु"रितिश्रुतेः, ननु ब्राह्मणेभ्य एव भोजनार्थमन्नं देयं नान्येभ्य इति कथं गोपेभ्यो देयमित्याशङ्कायामाहुः **ब्राह्मणभोजनसङ्कल्पेपीति**, ब्राह्मणभोजनसङ्कल्पे "एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः त्रींल्लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्यय" इतिपद्यते, तत्रापि विष्णुशब्द एतस्य श्रीकृष्णस्यैव वाचकोतः श्रीकृष्णार्थं गोपेभ्यो देयमेवेतिहार्दम् ॥ ४७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्यथा उक्तास्मत्प्रयोजनं विना पूर्णकामस्यास्माभिः किं फलं साधनीयम्? न किञ्चिदित्यर्थः। तत्र हेतुः–ईशितव्यैरिति। तत्परवशतया समर्थैरित्यर्थः। पूर्णकामत्वे ज्ञापकमाहुः–कैवल्येति। मोक्षादिचतुर्विधपुरुषार्थप्रदस्येत्यर्थः। अत ईशस्य सर्वथा समर्थस्यापि एतत् अन्नयाञ्चादिविडम्बनमस्मदनुग्रहार्थमनुकरणमात्रमेवेत्यर्थः ॥ ४२ ॥ लक्ष्मीसेव्यत्वेनापि भगवतः पूर्णकामत्वमेव सूचयन्तस्तद्याञ्चा अपि स्वमोहकत्वमाहुः–हित्वेति। अन्यान् ब्रह्मादीन् हित्वा तथा स्वात्मनो दोषाः चाञ्चल्यगर्वादयः, तेषां अपवर्गेण त्यागेन यस्य पादस्पर्शाशया चरणसेवामनोरथेन यमसकृत् निरन्तरं श्रीर्लक्ष्मीर्भजते, तस्य या ओदनयाञ्चा सा जनानां विज्ञजनानामपि मोहिनीत्यन्वयः ॥ ४६ ॥ स्वमोहमेव स्पष्टयन्ति–देश इति। देशादिपदार्थः प्रत्येकं यन्मयः यद्विभूतिरूपः ॥ ४७ ॥ स एष साक्षात् पूर्णो भगवान् ऐश्वर्यादिगुणपूर्णः योगेश्वराणां ब्रह्मादीनामपीश्वरो विष्णुर्यदुषु जात इति आश्रृण्म सर्वत्र श्रुतवन्तोऽपि वयं मूढा मूर्खा न विद्महे तदनुसन्धानं न कृतवन्त इत्यर्थः। 'तच्छ्रवणे तु सन्देहो नास्ती इत्याशयेनाहुः–हीति ॥ ४८ ॥

अन्वितार्थप्रकाशिका

नन्विति। अहो सतां गतिः भगवान् स्वार्थे विमूढानां गृहस्येहया व्यापारेण प्रमत्तानां विचारेऽप्यसमर्थानां नोऽस्माकं परमफलभूतमात्मानं गोपवाक्यैः स्मारयामास ॥ ४५ ॥ अन्यथेति। अन्यथा उक्तास्मत्प्रयोजनं विना पूर्णकामस्य कैवल्याद्याशिषां पतेः "षष्ठीयुक्तश्छन्दसि वा" इति पत्युर्घिसंज्ञा। ईशस्येश्वरस्य ईशितव्यैः ईशनकर्मीभूतैः अधीनैः अस्माभिः किं फलं साध्यम् तथा एतदन्नयाच्ञादिकर्मापि विडम्बनं लोकानुकरणमात्रम् ॥ ४६ ॥ हित्वेति। अन्यान् ब्रह्मादीन् हित्वा तथा स्वात्मनः दोषाः चाञ्चल्यगर्वादयस्तेषाम् अपवर्गेण त्यागेन यस्य पादस्पर्शाशया यम् असकृत् श्रीर्लक्ष्मीर्भजते तस्य या ओदनयाच्ञा सा जनानां विज्ञजनानामपि मोहिनी ॥ ४७ ॥ देश इति। प्राग्व्याख्यातम् ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कैवल्यमोक्षादीनामाशिषामसंख्यसमृद्धीनां ईशितव्यैः नियम्यैः किं प्रयोजनं तस्यै तद्याचनं विडंबनं नृलोकानुकरणमात्रम् ॥ ४५ ॥ अन्यान् ब्रह्मादीन् असकृत्मुहुर्मुहुः पादस्पर्शाशया हेतुना स्वात्मनि ये दोषाः चांचल्य-स्वातंत्र्य-गर्वादयस्तेषामपवर्गेण त्यागेन श्रीः यं श्रीकृष्णं भजते ॥ ४६ ॥ देशादिः यन्मयो यदंगभूतः ॥ ४७ ॥ स एषः श्रीपतिः वैकुंठं गोलोकब्रह्मपुरनिवासी यदुषु साक्षाज्जात इति जनमुखेभ्यः अश्रृण्म वयं श्रुतवंतोपि ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अस्माकं स्वरूपज्ञापनार्थमेव भगवतो याञ्चाऽन्यथाऽवाप्तसमस्तकामस्य तस्य साऽसंगतैवेत्याहुः ॥ नन्विति ॥ गृहेहया गृहव्यापारेण; प्रमत्तानामनवधानतावतां, अत एव स्वार्थविमूढानां स्वहिते विमूढतावतां अपि, नोऽस्माकं, अहो सतां गतिः,

हेतुगर्भमिदम्। सद्‌गतित्वाद्धेतोर्भगवान्, गोपवाक्यैः, स्मारयामास ननु। स्मृधातोः क्रियायोगे कर्मणि षष्ठी। साधुपरित्राणार्थमवतीर्णं निरतिशयपुरुषार्थस्वरूपमात्मानं याञ्चाव्याजेनास्मत्स्मृतिविषयं कारयामासेत्यर्थः॥ ४५॥ ननु कृष्णस्त्वन्नार्थी सन्नेव गोपान् प्रेषयामास न युष्मान् स्मारयितुमित्यत्राहुः॥ अन्यथेति॥ अन्यथा स्मारणाभावे; पूर्णकामस्य कैवल्याद्याशिषां पतेः, कैवल्यादीत्यादिशब्दो भोगमोक्षसंग्राहकः। कैवल्यादिपुरुषार्थस्वरूपस्येत्यर्थः। ईशस्य सर्वनियन्तुः, ईशितव्यैर्नियम्यैः, अस्माभिः, किं किं प्रयोजनमित्यर्थः। अत एव एतद्याचनं, विडम्बनमनुकरणमात्रं, तात्पर्यं त्वस्मदनुजिघृक्षैवेति भावः॥ ४६॥ पूर्णकामत्वमेव व्यञ्जयितुमाहुः॥ हित्वेति॥ श्रीः स्वयं महालक्ष्मीः, अन्यान् ब्रह्मादीन् हित्वा, यं श्रीकृष्णं, सकृदपि, पादस्पर्शस्याशा तया एकवारमपि भगवत्पादस्पर्शस्तु भवेदितीच्छया, स्वात्मदोषापवर्गेण चञ्चलत्वस्वदोषप्रहाणेन, भजते। एवं स्वयं श्रियाऽप्यनुवर्त्यस्य पूर्णकामत्वं किमु वक्तव्यमिति भावः। अतः तद्याञ्चा तस्यैवंभूतस्य यदन्नयाञ्चा, सा जनमोहिनी केवलं जनमोहोत्पादिका। अश्रुतभगवदवताराणां केवलमात्ममहिमाच्छादिनी, शास्त्रतः श्रुतावताराणामप्यस्माकं तु तत्स्मारिणीति भावः॥ ४७॥ श्रुतावताराणामप्यस्माकं तावद्विमोहिन्येवाभूत्, क्मुताश्रुतावताराणामित्यभिप्रायेणाहुर्देश इति द्वाभ्याम्॥ देश इति देशः, कालः, पृथक् द्रव्यं, मन्त्रतन्त्रर्त्विजः, अग्नयः, देवताः; यजमानश्च, क्रतुः, धर्मश्च, यन्मयः। व्याख्यातोऽस्त्ययं प्राक्॥ ४८॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अन्यथेति : १०.२३.४५.

यत्तुष्ट्यै मुनिभिर्वितन्द्रमतिभिर्यज्ञाद्यनुष्ठीयते यत्प्रीत्यै च तपो जपोऽनुमननध्यानादि चाधीयते।
सोऽस्मद्भाग्यवशेन वा स्वदयया दातुं क्रतोर्वा फलं सम्प्राप्तोऽपि तिरस्कृतो नृपशवः के वा पुरो नः परे॥ ८७॥

हित्वाऽन्यानिति : १०.२३.४६.

यद्‌दृक्पद्मपरागगन्धकलितो लोको धनी सन् स्वयं भोक्ताऽन्नादिभिरुत्तमैरतिथिसत्कारं विद्यते सदा।
सा श्रीरप्यनिशं यदङ्घ्रिजलजस्पर्शाशया तिष्ठति तस्येशस्य यदन्नयाचनमिदं नास्मद्विमोहाय किम्॥ ८८॥

स एष इति : १०.२३.४८.

भूभारक्षपणाय पद्मजनुतो जातोऽवनौ चिन्मयः श्रीस्वामीतिदृशासमाधिविधयाश्रुत्या च दृष्टं श्रुतम्।
एवं सत्ययमुद्भ्रमः समुदितः कस्मान्न विज्ञायते येनास्मिन्नधमाधमं पदममी सर्वे वयं प्रापिताः॥ ८९॥
अस्मिन् कर्मणि जानीमो निःसीममभवत् द्वयम्। प्रभोर्वात्सल्यमस्माकं मूर्खत्वं च गतोपमम्॥ ९०॥

कृष्णप्रिया

अब भगवत् कृपा से कुछ विनोदय होने से ऋषि लोग कहने लगे कि, भगवती श्री लक्ष्मी जी अपने सहज चांचल्य नाम के दोष से मुक्त होकर प्यारे श्रीकृष्णचन्द्रजी के श्री चरणों के स्पर्श करने की लालसा से अन्य सब देवताओं को छोड़कर जिन भगवान श्रीकृष्ण की निरंतर सेवा करती है, वैसे पूर्ण पुरुषोत्तम की अन्नयाचना यह तो अवश्य जन मोहिनी लीला ही है॥ ४५–४६॥ अधिक क्या कहा जाय! देश, काल, भिन्न भिन्न सामग्री, द्रव्य-पदार्थ, मन्त्र, तन्त्र पद्धति, ऋत्विज, अग्नि, देवता, यजमान, यज्ञ, और धर्म ये बारह पदार्थ सब श्रीकृष्णस्वरूप ही है॥ ४७॥ सच पूछो तो यह बात निश्चित है कि—योगेश्वरों के भी ईश्वर श्रीविष्णु पूर्णपुरुषोत्तम भगवान् ने यदुवंश में अवतार लिया है ऐसा जानने पर भी हम अज्ञानी अबुध, उन पुरुषोत्तम को नहीं पहिचान सके॥ ४८॥

[1]अहो वयं धन्यतमा येषां नस्तादृशीः स्त्रियः। भक्त्या यासां मतिर्जाता अस्माकं निश्चला हरौ॥ ४९॥
नमस्तुभ्यं[2] भगवते कृष्णायाकुण्ठमेधसे। यन्मायामोहितधियो [3]भ्रमामः कर्मवर्त्मसु॥ ५०॥
स वै न आद्यः पुरुषः स्वमायामोहितात्मनाम्। अविज्ञातानुभावानां क्षन्तुमर्हत्यतिक्रमम्॥ ५१॥
इति [4]स्वाघमनुस्मृत्य कृष्णे ते कृतहेलनाः। दिदृक्षवो व्रजमथ[5] कंसाद् भीता न चाचलन्॥ ५२॥

इति श्रीमद्भागवते महापुराणे [6]दशमस्कन्धे यज्ञपत्न्युद्धरणं नाम [7]त्रयोविंशोऽध्यायः॥ २३॥

---

१. प्राचीनप्रत्यां तथा वीर विज. पाठे अयं श्लोको नास्ति। २. नमस्तस्मै–गो. प्र. टी.। ३. दशो–विज.। ४. कृष्णमनुस्मृत्य विप्रास्ते–विज.। ५. ऽपि स्वस्थानात्कंसा–वीर.; ऽप्यच्युतयोः–श्रीधर. वंशी. विज.। ६. पारमहंस्यां संहितायां दशमस्कन्धे पूर्वार्धे–गो. प्र. पु.। ७. एकविंशोऽध्यायः–विज.।

कर्दमक्षमा

अन्वयः —अहो वयम् धन्यतमाः येषाम् नः तादृशीः स्त्रियः, यासाम् भक्त्या अस्माकम् हरौ निश्चला भक्तिः जाता ॥४९॥ अकुण्ठमेधसे भगवते कृष्णाय तुभ्यम् नमः, यन्माया मोहित धियः कर्मवर्त्मसु भ्रमामः ॥ ५० ॥ सः एष वा आद्यः पुरुषः, स्वमाया मोहित आत्मनाम् अविज्ञात अनुभावानाम् अतिक्रमम् क्षन्तुम् अर्हसि ॥ ५१ ॥ कृष्णे कृतहेलनाः ते इति स्व अघम् अनुस्मृत्य, दिदृक्षवः अपि च कंसाद् भीताः अथ व्रजम् न अचलन् ॥ ५२ ॥

इति त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

न चाचलन् तयोर्दर्शनाय न जग्मुरित्यर्थः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायां त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्त्रीभाग्यमहिम्नात्मानं श्लाघयंत ऊचुः—अहो इति। तादृशीस्तादृश्यः श्रीकृष्णानुरागिण्यः। यासां स्त्रीणाम् ॥ ४९ ॥ अनुतप्ता नमस्कुर्वन्तीत्याह—नम इति। कर्मवर्त्मसु यजनयाजनादिमार्गेषु ॥ ५० ॥ स्वापराधं क्षमापयंतः प्रोचुः—स इति। सः कृष्णः। अज्ञेषु महतां क्षमैवौचितेति भावः ॥ ५१ ॥ स्वाघम् गोपद्वारान्नार्थनापराकरणरूपम्। ते विप्राः। अच्युतयोः सर्वदैकरसयो रामकृष्णयोः। अस्माकं तत्र गमने कंसो ज्ञास्यत्ययमेव कृष्णो रामश्चेति, ततश्च तन्मारणे यत्नं करिष्यति। यद्वा कुबुद्धित्वात्कंसस्य यूयं किमर्थं मच्छत्रुपार्श्वे गता अतो वध्या यूयमिति भीता वा। यद्वा—श्रुतास्मद्गमनवृत्तांतः कंसोऽस्माकं वृत्त्यादिकं हरिष्यतीति भीताः। यद्वा—ऐकमत्याभावेन न गता इति भावः ॥ ५२ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मूढत्वमेव दर्शयन्तस्तत्कारणमायाप्रभावेन विस्मताः सन्तः तदपगमाय भक्त्या सर्वज्ञं तदीश्वरमेव प्रणमन्ति—नम इति। भगवते अचिन्त्यानन्तैश्वर्याय अकुण्ठमेधसे अलुप्तज्ञानाय स्वेषां तद्वैपरीत्यमाहुः—यन्माययेति। भ्रमामः पुनः पुनस्तत्रैवाभिनिवेशं प्राप्नुम जलावर्त्तादिवत् कदाचिदपि ततो निर्गन्तुं न शक्नुम इत्यर्थः ॥ ५० ॥ एवं परमदैन्यं गताः श्रीभगवन्तं क्षमापयन्ति—स इति स कृष्णो नोऽस्माकम् अतिक्रममपराधं क्षन्तुमर्हति योग्यो भवति तत्र हेतुः स्वस्य तस्यैव मायया मोहितचित्तानाम् अत एव न विज्ञातोऽनुभावः तन्माहात्म्यं यैस्तेषां यदि चास्माकमपराधः तथापि स आद्यः पुरुषः सहस्रशीर्षादिरूपः तन्मुखादेवोत्पन्नानां विप्राणां पितृवदपराधक्षमायुक्तेति भावः। यद्वा, आद्यः सर्वश्रेष्ठः अतो निकृष्टानामस्माकमपराधं क्षन्तुमर्हत्येव। किञ्च, पुरि शयानात् पुरुषोऽन्तर्यामी अतस्तेन यथा नियुक्ताः स्मः तथैव कृतवन्तो वयमिति। यद्वा, आद्यः पुरुषः पुरुषोत्तम इत्यर्थः। दीनवात्सल्यब्रह्मण्यदेवत्वादिनिजस्वाभविकमाहात्म्यात् क्षन्तुमर्हत्येवेति भावः ॥ ५१ ॥ स्वम् असाधारणम् अघमपराधं तदेव दर्शयति—कृतं हेलनं मनुष्यदृष्ट्याऽवज्ञा यैस्ते अत एव दिदृक्षवोऽपि स्वाघक्षमापनाय मिलितुमिच्छवोऽपि व्रजं प्रति न चाऽचलन् सकृदपि पादविक्षेपं न कृतवन्त इत्यर्थः। तत्र हेतुः अथ कार्त्स्न्येे कंसात् भीताः श्रीभगवति दृढविश्वासानुत्पत्त्या निजानिष्टशङ्कयेत्यर्थः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मूढत्वमेव दर्शयन्तस्तत्कारणमायाप्रभावेण विस्मिताः सन्तस्तदपगमाय भक्त्या तदीश्वरमेव प्रणमन्ति—नम इति। भगवतेऽचिन्त्यानन्तैश्वर्य्याय, इत्यात्मनस्तज्ज्ञानं दुर्घटमित्यभिप्रेतम्, निजाशेषभगवत्ताप्रकटनपरायेति वा। यतः कृष्णाय, अन्यथा गोपालनाद्यसम्भवात्, यद्वा, अन्यथा अस्मास्वन्नयाचनाद्यनुग्रहासम्भवात्; यद्वा, कृष्णायेति पत्नीनां चित्ताकर्षणाभिप्रायेण; अकुण्ठा अनवच्छिन्ना मेधा स्मृतिर्यस्मात् तस्मै, पत्नीनां गृहकृत्यादावपि सदैव तत्संस्मरणात्। यद्वा, अलुप्तज्ञानाय, अतोऽन्येषामस्मादृशानां मूढत्वञ्च युक्तमेवेति, अतो निजमायावैभवमस्माकं निजकारुण्यमहिमादिकञ्च स्वयं जानात्येवेति भावः। भ्रमामः पुनः पुनस्तत्रैवाभिनिवेशं प्राप्नुमः, जलवेगभ्रमरिकाया इव कदाचिदपि ततो निर्गन्तुं न शक्नुम इत्यर्थः। यद्वा, तदर्पणं तस्मिन् विश्वासेन निश्चित्य कर्त्तुं न शक्नुम इत्यर्थः ॥ ५० ॥ स्वमसाधारणमघमपराधम्, तद्दर्शयति—कृतं हेलनमाज्ञाभंगः, किंवा मनुष्य-

दृष्ट्यावज्ञा यैस्ते, यद्वा, अकारप्रश्लेषेण न कृतं श्रीकृष्णेनावहेलनं येषां ते, यज्ञसमापनव्याजेन पत्नीनां प्रस्थापनात्; अतएव दिदृक्षवोऽपि; अप्यर्थेऽथशब्दः, व्रजं न जग्मुः । तत्र हेतुः—कंसाद्भीताः, श्रीभगवति दृढविश्वासानुत्पत्त्या निजानिष्टशंकयेत्यर्थः ॥५२॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अविज्ञातानुभावानाम् अविज्ञातभगवदनुभावानाम् ॥ ५१–५२ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धीये श्रीसुदर्शनसूरिकृतशुकपक्षीये त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थमनुतप्ताः प्रणाममन्तरेण स्वापराधक्षमानिमित्तमनुपलभमाना नमस्कुर्वाणाः क्षमापयन्ति––नम इति द्वाभ्याम्। अज्ञानकृतमपराधं जानात्येवेत्यभिप्रायेण विशिंषन्ति अकुण्ठमेधस इति। प्रतिहता मेधा धिषणा यस्य तस्मै "नित्यमसिच् प्रजामेधयोः" (५।४।१२२) इति असिच् स्वयं त्वकुण्ठमेधाः वयं तन्मायामोहितधियः अतः क्षन्तुमर्हत्येवेत्यभिप्रायेणाहुः––यन्मायेति। कर्मवर्त्मसु तद्भक्तिविधुरेषु केवलं यज्ञादिकर्ममार्गेषु भ्रमामः पुरुषार्थसाधनबुद्धिं कुर्मः यद्वा "ते तं भुक्त्वा स्वर्गलोकं विशालम्" इत्याद्युक्तविधगमनागमनमार्गेषु पुण्यपापात्मककर्मायत्तस्वर्गनरकादिमार्गेषु वा भ्रमामः ॥ ५० ॥ अतः स्वमायया मोहितचित्तानामत एवाविज्ञातोऽनुभावो महिमा यैस्तेषां नोऽस्माकं व्यतिक्रममपराधं क्षन्तुमर्हति ॥ ५१ ॥ इत्थन्तावत्कृष्णे विषये कृतं हेलनमपराधो यैस्तथाभूताः शनैः स्वकृतमपराधमनुस्मृत्य ततस्तं श्रीकृष्णं द्रष्टुमिच्छवोऽपि कंसाद्भीताः स्वस्थानान्न चलितवन्तः द्रष्टुं न जग्मुः किन्तु तं ध्यायन्तः स्वस्थान एव तस्थुः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अथापि अनुतप्ता अपि हरिं दिदृक्षवो द्रष्टुकामाश्च नाचलन् नागच्छन् कुतः कंसाद्भीता इति ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां त्रयोविंशोऽध्यायः ॥ २३ ॥
(विजयध्वजरीत्या एकविंशोऽध्यायः)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अपराधादतिव्यग्रा प्रणमन्ति। नम इति ॥५०॥ अतिदैन्यग्रस्ताः भगवन्तं क्षमापयन्ति स वै इति अतिक्रममपराधम् ॥५१॥ ननु, तर्हि तदानीमेव तत्राशोकवने गत्वा विलम्ब्य व्रजं वा गत्वा कथं भगवन्तं शरणं न गतास्तत्राह––दिदृक्षव इति। तदानीं शोकानुतापादिमत्त्वात् सर्वैकमत्याभावाच्चाशोकवनं न गताः विलम्बे सति सायाह्ने व्रजं प्रति गतावैकमत्ये सति न चाचलन्निति चकाराच्चलन्तोऽपीत्याक्षेपलब्धं तत्र हेतुः सर्वेषामपि मनस्येकः सहसैवोद्भूत इत्याह––कंसाद्भीता इति। सूचकैरुक्तास्मद्वृत्तान्तः कंसोऽद्यैवास्माकं जीविका हरिष्यतीति भयव्याकुला इत्यर्थः। अतः पत्यादिकर्तृकवधत्यागादिलक्षणं भयं ब्राह्मणीनां कृष्णदर्शने किल न प्रति बध्नाति स्मेत्यत्र प्रेमैव हेतुः ब्राह्मणानां तु मनःकल्पितो भयाभास एव तत्र प्रतिबध्नाति स्मेत्यत्र भगवन्मायैव हेतुर्ज्ञेयः ॥ ५२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। त्रयोविंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ २३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तद्दर्शनाय न अचलन्न जग्मुः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्रयोविंशोऽध्यायार्थप्रकाशः ॥ २३ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अपराधादतिव्यग्रास्तं प्रणमन्ति नम इति ॥ ५० ॥ अपराधं क्षमापयन्ति–स इति। अतिक्रममपराधम् ॥ ५१ ॥ ननु कृष्णं द्रष्टुं ते कथं न जग्मुस्तत्राह–इतीति कृष्णे कृतहेलनान्ते विप्राः स्वापराधमनुस्मरन्तः पत्नीदर्शनाज्जातश्रद्धाभक्तयोऽच्युतयोर्दिदृक्षवोऽपि प्रेमानुदयान्न चाचलन्नागच्छन् तत्र हेतुः कंसादिति चारसूचितास्मत् कृष्णानुवृत्तिकः कंसोऽस्मद्वृत्तिं छिन्द्यादिति भीतिमन्तो गृह एव तिष्ठन्तः कृष्णमभजन्नित्यर्थः। पत्नीनां जातप्रेमत्वात् प्रतिबन्धागणनं पत्नीनान्तु तदभावात्तद्गणनमिति ॥५२॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सञ्चिन्तितं प्रणमन्ति ॥ नम इति । यन्मायामोहिता दृग्धीर्येषां ते कर्मवर्त्मसु प्रवृत्तकर्ममार्गेष्वकुण्ठमेधसे गतम् । यस्त्वमकुण्ठं यथा तथैधसे नित्यमभिवृद्धो भवसि तस्य या च याचना जनमोहिनीति वा ॥ ४९ ॥ स्वमायामोहितात्मनामित्यविज्ञातानुभावानां नोऽतिक्रमम् । अद्योपजीव्यः पुरुषः क्षन्तुमर्हति योग्यो भवति ॥ ५० ॥ कृतं हेलनमात्मनामात्मनैव यैस्तेऽच्युतयोर्मुख्यामुख्यतच्छब्दवाच्ययोस्ते दिदृक्षवोऽपि कंसाद्भीता न चाचलन्नवस्थानान्नोच्चेलुः ॥ ५१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे एकविंशोऽध्यायः ॥ २१ ॥

श्रीसुबोधिनी

तुभ्यं भगवते नम इति, अपराधेन दीनभावे जात आविर्भूतो भगवानिति लक्ष्यते, अन्यथा तुभ्यमिति न वदेयुः, अनेन तेषामपराधो गत इति निश्चितं, तस्य षड्गुणान् दृष्ट्वा नमस्यन्ति **भगवत** इति, दृष्टादृष्टयोः साङ्कर्याभावार्थमेवमुच्यते, स्वरूपमपि ज्ञातवन्तः **कृष्णायेति**, तस्य पूर्णज्ञानशक्तिं दृष्ट्वाहुर**कुण्ठा मेधा** बुद्धिर्यस्येति, यद्यपि भगवच्छब्देनैव नित्यज्ञानवत्त्वं प्राप्तं तथापि यथा 'सर्वस्येशान' इति श्रुतेरैश्वर्यं साधारणं तथा 'सर्वज्ञ' इति श्रुतेर्ज्ञानमपि तादृशमेव भगवत्पदेनोच्यते, एवं सति 'मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपी'ति वाक्यात् केवलभक्तविषयकं स्वीयत्वेन यज् ज्ञानं पुष्टिमार्गीयं तदत्र मेधाशब्देनोच्यते, तदस्मद्विषयकं पूर्वमासीन् मध्येस्माकं बहिर्मुखयेपि तस्याकुण्ठितत्वेन तत्कार्यमेव याञ्चारूपं प्रबोधं कृतवान्न तूपेक्षामिति भावः, नाप्यस्माकमयमपराधो भ्रान्तत्वादिति वदन्तो भ्रमस्त्वत्कृत एवेत्याहुर्यन्माययेति, भगवन्माययैव व्या**मोहितबुद्धयः कर्ममार्गेषु** भ्रमामोन्यथा ज्ञाने भक्तौ वा मतिः स्याच्छुद्धे वा वैदिके कर्मणि यत् कर्मवर्त्मस्वेवाभासरूपेषु तत्रापि निश्चयाभावात् केवलं भ्रमामोतो मोहिता एव ॥ ४९ ॥ वाचापि क्षमापयन्ति **स वैष** इति, क्रियया स्वापराधक्षमापनं न भवति दुर्बलत्वादतः **स वा** भगवानेव वा यस्यास्माभिरपराध कृतः स **एवैषोग्र** आविर्भूतः, अनेन ज्ञायते क्षमां करिष्यतीति, **किञ्चाद्योयं** सर्वेषां पितातः पुत्राणामपराधमिव सहिष्यति, किञ्च **पुरुषोयम**न्तर्याम्यतस्तत्प्रेरणयैव कृतमिति युक्तमस्य सहनं; किञ्च **स्वमायामोहितात्मनाम**तस्यैव **मायया मोहितचित्तानाम**त एव न **विज्ञातो** भगवदीयोनुभावो यैस्तादृशानामतिक्रममपराधं **क्षन्तुमर्हति**, स्वधर्मविचारेणापि क्षमा युक्तेत्यर्थः ॥ ५० ॥ एवमपराधक्षमां कारयित्वा निवृत्तव्यापारा जाता न तु स्वयं तत्र गत्वा लोकन्यायेन क्षमां कारितवन्तः, तत्र हेतुमाहेतीति, स्वाघं स्वापराधमनुस्मृत्य ते ब्राह्मणाः कृष्णे विद्यमानेपि **कृतहेलना अपि दिदृक्षवो**प्युद्वसायाथ भिन्नप्रक्रमेण व्रजं प्रति **न चाचलन्**, तत्र हेतुः **कसाद् भीता** इति, तत्र गते कंसो भगवानयमिति ज्ञात्वा कदाचिदपकारं कुर्याद् व्रजस्य तदा महानयमपराधो भवेदतो व्रजं प्रति न गताः ॥ ५१ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तरसाधनप्रकरणे
द्वितीयस्य स्कन्धादितो विंशाध्यायस्य विवरणम् ॥ २० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

यन्मायामोहितधिय इत्यस्य विवरणे **शुद्धं वा वैदिककर्मणीति** निष्कामतया क्रियमाणेऽग्निहोत्रादिसोमान्ते नित्यकर्मणीत्यर्थः, तस्य पञ्चविधस्य नित्यकर्मणो भगवत्प्रापकत्वात्, एतच्च तत्त्वदीपे सर्वनिर्णयप्रकरणे जागरूकम् ॥ ४९ ॥

इति विंशोध्यायः ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आत्मानमेवं विगर्ह्य भगवद्भक्तस्वस्त्रीजनसङ्गत्याऽऽत्मनः कृतार्थतामप्याहुः अहो इति । वयं लोके इति धन्यतमाः कृतार्था एव । तत्र हेतुमाहुः–येषामिति । येषां नोऽस्माकं तादृशीः स्त्रियः । 'कीदृश्य' इत्यपेक्षायामाहुः–यासां भक्तिप्रभावेण अस्माकमपि हरौ निश्चला मतिर्जातेति ॥ ४९ ॥ एवमवज्ञारूपेऽपराधे उपायान्तरस्याभावात् प्रणमतस्तमेव क्षमापयन्ति–नम इति । कृष्णाय तुभ्यं नमः । 'सर्वज्ञत्वस्याग्रे किं बहु वक्तव्यम्' इत्याशयेनाहुः–अकुण्ठमेधसे इति । अकुण्ठा सर्वत्र प्रसृता मेधा बुद्धिर्यस्य यस्मै । तत्र हेतुमाहुः–भगवत इति त्वन्मायामोहितानामस्माकमपराधस्त्वयाऽवश्यं सोढव्य' इत्याशयेनाहुः–यस्य मायया मोहिता विवेकरहिता धीर्येषां तेषां वयं कर्ममार्गेषु भ्रमाम इति ॥ ५० ॥ स वै सर्वशास्त्रप्रसिद्धः आद्य सर्वकारणभूतः पुरुषः सर्वान्तर्यामी श्रीकृष्णः स्वमायया मोहित आत्मा अन्तः करणं येषां तेषाम्, अत एव न विज्ञातस्तस्यानुभावो यैस्तेषां नोऽस्माकमतिक्रमं स्वाज्ञोल्लङ्घनापराधं क्षन्तुमर्हतीत्यन्वयः ॥ ५१ ॥ कृष्णे कृतं हेलनमवज्ञानं यैस्ते ब्राह्मणा इत्येवं स्वाघं स्वपराधननुस्मृत्य अच्युतयोः 'कर्मणि षष्ठी' रामकृष्णौ दिदृक्षवो द्रष्टुमिच्छवोऽपि कंसात् भीताः दर्शनार्थास्मद्गमनेन कंसो 'मम वैरी विष्णुरमयमेव

इति ज्ञात्वा कदाचित् कंचिद्व्रजेऽपकारं कुर्यात्तदा तस्य 'अस्मन्निमित्तत्वादन्योऽपि महानपराधः स्यात्' इति शङ्किताः न चाचलन् तद्दर्शनार्थं नैव जग्मुः। स्वाश्रमस्था एव तमभजन्नित्यर्थः ॥ ५२ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने। त्रयोविंशो गतो विप्रभार्यानुग्रहबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

स इति ॥ स एष साक्षात्पूर्णो भगवान् योगेश्वराणामीश्वरो विष्णुः यदुषु जात इति अश्रृण्म सर्वत्र श्रुतवन्तोऽपि वयं मूढा मूर्खा न विद्महे न ज्ञातवन्तः आर्षः प्रयोगः ॥ ४९ ॥ अहो इति ॥ अहो येषामस्माकं स्त्रियः तादृशीः तादृश्यो विष्णुभक्ताः। पूर्वसवर्णदीर्घ आर्षः। सन्ति ते वयम् अहो धन्यतमाः। यासां स्त्रीणां भक्त्या हेतुना अस्माकमपि हरो निश्चला मतिर्जाता ॥ ५० ॥ नम इति ॥ भगवते न कुण्ठा मेधा यस्य तस्मै। असिजार्षः। तुभ्यं कृष्णाय नमः। यस्य मायया विवेकरहिता धीर्येषां ते वयं कर्ममार्गेषु भ्रमाम इति ॥ ५१ ॥ स इति ॥ सर्वप्रसिद्धः आद्यः स पुरुषः कृष्णः स्वमायया मोहिता आत्मानो येषां तेषाम् अत एव न विज्ञातस्तस्यानुभावो यैस्तेषां नोऽस्माकमतिक्रमं स्वाज्ञोल्लंधनापराधं क्षन्तुमर्हति ॥ ५२ ॥ इतीति ॥ कृष्णे कृतं हेलनमवज्ञानं यैस्ते ब्राह्मणाः इत्येवं स्वाघं स्वापराधमनुस्मृत्य अच्युतयोः। शेषे षष्ठी। अशोकवनस्थौ रामकृष्णौ दिदृक्षवा द्रष्टुमिच्छवोऽपि कंसाद्भीताः नाचलन् कृष्णदर्शनार्थं सायाह्ने व्रजमपि नैवागमन्। तत्रस्था एवाभजन्। यदि ब्राह्मणा वयं तद्दर्शनार्थं व्रजेम तदा कंसः श्रीकृष्णं विष्णुं मत्वा कमपि हन्तुं कुर्यात्तस्य हेतवो वयं स्यामेति ॥ ५३ ॥

इति श्रीभागवते महापुराणेऽन्वितार्थप्रकाशिकायां दशमस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अकुण्ठदेशकालादिभिरप्रतिहता मेधा असंख्यैश्वर्य्यस्मृतिमज्ज्ञानं यस्य तस्मै यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वत इति श्रुतेः ॥ ४९ ॥ न विज्ञातः अनुभावो महिमा यैस्तेषां अतिक्रममपराधम् ॥५०॥ स्वाघं स्वदोषं कृतहेलनाः कृतं हेलनं मनुष्यदृष्ट्यावज्ञा यैस्ते अच्युतयोः रामकृष्णयोः दर्शनार्थं न चाचलन्न ययुः ॥ ५१ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने यज्ञपत्न्यनुग्रहोनाम त्रयोविंशोऽध्यायः ॥ २३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स एष इति ॥ योगेश्वरेश्वरः, विष्णुः सर्वान्तरात्मा, स उक्तमहिमः, एषः कृष्णनामा भगवान्, यदुषु साक्षात् सर्वजननयन विषयतायाततया, जातः सम्यगवतीर्णः। इति शृण्वानाः अपि श्रुतवन्तोऽपि वयं, यतो मूढाः, ततः, न विद्महे न तं ज्ञातवन्तः ॥ ४९ ॥ अहो इति ॥ यद्वा अहो, वयं धन्यतमाः, येषां नः, तादृशीः साक्षाद्भगवद्भक्तिमत्य इत्यर्थः। स्त्रियः, भवन्ति। यासां स्त्रीणां, भक्त्या हेतुना, अस्माकं हरौ, निश्चला मतिः, जाता। असंधितार्षो ॥ ५० ॥ इत्थमनुतप्ता विप्राः प्रणाममन्तरेण स्वात्मापराधक्षमानिमित्तमनुपलभमाना नमस्कुर्वाणाः क्षमापयन्ति द्वाभ्याम् ॥ नम इति ॥ अकुण्ठा अप्रतिहता मेधा धिषणा यस्य तस्मै, 'नित्यमसिच् प्रजामेधयोः' इत्यसिच्। भगवते कृष्णाय, तुभ्यं नमः। स्वयं त्वं त्वकुण्ठमेधाः, वयं तु, यस्य तव मायया मोहितधियः सन्तः, कर्मवर्त्मसु भ्रमामः। त्वद्भक्तिविधुरेषु केवलं यज्ञादिकर्ममार्गेष्वेव भ्रमन्तः सन्तस्तत्रैव पुरुषार्थबुद्धिं कुर्मस्ततो धिगस्मानिति भावः ॥ ५१ ॥ स वा इति ॥ आद्यः पुरुषः, स कृष्णः, स्वमायामोहिततात्मनां स्वनिष्ठानाद्यज्ञानमोहितचित्तानां अत एव अविज्ञातोऽनुभावो महिमा यैस्तेषां, नोऽस्माकं, अतिक्रममपराधं, क्षन्तुं अर्हति वै ॥ ५२ ॥ इतीति ॥ इतीत्थं, कृष्णे विषये, कृतं हेलनमपराधो यैस्ते, ते ब्राह्मणाः, स्वाघं स्वकृतमपराधं, अनुस्मृत्य तं श्रीकृष्णं दिदृक्षवः द्रष्टुमिच्छन्तः सन्तोऽपि यतः कंसात् भीताः तस्मात् न चाचलन्। स्वस्थानान्न चलिता द्रष्टुं न जग्मुरित्यर्थः। किं तु तं ध्यायन्तः स्वस्थान एव तस्थुरिति भावः ॥५३॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

हो वयमिति : १०.२३.४९.

पत्युः सङ्गादर्थसिद्धिः पृथङ् न स्त्रीणामेतत् सिद्धमासर्वलोकम्।
चित्रं धातुश्चेष्टितं यत्कृताः स्मः सम्प्रत्येते ह्यन्यथाऽर्थे प्रमाणम् ॥ ९१ ॥

याः स्वयं प्रमदा युक्तं जाता विप्रमदापहाः । चित्रं प्रचेतः क्लेशान्नोऽमोचयन् विप्रचेतसः ॥ ९२ ॥
अपरिग्रहस्थितिरितस्तैः स्तुत्या स्यादसंशयं यैर्नः । स्त्रीयोगादनघत्वं धन्यत्वं च श्रुतं न जातु नरैः ॥ ९३ ॥
अमुकानां स्त्रियो जाताः प्रभुभक्तिपरायणाः । इति लोकोक्तितः प्राप्ता धन्यता तु स्फुटैव नः ॥ ९४ ॥

अस्माकमच्युत सतीर्युवतीः प्रकल्प्य द्वारं कृतः करुणया भवतोपदेशः ।
साध्वेतदप्यजनि नाथ न चेत्परस्मात् स्याद्वा न वाऽप्युभयतोऽपि विडम्बनैव ॥ ९५ ॥

यद्यत्कृतं पुराऽस्माभिस्तदस्मत्स्त्रीभिरर्थतः । इदं तत्कृतमस्माभिः कृतमेवेत्यवेश नः ॥ ९६ ॥

नोक्तं नोमिति वा तदा यदुपते सत्यं परं त्वं ततो दृष्टे त्वत्कृतमेव कृत्यमखिलं यद्ब्राह्मणास्यो भवान् ।
तस्मात् स्वद्विजदंशितापि रसना न क्रोधहेतुर्भवत्येवं सम्प्रति सद्द्विजा वयमपि श्रीशार्ङ्गसम्बन्धिनः ॥ ९७ ॥

क्षन्तुमर्हतीति : १०.२३.५१.

यन्निम्नोन्नतचार्वचारुविविधक्रीडाविधौ धेनुपानाकुर्वंस्तव मन्तुमेकमपि वेत्येवं न सम्भाव्यते ।
तद्वत् कृत्यमयुक्तमेतदपि नः क्षन्तव्यमस्मत्कृतं यस्मात्ते च वयं च तुल्यकृतयस्तुल्येक्षितुस्तेऽङ्गजाः ॥ ९८ ॥

इति स्वाघमिति : १०.२३.५२.

यतो मुनिभिराश्रितो भवति नन्दपुत्रस्ततः स एव भविता रिपुर्मम नभोगिरा दर्शितः ।
प्रभाविति विभाव्य स प्रसभकृत्यमस्मासु वा करिष्यति किमप्यलं त्विति तथैव तेऽवस्थिताः ॥ ९९ ॥

अज्ञात्वा त्वां त्वदीयार्थितमपि मुनयोऽस्माभिरज्ञातमेतन्मायानैशद्यमैशं त्विति कृतमतयो हन्त गायन्त्वशङ्कम् ।
ज्ञात्वाऽपि त्वामजादिस्तुतमसुररिपुं क्षुद्रकंसप्रभीता यन्नाजग्मुस्त्वदीक्षासुखमनुभवितुं ह्येष मायाविलासः ॥ १०० ॥

निर्णीतमेतत्किल गोकुले द्वयं युगान्तरालभ्यसुखप्रसाधकम् ।
सदातिथिभ्योऽन्नसमर्पणं मुदा मुकुन्दसानन्दपदानुकीर्तनम् ॥ १०१ ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसुरिविरचिते भक्तिरसायने त्रयोविंशोऽध्यायः ॥ २३ ॥

कृष्णप्रिया

अहो हमारे लिये एक संतोष की बात है कि हम बडभागी है कि-हमारे घरों में श्रीकृष्णचन्द्रचरणों में अनन्य अनुरक्त-भक्त स्त्रियाँ है । इन अनन्यानुरक्त स्त्रियाँ की दृढ भक्ति से ही हम लोगों की श्रीकृष्णप्रभु में निश्चल एवं निश्छल सुदृढ हुई है ॥ ४९ ॥ अकुण्ठित मति भगवान् श्रीकृष्ण के श्रीचरणों में हमारा नमस्कार है जिनकी विलक्षणमाया से मुग्ध मतिवाले हमलोग कर्म मार्ग में भटक रहे हैं ॥ ५० ॥ वह श्रीकृष्ण आदिपुरुष है । उनकी माया में मोहित हो जाने से हम उनके प्रभाव को नहीं जान सके इसी कारण हमारा यह अपराध बना । वह भगवान् हम सेवकों के इस अपराध को क्षमा करें ॥५१॥ भगवान् श्रीकृष्ण के अनादर रूप अपने इस अपराध का अनुशीलन कर उन ऋषियों ने इस प्रकार बहुत पश्चाताप किया । यद्यपि उनके मनमें भगवान् श्रीकृष्ण के दर्शनों की बड़ी लालसा थी परंतु कंसराजा के भय से वे भगवान श्रीकृष्ण चन्द्रजी के समीप नहीं गए ॥ ५२ ॥

श्रीमद्भागवत दशमस्कन्ध निरोधलीला तामसप्रकरण में तेइसवाँ अध्याय समाप्त ॥ २३ ॥

* * *

अथ चतुर्विंशोऽध्यायः

श्लोकाः	अनु.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
३८	३८	५	१२१६	३०	३२	११७८	३६।।।	६

श्रीशुक[1] उवाच

भगवानपि तत्रैव बलदेवेन संयुतः । अपश्यन्निवसन् गोपानिन्द्रयागकृतोद्यमान् ॥ १ ॥
तदभिज्ञोऽपि भगवान् सर्वात्मा सर्वदर्शनः । प्रश्रयावनतोऽपृच्छद् वृद्धान् नन्दपुरोगमान् ॥ २ ॥

[2]श्रीभगवानुवाच

कथ्यतां मे पितः कोऽयं सम्भ्रमो व उपागतः । किं फलं कस्य [3]चोद्देशः केन वा साध्यते मखः ॥ ३ ॥
एतद् ब्रूहि महान् कामो मह्यं शुश्रूषवे पितः । न हि गोप्यं हि साधूनां कृत्यं सर्वात्मनामिह ॥ ४ ॥

कर्दमक्षमा

अन्वयः—भगवान् अपि बलदेवेन संयुतः, तत्र एव निवसन्, इन्द्रयाग कृत उद्यमान् गोपान् अपश्यत् ॥ १ ॥ सर्वात्मा सर्वदर्शनः भगवान् तद् अभिज्ञः अपि, प्रश्रय-अवनतः नन्दपुरोगमान् वृध्धान् गोपान् अपृच्छत् ॥ २ ॥ श्रीभगवान् उवाच- पितः ! अयम् नः कः सम्भ्रमः उपागतः इति मे कथ्यताम्, अस्य किम् फलम् ? कस्य अयम् सम्भ्रमः ! वा कः उद्देशः, ! वा, केन (हेतुना) अयम् मखः साध्यते ! ॥ ३ ॥ हे पितः ! शुश्रूषवे मह्यम् एतद् ब्रूहि, हि (मम) महान् कामः, इह साधूनाम् कृत्यम् सर्वात्मना गोप्यम् हि न, भवति ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चतुर्विंशे महेंद्रस्य मखं व्यावर्त्य हेतुभिः ॥ कृष्णः प्रवर्तयामास गोवर्धनमखोत्सवम् ॥ १ ॥
भूसुराणां क्रियागर्वं निरस्य स्वःसुरेषु च ॥ मघवन्मदभंगाय तन्मखं समवारयत् ॥ २ ॥

ब्राह्मणाः कंसाद्भीताः स्वाश्रमस्था एव भगवंतमभजन् भगवानपि तत्रैव निवसन्निंद्रयागे कृत उद्यमो यैस्तान्गोपानपश्यदिति संबंधः ॥ १–२ ॥ वृथा संभ्रमो न भवति मखोऽयमित्येवं चेत् किमत्र फलं का देवता केनाधिकारिणा केन वा साधनेन साध्यते ॥ ३ ॥ एतद् ब्रूहि महान्कामो मम श्रवणे वर्तते । यद्वा तव महान्कामो दृश्यत इति । तूष्णीं स्थितं प्रत्याह । नेति । सर्वात्मनां सर्वत्रात्मदृष्टीनाम् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हेतुभिः हेतुवाक्यैः 'रजसा चोदिता मेघा वर्षंत्यंबूनि' इत्यादिलक्षणैः (१)। निरस्य अपाकृत्य । तन्मखम् इंद्रयज्ञम् (२)। इंद्रयागनिवृत्त्या गोवर्द्धनोत्सवं श्रुतिविहितं प्रवर्त्तयितुं श्रुतिमाह–"आग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमाजिघर्त्ति असक्तुभिर्मायिनि शतं वा यस्य प्रचरन् स्वेदमेसंप्रवर्तयंतो विवर्त्तयन्नह" इति । अस्या अर्थः—यस्य वज्रिणः स्वेदमे वायुर्वेन्द्रो वांतरिक्षस्थान इत्युक्तेरंतरिक्षे शतं वा ततोऽधिकं वासं वर्त्तयंतः संवर्तं प्रलयं कुर्वंतः सांवर्तका नाम मेघाः प्रचरन्प्राचरन्संचारं कृतवंतः समायिनि मायामनुष्ये श्रीकृष्णे वरिष्ठं श्रेष्ठतमं वज्रमशनिं तद्वतीं महावृष्टिमाजिघर्त्ति क्षरति अक्तुभिः रात्रिभिः । सप्तभिरिति पुराणतः सप्तरात्रं वज्रधारेण पर्जन्येन ववर्षेत्यर्थः । तत्र हेतुमाह—आग्रावभिरहन्योभिरिति । ग्रावभिरिति समुदायिभिः ग्रावसमुदायः शिलोच्चयो लक्ष्यते तैः । अहन्येभिः अहः क्रतुमर्हतीत्यहन्यास्तैः पर्वते क्रतुभाजि सतीत्यर्थः । मायी पुनः किं चकारेत्यत आह–विवर्तयन्नहेति च । अनंतरं मायी अहाक्रतून् विवर्त्तयन् विपरीतं वर्त्तयन्नास्त इति शेषः । इंद्रयागार्थमाहृतैः संभारैर्गिरियागं प्रवर्त्तयति मायिनि इंद्रो महतीं वृष्टिं चकारेत्यर्थः । अत्र दृष्टांत उपरितो नेयः । यथास्माकं जाठराग्निः प्राणसहायो जलं शोषयति तच्चास्माभिर्बलसाध्ये कर्मणि क्रियमाणे रोमकूपद्वारा प्रस्वेदरूपेण वमति, एवं वायुसहायः सूर्यं भूम्यादिगतं तोयं शोषयति तच्चेंद्रेण बलसाध्ये निरंतरभ्रमिरूपे कर्मणि प्रयुक्तः सन् किरणद्वारा चर्मकोशरूपेषु मेघेषु वमति ततस्तानिंद्रो भिंदन्वृष्टिं प्रवर्त्तयतीत्यर्थः ॥

---

१. बादरायणि–प्रा. पा. । २. अन्यत्र न । ३. चो–श्रीधर. वंशी. जीव वीर. विज. विश्व. रा. शु. ध. सु. ।

स्वाश्रमास्थाः यज्ञशालास्थाः स्वगृहस्था वा । तत्रैव गोकुले ॥ १ ॥ तदभिज्ञः इंद्रयागार्थमयमुद्यम इति जानन्नपि । तत्र हेतुद्वयम्—सर्वात्मा सर्वान्तर्यामी, सर्वदर्शनः सर्वज्ञः । दृशिरत्र ज्ञाने ॥ २ ॥ मे मह्यम् । संभ्रमः उद्यमः । कोयम् किंविषयः "संभ्रम उद्यमेऽपि स्यान्मंडलेन गतौ भये" इति शाश्वतः । किं फलम् दृष्टफलमदृष्टफलं वा । कस्य देवस्य चोद्देशः, कां देवतामत्रोद्दिश्य द्रव्यत्यागः । 'मखः स्याद्दानयागयोः' इति हलायुधः । श्लेषेण संभ्रमः सम्यक् भ्रम एव वो युष्माकं मयि सर्वेश्वरे सति यदिन्द्रयागोद्योगः ॥ ३ ॥ एतत् यदर्थं संभ्रम इत्येतत् । ननु बालकस्य तव किमेतत्प्रश्नेन तत्राह—एतच्छ्रवणे मे महन्कामो महात्याकांक्षा । मदिच्छया न वदसि चेत्तर्हि स्वेच्छयैव वदेत्याह—यद्वेति । तवात्र महानभिलाषो निरीक्ष्यते । किमिदमिति उत्तरमददतं प्रत्याह—नेति । हिद्वयं साधुकृत्य सर्वथा प्राकट्यमाह ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पूर्वं व्रजकुमारीः प्रति "याताऽबला व्रजं सिद्धा मयेमारंस्यथ क्षपाः" इति हेमन्तगतया निजाङ्गीकृतास्तासु शरद्रात्रिषु ताभिः सह श्रीभगवान् अरमत ताः खलु शरदन्तराव्यवहितशरत्सम्बन्धिन्य एव सम्भवन्ति तद्रमणारम्भश्च शरत्पूर्णिमायामेव निर्देक्ष्यते सा च शरन्मध्यस्थाश्विनपूर्णिमैव सम्बध्यते कार्त्तिकशुक्लप्रतिपदित्येषा गोवर्द्धनपूजा सा च रासलीलायां व्रजदेवीभिरनुकृता गोवर्द्धनपूजानन्तरमेव वरुणलोकगमनं ततः पूर्वा शरदमेवारभ्यागामिनीं यावत् क्रमात् गोवर्द्धनपूजा वरुणलोकगमनवस्त्रहरणयज्ञपत्न्युपचर्याग्रहणरासक्रीडा ज्ञेयाः तत्र तत्तद्वर्षनिर्णयः कंसवधान्ते करिष्यते वैपरीत्योक्तिस्तु प्रेमवैवश्यात् क्वचित् सजातीयत्वाच्च अथ भगवानपि तत्रैवेत्यस्यायमर्थः यत्र तद्यागयोग्ये गोष्ठनिकट एव स्थानविशेषे सङ्गम्य निवसन्तो गोपाः कृतोद्यमा बभूवुः भगवानपि तत्रैव बलदेवेन संयुतो निवसन् इन्द्रयागकृतोद्यमान् गोपान् अपश्यत् पश्यन्नेवासीत् तद्द्रव्येण यागान्तरसाधनेच्छया नतु प्रथमं किञ्चिदुक्तवानित्यर्थः । यत्तु श्रीविष्णुपुराणे —

"विमलाम्बरनक्षत्रे काले चाभ्यागतो व्रजम् । ददर्शेन्द्रमहारम्भायोद्यतास्तान् व्रजौकसः" ॥ इति ।

श्रीहरिवंशे—

"व्रजमाजग्मतुस्तौ तु व्रजे शुश्रुवतुस्तदा । प्राप्तं शक्रमहं वीरौ गोपांश्चोत्सवलालसान् ॥ इति ।

तत्खलु सामान्यतो दर्शनमत्र तु विशेषत इति भेदः एषा च क्रीडा कार्तिकशुक्लप्रतिपदि कार्तिकविधानस्य मध्यदेशीयानामाचारस्य च तत एव प्रवृत्तेः "अपर्त्वत्युल्बणं वर्षम्" इति वक्ष्यमाणाच्च तथा चोक्तं पाद्मे दीपान्वितामावास्याकृत्यान्ते "प्रातर्गोवर्द्धनः पूज्यो रात्रौ द्यूतं प्रवर्त्तते" इति तस्मात् श्रीहरिवंशे वर्षाशरत्सन्धिप्रायवर्णनं समुद्रतीरादिवन्मध्यदेशेपि तदानीं वर्षाणां बाहुल्येन कदाचित्सर्वाश्विनव्याप्त्यपेक्षया ॥ १ ॥ ततश्च तस्य पूर्वपूर्वदृष्टस्येन्द्रमखस्य तथा श्रीव्रजराजेन प्रत्युत्तरयिष्यमाणस्य तदधिकस्य चार्थस्याभिज्ञोऽपि अपृच्छत् तत्र च भगवानपि सर्वसद्गुणनिधित्वेन विनयावनम्र एव सन्नपृच्छत् अभिज्ञाने हेतुः सर्वस्यात्मा परमात्मेति प्रश्ने हेतुः सर्वान् दर्शयति स्वार्थं प्रावर्त्तयतीति तथा सः भवतु नाम पूर्वेषामव्यवहितानां मद्बहिरङ्गदेवतापूजादिकं किन्त्वेषां मत्सन्निहितानां मदन्तरङ्गपूजैव मत्सुखकरी मत्पित्रादीनां तु "तद्भूरिभाग्यम्" इत्यादिलक्षणमहामहिमत्वादतिक्षुद्रस्य तत्रापि महागर्वस्येन्द्रस्य पूजा मम दुःखकरीति सम्प्रति परमान्तरङ्गगोवर्द्धनपूजाप्रवर्त्तनेच्छयैव वृद्धेषु तत्रैव मुख्यतात्मीयतापेक्षया विशेषतः स्वपितरि प्रश्न इति ज्ञेयः ॥ २ ॥ कथ्यतामित्यर्द्धकम् । मे मह्यं कथ्यतामिति सर्वेऽन्ये जानन्ति केवलं मयैव न ज्ञायत इति मां प्रत्येव कथ्यतामिति भावः । एषा च पितृसन्तोषार्थमौग्ध्यप्रायलीलैव आवश्यकतच्छ्रवणाय वः युष्माकं सर्वेषामेव नतु केषाञ्चित् तत्र च सम्भ्रमः त्वराविशेषः वैयग्र्यं वा श्लेषेण सम्यक् भ्रम एवेत्यर्थः । उपागतः दूरे स्थातुं योग्योऽपि समीपं प्राप्तः उपर्यापतित इति वा ॥ ३ ॥ केनेति तृतीयान्तपदेन कर्तृकरणयोः प्रश्नः एतद्ब्रूहीति पुनरुक्तिर्निजशुश्रूषातिशयबोधनाय मह्यं मां प्रीणयितुमित्यर्थः यद्वा, ननु बालके त्वयि तत्कथनेन किं तत्राह—शुश्रूषवे पुत्रस्येच्छावश्यं पूरयितुं युज्यत इति भावः । श्लेषेण शुश्रुषुं धर्ममाब्रूयादिति न्यायेनावश्यकतोक्ता पितरिति पुनः सम्बोधनं स्नेहविशेषजननाय पूर्वपूर्वमप्ययं जानात्येव तथापि यत्पृच्छति तत्र च सोल्लुण्ठमिव यत्पृच्छति तत् पुनरिन्द्रं प्रत्यानादरेणैवेति गम्यते नारायणसमगुणत्वात् तज्जयिदानववृन्दघातित्वाच्चेति संशय्य तूष्णीं स्थितं प्रत्याह —नहीति । सार्द्धकेन तत्र नहीत्येकम् उदासीन इत्यर्द्धकं साधूनामिति तेषां विकर्मस्वप्रवृत्त्या गोप्यत्वभावात् साधूनामेव लक्षणं सर्वात्मनामित्यादिविशेषणत्रयेण परमात्मा तद्दृष्टीनाम् इह जगति कुत्रापीत्यर्थः । अतः तत्तल्लक्षणवद्भिर्भवद्भिर्न गोपयितुं युज्यत इति भावः । ननु निजहितार्थं देवताराधकानां कुतः सर्वात्मता उक्ता अतोऽस्वपरदृष्टित्वादिकं तव च नास्त्येवेति भवतु, तथापि मयि गोपयितुं न युज्यत एवेत्याह उदासीन इति वर्ज्यः मन्त्रभङ्गभयात् अहं तु सुहृत्सु परमान्तरङ्गः पुत्र एवेत्यतो न वर्ज्य एवेति भावः ॥ ४–५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं गोपालनप्रवृत्तिमारभ्य प्रायः षष्ठसप्तमाब्दवयसि कृतां लीलामुक्त्वा अधुनाष्टमारम्भे च तां चतुर्विंशाद्यध्यायचतुष्केण वदन् तत्र च तत्तद्वयसि प्रायो मुख्यमुख्यलीलाया एव वर्णनादत्रापि तथैवाह—भगवानपीत्यादिना । व्रज एव नितरा-

मासक्तिपूर्व्वकं वसन्निति तस्य व्रजैकक्रीडापरता, तत्रत्यानाञ्च परमधन्यता पूर्व्ववत् सूचिता । अपिशब्दः पूर्व्वोक्तापेक्षया, तदर्थस्तैर्व्यञ्जित एव । यद्वा, विप्राः स्वस्थात् नाचलन्, भगवानपि तेषां सान्त्वनार्थं नाययौ, किन्तु व्रज एव निवसन् इत्यपि-शब्दार्थः । बलदेवेन संयुत इति न च तेषामाश्वासनार्थं तमपि प्रेषयामासेति भावः । भगवान् निजकारुण्यादिगुणप्रकटनेन जगद्धितार्थमवतीर्णोऽपीति तेषामपि हितसिद्धियोग्यतोक्ता । यद्वा, अपि निश्चये, बलदेवेन सह तत्रैव निवसन्नित्यत्र हेतुः—भगवानिति; तेन सहान्यत्र निजाशेषैश्वर्य्यप्रकटनस्यानुपपत्तेरसम्पत्तेश्चेत्यर्थः । तदेव दर्शयंस्तत्प्रसंगमारभते—इन्द्रयागकृतोद्यमानपश्यदिति श्रीगोवर्द्धनपूर्वदिग्वर्त्तीन्द्रध्वजाख्यकुण्डे इन्द्रध्वजोत्थापनादिना गोपानामिन्द्रपूजार्थं विविधद्रव्याहरणाद्युद्योगमद्राक्षीदित्यर्थः । यद्यपि प्रत्यब्दमेव तेषां तदर्थोद्यमस्तद्यागश्च वृत्तोऽस्ति, भगवता च दृष्टोऽस्त्येव, तथाप्यपश्यदित्यधुना विशेषोक्तिः श्रीगोवर्द्धनोद्धरणक्रीडाया इन्द्रयज्ञमखभञ्जनलीलाया वा योग्यकालापेक्षया पूर्व्वं तत्रौदासीन्यात् । एषा च क्रीडा वर्षान्ते शरदि प्रवृत्तायामेव (विष्णु. प. १६।१२–१३)—

'तं शरत्कुसुमापीडाः परिवार्य्य प्रदक्षिणम् । गावो गिरिवरं सर्व्वास्ततो यान्तु पुनर्व्रजम् ॥
प्राप्ता किलेयं हि गवां स्वादुतोयतृणैर्गुणैः । शरत् प्रमुदिता रम्या गतमेघजलाशया ॥'

इत्यादि श्रीहरिवंशोक्तेः, (भा० १०।२५।१५) 'अपत्त्वत्युल्वणं वर्षम्' इत्यत्रैव वक्ष्यमाणत्वाच्च ॥ १ ॥ तस्योद्यमस्याभिज्ञोऽप्यपृच्छदिति तेषामुत्तरद्वारैव तदनुरूपपरिहारार्थं तदभिज्ञत्वे हेतुः, सर्व्वात्मा सर्व्वव्यापकः, यद्वा, सर्व्वेषामात्मा चेतयिता, अतएव सर्व्वं दर्शयतीति तथा सः, यतो भगवान् सर्व्वैश्वर्य्ययुक्तः; यद्वा, सर्व्वात्मेतिपदद्वयेन तेषां तत्र प्रवृत्तौ हेतुरुक्तः, तथाप्यपृच्छत्, यतो भगवान् विचित्रलीला इत्यर्थः । यद्वा, प्रश्ने हेतुः—सर्व्वस्यात्मा प्रवर्त्तक इति शत्रुयागभंगेन श्रीगोवर्द्धनयागप्रवर्त्तनार्थम् ; कुतः ? सर्व्वं श्रीगोवर्द्धनस्य हरिदासवर्य्यस्य सेवादिकं पश्यत्यनुभवतीति तथा सः; तदपि कुतः ? भगवान् भक्तवात्सल्याद्यशेषसद्गुणयुक्तः, यद्वा, निजाखिलैश्वर्य्यविशेषप्रकटनपर इति हेत्वन्तरम्, प्रश्रयावनतः सन्निति सर्व्वसद्गुणनिधित्वेन, यद्वा, वक्ष्यमाणार्थग्रहणाय पूज्येषु प्रश्नरीत्यनुसारचातुर्य्या निजविज्ञताबोधनार्थम् । वृद्धानिति तेषामेव तद्विज्ञानात्, तथा तेषां प्रबोधने सति सर्व्वेषामेव तत्सम्पत्तेश्च । तत्र च नन्दः पुरोगमो मुख्यो येषामिति तस्य प्रबोधे सति स्वत एव वृद्धानां तत्सिद्धेः, विशेषतश्च गूढोऽयमभिप्रायः—ततोऽयं सरलस्वभावः परमवत्सलो मत्स्नेहाक्रान्तचित्तो मदिच्छां कदापि नात्येष्यति । अन्ये चैते सर्व्वे तदधीनाः, अतोऽमुं प्रत्येव प्राधान्येन प्रश्नो युक्त इति ॥ २ ॥ अतएव नन्दपुरोगमानित्युक्तेऽपि हे पितरिति, मे मह्यं कथ्यतामिति सर्व्वेऽन्ये जानन्ति, केवलं मयैव न ज्ञायत इति मां प्रत्येव कथ्यतामिति भावः । एषा च पितृसन्तोषणार्था मौग्ध्यलीला आवश्यकतत्श्रवणाय; यद्वा, अन्यं प्रति कथिते तस्य तत्त्वाज्ञानान्न किमपि प्रयोजनम्, अतो मां प्रत्येव कथ्यतामितीन्द्रमखनिरसनार्था सगर्व्वप्रौढोक्तिः । यद्वा, हे मत्पितरिति सस्नेहसम्बोधनम्, सन्याययथार्थकथनाय; वः युष्माकं सर्व्वेषामेव, न तु केषाञ्चित्; तत्र च सम्भ्रमस्त्वराविशेषो वैयग्र्यं वा, श्लेषे सम्यक् भ्रम एवेत्यर्थः । उपागतो दूरे स्थातुं योग्योऽपि समीपं प्राप्त उपर्य्यापतित इति वा ॥ ३ ॥ केनेति तृतीयान्तपदेन कर्त्तृकरणयोः प्रश्नः । अन्यत्तैर्व्यञ्जितम् । यद्वा, सम्भ्रमरूपः कोऽयं किन्नामा अयं मख उपगतः, तस्य च किं फलमित्यादिकं समानमेव । एतद् ब्रूहीति पुनरुक्तिर्निजशुश्रूषातिशयबोधनाय; मह्यं माम्, यद्वा, मत्प्रीत्यर्थमित्यर्थः, तत्र च शुश्रूषव इति 'शुश्रूषुं धर्म्ममाब्रूयात्' इति न्यायेन प्रत्युत्तरावश्यकतोक्ता । यद्वा, ननु बालके त्वयि तत्कथनेन किम् ? तत्राह—शुश्रूषवे, पुत्रस्येच्छावश्यं पूरयितुं युज्यत इति भावः । यद्वा, एषापि पूर्व्ववत् सगर्व्वोक्तिरेव; पितरिति पुनः सम्बोधनं स्नेहविशेषजननाय, तदभिप्रायश्च लिखित एव ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथेन्द्रप्रीतिकरयागभञ्जनं ततः सङ्क्रुद्धेन्द्रचोदितमहावातवर्षपीडितशरणागतव्रजवासिरिरक्षितोपयुक्तगोवर्द्धनाचलोद्धरणात्मकं भगवच्चेष्टितमनुवर्णयति–द्वाभ्यामध्यायाभ्यां; भगवानपीति; तत्रैव वृन्दावन एव निवसन्निन्द्रयागार्थं कृत उद्यमः प्रयत्नो यैस्तान् गोपानपश्यत् ॥ १ ॥ सर्वात्मा सर्वदर्शनश्चेति च हेतुगर्भम् अतस्तदभिज्ञोपि उद्यमस्येन्द्रयागार्थत्वं जानन्नप्यज्ञ इवाऽवनतो नम्रः नन्दप्रभृतीन् वृद्धानपृच्छत् ॥ २ ॥ प्रश्नप्रकारमेवाह–कथ्यतामिति । हे पितः ! वो युष्माकं कः संभ्रमः उपस्थितः संभ्रमो न भवति मखोऽयमित्यत्राह–किं फलमिति । मखश्चेत् किमत्र फलं कस्य सम्बन्धी उद्देशः का देवतेति प्रश्नः केन साधनेन साध्यत इति साधनप्रश्नः ॥ ३ ॥ हे पितः श्रोतुमिच्छवे मह्यमेतत् मत्पृष्टं ब्रूहि अत्र महान् कामः शुश्रूषा वर्त्तते गोप्यत्वात् वक्तुं श्रोतुं च न योग्यमित्याशङ्कां निराकरोति–नहीति । साधूनां कृत्यं न हि गोप्यं तत्र हेतुं वदन् विशिनष्टि सर्वात्मनां सर्वेष्यात्मानः आत्मतुल्या येषां ज्ञानैकाकारत्वेन सर्वेष्यात्मान एकरूपा एवेति जानतामित्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वमहिमानं प्रकटयितुमुत्पथवर्ती पुरुषः सन्मार्गोपदेशेन शिक्षणीय इति शास्त्रशासनं पश्यन् कृष्णः सन्मार्गं दर्शयितुमुपक्रमत इत्याह–शुक इति । तत्र व्रज एव निवसन् ॥ १ ॥ सर्वात्मा सर्वदर्शन इत्येतद्द्वयं तदभिज्ञत्वे हेतुः प्रश्रयः सेवा-

शीलता ।। २ ।। कोऽयं किंविषयः मखविषयश्चेत्तत्राह–किं फलमिति । दृष्टमुतादृष्टं फलम् यद्वा, किमर्थं सम्भ्रमः अस्य सम्भ्रमस्य किं फलं साध्यं मखश्चेदत्राह–कस्येति । कां देवतामुद्दिश्य द्रव्यत्यागलक्षणः केनाधिकारिणा हेतुना वा ।। ३ ।। तदेतत्पृष्टं सर्वं मह्यं ब्रूहि । किमर्थं ? महान् कामः मम तस्मिन् कार्ये महत्याकाङ्क्षा वर्तते तुशब्दो भेदार्थः इह वाच्यव्यवहारविशेषे यत्सर्वात्मा कीर्त्यं वक्तुं योग्यं तत्साधूनां गोप्यं न हि कुत इत्थं सङ्कल्पयत इत्यतः प्रसिद्धत्वादित्याह, हीति ।। ४ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

भगवानपीति अत्रापिशब्देन तत्रैव निवसन्नितीत्थं चैवं लभ्यते एवं ते पत्नीसम्बन्धेनातिविश्वस्ता असन्निहिता नाचलन् चकाराद्यत् किञ्चित् तत्साम्मुख्येन यज्ञमेव कुर्वन्तोऽतिष्ठन् अथ किञ्चित्कालान्तरे भगवानपि बलदेवेन संयुतस्तत्रैव निवसन् स्वयं यत्र निवसति तत्रापीत्यर्थः । इत्यभिलाषसमञ्जसत्वं दर्शितं ब्रह्मादिदुर्ल्लभं तत्संवासमहेतुमेभ्यस्तेभ्य इन्द्रस्यातिक्षोदियस्त्वात् बलदेवेन संयुत इति स कदाचित् सोढुं शक्नोति बलदेवस्तु तत् परमभक्तौ नैवेत्यर्थः । तस्य यज्ञस्य अभि सर्वतोभावेन सिद्धान्तानुष्ठानादिप्रकारेण जानातीति तदभिज्ञस्तादृशोऽपि पूर्वपूर्वमप्ययं जानात्येव तथापि यत् पृच्छति तत् पुनरिन्द्रं प्रत्यनादरेणैवेति गम्यते ।। १–४ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वपित्रा सह संलप्य मखं व्याधूय वज्रिणः । चतुर्विंशे गिरीन्द्रस्य मखं प्रावर्त्तयद्धरिः ।।

गोष्ठस्यास्थान्यां निवसन् स्वभ्रातृभिः सह नन्द इन्द्रयागसम्भारसिद्ध्यर्थं गोपानुद्योजयामास भगवानपि तत्रैव निवसन् इन्द्रयागकृतोद्यमान् गोपान् अपश्यदिति सम्बन्धः ।। १ ।। पूर्वपूर्ववर्षदृष्टत्वात्तस्याभिज्ञोऽपि सर्वात्मेति यद्यप्यन्तर्यामिस्वरूपेणेन्द्रयागे स्वयमेव प्रेरयति तदपि लीलाकौतुकार्थमित्यर्थः । सर्वम् इन्द्रगर्वखण्डनसप्तरात्रपर्य्यन्तप्रियजनसहवासविलासादिकमुदर्कं पश्यतीति सः ।। २ ।। मखो भविष्यति तत्सिद्ध्यर्थमयं सम्भ्रम इति चेत् किमत्र फलं कस्य चोदेशः को देवोऽत्र पूज्यत्वेन निर्दिष्ट इत्यर्थः । केन कर्त्रा करणेन वा ।। ३ ।। ननु, बालकस्य तव किमेतत् प्रश्नेन तत्राह–महान् कामोऽभिलाषो ममात्र वर्त्तते । यद्वा, महान् कामो युष्मदादीनामत्र दृश्यते अत एव तं मह्यं शुश्रूषवे शुश्रूषुं मां प्रीणयितुमित्यर्थः । रहस्यत्वादनतिकोविदबालकादिषु वक्तुमनर्हमिति चेत्तत्र स्वस्यातिकोवदित्वमुक्तिवैचित्र्यैव द्योतयन्नाह–नहीति । सर्व एवात्मान आत्मतुल्या येषां तेषाम् अत एवायं स्वोन्तरङ्गः अयं परो बहिरङ्ग इति न विद्यते दृष्टिर्येषां तेषाम् अत एव तद्भेदा मित्रोदासीनविद्वेषा न सन्तीत्याह–अमित्रेति । गृहस्था वयमेवंभूताः साधवो भवितुं न शक्नुम इति चेत्तदपि मय्येतद्गोपयितुं न युज्यत इत्याह–उदासीनोऽरिवदिति । तुल्यार्थकवति प्रत्ययेनारिणा तुल्य उदासीनो बर्ज्य इत्यर्थः । अरिसाधर्म्मञ्चास्यारिमित्रत्वेनापचिकीर्षापत्त्वान्न त्वपकारकत्वादिति ज्ञेयमत एव "यो विपक्षः सुहृत्पक्षः स तटस्थो निगद्यते" इत्युज्ज्वलनीलमणौ तल्लक्षणं दृष्टं यस्तूदासीनो नारिणो तुल्यो नापि सुहृदा तुल्यः स तु न वर्ज्योनाप्युपादेयः स्वकृत्येष्वित्यत एव सनोट्टङ्कितः सुहृदात्ममित्रत्वादात्मवद्विश्वास्य इत्यर्थः । अहं तु पुत्रः सुहृदः सकशादप्यन्तरङ्ग इत्यर्थः ।। ४–५ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

चतुर्विंशे इन्द्रमखानिकरणपूर्वकं श्रीकृष्णप्रवर्त्तितं गोवर्द्धनमहोत्सवं वर्णयति–भगवानपीति ब्राह्मणाः कंसाद्भीताः स्वाश्रमेभ्यो न चाचलन् तेष्वेवस्थिताः भगवन्तमभजन् भगवानपि तत्रैव वृन्दावने निवसन् इन्द्रयागाय कृतः उद्यमो यैस्तान् गोपानपश्यदित्यन्वयः ।। १ ।। तदभिज्ञोऽपीन्द्रयागोद्यमाभिज्ञोऽप्यपृच्छत् ।। २ ।। हे पितः ! वो युष्माकं कः सम्भ्रमः उपागतः उपस्थितः एतन्मे कथ्यताम् सम्भ्रमः किन्तु मखोऽयमित्यत्राह–किमिति । मखश्चेदत्र किं फलम् कस्य चोदेशः कां देवतामुद्दिश्यायं क्रियत केन साधनेन साध्यते च एतत् मह्यं शुश्रूषवे ब्रूहि ।। ३ ।। हे पितः ! महान् कामो दृश्यते तवेति शेषः । तं काममहं स्वमतानुसारेण साधयिष्यामीति भावः । गोप्यं कृत्यं न कथयामीत्यत्राह–नहीति, सार्द्धेन । साधूनां कृत्यं गोप्यं न ह्यस्ति तत्र हेतुगर्भं विशेषणं सर्वात्मनामिति सर्वं सर्वात्मनामिति सर्वे सर्वात्मनि वासुदेवे आत्मा मनो येषां सर्वं वासुदेवात्मकमिदमित्येवं ज्ञानवतामित्यर्थः ।। ४ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

चतुर्विंशे विनिर्धूय पूजामिन्द्रस्य हेतुभिः । प्रावर्त्तयत् स्वभक्तस्य गिरिराजस्य तां हरिः ।।

सभायां भ्रात्रादिभिः सहोपविष्टो नन्दराज इन्द्रपूजासम्भारसिद्धये गोपानादिशत् तत्रेव निवसन् भगवानपि गोपानिन्द्रयागोद्यतानपश्यत् ।। १ ।। तदभिज्ञोऽपि पूर्वपूर्ववर्षदृष्टत्वादिन्द्रपूजार्थकोऽयमुद्यम इति जानन्नपि सर्वात्मान्तर्यामिवपुषा तत्र तेषां प्रवर्त्तकोऽपि प्रश्रयेण विनयेनावनतः सन्नपृच्छत् सर्वमुदर्कमिन्द्राभिमानापनयनसप्तरात्रपर्यन्तप्रियजनसहवासविलासादिकं

पश्यतीति सः भगवान्नित्यसिद्धषडैश्वर्यस्तदभिमानापनयादिषु समर्थः ॥ २ ॥ संभ्रमो महोद्योगः मखो भावी तत्सिद्धयेऽयं संभ्रमः इति चेत् किमत्र फलं कस्य वोद्देशः को देवोत्र पूज्यत्वेनोद्दिष्ट इत्यर्थः केन कर्त्रा करणेन वा साध्यते ॥ ३ ॥ ननु त्वं बालः स्वसखैः क्रीडस्व किं तवानेन प्रश्नेनेति चेत् तत्राह–एतददति साधकेन। मे महान् कामो वाञ्छन्ति अतः शुश्रूषवे मह्यमेतद् ब्रूहि शुश्रूषुं मां प्रीणयितुमित्यर्थः। ननु रहस्यत्वादेतद्बाले य वाच्यमिति चेत्तत्रोक्तिवैचित्र्येण विज्ञत्वं स्वस्य सूचयन्नाह–नहीति। सर्वेष्वात्मा मनो येषां अत एव स्वोऽन्तरङ्ग इति नास्ति दृष्टिर्येषां तत एव तद्भेदा मित्रोदासीनद्विपोऽपि न सन्तीत्याह–मित्रेति। ईदृशां साधूनानिह लोके गोप्यं कृत्यं नास्ति ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ सर्ववित्स्वमहिमानं किञ्चिद्व्यक्तीकर्तुमिन्द्रमददमनं कुर्वन्नजानन्नि वनन्दादीन् प्रच्छेति शुकः शंसति ॥ श्रीशुक इति। तत्रैव गोकुल एव निवशन्निन्द्रमुद्दिश्य क्रियमाणो याग इन्द्रयागस्तत्र किं कृत उद्योग उद्यमो येषां ते तानपश्यद्ददर्शः ॥ १ ॥ सर्वात्मा सर्वदर्शन इति तदभिज्ञताहेतुप्रश्रयो भक्तिस्तेनावनतः प्रवणः सन्नन्दादीन्वृद्धान्। तत्रापि न प्रलोभः कर्तुं शक्य इति तमेव सम्बोध्य पृच्छति। कथ्यतां मे पितरिति। मे पितर्मे कथ्यतामित्यन्वयः। अयं कः सम्भ्रम उत्सव उपायातः। अकरणे च किं भयमुपागतमेतादृशो दुर्भ्रमो मयि सति कुत आयात इत्यान्तरङ्गिकोऽपि भावो भगवतो ज्ञेयः। न दृश्यते किमिति तत्राह ॥ किं फलमित्यादिना। कस्योद्देशः कां देवतामुद्दिश्य केन साधनेनायं मखः साध्यते केनाधिकारिणा वा ॥ ३ ॥ शुश्रूषवे श्रोतुकामाय मह्यं तदेतत्दृष्टं ब्रूहि। किं तवानेनेत्यत आह। महान्कामः श्रवणनिबर्हणीयोऽभिलाषो वर्तत इति हि यतः साधूनां सर्वात्मनां सर्वं कीर्त्यं गोप्यं गोपनीयं नेति हि प्रसिद्धं। अन्यथा तव साधुताऽसाधुता स्यादिति भावः। न त्वं साधुरतो गोप्यमित्यपि नेत्याह। साधूनामस्माकं कीर्त्यं न हि गोप्यं। तुशब्दो वचने वचनेन मया ज्ञातमेव सर्वमित्यान्तराङ्गिकविशेषसूचकः। सविशेषं ब्रूहीति सूचको वा ॥ ४ ॥

श्रीसुबोधिनी

एकविंशे हैतुकस्य कर्मणो विनिवारणम्। कृत्वा तद् वैदिकं चक्रे युक्त्यैवेति निरूप्यते ॥ १ ॥
यथा प्रबोधिता विप्रा एवं देवा अपि स्वयम्। महतां महती शिक्षा उत्तरोत्तरमुत्तमा ॥ २ ॥
स्त्रीणां वस्त्राणि जगृहे विप्राणां तु स्त्रियः सतीः। देवानां तु हवींष्येव येषु ते सुप्रतिष्ठिताः ॥ ३ ॥
तामसान् राजसांश्चैव समुद्धृत्य मनीषया। सात्त्विकोद्धरणेयं तु यागभङ्गं चकार ह ॥ ४ ॥

पूर्वाध्याये ब्राह्मणा नागता इत्युक्तं, तथा सति गोकुले वैदिको यज्ञो न प्रवर्तेत इत्याशङ्क्य भगवानपि सर्वनिरपेक्षोपि स्वार्थं तत्र यज्ञं कारितवानित्याह **भगवानपीति**, एवम्प्रकारेण **तत्रैव** गोकुले **बलभद्रसहितो** नितरां **वसन्** निरोधं कुर्वन्नन्यार्थं प्रवर्तमानान् दृष्टवान्, तदाह **गोपान्द्रियागकृतोद्यमा**निति, **इन्द्रयागार्थं कृत उद्यमो** यैर्वृद्धैर्गोपैस्तान**पश्यत्**, एतेन शुकस्याश्चर्यमपि ज्ञापितं भवति, तथा हि यत्र विहितत्वेनापि कृतः श्रवणादिपरम्पराभगवत्सम्बन्धी धर्मस्तिष्ठति न तत्रान्यधर्मसम्बन्धः सम्भवतीह तु नैसर्गिकैश्वर्यादिमान् साक्षाद्धर्मी **वसन्**नन्यधर्मासहिष्णुषु स्वैश्वर्यादिषु जागरूकेषु सत्स्वपि तत्रा**पि** स्वमन्यधर्म**मपश्यत्** स्वकिरणनाश्यं तमःपुञ्जं तरणिरिव, अत एव **निवासोक्तिरपिपदं भगवत्पदं** च, क्रियाशक्तिप्रधानेन देवत्वेन भजनधर्मविरोधिनाशकेन साहित्यमप्याश्चर्यहेतुः, एतावत्पर्यन्तं **निवासमात्रं** कृतवान्न त्वन्यधर्मबाधनमप्यत एतावत्कालपर्यन्तं यागकरणमित्यभिप्रेत्यापि **निवासोक्तिः**, शनैःशनैर्निरोधं कर्तुमिच्छा न त्वेकदैव सर्वप्रकारकं तं कर्तुं तथा सति लीलारसो न स्यादत इयदवधि नैतत्करणमिति चिरकालवर्तमानताबोधकशतृप्रत्ययेन ज्ञाप्यते, यद्यपि वर्तमानत्वमात्रमर्थस्तस्य तथाप्यखण्डदण्डायमानो वासश्चिरकालीन इति तस्य वर्तमानत्वबोधने यादृशः स तादृशस्य तथात्वमायातीति तथा, इदं दर्शनं तेषु स्वज्ञानशक्तिस्थापनरूपमन्यथा पारम्पर्यागतत्वेनोपपत्तिमत्त्वेन चाकरणे सुखाप्तिहेतुत्वेन चेन्द्रयागं जानतां लोकरीतिपरिनिष्ठितबुद्धीनां बालभाषितेन कथमेतादृशं कर्म त्याज्यमित्येव ज्ञानं स्यान्न तु भगवदुक्ताङ्गीकारः, अतः पूर्वमेतादृशीं स्वज्ञानशक्तिं बीजवद् गुप्ततया तेषु स्थापयित्वा तदुद्बोधकानि वचनानि वदिष्यति तेन सर्वेष्टसिद्धिरिति ज्ञेयम् ॥ १ ॥ तच्च भगवद्भक्तैर्भगवता निरुद्धैर्न कर्तव्यमिति तन्निषेधार्थं तन्मतं पूर्वपक्षीकृत्य सिद्धान्तं वक्तुं प्रस्तावनामाह **तदभिज्ञ** इति, **भगवान् हि 'सर्वज्ञः'**, लोकन्यायेनापि पूर्ववर्षे कृतत्वात् **तदभिज्ञः सर्वे**षामन्तरा**त्म**त्वाच्च **सर्व**ज्ञानशक्तिमत्त्वाच्च **सर्वे**ष्वेव **दर्शनं** यस्येति, एवम्भूतोपि **प्रश्रयेण** विनयेना**वनतो** भूत्वाजानन्निव **नन्दपुरोगमान् वृद्धानपृच्छत्** ॥ २ ॥ प्रश्नमेवाह **कथ्यता**मिति, **पित**रितिसम्बोधनमुत्तरत्रयपरिज्ञानार्थं, **अनुशिष्टेन हि भाव्यं पितुः पुत्रेण**त्यत एव **मे** मह्यं **कथ्यतां कोयं सम्भ्रमो व उपागत** इति, **सम्यग् भ्रमो** यत्र तादृशः को वा पदार्थः समागत इति **सम्भ्रम** उत्सवप्रयत्नो वा ? अलौकिकश्चेत् तस्य विधानं वक्तव्यमित्याह **किं फलमि**ति, आदौ कर्मणः फलं ज्ञातव्यमन्यथा प्रवृत्तिरेव न स्यात् 'प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते' इतिन्यायात्, किञ्च **कस्य वोद्देशः** कमुद्दिश्यैतत् कर्म प्रवृत्तमिति ?

का देवतेत्यर्थः, **केन वा द्रव्येण साध्यत** इति ? सर्वत्र हि द्रव्यदेवताफलानि वक्तव्यानि, महान् **सम्भ्रम** इति प्रायेणायं **मखो** महान् यागः, वेदे त्वप्रसिद्ध इति तदुपहासोपि ॥ ३ ॥ एतत् सर्वं विशेषाकारेण वक्तव्यमिति पुनराहै**तद् ब्रूहीति**, किं ततः स्यात् ? तत्राह **महान् कामो मह्यमिति**, अय **महानेव कामो**भिलषितोर्थः, तद्विषयिणीच्छा वा, अतः **शुश्रूषवे मह्यं** वदेति, अज्ञत्वज्ञापनाय पुनः **पितरितिसम्बोधनं, बाला हि पितरं बहुधा सम्बोधय**न्तीति, ननु गोप्यमेतन् न बालेभ्यो वक्तव्यमिति चेत् तत्राह **न हि गोप्यं ही**ति, इदं **न गोप्यं** प्रतिभाति महान् 'सम्भ्रमो' दृश्यत इति, किञ्च **साधूनां** न किञ्चिद् **गोप्यं**, अन्यथा **साधुत्वमेव** न स्यादतो हि द्वयं युक्तं, किञ्च **साधूनां** कृत्यमेव नास्ति कुतः **पुनर्गोप्यं** कृत्यं भविष्यति ? **साधवो**त्र शास्त्रीयाः **'कृपालुरकृतद्रोह'** इत्यादिधर्मयुक्ताः, तेषामगोप्यकार्यत्वे हेतुः **सर्वात्मनामिति, सर्वे**ष्वेवा**त्मा** हृदयं येषां, ते हि 'सर्वहिते रताः', तत्रापीहास्मिँल्लोके न तेषां कृत्यं **गोप्यं**, अनेन भगवच्छास्त्रं कदाचिन्न वदेयुरपि न तु लौकिकं किञ्चित् ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

एकविंशाध्याये, एतद् ब्रूहि महान्काम इत्यत्र, शुश्रूषव इत्यग्रे कथनात् सम्प्रत्ययेनेच्छैवोक्तेति कामपदार्थमन्यमाहुः **अभिलषितोर्थ** इति। यद्यप्यन्यद्वारा कथनेपि शुश्रूषानिवृत्तिः सम्भवति, तथापि शुश्रूषवे मह्यं साक्षाद्भगवत्कथनलक्षणोर्थो महानिति प्रातीतिकोर्थः। वस्तुतस्तु यागभङ्गलक्षणोर्थस्तथेति हृदयम्। तथाप्यन्यभजननिवारणपूर्वकस्वभजन एव प्रभुतात्पर्यमिति पक्षान्तरमाहुः **तद्विषयिणीच्छा**वेति। स्वयागविषयिणी सेत्यर्थः ॥ ४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एकविंशेध्याये **न हि गोप्यं ही**त्यत्र **अतो हि द्वयमिति** मूलोक्तं हिशब्दद्वयमित्यर्थः ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एकविंशाध्यायार्थोक्तौ **हैतुकस्य कर्मणो विनिवारण**मिति इन्द्रो वृष्टिं करोति तयान्नान्युत्पद्यन्ते तैर्वयं जीवाम इतिहेतोरिन्द्रस्मा**भिर्यष्टव्य** इतिज्ञानेनेन्द्रयागस्य कृतत्वाद् विधिस्पर्शाभावाद्धैतुकत्वं एतस्येन्द्रयागस्य, तं निवारयित्वा गोवर्धनयागः कृतस्तत्र गोवर्धमस्य भगवद्रूपत्वाद् भगवद्यागस्य सर्ववेदविहितत्वाद् वैदिकत्वमतो गोवर्धनयागं कारितवानित्यर्थः, अत एव श्रीनन्देन भगवन्तं प्रत्युत्तरदाने स्वकृतेन्द्रयागस्य हैतुकत्वमेवाभाणि "पर्जन्यो भगवानिन्द्र" इत्यादिना, भगवतापि श्रीनन्दकृतेन्द्रयागस्य वेदमूलकत्वाभावात् केवलयुक्तिसिद्धत्वात् तन्निवारणे "कर्मणा जायते जन्तु"रित्यादिना युक्तीः प्रदर्श्य श्रीगोवर्धनयागकरणेपि "वयं वनौकसस्तात नित्यं शैलनिवासिन" इत्यनेन युक्तय एव प्रदर्शिताः, तदेतदाहुः **कृत्वा तद्वैदिकं चक्रे युक्त्यैवेति निरूप्यते यथा प्रबोधिता** इत्यादि यज्ञपत्नीनामनुग्रहात् तद्भर्तारो **बोधिता** एवं इन्द्रमानभङ्गे न सर्वे देवाः शिक्षिता इत्यर्थः, एकोनविंशविंशैकविंशाध्यायलीलया सिद्धाननुग्रहानाहुः, **स्त्रीणां वस्त्राणी**ति, **स्त्रीणां** कुमारिकाणां **वस्त्राणीति जगृहे** वस्त्रग्रहणद्वारा ता अङ्गीकृतवान्, **विप्राणां** यजमानानां स्त्रियः जगृहे तद्द्वारा ब्राह्मणानङ्गीचकार, **देवानां हवींषि** गोवर्धनस्थरूपेण जगृहे हविर्ग्रहणद्वारा देवाननुजग्राहेत्यर्थः, **तामसान् राजसा**नित्यादि जीवविशेषणानीमानि **तामसान्** जीवान् कुमारिकारूपान् **राजसान्** ब्राह्मणान् **सात्त्विकान्** देवानित्यर्थः, एवमध्यायत्रयसिद्धं प्रमेयमुक्तं, ब्राह्मणानां राजसत्वं कर्मणत्वात् "कर्मश्रद्धा तु राजसी" तिभगवद्वाक्यात् ॥ ० ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एकविंश इत्यादि का० २११$\frac{३}{४}$–२१४$\frac{१}{४}$। एकविंशाध्याये **हैतुकस्य** "पर्जन्यो भगवानिन्द्र"इत्याद्युक्तप्रकारेण नन्दादियुक्तिसिद्धस्य **कर्मण** इन्द्रयागस्य **विनिवारणं** कृत्वा भगवान् युक्त्यैव "वयं गोवृत्तयोनिश"मित्याद्युक्तप्रकारेण **तत्** कर्म गोसवात्मकं **वैदिकं** चक्रे इति निरूप्यते इत्यर्थः, गोसवस्य वेदाप्रसिद्धत्वेपि भगवदुक्तत्वेन वैदिकत्वं ज्ञेयं, **यथा प्रबोधिता** इत्यादि स्पष्टं, शिक्षाधिक्यं प्रदर्शयन्ति **स्त्रीणां वस्त्राणी**त्यादि, वस्त्रहरणात् पत्नीहरणस्याधिक्यं ततो हविर्हरणस्येति, तदेवाहुर्येष्विति, देवानां प्रतिष्ठाया हविरधीनत्वात्, **तामसा**नित्यादि **तामस्यः** कुमारिकाः पुंस्त्वमविवक्षितं **राजसा** विप्राः **सात्त्विका** देवाः ॥ ० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इन्द्रपूजा चतुर्विंशे हेतुभिः सन्निवर्तिता। कृता गोवर्धनपूजा कृष्णेनेति निरूप्यते ॥ १ ॥

गोवर्धनमखोत्सवं सप्रसङ्गं निरूपयति –भगवानिति। बलदेवेन संयुतो भगवान् कृष्णस्तत्रैव गोकुले निवसन् इन्द्रयागाय कृतोद्यमान् गोपान् अपश्यदित्यन्वयः। अपिशब्देन "निरपेक्षस्यापि भगवत इन्द्रमदनाशाय तद्यागनिवर्तने व्रजवासिजनानां परमसौभाग्यलाभाय च गोवर्धनपूजामिषेण स्वपूजने प्रवृत्तिः" इति सूचयति ॥ १ ॥ भगवान् कृष्णस्तदभिज्ञोऽपि 'इन्द्रयागार्थोऽयमुद्यम' इति जानन्नपि प्रश्रयेण विनयेन अवनतः सन् नन्दादीन् वृद्धानपृच्छदित्यन्वयः। तज्ज्ञाने हेतुमाह–-सर्वदर्शन इति, सर्वसाक्षीत्यर्थः। तत्रापि हेतुमाह––सर्वात्मेति, सर्वेषामन्तरात्मेत्यर्थः ॥ २ ॥ तत्प्रश्नमेवाह – कथ्यतामिति। 'अनुशिष्टेनैव भाव्यं

पितुः पुत्रेण' इत्याशयेन सम्बोधयति—पितरिति। सम्यक् भ्रमो यत्र स सम्भ्रमः उत्सवविशेषः कोऽयं वो युष्माकमुपागतः स मे मह्यं कथ्यताम्। 'यागविशेषोऽयम्' इति चेत्तर्हि "अस्य किं फलम् ,कस्य च देवविशेषस्य उद्देशः, कं देवमुद्दिश्यैतत् कर्म प्रवृत्तम्" इति देवताप्रश्नः। "केन वा साधनेन केन वाऽधिकारिणाऽयं मखः साध्यते" इति द्वयो प्रश्नः ॥ ३ ॥ अज्ञत्वं ज्ञापयन् पुनः सम्बोधयति – पितरिति। महान् कामः श्रवणे महतीच्छा वर्तते, अतः शुश्रूषवे मह्यमेतत् मत्पृष्टं सर्वं ब्रूहि। 'गोप्यत्वाद्वक्तुं श्रोतुं च न योग्यम्' इत्याशङ्क्याह—नहीति। अत्रैको हिशब्दो हेत्वर्थकः, द्वितीयो हिशब्दोऽवधारणे। हि यस्मात् इह व्यवहारभूमौ साधूनां कृत्यं कर्म गोप्यं नैव भवति। 'के ते साधव' इत्यपेक्षायां सर्वात्मनामिति। सर्वत्रैकात्मकदृष्टीनामित्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

चतुर्विंशे शक्रयागव्यावृत्तिर्हेतुकल्पनैः ॥ गोवर्द्धनमखोद्भूतिस्तत्र श्लोका गजाग्नयः (३८) ॥
अनुष्टुभोऽपि (३८) तावत्यस्तथोवाचेति पञ्चकम् (५) ॥ २४ ॥

अथ गोवर्द्धनपूजनोत्सवः स चायं कार्तिकशुक्लप्रतिपदि प्रवृत्तोऽपि आश्विनपूर्णिमाप्रवृत्तरासक्रीडायाः पूर्वभावी ज्ञेयः। रासलीलायां गोपीभिरनुकृतत्वात्। रासश्च वस्त्राहरणानन्तरशरदन्तराव्यवहितशरदि इमा रंस्यथ क्षपा इत्यव्यवधानोक्तेः। तथा चायं क्रमः। अष्टमवर्षस्याश्विने वेणुगीतम्। कार्तिके गोवर्धनोद्धरणम्। कार्त्तिकशुक्लैकादश्यां गोविन्दाभिषेकः। द्वादश्यां वरुणलोकगमनम् 'तत्पूर्णिमायां ब्रह्महृदावगाहः। ततो हेमन्ते वस्त्राहरणलीला। तत्रैव निदाघे यज्ञपत्नीप्रसादः। नवमवर्षस्य शरदि रासलीलेति वैपरीत्योक्तिः प्रेमावेशात्। भगवानिति ॥ बलदेवेन संयुतः भगवान् कृष्णस्तत्रैव गोकुले निवसन् इन्द्रयागाय कृत उद्यमो यैस्तान् गोपान् अपश्यत् ॥ १ ॥ तदिति ॥ सर्वात्मा सर्वदर्शनः सर्वज्ञः भगवान् कृष्णः तदभिज्ञोऽपि इन्द्रयागार्थोऽयमुद्यम इति जानन्नपि प्रश्रयेण विनयेनावनतः सन्नन्दपुरोगमान् नन्दादीन् वृद्धानपृच्छत् ॥ २ ॥ कथ्यतामिति ॥ हे पितः ! वो युष्माकम् अयं संभ्रमः उत्सवः वैयग्र्यहेतुः कः उपागतः स मे मह्यं कथ्यताम्। अस्य किं फलम् ? अत्र कस्य देवस्य उद्देशः ? कं देवमुद्दिश्यैतत् कर्म प्रवृत्तमिति देवताप्रश्नः। केन साधनेन अधिकारिणा वाऽयं मखः साध्यते ॥३॥ एतदित्यर्द्धम् ॥ हे पितः ! मम महान् कामः श्रवणे महतीच्छा वर्तते। यद्वा। भवतामपि महान् कामो दृश्यते। अतः शुश्रूषवे मह्यं मां बोधयितुमेतन्मत्पृष्टं ब्रूहि ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अधुना चतुर्विंशेऽध्याये इन्द्रमानभंगाय सद्धेतुभिः श्रीकृष्णकृतस्तद्यज्ञभंगो गोवर्धनयजनोत्सवश्चोच्यते ऋषिपत्न्यनुग्रहानंतरं पुनर्व्रजमागतो हरिस्तत्र निवसन्सन् कचित् इंद्रयागकृतोद्यमान् ॥ १ ॥ प्रश्रयेण विनयचातुर्येण अवनतो नम्रः सन् ॥२॥ कोयं संभ्रम उत्सवः वो युष्माभिः प्राप्तः अस्य किं फलं अत्र कस्य देवस्योद्देश इज्यत्वेनाऽभिधानमस्ति केन साधनेन कर्त्रा वा मखो यज्ञः ॥ ३ ॥ महान् कामः मम महती श्रवणेच्छाऽस्ति अतो हे पितः एतत्सर्वं मह्यं ब्रूहि सर्वत्र संबंध्य संबंधिषु जीवात्मानः स्थिता इति दृष्टिर्येषां तेषां अतएव अस्य परदृष्टीनां अयं स्वकीयः अयं च परकीय एवंभूता दृष्टिर्येषां नास्ति तेषां अतएव अमित्रोदास्त विद्विषां साधूनां कृत्यमिह गोप्यं नास्ति ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

व्यावर्त्त्य हेतुभिर्यज्ञं चतुर्विंशे मरुत्वतः। गोवर्द्धनोत्सवं कृष्णो भूमौ प्रावर्त्तयच्छुभम् ॥ १ ॥
निरस्य भूमिदेवानां क्रियागर्वं व्रुवासिषु। मदं मघवतो भङ्क्तुं वारयामास तन्मखम् ॥ २ ॥

अथेन्द्रप्रीतिकरयागभञ्जनं ततः संक्रुद्धेन्द्रचोदितमहावातवर्षपीडितशरणागतव्रजवासिरिरक्षिषोपयुक्तगोवर्द्धनाचलोद्धरणात्मकं भगवच्चेष्टितमनुवर्णयति। भगवानपीति। तत्रैव वृन्दावने एव, बलदेवेन संयुतः, निवसन्, भगवान् अपि, इन्द्रयागार्थं कृत उद्यमो यैस्तान्, इन्द्रयागं विधातुं विहितप्रयत्नानित्यर्थः। गोपान्, अपश्यत् ॥ १ ॥ तदिति। सर्वात्मा सर्वान्तर्यामी, सर्वदर्शनः सर्वजनान्तःकरणवृत्तीनां साक्षात् द्रष्टा, भगवान् पूर्णषाड्गुण्यः कृष्णः, तदभिज्ञोऽपि उद्यमस्येन्द्रयागार्थत्वं जानन्नपि सर्वथाऽज्ञ इवेत्यर्थः। प्रश्रयावनतः विनयेन नम्रः सन्, नन्दपुरोगमान् नन्दप्रभृतीन्, वृद्धान् अपृच्छत् ॥ २ ॥ प्रश्नप्रकारमेवाह। कथ्यतामिति। हे पितः, वो युष्माकं, अयं कः संभ्रम उत्सवः, उपागतः, मे मम, कथ्यताम्। संभ्रमोऽयं न भवति मखोऽयमित्यत्राह। किं फलं यद्ययं मखश्चेत् किमत्र फलं, कस्य अत्र उद्देशश्च, कां देवतामुद्दिश्यायं मखः प्रवर्त्तते इत्यर्थः। अस्य का देवतेति प्रश्नः। अयं मखः, केन साधनेन वा, साध्यते इति साधनप्रश्नः। हे पितः, एतत् शुश्रूषवे श्रोतुमिच्छवे, मह्यं ब्रूहि। अत्र महान् कामः, मम महती शुश्रूषा वर्त्तते इत्यर्थः ॥ ३ ॥ गोप्यत्वाद्वक्तुं श्रोतुं च न च योग्यमित्याशङ्कां निराकुर्वन् पृच्छति। न हीति। हि यस्मात्, सर्वे आत्मान आत्मतुल्या येषां तेषां सर्वात्मनां, ज्ञानैकाकारत्वेन सर्वेऽप्यात्मान एकरूपा एवेति जानतामित्यर्थः। अस्ता रहिता स्वपरेषु स्वपराभिमतदेहेषु दृष्टिर्युष्मदस्मद्दर्शनं येषां तेषां, देहात्मनोर्याथात्म्यज्ञानामित्यर्थः। पाठान्तरे न विद्यते स्वः पर इति दृष्टिर्येषां तेषां, अत एव, न विद्यन्ते मित्राणि च उदास्ता उदासीनाश्च विद्विषः शत्रवश्च येषां तेषां, मित्रोदासीन-

शत्रुतारहितत्वात्समदर्शिनामित्यर्थः। साधूनां, इह लोके, कृत्यं कार्यं, गोप्यं, न हि नैवेत्यर्थः। अस्ति। एषा तु समदर्शिनां रीतिः, विषमदर्शिनामपि स्वसुहृद्विषये तु गोप्यं न ह्यस्तीत्याहोदासीन इति। विषमदृष्टिमतामपि, उदासीनस्तु, अरिवद्वर्ज्य एव। अनेनोदासीनामित्त्रयोर्गोप्यश्रावणप्रतिषेध उक्तः। सुहृत्तु, स्वात्मवत् स्वात्मसमानः, उच्यते। अतः, नाहमुदासीनामित्त्रान्यतमः किं तु पुत्रत्वात्सुहृदतो गोप्यमपि श्रावयितुं योग्य एवास्मीति भावः॥ ४॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

उक्ता युगत्रयनिसक्तविशेषधर्मास्त्रेतायुगे युजनमेव हि मुख्यधर्मः।
गोवर्द्धनाध्वर-निरूपणकैतवेन सोऽप्यत्र बोध्यत इति प्रविविक्तमूह्यम्॥ १॥

भगवानपीति : १०.२४.१.

एते ह्येव न केवलं मदधियो विप्राः स इन्द्रोऽपि यद् येनाद्यावगणय्य मामुपकृतेः कर्त्तारमात्तं हविः।
का चिन्तास्त्यरमेव तन्मदधियं नेष्यामि लोपं क्षणा–दित्यभ्यन्तर चिन्तनाञ्चितमना आसीत् स यावत्प्रभुः॥ २॥

तावद् यज्ञममेशेषघोषणजनैरारब्धमैक्षिष्ट तन्मुख्यं तत्र चिकीर्षितार्थकृतधीः प्रायोन्यषेधत् क्रतुन्।
नो चेदस्य न सर्वथा समुचितो निर्मलन्तुलेशात्मनो दण्डो नापि पुराऽऽस तद्धृदि परेशाज्ञानभावोदयः॥ ३॥

तस्मिन् क्रतुप्रकरणे प्रकटेन्द्रमतो तिष्ठन् द्विजातिवदलं भगवानपीति।
एवापि तत्र निवसन्निति शब्द जातं व्याख्येयमेवमिह नान्वयिताऽन्यथा तु॥ ४॥ (विशेषकम्)

यत्रर्षिस्त्रीप्रसादोऽभूत् तत्र वेत्यादियोजनम्। कुर्वन्त्येके व्रजेत्वन्ये प्राहुस्तत्र सदीद्यताम्॥ ५॥

शक्तोऽस्म्यहं मदधियं परिहर्तुमस्येत्येतद्विबोधजितुमास तदा बलाढ्यः।
सर्वेन्द्रियेष्वधिबलं मदधीनमेवेत्येतद्विवेक्तुमथवा बलदेवयुक्तः॥ ६॥

मदध्वंसमस्याध्वरप्राप्तिमद्रेस्तदुद्धारतस्त्राणमप्यात्मभाजाम्।
करिष्येऽहमत्रात्मयोगेन कृत्स्नमिनिशस्तदासीत् ससङ्कर्षणो वा॥ ७॥

तदभिज्ञ इति : १०.२४.२.

इन्द्रोद्देश्यकमध्वरं व्रजजनैरारब्धमन्तर्विदन्नप्यज्ञानिवदच्युतः प्रवयसो गोपानपृच्छत्तदा।
तद्बीजंत्विदमस्मि सर्वविदपि श्रुत्वैव हार्दाशयं स्वानां तद्वचनैर्भवाम्यविरतं भव्याधरागेष्टकृत्॥ ८॥

कृष्णप्रिया

निरोध लीला का तामस प्रकरण का यह तीसरा अध्याय है। इस अध्याय में भगवान के तृतीय भग यशः का निरूपण किया जायगा। जब-जब व्रज भक्त भगवान से विमुख होते थे और अन्याश्रय करने लगते थे तब तब भगवान् मधुर शिक्षा देकर, व्रज-भक्तों को स्वाभिमुख करते थे। कुमारिकाओं को शिक्षा देने के लिये उनके चिर उठा लिये एवं ऋषियों को ज्ञान देने के लिये उनकी स्त्रियों से भोजनार्थ सामग्री मंगवा ली थी। अब इस अध्याय में देवों को शिक्षा देने के लिये उनकी हवि बन्द कर दी, क्योंकि ये देव लोग हविष्य में ही प्रतिष्ठित हैं। इस अध्याय में ३८ श्लोक है। प्रथम तामस कुमारिकाओं का उद्धार कर, पुनः राजस ऋषि जनों का उद्धार कर अब सात्त्विक देवों का उद्धार करने के लिये इन्द्रयाग का प्रतिषेध करेंगे। श्रीशुक मुनि ने कहा—राजन् परीक्षित्! श्रीबलभद्र जी के साथ व्रज में विराजते हुए भगवान श्रीकृष्णचन्द्रजी ने एक दिन श्रीनन्द राय जी के साथ गोपों को इन्द्र याग करने का उद्योग करते देखा॥ १॥ राजन्! भगवान तो सर्वज्ञ सबके अन्तर्यामी और सर्व की आत्मा है। पुरुषोत्तम से कोई वस्तु अज्ञात नही। आप सर्व जानते हैं, फिर भी नन्दादि वृद्ध गोपों से नम्रतापूर्वक भगवान् पूछने लगे॥ २॥ भगवान् श्रीकृष्णचन्द्र जी ने कहा कि–हे पूज्य पितृचरण! आप कृपया बताओ तो सही, कि आप सर्व, किस विषय की अपूर्व तैयारी कर रहे हैं! कौन सा महोत्सव प्राप्त हुआ है। इस यज्ञ का फल क्या होगा? पुनः किस उद्देश्य को लेकर यह क्या किया जा रहा है और कौन सी सामग्रियों से यह यज्ञ सम्पन्न होगा?॥ ३॥ पूज्य पितृचरण! आप सब कुछ मुझसे कहिये! मेरा मन सुनने के लिये अत्यंत उत्कंठित है मुझे तो इस यज्ञ के विषय में कोई बात गोप्य जान नहीं पड़ती। पुनः सज्जन जन तो सबके हृदय ही होते हैं। इसलिये उनका यहाँ कुछ कर्त्तव्य ही नहीं होता॥ ४॥

[1]अस्तस्वपरदृष्टीनाममित्रोदास्तविद्विषाम्[2] । उदासीनोऽरिवद् वर्ज्य आत्मवत् सुहृदुच्यते ॥ ५ ॥
ज्ञात्वाज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति[3] । विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत् ॥ ६ ॥
तत्र तावत् क्रियायोगो[4] भवतां किं विचारितः । अथवा लौकिकस्तन्मे पृच्छतः साधु भण्यताम् ॥ ७ ॥

नन्द उवाच[5]

पर्जन्यो भगवानिन्द्रो मेघास्तस्यात्ममूर्तयः । तेऽभिवर्षन्ति भूतानां [6]प्रीणनं जीवनं पयः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—अस्त स्वपर दृष्टीनाम् अमित्र उदास्त विद्विषाम् उदासीनः अरिवद् वर्ज्यः सुहृद् आत्मवद् उच्यते ॥५॥ अयं जनः ज्ञात्वा च अज्ञात्वा कर्माणि अनुतिष्ठति, विदुषः यथा कर्मसिद्धिः स्यात् तथा अविदुषः न भवेत् ॥ ६ ॥ तत्र तावत् भवताम् विचारितः क्रियायोगः किं वैदिकः अथ किं लौकिकः तत् पृच्छतः मा साधु भण्यताम् ॥ ७ ॥ पर्जन्यः भगवान् इन्द्रः मेघाः तस्य आत्ममूर्तयः ते भूतानाम् प्रीणनम् जीवनम् पयः अभिवर्षन्ति ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत एव न विद्यते स्वः पर इति दृष्टिर्येषामिति स्वपरदृष्ट्यभावादेव तत्तद्भेदा अमित्रादयोऽपि तेषां न संतीत्याह । अमित्रेति । न मित्रमुदास्त उदासीनो विद्विड् येषां तेषां कृत्यं सर्वं कर्म नैव गोपनीयं किंचिदस्तीत्यर्थः । सत्यपि भेददर्शने उदासीनः शत्रुवद्वर्ज्यं आत्मतुल्यत्वात्सुहृन्मंत्रेषु न वर्जनीय इत्याह । उदासीन इति ॥ ५ ॥ किं च सुहृद्भिः सह विचार्य ज्ञात्वैव कर्म कर्तव्यं न तु गतानुगतिकत्वमात्रेणेत्याह । ज्ञात्वेति । अज्ञात्वा च तत्र विदुषो यथा तत्कर्मफलं स्यात्तथा नाविदुषः ॥ ६ ॥ भवतामयं क्रियायोगः शास्त्रतोऽपि किं विचारितः प्रवृत्तो लौकिक आचारप्राप्तो वेति साधु सोपपत्तिकं भण्यतां कथ्यतामिति ॥ ७ ॥ आचार प्राप्त एवेति सहेतुकमाह । पर्जन्य इति । आत्ममूर्तयः प्रियमूर्तयः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत एव सर्वात्मत्वादेव । तद्भेदाः स्वपरदृष्टिभेदाः । स्वदृष्टिभेदः शत्रुः, परदृष्टिभेदो मित्रम, उभयदृष्टिभेद उदासीनः । इत्यर्थ इति । गोप्यकरणे साधुत्वमेव भज्येतेत्यर्थः । उपकर्त्ता मित्रम, अपकर्त्ता शत्रुः, उभयहीन उदासीनः । यद्यपि साधूनां वस्तुतो भेददर्शनं नास्ति तथापि यथाकथंचित्सत्यपि शत्रुर्यथापकारित्वेन वर्ज्यस्तथोदासीनोऽप्युपकारित्वाभावाद्वर्ज्य एव ॥ ५ ॥ विचार्यकरणे फलमाह—किञ्चेति । गतानुगतिकमात्रेण पारंपर्यागतत्वमात्रेण । विदुषः विचार्य कर्त्तुः । अविदुषः पूर्णफलं न स्यादंगादिवैगुण्याद्यज्ञानादित्यर्थः ॥ ६ ॥ तत्र देवकर्मणां मध्ये ज्ञात्वा करणे वा । किमिति प्रश्ने । सौपपत्तिकं हेतुसहितम् । तावत् प्रथमम् । क्रियायोगः अनुष्ठानप्रकारः ॥ ७ ॥ पर्ज्जन्यः वर्षणशीलः । ननु वर्षणशीलास्तु मेघा नेंद्र इत्याह - मेघा इति । प्रियमूर्त्तयः आत्मा देहो यथा प्रेष्ठस्तथा तन्मूर्त्तयो मेघा अपीति भावः । ततस्तमघः किं प्रयोजनमतात्राह—ते मेघाः । प्राणनम् चेष्टाकरणम् । जीवनम् शरीराप्यायनम् । 'पयः स्यात्क्षीरनीरयोः' इति विश्वः । पयः जलम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अज्ञात्वा च दृष्टपरम्परयेत्यर्थः । कर्माणि दृष्टादृष्टाफलानि कृष्यादियागादीनि यथा यथावत् ॥ ६ ॥ तत्र तेषुः कर्मसु क्रियायोग इदमदृष्टफलं कर्म भवतां कि खलु विचारितः शास्त्रैकप्रमाणत्वात्तद्विचारप्राप्तः किमथवा लोकपरम्परयैव प्राप्ता इति साधुसोपपत्तिकं भण्यतां तावदिति प्रश्नान्तरं पश्चात् कर्त्तव्यमित्यर्थः । अनेन तत्तदभिज्ञत्वमपि सूचितं निजोक्तिग्रहणाय ॥ ७ ॥ पर्जन्यो वृष्टिद्वारा भगवान् ईश्वर इति भक्तिविशेषेण प्रीणनं सन्तर्पकं जीवनं मृतप्रायाणां तृणादीनां प्राणदम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु निजकृत्यं नहि सर्वत्र प्रकाशयितुं युज्यते, तत्राह—नहीति सार्द्धेन । साधूनामिति तेषां विकर्म्मत्वप्रवृत्त्या गोप्यत्वाभावात् साधूनामेव लक्षणं सर्वात्मनामित्यादि विशेषणत्रयेण, अतस्तत्तल्लक्षणवद्भिर्भवद्भिर्न गोपयितुं युज्यत इति भावः । तत्रापि इह गोकुले सर्वेषामेवात्रत्यानां वैष्णवप्रवरत्वेन खललोकाभावात् । यद्वा, ननु साधुभिरपि धर्म्मो गोप्यत एव, तत्राह—सर्वात्मनां सर्व्वात्मदृष्टीनाम् । तल्लक्षणमेवाह—अस्वपरेत्यादिविशेषणद्वयेन । ननु निजहितार्थं देवतार्थं देवताराधकानां कुतः सर्वात्मता

---

[1] अस्त–वीर ; अस्त्य–श्रीधर. वंशी. जीव. विज. विश्व. शुक. सु. ध. रा. । [2] अमित्रोदास–विज. । [3] तिष्ठते–विज. [4] योगा भवता कि विचारिता:–विज. । [5] नन्दगोप–प्रा. पा. । [6] प्री–श्रीधर. वंशी. जीव. वीर. विज. विश्व. रा. शु. सु. ध. ; प्राणसं–च. पु. टी. ।

युक्ता ? अतोऽस्वपरदृष्टित्वादिकञ्च नास्त्येवेति । भवतु, तथापि मयि गोपयितुं न युज्यत इत्याह—उदासीन इति । वर्ज्ज्यः मंत्रभंगभयात्; अहन्तु सुहृदतो न वर्ज्ज्य इति भावः ॥ ५ ॥ ननु सत्यं प्राणाधिकः सुहृद्भवान्, किन्तु बालोऽसि, मंत्रेषु न योग्यस्तत्राह—ज्ञात्वेति । अज्ञात्वा च दृष्टपरस्परयेत्यर्थः । यथा यथावत् यादृशीति वा, उभयथाप्यज्ञस्य स्वल्पफलं सूच्यते, तदभावे च सत्कर्म्मसु श्रमस्य वैयर्थ्यापत्तेः । ननु 'वक्तृविशेषनिस्पृहा गुणगृह्या वचने विपश्चितः' इति न्यायेन मयापि सह विचार्य्य कर्त्तुं युज्यत इति भावः ॥ ६ ॥ ननु पूर्व्वपूर्व्वतरैरस्मदीयैरन्यैश्चायं यागः प्रवर्त्तितोऽस्तीत्यधुना किं तत्र विचारणेन ? सत्यम्, त एव कथं प्रवृत्ता इति पृच्छति—तत्रेति । तस्यां कर्मसिद्धौ, यद्वा, तयोर्ज्ञानाज्ञानयोर्विचारितः शास्त्रविचारसिद्ध इत्यर्थः । यदि शास्त्रीयस्तर्हि शास्त्रन्यायेनैव, यदि च लौकिकस्तर्हि लौकिकन्यायेनैव परिहार्य्य इति भाव' । अनेन तत्त्वाभिज्ञत्वञ्च सूचितम् निजोक्तिग्राहणाय साधु सोपपत्तिकं यथा स्यात् ॥ ७ ॥ पर्ज्जन्यो वृष्टिद्वारा जगत्पालनाय वृष्टिकारकः, भगवान् ईश्वर इति भक्तिविशेषेण प्रीणनं सन्तर्पकं जीवनं मृतप्रायाणां तृणादीनां प्राणदम्, उद्भवादिकत्वात् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अस्तस्वपरदृष्टीनां स्वपराभिमतदेहेषु आत्मदृष्टिरहितानाम् अमित्रोहास्तविद्विषां मित्रोदासीनशत्रु रहितानाम् उदासीनोऽरिवद्वर्ज्यः हिताहितश्रवणानर्हत्वात् शत्रु तुल्य इत्यर्थः ॥ ५-६ ॥ क्रियायोगः शास्त्रीयः ॥ ७ ॥ पर्जन्यो वर्षाधिदेवतेति इन्द्र एव विशेष्यः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अस्तस्वपरदृष्टीनामस्तारहितास्वपरेषु स्वपराभिमतदेहेषु दृष्टिर्युष्मदस्मदर्शनं येषां देहात्मनोर्याथात्म्यज्ञानामित्यर्थः । अत एव मित्रोदासीनशत्रु रहितानां नहि समदर्शिनां गोप्यमस्तीति भावः । विषमदर्शिनामपि सुहृद्विषये न गोप्यमस्तीत्याह—उदासीन इति । अरिवदुदासीनोपि वर्ज्य एव अनेनोदासीनामित्रयोर्गोप्यश्रवणप्रतिषेध उक्तः सुहृत्त्वात्मवत् स्वतुल्य उच्यते अतः सुहृदहं श्रोतुं योग्य एवेति भावः ॥ ५ ॥ किञ्च सुहृद्भिः सह ज्ञात्वा ज्ञात्वा पुनः पुनर्विचार्यैवायं लौकिको जनः कर्माण्यनुतिष्ठतीति लोकपरिपाटी प्रदर्श्यते गतानुगतमात्रेणानुष्ठाने त्वन्धपरंपराप्रसङ्ग इति भावः । किञ्च यथा विदुषः कर्मसिद्धिर्नाविदुषस्तथाभवेत् ॥ ६ ॥ तत्र वंसति भवतामयं क्रियायोगः किं विचारितः सुहृद्भिः शास्त्रतः किं विचारित इत्यर्थः । आहोस्वित् केवलं लौकिक एवाचारप्राप्त एव भ्रान्तिमूलकोप्याचारोस्तीति भावः तदेतत् पृष्टं साधु यथा भवति तथा पृच्छतो मम भण्यतां कथ्यताम् ॥ ७ ॥ आचारप्राप्त एवेति वदन् तस्य कर्त्तव्यत्वं सहेतुकमाह नन्दः—पर्जन्य इत्यादिभिश्चतुर्भिः । पर्जन्यो वर्षाभिदेवता साकेन्द्र एव यद्यपि—

"अष्टौ मासान्निपीतं यद्भूम्याश्चोदमयं वसु । स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते ॥

इत्यादिषु पर्जन्यः सूर्य इति प्रतीयते तथापीन्द्रशासनानुवर्त्ती मेघद्वारकं तस्य वपुर्कत्वमित्यविरोधः अस्त्विन्द्रः पर्जन्यः ततः किमत आह—मेघास्तस्येन्द्रस्य आत्ममूर्त्तयः स्वशरीरतुल्याः तद्वन्नियाम्य इत्यर्थः । तेच मेघा भूतानां जीवानां जीवनं प्राणधारणसाधनभूतं प्राणनमाप्याधिकं प्राणाप्यावनद्वारा तद्धारणसाधनं पयः जलं वर्षन्ति ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कथमेतदवगतमिति तत्राह—अस्तीति । निरस्तस्वकीयपरकीयबुद्धीनां शत्र्वादिसद्भावेऽयं विशेषो दुर्घट इति तत्राह, अमित्रेति । न विद्यत मित्रम् उदासीनः विद्विट् येषां ते तथा तेषां मित्रादिविशेषाभावात् स्वकीयत्वादिबुद्ध्यभावेन साधूनां गोप्यं नास्तीति प्रसिद्धमेवेत्यर्थः । ननु, चेतनानां चित्तस्य प्रमितत्वेन साधूनां मित्राद्यभाववचनं कण्ठोपरिगतवदौपचारिकं परोक्षप्रिया इव हि देवाः "प्रत्यक्षद्विषः" इति श्रुतेः "षट्कर्णो भिद्यते मन्त्रः" इतिस्मृतेः । अतः कथं गोप्यं नास्तीत्याशङ्क्य योग्यतातिरेकेण मित्रादिकं नास्तीति तत्त्वं न तु सर्वात्मना अतो गोप्यं नास्त्येवेति शत्रुः सर्वथा वर्ज्यः मित्रविषये उदासीनोऽपि तथा तस्य शत्रौ कथनसम्भवादरिवदसुहृद्वर्ज्य आत्मवत्सुहृदवर्ज्य इत्यभिप्रायेणाह—उदासीन इति । अतस्त्वत्सुहृत्त्वाद्गोप्यमपि मह्यं ब्रूहीति भावः ॥ ५ ॥ अस्तु तव वक्तव्यम् अथाप्यस्माकं फलज्ञानाभावेऽपि सन्ध्योपासनादिवदनुष्ठानं घटत इत्याशङ्क्य सत्यं ज्ञानाभावे युष्माकं फलप्राप्तिर्न स्यादित्याह—ज्ञात्वेति कश्चित् । ज्ञात्वाऽनुतिष्ठतेकश्चिदज्ञात्वा तत्र विदुषः कर्मसिद्धिः अनुष्ठानफलं स्यात् अविदुषः कर्मानुष्ठानमजानतः पुंसः यथावत्फलं न भवेत् मन्त्रावृत्त्या द्रव्यसम्पत्त्या च ऋत्विगनुगुणेन वा किञ्चित्सम्भवेऽपि पूर्णफलं न स्यादित्यर्थः । यथाऽविदुषो न स्यात् तथा विदुष इति वा ॥ ६ ॥ अस्त्वन्यत्र प्रकृते किमित तत्राह—तत्रेति । तत्र देवताकर्मणां मध्ये तावत्प्रथमं क्रियायोगाः कर्मानुष्ठानप्रकाराः लौकिकवृद्धव्यवहारादवगताः गतानुगतवद्वा ॥ ७ ॥ पर्जन्यशब्दस्य गर्जन्मेघेपि वर्त्तनात्तद्व्यावृत्त्यर्थम् इन्द्र इति तर्हि इन्द्र इत्येवालमिति चेन्न, अस्य पर्जन्यशब्दस्य मेघाभिमानित्वविशेषद्योतनार्थत्वात् तत्कथमत्राह, मेघा इति । आत्मवत् देहवन्मूर्तयः देहाः स्वदेहो यथाभिमन्यमानत्वेन प्रेष्ठस्तथा मेघा अपीति भावः । मेघैः किं

प्रयोजनं लोकस्येत्याशङ्क्य "मिह सेचने" इति धातुनिष्पन्नमेघशब्दार्थसूचनपूर्वकं तत्प्रयोजनमाह—अभिवर्षन्तीति । प्राणनं चेष्टाकरणं जीवनं शरीराप्यायनम् अनेन प्राणशब्दविवरणं कृतं प्राणिनामिति पाठे पयसो गतेर्हेतुत्वेन यः शब्दवाच्यत्वे जलस्य "पयगतौ" इति धातोरर्थः ।। ८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नारायणसमगुणत्वात् तज्जयिदानवृन्दहननाच्चेति संशय्य तूष्णीं स्थितं प्रत्याह—उदासीन इति ।। ५ ।। कर्माणि दृष्टादृष्टफलानि ।। ६ ।। तत्रादृष्टफलः क्रियायोगो विचारितः शास्त्रद्वारा ज्ञातः ।। ७-१२ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च, बुद्धिमदन्तरङ्गजनेन सह विचार्य्य ज्ञात्वैव कर्म कर्त्तव्यम् नतु गतानुगतिकन्यायेनेत्याह—ज्ञात्वेति । अज्ञात्वा च कर्माणि दृष्टादृष्टफलानि कृष्यादियागादीनि ।। ६ ।। विचार्य्य ज्ञात्वैव क्रियत इति चेदत आह—तत्र कर्मसु मध्ये क्रियायोगो भवता भयनदृष्टफल एव किं शास्त्रप्राप्तत्वेन विचारितः अथवा लौकिकः लोकाचारप्राप्तत्वेन ।। ७ ।। लोकाचारप्राप्त एवेति सोपपत्तिकमाह-पर्जन्य इति । प्रीणनं सन्तर्पकं जीवनं मृतप्रायाण्यपि तृणादीनि जीवयतीति तत् ।। ८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अत एवास्वपरदृष्टीनाममित्रोदास्तविद्विषाम् उक्तज्ञानाभावे तूदासीनोऽरिवच्छत्रुवद्वर्ज्यः आत्मवदुच्यते अतो न वर्ज्य इत्यर्थः ।। ५ ।। किञ्चायं कर्मनिष्ठः प्रसिद्धो जनः फलतः देवतातः साधनतश्च ज्ञात्वा कर्माणि योऽनुतिष्ठति स विद्वान् यस्त्वज्ञात्वाऽनुतिष्ठति स अविद्वान् तत्र विदुषो यथा कर्मसिद्धिस्स्यात्तथाऽविदुषो नेत्यन्वयः ।। ६ ।। तत्र भवतामयं क्रियागोगः शास्त्रतः किं तावत्विचारितः फलदेवतासाधननिर्णयेन चिन्तितोऽथवा लौकिकः लोकाचारात् एव प्राप्तः तन्मे मम साधु यथा स्यात् तथा भण्यतां कथ्यताम् ।। ७ ।। जीवनफलकः इन्द्रदेवताकस्तदुत्पाद्य द्रव्यसाध्यः लोकाचारतः एव प्राप्त इत्युत्तरमाह—पर्जन्य इति चतुर्भिः । पर्जन्यः वृष्ट्यधिष्ठात्री देवता भगवानिन्द्रः "स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते" इति सूर्यस्य पर्जन्यत्वं मेघद्वारेन्द्राज्ञयैवेति ज्ञेयम्। तस्येन्द्रस्य मेघाः आत्ममूर्त्तयः स्वनियम्यमूर्त्तयः अतस्ते मेघाः प्राणनं तृप्तिकरं जीवनं जीवनहेतुं पयोऽभिवर्षन्ति ।। ८ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

ननु वयं साधवोऽपि गृहित्वाद् रहस्यं वक्तुं न शक्नुमस्तत्राह—उदित्यर्धकेन उदासीनश्चेदरिवद्वर्ज्यः अरिसाधर्म्यं चास्यारिमित्रत्वेनापचिकीर्षावत्त्वान्न त्वपकारित्वादिति बोध्यम् । अतएव "यो विपक्षः सुहृत्पक्षः स तटस्थो निगद्यते" इति लक्षणं य उदासीनस्तद्द्वयपक्षो न स्यात् स तु न वर्ज्यो नाप्युपादेय इति ज्ञेयं सुहृत्तु आत्मवद्ग्राह्यः ममत्वात्मजत्वात्तद्गोपनं नैव युक्तमिति भावः ।।५।। सुहृद्भिः सह विचार्य ज्ञात्वाऽयं जनः कर्मण्यनुतिष्ठति केचित्तु अविचार्याज्ञात्वा तत्र विदुषो यथा कर्मसिद्धिः स्यात्तथा नाविदुषः अतः सुहृद्भिरवश्यं बिचार्यम् ।। ६ ।। भवतामयं क्रियायोगः किं शास्त्रतो विचारितः कि वा लौकिकः कुलाचारप्राप्तः साधु सोपपत्तिकं मह्यं पुत्राय कथ्यताम् ।। ७ ।। कुलाचारप्राप्त इति सहेतुकमाह—पर्ज्जन्य इति पृषु सेचने" पर्ज्जन्यः आत्मतुल्या मूर्त्तयो येषां ते ते यत् पयो वारि वर्षन्ति तद्भूतानां प्रीणनं सन्तर्पकं जीवनं शुष्यतां तृणादीनां जीवकं प्ररोहकम् ।।८।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

साधूनां साधुस्वभावोऽयमिति न गोप्यमस्तीत्याह । अस्येति । अस्वपरदृष्टीनां स्वः पर इति दृष्टिः सा न विद्यते येषां तेषां योग्यतातिरेकेण न विद्यन्ते मित्राण्युदासा उदासीना विद्विषश्च येषां तेषां साधूनां । उदासीनः कश्चिद्वर्तेत चेत्स चारिवदेव वर्जनीयः सुहृच्चात्मवदुच्यते । स्वस्मिन्यथा स्वेन न किञ्चिद्गोप्यं तथा सुहृदि सुहृद्भिर्गोप्यं नास्तीति तव सुहृत्वान्ममापि तत्त्वात् गोप्यं नास्तीति ब्रूहीति भावः । उदासीनस्य सर्वसमतया विमतबोधनसम्भवाद्वर्ज्यता योग्यतातिरेकेणेति पूरणेन प्रत्यक्षद्विषः षट्कर्णैर्भिद्यते मन्त्र इत्यादेर्गतिरुदिताऽनुसन्धेया ।। ५ ।। अस्माकमियज्ज्ञानं न किन्तु सन्ध्याद्युपास्तिर्बाल्य इवास्माभिरनुष्ठीयते तातेत्यत आह । ज्ञात्वेति । यो जनः कर्माणि ज्ञात्वा तद्देवताफलादिकं ज्ञात्वा विज्ञाय । अनुतिष्ठतीत्यपि पाठः । अनुतिष्ठति तस्य विदुषः कर्मसिद्धिः कर्मफललाभस्तथाऽज्ञात्वा कर्माणि च योऽयं जनोऽनुतिष्ठति तस्याविदुषः कर्मसिद्धिर्न भवेत् ।। ६ ।। त्वमनयोः कतर इत्यादौ वद पितरित्याह । तत्रेति । भवता क्रियायोगास्तत्र देवताद्यन्यतममध्ये विचारिताः किं ते च कर्मानुष्ठानोपाया अथवा लौकिका गतानुगतिको लोक इतिवदज्ञात्वा करणीयाः । पृच्छतो मे तत्साधु भण्यताम् ।। ७ ।। पुत्रानुयुक्तेन पित्रा किमकारीत्यत ईरयति । नन्द इति । भगवान्पूज्यः पर्जन्यस्तच्छब्दवाच्यः पुरस्तात्तस्यात्ममूर्तय आत्मनो मूर्तयो शरीराणीव शरीराणि तदभिमन्यमानत्वात् कलेवरतुलता ते च मेघा भूतानां प्राणनं चेष्टाप्रदं जीवनं जीवनसाधनं पय उदकं पयः प्रसरज्जीवनमुदकं वाऽभिवर्षन्ति । इन्द्रः समर्थः शचीशः पर्जन्यो मेघध्वनिर्यस्तेन सहितं पयो वर्षन्ति ध्वनिं मुञ्चन्तः पयो वर्षन्तीति यावत् । पर्जन्यो मेघशब्दे स्यादिति विश्वः । अतो नेन्द्रपदातिरेकः ।। ८ ।।

श्रीसुबोधिनी

ननु '**नव गोप्यानि सर्वथे**'तिशास्त्रात् कथमगोप्यमिति चेत् तत्राहास्तस्वपरदृष्टीनामिति, अस्ता गता स्वः **पर**श्चेत्यवान्तरभेददृष्टिर्येषां, परबुद्धौ सत्यां गोप्यशास्त्रं न तु तदभावे, किञ्च **न मित्रमुदासीनो विद्वेषो** च येषां, तेषु बुद्धिभेदाभावात् तत्कृता **मित्रोदासीनरिपवो**पि न सन्ति तस्मात् सर्वत्र तुल्यबुद्धिरेव कर्तव्येत्युपदेशोपि, अथ यदि नास्मिन् ज्ञानेधिकारस्तस्मिन्नपि पक्षे द्वयी गतिः कर्तव्या त्याज्यात्याज्यभेदेन त्रिविधगतौ तु बुद्धिरतिनष्टा स्यात् सगुणापि भवेदतो द्वयमेव कर्तव्यमिति चतुर्णां भेदद्वयमेवाहोदासीन इति, आत्ममित्रोदा**सीनरिपव** इति चतुर्धा तत्रात्**मा** मित्रं चैकनु**दासीनो**रिश्चैकोतः कार्येषुदासीनोरिवद् वर्ज्यः शत्रुवन्निराकार्यः **सुहृन्** मित्रं **त्वात्मवदुच्यत** इति प्रमाणम् ॥ ५ ॥ ननु वक्तव्यं भवति परं न ज्ञायत इति चेत् तत्राह **ज्ञात्वाज्ञात्वेति**, यमर्थं ज्ञात्वा जनोनुतिष्ठत्यज्ञात्वा चा**नुतिष्ठति** तत्रापि **कर्माणि** वैदिकानि तत्र ज्ञानमावश्यकं, **कर्माणि ज्ञात्वा** तत्सम्बन्धिपदार्थोनुष्ठेयो नान्यथा, ततः किं स्यादत आह **विदुषः कर्मसिद्धिः स्या**दिति, यस्तु जानाति तस्यैव **कर्मसिद्धिः** कर्मफलं **स्याद्** 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवती'ति श्रुतेः, 'वीर्यवत्तर'मेव फलजनकं, अथ वा सम्पूर्णं फलं ज्ञानेन भवत्यल्पं तु फलमज्ञात्वापि भवतीत्थाह **तथा नाविदुषो भवे**दिति, **अविदुष**स्तथा फलं **न भवेत्** ॥ ६ ॥ आदौ चैतद् वक्तव्यं किमेतत् कर्म वैदिकं स्मार्तं लौकिकं वेति ? एतदभावेकर्तव्यमेवेत्याशयेनाह **तत्रे**ति, **तत्रा**न्यकथनापेक्षया प्रथममेतद् वक्तव्यं, अयं **विचारितः क्रियायोगः किं** वैदिकः स्मार्तो वाथ **वा लौकिकः** कुलदेशधर्म इव, **एतषामवान्तर**निर्णयरूपं **पृच्छतो मे साधु** यथा भवति तथा **भण्यतां** युक्तिपूर्वकं प्रमाणपूर्वकं वक्तव्यमित्यर्थः ॥ ७ ॥ एवं भगवता **पृष्टो** यादृशज्ञानेनेन्द्रयागं कृतवन्तस्तं प्रकारमाह **पर्जन्य** इति चतुर्भिः, हैतुकं शास्त्रमाश्रित्य भौतिकेन्द्राय लोकतः । भ्रमात् परम्पराप्राप्तं कुर्वन्तीति निरूप्यते॥१॥ हेतुशास्त्रमूलत्वात् प्रथमं हेतुमाह **पर्जन्यो** नाम वृष्टिकर्ता देवः स **भगवा**नेव, अन्यथा तद्व्रतसान्नादिकं जायत इति भगवतो जगत्कर्तृत्वं न स्यादतः **पर्जन्यो भगवानेव, मेघाः** पुनस्तस्यात्मनो देहस्य **मूर्तयो**वयवाः, **त** एव हि सर्वेषामेव **भूतानां** प्राणनरूपमाप्यायनजनकं **जीवनजनकं पयो** जलं **वर्षन्ति,** अतः सर्वजगद्रक्षकः **पर्जन्य** एव, **जलान्नाभ्यामेव हि जीवन्ति सर्वे प्राणिनः,** अत उपकारी परमैश्वर्यं प्राप्त इन्द्र एव सर्वोपास्यः ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पर्जन्यो भगवानित्यत्र, **अन्यथा तद्व्रतसे**त्यादि । भगवदतिरिक्तस्यैकस्याखिलजगदुत्पत्तिस्थितिहेतुत्वं न सम्भवतीत्येतत्परोऽयं ग्रन्थः ॥ ८ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अतस्वपरेत्यत्र **द्वयी गति**रिति बुद्धेरितिशेषः, **त्रिविधगता**विति तथा सति संशयरूपत्वान् मनस्त्वं भवेत्, बुद्धेश्चित्तत्वे स्थितिः, बुद्धिमात्रत्वे कञ्चित्कालेन नाशः मनस्त्वे तु तदैव नाश इतिबुद्धिरतिनष्टा भवेदित्यर्थः, **सगुणापी**ति चित्तत्वे निर्गुणत्वं गतिद्वये निश्चयात्मकत्वाच् चित्तत्वं भवेदपि, तृतीयगतौ तु मनस्त्वाच् चित्तत्वसम्भावनापि नास्तीति **सगुणा** भवेत्, नाशसमुच्चयार्थमपिशब्दः ॥ ५ ॥ **पर्जन्य** इत्यस्याभासे **यादृशज्ञानेने**ति यत्प्रकारकज्ञानेनेत्यर्थः ॥ ८ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

पर्जन्यो भगवानिन्द्र इत्यत्र **हैतुक**मिति का० २१५४ । **भौतिकेन्द्रायेति** आधिदैविकेन्द्रस्य भगवद्बाहुरूपत्वादयमिन्द्र आधिभौतिक इत्यर्थः ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतदव स्पष्टयति—अस्तेति । अस्ता निरस्ता 'स्वः पर' इति दृष्टिर्येषां तेषामित्यर्थः । पर इति दृष्ट्यभावादेव 'तद्भेदा मित्रादयोऽपि येषां न सन्ति' इत्याह—अमित्रेति । न विद्यते मित्र, उदास्त उदासीनो, विद्विट् येषां तेषामित्यर्थः । 'विषयदर्शिनामपि सुहृद्विषये कृत्यं न गोप्यम्' इत्याह—उदासीन इति । अरिवत् उदासीनोऽपि मन्त्रेषु वर्ज्यः । सुहृत् मित्रं तु आत्मवत् स्वतुल्य एवोच्यते, अतः सुहृत्त्वादहं श्रोतुं योग्य एवेत्याशयः ॥ किञ्च ज्ञात्वा सुहृद्भिः सह विचार्य तद्रहस्यं ज्ञात्वा तथा अज्ञात्वा गतानुगतमात्रेणाप्ययं जनः कर्माण्यनुतिष्ठति । तत्र यथा विदुषः कर्मसिद्धिः स्यातथा अविदुषः फलं न भवेत् । तत्रैवं सति तावदयं क्रियायोगोपायो भवतां किं सुहृद्भिः सह शास्त्रतो विचारितः, अथवा लौकिकः लोकव्यवहारत एव प्राप्तस्तदेतत् पृच्छतो मम साधु सत्यं भण्यताम् ॥५–७॥ आचारप्राप्त एव, तथापि तस्य कर्तव्यत्वं सहेतुकमाह–पर्जन्य इति । भगवान् इन्द्रः पर्जन्यो वर्षाधिपतिः, यतो मेघास्तस्येन्द्रस्यात्मवत्प्रियस्वरूपाः । ते भूतानां प्रीणनमाप्यायनकरं जीवनकरं च पयो जलमभिवर्षन्ति । नच 'अष्टौ मासान्निपीतं यत्' इत्यत्र 'कथं सूर्यस्य वृष्टिकर्तृत्वमिति' शङ्क्यम्, सूर्यरश्मिविशेषाणामेव मेघत्वात् तेषां चाधिष्ठातेन्द्र इति न विरोधः । तदुक्तं वैष्णवे—"भौममेतत्पयो दुग्धं गोभिः सूर्यस्य वारिदैः ॥ पर्जन्यः सर्वलोकस्य भवाय भुवि वर्षति" इति ॥ ८ ॥

अन्वितार्थप्रकाशिका

नहीति सार्द्धम् ।। हि यस्मात् इह सर्वात्मनां सर्वत्रात्मदर्शिनाम् अविद्यमाना सः पर इति दृष्टिर्येषामतो न विद्यन्ते मित्राणि उदास्ताः उदासीनाः । इडभाव आर्षः । विद्विषश्च येषां तेषां साधूनां कृत्यं गोप्यं नहि अस्ति । नहीत्येकं पदं निषेधे तथापि मन्त्रकार्ये उदासीनो जनः अरिवत् वर्ज्यः मन्त्रभङ्गभयात् । यद्वा । यः अरिवत् अरिणा तुल्यः उदासीनः सोऽपि वर्ज्यः । यस्तु उदासीनो नारिणा तुल्यो न सुहृत्तुल्यः स तु न वर्ज्यो नाप्युपादेयः । अत एवासौ नोट्टङ्कितः सुहृत्तु आत्मवदुच्यते । अहं तु पुत्रत्वात्सुहृदपेक्षयाऽप्यन्तरङ्गः ।। ५ ।। ज्ञात्वेति ।। तत्र अयं कश्चिज्जनः ज्ञात्वा सम्यग्विचार्य कर्माण्यनुतिष्ठति । कश्चिच्च अज्ञात्वैव गतानुगतिकत्वमात्रेणानुतिष्ठति । तत्र यथा विदुषः कर्मसिद्धिः फलं स्यात्तथा अविदुषः क्वचित् फलं न भवेत् ।। ६ ।। तत्रेति तत्र विषयेऽयं भवतां क्रियारूपो योग उपायः किं सुहृद्भिः सह शास्त्रतो विचारितः अथवा लौकिकः लोकव्यवहारत एव प्राप्तस्तदेतत्पृच्छतो मम साधु सोपपत्तिकं भण्यतां कथ्यताम् ।। ७ ।। आचारप्राप्त इत्याह–पर्जन्य इति ।। भगवान् इन्द्रः पर्जन्यो वर्षाधिपतिः यतो मेघास्तस्येन्द्रस्यात्मवत्प्रिया मूर्त्तयः स्वरूपाणि ते भूतानां प्रीणनमाप्यायनकरं जीवनकरं च पयो जलमभिवर्षन्ति ।। ८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ज्ञाने प्रयोजनमाह साधुनामपि उदासीनः अरिवच्छत्रुवद्वर्ज्यस्त्याज्यः सुहृन्मित्रमात्मवद्ग्राह्य उच्यते अरिस्तुत्याज्य एवेत्यर्थः ।। ५ ।। अतो मित्रैः सह विचार्य कर्मकर्त्तव्यं नान्यथेत्याह ज्ञात्वाऽज्ञात्वा च । अनुतिष्ठति करोति तत्र विदुषः सच्छास्त्रोदितकर्मणां कर्त्तव्यता प्रकारे फलं च ज्ञातुः यथा कर्मणां सिद्धिः फलं स्यात् अविदुस्तथा फलं स्यात् अविदुषस्तथा फलम् ।। ६ ।। भवतो अर्थक्रियायोगः भवद्भिः शास्त्रेण विचारितः किं वा लौकिको लोकरुद्रनाज्ञातः तदेतत् पृच्छतः मे साधुसाम्यक् यथा तथा भण्यतां कथ्यतां ।। ७ ।। सप्रयोजनं तमाह पर्ज्जन्य इति आत्ममूर्त्तयः तदधीनत्वात्तद्रूपाः प्राणनं तृप्तिकरं जीवनं जीवनकरम् ।। ८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च यद्यत् कर्त्तव्यं भवेत्तत्तत् स्वसुहृद्भिः सह विचार्य ज्ञात्वैव कर्त्तव्यं, न तु गतानुगतिकमात्रेणेत्याह ।। ज्ञात्वेति ।। सुहृद्भिः सहेति शेषः । ज्ञात्वा ज्ञात्वा पुनः पुनर्विचार्यैव, अयं जनः, कर्माणि अनुतिष्ठति, गतानुगतिमात्रेणानुष्ठाने त्वन्धपरंपराप्रसङ्ग इति भावः । किं च यथा विदुषः कर्मसिद्धिः स्यात्, तथा अविदुषः, न भवेत् । 'ज्ञात्वा कर्माणि कुर्वीत ह्यकुर्वाणो विनश्यति' इति मार्कण्डेयपुराणोक्तेः ।। ५ ।। तत्रेति ।। तत्र तावदेवं सतीत्यर्थः । भवतां, भवद्भिरित्यर्थः । अयं क्रियायोगः, कि विचारितः । सुहृद्भिः शास्त्रतश्च विचारितोऽस्ति किमित्यर्थः । अथवा आहोस्वित्, लौकिकः केवललोकपरिपाटीप्राप्त एवास्तीत्यर्थः । लोके भ्रान्तिमूलकोऽप्याचारः प्रवर्त्तते इति भावः । तदेतत्, साधु स्पष्टं यथा भवति तथा, पृच्छतः मे मम, भण्यताम् ।। ६ ।। आचारप्राप्त एवेति वदन् तस्य कर्त्तव्यत्वं सहेतुकमाह नन्दः पर्जन्य इत्यादिभिश्चतुर्भिः ।। पर्जन्य इति ।। भगवान् इन्द्रः, पर्जन्यो वर्षाधिदेवता, यद्यपि 'अष्टौ मासान्निपीतं यद्भूम्याश्चोदमयं वसु । स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते' इत्यादिषु पर्जन्यः सूर्य इति प्रतीयते, तथापीन्द्रशासनानुवर्त्तिमेघद्वारकं तस्य वपुष्कत्वमित्यविरोधः । मेघाः, तस्य आत्ममूर्त्तयः प्रियमूर्त्तीभूताः, ते मेघाः, भूतानां प्राणनमाप्यायनं जीवनं च पयः, अभिवर्षन्ति ।। ७ ।। अस्त्विन्द्रः पर्जन्य, ततः किमत आह ।। तमिति ।। हे तात अनुकम्प्य, वामुचां मेघानां, पतिं पालकं, ईश्वरं नियन्तारं च, तमिन्द्रं वयस्मत्प्रभृतयः, अन्ये च नराः, तद्रेतसा तस्येन्द्रस्य रेतःस्थानीयेन जलेनेत्यर्थः । सिद्धैर्निष्पत्तिं प्राप्तैः, द्रव्यैर्द्रव्यसाधनकैः क्रतुभिर्यज्ञैः, यजन्ते ।। ८ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अस्तीति १०.२४.५.

यैर्नाज्ञायि मनाक् सुहृद्द्विषदुदासीनत्वभेदोऽवनौ तेषामन्यहितार्थकं समदृशां गोप्यं न किंचित् क्वचित् ।
गोपानेवमुपादिशस्तदुचितं स्वात्माऽप्युपादिश्यताम् यो ह्यस्मद्धितकृत्कृपाप्रकटने श्रीशालसः सम्प्रति ।। ९ ।।

पर्जन्य इति : १०.२४.८.

दृष्टादृष्टफलप्रदर्शकतया द्वेधा गतिः कर्मणां प्रायस्तत्र कलौ तु कर्माणि जनोऽश्रद्धालुरामुष्मिके ।
श्रद्धालुश्चभवेददीर्घहितदृक् सद्यःफले कर्मणीत्येतद् व्यक्तमभूदुपस्थितमखस्यात्राप्फलोत्कर्तनात् ।। १० ।।

कृष्णप्रिया

पिताजी ! संतजन सर्व को अपने समान देखते है, सबको अपनी आत्मा समझते हैं, इसलिये इनको अपने पराये का भेदज्ञान नही होता, इनके हृदय में यह मित्र है और यह शत्रु है ऐसा भाव नहीं है । उन्हें संतजनों ने उदासीन का शत्रु की नाई त्याग कर देना चाहिये एवं मित्र को अपनी आत्मा की तरह मानना चाहिये, ऐसा कहा गया है ।।५।। पिताजी ! इस संसार

में प्रायः प्रत्येक मनुष्य, जानकर अथवा अज्ञान से ऐसे दो प्रकार से धर्मकर्मों का अनुष्ठान करते हैं; इनमें ज्ञानपूर्वक कर्म करने वाले विद्वान् को कर्म के फलों की अवश्य प्राप्ति होती है, अविद्वान को कर्मफल मिलता नहीं और मिलता भी है तो अल्प ही मिलता है ॥ ६ ॥ अब पिताजी ! आप आप्त जनों के साथ जो याग-कर्म कलाप करने जा रहे हैं वह याग वैदिक है ! या स्मार्त्त है ! अथवा तो केवल लौकिक है । नम्रतापूर्वक मेरा निवेदन है कि मेरी इस विषय की जिज्ञासा की आप पूर्ति कीजिये ॥ ७ ॥ श्रीनन्दबाबा ने कहा—सुनो प्यारे कृष्ण ! "पर्जन्य" वृष्टि करने वाला देव इन्द्र ही भगवान् है, और सारे मेघ उनके शरीर के अङ्ग हैं । वे प्राणियों को तुष्टि करने वाले एवं पुष्टि करने वाले और सर्व को जीवन देने वाले जल को बरसाते हैं !! ८ ॥

[1]तत्तात वयमन्ये च वार्मुचां पतिमीश्वरम् । द्रव्यैस्तद्रेतसा सिद्धैर्यजन्ति[2] क्रतुभिर्नराः ॥ ९ ॥
तच्छेषेणोपजीवन्ति त्रिवर्गफलहेतवे । पुंसः[3] पुरुषकाराणां पर्जन्यः फलभावनः ॥ १० ॥
य एवं[4] विसृजेद् धर्मं पारम्पर्यागतं नरः। कामाल्लोभाद्भयाद्द्वेषाद् सवै नाप्नोति शोभनम् ॥११॥

श्रीशुक[5] उवाच

वचो निशम्य नन्दस्य तथान्येषां [6]व्रजौकसाम् । इन्द्राय मन्युं जनयन् पितरं प्राह केशवः ॥ १२ ॥

कर्दमक्षमा

अन्वयः —तत् तात ! वयम् च अन्ये नराः, वार् मुचाम् पतिम् ईश्वरम् तद् रेतसा सिद्धैः द्रव्यैः क्रतुभिः यजन्ति ।९। तत् शेषेण त्रिवर्गफलहेतवे उपजीवन्ति, पुंसः पुरुषकाराणाम् पर्जन्यः फलभावनः ॥ १० ॥ यः नरः एवम् पारंपर्य्यागतम् धर्मं कामात् लोभात् भयात् द्वेषात् विसृजेत् सः वै शोभनम् न आप्नोति ॥ ११ ॥ नन्दस्य अन्येषाम् व्रजौकसाम् वचः, निशम्य केशवः इन्द्राय मन्युम् जनयन् पितरम् प्राह ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततः किमित्यत आह । तमिति । तमिंद्रं वार्मुचां मेघानां पतिं स्वामिनमीश्वरं नियंतारम् । तद्रेतसा तद्वृष्टिपयसा ॥ ९ ॥ उपजीवंत्युपजीविकां कल्पयंति धर्मार्थकामसिद्धये । ननु कृष्यादिभिर्जीवंति किमिंद्रेण तत्राह । पुंसामिति । फलभावनः फलसाधकः । पर्जन्यं विना कृष्यादिवैफल्यादित्यर्थः ॥ १०–११ ॥ इंद्राय मन्युं जनयन्निति कोपजननद्वारा गर्वपर्वतादिंद्रमवतारयितुं देवता-निराकरणं न त्वयमेवाभिप्राय इत्यर्थः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

रेतोवत्क्षरणशीलत्वाद्रेतो जलम् । तात प्रिय 'ततोऽनुकंप्ये जनके' इति मेदिनी । तत एव तातस्तत्संबुद्धौ । तथा तादृश-पूज्यदेवानुग्रहत एव त्वमेतादृशः पुत्रो लब्धोऽस्यतस्तत्पूजाप्रत्याख्यानं नोचितं तवेत्याह—तातेति ॥ ९ ॥ तच्छेषेण यज्ञावशिष्टेन । आशंकते—नन्विति । तत्र आक्षेपे । पुरुषकाराणामपराक्रमसिद्धकर्मणाम् । इत्यर्थ इति । विना वृष्टिं तृणान्नाद्यसिद्धेः कोऽपि पुरुषार्थ आहारं विना न सिध्यतीत्यर्थः ॥ १० ॥ विपक्षे बाधकमाह—कामात् दुर्विषयाभिलाषात् । लोभात् धनव्ययशंकया । भयात् राजादिभयतः । द्वेषात् देवेषु व्यर्थविरोधात् । स नरः ॥ ११ ॥ वचः इंद्रयागविषयम् । अयमेव देवतानिराकरणरूपः । इत्यर्थ इति । सात्त्विकत्वाद्देवानां गर्वरूपराजसधर्मे प्रवृत्तिं बाधयितुमिति भावः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तातेति सलालनं निजोक्तौ श्रद्धार्थं तदर्थाऽवगमार्थं च वयं गोपालनार्थं केवलं वयमेव किन्तु अन्ये च नराः सर्वे । ननु, "सूर्यः स्वरश्मिभिर्भौमं रसमाकृष्य वर्षति" इत्यादिवचनात् सूर्याद्वृष्टिः प्रसिद्धा तत्राह—वार्मुचां मेघानां पतिं मेघरूपाणां सूर्य्यरश्मीनामपि स एवेश्वर इत्यर्थः । तथा च श्रीविष्णुपुराणे "भौममेतत्पयोदुग्धं गोभिः सूर्यस्य वारिदैः । पर्जन्यः सर्वलोकस्य भवाय भुवि वर्षति" इति कुतः ईश्वरः देवेन्द्रत्वादित्यर्थः । अन्यथा भयमुत्पादयेदपीति भावः । यद्वा, वैष्णवप्रवराणां भवतां नान्य-देव पूजा युक्ता तत्राह—ईश्वरम् अन्तर्यामिदृष्ट्य वेत्यर्थः । अन्यत्समानं तद्रेतसा सिद्धैरिति तत्त्वतस्तेष्वस्माकं स्वाम्याभावेनादौ तैस्तत्पूजैव युक्तेति भावः । अन्यथा अकृतज्ञत्वादिदोषप्रसक्तेः यजन्त इति प्रथमपुरुषत्वमार्षं यजामः एवमग्रे चोपजीवन्तीति । यद्वा, पुत्राभिप्रायज्ञानेन तद्वागुल्लङ्घनभवान्निजदोषपरिहारार्थमन्येषां प्राधान्यविवक्षया तैः सह विशेषसम्बन्धेन प्रथमपुरुषत्वम् ॥ ९ ॥

---

१. तत्तात–विज. ; तं–श्रीधर. वंशी. जी. वीर. विश्व. रा. ध. शु. सु. । २. न्ते–श्रीधर. वंशी. जी. वीर. विज. विश्व. शु. सु. ध. रा । ३. पुंसा–श्रीधर. वंशी. जी. वीर. विज. विश्व. शु. सु. घ. रा. । ४. एनं–वीर. । ५. बादरायणि–प्रा. पा. । ६. वनौ–वीर. ।

ननु, तर्हि तैरस्माकं को नामोपकारः ? तत्राह—तच्छेषेणेति । त्रिवर्गः धर्मार्थकामाः स एव फलं तस्य हेतवे सिध्यर्थम् एवं दृष्टादृष्टफलहेतुतोक्ता पुंसामिति तैर्व्याख्यातम् यद्वा, ननु पुरुषप्रयत्नैर्द्धर्मादिकं सेत्स्यति तत्राह—पुंसामिति । देवताप्रसादनैव धर्मादिसिद्धेः पर्जन्यस्य च देवराजत्वादिति भावः पुरुषकाराणाम् उद्यमानाम् ।।१०।। व्यतिरेके दोषमप्याह—इति । कामात् अदृष्टविषयात् द्वेषात् देवताविषयात् तदुपासकविषयाद्वा भयात् विरोधिजनहेतुकात् लोभात् दृष्टविषयात् वा शब्दोऽत्राध्याहार्यः शोभनं नाप्नोति इहामुत्र च तस्य क्षेमं न स्यादित्यर्थः । अत्रैषां श्रीव्रजवासिनां त्रिवर्गलिप्सा तद्दोषजिहीर्षा च श्रीकृष्णैकनिबन्धनेति प्रतिपादितमेव ततः सर्वसद्वासनाशिरोमणितामेव धत्त इति विवेचनीयम् ।। ११ ।। तथान्येषां व्रजौकसां वचो निशम्येति तेऽपि स्वयं श्रीनन्देनैव प्रमाणिता वा तथैवोचुरिति इन्द्राय मन्युं जनयन्निति तस्य बहिरङ्गत्वमनादरणीयत्वं च ज्ञापितं पितरमिति अस्य परमान्तरङ्गत्वं परमादरणीयत्वं च व्यञ्जितं को ब्रह्मा ईशो रुद्रस्तौ वयते निजमहिम्ना व्याप्नोतीति कस्तत्र वराकः इन्द्र इति बोधयति ।। १२ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तातेति सलालनं सम्बोधनं निजोक्तौ श्रद्धार्थम्, यद्वा, तदर्थावगमार्थम्, वयं गोपा न च गोपालनार्थं केवलं वयमेव, किन्तु अन्ये च नराः सर्व्वे । ननु 'सूर्य्यः स्वरश्मिभिर्भौमं रसमाकृष्य वर्षति' इत्यादिवचनात् सूर्य्याद्वृष्टिः प्रसिद्धा, तत्राह—वामुचां मेघानां पतिमेघरूपाणां सूर्य्यरश्मीनामपि स एवेश्वर इत्यर्थः । तथा च श्रीविष्णुपुराणे (५।१०।२३)—'भौममेतत् पयो दुग्धं गोभिः सूर्य्यस्य वारिदः । पर्ज्जन्यः सर्व्वलोकस्य भवाय भुवि वर्षति ।।' इति । कुतः ? ईश्वरो देवेन्द्रत्वादित्यर्थः । यद्वा, ननु तर्हि मेघा एव पूज्यन्ताम्, तत्राह—वामुचां पतिं वृष्ट्यादिशक्तिप्रदानेन पालकमीश्वरञ्च, अनावृष्ट्यतिवृष्ट्याचरणे शास्तारम्, अतः स एव पूजार्ह इति भावः । यद्वा, पतिं प्रभुमीश्वरमिति, अन्यथा क्रोधेनास्माकं भयमुत्पादयेदपीति भावः । यद्वा, वैष्णवप्रवराणां भवतां नान्यदेवपूजा युक्ता, तत्राह—ईश्वरं भगवद्दृष्ट्यैव तदीयत्वेनैव वा ईश्वरबुद्ध्याचर्च्यत इत्यर्थः । अन्यत् समानम् । द्रव्यैर्दुग्धादिभिः, तद्रेतसा तद्वृष्टिपयसा, तच्छक्त्यैव वा सिद्धैरिति, तत्त्वतस्तेष्वस्माकं स्वाम्याभावेनादौ तैस्तत्पूजैव युक्तेति भावः; अन्यथा अकृतज्ञत्वादिदोषप्रसक्तेः; यजन्त इति प्रथमपुरुषत्वमार्षम् । यजामः, एवमग्रे चोपजीवन्तीति; यद्वा, पुत्राभिप्रायज्ञानेन तद्वागुल्लङ्घन—भयान्निजदोषपरिहारार्थमन्येषां प्राधान्यविवक्षया तैः सह विशेषसम्बन्धेन प्रथमपुरुषत्वम्, क्रतुभिर्विविधैर्यज्ञैरिन्द्रध्वजोत्थापनादिकर्मभिर्वा ।। ९ ।। ननु तर्हि तैरस्माकं को नामोपकारः ? तत्राह—तच्छेषेणेति । त्रिवर्गो धर्म्मकामार्थाः, स एव फलं तस्य हेतवे सिद्ध्यर्थम्, मुक्तिभक्त्याद्यनुक्तिस्तच्छेषोपजीवनेन तदसिद्धेः; यद्वा, फलं भक्तिः, अन्यथोपजीवनस्य वैयर्थ्यात्, मोक्षस्यानुक्तिः प्रायो भक्तिविघ्नत्वेन वैष्णवप्रवराणां तेषां तदनादरात्, एवं दृष्टादृष्टफलहेतुतोक्ता, पुंसामिति तैर्व्याख्यातमेव; यद्वा, ननु पुरुषप्रयत्नैर्धर्मादिकं सेत्स्यति, तत्राह—पुंसामिति । देवतानुग्रहं विना पुरुषप्रयत्नानां वैयर्थ्योपत्तेर्विघ्नोपस्थितेश्च, किंवा वृष्टिं विना न द्रव्यसिद्धिः, तां विना च न जीविका, ताञ्च विना बलाद्यभावेन न पौरुषम्, तद्विना तु न धर्म्मादिकमितीन्द्रः पूज्य एवेति भावः ।। १० ।। ननु केवलमेतद्दृष्टविचारत एव, न तु शास्त्रतः । तस्याप्यस्वातन्त्र्यात् फलदानाशक्तेश्च; यद्वा, गोपालनादस्माकं स्वयमेव धर्म्मादिकं सिध्येत्, गवाञ्च सदा शाद्वलादियुक्ते श्रीवृन्दावने सुखचार एवेति, किमिन्द्रेण ? यद्वा, भगवति दृढविश्वस्तानां नान्यापेक्षा युक्ता, सत्यम्, तथापि पूर्व्वपूर्वाचरितं कथञ्चिदपि त्यक्तुं नोपयुज्यत इत्याह—य इति । कामात् धनरक्षणालाभात्, कर्म्मान्तरेण फलान्तरेप्सातो वा, द्वेषात् अनावृष्ट्यादिनेन्द्रेऽनादरात् तद्भक्तजनैः सह द्वेषोदयाद्वा, भयात् देवतान्तरपूजया वैष्णवधर्महानेः, धनव्ययाद्वा वाक्याप्रतिपालनेन प्रियमान्यजनाद्वा द्रव्येषु प्रतिष्ठादिषु वा लोभात्, वाशब्दोऽत्राध्याहार्य्यः । शोभनं नाप्नोति इहामुत्र च तस्य क्षेमं न स्यादित्यर्थः । तत्र हेतुः—पारम्पर्य्यागतमिति, सदाचारातिक्रमणादित्यर्थः । वै प्रसिद्धौ निश्चये वा, इति तत्र निजदार्ढ्यं बोधितम् ।। ११ ।। चार्थे तथाशब्दः, अन्येषां चेति श्रीगोपराजोक्तौ गर्व्वेणामेवानुमोदनात् सम्मतेर्वा, यद्वा, स्वयं वक्ष्यमाणार्थं सर्व्वानेवैकमत्येन ग्राहयितुं पृथक् पृथक् प्रश्नेन तथैव तेषामप्युत्तरप्राप्तेः, व्रजौकसां सर्व्वेषामेव व्रजवासिनामित्यर्थः । यद्वा, अनेन वने गतास्तत्सहचरा व्यवच्छिन्नाः, तेषां सर्व्वथा तदेकमतानुसारात्, इति विकाले व्रजमागतेन श्रीभगवता यागोद्यमं दृष्ट्वा पृष्टमिति श्रीविष्णुपुराणाद्युक्तानुसारेण ज्ञेयम्; तथा श्रीविष्णुपुराणे (५।१०।१६)—'विमलाम्बरनक्षत्रे काले चाभ्यागतो व्रजम् । ददर्शेन्द्रमहारम्भायोद्यतांस्तान् व्रजौकसः ।।' इति; श्रीहरिवंशे च (विष्णु प० १५।२)—'व्रजमाजग्मतुस्तौ तु व्रजे शुश्रुवतुस्तदा । प्राप्तं शक्रमहं वीरौ गोपांश्चोत्सवलालसान् ।।' इति । इन्द्राय मन्युं जनयन्निति देवतानिराकरणकर्म्मवादेन मखभञ्जनेन वा, अन्यत्तैर्व्याख्यातम् । पितरमित्यस्याभिप्रायः पूर्व्वं पितरित्यत्र विवृत एव; यद्वा, पश्यंस्तस्य हितं कर्त्तुं युज्यत इत्यर्थः । प्रकर्षेण विविधदृढन्यायप्रदर्शनादिनाह—को ब्रह्मा ईशो रुद्रस्तौ वाति, 'वा गतिगन्धनयोः' इति; यद्वा, 'व्येञ् तन्तुसन्ताने' इति वयते निज महिम्ना व्याप्नोतीति; यद्वा, अस्त्यर्थे वः, तौ प्रकृष्टसेवकतया यस्य स्त इति । एवमशेषदेवताधीनस्य देवतानिराकरणं केवलं कौतुकस्वभावेनैवेति भावः । यद्वा, तयोः प्रीत्यर्थमेव ऐश्वर्य्यमदमत्तेन्द्रस्य मखभञ्जनेन मदनिरसनात्; यद्वा, केशवः श्रीमथुराधिष्ठाता, अतो माथुराणां श्रीगोवर्द्धनादीनां माहात्म्यविस्तारणाय तद्युक्तमेवेति ।। १२ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तद्रेतसा तज्जलेन ।। ९-१३ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः किमत आह—तमिति। हे तात ! तं वारिमुचां मेघानां पतिं पालकमीश्वरं नियन्तारं चेन्द्रमस्मत्प्रभृतयः सर्वे नराः तस्येन्द्रस्य रेतसा रेतःस्थानीयेन जलेन सिद्धैर्नानाविधैर्द्रव्यैर्द्रव्यसाधनकैः क्रतुभिर्यजन्ते ।। ९ ।। एवमिष्ट्वा तच्छेषेण यागविशिष्टद्रव्येण उपजीवन्ति जना इति शेषः जीविकां कल्पयन्ति किमर्थं त्रिवर्गफलहेतवे धर्मार्थकामहेतवे सिद्धये तं यजन्तीत्यन्वयः ! त्रिवर्गफलहेतवे उपजीवन्तीति वा एवमिन्द्रयागावशिष्टेन जीवनं ततस्त्रिवर्गसिद्धिरित्युक्तम् । ननु, वृष्ट्यादिभिरुपजीवनं ततस्त्रैवर्गसिद्धिरिति । किमिन्द्रेणेत्यत आह पुंसामिति; पुरुषं कुर्वन्ति त्रिवर्गफलयुक्तं कुर्वन्तीति, पुरुषकारास्त्रिवर्गप्रापका इति यावत् तेषां मध्ये पर्जन्यः इन्द्र एव पुंसां फलभावनः फलप्रापकः स्वायत्तवृष्ट्यादिद्वारेति भावः ।। १० ।। अतस्तदाराधनात्मकमिदं वृद्धाचारपरंपराप्राप्तं यः पुमान् कामाद्यदन्यतमाद्धेतोस्त्यजेत् स शोभनं सुखं नाप्नोति किन्तु दुःखमेव प्राप्नोतीति भावः ।। ११ ।। इत्थं नन्दस्य तथाऽन्येषां गोपानामपि वचो निशम्य भगवानिन्द्राय मन्युं जनयन् क्रोधजननद्वारा गर्वं वारयितुं नन्दं प्राह ।। १२ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यतो मेघा लोकोपकारिणः तत्तस्माद्वामुचां जलदानां मेघानामित्यर्थः । ईश्वरम् अष्टयणां शिक्षणसमर्थं तेषां मेघानां रेतसा रतिकरलक्षणेन जलेन सिद्धैः उत्पन्नैः अन्ये च नराः ।। ९ ।। तच्छेषेण इष्टावशिष्टेन त्रिवर्गफलहेतवे धर्मार्थकामलक्षणपुरुषार्थसिद्धये पुरुषकाराणां पराक्रमसिद्धकर्मणां फलभावनः फलसाधकः ।। १० ।। विपक्षे बाधकमाह–व एवमिति । कामाद्दुर्विषयाभिलाषात् लोभाद्वित्तव्ययशङ्कया भयात् राजभयात् द्वेषाद्देवताद्वेषात् ।। ११ ।। मन्युं क्रोधम् ।। १२ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तातेति सलालनसम्बोधनेन तादृशपूज्यदेवतानामेवानुग्रहेणैतावद्गुणवान् त्वं पुत्रः प्राप्तोऽस्यतस्तत् पूजाप्रत्याख्यानं त्वया शुभंयुना न कर्त्तव्यमिति द्योतितम् वस्तुतस्तद्यज्ञे कर्तृत्वाभिमानोपि नोचित इत्याह—तद्रेतसा तद्वृष्टपयसा सिद्धैः ।। ९ ।। तच्छेषेण तद्यज्ञशिष्टेनान्नेन उपजीवन्ति जीविकामुपकल्पयन्ति न च जीविकापि यथेष्टविषयभोगार्थेत्याह—त्रिवर्गेति । पुरुषकाराणां त्रिवर्गार्थमुद्यमानानां फलं यत्त्रिवर्ग एव तस्य भावनः साधकः पर्ज्जन्याद्वृष्टिर्वृष्टेरन्नम् अन्नाज्जीविका जीविकातो धर्मो धर्मादुद्यम इत्यर्थः । यतो वस्तुतः पर्जन्य एव त्रिवर्गे मूलहेतुरतः पर्जन्य एवेज्यत इति भावः ।। १० ।। व्यतिरेके दोषमाह—य इति । कामात् स्वेच्छातः लोभात् द्रव्यव्ययाभावविषयात् भयात् भीषणालोकहेतुकात् द्वेषात् देवताविषयकात् ।। ११ ।। इन्द्राय इन्द्रमन्युजननस्य प्रयोजनं तद्गर्वखण्डनप्रतिवर्षगोवर्द्धनोत्सवप्रवर्ततनदुद्धरणनिखिलप्रियजनसहवास—लीलाविलासादिकमुपरिष्टाज्ज्ञास्यते ।। १२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे तात ! कृष्ण ! तं वामुचां मेघानां पतिमिन्द्रं तद्रेतसा वृष्टिपयसा सिद्धैर्द्रव्यैः साध्या ये क्रतवस्तैर्यजन्ते ।। ९ ।। तच्छेषेण क्रत्ववशिष्टेन द्रव्येण उपजीवन्ति जीविकां कल्पयन्ति । ननु, कृष्यादिभिः पुरुषकारैर्जीवन्ति किं पर्जन्ययजनेन तत्राह–पुंसां ये पुरुषकाराः पुरुषं कुर्वन्तीति पुरुषकाराः कृष्यादिरूपाः जीबनोपायाः तेषां भावयति साधयतीति फलभावनः पर्जन्यः पुरुषकाराः दैवनिरपेक्षा न फलदा इत्यर्थः ।। १० ।। मन्यूतपादनद्वारा स्वप्रावण्यविरोधिशक्रगर्वं वारयितुं मन्युं जनयन् पितरं प्राह–"कालात्मना भगवता शक्रदर्पजिघांसता" इति वक्ष्यमाणात् यथाऽन्येषां तथैव तदनुरोधेनैव नन्दस्य वचो निशम्य नतु श्रीनन्देन स्वमतं प्रकटितम् यद्वदन्ति यदिच्छन्ति चानुमोदेत तस्य तदिति शास्त्रानुरोधेन गतानुगतिकानां स्वबन्धूनामेव मतं महाभागवतेन भगवदिच्छानुसारिणा श्रीनन्देनोक्तम् ।। ११ ।। अथ सर्वेश्वरः सर्वशक्तिः सर्वकारणकारणः श्रीपुरुषोत्तमो जिज्ञास्यस्तद्विवित्सोपयोगिनिवृत्तकर्मयोगः तस्यान्तःकरणशुद्धिद्वारा ज्ञानोत्पत्तिः फलं सर्वात्मा देवदेवः यदर्चनेन सर्वमर्चितं स्यात् स पुरुषोत्तमः क्रियायोगस्य भोक्ता प्रभुश्च "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति वचनात् तत्र वासुदेवाङ्गतया यथायथमीज्यानामिन्द्रादीनां न निराकारणम् तत्साधनं च शास्त्रीयं प्रसिद्धम् सत्क्रियायोगः "तत्र तावत् क्रियायोगो भवतां किं विचारितः" इत्यनेन भगवता पृष्टो मुमुक्षु विषयः "गतानुगतिको लोको न लोकस्तत्त्वचिन्तकः" इत्येवं गतानुगतिकैर्गोपैः परमभागवतैरपि कालगत्या विस्मृतः मोक्षधर्मे कालगत्या भगवदीयस्य क्रियायोगस्य लोपो नारायणीयोपाख्यानेऽपि प्रसिद्ध एव यत्र सर्वशास्त्रार्थभूतवासुदेवनैरपेक्ष्येण "तृप्त एवैनमिद्रस्तर्पयति" इत्यादिवाक्यार्थभूताः शास्त्रार्थानभिज्ञैः वाक्यार्थज्ञानबलेनेन्द्राद्या एव स्वातन्त्र्येणेज्या वरदाश्चेत्येवंविद्भिर्लौकैः इन्द्रादयो देवा एव स्वातन्त्र्येण इज्यन्ते स बुभुक्षुविषयः प्रकृतकर्मयोगांतर्गतः क्रियायोगो लौकिकः अथवालौकिकस्तन्मे पृच्छतः साधु भण्यतामित्यनेन भगवता पृष्टः सच गोपैः स्वीकृतः तत्रैवंविधात्, क्रियायोगा तु मदाश्रितगिरिविप्रादिमख एव श्रेष्ठ इत्याह भगवान् कर्मणेति षोडशैः केचिदत्राहुः प्रथमं, तावत् कर्मवादेन देवान् निराकरोतीति यदयुक्तम् अत्र कर्मवादाश्रवणपूर्वकदेवनिराकरणाभावात् "धर्मसंस्थापनार्थाय संभवामि युगे युगे" इति श्रीमुखवचनात् धर्मस्थापनायावतीर्णत्वात् नहि

निरीश्वरस्वर्गकर्मभावादिस्थापनाय निराकरणाय चैयं भगवतः प्रवृत्तिः किन्तु स्वचरणांकितगिर्य्यादिपूजनविधानेन स्वचरणाराधनरूपकर्मयोगस्थापनायैव शोधनायैव शक्रदर्पजिघांसयेति वक्ष्यमाणत्वात् कर्मणैवेत्यत्र एवकाराभ्यां कर्माभावे जन्माद्यभावः प्रतिपाद्यते नतु निरीश्वरत्त्वं कर्मणः सूच्यते ॥ १२–१३ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तमिन्द्रमीश्वरं वाम्मुचां मेघानां पतिं तद् रेतसा तत्पयसा सिद्धैर्द्रव्यैः क्रतुभिरस्मदादयो नरा यजन्ते ॥ ९ ॥ तच्छेषेण तद्यज्ञशिष्टेनान्नेन नरा उपजीवन्ति जीविकां कुर्वन्ति न च जीविकापि यथेच्छविषयभोगार्थेत्याहत्रिवर्गेति। धर्मार्थकामसिद्धये इत्यर्थः। ननु ते कृष्यादिभिरुपजीवन्ति किमिन्द्रेण इति चेत्तत्राह पुंसां पुरुषकाराणां त्रिवर्गार्थकोद्यमानां फलं त्रिवर्गस्तस्य भावनः साधकः पर्ज्जन्य एव पर्ज्जन्याद्वृष्टिस्ततोऽन्नं ततो जीविका ततो धर्मः तथा च पर्ज्जन्यस्य मूलहेतुत्वादेवेज्यत्वमिति भावः ॥ १० ॥ विपक्षे दोषमाह–य इति। कामान्निजेच्छातः लोभात् द्रव्यव्ययाभावविषयात् भयाद्भीषणलोकहेतुकात् द्वेषाद्देवता विषयात् शोभनं कुशलम् ॥ ११ ॥ इन्द्रायेति। इन्द्र निगर्वयितुं तस्य मन्युं जनयन् यद्यपीन्द्रोऽग्न्यादिवत् परेशेन सृष्टा वेदोक्ता देवता तेन दत्तभागा च तथापि तस्मिन् गर्वोदयात् तत्परिहारेण तद्विशुद्धयेऽसाववमन्यते स्वयं प्रभुत्वात् "शक्रदर्पजिघांसया" इति वक्ष्यति स्वभक्तवर्यस्य गिरेः प्रतिवर्षोत्सवाय चेति बोध्यम् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणो

हे तात, तमिन्द्रं वामुचां पतिं घनानां घनमीश्वरमकरणे बाधाक्षमं। ततत्वात्तदिति प्रोक्तो यानात्सर्वत्र यद्धरिरिति तात्पर्यान्तरोक्तेस्तस्य भगवतो रेतसा। अम्भस्तु यद्रेत उदारवीर्यमित्यादेः। नदपतौ पीतेन जलेन सिद्धैर्द्रव्यैर्व्रीहियवादिभिर्नराः क्रतुभिर्यजन्तेऽत इन्द्रयागोऽनुष्ठेय इति भावः ॥ ९ ॥ तच्छेषेण सवावशिष्टेन धमार्थकामरूपं यत्फलं तद्भवे तत्सिद्धये उपजीवन्ति नराः पुरुषकाराणां कर्मणा फलसम्पादनपौरुषवतां पुंसां जनानां पर्जन्य इन्द्रः फलभावनः फलं भावयति साधयतीति स तथा ॥ १० ॥ यो नर एवं पारम्पर्यागतं कुलपरम्पराप्राप्तं धर्मं विसृजेज्जह्यात्तत्र निमित्तं कामाद्विषयान्तराभिलाषाल्लोभादीनताया भयाद्भूपतिभीतेर्द्वेषात्परस्परं ज्ञातिद्वेषात्स शोभनं मङ्गलं प्राप्नोति नौ प्रसिद्धमेतत्। विपक्षे दण्डोऽयं दर्शित इति ज्ञेयम् ॥ ११ ॥ न केवलं नन्द एकल एवोवाच किन्तु व्रजौकसोऽपि तथैवावदन्नित्याह ॥ तथेति। तथा व्रजौकसां च वचो निशम्य बहुसंवादेन द्रढिमैतद्धर्मस्य सूचितं इन्द्रायमन्युं क्रोधं ॥ १२ ॥

श्रीसुबोधिनी

अतस्तद्भजनं सर्वे कुर्वन्तीत्याह **तत् तातेति**, स्नेहेन सम्बोधनमप्रतारणाय, **वयं** वैश्या **अन्ये** क्षत्रिया ब्राह्मणाश्च सुतरां ये केचित् सस्योपजीविनस्ते सर्वे वामुचां मेघानां **पतिमिन्द्रं** पोषकत्वेने**श्वरं** **तद्रे**तसैव बीजभूतेन जलेन सिद्धैर्व्रीह्यादिभिः क्रतुभिर्नानाविधैरेव यागैर्नराः सर्व एव मनुष्या **यजन्ति** मनुष्याधिकारित्वाच्छास्त्रस्त ॥ ९ ॥ **ततस्तच्छेषेण** यज्ञशिष्टान्नेन त्रिवर्गफलसिद्ध्यर्थं जीवन्तीत्याह **तच्छेषेणेति**, तस्येन्द्रस्य यज्ञस्य वा **शेषेण** शिष्टान्नेन **शेषत्वं** वा प्राप्यो**पजीवन्ति तच्छेषमन्नमुपजीवन्ति**, **त्रिवर्गफलस्य हेतुर्जीवनं** जीवनार्थमन्नं, तदास्यं वो**पजीवन्ती**त्यर्थः, ननु स्वपौरुषेणान्नमुत्पाद्य स्वत एव जीवन्ति किमिन्द्रेण कार्यमित्याशङ्क्याह पुंस इति, पुरुषस्य ये **पुरुषकाराः** पौरुषाणि कृष्यादिव्यापारास्तेषां **पर्जन्य एव फलं भावयति**, अन्यथा वृष्ट्यभावे **पुरुषप्रयत्नो** व्यर्थ एव स्यादतः स्वसामर्थ्ये विद्यमानेष्युपजीव्य इन्द्रः ।१०। किञ्च परम्परया प्राप्तोयं धर्मोतः कर्तव्योकरणे प्रत्यक्षमेवानिष्टं स्यादित्याह **य एवमिति**, यथा ग्रामदेवता अपूजितास्तत्कालमेव ग्रामं दहन्त्यतः पूजनीयाः 'प्राप्तसेवापरित्यागो द्वषमूलमिदं स्मृत'मिति, एवम्प्रकारेण **पारम्पर्यागतं धर्मं**त्वेन क्रियमाणं स्वयं **नरो** भूत्वा **यो विसृजेत् स शोभनं** शुभफलं **न** प्राप्नोति, त्यागे हेतुचतुष्टयं कामक्रोधलोभा अन्यभयात् प्रतिबन्धश्च, तानाह **कामादिति** **कामे** कर्तृरस्वास्थ्यं यावता कालेन यागः क्रियते तावान् कालो भोग एव व्याप्रियत इति कालसङ्कोचादकरणं **कामे**हेतुकं **लोभो** द्रव्यगतो दोषः, द्रव्यं स्वार्थे तिष्ठत्वित्यकरणं, **भयमन्यस्मात्** क्लेशभयं वा, **द्वेषो** देवताविषयकः प्रमाणविषयको वा, एवं चतुर्भिर्हेतुभिरभजनेनिष्टमेव फलं शुभफलाभावो वा शुभफले प्रतिबन्धो वा भवेत् एवं हेतुवादमाश्रित्य लौकिकस्मार्तवैदिकानां सम्बन्धरहितमपि कर्म कर्तव्यमिति निरूपितम् ॥११॥ तद् भगवान् सर्वधर्मरक्षकः पाखण्डधर्मनिराकरणकर्ता दूषितवानित्याह **वचो निशम्येति**, **नन्दस्य वचो निशम्य तथान्येषां** सम्मत्यर्थं पुरोहितानामपि, **व्रजवासिनः सर्वे मूर्खा एवेति** विचिन्त्याधिभौतिक इन्द्रो वृथा भक्षयतीति दृष्टो धर्मो न भवतीतीन्द्राय **मन्युं जनयन्** **पितरं नन्दं** प्रति भगवान् **प्राह**, ननु, देवद्रोहं कुतः कृतवान् जाते वा भगवतः किं स्यात्? तत्राह **केशव** इति, ब्रह्मशिवयोरपि मोक्षदाता कोयं वराक इन्द्रः? ततः पाषण्डधर्मैर्ब्रह्मादीनां देवत्वमेव गच्छतीति तन्निवृत्त्यर्थमेव कृतवानित्यर्थः ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

वचो निशम्येत्यत्र दृष्टे धर्म इति इदमग्रिमाध्यायकारिकायां स्फुटीकरिष्यते ॥ १२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

वचो निशम्येत्यस्य व्याख्याने **भौतिक** इन्द्र इति वेदेनाविहिते युक्तिकल्पिते कर्मणि वेदोक्तकर्मणेज्यमान आधिदैविक इन्द्रो बलिं न गृह्णाति, श्रद्धया क्रियमाणत्वाद् ग्रहणमप्यावश्यकमतो **भौतिकरूपेण भक्षयतीति** तथोक्तं, किञ्च वेदस्यापि वेदत्वं भगवद्वाक्यादतः श्रीनन्दं प्रति गोवर्धनयागकरणार्थं यानि वाक्यानि हरिणोक्तानि तानि वेदरूपाण्येव भगवद्गीतावत्, तथा सति तदुक्तत्वादन्नकूटयागस्य वैदिकत्वम् ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततः किमत आह–तमिति। 'पुत्रत्वान्नात्र मद्वाक्ये प्रतारणा शङ्कनीया, सत्यमेवोच्यते' इति सूचयन् सम्बोधयति—तातेति। वयं वैश्याः अन्ये च ब्राह्मणक्षत्रियादयो नरास्तमिन्द्रं क्रतुभिर्यज्ञैर्यजन्ते आराधयन्तीत्यन्वयः। आराधने हेतुमाह–ईश्वरमिति। तत्र हेतुमाह–वार्मुचां मेघानां पतिमिति। नच तदाराधनेऽस्माकं धनादिव्ययः, तज्जलेनैव सिद्धत्वात्। 'अतो न तत्र स्वकर्तृत्वाभिमानोऽपि युक्त' इत्याशयेनाह–तस्य रेतसा जलेन सिद्धैर्द्रव्यैः अन्नादिभिः सम्पादितैः क्रतुभिरिति ॥ ९ ॥ 'तस्य महानुपकारो मन्तव्य' इत्याशयेनाह–तच्छेषेणेति। इन्द्रयागावशिष्टेनान्नादिना नरा उपजीवन्ति जीविकां कल्पयन्ति। एवमिन्द्राराधनपूर्वकजीवनस्य फलमाह–त्रिवर्गफलहेतवे इति। धर्मार्थकामसिद्धये जीवन्तीत्यर्थः। ननु 'कृष्यादिव्यापारेणैवान्नादिसिद्धिदर्शनात् किमिन्द्राराधनेन ?' तत्राह–पुंसामिति। पुंसां पुरुषकाराणां कृष्यादिव्यापाराणां पर्जन्य इन्द्र एव वृष्टिद्वारा फलभावनः फलसाधकः, अन्यथा वृष्टिं विना कृष्यादिवैफल्यदर्शनादित्यर्थः ॥ १० ॥ अतएव वृद्धाचारपरम्परया आगतं धर्मरूपं यागं यो नरः कामाद्यन्यतमाद्धेतोर्विसृजेत् त्यजेत् स शोभनं सुखं नाप्नोति। "प्राप्तसेवापरित्यागो द्वेषमूलमिदं स्मृतम्" इति वचनाद्देवताद्वेषविषयत्वेन दुःखमेव प्राप्नोतीत्याशयः। तत्र कामः भोगासक्तिः, लोभो धनादिविषयः, भयं तद्विद्वेषिपुरुषात् कायक्लेशाच्च, द्वेषो देवतायामकिञ्चित्करबुद्ध्या प्रमाणे अप्रामाण्यबुद्ध्या वा ॥११॥ 'इन्द्राय मन्युं जनयन्' इति कोपजननद्वारा गर्वपर्वतान्द्रमवतारयितुमेव देवतानिराकरणम्, न त्वत्रैव तात्पर्यम्। यज्ञाङ्गभूतानां देवतानामप्यनादिवेदप्रमाणसिद्धत्वेन तन्निराकरणे तद्वैगुण्यापत्तेरित्यर्थः ॥ ननु 'सुरेश्वरस्येन्द्रस्य गर्वनिराकरणे कथं कृष्णः समर्थ' इति शङ्कानिरासाय केशवपदप्रयोगः। को ब्रह्मा, ईशो रुद्रः, तयोरपि सुखं यस्मात् स तथा। तस्येन्द्रगर्वनिराकरणं किं दुर्घटमित्याशयः ॥ अन्यत् स्पष्टम् ॥ १२ ॥

अन्वितार्थप्रकाशिका

तमिति ॥ हे तात ! वयं वैश्याः अन्ये च ब्राह्मणाद्यास्तं वार्मुचां पतिमीश्वरमिन्द्रं तस्य रेतसा जलेन सिद्धैः द्रव्यैः अन्नादिभिः सम्पादितैः क्रतुभिर्यज्ञैर्यजन्ते आराधयन्ति। प्रथमपुरुष आर्षः। यजामह इत्यर्थः ॥ ९ ॥ तदिति ॥ तच्छेषेण इन्द्रयागावशिष्टेनान्नादिना त्रिवर्गफलहेतवे धर्मादिसिद्धये नरा उपजीवन्ति उपजीविकां कल्पयन्ति। यतः पुंसां पुरुषकाराणां कृष्यादिव्यापाराणां पर्जन्य इन्द्र एव वृष्टिद्वारा फलभावनः फलसाधकः। अन्यथा वृष्टिं विना कृष्यादिवैफल्यदर्शनात् ॥ १० ॥ य इति ॥ अतः यो नरः एवं पारंपर्येण परम्परया आगतम् इमं धर्मं कामात् भोगसङ्गात् लोभात् भयात् तद्द्वेषिभयात् द्वेषान्नास्तिक्यप्रयुक्तदेवताद्वेषादनादरात् हेतोः विसृजेत् स शोभनं सुखं नाप्नोति ॥ ११ ॥ वच इति ॥ केशवः नन्दस्य वचो निशम्य तथा अन्येषां व्रजौकसां च वचो निशम्य इन्द्राय इन्द्रस्य मन्युं जनयन् पितरं नन्दं प्राह स्म। एतेन इन्द्रस्य गर्वापहाराय कोपजनन एव तात्पर्यम्। नतु देवतानिराकरण इति सूचितम् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वार्मुचां जलदानां पतिं ईश्वरं त्रिलोकेश्वरं इंद्रं तद्रेतसा तद्दत्तजलेन सिद्धैर्निष्पन्नैः द्रव्यैरन्नादिभिः कृत्वा साधितैर्यज्ञैः नरा यजंते वयं च यजाम इति पुरुषव्यत्ययेन योज्यं ॥९॥ तदिति तच्छेषेण तस्य यज्ञस्य शेषेण अवशिष्टान्नादिना नराः उपजीवंति जीविकां कुर्वंति। अतः त्रिवर्गफलहेतवे त्रिवर्गाः धर्मार्थकामा एव फलानि तेषां सिध्यर्थं पुंसां ये पुरुषकाराः कृष्णादिपुरुषप्रयत्नास्तेषां फलभावनः फलोत्पादकः पर्जन्य इंद्रोस्ति तं विना कृष्यादीनां वैफल्यं स्यादिति भावः ॥१०–११॥ पितरं नंदं ॥१२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तच्छेषेणेति ॥ तच्छेषेण तद्यागावशिष्टद्रव्येण, त्रिवर्गफलहेतवे धर्मार्थकामसिद्धये, उपजीवन्ति जनाः स्वस्वजीविकां कल्पयन्तीत्यर्थः। एवमिन्द्रयागावशिष्टेन जीवनं ततस्त्रिवर्गसिद्धिश्चेत्युक्तम्। ननु नराः कृष्णादिभिरेवोपजीवन्ति ततस्त्रिवर्गस्यापि सिद्धिर्जायते, तत्र किमिन्द्रेणेत्यत्राह। पुंसामिति। पुंसां, पुरुषकाराणां कृष्यादीनां, फलभावनः फलसंपादकः, पर्जन्यः एव। तदायत्तमेघप्रवर्षणं विना कृष्यादिवैकल्यादिति भावः ॥ ९ ॥ य इति। किं च यः नरः, पारंपर्यागतं वृद्धाचारपरंपराप्राप्तं, इमं तदाराधनात्मकं, धर्मं, कामात्, लोभात्, भयात्, द्वेषाद्वा, विसृजेत् कामाद्यन्यतमाद्धेतोः परित्यजेत्, सः शोभनं सुखं, न

आप्नोति वै। केवलं दुःखमेव तत्त्यागात् प्राप्नोतीति भावः ॥१०॥ वच इति। केशवः श्रीकृष्णः, नन्दस्य तथा अन्येषां, व्रजौकसां च, वच उक्तविधवचनं निशम्य, इन्द्राय, मन्युं क्रोधं जनयन् सन्, पितरं नन्दं, प्राह ॥ ११ ॥ तत्र प्रथमं तावत् कर्मवादेन देवान् निराकुर्वन् यदुक्तं 'तेऽभिवर्षन्ति भूतानां प्राणनं जीवनं पयः। तच्छेषेणोपजीवन्ति' इति तत्राह। कर्मणेति। जन्तुः प्राणी, कर्मणा जायते, कर्मणा एव, हि निश्चितं, लीयते च। लीयते इति दृष्टान्तार्थं वा। यथा कर्मणा लीयते तथैव तेन जायते इत्यर्थः। सुखं, दुःखं, भयं, क्षेमं, कर्मणा एव, अभिपद्यते। तत्र कोशेषु सुखक्षेमयोः पर्यायत्वेऽपि सुखमैहिकं, क्षेमं पारलौकिकमिति तयोर्भेदः। ननु जडात् केवलात् कर्मणः फलसिद्धिः कथं स्यादिति चेत्, अहो अशीलितमीमांसाशास्त्राणां कर्मजडत्वमिति स्वमतिविलसितैषा श्रद्धा कीदृशी, परं नैतदेवं, किं तु मीमांसावचनतः कर्मणामेव फलस्य कारणत्वेऽवगते कर्मत एव फलसिद्धौ निर्णीतायां सत्यां कर्मतः किमनुपपन्नं नामेति भावः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

य एवमिति : १०.२४.११.

शुभफलोपगमस्पृहया यथा भवति कर्मणि वृत्तिरतोऽधिका।
अकरणे हि तदन्यफलोद्गमोत्थितभयादिति तत्कथितं द्विधा ॥ ११ ॥

वचो निशम्येति १०.२४.१२.

यावन्मत्तो न शरणमीहते मदधीरयम्। तावन्मन्मन्तुपात्रं स नैषामिति तथाऽवदत् ॥ १२ ॥
अज्ञाततत्त्वविषयाः प्रायः प्रारब्धवादिनः। भविष्यति कलौ लोका इत्यनूद्याह स प्रभुः ॥ १३ ॥

कृष्णप्रिया

हे प्यारे लालन्। इसलिए, हम सब लोक, सर्वशक्तिमान, तथा मेघों के स्वामी इन्द्र का पूजन किया करते हैं, क्योंकि उसके रेतस्—"वीर्य स्वरूप जल से सिद्ध हुए पदार्थों से, हम तृतीयाश्रमी वैश्यगण, एवं ब्राह्मण-क्षत्रिय आदि सभी लोक" उनका अर्चन करना चाहिए यह मानकर पूजन-अर्चन करते हैं ॥ ९ ॥ प्यारे वत्स ! यज्ञ करने के बाद जो यज्ञशिष्ट अन्नादि पदार्थ रहते हैं, उन पदार्थों से, धर्म-अर्थ-काम नाम के पुरुषार्थों की सिद्धि करते हुए अपने जीवन का निर्वाह करते हैं, क्योंकि पुरुषों के पुरुषकारों के फल देने वाला भगवान पर्जन्य है। देखो वत्स ! लोगों की वृत्तियाँ-आजिविकायें एवं व्यवसायों का आश्रय वृष्टि ही है। विना वृष्टि खेती नहीं हो सकती और खेती सबके जीवन के लिये मूल कारण है ॥ १० ॥ लालन् ! यह इन्द्र यज्ञ नाम का वैश्यावश्यक धर्म हमारी कुलपरंपरा से चला आ रहा है। कोई मनुष्य परम्परा प्राप्त धर्म का काम-लालच-भय अथवा द्वेषवश त्याग करता है वह यह जान ले कि वो कभी मङ्गल नहीं प्राप्त कर सकता है ॥११॥ श्रीशुकाचार्य जी महाराज ने कहा राजन् ! ब्रह्मा रुद्रादि देवताओं के नियामक भगवान केशव ने श्रीनन्दराय जी और अन्य व्रजवासियों की यह बात सुनकर उनके मन में इन्द्र पर कोप भाव को उपजाते हुए कहा ॥ १२ ॥

श्रीभगवानुवाच

कर्मणा जायते जन्तुः कर्मणैव [1]प्रलीयते। सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ॥ १३ ॥
अस्ति चेदीश्वरः कश्चित् [2]फलरूप्यन्यकर्मणाम्। कर्तारं भजते सोऽपि न ह्यकर्तुः प्रभुर्हि सः ॥ १४ ॥
किमिन्द्रेणेह भूतानां स्वस्व[3]कर्मानुवर्तिनाम्। अनीशेनान्यथा कर्तुं स्वभावविहितं नृणाम् ॥ १५ ॥
स्वभावतन्त्रो हि जनः स्वभावमनुवर्तते। स्वभावस्थमिदं सर्वं सदेवासुरमानुषम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—जन्तुः कर्मणा जायते, कर्मणा एव प्रलीयते, सुखम् दुःखम् भयम् क्रोधम् कर्मणा एव अभिपद्यते ॥ १३ ॥ अन्यकर्मणाम् फलरूपी कश्चित् ईश्वरः अस्ति चेत् सः अपि कर्तारम् भजते हि अकर्तुः सः प्रभुः हि न ॥ १४ ॥ इह स्वम् स्वम् कर्मानुवर्तिनाम् भूतानाम् अनीशेन इन्द्रेण किम् ? नृणाम् स्वभावविहितम् अन्यथा कर्तुम् इन्द्रः कः प्रभुः ? ॥ १५ ॥ हि स्वभावतन्त्रः जनः स्वभावम् अनुवर्तते, सदेव असुर मानुषम् सर्वम् इदम् स्वभावस्थम् ॥ १६ ॥

---

[1] विली–श्रीधर. वंशी. जी. वीर. विज. विश्व. शुक. सु. घु. रा. ; हिली. प्रा. पा.। [2] फलरूप्यस्य–वीर. ; फलरूपः स कर्मणः विज. [3] स्वस्व–श्रीधर. वंशी. जीव. वीर विज. विश्व.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रथमं तावत्कर्मवादेन देवान्निराकरोति। कर्मणेति। ननु जडात्कर्मणः केवलात्कथं फलसिद्धिः स्यादिति चेत् अहो अशीलितमीमांसानां स्वमतिविलसिता श्रद्धा कर्मणां फलकारणत्वे वचनतोऽवगते किं ततोऽनुपपन्नं नाम ॥ १३ ॥ केचित्पुनरतिसाहसभीताः कर्मपरतंत्रमीश्वरं मन्यंते तन्मतमनूद्य निराकरोति। अस्ति चेदिति। स्वयं कर्मभिरलिप्तोऽन्येषां जीवानां कर्मणां फलरूपी फलदाता कर्तारं भजते तत्तत्कर्मफलदानेन ॥ १४ ॥ अतः कर्मण एव फलसिद्धेस्तत्पारतंत्र्ये चाजागलस्तनतुल्यत्वान्न देवतया कृत्यमित्याह। किमिंद्रेणेति। ननु कर्मणोऽपि प्रवृत्तिरंतर्याम्यपेक्षैव कथं सर्वथा देवताया अनुपयोग इत्याशंक्याह। स्वभावविहितमिति। स्वभावेन प्राक्तनसंस्कारेणैव विहितं यत्कर्म तदन्यथा कर्तुमनीशेन ॥ १५ ॥ एतद्विवृणोति स्वभावतंत्र इति। प्रवृत्तेः संस्काराधीनत्वात्किमंतर्यामिणेत्यर्थः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भयक्षेमयोर्यद्यपि दुःखसुखांतर्गतत्वं तथापि भेदेन कथनम्। भयं संसारं क्षेमं मोक्षमपि कर्मणैवेति, आसक्त्यनासक्तिभ्यां कृतं कर्मैवोभयहेतुरिति भावः। कर्मण्याशंकते—नन्विति। अशीलिताऽविचारिता मीमांसा जैमिनीयशास्त्रं यैस्तेषाम्। स्वमतिविलसिता निजबुद्धिप्रकाशिता। श्रद्धा फलदातेश्वरः कर्मभिन्नोस्तीत्येवंरूपा। वचनतः 'कर्मणा जायते' इत्यादिशास्त्रतः। अवगते ज्ञाते सति। ततः कर्मणः। किं नामा किं कार्यम्। अनुपपन्नम् असिद्धम्। न किमपीत्यर्थः ॥ १३ ॥ अतिसाहसम् अतिविचारासामर्थ्यम्। कर्मपरतंत्रम् कर्माधीनम्। फलं सुखदुःखादिलक्षणं रूपयति ददातीति तथा, सहायकल्पः न स्वतंत्र इति यावत्। स ईश्वरोऽपि। कर्त्तारं कर्मण इति शेषः। अकर्त्तुः कर्मणः। स ईश्वरः न प्रभुः तत्र कारणासत्त्वादित्यर्थः। इमं श्लोकं विजयध्वजस्त्वित्थमवतारयति—ननु प्रवृत्तेर्बुद्धिपूर्वकत्वेन कर्मणोऽचेतनत्वेन तदयोगान्न जगत्तदधीनमिति। किन्तु चेतनाधीनम्। चेतनोऽपि न देवदत्तादिसाधारणः किं तु विशिष्ट एव कश्चिदस्तीति कृष्णस्वाहार्दानभिज्ञनंदगोपस्य मानसीं शंकां गूढाभिसंधिः परिहरति—अस्ति चेदिति ॥ १४ ॥ यतः कर्मानुयायीश्वरोऽतो हेतोः। तत्पारतंत्र्ये कर्माधीनत्वे केश्वरस्याजागलस्तनतुल्य स्वाद्व्यर्थत्वात्। पुनरत्राशंकते—नन्विति। अंतर्यामिणमपेक्षत इत्यंतर्याम्यपेक्षेति। अनुपयोगः प्रयोजनाभावः। आह श्रीकृष्णः। स्वभावेति—स्वेन भवनं स्वभावः। अन्यथा कर्तुम् परावर्त्तयितुम्। अनीशेन असमर्थेन ॥ १५ ॥ एतत् स्वभावाधीनत्वम्। इत्यर्थ इति। प्रवृत्तिः पयस्स्यंदनादिवत्संस्कारानुरोधिन्येवेति, न त्वंतर्याम्यधीनेति भावः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एषां मतिपित्रादिरूपनित्यपरिकराणां पूजाग्रहणे को नाम इन्द्र इति तन्मदहरणं यद्यपि मनसि वर्तते तथापि नरलीलापालनाय तदनुद्घाट्य कर्मवादस्य सर्वत्रातिप्रसिद्धत्वात् तन्मताश्रयणनैव प्रथमं परिहरति, कर्मणीति। प्रमीयते म्रियते अत्र तु कर्मणेत्यत्र कर्तरि तृतीया प्रलीयत इति पाठेपि स एवार्थः हि नीयते इति पाठे तु ह्येतावेव हि निश्चये एवं जन्ममरणे उक्ते जन्ममरणानन्तरञ्च कर्मणैव सुखादिकमाह सुखमिति क्षेमम् अभयं कर्मणेति पुनःपुनरुक्तिः तदेकहेतुताविवक्षया दार्ढ्यार्थमेव शब्दद्वयञ्च ॥१३॥ फलं रूपयितुं दर्शयितुं दातुं शीलम् अस्येति फलरूपी भजते अनु सरति कर्मानुसारेणैव फलदानात् व्यतिरेकेण दृढयति नेति हि यतः कर्माभावे फलं दातुं न शक्त इत्यर्थः ॥ १४ ॥ अत्रापि भूतानां प्राणिमात्राणां कर्मानुवर्तिनां प्राक्तनकर्मानुसारेण सुखदुःखं भुञ्जानानामिन्द्रेण किं कर्मण एव तत्तद्भोगकारणत्वात् तेषु नृणाञ्च कर्मान्तरोपार्जकानां स्वं स्वं स्वभावविहितमन्यथा कर्त्तुमनीशेन तेन किं स्वभावस्यैव तत्तत्कर्मप्रवृत्तिकारणत्वात् ॥ १५ ॥ सर्वमित्यनेन गृहीतानामपि देवादीनां पृथगुक्तिर्विचारादिसद्भावेऽपि तदतिक्रमणाशक्तेः ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कर्म्मवादस्य सर्व्वत्रातिप्रसिद्धत्वात्तन्मताश्रयणेनैव प्रथमं पित्रोक्तं परिहरति—कर्म्मणेति; कर्म्मणा प्रायः प्रारब्धेन तस्यैव नियतफलप्रदत्वात्, जन्तुः सर्व्वोऽपि जीवः प्रमीयते म्रियते, 'विलीयते' इति पाठेऽपि स एवार्थः। एवं जन्ममरणे उक्ते, जीवने चेह लोके मरणेऽप्यमुत्र कर्म्मणैव सुखादिकमाह—सुखमिति। क्षेमं अभयम्, कर्म्मणेति पुनः पुनरुक्तिर्जन्मादीनां तदेकहेतुताविवक्षया तद्दाढ्यार्थमेव शब्दद्वयञ्च ॥ १३ ॥ फलं रूपयितुं दर्शयितुं दातुं शीलमस्येति फलरूपी, भजते अनुसरति आश्रयति वा, कर्म्मानुसारेणैव फलदानात्, तदेवाह—नेति। हि यतः कर्म्माभावे फलं दातुं न शक्त इत्यर्थः। हि निश्चितम् ॥ १४ ॥ स्वं स्वं कर्म्मानुवर्त्तिनामिति 'नाभुक्तं क्षीयते कर्म्म' इत्यादिन्यायेन तत्रापि प्रारब्धस्यावश्यभोग्यत्वात् नृणां विचारादिना स्वभावं क्रमितुं समर्थानामपि किं पुनरन्येषामित्यर्थः ॥ १५ ॥ सर्व्वमित्यनेन गृहीतानामपि देवादीनां पृथगुक्तिः, नृणामितिवत् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कर्त्तारं भजते सोऽपि देवः स चैतदेवोपपादयति—तस्य कर्मणीत्यनुषङ्गः ॥ १४–१५ ॥ स्वभावतन्त्रः स्वभावविहितकर्मतन्त्रः कर्मस्वभावस्थम् इति वक्ष्यमाणत्वात् ॥ १६–२१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यदुक्तं "पर्जन्यः फलभावनः" इति तत्प्रतिक्षेप्तुकामस्यावदीश्वरराधनभूतकर्मणामवश्यकर्त्तव्यतां वक्तुकामफलसाधनत्वव्युदासाय प्राधान्येन पुण्यपापकर्मणां सुखदुःखादिहेतुत्वमाह कर्मणेति। सुखसंहिकं क्षेम पारलौकिकं जायते प्रलीयते इति दृष्टान्तार्थं यथा कर्मणैव हेतुना जायते प्रलीयते च तथा सुखदुखादि च कर्मणैव प्राप्नोति एवकारेण केवलदेवतानिरासो गूढमभिसंहितः ॥ १३ ॥ ननु, क्षणिकस्य जडस्य च कर्मणः कथं कालान्तरभावि विचित्रफलहेतुत्वम् ? नत्वपूर्वद्वारा, तस्य स्थिरत्वेवि जडत्वाविशेषादतः "तृप्त एवैनम् इन्द्रः प्रजया पशुभिस्तर्पयति" इत्याक्तरीत्या कर्मजनितनिग्रहानुग्रहवर्ती देवतैव सुखदुःखादिहेतुस्तत्राह अस्तिचेदिति। अस्य कर्त्तुः कर्मणां फलं रूपयति कल्पयतीति तथा फलदाता कश्चिदीश्वरोऽस्ति चेत्तर्हि हे पितः! सोपि ईश्वरः कर्त्तारमेव भजते यस्स्वराधनरूपं कर्मानुतिष्ठति तमेवानुवर्त्तते तस्मा एव फलं ददाति नह्यकर्तुः प्रभुः फलदः एवमन्वयव्यतिरेकाभ्यां कर्मण एव फलसाधनत्वम् ईश्वरस्य तत्तत्कर्मानुवर्त्तित्वेन तत्पारतन्त्र्यञ्चोक्तं कश्चिदीश्वरोऽस्तिचेदित्यनेनेन्द्रस्यानीश्वरत्वमभिप्रेतं सम्भावितस्येश्वरस्यैकत्वं हि विवक्षितम् अयं भावः क्षणिकत्वाज्जडत्वाच्च केवलकर्मणः फलदत्वं न सम्भवतीति देवतैव फलदेति ब्रूषे; तर्हि सा किम् इन्द्रवाय्वादिरूपेणानैका ? उतैका ? नाद्यः, इन्द्रादीनां कार्यत्वकर्मत्वकर्मवश्यत्वदुःखित्वादेः प्रतिपन्नत्वेन फलदत्वासम्भवात् न हि स्वदुःखनिराकरणेष्टापादनासामर्थस्यान्येष्टानिष्टप्रापणपरिहारसामर्थ्यम्; अत इन्द्राद्यन्तर्याम्यकर्मवश्यो निस्सयाभ्यधिकः कश्चिदीश्वर एक फलदः सोप्यन्वयव्यतिरेकाभ्यां कर्मानुवर्त्तित्वेन तत्परतन्त्र इति, नचैवमीश्वरस्य स्वातन्त्र्यादिभङ्गः जन्ममरणसुखदुःखादेः कर्मायत्तत्वेपि ईश्वरस्य पूर्वपूर्वकर्मवासनानुरोधेन जीवप्रेरकत्वात्तस्य मूलकारणत्वात् ईश्वरस्य हि स्वकेष्वपि व्यापारेषु स्वयं ज्ञानचिकीर्षायाः प्रयत्नवत्त्वात्तत्कर्तृत्वं, चेतनप्रवृत्तिहेतुत्वाकारयितृत्वं, स्वयं सर्वकार्यहेतुत्वेन सामान्यकारणत्वादुदासीनत्वं, प्रवृत्तस्य चेतनस्योतरोत्तरं प्रवर्त्तकत्वादनुमन्तृत्वं सर्वव्यापारसाक्षात्कतृत्वात्साक्षित्वं, विशेषकारणभूततत्तत्कर्मसाहित्येनैव विशेषकार्यहेतुत्वात्सहकारित्वं कर्मभिराराधितस्यैव फलहेतुत्वात्फलदत्वं, चेतनशेषित्वात्तच्चेतनफलोपभोगस्यापि स्वोपभोगशेषत्वात्फलित्वं कर्मानुरोधेनैव फलप्रदानादविषयत्वं सहकारिसन्निधिक्रमानुरोधेनैव परदुःखनिराचिकीर्षाशालित्वादनैर्घृण्यं, तत्तत्कर्मानुरोधेन निग्रहानुहसद्भावेऽपि किञ्चिदानुकूल्यमवलोक्य निश्शेषनिग्रहप्रणाशेन यावदात्मभाविमोक्षप्रदानादनुग्रहप्राबल्यम्; अत एव परमोदारत्वं चेत्यादिसर्वमुपपन्नमेव, तस्मादीश्वरस्य कर्मपारतन्त्र्यकथनमन्वयव्यतिरेकाभ्यां कर्मणः फलसाधनत्वभावव्युदासार्थं नचैतावता "ईश्वरस्य फलदत्वव्युदासः" कर्तारं भजते सोपीत्यनेन तस्यापि फलदत्वावगमात् नचान्यतरसाधनत्वमन्यतरेण प्रतिबद्ध्यते कर्मणामीश्वरानुग्रहनिग्रहद्वारा सुखदुःखादिफलसाधनत्वादीश्वरस्य तु साक्षादिति विरोधाभावाच्चेदिति सम्भावनयेश्वरास्तित्वे वादिविप्रतिपत्तिः सूचिता अस्तीति तदभ्युपगमेन तस्य कर्मानुवर्तित्वकथनेन चेश्वरानश्युपगमवादो धर्मिग्राहकमानविरुद्ध इति दर्शितम् ॥ १४ ॥ तदेवमीश्वराराधनभूतकर्मणोऽवश्यानुष्ठेयत्वं फलितम् ईश्वर इत्येकवचनेनेन्द्रवह्न्यादीनामनीश्वरत्वमवगतं तदेव व्यञ्जयन्नाह–किमिति। स्वस्वकर्मानुवर्तिना राजसादिस्वस्वभावानुगुणपुण्यपापात्मककर्मानुवर्तिना भूतानाम् इन्द्रेण किं स्वभावानुगुणकर्मणामेव सुखदुःखादिहेतुत्वे सतीन्द्रस्य न तद्धेतुत्वमिति भावः। स्वस्वकर्मानुवर्त्तिनामित्यनेन कर्मवैचित्र्ये तत्तत्कर्त्तृस्वभाववैचित्र्यमेव निमित्तमित्यभिप्रेतम् ननु भूतानां स्वस्वकर्मानुवर्त्तित्वेपि स्वस्वकर्मजनितनिग्रहानुग्रहवानीश्वर एव फलद इति चेदस्त्वेवमीश्वरः किमिन्द्रेणानीशेनेत्याह—अनीशेनेति। नृणां स्वभावविहितं स्वभावानुगुणकर्मविहितं सुखदुःखादिकमन्यथाकर्तुमप्रभुणा इन्द्रेण किं नकिञ्चिदपीत्यर्थः। अन्यथाकर्तुमनीशेनेत्यनेन सर्वेश्वरस्तु साध्वसाधुकर्म कारयितृत्वद्वाराऽन्यथा च कर्तुं प्रभुरिति सूचितम् ॥ १५ ॥ स्वस्वकर्मानुवर्तिनामिति। स्वभावविहितमिति च भूतानां स्वस्वभावानुवर्तित्वं सूचितम्। तदुपपादयति स्वभावतंत्र इति स्वभाववस्थं सर्वं जगत् स्वभावानुगुणप्रवृत्तिमदित्यर्थः। अथवा जगदन्तर्भूतं देवादिवस्तु निस्स्वभावं नास्तीत्यर्थः। तथा च गीतं अथवा—

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः ॥ इति ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कर्मफलदातृत्वेन कर्मप्रेरयितृत्वेन कर्मशब्दवाच्यत्वेन च नारायण एव सर्वस्य कर्त्तेत्यभिप्रेत्य सर्वस्य कारणं कर्मैवेत्याह–कर्मणेति ॥ १३ ॥ ननु, प्रवृत्तेर्बुद्धिपूर्वकत्वेन कर्मणोऽचेतनत्वेन तदयोगाज्जगदधीनमिति वक्तुं न युक्तं किन्तु चेतनाधीनमेव चेतनोऽपि न देवदत्तवत्साधारणो भवति अपितु विशिष्ट एव कश्चिदिति श्रीकृष्णहार्दानभिज्ञस्य नन्दगोपस्य मानसीं शङ्कां गूढाभिसन्धिः परिहरति–अस्ति चेदिति। यदि कश्चिदीश्वरोऽस्तीति मतं तर्हि स ईश्वरः कर्मणः फलं सुखादिलक्षणं रूपयति। अनुकूलं करोति ददातीति फलरूपः सहायकल्पः न स्वतन्त्र इत्यर्थः तदेव द्रढयति, कर्तारमिति, फलरूपत्वेन प्रयोजकत्वाज्जगतस्तदधीनत्वमायातम् इत्यतोवाह-कर्तारमिति, सत्वदभिमत ईश्वरोऽपि कर्मकर्तारं भजते फलदातृत्वेनानुवर्त्तते नाकर्मकर्तारं कुत इत्यत आह—न हीति। स ईश्वरः कर्माकर्त्तुः फलदाने प्रभुः समर्थो न हि कस्मात्सामर्थ्याभाव इत्यत्राह–हीति। उद्रेके कारणाभावात् ॥ १४ ॥ अवान्तरेश्वरत्वमभ्युपगम्येदमुदितम् इदानीमीश्वर एव त्वदभीष्टो नापेक्षितः वस्तुतस्तु स्वभावविहितकर्मण एव फलदातृत्वोपपत्तेः

पयःस्यन्दनादिवदित्याशयेनेश्वरमाक्षिपति–किमिन्द्रेणेति। स्वस्माद्भावः सत्ता यस्य स तथा न पराधीनसत्ताकः यद्वा, स्वतन्त्रो भावः स्वभावः तेन नारायणेन विहितं कथितम् अन्यथाकर्तुमनीशेनासमर्थेन ॥१५॥ ननु, यदि स्वभावेनैव कर्म क्रियते तर्हि कर्ता मृद्दण्डसलिलादिबाह्यद्रव्यं किमर्थमपेक्षत इत्याशङ्क्य तदपि स्वभावनियतमित्यतः सर्वं स्वभावाधीनमित्याह–स्वभावेति। हि शब्देन पयःस्यन्दनादिकमपि नारायणकृतमित्यभिप्रैति "एतस्य वाअक्षरस्य प्रशासने गार्गि! प्राच्योऽन्या नद्यः स्यन्दन्ते" इति श्रुतेः स्वभावादिशब्दवाच्यस्य हरेरधीनमिदं सर्वमित्यभिप्रायेणावान्तरेश्वर एवात्र निषिध्यते न तु मुख्येश्वर इत्यत्र आचार्यैः फलरूपः सकर्मण इत्याद्यवान्तरेश्वरविषयमित्यभिधायि—

"स्वभावे कर्मणि च यः सत्वादिषु गुणेषु च। स्थितो विष्णुः सर्वकर्ता पृथक्संस्थश्च सर्वगः" ॥

इत्यादिप्रमाणं च कृष्णहार्दतात्पर्यार्थम् उदाहारि, यद्वा, स ईश्वरः कर्मणो हरेः फलरूपो ज्ञानात्मा कर्त्तारं कर्म भजते अकर्त्तुः अकर्मणः प्रभवतीति प्रभुः तदुक्तम् "तेन जातं फलं यस्मात्कर्मणः फलमीर्यते" इति अस्त्ववान्तरेश्वरः कर्मफलरूपः प्रकृते किमायातमिति तत्राह—किमिति। स्वस्वकर्मज्ञानविषयं बिम्बभूतं भगवन्तम् अनुवर्तिनां प्रतिबिम्बानाम् ननु, त्रैलोक्येश्वरमिन्द्रं कथं कर्मफलभागिति तुच्छीकरोषीति तत्राह–अनिशेनेति। अस्मदभिमतं कर्मशब्दवाच्यं वस्तु कर्मफलभाक् न भवतीत्याशयेन स्वभावेत्युक्तं स्वः स्वाधीनः भावः क्रिया यस्य स स्वभावः तदुक्तं "नचासौ कर्मफलभाङ्नास्य किञ्चिन्न शक्यते" इत्यादि, एतदेवोपपादयति—स्वभावतन्त्र इति। हिशब्देन तेषामवान्तरेशानां विष्णुवशत्वमन्तरेणान्यकर्मवशत्वं नास्तीति दर्शयति, "नान्यकर्मवशत्वं तु तेषां विष्णुविना क्वचित्" इति, स्वभावस्थमिदं सर्वम्" इत्यनेन सर्वशब्दवाच्यत्वं स्वभावस्य हरेरिति सूचितम् "स च ब्राह्मणगिर्यानामाविष्णुरजः पर" इत्यादि स्मृतेः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एषां मत्पित्रादिरूपनित्यपरिकराणां पूजाग्रहणे को नाम इन्द्र इति मन्मदहरणं यद्यपि मनसि वर्त्तते तथापि नरलीलापालनाय तदनुद्घाट्य कर्मवादमेवावलम्ब्याह–कर्मणेति ॥ १३–१४ ॥ भूतानां प्राणिमात्राणां कर्मानुवर्त्तिनां प्राक्तनकर्मानुसारेण सुखदुःखं भुञ्जानानामिन्द्रेण किं कर्मण एव तद्भोगकारणत्वात् तेषु नृणाञ्च कर्मान्तरोपार्ज्जकानां स्वं स्वं स्वभावविहितमन्यथाकर्त्तुमनीशेन तेन किम् ॥ १५ ॥ स्वभावस्यैव तत्तत्कर्मप्रवृत्तिकारणत्वात् ॥ १६–१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नरलीलतयैव इन्द्रमखभङ्गे कर्त्तव्ये युक्तिमुत्थापयन् सद्भिर्विगीतमपि कर्मवादमाश्रित्य देवतां निराकरोति, कर्मणेति ।१३। ननु, जडात् कर्मणः केवलात् कथं फलसिद्धिरतः कर्मफलदाता ईश्वरोऽवश्यापेक्ष्य इत्यपि केषाञ्चिन्मतं तत्राह—अस्तिचेदिति। फलरूपी अन्यकृत् कर्मणां फलदाता सोऽपि कर्तारं भजते अनुसरति कर्मानुसारेणैव फलदानात् व्यतिरेकेण द्रढयति, नेति। हि यतः कर्माभावे फलं दातुं न शक्त इत्यर्थः ॥ १४ ॥ अतोऽजागलस्तनतुल्यत्वान्न देवतया कृत्यमित्याह। किमिन्द्रेणेति। ननु, कर्मण्यपि प्रवृत्तिरन्तर्याम्यपेक्षयैव कथं सर्वथा देवताया अनुपयोग इत्याशङ्क्याह—स्वभावविहितमिति। स्वभावेन प्राक्तनसंस्कारेण विहितं कर्त्तव्यत्वेनोपस्थापितं यत्कर्म तदेव कर्तुमन्तर्यामी जीवं प्रेरयति न त्वन्यदित्यतः स्वभावविहितमेव कर्म अन्यथा कर्तुमसमर्थेन इन्द्रेण पूजनीयेन किं न किमपि फलमित्यर्थः ॥ १५ ॥ एतद्विवृणोति–स्वभावतन्त्रः प्राक्तनसंस्काराधीनः अतः स्वभावमनुलक्षीकृत्य तत्तत्कर्मणि स्वयमेव प्रवर्तते इत्यन्तर्यामिणापि न किमपि फलमिति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कर्मफलदमीश्वरं कालगत्या विस्मृत्य "स्त्रियः कामितकामिन्यो लोकः पूजितपूजकः" इत्यादिशास्त्रोक्ता एव गतानुगतिकाः "तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति" इत्यादिवाक्यमाश्रित्य कर्मफलदाने इन्द्रादीनेव स्वतन्त्रान्मत्वा कर्मभिः पूजयन्ति तानुपशिक्षयितुमिन्द्रादीनां जीवानामीश्वरनैरपेक्ष्येण न कर्मफलदातृत्वं घटते इति वदन् ईश्वरः कर्मफलदोऽस्तीति सूचयति—अस्ति चेदिति द्वाभ्याम्। कर्मणो जडत्वात्स्वफलदातृत्वं नैव घटेत अतः फलं रूपयतीति फलरूपी फलदाता कश्चिज्जीव ईश्वरोऽस्ति चेत् स अन्यः अन्यकर्मणां स्वतोऽत्यन्ततोऽन्येषां यानि कर्माणि तेषाम् प्रभुर्न भवति नापि लोकान्तरगतः लोकान्तरगतानां कर्माणि ज्ञातुं शक्नोति। किञ्च, कर्तारं सोऽपि भजते वृथैव कस्यचित्कर्म कर्तुर्बलिं सेवते इत्यर्थः। नतु फलं दातुं शक्नोति। किञ्च, नाकर्तुः प्रभुर्भवति विहिता कर्तुः सांसारिकफलदानेन सर्वकर्मफलत्यागेन कर्तृत्वाभिमानत्यागेन च योऽकर्ता शास्त्रेण निर्णीतस्तस्य मोक्षदानेनेति भावः ॥ १४ ॥ अतः स्वभावविहितं स्वभावेन अनादिकर्मप्रवाहवशवर्ति जीवस्वभावेन प्राक्तनसंस्कारेण विहितं यत्कर्म तत्फलभूतसुखं दुःखं चान्यथा कर्तुमनीशेनासमर्थेन जीवमात्रेणेत्यर्थः। अनेनेश्वरः सर्वं कर्तुं समर्थोऽस्ति कर्मफलद इति सूचितम् ॥ १५ ॥ अनादिकर्मप्रवाहपतितजीवस्य स्वभावमपि वर्णयति स्वभावतन्त्र इति ॥ १६ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

वेदमूर्त्तिः परेशो नन्दसूनुर्वेदोक्तां देवतामन्तः स्वीकुर्वन्नेव पित्रोक्तामिन्द्रदेवतां कर्मवादादिभिर्निराकर्त्तुं प्रवर्त्तते तत्र कर्मवादिनस्ते देवतापक्षमेवमवमन्यन्ते इत्याह—कर्मणेति। "यथाकारो यथाचारो तथा भवती"ति श्रुतेरिति भावः। न च जडस्य कर्मणः कथमुत्पत्त्यादिकर्त्तृतेति वाच्यं चलति जलं फलति तरुरित्यादौ जडेऽपि कर्त्तृत्व-दर्शनात् ॥ १३ ॥ देवतां फलदां केचन्मन्यते तामेवं ते निराकुर्वन्तीत्याह—अस्ति चेदिति! अस्मदीयकर्मणां फलरूपी फलार्थकश्चेदीश्वरोऽस्ति सोऽपि कर्मापेक्षः सन् कर्मकर्त्तारं भजते हि यतः स कर्माकर्त्तुः प्रभुः फलदो न भवनान्यथा वैषम्यापत्तेः तथा च कर्मणैव फलोपपत्तौ किमन्तर्गडुना देवतयेति देवताकाण्डन्तु कर्मस्वातन्त्र्यानास्थान् देवतास्वातन्त्र्यव्यपदेशेन कर्मसु प्रवर्त्तयितुं ज्ञानकाण्डवद् यजमास्वरूपावगमेनेत्याहुः ॥ १४ ॥ ननु फलदात्री देवता मा भूत् प्रवृत्तये तु सङ्गीकार्येति चेत्तत्राहुः—स्वं स्वं कर्मानुवर्त्तिनां नृणां स्वभावेन प्राक्तनसंस्कारेणाशीलशब्दितेन विहितं कर्मान्यथाकर्तुमनीशेनेन्द्रेण किं न किमयं "स्वभावः प्रकृतिः शीलम्" इति धनञ्जयः। तथा च पूर्वसंस्कारादेवोत्तरकर्मणि प्राणिनां प्रवृत्तिस्ततः कर्म ततः फलमिति किं देवतया चेतनतया जडे प्रवृत्तेरुक्तेश्च ॥ १५ ॥ एतदेव विवृण्वन्ति स्वभावतन्त्र इति कर्मसु प्रवृत्तेः पूर्वसंस्कारायत्तत्त्वात्तदभ्युपगमो न चारुरित्यर्थः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सति तत्फलोपलम्भके कर्मणि सर्वं सम्पद्यते तच्च भगवन्नियतमिति किमन्तर्गडुना शचीशेनेत्याह ॥ कर्मणेति। ईशेरितेन कर्मणा जन्तुर्जायते कर्मणैव प्रलीयते लयमाप्नोति सुखदुःखं भयं मोक्षं कर्मणा हरिणा। उक्तं बृहद्भाष्ये। कर्मनामा तु भगवान्फलदातृत्वतो हरिरिति। अभिपद्यते ॥ १३ ॥ अस्ति चेदीश्वरः कश्चिदिति श्लोके लोकेशो भवतीश्वरपदार्थश्चेद्प्रभुत्वादिकं न सम्भवति किञ्च फलं मुख्यमिति च प्रतीयत इत्यत ईश्वरपदार्थोऽत्रायमित्याह ॥ फलरूपः सकर्मण इत्याद्यवान्तरेश्वरविषयमिति। फलरूपः स कर्मण इत्यत्र पद्ये आदिभूतमस्ति चेदीश्वरः कश्चिदिति वाक्यमवान्तरो मुख्य ईश्वर एव विषयो यस्य तत्तथाऽतो प्रभुत्वं फलमुख्यता च सम्भवत इति व्याकुर्वते। फलनिरूपकतामात्रं प्रतीयते तच्च निरवधिकेश्वरतां बबाध इत्यत आह ॥ फलरूप इति। फलरूपः स कर्मण इत्यादिपादत्रयं प्रथमपादोदितावान्तरेश्वरविषयमिति वाऽन्वयार्थौ ज्ञेयौ। ततश्चायं मूलार्थः ॥ कर्माणि तानि च पृथक् चेतनान्येव सर्वशः। अचेतनशरीराणि स्वकर्मफलभाञ्जि चेत्युक्तेरचेतनानां स्वतोऽप्रवर्तकमिव चेतनानामस्वतन्त्रतया प्रवर्तकत्वेन कश्चिदीश्वरोऽणुरोद्धव्यः स च न निरवधिक एवेति स्वाभिप्रेतमेयमजानतो नन्दस्य स्वाभिप्रेतमनाविष्कुर्वन्पातनिकाशङ्कां परिहरति ॥ अस्ति चेदिति। ईश्वरः कश्चिदवान्तरोऽस्ति चेत्तर्हि स कर्मणः फलरूपः फलं रूपयति सुखदुःखादिकं निरूपयति वा प्रतिष्ठापयति वैतस्य कर्मण एतत्फलमिति स फलरूपः सोऽपीश्वरोऽपि कर्तारं भजते फलदातृत्वेन वर्तते हि यतः सोऽकर्तुर्न कर्मकर्ता तस्य प्रभुः फलदाने न समर्थ उक्ताननुष्ठाने न फलप्रापणाशक्तः स इत्यर्थः ॥१४॥ किमिन्द्रेणेह भूतानां स्वभावतन्त्रो हि पुमानित्यत्र स्वभावस्य स्वातन्त्र्यमुच्यते। तथा देहानुच्चावचानिति श्लोके च कर्मैव गुरुरीश्वर इति कर्मणः स्वतन्त्रतोच्यते। अपि च सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतव इति पद्ये च सत्त्वादीनामेव स्वातंन्त्र्यमुच्यत इति भाति न च तद्युक्तं। द्रव्यं कर्म च कालश्च स्वभावो जीव एव च। यदनुग्रहतः सन्ति न सन्ति यदुपक्षयेत्यादिमानावमानितत्वादिति स्वयं मानेन तत्तात्पर्यमाह ॥ स्वभाव इति। स्वभावे योग्यतायां कर्मणि पुण्यापुण्यप्रापके सत्त्वादिषु च गुणेषु चात्प्रकृतौ स्थितो विष्णुः सर्वकर्ता न तु स्वभावादिकं स्वतन्त्रं किन्तु तदन्तर्गतो भगवान्कर्ता तेभ्यः स्वभावादिभ्यः सर्वशः सर्वभेदकधर्मैः पृथक् संस्थस्तत्तदन्तर्गतस्य तत्वेदादिवेद्यतेति वाऽऽह ॥ सर्वशः पूर्णसुख इति। गुणकर्मस्वभावादिशब्दवाच्यः। सर्वनामा सर्वकर्मेत्यादेः। अपिपदेन फलरूपादिपदवाच्यताऽपि ग्राह्या। तत्र फलरूपपदार्थः किं फलात्मकता किंवा फलवत्ता न द्वयमपि सर्वविलक्षणस्य तत्त्वानुपपत्तेः। अपूर्णतापत्तेश्चेत्यतः फलरूपपदार्थं निरूपयन्मानमुदाहरति ॥ तेनेति। येन कारणेन यस्माद्धरेस्तत्करुणया वा। कर्मण इत्यावर्तते। कर्मणः करोऽस्मिन्मीयत इति कर्म जीव उदाहृत इति गीतातात्पर्योज्जीवजातस्य। तथा कर्मणः कृतस्य फलं जातं तेन कारणेन कर्मणो भगवानफलमितीर्यते न तद्धे दात्तद्वत्त्वाद्वेति। तथा च कर्मफलं रूपयतीति कर्मफलरूप इति विग्रह इति सूचितं भवति। असौ भगवानवान्तरेशवत्कर्मफलवान् न च पूर्वैव पूर्णत्वादिति भावः। न ह्यकर्तुः प्रभुर्हि स इत्यवान्तरेश्वरविषयोक्तमप्रभुत्वादिशङ्कां कर्मापेक्षयैव वितरति फलमयं किंवाऽनपेक्ष्य। नाद्यः। स्वातन्त्र्यहानिः स्यात्। द्वितीये सर्वसर्वदानं वाऽऽदानमेव वा स्यादिति प्रापय्य तामपाकरोति ॥ नास्य किञ्चिन्न शक्यत इति। अस्यानेन किञ्चिन्न शक्यमिति न सर्वं शक्यं कर्म कारयित्वैव तत्तद्योग्यं फलं यच्छति न कुर्यामित्यवस्थानं दुःखस्थं। न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्मेत्यादेः। तर्हि तथा तत्तथा कर्म कारयितुर्भगवतोऽन्ततो वैषम्यादिदोषानुषङ्ग इति तु वैषम्यनैर्घृण्ये नेत्यादिसूत्रे न वैषम्यनामकमित्यादिना निराकार्यम्। अवान्तरेश्वरे कर्मफलरूपशब्दप्रवृत्तिं निरूपयति ॥ तदन्येति। भगवदितरावान्तरेशानां सदा यतस्तद्वशत्वं तत्तत्कर्माधीनत्वं। अतस्तेषां कर्मणः फलरूपत्वं तदप्येतत्कर्ममर्म मत्वा फलं दिशेतीतिशशासनादेव तत्तद्वशत्वमीशानामवान्तराणामित्याह। तेषां विष्णुं विना कचिदप्यन्यत्कर्मवशत्वमपि न नास्तीति। तुश्च स्वस्वोत्तमज्ञाप्यधर्मैरपेक्षणीयेति विशेषसूचकः। अन्यकर्मवशत्वं जडकर्मवशत्वं न तदन्तर्गतस्वोत्तमवशत्वं तेषां तु। तेषां तु तेषामुत्तमानामपि विष्णुं विनेति कृष्णेनोच्यमाना न तत्सत्क्रिया युक्ता। न चायुक्तं वदति यदुनाथः स

इति सम्भवतीत्यतः प्रमाणेन तत्तात्पर्यमाह ।। स चेति । ब्राह्मण इति गीरित्यादी येषां तानि च तानि नामानि यस्य सः । अज उत्पत्तिरहितः परः क्षराक्षरविलक्षणो विष्णुरेतस्माद्ब्राह्मणादिनामवत्त्वहेतोः कृष्णः शक्रस्य कारणात् । ल्यब्लोपनिमित्ता पञ्चमी । कारणं तदस्वातन्त्र्यादिकमिव स्वस्वातन्त्र्यादिकं च प्रदर्श्य विमदाय मदाभावाय गिर्यादिस्थितमात्मानं स्वयमेव बल्लवैर्गोपालैः पूजयामास । एतस्मात्कारणादित्यन्वयने कारणशब्दो व्यर्थ इति सत्येवमन्वयने सार्थक इति ज्ञेयं । इति च तन्त्रभागवत इति शेषः ।। ततश्चायमस्ति चेदीश्वरः कश्चिदित्यारभ्याध्यायावसिति मूलार्थः ।। अवान्तरेश्वरप्रभावं प्रतिषिध्य स्वप्रभावमर्थात्साधयति ।। किमिति । इन्द्रेणेह भूतानां क उपकारस्तानि भूतानि किमधीनानि भूतानीत्यत आह ।। स्वस्वेति ।। स्वानि स्वानि यानि कर्माणि तान्यनुवर्तितुं शीलं येषां तानि नृणां स्वभावविहितं योग्यतायातमन्यथाकर्तुं सुखदुःखं वा स्वेच्छानुसारेण योजयितुं त्याजयितुं वाऽनीशेनासमर्थेनावान्तरेश्वरेण किं न किमपि प्रयोजनं । स्वभावादिपदानि तत्थत्वात्तत्स्वाम्याद्वा माधवाभिधानानीति ज्ञेयं । तत्पक्षे स्वस्मिन्भावः स्थितिर्यस्य स स्वभावः । स्वे महिम्नि प्रतिष्ठित इति श्रुतेः । स्वाख्यो भावोऽनन्यापेक्षनित्यसत्तावान्वा ।। १५ ।। हि यतो जनः स्वभावतन्त्रः स्वभावो हरिस्तन्त्रं कारणं यस्य सः । तन्त्रं कुटुम्बकृत्ये स्यात्कारणं च परिच्छद इति विश्वः । अतः स्वभावं हरिमनुवर्तते । इदं सदेवासुरमानुषं सर्वं । स्वभावे तिष्ठतीति तत्तथा । हिशब्दोऽस्य सर्वस्यार्थस्य तन्त्रभागवतावगतत्वसूचकः ।। १६ ।।

श्रीसुबोधिनी

प्रथमतो भगवान् हेतुपक्षं वारयति **कर्मणे**ति, **हेतुवादे हृदयारूढे साक्षाद्ब्रह्मवादो न वक्तव्य** इति तेषां तन्निष्ठात्याजनार्थं कालकर्मस्वभाववादा उपपन्नाः, तत्रापि कालवादो गूढः शीघ्रं हृदयारूढो न भवत्यतो ज्योतिर्विद एव तत्र निपुणाः कर्मस्वभाववादौ तूपपत्तावुत्पत्तौ चोपयुज्येते अत उपपत्त्यर्थं प्रथमतः कर्मवादमाह **कर्मणा जायत** इति, यादृशं हि शुभाशुभं **कर्म** तेन कृत्वा प्राणी देवस्तिर्यङ् मनुष्यो वा भवति यतः सर्वं **जायते** यस्मिन् प्रतिष्ठितं येन च **लीयते** तदेवोपास्यं भवत्यतः प्राणी **कर्मणा जायते कर्मणैव** च म्रियते, शुभाशुभभोगे समाप्ते विपरीते कर्मणि म्रियते, स्थितावपि कर्मैव हेतुरित्याह **सुखं दुःख**मिति, जीवन् प्राणी कदाचित् सुख प्राप्नोति कदाचिद् दुःखं प्राप्नोति कदाचिद् **भयं** कदाचिद् **क्षेम**मिति एतत् सर्वं कर्माभावे नोपपद्यते ।।१३।। ननु कथं कर्मणः कारणत्वं जडं हि कर्म फलं हि चेतनस्य चेतन एव प्रयच्छति स्वामिसेवकयोस्तथादर्शनात् तस्मादीश्वरवाद एव सत्यो न कर्मवाद इति चेत् तत्राहा**स्ति** चेदिति, आदावीश्वर एव नास्ति प्रयोजनाभावत् , **कर्मसिद्धान्तानभिज्ञो हि मूर्ख ईश्वरं मन्यते**, वेदो हि बोधयति कर्म फलसाधनत्वेन कृते च कर्मणि फलं भविष्यतीति, यथा भोजने तृप्तिर्यथा बीजावापे फलं यथा शयने निद्रैवमलौकिकेपि **कर्मणैव** फलं भवति, न चानधिष्ठितं कथं साधयेदिति वाच्यं, चेतनो हि जीवस्तस्याधिष्ठाता, न च कर्मानित्यमिति कथं फलसाधकं ? कर्मणो नित्यत्वात् तदानीमेव सूक्ष्मस्वर्गजननाद् बीजाद् गर्भाधानवददृष्टद्वारा वा, अन्यथानुपपत्त्या कल्पितमदृष्टं तादृशमेव कल्पनीयं यदितरानधिष्ठितमेव फलं जनयतीति; अस्तु वेश्वरः कल्प्यमानोप्यकिञ्चित्कर एव सूपकारवज् जीवशेष एव भवेद् यादृशं यस्य कर्म तादृशं तस्मै सिद्धं कृत्वा प्रयच्छतीति, तदाहान्य**कर्मणां** जीवकर्मणां फलनिरूपकः **ईश्वरः कश्चिदस्ति चेत् सोपि कर्तारमेव भजति** तत्कर्मफलं तत्कर्त्रे प्रयच्छति नान्यस्मै, **सोपि न ह्यकर्तुः प्रभुः**, स्वतन्त्रेश्वरबाधे तु वैषम्यनैर्घृण्ये स्यातामातः सर्वथेश्वरवादः समीचीनो न, **हैतुकोयमीश्वरो निषिध्यते न प्रामाणिकः**, तस्य हेतुनापि निषेधासम्भवात् ।। १४ ।। न ह्यप्रयोजकोपि भर्ता निषेद्धुं शक्यते तस्मात् प्रमाणाभावे हेतुसिद्ध ईश्वरो नाङ्गीकर्तव्यः, तदाह **किमिन्द्रे**णेति इह कर्मफलदाने **स्वं स्वं कर्मानुवर्तिनां भूतानामिन्द्रेण किं** कार्यम् ? कर्मानुवृत्तिरीश्वरेणापि निषेद्धुं न शक्यत उपजीव्यत्वादत ईश्वरं साधयन्ननीश्वरमेव साधयति तदाहानीशेनान्यथा कर्तुमिति, **अन्यथा कर्तुमनीशेना**समर्थे**नेश्वरेण** किं प्रयोजनम् ? ननु कर्मकरण ईश्वरो हेतुर्भविष्यति 'तं साधु कर्म कारयति यमुन्निनीषति तमसाधु कर्म कारयति यमधो निनीषती'तिश्रुतेः, अयमपि पक्षो नाङ्गीकर्तव्योन्यथोपपत्तेः, कर्मकरणे स्वभाव एव हेतुः, यदि सत्त्वमभिव्यक्तं साधु कर्म करोति रजश्चेन् मध्यमं तमश्चेदधममिति ततो **नृणां स्वभावविहितमेव** कर्म स्वभावेनैव सिद्धं, **अन्यथा कर्तुं** समर्थो न भवतीश्वरोतो नाङ्गीकर्तव्य इत्यर्थः ।। १५ ।। ननु स्वभावप्रबोधनार्थमीश्वरोङ्गीकर्तव्य इति चेत् तत्राह **स्वभावतन्त्रो हि जन** इति, यदि **स्वभावः** परिच्छिन्नो देशतः कालतश्च स्यात् तदा तत्प्रबोधार्थमीश्वरोङ्गीकर्तव्यः स्यात् स्वभावस्त्वादौ जीवं वशीकरोति तदा जीवः स्वभाववशगो भवति तदा बन्धे पतित इव **स्वभावतन्त्रः सन् स्वभावमेवानुवर्तते** यस्य यः स्वभावो भवति सात्त्विकादिः, नन्वस्वभाववशानामर्थ ईश्वरोङ्गीक्रियतां तत्राह **स्वभावस्थमिदं सर्व**मिति, **सर्व**मेव जगत् **स्वभाव** एव तिष्ठति, **देवाः** सात्त्विका **असुरा** राजसा **मानुषा**स्तामसास्त्रिविधैरपि जीवैः सहितं जगत् **स्वभावस्थ**मेव ।। १६ ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

कर्मणेत्यत्र उत्पन्ना इति वक्तव्यत्वेन भगवन्मनसीतिशेषः ।। १३ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यदुक्तं 'पर्जन्यः फलभावनः. इति; तत् प्रतिक्षेप्तुकामस्तावज्जन्मादिसर्वस्य कर्माधीनत्वमाह– कर्मणेति । जन्तुर्जीवमात्रं उत्पद्यते, लीयते म्रियते, सुखादिकं च कर्मणैवाभिपद्यते प्राप्नोति । एवकारेणान्यस्य तत्र हेतुत्वं निराकरोति । क्षेमं निर्भयत्वम् ।

'शास्त्रेषु युक्तिसिद्धोऽयमर्थ' इत्याशयेनाह—हीति ॥ १३ ॥ ननु 'कर्मणा तज्जनितापूर्वस्य च जडत्वात् कथं तत एव केवलाद्विचित्रफलसिद्धिः, अतः कर्मफलदाता सर्वज्ञ ईश्वरोऽवश्यमपेक्ष्य' इत्याशङ्क्याह—अस्ति चेदिति। अन्यतमस्य कर्मणां फलं रूपयति कल्पयति ददातीति तथाभूतः कश्चिदीश्वरोऽस्ति चेत्तर्हि सोऽपि कर्तारमेव भजते, यो यत्कर्म करोति तस्मा एव तत्फलं ददाति स ईश्वरः। कर्माकर्तुः प्रभुः फलदाता तु नैव भवति। हिशब्दद्वयमवधारणे ॥ १४ ॥ अतः सर्वस्य कर्माधीनत्वात् स्वं स्वं कर्मानुवर्तिनां भूतानामिह लोके इन्द्रेण किं प्रयोजनं सिद्ध्यति ? न किमपीत्यर्थः तत्र हेतुमाह–अनीशेनेति। नृणां स्वभावेन पूर्वसंस्कारेण विहितं कारितं कर्म तदधीनं सुखदुःखादिकं च अन्यथा कर्तुं विपरिवर्तयितुमनीशेन असमर्थेनेत्यर्थः ॥ १५ ॥ स्वभावाधीनत्वमेव स्पष्टयति स्वभावतन्त्र इति। अयं जनः प्राणिमात्रं स्वभावतन्त्रः स्वभावाधीन एव। हीति एवार्थे। अतः स्वभावमेवानुवर्तते स्वभावानुसारेणैव लौकिकालौकिकधर्माधर्मादिक्रियासु प्रवर्तते इत्यर्थः। नच "कश्चिदेवैवं स्वभावाधीनः किंतु सर्वमपि जगत्" इत्याह—स्वभावस्थमिति ॥ १६ ॥

अन्वितार्थप्रकाशिका

कर्मणेति ॥ जन्तुर्जीवमात्रं कर्मणा जायते कर्मणैव लीयते म्रियते सुखं दुःखं भयं क्षेमं च कर्मणैवाभिपद्यते। मीमांसाशास्त्रप्रामाण्याज्जडादपि कर्मणः फलाङ्गीकारः ॥ १३ ॥ केचित् कर्मफलदमीश्वरं मन्यन्ते तान्निराकरोति—अस्तीति ॥ स्वयं कर्मभिरभिरलिप्तोऽप्यन्यस्य कर्मणां फलं रूपयति ददाति। तादृशः ईश्वरः कश्चिदस्ति चेत् तर्हि सोऽपि कर्त्तारमेव भजते। यो यत्कर्म करोति तस्मा एव तत्फलं ददाति। हि यतः स ईश्वरः कर्माकर्तुः प्रभुः फलदाता तु नहि नैव भवति ॥ १४ ॥ किमिति ॥ अतः स्वं स्वं कर्मानुवर्त्तिनां भूतानामिह लोके नृणां स्वभावेन पूर्वसंस्कारेणैव विहितं कारितं कर्म तदधीनं सुखदुःखादिकं चान्यथा कर्तुं विपरिवर्तयितुमनीशेनासमर्थेन इन्द्रेण किं प्रयोजनं सिद्ध्यति न किमपीत्यर्थः ॥ १५ ॥ एतद्विवृणोति—स्वभावेति ॥ अयं जनः प्राणिमात्रं स्वभावतन्त्रः स्वभावाधीन एव। हीति एवार्थे। अतः स्वभावमनुवर्त्तते अनुसरति। अतः सदेवासुरमानुषं देवादिसहितमिदं सर्वं जगत् स्वभावस्थं स्वभावाधीनम्। प्रवृत्तेः संस्काराधीनत्वात् किमन्तर्यामिणापि इति भावः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं वेदविरुद्धेन कर्मवादेन देवानामसमर्थत्वं कर्मणस्तु समर्थत्वं च निरूपयन्नाह कर्मेति शुभेनाशुभेन च कर्मणा ॥ १३ ॥ अन्यकर्मणां अन्येषामीश्वराद्भिन्नानां जीवानां यानि कर्माणि तेषां फलरूपो फलानि रूपयति प्रकटीकरोतीति तथाभूतोजीवकर्मफलप्रदाता यः कश्चिदीश्वरोस्ति चेत्तर्हि सोऽपि कर्त्तारं भजते कृतानां कर्मणां फलप्रदानेन कर्मकर्त्तुः सुखदुखजनको भवतीत्यर्थः कर्मणामकर्त्तुः स ईश्वरः प्रभुः सुखदुःखदो न भवति ॥१४॥ कर्मपराधीनत्वाज्जीवानां देवैः किमुत्स्यादित्याह किमिति। इह लोके स्वं स्वकीयं स्वकीयं कर्मानुवर्त्तिनां तदनुसृत्य वर्त्तमानानां भूतानां देहिनामिंद्रेण किं स्यात् कथंभूतेन तेन नृणां स्वभावविहितं स्वभावेन प्राचीनसंस्कारेण विहितं निर्मितं यत्सुखदुःखं तदन्यथा कर्त्तुं अनीशेनासमर्थेन ॥ १५ ॥ तदेव विस्तरेणाह स्वे ते स्वभावतंत्रः स्वस्मिन्भावः सात्त्विकादिकर्मानुसारिणी वासना स्वभावस्तस्य तंत्रो धीनो जनः स्वभावं प्राचीनसंस्कारानुसारिणीं प्रकृतिमनुवर्त्तते अनुसृत्य वर्त्तते देवादिसहितं सर्वमिदं विश्वं स्वभावस्थमेवास्ति ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ केचित् पुनः कर्मतः फलसिद्धिप्रतिपादनरूपातिसाहसभीताः कर्मपरतन्त्रमीश्वरं मन्यन्ते तन्मतमनूद्य निराकरोति ॥ अस्ति चेदीश्वर इति ॥ अन्येषामीश्वराद्भिन्नानां जीवानां यानि कर्माणि तेषां, फलानि रूपयति प्रकटीकरोतीति फलरूपी फलप्रदाता, यः कश्चित्, ईश्वरः स्वयं कर्मभिरलिप्तः कश्चनेश्वर इत्यर्थः। अस्ति चेत्, अस्तु स ईश्वरोऽपि, कर्त्तारं हि कर्मकुर्वाणमेव, भजते। फलदानेनेति शेषः। कृतकर्मभ्य एव फलं ददातीत्यर्थः। स चेश्वरः सन्नपि, अकर्त्तुः प्रभुः, न हि नैवास्ति। अकर्त्तृभ्यः फलं दातुं न प्रभवेदित्यर्थः ॥ १३ ॥ एवं कर्मण एव फलसिद्धेः सत्त्वाज्जीवानां तत्पारतन्त्र्येण वर्त्तमानत्वात् तादेतरस्याजागलस्तनतुल्यताभाक्त्वाच्च न देवतया कृत्यमस्तीत्याह ॥ किमिन्द्रेणेति। नृणां, स्वभावविहितं प्राक्तनसंस्कारेणैव विहितं यत्कर्म, तदन्यथा कर्त्तुं, अनीशेन इन्द्रेण, इह संसारे, स्वं स्वं कर्म, अनुवर्त्तिनां, भूतानां प्राणिनां, किम्। इन्द्रेण किं कृत्यमस्ति न किंचित् ॥ १४ ॥ नन्विन्द्रस्यैवमकिंचित्त्वं भवतु नाम कर्मणोऽपि प्रवृत्तिरन्तर्याम्यपेक्षिकैवास्त्यतः कथं सर्वथा देवताया अनुपयोग इत्युच्यते इत्याशङ्क्याह ॥ स्वभावतन्त्र इति ॥ अयं जनः, स्वभावतन्त्रः प्राक्तनसंस्काराधीनः, हि अतः, स्वभावं, अनुवर्त्तते स्वभावमनुरुध्य प्रवर्त्तते। अतः सदेवासुरमानुषं देवासुरमनुष्यसहितं सर्वं, इदं विश्वं, स्वभावस्थं एव देवा अपि प्राक्तनसंस्काराधीना यतोऽतः प्रवृत्तेः संस्काराधीनत्वात्किमन्तर्यामिणेत्यर्थः। अस्यायं भावः। अन्तर्यामीतीश्वरः सोऽपि कर्मणैव यमयन् साक्षीति। संस्कारस्यापि कर्मजन्यत्वादाद्यः कश्चित्प्रवर्त्तकोऽपेक्षते एवेति चेत्, प्रपञ्चस्यानादित्वान्न तदपेक्षा ॥ १५ ॥ तस्मात् स्वभावतो निष्पन्नस्य कर्मण एव सर्वकारणत्वात् कर्मणैव सृज्यमित्याह देहानिति सार्द्धेन ॥ देहानिति ॥ जन्तुः, उच्चावचान्, देहान्, कर्मणा प्राप्य, उत्सृजति।

पूर्वं शत्रुः, पश्चात् मित्रं, दृश्यते, मित्रमपि उदासीनः, दृश्यते। अतः तत्कर्म एव कर्मनिमित्तकमेवेत्यर्थः। गुरुरपि, ईश्वरोऽपि, कर्मैव ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कर्मणेति : १०.२४.१३.

सुखं वा दुःखं वा धनमधनता वा स्वसुहृदां सदास्थाऽनास्था वा सुहृदरिपदैर्वा व्यवहृतिः।
तथा प्राप्त्यप्राप्ती समभिलषितस्यैवमखिला व्यवस्थाऽहं मन्ये भवति भुवि भोगाय विधितः ॥ १४ ॥
पत्नी संसृतितारणी गुणवती पुत्रः कुलोद्धारको वर्ष्मानामयमिष्टमन्नमुचितं वासोऽपि पश्वादयः।
विद्याद्रव्यमजातशत्रुवसतिः पूर्णायुरेतद् ध्रुवं प्रारब्धैकनिदानमेतदवनौ नैवानुमन्यते कः ॥ १५ ॥
विधौ सति च केवले स्फुटललाटलेखे भवत्यभीप्सितमनिष्टतोऽप्यरमिहेष्टतोऽप्यन्यथा।
स राहुरगमत् सुधाभुगपि यत्तदा पञ्चतां पिबन्नपि विषं भवो भुवि बभूव मृत्युञ्जयः ॥ १६ ॥
अहो जनक हे जना विदितमस्ति वः सर्वमप्यथापि भृशमुच्यते निखिललोकदृष्टं यतः।
गुरोर्निपतनं लघोरुपरि यानमुच्चावचं क्रिया दिशति तत्क्षितौ फलमितीव मे निर्णयः ॥ १७ ॥
असाधौ दुष्टत्वं सति सुजनता योषिति तथा सतीधर्माधर्मौ मनसि चलताऽद्रौ च गुरुता।
समभ्यस्तं नैतेरकथि न च वा कैरपि परैस्ततो मन्ये गोपा निखिलमपि नैसर्गिकमिदम् ॥ १८ ॥
अग्नावौष्ण्यमनौष्ण्यमप्सु धरणौ सर्वंसहत्वं सदागामित्वं पवने यथा च सहजं क्षाराम्बुधेर्वारिणः।
पीयूषाधिकमाधुरीकरणमप्यब्देऽपि तद्वत्पितः सिद्धा वर्षुकता स्वभावत इतीन्द्रेणात्र किं साध्यते ॥ १९ ॥

अस्ति चेदिति : १०.२४.१४.

इन्द्रः प्रभुर्यदि सहस्रभगप्रयुक्तं कस्माद् भुनक्त्यसुखमङ्ग सुदुःसहं तत्।
अन्वीहते कृपणवत्किमु वाऽन्नमस्मत् तत् तात कर्मकलितः सकलोऽपि लोकः ॥ २० ॥
स्वातन्त्र्यादुत कर्मणा सुरपदं भुङ्क्ते स युष्मन्मतमाद्यं चेदसुरात्पराभवमहो प्राप्नोति बिभ्यत्कुत।
अन्त्यं चेत्समुपागतं मम मतं कर्मैव पूज्यं ततो यः स्यादत्र शतक्रतुः स भविता शक्रः सुराधीश्वरः ॥ २१ ॥

किमिन्द्रेणेति : १०.२४.१५

उत्पत्तावथवनेऽथवाऽस्य विलये कर्तृत्वमस्मिञ्जने कुत्राश्रावि शतक्रतोर्यदधुना यत्नस्तदीयार्जवे।
पर्जन्यादयमौषधीर्जनयतीत्येष ग्रहश्चेत्तदा भोक्तृप्राकृतकर्मभिः स्वफलदैः स्थेयं विधायात्र किम् ॥ २२ ॥
स्वोपकारिणि स चेदुपकारीत्याग्रहस्तदिह किं न करोति। रत्नदायिनि किलामृतदेऽब्धौ क्षारचिह्नहरणादुपकारम् ॥ २३ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण ने कहा–पिताजी ? प्राणीमात्र निज निज कर्म के अनुसार उत्पन्न होते है और मृत्यु पाते हैं। सुख दुःख, भय कल्याण, उन्हें कर्म के अनुसार ही मिलते हैं ॥ १३ ॥ पिताजी ! यदि जीव को कर्मों का फल प्रदाता ईश्वर है तो भी वह परमेश्वर कर्म करने वाले को ही कर्म के अनुसार फल देता है जो मनुष्य कर्म नहीं करता उसका वह नियन्ता नहीं है ॥ १४ ॥ इसलिये जब जीवों को निज निज कर्मों का अनुसरण करना पड़ता है, तब उनको अल्पवीर्य इन्द्र से क्या प्रयोजन ? पूर्व संस्कार के अनुसार मनुष्यों के भाग्य में जो लिखा है उस फल को इन्द्र कभी पलट नहीं सकता अथवा तो विपरीत नहीं कर सकता ॥ १५ ॥ मनुष्य मात्र स्वभाव के अधीन है। स्वभाव पूर्व संस्कारों का ही स्वरूप है। जीवमात्र स्वभाव का ही अनुगमन करेंगे। सात्विक देवलोग, राजस असुर लोग एवं तामस मनुष्य लोग ये सब मिल कर स्वभाव के वशीभूत है और स्वभाव के अनुसार ही चलता है ॥ १६ ॥

देहानुच्चावचाञ्जन्तुः प्राप्योत्सृजति कर्मणा। शत्रुर्मित्रमुदासीनः कर्मैव गुरुरीश्वरः ॥ १७ ॥
तस्मा सम्पूजयेत् कर्म स्वभावस्थः स्वकर्मकृत्। अञ्जसा येन वर्तेत तदेवास्य हि दैवतम् ॥ १८ ॥
[1]आजीव्यैकनरं भावं यस्त्वन्यमुपधावति[2]। न तस्माद् विन्दते क्षेमं [3]जारान्नार्यसती यथा ॥ १९ ॥
वर्तेत ब्रह्मणा विप्रो राजन्यो रक्षया भुवः। वैश्यस्तु वार्तया जीवेच्छूद्रस्तु द्विजसेवया ॥ २० ॥

---

१. "आजाव्यैक" श्लोकः "न नः पुरो" श्लोकस्य पश्चाद् वर्तते। २. धावति–वीर. विज. ; जीवति–श्रीधरादयः। ३. जारं वा–श्रीधर. वंशी जीव. वीर. विज. विश्व. रा. घ. शु. सु।

कर्दमक्षमा

अन्वयः—जन्तुः कर्मणा उच्चावचान् देहान् प्राप्य उत्सृजति, कर्मणा शत्रुम् मित्रम् उदासीनः भवति, कर्म एव गुरुः एवम् ईश्वरः ॥ १७ ॥ तस्मात् स्वभावस्थः स्वकर्मकृत् कर्म सम्पूजयेत्, येन अञ्जसा वर्तेत तत् एव हि अस्य जीवनम् ॥ १८ ॥ यः तु आजीव्यैकतरम् भावम् अन्यम् उपजीवति, सः, यथा असती जारात् नरात् क्षेमम् न विन्दते तथा तस्मात् क्षेमम् न विन्दते ॥ १९ ॥ विप्रः ब्रह्मणा वर्तेत, राजन्यः भुवः रक्षया वर्तेत, वैश्यः तु वार्तया वर्तेत शूद्रः तु द्विजसेवया जीवेत् ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्मात्स्वभावतो निष्पन्नस्य कर्मण एव सर्वकारणत्वात् कर्मैव पूज्यमित्याह । देहानिति सार्धेन ॥ १७ ॥ संपूजतेत्संमानयेत् । ननु देवतोद्देशेन द्रव्यत्यागात्मकत्वात्कर्मणः कथं देवतां विना सिद्धिरित्याशंक्य कर्मागमात्रं देवतेति पक्षमुपसंहरन्निव हेतुवादमाश्रित्यान्यामेव देवतां समर्थयते । अंजसेति ॥ १८ ॥ हेतुबलेनैव विपक्षे दोषमाह । आजीव्येति । उपजीवति सेवते ॥ १९ ॥ स्ववृत्तिं वक्तुं दृष्टांतत्वेन वर्णानां वृत्तिभेदमाह । वर्त्तेतेति । ब्रह्मणा वेदाध्यापनादिना ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतः स्वभावायत्तं सर्वं तस्माद्धेतोः । शुभं कर्म मित्रम्, अशुभं शत्रुः, उभयविलक्षणविपणाक्षक्रीडादि उदासीनः । अंतःकरणशुद्धिद्वारा ज्ञानहेतुत्वाद्गुरुः "कषायपक्तिः कर्माणि ततो ज्ञानं प्रवर्तते" इति श्रुतेः । यागादिरूपमैश्वर्यहेतुत्वादीश्वर इति विवेकः ॥ १७ ॥ यतः कर्मैव मुख्यं सर्वतः तस्मात् । स्वभावस्थः प्राक्तनसंस्कारानुविधेयः । स्वकर्मकृत् विहितकारी सन् । पुनः जडत्वात्केवलकर्मणः फलदातृत्वमघटमानं मत्वा शंकते—नन्विति । अंगं देवतांगि कर्मेति पक्षे, तुष्यतु दुर्जनः' इति न्यायमाश्रित्येवशब्दं प्रयुंक्ते–उपसंहरन्निवेति । वस्तुत उपसंहारस्तु यागांत एवेति हेतुवादं तर्कबलेन हेत्वंतरं संभाव्य, अन्यां शैलगवादिरूपाम् । अंजसा तत्त्वेन । 'अंजसा त्वरिते तत्त्वे' इति यादवः । येन अनिरुक्तेन कर्मणा वर्तेत सदा तिष्ठेत् । अस्य पुरुषस्य तदेव सदा स्थितिहेतुः । [दैवतम् कुलदैवम् । हि प्रसिद्धम् ॥ १८ ॥ विपक्षे एतत्पक्षानंगीकारे । आजीव्य आश्रित्य । एकतरं मुख्यं भावं देवादिरूपम् । अन्यम् गौणम् । तस्मात् गौणात् ॥ १९ ॥ स्ववृत्तिम् निजजीवनम् । आदिना यागाध्ययनादिग्रहः । यद्वा–ब्रह्मणा तपसा कृच्छ्रचांद्रायणादिरूपेण 'वेदस्तत्त्वं तपो ब्रह्म' इत्यमरः । वार्तया कृष्यादिरूपया ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्राप्योत्सृजति प्राप्नोति त्यजति चेत्यर्थः । शत्र्वादयोऽपि कर्मैव एकस्यैव कदाचिच्छत्रुतायाः कदाचिन्मित्रतायाः कदाचिदुदासीनतायाश्च दर्शनात् । ननु, ज्ञानं विना कर्मसु अप्रवृत्तेः ज्ञानार्थमुपदेष्टारमवश्यमपेक्षते तत्राह—गुरुरिति । अदृष्टं विनोपदेशाप्राप्तेः प्राप्तेऽप्युपदेशे तत्फलासिद्धेः । ननु, कर्मणो जडत्वेन तत्फलदाता प्रभुरपेक्षते तत्राह—ईश्वरश्चेति । ईश्वरस्यापि कर्मानुगत्वात् तस्यैव तादृशशक्तेः ॥ १७ ॥ तस्माद् गुरुत्वेश्वरत्वादेर्हेतोः स्वभावस्थः संस्कारत एव स्वयं कर्म निष्पद्यते इत्येतद्दृष्टिः सन्नित्यर्थः । यद्वा, यस्मात् स्वभाव एव कर्मान्तरप्रवर्त्तकः कर्मैव च फलदात् तस्मात् केनचिद्दोषेण ब्राह्मणाद्यनर्हभावान्तरानुगमेऽपि यत्नात् स्वभावस्थस्तदर्हभावस्थ एव सन् स्वकर्मकृत् तदर्हकर्मकृदेव च सन् कर्मेति कर्माजीव्यमेव सम्पूजयेत् नतु बहिरङ्गदेवादीनित्यर्थः । अग्रे तथैव व्यक्तेः तदेवाह—अञ्जसेति । हि यतः सुखपूर्वकं येन या वर्त्तेत यत् य आजीव्येत् तदेवास्य जनस्य दैवतम् ॥ १८ ॥ एकतरं भावम् एकं पदार्थम् आजीव्य जीवनोपायं कृत्वा तस्मादन्यस्मात् जारादिति तत्सामानाधिकरण्येन दृष्टान्तः जारमिति क्वचित्पाठः तथापि तदेव तात्पर्यं पित्रादिष्वत्यन्तौद्धत्यमिदं तत्कर्तृकनीचाराधनजेन कोपेनैवेति ज्ञेयम् ॥ १९ ॥ अधुना स्वकर्माजीव्यपूजामेव साधयितुमादावात्मनो गोवृत्तिमाह–वर्तेतेति द्वाभ्याम् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्राप्योत्सृजति प्राप्नोति त्यजति चेत्यर्थः । देहोत्सर्ज्जनस्य मुख्यतयोक्तिर्जीवनकालस्याल्पत्वबोधनाय, तच्च तेषां निर्व्वेदोत्पादनेनाग्रहत्याजनाथ (भा० १०।२४।१३) 'कर्म्मणा जायते जन्तुः' इत्यादिना पूर्व्वमुक्तस्याप्यपुनरुक्तिर्जन्ममरणयोः कर्म्मैकाधीनत्वदार्ढ्याय, देहवैचित्र्यमपि तदधीनमेवेति बोधनाय वा, शत्र्वादयोऽपि कर्म्मैव, एकस्यैव कदाचिच्छत्रुतायाः कदाचिन्मित्रतायाः कदाचिदुदासीनतायाश्च दर्शनात्, ईदृग्नियमो विचित्रकर्म्महेतुक एवेति कार्य्यकारणभेदतस्ते कर्म्मैवेत्यर्थः । ननु ज्ञानं विना कर्म्मस्वप्रवृत्तेर्ज्ञानार्थमुपदेष्टावश्यमपेक्ष्यते, तत्राह—गुरुरिति अदृष्टं विनोपदेशाप्राप्तेः, प्राप्तेऽपि तत्फलासिद्धेः । ननु कर्म्मणो जडत्वेन तत्फलदाता प्रभुरपेक्ष्यते, तत्राह—ईश्वरश्चेति । कर्म्मण एव शक्तिमत्त्वात् तत्प्रतिपादितमेव ॥ १७ ॥ तस्मात् गुरुत्वेश्वरत्वादेर्हेतोः, स्वभावस्थः संस्कारत एव स्वयं कर्म्म निष्पाद्यते इत्येतद्दृष्टिः सन्नित्यर्थः । इत्थमन्तर्यामिप्रेरणनिराकरणदार्ढ्याय, यद्वा, संस्कारार्थं कर्म्माभिनिवेशाय, ननु तर्हि संस्कारेणैव कर्म्मपूजापि स्यात्, किं तत्र सम्पूजयेदिति विधिना ? तत्राह—

स्वकर्म्मकृत् कर्म्मण एव सर्व्वकारणत्वबुद्धया निजकर्म्मकृत् सन्नित्यर्थः । अन्यथानभिनिवेशेन कर्म्मासम्पत्त्या फलासिद्धेः इति कर्म्मानुष्ठानस्यावश्यकताभिप्रेता, यद्वा, सात्त्विकादिस्वभावे वर्त्तमानस्तदनुरूपं स्वकर्म्म कुर्व्वाणोऽपि कर्म्मैव सम्पूजयेत्, न तु तत्तत्स्वभावदेवतादिकमित्यर्थः । यद्वा, स्वभावस्थः स्वकर्म्मकृच्च सन्निति निजस्वभावातिक्रमणप्रयासस्य तथान्यकर्म्मशिक्षाप्रयत्नस्य च परिहारेण देवतापूजनात् कर्म्मपूजनस्य सुकरत्वं दर्शितम्, यद्वा, संपूजयेदित्यत्र हेतुः—स्वभावस्थः, संस्काराधीनः, अतः संस्कारजन्यस्य संस्कारमूलस्य वा कर्म्मणः पूजोपपन्नेति भावः । स्वकर्म्मकृच्च स्वकर्म्मैकभोगकर्त्तेत्यर्थः । अतो निजोपजीव्यपूजा युक्तैवेति भावः । तदेवाह—अञ्जसेति । हि यतः, येन यः सुखं वर्त्तेत, तदेवास्य जनस्य दैवतम् ॥ १८ ॥ एकतरं भावमेकं पदार्थमाजीव्य जीवनोपायं कृत्वा अन्यस्मात् सुखभोगादिकं करोतीत्यर्थः । तस्माद्धेतोः, तस्मादित्यन्यस्माद्वा क्षेमं सुखं मंगलं वा स नाप्नोति, अतोऽस्माभिर्निजोपजीव्यानां गवां तदुपजीव्यस्य च श्रीगोवर्द्धनस्य पूजा कार्य्येति भावः । इति (८ श्लो०) 'पर्ज्जन्यो भगवान् इन्द्रः' इत्यादिकं परिहृतम् तेऽभिवर्षन्तीत्यादेरन्ते परिहारेणैव सर्व्वापेक्ष्यसमाप्तेः ॥ १९ ॥ अधुना (१० म० श्लो०) 'तच्छेषेण' इत्यादिकं परिहरन् निजोपजीव्यपूजामेव सुसाधयितुमादावात्मनो गोवृत्तित्वमाह—वर्त्तेतेति द्वाभ्याम् । यद्यपि द्विजास्त्रैवर्णिकास्तथापि प्राधान्याद् विप्रा ज्ञेयाः, त्रैवर्णिका एव वा ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स्वभावमनुवर्त्तत इत्यनेन प्रवृत्ताख्यकर्मणः स्वभावानुवर्तित्वमुक्तं कर्मणा जायते जन्तुरित्यनेन कर्मणोपि जन्मादिनिमित्तत्वमुक्तं तदुभयमुपपादयन् कर्मैव बहुमन्तव्यमित्याह-देहानिति । जन्तुर्जीवः कर्मणा स्वभावानुगुणेनेति शेषः । नानाविधान् कर्मानुरूपान् देहान् प्राप्य त्यजति अरिमित्रादिकञ्च कर्मैव कर्मकृतमेवेत्यर्थः । ईश्वरः इन्द्रादिगतं सावधिकमीश्वरत्वमपि कर्मकृतमेवेति भावः ॥ १७ ॥ यतः कर्मैव सुखदुःखादिहेतुस्तस्मात्स्वभावस्थः पुमान् स्वकर्मकृत् स्वस्वभावानुरूपकर्मशीलः कर्म पूजयेद्बहुमन्येत कर्मेति द्वितीयान्तम् अहो कर्मणो वैभवमिति श्लाघेतेत्यर्थः । किञ्च वयं केवलं वनौकसः द्विजानामाशिषः गाः पर्वतं चोपजीवामस्ततस्त एवाराध्या इत्यभिप्रयन्नन्यथा सदृष्टान्तमनर्थमाह—अञ्जसेति सार्द्धेन । येन अञ्जसा सुखं वर्त्तेत जीवेत तदेवास्य जिजीविषोर्दैवतं दैवतत्वेन द्रष्टव्यं तद्वदाराधनीयमिति यावत् ॥ १८ ॥ यस्त्वेकमन्यतरं भावं पदार्थमुपजीव्य अन्यतरमुपधावत्यनुवर्त्तते भजत इति यावत् । स तस्मादुपजीव्यबुद्धया आराध्यमानात् क्षेमं न विन्दते असती पुंश्चली नारी पतिमुपजीव्यमनाराध्य जारमनुवर्त्य यथा न तस्मात् क्षेमं विन्दते तद्वत् ॥ १९ ॥ किञ्चास्मद्वृत्तिरिन्द्रयागानपेक्षा चेति विवक्षुस्तावत्स्ववृत्तिं वक्तुं दृष्टान्तत्वेन वर्णानां वृत्तिभेदमाह—वर्त्तेतेति । विभो ब्रह्मणा वेदेन वर्त्तेत वेदाध्ययनादिनोपजीवेदित्यर्थः । राजन्यो भुवः रक्षया वार्त्तया वैश्यो वर्त्तेत द्विजसेवया त्रैवर्णिकसेवया शूद्रः वर्तेत ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ननु, विष्णोः सर्वनामवत्त्वे एकस्यैवोच्चनीचदेहयोगवियोगप्राप्त्या देवदत्ताद्विशेषाभावेन सर्वं तदधीनमिति वक्तुं न शक्यते इति तत्राह—देहानिति । दुःखयतीति दुखी तद्दुःखस्वातन्त्र्यात्तच्छब्दवाच्यत्वं न तु तदनुभवतः अतः सर्वनामत्वं युज्यते उत्सृजति त्यजति सृजति आपादयति जातस्य शत्र्वादिभावश्च हरिणैवेत्याह—शत्रुरिति "सुखं दुःखं भवो भावः" इत्यादिस्मृतेः । यद्वा, यथा तत्तच्छक्तिप्रेरकत्वेन ब्राह्मणादिशब्दवाच्यत्वं हरेस्तथा शत्रुत्वादिशब्दवाच्यत्वमित्याह, शत्रुरिति । कर्मशब्दवाच्यो हरिरेव शत्रुत्वादिः पूज्यत्वात्तत्त्वोपदेशेन गुरुरैश्वर्यादियोगादीश्वरः ॥ १७ ॥ यस्माद्गिरति सर्वमिदमिति गिर्यादिनामा हरिस्तस्मात्स्वविहितकर्मकृत् स्वभावस्थः नारायणार्पितसर्वेन्द्रियवृत्तिः पुरुषः "क्रियापतनयोः कर्म" इत्यभिधानात् क्षितिधृत्यादिक्रियाश्रयत्वेन जगत्सर्जनादिक्रियाश्रयत्वेन वा परोक्षापरोक्षज्ञानविषयत्वेन वा कर्मसु पूजयेदित्यन्वयः । तदुक्तम्—

"एतस्मात्कारणात्कृष्णः शक्रस्य विमदाय च । गिर्यादिस्थितमात्मानं पूजयामास वल्लवैः" ॥ इति

स्वकर्मकृदित्युक्तं विवृणोति अञ्जसेति येनाञ्जसा तत्त्वेन यो वर्त्तेत अस्य तदेव दैवतं कुलदैवं हि लोकप्रसिद्धम् "अञ्जसा त्वरिते तत्त्वे महदद्भुतखेदयोः" इति यादवः । अनेन यच्छास्त्रे विघ्नेश्वरादिनामाख्यातं तदप्यस्य हरेर्नामेति सिद्धम् ॥ १८ ॥ एकतरं बहूनां सिद्धान्तानां मध्ये एकं भावं सिद्धान्तमाजीव्योपजीव्यान्यं भावमुपधावति उपास्ते स पुरुषः तस्माद्भावात् क्षेमं सुखं न लभते यौवनं जरयतीति जारः असती बहुभर्तृका ॥ १९ ॥ यस्य यत् किं किमिति तत्राह—वर्त्तेतेति । ब्रह्मणा वेदेन विहितेन यागादिना यद्वा, यो येन कर्मणा अञ्जसा सहितो वर्तेत अस्य तदेव कर्म दैवतं मान्यं हि तर्हि विप्रादेः किं कर्मविहितमित्यत्राह-ब्रह्मणेति । कृच्छ्रचान्द्रायणादिलक्षणेन तपसा "ब्रह्मवेदस्तपस्तत्त्वम्" इत्यमरः । वार्त्तया कृष्यादिलक्षणया चतुर्विधया ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यस्मात् स्वभाव एव कर्मान्तरप्रवर्त्तकः कर्मैव च फलदातृ तस्माद्दोषेण ब्राह्मणाद्यनर्हभावान्तरानुगमनेऽपि यस्मात् स्वभावस्थस्तदर्हभावस्थ एव सन् स्वकर्मकृत् तदर्ह कर्मकृदेव च सन् कर्मेति कर्माजीव्यमेव सम्पूजयेत् ननु बहिरङ्गदेवादिमित्यर्थः ।

अग्रे तथैव व्यक्तेः ॥ १८ ॥ तस्मादन्यस्मात् जारादिति तत्सामानाधिकरण्येन दृष्टान्तः पित्रादिष्वप्यौद्धत्यमिदं तत्कर्तृकनीचाराधनजेन क्रोधेन इति ज्ञेयम् ॥ १९ ॥ स्वकर्माजीव्यपूजामेव साधयितुमात्मनो गोवृत्तित्वमाह—द्वाभ्याम् ॥ २०–२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्मात्स्वभावतो निष्पन्नस्य कर्मण एव सर्वकारणत्वात् कर्मैव पूज्यमित्याह—देहानिति सार्द्धेन ॥ १७ ॥ सम्पूजयेत् सम्मानयेत् कर्मसामान्यस्यापि पूज्यत्वेपि कर्मविशेषकरणे शास्त्रमेव प्रमाणमित्याह—स्वभावस्थः ब्राह्मणादिवर्णस्थः स्वस्वविहितं कर्म करोतीति सः। ननु, तदप्यत्र देवतोद्देशेन द्रव्यत्यागात्मकत्वात् यागस्य कथं देवतां विना सिद्धिरित्याशङ्क्य कर्माङ्गमात्र देवतेति मतमङ्गीकुर्वन् हेतुवादमाश्रित्यान्यामेव देवतां समर्थयते अञ्जसा सुखेन वर्त्तेत जीवेत ॥ १८ ॥ हेतुबलेनैव विपक्षे दोषमाह—आजीव्येति। उपजीवति सेवते ॥ १९ ॥ तस्मादस्माकं य एवाजीव्यः सैव देवतेति वक्तुं दृष्टान्तत्वेनान्येषामप्याह—वर्त्तेतेति। विप्रस्य वेदशास्त्राण्येव दैवतानि रक्षया भुव इति भूरेव तस्य देवता वार्त्तयेति वार्त्तैव तस्य देवता द्विजशुश्रूषयेति द्विजा एव तस्य देवता इत्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वभावानुरूपेण कर्मणा जन्तुर्जीवः उच्चावचान् देवमनुष्यादिनामकान् देहान् प्राप्योत्सृजति, तेषु जन्तुषु क ईशः कश्चेशितव्यः इति भावः। कर्मणैव शत्र्वादिर्भवतीति कर्मैव शत्रुर्मित्रमुदासीनश्च इति प्रवृत्तं कर्म दर्शितं सङ्क्षेपतो निवृत्तं कर्म दर्शयति, कर्मैव गुरुर्ब्रह्मनिष्ठगुरुप्रापकत्वात् कर्मैवेश्वरः ज्ञानशक्त्युत्पादकतयेश्वरप्रापकत्वात् ॥ १७ ॥ एवं स्थिते मदीयैर्भवद्भिर्मदधिष्ठितगिर्य्याद्युद्देशेन स्ववृत्यनुरोधेन कर्मानुष्ठेयमित्याशयेनाह–तस्मादित्यादि। सम्पूजयेत्सम्मानयेत् तदेव दैवतं तत्रैव परमेश्वरः फलं ददातीति भावः ॥१८॥ एकतरं भावं पदार्थमाजीव्यसुसेव्यं अन्यं तदितरमुपजीवति सेवते ।१९। ब्रह्मणा शब्दब्रह्माध्ययनादिना ।२०।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

तस्मात् स्वभावनिष्पन्नेन कर्मणैव निखिलार्थसिद्धेरतदेव बहुमानेन सेवामित्याहुः—देहानिति। उच्चावचत्वादिकं सर्वं कर्माधीनमेवेत्यर्थः ॥ १७ ॥ तस्मादिति स्वभावस्थः विप्रादिवर्णस्थः स्वकर्मकृत् स्व स्व विहितकर्मानुष्ठायी कर्म सम्पूजयेत् स्वीकुर्यात् न तु देवतां चेत्यर्थः। ननु यागादिकर्मणो देवतोद्देशेन द्रव्यत्यागरूपत्वात् कथं देवतां विना तस्य सिद्धिरित्याशङ्क्याहुः—अञ्जसेति। येन भिक्षा विजयकृष्यादि सेवारूपेण कर्मणा जनोऽञ्जसा अनायासेन वर्तेत जीवेत तदेवास्य दैवतं न ततोऽन्यथा देवता दृश्यते इत्यर्थः कर्मैव गुरुरीश्वर इति पूर्वोक्तेः इन्द्रादिदेवतास्वीकारस्तु कर्मस्वरूपमविदुषामेवेति भावः ॥ १८ ॥ जीविकोपायस्यैव हेतुबलाद्देवतात्वमाश्रित्य विपक्षे ते दोषमाहुरित्याह–आजीव्येति। एकतरं जीविकोपायं भावमर्थमाजीवमालम्ब्य योऽन्यमिन्द्रादिमुपजीवत्याश्रयति स तस्मात् क्षेमं न विन्दति कृतघ्नत्वात् ॥ १९ ॥ जीविकोपायभूतां वृत्तिं ते विभजन्ति–वर्तेतेति। ब्रह्मणा वेदाध्ययनाध्यपनादिना ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यस्मादवान्तरेशानामनीशत्वं न तत्सभाजनेन कृत्यमतो हरिरेवार्हणीयः स च सर्वत्र वर्तत इति नगभिदि न प्रवणं तथा कुशलोऽत इदं तनुतेति वदति ॥ देहानिति। जन्तुर्जन्म्युच्चावचाननेकविधान्देहान्कर्मणा श्रीहरिणा प्राप्यते नैवोत्सृजति। शत्रुर्मित्रमुदासीन इत्येतेऽपि कर्मैव श्रीहरिरेव शत्र्वादिशब्दवाच्यः शातयितेति मित्वा त्रातीत्यन्यत्रोक्तेः सर्वोपर्यासीन इति शत्रुमित्रोदासीनशब्दैरुच्यते। गुरुरीश्वरश्चोपदेशक ईश्वरो योगैश्वर्यवानिति। मूलकृदपि शत्रुरुदासीनो गुरुरीश्वर इति पुंल्लिङ्गनिर्देशं कुर्वन्न कर्मपदं व्यापारपरं किन्तु हरिवाचकमिति सूचयन्प्रमाणतात्पर्यभूमिकां वाध्वनयामासेत्यवसेयं। तत्तन्निविष्टस्य तत्तद्दुर्भगवता भगवतो नेति दर्शयितुमीश्वर इति ॥ १७ ॥ स्वभावस्थो हर्याश्रयोऽनन्यथाभवत्स्वस्वभावाश्रयश्चेति बहिः कर्मान्ततो हरिर्बहिः क्रियां तस्मादितरेषामनीशत्वादेः सुपूजयेत्स्वकर्मकृद्विहितविहितं व्यापृतिर्येन ज्ञानात्मकेनाञ्जसा श्रीहरिरूपतत्त्वेन वर्तेत। उपासनादिभिरतत्त्वं हरिरेवास्य हि यतो दैवतमतस्तत्कर्मसु पूजयेत्। अञ्जसा स्वरिते तत्त्व इति यादवः। न च सर्वनामा हरिरिति यदि सभाजनीयोऽहं तर्हि कः प्रद्वेषः शचीशे तदपचितिरपि स्वापचितिर्भवतीति वाच्यं। शक्रो न वक्रीभूय नश्येदिति दयात एवमाततान काञ्चन लीलां लीलामानुष इति ज्ञेयं। तच्च तात्पर्यं शक्रस्य विमदायेति प्रकटितमाचार्यैः ॥ १८ ॥ अस्मदादीनां न स्म शचीशसेवोपयुक्तेति वक्तुं तत्तज्जातिजीविकाधर्मानाह ॥ वर्तेतेति। ब्राह्मणो ब्रह्मणा वेदेन तदुक्तयुक्तानुष्ठानेन वर्तेतेति राजन्य इत्यत्रानुवर्तते। राज्ञ्यां राज्ञा जातो राजन्यो भुवो रक्षया वर्तेत वैश्यस्तु वार्तया कृषिगोरक्षादिना शूद्रस्तु द्विजानां सेवया जीवेदित्युभयान्वयि। ब्रह्मणा तपसेति वा। ब्रह्मवेदस्तपस्तत्त्वमित्यमरः ॥ १९ ॥ वार्ता चैतत्प्रकारेति स्ववृत्तिरिति विविच्य कृषिभूलेखनं वाणिज्यं पदार्थविक्रियादि गोरक्ष्यं गोपालनं कुसीदं तुर्यं चतुर्थं वृद्ध्याऽधिकधनसम्पादनमेवं वार्ता चतुर्विधा। तत्रैतन्मध्ये वयमनिशं गोवृत्तयो गोभिरेव वृत्तिर्जीविका येषां ते तथा। अनेन समाहारासमाहाराभ्यां वैश्यवृत्तिर्वार्तासमग्रचतुष्टयवैशिष्ट्यं नैवेत्यभिप्रैति ॥ २० ॥

श्रीसुबोधिनी

ननु लोकान्तरगमनार्थमीश्वरोपेक्ष्यतेन्यथा गते देहे मार्गापरिज्ञानात् फलदेशे कथं गच्छेदित्याशङ्क्याह **देहानुच्चावचा**निति, उच्चावचाननेकविधान् **देहानयं जन्तुर्जीवः प्राप्यप्राप्योत्सृजति** अव्यवहितकर्मणा देहान्तरं प्राप्य पूर्वं त्यजतीत्यर्थः, तत् कर्मणैव, ननु समानेपि देहे कश्चित् कदाचिच् छत्रुर्भवति मित्रं भवत्युदासीनश्च तत्र को हेतुरिति चेत् तत्राह **शत्रुर्मित्रमुदासीनः कर्मैवे**ति, अन्यथा **ते**भ्योशुभाशुभफलभावा न स्युः, किञ्च **गुरुरपि कर्मैव,** न हि तादृशादृष्टाभावे गुरुरुपदिशति फलति वा, ईश्वरोपि कर्मैव फलदानात् ॥ १७ ॥ अतस्तमेव पूजयेदित्याह **तस्मा**दिति, **कर्मैव सम्पूजयेत्** सम्मानयेत्, तस्य सम्माननप्रकारमाह **स्वभा**वस्थः सन् **स्वकर्मकृद् भवे**दिति, यस्य यः **स्वभावो** ब्राह्मणादिस्तदनुसारेण स्ववर्णाश्रमविहितं कर्म कर्तव्यमन्यथा पतितः स्यात् फलं प्रयच्छतु मा वेश्वरोस्तु न वा कर्म कर्तव्यमेव, एवं सत्य**ञ्जसा** सामस्त्येनानायासेन **येन**वोपायेन प्रकारेण **वर्तेत** जीवेत **तदेवास्य दैवतं,** युक्तश्चायमर्थः, सद्वासद्वा यत्र प्रतिष्ठितस्तद् **दैवत**मिति ॥ १८ ॥ अन्यथात्वे बाधकमाहाजीव्येति, **एकतरं भावमाजीव्य** प्रथमं तदनुवृत्तिं कृत्वा पश्चाद् **योन्यमुपधावति** तत्र परितोषमकृत्वाधिकफलार्थ**मन्यं** चेत् पक्षमबलम्बते तदा **न तस्मात् क्षेमं विन्दते** सोपि मन्यते मामपि त्यक्ष्यतीति, अमन्यमानं प्रति दृष्टान्तमाह **जारान्नार्यसती यथे**ति, न हि **जारो** भरणपोषणादिकं करिष्यति नापि सम्भोगं सर्वदा, परलोकस्तु नास्त्येव, तस्मात् कर्मण आवश्यकत्वात् स पक्षो न त्याज्यः ॥ १९ ॥ किञ्च कर्मोपजीवका एव सर्वे यतो ब्राह्मणो **ब्रह्मणा** वेदेन **वर्तेत** तस्य वेदाध्ययनादिनैव जीवनं, **राजन्यो भुवो रक्षया** जीवेत, **वैश्यस्तु वार्तया** जीवेत, **शूद्रस्तु द्विजसेवया,** तेषां सेवायां क्रियमाणायां ते यद् दद्युस्तेन जीवेत, तुशब्देनान्यपक्षा निराक्रियन्ते ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अतः 'कर्मणा जायते' इत्युक्तमेवोपपन्नमित्याह–देहानिति। जन्तुः जीवः कर्मणा उच्चावचान् उत्कृष्टापकृष्टान् देहान् प्राप्य कर्मसमाप्तौ तान् उत्सृजति परित्यजति। तथा शत्रुरपि स्वकर्मैव, स्वापकारे वर्तमानस्याप्यन्यत्र मित्रतादर्शनात् ॥ अतो न हि परस्य स्वस्मिन् शत्रुता स्वतःसिद्धा, किन्तु स्वदुरितप्रयुक्तैव। तथा मित्रमपि सुखप्रदं स्वकर्मैव, स्वपकारे वर्तमानस्याप्यन्यत्र शत्रुतादर्शनात्। तथोदासीनोऽपि कर्मैव, कुत्रचित् शत्रुतया मित्रतया वा वर्तमानस्याप्यन्यत्रोदासीनतादर्शनात्। तथा गुरुरपि कर्मैव, शुभादृष्टंविना नित्यस्य सर्वत्र विद्यमानस्यापि तस्य प्रसादादर्शनात् ॥ १७ ॥ तस्मात् जन्मादेः कर्माधीनत्वात् कर्मैव सम्पूजयेत् सन्मानयेत्। सत्सन्मानप्रकारमाह—स्वभावेति। यस्य यः स्वभावः स्वभावाधीनो वर्णाश्रमादिः, तत्र स्थितः सन् स्वानुरूपकर्मकृद्भवेत्। एवं कर्मणैव फलसिद्धेर्देवता निराकृता। 'यदि देवतैव प्रसन्ना फलं ददातीति सवाराधनीया' इत्याग्रहस्तदा 'तदपि विचारपूर्वकमेव कर्तव्यम्' इत्याशयेनाह—अञ्जसेति। येन दैवतविशेषेणाञ्जसा सुखेनासौ जनो वर्तेत जीवेत् तदेवास्या दैवतं सेव्यम्। 'लोकवेदव्यवहारे प्रसिद्धोऽयमर्थ' इत्याह—हीति ॥ १८ ॥ विपक्षे दोषमाह–आजीव्येति यस्तु पुरुष एकतरं भावं देवताविशेषमाजीव्य जीवनोपायत्वेनोपसेव्यत् तत्रापरितोषात् अन्यमुपजीवति सेवते स तस्मात् सेवितात् अन्यस्मात् क्षेमं सुखं न विन्दते, तस्य स्वस्मिन् विश्वासाभावात्। तत्र दृष्टान्तमाह–जारमिति। असती पुंश्चली नारी यथा पतिं विहाय जारमुपसेव्य ततोऽपि सुखं न प्राप्नोति, पतिपरित्यागदर्शनेन विश्वासानास्पदत्वात्, तथेत्यर्थः ॥ १९ ॥ 'जीविकासम्पादको ह्यवश्यमाराधनीय' इत्याशयेन स्वजीविकां वक्तुं तावत् सर्वजीविकामाह–वर्तेतेति। विप्रो ब्राह्मणो वेदाध्ययनादिना वर्तेत जीविकां सम्पादयेत्। स्पष्टमन्यत् ॥२०॥

अन्वितार्थप्रकाशिका

देहानिति ॥ जन्तुः जीवः कर्मणा उच्चावचान् उत्कृष्टापकृष्टान् देहान् प्राप्य कर्मसमाप्तौ तान् उत्सृजति परित्यजति तथा शत्रुर्मित्रमुदासीन इति त्रयमपि कर्मैव तेषामपि स्वदुरितपुण्यमिश्रकर्मप्रयुक्तत्वात्। एवं गुरुरीश्वरश्च कर्मैव तत् कृपायाः पुण्यकर्मायत्तत्वात् ॥ १७ ॥ तस्मादिति ॥ तस्माज्जन्मादेः कर्माधीनत्वात् कर्मैव संपूजयेत् सम्मानयेत्। अतः स्वभावे तत्स्वभावाधीने वर्णाश्रमादौ स्थितः सन् स्वानुरूपकर्मकृद्भवेत्। एवं च देवताऽपि कर्मण एवाङ्गं न स्वतन्त्रा। यदि तु देवतैवाराध्येत्याग्रहस्तत्रापि नेन्द्रस्योपास्यत्वमित्याह। अञ्जसेति। हि यस्मात् येन दैवतविशेषेणाञ्जसा सुखेनासौ जनो वर्तेत जीवेत्तदेवास्य दैवतं सेव्यम् ॥ १८ ॥ आजीव्येति ॥ यस्तु पुरुष एकतरं भावं देवताविशेषामाजीव्य जीवनोपायत्वेनोपसेव्य तत्रापरितोषात् अन्यमुपजीवति सेवते स विश्वासाभावात् तस्मात् भावात्सुखं न विन्दते। यथा असती पुंश्चली नारी जारमुपसेव्य सुखं नाप्नोति तथा। जारादिति क्वाचित्कः पाठः ॥ १९ ॥ वर्तेतेति ॥ विप्रो ब्रह्मणा वेदाध्ययनादिना वर्तेत जीविकां सम्पादयेत्। एवं राजन्यः क्षत्रियो भुवः रक्षया वर्तेत। वैश्यस्तु वार्तया जीवेत् वर्तेत। शूद्रस्तु द्विजसेवया जीवेत्! एतेन ब्राह्मणस्य वेदादिशास्त्राण्येव देवता क्षत्रियस्य भूरेव वैश्यस्य वर्तैव शूद्रस्य द्विजा एव देवता इत्युक्तम् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उच्चावचान् श्रेष्ठकनिष्ठान् वा महतोऽऽल्पान् अतः शत्रुप्रभृतयः कर्मैवारित ॥१७॥ स्वभावस्थः सात्विकादि प्रकृतौ स्थितः अतः स्वकर्मकृत् स्वकीयं वर्णाश्रमोचितं कर्म कुर्वन् कर्मैव पूजयेत् बहुमानयेत् अंजसा यथा सुखं जनो ये न वस्तुनावर्ततत्तदेववातु

तस्य पुरुषस्य दैवतं देवः ॥१८॥ विपक्षे दोषमाह आजीव्येति एकतरं एकं भावं पदार्थं आजीव्य आजीविकारूपं कृत्वा ॥ अन्यमुपजीवति ते तथा विप्रः ब्रह्मणो वेदाध्यापनयाजनादि स्ववृत्त्या वर्त्तेत जीवेत् राजन्यः ते तथा ॥ १९ ॥ इतरं पदार्थं जीविकारूपं मत्वा सेवते इत्यर्थः यथा असती नारी पतिं त्यक्त्वा जारं सेवते विप्रः ब्राह्मणो वेदाध्यापनयाजनादि स्ववृत्त्यावर्त्तेत् जीवेत् राजन्यः क्षत्रियः भुवो रक्षया भूस्थितानां गोविप्रादीनां रक्षणेन द्विजानां त्रिवर्णानां सेवया ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्मादिति ॥ तस्मात्, स्वभावस्थः स्वकर्मकृत् पुमान्, कर्मैव संपूजयेत् संमानयेत्। ननु देवतोद्देशेन द्रव्यत्यागो हि कर्म, तत् कथं देवतां विना कर्मसिद्धिरित्याशङ्क्य, कर्माङ्गमात्रं देवता इति पक्षेणोपसंहरन्निव हेतुवादमाश्रित्यान्यामेव देवतां समर्थयते। अञ्जसेति। येन, अञ्जसा सुखेन, वर्त्तेत जीवेत्, तदेव वस्तु, अस्य जिजीविषोः देवतं देवता हि ॥ १७ ॥ हेतुबलेनैव विपक्षे दोषमाह आजीव्येति ॥ यस्तु पुमान्, सर्वमतिशयित एव एकतरस्तं, भावं पदार्थं, आजीव्य सर्वोत्कर्षेणोपास्यतयाऽऽश्रित्य, अन्यं भावं, उपजीवत्याश्रयति सेवते इति यावत्। सोऽन्यभावसेवको जनः, तस्मादन्यभावसेवनात्, क्षेमं सुखं, न विदन्ते न लभते। कथमिव। यथा असती असाध्वी पुंश्चलीति यावत्। नारी, जारं सेवमाना सती, क्षेमं न विन्दते तद्वत् ॥१८॥ स्ववृत्तिं वक्तुं दृष्टान्तत्वेन वर्णानां वृत्तिभेदमाह ॥ वर्त्तेतेति ॥ विप्रो ब्राह्मणः, ब्रह्मणा वेदाध्ययनादिना, वर्त्तेत। वेदाध्ययनादिनोपजीवेदित्यर्थः। राजन्यः क्षत्त्रियः, भुवः पृथिवीस्थप्रजानां रक्षणेनैवेत्यर्थः। वर्त्तेत। वैश्यस्तु, वार्त्तया कृष्यादिचतुर्विधान्यतमवृत्त्याश्रयेणेत्यर्थः। जीवेत्। शूद्रस्तुरीयवर्णस्तु, द्विजसेवया त्रैवर्णिकानां परिचर्याविधानेन, जीवेत् ॥ १९ ॥ तत्र वैश्यानां वृत्तिभूताया वार्त्तायाश्चातुर्विध्यमाह ॥ कृषीति ॥ कृषिः कर्षणं च वाणिज्यं व्यापारश्च ताभ्यां सहिता गोरक्षा, एतत्त्रयं, कुसीदं वृद्धिस्तेन जीवनं तु तुर्यं चतुर्थं, उच्यते। एवं चतुर्विधा वार्त्ता, तत्र, वयं अनिशं गोवृत्तयः गवां पालनेनैव वृत्तिर्जीविका येषां तथाभूताः भवामः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तस्मादिति : १०.२४.१८.

कर्मारम्भो धर्ममालोच्य कार्यः सद्भिः स्वीयं स्वेष्टदृग्भिः सदैव।
सभ्यं ब्राह्मं कर्म चेदत्यभीष्टं स्याद्वा शूद्रानुष्ठितं ब्रूत विज्ञाः ॥ २४ ॥

इहानुचितकर्मजं स्पृशति नैनमेनो जनं स्वधर्मपरिनिष्ठितो भवति यः सदेति स्फुटम्।
निजाप्तपितृबान्धवानपि रणेऽरिभावं गतान् निहन्ति नियतं तथाप्यधमता न भूमीभुजः ॥ २५ ॥

कृष्णप्रिया

जीव निज कर्मों के अनुसार उत्तम और अधम शरीरों को धारण करता और त्याग करता है। कर्म के अधीन रहकर ही, यह जीव शत्रु मित्र उदासीन-तटस्थ बनता है इसलिये कर्म ही मुख्य है एवं ईश्वर है ॥ १७ ॥ पिताजी! यदि इस बात का निश्चय है कि, स्वभावसिद्ध कर्म ही फल देने वाला है, तब केवल उसी का ही आदर-समर्चन करना चाहिए। प्राणियों को स्वभाव के अनुसार अपने कर्मों का पालन करना चाहिए और उसी का सन्मान करना चाहिए। जिससे सुखपूर्वक आसानी से जीविका चले वही प्राणियों के इष्ट देव है ॥ १८ ॥ जैसे अपने विवाहित पति को छोड़कर पर पुरुष से प्यार करने वाली कुलटा नारी, जीवन में कभी सुख नहीं पा सकती, वैसे ही जो मनुष्य प्रथम किसी एक पक्ष-देव मार्ग का आश्रय लेकर पुनः उसका त्याग कर दूसरे देवपक्ष आदि की ओर दौड़ता है उसे दूसरा भी सुख नहीं प्राप्त होगा ॥ १९ ॥ उचित है कि विप्र वेदाध्ययन अध्यापन यजन याजन से, क्षत्रिय पूजा पालन से, वैश्य वार्ता खेती व्यापार से और शूद्र द्विज सेवन से अपनी जीविका का निर्वाह करे ॥ २० ॥

कृषिवाणिज्यगोरक्षा[1] कुसीदं तुर्यमुच्यते। वार्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम् ॥ २१ ॥
सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः। रजसोत्पद्यते विश्वमन्योन्यं विविधं जगत् ॥ २२ ॥
रजसा चोदिता मेघा वर्षन्त्यम्बूनि सर्वतः। प्रजास्तेनैव[2] सिद्ध्यन्ति महेन्द्रः किं करिष्यति ॥ २३ ॥
न नः पुरो जनपदा न[4] ग्रामा न गृहा वयम्। नित्यं वनौकसस्तात [5]वनशैलनिवासिनः ॥ २४ ॥

---

१. रक्ष्यं–प्रा. पा.। २. स्तैरेव–श्रीधर. वंशी. जीव. वीर. विज. विश्व. रा. शु. घ. सु.। ४. न ग्रामगृहिणो वयम्–विज.। ५. काननादि–विज.।

कर्दमक्षमा

अन्वयः—कृषि वाणिज्य गोरक्षा कुसीदम् तुर्यम् इति चतुर्विधा वार्ता उच्यते, तत्र वयम् अनिशम् गोवृत्तयः ॥ २१ ॥ सत्वम् रजः तमः इति स्थिति उत्पत्ति अन्त हेतवः रजसा विश्वम् उत्पद्यते एवम् अन्योन्यम विविधम् जगत् उत्पद्यते ॥ २२ ॥ रजसा चोदिताः मेघाः सर्वतः अम्बूनि वर्षन्ति, तेन एव प्रजाः सिध्यन्ति, महेन्द्रः किम् करिष्यति ? ॥ २३ ॥ न नः पुरः जनपदाः न न ग्रामाः न गृहाः न हे तात ? वयम् नित्यम् वनौकसः वनशैलनिवासिनः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वैश्यवृत्तेश्चातुर्विध्यमाह । कृषीति । कृषिवाणिज्यसहिता गोरक्षा एवं त्रयम । कुसीदं वृद्धिजीवनं चतुर्थम ॥ २१ ॥ ननु गवामपि वृत्तिर्महेंद्राधीनवेत्याशंक्य निरीश्वरसांख्यमताश्रयेण निराकरोति। सत्त्वमिति श्लोकद्वयेन। अन्योन्यं स्त्रीपुरुषयोगेन ॥ २२ ॥ सर्वत इति। समुद्रशिलोषरादिष्वपि वृष्टिदर्शनान्न प्रेक्षावत्पूर्वकत्वं वृष्टेरिति भावः। तैरेव मेघैरेव सिध्यंति जीवंति ॥ २३ ॥ तथापि योगक्षेमार्थं देवतापेक्षेति चेदत आह। न नः पुर इति। पुरः पत्तनानि। जदपदाः देशाः। अस्माकं योगक्षेमहेतुर्वनशैलादय एवेति भावः ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृषिः भुवो हलादिनोल्लेखनरूपा क्रिया, वाणिज्यं तु सत्यानृतरूपम् । निर्णयसुधाकरे तु–"समर्घं पण्यमादाय महर्घं यत्प्रदीयते । तद्वाणिज्यमिति प्रोक्तं क्रयविक्रयसंज्ञकम ॥" इत्युक्तम् । गोरक्षा पशुपालनम् । तल्लब्धवस्त्वित्यर्थः । कुसीदम् वृद्ध्यर्थं धनप्रयोगः । तत्प्रकारं तु मनुराह–'आशीतिभागं गृह्णीयान्मासाद्वार्द्धुषिकः शते । द्विकं शतं वा गृह्णीयात्सतां धर्ममनुस्मरन् ॥ द्विकं शतं हि गृह्णानो नभवत्यर्थकिल्बिषी । द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं समम् ॥ मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः । न त्वेवाधौ सोपकरे कौसीदीं वृद्धिमाप्नुयात् ॥" इति । व्याख्यैषाम्–शते प्रयुक्ते अशीतिभागं शताशीतिभागं प्रतिमासं गृह्णीयात् । पणशते प्रयुक्ते पणद्वयं वा प्रतिमासं गृह्णीयात् । साधुधर्मत्वादेकशते द्विकग्रहणस्य तेन किल्बिषी पापी न स्यात् । ब्राह्मणादिक्रमेण द्विकं त्रिकं चतुष्कं पंचकं च शतं सममेवेतोधिकां मासवृद्धिं न गृह्णीयात् । नन्वशीतिभागो लघुः द्विकं शते गुरु कथमिमौ ब्राह्मणस्य विकल्पौ, अत्राह याज्ञवल्क्यः—"आशीतिभागो वृद्धिः स्यान्मासिमासि सबंधके । वर्णक्रमाच्छते द्वित्रिचतुः पंचकमन्यथा ॥" इत्यलं प्रसक्तानुप्रसक्तेन । कौ भूमौ सीदति वर्द्धते ग्रहीता तपति दाताऽनेनेति कुसीदम् । कुत्सितान्मुखतः कृत्वाऽदातृन्सीदति पीडयतीति वा कुसीदम् । औणादिकशप्रत्यये रूपम् । यद्वा–"कुसेरुंभोमेदेताः" इति 'कुस–संश्लेषणे' अस्मादौणादिके दप्रत्यये वा रूपम् । 'कुसीदं वृद्धिजीवनम्' इत्यमरः ॥ २१ ॥ पुनर्नंदः शंकते–नन्विति । निरीश्वरसांख्या हि गुणेभ्य एव सृष्ट्यादिमन्वते इत्येते । विविधम् स्थावरजंगमात्मकमंडजाद्यात्मकं वा ॥ २२ ॥ प्रेक्षावत्पूर्वकत्वम् बुद्धिमत्त्वपूर्वकत्वम् "प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः" इत्यमरः । इति भाव इति । बुद्धिपूर्वकत्वे तु समुद्रादिषु प्रयोजनाभाव द्वृष्टिः कदापि नो भवेदिति; विनैवेश्वरं जगदुत्पत्त्यादिसिद्धेरित्यर्थः ॥ २३ ॥ यद्यपि विनैव देवं जगदुत्पत्त्यादि भवति तथापि योगक्षेमार्थम् अप्राप्तप्रापणप्राप्तरक्षणाय । नः अस्माकम् पुरः योगक्षेमावहा न संति । इति भाव इति । वनशैलस्थानां वनादिदेवादयः पूज्या न जानपदाद्या इति तात्पर्यम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अनिशमिति वैश्येष्वपि गोपत्वान्न कृष्यादि कापि वृत्तिरिति भावः ॥ २१ ॥ पूर्वंपूर्वं कारणरूपं विविधं विश्वमन्योन्यं स्त्रीपुरुषादियोगेन विविधं जगद्रूपं सदुत्पद्यते सत्त्वादीनां स्थित्यादिहेतुत्वं स्वभावत एवेति ज्ञेयम् ॥ २२ ॥ महेन्द्र इति सोपहासं मेघानां तस्यापि रजोधीनत्वात् ॥२३ ॥ वनान्येव ओकांसि येषां तथाभूता जात्यैव वयम् अत एव न कदाप्यन्यत्र प्रयाम इत्याह–नित्यमिति । हे तातेति तमार्द्रयति एवं श्रीगोवर्द्धनसमीपे निजवासश्च सूचितः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यद्यपि 'वार्द्धुषिर्नरकं याति' इति वचनेन कुसीदं निषिद्धम् , तथापि वैश्यानां तस्य विहितत्वात् तद्वचनं नियताधिकवृद्धिग्रहणपरम् , किंवा, आपदा वैश्यवृत्तिकविप्रविषयकं ज्ञेयम् , अनिशमिति कदाचिदपि वृत्त्यन्तराभावात् सदा गाव एकास्माकमुपजीव्याः, तत्पालनाच्च स्वत एव त्रिवर्गोऽपि सम्पत्स्यत इति भावः ॥ २१ ॥ तेऽभिवर्षन्तीत्यादिकं परिहरति—सत्त्वमिति द्वाभ्याम् । विश्वं समस्तं विविधं देवासुरादिभेदेन जरायुजत्वादिभेदेन च यद्यपि वृष्टेः स्थितिहेतुत्वात् सत्त्वेन चोदिता इति वर्षायोग्यम् , तथापि वृष्ट्या प्रायोगवाजीवाहरिततृणादिजन्मापेक्षया रजसेत्युक्तिः ॥ २२ ॥ महेन्द्रः सर्वेषां देवानां मेघादीनाञ्च प्रभुरपि किं कर्त्तुं तत्र शक्नोति ? अपि तु न किञ्चिदित्यर्थः, मेघानां तस्यापि रजोऽधीनत्वात् , यद्वा, त्रिलोकीश्वरोऽपि किमपरं

तत्र साहाय्यं करिष्यति ? प्रजा इति तासां तत्प्रतिपाल्यता सूचिता। तथापि मेघैरेव तत्सुसिद्धेस्तेन किमिति भावः। अनेन (९ म० श्लो०) 'वाग्मुचां पतिमीश्वरम्' इत्यादि परिगृह्यम् ॥ २३ ॥ पुंसामित्यादिकं परिहरति–नेति वनान्येवौकांसि गृहा येषां तथाभूता वयम्, हे तातेति जातैतादृशा वयमिति बोधयति, न च कदाप्यन्यत्र प्रयाम इत्याह; गोपानां वहवो देशाः, पुरोहितादीनां ग्रामश्च, पुर्य्याञ्च तस्थां मणिस्तम्भादिरचिताः प्रासादाः सन्ति, तत्राह—नित्यमिति। पुर्य्यादिषु वर्त्तमानेष्वपि वनशैलेष्वेव नित्यं नितरां वासेन तत्तदनपेक्षणात् सन्तोऽपि ते न सन्त्येवेति भावः। एवं शैलश्रेष्ठ श्रीगोवर्द्धने निजनिवासश्च सूचितः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अध्यात्मदृष्ट्या च मतमुपपादयति–सत्वमिति ॥ २२–३८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

वर्णान्तराणामपि प्रतिनियतस्वस्ववृत्तिलाभे वार्त्तैव वृत्तिरित्यभिप्रयन्नेतत्स्वरूपं दर्शयितुं तस्याश्चातुर्विध्यमाह–कृषीति। कृष्यादीनां द्वन्द्वः कृष्यादयस्तिस्रः कुसीदं वृद्धिजीवनं तुरीयं चतुर्थमेवं वार्त्ता चतुर्विधोच्यते कृषिगोरक्षवाणिज्या इति त्वपपाठः रक्षाशब्दस्य स्त्रीलिङ्गत्वात् इत्थं वृत्तिरभिधायाथ स्ववृत्तिमाह–तत्रेति। तत्र वार्त्ताभेदानां चतुर्णां मध्ये गोवृत्ता गोरक्षा वृत्तिर्येषां तथाभूता वयम् ॥ २१ ॥ अथ स्ववृत्तेरिन्द्राराधेनानपेक्षत्वमाह–सत्वमिति त्रिभिः। तत्र तावद्गवा वृत्तेर्महेन्द्राधीनत्वशङ्कां निराऽह कुर्वन्ना द्वाभ्यां सत्वादयो जगतः सृष्टिस्थित्यन्तहेतवः तत्र रजसा हेतुभूतेनान्योन्यं स्त्रीपुंयोगेन जगदुत्पद्यते ॥ २२ ॥ ततः किमत आह–रजसेति रजसा रजः स्वभावेन प्रेरिताः सर्वत्र नदीसमुद्रपर्वतादिषु वर्षन्ति समुद्रेष्वपि वृष्टिदर्शनान्न प्रेक्षावत्पूर्वकत्वं वृष्टेरिति भावः। प्रजाः गवादयः तैर्मेघैरेव सिद्ध्यन्ति जीवन्ति व्रजा इति पाठे गोसमूहा इत्यर्थः। एवं सति महेन्द्रः किमप्यनिष्टं न करिष्यति किञ्चिदपि नोपकरिष्यति चेत्यर्थः ॥ २३ ॥ नोऽस्माकं पुरः पत्तनानि जनपदा देशा ग्रामागृहाश्च न सन्ति पुरादयो वा संस्थानानि पुरादयो वा न सन्तीत्यर्थः। किन्तु हे तात ! वयं नित्यं वनादिनिवासिनः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कृषिर्भुव उल्लेखनादिक्रिया, वाणिज्यं सत्यानृतलक्षणक्रियादि, गोरक्षा पशुपालनं, वृद्ध्यर्थं द्रव्यप्रयोगः कुसीदं, तत्र कृष्यादिषु गोभिर्वृत्तिराजीवनं येषां ते तथा ॥ २१ ॥ प्रकारान्तरेणेन्द्रमाक्षिपति, सत्त्वमित्यादिना। विश्वं समस्तम् अन्योन्यं निमित्तीकृत्येति शेषः ॥ २२ ॥ मेघानामिन्द्रो नियोजक इत्यत्राह–रजसेति। रञ्जयति सर्वमिति रजो भगवानभिहितः न ह्यचेतनस्य रजोगुणस्य मेघे प्रेरकत्वं सङ्घटीति सिद्ध्यन्ति सम्पन्नकार्या भवन्ति किं करिष्यति न किमपीत्यर्थः "प्रश्ने क्षेपे विकल्पे किम्" इति यादवः ॥ २३ ॥ इतोप्यस्मत्कुलदेवतात्वाभावादिन्द्रयागो नोचित इत्याशयेनाह, न न इति। पुरः पुराणि ग्रामस्थितिमुपादाय गृहिणः सपत्नीकाः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

न न इति द्वाभ्यां तदानीं श्रीगोवर्द्धनसमीप एव व्रजं बोधयति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वस्य वैश्यत्वादुक्तामपि वैश्यवार्त्तां विशिष्याह—कृषीति। कृषिवाणिज्याभ्यां सहिता गोरक्षा कुसीदं वृद्धिजीविका गोवृत्तयः गोरक्षणवृत्तयः अनिशमिति कदाप्यापत् कालेऽपि कृष्यादिकमस्माभिर्नक्रियत इति गाव एवास्माकं दैवतत्वात् पूज्या इत्यर्थः ॥ २१ ॥ ननु, गवामपि वृत्तिर्महेन्द्राधीनैवेत्याशङ्क्य निरीश्वरसाङ्ख्यमताश्रयेण निराकरोति–सत्त्वमिति द्वाभ्याम्। अन्योन्यं स्त्रीपुरुषयोर्योगेन ॥ २२ ॥ सर्वत इति समुद्रशिलोवरादिष्वपि वृष्टिदर्शनान्नप्रेक्षा पूर्व कत्वं वृष्टेरिति भावः। तैरेव मेघैरेव सिद्ध्यन्ति जीवन्ति ॥ २३ ॥ किञ्च, गा वर्द्धयतीति गोवर्द्धन इति व्युत्पत्त्यर्याथाथ्येनैवान भूयमात्वाद्गवां वृत्तिगोवर्द्धनाधीनैवेति गोवर्द्धनश्च पूज्य इत्याह, नेति द्वाभ्याम्। पुरः पत्तनानि जनपदा देशाः किन्तु गोधनचारकत्वाद्वनौकसः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वार्तायाश्चातुर्विध्यमाह—कृष्यादीनां द्वन्द्वः कुसीदं वृद्धिजीवनम् ॥ २१ ॥ ननु, गोवृत्तीनामस्माकं जीवनमिन्द्राधीनमित्यत्र परमेश्वरे सति तदा यत्तेषु प्रकृतितद्गुणतत्कार्यं सूर्ये इमेमजलादिषु बहुषु जीवनहेतुषु सत्सु इन्द्र एव एकलः जीवनहेतुरिति कोऽयं दुराग्रह इत्याशयेनाह—सत्त्वमिति द्वाभ्याम् ॥ २२ ॥ महेन्द्रः वृष्ट्याधिष्ठात्री देवता इन्द्र एव एकलः किं करिष्यति न किमपीत्यर्थः ॥ २३ ॥ तथापि प्रबलाद्धे तव्यमत्राह–नेति। पुरः पत्तनानि जनपदा देशाः वनशैलेषु अगतिकगतिनेश्वरेण विहितेषु निवासो येषां ते ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

वैश्यवृत्तेरवान्तरभेदमाहुः—कृषिवाणिज्याभ्यां सहिता गोरक्षा कुसीदं कलावृद्धिस्तुर्यमिति चतुर्विधा वैश्यस्य वार्त्ता वृत्तिः तत्र तासु वयं गोरक्षावृत्तयो वैश्यत्वात् अनिशमित्यापद्यपि कृष्याद्यकरणकरण्यात् तथा च कर्मवादिभिरप्यस्माकं गोपालनमेव वृत्तिरुक्ता अतः किमिन्द्रेणेति प्रजेशचरणैरङ्गीकृता देवता कर्मवादिभिरेवमवमन्यते ॥ २१ ॥ अथ गवां पालनमिन्द्राधीनमिति चेत्तातपादै रुच्यते तदिदं दूषयन्तीत्याह—सत्वमितिद्वाभ्याम्। अन्योन्यं स्त्रीपुरुषसंसर्गेण ॥ २२ ॥ सर्वत इति सागरशिलोषरादिष्वपि वृष्टेर्वीक्षणान्न तस्याः प्रेक्षापूर्वकत्वं तैर्मेघैरेव प्रजाः सिध्यन्ति जीवन्ति तथा च कर्मिभिः कापिलैश्च विद्वद्भिर्निराकृतत्वात् स्वजीविकार्थी महेन्द्रपूजा पितृचरणैरुक्ता न युक्तेति ॥ २३ ॥ ननु वत्स आयुष्मन्! वैष्णवपुत्रेण वेदमूर्तिना स्वयं भगवता त्वया किमयं वेदविरुद्धः कर्मवादः प्रधानवादश्च प्रस्तूयते तस्य तस्य च बादरायणेन परमर्षिणा चतुर्लक्षण्यांनिरस्तत्वात् तस्मात् परेशेन मृष्टा दत्तभागा च वेदोक्ता देवता त्वया स्वीकार्येति चेन्न मया निरीश्वरः स च स च वादः स्वीक्रियते, किन्तु साक्षात्फलदात्रीं देवतां विहाय ततोऽन्या अप्रत्यक्षा देवता तातपादैरभिमता, तेन तेन वादेनाक्षिप्यते, ननु साक्षात् फलदात्रीं तां देवतां त्वमादिशेति चेन्मदभिमता सातु गिरिराजोऽयमिति भावेनाह—न न इति। नोऽस्माकं बृहद्वननन्दीश्वरादिगताः पुरस्तत्सम्बद्धाः कालिन्दीपारावारभूषणजनपदास्तद्वर्त्तिनो ग्रामास्तत्स्था गृहाश्च नोपजीव्या इति शेषः। तेषां करैर्नो राजावामः, किन्तु तन्निवासिनामंजलियोजनमेव करत्वेन स्वीकुर्महे इति सुखिन्योऽस्मत्प्रजा इति भावः। हे तात! वयं नित्यं वनौकसः गोचारणाय गिरिराजवनेषु प्रायेणावस्थितेः वनशैलेन रत्नमयेन कल्पतरुमण्डितेन ततोऽखिलवाञ्छितदात्रा गिरिराजेन हेतुना निवासस्तेषु पुरादिषु सुखस्थितिर्विद्यते येषां तादृशा वयमिति योगक्षेमकारित्वात् शैलोऽयमस्माकं देवतापदर्शितान् दिव्यपुष्पादिभोगान् भुञ्जामहे यदुपाश्रयणात् दुर्दान्तान् रिपून् जयाम इति भावः। आपातार्थग्रहस्तु मन्द एव नन्दे व्रजपतित्वोक्तेर्विचित्रतूर्यरथमणिस्वर्णाविभूषणकुङ्कुमाद्यतैलपभागोक्तेर्व्रजे सर्वसमृद्धिमत्त्वोक्तेश्च व्याकोपात् "चिन्तामणि प्रकरसद्म" इत्यादि ब्रह्मवाक्याच्चान्यत्र ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सर्वथा न मघवत्कृत्यमिति भगवान्प्रकारान्तरेणाह ॥ सत्त्वं रजस्तम इति। स्थितिश्चोत्पत्तिश्चान्तश्च तेषां हेतवः कारणानि विविधं विश्वं समस्तं जगद्रजसाऽन्योन्यं कारणकार्यतामापन्नमुत्पद्यते। विश्व मामाश्रित्य स्थित्युत्पत्त्यन्तहेतव इत्यप्यन्वयः ॥ २१ ॥ रजसा रञ्जकेन हरिणा चोदिता मेघाः सर्वतोऽम्बूनि वर्षन्ति तैरम्बुभिः प्रजाः सिध्यन्ति तत्र परस्परं भविष्यति किं करिष्यति मघवेति भावः ॥ २२ ॥ केवलं वनवासिनां नः पुरो न सन्ति जनपदा देशाश्च न वयं च ग्रामाश्च गृहाणि चैषां सन्तीति ते तथा न वनौकसस्तपस्विन इव नित्यं काननाभिनिवासिनस्तात वयं वनवासिनो वनौकसः। न च शचीशो दूरेऽस्तीति वचनमिदं समीपमुपयातश्चेत्तदपेक्षावश्यकीति जनको न जल्पेति वाऽऽह ॥ केति। आननाभिनिवासिन आननमस्मन्मुखमभिनिवसतीति स तथा तस्यापि नः काऽपेक्षेति शेषः ॥ २३ ॥ एकतरं परतरशब्दवदयमखण्डः। एकं भाव्यमाजीव्योपजीव्य। उपधौ अतीति वा छेदः। उपधौ व्याजे सति योऽन्यमतिविन्दते स क्षेमं न विन्दते। भक्तिपूर्वकमित्यर्थं छन्दस्त्वाद्व्यवहितस्याप्यतेरन्वयः। तरन्त्यनेनानिष्टनिचयमितितर एकश्चासौ तरश्चेत्येकतरस्तं तारकमेकं भावमुपजीव्यति वा। ऋदोरबित्यप्प्रत्ययः। अन्यं भावमुपधावत्युपास्ते स तस्माद्भावात्क्षेमं न विन्दते आशामात्रं न काङ्क्षितं प्राप्नोति। असती पुंश्चली जारं प्राप्य यथा सार्वकालिकं क्षेमं न प्राप्नोति तथेति। अस्मज्जीवनं वनादिभिरिति नात्र वासे वासवसव आवश्यक इति भावः ॥ २४ ॥

श्रीसुबोधिनी

एवं सर्वेषामेव वर्णानां स्वकर्मणैव जीवनमिति निर्धार्य वार्तायामिन्द्रो हेतुभिरपेक्षित इत्युक्तस्तन्निराकरणार्थं वार्तां बिभजति; **कृषीति**, **कृषिः** कर्षणं **वाणिज्य** व्यापारो **गोरक्षा** गोचारणं **कुसीदं** वृद्धिजीविका तत् **तुर्यं** चतुर्थं पूर्वाभाव एवोपजीव्यमिति, अन्यथा तन् निन्दितमुपपातकमध्ये गणनात्, एवं चातुर्विध्यमुपपाद्य तस्य प्रकृतोपयोगमाह **वार्ता चतुर्विधेति**, तत्र प्रकारेषु **वयमनिशं सर्वदैव गोवृत्तयो**ऽतः कृष्यभावान् नेन्द्रेण **प्रयोजन**मितिभावः ॥ २१ ॥ अस्तु वा कृषिस्तथापि नेन्द्रस्योपयोग इत्याह **सत्त्वमिति**, उत्पत्तिस्थितिप्रलयार्थं **रजःसत्त्वतमांसि** स्वीकृतानि सन्त्यतस्त्रयोऽपि गुणाः **स्थित्युपत्त्यन्तहेतवः**, समुदायेन निरूपयति **रजसोत्पद्यते विश्वमिति**; अवश्यं हि रजो जगदुत्पादयति, यदि मेघान् रजो न प्रेरयेत् तदा कथमुत्पादयेत्? यदीन्द्रादयोऽप्यङ्गीकर्तव्यास्तेपि गुणाधीना इति न तेषां स्वातन्त्र्यं; **किञ्चान्योन्यं** चैतदुत्पद्यते सर्वत्र रजः प्रविष्टमित्यतो बीजादङ्कुरोऽङ्कुराद् बीज पितुः पुत्रः पुत्रात् पुनः पिता "प्रजामनु प्रजायन्त" इतिश्रुतेः, किञ्च विविधमपि जगदुत्पद्यतेचित्राच् चित्रं चित्रादप्यचित्रं विकलात् सकलः सकलाद् विकल इति, अत एतत् सर्वं रजस एवोत्पद्यत इति वक्तव्यं, एकस्यैव तथाङ्गीकारे लाघवं स्यादतो जीवसृष्टिः कर्मणा जडसृष्टी रजसेति जडसृष्ट्यर्थमपि नेश्वरापेक्षा, एवं सामान्यत ईश्वरवादो निराकृतः, श्रुतिसिद्धस्तु न निराकृता इत्यवोचाम ॥२२॥ इदानीं वृष्ट्यर्थमिन्द्रोऽपेक्षित इतिमतं विशेषाकारेण निराकरोति **रजसा चोदिता** इति, **मेघा वर्षन्ति** तेषामन्ता रजोगुणोऽति स हि विक्षेपकोतस्तेन विक्षिप्ता **वर्षन्त्येव** यथा राजानः कौतुकिनः, अन्यथेन्द्राज्ञया वर्षणपक्षे जलेयुक्तभूमौ च वृष्टिर्न स्यादतो रजोविक्षेपा-

देव यथासुखं **वर्षन्त्यत** आवश्यकत्वाल्लाघवाच्च नाज्ञा नियामिका किन्तु **रज** एव, अतस्तेनैव **रजः**प्रेरणवर्षणैव **प्रजाः** सिध्यन्ति जीवन्ति, एवं सति **महेन्द्रः किं करिष्यति ?** तत्कार्यमन्यथैव सिद्धमिति ॥ २३ ॥ अस्तु वा 'तुष्यतु दुर्जन' इतिन्यायेन महेन्द्रकार्यं तथापि नास्माकं तदुपयोगस्तदाह **न नः पुरो जनपदा** इति, नोस्माकं पुरो नगराणि न सन्ति न वा **जनपदा** देशा न वा **ग्रामा** हट्टा नापि **गृहाः**, इन्द्रस्य हि लोकपालकत्वं वृष्टिसाधकत्वं यागभोक्तृत्वं दिग्देवतात्वं च चतुर्विधत्वमप्यस्माकं नोपयुज्यते पुराभावात् न न तेन रक्षा कर्तव्या नापि तस्याधिपत्यं देशाभावान् न कृष्यादौ तदुपयोगो **ग्रामा**भावादाहिताग्नेरिवेन्द्रो हविर्न ग्रहीष्यतीति न भयं **गृहा**भावान्न दिगादिपरिज्ञानापेक्षा, किञ्च **वयं वनौकसः**, अस्वाभाविकं **वन**मितिशास्त्रं, **तात**तेतिसम्बोधनं स्नेहार्थमप्रतारणार्थं च, किञ्च नित्यं सर्वदा **शैले निवसामः**, 'वैष्णवा हि वनस्पतयः' विष्णुः पर्वतानामधिपतिः, अतो वैष्णव एव याग उचितः ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

सत्त्वं रजस्तम इत्यत्र **जीवसृष्टि**रिति जीवस्य देहयोगवियोगौ सुखादिप्राप्तिश्चेत्यर्थः ॥ २२ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

रजसा चोदिता मेघा इत्यस्य विवृतौ **यथा राजानः कौतुकिन** इति **यथा** रजोगुणेन विक्षिप्ता **राजानः कौतुकिनो** द्रव्यं प्रयच्छन्ति एवं रजोगुणेन विक्षिप्ता मेघा अम्बूनि वर्षन्ति ॥ २३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वैश्यवृत्तेश्चातुर्विध्यमाह—*कृषीति*। कृष्यादयस्तिस्रः, कुसीदं वृद्धिजीवनं तुर्यं चतुर्थम्, एवं वार्ता चतुर्विधोच्यते। तत्र तासु अनिशं सर्वदैव गोवृत्तयः गोपालनमेव वृत्तिर्येषां तथाविधा वयम्। कृषिवाणिज्यसहिता गोरक्षा इति समासः ॥ २१ ॥ ननु "तर्हि गवां तृणजलादिसम्पत्त्यर्थं वृष्ट्यधिष्ठातेन्द्रोऽवश्यमाराधनीयः" इत्याशङ्क्याह—सत्त्वमिति। सत्त्वादयः त्रयो गुणाः यथाक्रमं जगतः स्थित्युत्पत्त्यन्तहेतवः। तत्र रजसा गुणेन हेतुभूतेन अन्योन्यं स्त्रीपुरुषयोगेन विविधं देवमनुष्यतिर्यगादिरूपं विश्वं सर्वं जगदुत्पद्यते ॥ २२ ॥ रजसा रजःस्वभावेन प्रेरिता मेघाः सर्वत्र नदीसमुद्रोषरपर्वतादिषु जलप्रयोजनरहितेषु देशेष्वप्यम्बूनि वर्षन्ति, तैरम्बुभिरेव प्रजाः सिद्ध्यन्ति सम्पादितान्नादिप्रयोजना भवन्ति। एवं सति महेन्द्रः किं करिष्यति? यदीन्द्रेण बुद्धिपूर्वकं वृष्टिः कृता स्यात् तदा तदाराधकानां देश एव स स्यात्। न सर्वत्रेति भावः ॥ २३ ॥ तथापि 'योगक्षेमनिर्वाहायेन्द्र आराधनीय' इत्याशङ्क्याह—नेति। 'वृद्धानामग्रे मया किं बहु वक्तव्यम्' इति सूचयन् सम्बोधयति—तातेति। नोऽस्माकं पुरादयो न सन्ति, येषां रक्षाद्यर्थमिन्द्रोऽपेक्षितः स्यादिति शेषः। यतो नित्यं वयं वनौकस इति। दिवसेऽपि वनशैलनिवासिनः। **पुरः नगराणि,** जनपदाः देशाः, ग्रामाः हट्टाः ॥ २४ ॥

अन्वितार्थप्रकाशिका

कृषीति ॥ कृषिवाणिज्याभ्यां सहिता गोरक्षा इति त्रयं बहुत्वपाठे द्वन्द्व एव। कुसीदं वृद्धिजीवनं चतुर्थमेवं वार्ता चतुर्विधोच्यते। तत्र तासु वार्तासु वयम् अनिशं सर्वदैव गोवृत्तयः गोपालनमेव वृत्तिर्येषां तथाविधाः स्मः। अतो गाव एवास्माकं दैवतवत्पूज्याः। गोपत्वाच्च नास्माकं कृष्यादिवृत्तिः ॥ २१ ॥ ननु गवां वृत्तिरपीन्द्राधीनैवेत्याशङ्क्य निरीश्वरसाङ्ख्यमताश्रयेण निराकरोति—सत्त्वमिति ॥ सत्त्व रजस्तम इति त्रयो गुणाः यथाक्रमं जगतः स्थित्युत्पत्त्यन्तहेतवः। तत्र रजसा गुणेन हेतुभूतेनान्योन्यं स्त्रीपुरुषयोगेन विविधं देवमनुष्यतिर्यगादिरूपं विश्वं सर्वं जगदुत्पद्यते ॥ २२ ॥ रजसेति ॥ रजसा रजःस्वभावेन प्रेरिता मेघाः सर्वतः सर्वत्र नदीसमुद्रोषरपर्वतादिषु जलप्रयोजनरहितेषु देशेष्वप्यम्बूनि वर्षन्ति। अतो न प्रेक्षावत्प्रवृत्तिपूर्वकत्वं वृष्टेरिति भावः। तैरम्बुभिरेव प्रजाः सिध्यन्ति सम्पादितान्नादिप्रयोजना भवन्ति। एवं सति महेन्द्रः किं करिष्यति। यदीन्द्रेण बुद्धिपूर्वकं वृष्टिः कृता स्यात्तदा तदाराधकानां देश एव सा स्यान्न सर्वत्रेति भावः ॥ २३ ॥ नेति ॥ हे तात! नोऽस्माकं पुरः नगराणि न सन्ति न च जनपदाः देशाः नापि ग्रामा नापि गृहाः। यतो वयं नित्यं वनौकसः अतो वनशैलनिवासिनः। अतोऽस्माकं योगक्षेमहेतवो वनशैलादयः! गोवर्द्धनसमीपे वासश्च व्यज्यते ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वैश्पजीविकायाश्चतुर्विधत्वमाह कृषीति। कृषिवाणिज्याभ्यां युक्ता गोरक्षा इति त्रयं चतुर्थं कुशीदंवृद्धिजीवनं अनिशं निरंतरं ॥ २१ ॥ ननु गोजीवनमिंद्राधीनमित्याशंक्य न नास्तिकानां निरीश्वरवादमाह सत्वमिति द्वाभ्यां अन्योऽन्यं स्त्रीपुंसप्रसंगेन ॥ २२ ॥ तैर्जलैः ॥ २३ ॥ नोऽस्माकं पुरोनगरं न जनपदाः देशाश्च न गृहाः सौधान संति हे तात वयं तु वनौकसो वनस्थाः अतः वनादिवासिनः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु गवामपि वृत्तिर्महेन्द्राधीनैवेत्याशङ्क्य निरीश्वरसांख्यमताश्रयेण निराकरोति सत्त्वमिति श्लोकद्वयेन ।। सत्त्वमिति ।। सत्त्वं, रजः, तमः इत्येते गुणाः, स्थितिश्च उत्पत्तिश्च अन्तश्च तेषां हेतवः कारणभूताः । तत्र रजसा रजोगुणेन हेतुभूतेन, अन्योऽन्यं स्त्रीपुंससंयोगेन, विविधं विश्वं कृत्स्नं जगत्, उत्पद्यते ।। २१ ।। ततः किमत आह ।। रजसेति ।। रजसा रजःस्वभावेन, चोदिताः प्रेरिताः, मेघाः, सर्वतः सर्वत्र नदीसमुद्रपर्वतादिषु, अम्बूनि जलानि, वर्षन्ति । समुद्रेऽपि वृष्टिदर्शनान्न प्रेक्षावत्पूर्वकत्वं वृष्टेरिति भावः । प्रजा गवादयः, तैर्मेघाम्बुभिरेव, जीवन्ति । व्रजा इति पाठान्तरे गोसमूहा इत्यर्थः । एवं सति, महेन्द्रः शक्रः, किं किं वा करिष्यति । रजोनोदितमेघानां चातुर्मास्ये जलप्रवर्षणस्वभावत्वात् ततः प्रजासिद्धिसत्त्वे सति महेन्द्रस्तत्रानिष्टमिष्टं वा किमपि कर्त्तुं न शक्यतीत्यर्थः ।। २२ ।। तथापि योगक्षेमार्थं देवताऽपेक्षते इति चेदत आह ।। न नः पुर इति ।। नोऽस्माकं, पुरः पत्तनानि न, जनपदा देशाः, न, ग्रामाः संवसथाः, न, गृहा गेहानि च, न सन्ति । वासस्थानभूताः पुरादयो न सन्तीत्यर्थः । किं तु हे तात, वयं नित्यं, वनमेव ओकः स्थानं येषां ते, अत एव, वनानि अरण्यानि च शैलाः पर्वताश्च तेषु निवसन्तीति तच्छीलाः भवामः । अस्माकं योगक्षेमहेतुर्वनशैलादय एवेति भावः । तत्र योगस्त्वलब्धलाभः, क्षेमं लब्धस्य परिरक्षणम् ।। २३ ।। अत्र ब्राह्मणसंमतिं विना नैते स्वीकरिष्यन्तीति मत्वा तानपि संगृह्णन्निगमयति, तत्र स्वयमुत्प्रेक्षितयागप्रयोगकल्पनामाह ।। तस्मादिति ।। तस्मात्, गवामस्मज्जीवनहेतुभूतधेनूनां, अद्रेः तज्जीवनजलतृणादिहेतोर्गोवर्द्धनस्य, ब्राह्मणानां च, मखः तत्तुष्ट्यर्थो यागः, आरभ्यताम् । तत्र ब्राह्मणानां यजनं तु तत्प्रियभोजनविधापनं पुष्कलदक्षिणाप्रदानं च । अनेन 'अञ्जसा येन वर्त्तेत तदेवास्य हि दैवतम्' इत्यभिप्रेतं स्पष्टीकृतम् । कथमयमारम्भणीय इति आकाङ्क्षायामाह । हे पितः, ये इन्द्रयागार्थाः सामग्र्यः तैः, अयं मखो वक्ष्यमाणविधो यागः साध्यतां संपाद्यताम् । अनेन द्रव्यान्तराव्ययद्वारा यागसाधनसौकर्यमपि प्रदर्शितम् ।। २४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृषिवाणिज्येति : १०.२४.२१.

यच्चारब्धंभवद्भिर्विदितमविदितं वा यदन्त्यं फलाप्तिर्नावश्यं स्याद्यदाद्यं वदत तदखिला वैदिकं लौकिकं वा ।
अन्त्यं चेद्यत्र कुत्रास्तु च यदचरमं धर्मतोऽधर्मतो वा नान्त्यं चेदिष्टमाद्यं यदि च तदखिलैर्दृश्यतां वैश्यधर्मः ।। २६ ।।

रजसेति : १०.२४.२३.

तस्मात्तु येनोदयमेति विश्वं विश्वं स एवालमिहाब्दवृष्टौ । रजोगुणस्तात विभाति युक्तं महेन्द्रकृत्यं तु न चाण्वपीह ।। २७ ।।
तात त्वं वृद्ध एव श्रुतविपुलकथाः सर्व एतेऽपि गोपास्तत्प्राज्ञेनापि किं वस्तदपरमुपदेष्टव्यमिष्टार्थजुष्टम् ।
सत्यप्येवं वदामि स्वमतिविलसितं सावधानाः शृणुध्वं यत् सिद्धा बालवाणी श्रुतिसुखजनिका शब्दतोऽप्यर्थतश्च ।। २८ ।।

कृष्णप्रिया

पिताजी, हम तो वैश्य हैं, वैश्यों की वृत्ति आजीविका, खेती, व्यापार, गोपालन और ब्याज-बट्टा इन चार प्रकार के साधनों से चलती है । हम ग्वाल लोग नित्य गौओं को चराते अपनी आजीविका चलाते हैं । हमारी यही आजीविका है, इसलिए हम लोगों को इन्द्र से कोई प्रयोजन नहीं है ।। २१ ।। सत्व गुण, रजो गुण और तमो गुण ये तीन माया के गुण है । इन तीन गुणों से विश्व की रचना, रक्षा और संहार होता है, यह विविध प्रकार का चराचर जगत् रजोगुण की प्रेरणा से आपस में उत्पन्न होता है ।। २२ ।। पिताजी ! इस त्रिगुणात्मक व्यवहार से ये सारे मेघ रजोगुण की प्रेरित होकर सर्वत्र जल की वृष्टि करते हैं । जल से धान्यादि उत्पन्न होता है और उसी धान्यादि से सबका पालन होता है । इस में इन्द्र क्या करेगा ।। २३ ।। हे तात ! हम सब खेतवासी ग्वाल गण हैं न हमारे नगर हैं न जनपद हैं न गाँव है या तो घर है, हम तो केवल वनवासी ब्रजजन हैं, पर्वत और वन ही अपना निवास है ।। २४ ।।

तस्माद् गवां ब्राह्मणानामद्रेश्चारभ्यतां [1]मखः । य [2]इन्द्रयागसम्भारास्तैरयं साध्यतां मखः ।। २५ ।।
पच्यन्तां विविधाः पाकाः सूपान्ताः पायसादयः । संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यताम् ।। २६ ।।
हूयन्तामग्नयः सम्यग् ब्राह्मणैर्ब्रह्मवादिभिः । अन्नं बहुविधं तेभ्यो देयं [3]वो धेनुदक्षिणाः ।। २७ ।।
अन्येभ्यश्च [4]श्वचण्डालपतितेभ्यो यथार्हतः । यवसं च गवां दत्त्वा गिरये दीयतां बलिः ।। २८ ।।

---

१. मख–प्रा. पा. । २. गुणं-वीर. विज. । ३. दीयताम्–विज. । ४. भ्याश्च चाः–श्रीधर. वंशी. जीव. विश्व. ; भ्यश्च श्वच-वीर. विज. ।

कर्दमक्षमा

अन्वयः– तस्मात् गवाम् ब्राह्मणानाम् च अद्रेः मखः आरभ्यताम् ये इन्द्रयागसम्भाराः तैः अयम् मखः साध्यताम् ॥२५॥ संयाव अपूप शष्कुल्यः सूपअन्ताः पायसआदयः विविधाः पाकाः पच्यन्ताम् च सर्वदोहः गृह्यताम् ॥ २६ ॥ ब्रह्मवादिभिः ब्राह्मणैः सम्यग् अग्नयः हूयन्ताम्, तेभ्यः बहुविधम् अन्नम्, देयम् वः युष्माभिः धेनुदक्षिणाः देयाः ॥ २७ ॥ अन्येभ्यः च श्वचाण्डालपतितेभ्यः यथार्हतः देयम्, च, गवाम् यवसम् दत्त्वा, गिरये बलिः दीयताम् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ब्राह्मणानपि संगृह्णन्निगमयति । तस्मादिति । स्वयमुत्प्रेक्षितयागप्रयोगकल्पनामाह य इंद्रयागसंभारा इति सार्धपंचभिः। संभाराः साधनानि ॥ २५ ॥ सूपं मौद्गम् । पायसं केवले पयसि पक्वम् । संयावादयो गोधूमादिविक्रियाः । क्रमश्च सूपपायसयोः श्रुत्या दोहस्यार्थतोऽन्येषां पाठतः ॥ २६ ॥ यागशोभार्थं श्रद्धोत्पादनार्थं चाह । हूयंतामिति । धेनुदक्षिणाः धेनुसहितादक्षिणाः ता एव वा दक्षिणा वो युष्माभिः ॥ २७ ॥ यवसं तृणम् ॥ २८–२९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ब्राह्मणान् विना कर्ममात्रं न सेत्स्यतीत्यभिप्रेत्याह–ब्राह्मणेति । निगमयति बोधयति । यतो वयं वनौकसस्तस्माद्धेतोः। आरभ्यताम् अद्यारभ्य प्रवर्त्त्यताम् । संभारः सामग्री 'संभारः साधनोपाये पालसंधार्यभूषणे' इति निरुक्तिकारः । स्वयमुत्प्रेक्षितः स्वकल्पितः॥२५॥मौद्गम् मुद्गपाकः । संयावः गोधूमसारोघृतखंडनिर्मितः पाकः, दलितगोधूमादिपाको वा । अपूपः गोधूमपिष्टनिर्मितबहुछिद्रो मंडलाकृतिः सखंडः घृतपाकः । शष्कुली च मंडलाकृतिघृतपक्वा गोधूमविकृतिः । श्रुत्या श्रवणेन । आदौ पायसमंते सूपः । दोहस्य दुग्धस्यः । अर्थतः प्रयोजनतः । यत्र यस्य दुग्धादेरपेक्षा तत्रैव तदादेयमिति । सर्वपदेन समग्रदुग्धस्य वा दधितक्रादेर्ग्रहः । अन्येषाम् संयावादीनाम् ॥ २६ ॥ होमं विना यागशोभा श्रद्धा च न भवतीत्याशयेनाह—हूयंताम् । अग्नयः गार्हपत्यादयः । बहुविधम् लेह्यादिरूपम् । यज्ञे केवलगवामपि दक्षिणात्वेन विधानम्, अत एव ता गावः ॥ २७ ॥ यथार्हतः श्वभ्यो बहिः, चांडालेभ्यश्श्वपचादिभ्यश्च ततोऽपि बहिः, पतितेभ्यः सुरापादिभ्यस्ततोपि बहिरित्यर्थः । यवसम् तृणादि । बलिः पायसादिभागः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तस्मात् आजीव्यत्वात् तत्र ब्राह्मणानां गवादिवत् प्रागनुक्तिः सर्वाजीव्यतया सामान्यत एव प्राप्तेरिति भावः । तथा च मनुः–

"उत्तमाङ्गोद्भवा ज्यैष्ठ्यात् ब्रह्मणश्चैव धारणात् । सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः" ॥ इति

आजीव्यतयोक्तत्वेपि वनस्थानुक्तेर्देवतात्वाप्रसिद्धेः तत्राद्रेरेव वा । मुख्यत्वात् यथा स्कान्दे "अहो वृन्दावनं रम्यं यत्र गोवर्द्धनो गिरिः"इति अत्र देवानां समुच्चयात् मखस्य चैकवचनोक्तेर्देवतात्रयाराधनात्मक एक एवायं मखो ज्ञेयः वक्ष्यते च तद्द्रव्येण गिरिद्विजानित्यादि इत्यद्रिगोद्विजमखमिति च तथापि "कृष्णस्त्वन्यतमं रूपम्" इत्यादिना तस्यैव महिमदर्शनात् तदभेददर्शनाच्च शैलस्यैव मुख्यत्वमवगम्यते यद्यपि श्रीवृन्दावनभूमौ नन्दीश्वराष्टकूटवरसानुधबलगिरिसौगन्धिकादयोबहवोऽद्रयो वर्त्तन्ते तथाप्यत्र अद्रिः श्रीगोवर्द्धन एव तन्नामनिरुक्तिबलात् पञ्चमे कुलाचलमध्ये गणनेन तत्पादस्वरूपतत्तदद्रेस्तस्यैव मुख्यत्वात् लोकशास्त्रयोः तस्यैव पूजनप्रसिद्धेः पूजितस्य तस्याग्रे समुद्धरणात् तत्रैकदेशे स्वेवान्नकूट इत्यादिप्रसिद्धेश्च तन्नाम्ना ग्रहणम् अतिसन्निहितत्वेन व्रजाग्रिमदेशे तस्यैव ज्ञेयत्वात् तैरेव साध्यतामिति देवतानिराकरणेन इन्द्रस्याप्रयोजकतोक्तेः एवं द्रव्याहरणपरिश्रमाभावश्च सूचितः एतच्च तस्याधिककोपजननार्थमेव एवं पारम्पर्यागतधर्मपरिपालनमपि वृत्तम् अयोग्यप्रदानपरित्यागपूर्वकयोग्यसम्प्रदानमात्रग्रहणनाविशेषात् प्रत्युत वैशिष्ट्यात् ॥ २५ ॥ महेन्द्रयागादप्ययं मखो विशेषतः सम्पाद्य इत्याशयेन तद्विधिविशेषमुपदिशति, पच्यन्तामिति चतुर्भिः । पाकाः पचनीया अन्नव्यञ्जनादयः सूपा व्यञ्जनानि आदिशब्देन गृहीतानामपि संयावादीनां पृथगुक्तिः प्राचुर्यापेक्षया सर्वदोहस्य विवरणं यथा हरिवंशे "त्रिरात्रं चैव सन्दोहः सर्वघोषस्य गृह्यताम्" इति अन्यत्तैः तत्र श्रुत्या आद्यन्तशब्दश्रवणानुरूपमित्यर्थः दोहस्य दुग्धस्य अर्थतः प्रयोजनवशात् प्रथमत इत्यर्थः ॥ २६ ॥ क्रमविधिमाह—हूयन्तामिति । वेदाभ्यासपरैर्ब्राह्मणैरग्नयः सम्यक् हूयन्तां यद्वा, सम्यग्भिर्ब्राह्मणैर्वैष्णवविप्रैरित्यर्थः । बहुत्वं गार्हपत्यादिद्वयापेक्षया दक्षिणाग्नेरपि तत्र रक्ष आदिहननापेक्षया ग्रहणं बहुगुणमिति बहुविधमिति वा पाठः ॥ २७ ॥ अन्येभ्य ऋत्विगितरेभ्यः विप्रेभ्यो वैष्णवेभ्यो दीनेभ्यो याचकेभ्यश्च किं विशेषनिर्देशेन श्वादीनभिव्याप्यैवान्नादिकं देयं यथार्हतो यथायोग्यं देयं केवलमिन्द्रं वर्जयित्वेति भावः गवां गोभ्यः बलिः गन्धपुष्पाद्युपचारः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ब्राह्मणानामिति ब्रह्मण्यदेवत्वात्, अन्यथा देवानामिव तेषामप्यपूज्यत्वप्रशक्तेः तैर्विना यागासम्पत्तेश्च, अद्रिः श्रीगोवर्द्धन एव, मुख्यत्वात्, लोकतः शास्त्रतश्च तस्यैव पूजनप्रसिद्धेः, पूजितस्य तस्यैवाग्रे उद्धरणाच्च, तन्नामाग्रहणं तत्र तस्यैव

सुप्रसिद्धत्वात्, अतिसन्निहितत्वेन तदेकज्ञेयत्वाद्वा, तैरेव साध्यतामिति देवतानिराकरणेनेन्द्रस्याप्रयोजकतोक्तेः द्रव्याहरणपरिश्रमाभावाच्च: एतच्च तस्याधिककोपजननार्थमेव। एवं पारम्पर्य्यागतधर्म्मप्रतिपालनमपि वृत्तम्, पूज्यपूजार्थं काले संभूतानां द्रव्याणां तदर्थं तदानीमेव सम्यग्विनियोगात्, केवलं गड्डुरिकाप्रवाहन्यायेनाविचारतः पूज्यस्येन्द्रस्य परित्यागेन योग्यपूज्यान्तरस्यैव पूजाप्रवर्त्तनात्, अतो विशिष्टपूज्यसम्पत्तेः ॥ २५ ॥ महेन्द्रयागादप्ययं मखो विशेषतः सम्पाद्य इत्याशयेन तद्विधिविशेषमुपदिशति पच्यन्तामिति चतुर्भिः। पाकाः वचनीया अन्नव्यञ्जनादयः, आदिशब्देन गृहीतानामपि संयावादीनां पृथुगुक्तिस्तेषां प्राचुर्य्यापेक्षया, अन्यत्तैर्व्याख्यातप। तत्र दोहस्यार्थत इति दोहस्य गोरसस्य दुग्धदधिवृतैस्तत्क्रम इति। चकार एवार्थे, तस्यैव; यद्वा, उक्तसमुच्चये अधिकञ्च चक्रुरित्यर्थः। सर्वो निःशेषः; यद्वा सर्वेषामेव पशूनां सर्व्वस्य घोषस्य वा, दुह्यत इति दोहो दुग्धम्; तथा च हरिवंशे (विष्णु प० १६।११) 'तत्र हत्वा पशून् मेध्यान् वितत्यायतने सर्व्वघोषस्य सन्दोहः क्रियतां किं विचार्य्यते'॥ इति॥ २६ ॥ वेदाभ्यासपरैर्ब्राह्मणैरग्नयः सम्यक् हूयन्ताम्, यद्वा, सम्यग्भिर्ब्राह्मणैर्वैष्णवविप्रैरित्यर्थः। बहुत्वं गार्हपत्यादित्रयापेक्षया, होमबाहुल्येन गौरवापेक्षया वा। वो युष्माभिः, किंवा, वो युष्माकं याः प्रिया धेनवस्ता दक्षिणाश्च देयाः। हूयन्तामिति श्रीगोवर्द्धनस्याग्निमुखत्वसूचनेनान्यदेवतावत्तस्यापि देवतात्वं बोधयति॥ २७ ॥ अन्येभ्य ऋत्विगितरेभ्यो विप्रेभ्यो वैष्णवेभ्यो याचकेभ्यो दीनेभ्यश्च' किं विशेषनिर्द्देशेन, श्वादीनाभिव्याप्यैवान्नादिकं देयम्' यथार्हत इति विचारेण यस्मै यद्दातुं युज्यते तदनतिक्रमेणेत्यर्थः। गवां गोभ्यः, बलिः गन्धपुष्पाद्युपचारः॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्माज्जीवनहेतूनां गवां ब्राह्मणानामस्मत्कुलमाशासानामद्रेस्तृणजलादिभिर्नित्यं गोवर्द्धनस्याद्रेश्च तुष्ट्यर्थो मखो याग आरभ्यताम् अनेन "अञ्जसा येन वर्तेत तदेवास्य हि दैवतम्" इत्यभिप्रेतं स्पष्टीकृतं कथमारम्भणीय इत्यत्राह—य इति। सम्भाराः साधनानि तैरयं वक्ष्यमाणविधिः साध्यताम॥ २५ ॥ अयमित्यनेनाभिप्रेतं प्रकारं दर्शयति—पच्यन्तामिति चतुर्भिः। पाकाः पच्यन्तां क्रियन्तां सूपपायसादिशब्दास्तत्पाकपराः यद्वा पाकशब्दोऽत्र बहुलग्रहणादसंज्ञायामपि "अकर्त्तरि च कारके संज्ञायाम्" (३।३।१९) इति कर्मणि घञन्तः पक्तव्याः पच्यन्तां इत्यर्थः सूपान्ताः पायसादय इति पित्रर्थपाकक्रमविपर्ययद्योतनार्थमुक्त तत्र सूपादयः पायसान्ता हि पच्यन्ते सम्यावादयो गोधूमादिविक्रियाः सर्वदोहः व्रजे कृत्स्नं क्षीरं गृह्यतां पायसाद्यर्थमेकत्र समुद्ध्रियतामित्यर्थः॥ २६ ॥ तेभ्यो ब्राह्मणेभ्यो बहुगुणं षड्रसोपेतमन्नं वः युष्माभिः देयं यागशोभार्थं श्रद्धोत्पादनार्थञ्चाह—हूयन्तामिति। ब्रह्मवादिभिः ब्राह्मणैः सम्यक् यथावत् अग्नयः हूयन्ताम् धेनुसहिता दक्षिणाः ता एव दक्षिणा वा देयाः॥ २७ ॥ श्वादिभ्योऽपि यथायोग्यमन्नादिकं देयं श्वपर्यन्ताः अन्नादिभिस्तर्पणीया इत्यर्थः। तथा गवां यवसं तृणं दत्वा गवामिति सम्प्रदानस्य शेषत्वविवक्षया षष्ठी गिरये गोवर्द्धनाय बलिर्दीयताम्॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

॥ २५ ॥ सूपो मुद्गान्नम् अन्धः केवलान्नं संयावः भिन्नयवकृतः मुद्गभिन्नौदनो वा अपूपं पिष्टकृतं शष्कुली पैष्टिका मण्डलाकृतिः सर्वदोहः क्षीरदधितक्रादिकः॥ २६ ॥ बहुगुणं षड्रसोपेतम्॥ २७ ॥ यवसं तृणचूर्चिका गिरये गिरिसन्निहिताय तन्नाम्ने हरये॥ २८–३० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तस्मादाजीव्यत्वात् अत्र सर्वत्र प्रसिद्धेः ब्राह्मणा अपि संग्रहीता देवतानां समुच्चयात् मखस्य चैकत्वात् देवतात्रयाराधनात्मक एवायं मखः तथापि गोवर्द्धनस्य माहात्म्यविशेषदर्शनात्तदीयता प्रसिद्धिः॥ २५–२६ ॥ क्रमविधिमाह—हूयन्तामिति। स्वलङ्कृता इत्यादिकानि प्ररोचनार्थमुपलक्षणानि नतु विशेषणानि तानि विनापि फलसिद्धेः अतस्तत्तत्पूजानन्तरं तत्तत्प्रदक्षिणाभोजनानन्तरं श्रीगोवर्द्धनपरिक्रमः गोधनानि पुरस्कृत्येत्यादि पृथगुक्तेः॥ २७–२९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ब्राह्मणानामाशिषोऽस्माकं प्रत्यक्षफला इति तेऽपि पूज्या इति स्वमते तानप्यनुकूलयन्नाह—तस्मादिति। सम्भाराः साधनानि॥ २५॥ पाका अन्नव्यञ्जनादयः सूपान्ता इति सूपस्यौष्णं पायसादय इति पायसस्य शैत्यमपेक्षितं भवतीति भावः। संयावादयो गोधूमादिविक्रियाः सर्वेषामेव व्रजवासिनां दोहः दोहोत्थदुग्धदध्यादिसञ्चयः॥ २६ ॥ यागशोभार्थं श्रद्धोत्पादनार्थं चाह—हूयन्तामिति। धेनुसहिता दक्षिणाः वो युष्माभिः॥ २७ ॥ स्वमते अन्त्यजपर्यन्तान् सर्वानेव व्रजवासिनोऽनुकूलयन्नाह—अन्येभ्य इति। बलिः गन्धपुष्पाद्युपचारः॥ २८–२९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्मात् गवादीनां मखः आरभ्यतां सम्भाराः साधनानि॥ २५ ॥ पच्यन्तां क्रियन्ताम्॥ २६ ॥ वो युष्माभिः॥ २७ ॥ यवसं तृणम्॥ २८–२९ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

स्वाभिमता देवताः स्फुटयन् निगमयति–तस्मादिति ताभ्यः फलानि तु दुग्धादिन्याशीर्वादैर्गवादिसम्पदां वृद्ध्यरतृणजलदिव्यपुष्पफलादीनि च बोध्यानि। न च मदुक्ते मखे पृथग्द्रव्यव्ययोभावीत्याह–इन्द्रेति। सम्भाराः सामग्र्यः ॥ २५ ॥ पाकाः अन्नव्यञ्जनादयः सूपं मोदगमस्ते येषां पायसं केवले पयसि पक्वमादौ येषां ते सूपे उष्णयस्य पायसे शैत्यस्य चोपेक्ष्यत्वात् संयावादयो गोधूमादिविक्रियाः सर्वदोहश्च सर्वेषां व्रजौकसां दोहत्थदुग्धदध्यादिसमूहः ॥ २६ ॥ मखशोभायै श्रद्धोत्पादनाय चाह–हूयन्तामिति। धेनुसहिता दक्षिणाः वो युष्माभिः ॥ २७ ॥ स्वमते ब्राह्मणाननुकूलान् कृत्वान्यानपि व्रजस्थान् सर्वाननुकूलयन्नाह–अन्येभ्य इति। "अन्नस्य क्षुधितः पात्र"मित्युक्तेर्नत्विन्द्रायेति भावः। यवसं तृणं बलिर्गन्धपुष्पाद्युपहारः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अग्रत एव जाग्रता भगवन्भवता भाव्यं संसाराः सम्भृता वृथा भविष्यन्तीत्यत आह ॥ तस्मादिति। यद्वा नेह साहिती विहिता हातुं शक्या तस्या एवमवश्यं विनियोगः कार्य इत्यर्थान्प्रति वक्ति ॥ गवां ब्राह्मणानामिति। स्वयं गोगोप इति तत्पुरस्कृतिः। अद्रेरान्तरङ्गिको भावोऽद्रिरादरणीयत्वादित्यादेः सर्वत्रापि सर्वैराद्रियमाणस्य ममेति। गवां मखो ब्राह्मणानां च मखोऽद्रेश्च मख आरभ्यामिति मखपदस्य पृथक् पृथगन्वयसूचनार्थं पुनर्मख इत्युक्तिः। अन्यथा मख इत्यतिरिक्तस्यादिति ज्ञेयं। उखवखिमखिगतौ हलश्चेति घञ् संज्ञापूर्वकत्वान्न वृद्धिः। क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति भञ् विषयेऽपि पुंसीति घो वा। तस्मादिन्द्रकृत्याभावादिन्द्रयागसम्भाराः पदार्था एतैरयं मदुक्तो मखः साध्यतां। ये इन्द्रयागसम्भारास्तैर्गवां ब्राह्मणानामद्रेश्च मखः साध्यतां। अयं चारभ्यतां भिया तन्तीति भ्यतस्ते चाराश्च तेभ्यस्तश्च तेषां मध्ये मखो गतो दूतमध्ये निविष्ट इति तदिष्टिं त्यक्त्वाऽयं मखः साध्यतामिति मखस्त्वया मखपतित्वेन सम्मतोऽयं चारभ्यतां मध्ये मखो गत इत्यावृत्त्याऽन्वयो वा चारभ्यतां चारभ्यतः प्रति गति इति वा। यथोक्तं चतुर्थतात्पर्ये त्वत्वंचतुर्ष्विति सूत्रादिति। मख सहस्वदर्चतीत्यृभाष्यटीकयोर्मखात्मा पुरुहूतो वा मखात्मा मखाभिमानीत्युक्तेः ॥ २५ ॥ विविधा नानाप्रकाराः सूपो द्विदलपदार्थोऽन्धो भक्तं पायसं क्षीरविकृतान्नादिर्येषां ते पाकाः पाक्या भाविनीं संज्ञां गृहीत्वा पादसादीत्युक्तिः। संयावो गोधूमान्नमपूपः पोलिकादिः शष्कुल्यः पिष्टकृतमण्डलभक्ष्याणि पच्यतां सर्वदोहाश्च क्षीरादिर्गृह्यतां पाका अर्भकाः पाकाननुकूलाभिलल्लनाभिर्गृह्यतामित्यर्थः। अग्नयादौ पातः पोतानां स्यादिति कक्ष्यः निक्षिप्तरोदन ओदनसिद्धिर्वा न भवेदिति तद्ग्रहणमपि युक्तमिति सूचयितुं पाक्या इत्यनुक्त्वा पाका इत्युक्तमिति मन्येन स्यान्नेयं। मदुदितकृतौ दास्याम्यहमहर्मोक्षमपरोक्षप्रेक्षां वा तद्गृह्यतां। न तादृशी शक्तिस्तवेति नेत्याह ॥ सर्वद इति। अहर्मुहूर्तं विज्ञेयायमोक्षोऽपि भण्यते। अहर्दिनं प्रकाशश्च क्वचिज्ज्ञानं बलं तथेति बृहद्भाष्योक्तेः प्राग्ज्ञानमनन्तरं मोक्षश्चेत्तत्फलत्वेन गृह्यतामिति वा ॥ २६ ॥ ब्रह्मवादिभिर्ब्राह्मणैरग्नयो हूयतां। सम्यगित्यनङ्गभङ्गमाह। तेभ्यो ब्राह्मणेभ्यो बहुगुणं सषड्सं धेनवश्च दक्षिणाश्च ता दीयतां धेन्वात्मका दक्षिणा इति वा ॥ २७ ॥ आश्वचण्डालपतितेभ्यः श्वानश्च चण्डालाश्च पतिताश्च तेभ्यस्तान् आ अभिव्याप्य द्वे पदे। दीयतां यथार्हतो यथायथायोग्यतां गवां यवसं च दत्वा गिरये पर्वताय बलिर्दीयतां। अगायेत्यनुक्त्वा गिरय इति वदन्स्वस्मै सर्वनाम्ने वायवे चेत्यभिप्रैति। चतुर्थतात्पर्ये यथोक्तं। गिरिः प्राणः समुद्दिष्ट इति ॥ २८ ॥

श्रीसुबोधिनी

तत्र विष्णोर्द्वयमङ्गं ब्राह्मणा गावश्च, मन्त्रा एकत्र प्रतिष्ठिता हविरेकत्र, **अद्रिर्गोवर्धनः** स्वयमेव देवतातो वैष्णव एव यागः कर्तव्य इति वक्तव्ये **गवां ब्राह्मणानामद्रेश्च मख आरभ्यता**मित्याह **तस्मामिति**, यदि युक्तिरेव प्रमाणं तदा श्रुत्यनुसारिण्येषा भवतीति गिरिवनेचराणामेष एव याग उचितः, चकारादङ्गदेवताः सर्वा एव वैदिक्यः परिग्राह्याः, अयमिति गोसवात्मकः, 'अयाजयद् गोसवेने'तिवाक्याद् गोसत्रादयमतिरिक्त एव लौकिकोस्य विधानं भगवानेव वक्ष्यति, अनेनैतज् ज्ञापितं **युक्तिसिद्धमपीश्वरयुक्तिसिद्धमेव ग्राह्यं न तु लौकिकयुक्तिसिद्धमिति**, नन्विन्द्रार्थे द्रव्याणि सम्पादितानि कथमेतैरन्यसाधनं ? तत्राह **य इन्द्रयागसम्भारा** आज्यादयस्तैरेवायं **मखः साध्यतां**, मखपदेन च सर्वदेवोपकारो ज्ञापितस्तत्र त्वेक एवेन्द्रस्तुष्यतीति, अज्ञानात् कृते सर्वत्रैवं व्यवस्था, अन्यस्मै दत्तमपि हविराच्छिद्यान्यस्मै देयमिति, 'यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेद् ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेद् ये स्थविष्ठास्तानिन्द्राय प्रदात्र' इत्याद्यभ्युदयेष्टौ कालभ्रमात् प्रवृत्तेष्टिरन्यथा क्रियते तथा प्रकृतेपि युक्तिभ्रमादिन्द्रार्थमपि सम्भृता अन्यार्थमेव कर्तव्याः ॥२५॥ तस्माद् यागादत्र विशेषमाह **पच्यन्तामिति**, लौकिकोत्सवपुरःसरे तु प्राकृतानां महानुत्साहो भवतीति स्त्रीणामप्यत्रोपकारो भवतीति च, **विविधाः पाका** भर्जनजकपचनतैलघृतदुग्धदध्यादिषु च पाकाः परिगृहीतास्तेन नानाविधानि भक्ष्याणि सेत्स्यन्ति, तेषां सर्वेषामन्ते **सूपः** कर्तव्यः पक्वान्नादीनां करणे भूयान् कालो लगत्यतः प्रथमतः सूपकरणे सोमलतामापद्यते, **पायसं** हि बहुदुग्धेल्पीयांसस्तण्डुला दत्ता अल्पाग्नावेव पच्यमाना महता कालेन पच्यन्त इति **पायसमादौ** कर्तव्यं, अथ वा देवानां प्रथमतः पाको मध्ये लौकिकानां महतां प्राकृतानां सूपमात्रमिति, ततो यत् कर्तव्यं तदाह **संयावो** गोधूमचूर्णसारांशाः पूर्वदिवस एव पच्यमाना महता कालेन सिद्धा भवन्ति सोपि ग्राह्यः, **अपूपा** गुडमि-

श्रितचूर्णनिष्पादितपाकः स्नेहद्रव्येषु, **शष्कुल्यो** नालाकारेण भ्रमद्वर्तुला भक्ष्यविशेषाः, **सर्व** एवाद्यतनो **दोहो गृह्यतां** दुग्धस्य विक्रयादिविनियोगो न कर्तव्यः, चकारादशक्यं वत्सेभ्य एव देयमिति ॥ २६ ॥ ततोलौकिको देवानामर्थे होमः कर्तव्य इति **सम्यग्**विधानपूर्वकं **ब्राह्मणैः** स्वरूपत उत्तमा **ब्रह्मवादिनो** ज्ञानतः, ततो होमानन्तरं 'प्रत्यक्षदेवता ब्राह्मणा' इति **तेभ्योन्नं बहुविधं** पक्वान्नादिसहितं **देयं वो** युष्माभिः, **युष्माकं** वैतत् कर्तव्यं **ब्राह्मणान्** प्रति वो युष्मभ्यमिति, धेनवश्च **दक्षिणात्वेन** देयाः ॥ २७ ॥ ततोन्येभ्यो देयमित्याहान्येभ्य इति, क्षत्रियवैश्यादिसर्ववर्णेभ्यस्ततः **श्वचाण्डालपतितेभ्यश्च**, एते बहिर्बलिभुजोतोन्ते दैवतत्वान् निरूपिताः, श्वचाण्डालपतितवायसेभ्यो बलि'रिति, परं **यथायोग्यं**, ततो **गोभ्यो यवसं** देयं चारणार्थं न प्रस्थापनीयास्ततो **गिरये** पर्वताय **बलिर्देयः**, सर्वमेवान्नमुत्तमं पर्वतसमीपे राशीभूतं कर्तव्यम् ॥ २८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तस्माद् गवामित्यस्याभासे अद्रिर्गोवर्धनः स्वयमेव देवतेति देवता नाम विष्णुरित्यर्थः, नन्दग्रामवरसानुपर्वतौ शिवब्रह्मरूपौ गोवर्धनो विष्णुरूप इति पुराण उक्तत्वात् ॥ २५ ॥ **हूयन्तामग्नय** इत्यत्र **अलौकिकोदेवानामर्थे होम** इति लौकिकशब्दः स्मृतिपुराणोक्तवाचकः, अतो ह्यलौकिकशब्देन वेदोक्तो गृह्यते, तथा च वेदोक्तहोमः कार्य इति फलति, **देयं वो धेनुदक्षिणा** इत्यस्य विवृतौ **वो युष्माभिरिति वो युष्माभिरित्यत्र** तृतीयायां व इति वैदिकप्रक्रियया साध्यं **ब्राह्मणान् प्रति वो युष्मभ्यमितीति** नन्दादीन् प्रति यदा भगवत उपदेशस्तदा तु **वो युष्माभिरित्येवं** ज्ञेयं, यदा पुनः पुरोहितादीन् ब्राह्मणान् प्रत्युक्तिस्तदा वो युष्मभ्यमिति चतुर्थी ज्ञेयेत्यर्थः ॥ २७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यस्मादिन्द्रेण न कश्चिदुपकारस्तस्मात् जीवनहेतूनां गवां प्रत्यक्षभूदेवानां ब्राह्मणानां कन्दमूलफलतृणजलादिभिर्नित्यं योगक्षेमनिर्वाहकस्याद्रेर्गोवर्धनस्य च मखो यागः अद्यप्रभृति आरभ्यताम्। अनेन "अञ्जसा येन वर्तेत तदेवास्य हि दैवतम्" इति यदुक्तं तत् स्पष्टीकृतम्। ननु 'अस्य यागस्याननुभूतपूर्वकत्वात् कथं कर्तव्य' इति प्रकारापेक्षायामाह—य इति सार्धैश्चतुर्भिः। इन्द्रयागस्य ये सम्भाराः साधनानि तैरेवायं मखः साध्यताम् ॥ २५ ॥ विविधाः पाकाः पक्तव्यपदार्थाः पच्यन्ताम्। तेष्वेव कांश्चिद्दर्शयति—सूपान्ता इति। सूपं मौद्गं तदन्ते कर्तव्यम् तत्करणे विलम्बो न भवति, तस्योष्णता चापेक्षिता। पायसं बहुदुग्धे अल्पीयांसः प्रक्षिप्तास्तण्डुला अल्पाग्निना पच्यमाना महता कालेन पच्यन्ते तत्, तस्य शीतता चापेक्षितेति, तदादौ कर्तव्यम्। संयावः गोधूमचूर्णसारांशाः सितामिश्रा दुग्धे घृते वा पक्वाः। अपूपाः गुडमिश्रितगोधूमचूर्णनिष्पादिता घृतपक्वाः। शष्कुल्यो नालाकारेण भ्रमद्वर्तुला भक्ष्यविशेषाः। दोहो दुग्धदध्यादिः सर्वो गृह्यताम्। विक्रयादिविनियोगो न कर्तव्यः ॥ २६ ॥ 'अयाजद्गोसवेन' इत्युद्धवोक्तेरस्योत्सवस्य गोवर्धनपूजाप्रधानत्वेऽपि यागत्वसिद्ध्यर्थमाह—हूयन्तामिति। ब्रह्मवादिभिर्वेदज्ञैर्ब्राह्मणैरग्नयः आहवनीयादयः सम्यक् हूयन्ताम्। वो युष्माभिस्तेभ्यो ब्राह्मणेभ्यो बहुगुणं षड्रसोपेतमन्नं देयम्, धेनुसहिता दक्षिणाश्च देयाः ॥ २७ ॥ अन्येभ्यश्चाश्वादिभ्यो यथार्हतः यथा योग्यमन्नादिकं देयम्, तथा गवां यवसं तृणं च दत्त्वा गिरये गोवर्धनाय बलिर्नैवेद्यं पक्वान्नादिकं सर्वं दीयताम् ॥ २८ ॥

अन्वितार्थप्रकाशिका

तस्मादिति ॥ तस्मात् जीवनहेतूनां गवां प्रत्यक्षभूदेवानां सर्वकर्मकाण्डसंपादकानां च ब्राह्मणानां कन्दमूलफलतृणजलादिभिर्नित्यं योगक्षेमनिर्वाहकस्याद्रेर्गोवर्धनस्य च मखो यागः अद्यप्रभृति आरभ्यताम्। वनस्यात्रानुक्तिर्दैवतात्वप्ररूढेः। अतस्त्रयाणामयं मखः तत्रापि शैलो मुख्यः शैलोऽस्मीत्याद्युक्तेः। तत्रापि गोवर्धनो मुख्यः। इन्द्रयागस्य ये संभाराः साधनानि तैरेवायं मखः साध्यताम् ॥ २५ ॥ पच्यन्तामिति ॥ सूपोऽन्ते येषां ते सूपस्योष्मत्वमपेक्षितमित्यर्थः। पायसमादौ येषां ते पायसस्य शैत्यमपेक्षितम् इत्यर्थः। विविधाः पाकाः भोजनार्हद्रव्याणि पच्यन्तां संयावा अपूपाः शष्कुल्यश्च पच्यन्तां दोहो दुग्धदध्यादिः सर्वो गृह्यतां विक्रयादिविनियोगो न कर्तव्यः। अत्र सूपं मौद्गं पायसं केवले पयसि पक्वं संयावः मोहनभोग इति प्रसिद्धः। अपूपः मालपुवा इति ख्यातः। शष्कुली सुहाली पूरी मठडी इत्यादि संज्ञा अन्ये तु कर्णाकारा मध्ये द्रव्यान्तरैः पूरिता गूँजा इति ख्याता इत्याहुः। क्रमश्च सूपपायसयोः श्रुत्वा दोहस्य यत्र यत्रोपयोग इत्यर्थतोऽन्येषां पाठतः ॥ २६ ॥ हूयन्तामिति ॥ ब्रह्मवादिभिर्वेदज्ञैर्ब्राह्मणैरग्नयः आहवनीयादयः सम्यक् हूयन्तां वो युष्माभिस्तेभ्यो ब्राह्मणेभ्यो बहुगुणं षड्रसोपेतमन्नं देयं धेनुसहिता दक्षिणास्ता एव वा दक्षिणाश्च देयाः ॥ २७ ॥ अन्येभ्य इति ॥ अन्येभ्यः आश्वश्चाण्डालपतितेभ्यः श्वचाण्डालपतितपर्यन्तेभ्यः यथार्हतः यथायोग्यमन्नादिकं देयं तथा गवां गोभ्यः यवसं तृणं च दत्त्वा गिरये गोवर्धनाय बलिर्नैवेद्यं पक्वान्नादिकं सर्वं दीयताम् ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इंद्रयज्ञस्य संभाराः सामग्र्यः मखो यज्ञः वृंदावनभूमौ नंदीश्वराद्यनेकाद्रिसत्वेप्यत्रादिपदेन गोवर्द्धन एव ज्ञेयः कुलाचलमध्ये गणितत्वात् ॥ २५ ॥ पाकाः पचनीयाः भोज्यपदार्थाः पायसादयः दुग्धादयः सूपांताः द्विदलांताः तेके संयावः गुडशर्करा-

दिमिश्राः गोधुमविकाराः अपूपाः भाषायां पुडा इति ख्याताः शष्कुल्यः कर्णाकाराघृतपक्वाः शर्करामिश्रितगोधुमविकृतयश्च सर्वदोहः समग्रं दधि दुग्धं च तथाहपरिवंशेत्रिरात्रं चैवं संदोहं सर्वघोषस्य गृह्यतामिति ॥ २६ ॥ वो युस्माभिः धेनुयुक्ताः दक्षिणाः देयाः ॥ २७ ॥ अन्येभ्य ऋत्विगितरेभ्यो विप्रेभ्यःश्वादीनभिव्याप्य यथा योग्यं अन्नादि देयं यवसंतृणं गोवर्धनाय बलिनैवेद्यं पूजनसामग्रीं च एकं इंद्रं वर्जयित्वेति भावः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अयमित्यनेनाभिप्रेतं तत्प्रकारं दर्शयति पच्यन्तामिति चतुर्भिः ॥ पच्यन्तामिति ॥ सूपान्ताः पायसादयः, विविधाः नानाविधाः, पाकाः, पच्यन्तां क्रियन्ताम् । अत्र सूपपायसादयः शब्दास्तत्पाकपराः । अत्र केचित्तु बहुलग्रहणात् 'अकर्त्तरि च कारकेऽसंज्ञायां' इति पाकशब्दं कर्मणि घञन्तं कृत्वा पक्तव्या' पक्तुं योग्या इत्यर्थ इत्याहुः । सूपान्ताः पायसादय इति पित्रर्थपाकक्रमविपर्ययद्योतनार्थमुक्तम् । पित्रर्थपाके सूपादयः पायसान्ता हि पच्यन्ते । अनेनाभिप्रायेण श्रीधरस्वामिनः क्रमश्च सूपपायसयोरित्याहुः । तत्र सूपो मौद्गः पायसं केवलपयसि पक्वं, संयावश्च अपूपाश्च शष्कुल्यश्च ता गोधूमादिविकाराः, तेऽपि पच्यन्ताम् । सर्वदोहः व्रजसंबन्धि सर्वं क्षीरं च, गृह्यतां पायसाद्यर्थमेकत्र समुदीयतामित्यर्थः । दोहशब्दो दुग्धदधिघृततक्रघोलादिगमकः । तच्च यथाप्रयोजनमुपादेयम् । संयावादयो यथापाठं बोध्याः ॥ २५ ॥ यागशोभार्थं श्रद्धोत्पादनार्थं चाह ॥ हूयन्तामिति ॥ ब्रह्मवादिभिः, ब्राह्मणैः, सम्यक् अग्नयः, हूयन्ताम् । तेभ्यो ब्राह्मणेभ्यः, बहुविधं षड्सोपेतत्वाद् बहुगुणमन्नं च, वो युष्माभिः, देयमधिनुदक्षिणाः धेनुसहिता दक्षिणाः ता एव दक्षिणाः, देयाः ॥ २६ ॥ अन्येभ्य इति ॥ अन्येभ्यः, आश्वचाण्डालपतितेभ्यश्च, यथार्हत, यथायोग्यं, अन्नं देयम् । श्वादयोऽप्यन्नादिभिस्तर्पणीया इत्यर्थः । गवां धेनूनां, संप्रदानस्य शेषत्वविवक्षया गवामिति षष्ठी । गोभ्य इत्यर्थः । यवसं तृणं च, दत्त्वा, गिरये गोवर्द्धनाय, बलिः दीयताम् । गिरिराजायापि नैवेद्यं दीयतामित्यर्थः ॥ २७ ॥ स्वलंकृता इति ॥ यूयमपि, स्वलंकृताः स्वाङ्गधृनशोभनालंकाराः, स्वनुलिप्ता उत्तमचन्दनानुलिप्तस्वदेहाः, सु शोभनानि वासांसि येषां ते, परिहितोत्तमवसनाः, भुक्तवन्तः विहितोत्तमान्नभोजनाः सन्तः, गावश्च विप्राश्च अनलोऽग्निश्च पर्वतो गोवर्द्धनश्च तान् , प्रदक्षिणं च, कुरुत ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तस्माद् गवामिति १०.२४.२५

सोऽच्यर्योऽन्वर्थाभिधो योऽस्मिन् गोवर्द्धन इतीरितः । मम चेद् गिरिप्रामाण्यं गिरि प्रामाण्यमस्तु वः ॥ २९ ॥

गोरक्षकेऽर्पणमिहास्य मखस्य कार्यमित्यावर्यमनसो दृढनिश्चयश्चेत् ।
एकां स गामवति चायमनेकशोद्रिः सिद्धस्ततोऽप्यधिकसारभृदेष एव ॥ ३० ॥

विमानी प्राचीनः सुभगसुमनःसंघरुचिरः सुधर्मेड्यः स्वस्थो विविधबहुगोरक्षणचणः ।
शुभोहल्याक्रीडो भवति सुकृतालङ्कृतपदः सहस्राक्षोऽप्यद्रिस्तदयमपि तेनेव सदृशः ॥ ३१ ॥

भुक्त्वाऽस्मत्कृतयज्ञकल्पितहविर्भागं स पर्जन्यतः शक्रोऽस्मानवतीति तात भवतश्चित्ताशयश्चेत् तदा ।
तृप्तः सन्नयमद्रिरप्यनुपदं पर्जन्यतो रक्षिता स्यादेवेति मदुक्तसद्गिरिफलश्रद्धारं स्थाप्यताम् ॥ ३२ ॥

भूदेवाः प्रकृतीन्द्रमिन्द्रमवनीपालाः स्वराराधयन्त्युर्वी देवमिहेन्द्रमङ्घ्रिजनुषः क्षोणीभृदिन्द्रं विशः ।
श्रुत्युक्तेन्द्रपदार्थ एवमृषिभिर्व्याख्यायि वर्णक्रमात् तत् ते वैश्यपते भवेत्सुफलदं क्षोणीधराराधनम् ॥ ३३ ॥

स्वभूभृदनुसेवनाद्भवति यच्च यच्च द्विषद्विशेषपरिचर्यया भवति कीदृशं तत्सुखम् ।
द्वयोरपि तयोस्तवास्त्यनुभवः पितस्तत्स्फुटं विचिन्तय चिरन्तनश्रुतिसुखप्रदां मद्गिरम् ॥ ३४ ॥

प्रमाणेभ्योऽन्येभ्यः प्रबलमपरोक्षं तदपि चेच्छ्रुतिप्रत्यासन्नं प्रबलतरमेवं सति पितः ।
नगेन्द्रं गोपालं सततमनुभूयागमशतैर्लसन्तं हित्वैकश्रुतिपरिचिते का रतिरहो ॥ ३५ ॥

भूभारोद्वहनश्रमाकुलमनाः शेषोऽपि यस्मिंश्चिरं भारं स्वं विनिधाय विश्रमतनुः क्रीडारसे मज्जति ।
किं चानेकतपस्विनोऽपि कवयोऽप्यस्मिन् स्वरावासिनो मन्यध्वं न तदेव भूधरपतिः स्यादन्यसाधारणः ॥ ३६ ॥

अहयोऽपि सदा यत्र नाकुलीनतया स्थिताः । तस्याद्रेरतत्कुलीनत्वमुच्चत्वं च वदामि किम् ॥ ३७ ॥

सहस्रकर्णोऽक्षसहस्रकान्वितःसहस्रपादोरुविराजितो महान् ।
विराट् स्वरूपोऽप्यपरोक्षतां गतो नगात्मनाऽनादृतिरत्र वः कथम् ॥ ३८ ॥

गोपानस्मान् मित्रभूतान् सत्कुर्यादिति नाद्भुतम् । सत्करोतीशवद्यो हि विपक्षानागतानपि ॥ ३९ ॥

माहात्म्यं विदितं न ते व्रजपते नित्यं गृहस्थायिनो यस्मादिन्द्रमहिम्नि भद्रगदिते श्रद्धा विवृद्धा क्रमात् ।
तस्याद्रेस्तु सहस्रनेत्रकलितो दृष्टो मया षाक्पदप्रान्तः क्रीडनकारिणा सहचरा एतेऽपि तत्साक्षिणः ॥ ४० ॥
इन्द्रोद्देशाद्यदि कृतः सवः केवल एव सः । यदि गोवर्द्धनोद्देशादुत्सवः स्यादितीक्ष्यताम् ॥ ४१ ॥

अन्येभ्य इति : १०.२४.२८.

मत्प्रीतिकृद्यदि मतिर्भवतां तदा तु गो-ब्राह्मणानलवितीर्णहविर्विभागः ।
देयो बलिर्गिरिवराय झटित्यमुष्मै वाञ्छा क्षणार्पितफलाय निजाङ्घ्रिभाजाम् ॥ ४२ ॥

कृष्णप्रिया

हे पिताजी ! मेरी तो यह राय है कि, हम लोग गौओं, ब्राह्मणों और गोवर्धन गिरिवर का ही यजन करने की तैयारी करें। हम लोगों ने इन्द्र यज्ञ की जो सामग्री इकट्ठी की है उससे इस गिरिराज का पूजन यजन आराधन करें ॥ २५ ॥ पिताजी ! यज्ञ का प्रकार बताता हूँ, खीर, पूआ, पूरी, जलेबी आदि पक्कान्न बनायें जाय। सब से प्रथम पायस-खीर बनायी जाय और मूंग की दाल शाक आदि सामग्री बनाई जाय। आज का सारा ही दूध सामग्री आदि बनानें के लिये लिया जाय, आज दूध न बेचें उपयोग में लगा दें। सामग्री सिद्ध करने से जो दूध बच चाय उसको अपने बछड़ों को पिला दें ॥२६॥ वेदविद् विप्रों द्वारा विधि पूर्वक भली-भांति हवन करवाया जाय और अग्निदेवता को तृप्त करें। विप्रवरों को स्वादिष्ट भोजन करवावें, उनको अनेक प्रकार के अन्न गौएँ और दक्षिणाएँ दी जायें ॥ २७ ॥ हे पिताजी ! क्षत्रिय वैश्यादि को भी यथोचित दिया जाय, साथ साथ चाण्डाल पतित पातकी और श्वान पर्यन्त सबको यथोचित वस्तुएँ भली-भाँति देकर, हमारी गौओं को हरी हरी घास खिलाकर गिरिवर श्रीगोवर्धन जी की पूजा कीजिए, एवं भोग लगाइए ॥ २८ ॥

स्वलङ्कृता भुक्तवन्तः स्वनुलिप्ताः सुवाससः । प्रदक्षिणं च कुरुत गोविप्रानलपर्वतान् ॥ २९ ॥
एतन्मम मतं तात क्रियतां यदि रोचते । अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ॥ ३० ॥

श्रीशुक उवाच

कालात्मना भगवता शक्रदर्पं[1] जिघांसता । प्रोक्तं निशम्य नन्दाद्याः साध्वगृह्णन्त[2] तद्वचः ॥ ३१ ॥
तथा च व्यदधुः [3]सर्वं यथाऽऽह मधुसूदनः । वाचयित्वा स्वस्त्ययनं [4]तद्द्रव्येण गिरिद्विजान् ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—पुनः भुक्तवन्तः स्वलङ्कृताः सुवाससः च स्वनुलिप्ताः गो विप्र अनल पर्वतान् प्रदक्षिणम् कुरुत ॥ २९ ॥ हे तात ! एतत् मम मतम्, यदि रोचते क्रियताम्, अयम् गो ब्राह्मण अद्रीणाम् च मह्यम् मखः दयितः मखः ॥ ३० ॥ काल आत्मना भगवता, शर्कदर्प जिघांसया गोक्तम्, निशम्य, नन्द आद्याः तद् वचः साधु अगृह्णन्त ॥ ३१ ॥ मधुसूदनः यथा आह, सर्वम् तथा व्यदधुः, च, स्वस्त्ययनम् वाचयित्वा, तद् द्रव्येण गिरिद्विजान् च आनर्चुः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सर्वाञ्छिरःकंपेनानुमोदयन्नाह । गोब्राह्मणाद्रीणामिति । मह्यं मम च ॥ ३०-३१ ॥ तद्द्रव्येण तेन महेंद्रमखद्रव्येण । गिरिं द्विजान्प्रति यथायथम् ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गिरिपूजानंतरं ब्राह्मणान्संभोज्य पश्चात्स्वयं भुक्त्वालंकृताः संतः ॥ २९ ॥ अनुमोदयन् आनंदयन्। अयम् मत्प्रोक्तो मखः । दयितः प्रियः ॥ ३० ॥ कालस्य सर्वदर्पहरत्वाद्भगवतोऽपींद्रदर्पहरणात्तद्रूपत्वेन विशिनष्टि—कालात्मनेति । काल आत्मा चेष्टारूपो यस्य तेन । 'योयं कालस्तस्य ते व्यक्तबंधो चेष्टामाहुः' इत्याद्युक्तेः । यद्वा'—कालश्यामलमेचकाः' इत्यमरोक्तेः कालः श्यामल आत्मा देहो यस्य तेन । यद्वा—कलयत्याकर्षति सर्वचित्तमिति कालः स आत्मा स्वभावो यस्य तेन तथा । आत्मानस्तु मनोबुद्धिस्वभावधृतिजीवात्मपरमात्मान इति । तद्वचः कृष्णवाक्यम् ॥ ३१ ॥ मधुसूदन इति शक्रात्तेषां भयाभावं बोधयति । यद्वा—भ्रमरवत्सारग्र ही मिष्टरसस्य विशेषेण भोक्तेति । तथा मधुसूदनोक्तिप्रकारेण । यथायथम् यथास्वमित्यर्थः ॥ ३२ ॥

---

१. दर्पजीघांसया–बिज. । २. तद्विदः–वीर. । ३. सर्वे–विज. । ४. द्रव्यैर्गोविप्रभृताम्–विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न चान्यकृत्यवदिदं दुःखसाध्यं किन्तु परमसुखमयमेवेत्याह, स्वलमिति। भुक्तवन्त इत्यत्र प्राक् पश्चादिव सुशब्दप्रयोगो दरिद्रं प्रत्येव तद्वचनौचित्यात् यद्यप्येकदैवात्र गवादीनां परिक्रमविधानं तथापि तत्तत्पूजान्ते पृथक् पृथगेव ज्ञेयं पूजान्तकर्त्तव्यत्वात् तस्य अत एव "गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणम्" इति गिरेः परिक्रमः पृथगेव वक्ष्यते उदाहरिष्यमाण हरिवंशवचनेन च नान्यथार्थः कल्प्यते स्वलङ्कृता इत्यादिकानि तु न विषेषणानि किन्तु प्ररोचनार्थमुपलक्षणानि ततो नाङ्गत्वे प्रविशन्ति तदभावेपि तन्निःस्पृहत्वेपि तत्सिद्धेः तस्मात् गवादीनां भोजनात् पूर्वमेव परिक्रमः मद्रेस्तु महाभोजनसमाधानायैव तत्पश्चादिति गवां च पूजा न सर्वासाम् असङ्ख्यत्वात् किन्तु मुख्यानामेव तयातासां परिक्रमश्चाल्प इति ॥ २९ ॥ हे तातेति यदि मयि स्नेहो वर्त्तते तर्हि क्रियतामिति गूढो भावः यदि रोचत इति पूज्येषु तथैवोक्तेर्योग्यत्वात् तेन च विनयविशेषेण तत्कृत्यतामेव सम्पादयति। किञ्च अयं गोब्राह्मणाद्रीणां सखा मह्यं च दयितो हित इत्यर्थः। हितार्थयोगेहि चतुर्थी भवति कथमपि स्वहितं ज्ञात्वा मद्भक्तस्यैव च भवदेककर्त्तव्यतामनुभूय भवतामिदं प्रार्थये न केवलं युक्ततामेव निश्चित्यति भावः ॥ ३० ॥ कालस्यापि आत्मना प्रवर्त्तकेनेति सर्वेषां तदेकाधीनत्वं सूचितम् अयं च तद्वचो ग्रहणे हेतुः यद्वा, परमशक्तिमत्वम् अत इन्द्रदर्पहतिस्तस्येषत्कर इति भावः यद्वा, यदा शक्रयागः प्रवर्तितः तदानीं स एव प्रवृत्तः अधुना चायमेवेति तदिच्छयैव सर्वं प्रवर्त्तते तामतिक्रमितुं कः शक्नोतीति भावः यद्वा कालः श्यामल आत्मा देहो यस्येति श्यामसुन्दरेणेत्यर्थः। तत्सौन्दर्येण सर्वे वशीकृताः किं पुनर्वचनेनेति भावः यद्वा, कलयति जगच्चित्तमाकर्षतीति कालः आत्मा स्वभावो यस्य तत्तद्वचनाङ्गीकरणमिदं न चित्रमिति भावः। शक्रस्य यो दर्पः पूज्यमानस्यापि स्वपित्रादिषु प्राकृतदृष्ट्या तेषां सम्बन्धेन स्वस्मिन्नपि मर्त्यदृष्ट्या बाढमनादरात्मकः य एव "अहो श्रीमदमाहात्म्यं गोपानां काननौकसाम् कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनम् ॥ इति प्राकट्यं लप्स्यमानः तस्य स्वयम् ज्ञायमानस्य जिघांसया अत एव मन्युं जनयन्नित्युक्तम् अन्यथा भयमेव स्यात् न मन्युजननं चेदं तत्सम्बन्धेनवैतदत्यन्तकदर्थनेच्छयेति ॥ ३१ ॥

अत एवाह—तथा चेत्यर्द्धकेन। तद्विशेषश्च श्रीहरिवंशे—

"आनन्दजननो घोषो महान् मुदितगोकुलः। तूर्य्यप्रणादघोषश्च वृषाभाणां च गर्जितैः ॥

हम्भारवश्च वत्सानां गोपानां हर्षवर्द्धनः। दग्धो ह्रदः सरावर्त्तः पयःकुल्यासमाकुलः" ॥

इत्यादि मधुसूदन इति परमसामर्थ्यसूचनेन शक्रात्तेषां भयाभावं बोधयति श्लेषेण मधुपवत् सारग्राहीमिष्टरसस्य विशेषेण भोक्ता चेति तस्य प्रियतमदासवयंमवप्रवर्त्तनं तत्र च वक्ष्यमाणतद्बलिभोजनादिकं युज्यत एवेति भावः। वाचयित्वेति सार्द्धद्वयकेन सङ्कल्पस्यैवानूद्यते क्रमस्तु श्रीकृष्णोक्तविध्यनुसारेणैव ज्ञेयः ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पश्चात् सुष्ठ्वलंकृतास्तच्छेषं भुक्तवन्तश्च सन्तः, यद्वा, न चान्यकृत्यवदिदं दुःखसाध्यम्, किन्तु सानन्दमहोत्सव एव कार्य्यं इति। प्रीतिविशेषार्थमुपदिशति—स्वलमित्यादि। भुक्तवन्त इत्यत्र प्राक् पश्चादिव सुशब्दप्रयोगस्तेषां गोरसप्रधानभोजनेन स्वत एव तत्सौष्ठवसद्भावात् ॥ २९ ॥ हे तातेति पुत्रे मयि यदि स्नेहो वर्त्तते, तर्हि क्रियतामिति गूढो भावः। यदि रोचत इति पूज्येषु तथैवोक्तेर्योग्यत्वात्, तेन च विनयविशेषेण तत्कृत्यतामेव सम्पादयति। यद्वा, अकरणे निजान्तरवैवश्याभिव्यञ्जनेन स्वमतमेव साधयति—न केवलं मयि स्नेहेन मन्मतादरतः कार्य्यः, किन्तु सर्व्वेषां प्रियचिकीर्षयापीत्याह—अयमिति। गवादीनां मम च प्रियः, यद्वा, गवादीनां सखोऽयं मम, चकारादन्येषाञ्च सर्व्वेषामत्रत्यानां प्रियः, ब्राह्मणादीनामिति वा पाठः। आदिशब्देन सर्व्वे व्रजजनाः, अयं पाठस्तेषामपि सम्मतो लक्ष्यते, सर्व्वान् शिरःकम्पेनानुमोदयन्नाहेति व्याख्यानात्, अन्यथा अद्रेः शिरःकम्पासम्भवात्, तथा सर्व्वानित्यनुपपत्तेश्च ॥ ३० ॥ कालस्यापि आत्मना प्रवर्त्तकेनेति सर्व्वेषां तदेकाधीनत्वं सूचितम्, अयं तद्वचोग्रहणे हेतुः, यद्वा, परमशक्तिमत्त्वम्, अत इन्द्रदर्पहतिस्तस्येषत्करेति भावः। यद्वा, शक्रयागः प्रवर्त्तितस्तदानीं स एव प्रवृत्तः, अधुना चायमेवेति तदिच्छयैव सर्व्वं प्रवर्त्तते, तामतिक्रमितुं कः शक्नोतीति भावः। यद्वा, कालः श्यामल आत्मा देहो यस्येति श्यामसुन्दरेणेत्यर्थः, यद्वा, कलयति जगच्चित्तमाकर्षतीति काल आत्मा स्वभावो यस्य। किञ्च, तत् महामधुरम्, यद्वा, प्रोक्तमर्थं तस्य परमस्निग्धस्य प्रियतमस्य वचः, तत्रापि साधु शब्दतोऽर्थतश्चोत्तमम्; यद्वा, साध्विति वदन्तु इति शेषः, यद्वा, साधु यथा स्यात्तथा प्रीतिपूर्व्वकमनुमोद्य परमोत्साहेन स्वीचक्रुरित्यर्थः ॥ ३१ ॥ अत एव तदनुरूपमेव सर्व्वे चक्रुरित्याह—तथेति द्वाभ्याम्। चकार एवार्थे तथैव, यद्वा, अनुक्तसमुच्चये, अधिकञ्च चक्रुरित्यर्थः। तद्विशेषश्च श्रीहरिवंशे श्रीवैशम्पायनेनोक्तः (विष्णु प० १७-१६-१८)—

'आनन्दजननो घोषो महान्मुदितगोकुलः। तूर्य्यप्रणादघोषैश्च वृषभाणाञ्च गर्जितैः ॥
हम्बारवैश्च वत्सानां गोपानां हर्षवर्द्धनः। दध्नो ह्रदः सरावर्त्तः पयः कुल्यासमाकुलः ॥
मांसराशिप्रकृष्टौघः प्रकाशौदनपर्व्वतः। संप्रावर्त्तत यज्ञोऽस्य गिरेर्गोभिः समाकुलः ॥' इति।

तत्र दध्नो ह्रद इत्यादिकं गोपवर्गैः प्रहर्षेण दिनत्रयं सर्व्वघोषस्य दोहग्रहणात्, तथा च तेषां वाक्यं तत्रैव (विष्णु० पु० १७।१४) 'त्रिरात्रञ्चैव सन्दोहः सर्व्वघोषस्य गृह्यताम्' इति । **मधुसूदन** इति परमसामर्थ्यसूचनेन शक्रात्तेषां भयाभावं बोधयन् श्रीपरीक्षितमाश्वासयति । यद्वा, मधुपवत् सारग्राही मिष्टरसविशेषोपभोक्ता चेति तस्य प्रियतमदासवर्ग्य-मखप्रवर्त्तनं तत्र च वक्ष्यमाणतद्बलिभोजनादिकं युज्यत एवेति भावः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

शोभनानि वासांसि येषां तथाभूताः गवादीन् प्रदक्षिणं कुरुत ॥ २९ ॥ हे तात ! एतदेवम्विधं कर्मास्माभिः कर्त्तव्यत्वेन मम सम्मतं यदीदं रोचते तर्हि क्रियताम् अयं मदुक्तो मखो गवादीनां मह्यं मम च दयितः प्रियः गवाद्यन्तरात्मनो मम प्रीतिकर इति गूढोऽभिप्रायः ॥ ३० ॥ शक्रस्य दर्पनाशं चिकीर्षता कालात्मना कालरूपेण बहिः कालरूपेणान्तःपुरुषरूपेण च नियमयतेति भावः । तेन भगवता प्रोक्तं निशम्यातद्विदः शक्रदर्पजिघांसामजानाना अपि नन्दाद्यास्तत् साध्वगृह्णन्नभ्युपजग्मुः ॥ ३१ ॥ ततो यथोक्तं चक्रुः तदेवाह—वाचयित्वेति । स्वस्त्ययनं पुण्याहं तद्द्रव्येण इन्द्रयागार्थद्रव्येण गिरिं द्विजांश्चोद्दिश्य ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

शक्रदर्पजिघांसया शक्रादिदेवानाम् असुरावेशाद्दर्पादिकं भवति तदनुग्रहार्थं तद्दर्पादिहननेच्छया तदुक्तम् अत्यल्पस्त्वसुरावेशो देवानां च भविष्यतीति ॥ ३१–३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अयं गवादीनां मखो मह्यं मम च दयितो हितः शक्रस्य दर्पोऽयं श्रीगोकुले श्रीकृष्णे च अवज्ञात्मकः अहो श्रीमदमाहात्म्यमित्यादिना व्यक्तीभावित्वात् ॥ ३०–३१ ॥ वाचयित्वादिकम् अनुवादमात्रं न क्रमतात्पर्यकम् ॥ ३२–३४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ गोवर्द्धनोद्धरणलीलां दर्शयन्नाह—कालात्मनेत्यादि । कालात्मना कालस्य नियामकेन इन्द्रस्य मदभङ्गस्य समयोऽयमिति तथाविधं कालं प्रेरयामासेति भावः । प्रोक्तमुक्तप्रकारं मखमङ्गरूपं वचनं, साधु अवितर्कं यथास्यात्तथा अगृह्णन्त ॥ ३१–३३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कालात्मना भगवतेत्यादि । कालात्मना कालस्य नियन्त्राप्रेरकेण ॥ ३१–३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मह्यं मम ॥३०॥ कालात्मना इन्द्रमखसंहारकेण ॥३१॥ तद्द्रव्येण इन्द्रमखद्रव्येण गिरिद्विजान् गिरये द्विजेभ्यश्च ॥३२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उपदिष्टार्थमुपसंहरति—एतदिति । परमां सर्वयज्ञदेवतां शनैः सूचयति—मह्यमिति ॥३०॥ कालात्मना कालशक्तिना ॥३१॥ गिरिद्विजान् प्रति ॥ ३२ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

उपस्करत्वमाह—स्वलङ्कृता इति ॥ २९ ॥ सर्वैकमत्यं प्रकाशयितुमाह—एतदिति । मह्यं मम ॥ ३० ॥ कालात्मना इन्द्रमखसंहारेण तथाचेत्यर्द्धम् ॥ ३१ ॥ तद् द्रव्येणेन्द्रमखसम्भारेण गिरिद्विजान् बलिमुपहृत्य गिरये द्विजेभ्यश्च दत्त्वा कृष्णेनादृताः गवां गोभ्यो यवसं तृणमुपहृत्य ॥ ३२–३३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वनुलिप्ता गन्धादिना यूयं गोविप्रानलपर्वतान्प्रदक्षिणं च कुरुत ॥ २९ ॥ रोचते तुभ्यं मह्यं मम दयितः ॥ ३० ॥ कालात्मना विनाऽन्यान्स्वयं काकुपूरकैश्च । यथोक्तं तद्वचः साधुः अगृह्णन्त जगृहुः । शक्रदर्पजिघांसा तु तदुद्दिधीर्षयेति ज्ञेयं ॥ ३१ ॥ गावश्च विप्राश्च भूभृत्पर्वतश्च तेषां स्वस्त्ययनं विदधुः ॥ ३२ ॥

श्रीसुबोधिनी

ततः सर्वे वयं स्त्रियोश्च बालाश्च **स्वलङ्कृता भुक्तवन्तः** कृतभोजनास्ततश्चन्दनादिलेपनयुक्तास्तत उत्तमकञ्चुकादिवस्त्राणि परिधाय गोवर्धनस्य **प्रदक्षिणं कुरुत** चकाराद् वृन्दावनस्यापि गवां विप्राणामग्नीनां च **प्रदक्षिणं** कर्तव्यं, पर्वता अन्येपि तत्समीपस्थाः, आचाराद् गोवर्धन एव वा ॥२९॥ ननु किमेतद् वैदिकं वैदिकादिष्वन्यतरदाहोस्विद् युक्तिसिद्धत्वे केवलयुक्तिसिद्ध पूर्वयुक्तिसिद्ध इन्द्रयाग एव कथं न क्रियत इत्याशङ्क्याह**ैतन् मम मत**मिति, भवद्भिरिन्द्रो वाहं वा परिग्राह्यो मत्परिग्रह **एतन् मम मतं** कर्तव्यमिन्द्र-

परिग्रहे त्विन्द्रयागः कर्तव्यस्तात इतिसम्बोधनादत्र स्नेहोऽप्यधिकः सेत्स्यत्यतः **क्रियतां** तथापि निर्बन्धेन न कर्तव्यं तथा सत्यश्रद्धया कृतमकृतं स्यात्, किञ्चायं यागो **गवां ब्राह्मणाद्रीणां मम च दयितः**, चकाराद् देवानामपि प्रियश्चायं यागो यतो **मह्यं** मत्सम्प्रदानकमेव, एवं सर्वथा तत्परित्यागेनैतत् कर्तव्यमिति ज्ञापितम् ॥ ३० ॥ हृदयपूर्वकं भगवताज्ञापितमिति तेषां हृदये समागतमिति वदन् तथा कथने हेतुमाह **कालात्मनेति**, अयं दुष्टनिराकरणार्थं कालात्मा जातः **कालस्यात्माधिदैविकरूपोन्तर्यामी** वा जातः, तादृशोपि न स्वरूपात् प्रच्युत इत्याह **भगवतेति**, तथाकथने हेतुः **शक्रदर्पं जिघांसतेति**, गर्वस्तस्य दूरीकर्तव्यस्तदुकारार्थं समागते भगवति तेनावश्यमनुवृत्तिः कर्तव्या तथा सति लीला पुष्टा भवति भूयांश्च **निरोधः** कर्तव्यो न भवति, अनुवृत्त्यकरण च गर्वात्, ऐश्वर्यं च तत्र हेतुः, आधिकारित्वात् तन्न निराकर्तव्यमतो भ्रमशास्त्रप्राप्तमेव तस्य निराकृतवान्, अतस्तेन **प्रोक्तं** निशम्य साधनं श्रुत्वा मुख्या एव **नन्दाद्याः साधु तद्वाक्यं** यथा भवति **तथागृह्णन्त** तदुक्तोर्थोङ्गीकृतः ॥ ३१ ॥ ततस्तथैव कृतवन्त इत्याह तथा चेति, विधानपूर्वकं कृतवन्त इति वक्तुं **वाचयित्वा स्वस्त्ययनमित्युक्तवान्**, **स्वस्तिवाचनं** पुण्याहवाचनं ततः पूज्यानामर्चा ग्रहाणामिव निमन्त्रणप्रायमेतत् ॥ ३२ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

सुखसेव्यत्वं दर्शयन्नाह–स्वलङ्कृता इति। स्वनुलिप्ताः चन्दनादिलेपनयुक्ताः ॥ २९ ॥ 'पुत्रस्य मम प्रियाचरणं तव पितुर्युक्तमेव' इति सूचयन् सम्बोधयति–तातेति। एतत् एवंविधं कर्म मम मतं कर्तव्यत्वेन सम्मतं तत् हठात् अश्रद्धया कृतमपि निष्फलमेव स्यात्, अतो यदि भवतां रोचते तर्हि गोब्राह्मणाद्रीणां मह्यं मम च दयितः प्रियोऽयं मखः क्रियतामित्यन्वयः ॥ ३० ॥ एवं भगवता प्रोक्त वचनं निशम्य श्रुत्वा नन्दाद्याः साधु सादरं यथा भवति तथा तद्वचः अगृह्णन्तः अङ्गीकृतवन्तः। भगवतस्तत्पूजाविधानेऽभिप्रायमाह—शक्रदर्पजिघांसतेति। इन्द्रदर्पहननसामर्थ्ये नन्दाभिस्तद्वाक्याङ्गीकारे च हेतुं सूचयन्नाह–कालात्मनेति। पूर्वमपि शक्रयागः कालेनैव प्रवृत्तः, इदानीमपि तेनैव स निवर्तितो गोवर्धनयागश्च प्रवर्तितः, सर्वंप्रति साधारणकारणत्वादित्याशयः ॥ ३१ ॥ ततश्च मधुसूदनः कृष्णः यथा आह तथैव सर्वं व्यदधुः कृतवन्तः। तदेव स्पष्टयति–वाचयित्वेति। स्वस्त्ययनं पुण्याहं ब्राह्मणैर्वाचयित्वा तद्द्रव्येण इन्द्रयागार्थसम्पादितपक्वान्नादिना गिरिं द्विजांश्च प्रति सर्वान् बलीन् नैवेद्यानि तथा गवां यवस तृणं चोपहृत्य समर्प्य आदृता आदरयुक्ताः सद्विजाशिषाः लब्धब्राह्मणाशीर्वादास्ते नन्दादयो गोपाः, तथा स्वलङ्कृताः कृष्णवीर्याणि गायन्त्यो गोप्यश्च गोधनानि पुरस्कृत्य अग्रे कृत्वा अनडुद्भिर्युक्तानि अनांसि शकटान्यारुह्य गिरेः प्रदक्षिण चक्रुरिति त्रयाणामन्वयः ॥ ३२–३४ ॥

अन्वितार्थप्रकाशिका

स्वलङ्कृता इति ॥ सुष्टु अलंकृताः भुक्तवन्तः सुष्ठु चन्दनाद्यैः अनुलिप्ताः सुवाससश्च यूयं गोविप्रानलपर्वतान् प्रदक्षिणं कुरुत ॥ २९ ॥ एतदिति ॥ हे तात ! एतत् मम मतं कर्त्तव्यत्वेन संमतम्। अतो यदि भवतां भवद्भ्यः। शेषे षष्ठी। रोचते तर्हि गोब्रह्मणाद्रीणां मह्यं मम च दयितः प्रियोऽयं मखः क्रियताम् ॥ ३० ॥ कालेति ॥ शक्रस्य दर्पं जिघांसता कालात्मना भगवता प्रोक्तं वचनं निशम्य श्रुत्वा नन्दाद्याः साधु सादरं यथा भवति तथा तद्वचः अगृह्णन्त अङ्गीकृतवन्तः ॥ ३१ ॥ तथा चेति त्रयम् यथा मधुसूदन आह स्म तथा सर्वं व्यदधुः कृतवन्तः। तथा स्वस्त्ययनं पुण्याहं ब्राह्मणैर्वाचयित्वा तद्द्रव्येण इन्द्रयागार्थसम्पादितपक्वान्नादिना गिरिं द्विजांश्च प्रतिबलीन् नैवेद्यानि तथा गवां यवसं तृण चोपहृत्य समर्प्य आदृताः आदरयुक्ता सद्विजाशिषः लब्धब्राह्मणाशीर्वादास्ते नन्दादयो गोपास्तथा स्वलङ्कृताः कृष्णवीर्याणि गायन्त्यो गोप्यश्च गोधनानि पुरस्कृत्य अग्रे कृत्वा अनडुद्भिर्वृषैर्यक्तानि अनांसि शकटान्यारुह्य गिरिं प्रदक्षिणं चक्रुः ॥ ३२–९४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वलंकृताः घृतभूषणाः कृतभोजनाः स्वनुलिप्ताः शोभनतया चंदनचर्चितांगाः ॥ २९ ॥ दयितः प्रियः ॥ ३० ॥ कालात्मनाकालप्रवर्त्तकेन शक्रदर्पं इंद्रगर्वं हंतुमिच्छया साधु समीचीनं तस्य कृष्णस्य वचः जगृहुः ॥ ३१ ॥ व्यदधुः चक्रुः तद्द्रव्येण महेंद्रयज्ञवस्तुनागिरिद्विजान् पूजयांचक्रुः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सर्वान् शिरःकम्पेनानुमोदयन्नाह ॥ एतदिति ॥ हे तात, एतदेवंविधं कर्म, अस्माभिः कर्त्तव्यमिति शेषः। ममापि, मतं ममाप्येतदेव संमतमस्तीत्यर्थः। यदि रोचते, भवतां रुचिकरं स्याद्यदि तर्हीत्यर्थः। इदमेव, क्रियताम्। अयं मदुक्तैतत्कर्मात्मकः, मखो यागः, गोब्राह्मणाद्रीणां, मह्यं च, दयितः प्रियः। गवाद्यन्तरात्मनो ममातिप्रीतिकरोऽस्तीति गूढोऽभिप्रायः ॥ २९ ॥ कालेति ॥ शक्रदर्पमिन्द्रस्य गर्वं जिघांसया, कालात्मना बहिः कालरूपेणान्तः पुरुषरूपेण च नियमयतेति भावः। भगवतोक्तविधेन श्रीकृष्णेन,

प्रोक्तं युक्त्या कथितं वचनमित्यर्थः । निशम्याकर्ण्य, तद्वचो भगवद्वचनं, नन्दाद्या भगवद्विधेयशक्रदर्पजिघांसामजानन्तो नन्दप्रभृतयः, साधु यथा तथा, अगृह्णन्त अगृह्णन् ॥ ३० ॥ ततो भगवता यथोक्तं तथैव चक्रुरित्याह ॥ तथा चेति ॥ उपहृत्येति ॥ मधुसूदनः श्रीकृष्णः, यथा आह, तथा च तेन प्रकारेणैव सर्वं व्यदधुर्नन्दादयोऽकुर्वन्नेव । किंचित्तत्क्रममाह । स्वस्त्ययनं पुण्याहं वाचयित्वा, तद्द्रव्येण, गिरिद्विजान् उद्दिश्य, सर्वान् बलीन् उपहृत्य यथायथं दत्त्वा, आदृता आदरयुक्ताः सन्तः, गवां यवसं घासं च, उपहृत्य, गोधनानि पुरस्कृत्याग्रतः कृत्वा, गिरिं प्रदक्षिणां चक्रुः । इति द्वयोरेकसंबन्धः ॥ ३१-३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एतन्ममेति : १०.२४.३०.

बुद्धिग्रहो यदनिवार्यतरोऽस्ति लोके यद्यूयमिच्छत यथा कुरुतैव गोपाः ।
तत्पादसेवनमहं तु कृतं करिष्ये भूयोऽपि तात शृणु मन्मतिनिश्चितार्थम् ॥ ४३ ॥
एवमिन्द्राय वाङ्मन्युं निर्माय जगदीश्वरः । गिरिं समन्युमाधातुं गिरमूचेऽतिनिर्मलाम् ॥ ४४ ॥

अनेकपाकपालकस्य पाकवैरकारिणा विभन्युचेतसः सदैव यन्युसक्तचेतसा ।
सुगोत्रधारिणो मिथः स्फुटाऽस्ति गोत्रभेदिना बलाभ्यसेविनो बलद्विषा निसर्गवैरिता ॥ ४५ ॥

यावद्भारतभूवन्नवनवानेकाध्वरोत्थं हविर्दायं मामपि दायभागिनमनादृत्योपभुङ्क्ते स्वयम् ।
इत्यन्तर्जनितक्रुधा भगवतोपेन्द्रेण मन्ये व्रजारब्धोऽसौ क्रतुरात्मसाद्गिरिवरोद्देशापदेशात्कृतः ॥ ४६ ॥
स्वस्थः सन् वसुवृद्धिकृत्सुरचितस्वीयालयः सन्मणिः सन्तानाञ्चितनन्दनोदितसुखः स्वर्णाचलाधिश्रितः ।
सत्येवं शतमन्युरस्म्यहमिति स्वस्मिन् सदा मन्यते वक्त्यन्यानपि यः सदा न उचितो नेत्यच्युतस्तं जहौ ॥ ४७ ॥

उद्दिश्येन्द्रमसौ यदीह विहितात्तन्मात्रगामी भवेन्मन्युर्नाऽचलगः स तं यदि समुद्दिश्य व्रजेद् द्वावपि ।
आलोच्यारभतेति तन्नगसमुद्देशेन यज्ञं प्रभुः स्पष्टं मन्युयुतावुभावभवतां रोषात्सवाधापि तौ ॥ ४८ ॥
दत्तं वित्तमकिंचनाय भवि चेद् यत् किञ्चिदप्यादरात् तत्स्यात्कोटिगुणाधिकं नहि तथा स्वस्थाय चाढ्याय च ।
मन्येऽसो शतमन्युरिन्द्र इति तं हित्वा तमेवाध्वरं श्रीनाथो वनवासिने तृणजुषे गोवर्द्धनायादिशत् ॥ ४९ ॥

पूर्णानुग्रहमापिताः प्रतिपदं संरक्ष्यमाणा मया तेषामल्पसुराजवैरलमलं तेभ्यश्च भीशङ्कया ।
इत्थं स्वीयमिहाशयं विशदयन्नीशस्तदानीं पुनर्मन्ये वासवतोषदं निजकुलप्राप्तं न्यषेधत् क्रतुम् ॥ ५० ॥

कालात्मनेति : १०.२४.३१

यद्भागंशावलम्बेन संचरत्यभयो विधिः । श्रुत्वा तस्योक्तिमचलां साध्वगृह्णन्न चाद्भुतम् ॥ ५१ ॥
प्राणिमात्रप्रियो विष्णुस्तत्प्रियो योऽखिलप्रियः । सोऽर्थादेवेति तद्युक्तं स सवः सकलप्रियः ॥ ५२ ॥

तथा चेति : १०'२४.३२.

कृत्वोद्देश्यविधेयभावकलितं संकल्पमन्तर्जनैः कर्तव्यः शुभकांक्षिभिः सति समुद्योगः सदा कर्मणि ।
भूयात् तस्य हि कर्मणः परिणतिः कीदृङ् नियोगः क्वा तद्विच्छ्रीषतिरेव तत्त्वत इति स्पष्टार्थमेतत्कृतौ ॥ ५३ ॥
तव्येन्द्रिराधिपकृपः समुपासनाद्यः स स्वैरमुज्झितविधिर्भवति प्रमादात् ।
वाच्यं न चैवमखिलेश्वर एव तावत् तादृक्प्रवर्तयति यत्स्फुटमिन्द्रयागे ॥ ५४ ॥

कृष्णप्रिया

यह पूजन यजन अर्चन आदि विधि समाप्त होने के बाद खूब प्रसाद खा-पीकर उत्तम प्रकार के वस्त्र आभूषण धारण कर सुवासित चन्दन इत्र आदि लगाईए । पुनः, विप्रों की, गौओं की, अग्नि नारायण की एवं गिरिवर गोवर्धन की प्रदक्षिणा कीजिए ॥ २९ ॥ हे तात ! यह तो मेरा मन्तव्य है । यदि आप सबको यह मत रुचें तो इसके अनुसार महोत्सव मनाईए । इस प्रकार का गोवर्धन याग, गौओं को, ब्राह्मणों को एवं श्रीगिरिराजजी को तो प्रिय लगेगा ही, लेकिन मुझे तो अत्यंत प्रिय ही है ॥ ३० ॥ श्रीशुकाचार्य जी ने कहा—राजन् परीक्षित ? कालरूप भगवान् श्रीकृष्ण ने इन्द्र के घमण्ड को मिटाने की इच्छा से जो कहा, उस बात का श्रवण कर, श्रीनन्दराय जी एवं गोपवृन्द भगवानकी प्रशंसा करने लगे और अत्यन्त प्रसन्न मन से भगवदिच्छा का स्वीकार किया ॥ ३१ ॥ भगवान् मधुसूदन के कथनानुसार सारा कार्यक्रम गोपों ने बनाया और वैसा ही किया । प्रथम सर्वविप्रवरों से स्वस्ति पुण्याह वाचन विधि कराया, पुन उसी द्रव्य एवं सामग्री से श्रीगिरिराज महाराज जीका और विप्रवर्यो का समर्थन एवं सत्कार किया ॥ ३२॥

उपहृत्य बलीन् सर्वानादृता यवसं गवाम् । गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणम् ॥ ३३ ॥
अनांस्यनडुद्युक्तानि ते चारुह्य स्वलङ्कृताः । गोप्यश्च कृष्णवीर्याणि गायन्त्यः सद्विजाशिषः ॥ ३४ ॥
कृष्णस्त्वन्यतमं रूपं गोपविश्रम्भणं गतः । शैलोऽस्मीति [1]वदन् भूरि बलिमादद् बृहद्वपुः ॥ ३५ ॥
तस्मै नमो व्रजजनैः सह चक्रे आत्मनाऽऽत्मने । अहो पश्यत शैलोऽसौ रूपी नोऽनुग्रहं व्यधात् ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—पुनः सर्वान् बलीन् उपहृत्य, आदृताः गोपाः गवाम् यवस उपहृत्य गोधनानि पुरस्कृत्य, गिरिम् प्रदक्षिणम् चक्रुः ॥ ३३ ॥ स्वलङ्कृताः ते गोपाः च गोप्यः अनडुह युक्तानि अनांसि, आरुह्य, च गोप्यः कृष्णवीर्याणि गायन्त्यः प्रदक्षिणम् चक्रुः च सताम् द्विजानाम् च आशिषः जाताः ॥ ३४ ॥ कृष्णः तु गोप विश्रम्भणम् अन्यतम् बृहद् वपुः रूपम् गतः अहम् शैलः अस्मि इति वदन् भूरि बलिम् आदत् ॥ ३५ ॥ कृष्णः व्रजजनैः सह आत्मने तस्मै आत्मना नमः चक्रे, अहो ! पश्यत, असौ शैलः रूपी नः अनुग्रहम् व्यधात् ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

बलीनुपहृत्य दत्त्वा । आदृताः सादराः ॥ ३३ ॥ अनडुद्युक्तानि उत्तमवृषभैर्युक्तानि । सद्विजाशिषो द्विजाशीर्भिः सहिताः ॥ ३४ ॥ गोपविश्रमणं गोपानां विश्वासजनकं रूपं गतः प्राप्तः सन्बलिमुपहारमाददभक्षयत् ॥३५॥ तस्मै आत्मने आत्मना स्वयं व्रजजनैः सह नमश्चक्रे अहो इति सार्धं श्लोकं पठन् ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बलीन् उपहारान् पुष्पधूपदीपादिरूपान् ॥ ३३ ॥ अनड्वाहो युक्ता वहनोचिता येषु तानि तथा । न त्वत्र युक्तशब्दो योजनार्थकोऽपि तु योग्यार्थकः 'युक्त योजनयोग्ययोः' इति शब्दार्णवः । अत एव स्वामिचरणैरुक्तमुत्तमानडुद्युक्तानीति । ते गोपाः । चात्पुरोहिताद्याः । कृष्णवीर्याणि पूतनादिवधरूपाणि बालचरितानि ॥ ३४ ॥ अन्यतममिति । तमप्प्रत्ययेनान्यान्यपि तत्तत्संधानार्थं रूपाणि कृतानीति लभ्यते । उक्तरूपापेक्षया नवीनम् । बृहद्वपुः गिरितुल्यशरीरः । गोपविस्रंभणम् पर्वत एवायमिति गोपविश्वासजनकं रूपं प्राप्तः । शैलोस्मीति । एतद्देशाधिपतिरहमेव युष्मद्भक्त्या प्रादुरासं स्वस्वाभिमतं वरं वृणुतेति वदन् बलिं नैवेद्यं दूरस्थैर्निकटस्थैर्नंदग्रामादिवर्तिभिरपरोक्षतः परोक्षतो वा ध्यानेन समर्प्यमाणं सहस्रकोटिहस्ततस्ततः स्थानादतिदीर्घानतिदीर्घीकृतपाणिभिरादाय तांस्तानानंदयन्नादत् बुभुजे इति विश्वनाथः ॥३५॥ आत्मना कृष्णरूपेण । आत्मने गोवर्द्धनस्थहरिदर्पहारिणे । चक्रेऽत्मना इह पूर्वरूपमार्षम् । रूपी स्वीकृतप्रशस्तरूपः । अत्र प्रशंसायामिनिः । नः अस्मभ्यम् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आदृता इति कर्तव्यार्थम् ॥ ३३ ॥ कथं चक्रुस्तदाह—अनांसीति । तद्विशेषश्चोक्तो हरिवंशे—

"ततो नीराजनार्थं वै वृन्दशो गोकुलानि वै । परिवव्रुर्गिरिवरं सवृषाणि समन्ततः ॥
ता गावः प्रद्रुता हृष्टाः सापीडकनकाङ्गदाः । सस्रगापीड शृङ्गाग्राः शतशोऽथ सहस्रशः ॥
अनुजग्मुश्च गोपालाः कालयन्तो धनानि च । भक्तिच्छेदानुलिप्ताङ्गाः रक्तपीतासिताम्बराः ॥
मायूरचित्राङ्गादिनो भुजैः प्रहरणावृतैः । मयूरपत्रचित्रैश्च केशबन्धैः सुयोजितैः ॥
बभ्राजुरधिकं गोपाः समवाये तदा तु ते । अन्ये वृषानारुरुहुर्नृत्यन्ति स्म परे मुदा ॥
गोपालास्त्वपरे गावैर्जगृहुर्वेगगामिनः" । इति ।

अत्र गोकुलानीति गोकुलस्था जना इत्यर्थः । सवृषाणीति तानि च निजनिजश्रेष्ठैः सह वर्त्तमानानीत्यर्थः । गोप्यश्चानांस्यारुह्य प्रदक्षिणं चक्रुः चकाराभ्यामुभयेषामपि प्राधान्येन परिक्रमणे निर्विशेषमुक्त्वा श्रीगोपीनां कञ्चिद्विशेषमाह कृष्णस्य वीर्य्याणि श्रीगोवर्द्धनयज्ञप्रवर्त्तनान्तानि गायन्त्य इति सद्विजाशिष इत्यनेन विप्रा अपि सस्त्रीकाः प्रदक्षिणं चक्रुरिति सूच्यते ॥ ३४ ॥ इन्द्रयागादपि स्वप्रवर्त्तितयागस्यास्य परमोत्तमत्वं दर्शयन् तस्मिन् विश्वासं नितरां जनयन् गोवर्द्धनमिषेण पृथक् स्वयं तन्मूर्तिराविर्भूय तद्बलिस्वामिनं निजदासवर्यं तं गोपांश्च सर्वानान्दयन् बलिदानानन्तरमेव साक्षात् तद्बलिं बुभुज इत्याह–कृष्णस्त्विति । तुशब्दः पूर्वतो विशेषे अन्यतममिति बहूनां प्रकर्षेण मद्विधानात् अतस्तदा सर्वकर्मसमाधानार्थं सर्वगोपगोष्ठीसन्तोषार्थमलक्षितं बहूनि रूपाण्याविष्कृतानि इति लभ्यते तस्मिन् प्रकर्षश्च वृहत्त्वापेक्षयेति रूपमाकारम् अत एव बृहद्वपुर्यस्य तम् अत एव भूरि प्रचुरतरमपि

---

[1] ब्रूवद्–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. स. रा. घ. ।

बलिं तं सर्वमेव अभुङ्क्त एवं सर्वगोकुलवासिनां तादृशप्रेमेच्छातस्तस्य च तथालालसातस्तथा भोजनमिति च ज्ञेयम्। तदुक्तं हरिवंशे—

तं गोपाः पर्वताकारं दिव्यस्रगनुलेपनम्। गिरिमूर्द्धिन स्थितं दृष्ट्वा हृष्टाः जग्मुः प्रधानतः" ॥ इति ॥ ३५ ॥

तस्मा इत्यर्द्धकम्। कृष्ण इत्यनुवर्त्तते व्रजजनैः सहेति व्रजजनानामप्राधान्यं व्यज्य कृष्णस्य भक्त्यतिशयव्यञ्जकत्वं व्यञ्जितं चक्रे आत्मनेति आकारेपि परे पूर्वरूपत्वमार्षम् आत्मना स्वयमेव तत्र नानाजनवचनं अहो इति सार्द्धकम् रूपी प्रत्यक्षः सन्नित्यर्थः। अनुग्रहं व्यधात् रूपित्वेन साक्षाद्बल्यादनादिना च ॥ ३६ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तेन तदुपदिष्टेन द्रव्येण महेन्द्रमखार्थं सम्भृतेनान्येन च तदधिकेन सर्व्वघोषदोहेन विविधपाकादिसाधितेनेत्यर्थः। गिरेरादौ निर्देशस्तस्यैव यागे मुख्यत्वात्, तन्नामग्रहणं गौरवेण, किञ्चात्मप्रभुश्रीकृष्णोक्तानुसारेण, तच्च प्रागुक्तमेव। एवमग्रेऽपि सम्यक् यथाविधि श्रद्धयोपहृत्य, यद्वा, सम्यगादृताः परमादरयुक्ताः सन्तः श्रीभगवता नितरां श्लाघिता सम्मानिताश्चेति वा; यद्वा, श्रीगोवर्द्धनमूर्द्धिन स्थितेन वक्ष्यमाणेन बृहद्वपुर्द्धरेण तेन सम्यगादृताः सन्त इति श्रीहरिवंशोक्तानुसारेण ज्ञेयम्, तथा च तत्र (विष्णुः प० १७।२७–३१)—

'अद्य-प्रभृति चेज्योऽहं गोषु चेदस्ति वो दया ॥
अहं वः प्रथमो देवः सर्व्वकामकरः शुभः। मम प्रभावाच्च गवाममृतान्येव भोक्षाय ॥
शिवश्च वो भविष्यामि मद्भक्तानां वने वने। रंस्येऽहं सह युष्माभिर्यथा दिवि गतस्तथा ॥
ये चेमे प्रथिता गोपा नन्दगोपपुरोगमाः। एषां प्रीतः प्रयच्छामि गोपानां विपुलं धनम् ॥
पर्य्याप्नुवन्तु क्षिप्रं मां गावो वत्ससमाकुलाः। एवं मम परा प्रीतिर्भविष्यति न संशयः' ॥ इति ॥

कथं चक्रुः? तदाह—अनांसीति। ते श्रीनन्दादयो गोपाः, चकारात् केचिद्वृषानारुह्य त्यादिकं ज्ञेयम्। यद्वा, कृतभोजनादिका इति। तद्विशेषाश्चोक्ता हरिवंशे (विष्णु प० १७।३२।३७)—

'ततो नीराजनार्थं हि वृन्दशो गोकुलानि वै। परिवव्रुर्गिरिवरं सवृषाणि समन्ततः ॥
ता गावः प्रद्रुता हृष्टाः सा पीडकनकांगदाः सस्रगापीड़शृंगाग्राः शतशोऽथ सहस्रशः ॥
अनुजग्मुश्च गोपालाः पालयन्तो धनानि च। भक्तिच्छेदानुलिप्तांगा रक्तपीतासिताम्बराः ॥
मायूरचित्रांगदिनो भुजैः प्रहरणावृतैः। मयूरपत्रचित्रैश्च केशबन्धैः सुयोजितैः ॥
बभ्राजुरधिकं गोपाः समवाये तदा तु ते। अन्ये वृषानारुरुहुर्नृत्यन्ति स्म परे मुदा ॥
गोपालास्त्वपरे गाश्च जगृहुर्वेगगामिनः ॥'

इति गोप्यश्चानांस्यारुह्य प्रदक्षिणं चक्रुः; चकाराभ्यामुभयेषामपि प्राधान्येनादौ परिक्रमणे निर्विशेषमुक्त्वा पश्चाद्भगवत्प्रियतमानां श्रीगोपीनां तदिष्टसिद्ध्या परमहृष्टानां विशेषमाह—कृष्णस्य वीर्य्याणि श्रीगोवर्द्धनयज्ञप्रवर्त्तनादीन्यद्भुतचरितानि गायन्त्य इति, सद्विजाशिष इत्यनेन विप्रा अपि सस्त्रीका गोपगोपीनां संगत्या प्रदक्षिणं चक्रुरिति सूच्यते ॥ ३४ ॥ इन्द्रयागादपि स्वप्रवर्त्तितयज्ञस्यास्य परमोत्तमत्वं दर्शयन् तस्मिन् विश्वासञ्च नितरां जनयन् श्रीगोवर्द्धनमिषेण पृथक् स्वयं तन्मूर्ध्नि आविर्भूय तद्बलिस्वामिनं निजदासवय्य तं गोपांश्च सर्व्वानानन्दयन् साक्षात् तद् बलिं बुभुज इत्याह—कृष्णस्त्विति। तु-शब्दः पूर्व्वतो विशेषे, अन्यत् समम्, गोपवर्गमध्ये वर्त्तमानान्निजरूपादितरत्, तमप्रत्ययोऽत्यन्तभेदविवक्षया, गोपान् विस्रम्भयति विश्वासयतीति तथा तत्, अत एव बृहद्वपुराकारो यस्य तत्, अत एव भूरिं प्रचुरतरमपि बलिं तं सर्व्वमभुङ्क्त, तदुक्तं हरिवंशे (विष्णु प० १७।२४) 'तं गोपाः सर्व्वताकारं दिव्यस्रगनुलेपनम्' गिरिमूर्ध्नि स्थित दृष्ट्वा हृष्टा जग्मुः प्रधानतः ॥' इति। अतः श्रीकृष्णोऽयामति प्रत्यभिज्ञा गोपानां नाजनीति बोधितम् ॥ ३५ ॥ आकारलोप आर्षः। आत्मना स्वयमेव ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

बलिं गवां यवसं च समर्प्य सर्वे नन्दादयः आदरयुक्ता गोधनान्यग्रतः कृत्वा प्रदक्षिणं च चक्रुः ॥ ३३ ॥ अनडुद्युक्तानि वृषभयुक्तान्यनांसि शकटान्यारुह्य ते नन्दादयस्तथा स्वलङ्कृताः गोप्यश्च द्विजानामाशीर्वादसहिताः कृष्णस्य चेष्टितानि गायन्त्यो गिरिं प्रदक्षिण चक्रुरित्यन्वयः। कथमयमचेतनो गिरिर्बलिं गृह्णाति कथन्तरामस्माननुगृह्णाति चेत्यादिरूपां नन्दादीनामाशङ्कामपनुदन् कृष्णः स्वयं गोपानां विश्वासकरं तन्मध्यगतमेकमन्यच्च रूपं प्राप्तस्तत्र बृहद्वपुष्मान् गिरेमूर्ध्नि स्थित्वा शैलोऽस्मीति ब्रुवन्बलिं स्वीकुर्वन् ॥ ३४–३५ ॥ पुनर्गोपमध्यगतेन रूपेण अहो इत्यादिना सार्द्धश्लोकं पठन् गोपजनैः सह महात्मने बृहद्वपुषे स्वस्मा एव तस्मै गिरिरूपाय नमश्चक्रुरित्यन्वयः। अहो इति अहो गोपाः पश्यतासौ शैलः रूपी अस्मदुपहृतबल्यादानोपयुक्तरूपधरः नाऽस्माकमनुग्रहं व्यधादकरोत् ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गोपविश्रम्भणं गोपानां विश्वासकरम् आदत् भक्षितवान् ।। ३५ ।। तस्मै आत्मने पर्वतरूपिणे सङ्कल्प्य नमनमिति तत्राह-अहो इति ।। ३६-३८ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां चतुर्विंशोऽध्यायः ।। २४ ।।
(विजयध्वजरीत्या द्वाविंशोऽध्यायः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अन्यतममिति तमप्रत्ययेन तदानीं तत्तत्समाधानार्थं अन्यान्यपि बहूनि रूपाणि प्रादुष्कानीति लभ्यते बहूनां प्रकर्षे तमप्रकृष्टत्वञ्च बृहत्त्वमात्रेण ।। ३५-३८ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे चतुर्विंशोऽध्यायः ।। २४ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

गोपाश्च कृष्णवीर्याणि । अयमर्थः । गोपीनामन्योन्यमेवं कथासीत् ,—'असौ व्रजराजकुमारः शत्रुमखभङ्गं कृतवान् । शत्रुस्तु कुपितः सन् यदि गोकुलनाशाय वर्षति, तदानेनैव सर्वं समर्थयिष्यते । अस्य किमपि दुष्करं नास्ति' इति पूतनामोक्षावधि यद् यद् वीर्यम् , तदेव गायन्ति स्मेत्यर्थः । द्विजा अपि तत् श्रुत्वा ताभ्य आशिषं चक्रुरित्याह-सद्विजाशिषः ।। ३४-३८ ।।

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे चतुर्विंशोऽध्यायः ।। २३ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

गोप्यश्च कृष्णवीर्याणि गायन्त्यः । अयं भावः अन्योन्यं गोपीनामेवं कथासीत्-असौ कृष्णः शत्रुमखभङ्गं कृतवान् । शत्रुः खलु कुपितः सन् यदि गोकुलनाशाय सज्जते, तदाऽनेनैव सर्वं लक्षिष्यते, अस्य किमपि दुष्करं नास्ति, यदनेन शैशव एव पूतनादयो नाशिता इति पूर्व-पूर्वतराणि यानि वीर्याणि तानि गायन्त्यो गिरिं प्रदक्षिणं चक्रुरित्यन्वयः ।। ३५-३८ ।।

इति चतुर्विंशोऽध्यायः ।। २३ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तद्द्रव्येण इन्द्रमखद्रव्येण गिरिद्विजान् गिरये द्विजेभ्यश्च उपहृत्य दत्वा आदृताः कृष्णेन गवां गोभ्यः अनडुद्भिरनोवाहकैर्वृषैर्युक्तानि ते गोपाश्च गोप्यश्च प्रदक्षिणं चक्रुः सद्विजाशिषः गीयमानाभिर्द्विजाशीर्भिः सहिता द्विजकर्त्तृकाशिषोपि गायन्त्य इत्यर्थः ।। ३३-३४ ।। स्वप्रवर्त्तितयागस्यासाधारणमुत्कर्षं दर्शयंस्तत्र सर्वेषां विश्वासं जनयन् स्वयमेव देवतारूपेण प्रत्यक्षीबभूवेत्याह—कृष्णस्त्विति । अन्यतमं गोवर्द्धनपर्वतोपरि द्वितयं पर्वतमिव सर्वेन्द्रियवत् स्वरूपं गतः प्राप्तः गोपानां विश्रम्भणं पर्वत एवायमिति विश्वासो यत्र तत् शैलोऽस्मीति एतद्देशाधिपतिरहमेव युष्मद्भक्त्या प्रसन्नः प्रादुरभूवं स्वस्वाभिमतं वरं वृणुतेति विब्रुवन् बलिं नैवेद्यं दूरस्थैर्निकस्थैः नन्दग्रामादिवर्त्तिभिर्वा व्रजवासिजनैरपरोक्षतः परोक्षतो वा ध्यानेन समर्प्यमाण सहस्रकोटिहस्तस्तत तत्स्थानादतिदीर्घानतिदीर्घीकृतपाणिभिरादय स्तांस्तानानन्दयन्नादत् भुङ्क्ते स्म ।। ३५ ।। ततश्च तस्मै आत्मने आत्मना देहेन स्वयं व्रजजनैः सह चक्रे आत्मने इत्याकारलोप आर्षः अहो इति सार्द्धश्लोकं पठन् ।। ३६ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उपहृत्य दत्त्वा ।। ३३ ।। सद्विजाशिषः द्विजाशीर्भिः सहिताः ।। ३४ ।। गोपविस्रम्भणं गोपविश्वासकरं गतः प्राप्तः भूरि बलिं बहूपहारम् आदत् अखादत् ।। ३५-३६ ।।

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अनडुद्भिर्युक्तान्यनांसि रथानारुह्य ते नन्दादयो गोपाः गोप्यश्च श्रीयशोदादयो गिरिं प्रदक्षिणं चक्रुः सद्विजाशिषो द्विजाशीर्भिः सहिताः ।। ३४ ।। अथ स्वक्ते मखे लोकविश्वासाय तदर्चितां गोवर्द्धनदेवतां प्रादर्शयदित्याह—कृष्ण इति । व्रजजनमध्यवर्ती कृष्णः अन्यतमं गोवर्द्धनाद्रेरुर्ध्वगतं रूपं प्रकटितवान् कीदृक् बृहद्वपुः सर्वतोपमं दिव्यनेत्रश्रोत्रादिमत् सहस्रभुजमतिदीप्त गोपानां विश्रम्भणं गिरिरयमिति विश्वासो यत्र तत् शैलोऽहमस्म्येतद् देशाधिपतिरर्चनतुष्टान्मत्तोभीष्टानि वृणुतेति तेनैव रूपेण ब्रुवन् सर्वैरर्पितं भूरिबलिमादत् भुङ्क्ते स्म ।। ३५ ।। ततश्च तस्मै शैलरूपायात्मने आत्मना देहेनैव व्रजजनैः सह नमश्चक्रे आत्मनेत्याकारलोपः गूढोत्मेतिवत् पृषोदरादित्वात् ।। ३६ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आहृता बलीनुपहृत्य गवां यवसं तृणं चोपहृत्य गोधनानि च पुरस्कृत्य गिरिं प्रदक्षिणं चक्रुः ॥ ३३ ॥ अनडुद्भिर्वृषभैर्युक्तान्यनांसि शकटानारुह्य सद्द्विजाशिषस्ताभिः सहिता गोप्यः कृष्णवीर्याणि गायन्त्योऽभवन्निति शेषः ॥ ३४ ॥ गोपान्विस्रम्भयंतीति तत्तथा गोपानां विश्रम्भणं येन तद्वाऽन्यतममन्यत् । स्वार्थे तनप् । अन्यतमो मुकुन्दादित्यादिवत् । दृश्यमानान् गतः । शैलोऽहमस्मीति ब्रुवन् भूरिबलिं महान्नराशिं बृहद्वपुश्च सन्नादनभक्षयत् । रूपं दृश्यमानं ततोऽन्यतममन्यद्वपुर्गत इत्यन्वयो वा ॥ ३५ ॥ व्रजजनैः सहात्मनाऽऽत्मने नमश्चक्रे असौ शैलरूपी सन्नोऽनुग्रहं व्यधात् । अहो पश्यत ! रुशब्द इत्यस्मादौणादिकडुप्रत्यये रुरिति भवति । रुणाशब्देनोत्कृष्टतया पीनोरूपीनः । यथोक्तं प्राक् । शैलोऽस्मीति ब्रुवन्भीरीति स्वारस्यात् ॥ ३६ ॥

श्रीसुबोधिनी

ततः सर्वानेव **बलीनुपहृत्य** ग्रहेभ्यो दिग्देवताभ्यस्तदङ्गेभ्यश्च यथोक्तप्रकारेण बलीन् दत्वा पूजाप्रकारानुपहारांश्च, ततः स्वयमत्यादरयुक्ता **गोधनान्यग्र** कृत्वा गिरिं **प्रदक्षिणं चक्रुः** प्रकर्षेण दक्षिणो यथा भवति तथा, यद्यपि सामान्यकथनेनैव विशेषः समायाति तथाप्यन्यूनानतिरिक्तं कृतमिति वक्तुं विशेष उच्यते ॥ ३३ ॥ प्रदक्षिणायां विशेषमाहा**नांसीति**, अन्यथा क्लेशः स्याद् भगवत्परता च न स्यादतो**नांस्यनडुद्युक्तानि** कृतानि, ततोनांस्यलङ्कृतान्यनडुहश्च ते गोपालास्तान्यारुह्य चकारादनारुह्याप्यन्यानारोप्य सुष्ठ्वलङ्कृता जाता येलङ्कारा अधो न भवन्ति, **गोप्याप्यारुह्य प्रदक्षिणं** चक्रुरितिसम्बन्धः, चाकारादन्याश्च स्त्रियः कृष्णस्य सदानन्दस्य स्वार्थमेवावतीर्णस्य **वीर्याणि** पूतनानिराकरणादीनि **गायन्त्यो** जाताः, अनेन कर्माङ्गवैकल्यं च निराकृतं **सत्यो द्विजाशिषश्च** जाताः सतां द्विजानां सतां वा भगवदीयानां द्विजानां च, अनेनास्मिन् यागे ब्राह्मणानामतिसन्तोषः स्त्रीणां चेति निरूपितम् ॥ ३४ ॥ ते हि प्राकृता गोपाला दृष्टमेव मन्यन्तेतो विश्वासार्थं रूपान्तरं कृतवानित्याह **कृष्णस्त्विति**, अत्यन्तमन्योन्यतमोस्याद् रूपादतिविलक्षणोतिस्थूलो रूपान्तरमेव, तत् पर्वतस्याधिदैविकं रूपमितिपक्षं व्यावर्तयति तुशब्दः, गोपानां **विश्रम्भणं** विश्वासं **गतः** विश्वासो यत्र तादृशे रूपे दृष्ट एव तेषां विश्वास इति विश्वासो भगवद्विषयक इति नमादत् तं बलिं बुभुजे तदा गोपैः कस्त्वमिति पृष्टः **शैलोस्मीति वदन्नितिशब्दः** प्रकारवाची कञ्चित् प्रति गोवर्धनोस्मीति कञ्चित् प्रति शैलोस्मीति कञ्चित् प्रति पर्वतोस्मीत्येवं **वदन्**, एवं **भूरिबलिमादत्** पक्वान्नादिकं बहु भक्षितवान् पर्वतस्थान् सर्वानेव तर्पितवान् ॥ ३५ ॥ ततः केषाञ्चित् सन्देहोपि भवेदिति सर्वान् प्रदर्श्य नमस्कारं करोति, **व्रजजनैः** सह **तस्मै नमश्चक्र आत्मना** स्वेनैवात्मने स्वस्मै, आकारस्त्वत्र वैदिकप्रक्रियया लुप्तः, आत्मनेति द्वारान्तरनिषेधाय स्वरूपस्य करणता, तत्र तत्र स्थिता मायापसारितेति ज्ञापयितुमात्मन इत्युक्तं, सर्वथा 'तदेवैत'दितिवचनमप्याहाहो **पश्यतेति, असौ शैलः** सर्वात्मकत्वादानन्दमयस्य बीजस्य तथात्वादतस्तन्नाम्नैव व्यपदिश्यते, पश्यतेतिप्रबोधनं विशेषज्ञापनार्थं प्रमाणवस्तुपरतन्त्रेपि सावधानार्थं विधियुक्त एव, ननु शैलो गोवर्धनः **पृथग्** दृश्यते कथमसौ शैल इति ? तत्राह **रूपीति, असौ रूपवान् कामरूपो** ह्ययं; अतो भवतां सन्तापार्थमेतादृशरूपं कृत्वा भुङ्क्त इत्यर्थः, एतदप्यामन्द एव सङ्गच्छते, किञ्च **नोस्माकमनुग्रहं व्यधाद्** दत्तार्थस्वीकारात्, अन्यथा प्रदर्शयेदेवात्मानं न तु भुञ्जीत, न इति सामान्योक्तिर्नमस्कारवत् समर्थनीया ॥ ३६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

अहो पश्यत इत्यत्र **आनन्दमस्येति तथात्वात्** भगवत्त्वादित्यर्थः, "आनन्दाद् ध्येवे"त्यादिश्रुतेरानन्दमयः सर्वबीजं स च भगवद्रूप इति सर्वैरपि नामभिर्भगवान् व्यपदेष्टव्यः, **एतदपीति** आनन्दे बीजे सति तस्य सर्वतः सूक्ष्मत्वात् तत्कार्यस्य कामरूपत्वं सङ्गच्छत इत्यर्थः, **नमस्कारवदिति** यथात्मनात्मने नमनं तथा स्वेनैव स्वस्यानुग्रह इत्यर्थः ॥ ३६ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

अनांस्यनडुद्युक्तानीत्यस्य विवरणे **अनडुहश्चे**ति **आरुह्ये**त्यनेनान्वयः तथा सति द्वितीयान्तमेव कर्म युक्तमिति अनडुहश्चेत्युक्तं, अनांसि अलङ्कृतानि अनडुहश्च अलङ्कृतानिति फलितम् ॥३४॥ **कृष्णस्त्वन्यतमं रूपमित्यत्र तत्पर्वतस्याधिदैविकं रूपं इति पक्षं व्यावर्तयति तु शब्द** इति पर्वतस्याधिदैविकं रूपमिदं न भवत्यपि तु श्रीगोवर्धनस्थायिशुद्धपुष्टिपुरुषोत्तमस्वरूपमिदमित्यर्थः, अत्र गोवर्धनस्थायिपुरुषोत्तमस्वरूपेण सह नन्दराजकुमाररूपपुरुषोत्तमस्य सहैव भोजनं, रूपद्वयस्यैकत्वात्, तथा च एकं नन्दराजकुमारात्मकं रूपं गोपान् प्रति गोवर्धनस्थायिस्वरूपपूजां शिक्षयन् स्वयं गोवर्धनं पूजयति, तस्मिन् शिक्षकस्वरूपे नन्दस्य पुत्रभावदार्ढ्यान् मत्पुत्रस्यायं देवः कल्याणं करोत्वितिबुद्ध्या श्रीनन्दः स्वयं गोवर्धनं पूजयन् स्वबालकेन श्रीकृष्णेन पूजां कारयति, अत एनां लीलामेनं भावं च समाश्रित्यास्मन्मार्गे श्रीनवनीतप्रियो भगवान् गोवर्धनं पूजयति, नन्दराजकुमारस्य गोवर्धनस्थस्वरूपस्य च सहभोजनात् गोकुलस्थगोवर्धनस्थस्वरूपयोः एकत्र भोजनलीलां प्रदर्शयितुं भगवदाज्ञां प्राप्य श्रीविट्ठलेश्वरैः श्रीनवनीतप्रियादिस्वरूपाः श्रीगोकुलतः समानीय श्रीगोवर्धनधरेण महान्नकूटोत्सवसमये सह स्थापितः सहैव भुञ्जते,

श्रीमद्भागवतरीत्या गोकुलस्थगोवर्धनस्थपुरुषोत्तमस्वरूपयोः सहभोजनात्, रूपद्वयस्यात एव पृथग्दर्शनमुक्तं "तस्मै नमो व्रजजनैः सह चक्रेत्मनात्मने" इति, अतोत्रैकं रूपं नन्दराजनिकटे तिष्ठत् गोवर्धनस्थस्वस्वरूपं नमस्करोति, तथा च व्रजस्थानां सर्वे भावाः श्रीकृष्ण एव स्थिताः, परं नन्दराजकुमारत्वेन, श्रीकृष्णे देवभावो न स्थित इति देवभावेनान्यस्य भजनं करिष्यन्ति, तथा सति निरोधो न सेत्स्यत्यतो देवभावस्यापि स्वस्मिन् स्थापनार्थं श्रीगोवर्धनस्थायिस्वरूपस्य पूजनं कारितवान्, तेषां हृदि माहात्म्यज्ञानजननार्थं स्वयमपि पूजितवान्; अनया लीलया व्रजस्थानां देवो गोवर्धनस्थायी भगवान् **पुरुषोत्तम** इति सिद्धं, अत एव गोवर्धनस्थायी श्रीगोवर्धननाथोस्मत्सिद्धान्ते पुष्टिमार्गे देव इति तत्र देवत्वव्यवहारो देवमन्दिरवत् तत्र ध्वजस्थापनादीनि पुष्टिस्थैर्विभावनीयम् ॥ ३५ ॥ **अहो पश्यते**त्यत्र ननु भगवता स्वस्वरूपस्य "असौ शैल" इति शैलत्वं कथमुक्तमित्याकाङ्क्षायामाहुः **असौ शैलः सर्वात्मकत्वादिति** असौ भगवान् शैलः, तत्र हेतुः **सर्वात्मकत्वादिति**, "एतदात्म्यमिदं सर्वं" "पुरुष एवेदं सर्वं" 'स सर्वं भवती'त्यादिश्रुतेः, तदेवोपपादयन्ति **आनन्दमयस्य बीजस्य तथात्वादिति**, एतमानन्दमयमात्मानमुपसङ्क्रामती"तिश्रुतेरस्यानन्दमयत्वं, आनन्दमयस्य बीजत्वं कारणत्वात्, कारणत्वं "तस्माद् वा एतस्मादात्मनः आकाशः सम्भूत" इत्यादि श्रुतेः, "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त" इत्यत्र आनन्दमयस्य कारणत्वोक्तेर्बीजत्वं ज्ञेयं बीजस्य समवायिकारणत्वात् कार्यस्य तदात्मकत्वं, अतः कारणरूपो भगवान् शैलरूप इति शैलत्वकथनं युक्तमेव, **रूपी नोऽनुग्रहं व्यधात्** इत्यत्र **नमस्कारवत् समर्थनीये**ति यथा स्वेन स्वस्मै शैलरूपिणे नमस्कारः कृतस्तेषां व्रजवासिनां तस्मिन् स्वरूपे माहात्म्यज्ञानजननार्थं **नोनुग्रहं व्यधा**दिति अनुग्राह्याणां मध्ये न इति पदेन स्वस्यापि निवेश उक्त इत्यर्थः ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कृष्णस्तु गोपानां विश्रम्भणं गोवर्धने दैवतविश्वासकरमन्यतमं रूपान्तरं गतः प्राप्तः, अत एव बृहद्वपुश्च सन् गिरेर्मूर्ध्नि स्थितः 'शैलाभिमानी देवोऽस्मि' इति ब्रुवन् गोपैरर्पितं बलिमादत् अभक्षयत् ॥ ३५ ॥ अहो आश्चर्यं पश्यत । युष्माभिर्बहुकालमि-'द्रपूजा कृता' परन्तु कदापि प्रत्यक्षः स नाभूत् ॥ असौ शैलस्तु रूपी प्रत्यक्षस्वरूपः सन् अनुग्रहं व्यधात् अनुग्रहेणास्मद्दत्त बलिं बुभुजे । एष गिरिः कामरूपी यथेष्टरूपग्रहणसमर्थोऽतोऽवजानतः अवज्ञां कुर्वाणान् वनौकसो मर्त्यान् मनुष्यान् सिंहव्याघ्रसर्पादिरूपेण हन्ति । यस्मादेवं तस्मादात्मनः गवां च शर्मणे क्षेमायास्मै गोवर्धनदेवाय वयं नमस्यामः इति वदन् व्रजजनैः सह श्रीकृष्णः आत्मना स्वयमेव तस्मै गृहीताभिनवस्वरूपाय आत्मने नमश्चक्रे इति द्वयोरन्वयः ॥ ३६-३७ ॥

अन्वितार्थप्रकाशिका

कृष्ण इति ॥ कृष्णस्तु गोपानां विश्रम्भणं गोवर्धने दैवतत्वविश्वासकरमन्यतमम् अन्येषु भगवद्रूपेषु अतिशयितं रूपान्तरं गतः प्राप्तः । अत एव बृहद्वपुश्च सन् गिरेर्मूर्ध्नि स्थितः शैलः शैलाभिमानी देवोऽस्मीति ब्रुवन् गोपैरर्पितं बलिमादत् अभक्षयत् । बृहद्वपुरिति दूरतोऽपि तत्तद्ग्रामवासिभिर्दत्तं दूरादेवादाय अभक्षयदिति ॥ ३५ ॥ तस्मै इति द्वयम् ॥ अहो आश्चर्यं पश्यत युष्माभिर्बहुकालमिन्द्रपूजा कृता परंतु कदापि प्रत्यक्षः स नाभूत् । असौ शैलस्तु रूपी प्रत्यक्षस्वरूपः सन् नः अनुग्रहं व्यधात् अनुग्रहेणास्मद्दत्तं बलिं बुभुजे । एष गिरिः कामरूपी यथेष्टरूपग्रहणसमर्थोऽतोऽवजानतः अवज्ञां कुर्वाणान् वनौकसो मर्त्यान् मनुष्यान् सिंहव्याघ्रसर्पादिरूतेण हन्ति । हि यस्मादेवं तस्मादात्मनो गवां च शर्मणे क्षेमायास्मै गोवर्धनदेवाय वयं नमस्यामः । इति सार्द्धश्लोकं वदन् व्रजजनैः सह श्रीकृष्णः आत्मना स्वयमेव तस्मै गृहीताभिनवस्वरूपाय आत्मने नमश्चक्रे । सह चक्रेऽऽत्मनेति पाठे मन्त्रेष्वाङ्यदेरात्मन इत्यालोपः । स चक्र आत्मनेति पाठेऽपि सन्ध्यभाव आर्षः ॥ ३६-३७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तेभ्यः सर्वान् बलीन् नैवेद्यादीन् उपहृत्यदत्वा आदृताः सादराः संतः पुरस्कृत्य अग्रे कृत्वा गिरिप्रदक्षिणं दक्षिणभागे गिरेः परिक्रमण चक्रुरित्यर्थः ॥ ३३ ॥ बलीवर्दसंयोजितानि अनांसि रथान् शकटानि च आरुह्य सद्विजाशिषः द्विजाशीर्वादैः सहिताः प्रदक्षिण व्यदधुरिति पूर्वेण संबधः ॥ ३४ ॥ गोपानां विश्रंभणं विश्वासजनकं द्वितीयं रूपं प्राप्तः शैलोस्मीति ब्रुवन् सन् बलिमादत् भुंक्ते स्म ॥ ३५ ॥ आत्मनात्वयं मन्त्रेष्वाङ्ग्यादेरात्मन इति छांदस सूत्रेणआत्मन् शब्दस्याकारलोपः व्रजजनैः सह तस्मै द्वितायरूपाय स्वस्मै नमश्चक्रे अहो इति सार्धश्लोकेन गोपान् श्रीकृष्णः प्राह रूपी मनुष्याकृतिः नोस्माकम् अनुग्रहं व्यधात् चकार ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रदक्षिणाचरणप्रकारमाह ॥ अनांसीति ॥ अनडुद्युक्तानि उत्तमवृषभयुक्तानि, अनांसि शकटानि आरुह्य, स्वलंकृताः ते नन्दादयो गोपाश्च, गोप्यश्च, सद्विजाशिषः द्विजानामाशीर्वादसहिताः, कृष्णवीर्याणि श्रीकृष्णचेष्टितानि, गायन्त्यः सत्यः, गिरिं प्रदक्षिण चक्रुरित्यन्वयः ॥ ३३ ॥ तदानीं गोपविश्रम्भाय यच्चित्रं चरित्रं चकार तदाह ॥ कृष्ण इति ॥ कृष्णस्तु गिरये दीयतां बलिरित्युक्तेरचेतनोऽयं गिरिः कथं बलिं गृह्णाति कथतरामस्माननुगृह्णाति चेत्यादिरूपां नन्दादीनां शङ्कामपनुदन् श्रीकृष्णः स्वयमपि,

गोपविश्रम्भणं गोपानां विश्वासकरं गिरिमध्यगतं, अन्यतमं स्वमाषमूर्तेरन्यत्, रूपं गतः प्राप्तः, बृहद्वपुः बृहद्वपुष्मान् गिरेर्मूर्द्धिन स्थितः, शैलोऽस्मि, इति ब्रुवन् सन्, भूरि प्रचुरं बलिं, आदत् अभक्षयत् ॥ ३४ ॥ तस्मा इति ॥ पुनर्गोपमध्यगतेन रूपेणेति शेषः। महात्मने तस्मै गोवर्द्धनाय, व्रजजनैः सह, नमः चक्रे। अहो इति वक्ष्यमाणसार्द्धश्लोकं पठन् स्वयं स्वस्मै नमस्कृतवान्। हे गोपाः, अहो आश्चर्यमिदम्। असौ शैलः, रूपी मूर्त्तिमान् सन्, नोऽस्माकं, अनुग्रहं व्यधात्। अतः, पश्यत ॥ ३६ ॥ एष इति ॥ कामरूपी यथेष्टरूपग्रहणसमर्थः, एषः गिरिः, अवजानतः अवहेलनं कुर्वाणान्, व्रजौकसो व्रजवासिनः मर्त्यान्, हन्ति। अतः, आत्मनोऽस्माकं, गवां हि गवां च, शर्मणे सुखाय, अस्मै गिरये, नमस्यामो नमस्करवाम ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

उपहृत्येति : १०.२४.३३.

यस्याङ्गीकरणं देव करोषि त्वं स पूजितः। दृषन्मयोऽपि सर्वैः स्यात् किं नाद्रिस्तदुदाहृतिः ॥ ५५ ॥

कृष्णस्त्विति : १०.२४.३५.

वस्तुगचेतनजडते स्वेष्टाप्त्यनवाप्तिकारणे न स्तः। किं त्वेकहार्दभावो यत्स्फुटमद्रिस्तदाऽऽस सन्मूर्तिः ॥ ५६ ॥
नाविष्णुभूर्भृदिति स्मृतिं यथार्थां विधातुमखिलेशः। गोवर्द्धनभूभृति स स्फुटं किमाविश्चकार निजरूपम् ॥ ५७ ॥
व्याप्तिं चराचरजगत्यखिलेऽपि वेदवेद्यां प्रकाशयितुमेवमधोक्षजोऽसौ।
भक्तानुरञ्जितपदे विशदां स्थितिं स्वां कृत्वाऽऽस तज्जडगिरिप्रकटस्वरूपः ॥ ५८ ॥
कृत्वा वपुर्बृहत्प्रागप्यन्वग्राहि बलिर्मया। बलिग्रहणमत्रापि प्राप्तमित्यभवत्तथा ॥ ५९ ॥
दुर्धर्ष एष जठरानल एव तत्र बाह्यानलद्वयमपि प्रकृते प्रविष्टम्।
तत्तादृगन्नबहुभक्षणमन्तरा स्यान्नास्योपशान्तिरिति तं बलिमाददे किम् ॥ ६० ॥
जडे वा चेतने वापि प्रकटीभूय सर्वदा। भक्तैर्भावार्पितं सम्यगश्नामीत्यास तादृशः ॥ ६१ ॥

कृष्णप्रिया

राजन्! भगवान की आज्ञानुसार सर्वग्रहों का, दशदिशा के देवताओं का अर्चन करके, गौओं को हरी-हरी घास खिलाकर प्रसन्न किया। अर्चन विधि समाप्त कर, गौओं और बछड़ों को अग्रसर बनाकर श्रीगिरराज महाराज की प्रदक्षिणा करने लगे ॥ ३३ ॥ वस्त्रालङ्कारों से समलङ्कृत हुए गोपालों ने बैलों के छकड़ों को सुसज्जित किया। तरह तरह के वस्त्र तथा आभूषणों को धारण कर गोपियाँ उन सजेधजे शकटों पर सवार होकर प्यारे नन्द दुलारे श्रीकृष्ण की लीलाओं को गाती हुई, श्रीगिरिराज महाराज की प्रदक्षिणा करने लगी। व्रज के विप्रवर भी प्रमुदित होकर सफल सुमङ्गल आशीर्वाद देने लगे ॥ ३४ ॥ राजन् परीक्षित! गोपवृन्द को विश्वास प्राप्त कराने के लिये, भगवान श्रीकृष्ण, श्रीगोवर्धन के शिखर ऊपर, दूसरे विशाल काय स्वरूप से प्रकट होकर विराजित हुए। अये गोपवृन्दः "मैं ही गिरिराज हूँ" आप पर प्रसन्न हूँ ऐसा कहते हुए पुष्कल पक्वान्न आरोगने लगे ॥ ३५ ॥ श्रीनन्द बाबा के साथ खड़े हुए भगवान् श्रीकृष्ण ने उस अवसर व्रजजनों के साथ अपने दूसरे स्वरूप को नमस्कार किया और गोपवृन्द को कहा—सुनो भैया! देखो बाबा! श्रीगिरिराज महाराज ने स्वयं प्रकट होकर हम पर दया दिखाई, हमारे गिरिराज चाहे जैसा रूप धारण कर सकते है ॥ ३६ ॥

एषोऽवजानतो मर्त्यान् कामरूपी वनौकसः[1]। हन्ति ह्यस्मै नमस्यामः शर्मणे आत्मनो गवाम् ॥३७॥
इत्यद्रिगोद्विजमखं वासुदेवप्र[2]णोदिताः। यथा विधाय ते गोपाः सहकृष्णा व्रजं ययुः ॥३८॥

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] [5]चतुर्विंशोऽध्यायः ॥ २४ ॥

कर्दमक्षमा

अन्वयः एषः कामरूपी अवजानतः वनौकसः मर्त्यान् हन्ति, हि, आत्मनः गवाम् शर्मणे अस्मै नमस्यामः ॥ ३७ ॥ वासुदेवप्रणोदिताः गोपाः इति अद्रि गोद्विज मखम् यथा विधाय ते सहकृष्णाः व्रजम् ययुः ॥ ३८ ॥

इति चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कामरूपी सर्पादिरूपः। अस्मै अद्रये शर्मणे क्षेमाय ॥ ३७ ॥
कर्मैवालं प्राक् स्वभावो गुणो वा कर्मांगं वा तद्वशो वा महेशः ॥ वार्त्ता कर्त्री देवतेतीयमुक्ता देवक्षोभे षण्मती न त्वभीष्टा ॥१॥३८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायां चतुर्विंशोऽध्यायः ॥ २४ ॥

---

[1] वनेचरः–विज.। [2] प्रचो–वीर. विज.। [3] पारमहंस्यां संहितायां–प्रा. पा.। [4] पूर्वार्द्धे इन्द्रमखभङ्गश्च। [5] द्वाविंशो–विज.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एषः गिरिराजः। अवजानतः स्वार्चापरित्यागिनः वनौकस इति। गृहद्वाराद्यावरणाभावात्तेषां हननं सुकरमेव। यद्वा–हे वनौकस इति। पित्रादीनां नमस्कृतिप्रेरणात्रावतारांतरवद्रूपांतरत्वेन न विरुद्धा तेषां नारायणादिषु तथा व्यवहारदर्शनात् ॥ ३७ ॥ इति इत्थम्। यथा यथावत्। ते नंदादिगोपाः। वासुदेवेन सर्वाधिष्ठात्रा प्रेरिताः कृष्णेन सहैव गोवर्द्धनैशानकोणस्थश्रीराधाकुंडात् क्रोशैकोपरिस्थितं व्रजं ययुरिति तोषिणी। कर्मैवालं सुखदुःखजन्मादिहेतुरिति 'कर्मणा जायते जंतुः' इत्यादिवाक्यैः प्रथममतम्, कर्मवादः। प्राक्स्वभावः प्राक्त सस्कार एव सर्वहेतुरिति द्वितीयं मतम् स्वभाववादः 'स्वभावतंत्रो हि जनः' इत्यादिनोक्तः। गुणो वा सत्त्वादिगुण एव सर्वहेतुरिति तृतीयं मतम् "सत्त्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः" इत्यादिना गुणवाद उक्तः। कर्मांगं महेश ईश इति चतुर्थं मतम्, 'अंजसा येन वर्त्तेत' इत्यादिनोक्तः कर्मांगवादः तद्वशः कर्मवशो महेश इति पंचमं मतम्। 'अस्ति चेदीश्वरः कश्चित्' इत्यादिनोक्तः कर्मवशेशवादः वार्त्ता जीविका तत्कर्त्री देवता मुख्येति षष्ठं मतम्। 'वर्त्तेत ब्रह्मणा विप्रः' इत्यादिश्लोकद्वयेन वृत्तिहेतुदेववाद उक्तः। उक्ता कथिता इयं षण्णां मतानां समाहारः षण्मती षण्मतसमुदायः। देवस्य सर्वद्योतकस्य श्रीकृष्णस्य क्षोभे सर्वेशं मां त्यक्त्वैतेऽन्यानेव भजत इत्येवं कुपिते। न त्वभीष्टा न त्वभीष्टफलदेत्यर्थः। हस्तिपादसर्वपादप्रवेशन्यायेन श्रीकृष्णार्चनेन सर्वार्चनं तदनर्चनेऽन्येषामर्चनेऽपि न किंचित्फलमिति "यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः" इत्याद्युक्तेः। इत्थं कर्मवादावतारणेन कर्मणां प्राधान्यं स्थापितं, तच्च संस्कारवशेनैव कर्मप्रवृत्तिरिति संस्कारस्य कर्ममूलत्वेन कर्मनिष्ठतैवाभिप्रेता। अतोंतर्यामिणा यथा प्रेर्यते इति न्यायेन घटमाना कर्मानासक्तिरपि परिहृता। तत्र च सत्त्वादिगुणस्वभावेन जीविकावश्यं सिध्येदिति तदर्थे प्रयासाभावेन कदाचित्कर्मणो लोपश्च निरस्तः। योगक्षेमकृन्निजोपजीव्यावश्यपूज्योक्तेः सर्वथा कर्मणां प्राधान्यमेव दृढीकृतम्। तच्च सर्वमशेषकर्मप्रधाननिजभक्तिपरतार्थमेव, भक्तिपरतायाश्च मुख्यलक्षणं तद्भक्तार्चनमिति हरिदासगोवर्द्धनपूजनमिति सिद्धांतः। तत्र। निगूढश्रीकृष्णाभिप्रायश्च–योऽहं पूर्णपरमेश्वरः स एव तेषां पुत्रादिरूपः ततः को नामैषामीश्वरः का वाऽन्या देवता प्रवर्त्तकस्तु तत्प्रेममयः स्वभाव एव स्यात् यदि च नरलीलया देवतास्वीकारस्तदा मन्निकटसबंधिन्य एव युञ्ज्येरंस्तथापि नरलीलारक्षार्थं न तत्तद्व्यञ्जयितुमुत्सहे तस्मान्निरीश्वरमीमांसासांख्यवादापदेशेनैव तद्बोधयित्वा तथा प्रवर्त्तयामीति वैष्णवतोषिण्याम् ॥ ३८ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अभक्तांश्च निहन्तीत्याह–एष इति। अवजानतः अवज्ञां कुर्वतः सर्वेषां साक्षात्तावदशेषबलेः स्वयमेव भक्षणं दृष्ट्वेति भावः। यद्वा, यागाकरणेनानादरं कुर्वन् इति पुनः पुनस्तद्यागोऽभिप्रेतः मर्त्त्यान् मरणशीलान् तत्रापि वनौकसः गृहद्वाराद्यावरणशून्यानिति हनने सुकरत्वं दर्शितम् हे वनौकस इति वा चकारात्द्रवादीनां रोगोत्पादनादिना पीडयति चेति पाठान्तरे हि यस्मात् हन्ति अतो वयं नमस्यामः वन्देमहि आत्मनो गवां च शर्मणे। यद्वा, आत्मनो या गावस्तासामिति गवां शर्मणैव तेषां जीवनसिद्धेः अत्र पित्रादिष्वपि नमस्कारप्रेरणेयं तेन रूपेणावतारान्तरेणैव पुत्रत्वाभावान्न विरुद्धा नारायणादिषु तेषां तथा व्यवहारात् एतदनन्तरं साक्षात्तस्य बृहन्मूर्त्तेरादेशश्च श्रीहरिवंशे—

अद्य प्रभृतिचेज्योऽहं गोषु चेदस्ति वो दया। अहं वः प्रथमो देवः सर्वकामकरः शुभः ॥
मम प्रभावाच्च गवाममृतान्येव भोक्ष्यथ। शिवश्च वो भविष्यामि मद्भक्तानां वने वने ॥
रंस्येऽहं सह युष्माभिर्यथा दिवि गतस्तथा। ये चेमे प्रथिता गोपा नन्दगोपपुरोगमाः ॥
एषां प्रीतः प्रयच्छामि गोपानां विपुलं धनम्। पर्याप्नुवन्तु विप्रा मां गावो वत्ससमाकुलाः ॥

एवं मम परा प्रीतिर्भविष्यति न संशयः इति ॥३७॥ वासुदेवेन सर्वाधिष्ठात्रा प्रचोदिता इति तेषां तदुपदिष्टविध्यनतिक्रमः तत्र सर्वात्मना सुखसम्मतिविशेषोऽपि दर्शितः यथा यथावत् सहकृष्णा कृष्णेन सहिताः इति प्रीतिविशेषोदयेन त्यक्तुमशक्तास्तेन मिलित्वैव गोवर्द्धनैशानकोणस्थ श्रीराधाकुण्डात् क्रोशैकोपरि स्थितं व्रजं ययुरित्यर्थः। इत्थं देवतानिराकरणकर्मवादावतारणेन कर्मणां प्राधान्यं स्थापितं तत्र संस्कारवशेनैव कर्म प्रवृत्तिरिति संस्कारस्य कर्ममूलकत्वेन कर्मनिष्ठतैवाभिप्रेता अतोऽन्तर्यामिणाऽन्यथा प्रेर्यते तथानुष्ठीयत इति न्यायेनाघटमाना कर्मणां शक्तिरपि परिहृता तत्र च सत्त्वादिगुणस्वभावेन जीविकावश्यं सिद्ध्येदिति तदर्थप्रयासाभावेन कदाचित् कर्मलोपश्च निरस्तः योगक्षेमकृन्निजोपजीव्यावश्यपूजोक्तेः इति सर्वथा कर्मणां प्राधान्यमेव दृढीकृतं तच्च सर्वमशेषकर्मप्रधाननिजभक्तिपरतार्थमेव भक्तिपरतायाश्च मुख्यं लक्षणं तद्भक्तार्चनम् इति हरिदासश्रीगोवर्द्धनपूजनमिति सिद्धान्तः अत्र निगूढश्चायं श्रीकृष्णाभिप्रायः योऽहं पूर्णः परमेश्वरः स एव तेषां पुत्रादिरूपः तस्मात् को नामैषामीश्वरः का वान्या देवता प्रवर्त्तकस्तु तत्प्रेममयः स्वभाव एव स्यात् यदि च नरलीलाया देवतास्वीकारस्तदा मन्निकटसम्बन्धिन्य एव युञ्ज्येरन् तथापि

नरलीलारक्षार्थं न तद्व्यञ्जयितुमुत्सहे तस्मान्निरीश्वरमीमांसा साङ्ख्यावादापदेशेनैव तत्तद् बोधयित्वा तथा प्रवर्त्तयामीति एवमन्यत्रापि सर्वत्रोह्यम् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कथं नमश्चक्रे ? तदाह—अहो इति सार्द्धेन। रूपी प्रत्यक्षः सन्नित्यर्थः। यद्वा, परमसुन्दरः सन् स्वाभाविकनिजपरमसौन्दर्य्यस्य सम्यगाच्छादनाशक्त्या तथा च गोपानां प्रत्यभिज्ञोदयमाशंक्य तत्संगोपनार्थं तथोक्तमनुग्रहं व्यधात्। रूपित्वेन साक्षाद् बल्यदनादिना च अभक्तांश्च निगृह्णातीत्याह—एष इति। अवजानतोऽवज्ञां कुर्व्वत इति सर्व्वेषां साक्षात्तावदशेषबलेः स्वयमेवक्षणात्, यद्वा, यागाकरणेनादरं कुर्वत इति पुनः पुनस्तद् यागोऽभिप्रेतः। मर्त्त्यान् मरणधर्म्मशीलान्, तत्रापि वनौकसो गृहद्वाराद्यावरणशून्यानिति हनने सुकरत्वं दर्शितम्। हे वनौकस इति वा, ततश्च तेषां तदेकाश्रयत्वात् तद्वन्दनं सदा युक्तमेवेति भावः। चकारात् गवादीनां रोगोत्पादनादिना पीड़यति चेति, अतो वयं नमस्यामो वन्देमहि, पूजयिष्याम इति वा। आत्मनो गवाञ्च शर्म्मणे। हीति पाठे निश्चयेन विश्वस्येत्यर्थः। तथापि गवाञ्चेत्येवार्थः। यद्वा, आत्मनो या गावस्तासामिति गवां शर्म्मणैव तेषां जीवनसिद्धेः, ततश्च कस्मैचित् कञ्चिद्वरं साक्षादनुभूतफलं दत्त्वासावन्तर्हित इति ज्ञेयम् ॥ ३७ ॥ इति अनेन प्रकारेण ईदृशं वा, अद्रेर्गवाञ्चादौ निर्द्देशस्तस्य तासाञ्च तद् यागे मुख्यत्वात्, तत्रापि श्रीगोवर्द्धनस्य प्राधान्येन हरिदासवर्य्यत्वेन चादौ ब्राह्मणानां तद् यागोपकरणमात्रत्वेन गौणत्वात्, तत्तत्पूजकत्वेन पूजनत्वाद्वा पश्चान्निर्द्देशः। वासुदेवेन चित्ताधिष्ठात्रा प्रचोदिता इति तेषां तदुपदिष्टविधानतिक्रमः। तत्र सर्व्वात्मना सुखसम्मतिविशेषोऽपि बोधितः। यद्वा, श्रीवसुदेवनन्दनेनेति निजैश्वर्य्यविशेषप्रकटनपरत्वमभिप्रेतम्। अत ऐश्वर्य्यमदमत्तेन्द्रमखभञ्जनेन हरिदासवर्य्यश्रीगोवर्द्धनपूजाप्रवर्त्तनं युक्तमेवेति भावः। यथा यथावत्, सह कृष्णाः कृष्णेन सहिता इति प्रीतिविशेषोदयेन तं त्यक्तुमशक्तास्तेन सह मिलित्वैव व्रजं निजवासं श्रीनन्दीश्वरगिरिनिकटे, श्रीराधाकुण्डोपान्ते वा वर्त्तमानं ययुरित्यर्थः। इत्थं देवतानिराकरणकर्म्मवादावतरणेन कर्मणां प्राधान्यं स्थापितम्, तत्र च संस्कारवशेनैव कर्मप्रवृत्तिरिति संस्कारस्य कर्ममूलकत्वेन कर्मनिष्ठतैवाभिप्रेता। अतोऽन्तर्य्यामिणा यथा प्रेर्य्यते तथानुष्ठीयत इति न्यायेन वटमाना कर्म्मानासक्तिरपि परिहृता। तत्र च सत्त्वादिगुणस्वभावेन जीविका अवश्यं सिध्येदिति तदर्थप्रयासाभावेन कदाचित् कर्मलोपश्च निरस्तः। योगक्षेमकृन्निजोपजीव्यावश्य पूजोक्तेः, इति सर्वथा कर्मणां प्राधान्यमेव दृढ़ीकृतम्। तच्च सर्वमशेषकर्मप्रधाननिजभक्तिपरतार्थमेव, भक्तिपरतायाश्च मुख्यलक्षणं तद्भक्ताच्चर्नमिति हरिदासवर्य्य श्रीगोवर्द्धनपूजनमिति सिद्धान्तः। एवमन्यत्रापि सर्वत्रोह्यम्। स च कथारसविशेषविघातकत्वेन ग्रन्थबाहुला भयेन च न तत्र तत्र विव्रियते ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एष कामरूपी यथेष्टरूपग्रहणसमर्थो गिरिरवजानतोऽवहेलनं कुर्वाणान् वनौकसो मर्त्त्यान् हन्ति अत आत्मनोऽस्माकं गवाञ्च शर्मणे क्षेमायास्मै गिरये नमस्यामः नमः करवाम ॥ ३७ ॥ इति इत्थं वासुदेवेन चोदिता गोपाला अद्र्यादीनां मखं यथावद्विधाय कृष्णेन सहिता व्रजं प्रति जग्मुः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कामरूपी सर्पादिरूपः हि तस्मात् ॥ ३७ ॥

यन्निरीश्वरमीमांसासांख्ययोरुररीकृतिः। तदिन्द्रमखभङ्गार्थं न तु ते संस्मते सतम् ॥

यथाहुः श्रीस्वामिचरणाः—

कर्मैवालं प्राक् स्वभावोगुणो वा कर्माङ्गं वा तद्वशो वा महेशः वार्त्ता कर्त्री देवतेतीयमुक्ता देवक्षोभे यन्मयी नत्वभीष्टा ॥ ३८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। चतुर्विंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एष एव गिरिः कामरूपी यथेष्टग्रहणसमर्थः अवजानतः अवज्ञां कुर्वाणान् अजगरादिरूपेण हन्ति अस्मै कामरूपिणे अद्रये शर्मणे सुखाय नमस्यामः ॥ ३७–३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुर्विंशोऽध्यायार्थप्रकाशः ॥ २४ ॥

श्रीबलदेवविद्याभूषणकृता वैष्णवानन्दिनी

अहो इत्यादि साद्धपद्यं पठन् रूपी प्रकाशितदेवतारूपः कामरूपी सर्पादिरूपधरः सन् हन्ति हनिष्यति हि तस्मादात्मनो गवाञ्च शर्मणे नमस्यामः ।। ३७ ।। सह कृष्णः कृष्णेन सहिताः व्रजं नन्दीश्वराजधानीम् ।। ३८ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्बलदेवविद्याभूषणकृतवैष्णवानन्दिन्यां चतुर्विंशोऽध्यायः ।। २४ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणि

एष अवजानतोऽवज्ञां कुर्वतः कामरूपी वनेचरो मर्त्यान्हन्ति घातयति । अतोऽस्मै आत्मनां गवां च शर्मणे सुखाय नमस्याम इत्युक्त्वा नमश्च सञ्चक्रुरित्यतीतेनान्वयः ।। ३७ ।। यथावद्वासुदेवप्रचोदिता गोपाला अद्रिगोद्विजमखं । अत्र भोक्तृतयाऽद्रेः प्रथमत उक्तिः विधाय सहकृष्णा व्रजं ययुः ।। ३८ ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे द्वाविंशोऽध्यायः ।। २२ ।।

श्रीसुबोधिनी

एवं तस्य स्वरूपमुक्त्वाग्रेपि भजनसिद्ध्यर्थं प्रार्थयतेत्याहैष इति, अप्रार्थनायां बाधकं वदन्नवज्ञामात्रेपि बाधकमाहाव**जानतोवज्ञां कुर्वतः** किमयं करिष्यतीति मर्त्यान् मरणधर्मयुक्तानिदं महदनिष्टमिष्टानिष्टवार्ता दूरे वस्तुतो हन्त्येव, तस्य हनने सामर्थ्यं प्रकारं चाह **कामरूपी**ति, कामं यथेष्टं रूपवानतः शस्त्री भवति व्याघ्रो भवति सिंहो भवति, पलायनं त्वशक्यं यतः सर्वे **वनौकसः**, **वनमेवौकः** स्थानं येषामित्यतस्तान् हन्त्येव, अहनन उपाय**माहास्मै नमस्याम** इति, अप्रतारणार्थमात्मानुप्रवेशः, हेतुवादोयमितीतरनिषेधे तात्पर्यान् नात्यन्तमाग्रहः कर्तव्यः, **आत्मनः शर्मणे गवां च शर्मणे** व्याघ्रादीनामुभयोपद्रवजनकत्वात्, **नमस्कार** एव महतां प्रतिविधिः, तदाह हि शब्दः, एवमग्रेपि तथाकरणसिद्ध्यर्थमेतत्परित्यागे भयं च जनयितुं तथोक्तवान्, ईश्वरवाक्यात् तथैव च भवेत् ।। ३७ ।। एवं कारयित्वा च पुनः स्वस्थानं प्रापितवानित्युपसंहरतीति, **अद्रिगोद्विजानां** मखं वैष्णवमखं कृत्वा **वासुदेवेनैव प्रकर्षेण नोदिता** विशेषाकारेण तत्र तत्र तथा तथा बोधिता **यथा** यथावद् **विधाय** भगवदावेशेनैतत् कृत्वा पुनस्त एव **गोपा** भूत्वा फलसहिता **व्रजं ययुः** स्वस्थानं प्राप्तवन्तः, अन्ते प्रत्यापत्तिरुक्ता, अन्यथा तज्जनितमन्यदेव किञ्चित् फलं स्यादितिशङ्का स्यादतः प्रत्यापत्तिरुक्ता ।। ३८ ।।

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तरसाधनप्रकरणे
तृतीयस्य स्कन्धादितो एकविंशाध्यायस्य विवरणम् ।। २१ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

इत्यद्रिगोद्विजमखमित्यत्र, वासुदेवत्वेन शुद्धसत्त्वाकारमन्तःकरणं कृत्वा कर्मोपयोगिश्रद्धासामर्थ्याद्युपयोगित्वेन तत्राविभूय सर्वं कारितवानित्याशयेन **वासुदेवप्रचोदिता** इत्युक्तम् । प्रेरणे प्रकर्षोप्ययमेव । अन्यथा न वदेत् । अग्र च गमने गोपानां मुख्यत्वं प्रभोस्तु गौणत्वमुक्तमित्यनावेशस्तदा सूच्यत इति तदुभयतात्पर्यमाहुः **भगवदावेशेनैत**दित्यादि ।। ३८ ।।

इत्येकविंशोध्यायः ।। २१ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

इत्य**द्रिगोद्विजे**त्यत्र **वासुदेवेनैवे**त्यादेरर्थष्टिप्पण्यां स्फुटः ।। ३८ ।।

इति एकविंशोध्यायः ।। २१ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गोवर्धनपूजामुपसंहरति-इतीति । इत्येवं वासुदेवेन कृष्णेन प्रणोदिताः प्रेरितास्ते नन्दादयो गोपा अद्र्यादीनां मखं यथाद्विधाय कृष्णेन सहिता व्रजं गताः ।। ३८ ।।

इति श्रीवल्लभाचार्य-वंश्यगोपालसुनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ।। १ ।।
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ।। २ ।।
रचिता दशमे तत्र तामसरोधवर्णने । चतुर्विंशो गतो विप्रभार्यानुग्रहबोधकः ।। ३ ।

अन्वितार्थप्रकाशिका

इतीति ।। इत्येवं वासुदेवेन कृष्णेन प्रणोदिताः प्रेरितास्ते नन्दादयो गोपा अद्र्यादीनां मखं यथावद्विधाय कृष्णेन सहिता व्रजं ययुः । यन्निरीश्वरमीमांसासांख्ययोरुररीकृतिः तदिन्द्रमखभङ्गाय न तु ते सम्मते सताम् ।। ३८ ।।

इति श्रीभागवते महापुराणेऽन्वितार्थप्रकाशिकायां दशमस्कन्धे चतुर्विंशोऽध्यायः ।। २३ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अवजानतः अवज्ञाकारकान् एषोऽद्रिः कामरूपी सर्पव्याघ्रादियथेष्टरूपाणि कृत्वा हंति अतः स्वस्य गवां च शर्मणे सुखाय अस्मै गोवर्धनाय ॥ ३७ ॥ यथा यथावत् यथा शास्त्रं विधाय कृत्वा ॥ ३८ ॥

इति श्रीशुद्धकांतधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने गोगोवर्धनोत्सवनामा चतुर्विंशोऽध्यायः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं, वासुदेवेन सर्वान्तरात्मना श्रीकृष्णेन प्रणोदिताः संप्रेरिताः, ते गोपा गोपालाः, अद्रिगोद्विजमखं, यथा यथावत्, विधाय, सहकृष्णाः कृष्णेन सहिताः, व्रजं ययुः ॥ ३७ ॥ कर्मैवालमिहेति तद्वशगतः प्रोक्तो महेशस्तथा प्राचीनोऽथ निसर्ग एव गदितः कर्माङ्गमन्यत्तथा । वार्त्ता कर्त्र्युदिता गुणश्च कथितः स्पष्टं मतानीति षट् नाभीष्टान्युदितानि सन्ति सुरराट्क्षोभाय तानि ध्रुवम् ॥ १ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एष इति : १०.२४.३७

योऽस्मिन्नरः सरलधीरनुवर्तते मद्वाचं मदुक्तिधृतविश्वसनो विशङ्कम् ।
तत्कर्म लौकिकदृशा कथमप्यमुष्य श्रेयस्करं सुखकरं हरिणेत्यबोधि ॥ ६२ ॥
दात दापयिता भोक्ता प्रतिग्राह्यभिनन्दकः । सर्वात्मा हरिरेवेति स्पष्टं गोवर्द्धनोत्सवे ॥ ६३ ॥
गोपा गोकुलपत्यहङ्कृतिजुषो नित्यं स्वभद्राय ते कुर्वन्ति स्वयमेव कर्म विविधं तत्रास्मि तद्द्रोण्यहम् ।
द्रष्टा केवल इत्यलं यदुपते वाचा श्रुतिड्यार्थया यज्ञोऽसौ भवतैव यद्गिरिवरोद्देशेन संयोजितः ॥ ६४ ॥
त्रेता धर्मस्तद्युगे एव शस्तो व्यस्तोऽन्यस्मिन् जायतेऽनुष्ठितश्चेत् ।
पूर्णः श्रेशश्चेत् प्रसादस्तदाऽसौ सम्पूर्णः स्यात्तादृशोऽपीत्यबोधि ॥ ६५ ॥

व्रजं ययुरिति : १०.२४.३८.

वने वापि गिरौ वापि येषामद्धोपदेशकः । प्रभुरेव क्षमा तेषामानन्दाय व्रजस्थितिः ॥ ६६ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसुरिविरचिते भक्तिरसायने चतुर्विंशोऽध्यायः ॥ २४ ॥

कृष्णप्रिया

प्यारे गोपजन ! इस बात का ध्यान रखें ? वन निवासी जो, जन इन प्राणी इन गिरिराज महाराज का अनादर करते हैं, स्वेच्छा रूपधारी यह देव उनका विनाश कर देता है । आप सब चलो, हम सब लोग मिलकर, अपने-अपने गोधन धन के एवं सारे व्रज के कल्याण के लिए इन गिरिराज महाराज को प्रणाम करें ॥३७॥ राजन् ! इस प्रकार भगवान वासुदेव की प्रेरणा से सारे वे गोप लोग, भगवान की सूचना एवं आज्ञानुसार ही श्रीगिरिराज महाराज, गौओं और विप्रों के प्रिय वैष्णव याग को यथाविधि समाप्त कर फलात्मा भगवान् श्रीकृष्णचन्द्र जी के व्रज में पधार गये ॥ ३८ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां पूर्वार्द्धे हिन्दी भाषान्तरे चतुर्विंशोऽध्यायः ॥ २४ ॥

—: ० :—

अथ पञ्चविंशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष
३३	३१	२	२	१०८८	१२	३२	११३२	३५।	४

श्रीशुक[1] उवाच

इन्द्रस्तदाऽऽत्मनः पूजां विज्ञाय विहतां नृप । गोपेभ्यः कृष्णनाथेभ्यो नन्दादिभ्यश्चुकोप सः ॥ १ ॥
गणं [2]संवर्तकं नाम मेघानां चान्तकारिणाम् । इन्द्रः [3]प्राणोदयत् क्रुद्धो वाक्यं चाहेशमान्युत[4] ॥ २ ॥

[5]इन्द्र उवाच

अहो श्रीमदमाहात्म्यं गोपानां काननौकसाम् । कृष्णं मर्त्यमुपाश्रित्य [6]ये चक्रुर्देवहेलनम् ॥ ३ ॥
यथादृढैः कर्ममयैः [7]क्रतुभिर्नामनौनिभैः । विद्यामान्वीक्षिकीं हित्वा तितीर्षन्ति भवार्णवम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—नृप ! तदा इन्द्रः आत्मनः पूजाम् विहताम् विज्ञाय, सः, कृष्णनाथेभ्यः नन्दादिभ्यः गोपेभ्यः चुकोप ॥ १॥ क्रुद्धः इन्द्रः अन्तकारिणाम् मेघानाम् सांवर्तकम् गणम् प्राणोदयत् च ईशमानी उत वाक्यम् आह ॥ २ ॥ अहो काननौकसाम् गोपानाम् श्रीमदमाहात्म्यम् ? ये मर्त्यम् कृष्णम् आश्रित्य देवहेलनम् चक्रुः ॥ ३ ॥ यथा (मन्दाः) आन्वीक्षिकीम् विद्याम् हित्वा, नामनौनिभैः कर्ममयैः अदृढैः क्रतुभिः भवार्णवम् तितीर्षन्ति ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पंचविंशे रुषा शक्रे व्रजनाशाय वर्षति ॥ उद्धृत्य गिरिमासारदरक्षद्गोकुलं प्रभुः ॥ १ ॥

कृष्णो नाथो येषां तेभ्यः ॥ १ ॥ क्रुद्धः सन्निंद्रः सांवर्तकं नाम संवर्त्तः प्रलयस्तत्कर्तारं प्रसिद्धमेघानां गणं प्राचोदयत् प्रेषयामास । ननु कृष्णनाथानां घाते कथं प्रवृत्त इत्याशंक्यात्मसंभावनया निरस्तविवेकत्वादित्याशयेनाह वाक्यं चाहेत्यादि पंचभिः । ईशमान्यहमेवेश्वरः इति गर्ववान् ॥ २ ॥ देवहेलनं देवस्य ममावज्ञाम् ॥ ३ ॥ अदृढैरसमर्थैः कर्ममयैः क्रियानिर्वर्त्यैरत एव नामनौनिभैर्नाम मात्रेण या नौरिति व्यवह्रियते तत्सदृशैः । आन्विक्षिकीमात्मानुस्मृतिरूपाम् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आसारात् धारासंपातात् 'धारासंपात आसारः' इत्यमरः । प्रभुः कृष्णः (१) । नाथः स्वामी । गोपेभ्य इति "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" इति चतुर्थी । सः इंद्रः ॥ १ ॥ आत्मसंभावनया मत्तोऽन्यः कोधिक इति बुद्ध्या "आत्मसभावनेति स्यान्मत्तोऽन्यः कोऽधिको भुवि" इत्युक्तेः ॥ २ ॥ मर्त्यम् मरणधर्माणम्, मनुष्यमित्यर्थः । उपाश्रित्य अयमेव सर्वेभ्यो बलीति कृत्वा । देवस्य अमरस्य मम । श्रीमदमाहात्म्यानां द्वंद्वैक्यम् । काननौकसाम् गोपानामिति तेषामज्ञत्वानिकृष्टत्वे बोधिते । मर्त्येभ्यो हितं मर्त्यम् । देवस्य ममेष्टस्य हेलनमिति वास्तवोर्थः ॥ ३ ॥ क्रियानिर्वर्त्यैः बहुव्यापारसाध्यैः । अत एव क्रियासाध्यत्वादेव। नाम्ना नावो नामनावस्ताभिर्निभास्तुल्यास्तैः "निभस्तु कथितो व्याजे पुँल्लिंगः सदृशे त्रिषु" इति मेदिनी । "प्लवा एते ह्यदृढा यज्ञरूपा अष्टादशोक्तं ह्यवरं येषु कर्म । एतच्छ्रेयो येऽभिनंदंति मूढा जरामृत्यू ते नराः प्राप्नुवंति ।।" इति श्रुतेः । "शाब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः । परिभ्रमंस्तत्र न विंदतेऽर्थान्" इत्युक्तेः कर्ममयैः क्रतुभिस्सहान्वीक्षिकीं त्यक्त्वा कृष्णमाश्रित्यैव कृष्णाश्रयेणैव भवार्णवस्य गोवत्सपदत्वे जाते तत्तरणयत्नानौचित्यात्तेषां तितीर्षामात्रमिति वास्तवोर्थः ।। ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विज्ञाय साक्षादनुभूय विहतां द्रव्याणामप्यन्यत्र व्ययात् कृष्णनाथेभ्यः तत्रापि गोपेभ्यः तादृशश्रीव्रजवासिभ्यः तत्रापि श्रीनन्दादिभ्य इति कोपेन दुर्मदकत्ततो दुर्बुद्धिता च सूचिता ह स्फुटमेव तदनुरूपव्यवहारात् स इति क्वचित्पाठः परमदु-

---

१. बादरायणि—प्रा. पा. । २. सांव-श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ३. प्राचो—श्रीधर. वंशी. जीव. वीर. विज. विश्व; प्रचो—इति कस्यचित् । ४, मन्युना—विज. । ५. इन्द्र उवाच—श्रीधरादिषु नास्ति । ६, मखभङ्गमचीकरन्—प्रा. पा । ७. कुप्लवैर्ज्ञानमानिनः—विज. ।

बुद्धिरित्यर्थः ॥ १ ॥ अन्तः प्रलयस्तत्कारिणाम् अत एव सम्वर्त्तकं नाम अप्यर्थे च शब्दः यद्वा, चकारादऽऽवहप्रवहादिवातगणं च प्रकर्षेण गर्वोक्त्या तेषामुत्साहवर्द्धनादिना प्रेरयामास उत अप्यर्थे स च गर्हारूपः देवेन्द्रस्याप्ययोग्ये प्रवृत्तेः ॥ २ ॥ अहो आश्चर्यं काननौकसामिति निकृष्टत्वमज्ञत्वं चाभिप्रेतं पत्युपपतिशब्दवदाश्रयो नाम कुलधर्मादिप्राप्तः उपाश्रयस्ततो विच्युत्य कृतः तदेवमुक्तमुपाश्रित्येति देवत्वेनात्मनो मर्त्त्यान् माहात्म्यसिद्धेदेंवेत्युक्त न च ममेति तथा अमरत्यागेन मर्त्याश्रयणस्यायोग्यताबोधनार्थं चेति मयि तावद्देवबुद्धिमपि न चक्रुः अस्तुतरां देवदेवबुद्धिरिति भावः । अत्र च वनवासेन गोपत्वेन च परमसात्त्विकत्वादिकं तेषां कृष्णं परब्रह्मादि मनुष्यरूपमिति च भक्तवात्सल्यं अतस्तदर्थं तस्य देवहेलनं युक्तमेवेति सरस्वतीव्यञ्जिततत्वार्थः ॥ ३ ॥ अदृढैः क्षयिष्णुफलकैः यतः कर्ममयैः यथा तितीर्षन्ति मूढाः तथा कृष्णमुपाश्रित्य ममाप्रियं गोपाश्चक्रुरित्यविचारेणायोग्याचरणमात्रे दृष्टान्तः । यद्वा, तथा मां हित्वा कृष्णाश्रयेण गोपा भयदुःखादिकं तितीर्षन्तीतीन्द्रस्य क्रोधावेशेनासमाप्तं वाक्यं ज्ञेयं तत्वार्थश्चायं यथा वैष्णवाः कर्मभिः सहान्वीक्षिकीं हित्वा केवलकृष्णाश्रयेण भवार्णवं तितीर्षन्तीति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

विज्ञाय साक्षादनुभूय, तन्महोत्सवे तत्र वाकाशे निभृतमागमनात्, किंवा निजयोग्यभोज्यानुपस्थितेर्विशेषणं हतां तद्द्रव्याणामप्यन्तत्र व्ययात्; कृष्णनाथेभ्य इति अस्थाने कोपेन दुर्म्मदमत्तता दुर्बुद्धिता च सूचिता । हे नृपेति श्रीमदस्यानर्थहेतुत्वं भवता ज्ञायत एवेति भावः । आदिशब्देन उपनन्दादयो गोपास्तत्पुरोहितादयश्च । ह स्फुटमेव, तदनुरूपव्यवहरणात् ॥ १ ॥ अप्यर्थे च शब्दः, अन्तः प्रलयस्तत्कारिणामपि; यद्वा, चकारादावह प्रवहादिवातगणश्च, प्रकर्षेण गर्व्वोक्त्या तेषामुत्साहवर्द्धनादिना प्रेरयामास । उत खेदे विस्मये वा, देवेन्द्रस्याप्ययोग्ये प्रवृत्तेः ॥ २ ॥ अहो आश्चर्य्यम्, काननौकसामिति निकृष्टत्वमज्ञत्वञ्चाभिप्रेतम् । मर्त्त्यं मनुष्यम्, उप निजहितोपाधिनाश्रिता देवस्य हेलनं चक्रुः । श्रीमदमाहात्म्यं विनैतन्न सम्भवतीति भावः । देवत्वेनात्मनो मर्त्त्यान्माहात्म्यसिद्धेर्देवेत्युक्तम्, न च ममेति, तथा अमरत्यागेन मर्त्त्याश्रयणस्यायोग्यताबोधनार्थं चेति दिक् । अत्र च वनवासत्वेन गोपत्वेन च परमसात्त्विकत्वादिकं तेषाम्, कृष्णं परब्रह्मापि मनुष्यरूपमिति तस्य च भक्तवात्सल्यम्, अतस्तदर्थं तस्य देवहेलनं युक्तमेवेति तत्त्वार्थः ॥ ३ ॥ अदृढैः क्षयिष्णुफलकैः, यतः कर्म्ममयैः न तु ध्यानकीर्त्तनादिप्रधानैः, यथा तितीर्षन्ति मूढाः, तथा कृष्णमुपाश्रित्य ममाप्रियं गोपाश्चक्रुरित्यविचारेणायोग्याचरणमात्रे दृष्टान्तः । यद्वा, तथा मां हित्वा कृष्णाश्रयेण गोपा मत्तो भयदुःखादिकं तितीर्षन्तीन्द्रस्य क्रोधावेशेनासमाप्तं वाक्यं ज्ञेयम् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः किं जातं तदाह–इन्द्र इति । हे नृप ! तदा इन्द्रः स्वस्य पूजां कृष्णेन विहितां ज्ञात्वा कृष्णो नाथो रक्षिता येषां तेभ्यः गोपेभ्यः चुकोप क्रुद्धवान् ॥ १ ॥ तदा क्रुद्धः अन्तकारिणां प्रलयकारिणां मेघानां साम्वर्त्तकाख्यं गणं प्राचोदयत् मन्युमानी ईशमानीति पाठान्तरम् इदं वक्ष्यमाणं वाक्यं चाह ॥ २ ॥ तदेवाह–अहो इत्यादिभिः पञ्चभिः, काननौकसां गोपानां श्रीमदस्य धनसम्पत्तिकृतस्य मदस्य माहात्म्यं वैभवमहो आश्चर्यकरं, तदेव दर्शयति । ये गोपाः कृष्णं मर्त्यं मरणशीलम् उपाश्रित्य देवस्य मम हेलनमपराधं चक्रुर्मद्यागं बभञ्जुरित्यर्थः ॥ ३ ॥ किन्त्वद्यागमात्रेणेत्यत आह–यथेति । आन्वीक्षिकीमात्मविद्यां हित्वा विहाय केवलं दृढैर्नौकातुल्यैः कर्मात्मकैः क्रतुभिरस्मदाराधनात्मकैरेव साधनैर्भवार्णवं यथा तितीर्षन्ति तर्तुमिच्छन्ति विवेकिन इति शेषः । अहमेव मुक्तिदोपि मद्याग एवं तत्साधनमपीति भावः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गोवर्धनोद्धरणेन स्वनाथाः सगोधना गोपालाः इन्द्रकृतापदो रक्षिताः एवं भक्तिज्ञानसम्पन्नान्संसारार्त्तान् प्राणिनो रक्षत्येवाधोक्षज इति प्रतिपादयितुमयमध्याय आरभ्यते; तत्र मुख्यप्राणमेकमन्तरेणान्येषां देवादीनामत्यल्पासुरावेशस्तस्मिन् गते प्रकृतिभावश्चेत्युभयं दर्शयितुमुपक्रमते, इन्द्र इति । विहतां निराकृतां कृष्ण एव नाथो येषां ते तथा तेभ्यः क्रुधद्रुहेर्ष्यासूयार्थानां य प्रति कोप इति चतुर्थी कृष्णं प्रति च कोपं कृतवानिति सूचनायेदं विशेषणम् असुरावेशं प्रकटयतीति ज्ञायतेऽनेन हेत्यनेन शक्रकोपेन कृष्णमाहात्म्यमेव प्रकाश्यते ॥ १ ॥ अन्तकारिणां प्रलयं कुर्वतामित्यनेन भगवन्तमन्तरेणान्यानिवर्त्यत्वमाह–सांवर्तकमिति । अमुनैव जगत्क्षयकरत्वे सूचितेऽप्यन्तकारिणामिति तदेव विशेषितं प्राचोदयत् प्रेरितवानित्यर्थः । ईशं कृष्णमुद्दिश्य मन्युना कोपेन अहमेवेशो नान्य इति मन्युना दैन्याभिमानेन वा "मन्युर्दैन्ये क्रतौ क्रुधि" इति यादवः ॥ २ ॥ मर्त्यं मरणधर्मत्वेनानित्यं कृष्णमुपाश्रित्य सर्वस्मादधिकाश्रयोयमिति कृत्वा देवस्य त्रैलोक्याक्षेप्तुः मम हेलनम् अवज्ञां कृतवन्त इति अनेनेशमन्युनेत्येतद्विवृतम् ॥ ३ ॥ देवस्वभावत्वादसुरावेशेऽपि तत्त्वमेव कथ्यत इत्याशयेनाह, यथेति । अदृढैरसारैः अन्यत्र क्षरद्दारुकृतैः कर्ममयैः बहुव्यापारसाध्यैः अन्यत्र तक्षणादिबहुकर्मसाधितैः कुत्सितैरल्पप्रयोजनैर्वा प्लवैः "कुः पापेल्यार्थवुत्सयोः" इति यादवः । आन्वीक्षिकीं स्वानुकूलबिंबदर्शनात्मिकां विद्याम् आत्मज्ञानमित्यर्थः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

उत अप्यर्थे सच गर्हारूपः देवेन्द्रस्याप्ययोग्यप्रवृत्तेः ॥ २-५ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ कुपितस्येन्द्रस्य भणितमाह्–अहो इत्यादि द्वाभ्याम्। अहो वनौकसामिति साक्षेपपरम् श्रीमदमाहात्म्यं कृष्णमुपाश्रित्य देवहेलनं चक्रुरित्यहो मौग्ध्यमेतेषामिति भावः। देवहेलनं कीदृशम् ? मर्त्यं मरणोपयुक्तम् ॥ १-४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कृष्ण सत्यमुपाश्रित्य ये चक्रुर्देवहेलनमिति मर्त्यं मरणार्हम्, देवहेलनमित्यस्य विशेषणम्, येन मरणं भविष्यति, तथा कृतम्। अहो ! श्रीमदमाहात्म्यं कृष्णमुपाश्रित्य कृष्णोपष्टम्भेनेत्यर्थः ॥ १-४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पञ्चविंशे सकोपोक्ताविन्द्रे नाशाय वर्षति। व्रजस्य रक्षामकरोदुद्धृत्याचलमच्युतः ॥

कृष्णनाथेभ्योपि चुकोपेति इन्द्रस्य मौढ्यं तत्कोपस्य च वैफल्यं प्रथमत एव दर्शितम् ॥ १ ॥ कोपं विवृणोति, गणमिति। सम्वर्त्तः प्रलयस्तत्कर्त्तारं मेघानां गण चकारादावप्रवाहादिसाम्वर्त्तकवातगण च प्राचोदयत् प्रेषयामास ईशमानी अहमेवेश्वर इति गर्ववान् ॥ २ ॥ श्रीश्च मदो हर्षश्च माहात्म्यं च तेषां द्वन्द्वैक्यं मर्त्यं मर्त्येभ्यो हित देवस्य मम दुष्टस्य हेलनमिति सर्वत्वर्थो वास्तवः ॥ ३ ॥ अदृढैः असमर्थैः कर्ममयैः केवलकर्मप्रचुरैरत एव नाम्नैव नौ तुल्यैर्नतु वस्तुतः आन्वीक्षिकीमात्मानुसन्धानरूपां वस्तुतश्च कर्ममयैः क्रतुभिः सह आन्विक्षिकीं हित्वा अवज्ञया त्यक्त्वा कृष्णमाश्रित्यैव वैष्णवा यथा भवार्णवं तितीर्षन्तीति कृष्णाश्रयणमात्रेणैव भवार्णवस्य गोवत्सपदत्वे जाते तत्तरणार्थप्रयत्नानौचित्यात् तेषां तितीर्षामात्रमिति ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पञ्चविंशे शक्रकृतापद्रवाद्भगवान् गोवर्द्धनमुद्धृत्य व्रजमरक्षदित्याह–इन्द्र इति। विहितां वर्धिताम् कृष्णो नाथः वाच्यो येषां तेभ्योऽता गोपयाचित्तश्रीकृष्णप्रयत्नकामः स इन्द्र इति गम्यते ॥ १ ॥ नन्वेवमनर्थाचरणे इन्द्रस्य को हेतुरत्राज्ञानविलसितः श्रीमदजनितेश्वरत्वाभिमान एवेति वदन् क्रुद्धेन यत्कृतं तदाह, गणमिति षड्भिः। सांवर्तकं नाम संवर्तः प्रलयस्तत्कर्तारम् अनेन प्रलयकर्तुर्येत्यैव सांवर्तको गणस्तदपकारार्थमिन्द्रेण अज्ञानान्नियुक्तः स्वय चेन्द्रोपदेशात्तदपकारं कर्तुं प्रवृत्तः इत्येवमज्ञानस्य श्रीमदस्य चानर्थहेतुता द्योतिता ॥ २ ॥ देवहेलनं ममापराधं मां हित्वा कृष्णेन सुखमिच्छन्तीति फलितार्थः। अहो श्रीमदमाहात्म्यम् इत्यनेन स्वदोषमन्यत्रारोपयति जनः इति जनस्वभावो ज्ञापितः कृष्णं मर्त्यमुपाश्रित्येत्यनेन "गां पौरुषीं मे शृणुतामराः" इत्यादिब्रह्मवाक्यात् सुज्ञाततत्त्वस्येन्द्रस्य वाक्येन अभिमानिनः क्रोधाविष्टस्य पूर्वापरविवेकभ्रंशः पूज्येऽपूज्यबुद्धिश्च भवत्येवेति ज्ञाप्यते ॥३॥ मां हित्वा कृष्णेन सुखमिच्छन्तीत्युक्त तत्र दृष्टान्तमाह, यथा आन्वीक्षकीमध्यात्मविद्यां हित्वा अदृढैः असमर्थैः कर्ममयैः कर्ममयैः कर्मनिवृत्त्यै अत एव नामनौनिभैर्नाममात्रनौकासदृशैः भवार्णवं तितीर्षन्ति मुक्तिं सुखमिच्छन्ति तद्वत् ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ शक्रदर्पजिघांसयेति मूलेन तात्पर्येण चेन्द्रस्य विमदायेति मदः सूचितस्तं विस्तृत्य तदपनयनं चेत्यमित्थमेव भक्तसामान्यं दयापयोधिरुद्धरतीत्येतदस्मिन्नध्याये प्रतिपाद्यते। तत्रादौ मखदिखण्डनं श्रुत्वाऽऽखण्डलः कामारभटीमारेभ इत्यतः शुक आहेत्याह श्रीशुक इति इन्द्र आत्मनः पूजां विहिताम्। अनेनारब्धता ध्वन्यते। विज्ञाय तत्तदा कृष्णनाथेभ्यो नन्दादिभ्यो गोपेभ्यश्चुकोप। हेति तदज्ञानमन्यकृतमिति सूचयति। क्रुधद्रुहेति चतुर्थी ॥१॥ अन्तकारिणां लयं कल्पतां मेघानां नाम्ना सांवर्तकं प्रलयकालिकमित्यर्थः। गणं सङ्घं प्रचोदयत्। क्रुद्ध ईशमन्युनेशं प्रति कृतक्रुधा। अनेन तस्य नैष्फल्यं सूचयति। वाक्यं चाह। सांवर्तकमित्युक्त्यैवान्तकारितावगतौ पुनरन्तकारिणामित्यनेन काले तथात्वमरत्वकाले इति नेति ध्वनयतीति मन्तव्यम् ॥ २ ॥ काननौकसां गोपानां श्रीमदमाहात्म्यमहो आश्चर्यावहम्। किं रूपं तदित्यतो निरूपयति। ये मर्त्यं मरणशीलं कृष्णमुपाश्रित्य देवानाममर्त्यानां हेलनमनादरं चक्रुरिति ॥ ३ ॥ पूर्वमुक्तं न स्वकं किन्तु परप्रेरणकृतं न तच्चिरस्थायीत्यपि सूचयितुं किञ्चित्सतत्त्वभावव्यापारणं निदर्शनेन दर्शयति। यथेति। अदृढैरफलपर्यवसायकैरन्यत्रासारभूरुहकृतैः कर्ममयैः प्रवृत्तकर्मप्रवृत्तेरन्यत्रानल्पशिल्पिकर्मभिः कुप्लवैः कुः पृथिवी तस्यामेव सद्भिः प्लवत्वेन प्रतीयमानैः कुत्सितैरन्यत्रापारगामिभिः पापप्रायैः प्लवैर्वा। कुः पापेऽल्पार्थकुत्सयोरिति यादवः। ज्ञानमस्मदीयं ज्ञानमेवेति मानिनोऽभिमानवतः समार्थमिदम्। आन्वीक्षिकीं ब्रह्मतर्कजनितां विद्यां ज्ञानं हित्वाऽन्यत्रार्णवपारमेवं गच्छेमिति परोक्षां हित्वा तात्कराऽर्णवं तितीर्षतो यथा तथैते भवार्णवं तितीर्षन्तीयं मर्त्यमाश्रित्याहो। आन्वीक्षिकीं विद्यां स्वबिम्बं प्रतिपत्तिं वा ॥ ४ ॥

श्रीसुबोधिनी

हेतुशास्त्रमिद यस्माद् दृष्टार्थमुपयुज्यते । अदृष्टार्थं तथा चान्यत तज् ज्ञापयति निश्चितम् ॥ १ ॥
हैतुके फलभोक्तायमिन्द्रो विघ्नं चकार ह । वृष्टिरूपं ततः कृष्णः शैलधारी बभूव ह ॥ २ ॥
उभयोर्हैतुकत्वार्थमेवं भगवता कृतम् । निषिद्धभोगिनो बुद्धिर्नष्टा भवति सर्वथा ॥ ३ ॥
इतीन्द्रस्य महामोहवाक्यान्याह विशेषतः । द्वाविंश ईर्यते कृष्ण इन्द्रेण विनिपीडितम् ॥ ४ ॥
व्रजं गोवर्धनं धृत्वा सम्यक् पालितवानिति ॥ ४½ ॥

पूर्वाध्याये इन्द्रयागभङ्गो निरूपितस्ततः क्रुद्ध इन्द्रो व्रजपीडार्थं वृष्टिं करोतीति निरूप्यते इन्द्र इतिदशभिः,

क्रोधोद्यमौ च वाक्यानि चतुर्भिः सर्वनाशनात् । पीडाहेतुफलान्युक्त्वा सन्धिमाहेतरेण हि ॥ १ ॥

आदौ तस्य क्रोधमाहेन्द्र इति, तदा गोकुलगमनसमय एव, आत्मनः **पूजां विहतां** ज्ञात्वा **नृपे**तिसम्बोधनं राज्ञा तथात्वज्ञापनाय **गोपेभ्यश्च कोप**, ननु गोपा अज्ञाः कथं कोपस्तेषु ? तत्राह **नन्दादिभ्य** इति, **नन्दो हि महान्, तर्हि कोप** उचित इति चेत् तत्राह, **कृष्णनाथेभ्य** इति, **कृष्ण एव नाथो** येषां, नन्विन्द्रः शुद्धसत्वपरिणामरूपः कथमेवं कृतवान् ? तत्राह **स** इति, निषिद्धभागभोक्ता ॥ १ ॥ न केवलं कोपमात्रं किन्तु प्रयत्नमपि चकारेत्याह **गण**मिति, **गणो** हि बहूनां सङ्घातो भवति. **संवर्तकः** प्रलयकर्ता, नामेति प्रसिद्धौ, अतः प्रसिद्ध एवायं **संवर्तको गणः**, समुदाय एव नाशशक्तिरितिपक्षनिराकरणार्थं प्रत्येकमपि **मेघानां** तथात्वमाह **मेघानां चान्तकारिणा**मिति, **अन्तकारिणां मेघानां गण सवर्तकं** च **गणं** प्रेषयामास तथा सति प्रत्येकसमुदायाभ्यां सामान्यतो विशेषतश्च नाशो भवति, तस्याज्ञा कर्तव्येतिज्ञापनार्थमिन्द्र इति, 'यदि परमैश्वर्ये', **परमैश्वर्यं प्राप्तस्य वाक्यमनुल्लङ्घ्यमतः प्राणोदयत्** प्रकर्षेण तदैवाविचारं प्रेषितवान्, तत्र हेतुः क्रुद्ध इति, एवं तस्य मानसदोषमुक्त्वा वाचनिकं दोषमाह **वाक्यं चाहेति**, यतो**यमीशमान्य**हमेवेशस्त्रैलोक्यस्येति मन्यते, **उतापि वाक्यमप्याहे**त्यर्थः, एतेनायुक्तमत्वमुक्तं भवति ॥ २ ॥ वाक्यमाह चतुर्भिः, **परम्परया** सिद्धो हैतुको न त्याज्य आधुनिकस्त्याज्य इति मन्यते, **अहो** अत्याश्चर्यं **सर्वथा** विवेकरहिता **गोपाः** कथमेवं **मर्यादोल्लङ्घनं** कृतवन्त इति स्वहृदय एवाह, **श्रीमदस्य माहात्म्यमहो** आश्चर्यं यतः **श्रीमदाद् ये गोपा देवहेलनं** चक्रुस्तत्रापि न महान्तः किन्तु **गोपा** न वा तेषां सत्सङ्गः सम्यग्देशस्थितिर्वा किन्तु **काननौकसः**, एतादृशानामपि **श्रीमदं** करोति, ननु न **श्रीमदात्** तैरेवं कृतं किन्तु भगवद्वाक्यादतस्तेषां को दोष इति चेत् तत्राह **कृष्ण मर्त्यमुपाश्रित्येति**, देवा अमर्त्या मनुष्या मर्त्याः, भगवान् सदानन्दोपि मनुष्यवेषं कृतवान्, तस्य परिग्रह एव तेषां दोषः, **उप समीप आश्रयणं**, न केवलं यागान्तरं कृतवन्तः किन्तु **देवस्येन्द्रस्यैव हेलनं** तद्द्रव्यैरेव कृतमिति ॥ ३ ॥ ननु भगवता कर्ममार्ग एव समीचीन उक्तः कथं दूष्यत इत्याशङ्क्याह **यथादृढै**रिति अदृढैः क्रतुभिर्य **भवार्णवं तितीर्षन्ति** ते मध्य एव निमग्ना भवन्ति, न हि स्वेन नीयमानया नौकया तरणं सम्भवति सापि स्वकर्मण्येव प्रेर्यत इति द्विगुणः क्लेशः, तदाह **कर्ममयै**रिति **कर्मैव** तेषां स्वरूपं तदप्यदृढं प्रायश्चित्तबाहुल्यात्, **क्रतुभिरिति नाममात्रं** यतस्ते **नौनिभा** नौकासदृशा दर्शनार्थमेव नौकातुल्याः, तान्यपि **कर्माणि** यदि चित्तशुद्ध्यर्थं कुर्यात् तदा भवतु वारादुपकारकत्वं तदपि नास्तीत्याह **विद्यामान्वीक्षिकीं** हित्वेति, कर्म त्वविद्या **विद्यान्वीक्षिकी, अन्वीक्षणमन्वीक्षा** श्रवणानन्तरं पुनरात्मानुसन्धानं, 'विद्यां चाविद्यां च यस्तद् वेदोभयं सहे'त्यत्र केवलाविद्यायाः प्रतिषेधात् तदाह **हित्वेति**, यथा ते **तितीर्षन्ति** न तु तरन्ति तथैवैत ईश्वरवादं निराकृत्य केवलकर्मवादेन स्वनिर्वाहेच्छामपि न तरन्ति निर्वाहं न प्राप्नुवन्त्यतः कृतस्य कर्मणो वैयर्थ्यात् तेन पालयितुं न शक्यत इति सुखेन तद्विघातः कर्तव्य इतिभावः ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

द्वाविंशाध्यायार्थोक्तिसन्दर्भे, तद् ज्ञापयति निश्चितमिति । दृष्टार्थफलककर्माधिष्ठाता दृष्टानिष्टजननद्वारा स्वत्यागे सति स्वानुभावं ज्ञापयतीत्यर्थः । अदृष्टानेकसाधनवत्त्वेपि गोवर्धनात्मकदृष्टसाधनेनैव रक्षणे तात्पर्यमाहुः **उभयोर्हैतुकत्वार्थमिति** । एतज्ज्ञापनार्थमित्यर्थः । 'तच्छेषेणोपजीवन्ती'तिवाक्यात् स्वोपजीव्यान्नजनकत्वेनेन्द्रो यष्टव्य इति व्रजराजेनोक्तं यथा, तथा भगवतापि 'वयं गोवृत्तयोऽनिशं' 'वनशैलनिवासिनश्चा'त उपजीव्यत्वाद्धेतो'र्गवादीनां मख आरभ्यता'मित्युक्तमित्युभयोर्हैतुकत्वम् । **एवं भगवता कृत**मिति । दृष्टमेवानिष्टमन्यप्रतीत्या दृष्टेनैव तद्वारणं चेत्यर्थः । अन्यथा 'गोपाये स्वात्मयोगेने'तिपदं विरुध्येत । भुक्त यद्रूपेणैव रक्षितवानिति तत्त्वम् । **दशश्लोक्यां प्रतिवाक्यार्थोक्तौ सर्वनाशना**दिति । सर्वपुरुषार्थनाशनादित्यर्थः । तेषामेतत्सङ्ख्यावत्त्वादिति भावः । **कृष्णं मर्त्यमित्यस्य** द्वितीयार्थोक्तौ, **अथवा कृष्ण**मित्यादि । विपरितषड्गुणमिति मर्त्यपदव्याख्यानम् । मर्त्यत्यानीश्वरत्वादिधर्मनैयत्येन विपरीतषड्गुणा लक्ष्यन्ते । तथा च शङ्खे गृह्यमाणेपि पीतिमारोपवत्स्वधर्मारोपं सदानन्दे कृतवन्त इति मे अप्रियं चक्रुरित्यर्थः । तत्त्वेनोपाश्रित्येत्यस्यैव विवरणं भगवत्यपीत्यादिना कृतम् ॥ ३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

इन्द्र इत्यत्र **वाक्यानि चतुर्भिरिति** पञ्चमश्लोकस्तु चतुर्णामेवोपोद्बलक इति भावः ॥ १ ॥ **अहो श्रीमदे**त्यत्र **तस्य परिग्रह** एवेति मर्त्यवाक्यस्य परिग्रह इत्यर्थः ॥ ३ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

द्वाविंशाध्यायविवरणे **इन्द्रस्तदात्मनः पूजा**मित्यादिदशश्लोकार्थनिरूपणे **क्रोधोद्यमौ च वाक्यानि चतुर्भिः सर्वनाशनात् पीडाहेतुफलान्युक्त्वा सन्धिमाहेतरेण** होति कारिका, तत्र 'इन्द्रस्तदे'ति श्लोके क्रोधः, 'गणं सांवर्तकं नामे'ति श्लोके **उद्यमः**, ततो वाक्यानि **चतुर्भिः**, तत्रैष क्रमः, "अहो श्रीमदमाहात्म्य"मित्येकं, "यथादृढै"रिति द्वितीयं, "वाचालं बालिश"मिति तृतीयं, "एषां श्रियावलिप्ताना"मिति चतुर्थं, एवं चत्वारि वाक्यानि, ततो मध्ये "अहं चैरावतं नाग"मितिश्लोकः मेघानां व्रजागमनस्य पश्चाद् व्रजनाशार्थं मघवदागमनं हि तदर्थं, अत इन्द्रस्य व्रजनाशार्थमागमनं सन्धौ परिणतत्वात् **सन्धिशब्देन** व्यवह्रियते, "अहो श्रीमदमाहात्म्य"मित्यादिचतुर्णां वाक्यानां "इत्थं मघवताज्ञप्ता" इत्यारभ्य "नादृश्यत नतोन्नत"मित्यन्तानां त्रयाणां वाक्यानां सन्धौ पठितत्वात् **सन्धिशब्देन** व्यवह्रियते, "अहं चैरावतं" इत्यनेन स्वागमनमिन्द्रेण पठितं, अत इन्द्रकर्तृकव्रजागमनस्य सन्धित्वं, अथ वा यद्यपि शक्रेण व्रजनाशार्थं व्रज आगमिष्यामीत्युक्तं तथापीन्द्रकर्तृकव्रजागमनं तु भगवच्चरणस्पर्शार्थं जातमिति तदागमनस्य सन्धिरूपत्वमेव जातमिति सन्धित्वमुक्तं, सन्धिशब्दः कलहनिवारककृतिवाचकः, तत "इत्थं मघवताज्ञप्ता" इत्यनेन **पीडोक्ता**, ततो "विद्योतमाना" इत्यनेन पीडायां हेतुरुक्तः, ततो "जलौघै"रित्यनेन दृष्टः **फलमुक्तं**, एवं दश श्लोकाः, तथा च **क्रोधोद्यमयोः** श्लोकद्वयं, तत **इन्द्रवाक्य**निरूपकाश्चत्वारः "अहो श्रीमदे"त्यारभ्य "पशून् नयत संक्षय"मित्यन्ताः श्लोकाः, एवं षट् श्लोकाः, तदनन्तरम "हं चैरावत"मिति **सन्धिश्लोकः**, तदनु 'एवं मघवताज्ञप्ता' इति **पीडानिरूपणश्लोकः**, 'विद्योतमाना' इति **हेतुनिरूपकः**, "स्थूणास्थूले"ति **फलनिरूपकः**, एवं दश, तदुक्तं **पीडाहेतुफलान्युक्त्वेति**, न चैवं सति "पीडाहेतुफलान्युक्त्वा सन्धिमाहे"त्युक्तिर्विरुद्धा सन्धिनिरूपणस्य पीडादिनिरूपणात् पूर्वमुपलभ्यमानत्वादितिवाच्यं, "अहं चैरावतं नाग"मित्यनेन निरूपितात् सन्धिपदार्थात् पूर्वं पीडां कुरुत विद्योतनादि कुरुत स्थूणास्थूलावर्षधाराभिगर्तादि कुरुत जलौघैर्भुवं प्लाव्यमानां कुरुतेतीन्द्रेण मेघान् प्रत्याज्ञापनात्, एवं पीडाहेतुफलान्युक्त्वा "अहं चैरावतं नाग"मित्यनेन सन्धिमुक्तवान् इन्द्र इत्यर्थः, युक्तं चैतत्, इन्द्रोक्तिं विना मेघाः कथं कुर्युः, अतः 'पीडाहेतुफलान्युक्त्वा सन्धिमाहे'ति यदुक्तं तत् **सम्यगेव, इन्द्रः** पीडाहेतुफलान्युक्त्वा "अहं चैरावतं नागमारुह्यानुव्रजे व्रज"मित्यनेन सन्धिमाहेतिकारिकार्थः फलितः, यद्यपि **पीडाहेतुफलानि शक्रोक्तौ मूले** नोपलभ्यन्ते तथापि "इत्थं मघवताज्ञप्ता मेघ" इत्यादिशुकोक्तश्लोकत्रये मेघकर्तृकपीडाहेतुफलानामुपलभ्यमानत्वात् पीडाहेतुफलानि व्रजे मेघैः कृतानि, तानि चेन्द्राज्ञां विनानुपपन्नानीतीन्द्रवाक्यानि पीडाहेतुफलबोधकान्याक्षिपन्ति, तथा चेन्द्रः पीडाहेतुफलानि मेघान् प्रत्याज्ञप्तवानिति ज्ञायते, अतः इन्द्रः पीडाहेतुफलान्युक्त्वा सन्धिमाहेतिकारिकार्थो युक्त एव, "इत्थं मघवताज्ञप्ता" इत्यत्र **पीडा** स्पष्टैव "पीडयामासुरोजसे"तिवाक्यात्, पीडा कथं भवेदित्याकाङ्क्षायां "विद्योतमाना विद्युद्भि"रित्यनेन विद्युत्स्तनयित्नुतीव्रमरुज्जलशकरा वृष्टयः पीडायां हेतवो निरूपिताः, अतोऽस्मिन् श्लोके हेतुनिरूपणं, "स्थूणास्थूला वर्षधारा" इत्यनेन व्रजभूमेर्जलप्लावनरूपं प्रलयदृष्टिफलमुक्तं, अतोऽस्मिन् श्लोके फलनिरूपणं, एवं पीडाहेतुफलानि मेघकृतानि श्रीशुकेनोक्तानि त्रिभिः, एतानि पूर्वमिन्द्रेण मेघान् प्रत्याज्ञारूपेणोक्तानीति सर्वं सुस्थम् ॥ १ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

द्वाविंशाध्याये हेतुशास्त्रमित्यादि का० २१६४–२१९४ । हेतुशास्त्रमित्यादि **तज्ज्ञापयति निश्चितमिति** एतच्च टिप्पण्यां व्याख्यातं, तद्यथा, दृष्टार्थफलकर्माधिष्ठाता स्वत्यागे सति दृष्टानिष्टजननद्वारा स्वानुभावं ज्ञापयतीत्यर्थः, दृष्टोर्थः भूतेभ्यो जीवनदानं, तत्फलकं कर्म इन्द्रयागः, दृष्टानिष्टं गोष्ठजिघांसया वृष्टिकरणं, **उभयोर्हेतुकत्वार्थ**मिति व्रजराजकृतेन्द्रयागभगवदुक्तगवादियागयोर्हेतुकत्वज्ञापनार्थमित्यर्थः, "तच्छेषेणोपजीवन्तीतिवाक्यादिन्द्रयागस्य यथा व्रजराजयुक्तिसिद्धत्वं तथा गवादियागस्य "वयं गोवृत्तयोऽनिशं" "नित्यं शैलनिवासिन" इत्यादिवचनेन भगवद्युक्तिसिद्धत्वमिति **उभयोर्हेतुकत्वं, एवं भगवता कृतमिति** वृष्टिरूपं दृष्टमेवानिष्टं लोकप्रतीत्या दृष्टेनैव श्रीगोवर्धनेन वृष्टिवारणं चेत्यर्थः, वस्तुतस्तु "गोपाये स्वात्मयोगेने"तिपदात् स्वात्मयोगेनैव रक्षणमितिभावः ॥ ० ॥ **इन्द्रस्तदात्मनः पूजा**मित्यादिदशश्लोकीप्रतिपाद्यानर्थानाहुः **क्रोधोद्यमौ**, इति का० २२०४ । द्वाभ्यां क्रमेण **क्रोधोद्यमौ**, चतुर्भिरिन्द्रवाक्यनिरूपणं हेतुमाहुः सर्वनाशनादिति, सर्वपुरुषार्थनाशनादित्यर्थः, पुरुषार्थानां चतुःसङ्ख्याकत्वादितिभावः,पीडेत्यादि "इत्थं मघवताज्ञप्ता" इत्यनेन पीडा, "विद्योतमाना" इति श्लोकेन पीडाहेतुः, "स्थूणास्थूले"त्यनेन वृष्टिरूपं फलं, "अहं चैरावतं नाग"मितिश्लोकेन सन्धिरूपमिन्द्रागमनं, यद्यपि "नन्दगोष्ठजिघांसये"तिवाक्याद् विग्रहार्थमेव इन्द्रेण स्वागमनमुक्तं तथापि "गोलोकादाव्रजत् कृष्णं सुरभिः शक्र एव चे"त्युक्तप्रकारेण सन्ध्यर्थमेव इन्द्रागमनं जातमिति **सन्धिमाहेतरेण** हेत्युक्तं, अत्र यद्यपि सन्धिश्लोकात् पूर्वं पीडाहेतुफलानि इन्द्रेण स्फुटं नोक्तानि तथा च कारिकायां 'पीडाहेतु-

फलान्युक्त्वे'ति क्त्वाप्रत्ययान्तप्रयोगानुपपत्तिस्तथापि ''पशून् नयत संक्षय''मितिवचनात् ''इत्थं मघवताज्ञप्ता'' इतिपदाच्च पीडाहेतुफलानामपीन्द्राज्ञप्तत्वं ज्ञेयं, अतो नानुपपत्तिः ॥ १ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पञ्चविंशे तु शक्रेण जलपाषाणमारुतैः । पीडितं गोकुलं त्रातं कृष्णेनेति निरूप्यते ॥ १ ॥

'राज्ञामपमाने कोपो भवत्येव, तत्तु स्वदृष्टान्तेन ज्ञेयम्' इत्याशयेन सम्बोधयति–नृपेति । स प्रसिद्धो देवराज इन्द्रः आत्मनः पूजां गोपैर्विहतां त्यक्तां विज्ञाय नन्दादिभ्यो गोपेभ्यश्चुकोप । 'तदत्यनुचितं कृतवान्' इत्याह–कृष्णो नाथो रक्षको येषां तेभ्य इति ॥ १ ॥ क्रुद्धश्च सन् इन्द्रः सांवर्तकं संवर्तः प्रलयस्तत्कर्तारं नाम प्रसिद्धम् । तत्र हेतुः–अन्तो विनाशः, तत्कारिणा मेघानां गणं प्राचोदयत् व्रजनाशाय प्रेषयामास । प्रेरणवाक्यं चाह–ननु 'कथं कृष्णनाथानां घाते प्रवृत्त' इत्याशङ्क्य 'आत्मसम्भावनया निरस्तविवेकत्वात्' इत्याशयेनाह–ईशमान्युतेति । उत यस्मात् ईशमानी 'अहमेवेश्वर' इति गर्ववानित्यर्थः ॥२॥ तद्वाक्यं दर्शयति–अहो इत्यादिपञ्चभिः । गोपानां श्रीमदस्य धनसम्पत्तिकृतस्य मदस्य माहात्म्यं वैभवमहो आश्चर्यभूत 'पश्यत' इति शेषः । 'यदि कश्चित् पुरदेशाधिपतिर्महाराज एवं कुर्यात्तदा तस्मै तच्छोभेतापि, एतेषां तु वासस्थानस्याप्यास्था नास्ति' इत्याशयेनाह–काननौकसामिति । तदाश्चर्यमेव दर्शयति–कृष्णमिति । मर्त्यं मरणशीलमुपाश्रित्य ये गोपा मम देवस्य हेलनमपमानं चक्रुरित्यर्थः ॥ ३ ॥ विपरिताचरणे दृष्टान्तमाह–यथेति । आन्वीक्षिकीमात्मानुसन्धानरूपां विद्यां हित्वा क्रतुभिरेव केचित् भवार्णवं यथा तितीर्षन्ति तर्तुमिच्छन्त्येव केवलं, नतु तरन्ति, किन्तु तत्रैव निमज्जन्ति । तत्र हेतुमाह–नाममनौनिभैरिति । नाममात्रेण 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इत्यर्थवादमात्रेणैव संसारतारकत्वेन श्रुतैः, न तु वस्तुतस्तेषां तारकत्वमित्यर्थः । तत्र हेतुः–अदृढैरिति, असमर्थैर्नश्वरैः । तत्रापि हेतुः–कर्ममयैरिति, क्रियानिवर्त्यैरित्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

पञ्चविंशेतिवर्षेण पीड़ितं गोकुलं हरिः ॥ जुगोप गोवर्द्धनेन तत्र श्लोकास्तिवह्नयः (३) ॥
अनुष्टुभश्चतुस्त्रिंशदुवाचेति वचोद्वयम् (२) ॥ २५ ॥

इन्द्र इति ॥ हे नृप ! तदा स इन्द्रः आत्मनः पूजां गोपैर्विहितां त्यक्तां विज्ञाय कृष्णो नाथो येषां तेभ्यो नन्दादिभ्यो गोपेभ्यश्चुकोप ॥ १ ॥ गणमिति ॥ क्रुद्धः उत यस्मात् ईशमानी आत्मानमीशं मन्यमान इन्द्रः सांवर्तकं संवर्तः प्रलयस्तत्कर्तारं नाम प्रसिद्धम् । तत्र हेतुः अन्तो विनाशस्तत्कारिणां मेघानां गणं प्राचोदयत् व्रजनाशाय प्रेषयामास प्रेरणावाक्यं चाह स्म ॥ २ ॥ अहो इति ॥ अहो काननौकसां वनवासिनामपि गोपानां श्रीमदस्य माहात्म्यं पश्यत । ये गोपा मर्त्यं मनुष्यमात्रं मरणधर्माणं कृष्णमुपाश्रित्य देवस्य मम हेलनमवज्ञाञ्चक्रुः । वस्तुतः श्रीश्च मदो हर्षश्च माहात्म्यं च तेषां द्वन्द्वैक्यम् । मर्त्येभ्यो हितं मर्त्यं देवस्य मत्तस्य दुष्टस्य मम हेलनमित्यर्थः ॥ ३ ॥ यथेति युग्मम् ॥ यथा केचित् आन्वीक्षिकीम् आत्मबोधविद्यां हित्वा अदृढैर्नश्वरैः कर्ममयैः क्रियासम्पादितैः नाममात्रेण नौनिभैः नौकावत्संसारतारकत्वेनाभिमतैः क्रतुभिरेव भवार्णवं तितीर्षन्ति । तथैव वाचालं बहुभाषिणं बालिशं शिशुं स्तब्धं स्वपितुरग्रेऽपि धाष्ट्र्याद् दुर्विनीतम् अज्ञं तथापि वृथैव पण्डितमानिनं पण्डितमन्यं मर्त्यं कृष्णमुपाश्रित्य गोपा मे देवस्याप्रियमपमानं चक्रुः । वास्तवोऽर्थस्तु वाचा अलं पूर्णं शास्त्रयोनित्वात् बालिशं शिशुमिव निरभिमानिनम् । यद्वा । वाचया सरस्वत्याऽलं पूर्णो बालिशोऽपि यस्मात् तमित्येकं पदं स्तब्धमनम्रमन्यस्य वन्द्यस्याभावात् । अज्ञं नास्ति ज्ञो यस्मात्तं सर्वज्ञं पण्डितैर्ब्रह्मविद्भिः कृतो मानो यस्यास्ति तं पण्डितमानिनं कृष्णं सदानन्दरूपं परं ब्रह्म तथापि भक्तवात्सल्येन मर्त्यं मनुष्यतया प्रतीयमानम् ॥ ४–५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं पंचविंशेऽध्याये व्रजे नाशाय इंद्रवर्षणं व्रजरक्षणार्थं हरिकृतं गोवर्धनधारणं च निगद्यते तदा तस्मिन्काले आत्मनः स्वस्य ॥ १ ॥ अंतकारिणां प्रलयकर्तॄणां मेघानां गणं समुदायं अतः सांवर्त्तकः प्रलयस्तज्जनकं सांवर्त्तकं नामजनावदं तं प्राचोदयत् नोदयामास क्रुद्धः ईशमानी देवानामपि अहमेवेश इत्यभिमानयुक्तः सन्निदं वाक्यमाह ॥ २ ॥ अहो श्रीमदमाहात्म्यं तु पश्यत किं तत् देवस्य ममापि हेलनं अपमानं यत् ॥ ३ ॥ अदृढैः शिथिलैः कर्ममयैः क्रियाप्रचुरत्वेन निष्पन्नैः नामनौमिभैः नाममात्राया नौकासदृशैः यज्ञैः आन्वीक्षिकी आत्मपरमात्मानुस्मृतिरूपां विद्यां हित्वा यथा भवार्णवं तितीर्षंति ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विंशे पञ्चाधिके शक्रे रुषा नाशाय वर्षति । व्रजस्य गिरिमुद्धृत्यासाराद्व्रजमपाद्धरिः ॥ १ ॥

ततः किं जातं तत्राह ॥ इन्द्र इति ॥ हे नृप, तदा यदा स्वयागभङ्गो जातस्तस्मिन् काले इत्यर्थः । आत्मनः स्वस्य, पूजां यागविधेयामर्चां, विहतां कृष्णेन निरा- कृतां, विज्ञाय ज्ञात्वा, कृष्णो नाथो रक्षिता येषां तेभ्यः, नन्दादिभ्यः, गोपेभ्यः, ह स्फुटं

यथा तथा, चुकोप 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इति चतुर्थी ॥ १ ॥ गणमिति ॥ तदा क्रुद्धः, इन्द्रः, अन्तकारिणां, प्रलयकारिणां, मेघानां सांवर्त्तकं नाम सांवर्त्तकाख्यया प्रसिद्धं, गणं प्राचोदयत् प्रेषयामास। चकारोऽवधारणे। ईशमानी उत अहमेवेश्वर इति गर्ववान् सन्नेवेत्यर्थः। वाक्यं च आह। वक्ष्यमाणं वाक्यमपि प्रोवाचेत्यर्थः ॥ २ ॥ यदाह तदाह अहो इत्यादि पञ्चभिः ॥ अहो इति ॥ काननौकसां वनवासिनां, गोपानां, श्रीमदमाहात्म्यं धनसंपत्तिकृतस्य मदस्य वैभवं, अहो आश्चर्यकरम्। ये गोपाः, मर्त्यं मरणशीलं, कृष्णं उपाश्रित्य, देवहेलनं देवस्य ममापराधं, चक्रुः। मद्यागं बभञ्जुरित्यर्थः ॥ ३ ॥ एतदेतैः कीदृशं कृतमेवंविधमिति दृष्टान्तेनाह ॥ यथेति ॥ आन्वीक्षिकीमात्मविद्यां, हित्वा विहाय, अदृढैरसमर्थैः, केवलं नामनौनिभैः नाममात्रेण नौकासदृशैः, कर्ममयैः कर्मात्मकैः, क्रतुभिर्यज्ञैः, यथा भवार्णवं संसारसमुद्रं, तितीर्षन्ति तर्त्तुमिच्छन्ति, याज्ञिका इति शेषः। तद्वदेतेषामेतत् सर्वमिति भावः। अहमेव मुक्तिदोऽपि मद्याग एव तत्साधनमपि भवतीति दृष्टान्तगूढाभिप्रायः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं निरूप्य निगमोक्तकृतादिधर्मांस्तत्तद्युगोदितजनैरपि यत्नसाध्यान् ।
उद्यत्कलिस्थजनजातकृपः स चर्षिस्त्र्यध्यायतः पुनरुवाच कलिस्थधर्मान् ॥ १ ॥
प्राधान्यं वसुनोऽतिशायिमदिता तद्वत्सुतप्राप्तिरप्यत्यन्ता विधितश्च गोकुलमहाक्षोभोऽपि तत्प्रापितः ।
तत्तद्व्यापगमार्थमेवमचलोद्धारार्थमस्मिन् कलावेकं श्रीपतिपादसेवनमिति व्यक्तिर्षिवागाशयः ॥ २ ॥
वानप्रस्थमुपागतं प्रभुवचो-दत्तावधानं नरं किंचित्कर्म कथञ्चिदप्यनुदिनं कर्तव्यमित्यादृतम् ।
यत् क्रुध्यन्ति विलोक्य तं मखभुजस्तत्रास्य नागो न वा दुर्मार्गाश्रयणं च हेतुरिह तत्स्वार्थच्युतिः किन्त्वसौ ॥ ३ ॥

इन्द्र इति : १०.२५.१
इमेऽपि प्राचीना अहमपि तथैव क्रतुरयं ध्रुवं प्राचीनश्चेत्युचितमपहायान्वयविधिम् ।
अमन्दं यन्मन्दैरभिनव-मुकुन्दोक्त्यनुसृतैः कृतस्तादृग् गोपैः क्रतुरिति सरोषः स च वृषा ॥ ४ ॥
कंसे दुर्नयराशिनाशितमहायज्ञाद्यशेषक्रिये रुष्टां दृष्टिमपि क्षणं न विदधेऽनिष्टं स्वदिष्टं वदन् ।
सोऽन्यत्रैकमखार्पणं विदधति श्रीशाज्ञया गोपतौ क्रुद्धोऽभूत् क्षममेव सिद्धमवनौ यत्तद् बलं दुर्बले ॥ ५ ॥
यदेकभगवानयं भुवि भवत्यहं सर्वतः सहस्रभगवानिति प्रथितकीर्तिरस्मि स्फुटम् ।
इति स्मयमहातमःस्तिमितदृक् सहस्रेक्षणोऽपि जाल्मपदभागभूद् ध्रुवमलक्षितेशेहितः ॥ ६ ॥

गणं सांवर्तकमितिः १०.२५.२
जडार्णवोत्तारणनौस्वरूपभागहं सदाऽस्मीत्यचलाभिमानिनम् ।
जलार्णवेऽद्यैव निमज्जयाम्यलमितीव तानेव वृषाऽशिषद् घनान् ॥ ७ ॥
ये शास्त्रार्थमलंघ्यमुद्गतरजश्चित्ताः समुल्लङ्घयन्त्यन्तः पथ्यमपथ्यमेतदिति वा पश्यन्ति नान्धावृताः ।
ते मज्जन्ति भवार्णवे नियतमित्यज्ञोक्तितः सिद्धमित्यैषीत् स्वीयभवार्णवाकुलगतीन् कर्तुं स तांस्तादृशान् ॥ ८ ॥
श्रीकृष्णपादशुचिपूर्णरसावलीढे साधौ क्वचिद्भवति नाङ्ग गिरां प्रवृत्तिः ।
इन्द्रोऽध एवमविदन् स्वत एव मक्तुं मन्ये तदारभत कर्म तमो भवाब्धौ ॥ ९ ॥

अहो श्रीमदेति : १०.२५.३.
ऐश्वर्यं मतिमत्त्वमुत्तम-पदावासश्च निश्चिन्तता भूयोऽन्यासुलभान्नवस्त्र—विविधालङ्कारनित्यागमः ।
प्रत्येकं मदकारि किं पुनरसौ युक्तोऽखिलैर्देवराट् चित्रं त्वत्र यदेष तान् व्रजजनानूचे प्रमत्तानिति ॥ १० ॥
नीतिज्ञत्वमशेषशास्त्रविषयत्वं विधिज्ञत्वमप्याप्तं तद्ध्यखिलं निरर्थकमहो नाज्ञानमज्ञायि चेत् ।
स्पष्टं गीष्पतिशिष्यतामुपगतोऽप्यस्वच्छदृक् स्वस्थधीरज्ञानाद्भगवन्तमप्यतिरुषा वाचं वृषोवाच यत् ॥ ११ ॥

कृष्णप्रिया

इस अध्याय में ३३ श्लोक है। याग दो प्रकार के होते हैं, जिस याग का फल प्रत्यक्ष दिख पड़ता है वह याग प्रत्यक्ष फल याग कहा जाता है। जिसका प्रत्यक्ष फल दिखाई नहीं देता उसको परोक्षफल याग कहा जायगा। इन्द्र याग का फल वृष्टि माना है और वृष्टि का होना प्रत्यक्ष फल है "ज्योतिष्टोमेन यजेत स्वर्गकामः" स्वर्ग की कामना वाला ज्योतिष्टोम याग से यजन करें ऐसे यज्ञों के फल परलोकादि होने से परोक्ष फलयाग कहे जायेंगे। प्रत्यक्ष फल को हेतु शास्त्र कहते हैं। इन्द्र याग फल भोक्ता इन्द्र था; पर्वतयाग गोवर्धन याग के फल भोक्ता स्वयं भगवान थे। दोनों याग दृष्टफलक है। अभिमानी इन्द्र का मानभङ्ग करने के लिये भगवान् ने गोवर्धन याग कराया। दोनों में अन्तर यह था कि इन्द्र कभी दर्शन नहीं देता था; तब गोवर्धन याग में प्रत्यक्ष गोवर्धन जी का दर्शन हुआ यह प्रसङ्ग इस अध्याय में आयेगा।

श्रीशुकाचार्य जी महाराज ने कहा—राजन् ? जब राजा इन्द्र ने देखा अपनी प्रतिवार्षिकी पूजा रोक दी गई है, तब श्रीकृष्ण को अपना नाथ मानने वाले, और श्रीकृष्ण की प्रेरणा से याग को बंद करने वाले गोपों पर अत्यन्त क्रुद्ध हुआ ॥ १ ॥ राजन् ! राजा इन्द्र अपने आपको त्रिलोकी नाथ मानता था । उन्होंने कोप से तिलमिलाकर, प्रलय काल में जल वर्षा करने वाले 'सांवर्तक' नाम के मेघों के अध्यक्ष को व्रजमण्डल पर घोर वर्षा करने के लिए आदेश दिया और कहा—राजा इन्द्र ने कहा—देखो तो सही ! वन निवासी इन गोपों के धन और ऐश्वर्य से उत्पन्न हुए अभिमान को देखो ?; उन व्रजवासियों ने एक सामान्य बालक कृष्ण के अवलंबन पर मुझ देवता का अपमान कर डाला, इससे बड़ा आश्चर्य क्या होगा ॥ ३ ॥ जैसे कोई मन्दमति लोग, ब्रह्मविद्या नाम की सुदृढ नाव का अनादर कर, अन्य नाम मात्र की नाव के समान पार लगाने में असमर्थ, ऐसे कर्ममय यज्ञों के द्वारा अपार संसार सागर के पार जाना चाहें वह कितना सुसंगत होगा ॥ ४ ॥

वाचालं [1]बालिशं स्तब्धमज्ञं पण्डितमानिनम् । कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियम् ॥ ५ ॥
एषां श्रियावलिप्तानां[2] कृष्णेनाध्मा[3]यितात्मनाम् । धुनुत श्रीमदस्तम्भं पशून् नयत संक्षयम् ॥ ६ ॥
अहं चैरावतं नागमारुह्यानुव्रजे व्रजम् । मरुद्गणैर्महा[4]वीर्यैर्नन्दगो[5]ष्ठजिघांसया ॥ ७ ॥

श्रीशुक उवाच

इत्थं मघवताऽऽज्ञप्ता मेघा निर्मुक्तबन्धनाः । नन्दगोकुलमासारैः पीडयामासुरोजसा ॥ ८ ॥

कर्दमक्षमा

अन्वयः – गोपाः वाचालम् बालिशम् स्तब्धम् अज्ञम् पण्डितमानिनम् मर्त्यम् कृष्णम् आश्रित्य मे अप्रियम् चक्रुः ॥ ५ ॥ श्रिया अवलिप्तानाम् कृष्णेन आध्मायितानाम् एषाम् श्रीमदस्तम्भम् धुनुत पशून् संक्षयम् नयत ॥ ६ ॥ अहम् नन्द गोष्ठ जिघांसया महावीर्यैः मरुद्गणैः वृतः च ऐरावतम् नागम् आरुह्य व्रजम् अनुव्रजे ॥ ७ ॥ इत्थम् मघवता आज्ञप्ताः निर्मुक्तबन्धनाः मेघाः नन्द-गोकुलम् ओजसा आसारैः पीडयामासुः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तथा वाचालं बहुभाषिणं बालिशं शिशुं पंडितमानिनं पंडितंमन्यमतः स्तब्धविनितमिति निंदायां योजिताऽपींद्रस्य भारती श्रीकृष्णं स्तौति । तथाहि । वाचालं शास्त्रयोनिम् । बालिशमेवमपि शिशुवन्निरभिमानिनम् । स्तब्धमन्यस्य वंद्यस्याभावादनम्रम् । अज्ञं नास्ति ज्ञो यस्मात्तं सर्वज्ञमित्यर्थः । पंडितमानिनां ब्रह्मविदां बहुमाननीयम् । कृष्ण सदानन्दरूपं परं ब्रह्म मर्त्यं तथापि भक्तवात्सल्येन मनुष्यतया प्रतीयमानमिति ॥ ५ ॥ अवलिप्तानां मत्तानाम् आध्मायितात्मनां बृंहितदेहानां धुनुतापनयत । श्रीमदेन यः स्तंभो गर्वस्तम् ॥ ६ ॥ बिभ्यतस्तान्प्रत्याह । अहं चेति । अनु व्रजे अन्वनंतरमेवागमिष्यामि । मरुद्गणैर्देवगणैः सह ॥ ७ ॥ मघवता इंद्रेण निर्मुक्तं बंधनं येषां ते प्रलयाभिप्रायेण बद्धा आसन् तदा निर्मुक्तबंधनाः संतः आसारैर्धारासंपातैः पीडयामासुः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बहुभाषिणम् शास्त्रविरुद्धभाषिणमनधीतशास्त्रत्वात् अज्ञम् नित्यगोचारित्वात् । स्तब्धं पितुरप्रेष्यतिधृष्टत्वात् । अतः पंडितंमन्यत्वात् । वाचा वाण्या अलं पूर्णं शास्त्रयोनिम् "ऋचः सामानि जज्ञिरे" इत्यादिश्रुतेः एवमपि शास्त्रयोनित्वेऽपि । 'मूर्ख-बालौ तु बालिशौ' इति कोशात् । अनम्रम् सर्वेश्वरम् । "एष सर्वेश्वरः" इति श्रुतेः । इत्यर्थ इति । "स सर्ववेत्ता न हि तस्य वेत्ता" इत्यादिश्रुतेः । पंडितैर्मन्यत इति पंडितमानीनम् । णिनिरत्र प्रत्ययः । कृष्णम् "कृषिर्भू वाचकः शब्दः" इत्यादिश्रुतेः । तथापि परब्रह्मत्वेऽपि ॥ ५ ॥ आधमतीत्याध्माः स इवाचरतीत्याध्मायते ततः कर्मणि क्तः आध्मायितः बृंहितो वर्द्धित आत्मा देहो मनो वा येषां ते तेषाम् । 'स्तंभः स्थूणाजडत्वयोः । अभिमाने रोधके च' इति शाश्वतः ॥ ६ ॥ बिभ्यतः भीतान् । तान् मेघान् । नागम् गजम् 'नागौ गजभुजगमौ' इति हलायुधः ॥ ७ ॥ प्रलयाभिप्रायेण प्रलय एव तेषां निर्मुक्तिर्न त्वन्यदेत्यभिप्रायेण । निर्मुक्तबंधना विगलितजलस्तंभाः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वाचालमित्यादिकं सतर्ककर्कशकर्मवादातरणाद्यभिप्रायेण गोपा इति निकृष्टत्वं मे त्रिलोकीश्वरस्येति दुर्मदभरेण सूचितम् अन्यत्तैः तत्र स्तुतिपक्षे वाचालमिति वाचा हेतुना अलं समर्थ इत्येवार्थः । मत्वर्थीयणिच्प्रत्ययस्य निन्दायामेवाभिधानात्

---

१. मानिनमत्त-विज. । २. मत्तानां-च. पु. टी. । ३. नाप्या-विज. । ४. वेगै-वीर. विज. । ५. गोप-वीर. ।

शिशुवदिति बालिशः शावके मूर्खे इति विश्वप्रकाशात् ब्रह्मविदां माननीयमिति तत्कर्तृको मानो विद्यते यत्रेति ।।५।। एवं दुर्वृत्यतिशयार्थं तेषां दोषं तेनात्मनः तेषु रोषभरं च बोधयित्वा अधुना कृत्यमादिशति, एषामिति । कृष्णेन हेतुना श्रिया पशुवर्गलक्षणलक्ष्म्या मत्तानाम् इत्यनन्तरं बृंहितदेहानां चेति बाह्यं सुखं दर्शितं तत्र च कृष्णेनेति तत्कृतगोपालनादिना क्षीराद्युपभोगसम्पत्तेरिति भावः । अन्यत्तैः तत्र धमनं नाम सतेजस्कीकरणं तच्च बृंहणतात्पर्यकं णिच् प्रयोगस्तु तेषां कर्तृत्वं कृष्णस्य हेतुकर्तृत्वमित्यपेक्षयेति ज्ञेयम् । यद्वा, स्वतः श्रिया सगर्वाणां विशेषतः कृष्णेन सतेजस्कीकृतचित्तानामित्यर्थः भक्तिलक्ष्म्या समृद्धानां तथा तयैवोज्वलितचित्तानामिति तत्त्वार्थः कथं धुनवामेत्यपेक्षायामाह–पशून् सम्यक् क्षयं नयत पशूनामेव श्रीमदहेतुत्वात् तत्त्वार्थे सम्यक् निवासः स्वास्थ्यमित्यर्थः ।। ६ ।। ऐरावतमारुह्येति । युष्माकं जलाभावे सति सोयं साहाय्यं करिष्यतीति भावः । नन्दगोष्ठेति तत्रैव वर्षणीयं नतु मधुपुर्यामिति च सह कंसेनापि मैत्रीचिकीर्षया सूचितं जिघांसया जिगमयिषयेति तात्त्विकोर्थः ।। ७ ।। ओजसा बलेन ।। ८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वाचालं सतर्ककर्कशकर्म्मवादावतारणाद्यभिप्रायेण, गोपा इति निकृष्टत्वम् ; मे त्रिलोकीश्वरस्येत्युत्कृष्टतरत्वं दुर्म्मदभरेण सूचितम्, अतएवात्रोक्तं मे इति ।। ५ ।। एवं दुर्वृत्त्यतिशयार्थं तेषां दोषं तेनात्मनस्तेषु रोषभरञ्च बोधयित्वा अधुना कृत्यमादिशति—एषामिति । कृष्णेन हेतुना श्रिया विविधधनादिसम्पदा पशुवर्गलक्षणलक्ष्म्या वा मत्तानामित्यन्तर–बृंहितदेहानाञ्चेति बाह्यं सुखं दर्शितम् । यद्वा, श्रीमत्तानां लक्षणं ध्मापितात्मनामिति; तत्र च कृष्णेनेति तत्कृतगोपालनादिना क्षीराद्युपभोगसम्पत्तेरिति भावः । भक्तिलक्ष्म्या समृद्धानामिति तयाध्मायितस्वभावानां किजप्रेमाग्निदाहितचित्तानां चेति तत्त्वार्थः । 'ध्मा शब्दाग्निसंयोगयोः' इत्यस्मात्, कथं धुनवामेत्यपेक्षायामाह–पशून् सम्यक् क्षयं नयत, पशूनामेव श्रीमदहेतुत्वात् सर्व्वानेव ताननतिवृष्ट्या मारयतेत्यर्थः ।। ६ ।। ननु तत्रास्माकमल्पानां का शक्तिः ? तत्राह–अहञ्चेति । अनुव्रजे युष्मत्पश्चादेवागच्छामि, ऐरावतमारुह्येति । युष्माकं जलाभावे सति स निजकरेण जलमुद्धृत्य साहाय्यं करिष्यतीति भावः । मरुद्गणैः–एकोनपञ्चाशद्भिर्वर्गैः सह, नन्दः श्रीभगवत्पिता तस्य, यद्वा, नन्दति भगवद्भक्त्या हृष्यति नन्दयति जगत् सन्तोषयतीति वा नन्दं यद्गोष्ठ तस्य जिघांसयेति । गोष्ठ एव वर्षणीयम्, न तु मधुपुर्य्यामिति सूचितम्, अन्यथा महाबलिष्ठकंसतो भयापत्तिः । अतएव दुःसंकल्पेन यात्रायाममंगलमेव वृत्तमिति ज्ञेयम् ।। ७ ।। गोकुलं गवां कुलं व्रजं तत्रत्यान् सर्व्वानेवेत्यर्थः । ओजसा वेगेह निजबलेन वा ।। ८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं सति केवलं वाचालङ्कुत्सितं बहु च वदन्तं बालिशं मूर्खं स्तब्धमविनीतमज्ञं पण्डितमात्मानम्मन्यमानं मर्त्यं मन्त्रिग्रहात् मरिष्यमाणं च कृष्णमाश्रित्य ये गोपाः मम अप्रियं चक्रुः ।। ५ ।। श्रिया सम्पदा गर्वितानां कृष्णेनाध्मायिताः वर्द्धिता आत्मानो देहा येषां तेषां गोपानां श्रीमदप्रयुक्तमविनयं धुनुतापाकुरुत तथा पशून् सङ्क्षयं नाशं नयत ।। ६ ।। बिभ्यतस्तान् प्रत्याह–अहमप्यैरावतं गजमारुह्य महावेगैर्मरुद्भिः सह व्रजं प्रत्यनुव्रजे युष्मत्पृष्ठत एवागमिष्यामि किमर्थं नन्दादयो गोपास्तेषां जिघांसया हेत्वर्थे तृतीया सनर्थस्त्वश्वेन जिगमिषतीतिवदविवक्षितः हननार्थमित्यर्थः ।। ७ ।। इत्थमिन्द्रेणादिष्टाः मेघा मुक्तानि बन्धनानि शृङ्खलानि येषां तथाभूताः आगत्यासारैर्जलधारासम्पातैर्यावद्बलं नन्दव्रजं पीडयामासुः ।। ८ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वाचालम् अस्ति चेदीश्वरः कश्चिदित्यादि शास्त्रकुत्सित भाषणम् अत एव वर्तेत ब्रह्मणेत्यादिमानं प्रमाणमस्यास्तीति मानिनं "रजसा चोदिता मेघा" इत्यादिना मत्तत्वमज्ञत्वं च लभ्यते आजीव्येकतरम्भावमित्यादिना पण्डितमानित्वम् ।। ५ ।। अवलिप्तानां दृप्तानाम् आप्यायितात्मनां वर्धितमनसां धुनुत निराकुरुत ।। ६ ।। नागं गजम् ।। ७ ।। निर्मुक्तबन्धनाः विगलितनिगडाः त्यक्तजलस्तम्भा इत्यर्थः । आसारैर्धारासम्पातैः वेगवद्वर्षैरित्यर्थः । ओजसा स्वशक्तिलक्षणबलेन ।। ८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स्वतः श्रियावलिप्तानां विशेषतः श्रीकृष्णेन सतेजस्कीकृतचित्तानामित्यर्थः ।। ६–९ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवमुत्तरत्रापि, विशेषस्तु वाचा वचसा अलमितिप्रगल्भम्, अलं भूषणं प्रियंवदमिति वा । वालि वलितुं शीलमस्य तथाभूतं शं क्षेमं यस्मात् । स्तब्धं जडं माति चेतयति स्तब्धमा, ज्ञा अवरोधो यस्मात् । अतः पण्डितेभ्योऽपि सर्वज्ञेभ्योऽपि मानिनं सर्वज्ञेश्वरम् ।। ६–२३ ।।

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे पञ्चविंशोऽध्यायः ।। २५ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवं परत्रापि विशेषतस्तु तत्र वाचालं वाचा वचनत्वेन अलं भूषणं प्रियम्वदम्, वालिशं वलितुं शीलं यस्य तद् वालि तथाभूतं शं कल्याणं यस्मात्, स्तब्ध ज्ञं स्तब्धं जडं मातीति स्तब्धमं चित् तस्य ज्ञा अवबोधो यस्मात्। अथवा, स्तब्धानां जडानां मा लक्ष्मीर्यस्मात् लक्ष्मीस्तु चेतन-रूपा तत् स्तब्धमं ब्रह्म तत्वेन ज्ञा ज्ञानं यस्य, अत एव पण्डितानां सम्मानमस्यातीति तथा पण्डितान् कृष्णतत्त्वज्ञान् मानयितुं शीलं यस्येति वा ॥ ६–३३ ॥

इति पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वाचालं मीमांसासाङ्ख्यानभिमतविरुद्धबहुभाषिणं बालिशं मूर्खमनधीततत्तच्छास्त्रत्वादिति भावः। स्तब्धं पितुरप्रेप्यतिधाष्ट्र्यात् दुर्विनीतम् अज्ञं नित्यगोचारणात् किमप्यजानन्तम् अथ च पण्डितम्मन्यं मर्त्यं मनुष्यमाश्रित्य मे देवस्याप्रियं चक्रुः वस्त्वर्थश्च वाचया सरस्वत्या अलङ्कृतो बालिशो मूर्खोपि यस्मात्त वाचाशब्दष्टाबन्तोऽयं। स्तब्धं वन्द्यस्याभावादनम्रं नास्ति ज्ञो यस्मात्तं पण्डितकर्त्तृको मान आदरो वर्त्तते यस्य तम् ॥ ५ ॥ अवलिप्तानां मत्तानां यतः कृष्णेनाध्मायितः सतेजस्कीकृतः आत्मा मनो येषां वस्त्वर्थश्च श्रिया चन्दनचर्चयेव अवलिप्तानां लिप्ताङ्गानां श्रीमान् यः स्वल्पस्तम्भः जाड्याभावात्त धुनुत दूरीकुरुत तेन तथा वर्षेथ यथा तेषां शीतजनितस्तम्भः औष्ण्यनिवर्त्तको भवेदित्यर्थः। तथा पशून् धुनुत शीतेन कम्पयत ततश्च कृष्णेन गोवर्द्धने उद्धृते सति सङ्क्षयं सम्यङ्निवासं तत्तलं नयत अतिसुखदगोवर्द्धनतलनिवासं प्रति नयने यूयमेव कारणीभवतेत्यर्थः ॥ ६ ॥ बिभ्यतस्तान् प्रत्याह–अहं च अनुव्रजामि जिघांसया जिगमिषयेति वस्त्वर्थः ॥ ७ ॥ निमुक्ता बन्धना इति ये खल्वेकार्णवीकरणपटवः प्रलयकाल एव निमुच्यन्ते तेपि मेघाः कोपेन लुप्तविवेकत्वादपरिणामदर्शिनेन्द्रेण मोचिताः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णं मर्त्यमित्यनेन श्रीकृष्णस्य मर्त्यत्वमात्रमुक्तं तत्र मर्त्या अपि प्रायो गुणवन्त एव अयं तु निर्गुण इत्याह वाचालमिति। वाचालं बहुभाषिणम् बालिशं मुग्धम् स्तब्धं कर्तव्याकर्त्तव्यचिन्तारहितम् अज्ञमनधीतशास्त्रम् ॥ ५ ॥ श्रिया सम्पदा अवलिप्तानां मत्तानाम् कृष्णेन ध्मायिता वर्द्धिताः आत्मानः मनांसि येषां तेषाम् श्रीमदेन यः स्तम्भो गर्वस्तं धुनुत अपनयत ॥ ६ ॥ मरुद्गणैः देवगणैः सहाहमपि अनुव्रजे अनन्तरमेवागमिष्यामि सर्वांशैरिदं कार्य्यमवश्यमनुष्ठेयमिति भावः ॥ ७ ॥ प्रलयं करिष्यन्त्यतो दृढैर्बन्धनैर्बद्धा अनेन तेषामतिप्रचण्डता सूचिता तदानीं तु निमुक्तबन्धनाः सन्तः आसारैर्धारासम्पातैः नन्दगोकुलं पीडयामासुः नतु त्रिलोकीम् ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अनुवाचालं मानिनं स्तब्धमिति श्लोके तथा मर्त्यमित्यतीतग्रन्थे च नन्दनन्दननिन्दनमिन्द्रकृतं प्रतीयते। तच्च हरिद्विपस्ते यैः तमसि प्रपतन्तीत्यादेस्तमआद्यन्यतमानर्थदम्। तद्देवानां निरया नास्ति तमश्चापि कथञ्चनेति मानबाधितम् सामान्यता देवानां किमु तत्सम्मान्यस्य शचीशस्येत्यतस्तात्पर्यं मानाननत आह ॥ अत्यल्प इति। तुशब्दस्तत्तारतम्ययोग्यतातारतम्यादिति विशेषसूचकः। देवानां भविष्यति। देवानामिति बहुवचनेन सर्वसुपर्वणामिति प्राप्तौ किञ्चिद्विषयेऽपवादं वदति ॥ प्राणमिति। एकं मुख्यं प्राणं विना व्याख्यातो ब्रह्मणो मरुदितिव्याख्यातो वायुना विधिः। तत्स्वरूपं निरूपयति आसाविति। हि यतोऽसौ वायुराखणाश्मसमः स्मृतः स एषोऽश्माखणः। अखन्याश्मानमेवाप्य लोष्ठो विध्वंसते यथेति छन्दोगोपनिषद्भाष्योक्तेः। तर्हि बहिर्मुखानामसुरावेशो गच्छत्यागतो न वेत्यत आह ॥ असुरावेश इति तस्मिन्नसुरावेशे गते प्रकृतिरेव चरत्स्वभाव एवावतिष्ठते। अनर्थश्रुतिस्तु सर्वथा दुरात्माऽसुरपरेति तात्पर्यम्। तुशब्दस्त्वेवमादिमहात्मशिक्षया स्वभावाविर्भाव इति विशेषसूचकः। स्मृत इति भागवततन्त्रं स्वस्यापि मूलं लपत्तद्दार्ढ्यं सूचयतीति मन्तव्यम् ॥ अथ मूलार्थः ॥ वाचालमालजाटचौ बहुभाषिणीति वाचालो बहुगर्ह्य वागित्यमरः। अस्ति चेदीश्वर इत्यादिबहुभाषिणं मानिनमप्रमाणप्रमाणताज्ञानिनमित्यर्थो निन्दिततामत मन्मखविखण्डकत्वात्। अज्ञं रजसा चोदिता मेघा इति मत्स्वाम्यज्ञानहीनं पण्डित इति मानी तमाजीव्यैकतरं भावमिति तथात्वनटनम्। मर्त्यं कृष्णमुपाश्रित्य गोपा मेऽप्रियं चक्रुः ॥ ५ ॥ अवलिप्तानामहङ्कृतां कृष्णेनाप्यायित आत्मा मनो येषां ते तथा वर्धित आप्यायितः श्रीमदप्रयुक्तस्तम्भोऽविद्यमानसामर्थ्यप्रकटनं विधुनुत निराकुरुत। पशूंस्तदुपजीव्यान्सङ्क्षयं नाशं नयत ॥ ६ ॥ अहं नागं नाम्नैरावतमारुह्य व्रजं गोपालस्थलमनुव्रजे व्रजामि। नैकाकीत्याह। महावर्गैर्मरुद्गणैर्महावातैः फलमालपति ॥ नन्दगोष्ठजिघांसयेति। नन्दघोषहननेच्छया यथोक्त चतुर्थतात्पर्यं। गोष्ठं घोष इति प्रोक्तो व्रजस्तत्पालसंस्थितिरिति ॥ ७ ॥ मघवतेत्थमाज्ञप्ता निमुक्तानि बन्धनानि शृङ्खला येभ्यस्ते मेघा आसारैर्धारासम्पातैर्नन्दगोकुलमोजसा स्वसामर्थ्येन पीडयामासुः। उच्चैः श्रवसं स्यन्दनं वा विहायैरावणारोहणं तच्छुण्डादण्डसमासारान्मुञ्चतेति सूचयितुं नमुचिपविमुच इति भावो भावस्य इति ज्ञेयम्। धारा वितेरुरुरु नागकरप्रमाणा इति श्रीमदुक्तेः ॥ ८ ॥

श्रीसुबोधिनी

तस्य भगवति दोषवशाद् विपरीता बुद्धिर्जाता षड्गुणैश्वर्यसम्पन्ने षड्दोषवचनात् तत्र भगवत ऐश्वर्यमप्रतिहतं तदनुसारेणैवान्यत्रैश्वर्यं दूरीकर्तुं यथार्थान्येव वाक्यान्युक्तानीन्द्रस्य तु बुद्ध्यानीश्वरस्तथोक्तवानित्यत आह **वाचालमिति**, बहुभाषी **वाचालः**, अनीश्वर ईश्वरवद् वक्ता, वैराग्याभावो वानेनोक्तः, स्वार्थं बहूक्तवानिति **बालिशो** ज्ञानरहितः, यस्तु वीर्यरहितोशक्यं कर्तुं वाञ्छति स तथोच्यते, ज्ञानाभावः स्पष्ट एव, **स्तब्धोनम्रस्तादृशस्य** कीर्त्यभावः स्पष्टः, विनीतस्यैव तथा, आत्मानमेव पण्डितं मन्यत इति **पण्डितमानी**, न तस्य श्रीः, विपर्ययो वा, कीर्त्यभाव एवानेनोच्यत इति, **अज्ञो** ज्ञानरहितः स्पष्ट एव, **मर्त्यो** मनुष्यः, **न स विरक्त** ईश्वरो वा **कृष्ण** इति प्रसिद्धः, एवं विपरिता बुद्धिरिन्द्रस्य, अथ वा **कृष्ण** सदानन्दमपि विगरितषड्गुणं तत्त्वेनो**पाश्रित्य** भवत्यपि विपरीतां बुद्धिं सम्पाद्य सर्वे **गोपा अल्पबुद्धयो मेप्रियं** यागभङ्गं कृतवन्तः, यदि भगवन्तं वा परमेश्वरं जानीयुस्तदापि न खेदः, वस्तुतस्तु वाचा **अलं** पूर्णं यत्र यत्र वाङ् **न प्रवर्तते** स पूर्णः सर्ववेदकर्ता सर्वथा नाश्रितः किन्तूप **समीपेल्पमेवाश्रित** इति, किञ्च **बालिशालि** शं सुखं यस्मात्, स हि शत्रुपक्षपाती रावणमित्रं तस्यापि मोक्षदाता, **बालमस्यास्ती**ति पुच्छवान् **मर्कटः** प्रतिपादितः, उत्कर्षस्तु वेदानामप्यगम्यः, कृपालुता तु **बालिनमपि** मोचयति, **स्तब्धो ब्रह्ममूतो** 'वृक्ष इव **स्तब्धो** दिवि **तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्**मितिश्रुतेः, यदि भगवान् **नम्रः** स्यात् सत्यादिलोकानां नाश एव भवेदतो भगवान् स्वयमनम्रोन्यान् **नामितवान्**, पण्डितान् मानयतीति **पण्डितमानी** विद्यावतः पूजयत्यतः पूजनार्थं विद्यामुपदिष्टवान्, न विद्यते **ज्ञो** यस्मात् **सर्वज्ञोय**, यतोयं **कृष्णः** सदानन्दः, **यत्र हि धर्मो** तिष्ठति स धर्मसहित एव भवति, अतो गोपा **मर्त्यं** शरीरमुपा**श्रित्य** शरीरधारिणो भूत्वा **मेप्रियं न** विद्यते प्रियं यस्मान् न ह्यन्यस्ततः प्रियोस्ति तं भगवन्तं कृतवन्तः, यथा मम नित्यं प्रियजनको भवति तथोत्तरोत्तरं कृतवन्तस्तथा तथा धर्मान् सम्पादितवन्त इतिसरस्वती ॥ ५ ॥ अतो विपरितां बुद्धिमाश्रित्य भक्तद्रोहं कर्तुमाज्ञापयत्येषामिति, **एषां गोपानां श्रिया** धनेना**वलिप्तानां** गर्विष्ठानां **कृष्णे**नाध्मायित आत्मा येषां, यथा स्तब्धो वायुरन्तः प्रविष्टो देहिनमाध्मापयति तादृशस्योपवासेषु कृतेषु तदाध्मानं गच्छति, अतः **श्रीमदस्तम्भं धुनुत**, श्रीमदस्यापि मूलं पशवोतो भवन्तो गत्वा **पशून् सङ्क्षय नयता**तिवृष्ट्या पाषाणवर्षणेन च सम्यक् **क्षयं नयत** ॥ ६ ॥ गोपालास्तु कन्दरादिष्वपि स्थातुं शक्ता अतस्तेषां वधार्थं कृष्णेन सह युद्धसम्भवादैरावतमारुह्याहमागमिष्यामीत्याहाहं **चैरावतं नागमिति**, ऐरावतोक्षयो गजो जले स्थले च युद्धसमर्थोतस्तमारुह्यानुपश्चाद् भवद्गमनानन्तरं **व्रज आगमिष्यामि**, प्रसङ्गादागमनं निराकरोति **व्रजमिति**, ननु बहवो गोपाला एकस्त्वं बलभद्रश्च बल्यतः कथं युद्धमिति चेत् तत्राह **मरुद्गणैरिति**, **महावीर्यैरतिबलिष्ठैर्मरुद्गणैः** सह, तत्र गतस्य प्रयोजनमाह **नन्दगोष्ठजिघांसयेति**, **नन्दगोष्ठस्य** घातनेच्छया, इच्छया गतस्तदिच्छां पूरयति, अतो मारयिष्यामीत्यर्थः ॥ ७ ॥ ततो यज् जातं तदाहेत्थमिति, **मघवतेन्द्रेणाज्ञप्ता मेघाः** पूर्वं शृङ्खलाबद्धास्ते निर्मुबन्धनाः कृतास्ततो **नन्दगोकुलमासारैर्धारासम्पातैरोजसा** बलेन वायुसहिताः **पीडयामासुः** ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अह **चैरावतं नागमित्यत्र, अक्षयो गजो जले स्थले** चेत्यादि । अमृतमथनप्रस्ताव एवोत्पन्नत्वेनामृतधर्मा अप्यस्मिन्सन्तीत्यक्षयत्वम् । पूर्वं जल एव स्थितत्वादधुना च स्थले सत्त्वात्तथेत्यर्थः ॥ ७ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

वाचालमित्यत्र अथ वेतिपक्षे वाचालमित्यादिपदपञ्चकस्यार्थो वक्ष्यमाणरीत्यैव ज्ञेयः, एतादृशं महान्तमपि मर्त्यत्वेन अनीश्वरत्वादिप्रकारेणोपाश्रित्येत्यर्थः, अलं **पूर्ण**मिति अल्धातोः पचाद्यजन्तम् ॥ ५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दार्ष्टान्तिकमाह – वाचालमिति । एवं वाचालं बहुभाषिणं बालिशं शिशुं स्तब्धमनम्रमज्ञं तथापि वृथैव पण्डितमानिनं पण्डितंमन्यं मर्त्यं कृष्णमुपाश्रित्य गोपा मे देवस्याप्रियमपमानं सुखार्थं चक्रुः । परन्तु न तेन सुखं प्राप्स्यन्ति, किन्तु दुःखे एव निमग्ना भविष्यन्तीत्याशयः । एवं भगवन्निन्दायां योजितापीन्द्रस्य भारती तं स्तौति । तथाहि—वाचाल शास्त्रयोनित्वात्, बालिशं शिशुवन्निरभिमानित्वात्, स्तब्धमनम्रमन्यस्य वन्द्यस्याभावात्, अज्ञं नास्ति ज्ञो यस्मात्तं सर्वज्ञं, पण्डितमानिनं ब्रह्मविदां बहुमाननीयं, कृष्णं सदानन्दरूपं परं ब्रह्म, मर्त्यं तथापि भक्तवात्सल्येन मनुष्यतया प्रतीयमानमित्यर्थः ॥ ५ ॥ एवं गोपानामपराधं तेषु स्वरोषं च निरूप्य तेषां द्रोहं कर्तुमाज्ञापयति—श्रियेति । श्रिया सम्पदाऽवलिप्तानां गर्वितानां कृष्णेनाध्मायिताः **संवर्धिता आत्मानो मनांसि** येषां तेषामेषां गोपानां श्रीमदप्रयुक्तं स्तम्भं गर्वं धुनुत अपनयत 'कथम्' इत्यपेक्षायामाह—एषां सम्पदः पशुप्रयुक्तत्वात् पशूनेव सम्यक् क्षयं नयत ॥ ६ ॥ व्रजं गन्तुं बिभ्यत आलक्ष्याह—अहमिति । अहं च ऐरावतं नागं हस्तिनमारुह्य महावीर्यैः असह्यवेगैर्मरुद्भिः सह नन्दगोष्ठस्य जिघांसया हननार्थं व्रजमनुव्रजे युष्मत्पृष्ठत एवागमिष्यामीत्यन्वयः ॥ ७ ॥ इत्थं

मघवता इन्द्रेणाज्ञप्ताः प्रलयकर्तृत्वात्तन्मध्ये ते बद्धा भवन्ति, तदा तु निर्मुक्तं बन्धनं येषां तथाभूता मेघा नन्दगोकुलमासाद्य आसारैः जलधारासम्पातैः ओजसा बलेन पीडयामासुः ॥ ८ ॥

अन्वितार्थप्रकाशिका

एषामिति ॥ श्रिया सम्पदाऽवलिप्तानां गर्वितानां कृष्णेनाध्मायिताः संवर्धिता आत्मानो मनांसि येषां तेषां पुम्युक्तः साधुः पाठः। पुक्युक्तस्त्वार्षः। एषां गोपानां श्रीमदप्रयुक्तं स्तम्भं गर्वं धुनुत अपनयत। तद्धेतून् पशून् संक्षयं नयत। वस्तुतः श्रिया शोभया अवलिप्तानां व्याप्तानां श्रीमान् यः अस्तम्भः जाड्याभावः औष्ण्यं तं धुनुत। वृष्ट्या शीतजननेनौष्ण्यं निवर्त्तयत संक्षयं सम्यङ् निवासं नयतेति ॥ ६ ॥ अहमिति ॥ अहं च ऐरावतं नागं हस्तिनमारुह्य महावीर्यैः असह्यवेगैर्मरुद्भिः देवैः वातैर्वा सह नन्दगोष्ठस्य जिघांसया हननार्थं व्रजमनुव्रजे युष्मत् पृष्ठत एवागमिष्यामि। तङार्षः ॥ ७ ॥ इत्थमिति ॥ इत्थं मघवता इन्द्रेणाज्ञप्ताः प्रलयकर्तृत्वात्ततः प्राक् ते बद्धा भवति तदा तु निर्मुक्तं बन्धनं येषां तथाभूता मेघा नन्दगोकुलमासाद्य आसारैः जलधारासम्पातैः ओजसा बलेन पीडयामनासुः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तथा कृष्णं मर्त्यं मनुष्यमाश्रित्य गोपाः मे ईश्वरस्य अप्रियं हेलनं चक्रुः कथंभूतं तं वाचालं भूरिभाषिणं बालिशं बालकं ॥ अत एवाऽज्ञं पंडितमानिनं पंडितोहमिति मन्यमानं ॥ अत स्तब्धमनम्रं ॥ ५ ॥ श्रिया लक्ष्म्या ॥ अवलिप्ताना गर्विष्ठानां कृष्णेन हेतुकर्त्रा आध्यायितात्मनांवृहितशरीराणां ॥ आध्मायितात्मनामित्यपि पाठस्तत्रापि स एवार्थः ॥ एषां गोपानां श्रीमदेन प्राप्तांस्तंभं गर्वं ॥ यूयं धुनुत कं यत् ॥ ६ ॥ मरुद्गणैः देवसमूहैः सह ॥ अनु अनतरं व्रजं प्रतिव्रजे अहमपि आगमिष्यामि ॥ ७ ॥ मघवत इंद्रेण आज्ञप्ताः प्रेरिताः प्रलयकालात्पूर्वं बद्धाः तथापि अधुना निर्मुक्तबधनाः त्यक्तबंधनाः आसारैर्जलधारासंपातैः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वाचालमिति ॥ एवं सत्यपि केवलं, वाचालं कुत्सितं बहु वदन्तं, बालिशं मूर्खं, स्तब्धमविनीतं, अज्ञं पण्डितमानिनमात्मानमेव पण्डितं मन्यमानं, मर्त्यं मन्निग्रहात् मरिष्यमाणं च, कृष्णं उपाश्रित्य, गोपाः, मे मम, अप्रियमप्रीतिकर कर्म, चक्रुः ॥ ५ ॥ एषामिति ॥ श्रिया संपदा, अवलिप्तानां गर्वितानां, कृष्णेन आध्मायितात्मनां भ्रामितबुद्धीनां, आप्यायितात्मनामिति पाठे, कृष्णेन आप्यायिता वर्द्धिता आत्मानो देहा येषां तेषां, एषां गोपानां, श्रीमदस्तम्भं श्रीमदप्रयुक्तमविनयमित्यर्थः। धुनुत अपाकुरुत। पशूनेतदीयधेन्वादीन्, संक्षयं नाशं, नयत प्रापयत ॥ ६ ॥ बिभ्यतो मेघान् प्रत्याह ॥ अहमिति ॥ अहं च स्वयमहमपि ऐरावतं नागं गजं आरुह्य, महावीर्यैर्महावेगैः, मरुद्गणैर्मरुद्व्रजैः सह, नन्दगोष्ठजिघांसया, हेत्वर्थे तृतीया। सनर्थस्त्वश्रवेन जिगमिषतीति वदविवक्षितः। हननार्थमित्यर्थः। व्रजं, अनुव्रजे युष्मत्पृष्ठत एवानुगमिष्यामि ॥ ७ ॥ इत्थमिति ॥ इत्थं, मघवतेन्द्रेण, आज्ञप्ता आदिष्टाः, मेघाः पर्जन्याः, निर्मुक्त बन्धनं येषां तथाभूताः सन्तः, प्रलयकाल एवैषां निर्बन्धनार्हत्वात् क्रुधा सांप्रत तन्निर्बन्धनत्वोक्तिः। आसारैः जलधारासंपातैः, नन्दगोकुल नन्दव्रजं, ओजसा बलेन, पीडयामासुः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वाचालमिति : १०.२५.५.

यज्ञध्वंसकृतागसां निधिरसौ कंसो नृशंसोऽप्यहो नोक्तो जातुचिदप्यनेन सरुषा जातः प्रमत्तस्त्विति।
तादृग्दुष्टजनार्दनं मखभुगानन्दप्रदं श्रीधरमश्लीलं वदता न किं भुवि कृतघ्नत्वाय दत्तः करः ॥ १२ ॥
वसुदेवजातमहिमावहेलनं मम कृत्यतोऽत्र भवितेत्यचिन्तयन्। यदवोचदाढ्यमदत स्वहेलनं कृतमेभिरत्र मदभाक् सुराधिपः ॥१३॥

यस्यैकघस्रगघटीविभवः शचीशात् मर्त्यमित्यजगुरुं निरपायरूपम्।
उद्दिश्य कृष्णमवदद् यदितः किमास्ते श्रीमन्मदस्फुटनिदर्शनमन्यदस्मिन् ॥ १४ ॥
तथा प्रसारं कुरुताम्बुवाहा यथा हि गोष्ठं तमसाकुलं स्यात्।
इति ब्रुवन्नैक्षत चित्रमेष स्वगोकुलं भूरितमः प्रविष्टम् ॥ १५ ॥
जडभृत्सहचारतः प्रतिष्ठां वहते यो जडजातसक्तचेताः स्फुटमेव तदस्य धीवरत्वं भुवनेष्वित्यभियुक्तमिन्द्रकृत्यम् ॥ १६ ॥

अहं चैरावतमिति : १०.२५.७.

यत्किंचिदुन्मादकतोऽपि भृत्याः प्रभोः पुरो गन्तुमपत्रपन्ते।
इन्द्रो धनोन्मादकरोऽपि धृष्टो नागस्थताऽहङ्कृतिरास चित्रम् ॥ १७ ॥
यच्छ्रीशो मदनुग्रहाय यतते साक्षात् क्रतुव्याजतः तत्संवर्तककारिणीमतिजडां मेघस्थिति तत्पदे।
प्रादर्श्यैव निजां मया विदधता नागस्थितिं तत्पुरोगन्तव्यं भविता ततो मयि महाप्रेष्ठप्रसादोदयः ॥ १८ ॥

इत्यालोच्य सहस्रदृक् सुरपतिर्मन्ये स सांवर्तकान् मेघान् विष्णुपदे विधाय पुरतो नागस्थितः संययौ ।
नो चेदेवमिहैककखेटककृते तत्प्रेषणं वा स्वतोयानं नागमधिश्रितस्य सुरपस्याज्ञानिता वा कथम् ॥ १९ ॥
तस्माद्विरोधीशभक्तिप्रकारं दर्शयन् बहिः । अन्तरे तु स्वमात्मानं तन्मिषादनघं व्यधात् ॥ २० ॥ (विशेषकम्)—
योऽन्यं मत्त इति ब्रवीति सहसा तेनाप्रमत्तो निजाचारः साधुपदे प्रदर्श्य इति सन्न्यायानुगो वृत्रहा ।
मन्ये गोपगणं प्रमत्त इति संजल्पन्ननल्पक्रियश्चक्रे व्यक्तमिहाप्रमत्तघनसंचारं तदा सत्पदे ॥ २१ ॥

कृष्णप्रिया

उन गोपोंका व्यवहार उन मन्द मतियों के समान ही है, देखो ! उन लोगोंने १.–वाचालम्–केवल बढाके बातें करने वाले, २. वालिशम्-नादान, ३. स्तब्धम्-अविनीत, ४. अज्ञम्-अनुध, ५. पण्डितमानिनम् अपने को बड़ा विद्वान् मानने वाले ६. मर्त्यम्–मामुली मनुष्य कृष्ण का सहारा लेकर मेरा सर्वथा अप्रिय किया है, उन गोपोंने मेरा अनादर किया है, भगवान के ऐसा व्यवहार उचित नहीं। इस लिये भगवती अन्तः सरस्वती भिन्नार्थ बता रही हैं। १. वाचा अलम् जहाँ वाणी-सरस्वती की भी गति नहीं ऐसे "पूर्ण" २. वालि-शम् वाली को भी निजपद गति का दान देने वाले ३. स्तब्धम्–ब्रह्मस्वरूप कूटस्थ-निर्विकार ४. पण्डितान् मानयतीति पण्डितमानिनम् विद्वज्जन ऋषिमुनियोंका सन्मान करने वाले, ५. अज्ञम् इनके समान कोई ज्ञानी नहीं ऐसे सर्वज्ञ, ६. मर्त्यम् भक्तों के लिये मनुष्य देह धारण करने वाले कृपालु ऐसे पर ब्रह्म श्रीकृष्ण चन्द्रको मेरे प्रिय बनाये ॥ ५ ॥ वैसे तो ये गोपगण श्रीमद से छके हुए थे; फिर कृष्णने इन्हें और बढावा दे दिया है, इनकी सान ठिकाने लाने के लिये, हे प्रलय कालीन मेघ ! आप त्वरित गति से व्रज में जाकर इन ग्वालों के श्रीमद् को नष्ट करदो और इनके सारे पशुओंका विनाश कर दो ॥ ६ ॥ हे मेघगण ! मैं भी शीघ्र तुम्हारे पीछे नन्दराय के व्रज का विनाश करने के लिये पराक्रमशाली उनचास मरुद्गणों को साथ लेकर ऐरावत हाथी पर आरूढ होकर वहीं आ रहा हूँ ॥७॥ श्रीशुकाचार्य जी ने कहा–राजन् ! इस प्रकार राजा इन्द्र की आज्ञा को सुनकर बन्धनमुक्त मेघ अत्यंत त्वरित गति से व्रज में जाकर घोर वर्षा करने लगे। उस धारा संपात वृष्टि से "नन्दबाबा" का सारा गोकुल आकुल व्याकुल एवं दुःखित हुआ ॥ ८ ॥

विद्योतमाना विद्युद्भिः [1]नदन्तः स्तनयित्नुभिः । तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ॥ ९ ॥
[2]स्थूणास्थूला वर्षधारा [3]मुञ्चन्त्यभ्रेष्वभीक्ष्णशः । जलौघैः प्लाव्यमाना भूर्नादृश्यत [4]नतोन्नतम् ॥ १० ॥
अत्यासारातिवातेन पशवो जातवेपनाः । गोपा गोप्यश्च शीतार्ता गोविन्दं शरणं ययुः ॥ ११ ॥
शिरः सुतांश्च कायेन प्रच्छाद्यासारपीडिताः । वेपमाना भगवतः पादमूलमुपाययुः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—विद्युद्भिः विद्योतमानाः स्तनयित्नुभिः नदन्तः तीव्रैः मरुद्गणैः नुन्नाः जलशर्कराः ववृषुः ॥ ९ ॥ अभीक्ष्णशः स्थूणास्थूलाः वर्षधाराः मुञ्चत्सु अभ्रेषु भूः जलौघैः प्लाव्यमाना नतोन्नतम् न अदृश्यत ॥ १० ॥ अत्यासारातिवातेन जातवेपथाः शीतार्ताः पशवः गोपाः च गोप्यः गोविन्दम् शरणम् ययुः ॥ ११ ॥ आसारपीडिताः वेपमानाः शिरः च सुतान् कायेन प्रच्छाद्य पादमूलम् उपाययुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्तनयित्नुभिरशनिध्वनिभिः । स्तनंतो गर्जंतः । मरुद्गणैरावहादिवायुसमूहैर्नुन्नाः प्रेरिताः । जलशर्करा जलोपलान् ॥ ९ ॥ स्थूणावत्स्थूलाः अभ्रेषु मुंचत्सु सत्सु । नतोन्नतं नतं नूनमुन्नतं तद्विपरीतं यथा भवति तथा भूर्नादृश्यत ॥ १० ॥ जातवेपना जातकंपाः ॥ ११ ॥ तत्र पशूनां यानं विशिनष्टि । शिर इति ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"स्तनयित्नुर्मेघशब्दे मेघे व्रजे तडद्ध्वनौ" इति धरणिः । अशनिभिः वज्रैः 'दंभोलिरशनिर्द्वयोः' इत्यमरः । "प्रवहो निवहश्चैव विवह उद्वहस्तथा । संवहावहपरावहा इत्येते मरुतां गणाः ॥" इति । जलोपलाः वायुना घनीभूतजलमयपाषाणाः, करका इत्यर्थः ॥ ९ ॥ 'स्थूणा स्तंभे गृहस्य च' इति मेदिनी । प्लाव्यमाना छाद्यमाना ॥ १० ॥ शरणम् रक्षकम् ॥ ११ ॥ तत्र तेषु गोगोपगोपीषु मध्ये । पशूनाम् गवाम् । यानम् धावित्वा भगवत्समीपे गमनम् । कायेन स्वदेहेन । शिरः तिरोविधायाग्रपादयोः कृत्वा, सुतान्वत्सांश्च निजाधोठरभागे कृत्वेत्यर्थः । पादमूलम् चरणसमीपम्, तत्पार्श्वमिति यावत् ॥ १२ ॥

---

[1] स्तनन्तः–श्रीधर. वंशी. जीव. विश्व.; नदन्तः–वीर. विज. । [2] स्थाणु–विज. । [3] स्व–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. रा. ध. सु. । [4] न्नता–वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पीडनप्रकारमाह-विद्योतमाना इति द्वाभ्याम्। विशेषेण द्योतमाना इत्यादिना विद्युदादीनामिति बाहुल्यं भीषणत्वं च सूचितं स्तनयित्नुभिर्गर्जद्भिरंशविशेषैः तीव्रैरित्यस्य पूर्वेणाप्यन्वयः। जलानि शर्कराश्च तदीयाः करकाः ॥ ९ ॥ स्थूणा गृहस्तम्भाः तद्वत् स्थूलाः प्लाव्यमाना सती भूर्नाऽदृश्यत अतो नतोन्नतं च स्थूलन्नादृश्यतेत्यर्थः ॥ १० ॥ जातवेपना इति शीतार्त्ता इति च पश्वादीनां सर्वेषामपि विशेषणम् अत्र पशूनां बहिस्थत्वेनादौ निर्देशः बहिस्थप्रायत्वेन तत्पश्चाद्गोपानाम् अन्तःस्थप्रायत्वेन गोपीनामिति विवेचनीयम् इत्यादिकं च सर्वं श्रीभगवतो व्रजजनप्रेमवर्द्धनगोवर्द्धनोद्धरणक्रीडेच्छयैव शक्रादीनां श्रीमदस्य परमानर्थहेतुताप्रदर्शनेच्छया च अन्यथा भगवत्प्रियाणा तेषां तत्तद्सम्भवात् ॥ ११ ॥ प्रच्छाद्य प्रयासेन छादयित्वा। ननु, कथ ते तादृशज्ञाना जातास्तत्राह-भगवतः अलौकिकगुणत्वात् तेषामपि तादृशप्रभावदयादिगुणवत्तया स्फुरत इत्यर्थः। अतः पादभूलमुपाययुः अत्यन्तनिकटं प्राप्ताः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पीड़नप्रकारमाह-विद्योतमाना इति द्वाभ्याम्। विशेषेण द्योतमाना इत्यादिना विद्युदादीनामानन्त्यमुक्तम्। तीव्रैरित्यस्य पूर्वेणाप्यन्वयः। जलानि शर्कराश्च करकाः ॥ ९ ॥ स्थूणा गृहस्तम्भो लोहप्रतिमा स्तम्भो वा तद्वत् स्थूलाः, प्लाव्यमाना भूरभूत्; यद्वा, प्लाव्यमाना सती भूर्नादृश्यत, अतो नतोन्नतञ्च स्थूलं नादृश्यतेत्यर्थः ॥ १० ॥ जातवेपना इति, शीतार्त्ता इति च, पश्वादीनां सर्व्वेषामपि विशेषणम्। तत्र पशूनां शीताधिक्येनादौ निर्द शः, अतएव तेषां प्राक्शरणयानप्रकारं विशेषतो वक्ष्यति। इत्यादिकञ्च सर्व्वं श्रीभगवतो गोवर्द्धनोद्धरणक्रीड़ेच्छयैव; यद्वा, श्रीमदस्य परमानर्थहेतुताप्रदर्शनार्थम्, अन्यथा भगवत्प्रियाणां तेषां तत्तदसम्भवात्। गवामिन्द्रं स्वामिप्रवरम्; यद्वा, गाः स्वामित्वेन पाल्यत्वेन च विन्दतीति तथा तम्, अतस्तं शरणं ययुः ॥ ११ ॥ प्रच्छाद्य प्रयासेन प्रच्छदपटरूपेण वा आच्छाद्य; प्रसाद्येति पाठेऽपि स एवार्थः। भगवतः स्वपालनादिना निजाशेषैश्वर्य्यं दीनवात्सल्यादिनिजगुणान् वा प्रकटयतः; अतः पादमूलमुपाययुः, अत्यन्तनिकटं प्राप्ताः, स्नेहभरेण तद्रक्षणेच्छयैवेति तत्त्वार्थः। एवञ्च भगवतः परमस्नेहविषयस्येत्यर्थः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वेपमानाः कम्पमानाः ॥ १२-१४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पीडामेव प्रपञ्चयति द्वाभ्याम्। तडिद्भिर्विद्योतमानाः स्तनयित्नुभिरशनिभिर्गर्जन्तः यद्यपि स्तनयित्नुशब्दो गर्जन्मेघपरः तथाप्यौचित्यादेवं व्याख्यातं चण्डवातसङ्घातैः प्रेरिताः सन्तो जलशर्कराः वर्षोपलान् ववृषुः ॥ ९ ॥ अभीक्ष्णशोऽविच्छेदेन स्तम्भवत् स्थूला वर्षधारा मेघेषु मुञ्चत्सु सत्सु जलप्रवाहैः प्लाव्यमाना सती पृथिवी निम्नोन्नता नादृश्यत नतोन्नतमिति पाठे तद्यथा तथा अदृश्यत ॥ १० ॥ अत्यासारैः अत्यन्तवातेन च अत्यासारानिपातेनेति पाठे अत्यासारस्यात्यन्तपातेन निष्ठुरपातेन जातकम्पनाः पशवो गोपाः गोप्यश्च शीतेनार्ताः पीडिता भगवन्तं शरणं प्रापुः परीता इति पाठे परितो व्याप्ता इत्यर्थः ॥ ११ ॥ शरणयाचनप्रकारमेवाह द्वाभ्याम्-शिर इति। जातावेकवचनं शिरांसि स्वसुतांश्च देहेनाच्छाद्यासारैः कम्पमानाः भगवतः पादमूलं श्रीभगवतः पादमूलमुपाययुः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्तनयित्नुभिर्गर्जितैः "स्तनयित्नुर्हि गर्जितः" इति यादवः। जलान्येव शर्कराः श्वेतपाषाणशिलाः ॥ ९ ॥ स्थाणुवत्स्थूलाः नतोन्नत निम्नोच्चस्थलम् ॥ १०-११ ॥ स्वकायेन शिरश्च सुतांश्च प्रच्छाद्य ॥ १२-१३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्लाव्यमाना भूरभूत् अत एव नतोन्नतं स्थलं नादृश्यत ॥ १०-११ ॥ शिर इति अतो व्रजस्थपशूनामपि तादृशज्ञानं सूचितम् ॥ १२-१५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्तनयित्नुभिरशनिभिः स्तनन्तः गर्जन्तः मरुद्गणैस्सह आवहप्रवहाद्यैः नुन्नाश्चालिता जलशर्करा जलोपलान् ववृषुः ॥ ९ ॥ "स्थूणास्तम्भेपि वेश्मनः" इत्यमरः स्थूणावत्स्थूला अभ्रेषु वर्षत्सु प्लाव्यमाना भूरभूत् ततश्च नतोन्नतं स्थलं नादृश्यत ॥ १०-११ ॥ शिरांसि च सुता वत्साश्च तान् कायेनैवाच्छाद्य ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ते मेघाः विद्युद्भिर्विद्योतमाः केवलं सूर्यादीनामत्यन्तत आवृतत्वात् स्तनयित्नुभिरशनिभिस्तनन्तो गर्जन्तः मरुतामावहप्रवहादितवायूनां गणैः समूहैः नुन्नाः प्रेरिताः जलशर्कराः जलोपलान् ववृषुः ॥ ९ ॥ तदा अभीक्ष्णशो नैरन्तर्य्येण स्थूणा इव स्थूलाः

वर्षधाराः अभ्रेषु मुञ्चत्सु जलौघैः प्लाव्यमानाः नतोन्नतं यथा भवति तथा भूर्नादृश्यत ॥ १० ॥ अत्यासारेण अत्यन्तधारासम्पातेन अतिवातेन च जातवेपनाः प्राप्तकम्पाः पशवोऽपि शरण ययुरित्यनेन यो गोविन्दं शरण न याति स पशुभ्योऽपि हीन इति ज्ञाप्यते ।११। शिरः सुतांश्च कायेन पशवः गोपाः गोप्यश्च यथेष्ट प्राच्छाद्य ॥ १२–१३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विद्युद्भिश्चपलाभिर्विद्योतमानाः प्रकाशमानाः स्तनयित्नुभिः । स्तनयित्नुः पयोवाहे तद्ध्वनौ मृत्युरोगयोरिति विश्वः । अत्र ध्वनिमात्रपरः स्तनयित्नुशब्दः । जलशर्कराः कर्कान्ववृषुः ॥ ९ ॥ स्थाणुवत्स्थूला वर्षधारा अभ्रेषु मुञ्चत्सु सत्सु । विरामो नेत्याह । अभीक्ष्णश इति । भूर्जलौघस्तत्प्रवाहैः प्लाव्यमाना नतोन्नतमनुन्नतमुन्नतं च यथा भवति तथा नादृश्यत ॥ १० ॥ अत्यासारसहितो योऽतिवातस्तेन जातं वेपनं कम्पनं येषां ते गोपा गोप्यश्च शीतेनार्ता गोविन्दं शरणं ययुः ॥ ११ ॥ शिरः स्वकीयं सुतानुदरे निवेश्याच्छाद्य कायेन शरीरेणासारपीडिता वेपमाना भगवतः पादमूलं स्थातुं भूर्नास्तीति तत्प्रसवितृमूलोपसरणं युक्तिमत्कृतमिति मन्तव्यम् ॥ १२ ॥

श्रीसुबोधिनी

पीडायां प्रकारमाह **विद्योतमाना** इति, **विद्युद्भिर्विद्योतमानाः** सात्त्विकोत्कर्षः **स्तनयित्नुभिश्च नदन्तो** गर्जनं कुर्वन्तस्**तीव्रैर्वायुगणैर्नुन्ना जलशर्करा** ववृषुरिति तामससम्पत्तिः, विद्योतनेनाक्षिप्रतिघातः, स्तनयित्नुभिः श्रोत्रप्रतिघातः, जलेन प्राणप्रतिघातः, शर्कराभिः शरीरस्य, स्वाधीनाश्च तेषां विद्युतः सन्ति ता नात्र विवक्ष्यन्ते, किन्तु या वज्ररूपा विद्युतः ताभिर्विद्योतनं, स्वतोऽपि शब्दकरण मेघानां परं **स्तनित्नुभिस्**तथा स्तनयित्नवो वाद्यरूपा अतिनिष्ठुरा जलमयाः **शर्कराः** करकास्तत्रापि वायुवेगेन पतन्तः पीडयन्ति ॥ ९ ॥ ततो वृष्टिं कृतवन्त इत्याह स्थूणेति, स्थूणास्तम्भवत् स्थूला वर्षधाराः प्रतिमुञ्चन्ति **श्वभ्राणि** यैः, एकां धारां प्रत्येको गर्तो मेघेन क्रियते, एवं सर्वेष्वेव मेघेषु सत्सु, अभीक्ष्णशो जलौघैः प्लाव्यमाना भूः, नतोन्नतं नतमुन्नतं वा यथा भवति, **नतोन्नता** वा, वस्तुतः सर्वत्रैव गर्ता जातास्तथापि निम्ना वोन्नता वा पादस्थापनार्थं विचार्यमाणापि **जलौघैः प्लाव्यमाना भूर्नादृश्यत** ॥ १० ॥ ततो यज्जातं तदाहात्यासारेति, अत्यन्तं धारासम्पातेनातिवातेन च **पशवो जातवेपना** जातकम्पा जाताः, अतो **गोपा गोप्यश्च** त्रिविधा अपि **शीतपीडिता गोविन्द** गवां गोपगोपीनां चेन्द्रं लौकिकेन्द्रेण पीड्यमानाः **शरणं ययुः** ॥ ११ ॥ एषां शरणगतावागमनप्रकारमाह शिर इति, स्वशिरः **सुतांश्च** स्वस्यैककायेन **प्रच्छाद्यासारेण पीडिताः** सन्तो **वेपमाना भगवतः पादमूलमुप** समीप एवाययुरागताः शिरोऽत्यन्तमुदरे समागतं सुतांश्च, शरीरेणोभयोः **प्रच्छादनं** भगवद्दर्शनार्थं दयार्थं च, **आसारेण पीडिता भक्तिमार्गं** त्यक्तवन्तोऽन्यथा भगवद्रक्षार्थमेव यत्नं कुर्युर्न तु स्वरक्षार्थं भगवन्तं प्रार्थयेयुः, किञ्च **वेपमाना** जाता अतो देहस्थितिं सन्दिग्धां मत्वा **पादमूलमाययुस्**तेषु कृपया भगवान् निकट एवागतस्तत उपेत्युक्तमासर्वतः पादयो**र्मूल**मन्तर्जातभक्त्या शरीरेण समीपमागता अपि मनसा **पादमूले** प्रविष्टाः ॥ १२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

स्थूणेत्यत्र **मुञ्चन्ती**ति स्वात्मानमितिशेषः, मेघैर्भूमिशैथिल्ये प्रतिधार गर्तो जायत इत्यर्थः ॥ १० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्प्रकारं प्रपञ्चयति–विद्योतमाना इति विद्युद्भिर्विद्योतमानाः, स्तनयित्नुभिः अशनिभिः स्तनन्तः गर्जन्तः, तीव्रैर्महावेगैर्मरुद्गणैः नुन्नाः प्रेरिताः सन्तो मेघा जलशर्करा जलोपलान् ववृषुः ॥ ९ ॥ अभीक्ष्णशः पुनः पुनः स्थूणावत् स्तम्भवत् स्थूला वर्षधाराः अभ्रेषु मेघेषु मुञ्चत्सु सत्सु जलस्य ओघैः प्रवाहैः प्लाव्यमाना सती भूः नतोन्नत नतं निम्नमुन्नत तद्विपरीत च यथा भवति तथा नादृश्यत ॥ १० ॥ पशवो गोपा गोप्यश्च अत्यन्तासारेण अतिवातेन शीतेन चार्ताः पीडिताः, अत एव जातवेपनाः जातकम्पाः सन्तो गोविन्दं शरणं ययुः ॥ ११ ॥ शरणगमनप्रकारमाह–शिर इति । जातावेकवचनम् । शिरांसि सुतांश्च कायेनाच्छाद्य भगवतः पादमूलमुपाययुः । तत्र हेतुः–वेपमाना इति । तत्र हेतुः–आसारपीडिता इति ॥ १२ ॥

अन्वितार्थप्रकाशिका

विद्योतमाना इति ॥ विद्युद्भिर्विद्योतमानाः स्तनयित्नुभिः अशनिभिः स्तनन्तः गर्जन्तः तीव्रैर्महावेगैर्मरुद्गणैः आवहप्रवहादिवायुसमूहैः नुन्नाः प्रेरिताः सन्तो मेघा जलशर्करा जलोपलान् ववृषुः ॥ ९ ॥ स्थूणेति ॥ अभीक्ष्णशः पुनः पुनः स्थूणाः स्तम्भा इव स्थूला वर्षधाराः अभ्रेषु मुञ्चत्सु सत्सु जलस्य ओघैः प्रवाहैः प्लाव्यमाना सती भूः नतोन्नतं नतं निम्नमुन्नत तद्विपरीतञ्च यथा भवति तथा नादृश्यत ॥ १० ॥ अत्यासारेति ॥ पशवो गोपा गोप्यश्च अत्यन्तासारेणातिवातेन शीतेन चार्त्ताः पीडिता अत एव जातवेपनाः जातकम्पाः सन्तो गोविन्द शरण ययुः ॥ ११ ॥ शिर इति ॥ आसारैः पीडिताः अतो वेपमानाः ते शिर शिरांसि जात्यामेकत्वं सुतांश्च कायेन प्रच्छाद्य "नारायणसमो गुणैः । अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ" इति गर्गोक्तिमनुस्मृत्य भगवतः पादमूलमुपाययुः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विद्योतमानाः प्रकाशमानाः स्तनयित्नुभिः वज्रपातैः स्तनंतो गर्जंतः मेघाः मरुद्गणैर्वायुवृंदैर्नुन्ना प्रेरिताः जलशर्कराः जलानि शर्कराः करकाश्च जलपाषाणशकलानि वा ववृषुः ॥ ९ ॥ स्थूलर्णेति स्थूणाः स्तभास्तद्वत् स्थूलाः पीनाः वृष्टिधाराः अभीक्ष्णशः प्रतिक्षणं अभ्रेषु मुंचत्सु सत्सु जलानां ओघैः समूहैः प्लाव्यमाना आच्छाद्यमाना नतोन्नतं नतं निम्नमुन्नतं तद्विरुधं यथातथाभूः नादृश्यत ॥ १० ॥ जातवेपना जातकंपा ॥ ११ ॥ शिरांसि सुतांश्च कायेन देहेन आच्छाद्य पादमूल चरणसमिपम् ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पीडामेव प्रपञ्चयति द्वाभ्याम् ॥ विद्योतमाना इति ॥ विद्युद्भिस्तडिद्भिः, विद्योतमानाः संशोभमानाः, स्तनयित्नुभिरशनिभिः, स्तनन्तो गर्जन्तो मेघाः, यद्यपि स्तनयित्नुशब्दो गर्जन्मेघपरस्तथाप्यौचित्यादेवं व्याख्यातम् । तीव्रैः मरुद्गणैः, चण्डवातसंघातैरित्यर्थः । नुन्नाः प्रेरिताः सन्तः, जलशर्कराः जलोपलान्, ववृषुः ॥ ९ ॥ स्थूणेति ॥ अभीक्ष्णशोऽविच्छेदेन, स्थूणास्थूलाः स्तम्भवत् स्थूलाः, वर्षधाराः अभ्रेषु मेघेषु, मुञ्चत्सु सत्सु, जलौघैः जलप्रवाहैः, प्लाव्यमाना व्याप्यमाना सती, भूः पृथ्वी, नतोन्नता न अदृश्यत । नतोन्नतमिति पाठे नतं निम्नमुन्नतं तद्विपरीतं यथा भवति तथा नादृश्यत ॥ १० ॥ अतीति ॥ अत्यासारसहितो योऽतिवातश्च तेन, अतिपातेनेति पाठान्तरे अत्यन्तसाराणामतिशायितधाराणां अतिपातस्तेन जातवेपना जातकम्पाः, पशवो गवादयः गोप्यः, गोपाश्च, शीतार्त्ताः शीतपीडिताः सन्तः, गोविन्दं श्रीकृष्णं, शरणं ययुः ॥ ११ ॥ शरणयानप्रकारमाह द्वाभ्याम् ॥ शिर इति ॥ शिर इति जातवेकवचनम् । शिरांसीत्यर्थः । सुतांश्च, कायेन देहेन, प्रच्छाद्य आच्छाद्य, आसारपीडिताः धारासंपातार्दिताः, वेपमानाः कम्पमानाः सन्तः, भगवतः श्रीकृष्णस्य, पादमूलं, उपाययुः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विद्योतमाना इति : १०.२५.९.

प्रादर्शि लोकोत्तर एव सद्यः स्मयो मघोना घनगर्जितेन ।
श्रीकृष्णपादाम्बुजचेतसां तु चित्रं स एवाजनि विस्मयोऽलम् ॥ २२ ॥
वयमप्रमदाः सदुन्नता अप्यसि रे संप्रमदस्त्वमल्पकोऽपि ।
तदिहाप्रमदं भगन्तमद्य भुवि कुर्मस्त्विति गर्जनादवोचन् ॥ २३ ॥

कृष्णोऽस्मत्प्रभयैव सुप्रभपदं प्राप्तोऽयमस्मत्प्रभोः कृत्वा यज्ञविघातमर्जयति चेदागस्तदा हन्यताम् ।
इत्युच्चैः कृतगर्जना जलभृतश्चञ्चत्तडिद्दन्तिनो धारायष्टिभिरेकलोष्ठनयतः किं ते प्रसारं व्यधुः ॥ २४ ॥
पूर्वाशोल्लसदन्तरोऽपि मघवा प्रोत्सृज्य तद्यज्ञगां पूर्वाशां व्रजशासनैकविशदामाशां त्वपूर्वां श्रितः ।
तद्युक्तं भुवने सुराधिकरुचिः स्फीतस्मयावेशिनी युक्तोन्मत्तदशापि तद्गततया साध्वप्रवृत्तिर्हि नः ॥ २५ ॥
मा धत्स्व रोषमच्युत दृष्ट्वैवारमान्घनाघनारवतः । यद्वयमिह परतंत्रा इत्यूचुस्ते घनाघनारवतः ॥ २६ ॥ (युग्मम्)

इन्द्रोपेन्द्रौ द्वावपि स्वामिनौ नस्तन्नो युक्तस्त्वेक-पक्षावलम्बः ।
आश्रित्यौदासीन्यमब्दाः स्थितास्ते वातैस्तीव्रैः प्रेरिता इत्यवर्षन् ॥ २७ ॥

अत्युल्बणां वृष्टिमकार्षु रब्दाः दृष्ट्वापि कृष्णं निजरूपशोभम् । चित्रं न यत्स्वाम्यनुरागभाजां विशृंखलानां स्थितिरीदृगेव ॥२८॥
कंसेन प्रहितोऽपि हिंस्रमतिना घोषं श्वफल्कात्मजः स्वं श्रेयः परमीशदर्शनभवं निर्व्याजमेवार्जयत् ।
कर्तुं चेतसि तद्वदात्मकुशलं जातोत्सवास्ते घना मन्ये विष्णुपदाश्रयात्स्वमखिलं जाड्यं जहुस्तन्मिषात् ॥ २९ ॥
ये कान्ताभिरलंकृताः प्रतिपदं प्रोत्साहहीनाः स्वतो गर्जन्तस्तरसाऽन्यनुन्नगतयः साध्यो न तेषां जयः ।
सङ्ग्रामे शरवृष्टिमुल्बणतमामातन्वतामप्यलं स्यादित्यध्वनि तादृगम्बुदपरिष्कारेण तत्रर्षिणा ॥ ३० ॥

स्थूणेति : १०.२५.१०.

यत्राप्प्रागल्भ्यबाहुल्यं यत्र निम्नोन्नतस्थितिः । अतर्कितप्रकारवात्रासीत्तद्भू र्निदर्शनम् ॥ ३१ ॥

अत्यासारेति : १०.२५.११.

कृत्स्नं गोकुलमच्युताश्रयमिति प्राचां प्रवादोऽनघः प्राचीनेन जडेन केनचिदलं नीतस्तिरस्कारिताम् ।
प्राचीनैरपरैः कुशाग्रमतिभिः सोढं यदि स्युस्तदा सर्वे तेन जिता इति प्रभुयुतैर्भाव्यं च तैस्तज्जये ॥ ३२ ॥
युक्तमेतद्विभाव्यैव सर्वे ते व्रजवासिनः । तद्वातवर्षशीतार्ता गोविन्दं शरणं ययु ॥ ३३ ॥ (युग्मम्)
शरणं प्रभुरेक एव हि व्यसने सत्युदितेऽपि कीदृशे । इति निश्चितचेतसो ययुः शरणं तं विधुतापरोद्यमाः ॥ ३४ ॥

यद्यच्चोल्बणमुद्गतं व्रजभुवि प्राक्तञ्च सर्वं समुद्दिश्यैनं तदुपारमेष्यलमसौ यत्तत्र तत्राजनि।
इत्थं भूर्यवधारितान्वयतया प्राप्तास्तमेवाखिला नो चेत्तैर्विहितस्तदा तदवने साध्ये कथं व्युत्क्रमः ॥ ३५ ॥

शिरःसुतांश्चेति : १०.२५.१२.

प्रधानरक्षाप्यधिकेलि मुख्या तवास्ति मायामनुगृह्णतो यत् । प्रधानमेतद्भुवि गोकुलं तत् संरक्ष्यमि यावृर्तकः समीयुः ॥ ३६ ॥
दीनानामपि नः सुतावनकृते यत्नो हि यावद् बलं यातोपेक्षमुदेति चेतसि विभो श्रीश त्वमस्मत्पिता।
दीनान्नः समुपेक्षसे घनकृपः कस्मात्कथं वेत्यलं श्रीशं बोधयितुं तदा ययुरमी कायावृतस्वात्मजाः ॥ ३७ ॥

पादमूलमिति : १०.२५.१२.

त्रितापहृत्रम्बुजनिर्यदाऽऽसीत् तदोर्ध्वलोकोदितमित्रभावः । श्रैशः स पादस्तदलं तदुत्थानिष्टोपशान्त्या इति पादमीयुः ॥ ३८ ॥
दिष्टेन निर्दिष्टमिदं यदि स्यान्निमज्जनं तत्किमिहाभिरद्भिः । त्रितापहारीशपदाम्बुजाते तद्योग्यमित्याशयततमीयुः ॥ ३९ ॥
यद्दृक्कोणकटाक्षलब्धविभवोल्लासः स्वरीशः स्मयादस्मान्घस्मरवृष्टिभिर्वितनुते क्लिष्टान् वृथाऽनागसः।
तत्साऽर्व्याऽब्जगृहा रमैव यदसौ कृत्वाऽस्य शिक्षां बलाद् रक्षेन्न शरणागतानिति धिया तं तद्गृहं ते ययुः ॥ ४० ॥

यदाश्रयतयैव यः क्वचिदसत्कृतावुद्यतस्तदार्जववशात्तदा स खलु दण्डनीयः खलः।
इति प्रथितपद्धतिं हृदि निधाय विष्णोः पदं समंजसमुपाययुः शरणमब्ददण्डेच्छवः ॥ ४१ ॥

आस्येनारण्यवह्निग्रसनमथकरेणासुरध्वंसनं च कृत्वा पीयूषवृष्टिं निजसदयदृशा त्राणमर्वाक् कृतं नः।
पादेनास्मासु नाद्याप्युपकृतमधुना तत्प्रसङ्गोऽखिलाङ्गेष्वङ्घ्रि स्वत्राणशिष्टं शरणमगुरिदं योग्यमीशस्य गोपाः ॥ ४२ ॥

कृष्णप्रिया

आकाश में चारों ओर बारंबार भयानक बिजलियाँ चमकने लगी, घोर बिजलियों के साथ मेघों की गर्जना सबको व्याकुल करने लगी। तेज हवा के झकोरों से प्रचण्ड आँधी से परस्पर टकराते और इधर-उधर दौड़ते हुए मेघ बड़े-बड़े ओले बरसाने लगे ॥ ९ ॥ खम्भे के समान बड़ी-बड़ी जलधाराओं के बरसने से जमीन पर बड़े-बड़े गढ्ढे पड़ गये। सारी पृथ्वी जल जलाकार हो गई थी। सर्वत्र जल फैल गया इस कारण कहीं भी ऊँचा-नीचा प्रदेश का पता चलना मुश्किल हो गया ॥१०॥ मूसलाधार वृष्टि और महाप्रचण्ड वायु के मारे सारे पशुगण काँपने लगे। शीत से आर्त गोपजन एवं व्रज की गोपियाँ भगवान गोविन्द की शरण में गए ॥ ११ ॥ बालकों को और अपने मस्तकों को अपनी छाती में छिपाकर और शिलाओं की बौछार से बचाकर काँपते हुए, वृष्टि से संपीडित गोप गोपीजन के समुदाय भगवान श्रीकृष्ण के श्रीचरणों की शरण में आ गये ॥ १२ ॥

कृष्ण कृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो । त्रातुमर्हसि देवान्नः कुपिताद् भक्तवत्सल ॥ १३ ॥
शिलावर्षनिपातेन[1] हन्यमानमचेतनम् । निरीक्ष्य भगवान् मेने कुपितेन्द्रकृतं हरिः ॥ १४ ॥
[2]आपतांवुल्बणं वर्षमतिवातं शिलामयम् । स्वयागे[3] [4]निहतेऽस्माभिरिन्द्रो नाशाय वर्षति ॥ १५ ॥
तत्र प्रतिविधिं सम्यक् साधये [5]योगमायया । लोकेशमानिनो[6] मौढ्याद्धरिष्ये[7] श्रीमदं तमः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—कृष्ण ! कृष्ण ! महाभाग ! हे प्रभो ! गोकुलम् त्वन्नाथम् हे भक्तवत्सल ! कुपितात् देवात् नः त्रातुम् अर्हसि ॥ १३ ॥ भगवान् हरिः, शिला वर्ष निपातेन हन्यमानम् अचेतनम् निरीक्ष्य कुपितेन्द्रकृतम् मेने ॥ १४ ॥ अस्माभिः स्वयागे निहिते इन्द्रः अपर्ता उल्बणम् शिलामयम् अतिवातम् वर्षम् नाशाय वर्षति ॥ १५ ॥ तत्र योगमायया सम्यक् प्रतिविधिम् साधये, मौढ्यात् लोकेशमानिनः श्रीमदम् तमः हरिष्ये ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गोपगोपीनां प्रार्थनामाह। कृष्णकृष्णेति। त्वमेव नाथो यस्य तद्गोकुलं गवां कुलं वंशं नोऽमांश्च देवादिंद्रात्त्रातुं रक्षितुमर्हसि ॥ १३ ॥ विज्ञापनात्पूर्वमेव कुपितेनेंद्रेण कृतं तद्वर्षं मेने ॥ १४ ॥ कथं मेने तदाह। अपर्त्विति। अपगत ऋतुर्यस्य तद्वर्षमति-

---

१. वर्षातिवा–विज.। २. अपर्त्वत्यु–श्रीधर, वंशी. जीव. वीर. विश्व.; अपर्तावु–विज.। ३. तन्मखे–विज.। ४. विह–श्रीधर. वंशी. जीव. वीर. विज. विश्व.। ५. गात्मयोगेन साधये–श्रीधर, वंशी. जीव. वीर. विज. विश्व.। ६. मानिनां–श्रीधर. वंशी. जीव. वीर. विश्व.; मानिनो–विज.। ७. दर्पनिघ्ने–प्रा. पा.।

शयितो वातो यस्मिंस्तदतिवातम्। शिलामयं शिलाप्रचुरम् ॥ १५ ॥ तत्र प्रतिज्ञापूर्वकं गोवर्धनोद्धरणमाह। तत्रेति। तत्र प्रतिविधिं प्रतीकारं स्वसामर्थ्येन साधयिष्यामि तेन च मौढ्याल्लोकेशमानिनां श्रीमदलक्षणं तमो हरिष्यामि। बहुवचनेन वरुणादीनभिप्रैति ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अस्माकं देवान्न तु तवेत्यर्थः। भक्तवत्सलेति दयोत्पादनार्था संबुद्धिः तदानीं गोपाः 'अनेन सर्वदुर्गाणि' इत्यादिगर्गोक्तिं स्मृत्वा श्रीकृष्णमेवार्थयामासुरित्याह–कृष्णेति,–सर्वदुःखाकर्षणाभिप्रायेण। वीप्सा त्वर्त्त्या। हे महाभाग अस्माकं परमभाग्यरूप। गोकुलं गवां समूहम्। प्राकृतोपि पुमानेकामपि गां यथाबलं रक्षितुं प्रयतते त्वं तु प्रभुरसि सर्वथा सर्वतः सर्वान्रक्षितुं समर्थः। कालियमर्दनादौ तवालौकिकं प्रभुत्वमस्माभिरनुभूतत्वमित्याहुः–हे प्रभो इति। ननु देवेषु स्वशक्तिदर्शनं नोचितं तथापि मदाधकारत्त्वात्तत्राहुः–हे भक्तवत्सल। भक्तजनरक्षणार्थं तव न किमप्यकृत्यमस्तीति। अर्जुनरथसारथित्वस्य वक्ष्यमाणत्वादिति भावः ॥ १३ ॥ गोपविज्ञापनात्पूर्वमेव तद्वर्षमिंद्रकृतं मेने नित्यभगवत्पार्षदानामप्येतादृशकष्टं लीलाशक्त्या प्रेमानंदरसस्योत्कर्षेणास्वादनार्थमुपस्थापितं लोभवतां बुभुक्षूणां क्षुत्कष्टमिव सुखोदर्कत्वात्सुखात्मकमेवेति ज्ञेयम्। अचेतनम् निःसंज्ञम् ॥ १४ ॥ अत्युल्बणम् भयजनकम् ॥ १५ ॥ तत्र वर्षणे। तेन प्रतीकारेण। लोकेशमानिनाम् लोकेशा वयमित्यभिमानवताम्। तमः अज्ञानम्। अभिप्रैति अभिप्रायविषयं करोति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्णेति। सर्वदुःखाकर्षणाभिप्रायेण आर्त्त्या वीप्सा हे महाभाग अस्माकं परमभाग्यरूप! नोऽस्माकं गोकुलं गवाङ्कुलं व्रज अव वा सर्वं त्रातुमर्हसि। यद्वा, नोऽस्मांश्च देवात् इन्द्रात् तन्नामाग्रहणं द्वेषेण पापबुद्ध्या वा। यद्वा, देवात् तत्रापि कुपितात् इति तत्प्रतीकारासमर्थानस्मान् त्वमेव त्रातु योग्योऽसीत्यर्थः। ननु, तर्हि ममापि तत्र का शक्तिस्तत्राह–प्रभो! हे सर्वशक्तियुक्तेति। कालियमर्दनादौ तवालौकिकशक्तिदर्शनादिति भावः। ननु, देवेषु निजशक्तीर्दर्शयितुं नो युज्येत तत्राह–हे भक्तवत्सलेति। भक्तार्थं तवाकृत्यं न किञ्चिदपीत्यर्थः ॥ १३ ॥ शिलावर्षयुक्तेनातिवातेन पाठान्तरे शिलावर्षस्य निपातेन हन्यमानम् अत एव अचेतनं मूर्च्छितप्रायं गोकुलमिति प्रकरणात् कृतम् क्लान्तम् ॥ १४ ॥ पश्चात् क्रोधावेशेन स्वगतमुवाचेत्याह–अपर्त्वित्यादिपञ्चकेन। इत्युक्त्वेति परेणान्वयात् पृथक् तु व्याख्यायते वर्षं वर्षतीति तपस्तप्यत इतिवद्वर्षंकरोतीत्यर्थः। अस्माभिरिति बहुत्वं श्रीनन्दाद्यपेक्षया शक्रमदभञ्जनार्थं निजप्रौढिप्रकटनेन वा नाशाय गोष्ठस्य तत्त्वतस्तु निजमदस्यैव ॥ १५ ॥ सम्यक् सर्वेषां सुखपूर्वकनिजदासवर्यमाहात्म्यप्रदर्शनादिप्रकारेण साधयामि वर्त्तमानसामीप्ये लट् आत्मयोगेन योगमायाख्यया स्वाभाविकशक्त्येत्यर्थः। लोकेशमानिनामिति बहुत्वं तद्दण्डेनान्येषामपि शिक्षाभिप्रायेण ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णकृष्णेति वीप्सा शीतार्त्त्या जिह्वाकर्षकतन्नामस्वभावाद्वा, तत्र च कृष्णेति संज्ञामात्रापेक्षया सर्व्वदुःखकर्षणाभिप्रायेण वा, हे महाभागेति–सप्तदशाध्यायान्ते दावाग्निमोक्षणप्रसंगे व्याख्यातमेव। यद्वा, महान् भागो भाग्यं यस्य तच्च तत्, यतस्त्वन्नाथञ्चेति नोऽस्माकं गोकुलं व्रजमेव वा सर्वं त्रातुमर्हसि, तत्त्राणेऽस्माकं स्वत एव त्राणसिद्धेः, यद्वा, नोऽस्मांश्च देवात् इन्द्रात्, तन्नामाग्रहणं द्वेषेण पापबुद्ध्या वा; देवात् तत्रापि कुपितादिति तत्कृतोपद्रवोऽत्र सामान्यमनुष्यैरस्माभिः परिहर्त्तुं न न शक्यत इति त्वमेव त्रातुं योग्योऽसीत्यर्थः। ननु, तर्हि तत्र ममापि का शक्तिः? तत्राह–हे प्रभो! सर्व्वशक्तियुक्तेति कालियमर्द्दनादौ तवालौकिकशक्तिदर्शनादिति भावः। ननु देवेषु निजशक्तिं दर्शयितुं नोपयुज्येत; तत्राह–हे भक्तवत्सलेति। भक्तार्थं तवाकृत्यं न किञ्चिदस्तीत्यर्थः। दावादिभयेन पूर्वं भगवन्तं बलदेवञ्च प्रति विज्ञापितमस्ति, अधुना च केवलं श्रीभगवन्तं प्रत्येव प्रार्थनमस्या महाविपदस्तेनैव निस्तारसम्भवात्, किंवा तस्मिन्नेवात्यन्तिकस्नेहभरात् ॥ १३ ॥ अचेतनं मूर्च्छितप्रायं यथा स्यात्तथा, हन्यमानं निरीक्ष्य साक्षाद्दृष्ट्वा, मेने ज्ञातवान्, यतो भगवान् सर्व्वज्ञः, हरिः सर्वदुःखदोषहर्त्तेति वक्ष्यमाण गोवर्द्धनधारणेन गोकुलदुःखहरणं शक्रदर्पहरणञ्च सूचितम् ॥ १४ ॥ पश्चात् क्रोधावेशेन स्वस्मिन् स्वयमेव, किंवास्वासनार्थं गोपान् प्रत्युवाच अपर्त्वित्यादिचतुर्भिरिति ज्ञेयम्, इत्युक्त्वेत्यग्रे वक्ष्यमाणत्वात्। अस्माभिरिति बहुत्वं श्रीनन्दाद्यपेक्षया शक्रमदभञ्जनार्थं निजप्रौढताप्रकटनेन वा, नाशाय गोष्ठस्य तत्त्वतस्तु निजमदस्यैव ॥ १५ ॥ सम्यक् सर्व्वेषां सुखपूर्व्वकनिजदासवर्य्यमाहात्म्यप्रदर्शनादिप्रकारेण साधयामि, तत्कालिकताभिप्रायेण वर्तमाना। एवमग्रे (१८ श. श्लो.) 'गोपाये इति च मौढ्याल्लोकेशमात्मानं प्रत्येकम्मन्यमानानाम्, अन्यत्तैर्व्याख्यातम्; यद्वा, आत्मनो योगेनोपायेन लीलया श्रीगोवर्द्धनधारणादिना ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अपर्त्तु ऋत्वतिक्रमेण ॥ १५–१६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे महाभाग अस्मद्रक्षोपययुक्तज्ञानरूपमहाभाग्यशालिन् ! त्वमेव नाथो यस्य तद्गोकुलं कुपिताद्देवात्पातुमर्हसि भक्तवत्सलस्याधुनोपेक्षानुचितेति तत्संबोधनाभिप्रायः शिलावर्षस्य निष्ठुरपातेन पीड्यमानमत एवाचेतनं तज्जडीभूतं गोकुलमवलोक्याश्रितार्तिहरो भगवान् कुपितेनेन्द्रेण कृतम् एतत्कर्मेति मेने ।। १३–१४ ।। मननप्रकारमेवाह–अपगतो वर्षर्त्तुर्यस्याऽत्यन्तो वातो यस्य तच्छिलामयमत्युल्बणं वर्षमस्माभिः स्वयागे विहते सत्यस्मन्नाशाय वर्षति ।। १५ ।। अथ भगवतः प्रतिज्ञापूर्वकं गोवर्द्धनोद्धरणमाह–तत्रेति । तत्रैवं सति प्रतिविधिं वर्षप्रयुक्तपीडाप्रतीकारं स्वसामर्थ्येन साधयिष्यामि मौढ्याल्लोकेशमात्मानं मन्यमानस्य श्रीमदात्मकं तमोज्ञानं तमोगुणकार्यं श्रीमदं वा हरिष्यामि ।। १६ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अचेतनं निस्सञ्ज्ञम् ।। १४ ।। अपर्त्तौ अनृतौ अवृष्टिसमय इत्यर्थः ।। १५ ।। प्रतिविधिं परिहारम् आत्मयोगेन आत्मसामर्थ्येन स्वनिर्मितोपायेन वा तमोऽज्ञानम् ।। १६ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आत्मयोगेन योगमायाख्यया स्वाभाविकशक्त्येत्यर्थः । लोकेशमानिनामिति बहुत्वं तद्दण्डेनान्येषामपि शिक्षाभिप्रायेण मत्त एव नान्यतः ।। १६–१७ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

"अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ" इति गर्गोक्तिमनुस्मृत्य एतादृशमहाविपत्तौ श्रीनारायण एव कृष्णमाविश्यास्मान् रक्षतीति विश्वस्ता गोपाः प्रार्थयन्ते कृष्णेति देवादिन्द्रात् ।। १३ ।। कुपितेनेन्द्रेण कृतं तद्वर्षं विज्ञापनात् पूर्वमेव मेने भगवन्नित्यपार्षदानामपि तत्तत्कष्टं लीलाशक्त्यैव प्रेमानन्दरसस्योत्कर्षेणास्वादनार्थमुपस्थापितं लोभवतां बुभुक्षूणां क्षुत्कष्टमिव सुखोदर्कत्वात् सुखात्मकमेवेति ज्ञेयम् ।। १४ ।। कुपितेन्द्रकृतं मत्वा स्वगतमुवाच—अपर्त्वित‍ि पञ्चकम् । भगवानेवेत्याह अपगतऋतुर्यस्य तद्वर्षं शिलामयं शिलाप्रचुरम् ।। १५ ।। प्रतिविधि प्रतीकारम् आत्मनो योगेन योगमायया लोकेशमानिनां श्रीमदलक्षण तमो हरिष्यामि बहुवचनं वरुणादीनप्यभिप्रैति ।। १६ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हरिः शरणागतार्तिहरः विज्ञापयन्तं जनं हन्यमानं निरीक्ष्येन्द्रकृतं व्यतिक्रमं मेने पूर्वन्तु शिलावर्षनिपातं सहमानोपि तूष्णीं बभूव स्वविषयेऽकिञ्चित्करत्वादिति भावः ।। १४ ।। कथं मेने ? इत्यत आह—अपगतः ऋतुर्यस्य तत् अति अतिशयितो वातो यस्मिन् तत् शिलामयं जलोपलप्रचुरमत्युल्यणमसह्यं वर्षं नाशायास्माकमिति शेषः । वर्षति ।। १५ ।। श्रीभगवतः प्रतिज्ञापूर्वकं गोवर्द्धनोद्धरणमाह—तत्रेत्यादिना । मौढ्याल्लोकेशमानिनां श्रीमदलक्षणं तमो हरिष्यामि नतु किञ्चिदपि भयकारं करिष्यामि बहुवचनस्येन्द्रविमदत्वविधानालोचने अन्येपि विमदाः भविष्यन्तीत्यर्थः । अतस्तत्र वर्षे एव प्रतिविधिं प्रतिकारं साधये ।। १६ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्वन्नाथो यस्य तत्त्वन्नाथं कुपिताद्देवेन्द्रात् । कुतः कोपस्तस्येत्यस्त्वं देवान्नो देवानामिन्द्रादीनां देयमन्नं यस्य स इति कुपितादिति भावः ।। १३ ।। अचेतनं निस्संज्ञं कुपितश्चासाविन्द्रश्च तेन कृतं मेने ।। १४ ।। मननप्रकारमेवमालुलोच भगवानित्याह ।। अपर्ताविति । अवर्षर्तौ स्वयागेऽस्माभिर्विहिते नाशिते सति स्वयाग इति स्फुटार्थः गोकुलस्य नाशायेन्द्रोऽतिवातं शिलामयं वर्षं वर्षति करोति ।। १५ ।। आत्मयोगेन स्वरूपोपायेन साधये साधयामि मानसिकव्यथावते गोजनाय हितं च साधये इत्यावृत्त्याऽन्वयः । एतदाशयेनैव साधय इत्युक्तिरिति भावः । मौढ्यादेव लोकेशमानिनो लोकेश इति मानिनी तस्य श्रीमदं तज्जनकं तमो हरिष्ये । लोकेऽशमानीति छेदः । लोकेऽवलोके कृते सत्यशमेनाक्षमाया अनिनीति लोकेशमानी ।। १६ ।।

श्रीसुबोधिनी

तादृशानां विज्ञापनमाह **कृष्ण कृष्णेति**, सम्भ्रमाद् वीप्सा, **गोकुलं त्रातुमर्हसीति**विज्ञापना, ननु स्तोत्रं कृत्वैव सर्वे विज्ञापनां कुर्वन्ति ततः कथमस्माद् विज्ञापनमिति चेत् तत्राहुर्हे **महाभागेति**, महद् भाग्य यस्येति, के वयं वराकाः स्तोत्रे ? व्यासादय एव महान्तो निरन्तरं स्तुवन्त्यतो **महाभाग्यवतोल्पैः** किं कर्तव्यमिति, अथ वा यथा भवन्तो वेपमानास्थाहमपीति न वक्तव्यं त्वं तु **महाभागो**लौकिकसर्वभाग्ययुक्तोतोलौकिकेन प्रकारेण **त्रातुमर्हसी**त्यर्थः, सर्वथा रक्षायां हेतुस्त्वन्नाथमिति, त्वमेव नाथो यस्य, किञ्च **गवां** कुलं गावः सर्वैरेव पाल्यास्त्वं च प्रभु पालनक्षमः पालनसमर्थोतो बहूनां हेतूनां विद्यमानत्वात् **त्रातुमर्हसि**, ननु लौकिक एवोपायः कर्तव्यः कम्बलवस्त्रादिभिर्गृहैर्गुहादिभिर्वा किं मत्प्रार्थनयेति चेत् तत्राहुर्दैवादिति **प्राकृतापकारे हि प्राकृतः प्रतिक्रियायं**

त्वपकारो दैव इन्द्रेण कृतः, तर्हि स एव प्रार्थ्यतामिति चेत् तत्राहुः कुपितादिति, स हि कोपं प्रापितोपकारकरणादतः कुपितो **मारय**त्येव, ननु दैन्यं दृष्ट्वा न मारयिष्यतीति चेत् तत्राहुर्हे **भक्तवत्सले**ति, भवानेव **भक्तवत्सलः** स तु निर्दय एवातस्त्वयैव वयं पालनीयाः ॥ १३ ॥ एवं विज्ञापितः कर्तव्यं विचारितवान् किमिन्द्रो मारणीयो मेघा वा निवारणीया वृष्टिस्तम्भो वा कर्तव्य एतेभ्यो वालौकिकं सामर्थ्यं देयमन्यत्र वा नेया अन्यद् वा कर्तव्यमिति, तत्र प्रथममुपद्रवनिदाननिर्धारमाह शिलावर्षेति, शिलानां वर्षणरूपो यो **निपातो** निरन्तरपतनं सर्वतस्तेन **हन्यमान** गोकुलं **निरीक्ष्य कुपितेन्द्रकृतमेव मेने**, यद्यपि तैरुक्तमेव तथापि किं वासनया वदन्त्याहोस्वित् सत्यमेव, लौकिकास्तु पौर्वापर्यमेव दृष्ट्वाहेतुमपि हेतुं मन्यन्ते तथैव किं यागभङ्गानन्तरमेव वृष्टिर्जातेति वदन्त्याहोस्वित् तथैवेति भवति विचारणा, ज्ञानेप्यर्थनिराकरणार्थमनूद्यतेन्यथाविमृश्यकारित्वं शङ्क्येत ॥ १४ ॥ ततस्तेषामुपद्रव इन्द्रकृत इति निश्चित्य हन्यमानत्वाच् छीघ्रं प्रतीकारं कर्तुं विचारयतीत्याहापर्ताविति द्वाभ्यामचेतनत्वान्न तद्वचनापेक्षा क्षणमात्रविलम्बश्च भगवत्त्वात् सर्वसाधनपरिज्ञानं, वृष्टिरेतादृशी स्वाभाविक्यपि भवतीति तन्निराकरणार्थमपर्ताविति उक्त मर्यादाकालोयमतः कलाविव न यदा कदाचिद् वृष्टिस्तत्राप्यत्यु**ल्बणम**तिभयानकमृतावप्येतादृश दुर्लभमिति, अत्यन्त **वातो** यत्र, वायुना हि नीयन्ते मेघाः, तत्रापि **शिलामयमल्पं** जलं करका बह्व्यः, एवं चतुर्भिर्दोषैरिन्द्र एव **वर्ष**तीति ज्ञायते, आर्षज्ञाने नित्यज्ञाने वा तर्को यदि न सहकारी स्याद् विरुद्धो वा भवेत् तदा लोकानामार्षज्ञानप्रतीतिर्न भवेत् कार्ये जातेपि काकतालीयप्रसङ्गः स्यादतस्तर्को युक्तो ज्ञानसहकारी, तदाह **स्वयाग** इन्द्रयागे **नितरां हते** गोकुलनाशार्थमेवेन्द्रो **वर्षती**ति ॥ १५ ॥ तर्हि किं विधेयमित्याकाङ्क्षायामाह तत्र **प्रतिविधि**मिति नात्रेन्द्रो दूरीकर्तव्यस्तथा सति क्लिष्टकारित्वं स्यादधिकारस्यैव तथात्वेन स्वतो दोषाभावाद् वृष्टिनिवारणे तु स्वतो युद्धं कुर्यात् तत्र मारणामारणाभ्यां पूर्वदोषानिवृत्तेर्वृष्टिस्तम्भे मेघान् मारयेन् मेघनाशेग्रिमकार्यं न स्यादतः प्रतिविधानमेव कर्तव्यं, तदाह **तत्र प्रतिविधिं साधय** इति, यद्यन्यत्रैते नीयेरंस्तदा तत्रापि भवेत् स्थानच्युतिर्वा स्यादितराश्रयणं वा भवेदतोनेन गोवर्धनेनौदनो भुक्त इत्ययमेव साधनीकर्तव्यः **प्रतिकृत्या तस्य क्लृप्तत्वात्**, तदाह **सम्यग**िति, नन्वेते पाषाणाः समुदायीभूता पर्वतव्यपदेशं लभन्ते नात्रैकोवयव्यत उत्तोलनेपि पाषाणानां पातः स्यादवतीर्णस्य लौकिकन्यायेन प्रवृत्तस्य पुष्टिकार्यपरस्य न प्रशासनन्यायेन पर्वत उपरि स्थापयितुं शक्योतः कथमुद्धरणमिति चेत् तत्राह **योगमायये**ति, **योगमायात्र** कार्ये स्वीकृता यथा गर्भसङ्कर्षणे तदत्र पर्वतधारणेपि विनियोज्या यथा न कोप्यंशः पतेत्, तस्या बलसिद्ध्यर्थं स्वक्रियाशक्तिस्तत्र प्रयोजनीया, ननु किमेतावता क्लेशेन पूर्वमेवायमुपद्रवः कथं न विचारितः ? तत्राह **लोकेशमानिन** इति, अहमेव **लोकेश** इति स्वात्मानं मन्यते न त्वधिकारिणमिति, ननु वस्तुत एवायं **लोकेश** इति चेत् तत्राह **मौढ्या**दिति, ह्यधिकारीशो भवति, एतदुपपादितं "स वै पतिः स्यादि"त्यत्र, स एक एवेतरथा मिथो भयमित्यत इन्द्रो नेश्वरो **मौढ्या**देव तथा मन्यते तस्य स **मोहः श्रीमदेन** जातस्**तमो**ज्ञानमेवातो हरिष्ये ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

शिलावर्षनिपातेनेत्यस्याभासे, अन्यद्वा कर्तव्यमिति। अधुना स्वस्मिन्प्रवेशोऽन्यशब्दार्थो ज्ञेयः ॥ १४ ॥ तत्र प्रतिविधिमित्यत्र योगमायेत्यस्याभासे, न प्रशासनन्यायेनेति। 'एतस्यैवाक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत' इति श्रुत्युक्ततद्धारणवदत्र तन्न सम्भवतीत्यर्थः।

(२) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

शिलावर्षेत्यस्याभासे किमिन्द्र इति इन्द्रमारणमेघनिवारणवृष्टिस्तम्भान्यत्रनयनानां विमर्श "स्तत्र प्रतिविधि" मितिश्लोके, अवशिष्टयोर्द्वयो "स्तस्मान् मच्छरण" मितिश्लोके वक्ष्यत इतिविभागः ॥ १४ ॥ **तत्र प्रतिविधिमित्यत्र प्रतिविधि**पदेन गोवर्धनोद्धरणरूपप्रतिविधिकथने हेतुमाहुः प्रतिकृत्येति, भावप्रधानमिदं, प्रतीकारत्वेन गोवर्द्धनोद्धरणस्यैव भगवता क्लृप्तत्वादित्यर्थः ॥ १६ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

तत्र गोपगोपीनां प्रार्थनामाह–कृष्णकृष्णेति। सम्भ्रमाद्वीप्सा। गोकुलं गवां कुलं वंशं नोऽस्मांश्च देवात् इन्द्रात् त्रातुमर्हसि। 'देवात्' इत्यनेन त्वत्तोऽन्येन ततो रक्षाऽशक्येति सूचितम्। 'नच तत्प्रार्थनैव युक्ता' इत्याशयेनाहुः कुपितादिति। 'रक्षाकरणं च तवावश्यकम्' इति सूचयन्त आहुः–तन्नाथमिति। त्वमेव नाथः स्वामी रक्षको यस्य तत्। 'त्वदुपकारे च वयं न समर्था' इत्याशयेन सम्बोधयन्ति—महाभागेति। महान् भागो भक्तानां यस्मात्। 'तव पूर्णतायां किं वक्तव्यम्' इत्याशयः। 'रक्षणे सामर्थ्यं तु तवास्त्येव' इत्याशयेन पुनः सम्बोधयन्ति—प्रभो इति। 'तथापि रक्षार्थं प्रवृत्तौ मम किं प्रयोजनम्' इत्याशङ्क्य पुनः सम्बोधयन्ति—भक्तवत्सलेति। भक्तकृपावशादेव तद्रक्षायां प्रवृत्तिरित्याशयः ॥ १३ ॥ शिलावर्षस्य निष्ठुरपातेन हन्यमानम्, अत एव अचेतनं जडीकृतं गोकुलं निरीक्ष्य हरिः आश्रितदुःखहर्ता भगवान् सर्वज्ञः कृष्णः कुपितेनेन्द्रेण कृतमुपद्रवं मेने ॥ १४ ॥ मननप्रकारमाह—अपर्त्विति। अपगतः ऋतुर्यस्य तत् अपर्तु, अति उल्बणं भयंकरम्, अतिशयितो वातो यस्मिंस्तदतिवातम्,

शिलामयं शिलाप्रचुरं वर्षमस्माभिः स्वयागे निहते सति व्रजनाशायेन्द्रो वर्षति करोतीत्यर्थः ॥ १५ ॥ अथ भगवतः प्रतिज्ञापूर्वकं गोवर्धनोद्धरणमाह—तत्रेति । तत्रैवं सति विधिं वर्षप्रयुक्तपीडाप्रतीकारमात्मयोगेन स्वसामर्थ्येन सम्यक् साधयिष्यामि, तेन च मौढ्याल्लोकेशमानिनामिन्द्रादीनां श्रीमदरूपं तमस्तमः कार्यं हरिष्यामि । बहुवचनमिन्द्रस्य लोकपालश्रेष्ठत्वात् 'तन्मदनाशद्वारा वरुणादीनामपि मदविनाशो भविष्यति' इति सूचनार्थम् ॥ १६ ॥

अन्वितार्थप्रकाशिका

कृष्ण कृष्णेति ॥ हे कृष्ण कृष्ण ! हे महाभाग ! हे प्रभो ! हे भक्तवत्सल ! त्वमेव नाथो यस्य तादृशं गोकुलं गोसमूहं नोऽस्मांश्च कुपिताद्देवादिन्द्रात् त्रातुमर्हसि ॥ १३ ॥ शिलेति ॥ शिलावर्षस्य निष्ठुरपातेन हन्यमानमत एवाचेतनं जडीकृतं गोकुलं निरीक्ष्य भगवान् हरिः कुपितेनेन्द्रेण कृतमुपद्रवं विज्ञापनात्पूर्वमेव मेने ॥ १४ ॥ अपर्त्वितिति ॥ अपगत ऋतुर्यस्य तत् अपर्तु अति उल्बणं भयङ्करमतिशयितो वातो यस्मिंस्तदतिवातम् । शिलामयं शिलाप्रचुरं वर्षमस्माभिः स्वयागे निहते सति व्रजनाशायेन्द्रो वर्षति ॥ १५ ॥ तत्रेति ॥ तत्रैवं सति प्रतिविधिं वर्षप्रयुक्तपीडाप्रतीकारमात्मयोगेन स्वसामर्थ्येन सम्यक् साधये साधयिष्यामि । तेन च मौढ्याल्लोकेशमानिनामिन्द्रादीनां श्रीमदरूपं तमस्तमःकार्यं हनिष्ये हरिष्यामि । बहुवचनमिन्द्रगर्वनाशे वरुणादीनां गर्वनाशसूचनार्थम् ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गोपादीनां प्रार्थनमाह कृष्णेति । त्वमेव नाथः स्वामी यस्य तत् गवां कुलं निकरं नोऽस्मांश्च देवात् मघवतः ॥ १३ ॥ शिलेति शिलानां हिमपाषाणानां वर्षं वृष्टिस्तस्य निपातेन अचेतनं जडतुल्यं एतत् वर्षं कुपितेन इन्द्रेण कृतं मेने ॥ १४ ॥ एवं कुतो मेने इति चेत्तत्राह अपेति । अपगत ऋतुः वर्षाकालो यस्य तत् अपर्त्तु अत्युल्वणं अतिक्रूरं । अतिवातं अतिशयितो वायुर्यस्मिंस्तत् जलशिलाप्रधानं वर्षं जलवर्षणं अस्माकं नाशाय ॥ १५ ॥ तत्प्रतीकारमाह तत्रेति तत्र तस्य नाशस्य वर्षस्य वा प्रतिविधिं समीचीनं प्रतीकारं आत्मयोगेन स्वैश्वर्येणाऽहं साधयिष्ये मौढ्यात् मूर्खत्वात् । लोकेशमानवतां इन्द्रादीनां श्रीमदरूपं तमः अज्ञानाम् ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्णेति ॥ हे कृष्ण कृष्ण, हे महाभाग महैश्वर्ययुत, हे प्रभो, संबोधनद्वयेन स्वरक्षणोपयुक्तज्ञानरूपमहाभाग्यशालिता स्वपरित्राणस्यानायासेन कर्त्तुं समर्थतापि ज्ञापिता । त्वमेव नाथो यस्य तत्, गोकुलं गवां समूहं, नोऽस्मांश्च, हे भक्तवत्सल, कुपितात् देवात् पर्जन्यात्, त्रातुं पातुं, अर्हसि । भक्तवात्सल्याधुनोपेक्षानुचितेति अन्तिमसंबोधनाभिप्रायः ॥ १३ ॥ शिलेति ॥ शिलानां वर्षस्य यो निपातो निष्ठुरपातस्तेन, शिलानां जलाश्मनां वर्षणां च नितरां पातेनेति वा । हन्यमानं पीड्यमानं, अत एव अचेतनं जडीभूतं, गोकुलमिति शेषः । निरीक्ष्यावलोक्य, हरिः स्वाश्रितार्त्तिहरः, भगवान् स्वाश्रितपीडाकारकशास्ता भगवान्, कुपितेन्द्रकृतमेमत्कर्मयागभङ्गसञ्जातकोपेनेन्द्रेणैव कृत, इति मेने ॥ १४ ॥ मननप्रकारमेवाह ॥ अपर्त्त्विति ॥ अपगतः ऋतुर्वर्षाकालो यस्य तत्, अत्यतिशयितो वातो यस्मिंस्तत्, शिलामयं प्रचुरजलशिलापातं, अत एव, अत्युल्बणमतिदारुणं वर्षं, अस्माभिः स्वयागे निहते सति, इन्द्रः, नाशाय अस्मन्नाशं कर्त्तुं, वर्षति ॥ १५ ॥ अथ भगवतः प्रतिज्ञापूर्वकं गोवर्द्धनोद्धरणप्रकारमाह ॥ तत्रेति ॥ तत्रैवंविधैतत्कर्मणि सति प्रतिविधिं वर्षप्रयुक्तपीडाप्रतीकारं, मदीयजनपीडाप्रवर्षणपरिहारमिति यावत् । आत्मयोगेन स्वसामर्थ्येन, सम्यक् साधये साधयिष्यामि । तेन मौढ्यात् मूढभावतः, लोकेशमानिनः लोकेशमात्मानं मन्यमानस्येन्द्रस्य, श्रीमदं श्रीमदात्मक तमोऽज्ञानं, तमोगुणकार्यं श्रीमदं वा हरिष्ये हरिष्यामि ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृष्णेति : १०.२५.१३.

अस्माभिस्तु पुरैव कृष्ण कलितं नायं क्रतोरन्यथाकारः किन्तु बलाद्बलारिहृदये क्षोमः समुत्पाद्यते ।
नैवाश्रावि तदा मुधा प्रवयसोऽस्मान् ख्यापयित्रा त्वया भूयास्तां गतकीर्तनं विरचितः को वाऽभ्युपायोधुना ॥ ४३ ॥
हे श्रीकृष्ण जगन्निवास भगवन्नारायण श्रीपते गोपालाः सकलाः सदेकमतयो जल्पन्ति मामेव ते ।
एतद्वक्ष्यनुसारिणो वयममी भूत्वा ह्यनर्थं परं प्राप्तास्तन्निजबुद्धिरेव हितकृन्नान्योदगतेत्यादिकम् ॥ ४४ ॥
तच्छ्रीकृष्ण कमप्युपायमधुना संचिन्तयन् दुर्यशोमालिन्यं मम मार्जयेदमखिलं लोलायित दुर्विधेः ।
अस्मत्तोऽस्तु सुखं सदैव पितुरित्युक्तिस्तवैतद्विना सत्या स्यान्न मनागपीत्यवितथ जानीहि किं भाषितैः ॥ ४५ ॥ (युग्मम)
विद्मो नैव विधेर्विधानमविधेर्वा केवलं त्वद्वचः श्रद्धालम्बितचेतसस्त्वदनुगाः कर्मैतदाकुर्महि ।
यत्संप्रत्यपि वेद्यते न किमिदं कस्माच्च वेत्यंशतस्तत्संचिन्तय चिन्तयीयमधनोपायं त्वमस्मद्गतिः ॥ ४६ ॥
किं कृष्णेन वृथाभिमानजनितास्मच्छुद्धिदुर्नीतिना किं कृष्णेन विधेयमत्र बलवत्प्रारब्धमीदृग्घि नः ।
तादृग्यज्ञविधित्सितेन भवितोपायोऽपि संचिन्तितः कृष्णेनेति जगुर्मिथो यदवनौ सिद्धो हि लोकस्त्रिधा ॥ ४७ ॥

हितं वाऽहितं वेत्यनालोचयन्तस्त्वगाज्ञां समाज्ञाय यज्ञार्थमज्ञाः ।
प्रवृत्ताः प्रवृत्ता कथा वाऽस्तु कीदृक् कृपादृक् त्वमस्मान् हरे पाह्यपायात् ॥ ४८ ॥
न वारिवाहो यदकालगस्ततो न वारिवाहोऽयमुपागतः प्रभो ।
अवारितश्चेल्लयकृन्न किं भवेदवारितोऽस्मांस्तव पादसन्नतान् ॥ ४९ ॥
साक्षाद्विषादपि विधाय दया दयाब्धे त्राताः सुधारसमुचा स्वदृशा तदानीम् ।
नाम्ना विषादपि जलादुदिता ह्यपेक्षा पातुं तदा न किमु भाविजनेषु हास्यम् ॥ ५० ॥
न नाशिताः प्राग्यदि पूतनादयो न नाशिताः स्युर्यदि वा ह्यघादयः ।
कुतोऽर्थनायाः प्रसरस्तदा वयं त्रातास्तदानीं किमुपेक्षसेऽधुना ॥ ५१ ॥
श्रीकृष्णाखिलदेववन्दितपदद्वन्द्वेन्दिरानन्दद प्राणिप्रेष्ठ धृतावतार करुणाम्भोधे जगत्कृद् गुरो ।
त्रातारं समवेक्ष्य कंचिदपरं चेतस्युपेक्षोदिता किं वाऽस्मिञ्जलविप्लवे वयमिवामग्नाऽनुकम्पाऽपि ते ॥ ५२ ॥
प्राप्तान्नस्त्वदुपांघ्रि पश्यसि न चेद्धस्ते न वा स्वात्मजानंके वीक्ष्य च वृष्टिकूपपतितान्दत्से न हस्तं यदि ।
दूरस्थानधिकारतो यदि विभो नायास्यसंख्यत्वतस्त्वन्नेत्रोरुकरांघ्रिगात्किमु फलं का वाक्प्रतिष्ठाऽथवा ॥ ५६ ॥
गोत्रावनं कर्तुमिहोद्यतस्य गोत्रावनं तेऽर्थत एव सिद्धम् । पार्थक्यतस्तेऽर्थनया किमीश त्राणाय नारायण जागृहीति ॥ ५४ ॥
इत्थं जितं घोषजनैरशेषैः स्वाक्रन्दघोषेण तदब्दघोषम् । दृष्ट्वा विभाव्येष्टकुदग्रतोऽभून् सवारिहृल्लक्षित–वासवारिः ॥ ५५ ॥
कांश्चित्पादगतान्प्रणम्रवपुषः कांश्चित्स्ववक्त्रेक्षणान् कांश्चिद् वृष्टिभिरर्दितानवदृशेत्याक्रन्दमानान् परान् ।
मस्तन्यस्तसुहस्तकानथ परानावेक्ष्य सर्वास्तथा स्वीयैकेक्षणलक्षितान्प्रभुरभूत् सद्यः कृपालङ्कृतः ॥ ५६ ॥
आसीत्तेषां वृष्टिपूरो यावन्मज्जनहेतवे । चित्रमुन्मज्जनायेशः कृपापूरस्ततोऽधिकः ॥ ५७ ॥

दृष्ट्वा वृष्टिमपूर्वकालकलितां स्वर्नाथगर्वानलज्वालाजालकरालभूरिचपलां तज्जाड्यखण्डोपलाम् ।
दास्यन् दृष्टित एव तेष्वभयदां श्रीशो निजाश्वास्यतामापृच्छत्कुतुकादरं क्रतुरसो प्रेष्ठः किमैन्द्रोऽथवा ॥ ५८ ॥

अचलविहितयज्ञे तृप्तिमद्धाऽऽप यज्ञभुगलमुपगतो वः सत्यमस्मिन् हि गोपाः ।
सकलभुवनलाभस्तत्फलं युक्तमस्माद् व्रजत किमिति भीताः सुप्रसादाप्तिकाले ॥ ५९ ॥
कर्मैव साङ्गमुदितं यदि तत्प्रसूते सर्वेष्टमस्य मघवा नहि तत्र हेतुः ।
उक्तं मया निजधियाऽपि च पश्यतैतन्नो चेदतत्क्रतुविधेः कथमास वृष्टिः ॥ ६० ॥
निरतिशयसमृद्धिः प्रैति नित्यं विशुद्धक्रियमलमपयाति प्राणिनो ह्यप्रगल्भात् ।
स्फुटमिदमभवद्यत्तादृशान् वः समागात् सकलवसुसमृद्धिस्तादृगिन्द्रादपेता ॥ ६१ ॥
यः स्वात्मरूपमपरेक्षणदुर्लभं वः सन्दर्श्य चारुबलिभक्षणपूर्वकं हि ।
स्वानुग्रहं निरुपमं विदधे स एव त्राता गिरिविजयते तदलं भयेन ॥ ६२ ॥
क्षुत्क्षुब्धकुक्षिरखिलोऽपि किलात्र लोकः कुप्यत्यनाप्तविहिताशनभागभोगः ।
तत्किं वृषोपरिरुषा मम यज्ञभाजोऽप्राप्ताशनस्य भृशमस्य तु युक्तमेव ॥ ६३ ॥
यद्यप्युक्तमयुक्तमेतदमराधीशेन कार्यं तथाप्येतैः कीर्तिकरैः कथं नु सरसैरङ्गीकृतं प्रेमतः ।
प्रायो वृद्धदशाऽत्रहेतुरथवा के नाप्प्रगल्भां स्थितिं पृष्ट्वैवोत्पथगामिनीमतिजडात्मानः कृता नीरदाः ॥ ६४ ॥

तत्र प्रतिविधिमिति : १०.२५.१६.

प्रागपि विधिर्न चैतैर्दृष्टो मद्वचनदत्तविश्वासैः । प्रतिविधिचिन्तनकथनं न युक्तमिति स स्वयं ह्यचिन्तयत ॥ ६५ ॥
विध्युत्पादयितुर्मे प्रतिविध्युत्पादनं न यत्नसहम् । भविताऽस्यपरं प्रथमात्स्वः स्थितिरिव भूर्धस्थितिस्त्वरमात् ॥ ६६ ॥
शान्तः सद्धिषणः सदध्वविहृतिर्नित्यं सुधर्माश्रितः पूज्यः श्रीपतिनापि गौरवधिया सभ्यैः सदाभ्यर्हितः ।
वीरो वैरिनिकृन्तनोऽपि भुवने निन्दां शचीशोऽप्यगादेकोक्छृङ्खलधीजडाश्रयशशात्तत्रान्यवार्त्ता तु का ॥ ६७ ॥
आलोच्यवं नाप्रगल्भस्य सङ्गं कुर्याद्धीमान् मत्पदप्राप्तिकामः इत्थं स्वीयान्बोधयन्नब्दवाहे शक्रे चक्री वक्रदृष्टिं स चक्रे ॥६८॥ (युग्मम)
स्वस्थोऽहमस्मि सदयानुजनुप्रसादाद् विस्मृत्य चैवमतुलस्मयसम्भृतात्मा ।
स्वातन्त्र्यमेव मनुते यदसौ स्वसौख्ये तन्मौढ्यमस्य परिहृत्य विवेचनीयम् ॥ ६९ ॥
यत्प्राग्भुक्तमनेन हव्यमृषिभिर्दत्तं स्मयान्मामनादृत्यातः कुतुकान्मया प्रतिविधिः क्लृप्तोऽपि यज्ञात्मकः ।
एतेनेदृश एव तत्प्रतिविधिः क्लृप्तोऽखिलानिष्टकृत् तन्मौर्ख्यस्य मदस्य पात्रमपरो नातः: परः स्यात् क्वचित् ॥ ७० ॥
आस्तां मूर्खकथाऽधुना प्रतिविधिं संसाधयेऽहं तथा स्यात्सौख्यं व्रजवासिनां जडधियोऽस्यापि प्रकामं यथा ।
आलोच्यैवमचिन्तयद् गिरिवरोद्धारप्रकारं प्रभुर्नोचेद्विप्रकृतापकारशमने सम्यक्त्वचिन्ता कुतः ॥ ७१ ॥

गुरुत्वान्नाशार्हो न स भवति मेघोऽप्यविकलो जगज्जीवातुत्वाच्चरणशरणस्त्वेष हि जनः ।
इति ध्यात्वा स्वीयाभयदविरुदः सर्वसमदृक् कृपालुस्तत्रैषोत्प्रतिविधिमसौ पर्वतधृतिम् ॥ ७२ ॥
अचलोद्धरगे धृतावतारो यदुदासीनतया स्थितोऽत्र काले प्रतनं सुयशोऽपि मे निमज्जेत्समभेतैरिति तत्प्रभुस्तथैषीत् ॥ ७३ ॥
क्षमागतोहं यदतो करिष्ये क्षमागतो ह्येव जलौघशान्तिम् । स्यात्तेन रक्षा व्रजशक्रयोरित्यात्माशयाददिद्रधृतिं समैषीत् ॥ ७४ ॥

कृष्णप्रिया

हे कृष्ण ? हे कृष्ण ? हे महाभाग ! आपके भाग्य से ही हम हतभागियों की रक्षा होगी, हे नाथ आप ही इस गोकुल के नाथ हो ! हे प्यारे श्रीकृष्ण ? आप भक्तवत्सल है, अब आप कोपित वाक पति इन्द्र से हमारी रक्षा करें ॥ १३ ॥ सारे गोकुल को शिलाओं की सतत अविच्छन्न भयानक वृष्टि से दुःखित, दीन और अचेतन से सबको देखकर, समझदार भगवान श्रीहरिने जात लिया कि यह सारा करतूत क्रुद्ध इन्द्र का ही है ॥ १४ ॥ भगवान् श्रीकृष्ण ने कहा कि—हे व्रजजन ? हम सब ने राजा इन्द्र के वार्षिक यज्ञ का अवरोध किया इससे क्रुद्ध इन्द्र प्रचण्ड आँधी के झोंके और विशाल शिलाओं की बौछारों वाली विना मोसम की घोर वृष्टि से व्रज को नष्ट कर देने के लिये सक्रिय बना है ॥ १५ ॥ आप लोग चिन्ता न करें, मैं अभी मेरी दिव्य शक्ति से उसका पूर्ण प्रतिकार कर रहा हूँ । ये इन्द्रादि देव लोग मोहवश अपने को स्वतन्त्र सर्वेश्वर मानकर व्यर्थ अभिमान कर रहे हैं । मैं अभी इन लोगों का ऐश्वर्य और धन का घमण्ड एवं अज्ञान को चूर चूर कर दूँगा ॥ १६ ॥

न हि [1]सद्भावयुक्तानां सुराणामीशविस्मयः । [2]मत्तोऽसतां मानभङ्गः प्रशमायोपकल्पते[3] ॥ १७ ॥
तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् । गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ॥ १८ ॥
इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलम् । दधार लीलया [4]कृष्णश्छत्राकमिव बालकः ॥ १९ ॥
अथाह भगवान् गोपान् हेऽम्ब तात व्रजौकसः । यथोपजोषं विशत गिरिगर्तं सगोधनाः ॥ २० ॥

कर्दमक्षमा

अन्वयः—मद्भावयुक्तानाम् सुराणाम् ईशविस्मयः न हि, मत्तः असताम् मानभङ्गः प्रशमाय उपकल्पते ॥ १७ ॥ तस्मात् गोष्ठम् मत्शरणम् मन्नाथम् मत्परिग्रहम्, आत्मयोगेन गोपाये, सः अयम् मे व्रत आहितः ॥ १८ ॥ कृष्णः इति उक्त्वा एकेन हस्तेन गोवर्धनाचलम् कृत्वा, बालकः छत्राकम् इव लीलया दधार ॥ १९ ॥ अथ भगवान् गोपान् आह, हे अम्ब ! हे तात ! हे व्रजौकसः सगोधनाः यथा उपजोषम् गिरिगर्तम् विशत ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु देवाः सात्त्विकास्त्वद्भक्ताश्च कुतस्तेषां तमस्तत्राह । न हीति । सद्भावः सत्त्वं मद्भक्तिर्वा तद्युक्तानां सुराणामीश वयमिति विस्मयो गर्वो हि यस्मान्न घटतेऽतोऽसंतस्ते । किं च तेषां मानभंगोऽनुग्रह एवेत्याह । मत्त इति ॥ १७ ॥ गोपाये रक्षिष्यामि । किं च सोऽयं मे मया व्रतो नियमः संकल्पो वा आहितो धृत इत्यर्थः ॥ १८ ॥ कृत्वा उत्कृत्य । छत्राकमुच्छिलींध्रम् ॥ १९ ॥ यथोपजोषं यथासुखम् ॥ २०-२१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गोपा आशंकंते नन्विति । असत्सु दण्डमाह—किञ्चेति । तेषाम् असताम् त्यक्तसत्त्वस्वभावानाम् । मत्तः मत्सकाशात् प्रशमाय गर्वाभावाय ॥ १७ ॥ यस्माद्गोष्ठ मच्छरणं तस्मात् गोपाये इति । आत्मनेपदमार्षम् । अहं शरणं रक्षिता यस्य तत्तथा । मां नाथते 'कृष्णकृष्ण महाभाग' इत्येवं प्रार्थयते रक्षार्थमिति मन्नाथम् 'नाथृ—याञ्चादिषु' । अहं परिग्रहो मूलं यस्य तत्तथा । "पत्नीस्वीकारशपथमूलेष्वपि परिग्रहः" इति यादवः । यद्वा—"महिषी च सुतो भ्राता मातुलः श्यालकस्तथा । मंत्री दूतश्च सेना च सर्व एते परिग्रहाः ॥" इति वररुचिकोशान्मम परिग्रहा मत्परिग्रह इति तत्पुरुषो वा । अत्र "प्रकृतेर्विकृतेर्वापि ह्येकदा प्रतिपादने प्रकृतेर्वाचकः संख्यां गृह्णाति विकृतेर्न तु ॥" इति न्यायस्यानियतावमपि बोध्यते । रक्षणे निजदार्ढ्यमाह—किं चेति । सोऽयम् व्रजरक्षणरूपः । नियमः अपरित्याज्यधर्मः । नियमत्वे प्राग्वर्षपीडा कुतो न वारितेत्याशंकासंभवादाह—संकल्पो वेति । इदानीमेव संकल्पितः । इत्यर्थ इति । धारितो न तु स्थापित इति । आदधातेः स्थापनार्थत्वस्याधानादिपदे प्रसिद्धत्वादिति भावः । यद्वा—सः मद्बुद्धिस्थः । अयम् प्रत्यक्षभूतो गोवर्द्धन एव मे व्रतो जयस्तंभ आहितः स्थापित इत्यर्थः । "संकल्पे विजयस्तंभे नियमे च व्रतः स्मृतः" इति धरणिः ॥ १८ ॥ उत्कृत्य उद्धृत्य 'कृती—छेदने' । "शिलींध्र कंदलीपुष्पे करके ना झषांतरे । द्रुभेदे स्त्री तु विहगी-

---

१. मद्भा—वीर, विज. । २. मत्तः सतां—विज. । ३. पद्यते—विज. । ४. विष्णुः—विज. ।

गंडूपदीमृदोः ॥'' इति मेदिनी । इति इत्थम् ॥ १९ ॥ अथ पर्वतधृतेरनु । हेऽम्बेति विकल्पेन प्रकृतिभावः । ननु क्रोशत्रयमात्रस्य गोवर्द्धनस्य तले सर्वव्रजस्थाः कथं मांतु । तत्रेदमवधेयम्—भगवत्पाणिस्पर्शानंदादेव लब्धाचिंत्यौजसा श्रीगोवर्द्धनेन क्रुद्धेंद्रक्षिप्तकुलिशशतघातमपि स्वपृष्ठे कुसुमहारप्रहारमिवानुभवता तथा सम्यगवबुध्यते यथा योजनचतुष्टयप्रमाणव्रजनगरस्थजनाः पशवश्च स्वतलयथावकाशमेव निवासयामासिरेऽत एवोक्तं हरिवंशे भगवता–''शैलोत्पाटेन भूरेषा महती निर्मिता मया । त्रैलोक्यमप्युत्सहेत रक्षितुं किं पुनर्व्रजम् ॥'' इति । किञ्च, गोवर्द्धनोपरिष्ठानां मृगवराहादीनां पशूनां पक्षिणाञ्च 'स धृतः संगतो मेघैः' इति हरिवंशोक्तेस्तन्नितंबारूढान्वर्षतो मेघानालक्ष्य तदूर्ध्वश्रृंगाण्यारोहतां न तिलमात्रमपि कष्टमभूदिति ज्ञेयमिति विश्वनाथः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

असतां श्रीमदेन दुश्चेष्टितानाम् अन्यत्तैः । यद्वा, श्रीमदं हरिष्य इत्यत्र हेतुमाह—हि यतः सुराणां ईशोऽहमिति विशेषेण स्मयो गर्वो नोपकल्पते योग्यो न भवति यतः सद्भावयुक्तानाम् अतः श्रीमदेनासतामपि तेषां हितमेव करिष्यामीत्याह—मत्त इति । नान्यतः मदैश्वर्यस्फूर्त्तावेव तादृशयोग्यत्वादिति भावः ॥ १७ ॥ यस्मान्ममात्मनिर्विशेषत्वेनास्मच्छन्दक्रोडीकृतानां मत्पित्रादिगोष्ठवासिनां नाशायेन्द्रो वर्षति तत्र च प्रतिविधिं सम्प्रत्येव साधयिष्यामि तत्र चानुषङ्गितया लोकेशमात्राणां तमो हरिष्ये तच्च युक्तं तस्मात् अहमेव तदिदं गोष्ठं स्वात्मयोगेन असाधारणस्वाभाविकप्रभावेन गोपाये सम्प्रत्येव गोपयिष्यामि न केवलं सम्प्रत्येव किन्तु सः पूर्वपूर्वसिद्धः अयं गोष्ठस्य गोपनरूपो मम व्रतो नियम एवाहितः सम्यक् धृतो विहित इत्यर्थः । कीदृशं गोष्ठं ? तत्राह अहमेव शरणं रक्षिता यस्य तत् यतोऽहमेव नाथ ईश्वरो यस्य तत् । किञ्च, मम परिग्रहं कुटुम्बम् अतोऽकृत्येनापि रक्ष्यमित्यर्थः—

''वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः । अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्'' ॥ इतिवत् ।

यद्वा, मम शरणम् आश्रयं मम नाथं परिपालकं कुतः अहमेव परिग्रहो धनपुत्रदारादिसर्वं यस्य तत् मदेकप्रियमित्यर्थः । अतो गोपाये इति वर्त्तमानप्रयोगेन स्वाभाविकत्वं व्यञ्जयति अत आत्मयोगेनेत्युक्तम् । अतः सोऽनादिसिद्धोऽयं सम्प्रत्यपि प्राप्त इति दर्शितं तत्र हेतुः ये मम नित्यनराकृतिलीलस्येश्वरस्येति व्रतः प्रतिज्ञा आहितः सर्वांशेन धृतः तदेवमिन्द्रस्य मच्छरणत्वादिविरुद्धधर्मवन्मच्छरणादिरूपगोष्ठवासिनां विरोधाय प्रवृत्तत्वान्मानभङ्गोऽपि गोष्ठवासिगोपनाय योग्य इति विवक्षितम् ॥ १८ ॥ इत्युक्त्वेति । महामेघारम्भादेव गोवर्द्धननिकटे सर्वेषामानयनमवगम्यते एकेन वामेन सव्येन पाणिनेति हरिवंशोक्तेः कृत्वा छित्वेति मूलतोदूर्ध्वतश्च ज्ञेयं मानसगङ्गाया उत्तरतो विच्छिन्नत्वात् तेषां संरक्षणार्थाय धृतो गिरिवरो मया सोऽन्नकूट इति ख्यातः ''सर्वतः शक्रपूजितः'' इति वाराहप्रसिद्धस्य तस्य भागस्याद्यापि पृथक् प्रसिद्धेः न कथमपि कदाचिदपि चलतीत्यचलपदश्लेषः लीलया अनायासेन–यद्वा, कटितटे दक्षिणश्रीहस्तन्यासादिभङ्गीविशेषेण दधार तथैव प्राचीनश्रीमूर्त्तिदर्शनात् यतो बालकश्छत्राकमिव बाल्यलीलानतिक्रमेणैवेत्यर्थः । एवमनायासोऽपि दर्शितः ननु, बालमूर्त्तेस्तद्धारणादिसंनिवेशः कथं घटते ? तत्राह—विष्णुः अचिन्त्यशक्त्या तत्तद्रूपत्वेऽपि विभुः कृष्ण इति पाठेऽपि स एवार्थः तथैव हि सहस्रनामस्तोत्रे ''अनिर्देश्यवपुः श्रीमानमेवात्मा महाद्रिधृक्'' इति । अतो यथेच्छमेव पर्वतादीनामुच्चपदादिस्थितिर्जातेत्यर्थः । ततः श्रीवैशम्पायनोक्तिरपि घटते ''स धृतः सङ्गतो मेघैः'' इति तथा ''आप्लुतोऽयं गिरिः पक्षैरिति विद्याधरोरगाः । गन्धर्वाप्सरसश्चैव वाचो मुञ्चन्त सर्वशः'' इति । तच्च श्रीगोवर्द्धनश्रृङ्गाग्रैर्मेघवर्गोद्घट्टनक्रीडार्थमेवेति ज्ञेयम् तत्र व्रजकर्तृकदर्शनसौकर्याय श्रीकृष्णकर्तृकधारणसौकर्याय शोभाविशेषाय चेदं कल्पते उत्थापनसमये लीलाशक्त्यानुकूल्येन पर्वतमध्याधोभागात् विच्छिद्य कुट्टिमायमानो महाशिलासमुच्चय एको मध्यगर्त्ते स्थितः यं शिलासमुच्चयमारुह्य यं निम्नं पर्वतमध्यदेशं श्रीहस्तेन विष्टभ्य च सुखं दधारेति अत्र गर्त्तमध्ये बहिर्जलपतनागमननिवारणादिसमाधानशतमपि लीलाशक्त्यानुकूल्येनैव ज्ञेयम् तथाच श्रीहरिवंशे ''स धृतः सङ्गतो मेघैर्गिरिः सव्येन पाणिना । गृहभावं गतस्तत्र गृहाकारेण वर्चसा'' इति एवं वामकरेण लीलया तद्धारणं वस्तुतः निजजीवनानपेक्षया तदेकसुखापेक्षकाणां व्रजजनानां तेषां स्वीयाश्रमबोधनेन सुखार्थमेव अन्यथा तेषां सर्वनाशतोऽपि महादुःखापत्तेः एवमन्यच्च तस्य सर्वमेवोह्यम् ॥ १९ ॥

हे अम्बेति मातुरादौ सम्बोधन स्नेहविशेषेण पुत्रहेतुकेन्द्रक्रोधवृष्टिदृष्ट्या तया वा पुत्रदुःखशङ्कया चिन्ता दुःखाकुलायाः सान्त्वनेच्छया च । ततश्च हे तातेति स्नेहानुक्रमात् तस्य प्रवेशे सत्येव तस्याः प्रवेशाच्च उपलक्षणञ्चैतत् श्रीरोहिण्यादीनां हे व्रजौकसो यथोपजोषमिति यथा व्रजे वासस्तथैवात्रापि सम्पत्स्यत इति भावः । ननु, ''मध्ये योजनविस्तारं तावद्विगुणमायतम्'' इति श्रीहरिवंशे व्रजविस्तारस्य वर्णितत्वात् कथं गोवर्द्धनगर्ते व्रजो माति ? उच्यते; तस्याचिन्त्यशक्त्या महत्त्वापत्तेरिति तथाच हरिवंशे तेनैवोक्तं ''शैलोत्पाटनभूरेषा महती निर्मिता मया । त्रैलोक्यमप्युत्सहते रक्षितुं किं पुनर्व्रजम्'' इति । गिरेर्गर्त्तं तन्मूलोत्पाटनभूभागं गर्त्त एव समाह्वानञ्च वाताद्यावरणापेक्षया गावः पशव एव धनानि । यद्वा, गावो धनानि चान्यानि तत् सहिताः तदेवं सर्वव्रजवासिनां तत्पश्चादेवावगतत्वं तद्वचनस्य च सर्वसुश्रवत्वं ध्वनितम् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

असतां श्रीमदेन दुश्चेष्टितानाम्, अन्यत्तैर्व्याख्यातम्। यद्वा, श्रीमद हरिष्य इत्यत्र हेतुमाह—हि यतः सुराणामीशोऽहमिति विशेषेण स्मयो गर्व्वः, नोपकल्पते योग्यो न भवति, यतः सद्भावयुक्तानामतः श्रीमदेनासतामपि तेषां हितमेव करिष्यामीत्याह—मत्त इति। प्रशमाय प्रकृष्टः शमः शान्तिः सुखं वा, किंवा (भा० ११।१९।३६) 'शमो मन्निष्ठता बुद्धेः' इति श्रीभगवदुक्त्या तन्निष्ठबुद्धिता तस्मै भवति। असतामिति शक्रदुश्चेष्टिताभिप्रायेण ॥ १७ ॥ अहमेव शरणं रक्षिता यस्य तत्, यतोऽहमेव नाथ ईश्वरो यस्य तत्, अन्यथा ममैवैश्वर्य्यहानिः; किञ्च; मम परिग्रहं कुटुम्बम्, अतोऽकृत्येनापि रक्ष्यमित्यर्थः। यद्वा, मम शरण आश्रयम्, मम नाथं परिपालकम्, कुतः ? अहमेव परिग्रहो न पुत्रदारादिसर्व्वं यस्य तत् मदेकप्रियमित्यर्थः। स्वेषु निमित्तेषु, यद्वा, सुशोभन ऐश्वर्य्यविशेषसम्वलितलौकिकलीलामयो य आत्मयोगो निजशक्तिविशेषस्तेन रक्षामि। ननु तेनात्रैश्वर्य्यविशेषप्रकटः स्यात्, तत्राह—सोऽयमिति। अन्यथा 'सकृदेव प्रपन्नो यः' इत्यादिव्रतभंगापत्तिः; यद्वा, व्रतः प्रतिज्ञा मे मया आहितो दृढं धृत इत्यर्थः; एतच्च गोपादीनामाश्वासनार्थं महावीरदर्पोद्घाटनं ज्ञेयम् ॥ १८ ॥ एकेन वामेन, (विष्णु० प० १८।३१) 'सव्येन पाणिना' इति हरिवंशोक्तेः, तथैव श्रीमूर्त्त्यादिदर्शनाच्च, गोवर्द्धनं स्वनाम्नैव महाद्रिवर्गेषु प्रसिद्धम्; यद्वा, गवां हितकृत्येन विख्यातम्, न कथमपि कदापि चलतीत्यचलः, तञ्च तञ्च, लीलया अनायासेन; यद्वा, कटितटे दक्षिणश्रीहस्तन्यासादिभंगीविशेषेण दधार, यतो बालकः कलितवाल्यः श्रीनन्दकुमारो वा यो विष्णुः, स इति तद्धारणेऽपि बाल्यलीलाद्यनतिक्रमः, तेन च बाल्यलीलाविशेष एव दर्शितः। विश्वं व्याप्नोतीति विष्णुरिति प्रयासो निरस्त एव; यद्वा, बालकः कश्चिद्यथा छत्राकमिति तथापि स एवार्थः। तत्र च छत्राकमित्यनेन यथैकहस्तेन छत्राकस्य मूलदण्डधारणेन सर्व्वस्य धारणं स्यात्, तथा श्रीगोवर्द्धनस्य मूलैकभागधारणेन सर्व्वस्यैव तस्य धारणं वृत्तमिति बोधितम्। श्रीवैशम्पायनेन त्वभिप्रेतं जनैरलक्ष्यमाणेन बृहदाकारेण सता तेनाय धृत इति, तथा च हरिवंशे (विष्णु० प० १८।३१)—'स धृतः संगतो मेघैः' इति तथा (विष्णु० प० १८।३७) 'अप्लुतोऽयं गिरिः पक्षैरिति विद्याधरोरगा गन्धर्व्वाप्सरसश्चैव वाचो मुञ्चत सर्व्वशः ॥' इति। अन्यथा सूक्ष्मनिजकरेण धारणे स्वल्पमात्रोच्चताप्राप्तौ तत्तदुक्त्यसंगतेः; तच्च श्रीगोवर्द्धनशृंगाग्रैर्मेघवद्गोघट्टन-क्रीड़ार्थमेवेति ज्ञेयम्। एवं वामकरेण लीलया तद्धारणम्, वस्तुतो निजजीवनानपेक्षया तदेकसुखापेक्षकाणां व्रजजनानां तेषां स्वकीयाश्रमबोधनेन सुखार्थमेव, अन्यथा तेषां सर्व्वनाशतोऽपि महादुःखापत्तेः; यद्वा, गोवर्द्धनोच्चतयैव तथात्वम्, श्रीविग्रहस्य तु न बृहत्त्वम् एवमन्यच्च तस्य सर्व्वमेवोह्यम् ॥ १९ ॥ अथ गोवर्द्धनधारणानन्तरमाहेति—स्वस्य सम्यगप्रयास एव द्योतितः, अन्यथा सम्भाषणाशक्तेः। हे अम्बेति मातुरादौ सम्बोधनं स्नेहविशेषात्; यद्वा, पुत्रहेतुकेन्द्रक्रोधवृष्टिदृष्ट्या, तया वा पुत्रदुःखशंकया चिन्तादुःखाकुलायाः सान्त्वनार्थम्। ततश्च हे तातेति तस्य प्रवेशे सत्येव तस्याः प्रवेशात्; यद्वा, सर्व्वगोष्ठार्त्तिव्यग्रस्य तस्याश्वासनार्थम्; यद्वा, तयोः प्रवेशे सत्येव सर्व्वेषामन्येषां प्रवेशसिद्धेरादौ पृथक् तयोः सम्बोधनम्। हे व्रजौकस इति यथा व्रजे वासोऽत्रापि तथैव सम्पत्स्यत इति भावः। यथोपजोषं स्वस्वप्रीत्यनुसारेणेति तद्गर्त्तस्यासंकीर्णतादिकं बोधितम्; तथा च श्रीहरिवंशे (विष्णु० प० १८।५६) तेनैवोक्तम्—'शैलोत्पाटनभूरेषा महती निर्म्मिता मया। त्रैलोक्यमप्युत्सहते रक्षितुं किं पुनर्व्रजम् ॥' इति गिरेर्गर्त्तं तन्मूलोत्पाटन-भूभागम्। गाव एव धनानि; यद्वा, गावो धनानि चान्यानि रत्नस्वर्णरजतादि-द्रव्याणि तत्सहिताः; गोशब्देन सर्व्व एव पशवो लक्ष्यन्ते ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मद्भावयुक्तानां मयि भावबन्धयुक्तानाम् ॥ १७–२५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु उपेन्द्रादिरूपेण तद्रक्षणशीलः कथं तदनर्थोद्युक्तः ? इत्यपवादशङ्कया स्वयमेव सोपपत्तिकं तत्समाधातुमाह—नहीति। मद्भावयुक्तानां मयि भक्त्यात्मकभावबन्धयुक्तानां सुराणां सत्त्वप्रचुराणाम् ईशा वयमिति विस्मयो गर्वो न हि नास्त्येव अथापि प्रकृतिवशात् कदाचिदसज्ज्ञानानामीशविस्मयवतामसतां तेषां मानभङ्गः ईशविस्मयभङ्गः प्रशमायवोकल्पते तद्रक्षैकशीलस्य मम तन्मानभङ्गद्वारा तदुपशान्त्युपयुक्तोद्योग उचित एवेति भावः ॥ १७ ॥ तस्मात् तदुद्योगस्य सूचितत्वात् गोकुलस्य शरणागतत्वाच्चाहमेव नाथो रक्षिता यस्य अहमेव रक्षणोपायो यस्य अहमेव परिग्रहः शरण्यः प्राप्यो यस्य तद्गोष्ठं स्वात्मयोगेन स्वसामर्थ्येन गोपाये रक्षेयं सोयं शरणागतरक्षणमद्भक्तविस्मयभङ्गरूपो व्रतो मया आहितः धृतः ॥ १८ ॥ इति इत्थमुक्त्वा एकेनैव हस्तेन गोवर्द्धनाचलं कृत्वा उत्कृत्य उत्पाट्येति यावत् सप्तवर्षः विष्णुः श्रीकृष्णः लीलया शिलीन्ध्रमिव दधार वामकरकनिष्ठिकानखाग्रेण दधारेत्यर्थः ।१९। अथ धारणानन्तरं भगवान् गोपानाह, उक्तिमेवाह—अम्बेत्यादिना तथेत्यतः प्राक्तनेन। हे अम्ब ! हे तात ! हे व्रजौकसः ! यथासुखं सगोधनाः सर्वे यूयं गिरिखातं निर्विशत ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अज्ञानहरणेन किं प्रयोजनमित्याशङ्क्य संसारबन्धननिमित्ताहङ्कारनाशनार्थमित्याशयेनाह—नहीति। मद्भावयुक्तानां मद्भक्तियुक्तानाम् इत्थमर्थश्चेत्पाठोऽप्येवं किं न स्यादिति चेन्न भक्तिशब्दार्थविवरणार्थत्वात् तथाहि भावो लीलाक्रिया चेष्टाभक्त्या-

दिष्वर्थेषु भावशब्दप्रवृत्तेः भगवल्लीलादिमत्त्वप्रदर्शनेन सर्वकालम्भगवत्येव मनोवृत्तिरिति प्रकाशनेन भक्तेस्तिमितत्वमुक्तं स्यादिति ईशोऽहमिति स्मयोऽत्युल्बणदर्पो नहि सतां स्वभावमाह—मत्त इति । प्रशमाय प्रकृष्टमन्निष्ठायै ॥ १७ ॥ ममायं जयस्तम्भ इत्याह—तस्मादिति । अहमेव परिग्रहो मूलं यस्य स तथा पत्नीस्वीकारशपथमूलेष्वपि परिग्रहः इति व्रतो नियमो जयस्तम्भः गोपाये पालयामि ॥ १८ ॥ कृत्वा उन्मूल्य "कृती च्छेदने" छत्राकं शिलीन्ध्रं यथोपजोषं यथासुखं गर्त्तं विलम् ॥ १९–२० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गोपाय इति वर्त्तमानप्रयोगेन स्वाभाविकत्वं व्यञ्जयति ॥ १८–२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नच्चैवमिन्द्रायातिक्षुद्राय अतिक्षोदीयसेऽहं स्पर्द्धे किन्तु तस्य मद्भक्तस्योद्भूतं दोषमेव कृपयैव चिकित्सन्नस्मीत्याह नहीति । सद्भावः सत्त्वं मद्भक्तिर्वा तद्युक्तानां सुराणामीशा वयमिति विशिष्टः स्मयो गर्वो हि यस्मान्न घटते तस्मात् सम्प्रति असन्मार्गे स्थितत्वादसतां तेषां मानस्यादरस्य भङ्ग एव प्रशमाय गर्वरोगस्योपशान्त्यै ॥ १७ ॥ किञ्च, यतस्तत्कृतमिदमत्र सङ्कटमुपस्थितं तस्माद्गोपाये मम शरणं गृहरूपं "शरणं गृहरक्षित्रोः" इत्यनेकार्थवर्गः । गृहस्यास्याहमेव नाथ इत्याह—मन्नाथं मम परिग्रहाः पितृभ्रातृप्रेयस्यादयो यत्र तत् न केवलमस्मादेव सङ्कटाद्गोपाये अपि तु सर्वस्मादपि सङ्कटान्महाप्रलयकालादपीत्याह—स प्रसिद्धोऽयं व्रतो नियमो मे मया आहितो गृहीतः ॥ १८ ॥ इति स्वगतमुक्त्वा एकेन हस्तेनेति वामेनैव यदुक्तं हरिवंशे "स धृतस्सङ्गतो मेघैर्गिरिः सव्येन पाणिना । ग्रहभावं गतस्तत्र गृहाकारेण वर्चसा" इति छत्राकं शिलीन्ध्रमिव दधारेति दिधीर्षासमये योगमायांशभूतया संहारिकया शक्त्या तावत्यपि वृष्टिराकाश एव तथा सञ्जहे यथा स्वगृहालिन्दादतिवेगेन गोवर्द्धनमुद्धर्त्तुमभिद्रुतवतो भगवत उष्णीषादिवासांस्यपि नातिस्तिमितानीति ज्ञेयम् ॥ १९ ॥ यथोपजोषं यथा सुखम् । ननु, क्रोशत्रयमात्रस्य गोवर्द्धनस्य तले सर्वव्रजस्थाः कथं मान्तु ? उच्यते भगवत्पाणिस्पर्शानन्दादेव लब्धाचिन्त्योजसा श्रीगोवर्द्धनेन कुपितेन्द्रप्रक्षिप्तकुलिशशतघातमपि स्वपृष्ठे कुसुमहारमिवानुभवता तथा सम्यगबुद्ध्यत यथा योजनचतुष्टयप्रमाणव्रजनगरस्था जनाः सर्वे एव गवादिपशवश्च स्वतले यथावकाशमेव निवासयामासिरे अत एव हरिवंशे भगवतोक्तम्—

"शैलोत्पाटनभूरेषा महती निर्मिता मया । त्रैलोक्यमप्युत्सहते रक्षितुं किं पुनर्व्रजम्" ॥ इति ।

किञ्च, गोवर्द्धनोपरिस्थानां हरिणवराहादीनां पशूनां पक्षिणां च "सधृतः सङ्गतो मेघैः" इति हरिवंशोक्तेस्तन्नितम्बारूढान् वर्षतो मेघानालक्ष्य तदूर्ध्वशृङ्गाण्यारोहतां न तिलमात्रमपि कष्टमभूदिति ज्ञेयम् ॥ २०–२१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

"यत्सत्त्वतः सुरगणाः" इति शास्त्रात् सद्भावयुक्तानां सत्त्वगुणयुक्तानामीशा वयमिति विस्मयो गर्वो न घटते हि यदि तत् सहचरयो रजस्तमसोरपि वृद्धिर्दैवात्स्यात्तदा सात्विका अपि असन्तो भवन्ति तेषामसतां मत्तो मानभङ्गो युक्त एव स च प्रशमाय पुनः सद्भावाय कल्पते योग्यो भवति ॥ १७ ॥ शोभनेन आत्मयोगेन स्वसामर्थ्येन गोपाये रक्षिष्यामि सोऽयं शरणागतरक्षणरूपो व्रतः मे मया आहितः धृत इत्यर्थः ॥ १८ ॥ द्वाभ्यां हस्ताभ्यां कृत्वा उत्कृत्य उत्पाट्य छत्राकं शिलीन्ध्रमिवैकेन हस्तेन दधारेत्यन्वयः—

"दोर्भ्यामुत्पाटयामास कृष्णो गिरिरिवापरः" इति । "दधारैकेन हस्तेन शैलं प्रियमिवातिथिम्" ॥

इति च हरिवंशे ॥ १९ ॥ यथोपजोषं यथावकाशं गिरिगर्त्तं गिरिखातम् ॥ २०–२१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स कस्त्वं कः कुतस्तन्मदहरणं हर इत्यत आह ॥ न हीति । मद्भावयुक्तानामिदानीमनङ्कूरणेऽपि भक्तियुक्तताऽनपोहादेवमुक्तिः । सुराणामीश इति विस्मयो गर्वो न हि युक्तो न मत्तो मत्सतां मानभङ्गो मानहानिः प्रशमाय । बुद्धिर्मन्निष्ठतायै उपपद्यते ॥ १७ ॥ मच्छरणमहमेव रक्षयिता यस्य तन्मन्नाथं मया परिग्रहो मदीयतया स्वीकारो यस्य तद्गोष्ठमगेन पर्वतेन गोपये रक्षामि । इत्याहितोऽयं स्वात्मने इति नः स्वात्मानं याति गच्छतीत्यात्मयो मयि सर्वदा विद्यमान इत्यर्थः । एतेनाहित इत्यस्यारोपित इत्ययं भ्रमो वारित इति ज्ञेयम् । यमो व्रतमस्त्री तच्चोपवासादिपुण्यकमित्यमरात्पुल्लिङ्गोऽपि व्रतनियम इत्यर्थो वा मे व्रते नियमे सति कृते सोऽयं समय आहितः सम्यगागतोऽव्रते इन्द्रयागेऽननुष्ठिते सोऽयमाहित इति वा ॥ १८ ॥ इत्युक्त्वा व्रजजनं प्रत्येकेन हस्तेन गोवर्धनाचलं कृत्वोत्कृत्य । ह्रस्वान्तोऽपि धातुस्ततो नुम् । बालकश्छत्राकमुच्छिलीध्रमिव लीलया दधार । गिरि मद्वचने सति ॥१९॥ अथ गिरिधारणानन्तरं हे अम्ब हे तात हे व्रजौकस इति गोपानाह । यथासुखं सगोधना गर्तं विशत ॥ २० ॥

श्रीसुबोधिनी

ननु किं तदज्ञानहरणेनेत्यत आह **न हीति, मद्भावः** शुद्धसत्त्वं देवत्वं वा पूज्यत्वमैश्वर्यं वा, षण्णां यत्र स्थितिस्तत्राज्ञानं न तिष्ठेदित्यन्यथा स न **मद्भावः** स्यात्, भक्तिस्तु नात्र विवक्षिता **विस्मयसामानाधिकरण्याभावादत** ऐश्वर्यसत्त्वादेरज्ञानसहकारित्वं न युक्तमित्युभयोरप्यन्यतरनिराकरणे कृपालुत्वात् तम एव हरिष्ये, ईशा वयमिति **विशेषेण स्मयो** गर्वो न हि लोकेपि भवति जाते वा सोधिकारी स्थाप्यते, लोकन्यायेन त्वकरणं कृपालुत्वादेवाक्लिष्टार्थं च, ननु मानभङ्गापेक्षयाधिकाराभाव एव **श्रेष्ठं** इति चेत् तत्राह **मत्तोसतामिति**, यद्ययं **मानभङ्गो**न्यतः स्यादयुक्तं स्याल् लज्जाकरश्च **भवेन् मत्तः** सर्वेश्वरान् **मानभङ्ग** उचित एव नात्यन्तं लज्जाकरः, यद्यप्येक एवेन्द्रस्तथा भवेत् तदा निराकर्तव्यः स्यात् सर्व एव तथा जाता इति **प्रधानशिक्षया सर्व एव शिक्षणीयाः**, तदाहा**सता**मिति, सर्व एव लोकपाला असन्तो जाता इति, अन्यथान्योप्येतादृश एव स्यात् ततोनवस्था भवेत्, तस्माद**सतां मानभङ्ग** एकद्वारा कृतः सर्वेषामेव **प्रशमाय भवत्युप** समीपे **च कल्पते** शीघ्रं च भवति, प्रत्येककरणे बहु कर्तव्यं स्यात्, एतद् राजमन्त्रणम् ॥ १७ ॥ नन्वेतेभ्य एव आवश्यकत्वाल्लाघवादिदानीमेव **कथं न मुक्तिर्दीयते मानभङ्गस्तु प्रकारान्तरेणापि** भवति गोवर्धनस्य तूद्धरणमलौकिकं ज्ञानोपदेशो वा कर्तव्योलौकिकं सामर्थ्यं वा देयं बृहस्पतिद्वारेन्द्रो वा निवारणीयोत एतावति प्रकारे सति गोवर्धनोद्धरणमेव कुतः क्रियत इत्याशङ्क्याह **तस्मादिति, अहमेव शरण यस्य नापि ज्ञानं नापि भक्तिरन्यथावतारप्रयोजनं न स्यात्, पुष्टिमार्गश्च न भवेत्**, तत्रापि **गोष्ठं**, न हि गाव उपदेशयोग्याः, इदानीं तु मुक्तिर्भक्तिमार्गविरोधिनी, तदाह **मन्नाथमिति**, अहमेव **नाथः** स्वामी यस्यातः स्वामिसेवकभावनाशकत्वात् नेदानीं मुक्तियुक्ता, किञ्च **मत्परिग्रहमिति, मम परिग्रहो** यत्र मया सर्वे सङ्गाता एव **परिगृहीता**स्तत्र यद्येकोप्यंशो गच्छेत् तदा प्रतिज्ञाविरोधः स्यात् तथा सति विशेषाभावात् सर्वनाश एव भवेदतो यथा ते जीवाः परिगृहीता एवं तेषां देहा अप्यतो **गोपाये**, साधनं तु **स्वात्मयोगेनेति**, पर्वतधारणे **योगमायायाः करणत्व**मेतेषां सर्वथा रक्षायां **स्वात्मयोग** एव, यथा वायुनिरोध इन्द्रियाणि सर्वोपद्रवरहितानि भवन्ति तथैतेष्वहमात्मानं स्थापयिष्यामि, ततो मयि स्थिता मदभ्यन्तरस्थितपूर्वभुक्तान्नभोजिनो भूत्वा सुखिता भविष्यन्तीत्ययमेव पूर्वकृतभोजनोपयोगः, ननु किमेतावत्क्लेशेन ? तत्राह, **सोयं मे व्रत आहित** इति,

शरणागतसंरक्षा सर्वभावेन सर्वथा । 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति' ॥ १ ॥
'सङ्ग्रामे च प्रपन्नानां तवास्मीति च यो वदेत् । अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम' ॥ २ ॥

तस्मात् सर्वथा स्वव्रतं पालनीयमिति, स्वधर्मनिर्वाहार्थमेव **गोपाये**, नन्वेतद् **व्रतमेव** किमिति गृह्यते ? तत्राहा**यं व्रतः** पूर्वमेव मया**हितः** स्वीकृत आस्थितो वातो गृहीतस्य त्यागाभावात् पालनमेवोचितम् ॥ १८ ॥

प्रथमं क्लेशसम्बन्धः पूर्वपाषण्डधर्मतः । शरणागमने बुद्धिर्यागानुष्ठानतोभवत् ॥ १ ॥
मर्यादास्थापनार्थाय शरणागतिवर्णनम् । अन्यथान्यगृहीतार्थं गृह्णीयाद् भगवान् कथम् ॥ २ ॥
अतो यागोपदेशश्च दूरोपायतया मतः । भक्तिमार्गस्तथाक्लिष्टकर्मत्वं च ततो भवेत् ॥ ३ ॥

अतो भगवानेवं विचार्य तान् प्रति तथोक्त्वा विश्वासार्थं श्रुतिविरोधपरिहारार्थमाधिदैविकसम्पत्त्यर्थं **मायागोवर्धनादीनां** प्रबोधनार्थं च तथोक्त्वा गोवर्धनोद्धरणं कृतवानित्याहेत्युक्त्वेति, अयं गोवर्धन उत्तोलितः **संश्चलः** स्यात् तथा सति स्वरूपनाशो भवेद**चलो** हि सोत **एकेन** हस्तेन **गोवर्धनमचलं कृत्वा** दधारेतिसम्बन्धः, गा वर्धयतीति **गोवर्धन** आधिदैविकस्य नामेति पूर्वं व्यवस्थापितः, स चलोपि भवेत् तस्याप्य**चलता** सम्पादिता धारणार्थमेकया क्रियाशक्त्या पालनलक्षणयान्यथा सेवायामपि प्रवृत्तश्चलनं स्यात्, अथ वाल्यो **गोवर्धनो** लम्बो विकृतश्च **तमेकेन** हस्तेन यादृश उद्धर्तव्यस्तादृशं **कृत्वा पश्चाद् दधार**, एवं सति क्लेशो **भवेत्** किं वा प्रयोजनमित्याशङ्क्याह **लीलयेति**, **लीलायां क्लेशो रसाय भवति**, लीलामात्रेण कृतमित्यक्लेशश्च, ननु सर्वेश्वरो भगवान् कथमेवमचल विधाय स्वतःस्थितमन्यथाकृत्वा पालनं कृतवान् प्रकारान्तरेणापि पालनसम्भवात् ? तत्राह **छत्राकमिव बालक** इति, यथा बाला लीलायां छत्राकं स्थिरमपि राजलीलां बोधयितुं तत उत्पाट्य मस्तकोपरि स्थापयन्ति तथा सति बाललीला सा भवेदन्यथा मर्यादाभङ्गो दोषाय स्यादत एवेन्द्रो न निवृतः पौरुषस्याप्रकटितत्वादनायासेपि दृष्टान्तः, वस्तुतो रक्षा भगवतैव कृता न तु गोवर्धनेनात्युद्धृतेन न हि छत्राकं क्वचिद् वृष्टिं वारयति वृष्ट्या नाशसम्भवाच्चातोप्रयोजकत्वमपि ज्ञापयितुं दृष्टान्तः, तथोद्धृतवान् यथा मध्ये गर्तो भवति प्रान्तभागश्चोन्नतो गर्ताधिकप्रदेशे तद्गता छाया ॥ १९ ॥ एवं धृत्वा **शरणागतानाहाथेति**, उपायं कृत्वैव समाधानवचनमुक्तत्वान्न तु पूर्वमित्यानन्तर्यार्थोथशब्दः, भगवानिति पर्यवसानपरिज्ञानं, **गोपानिति** धर्मपरान्, अन्यथा भगवद्वाक्ये विश्वासो न भवेद् विपरीतक्लेशानुभवात्, अतस्तान् प्रत्याहेति वक्तव्ये **गोपानाहे**त्युक्त, तेष्ववान्तरभेदं वक्तुं स्थानविशेषनिर्देशार्थं स्नेहेन विशेषतः सम्बोधयति **हेम्ब** हे **तात** हे **व्रजौकस** इति, राजसादित्रैविध्यं च प्रदर्शितं सर्व एव पाल्यन्त इतिज्ञापनार्थं, **यथोपजोषं** यथासुखं **गिरिगर्तं विशत**, सर्वेषामेव स्थितौ महत् स्थानमस्तीति बोधितं, **गोधन**सहिता गाव एव धनानि येषां गोभिर्धनैश्च **सह वा** ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गोपाये स्वात्मयोगेनेत्यत्र, पर्वतधारण इत्यारभ्य **भविष्यन्तीत्यन्तम्**। अत्र हि द्वयं कार्यम् आसाराद्रक्षा पर्वतधारणेन, एतेषां जीवदेहादिरक्षा च अन्यथा पर्वतधारणेपि प्रलयकालीनमेघानां स्तनितादिभिरेतत्प्राणस्थितिर्न स्यात्। तदेतदुक्तं **पर्वतधारण** इत्यारभ्य **योग एवे**त्यन्तेन। तेनात्मयोगेन गोपाये। स्वात्मयोगेन गोपाय इति मूलार्थो विवक्षितः, अन्यथा स्वपदं न वदेत्। अथवा। स्वश्चात्मयोगश्च तयोः समाहारस्तथा। युज्यते फलमनेनेति योगः साधनं सामर्थ्यं शक्तिरिति यावत्। आत्मनः सा योगमायैवेति सैवोक्ता। एव सति स्वेन तत्प्राणादिरक्षा स्वरूपानन्ददानेन। तदुक्तं 'क्षुत्तृड्व्यथा'मित्यनेन मूले। तथाचाद्रिधारणं तेनासाराद्रक्षेति भावः। 'तस्मान्मच्छरणं गोष्ठ'मिति वाक्योक्त्यनन्तरं प्राप्ताशङ्कानिरासायाहुः **प्रथमं क्लेशसम्बन्ध** इत्यारभ्य **ततो भवे**दित्यन्तम्। नन्वीदृक्परिग्रहे नन्दादीनामन्यभजनमसम्भवि। कथञ्चित्सम्भवे वा ततो निवर्तनमवोचितम्, न तु यागोपदेशोपि, स्वरूपेणैवैतत्परिग्रहात्साधनानन्तरानपेक्षणात्। न चाधुनैवायं परिग्रह इति वाच्यम्, 'स्वगोकुलमनन्यगति'मित्यादिवाक्यैः सार्वदिकत्वात् किञ्च, स्वस्य सर्वज्ञत्वेन व्रजपरिग्रहस्य च पूर्वसिद्धत्वेन शरणागमनप्रार्थनपर्यन्तं तूष्णींभावोनुपपन्न इति चेत्तत्राहुः प्रथममित्यादि। अत्रायं भावः। अत्र परिग्रहेणैव सर्वम्, न तु सोऽत्यन्तसाधनसाध्य इति ज्ञाप्यते। एवं सति पूर्वं विपरीतसाधनवत्त्वेपि स्वपरिग्रहेणैव तन्निवर्तनोक्तौ तत्सम्पद्यते, न तु पूर्वमेव तदभावक्तौ। अत एवेतरसाधनासाध्यत्वोक्तिपूर्वकं 'यमेवैष वृणुते तेन लभ्य' इति श्रुतिरप्याह। इदमेवोक्तं **प्रथमं क्लेशे**त्यर्धेन। यागोपदेशप्रयोजनमाहुः **शरणागमन** इत्यादि। अन्यथा भगवद्वचनानिन्द्रयागे त्यक्तेऽस्माभिः क्लेशः प्राप्त इत्यसूयैवोत्पद्यत। तथा सति सर्वो निरोधो व्यर्थः स्यात्। परिग्रहस्य स्वतः प्राबल्यज्ञापनायैतेषां लोकसाधारणी रीतिर्यत उच्यते, अतो नासूयानुत्पत्तिशङ्कापि। पूर्वं देहेन्द्रियादीनामन्यत्र विनियुक्तत्वादपि तत्सम्भवः अत एव तादृशत्वे इन्द्रियादीनां निरोधो न सम्भवतीति स्वकर्मणि विनियुक्तवांस्तानि तद्वस्तूनि च तथा सति पूर्वदोषापगमात्प्रभौ न दोषारोपः, तच्छरणागमने च बुद्धिरभूत्। न च स्वरूपबलेनैव परिग्रहादेतन्नैरर्थ्यमिति वाच्यम्, परिग्रहान्तः पातित्वादस्य। परिग्रहो हि तेषां तदीयस्य च वाच्यः, तेषां च परिग्रहीतृनिष्ठत्वाभावे परिग्रहस्वरूपादम्भवात् न च शरणागमनेन परिग्रहोऽन्यथासिद्ध इति वाच्यम्, तस्यैव रक्षाहेतुत्वात्। शरणागतिवर्णनं तु भगवत्परिगृहीता भगवन्तमेवैहिके पारलौकिके चार्थे प्रार्थयन्ति, नान्यमिति भक्तिमार्गीयमर्यादाज्ञापनार्थम्, परिग्रहोऽप्यनेन सिद्ध इति ज्ञापनार्थं च। अन्यथेन्द्रापराधेऽनिष्टं दृष्ट्वा, अतः परं त्वद्यागमेव करिष्यामोऽस्मान्रक्षेतीन्द्रमेव प्रार्थयेयुः। इदमेवोक्तं मर्यादास्थापनायेत्यनेन। अथवा। मादकार्थमत्तस्येतरागणनवत्परिग्रहस्वभावेनैव को वा वराक इन्द्रोऽस्माकं कस्य वा भयमिति स्मयेन प्रभुमपि चेन्न प्रार्थयेयुस्तदपि रक्षणीया एव स्युः, परन्त्वेतद्भावानुसारेणैव। तथा सति गोवर्धनोद्धरणं न स्यात्। वृष्टिनाश एव कर्तव्यः स्यात्। एवं सति गोवर्धनोद्धरणेऽन्यापेक्षाराहित्यपूर्वकाप्रयेक्षणकेवलभगवदीयत्वमाहात्म्यज्ञानगोविन्दनामधारणाभिषेकादिलीला यास्तासामननुभवोऽसम्भवश्च स्यात्, एतज्जनितनिरोधश्च न स्यात्। तथा सत्येतन्निरोधार्थमेव सर्वकरणमिति नियमरूपा या मर्यादा सा भज्येत अतस्तद्रक्षणाय तथेत्यर्थः। किञ्च, अस्य साधनप्रकरणत्वात् साधनमार्गानुसारेण या लीला कृता, सैवात्रोच्यते। अतोऽन्ययागनिषेधस्वयागकारणशरणागमनतदनन्तररक्षणादिकथनं च युक्तमितिभावः। विपक्षे बाधकमाहुः अन्यथेति। यद्येतान्सर्वतः पृथक्कृत्यात्मसात् करिष्यामीतीच्छयैव यागभङ्गादिकं न कृतं स्यात्, तदेन्द्रार्थमुद्दिष्टत्वेन तच्छेषीभूतमन्नं नोरीकृतं स्यात्। अन्येनाप्यन्नेन गोसवसम्भवात्। तथा सति गोकुले तदीयेशः स्थापित एव भवेत्। अत एव प्रभूणोक्तं 'य इन्द्रयागसम्भारास्तैरेवायं मखः साध्यताम्, नान्यै'रिति। अतः केवलात्मसात्करणेनाग्रे केवलस्वरूपानन्ददानार्थमेव यागोपदेश इत्याहुरतो **यागोपदेश** इत्यादिना। किञ्च, एवमनन्यभक्तिमार्गः सिध्यति, अन्यथान्यसंवलितैव सा स्यात्। यावति कृते भक्ताः कालकर्मादिभ्यो मुक्ताः सन्तः केवलं स्वीया भवन्ति, तावति क्रियमाणे सति यदानुषाङ्गिकमिन्द्रमानभङ्गादिकं भवति, तद् भवतु नामेत्यक्लिष्टकर्मत्वं च स्यादित्याहुर्भक्तिमार्ग इति। **इत्युक्त्वैकेन हस्तेने**त्यस्याभासे, **विश्वासार्थ**मित्यादि। सार्धेनाद्येन गोपानां रक्षिष्यत्येवेति विश्वास उत्पादितः। स्ववचनकृतिहेतुकत्वज्ञाने सत्यवश्यं तत्प्रतिकृतिर्भवतीति तज्ज्ञापनायापर्ताविव्याद्युक्तम्। यतो वचनेन यागे कृते प्रत्यक्षं देवो दृष्टः। तदुक्तं '**कृष्णस्त्वन्यतम**'मित्यनेन। इन्द्रदमने क्रियमाणे 'त्विन्द्रस्य युज्यः सखे'ति श्रुतिविरोधो भवेत्। तत्र श्रीमदहरणोक्त्या हितकर्तृत्वेन स परिहृतः। आधिदैविकस्य सर्वत्रैव भगवद्रूपत्वात् तद्युक्तस्य च मदासम्भवादस्य च तद्युक्तत्वात् तद्रहितत्वेन मानभङ्ग आधिदैविकसम्मत एवेति ज्ञापनायोक्तं नहि **मद्भावयुक्ताना**मिति। अन्यथा मद्भावयुक्तानामिति न वदेदिति भावः। **गोपाये स्वात्मयोगेनेत्य**नोक्तरीत्या तयोः प्रबोधनम्। आदिपदेन गोवर्धनस्थवृक्षपक्ष्यादय उच्यन्ते। तेषामावरणाभावान्नाशस्य चानिष्टत्वात् तेष्वपि स्वयोगो ज्ञाप्यते। अन्यथेत्युक्त्वा दधारेति न वदेत्, वचनं विनापि गोवर्धनोद्धरणेन रक्षासम्भवादिति भावः॥ १८–१९॥

इति द्वाविंशोऽध्यायः॥ २२॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तस्मान् मच्छरणमित्यस्याभासे अलौकिकं सामर्थ्यमिति "ब्राह्मेण जैमिनिरुपन्यासादिभ्य" इतिमते इव जीवानां देहादिकं विनैव लीलाकरणसामर्थ्यमित्यर्थः, एतस्य समाधानं **मत्परिग्रहमित्यनेन** भविष्यति बृहस्पतिद्वारेत्यस्य समाधानं **स्वात्मयोगेनेत्यनेन,** एवम्प्रकारेण न तु प्रकारान्तरेणेत्यर्थः, व्याख्याने, **नापि भक्तिरिति** ज्ञानोपदेशकथनेन "ज्ञानयोगश्चे"त्यादिवाक्यैस्तयोरैकार्थ्याद् भक्तिदानमप्याक्षिप्तमेवेति ज्ञेयं, **स्वात्मयोग एवेति स्वात्मनः** स्वरूपस्य **योग** एतेषु स्थापनमित्यर्थः, **समाहारपक्षे मूलस्थस्वपदस्यैव विवरणमिदं,** अव्यापारस्य करणतासम्भवात्, **स्वं स्वात्मनो योगः** स्थापनमित्यर्थः, **व्यापारवतः करणत्वमते** एतादृशप्रयोगेषु लक्षणेत्याद्यन्यत्र विस्तरः, स्वरूपस्थापनेन **रक्षणं** व्युत्पादयन्ति **यथेति,** वायोर्निरोधे प्राणायामैरन्तः **स्थापने इन्द्रियाणां** वाय्वधीनत्वादिन्द्रियाण्यु**पद्रवरहितानि** बहिर्गमनरहितान्यन्तर्निष्ठानि भवन्ति तथा मत्स्वरूपस्यैतदन्तःस्थापने **एतेषां मदधीनत्वादेतेन्तर्निष्ठा** भविष्यन्तीत्यर्थः, **आत्मानं स्थापयिष्यामि** तदा एते उपद्रवरहिता अन्तर्निष्ठा भविष्यन्तीतिशेषः, **तत** इति एतेषामन्तर्निष्ठत्वादन्तश्च मम स्थितत्वान् **मयि स्थिता** मन्निष्ठा इत्यर्थः, **सुखिता** इति मद्भुक्तान्नप्रभावरूपसामर्थ्येन स्तनितादिप्रतिघातरहिता इत्यर्थः, **इतीति** एवं स्वात्मयोगेन रक्षेत्यर्थः ॥ १७ ॥ **इत्युक्त्वैकेनेत्यत्र पूर्वं व्यवस्थापित** इति "एषोवजानतो मर्त्या" नित्यत्र "गवां शर्मणे"एतन्नमस्कारकथनेनेत्यर्थः, **अन्यथेति** अचलत्वसम्पादनाभावे भगवता चालनेन चलनधर्माविर्भावे अन्यार्थं चलनाभावेपि हरिदासवर्यत्वात् सेवाप्रवृत्तौ चलनं स्यादेव, अचलत्वसम्पादने त्वचलत्वाविरोधेन या सेवा "पानीयसूयवसकन्दरकन्दमूल" प्रकटनरूपा तामेव करिष्यतीत्यर्थः, भगवता अचलत्वं सम्पाद्यैवोत्थापनान् न चलत्वमितिभावः ॥ १९ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

तस्मान् मच्छरणं गोष्ठमित्यत्र शरणागतसंरक्षेत्यादि का० २२१¾–२२२¾। स्फुटं, अत्रैव **प्रथममित्यादि** का० २२३¾–२२५¾। एतच्च विस्तरेण व्याख्यातं टिप्पण्यां, अक्षरार्थस्तु स्फुट एव, अन्यथेत्यादि **अन्यथा** विशेषाङ्गीकाराभावे इन्द्रार्थमुद्दिष्टं **भगवान् कथं गृह्णीयात्,** अतः केवलात्मसात्करणेनाग्रे स्वरूपानन्ददानार्थमेव यागोपदेश इत्याहुः **अतो यागोपदेशश्चेत्यादिना,** किञ्चैवमनन्यभक्तिमार्गः सिध्यति अक्लिष्टकर्मत्वं च स्यादित्याहुः **भक्तिमार्ग** इति ॥ १८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'सात्त्विकानां देवानां मानभङ्गः कथं युक्तः ?' तत्राह–नहीति। सद्भावः सत्त्वं 'मद्भाव' इति पाठान्तरम्, तद्युक्तानां सुराणाम् 'ईशा वयम्' इति विस्मयो गर्वो हि यस्मान्न युक्तः, 'अतस्तन्मानभङ्गो युक्त एव' इति शेषः। 'तेन किं स्यात्' इत्यपेक्षायामाह–मत्त इति। असतामीशाभिमानिनां यो मत्तो मानभङ्गः स प्रशमायोपकल्पते सर्वानर्थनिवृत्तये पर्यवस्यति ॥१७॥ तस्मादिन्द्रमानभङ्गकरणस्यावश्यकत्वात् स्वात्मयोगेन स्वसामर्थ्येन गोष्ठं व्रजं गोपाये रक्षयेयम्। सोऽयं व्रजरक्षाविषयको व्रतः सङ्कल्पः मे मया आहितः कृतः। तत्र हेतूनाह–मच्छरणमिति। अहमेव शरणं रक्षको यस्य तत् ॥ मन्नाथमिति। अहमेव नाथः स्वामी यस्य तत् ॥ मत्परिग्रहमिति। मया स्वकीयत्वेन परिग्रहो यस्य तत्, मत्क्रीडोपकरणभूतमित्यर्थः ॥ १८ ॥ इति स्वमनस्युक्त्वा कृष्णः लीलया अनायासेनैव एकेनैव हस्तेन गोवर्धनाचलं कृत्वा उत्कृत्य बालको यथा छत्राकं धरति तथा वामेन हस्तेन दधारेत्यन्वयः। वामहस्तेनैव धारणमुक्तं हरिवंशे–"स धृतः सङ्गतो मेघैर्गिरिः सव्येन पाणिना" इति ॥ १९ ॥ अथ धारणानन्तरं भगवान् "हे अम्ब ! हे तात ! हे व्रजौकसः ! यथोपजोषं यथासुखं सगोधनाः सर्वे यूयं गिरिगर्तं विशत" इति गोपान् प्रत्याहेत्यन्वयः। नच "मध्ये योजनविस्तारं तावद्द्विगुणमायतम्" इति हरिवंशे व्रजविस्तारस्य वर्णितत्वात् 'कथं गोवर्धनगर्ते व्रजो माति स्म' इति शङ्कनीयम्, भगवतोऽचिन्त्यशक्त्या तस्य महत्त्वापत्तेः। तदुक्तं हरिवंशे तेनैव–"शैलोत्पाटनभूरेषा महती निर्मिया मया। त्रैलोक्यमुत्सहेऽनेय रक्षितुं किं पुनर्व्रजम्" इति ॥ २० ॥

अन्वितार्थप्रकाशिका

न हीति ॥ मद्भावः सत्त्वं सद्भाव इति पाठे मद्भक्तिस्तद्युक्तानां सुराणामीशा वयमिति विशिष्टः स्मयो गर्वो हि यस्मान्न युक्तोऽतस्तन्मानभङ्गो युक्त एवेति शेषः। यद्वा। तेषामीशविस्मयो न घटते। अतस्ते असन्त एव अतः तेषाम् असतामीशाभिमानिनां यो मत्तो मानभङ्गः स प्रशमायोपकल्पते सर्वानर्थनिवृत्तये पर्यवस्यति अतस्तेषां मानभङ्गस्तेषामपि श्रेयसे ॥ १७ ॥ तस्मादिति ॥ तस्मात् मच्छरणम् अहमेव शरणं रक्षको यस्य। यद्वा। मम शरणं गृहरूपम् अहमेव नाथः स्वामी यस्य तं मम परिग्रहं कुटुम्बमिव सर्वतो रक्ष्यं गोष्ठं व्रजं स्वात्मयोगेन स्वसामर्थ्येन गोपाये रक्षामि। तडार्षः। सोऽयं व्रजरक्षाविषयको व्रतः संकल्पः नियमो वा मे मया आहितः गृहीतः। अत्र महामेघारम्भ एव गिरिसमीपे सर्वानयनं गम्यते ॥ १८ ॥ इतीति ॥ इति स्वमनस्युक्त्वा कृष्णः लीलया अनायासेनैवैकेनैव हस्तेन गोवर्धनाचलं कृत्वा उत्कृत्य बालको यथा छत्राकं शिलीन्ध्रमनायासेन धरति तथा वामेन हस्तेन दधार। "गिरिः सव्येन पाणिना" इति हरिवंशोक्तेः ॥ १९ ॥ अथेति ॥ अथ धारणानन्तरं भगवान् हे अम्ब ! हे तात ! हे व्रजौकसः !

यथोपजोषं यथासुखं सगोधनाः सर्वे यूयं गिरिगर्त्तं विशतेति गोपान् प्रत्याह स्म। स्वल्पे गोवर्द्धनगर्त्ते सर्वव्रजस्थितियोग्यता तु भगवत्प्रभावादेव। "शैलोत्पाटनभूरेषा महती निर्मिता मया॥ त्रैलोक्यमुत्सहेऽनेन रक्षितुं किं पुनर्व्रजम्॥" इति हरिवंशोक्तेः।२०।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु सात्त्विकानां देवानां तमः कथमिति चेत्तत्राह न हीति सति परब्रह्मणि मयि भावोभक्तिस्तद्युक्तानां सुराणां देवानां ईश वयमिति विस्मयो गर्वो न स्यात्। मयि भक्तिहीनानां तु सात्त्विकानामपि गर्वः स्यादेव असतां मयि सद्भावहीनानां तेषां प्रशमाय शांतये सुखायेति यावत् भवति ॥१७॥ मत्परिग्रहं मम कुटंबं स्वस्य आत्मनि स्थितेन योगबलेन अहं गोपाये गोपायिष्ये सोयं मे मया व्रतः संकल्पः आहितः कृत इत्यर्थः ॥१८॥ हस्तेन कृत्वा उद्धृत्येति शेषः। छत्राकं उच्छिलिन्ध्रं श्वेतं वाश्यामं भूविकारमिव ॥१९॥ हे अंब यशोदे तात हे नंद हे व्रजौकसः गिरेर्गर्त्तं अधःप्रदेशं याथोपजोषं यथा सुखं यथा व्रजेवासस्तथैवेति भावः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननूपेन्द्रादिरूपेण तद्रक्षणशीलः कथं तदनर्थोद्युक्त इत्यपवादशङ्कया स्वयमेव सोपपत्तिकं तत्समाधातुमाह ॥ न हीति ॥ मद्भावयुक्तानां मयि भक्त्यात्मकभावबन्धयुक्तानां, सुराणां सत्त्वप्रचुराणां देवानां, ईशविस्मयः ईशा वयमिति गर्वः, हि नास्त्येव। अथापि, प्रकृतिवशात् कदाचिदिति शेषः। असतामीशविस्मयवतां सतां, तेषां मत्तः सकाशात्, मानभङ्ग ईशविस्मयभङ्गः, प्रशमायानुग्रहायैव, उपकल्पते उपपद्यते ॥ १७ ॥ तस्मादिति ॥ तस्मात्, अहं शरणं रक्षको यस्य तत्, अहमेव नाथः स्वामी यस्य तत्, अहमेव परिग्रहः परिजनः अस्मिन् समये रक्षणमूलं वा यस्य तत्, 'परिग्रहः परिजने पत्न्याः स्वीकारमूलयोः' इति मेदिनी। गोष्ठं व्रजं, स्वात्मयोगेन स्वसामर्थ्येन, गोपाये रक्षेयम्। सोऽयं शरणागतरक्षणमद्भक्तविस्मयभङ्गरूपः, व्रतो नियमः संकल्पो वा, मे मया आहितः धृतः। 'नियमो व्रतमस्त्रियाम्' इत्यमरः ॥ १८ ॥ इतीति ॥ इतीत्थं उक्त्वा, एकेन हस्तेन, गोवर्द्धनाचल, कृत्वोत्कृत्योत्पाट्येति यावत्। बालकः छत्राकं शिलीन्ध्रं इव, कृष्णः सप्तवर्षवयाः श्रीकृष्णः, लीलया दधार। वामकरकनिष्ठिकानखाग्रेण दधारेति वीरराघवाचार्याः ॥ १९ ॥ अथेति ॥ अथ गोवर्द्धनधारणानन्तरं, भगवान् श्रीकृष्णः, गोपान् आह। उक्तिमेवाहाम्बेत्यादिना तथेत्यतः प्राक्तनेन ग्रन्थेन। हे अम्ब मातः, हे तात नन्द, हे व्रजौकसः, यथोपजोष यथासुखं, सगोधनाः गोधनसहिताः, सर्वे यूयं, गिरिगर्त्तं गिरिखातं, विशत प्रविशत ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

इत्युक्त्वेति : १०.२५.१९.

असत्सदविवेचकः सदवलिप्तचित्तो गुरुर्भृशं यदिह सङ्गतो जडविहाररम्येऽध्वनि।
तदा निपुणबुद्धिनाऽनुजवरेण बोध्यो मुहुर्विधाय पुरतः सुखावहमनन्तगोवर्धनम् ॥ ७५ ॥
इत्यभिप्रायतो मन्ये परित्यज्य नगान्तरम्। तादृगिन्द्रोपदेशार्थमुपेन्द्रस्तत्करोऽजनि ॥ ७६ ॥ (युग्मम्)
स्यां तेष्वचलकरोऽहं ये मय्यचलान्तराः सुधियः। इति बोधयन् स तादृशगोपान्पातुं तथाविधः किमभूत् ॥ ७७ ॥
शूरोऽसि प्रथितात्मधीरसि तथा शिष्योऽसि वाचस्पतेस्तन्मा साहसमेवमाचर सुराधीशातिगर्ह्यं सताम्।
कर्तुं तच्छ्रुतिगं वचो गिरिसमौन्नत्यं चकाराच्युतो मन्ये तन्मिषतो यदेष समभिख्यातो हि वृद्धश्रवाः ॥ ७८ ॥
स्यादस्यापि नगस्य भुव्यवितथा गोवर्धनेति प्रथा रक्षा च व्रजवासिनामविकलाऽधिष्ठानभावेऽपि मे।
व्यक्तिः श्रौतगुहागतस्य च परेत्यालोच्य कृष्णस्तथा कर्तुं वा तमधाद्धि साधुविहिता द्व्यर्था क्रियैकेडिता ॥ ७९ ॥
अत्तुं प्राग्बलिमिष्टमेष विकसद्वक्त्रो बभूवाधुना त्रातुं मौनमुरीकरोत्यवनिभृत्तद्धिक्पदार्हो न किम्।
माभूदित्थमशेषधिक्पदगतेः पात्रं वृथा मत्कृतेरित्यालोच्य विभुस्तदा तदवनं कर्तुं तमग्रे दधौ ॥ ८० ॥
गिरिवरस्त्वमहं च तदग्रणीस्तदुभयोरपि सांप्रतमावयोः। अनुचिता शठताऽऽप्तजनावनेत्त्विति स बोधयितुं तमधात्करे ॥ ८१ ॥
गोवर्द्धनोऽप्युद्धरणीय आस्त इत्युद्धृतोऽसावधुना प्रसंगे। सर्वावनं त्वात्मदृशैव कुर्यामुक्त्वेति वाचेदमबोधि तत्त्वम् ॥ ८२ ॥
अन्यथा तद्गिरिस्थानामनेकविधजन्मिनाम्। गोत्रानावृतगात्राणां त्राणचिन्ताऽवशिष्यते ॥ ८३ ॥ (युग्मम्)
स्वरीश्वरमशिक्षयन् भृशमवारयन्नम्बुदानपोऽनलमिवापिबन्न च नयन् व्रजं वाऽन्यतः।
प्रभुर्यदकृताचलोद्धरणमेव यत्तत्कृते जडेऽपि मदनुग्रहे सति भवेज्जडोद्धारकः ॥ ८४ ॥
चेतनाः स्युस्तथेत्यर्थाद्गोपास्त्वसव एव मे। स्वानुग्रहमहो व्यक्तिर्बीजमस्येन्द्रसंविदे ॥ ८५ ॥
सम्पत्फलं तदिदमेव यदाप्तवर्गे सौख्यार्पणं तदरिभूरिविडम्बनं च।
आवेदयन्निति सगोत्रवरोत्सवोत्को गोत्रद्रुहं गतमदं चकमे विधातुम् ॥ ८६ ॥

यस्यान्नं येन भुक्तं सकृदपि स यदि प्रोद्धृतस्तेन पुंसा तत्स्यात् कीर्त्यै महत्यै सकलनिजजनश्रेयसे चापि लोके।
एवं गोवर्धनीयं बलिमुपहरता श्रीमताऽन्तर्विचिन्त्य स्वीयश्रेयोऽर्थिनाऽसौ विशदतरयशोलिप्सुना वोद्धारि ॥ ८७ ॥
विधाय स नगोद्धृतिं निजदृशैव मायाजुषा विधातुमलमच्युतोऽवनमथापि दध्रे करे।
करस्त्वकरतां व्रजेज्जडजनुष्मदुद्धारगे जगत्यपि चमत्कृतिः स्फुटतरा न भूयादिति ॥ ८८ ॥
यस्मिञ्जनुष्मति हि मूर्तिधरो वसामि येनार्पितं निजमशेषमपीह मह्यम्।
तं नोद्धरामि जडतो यदि तत्प्रतिष्ठा का वा ममेति विभुरद्रिमुतोद्दधार ॥ ८९ ॥
जडोऽजडो वा कोऽप्यस्तु सदर्थं यो मयेक्षितः। स्वकरेण तदुद्धारं करोम्येवेति बोधितम् ॥ ९० ॥

यो यत्कर्म करोत्यसत्सदपि वा द्राक्तत्फलस्याप्यसौ भोक्ता स्यात्सुमहा लघुर्भवतु वेत्यर्थप्रकाशाय किम्।
बाहाविन्द्रसुदैवतेऽवनिभृतं श्रीनायकः संदधे तस्मादेव ररक्ष मंक्षु सकलान्सत्कर्मणो बल्लवान् ॥ ९१ ॥
दृङ्मात्रेण तदात्त्ववृष्टिविरतिं कर्तुं समर्थोऽप्यसावीशो यद्गिरितश्चकार बहुधा तद्बीजमेवं भवेत्।
संजाता स्वजितारितो यदि पराभूतिस्तदेषाऽखिलोन्मादोत्सादचणा भवत्वनुभवो गोत्रद्रुहश्चेतसि ॥ ९२ ॥

यः स्याद्गोवर्द्धनोऽस्मिञ्जगति निजबलादुन्नतं भूभृतं तं कृत्वा तदुद्धारतोऽहं सकलनिजजनं पालये भूभृदीड्यः।
सिद्धां शापेन राज्यानधिकृतिमिति तां सूचयन्नात्मवंशे श्रीशो मन्ये तदानीमवनिधरपरिष्कारतस्तानरक्षत् ॥ ९३ ॥
अनुचितकर्मारम्भी यदि कश्चिद् गुरुत एव शिक्ष्योऽसौ। इति शासितुं किमिन्द्रं गिरीश्वरं तं गुरुं पुरश्चक्रे ॥ ९४ ॥
युक्तमब्दोन्मुक्तभूरिशरधाराविमुक्तये। निजावनचणः शौरिः पुरश्चक्रेऽद्रिखेटकम् ॥ ९५ ॥
सदाशयेऽहं तिष्ठामि जगद्गुरुरपीह का। गणनाऽस्येति वामत्वात् तमधात्स तदाशये ॥ ९६ ॥
अचलोद्धरणात्करोमि भारापगमन्ते भुजगेन्द्र माम खिद्याः। इति मे गिरि भग्नताऽत्रमैवास्त्विति तं तादृशमेक एव दध्रे ॥ ९७ ॥
अभयदो वरदश्च करावुभावपि सदा भजतां प्रथितौ मम। अभयदावसरस्त्वधुनेत्यसौ किमु दधार तदैककरेण तम् ॥ ९८ ॥
यः श्रीशस्य पुरा द्विजेन विहितः सर्वाङ्गपृष्ठस्थितेनाङ्के नापि च लीलया तमचलोद्धारं तथा सम्प्रति।
सर्वक्षत्रियवंद्यतापदमहं कुर्यां न चेच्छूरभूः स्यामङ्घ्र्यखिलेषु हास्यपदमित्यद्धा करेतं दधौ ॥ ९९ ॥

भभृत्पदव्यवहृतिप्रचुराभिमानाः सन्त्येव नाम बहवोऽपि हि सन्तु किं तैः।
भूभृत्स एव सुजनावनदीक्षितश्रीः श्रीशोऽदिशन्नियतमात्मकरं हि यस्मै ॥ १०० ॥
क्षमां परित्यज्य जडेन येनौन्नत्यं समालम्बि न तत्र दृष्टः।
महीभृति काप्यवनप्रकारः सोऽस्मिन् गिरौ तादृशि चित्रमेतत् ॥ १०१ ॥
अजडोऽपि सुरेशोऽभूज्जडो जडपदाश्रयात्। जडोऽद्रिस्त्वजडः कृष्णकरालम्बादिति क्षमम् ॥ १०२ ॥
निजेष्टदः स्वर्नग एव पारिजाताख्य इत्युक्तिरविद्वदर्हा। जातो यदाप्तेशकरप्रसादः स भूनगस्तादृगपारिजातः ॥ १०३ ॥

क्षितेरुद्धृतोऽवस्थितोऽप्यन्तरिक्षे करे श्रीहरे राजितोऽधिष्ठितो यः।
तथाप्यस्य शैलस्य कृष्णप्रसादादनन्ताचलोर्वीस्थितिः प्राग्वदासीत् ॥ १०४ ॥
रे रे स्वर्नाथ मैनाको नास्मि गोवर्द्धनोऽस्म्यहम्। तन्मा कलय मां वारिमग्नमित्युन्नतां दधौ ॥ १०५ ॥

न चेद् बाढमाप्ते प्रसङ्गेऽपि कुर्यां गवां वर्द्धनं तर्हि गोवर्द्धनाख्या।
मुधैवात्र भूयादिति प्राप्तरक्षानुकूलः स एवास कृष्णाश्रयेण ॥ १०६ ॥
पुण्येन पापमपहार्यमिति श्रुतार्थं गोवर्द्धनोऽच्युतकराकलिताङ्घ्रिभागः।
ध्यात्वा निजाघमपनेतुमसौ स्वतोऽपि विष्णोः पदे स्थितिमधात् प्रसृताम्बुवाहे ॥ १०७ ॥

निजवैरिमदापनोदनार्थं यदि कश्चित्सबलाश्रयो हि लब्धः। तदरेः स पुरः प्रयात्यशङ्कं स्फुटमद्राविदमच्युताश्रयेऽभूत् ॥ १०८ ॥
स्वभावसिद्धमौन्नत्यमक्षमाशालिनामहम्। क्षमाशालीति साध्वीशो गिर्यधः स्थितिमादधे ॥ १०९ ॥
यस्मै करं दिशति यः स हि तस्य सिद्धः क्षोणीभृतोऽधरपदाधिगतप्रतिष्ठः।
जानन्निमं नृपनयं प्रभुरप्यधस्थाश्चक्रे स्ववासमतिसृष्टिकरोऽस्य मन्ये ॥ ११० ॥
अशेषकार्यं क्रियते मयैव स्वानामितीशोक्तिविचारदृग्बलः। तूष्णीं तदासीदचलोद्धृतौ स नो चेदशक्यं किमिहास्य भूभृतः ॥१११॥
कुवलयमहं वहामि प्रभुणा क्रियते च वारिजातधृतिः। इति सबलः स बलोऽपि हि तदास वृष्टावपामुदासीनः ॥ ११२ ॥
अथाहेति : १०.२५.२०.

मदुद्धृतस्याम्ब पितः समग्राऽलघोरपि स्यान्न मनागधोगतिः।
गिरीश्वरस्त्वेष गुरूत्तमोऽस्तीत्यशङ्कचित्तं विशताथ तिष्ठत ॥ ११३ ॥

कृष्णप्रिया

जो देव लोग "हम भगवान के" हैं ऐसे मेरे भाव से युक्त हैं, उन्हें हम ईश्वर हैं ऐसा दुरभिमान कभी नहीं हो सकता। लेकिन जो असज्जन हैं उनके अभिमान का ध्वंस होना उनके लिये परम हितकर होता है, क्योंकि अभिमान के नष्ट होने से वे देव लोग शान्त हो जाते है और हम सर्वेश्वर है ऐसा भ्रम भी मिट जाता है ॥ १७ ॥ इस गोष्ठ का, सारे व्रज का मैं ही रक्षक और स्वामी हूँ, और ये सब व्रजवासी मेरी शरण में आए हैं। मैं इन व्रजजनों को मेरे आप्तजन एवं आश्रितजन मानता हूँ। मेरी यह प्रतिज्ञा, मेरा यह व्रत है, मेरा यह निश्चय है कि मेरे समर्पित जनों का अपने योग बल से निरंतर रक्षण करता हूँ ॥ १८ ॥ ऐसा कहकर भगवान् श्रीकृष्ण ने अपने एक हस्त से श्रीगोवर्धन को अचल करके आसानी से उठा लिया, मान लीजिए कोई नन्हा बालक खेलते खेलते वरसाती छत्ते के पुष्प को धरती के पुष्प को धरती से उखाड ले ॥ १९ ॥ भगवान् श्रीकृष्णने श्रीगिरिवर को धारण करके श्री गोपजन एवं गोपीजन को कहा—हे माताजी, हे पिताजी ? हे प्यारे व्रजवासियों ? आप निर्भय बनकर सब श्रीगिरिवरजी के गह्वर में आइए और सुख पूर्वक बैठिये ॥ २० ॥

न त्रास इह वः कार्यो मद्धस्ताद्रिनिपातनात्[1] । वातवर्षभयेनालं [2]तत्त्राणं विहितं [3]मया ॥ २१ ॥
तथा निर्विविशुर्गर्तं कृष्णाश्वासितमानसाः । यथावकाशं सधनाः [4]सव्रजाः सोपजीविनः[5] ॥ २२ ॥
क्षुत्तृड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः । वीक्ष्यमाणो [6]दधावद्रिं सप्ताहं नाचलत् पदात् ॥ २३ ॥
कृष्णयोगानुभावं तं निशाम्येन्द्रोऽतिविस्मितः । निःस्तम्भो भ्रष्टसङ्कल्पः स्वान् मेघान् संन्यवारयत् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—मत् हस्त अद्रि निपातनात् इह वः त्रासः न कार्यः वातवर्षभयेन अलम् मया हि तत् त्राणम् विहितम् ॥२१॥ कृष्ण आश्वासित मानसाः सधनाः स प्रजाः सोपजीविनः यथावकाशम् तथा गर्तम् निर्विविशुः ॥ २२ ॥ क्षुत् तृड् व्यथाम् सुखापेक्षाम् हित्वा तैः व्रजवासिभिः वीक्षमाणः सप्ताहम् अद्रिम् दधौ सप्ताहम् पदात् न अचलत् ॥ २३ ॥ तम् कृष्णयोगानुभावम् तम् निशम्य अतिविस्मितः भ्रष्टसंकल्पः निस्तब्धः इन्द्रः स्वान् मेघान् सन्यवारयत् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सव्रजाः शकटमंडलीसहिताः सोपजीविनो भृत्यपुरोहितादिसहिताः ॥ २२ ॥ पदात्स्थानात् ॥ २३–२५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इह गर्त्ते। अलम् तद्वारितम्। तदेवाह—वः युष्माकम्। तस्माद्वातवर्षात्त्राणं रक्षणं विहितमस्ति विशेषेण हिनोति स्म वर्द्धते स्मेति विहितं शेषनागशरीरम् 'हि–गतिवृद्धिहिंसासु' इति कर्त्तरि क्तोऽकर्मकत्वात्। तस्य ब्रह्मांडाधारत्वेनातिविस्तृतत्वान्न हि तदावृतगर्त्ते जलं प्रवेष्टुं शक्नोतीत्यर्थः। एतच्च संहितायां स्पष्टम् ॥ २१ ॥ स्वान्स्वान्व्रजान्समायुज्येत्यत्र व्रजशब्दः शकटव्यूहे व्याख्यात इति ध्येयम्। सव्रजा इत्यत्र व्रीहितंडुलाद्युपजीवनम् सहिता वा ॥ २२ ॥ सुखस्य शयनासनादिरूपसुखसाधनस्यापेक्षां श्रद्धाम् ॥ २३ ॥ कृष्णयोगस्यानुभावम् प्रभावम् "अनुभावः प्रभावे स्यान्निश्चये भावसूचके" इति यादवः। तम् पर्वतधारणगर्तजलाप्रवेशरूपम्। महापुरुषान्समीक्ष्यापि स्थाणुवत्प्रावण्यराहित्यं स्तंभस्तद्रहितो निस्तंभः। भ्रष्टोऽधोगतः व्रजनाशरूपः संकल्पो मनोरथो यस्य सः। न्यवारयदिति। न जानेऽद्य मह्यं कृष्णः कं दंडं दास्यतीति भयात् ॥ २४–२५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मम हस्तात् अद्रेर्नैतरां पातनं पतनं तदाऽऽशङ्क्य स्वार्थेणिच्। यद्वा, इन्द्रादिना केनापि पातनं तस्मात् त्रासः मदनिष्टशङ्का वो युष्माकं कार्यः कर्त्तुं योग्यो न भवति "कृत्यानां कर्त्तरि वा" (२।३।७१) इति षष्ठी—अतो वो युष्माकं वातवर्षाभ्यां भयेनालं प्रयोजनं नास्ति हि यस्मात् तेनाद्रिधारणेन त्राणं विहितं मयेति शेषः। वो युष्माभिरेव विहितमिति वा श्रीगोवर्द्धनार्चनादिभिरिति भावः ॥ २१ ॥ तथा तेन प्रकारेण उक्तिचातुर्येण साक्षाद्वामकरे लीलया गिरिधारणेन च कृत्वा कृष्णेन सर्वचित्ताकर्षकाद्भुतानन्तलीलेन भगवता आश्वासितानि सान्त्वितानि मानसानि येषां ते धनानि गावोऽन्यानि च विविधद्रव्याणि तत्सहिताः२२ क्षुत्तड्भ्यां या व्यथा तां सुखं शयनाशनादितदपेक्षां च हित्वा विस्मृत्येत्यर्थः। तैः तदैकजीवनैः तद्वीक्षणैकसुखैः व्रजवासिभिर्गोपगोपीगवादिभिः विशेषेण महाविस्मयपरमस्नेहार्दिना ईक्ष्यमाणः इति तत्त्यागे कारणं प्रयोजनं च क्त्वाप्रत्ययश्च वीक्षणारम्भ एव तदपगमात् तद्वीक्षणस्य च तद्धारणे साहाय्यमेव दर्शितं तेन मुहुः स्फीतमनस्त्वात् तथैव विष्णुपुराणेऽपि—

---

१. निपातनात्–वीर विज. ; तने–श्रीधर. जीव. विश्व. । २. भपं धात्तं–विज. । ३. हि वः–श्रीधर. वंशी. जीव. वि. विज. वीर. । ४, सप्रजाः–वीर. विज. । ५. जीवनाः । ६. दधाराद्रि–वीर. विज. ।

"कृष्णोपि तं दधारैव शैलमत्यन्तनिश्चलम् । व्रजैकवासिभिर्हर्षविस्मिताक्षैर्निरीक्षितः ॥
गोपगोपीजनैर्हृष्टैः प्रीतिविस्फारितेक्षणैः । संस्तूयमानचरितः कृष्णः शैलमधारयत्" ॥ इति ।

यद्वा, हित्वेति कृष्णकर्तृकं ज्ञेयम् अनेन क्षणेन तमोपि तत्र नासीदिति गम्यते पदादेकस्मादपि पदाक्रमणस्थानान्नाचलदिति धारणेत्यन्तानायास उक्तः ॥ २३ ॥ कृष्णस्य योगः स्वाभाविकशक्तिविशेषः तस्यानुभावं प्रभावं निशम्य दृष्ट्वा तथा च विश्वः "श्रुतौ दृष्टौ निशमनम्" इति निस्तम्भो नष्टमदः कुतः भ्रष्टः अधोपगतः सङ्कल्पो गोष्ठजिघांसालक्षणो यस्य सः स्वान् मरुद्गणान् मेघांश्च अनिवारणे स्वाऽनिष्टापत्तेरिति भावः । संशब्देन दूरतोऽपि स्थितिर्निवारिता ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु बालकस्य तव हस्तादयं कदाचिन्निपतेदिति बिभीमः, तत्राह—नेति । मम हस्तादद्रेर्नितरां पातनम्, स्वार्थे इन्; यद्वा, इन्द्रादिना केनापि पातनं तस्मात्त्रासः, वो युष्माभिः, यद्वा, युष्माकं कार्य्यं कर्त्तुं न योग्यो भवति, अतो वातवर्षाभ्यां भयेनालं प्रयोजनं नास्ति, यद्वा, हि यतो वातवर्षभयेन हेतुना वो युष्माकं तत्त्राणं विहितं मया, वो युष्माभिरेव, विहितमिति वा गोवर्द्धनाच्चर्चनादिति भावः । यद्वा, युष्मत्पूजितेन परमदयालुनानेन गिरिवर्य्येणेव, अन्यथा मया बालकेनास्य परमगरिष्ठतरस्य धारणासम्भवात्, साक्षात्तदनुक्तिगौरवेण श्रद्धाविशेषार्थम् ॥ २१ ॥ तथा तेन प्रकारेण उक्तिचातुर्य्येण साक्षात् वामकरे लीलया गिरिधारणेन च कृत्वा, कृष्णेन सर्वचित्ताकर्षणाद्भुतानन्तलीलेन भगवता आश्वासितानि विश्वासं नितानि सान्त्वितानि वा मानसानि येषां ते, 'ततः' इति वा पाठः, तथापि स एवार्थः यथावकाशमसंकीर्णतयेत्यर्थः, श्रीगोवर्द्धनस्यैव योजनायतत्वात् तदनुरूपविस्ताराच्च, अधुना च कलिकाले श्रीभगवानिव श्रीहरिदासवर्य्योऽयमाच्छन्नप्रायोऽभूदिति बोद्धव्यम् । धनानि गावोऽन्यानि च विविधद्रव्याणि तत्सहिताः, तद्गर्त्ते च पार्श्वतो वृष्टिच्छटया गिरिमूर्द्धतो निपतनेन च जनानां प्रवेशो भगवदिच्छया श्रीगोवर्द्धनस्यैव सन्निवेशविशेषसम्पत्तेर्नाभूदिति ज्ञेयम्, तथा च श्रीहरिवंशे (विष्णु० प० १८।२१) 'स धृतः संगतो मेघैर्गिरिः सव्येन पाणिना । गृहभावं गतस्तत्र गृहाकारेण वर्च्चसा ॥' इति वस्तुतस्तु यथा तद्गर्त्तान्तरनन्तानां सर्वेषामेव व्रजवासिनां सपरिच्छदपरिवाराणामसंकीर्णतया सुखनिवासः, यथा चैकेनैव श्रीहस्तेन कदाचित् तदेकांगुल्या च शिलैक भागधारणेन पृथक् पृथक् शिलासमुच्चयबद्धमूलस्य गिरिवरस्य सर्वस्य धारणम्, तथा तत्र जलवाताप्रवेशदिकञ्च श्रीभगवच्छक्तिविशेषेणैव ज्ञेयम् । एवमैश्वर्य्येऽपि बाल्याव्यभिचारेण छत्रवद्गोवर्द्धनधारणादिलौकिकलीलया पूर्ववद्भगवत्ताविशेषप्रकटनमेवोह्यम् ॥ २२ ॥ क्षुत्तृड्भ्यां या यथा ताम्, सुखं शयनासनादि तदपेक्षाञ्च हित्वा तैर्गर्त्तान्तर्वर्त्तिभिः, किंवा तदेकजीवनैस्तद्वीक्षणैकसुखैर्वा, व्रजवासिभिर्गोपगोपीगवादिभिः, विशेषेण महाविस्मयपरमस्नेहादिना; ईक्ष्यमाण इति तत्तत्त्यागे कारणं प्रयोजनञ्च । तस्य च तद्धारणे साहाय्यमेव दर्शितम्, तथैव श्रीविष्णुपुराणेऽपि (५।११।२०-२१)—

'कृष्णोऽपि तं दधारैवं शैलमत्यन्तनिश्चलम् । व्रजैकवासिभिर्हर्षविस्मिताक्षैर्निरीक्षितः ॥
गोपगोपीजनैर्हृष्टैः प्रीतिविस्फारितेक्षणैः । संस्तूयमानचरितः कृष्णः शैलमधारयत् ॥' इति ।

पदादेकस्मादपि पदाक्रमणस्थानान्नाचलदिति धारणेऽत्यन्तानायास उक्तः, तथा पादाब्जादिति लीलयैकेनैव पादेन भुवमवष्टभ्य दधारेत्यप्युक्तं स्यात् ॥२३॥ कृष्णस्य नराकृतिपरब्रह्मणो व्रजवीरस्य वा योगः शक्तिविशेषो वृष्टिनिवारणोपायो वा, तस्यानुभावं माहात्म्यम्, यद्वा, योगेन योऽनुभावः प्रभावस्तं निशम्य दूतादिमुखेन श्रुत्वेति व्रजमनुव्रज इत्युक्त्वापि पश्चान्महामदेनावेक्षया स्वयमनागमनात्, यद्वा तत्रागतोऽपि दुर्म्मदमत्ततया स्वयमबुध्यमानं मेघादीनां विज्ञापनादेव श्रुत्वा, यद्वा, निशम्य दृष्ट्वा, तथा च विश्वः—श्रुतौ दृष्टौ निशमनम्' इति, निःस्तम्भो नष्टमदः । कुतः ? भग्नसंकल्पो गोष्ठजिघांसालक्षणो यस्य सः, स्वांश्च मरुद्गणान्, यद्वा, स्वीयान्, अनिवारणे तेषामनिष्टापत्त्यात्मनोऽप्यनिष्टापत्तेरिति भावः । सम्यक्, भयेन पलायनार्थमिवाकाश परित्याजनादिपूर्वकं न्यवारयत् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मद्धस्ताद्योऽद्रेर्निपातनाद्वो युष्माभिरिहाधुना त्रासो भयं न कर्त्तव्यं वातवर्षाभ्यां यद्भयं तेनालं तन्न कर्त्तव्यमित्यर्थः । तत्त्राणं वातवर्षभयात् त्राणं मया विहितम् ॥ २१ ॥ तथा कृष्णेन समाधापितचित्ताः सगोधनाः सपुत्रपौत्राः भृत्यपुरोहितादिवर्गसहिताश्च सर्वे व्रजौकसो यथावकाशम् असङ्कीर्णं यथा तथा गिरिगर्त्तं विविशुः ॥ २२ ॥ स्वावलोकनजानन्दपूर्त्यैव तेषां क्षुत्तृट्कृतपीडां वारयन् सप्ताहं तथा दधारेत्याह–क्षुत्तृड्व्यथां सुखापेक्षां च हित्वा केवलमीक्षमाणो भगवान् सप्ताहमद्रिं दधार पदान्न चचाल यत्रोद्धारसमये पदं विन्यस्तं न ततश्चचालेत्यर्थः ॥ २३ ॥ ततस्तं कृष्णस्य योगानुभावं सामर्थ्यप्रभावं दृष्ट्वेन्द्रोऽतीव विस्मितः भ्रष्टसङ्कल्पोऽत एव विस्तम्भः निर्गर्वः मेघान् न्यवर्त्तयत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

वातवर्षनिमित्तं भयन् अलं निवारितम् "अलं तु भूषणे शक्तौ पर्याप्तौ विनिवारणे" इति यादवः । तत्त्राणं तस्माद्भयाद्रक्षणम् ॥ २१ ॥ कृष्णेनाश्वासितमानसाः आप्यायितमनोरथाः सोपजीवनाः व्रीहितन्दुलादिशरीरयात्रासाधनैः सहिताः ॥ २२ ॥ सुखापेक्षां शयनासनवसनादिसुखसाधनश्रद्धां हित्वा मुक्त्वा ॥ २३ ॥ योगानुभावं योगैश्वर्यम् "अनुभावः प्रभावे स्यान्निश्चये भावसूचके" इति महापुरुषान्दृष्ट्वा स्थाणुवत्प्रावण्यराहित्यं स्तम्भः तद्रहितो निरस्तम्भः भ्रष्टसङ्कल्पः गलितमनोरथः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

हित्वा विस्मृत्य कृष्णयोगानुभावं तत्स्वभाविकशक्तिप्रभावं निशम्य निशाम्येति पाठः उभयथापि दृष्ट्वेत्यर्थः । स्वयमेवोपारतम् इत्यादि ज्ञापनात् ॥ २३–३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सव्रजाः शकटमण्डलीसहिताः सोपजीविनः भृत्यपुरोहितादिसहिताः ॥ २२ ॥ क्षुत्तृड्व्यथां हित्वेति तन्निरन्तरदर्शनानन्दादेव यदुक्तं वैष्णवे—

> "व्रजैकावासिभिर्हर्षविस्मिताक्षैर्निरीक्षितः । गोपगोपीजनैर्हृष्टैरतिविस्फारितेक्षणैः ।
> संस्तूयमानचरितः कृष्णः शैलमधारयत्" ॥

कृष्णोऽत्रसर्वाभिमुखो बभूवेति बोध्यम् । अत्र श्रीकृष्णसौन्दर्यलावण्यपीयूषपानेन व्रजौकसां प्रेयसीसौन्दर्यादितीत्यनेन कृष्णस्य च क्षुधादिविगमोऽभवदिति अत्र सप्ताहव्यापिन्या सांवर्त्तकमेघवृष्ट्यापि यन्माथुरमण्डलं न ममज्ज तत्खलु भगवच्छक्त्यैव सद्यः पयःशोषणादिति ज्ञेयं तथा षष्ठिघटिकस्यैव कालस्य दिवसत्वात् घटीति प्रसिद्धा घटिका गणनेनैव व्रजजनानां सप्तदिवससंज्ञानमभूदित्यपि ज्ञेयम् ॥ २३ ॥ निस्स्तम्भो नष्टमदः न्यवारयदिति न जानेऽद्य कृष्णो मह्यं कं दण्डं दास्यतीत्यतिभयात् ॥ २४–२५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सव्रजाः शकटव्यूहसहिताः निर्विविशुः गर्त्तपरिमाणोक्तिरपि हरिवंशे "पञ्चक्रोशन्तु दैर्घ्येण क्रोशैकम्बिस्तरेण तु" इति ॥ २२ ॥ पादात् चरणाधिष्ठितात् स्थानात् ॥ २३ ॥ कृष्णस्य योगाऽनुभावं सामर्थ्यम् ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ननु पर्वतोत्कर्तनमुपरि वारिपतनमात्रं जातम् । जातं न च परितः प्रस्रवद्वारिवारणमिति तज्जनमज्जनं भवेदेव । ततश्च मोघो यत्नः कृतः स्यादिति चेन्न । आत्मयोगेनेत्युक्तेस्तेनास्मास्तम्भनसम्भवादिति केचित् । तत्तावन्मन्दं तेनैवापेक्षितसिद्धेः पर्वतोद्धारस्याप्यकर्तव्यत्वात् । अत्र ब्रूमः । अङ्कुरमात्रस्य गोत्रात उत्कर्तने मून्मण्लीभूयावतिष्ठते । उरौ गिरौ हरिणोत्कृते परितः स्वातं मृदूर्ध्वं निः सृता भित्तितां धत्त इति तत्प्रतिबद्धं वारि नान्तर्निविवेशेति भगवानमोघसंङ्कल्पस्ते च न निम्नगा इति सम्भवात् । अथवाऽऽत्मयोगेनेत्युक्तयोग एव भवत्वम्भस्तम्भको भरोद्धरणं तद्धरितस्तन्मददमने महान्माननाशमिति न तत्र योगविनियोग इति सम्भवात् । तत्त्राणं विहितं व इत्युक्तेः । मद्धस्तादद्रेर्निपातनं तस्मात्त्रासो भयं वो न माऽस्तु वातवर्षभयं चालं वारितम् । अलं तु भूषणे शक्तौ पर्याप्तौ विनिवारण इति यादवः । तस्मात्त्राणमेवंरूपं वो विहितम् ॥ २१ ॥ कृष्णेनाश्वासितं मानसं येषां ते यथावकाशं सधना गोधनसहिताः सप्रजाः सोपजीवना व्रीह्यादिजीवनोपायसहिता गर्तमवटं निविविशुः ॥ २२ ॥ वहुधा बहुधान्यसङ्ग्रहात्क्षुत्तड्व्यथां क्षुच्च तृट् च ताभ्यां व्यथां हित्वा सुखापेक्षां स्वस्थतयाऽवस्थानात्प्राप्तसुखा इति तदपेक्षां हित्वेत्युक्तिः । तैर्व्रजवासिभिर्गोपवीक्ष्यमाणः सप्ताहमद्रिं दधौ पदात्पदं च नाचलच्चचाल । असंमान्यान्युपायं धराधरहरणं हरिः कुर्वन्पर्वताश्च गोत्रभिच्छात्रव इति तदुद्धृत्या तन्मानहानिः कार्येति काञ्चन वैरी वैरीसहजमित्रमिति किंवदन्तीं लालयामासेत्यवसेयम् । उक्तं च रुक्मिणीशविजये । शतक्रतौ वर्षति वासुदेवो गिरिं समुद्धृत्य बभूव तूष्णीम् । जिहीर्षुभिः स्वात्समशत्रुशौर्यं तदाद्यवैर्युद्धरणं हि कार्यमिति । श्रीधर एवं धरति धरं किमचीकरन्नमुचिसूदन इति परीक्षिन्मानसीं शङ्कां शुकः परिहरतीतरियति ॥ श्रीशुक इति । तं कृष्णयोगानुभावं निशाम्यातिविस्मित इन्द्रो निरस्तम्भो गतगर्वो भ्रष्टः सङ्कल्पो गोकुलनाशविषयो यस्य स सन्स्वान्मेघान्सन्न्यवारयन्निवारयामास ॥२४॥

श्रीसुबोधिनी

उपरि मद्धस्तं दृष्ट्वा त्रासो न कर्तव्य इत्याह **न त्रास** इति, इहास्मिन् गर्ते प्रविष्टैर्मद्धस्तादद्रिपातनाद्धेतोस्त्रासो न कार्यो न पतिष्यति यतः, ननूभयोर्भययोरेकमङ्गीकर्तव्यं ततो वरं वृष्टिभयमेवास्त्वित्यस्याशङ्क्याह **बातवर्षभयेनालमिति**, **वातवर्षभयं न कर्तव्यमलंशब्दो** निवारणेतस्तद्भयं मास्त्वत्र तु शङ्का न कर्तव्या, आगन्तव्यमित्याशङ्काभावमुपपादयति **तत्त्राणं विहितं मयेति**, तस्य भयस्य त्राणं रक्षणं प्रतीकारस्तन् मया विहितं, न ह्युपायः कदाचिदप्यनुपायतामापद्यते, मयेतिवचनान् न भ्रान्तेन कृत

कृतत्वान् न कर्तव्यम् ॥ २१ ॥ ततस्ते तथैव कृतवन्त इत्याह **तथेति**, पतनभयाभावार्थमाह **कृष्णाश्वासितमानसा** इति, **यथावकाश**मित्युक्तार्थस्थापनं **सधना** गोसहिताः पुत्रादिसहिता **उपजीवी** सेवकादिर्विप्रादिश्च तत्सहिताः, ततो वृष्टिः सप्तरात्रं जाता भगवतो गुणानां च मर्यादायां प्रतीक्षार्थं यद्यग्रेपि भवेन् म्रियतैवेन्द्रो मेघाश्च तदुपरिसहनं भगवतो नास्त्यत एव यो **भगवदीयेभ्यो विचार्यापकारं करोति सप्तरात्रं प्रतीक्षत** एतन्मध्ये चेद् भगवता परिपालितस्तदा न करिष्याम्युपेक्षितश्चेत् करिष्यामीत्यविचार्योपद्रवकर्ता तु सप्तरात्रं करोति यदि तावत्कालं जीवितस्तदा निवर्तते स्वनाशभयात्, एवं व्यवस्था सर्वत्र ॥२२॥ ततो भगवान् सप्तरात्रं तथा स्थित इत्याह **क्षुत्तृडिति**, **क्षुत्तृड्भ्यां** जायमानं **व्यथां** सोढ्वा **सुखस्य** निद्रादेरप्यपेक्षां त्यक्त्वा **तैर्व्रजवासिभिर्निरीक्षमाणो** भगवानद्रिं **दधौ**, न दीर्यत इत्यद्रिः सोपि वृष्ट्या मध्ये न दीर्णो भगवानपि पदादपि न चलितः, अत्र हित्वेत्यनेनैव सम्बध्यते क्षुत्तृड्व्यथामिति दर्शनेनान्नभोजनेन वान्यथा गोपानां कथं धैर्यं भवेत्? एवं **सप्तरात्रं** धृत्वा तान् व्रजस्थान् सर्वेभ्यः पृथक्कृत्य स्वीयानेव कृतवानिति निरूपितं, **सप्ताङ्गानि प्राणिनो भवन्ति देवर्षिपितर आत्मात्मीयावैदिकः पारलौकिकश्चे**ति, यद्येतेषां मध्ये कश्चिदप्येतान् पालयेत् तदा तेषां वा भवेयुर्यदि ते सर्व एवाशक्ताः प्रतिपक्षा वा तदा नातःपरं तेषां सम्बन्ध इति, अत एव **प्राणान्तःकरणधर्मत्याग उक्तस्तेषां शुद्धभगवद्भावे बाधकत्वात्**, एतेन प्रभुस्वरूपातिरिक्त स्मृतवन्तोपि नेत्युक्तं भवति भगवद्रक्षणमेतादृशमिति च ज्ञापितं, सपदि रक्षाग्रे च सुखमेतेन भविष्यतीत्यनुसन्धानेन **वीक्षणे** वीक्षणस्य तच्छेषत्वं स्यात् तथा सति भक्तिमार्गीया सा रक्षा न भवेदिति सर्वमन्यथा स्यादत एव **तैरि**ति पूर्वोक्तं केवलभगवदधीनत्वमेतादृग् रक्षणे हेतुत्वेन परामृष्ट पारम्पर्यागतस्यापीन्द्रयागस्य भगवद्वचनमात्रेण पूर्वं त्यक्तत्वात्, **दधावि**ति 'डुधाञ् धारणपोषणयो'रित्यस्य रूपं तेनाद्रिं धृतवान् पोषितवांश्च, **सप्ताह**मित्य'त्यन्तसंयोगे द्वितीया', अहःशब्दो रात्रिदिनवाची, अचलत्वस्थापनार्थं **नाचल**दिति **पदादीषदपि**, गतिः पादस्य सहजेति स निर्दिष्टः ॥ २३ ॥ तत इन्द्रो युद्धार्थं समागत्यालौकिकं दृष्ट्वा भीतः सन् मेघान् न्यवर्तयदित्याह **कृष्णेति**, लीलार्थमवतीर्णस्य **सर्वयोगाधिपते**रप्रच्युतस्वरूपस्य तं गोवर्धनोद्धरणलक्षणम**नुभाव निशम्य** श्रुत्वा मेघद्वारेन्द्रो**तिविस्मितो** जातस्ततो **निःस्तम्भो** गतगर्वो **भ्रष्टसङ्कल्पो**पि जातः स्वोत्कर्षमपि त्यक्तवान् मारयिष्यामीतिसङ्कल्पं च त्यक्तवांस्ततः स्वान् **मेघान् सम्यङ् न्यवारयत्** ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

क्षुत्तृड्व्यथामित्यस्मात् पूर्वं **प्रतीक्षार्थ**मिति सप्तसु मध्ये एकोपि चेदुपेक्षेत तदा सर्वथोपद्रवं करिष्यामीति सप्तानां प्रतीक्षार्थमित्यर्थः, **तदुपरीति** अतः परं रक्षकाभावान् नष्टा एव भविष्यन्तीत्युपद्रवकर्तारमेव मारयेदित्यर्थः अत्राविचार्योपद्रवकर्ता इन्द्र इति ज्ञेयम् ॥ २२ ॥ **क्षुत्तृडि**त्यत्र हित्वेत्यस्यैव विवरणं सोढ्वेति न तु पदान्तराध्याहारः अग्रे तथान्वयकथनात् ॥ २३ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

क्षुत्तृड्व्यथामित्यत्र सप्तदिवसधारणस्य तात्पर्यनिरूपणे **ततो वृष्टिः सप्तरात्रं जाता भगवतो गुणानां च प्रतीक्षार्थ**मिति, अत्रायमभिप्रायः, शक्तिमान् हि शक्तिभिः सर्वं करोति यथानेकशस्त्रवान् यथासौकर्यमेकैकेन शस्त्रेण मारकान् परिहृत्य दीनान् रक्षति एवमैश्वर्यादिषड्गुणवान् भगवान् प्रत्यहमेकैकेन गुणेन वृष्ट्यादिकृतदुःखं परिहृत्य श्रीगोकुलं रक्षितवान्, एवं षट्सु दिनेषु षड्भिर्गुणैः रक्षा, सर्वगुणवैशिष्ट्येन यद् रक्षणं तद् धर्मिरूपेण रक्षणमेवं सप्त प्रकारा रक्षणे, तत्र प्रथमदिवसे ऐश्वर्येण रक्षणे जायमाने एकस्मिन् दिने रक्षित्वा द्वितीये तृतीये चतुर्थे वा श्रीकृष्णो व्रजस्योपेक्षां करिष्यति तदा व्रजनाशो भवितेत्याशयात् प्रलयकर्त्रीं वृष्टिं शक्रः सम्पादितवान्, सेयं **भगवतो गुणानां च प्रतीक्षा** नाम, ततोष्टमदिवसे कुतो वृष्टिर्नाभूदित्याशङ्क्य तदाशयं विवृण्वन्ति **तदुपरि सहन**मित्यादिना, **तदुपरीति** गुणगुणिकृतरक्षानादरेण सप्तदिवसोपरीत्यर्थः, अयमाशयः, गुणषट्ककृतरक्षामविचार्य सप्तमदिवसे वृष्टिः कारिता, एवं यदि धर्मिरूपेण कृतां रक्षामविगणय्याष्टमदिवसे वर्षेत् तदा धर्मिणोनादरे भगवानिन्द्रं मारयेत्, तदुक्तं **यद्यग्रेपि तद् भवेन् म्रियेतैवेन्द्रो मेघाश्चे**त्यनेन, एवं सति इन्द्रानुजिघृक्षया न तादृशीं बुद्धिं हरिरुत्पादितवान्, अपि तु सद्बुद्धिं शक्राय दत्तवान्, यया सप्तमीं रक्षामवलोक्य वासवो वृष्टिं वारितवान्, तदग्रे वक्ष्यन्ति 'सप्तमदिवसस्य रात्रिशेषे वारण'मिति, अत **एवे**त्यारभ्य **एव व्यवस्था सर्वत्रे**त्यन्तं **विचार्ये**ति विचार्योपद्रवकर्ता त्वनेन भगवद्भक्तेनायमपराधः कृत एतस्मै दण्डो देयो न वेतिसन्दिह्य भगवता यस्य रक्षार्थं यत्नः कृतस्तस्मै दण्डो न देय इति निश्चिनोति ततो न दण्डयति, एवं **सप्तरात्रं** प्रतीक्षणं भगवतो गुणानां च अत्र विचार्योपद्रवकर्ता देवादिर्ज्ञेयो यस्य भगवत्कृतभक्तरक्षाया भक्तापेक्षायाश्च ज्ञानमस्ति न तु यः कश्चित् साधारण इति ज्ञेयं, तथा च सप्तरात्रमध्ये यदा कदाचिद्रक्षोपाये भगवता कृते भगवद्रक्षितस्य नाशाभावमवगत्य विचारकुशलस्तु भक्तान् नापकरोति, ननु यदा कश्चिद् भक्तानुपद्रावयेत् तदा भगवान् पालयेदतः पूर्वमेव कथं ज्ञायेत यदयं भगवता रक्षित उपेक्षितो वेति चेत्, न, उपद्रवसम्भावनयापि भक्तरक्षार्थं उपायकरणात्, प्राग्दिष्टं भक्तरक्षाया'मिति नवमस्कन्धे शुकवाक्यात् उपद्रवशङ्कयैव अम्बरीषभूपभक्तरक्षार्थं चक्रस्थापनस्य सिद्धत्वात्, भगवत्कृततादृग्रक्षावबोधो देवादीनामलौकिकप्रकारेण जायत एव, अत एव चेतसा भगवत्स्मरणमनेन कृतमनेन न कृतमिति ज्ञानं यमदूतानामुत्पद्यते, अन्यथा

भगवत्स्मृतान् कथं न नयन्ति, कथं वा भगवत्स्मरणरहितान् नयन्ति, तदुक्तं "जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दं कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोकृतविष्णुकृत्या"निति षष्ठस्कन्धे यमेन, तथा च देवादीनां अलौकिकप्रकारेण भगवत्कृतरक्षोपेक्षोभयज्ञानं मन्तव्यं, एवं सति विचार्योपद्रवकर्ता तु सप्तरात्रं प्रतीक्षत इति यदुक्त तत्र विचार्योपद्रवकर्ता तु देवादिर्ज्ञेयः अलौकिकद्रष्टृत्वात्, **अविचार्योपद्रवकर्ता त्विति यथेन्द्रस्तथेत्यर्थः** स्पष्टमेतत्, इह विचार्योपद्रवकरणे सप्तरात्रप्रतीक्षोक्ता, अविचार्योपद्रवकरणे सप्तरात्रपर्यन्तं करणमिति यदुक्त तत्र न सप्तरात्रपर्यंतमेव प्रतीक्षा सप्तरात्रपर्यन्तमेवोपद्रवकरणमिति नियमोस्ति, अपि तु सप्तरात्रपर्यन्तं प्रतीक्षा सप्तरात्रपर्यन्तमुपद्रवश्चेतिपरमावधिरुक्ता इति ज्ञेयम् ॥ २२ ॥ **क्षुत्तृड्व्यथां सुखापेक्षां हित्वेत्यत्र** व्यथायास्त्यागासम्भवात् पदान्तरेण सम्बन्धः कर्तव्य इत्याहुः **क्षुत्तृड्भ्यां जायमानां व्यथां सोढ्वेति सोढ्वेत्यध्याहार्यं**, अस्मिन् पक्षे सोढ्वेतिपदाध्याहारदोषशङ्कया **प्रकारान्तरेण** व्याचक्षते, **अत्र हित्वेत्यनेनैव सम्बध्यते क्षुत्तृड्व्यथामितीति**, तथा च **क्षुत्तृड्व्यथां हित्वेत्यन्वयं** विधाय व्यथाया अपि त्यागो वाच्यः, व्यथात्यागः कथं सम्भवतीत्याकाङ्क्षायामाहुः **दर्शनेन अन्नभोजनेन वेति, वीक्ष्यमाण** इतिपदादासक्तिर्निरूपिता, सा च प्रपञ्चविस्मरणपूर्विकैव वाच्या स्कन्धार्थनिरोधस्य तादृशत्वात्, अतो निखिलप्रपञ्चविस्मरणे क्षुत्तृडादिविस्मरणमर्थादायातमिति स एव त्यागपदार्थः, **अन्नभोजनेन वेति** भगवत्कृतेनान्नकूटान्नभोजनेन वेत्यर्थः, भगवद्भुक्तस्य सर्वतृप्तिजनकत्वेन व्रजवासिनां सर्वेषां तृप्तिर्जातेति क्षुत्तृड्व्यथासुखापेक्षात्यागः युक्त एवेतिभावः, अत एव प्रथमस्कन्धे "शाकान्नशिष्टमुपभुज्य यतस्त्रिलोकीं तृप्ताममंस्त सलिले विनिमग्नसङ्घ" इतिवाक्याद् भगवत्कृतभोजनस्य सगणदुर्वासस्तृप्तिजनकत्वमुपलभ्यते, **सप्ताङ्गानि प्राणिनो भवन्तीति प्राणिन इति षष्ठी, प्राणिनो** जीवस्य हिताचरणे **सप्ताङ्गानि भवन्तीत्यर्थः**, सप्ताङ्गानि गणयन्ति **देवर्षिपितर** इत्यादिना, स्वयमपि स्वसामर्थ्येन स्वहितमाचरतीत्यात्मोक्तः, **आत्मीयः** पुत्रादिः, **ऐहिकः** स्वदेहसम्बन्धिभिन्नः स्वरचितोपकारः **पारलौकिको** यागादिधर्मः एतैः सप्तभिर्यदा व्रजवासिनो न रक्षितास्तदा व्रजवासिनां नैतेषु कदाचिदपि प्रीतिसम्भवः, किन्तु स्वरक्षके श्रीगोवर्धनधर एव प्रीतिर्व्रजस्थानां समुद्भूतेति ज्ञेयं **सप्ताहं नाचलत् पदा**दित्यस्य व्याख्याने **गतिः पादस्य सहजेति स निर्दिष्ट** इति यथा व्रजवासिभिः सहजः क्षुत्तृड्रूपो धर्मो भगवदर्थं त्यक्तस्तथा प्रभुणापि स्वाभाविकश्चलनरूपश्चरणधर्मस्त्यक्तः "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह"मितिवाक्यादितिभावः ॥ २३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इह गिरिगर्ते स्थितैर्वो युष्माभिर्मद्धस्तादद्रिनिपातने अद्रिनिपातनिमित्त त्रासो न कार्यः। तथा वातवर्षाभ्यां यद्भयं तेनाप्यलं तदपि न कर्तव्यम्। हि यस्मात्तत्तो भयात्त्राण रक्षणं वो युष्माक मया विहितं निर्मितम् ॥ २१ ॥ तथोक्तप्रकारेण कृष्णेन आश्वासितं मानसं येषां ते सधनाः सगोधनाः, सव्रजाः शकटारोपितोपकरणसहिताः, सोपजीविनः भृत्यपुरोहितादिवर्गसहिताः सर्वे व्रजोकसो यथावकाशमसङ्कीर्णं यथा भवति तथा गिरिगर्तं निर्विविशुः ॥ २२ ॥ तद्दर्शनानन्देन क्षुत्तृड्व्यथां निद्रादिसुखापेक्षां च हित्वा विस्मृत्य तैर्व्रजवासिभिर्वीक्ष्यमाणो भगवान् सप्ताहमद्रिं दधार। पदात् 'तदुद्धारसमये यत्रैव पादौ न्यस्तौ ततः स्थानात्' नाचलत् ॥ २३ ॥ तं श्रीकृष्णस्य योगानुभावं सामर्थ्यं मेघद्वारा निशम्य श्रुत्वाऽतिविस्मितः, निस्तम्भः गतमदः, भ्रष्टो व्रजविनाशविषयकः सङ्कल्पो यस्य सः, इन्द्रः स्वकीयान् मेघान् वर्षातः संन्यवारयत् ॥ २४ ॥

अन्वितार्थप्रकाशिका

नेति ॥ इह गिरिगर्ते स्थितानां युष्माकम्। कर्त्तरि षष्ठी। मद्धस्तादद्रेर्निपातने निपतने। स्वार्थे णिच्। तन्निपातनिमित्तं त्रासो न कार्यः तथा वातवर्षाभ्यां यद्भयं तेनाप्यलं तदपि न कर्तव्यम्। हि यस्मात् मया वो युष्माकं तत्ततो भयात्त्राणं रक्षणं विहितम् ॥ २१ ॥ तथेति ॥ तथोक्तप्रकारेण कृष्णेन आश्वासितं मानसं येषां ते गावश्च धनानि च गाव एव धनानि वा तत्सहिताः सगोधनाः सव्रजाः शकटारोपितोपकरणसहिताः सोपजीविनः मृत्युपुरोहितादिवर्गसहिताः सर्वे व्रजौकसो यथावकाशमसंकीर्णं यथा भवति तथा गिरिगर्तं निर्विविशुः ॥२२॥ क्षुदिति ॥ तद्दर्शनानन्देन क्षुत्तृड्व्यथां निद्रादिसुखापेक्षां च हित्वा विस्मृत्य तैर्व्रजवासिभिर्वीक्ष्यमाणो भगवान् सप्ताहमद्रिं दधौ दधार। पदात् तदुद्धारसमये यत्रैव पादौ न्यस्तौ ततः स्थानान्नाचलत्। अत्र सप्ताहव्यापिन्या सांवर्त्तकवृष्ट्या माथुरं मण्डलं न ममज्ज। तद्भगवच्छक्त्यैव जलशोषणात् सप्ताहगणनाऽपि भगवतैव कृता। अन्येषां रात्रिदिनज्ञानस्याऽभावात् भगवत्प्रभावाद्गोवर्द्धनापरिस्थहरिणादीनामपि कष्ट नाभूदित्यपि ज्ञेयम् ॥ २३ ॥ कृष्णेति ॥ तं श्रीकृष्णस्य योगानुभावं सामर्थ्यं स्वानुचरमेघद्वारा निशम्यातिविस्मितः निस्तम्भः गतमदः भ्रष्टो व्रजविनाशविषयकः संकल्पो यस्य सः इन्द्रः स्वान् स्वकीयान्मेघान् वर्षातः संन्यवारयत् ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इह पर्वतोत्पाटनभूभागे वो युष्माभिः हि यतः वो युष्माकं तेन अद्रिधारणेन त्राणं रक्षणं मया विहितं कृतं अतो वातवर्षभयेन अलं किमपि न स्यादित्यर्थः ॥ २१ ॥ सगोधनाः सव्रजाः शकटवृंदसहिता उपजीविनो भृत्युपुरोहिताः तद्युताः ॥२२॥ वीक्ष्यमाणो हरिः पदात्स्थानात् ॥ २३ ॥ निःस्तंभो गर्वहीनः ॥ २४–२५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नेति ॥ इह बिले, मद्धृताद्रिनिपातने मम हस्ततोऽद्रेः पतनात इत्यर्थः । वो युष्माभिः, त्रासो भयं न कार्यः । भीतिर्न कर्त्तव्येत्यर्थः । वातश्च वर्षं च ताभ्यां यद्भयं तेन, अलं तन्न कर्त्तव्यमित्यर्थः । मया, तत्त्राणं वातवर्षभयभ्या रक्षणं विहितं संपादितम् ॥ २१ ॥ तथेति ॥ तथा कृष्णाश्वासितमानसाः श्रीकृष्णेन समाधापितचित्ताः, सधना गोधनसहिताः, सव्रजाः शकटमण्डलीसहिताः, सप्रजा इति पाठान्तरे पुत्रपौत्रादिप्रजासहिताः, सोपजीविनः भृत्यपुरोहितादिसहिताश्च, सर्वे व्रजौकस इति शेषः । यथावकाशमसंकीर्णं यथा भवति तथा, गर्त्तं गिरिखातं, निर्विविशुः ॥ २२ ॥ स्वावलोकनजानन्दपूर्त्त्यैव तेषां क्षुत्तृट्पीडां वारयन् सप्ताहं दधारेत्याह ॥ क्षुदिति ॥ क्षुच्च तृट् च ताभ्यां व्यथा तां, सुखापेक्षां च हित्वा त्यक्त्वा, तैः व्रजवासिभिः, वीक्ष्यमाणः सानन्दं यथा तथा केवलमीक्ष्यमाणः भगवान्, सप्ताहं सप्ताहोरात्रं, अद्रिं भगवत्स्पर्शजानन्दतः परितः प्रवृद्धप्रान्तभागं गोवर्द्धनाचलं, दधौ दधार । पदात् नाचलन्न चचाल । उद्धारसमये यत्र पदं विन्यस्तं न ततश्चचालेत्यर्थः ॥ २३ ॥ कृष्णेति ॥ ततः तं कृष्णयोगानुभावं, श्रीकृष्णस्य सामर्थ्यप्रभावं निशम्य श्रुत्वा, इन्द्रः, अतिविस्मितः, भ्रष्टसंकल्पः विनष्टमनीषितः, अत एव, निस्तम्भः निर्गर्वः सन्, स्वान् मेघान्, संन्यवारयत् ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

न त्रास इहेति : १०.२५.२१.

मदभिहिताऽधरगतिरपि सुखार्थमचलानुयोगतो बलिवत् । भवितेति यात भीतिं त्यक्त्वा पाताऽहमस्मि सन्निहितः ॥ ११४ ॥
मद्गिरिस्थैर्यविश्रब्धा बुद्धिरस्त्येव वः सदा । अलं तत्कल्पनाजालैरलं याताचलान्तरम् ॥ ११५ ॥

तथेति : १०.२५.२२.

यत्किंचित्कालमेवेशेनाशु गार्तान्तरे कृताः । ते तु तत्कृपयाऽऽजन्मैवानुगार्तान्तरे स्थिताः ॥ ११६ ॥

क्षुत्तृडिति : १०.२५.२३.

श्रीशास्येन्दुसुधापानसुतृप्ताक्षिचकोरकैः । त्यक्ता तदा तैरखिलैः क्षुत्तृट् चेति न विस्मयः ॥ ११७ ॥
गिरिवरो गुरुरेष हि सर्वशो लघुरयं च दयानिधिरच्युतः । नगणपालनपाटवमर्थतः कलयतीति सशङ्कमलोकयन् ॥ ११८ ॥
लघुरयं सरलो यदिहाच्युतो नियतवक्रपदो हि गुरुस्त्वसौ । कथमितो भवितेति न बुध्यते त इति वीक्षणतत्परतां दधुः ॥ ११९ ॥
भूभृन्निकरे त्वचलो विज्ञातोऽयं दयावतां निकरे । विद्मो न कीदृगस्तीत्यच्युतमचल सशङ्कमद्राक्षुः ॥ १२० ॥
यज्ञघ्नस्य कियद्वयस्त्विति सुरैः पृष्टस्य सप्ताहमित्युक्तिं देवपतेर्निशम्य जलदाः प्रश्नोत्तराऽकोविदाः ।
उक्ताहर्गणवृष्टिकार्यममुना निर्दिष्टमस्मानिति स्वान्तर्निर्णयिनः किमत्र ववृषुः सप्ताहमेवानिशम् ॥ १२१ ॥
यद्द्वारास्थितिभिस्त्वदंघ्र्यनुचरैस्तत्कृत्स्नवारास्थितेर्वृष्टं तत्र वताऽऽप्लुतं त्वजनि तद्रोमापि नात्यल्पकम् ।
आज्ञा का पुरतो विधेयविषयेत्यब्दोक्तिमाकर्ण्य स प्रावाचालमिति स्फुटा किमभवत्तेनैव सप्ताहता ॥ १२२ ॥
सप्ताहमेव मघवा यदवर्षदम्भः तत्तत्स्वभावरचनैव च बीजमस्य ।
गर्भं यदेकमकरोत्स हि सप्तभागमेकैकमप्यथ पुरा किल सप्त सप्त ॥ १२३ ॥
यदि चेदुररीकरोमि सम्प्रत्यहमप्युद्धरणेऽत्र चंचलत्वम् । अचलाद्धरणं तदा न सिद्ध्येदिति तस्थौ स तथैव सत्यसंधः ॥ १२४ ॥
अचलोद्धरणं क्वचित्प्रसक्तं न मयैकेन पदेन चेदकारि । उपहासपदं तदा भवेय भुजगेशस्य सदा धृताचलस्य ॥ १२५ ॥
वयं धारयामो वयं धारयामो वयं धारयामोऽद्रिमेन समग्राः ।
अतद्भारभाजो व्रजस्यैवमुक्तीर्निशम्य स्वभारं न कृष्णोऽप्यवेदीत् ॥ १२६ ॥

कृष्णेति : १०.२५.२४.

सदयकरे सदयकरे विलोक्य विलसन्तमचलमचलमलम् । तानपि गुप्तान् गुप्तान् हरिणा हरिणाऽप्यधारि विस्मयता ॥ १२७ ॥
अचले चञ्चलीभावमचलन्तं च चञ्चलम् । वीक्ष्यास्य विस्मयो युक्तो भ्रष्टाभ्रादभ्रसंभ्रमः ॥ १२८ ॥
गोकुलार्थं हि येनास्मिन् कृतः कृत्स्नवसुव्ययः । सिद्ध एवानुतापोऽस्य स्फुटं तन्निर्जरेश्वरे ॥ १२९ ॥
असिद्धिः समारब्धकार्यस्य तद्वद् विपक्षोन्नतिश्चापि सन्तापहेतुः ।
न चित्रं मनागत्र वृत्रद्विषोऽस्य द्वयं चाप्यभूत् तत्सकृत्कृष्णवैरात् ॥ १३० ॥
गुरुगिरिनिश्चलभावो गदितः सद्भिस्तमोभिदरुण इव । तद्युक्तं यन्मघवति स एव तादृक्तया फलितः ॥ १३१ ॥
कृष्णाञ्जनेऽखिलसुदृग्जनसेव्यमाने गोरोगहारिणि विहीनदृशामगम्ये ।
दृष्टिस्थिते सति यदाप तदा सहस्रदृष्टिस्थितिर्विमलभावमलं क्षमं तत् ॥ १३२ ॥

कृष्णप्रिया

आप सर्व मेरे हस्त से इस गिरिवर के गिर जाने का संदेह–एवं भय न करें। अब गिरिवर के गहववर में हम आश्रित है इसलिये इस मूसलधार वर्षा और प्रचण्ड आंधो से भी हमें कुछ भी भय नहीं है क्योंकि उस आपत्ति से सुरक्षित रहने के लिये ही मैंने यह उपाय किया है ॥ २१ ॥ भगवान् श्रीकृष्ण के अभयप्रद विश्वास सभर वाक्यों से विश्वस्त सारे व्रजवासी अपने गोधन, आश्रितों, पुरोहितों पुत्रादि, एवं सेवकों के सहित सुख से श्रीगिरिवर के गह्वर में प्रविष्ट हुए। सबने अपनी अपनी सामग्री भी छकड़ों में भरकर वहीं रख ली। किसी के लिये स्थान की कमी नहीं रही ॥ २२ ॥ भगवान श्रीकृष्ण, क्षुधा-तृषा की व्यथा, सुख विश्राम की अपेक्षा को त्यागकर, सात सात दिन पर्यन्त ठीक इसी तरह श्रीगोवर्धन गिरिवर को उसी हस्त पर धारण करते खड़े रहे। एक पाँव भी इधर उधर नहीं हटे। सारे व्रजजन आश्चर्यचकित दृष्टि से भगवान श्रीकृष्ण की ओर एक टक निर्निमेष नजरों से निहारते रहें ॥ २३ ॥ भगवान् श्रीकृष्ण के इस अद्भुत योग के प्रभाव को देखकर इन्द्र को बड़ा आश्चर्य हुआ। इन्द्र का सारा संकल्प भ्रष्ट हो गया। फिर तो अभिमानशून्य इन्द्र ने मेघों को पानी वरसाने से पूर्णतया रोक दिया ॥२४॥

खं व्यभ्रमुदितादित्यं वातवर्षं च दारुणम्। निशाम्योपरतं गोपान् गोवर्धनधरोऽब्रवीत् ॥ २५ ॥
निर्यात त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः। उपारतं वातवर्षं व्युदप्रायाश्च निम्नगाः ॥ २६ ॥
ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय गोधनम्। [1]शकटाटोपकरणं स्त्रीबालस्थविराः शनैः ॥ २७ ॥
भगवानपि तं शैलं स्वस्थाने पूर्ववत् प्रभुः। पश्यतां सर्वभूतानां स्थापयामास लीलया ॥ २८ ॥

कर्दमक्षमा

अन्वयः गोवर्धनधरः उदितादित्यम् व्यभ्रम् खम् च दारुणम् वातवर्षम् उपरतम् निशम्य गोपान् अब्रवीत् ॥ २५ ॥ हे गोपाः ! त्रासम् त्यजत, वातवर्षम् उपारतम् च निम्नगाः व्युदप्रायाः सस्त्रीधनार्भकाः निर्यात ! ॥ २६ ॥ ततः ते स्त्रीबालस्थविराः गोपाः शकटोपकरणं स्वम् स्वम् गोधनम् आदाय शनैः निर्ययुः ॥ २७ ॥ प्रभुः भगवान् अपि, सर्वभूतानाम् पश्यताम् तम् शैलम् स्वस्थाने लीलया पूर्ववत् स्थापयामास ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्युदप्राया विगतोदकप्रायाः स्वल्पजला इत्यर्थः ॥२६॥ शकटोढोपकरणं शकटैरूढमुपकरणं यथा भवति तथा ॥२७-२८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

त्रासम् उद्वेगम्। वातेन सहितं वर्षमुपारतम्। उं शिवावतारं दुर्वाससं पाति रक्षत्यंबरीषप्रार्थनयेत्युपं सुदर्शनम्। स्पष्टमतेन्नवमस्कध। तेनारतं दूरीभूतं सुदर्शनेन शोषितं वातवर्षमत एवाह–व्युदप्राया इति। एतदपि गर्गसंहितादौ स्पष्टम्। इत्यर्थ इति। नाममात्रजला इति भावः ॥ २६ ॥ ततः भगवदुक्त्युत्तरम्। ते गर्तस्थाः। ऊढम् धृतम् उपकरणं जीवनसाधनं यथा स्यात्तथा। 'शकटाटोपकरणम्' इति विजयध्वजः। तत्र शकटेष्वटं गतमुपकरणम्। यद्वा—शकटेषु गमनसमये आटोपकरणं संभ्रमविधि यथा स्यात्तथेत्यर्थः ॥ २७ ॥ तम् उत्थापितम्। स्वस्थाने यत उद्धृतस्तत्रैव ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत एवोदितः दृष्टिपथं गत आदित्यो यस्मिन् तत् दारुणं भीषणम् उपरतं निवृत्तम् अत्र च निशाम्य दृष्ट्वेत्यर्थः। उपारतं वातवर्षमिति स्वयमेव विज्ञापनात् दर्शनं च तिर्यक्कृतहस्तेन गिरिं धृत्वेति ज्ञेयम् गोवर्द्धनधर इति श्रीशुकदेवस्य सोत्साहनिजस्फूर्त्तिमयं वाक्यम् ॥२५॥ हे गोपाः ! इति भवद्भिर्वृष्टितोऽधुना गवां रक्षा कृतेति श्लेषः। झटिति निम्नगानां व्युदप्रायत्वं च नाश्चर्यं वृष्टानां जलानां पततामेव श्रीभगवत्प्रतापतपनेन प्रायो विलीनत्वात् अन्यथा प्रलयकारिमेघैः सर्वाप्लावनं स्यात् धनानि गावो गवादीनि वा ॥ २६ ॥ ततस्तादृशगिरिधारणतादृशवचनानन्तरं ते इति तथा तथा भगवदङ्गीकारेण निर्जितमहेन्द्रास्तदेकजीवनाश्च ये तादृशा इत्यर्थः। उपकरणं धनादिकं स्त्र्यादयश्च शनैर्निर्ययुः शैघ्र्येण सम्मर्दापत्तेः ॥ २७ ॥ गोपादयो निर्ययुः भगवानपि तं स्थापयामासेत्यपि शब्दार्थः तत्र स्वस्थान इति। स्थानात्ययो निषिद्धः पूर्ववदिति पर्वत वैपरीत्यादिकं निरस्तं प्रभुरिति तत्र शक्तिर्दर्शिता अत एव लीलया सर्वेषां मनोहारिण्या अनायासचेष्टया अत एव विस्मयेनानन्देन च सर्वभूतानां व्रजस्थानां दिविष्ठानां च पश्यतामिति सप्तम्यर्थ षष्ठी ॥ २८ ॥

---

[1] शकटोढो–श्रीधर. वंशी. जीव. वीर. विश्व. रा. शु. सु.।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत एवोदितो दृष्टिपथं गत आदित्यो यस्मिन् तत्, दारुणमत्युल्वणम्, उपरतं निवृत्तम्, निशम्य व्रजवासिवीक्षणेन तद्धारणसुखासक्त्या स्वतोऽननुसन्धानात्, केवलं मुग्धगोपादिमुखतः श्रुत्वा दृष्ट्वेति वा, गोवर्द्धनं धरन्नेव गोपानब्रवीदिति तदानींमध्यप्रयास एव सूचितः। ईदृश सर्वं प्रेमवेगेन श्रीभगवच्छ्रमादिशंकया खिद्यमानस्य श्रीपरीक्षितः समाश्वासनार्थं ज्ञेयम् ॥ २५ ॥ हे गोपा इति भवद्भिर्वृष्टितोऽधुना गवा रक्षा कृतेति श्लेषः। स्वाभिर्धनैर्गोभिर्गवादिभिर्वा सर्वैरर्भकैश्च सहिता निर्य्यात, नद्यश्च व्युदप्राया महावृष्टिविवृद्धजलरहितप्राया बभूवुः, अनेन स्थलानां प्रायो जलप्लावापगमोऽपि ध्वनितः ॥ २६ ॥ ततस्तस्मात्तद्वचनादेव, ते गर्त्तान्तर्वर्त्तिनः, यद्वा, गर्त्तान्तरमपि श्रीभगवद्वीक्षणेन सुखस्थिताः, यद्वा, सप्ताहमेकत्र नैश्चिन्त्येन लब्धश्रीमुखसन्दर्शनाः। उपकरणं धनादिकं स्त्र्यादयश्च शनैर्निर्ययुः, तेषां स्वभावेन नन्दगतित्वात् भीरुत्वेन पुनर्वृष्टिशंकया वा, यद्वा, तत्सहचराणामिव वने गन्तुमशक्तानां तेषां तद्वीक्षणत्यागाशक्तेः, यद्वा, गोपादयः सर्वेऽपि शनैरेव निर्ययुः, तदानीन्तन तच्छ्रीमुखशोभाविशेषवीक्षणासक्तेः ॥ २७ ॥ गोपादयो निर्ययुः, भगवानपि तं स्वस्थाने स्थापयामासेत्यपि शब्दार्थः। पूर्ववद् यथायं पूर्वमासीतथैव लीलया स्थापयामास, न स बलेन प्रक्षेपणात्, पूर्वस्थितशिलादिसन्निवेशानतिक्रमेणेत्यर्थः, इति शक्तिविशेषो दर्शितः, पश्यतां लीलया धारणात् यथापूर्वं लीलया स्थापनाच्च, परमाश्चर्य्येण निरीक्षमाणानां सतामिति तत्र संशयो निरस्तः। ननु गर्त्ते पुनः स्थापनेन महागरिष्ठतरस्य तस्यावश्यमेव भूमौ किञ्चित् प्रवेशहानिः स्यादेव, तत्राह—प्रभुः, तस्य किमशक्यमित्यर्थः। तत्र प्रयोजनविशेषमप्याह—भगवान्, व्रजक्रीडाविशेषेण निजाशेषैश्वर्य्यप्रकटनपरः, पूर्ववत्तस्मिन् विचित्रक्रीडार्थमिति भावः, अन्यथा तत्सुखासम्पत्तेः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

व्युदप्रायाः निरुदकप्रायाः ॥ २६–३३ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धीये श्रीसुदर्शनसूरिकृतशुकपक्षीये पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत उपरतं वातवर्षात् अतएव विगतान्यभ्राणि यस्मादत एवोदितः प्रकाशमान आदित्यो यस्मिन्। तदाकाशं च दृष्ट्वा गोवर्द्धनधरो भगवान्। गोपानाह ॥ २५ ॥ उक्तिमेवाह—निर्यातेति। हे गोपाः! स्त्रीभिर्द्धनैरर्भकैश्च सहिताः निर्गच्छत त्रासं भयं त्यजत वातवर्षमुपारतं निवृत्तं निम्नगाः नद्यः व्युदप्रायाः निरुदकप्रायाश्च स्वल्पजलाश्चेत्यर्थः ॥ २६ ॥ ततो भगवदुक्त्यनन्तरं सर्वे गोपाः स्त्रियो बालाः स्थविरा वृद्धाश्च शनैः शकटैः रूढानि गृहोपकरणानि यस्मिंस्तद्यथा भवति तथा स्वं स्वं गोधनमादाय निर्ययुर्गर्त्तान्निर्जग्मुः ॥ २७ ॥ अथ प्रभुः समर्थो भगवानपि सर्वभूतानां पश्यतां सतां लीलया पर्वतं शैलं गोवर्द्धनं स्वस्थान एव स्थापयामास ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

व्यभ्रं विगतमेघं वातश्च वर्षश्च वातवर्षम् एकवद्भावः ॥ २५ ॥ व्युदप्रायाः विगतजलप्रायाः ॥ २६ ॥ शकटाटोपकरणम् शकटगतमुपकरणं जीवनसाधनं शकटाटोपकरणं चादाय गतौ शकटपरिवर्त्तनेनाटोपकरणं संभ्रम विधिर्यथा भवति तथेति वा ॥ २७–२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

व्युदप्रायाः विगतोदकप्राया अल्पजला इत्यर्थः ॥ २६ ॥ शकटेष्वारूढान्युपकरणानि यत्र तद्यथा स्यात्तथा निर्जग्मुः ॥ २७–२८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वातवर्षमुपरतं निशम्य विगतान्यभ्राणि यस्मात्तत् उदितः आदित्यो यस्मिन् तत् खं च निशम्य ज्ञात्वा ॥ २५ ॥ व्युदप्रायाः निरुदकप्रायाः समजला इत्यर्थः ॥ २६ ॥ शकटेषु रूढमुपकरणं गृहोपकरणं यथा भवति तथा स्वं स्वं गोधनमादाय निर्ययुर्गिरिगर्त्तात् ॥ २७–२८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणि

नीलं नैव नभः सुलज्जितशचीभर्तुर्मुखे नीलिमा मेघाः क्वापि न सन्ति सन्ति दिविजभ्राजद्विमानाम्बुदास्तामिस्रं न हि दिश्यथाऽपि च दृशि त्वां मानुषं मन्वतां चित्तेष्वस्ति न वेपथुर्निजजने भीतेन्द्रगात्रे परम् ॥ १ ॥ धारा नैव पयोमुचां यदुपते प्रेमाश्रुधारा परं स्वानां नो परिगर्जितं स्तुतिकृतां सिद्धेश्वराणां ध्वनिः। विद्युन्नामरनर्तकी करचयालङ्कारकान्तिः प्रभो नो वायुः

सुखृष्टपुष्पसहगानाल्पालिपक्ष्मर्मरुदित्यादिप्रकारेण केनचिदभिहितः स्वयमाहेत्युत्प्रेक्षितम्। वस्तुतस्तु सर्ववित्प्राह ॥ खमिति। व्यभ्रं विगतान्यभ्राणि यस्मात्तत्खमाकाश उदितादित्यं च दारुणमुल्बणं वातं वर्षं चोपरतं निशम्य गोवर्धनधरो गोपानब्रवीत् ॥२५॥ हे गोपास्त्रासं त्यजत सस्त्रीधनार्भका निर्यात बहिर्वातवर्षं वातेन सहितं च तद्वर्षं च तदुपारतं शान्तं निम्नगा व्युदप्राया विगतान्युदान्युदकानि येषां ते कासारादयस्तत्तुल्या इति। ता नद्यस्तथा। स्वतन्त्रोऽयमुदकवाच्युदशब्दः ॥ २६ ॥ शकटेष्वनस्खटन्ति गच्छन्ति तानि तद्गतानीति यावत् उपकरणान्युर्वरितजीवसाधनान्यस्मिन्कर्मणि तद्यथा भवति तथा निर्ययुः। शकटानामाटोप आरेभटी तत्करणं यथा तथेति वा स्त्रीबालस्थविरा गोपाः शनैः स्वं स्वं गतं ॥ २७ ॥ स्वस्थाने पूर्वोत्कृतस्वस्थले सर्वभूतानां पश्यतां सताम्। अनादरे चैषा षष्ठी। सहाया भवतेत्यनादृत्य स्थापयामास ॥ २८ ॥

श्रीसुबोधिनी

ततो यज् जातं तदाह खमिति, सप्तमदिवसस्य रात्रिशेषे निवारणं तत आकाशो **व्यभ्रो** जात **उदित आदित्यो** यस्य, एवमुपरितनवृष्ट्यभावं ज्ञात्वा **गोवर्धनं धृत्वैव भगवानब्रवीत्**, वातयुक्तं **वर्षं** चकारात् शिलावर्षं मेघांश्च दारुणमतिमारकमुपरतं **निशम्य**, **गोपानिति** पूर्ववद् धर्मपरान् ॥ २५ ॥ भगवद्वाक्यमेवाह **निर्यातेति**, **त्रास च त्यजत** वातवर्षकृतं **गोपा** इतिसम्बोधनं गवां पालनमावश्यकमिति, प्रथमतो बहिर्द्दष्ट्वा पश्चात् सामग्री नेयेतिशङ्कां वारयन्नाह **सस्त्रीधनार्भका** इति, **स्त्रियो धनान्यर्भका** बालाश्चेति तैः **सहिता** एव **निर्गच्छत** यतो **वातवर्षमुपारतं निम्नगाः** सूक्ष्मनद्यो **व्युदप्रायाः** क्वचिद् गभीर एवोदकं नान्यत्रेति, तेषां जिज्ञासाभावादेतदुक्तम् ॥ २६ ॥ प्रवेशवदेव निर्गता अपीत्याह **ततस्त** इति, तत्र सर्वं पृथगेव स्थितमिति ज्ञापयितुं **स्व स्वं गोधनमादाय सर्वे निर्गताः**, **शकटानामाटोपकरणं** यथा भवति तथा यथा निर्भया हृष्टा निर्गमने महान्तं सम्भ्रमं कुर्वन्ति तथा कृत्वा निर्गता इति तेषामानन्दः सूचितः, ततोन्येपि **स्त्रीबालस्थविराः शनैरेव** निर्गता अव्यग्राः ॥ २७ ॥ सर्वेषु निर्गतेषु भगवत्कृतमाह **भगवानपीति**, यथा ते स्वस्वकार्यार्थं निर्गता एवं भगवानपि तं **शैलं स्वस्थाने** तस्यैव **स्थाने पूर्ववदे**वानुपूर्वां विधाय स्थापितवान्, अनेन प्रथनेनैकत्रकरणपक्षेपि यथापूर्वं स्थापितवानिति लक्ष्यते, अत्र स्थापने ग्रहणे वा न किञ्चिन् मायिकमिति ज्ञापयितुं पूर्ववदेव स्थापितवान्, तदाह **पश्यतां सर्वभूतानामिति**, यथा हस्तस्थितं पात्रं यथास्थानं स्थाप्यते तथैव **लीलया स्थापयामास** ॥ २८ ॥

३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

निर्यातेत्यत्र तेषामिति तेषां गोपानां विचारसामर्थ्याभावात् स्वयमेवोक्तमित्यर्थः, जिज्ञासापदेन विचारः ॥ २६ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

दारुणं वातवर्षमुपरतं निवृत्तं दृष्ट्वा, अत एव विगतानि अभ्राणि यस्मात्, अत एव उदितः प्रकाशमानः आदित्यो यस्मिंस्तथाभूतं खमाकाशं च निशाम्य दृष्ट्वा गोवर्धनधरो भगवान् गोपानब्रवीत् ॥ २५ ॥ तदुक्तमाह–निर्यातेति। हे गोपाः ! स्त्रीभिर्धनैरर्भकैश्च सहिता निर्यात गोवर्धनगर्तादितो निर्गच्छत। त्रासं वर्षभयं त्यजत। यतो वातवर्षमुपारतं निवृत्तम्। 'तथापि महावृष्ट्या व्रजभूमिर्जले निमग्ना स्यात्' इत्याशङ्क्याह–व्युदप्राया इति। निमग्ना नद्योऽपि व्युदप्रायाः, निरुदकप्रायाः स्वल्पजलाः सन्तीत्यर्थः। प्रलयहेतुजलमपि भगवच्चिन्त्यशक्त्यैव शुष्कमिति ज्ञेयम्। नच "जलशोषेण वृष्टिनिवारणादिना वा रक्षा कुतो न कृता ? गोवर्धनोद्धरणस्य किं प्रयोजनम् ?" इति शङ्कनीयम्। "अन्यथा रक्षाकरणे व्रजवासिनां गोवर्धनपूजायां निष्फलत्वबुद्धिः स्यात्तथा च ततोऽग्रे तत्पूजा न स्यात्, तद्द्वारारक्षणे तु 'पूजितेन गोवर्धनेन रक्षिताः, अतोऽयं महान् देवः सर्वदा पूजनीयः' इति बुद्ध्या सर्वदा तत्पूजा स्यात्" इत्याशयेन गोवर्धनोद्धारेणैव व्रजरक्षा कृतेति ज्ञेयम् ॥ २६ ॥ ततो भगवदुक्त्यनन्तरं ते सर्वे गोपाः स्त्रियो बालाः स्थविरा वृद्धाश्च शकटैरूढमुपकरणं यथा भवति तथा स्वं स्वं गोधनमादाय निर्ययुः गिरिगर्तान्निर्जग्मुः ॥२७॥ भगवान् श्रीकृष्णोऽपि सर्वेषां भूतानां जनानां पश्यतामेव लीलया अनायासेनैव तं शैलं पूर्ववत् पूर्वं यथाऽऽसीत्तथैव स्वस्थाने स्थापयामास। आयासाभावे हेतुः–प्रभुः समर्थः ॥ २८ ॥

अन्वितार्थप्रकाशिका

खमिति ॥ दारुणं वातवर्षमुपरतं निवृत्तं दृष्ट्वा अत एव विगतानि अभ्राणि यस्मात् अत एव उदितः प्रकाशमानः आदित्यो यस्मिंस्तथाभूतं खमाकाशं च निशाम्य दृष्ट्वा गोवर्धनधरो भगवान् गोपानब्रवीत् ॥ २५ ॥ निर्यातेति ॥ हे गोपाः ! स्त्रीभिर्धनैरर्भकैश्च सहिता निर्यात गोवर्धनगर्तादितो निर्यात निर्गच्छत त्रासं च वर्षभयं त्यजत। यतो वातवर्षमुपारतं निवृत्तं निम्नगा नद्योऽपि व्युदप्रायाः निरुदकप्रायाः स्वल्पजलाः सन्तीत्यर्थः। एतस्यातिवृष्टिजलस्य सद्यः शोषणमपि हरेः प्रभावादेव ॥ २६ ॥ तत इति ॥ ततस्ते सर्वे गोपाः स्त्रियो बालाः स्थविरा वृद्धाश्च शकटैरूढमुपकरणं यथा भवति तथा स्वं स्वं गोधनमादाय शनैः सुखेन निर्ययुः गिरिगर्त्तान्निर्जग्मुः भगवनिति ॥ प्रभुर्भगवान् अपि सर्वेषां भूतानां जनानां पश्यतामेव लीलया अनायासेनैव तं शैलं पूर्ववत् पूर्वं यथाऽऽसीत्तथैव स्वस्थाने स्थापयामास ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उपारतं विरतं व्युदप्रायाः विगतोदकप्रायाः अल्पोदका इत्यर्थः निम्नं नीचप्रदे संगच्छंतीति निम्नाः गाः नद्यः ॥ २६ ॥ शकटैरूढं उपकरणं धनादि यथा भवति तथा स्थविराः वृद्धाः पूर्ववत् पूर्वं यथा स्थितास्तद्वत् ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

खमिति ॥ दारुणमतिभयंकरं, वातवर्षं तीव्रवातोपेतजलप्रवर्षणं, उपरतं विरतिं प्राप्तं, निशाम्य दृष्ट्वा, खमाकाशं च विगतान्यभ्राणि यस्मात्तत्, उदितः प्रकाशमान आदित्यो यस्मिंस्तत्तथाभूतं च, निशाम्य, गोवर्द्धनधरः भगवान् गोपान् अब्रवीदाह ॥२५॥ उक्तिमेवाह ॥ निर्यातेति ॥ हे गोपाः, सस्त्रीधनार्भकाः स्त्रीभिर्धनैरर्भकैश्च सहिताः सन्तः, निर्यात गर्त्ताद्बहिर्निर्गच्छत । त्रासं वातवर्षादिजातमुद्वेगं, त्यजत । वातवर्षं, उपारतं, ननु नद्यादेरेतावज्जलानिवृत्तेर्निर्गत्य क्व वा स्थास्याम इत्यत्राह । निम्नगाश्च नद्योऽपि, व्युदप्रायाः निरुदकप्रायाः स्वल्पजला इत्यर्थः । जाताः ॥ २६ ॥ प्रदृष्टकृष्णप्रभावा गोपा नदीनां निरुदकत्वश्रुत्या प्राज्यस्यापि जलस्य सद्यो निवृत्तिं तदुपलक्षितां स्थलस्याप्यनार्द्रतां च कृष्णमहिमजां बुद्ध्वा यच्चक्रुस्तदाह ॥ तत इति ॥ ततः भगवद्वाक्यश्रवणानन्तरं, ते भगवत्प्रतापवीक्षकाः, स्त्रियश्च बालाश्च स्थविरा वृद्धाश्च ते, शनैः निर्ययुः । शकटैरनोभिरूढानि उपकरणानि गृहोपकरणानि यैस्तथाविधा यथा भवन्ति तथा स्वं स्वं, गोधनं आदाय गृहीत्वा, गोपाः अपि, निर्ययुर्गर्त्तान्निर्जग्मुः ॥ २७ ॥ भगवानिति अथ प्रभुः समर्थः, भगवान् श्रीकृष्णः अपि, सर्वभूतानां पश्यतां सतां, लीलया तं यमुद्धृत्य सर्वपरित्राण कृतं तथाविध, शैलं गोवर्द्धनाचलं, स्वस्थाने पूर्ववत् एव, स्थापयामास । पूर्ववदित्यस्यायं भावः । यदा स उत्पाटितस्तदा गर्त्ते जलाप्रवेशार्थं परितः प्रवृद्धप्रान्ततां नीतं तं स्थापनावसरे खातपूर्त्तिसंमितं विधाय यथापूर्वमस्थापयदिति ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

खं व्यभ्रमिति : १०.२५.२५.

अचलकरं भक्तानामचलकरं वीक्ष्य निश्चलैकपदम् । अतिचपला अतिचपलायुक्तं च पलायनाशया शरदाः ॥ १३३ ॥
तावद्धरिगिरिगौरवममानयंस्ते प्रकाण्डबलमब्दाः । यावद्धरिगिरिगौरवमदृष्टमासीदकुण्ठमचलपदम् ॥ १३४ ॥
न नष्टं गोकुलं श्रीशाश्रितमस्मच्छरोत्करैः । नष्टं किन्तु तवास्माकं निवृत्तैरित्यबोधि तैः ॥ १३५ ॥
(गोवर्द्धनधर इति)

अतीतकर्मभिर्नामनिर्देशः पारिभाषिकः । अतस्तच्छालिने श्रीशे तन्नामर्षिरुपाददे ॥ १३६ ॥

भगवानपीति : १०.२५.२८.

स्थानभ्रष्टा न शोभन्ते लोकोक्तिमिति चिन्तयन् । श्रीशः सिद्धस्वात्मकार्यः स्वस्थाने तं न्यधात्पुनः ॥ १३७ ॥
येन स्वीया रक्षिता मे स सर्वस्वीयाधिक्यप्रीतिमान् स्पष्टमेव ।
भूतेष्वशीः ख्यापयन्भक्तवत् तं स्वीयस्थानेऽस्थापयद् भक्तिमन्तम् ॥ १३८ ॥
दुष्टानेकदुरध्ववृत्त्यवनिभृद्भारावनुत्यै विधिं द्वारीकृत्य मयाऽऽर्तया सह सुरैर्योऽयं पुराऽभ्यर्थितः ।
प्रारब्धं किमदोऽधुना तु विभुना मद्वर्धनोन्मूलनं मैव गोमनसि प्रयात्विति पुनस्तं तत्र संन्यस्तवान् ॥ १३९ ॥
यः पूर्वं स्वकरादनुग्रहपदं नीतस्तथोच्चैर्गतिं सत्रागेड्यमिलाभृतं कथमधस्तात्तं पुनर्नीतवान् ।
इत्थं माष्टु मतत्त्वविज्जनवचः शङ्काकलङ्कं मुनिः प्रावोचद्धि विचार्य स प्रभुरमुं स्वस्वस्थान एव न्यधात् ॥ १४० ॥
मत्प्रीतये मज्जनरक्षणाय सोढा दृढा येन शिरोऽप्रतिष्ठा ।
कर्ता तमत्राप्यचलप्रतिष्ठमित्यद्रितादृक्स्थितः प्रदिष्टम् ॥ १४१ ॥
अत्युद्भुतात्मचरितानुभवाय लोकेष्वेनं दधाम्यमितोऽपि यदन्तरिक्षे ।
मत्स्वीकृतेरपरतः परतो रसात्मा नार्हत्यसावसरसत्वमिति न्यधात् तम् ॥ १४२ ॥
उन्मूलनं क्षितिभृतां करतो धृतिश्च संस्थापनं पुनरलोलमपि स्ववासे ।
लीलायितं भुवि मनेत्यखिलावनीभृद्बोधाय तत्त्रितयमत्र गिरावदर्शि ॥ १४३ ॥
योऽस्मिन्मदच्युतगतिर्भविता गिरीन्द्रः सोऽस्मिन् मदच्युतपदस्थितिमेति यश्च ।
नैवंविधः स्फुटमसौ न हि तामुपैति ह्याद्यं गिरौ तदपरं च मघोन्यदर्शि ॥ १४४ ॥
इन्द्रः पुरा स्वरधिकारपदेऽविषिक्तो यो मेघहेतुरधुना तमवेक्ष्य दृप्तम् ।
निष्कास्य तत्र हरिणा गिरिरभ्यषेचि स्वस्थानपूर्ववदिति प्रतिभाति शब्दात् ॥ १४५ ॥
अतएव निजाधिकारमाप्तुं पुनरिन्द्रेण मुहुः स्तुतस्य विष्णोः ।
मद्भावमपोह्य शक्र नैजे वसराज्य वच इत्यलंकृतार्थम् ॥ १४६ ॥ (युग्मम्)

यः स्याद् गोवर्धनोऽस्मिन् भुवन भयहरो योग्य एकः स एव स्वाराज्ये जातु नान्यः पुरुष इति तदा तादृशं भूभृदिन्द्रम् ।
दृष्ट्वा स्वस्थानराज्ये प्रभुरमलपदेऽस्थापयत् स स्वतन्त्रः प्रेक्ष्यागोवर्द्धनं तं भुवनभयकरं शक्रमौज्झीत् क्षमं तत् ॥१४७॥
भूस्थानां स्वस्थसुखं येनादायीह भुवनभयहर्त्रा । स्थाने तत्फलमस्य स्थितिसुखभोग इत्यधात्स तथा ॥ १४८ ॥
बलिरिवायमपि प्रभुणा गिरिर्भुवनरक्षणवृत्तिरचंचलः । निजपदाच्च्युतिभावमनायियत् तदरिमित्रभिदाहृदयेऽस्यका ॥१४९॥
इत्यल्पजनताजल्पमार्जनाय तदा प्रभुः । स्वीयं स्वीयावनासक्त न्यस्तवांस्तत्र तं पुनः ॥ १५० ॥ (युग्मम्)
पश्यत्स्वेय समस्तभूतनिवहेष्वप्रज्ञमिन्द्रं प्रभुरस्थाने सुतरामयोज्ञयदलं नार्होऽयमस्मिन्पदे ।
तं चाद्रिं सकलाधिकं निजपदे स्वं च स्वयोग्याकृतौ प्राग्वद्बाल्यजुषीत्यधात्त्रिकमिदं स्थाने तदा लीलया ॥ १५१ ॥
कृष्णोऽपि वञ्चक इवोपधिविध्यभिज्ञः सम्पाद्य पूर्णममुतो गिरितः स्वकार्यम् ।
स्वस्थानमप्यसुलभं कृतवान् यदस्येतीशो सदुक्तिमपमार्ष्टमधात्पुरेव ॥ १५२ ॥
गोत्रोद्धारं कृत्वा स्वजनावनकृद्य एव स कुलीनः । अहमस्मि तथायमपीत्यालोच्येशो निनाय निजसमताम् ॥ १५३ ॥

कृष्णप्रिया

उसी समय आकाशमें एक भी मेघ नहीं रहा। यह भारी आँधी और घनघोर वर्षा भी रुक गई। भगवान् सूर्य भी निकल आए यह परिस्थिति को निहालते गिरिवरधारी गोविन्द ने गोपों से कहा ॥ २५ ॥ भगवान् श्रीकृष्ण ने कहा, हे प्यारे गोपजन! आप निर्भय बन जाये। आकाश की और देखो अब एवं वृष्टि का कोई चिन्ह भी नहीं रहा, उमडी नदियाँ उतर गई। आप अपनी अपनी सामग्री सम्पत्ति, संतान, स्त्रियों को लेकर बाहर निकलो ॥ २६ ॥ प्यारे नन्द दुलारे के निर्भय वचन सुनकर सब गोप लोग बालकों, वृद्धों एवं स्त्रियों के साथ निजी गोधन सम्पत्ति को आगे कर और छकडों में सब सामान लाद कर धीरे धीरे श्रीगिरिराज महाराज के गड्ढे से बाहर निकल आए ॥ २७ ॥ सर्व समर्थ भगवान श्रीकृष्णने भी सर्व गोपजनके सामने ही, श्रीगिरिराज महाराज को पूर्ववत् लीला पूर्वक उसी स्थान पर स्थापित कर दिया ॥ २८ ॥

तं [1]प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरम्भणादिभिः ।
गोप्यश्च सस्नेहमपूजयन् मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः ॥ २९ ॥
यशोदा रोहिणी नन्दो रामश्च बलिनां वरः । कृष्णमालिङ्ग्य युयुजुराशिषः स्नेहकातराः ॥ ३० ॥
दिवि देवगणाः साध्याः सिद्धगन्धर्वचारणाः । तुष्टुवुर्मुमुचुस्तुष्टाः[2] पुष्पवर्षाणि [3]पार्थिव ॥ ३१ ॥

कर्दमक्षमा

अन्वयः—प्रेमवेगात् निभृताः व्रजौकसः परिरम्भणादिभिः यथा "यथायोग्यम्" तम् समीयुः च गोप्यः दधि अक्षतादिभिः मुदा सस्नेहम् अपूजयन् च सदाशिषः युयुजुः ॥ २९ ॥ स्नेहकातराः यशोदा रोहिणी नन्दः च बलिनाम् वरः रामः, कृष्णम् आलिङ्ग्य आशिषः युयुजुः ॥ ३० ॥ पार्थिव ? दिवि देवगणाः, साध्याः सिद्ध गन्धर्व चारणाः तुष्टाः तुष्टुवुः च पुष्प वर्षाणि मुमुचुः ॥ ३१ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

निभृताः पूर्णाः । यथा यथोचितं परिरंभणादिभिः समीयुरुपजग्मुः । सदाशिषः श्रेष्ठानाशीर्वादान् ॥ २९-३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तम् श्रीकृष्णम् । प्रेमवेगात्प्रेमोद्रेकात् । तं यथा यथोचितं गुरुसमलघुवर्गभेदैः परिरंभणादिभिस्समीयुर्मिलिताः । आदिपदात् शुभाशीर्वादमस्तकाघ्राणचुंबनवामबाहुसंमर्दनतदंगुलिस्फोटस्तवनश्रमदुःखाभावप्रश्नादयो गुरुवर्गस्य, हास्यपरिहासादयः समवर्गस्य, पादपतनादयो लघुवर्गस्य ज्ञेयाः । गोप्यो वत्सलाश्चात्पुरोहितादयः दध्यादिभिर्मंगलद्रव्यैरपूजयन् । तदाशिषस्तु दुष्टान्नाशय शिष्टान्पालय पितरावानंदय धनैश्वर्यसंपन्नो भवेत्याद्याः । ननु परमवात्सल्यवता शेषांशेन पृथ्वीमपि दधता रामेण गोवर्द्धनधारणे स्वानुजस्य कथं साहाय्यं न कृतम्, उच्यते—इंद्रमखभंगगोवर्द्धनमखप्रवर्तनयोर्मयैव कृतत्वादहमेव गोवर्द्धनं धृत्वा व्रजं रक्षिष्यामि सोयं मे व्रत आहित इति तत्संकल्पस्य तदंशेन रामेणान्यथा कर्त्तुमनौचित्यात् । क्वचित्प्राचीनगोवर्द्धनधरप्रतिकृतौ मातृभ्यां नवनीतादिदानं पित्रा भ्रात्रा च गोवर्द्धनस्य शिरसावष्टंभादि, तच्च स्नेहकातरा इत्यनेनासूचीति तोषिणी ॥ २९ ॥ स्नेहेन कातरा आकुलांतःकरणाः ॥ ३० ॥ तुष्टाः गोरक्षणाद्धर्षिताः । सर्वेषामस्माकं हविर्दानसाधनीभूतगोरक्षणेन हितमाचरितं भगवतेति भावः ॥ ३१ ॥

---

[1] प्रेमगर्भान्नि-प्रा. पा. । [2] सर्वे-विज. । [3] प्रबोदिताः-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अधुना परमहर्षेण श्रीभगवता सह सर्वेषां तत्रत्यानां समागमं वदन् प्रेमोद्रेकेण गायन्निवाह–तमिति। गोष्ठरक्षार्थं धृतगोवर्द्धनम् यद्वा, प्रकटितैश्वर्यमपि व्रजौकसः सर्वे व्रजवासिजनाः परिरम्भणादिभिः समीयुः मिलितवन्तः तत्र हेतुः प्रेम्णो वेगः स्वनिमित्तप्रयासेन उद्रेकस्तस्मात् तेनेत्यर्थः। आदिशब्देन शुभाशीर्वादश्रीमस्तकाघ्राणचुम्बनपादग्रहणवामबाहुसम्मर्दनतदङ्गुलिस्फोटनस्तवनश्रमदुःखाभावप्रश्नादयः यथा यथोचितं गुरुसमलघुवर्गभेदैः सस्नेहं यथा स्यात्त वा सस्नेहं आशिषः दुष्टान् दमय शिष्टान् पालय सर्वैश्वर्यसेवितो भव निजजनानानन्दयेत्याद्याः ॥ २९ ॥ गोप्यगोप्याद्यपेक्षया पश्चात् स्थितानां परमस्निग्धानां मात्रादीनां सङ्गतिमाह–यशोदेति। श्रीयशोदासाहचर्येण श्रीनन्दस्यादरविशेषेण वा तस्मात् प्राक् श्रीरोहिण्या निर्देशः बलिनां वर इति यद्यपि तस्यापि गोवर्द्धनधारणसामर्थ्यमास्ते शेषरूपेण स्वांशेन मूर्द्धैकदेशे हेलया पृथ्वीधारणात् तथापि तत्राप्रवृत्तिस्तद्विधलीलायास्तदभीष्टत्वादिति भावः। यद्वा, बलिनां वर इति निर्भरगाढालिङ्गनमभिप्रैति स्नेहातिशयेन प्रभावज्ञानेन च सर्वत्र श्रीकृष्णेच्छायां सम्मत्या मौनं गोवर्द्धनोद्धरणादौ तत्कीर्त्यपेक्षया चासाहाय्यमिति पूर्वं तन्नामाश्रवणमिति ज्ञेयम् आशिषः एवं चिरमस्मान् पालय सदासुखी भव नित्यं पूर्णमनोरथ एधस्वेत्याद्याः स्नेहेन कातरा अधीराः सन्तः अत्र प्राचीनश्रीगोवर्द्धनधरप्रतिकृतौ क्वचित् दृश्यते मातृभ्यां नवनीतादिसमर्पणं पिताभ्रातृभ्यां च शिरसा श्रीगोवर्द्धनावष्टम्भनादिकमिति तच्च स्नेहकातरा इत्यनेन सूचितमवगम्यते ॥ ३० ॥ न केवलं व्रजौकसां देवानामपि प्रहर्षो जात इत्याह–दिवीति। द्वाभ्याम्। नन्विन्द्रस्य मदभङ्गदुःखेऽपि तादृशे कथं ते तथाऽकुर्वत तत्राह–तुष्टाः दुर्मदेनाकृत्ये प्रवृत्तस्येन्द्रस्य मानभङ्गेन श्रीकृष्णस्य च मधुरतरक्रीडाप्रदर्शनेन हर्षोदयादित्यर्थः। हे पार्थिव इत्याश्चर्येण सम्बोधनं देवेन्द्रस्य दुःखेऽपि तेषां प्रहर्षात्। यद्वा राज्ञोऽपेक्षया प्रजाना देशाधिकारिणोऽनपेक्षापत्तेषां श्रीभगवदपेक्षया शक्रानपेक्षा युक्तैव तच्च त्वया ज्ञायत एवेति भावः। मदभङ्गे न त्विन्द्रस्यापि तत्र न क्रोध इति ज्ञेयम् ॥ ३१ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना परमहर्षेण श्रीभगवता सह सर्व्वेषां तत्रत्यानां समागमं वदन् प्रेमोद्रेकेण गायन्निवाह–तमिति। गोष्ठरक्षार्थं धृतगोवर्द्धनम्, यद्वा, प्रकटितैश्वर्य्यमपि व्रजौकसः सर्व्वे व्रजवासिजना गोपा भृत्यपुरोहितादयश्च परिरम्भणादिभिः समीयुः संगता मिलितवन्त इत्यर्थः। तत्र हेतुः—प्रेम्णा वेग आवेग उद्रेको वा, श्रीभगवत्कीर्त्तिविशेषसम्पत्त्यादिना तत्कर्ममाधुर्य्येण वा तस्मात्तेनेत्यर्थः; नितरां भृताः पूर्णा रक्षिता वा सन्तः। आदिशब्देन शुभाशीर्व्वादश्रीमस्तकाघ्राणचुम्बनपादग्रहणवामबाहुसम्मर्द्दनतदंगुलिस्फोटनस्तवनाश्रमदुःखप्रश्नादयः। यथा यथोचितमिति, तत्र पुरोहिताः प्रायः शुभाशीर्व्वादादिभिः, वृद्धा मूर्द्धाघ्राणादिभिः, भृत्या बालकाश्च पादग्रहणादिभिः, वयस्याश्च गोपाः परिरम्भणबाहुसम्मर्द्दनादिभिरिति विवेचनीयम्। यद्वा, यथावत् साश्रुपुलकपूर्व्वकबाहुप्रसारणगाढग्रहणायुक्तप्रकारेणेत्यर्थः; तथापि यथोचितमिति स्वतः सिद्धमेव। यद्वा, यथा ते सर्व्वे समीयुस्तथा गोप्योऽपि समीयुः, जनसंसद्यपि प्रेमवशेन धैर्य्यहानेरिति भावः। यद्वा, भावविशेषयुक्ता अपि तास्तथैव समीयुः, न च तदालिंगनादिना निजेच्छानुरूपमित्यर्थः, तदानीं तत्र तस्यायोग्यत्वात्; इयं श्रीवादरायणेर्भावविशेषोदयोक्तिः; 'च' इति पाठे अप्यर्थे चकारः, अन्यच्च तासां कश्चिद्विशेषमाह; यद्वा, त्वर्थे चकारः पूर्व्वतो विशेषाय; तमेवाह—सस्नेहमिति। स्नेहोऽत्र नवानुरागः, तेन सहितं यथा स्यात्; यद्वा, तैलघृतादि तेन तद्गात्रमर्द्दनपूर्व्वकमित्यर्थः; तत्र प्रेमवेगादिति हेतुरनुवर्त्तत एव, सतीराशिषः 'दुष्टान् दमय, शिष्टान् पालय, सर्व्वैश्वर्य्यसेवितो भव' इति तानानन्दयेत्याद्या युयुजुश्च। तत्र हेतुः—मुदा प्रहर्षविशेषेण स्वयमेव विचित्राशीर्व्वादोदयादित्यर्थः। अथवा व्रजौकसो वृद्धतरुणबालगोपाः पुरोहितादयश्च यथा यथावत् मूर्द्धाघ्राणकण्ठग्रहणपादपतनादिप्रकारेण समीयुः; गोप्यः श्रीभगवत्प्रियतमाः परिरम्भणादिभिः समीयुः, अर्थान्मनसैव; चकाराज्जरत्यश्च सस्नेहं यथा स्यात्, किंवा, स्नेहवन्तं तमपूजयन् सदाशिषश्च युयुजुरित्यर्थः। अन्यत् समानम् ॥ २९ ॥ गोपगोप्याद्यपेक्षया पश्चात् स्थितानां परमस्निग्धानां मात्रादीनां संगतिमाह—यशोदेति, श्रीयशोदासाहचर्य्येण श्रीनन्दस्यादरविशेषेण वा, तस्मात् प्राक् श्रीरोहिण्यनिर्देशः। आशिषः—'चिरं जीव, सदा सुखी भव, पूर्णमनोरथो नित्य भव' इत्याद्याः। बलिनां वर इति तस्यापि गोवर्द्धनधारणसामर्थ्यं सूचयति, शेषरूपेण मूर्द्धैकदेशे हेलया पृथ्वीधारणात्, तथापि मधुरलीलाविशेषेण गिरिधरणं तेनापि दुष्करमिति तत्र तस्यौदास्यात्; यद्वा, श्रीकृष्णैकयोग्यमधुरतरक्रीडाविशेषे तस्मिन् स्वस्यायोग्यत्वमननात्, यद्वा, बलिनां वर इति निर्भरगाढालिंगनमभिप्रैति, स्नेहकातर्य्येणैव सर्व्वत्र श्रीकृष्णाच्छायां सम्मत्या मौनम्, गोवर्द्धनोद्धरणादौ तत्कीर्त्त्यपेक्षया साहाय्यञ्चेति पूर्व्वं तन्नामाश्रवणमिति ज्ञेयम्, यद्वा, स्नेहकातरा इत्यतः प्राक् श्रीगोवर्द्धनधारणसमये मातृभ्यां नवनीतादिविचित्रभोज्यपेयसमर्पणम्, पिताभ्रातृभ्याञ्च शिरसा श्रीगोवर्द्धनावष्टम्भनादिकं ज्ञेयम्, तथैव श्रीमूर्त्तिदर्शनादिति दिक् ॥ ३० ॥ न केवलं व्रजौकसाम्, देवानामपि प्रहर्षो जात इत्याह—दिवीति द्वाभ्याम्। ननु, इन्द्रस्य मदभंगदुःखेऽपि तादृशे कर्म ते तथा अकुर्व्वत? तत्राह—तुष्टा दुर्म्मदेनाकृत्ये प्रवृत्तस्येन्द्रस्य मानभंगेन श्रीकृष्णस्य च मधुरतरक्रीडाप्रदर्शनेन हर्षोदयादित्यर्थः। हे पार्थिवेत्याश्चर्य्येण सम्बोधनम्, देवेन्द्रस्य दुःखेऽपि

तेषां प्रहर्षात्, यद्वा, राज्ञोऽपेक्षया प्रजानां देशाधिकारिणोऽनपेक्षेव तेषां श्रीभगवदपेक्षया शक्रानपेक्षा युक्तैव, तच्च त्वया ज्ञायत एवेति भावः ॥ ३१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तं स्थापितवन्तं भगवन्तं प्रेमातिशयात् परिरम्भणादिभिर्यथार्हं संजग्मुः निभृताः सुखिताश्च बभूवुः तथा गोप्यश्च दध्यादिभिः स स्नेहं यथा भवति तथा मुदा हर्षेणापूजयन् सदाशिषः श्रेष्ठाशीर्वादान् प्रयुयुजुः ॥ २९ ॥ यशोदेति यशोदादयः स्नेहकातराः स्नेहेन व्याकुलचित्ताः ॥ ३० ॥ दिवीति । दिवि देवगणादयः तुष्टास्तुष्टुवुः पुष्पवर्षाणि मुमुचुर्ववृषुश्च हे पार्थिव ॥ ३१ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रेमवेगात्प्रेमोद्रेकात् निभृताः निश्चलाः पूर्णानन्दा वा समीयुः समाजं प्राप्ताः ॥ २९ ॥ स्नेहकातराः स्नेहकलिलान्तःकरणाः ॥ ३०-३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निभृताः पूर्णाः यथा यथोचितं गुरुसमलघुवर्गभेदैः परिरम्भणादिभिः समीयुर्मिलितवन्त आदिशब्दात् शुभाशीर्वादमस्तका घ्राणचुम्बनवामबाहुसम्मर्दनतदङ्गुलिस्फोटनस्तवनश्रमदुःखाभावप्रश्नादयो गुरुवर्गस्य परिहासादयः समवर्गस्य पादपतनपादसम्मर्दनादयो लघुवर्गस्य ज्ञेयाः गोप्यो वत्सलाः चकारात् पुरोहितपत्न्यः दध्यादिभिर्मङ्गलद्रव्यैः अपूजयन् संमानयामासुः शुभाशिषः दुष्टान् दमय शिष्टान् पालय पितरावानन्दय धनैश्वर्य्यसम्पन्नो भवेत्याशिषो ययुजुर्योजयामासुः ॥ २९ ॥ निजमात्रादीनां त्वतिविशेषमाह–यशोदेति । रामश्चेति तस्यापि वात्सल्यवद्वर्गे निर्देशो ज्येष्ठत्वादेव नानुपपन्नः । ननु, परमस्नेहवता तेन शेषाख्यस्वांशेन पृथ्वीमपि दधता स्वानुजस्य गोवर्द्धनधारणे कथं माहात्म्यं नाचरितम् ? उच्यते इन्द्रमखभङ्गगोवर्द्धनमखप्रवर्त्तनयोर्मयैव कृतत्वादहमेव गोवर्द्धनं धृत्वा व्रजं रक्षिष्यामि "सोऽयं मे व्रत आहितः" इति तदीयसङ्कल्पस्य तद्दर्शेन रामेणाऽन्यथा कर्त्तुमनौचित्यादशक्यत्वाच्च तस्यैव सर्वशक्तिमत्त्वात् तदिच्छयैव तदंशेषु यथोपयोगि तदीयशक्त्युदयाच्चेत्यग्रिमग्रन्थेऽपि यथास्थानं सिद्धान्तयिष्यते इति अत्र प्राचीनश्रीगोवर्द्धनधरप्रतिकृतौ क्वचिद्दृश्यते मातृभ्यां नवनीतादि समर्पणं पित्रा भ्राता च शिरसा गोवर्द्धनावष्टम्भनादिकमिति तत्स्नेहकातरा इत्यनेन सूचितमवगम्यते इति वैष्णवतोषणी ॥३०॥ व्रजौकसो यथा जहृषुस्तथा देवा अपीत्याह–दिवीति ॥ ३१-३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रेमवेगान्निभृताः पूर्णाः तं श्रीकृष्णं यथा यथोचितं परिरम्भादिभिः समीयुः गोप्यश्च सस्नेहं यथा तथा दध्यक्षतादिभिर्मुदा अपूजयन् सदाशिवः श्रेष्ठानाशीर्वादान् ययुजुः ॥ २९-३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रेमवेगात्स्नेहप्रवाहान्निभृता नितरां भृतं भरणं येषां ते पूर्णा इति वा पररम्भणादिभिर्व्रजौकसः पुमांसो यथा समीयुस्तथा गोप्यश्च सस्नेहं मुदा दध्यक्षताद्भिः । समासान्तविधेरनित्यत्वादुच्यते दध्यक्षताद्भिरिति । अपूजयंस्तथाऽऽशिषश्च युयुजुः ॥ २९ ॥ स्नेहकातराः स्नेहपरवशाः ॥ ३० ॥ सर्वेसिद्धगन्धर्वचारणा इति पदमेकम् । सर्वश्च शर्वश्च इश्च कामश्च सिद्धगन्धर्वचारणाश्च सर्वे सिद्धगन्धर्वचारणाः । सर्वो ह्येष रुद्र इति श्रुतिः । सर्वः कालञ्जरः शिव इति नामनिधानम् । अतो न सर्वपदातिरेकः । साध्या इति पाठस्तु नासाध्यार्थः । पुष्पवर्षाणि मुमुचुस्तत्र तन्त्रं तुष्टा इति ॥ ३१ ॥

श्रीसुबोधिनी

एतद् भगवता लीलया कृतमपि लोके चेत् तथात्वेन न प्रसिद्धं स्यात् तदा लीलात्वं न भवेदिति माहात्म्यदर्शनानन्तरमपि गोपानां पूर्ववदेव स्थितिमाह तमिति, यदैव भगवान् गोवर्धनं स्थापयामास तदैव तं भगवन्तं **प्रेमवेगात् परिरम्भणादिभिर्यथा यथावत् समीयुः**, ते हि भगवदालिङ्गनार्थं प्रतीक्षन्त एव स्थिता यतः, यतः प्रेम्णो वेगस्तेषु स्थितो हृदये पूर्णं प्रेम बहिरपि निस्सरतीति **प्रेम्णो वेगः**, अत एव यथावद् यस्य यथोचितं तथा स कृतवान्, **प्रेम्णव नितरां भृताश्च गोप्योपि**, तथा विशेषमप्याह **सस्नेहमपूजयन्निति**, तैः सर्वैरेवायं देव इति ज्ञातस्तेन लौकिकीमपि क्रियां वैदिकीं कृतवन्तो भावद्वयस्य विद्यमानत्वादतः स्नेहपूर्वकं पूजां कृतवन्तः, मुदेति पूजायामुत्साहस्तेन लौकिकीत्वेनान्यथाबुद्धिर्न बाधिकेति सूचितं, **दध्यक्षताद्भिरिति** पूजासाधनानि, जलानि चरणक्षालनादौ **दध्यक्षता** अलङ्कारार्थं, मार्जनार्था वापः, लौकिकी **तद्देशप्रसिद्धेयं पूजा, दध्ना तिलकं दत्वा तदुपर्यक्षतान् स्थापयित्वाप उपरि भ्रामयित्वा पिबन्तीति, सदाशिषश्च युयुजु**"र्जीव पालये"त्यादिरूपाः सन्तोषादेव न तु स्वाधिकारेण देवत्वेन ज्ञातत्वात् ॥ २९ ॥ एवं साधारणीं प्रतिपत्तिमुक्त्वा चतुर्भिः कृतां विशेषप्रतिपत्तिमाह **यशोदेति** आदौ स्त्रीनिर्देशः स्नेहा-

धिक्यात्, अनयैवानुपूर्व्या स्नेहतारतम्यमपि ज्ञातव्यं, चकाराच् छ्रीदामादयोपि, **बलिनां** मध्ये **वर** इति **बलभद्रविशेषणं तस्याप्याश्चर्यमेतदिति** ज्ञापयति **कृष्णं** सदानन्दं, एते ह्यन्तरङ्गाः ज्येष्ठाश्चात **आलिङ्ग्याशिषो युयुजुः स्नेहेन च कातरा** जाताः ॥३०॥ माहात्म्यदर्शनाद् देवतानामपि स्वापराधनिवृत्त्यर्थमुत्सवकार्यमाह **दिवीति**, **देवगणा** वस्वादय एकः कश्चिद् भक्तो भवतीति गणपदप्रयोगः, **साध्या** अपि देवभेदास्तथा **सिद्धा गन्धर्वा** अप्सरसश्च चारणाश्च **तुष्टवुः पुष्पवर्षाणि मुमुचुस्तुष्टाश्च** जाताः, वाचिककायिकमानसिकव्यापारा निरूपिताः, **पार्थिवेतिसम्बोधनं** महत्कर्मकरणानन्तरं राज्ञामप्येवं तद्वश्यैः क्रियत इति ज्ञापनार्थम् ॥ ३१ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

दिवीत्यत्र अप्सरसश्चेति "रूपमिति गन्धर्वा गन्ध इत्यप्सरस" इतिश्रुतौ साहचर्याद् गन्धर्वपदेनाप्सरसोप्युक्ता इतिभावः ॥ ३१ ॥

इति द्वाविंशोध्यायः ॥ २२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तं कृतरक्षणं कृष्णं प्रेमवेगात् निभृताः पूर्णाः व्रजौकसः यथा यथोचितं परिरम्भणादिभिः समीयुः सम्यक् मिलिताः, गोप्यश्च सस्नेहं मुदा दध्यादिभिरपूजयन्, तथा वृद्धब्राह्मणादयः सतोः आशिषः आशीर्वादान् युयुजुः। आदिशब्दात् मस्तकाघ्राणचुम्बनवामबाहुसम्मर्दनतदङ्गुलिस्फोटनश्रमदुःस्वाभावप्रश्नादयो गुरुवर्गस्य, परिहासादयः समवर्गस्य, पादपतनपादसम्मर्दनादयो लघुवर्गस्य ज्ञेयाः। दध्ना तिलकं अक्षतानां तदुपरि स्थापनमपां तदुपरि भ्रामणेनाधःपातनं ज्ञेयम् ॥ २९ ॥ एवं सामान्यतः सर्वेषां स्नेहकृत्यमुक्त्वा विशेषतो यशोदादीनां तदाह–यशोदेति। स्नेहेन कातरा व्याकुलचित्ताः यशोदादयः कृष्णमालिङ्ग्य आशिषो युयुजुरित्यन्वयः ॥ ३० ॥ दिवि स्वर्गे देवादयोपीन्द्रनिग्रहेण व्रजसंरक्षणेन च न दुर्मनस्का जाताः, किन्तु तुष्टाः सन्तो भगवन्तं तुष्टुवुः। पुष्पवर्षाणि मुमुचुः। "तुष्टा इति मानसिकः, तुष्टुवुरिति वाचनिकः, मुमुचुरिति कायिकः" इति त्रिविधोऽपि शुभव्यापारो दर्शितः चक्रवर्तिना। 'दुष्टखण्डमण्लाधिपतिनिग्रहेऽपि प्रजास्तुष्टा एव भवन्तीति तु तव विदितमेव' इत्याशयेन सम्बोधयति–पार्थिवेति ॥ ३१ ॥

अन्वितार्थप्रकाशिका

तमिति ॥ तं कृतरक्षं कृष्णं प्रेमवेगात् निभृताः पूर्णाः व्रजौकसः यथा यथोचितं परिरम्भणादिभिः समीयुः सम्यक् मिलिताः। आदिना मस्तकाघ्राणादिभिः गोप्यश्च सस्नेहं मुदा दध्यक्षताद्भिः अपूजयन्। समासान्तभाव आर्षः। सतीः आशिषश्च युयुजुः दध्ना तिलकम् अक्षतानां तदुपरिस्थापनमपां तदुपरि भ्रमणेनाधःपातनं ज्ञेयम् ॥ २९ ॥ यशोदेति ॥ स्नेहेन कातराः व्याकुलचित्ता अत एव क्वचित्प्राचोनगिरिधरमूर्तौ मातृभ्यां नवनोतादिदानं पित्राभिर्गिर्यवष्टम्भश्च दृश्यन्ते। यशोदा रोहिणी नन्दो बलिनां वरो रामश्च कृष्णमालिङ्ग्याशिषो युयुजुः ॥ ३० ॥ हे पार्थिव ! दिवि स्वर्गे नष्टममददोषेण प्रसन्नचेतसा इन्द्रेण प्रेरिताः देवगणादयः तुष्टाः सन्ता भगवन्तं तुष्टुवुः पुष्पवर्षाणि च मुमुचुः ॥ ३१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तं श्रीकृष्णं निभृताः परिपूर्णाः यथा यथायोग्यं परिरंभादिभिरालिंगनादिभिः समीयुः समीपं प्राप्ताः आदिनामूर्धावघ्राणादयः दध्यक्षतजलैः सदाशिषः समीचीनाशीर्वादान् युयुजुः ददुः ॥ २९ ॥ स्नेहेन कातराः व्याकुलाः ॥ ३०–३१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

॥ तमिति व्रजौकसो गोपाः, तं पूर्ववत् संस्थापितगोवर्द्धनाचलं भगवन्तं, प्रेमवेगात् प्रेमातिशयात्, परिरम्भणादिभिः, यथा यथार्हं, समीयुः यथायोग्यं परिरम्भणादि विधातुं भगवत्समीपमुपजग्मुः। परिरम्भणादि विधाय, निभृताः सुखिताश्च, बभूवुः। तथा गोप्यश्च, दध्यक्षताद्भिः, सस्नेहं यथा तथा, मुदा हर्षेण, अपूजयन्। सदाशिषः श्रेष्ठाशीर्वादान्, युयुजुः। दध्यक्षताद्भिरित्यनेन गर्त्तेऽपि दध्यादिसद्भावः सूचितः ॥ २९ ॥ यशोदेति ॥ यशोदा, रोहिणी, नन्दः, बलिनां वरः रामश्च, कृष्ण आलिङ्ग्य, स्नेहकातराः स्नेहेन व्यकुलचित्ताः सन्तः, आशिषः युयुजुः प्रयुयुजुः ॥ ३० ॥ दिवीति ॥ हे पार्थिव राजन्, दिवि देवगणाः, साध्याः, सिद्धगन्धर्वचारणाः, तुष्टाः सन्तः, तुष्टुवुरस्तुवन्। पुष्पवर्षाणि, मुमुचुः ॥ ३१ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तमिति : १०.२५.२९.

मायातोऽप्यतिशायिमोहजनकः स प्रेमभावो जने मन्ये यत्कलितान्तरा व्रजजना मोहं ययुस्तेऽन्यथा ।
कर्तुः स्वामनमाशिषां फलमलं दातुश्च गोवर्धनं धर्तुर्लोकगुरोरमीयदवदन्नाशोर्गिरस्तत्कथम् ॥ १५४ ॥

यशोदिति : १०.२५.३०.

दृष्ट्वाऽद्भुतं कर्म तद तदीयं भूयो यशोदाप्रमुखा हि दुर्दृशाम् ।
दृक्पातभीता युयुजुः सदाशिषस्तद्युक्तमव्याजहितस्पृहाणाम् ॥ १५५ ॥
शिरोभिर्मयेयं धराधारितेति बलिष्ठप्रतिष्ठः स्थविष्ठः स्मयो मे ।
करेणोदधार्यप्रयत्नं त्वनेन धराधार्यपीति प्रियाशीर्वचाः सः ॥ १५६ ॥

दिवि देवगणा इति : १०.२५.३१.

यस्योत्कर्षस्तावकास्तस्य लोका नैवं लोके किन्तु नाकेऽपि यस्मात् ।
अर्वागिन्द्रं तुष्टुवुर्ये त एव कृष्णोत्कर्षे तुष्टुवुः कृष्णमेव ॥ १५७ ॥

कृष्णप्रिया

राजन् ! प्रेम पूर से परिपूर्ण सर्व व्रजजन, भगवान श्रीकृष्ण के समीप आए, यथोचित विधि अनुसार प्रणाम, आशीर्वाद, आलिङ्गन आदि से उसका सत्कार करने लगे। गोपीजन ने भी आनन्द विभोर बनकर स्नेह सभर दहीं, अक्षत, एवं जल से प्यारे श्रीकृष्ण का समर्चन किया और मङ्गल गान के साथ मङ्गलाशीर्वाद दिए ॥ २९ ॥ स्नेह विभोर श्रीनन्दबाबा, श्रीयशोदा जी, श्रीरोहिणी जी, और बलवानों में अग्रसर श्रीबलभद्र जी ने भगवान श्रीकृष्ण को गले में लगा कर शुभाशीर्वाद दिए ॥ ३० ॥ राजन् ! इस अवसर स्वर्ग निवासी देववृन्द, साध्य, सिद्ध, गन्धर्व, चारण आदि भगवान् श्रीकृष्ण की स्तुति करने लगे और प्रसन्नता को व्यक्त करते हुवे पुष्पों की वृष्टि करने लगे ॥ ३१ ॥

शङ्खदुन्दुभयो नेदुर्दिवि देवप्रणोदिताः[1] । जगुर्गन्धर्वपतयस्तुम्बुरुप्रमुखा नृप ॥ ३२ ॥
ततोऽनुरक्तैः पशुपैः परिश्रितो राजन् स गोष्ठ सबलोऽव्रजद्धरिः[2] ।
तथाविधान्यस्य कृतानि गोपिका गायन्त्य ईयुर्मुदिता हृदिस्पृशः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] [5]पञ्चविंशोऽध्यायः ॥ २५ ॥

कर्वमक्षमा

अन्वयः –नृप ! दिवि देवप्रणोदिताः शङ्खदुन्दुभयः नेदुः तुम्बुरुप्रमुखाः गन्धर्वपतयः जगुः ॥ ३२ ॥ राजन् ! ततः सबलः सः हरिः अनुरक्तैः पशुपैः परिश्रितः गोष्ठम् अव्रजत् गोपिकाः तथाविधानि अस्य कृतानि हृदिस्पृशः गायन्त्यः मुदिताः ईयुः ॥ ३३ ॥

इति पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततो गोवर्धनस्थातात् । अस्य श्रीकृष्णस्य । तथाविधानि गोवर्धनोद्धरणादिरूपाणि तानि कृतानि कर्माणि गायंत्य इयुर्ययुः । कथंभूताः । एवं प्रेम्णा हृदि स्पृशन्तीति हृदिस्पृशस्ताः । यद्वा । कथंभूतस्य । प्रेष्ठत्वेन तासां स्पृशतीति हृदिस्पृक् तस्य ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायां पंचविंशोऽध्यायः ॥ २५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गोरक्षणमहोत्सवमाह—शंखेति ॥ ३२ ॥ ततः देवकृतोत्सवोत्तरम् वा एवं प्रेम्णा कृष्णकृतगायनस्नेहेन कृष्णस्य हृदिस्पृशः मनोहराः 'कामश्चाष्टगुणः स्त्रीणाम्' इत्युक्तेः कामाधिक्यात् । यथा स्त्रीणामुपपतो प्रेमास्ति तत उपपतेः स्त्रीषु किञ्चिन्न्यूनोस्ति प्रायेणेत्यस्वारस्यादाह–यद्वेति । गोवर्द्धनधृतौ श्रुतिः–"तमस्य राजा वरुणः स्वमश्विना क्रतुं सचंत मारुतस्य वेधसः दाधार दक्षमुत्तमहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णु ते तेन" अस्या अर्थः–अस्य विष्णोस्तं पवताथ कृतं स्वं स्वन संपादित क्रतु वरुणोऽश्विनौ च सचंत अन्वमोदंत । मारुतस्य वायोरपि वेधसः स्रष्टुः ततश्च स्वमखभंगे कृते इन्द्रे कुपिते विष्णुः कृष्ण उत्तमं श्रेष्ठं दक्षं वृष्टिवारणक्षमम् अहर्विदं क्रतोर्लब्धारं पर्वतं दाधार दधार । यतः सखिवान् व्रजाख्यसखिसमुदायवान् । व्रजमपोर्णु ते तेनाहर्विदा शैलेनाच्छादयतीत्यर्थः ॥ ३३ ॥

इति श्रीमदभागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे पंचविंशोऽध्यायः ॥ २५ ॥

---

[1] प्रचोदिताः–विज. । [2] ऽविशद्–विज. । [3] पारमहंस्यां संहितायां–प्रा. पा. । [4] पूर्वार्द्धे–प्रा. पा. । [5] त्रयोविंशो–विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

देवैः प्रकर्षेण विचित्रतया वादिता इत्यर्थः। यद्वा, स्वयमेव नृत्याचरणादिना प्रेरिता वादकद्वारा प्रवर्त्तिताः सन्तः दिवीति पुनरुक्तिः इन्द्रभयाभावेन दिव्येव तेषां तत्तदाचरणस्य बोधार्थं हे नृपेति प्रहर्षेण। यथा भवद्विधस्य राज्ञो महोत्सव इति वा ॥३२॥ प्रहर्षेणैव तस्य गोष्ठप्रवेशं पूर्ववद्गायन्निवाह—तत इति। परितः श्रितः वृत्तः यतोऽनुरक्तैः सव्रजरक्षार्थं धृतगोवर्द्धनः स्वगोष्ठमिति क्वचित् पाठः मध्ये गोष्ठं श्रीनन्दस्य स्वीयावासपर्यन्तं प्रविवेश इत्यर्थः। प्रहर्षोद्रेकेण सर्वेषामेव तेषां तेन सह तत्रैव गमनात् हरिः शक्रदुर्मदगोष्ठार्त्तिहरणात् तत्क्रीडया सर्वमनोहरणाच्च श्रीगोपीनाञ्च सर्वतोऽधिकं सुखमजनी याह—तथेति। गायन्त्य इति, तत्क्षणमेव गतिकरणशक्तिश्च दर्शिता ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

देवैः प्रकर्षेण विचित्रोत्कृष्टप्रकारादिना चोदिताः वादिता इत्यर्थः, यद्वा स्वयमेव नृत्याचरणादिना प्रेरिताः सन्तः; दिवीति पुनः पुनरुक्तिः, इन्द्रभयाभावेन दित्येव तेषां तत्तदाचरणस्य किंवा तेषां तदानीं व्रजागमनायोग्यतया भूमावनागमनस्य बोधनार्थम्। हे नृपेति—यथा राज्ञो महोत्सवे गायकादीनां मुख्या गानादिकं कुर्वन्ति तथेति भावः, यद्वा, प्रहर्षोद्रेकेण पुनः पुनः सम्बोधनम् ॥ ३२ ॥ अतएव तस्य गोष्ठप्रवेशं पूर्ववद्गायन्निवाह—तत इति। परिश्रितो वृतः, यतोऽनुरक्तैः पशुपैश्च स्वभावत एव स्नेहार्द्रचित्तैरित्यर्थः। पशुपैरित्युपलक्षणम्, अन्यैश्च सर्व्वैर्व्रजवासिभिरिति ज्ञेयम्, (भा० १०।२५।२२) 'सव्रजाः सोपजीविनः' इति भृत्यपुरोहितादीनामपि तद्गर्त्ते प्रवेशोक्तेः, तत्र च गोपानां मुख्यतया निर्द्देशोऽनुरागविशेषेणावरणात्। हे राजन्निति प्रहर्षवेगेन विवशीभवन्तं श्रीपरीक्षितमवधारयति; यद्वा, राजमानः सर्व्वैरेव तैरनुरागेण परिवेष्टितत्वात्। स व्रजरक्षार्थं धृतगोवर्द्धनः; यद्वा, सप्ताहमेकत्र निरन्तरं श्रीगोपीसामासादिति-दुर्लभ-श्रीमुखचन्द्रावलोकः, त्वत्प्राणनाथ इति वा। सबलः स्नेहकातर्य्येण तेन परस्परं वा गृहीतहस्त इत्यर्थः। गोष्ठं निजवसतिस्थानमव्रजदिति श्रीगोवर्द्धनोपान्ते श्रीराधाकुण्डान्तिके वृत्तम्; गोष्ठं वृष्टिभयेन व्रजवासिभिर्गोवर्द्धनोद्धरणार्थं तन्मध्यप्रदेशागत-श्रीभगदन्तिकमागतैस्त्यक्तम्, पुनस्तदेव तैः सह गत इत्यर्थः। 'स्वगोष्ठम्' इति क्वचित् पाठः, ततश्च श्रीगोवर्द्धन-पूर्व्वदिग्भागवर्त्तमानान्यदीयवसतिं परित्यज्य श्रीनन्दस्य स्वकीयवासमेव प्रविवेशेत्यर्थः। ततश्च पशुपैः परिश्रित इति प्रहर्षोद्रेकेण सर्व्वेषामेव तेषां तेन सह तत्रैव गमनादिति ज्ञेयम्। हरिः शक्रदुर्म्मदगोष्ठार्त्तिहरणात्, तत्क्रीड़या सर्व्वमनोहरणाच्च। श्रीगोपीनाञ्च सर्व्वतोऽधिकं सुखमजनीत्याह-तथेति। हृदिस्पृशः—श्रीकृष्णस्य सर्व्वेषामपि वा चित्तमाकर्षत इत्यर्थः। श्रीभगवन्माहात्म्यविशेषक्रीड़ामाधुर्य्याधिक्यदृष्ट्या प्रहर्षभरेण गानात्, तद्गानस्वभावाद्वा। अन्यत्तैर्व्याख्यातम्; यद्वा, तथाविधानि तादृशान्यनिर्व्वचनीयमाहात्म्यानीत्यर्थ'। कृतानि श्रीगोवर्द्धनधारणकर्म्माणि, बहुत्वं गौरवात् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सङ्खेति। शङ्खादयो नेदुर्दध्वनुः हे नृप ! ॥ ३२ ॥ ततो हे राजन् ! अनुरक्तैः पशुपालैः परिवृतो बलदेवेन सहितो हरिः स्वगोष्ठं जगाम गोपिकाश्च तथाविधानि गोवर्द्धनोद्धरणतुल्यान्यमानुषाण्यन्यान्यप्यस्य भगवतः कृतानि कर्माणि गायत्यः हृदिस्पृशः श्रीकृष्णहृदयङ्गमाः सत्यः हृदिस्पृश इति भगवद्विशेषणं वा मुदिताः सत्यो ईयुः व्रजं जग्मुः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हृदि स्पृशः मनोहराः "हृद्युभ्यामुपसङ्ख्यानम्" इत्यलुक् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां पञ्चविंशोऽध्यायः ॥ २५ ॥

(विजयध्वजरीत्या त्रयोविंशोऽध्यायः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

शङ्खेति। अन्येषां देवानामपि हर्षकौतुकं दर्शयति ॥ ३२-३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पंचविंशोऽध्यायः ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्प्रेयसीनां तु सर्वजनालक्षितं दूरतः कटाक्षैरेव मिलनं वृत्तं गृहगमनसमये सप्रेमगानञ्चाह—ततो गोवर्द्धनस्थानात् कृतानि चरित्राणि गायन्त्य इति तत्क्षण एव गीतकरणे सामर्थ्यं हृदि प्रेम्णा स्पृशन्तीति ता इति याः कृष्णं सदा ध्यायन्तीत्यर्थः। यद्वा हृदि वक्षसि मनसि च स्पृशतीति हृदिस्पृक् प्रेष्ठस्तस्येति कृष्णस्य विशेषणम् ॥ ३३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। पंचविंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ २५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ततो गोवर्द्धनात् गोष्ठं व्रजं स हरिः सबलो व्रजं जगाम। गोपिका च हृदिस्पृशः श्रीकृष्णहृदयङ्गमाः तथाविधानि गोवर्द्धनोद्धरणादिरूपाणि कृतानि कर्माणि अस्य हृदि स्पृशः हृदयंगमस्यः श्रीकृष्णस्य गायन्त्यः ईयुः व्रजं जग्मुः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चविंशोऽध्यायार्थप्रकाशः ॥ २५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दिवीति दुन्दुभिपदेनैव गन्धर्वपतिपदेनाप्यन्वेति ॥ ३२ ॥ हृदिस्पृशो मनोज्ञाः हद्युभ्यां चेति सप्तम्या अलुक् ॥ ३३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीसुबोधिनी

समागतानां देवानामेतदुक्त्वेन्द्रभयात् तत्रत्या न करिष्यन्तीत्याशङ्कां परिहरंस्तत्र स्थितानामप्युत्सवमाह **शङ्खेति**, **शङ्खा दुन्दुभयश्च नेदुः** शङ्खशब्दो वैदिको दुन्दुभिशब्दो लौकिक इत्युभयोर्निर्देशः स्वयमेव **नेदुर्देवप्रणोदिताश्च नेदुः**, **गन्धर्वादीनां पतयो** विश्वावसुप्रभृतयो **जगुर्गानं** कृतवन्तः, त्रयो मुख्या विश्वावसुस्तुम्बुरुनारदश्चेति तत्र मध्यमो निरूपितस्**तुम्बुरुप्रमुखा** इति स उभयात्मक इति, **पुनर्नृपे**तिसम्बोधनं तथादर्शनाद् विश्वासाय ॥ ३२ ॥ एवं भगवल्लीलामुक्त्वोपसंहरति **तत** इति, देवादीनां शब्दादिश्रवणानन्तरमत्यन्तमनुरक्तैः **पशुपैः परिश्रित** एव सन् भगवान् **गोष्ठमव्रजद्** यतो हरिः, पशुपानां चारणार्थं गमनं निषिद्धं गवां तेषां चापेक्षाभावात् तदुपपादितुं, अतोनुरागबाहुल्यात् **पशुपैः परिश्रित** एव गतः, राजन्निति पूर्ववत्, प्रायेण क्लिष्ट इति पुनः पुनः सम्बोधनं स इति तथा समर्थोपि, न हि तादृशो गोष्ठे स्थातुं युक्तो भवति, तत्रापि **सबलः** बलभद्रसहितस्तथाप्य**व्रजद्** यतो हरिः, अथ वैतादृशालौकिकसामर्थ्यवतो द्वारकावदिहाप्युत्कृष्टं स्थानं निर्माय स्थातुमुचितं न तु गोष्ठ इत्यत्र आह स इति, "ते ते धामानी"त्यादिश्रुतिभिर्वैकुण्ठादप्यधिकमस्य सहजं स्थानमस्तीति निरूपितमस्तीति तथा प्रसिद्धो वेद इति तत्रैव गमनमुचितमावश्यकमपीत्यर्थः। यथा राजान्यत्र कार्यं कृत्वा स्वराजधानीमेव गच्छति तथेतिज्ञापनाय सम्बोधनं, गोपीनां गमने भगवत्सङ्गो नास्तीत्याशङ्क्याह तथाविधानीति, गोवर्धनोद्धरणसदृशानि पूतनासुपयःपानादीन्यनेनैव रूपेण कृतानि गोपिका विशेषानभिज्ञा अतः **कृतान्येव गायन्त्यो व्रजमीयुः**, तत्र गतानां संसारनिवृत्त्यर्थमाह **मुदिता हृदिस्पृश** इति **मुदिता** इति पूर्वदुःखनिवृत्तिः, अद्भुतभगवल्लीलादर्शनेन माहात्म्यज्ञानपूर्वकस्नेहातिशयो गोपानामधुना जात इति प्रियनिकटगमने प्रतिबन्धं तेन करिष्यन्ति करणे वा सपदीवाद्भुतरीत्याप्यस्मान् पालयिष्यतीति ज्ञात्वापि **मुदिताः**, भगवतो **हृदिस्पृशो** जाता **हृदि** भगवन्तं वा स्पृशन्तीति एतेनेतरेभ्योधिकोन्तरङ्गः सङ्ग एतासामुक्तः, एवं दुःखनिवृत्तिपूर्विका भगवदासक्तिर्निरूपिता ॥ ३३ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तरसाधनप्रकरणे
चतुर्थस्य स्कन्धादितो द्वाविंशाध्यायस्य विवरणम् ॥ २२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दिवि देवैः प्रणोदिताः शङ्खदुन्दुभयो नेदुः, तथा हे नृप ! तुम्बुरुप्रभृतयो गन्धर्वपतयो जगुः ॥ ३२ ॥ हे राजन् ! ततस्तदनन्तमनुरक्तैः पशुपैर्गोपैः परिश्रितो बलेन च सहितः स हरिः गोष्ठमव्रजत्। गोपिकाश्चास्य कृष्णस्य तथाविधानि गोवर्द्धनोद्धरणतुल्यानि अन्यान्यपि कृतानि कर्माणि गायन्त्यः मुदिता गोष्ठमीयुः जग्मुः। हृदिस्पृशः प्रेम्णा कृष्णस्य हृदि स्पृशन्तीति, तथाभूताः, प्रेष्ठत्वेन तासां हृदि स्पृशतीति तस्येति कृष्णविशेषणं वा ॥ ३३ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने। पञ्चविंशो गतो वृत्तिं व्रजरक्षानिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

शङ्खेति ।। हे नृप ! दिवि देवैः प्रणोदिताः शङ्खदुन्दुभयो नेदुः तुम्बुरुप्रमुखा गन्धर्वपतयो जगुः ।। ३२ ।। तत इति ।। हे राजन् ! ततः अनुरक्तैः पशुपैर्गोपैः परिश्रितो युक्तः बलेन च सहितः स हरिः गोष्ठमव्रजत् । गोपिकाश्चास्य कृष्णस्य तथाविधानि गोवर्द्धनोद्धरणतुल्यान्यन्यान्यपि कृतानि कर्माणि गायन्त्यः मुदिताः हृदिस्पृशः प्रेम्णा कृष्णस्य हृदि स्पृशंतीति । प्रेष्ठत्वेन तासां हृदि स्पृशतीति । तस्येति कृष्णविशेषणं वा । गोष्ठमीयुः जग्मुः ।। ३३ ।।

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमपञ्चविंशे व्यधादिमाम् ।।

इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां पञ्चविंशोऽध्यायः ।। २५ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

देवैः प्रणोदिताः वादिताः ।। ३२ ।। ततो गोवर्धनसमीपात् हरिः गोष्ठं अव्रजत् हृदि स्पृशतीति हृदि स्पृक्तस्य अस्य श्रीकृष्णस्य यद्वा तानि हृदि स्पृशस्ताः ईयुर्जग्मुः ।। ३३ ।।

इति श्रीशुद्धैकांतधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धव्याख्याने गोवर्धनधारणे पञ्चविंशोऽध्यायः ।। २५ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शङ्खेति ।। हे नृप, दिवि देवप्रणोदिताः देवताप्रणोदिताः, शङ्खाश्च दुन्दुभ्यश्च ते नेदुः । तुम्बुरुप्रमुखाः, गन्धर्वपतयः, जगुरगायन् ।। ३२ ।। तत इति ।। हे राजन्, हरिः श्रीकृष्णः, ततो गोवर्द्धनस्थानात्, अनुरक्तैः स्वस्मिन्ननुरागवद्भिः, पशुपैर्गोपैः परिश्रितः परिवृतः, सबलो बलभद्रसहितः सन्, स्वगोष्ठं अव्रजत् जगाम । गोपिकाश्च, हृदिस्पृशः प्रेमातिशयेन श्रीकृष्णहृदयं स्पृशन्त्यः, मुदिताः सत्यः, हृदिस्पृश इति कृष्णविशेषणं वा । अस्य श्रीकृष्णस्य, तथाविधानि गोवर्द्धनोद्धारणादीनि अमानुषाणि, मानुषाधारणानि अन्यान्यपि, कृतानि चरित्राणि, गायन्त्यः सत्यः, ईयुर्व्रजं जग्मुः ।। ३३ ।।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्ष पुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे पञ्चविंशोऽध्यायः ।। २५ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सबल इति : १०.२५.३३.

निरतिशयः शरणागतजनगिरिभारो यथा तथा नायम् ।
इति बोधयन् स चक्रे गिरिधृतिमबलो व्रजं तु सबलोऽगात् ।। १५८ ।।
कथं वृष्टिरासीत्कथं वा धृतोऽद्रिः कथं गोप-गोपिकावस्थितिर्वा ।
क्व वाऽऽपो गतास्ताः कुतो वा निरभ्रं कथं वा पुनस्तादृगद्रेः प्रतिष्ठा ।। १५९ ।।
न तद्धीर्विधेरप्यहं त्वल्प एवेत्यनल्पैर्विकल्पैरलं जल्पनैर्वा ।
यदीयप्रभावादिदं सर्वमासीत् तमीशानमेवानिशं चिन्तयामि ।। १६० ।। (युग्मम्)

इति श्रीमन्नासिकनिवासि-कविवर-हरिसुरिविरचिते भक्तिरसायने पञ्चविंशोऽध्यायः ।। २५ ।।

कृष्णप्रिया

स्वर्ग में उत्सव को मनाते देवगण शंखनाद दुन्दुभिनाद करने लगे, बाजे बजाने लगे और तुम्बुरु आदि श्रेष्ठ गन्धर्वगण और गन्धर्व पति भगवान् का यशोगान करने लगे ।। ३२ ।। गोवर्धन के समीप उत्सव मनाकर, प्रेमपूर्ण निजभक्त गोपों के मध्य बिराजमान बलदेवजी सहित भगवान श्रीकृष्ण व्रज में पधार गए । इसी प्रकार प्रसङ्ग-प्रसङ्ग पर किए भगवान् श्रीकृष्ण के हृदयहारि चरितों का प्रमोदपूर्वक गान करती व्रजनारियाँ भी व्रजराज को हृदय में पधराकर हृदय से आलिङ्गन कर व्रज में पधार गई ।। ३३ ।।

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां तामसप्रकरणे हिन्दी भाषान्तरे पञ्चविंशोऽध्यायः ।। २५ ।।

—:०:—

अथ षड्विंशोऽध्यायः

श्लोकाः	अनु.	शार्दूल	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
२५	२४	१	२	८६०	११	३०	९०१	२८	५

श्रीशुक[1] उवाच

एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते । [2]अतद्वीर्यविदः प्रोचुः [3]समभ्येत्य सुविस्मिताः ॥ १ ॥
[4]बालकस्य यदेतानि कर्माण्यत्यद्भुतानि वैः । कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितम् ॥ २ ॥
यः सप्तहायनो बालः करेणैकेन लीलया । कथं बिभ्रद् गिरिवरं पुष्करं गजराडिव ॥ ३ ॥
तोकेनामीलिताक्षेण पूतनाया महौजसः । पीतः स्तनः सह प्राणैः कालेनेव वयस्तनोः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—ते गोपाः कृष्णस्य एवंविधानि कर्माणि वीक्ष्य, अतद् वीर्यविदः सुविस्मिताः समभ्येत्य प्रोचुः ॥ १ ॥ बालकस्य एतानि अद्भुतानि कर्माणि यत् वै असौ ग्राम्येषु आत्मजुगुप्सितम् जन्म कथम् अर्हति ॥ २ ॥ यः सप्तहायनः बालः एकेन करेण लीलया, गजराड् पुष्करम् इव; गिरिवरम् कथम् बिभ्रद् कथम् बालकः भवेत् ॥ ३ ॥ कालेन तनोः वयः इव, तोकेन आमीलिताक्षेण महोजसः पूतनायाः प्राणैः सह स्तनः पीतः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

षड्विंशे विस्मितान्गोपान्कृष्णस्याद्भुतकर्मभिः । नंदो गर्गोक्तिमाश्राव्य तदैश्वर्यमवर्णयत् ॥ १ ॥

समभ्येत्य नंदं समभिगम्य ॥ १ ॥ यदूचुस्तदाह । बालकस्येति । यद्यस्माददद्भुतानि कर्माणि तस्माद् ग्राम्येषु गोपालेषु कथं जन्मार्हति । आत्मजुगुप्सितमात्मानर्हम् ॥ २ ॥ अद्भुतानि कर्माण्याहुः । यः सप्तहायन इति । कथं बिभ्रत्स्थित इति । पुष्करं पद्मं गजराण्महागज इव ॥ ३ ॥ महौजसो महाबलायाः तनोर्वय आयुर्यौवनं वा कालेन यथा पीयते तद्वत् । कथमित्यनुवर्तते ॥४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदैश्वर्यम् कृष्णवैभवम् (१) । एवंविधानि गोवर्द्धनधारणादीनि । अतद्वीर्यविदः श्रीकृष्णमाहात्म्यमजानंतः । शुचिस्मिता नंदभाग्यं विमृश्य जातानंदाः । 'सुबिस्मिताः' इति विजयध्वजः । इह किल गोवर्द्धनधारणसमये श्रीकृष्णलावण्यामृतरसास्वादनिमग्नानां गोपानां मनसि कोऽपि विचार उद्भवितुमवसरं न प्राप्तः तदनु स्वस्वगृहगतानां सर्वेषां हृदि संदेह उत्पेदे—अहो संप्रति साक्षाद्दृष्टेन गिरिधारणेन पूतनावधादि दावानलोपशमनादिकं चास्यैव कर्म प्रतीमस्तदातदा ब्राह्मणाशीर्वादान्नंदभाग्यातिरेकाच्च नारायणप्रसादप्राप्तेऽस्मिन्बालके नारायणावेशाद्वा तेतेऽभूवन्निति वितर्का वृथैव कृता । वस्तुतस्तु साप्तवर्षिकस्य बालस्य सप्तदिनावधि शैलेंद्रधारणं नरत्वं निषिध्य परमेश्वरत्वमेव कथयति, किं च अस्माकं सांसारिकाणां ग्राम्यगोपानामेतत्पितृपितृव्यमातुलादीनां लालनैः प्रफुल्लत्वमलालनैव क्लैब्यं तथा क्षुत्पिपासादधिपयश्चौर्यदंभानृतप्रलपनवत्सगोचारणादिकं परमेश्वरत्वे सति कथं संभवेदत ईश्वरत्वं निषिध्य नरत्वमेव प्रतिपादयत्यतोऽस्य तत्त्वं निश्चेतुमसमर्था महाबुद्धिमंतं व्रजराजमेव पृष्ट्वा निःसंशया भवाम इति मनसि कृत्वा तस्यैव महास्थानं प्रविश्य तं पप्रच्छुः—एवमिति विश्वनाथः ॥ १ ॥ यत् वचः । तद्वचः शुक आह । अद्भुतानि वक्तुमशक्यानि । ग्राम्यषु विषयाविष्टजनेषु । आत्मनः स्वस्यानर्हनिरूपणायोग्यम् । न ह्येतादृगैश्वर्यता गोपेष्वाविर्भावः शोभत इति भावः । तदा कृष्णे वनं गत इति ज्ञेयम् । परोक्ष एव रसापत्तेः परमनिकृष्टोऽपि स्वजुगुप्सायां न प्रवर्त्तते किमुत सर्वेश्वर इति चक्रवर्त्ती ॥ २ ॥ सर्वं बालचरितमनुक्रमंते किञ्चिद्वैपरीत्येन । वैपरीत्यमाह—य इति । धारणानायासे दृष्टांतमाह—पुष्करमिति । 'पुष्करांभोरुहाणि च' इत्यमरः ॥ ३ ॥ तोकेन शिशुना "तोकमल्पशिशौ पुंसि कन्यायां स्त्री तथाल्पके इति धरणिः । तनोः शरीरस्य । बालवार्द्धक्ययोरल्पपराक्रमत्वान्महौजस इत्यनेन दृष्टांतवैषम्यादाह—यौवनं वेति । "वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्" इति मेदिनी ॥ ४ ॥

---

१. बादरायणि—प्रा. पा. । २. नत—इति गो. प्रे. टी. । ३. नन्दमभ्येत्य विस्मिताः—वीर. ; समुपेत्य—विज. । ४. बालस्य—वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्थं श्रीभगवतः शक्त्यतिशयं दृष्ट्वा ऐश्वर्यज्ञानेन व्रजजनानां तस्मिन् कदाचिद् प्रेमह्रासमाशङ्क्य तत्परिहारार्थं विशेषतश्च गोपवर्गकृतशङ्कायाः श्रीनन्देन निरसनात् प्रेमविवृद्धमिति बोधनार्थं तत्प्रसङ्गमारभते, एवमित्यादिना यावत्समाप्ति। ईदृशान्यलौकिकानीत्यर्थः। बहुत्वं पूर्वपूर्वापेक्षया न तस्य वीर्यम् ऐश्वर्यं विन्दन्ति अनुसन्दधतीति तथा ते यतः ते इति सदा तत्स्नेहविवशत्वेन प्रसिद्धा इत्यर्थः। अत एव सुविस्मिताः सन्तः सम्यक् भक्त्या प्रणतिपूर्वकं श्रीगोपराजमभिगम्य यद्वा, मिथः सम्भूय प्रकर्षेण न्यायप्रदर्शनादिना प्रेमपर्यवसानत्वेन वा ऊचुः ॥ १ ॥ बालकस्य चेत्यन्वयः। अप्यर्थे चकारः वै क्वचित् बाल्येवर्त्तमानस्यापीत्यर्थः। ग्राम्येषु ग्राम्यत्वात् उत्तमताहीनेषु येषु आत्मनो जुगुप्सितं निन्दा यस्मात् तत् असाविति पारोक्ष्यनिदर्शन तथाऽसौ वनं गत इति लक्ष्यते पारोक्ष्य एव रसापत्तेः ॥ २ ॥ बालः तत्र च सप्तहायनः सप्तवर्षमात्रवयाः तत्रापि एकेनैव नच कदाचित्परिवृत्त्य करान्तरेण तत्रापि गिरिषु वरं श्रेष्ठं परमगुरुतरमित्यर्थः। तत्रापि लीलया कथं बिभ्रत् स्थित इत्यसम्भाव्यत्वेनात्यद्भुतत्वं व्यञ्जितं यो बालः स कथमित्यध्याहारेणान्वयः। लीलया धारणे दृष्टान्तः, पुष्करमिति, एतेन सौन्दर्यादिविशेषोऽपि सूचितः अतोऽसौ लौकिकबालको न भवतीति भावः। यत्तु विष्णुपुराणादौ ग्रीष्मकाले श्रीवृन्दावनमागत्य तस्य सप्तमवर्षे गोपालने प्रवृत्तिरिति तथा चोक्तम्—

"कालेन गच्छता तौ तु सप्तवर्षौ महाव्रजे। सर्वस्य जगतः पालौ वत्सपालौ बभूवतुः" ॥ इति

अस्यार्थः श्रीस्वामिपादैरेव तट्टीकायां व्यञ्जितोऽस्ति एवं वत्सपालौ च संवृत्तौ रामदामोदरौ तत् इति पूर्वमुक्तत्वात् तदनन्तरं च तस्मिन्नेवाब्दे परस्मिन् वा प्रावृट्क्रीडा ततः कालियमर्दनं ततो धेनुकप्रलम्बयोर्वधः ततः शरदि श्रीगोवर्द्धनाद्धरणमिति तस्य च कल्पभेदव्यवस्थया "ततश्च पौगण्डवयःश्रितौ" इत्यादिना विरोधः परिहार्य इति दिक् ॥ ३ ॥ पूर्वमतिबाल्ये दुरूहत्वेन तत्कृतत्वे सन्दिग्धान्यपि पूतनावधादीन्यधुना साक्षात् श्रीगोवर्द्धनोद्धरणदृष्ट्या तदीयान्येवेति निश्चितवन्तोऽप्याहुः—तोकेनेति नवभिः। आ सम्यक् मीलिताक्षेण इत्युक्तदिशा तेन चात्यन्तबाल्यं वा बोधितं पानप्रकारश्च दुर्बोध इति दृष्टान्तेनाहुः—कालेनेति। इति शक्तिविशेषः सूचितः कथमित्यस्य सर्वत्राप्यनुवृत्तेः सर्वेषामेव तत्तत्कर्मणामाश्चर्यत्वोक्त्या ग्राम्येषु जन्मायोग्यतामेव साधयन्ति यद्वा कथमित्यस्याननुवृत्यापि अत्यद्भुतानीत्युक्त्या सोऽर्थः स्वतः पर्यवस्यति तोकेनैवेत्यादिभिश्चाद्भुतकर्माण्येवोक्तानि ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्थं श्रीभगवतः शक्त्यतिशयदृष्ट्या ऐश्वर्यज्ञानेन व्रजजनानां तस्मिन् प्रेमह्रासमाशंक्य तत्परिहारार्थं विशेषतश्च गोपवर्गकृतशंकायाः श्रीनन्देन विरसनात् प्रेमभक्तिविवृद्धेति बोधनार्थं तत्प्रसंगमारभते—एवमित्यादिना यावत्समाप्ति। ईदृशान्यलौकिकानीत्यर्थः। न तस्य वीर्य्यमैश्वर्य्यं सामर्थ्यं वा विदन्ति अनुसन्दधतीति तथा ते; यतस्ते सदा तत्स्नेहविवशा इत्यर्थः। अतएव सुविस्मिताः सन्तः सम्यक् भक्त्या प्रणतिपूर्व्वकं श्रीगोपराजमभिगम्य; यद्वा, मिथः सम्भूय प्रकर्षेण न्यायप्रदर्शनादिना प्रेमपर्य्यवसानत्वेन वा ऊचुः ॥ १ ॥ बालकस्य चेत्यन्वयः, अप्यर्थे चकारः, बाल्ये वर्त्तमानस्यापीत्यर्थः; ग्राम्येषु नीचेषु, आत्मनो जुगुप्सितमयोग्यम्, यद्वा, आत्मनो जुगुप्सितं निन्दा यस्मात्तत्; तथा च श्रीविष्णुपुराणे (५।१३।३) 'गोपालत्वं जुगुप्सितम्' इति। असावित्यनेन श्रीभगवतो गोचारणं सहचरैः सह वनं गतस्य असाक्षादयं प्रायो वृद्धानां प्रसंगो ज्ञेयः ॥ २ ॥ बालस्तत्र च सप्तहायनः सप्तवर्षमात्रवयाः, तत्रापि एकेनैव, न च कदाचित् परिवृत्त्या करान्तरेण; तत्रापि गिरिषु वरं श्रेष्ठं परमगुरुतरमित्यर्थः, तत्रापि लीलया स कथं बिभ्रत् स्थित इत्यसम्भाव्यत्वेनाद्भूतत्वं व्यञ्जितम्। लीलया धारणे दृष्टान्तः—पुष्करमिति। अतोऽसौ लौकिकबालको न भवतीति भावः। एतेन सौन्दर्य्यादिविशेषोऽपि सूचितः। यद्यप्यष्टमाब्दारम्भे शरदि श्रीगोवर्द्धनधारणम्, तथापि सप्तहायन इति भाद्रमासि सप्ताब्देषु पूर्णेषु किञ्चिदधिकैकमासस्याल्पकालत्वेनागणनात्। यच्च श्रीविष्णुपुराणादौ ग्रीष्मकाले श्रीवृन्दावनमागतस्य सप्तमवर्षे गोपालने प्रवृत्तिरिति, तथा चोक्तं श्रीपराशरेण (वि. पु. ५।६।३६) 'कालेन गच्छता तौ तु सप्तवर्षौ महाव्रजे। सर्व्वस्य जगतः पालौ वत्सपालौ बभूवतुः ॥' इति। अस्यार्थः श्रीस्वामीपादैरेव तट्टीकायां व्यञ्जितोऽस्ति—'एवं वत्सपालौ कालेन गच्छता सप्तवर्षौ गोपालने समर्थौ बभूवतुः' इति; (वि. पु. ५।६।३२) 'वत्सपालौ च संवृत्तौ रामदामोदरौ ततः' इति पूर्व्वमुक्तत्वात्। तदनन्तरञ्च तस्मिन्नेवाब्दे परस्मिन् वा प्रावृट्क्रीड़ा, ततः कालियमर्द्दनम्, ततो धेनुकप्रलम्बयोर्वधः, ततः शरदि श्रीगोवर्द्धनोद्धरणमिति, तस्य च कल्पभेदव्यवस्थया (भा. १०।१५।१) 'ततश्च पौगण्डवयःश्रितौ' इत्यादिना विरोधः परिहार्य्य इति ॥ ३ ॥ पूर्व्वमतिबाल्ये दुरूहत्वेन तत्कृतत्वे सन्दिग्धान्यपि पूतनावधादीनि अधुना साक्षाच्छ्रीगोवर्द्धनोद्धरणदृष्ट्या तदीयान्येवेति प्रत्यभिज्ञाय तान्यप्याहुः—तोकेनेति नवभिः। आमीलिताक्षेणेति (भा. १०।६।८) 'आस निमीलितेक्षणः' इति पूर्व्वोक्तस्यानुवादः, तेन च बाल्यकौतुकमत्यन्तबाल्यं वा बोधितम्; यद्वा, ईषदक्षिनिमीलनमात्रेणैवेत्यर्थः, तेन चातिशीघ्रत्वमनायासत्वं वा दर्शितम्; यद्वा, अमीलिताक्षेण निरीक्षमाणेत्यर्थः, इति निर्भयत्वं दृष्टिमात्रेणैव सप्राणस्तनपानं चाभिप्रेतम्। तत्प्रकारश्च दुर्ब्बोध

इति दृष्टान्तेनाहुः—कालेनेति, इति शक्तिविशेषः सूचितः। कथमित्यस्य सर्व्वत्राग्रेऽप्यनुवृत्तेः, सर्व्वेषामेव तत्तत्कर्म्मणामाश्चर्य्यत्वोक्त्या ग्राम्येषु जन्मायोग्यतामेव साधयन्ति; यद्वा, कथमित्यस्याननुवृत्त्यापि अत्यद्भुतानीत्युक्त्या सोऽर्थः स्वतः पर्य्यवस्यत्येव। तोकेनेत्यादिभिश्चाद्भुतकर्म्माण्येवोक्तानि ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथामानुषगोवर्द्धनोद्धरणात्मकचेष्टितस्मारितपूतनाशकटासुरवधादिवृत्तान्तैरतिमानुषैः कृष्णममानुषं शङ्कमानैर्गोपैः पृष्टो नन्दो गर्गगीतानुवादेन साक्षादयं नारायणो न केवलं मर्त्य इत्याहेत्याह मुनिः—षड्विंशेन। एवमिति। ते गोपाः कृष्णस्यैवंविधानि गोवर्द्धनोद्धरणादिवदमानुषाणि पूतनादिवधात्मकानि कर्माणि वीक्ष्यानुस्मृत्य न तद्वीयविदः कृष्णासाधारणजगद्व्यापारादिरूपापारमहिमानमजानन्तः केवलमेतैरेव कर्मभिस्तं विस्मयपूर्वकमाशङ्कमानाः विस्मयप्रयुक्तमुखविकासयुक्ताः नन्दमभिगम्योचुः ॥ १ ॥ उक्तमेवाह—बालकस्येत्यादिभिस्त्रयोदशभिः यद्यस्मादेतानि बालकस्य कर्माण्यत्यद्भुतानि तस्माद्ग्राम्येषु गोपेषु कथमसावात्मनः स्वस्य जिगुप्सितमननुरूपं जन्मार्हति ॥ २ ॥ अद्भूतान्येवास्य कर्माण्याहुः दशभिः। यः कृष्णः कथं बिभ्रत्स्थितः पुष्करं पद्मं महाराज इवेति धारणायोग्यत्वसूचकं बालः सप्तहायन इति च विशेषणद्वयं साधनत्वायोग्यत्वसूचनाय करेणैकेनेत्युक्तम् धार्यत्वानर्हत्वसूचनाय गिरिवरमित्युक्तम् एवमुत्तरत्रापि द्रष्टव्यम् ॥ ३ ॥ तोकेनेति। किञ्च महौजसो महाबलायाः पूतनायाः प्राणैः सह स्तनस्तोकेन शिशुना तत्रापि मीलिताक्षेण नेत्रोन्मीलनेप्यसमर्थवयस्केनेति भावः कथं पीतः? यथा तनोः शरीरस्य वयो यौवनकालेन पीयते तद्वत् ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अनुस्मरणार्थमाप्रेङ्खाश्रितवयः सप्तवर्षपर्यन्तं बालचरितमनुक्रम्यतेऽस्मिन्नध्याये तत्र श्रीशुको गोपानां सङ्कथनप्रकारं कथयति—एवंविधानीति। ये गोपाः कृष्णस्यैवंविधानि कर्माणि वीक्ष्य तत्र तत्र साक्षाद्दृष्ट्वापि तस्य कृष्णस्य वीर्यं माहात्म्यं विदन्ति जानन्ति ते तद्वीर्यविदो न भवन्ति ते गोपाः समेत्य सम्भूयः प्रोचुः व्याकुर्वन्नित्यन्वयः ॥ १ ॥ बालस्यैतानि कर्माण्यत्यद्भुतानि वक्तुमशक्यानि वा इति यत्तस्मादसावात्मनः स्वस्य जुगुप्सितं ग्राम्येषु विषयिजनेषु जन्म कथमर्हति निरूप्यमाणे न योग्य इत्यन्वयः ॥ २ ॥ कानि तानि कर्माणीति? तत्राहुः यत इति। बिभ्रत् अबिभ्रत् पुष्करं पद्मम् ॥ ३ ॥ तोकेन शिशुना आमीलिताक्षेण ईषत्फुल्लनेत्रेण महौजसः महाबलायाः अधृष्यावष्टम्भाया वा "ओजोऽवष्टम्भबलयोः" इति स्तनं पीतं वयमद्राक्ष्मेति शेषः। कालेनान्तकेन ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

षड्विंशे तु तदैश्वर्य्यानैश्वर्य्येणक्षणशङ्किनः। गोपान् प्रबोधयामास नन्दो गर्गोक्तिगौरवैः ॥

इह किल श्रीगोवर्द्धनधारणसमये श्रीकृष्णलावण्यामृतरसास्वादनिमग्नानां मनसि कोपि विचार उद्भवितुमवसरं न प्राप तदनन्तरं स्वस्वगृहं गतानां तेषां सर्वेषामेव हृदि सन्देह एक उदपद्यत अहो सम्प्रति साक्षाद्दृष्टेन गिरिधारणेन पूतनावधादयो दावानलोपशमनादयोप्यस्यैव कर्माणि प्रतीमस्तदा तदा तु ब्राह्मणाशीर्वादात् नन्दभाग्यातिरेकात् नारायणप्रसादप्राप्तेऽस्मिन् बालके नारायणावेशाद्वा ते तेऽभूवन्निति वितर्का वृथैव कृता वस्तुतस्तु सप्तवार्षिकबालकस्यास्य सप्तदिनावधिशैलेन्द्रधारणं खलु नरत्वं निषिद्ध्य परमेश्वरत्वमेव कथयति किम्वास्माकं सांसारिकाणां ग्राम्यगोपानामेतत् पितृपितृव्यमातुलादीनां लालनैः प्रफुल्लत्वमुपलालनैर्वैक्लव्यं तथा क्षुत्पिपासादधिपयश्चौर्य्यदम्भानृतप्रलपनवत्सगोचारणादिकं परमेश्वरत्वे सति कथं सम्भवेदेतत्तु परमेश्वरत्वं निषिद्ध्य नरत्वमेव प्रतिपादयत्यतोऽस्य तत्त्वं निश्चेतुमसमर्था महाबुद्धिमन्तं व्रजराजमेव पृष्ट्वा निःसंशया भवामेति मनसि कृत्वा तस्यैव महास्थानीं प्रविश्य पप्रच्छुरित्याह, एवमिति ॥ १ ॥ अत्यद्भुतानीत्यतो नायं प्राकृतो बालकः किन्त्वीश्वर एव इति चेदत आह—कथमिति? असाविति परोक्षनिर्देशेन तत्रासौ वनङ्गत इति लभ्यते परोक्षत्व एव रसापत्तेः आत्मजुगुप्सितमित्यात्मनो जुगुप्सायां निकृष्टोऽपि न प्रवर्त्तते किमुत सर्वं प्रकृष्ट ईश्वर इति भावः ॥ २ ॥ यदि च नेश्वरस्तर्हि कथमेतानि कर्माणि सम्भवेयुरित्याहुः—द्वादशभिः। य इति, बिभ्रत् स्थित इति शेषः। पुष्करं पद्म कथमित्यस्य विभक्तिविपरिणामेन यच्छब्दस्य चाग्रिमश्लोकेष्वनुवृत्तिर्ज्ञेया ॥ ३ ॥ तोकेन ये न बालेन ईषन्मुद्रिताक्षेण अलक्ष्यमाणत्वे दृष्टान्तः तनोर्वयो यौवनं कालेन यथा पीयते तद्वत् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ श्रीकृष्णचरितदर्शनस्मरणेन विस्मितेभ्यो गोपेभ्यः श्रीनन्देन यत्तत्प्रभुत्वं वर्णितं तद्वर्णयति—एवमिति। ये अतद्वीर्यविदस्ते एव श्रीनन्दं समभ्येत्याभिगम्य प्रोचुः ॥ १ ॥ यत्प्रोचुस्तदाह—बालकस्येति त्रयोदशभिः। यत् यस्य बालकस्यैव एतान्यद्भुतानि कर्माणि स आत्मजुगुप्सितं स्वाननुरूपं जन्म कथमर्हति? ॥ २–३ ॥ तनोर्देहस्य वयः अवस्था कालेन यथा पीयते तद्वत् महौजसः महाबलायाः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ।। ये डोलालीलामारभ्यैतत्कुत्कीलतोलनादिपर्यन्तमधिकार्यन्तरात्मपरिशुद्धयेऽनन्तस्मरणेन भवितव्यं सङ्गृह्य तत्रापि सर्वचरिततादृूप्यमावेदयितुं धरोद्धरणमादितस्तथा कथा कथाव्यत्यासश्च सम्भवतः सम्भूय कथयन्ति गोपा इति शुको वक्ति ।। श्रीशुक इति । ते गोपास्तद्वीर्यविदस्तत्पराक्रमज्ञास्ते न भवन्तीति न तद्वीर्यविदः समुपेत्य मिलित्वा सुविस्मिताः सन्तः प्रोचुः ।। १ ।। यस्य बालकस्यैतानि कर्माण्यत्यद्भुतानि वै प्रसिद्धानि स्वस्यात्मनो जुगुप्सितं निन्दितं ग्राम्येषु मूर्खेषु मानुषेष्वसौ जन्म कथमर्हतीति परस्परं प्रोचुः ।।२।। सप्तहायनानि वत्सरा यस्य स करेण शुण्डया पुष्करं पद्मं बिभ्रद्गजराडिव कथं बिभ्रत्स्थित इति शेषः । अडभावे छान्दसे गणकार्यत्यानित्यत्वे बिभ्रदबिभ्रदिति वा । बालः करेण गिरिवरं बिभ्रज्जन्मकथमर्हतीत्यन्वयो वा ।। ३ ।। अमीलिताक्षेण तोकेन महौजसो महाशक्तेः पूतनायाः सह प्राणैः स्तनः पीतस्तनोर्वयो यौवनं कालेनेव यथा ग्रस्यते कालो बार्धकादिर्यथा वयोऽङ्गस्य नाशयति तथा पूतनामघातयदिति ।। ४ ।।

श्रीसुबोधिनी

अज्ञानमन्यथाज्ञानं कृष्णगं विनिवार्यते । त्रयोविंशे समत्वाय निरुद्धानामशेषतः ।। १ ।।
पूर्वपक्षश्च सिद्धान्तः फलं चेति निरूप्यते । अप्राकृतत्वं सम्बन्धो द्वयं स्थाप्यमिहोक्तिभिः ।। २ ।।
विरोधात् प्राकृतत्वेन सम्बन्धस्त्यज्यते पुरा । जातस्तादृश एवात्र न सन्देहस्तथापरः ।। ३ ।।
माहात्म्यदर्शनं हेतुः पूर्वपक्षे तथापरे । गर्गवाक्यानि तज्ज्ञानं फलमित्येष निश्चयः ।। ४ ।।

पूर्वाध्यायान्ते गोकुले समागताः सर्व इत्युक्तं, आगतानां सन्देहो वर्ण्यते भगवति पूर्वपक्षरूपः, आदौ पूर्वपक्षनिरूपणार्थं तेषामुद्योगमाहैवं **विधानीति**, गोवर्धनोद्धरणरूपाणि बहूनि भगवतः **कर्माणि** दृष्ट्वा धर्मिस्वरूपमज्ञात्वा हेत्वभावेनैवैतत् कार्यमाहोस्विद् धर्मी हेतुः ? तथा सति न स नन्दपुत्र इति निश्चित्या**तद्वीर्यविदो** भगवतः क्रियाशक्तिमज्ञात्वा **सुविस्मिता** विकसितवदनाः **सर्वे सम्भूय** नन्दसमीपमागत्य **प्रोचुः** ।।१।। कर्माणि तु दृष्टान्यहेतुकानि च न भवन्ति तस्मान्नायं नन्दस्य पुत्रो भवितुमर्हत्यलौकिककार्यकर्तृत्वात्, तदाहुर्यद् यस्मादेतानि **कर्माण्यत्यद्भुतानि बालकस्य** दृश्यन्ते **वै** निश्चयेन, किमतो यद्येवम् ? तत्राहुः **कथमर्हत्यसौ जन्मेति, ग्राम्येष्व**स्मासु कर्मग्रस्त इवात्मनो महतो **जुगुप्सितं** निन्दितं **जन्म कथमर्हति** ? कर्मगेन्द्राद्यपेक्षयापि महानिति निश्चीयते तथा सति कथमधमेष्ववतारः ? **न हि स्वेच्छया कश्चित् स्वस्य हीनतां सम्पादयति,** कर्माधीनता तु नास्त्येव कर्तुमकर्तुमन्यथाकर्तुं सामर्थ्यात्, **अतो जुगुप्सितं जन्म नार्हति** ।। २ ।। अलौकिकानि कर्माण्याह **यः सप्तहायन** इति, षड्गुणा भगवांश्च तेषां तत्तच्चेष्टाः सर्वा एवात्र समागता अतश्चेष्टारूपः काल **एकेन करेण स्वयं सप्तहायनोपि** भूत्वा **कथं गिरिवरं बिभ्रज्** जातः ? तत्रापि **लीलया** कदाचिदङ्गुलीष्वपि समानयति, वेणुं वादयन्, अडभावो वा छान्दसः, **अबिभ्रदिति**, एते तु यथादृष्टमनुवदन्तीति नात्र विचारणीयं, **गिरिवरं** पर्वतश्रेष्ठं, अनायासे दृष्टान्तः पुष्करं गजराडिवेति, न हि मत्तगजस्य कमलधारणे कश्चन प्रयासोस्ति, अथ वा सप्तहायन एकेन करेण गिरिवरं **बिभ्रत्** कथं **बालक** इति तस्मान्नायं तव पुत्रो नापि बालकः ।। ३ ।। अबालकत्वे हेत्वन्तरमाह तोकेनेति, आ समन्तान् **मीलिताक्षेण तोकेनाति** बालकेन **पूतनाया महौजसो**तिसमर्थायाः **प्राणैः सह स्तन्यं पीतं**, यद्यपि पूर्वं प्राणाः पीता इति न ज्ञातं तथाप्युत्तरोत्तरं सामर्थ्यदर्शनात् पूर्वकार्याण्यप्येतद्धेतुकानीत्येवावधार्यते, पाने तयापि न ज्ञातमित्येतदर्थं दृष्टान्तमाह **कालेनेव वयस्तनोरिति**, यथा **तनोः** शरीरस्य **वयः** प्रत्यहं क्षीयमाणमपि कालेन पुरुषो न जानाति तथा भगवता पेपीयमानाः प्राणाः पूतनया न ज्ञाता अन्यथा प्रतिक्रियां कुर्यात् पलायेत वा, तस्मादेवमलौकिकं सामर्थ्यं बाल्येपि ।। ४ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

त्रयोविंशाध्यायार्थोक्तौ, अज्ञानमिति । **निरुद्धानामज्ञानादि कृष्णगं** कृष्णविषयकं निवार्यत इत्यर्थः । प्रयोजनमाहुः **समत्वायेति** । गोवर्धनोद्धारणेन कृतो यो निरोधः स तु सर्वेषां समान इति तज्ज्ञापनाय तथेत्यर्थः । **प्राकृतत्वेनेति** । स्वनिष्ठो हेतुः । **जातस्तादृश एवेति** । तादृश एव, अप्राकृत एव, प्रकट इति । अत्र भगवत्यप्राकृतत्वस्वसम्बन्धित्वयोर्विरोधाभावान्न सन्देह इति परः सिद्धान्त**स्तथा**, उच्यत इत्यर्थः । गर्गवाक्यानि परे सिद्धान्ते । **तथा**, हेतव इत्यर्थः । **तज्ज्ञानमिति** । भगवत्स्वरूपज्ञानं फलमित्यर्थः ।। ० ।। **एवंविधानीत्यस्य** विवरणे, **हेत्वभावे नैवेतत्कार्यमिति** । अतिप्राकृतबुद्धितुल्यत्वज्ञापनायैवमुक्तमिति ज्ञेयम् । तेन भगवन्माहात्म्यं सूचितं भवति । यद्वा, हेतुत्वेन प्रतीयमानो यः प्रभुस्तदन्योन्याभाववता तदतिरिक्तेनेत्यर्थः ।। १ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

त्रयोविंशाध्यायार्थोक्तौ **अज्ञानमिति** एतस्यार्थष्टिप्पण्यां स्फुटः, **समत्वायेत्य**स्यापि, **विरोधात्** प्राकृतत्वेनेति स्वेषु **प्राकृतत्वेन** प्राकृतैरस्माभिरेतस्य श्रीकृष्णस्य कथं सम्बन्धः स्यात्, गोपैर्भगवता सह दैहिकः **सम्बन्धस्त्यज्यते पुरा** पूर्वपक्षे इत्यर्थः,

एतावता श्रीनन्दं प्रति गोपकृतप्रश्नस्याशय उक्तः, सोयं पूर्वपक्षरूपः, श्रीनन्ददत्तोत्तराशयमाहुः **जातस्तादृश एवात्रेति**, अस्यार्थष्टिप्पण्यां स्फुटः, अप्राकृतोपि वस्तुस्वभावात् मत्पुत्र इति अप्राकृतत्वं मत्पुत्रत्वं द्वयमपि वास्तवमिति श्रीनन्ददत्तोत्तराशयः, सोयं सर्वोपनिषदां सिद्धान्तः ॥ ० ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

त्रयोविंशाध्याये अज्ञानमित्यादि २२६¾–२२९¾ । **निरुदधानामज्ञानादि** कृष्णगं कृष्णविषयकं **निवार्यते** इत्यर्थः, प्रयोजनमाहुः **समत्वायेति**, गोवर्धनोद्धरणेन कृतो यो निरोधः स तु सर्वेषां समान इति समत्वज्ञापनायेत्यर्थः, **पूर्वपक्षश्चे**त्यादि "ततो नो जायते शङ्का व्रजनाथ तवात्मजे" इत्यन्तेन ग्रन्थेन पूर्वपक्षः, "श्रूयतां मे वचो गोपा" इत्यादिना **सिद्धान्तः**, "मुदिता नन्दमानर्चुः कृष्णं विगतविस्मया" इत्याश्चर्याभावः **फलं, इह** भगवत्यप्राकृतत्वं पुत्रत्वरूपः **सम्बन्धश्चे**तिद्वयं **स्थाप्यं, प्राकृतत्वेनेति** अस्मासु गोपेषु **प्राकृतत्वेन** भगवत्सम्बन्धो विरुद्ध इति हेतोः **सम्बन्धस्त्यज्यते** न मन्यते इति पुरा पूर्वपक्ष इत्यर्थः, सिद्धान्तमाहुः **जातस्तादृश एवेति, तादृश एव** अप्राकृत एव प्रकट इतिहेतोर्न **सन्देह** इति **परः** सिद्धान्तस्त**थोच्यते** इत्यर्थः, तथा च गोपानां प्राकृतत्वेनाप्राकृतेन भगवता सह सम्बन्धः कथं सम्भवतीति संशये भगवत्यप्राकृतत्वसम्बन्धित्वयोर्विरोधाभावान्न सन्देह इति सम्बन्धः सिद्धः, एतदुपपादयन्ति **माहात्म्यदर्शनं** हेतुरित्यादिना, **परे** सिद्धान्ते **गर्गवाक्यानि** हेतव इत्यर्थः, **तज्ज्ञानमिति** भगवत्स्वरूपज्ञानं फलमित्यर्थः ॥ ० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

शड्विंशे विस्मिता जाता गोपा कृष्णस्य कर्मभिः ॥ नन्देन तत्प्रबोधाय गर्गगीत निरूप्यते ॥ १ ॥

एवंविधानि गोवर्धनोद्धरणसदृशान्यतिमानुषाणि कृष्णस्य कर्माणि ते गोपा वीक्ष्य अनुस्मृत्य सुविस्मिताः आश्चर्ययुक्ताः सन्तो नन्दं समभ्येत्य समभिगम्य प्रोचुः । ननु 'ईश्वरलीलायाः किमाश्चर्यम् ? इत्याशङ्क्याह–अतद्वीर्यविद इति । तस्य वीर्यमैश्वरं प्रभावमजानन्त इत्यर्थः ॥ १ ॥ तदुक्तमेवाह–बालकस्येति 'वै' अवधारणे । यत् यस्मात् बालकस्य सत एतानि कर्माणि अत्यद्भुतान्येव तस्मात् असौ आत्मनः स्वस्य जुगुप्सितमयोग्यं ग्राम्येषु गोपेष्वस्मासु जन्म कथमर्हतीत्यन्वयः ॥ २ ॥ अद्भुतानि कर्माण्येव दर्शयन्ति–यः इति द्वादशभिः । यः सप्तहायनः सप्तवर्षमात्रवयाः बालः सर्वथा असमर्थः स कथमेकेन करेण लीलया अनायासेन गिरिवरमबिभ्रदित्यन्वयः । अडभाव आर्षः, 'बिभ्रत्स्थित' इति शेषो वा । अनायासेन धारणे दृष्टान्तमाह–पुष्करं कमलं गजराडिवेति ॥ ३ ॥ आसमन्तात् मीलिताक्षेण तोकेन अतिबालेन महौजसो महाबलायाः पूतनायाः प्राणैः सह स्तनः कथं पीतः ? । अज्ञाततया बलात् पाने दृष्टान्तमाह—कालेनेति । तनोः शरीरस्य वयो यौवनमायुर्वा यथा कालेन पीयते, तथेत्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

षड्विंशेऽबोधयद्गोपान् कृष्णाचरितविस्मितान् । नन्दो गर्गोक्तिभिस्तत्र श्लोकाः सार्द्धेषुबाहवः (२५॥) ॥
द्वे (२) उवाचेति पादोनाः सप्तहस्ता अनुष्टुभः (२६॥।) ॥ २६ ॥

एवमिति ॥ एवंविधानि गोवर्द्धनोद्धरणादीन्यतिमानुषाणि कृष्णस्य कर्माणि ते गोपा वीक्ष्य अनुस्मृत्य सुविस्मिताः आश्चर्ययुक्ताः अतद्वीर्यविदः तस्य वीर्यं प्रभावमजानन्तः नन्दं समभ्येत्य समधिगम्य प्रोचुः ॥ १ ॥ बालकस्येति ॥ वै अवधारणे । यत् यस्मात् बालकस्य सत एतानि कर्माणि अत्यद्भुतान्येव तस्मात् असौ आत्मनः स्वस्य जुगुप्सितमयोग्यं ग्राम्येषु गोपेष्वस्मासु जन्म कथमर्हति । असाविति विप्रकृष्टार्थकादाशब्दप्रयोगात्तदा कृष्णो वनं गतो ज्ञेयः । प्रशंसानां परोक्षे औचित्यात् ॥२॥ य इति ॥ यः सप्तहायनः सप्तवर्षमात्रवयाः बालः सर्वथा असमर्थः स कथमेकेन करेण लीलया अनायासेन पुष्करं कमलं बिभ्रत् गजराडिव गिरिवरं बिभ्रत् स्थितः ॥ ३ ॥ तोकेनेति ॥ तनोः शरीरस्य वयो यौवनमायुर्वा यथा कालेन पीयते तथा आसमन्तात् मीलिताक्षेण तोकेनातिबलेन महौजसो महाबलायाः पूतनायाः प्राणैः सह स्तनः पीतः । अत्र स्तनः कथं पीत इत्यादि सर्वत्र कथंशब्दं स्वामिचरणाद्याः अन्वषञ्जयन् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं षडविंशेऽध्याये गोपकृतं श्रीकृष्णचरित्रवर्णनमाह तस्य श्रीकृष्णस्य वीर्याणि पराक्रमान् विदंति तथाभूता न भवंत्यतद्वीर्यविदः ते गोपाः समभ्येत्य नंदं प्राप्य ॥ १ ॥ यद्यस्मात् एतानि अद्भुतानि संति । अतः सोऽसौ ग्राम्येषु अस्मासु वीहीनेषु आत्मनः जुगुप्सितं निंदितं गोपजन्मकथमर्हति योग्यमस्ति ॥ २ ॥ तानि वीर्याण्येवाह द्वादशभिः सप्तहायनानि वयो वर्षाणि यस्य पुष्करं कमलं ॥ ३ ॥ महौजसो महासामर्थ्यवत्याः यथा तनोर्देहस्य वयो बालाद्यवस्था कालेन पीयते तथास्तनः पीतः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अद्भुतैः कर्मभिर्गोपान् षड्विंशे विस्मितान् हरेः । नन्द आश्राव्य गर्गोक्तिं वर्णयामास तस्य तत् ।। १ ।।

अथामानुषगोवर्द्धनोद्धरणात्मकचेष्टितसंस्मारितपूतनाशकटासुरवधादिवृत्तान्तैरतिमानुषैः श्रीकृष्णममानुषं शङ्कमानैर्गोपैः संपृष्टो नन्दो गर्गगीतानुवादेन साक्षादयं नारायणो न केवलं मर्त्यं इत्युवाचेत्याह मुनिः ।। एवमिति ।। ते पूर्वेक्षितभगवदमानुषचरित्राः, गोपाः, कृष्णस्य, एवंविधानि गोवर्द्धनोद्धरणपूतनादिवधादीन्यदेवमानुषाणि, कर्माणि वीक्ष्य अनुस्मृत्येयर्थः । अतद्वीर्यविदः श्रीकृष्णस्यासाधारणजगद्व्यापारादिरूपापारमहिमानमजानन्तः केवलमेतैरेव कर्मभिस्तं विस्मयपूर्वकमाशङ्कमाना इत्यर्थः । सुविस्मिता विस्मयप्रयुक्तमुखविकासयुक्ताः सन्तः, समभ्येत्य नन्दमभिगम्य, प्रोचुः ।। १ ।। उक्तमेवाह त्रयोदशभिः ।। बालकस्येति यद्यस्मात्, एतानि बालकस्य तव सुतस्य, कर्माणि अत्यद्भुतानि अत्याश्चर्यकराणि, सन्ति वै । तस्मात् हे नन्द, असौ कृष्णः ग्राम्येषु गोपेषु, आत्मनः स्वस्य, जुगुप्सितमननुरूपं जन्म, कथ अर्हति ।। २ ।। अद्भुतान्येवास्य कर्माणि प्राहुर्द्वादशभिः ।। य इति ।। यः श्रीकृष्णः सप्तहायनः सप्तवर्षवयाः, अत एव, बालः सन्नपि, गजराट् करीन्द्रः, पुष्करं कमलं इव, लीलया एकेन करेण एव, गिरिवरं पर्वतश्रेष्ठं गोवर्द्धनाचलं कथं बिभ्रत् धारयन् सन्नवस्थितः । बालः सप्तहायन इति च, विशेषणद्वयं धारणायोग्यत्वसूचकम् । धार्यत्वानर्हत्वसूचनाय गिरिवरमित्युक्तम् । साधनत्वायोग्यत्वसूचनाय करेणैकेनेत्युक्तम् । एवमुत्तरत्रापि द्रष्टव्यम् ।। ३ ।। तोकेनेति ।। किं च महौजसो महाबलायाः पूतनायाः, स्तनः प्राणैः सह, तोकेन शिशुना, तत्रापि मीलिताक्षेण नेत्रोन्मीलनेऽप्यसमर्थवयस्केन कृष्णेन यथा, तनोः शरीरस्य, वयो यौवनं, कालेन पीयते तद्वत्, कथं पीतः ।। ४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

श्रीगोविन्दपदाम्बुजातशरणीभावोपलब्धं फलं विज्ञायैवमशेषसंकटभवप्रारब्धदुःखापहम् ।
त्यक्त्वा साधनमन्यदच्युतपदप्राप्त्यै सदैवाऽच्युतः श्रेयःकांक्षिभिरादरात् कलिजनैर्गेयस्त्वितीहोच्यते ।। १ ।।

गिर्युत्तमस्थितिमिहाधिगतेन पुंसा निर्भीतिगोकुलनिवासमवाप्य कामम् ।
गेयान्यनन्तचरितान्यवतारभाजो बोध्यं हि तेन परतत्त्वमिति स्फुटार्थम् ।। २ ।।

एवंविधानीति : १०.२६.१.

वृद्धानामपि दुर्धरेन्द्रियसमुद्धारप्रकारः सतां सोऽस्मिन्कौतुकशालिनैव विहितो बालेन पालेन चेत् ।
तत्स्यात्कस्य न विस्मयाय परमाल्हादाय वा संशयोत्पत्त्यै चेत्युचितं त्रयं तदभवद् गोवर्धनोद्धारिणि ।। ३ ।।

तोकेनेति : १०.२६.४.

नीता नाशमनेन सा बत बकी तद्वद् बकोऽघस्तृणो दुष्टाहिश्च पदप्रहारविगलद्गर्वः सलीलं कृतः ।
यत्पीतोऽग्निरपीति सर्वमपरोक्षं पश्यतां नः पुनः शंकोदेति यदद्रिधारणकृतौ तत्का परा मूर्खता ।। ४ ।।

यत्केनापि कदापि नैव चरितं तत्ते चरित्रं प्रभो पश्यन्तोऽपि दिवानिशि व्रजजनाः सन्तोऽप्यसच्छङ्किनः ।
पप्रच्छुद्रमुहुरप्यहो व्रजपतिं का नः कथा तत्र तन्मायावैभवमेव तादृशमिति स्पष्टं चरित्रैस्तव ।। ५ ।।

नानाविधानि भगवांश्चरितानि भूयोभूयः करोति विशदानुभवास्पदानि ।
मोहः पुनस्त्वनुभवे चरिते च शङ्का तत्राप्युदेति तदिदं कलिकेलिलास्यम् ।। ६ ।।

कृष्णप्रिया

इस अध्याय में २५ श्लोक हैं । तीन बातें इस अध्याय में बताई गई । सन्देह सिद्धान्त और समान इन तीन बातों का समावेश स्पष्ट रूप से किया गया है । श्रीगोवर्धन पर्वत को उठाना और सात दिन पर्यन्त धारण करना एक विशिष्ट कार्य छोटे बालक के लिए संभवित नहीं, यह पूर्वपक्ष माने अथवा गोपजनों का संदेह माने । श्रीगर्गाचार्य महर्षिजी के वाक्यों का सुनाना यह समाधान था, और श्रीकृष्ण का माहात्म्य एवं स्वरूप ज्ञान के बाद भगवान का समर्चन यह फल है । २५ श्लोकों में ये तीन विषय निरूपित किए गए । **श्रीशुकाचार्य महाराज ने कहा**–राजन् परीक्षित् ! व्रजवासी गोपजन पूर्णपुरुषोत्तम भगवान् श्रीकृष्ण के वीर्य और माहात्म्य को नहीं जानते थे, इससे श्रीकृष्ण भगवान के पूतना मोक्ष से लेकर श्रीगिरिवर धारण पर्यन्त अनेक लोकोत्तर चरितों को देखकर अत्यंत विस्मित हो गए । मनः समाधान की भावना से एक दिन सारे गोपजन इकट्ठे होकर श्रीनन्दराय जी के समीप गये और विनय करने लगे ।। १ ।। गोपगण कहने लगे बाबा नन्द बाबा ! आप के बालक श्रीनन्दलालजी के समस्त चरित्र अतिशय अद्भुत है । हम अबुध ग्रामीण गोपजनों के घर में ऐसे समर्थ का जन्म कैसे हो सकता है । अपने घर जन्म लेना तो इनके लिये तो बड़ो निन्दा की बात है ।। २ ।। नन्दबाबा ! सुनो ! जैसे गजराज जलाशय

में से कमल को उखाड़ कर खेलते खेलते उपर उडा लेती है उसी प्रकार यह सप्त वर्षीय नन्हे बालक ने आसानी से वाम करकमल से गिरिवर को उठाकर सात रात्रो दिवस पर्यन्त अविचल एक पैर से कैसे खड़ा रहा ! ॥ ३ ॥ महाराज ! जैसे काल शरीर की आयु को निगल जाता है, वैसे ही इस नन्हें से बालक ने बचपन में नयन बंदकर भयानक राक्षसी पूतना का स्तन तो पिया ही लेकिन अनेक बालकों के प्राणों के साथ इनका प्राण भी पी डाले ॥ ४ ॥

हिन्वतोऽधः शयानस्य मास्यस्य चरणावुदक् । अनोऽपतद् विपर्यस्तं रुदतः प्रपदाहतम् ॥ ५ ॥
एकहायन आसीनो ह्रियमाणो विहायसा । दैत्येन यस्तृणावर्तमहन् कण्ठग्रहातुरम् ॥ ६ ॥
क्वचिद्धैयङ्गवस्तैन्ये मात्रा बद्ध उलूखले । गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ॥ ७ ॥
वने सञ्चारयन् वत्सान् सरामो बालकैर्वृतः । हन्तुकामं बकं दोर्भ्यां मुखतोऽरिमपाटयत् ॥ ८ ॥
वत्सेषु वत्सरूपेण प्रविशन्तं जिघांसया । हत्वा न्यपातयत्तेन कपित्थानि च लीलया ॥ ९ ॥
हत्वा रासभदैतेयं तद्बन्धूंश्च बलान्वितः । चक्रे तालवनं क्षेमं परिपक्वफलान्वितम्[1] ॥१०॥
प्रलम्बं घातयित्वोग्रं बलेन बलशालिना । अमोचयद् व्रजपशून् गोपांश्चारण्यवह्नितः ॥११॥
[2]आशीविषतमाहीन्द्रं दमित्वा विमद ह्रदात् । प्रसह्योद्वास्य यमुनां चक्रेऽसौ निर्विषोदकाम् ॥१२॥

कर्दमक्षमा

अन्वयः अधः शयानस्य मास्यस्य रुदतः चरणौ उदक् हिन्वतः प्रपदाहतम् अनः विपर्यस्तम् अपतत् ॥ ५ ॥ दैत्येन विहायसा ह्रियमाणः एकहायन आसीनः यः कण्ठग्रहातुरम् तृणावर्त्तम् अहन् ॥ ६ ॥ क्वचित् हैयंगवस्तैन्ये मात्रा उलूखले बद्धः अर्जुनयोः मध्ये गच्छन् तौ बाहुभ्यां अपातयत् ॥ ७ ॥ बालकैः वृतः सरामः वने वत्सान् सञ्चारयन् हन्तुकामम् बकम् अरिम् दोर्भ्याम् मुखतः अपाटयत् ॥ ८ ॥ वत्सेषु वत्सरूपेण जिघांसया प्रविशन्तं हत्वा, तेन च लीलया कपित्थानि न्यपातयत् ॥ ९ ॥ रासभदैतेयम् च तद्बन्धून् बलान्वितः हत्वा परिपक्वफलान्वितम् तालवनम् क्षेमम् चक्रे ॥ १० ॥ बलशालिना बलेन उग्रम् प्रलम्बम् घातयित्वा व्रजपशून् च गोपान् अरण्यवह्निना अमोचयत् ॥ ११ ॥ आशीविषम् तम् आहीन्द्रम् दमित्वा विमदम् तम् प्रसह्य उद्वास्य असौ यमुनाम् निर्विषोदकाम् चक्रे ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनसोऽधः शयानस्य मास्यस्य मासास्त्रयः परिच्छेदका यस्य उदगूर्ध्वं चरणौ हिन्वतश्चालयतः प्रपदेन पादाग्रेण हतं विपर्यस्तमनः कथमपतत् ॥५॥ यः कृष्णो दैत्येन ह्रियमाणः संस्तं तृणावर्तं कथमहन्नित्यर्थः ॥६॥ हैयंगवस्तैन्ये नवनीतचौर्ये । बाहुभ्यां गच्छन् रिंगन्नित्यर्थः ॥ ७ ॥ मुखतो हंतुं कामो यस्य तं बकवेषमरिं बाहुभ्यां मुखतः कथमपाटयत् ॥ ८–११ ॥ आशीविषतमोऽतिक्रूरविषश्चासावहींद्रश्च तम् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अनसः शकटस्य । परिच्छेदकाः वयोज्ञापकाः "परिमाणे परिच्छेदः सर्वतश्छेदकेऽल्पके" इति नैरुक्तः । हिनोतेः शतृप्रत्यये हिन्वत इति ॥ ५ ॥ एकहायनो वर्षैकायुः । दैत्येन तृणावर्त्तेन । इत्यर्थ इति । न हि बालकर्तृककंठग्रहणेन महावपुषो हननं संभवतीत्यर्थः ॥६॥ इत्यर्थ इति । बाहुभ्यां केवलाभ्यां नटवन्न किं तु बालवत्स्खलन्निति भावः ॥७॥ मुखतः मुखभागतः । अपाटयत् व्यदारयत् ॥ ८ ॥ तेन दैत्येन ॥ ९ ॥ तद्बंधून् धेनुकज्ञातीन् । क्षेमं निरुपद्रवम् ॥ १० ॥ उग्रम् भयंकरम् ॥ ११ ॥ दमित्वा निगृह्य । उद्वास्य निष्कास्य । असौ कृष्णः । प्रसह्य हठात् । अश्नुते व्याप्नुतेऽतिवेगेन सर्वांगमित्याशि । अशेरिन् । तादृशं विषं यस्य स तथा । बाहुलकात्पूर्वपदस्य दीर्घः । ततस्तमप् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रपदेन आ ईषत् हतं प्रहृतं रुदत इति पूर्ववत् बाल्यातिशयः सूच्यते तेन चात्यद्भुतत्वहेतुतया शक्तिविशेष एव बोध्यते एवमग्रेऽपि अन्यत्तैः तत्र मास्यस्येति मासमात्रं व्याप्यजातबाल्यस्येत्यर्थः । कालादित्यधिकारे "तमधीष्टो भृतोभूतो भावी" (५।१।८०) वेत्यधिकृत्य "मासाद्वयसि यत् खञौ" (५।१।८१) इत्यनेन यद्विधानात् तत्र द्वितीयसूत्रे तं भृत इति तावन्तं कालं व्याप्य लब्धसत्ताक इत्यर्थे सतीति व्याख्यानात् तृतीयसूत्रे वयसीति विशेषोपादानाच्च किन्तु मासश्च मासश्च मासश्च मासा इति त्रयाणामेवैकशेषत्वकरणात् "त्रैमासिकस्य च पदा शकटोपवृत्तः" इति द्वितीयस्कन्धस्य च सम्वादः कर्त्तव्यः ॥ ५ ॥ आसीन इति अत्यन्त-

---

[1]. फलोचितम्–विज. । [2]. आशीविषं महारौद्रं–विज. ।

बाल्यमेवाभिप्रेतं सम्यक् चलितुमपि पदा न शक्नोतीत्यभिप्रायात् कण्ठग्रहणमात्रेणैव आतुरं विह्वलम् ॥ ६ ॥ क्वचित् कदाचित् अस्याऽग्रेपि सर्वत्रैवानुवृत्तिः बाहुभ्यां तदग्रभागाभ्यां कराभ्यामित्यर्थः। उलूखलकर्षणाय तयोरेवाधिक्येन प्रणोदनात् ॥ ७ ॥ सरामो बालकैर्वृत इति रामे बालकेषु च तत्रैव सत्सु स एवापाटयदिति सर्वेभ्यः शक्तिविशेषो ध्वनितः मुखतो मुखमारभ्य अरिमिति न तामसयोनित्वात् यदृच्छया हन्तुकाममपि तु अरिं भगिनीवधजातशत्रुभावादाग्रहेणापीत्यर्थः। पूर्वोक्ततत्तद्वधव्युत्क्रमरतथाद्य व्योमवधातिक्रमश्च परमविस्मयेनाक्रान्तचित्तत्वात् एवमग्रेऽपि ॥ ८ ॥ जिघांसया सरामस्य तस्य लीलया हत्वा पश्चात् पादद्वयग्रहणेन भ्रमणात् कपित्थानि चेति महावृक्षाग्रविक्षेपद्योतनेन शक्तिविशेषः सूचितः ॥ ९ ॥ बलान्वित इति धेनुकवधेपि तस्यैव प्राधान्यविवक्षया नूनमेतत्प्रभावेणैव बलस्यापि बलोदयादेतस्यैककर्तृत्वमिति भावः। क्षेमं निर्भयं सर्वोपभोग्यमित्यर्थः ॥ १० ॥ बलेन घातयित्वेति तत्रापि तस्य मुख्यत्वं सूचितं कुतो बलेनैवाऽघातयत् न त्वन्येन तत्राहुः—बलेति। तत्प्रभावलब्धबलविशेषवता अतस्तस्मिन् विद्यमानेऽन्येन घातना न योग्येति भावः ॥ ११ ॥ विमदं यथा स्यात् तथा दमयित्वा यद्वा विमदं सन्तं ह्रदादुद्वास्य ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रपदेन आ ईषत् हतं प्रहृतम्, रुदत् इति पूर्व्ववत् बाल्यातिशयकौतुकविशेषो वा सूच्यते, तेन चात्यद्भुतत्वहेतुतया-शक्तिबिशेष एव बोध्यते, यद्वा, यथावृत्तं तत्तत्कर्म्मप्रकारमात्रकथनमेतत्; एवमग्रेऽपि ॥ ५ ॥ आसीन इति—अत्यन्तबाल्यमेवाभिप्रतम्, कण्ठे ग्रहणमात्रेणैवातुरं विह्वलम्, अनेनापि शक्तिविशेष एव सूचितः ॥ ६ ॥ क्वचित् कदाचित्, अस्याग्रेऽपि सर्व्वत्रैवानुवृत्तिः। बाहुभ्यां तदग्रभागाभ्यां कराभ्यामित्यर्थः, जानुभ्यां सपाणिभ्यां गमनस्यैव रिंगणत्वात्, यद्वा, रिंगणेऽपि बाहुभ्यां गमनेन बलाभावादत्यन्तबाल्यमेवाभिप्रेतम् ॥ ७ ॥ सरामो बालकैर्वृत इति रामे बालकेषु च तत्रैव सत्स्विति स एवापाटयदिति सर्व्वेभ्यस्तेभ्यः शक्तिविशेषो ध्वनितः। मुखतश्चञ्च्वोर्ग्रहणेन मुखद्वारा व्यदारयदित्यर्थः। अरिमात्मनः सर्व्वेषाञ्च देवादीनाम् यद्वा, अरिञ्च सर्ववयस्यादीनां ग्रसनेन परमद्वेष्टारमघासुरमप्यपाटयत् (भा० १०।१२।३१) 'मूर्द्धन् विनिर्भिद्य' इति पूर्वमुक्तेः, मुखत इत्यस्यात्रैव वान्वयः, मुखद्वारा ग्रसनेन योऽरिस्तम्, किंवा तद्द्वारा प्रविश्यैव तत एव भेदनात्। पूर्व्वोक्त-तत्तद्वधक्रमातिक्रमः परमविस्मयेनाक्रान्तचित्तत्वात्। एवमग्रेऽपि ॥ ८ ॥ जिघांसया सरामस्य तस्य लीलया हत्वा पश्चात् पादद्वयग्रहणेन भ्रमणात्; अप्यर्थे चकारः, कपित्थफलान्यपि, इत्येकेन कर्मणा प्रयोजनद्वयमुक्तम् अनेनापि शक्तिविशेष एव सूचितः एवमन्यत्राग्रेऽप्युह्यम् ॥ ९ ॥ बलान्वित इति धेनुकवधेऽपि तस्यैव प्राधान्यविपक्षया क्षेमं निर्भयं सर्व्वोपभोग्यमित्यर्थः ॥ १० ॥ बलेन घातयित्वेति प्रलम्बस्य गोपरूपिणः संख्यानुमोदनादिना वधे तस्यैव प्रयोजकत्वात्, कुतो बलेनैवाघातयत्, न त्वन्येन ? तत्राहुः बलेनेति बलं प्रदर्शयितुमित्यर्थः ॥ ११ ॥ विमदं यथा स्यात्तथा दमित्वा, यद्वा, विमदं सन्तं ह्रदादुद्वास्य ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हिन्वत इति। शकटस्याधश्शयानस्य बालस्य मास्यस्येति पाठे मासाख्यः परिच्छेदका यस्य तस्य उदगूर्ध्वं चरणौ हिन्वतः चालयतः रुदतश्च प्रपदा पादाग्रेण हतमनः शकटं विपर्यस्तं सत्कथमपतत् सर्वत्र कथं शब्दोऽनुवर्तते ॥ ५ ॥ एकहायन इति। यः कृष्ण एकाब्दवयस्को भुवि निषण्णः दैत्येन तृणावर्त्तेनाकाशमार्गेण नीयमानः तं कण्ठग्रहणेनातुरं पीडितं तृणावर्तं कथमहन् हतवान् ॥ ६ ॥ क्वचिदिति। कदाचिन्नवनीतचौर्ये सति क्रुद्धया मात्रा यशोदया उलूखले बद्धो बाहुभ्यामर्जुनयोर्मध्ये गच्छन् रिङ्गन् तावदर्जुनौ कथमपातयत् ॥ ७ ॥ वन इति। रामेण सहितो बालकैश्च वृतो वत्सान् वने सम्यक् चारयन् जिघांसुं बकासुरमरिं मुखे भुजाभ्यां कथमपाटयद्विदारितवान् ॥ ८ ॥ वत्सेष्विति। हन्तुमिच्छया वत्सरूपेण वत्सेपु प्रविष्टं वत्सासुरं हत्वा लीलया न्यपातयत् तेन पातितेन दैत्यदेहेन कपित्थानि च न्यपातयत् ॥ ९ ॥ हत्वेति। बलदेवेन सहितो रासभासुरं तद्बन्धूंश्च हत्वा परिपक्वैः फलैरन्वितं तालवनं क्षेमं चक्रे सर्वैः प्रवेष्टुं क्षेमं चक्रं इत्यर्थः ॥ १० ॥ प्रलम्बमिति। बलशालिनाबलदेवेन उग्रं प्रलम्बमसुरं घातयित्वा स्वयं व्रजपशून् गोपांश्च दवाग्नेरमोचयत् ॥ ११ ॥ आशीविषेत्यादि। आशीविषतम अतिक्रूरविषः स चासावहीन्द्रश्च तं बलाद्धमित्वा विगतमदं ह्रदादुद्वास्य निष्कास्य यमुनां निर्विषोदकां चक्रे ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

चरणावुदक् ऊर्ध्वं हिन्वतः उत्क्षिपतः मास्यस्य मासमात्रवयस्कस्य प्रपदेन पादाग्रेण हतं पीडितम् ॥ ५ ॥ एक एव हायनो वर्षं वत्सरो यस्य स तथा तृणावर्त्तमहन्निति यत्कर्म तदपि ॥ ६ ॥ हैयङ्गवं हैयङ्गवीनं सद्यो दधिमन्थने जातं नवनीतं तस्य स्तैन्ये चौर्ये सति बाहुभ्यां गच्छन्निति सम्बन्धः ॥ ७ ॥ मुखतः मुखे ग्रहीत्वेति शेषः। अपाटयत् व्यदारयत् ॥ ८ ॥ तेन दैत्येन कपित्थानि कपित्थबीजानि फले लुक् ॥ ९ ॥ क्षेमं प्राप्तरक्षम् ॥ १०–११ ॥ दमित्वा निगृह्य उद्वास्य उच्चाटयित्वा ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

बाहुभ्यां गच्छन्निति उलूखलाकर्षणाय अरिं शत्रुत्वेनास दाग्रहपरमपि ॥ ७–१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अनसोऽधः शयानस्य मास्यस्य मासत्रयवयसः मासाद्वयसियत खत्रविति यत् चरणौ उदक् ऊर्ध्वं हिन्वतः चालयतः यस्य प्रपदेन पादाग्रेणाहतं अनः शकटं विपर्यस्तं सत् कथम् पतत् ॥ ५ ॥ यो दैत्येन ह्रियमाणः सन् तं तृणावर्तं दैत्यं कथमहत् ।६। हैयङ्गवस्तैन्ये नवनीतचौर्ये बाहुभ्यां गच्छन् रिङ्गन्नित्यर्थः ॥ ७ ॥ दोर्भ्यां धृत्वा मुखतः मुखमारभ्य कथमपाटयत् ॥ ८–९ ॥ रासभदैतेयं धेनुकं बलान्वित इति तत्रापि कृष्णस्य प्राधान्यं विवक्षितम् ॥ १०–११ ॥ आशीविषतमोऽतिक्रूरविषश्चासावहीन्द्रश्चेति तं विमदं यथास्यात्तथा दमित्वा ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अधः अनस इति शेषः "त्रैमासिकस्य च पदा शकटोऽपवृत्तः" इति वचनान्मास्यस्य मासास्त्रयः प्रादुर्भावावधिभूताः यस्य तस्य उदगूदूर्ध्वं चरणौ हिन्वतः चालयतः प्रपदेन पादाग्रेणाहतं विपर्यस्तम् अनः अपतत् ॥ ५–६ ॥ हैयङ्गवस्य नवनीतस्य स्तैन्ये चौर्ये ॥ ७–११ ॥ आशीविषतमः अतितीव्रविषश्चासावहीन्द्रश्च तम् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मासस्य मास्येषु चतुर्षु भवो मास्यः । यथोक्तमाचार्यैः । यदाप देवश्चतुरोऽथ मासांस्तदोपनिष्क्रामणमस्य चासीदिति । अधः शयानस्योदगूर्ध्वं चरणौ हिन्यत उत्क्षिपतौ रुदतः प्रपदेन पादाग्रेण हतमनो विपर्यस्तं सदपतत् ॥ ५ ॥ एको हायनः शरद्यस्य स यो बालो दैत्येन विहायसा ह्रियमाणः कण्ठग्रहातुरं कण्ठग्रहेणैवातुरस्तं तृणावर्तमप्रह्लतवानिति यत्तदपि प्रोचुः ॥ ६ ॥ हैय्यङ्गवं नवनीतं गतं । तस्य स्तैन्ये चौर्ये मात्रोलूखले बद्धो बाहुभ्यामबाहुभ्यां पादाभ्यां च रिङ्गणसमये चतुर्णामुपयोगादिति केचित् । यत्किञ्चिदेतत् । अघृष्टजानुभिः पद्भिरिति पूर्वमुक्तेर्मात्रा बाहुभ्यामुलूखले बद्ध इत्यन्वयः । यद्वा बाहुभ्यां पदभिन्नाभ्यामङ्गुलवत्त्वेन तत्सदृशाभ्यां गच्छंस्तावर्जुनावपातयत् ॥ ७ ॥ अरिं बकमित्यन्वयः ॥ ८ ॥ वत्सेषु वत्सरूपेण प्रविशन्तं वत्सासुरं हत्वा तेन तद्दैत्यकायेनेव लीलयेव कपित्थानि तत्फलानि । फले लुक् । न्यपातयत् ॥ ९ ॥ बलान्वितो बलरामसहितो बलवांश्च परिपक्वफलोचितं तालवनं क्षेमं । क्षेममस्यास्तीत्यर्शआद्यचि । वनमवनवच्चक्रे । फले लुगिति लुक् ॥ १० ॥ बलेनान्तर्वर्तिशुक्लबालबलेन शालत इति स तथा तेन बलेन प्रलम्बं घातयित्वा व्रजपशूनमोचयन्मोचयामास । गोपांश्चारण्यवर्तिनो वनानलात् । ल्यब्लोपनिमित्तयं पञ्चमी । अरण्यवह्निमापीयामोचयत्तस्मादमोचयदिति वा ॥ ११ ॥ विमदं ह्रदात्प्रसह्योद्वास्य निष्कास्य निर्विषोदकां यमुनामसौ चकार चक्रे ॥ १२ ॥

श्रीसुबोधिनी

किञ्चाधः **शयानस्य** हिन्वतश्चरणौ चालयतो "हिम् चलन" इति, **मास्यस्य** मासत्रयपरिमितस्य सङ्ख्यानुक्तिर्वर्षाभावार्था नाद्यापि वर्षः परिच्छेदको नाप्ययनं किन्तु मासा एव परिच्छेदका अत एव **चरणावुद् ऊर्ध्वं हिन्वतः** सतः, नतु तदर्थं **हिन्वतः**, तथापि **विपर्यस्तं सदनः** शकटमपतत्, पादचालने निमित्तमाहू **रुदत** इति, अथेनाशक्तिर्दृढीकृता, तत्रापि **प्रपदेन** पादाग्रेण, **आ** ईषद्धतं सत् **विपर्यस्तं** विपरीतं सदपतत् साधनाल्पत्वं कायमहत्त्वं चोक्तम् ॥ ५ ॥ क्रमेण भगवच्चरित्रं वदन्तस्तृणावर्तवधमाहुरे**कहायन** इति, अयमेकहायन एकवार्षिक **आसीन** उपविष्टो न तु चलितुं समर्थस्तादृशोपि **दैत्येन विहायसा** नीतो निरालम्ब एवाकाशे **तमहन्** मारितवान्, तत्रापि न युद्ध किन्तु **कण्ठग्रहेणैव**, यदैव **कण्ठे** गृहीतस्तदैवातुरो जातः मातुः प्रदर्शनादिकमप्रसिद्धमिति न तद्वर्णनम् ॥ ६ ॥ ततः क्रमाज् जातं यमलार्जुनभङ्गमाहुः क्वचिदिति, **हैयङ्गवस्य स्तैन्ये** निमित्ते शिक्षार्थं मात्रोलूखले योजितस्तादृशोप्यर्जु**नयोर्मध्ये बाहुभ्यां** गच्छन् पश्चादुलूखलस्य भारत्वात् पादद्वयेन सहोलूखलस्याकर्षणमेव गमनं तु बाहुभ्यामेव, **बाहुभ्यां वापातयत् यथादृष्टवचना** हि ते तेषामेतदेवाश्चर्यमुभयोः पातनमुभाभ्यामिति ॥ ७ ॥ ततो वृन्दावने बलभद्रसहितो **वत्सांश्चारयन् बालकैर्वृतो** विशेषसामर्थ्यमप्रकाशयन्नपि **हन्तुकामं बकमरिं** शत्रुभूतं, न तु प्रासङ्गिकं, **मुखत एवापाटयत्**, एतत् सर्वजनीनं, **बालानां पलायनमप्यशक्यं**, स तु विपाटितवानेव, वत्सबकयोर्व्यत्यासेन कथनमनवधानात् क्रमाग्रहणात्, नाप्येतेषां क्रमे तात्पर्यं, बाहुभ्यां पातनं बाहुभ्यामुत्पाटनमिति बाह्वोः सामर्थ्यकथनार्थं, यमलार्जुनयोर्भङ्गकथेनानन्तरं बकनिरूपणमतः पश्चात् ॥ ॥ ८ ॥ एकहस्तसाध्यं वत्सासुरवधमाहुर्वत्सेष्विति, **वत्सरूपेण जिघांसया वत्सेषु प्रविशन्तं** तदानीमेव ज्ञात्वा मारयितुमागतः इति, प्रथमत एव तं परिभ्रामणेन **हत्वा तेन कपित्थानि न्यपातयत्**, चकारात् तमपि वृक्षशाखां वा, महाबलकार्यं तत्, तादृशमपि **लीलया** कृतवान् ॥ ९ ॥ ततो धेनुकवधमाहु**र्हत्वा रासभदैतेय**मिति, बहवो धेनुकसदृशा हता इति "प्रधानेन व्यपदेश भवन्ती"तिन्यायेन बलभद्रेण सहभावमात्रं वस्तुतो भगवतव हत इति **हत्वा रासभदैतेय**मित्युक्तं, रासभो भूत्वा दैतेयो धेनुकस्तद्बन्धवोपि रासभास्तानपि **हत्वा बलभद्र**सहितस्ता**लवनं क्षेमं चक्रे**, यो हि तत्र गच्छति स क्षेमं न प्राप्नोतीति, फलं तु स्वभावत एव प्राप्नोतीत्याह **परिपक्वफलान्वित**मिति परिपक्वैः **फलैरन्वितम्** ॥ १० ॥ एवं धेनुकवधोपि लोकानां हितार्थमेव **न**

त्वहितार्थं, मारणक्रमाद् धेनुकवधानन्तरं प्रलम्बबधो निरूप्यते, मध्ये जातं कालीयदमनमग्रे वक्ष्यन्ति, उग्रमपि **प्रलम्बं बलभद्रेण घातयित्वा बलभद्रे** घातकशक्तिं दत्वा, स्वस्य मारकत्वे प्रयोजनाभावात्, **व्रजपशून् गोपांश्चारण्यवह्नितोमोचयद्** दावानलान् मोचितवान् ।। ११ ।। वह्निसाम्याद् विषाग्निमपि निरूपयन्त्या**शीविष**मिति, **आशी** नाम विषदंष्ट्रा तत्र विषं यस्य स्वाभाविकविषादधिकविषयुक्तो हीन्द्रः सर्पश्रेष्ठस्तं प्रसिद्धं कालियमन्यैः स्मर्तुमपि भीयते तादृशं ह्रदाद् ह्रदं प्राप्य ह्रदमध्ये **दमित्वा प्रसह्य** बलाद् **ह्रदादुद्वास्य** दूरीकृत्य **यमुनां निर्विषोदकां चक्रे**, अनेन यद् गरुडस्यासाध्यं यमादीनां देवानामपि, अन्यथा गरुडः शत्रुं मारयेद् यमुनां वा यमादिः शुद्धां कुर्यात्, दमनं च सुतरामशक्यं निर्विषकरणं च ।। १२ ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

त्रयोविंशे हत्वेत्यत्र बहव इति एतद्वधस्य बलदेवकृतस्य भगवत्कृतत्वकथने एतेषामावेशाज्ञानान् न्यायान्तरमाहुः **प्रधानेनेति,** सैनिककृतं राजकृतमेवेतिभावः, तत्सदृशा बहवो अनेन मारिता इति प्राधान्ये हेतुः ।। १० ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

दमित्वा विमदं ह्रदादित्यस्य विवृतौ ह्रदं **प्राप्येति ह्रदादिति** ल्यब्लोपे पञ्चमीतिभावः ।। १२ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

शकटस्याधः शयानस्य मास्यस्य मासास्त्रयः परिच्छेदका यस्य तस्यासमर्थस्य, अत एव रुदतः उदक् ऊर्ध्वचरणौ हिन्वतः प्रक्षिपतः प्रपदा पादाग्रेण हतम्, अत एव विपर्यस्तं सत् अनः शकटं कथमपतदित्यन्वयः ।। ५ ।। य एकहायनः एकवार्षिकः, अत एव आसीनः उपविष्टः चलनेऽप्यसमर्थः, अत एव दैत्येन तृणावर्तेन विहायसा आकाशमार्गेण ह्रियमाणः स कथं तं तृणावर्तं कण्ठग्रहणेनातुरं विवशं कृत्वा अहन्नित्यन्वयः ।। ६ ।। क्वचित् कदाचित् हैयङ्गवस्तैन्ये नवनीतचौर्ये सति क्रुद्धया मात्रा उलूखले बद्धो बाहुभ्यामर्जुनयोर्मध्ये गच्छन् रिङ्गन् तावर्जुनौ कथमपातयत् ? ।। ७ ।। रामेण सहितो बालकैश्च वृतो वने वत्सान् सञ्चारयन् आत्मानं हन्तुकामम्, अत एव अरिं शत्रुं बकं बकवेषमसुरं दोर्भ्यां भुजाभ्यां मुखतो मुखं चञ्चुं गृहीत्वा कथमपाटयत् विदारितवान् ? ।। ८ ।। जिघांसया हन्तुमिच्छया वत्सरूपेण वत्सेषु प्रविशन्तं प्रविष्टं वत्सासुरं लीलया भ्रामणरूपया हत्वा तेन मृतदैत्यशरीरेण कपित्थानि न्यपातयत् ।। ९ ।। बलदेवेनान्वितः सहितः रासभदैतेयं धेनुकासुरं तद्बन्धूंश्च हत्वा परिपक्वैः फलैरन्वितं तालवनं क्षेमं निर्भयत्वेन सर्वैः प्रवेष्टुं योग्यं चक्रे ।। १० ।। उग्रमतिभयङ्करं प्रलम्बं बलेन घातयित्वा स्वयं व्रजपशून् गोपांश्च आरण्यवह्नितः अमोचयत् । अत्र यद्यपि धेनुकप्रलम्बयोर्वधो बलेनैव कृतस्तथापि सर्वत्र कृष्णप्रभावस्य दृष्टत्वात्तस्यैव मुख्यता । 'तर्हि बलेनैव कथमघातयत् ?' तत्राह–बलशालिनेति ।। ११ ।। आशीविषतमः अतिक्रूरविषश्चासावहीन्द्रश्च तं प्रसह्य बलात् दमित्वा ततो विगतमदं तं ह्रदादुद्वास्य निष्कास्य यमुनां निर्विषोदकां चक्रे ।। १२ ।।

अन्वितार्थप्रकाशिका

हिन्वत इति ।। शकटस्याधःशयानस्य मास्यस्य मासान् भूतो मास्यः त्रिमासवयस्कः । "तमधीष्ट" इत्यधिकारे "मासाद्वयसि यत्खञौ" इति यत् । त्रैमासिकस्य च पदा शकटोऽपवृत्त इति प्रागुक्तेः । तस्यासमर्थस्य अत एव रुदतः उदक् उर्ध्वं चरणौ हिन्वतः प्रक्षिपतः प्रपदेन पादाग्रेण आहतमत एव विपर्यस्तं सत् अनः शकटमपतत् । एकेति ।। यः एकहायनः एकवार्षिकः अत एव आसीनः उपविष्टः चलनेऽप्यसमर्थः अत एव दैत्येन तृणावर्तेन विहायसा आकाशमार्गेण ह्रियमाणः तृणावर्तं कण्ठग्रहणेनातुरं कृत्वा अहन् ।। ५–६ ।। क्वचिदिति ।। क्वचित् कदाचित् हैयङ्गवस्तैन्ये नवनीतचौर्ये सति क्रुद्धया मात्रा उलूखले बद्धो बाहुभ्यामर्जुनयोर्मध्ये गच्छन् रिङ्गन् तावर्जुनौ अपातयत् ।। ७ ।। वन इति ।। रामेण सहितो बालकैश्च वृतो वने वत्सान् संचारयन् आत्मानं हन्तुकाममत एवारिं शत्रुं बकं बकवेषमसुरं दोर्भ्यां भुजाभ्यां मुखतो मुखं चञ्चुं प्रगृह्यापाटयत् विदारितवान् ।।८।। वत्सेष्विति ।। जिघांसया हन्तुमिच्छया वत्सरूपेण वत्सेषु प्रविशन्तं प्रविष्टं वत्सासुरं लीलया भ्रामणरूपया हत्वा तेन मृतदैत्यशरीरेण कपित्थानि न्यपातयत् ।। ९ ।। हत्वेति ।। बलदेवद्वारा रासभदैतेयं धेनुकं हत्वा घातयित्वा । अन्तर्भावितण्यर्थो णिनिः । बलदेवेनान्वितः तस्य धेनुकासुरस्य बन्धूंश्च हत्वा परिपक्वैः फलैरन्वितं तालवनं क्षेमं निर्भयत्वेन सर्वैः प्रवेष्टुं योग्यं चक्रे ।। १० ।। प्रलम्बमिति ।। उग्रमतिभयङ्करं प्रलम्बं बलशालिना बलेन घातयित्वा स्वयं व्रजपशून् गोपांश्च आरण्यवह्नितः अमोचयत् ।। ११ ।। आशीविषेति ।। असौ आशीविषतमः अतिक्रूरविषश्चासावहीन्द्रश्च तं प्रसह्य बलात् दमित्वा ततो विगतमदं तं ह्रदादुद्वास्य निष्कास्य यमुनां निर्विषोदकां चक्रे ।। १२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शकटस्य अधःशयानस्य उदक् ऊर्ध्वं चरणौ हिन्वतः क्षिपतः त्रीन् मासान् भूतः प्राप्तो मास्यस्तस्य मास्यस्य त्रैमासिकस्येत्यर्थः । त्रैमासिकस्य च पदाशकटोऽपवृत्त इति द्वितीयस्कंधोक्तेः मासश्च मासश्च मासश्चेति कृतैकशेषान्मास शब्दात्तमधीष्ट इत्यधिकारे

मासाद्वयसि यत्खत्वाविति प्राप्त्यार्थं यत् एवंभूनय बालस्य प्रपदेन पादतलेन आहतं अनःशकटं विपर्यस्तं विपरीतं अपतत् ॥ ५ ॥ भूमौ आसीनः विहायसा आकाशमार्गेण कृत्वाकंठग्रहणेन आतुरं व्याकुलं अहन् जघान ॥ ६ ॥ हैयंगवं नवनीतं तस्यस्तैन्ये चौर्यं गच्छन् रिंगन् ॥ ७ ॥ अरिं शत्रुं मुखतो मुखे गृहीत्वा विदारयामास ॥ ८ ॥ तेन वत्सासुरेण कृत्वा ॥ ९ ॥ बलान्वित इत्यनेन रामेण धेनुकं घातयित्वात दन्वितः स्वयं तद्बंधून् हत्वा क्षेमं सुखोपभोग्यम् ॥ १० ॥ अरण्यवह्नितो दावानलात् ॥ ११ ॥ आशिषि दंष्ट्रायां अतिशयितं विषं यस्य तथाभूतश्चासौ अहींद्रश्च तं दमित्वा ततो विपदंतं प्रसह्य हठेन उद्वास्य निष्कास्य ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हिन्वत इति ॥ अधःशयानस्य शकटस्याधः पर्यङ्किकायां सुप्तस्य, रुदतः बालस्य, मास्यस्येति पाठे मासास्त्रयो मासाः परिच्छेदका यस्य तस्येत्यर्थः । 'त्रैमासिकस्य च पदा शकटोऽपवृत्त' इति द्वितीये प्रागुक्तः । उदगूर्ध्वं, चरणौ हिन्वतश्चालयतोऽस्य कृष्णस्य, प्रपदं पादाग्रं तेनाहतं, अनः शकटं, विपर्यस्तं सत्, कथं अपतत् । सर्वत्र कथं शब्दोऽनुवर्त्तनीयः ॥ ५ ॥ एकेति ॥ यः श्रीकृष्णः, एकेति ॥ यः श्रीकृष्णः, एकहायन एकाब्दवयस्कः, आसीनो भुवि निषण्णः, दैत्येन तृणावर्त्तासुरेण, विहायसाऽऽकाशमार्गेण, ह्रियमाणः नीयमानः सन्, कण्ठे ग्रहो ग्रहण तेनातुरं संपीडितं, तृणावर्त्तं, कथं अहन् हतवानित्यर्थः ॥ ६ ॥ क्वचिदिति ॥ क्वचित्कदाचित्, हैयंगवस्तैन्ये नवनीतचौर्ये सति, मात्रा क्रुद्धया जनन्या यशोदयेति यावत् । उलूखले बद्धः सन्, अर्जुनयोः ककुभतर्वोः । मध्ये गच्छन् संश्च, तावर्जुनौ, बाहुभ्यां कथं अपातयत् ॥ ७ ॥ वन इति ॥ सरामो रामेण सहितः, बालकैश्च, वृतः कृष्णः, वत्सान् वने सम्यक् चारयन् सन्, हन्तुकामं जिघांसुं, बकं बकासुरं, अरिं स्वशत्रुं, मुखतः मुखे, दोर्भ्यां बाहुभ्यां, कथ अपाटयत् विदारितवान् ॥ ८ ॥ वत्सेति ॥ जिघांसया हन्तुमिच्छया, वत्सरूपेण वत्सेषु प्रविष्ट वत्सासुरं, लीलया हत्वा व्यसुं कृत्वा तेन स्वहृतदैत्यदेहेन, कपित्थानि दन्तशठतरुफलानि चापि, न्यपातयत् ॥ ९ ॥ हत्वेति ॥ बलान्वितो बलदेवेन सहितः कृष्णः, रासभदैतेयं रासभाकृतिं धेनुकासुरं, तद्बन्धूंश्च हत्वा, परिपक्वफलान्वित परिपक्वैः फलैरन्वितं, तालवनं तृणराजारण्यं, क्षेमं चक्रे सर्वेषां प्रवेशार्हं चक्रे इत्यर्थः ॥ १० ॥ प्रलम्बमिति ॥ बलशालिना बलातिशयसंशोभमानेन, बलेन बलभद्रेण, उग्र प्रलम्बमसुरं घातयित्वा, स्वयं व्रजपशून् गापांश्च, अरण्यवह्नितो दवानलात्, अमोचयत् ॥ ११ ॥ आशीति ॥ आशीविषतमोऽतिक्रूरविषश्चासावहीन्द्रः कालियश्च तं, प्रसह्य बलात्, दमित्वा, ततः विमद विगतमदं कृत्वा; ह्रदात् उद्वास्य निष्कास्य, असौ कृष्णः, यमुनां निर्विषोदकां, चक्रे ॥ १२ ॥

कृष्णप्रिया

हे नन्दबाबा ! यह बाल मुकुन्द जब तीन ही मास के थे, तब एक छकड़े के नीचे सोते समय उसने रुदन करते करते अपने दोनों चरण उपर उछाले तब इनके सुकोमल प्रपदों के स्पर्श मात्र से भारी छकड़ा उलटकर गिर पडा ॥ ५ ॥ महाराज ! अब आगे सुनिए–यह बालक जब पूरे एव वर्ष का था और माता की गोद से नीचे बैठा था तब तृणावर्त दैत्य बवंडर के स्वरूप में इसको उठाकर नभोदरों में ले उड़ा । परंतु महाराज ! मार्ग में ही इस बाल मुकुन्दने अपने दोनों हाथों से तृणावर्त का गला घोट डाला तब व्यथित होकर वह दैत्य मर गया ॥ ६ ॥ हे नन्दबाबा ! नये वर्ष के नये प्रथम दिन जब अम्मा यशोदा जी ने माखन चुराने के अपराध के बहाने बाल लालन को ओखली से बांध लिया, तब घुटनों के बल बकैयाँ खीचते खीचते बड़े बड़े यमलार्जुन तरुओं के बींच से जाकर उन्हें गिरा दिया ॥ ७ ॥ हे महाराज ! यह श्रीनन्दनन्दन, बलदाउ भैया और ग्वाल बालों के साथ जब वनमें बछड़े चरा रहे थे तब श्रीकृष्ण को मारने को इच्छा से कोई एक दैत्य बक के स्वरूप में आया और कृष्णको निगलने लगा । उस अवसर उसके गले से बहार निकल कर उनके दोनों डोर दो चोचको दोनों हस्तों से पकड़ कर तिनके की भाति चीर डाला ॥ ८ ॥ हे नन्दराय ! एक दिन एक दैत्य श्रीनन्द लाल को मारनी की इच्छा से 'बछड़े' का रूप लेकर बछडो के भीतर घुस गया था, तब श्रीकृष्णने वत्सासुर को जान लिया । पुनः श्रीकृष्ण खेलते ही खेलते उस के समीप पहुँच गए और उसके पिछले पांव पकड कर उठाकर घुमाकर कैत्थों वृक्षों पर फेंक दिया, उसी क्षण वह वत्सासुर मर गया और कैथ के अनेक फल पृथ्वी पर गिर पडे ॥ ९ ॥ एक दिन वन में गधे का रूप को धारण कर आये हुए धेनुकासुर दैत्य और उसके जाति बन्धुओं को श्री बलभद्रजी के माध्यम से मारकर, परिपक्व फलों से परिपूर्ण तालपेडों को गिराकर नित्यके लिये तालवन को सर्वोपयोगी एव मङ्गलमय बनाया ॥ १० ॥ महाराज ! प्रलम्बासुर बलशाली दैत्य था श्रीकृष्ण ने बलवीर बलभद्रजी के द्वारा क्रूर प्रबम्बासुरका वध करवा कर उस वन में प्रज्वलित आग से ब्रज के पशुओं, गौओं और ग्वालबालकों को बचा लिया ॥ ११ ॥ उस बालक कृष्णने अतिशय उग्र विषवाले कालीय नाग का दमन कर, मदमुक्त बनाकर अपने अधीन बनाया और उस कालिय को बलपूर्वक कालीय दह से निकाल दिया । पुनः श्रीकृष्ण ने श्रीयमुनाजी के जल को निर्विष बनाकर सर्व के पीने योग्य बनाया ॥ १२ ॥

दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसाम् । नन्द ते [1]तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम् ॥ १३ ॥
क्व सप्तहायनो बालः क्व महाद्रिविधारणम् । ततो नो जायते शङ्का व्रजनाथ तवात्मजे ॥ १४ ॥

नन्द उवाच

श्रूयतां मे वचो गोपा व्येतु शङ्का च वोऽर्भके । एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह ॥ १५ ॥
वर्णास्त्रयः किलास्यासन् गृह्णतोऽनुयुगं तनूः । शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १६ ॥
प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः । वासुदेव इति श्रीमानभिज्ञाः सम्प्रचक्षते ॥ १७ ॥
बहूनि सन्ति नामानि रूपाणि च सुतस्य ते । गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १८ ॥
एषः वः श्रेय आधास्यद् गोपगोकुलनन्दनः । अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ ॥ १९ ॥
पुरानेन व्रजपते साधवो दस्युपीडिताः । अराजके रक्ष्यमाणा जिग्युर्दस्यून् समेधिताः ॥ २० ॥

कर्दमक्षमा

अन्वयः—हे नन्द ! सर्वेषाम् नः व्रजौकसाम् ते तनये दुस्त्यजः अनुरागः कथम् तस्य अपि अस्मासु औत्पत्तिकः अनुरागः कथम् ॥ १३ ॥ सप्तहायनः बालः क्व ? च महाद्रिविधारणम् क्व ? हे व्रजनाथ ! ततः नः तव आत्मजे शङ्का जायते ॥१४॥ हे गोपाः ! एनम् कुमारम् उद्दिश्य गर्गः मे यद् उवाच ह तत् वचः श्रूयताम् तेन मे अर्भके शङ्कावचः व्येतु ॥ १५ ॥ अनुयुगम् तनूः गृह्णतः अस्य किल शुक्लः रक्तः तथा पीतः इति त्रयः वर्णाः आसन् इदानीम् कृष्णताम् गतः ॥ १६ ॥ तव अयम् आत्मजः प्राक् वसुदेवस्य क्वचित् जातः, इति अभिज्ञाः श्रीमान् वासुदेवः इति अभिज्ञाः सम्प्रचक्षते ॥ १७ ॥ गुण कर्म अनुरूपाणि ते नामानि च रूपाणि बहूनि सन्ति अहम् तानि वेद नो जनाः ॥ १८ ॥ गोपगोकुलनन्दनः ! एष वः आधास्यत् अनेन यूयम् सर्वदुर्गाणि अञ्जः तरिष्यथ ॥ १९ ॥ हे व्रजपते ! पुरा अराजके अरक्ष्यमाणाः प्रजाः च दस्युपीडिताः साधवः अनेन समेधिताः दस्यून् जिग्युः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

औत्पत्तिकः स्वाभाविकः । कथमिति । किं सर्वेषामात्माऽयं स्यादिति शंका ॥ १३ ॥ उक्तमप्यतिविस्मयेनाभिनयेन वदंति । क्व सप्तहायन इति ॥ १४ ॥ प्राक्छ्रुतमेव गर्गाचार्यवाक्यं तच्चरितपरिशीलनेन निवृत्तासंभावनस्य नंदस्य कृष्णतत्त्वावबोधकं जातं स इदानीं तेनैव वाक्येन गोपानुपदिशति । श्रूयतामिति ॥ १५–२१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अनुरागः हृदयंगमः स्नेहः । अस्मिन् तवात्मजे । तस्य तव तनयस्यापि । किमिति वितर्के । आत्मवत्प्रियत्वादात्मायं सर्वेषामित्यर्थः ॥ १३ ॥ उक्तम् अर्थम् । अभिनयः प्रदर्शनम् । ततः महाद्रिधारणातः ॥ १४ ॥ तस्य कृष्णस्य चरितस्य परिशीलनेन विलोकनेन विवृत्ता संभावना अयमुक्तसदृशो भविष्यति न वेत्येवरूपः संशयो यस्य तस्य । तत्त्वावबोधकम् याथार्थ्यप्रकाशम् । स नंदः । तेनैव गर्गोक्तेनैव । व्येतु व्यपगता भवतु । वः युष्माकम् । अर्भके बाले । एनमित्यन्वादेशत्वादिदम एनादेशः । हेति प्रसक्तकथां प्रत्यंतरंगत्वेन कथांतरारंभसूचनाय "प्रत्यारंभे प्रसिद्धौ ह हा विषादशुगार्त्तिषु" इति यादवः ॥ १५ ॥ पूर्वोक्तमेव स्मारयति । वर्णाः शुक्लाद्याः ॥ १६–२१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किञ्च, दुस्त्यजश्चेति । ते तनये तवैव तनयोऽयं नास्माकमिति विचारितेऽपि त्यक्तुमशक्यः स्वाभाविक इत्यर्थः । तत्रापि सर्वेषाम् अहो भवतु वा सर्वाकृतिप्रकृतिसुन्दरे सर्वचित्ताकर्षकेऽनन्यगतीनामस्माकमनुरागो दुस्त्यजः तस्याप्यस्मास्वयोग्येष्वपि औत्पत्तिकः जन्मदिनमेवारभ्य दृष्टः स्वाभाविक एवेत्यर्थः । अत्रास्मिन्निति तत्तद्वैलक्षण्येन सम्प्रति प्रस्तूयमान इत्यर्थः । अन्यत्तैः तत्र किमित्याद्युत्प्रेक्षायां मिथोदेहदेहिनोर्यथा तद्वदित्यर्थः ॥ १३ ॥ क्वेति अयमर्थः सप्तहायनत्वेन जन्मवृद्ध्यादयस्तदवस्था गृहीताः ताभिश्च बालत्वं निश्चितं तच्चात्यन्तं बालान्तरेषु व्याप्तिदर्शनात् तथा महाद्रिविधारणेन पूतनादिवधहेतुप्रभावत्वं स्वाभाविकप्रेम-विषयाश्रयत्वं च गृहीतं ताभ्यां बालादन्यत्वं तदन्यत्वेऽपि देवादित्वं तत्रापि परमविलक्षणत्वं निश्चितं बालान्तरादौ तत्तददर्शनात्

---

१. ऽह्यस्मिन्–प्रा. पा. । २. नन्दगोप–प्रा. पा. ।

तदेवं सप्तेत्यादित्वे बालादन्यत्वं न सम्भवति महाद्रीत्यादित्वे च बालत्वं च न सम्भवतीत्यर्थः। ततस्तस्मादेकस्मिन् मिथो विरोधिधर्म्मद्वयात् शङ्काविप्रतिपत्तिजः संशयः बालोऽयं बालादन्यः परमविलक्षणदेवादिर्वेति ॥ १४ ॥ निजाशेषभगवत्ताप्रकटनार्थम् अवतीर्णोऽयं साक्षात् श्रीभगवानेवेति व्यक्तमुक्ते कदाचिदैश्वर्यज्ञानेन भयगौरवादिना स्नेहभरहानिः स्यादिति शङ्कया श्रीगर्गेण साक्षात् परमैश्वर्य्यमनुक्त्वा व्यपदेशेनैव तद्व्यञ्जयता यान्यक्षराण्युक्तानि तैरेव ईदृश स्वाभाविकगुणबालकता प्रतिपादकतयाऽवधारितैर्गोपान् प्रबोधयन्नाह–श्रूयतामिति। मे मम गर्गद्वारा श्रुतैतत्प्रभावस्य वचः वः शङ्का व्येतु श्रूयतां अर्भक इति स्वस्य बालत्वेनैव निश्चयं बोधयति यद्वा, वो युष्माकं योऽर्भकस्तस्मिन्निति ममेव युष्माकमप्ययं बालक इति स्नेहविशेषमेव वर्द्धयति एवं भवतां परमानुरागविषयं परोक्षेऽप्यपरोक्षवदुक्तिः सदा तस्य साक्षादिव हृदि स्फूर्त्तेः मे मम कुमारं पुत्रमिति पूर्ववत् पुनः पुनस्तथैवोक्तिरतिनिश्चयाय यद्वा, मे माम् एकाकिनं यद्वचः व्यक्तमेव न च सङ्केतादि नेत्यर्थः–यद्वा ह हर्षे ॥१५॥ गर्गोक्तिमेवाह–वर्णा इत्यादिना। न विस्मय इत्यन्तेन अत्र प्राचीनप्रकटार्थोऽनुसन्धेयः। किञ्चात्र "तस्मान्नन्द! कुमारोयम्" इति प्रथमश्चरणः "तत्कर्मसु न विस्मयः" इति चतुर्थः गर्गवाक्ये तु "तस्मान्नन्दात्मजोऽयं ते" इति प्रथमः "गोपायस्व समाहितः" इति चतुर्थः। इत्यद्धा मां समादिश्येति वक्ष्यमाणात् श्रीनन्दवाक्यात् तद्वाक्यमेवानेनानुदितमिति लभ्यते तस्माद्विनयार्थं स्वपुत्रे सर्वेषां स्वसाधारण्येन ममताया गोपायित्वतायाश्च व्यञ्जनार्थमेव च किञ्चिदन्यथा विधायानूदितमपि श्लेषेण यथार्थतया सम्पाद्यते स्म ॥ १६–२१ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमन्योन्यमुक्त्वा अधुना ईश्वर एवायमिति चेत्तथाप्यैश्वर्य्येण प्रीतभक्तिरेव वर्द्धते, स्वाभाविकनिरन्तरानुरागश्च भयगौरवादिसंकोचेन सम्भवेदेवेति स्नेहविशेषं प्रतिपादयन्तः परमस्निग्धं तत्पितरं सम्बोध्याहुः—दुस्त्यजश्चेति। ऐश्वर्य्ये साक्षादनुभूतेऽपि त्यक्तुमशक्यः, यत औत्पत्तिकः, अग्न्यादेरौष्ण्यादिवत् स्वाभाविकत्वादित्यर्थः, इत्यापद्रक्षणादिनोपाधिना शंकमानोऽनुरागो निरस्तः। तत्रापि सर्व्वेषां बालादिवृद्धपर्य्यन्तानां 'नः' इति तत्रासन्देहार्थं स्वानुभवमभिव्यञ्जयन्ति—अहो भवतु वा सर्व्वथा आकृतिप्रकृतिसुन्दरे सर्व्वचित्ताकर्षकेऽनन्यगतीनामस्माकमनुरागो दुस्त्यजः, तस्याप्यस्मासु निकृष्टेषु सेवकेष्वपराधादावपि स दुस्त्यजः कथम्? अतो नायमवतारी श्रीनारायणः, न च तदवतारः कश्चिदपि भवेत्, किन्तु मधुरैश्वर्य्यविशेषसम्बलितविचित्रबाल्यविशेषेणानेन सर्वतो विलक्षणो दुर्वितर्क्यमाहात्म्यार्णवः कोऽपि पुरुषोत्तमो भविष्यतीति भावः। सिद्धान्तश्चायम्—एक एवावतारी अवतारश्च तथाशेषपरमैश्वर्य्ययुक्तालौकिकबाल्यलीलामयश्चेत्येवं विविधविरोधप्रवाहविलयविषयः परमानिर्वचनीयः श्रीभगवद्विशेषोऽयं स्यादिति। हे नन्द! तव तनय इत्यहो भाग्यमहिमा तवेति, तत्र च नन्दति सदा हृष्यतीति नन्दस्तथा सम्बोधनम्, ईदृशेन पुत्रेण तव सदानन्दतया नाम्नोऽप्यन्वर्थत्वमेवेति भावः ॥ १३ ॥ अहो लौकिकबाल्यमेव परमैश्वर्य्यसम्बलितमस्माभिरधुना साक्षादेवानुभूतमिति विस्मयं वदन्तः, ततश्च लौकिकबाल्यलीलापरमैश्वर्य्ययोरन्योन्यविरोधेन निजसन्देहोत्पत्तिमाहुः—क्वेति सप्तहायन इत्यनेन लौकिकत्वमेवाभिप्रेतम्, तच्च निजसहजभावानुरूपमेव, महाद्रेर्विशेषेण लीलादिना धारणमिति परमैश्वर्य्यमेव, एवं लौकिकबालस्य महाद्रिविधारणासम्भवात् महाद्रिविधारणे च लौकिकबाल्यासम्भवाद्विरोधो महानेवेत्यर्थः। ततस्तस्माद् बालस्य महाद्रिविधारणाद्धेतोर्नोऽस्माकं बालतया ईश्वरतया चाधुना प्रतीतेः, तयोरन्योन्यं विरुद्धत्वात् शंका आशंका संशय एव जायते, न च निश्चयो भवेदिति अवतारित्वेऽप्यवतारत्वमवतारत्वेऽप्यवतारित्वम्, तथा लौकिकत्वाव्यभिचारेणैश्वर्य्यमैश्वर्य्याव्यभिचारेणैव लौकिकत्वमपीत्यन्योन्यं विरुद्धयोस्तयोः कथं सम्भवेदित्यादिविचारादिति सिद्धान्तः। यद्वा, ततस्तस्मात् प्राकट्यं प्राप्तादैश्वर्य्यादपि शंका भयं तस्मिन् नो न जायते, इत्यनुरागस्य दुस्त्यजत्वमेव दर्शितम्। हे व्रजनाथेति त्वन्नाथत्वात् सर्वव्रजस्यापि महाभाग्यमिति भावः, यद्वा, सर्वेषां व्रजजनानामस्माकं नाथत्वेन त्वमेवास्माकमेतां शंकां परिहर्त्तुमर्हसीति भावः। यद्वा, प्रभुपुत्रत्वेन तस्मिन् शंकाया योग्यतोक्ता, तथापि न जायत एवेत्यर्थः। किञ्च, वारं वारं तत्पुत्रत्वोक्त्या परमेश्वरत्वेन श्रीवसुदेवपुत्रत्वेन च तज्ज्ञानं तत्तच्छंकया असम्भवात्, तादृशानुरागासम्भवाच्च, यद्वा, ते तनय इति तवात्मज इति चानुरागस्य दुस्त्यजतायामेव हेतुः, तथाप्यनुरागस्य निरूपाधिकत्वमेव बोद्धव्यम्, तस्यैव नित्यं तत्पुत्रैकलक्षणत्वात्, एवं रूपगुणादिविशेषेणोपाधिना तदनुरागेऽपि निरुपाधिकत्वमेव स्यात्, तस्यैव नित्यतत्तदेकलक्षणत्वादित्येतच्चाग्रे यथास्थानं विस्तार्य्यम् ॥ १४ ॥ निजाशेषभगवत्ताप्रकटनार्थमवतीर्णोऽयं साक्षाच्छ्रीभगवानेवेति व्यक्तमुक्ते कदाचिदैश्वर्य्यज्ञानेन भयगौरवादिना स्नेहभरहानिः स्यादिति शंकया श्रीगर्गेण साक्षात् परमैश्वर्य्यमनुक्त्वा व्यपदेशेनैव तद्व्यञ्जयता यान्यक्षरान्युक्तानि, तैरेव परमाचिन्त्यकर्म्मलोकोत्तरमहापुरुषप्रतिपादकतयाऽवधारितैर्गोपान् प्रबोधयन्नाह—श्रूयतामिति। मे तत्त्वज्ञस्य वचः सर्वशंकानिरसनं परमानन्ददञ्च वाक्यं श्रूयताम् हे गोपा इति स्नेहभरव्याप्तचित्तत्वं बोधयति। वः शंका व्येतु क्षीयताम्। अर्भक इति सदैव स्नेहभराक्रान्तत्वात्, यद्वा, तत्तत्त्वेऽपि स्नेहविशेषेण बालतयैव ज्ञानात्, यद्वा, वो युष्माकं योऽर्भकस्तस्मिन्निति ममैव युष्माकमप्ययं बालक इति स्नेहविशेषमेव द्रढयति। एवं भवतां परमानुरागविषयं परोक्षेऽप्यपरोक्षवदुक्तिः, सदा तस्य साक्षादिव हृदि स्फूर्त्तेः, यद्वा, बाल्यक्रीडादिना सर्व्वैरेव बालकत्वेनानुभूयमानं मे माम्, यद्वा, मे मम कुमारं पुत्रमिति पूर्ववत् पुनः पुनस्तथैवोक्तिः, सर्वेषु तस्य बालकभाव-

स्फूर्त्तेः, यद्वा, अतिबाल्यावस्थायां वर्त्तमानं नामकरणकाल इत्यर्थः । 'माम्' इति पाठे रहसि मां केवलमेवोवाचेत्यतो भवद्भिर्न ज्ञातमिति भावः, यद्वच, ह व्यक्तमेव, न च संकेतादिनेत्यर्थः, यद्वा, ह हर्षे ॥ १५ ॥ निजसत्यवाक्यत्वेन तेषां विश्वासार्थं वा श्रीगर्गोक्तिमेवाह—वर्णा इत्यादिना (२२ श० श्लो०) 'न विस्मयः' इत्यन्तेन, (भा० १०।८।१९) 'गोपाय सुसमाहितः' इति सर्वान्त्येनोक्तम्, तत्र माहात्म्यविशेषप्रतिपादनाभावात् विशेषतश्च गोपायस्वेत्यन्यरक्ष्यत्वेन माहात्म्यहान्यापत्तेश्च, गोपानामाये लाभे सुसमाहित इत्यर्थे तेषां कदाचिद्गर्वाभ्युदयशंकया, तेन च जगद्धितानाचरणात् नारायणसमत्वासम्भावनाशंकया वा नोक्तमिति अत्युद्भुतत्वेन विस्मयो न कार्य इत्यर्थः । यद्यपि पूर्वं तैः श्रीगर्गवाक्यं ज्ञातमेवास्ते, बकवधानन्तरम् (भा० १०।११।५७) 'अहो ब्रह्मविदां वाचः' इत्यादिवचनात्, तथाप्यधुना तत्तदक्षरेण समग्रतयेति विशेषः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अञ्जः अञ्जसोः ॥ १९–२५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दुस्त्यज इति । हे नन्द ! ते तव तनयेस्मिन् कृष्णे नोऽस्माकं सर्वेषां व्रजौकसामनुरागः दुस्त्यजः कथं तस्यैवं विधातिमानुषचेष्टितस्य चास्माल्वौत्पत्तिकः जन्मसिद्धोनुरागः कथम् ? अतः सर्वशक्तिः सर्वेषामात्मा च किं तवात्मज इत्याशङ्कामाह इति भावः ॥ १३ ॥ अन्यथैतन्न घटत इत्याशङ्कामेवाविष्कुर्वन्ति—क्वेति । हे व्रजनाथ ! ततोऽद्रिधारणादेरतवात्मजे शङ्का सर्वशक्तिपरमात्मशङ्का जायते ॥ १४ ॥ एवमापृष्टः प्राकृतश्रीकृष्णजातकात्मकगर्गवाक्यो नित्यं तच्चरित्रपरिशीलननिवृत्तेश्वरत्वासम्भावना नन्दस्तेनैव गर्गवाक्येन गोपानामाशङ्कामपनुदति हे गोपाः एनं कृष्णमुद्दिश्य गर्गो यदुवाच तच्छ्रूयतां तच्छ्रवणेनैवास्मिन्नर्भके विषये भवतां शङ्का व्येतु निवर्त्यताम् ॥ १५ ॥ किं तद्गर्गोक्त येन शंका व्येतीत्यत्र तदेवाह—वर्ण इत्यादिभिः इत्यद्धा इत्यतः प्राक्तनैः इमे श्लोकाः पुरस्तादेव व्याख्याताः ॥ १६–२२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अनुरागो हृदयङ्गमः स्नेहः औत्पत्तिकः उत्पत्तिसिद्धः कथम् ॥ १३ ॥ ततो नो जायते शङ्केत्यादिना न तद्वीर्यविद इति स्पष्टीकृतम् ॥ १४ ॥ व्येतु विगता भवतु वः युष्माकं प्रसक्तकथां प्रत्यन्तरङ्गत्वेन कथान्तरमारभ्यत इति सूचनाय हकारः "प्रत्यारम्भप्रसिद्धौ ह हा विषादशुभार्त्तिषु" इति च ॥ १५ ॥ वर्णाः शुक्लाद्याः ॥ १६ ॥ क्वचिन्मथुराया वा वसुदेवस्य सकाशात् अभिज्ञाः वसुदेवस्यापत्यमिति तद्धितप्रत्ययज्ञानपटवः ॥ १७ ॥ न केवलमेतदेव नामरूपत्रयमेव अपि त्वन्यान्यपि सन्तीत्याह—बहूनीति । नारायणादीनि गुणानुरूपाणि मधुसूदनादीनि कर्मानुरूपाणि ॥ १८ ॥ आधास्यत् आधास्यति । यद्वा, यदि यूयमस्मिन् भक्त्युद्रिक्तं चित्तमकरिष्यन् तर्ह्ययं वः पुरुषार्थलक्षणमाधास्यत् "लिङ्निमित्ते लङ्क्रियातिपत्तौ" (३।३।१३९) इति सूत्रात् अयं विधिः ॥ १९–२३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

किञ्च, दुस्त्यजश्चेति तस्माद्विरुद्धधर्माद्धेतोः ॥ १३ ॥ शङ्का संशयः ॥ १४ ॥ बाल एव वा परमविलक्षणा देवादिर्वेति श्रूयतामित्यादि ॥ १५–२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवमस्येश्वरत्वे गिरिधारणादय एतन्निष्ठा धर्म्मा एव हेतवो दर्शिताः अस्मदादिसर्वव्रजवासिनिष्ठश्चैको धर्मो दृश्यतामित्याह—दुस्त्यजश्चेति । ते तनये तवैव तनयो नाऽस्माकमिति सम्यग्विचारिते सत्यपीति भावः । न केवलमस्माक वात्सल्यभाववतामेव गोपानाम् अपि तु सर्वेषां बालादीनामपि सख्यादिभाववतां स्त्रीपुंसामपि जात्यन्तराणामपि वनौकसां मृगपक्ष्यादीनामपि अनुरागः प्रतिक्षणं नवनवायमाना वर्द्धमाना प्रीतिरनुरागशब्दस्य तथाभूतार्थकत्वात् न तु प्रीतिमात्रम् । किञ्च, दुस्त्यज उत्पत्तिकत्वात् सम्प्रतीश्वरत्वलक्षणे दृष्टेऽपि त्यक्तुमशक्यः तेन पुत्रवित्तादिदेहजीवात्मभ्यो यथोत्तराधिकप्रेमास्पदेभ्योऽप्यात्यन्तिकं प्रेमास्पदं परमात्मैवायमिति बुध्यते नहि केवलनरत्वे सत्येवं सति सम्भवतीति भावः । सत्यं तर्हि परमात्मैवायं निश्चीयतामिति चेत्तत्राहुः—अस्मासु सर्वेषु व्रजवासिषु वनौकस्सु च तस्याऽपि अनुराग उक्तलक्षणः कथं सम्भवेत् तस्यात्मरामत्वेन सर्वत्रौदासीन्यादस्मासु संसारिकेष्वौत्पत्तिक्याशक्तिर्न घटत इति भावः ॥१३॥ उक्तमप्यद्रिधारणं प्रस्तुतत्वादतिविस्मयेन पुनराहुः—क्वेति ॥ १४ ॥ अहो मद्बालकेऽस्मिन् प्राक् सिद्धमहाप्रभावे मदिष्टदेवस्य श्रीनारायणस्य मय्यतिकृपया मद्विपदोऽभिहन्तुमावेशमालक्ष्यते संशेरते तदेतान् श्रीगर्गोक्त्यैव प्रबोधयामीत्याशयेनाह श्रूयतामिति ॥ १५–२१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

औत्पत्तिकः स्वाभाविकः ॥ १३–२२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणि

परस्परमेवं विचार्य नन्दं प्रति पप्रच्छुः ॥ दुस्त्यज इति। हे नन्द वनौकसां नोऽस्माकं तेऽस्मिंस्तनये दुस्त्यजस्त्यक्तुमशक्योऽनुरागः स्नेहः कथं जातस्तथाऽस्मासु तस्य कृष्णस्यापि स कथं न च स यादृच्छिक इत्याहुः ॥ औत्पत्तिक आजनीन इति। नन्दत इत्यत्र त इत्यन्वयः ॥ १३ ॥ क्रमतो व्युत्क्रमतश्च सङ्गृह्योक्त्वा पुनरतिसन्निहितं तद्विहितमुक्त्वा सम्पुटीकुर्वन्ति ॥ क्वेति। क्व सप्तहायनो बालो महाद्रेर्गोवर्धनस्योद्धरणं क्व हे व्रजनाथ तवात्मजे नः शङ्का संशयो जायतेऽतो न तद्वीर्यविद इति प्रागुदीरितमुज्जीवितम् ॥ १४ ॥ एवं गोविन्दविषये सन्दिग्धबुद्धीन्गोपान्प्रति स्वेन यद्गर्गेण श्रुतं तन्नन्द उपदिशतीत्याह ॥ नन्द इति। हे गोपा मे तद्वचः श्रूयतां वोऽर्भके मत्पुत्रविषये शङ्का व्येतु गच्छतु। एनं कुमारमुद्दिश्य गर्गः पुरोधा यदुवाच। हेत्यनेन तद्वचनान्यथात्वम् सिद्धिं सूचयति। प्रत्यारम्भे प्रसिद्धौ हेति यादवः ॥ १५ ॥ तमेव श्लोकनिकायमनुवदति ॥ वर्णा इति। व्याख्यातचराः श्लोकाः ॥ १६–१८ ॥ यदि यूयमस्मिन्भक्तिमकरिष्यंस्तर्ह्ययं वः श्रेयोऽधास्यत्। लिङ्निमित्ते लृङ्क्रियातिपत्ताविति विध्यर्थता ॥ १९ ॥ पृथुत्वदशायाम् ॥ २० ॥

श्रीसुबोधिनी

एतत् सर्वं बाह्यं निरूप्यान्तरं निरूपयन्ति दुस्त्यज इति, **अस्मिन् कृष्णे सर्वेषामेव नोस्माकनुरागोपि दुस्त्यजः, न** ह्यन्योद्धवे सम्बन्धिनि साधारणसम्बन्धमात्रेण वित्तात् पुत्रात् प्राणादप्यधिकः स्नेहो भवितुमर्हति, तर्हि पुत्र एवास्य न भवत्यकस्मादेवागत इति मन्तव्यं तत्राहुर्**नन्द ते तनय** इति, **क्वचिद् गुर्वादिषु कस्यचित् स्नेहोपि भवेन् न तु सर्वेषां, न वा व्रजौकसां** ज्ञानमस्ति, अतो वस्तुसामर्थ्यादेवैवं जायत इति **किञ्च तस्याप्यस्मास्वौत्पत्तिक** एव स्नेहो नान्येषां बालकानां, एतत् कथं भवेत्? अतो वस्तुसामर्थ्यात् क्रियासामर्थ्याच्च धर्मविचारेण धर्मिविचारेण वा महान् भवतीति कथं तव पुत्रो भवेत् ॥१३॥ आस्तां तावदन्यदिदमधुना जातमत्याश्चर्यमित्याहुः क्व **सप्तहायनो बाल** इति, **सप्तहायनो बालः क्व महाद्रिविधारणं च क्व**? अतः कार्यकारणयोर्लोकन्यायेन विरोधात् **तवात्मजे नः शङ्का जायते**, अस्माकमेतदतिसन्दिग्धं तव पुत्रो भवति न वेति, विधिपक्षे कृतार्था भविष्यामोविधिपक्षेपराधाः क्रियन्त इति को वेद किं भविष्याम इति भवति विचारणा ॥ १४ ॥ एवं पूर्वपक्षे कृते नन्दः सिद्धान्तमाह **श्रूयता**मिति, भगवानद्भुतकर्मेति पूर्वपक्षसिद्धान्तयोर्व्यत्यासोन्यथैतद् भगवच्चरित्रं न भवेत्, नन्दस्तु स तादृश एव कश्चिन् महापुरुषो मम गृहे जात इति मन्यते गर्गवाक्यात्, यथा भगवदवताराः कचिद् भवन्ति तथायमपि मम गृहेवतीर्ण इति, अतः सम्बन्धोप्यस्ति माहात्म्यं चोपपद्यत इति गर्गवाक्यानि वक्तुमुपक्रमते **श्रूयता**मिति, हे **गोपा** भवन्तो न विचारणक्षमा अतो मे वच **एव श्रूयतां** सर्वैरेव भवद्भिः, ततः किं स्यात्? अत आह **व्येतु शङ्कावचोर्भक** इति, **अर्भके** बालके शङ्कावचनमपगच्छतु मत्पुत्रो भवति न वेति, ननु त्वद्वाक्यं कथं प्रमाणं वादिवाक्यस्याप्रमाणत्वात् तत्राहैनं **कुमारमुद्दिश्ये**ति, यदायं कुमारो बालक एव स्थितस्तदैव **गर्गो मे मह्यं** मां बोधयितुं किञ्चिदुवाच हेत्याश्चर्यं कथमेवं ज्ञातवामिति ॥ १५ ॥ गर्गवाक्यानि पूर्वं व्याख्यातान्यपि पुनरापाततो व्याख्यायन्तेनुवादात्, **वर्णास्त्रय** इत्यादीनि वाक्यान्यष्टश्लोकैरुक्तानि, **किले**ति प्रसिद्धे, **अस्य** बालस्य पूर्वं **त्रयो वर्णा** जाताः, **वर्ण**शब्दो रूपविशेषे जातिविशेषे च वर्तते तत आह **शुक्लो रक्तस्तथा पीत** इति, **इदानीं कृष्णः** कृष्णवर्णत्वं प्राप्तः, सत्यादिष्वेवं भवति रामो रामो रामो वा, इदानीं त्वद्गृहे वर्तमानसमीपे कलौ वा कृष्णधम **कृष्णत्वं** प्राप्तः, न तु कृष्णः, मध्यन्दिने सवितरि मण्डलस्थकृष्णत्ववदिति कृष्णनामनिरुक्तिः ॥ १६ ॥ वासुदेवनिरुक्तिमाह **प्रागयमि**ति, **क्वचिद्** देशविशेषे कालविशेषे वा **वसुदेव**स्यायं पुत्रो **जातः**, अतो **येभिज्ञा** एतन्मर्म जानन्ति ते **वासुदेव इति प्रचक्षते**, वस्तुतस्तु **वसु**शब्देन धनं **वसुरूपो देवो** वसुदेवो लक्ष्मीस्तस्याः **पतिर्वासुदेव** इति तदाह **श्रीमा**निति, **इती**ति तत्रापि सम्बध्यते, **इति**शब्दस्तदन्ते वा योजनीयः ॥ १७ ॥ न केवलं नामद्वयमेव भगवतः किन्त्वन्यान्यपि बहूनि सन्तीत्याह **बहूनी**ति, **रूपाण्य**पि **सन्ति, ते सुतस्ये**ति सम्बन्धस्थापनार्थं, रूपनाम्नोर्हेतुमाह **गुणकर्मानुरूपाणी**ति, तावन्तो **गुणा**स्तावन्ति च **कर्मा**णि प्रतिरूपनामभेदेन कर्तव्यान्यतस्तेषा**नुरूपा**णि, तत्र प्रमाणमाह **तान्यहं वेदे**ति, बाधाभावमाह **नो जना** इति, **जनास्तु न** जानन्ति ॥ १८ ॥ एवं नामान्युक्त्वा भगवतः कार्याण्याहै**ष** इति **एष** एव वो युष्माकं **श्रेय आधास्यद**ाधास्यति, “छन्दसि लुङ्लङ्लिट” इति भविष्यदर्थे लङ्, पूतनादिवधस्य कृतत्वात् भूतार्थताप्यस्ति, किञ्च **गोपगोकुलयोर्नन्दन आनन्द**जनको भविष्यति, किञ्चानेनैव **सर्वदुर्गाणि** सङ्कटस्थानानि **यूयं तरिष्यथ**, परमानायासेनेव ॥ १९ ॥ अत्रार्थे पूर्वसम्मतिमाह **पुरानेने**ति, पृथुरूपेणान्येन वा, **व्रजपत** इतिसम्बोधनमज्ञानं नाश्चर्यमितिबोधनार्थं, **साधवः** सर्व एप **दस्युभिः पीडिता दस्यूञ् जिग्युः**, रावणादयोपि **दस्यवोराजके चारक्ष्यमाणाः** स्थितास्तदानेनैव **समेधिता दस्यूञ् जिग्युः**, पृथावेव तत् स्पष्टम् ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

श्रूयतां मे वच इत्यत्र, **पूर्वपक्षसिद्धान्तयोर्व्यत्यास** इति। नन्दस्यात्मनो देहाज्जातत्वाभावेन तथात्वं सिद्धान्तो भवितुमर्हति यद्यपि, तथाप्येतादृश एव स्वात्मज इति भगवता लीलार्थं तद्बुद्धिः सम्पादितेति तथात्वम्। न चास्या भ्रमरूपत्वेनास्य

सिद्धान्ताभासत्वम्, न तु वस्तुतस्तथात्वमिति वाच्यम्, हेत्वसिद्धेः। भगवता तथैव लोलार्थमङ्गीकारात्। नित्यस्यैवंभावोनुपपन्न इत्याशङ्कानिरासाय तादृशस्य तथात्वे हेतुमाहुरद्भुतकर्मेतीति। लौकिकोपपत्तिरहितं ह्यद्भुतम् तथाचात्र तद्राहित्यं भूषणम्, न तु दूषणम्, अद्भुतकर्मत्वलक्षणत्वरूपसम्पादकत्वात्। अत एव 'तस्मान्नन्दात्मजोऽयं त' इति गर्गोक्तिरपीति भावः ॥ १५ ॥ **वर्णास्त्रय** इत्यत्र, **वाक्यान्यष्टश्लोकैरुक्तानीति** नामकरणसमये गर्गेण छन्दोननुरोधेनैव वाक्यान्युक्तानि, तथैव नन्दैरपि, तान्येव व्यासेन श्लोकैरुपनिबद्धानीति तथोक्तम्। यद्यप्यासन्नित्यादीनि तानि सप्तैव, तथापि मन्ये नारायणस्यांशमित्यादिकं गर्गवाक्यफलितार्थनिरूपकत्वेन तद्रूपमेवेत्याशयेनाष्टसङ्ख्योक्ता ॥ १६ ॥

इति त्रयोविंशोऽध्यायः ॥ २३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

वर्णास्त्रय इत्यत्र वर्णशब्दस्य जातिविशेषपक्षे आहुः **राम** इति परशुरामरघुनाथबलरामा ब्राह्मणक्षत्रियवैश्याः, बलो भगवदावेशाद् "व्रजेशसुत" इति व्युत्पादितं पूर्वं, "इदानीं" त्वद्गृहे "कृष्णतां गत,ः" दास्यमार्गं प्रकटितवानितिभावः ॥ १६ ॥ **बहूनीत्यत्र** रूपनाम्नोरिति बहुत्वे इतिशेषः, **प्रमाणमाहेति** ब्रह्मविदां ज्ञानमेतत्प्रमाजनकमित्यर्थः, **बालाभावमाहेति** अन्येषां जनत्वात् तद्ज्ञानेन बाधो न शङ्कनीयः इत्यर्थः ॥ १८ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

श्रूयतां मे वच इत्यत्र **पूर्वपक्षसिद्धान्तयोर्व्यत्यास** इति अस्यार्थष्टिप्पण्यां स्फुटः ॥१५॥ **शुक्लो रक्तस्तथा पीत** इत्यस्य **रामो रामो रामो वेति** "वर्णास्त्रयः किलास्यास" न्नित्यत्र वर्णशब्दो ब्राह्मणादिवर्णवाचक इत्याश्रित्येदमुक्तं, तथा च **रामः** परशुरामः ब्राह्मणो **रामो** दाशरथिः क्षत्रियो **रामो** बलरामो वैश्यः, बलदेवे श्रीकृष्णावेशात्, श्रीकृष्णस्य नन्दपुत्रत्वान् नन्दस्य वैश्यत्वात्, **न तु कृष्ण** इति "यत् कृष्णं तदन्नस्ये" तिश्रुत्या पृथिव्याः कृष्णरूपत्वमुक्तं तत्पार्थिवं कृष्णरूपं श्रीकृष्णे नास्तीत्यर्थः, तर्हि कथं श्यामत्वं प्रतीयत इत्याकाङ्क्षायामाहुः **मध्यंदिने सवितरि मण्डलस्थकृष्णत्ववदिति**, सवितरि तेजोमये प्रतीयमानं श्यामत्वं यथा न पार्थिवं तथेदमपि न पार्थिवं किन्तु वस्तुस्वभावात् प्रतीयत इत्यर्थः, न चौपाधिकमितिवाच्यं "यदादित्यस्य नीलं भा" इति छान्दोग्ये आदित्यस्येतिषष्ठ्या सूर्यसम्बन्धित्वकथनादुपाधिसम्बन्धाकथनाच्च ॥ १६ ॥ **प्रागयं वसुदेवस्येत्यत्र वसुरूपो देवः वसुदेवः लक्ष्मीः तस्याः पतिरिति** तथा च वसुदेवस्यायं वासुदेवः, तस्येदमित्यण् ॥ १७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'सर्वथा त्वया महान् आनन्दो दत्तः, कस्त्वां स्तोतुं समर्थ ?' इति सूचयन्तः सम्बोधयन्ति–नन्देति। सर्वेषां पशुपक्ष्यादिसहितानां नोऽस्माकं व्रजौकसामस्मिन् ते तव तनये कृष्णे दुस्त्यजोऽनुरागस्तथाऽस्मासु तस्यौत्पत्तिकः स्वाभाविकोऽनुरागः कथम् ? ॥ १३ ॥ क्व सप्तहायनो बालः, क्व च महाद्रेर्विधारणम् ? ततः तस्मात् सर्वात्मसर्वशक्तिं विना उक्तप्रभावस्यासम्भवात् हे व्रजनाथ ! तवात्मजे नोऽस्माकं परमेश्वरत्वशङ्का जायते ॥ १४ ॥ एवं श्रीकृष्णस्याद्भुतकर्मभिर्विस्मितान् गोपान् नन्दो गर्गोक्तिमाश्रव्य तदैश्वर्यं वर्णयति–श्रूयतामिति। हे गोपाः ! मम वचः श्रूयताम्। तेन वचःश्रवणेन ममार्भके बालके या वो युष्माकं शङ्का सा व्येतु अपगच्छतु। 'अस्मिंश्च वचसि विश्वासः कर्तव्यः, परमात्मोक्तत्वात्' इत्याशयेनाह–एनमिति। 'ह' इति स्फुटमुवाच ॥ १५ ॥ 'किल' इति निश्चयेन। अनुयुगं तनूः अवतारान् गृह्णतोऽस्य शुक्लादयस्त्रयो वर्णा आसन्। इदानीं कृष्णतां गतः ॥ १६ ॥ अयं श्रीमांस्तवात्मजः प्राक् कदाचिद्वसुदेवस्य सुतो जातः, अतस्तदभिज्ञा एनं वासुदेव इति सम्प्रचक्षते ॥ १७ ॥ तानि नामरूपाणि सर्वाण्यहमपि नो वेद, अन्ये जनास्तु कुतो विदुः ? स्पष्टमन्यत् ॥१८॥ एष वो युष्माकं श्रेयः पारलौकिकं सुखमाधास्यत् करिष्यति। अस्मिंश्च लोके गोपानां गोकुलस्य चानन्दकरो भविष्यति। सर्वाणि दुर्गाणि अन्येन दुर्निवार्यदुःखानि ॥ १९ ॥ हे व्रजपते ! पुरा अराजके दस्युभिः पीडितः साधवोऽनेन रक्ष्यमाणाः समेधिताः संवर्धिताश्च सन्तो दस्यून् जिग्युः जितवन्तः ॥ २० ॥

अन्वितार्थप्रकाशिका

दुस्त्यज इति ॥ हे नन्द ! सर्वेषां पशुपक्ष्यादिसहितानां नोऽस्माकं व्रजौकसामस्मिन् ते तव तनये कृष्णे दुस्त्यजोऽनुरागस्तथाऽस्मासु तस्यापि औत्पत्तिकः स्वाभाविकोऽनुरागः कथं किं सर्वेषामयमात्मा स्यात् ॥ १३ ॥ उक्तमप्यतिविस्मयेन पुनः वदन्ति क्वेति ॥ क्व सप्तहायनो बालः क्व च महाद्रेर्विधारणं ततः तस्मात् सर्वात्मसर्वशक्तिं विनोक्तप्रभावस्यासंभवात्। हे व्रजनाथ ! तवात्मजे नोऽस्माकं परमेश्वरत्वशङ्का जायते ॥ १४ ॥ श्रूयतामिति ॥ हे गोपाः ! एनं कुमारं बालमुद्दिश्य गर्गो मह्यं यद्वचः उवाच तत् मे मम वचः श्रूयताम्। तेन वचःश्रवणेन ममार्भके बालके या वो युष्माकं शङ्का सा व्येतु अपगच्छतु ॥ १५ ॥ तान्येव गर्गवाक्यान्यनुवदति—वर्णा इति ॥ अनुयुगं युगे युगे तनुमूर्तीर्गृह्णतोऽस्य तव पुत्रस्य शुक्लो रक्तस्तथा पीतश्चेति त्रयो वर्णा आसन्। इदानीं

तु द्वापरस्यान्ते कृष्णतां गतः अतः कृष्णनामा भविष्यति ॥ १६ ॥ प्रागिति ॥ अयं श्रीमांस्तवात्मजः क्वचित् प्राक्समये वसुदेवस्य सुतो जातः । अतः अभिज्ञा ये अभितोऽस्य स्वरूपं जानन्ति त एनं वासुदेव इति संप्रचक्षते कथयन्ति ॥ १७ ॥ बहूनीति गुणानुरूपाणि सर्वेश्वरः सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गोवर्द्धनोद्धरणः कालियदमन इत्यादीनि तव सुतस्य बहूनि नामानि सन्ति तान्ति च सर्वाणि जना न विदुः । अहमपि नो वेद न जानामि ॥ १८ ॥ एव इति ॥ गोपान् गोकुलं च नन्दयति तथाभूतः एष वो युष्माकं सर्वेषां श्रेयः सुखम् आधास्यत आधास्यति । इलोप आर्षः । अनेनैव रक्षकेण सर्वाणि दुर्गाणि महतोऽप्युपद्रवान् अञ्जः अनायासेनैव यूयं तरिष्यथ अतिक्रमिष्यथ ॥ १९ ॥ पुरेति ॥ हे व्रजपते ! पुरा अराजके दस्युभिश्चौरैः पीडिताः साधवः अनेन रक्ष्यमाणाः समेधिताः संवर्धिताश्च सन्तस्तान् दस्यून् जिग्युः निर्जितवन्तः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्मिन् ते तव तनये नोऽस्माकं स्नेहोऽस्ति तस्य तव सुतस्यापि अस्मासु स्नेहः औत्पत्तिकः स्वाभाविकोऽस्ति उभयपक्षेपि स तस्य सर्वजीवानामंतरात्मकत्वात्किमस्ति कथमेतत्पूर्वोक्त सर्वमद्भुतं केन प्रकारेण ज्ञातव्यमित्यर्थः ॥ १३ ॥ श्रीकृष्णस्य चरित्रं कथितमपि तस्य अत्याश्चर्यजनकत्वात् पुनराहुः क्वेति हे व्रजनाथ नंद तवात्मजे नोऽस्माकं शंका वर्त्तते अयं परमेश्वरोऽस्ति वा ब्रह्मादित्रयाणां मध्ये कोऽप्यमरोऽस्तीति संशयो जायते ॥ १४ ॥ नंदस्तेषां शंकां निवारयन्नाह श्रूयतामिति हे गोपाः ततो वो युष्माकं बालके शंकां व्येतु गच्छतु गर्गगीतं निरूपयन्नाह ॥ १५–२२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दुस्त्यज इति ॥ हे नन्द, ते तव, तनये पुत्रे अस्मिन् कृष्णे, सर्वेषां व्रजौकसां, नोऽस्माकं, अनुरागः स्नेहातिशयश्च, दुस्त्यजः कथम् । तस्यैवंविधाऽमानुषचेष्टितस्यास्य च, अस्मासु विषये अपि, औत्पत्तिकः जन्मसिद्धोऽनुरागः, कथं, अतः सर्वशक्तिः सर्वेषामात्मा च, किं तवात्मज इत्याशङ्कामहे इति भावः ॥ १३ ॥ अन्यथैतन्न घटते इत्याशङ्कामेवाविष्कुर्वन्ति ॥ क्वेति ॥ हे हे व्रजनाथ, सप्तहायनः सप्तवर्षवयाः, बालः क्व । महाद्रिविधारणं, क्व । ततः सम्यगद्रिविधारणादेरेव, नोऽस्माकं, तव आत्मजे सूनौ, शङ्का जायते सर्वशक्तिः सर्वान्तरात्मायं परमात्मैवेत्याशङ्कोत्पद्यते ॥ १४ ॥ एवं गोपैराप्रृष्टः प्राक् श्रुतश्रीकृष्णजातकर्मात्मकगर्गवाक्यो नित्यं तच्चरितपरिशीलननिवृत्तेश्वरत्वासंभावनो नन्दस्तेनैव गर्गवाक्येन गोपानामाशङ्कामपनुदति ॥ श्रूयतामिति ॥ हे गोपाः, एनं कुमारं श्रीकृष्णं उद्दिश्य, गर्गः, मे मह्यं, यत् ह स्फुटं उवाच, तत् मे वचः, श्रूयताम् । तच्छ्रवणेन, अर्भके बालकेऽस्मिन् श्रीकृष्णे विषये, वो युष्माकं, शङ्का च, व्येतु निवर्त्त्यताम् ॥ १५ ॥ किं तद्येन शङ्का व्येतीत्यत्र तदेवाह ॥ वर्णा इति ॥ अनुयुगं प्रतियुगं, तनूर्देहान्, गृह्णतः अस्य त्वत्पुत्रस्य कृष्णस्य, त्रयः वर्णाः शुक्लादयः, आसन्नभवन् । तत्र शुक्लो वर्णः; कृतयुगे इति शेषः । गतः व्यतीत इत्यर्थः । तथा रक्तः वर्णः, त्रेतायुगे इति शेषः । गतः । अपीतः कृष्णो वर्ण इत्यर्थः । द्वापरे इति शेषः । गतः । इदानीं कलौ युगेऽपीत्यर्थः । कृष्णतां कृष्णवर्णत्वमेवेत्यर्थः । गतः प्राप्तः । अस्मिन्नर्थे एकादशस्कन्धपञ्चमाध्यायस्थं करभाजनयोगीश्वरवचनं प्रमाणम् ॥ १६ ॥ प्रागयमिति ॥ हे नन्द, अयं तव, आत्मजः पुत्रः, प्राक् पूर्वं, क्वचित् कदाचित्, वसुदेवस्य जातः वसुदेवादुत्पन्नोऽस्तीत्यर्थः । अतः अभिज्ञाः एतत्स्वरूपयाथार्थ्यज्ञानिनो जनाः, श्रीमान् सर्वथा श्रीसंपन्नः, वासुदेवः इति, संप्रचक्षते कथयन्ति । सर्वदा श्रीसंपन्न वासुदेवं कथयन्तीत्यर्थः ॥ १७ ॥ बहूनीति ॥ तथा यानि गुणाश्च कर्माणि च तेषामनुरूपाणि, अस्य ते तव सुतस्य, बहूनि नामानि रूपाणि च सन्ति । तानि अहं, वेद वेद्मि । जनाः तानि नो विदुर्नैव जानन्ति । तत्र गुणानुरूपाणि नामानि भगवान्नारायणः सर्वज्ञ ईश्वर इत्यादीनि, कर्मानुरूपाणि मधुसूदनः गोपतिः गोवर्द्धनोद्धारक इत्यादीनि ॥१८॥ एष इति ॥ गोपाश्च गोकुलं च तानि नन्दयतीति तथाभूतः, एष कृष्णः, वो युष्माकं, श्रेयः ऐहिकामुष्मिकं मङ्गलं, आधास्यत् आधास्यतीत्यर्थः । अनेन सुतेन हेतुभूतेन, यूय सर्वदुर्गाणि सर्वाणि दुःखानि, अञ्जः अञ्जसा, तरिष्यथ ॥ १९ ॥ पुरेति ॥ हे व्रजपते नन्द, पुरा पूर्वं, अराजके जगति रक्षकरहिते सतीत्यर्थः । दस्युपीडिताः चौरप्रायदुर्जनार्दिताः, साधवो धर्मानुवर्त्तिनो जनाः, अनेन त्वत्पुत्रेण, रक्ष्यमाणाः समेधिताश्च सन्तः, दस्यून् जिग्युर्जितवन्तः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

श्रूयतामितिः १०.२६.१५.

यो गायेच्छ्रीधरस्य स्वजनभवपरित्राणदीक्षस्य लीलामात्रोपात्ताचलस्योत्पथगजड गतित्विट्परिस्पर्धिनोऽस्मिन् ।
स्मारं स्मारं चरित्राण्यलघुलघुमहापातकध्वंसकानि सोऽस्मिंस्तत्त्वार्थवित्स्यात् स्फुटमिदमभवद् गर्गगीतप्रकाशात् ॥ ७ ॥
अन्यथा येन तद्गीतश्रवणाय रहःस्थितिः । यदर्थं कल्पिता तेभ्यः स एव कथमब्रवीत् ॥ ८ ॥ (युग्मम्)
अथवाऽत्यद्भुतानन्द–निधाननिहितेन्द्रियः । पूर्वोत्तरानुसन्धानरहितोहार्दमुक्तवान् ॥ ९ ॥
एतन्नामकृतौ मया च मुनिन याऽकल्प्यषट्कर्णकस्थानावस्थितिरश बीजमदयः कंसा न गोपा इमे ।
यत्संप्रत्यमरेन्द्रकोपमयमप्यस्तं गतं किं पुनः कंसस्येति जगाद गर्गगदितं निःशङ्कमेष स्वकान् ॥ १० ॥

कृष्णप्रिया

हे नन्दबाबा ! हमें एक बात का अचम्भा होता है कि–आप के लालन् नन्दलालजू पर हम सब व्रज वासियों का ऐसा अवर्ण्य अटल प्रेम क्यों है, और हम लोगों पर जन्म से ही नन्दलाल का सहज स्नेह क्यों है ? ॥ १३ ॥ हे महाराज ! यही बड़ा आश्चर्य है कि कहाँ सात साल की आयु का बालक और कहाँ अति भारी गोवर्धन गिरिवर को उठाना और सात दिन पर्यन्त अपने हस्त में लेकर खड़े रहना। यह सर्व सामर्थ्य देखकर हम सबको संदेह हो रहा है कि ऐसा सामर्थ्य आपके पुत्र नन्दलाल में क्यों ? ॥ १४ ॥ श्रीनन्दराय जी ने कहा कि हे प्यारे गोपजन ? मेरी बात ध्यान देकर सुनो ! मेरी बात सुनने से कृष्ण के विषय की सम्पूर्ण शङ्का निवृत्त हो जायगी कि, यह मेरा पुत्र है या नहीं। मैं आप को श्रीकृष्ण के नामकरण संस्कार के अवसर जो वाक्य सुनाये थे वह मैं आप को कहता हूँ। मुझे भी आश्चर्य है कि गर्गमुनि ने वह कैसे जाना ॥ १५ ॥ श्रीगर्गाचार्यजी ने कहा कि नन्दराय ! यह आप का पुत्र श्रीकृष्ण भगवान है और प्रत्येक युग में अवतार लेते हैं आप के पुत्र के श्वेत-रक्त और पीत ये तीन वर्ण हो चुके हैं। आज यह "श्रीकृष्ण" कृष्ण वर्ण लेकर भूतल पर पधारे हैं ॥ १६ ॥ श्री गर्गाचार्यजी ने कहा—हे नन्दराय ! आप के कुमार श्रीकृष्ण ने पहले कहीं किसी देश में और काल में श्रीवसुदेवजी के यहाँ भी जन्म लिया है। इसी कारण इस रहस्य के मर्मज्ञ ऋषि लोग आप के पुत्र को "श्रीमान्" वासुदेव नाम से याने लक्ष्मीपति के नाम से भी जानते हैं ॥ १७ ॥ हे व्रजजन ! आगे बढ़ते श्री गर्ग जो ने कहा कि बाबा ! आप के पुत्र के, "गुणों के और कर्मों के अनुरूप अनेक नाम है और रूप भी है। भगवदिच्छा से यह मैं जानता हूँ लेकिन सामान्य जन जानते नहीं ॥ १८ ॥ राजन् ! आपके यह कुमार, गायें एवं गोकुल निवासियों आनन्ददायक होंगे। इसके माध्यम से तुम्हारा सर्व प्रकार से कल्याण होगा। इसकी सहाय से आप संसार के सारे संकटों को आसानी से पार कर जायेंगे ॥ १९ ॥ हे व्रजपते नन्दराय ! पूर्वकाल जब साधुजनों को दस्यु लोगों ने सताया था, और राजा न होने से प्रजा का कोई रक्षक नहीं था, तब इसकी कृपा से प्रजा ने आप के कुमार श्रीकृष्णजी की कृपा से उत्कर्ष प्राप्त कर उन दस्युओं पर विजय पाई थी ॥ २० ॥

य एतस्मिन् महाभागाः प्रीतिं कुर्वन्ति मानवाः । नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुराः ॥ २१ ॥
तस्मान्नन्द कुमारोऽयं [1]नारायणसमो गुणैः । श्रिया कीर्त्यानुभावेन तत्कर्मसु न विस्मयः ॥ २२ ॥
इत्यद्धा मां समादिश्य गर्गे च स्वगृहं गते । मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणम् ॥ २३ ॥
इति नन्दवचः श्रुत्वा गर्गगीतं व्रजौकसः ।
[2]दृष्टश्रुतानुभावस्य[3] कृष्णस्य मिततेजसः । मुदिता नन्दमानर्चुः कृष्णं च गतविस्मयाः ॥ २४ ॥
देवे वर्षति यज्ञविप्लवरुषा[4] वज्राश्मपर्षानिलैः [5]सीदत्पालपशुस्त्रि आत्मशरणं दृष्ट्वानुकम्प्युस्तमयन्[6] ।
उत्पाट्यैककरेण शैलमबलो लीलोच्छिलीन्ध्रं यथा बिभ्रद् गोष्ठमपान्महेन्द्रमदभित् प्रीयान्न इन्द्रो गवाम् ॥२५॥

इति श्रीमद्भागवते महापुराणे[7] दशमस्कन्धे[8] [9]षड्विंशोऽध्यायः[10] ॥ २६ ॥

कर्दमक्षमा

अन्वयः - एतस्मिन् ये महाभागा मानवाः प्रीतिं कुर्वन्ति एतान् असुराः विष्णुपक्षान् इव अस्य न अभिभवन्ति ॥ २१ ॥ हे ! नन्द ! तस्मात् श्रिया कीर्त्या अनुभावेन गुणैः अयम् कुमारः नारायणसमः "वर्तते" तत् कर्मसु विस्मयः न ॥ २२ ॥ इति अद्धा माम् समादिश्य गर्गे च स्वगृहम् गते, अहमपि अक्लिष्टकारिणम् कृष्णम् भगवन्तम् नारायणस्य अंशं मन्ये ॥ २३ ॥ व्रजौकसः दृष्ट श्रुत अनुभावस्य अमित तेजसः कृष्णस्य "कृते" इति गर्गगीतम् नन्दवचः श्रुत्वा गतविस्मयाः मुदिता कृष्ण "भगवन्तम्" च नन्दम् आनर्चुः ॥ २४ ॥ यज्ञ विप्लव रुषा वज्र अश्म पुरुष अनिलैः देवे वर्षति "सति" सीदत् पाल पशु स्त्रि गोष्ठम् आत्मशरणम् दृष्ट्वा अनुकम्पां उत्स्मयन् यथा अबलः लीला उच्छिलीन्ध्रं तथा एककरेण शैलम् एककरेण उत्पाट्य शैलम् बिभ्रद् महेन्द्रमदभित् गोष्ठम् अपात् सः नः गवाम् इन्द्रः प्रीयात् ॥ २५ ॥

इति षड्विंशोऽध्यायः ॥ २६ ॥

---

१. मन्ये नारायणं साक्षात् वीर. । २. दृष्टश्रुतानु–इदमधिकं भाति वीर. विज. । ३. भावास्ते–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ४. वर्षा–वीर. विज. । ५. बालपशुस्त्रिया–वीर. विज. । ६. स्मयः-विज. । ७. पारमहंस्यां संहितायां–गो प्रे. टी. । ८. पूर्वार्द्धे–गो. प्रे. टी. । ९. नन्दगोपसंवादे–गो. प्रे. टी । १०. चतुर्विंशोऽध्यायः–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्मात्तस्य कर्मसु विस्मयो नास्तीति नंदस्योक्तिः ॥ २२ ॥ इत्यद्धा साक्षान्मां प्रति समादिश्य गर्गे च स्वगृहं गते सति तदानीं तथा मन्यमानोऽपि इदानीं कृष्णं नारायणस्यांशं मन्ये । अत्र हेतुः । अक्लिष्टकारिणमिति ॥ २३–२४ ॥ गोवर्धनोद्धरणं सपरिकरमनुस्मरन्प्रकटितैश्वर्यस्य श्रीकृष्णस्य प्रीतिं प्रार्थयते । देव इति । यज्ञविप्लवेन या रुट् तया देवे इंद्रे वर्षति सति वज्राश्मपर्षानिलैः अशनिजलशर्करातीव्रवायुभिः सीदत्पालपशुस्त्रि आत्मशरणं सीदंतः पालाः पशवः स्त्रियश्च यस्मिंस्तत्तथा आत्मा स्वयमेव शरणं यस्य तद्गोष्ठं दृष्ट्वा अनुकंपी उत्स्मयन् हसन्प्रौढिमाविष्कुर्वन् शैलमुत्पाट्याबलो बालो लीलार्थमुच्छिलींध्रं यथा तथैकेन करेण बिभ्रद्दधद्गोष्ठबपात्पालितवान् । एवं महेंद्रमदभित् गवामिंद्र इत्युत्तराध्यायार्थं च स्मरति । स एवंभूतः श्रीकृष्णो नः प्रीयात्प्रीयतामिति ॥ २५ ॥

षड्विंशे दशमे व्यक्तः षड्विंशो दशमो हरिः ॥ व्यनक्तु पंचविंशं मां चतुर्विंशतितः पृथक् ॥ १ ॥

इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां षड्विंशोऽध्यायः ॥ २६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यस्मान्मदुक्तसदृशस्तस्माद्धेतोः । तस्य बालस्य ॥ २२ ॥ तदानीम् गर्गोपदेशसमये । तथा मन्यमानोपि नारायणसमं मन्यमानोऽपि । इदानीम् तदुपदिष्टस्य शैथिल्यादंशमिति । अत्र नारायणांशत्वे । न क्लिष्टं कर्त्तुमशक्यं यस्माद्दावानलपानगोवर्द्धनोद्धरणादिरूपात्तदक्लिष्टमलौकिकं कर्म, तत्कर्त्तुं शीलमस्येति तथा । यद्वा–क्लिष्टाः क्लेशिताःस्तद्रहिता अक्लिष्टास्तान्करोति निजसेवकानिति वा तम् ॥ २३ ॥ गतविस्मया अपास्तसंदेहाः । आनर्चुः अर्चयांचक्रुः । यद्वा—आनर्च्चुः वस्त्ररत्नस्वर्णमुद्रोपहारैर्वनात्सायं कृष्णेऽप्यागते तं पीतांबरहारकटककुंडलैरलंकृत्य जयजय व्रजभूभूषण चिरं जीवेत्युपलालयामासुः ॥ २४ ॥ भो राजन् इंद्रकोपोत्थिताद्वज्राश्मपर्षादिकमहासंकटाद्गोवर्द्धनमुद्धृत्य तदाश्रितं गोष्ठं रक्षंस्तन्मखप्रवर्त्तनपंडितः कृष्णो यथा सुरलोकगर्वहंता प्रीणाति तथा ब्रह्मकोपोत्थिताद्वाग्वज्रादिदं श्रीभागवतं वेदोदधित उद्धृत्य त्वां रक्षंस्तत्परायणमखप्रवर्त्तनपंडितः कृष्णो भक्तिरहितदार्शनिकभूसुरलोकहंता प्रीणात्वित्याशयेन परीक्षितं स्वांतःपातं मानयन्कृष्णप्रीतिं प्रार्थयते—देव इति । सपरिकरम् सांगोपांगम् । यद्वा—श्रीशुकः स्वेष्टदेवं पूर्वार्द्धप्रथमभागांते स्मरन्स्वरक्षां प्रार्थयते । यज्ञस्य विप्लवेन भंगेन । जलशर्कराः करकाः । सीदंतः कंपमानाः । शरणं रक्षिताः । अनुकंपी हृदयद्रवी भावयुक्तः । प्रौढिम् प्रागल्भ्यम् । "कंदल्यां च शिलींध्रः स्याच्छत्राक तन्निगद्यते" इति शब्दार्णवः । प्रीयताम् प्रीतो भवतु गवामिन्द्रः गोस्वामी 'गोविंदोऽधिकृतो गवाम्' इत्यमरः । अस्य पद्यस्य लक्षजपात्प्रतिपक्षनाशः । देवे वर्षतीति मंत्रस्य श्रीवेदव्यासः ऋषिः, श्रीकृष्णः परमात्मा देवता, जगती छंदः, सर्वकार्यसिद्ध्यर्थं जपे विनियोगः । 'करधृतवरशैलं वेणुवाद्ये रसालम्' इत्युक्तरीत्या ध्यानं च कार्यम्, अंते पायसेन होमो ब्राह्मणभोजनञ्च तेनाभिलषितसिद्धिः (२५) षड्विंशे इति । दशमे दशमस्कंधे षड्विंशेऽध्याये दशमो लक्ष्यभूत आश्रयशब्दोदितः परमात्मा नंदनंदनो व्यक्तः गोवर्द्धनोद्धृतिपूर्वकव्रजरक्षया यः प्रकटितोऽभूत्, स मां चतुर्विंशतितश्चतुर्विंशतितत्त्वघटितक्षेत्रसंज्ञशरीरात् पचविंशं जीवात्मानं पृथक् व्यनक्तु प्रकटयतु । मे देहात्मबुद्धिमपाकृत्य निजोपासने योजयत्वित्यर्थः । किंभूतः स षड्विंशः पञ्चविंशतितत्त्वनियामकत्वेनेश्वर इत्यर्थः । एकादशस्कंधे तत्त्ववादाध्याये षड्विंशतितत्त्ववादिमते "अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् । स्वतो न संभवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत् ॥" इत्यनेन पंचविंशो जीवः षड्विंश ईश उक्त इति (१) ॥ अत्र श्रुतयः–"जजान एव व्यबाधत स्पृधः प्रापश्यद्वीरोऽभिपौस्यं रणम् । अवृश्चदद्रिमवसंपदः स्पृधस्तभ्नान्नाकं स्वरमाया पृथुम्" इति । अयमर्थः—वीरः श्रीकृष्णो जजानः जातमात्र एव स्पृधः स्पर्द्धमानान् व्यबाधत विशेषेणैव बबाधे । अभिपौस्यं रणं प्रापश्यत् । पुंस इदं पौस्यं स्वयोग्यं रणं प्रापश्यत् । दैत्यैर्नानाविधान्संग्रामांश्चकारेत्यर्थः । किं च, अवसंपदस्संपदः स्वयमेव गोवर्द्धनरूपेण अव अनायासेन संपदः गोपैर्दत्तमन्नादिकं भक्षितवान् किं च, स्पृधस्पर्द्धमानं नाकं तत्पतिं नाकस्थं मेघचक्रं चास्तभ्नात्स्तंभयामास । यतः पृथुमद्रिमवृश्चत् उत्पाट्य धृतवान् । स्वरम्यया लीलयैवेत्यर्थः ॥ २५ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे षड्विंशोऽध्यायः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्दकुमारोऽयमित्यत्र नन्दस्य तव कुमार इति षष्ठीतत्पुरुषात् तथा तत्कर्मसु न विस्मय इत्यत्र तथापि स्वप्रभावेण पुत्रतया लब्धस्य तस्य नारायणस्येवास्य कर्मसु विस्मयो न कार्य्यः आश्चर्यं मत्वा गोपायनादुदासीनेन न भाव्यमिति तात्पर्य्यावगमात् । किञ्च, तत् कर्मस्वित्युपलक्षणं स्वाभाविकप्रेमविषयाश्रयत्वेऽपि न विस्मयः कार्य इति श्रीनन्दाभिप्रायः वस्तुतस्तु मिथो नित्यस्वाभाविकसम्बन्धो हेतुरिति न ज्ञायते स्म यद्यपि पूर्वं तैः श्रीगर्गवाक्यं ज्ञातमेवास्ति बकवधानन्तरम् अहो ब्रह्मविदां वाच इत्यादिवचनात् तथाप्यधुना तत्तदक्षरेण समग्रतयेति विशेषः इति । सप्तवाक्यानि ॥२२॥ यतोऽहं पितापि ततः प्रभृत्येनं श्रीनारायणोपममेव

मन्ये इत्याह–इतीति। अंशं तच्छक्त्यावेशिनं मन्ये वितर्कयामि ॥ २३ ॥ नन्दस्य वचः तद्द्वारा गर्गगीतं च श्रुत्वा। यद्वा, गर्गस्य गीतं गाथा श्रीभगवद्गीतादिवद्गीता वा यस्मिन् तत् आनर्चुः स्वस्वगृहात् गन्धचन्दनवस्त्रभूषणादिना आदौ श्रीनन्दस्यार्चनं श्रीकृष्णस्य तत एवोत्पन्नत्वात् तस्यापि पितृत्वेन मान्यत्वात् तच्च कृष्णे वनादागते सन्ध्यायामिति ज्ञेयम् यत्तूक्त श्रीपराशरेण श्रीकृष्णं गोपाः साक्षादेव पप्रच्छुरिति तेन च निजाधिक्यज्ञानाल्लज्जया सप्रणयकोपं प्रत्युक्तं यथा श्रीविष्णुपुराणे श्रीपराशर उवाच—

"गते शक्रे तु गोपालाः कृष्णमक्लिष्टकारिणम्। ऊचुः प्रीत्या घृतं दृष्ट्वा तेन गोवर्द्धनाचलम् ॥
वयमस्मान् महाभाग! भवता महतो भयात्। गावश्च भवता त्राता गिरिधारणकर्मणा ॥
बालक्रीडेयमतुला गोपालत्वं जुगुप्सितम्। दिव्यं च कर्म भवतः किमेतत्तात! कथ्यताम् ॥
कालियो दमितस्तोये प्रलम्बो विनिपातितः। धृतो गोवर्द्धनश्चायं शङ्कितानि मनांसि नः ॥
सत्यं सत्यं हरेः पादौ शपामोऽमितविक्रम! यथा त्वद्वीर्यमालोक्य न त्वां मन्यामहे नरम् ॥
प्रीतिः सस्त्रीकुमारस्य व्रजस्य त्वयि केशव!। कर्म चेदमशक्यं यत् समस्तैस्त्रिदशैरपि ॥
बालत्वं चातिवीर्य्यं च जन्म चास्मास्वशोभनम्। चिन्त्यमानममेयात्मन्! शङ्कां कृष्ण प्रयच्छति ॥
देवो वा दानवो वा त्वं यक्षो गन्धर्व एव वा। किं वाऽस्माकं विचारेण बान्धवोसि नमोस्तु ते ॥

श्रीपराशर उवाच ॥

क्षणं भूत्वा त्वसौ तूष्णीं किञ्चित्प्रणयकोपवान्। इत्येवमुक्तस्तैर्गोपैराह कृष्णो महामुने! ॥
मत्सम्बन्धेन वो गोपाः! लज्जा न जायते। श्लाघ्यो वाहं ततः किं वा विचारेण प्रयोजनम् ॥
यदि वोऽस्ति मयि प्रीतिः श्लाघ्योऽहं भवतां यदि। तदात्मबन्धुसदृशी बुद्धिर्वः क्रियतां मयि ॥
नाहं देवो न गन्धर्वो न यक्षो न च दानवः। अहं वो बान्धवो जाता नातश्चिन्त्यमतोन्यथा" ॥ इति।

तथा वैशपायनेनोक्त तत्प्रतिवचनम्—

"मन्यन्ते मां यथा सर्वे भवन्तो भीमविक्रमाः। तथाहं नावमन्तव्यः सजातीयोस्मि बान्धवः! ॥
यद्यहं भवतां श्लाघ्यो बान्धवो देवसप्रभः। परिज्ञानेन किं कार्यं यद्येषोऽनुग्रहो मम" इत्यादि।

तच्च श्रीनन्दोत्तरेण हन्त सन्देहा अपि परमौत्सुक्येन साक्षात् श्रीभगवन्मुखादेव श्रोतुं दृढयितुं च तमेवोचुरिति कल्पनया परिहार्यमिति ॥ २४ ॥ एवं समाप्यापि परमानन्देन तदेव गोवर्द्धनोद्धरणं सपरिकमनुस्मरन् तत्र च निजभावाश्रयस्य गोष्ठस्य निजभावविषयेण गवेन्द्रतयानुध्यातेन श्रीभगवता कृतां रक्षां तदर्थमिन्द्रमखभङ्गभङ्गीं चानुस्मृत्य बाढं प्रीयमाणस्तां प्रीतिमेव सर्वं पुरुषाधिकतयाऽनुभवन् तां च पुनः श्रीगवेन्द्रविरचितप्रीत्यनुगृहीतत्वे सति परमास्वादवतीं जानस्तत्प्रीतिमेव प्रार्थयते, देवेति। तत्र देवे वर्षतीत्यप्रतिकार्यत्वं सत्रासमिव दर्शितं तत्रापि यज्ञविप्लवरुषेत्यतिशयः स्वरूपतोप्यतिशयमाह—वज्रेति। पर्षेतिरेफसंयोगीपाठः क्वचित् वज्रादिभिः सीदन्तः पालाः गोपाः पशवस्त्रियश्च यस्मिन् तत् तत्राप्यतिशयः आत्मशरणमिति तस्मात् मच्छरणमित्यादेः तत्राप्यतिशयः दृष्ट्वा स्वयं चक्षुर्विषयी कृत्येति अत एवानुकम्पीति भूम्नि मत्वर्थीयः एवं कृपाव्यग्रेऽपि तस्मिन् शौर्यं त्वव्यग्रमेवासीदित्याह–उत्स्मयन्नित्यादि। इन्द्रं प्रति सोत्प्रासं स्मयन्नित्यर्थः। तादृश एव सन् शैलमुत्पाट्य तत्राप्येकेन वामेन करेण तत्रापि बालो लीलाप्रयोजनकमुच्छिलीन्ध्र यथा तद्वत् तत्रापि बिभ्रत् सप्ताहोरात्रानेकरोत्या दधत् तदेवं विस्मयहर्षौत्सुक्यधृतिभिराविष्ट आह–गोष्ठमपादिति। सगर्वहर्षमाह—महेन्द्रमदभिदिति। गवामिन्द्रोपि महेन्द्रस्य मदभेत्तेति सोत्प्रासं वस्तुतस्तु गवेन्द्रत्वे तस्मिन् महेन्द्रत्वमपि समुद्रे नदीवत्प्रविशतीति भावः। प्रीयादित्याशीर्लिङ् तत्प्रीतौ जातायां मम गोष्टजनानुगतत्वमपि सेत्स्यतीति भावः। तथैव श्रीगोष्ठजनभावेनाह–इन्द्रो गवामिति। नोऽस्माकं गोकुवेन्द्रो वा तदेवं तदेव स्वपुरुषार्थत्वेन दर्शितं श्रीब्रह्मवदेवेति ज्ञेयम् अत्र श्रुतिश्च "जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभिपौंस्यं रणं अवृश्चदद्रिमवसस्यदः स्पृधस्तभ्नान्नाकं स्ववश्यया पृथुम्" इति अयमर्थः वीरः श्रीकृष्णो जज्ञानो जातमात्र एव स्पृधः स्पर्द्धमानान् दैत्यान् व्यबाधत विशेषेणैव बबाधे अभिपौंस्यं रण प्रापश्यत् पुंस इदं पौंस्यं त्वयोग्यं रणं प्रापश्यत् दैत्यैर्नानाविधान् सङ्ग्रामांश्चकारेत्यर्थः। किञ्च, अवसस्यदः स्वयमेव गोवर्द्धनरूपेण अव अनायासेन सस्यदः गोपैर्दत्तमन्नादिकं भक्षितवान् किञ्च, स्पर्द्धमानं नाकं तत्पतिं नाकस्थं मेघचक्रं चास्तभ्नात् स्तम्भयामास यतः पृथुमद्रिमवृश्चत् उत्पाट्य धृतवानित्यर्थः। स्ववश्यया लीलयैवेति ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां षड्विंशोऽध्यायः ॥ २६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यतोऽहं पितापि ततः प्रभृति तं नारायणोपममेव मन्ये इत्याह—इतीति; यद्वा, 'तत्कर्म्मसु' इत्यादिकं पूर्व्वमनुक्तमपि अत्रोक्तबलात् पूर्व्वमपि श्रीगर्गवाक्यान्ते द्रष्टव्यम्। इति-शब्देन तस्यापि गर्गसमादेशे प्रवेशनात्; यद्वा, गोपायस्वेत्यादिपरिवर्त्तेन

'तत्कर्म्मसु' इत्यादिश्लोकैकपादोगर्गेण साक्षादनुक्तोऽपि तात्पर्य्येण प्राप्तः। श्रीनन्देन विरचय्य गर्गसमादिष्टतयोक्तः; तया तेषां श्रद्धोत्पादनेन विस्मयनिरसनार्थमिति दिक्। स्वगृहं गत इति, अन्यथा तदानीमेव तथामनने चापल्यप्रसक्तेः, अतः पूर्व्वं श्रीवादरायणिनापीदृशमेवोक्तम्। इत्यात्मनो गाम्भीर्य्यं विचारपरत्वञ्च तेषां श्रद्धार्थं सूचितम्। नारायणः समो यस्येति नारायणादधिकत्वेऽपि नारायणसाम्येऽपि वा नारायणांशमिति स्नेहभरविवृद्ध्यर्थमेवैश्वर्य्यगोपनम्; यद्वा, नारायणस्यांशं कमपि भागं तत्समं कमप्युत्तमपुरुषविशेषमित्यर्थः, मन्ये जानामि; यद्वा, निजात्मजमपि नारायणांशं मन्ये, तस्य समादेशादरात्, न च केवलं तदोदेशादरेण स्वानुभवादपीत्याह—अक्लिष्टकारिणमक्लेशेनैवात्यद्भुतकर्म्माचरणशीलमित्यर्थः ॥ २३ ॥ नन्दस्य वचस्तद्द्वारा गर्गगीतञ्च श्रुत्वा; यद्वा, गर्गस्य गीतं गाथा श्रीभगवद्गीतादिवत् गीता वा यस्मिन् तत्; गतविस्मयाः सन्तः श्रीकृष्णस्य नारायणांशत्वेन परमपुरुषोत्तमतया तत्तत्कर्म्मसम्भवात्, अतएव मुदिताश्च सन्तो गतविस्मयाश्च बभूवुरिति वा। आदौ नन्दस्यार्च्चनं तद्वाक्यतो मुदितत्वात् कृष्णस्यापि पितृत्वेन मान्यत्वात्। यद्वा, कृष्णस्य वनादागतस्यैव सताऽर्च्चनात् पश्चान्निर्द्देशो युक्त एव; तथोक्तं पराशरेण—श्रीकृष्णं गोपाः साक्षादेव पप्रच्छुरिति तेन च सप्रणयकोपं प्रत्युक्तम् (वि० पु० ५।१३।१०-११)—

'मत्सम्बन्धेन भो गोपा यदि लज्जा न जायते। श्लाघ्यो वाहं ततः किं वो विचारेण प्रयोजनम् ॥
यदि वोऽस्ति मयि प्रीतिः श्लाघ्योऽहं भवतां यदि। तदात्मबन्धुसदृशी बुद्धिर्वः क्रियतां मयि ॥' इत्यादि।

तथा वैशम्पायनेनोक्तं तत् प्रतिवचनम् (हरिवंशे बिष्णु० प० २०।११,१३)—

मन्यन्ते मां यथा सर्व्वे भवन्तो भीमविक्रमाः। तथाहं नावगन्तव्यः स्वजातीयोऽस्मि बान्धवः ॥
यद्यहं भवतां श्लाघ्यो बान्धवो देवसप्रभः। परिज्ञानेन किं कार्य्यं यद्येषोऽनुग्रहो मम ॥' इत्यादि,

तच्च कल्पभेदव्यवस्थया, किंवा श्रीनन्दोत्तरेण हतसन्देहा अपि परमौत्सुक्येन साक्षाच्छ्रीभगवन्मुखादेव श्रोतु द्रढयितुञ्च साक्षात्तमूचुरिति कल्पनया परिहार्य्यम्, तच्च सुप्रसिद्धत्वादत्र श्रीबादरायणिना नोक्तमिति ॥ २४ ॥ एवं सर्व्वेषां व्रजजनानां प्रीतिविशेषसम्पत्त्या अतृप्त्या प्रीतिमाशास्ते—देव इति। निजव्रजजनत्वाभिमानेन द्वेषतस्तन्नामाग्रहणात् यद्वा, दीव्यति क्रोधेन द्योतते दीप्यत इति; किंवा, श्रीकृष्णं विजिगीषत इति देवस्तस्मिन् यज्ञस्य निजार्च्चनस्य विप्लवो नाशस्तत्परिवर्त्तेन श्रीगोवर्द्धनयज्ञप्रवर्त्तनात्, तेन रुट् तया वर्षति सति इति वृष्टेराधिक्यं सूचितम्। अतएव वज्रादिभिः सीदन्तः पाला गोपाः पशवश्च गवादयः स्त्रियोऽपि यस्मिन् तत्, पश्वादीनां यथोत्तरमवसादस्याधिक्यम्, तेन चानुकम्पाया आधिक्यञ्च तेषु ज्ञेयम्; उत्पाट्य समूलमुद्धृता, अन्यत्तैर्व्याख्यातमेव; यद्वा, अवलो बाल्ये वर्त्तमान इत्यर्थः, किंवा, बलदेवरहित इति तदेकमाहात्म्यार्थं तत्र तस्य साहाय्यादिकं निरस्तम्, यद्वा, अकाराख्यात् विष्णोरपि सकाशाद्बलं शक्तिर्यस्येति तत्र तत्र तत्तच्छक्तिविशेषप्रकटनात्, यथा लीलोच्छिलीन्ध्रमिति दृष्टान्तेन लीलयानायासेन धारणं समर्थितमेव। महेन्द्र-शब्देन मदस्य स्वाभाविकत्वं सर्व्वत आधिक्यञ्च सूचयति, अतएवात्र तन्नामग्रहणम्, यद्वा, महान् भगवत्प्रियगोष्ठविषयकमहाकोपात् य इन्द्रस्य मदः, तं भिनत्तीति तथा सः इति महापराधिनोऽपि परमहितकारित्वमुक्तम्। अतएवानुकम्पी कृपाशीलः, अतएव नोऽस्मान् दीनजनान् तदेकगतीन् वा प्रति प्रीयताम्, एतच्च प्रेमभराकुलश्रीपरीक्षिदाश्वासनार्थम्, अतएव तदेकप्राणैर्व्रजजनैरपि तत् सोढमिति बोधितम् ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां षड्विंशोऽध्यायः ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्यद्धेति नन्दोक्तिः। इति नन्दवच इत्यादिस्तु शुकोक्तिः इति इत्थमद्धा स्फुटं मां समादिश्य सम्यग्ज्ञापयित्वा गर्गे स्वगृहं गते सति अहं कृष्णं साक्षात् नारायणं मन्ये तत्र हेतुं वदन् विशिनष्टि अक्लिष्टकारिणम् अक्लिष्टानि क्लेशरहितान्यतिमानुषचेष्टितानि करोतीति तथा तम् अतो नारायणे मन्य इत्यर्थः ॥ २३ ॥ इत्येवंविधं गर्गगीतं नन्दवचः नन्देनोदितं श्रुत्वा सर्वे व्रजौकसो विगताश्चर्या मुदिताश्च नन्दं कृष्णं चानर्चुः कृष्णं प्रति गतविस्मया नन्दमानर्चुर्बह्वमन्यन्तेति वा ॥ २४ ॥ गोवर्द्धनोद्धरणं सपरिकरमनुस्मरन् प्रकटितैश्वर्य्यस्य भगवतः स्वविषयप्रीतिं प्रार्थयते शुकमुनिः—देव इति। यज्ञविघातेन हेतुना या रुट् तया हेतुभूतया देवेन्द्रे वर्षति सत्यशनिशिलावर्षवातैः सीदन्तः क्लिश्यन्तः बालाः पशवः स्त्रियश्च यस्मिन् तथा स्वयमेव शरणं रक्षिता रक्षणोपायश्च यस्य तद्गोष्ठं दृष्ट्वा स्त्रियात्मेतीयङार्षः अनुकम्पायुक्तः उत्स्मयन् स्वमाहात्म्यमाविश्चिकीर्षुस्तावद्धसन् अबलः बालोपि शैलं लीलार्थमुत्पाटितं छत्राकमिवैकेन करेण उत्पाट्य बिभ्राणो गोष्टं यो ररक्ष स महेन्द्रमदभिद्गवामिन्द्रो नोऽस्माकं प्रीयत् प्रसन्नो भवतु यदुत्तराध्यायस्थं प्रीयात् प्रसन्नो भवतु यदुत्तराध्यायस्थं सुरभिवाक्यादि "त्वं न इन्द्रो जगत्पते" इत्यादि तदपि अनुसन्दधता शुकेन विशेषितो गवामिन्द्र इति ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां षड्विंशोऽध्यायः ॥ २६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

आनर्चुः पूजयामासुः ॥ २४ ॥ श्रीशुकः प्रथमभागसमाप्तिसूचनाय स्वेष्टदेवतां कृष्णमभिष्टुवन् तत आत्मारक्षामाशास्ते–देव इति । यज्ञविप्लवः यज्ञभङ्ग इत्यर्थः । तस्मादुतत्रया रुषा वज्राश्मवत् वज्रपाषाणवत् कर्कशैर्वर्षैः अनिलैश्च स्त्रिया सह सीदन्तः कम्पमानाः बालाश्च पशवश्च यस्मिंतत्सीदद्बालपशु आत्मा शरणं रक्षिता यस्य तत्तथा अनुकम्पी हृदयद्रवीभावयुक्तः उत्स्मयः उद्गतस्मयः निरस्तदर्पः उत्कृष्टमन्दहासो वा महेन्द्रस्य मदं गर्वं भिनत्ति निर्मूलयतीति महेन्द्रमदभित् अबलो स्थूलः अणुर्बालः लीलासाधनमुत्फुल्लं शिलीन्ध्रं यथा तथैकेन हस्तेन शैलं शिलोच्चयं पर्वतमुत्पाट्य बिभ्रत् गवामिन्द्रो गोविन्दोऽस्मभ्यं प्रीयात् प्रीतो भवत्वित्यन्वयः । पायान्न इति पाठे नोऽस्मान् रक्षत्वित्यर्थः । "गोस्वामी गोविन्दोऽधिकृतो गवाम्" इत्यमरः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां षड्विंशोऽध्यायः ॥ २६ ॥

(विजयध्वजरीत्या चतुर्विंशोऽध्यायः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्कर्मसु न विस्मय इति श्रीगर्गस्यैवाभिप्रायकथनं तदुत्तर इतिशब्दोऽप्यन्वेति "गोपायस्व समाहितः" इति त्वनुपयोगान्नोदाहृतम् अंशं शक्त्या वेशिनम् ॥ २२–२३ ॥ गर्गस्य गीतं यत्र तत् आनर्चुः स्वस्वगृहेभ्यो गन्धमाल्यवस्त्रादिना एतच्च सन्ध्यावृत्तं सम्वादस्तु श्रीकृष्णे वनं गतएवेति गम्यते ॥ २४ ॥ पुनस्तामेव लीलां स्मरन् तत्र दर्शितगोकुलकृपातिशयं श्रीकृष्णं स्मरंस्तत्कृपामेव स्वपुरुषार्थत्वेन प्रार्थयमानस्तमेव निजेष्टदेवत्वेन व्यञ्जयति–देव इति ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे षड्विंशोऽध्यायः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ गोवर्द्धने घृते सति विस्मितैर्गोपैः पृष्टो व्रजराजो गर्गोक्तिमनुस्मृत्योपसंहरति—इत्यद्धा मामित्यादि । हे गोपाः ! किमस्मिन् विस्मयं कुरुथ ? एवमेवं गर्गो यदाह, तत्सन्देहेनालम् । तत्कथनात् प्रभृति कृष्णं नारायणस्याश्वानन्दप्रदम्, तस्मादपि परमित्यर्थः । कीदृशम् ? अशम् उपं विष्णु शं सुखं स्वरूपम् ; अथवा, अंश्यते विभज्यते अंशसमूहोऽस्मादिति अंशः परिपूर्णभागः, अपादानसाधनः । अथवा, आमिति स्मृतौ गर्गवाक्यस्मरणार्थः । नारायणस्य शं सुखस्वरूपं रूपमिति सरस्वतीसुरसम् । व्रजराजस्तु 'नारायणस्यांशं मन्ये' इत्येवावदत् । अतोऽत्र कोऽपि सन्देहो मा कर्तव्यः ॥ २४–२५ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे षड्विंशोऽध्यायः ॥ २६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मन्ये नारायणस्यांशं कृष्णमित्यादि । अंश्यते विभज्यतेऽवतार—समूहोऽस्मादनेनेति वा अंशः परिपूर्णभागः, पूर्णदेवांशकल्पना,–नारायणस्यापि अशत्वेन भागकारिणम् । यद्वा, अमिति स्मृतौ पूर्वोक्तगर्गवचनस्मृतौ नारायणस्य शं कल्याण कल्याणप्रदमीश्वरत्वात् मान्यं जानामीत्यर्थः । अतएव अक्लिष्टकारिणं सर्वानेव नारायणप्रमृतीनक्लिष्टान् कर्तुं शीलं यस्य तम् ॥ २४ ॥ प्रीयान्न इत्यादिः सभाजनं श्रीशुकस्योक्तिः ॥ २५ ॥

इति षड्विंशोऽध्यायः ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हे नन्द ! तस्मादयं कुमार इति गर्गोक्तेर्न केवलमयं ममैव कुमारोऽपि तु युष्माकमपीत्यतोऽस्मिन् ऐश्वर्ये दृष्टेऽपि वात्सल्यं प्रतिदिनमाशीःशतञ्च न त्याज्यमिति विवक्षयैव "तस्मान्नन्दात्मजोऽयन्ते" इति गर्गोक्तेरनुक्तिः नारायणसम इति नारायणावेशादेव नत्वयं नारायणः यथा सूर्यकान्तशिलापि सूर्यसमेत्युच्यते तस्मादयं नेश्वरः नापि निकृष्टो जीवः किन्तु लोकोत्तरकर्मा कोऽप्ययमस्मस्मत्कुलभूषण एव अत एव तेन गर्गेणैव सर्वान्ते प्रोक्तं "तत्कर्मसु न विस्मय" इति तस्य लोकातीतकर्मसु अत्यद्भुतदृष्ट्या अयमीश्वर इति बुद्धिर्न कर्त्तव्येति तेनैव निषिद्धत्वादस्मिन् युष्मदनुकम्पे चिरं जीवेत्याशीरेव कार्या न त्वौदासीन्यमिति फलतो गोपायस्व समाहित इति गर्गोक्तिरेवोक्ता गोपानां विस्मयनिरसनेन संशयापनोदनञ्च कृतमिति ॥ २२ ॥ अंशं तच्छक्त्यावेशिनं मन्ये वितर्कयामि अस्मान् अक्लिष्टान् कर्त्तुं शीलं यस्य तम् ॥ २३ ॥ आनर्चुः वस्त्ररत्नस्वर्णमुद्रोपहारेण सम्मानयामासुः कृष्णे वनादागते सति सायञ्च तं पीताम्बरहारकटककुण्डलकिरीटैरलङ्कृत्य जय जय व्रजभूमिभूषण ! चिरं जीवेत्युपलालयामासुः ॥ २४ ॥ भोः राजन्निन्द्रकोपोत्थिताद्वज्राश्मवर्षादिकात् महासङ्कटाद्गोवर्द्धनमुद्धृत्य तदाश्रितं गोष्टं रक्षन् तन्मखप्रवर्त्तनपण्डितः कृष्णो यथा सुरलोकगर्वहन्ता प्रीणाति तथैव ब्रह्मकोपोत्थिताद्वाग्वज्रादिदं श्रीभागवतं वेदोदधिभ्य उद्धृत्य त्वां रक्षन् तत्परायणमखप्रवर्त्तनपण्डितः कृष्णो

भक्तिरहितदार्शनिकभूसुरलोकगर्वहन्ता प्रीणात्वित्याशयेन परीक्षितः स्वान्तःपातं मानयन् कृष्णप्रीतिं प्रार्थयते—देवे इति। यज्ञविप्लवेन या रुट् तया देवे इन्द्रे वर्षति सति वज्रैरश्मभिश्च पुरुषानिलैश्च सीदत्पालपशुस्त्रिसीदन्तः पालाः पशवस्त्रियश्च यस्मिन् तत्तथा आत्मा स्वयमेव शरणं यस्य तद्गोष्ठं दृष्ट्वा अनुकम्पी कृपालुरुत्स्मयन् प्रौढिमाविष्कुर्वन् अबलो बालो लीलया यथा उच्छिलीन्ध्रमेकेनैव करेणोत्पाटयति तथैवोत्पाट्य यो गोष्ठमपात् स गवामिन्द्र इति इन्द्र एवेन्द्रस्य मदं भिनत्तीति न्यायः कृष्णो नो मां परीक्षितम् एतान् श्रोतॄंश्च प्रति प्रीयात् प्रीणातु ॥ २५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । षड्विंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ २६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नारायणस्यांशमिति "जगृहे पौरुषं रूपं भगवान्" इत्यनेन भगवदवतारः "नारायणोऽङ्गम्" इत्यनेन च कृष्णस्याङ्गभूतः नारायणः इत्युक्तम् "कृष्णस्तु भगवान्स्वयम्" "एष वै भगवान्साक्षादाद्यो नारायणः पुमान्, स वै किलायं पुरुषः पुरातनो, य एक आसीदविशेष आत्मनि" इत्यादिभिः कृष्णस्य स्वयं भगवत्त्वमुक्तम्। एवं सति गर्गेण सम्भावनादोषानुत्पादनाय नारायणसम इत्युक्तम् श्रीनन्देन तु गोपासम्भावनानुत्पादनाय नारायणांशं मन्ये इत्युक्तम्। अन्ये (षां) च स्वस्वबुद्ध्यनुसारेण मेनिरे देवप्रवरौ क्व च गायमानौ" "कृष्णं मर्त्यमुपाश्रित्य" "मल्लानामशनिर्नृणां नरवरो स्त्रीणां स्मरो मूर्त्तिमान्" इत्यादिषु देवप्रवरत्वनटतुल्यत्वमर्त्यत्वादयः नानाप्रतीतयः श्रीकृष्णे जाताः श्रीकृष्णस्तु न नारायणतुल्यः न च नारायणांशः न च नटतुल्यो मर्त्यांशन्यादिरूपं किन्तु सर्वशक्तिः सर्वात्मा सर्वकल्याणगुणराशिः निःसमानातिशयः सर्वकारणकारणः ब्रह्मनारायणपरमपुरुषादिनामध्येयः सर्ववेदैकवेद्यः सर्वस्मृतिपुराणेतिहासप्रसिद्धः इह च प्रतिप्रकरणं सुप्रसिद्धस्वरूपगुणादियाथात्म्य इति दिक् ॥ २३–२४ ॥ सर्ववेदार्थवित् भगवत्पुत्रः श्रीशुको महामुनिः दीनानुकम्पी स्वदुर्मदघ्नत्वादिगुणनिधेः स्वोपास्यस्य श्रीपुरुषोत्तमस्य प्रीतिं प्रार्थयते—देवे इति यज्ञस्य विप्लवेन विघातेन या रुट् रोषस्तया हेतुभूतया देवे वर्षति सति वज्राश्मवर्षानिलैरशनिजलोपलकठिनवातैः सीदन्तः क्लिशयन्तः पालाः पशवस्त्रियश्च यस्मिन् तत् आत्मा स्वयमेव शरणं रक्षिता यस्मिन् तत् गोष्ठं दृष्ट्वा अनुकम्पी उत्स्मयन् इन्द्रबाल्यदर्शनेन हसन् शैलमुत्पाट्य अबलो बालो लीलार्थमुच्छिलीन्ध्रं यथा तथा एकेन करेण बिभ्रत् दधत् गोष्ठमपात् पालितवान् इत्थं महेन्द्रमदभित् गवामिन्द्रः श्रीगोपालः नोऽस्माकं प्रीयात् प्रीयतां प्रसन्नो भवत्वित्यर्थः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षड्विंशोऽध्यायार्थप्रकाशः ॥ २६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दृष्टान्तमन्यमनार्चक्षाणो गर्ग एवमाहेत्याह ॥ विष्णुपक्षानिति ॥ २१ ॥ तत्कर्मसु कृष्णकृतकर्मचरितेषु विस्मयो न कार्यः ॥ २२ ॥ मन्य इति साक्षान्नन्दवचः। नन्दमेतादृशो नन्दनस्तवेत्यानर्चुः पूजयामासुः। गतविस्मया नारायणश्चेत्सर्वं सम्भावितमिति गतविस्मयाः कृष्णं चानर्चुः ॥ २३–२४ ॥ निरन्तरहरिचरितसमीरणपरवशचेताः शुको बाललीलेदमवधिरिति मङ्गलं तन्वन्सर्वमङ्गलापतित्वांशिसदाशिवः सुतां गृहीत्वोदधार धरं किञ्च कैलासागिर्यगारश्चेति किञ्चिदनुबन्धेन सपरिकरमिमं गिर्युद्धरणपराक्रममनुवर्ण्य श्रीकृष्णो गोगोपानिव नः पायादपायादिति प्रार्थयते ॥ देव इति। यज्ञस्य विप्लवो भङ्गस्तज्जनिता च सा रुट् च रोषश्च तया देवे मघोनि वर्षति सति वज्राश्मवददायदृषद्वद्विद्यमानं च तद्वर्षं तथाऽनिला वायवश्च तैः सीदन्तश्च सीदन्त्यश्च कम्पमाना बालाः पशवश्च स्त्रियश्च यस्मिंस्तत्। परवल्लिंगं द्वन्द्वतत्पुरुषयोरिति स्मरणात्। विशेषस्तु अधिकारश्च तद्धानिः प्रसङ्गादेव चिन्तितावित्यनुव्याख्यानव्याख्यासुधादितो बोध्यः। स्त्रियात्मेत्यत्राधिकारिवर्जितं च स्त्रियात्मादिकं। त्रियाद्यवयवात्मिकामितिवद्यणागमः। यद्वा या रमाया आत्मा स्वाम्ययं शरणं यस्य तत्। लक्ष्मीराकर उच्यत इति विश्वः। गोष्ठं दृष्ट्वाऽनुकम्पी शिखादिः। अनुकम्पा हि हृदयद्रवणं साऽस्यास्तीति सः। भक्तानुकम्पादतिशुद्धसंविद्वात्र इत्यनुव्याख्याव्याख्यासुधायामनुकम्पादनुक्रोशादित्युक्तेरकारान्तोऽनुकम्पशब्दः। ततश्चात इति निठनावितीन्वा। हृदयस्य द्रवीभावस्त्वनुकम्पेति कथ्यते। उपकारं कर्तुमिच्छा कृपेत्याहुर्मनीषिण इति शब्दनिर्णय इति चतुर्थतात्पर्योक्तेः। उत्स्मय उत्कृष्टहास एककरेण शैलं गोवर्धनं यथाऽबलबालो लीलोच्छिलीध्रं लीलासाधनं छत्राकं वा। उत्कृष्टं कदलीपुष्पं वा धरति तथोत्पाट्य। अधिपुरन्ध्रिशिलीन्ध्रसुगन्धिभिरिति माघव्याख्यायां शिलीध्राणां कदलीकुसुमानां कदल्यां तु शिलीध्रं स्यादिति शब्दार्णव इत्युक्तेः। उत्कृत्य बिभ्रदेककरेणेत्यत्रान्वेति। अपादपीपलदिति। महेन्द्रस्य मदोहन्ता तं भिनत्तीति स तथा गवामिन्द्र इदानीं गवां वेदादिवाचामिन्द्रः प्रतिपाद्यतयेति नः पायात्। वेदादिप्रतिपत्तिदोऽपि सन्नः पायादिति प्रकृतव्याकरणाननुगुणं प्रार्थनमिति मन्तव्यम् ॥ २५ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीसुबोधिनी

किञ्च य एतस्मिन् महाभागाः परमभाग्यव्यतिरेकेण परं नास्मिन् प्रीतिर्भवत्येतादृशे प्रीतिं कुर्वन्ति ते मानवा अपि भूत्वा शत्रून् जिग्युः, तदाह नारय इति, अरय एतान् नाभिभवन्ति यतो विष्णुपक्षान् विष्णुः पक्षे येषां वैष्णवानासुरा असुरा-

वेशिनो यथा लोकेपि नाभिभवन्ति, लौकिकी कथेयमिति दृष्टान्तः ॥ २१ ॥ एवं भगवत्सामर्थ्यमुपपाद्योपसंहरति **तस्मादिति**, अत्र **पाठभेदः**, अयं कुमारो हे **नन्द नारायणसमो गुणैः** कृत्वा नारायणतुल्यः **श्रिया** कीर्त्यानुभावेन च नारायणतुल्यः, एतावद् गर्गवाक्यं, स्वयमाह **तत्कर्मसु न विस्मय** इति, तस्य भगवतः **कर्मसु** गोवर्धनोद्धरणादिषु **विस्मयो** न कर्तव्यः ॥ २२ ॥ एतादृश एवायं मम गृहेवतीर्ण इति ममाप्यत एवात्र न विस्मय इति सम्मत्यर्थं स्ववृत्तान्तमाहेत्यद्धेति, **अद्धा** साक्षान् **मां प्रति सम्यगादिश्य** भगवत्स्वरूपमुक्त्वा **गर्गे स्वगृहं गते कृष्णं नारायणस्यांशमेवाहं मन्ये**, चकारादहमपि गृहे गत्वा, पुरुषोत्र **नारायणस्तस्यायमंशावतार** इत्येतावज् ज्ञातवान् न त्वधिकं, अधिकमग्रे वक्ष्यति, **ब्रह्मांशोयमित्यस्मिन्नर्थे न केवलं** वाक्यं प्रमाणं किन्त्वनुभवोप्यस्तीत्याहा**क्लिष्टकारिणमिति**, न क्लिष्टं कदाचित् कृतवान् करोति वा, यदि जीवः स्यात् क्लिष्टं कुर्यात्, व्यसनैः पीडितो हि तथा करोति न त्वपीडितः, व्यसनाभावस्तु ब्रह्मण्येव यतः कृष्णो ब्रह्मेत्यहं **मन्ये** ॥ २३ ॥ एवमुपदेशे यज् जातं तदाहेतीति, गर्गेण पूर्वं **गीतं** वस्तुतो **गर्गा**दपि पूर्वसिद्धं तदिदानीं **नन्दवचः**, तच् **छ्रुत्वा व्रजौकसो**त्यन्तासम्भावनारहिता मुदिता जाता इतिसम्बन्धः, न केवलं वाक्यप्रामाण्यं स्वयमपि कृष्णं तथाभूतं दृष्टवन्त इत्याह **दृष्टश्रुतानुभावस्येति**, दृष्टः श्रुतश्चानुभावो यस्य; अमितं च **तेजो** यस्य, स्वरूपतोपि सदानन्दस्य सम्बन्धि गर्गवाक्यं तच् छ्रुत्वा **मुदिताः** सन्तो **नन्दमानर्चुः कृष्णं** च गतविस्मयाश्च जाताः, महान् नन्दो यस्यैतादृशः पुत्र इति नन्दपूजा भगवांस्तु पूजनीय एव, आश्चर्याभावः फलं, एवमध्यायत्रयेण सन्देहाभावपूर्वकमुपधर्मनिवृत्तिपूर्वकं भगवन्माहात्म्यं भगवद्धर्मश्च स्थापितः ॥ २४ ॥ एतादृशधर्मप्रवर्तकं भगवन्तं **शुको** नमस्यति **देव** इति, स भगवान् **गवामिन्द्रो नोस्माकं प्रीयात्** प्रीतो भवतु, स एव **प्रीतो भवति यः कस्यचित् कदाचित्** प्रीतो भवति, अतस्तस्य प्रीतिलीलामाह **देव इन्द्रे वर्षति** सति, वर्षणमपि न यादृच्छिकं किन्तु **यज्ञविप्लवरुषेन्द्र**यागस्य **विप्लवो** नाशस्तेन रुड् रोषो न केवलं वृष्टिमात्रं किन्तु **वज्राश्मपरुषानिलैः** सह **वज्रोश्मा परुषानिलश्च** सात्त्विकतामसराजसा निरूपिताः, ततः किमत आह **सीदत्पालपशुस्त्रीति**, **सीदन्तः** पालाः पशवः स्त्रियश्च यत्र व्रजे तत् सीदत्पालपशुस्त्रि तादृशमप्यात्मशरणमात्मैव **शरणं** रक्षको यस्य तादृशं **दृष्ट्वानुकम्पी** जातः कृपावान् जातः, ततस्तद्दुःखनिवृत्त्यर्थमुत्स्मयन्नूर्ध्वं स्मितं कुर्वन् गोपानामज्ञानं स्थापयन्नेकैककरेण **शैलं** गोवर्धन**मुत्पाट्याबलो** बालो यथा लीलयोच्छिलीन्ध्रमुत्पाट्य बिभर्ति तथा **बिभ्रद् गोष्ठमपाद्** रक्षितवान्, न केवलं गोष्ठरक्षैव फलं किन्तु **महेन्द्रमदभिद्** महेन्द्रस्यापि **मदं भिनत्ति गवां चेन्द्रो** गोविन्द इत्याख्यां बिभर्ति, भाव्यर्थोयं, स **प्रीया**दितिप्रार्थना ॥ २५ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तरसाधनप्रकरणे पञ्चमस्य स्कन्धादितस्त्रयोविंशाध्यायस्य विवरणम् ॥ २२ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

देवे इत्यत्र **सीदत्पालपशुस्त्रि** इति गोष्ठमित्यस्य विशेषणं, **व्रजे** इति त्वर्थकथनम् ॥ २५ ॥

इति त्रयोविंशोध्यायः ॥ २३ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

विष्णुपक्षानिवासुरा इत्यत्र ननु विष्णुपक्षानिवेतिदृष्टान्तोनुचितः, एतस्यैव विष्णुत्वान् न ह्येकस्यैव दृष्टान्तदार्ष्टान्तिकभाव इत्याशङ्क्याहुः **लौकिकी कथेयमिति दृष्टान्त** इति, **इयं गर्गेणोक्ता** लौकिकानां बुद्धिमाश्रित्योक्तेति **लौकिकी,** अतो दृष्टान्तोक्तौ न दोष इत्यर्थः ॥ २१ ॥ **मन्ये नारायणस्यांशमित्यत्र अधिकं अग्रे वक्ष्यतीति** 'अक्लिष्टकारिण'मित्यनेन विशेषणेन ब्रह्मत्वं वक्ष्यतीत्यर्थः ॥ २२ ॥

इति त्रयोविंशोध्यायः ॥ २३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ये महाभागाः अनेकजन्मानुष्ठितसुकृता मानवा एतस्मिन् प्रीतिं कुर्वंति तानेतान् अरयः शत्रवो नाभिभवन्ति। तत्र दृष्टान्तमाह—विष्णुपक्षानिति। विष्णुना रक्ष्यमाणान् देवान् यथा असुरा नाभिभवन्ति तथेत्यर्थः ॥ २१ ॥ यस्मादेव तस्मात् हे नन्द ! अयं कुमारो गुणादिभिर्नारायणसमः। एवं 'वर्णास्त्रय' इत्यारभ्य नन्दो गर्गवाक्यमाश्राव्य स्वयमाह–तत्कर्मस्विति। यस्मात् गर्गो नारायणसमत्वेनोक्तवान् तत् तस्मात् अस्य कर्मसु युष्माभिर्विस्मयो न कार्यः ॥ २२ ॥ स्वनिश्चयमाह—इतीति। इत्येवमद्धा साक्षात् मां प्रति समादिश्य कृष्णप्रभावं निरूप्य गर्गे स्वगृहं गते सति अहं कृष्णं नारायणस्यांशं मन्ये। साक्षान्नारायणत्वेऽपि तस्य स्वपुत्रत्वासम्भावनया नन्दस्य तदंशत्वाभिमानः। 'न केवलं गर्गवाक्यमेव तत्र प्रमाणम्, किन्तु तत्प्रभावदर्शनमपि' इत्याशयेनाह—अक्लिष्टेति। अक्लिष्टानि भक्तजनक्लेशनिवर्तकानि कर्माणि करोतीति तथा तमित्यर्थः ॥ २३ ॥ अमिततेजसः अचिन्त्यप्रभावस्य कृष्णस्य दृष्टाः श्रुताश्चानुभावा यैस्ते व्रजौकसः इत्येवं गर्गगीतं, 'तत्कर्मसु न विस्मयः' इत्यादि नन्दवचश्च श्रुत्वा गतविस्मयाः आश्चर्यरहिता मुदिताश्च सन्तः नारायणबुद्ध्या श्रीकृष्णं तस्य नन्दपुत्रत्वाङ्गीकारात् नन्दमपि तत्पितृबुद्ध्या आनर्चुरिति

सार्धान्वयः ।। २४ ।। गोवर्धनोद्धरणं सपरिकरमनुस्मरन् प्रकटितैश्वर्यस्य श्रीकृष्णस्य प्रीतिं प्रार्थयते–देवे इति । स्वयज्ञस्य विप्लवेन प्रतिरोधेन या रुट् क्रोधः, तया देवे इन्द्रे नाशाय वर्षति सति वज्राश्मपरुषानिलैः अशनिजलशर्करातीव्रवायुभिः सीदत्पालपशुस्त्रिसीन्दतः पालाः पशवः स्त्रियश्च यस्मिंस्तथाभूतं गोष्ठं व्रजं दृष्ट्वा अनुकम्पी जातकृप उत्स्मयन् प्रहसन् प्रौढिमाविष्कुर्वन् शैलं गोवर्धनमुत्पाट्य उत्कृत्य एकेन करेण बिभ्रत् दधत् यो गोष्ठमपात् पालितवान् स इन्द्रमदभित् गवामिन्द्रः श्रीकृष्णो नोऽस्मान् वक्तृश्रोत्रादीन् प्रीयात् प्रीयतामित्यन्वयः । अनुकम्पायां हेतुमाह—आत्मशरणमिति । आत्मा स्वयमेव शरणं रक्षको यस्य तत् । 'देवे' इत्यादिपदैरन्यैरपरिहार्यत्वं सूचितम् । अनायासेन गोवर्धनधारणे दृष्टान्तमाह—अबल इति । बालो लीलार्थमुच्छिलीन्ध्रं छत्रं यथा बिभर्ति तथेत्यर्थः । 'इन्द्रमदभित्, इन्द्रो गवाम्' इति पदद्वयेन उत्तराध्यायार्थस्मरणं ज्ञेयम् ।। २५ ।।

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ।। १ ।।
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ।। २ ।।
रचिता दशमे तत्र तामसरोधवर्णने । षड्विंशो विवृतोऽध्यायो गर्गगीतनिरूपकः ।। ३ ।।

अन्वितार्थप्रकाशिका

य इति ये महाभागा मानवाः एतस्मिन् त्वत्पुत्रे प्रीतिं कुर्वन्ति । विष्णुः पक्षे येषां तान् देवान् असुरा इव एतान् अरयः शत्रवो न अभिभवन्ति न तिरस्कुर्वन्ति ।। २१ ।। तस्मादिति ।। तस्मात् हे नन्द ! अयं ते कुमारो गुणैः श्रिया कीर्त्याऽनुभावेन च नारायणसमः इत्यन्तं गर्गवाक्यमाश्राव्याह । यस्मात् गर्गो नारायणसमत्वेनोक्तवान् तत् तस्मात् तस्य कर्मसु विस्मयो नास्ति । अतो युष्माभिर्विस्मयो न कार्यः यद्यपि गर्गवाक्यं गोपैः पूर्वं ज्ञातमेव बकवधानन्तरं तद्वचनात् तथापीदानीं समग्रतया श्रावितमिति विशेषः ।। २२ ।। इतीति ।। इत्येवमद्धा साक्षात् मां प्रति समादिश्य कृष्णप्रभावं निरूप्य गर्गे स्वगृहं गते सति तदानीं तथा अमन्यमानोऽपि इदानीम् एष अक्लिष्टानि क्लेशापहानि कर्माणि करोति अस्मान् अक्लिष्टान् क्लेशरहितान् करोति इति वा । तादृशं कृष्णं नारायणस्यांशं मन्ये ।।२३।। इतीति सार्द्धम् ।। अमिततेजसः अचिन्त्यप्रभावस्य कृष्णस्य दृष्टाः श्रुताश्चानुभावा यैस्ते व्रजौकसः इत्येवं प्रागुक्तं गर्गगीतं तत्कर्मसु न विस्मय इत्यादि नन्दवचश्च श्रुत्वा गतविस्मयाः आश्चर्यरहिताः मुदिताश्च सन्तः नारायणपितृबुद्ध्या नन्दमानर्चुः ततो वनादागतं श्रीकृष्णं नारायणबुद्ध्या आनर्चुः ।। २४ ।। देव इति ।। स्वयज्ञस्य विप्लवेन प्रतिरोधेन या रुट् क्रोधस्तया देवे इन्द्रे नाशाय वर्षति सति वज्रादशनिभिः अश्मभिः जलशर्कराभिः परुषानिलैश्च । परुषेति वर्षति च पाठः । सीदत्पालपशुस्त्रिसीदन्तः पालाः पशवः स्त्रियश्च यस्मिन् तत् । कबभाव आर्षः । आत्मा स्वयं शरणं रक्षको यस्य तत् गोष्ठं व्रजं दृष्ट्वा अनुकम्पी भूरिदयः । णिनिप्रत्ययान्तम् । उत्स्मयन् प्रहसन्नेव । आर्षः शता । अबलो बालो लीलार्थमुच्छिलीन्ध्रं छत्त्राकं यथा बिभर्ति तथा शैलं गोवर्द्धनमुत्पाट्य उत्कृत्य एकेन करेण बिभ्रत् दधत् यो गोष्ठमपात्पालितवान् स इन्द्रमदभित् गवामिन्द्रः इत्युत्तराध्यायार्थं स्मरति । श्रीकृष्णो नोऽस्मान् वक्तृश्रोत्रादीन् प्रति प्रीयात् प्रीयताम् एतान् प्रीणातु वा ।। २५ ।।

इति श्रीभागवते महापुराणेऽन्वितार्थप्रकाशिकायां दशमस्कन्धे षड्विंशोऽध्यायः ।। २६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अद्धा साक्षात् । समादिश्य उक्त्वा । अक्लिष्टकारिणं मंगलजनकं ।। २३–२४ ।। एवं कृष्णचरित्रकलापस्मरणेन प्रसन्नो जातः शुकः गोवर्धनधरप्रसन्नतां या च ते देव इति । यज्ञस्य विप्लवो भंगस्तज्जनितरोषेण इंद्रे वर्षति सति वज्राश्मपर्षोऽनिलैः वज्रतुल्याः अश्मानो जलमयपाषाणशकलानि च पर्षोऽनिलाः तीव्रवाताश्च तैः सीदंतः पाला गोपाः पशवश्च स्त्रियः गोप्यश्च यस्मिंस्तत् गोष्ठं आत्मशरणं आत्मास्वयं शरणं रक्षिता यस्य एवंभूतं दृष्ट्वा अनुकंपी बहुदयालुः सन् भूमार्थे मत्वर्थी यः उत्स्मयन् शरणागतवत्सलत्वगर्वं आविष्कुर्वन् सन् अबलो निर्बलः बालो लीलया उच्छिलींध्रं छत्राकं यथा तथा एककरेण शैलं उत्पाट्य ऊर्ध्वं कृत्वा बिभ्रत् ससाहोरात्रान् दधत् सन् गोष्ठं अपात् रक्षितवान् महेंद्रमदभित् गवां इन्द्रः सः श्रीकृष्णः नोऽस्मान् प्रीयात् प्रसन्नो भूयात् ।। २५ ।।

इति श्रीशुद्धकांतधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने गोपशंकानिरासो नाम षड्विंशोऽध्यायः ।। २६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

य इति ।। हे महाभाग, एतस्मिंस्त्वत्पुत्रे, ये मानवाः, प्रीतिं कुर्वन्ति, एतान्मानवान्, विष्णुपक्षान् विष्णवाश्रयान् देवान्, असुराः इव, अरयः शत्रवः न अभिभवन्ति ।। २१ ।। तस्मादिति ।। तस्मात् हे नन्द, अयं, ते तव, आत्मजः पुत्रः, श्रिया, कीर्त्त्या, अनुभावेन, गुणैरन्यैरपि गुणैः, नारायणसमः भविता । अतः, हे गोपाः, तत्कर्मसु, विस्मयः न कार्यः । इति नन्दस्योक्तिः ।। २२ ।। इतीति ।। इतीत्थं, अद्धा स्फुटं, मां समादिश्य सम्यक् ज्ञापयित्वा, गर्गे स्वगृहं गते सति च, अहं अक्लिष्टानि क्लेशरहितानि अतिमानुषचेष्टितानि करोतीति तथाभूतं, कृष्णं नारायणस्य अंशं, मन्ये 'नारायणं साक्षात्' इति पाठः एव साधीयान् ।

पुरातनमपि तमन्यथा कर्त्तुरभिप्रायं स एव वेत्ति ॥ २३ ॥ इति नन्दवच इत्यादिका शुकोक्तिः ॥ इतीति ॥ इत्येवंविधं, गर्गगीतं गर्गाचार्योक्तं, नन्दवचः नन्देनानूदितवचनं श्रुत्वा, व्रजौकसः सर्वे व्रजवासिनो जनाः, गतविस्मया विगताश्चर्याः मुदितः सन्तश्च, नन्दं, कृष्णं च, आनर्चुः पूजयामासुः बहुमन्यन्त इति वा ॥ २४ ॥ गोवर्द्धनोद्धरणं सपरिकरमनुस्मरन् प्रकटितैश्वर्यस्य भगवतः स्वविषयप्रीतिं प्रार्थयते मुनिः ॥ देव इति ॥ यज्ञविप्लवेन यज्ञविघातेन हेतुना या रुट् तया हेतुभूतया, देवे इन्द्रे, वर्षति सति, वज्राश्मपर्षानिलैः अशनिजलशर्करातीव्रवायुभिः, परुषशब्दे रकारगतोकारलोप आर्षः । परुषपर्यायरतीव्रशब्दः । सीदन्तः क्लिश्यन्तः पाला गोपाश्च पशवो गवादयश्च स्त्रियो यशोदा गोप्यश्च यस्मिंस्तत्, आत्मा स्वयमेव शरणं रक्षिता रक्षणोपायश्च यस्य तत् । स्त्रियात्मेतीयङार्षः । एवंविधं गोष्ठं दृष्ट्वा, अनुकम्पी अनुकम्पायुक्तः, उत्स्मयन् स्वमाहात्म्यमाविष्कुर्वंस्तावद्धसन्, अबलो बालः सन्नपि, शैलं गोवर्द्धनं लीलोच्छिलीन्ध्रं लीलार्वमुत्पाटितं छत्राकं, यथा एकेनैव करेण, उत्पाट्य, बिभ्रद्बिभ्राणः दधदित्यर्थः । एवंभूतो यः कृष्णः, महेन्द्रमदभित्, गवां इन्द्रः सन्, इत्युत्तराध्यायार्थं स्मृत्वोक्तम् । गोष्ठं, अपादरक्षत् । सः नः, प्रीयात् प्रसन्नो भवतु ॥ २५ ॥

षड्विंशे षड्विंशो दशमे दशमः परो हरिर्व्यक्तः । मां तु चतुर्विंशतितः पृथग्व्यज्यात्सपञ्चविंशम् ॥ १ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे षड्विंशोऽध्यायः ॥ २३ ॥

श्रीहरिसूरिदिरचितं श्रीभक्तिरसायनम्

इति नन्दवच इति : १०.२६.२४.

अनादिसिद्धमेवेशनामरूपनिरूपणम् । नन्देन गर्गवद् गीतं गर्गगीतपदात्स्फुटम् ॥ ११ ॥
नन्दस्त्वेवमिहास्य वक्ति महिमानं सत्प्रमाणाग्रगाद् गर्गादस्तसमस्तसंशयतमा वृद्धः स्वयं सत्यवाक् ।
कृत्यैरप्यनुमापका वयमतः सिद्धोऽयमद्धेश्वरो भूयोऽस्माभिरशेषकेलिषु कथं मूर्खैरकल्प्यल्पकः ॥ १२ ॥
न कस्यां क्रीडायां निगदितमवाच्यं मुहुरहो न कस्यां वा श्रीशो भृशमधरभावेन कलितः ।
न कस्यां वाऽस्माभिः करतलचपेटाभिघटितः कियत्तत्स्मर्तव्यं निखिलमपराधैकसदनम् ॥ १३ ॥
अहो नास्माद्भीतिः क्वचिदपि यदि स्याद्वयमिव तदा नागो लेशो यदिह सहकेलिः स्फुटतरा ।
परात्मा चेत्सत्यस्तदपि न हि भीर्मन्तुजनिता दयालुत्वं तस्मिन् जगति बहु जागर्ति सहजम् ॥ १४ ॥
यथा वाचाऽस्माभिः क्वचिदनुचितं स्यात्कृतमहो तथा भूयो भुक्तं सह निजकरेणार्पितमपि ।
धृतौ पादौ मूर्ध्नि क्वचिदिति कुतः पापमपि नः प्रसिद्धं यद्भर्मो पृथुतिमिरहृद्दीपकलिका ॥ १५ ॥
अहो दीनत्राता स्वजननिखिलागःसहकृत् कृपापारावारोऽनुपधिसुखदः श्रीपतिरयम् ।
इति श्रुत्वा गीतं तदभवदिहाद्यानुभवगं प्रसन्नास्यः पश्यत्यलमकृतमन्तूनिव हि नः ॥ १६ ॥
दिष्टं नष्टमनिष्टमद्यफलिताः पुण्यक्रियाः प्राक्कृता यत्संप्रत्यपि चैतदङ्घ्रिजरजोलाभैरलं भूषिताः ।
यद्योगीश्वरदुर्लभं सुलभतां प्राप्तं प्रयत्नं विना रूपं श्रीशमचिन्त्यचेष्टितमहो चक्षुश्चरं तत्त्वतः ॥ १७ ॥
निर्णीतमेतदधुनाऽचलयज्ञभोक्ता रूपान्तरेण सदयो भृशमेष एव ।
दृष्टः श्रुतो न हि गिरिर्बलिभुग्वपुष्मान् क्वापीत्ययं तु विशदोऽस्ति चराचरात्मा ॥ १८ ॥
आस्तामशेषदुरितक्षयकारिणाऽस्य गीतेन चारुचरितेन हृदो हि शुद्धिः ।
वाचश्च पादरजसा वपुषोऽखिलस्याप्यन्वर्थचिन्तनवशात्सुफलः प्रसादः ॥ १९ ॥

(नन्दमानर्चुरिति)

विज्ञाय संकटमसह्यमिह प्रयाति सर्वोऽपि मां शरणमार्तिभयाकुलात्मा ।
ऊर्ध्वं भवेन्मदुपकृत्यचलस्मृतिर्यः पूज्यः स चेति विशदं व्यतनोत् स नन्दे ॥ २० ॥
येन येन प्रसंगेन कस्मिंश्चिदपि कर्मणि । मत्कथागीतिसक्तो यस्तत्सखोऽहं सदेष्टकृत् ॥ २१ ॥
जानन् वदन्नपि च गर्गगिरं स नन्दो गोपास्तदुत्तरकृतौ मुमुहुर्मुहुर्यत् ।
प्रायः कलौ किल जनाः परमानुवादमात्रप्रगल्भमतयो बहुशो भवेयुः ॥ २२ ॥

देवे वर्षतीति : १०.२६.२५.

कृत्वा गवामवनमुल्बणवृष्टिपाताद् गोविन्दनामविशदं निजमुच्चकार ।
कारुण्यदुग्धजलधिर्य इतो भविष्यद्गोनिर्भयावसतये भयतः स पायात् ॥ २६ ॥
विगतार्तीन् प्रसन्नास्यान् गोपानालोक्य यः प्रभुः । कृतकृत्यमिवात्मानं मेने तस्मै नमोऽस्तु नः ॥ २४ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने षड्विंशोऽध्यायः ॥ २६ ॥

कृष्णप्रिया

जो भाग्य भागजन इस से प्रीति करते हैं वे कभी अपने शत्रुओं से पराजित नहीं होते, जैसे भगवान विष्णुजीके आश्रित एवं पक्षस्थित देवों को दैत्य कभी जीत नहीं सकते ।। २१ ।। इसलिये हे नन्दराय ? यह आप के पुत्र श्रीकृष्णजी गुणों में, श्रीलक्ष्मी में कीर्ति में, एवं प्रभाव में साक्षात नारायण के समान है । नन्दजी ने आगे बढते कहा कि हे गोपजन श्री गर्गाचार्य जी के वचनों पर निःसंदेह होकर इन बालक के अद्भुत चरित्रों को सुनकर, देखकर आश्चर्य नहीं करना चाहिए ।। २२ ।। हे प्यारे गोपजन ! महर्षि गर्गाचार्यजी ऐसे वाक्य कह कर मथुरा की ओर प्रस्थान कर गए । तब से मैं अक्लिष्टकर्मा श्रीकृष्ण को नारायण का स्वरूप मानता हूँ ।। २३ ।। श्रीगर्गाचार्य मुनिवर्य ने, अपरिमित तेज बल परिपूर्ण, सदानन्द श्रीकृष्णचन्द्र भगवान के विषय में कहे हुए वाक्यों को नन्दरायजी के मुखारविन्द से सुनकर भगवान श्रीकृष्णके प्रभाव वीर्य पराक्रम आदि को प्रत्यक्ष देखने और सुनने वाले वे व्रजजन सर्वथा प्रसन्न हुये । उन्होंने नन्दरायजी और श्रीकृष्णकी अर्चना की और उनके सारे संदेह नष्ट हो गए । ।। २४ ।। इन्द्रयाग अवरुद्ध होने पर क्रोधाविष्ट राजा इन्द्र, जब व्रज पर घोर वर्षा करने लगा, गोकुल एवं गोकुल वासियों पर व्रजपात एव शिलाओं की बौछार और भयानक आंधी के कारण सारे गोपाल ग्वालबाल वृद्ध नारीवृन्द, और पशुगण व्याकुल हो ऊठे, तब इन सबकी रक्षा के लिये जैसे नन्हें खेलते कूदते बालक आसानी से धरती के फूलको धरती से ऊठा लेता है, वैसे ही जिन्होंने करुणावश होकर लीलापूर्वक हसते हसते गिरिवर गोवर्धन को एक हस्त से उठा लिया और आप ही केवल जिसके एक मात्र रक्षक थे, उस दिव्य व्रज की रक्षा की । वही राजा इन्द्र के गर्व विनाशक श्रीगोविन्द भगवान् नित्य हम पर प्रसन्न हो ।। २५ ।।

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां तामसप्रकरणे हिन्दीभाषान्तरे षड्विंशोऽध्यायः ।। २६ ।।

—:०:—

अथ सप्तविंशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	इ.वं.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
२८	२०	७	१	६	१०१०	३६	३८	१०८४	३३॥	४

श्रीशुक[1] उवाच

गोवर्धने धृते शैल आसाराद् रक्षिते व्रजे । गोलोकादाव्रजत् कृष्णं सुरभिः शक्र एव च ॥ १ ॥
विविक्त उपसङ्गम्य व्रीडितः कृतहेलनः । पस्पर्श पादयोरेनं किरीटेनार्कवर्चसा ॥ २ ॥
दृष्टश्रुतानुभावोऽस्य कृष्णस्यामिततेजसः । नष्टत्रिलोकेशमद इन्द्र आह कृताञ्जलिः ॥ ३ ॥

इन्द उवाच

विशुद्धसत्त्वं तव धाम शान्तं तपोमयं ध्वस्तरजस्तमस्कम् ।
मायामयोऽयं गुणसम्प्रवाहो न विद्यते तेऽग्रहणानुबन्धः ॥ ४ ॥

कथंमक्षम।

अन्वयः—गोवर्धने शैले धृते, व्रजे आसारात् रक्षिते, गोलोकात् सुरभिः च शक्र एव, कृष्णम् आव्रजत् ॥ १ ॥ व्रीडितः कृतहेलनः विविक्ते उपसङ्गम्य अर्कवर्चसा किरीटेन पादयोः एनम् पस्पर्श ॥ २ ॥ नष्टत्रिलोकेशमदः कृताञ्जलिः इन्द्रः दृष्टश्रुत अनुभावस्य अमिततेजसः कृष्णस्य आह ॥ ३ ॥ हे नाथ ! तव धाम, विशुद्धसत्वम् शान्तम् तपोमयम् ध्वस्तरजस्तमस्कम् वर्तते अयम् गुणसम्प्रवाहः मायामयः ते ग्रहणानुबन्धः न विद्यते ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सप्तविंशे तदालक्ष्य कृष्णस्य प्राभवं परम् । वर्ण्यते सुरभींद्राभ्यामभिषेकमहोत्सवः ॥ १ ॥

गोवर्धने धृते शैल इति शक्रस्य भयेनागमने हेतुः आसाराद्रक्षिते व्रज इति सुरभेर्हर्षेणागमने ॥ १ ॥ तत्रेंद्र आगत्य किं कृतवांस्तदाह विविक्त उपसंगम्येत्यादिना अथाह सुरभिरित्यतः प्राक्तनेन ग्रंथेन विविक्ते एकांते । पादयोः पस्पर्श नमश्चकार ॥ २ ॥ अस्य श्रीकृष्णस्य श्रुतश्चासावनुभावश्च श्रुतानुभावः दृष्ट श्रुतानुभावो येन स इंद्रः । नष्टस्त्रिलोकेशोऽहमिति मदो यस्य सः ॥ ३ ॥ तत्र ममापराधं क्षमस्वेति वक्तुं तव तावदपराधो नास्त्येव त्वयाऽनुग्रह एव कृत इत्याह चतुर्भिः । विशुद्धसत्त्वमिति । तव धाम स्वरूपं शांतमेकरूपमतश्च तपोमयं प्रचुरज्ञानं सर्वज्ञमित्यर्थः । कुतः । ध्वस्तरजस्तमस्कं ध्वस्ते अविद्यमाने रजस्तमसी यस्मिन् । अत एवायमस्मदादिषु दृश्यमानो मायाकार्यरूपो गुणसंप्रवाहः गुणैः सम्प्रोह्यत इति तथा संसार इत्यर्थः । स ते तव न विद्यते यतः अग्रहणेनाज्ञानेनानुबध्यत इति तथा स सर्वज्ञस्य ते नास्तीत्यर्थः । अज्ञानसंबंधो वा ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् गोवर्द्धनोद्धरणादिरूपम् । परम् अत्युत्कृष्टम् । प्राभवम् प्रभोर्भावः प्राभवं प्रभुताम् (१) । येन गोवर्द्धनेन गोव्रजरक्षा मद्दर्पहननपूर्वकं कृता स इंद्रमप्यन्यं करिष्यतीति भीतोरिद्र आजगामेति । गोलोकात् गवामधिष्ठितस्थानात् । यद्वा—गोलोकात् प्राकृतात्, परमवैकुंठरूपगोलोकसुरभ्या इंद्रसाहित्यानुपपत्तेः । यद्वा—गोलोकं व्रजमुद्दिश्य 'ल्यब्लोपे' इति कर्मणि पंचमी । तथाह श्रुतिः "ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंगा अयासः अत्राह तदुरुगायस्य वृष्णः परमं परमवभाति भूरि" इति । अर्थः—तानि वां युवयोः रामकृष्णयोर्वास्तूनि रम्यस्थानानि गमध्यै गंतुम् उश्मसि उश्मः कामयामहे न तु तत्र गंतुं प्रभवामः । यत्र येषु वास्तुषु भूरिशृंगा महाशृंगवत्यो गावः अयासः संचरंति । अत्र भूलोके अह निश्चितं तत् गोलोकाख्यं परमं पदं भूरि अत्यंतं मुख्यादपि विशिष्टमवभाति अत्यंतं शोभते । वृष्णः आनंदवर्षुकस्योरुगायस्य महाकीर्त्तेः श्रीकृष्णस्येत्यर्थः । यद्वा—गोलोकात् स्वर्गात् इंद्रसुरभ्या आव्रजतामित्यर्थः । 'दृग्दृष्टि—'इत्यादिना गोशब्दो हलायुधे स्वर्गवाचकोऽप्यस्तीति ॥ १ ॥ तत्र व्रजे । तदाह इंद्रकृत्यमाह । एकांते

---

१. बादरायणि—प्रा. पा. । २. इदमाह—वीर. विज. ।

जनसंमर्दरहितस्थले, प्रकटस्थले मां दृष्ट्वा लोका हसिष्यंतीति भीतेरिति भावः । विविक्त इति । हंतहंत शक्रहतकस्य वज्रप्रहारैर्मम गोवर्द्धनपृष्ठं कीदृग्जर्जरमभूदिति दिदृक्षया कदाचित्प्रातरेकाकिनैव कृष्णेन तत्र गमनात्तदैवेंद्रेणाप्यागमनादिति बुध्यत । दर्शनस्थानं च हरिवंशे व्यक्तम् "स ददर्शोपविष्टं वै गोवर्द्धनशिलातले" इति । शृणु भो शक्र त्वं प्रथममेकैक एव वाहनादिपरिच्छदं परित्यज्य दीनो भूत्वा स्वापराधं क्षमयितुं प्रभोश्चरणांबुजयोर्दंडवन्निपतेति सुरभ्या प्रेरणादुपसंगम्य । हंत भो देवेन्द्र किमिदं ते मय्यपारं वात्सल्यं दृश्यते, यद्बाल्यादज्ञत्वात्त्वन्मखहंतारं मामनुकंपितुमायासीति दृगिंगितेनोक्ते सति व्रीडितः । एनम् श्रीकृष्णम् ॥२॥ गोवर्द्धनधारणे स्वाक्षिभ्यामादौ तत्प्रभावं दृष्ट्वा पश्चात्स्वस्यापराधित्वं निश्चित्य स्वात्मरक्षार्थं मेरुपृष्ठस्थब्रह्ममुखाच्छ्रुतोऽयमेवास्माकं परमगुरुरित्येवंलक्षणं यस्य स तथा । स्मिततेजः दुर्ज्ञेयप्रभावस्य ॥ ३ ॥ तत्र तदा कृष्णपार्श्वे वा । इंद्र गर्वादेव त्वन्मखं विखंड्य त्वत्संप्रदानीयनैवेद्यं भोक्तुं गोवर्द्धनमखं मिषेण करवमिति त्वं वेत्स्येवेति वक्रोक्तिं ज्ञात्वा—भो नाथ त्वन्मायामोहितोऽप्यहमधुना त्वत्कृपालेशेन त्वत्तत्त्वं किंचिज्जानामीत्याह—विशुद्धेति । विशुद्ध रजस्तमोभ्यामनभिभूतं सत्त्वं यस्मिंस्तत्तथा । अतश्च शांतत्वाच्च । इत्यर्थ इति । प्राचुर्ये मयट् । सर्वप्रचुरशब्दौ पर्यायौ, प्रगतः चुरः स्तेयं यस्मादिति विग्रहादित्यर्थः । तत्र हेतुमाशकते—कुत इति । यस्मिन् धाम्नि । अत एव गुणसंबंधराहित्यादेव । संप्रोह्यते संचाल्यते संबध्यते वा । इत्यर्थ इति । गुणसंबंधस्यैव संसारपदार्थत्वादिति तात्पर्यम् । स संसारः । यतो हेतोः । न गृह्यते वस्तुयाथात्म्यमनेनेत्यग्रहणं तेनानुबध्यते सम्बध्यते प्राप्यते इत्यर्थः । इत्यर्थ इति । सर्वज्ञस्येश्वरस्य संसारसत्त्व ईश्वरतैव लालुप्येतेति भावः । कार्यापेक्षया कार्यिणो मुख्यत्वात् 'मुख्यामुख्ययोर्मुख्ये कार्यसंप्रत्ययः' इति न्यायेनाह—अज्ञानसंबंधो वेति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गा नित्यं वर्द्धयतीति तथा तस्मिन्निति तत्साहाय्येन महावृष्ट्यापि तया गवां दुःखशङ्का निरस्ता प्रत्युत तृणाद्यधिकसम्पत्त्या समृद्धिरेव सूचिता व्रजशब्देन तत्रत्या मानुषाः पशुपक्ष्यादयश्च गोलोकात् प्राकृतात् नत्वप्राकृतात् श्रीगोकुलप्रकाशविशेषात् इन्द्रस्य तदीयसुरभिसङ्गासम्भवात् अप्राकृतगोलोकत्वष्टाविंशत्यध्यायान्ते दर्शयिष्यते इन्द्रस्य तया सहागमनं श्रीकृष्णस्य गोप्रियताज्ञानात् तत्रापि तस्या आद्यत्वात् अत्र इन्द्रोऽपि तदानयनार्थं तत्र गत्वा तस्मादाव्रजदिति सम्बध्यते, ब्रह्मणा चोदिता वयमिति सुरभिवाक्यात्तत्र तु ब्रह्मणा प्रेषितः तेनैव सह चागतस्ततश्च सुरभ्या समं ब्रह्माज्ञामादाय गत इति च अप्यर्थे चकारः महापराधित्वेन तस्यागमनं न सम्भवेत् तथाप्याव्रजदित्यर्थः । अनन्यगतिकत्वात् तत्र हेतुः कृष्णं स्वयं भगवन्तम् अतः शरणागतत्वेनाव्रजदित्यर्थः सुरभिपक्षे कृष्णं स्वसन्तानप्रियतागुणेनाकर्षकम् एवशब्देन शक्रस्य कैवल्यं बोधयते वाहनादिपरिवारत्यागेनागमनात् ब्रह्मर्षिदेवमातॄणां चातिसङ्कटभिया दूरे स्थितत्वात् अत्र विशेषः श्रीवैशम्पायनेनोक्तः—

> "स ददर्शोपविष्टं वै गोवर्द्धनशिलातले । कृष्णमक्लिष्टकर्माणं पुरुहूतः पुरन्दरः ॥
> तं वीक्ष्य बालं महता तेजसा दीप्तमव्ययम् । गोपवेषधरं विष्णुं प्रीतिं लेभे पुरन्दरः ॥
> तं साम्बुजदलच्छायं कृष्णं श्रीवत्सलक्षणम् । पर्याप्तनयनः शक्रः पुनः पुनरुदैक्षत" ॥

अतः प्रीतिं लेभ इति पूर्वं श्रीकृष्णस्यैकान्ते दर्शनासम्भावनायासीत् तस्याप्यपगमादिति भावः । किञ्च, तत्रैव—

> "तस्योपविष्टस्य सुखं पक्षाभ्यां पक्षिपुङ्गवः । अन्तर्द्धानगतश्छायां चकारोरगभोजनः" ॥ इति ।

श्रीपराशरेणापि—

> "गरुडं च ददर्शोच्चैरन्तर्द्धानगतं द्विजम् । कृतच्छायं हरेर्मूर्द्ध्नि पक्षाभ्यां पक्षिपुङ्गवम्" ॥ इति ॥ १ ॥

विविक्ते विजन इति गोकुले तेषां प्रकटागमनव्यवहाराभावात् क्षमापणाया एकान्ते व्यवहारसिद्धत्वाच्च श्रीकृष्णस्यैकाकित्वेन तत्र स्थितिश्च नभसि दूरतस्तत्सुरभिसहितं तं दृष्ट्वा केनापि व्याजेनागमनात् विविक्त उपसङ्गम्येति सुरभिं विनेति गम्यते तच्च स्वयमेवासावेकाकितया दीनो भूत्वा प्रथमं मिलत्विति सुरभ्या एव प्रेरणयेति ज्ञेयम् । तत्र हेत्वन्तरं व्रीडितः प्राप्तलज्जः कुतः ? कृतं हेलनं दुरुक्त्यादिना भगवदवज्ञा येन किरीटेनेति दण्डवत्प्रणामं बोधयति अर्कवर्चसेति तस्य तत्पादयो रुपयोजितस्य शोभां वर्णयति ॥ २ ॥ अस्य बालगोपालरूपस्य कृष्णस्य नराकृतिपरब्रह्मणः दृष्टः श्रीगोवर्द्धनोद्धरणेन श्रुतः श्रीब्रह्मादिमुखेनानुभावो येन सः अमितम् अनन्तं तेजो यस्य तस्येति अर्कतुल्यकिरीटतेजो युक्तोऽप्यसावर्ककोट्यधिकतेजः पुञ्जजाज्वल्यमानश्रीपादाब्जनखाग्रांशुलहरीकस्य तस्याऽग्रे दिवा खद्योतायमान इव वृत्त इति सूचयति, अत एव च सद्यो नष्टत्रिलोकेशमदः अमिततेजस इति—पञ्चम्यन्त वा हेतौ । अर्थः स एव ॥ ३ ॥ तत्र महापराधिन्यपि स्वस्मिन् श्रीभगवतः स्वाभाविकश्रीमुखप्रसक्त्या कोपाभावमवधार्याऽस्वस्थः सन् त स्तुवन् आदौ निजापराधं क्षमयितुं परमेश्वरस्य तवास्मासु कोपादिकं न घटते वयं तु त्वन्मायामोहिताः संसारिणो बहुधा नित्यापराधिन एवेत्याह—विशुद्धसत्त्वमिति । विशुद्धसत्त्वमत्र प्राकृतसत्त्वानुस्यूतचिच्छक्तिवृत्तिविशेषो ज्ञेयः । यथोक्तं ब्रह्मसंहितायाम् "सत्त्वावलम्बिपरसत्त्वविशुद्धसत्त्वम् गोविन्दमादिपुरुषं तमहं भजामि" इति अन्यत्तैः । तत्र विशुद्धसत्त्वात्मकं स्वरूपमित्यर्थः यद्वा, तव धाम प्रकाशोयं विशुद्धसत्त्वं तदाख्यं स्वप्रकाशतारूपमित्यर्थः । विशुद्धपदस्य जाड्यांशपरित्यागेऽपि हेतुत्वात् सत्त्वपदस्याविर्भावार्थत्वात् तच्च शान्तं क्षोभरहितं किञ्च, तपोमयं ज्ञानातिशयरूपम्—

"ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः" ॥ इति

श्रीविष्णुपुराणवचनात्। ज्ञानप्रचुरं च शान्तत्वे हेतुः ध्वस्तरजस्तमस्कं विक्षेपावरणशून्यम् "अयमात्माऽपहतपाप्मा" इति श्रुतेः। प्राकृतसत्त्वं तु तत्र निषिद्धं श्रीविष्णुपुराणे—

"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः। स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु" ॥ इति
"ह्लादिनी सन्धिनी संवित् त्वय्येका सर्व (संस्थितौ) संश्रये। ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते" ॥ इति च,

अतः स्वयं साक्षादनुभूयमानस्ते तव कारुण्यादिगुणाना सम्प्रवाहः परम्परा मायामयो न विद्यते न भवति कुतः ? ग्रहणेन त्वत्स्वीकारेणैव अग्रहणेन इन्द्रियकरणकपरिच्छेदाभावेनैव वा अनुबध्यते प्राप्यत इति तथा सः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गाः सुखभोगादिना नित्यं वर्द्धयतीति तथा तस्मिन्निति महावृष्ट्यापि तथा गवां दुःखशंका निरस्ता; प्रत्युत शिलादिक्षालनेन तृणाद्यधिकसम्पत्त्या च समृद्धिरेव जातेति सूचितम्। व्रज-शब्देन तत्रत्या मानुषा पशुपक्ष्यादयश्च सर्व्व एव प्राणिनो लक्षिताः; गोलोको नाम वैकुण्ठलोकोपरि वर्त्तमानो गवां लोकः; तथा च श्रीहरिवंशे शक्रवाक्ये (विष्णु. प. १९।२९-३१)—

'स्वर्गादुर्ध्वं ब्रह्मलोको ब्रह्मर्षिगणसेवितः। तत्र सोमगतिश्चैव ज्योतिषाञ्च महात्मनाम् ॥
तस्योपरि गवां लोकः साध्यास्तं पालयन्ति हि ।
स हि सर्व्वगतः कृष्ण महाकाशगतो महान्। उपर्य्युपरि तत्रापि गतिस्तव तपोमयी ॥' इत्यादि ।

स्कान्दे श्रीभगवदर्ज्जुनसंवादे—'एवं बहुविधै रूपैश्चरामीह वसुन्धराम्। ब्रह्मलोकञ्च कौन्तेय गोलोकञ्च सनातनम् ॥" इति; तथा श्रीब्रह्मसंहितायां चादिपुरुषस्तोत्रे (५।४८)—आनन्दचिन्मयरस प्रतिभावितामि,-स्ताभिर्य एव निजरूपतया कलाभिः। गोलोक एव निवसत्यखिलात्मभूतो, गोविन्दमादिपुरुषं तमहं भजामि ॥' इत्यादि। ब्रह्मलोकः श्रीवैकुण्ठलोक इत्यादिदमेषां व्याख्यानञ्च श्रीभगवतामृतगोलोकमाहात्म्यान्ते कृतमेवास्ति। तस्मात् सुरभिः शक्रश्चाव्रजत्। तत्र च गोलोकस्थ-गोकुलमुख्यां गवां मूलभूतां सुरभिं श्रीभगवता स्ववंशरक्षणात् परमहर्षेण तदन्तिके श्रीगोवर्द्धने समागच्छन्तीं दृष्ट्वा, तस्य प्रीतिपात्रभूतां नत्वा, परमभक्त्या प्रसाद्य, तया सह शक्रः स्वर्गादगच्छदिति ज्ञेयम्। कश्यपपत्नी गवापत्या शक्रविमाता सुरभिस्तु स्वर्ग एव निवसति, अतः साऽन्यैव गोलोके तस्या वसत्यसम्भवात्। अप्यर्थे चकारः, महापराधित्वेन लज्जाभयादिना तस्यागमनं न सम्भवेत्, तथाप्याव्रजदित्यर्थः; अनन्यगतिकत्वात्। तत्र हेतुः—कृष्णं साक्षाद्भगवन्तम्, यद्वा, शरणागतवात्सल्यादिनिजाशेषगुणप्रकटनपरमतः शरणागतत्वेनाव्रजदित्यर्थः; यद्वा, तत्प्रियजनसंगबलादाव्रजत्, यतः कृष्णं प्रियजनैकवश्यमित्यर्थः; सुरभिपक्षे निजरूपगुणादिना परमानन्दकरं जगच्चित्ताकर्षकं चेति, एव-शब्देन तस्य कैवल्यं बोध्यते, भयेन दैन्येन च वाहनादिपरिवारपरिच्छदत्यागेन एकाकितया गमनात्। अत्र विशेषः श्रीवैशम्पायनेनोक्तः, (हरिवंशे विष्णु. प. १९।३-५)—

'स ददर्शोपविष्टं वै गोवर्द्धनशिलातले। कृष्णमक्लिष्टकर्म्माणं पुरुहूतः पुरन्दरः ॥
तं वीक्ष्य बालं महता तेजसा दीप्तमव्ययम्। गोपवेशधरं कृष्णं प्रीतिं लेभे पुरन्दरः ॥
तं सोऽम्बुजदलश्यामं कृष्णं श्रीवत्सलक्षणम्। पर्य्याप्तनयनःशक्रः पुनः पुनरुदैक्षत ॥'

किञ्च, (विष्णु. प. १९।७)—'तस्योपविष्टस्य मुखं पक्षाभ्यां पक्षिपुंगवः। अन्तर्द्धानं गतश्छायां चकारोरगभोजनः ॥' इति। श्रीपराशरेणापि (वि. पु. ५।१२।४)—'गरुडञ्च ददर्शोच्चैरन्तर्द्धानगतं द्विज। कृतच्छायं हरेर्मूर्ध्नि पक्षाभ्यां पक्षिपुंगवम् ॥' इति ॥ १ ॥ विविक्ते विजन इति। कदाचिद्गोपा द्वयेण शपेयुः, अवज्ञया वोपहसेयुरित्याशंकया, पूर्व्वमेव श्रीभगवता कथञ्चित् कुत्रापि तेषां प्रस्थापनात्, निजाभिषेकापेक्षया श्रीबलदेवस्य गौरवेण संगेऽनानयनाच्च, उपसमीपे, सम्यक् मूर्ध्नि बद्धाञ्जल्यवनतमुखत्वादिप्रकारेण गत्वा, यद्यपि सुरभेरनुगत्वेन पश्चादेव तस्योपसंगतिर्युक्ता, तथाप्यादौ तस्य सा भगवद्रूपेण वा कर्षणाद्धैर्य्यहानेः; यद्वा, भगवता सह प्राक्संगतायाः सुरभेः पश्चादेव तस्य संगतिरुशब्दात् ज्ञेया, यद्वा, उप अनु सुरभेः पश्चात् स्थित्वा संगत्येत्यर्थः; तथापि भावः स एव। तत्र हेतुः—व्रीडितः प्राप्तलज्जः; कुतः ? कृतं हेलनं दुरुक्त्यादिना भगवदज्ञानेन, यद्वा, पूजाभञ्जनेन भगवता यस्य सः, अर्कस्येव दूरव्यापि वर्च्चो यस्य तेन, एनं गोपरूपेण वर्त्तमानस्मत्प्रभुं पादयोः पस्पर्शेति लज्जाभयादिना दूरत एवाष्टांगप्रणामं बोधयति ॥ २ ॥ अस्य श्रीबालगोपालरूपेण वर्त्तमानस्य कृष्णस्य नराकारपरब्रह्मणः, अमितमनन्तं तेजो तस्येति अर्कतुल्यकिरीटतेजोयुक्तोऽप्यसौ अर्ककोट्यधिकतेजः पुञ्जजाज्ज्वल्यमानश्रीपादाब्जकनिष्ठनखाग्रांशुलहरीलवेन तदग्रे दिवा खद्योतायमान इव वृत्त इति सूचयति; अतएव सद्यो नष्टत्रिलोकेशमदः, अमिततेजस इति पञ्चम्यन्तं वा, हेतौ अर्थः स एव; किञ्च, दृष्टः साक्षादनुभूतः श्रीगोवर्द्धनधारणादिना अत्रागमनमात्रेण वा, श्रुतोऽनुभावो माहात्म्यविशेषो येन, अतएव कृताञ्जलिरिदं वक्ष्यन्नाह। यद्वा, तादृशोक्तिस्फूर्त्तौ हेतुः—दृष्टो गोवर्द्धनधारणादि-लीलारूपविशेषानुभावेन, श्रुतश्च शास्त्रादिना अनुभावो यस्य, अतस्तदनुरूपं तुष्टावेत्यर्थः। इति स्तुतेरुत्कृष्टता सूचिता ॥३॥ तत्र महापराधिन्यपि स्वस्मिन् श्रीभगवतः स्वाभाविकश्रीमुखप्रसक्त्या कोपाभावमवधार्य्य

आश्वस्तः संस्तं स्तुवन् आदौ निजापराधं क्षमयितुं 'परमेश्वरस्य तवास्मासु कोपावज्ञादिकं न कथञ्चित् कदाचिदपि घटते, वयन्तु त्वन्मायामोहिताः संसारिणो बहुधा नित्यापराधिन एव' इत्याह—विशुद्धमिति। यद्यपि श्रीभगवद्रूपं गुणातीतं सच्चिदानन्दघनमेव, तथापि विशुद्धसत्त्वमिति लोभ-क्रोधादिरहित-सत्त्वगुणस्वभावसादृश्यदृष्टिमात्रेणोक्तम्, तत्र यद्यपि देवा अपि सात्त्विकास्तथापि स्वस्येव तेषां लोभादिसम्भवनाद्विशुद्धेत्यादि-विशेषणैदात्मादिदेववर्गस्वभावो व्यवच्छिन्नः। अन्यत्तैर्व्याख्यातम्; यद्वा, विशुद्धसत्त्वं चिच्छक्तिविलासभूतं नित्यानन्दरूपम्; यद्वा, भो विशुद्ध! सर्व्वदोषरहित। मायागुणस्पृष्टेति वा, तव धाम श्रीमूर्त्तिः सत्त्वं सत्त्वमात्रं ब्रह्मधामेत्यनेन ब्रह्मघनत्वमायातमेव; कथम्भूतं सत्त्वम्? तपः चित्तकाग्र्यं तन्मयं तदेकसाध्यमित्यर्थः। कथम्भूतं धाम? ध्वस्ते अतिविनष्टे निरस्ते वा रजस्तमसी सेवकानां यस्माद् येन वा तत्, अतोऽयं साक्षादनुभूयमानस्ते तव कारुण्यादिगुणानां सम्प्रवाहः परम्परा मायामयो न भवति; कुतः? ग्रहणेन त्वत्स्वीकारेणैवानुबध्यते प्राप्यत इति तथा सः, अनन्यसाध्यतया तस्य स्वप्रकाशत्वपर्य्यवसानेन गुणातीतत्वासिद्धेः; यद्वा, ध्वस्तरजस्तमस्कत्वेन त्वत्सेवकानामपि तेषां गुणप्रवाहः संसारो नास्त्येव, यतस्तेऽग्रहणेन त्वदज्ञानेनैवानुबध्यत इति; यद्वा, धाम वसतिस्थानं गोष्ठमित्यर्थः। अतोऽत्रापि मायामयो गुणसंप्रवाहो न विद्यते; अस्यापि त्वत्सदृशत्वात्, अतो मयात्र किं कर्त्तु शक्यते, तथापि यत्तादृशं कृतं तन्महाग एव ममेति भावः। यद्वा, विशुद्धं सत्त्वं प्राण्येव तव धाम निवासस्थानम्; कथम्भूतम्? शान्तं शान्तियुक्तम्, अतस्तपोमयं तपःप्रचुरम्, अतएव तस्मिन्नयं नास्ति; अन्यत् समानम्; अतो मम तद्वैपरीत्येन हृदि तदभावात् त्वज्ज्ञानं नाभूत्, सदा संसारो महापराधश्च जात इति भावः॥ ४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विविक्ते विजनदेशे॥ २–३॥ विशुद्धसत्त्वं रजस्तमोरहितं सत्त्वं धाम स्थानं ते मायामयोयं त्वच्छरीरप्रकृतिपरिणामभूतः एवं विभूतिमुक्त गृहणानुबन्धि शरीरगृहणसाधनं कर्म॥ ४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ कृतापराधेनेन्द्रेण स्तुतिपूर्वकं क्षमापितस्य तदनुग्रहप्रकारं सुरभीन्द्रादिकृतक्षीरगङ्गाजलाद्यभिषेकप्रकारं तन्निमित्तं गोविन्दनामधेयं तदात्विकं तुम्बुरुनारदहर्षप्रयुक्तगानादिप्रकारं चाह–सप्तविंशेन; तत्र प्रथमं शक्रागमनं तत्कृतश्रीकृष्णस्तवनं चाह गोवर्द्धन इति। सुरभिः कामधेनुः गोवर्द्धनाख्ये शैले पर्वते धृते सति कृष्णेनेति इतीन्द्रस्य सभयागमने हेतुः आसाराद्व्रजे रक्षिते सतीति सुरभेः सहर्षागमने हेतुः॥ १॥ तत्रेन्द्र आगत्य किं कृतवांस्तत्राह—विविक्त इत्यादिना अथाह सुरभिरित्यतः प्राक्तनेन ग्रन्थेन। कृतं हेलनमपराधो येनात एव व्रीडितो लज्जितोऽत एवैकान्ते समीपमेत्याऽर्भस्येव वर्चो यस्य तेन किरीटेनैनं कृष्ण पादयोः पस्पर्श नमश्चकार॥ २॥ दृष्टेति। अमितं तेजः प्रभावो यस्य तस्य कृष्णस्य दृष्टः श्रुतश्चानुभावो येन तथाभूतोऽत एव नष्टोऽपगतः त्रिलोकेशोऽहमितिमदो यस्य कृत अञ्जलिर्येन तथाभूत इदं वक्ष्यमाणं स्तुत्यात्मकं क्षमापणात्मकं च वाक्यमाह॥ ३॥ तत्र स्तुत्यात्मकं वाक्यं तावद्दर्शयति–विशुद्धसत्त्वमित्यादिना। तत्रेतः प्राक् त्रिलोकेशमदाऽऽविष्टोहमधुना यथाश्रुतादेवमानुषत्वन्महात्म्यावलोकनाध्यवसितनित्यनिरुपाधिकत्रिलोकेशत्वं त्वदसाधारणमिति मत्वा त्यक्तत्रिलोकेशमदोऽभवमित्यभिप्रायेणाऽकर्मायत्तविभूतिद्वयसम्बन्धविशिष्टं स्तौतीन्द्रः विशुद्धेति। तव धाम स्थानं परमव्योमेति यावत् विशुद्ध रजस्तमोभ्यामननुविद्धं सत्त्वं सत्त्वमयमत एव ध्वस्तरजस्तमस्कं निर्धूतरजस्तमोगन्धमत एव शान्तं रागद्वेषादिरहितं केवलं त्वदुपासनात्मकतपस आगतं ततोऽगम्यमित्यर्थः। तवेति स्वस्वामिभावरूपसम्बन्धे षष्ठी एवं नित्यविभूतिनायकत्वमुक्तम्। अथ तदेव धाम विशिंषन् लीलाविभूतिनायकत्वमाह–ते तवायं मायामयः मायाया आगतः पूर्वत्रात्र च "तत आगतः" (४।३।७४) इत्यधिकारे "मयट्च" (४।३।८२) इति मयट् सङ्कल्पमात्रपरिक्लप्त इत्यर्थः। सत्त्वादिगुणकार्यरूपः संसारस्तन्मूलकः ग्रहणानुबन्धः शरीरग्रहणकारणभूतः कर्मानुबन्धश्च न विद्यते यत्रेति शेषः। यत्र गुणसंप्रवाहः ग्रहणानुबन्धश्च न विद्यते तथाभूतं त्वद्धामेत्यर्थः। तव मायामय इति गुणसंप्रवाहस्य भगवत्सङ्कल्पायत्तत्वोक्त्या तस्य तावदधीन्यलाभाल्लीलाविभूतिनायकत्वमुक्त भवति॥ ४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

"तस्मिन्नप्यसुरावेशे गते प्रकृतिरेव तु" इति वचनात् देवस्वभावप्रकटनपूर्वकं सुरभिक्षीराभिषेकेण शक्रस्तुत्या च हरिमाहात्म्यस्यातिसिद्धत्वान्मुमुक्षुभिस्तस्मिन्नतिशयितं प्रेम विधेयमित्यस्याध्यायस्यारम्भः। तत्र सुरभीन्द्रयोरागमनं कथयति, गोवर्द्धन इति, गोलोकाद्गवामधिकृतस्थानात्सुरभिः इन्द्रस्तु स्वर्गलोकात्—

"दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु। भूमौ पशौ च विद्वद्भिर्गोशब्दो दशसु स्मृतः"॥ इति हलायुधः।

यो हरेर्विरोधमाचरत्स एवाव्रजदित्यन्वयः॥ १॥ विविक्तं एकान्ते "विजिर् पृथग्भावे" इति धातुः जनसम्मर्दराहित्यस्थल इत्यर्थः॥ २॥ इदानीं दृष्टः पूर्वं श्रुतोऽनुभावो येन स तथा इन्द्र इदमाह॥ ३॥ कीदृशं तत्राह—विशुद्धेति। अहं तव धाम गृहस्थानीयं स्वरूपं शरण प्रपद्य इति शेषः। अनन्तपदार्थराशिं गृह्णातीति गृहम्। ननु, गृहवत्सत्त्वादिगुणदारुभी

रचितं चेत्कालान्तरे जीर्णं स्यादित्यत्राह—विशुद्धेति। विगतं शुद्धसत्त्वं रजस्तमोमिश्ररहितं केवलसत्त्वगुणो यस्मात्तथा चारुतरपदार्थैः कुशलपुरुषेण रचितं न चेन्नयनशुभगं न स्यादित्यत्राह–शान्तमिति। शान्ते मङ्गलम्। "शान्तिः प्रशममङ्गले" इति अत एव सुखनिष्ठं वा क्षोभरहितं वा नन्वेवं चेत्पाषाणकल्पमित्यत्राह–तपोमयमिति, ज्ञानात्मकं यदासत्त्वमपि न सम्बध्यते तदा रजःसम्बन्धो नास्तीति किं वक्तव्यमितिभावेनाह–ध्वस्तेति। अत्र लिङ्गमाह, मायामय इति यत्र त्वयि अयं मायामयः भगवदिच्छानिमित्तगुणसम्प्रवाहः त्रिगुणसम्बन्धो न विद्यते यस्मात्तस्मादिति शेषः "विद् सत्तायाम्" इति धातोः जीववत्सम्बन्धो नास्ति किन्तु सृष्ट्यादौ प्रेरकत्वसम्बन्धोऽस्तीति कृत्वा न विद्यते इति कीदृशः अग्रहणाऽनुबन्धः अग्रहणमाग्रहः स एकानुबन्धो गुणभूतो यस्य स तथा। यद्वा, यत्र गुणसम्प्रवाहे अग्रहणम् अज्ञानमनुबध्नातीत्यग्रहणाऽनुबन्धः अनेन कार्याभावे कारणाभावोऽनुमीयते इति सूचितम् ॥४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गोलोकात् प्राकृतादेव नत्वप्राकृतात् इन्द्रस्य तदीयसङ्गो न सम्भवतीति "इन्द्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा चोदिता वयम्" इति सुरभिवाक्याच्चेदं लभ्यते श्रीब्रह्मपार्श्वे भयाद्गतः शक्रस्तदाज्ञया गोलोकात् सुरभिमानीय पुनस्तथा तदाज्ञयागत इति ॥ १ ॥ विविक्त विजने श्रीवैशम्पायनेन स्थानं चोक्तम् "स ददर्शोपविष्टं वै गोवर्द्धनशिलातले" इति विविक्तत्वञ्च दूरतस्तं दृष्ट्वा बहुलपुष्पहरणादिकमिषेण सखीनां दूरतः प्रस्थापनात् श्रीरामस्य च तद्दिने कथञ्चित् अनागमनादिति ज्ञेयम् ॥ २–३ ॥ विशुद्धं सत्त्वमिति व्याख्या ॥ ४–६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ गवां रक्षणतः परमसन्तुष्टो सुरभिर्गोलोकात् सुरभिलोकादागता स्वक्षीरैः कृष्णमभिषेच्यतीत्युपक्रामति गोवर्द्धने धृत इत्यादि। कृष्णमाव्रजत् कृष्णमाससाद। ततः शक्रश्च स्वलोकादाव्रजदित्यर्थः ॥१॥ उभयोः समागमे शक्रस्य प्रथमचेष्टितमाह–विविक्तमित्यादि। अभिमानातिरेकात् कदाचिच्चरणपतितं मां गोपाः पश्येयुरिति लज्जया विविक्तं यथा भवति तथा उप निकटे सङ्क्रम्य लोकेऽधायि, अपराद्धो जनस्तथैवाचरति। किरीटेनैव पस्पर्श, न तु शिरसा सङ्कोचातिशयात् साक्षात् स्पर्शाक्षमः। अत्र हेतुः व्रीडितः। कुतः? कृतहेलनः ॥ २ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

गोलोकात् सुरभिलोकात्, न तु गोलोकाख्यवैकुण्ठात् ॥ १ ॥ विविक्त इति लोकलज्जाभयात् सर्वात्मनि तस्मिन् पुनर्लज्जा नास्त्येव, पादस्पर्शनमिन्द्राभिमानित्वाल्लोकदृष्ट्या लज्जाकरं भवति ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सप्तविंशे भयादिन्द्रस्तुतिस्तत्र कृपा हरेः। सुरभ्या चाभिषेको यद्गोविन्देत्यभिधाऽभवत् ॥

आसाराद्रक्षिते व्रजे इति शक्रस्य भयेनागमने हेतुः सुरभेस्तु ब्रह्माज्ञया भगवदभिषेकः शक्रसाहाय्यञ्च ब्रह्मणा चोदिता वयमिति तदुक्तेः गोलोकात् प्राकृतादेव नत्वप्राकृताद्वैकुण्ठविशेषात् तदीयसुरभेरिन्द्रसाहित्याऽनुपपत्तेः ॥ १ ॥ विविक्त इति हन्त हन्त शक्रहतकस्य वज्रप्रहारैर्मम गोवर्द्धनपृष्ठं कीदृशं जर्जरमभूदिति दिदृक्षया कदाचित् प्रातरेकाकिनैव कृष्णेन तत्र गमनात्तदैवेन्द्रेणाप्यागमनादिति बुद्ध्यते दर्शनं न स्थानं च हरिवंशे व्यक्तम्। "ददर्शोपविष्टं वै गोवर्द्धनशिलातले" इति। शृणु भो! शक्र त्वं प्रथममेक एव वाहनादिस्वपरिच्छदं परित्यज्य दीनो भूत्वा स्वापराधं क्षमापयितुं प्रभोश्चरणाम्बुजयोर्दण्डवन्निपतेति सुरभ्या प्रेरणादुपसङ्क्रम्य हन्त भो देवेन्द्र! किमिदं ते मय्यपारं वात्सल्यं दृश्यते यद्बाल्यादज्ञत्वात् त्वन्मखहन्तारं सागसमपि मामनुकम्पितुमायासीति दृगिङ्गितेनोक्ते सति व्रीडितः ॥ २ ॥ आदौ दृष्टः स्वनेत्राभ्यामेव पश्चादपराधित्वं स्वस्य निश्चित्य परित्राणोपायजिज्ञासया मेरुपृष्ठं गत्वा श्रुतो ब्रह्ममुखादनुभावः प्रभावो येन सः ॥ ३ ॥ गर्वादेव त्वन्मखं विखंड्य लोभादेव त्वत् सम्प्रदानीयनैवेद्यं भोक्तु गोवर्द्धनमखमिषमेवाकरवमहमिति तत्तत्त्वं त्वं जानास्येवेति स्वस्मिन् वक्रोक्तिमाशङ्क्य भो नाथ त्वन्मायामोहितोऽप्यहं त्वत् कृपालेशेनाधुना त्वत्तत्त्वमेतन्मात्रं त्वहं जानामीत्याह–विशुद्धमिति, द्वाभ्याम्। तव धाम स्वरूपं शान्तमनुग्रं तपोमयं ज्ञानस्वरूपं तर्हि किं सत्त्वगुणात्थं विशुद्धसत्त्वम् अप्राकृते चिदानन्दमयमित्यर्थः। अतो रजस्तमसोस्त्वयि सम्भावनैव नास्ति प्रत्युतान्यगतयोरपि तयोस्त्वत्तो ध्वस एवेत्याह–ध्वस्तं रजस्तमश्च यस्मात् यत् स्मरणादिकर्त्तुरपि रजस्तमसी नश्यत इत्यर्थः। अतोऽस्मिन् जगत्यस्मदादिषु यो गुणानां सम्यक् प्रवाहः संसाररूपमायामयः अयं ते तव नैव विद्यते। ननु, जीववन्मास्तु किन्तु मायामधीनीकृत्य कदाचित् कौतुकवशादस्तु नात्र कापि दोषस्तत्राह–अग्रहणानुबन्धः न विद्यते ग्रहणस्यानुबन्ध आकाङ्क्षापि यत्र सः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सप्तविंशेऽध्याये भगवत्प्रभावदर्शनेन भगवन्तं शरणं गतेनेन्द्रेण कृता स्तुतिः सुरभीन्द्रकृतो भगवदभिषेकमहोत्सवश्च वर्ण्यते–गोवर्द्धने इति। गोवर्द्धने धृते शैले इतीन्द्रस्य भयेनागमने हेतुः "आसाराद्रक्षिते व्रजे" इति सुरभेर्हर्षेणागमने हेतुः इन्द्रः इन्द्रलोकादव्रजत् सुरभिः गोलोकादव्रजत् गोलोकः सर्वगतोऽहि नित्य एव भगवल्लोकः तदुक्तं हरिवंशे।

“अपामधस्ताल्लोको वै तस्योपरि महीधराः ।
नगानामुपरिष्ठाद्भूः पृथिव्युपरि मानुषाः । मनुष्यलोकादूदूर्ध्वन्तु खगानां गतिरुच्यते ॥
आकाशस्योपरि रविर्द्वारं स्वर्गस्य भानुमान् । देवलोकः परस्तस्माद्विमानगमनो महान् ॥
यत्राहं कृष्ण देवानामिन्द्रे विनिहतः पदे ।
स्वर्गादूर्ध्वं ब्रह्मलोको ब्रह्मर्षिगणसेवितः । तत्र सोमगतिश्चैव ज्योतिषां च महात्मनाम् ॥
तस्योपरि गवां लोकः साध्यास्तं पालयेति हि । स हि सर्वगतः कृष्ण महाकाशगतो महान्” ॥

महाकाशगतः परमव्योमादिशब्दवाच्यपरमधामाभिन्नः । यद्वा, महाकाशशब्दोऽत्र परब्रह्मपरः परब्रह्मणो निःसमानातिशयव्यापकत्वसूचनार्थः ॥ १ ॥ तत्र प्रथममिन्द्रेण कृतं प्रणामादिकं दर्शयति—विविक्त इत्यादिना । एवं श्रीकृष्ण पादयोः किरीटेन पस्पर्श नमश्चकार ॥ २–३ ॥ नित्यलोकवासी अनित्ये प्राकृते लोकेऽवतीर्य्य तद्दोषगन्धास्पृष्ट एव जननिग्रहानुग्रहौ तत्तत्प्राण्यधिकारानुसारेण करोषि नतु रागद्वेषाभ्यां संसारीव तव संसारित्वाभावादित्याह, विशुद्धसत्त्वमिति द्वाभ्याम् । तव धाम स्थानं विशुद्धसत्त्वम् त्रिगुणप्रकृतिकालभिन्नम् अनावरकस्वभावमचेतनं द्रव्यम् “तमसः परस्तात्” इत्यादिश्रुतेः । शान्तं निरुपद्रवम् तपोमयं ज्योतिर्मयं प्रकाशात्मकमित्यर्थः । “आदित्यवर्णनम्” इति श्रुतेः । ध्वस्ते अविद्यमाने रजस्तमसी यस्मिन् तत् अयं मायामयः त्वच्छक्तिविकाररूपः गुणैः सम्प्रोह्यते इति गुणसम्प्रवाहः संसारः तं तव न विद्यते भगवान् संसार नियन्तेत्यर्थः । यतः ग्रहणेन ममेदं देहगेहादिद्वारा प्राप्यं भवत्येवंभूतेन ग्रहणेनानुबद्ध्यते इति ग्रहणानुबन्धः बद्धजीवविषय इत्यर्थः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ अत्यल्पस्स्वसुरावेश इत्युक्तासुरावेशवशकार्यं शचीशस्य निरूप्याधुना तस्मिन्नप्यसुरावेशे गते प्रकृतिरेव त्वित्यन्तशः शंसितसुत्रामा किं तवाकरोदनन्तरं वारिदवारणं कृत्वा वारगेन्द्रग इति परीक्षकपरीक्षिन्मानसीं शङ्कामपाकुर्वन्हरौ निरन्तररतिमुक्तिसाधनमिति बोधयत्यध्याये । तत्रादौ सुरभ्याः सुरर्षभस्यागमनादागमनमवगमयति शुक इति कथयति ॥ श्रीशुक इति । गोवर्धने शैले घृते सति । आसारात्स्वाज्ञया पयोमुङ्मुक्ताद्धारासम्पाताद्व्रजे येन रक्षिते सति गोलोकात्स्वर्गलोकात् । गोः स्वर्गवज्राम्बुभूमिष्विति विश्वः । गोरित्येतेन पूर्तयद्गोलोकादित्यूचे तेन को वाऽवादीदासारासारतामिव व्रजरक्षण चेत्यतः स्वस्य गोभिः सर्वनेत्रैर्लोकोऽवलोकस्तस्मादित्यबोधयदर्थमिति तात्पर्यमवधेयं । दृष्टानुभाव इत्युरस्वारस्यं चैवं सति भविष्यतीति ज्ञेयं । आचार्या अपि सहस्रगुरगाधगुमय्यमय्यादिति सूचितवन्तः । सुरभिः कामधेनुः शक्रः पृथक् पृथगन्वयः । इन्द्रादपि सुरभिपुरस्कृतिरधुना मधुनाथस्य तत्पतित्वं निमित्तीकृत्येति ज्ञेयं । गवां लोको हि गोलोको गोनिवासस्थानं तस्मात्सुरभिरित्यप्यर्थः । स च स्वर्गोपरितनः । यथोक्तं भारत आनुशासनिके । सुरभिरुवाच । वरेण भगवन्मह्यं कृतो लोकः पितामह । एष एव वरो मेऽद्य यत्प्रीतोऽस्मि तवानघ । ब्रह्मोवाच । त्रयाणामपि लोकानामुपरिष्टान्न वत्स्यसि । मत्प्रसादाच्च गोलोको विख्यातः स भविष्यति । निवत्स्यन्ति महाभागे सर्वा दुहितरश्च त इत्यारभ्याष्टाशीतितमाध्यायसमाप्तिपर्यन्तमिन्द्रं प्रति ब्रह्मवाण्यां । न च स्वर्गादूर्ध्वं ब्रह्मलोको ब्रह्मर्षिगणसेवितः । तस्योपरि गवां लोक इति हरिवंशवचनविरोधः । त्रयाणामपि लोकानामिति सामान्यवचनस्य विशेषपर्यवसानसम्भवात् । दृग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु । भूमौ पशौ च गोशब्दो विद्वद्भिर्दशसु स्मृत इति यादवो हलायुधोऽप्येवं । एवंकारेण च योऽसुरावेशत आसारैर्बबाधे समाधेयोऽयं माधव इत्यमाधेनुनागतासुरावेश आव्रजदिति द्योतयति ॥ १ ॥ कृतहेलनः कृतं हेलनमनादरो येन स तथेति व्रीडितो लज्जितो विविक्ते एकान्ते । विजिर् पृथग्भावे क्तः । विचिर् विवेचन इत्यतो वा क्तः । विविक्तौ पूतविजनावित्यमरः । विविक्तं त्रिष्वसम्पृक्तरहःपूजाविवेकिष्विति भानुः । एनं कृष्णमुपसङ्गम्यार्कवर्चसा किरीटेन पादयोः स्पर्शः ॥ २ ॥ अमिततेजसः कृष्णस्येदानीं दृष्टः प्राक श्रुतश्चानुभावो येन सः । नष्टः त्रिलोकेश इति मदोहन्ता यस्य सः । तस्मिन्नप्यसुरावेशे गते सति तात्पर्यभूमिकेदं विशेषणमिति मन्तव्यं । कृताञ्जलिर्बलाहकश्रृङ्खलामोचनस्य करकार्यत्वाद्वाऽऽज्ञायाश्च जिह्वाकार्यत्वात्कृताञ्जलिरिदमाहेत्युक्तिरिव नष्टत्रिलोकेशमद इत्यहङ्कारस्य मनः प्रभेदत्वात्तच्छुद्ध्युक्तिरिति मन्तव्यं ॥ ३ ॥ विशुद्धसत्त्वमिति श्लोके धाम भगवद्गृहं शुद्धसत्त्वात्मकमत एव प्रकृतिविकृतं तथा तपोमयं कृच्छ्रचान्द्रायणादिप्राप्यमिति च प्रतीयते । तथा गुणसम्प्रवाहः सत्त्वगुणकार्यप्रवाहो न पारमार्थिको मायामय इति ग्रहणानुबन्धः । ज्ञानं ग्रहण तेनानुबद्ध्यते सम्बध्यते विषयीक्रियत इति यावत् ततः प्रपञ्चः प्रातीतिको मिथ्याभूत एवेति प्रतीयत इत्यतस्तत्तात्पर्यार्थमाह ॥ विशुद्धसत्त्वमित्यादिना । यस्मात्त्रिगुणसम्बन्ध इत्यत्रत्यत्रिगुणपदयोर्विशेषणसमासत्रयश्च ते गुणाश्च तेषां सम्बन्धस्त्वयि न विद्यते विगतं शुद्ध रजस्तमोसंवलितं सत्त्वगुणो यस्मिन्निति विग्रहः सूचितः । मूले त इति षष्ठी सप्तम्यर्थ इति सूचितं स्वपीति । सम्बन्धेति सम्प्रवाहपदप्रतिरूपं ते ग्रहणानुबन्ध इत्यत्र न ग्रहणमिति पदमपि त्वकारप्रश्लेषेगेत्याह ॥ यत्राग्रहणमनुबद्धमिति । अग्रहणमज्ञानं यत्र मायामये गुणसम्प्रवाहेऽनुबद्धं सम्बद्धं तपोमयं ज्ञानात्मकं । तप आलोचन इति स्मृतेः ॥ ततश्चायं श्लोकार्थः ॥ हे देव तव धाम स्वरूपं देहो वा । तेजः शक्तिः स्वरूपं च गृहं धामेति चोच्यत इति चतुर्थतात्पर्योक्तेः । धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोरिति

विश्वः । विशुद्धसत्त्वं शुद्धं रजस्तमोऽमिश्रं सत्त्वं गुणस्तद्रहितं । आन्तरङ्गिको भावश्च सत्त्वं सद्गुणरूपत इति बृहद्भाष्ये सदा सर्वगुणाढ्यत्वात्सत्त्वो हरिरुदीयंत इति कापिलेय इति तृतीयतात्पर्येचोक्तेः सकलगुणमित्यपि ज्ञेयः । शान्तं बहिः कृतस्वापराधः क्षन्तव्य इति समाधाननिधानमित्यन्तस्त्वस्मदादिसुखनिर्णायकं मङ्गलरूपं वा । शान्तिः प्रशममङ्गल इत्यभिधानं । तपोमयं ज्ञानात्मकं यद्यपि सत्त्वस्यैव यदा नावकाशः काऽऽशा रजस्तमसोः सत्ताशङ्कायामिति तन्न वक्तव्यं । तथाऽपि मन्दानुजिघृक्षयाऽऽह ॥ ध्वस्तरजस्तमस्कमिति । ध्वस्तेऽत्यन्तासती रजस्तमसी येन तत् । यद्वा ध्वस्ते रजस्तमसी प्रचुरस्वकार्योजनके यस्य स को ब्रह्मा येन तदिति । शुद्धसत्त्वश्चतुर्मुख इत्युक्तेः । प्रथमेऽसौ पदादाविति सत्त्वं द्वितीये करकादिः । मायामयो माया स्वतप्रज्ञा सैव मयं प्रधानं निमित्तामिति यावत् यस्य सः । मायेति ज्ञप्तिरुद्दिष्टा मयं प्रधानमुद्दिष्टमिति बृहद्भाष्याक्तेः । गुणसम्प्रवाहस्तत्सम्बन्धोऽयं ते त्वयि न विद्यते सन्नेत्यर्थः । यस्मात्तस्मात्तव धाम तथागुणसम्प्रवाहः । अग्रहणानुबन्धोऽग्रहणमज्ञानं तस्यानुबन्धः सम्बन्धो जनकतारूपो यस्य सः । एतेन कार्यमज्ञानं नास्ति ततो नियमेन तज्जनको गुणसम्प्रवाहो नास्तीत्युच्यत इति सूचयति ॥ ४ ॥

श्रीसुबोधिनी

चतुर्विंशे भगवतो अभिषेको निरूप्यते । स्तुतिः शिक्षा तथेन्द्रस्य कामधेन्वादिभिः कृता ॥ १ ॥
यथा रक्षा सुसंसिद्धा मदाभावस्तथा यदि । तदैव भगवत्कार्यं सर्वं सफलतां व्रजेत् ॥ २ ॥
गोरक्षा चेद्धरिकृता नाधिदैविकगामिनी । तया वा दासभावश्चेन् न चाप्यङ्गीकृतः क्वचित् ॥ ३ ॥
स्वयं वा स्वामिभावेन न स्वीकुर्यान् मुरद्विषम् । तदेय भगवल्लीला प्रमाणं नैव जायते ॥ ४ ॥
अतो हेतूक्तिरप्येषा सत्फला वर्ण्यते स्फुटा । इन्द्रयागश्च भविता यस्मादिन्द्रो हरिः स्वयम् ॥ ५ ॥

पूर्वाध्याये सन्देहाभावो निरूपितोतो भगवदुक्तमेव कर्तव्यमिति स्थापितं, तद् यदि परम्परयेन्द्रयागत्वेन प्रसिद्धं कर्म नेन्द्रयागत्वमापद्येत तदा प्रसिद्धिविरोधः स्यादिति भगवत इन्द्राभिषेको निरूप्यते, न केवलं भगवानेव स्वयमिन्द्रो जातः किन्तु सर्वैरेवेन्द्राभिषेककर्तृभिरिन्द्रः कृत इति वक्तव्यं तदर्थमिन्द्रस्य कामधेनोश्चागमनमाह **गोवर्धने** इति गोवर्धने **शैले धृत** इन्द्रमानभङ्गादिन्द्रः समागतोन्यथा भगवान् गोवर्धनधारणेन क्लिष्ट इव तत् स्मृत्वेन्द्रं मारयेदतः क्षमापनीय इति, **आसाराद्** धारासम्पाताच्च **रक्षिते** गोकुले स्ववंशो रक्षित इति **सुरभिः** समागता, न **प्राकृतैः हि स्ववंशीयैर्भगवत्पूजा कर्तुं शक्या**तः स्वयमागता चकारादन्येपि तदीया देवा उत्सवार्थं समागता इति ज्ञातव्यम् ॥ १ ॥ तत्र प्रथममपराधनिवृत्तिः कारणीयेतीन्द्रस्योपाख्यानमुच्यते तत्र समागत इन्द्रो भगवन्तं प्रार्थितवानित्याह **विविक्त** इति, एकान्ते भगवत्समीपं गतो भक्ता अपकृता इति कदाचित् तेनिष्ट वदेयुः, लज्जां च हेतुत्वेन वक्ष्यति, अप्रार्थिते सर्वनाशो भविष्यतीति प्रार्थनावश्यकी, अत एकान्ते निकटे गतः, तत्रापि **व्रीडितो** लज्जितः, **कृतं हेलन** येनेति भीतश्च, अत एनं भगवन्तं **पादयोः पस्पर्श, अर्कवर्चसा** किरीटेन भुग्नपृष्ठः शिरो भगवत्पादयोः स्थापितवान्, **महत एतत् सर्वापराधक्षमापकम्** ॥ २ ॥ एवं नमस्कारं कृत्वा स्तोत्रं कर्तुमारेभे **दृष्ट** इति, ननु देवा नानृतं वदन्ति नाप्यारोपेणायं च भगवतो नोत्कर्षं जानात्यथापराधं न कुर्याद् विपरीतबुद्धिश्चातः कथं स्तोत्रमिति चेत् तत्राह **दृष्टश्रुतानुभावस्ये**ति, **दृष्टो** गोवर्धनोद्धरणलक्षणः **श्रुतः** पूतनासुपयःपानादिरनुभावो यस्य, किञ्च न केवलं **दृष्टश्रुतानुभावमा**त्रत्वमन्यदप्यधिकमस्तीति ज्ञापयति, यथा जाज्वल्यमानोग्निः सर्वमेव धक्ष्यतीति ज्ञायते तथा भगवत्तेजोपि परिदृश्यमानं सर्वं कर्तुं समर्थमित्यवसीयते, तदाह **मिततेजस** इति, अत एव **नष्टस्त्रिलोके**शोहमितिमदो यस्यात इन्द्र इति **नाममात्रं** भगवदधिकारी **कृताञ्जलिः** सन्नाहाग्रे वक्ष्यमाणम् ॥ ३ ॥

भगवन्तं स्तौति दशभिः प्राणश्लोकैः,

क्रियाशक्तिप्रधानोयं बाह्यश्चायं तथाविधः । पुरुषार्थप्रसिद्ध्यर्थं षड्गुणं स्तौति माधवम् ॥ १ ॥

निर्दुष्टा भगवद्गुणा इति वक्तुं प्रथमं दण्डकरणेन प्राप्तं क्रोधं निवारयति द्वाभ्यां हेतुफलाभ्यां, तत्र प्रथमं भगवतः क्रोधे हेतुर्नास्तीत्याह **विशुद्धसत्त्व**मिति, परमार्थतस्तु सर्वात्मा सर्वकर्ता सर्वप्रेरकोतः क्रोधः सम्भावित एव न, आविर्भावप्रकारेणापि लीलापि क्रोधे हेतुर्नास्तीत्युच्यते, तत्र क्रोधे रजस्तमसी हेतू ते त्वयि न स्त इत्याह **विशुद्धसत्त्वं तत्त्वं धामे**ति, **शुद्धं** रजस्तमोभ्यामसम्पृक्तं विशेषेण शुद्धं सत्त्वेनाप्यसम्पृक्तं तत् **तव धाम** स्थानं "सत्त्वं विशुद्धं वसुदेवशब्दित"मिति, तत्र भगवानाविर्भवतीति वासुदेवः, किञ्च **धाम** तेजोपि सात्त्विकमेव भगवत्तेजः सत्त्वमेव वा, किञ्चेदं सत्त्वं शुद्धसत्त्वान्तरेणाप्यमिश्रितं तज् जीवस्थं तरतभावापन्नं भवत्यत इदं सत्त्वं परमकाष्ठापन्नमेव, तदाह **शान्त**मिति, परमा शान्तिः सत्त्वोत्कर्षो ज्ञानादयोवान्तरभेदो अल्पविक्षेपरूपाः, अन्यथा कथं बोधयेत् कथं वा भजेत् ? अतः शान्तिरेव **परमकाष्ठा**, नन्वज्ञानस्यापि शान्तिः परमकाष्ठा भवति वृक्षादिषु सुषुप्तौ च तथोपलम्भादतस्तद्व्यावृत्त्यर्थमाह **तपोमय**मिति, **तपस्तु** विहितज्ञानात्मकं तेजोरूपमत एव तेजोव्यतिरिक्तं सन्तापयति, सुतरां भगवत्तपस्तु ज्ञानमयं "यस्य ज्ञानमयं तप" इति श्रुतेरतो मौढ्याद् या शान्तिरुपरतिरूपा सा नात्र ग्राह्यात एव 'शम उपशम' इति, आत्मसमीपे यः शान्तस्तिष्ठति स उक्तो न तु शान्तिमात्रे निरोधेनाज्ञानसमीपे वातस्तपोमयमित्युक्तं, ननु

"रजस्तमश्चाभिभूय सत्त्वं भवति भारते"ति यथा सत्त्वं प्रबलमेवं "रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथे"त्यपि, "न तदस्ति पृथिव्यां वे"ति च केवलसत्वस्य बाधः, तत्राह **ध्वस्तरजस्तमस्कमिति**, ध्वस्ते **रजस्तमसी** येन लोकानामपि रजस्तमसी यो नाशयति तं को वा नाशयेत् ? आधिदैविक एव तादृशस्य नाशको भवति, स च व्यवस्थया स्थापितस्ते गुणाश्चाप्राकृताः सच्चिदानन्दधर्मरूपाः प्राकृतेभ्यो भिन्ना अन्यथा "प्रकृतिजैस्त्रिभिर्मुक्तं सत्त्वं पृथिव्यादिषु नास्ती"ति न वदेत् तस्यैवाप्रसिद्धत्वाद् गुणावताराश्च भगवतोप्राकृता न भवेयुः, किञ्च सत्त्वस्य सत्त्वसम्बन्धः कथं भवेद् भेदाभावेतस्ते त्रयो गुणा ब्रह्मविष्णुशिवेष्वेव प्रतिष्ठिता अतः सच्चिदानन्दधर्मत्वाद् यदा ब्रह्मादिष्वितरापेक्षा तदेतरभजनं सति सत्त्वं चिति रज आनन्दस्तमसीति भगवांस्तु कदाचिद् विष्णोः सत्त्वमाधारत्वेन गृह्णाति यदि न केवलः समायाति, प्रकृते तु केवलोपीन्द्रेण भ्रमात् तथा ज्ञायतेन्यथा "प्रागयं वसुदेवस्य क्वचिज्जात" इति न वदेत् सर्वदैव वसुदेव एव जायमानत्वादत इदानीं केवलोपि सत्त्वाश्रित उच्यते, पूर्वभ्रमापेक्षयायं भ्रम उत्तम इति स्तुतित्वमन्यथा व्यापिवैकुण्ठे सर्वान् नेतुं न शक्नुयात्, सत्त्वं त्वाधारत्वेनैव गृहीतमिति विष्णोरपि तथा सामर्थ्यं क्वचिदुच्यते "ब्रह्मेव सगुणं बभा"वित्यत्रापि विष्णुरेव गृह्यतां तदवतारा भगवान् वा क्वचिदन्यथा कृष्णवद् बभावित्येव वदेदत इन्द्रो विष्णुं भगवन्तं जानातीति स्वज्ञानानुसारेणाह, यदा भगवत्सत्त्वं सर्वरजस्तमोनाशकं तदा तदाश्रित्य स्थिता माया तत्र दुरापास्तेत्याह **मायामयोयमिति**, अयं सर्वोपि **गुणानां सम्यक् प्रवाहो** देवतिर्यङ्मनुष्यादिरूपो **मायामयो** मायाप्रचुरो गुणानां कारणभूतत्वान् मायायाः, तत्र प्रमाणमाहायमिति, अन्यथा कथं दृश्यः स्यात् ? तस्मात् प्राकृतमेवैतत् सर्वमप्राकृतं तु न दृश्यत इति तस्मादयं प्राकृतोपि प्रपञ्चस्ते **ग्रहणस्य** ज्ञानस्यानुबन्धरूपो न भवत्यतः **प्राकृतदृष्ट्यायमपकारं** कृतवानयमुपकारं कृतवानिति तव न सम्भवति ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

चतुर्विंशाध्यायतात्पर्योक्तौ, गोरक्षा चेदित्यारभ्य जायत इत्यन्तस्यायं भावः । साजात्यमात्रेणाप्यखिललौकिकगवाधिदैविकगामिनी पालनलीला पुरुषोत्तमातिरिक्तस्य न सम्भवतीति तत्त्वप्रमापिका तादृग्रूपसुरभिप्रपत्तिः । तदुक्तं 'भवताऽलोकनाथेन सनाथा वयमच्युत' इति सुरभ्या । लोकभिन्ना अलोका अलौकिक्य इति यावत् । तासां नाथेन पालनकर्त्रा त्वया वयमपि सनाथाः पालिता भवाम इत्यर्थः । लीलास्थपदार्थमात्र इयं व्यवस्थेति ज्ञापनायालोकेति सामान्योक्तिः, अन्यथोक्तरीत्या लोकनाथेति वदेत् । तत्र हेतुरच्युतेति । धर्मतोऽपि च्युतिराहित्येन पालनलक्षणो धर्मो यद्यस्मद्गामी न स्याद्गोत्वाविशेषात् तदास्मदंशे स च्युतः स्यादित्यर्थः । **तदेयमिति** । लीलापदं भावप्रधानम् । भगवल्लीलाप्रमाणमिति समस्तं पदम् । तथा चेयमुच्यमाना लीला भगवल्लीलात्वे प्रमाणं तथेत्यर्थः । ननु हेतुवादसिद्धत्वेनेन्द्रयागश्चेद् भग्नः, तदा प्रकृतेपि 'भवता लोकनाथेने'त्यादिना रक्षकत्वादिहेतूक्तिपूर्वक एवेन्द्राभिषेकः कृत इति को विशेष इत्यत आहुः **अतो हेतूक्तिरपीति** । यतो यागभङ्गकरणप्राप्तसदोषत्वशङ्कापरिहाराय तद्भङ्गतदपूर्वकारणपालनानां केवललीलात्वं ज्ञापनीयम् । तच्चाधिदैविकगामित्वनिरूपणेन भवतीति तद्रूपमेव । अतोऽत्र हेतूक्तिरपि । एषा लीलारूपैवेत्यर्थः । अत एव 'भवाय भवे'ति 'कृष्णेऽभिषिक्त एतानी'त्यादिना सत्फला वर्ण्यत इत्याहुः **सत्फलेति** । किञ्च, पारम्पर्यागतमर्यादाभङ्गोऽप्येवं न जात इत्याहु**रिन्द्रयागश्चेति** । अग्रेपि प्रतिवर्षं गोसवं करिष्यन्तीति भवितेत्युक्तम् । एतेन लीलासम्बन्धिलोकपालादयोपि न भगवदतिरिक्ता इति ज्ञापितमिति दिक् ॥ ० ॥ **गोलोकादाव्रजदित्यत्र, न हि प्राकृतैः स्ववंशीयैरिति** । प्रकृतं लीलाकरणं तत्सम्बन्धिभिरित्यर्थः । तथा सति लीलारसविरोधः स्यादिति भावः ॥ १ ॥ **इन्द्रस्तुत्याभासे, दशभिः प्राणश्लोकैरिति** । भगवदपराधैराधिदैविकसर्वतिरोधाने तादृशाः प्राणा अपि तिरोहिता इत्ययं मृत इवाधुनेत्याधिदैविकतत्प्राप्त्या स्वजीवनसिद्ध्यर्थं तत्समानसंख्याकैः श्लोकैः स्तुतिमाहेति संख्यातात्पर्यमुक्तम् । ननु 'गोवर्धने धृते शैल' इतिवाक्यात् क्रियाशक्त्याविर्भावं कृत्वा यथायं बोधितस्तथा पूर्वमेव ज्ञानशक्तिमेवाविर्भाव्य कुतस्तथा न कृतवान्, तदा प्रभुमाहात्म्यज्ञानान्नापराधं कुर्यात्, अधुनाग्रेऽपि चेत्यत आहुः **क्रियाशक्तेति** । इन्द्रादीनां बाहुरूपत्वादिति भावः । ननु प्रयोजनमस्तीति कुतस्तथा नाकरोदित्याशङ्क्य तदनधिकारमाहुः **बाह्यश्चायमिति** । हेतुककर्मसम्बन्धित्वेन वेदबाह्य इत्यर्थः । अत एव गवादिद्रोहार्थमाज्ञप्तवानिति भावः । एतदेवाहु**स्तथाविध** इति । अतःपरं क्रियाशक्तिर्यावत्प्रयोजनार्थं स्वस्मिन्यावती च दत्तास्ति तदुपयोगिज्ञानमपि दत्तमस्तीति भगवदपरावेन चतुर्विधपुरुषार्थानां भगवद्दत्तगुणानां च तिरोधानं ज्ञात्वा तत्सिद्ध्यर्थं स्तौतीति तावत्सङ्ख्याकैः श्लोकैः स्तुत्या ज्ञाप्यत इत्याहुः **पुरुषार्थप्रसिद्ध्यर्थमिति** ॥ ३ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

चतुर्विंशे **गोरक्षेति**सार्धेन सुरभिस्तुतिश्लोकत्रयार्थः **क्रमेणोक्तः**, **तदेयमिति** गोरक्षाया भगवल्लीलात्वे प्रमाणभूता सुरभिप्रपत्तिर्न **जायते** न स्यादित्यर्थः, **अत** इति प्रपत्तेः प्रमाणत्वादित्यर्थः ॥ ० ॥ **विविक्त** इत्यस्याभासे तत्रेत्यारभ्येत्याहेतिश्लोकद्वयेनेतिशेषः, समागमनं तु पूर्वानुवादः, प्रार्थनाङ्गं नमस्कारो "विविक्त" इत्यस्यार्थः, प्रार्थनाकरणं "दृष्टे"त्यस्यार्थः, तथा च साङ्गप्रार्थनाकरणं श्लोकद्वयार्थः ॥ २ ॥ **दृष्टेत्यस्याभासे आरेभे** इति इत्याहेतिशेषः, व्याख्याने, एतादृशस्य कृष्णस्येन्द्र इत्यन्वयमभि-

प्रेत्याहुः **भगवदधिकारीति** ॥ ३ ॥ **विशुद्धसत्त्वमित्यत्र** ननु शुद्धसत्त्वं धाम त्ववतारे अतो **मूलरूपे** क्रोधाभावः केन साध्य इत्याशङ्क्याहुः **परमार्थतस्त्विति**, **सत्त्वेनापि असम्पृक्तमिति** तरतमभावापन्नेनेतिशेषः, **तपोमयमित्यत्र** सामीप्यस्य भेदसहिष्णुत्वादात्मसामीप्यं न सम्भवतीति पक्षान्तरमाहुः **निरोधेनेति**, सर्वेन्द्रियनिरोधेनेत्यर्थः, तेन सुषुप्तिनिषेधः, तथा च परमात्मसामीप्यमुक्तं, परमात्मा तु “ज्ञाज्ञौ द्वावजा”वितिवाक्यात् ज्ञ एवेत्यज्ञानसामीप्यनिषेधः, **सुषुप्तौ परमात्मनि लय एव** न तु तत्सामीप्यमिति भावः, **अत** इति मौढ्यकृतशान्ते रूढाया अग्राह्यत्वादित्यर्थः, **इयं तु यौगिकीज्ञेयं, लोकानामिति** “सत्त्वं न चेद् धातरिदं निज”मित्यादौ साधितत्वात् पूर्वोक्तवाक्यानि प्राकृतसत्त्वपराणीति व्यवस्थया न बाध इतिभावः, **आधिदैविक एवेति** गुण इतिशेषः, **सतीति** सच्चितोः सत्त्वरजसी तिष्ठतः अतस्तत्तद्धर्मावित्यर्थः, तमस आनन्दधर्मत्वं सन्दिग्धमिति व्युत्पादनपूर्वकमाहुः **आनन्द** इति, तमसि सति तेन सर्वविस्मृतौ सत्यामानन्दोनुभूयते, तत्स्वरूपस्य विगलितवेद्यान्तरत्वात्, इतिहेतोस्तम आनन्दधर्म इतिशेषः, **भगवांस्त्विति** गुणावताराणां त्रयाणां नैवं सामर्थ्यमिति तुशब्दः, **आधारत्वेनेति** देहत्वेनेत्यर्थः, अप्राकृता गुणास्त्रयाणां स्वरूपं, प्राकृता गुणास्त्रयाणां गुणा इतिविभागः, **आधारत्वेनैवेति** आवेशिदेहत्वेन न तु भेदेनेत्येवकारः, विष्णोः सत्त्वात्मकत्वेन गुणत्वमेव न तु सगुणत्वमित्यत आहुः **तदवतारा** इति, **गृहीतसत्त्वदेहा अवतारा** मत्स्यादयोंशावतरणे भगवान् कृष्णश्च, एते वा गृह्यतामित्यन्वयः, नन्वत्र तु तथा नास्तीत्यत आहुः **अत इन्द्र** इति, इन्द्रबुद्धिमनुसृत्येदमुक्तं, **तदाश्रित्य स्थितेति** रजस्तमश्चाश्रित्य स्थितेत्यर्थः, अत्र **प्रमाणमिति** मायामयत्वे इत्यर्थः, **अन्यथेति** मायाप्राचुर्याभावेन केवलब्रह्मत्वे इत्यर्थः, अत्र **मायाशब्देन** प्रकृतिः, **तस्मादिति** दृश्यत्वाद्धेतोरयं प्राकृतो बन्धकस्वभावोपि प्रपञ्चस्ते ज्ञानस्यानुबध्नातीत्यनुबन्धस्तादृशरूपो न विद्यते त्वद्ज्ञानं स्वविषयकं कर्तुं न शक्नोति प्राकृतवत् तत्र क्रोधादिकं न भवतीत्यर्थः, न हि त्वद्ज्ञानं प्राकृतवद् वैषम्यरीत्या तद्विषयकं भवति, तत्र हेतुमाहुर**न्येषामपीति** ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

चतुर्विंशाध्यार्थोक्तौ **कामधेन्वादिभिः कृत** इति **अभिषेकविशेषणमेतत्**, **गोरक्षा चेद्धरिकृतेत्यारभ्य जायत** इत्यन्तस्यार्थष्टिप्पण्यां स्फुटः, **अतो हेतूक्तिरप्येषेत्यस्यार्थः सत्फलेत्यस्यार्थष्टिप्पण्यां** स्फुटः ॥ ० ॥ इन्द्रस्तुतिश्लोकसङ्ख्यातात्पर्योक्तौ **दशभिः प्राणश्लोकैरित्यस्यार्थष्टिप्पण्यां** स्फुटः, **क्रियाशक्तिप्रधान** इत्यस्य **बाह्यश्चायमित्यस्य तथाविध** इत्यस्य चार्थष्टिप्पण्यां स्फुटः, **पुरुषार्थप्रसिद्ध्यर्थमित्यस्य षड्गुणं स्तौतीत्यस्य** चार्थष्टिप्पण्यां स्फुटः, **पुरुषार्थानां** धर्मादीनां प्रकर्षेण **सिद्ध्यर्थं** ऐश्वर्यादिषड्गुणयुक्तं भगवन्तं स्तौतीत्यर्थः, तथा च पुरुषार्थसिद्धिसूचनार्थं चत्वारः श्लोकाः, षड्गुणसिद्धिसूचनार्थं षट् श्लोकाः, एवं दश श्लोका भवन्तीति ज्ञेयम्, **विशुद्धसत्त्वमित्यत्र ज्ञानादय** इत्यारभ्य **भजेतेत्यन्तं** ननु परमशान्तेरेव सत्त्वोत्कर्षत्वमुक्तं तन् न युक्तं ज्ञानादीनामेव सत्त्वोत्कर्षरूपत्वस्योचितत्वादित्याशङ्क्याहुः **ज्ञानादयस्त्वित्यादि**, **ज्ञानादय** इति **आदिशब्देन** “मुक्तसङ्गोनहंवादी”तिगीतोक्ताः सङ्गत्यागानहङ्कारधैर्योत्साहनिर्विकारत्वादयो ग्राह्याः, तेपि सत्त्वस्यावान्तरभेदा न तु सत्त्वोत्कर्षरूपाः किन्तु **परमशान्तिरेव** सत्त्वोत्कर्षरूपा अतो यस्य शान्तिर्नास्ति तस्य ज्ञानादयोपि विक्षेपरूपाः, अत इन्द्रस्य सात्त्विकत्वेन ‘सत्त्वात् सञ्जायते ज्ञान’मितिवाक्याज् जायमानं विक्षेपरूपं ज्ञानं शान्त्यभावान् न कार्यक्षमं भवतीत्याहुः अन्यथेति, इन्द्रो भगवत्स्वरूपं बोधयति क्वचिद् भगवन्तं त्यजति अन्यथा वृष्ट्याद्युपद्रवं न कुर्यात्, क्वचिद् भगवन्तं भजति अन्यथा “विशुद्धसत्त्वं तव धामे”त्यादिना स्तोत्रं न कुर्यात्, अत इन्द्रकृतं बोधनं भगवत्त्यागो भजनं च विक्षेपरूपमेव, अस्थिरत्वात्, तदेतदाहुः **अन्यथा कथं बोधयेत् कथं वा त्यजेत् कथं वा भजेदिति**, अतः शान्त्यभावाद् विज्ञानादिकं विक्षेपरूपं अस्थिरमेव, अत एव पुनः पारिजातप्रसङ्गे शक्रस्य मोहो भविष्यतीति बोध्यं, **तपोमयमित्यस्य** विवरणे **न तु शान्तिमात्रे निरोधेनेति** इन्द्रियनिरोधेन **शान्तिमात्रे** सति अयं पुरुषः शान्त इति न शास्त्राभिप्रायः किन्तु ‘शम् उपशम’ इतिधातुपाठात् उप समीपे आत्मनः समीपे अवस्थितौ सत्यां अयं शान्त इति शास्त्रव्यवहारः, आत्मसमीपेवस्थितिस्तु ज्ञानेन भवति, अतस्तपोमयमितिविशेषणेन अज्ञानशान्तिर्व्यावर्तिता, **अज्ञानसमीपे** वेति शम् उपशमे इत्यत्र सामीप्यमात्रं न ग्राह्यं किन्त्वात्मसामीप्यमतो नाज्ञानसामीप्यं शान्तिशब्दवाच्यमित्यर्थः, न चात्र मानाभावः, “तपोमय”मितिविशेषणस्य मानत्वात्, “यस्य ज्ञानमयं तपः” इतिश्रुतेस्तपसो ज्ञानरूपत्वात्, तथा च लोके शान्तिशब्देन शान्तिमात्रग्रहणेपि प्रकृते ज्ञानशान्तिरेव ग्राह्येति भावः, यदा **ब्रह्मादिषु इतरापेक्षेति** ब्रह्मणः सत्त्वापेक्षा यदा तदा विष्णुं भजते तमोपेक्षा यदा तदा शिवं भजते, एवं विष्णुशिवावपि, अत एव ‘शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिव’ इत्यादिवाक्यानि पुराणेषु दृश्यन्ते, सेयं गुणावतारयोर्विष्णुशिवयोः परस्परं भजनव्यवस्था, पुरुषोत्तमः श्रीकृष्णस्तु गुणावताराणां ब्रह्मविष्णुशिवानां त्रयाणामप्यवतारीति परब्रह्मरूपः परमकाष्ठापन्न एव, तदेतदाहुः **भगवांस्तु कदाचिदित्यादि**, **प्रकृते तु केवलोपीति** निरावरणपरब्रह्मपूर्णपुरुषोत्तमत्वेन आधाररूपशुद्धसत्त्वरहितोपीत्यर्थः, नन्वत्र विशुद्धसत्त्वसाहित्यं कुतो नाङ्गीक्रियत इति चेत् तत्राहुः **अन्यथा “प्रागयं वसुदेवस्य क्वचिज्जात” इति न वदेत्** इति, “वसुदेवस्य क्वचिज् जात” इत्युक्त्या क्वचिज् जातः क्वचिन् नेति सिध्यति, यदि सर्वदैव शुद्धसाहित्यं स्यात् तदा “क्वचि”दिति न वदेत्, वसुदेवशब्दस्य विशुद्धसत्त्ववाचित्वात् “विशुद्धसत्त्वं वसुदेवशब्दित”मितिवाक्यात्, ननु वसुदेवशब्दोत्र शूरपुत्रवसुदेववाचको न विशुद्धसत्त्ववाचकस्तथा च वसुदेवस्य

क्वचिदेव पुत्रो जात इति लापनं युक्तमिति चेन् न, वसुदेवस्याधिदैविकविशुद्धसत्त्वात्मकत्वेन तत्र च सर्वदैवाविर्भावाङ्गीकारे क्वचिदितिपदस्य वैयर्थ्यात्, अतोत्र "विशुद्धसत्त्वं वसुदेवशब्दित"मितिवाक्यसिद्धं विशुद्धसत्त्वमेव वसुदेवशब्देन ग्राह्यं, तथा च कदाचिद् विशुद्धसत्त्वे आविर्भवति, यदा तु पूर्णावतारस्तदा विशुद्धसत्त्वे नाविर्भवतीत्यर्थो भवति, एवं च प्रकृते पूर्णावतारत्वान् न सत्त्वे आविर्भावस्तथापीन्द्रस्योक्तिस्तु भ्रमादितिहार्दं, **भगवान् क्वचिदिति** यदा कृष्णावतारो न पूर्णस्तदा सत्त्वव्यवधानात् सत्त्वाधारत्वाद् वा **सगुण**पदेन कृष्णो ग्राह्य इत्यर्थः, **अन्यथा कृष्णवद् बभावित्येवेति** "ब्रह्मेव सगुणं बभौ" इत्यत्र "सगुणं" विशुद्धसत्त्वसहितं "ब्रह्म" विष्णुरूपं यथा तथा "बभा"वित्यर्थो ग्राह्यः, **अन्यथा** यदि विष्णुर्न गृह्येत तदा "कृष्णवद् बभौ" इत्येव वदेत् 'सगुण'पदं न वदेत्, अतः 'सगुण'पदाद् विष्णुर्गुणावतारो गृह्यतां तदवतारा इति, **प्राकृतमेवैतत् सर्वमिति एतत्** परिदृश्यमानं प्रकृतिसम्बन्धयुक्तं न तु प्रकृतिसमवायिकारणकं, अत एव प्राकृतैरिन्द्रियैर्दृश्यते, तथा च दृश्यस्य प्रपञ्चस्य प्रकृतिसम्बन्धित्वेन द्रष्टुरिन्द्रियाणामपि प्रकृतिसम्बन्धसत्त्वाद् यक्षबलिन्यायः, न तु परिदृश्यमानस्य मायिकत्वमितिसारं, यत्र लीलाप्रपञ्चे प्रकृतिसम्बन्धो नास्ति तत्र इन्द्रियग्राह्यतापि नास्तीत्याहुः **अप्राकृतं तु न दृश्यत इतीति**, प्राकृतैश्चक्षुर्भिर्न दृश्यत इत्यर्थः, **प्राकृतमेवैतत् सर्वमिति**सुबोधिन्यां **प्राकृत**शब्दः शैषिकेण अणप्रत्ययेन सिद्धः, उपनिषदा ज्ञायते, औपनिषदः पुरुषः चक्षुषा गृह्यते चाक्षुषं रूपमितिवत् प्रकृत्या सम्बध्यत इतिप्राकृतमितिबोध्यम् ।। ४ ।।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

चतुर्विंशाध्याये **चतुर्विंश** इत्यादि का० २३०¾–२३४¾ । चतुर्विंशाध्याये **कामधेन्वादिभिः कृतोभिषेकः**, इन्द्रकृता स्तुतिः, भगवत्कृतेन्द्रस्य **शिक्षा च निरूप्यत** इत्यर्थः, **गोरक्षेत्यादि** गोरक्षेतिसार्द्धेन सुरभिस्तुतिश्लोकत्रयार्थः **क्रमेणोक्तः**, **तदेयमिति लीलापदं** भावप्रधानं, **भगवल्लीलाप्रमाणमिति**समस्तं पदं, तथा चेयमुच्यमाना लीला भगवल्लीलात्वे प्रमाणं न स्यादित्यर्थः । **अतो हेतूक्तिरपीति** अत इन्द्रयागभङ्गगोसवकरणगवादिपालनानां गोरक्षाया आधिदैविकगामित्वादिनिरूपणेन केवलतीलात्वज्ञापनादेव "भवता लोकनाथेने"त्यादिना सुरभिकृतभगवदभिषेके रक्षकत्वादिहेतूक्तिरप्येषा लीलारूपैवेत्यर्थः, अन्यथा हेतुवादसिद्धेन्द्रयागाद् विशेषो न स्यात्, अत एव 'कृष्णेभिषिक्त एतानी'त्यादिना सत्फला वर्ण्यत इत्याहुः **सत्फलेति** । **विशुद्धसत्त्वमित्यस्याभासे क्रियाशक्तीति** का० २३५¾ । "ननु गोवर्धने धृते शैले" इति वाक्यात् क्रियाशक्त्याविर्भावं कृत्वा यथायमिन्द्रो बोधितस्तथा पूर्वमेव ज्ञानशक्तिमेवाविर्भाव्य कुतो न बोधितः तदा प्रभुमाहात्म्यज्ञानान् नापराधं कुर्यादित्यत आहुः **क्रियाशक्तिप्रधानोयमिति**, इन्द्रादीनां बाहुरूपत्वादिति भावः, **बाह्यश्चायमिति** हैतुककर्मसम्बन्धित्वेन वेदबाह्य इत्यर्थः, दशभिः श्लोकैः स्तुतौ तात्पर्यमाहुः **पुरुषार्थप्रसिद्ध्यर्थं षड्गुणं स्तौतीति** भगवदपराधेन चतुर्विधपुरुषार्थानां भगवद्दत्तगुणानां च तिरोधानं ज्ञात्वा तत्सिद्ध्यर्थं तावत्सङ्ख्याकैः श्लोकैः स्तौतीत्यर्थः, पुरुषार्थसिद्ध्यर्थं चत्वारः, ऐश्वर्यादिगुणसिद्ध्यर्थं च षट् ।। ४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सप्तविंशे तु भीतेन शक्रेण संस्तुतिर्हरेः ।। तथा च सुरभीन्द्राभ्यमभिषेको निरूप्यते ।। १ ।।

गोवर्धने शैले कृष्णेन धृते सति तस्य परिश्रममाशङ्क्य भयात्तं क्षमापयितुं शक्रः आव्रजत् । आसारात् धारापातात् व्रजे गोकुले रक्षिते सति हर्षाच्छ्रीकृष्णाभिषेकार्थं सुरभिः कामधेनुश्च गोलोकादाव्रजत् एवकारः पादपूरणार्थः ।। १ ।। 'तत्रेन्द्र आगत्य किं कृतवान् ?' तत्राह—विविक्त इत्यादिना 'अथाह सुरभिः' इत्यतः प्राक्तनेन ग्रन्थेन । इन्द्रो विविक्त उपसङ्गम्य एकान्ते श्रीकृष्णसमीपं गत्वा अर्कः सूर्यस्तद्वद्वर्चो यस्य तेन किरीटेनैनं कृष्णं पादयोः पस्पर्श नमश्चकार । ततश्च कृताञ्जलिः सन् वक्ष्यमाणमाहेति द्वयोरन्वयः । विविक्तसङ्गमे हेतुमाह—व्रीडित इति । लज्जया पादस्पर्शे हेतुमाह–कृतहेलन इति' वर्षादिना कृतापराध इत्यर्थः ।। २ ।। त्रिलोकेशमदव्याप्तस्य स्वापराधाङ्गीकार एव कथम् ?' तत्राह–नष्टः 'त्रिलोकेशोऽहम्' इति मदो यस्य सः । तत्र हेतुमाह–दृष्टेति । अमितं तेजः प्रभावो यस्य तस्य अस्य कृष्णस्य दृष्टः गोवर्धनोद्धरणव्रजरक्षादिरूपः, श्रुतश्च पूतनानिधनादिरूपोऽनुभावो येन सः ।। ३ ।। तत्कृतां स्तुतिमेव दर्शयति–विशुद्धसत्त्वमित्यादिदशभिः । तव धाम स्वरूपं शान्तं रागलोभादिविकाररहितम् । तत्र हेतुमाह—तपोमयमिति । 'यस्य ज्ञानमयं तप' इति श्रुतेः । ज्ञानप्रचुरमित्यर्थः ।। तत्र हेतुमाह–विशुद्धसत्त्वमिति, 'सत्त्वात् सञ्जायते ज्ञानम्' इति वचनात् ।। विशुद्धमेव स्पष्टयति–ध्वस्ते अविद्यमाने रजस्तमसी यस्मिंस्तत्, अत एव अयमस्मदादिषु दृश्यमानो मायामयः प्राकृतः गुणसम्प्रवाहो गुणैः सम्प्रोह्यते इति स संसारस्ते तव न विद्यते । तत्र हेत्वन्तरमप्याह–ग्रहणानुबन्ध इति । ग्रहणेन प्राकृतदेहादावात्माध्यासेनैवानुबद्ध्यते इति तथा । तव सर्वज्ञस्य तथाध्यासाभावादित्याशयः ।। ४ ।।

अन्वितार्थप्रकाशिका

सप्तविंशे स्तुतिः शक्रसुरभिभ्यां हरेः कृता ।। अभिषेकोत्सवश्चास्य श्लोकास्तत्राष्टबाहवः (२८) ।।
षडुवाचेत्यर्द्धयुक्ता एकत्रिंशदनुष्टुभः (३१) ।। २७ ।।

गोवर्द्धन इति ।। गोवर्द्धने शैले कृष्णेन धृते सति तस्य परिश्रममाशङ्क्य भयात्तं क्षमयितुं शक्रः आव्रजत् । आसारात् धारापातात् व्रजे गोकुले रक्षिते सति हर्षाच्छ्रीकृष्णाभिषेकार्थं सुरभिः कामधेनुश्च गोलोकादाव्रजत\ एव पादपूर्तौ । गोलोकाश्चायं

स्वर्गविशेषो नतु वैकुण्ठविशेषः। तत्सुरभेरिन्द्रसाहित्यानुपपत्तेः। ब्रह्ममन्त्रितः शक्रो ब्रह्माज्ञया गोलोकं गत्वा गवा सहागत इति ज्ञेयम् ॥ १ ॥ विविक्त इति ॥ कृतहेलनः अतो व्रीडित इन्द्रो विविक्ते उपसंगम्य एकान्ते श्रीकृष्णसमीपं गत्वा व्रजे प्रकटगमनव्यवहाराभावात् एकान्ते क्षमापनौचित्याच्च भगवानपि नभस्यागच्छन्तं शक्रं दृष्ट्वा केनापि व्याजेन रहस्यागत इति : अर्कः सूर्यस्तद्वद्वर्चो यस्य तेन किरीटेनैनं कृष्णं पादयोः पस्पर्श नमश्चकार ॥ २ ॥ दृष्टेति ॥ अमितं तेजः प्रभावो यस्य तस्य अस्य कृष्णस्य दृष्टः गोवर्धनोद्धरणव्रजरक्षादिरूपः श्रुतश्च पूतनानिधनादिरूपोऽनुभावो येन सः। श्रुतश्चासावनुभावश्च दृष्टः श्रुतानुभावो येनेति स्वामिपादाः। नष्टस्त्रिलोकेशोऽहमिति मदो यस्य स इन्द्रः कृताञ्जलिः सन्नाह स्म ॥ ३ ॥ विशुद्धेति ॥ तव धाम स्वरूपं विशुद्धसत्त्वं शान्तं निर्विकारं तपोमयं ज्ञानप्रचुरं सर्वज्ञं ध्वस्ते अविद्यमाने रजस्तमसी यत्र तत् अत एव ग्रहणेन देहादावात्माध्यासेनैवानुबध्यते इति अग्रहणेन अज्ञानेनेति वा। तथा अयं दृश्यमानः मायामयः गुणसंप्रवाहो गुणैः संप्रोह्यते इति। स संसारस्ते सर्वज्ञस्य तव न विद्यते ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अधुना सप्तविंशेऽध्याये सुरभींद्रयोर्हरिसमीपागमनं ताभ्यां कृतं स्तवनं च पूजनं च वर्ण्यते ॥ वर्धयतीति गाः गोवर्द्धनस्तस्मिन् ॥ गोलोकात्सुरभिः कामधेनुः स्वर्गात् शक्र इंद्रश्च। कृष्णं प्रति आव्रजत् आजगाम ॥ १ ॥ कृष्णे कृतं हेलनं येन सः ॥ अतो व्रीडितः विविक्ते विजने उपसंगम्य पादयोः अर्कवर्चसा सूर्यकांतिना मुकुटेन एवं कृष्णं यस्पस्पर्श अस्पृशत् ॥ २ ॥ दृष्टेति दृष्टश्च श्रुतनु भावो महिमा येन सः अत एव नष्टः त्रिलोकेशोहमिति मदो यस्य सः ॥ ३ ॥ विगतं शुद्धसत्वमपि यस्मात्तत् विशुद्धसत्वं ध्वस्ते नष्टे रजस्तमसी यस्मिंस्तत् ध्वस्तरजस्तमस्कंध तव धाम ब्रह्म पुरस्थानं यद्वा तव धाम वपुः त्रिगुणातीतमस्तीत्यर्थः पुनः कथंभूतं शांतं सर्वेषां भक्तानामनवधिकातिशयशांतिकरं तपोमयं विषयेछाविवर्जितं एवंभूतस्य ते तव अयं अस्मदादिषु वर्त्तमानो मायामयः प्रकृतिविकारः गुणानां सत्त्वादीनां संप्रवाहः सात्त्विराजसतामसंदेहपरंपरा न विद्यते नास्ति स च कथंभूतः अग्रहणेन ग्रहणं विना अनुबध्यते जीवेषु स्वभावेनैवं संबध्यते त्वयि तु न कदाचिदित्यर्थः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रभावं परम कार्ष्णमालक्ष्य सप्तविंशके। सुरभीन्द्रकृतः प्रोक्तो महः कृष्णाभिषेकजः ॥ १ ॥

अथ कृतापराधेनेन्द्रेण स्तुत्याचरणपूर्वकं क्षमापितस्य कृष्णस्य तदनुग्रहप्रकारं सुरभीन्द्रादिकृतक्षीरगङ्गाजलाद्यभिषेकप्रकारं तन्निमित्तकं गोविन्दनामधेयं तादात्विकहर्षप्रयुक्तगन्धर्वादिकृतगानादिप्रकारं चाह, तत्र प्रथमं शक्रगमनं तत्कृतश्रीकृष्णस्तवनं चाह ॥ गोवर्द्धन इति ॥ गोवर्द्धने गोवर्द्धनाख्ये, शैले पर्वते, धृते सति, श्रीकृष्णेनेति शेषः। व्रजे गोष्ठे, आसारात् रक्षिते सति, शक्र इन्द्रः, स्वर्गात् इति शेषः। सुरभिः कामदुघा च गोलोकात् एवं कृष्णं आव्रजत्। तत्र 'गोवर्द्धने धृते शैले' इति शक्रस्य भयेनागमने हेतुः। 'आसाराद्रक्षिते व्रजे' इति सुरभेर्हर्षेण आगमने हेतुः ॥ १ ॥ तत्रेन्द्र आगत्य किं कृतवांस्तत्राह विविक्त इत्यादिनाऽथाह सुरभिरित्यतः प्राक्तनेन ग्रन्थेन ॥ विविक्त इति ॥ कृतं हेलनमपराधो येन सः, अत एव व्रीडितो लज्जितः, अत एव विविक्ते एकान्ते, उपसंगम्य समीपमेत्य, अर्कस्य सूर्यस्येव वर्चो यस्य तेन, किरीटेनैव, एनं श्रीकृष्णं, पादयोः पस्पर्श नमश्चकार ॥ २ ॥ दृष्टेति ॥ अमितं निरवधिकातिशयं तेजः प्रभावो यस्य तस्य, कृष्णस्य, दृष्टः स्वनयनविलोकितः श्रुतः पूर्वमाकर्णितश्च अनुभावो येन तथाभूतः, अत एव नष्टोऽपगतः त्रिलोकेशोऽहमिति मदो यस्य सः, कृतोऽञ्जलिर्येन तथाभूतः, शक्रः, इदं वक्ष्यमाणस्तुत्यात्मकं क्षमापणात्मकं च वाक्यं, आहोवाच ॥ ३ ॥ तत्र स्तुत्यात्मकं वाक्यं तावद्दर्शयति विशुद्धेत्यादिना तत्रेत्यतः प्राक्। त्रिलोकेशमदाविष्टोऽहमधुना यथाश्रुतदैवमानुषत्वन्माहात्म्यावलोकनाध्यवसितनित्यनिरुपाधिकत्रिलोकेशत्वं त्वदसाधारणमिति मत्वा त्यक्तत्रिलोकेशमदोऽभूवमित्यभिप्रायेण सर्वकारणकारणं मत्वा स्तौतीन्द्रः ॥ विशुद्धेति ॥ हे कृष्ण, तव स्वस्वामिभावसंबन्धे षष्ठी। धाम स्थानं परमव्योमेति यावत्। विशुद्धसत्त्वं रजःसत्त्वतमोभिरननुविद्धशुद्धसत्त्वमयं, अत एव ध्वस्तरजस्तमस्कं निधूतरजस्तमोगन्धं, एतत्सत्त्वस्याप्युपलक्षणम्। अत एव शान्तं रागद्वेषादिरहितं, तपस आगतं तपोमयं, त्वदुपासनात्मकतपोऽवगम्यमित्यर्थः। ते तव, अयं मायामयः मायाया आगतः, पूर्वत्राऽत्र च 'तत आगतः' इत्यधिकारे 'मयट् च' इति मयट्। संकल्पमात्रपरिक्लृप्त इत्यर्थः गुणसंप्रवाहः सत्त्वादिगुणकार्यभूतं संसारः, ग्रहणानुबन्धः संसारमूलकः शरीरग्रहणकारणभूतः कर्मानुबन्धश्च, न विद्यते। यत्रेति शेषः। गुणसंप्रवाहो ग्रहणानुबन्धश्च न विद्यते तथाभूतं त्वद्धामेत्यर्थः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवंविधं सकलगोकुलपालनार्थं लीलाविलासमचलोद्धरणप्रधानम्।
आलोच्य विच्युतविकल्पनमच्युतस्य नामार्तिहारि सततं मनुजेन गेयम् ॥ १ ॥

गोवर्धन इति : १०.२७.१.

गोव्रजत्राणमालक्ष्य कृपया प्रभुणा कृतम्। तौ रुक्मागतौ तत्र यत्सर्वोऽपि निजेष्टदृक् ॥ २ ॥

मत्स्तुत्य फलमिन्द्र किं मम कृतः को वाऽपराधस्त्वया वृष्ट्या क्षोभमवापितोऽतिशयितं यो गोव्रजः सम्प्रति ।
त्वं तत्सांत्वनमाचराशु यदिह प्रीते त्वहं प्रीतिमानेवं कृष्णवचो विभाव्य मतिमान् सोऽगात् सुरभ्या समम् ॥ ३ ॥
गोयोगाद् गोव्रजः क्षोभं प्राप्तः सम्प्रति तत्प्रभुः । तद्योगादेव तच्छान्तिं कर्तुमागत् तया सह ॥ ४ ॥

विविक्तः इति : १०.२७.२.
स्वस्वामी द्रष्टव्यो निरागसाऽपि स्पर्शेन रहसि सदा । युक्तं कृतापराधौ मघवा कृष्णं विविक्त एवागात् ॥ ५ ॥
सोऽस्पृशंच्छ्रीशपादाब्जे किरीटेनार्कवर्चसा । तन्मैत्र्यं वीक्ष्य तल्लिप्सुस्तं मध्यस्थं व्यधात् क्षमम् ॥ ६ ॥
वराभयकरौ कराविव हरेर्निरीक्ष्याचलस्थिती गिरिसमुद्धतौ सुरपतिः स पादौ तदा ।
स्वमन्तुकृतचिन्तनस्तदभयार्थनाकामुको ह्रिया स्वमुकुटेन तौ भृशनतोऽस्पृशम् तत्क्षमम् ॥ ७ ॥

विशुद्धसत्त्वमिति १०.२७.४.
नित्यं कैतववर्जितेन मनसा यः स्वामिनं सेवते मन्तुर्नामपदार्थ एव सहसा नाज्ञायि येन क्वचित् ।
सोऽपि श्रीशनिजाधिपस्य पुरतो वक्तुं सभीतिर्भवत्यत्यागः स्थितचेतसो मम तु का वाच्या वचःप्रक्रिया ॥ ८ ॥

कृष्णप्रिया

इस अध्याय में २८ श्लोक हैं । तामस प्रकरण के तृतीय साधन प्रकरण का वैराग्यधर्म निरूपक यह षष्ठ अध्याय है । इस अध्याय में कामधेनु और देवों के द्वारा भगवान का अभिषेक, इन्द्र ने की हुई भगवान की स्तुति एवं भगवान ने की हुई शिक्षा का वर्णन है ।

श्रीशुकदेवजी ने कहा—राजन् परीक्षित् ! भगवान् श्रीकृष्ण ने वाम करकमल से श्रीगोवर्धन गिरिवर को धारण कर धारासंपात वर्षा से समस्त व्रज का संरक्षण किया, उस अवसर गोलोक से कृतज्ञ कामधेनु लज्जित इन्द्र एवं देववृन्द भगवान् श्रीकृष्ण के श्रीचरणों की सेवा में उपस्थित हुए ॥ १ ॥ भगवान श्रीकृष्ण का अवहेलन-अनादर करने के अपराध से अपराधी एवं सुलज्जित इन्द्र ने प्रभु के समीप में आकर, अपने अपराध की क्षमा कराने के लिए, सूर्य तुल्य तेजस्वी मुकुट से सुशोभित मस्तक से, प्रणाम करते हुए एकान्त में प्रभुजी के श्रीचरणों का स्पर्श करते हुए प्रपत्ति ली ॥ २ ॥ अपार पराक्रमी और अमित तेजस्वी भगवान श्रीकृष्ण के अद्भुत प्रभाव का अनुभव कर और श्रवण कर "मैं त्रिलोकीनाथ हूँ" ऐसा इन्द्र का भ्रान्त अभिमान टल गया और अञ्जलि बद्ध भगवान के श्री चरणों में निवेदन करने लगा ॥ ३ ॥ राजा इन्द्र ने कहा—नाथ ! आप की महिमा, आप का तेज, आप का धाम विशुद्ध सत्व स्वरूप है शान्त है और तपोमय है । आप के दिव्य तेज ने तमोगुण और तमोगुण का मोह का नाश किया है । तीन गुणों से सक्रिय बनता माया का यह व्यवहार आप के दिव्य तेज को छु नहीं सकता आप तक नहीं आ सकता ॥ ४ ॥

कुतो न तद्धेतव ईश [1]मन्युलोभादयो येऽबुधलिङ्गभावाः ।
[2]तथापि दण्डं भगवान् बिभर्ति धर्मस्य गुप्त्यै खलनिग्रहाय ॥ ५ ॥
पिता गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदण्डः ।
हिताय [3]चेच्छातनुभिः समीहसे मानं बिधुन्वञ्जगदीशमानिनाम् ॥ ६ ॥
ये [4]मद्विधाज्ञा जगदीशमानिनस्त्वां वीक्ष्य कालेऽभयमाशु तन्मदम् ।
हित्वाऽऽर्यमार्गं प्रभजन्त्यपस्मया ईहा खलानामपि तेऽनुशासनम् ॥ ७ ॥
स त्वं ममैश्वर्यमदप्लुतस्य [5]कृतांहसस्तेऽविदुषः प्रभावम् ।
क्षन्तुं प्रभोऽथार्हसि मूढचेतसो मैवं पुनर्भून्मतिरीश [6]मेऽसती ॥ ८ ॥

कर्दमक्षमा

अन्वयः—हे ईश ! ये अबुध लिङ्ग भावाः तद् हेतवः मन्यु लोभादयः न कुतः ? तथा अपि, भगवान् धर्मस्य गुप्त्यै, च, खलनिग्रहाय दण्डम् बिभर्ति ॥ ५ ॥ हे नाथ ! त्वम् जगताम् पिता, गुरुः, अधीशः, च उपात्तदण्डः दुरत्ययः कालः, जगदीश-

---

[1] तव कृता-श्रीधर. वंशी. जीव. विश्व. शु. सु. ; ईश मन्यु-विज. चित्सुख. । [2] अथापि-इति कस्यचित् । [3] स्वेच्छा-श्रीधर. वंशी. जीव. वीर विश्व. शुक. सु. ; चेच्छा विज. । [4] मादृशाज्ञा-वीर. ; ये मद्विधाः स्युः-विज. । [5] कृतागस-श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक. सु । [6] मे मतिः-म. पु. मूले ।

मानिनां हिताय मानम् विधुन्वन् , इच्छातनुभिः समीहसे॥६॥जगदीश मानिनाम् मद्विधाः ये अज्ञाः, ते काले 'स्वान्तकाले' भयम् त्वाम् वीक्ष्य, आशु तन्मदम् हित्वा अपस्मयाः आर्यमार्गम् प्रभजन्ति, ते ईहा, खलानाम् अपि अनुशासनम् हे प्रभो ? सः त्वम् ऐश्वर्यमदप्लुतस्य, ते प्रभावम् अविदुषः, मूढचेतसः कृताहसः क्षन्तुम् अर्हसि हे ईश ? मे पुनः एवम् असती, मतिः मा भूत् ॥८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यदा अज्ञानतत्कृतदेहसंबंधौ न स्तस्तदा तत्कृतानां लोभादीनां का वार्तेत्याह । अतो न्विति । तत्कृता देहसंबंधकृताः तद्धेतवः पुनरन्यस्य देहस्य हेतवः । ननु ज्ञानिनामपि ते दृश्यंतेऽत आह अबुधलिंगभावा अज्ञानिनां गमकाः । यावद्रागादिमत्त्वं तावज्ज्ञानित्वमेव न सिद्धमित्यर्थः । लोभाद्यभावेऽपि मन्मानभंगो दंडार्थमित्याह । तथापीति ॥ ननु त्वद्दंडे च मम गोपपुत्रस्य का शक्तिः किं वा कारणं को वा दंडो मया कृत इत्यत आह । पितेति त्वं पिता जगतां जनकः गुरुरुपदेष्टा अधीशो नियंता इति दंडधारणे हेतुत्रयम् । कालत्वात्समर्थः तस्मादुपात्तदंडो हिताय कल्याणाय स्वेच्छातनुभिर्लीलावतारैः समीहसे । तव समीहा लीलैव जगदीशमानिनामस्माकं मानविधूननमित्यर्थः ॥ ६ ॥ कथमेतदित्यत आह । य इति मद्विधाश्च ते अज्ञाश्च ते अतो जगदीशमानिनः काले भयकालेऽपि यथाऽधुनैवातिवृष्टौ त्वामभयं भयमगणयंतं वीक्ष्याशु तन्मदं जगदीशा इति मद्विधाश्च ते अतो जगदीशा इति मदं हित्वा विगतगर्वाः संतः आर्यमार्गं त्वद्भक्तिलक्षणं भजंति । अतस्तवेहैव खलानामनुशासनं दंड इत्यर्थः ॥ ७ ॥ एवं भगवत्स्वरूपमभिप्रायं चानुवर्ण्य क्षमापयति । स त्वमिति । एवंभूता असती मतिर्मे पुनर्मा भूदिति प्रार्थनांतरम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कारणाभावे कार्याभावमाह–यदेति । तत्कृतानाम् अज्ञानकृतानाम् । ज्ञानिष्वपि लोभादीनाशंकते–नन्विति । ते लोभादयः । अतः अत्र । अबुधानां लिंगं स्वरूपं भावयंति बोधयंतीत्यबुधलिंगभावाः । इत्यर्थ इति रागादय एवाज्ञानित्वापादका इत्यर्थः । भगवतः स्वहितैषित्वमाह–लोभाद्येति । तथापि लोभाद्यभावेपि । दंडम् शासनम् । यद्वा–दंडं संन्यासचिह्नीभूतं वेणुलकुटम् । धर्मस्य प्रव्रज्याधर्मस्य । गुप्त्यै खलस्याज्ञानस्य निग्रहाय "त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम्" इत्युक्तेः । इत्यभिप्रेत्यैव देवलेनोक्तम्—"मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणम्" इति । विष्णुलिंगम् दंडः "दंडोऽस्त्री शासने राज्ञा हिंसने लकुटे गुणे । दमने वेणुलकुटे" इति यादवः ॥ ५ ॥ भगवांस्तस्य महत्त्वं द्योतयन्दंडे कारणमाशंकते—नन्विति । जनको ब्रह्मादिद्वारा, उपदेष्टा मन्वादिरूपेण, नियंता यमराजादिरूपेण । मानधूननं माननाशनम् । इत्यर्थ इति । माननिवृत्त्या साधुमार्ग प्रवृत्तिः स्यात्तदेव भगवल्लीलाप्रयोजनमिति भावः ॥ ६ ॥ एतत् जगदीशमानिनां दंडेन मानहननम् । मल्लीलेति यत् तत्कथमित्यर्थः । अतः अत्र । मद्विधाः मत्तुल्याः । अतः अज्ञत्वात् । तन्मदं येन मदेन त्वदपराधमकार्ष्मेत्यर्थः । स च जगदीशा वयमित्येवंरूपः अपगतः स्मयो गर्वो येषां ते तथा 'स्मयः स्यात्स्मितगर्वयोः' इति धरणिः । आर्याणां महतां मार्गम् । "वेदोक्तिं योऽनतिक्रम्य कर्माणि कुरुतेऽनिशम् । स आर्यः प्रोच्यते सद्भिरनार्यस्तु ततोन्यथा ॥" इति कौशिकोक्तेः । "चतुर्ष्वाश्रमवर्णेषु पूज्येषु वणिजां गणे । शिष्टाचाररते पुंसि स्यादार्यो गम्यपद्धतौ ॥" इति मार्कंडेयादौ । यतस्त्वं सर्वदाऽभयोऽतो हेतोः । ईहा लीलैव । इत्यर्थ इति । खलानुशासनार्थमेव लीलां बिभर्षीति भावः । "ईह स्यादुद्यमे चेष्टावाञ्छालीलासु च स्त्रियाम्" इति नैरुक्तः ॥ ७ ॥ एवम् उक्तरीत्या । 'विशुद्धसत्त्वम्' इत्यादिना भगवत्स्वरूपं गर्वपरित्यागेनार्यमार्गे प्रवृत्तिरस्त्वस्येत्यभिप्रायञ्च । यस्सर्वेश्वरः सः त्वम् । "प्लुतो व्याप्ते त्रिमात्रे च स्वरे कूर्दननृत्ययोः" इति धरणिः । एवंभूता महदवज्ञानप्रवृत्ता ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अतः कैमुतिकन्यायेनाह–कुतोन्विति । यदि ते गुणाः मायामया न भवन्ति तर्हि तद्धेतवो मायाहेतुका दोषाः कुत इत्यर्थः । तत्र हेतुः ईश, हे मायानियन्तः ! नवन्नकूटभोजनत्वन्मदासहनादिना मयि ते भवद्भिरवगता एव कथमधुना भयेनाऽपलप्यन्ते तत्राह–तत्कृता लोभादयो ये बुधलिङ्गभावा इति । ये बुधलिङ्गभावा भक्तभक्तिमाहात्म्यगमकाः भक्तदत्तभोजनसमास्वादात्मका लोभादयस्ते तु तत्कृताः कुत इति न मायाकृताः किन्तु कृपामात्रकृता इत्यर्थः "पत्रं पुष्पं फलं तोयम्" इत्यादेः ननु, भवतु तादृशो लोभः भक्तसुखकरत्वादन्येषामदुःखकरत्वाच्च क्रोधस्तु स्वविषयदुःखकर एव दण्डात्मकत्वात् कथं तर्हि तत्र च न कृपा तत्राह–अथापीति । धर्मस्य गुप्त्यै यः खलस्य निग्रहः तस्मा इति खलानामपि धार्मिकत्वापत्त्या सुखमेव स्यादिति सोऽपि कृपामात्रकृत एवेति भावः । तथापीति पाठः क्वचित्भगवान् बिभर्तीत्यपरोक्षेऽपि परोक्षवदुक्तिभयगौरवादिना ईश मन्युलोभादय इति चित्सुखादीनां पाठे मन्युलोभादीनां च कुतोन्वित्यनेनैवान्वयात् ॥ ५ ॥ अतो मम हितमेवाकरोदित्याह–पिता च गुरुश्चेत्यादिरन्वयः । सम्यक् ईहसे विचित्रलीलां तनुषे अन्यत्तैः तत्र मानधूननमित्यतिशयविवक्षयैव भेदानिर्देशः ॥ ६ ॥ मानभञ्जनपूर्वकं हितप्रवर्त्तनप्रकारमेवाह–य इति । हितमाह, आर्येति यद्यपि भक्तानन्दनार्थमेव तथापि तवेहा लीला मद्विधानां खलानामपि अनुशासनं शिक्षाकारण भवतीत्यर्थः ॥ ७ ॥ प्रभो, भो मदादिसर्वदेवेश्वर ! हे क्षमासमर्थेति वा, अथ अस्मादुक्ताद्धेतोः स जगद्धितकारी कृतागसोऽपि मम क्षन्तुमर्हसि योग्योसि कृतागस्त्वे हेतुः तव प्रभावं माहात्म्यमविदुषः अज्ञानतः तत्कुतः ? मूढचेतसः विचाराहतरयेत्यर्थः तदपि

कुतः ? ऐश्वर्यमदव्याप्तस्य । यद्वा, तव प्रभावं विदुषोऽपि कृतागस इत्यधिकमागोऽभिप्रेतं तथापि क्षन्तुमर्हसि कुतः ? मूढचेतसः विस्मृतप्रभावस्य अज्ञत्वेनाऽग्राह्यापराधत्वादिति भावः । किञ्च सकलजगद्धितार्थावतीर्णस्य परमदयालोरुदारशिरोमणेस्तव मदीयतत्सकृदपराधक्षमापणं कियन्नाम किन्तु तथा कुरु यथा पुनस्त्वयि त्वदीयेषु च कोप्यपराधो न स्यादित्याह–मैवमिति । एतादृशी त्वयि तावकेषु च महाऽऽगसाञ्जननी अत एवासती मूढचेतसः इत्यस्यात्रैव वान्वयः यत् किञ्चित् ज्ञानरहितस्यापि सतो मे न त्वैश्वर्ये सति कथं नाम न भवेत् तत्राह–हे ईश ! तत्रापि त्वया तथा कर्त्तुं शक्यत इत्यर्थः । एतच्च नातिशुद्धेन चेतसा प्रार्थितमिति ज्ञेयम् "त्वां वीक्ष्य काले भयम्" इत्युक्तेरक्षमतयैव तदनुगतेः अत एव पुनः पारिजातापरणादावपि विस्मरिष्यते ॥ ८ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं सद्गुणनिधित्वात् दोषाणामभावात्त्वयि भावकेषु च लोभादयो न सन्तीति कैमुतिकन्यायेनाह—कुतोन्विति । ईश हे मायानियन्तः ! आदिशब्देन क्रोधादयः, लोभस्यादावुक्तिः श्रीगोवर्द्धनयागे (एतादृशलोभस्य भक्तसुखकरत्वादन्येषामदुःखकरत्वात् ईश मन्युलोभादयः इति पाठः श्रीचित्सुखादीनां सम्मतः, अतस्तावकत्वरहितानामबुधानामस्माकमेव लोभादयो युक्ता एवेति भावः । अथापि यद्यपि तव त्वदीयानाञ्च लोभादयो न सन्ति, तथापीत्यर्थः, बिभर्त्ति भवान्, यतो भगवान्, सर्वलोकहितार्थमवतीर्णः साक्षात् परमेश्वर इत्यर्थः, यद्वा, भगवान् बिभर्त्तीत्यपरोक्षेऽपि परोक्षवदुक्तिर्भयगौरवादिना ॥ ५ ॥ अतो मम हितमेवाकरोरित्याह, चकारात् स्वयञ्च, यद्वा, च एव, जगतां हितायैव, सम्यक् ईहसे चेष्टसे, विचित्रलीलां तनुषे; किं कुर्वन् ? जगदीशमानिनां जगदीशा वयमिति मानवताम्, यद्वा, हे जगदीशेति । तत्र तत्र हेतुः—मानिनामभिमानवतामस्मादृशामभिमानं निरस्यन्, अन्यथा लोकपालानामभिमानदृष्ट्या लोकानामप्यभिमानेन हितासम्पत्तेः, यद्वा, अप्यर्थे चकारः, मानं विधुत्वन्नपि तेषामपि हिताय समीहसे । अन्यत्तैर्व्यञ्जितम्; यद्वा, दण्डं बिभ्रतोऽपि हितकारित्वं समर्थयति—पितेति, उपात्तदण्डो दण्डं बिभ्रदपि त्वं जगतां पित्रादय एव, यथा पुत्रादिहिताथ तेऽपि दण्डं धारयन्तीत्यर्थः । तत्र गुरुः शिष्यहितार्थम्, अर्धाशः स्वामी भृत्यस्य, कालो यमस्य सर्वजीवानाम्, नरकोपभोजनादिना पापादिक्षपणात्, तच्चाजामिलोपाख्यानादौ व्यक्तमेव, यद्वा, परमाष्वादिलक्षणः कालः सोऽपि जन्ममरणादिना दण्डं कुर्वन् वैराग्योत्पादनादिनाहितं करोत्येव, तत्र कथञ्चित् पित्रादयो वञ्चयितुं शक्यन्ते, न च काल इत्याह—दुरत्ययो दुर्ल्लंघ्यः, अतः स्वस्य भक्तानां चेच्छया यास्तनवोऽवतारास्ताभिः ॥ ६ ॥ ननु मया स्वभक्तविनोदार्थं विविधाश्चेष्टाः क्रियन्ते, न तु त्वादृशानां मानभञ्जनाय, सत्यम्, तत एवास्मादृशानां स्वत एव मानभंगः स्यादित्याह—ये इति, तैर्व्यञ्जितमेव, यद्वा, काले कस्मिंश्चिद्योग्यसमये भयं साक्षाद्भयरूपं त्वां वीक्ष्य, किंवा, अभयमाप्यमागं प्रकर्षण प्रेमविस्तारणादिना प्रभजन्ति, इति हितमभिव्यञ्जितम् । एवमीहया चेष्टयापि, न केवलं वाचा, ये खलास्तेषामप्यनुशासनं शिक्षा बभूव, 'ते' इत्यस्य 'ये' इति पूर्वेणैव सम्बन्धः, यद्वा, तव ईहायां श्रीगोवर्द्धनार्च्चनगोष्ठावनादि–चेष्टायां ये खला दुष्टास्तेषामपि, एतच्चात्मोद्देशेनोक्तम्; अन्यत् समानम् ॥ ७ ॥ प्रभो भो मदादि सर्वदेवेश्वर हे क्षमासमर्थेति वा, अतोऽस्मादुक्ताद्धेतोः, स जगद्धितकारी, कृतागसोऽपि मम क्षन्तुमर्हसि योग्योऽसि । कृतागस्त्वे हेतुः—तव प्रभावं माहात्म्यमविदुषोऽजानतः, तत् कुतः ? मूढचेतसो विचाररहितस्येत्यर्थः । तदपि कुतः ? ऐश्वर्य्यमदव्याप्तस्य, यद्वा, तव प्रभावं विदुषोऽपि कृतागस इत्यधिकमागोऽभिप्रेतम्; तथापि क्षन्तुमर्हसि, कुतः ? मूढचेतसः अज्ञत्वेनाग्राह्यापराधत्वादित्यर्थः, किञ्च, सकलजगद्धितार्थावतीर्णस्य परमदयालोरुदारशिरोमणेस्तव मदीयैतत् सकृदपराधक्षमापनं कियन्नाम, किन्तु तथा कुरु यथा पुनस्त्वयि त्वदीयेषु च कदाचिदपि कोऽप्यपराधो न स्यादित्याह—मैवमिति, एतादृशी त्वयि तावकेषु च महागसां जननी, अत एवासती, 'मूढचेतसः' इत्यस्यात्रैव वान्वयः, कथञ्चिज् ज्ञानरहितस्यापि सतो मे । ननु ऐश्वर्य्ये सति कथं नाम न भवेत् ? तत्राह—हे ईश ! तत्रापि त्वया तथा कर्त्तुं शक्यत इत्यर्थः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तद्धेतवः शरीरग्रहणहेतुकाः अबुधलिङ्गभावाः अज्ञानचिह्नभूतपदार्थाः ॥ ५ ॥ काल इति सप्तमी ॥ ६ ॥ मद्विधा अज्ञाः खलानामनुशासनम् ईहा तव चेष्टा ॥ ७–१६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नन्वहमेवंविधश्चेत्कथं रागादयः कथं तन्मूला दण्डादिप्रवृत्तिरित्याशङ्क्य परिहरति–कुत इति । यद्यपि तव धामैव गुणसंप्रवाहग्रहणानुबन्धादिरहितमतो हे ईश्वर ! निरुपाधिकसर्वेश्वर ! तत्कृतास्तेन शरीरग्रहणेन कृतास्तत्प्रयुक्ता इत्यर्थः । तद्धेतवः पुनरन्यस्य शरीरग्रहणस्य हेतवो ये रागादयः ते कुतोनु तव न सन्त्येवेत्यर्थः । अत्यन्तासम्भावनायां हेतुं वदन् रागादीन् विशिनष्टि–अबुधलिङ्गभावाः अबुधानां देहात्मभ्रमवतां लिङ्गभावाः चिह्नभूतपदार्थभूताः रागादिभिरेवह्यबुधत्वं व्यज्यते नित्यं स्वयाथात्म्यानुभवस्वरूपस्य तव कथं रागादिसम्भावनापीति भावः । तथापि हे भगवन् ! पूर्णषाड्गुण्य ! भगवान् धर्मसंस्थापनाय खलानां निग्रहाय च दण्डं बिभर्ति भगवानिति पाठे षाड्गुण्यपूर्णो भवानित्यर्थः ॥ ५ ॥ न च खलनिग्रहेण तव वैषम्यप्रसङ्गः तन्निग्रहस्यापि तद्दमनद्वारा तदनु-

ग्रहहेतुत्वादित्यभिप्रायेण खलनिग्रहस्यौचित्यं द्योतयितुं विशिंषन् वैषम्याभावमाह–पितेति। सर्वजगतां पिता जनकः गुरुर्हितोपदेष्टा अधीशो नियन्ता दुरत्ययः न तु लौकिकनियन्तृवत्कथञ्चिदत्येतुं शक्यः अतः काले उचितकाले उपात्तो दण्डो येन तथाभूतः नहि लोके पित्रादयः उत्पथगामिनः पुत्रादीन् शिक्षया सन्मार्गं प्रवर्तयितुं प्रभवोऽप्युपेक्षन्ते नचैतावता तेषां वैषम्यञ्चेति भावः। अतः सर्वजगत्पितृत्वादिसम्बन्धविशिष्टस्य प्रभोरतवोचित एव खलनिग्रहार्थो दण्ड इत्यर्थः। अतस्त्वं जगदीशमात्मानं मन्यमानानां मादृशां मानं गवं विधुन्वन्नस्माकं हितार्थमेव स्वेच्छोपात्ताप्राकृतदिव्यतनुभिरुपलक्षितः ईहसे चेष्टसेऽतो न वैषम्यमिति भावः॥ ६॥ दण्डस्य हितार्थत्वमेव उपपादयति–य इति। ये मादृशाश्च ते अज्ञाश्च जगदीशमात्मानं मन्यमानास्ते उचितकाले भयं भयङ्करं दण्डधरं त्वां वीक्ष्य तन्मदं जगदीशाभिमानप्रयुक्तं मदमाशु हित्वा अपस्मया अपगतगर्वाः आर्यमार्गं सतां वर्त्म प्रभजन्त्यनुवर्त्तन्ते अतस्तवेहा चेष्टाऽपि खलानामनुशासनं शिक्षैव॥ ७॥ तदेवं भगवतः केवलं लोकहितार्थैकप्रवृत्तत्वमभिधायाथ क्षमापयति–स त्वमिति। मदैश्वर्यणेन्द्राधिपत्येन यो मदस्तेन प्लुतस्य व्याप्तस्य उत्पथं प्रतिपन्नस्येति वा ममैश्वर्येति पाठान्तरं तदैश्वर्येणेन्द्राधिपत्येनेत्येवार्थः। अत एव ते तव प्रभावमविदुषः अत एव कृतमागोऽपराधो येन तस्य ममापराधमिति शेषः। स एवम्भूतस्त्वं क्षन्तुमर्हसि हे प्रभो! निग्रहीतुम् अनुग्रहीतुं च समर्थः अथ पुनर्मूढचेतसो ममासती दुष्टा एवंविधा मतिः माभूत्तथा अनुगृहाणेति प्रार्थना॥८॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ननु, "खलेन पर्षान्प्रतिहन्मि भूरि किं मा निन्दन्ति शत्रवोनिन्द्राः" इति श्रुतेः हरे कामक्रोधादिदर्शनाल्लोभाद्यभावः कथं कथ्यत इत्यत्राह–कुत इति। ते गुणा हेतवो निमित्तानि येषा ते तद्धेतवः न विद्यन्त इति कुतो नु किं वक्तव्यमित्यर्थः। यद्वा, तस्य संसारहेतवः कुतः कल्प्यन्त इति शेषः। अबुधस्याज्ञानिनः लिङ्गभावाः लक्षणभूताः अत्र कारणाभावात्कार्याभावानुमानं च द्रष्टव्यमित्यर्थः। यद्यपि तव गुणनिमित्ताः कामादयो न सन्ति तथापि शास्त्रविहिता अदोषकरत्वात्सन्तीत्याशयेनाह–अथापीति, दण्डं शासनं हिंसां वा "दण्डोऽस्त्रीशासने राज्ञां हिंसायां लगुडे गुगे" इति यादवः विशुद्धसत्त्वं निर्मलसत्त्वगुणयुक्तं इत्याद्यपव्याख्यानप्रत्याख्यानाय विगतशुद्धसत्त्वमित्यादिव्याख्यातमाचार्यैः सत्त्वगुणाङ्गीकारे मायामयोयं गुणसम्प्रवाहो न विद्यत इत्येतद्व्याहतं न स्यादिति पश्यद्भिरिति। असच्छासनेन धर्मस्थापनं प्रयोजनं सच्छिक्षणेन किं फलं स्यात्। किञ्च, उभयेषां शासका उभयो तौ नैक इतीय शङ्का—

"असतां च सतां चैव हरिरेवानुशासकः। सतां तु श्रेयसे सैव ह्यनुशास्तिर्भविष्यति"॥

इत्याग्नेयवचनेन परिहर्त्तव्येति॥ ५॥ पितृत्वाद्गुरुत्वात्स्वामित्वाच्च हरेरेकस्यैनुशासकत्वं नान्यस्येत्याशयेनाह–पितेति। पुण्यपापफलपाचकत्वेन उपात्तदण्डः गृहीतशासनः हिताय सतामिति शेषः। "गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम्। इह प्रपच्छन्नपापानां शास्ता वैवस्वतो यमः" इत्येतन्निरस्तमिति ज्ञातव्यम्॥६॥ सतामनुशासनं श्रेयस इत्यभिप्रेत तदिदानीं व्यक्तमाह, य इति। हे जगदीश! मद्विधा मानिनः स्युः ते काले असुरावेश निर्मोकसमये प्राप्ते अभयं त्वां वीक्ष्य अस्मन्मदनिमूलनवीर्यं त्वां दृष्ट्वा येन मदेन त्वदपराधमकार्ष्म तं मदं हित्वा अपस्मयाः निरस्तगर्वाः आर्यमार्गं विद्वज्जनसिद्धान्तं प्रभजन्ति न केवलमस्माकं तवेहानुशासनं खलानामपीत्याह, ईहेति॥ ७॥ तत्र कर्त्तव्यं प्रार्थयते सत्त्वमिति अविदुषः अज्ञस्य॥ ८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मानभञ्जनपूर्वकं हितप्रवर्त्तने प्रकारमेवाह—य इति हितमाह–आर्येति। अनुशासनं शिक्षाकारणम्॥ ७॥ मैवं पुनर्भूदिति प्रार्थना नातिशुद्धचेतसा विहितेति ज्ञेयं पुनरपि पारिजातहरणेऽपराधापातदर्शनात्॥ ८–१०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अतः कैमुतिकन्यायेनाह—कुत इति। नु भो ईश! यदि तव गुणप्रवाहे जिघृक्षापि नास्ति तर्हि कुतस्तस्य गुणप्रवाहस्य हेतवो गुणाः स्युः तत्कृता गुणप्रवाहकार्यभूताः लोभादयश्च येऽबुधस्य लिङ्गं चिह्नं भावयन्त्युत्पादयन्तीति ते। ननु, तर्हि कथं त्वन्मखभङ्गमकरवं तत्राह—अथापीति। लोभकोपाद्यभावेऽपि॥ ५॥ धर्मगोपनखलनिग्रहाभ्यां पूर्णस्य परमेश्वरस्य मम किं फलमिति चेत् जगतां मङ्गलमेवेत्याह—पितेति। तव साहजिककारुण्यात् जगतां मध्ये ये धार्मिकास्तेषु त्वं पिता यथा पुत्रस्य देहद्वये वत्सलः गुरुर्यथा शिष्यस्य जीवात्मनि वत्सलः अधीशस्तत्तद्दुःखत्राणसुखप्रदानसमर्थः ये तु खलास्तेषु त्वं दुरत्ययो दुर्वारः कालः स इव उपात्तदण्डः दण्डप्रदानेनैव तच्छोधक इत्यर्थः। अत उभयेषां हितायैव इच्छातनुभिः स्वेच्छामयावतारैः समीहसे चेष्टसे तव समीहा लीलैव पूतनावधादिका दुष्टसंहारिका शिष्टपालिका चेत्यर्थः। ये त्वधिकृतभक्ता ब्रह्माद्यास्त्वद्दत्त यत्किञ्चिदैश्वर्येणैव मत्ता भवन्ति तेषामपि मदनिरसिनी त्वल्लीलैवेत्याह—मानमिति॥ ६॥ तेषु जगदीशमानिष्वपि मध्येऽहमत्यधम इत्याह—मद्विधाश्च ते अज्ञानादप्युपगानत्वादहमत्यज्ञ इति भावः। काले भयकालेऽपि यथा अधुनैवातिवृष्टो अभयं भयमगणयन्तं वीक्ष्य यद्वा, न जाने प्रभुरयं मां कीदृशं दण्डयिष्यतीति स्वस्य भयं भयहेतुं वीक्ष्य तन्मदं

जगदीश्वरत्वमदं त्यक्त्वा आर्याणां त्वद्भक्तानां मार्गं भजन्ति गतस्मया नष्टगर्वा अतस्तवेयं गोवर्द्धनधारणलीलैव खलानामस्माकमनुशासनं दण्डः ॥ ७ ॥ ननु, गोवर्द्धनधारणेन व्रजस्य रक्षामेवाऽकरवं नतु तव दण्डं तव दण्डं तु साम्प्रतं वैवस्वतमाहूय समीचीनतयैव कारयिष्यामीत्याशङ्क्य महाभयविह्वल आह–संप्रसिद्धः पिता च गुरुश्चातः कृपालुत्वात् क्षमासिन्धुत्वाच्च ऐश्वर्य्यमदसिन्धौ प्लुतस्य निमग्नष्य अत एव तव प्रभावम् अविदुषोऽजानतः ममापराधं क्षन्तुमर्हसि यतो मूढचेतसः पशुस्वभावस्य पशुर्हि स्वामिना दत्तदण्डप्रहारोपि क्षणान्तरे तमेवापराधं करोत्यतोहं दण्डप्रदानेन न शोधनमर्हामि किन्तु कृपया तथा मां शोधय यथा मे मूढचेतस्त्वं नश्यतीत्याह—मैवमिति। एतच्च नातिशुद्धेन चेतसा प्रार्थितमिति ज्ञेयम्। त्वां वीक्ष्य काले भयमित्युक्तेरक्षमतयैव तदनुगतेः अतः पुनः पारिजातहरणादावपि विस्मरिष्यत इति श्रीवैष्णवतोषिणी ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यदि संसार एव तव न तर्हि तद्धेतवः संसारप्रापकाः तत्कृताः संसारकृताः लोभ आदिर्येषां ते रागद्वेषादयः कुतस्तव स्युः तथापि संसारतत्कृतलोभादिरहितोऽपि धर्मस्य गुप्त्यैखलानामस्मदादीनां निग्रहाय दण्डं बिभर्त्ति ॥ ५ ॥ तच्च योग्यमेवेत्याह—पितेति द्वाभ्याम्। सर्वजगतां त्वं पिता जन्मदः गुरुर्ज्ञानप्रदः दुरत्ययो निरतिशयोऽधीशः अधिष्ठाता अतः काले उचितकाले उपातदण्डः स्वेच्छातनुभिः नानालीलावतारैः जगदीशमानिनां मानं गर्वं विधुन्वन् अपनयन् हितायैव ईहसे चेष्टसे इत्यन्वयः ॥ ६ ॥ मद्विधाश्च ते अज्ञाश्च मद्विधाज्ञाः जगत ईशा त्रयमिति मानवन्तः काले भयकालेपि त्वां यथेहैवातिवर्षनिपातेऽभयं वीक्ष्य आशु तन्मदं जगदीशा वयमिति मदं हित्वा अपस्मया गतगर्वाः सन्तः आर्याणां शिष्टानां मार्गं त्वज्ज्ञानभक्तिमार्गं प्रभजन्ति अनुवर्तन्ते अतस्तव ईहापि निश्चितं खलानामनुशासनं दण्ड इत्यर्थः। गोवर्द्धनोद्धरणेहयैव मदनुशासनं त्वया कृतमिति भावः ॥ ७ ॥ तदेवं भगवतो धर्मरक्षणायैव निग्रहादिकर्तृत्वमुक्त्वाथ क्षमापयन् एवमसती मतिः पुनर्मे माभूदिति प्रार्थयते स त्वमिति ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कुतो नु तद्धेतव इति श्लोके तत्पदार्थो गुणसम्प्रवाहश्चेन्मन्व्यादीनां तं प्रत्यहेतुत्वात्तथा स गुणसम्प्रवाह एव हेतुः साक्षान्न तान्प्रतीति तच्छब्दार्थानुसङ्क्ष्टये स्वयं तदर्थमाह ॥ पुनर्गुणसम्प्रवाहस्य कारणत्वात्तद्धेतव इति। गुणसम्प्रवाहो हि द्वयीं गतिमवलम्बते महत्तत्त्वादिकारणीभूतमूलसत्त्वादिगुणसम्प्रवाह एकोऽवान्तरश्चापर इति। पुनः प्रथमे प्रश्ने व्यावृत्तावधारण इत्युक्तेः। पुनर्गुणसम्प्रवाह इति पदमेकं। पुनर्गुणसम्प्रवाहोऽप्रथमो द्वितीयोऽवान्तर इति। तस्य कारणत्वान्मन्व्यादीन्प्रतीति शेषः। तथा च सोऽवान्तरगुणसम्प्रवाहो हेतुर्येषामिति विग्रहः सूचितो भवति ॥ ततश्चायं मूलार्थः ॥ ननु गुणसम्प्रवाहो मयि नास्तीति शक्यते वक्तुं। तत्कार्यकोपादेस्त्वदनुभवसिद्धस्यापलपितुमशक्यत्वातित्यतो न ते तत्कृताः किन्तु धर्मादिरक्षणायैव शिक्षणाय दुरात्मनां स्वेच्छा प्रदर्शिता इत्याह ॥ कुत इति। हे ईश तद्धेतवोऽवान्तरगुणसम्प्रवाहकारणका येऽबुधलिङ्गभावा अबुधानामज्ञानां लिङ्गभावो लिङ्गत्वं येषां तेऽज्ञानिचिह्नभूता मन्युलोभादयः स्वकारणगुणसम्प्रवाहस्याभावादेव कुतस्तद्धेतवः स्युर्नुनिश्चयः। सोऽवान्तरगुणसम्प्रवाहो हेतुर्येषां त इति विग्रहान्वयौ ज्ञेयौ। अथाऽपि शास्त्रविहितस्यादोषावहत्वाद्भवान्भगवान्दण्डं वाचोपदेशरूपं सतां मध्यमानां तर्ज्जनादिरूपमधमानां हिंसारूपं बिभर्ति। दण्डोऽस्त्री शासने राज्ञां हिंसायां लकुटे गुण इति यादवः। धर्मस्य गुप्त्यै रक्षायै मध्यमानामुभयरूपाणां धर्मस्य गुप्त्यै उत्तमेष्विवाप्रकाश्यत्वाद्गोपनाय खलानां निग्रहाय संहाराय। वस्तुतस्तु पुनर्गुणसम्प्रवाहस्येति कर्मणि षष्ठी। मन्व्यादीनामिति शेषः। आदौ गुणसम्प्रवाहस्तेन मन्व्यादयस्तैश्च पुनर्गुणसम्प्रवाह इति तेषां पुनर्गुणसम्प्रवाहकारणत्वसम्भवात्। पक्षममुं पुनः शब्दव्यासनिर्देशावुपोद्बलयत इति ज्ञेयं मूले तु तद्धेतव इत्यत्र तस्य हेतव इति विग्रहो ज्ञेयः ॥ ५ ॥ हिताय चेच्छातनुभिर्जगदीशमानिनामिति तत्सामान्यविहितता तथा मानविधूननं च प्रतीयते। ते च मानिनः सन्तोऽसन्तः सदसन्तश्चेति भिन्नाः। तेषां ते कथं युक्ते इत्यतोमानेनाधिकारिणो विविच्य तद्योग्यं फलं लपति ॥ असतां चेति। यद्यपि भावप्रतीत्यधीनाऽभावप्रतीर्नियमेनेत्युक्तेः सतामसतामिति वक्तव्यं। तथाऽपि तेषां भूयस्त्वात्किञ्च सतामपि तदावेशवशाशुभशासनीयताघटककार्यकारितायास्तत्पुरस्कृतिरिति मन्तव्यं। असतां सतामसतां सतां चेति मध्यमानां च। नित्यानित्यं त्रिधा प्रोक्तमित्यादिवद्धरिरेवानुशासकः। हरेरनुशास्तिः सतां श्रेयसे भाविमङ्गलाय चान्मध्यमानामनुबंधनाय च भविष्यति। अन्वाश्रये बन्धने मोक्ष इति विश्वः। असतां विपरीताय तमआद्यनर्थाय। तत्र तन्त्रं ॥ अनुशासनं लङ्घयित्वा स्थितानामिति। लङ्घयित्वा तत्तत्कर्मानुसारेण लङ्घनं कारयित्वा सैव शास्तिर्विपरीताय भविष्यतीति वा ॥ अथ मूलार्थः ॥ सर्वोपाधिभिः सर्वानुशासिता त्वमेव तत्त्वत इति विज्ञापयति ॥ पितेति। पिता जनको गुरुः शास्त्रोपदेष्टा जगतामधीशो निरवधिकमधिक इति दुरत्ययो दुःसाधस्वातिक्रमः कालः पुण्यपापफलवाचक इति तद्रूप्युपात्तदण्डो गृहीतशासनो हिताय सतां चात्सदसतां हिताहितफलायेच्छातनुभिः स्वेच्छोपात्तशरीरैर्जगदीशा वयं तदात्मका इति मानिनामसतां मानं मदं विधुन्वंस्तमसि तान्क्षिपंश्च समीहसे चेष्टसे। अमानं यथा तथा हिताय जगदीशमानिनां तान्विधुन्वन्निति वा गतम्। गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम्। इह प्रच्छन्नपापानां शास्ता वैवत्वतो यम इत्यादिकं त्ववान्तरत्वदाज्ञाकारिशासयितृविषयमिति न विरुणद्धीति हृदयम् ॥ ६ ॥ त्वं

किमव्यस्य इत्यत आह ।। येऽस्मद्विधा इति । जगदीशमानिन इति वा खण्डं वा पदम् । कालेऽसुरावेशकाले काले तदनाविर्भावसमये च जगदीशमानिनोऽभयं त्वां वीक्ष्येति यथाक्रममन्वयो ज्ञेयः । तं मदं हित्वाऽऽर्यमार्गमपरमया गतगर्वाः प्रभजन्ति खलानामसतामपि तवेहा चेष्टानुशासनं शिक्षात्मिकेव नास्मद्वदार्यमार्गभजनं तेषामिति भावः ।। ७ ।। इतः परं परमपुरुष त्वया विधेयं विनेयोपरि दयेदमिति प्रार्थयते ।। स इति । ऐश्वर्यमदप्लुतस्यातन्मदपारगस्याद्भिः प्लुतोऽप्लुतो ममाप्लुतो मदप्लुत ऐश्वर्येणाभिमानिकेन मदप्लुतस्तस्य ते कृतागसो मम ते प्रभावं चाविदुषोऽज्ञस्य कृतागसोऽनुष्ठितापराधस्य क्षन्तुमाग इति शेषः । अर्हसि । अथ हे प्रभो ईश श्रीश देव इह मूढचेतसो मेऽसत्वमङ्गला मतिः पुनर्मैवं भूत् न माङ्योग इति नाडागमः । पृथक् प्रार्थनाविषयत्वान्न **मम मेऽविदुषो मूढचेतस** इति पुनरुक्तेति मन्तव्यम् ।। ८ ।।

श्रीसुबोधिनी

यद्येषा वैषम्यबुद्धिरेव नास्त्यन्वेषामपि तादृशबुद्धिनाशकत्वात् तदा वैषम्यबुद्धिवृतानि कार्याणि क्रोधादीनि न भवन्तीति किं वक्तव्यमित्याह **कुत** इति, **न्विति** वितर्के **तद्धतवो** ग्रहणहेतवो मायाहेतवो वा कुतो भवेयुः ? किञ्च हे ईश यदि तवापि ते स्युस्तदा तत्पारवश्यादीशत्वं नोपपद्येत यद्यपि बहव एव दोषा निराकर्तव्यास्तथापि **प्रकृते द्वयं प्रतिभात्यपकारिणी** कोपो द्रव्ये लोभश्चेत्यतः आह **मन्युलोभादय** इति, **मन्यू** राजसो **लोभ**स्तामस इति वा, नन्वेते दृष्टाः कथं निराक्रियन्ते ? तत्राहा**बुधलिङ्गभावा** इति, **अबुधानामज्ञानां लिङ्गभावो** लिङ्गत्वं येषां ते ह्यज्ञानिनं ज्ञापयन्ति न तु सर्वज्ञा धीरास्तज्ज्ञापका वातः श्रुतिविरोधान् न तेऽङ्गीकर्तव्याः, न हि क्रोधादयो भगवति कैश्चिदनुभूताः कार्येण कल्पनं त्वन्यथाप्युपपद्यते ये प्राकृतेषु क्रोधादिभिर्जायन्ते ते भगवतीति स्वत एव न हि दोषेणैव काय भवति गुणेन न भवतीति वक्तुं शक्यं दुःखादप्यश्रूण्यानन्दादप्यश्रूणि तथा प्रकृतेपि क्रोधादपि निग्रहोनुग्रहादपि निग्रह इत्यतः प्रमाणयुक्तिबाधान् न भगवति क्रोधादयः, **एवमपि** सति **भगवान् दण्डं बिभर्त्य**तो ज्ञायते **धर्मरक्षार्थं खलानां निग्रहार्थं च** तत् करोतीति लौकिकभगवतोरेतावान् विशेषः एकत्र फलाभावोपरत्र लौकिकसाधनाभाव इति साधनं भगवानेव **तत्र साधन स्वरूपमेवेतिसिद्धान्तः**, फलं भ्रमप्रतिपन्नमन्यथा प्रवृत्तिर्न स्यात्' यदि भगवानेवं न कुर्यात् पाषण्डप्रवृत्त्वा धर्मनाशः स्यात्, स च सर्वेषां श्रेयोरूपः, किञ्च यदि स्वानुभावं न प्रकाशयेद् गोवर्धनोद्धरणादिना तदा खला न निगृहीताः स्युः, अत्र दण्डद्वयं पूर्वस्थितस्य नाशोधिकताडनं च, एकस्तु दण्डत्वेन **न** व्यवह्रियत इत्येकवचनं, एवं कृत एवैतद् भवतीति तवैव ज्ञानं नान्यस्येति**भगवानित्युक्तं**, अतस्तस्य फलसाधकत्वेन प्रमाणान्तरं **न मृग्यम्** ।। ५ ।। एवं श्लोकद्वयेन दण्डः कृतः परं प्रयोजनार्थमिति निरूपितमिदानीं शिक्षैवैषा न तु दण्ड इत्याह **पितेति पुत्रा हि पितृभिस्ताड्यन्ते गुरुभिश्च शिष्या राजभिश्च प्रजाः कालादिभिश्च पुरुषा न चैते दण्डं कुर्वन्ति किन्तु शिक्षामेव**, त्वं तु सर्वेषां सर्वरूपो जनकत्वात् **पिता** वेदकर्तृत्वाद् **गुरुः** सर्वेषामेव **जगतामधीशः** स्वामी ब्रह्मादीनामप्यधिकारसम्पादकोतोधीशो दुरत्ययः **कालो मृत्युः कालमृत्युर्हि न केनाप्यतिक्रान्तो भवति, उपात्तो दण्डो येन स यमः**, परलोकेपि दुःखदाता तवैवाधिकारिणस्त इति कर्मकारणात् प्रेरणाद्वातः सर्वत्राधिकृतो भवानेवेती**च्छातनुभी**राजादिशरीरैर्लोकानां **हितायैव** दण्डं **समीहसे जगदीशमानिनां मानं च विधुन्वन्, इच्छातनवो** मत्स्यादयोपि, **पुरुषः पिता** मत्स्यो **गुरुरधीशः** कूर्मो वराहश्च **मृत्युदण्डधारिणौ** नृसिंहवामनौ तथान्यत्रापि ज्ञेयं, **चकारान्** मोक्षाय च तेषां जगतश्च ।। ६ ।। तत्र हितं सन्दिग्धमिति स्वदृष्टान्तेन विवृणोति **ये मद्विधा** इति, अहमिन्द्रो यथैवमेव वरुणादयोज्ञा मूर्खा अन्यथा कथं **नन्दं** नयेयुः ? तेषामज्ञानस्थानमाह **जगदीशमानिन** इति, यद्यपि भगवदाज्ञा क्रियत इतिबुद्ध्यभावे सर्वमेव मौढ्यकृतं तथापि जगदीशा वयमित्यभिमानः **स्पष्टः**, मोहकार्यत्वेन तादृशा, स्वावसरेन्तकाले **भयरूपं त्वां वीक्ष्याशु** शीघ्रं वयमीश्वरा इति तन्मदं परित्यज्या**र्यमार्गं नामस्मरणादिकं तुलसीगोपीचन्दनादिधारणं प्रपद्यन्ते**, यथेदानीमहं नमस्कारे प्रवृत्त एवमपि केचित् प्रपद्यन्ते, यावत् पुनर्भयात्मकमपि त्वां न प्रपश्यति तावन्नार्यमार्गं प्रपद्यन्त इति धर्मरक्षार्थं दण्ड उपपादितः, **प्रकर्षेण भजन** पुनः पूर्वावस्थानं न गृह्णन्ति, **अपगतः स्मयो** गर्वो येषां, **आर्यमार्गस्य गर्व एव बाधकः**, अतो यद्यपि कौतुकार्थमेव गोवर्धनोद्धरणं कृतं तथापि **खलानामनुशासनरूपं** जातमतस्तव चेष्टामात्रमपि सफलमेव ।। ७ ।। एवं शिक्षार्थतामुपपाद्य कदाचिज् ज्ञानवत्त्वेन कृतं कर्म चित्तेपराधत्वेनैव भासेतातस्तन्निषेधार्थं प्रार्थयति **स त्वमिति, ऐश्वर्यमदेन** प्लुतत्स्यात एव **कृतांहसः** कृतापराधस्य, उभयत्रापि हेतुस्ते **प्रभावमविदुषः क्षन्तुमर्हसि, अथ** भिन्नप्रक्रमेण मदीयानधर्मानविचार्य केवलोयं दीन इति भ्रान्त इति, यतस्त्वं **प्रभुः, न हि प्रभोश्चेतसि क्षुद्रकृता भासन्ते मूढचेतसो म** इति वचनान् मौढ्यं सिद्धमेव, नन्वज्ञानं निवर्तितं शिक्षा च कृता कातः परं क्षमा या कर्तव्येति चेत् तत्राह **मैवं पुनर्भू**'दिति, एतादृशी मतिः **पुनर्माभू**दिति, यदि भगवान् क्षमां न कुर्यात् मदपराधं स्मरेत् तदा सत्यसङ्कल्प इति नित्यविषयज्ञान इति मदाश्रयोप्यपराध उत्पद्यते स्मरणे तु नोत्पद्यते साधनाभावात् पूर्वसाधनस्य निवृत्तत्वाच्च, यत **इयं मतिरसती** सम्बन्धिनमप्यसति योजयत्यतस्तन्निवृत्तिप्रार्थनोचितैव ।। ८ ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

कुतो न्वित्यत्र **ग्रहणेति मायेति** ग्रहणं हेतुर्येषां मायाहेतुर्येषामितिसमासो ज्ञेयः, **फलाभाव** इति दण्डफलं धर्मरक्षा तदभाव इत्यर्थः, **लौकिकेपि** दण्डे लौकिकं साधनं कोपस्तदभाव इत्यर्थः, राजदण्डादिनापि धर्मरक्षा जायते तदर्थमाहुः **फलमिति**,

परं न नियतमितिभावः, **अन्यथेति** कदाचिदपि फलाभावे प्रवृत्तिर्न स्यादित्यर्थः, **यदीति** यागभङ्गो धर्मरक्षार्थं गोवर्धनोद्धरणं खलनिग्रहार्थमित्यर्थः, **एवमिति** यागभङ्गमित्यर्थः, **पूर्व**ति यागस्वामित्वनाश इत्यर्थः, **अधिकेति** गोवर्धनोद्धरणेन मानभङ्ग इत्यर्थः, **एकस्त्वति** पूर्व इत्यर्थः ॥ ५ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

कुतो नु तद्धेतव इत्यत्र **अनुग्रहादपि निग्रह इतीति** "क्रोधोपि देवस्य वरेण तुल्य"इत्यादिवाक्यात्, **लौकिकभगवतोरेतावान् विशेषः एकत्र फलाभावोपरत्र लौकिकसाधनाभाव** इतीति **एकत्र** लौकिके **फलाभावः**, क्रोधे जातेपि दण्डरूपं फलं कर्तुं न शक्यते दण्डकरणेप्सोरसमर्थत्वादित्यर्थः, **अपरत्र** भगवति **लौकिकस्य दण्डसाधनस्य क्रोधस्याभावः**, क्रोधं विनैव अनुग्रहेण दण्डदानादित्यर्थः, ननु यस्मै भगवता दण्डो दीयते तस्य **सम्पत्त्यादिनाशो मरणं** वा जायते कंसादौ तथादृष्टत्वात्, अतः फलेन साधनेनुमीयमानेनिष्टफलस्य क्रोध एव साधनमित्याशङ्क्याहुः **फलं भ्रमप्रतिपन्नमिति**, सम्पत्त्यादिनाशो मरणं वा दण्डस्य न फलं किन्त्वग्रे दास्यमानं मुक्तिरूपमेव फलं फलत्वेन बोद्धव्यं, **अतो मरणादिकं भ्रमेण फलत्वेन प्रतिपन्नं** ज्ञातमित्यर्थः, ननु यदि मुक्तिफलं दित्सितं तदा भक्तेभ्य इव कुतो न दीयते मारयित्वा कुतो दीयत इत्याशङ्क्याहुः **अन्यथा प्रवृत्तिर्न स्यादिति**, यदि निषिद्धकर्मकर्तृभ्योपि भक्तेभ्य इव मुक्तिं दद्यान् मारणादि न कुर्यात् तदा सन्मार्गे प्रवृत्तिरेव न स्यात्, आर्याणां दुष्कृतीनां तुल्यत्वादित्यर्थः, **य द भगवानेवं न कुर्या**दित्यादि भक्तानामिव सुखेनैव मुक्तिं दद्यात् दुष्कृतीनां सम्पद्भ्रंशं मारणं वा न कुर्यात् तदानिष्टफलाशङ्काभावात् सर्वे निषिद्धकर्माणि कुर्युस्तदा पाषण्डप्रवृत्त्या धर्मनाशः स्यादित्यर्थः, **स च सर्वेषां श्रेयोरूप** इति **स च** धर्मः सर्वेषां श्रेयोरूप इत्यर्थः, इह "स चे"त्यनेन धर्मनाशशब्दान्तर्गतो धर्मः परामृश्यते "पटोलपत्रं पित्तघ्नं नाडी तस्य कफापहे"त्यत्र 'तस्ये'त्यनेन पटोलवत् ॥ ५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यद्यवं तदा तत्कृता देहाद्यात्माध्यासकृतास्तद्धेतवः पुनरन्यदेहग्रहणस्य हेतवो लोभादयस्तु कुतः स्युः ? । तत्रैव हेत्वन्तरं सूचयन् सम्बोधयति–ईशेति । ननु 'ज्ञानिनामपि ते दृश्यन्ते ?' तत्रा–अबुधलिङ्गभावा इति, अज्ञानिनां गमकाः । रागलोभादिसत्त्वे ज्ञानित्वमेव न सिद्ध्यतीति भावः ॥ ननु 'रागलोभाद्यभावे कथं त्वन्मभङ्गेन स्वमखसाधने प्रवृत्तिः ?' इत्याशङ्क्याह–तथापीति । लोभाद्यभावेऽपि भगवान् ऐश्वर्यादिपूर्णोऽपि भवान् खलानां परीद्वजकानामस्मदादीनां निग्रहाय वशीकरणार्थं मानभङ्गादिरूपं दण्डं बिभर्ति करोति । तत्प्रयोजनमाह–धर्मस्य गुप्त्या इति । दण्डाभावे प्रमादेन त्वदाराधनरूपस्य धर्मस्य विलोपादित्याशयः ॥ ५ ॥ 'उचितं च तव एतत्' इत्याह–पितेति । जगतां प्राणिनां त्वं पिता जनकः, गुरुरुपदेष्टा, अधीशः नियन्ता चेति दण्डस्योचितत्वे हेतुत्रयम् । तत्र सामर्थ्यमाह–दुरत्यय इति । तत्र हेतुमाह–काल इति । तस्मादुपात्तदण्डः सङ्कल्पितदण्डः सन् जगदीशमानिनामस्माकं मानं विधुन्वन् दूरीकुर्वन् स्वेच्छातनुभिः लीलावतारैः समीहसे चेष्टसे । 'मानदूरीकरणं तु शिक्षाद्वारा कल्याणार्थमेव' इत्याह–हितायेति ॥ ६ ॥ 'तेन हितं भवत्येव' इत्याह–ये इति । ये मद्विधाश्च ते अज्ञाश्च, अत एवात्मानं जगदीशं मन्यमानास्ते भयकालेऽपि त्वामभयं भयरहितं दण्डधरं वीक्ष्य तन्मदं जगदीशाभिमानप्रयुक्तं मदमाशु हित्वा अपस्मयाः अपगतगर्वाः सन्तः आर्यमार्गं सतां वर्त्म त्वद्भक्तिं प्रभजन्ति अनुवर्तन्ते । अतस्तवेहा लीला खलानामनुशासनं शिक्षैव ॥ ७ ॥ एवं स्वयागभङ्गगोवर्धनपूजादिभगवल्लीलायाः स्वशिक्षार्थत्वमभिधाय तं क्षमापयति–स इति । 'समर्थस्य स्वामिनः क्षमैव युक्ता' इत्याशनेन सम्बोधयति–प्रभो इति । स सर्वेश्वरस्त्वं कृतागसः वर्षादिना कृतापराधस्य ममापराधं क्षन्तुमर्हसीत्यन्वयः । 'अपराधः कुतः कृतः ?' इत्यत आह–ते इति । तव प्रभावमविदुषः अजानतः ॥ प्रभावा ज्ञाने हेतुमाह–ऐश्वर्येति । इन्द्राधिपत्येन यो मदस्तेन प्लुतस्य व्याप्तस्येत्यर्थः । मदेऽपि हेतुमाह–मूढचेतस इति । मूढमविद्यया विवेकहीनं चेतो यस्य तस्येत्यर्थः । हे ईश सर्वान्तर्यामित्वेन सर्वकरणसमर्थ ! अथ इतोऽनन्तरमपि मे ममासतो दुष्टा त्रिलोकेशत्वाभिमानरूपा मतिर्मा भूदिति प्रार्थनान्तरम् ॥ ८ ॥

अन्वितार्थप्रकाशिका

कुत इति ॥ हे ईश ! गुणसम्प्रवाहाभावे तद्धेतवः जन्ममरणहेतवः देहान्तरहेतवश्च तत्कृता देहाध्यासकृताः अबुधानाम् अज्ञानिनां लिङ्गभूताः यावल्लोभादिमत्त्वं तावज्ज्ञानित्वमसिद्धम् । अतो अज्ञानिनां लक्षणभूता भावाः लोभादयस्तव कुतः स्युः । तथापि लोभाद्यभावेऽपि भगवान् धर्मस्य गुप्त्यै खलानामस्मादृशां निग्रहाय च दण्डं बिभर्त्ति ॥ ५ ॥ पितेति ॥ जगतां प्राणिनां त्वं पिता जनकः गुरुरुपदेष्टा अधीशः नियन्ता चेति दण्डधारणे हेतुत्रयम् । दुरत्ययः प्रबलः कालः तस्मादुपात्तदण्डः संकल्पितदण्डः सन् जगदीशमानिनामस्माकं हिताय मानं विधुन्वन् दूरीकुर्वन् स्वेच्छा तनुभिः लीलावतारैः समीहसे चेष्टसे । तव समीहा लीलैव जगदीशमानिनामस्माकं मानविधूननमित्यर्थः ॥ ६ ॥ य इति ॥ ये मद्विधाश्च ते अज्ञाश्च अत एवात्मानं जगदीशं मन्यमानास्ते भयकालेऽपि यथाऽधुनैवातिवृष्टौ त्वामभयं भयमगणयन्तं दण्डधरं वीक्ष्य तन्मदं जगदीशाभिमानप्रयुक्तं मदमाशु हित्वा अपस्मयाः अपगतगर्वाः सन्तः आर्यमार्गं सतां वर्त्म त्वद्भक्तिं प्रभजन्ति अनुवर्तन्ते । अतस्ते तवेहा लीला एव खलानामप्यनुशासनं

शिक्षा दण्डो वा ॥ ७ ॥ स इति ॥ हे प्रभो ! हे ईश ! स सर्वेश्वरस्त्वम् ऐश्वर्यं देवस्वामित्वं तेन यो मदस्तेन प्लुतस्य व्याप्तस्य कृतागसः ते तव प्रभावम् अविदुषः मूढचेतसो मम क्षन्तुमर्हसि । अथ इतोऽनन्तरमपि एवं मे ममासती दुष्टा त्रिलोकेशत्वाभिमानरूपा मतिर्माभूत् । इदं च नातिशुद्धेन चेतसा प्रार्थितम् अत एव पारिजातहरणादौ विस्मरिष्यते ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नन्वेवं चेत्तर्हि जनानां निग्रहत्वमनुग्रहत्वं च मयि कथं संघटेत तत्राह कुत इति तर्हि ये अबुधलिंगभावाः अबुधानामज्ञानालिंगे शरीरे भवंतीति तथाभूताः तस्य शरीरस्य हेतव उत्पादकाः तत्कृतोस्तेन गुणप्रवाहेण कृतास्ते लोभादयः त्वयि कुतो भवेयुर्न स्युः हे ईश तथापि धर्मस्य गुप्त्यै खलानां निग्रहाय तेषु भगवान् अनेकविधैश्वर्यः षट्कयुक्तो भवान् दंडं बिभर्त्ति ॥ ५ ॥ ननु त्रिलोकाधिषे त्वयि गोपेन मया कथं दंडधारणं स्यात् तत्राह पितेति जगतां त्वं पिता उत्पादकः गुरुर्बोधकर्त्ता अधीशो नियामकः दुरत्ययः अनिवार्यः कालो नाशकः उपात्तदंडः कालप्रकृतिपुरुषादीनां नियमनाय उपात्तो गृहीतो दंडो येन सः त्वं जगदीशमानिनां मानं विधुन्वन् कंपयन्सन् जनानां हिताय कल्याणाय मोक्षायेति यावत् इच्छातनुभिः इच्छया स्वेच्छया आविर्भूतास्तनुभिः मनोहरमूर्त्तिभिः समीहसे रमणं करोषि तव रमणेनैवास्माकं मानहानिः स्यादिति देवेन्द्राभिप्रायः ॥ ६ ॥ पुनस्तदेव विस्तारयति स्वं जगत ईशं मानयंतीत्येवंशीलाः जगदीशमानिनः काले भीत्तिकालेपि यथा ईदानीं वर्षासु अभयं निर्भयं त्वां वीक्ष्य आश्रुतन्मदंतस्य ईशत्वस्य मदं गर्वं हित्वा आर्याणां साधूनां मार्गं अपस्मया विधूगतगर्वाः संतः प्रकर्षेण भजंतीति ते तव ईहा चेष्टा खलानामपि अनुशासनं भवति ॥ ७ ॥ एवं भगवत्स्वरूपनिरूपणपूर्वकं स्वाभिप्रायं निरूप्येदानीं स्वापराधं क्षमापयन्नाह स इति ऐश्वर्यमदेन प्लुतस्य व्याप्तस्य ते तव प्रभावं माहात्म्यं अविदुषोऽजानतः अतएव मूढचेतसो मम अपराधं सः परमेश्वरस्त्वं क्षंतुमर्हसि यद्वा ते प्रभावं विदुषो ज्ञात्वाऽपि कृतागसः कुतो मूढचेतसो विस्मृतप्रभावस्येति तोषणीकारः हे ईश एवं मेऽसती मतिर्माभूत् ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वहमेवंविधधामाधिपः स्यां चेत्तथाविधधामाधिपे मयि कथं रागादयः कथं वा तन्मूलादण्डादिप्रवृत्तिश्चेत्याशङ्क्य परिहरति ॥ कुत इति यतस्तवधामैव गुणसंप्रवाहग्रहणानुबन्धाभ्यां रहितं, अतः हे ईशेश्वर निरुपाधकसर्वेश्वरेत्यर्थः । तत्कृतास्तेन शरीरग्रहणेन कृतास्तत्प्रयुक्ता इत्यर्थः । तद्धेतवः पुनरन्यस्य शरीरग्रहणस्य निमित्तभूताः, रागादयः, लोभादय इति पाठे लोभप्रभृतयः ते कुतो नु । तव न सन्त्येवेत्यर्थः । अत्यन्तासंभावनायां हेतुं वदन् रागादीन्विशिनष्टि । ये अबुधलिङ्गभावाः अबुधानां देहात्मभ्रमवतां लिङ्गभावाश्चिह्नीभूताः, रागादिरेवाबुधत्वं व्यज्यते । नित्यं स्वयाथात्म्यानुभवरूपस्य तव कथं रागादिसंभावनापीति भावः । यद्यपि त्वं त्वेवंभूतो भवसि तथापि, भगवान् पूर्णषाड्गुण्यः भवान्, धर्मस्य गुप्त्यै धर्मसंस्थापनाय खलानां निग्रहाय च, दण्डं बिभर्त्ति । तथैवैतद्वचनं 'परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे' इति ॥ ५ ॥ न च खलनिग्रहेण तव वैषम्यप्रसङ्गः तन्निग्रहस्यापि तद्दमनद्वारा तदनुग्रहहेतुत्वादित्यभिप्रियन् खलनिग्रहस्यौचित्यं द्योतयितुं विशिंषन् वैषम्याभावमाह ॥ पितेति ॥ जगतां सर्वजगतां, त्वं पिता जनकः, गुरुर्हितोपदेष्टा, अधीशो नियन्ता, इति दण्डधारणे हेतुत्रयम् । दुरत्ययः न तु लौकिकनियन्तृवत् कथंचिदत्येतुं शक्यः । अतः, काले उचितकाले, उपात्तो दण्डो येन तथाभूतः त्वं, जगदीशमानिनां स्वात्मानं जगदीशं मन्यमानानां मादृशां, मानं विधुन्वन् सन्, हितायास्माकं हितार्थमेव । स्वेच्छातनुभिः स्वेच्छोपात्ताप्राकृतदिव्यतनुभिरुपलक्षितः संश्च, समीहसे चेष्टसे । नातो वैषम्यमिति भावः ॥ ६ ॥ दण्डस्य हितार्थत्वमेवोपपादयति ॥ ये इति ॥ ये इति ॥ ये मद्विधा मादृशाश्च तेऽज्ञाश्च ते, जगदीशमानिनः सर्वथा जगदीशमात्मानं मन्यमानाः ते, काले उचितकाले, भयं भयंकरदण्डधरं, यद्वा काले भयकालेऽपि, अभयं भयमगणयन्तं, त्वां वीक्ष्य, तन्मदं जगदीशाभिमानप्रयुक्तं मदं, आशु हित्वा, अपस्मयाः अपगतगर्वाः सन्तः, आर्यमार्गं त्वद्भक्तिलक्षणं वर्त्म, यद्वा । सतां वर्त्म, प्रभजन्ति अनुवर्त्तन्ते । अतः ते तव, ईहा चेष्टापि, खलानां अनुशासनं शिक्षैव ॥ ७ ॥ तदेवं भगवतः केवलं लोकहितार्थैकप्रवृत्तत्वमभिधायाथ क्षमापयति ॥ स त्वमिति ॥ ऐश्वर्येणैन्द्राधिपत्येन मदस्तेन प्लुतो व्याप्तस्तस्य, उत्पथं प्रतिपन्नस्येति वा । अत एव, ते तव प्रभावं महिमानं, अविदुषो न जानतः, अत एव, कृतमागोऽपराधो येन तस्य, मम, अपराधमिति शेषः । स एवंभूतस्त्वं, क्षन्तुं अर्हसि । हे प्रभो निग्रहीतुमनुग्रहीतुं च समर्थ, अथ पुनः, दृढचेतसस्त्वदाज्ञायां वर्त्तने सुदृढमानसस्य, अस्मिन् पाठे छन्दोभङ्ग आर्षः । मूढचेतस इति पाठे प्रसिद्धोऽर्थः । मे मम, असती दुष्टा, एवमेवं विधा, मतिः हे ईश, मा भूत् । तथानुगृहाणेति प्रार्थनान्तरम् ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कुत इति : १०.२७.५.

रुण्मोहकामलोभाः स्युर्भृशमस्मासु दुर्गुणावृतिषु । त्यज रुषमिति वागेपा भगवंस्त्वयि मेऽन्यजनकृताभ्यासा ॥ ९ ॥

पिता गुरुरिति : १०.२७.६.

पित्रा वा गुरुणा वा कृतोऽपमानः स मानशतवर्यः । यस्मात्परिणतिसुखदो भवतीत्यधुना तु मे द्वयं त्वमसि ॥ १० ॥

ये मद्विधाज्ञा इति : १०.२७.७.

अज्ञत्वान्मम निग्रहाय यतसे चेन्मद्विधाज्ञाः कति सन्त्यस्यां जगदीश पश्य भुवि तेऽज्ञत्वं न सार्वज्ञतः ।
अन्याय्याचरणं प्रधानमिति चेदज्ञानकार्यं तथाऽस्ति स्पष्टं त्वमधोक्षजाभयकरस्तत्स्वाकृतिं दर्शय ॥ ११ ॥
स्वीयावनार्थं दधता स्वहस्ते मयाऽचतं ते किमकारि शासनम् ।
मैवं वदेशाच्युत यत्खलानामीहैव तेऽनुग्रहनिग्रहप्रसूः ॥ १२ ॥

स त्वं ममेति : १०.२७.८.

अयं त्रिदशनायकः सकललोकनाथस्त्वहं सुराभिरुचिरेष भूर्यमृतदानदीक्षस्त्वहम् ।
सनालमिति मन्यते गृहमहं श्रियाऽलंकृतस्तदुन्नतिमतः सहे कथमितीश धीस्ते सती ॥ १३ ॥
आसीदेव पुरा सुराधिकरुचिर्मत्तत्त्वहेतुर्मम श्रीमत्तत्त्वमपि स्फुटं समभवद् गोवर्धनोद्धारतः ।
एवं सत्य इहावयोरपि समो हार्दाशयो दृश्यतां स्वामी त्वं नितरां स्पशोऽहमिति वा वाच्योऽपराधो न ते ॥ १४ ॥

कृष्णप्रिया

हे भगवन्, हे नाथ ! यदि आप में अज्ञान एवं अज्ञानजन्य देहसम्बन्ध सम्भवित नहीं है, तव अज्ञान से और देह सम्बन्ध से उत्पन्न हुए दूसरे शरीर के बन्धन में डाल देने वाले और अज्ञान के कारणभूत अथवा अज्ञान से उत्पन्न होनेवाले क्रोध लोभ आदि विकार भाव, नाथ ! आप में कैसे सम्भवित हैं। फिर भी जो आप के दण्डादि प्रदानादि से क्रोधादि का दर्शन होता है वह तो आप की लीला एवं जगत् संचालन के अङ्ग है। आप को जगदीश्वर होने के नाते धर्मकी रक्षा और खलों का निग्रह करने के लिये दण्ड-शिक्षा के लिये क्रोध का प्रयोग करना पड़ता है। हे नाथ ! आप तो नियामक-भगवान है इस से क्या करना और क्या नहीं करना इसका पूर्णतया आप को ज्ञान है और आप वही करते हो ॥ ५ ॥ नाथ ? आप केवल नियामक नहीं है किन्तु जगत् के पिता, गुरु, त्रिजगत् के अधीश्वर, और दण्ड देने वाले अनिवार्य काल रूप आप ही है। अपने आप को जगदीश्वर मान बैठे मुझ जैसे बालिशों के दुरभिमान को दूर करने के लिए और उनका कल्याण मङ्गल करने के लिए समय समय पर निजेच्छा से अवतार लेते हो और नियमन करते हो ॥ ६ ॥ हे भगवन् ! जो मुझ जैसे अज्ञानी लोग अपने को जगदीश्वर मान बैठे है उनका वह मद उन जनों का वह अधिकार नशा, अन्तकाल में आप का अत्युग्र स्वरूप का दर्शन करते चकाचौंध ही उतर जाता है। या नष्ट हो जाता है। वे लोग क्षण में गर्व मुक्त बनकर सन्मार्ग सत्य पर प्रस्थान करते हैं और आप का निरन्तर भजन करते हैं। नाथ ? कालीय दमन, दावानल पान, गिरिवर धारण आदि लीलाओं खलों के अनुशासन के लिए होती है ॥७॥ हे नाथ ? ऐश्वर्य के नशे में चकाचौंध बना हुआ मैं आप के प्रभाव को सामर्थ्य को विसर गया इसके परिणाम में मैंने यह वृष्टि वरसाने का अपराध किया। हे जगदीश्वर, मुझ मूढ मति के इस अपराध को क्षमा करें और आप ऐसी करुणा करें की हे करुणाकर मैं ऐसी भूल कभी न करूँ और न तो मेरी ऐसी पुनः कुमति हो ॥ ८ ॥

तवावतारोऽयमधोक्षजेह [1]भुवो भराणा मुरुभारजन्मनाम् ।
चमूपतीनामभवाय देव भवाय युष्मच्चरणानुवर्तिनाम् ॥ ९ ॥
नमस्तुभ्यं भगवते पुरुषाय महात्मने । वासुदेवाय कृष्णाय सात्वतां पतये नमः ॥ १० ॥
[3]स्वच्छन्दोपात्तदेहाय विशुद्धज्ञानमूर्तये । सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ॥ ११ ॥
मयेदं भगवन् गोष्ठनाशायासारवायुभिः । चेष्टितं [4]विहिते यज्ञे मानिना तीव्रमन्युना ॥ १२ ॥

कर्दमक्षमा

अन्वयः—अधोक्षज ! अयम् तव अवतारः, इह, भुवः भराणाम् उरुभारजन्मनाम् चमूपतीनाम् अभवाय, हे देव ! युष्मत्चरणानुवर्तिनाम् भवाय, "भवति" ॥ ९ ॥ भगवते पुरुषाय महात्मने वासुदेवाय सात्वतां पतये कृष्णाय तुभ्यम् नमः ॥ १० ॥ स्वच्छन्द उपात्तदेहाय विशुद्धज्ञानमूर्तये सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ॥ ११ ॥ हे भगवन् यज्ञे विहिते तीव्रमन्युना मानिना मया गोष्ठनाशाय आसारवायुभिः इदम् चेष्टितम् तत् भगवान् क्षन्तुम् अर्हति ॥ १२ ॥

---

१. स्वयं–श्रीधर. वंशी. जीव. विश्व. शुक. सु. ; भुवो–वीर. विज. । २. बहु–प्रा. पा. । ३. स्वच्छतप्त–विज. । ४. विहृते–श्रीधर. वंशी वीर. विज. विश्व. शुक. सु. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

महानयमपराधः कथं क्षंतव्य इति चेदत आह । तवेति । स्वयंभराणां पुनश्चोरुभारजन्मनां बहूनां भाराणां जन्म येभ्यस्तेषामभवाय नाशाय युष्मच्चरणसेविनां तु भवाय । अतो मम त्वत्सेवकत्वादत्यंतापराधिनोऽपि क्षंतव्यमिति भावः ॥ ९ ॥ क्षमापयन्नमस्करोति नम इति । तुभ्यं भगवते कृष्णाय नमः । पुरुषाय सर्वांतर्यामिणे । महात्मनेंतस्थत्वेऽप्यपरिच्छन्नाय । कुतः । वासुदेवाय सर्वनिवासाय । सात्वतां यादवानां पतये नमः ॥ १० ॥ तर्हि किमहं यादवः । न । स्वच्छंदोपात्तदेहाय स्वेषां भक्तानां छंदेनेच्छया यादवादिषु स्वीकृतदेहाय । तत्रापि विशुद्धं ज्ञानमेव मूर्तिर्यस्य तस्मै मायया सर्वस्मै सर्वरूपाय । कुतः । सर्वस्य बीजाय कारणाय अत एव सर्वभूतात्मने नम इति ॥ ११ ॥ कृतागस इत्यनेनोक्तमपराधं निवेदयति । मयेदमिति । आसारैर्वायुभिश्च गोष्ठनाशाय मयेदमकृत्यं चेष्टितं कृतम् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अयम् मदवज्ञालक्षणः । अतः अत्र । भाराणाम् भारभूतानामुत्पथगामिनामित्यर्थः । इह भूमौ यदुकुले वा । यतः सेविनां भवायातो हेतोः । इति भाव इति । 'अपराधः सकृद्भर्त्रा सोढव्यः' इति न्यायेनेति तात्पर्यम् । अहन्तूभयेषां मध्ये न कोपि मम तु न भवो नाभवो मयि तूदासीन एव वर्त्तसेऽतो धिङ् मामित्यर्थः ॥ ९ ॥ अपरिच्छिन्नत्वे शंकते–कुत इति ॥ १० ॥ भगवानाशंकते–तर्हीति । तर्हीति वाक्यालंकाराक्षेपयोः । परिहरति—नेति । तत्रापि स्वच्छंददेहत्वेपि । विशुद्धम् केवलम् । मायया अघटनघटनापटीयस्या शक्त्या । सर्वरूपत्वे हेतुमाशंकते–कुत इति । अतः एव सर्वकारणत्वादेव । सर्वेषां भूतानामात्मने स्वरूपाय ॥ ११ ॥ भो शक्र त्वं मद्भक्त इत्यनया स्तुत्यैव ज्ञायसे । किं तु, विनैव त्वदाज्ञां दुष्टा मेघा मद्व्रजं यत्कदर्थयंति स्म तदिमे त्वया दंडनीया इति पवित्रभर्त्सनमाशंक्य हन्तहंतास्मिन्नंतर्यामिणि कपटं न घटेतेति विमृश्य स्वचेष्टितं यथार्थमेवाह—मयेति । ननु मद्भक्ते त्वयि कथं संभवेत्तत्राह—विहते यज्ञ इति । ननु त्वत्प्रभुणा मयैव विहतेपि दासस्य तवैतावदकृत्यं न प्रत्येमि तत्राह—मानिना ऐश्वर्यगर्वस्य किमशक्यमिति भावः । ननु दैवादुत्थिता गर्वादयो मद्भक्तैर्विवेकेनैव तिरोधाप्यास्तत्राह तीव्रमन्युना । तीव्रः क्रोधो हि विवेधमपि बलाद्ग्रसतीति भावः । आसारेण धारासंपातेन सहिता वायव आसारवायवस्तैः । मध्यमपदलोपी समासः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अधोक्षज ! हे इन्द्रियज्ञानागोचरेति परमादृश्यतोक्ता तथापि इह पृथ्वीतले तवावतारः प्राकट्यं भवाय मङ्गलाय देव ! हे पूज्य इति स्वस्य सेवकतां साधयति—युष्मदिति । बहुत्वेन तदीयान् श्रीव्रजजनादीनपि सङ्गृह्णाति अन्यत्तैः । यद्वा, स्वस्य तत्प्रभावविद्वत्तामेवाभिव्यञ्जयन् मूढचेतस्त्वमेव च दर्शयन् सानुतापमाह—तवेति । अस्माकं प्रार्थनयाऽस्माकमेव हितार्थं त्वमवतीर्णोसीत्यस्माभिर्ज्ञायत एव तथाप्येतादृशोऽपराधः कृतः अहो बत मूडचेतस्त्वम् अतः क्षन्तुमर्हस्येवेति भावः ॥ ९ ॥ भगवते साक्षात् परमेश्वराय तत्रापि कृष्णाय अशेषैश्वर्यप्रकटनेन सर्वचित्ताकर्षकाय तुभ्यं नमः एवं बहिरैश्वर्यमुक्त्वाऽऽन्तरमप्याह—पुरुषायेति । लीलया तु सात्वतां पतये अन्यत्तैः । यद्वा, सर्वावतारेष्वप्येवमेव त्वं यद्यपि करोषि तथाप्यत्र सर्वतो महाविशेष इत्याह—नम इति । तुभ्यं कृष्णाय सर्वचित्ताकर्षकाय नमः कृष्णत्वमेव सूचयति, भगवते सर्वैश्वर्य्यपरिपूर्णाय कुतः पुरुषाय निजाशेषपुरुषार्थव्यञ्जकायेत्यर्थः । अत एव महात्मने अपरिच्छिन्नमाहात्म्यायेत्यर्थः । कृष्णत्वमेव स्पष्टयति वसुदेवसुतायेति अतः सात्वतां यादवानां सर्वेषां परिपालकाय ॥ १० ॥ अतस्त्वमेव सर्वमित्याह—स्वच्छन्देति स्वैर्भक्तैः कर्तृभिश्छन्देनेच्छया करणभूतया उप समीपे आत्ता आकृष्टा देहाः श्रीमत्स्यकूर्मादयोऽपि विग्रहा येन तस्मै तेषां देहादीनां स्वरूपज्ञानार्थं पुनराह, विशुद्धज्ञानमूर्त्तये विशुद्धा मायातीता स्वप्रकाशतया ज्ञानरूपाश्च मूर्त्तयो देहा यस्य तस्मा इति, अन्यत्तैः । तत्र सर्वस्मै जगद्रूपाय सर्वस्य बीजाय कारणाय महापुरुषरूपाय सर्वभूतात्मने तदन्तर्यामिणे इति । यद्वा, स्वच्छन्दं यथा स्यात् तथा उपाता अन्तर्यामित्वेन स्वीकृता देहाः समष्टिव्यष्टिरूपा येन स्वयं तु विशुद्धज्ञानमूर्त्तय इति पूर्ववत् ॥ ११ ॥ किञ्च, महापराधिन्यपि परमानुग्रहोऽयं सर्वतो महाविशेष इत्याह—मयेति सार्द्धेन । मया स्वयमेव इदं साक्षादिदानीमेवेत्यर्थः । गोष्ठस्य नाशायेति । परमाऽकृत्यमुक्तं यतः मानिना अत एव तीव्रमन्युना भगवन्, हे सर्वज्ञ ! तन्मम दुष्टतावृत्तं त्वया ज्ञायत एव किं मया धृष्टेन विस्तार्य्यमिति भावः । यद्वा, हे भगवन्निति सर्वैश्वर्य्यपरिपूर्णे त्वयि साक्षाद्वर्त्तमानेऽपि त्वद्गोष्ठनाशायेत्यपराधाधिक्यं सूचितम् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधोक्षज ! हे इन्द्रियज्ञानागोचरेति परमादृश्यतोक्ता, तथापि इह पृथ्वीतले तवावतारः प्राकट्यं श्रीवैकुण्ठलोकादवतरणं वा, भवाय मंगलाय, देव हे पूज्य इति स्वस्य सेवकतां साधयति, युष्मदिति बहुत्वेन तदीयानपि सर्वान् श्रीनन्दादीन् संगृह्णाति, अन्यत्तैर्व्याख्यातम्, यद्वा, निजप्रभावविद्वत्तामेवाभिव्यञ्जयन् स्वस्य मूढचेतस्त्वमेव दर्शयन् सविक्रोशमाह—तवेति; अस्माकं प्रार्थनयास्माकमेव हितार्थं त्वमवतीर्णोऽसीत्यस्माभिर्ज्ञायत एव, तथाप्येतादृशोऽपराधः कृतः, अहो बत मूढचेतस्त्वम्,

अतः क्षन्तुमर्हस्येवेति भावः। यद्वा, आगः क्षमा पुनरसम्मत्यभावश्च त्वत्स्वभावात् सुघटैवेत्याह—तवेति। हे अधोक्षजेति शकटाक्षाधःशयनादिसूचनेन परमभक्तवात्सल्यादि स्मारितम्; चमुपतीनां दुष्टानामप्यभवाय मोक्षाय, अत आगः क्षमा युक्तैवेति भावः। दीव्यति द्योतत इति देवो यो भवः समृद्धिः प्रेमभक्तिसम्पल्लक्षणा तस्मै, अतोऽसन्मतेरपुनर्भवोऽपि त्वत्तो युक्त एवेति भावः॥१०॥ भगवते साक्षात्परमेश्वराय, तत्रापि कृष्णायाशेषैश्वर्य्यप्रकटनेन सर्वचित्ताकर्षकाय तुभ्यं नमः। एवं बहिरैश्वर्य्यमुक्त्वान्तरमप्याह—पुरुषायेति। तथापि सात्वतां पतये कृपयावतीर्य्य यादवश्रेष्ठतां प्राप्तायेत्यर्थः, अन्यत्तैर्व्यञ्जितम्। यद्वा, सर्वावतारेष्वप्येवमेव त्वं यद्यपि करोषि, तथाप्यत्र सर्वतो महाविशेष इत्याह—नम इति द्वाभ्याम्। तुभ्यं कृष्णाय सर्वचित्ताकर्षकाय सर्वतोऽसाधारणाय नमः, कृष्णत्वमेव दर्शयति—भगवते सर्वैश्वर्य्यपरिपूर्णाय; कुतः? पुरुषाय निजाशेषपौरुषाभिव्यञ्जकायेत्यर्थः। अत एव महात्मने अपरिच्छिन्नमाहात्म्यायेत्यर्थः। यतो वसुदेवनन्दनाय, अतो यादवानां सर्वेषां परिपालकाय, सर्वेषां भूतानां जीवानामात्मने कार्य्यकारणभेदन्यायेन तत्तत्स्वरूपाय व्यापकाय वा, अन्यत्तैर्व्याख्यातम्, यद्वा, यादवपतित्वादेव भक्तेच्छापरिपूरणायाविष्कृतपरममनोहरमूर्त्तये, यद्वा, सात्वतां सर्वेषां भक्तानां पतये पत्ये, अतो भक्तेच्छाप्रकटितविविधमूर्त्तये, अत एव विशुद्धं भक्तिरहितं ज्ञानं येषां तेषु केवलात्मबोधपरेषु मूर्त्तिः काठिन्यं यस्य तस्मै, 'मूर्त्तिः काठिन्यकाययोः' इत्यभिधानात्, तत्र सर्वस्मा इति कार्य्यकारणयोरभेदविवक्षया, यद्यपि सर्वस्मै, तथापि केवलात्मबोधपरेषु कठिनायेत्यर्थः। अतोऽद्भुतस्वभावत्वादसाधारणमाहात्म्यत्वाच्च नमः, यद्वा, विशुद्धं भगवदेकविषयकं ज्ञानं येषां तेषु मूर्त्तिः श्रीविग्रहप्राकट्यं यस्य, किमर्थम् सर्वेषां साध्यसाधनानां बीजाय भक्तियोगाय प्रेम्णे वेत्यर्थः, सर्व्वस्मै अखण्डाय परिपूर्णायेत्यर्थः, सर्वभूतानामात्मने प्रियाय व्यापकायेति वा, तेष्वपि तद्विस्तारणायेत्यर्थः॥ ११॥ किञ्च, महापराधिन्यपि परमानुग्रहः सर्वतो महाविशेष एवायमित्याह—मयेति सार्द्धेन। मया स्वयमेवेदं साक्षादिदानीमेवेत्यर्थः; गोष्ठस्य नाशायेति परमाकृत्यत्यमुक्तम्, यतो मानिना, अत एव तीव्रमन्युना, भगवान् हे सर्वज्ञ! तन्मम दुष्टतावृत्तं त्वया ज्ञायत एव किं मया धृष्टेन विस्तार्य्यमिति भावः, यद्वा, हे भगवन्निति सर्वैश्वर्य्यपरिपूर्णे त्वयि साक्षाद्वर्त्तमानेऽपि त्वद्गोष्ठनाशायेत्यपराधाधिक्यं सूचितम्॥ १२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं प्रार्थनां कृत्वा भगवतो भूभारावतरणाय कृतावतारस्य लोकहितार्थैकप्रवृत्तत्वमेवोपपादयति—तवेति। हे अधोक्षज! भुवः उरुभारस्य जन्म येभ्यस्तेषां भुवो भराणां भूभृतां चमूपतीनामभवाय संसाराभावाय दण्डद्वारा मुक्तिप्रदानायेति भावः। हे देव! युष्मच्चरणानुवर्त्तिनां भवाय विभवाय उत्तरोत्तरमनुवृत्त्यभिवृद्धये चेह लोके तवावतारः॥ ९॥ क्षन्तुमर्हसीत्युक्त तत्र "अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी" इत्युक्तरीत्याऽञ्जलिबन्धननमस्कृतिपूर्वकतच्छरणागतिमन्तरेण नान्योऽस्ति क्षमाहेतुरित्यभिप्रयन् शरण्यगुणानाविष्कुर्वन्नञ्जलिबन्धेन नमस्कुर्वन् स्वापराधमावेदयन् कार्पण्यं च प्रकाशयन् शरणं व्रजति–नम इति चतुर्भिः। भगवत इत्यादिभिः शरण्यगुणाविष्कारः पूर्णषाड्गुण्यमूर्त्तये महात्मने शरणागतशब्दभाजमवलोक्यापराधविस्मरणेन केवलमनुजिघृक्षैकप्रवणचित्ताय वासुदेवाय वसुदेवपुत्रायानेन सौलभ्यं सौशील्यं चाभिप्रेतं कृष्णायेत्यनेन केवल क्षेमकरत्वं सात्वतां भक्तानां पतये इत्यनेन कृतागसामपि भक्तानां मादृशां पुनः शिक्षया पालकायेति पुरुषाय महात्मने इति पदद्वयेन "महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्त्तकः" इत्युक्तसत्त्वप्रवर्त्तकत्वम्॥ १०॥ स्वच्छन्देन स्वेच्छयैव न तु कर्मणापात्तः परिगृहीतो देहो यस्य तस्मा इत्यनेन कर्मोपात्तदेहानां ब्रह्मादीनां प्रपित्सुतुल्यत्वं भगवत एवाश्रितकार्यावहक्षमत्वं च विशुद्धं नित्यं सङ्कोचविकासादिविकाररहितं ज्ञानं मूर्तिराकारः प्रकार इति यावत् सा यस्य तस्मै अनेन "ब्रह्मविदाप्नोति परम्" इति प्रक्रम्य "सत्यं ज्ञानमनन्तं ब्रह्म" इत्युक्तज्ञानशब्दार्थप्रत्यभिज्ञानात्परत्वमुक्त भवति तदेव प्रपञ्चयति–सर्वस्मै सर्वपदार्थानन्यस्मै अनन्यत्वं च मृदनन्यो घट इतिवत् स्वरूपाभेदनिबन्धनमपितु कारणात्वान्तरात्मत्वनिबन्धनमित्यभिप्रायेणोक्तं सर्वबीजाय सर्वकारणाय सर्वभूतानामात्मन इति॥११॥ स्वापराधमावेदयति–मयेति। यज्ञे विहते सति तन्निमित्तस्तीव्रो मन्युर्यस्य तेन देहात्माभिमानिना मया हे भगवन्! पूर्णषाड्गुण्येन त्वयाऽनुगृहीतस्य गोष्ठस्य नाशायासारवायुभिरिदमकृत्यं चेष्टितं कृतम्॥ १२॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सतां भवाय पुण्यलक्षणभद्राय देवदत्तवज्जननं भजतो हरेरवतारः कथं भवाय स्यादितीदं "आवेशो वसुदेवादौ देहादानं हरेः स्मृतम्" इत्यादिपाद्मवचनेन परिहर्त्तव्यम्॥ ९–१०॥ न केवलं ग्रन्थान्तरसिद्धमिदम् अत्रापीत्याशयेनाह—स्वच्छन्देनेति। स्वच्छन्देन स्वेच्छया सर्वस्मै सर्वव्यापिने सर्वबीजाय सर्वस्य मूलकारणाय॥ ११॥ आसारसहितवायुभिः॥ १२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

त्वां वीक्ष्य काले भयमित्यगत्यैवानुगतेश्च स्वेषां भक्तानां छन्देनाभिलाषेण उपात्तः तत्समीपे गृहीत आनीतः प्रकटीकृतो देहो येन तस्मै॥ ११–१७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

न केवलं चरणावेव पस्पर्श, तुष्टाव चेत्याह—स्वच्छन्दोपात्तेत्यादि । स्वेषां भक्तानां छन्देनेच्छयोपात्तो देहो मनुष्यलोको यन । दिह उपचये, दिह्यते उपचीयते ज्ञानेनेति मनुष्यलोकस्य ज्ञानाधिक्यात् । यद्वा, स्वच्छन्दं यथा स्यात्तथा उपात्त देहे येन, दैप् शोधने, दा शुद्धिः, ईहा लीला । यद्वा, स्वच्छन्दैर्मुक्तैरपि सेवार्थमुपात्तो गृहीत उपास्यत्वेनादृतो देहो यस्मै । यद्वा, स्वैः स्वरूपैश्छन्दोभिः श्रुतिभिरपि अपात्तोऽप्राप्तो देहः श्रीविग्रहो यस्य, (भा० १०।१४।३४) "अद्यापि यत्पदरजः श्रुतिमृग्यमेव" इत्यर्थः । अथवा, स्वच्छन्दं प्रारब्धानधीनं यथा स्यात्तथा, उपात्तः स्वीकृतो देहो मत्स्यादिदेहो येन, स्वयं तु विशुद्ध ज्ञानमूर्त्तियस्य स तथा तस्मै परस्मै, परस्मै, भक्तानां सर्वबीजाय सर्वेषां नारायणादीनामपि बीजाय । अतः सर्वभूतात्मने सर्वेषां भूः सत्ता, तया उत, आत्मा श्रीविग्रहो यस्य तस्मै । उक्तञ्च–(भा० १०।१४।५७) "सर्वेषामेव भावानां भावार्थो भवति स्थितः । तस्यापि भगवान् कृष्णः" इति ॥ १२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

स्वच्छन्दोपात्तदेहायेत्यादि । स्वेषां भक्तानां छन्देनेच्छया उपात्तो देहो मनुष्यलोको येन, दिह उपचये देह ऐश्वर्यं वा । यद्वा, स्वच्छन्दैरात्मारामैरप्युपात्तः सेवार्थं गृहीतो देहः श्रीविग्रहो यस्य, । स्वच्छन्दैर्मुक्तै रपि सेवार्थमुपात्तो देहो यदर्थम् । यद्वा, स्वस्वरूपैश्छन्दोभिः श्रुतिभिरप्युपात्तोऽनुलब्धो देहः श्रीविग्रहो यस्य,—(भा. १०।१४।३४) "अद्यापि यत्पदरजः श्रुतिमृग्यमेव" इत्यादि–वचनात्, यद्वा, स्वच्छन्दं प्रारब्धानधीनं यथा भवति, तथा उपात्तो मत्स्यादिदेहो येन । अतो विशुद्धज्ञान–मूर्तये विशुद्धं केवलं ज्ञानं येषां तेषु मूर्त्तिः काठिन्यं यस्य, केवल–ज्ञानिषु प्रसादसुमुखत्वादि–व्यतिरिक्तये । यद्वा, विशेषेण भक्तियोगतः शुद्धं ज्ञानं येषु तेषु मूर्तिः श्रीविग्रहो यस्य । सर्वस्मै भक्तानां सर्वस्व रूपाय सर्वबीजाय सर्वेषां नारायणादीनामपि बीजाय कारणाय सर्वकारणकारणत्वात् । अतः सर्वभूतात्मने सर्वेषां भूः सत्ता तया उत आत्मा श्रीविग्रहो यस्य,—(भा० १०।१४।५७) "सर्वेषामेव वस्तूनां भावार्थो भवति स्थितः । तस्यापि भगवान् कृष्णः" इत्याद्युक्तेः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहो मे मूढचेतस्त्वं यदस्माकं प्रार्थनयाऽस्माकमेव हितार्थमवतीर्णोसीति पश्यन्नप्यन्धोऽहमभवं सम्प्रति लब्धदण्डः प्राप्त चक्षुरेवं तत्त्वं ते जानामीत्याह–तवेति । स्वयमेव भराणां भाररूपाणां पुनश्च उरुभारजन्मनां बहूनां भाराणां जन्म येभ्यस्तेषां चमूपतीनाम् अभवाय नाशाय युष्मच्चरणसेविनां तु भवाय मङ्गलाय अहन्तु उभयेषां मध्ये न कोऽपीति मम नाभवो नापि भव इति मय्युदासीन एव त्वं वर्त्तसे इति धिङ् मामिति भावः ॥ ९ ॥ तस्मात् युष्मच्चरणानुवर्त्तित्वं ममाप्यस्त्विति प्रणमन्नाशास्ते-नमस्तुभ्यमिति द्वाभ्याम् । "परावरेशो महदंशयुक्तः" इत्युद्धवोक्तेः । सर्वांशसाहित्येनैवावतीर्णस्य तस्य प्रथममंशान् प्रणमति भगवते महावैकुण्ठनाथाय पुरुषाय महत्स्रष्ट्रे महात्मने समष्टयन्तर्यामिणे अंशान् प्रणम्य साक्षात्तमंशिनं प्रणमति—वासुदेवायेति, पितृनामोल्लेखेन कृष्णायेति तन्नामोल्लेखेन सात्वतां पतय इति पार्षदनामोल्लेखेन ॥ १० ॥ अनेकविधप्रेमविषयत्वात् स्वैर्भक्तैश्छन्देन प्रतिस्वेच्छया दास्येन सख्येन वात्सल्येन रमणेन च सुखप्रदानार्थम् उपात्तो गृहीतो देहो यस्येति तस्मै देहस्याप्राकृतत्वात् विशुद्धं मायातीतं ज्ञानमेव मूर्त्तिर्यस्य तस्मै मायादिशक्तिमत्त्वात् सर्वस्मै अत एव सर्वस्य बीजाय कारणाय अत एव सर्वभूतात्मने ॥ ११ ॥ भोः शक्र ! त्वं मद्भक्त इत्यनया स्तुत्यैव ज्ञायसे किन्तु विनैव त्वदाज्ञां दुष्टा मेघाः तद्व्रजमधिकं यत्कदर्थयन्तिस्म तदिमे त्वया दण्नीया इति पवित्रभर्त्सनमाशङ्क्य हन्त हन्तास्मिन् अन्तर्यामिणि कपटं न घटत इति विमृश्य स्वचेष्टितं यथार्थमेवाह—मयेति । मन्वेतन्मद्भक्ते त्वयि कथं सम्भवेत्तत्राह—विहते यज्ञे इति । ननु, त्वत्प्रभुणा मयैव विहतेऽपि दासस्य तवैतावदकृत्यं न प्रत्येमि तत्राह—मानिना ऐश्वर्यगर्वस्य किमशक्यमिति भावः । ननु, दैवादुत्थिता अपि गर्वादयो भावा मद्भक्तैर्विवेकेनैव तिरोधाप्यन्ते इति तत्राह—तीव्रमन्युना तीव्रः क्रोधो हि विवेकमपि बलाद्ग्रसतीति भावः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निग्रहविषयाः असुराः अहं तु अनुग्रहविषयेषु तव चरणानुवर्तिषु सुरेषु त्वया स्थापितोऽतोऽनुग्रहं कुर्वित्याशयेनाह तवेति । स्वयम्भुवो भराणां भारभूतानां पुनश्चोरुभाराणां जन्मयेभ्यस्तेषां राजन्यव्याजेन वर्त्तमानानामसुराणामभवायाऽसमृद्ध्यै ॥ ९ ॥ अथ नमस्कुर्वन् स्वपराधं वदन् भगवन्तं शरणं व्रजति, नम इति चतुर्भिः । भगवते स्वाभाविकषड्गुणयुक्ताय पुरुषाय सर्वान्तर्यामिणे महात्मने भूम्ने वासुदेवाय सर्वनिवासाय सात्वतां भागवतानां पतये कृष्णाय नमः ॥ १० ॥ स्वच्छन्देन स्वेच्छयैवोपात्तदेहाय परिग्रहीतदेहाय विशुद्धज्ञानवत् जन्ममरणादिसर्वदोषवर्जितस्वरूपवत् मूर्त्तिरप्राकृतदेहो यस्य तस्मै "यदात्मको भगवांस्तदात्मिका व्यक्तिः" इति श्रुतेः—

"यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः । स सर्वस्माद्बहिः कार्यः श्रौतस्मार्त्तविधानतः ॥
मुखं तस्यावलोक्यापि सचैलं स्नानमाचरेत्" ।

इति स्मृतेश्च "अस्यापि देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य नतु भूतमयस्य कोऽपि" इति ब्रह्मवचनाच्च चेतनाचेतनशक्तीनां महदादितृणान्तस्य विश्वस्य स्वशक्तिमयस्य च पुरुषात्केशलोमादीनामिव पृथिव्याः औषधीनामिव पृथक् स्थितिप्रवृत्त्याद्यभावात् अन्यस्याकृष्णात्मकस्य तत्सजातीयस्याऽभावात्सर्वस्मै कृष्णाय नमः "सर्वं खल्विदं ब्रह्म" इति श्रुतेः "तदनन्यत्वयारम्भणशब्दादिभ्यः" (२।१।१५) इति न्यायाच्च नित्यस्वरूपयोरणुविभुपरिमाणयोः चेतनाचेतनपदार्थानां च स्वरूपैक्यसम्भवाद्भेदाऽभेदः सम्बन्धोऽत्र विदुषामभिमतः तथाऽऽह भगवान् सूत्रकारः "उभयव्यपदेशात्त्वहिकुण्डलवत्" (३।२।२६) इति एतदेवोपपादयितुमाह, सर्वबीजायेति । सर्वभूतात्मने इति च क्लेशलोमादीनां कार्याणां पुरुषः कारणं तस्मात्स्वरूपतो हि क्लेशादयो भिन्नाः अप्यभिन्ना एव यथा पृथिव्याः ओषधयः यथा च अहेः कुण्डलानि तत्तुल्यायेत्यर्थः ॥ ११ ॥ आसारवायुः गोष्ठस्य नाशाय मानिना लोकेशमानिना तीव्रः स्वात्मपरमात्मविवेकाखको मन्युर्यस्य तेन मयेदं चेष्टितं कृतमित्यर्थः ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे अधोक्षज इह तवायमवतारो भुवो भूमेर्गुरुभारजन्मनां बहुभाररूपं जन्म येषां ते तेषां चमूपतीनां सेनानायकानामभवायासत्तायै नाशायेति यावत् तथा भुवोऽभराणामभाररूपाणामतो न भराणामुरुभारजन्मनामित्यनयोरार्थिकी पुनरुक्तता । युष्मच्चरणानुवर्तिना सतां चमूपतीनामित्यत्राप्यन्वेति । तदादीनां भवाय क्षेमायेति यावत् भवति ॥ ९ ॥ वासुदेवाय गतम् । शाश्वत भक्तानामधुना यादवानां वा पतये गतम् ॥ १० ॥ वासुदेवाय स्वच्छन्दोपात्तदेहायेति वसुदेवरेतोविकृतदेहवत्त्वं तथा स्वेच्छोपात्रदेहवत्वं चेति विरुद्धं कथमुच्यत इत्यतः प्रमाणेनाविरोधमभिधत्ते ॥ आवेश इति । वसुदेवादौ हरेरावेशः प्रवेशमात्रं देहादानं जन्मेत्युच्यते तदन्येषां देहादानं नाम जन्म नूतनकर्माधीनतनुप्राप्तिरिति कवयो ज्ञानिनो विदुः । अनेन बहुमाहात्म्यसम्मतोऽयमर्थ इति न सन्देहः कार्य इति बहुवचनकविशब्दाभ्यां सूचयति । ननु वसुदेवादजायत राज्ञे दशरथादित्यादिवचसां का च गतिरित्यत आह ॥ तथाऽपीति । असुरमोहाय तान्वञ्चयितुं ग्रन्थेषु बहुधेयते । तदर्थस्तु नायं गर्भेऽवसद्देव्या नायं दशरथाज्जातो न चापि जमदग्नितः । यथा नृसिंहाकृतिराविरासीत् । प्रादुर्भावो हरेर्जनिरित्यादिना ज्ञातव्यः ॥ ततश्चायं मूलार्थः ॥ स्वच्छन्दोपात्तदेहाय । स्वच्छन्देनात्तदेहायेति पाठावेकार्थाविति स्वच्छन्दतः पठनीयौ । स्वच्छन्देनैवोपात्तो देहो यस्य स आत्तो देहो येन कथमित्यतः स्वच्छन्देन स्वेच्छयेति । एतत्सम्भावकमाह ॥ ज्ञानमूर्त्तय इति । सर्वस्मै सर्वं समाप्नोषि ततोऽसि सर्व इत्युक्तेर्व्याप्तस्तस्मै सर्वबीजाय सर्वकारणाय । व्यञ्जनाद्बीजमित्युक्त इत्युक्तेः । सर्वव्यञ्जकाय वा सर्वभूतात्मने सर्वभूतस्वामिने ॥ ११ ॥ आसारैः सहिताश्च ते वायवश्च तैर्यज्ञे विहते सति तीव्रमन्युना मानिना गोष्ठनाशायेदं कर्म चेष्टितं कृतम् ॥ १२ ॥

श्रीसुबोधिनी

किञ्चैतदर्थमेव तवावतारो दुष्टा निराकर्तव्या अशक्यानिराकरणदोषाः स्वरूपतोन्ये तु दोषसम्बन्धादतो वयं निवार्यदोषा इत्यस्मद्दोषा एव निराकार्या न तु वयमित्यभिप्रायेणाह **तवावतारोयमिति**, विशेषेण**ायमवतारो भुवो भाररूपाणां चमूपतीनामभवाय युष्मच्चरणानुवर्तिनां भवाय**, अन्ये त्ववतारा एकमेव कार्यं साधयन्ति भारनिराकरणं वा सद्रक्षां वा, कालभेदेन यद्येक एवोभयात्मकः स्यात् तदा द्वयमपि कर्तव्यं, इदानीमहं प्रपन्न इत्युद्धवोपि कर्तव्यो निग्रहस्तु कृत एवान्यथोभयार्थमवतारो न **भवेत्**, उभयार्थत्वे हेतुरधोक्षजेति, **अधोक्षजं** ज्ञानं यस्मादेतादृशो यः प्रकटो जातः स उभयसम्पादनार्थमेव हेतुरधोक्षजेति **अधोक्षजं** ज्ञानं यस्मादेतादृशो यः प्रकटो जातः स उभयसम्पादनार्थमेव, एकैकं तु पूर्वमपि क्रियत इति, **तत्रापीह गोकुले भुव उरुभारार्थमेव जन्म येषां** जन्मकारणेषु भुवो दुःखार्थं जन्म स्वस्य तु नाशार्थं स्वयमेव भारभूता अधिकं च भारं जनयन्ति नौकारूढेष्वेतद्द्वयं पृथक् प्रसिद्धं, **उरुभारस्य वा जन्म येषु**, एतेन दोषत्रयमुपपादितं, **भाररूपा** उच्छृङ्खला भारजनका इति तादृशा अपि सेनापतयः, जननमात्रेणैव तन्नाश इत्य**भवाये**त्युक्त यथान्धकारस्य सूर्योदये, देवेतिसम्बोधनमतः परं पूजार्थं, **युष्मच्चरणमेवानुवर्तितुं** शीलं येषां तेषामुद्भ**वाय** मुक्तये वा संसाराभावाय वा संसाराय वा भवानेव तथा भवतीति ॥ ९ ॥ एवं प्रार्थनामुक्त्वा क्षमापनार्थमेव नमस्यति **नम** इति, भगवदीयत्वाय वा, भक्तिमार्गं प्रकटीकुर्वन् सामान्यतो दशविधलीलायुक्तमाह **नमो भगवत** इति, आवेशादिपक्षव्यावृत्त्यर्थं **तुभ्यमिति**, योयं दृश्यते स एव **भगवानिति**, अनेनैव षड्विधा लीला निरूपिता स्थानादिनिरोधान्ता, **पुरुषाय महात्मन** इति कार्यकारणरूपाय, **पुरुषः प्रथमतो महान्** महत्तत्वं, अन्तर्बहिर्वा साधकाय, **वासुदेवायेति** मोक्षदाता, **कृष्णायेति** फलं सदानन्दरूपत्वादाश्रयश्च, किञ्च न केवलं दशविधामेव लीलां करोत्यवतीर्णस्त्वधिकमपि करोतीत्याह **सात्वतां पतये नम** इति, यादवानामयं स्वामी, दशविधलीलावद्भक्तिरेकैव स्वतन्त्रेति पृथङ् नमस्कारः ॥ १० ॥ एवं परमार्थतो नमस्कारं कृत्वा मोहकलीलासहितमपि भगवन्तं लौकिकरसार्थं **नमस्यति स्वच्छन्देति**, स्वा भक्तास्तेषां **छन्द** इच्छा तदर्थं तेषामिच्छापूर्त्यर्थ**मुपात्तो देहो** येन, ते हि यथा भावयन्ति तथा रूपं करोति नटवदेव, रूपं तु विशेषेण शुद्धं चिद्रूपमेव तदाह **विशुद्धज्ञानमूर्तय** इति, ननु विशुद्धस्याभिलषितरूपत्वं कथं ? तत्राह **सर्वस्मा** इति, सर्वरूप एव जातस्तत्राभिलषितरूपभवने कः प्रयास इत्यर्थः, **किञ्च सर्वबीजाय** सर्वेषां कारणभूताय, अतोनन्तप्रकारेण भवति, अनेन सद्रूपतानन्दरूपताप्युक्ता, सत् सर्वमानन्दो **बीजमिति, सर्वभूतानामात्मने** चिद्रूपाय **नमः**, अतः ।

सच्चिदानन्दरूपाय भक्तेच्छापूरकाय हि । शुद्धज्ञानस्वरूपाय फलसाधनरूपिणे ॥ १ ॥

नम इत्युक्तं भवति ॥ ११ ॥ स्वापराधं **प्रकटीकरोति मयेदमिति,** को वेद भगवान् न विचारयतीत्यन्यथा कालान्तरे विशेषपर्यालोचनायामपराधं भावयेदतः कथयति, इदं वृष्ट्यादिरूपं **गोष्ठनाशायासारवायुभिर्मया चेष्टितं यज्ञे विहित** इति निमित्तं वस्तुतस्त्वस्मिन्नेव यज्ञे मया भुक्तं न पूर्वं कदापि भगवता भुक्तमिति हस्तेन भुक्तमित्यतो **यज्ञे विहित** एव, तथाप्यभिमानादन्यथाङ्गीकृतं तदाह मानिनेति, ननु तृप्तिः कथं न प्रतिबन्धिका जाता ? तत्राह **तीव्रमन्युनेति,** शीघ्रमेव क्रोध उत्पन्नोतो जातापि तृप्तिर्विस्मृतेति, अन्यथा **गोष्ठनाशे** कश्चित् किं प्रवर्तेत ? गवामुपजीव्यत्वात् सुतरां ममोपजीव्याः, **भगवन्निति**सम्बोधनं स्वस्य दासत्वख्यापकं, इदानीं निर्दुष्टत्वख्यापकं वा ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

स्वच्छन्दोपात्तदेहायेत्यत्र, नटवदेव रूपमित्यादिग्रन्थः पूर्वोक्तरूपेन्द्रस्तुत्यभिप्रायेणेति ज्ञेयम् ॥ ११ ॥

इति चतुर्विंशोऽध्यायः ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

तवावतारोयमित्यत्र कालभेदेनेति एक एव पुरुषः पूर्वं दुष्टः पश्चाच्च चरणानुवर्ती चेत् स्यादित्यर्थः ॥ ९ ॥ **नमो भगवत** इत्यत्र **अनेनैवेति** भगवत्पदेनेत्यर्थः, 'पुरुषाय' 'महात्मने' इतिपदद्वयेन सर्गविसर्गयुक्तत्वं, इदं पूर्वं नागपत्नीस्तुतौ विवृतमिति नात्र विव्रियत इतिभावः, द्वितीयं व्युत्पादयन्ति **महानिति;** महत्तत्त्वरूपत्वेन चतुर्मुखत्वाद् विसर्गतेति भावः ॥ १० ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

नमो भगवते तुभ्यमित्यस्याभासे **भगवदीयत्वाय वेति क्षमापनार्थं नमस्यतीति** पूर्वमुक्तं, **पक्षान्तरेण नमनप्रयोजनमाहुः भगवदीयत्वाय वेति,** भगवदीयत्वसिद्धये **नमस्यतीत्यर्थः,** नम्रत्वेनैव भगवदीयत्वसिद्धिः, दैन्यबोधकत्वान् नमनस्य, **अनेनैव षड्विधा लीला निरूपितेति** अनेन भगवत इतिचतुर्थ्यन्तेन, **षड्विधा लीला** निरूपिता भगवत्पदेनैश्वर्यादिषड्गुणाभिधानादित्यर्थः, कास्ताः षड्विधा इत्याकाङ्क्षायामाहुः **स्थानादिनिरोधान्ता** इति, **कार्यकारणरूपायेति** "पुरुष"शब्देन कार्यं पुरुषशरीरमुच्यते **तच्च महत्तत्त्वादीनां कार्यं अतो महत्तत्त्वादिकार्यरूपाय** विराड्विग्रहायेत्यर्थो **भवति,** अनेन सर्गलीला उक्ता, अशरीरस्य **विष्णोः पुरुषशरीरस्वीकारः सर्ग** इति टिप्पण्यां लक्षणस्योक्तत्वात्, "महात्मने"इत्यनेन **कारणरूपमहत्तत्त्वादि गृह्यते तद्रूपायेत्यर्थः,** अनेन विसर्गलीलोक्ता महत्तत्त्वस्य चतुर्मुखरूपत्वात् चतुर्मुखस्य विसर्गरूपत्वात् पुरुषाद् ब्रह्मादीनामुत्पत्तिः विसर्ग इतिलक्षणाङ्गीकारात्, **पुरुषाय महात्मने** इतिपदद्वयस्यार्थान्तरमाहुः **अन्तर्बहिर्वा सर्वसाधकायेति,** पुरि शेते इति पुरुष इति व्युत्पत्त्या पुरुषस्यान्तरत्वादन्तःसर्वसाधकत्वं, 'महात्मने' इत्यनेन बहिःसर्वसाधकत्वं, महांश्चासौ आत्मेत्यर्थाद् व्यापकत्वेन बहिरपि सत्त्वात्, एवं पदद्वयेन सर्गविसर्गलीले उक्ते, 'भगव'त्पदेन षडित्येवमष्टलीला उक्ताः, 'वासुदेवाये'त्यनेन मुक्तिलीलोच्यत इत्याहुः **वासुदेवायेति मोक्षदातेति,** 'कृष्णाये'त्यनेन आश्रयलीलोक्तेत्याहुः **सदानन्दरूपत्वादाश्रयश्चेति, भक्तिरेकैव स्वतन्त्रेति पृथङ् नमस्कार** इति "**नमो भगवते**" इतिपूर्वमुक्तेन "नमः"शब्देन निर्वाहेपि पुनः **सात्वतां पतये नम** इति यदुक्तं तेन भक्तेः दशविधलीलावत् उद्धारकरणे स्वातन्त्र्यं बोधितं, यद्यपि भगवत्पदेन निरोधान्ताः षड् लीला उक्तास्तन्मध्ये ईशानुकथाशब्दवाच्यभक्तिरप्यागता तथापि सर्वलीलातुल्यत्वपरिहारपूर्वकं स्वातन्त्र्यसूचनाय पुनर्भक्तिर्वर्णिता; प्रथमस्कन्धे तृतीयाध्याये सर्वेष्ववतारेषु कृष्णावमतारमप्युक्त्वा अंशित्वेन पूर्णत्वसूचनार्थं "कृष्णस्तु भगवान् स्वय"मिति पृथङ्निर्देशः कृतस्तद्वदत्रापीत्यर्थः ॥ १० ॥ **स्वच्छन्दोपात्तदेहायेत्यत्र ते हि यथा भावयन्ति तथारूपं करोति नटवदेवे**त्यादिग्रन्थस्यार्थष्टिप्पण्यां स्फुटमुक्तः, **अनेन सद्रूपता आनन्दरूपताप्युक्ते**ति 'सर्वस्मै' इत्यनेन **सद्रूपतोक्ता,** सद्रूपेणांशेन सर्वरूपत्वात्, 'सर्वबीजाये'त्यनेना**नन्दरूपतोक्ता** आनन्दस्य सर्वबीजत्वात्, "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त" इतिश्रुतेः, 'सर्वभूतात्मने' इत्यनेन **चिद्रूपतोक्ता,** तदेतत् सङ्गृह्णन्ति कारिकया **सच्चिदानन्दरूपायेत्यारभ्य फलसाधनरूपिण** इत्यन्तया ॥ ११ ॥ **मयेदं भगवन्नित्यत्र न पूर्वं कदापि भवता भुक्तमिति** हस्तेन **भुक्तमितीति** श्रीनन्देन युक्त्यैवेन्द्रयागस्य कृतत्वाद् वेदविहितत्वाभावाद् व्रजराजकृतेन्द्रयागे भगवता न भुक्तं, अतो हस्तरूपेणेन्द्रेणापि न भुक्तं, अस्मिन्नेव अन्नकूटोत्सवे भगवतोक्तत्वेन वेदविहितत्वाद् भगवता भुक्तं भोजनं तु हस्तकार्यं, अतो हस्तरूपेण मया इन्द्रेण भुक्तं, तथा चास्मिन्नेव यागे मया भुक्तमित्युपपन्नं, **अतो यज्ञ अविहत एवेति** यद्यपि भगवतेन्द्रयागभङ्गः कृतस्तथापि तस्यावैदिकत्वात् यज्ञत्वाभावेन तद्विघाते यज्ञस्याविहतत्वमेवेत्यर्थः, तर्हि "चेष्टितं विहिते यज्ञे" इति कथमुक्तमिति चेत् तत्राहुः **अभिमानादन्यथाङ्गीकृतमिति** इन्द्रस्य युक्तिकल्पितेपि स्वयागे यागत्वा**भिमानात्** तादृशयागविघाते **अन्यथाङ्गीकृतं** यज्ञनाशनमङ्गीकृतमिति यज्ञविघातोक्तिरितिभावः ॥ १२ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

"स्वच्छन्दोपात्तदेहाये"'त्यत्र **सच्चिदानन्देति** का० २३६$\frac{३}{४}$। "सर्वस्मै" इतिपदेन सद्रूपता, "सर्वबीजाये"त्यानन्दरूपता, "सर्वभूतात्मन" इतिचिद्रूपता, **भक्तेच्छापूरकायेति** "स्वच्छन्दोपात्तदेहाये"त्यस्यार्थः, **शुद्धज्ञानस्वरूपायेति** मूलस्थद्वितीयपादार्थः **स्वष्ट एव फलसाधनरूपिणे** इति आनन्दः फलं, चित् साधनं, एतादृशाय नम इत्युक्तं भवति ॥ ११ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतदवतारप्रयोजनमाह—**तवेति**। अधः अक्षजं ज्ञानं यस्मात्तत्सम्बोधनं हे अधोक्षज ! एवंविधस्यापि **तवेह भूमावयमवतारः स्वयंभराणां** स्वप्राणमात्रपोषकाणाम्, अत एव **उरुभारजन्मनां** बहूनां भाराणां जन्म येभ्यस्तेषां **चमूपतीनां** राज्ञाम**भवाय** विनाशाय, **युष्मच्चरणसेविनां तु भवाय** यथोचितं धर्मादिपुरुषार्थलाभाय। तथा च पूर्वं मम दुर्मदत्वेन मानभङ्गस्य कृतत्वादिदानीं तु त्वच्छरणागते मय्यनुग्रह एव युक्त इत्याशयः। 'एवं विधानानाक्रीडा अपि तवावतारप्रयोजनम्' इति सूचयन् सम्बोधयति—**देवेति** ॥ ९ ॥ एवं क्षमां प्राथ्य तदर्थं नमस्करोति—**नम इति** द्वयेन। तुभ्यं **भगवते** ऐश्वर्यादिषड्गुणपूर्णाय, **पुरुषाय** सर्वान्तर्यामिणे, अन्तस्थत्वेऽपि **महात्मने** अपरिच्छिन्नाय, **वासुदेवाय** वसुदेवनन्दनाय, **कृष्णाय** सदानन्दरूपाय, **सात्वतां** यादवानां **पतये**। 'नम' इत्यस्य सर्वत्रान्वयः ॥ १० ॥ कर्माधीनत्वशङ्कां वारयन्नाह—**स्वच्छन्दोपात्तदेहाय** स्वेच्छया स्वीकृतदेहाय। तथा देहस्य प्राकृतत्वशङ्कां वारयन्नाह—**विशुद्धं ज्ञानमेव मूर्तिर्यस्य तस्मै**। **सर्वस्मै** विश्वरूपाय। तत्र हेतुमाह—**सर्वबीजायेति**, सर्वोपादानायेत्यर्थः ॥ **सर्वेषां भूतानामात्मने** साक्षिणे नमः ॥ ११ ॥ 'कृतागस' इति यदुक्तं तं स्वापराधं निवेदयति—**मयेति**। स्वस्यातितुच्छत्वं सूचयन् सम्बोधयति—**भगवन्निति**। **आसारवायुभिर्गोष्ठनाशाय मयेदं चेष्टितमकृत्यं कृतमि**त्यन्वयः। तत्करणे हेतुमाह—**तीव्रमन्युनेति**। क्रोधे हेतुमाह—**यज्ञे विहते सतीति**। 'मया परमेश्वरेण यज्ञे विहतेऽपि तव क्रोधः कथमुचितः ?' तत्राह—**मानिनेति**। त्रिलोकेशत्वाभिमानिनेत्यर्थः ॥ १२ ॥

अन्वितार्थप्रकाशिका

तवेति ॥ हे अधोक्षज ! हे देव ! एवंविधस्य तवेह भूमावयमवतारः स्वयंभराणां स्वप्राणमात्रपोषकाणां स्वयंभाररूपाणां वा। अत एव उरुभारजन्मनां बहूनां भाराणां जन्म येभ्मस्तेषां चनूपतीनां राज्ञामभवाय विनाशाय युष्मच्चरणसेविनां तु भवाय पुरुषार्थलाभाय अस्ति ॥ ९ ॥ **नम इति** ॥ स्पष्टम् ॥ १० ॥ **स्वच्छन्देति** ॥ स्वछन्देन स्वेच्छया गृहीतदेहायेत्यादि स्पष्टम् ॥ ११ ॥ **मयेति** ॥ हे भगवन् ! यज्ञे विहते सति मानिना तीव्रमन्युना च मया आसाारवायुभिः गोष्ठनाशायेदमकृत्यं चेष्टितं कृतम् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भुवो भराणां भूमेर्भारभूतानां स्वयं भराणामिति पाठे तु इह भूमौ स्वयमेव भारभूतानां पुनश्च ऊरुभाराय जन्म येषां तेषां सेनापतीनां अभवाय नाशाय हे देव भवाय सुखाय ममत्वद्भक्तत्वाद्रक्षणं कार्यमित्यर्थः ॥९॥ पुरुषाय अनादिसिद्धदिव्या प्राकृतपुरुषाकार विघ्नहराय महान् क्षराक्षरेभ्य उत्कृष्टः आत्मा स्वरूपं यस्य तस्मै अतः चेतनाचेतनेषु वासुर्व्यापकश्चासौ देवोद्योतकश्च तस्मै प्रत्यक्ष श्रीकृष्णाय नमः ॥ १० ॥ स्वच्छंदेन स्वेच्छया उपात्तो गृहीतो देहोऽवतारो येन तस्मै विशुद्धं मायादिदोषरहितं ज्ञानं मूर्त्तौ विग्रहे यस्य तस्मै सर्वस्मै यथादेहवाचकाः शब्दाः देहिषु पर्यवस्यंति तथा चेतनाचेतनवाचकाः शब्दाः सर्वात्मनिहारौ पर्यवस्यंतीति सर्वभूतात्मकत्वात् सर्वरूपाय सर्वेषां बीजाय कारणाय ॥ ११ ॥ मानिना मया इदं चेष्टितकृतं ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तरीत्या प्रार्थनां कृत्वा भूभारहरणाय कृतावतारस्य भगवतो लोकहितार्थैकप्रवृत्त्वमेवोपपादयति ॥ **तवेति** ॥ हे अधोक्षज, उरूणां बहूनां भाराणां जन्म प्रादुर्भावो येभ्यस्तेषां, भुवः पृथिव्याः, भराणां भारभूतानां, स्वयंभराणामिति पाठेऽपि स्वत एव भारभूतानामित्यर्थः। उभयथाप्यर्थत एकत्ववत्प्रतीयमानत्वाद्भुवो भराणां भूभृतामित्यर्थः साधुः। चमूपतीनां प्रचुरसेनाधिपतीनां अभवाय नाशाय, यद्वा। दण्डद्वारा मुक्तिप्रदानाय, हे देव, युष्मच्चरणानुवर्तिनां युष्मच्चरणसेविनां तु, भवाय विभवाय उत्तरोत्तरमनुवृत्तिवृद्धये च, इह लोके, तव अयं अवतारः ॥ ९ ॥ क्षन्तुमर्हसीति यत् प्रागुक्तं तत्र 'अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी' इत्युक्तरीत्याञ्जलिबन्धनमस्कृतिपूर्वकच्छरणागतिमन्तरेण नान्योऽस्ति क्षमापनहेतुरित्यभिप्रयन् शरण्यगुणानाविष्कुर्वन्नञ्जलिबन्धेन नमस्कुर्वन् स्वापराधमावेदयन् कार्पण्यं प्रकाशयन् शरणं व्रजति नम इति चतुर्भिः ॥ **नम इति** ॥ भगवते पूर्णषाड्गुण्यमूर्त्तये, पुरुषाय सर्वदा पुरुषकाराय, तुभ्यं नमः। महात्मने शरणागतशब्दभाजं जनमवलोक्यापराधविस्मरणेन केवलमनुजिघृक्षैकप्रवणचित्ताय, वासुदेवाय वसुदेवपुत्राय, अनेन सौलभ्यं सौशील्यं चाभिप्रेतम्। कृष्णाय, अनेन केवलं क्षेमंकरत्वमुक्तम्। सात्त्वतां भक्तानां पतये, तुभ्यं नमः। अनेन कृतागसमापि मादृशां भक्तानां पुनः शिक्षया पालकायेति सूचितम। यद्वा। पुरुषाय महात्मने

इति पदद्वयेन 'महान् प्रभुर्वै पुरुषः सत्त्वस्यैव प्रवर्त्तकः'' इत्युक्तसत्त्वप्रवर्त्तकत्वमुक्तम् ॥ १० ॥ स्वच्छन्देति ॥ स्वच्छन्देन स्वेच्छयैव न तु कर्मणोपात्तः परिगृहीतो देहो येन तस्मै, अनेन सर्वदा दिव्यदेहवत्त्वेऽपि मानुषभावोपेतदेहप्रदर्शकत्वमसुरप्रतारणार्थमेवेति सूचितम् । विशुद्धं नित्यं संकोचविकाशरहितं ज्ञानं मूर्त्तौ यस्य तस्मै, सर्वस्मै सर्वव्यापिने, सर्वबीजाय सर्वेषां मूलकारणाय, सर्वभूतानामात्मा तस्मै, तुभ्यं नमः ॥ ११ ॥ स्वापराधमावेदयति ॥ मयेति ॥ हे भगवन्, यज्ञे म यागे, विहिते त्वया खण्डिते सति, तीव्रस्तन्निमित्तं तीव्रतां प्राप्तो मन्युः क्रोधो यस्य तेन, मानिना देहात्माभिमानवता, मया गोष्ठस्य त्वयाऽनुगृहीतस्य व्रजस्य नाशस्तस्मै, गोष्ठनाशं कर्त्तुमित्यर्थः । आसारवायुभिः, इदं चेष्टितं कृतम् ॥ १२ ॥

श्रीहरिसूरिदिरचितं श्रीभक्तिरसायनम्

तवावतारोऽयमिति : १०.२७.९.

भूभारक्षपणार्थमेव विधिना सम्प्रार्थितस्त्वं त्वयाप्यंगीकृत्य समुक्तमच्युतविधे देवांस्त्वमाश्वासथ ।
सत्येवं यदिहाऽधुनोदितमहीभारं त्वनालोकयन् स्वभारापनयात्तधीरसि तदा किं वक्ष्यसि त्वं प्रभुः ॥ १५ ॥
जातं शासनमेतदेव परमित्यालोच्य दीनं पदे प्राप्तं नावसि चेत्तदस्तु भगवन्नेकं तु पृच्छामि ते ।
नूत्नं चेन्द्रशतं विधातुमिह तेऽशक्यं न सर्वेशितुः पादोऽत्राणकृदेष चेत्तदवने कः स्यात्पुरस्तद्वद ॥ १६ ॥
कृतमिदं भुवनं जनजीवनमपि सदा मदधीनमिति स्मयात् । किमनया कथया कथयामिते शरणमेकमिदं विशदं पदम् ॥ १७ ॥
यत्कृत्यं सुहृदा कृतं प्रियतरेणास्मिंस्तदागःशताकीर्णं पूर्णमपि प्रियस्य भवति क्रोधाय नो जात्वपि ।
सिद्धे सत्यवनावितीश भगवंस्त्वन्मुख्यभूतेन मे प्राक्प्रादायि धनं जयेन हविरित्येतत्कथं त्वद्रुषे ॥ १८ ॥
गोत्रोद्धारविधावनालसमना भूयोऽस्मि भूमाविति गोत्रोद्धारमहो विधाय भगवंस्त्वं दर्शयन्स्वाशयम् ।
यज्ज्यायस्यपि पूर्वजे रचयसि श्रीशापगोत्रा गिरस्तत्स्यादङ्कपदं न ते किमवनौ पश्य त्वमेवान्ततः ॥ १९ ॥
भूभृद्यज्ञतदुद्धृतिव्रजजनत्राणत्रिकर्म क्रमात् प्राप्तं सम्प्रति नाम वामनतनोस्त्रैविक्रमं बिभ्रतः ।
स्वाग्र्येन्द्रस्थितितोऽप्युपेन्द्र कलिताभिख्यस्य सौख्यावधेः प्राप्तं प्राग्वदिहाप्यनन्त मघवत्त्राणं तवावश्यकम् ॥ २० ॥
तवांगगन्धः सुमनोविमोहकृद्गिरः श्रुतिस्थाः सुमनोविमोहिकाः ।
अदृष्टमेतच्च निरीक्ष्य चेष्टितं न चित्रमासीन्मनसो विमुग्धता ॥ २१ ॥
यदाशयागस्थितिरास कामं तदाशयागःस्थितिरित्यगूढम् ।
यत्संशयागः प्रकृते तु नास्ति तत्संशयागोऽस्ति न ते मयीश ॥ २२ ॥
जित्वाऽनन्तदुरन्तदैत्यनिवहान् यस्य प्रसादात्सुरश्लाघ्यं राज्यमकण्टकाङ्कुरमहो स्वस्थो भुनज्म्यञ्जसा ।
तस्यापीश तव च्छलं विदधता दुष्कीर्तिरूपं मया यत्संप्रत्यनुभूयते फलमिदं नैवानुमन्येत कः ॥ २३ ॥
नालोच्यद्भुतरूपमेतदनघं नालोकि विक्रीडितं वृन्दारण्यभुवि व्रजस्थविलसद्भाग्योपलब्धं प्रभो ।
नैवाचिन्ति दुरन्तदैत्यहननं यत्त्वच्छलं कुर्वता जात्यंधादधमः सहस्रदृगपि प्रायस्तदात्मा कृतः ॥ २४ ॥
कोट्यंडौघतनूरुहेण भवता विश्वेश विश्वात्मना सप्ताहं स्वकरे गिरिं विदधता विश्वेऽपि विस्मापिताः ।
मच्चित्तेन हरेऽणुनापि विधृतः कोट्यद्रिसारस्वपागोत्रस्तत्र न विस्मयस्तव ततस्तद्विस्मयत्वं गतम् ॥ २५ ॥
प्राचीनादधिकोल्लसद्गुरुपदान्नित्यं सुधर्मोच्छ्रयाज्ज्ञाताशेषसुपर्वतत्त्वमनसो निष्पातकार्योद्गतात् ।
मत्तोऽनारतसर्वतोमुखदृशोऽस्वप्नादपीदृक्कथं प्रादुर्भूतमिति त्रपैव भगवन्भूयन्तरं कृन्तति ॥ २६ ॥

मयेदमिति : १०.२७.१२.

निगृह्य प्राग्यज्ञे बलिमपहृतं तस्य भुवनमिदानीं देयं स्यात्पुनरनुगृहीतोऽद्य यदसौ ।
विचिन्त्यैवं तर्कोत्कृतमखिलमेतत्पदगतं नियोगात्प्राग्यस्मादभयवरदाने प्रभुरसि ॥ २७ ॥
वनमालिनो वनविहारजुषस्ते प्रियकृद्भवेदपि वनप्रसरोऽयम् । इति जानतावनमिदं स्ववनेन रचितं मयाऽधिकमतो न मदागः ॥२८॥
न श्रुतमस्ति क्वचिदपि रसनादनदशनशिक्षणं लोके । सदय त्वद्भजरूपे मयि ते विहितं तु भाति नूत्नमिव ॥ २९ ॥
यस्त्वयाऽपहृतः श्रीश मद्विपक्षेण मन्मदः । मानापनोदः किमितो निग्रहोऽनुग्रहोऽपि वा ॥ ३० ॥
सर्वतोमुखजातस्य नारदस्य समागमात् । अनुग्रहस्ते प्राक्सिद्धोऽधुनाऽपीश तथास्तु सः ॥ ३१ ॥
सपक्षात् सुस्वस्थान्निजजनविनाशोद्यतमते विपक्षोऽपि ज्यायान् यदि निजजनत्राणकुशलः ।
स्फुटोऽयं नीत्यर्थोऽजनि मयि च नीत्याहितमतौ तदेतत्क्षन्तव्यं नहि पुनरितः स्यात्क्वचिदपि ॥ ३२ ॥
त्वया करेणोद्धरणीय एष इति प्रभो नैव मया विबुद्धम् ।
बुद्धे कृता स्यान्न विपक्षताऽस्मिन् गिरौ मयापीत्यविषह्यमेतत् ॥ ३३ ॥

यद्वा विपक्षत्वमवापितो मयेत्युद्धारयोग्योऽभवदेष ते प्रभो।
तस्माच्छमेवास्य मया कृतं गिरेर्विपक्षभावेऽपि विलोकयान्ततः॥ ३४॥
त्वया विपक्षोऽपि गिरिर्गरीयान् ममावलंबाच्छ्रयणीय एषः।
ततः प्रियस्त्वं मम चेति वाचः पुरैव जातोऽस्मि सुपर्वतास्थः॥ ३५॥
इयमधिकबन्धमुक्तिरनेन रचिता मयीति यदि मनसि। भृशमधिकबन्धमुक्तिं त्वमपि कृपाधन कुरुष्व तदिह मयि॥ ३६॥
मयोदासीनस्त्वं कृतविविधयत्नेन रचितोप्युदासीनः स्वीये क्षणमपि न जातोऽसि भगवन्।
तव स्वाप्तत्राणोदितसदयवृत्तावधिकता ततः सिद्धासिद्धाप्यधिकवति मेघे त्वधिकता॥ ३७॥
प्राचीनो हि विभो जडोन्मदमना उच्चैःश्रवो वाहकः कामं पाकबलानुशिक्षणचणोऽहल्यैकसख्यप्रियः।
प्राप्तप्राप्तव्रजवैरितां च कलयन्नाशाविशेषाश्रितः सिद्धोऽस्मीति विडम्बनाभिरधुना श्रीशालमेषा नतिः॥ ३८॥
रुष्टे त्वय्यथवा तुष्टे स्वः पुरन्दरमावहेत्। स्वतन्त्रोऽसि यतस्तत्र तद्वामां वा निधेहि भोः॥ ३९॥
नाप्रतिष्ठात्त्वपूर्वेयं सर्वदोशाश्रिते मयि। दाशार्होऽहमिति ज्ञात्वा यथेच्छसि तथा कुरु॥ ४०॥
त्वमन्नेन प्रभो तोषं प्रापितो व्रजवासिभिः। मयोदकेन तत्तुल्यस्तैरहं त्वदनुग्रहे॥ ४१॥
मया न लब्धो भगवन् पुरा यः शतेन सांगैरपि मन्युवर्यैः।
स मन्युनैकेन तव प्रसादो लब्धो ब्रुवे तद्वरमेनमेव॥ ४२॥
नित्याभ्यस्तसमस्तवेदनिवहः स्रष्टाऽण्डसृष्टेरपि स्पष्टं ज्येष्ठतमोऽखिलेष्वपि जनेष्वद्धा त्वदात्मैव यः।
तस्याऽप्यच्युत भूरिदुर्लभमिदं गोगोपगोपीष्टदं रूपं दृष्टमतस्त्रिविष्टपतटे धन्यो मदन्योऽस्ति कः॥ ४३॥
स्वस्थोहमप्रवासात्यासीन्मदहेतुरेतदेव मम। तद्द्वयमत्रागमनाद् गतमिति विमदत्वमर्थसिद्धमहो॥ ४४॥
सदाखण्डलसत्प्रीतिस्त्वयि मेऽस्तीति नौ वचः। सत्कृता तु मया मद्वाक्प्रमाणं परतो भवान्॥ ४५॥
यत्नेनोद्धृत्य वेगाद् विषयनिगडितं स्वेन्द्रियग्राममन्यत्राणायाऽसौ हि येनाऽचलपदगतिनाऽऽयोजितः शत्रुजेत्रा।
के वा देवा न सेवाचरणकृतधियस्तस्य वश्येन्द्रियस्य स्युर्लोकेष्वित्यबोधि प्रपदनतसुरेशेन तादृक् परस्य॥ ४६॥

कृष्णप्रिया

हे अधोक्षज! हे इन्द्रियातीत कृष्ण? भूमि के भाररूप, भूमि के पापों के बोझा को लादने वाले आसुरिवृत्ति वाले खल सेनाधिपतिओं के विनाश के लिये, और आपके श्रीचरणों के अनन्य सेवक भक्तजनों के कल्याण के लिये ही आपने अवतार लिया है। आपका अवतरण विश्व के लिये वरदान ही है॥ ९॥ पुरुषोत्तम; महत् स्वरूप अथवा कार्य कारणस्वरूप वासुदेव, यादवपति, भगवान श्रीकृष्ण के चरण कमलो में बार बार प्रणाम॥ १०॥ निजजनों की इच्छा के अनुकूल-अनुरूप अवतार लेने वाले, विशुद्ध चिद्रूप स्वरूप धारण करने वाले, सर्व स्वरूप, सर्व के बीजरुपरूप प्राणीमात्र की आस्था वैसे चैतन्यमय आपके चरणां में प्रणाम॥ ११॥ हे भगवन्! हे महाराज! यज्ञ के अवरोध के कारण, मिथ्याभिमानी मुझे उम्रभर क्रोध उत्पन्न हुआ, और मैंने पागलपने में धारासम्पात वृष्टि, तीव्रवर वायु, बौछारों से व्रज को नष्ट करने की खल चेष्टा की॥१२॥

त्वयेशानुगृहीतोऽस्मि ध्वस्तस्तम्भो वृथोद्यमः[1]। ईश्वरं गुरुमात्मानं त्वामहं शरण गतः॥ १३॥

श्रीशुक उवाच

[2]एवं सङ्कीर्तितः कृष्णो मघोना भगवानमुम्। मेघगम्भीरया वाचा प्रहसन्निदमब्रवीत्॥ १४॥

श्रीभगवानुवाच

मया तेऽकारि मघवन् मखभङ्गोऽनुगृह्णता। मदनुस्मृतये नित्यं मत्तस्येन्द्रश्रिया भृशम्॥ १५॥
मामैश्वर्यश्रीमदान्धो दण्डपाणिं न पश्यति। तं भ्रंशयामि सम्पद्भ्यो यस्य [3]चेच्छाम्यनुग्रहम्॥ १६॥

कर्दमक्षमा

अन्वयः—हे ईश! त्वया ध्वस्त स्तम्भः हतोद्यमः अनुगृहीतः अस्मि, ईश्वरम् गुरुम् आत्मानम् त्वाम् अहम् शरणम् गतः॥ १३॥ मघोना एवम् संकीर्तितः कृष्णः भगवान्, मेघगम्भीरया वाचा प्रहसन् अमुम् इदम् अब्रवीत्॥ १४॥ मघवन्! इन्द्रश्रिया भृशम् मत्तस्य, नित्यम् मदनुस्मृतये अनुगृह्णता मया ते मखभङ्गः अकारि॥ १५॥ ऐश्वर्य श्रीमदान्धः दण्डपाणिम् माम् न पश्यति, यस्य च अनुग्रहम् इच्छामि तम् सम्पद्भ्यः भ्रंशयामि॥ १६॥

---

१. हतोद्यमः–वीर.। २. इत्थं–वीर.। ३. वाञ्छा–प्रा. पा.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तथापि भो ईश त्वयाऽनुगृहीतोऽस्मि । अनुग्रहं दर्शयति । ध्वस्तस्तंभ इति वृथोद्यम इति च ॥ १३-१४ ॥ इंद्रेण स्वाभिप्राये निवेदिते भगवानपि तथैवाह । मयेति । इंद्रश्रिया देवराज्येन ॥ १५-१६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यद्यपि मयानुचितं कृतं तथापि ध्वस्तोऽपास्तः स्तंभो गर्वो यस्य स तथा । 'दृप्तो धर्मं न पश्यति' इत्युक्तेर्धर्माकरणेन गर्वितस्य नरकावाप्तिर्दर्पापहारेण धर्मप्रवृत्तौ स चानुग्रह एवाद्वितीयमनुग्रहं दर्शयति–वृथोद्यम इति । उद्यमसाफल्ये तु गवादिनाशान्नरकावाप्तिरतस्तद्वृथाकरणमप्यनुग्रह एवेति तिरस्कृते नापि भिषजा कृपालुना चिकित्सितो रोगीव त्वयाहमनुगृहीत एवातः ध्वस्तस्तम्भरोगः । हता उद्यमा वज्रनिक्षेपादयो यस्य सः । नियंतृत्वादीश्वरं, हितकारित्वाद्गुरुं प्रेमास्पदत्वादात्मानम् ॥१३॥ एवम् त्वयेशानुगृहीतोस्मीत्येवंप्रकारेण । अमुम् मघवानम् । इदम् वक्ष्यमाणम् ॥ १४ ॥ तथैव स्वाभिप्रायमाह—हे मघवन्निति । त्वत्पूज्यवाधिकारमिंद्रत्वमहं न नाशयामीति भावः । संपद्भ्यो धनादिभ्यः, तव तत्रासहिष्णुतां दृष्ट्वा यज्ञमेवाहरमिति भावः । अनुग्रहमाह–मदनुस्मृतय इति ॥ १५ ॥ ऐश्वर्यमीश्वरत्वम् श्रीः समृद्धिस्ताभ्यां मदेनांधो नष्टज्ञानचक्षुः । पणते व्यवहरते दानादानादिष्विति पाणिः । पणेरिञ् , हस्तः । दंडः पाणौ यस्य तं तथा । संपन्नाशे मदनुस्मृतिर्नान्यथाऽतस्तां दातुं श्रीभ्रंशं करोमीति भावः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हे ईश, हे सर्वनियन्तः ! यद्यपि सद्य एव मयि दण्डं कर्त्तुं समर्थस्त्वं तथापि त्वयाऽनुगृहीतोस्म्येवेत्यर्थः । न च बाह्यानुग्रह इत्याह—ध्वस्तस्तम्भः नष्टमदोऽस्मि यतो हतोद्यमः ध्वंसिरत्रान्तर्भूतण्यर्थः । यतस्त्वयैव स्तम्भो नाशित उद्यमश्च हत इत्यर्थः । अतो गुरुः त्वामेव महापराध्यप्यहं शरणङ्गतः तत्रैवान्यदपि हेतुद्वयम् ईश्वरं नियन्ताम् आत्मानं रश्मीनां सूर्य्यमिव सर्वेषां मूलस्वरूपं त्रिधाप्यनन्यगतिकत्वादिति भावः ॥ १३ ॥ सङ्कीर्तितः स्तुतः भगवानिति परमप्रभुत्वं बोधयन् अपराधिन्यपि तादृशे क्षुद्रेऽनभिनिवेशं बोधयति, अत एव मेघेति मेघगर्जितं लक्षयति अनेन तस्य महासत्त्वतां प्रहसन्निति महाशयतां च व्यनक्ति अमुमित्येकवचननिर्दिष्टाऽदःशब्देन लौकिकरीत्या मघोनस्तु क्षुद्रतामिति ॥ १४ ॥ मयेदमित्यादितद्वाक्यानुरूपप्रभुत्वोचितमेवाह—अनुगृह्णतैव नतु क्रुध्यतेत्यर्थः । तत्र क्रोधविषयत्वेऽपि त्वद्विधस्यायोग्यत्वादिति भावः । नित्यं मम अनु वारम्बारं या स्मृतिस्तदर्थम् अन्यथा विपथगामी स्या इति हि यतः ऐश्वर्य्येण प्रभुत्वेन श्रिया धनादिसम्पदा च मदस्तेनान्धः गताशेषज्ञानस्सन्नित्यर्थः । दण्डपाणिं मदीयोपासकान् प्रति गोपवेषोचितसुभगयष्टिपाणित्वेन भासमानतयैव त्वद्विधान् प्रति तु व्यञ्जितदण्डपाणित्वमपि न पश्यति नावगच्छ त इति गोपलीलायां निजप्रभुत्वविशेषमुक्त्वा तदन्तरङ्गपरिकरेषु श्रीगोपराजादिष्वपि भक्तिरनुशिष्टा यतो न पश्यति अत एव यस्यानुग्रहमिच्छामि यमनुग्रहीतुमिच्छामीत्यर्थः । तं सम्पद्भ्यो भ्रंशयामि तस्यैश्वर्यहेतुकधनादिसम्पत्तीर्हरामीत्यर्थः । भवतस्तु तत्रासहिष्णुतां दृष्ट्वा न तादृशमप्यकरवं किन्तु यत्किञ्चिन्मखभङ्गमेवेति भावः ॥ १५-१६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ईश ! हे सर्व्वनियन्तः ! यद्यपि सद्य एवमपि दण्डं कर्त्तुं समर्थोऽसि, तथाप्यनुग्रहीतोऽस्म्येवेत्यर्थः । न च बाह्यानुग्रह इत्याह–ध्वस्तस्तम्भो नष्टमदोऽस्मि, यतो हतोद्यमः, ध्वस्तेति सकर्म्मकं वा, यतस्त्वयैव स्तम्भो नाशित उद्यमश्च हत इत्यर्थः, अतो महापराध्यप्यहं त्वामेव शरण गतः । तत्रैव हेतवः—ईश्वरमित्यादित्रयम् । आत्मानं प्रियं परमसुहृत्तममित्यर्थः; एषां यथोत्तरश्रैष्ठ्यमुह्यम् । ईश्वरत्वादिकं स्वभावादेव, किंवा कृतानुग्रहविशेषात्; यद्वा, कथम् ? तदाह—ईश्वरमिति ईश्वरादिरूपेणेत्यर्थः । अतोऽधुना ममैश्वर्य्येणालम्, अत्रैव त्वत्पादाब्जान्तिके स्थास्यामीति भावः ॥ १३ ॥ संकीर्त्तितः स्तुतः । भगवानिति परमदयालुत्वं बोधयति, अन्यथा त प्रति तादृशोक्तेरयोग्यत्वात्, यद्वा, भगवान् परमकारुण्य-शरणागतवात्सल्यादिगुणप्रकटनपरोऽपि इदं वक्ष्यमाणमन्तःप्रसादरहितमब्रवीत्, यतः कृष्णः श्रीनन्दव्रजजनैकप्रियः, तत्र महापराधेन तादृशोक्तेरेव योग्यत्वादिति भावः । आद्ये पक्षे मेघगम्भीरयेति निजस्वाभावाभिव्यञ्जनेन वञ्चनं निरस्तम्; अतएव प्रहसन् स्मयमानः; यद्वा, तस्य दुर्म्मदतामनुसन्धाय हसन्, द्वितीये च गोष्ठनाशायेति तत्तत्स्मारणादन्तः कोपेन मेघगर्ज्जितगम्भीरस्वरया वाचा, अतएव अकारप्रश्लेषेण स्वाभाविकमपि निजश्रीमुखप्रसत्तिमप्रकाशयन्नित्यर्थः । यद्वा, 'हासो जनोन्मादकरी हि माया' इत्यादिन्यायेनोक्तिचातुर्य्योवञ्चनं कुर्व्वन्नेवेत्यर्थः । एवं पक्षद्वयापेक्षया विकल्पोऽग्रेऽप्यूह्यः ॥ १४ ॥ अनुगृह्णतैव, न तु क्रुध्यतेत्यर्थः । एतच्च शुद्धकृपयान्तःकोपेनैव वा, नित्यं मम अनु वारं वारं या स्मृतिस्तदर्थम्, अन्यथैश्वर्य्यस्वभावेन कदाचिदेव स्मरणासम्भवात्; यद्वा, नित्यं मत्तस्य मम अनुषंगेणासकृत् स्मरणार्थमित्यर्थः; एतमपि तथैव, हि यतः, ऐश्वर्य्येण मदस्तेनान्धो गताशेषज्ञानः सन्नित्यर्थः । दण्डपाणिं कालादिरूपेण साक्षाच्छासितारमपि न पश्यति, न जानाति, 'ऐश्वर्य्यश्रीमदान्धः' इति पाठे ऐश्वर्य्येण याः श्रियः सम्पदस्ताभ्यो मदस्तेनान्धः, अतएव यस्यानुग्रहमिच्छामि यमनुग्रहीतुमिच्छामीत्यर्थः, तं सम्पद्यो भ्रंशयामि, तस्यैश्वर्य्यहेतुकधनादिसम्पत्तीर्हरामीत्यर्थः ॥ १५-१६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तथाप्यहं हे ईश ! त्वया ध्वस्तः अविनयो यस्य सः मदापनयनद्वाराऽनुगृहीत एवास्मि सम्प्रति हतः उद्यमः अपचिकीर्षात्मको यस्य स अनेनाधुनाऽपराधचिकीर्षाभिसन्धिराहित्यमावेदितमनेनैव कार्पण्यं च प्रकाशितम् एवंम्भूतोऽहमधुना त्वां शरणं गतः शरणागतावपि त्वमेव प्रयोजककर्त्तेत्यभिप्रायेण विशिनष्टि–ईश्वरमिति । शरणागतये मां नियमयन्तमित्यर्थः । आचार्यसान्निध्याभावशङ्काप्रयुक्तशरणागतिवैयर्थ्याशङ्कापरिहाराय विशिनष्टि—गुरुमिति । देहात्माभिमानक्रोधादिदुर्गुणापनयनद्वारा हितप्रवर्त्तकत्वेनाचार्यकृत्यमपि प्राप्तमित्यर्थः । ननु, न तदेवं शरणङ्गतोस्मीति वचो निर्व्यलीकमिति शङ्कां निराचिकीर्षुर्विशिनष्टि–आत्मानमिति । अन्तरात्मनः तवाविदितं किमस्तीति भावः ॥ १३ ॥ इत्थमिति । इत्थं मघोनेन्द्रेण सङ्कीर्त्तितः कृष्णोऽमुं मघवानमुवाच ॥ १४ ॥ तदेवाह—मयेति त्रिभिः । हे मघवन् ! अनुजिघृक्षता मया त्वद्यज्ञभङ्गः कृतः, कोसावनुग्रहः ? इत्यत्र तं दर्शयति इन्द्रश्रियेन्द्राधिपत्येन इन्द्रेति सम्बोधनं वा नितरां मत्तस्य तव नित्यं मद्विषयकानुस्मृतये मखभङ्गोऽकारीत्यन्वयः । मदनुस्मृत्यापादकमेवानुग्रहमिति भावः ॥ १५ ॥ मत्तस्य मदनुस्मृतय इत्यनेन मदन्यस्य स्वानुस्मृतिप्रतिबन्धकत्वमत एव तदपनयनस्य हि तत्वं च सूचितम् । तदेव व्यनक्ति, मामिति । ऐश्वर्यश्रीमदाभ्यामाधिपत्यसम्पद्भ्यामन्धो विवेकशून्यः जनः दण्डधरं मां न पश्यत्यतो "यस्यानुग्रहमिच्छामि" तं सम्पद्भ्यो भ्रंशयामि तस्य सम्पदभिलाषं निवर्त्तयामीत्यर्थः ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ध्वस्तस्तम्भः निरस्तस्थूणस्वभावः ॥ १३ ॥ मघोना इन्द्रेण ॥ १४ ॥ अकारि कृतः हे मघवन्, इन्द्र ! ॥ १५ ॥ "पण व्यवहारे" इति धातोः हानादिव्यवहारसाधनत्वात् पाणिः हस्तः दण्डपाणि यमं माम् । भ्रंशयामि विस्रुतं करोमि च शब्द एवार्थे अनुग्रहमेव नान्यद्वित्तादिकम् अनुग्रहानन्तरमविनश्वरसम्पदश्चेति समुच्चये वा ऐश्वर्यमीश्वरत्वं गवादिसमृद्धिः श्रीराभ्यामुद्धृतेन मदेनान्धः ज्ञानलक्षणचक्षुरहितः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

त्वत्कृतो दण्डोऽपि मे अनुग्रह स्व, इत्याह—त्वयेत्यादि । ईश्वर ! त्वयानुगृहीतोऽस्मि । तथाहि यदहं ध्वस्तस्तम्भो हतोद्यम, अतस्त्वं मे गुरुरसि । अतः परं शिक्षितोऽस्मीत्याह—ईश्वरं गुरुमात्मानमात्मवत् प्रियं त्वां शरणं गतोऽहमिति ॥ १४–१८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ईश्वरं न केवलमीश्वरं गुरुश्चोपदेष्टारम्, अन्यदेवं न कर्त्तव्यमिति यत् शिक्षा च कारिता, न केवलं गुरुरात्मा च, सर्वेषामस्मदादीनां त्वमेवात्मा अतस्त्वयि का त्रपेति भावः ॥ १४–१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदपि तिरस्कृतेनापि भिषजा कृपालुना चिकित्सतो रोगीवत्त्वयाऽहम् अनुगृहीतः अत एव सम्प्रति ध्वस्तस्तम्भरोगः यतो हता उद्यमाः वज्रनिक्षेपादयो यस्य सः अतो नियन्तृत्वादीश्वरं हितकारित्वाद्गुरुं प्रेमास्पदत्वादात्मानम् ॥ १३–१४ ॥ इन्द्रेण निष्कपटमुक्ते भगवानपि तथैवाह—मया ते इति ॥ १५–१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तथापि हे ईश ! सर्वनियन्तः मखभङ्गद्वारा त्वया अनुग्रहीतोऽस्मि अतो हतोद्यमः ध्वस्तस्तम्भः ईश्वरं नियन्तारं गुरुम् ईहयैव सन्मार्गोपदेष्टारम् आत्मानं सर्वेषां जीवानामाश्रयम् "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" इत्युक्तेश्च एवम्भूतं त्वां शरणं गतोस्मि ॥ १३ ॥ अमुं मघवानम् ॥ १४ ॥ इन्द्रश्रिया देवराज्येन ॥ १५–१६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणि

ध्वस्तः स्तम्भो यस्य स वृथोद्यमो वृथाभूत उद्यमो मेघौघादिप्रेषणादिर्यस्य स त्वयाऽनुगृहीतोऽस्मि । अधुनाऽपि मधुनाथेन सुष्ठु तथाऽप्रष्टुर्वा नोक्तं कथयदनुगृहीत इति शक्र इति चेन्न । न मनोपवेशोपश्रवणादिकं नानुग्रहं विना घटेतेति मघवान्भगवन्ननुगृहीत इत्युक्तवानिति सम्भवात् । अहमीश्वर गुरुमात्मानं शरणं गतः ॥ १३ ॥ अमुमिन्द्रं मघोनेन्द्रेण ॥ १४ ॥ हे मघवन् इन्द्रः स्वर्गाधिपतिरिति श्रीस्तथा भृशं मत्तस्य नित्यं मदनुस्मृतयेऽनुगृह्णता मया मखभङ्गोऽकारि कृतः ॥ १५ ॥ ऐश्वर्यं स्वामित्वं श्रीः सम्पच्चाभ्यां जातो यो मदस्तेनान्धोऽधिकारी दण्डपाणिं शासितृत्वेन यमसमम् । अदण्डपाणिरस्वतन्त्रयमभिन्नं शिक्षकं न पश्यति चक्षूरहितवत् । यो यस्य चोपर्यनुग्रहं कर्तुमिच्छामि तं सम्पद्भ्यो भ्रंशयामि च्यावयामि ॥ १६ ॥

श्रीसुबोधिनी

तथापि स्वामिनानुग्रहः कृत एवेत्याह **त्वयेति**, ईशत्वादनुग्रहकरणं, **न ह्युपजीवकेषु क्रुद्धेषूपजीव्योपि क्रुध्यति तथा सति तेषां नाशएव स्यादत एवानुगृहीतोस्मि**, गोवर्धनधारणेन **मान एव** हतो न त्वहं हत इति मानहतिमेवाह ध्वस्तस्तम्भ इति, स्तम्भो गर्वोनम्रता **ध्वस्तो** यस्य, तत्र हेतुर्**हतोद्यम** इति, तथापि न **मम** लज्जा यतस्त्वमीश्वरो **गुरुरात्मा** च लोकतो वेदतोनुभवतश्च त्वच्छिक्षायां नापमानं भवतीत्यतस्त्वां **शरणं गतः**, यथोचितं विधेयमिति भावः ॥ १३ ॥ तदा प्रसन्नो भगवांस्तस्य मनःपीडां दूरीकृतवानित्याहैवमिति चतुर्भिः ।

उपक्रमः कृतं चैव हेतुश्चापि तथाकृतौ । प्रसादश्चेति भृत्याय भगवान् स्वयमुक्तवान् ॥ १ ॥

एवं पूर्वोक्तप्रकारेण **सङ्कीर्तितः कृष्णः** फलात्मा **मघोनेन्द्रेण** पूर्णः सर्वतो **भगवान् मेघगम्भीरया वाचा** तस्य तापं शमयन् **प्रहसन्** मोहयन्निदं वक्ष्यमाणमब्रवोत्, अत एवाग्रेपि तस्य मोहः ॥ १४ ॥ स्वकृतमाह मयेति, काकतालीयव्यावृत्त्यर्थं स्वकृतं ज्ञापयति हे **मघवन्ननुगृह्णता मया मखभङ्गोकारि**, अनुग्रहमेवाह **मदनुस्मृतय** इति, ममानुस्मृतिरेवानुग्रहः, यागभङ्गाभावेनुस्मृतिर्न स्यादिति, हेतुमाह **नित्यमिन्द्रश्रिया मत्तस्येति** ॥ १५ ॥ नाप्येतत् त्वया प्रार्थनीयं ममैवायं सहजो धर्म इत्याह **मामैश्वर्यंति**, **ऐश्वर्यं श्रीश्चान्यतराभावे** न मदः पुष्टो भवतीतरसापेक्षत्वात्, न ह्येकाक्षिविकलोन्धो भवत्यत **ऐश्वर्येण श्रिया च** यो मदस्तेनान्धः, **दण्डपाणिं** घातकमपि **मां न पश्यति**, अतस्तं **सम्पद्भ्यो भ्रंशयामि** शिक्षार्थमवश्यं मारणोयः, तदैव मारणे शिक्षा भवति यदि जानीयादतो ज्ञानार्थं **सम्पद्भ्यो भ्रंशयाम्य**न्यथानुग्रहो न भवेत्, इयं साधारणी व्यवस्था, विशेषमप्याह **यस्य चेच्छाम्यनुग्रहमिति**, **यस्य** चानुग्रहमिच्छामि, अयमनुग्रहं प्राप्नोत्विति **विषयैर्बुद्धिभ्रंशो भवतीतिवाते दीपवद् विषयैरनुग्रहोपि न स्थिरो भवति**, अल्पेनैव कार्यसिद्धौ महाननुग्रहो न कर्तव्योतो यथाल्पेनैव कार्यं भवति तदर्थं **सम्पद्भ्यो भ्रंशयामि**, तदनन्तरमनुग्रह इति पूर्वमिच्छैवोक्ता, अत्रत्यः क्रमोग्रे वक्तव्यो "यस्यानुग्रहमिच्छामी"त्यत्र, अतः शिक्षार्थं प्रसादार्थं चैश्वर्यभ्रंशः कार्यते, अत एकदेश एव स कृतो यागमात्रैश्वर्यनिराकरणात् ॥ १६ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

एवमित्यत्र **उपक्रम** इति शुकेनोक्त इतिशेषः, अग्रिमत्रयं भगवानुक्तवानित्यन्वयः ॥ १४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

एवं सङ्कीर्तितः इत्यादीनां चतुर्णां श्लोकनामर्थमाहुः **उपक्रमः कृतं चैवेति**कारिकया, "एवं सङ्कीर्तित" इत्यनेन प्रसादो**पक्रमः**, "मया तेकारि मघव"न्नित्यनेन **कृतं** भगवत्कृतं मखभङ्गादिरूपं निरूपितं, "मामैश्वर्यश्रीमदान्ध" इत्यनेन **तथाकृतौ मखभङ्गकृतौ हेतुरुक्तः**, "गम्यतां शक्र भद्रं व" इत्यनेन **प्रसाद** इति बोद्धव्यम् ॥ १४ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एवं सङ्कीर्तितः कृष्ण इत्यादिश्लोकचतुष्टयार्थानाहुः **उपक्रम** इत्यादि; का० २३७३ । "एवं सङ्कीर्तित" इत्यनेन स्तोत्रो**पक्रमः**, "मयातेकारि मघव" न्नितिश्लोकेन भगवता **कृतं** इन्द्रयागभङ्गात्मकं कार्यमुक्तं, "मामैश्वर्यश्रीमदान्धो य" इत्यनेन **वितथाकृतौ** इन्द्रयागभङ्गकरणे ऐश्वर्यश्रीमदरूपो **हेतुरुक्तः**, "गम्यतां शक्र भद्रं ते"इत्यनेन भृत्याय इन्द्राय भगवता स्वप्रसाद उक्तः ॥१४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'मयैवमपराधे कृतेऽपि त्वया तु स्वोचितमेव कृतम्' इत्याशयेन सम्बोधयति—**ईशेति** । 'त्वयाऽनुगृहीतोऽस्मीति कथं' तत्राह**ध्वस्तस्तम्भ** इति । ध्वस्तः स्तम्भः अविनयो यस्य सः । तत्र हेतुमाह—**हतोद्यम** इति । हतः उद्यमो व्रजविनाशविषयको यस्य सः ॥ "अत इदानीं त्वामहं शरणं गतोस्मीति, शरणागमनयोग्यश्च त्वम्" इत्याशयेनाह—**ईश्वरमिति** । गुरुं शास्त्रप्रवर्तकमात्मानं परमात्मानं सर्वान्तर्यामिणमित्यर्थः ॥ १३ ॥ **मघोना** इन्द्रेण **एवं सङ्कीर्तितः** संस्तुतः **कृष्णो मेघवत् गम्भीरया** मधुरया **वाचा अमुं** इन्द्रं हर्षयन् स्वयमपि **प्रहसन् इदं** वक्ष्यमाणमब्रवोदित्यन्वयः । 'तस्य तस्मिन्नपराधवत्यपि क्रोधो न जातः, वैराग्यादिगुणपूर्णत्वात्' इत्याशयेनाह—**भगवानिति** ॥ १४ ॥ भगवद्वाक्यमाह – **मयेति** त्रिभिः । **हे मघवन्!** अनुगृह्णता अनुजिघृक्षता **मया ते** तव **मखभङ्गः** अकारि कृतः । 'मखभङ्गे न कथमनुग्रहः ?' इत्यपेक्षायामाह—**मदनुस्मृतय** इति । इन्द्राधिपत्येन भृशमत्यन्तं **नित्यं प्रमत्तस्य** कर्तव्यमदनुसन्धानशून्यस्य **मदनुस्मृतये मखभङ्गः** कृतः । तेन मदनाशद्वारा मदनुस्मृत्यापादनमेवानुग्रह इति भावः ॥१५॥ एवं **यस्य** चानुग्रहमिच्छामि तं **सम्पद्भ्यो भ्रंशयामि**, यस्मात् **ऐश्वर्यश्रीभ्या**माधिपत्यसम्पद्भ्यां **यो मदस्तेनान्धो** विवेकशून्यो जनः **दण्डपाणिं** दण्डधरं कालयमादिरूपं **मां न पश्यति** । अत्रेदं बोध्यम् यत्र ऐश्वर्यादिसत्त्वे मदस्तद्भ्रंशदशायां धर्मार्थकामसाधनप्रवृत्त्यभावपूर्वककेवलभगवद्भजनपरत्वं तत्रैव भगवदनुग्रहः । यत्र चैश्वर्यादिसत्त्वेपि उक्तप्रकारेण भगवद्भजनपरत्वं तत्रैव भगवदनुग्रहः, अम्बरीषादौ तथादर्शनात् ॥ यत्र त्वैश्वर्यादिसत्त्वे तदभावे वा त्रिवर्गसाधने प्रवृत्तिरेव, तत्र तु स्वकर्मभोग एव तदनुग्रहः ।

"त्रैवर्गिकायासविघातमस्मत्पत्तिर्विधत्ते पुरुषस्य शक्र ।। ततोऽनुमेयो भगवत्प्रसाद" इति वृत्रवचनात् ।। इन्द्रे तु पूर्णानुग्रहाभावान्न स ऐश्वर्याद्भ्रंशितः, अत एव वक्ष्यमाणं पारिजातापहरणे मदेन पुनर्भगवता सह युद्धं सङ्गच्छते ।। १६ ।।

अन्वितार्थप्रकाशिका

त्वयेति ।। हे ईश ! ध्वस्तः स्तम्भः अविनयो यस्य हतो निष्फल उद्यमो वृजनाशार्थो यस्य सोऽहं स्तम्भादिध्वंसात् त्वयाऽनुगृहीतोऽस्मि । अतः ईश्वरं गुरुमात्मानं च त्वां शरणं गतः ।। १३ ।। एवमिति ।। मघोना इन्द्रेण एवं संकीर्तितः संस्तुतो भगवान् कृष्णो मेघवत् मेघस्येव गम्भीरया मधुरया वाचा अमुम् इन्द्रं हर्षयन् स्वयमपि प्रहसन् इदं वक्ष्यमाणमब्रवीत् ।। १४ ।। मयेति ।। हे मघवन् ! इन्द्रश्रिया देवेन्द्रत्वसम्पदा भृशं मत्तस्य ते तव नित्यं मम अनुस्मृतये अनुगृह्णता अनुजिघृक्षता मया तव मखभङ्गः अकारि कृतः ।। १५ ।। मामिति ।। ऐश्वर्यश्रीभ्यामाधिपत्यसंपद्भ्यां यो मदस्तेनान्धो विवेकहीनो जनः दण्डपाणिं दण्डधरं कालयमादिरूपं मां न पश्यति । अतः यस्य चानुग्रहमिच्छामि तं सम्पद्भ्यो भ्रंशयामि । अत्रेदं बोध्यम् । यत्रैश्वर्यसत्त्वे मदस्तद्भ्रंशदशायां च भगवद्भजनपरता तत्र सम्पद्भ्रंशो भगवदनुग्रहः । यत्र त्वैश्वर्यसत्त्वेऽपि मदत्यागपूर्वकं भगवद्भजनपरता तत्राम्बरीषादाविव सम्पद्भ्रंशो न क्रियते । यत्र त्वैश्वर्यसत्त्वे तदभावे वा त्रिवर्गसाधने प्रवृत्तिरेव तत्र स्वकर्मभोग एव भगवदनुग्रहः । इन्द्रे तु पूर्णानुग्रहाभावान्न त ऐश्वर्याद्भ्रंशितः । अत एव वक्ष्यमाणं पारिजातापहरणे मदेन पुनर्भगवता सह युद्धं संगच्छते ।। १६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ध्वस्तौ गतः स्तंभ ईशत्वमदो यस्य ।। १३ ।। मघोना इन्द्रेण अमुमिदं ।। १४ ।। अनुगृह्णता मया ते मखभंगो कारि कृतः कथंभूतं यस्य तव इंद्रश्रिया देवेद्रं राजलक्ष्म्या ।। १५ ।। ऐश्वर्येण श्रिया संपत्त्याचमदस्तेनांधोमतः तं मत्तं यस्यानुग्रहं ।। १६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त्वयेति ।। तथापि, हे ईश, त्वया ध्वस्तो निवर्तितः स्तम्भोऽनम्रत्वरूपः कुविनयो यस्य सः, हतो नष्ट उद्यमो यस्य स एवंभूतः, अहं अनुगृहीतः एव अस्मि । अत एवंविधः अहं, ईश्वरं, गुरुं, आत्मानं, त्वां शरणं, गतः ।। १३ ।। एवमिति ।। एवमित्थं मघोना इन्द्रेण, संकीर्त्तितः भगवान् कृष्णः, अमुमिद्रं, मेघगम्भीरया मेघध्वनितुल्यया, वाचा वाण्या, प्रहसन् सन् , इदं वक्ष्यमाणं, अब्रवीत् । मघवानं प्रत्यचकथत् ।। १४ ।। तदेवाह मयेति त्रिभिः ।। मयेति ।। हे मघवन्, अनुगृह्णता अनुजिघृक्षता, त्वदनुग्रहं कर्त्तुमिच्छतेत्यर्थः । मया ते तव, मखभङ्गः यज्ञखण्डनं अकारि कारितः । कोऽसावनुग्रह इत्यत्र तं दर्शयति । इन्द्रश्रिया ऐन्द्राधिपत्येन, इन्द्रेति संबोधनं वा । नित्यं मत्तस्य तव, भृशं मदनुस्मृतये मद्विषयकानुस्मृतिसिद्ध्यर्थं, मखभङ्गोऽकारीत्यन्वयः । मदनुस्मृत्यापादनमेवानुग्रहः ।। १२ ।। मत्तस्य मदनुस्मृतये इत्यनेन मदस्य स्वानुस्मृतिप्रतिबन्धकत्वमत एव तदपनयनस्य हितत्वं सूचितं तदेव व्यनक्ति ।। मामिति ।। ऐश्वर्यं च श्रीमदश्च ताभ्यामाधिपत्यसंपद्भ्यामन्धो विवेकशून्यो जनः, दण्डपाणिं दण्डधरं मां, न पश्यति । अतः, यस्य अनुग्रहं इच्छामि, तं संपद्भ्यः भ्रंशयामि । चोऽवधारणे । संपदभिलाषं निवर्त्तयामीत्यर्थः ।। १६ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

प्रहसन्निति : १०.२७.१४.

लब्धप्रतिष्ठस्य सतोऽप्रशस्तं कर्म ह्रियै स्यात् खलु नेतरस्य ।
सदाऽप्रतिष्ठस्तदयं विविक्ते कुतः समागादिति वा जहास ।। ४७ ।।
जडवृत्त्यनुसृत्य पाकृतिभ्यां मदभावामदभावयोर्विशेषः । निरणायि सुरेश मे पुरैव त्वमिहागाः किमितीति वा जहास ।। ४८ ।।
कनीयांस्तु गरीयांसं नमति स्तौति याचते । अद्याऽन्यथा प्रसङ्गेन प्राप्तमित्यास हास्यकृत् ।। ४९ ।।
भक्तानुग्रहकर्तुर्मे दृष्टिरागन्तुकी सरुट् । प्रसन्ना तु सदैवाऽस्तीत्यबोधीशेन हास्यतः ।। ५० ।।

मया तेऽकारीति : १०.२७.१५.

यः स्यादनुग्रहपदं मम तं सदैव रक्षन् क्वचित् समुदितं मदभावमस्मिन् ।
सद्यो हरामि मदनुस्मृतये परस्तु शिक्ष्यो ममेति न हि तत्र तथाऽऽचरामि ।। ५१ ।।

कृष्णप्रिया

हे सर्व समर्थ नाथ ? आपने मेरे घोर अभिमान का विध्वंस किया, यह तो आपने मुझ पर अपार अनुग्रह किया है। मेरे सारे प्रयत्न आपने निरर्थक किए। अब मुझको सर्वेसर्वा मानने वाले को मान आया, हे भगवन् ! आप ही गुरु, ईश्वर, आत्मा और सर्व हो मैं आपका शरणागत हूँ ।। १३ ।। श्रीशुकाचार्य महाराज ने कहा—राजन् ! राजा इन्द्र ने जब पूर्ण पुरुषोत्तम श्रीकृष्ण की इस प्रकार की स्तुति की तव मधुरस्मित-मन्दहास्य करते हुए मेघ गर्जना के गम्भीर वाणी से इन्द्र को यों

कहा ॥ १४ ॥ भगवान श्रीकृष्ण कहने लगे—मघवन् ? हे इन्द्र ? इन्द्र पद के अधिकार मद से चकचूर बन गये थे इसलिये मैंने तुम्हारे यज्ञ का अवरोध किया, इससे तुम्हे निरंतर मेरा अनुसंधान रहेगा ॥ १५ ॥ राजन् ! सुनो ! ऐश्वर्य मद और सम्पत्ति मद से अन्ध बने हुए वे दण्ड हाथ में ग्रहण कर बैठे हुए नियन्ता को देखते नहीं है। उन मदान्धों में जिस जन पर में अनुग्रह करना चाहता हूँ उनका पद मद और सम्पत्ति पद को नष्ट कर देता हूँ ॥ १६ ॥

गम्यतां शक्र भद्रं वः[1] क्रियतां मेऽनुशासनम् । स्थीयतां स्वाधिकारेषु युक्तैर्वः [2]स्तम्भवर्जितैः ॥ १७ ॥
अथाह सुरभिः कृष्णमभिनन्द्य[3] मनस्विनी । स्वसन्तानैरुपामन्त्र्य[4] गोपरूपिणमीश्वरम् ॥ १८ ॥

सुरभिरुवाच

कृष्ण कृष्ण महायोगिन् विश्वात्मन् विश्वसम्भव[5] । भवता लोकनाथेन सनाथा वयमच्युत ॥ १९ ॥
त्वं नः परमकं दैवं त्वं न इन्द्रो जगत्पते । भवाय भव गोविप्रदेवानां ये च साधवः ॥ २० ॥

कर्बमक्षमा

अन्वयः—हे शक्र ! गम्यताम् ! वः भद्रम्, "अस्तु", मे अनुशासनम् क्रियताम्, युक्तैः स्तम्भवर्जितैः वः स्व अधिकारेषु, स्थीयताम् ॥ १७ ॥ अथ मनस्विनी सुरभिः स्वसन्तानैः उपामन्त्र्य गोपरूपिणम् ईश्वरम् कृष्णम् अभिनन्द्य आह ॥ १८ ॥ हे कृष्ण ! हे कृष्ण ! हे महायोगिन् ! हे विश्वात्मन् ! हे विश्वसम्भव ! हे अच्युत ! लोकनाथेन भवता वयम् सनाथाः ॥ १९ ॥ त्वम् नः परम् अकम्, परं दैवम्, त्वम् नः इन्द्रः, हे जगत्पते ! गो विप्र देवानाम् भवाय भव ये च साधवः तेषाम् भवाय भव ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वो युष्माभिः। बहुवचनं वरुणाद्यभिप्रायेण। क गंतव्यं स्वर्गेपि तवैवेश्वरत्वादिति चेत्तत्राह। क्रियतामिति। मदनुशासनेन यथापूर्वं तत्र स्थीयतामित्यर्थः। युक्तैरप्रमत्तैः। स्तंभवर्जितैर्निरहंकारैः ॥१७॥ स्वसंतानैर्गोभिः सहोपामंत्र्य कृष्ण कृष्णेत्यादि संबोध्य ॥ १८ ॥ इंद्रेण हता अपि भवता वयं सनाथाः कृताः रक्षिता इत्यर्थः ॥ १९ ॥ त्वं नः परमं दैवं देवताऽतो हे जगत्पते गोविप्रदेवानां येऽन्ये च साधवस्तेषां भवाभ्युदयायाद्य त्वमेव नोऽस्माकमिंद्रो भव ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गम्यस्थानाभावमाह—क्वेति। सर्वत्र मत्स्वाम्येपि स्थितौ प्रकारमाह—क्रियतामिति। अत्र क्रियतां मेऽनुशासनमित्युक्तेरनुशासनानंगीकारे पुनर्दंडो भविष्यति परिजातहरणे तथात्वप्रसिद्धेः ॥ १७ ॥ अथ इंद्रानुज्ञानोत्तरम्। स्वसंतानैः व्रजगोभिः, प्राकृताया अपि तस्या अप्राकृतासु कृष्णपरिकरभूतासु स्वसंतानाभिमानस्तासां सुरभिवंशोद्भूतत्वात्। यथा प्राकृतस्य चंद्रस्य चंद्रवंशोद्भूतेऽप्राकृते श्रीकृष्णे स्वसन्तानाभिमान इति। गोपरूपिणम् नंदनंदनम् ॥ १८ ॥ इत्यर्थ इति। रक्षकस्यैव नाथपदार्थत्वादिति भावः। कृष्णकृष्णेति वीप्सा परमादरे। हे निजक्लेशकर्षक युक्तं गोकुलरक्षणमिति भावः। हे महायोगिन्निति। योगिनोऽपि सर्वं कर्तुं समर्थाः संति त्वं तु महायोग्यसि ततो गोवर्द्धनधारणादि ते नाद्भुतमिति भावः। किमहं व्रजत्रातैवास्मीति—तत्राह हे विश्वात्मन्निति। सर्वेषामात्मत्वादात्मानं सर्वस्त्रातुमीहते सर्वं त्रातुमीहस तदेवाह—विश्वसंभवेति। "जातो नारायणादिंद्रः" इत्यर्थवरहस्योक्तेरिंद्रोपि त्वया त्रात इति भावः। हे अच्युतेति। न हींद्रादयस्तव च्युतिं कर्तुमलमिति भावः ॥ १९ ॥ नः अस्माकं गवादीनाम्। परमकम् अत्युत्कृष्टम्। दैवम् अभीष्टदेवता। यतो नः परमं दैवमतो हेतोः। साधवः सदाचाराः। इंद्र ईश्वरो भव। हे जगत्पते जगदंतःपातित्वादस्माकं पतिरपि विशेषतोऽतो रक्षको भवेत्यभिप्रायः। गवेंद्रत्वेऽपि विप्रादीनामभ्युदयः "गोभ्यो यज्ञाः प्रवर्तंते गोभ्यो देवाः समुत्थिताः। गोभिर्वेदाः समुद्गीर्णाः सषडंगपदक्रमाः ॥" इति श्रुतेः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, तर्हि ममापि तादृशमेवानुग्रहं कुरु मयात्रव स्थीयतां तत्राह–गम्यतामिति। वो युष्माकं यत् भद्रं क्षेमं तदस्त्वित्यभयदानं वस्तुतस्तु न मदेकान्तभक्तानां तद्भद्रमित्युक्तिपरिपाट्या तदक्षेममेवाभिप्रेतम् अजिगमिषन्तं प्रत्याह—क्रियतामिति गत्वा च मदाज्ञा परिपाल्यतामित्यर्थः। अनधिकारिणस्ते अत्रावस्थित्याऽपराध एव भावीति गमनमेव युक्तमिति भावः। यद्वा, ननु भगवन् ! तत्र गतस्याप्यैश्वर्य्यस्वभावेनावश्यमपराधो भवितैव तत्राह—क्रितामिति। मदनुशासनं मच्छिक्षितमित्यर्थः। तदेवाह स्थीयतामिति। स्वस्यैव नतु परस्याधिकारेषु किं पुनर्मदन्तरङ्गपरिकरश्रीव्रजवास्यादिष्वित्यर्थः। तत्रापि युक्तैरप्रमत्तैः भक्तियोग-

---

१. ते–विज.। २. युक्तैर्विस्त–विज.। ३. वन्द्य–श्रीधर. वंशी. जीव. विज. विश्व. शु. सु.; वाद्य–वीर.। ४. गत्य–वीर.। ५. भावने–प्रा. पा.।

वद्भिर्वा तत्रापि निर्मदैश्च सद्भिर्वो युष्माभिः स्थीयताम् इत्थं वरप्रदानरूपोऽनुग्रहो न कृतः किन्तु केवलसमर्थनैव युक्तिपूर्वकशिक्षारूप एव कृतः सम्यक् प्रसादाप्रवृत्तेः अत एव तदनुशासनापालनेन पश्चादपराधान्तरमपि जातं तच्च पारिजातहरणादौ व्यक्तं भावि ॥ १७ ॥ अथानन्तरमित्यस्याभिप्रायस्तु विविक्त इत्यत्र पूर्वमेव व्याख्यातः स्वसन्तानैः चन्द्रवंशे श्रीकृष्णवत् स्वस्य वंशो प्रादुर्भूतैर्नित्यतदीयगोधनरूपैस्तैरुपलक्षिताभितो वन्दित्वाऽऽह स्तुतिपूर्वकं निवेदितवती अभिनन्द्येति पाठेपि स एवार्थः । न केवलमभिवन्द्याह, किन्तूपामन्त्र्य वक्ष्यमाणसम्बोधनैरात्मन्यवधानं प्रार्थ्य चाह स्वाभीष्टनिवेदने हेतुः गोपरूपिणमीश्वरमिति, अभिवन्दने हेतुः ईश्वरमिति । ननु, इन्द्रमानीय प्रथमं स्वयं कथं तत्साहाय्यार्थमपि न किञ्चिन्निवेदतवती तत्राह, मनस्विनी धीरचित्ता ततो भगवतः सर्वज्ञत्वसर्वहितकारित्वे इन्द्रस्य चोत्तानचित्तत्वे स्वयमेव विविदिषुतां स्वस्य च निवेदनीयविशेषं विचार्य्य प्रथमं तु नोक्तवतीत्यर्थः ॥ १८ ॥ अथ गोपरूपत्वेनेश्वरत्वेन च सम्बोध्य तदुभयथा प्रकाशमानेन त्वया स्वेषामसाधारणेन नाथेन सर्वतोऽपि वयं पूर्णा इति व्यञ्जयति, तत्र कृष्णकृष्णेति । गोपरूपत्वव्यञ्जकम् अत्रैव वीप्सा च निजरुच्यतिशयेन ईश्वरत्वेन सम्बोधयति महायोगिन् सर्वोत्तमाणिमादियोगैश्वर्यनित्यप्रकाशविश्वेषामप्राकृतप्राकृतयत्किचित् पदार्थानां मूलरूप ! तत एव हे विश्वसम्भव, तत्कारणरूप विश्वभावनेति पाठे तथैवार्थः । तथैव स्वकृतकृत्यता सुखं निवेदयति लोकनाथेनापि भवता वयमेव सनाथा इत्यर्थः । पुनरुक्त्या वैशिष्ट्यापत्तेः लोकैर्नाथ्यमानमात्रेणेति वा अत्राच्युतेति सम्बोध्य तथैव नित्यत्वं च दर्शयति ॥ १९ ॥ वैशिष्ट्ये हेतुः त्वं नः परमकं दैवमिति "नीतौ च तद्युक्तात्" (५।३।७७) इति कन् जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योयं "योसौ सौर्य्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गोपान् पालयति योऽसौ गोपेषु तिष्ठति योऽसौ सर्वेषु देवेषु तिष्ठति योऽसौ सर्वैर्वेदैर्गीयते योऽसौ सर्वेषु भूतेष्वाविश्य भूतानि विदधाति" इत्यादि तापनी श्रुतेः । अतो नोऽस्माकमिन्द्रस्त्वमेव भव जगत्पते इति यद्यपि जगतामेव पतिस्त्वं तथापीति पूर्ववत् गवेन्द्रत्वेपि विप्रादीनामभ्युदयः "गोभ्यो यज्ञाः प्रवर्त्तन्ते गोभ्यो देवाः समुत्थिताः । गोभिर्वेदाः समुद्गीर्णाः सषडङ्गपदक्रमाः" इति गासूक्तात् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तर्हि ममापि तादृशमेवानुग्रहं कुरु, मयात्रैव स्थीयताम्, तत्राह—गम्यतामिति । वो युष्माकं भद्रं क्षेममस्त्विति सान्त्वनम्, वस्तुतस्तु तादृशैश्वर्ये तदसम्भवादुक्तिपरिपाट्या अक्षेममेवाभिप्रैति । आजिगमिषन्तं प्रत्याह—क्रियतामिति; गत्वा च मदाज्ञा परिपाल्यतामित्यर्थः । अनधिकारिणस्तेऽत्रावस्थित्यापराध एव भावीति गमनमेव युक्तमिति भावः । यद्वा, ननु भगवन् तत्र गतस्याप्यैश्वर्यस्वभावेनावश्यमपराधो भवितैव, तत्राह—क्रियतामिति । तदेवाह—स्वीयतामिति, स्वस्यैव, न तु परस्याधिकारेषु, इति लोकपालत्वेन हिंसादिकं त्याजितम्, तत्रापि युक्तैरप्रमत्तैर्भक्तियोगवद्भिरिति वा, तत्रापि निर्म्मदैश्च सद्भिर्वो युष्माभिः स्थीयताम् । इत्थं वरप्रदानरूपोऽनुग्रहो न कृतः, केवलमसमर्थनेव युक्तिपूर्वकशिक्षारूप एव कृतः, महापराधेनान्तः कोपानपगमात्, सम्यक् प्रसादावृत्तेः अतएव तदनुशासनापालनेन पश्चादपराधान्तरमपि जातम् । तच्च परिजातहरणादौ व्यक्तं भावि ॥ १७ ॥ अथ श्रभगवतः कृपावाक्यात् चातुर्य्योक्तेर्वानन्तरम्; मनस्विनीति—स्वसंगागतेन्द्रसम्माननार्थं निजकृत्यविशेषार्थं वा धैर्य्येणादावनुक्तेः, यद्वा, महापराधी मत्संगागतोऽयं यदि श्रीभगवतानुगृह्येत, तदैव मया निशंकं निवेदनं कार्य्यमिति विचारणात्; यद्वा, दुरुक्तिजालप्रलापिनं गोकुलद्रोहिणं महापराधिनं तं प्रति श्रीभगवतः सम्यक् प्रसादो न वृत्त इति बुद्धवतीत्यर्थः; अतएव प्रहर्षेणाभितो वन्दित्वा उपामन्त्र्य च, 'हे भक्तवत्सल ! भो गोपालचूडामणे ! गोकुलपरिपालक ! श्रीनन्दकुमार ! श्रीयशोदानन्दन' ! इत्यादिना सम्बोध्येत्यर्थः, यद्वा, अभिषेकोत्सवेऽस्मिन् मम दुग्धपानादिकं कार्यमिति निमन्त्र्य । तत्र हेतुः—जगदीश्वरमपि गोपरूपिणं निजप्रभुमिति प्रार्थनायोग्यतापि ध्वनिता ॥ १८ ॥ कृष्ण हे साक्षाद्भगवन् ! वीप्सा तद्दार्ढ्याय प्रहर्षेण वा; यद्वा, हे नराकारपरब्रह्मन्निति द्वितीयकृष्णपदार्थः । तेनाशेषगुणरूपादिप्रकटनाभिप्रेतम्, अतो महायोगिन् हे अचिन्त्यानन्तशक्तियुक्त ! यतो विश्वस्य आत्मन् हे अन्तर्य्यामिन् ! यद्वा, महायोगो भक्तियोगस्तद्युक्त ! हे सदा तत्प्रवर्त्तकेत्यर्थः । अतो विश्वस्यात्मन् परमप्रियेत्यर्थः, किञ्च, विश्वस्य सम्यक् भवोऽभ्युदयो यस्मात्तथाभूत एव, लोकानां नाथेन स्वामिना किंवा प्राप्तुमिष्यमाणेन, नाथतेराशीरर्थात्, सनाथत्वे च कदाचित् कथञ्चिद्विच्युतिर्नास्तीत्यभिप्रायेण । अच्युत हे भक्तवात्सल्याद्यशेषगुणपरिपूर्णित ! ईदृशेन भवता वयमेव सनाथाः, बहुत्वं निजसन्तानानां गोपोपादीनां वापेक्षया, अन्यत्तैर्व्याख्यातम्; यद्वा, भवतैव वयं सनाथाः स्मः, न त्वन्येन ब्रह्मादिना केनापीत्यर्थः । कुतः ? लोकानां सर्वेषां जीवानां भुवनानां वा नाथेन, यद्वा, गोलोकनाथेन तदैव परमेश्वरत्वादित्यर्थः, यद्वा, अकारप्रश्लेषेण हे सर्वलोकातीत ! भवता नाथेनैव सनाथाः, तद्धेतुत्वेन सम्बोधनानि । अच्युत हे सदा सर्वत्र वर्त्तमान ! अन्येषां नश्वरत्वेन तैः सनाथत्वासिद्धेः, किञ्च, सर्वथा सर्वतस्तवैवोत्कर्षभरादित्याशयेनाह—कृष्ण कृष्णेत्यादि; अन्यत् समानम् ॥ १९ ॥ अतोस्माकं कञ्चित् कामं परिपूरयेत्याह—त्वमिति, नो गवादीनामस्माकं परमं कं सुखं यस्मात्तत् यद्वा, स्वार्थे कः, नोऽस्माकमिन्द्रस्त्वमेव भव, तत्र च समर्थस्त्वमेवेत्याशयेनाह—जगत्पते हे जगदीशेति, अन्यत्तैर्व्यञ्जितम्; यद्वा, नो गवामस्माकमिन्द्रोऽपि त्वमेव, तत्र हेतुः—हे जगत्पते वृष्ट्यादिना तत्रैव जगत्पालकत्वादिति भावः; अतो भवाय सर्वदा क्षेमाय भव ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विश्रम्भवर्जितैः विश्वासवर्जितैः ॥ १७–२१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे शक्र! वो युष्माकमितःपरं मदनुस्मृत्यात्मकं भद्रमेव भवेत् बहुवचनं वरुणाद्यभिप्रायकं किन्तु ममानुशासनं क्रियतां किं तदनुशासनं यदस्माभिः कर्त्तव्यम्? तत्राह—स्तम्भवर्जितैरिति। अविनयरहितैर्युक्तैः सावधानैर्वो युष्माभिः विभक्तिव्यत्यय आर्षः स्वाधिकारेष्वेव स्थीयताम् ॥१७॥ सुरभिरप्यात्रजदित्युक्तं साऽऽगता किं चकारेत्यत्राह–अथेति। मनस्विनी तत्तद्वाञ्छितार्थप्रदानप्रवणरूपप्रशस्तमनस्का पयस्विनीति पाठे तदा प्रभूतपयस्का सुरभिः स्वसन्तानैः स्वापत्यैः सहागत्य गोपस्येव रूपमस्यास्तीति तथा तं साक्षादीश्वरं कृष्णमभिवाद्योवाच ॥ १८ ॥ तदेवाह—कृष्णकृष्णेति त्रिभिः। हे विश्वस्यान्तरात्मन्! विश्वस्य सम्भवो यस्मात्तथाभूत! हे महायोगिन्! युज्यते इति योगो धर्मः सोऽस्यास्तीति तथा स्वासाधारणकल्याणगुणशालिन्! वयं लोकनाथेन साक्षाद्भवतैव सनाथाः कृताः नाथाभासेनेन्द्रेण हता अपि त्वया रक्षितत्वात्त्वमेव नो नाथ इत्यर्थः ॥ १९ ॥ त्वमेवास्माकं परो मा न विद्यते यस्मात्तथाभूतं दैवतं हे जगत्पालक! गवां विप्राणां देवानां ये च साधवस्तेषां च नोऽस्माकं चाभ्युदयाय त्वमेवेन्द्रो भवेति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मयि मनसा युक्तैः अनित्यैश्वर्यादौ विस्रम्भवर्जितैः भवद्भिः स्वाधिकारेषु त्रैलोक्यरक्षणादिषु स्थीयताम् ॥ १७ ॥ अथ शब्दः कथारम्भे मनस्विनी शुद्धमनाः स्वसन्तानैः स्ववंशजातगोभिः सहेति शेषः ॥१८॥ विश्वात्मन्! विश्वव्यापिन्! सनाथाः कृताः स्म इति ॥ १९ ॥ नोऽस्माकं परमकम् अत्युत्तममभीष्टदैवम् इन्द्रः ईश्वरः देवानां देवजातीनां ये च साधवः ऋष्यादयः तेषां भवाय भद्रलक्षणाय श्रेयसे ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथानन्तरं स्वसन्तानैः सह तदीयगोधनरूपैस्तैः सहाभिवन्दित्वा तथोपामन्त्र्य वक्ष्यमाणसम्बोधनैरात्मन्यवधानं प्रार्थ्येत्यर्थः ॥ १८ ॥ एवं श्रीकृष्णव्रजगवीनामपि तादृशत्वं दर्शितं लोकनाथेनाऽपि भवता वयमपि सनाथा इत्यर्थः। पुनरुक्त्या वैशिष्ट्यप्राप्तेः अच्युतेति तत्रापि नित्यत्वं निश्चिनोति वैशिष्ट्ये हेतुः ॥१९॥ त्वं नः परमकं दैवमिति जगत्पतेरिति यद्यपि जगत्पतित्वं तथापीति पूर्ववत् गवेन्द्रत्वेऽपि विप्रादीनामभ्युदयः "गोभ्यो यज्ञाः प्रवर्त्तन्ते गोभ्यो देवाः समुत्थिताः। गोभिर्वेदाः समुद्गीर्णाः स षडङ्गपदक्रमाः" इति श्रुतेः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

सुरभिर्वदति—कृष्ण कृष्णेत्यादि; हर्षोत्कर्षेण वीप्सा। विश्वेषामात्मन्! विश्वस्य विष्णोरपि सम्भव! 'विश्वं विष्णुः' इत्युक्तेः। हे अच्युत अव्यय! भवता वयं सनाथाः। कीदृशेन? लोको ज्ञानम्, सर्वे दर्शनार्था ज्ञानार्थाः, ज्ञानस्य नाथेन ज्ञानप्रदत्वात् ॥ १९ ॥ अपि च त्वं नः परमकं परमानन्दः, त्वं नो दैवम्, त्वं न इन्द्रः परमेश्वरः, इति परमैश्वर्ये। हे जगत्पते! गोविप्रदेवानां भवाय स्वस्तये भव; न केवलं तेषामेव ये च साधवस्तेषामपि ॥ २० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

त्वं नः परमकं दैवमित्यादि। परमं कं सुखं यस्मात् तत् परमकमित्याह—(भा० १०।२८।७) "ब्रह्मणे परमात्मने" तयोरपि तद्वैभवत्वात् ॥ (२०–२८)

इति सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

व इति वरुणाद्यभिप्रायेण युक्तैरप्रमत्तैः स्तम्भवर्जितैर्निरहङ्कारैः स्थीयतामन्यथा पुनरपि दण्डं प्राप्स्यतीति भावः। अत्र पुनस्ते स्तम्भो न भविष्यतीति भगवता नोक्तमत एव परिजातहरणेन पुनस्तम्भोऽस्य भविष्यतीति तादृशलीलासिद्ध्यर्थमिति ज्ञेयम् ॥ १७ ॥ स्वसन्तानैर्व्रजस्थैर्गोभिः सहेति प्रकृत्या अपि तस्या अप्राकृतासु तासु कृष्णपरिकरभूतासु स्वसन्तानाभिमानस्तासां सुरभिवंशोद्भूतत्वात् यथा चन्द्रवंशोद्भूते कृष्णे प्राकृतस्यापि चन्द्रस्य स्वसन्तानाभिमानः उपामन्त्र्य सम्बोध्य ॥ १८ ॥ कृष्णकृष्णेति हर्षेण द्वित्वं महायोगिन्निति योगबलेनैव गोवर्द्धमुद्धृत्य मत्सन्तानानित्वमरक्ष इति भावः। भवता सनाथा इति मत्सन्तानात् जिघांसुना इन्द्रेण नाथेनालमिति भावः ॥ १९ ॥ परमं कं सुखं यस्मात्तत् अतस्त्वमेवास्माकमिन्द्रो भव जगत्पते! इति तव जगत्पतित्वेऽपि सम्प्रति गोपजातित्वात् गोपत्वेऽपि इन्द्र मखमर्हित्वादिन्द्रपराभावकत्वाच्च त्वेन्द्रत्वमुपयुक्तमेवेति भावः। ये चान्ये साधवस्तेषाञ्च ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे शक्र ! वः युष्माकं भद्रमेवातः परं भवतु बहुवचनं वरुणाद्यभिप्रायेण अतः गम्यताम् युक्तैः सावधानैः स्तम्भवर्जितैर्निर्गर्वैः वो युष्माभिः स्वाधिकारेषु स्थीयताम् हे भगवन् । त्वत्सेवार्थमिहैव वासो युक्तः अतः आह क्रियतां मदनुशासनमिति । यस्मिन्नधिकारे मया नियुक्तस्तत्पालनमपि मत्सेवैवेति भावः ॥ १७ ॥ स्वसन्तानैः स्वापत्यैः सह अभिवन्द्य कृष्णकृष्ण महायोगिन्नित्याद्युपामन्त्र्य अभिषेकार्थमाह ॥ १८ ॥ सनाथाः कृताः इन्द्र क्रोधाद्रक्षिता इत्यर्थः ॥१९॥ नोऽस्माकं गवादीनां भवायाभ्युदयाय हे जगत्पते ! त्वमिन्द्रो भव यतस्त्वमेव नः परमं दैवम् ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे शक्र गम्यतां ते भद्रमस्तु मेऽनुशासनं क्रियताम् । सर्वान्सुपर्वण एतद्द्वाराऽनुशास्ति स्वाधिकारे स्वस्वाधिकारेषु युक्तैर्मन्मानससमेतैः स्वर्गादयः स्थिरा इति विश्वासवर्जितैः स्थीयतां विश्रम्भो वर्जितो मह्यं दत्तो मयि स्थापित इति यावत् यैस्तैरिति वा । यथोक्तम् । परमावर्जते न इत्यृग्भाष्यटीकादिषु । परमावर्जते नः । ददाति त्यागार्थत्वाद्ददातीति । वृजलीत्याग इति कविकल्पद्रुमे पठितत्वेन वृजेस्त्यागार्थत्वादिति ॥ १७ ॥ अथ वासववासुदेवसंवादानन्तरं सुरभिरागता सा किमकरोदित्यतस्तदारम्भो वाऽथशब्दः । मङ्गलानन्तरारम्भप्रश्नेत्यमरः । मनस्विनी प्रशस्तचित्ता । सुरभिरभिवन्द्य कृष्णं स्वसन्तानैर्गोभिः सहोपामन्त्र्यालोच्य गोपरूपिणमीश्वरं प्रत्याह ॥ १८ ॥ विश्वात्मन् जगत्स्वामिन् महान्योगोऽस्यास्तीति महायोगिन्नणिमादिसिद्धिसम्पन्न विश्वसम्भव जगदुत्पादक वायुजनक वा हे अच्युत लोकनाथेन भगवता वयं सनाथास्त्वदभिन्ननाथसहिता इत्यर्थः ॥ १९ ॥ त्वं नः परमकं पूर्णसुखमत्युत्तमं वा दैवमिष्टं हि जगत्पते त्वं न इन्द्रः स्वामी ये च साधवस्तेषामृत्यादीनां गावश्च विप्राश्च तेषां भवाय श्रेयसे भव ॥ २० ॥

श्रीसुबोधिनी

अतस्त्रैलोक्यमवशिष्टमस्तीति तदर्थं गच्छेत्याह **गम्यता**मिति, अत्र शिक्षामात्रमेव ज्ञापनीयं, तदल्पेनापि भवतीति न सर्वैश्वर्यभङ्गः, तदाह **शक्र भद्रं व** इति, इन्द्रत्वमग्रे स्वास्थ्यं च प्रयच्छति, अन्यथा भक्तिर्वा तन्नाशयेत् भक्तापकारित्वात् भगवद्वाक्यात् **तु न नाशः**, अग्रे मोहाभावायाह **क्रियतां मेनुशासन**मिति, मदाज्ञाकरणे न मोहः स्यादिति, इन्द्रद्वारा सर्वानेवाज्ञापयति प्रधानत्वात् **स्वाधिकारेषु स्थीयतां** वो युष्माकमेव सम्बन्धिषु, यत्र यस्याधिकारः स तत्र तिष्ठत्वित्यर्थः, युक्तैरित्याज्ञायां योजितैः परं तत्रापि **स्तम्भो** मास्तु, अनम्रतयाज्ञापि न कर्तव्या, न हि **कृतिमात्रेण भगवांस्तुष्यत्यपि तु नम्रत्वसहितया,** एवमाज्ञापितोपि पूजां कर्तुं विलम्बमानो जातः ॥ १७ ॥ एवमिन्द्रप्रसादमुक्त्वा कामधेन्वाः प्रसादार्थं तदभिषेकः प्रस्तूयतेथेति, अयमभिषेको नेन्द्राद्यभिषेकवत् स्वतन्त्रतया कर्तुं शक्यते भगवतो हीनभावात् प्रार्थनया तु कर्तुं शक्यो हीनभावेनैव लीलायाः क्रियमाणत्वादतः प्रार्थनार्थमादौ स्तोत्रं कृतवतीत्याहाथेति, अथेन्द्रवाक्यानन्तरं **सुरभिः** कामधेनुः **कृष्णमभिनन्द्य** साधु गोरक्षा कृतेन्द्रश्च साध्वनुगृहीतोयमप्यस्मत्पुत्रप्राय इति, स्वयमपि **मनस्विनी** महामानवती सम्मानपात्रमतो भगवांश्चेन्न मानयेत् मत्क्रियमाणभभिषेक नाङ्गीकुर्यात् तदा न जीविष्यामीतिनिर्बन्धयुक्ता सर्वैरत्रार्थे निर्बन्धः कारणीय इति **स्वसन्तानैर्गोभिः सहोपामन्त्र्य** निकटे सम्मन्त्रणं कृत्वाह य इन्द्रोपकरोति सोस्माकमिन्द्रो मा भवतु न हि वयं भवानिव निरभिमाना यतो **वयं मनस्विन्यः**, ननु कथमेवं धाष्ट्र्यं कर्तुमिच्छसि न हि सर्वेश्वर इन्द्रो भवितुमर्हसि, तत्राह **गोपरूपिण**मिति, स ह्यस्मान् पाति लोकवत् पालकास्तूपसर्जनाभूताः यत्र स्वत एतावदवलम्बते तत्रास्मदुक्तमैश्वर्यं कथं न स्वीकरिष्यति ॥ १८ ॥ किञ्च पूर्वमप्ययं इन्द्र ईश्वरो यज्ञ इन्द्रो जात इत्यैश्वर्यमेतदीयमेवेत्यतो नास्माभिरलौकिकं किञ्चित् सम्पाद्यते किन्तु विद्यमानमेव लोके प्रकटीक्रियतेतो युक्तमेवाभिषेचनमिति विज्ञापयितुं स्तुतिमाह **कृष्ण कृष्णे**ति द्वाभ्यां, आदरे वीप्सा, योग्युपायविन् **महायोग्य**लौकिकोपायकर्तान्यदेव करोत्यन्यत् सम्पद्यत इन्द्रेण क्लेशं प्रापित एवं ज्ञातोपीन्द्रमेव क्लेशं प्रापितवान्, अथ वा **महायोगिनो** लीलार्थं प्रवृत्तस्य न किञ्चिदनुचितमुचितं वात इन्द्रस्वमपि गृह्यतामित्यभिप्रायः, किञ्च **विश्वात्मा** त्वं, अनेन प्रमेयोत्कर्ष उक्तः, पूर्वेणैव साधनोत्कर्षः, **विश्वस्यापि सम्भवो** यत्रेतिप्रमाणोत्कर्षः, फलोत्कर्षं वक्तुं तस्य स्वस्मिन् पर्यवसानमाह, **भवतैव लोकनाथेन** सर्वलोकरक्षकेण **वयं सनाथा** न त्विन्द्रेण घातकत्वात्, किञ्च प्रतिमन्वन्तरं भिन्न एवेन्द्रोतोव्यवस्थितत्वात् कालपरिच्छेदात् स्वभावतस्तस्य जीवस्यापि नियम्यत्वात् **भवानेव लोकनाथः**, अत एव **वयं सनाथाः**, यो हि जीवयति स एव नाथः "स वै पतिः स्यादि"तिन्यायेन, भवानच्युतश्च ॥ १९ ॥ एवं नाथत्वमुपपाद्य देवत्वमुपपादयति त्वं न इति, त्वमेव नोस्माकं गवां परममुत्कृष्टं दैवमस्माकं भाग्यरूपोपि त्वमेवास्माकं नियामकश्च, अस्मासु क्रीडतीन्द्रात् पृथक्कृत्यास्मान् विजयतेस्माभिर्व्यवहरत्यस्माकं कान्तिरतत एवास्माभिः स्तूयते चास्माकं च तत एव सौन्दर्यं गतिरपि सर्वातो भवानेव देवः, किञ्च न केवलं देवमात्रं किन्तु देवेन्द्रोपि भवानेव त्वं न इन्द्र इति, परमैश्वर्यं नान्यास्यास्ति जगत्पतित्वाभावात्, यो ह्यन्तर्बहिर्नियामकः स **पतिरतो जगत्पतित्वात्** त्वमेन्द्रोतो **गोविप्रदेवानां** हविर्मन्त्रहविर्भुजां **भवायोद्भवाय भव**

यज्ञपरिपालको **भव**, एवं पूर्वकाण्डानुवर्तिनां तत्प्रतिपाद्यधर्मस्योद्भवजनकत्वं प्रार्थयित्वा निवृत्तिपराणां भगवद्भक्तानां **चोद्भवाय भवेति** प्रार्थयति **ये च साधव** इति, तेषामपि **भवाय भवे**तियोजना ॥ २० ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

गम्यतामित्यत्र **भक्तिर्वे**ति भक्तनिष्ठा भक्तिस्तदपकारिणस्तन्नाशयेदित्यर्थः ॥ १७ ॥ **गोपरूपिण**मित्यत्र पालकानां पाल्योपसर्जनत्वे दृष्टान्तमाहुः **लोकव**दिति, सप्तम्यर्थे वतिः, यथा लोके पालकाः पाल्यानुगास्तथा लीलायामपीत्यर्थः, **एताव**दिति उपसर्जनीभूतं पालकत्वमित्यर्थः, ऐश्वर्यमिति स्वामित्वमित्यर्थः ॥ १८ ॥ **कृष्ण कृष्णे**त्यस्याभासे **इति विज्ञापयितुमिति** इतिहेतो- र्विज्ञापयितुमित्यर्थः, व्याख्याने **प्रमाणोत्कर्ष** इति विश्वाधारस्य श्रुतिप्रतिपाद्यत्वादितिभावः, **न त्विन्द्रे**णेति लोकनाथेनेतिशेषः, **भवत्पदं लोकनाथ**विशेषणं, भवता लोकनाथेन न त्विन्द्रेण लोकनाथेनेत्यर्थः, लोकनाथपदस्य भवत्पदविशेषणत्वेन व्याख्यानमपि सम्भवतीत्याहुः **किञ्चे**ति, यतो भवानेव लोकनाथो न त्विन्द्रादिरतो **भवतैव सनाथा** इति हेतुगर्भं विशेषणं ज्ञेयम् ॥ १९ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

गम्यतां शक्रेत्यत्र **भक्तिर्वा तन् नाशयेत्** इति गोपानां भगवद्भक्तिः सा भक्तापकारिण इन्द्रस्य ऐश्वर्यादि नाशयेदित्यर्थः ॥१७॥ **अथाह सुरभि**रित्यस्य विवृतौ **मनस्विनी**पदतात्पर्यमाहुः **मत्क्रियमाणमभिषेक**मित्यारभ्य **निर्बन्धयुक्ते**त्यनेन ॥१८॥ **कृष्ण कृष्ण महायोगिन्नि**त्यस्य विवृतौ **अनेन प्रमेयोत्कर्ष** इति 'विश्वात्म'पदेन प्रमेयोत्कर्ष उक्त इत्यर्थः, **पूर्वेणै**वेत्यादि 'महायोगिन्नि'त्यनेन **साधनोत्कर्षः** साधनेषु योगस्य मुख्यत्वात्, **विश्वस्यापि सम्भव** इत्यादि 'विश्वसम्भवे'त्यनेन **प्रमाणोत्कर्षः**, विश्वमध्ये वेदस्यापि सत्त्वाद् विश्वोत्पादकत्वेनैव वेदोत्पादकत्वेन प्रमाणोत्कर्ष इत्यर्थः, फलोत्कर्षमित्यादि "भवता लोकनाथेन वयं सनाथा" इत्यनेन फलोत्कर्ष उक्तः ॥ १९ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

त्वं नः परमकं दैवमित्यत्र **अतो गोविप्रदेवानां हविर्मन्त्रहविर्भ**जामितिकारिकार्थं, "भवाय भव गोविप्रदेवानां ये च साधव" इतिमूले गवां हविर्धानीत्वात् विप्राणां मन्त्राधारत्वात् देवानां हविर्भोक्तृत्वात् तेषामेव कुशलप्रार्थना कृतेतिभावः ॥२०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे शक्र ! **स्वर्गं गम्यताम्**, गत्वा **च मे** अनुशासनं क्रियताम् । तेन वो युष्माकं भद्रमेव भविष्यति । 'किं तदनुशासनम् ? इति तत्राह—स्थीयतामिति । स्तम्भवर्जितैः गर्वरहितैः युक्तैः स्वकर्तव्ये सावधानैर्वो युष्माभिः स्वाधिकारेषु स्थीयतामित्यन्वयः । बहुवचनं वरुणाद्यभिप्रायेण ॥ १७ ॥ एवमिन्द्रकृतस्तुत्यादिकं निरूप्य सुरभिकृत्यमाह–अथेति । इन्द्रं प्रति भगवदाज्ञानन्तरं स्वसन्तानैः स्वापत्यैर्गोभिः सह सुरभिः कृष्णमामन्त्र्य सम्बोध्य साधुरक्षा कृतेत्यभिनन्द्य चाहेत्यन्वयः । तस्य स्तुतियोग्यत्वं सूचयन् विशिनष्टि–गोपरूपिणमीश्वरमिति । सुरभेरपि तत्स्तुतिकर्तृत्वयोग्यतामाह—मनस्विनीति । प्रशस्तमनस्का ॥ १८ ॥ सुरभिवाक्यमाह । सम्बोधनान्याह - कृष्ण कृष्णेति । वीप्सा आदरार्था । जगदुपादानत्वं सूचयन्त्याह—विश्वात्मन्निति । निमित्तकारणतां सूचयन्ती सम्बोधयति–विश्वसम्भवेति । एवं सति विकारित्वमाशङ्क्य सम्बोधयति—अच्युतेति । 'एतत् कथं सम्भवति ? ' इत्याशङ्क्य सम्बोधयति–महायोगिन्निति । अचिन्त्यशक्तियुक्त इत्यर्थः । भवता वयं सनाथा रक्षिताः । 'युक्तं च तवैतत्' इत्याशयेनाह—लोकनाथेनेति ॥ १९ ॥ हे जगत्पते ! यतस्त्वं नोऽस्माकं परमकं सर्वोत्कृष्टं दैवम्, अतस्त्वं गवां विप्राणां देवानां ये चान्ये साधवस्तेषां च नोऽस्माकं भवाय अभ्युदयायेन्द्रो भवेत्यन्वयः ॥ २० ॥

अन्वितार्थप्रकाशिका

गम्यतामिति ॥ हे शक्र ! स्वर्गे गम्यतां गत्वा च मे अनुशासनं क्रियतां तेन वो युष्माकं भद्रमेव भविष्यति । अतः स्तम्भवर्जितैः गर्वरहितैः युक्तैः स्वकर्तव्ये सावधानैर्वो युष्माभिः स्वाधिकारेषु स्थीयताम् ॥ १७ ॥ अथेति ॥ अथ मनस्विनी प्रशस्तमनस्का सुरभिः स्वसन्तानैर्गोभिः सह गोपरूपिणमीश्वरं कृष्णमुपामन्त्र्य संबोध्य साधु रक्षा कृतेत्यभिनन्द्य चाह स्म । अभिवाद्येत्यपि पाठः ॥ १८ ॥ हे कृष्ण कृष्णेति सम्बुद्धयः । इन्द्रेण हता अपि लोकनाथेन भवता वयं सनाथाः रक्षिताः ॥ १९ ॥ त्वमिति ॥ हे जगत्पते ! यतस्त्वं नोऽस्माकं परमकं सर्वोत्कृष्टं दैवमतस्त्वं गवां विप्राणां देवानां ये चान्ये साधवस्तेषां च नोऽस्माकं भवाय अभ्युदयायेन्द्रो भव ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वो युष्माभिः अत्र बहुवचनं तु वरुणाद्यभिप्रायेण ममानुशासनं शिक्षाक्रियतां युक्तैः मयायोजितैः गर्ववर्जितैः स्वाधिकारेषु इंद्रत्ववरुणत्वादिमात्वेषुस्थीयतां ॥ १७ ॥ अथेदानीं मनस्विनीधैर्यचिता ॥ स्वसंतानैः अन्यगोभिः सह उपामंत्र्य विचार्य ईश्वरमाह ॥१८॥ विश्वस्य संभवः कारणं तत्संबुद्धिः ॥ १९ ॥ नोऽस्माकं विप्रादीनां ये साधवः संतस्तेषां च भवाय वृद्धये । त्वमेव इंद्रो भव ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गम्यतामिति ।। हे शक्र, वो युष्माकं, भद्रं मदनुस्मृत्यात्मकं मङ्गलमेव, भवेत् । गम्यतां स्वपदं प्रति गमनं क्रियताम् । बहुवचनं वरुणाद्यभिप्रायकम् । किं तु मे मम, अनुशासनं क्रियताम् । यदस्माभिः कर्त्तव्यं किं तत्त्वदनुशासनं तत्राह । स्तम्भवर्जितैरविनयरहितैः निरहंकारैरित्यर्थः । युक्तैः सावधानैः, वो युष्माभिः, विभक्तिव्यत्यय आर्षः । स्वाधिकारेषु, स्थीयताम् ।। १७ ।। सुरभिरप्याव्रजदित्युक्तं साऽऽगता किं चकारेत्यत्राह ।। अथेति ।। अथ, मनस्विनी तत्तद्वाञ्छितप्रदानप्रवणतारूपप्रशस्तमनस्का, यशस्विनीति पाठे प्रभूतयशस्का, सुरभिः स्वसंतानैः स्वापत्यैः सह, आगत्य, गोपस्येव रूपमस्यास्तीति तथा तं, ईश्वरं साक्षात्परमेश्वरं, कृष्णं अभिवन्द्य, उपामन्त्र्य हे कृष्णेति संबोध्य, आह ।। १८ ।। तदेवाह कृष्णेति त्रिभिः ।। कृष्णेति ।। हे कृष्ण हे कृष्ण हे विश्वात्मन् विश्वस्यान्तरात्मभूत, विश्वस्य संभव उत्पत्तिर्यस्मात्तथाभूत, युज्यते इति योगो धर्मः सोऽस्यास्तीति योगी महांश्चासौ योगी च महायोगी तत्संबोधनम् । स्वासाधारणकल्याणगुणशालिन्नित्यर्थः । हे अच्युत, वयं लोकनाथेन, भवता, साक्षात् परमेश्वरेण त्वयैव, सनाथाः कृताः । नाथाभासेनेन्द्रेण हता अपि त्वया रक्षितत्वात्त्वमेवास्माकं नाथ इत्यर्थः ।। १९ ।। त्वमिति ।। हे जगत्पते, त्वं एव नोऽस्माकं, परः मा न विद्यते यस्मादिति परमं परममेव परमकं, दैवं दैवतं, भवसि । अतः, गावश्च विप्राश्च देवाश्च तेषां ये साधवस्तेषां च, नोऽस्माकं, भवायाभ्युदयाय, त्वमेव इन्द्रः भव ।। २० ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गम्यतामिति : १०.२७.१७.

अनुशासनमादधाति यो मे सुखसन्तानसमृद्धिमान् स एव । भवितेह परत्र लब्धवर्णो मघवन् जात्वपि नाऽघवांश्च भूयात् ।।५२।।
आस्तामेतन्मद्गिरीन्द्रस्त्वमेवासीति स्वस्थः स्वाधिकारं भजस्व । गोपत्राता मद्गिरीन्द्रोऽयमन्यो मत्संकल्पाद् भूभृदीड्यत्वमेतु।।५३।।

प्रसन्नगम्भीरगिरोल्लसन्तं वासस्तडिद्वन्तमगाधसारम् ।
सुखे स्थितं वीक्ष्य स कृष्णमेघं सहस्रनेत्रो मुमुदे क्षमं तत् ।। ५४ ।।

अथाह सुरभिरिति : १०.२७.१८.

यदिहागोनिवासेऽस्मिन् गोपत्वं प्रभुणाऽर्पितम् । वीक्ष्य गौस्तद् दृढीकर्तुं सुरभिस्तत्पुरोऽभवत् ।। ५५ ।।

यन्नाम्ना व्यवहारभागहमिहास्म्येनं वसन्तं पुरः सन्तं माधवमुच्छ्रितागमफलं सामोदगर्भाशयम् ।
भूयो मन्दमरुद्वरं यदि परं नार्चामि तद्धिक् पदं लोके स्यामिति सा विचिन्त्य सुरभिस्तत्स्तोत्रजातादरा।। ५६ ।।

कृष्णेति : १०.२७.१९.

हस्ताब्जैर्मृदुलैः शरीरकषणं पृष्ठेषु संमार्जनं यद्धम्बारवतः प्रतिक्षणमुपान्ते स्वैरमाकारणम ।
स्वग्रीवोपरि यद्गलानुवहनं लब्धं यया सैव गौः सौभाग्यस्य पदं सुरभ्यपि दरिद्राऽस्मिन् प्रभो कर्मणि ।। ५७ ।।

तदा तु सुरभीभवाभ्यनघ सार्थनाम्नी यदि मयीश सुरभीभवेत्तव कराब्जसंलालनम् ।
भवामि सुरसालताधिकपदा तदा ते प्रभो भवामि तरसालसत्सदयवीक्षणैर्लक्षिता ।। ५८ ।।

स्वतश्चरित्रं तव विस्मयावहं युक्तं भवत्यन्यजनस्मयापहम् । मुदापरागस्थितिना त्वयेश चित्रं तु यन्नाद्रियते परागः ।। ५९ ।।

गोगोरक्षकरक्षणाय भगवाञ्जातोऽस्त्यजोऽपि व्रजे श्रीशैवं विशदं वचो विधिमुखादश्रावि विश्रम्भतः ।
तत्संप्रत्यनुभूतमेव सकलं गोवर्द्धनोद्धारतस्तन्मामिन्द्रममुं च पाहि यदहं गौरेष गोपः प्रभो ।। ६० ।।

त्वं न इन्द्र इति : १०.२७.२०.

एकखेटकपतावखिलोर्वीनेतृशौर्यविधिरीश न योग्यः । एवमाशयहृदित्यवदत् सा त्वं गवामसि सदैव महेन्द्रः ।। ६१ ।।

कृष्णप्रिया

राजन् इन्द्र ! अब निश्चिंत बनकर इन्द्रलोक में जाइए। तुम्हारा कल्याण हो। आप सब दिक्पाल एवं लोकपाल पद मद का एवं सम्पट् मद् का त्यागकर, मेरी आज्ञा का अनुशीलन करते करते निज निज कार्य करते रहो ।।१७।। श्री शुकाचाय जी ने कहा—राजन् ! इन्द्र स्तवन एवं भगवदादेश के अनन्तर मनस्विनी कामधेनु ने अपने सन्तान परिवार के साथ गोपाल कृष्ण भगवान के समीप आकर, प्रभुजी का आदर एवं अभिनन्दन करके कहा ।। १८ ।। श्री कामधेनु ने कहा—हे श्रीकृष्ण हे प्यारे कृष्ण ! हे महायोगिन् ! हे विश्वात्मन् ! हे विश्व के सर्जक ! हे विश्वनाथ ! हे अच्युत ! आप से ही हम सब सनाथ है ।। १९ ।। हे भगवन् ! आप ही हमारे परम सौभाग्य हो, आप ही हमारे परम दैवत हो ! हे जगन्नाथ ! आप ही हमारे इन्द्र हो। आप ही हमारे सर्वस्व हो इसलिये, आपने गौओं, विप्रों, देवों और भक्तजनों की रक्षा किया एवं अभ्युदय कर रहे हो ।। २० ।।

इन्द्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा [1]नोदिता वयम् । अवतीर्णोऽसि विश्वात्मन् भूमेर्भारापनुत्तये ॥ २१ ॥

श्रीशुक उवाच

एवं कृष्णमुपामन्त्र्य सुरभिः पयसाऽऽत्मनः । [2]जलैराकाशगङ्गाया ऐरावतकरोद्धृतैः ॥ २२ ॥
इन्द्रः सुरर्षिभिः साकं [3]प्रहितो देवमातृभिः । अभ्यषिञ्चत दाशार्हं गोविन्द इति चाभ्यधात्[4] ॥ २३ ॥
तत्रागतास्तुम्बुरुनारदादयो गन्धर्वविद्याधरसिद्धचारणाः ।
जगुर्यशो लोकमलापहं हरेः सुराङ्गनाः संननृतुर्मुदान्विताः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—हे विश्वात्मन् ! ब्रह्मणा नोदिता वयम् त्वाम् इन्द्रम् अभिषेक्ष्यामः, हे विश्वात्मन् ! भूमेः भारापनुत्तये, अवतीर्णः असि ॥ २१ ॥ सुरभिः एवम् कृष्णम् उपामन्त्र्य, आत्तनः पयसा, ऐरावत करउद्धृतैः आकाशगङ्गाया जलैः अभिषेचयामासौ ॥ २२ ॥ देवमातृभिः सुरर्षिभिः साकम् प्रहितः इन्द्रः दाशार्हं अभ्यषिञ्चत, च गोविन्दः इति अभ्यधात् ॥ २३ ॥ तुम्बुरुनारदादयः गन्धर्व-विद्याधर-सिद्ध-चारणाः, तत्र आगताः, हरेः लोकमलापहम् यशः जगुः मुदान्विताः सुराङ्गनाः सन्ननृतुः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु भवतामिंद्रोऽस्तीति चेदत आह । इंद्रमिति । अलं पुरंदरस्येंद्रतयेत्यर्थः । ननु देव एवेंद्रो भवति कथमहं भवेयमिति चेदत आह । अवतीर्णोऽसीति ॥ २१ ॥ सुरभिरात्मनः पयसाऽभ्यषिंचदिंद्रश्चाकाशगंगाया मंदाकिन्या जलैरभ्यषिञ्चत् ॥ २२ ॥ देवमातृभिरदित्यादिभिर्देवैर्मातृभिश्चेति वा । गाः पशून् गां स्वर्गं वा इंद्रत्वेन विंदतीति कृत्वा गोविंद इत्यभ्यधात् नाम कृतवानित्यर्थः ॥ २३–२४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नन्वेकेंद्र सत्त्व इन्द्रान्तरकरणमनुचितमिति शंकते—नन्विति । अतः अत्र । इत्यर्थ इति । पुरमत्र गोकुलग्रामादि गोसमूहो वा, तद्दारकस्य नाशकस्येंद्रत्वं न शोभते परमैश्वर्ययुक्तस्यैवेंद्रत्वादिति भावः । इंद्रमखविमर्दित्वादिंद्रपराभवकर्तृत्वात्तवैवेंद्रत्वमुचितमिति भावांतरम् । ननु स्वातंत्र्येणैव कस्यचिदाज्ञया वेत्याह—ब्रह्मणेति । स्वापराधभीतेंद्रेण ब्रह्मा स्वरक्षार्थं निवेदितस्तेनाहं हे सुरभे त्वत्संतानपालकस्य त्वमतिप्रीतिपात्र्यस्यतस्त्वमिंद्रापराधं क्षमापयस्वेंद्रत्वे चाभिषिंचेत्युक्ता । किं च ब्रह्मांडकोटींद्रस्य ब्रह्मरुद्रादिदुर्लभांघ्रिसेवस्य तव गवेंद्रत्वेनाभिषेके न कश्चिदुत्कर्षः किं त्वस्माकमभिषेक एव स भावीत्याह—अवतीर्णेति यदि त्वं नावतरिष्यस्तर्ह्यस्माकमिदं भाग्यं कथमभविष्यदिति भावः । स्वस्य मानुष्यं संभावयन्नाशंकते—नन्विति । हे विश्वात्मन् सर्वनियंतः ॥ २१ ॥ एवम् उक्तरीत्या । उपामंत्र्य संप्रार्थ्य । पयसा क्षीरेण । इंद्रश्चाभ्यषिंचतेति द्वयोरन्वयः । दाशार्हम् दशार्हकुलमुख्यम् । यद्वा—दाशं सुखादिदानमर्हतीति तथा तम् । तथा च श्रुतिः—“ऋषभं मासमानानां सपत्नानां विषासहिम् हंतारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥” इति । विषासहिं सहनसमर्थम् ॥ २२ ॥ ननु देवान् विहाय मातर एवागतास्ते कथं नागता इत्याशंकापनुत्तये आह—देवैर्मातृभिश्चेति । विंदति लभते । ‘विद्लृ–लाभे’ इति शब्देनोक्तत्वात् । ‘क्रमादमुं नारद इत्यबोधि’ इतिवद्गोविंद इति । इत्यर्थ इति । ‘अभिपूर्वस्तु भाषणे’ इति व्याड्युक्तेः । अभ्यधात् कथितवान् । कथनं च नाम्न एवेति भावः ॥ २३ ॥ तत्र अभिषेकस्थले गोवर्द्धनप्रदेशे तत्र शक्रकुंडमिति वाराहे गोविंदकुंडमिति प्रसिद्धेः । आगता न तु तैरिंद्राज्ञापेक्षितेति भावः । तुंबुरोनारदपिनिर्देशस्तु नारदादपि तस्य गाने ज्येष्ठत्वात्, तल्लिंगपुराणे व्यक्तम् । नारदश्चायं नित्यपार्षदः गरुडादीनां वैनतेयादिरिव भगवदवतारतत्पार्षदप्रवरश्रीनारदस्यैवावतारो गीतादिकौतुकेन गंधर्वादिषु वर्त्तते । आदिपदाच्चित्ररथादयः । यद्वा—तुंबुरुनारदावादावग्रतो येषां ते इति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्प्रकारमेव भक्तिविशेषेण सनिश्चयं विज्ञापयति—इन्द्रमिति, स्वभावत एव नोऽस्माकम् इन्द्रं त्वामधुना मनुष्यलोके प्रचाराय केवलमभिषेक्ष्यामः । ननु, तर्हि इन्द्राद्याधिकारदातुर्ब्रह्मणोऽवमानः स्यात्तत्राह—ब्रह्मणेति । अतो ब्रह्मवाक्यापेक्षयापि

---

[1] चोदिता–वीर विज. । [2] जलैश्चा–विज. । [3] नोदितो–श्रीधर. वंशी. जीव ; प्रेरितः–विश्व. ; चोदितः–वीर. विज. ।

[4] अहमिन्द्रो हि देवानां त्वं गवामिन्द्रतां गतः । गोविन्द इति लोके त्वां गास्यन्ति भुवि मानवाः ॥

म. पु. मूले अधिकः ।

त्वया सम्मतिः कार्य्येति भावः । ननु, तर्हि स एव कथं नागतः तत्राह—वयमिति । अत्रास्माकमेवाधिकारः त्वदीयगोवंशस्यादिमातृत्वेन तत्रान्तरङ्गत्वात् तस्य तु प्रपञ्चाधिकारित्वेन बहिरङ्गत्वादिति भावः । अतो बहुत्वमप्यात्मनो बहुमानेन । यद्वा, वत्सलतया स्वसङ्गागतमिन्द्रं तदीयांश्च कृतार्थयितुं बहुत्वेन तान् सर्वान् सङ्गृह्णाति ततश्च कृतापराधेन स्वेन महापराधिन इन्द्रस्याप्यपराधक्षमापणे पूर्ववदपराधशङ्कया ब्रह्मा नागमदिति ज्ञेयम् अवतीर्णासि इति तैर्व्यञ्जितम् । यद्वा, नन्वहं श्रीगोपनन्दनः कथं युष्मद्दैवम् ? ततो यूयं ब्रह्माप्यसमीक्ष्यकारिण एवेत्याशङ्क्य न मुहुरस्मान् प्रतारयेत्याह—अवेति । श्रीमति परमगोलोके विराजमानो नित्यमस्मत्परमदैवतरूप एव त्वम् अवतीर्णोऽसि श्रीनन्दादिनिजपरिकरैः सह केवलं भूम्यां प्रकटोऽसि न तु जीववज्जातोऽसीत्यर्थः । ननु, भूभारापनोदेन मम किन्तत्राह—विश्वात्मन्निति । अतो विश्वस्यापि स्थितिस्त्वत्त एव युज्यत इति भावः । तत्रैव “यथा तरोर्मूलनिषेचनेन” इत्यादिन्यायेन सर्वेषामेवात्र तवाभिषेके जायमानं सुखं तदर्थमवतीर्णेन भवताऽनुमोदनीयमेवेति व्यञ्जितम् ।। २१ ।। एवमिति युग्मकम् उपामन्त्र्य निजेन्द्रत्वस्वीकाराय प्रार्थ्येत्यर्थः । लज्जादिना श्रीभगवता साक्षादकृतेपि स्वीकारे “मौनं सम्मतिलक्षणम्” इति न्यायेन सुरभिः स्वयमेवाभ्यषिञ्चत् ।। इन्द्रः स्वयमप्रवृत्तः किन्तु तदभिषेकार्थमेव सुरर्षिभिः साकं तत्र साक्षादागताभिर्देवमातृभिः प्रेषितः यथा श्रीकृष्णोऽयं भगवान् कृपार्द्रचित्तः शरणागतवत्सलः विशेषतश्च तत्प्रियजनसङ्गत्या त्वमागतोऽसि समयोऽयमप्यतिप्रशस्तस्तस्मान्मा भयं कार्षीः महोत्सवं भक्त्या विधत्स्वेति अतस्तैरेव सहितोऽभ्यषिञ्चदित्यर्थः । ऐरावतस्य करेण कृत्वा रत्नकुम्भादिद्वारा उद्धृतैरानीतैः तदीयरत्नमयघण्टयेति विष्णुपुराणे तच्च गजेन्द्रद्वारा तद्विधानात् सद्यो वाञ्छिततीर्थजलाभाच्च गवामिन्द्रो गोविन्द्रः तत्पदेनैव गवेन्द्रताया वाच्यत्वात् “प्रीयान्न इन्द्रो गवाम्” इति तदर्थनिर्देशेन तन्नाम्नः सूचितत्वात् “इति गोगोकुलपतिं गोविन्दमभिषिच्य सः” इति वक्ष्यमाणाच्च पृषोदरादिपाठ इति दाशार्हमिति दाशार्हत्वेऽपि गोविन्दत्वमुत्कृष्टमित्यभिप्रेतम् ।। २२–२३ ।। ततश्च महोत्सवो जगदानन्दकरो वृत इत्याह—तत्रेति त्रिभिः । तस्मिन् शक्रकुण्डमिति श्रीवाराहतः गोविंदकुण्डमिति स्कान्दतः प्रसिद्धे श्रीगोवर्द्धनप्रदेशे आगताः सर्वत्र हेतुः मुदान्विताः अत इन्द्राज्ञापेक्षापि तैर्न कृतेति भावः । तुम्बुरोरादौ निर्देशः पूर्वं नारदोपि तस्य गाने ज्यैष्ठ्यात् तच्च लिङ्गपुराणे व्यक्तं श्रीनारदाश्चायं नित्यपार्षदप्रवरश्रीगरुडादीनां श्रीवैनतेयादिभिरिव भगवदवतारतत्पार्षदप्रवरश्रीनारदस्यैवावतारो गीतादिकौतुकेन गन्धर्वादिषु वर्त्तत इति आदिशब्दात् चित्ररथादयः यद्वा, तुम्बुरुनारदावादावग्रतो येषां ते गन्धर्वादयः लोकानां सर्वेषां मङ्गलं तद्भक्तौ दोषं मोक्षाभिसन्धिपर्यन्तम् ।। २४ ।।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्प्रकारमेव भक्तिविशेषेण सनिश्चयं विज्ञापयति–इन्द्रमिति । त्वदिन्द्रत्वेनास्माकं परमहितसम्पत्त्या स्वत एव विप्रादीनां दृष्टादृष्टहितसिद्धेः, धर्म्मादीनामस्मन्मूलकत्वात्, सर्वोपरिस्थितानामस्माकमिन्द्रत्वेन तव स्वत एव ऋषिदेवादीन्द्रत्वं सिध्यति, तेषां स्वत एव क्षेमसम्पत्तेः । ननु तर्हि इन्द्राद्यधिकारदातुः श्रीब्रह्मणोऽवमानः स्यात्तत्राह—ब्रह्मणेति । अतो ब्रह्मवाक्यापेक्षयापि त्वयात्र सम्मतिरेव कार्य्येति भावः । ननु तर्हि स एव कथं नागतः ? तत्राह––वयमिति । अत्रास्माकमेवाधिकारः, अन्तरंगत्वात्, न तु तस्य, बाह्यत्वादिति भावः । बहुत्वं श्रीभगवदभिषेकादात्मनो बहुमानेन निजसन्तानापेक्षया वा, यद्वा, वत्सलतया स्वसंगागतमिन्द्रं तदीयांश्च कृतार्थयितुम्, बहुत्वेन तान् सर्वान् संगृह्णाति, ततश्च पूर्ववदपराधशंकया ब्रह्मा नागमदिति ज्ञेयम्; अवतीर्णोऽसीति तैर्व्यञ्जितमेव, यद्वा, ननु मदिच्छयैव भवति, न तु ब्रह्मप्रेरणया, तत्राह—अवेति । त्वदभिषेके सति जगतां पापनाशेन पुण्यसम्पत्त्या च स्वत एव भूभारनाशः स्यादिति भावः, कुतः ? हे विश्वात्मन् (भा० ४।३।१४) ‘यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः’ इत्यादिन्यायेन तवाभिषेकोत्सवेन सर्वेषामेव स्वतो महोत्सवसम्पत्तेः, अतस्तवावतारप्रयोजनसुखसिद्ध्या सम्मतिरनुमीयत एवेति भावः ।। २१ ।। उपामन्त्र्य अनुज्ञाप्येत्यर्थः, लज्जादिना श्रीभगवता साक्षादकृतेऽपि स्वीकारे ‘मौनं सम्मतिलक्षणम्’ इति–न्यायेन, किंवा ब्रह्मप्रेरणबलेन निजभक्तिविशेषबलेनैव वा सुरभिः स्वयमेवाभ्यषिञ्चत्, इन्द्रस्तु महापराधेनान्तर्भयादिना श्रीभगवदन्तःप्रसादाक्षणेन च स्वयमप्रवृत्तः, केवलमिन्द्रस्नेहेनागताभिरन्तर्धानेन स्थिताभिः, किंवा, गोपीश्वरतीर्थे शकटभञ्जनानन्तरमिवाभिषेकार्थमेव तत्र साक्षादागताभिर्देवमातृभिरेव ‘श्रीकृष्णोऽयं भगवान् कृपार्द्रचित्तः शरणागतवत्सलो विशेषतश्च तत्प्रियजनसंगत्या अत्र तत्प्रियस्थाने त्वमागतोऽपि । समयाऽयमप्यतिप्रशस्तस्तन्मा भयं कार्षीः, महोत्सवं भक्त्या विधत्स्व’ इत्येवं प्रेरितः सन् सुरैर्ऋषिभिश्च सहितोऽभ्यषिञ्चदिति ज्ञेयम् । ततश्चागतस्यैरावतस्य करेण कृत्वा-रत्नकुम्भादिद्वारा उद्धृतैरानीतैः अन्यथा सद्यः परमपवित्रबहुलजलाप्राप्तेः, निजभक्तिविशेषप्रदर्शनासिद्धेर्वा । दाशार्हं यदुकुलेऽवतीर्णमपि, गोविन्द इति गोकुललीलासम्बन्धेनैव नाम चक्रे सुरभिरिन्द्रश्चेत्यर्थः । तथैव माहात्म्यविशेषस्य श्रीभगवत्प्रीतिविशेषस्य च सम्पत्तेः । हे देवेति श्रीपरीक्षित्सम्बोधनं वा, नरदेवत्वेन तत्त्वया बुध्यत एवेति, यद्वा, तत्प्रकारो ज्ञायत एवेति, किन्तद्विस्तारणेनेति भावः, यद्वा, श्रीभगवदभिषेकश्रवणात् प्रहर्षेण द्योतमानं तं दृष्ट्वा तथैव सम्बोधयतीति ।। २२–२३ ।। ततश्च महोत्सवो जगदानन्दकरो वृत्त इत्याह—तत्रेति त्रिभिः । तस्मिन् अभिषेके, किंवा श्रीगोवर्द्धने ‘शक्रकुण्डम्’ इति स्कान्दतः प्रसिद्धे स्थाने आगताः । तत्र हेतुः—मुदान्विताः, अत इन्द्राज्ञापेक्षापि तैर्न कृतेति भावः । तुम्बुरोनारदादौ निर्देशः पूर्वं नारदादपि तस्य गाने श्रैष्ठ्यात्, नारदस्य तु द्वारकायां श्रीरुक्मिण्याद्यनुग्रहत एव, तच्च लिंगपुराणे व्यक्तमेव । यद्वा, नारदोऽयं नित्यपार्षद श्रीगरुडा-

दीनां श्रीवैनतेयादिरिव भगवदवतारतत्पार्षदप्रवरश्रीनारदस्यैवावतारो गीतादिकौतुकेन गन्धर्वेषु वर्त्तत इति। एवं तुम्बुरुप्रमुखानां यथापूर्वं गाने श्रेष्ठ्यम्, आदिशब्दाच्चित्ररथादयः, यद्वा, तुम्बुरुनारदौ अग्रतो येषां ते गन्धर्वादयो लोकानां सर्वेषामलं कामक्रोधादिकमद्वैतवासनात्मकं वा, अत एव हरेर्मनोहरस्य सर्वदोषहरस्येति वा, सम्यक् ननृतुरिति विद्याधराः सुवाद्यं चक्रुरित्यायातमेव ॥ २४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

ऐरावतकरोद्धृतैः ऐरावतकरगतघटसमाहृतैः प्रमाणान्तराविरोधात् ॥ २२–२५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, गवादीनामयमिन्द्रोऽस्त्येवेत्यत्राह—इन्द्रमिति। तत्तदधिकारप्रदेन ब्रह्मणा चोदिता वयं त्वामेवेन्द्रमभिषेक्ष्यामः पुरन्दरस्यालमिन्द्रतयेति भावः। ननु, देव इन्द्रो भवितुमर्हति नत्वहं मर्त्यः तत्राह—अवतीर्ण इति। भारावतरणाय देवानामपि देवस्त्वम् इति भावः ॥ २१ ॥ इत्थं सुरभिः कृष्णं सम्प्राभ्यर्थ्यात्मनः पयोभिः क्षीरैरभ्यषिञ्चत् तथेन्द्रोऽपि देवमातृभिरदित्यादिभिश्चोदितः देवैर्मातृभिश्चेति वा सुरैः ऋषिभिश्च सहितः ऐरावतकरोद्धृतैरैरावतकरगतघटसमाहृतैः प्रमाणान्तराविरोधादेवं व्याख्यातम् आकाशगङ्गायाः जलैर्दाशार्हं श्रीकृष्णमभिषिक्तवान् गोविन्द इत्यभ्यधात् अभिधां चकार गाः पशुः धनं विन्दते लभते इति वा गां स्वर्गमिन्द्रत्वेन विन्दतीति वा उभयविधशब्दप्रवृत्तिनिमित्ताश्रयत्वादन्वथसञ्ज्ञामकरोदित्यर्थः। गाम्भुवं विन्दतीति संज्ञातु स्वाभाविकीत्यभिप्रायः ॥ २२–२३ ॥ तत्रेति। तत्रेत्यादिग्रन्थस्य कृष्णेऽभिषिक्तं एतानि इत्यादिः तुम्बुरुप्रभृतयो हरेर्लोकस्य शृण्वतः संस्मरतश्च मलमपहन्तीति तथा तद्यशो जगुः सुराणामङ्गना रम्भादयः सम्यङ्ननृतुः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नः इन्द्रं स्वामिनं त्वाम् ॥ २१ ॥ सुरभिः आत्मनः पयसा ॥ २२ ॥ दाशार्हं दशार्हकुलतिलकं दाशं सुखादिदानमर्हतीति वा अभ्यषिञ्चत् देवमातृभिश्चोदित इन्द्रश्च सुरर्षिभिः सार्द्धमाकाशगङ्गाया जलैः कृष्णमभ्यषिञ्चदित्यन्वयः। गोविन्दः गोर्विन्दो लाभो यस्य सः आलभत इति वा गोविन्द इत्यभ्यधात् अभिधानं कृतवांश्च ॥ २३ ॥ संननृतुः समीचीनं नृत्यं चक्रुः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

परमगोलोके स्वभावत एव नोऽस्माकमिन्द्रं त्वामधुना मनुष्यलोके प्रचाराय केवलम् अभिषेक्ष्यामः ॥ २१ ॥ उपामन्त्र्य निजेन्द्रस्वीकाराय प्रार्थ्येत्यर्थः। प्रचोदितः प्रेरितः भयात् स्वयमप्रवृत्तैः ऐरावत इति गजेन्द्रद्वारा तद्विधानात् ॥ २२ ॥ गवामिन्द्रो गोविन्दः तत्पदेनैव गवेन्द्रताया वाच्यत्वात् प्रीयान्न इन्द्रो गवामित्युक्तत्वात् त्वन्न इन्द्रो जगत्पतेरिति इति गोगोकुलपतिं गोविन्दमभिषिच्य सः इति वक्ष्यमाणात् ॥ २३–२६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अन्यदपि निवेदनमस्तीत्याह—इन्द्रं नस्त्वेत्यादि। त्वा त्वां नोऽस्माकमिन्द्रं कृत्वा अभिषेक्ष्यामः। ननु किं ममेन्द्रत्वेन, तदेवं नैव कार्यमित्याह–ब्रह्मणा चोदिताः प्रेरिताः। तस्याज्ञा अस्माकमखण्डनीयैव। नन्वहं गोपबालकः, ब्रह्मणा कथं मदभिषेकाय यूयं नियोक्तव्याः? नैवम्, इह हे विश्वात्मन्! त्वं विश्वात्मैवासि। तर्हि कथं भूमौ? इत्याह—अवतीर्णोऽसि। किमर्थम्? भूमेर्भारापनुत्तये ॥ २१–२८ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नोऽस्माकं त्वा त्वाम् इन्द्रं ननु कस्याप्यादेशेन स्वातन्त्र्येणैव वा तत्राह—ब्रह्मणेति। यदा महाभयविह्वलेनेन्द्रेण स्वसाहाय्यार्थं गत्वा ब्रह्मानिवेदिनस्तदा ऽनेनापि भूतपूर्वं स्वापराधस्मृत्या भीतेन विमृश्याहमादिष्टा सुरभे त्वत्सन्तानपालकस्य प्रभोस्त्वमतिप्रीतिपात्री भवसि तत् त्वमेव गत्वा कृपासिन्धो तत्रेन्द्रापराधं क्षमय गवेन्द्रत्वेन तमभिषिञ्च चेति किञ्च ब्रह्माण्डकोटीन्द्रस्य ब्रह्मरुद्रादिदुर्लभचरणपरिचरणस्य तव गवेन्द्रत्वेनाऽभिषेको नामकः खलूत्कर्षः? किन्त्वभिषिञ्चतामस्माकमेवोत्कर्षार्थमस्माकमयं प्रयत्न इत्याह—अवतीर्णोसीति। विश्वात्मन्निति विश्वात्मत्वेन सर्वथैवादृश्य एव त्वं यदि नावातरिष्यस्तदा अस्माकमेतावद्भाग्यं कथमभविष्यदिति भावः ॥ २१ ॥ पयसा दुग्धेन देवमातृभिरदित्यादिभिः प्रेरित इन्द्रश्चाभ्यषिञ्चत् आत्मनो भगवन्निकृष्टदासत्वमननेनाभिषेककर्मण्यभ्यर्हिते स्वयमप्रवृत्तः प्रथमं स्थगित एवेन्द्र आसीत् पश्चाददित्यादिभिः प्रेरितस्तदाज्ञावशाल्लब्धतदधिकारसम्भावन एव अभ्यषिञ्चदित्यर्थः। दाशार्हमिति दाशार्हवंशत्वेन जातस्यापि तस्य गोपत्वस्यैव स्पृहणीयत्वाधिक्यात् गाः पशून् विन्दति गां स्वर्गं वा इन्द्रत्वेन विन्दति गाः सर्वभक्तेन्द्रियाण्याकर्षकत्वेन विदन्तीति वा गोविन्द इत्यभ्यधात् नाम कृतवानि-

त्यर्थः ॥ २२–२३ ॥ देवनिकायेषु केतव इव मुख्या वरुणादयः अद्भुतपुष्पवृष्टिभिर्विशेषेण अवाकिरन् आवव्रुरित्यर्थः। गां पृथ्वीं पयोभिर्द्रुताम् आर्द्राम् अनयन् अकुर्वन्नित्यर्थः ॥ २४–२५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे विश्वात्मन्! त्वा त्वां नः इन्द्रमभिषेक्ष्यामः ॥ २१ ॥ सुरभिः स्वसन्तानैः स आत्मनः पयसा अभ्यषिञ्चदिन्द्रः नोदितः ब्रह्मणैवेति ज्ञेयं सुरर्षिभिः देवैर्मातृभिरदित्यादिभिश्च सह आकाशगङ्गायाः जलैरभ्यषिञ्चदित्यन्वयः। गां वेदलक्षणां वाणीं वेदयते इति गोविन्दपदवाच्यः प्रथमत एव "गौरेषा भवतो वाणी तां च वेदयते भवान्। गोविन्दस्तु ततो देवमुनिभिः कथ्यते भवान्। इति हरिवंशस्थवचनात् पृषोदरादित्वात्साधुः सुरभिरिन्द्रश्च गाः धनभूताः गोपालतया गां स्वर्गं वेन्द्रत्वेन विन्दतीति कृत्वा गोविन्द इत्यभ्यधात् अभिधां चकार सुरभ्या गवां स्वामी त्वमतो गोविन्दोसीत्युक्तः इन्द्रेण स्वर्गस्य गोपदवाच्यस्य स्वामी त्वमतो गोविन्दोऽसीत्युक्त इति फलितोर्थः ॥ २२–२४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ब्रह्मणा चोदिता वयं न इन्द्रं त्वामभिषेक्ष्यामो भूमेर्भारापनुत्तये त्वमवतीर्णश्चासि यतोऽतोभिषेक्ष्याम इत्यन्वयः ॥ २१ ॥ सुरभिरेवं कृष्णमुपामन्त्र्य सुरभिरात्मना पयसा क्षीरेणैरावतकरोद्धृतैराकाशगङ्गाया भागीरथ्या जलैः सुरर्षिभिः साकं देवमातृभिर्देवैर्मातृभिर्ब्रह्मादिभिरदियादिदेवमातृभिर्वा दाशार्हमभ्यपिञ्चत ॥ गोविन्द इति। मम स्वातन्त्र्यं नास्ति गौः स्वर्गस्थं विन्दते लभत इति गोविन्द इति सुरवरसुरभिपक्षे निरुक्तिर्ज्ञेया। अभ्यधोदुपचार तन्नाम स्थापितवानिति यावत् ॥ २२–२३ ॥ हरेर्लोकमलापहं गतम्। यशस्तत्रागतास्तुम्बुरुश्च नारदाश्चादी येषां ते त्यन्तास्पच्त्वापेक्षयाऽभ्यर्हितत्वान्नारदपर्वताभ्यां वासुदेवार्जुनाभ्यामित्यादिवन्नारदशब्दः प्राक् प्रयोज्यस्तथाऽपि रामावतारे विरोधः सन्विरोधं कृत्वा शिक्षां प्राप्तो जाग्रत्सन्नग्रत एवायात इति विशेषं द्योतयितुं तुम्बुरु शब्दः प्राक् प्रयुक्त इति ज्ञेयम्। रामोऽपि तत्र ददृशे धनदस्य शापाद्गन्धर्वभुवंशिरतेरथ यातुधानीम्। प्राप्तं दशां सपदि तुम्बरुनामधेयं नाम्ना विराधमपि शर्ववरादवध्यम्। भङ्क्त्वाऽस्य बाहुयुगलं बिलगं चकार सम्मानयन्वचनमम्बुजजन्मनोऽसौ। प्रादाच्च तस्य सुगतिं निजगायकस्येत्याचार्योक्तेः। गन्धर्वविद्याधरचारणा जगुः सुराङ्गना अप्सरसो मुदान्विताः सन्ननृतुः ॥ २४ ॥

श्रीसुबोधिनी

किञ्चानभिषिक्तः शाश्वत इन्द्रो न भवत्यभिषेकस्य संकाररूपत्वात्, अभिषेके तु कृते नान्यः पतित्वं मन्यतेन्यथा मोहाद् यः कश्चिन् मन्येत, नन्विन्द्राधिकाराभिषेके ब्रह्माधिकृतः कथमन्यनाभिषेक इति चेत् तत्राह **ब्रह्मणेति**, ब्रह्मा स्वयं लज्जते कथं स्वस्वामिनं **गवामिन्द्रपदेभिषेक्ष्यामीति**, अयुक्तश्च भवत्यस्माकं तु युक्तं, **हीनोपि महान्तं पतित्वेन वृणुते**, सम्मतयर्थं ब्रह्मप्रार्थना तेन च प्रेरिता **वयं**, भगवदधिष्ठितासु गोषु **सर्वोत्कृष्टं** हविर्भवेदित्यतः शीघ्रं प्रेरितवान्, शीघ्रप्रेरणायां हेतु**रवतीर्णोसीति**, **भूभारहरणार्थमवतीर्णः** शीघ्रं भूभारं हृत्वा तिरोभवेदतः शीघ्रं गवामिन्द्रः कर्तव्य इति, हीनतादूषणं तु नास्ति **विश्वात्मकत्वाद्** व्यापिवैकुण्ठादधः समागतः पदान्तरं च प्राप्नोत्यत इन्द्रत्वमुचितम् ॥ २१ ॥ एवं **प्रार्थनां** कृत्वाभिषेकं कृतवतीत्याहै**वमिति**, फलरूपमपि देवतात्वनोपामन्त्र्याङ्गीकृते भगवत्यभ्यषिञ्चदिति**सम्बन्धः**, भगवतोङ्गीकारे दया हेतुरिति वदंस्तस्या अभिषेकावश्यतामाह **सुरभिरिति**, सुराद् बिभेतीति **सुरभिः**, **देवा** एव तां भक्षयन्ति किं पुनर्देवेन्द्रोतो भगवन्तं शरणं गच्छन्ती व्यागेनेन्द्राभिषेकं कृतवत्यत एव **ततः प्रभृति सर्ववेदसिद्धोपि गोवधो निवृत्त उपपातकत्वं तद्वधे महापातकादप्यधिकविगानं** च, प्रथमत **आत्मनः पयसा** दुग्धेनाभ्यपिञ्चदत एव तदिन्द्रियं जातमिन्द्रं यातीति, ततो जलाभिषेकोपि जात इत्याह **जलैरिति**, **आकाशगङ्गा** नित्या या शिशुमारे प्रसिद्धा, तन् नित्यं जलं **तत्तरणादेव तारकात्वं**, आकाशगङ्गा वोदरत इत्युपपादितं, **ऐरावतो** गजस्तस्य करोभिषेके प्रशस्तः, तथा सति पुष्करजलत्वमापद्यते, तत्सम्बन्धेपि जलं नोपहतं भवति प्रत्युत पवित्रमेव, अन्यस्य तत उद्धारोशक्य इति तथोक्तम् ॥ २२ ॥ एवं तस्याभिषेकसमय एकदेशभूतास्ते देवा ब्राह्मणा अप्यभिषेकं कृतवन्तः इत्याहेन्द्र इति, **सुरभिभिर्नारदादिभिः** सहित इन्द्रस्तैर्वा यथेष्टं प्रेरितो **देवमातृभिः** सहितोदित्यादिभिः श्रद्धादिभिर्वा, सर्वसम्मत्या सर्वैरेव सहित सुरभिरिन्द्रश्च **दाशार्हं** सेवकरक्षणक्षमं रक्षणपरं **वाभ्यषिञ्चत्, नामान्तरं** च धारितवतीत्याह **गोविन्द** इति **चाभ्यधादिति**, **गवामिन्द्रः**, अत्रामृतबीजस्य **वकारस्य** मध्य उपादानं "भूवादय" इतिवत्, **रन्प्रत्ययो** नात्रोपात्तः, रूडिजनकत्वेन धात्वर्थस्य गौणत्वापादकत्वादतोच्प्रत्ययान्त एव **निर्दिष्टः**, स तु **धात्वर्थपर** एव भवतीति गोविन्द इत्येव शब्दः साधुर्न तु गवेन्द्र इति, चकारादिन्द्र न्द्रो देवेन्द्रः सुरभीन्द्र इत्यादिनामान्यपि स्वस्वनामपुरःसरं सर्वैर्धृतानि, तेन व्रजेन्द्रो गोपेन्द्र इत्याद्यपि भवति ॥ २३ ॥ एवं भगवतोभिषेक उत्सववाद्यानि जातानीत्याह **तत्रागता** इति, **तुम्बुरुर्मध्यमः** पूर्वमुभयात्मको निरूपित इति **तुम्बुरुर्नारदश्चादिर्येषां**, **गन्धर्वा गायका विद्याधरा** वादकाः **सिद्धा** अद्भुतप्रदर्शकाश्**चारणाः** पुरुषनर्तका एते सर्व एव भगवतो **यशो जगुः** ननूत्सवे सर्वेभ्योभीष्टं देयं किं गानमात्रेणेति चेत् तत्राह **लोकमलापहमिति**, सर्वेषां सर्वदुःखे निदाभूतं **मलमेव** दूरीकरोति, **सुराङ्गनाश्च हर्षेणान्विताः सम्यङ्ननृतुस्ता** हि कृष्णेन सह रमणोत्सु-

क्यो देवादिन्द्राच्च भीताः स्थिता अधुनेन्द्रत्वे सम्पन्ने भयान्निवृत्ता आगमनं चावश्यकं जातमिति **मुदान्विता** जाता भावपूर्वकं च नृत्यं कृतवत्यो यथा च भगवान् वशे भवति ॥ २४ ॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

इन्द्रं न इत्यस्याभासे **किञ्चेति** स्वभावत इन्द्रोसीति पूर्वमुक्तं, अभिषेकेणापि तथा सम्पादयिष्याम इतिसमुच्चयः, पुष्करं तीर्थविशेषः, करिहस्तोपि, तथा च श्लेषेण तीर्थजलत्वमित्यर्थः, करपदतात्पर्यमाहुः **तत्सम्बन्धेपीति**, अन्यान् विहायैरावतकथने हेतुमाहुः **अन्यस्येति** ॥ २१ ॥ इन्द्र इत्यत्र **यथेष्टमिति** "सुरभीन्द्रे देवेन्द्र" इत्याद्यग्रे वक्ष्यमाणं यथा यस्येष्टं तथा स प्रेरितवानित्यर्थः, आदित्यतिरिक्तानां देवमातृत्वाभावादरुच्या पक्षान्तरमाहुः **श्रद्धादिभिरिति**, तथा च शुभादयो धर्मपुत्रत्वेन सत्त्वपरिणामत्वाद् देवा इत्यर्थः ॥ २३ ॥ **मुदान्विता** इत्यत्र 'मुदे'त्यस्यानन्दवाचकत्वेन कृष्णपरत्वमभिप्रेत्याहुः **ता** इति, तथा च पूर्वमपि कृष्णेन सह स्थिताः, अतोधुना भयस्य निवृत्तत्वात् सन्ननृतुरित्यर्थः, कृष्णसाहित्यं विवृण्वन्ति **कृष्णरमणौत्सुक्य** इति, तथा च मनसि कृष्णसाहित्यं स्थितमेवेत्यर्थः, तथा च **मुदे**त्यस्यावृत्तिरभिप्रेतेति ज्ञायते, **सन्ननृतुरित्यत्र** समित्यस्यार्थद्वयमाहुः **भावेति**, **यथेति** ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'भवतामिन्द्रोऽस्त्येव' तत्राह–इन्द्रमिति । ब्रह्मणा तदधिकारप्रदेन नोदिता वयं त्वा त्वामेव नोऽस्माकमिन्द्रमभिषेक्ष्यामः । अस्मत्कुलनाशाय प्रवृत्तस्य पुरन्दरस्य इन्द्रत्वेनालमित्याशयः ॥ ननु 'देव इन्द्रो भवितुमर्हति, मर्त्योऽहं कथमिन्द्रः स्याम् ?' इत्याशङ्क्याह—अवतीर्णोऽसीति । हे विश्वात्मन् सर्वेश्वर ! त्वं भूमेर्भारापनुत्तयेऽवतीर्णोऽसीति ॥ २१ ॥ एवं सुरभिः कृष्णमुपामन्त्र्य सम्प्रार्थ्य तस्य मौनभावेऽपि मौनत्वस्य सम्मतिज्ञापकत्वात् तेन तत्सम्मति ज्ञात्वा आत्मनः पयसाऽभ्यषिञ्चत । तथेन्द्रोऽपि देवैः, मातृभिरदित्यादिभिश्च नोदितः प्रेरितः सुरैः ऋषिभिश्च सहितः ऐरावतस्य हस्तिनः करेण शुण्डेन उद्भूतैराकाशगङ्गाया जलैर्दाशार्हं कृष्णमभिषिक्तवान् । 'गोविन्द' इति चाभ्यधात् अभिधां चकार ॥ २२–२३ ॥ तद्दर्शयति–अहमिति । हिशब्दः प्रसिद्धौ । अत्र 'गा इन्द्रत्वेन विन्दति गोविन्द' इति नामनिरुक्तिर्बोध्या ॥ २४ ॥

अन्वितार्थप्रकाशिका

इन्द्रमिति ॥ ब्रह्मणा तदधिकारप्रदेन नोदिता वयं त्वा त्वामेव नोऽस्माकमिन्द्रमभिषेक्ष्यामः । अलं पुरन्दरस्यास्मद्गोत्रदुःखदस्येन्द्रतया हे विश्वात्मन् सर्वेश्वर ! त्वं भूमेर्भारापनुत्तयेऽवतीर्णोऽसीति ॥ २१ ॥ एवमिति द्वयम् ॥ एवं सुरभिः कृष्णमुपामुपामन्त्र्य संप्रार्थ्य आत्मनः पयसाऽभ्यषिञ्चत् तथेन्द्रोऽपि देवैर्मातृभिरदित्यादिभिश्च नोदितः प्रेरितः सुरैः ऋषिभिश्च सहितः ऐरावतस्य हस्तिनः करेण शुण्डयोद्धृतैराकाशगङ्गाया जलैर्दाशार्हं कृष्णमभिषिक्तवान् गोविन्द इति चाभ्यधात् अभिधां चकार । गवामिन्द्रो गोविन्दः पृषोदरादिः । गाः विन्दतीति गवादिषु विन्देरिति शो वा ॥ २२–२३ ॥ अहमिति ॥ क्वाचित्कः श्लोकः ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इंद्रत्वाभिषेकं कुर्वतीसत्याहनः इंद्रं त्वा त्वां वयमभिषेक्ष्यामः अभिषेचनं च पूजनसूचकं भारापनुत्तये भारनाशाय विश्वस्य चेतनाचेतनामकस्य आत्मा अंतर्यामितत्संबुद्धिः ॥ २१ ॥ एवं उपामंत्र्य गदित्वा आत्मनः स्वस्य पयसा दुग्धेन सुरभिः अभ्यषिंचत इंद्रश्च ऐरावतस्य गजस्य करेणोः धृतैर्जलैः अभ्यषिंचतेत्युत्तरेणान्वयः ॥ २२ ॥ देवस्य मातृभिः अदिति प्रभृतिभिः देवैः मातृभिश्चेति वागाः पश्वनूगां नाकं वा विंदति तेषामहं स्वामिति स्वकीयत्वेन जानातीति गोविंद इत्यभ्यधात् अभिधानं कृतवान् गवादिषु विंदेः संज्ञायामित्यनेन कर्मण्युपपदे विंदेः कर्त्तरिश प्रत्ययः ॥ २३–२४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु गवादीनामयमिन्द्रोऽस्त्येवेत्यत्राह ॥ इन्द्रमिति ॥ ब्रह्मणा तत्तदधिकारप्रदात्रा विधिना, नोदिताः प्रेरिताः, वयं, नोऽस्माकं, इन्द्र, त्वा त्वामेव, अभिषेक्ष्यामः । पुरन्दरस्येन्द्रतयाऽलमित्यर्थः । ननु देव एवेन्द्रो भवितुमर्हति नाहं मनुष्यस्तत्राह । अवतीर्ण इति । हे विश्वात्मन्, भूमेः भारापनुत्तये भारापकरणाय, देवानामपि देव इति शेषः । त्वं एव अवतीर्णः असि । न त्वं मनुष्य इति भावः ॥ २१ ॥ एवमिति ॥ इन्द्र इति च ॥ एवमित्थं, सुरभिः कृष्णं उपामन्त्र्य संप्रार्थ्य, आत्मनः पयसा क्षीरेण, अभ्यषिञ्चत । तथा इन्द्रः अपि, देवमातृभिरदित्यादिभिः, देवैर्मातृभिश्चेति वा । नोदितः सन्, सुराश्च ऋषयश्च तैः साकं, ऐरावतकरोद्धृतैरैरावतकरगतघटसमाहृतैः, प्रमाणाविरोधादेवं व्याख्यातम् । आकाशगङ्गायाः जलैः, दाशार्हं श्रीकृष्णं, अभ्यषिञ्चत अभिषिक्तवान् । गोविन्दः इति च, अभ्यधात् । अभिधां चकार । गाः पशुधनं विन्दते लभते इति गां स्वर्गमिन्द्रत्वेन विन्दतीति वा । उभयथा शब्दप्रवृत्तिनिमित्ताश्रयत्वादन्वर्थसंज्ञामकरोदित्यर्थः । गां भुवं विन्दतीति संज्ञा तु स्वाभाविकीत्यभिप्रायः । इति

द्वयोरेकान्वयः ॥ २२–२३ ॥ तत्रेति ॥ तत्र आगताः तुम्बुरुश्च नारदश्च तावादी येषां ते गन्धर्वाश्च विद्याधराश्च चारणाश्च ते, हरेः, लोकस्य शृण्वतः स्मरतश्च जनस्य मलमपहन्तीति तथाभूतं, यशः जगुः। सुराणां देवानामङ्गमारम्मदयोऽप्सरसश्च, मुदाऽत्यानन्देनान्विताः सत्यः, संननृतुः सम्यक् नृत्यं चक्रुः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

इन्द्रमिति : १०.२७.२१.

अस्माभिर्यदसाधुबुद्धिभिरहन्ताऽखर्वरोगास्पदैर्जाल्मैर्घोषलयेहया भगवतश्चित्ते रुडुत्पादिता ।
सर्वस्वार्पणमन्तरा न हि परस्तत्क्षान्त्युपायोऽधुनेत्यालोच्याखिलशङ्करं व्यधित सा तत्राभिषेकोद्यमम् ॥ ६२ ॥
स्वामिप्रमोददमपि प्रकटाखिलेष्टमभ्यर्हणीयमखिलैरपि कर्म सद्भिः ।
कार्यं निवेद्य विनयेन निजाधिपायेत्येषाऽभिषेकविधिमप्यनऽघाप्यपृच्छत् ॥ ६३ ॥
उद्दिश्य गोवर्धनमच्युताय वस्वर्पणं त्विन्द्रकृतं तदीड्यम् ।
तद्रुट् ततोऽभूदनिवेद्यजातादिति स्वकर्तव्यमपृच्छदग्रे ॥ ६४ ॥
सदसदपि कर्म जातं विना न विधिचोदनां जनः कुरुते। तत्क्षममेव तदा तौ प्रहितौ विधिनैव कृष्णमभिषेक्तुम् ॥ ६५ ॥
गोवर्धनं निजकराकलितं विधाय भूभृद्वरं यदवनं हि गवामकारि ।
तत्त्वं सदाऽस्मदवनप्रगृहीतदीक्षस्तस्मादयं त्वधभिषेकविधिर्न नूत्नः ॥ ६६ ॥
इत्युक्त्वा सुरभिश्चैनं गोकुलत्राणदीक्षितम्। स्वजातिसुखसन्तोषदार्ढ्यायैवाभ्यषिञ्चत ॥ ६७ ॥ (युग्मम्)

एवमिति : १०.२७.२२.

आकाशनद्यम्बु तु तत्पदस्थमेवेति किं तत्र मयार्पितं स्यात् ।
एवं विचिन्त्य स्वपयोभिरादौ चक्रेऽभिषेकं सुरभिः सहर्षम् ॥ ६८ ॥

इन्द्र इति : १०.२७.२३.

आदाय पुष्करवरं निजपुष्करेण सत्पुष्कराज्जगधीश समर्पितं यत् ।
सद्योऽभवत् कलिभयावहमेवमिन्द्रो ज्ञात्वा तथैव कृतवान् कलिदोषशान्त्यै ॥६९॥
मन्दाक्षभावस्थमवेद्य भर्तुः सहस्रमक्ष्णामपि निर्निमेषम् ।
सा गौः शुभाक्षी रचिताभिषेका गोविन्दसंज्ञामकृतेति युक्तम् ॥ ७० ॥
सच्छृंगारोचिताभां शुभफलदपदाकामपूर्णाभिधानां स्वस्थप्रत्यक्षलभ्यां सुखकरसुरवां गोष्ठपावित्र्यहेतुम् ।
दृष्ट्वैवं स्वामिवंशीमपि तनुममलोद्दीप्रबालप्रतिष्ठां युक्तं गोविन्दसंज्ञां यदकृत सुरभिर्गोपतेर्गोपतिश्च ॥ ७१ ॥
अन्येषु नामसु चिरं विवदन्तु केचिद् गोविन्दनाम तु जगत्यविवादमेव ।
यत् सर्वदेव मुनिदैवतदेवताभिरुक्तं तदा तदभिधानमधान्महेन्द्रः ॥ ७२ ॥
नानापराधदहनप्रतिरोधिरत्नं प्रत्नर्षिगेयमभतूललयानलार्चिः ।
सद्याग्यनल्पफलकल्पतरुस्वरूपं गोविन्दनाम जगतिदृगिति व्यबोधि ॥ ७३ ॥
सन्त्वनन्तान्यनन्तस्य नामान्यघहराण्यलम्। गोविन्दनामपीयूषमाधुर्यं त्वन्यदेव हि ॥ ७४ ॥
सद्वृन्दावनवर्त्मवर्तनमनायासेन कंसारिणा यच्चोरीकृतमेतदग्रिमयुगे स्याद् भव्यकृत् प्राणिनाम् ।
आलोच्यैवमथाच्युतं हितमतिः सा गौः सचाक्षुण्णतद्वर्त्मालम्बनदीक्षितं समकरोन्नामाभिषेकाद् भुवि ॥ ७५ ॥
साधारणैव जलैर्द्विजैश्च साधारणश्चेत् पुरुषाऽभिषिक्तः ।
तेजस्वितां यात्यलमिन्द्रधेनूतं ध्वर्षयः स्वर्जलतोऽभ्यषिंचन् ॥ ७६ ॥

तत्रागता इति : १०.२७.२४.

भूताहुरास्रपपिशाचतमः-प्रणाशे गोविन्दनाममिहिरे सति सुप्रकाशे ।
का नाम भीतिरिति निर्भयमागतास्ते गोविन्दनामकथनाद् विशदोऽर्थ एषः ॥ ७७ ॥

कृष्णप्रिया

हे श्री विश्वात्मन्! आप तो भूमि भार निवारण के लिये ही भूतल पर पधारे हैं। ब्रह्माजी की प्रेरणा से हमारे इन्द्र स्वरूप से आपका अभिषेक करना चाहती हूँ ॥ २१ ॥ श्रीशुकदेवजी ने कहा—राजन्? श्रीकामधेनुजी ने इस प्रकार भगवान श्रीकृष्ण का अनुमोदन प्राप्त कर लिया, पुनः अपने दूध से, और ऐरावत हाथी की शूँड से लाये हुए आकाश गङ्गाजी के पावन

जल से अभिषेक किया ॥ २२ ॥ हे राजन् ! श्री नारद तुम्बुरु आदि देवर्षियों श्रद्धा आदि अथवा अदिति आदि देवमाताओं की आज्ञा से देवराज इन्द्र ने भक्त रक्षणक्षम भगवान् श्रीकृष्ण का अभिषेक किया और गोविन्द नाम रखा ॥ २३ ॥ वहाँ पधारे हुए तुम्बुरु, नारद आदि देवर्षिवर्य, एवं गन्धर्व, विद्याधर; सिद्ध और चारण लोग, समस्त लोकों के पापों के निवारक श्रीहरि के यश का गान करने लगे, और अप्सरावृन्द ने आनन्द निमग्न होकर नृत्य और गान किया ॥ २४ ॥

तं तुष्टुवुर्देवनिकायकेतवो व्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ।
लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावस्तदा गामनयन् पयोद्रुताम्॥ २५ ॥
नानारसौघाः सरितो वृक्षा आसन् मधुस्रवाः । अकृष्टपच्यौषधयो गिरयो [1]ऽव्यसृदुन्मणीन् ॥ २६ ॥
कृष्णेऽभिषिक्त एतानि [2]सर्वाणि कुरुनन्दन । निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः ॥ २७ ॥
इति गोगोकुलपतिं गोविन्दमभिषिच्य सः । अनुज्ञातो ययौ शक्रो वृतो देवादिभिर्दिवम् ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] इन्द्रस्तुतिर्नाम [5]सप्तविंशोऽध्यायः ॥ २७ ॥

कर्दमक्षमा

अन्वयः—देवनिकाय केतवः तम् तुष्टुवुः, च, अद्भुत पुष्पवृष्टिभिः, व्यवाकिरन्, त्रयो लोकाः पराम् निर्वृतिम् आप्नुवन्, तदा गावः पयोद्रुताम् गाम् अनयन् ॥२५॥ सरितः नानारसौघाः आसन्, वृक्षाः मधुस्रवा आसन्, आकृष्टपच्यौषधयः आसन् गिरयः मणीन् वि-असृजन् ॥ २६ ॥ हे कुरुनन्दन ! हे तात ! कृष्णे अभिषिक्ते, सर्वाणि एतानि, निसगतः क्रूराणि अपि, निर्वैराणि अभवन् ॥ २७ ॥ सः गो गोकुलपतिम् गोविन्दम् इति अभिषिच्य अनुज्ञातः देवादिभिः वृतः शक्रः ययौ ॥ २८ ॥

अन्वयेषु सप्तविंशोऽध्यायः समाप्तः ॥ २७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

देवनिकायेषु केतव इव दर्शनीया मुख्या इत्यर्थः । गावो गां पृथ्वीं पयोभिर्द्रुतामार्द्रामनयन् अकुर्वन्नित्यर्थः ॥ २५ ॥ नानारसौघाः क्षीरादिवाहिन्यः । अकृष्टपच्याः कर्षणं विनैव पक्वा औषधयो व्रीह्यादय आसन् । संधिरार्षः । यद्वा अकृष्टपच्या ओषधयो येषु ते गिरय उन्मणीन्गर्भगतान्मणीन् उत् उद्गतान्बहिः प्रकटानबिभ्रदबिभरुः ॥ २६-२८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायामिद्रस्तुतिगोविंदाभिषेको नाम सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

देवानां निकायेषु समूहेषु "निकायस्तु पुमाँल्लक्ष्ये सुधर्मिप्राणिसंहतौ । समुच्चये संहतानां निलये परमात्मनि ॥" इति मेदिनी । इत्यर्थ इति । मुख्यानामेव मंगलकर्मसु प्राधान्यादिति तात्पर्यम् । इत्यर्थ इति । सर्वधातुषु कृत्यर्थस्य व्याप्तत्वादित्यर्थः॥२६॥ पूर्वव्याख्यान आर्षत्वाश्रयणेनाधिकरणानुक्त्या वारुच्याह–यद्वेति ॥ २६ ॥ एतानि गोव्याघ्राहिनकुलादीनि । सत्त्वानि जीवाः । निसर्गतः स्वभावत एव क्रूराणि क्रूरस्वभावानि । निर्वैराणीति कृतयुगतुल्यता ध्वनिता । हे कुरुनन्दनेति । अत्युत्तमकुरुराजवंशोद्भूतत्वात्त्वां मयेदं श्रावितमिति । हे तातेति । तस्य श्रवणे श्रद्धां वीक्ष्य प्रीत आहेति भावः ॥ २७ ॥ इति उक्तरीत्या । सः शक्रः ॥ २८ ॥

इतिश्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

देवनिकायकेतवः वरुणाद्याः पुष्पाणां स्वरूपेण वृष्टीनामपारमित्यनेन च अद्भुताभिः पुष्पाणां वृष्टिभिर्व्यापयामासुः परां यतोऽतिशयिता नान्यास्ति ताम् ॥ २५ ॥ नानारसेत्यादावेवं ज्ञेयं पूर्वं वृन्दावने यद्यद्वैशिष्ट्यमासीत् तत्तदप्यधुनाऽधिकतया तत्र भूत्वा त्रैलोक्यमपि व्याप्नोदिति अकृष्टपच्यौषधय इति मध्ये सुप्लुक् छान्दसः सन्धिर्वा ॥ २६ ॥ नच केवलं गुणा एव सम्पन्नाः स्वाभाविकदोषा अपि विनष्टा इत्याह—कृष्ण इति । एतानि प्रसिद्धानि सत्त्वानि निसर्गतः जातिस्वभावेन क्रूराणि परस्परं हिंसापराण्यपि अहिनकुलादीनि सर्वाणि सर्वभूतान्येव निर्वैराणि मित्राणीवाभवन् "जायमाने जनार्दने" इतिवत्तदानीमिति ज्ञेयं वृन्दावने तु सर्वदैवेति विशेषः । हे कुरुनन्दनेति तस्य तवानुमोदनेन हे तातेति परमाश्चर्येण प्रेमवैवश्येन वा पुनः पुनः सम्बोधनम् ॥ २७ ॥ सः अपराध्यपि श्रीभगवता स्वीकृतोपचारः गोगोकुलपतित्वेन स्वत एव तं गोविन्दमभिषिच्येति तेन तस्य नातिशयः

---

१. योऽविभ्र–श्रीधर. वंशी. जी. वीर. विज. विश्व. शुक. सु. । २. सत्वानि–श्रीधर. वंशी. जीव. वीर. विश्व. शुक. सु. ; सर्वाणि–विज. । ३. पारमहंस्यां संहितायां–प्रा. पा. । ४. पूर्वार्द्धे–प्रा. पा. । ५. पञ्चविंशोऽध्यायः–विज. ।

किन्तु तेन कर्मणा लोकस्यैव स्वस्यैव हितं चकारेति भावः तस्य हितमेव दर्शयति—ततः श्रीगोविन्देनानुज्ञातः सन् पूर्वं तदपराधित्वात् प्रायस्त्यक्तोऽपि पुनर्देवादिभिर्वृतः स्वीकृतो भूत्वा दिवं ययाविति लीलेयं सखिभिः स्थानवेषादिवैशिष्ट्येनैव ज्ञातत्वात् दूरतो वा निह्नुत्य दृष्टत्वात् पश्चादेव व्रजे कथितेति ज्ञेयम् इति गोगोकुलपतिं गोविन्दमभिषिच्येति गोगोकुलयोस्तदीशितव्ययोर्निजेशितृत्वेन तस्य ज्ञान एव सुखचमत्कारात्। पाद्मोत्तरखण्डे तु—

"गोपवृद्धाश्च गोप्यश्च दृष्ट्वा तत्र शतक्रतुम्। तेन सम्पूजिताश्चैव प्रहर्षमतुलं ययुः" ॥ इति
श्रीनन्दयशोदादीनामपि तत्रागमनं वर्णितं तत्तु विविक्त उपसङ्गम्येति विरोधात् कल्पान्तरे ज्ञेयम् ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

देवनिकायकेतवो वरुणाद्याः श्रीगरुडनारदाद्या वा पार्षदप्रवराः, हि निश्चितम्, अद्भुतानामपूर्ववृत्तानां किंवा अद्भुताभिः सर्वतो बहुधा व्याप्य पतन्तीभिः पुष्पाणां वृष्टिभिर्व्योपयामासुः, परां मोक्षादप्युत्कृष्टामित्यर्थः। अतो भगवदभिषेकमहोत्सवस्वभावेनेन्द्रस्यापि प्रहर्षोऽभूदिति ज्ञेयम्। तदा तदानीम्, यद्वा, ततः प्रभृतीत्यर्थः, अस्य पूर्वापराभ्यां वाक्याभ्यां तथा परपद्येनाप्यन्वयः। पूर्वं श्रीवृन्दावन एव वृक्षा मधुस्रवा आसन्, इदानीञ्च सर्वभूगता एवेति विशेषः। एवमग्रेऽपि ॥ २५–२६ ॥ न च केवलं गुणा एव सम्पन्नाः, स्वाभाविकदोषा अपि विनष्टा इत्याह—कृष्ण इति, निजभगवत्तासारसर्वस्वप्रकटनपर इत्यर्थः, एतानि साक्षाद्दृश्यमानानि सत्त्वानि निसर्गतो जातिस्वभावेन क्रूराणि परस्परं हिंसापराण्यपि अहिनकुलादीनि सर्वाणि सर्वभूगतान्येव निर्वैराणि मित्राण्यभवन्। हे कुरुनन्दनेति हे तातेति परमाश्चर्येण प्रेमवैवश्येन वा पुनः पुनः सम्बोधनम्, यद्वा, ननु तदानीं श्रीभगवता गुप्तमधुरक्रीडापरेणापि कथमीदृशमैश्वर्यं प्रकटितम्? तत्राह—एतानि सर्वलोकपरमनिर्वृतिप्राप्त्यादीनि तदभिषेकोत्सवस्वभावादेव जायमानानि तस्यापि दुर्निवाराणीत्यर्थः। श्रीवृन्दावने च सदैव तादृशत्वात् मधुरक्रीडा सम्पद्येत एवेति दिक्। हे कुरुनन्दनेति तव जन्मना यथा कुलक्षयशोककालेऽपि त्वत्पितामहादीनामानन्दो वृत्त इति भावः, किञ्च, निर्वैराणीति, अन्यत् समानम् ॥ २७ ॥ इति—अनेनोक्तप्रकारेण, गवां गोकुलस्य च तत्रत्यानामपि सर्वेषां पतिं श्रीकृष्ण गोविन्दमित्यभिषिच्य, यद्वा, गोकुलपतिमित्यन्वर्थतया गोविन्दत्वेनाभिषेके हेतुः तत्र यद्यपि गोकुलशब्देन गावोऽपि गृह्यन्ते, तथापि तत्र तासां मुख्यत्वात् पृथगादौ निर्देशः, यद्वा, गोकुलपतित्वेन स्वत एव गाः स्वाम्यादिना विन्दतीति गोविन्दो भवत्येव, तस्य हि गोविन्दत्वेनाभिषेको नाम विशेष इतीन्द्रं प्रति कटाक्षः। स अपराध्यपि श्रीभगवता स्वीकृताभिषेकोपकरणगोपादिभ्यां लज्जया शीघ्रं यियासुत्वादनुज्ञातः, ततश्च देवादिभिर्वृतः परिवेष्टितः सन् स्वर्गं ययौ, आदिशब्देन पूर्वोक्ताः सुरभ्यादयः, सुरभिस्तु श्रीगोलोकेन सह श्रीमाथुरव्रजभूमेरैक्यादत्रैव निजसन्तानसंगे स्थितेति ज्ञेयम्, द्वयोरभेदश्च श्रीभागवतामृतोत्तरखण्डे विवृतोऽस्त्येव। यद्वा, आदिशब्देन सापि गृहीता, यानेऽनिच्छया तस्या गौणत्वेन पृथक् स्पष्टमनुक्तिः, एवं श्रीभगवत्सहचरा गोपास्तदानीं तत्र नासन्निति बोद्धव्यम्। पूर्वं (द्वितीय श्लो०) 'विविक्तः' इत्युक्तेः, अतस्तस्यैतद्वृत्तं न ज्ञातम्। अत एव तैरकथनाद्व्रजे च न प्रचारितमित्यूह्यम् कुत्रापि तत्प्रसंगाभावात्; यद्वा, (१८ श० श्लो०) 'स्वसन्तानैः' इति गवां साहचर्येण (१९ श० श्लो०) 'वयम्' इत्यनेन च ते गृहीता एव, ततश्च तन्महोत्सवे समागतास्तं दृष्ट्वापि साक्षाच्छ्रीभगवद्विचित्रानन्तमाहात्म्यानुभवेनाश्चर्यं मत्वा, यद्वा, 'गोपवृद्धश्च गोप्यश्च दृष्ट्वा तत्र शतक्रतुम्। तेन सम्पूजिताश्चैव प्रहर्षमतुलं ययुः ॥' इति पाद्मोत्तरखण्डोक्तानुसारेण श्रीनन्दयशोदादीनामपि तत्रागमनात् व्रजे नैव कथयामासुरिति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उन्मणीन् उद्भूतान् मणीन् ॥ २६–२८ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धीये श्रीसुदर्शनसूरिकृतशुकपक्षीये सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तमिति। देवसङ्घेषु केतव इव दर्शनीयाः मुख्या इत्यर्थः। अद्भुताभिः पुष्पवृष्टिभिरभितोऽवाकिरन् त्रयो लोकाः परां निर्वृतिमानन्दं प्रापुः गावो गां पृथ्वीं पयोभिः क्षीरैर्द्रुतां सिक्तामनयन् चक्रुः ॥ २५ ॥ सरितो नानारसौघाः क्षीरादिवाहिन्यो बभूवुः वृक्षास्तु मधूनि स्रवन्तीति तथाभूता ओषधयस्त्वकृष्टपच्याः कृषिं विनैव व्रीह्यादयः फलिता आसन् इत्यर्थः। सन्धिरार्षः। यद्वा, अकृष्टपच्याश्चौषधयश्चेति कर्मधारयः यद्वा अकृष्टपच्या ओषधयो येषु ते गिरयः उन्मणीन् उद्गतान् बहिः प्रकाशान्मणीन्बिभ्रदबिभरुः ॥ २६ ॥ तदा हे कुरुनन्दन! कृष्णेऽभिषिक्ते सतीन्द्रे कृते सतीति भावः। एतानि स्वभावतः क्रूराण्यपि सर्वाणि

भूतानि सर्पव्याघ्रादीनि हे तात ! वैररहितान्यभवन् ॥ २७ ॥ स इन्द्र इत्थं गवां गोकुलस्य नन्दव्रजस्य पति गोविन्दमभिषिच्येत्युक्तार्थोपसंहारः तेनाभ्यनुज्ञातः कृष्णाधीनस्वाधिकारो भूत्वेति तात्पर्यं देवादिभिः परिवृतो दिवं स्वर्गलोकं प्रति ययौ ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

देवनिकायानां केतवः श्रेष्ठाः गां भूमिं पयसा द्रुतां परिप्लुताम् अनयन् प्रापयामासुः ॥ २५ ॥ मधु मधुररसं स्रवन्त्यः उन्मणीन् अबिभ्रन् भृतवन्तः ॥ २६–२८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां सप्तविंशोऽध्यायः ॥ २७ ॥

(विजयध्वजरीत्या पञ्चविंशोऽध्यायः)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

निर्वैराणीति सर्वभूतान्येव तदानीमिति शेषः ॥ २७–२८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नानारसौघाः क्षीरादिवाहिन्यः अकृष्टपच्याः कर्षणं विनैव पक्का ओषधयो यत्र ते गिरयः उन्मणीन् उत्कृष्टान् अबिभ्रन् अबिभरुः ॥ २६ ॥ एतानि भूतानीति शेषः ॥ २७–२८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । सप्तविंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ २७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

देवनिकायेषु केतव इव दर्शनीयाः मुख्याः ब्रह्मशिवादयः तं श्रीगोविन्दं तुष्टुवुः अद्भुतपुष्पवृष्टिभिः व्यवाकिरन् विविधैः प्रकारैः अवाकिरन् त्रयो लोका परामुत्कृष्टां निर्वृतिमानन्दमवाप्नुवन् प्रापुः गां पृथ्वीं पयोभिर्द्रुतामार्द्रामनयन् चक्रुरित्यर्थः ॥ २५ ॥ सरितः नानारसौघाः क्षीरादिवाहिन्यः आसन् मधूनि स्रवन्तीति ते तथा वृक्षा आसन् अकृष्टपच्याः कर्षणं विनैव पक्काः ओषधयो व्रीह्यादयो येषु ते गिरयः गर्भस्थानपि उत् उद्गतान् बहिः प्रकटान् मणीन् अबिभ्रन् अबिभरुः ॥ २६ ॥ एतानि भूतानि ॥२७–२८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तविंशोऽध्यायार्थप्रकाशः ॥ २७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

देवनिकायकेतवः सुरसमूहमहान्तोऽद्भुता आश्चर्यवहाः पुष्पवृष्टयस्ताभिः पुष्पवृष्टिभिर्व्यवाकिरन् । वृष्टं वर्षं भावे क्तः । तदेषामस्ति तानि वृष्टीन्यद्भुतानि च तानि वृष्टीनि च तैराश्चर्यावहवर्षणवत्पुष्पैर्व्यवाकिरन् । किरणं चक्रुरिति वा वर्षत आभिरिति वृष्टयः करणे क्तिन् । पुष्पाण्येव वृष्टयस्ताभिरवाकिरंश्चिक्षिपुरित्यर्थः । यविष्ठमन्मभिरित्यृग्भाष्ये मन्मभिर्मतिभिः । तट्टीकायां मतिभिर्बुद्धिवृत्तिभिः सह । तट्टिप्पणेऽत्र क्तिन्प्रत्ययः करणार्थ इत्युक्तेरिति वा । यत्रापि लोकाः परामुत्कृष्टां निर्वृतिं मुदं तदा गावो गां भूमि पयोद्रुतं पयोभिः स्वक्षीरैः संक्षरणैर्द्रुतां परिप्लुतामनयंश्चक्रुः । यद्वा पयसा सिक्ता द्रवो द्रुमा यस्याः पयोद्रुस्तस्या भावः पयोद्रुता तां पयः सिक्ततरुकत्वमनयन्यापयामासुः ॥ २५ ॥ स्वतः पतन्नानावृक्षादिरसवत्यो मधुस्रवा मधुरं स्रवन्ति ते मधुस्रवास्तरवोऽकृष्टपच्यौषधयः कर्षणं विनैव पाकं प्राप्ता अकृष्टपच्यास्ताश्च ता ओषधयश्च । कर्मधारयेऽपि बुद्ध्या विवेकेनौषधीरुद्दिश्याकृष्टपच्यत्वं विधीयते । कृष्णाभिषेकसमय एवैवमभवदिति भावः । राजसूयसूर्यमृषोद्यरुच्यकृष्टपच्याव्यथ्या इति क्यबन्ततया निपातितः कृष्टपच्यशब्दः । गिरयः पर्वता उन्मणीनुत्कृष्टान्मणीनबिभ्रत् । अगाः प्रत्यन्तपर्वताः सन्त्यस्येति मत्वर्थ इकारप्रत्ययः । अथवा गोऽगिः । तृतीयोऽतिशय इति महामहीध्र इति महापर्वतः प्राग्यत्रायः कृष्णायस्तत्रेदानीमुन्मणीनबिभ्रदिति वा । बहुवचनमेकवचनार्थे । अकृष्टपच्यौषधय इति प्रथमपक्षे गिरिविशेषणं वा ॥ २६ ॥ हे कुरुनन्दन तात परीक्षित् निसर्गतः स्वभावतः क्रूराण्यप्येतानि सम्यगेकस्थानं प्राप्तानि सत्त्वानि गोव्याघ्रादीनि निर्वैराणि वैररहितान्यभवन् । बुद्धिसन्निहितत्वादेतानीत्युक्तिर्वा ॥ २७ ॥ स शक्रो गोगोकुलपतिं गोविन्द इत्युक्तरीत्याऽभिषिच्यानुज्ञातः । प्रथमात्वे तसिलन्तत्वे वाऽर्थः समः । देव्यश्च सुरभ्यादयश्च सुरस्त्रियश्चैकशेषे देवाश्चादयो येषां सिद्धादीनां तैर्वृतो दिवं स्वर्गं ययौ ॥ २८ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीसुबोधिनी

इन्द्रत्वे जाते सर्व एव स्वर्गलोकः समागतस्तदा **देवसमूहे** ये **केतव** इवोन्नता देवोत्तमा ब्रह्मादयो मन्त्रा वेदा वा तं भगवन्तमिन्द्रं **तुष्टुवुः**, अत एव वेद इन्द्रो महान् स्तूयते भगवानिन्द्रो जात इति, ननु प्राकृतानामिन्द्रत्व आधिदैविके "पर्यैन्द्राणि जुहोमी"ति नोपपद्यत इन्द्रत्वेनार्धता भगवत्त्वेन तु सर्वत्वं, **अद्भुतपुष्पवृष्टिभिश्च** विशेषेणावाकिरन् पुष्पवृष्टिं कृतवन्तः, एवं दिविष्ठानां वाचनिकं कायिकं चोक्तं, मानसिकमाह **सर्वे लोकाः परां निर्वृतिमाप्नुवन्निति**, त्रयोपि लोकाः परमानन्दं प्राप्ताः,

तदा गावोन्ता रसपूर्णा बहिरपि रसं त्यक्तवत्य इत्याह **गावस्तदा गां** पृथिवीं **पयोद्रुतां** पयसा पिच्छिला**मनयन्** कृतवत्यः ॥२५॥ **सरितश्च नानारसानां** घृतक्षीरादीनामोघो यासां तादृश्यो जाता **वृक्षाश्च मधुच्युत औषधयो** व्रीह्यादयः कर्षणव्यतिरेकेणैव **पक्वा** जाताः, **अकृष्टपच्यश्च** ता **औषधयश्च गिरयः** पर्वताश्च स्वाभ्यन्तःस्थितान् **मणीन् व्यसृजन्**, एवं स्थावरजङ्गमानां सर्वेषामेवोत्सवो निरूपितः ॥ २६ ॥ तमुपसंहरन् पूर्वेन्द्रेभ्यो भगवतीन्द्रे वैलक्षण्यमाह **कृष्णेभिषिक्त** इति, सदानन्दे**भिषिक्ते** सहि स हि सर्वानभिषिञ्चति स्वानन्देन यदि सोप्यभिषिक्तः सर्वैस्तदा महदाश्चर्यं जातमिति, **एतानि** परिदृश्यमानानि **सर्वाण्येव निसर्गतोपि क्रूराणि** शाश्वतिकविरोधयुक्तान्यपि **निर्वैराण्यभवन्**, तदा शुकस्तामवस्थां प्राप्तः पशून् पश्यन्नाहै**तानी**ति, **कुरुनन्दने**तिसम्बोधनं विश्वासार्थं सद्वंशोत्पन्नस्यैव विश्वासो भवतीति, **ताते**तिसम्बोधनं स्नेहसूचकं तेनाप्रतारणापि सूचिता ॥२७॥ एवमभिषेकमहोत्सवमुक्त्वाभिषेककर्तुः स्वर्गप्राप्तिमाहे**ती**ति, पूर्वं **गोगोकुलपति**मित्यमुना प्रकारेण **गोविन्द** कृत्वा**भिषिच्य स** प्रसिद्धो भगवदनुगृहीतो वा भगवतैवानुज्ञातो **देवादयो**त्र स्थास्यन्तीति सन्दिह्य **तैर्वृतः** सन् **दिवं ययौ**, भगवांस्तु स्वस्थान एव वर्तत इति नात्र प्रत्यापत्तिः कर्तव्या ॥ २८ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तरसाधनप्रकरणे
षष्ठस्य स्कन्धादितश्चतुर्विशाध्यायस्य विवरणम् ॥ २४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

तं तुष्टुवुरित्यस्य विवरणे **आधिदैविकेपि अर्धैन्द्राणि जुहोतीति नोपपद्यत** इति आधिदैविकेपि इन्द्रे अर्धैन्द्राणीति नोपपद्यते, अर्धैन्द्राणि जुहोतीत्यत्र इन्द्रस्य सर्वदेवतापेक्षयाधिको भागो निरूपितः, हविषः अर्धभागे मध्ये अन्ये बहवो देवाः अर्धमध्ये एक इन्द्र इति, सोयं विभागाधिक्यज उत्कर्षो भगवन्तं श्रीकृष्णं इन्द्रमवगत्य श्रुत्या कृतस्तत्रैव श्रुतितात्पर्यात् न तु इन्द्रं (अवगत्य) तदाहुः **इन्द्रत्वे नार्धतेति इन्द्रत्वे** इति सप्तमी, इन्द्रस्य इन्द्रत्वे भागस्य अर्धता नास्तीत्यर्थः, अर्धो भागो नास्तीति फलितं, तथा च इन्द्रस्य इन्द्रत्वे अर्धैन्द्राणि जुहोतीति न सङ्गच्छत इत्यर्थः, **भगवत्त्वेन तु सर्वत्व**मिति यदि भगवानेवेन्द्रो जातस्तदा तु सर्वमेवोपपन्नं अर्धेन्द्रत्वं पूर्णेन्द्रत्वं च, सर्वरूपत्वात् सर्वसामर्थ्ययुक्तत्वात् विरुद्धसर्वधर्माश्रयत्वाच्च ॥ २५ ॥

इति चतुर्विशोऽध्यायः ॥ २५ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

तत्र भगवतोऽभिषेकस्थाने आगताः तुम्बुर्वादयो हरेर्यशो जगुः । गाने हेतुमाह—लोकमलापहमिति । लोकस्य वक्तृश्रोतृस्तृजनस्य मलानि पापादीनि हन्तीति तत् । तथा सुराङ्गना रम्भादयः अप्सरसो मुदान्विता ननृतुः ॥ २५ ॥ तं श्रीकृष्णं देवानां निकायेषु समूहेषु ये केतव इव दर्शनीया मुख्यास्ते तुष्टुवुः, तथाऽद्भुतानां पुष्पाणां वृष्टिभिः हि प्रसिद्धं यथा तथा अवाकिरन् आच्छादितवन्तश्च । तथा त्रयो लोकाः त्रिलोकस्था जनाः परां निर्वृतिं परमानन्दमाप्नुवन् । तदा गावो गां पृथ्वीं पयोभिद्रुतां सिक्तामनयंश्चक्रुः ॥ २६ ॥ सरितो नानारसौघाः क्षीरादिवाहिन्यो जाताः । वृक्षाश्च मधूनि स्रवन्तीति तथाभूता आसन् । अकृष्टपच्याः कर्षणं विनैव पक्का ओषधयो व्रीह्यादयः आसन् । अत्र समासः कर्मधारयः । तथा गिरयः उन्मणीन् उद्गतान् बहिःप्रकटान् मणीन् अबिभ्रत् अबिभरुः ॥ २७ ॥ 'तव राज्याभिषेकेऽपि कुलस्य महानानन्दो जात' इति सूचयन् सम्बोधयति—कुरुनन्दनेति । तत्रापि स्नेहातिशयेन पुनः सम्बोधयति—तातेति । कृष्णे इन्द्रतयाऽभिषिक्ते सति निसर्गतः स्वभावतः क्रूराण्यप्येतानि सर्पव्याघ्रादीनि भूतानि निर्वैराण्यभवन् ॥ २८ ॥ उपसंहरति—इतीति । इत्येवं गवां गोकुलस्य व्रजस्य च पतिं कृष्णं गोविन्दनामधारपूर्वकमभिषिच्य कृष्णेनानुज्ञातः स शक्रो देवादिभिर्वृतो दिवं स्वर्गं ययौ ॥ २९ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोघवर्णने । सप्तविंशो गतो वृत्तिमभिषेकनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

तत्रेति ॥ तत्राभिषेकस्थाने शक्रकुण्डं गोविन्दकुण्डमिति च प्रसिद्धे आगताः तुम्बुरुनारदादयः गन्धर्वाश्च लोकानां मलस्यापहं हरेर्यशो जगुः तथा सुराङ्गना रम्भादयः अप्सरसो मुदान्विता ननृतुः । नारदश्चायं गन्धर्वविशेषः । पार्षदभूतस्य देवर्षेर्नारदस्यावतारभूतः । यथा नित्यपार्षदगरुडस्य विनतासुतः ॥ २५ ॥ तमिति ॥ तं श्रीकृष्णं देवानां निकायेषु समूहेषु ये केतव इव दर्शनीया मुख्यास्ते तुष्टुवुः तथाऽद्भुतानां पुष्पाणां वृष्टिभिः हि प्रसिद्धं यथा तथा अवाकिरन् आच्छादितवन्तश्च । तथा त्रयो लोकाः त्रिलोकस्था जनाः परां निर्वृतिं परमानन्दमाप्नुवन् । तदा गावो गां पृथ्वीं पयोभिर्द्रुतां सिक्तामार्द्रामनयंश्चक्रुः ॥ २६ ॥ नानेति ॥ सरितो नानारसौघाः क्षीरादिवाहिन्यो जाताः । वृक्षाश्च मधूनि स्रवन्तीति तथाभूता आसन् । अकृष्टपच्याः कर्षणं विनैव पक्का ओषधयो व्रीह्याद्याः आसन् । तथा गिरयः उन्मणीन् गर्भगतान्मणीन् उत् उद्गतान् बहिः प्रकटान् अबिभ्रत् अबिभरुः । आर्षः प्रयोगः । अकृष्टपच्योषधय इति समासः सन्धिर्वाऽऽर्षः । यद्वा । अकृष्टपच्या ओषधयो येष्विति गिरिविशेषणम् ॥ २७ ॥ कृष्ण

इति हे कुरुनन्दन ! हे तात ! कृष्णे इन्द्रतयाऽभिषिक्ते सति निसर्गतः स्वभावतः क्रूराण्यप्येतानि सर्पव्याघ्रादीनि सत्त्वानि भूतानि निर्वैराण्यभवन् ।। २५ ।। इतीति ।। इत्येवं गवां कुलस्य व्रजस्य च पतिं कृष्णं गोविन्दनामधारणपूर्वकमभिषिच्य कृष्णेनानुज्ञातः स शक्रो देवादिभिर्वृतो दिवं स्वर्गं ययौ ।। २९ ।।

इति श्रीभागवते महापुराणेऽन्वितार्थप्रकाशिकायां दशमस्कन्धे सप्तविंशोऽध्यायः ।। २७ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तमिति देवानां निकायेषु समूहेषु केतव लोकनीया अग्रेसरा इत्यर्थः । व्यवाकिरन् विशेषेण ववृषुः निर्वृतिं सुखं गावः गां भूमिं स्वपयोभिर्दुग्धैः द्रुतां आर्द्रां अनयन्नकुर्वन्नित्यर्थः ।। २५ ।। नानारसौघाः नानाविधरसवाहिन्यः सरितः आसन् अकृष्टपच्याः कर्षणं विनैव वक्तुमर्हाः शाल्यादयः अत्र संधिरार्षः यद्वा अकृष्ट पच्या उ षधयो येषु ते गिरयः उन्मणीन् आदौ आभ्यंतरस्थितान् पश्चाच्च उद्गतान् बहिः प्रत्यक्षान् मणीन् अबिभ्रत् अबिभरुः ।। २६ ।। निसर्गतः स्वभावेन ।। २७–२८ ।।

इति श्रीशुद्धकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धव्याख्याने इंद्रस्तुतिनामा सप्तविंशोऽध्यायः ।। २७ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ।। देवानां निकायाः संघास्तेषु केतवः केतुवद्ये दर्शनीया मुख्यास्ते इत्यर्थः । तं श्रीकृष्णं, तुष्टुवुरस्तुवन् ! अद्भुताश्च ताः पुष्पवृष्टयश्च ताभिः, अवाकिरंश्च हि । त्रयः लोकाः, परामतिशयितां, निर्वृतिमानन्दं, आप्नुवन् संप्रापुः । तदा गावः, गां पृथिवीं, पयोभिः द्रुतां सिक्तां, अनयन् संचक्रुः ।। २५ ।। नानेति ।। सरितो नद्यः, नानारसौघाः क्षीरादिनानारसवाहिन्यः, बभूवुः । वृक्षास्तरवः, मधूनि स्रवन्तीति मधुस्रवाः, आसन् । अकृष्टपच्याः कर्षणं विनैव पक्वाश्च ता औषधयो व्रीह्यादयः, आसन् । यद्वा अकृष्टपच्याः औषधयः, पृथक्पदे संधिरार्षः । यद्वा, अकृटपच्या औषधयो येषु ते गिरयः पर्वताः, उन्मणीन् बहिः प्रकाशितान्मणीन्, अबिभ्रन् ।। २६ ।। कृष्णे इति हे तातानुकम्प्य, हे कुरुनन्दन, कृष्णे श्रीकृष्णभगवति, अभिषिक्ते सति, इन्द्रे कृते सतीत्यर्थः । एतानि सत्त्वानि, निसर्गतः स्वभावतः, क्रूराणि सन्त्यपि, निर्वैराणि अभवन् । व्याघ्रादीनि सर्वाणि भूतानि साहजिकमपि वैरमत्यजन्नित्यर्थः ।। २७ ।। इतीति ।। सः शक्रः इन्द्रः, इति गावश्च गोकुलं च तेषां पतिस्तं, गोविन्दं, अभिषिच्य, अनुज्ञातस्तेन कृष्णेन कृताभ्यनुज्ञः, श्रीकृष्णाधीनस्वाधिकारो भूत्वेति तात्पर्यम् । देवादिभिः वृतः परिवृतः सन्, दिवं स्वर्गलोकं प्रति, ययौ ।

देवानामस्म्यहं हीन्द्रो गवां त्वमिन्द्रतां गतः । लोके गोविन्द इत्येवं गास्यन्ति त्वां नरा भुवि ।। १ ।। २८ ।।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे सप्तविंशोऽध्यायः ।। २७ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृष्णेऽभिषिक्त इति : १०.२७.२७.

सामान्येऽप्यभिषिक्ते भूभृति सुखशालि भवति जनजातम् । तद्युक्तमेव तादृग् भूभृद्वरधरकराभिषेचनतः ।। ७८ ।।
कृत्वा कृपानुग्रहमर्पितं मे यज्ज्ञानचक्षुर्मलमात्रहारि । धन्योऽस्मि पश्यामि च नित्यमक्ष्णां सहस्रमात्मीयमदुष्टमेव ।। ७९ ।।
स्वरूपशोभः सुरताधिवासस्तथा सुधर्मावनजागरूकः । स्वराढ्यवाद्यः कलितापमेघः कृपाबलात्ते त्वमिवाहमासम् ।। ८० ।।
इत्युक्त्वा तदनुज्ञातः सहस्राक्षः प्रभोगिरा । स्वस्थोऽप्यभूत् पुनः स्वस्थः सुखेनानुचरैः सह ।। ८१ ।।
इन्द्रादप्यधिकस्तव प्रियतरो गोगोपसंघोऽभवत् यत्तत्त्राणकृते स देवपतिरप्यग्र्योऽप्यधस्तात् कृतः ।
तस्मादेतदशङ्कमच्युत मया निर्णीतमस्मिञ्जने यस्त्वत्सेवनधीः स ते प्रियतरः स्वल्पोऽस्त्वनल्पोऽस्तु वा ।। ८२ ।।

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने सप्तविंशोऽध्यायः ।। २७ ।।

कृष्णप्रिया

ब्रह्मादि देववर्य, एवं देवोत्तम स्वरूप मन्त्रात्मक वेदों ने भगवान् श्रीकृष्ण पर दिव्य पुष्पों की वृष्टि की और भगवान का यशोगान करने लगे । भगवान के अभिषेक से तीनों लोक में परमानन्द छा गया । भावाविष्ट गौओं के उधस् धनों से दुध की धाराएँ वह चली, जिससे धरणी भींग गई ।। २५ ।। भाँति भाँति के रसों से भरपूर नदियाँ बहने लगी और रसों के पूर आ गए । तरुवरों के कोटरों में से मधुधाराओं बहने लगी ।। २६ ।। हे तात ! हे कुरुनन्दन ! भगवान् श्रीकृष्ण का अभिषेक होने के समय जन्म से और स्वभाव से वैर वाले कूर-निर्दय जीवों ने भी परस्पर का साहजिक वैर को छोड़ दिया ।। २७ ।। इस प्रकार गोपों के एवं गौओं के नाथ श्री गोविन्द प्रभुजी का अभिषेक करके भगवान की आज्ञा लेकर नारदादि देवर्षियों के साथ देवराज इन्द्र ने अपने लोक स्वर्ग की और प्रस्थान किया ।। २८ ।।

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां तामसप्रकरणे हिन्दीभाषान्तरे सप्तविंशोऽध्यायः सम्पूर्णः ।। २६ ।।

* * *

अथाष्टाविंशोऽध्यायः

श्लोकाः	अनु.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
१६	१६	३	५२८	१८	४३	५८९	१८।	५

श्रीशुक[1] उवाच

एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् । स्नातुं नन्दस्तु कालिन्द्या द्वादश्यां जलमाविशत् ॥ १ ॥
तं गृहीत्वानयद् भृत्यो वरुणस्यासुरोऽन्तिकम् । अविज्ञायासुरीं बेलां प्रविष्टमुदकं निशि ॥ २ ॥
[2]चुक्रुशुस्तमपश्यन्तः कृष्ण रामेति गोपकाः ।
भगवांस्तदुपश्रुत्य पितरं वरुणाहृतम् । [3]तदन्तिकं गतो राजन् स्वानामभयदो विभुः[4] ॥ ३ ॥
प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्यया । महत्या पूजयित्वाऽऽह तद्दर्शनमहोत्सवः ॥ ४ ॥

कर्दमक्षमा

अन्वयः— नन्दः तु एकादश्याम् निराहारः जनार्दनम् समभ्यर्च्य द्वादश्याम् स्नातुम् कालिन्द्याः जलम् आविशत् ॥ १ ॥ आसुरीम् वेलाम् अविज्ञाय निशि उदकम् प्रविष्टम् तम् गृहीत्वा, वरुणस्य भृत्यः असुरान्तिकम् अनयत् ॥ २ ॥ गोपकाः तत्र तम् अपश्यन्तः हे कृष्ण ! हे राम ! इति चुक्रुशुः, भगवान् तत् वरुणाहृतम् पितरम् उपाश्रुत्य हे राजन् स्वानाम् अभयदः "भगवान्" विभुः तदन्तिकः ययौ ॥ ३ ॥ हृषीकेशम् प्राप्तम् वीक्ष्य तद् दर्शनमहोत्सवः लोकपालः महत्या सपर्यया पूजयित्वा आह ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अष्टाविंशे ततो नंदानयनं वरुणालयात् ॥ वैकुंठदर्शनं चाथ गोपानामनुवर्ण्यते ॥ १ ॥
गोवर्धनं समुद्धृत्य वंशे कृत्वाऽमरेश्वरम् ॥ नंदानयनतः कृष्णो वरुणं च वशेऽनयत् ॥ २ ॥ १ ॥

कलामात्रायां द्वादश्यां पारणादराभिनिवेशेनासुरीं वेलामविज्ञायारुणोदयात्पूर्वमेव शास्त्रबलेन निश्युदकं प्रविष्टं तदनभिज्ञो वरुणस्य भृत्योऽनयदिति । तथा च शास्त्रम् " कलार्धां द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि आमध्याह्नाः क्रियाः सर्वाः कर्तव्याः शंभुशासनात् ॥ " इत्यादि । वक्ष्यति च वरुणः 'अजानता मामकेन' इति भगवद्धर्ममजानतेत्यर्थः ॥ २ ॥ स्वानां भगवद्धर्मपराणामभयदो मा भैष्टेत्यभयं ददत् ॥ ३ ॥ सपर्ययाऽर्हणेन ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः सप्तविंशाध्यायोत्तरम् (१) । अनयत् अकरोत् (२) । निराहारः व्रतघ्नाहाररहित उपोषितो वा । " अष्टैतान्यव्रतघ्नानि ह्यापो मूलं पयो दधि । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥" इति हेमाद्रिः ॥ १ ॥ तम् नन्दम् । तदनभिज्ञः भगवद्धर्मानभिज्ञः । निशीथात् अर्द्धरात्रात् । कलार्द्धाम् त्रिंशत्पलीमताम् । शंभुः शंकरः ऋषिर्वा । "यामौ द्वौ मध्यमौ रात्रेरासुरः समयो मतः" इत्युक्तेरर्द्धरात्रात्परयामावशेषनिशातः परं प्रविष्ट इत्यवधेयम् । इत्यर्थ इति । सर्वज्ञोऽपि भगवद्धर्मानभिज्ञोऽज्ञ एवेति भावः । असुर एवासुरवेलायां जलारक्षायां नियुक्त इत्युक्तमसुर इति । यद्वा—सुरभिन्नोऽसुरो यक्ष एवेत्यर्थः ॥ २ ॥ तं नंदम् । गोपका रात्रौ स्नानार्थं गतस्य रक्षकाः । तद्गोपाक्रोशं पितरमानेतुमिति । तदंतिकम् वरुणसमीपम् । विभः सर्वतो दीप्तिमान् ॥ ३ ॥ लोकपालो वरुणः । तद्दर्शनेन कृष्णदर्शनेन महानुत्सवो यस्य स तथा ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रसङ्गाददद्भुतचरितमेवानुवर्णयन् आदौ ऐश्वर्यमदानर्थतामेव दर्शयन् इन्द्रस्येव वरुणस्यापराधं वक्तुं तत्प्रसङ्गमारभते—एकादश्यामित्यादिना मुदमिन्त्यंतेन । एकादश्यां वृद्ध्या ह्रासेन वा किञ्चिन्मात्रनिष्क्रान्तायां तस्यां षट्प्रहरावेव तद्यतनकालं व्याप्येत्यर्थः । द्वादश्यां पारणाह निःक्रान्ते किञ्चित् द्वादश्यादिप्रहरद्वयावसरतद्यतनकाल इत्यर्थः । किञ्च सम्यक् अभितोऽर्चयित्वा परमभागवताग्र्यत्वेन यथाविधि सजागरणपूजाविशेषं कृत्वेत्यर्थः । जनैः भक्तैरर्द्यते अतृप्ततया नित्यं भक्त्यर्थं याच्यत इति तथा तम् इति परमकृतार्थस्यापि तस्य निराहारत्वेन समभ्यर्चने हेतुः अत एव कालिन्द्यां भगवद्भक्तिविवर्द्धन्यां स्नातुं जलमाविशत्

---

१. श्री बादरायणि—प्रा. पा. । २. गोपालास्तमपश्यन्तः कृष्ण रामेति चुक्रुशुः-विज. । ३. नन्दान्तिक-प्रा. पा. । ४. हरिः—प्रा. पा. ।

तुशब्देनान्यो नाविशत् किन्तु गृह एव सस्नाविति व्यञ्जयित्वा तस्य यमुनास्नानाग्रहं बोधयति ॥ १ ॥ असुर इति जात्यैव वैष्णवधर्माज्ञत्वमुक्तं तथाऽऽसुर्य्यां वेलायां जलरक्षणे बलिष्ठस्य तस्यैव योग्यत्वं च दर्शितं वरुणस्य भृत्य इति तस्यापि दोषापत्तिः अवज्ञाय अनादृत्य ॥ २ ॥ चुक्रुशुरित्यर्द्धकम् । गोपकाः महाराजस्य तस्य चतुर्दिक् रक्षका जनाः ॥ तत्क्रोशनं दूरगोपि उप समीप एव श्रुत्वा पितरं वरुणाहृतं च ज्ञात्वेति शेषः तदन्तिकं गतः तत्र कैमुत्येन हेतुः विभुर्व्यापक इति स्वानां गोपज्ञातिमात्राणामभयदः किम्पुनः पितुरित्यर्थः ॥ ३ ॥ हृषीकेशं सर्वेन्द्रियप्रवर्त्तकम् इतीन्द्रियवृत्त्यगोचरमपि प्राप्तं वीक्ष्य निकटमागतं ज्ञात्वेत्यर्थः । ततश्चोपव्रज्येति ज्ञेयं लोकपाल इति महासपर्यया सामर्थ्यं द्योतितं ततस्तदैव लोकपालत्वं सफलं वृत्तमिति च तद्दर्शनेन महानुत्सव आनन्दो यस्येति तादृशपूजने हेतुः, एतदुक्तं भवति; पूर्वं श्रीभगवतो दुर्जनानुचरे तस्मिन् क्रोध एव जातः सङ्गत्य तु तं सभयतायामपि नातिव्यग्रं सदण्डवन्नतितयोपव्रजन्तं च दृष्ट्वा निश्चितस्वाभीष्टलब्धितया तस्य तत्र क्षमाबलितवृष्टिर्जाता ततश्च तस्य तद्दर्शनमहोत्सवो जातः ततश्च स्तुतिपूजादिकं तेनारब्धमिति ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रसंगादद्भुतचरितमेवानुवर्णयन्नादौ ऐश्वर्य्यमदानर्थतामेव दर्शयन् इन्द्रस्येव वरुणस्याप्यपराधं वक्तुं तत्प्रसंगमारभते—एकादश्यामित्यादिना मुदमित्यन्तेन । एकादश्याः वृद्ध्या ह्रासेन किञ्चिन्मात्रनिष्क्रान्तायां तस्यामिति ज्ञेयम्; पारणाहे किञ्चिन्निष्क्रान्तद्वादश्यपेक्षयारात्रौ स्नानार्थं जलप्रवेशात्; किञ्च, सम्यगभितोऽर्चयित्वा परमभागवताग्र्यत्वेन यथाविधि सजागरणपूजाविशेषं कृत्वेत्यर्थः । जनैर्भक्तैरर्द्यते अतृप्ततया नित्यं भक्त्यर्थं याच्यत इति तथा तम्, इति परमकृतार्थस्यापि तस्य निराहारत्वेन समभ्यर्च्चने हेतुः, अतएव कालिन्द्यात् भगवद्भक्तिविवर्द्धिन्यां स्नातुं जलमाविशत्, भक्त्या जले निममज्जेत्यर्थः । इन्द्रोऽसौ कृष्णं त्यक्त्वा स्वाराज्यमुपभोक्तुं ययौ, नन्दस्तु पुत्रत्वेन प्राप्तकृष्णोऽपि भगवद्धर्म्ममपि न त्यजतीति तु-शब्दार्थः; यद्वा, परवाक्यापेक्षया तु-शब्दः, स्नानन्तु भक्त्यर्थमेव चक्रे ॥ १ ॥ देवप्रवरस्य लोकपालस्य वरुणस्य भृत्यस्तु तं धृत्वा अनयदित्यहो ऐश्वर्य्यमदान्धतेति भावः । असुर इति जात्यैव वैष्णवधर्म्माज्ञत्वमुक्तम्, तथासुर्य्यां बेलायां जलरक्षणे बलिष्ठस्य तस्यैव योग्यत्वं च दर्शितम् । ननु तर्हि वरुणस्य को नाम दोषः ? तत्राह—वरुणस्येति, भृत्यस्य दोषेण स्वामिनोऽपि दोषापत्तेः; श्रीनन्दानयनार्थं भगवदिच्छयैव तेन तन्नयनं बोद्धव्यम्, अन्यथा कथमपि तदसम्भवात्, तच्चाग्रे व्यक्तं भावि । अवज्ञाय अनादृत्य ॥ २ ॥ कृष्ण रामेत्येवं चक्रुशुः, उच्चैरकीर्त्तयन्, परमार्त्त्या भगवन्नाममात्रैकस्फूर्त्तेः, तत्र कृष्णनाम्न आदौ क्रोशनं स्वभावतस्तस्मिन् प्रीतिविशेषात्, तस्य माहात्म्यविशेषाच्च । यद्वा, हे कृष्ण हे रामेति द्वावेव भ्रातरावुच्चैराह्वयामासुः, गोपकास्तत्संगे स्नानार्थं गता गोपा एवेत्यर्थः; यद्वा, महाराजस्य तस्य चतुर्दिग्रक्षका जनाः ॥ ३ ॥ तत्क्रोशनं पितरं च वरुणाहृतमुप समीप एव श्रुत्वा, इति श्रीभगवन्तमपि तत्पश्चात्तत्रैव गच्छन्तं बोधयति; यद्वा, तत्तस्मात् क्रोशनात्, अतो दूरेऽपि समीपवच्छ्रवणात् क्रोशनस्याविष्टत्वं सूचितम् । हे राजन्निति—यथा अश्वत्थाम्नोऽस्त्रात् क्रोशतां त्वत्पितामहानामभयं दत्तवांस्तथेति भावः; यद्वा, राजमानः कोपेनाविर्भूततेजोविशेषात्; यतो विभुर्व्रजजनैकप्रभुः; यद्वा, व्यापकस्तत्रैव वर्त्तमानोऽपि स्नेहादतित्वरया सद्य एव तत्र गत एवेत्यर्थः । भगवानिति जगद्धित्यर्थं निजकारुण्याद्यशेषगुणप्रकटनपर इत्यर्थः । अयं भावः—यद्यपीच्छामात्रेण सद्य एवासुरात् नन्दं मोचयितुं शक्तस्तथापि परमकृपया वरुणस्य हितार्थं नन्दानयनच्छलेन तत्र गत इति ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ वरुणदूताहृतनन्दनयनस्वलोकप्रदर्शनात्मकं कर्मानुवर्णयत्यष्टाविंशेन–एकादश्यामिति । कदाचिन्नन्द एकादश्यां निराहारो जनार्दनं सम्यगभ्यर्च्य कलामात्रावशिष्टायां द्वादश्यां पारणाभिनिवेशेनासुरीमसुरसञ्चारसहचरितां वेलामर्द्धरात्ररूपामविज्ञायैव तदा स्नातुं कालिन्द्याः यमुनायाः जलम् विवेश प्रविष्टः ॥ १ ॥ तं निश्युदकं प्रविष्टं नन्दं वरुणस्य भृत्यः असुरो गृहीत्वा वरुणस्य समीपमनयत् ॥ २ ॥ ततः प्रभाते तं नन्दमपश्यन्तो गोपाः हे कृष्ण राम ! इति चुक्रशुः रुरुदुःआजुहावुर्वा तदा भगवांस्तदाक्रोशनं वरुणाहृतं नन्दं च श्रुत्वा ज्ञात्वा चेतिशेषः हे राजन् ! स्वानाममभयदः विभुः समर्थः । हेतुगर्भमिदम् एवंविधत्वात्तस्य वरुणस्यान्तिकं गतः ॥ ३ ॥ तदा लोकपालो वरुणः स्वान्तिकं प्राप्तं कृष्णमवलोक्य तस्य दर्शनमेव महानुत्सवो यस्य तथाभूतो महत्या सपर्यया पूजयासाधने पूजयित्वा ऽब्रवीत् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भक्तजनानुकम्पार्थो ऽयमवतारो नात्मार्थम् इति दर्शयितुं वरुणपाशान्नन्दगोपमोचनं नन्दादीनां स्वलोकप्रदर्शनञ्च कथं यत्यस्मिन्नध्याये, शुक इति । तत्र वरुणपाशग्रहणं कथं नन्दस्याऽभूदितीदं वक्तुमारभते–एकादश्यामिति । व्रतघ्नाहारो नास्तीति निराहारः ॥ १ ॥ आसुरीं वेलां निशीथकालम् ॥ २ ॥ वरुणभृत्येनाहृतमपि वरुणाहृतमिति वचनं वरुणस्य स्वामित्वात् भृत्यापराधे स्वामिनो दण्ड इति यथा तथा युज्यत इत्यर्थः ॥ ३–४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एकादश्यां स्वल्पमात्रैकादश्युपलक्षितषट्प्रहरतदुत्तरतदद्यतनकालं व्याप्येत्यर्थः। द्वादश्यां पारणाऽनिष्कान्तकिञ्चिद्द्वादश्यादिप्रहरद्वयारब्धतदद्यतनकाल इत्यर्थः। तुशब्देनान्यो नाविशदिति व्यज्य तस्य तादृशभगवद्धर्मतत्त्वज्ञतां बोधयति अवज्ञाय अनादृत्य तत्क्रोशनमुपश्रुत्य पितरञ्च वरुणाहृतं विज्ञायेति शेषः ॥ १–४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अष्टाविंशेऽभवन्नन्दाहरणं वरुणस्तुतिः। गोपानां विस्मयौत्सुक्यं ब्रह्मवैकुण्ठदर्शनम ॥
इन्द्रस्यागश्च तत्क्षतिमुक्त्वा स्वस्मृतिमागते। वरुणस्यापि ते वक्तुमाह लीलान्तरं मुनिः ॥

जलमाविशदित्यरुणोदयादपि पूर्वं कलामात्रावशिष्टायां द्वादश्यां पारणाप्राप्त्यर्थं शास्त्राज्ञावलेनैवेति ज्ञेयं, तथा च शास्त्रम्–

कलार्द्धां द्वादशीं दृष्ट्वा निशीथादूद्र्ध्वमेव हि। आमन्याह्नाः क्रियास्सर्वाः कर्त्तव्याः शम्भुशासनात् ॥ इति ॥ १ ॥

वरुणस्य भृत्योऽसुरः वरुणस्यान्तिकम् अनयत् तत्र हेतुः आसुरीं वेलामविज्ञाय उदकं प्रविष्टमित्यज्ञानेनैव तस्मिन् दोषकल्पनं श्रीनन्देन तु शास्त्राज्ञाबलेनैवोदके प्रविष्टत्वात् अत एवाग्रे वक्ष्यते "अजानता मामाकेन मूढेन"इति ॥ २ ॥ गोपकाः स्नानार्थं रात्रौ गतस्य तस्य रक्षकाः तत् क्रोशनम् उपश्रुत्य तदानीं दूरतः पुष्पशय्यायां शयानोपि निकट एव श्रुत्वेति तस्य सर्वदेशवर्त्तित्वात् पितरं वरुणाहृतं ज्ञात्वेति शेषः तदानीमेव रक्षकगोपानां निकटमेत्य क मे तातो निममज्जेति (पृ) दृष्ट्वा तत्रैव तटात् सझंपं निमज्य तदन्तिकं वरुणान्तिकं गतः स्वानामभयदः ततः सकाशान्नन्दमानीय ज्ञातीनामभयं दास्यन्नित्यर्थः ॥ ३–४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अष्टाविंशेऽध्याये वरुणलोकाच्छ्रीनन्दानयनं ब्रह्महृदे गोपानां परमधामदर्शनं च वर्णयति–एकादश्यामिति—

यानि कानि च पापानि ब्रह्महत्याशतानि च। अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे ॥
रटन्तीह पुराणानि भूयो भूयो वरानने। न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे ॥
एकादशीव्रतं यस्तु भक्तिमान् कुरुते नरः। स याति परमं स्थानं यत्र देवो हरिः स्वयम् ॥

इत्यादिशास्त्राज्ञया एकादश्यां नन्दो निराहारः जनार्दनमभ्यर्च्य द्वादश्यां यदा व्रतं तत्पारणं त्रयोदश्यां भवति "त्रयोदश्यां तु पारणम्" इत्यादिवचनात् एकादशीव्रतपारणं तु द्वादश्यामेव "न द्वादशीमतिक्रमेत्" इत्यादिवाक्यात् इत्येवं निर्णयवित् कदाचिदल्पायां द्वादश्यां पारणायै—

"कलार्द्धां द्वादशीं दृष्ट्वा निशीथादूद्र्ध्वमेव हि। आमध्याह्नाः क्रियाः सर्वाः कर्त्तव्याः शम्भुशासनात्" ॥ इति

शास्त्रबलेन निशीथात्कलार्द्धादित्योदयपर्यन्तकाले एव आमध्याह्नक्रियासमाप्तिकाम आसुरीं वेलामविज्ञाय निशीथादुपरि द्वादश्यां स्नातुं कालिन्द्याः जलमाविशदित्यर्थः ॥ १ ॥ एवमासुरीं वेलामविज्ञाय निशि उदकं प्रविष्टं श्रीनन्दं गृहीत्वा वैष्णवधर्मानभिज्ञो वरुणस्य भृत्योऽसुरः वरुणान्तिकमनयत् ॥ २–३ ॥ लोकपालो वरुणः सपर्ययाऽर्हणेन ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणि

॥ हरिः ॐ ॥ संसारसागरात्कंसारिरहमेवोत्कृष्टानुत्कष्टुमीश इति भावमाविष्कुर्वन् जलचरनीतं तातममूमुचत्स्वलोकं चैतदादीनामदर्शयदिति कथयत्यस्मिन्नध्याये। तत्रादौ नन्दः क क स नीरचरः कथं नयनमित्यतस्तत्पूर्वरङ्गं सङ्गमयति शुक इत्याह। श्रीशुक इत्यादि। एकादश्यां निर्गत आहारो यस्य स जनार्दनमभ्यर्च्य द्वादश्यामल्पीयस्यां स्नातुं नन्दः कालिन्द्या यमुनाया जलमाविशत्प्रविवेश। तुः साधनादिसद्भावसूचकः ॥ १ ॥ वरुणस्य भृत्यस्तं नन्दं गृहीत्वा वरुणस्यान्तिकं समीपमनयत्। तत्र तन्त्रमाह। अविज्ञायेति। वरुणभृत्यः स्वयमविज्ञाय कलार्धां द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि। आमध्याह्नाः क्रियाः सर्वाः कर्तव्याः शम्भुशासनादित्यादिशास्त्रमज्ञात्वा निश्यल्पीयस्यां सत्यामप्यासुरी बेलां मत्वेति शेषः। अवज्ञायेति पाठेऽसुरवेलामविज्ञायानालक्ष्य प्रविष्टमित्यन्वयः। शास्त्रसम्मत्या तदवज्ञानमिति ज्ञेयं। यद्वक्ष्यति च वरुणोऽजानता मामकेनेति ॥ २ ॥ गोपालास्तं नन्दमपश्यन्तः कृष्णरामेति चुक्रुशुः। तत्प्रदाननिदानं दानवारिः कृष्ण एवेति तत्पुरस्कृतिः। चुकूजुः। भगवांस्तज्जनकूजनमुपसृत्य वरुणाहृतं नेतृनेतृत्वाद्वरुणाहृतमित्युदाहृतं निशम्य ॥३॥ तदन्तिकं वरुणसमीपं गतः स्वानामभयदः। न नास्ति सामर्थ्यमित्याह। विभुरिति। लोकपालो वरुणः। न च वञ्चनरचनमत्र सम्भवीत्याह। हृषीकेशमिति। महत्या सपर्यया तत्साधनेन पूजयित्वा तद्दर्शनमहोत्सव आह ॥ ४ ॥

श्रीसुबोधिनी

पञ्चविंशे तु वरुणान् नन्दं मोचयिता हरिः । ततः सर्वान् स्ववैकुण्ठे नेष्यतीत्युच्यते फलम् ॥ १ ॥
अभिषेकश्च तद्दृष्टो देवस्तोत्रादिकं श्रुतम् । ज्ञाते देवोत्तमत्वे तु द्रष्टव्यं पौरुषं परम् ॥ २ ॥
अन्यथा नन्दविज्ञानं भवेत् पर्यवसायि तत् । अतस्तन्निग्रहो वाच्यो वरुणस्तेन सेवकः ॥ ३ ॥
कालाद्युपासकश्चेत स्याद् भगवत्सेवकः क्वचित् । ततः क्लेशमवाप्नोति कृष्णादेव च मुच्यते ॥ ४ ॥
ततो माहात्म्यविज्ञानं पूर्णं तस्य भविष्यति । ततश्चिन्तनमात्रेण भगवान् स्वपदं नयेत् ॥ ५ ॥

भगवतः सम्पूर्णमाहात्म्यज्ञानार्थं निरुद्धानां वैकुण्ठे गमनमुच्यते तदर्थं प्रथमं धर्मबुद्ध्या मर्यादायां प्रवृत्तस्य सर्वथा भगवन्तमभजतो नन्दस्यानर्थसम्बन्धमाहैकादश्यामिति, स हि विष्णुव्रतपरायणो धर्मनिष्ठश्चान्यस्य माहात्म्यज्ञानं न स्यादिति तथोच्यते माहात्म्यज्ञापनार्थमेव नयनमतो न वरुणो निगृहीतः, **एकादश्यां निराहारः सन् जनार्दनं मोक्षदातारं सम्यगभ्यर्च्य** नन्दो व्रते स्वधर्ममपि कर्तुं वैष्णवं पक्षमाश्रित्य वैदिकपक्षं त्यक्त्वार्धरात्रसमये द्वादश्यां जातायां **कालिन्द्यां** प्रवाहमध्ये **जलमाविशत्**, "मुहूर्तार्धावशिष्टायां पारणं प्रति निशीथात् सम्यगुत्थाय क्रियाः कुर्याद् यथोचितम् अग्निहोत्रादिकर्माणि तथा नैमित्तिकानि च आ मध्याह्नात् क्रियाः सर्वाः कर्तव्याः शम्भुचोदना"दिति वैष्णवधर्मविश्वासात् स्नातुं **प्रवृत्तः** ॥ १ ॥ तद्रक्षको वरुणस्य सेवकोन्यायं करोतीति मत्वा वैष्णवधर्मापरिज्ञानात् तं बद्ध्वा नीतवानित्याह **तं गृहीत्वेति**, **वरुणस्यैव भृत्यो वरुणस्यान्तिकमनयत्**, तस्य नयनेभिप्रायमाहाविज्ञायेति, **सासुरी वेला** यस्तत्र धर्मं करोति तदसुरगामि भवतीममर्थं नन्दोज्ञात्वा जलं प्रविष्ट इति विज्ञायानयत्, वस्तुतोयमपि न जानाति तदग्रे वक्ष्यति वरुणोजानतेति ॥ २ ॥ ततस्तं मोचयितुं सर्वे गोपाला**श्चुक्रुशुः कृष्णरामेति**, अकस्माज्जले प्रविष्टः पश्चान्न इष्ट इति तं **नन्दमपश्यन्तः सर्वावस्थासु सर्वकार्येषु चोपायान्तरमलभमाना भगवन्तमेव विज्ञापयन्ति यतो गोपका** अल्पा गोपास्तदा भगवान् गृह एव स्थितः शयनो दूरादेव **कृष्णरामे**तिवचनमाकर्ण्य **पिता वरुणेन हृत इति** ज्ञात्वेत एव **वरुणान्तिकं गतः** प्रायेणोक्त्वा गतोन्यथा महद् भयं स्यात्, भगवान् निरोधलीलामेतदर्थं कृतवान् **यत् सर्वकर्मसु स्वयं प्रविष्टस्तानि कर्माणि स्वकर्माणि कृत्वा तेभ्यस्तान् मोचयत्यन्यथैवं** न कुर्यात् तत् साधन**दशायां च वक्तव्यं**, आवश्यकफले पूर्वं कृते कर्मणि सति कर्मणोनिवृत्तत्वान्न प्रवेशः सम्भवतीत्यतो वरुणस्यान्तिकं स्वयमपि **गतः**, अन्यथा वरुणमेवाकारयेन् नन्दं वा कर्षेत्, माहात्म्यं च ज्ञापनीयमतः स्वयमेव **गतः**, **राजन्निति** सम्बोधनं राजधर्म एतादृश इति ज्ञापयितुमनुपेक्षणीयाः **सेवका** इति, किञ्च **स्वानामभयदो** यदि शीघ्रं न गच्छेदिदानीं भक्तानां भयं न निवर्तेत, **विभुरिति** सर्वप्रकारेणापि सर्वं कर्तुं समर्थः, न हि भूमावतीर्णोत्रैव किञ्चित् करोति नान्यत्रेति, अन्यथा लीलाया अन्ते तान् वैकुण्ठे न नयेदवतारान्तरवदतः **कृष्णः सर्वत्र सर्वसामर्थ्ययुक्तः** ॥ ३ ॥ ततो यज् जातं तदाह **प्राप्तं वीक्ष्येति**, ननु पूजात्र न वक्तव्या मोचयितुमेव गतोपकारिगृहे च पूजा न ग्राह्यातः कथं पूजां कृतवानित्यशङ्क्याह **प्रकर्षप्राप्तं समागतं भगवन्तं वीक्ष्य पूजयामास** तत्र हेतुर्**हृषीकेशमिति**, इन्द्रियाधिपतिरयं, यदि न पूजयेत् तल्लोकभोगः पश्चात् तस्य न स्यात्, अनिवेदितभोगे दोषश्च स्यात्, यथा देवेष्विन्द्र एवं दैत्येषु वरुणः, यद्यत्रैव तां श्रियं **गृह्णीयाद्** दैत्या न हता भवेयुरतस्तत्रैव गत्वा गृहीतवानन्यथा **भिन्नसत्ताके जाताः पदार्था भगवद्भक्तानां शुद्धिहेतवो न भवेयुः**, जीवास्तु त्रिविधा एव "देवमानुषदानवा" इति, तत्र मानुष्याकृत्या देवोभिषेकेण दैत्येश्वरपूजां च गृहीतवानतस्तस्मिन् **समये सर्वमेव पुष्ट्युपयोगि फलसाधकं च भवति**, तस्य सर्वस्वनिवेदनपूर्विकां पूजामाह **लोकपालः सपर्ययेति**, स हि सर्वेषामेव दैत्यानां लोकान् पात्यतः स्वस्य यावती **सपर्या** पूजासामग्री ततोप्यधिका कृताग्रे जायमानभोगमपि मध्ये निवेश्य पूजां कृतवान्, तदाह **महत्येति**, न केवलं कायिकीमेव सेवां कृतवान् किन्तु वाचनिकीमपि, 'मनः पूर्वरूपं वागुत्तररूप'मिति मानसिकं तत्रैव प्रवेक्ष्यतीति, वक्ष्यमाणमाह किञ्च **तस्य दर्शनेनैव महानुत्सवो** यस्य, समागते **महानाह्लादो** मानसिकी पूजा, स्तुतियोग्यः स्तुतिं कुर्याद् भगवद्गुणवर्णनम् ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पञ्चविंशेध्याये तात्पर्योक्तौ, **अन्यथा नन्दविज्ञानमिति** । यदि वरुणैश्वर्यतद्दास्यस्वानयलक्षणं पुरुषसम्बन्धि यत्परं माहात्म्यं पुरुषोत्तमत्वेन ज्ञानजनकमिति यावत् तद्दर्शनं न स्यात्तदा तत्तदेव पूर्वोक्तं नारायणांशत्वेन देवोत्तमत्वेन यज्ज्ञानम्, वस्तुतस्तु पुरुषोत्तमविषयकमेवं ज्ञानं भक्तिमार्गविरुद्धं, पर्यवसायि पर्यवसानशीलं स्यादित्यर्थः । तथा सत्यग्रे भजनानन्दानुभवो न स्यात्, तद्विरुद्धज्ञानवत्त्वाद्, अतो निरवधिमाहात्म्यवत्त्वेन पुरुषोत्तमत्वेन ज्ञानं जननीयम् भक्तिमार्गविरुद्धज्ञानवत्त्वेन निग्रहश्च कार्यः । वरुणद्वारा भगवानुभयं कारितवानिति वरुणं सेवकत्वेन प्रभुर्मनुत इत्यर्थः ।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

पञ्चविंशाध्यायप्रथमकारिकायां **मोचयितेति** तृन्नन्तं, **स्ववैकुण्ठे नेष्यतीति** अधुनापि व्यापिवैकुण्ठ एव लीला, "रमाक्रीडमभू"दिति पूर्वमेवोक्तेस्तथापि भगवतो मानुषभावस्वीकारे व्यापिवैकुण्ठस्यापि प्राकृतभावस्वीकारः, अधुना अर्जुनस्य मानुष-

भावरहितं स्वरूपमिवैतेषां प्राकृतभावरहितं वैकुण्ठं प्रदर्शयिष्यतीत्यर्थः, **देवा** इति दृष्टा इतिवचनविपरिणामेन पूर्वेणान्वयः, **पर्यवसायीति** अंशत्वे एव पर्यवसन्नं भवेत् न तु पुरुषोत्तमत्वे इत्यर्थः ॥ ० ॥ **एकादश्यामित्यस्याभासे अनर्थसम्बन्धमिति नन्दे** अनर्थं सम्बध्नाति तादृशं जलप्रवेशमाहेत्यर्थः ॥ १ ॥ **तदन्तिकमित्यत्र निरोधलीलामिति** अनुशयनलीलामित्यर्थः, **साधनेति** यागदशायामित्यर्थः, **फलेति** वृष्टिदशायामित्यर्थः, अत्र साधनदशायामप्रवेशने हेतुमाहुः **आवश्यकेति**, पूर्वं तु प्रयोजनाभावान् न प्रवेशः, पश्चात् तु कर्म निवृत्तमेव, अतो वरुणहरणरूपफलदशायामेव प्रवेश इत्यर्थः, **लीलाया अन्ते** इति वरुणनिग्रहलीलान्ते इत्यर्थः ॥ २ ॥ **प्राप्तं वीक्ष्येत्यत्र दैत्या न हता** इति अत्रागमने प्रपन्ना एव भवेयुरित्यर्थः, **अन्यथेति** तत्र गमनाभावे तद्देशस्य शुद्ध्यभावादितिभावः ॥ ४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

पञ्चविंशाध्यायार्थोक्तौ **नेष्यतीत्युच्यते** फलमिति वैकुण्ठे गोपान् नेष्यतीति **फलमवान्तरफलमित्यर्थः, पर्यवसायीति** स्तुतीन्द्रकृताभिषेकदेवदर्शनादिना श्रीकृष्णो **देवोत्तम** इति **ज्ञाते** सति **परं पौरुषं द्रष्टव्यं** अन्यथा इन्द्रदमनादिमात्रं पौरुषं श्रीकृष्णेस्तीति ज्ञाते तावन्मात्रत्वे ज्ञानस्य पर्यवसानं स्यादित्यर्थः, अतः श्रीनन्दस्य निग्रहो वाच्यः, तथा सति वरुणलोके वरुणवैभवं दृष्ट्वा भूमौ तादृग्वैभवस्य कदाप्यदृष्टत्वात् तादृग्वैभववतो वरुणस्य भगवति प्रपत्तिं दृष्ट्वा अयं भगवान् सर्वश्रेष्ठ इतिज्ञानमभूदित्यर्थः, **तेन सेवक** इति यतो वरुगेन श्रीनन्देपहृते श्रीनन्दस्य वरुणवैभवदर्शनेन भगवत्परमवैभवदिदृक्षाभूत्, ततो भगवान् वैकुण्ठं प्रदर्शितवान्, एतावानुपकारो वरुणकृतनिग्रहेण जात इति भक्तोपकारकरणं वरुणस्येति, तेन हेतुना नन्दनिग्रहरूपेण वरुणस्य सेवकत्वमित्यर्थः, ननु श्रीनन्दस्य परमभक्तस्य क्लेशप्राप्तिः कथमित्याशङ्क्याहुः **कालाद्युपासकश्चेदित्यारभ्य क्लेशमवाप्नोतीत्यन्तेन**, भगवत्सेवकः श्रीनन्दो द्वादशीरूपकालविशेषोपासको जातस्ततो दुःखमन्वभूदित्यर्थः ॥ ० ॥ **तदन्तिकं गत** इत्यत्र ननु व्रजपतेरानयनार्थं भगवता वरुणसमीपे गतं तन् न कर्तव्यं वरुणस्य सेवकत्वात् सेवकगृहे स्वामिगमनस्यानुचितत्वादित्याशङ्क्याहुः **भगवान् निरोधलीलामेतदर्थं कृतवान् यत् सर्वकर्मसु स्वयं प्रविष्ट** इति, **एतदर्थं** नन्दादीनां प्रयोजनसिद्ध्यर्थं **निरोधलीलां** प्रपञ्चविस्मृतिपूर्वकस्वासक्तिसम्पादकलीलां **भक्तानामर्थे** स्वसेवकवरुणगृहगमनलीलां स्वयं कृतवान् यया वरुणगृहगमनलीलया श्रीनन्दादीनामेतादृशं ज्ञानमभूद् यदयं श्रीकृष्णोस्मदर्थे स्वायोग्यमपि कार्यं श्रमबहुलं करोति, ततश्च तादृशज्ञानात् श्रीकृष्ण एव तेषां परमासक्तिरभूदितिभावः, नन्वेतेषां निरोधसिद्ध्यर्थं वरुणगृहे गतमिति कुतो ज्ञायते इत्याकाङ्क्षायामाहुः **यत् सर्वकर्मसु स्वयं प्रविष्टस्तानि कर्माणि स्वकर्माणि कृत्वा तेभ्यस्तान् मोचयतीति, यद्** यस्माद्धेतोः **सर्वकर्मसु** कुमारिकाकर्तृकव्रतकर्मयजमानकृतयागकर्मश्रीव्रजेन्द्रकृतेन्द्रयागकर्मसु **स्वयं प्रविष्टस्तत्र** तत्र तदीयपदार्थानां स्वस्मिन् विनियोगं कारितवानतो निरोध्यानां भक्तानां कर्मसु स्वयं पूज्यत्वेन प्रविष्ट इत्यर्थः, तथा चान्यत्र विनियुक्तान् स्वकीयान् कर्तुं एतावताग्रहेण स्वयं पूज्यो भवत्यतो ज्ञायते प्रकृतेपि वरुणगृहगमनं निरोध्यानां निरोधसिद्ध्यर्थमेवेति, **तानि कर्माणि स्वकर्माणि कृत्वेति** अन्यार्थं क्रियमाणानि कर्माणि भगवत्कर्माणि कृत्वेत्यर्थः, तद् यथा कुमारिकाप्रसङ्गे कात्यायनीपूजने कात्यायनीस्वरूपेण स्वयं प्रविष्टः स्वपूजां कारितवान्, तदुक्तं "भगवानेव वा गुणातीत" इति तत्रत्यसुबोधिन्यां, यजमानयज्ञप्रसङ्गे यजमानपत्नीद्वारा तदीयपदार्थानां स्वस्मिन् विनियोगं कारितवान्, इन्द्रमखभङ्गप्रसङ्गे श्रीगोवर्धनस्थरूपेण सर्वसामग्रीस्वीकारं कृतवान्, यतः सर्वकर्मसु स्वयं प्रविष्टः, अतः प्रकृतेपि श्रीनन्दानयनार्थं स्वयं गत इति ज्ञेयं, **तेभ्यस्तान् मोचयतीति तेभ्यः** अन्योद्देश्यककर्मभ्यस्तान् भक्तान् **मोचयतीत्यर्थः**, अन्यथा यदि स्वकीयकरणरूपं प्रयोजनं न स्यात् तदा अन्योद्देश्यककर्मसु विघ्नमेव कुर्यान् न तु पूज्यत्वेन स्वप्रवेशं, तदाहुः **अन्यथा एवं न कुर्यादिति**, अर्थस्तु एवं स्वप्रवेशेन कर्मभ्यो मोचनं न कुर्यादित्यर्थः, विघ्नमात्रकरणे तु कालान्तरे पुनरपि कुर्युः, अन्यदेवस्थाने स्वप्रवेशे तु तदेव भगवत्कर्म सर्वदा कुर्युर्यथान्नकूटोत्सवमितिभावः, **तत्साधनदशायां फलदशायां च वक्तव्यमिति** तत् कर्मभ्यो मोचनं **साधनदशायां फलदशायां च** श्रीनन्दस्य **वक्तव्यं** मुख्यद्वारा सर्वेषां बोधसम्भवादित्यर्थः, साधनदशायां द्वादशीव्रते वरुणकृतोपद्रवं निवर्त्य तत्कर्मतो नन्दस्य मोचनं फलप्रकरणे अम्बिकावनगमनप्रसङ्गे सुदर्शनसर्पतो नन्दं मोचयित्वा अन्यदेवतोद्देश्यककर्मभ्यो मोचितवान्, एतादृशसुदर्शनसर्पजन्यदुःखस्यानुभूतत्वात् तत्प्रभृति देवतान्तरभजनं न कृतं भगवता मोचितत्वाद् भगवत्तोषजनकमेव कर्म कृतमितिभावः, ननु शक्रयागभङ्ग इव प्रकृतेपि पूज्यत्वेन स्वयमेव कुतो न प्रविष्टस्तत्राहुः **आवश्यकफले** इत्यारभ्य **सम्भवतीत्यन्तं**, द्वादशीव्रतलक्षणं कालप्रधानं कर्म पूर्वमेव जातं, ततो निवृत्तं कर्मेति कर्मणि न भगवतः प्रवेशः सम्भवतीत्यर्थः, एवं सति भगवत्प्रवेशाभावादस्मात् कालप्रधानकर्मणो निवृत्तिर्न भविष्यत्यतः कर्मतो निवर्तयितुं तत्कर्मणि वरुणकृते उपद्रवे श्रीनन्दं मोचयितुं स्वयं गतस्तथा च कर्मण्यनादरो भविष्यति दुःखानुभवस्य जातत्वात्, भगवत्यादरो भविष्यति दुःखमोचकत्वात्, ततश्च भगवत्तोषजनकं भक्तिमार्गसरणिसिद्धं कर्मैव करिष्यन्तीत्यन्यकर्मभ्यो मोचनमेवम्प्रकारेण सिद्धमितिभावः ॥ ३ ॥ **प्राप्तं वीक्ष्य हृषीकेशमित्यत्र** हृषीकेशपदतात्पर्यमाहुः **इन्द्रियाधिपतिरयं यदि न पूजयेत् तल्लोकभोगः पश्चात् तस्य न स्यादिति** भोगमात्रस्य चेन्द्रियसाध्यत्वादिन्द्रियाणां च हृषीकेशनियम्यत्वात् हृषीकेशपूजनाभावे हृषीकाणां भोगो न

स्यादितिहार्दं, **यद्यत्रैव तां गह्णीयाद् दैत्या न हताभवेयुरिति अत्रैव** व्रज एव स्थित्वा सपर्यां श्रियं गृह्णीयात् तदा दैत्यानामत्रागमने पूजादर्शने सत्सङ्गेन प्रपत्तिरेवोदियात् ततश्च न हता भवेयुरितिभावः, **अन्यथा भिन्नसत्ताक** इति यदि वरुणपूजां न गृह्णीयात् तदा वरुणदेशे भगवत्सम्बन्धाभावजन्याशुद्धया तत्रोत्पन्नाः पदार्था **भगवद्भक्तानां** वरुणादीनां शुद्धिहेतवो न भवन्तीत्यर्थः, तत्र **मानुषा आकृत्येति** अङ्गीकृता इतिशेषः, **मानुषा आकृत्या** स्वरूपसौन्दर्येणाङ्गीकृता इतिभावः, **देवाभिषेकेणेति देव** इन्द्रः **अभिषेकेण** हेतुना इन्द्रकर्तृकेन भगवता अङ्गीकृतः, देवपदेन इन्द्रं गृहीत्वा मुख्यत्वात् सर्वे देवा गृहीता इति बोध्यं, **दैत्येश्वरपूजामिति दैत्येश्वरस्य** वरुणस्य **पूजां** गृहीतवान् पूजाग्रहणेन सोऽप्यङ्गीकृतः, तदङ्गीकृत्यैव ये भक्ता दैत्येषु ते सर्व एव, एवं मानुषदैवदैत्या ये भक्तास्ते सर्वे निरुद्धा इति बोधितं, **महत्या पूजयित्वाहेत्य**स्याभासे **अग्रे जानमानभोगमपि मध्ये निवेश्येति** सर्वेषां स्वकीयपदार्थानां शुद्ध्यर्थं पूजा, यतः पूजया सर्वं भगवदुच्छिष्टं विधाय उच्छिष्टेन भोगः कर्तव्य इति मार्गमर्यादा, एवं सति जनिष्यमाणभोगान् पदार्थान् पूर्वं समर्प्य सर्वैर्भगवदीयैर्भुज्यन्ते, वरुणेन तु जायमानभोगा अपि पदार्थास्तद्भोगं निवार्य भगवते समर्प्यन्ते भगवदुच्छिष्टाः पुनर्भोक्ष्यन्ते इत्याशयेन, तदेतदाहुः मूले **महत्येत्यनेन, किन्तु वाचनिकीमपीति** वाचनिकीमपि पूजां स्तुतिरूपां कृतवानित्यर्थः, तदुक्त मूले **महत्या पूजयित्वाहे**त्यनेन, मानसिकी पूजा कुतो नोक्तेत्याकाङ्क्षायां मानसिक्याः पूजाया वाचनिक्यां पूजायामन्तर्भावमाहुः **मनः पूर्वरूपं वागुत्तररूपमिति मानसिकं तत्रैव प्रवेक्ष्यती**त्यनेन, वाचः उत्तररूपत्वादुत्तररूपस्य पूर्वरूपं विनाऽसम्भवादुत्तररूपेण वाचनिकेन तत्पूर्वरूपं मानसिकं आक्षिप्यत इति वाचनिकेन पूजनेन मानसिकं उक्तमेव, तदेतदाहुः **मानसिकं तत्रैव प्रवेक्ष्यतीति, मानसिक पूजनं तत्रैव** वाचनिके पूजने एव **प्रवेक्ष्यती**त्यर्थः, प्रकारान्तरेण मानसिकीपूजामाहुः **किञ्चे**त्यारभ्य **मानसिकी पूजे**त्यन्तेन, तथा च **तद्दर्शनमहोत्सव** इत्यनेनोक्तो महोत्सवो मानसिकी पूजेत्यर्थः ॥ ४ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

पञ्चविंशेऽध्याये **पञ्चविंशे त्वि**त्यादि का० २३८$\frac{३}{४}$–२४२$\frac{३}{४}$ । **पञ्चविंशे त्वि**त्यादि अत्राध्याये वैकुण्ठनयनात्मकमवान्तरफलमुच्यत इत्यर्थः, **अभिषेक** इत्यादि **देवा** इन्द्रादयः, **स्तोत्रं** तत्कृतं, **आदिपदेन** भगवत्कृतेन्द्रशिक्षा, एवमिन्द्रदमनादिना **देवोत्तमत्वे ज्ञाते सति** वरुणैश्वर्यं तद्दास्यनन्दानयनलक्षणं **परं पौरुषं** पुरुषोत्तमत्वेन ज्ञानजनकं **द्रष्टव्यं, अन्यथा नन्दविज्ञानमिति** यदि वरुणकृतस्तुत्यादिकं नन्देन **दृष्टं** न स्यात् तदा नन्दविज्ञानं **तदेव** नारायणांशत्व**पर्यवसायि** पर्यवसानशीलं स्यान् न तु पुरुषोत्तमत्वपर्यवसायीत्यर्थः, **अत** इति "मन्ये नारायणस्यांश"मितिवाक्योक्तं नारायणांशत्वेन ज्ञानं हि भक्तिमार्गविरुद्धमतः कारणात् **तन्निग्रहो** नन्दनिग्रहो वाच्यः, **वरुणस्तेन सेवक** इति भगवानुभयं कारितवान् निरवधिमाहात्म्यज्ञानं भक्तिमार्गविरुद्धनारायणांशत्वज्ञानहेतुकनिग्रहं च, तेन वरुणं सेवकत्वेन मनुते इत्यर्थः, **कालाद्युपासक** इत्यादि **भगवत्सेवकश्चेद्** द्वादश्यादिकालसाधनपरो भवेत् तदा नन्दवत् **क्लेशमवाप्नोति कृष्णादेव च मुच्यते, तत** इति ततो मोचनान् **माहात्म्यज्ञानं ततश्चिन्तनमात्रेण** मनोरथमात्रेण **स्वपदं** वैकुण्ठं **नयेदि**त्यर्थः ॥ ० ॥ **एकादश्यां निराहार** इत्यत्र **मुहूर्तार्धावशिष्टाया**मिति का० २४३$\frac{३}{४}$, २४४$\frac{३}{४}$ । इति । एतच्च स्मृत्यन्तरे द्वादशीव्रतप्रकरणस्थवचनं स्पष्टार्थकम् ॥ १ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नन्दस्यानयनं कृत्वा श्रीकृष्णो वरुणालयात् । स्वलोकं दर्शयामासेत्यष्टाविंशे निरूप्यते ॥ १ ॥

एवं गोवर्धनपूजनेन इन्द्रमानं विमर्द्य तद्वशीकरणं निरूपितम्, अथ नन्दानयनेन वरुणवशीकरणं सप्रसङ्गं निरूपयति—एकादश्यामित्यादिना । नन्दस्तु कदाचिदेकादश्यां निराहारः सन् जनार्दनं सम्यगभ्यर्च्य कलामात्रावशिष्टायां द्वादश्यां पारणाभिनिवेशेन कालिन्द्यां स्नातुं जलमाविशत् ॥ १ ॥ तमासुरीमसुरसञ्चारविशिष्टां वेलामविज्ञाय अननुसन्धाय "मुहूर्तार्धावशिष्टायां द्वादश्यां पारणां प्रति । निशीथात् सम्यगुत्थाय क्रियाः कुर्याद्यथोचितम् ॥ अग्निहोत्रादिकर्माणि तथा नैमित्तिकानि च । आमध्याह्नाः क्रियाः सर्वाः कर्तव्याः शम्भुशासनात्" इत्यादिशास्त्रानुसारेण निशि अर्धरात्रिसमये उदकं प्रविष्टं नन्दं गृहीत्वा वरुणस्य भृत्यो रात्रौ जलरक्षापरः वरुणस्यान्तिकं समीपमनयत् । ननु 'नन्दस्तु शास्त्रानुसारेण रात्रौ स्नातुं प्रवृत्तः, तस्य कोऽपराधो येन स गृहीतवान् ?' इत्याशङ्क्याह—असुर इति । भगवद्धर्मानभिज्ञत्वादित्याशयः । अत एव वरुणो वक्ष्यति—अजानता मामकेनेति ॥ २ ॥ ततः प्रभाते तं नन्दमपश्यन्तो गोपकाः 'हे कृष्ण ! हे राम ! स्नातुं गतो नन्दो न मिलति' इति चुक्रुशुः । भगवान् सर्वज्ञः कृष्णस्तदाक्रोशमुपश्रुत्य पितरं नन्दं च वरुणेनाहृतं ज्ञात्वा तस्य वरुणस्यान्तिकं गतः । तस्य तत्र गमने हेतुमाह—स्वानां स्वभक्तानामभयद इति । तत्र सामर्थ्यमाह—विभुरिति । राजधर्म ईदृश एव, यत्स्वसेवका अनुपेक्षणीया' इति सूचयन् सम्बोधयति—राजन्निति ॥ ३ ॥ स्वान्तिकं प्राप्तं हृषीकाणामीशं नियन्तारं कृष्णं वीक्ष्य तस्य दर्शनेन महानुत्सवो यस्य स लोकपालो वरुणो महत्या सपर्यया पूजासाधनेन पूजयित्वा आहेत्यन्वयः ॥ ४ ॥

अन्वितार्थप्रकाशिका

अष्टाविंशे तु नन्दस्यानयनं वरुणालयात् ॥ वैकुण्ठेक्षा च गोपानां श्लोकाः सार्द्धा गिरिक्षमाः (१७॥) ॥
तावत्योऽनुष्टुभः (१७॥) प्रोक्तास्तत्रोवाचेति च त्रयम् ॥ २८ ॥

एकादश्यामिति ॥ नन्दस्तु कदाचिदेकादश्यां निराहारः सन् जनार्दनं सम्यगभ्यर्च्य कलामात्रावशिष्टायां द्वादश्यां पारणादरेण अरुणोदयात्पूर्वमेव कालिन्द्यां स्नातुं जलमाविशत् ॥ १ ॥ तमिति ॥ तमासुरीमसुरसंचारविशिष्टां वेलामविज्ञाय अनादृत्य "कलार्द्धां द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि ॥ आमध्याह्नाः क्रियाः सर्वाः कर्तव्याः शम्भुशासनात् ॥" इति शास्त्रमनुसृत्य निशि उदकं प्रविष्टं नन्दं गृहीत्वा असुरः भगवद्धर्मानभिज्ञः वरुणस्य भृत्यो रात्रौ जलरक्षापरः वरुणस्यान्तिकं समीपमनयत् ॥ २ ॥ चुक्रुशुरिति सार्द्धम् ॥ ततः प्रभाते तं नन्दमपश्यन्तो गोपका स्नानार्थं गतस्य नन्दस्य रक्षकाः हे कृष्ण ! हे राम ! स्नातुं गतो नन्दो न मिलतीति चुक्रुशुः । भगवानिति । हे राजन् ! स्वानामभयदो ज्ञातीनामभयं दास्यन् विभुः भगवानपि तदाक्रोशनमुपश्रुत्य पितरं नन्दं च वरुणेनाहृतं ज्ञात्वा तस्य वरुणस्यान्तिकं गतः ॥ ३ ॥ प्राप्तमिति । स्वान्तिकं प्राप्तं हृषीकेशं कृष्णं वीक्ष्य तस्य दर्शनेन महानुत्सवो यस्य स लोकपालो वरुणो महत्त्या सपर्यया पूजासाधनेन पूजयित्वा आह स्म ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीमष्टाविंशेऽध्याये वरुणानुचरेण कृतनंदानयनं गोपानां हरिलोकदर्शनं च निरूप्यते एकादश्यामिति जनैर्भक्तैरर्द्यते अतृप्ततयाभक्त्यर्थं नित्यं याच्यते इति जनार्दनस्तं ॥ १ ॥ असुरः आसुरसंपद्युक्तः भृत्यो वरुण सेवकः वरुणस्यांतिकं समीपं तं नंदमनयत् कथंभूतं तं आसुरीवेलां अरुणोदयात् पूर्वीयः कालः स आसुरस्तं अविज्ञाय द्वादश्यां कर्त्तव्यपारणावेगेन निशि जलं प्रविष्टं ॥ २ ॥ तस्य वरुणस्यांतिकं समीपं स्वानां स्वकीयानां ॥ ३ ॥ लोकपालो वरुणः सपर्यया सामग्र्या तस्य श्रीकृष्णस्य दर्शनेन महोत्सवः महोत्साहः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्दस्यानयनं त्वष्टाविंशे वरुणलोकतः । गोपानां निजलोकस्य प्रोच्यतेऽथ प्रदर्शनम् ॥ १ ॥
समुद्धृत्य गिरिं कृष्णो वशे कृत्वा दिवस्पतिम् । वरुणं चाकरोन्नन्दानयनेन वशे हरिः ॥ २ ॥

एकादश्यामिति ॥ तमिति ॥ कदाचिदिति शेषः नन्दः तु, एकादश्यां निराहारः सन्, जनार्द्दनं समभ्यर्च्य, द्वादश्यां कलामात्रावशिष्टायां द्वादश्यां पारणाभिनिवेशेनेत्यर्थः । आसुरीमसुरसुंचरसहचरितां वेलामर्द्धरात्ररूपां, अविज्ञाय, कालिन्द्यां यमुनायां, स्नातुं स्नानं कर्त्तुमेवेत्यर्थः । जलं आविशत् । तं नन्दं, निशि रात्रौ, उदकं प्रविष्टं सन्तमेव, वरुणस्य भृत्यः, असुरः गृहीत्वा, अन्तिकं वरुणसमीपं, अनयत् । ततः प्रभाते इति शेषः । तं नन्दं, अपश्यन्तः गोपकाः, हे कृष्ण, हे राम, इति चुक्रुशुः । इति सार्द्धद्वयस्यैकान्वयः ॥ १–२ ॥ भगवानिति ॥ तदा भगवान्, तत् गोपकृतमाक्रोशनं, उपश्रुत्य, वरुणाहृतं पितरं, ज्ञात्वा चेति शेषः । हे राजन्, स्वानामात्मीयजनानां, अभयदः विभुः समर्थः, हेतुगर्भमिदम् । समर्थत्वादित्यर्थः । तदन्तिकं वरुणस्यान्तिकं, गतः ॥ ३ ॥ प्राप्तमिति ॥ तदा लोकपालः वरुणः, प्राप्तं स्वान्तिकागतं हृषीकेशं श्रीकृष्णं वीक्ष्यावलोक्य, तस्य श्रीकृष्णस्य दर्शनेनैव महानुत्सवो यस्य तथाभूतः सन्, महत्या सपर्यया पूजया पूजयित्वा, आह अब्रवीत् ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं भक्तिप्रकारं निखिलसुखकरं दर्शयित्वा चतुर्भिरध्यायैः कल्मषघ्नैः कलिजनसुलभश्रीधरप्राप्त्युपायैः ।
भीतिर्लोकद्वयादप्यविधिविधिकृतानुष्ठितेर्भक्तिभाजो नास्त्येवात्मा परोक्षोदय इह सुलभश्चार्थ एषोऽत्र बोध्यः ॥ १ ॥

एकादश्यामिति : १०.२८.१.

कृतार्थस्य कर्तव्यमस्मिन्न यद्यप्यथाप्यन्यवत्कार्यमालक्ष्य कार्यम् ।
न चेदप्रचारी प्रगल्भोऽपि भूयात् स वा इत्यभिव्यक्तमासीद् व्रजेशे ॥ २ ॥

भगवानिति : १०.२८.३.

मच्छासनादेव करोति वासं बाधीवसावित्यसमञ्जसा मे ।
या चाब्धितोऽद्यास्य बहिष्कृतिः स इत्येनमागात् सद्योऽम्बुधिस्थम् ॥ ३ ॥
यन्मद्भक्तेन कृतं सदसद्वा कर्म तन्मयैव कृतम् । इति बोधयन् प्रभुरगात्तत्र तदैवान्यथास्य किमशक्यम् ॥ ४ ॥
जानात्येष मदुक्तशासनवचः प्रोक्तौ प्रचेताः स्वतो यस्माद् विध्यविधी न चार्हति ततः शिक्षामसाविन्द्रवत् ।
एतौ दुष्टपरौ न भक्तिविषयौ ते सर्वतो निर्भया इत्यात्मोदिततद्यथार्थकथनायाऽगात् तमीशः स्वयम् ॥ ५ ॥

ज्ञात्वैवैवं वर्ततां मद्वचोऽर्थं भूयोऽप्येवं मा करोतु प्रमादम् ।
आलोच्यैवं नानयन्नन्दमस्मात् तं वा नित्यं भक्तकल्याणकामः ॥ ६ ॥ (युग्मम्)
पितृधर्मानुगेनैव कर्तव्यः कुलजन्मना । पित्रुद्धार इतीशोऽर्थं बोधयंस्तादृगाचरत् ॥ ७ ॥
नीतिज्ञो निजसेवको विधिवशात् प्राप्तोऽप्रतिष्ठापदं गत्वा तद्गृहमुत्तमोक्तिभिरलं नेयः प्रतिष्ठापदम् ।
इत्यालोच्य तदन्तिकं प्रभुरगात् तं नानयत् स्वान्तिकं तद्बीजं स्फुटमप्रतिष्ठितगतेः स्यादप्रतिष्ठाऽधिका॥ ८ ॥
ये मद्भक्ता मत्पदन्यस्तचित्ताः स्वप्नेऽपि स्यान्नैव तेषां कदापि ।
पाश्यालोको जागृतौ त्वस्तवार्त इत्यर्थज्ञोऽगात् स्वयं नानयत् तम्॥ ९ ॥
तस्यात्रानयने कृते स हि सदानन्देन यातो भवेत् तस्मान्मत्कृतमीड्यमित्यनुपदं मत्वा प्रमत्तो भवेत् ।
तस्मादग्रिमभक्तभीर्विगलिता न स्यादमुष्मादिति प्रागात् तं स दयाम्बुधिस्त्रिसमयस्वीयाभयात्तव्रतः ॥ १० ॥

कृष्णप्रिया

इस अध्याय में १६ श्लोक हैं। पूर्वाध्याय पर्यन्त की भगवल्लीलाओं के दर्शन से श्रीनन्दरायजी के मनमें भगवान् नारायण के अंश हैं ऐसा ज्ञान था अब इस अध्याय की वरणलोक की लीलासे श्रीकृष्णजी परब्रह्म है ऐसा ज्ञान होगा।

श्रीशुकाचार्यजीने कहा राजन्! श्रीनन्दरायजी ने एकादशी के दिन निराहार उपवास व्रत किया मोक्षदाता श्रीजनार्दन भगवान का अर्चन किया, पुनः द्वादशी के दिन अल्पकाल द्वादशी तिथि होने के कारण; पारणा व्रतान्त भोजन द्वादशी तिथि में करना चाहिए ऐसा विधान होने के कारण अरुणोदय से पूर्ण आसुरी वेलामें स्नान करने के लिये श्रीयमुना जल में प्रवेश किया ॥ १ ॥ श्रीनन्दरायजी को आसुरी वेलामें स्नान नहीं करना चाहिए यह ज्ञान न होने के कारण रात्री के समय आसुरी वेलामें स्नानार्थ प्रवेश किया होगा ऐसा समझ कर वरुणका सेवक श्रीनन्दबाबा को वरुण के समीप ले गया ॥ २ ॥ स्नानार्थ प्रविष्ट नन्दरायजी को श्रीयमुनाजी के जल से बाहर निकलते न देखकर सचिन्त होकर हे कृष्ण! हे बलराम! ऐसे उच्च स्वरसे पुकारने लगे। गोपलोगों का करुण रुदन को सुनकर और पितृचरण को वरुण के समीप ले जाए जानकर निज भक्तजनों के अभय दाता एवं सर्वसमर्थ भगवान् श्रीकृष्ण वरुण के समीप गए ॥ ३ ॥ वरुण ने निज आङ्गन में पधारे हुए पुरुषोत्तम प्रभु का दर्शन किया और अत्यन्त प्रसन्न हो गये, पुनः श्रीहृषीकेश भगवान की सर्वोच्च प्रकार एवं सर्वश्रेष्ठ सामग्रीं से समर्चना की ॥ ४ ॥

वरुण उवाच

अद्य मे [1]विधृतो देहोऽद्यैवार्थोऽधिगतः प्रभो।[2] [3]यत्पादभाजो भगवन्नवापुः पारमध्वनः ॥ ५ ॥
नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने । न यत्र श्रूयते माया लोकसृष्टिविकल्पना ॥ ६ ॥
अजानतां [9]मामकेन मूढेना[5]कार्यवेदिना । [6]आनीतोऽयं तव पिता तद् भवान्[7] क्षन्तुमर्हति ॥ ७ ॥
[[8]ममाप्यनुग्रहं कृष्ण कर्तुमर्हस्यशेषदृक् । गोविन्द नीयतामेष पिता ते [4]पितृवत्सल ॥]

श्रीशुक उवाच

एवं प्रसादितः कृष्णो [10]भगवानीश्वरेश्वरः । आदायागात् स्वपितरं बन्धूनां चावहन् मुदम् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—हे प्रभो! अद्य मे देहः विधृतः, अद्य एव अर्थः अधिगतः, हे भगवन् यत् पादभाजः अध्वनः पारम् अवापुः ॥ ५ ॥ तुभ्यम् ब्रह्मणे परमात्मने भगवते नमः लोक सृष्टि विकल्पना माया, यत्र न श्रूयते ॥ ६ ॥ मूढेन अकार्यकोविदा

---

१. निभृतो—श्रीधर. वंशी. जीव. वीर. विश्व. शुक. सुदर्शन. ; विधृतो देह अधार्थो—विज. । २. अक्ष्णोर्वाचश्च साफल्यं तव मे दर्शनाद्विभो—वीर. । ३. त्वत्—श्रीधर. वंशी. जीव. वीर. विश्व. शुक. सुदर्शन ; यत्पाद-विज. । ४. त्वत्पितरं—वीर. । ५. त्वत्प्रभावं जगद्गुरो—इति कस्यचित् । ६. पितेव ते मया नीतो यन्नस्त्वत्पाददर्शनम्—वीर. । ७. तत्प्रभो—वीर. विज. ।

८. ममाप्यनुग्रहं कृष्ण कर्तुमर्हस्यशेषदृक् । गोविन्द नीयतामेष पिता ते पितृवत्सल ॥

श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. आदिभिर्गृहीतः । किन्तु विसंवादिनमेन मन्वते श्रीमद्वल्लभाचार्यैः । विजयमते तु अस्य श्लोकस्य पूर्वोत्तरार्द्धौ विपर्यस्तौ वर्तेते । वीर. मते अस्मिन् श्लोके "प्रजावयमनुग्राह्यासापराधा अपि प्रभो" इत्यधिकं चरणं तथा च ममाप्यनुग्रहं चदस्य स्थाने पितैष ते मया नीतो यन्नस्त्वत्पाददर्शनम् ॥

९. मामकाहृतः—विज. । १०. वानखिलेश्वरः—प्रा. पा. ।

मामकेन अजानता अयम् तव पिता आनीतः भवान् तत् क्षन्तुम् अर्हति ॥ ७ ॥ इति ईश्वरेश्वरः भगवान् कृष्णः एवम् प्रसादितः स्वपितरम् आदाय आगात् च बन्धूनाम् मुदम् आवहत् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अद्येदानीं मे मया देहो निभृतो धृतः यदा त्वद्दर्शनं जातं तदैव देहसाफल्यं प्राप्तमित्यर्थः । यद्वा । निभृतः पूर्णमनोरथ इत्यर्थः । किं च अद्यैवार्थोऽधिगतः सर्वरत्नाकरपतिनापीतः पूर्वं नैवंविधोर्थः प्राप्त इत्यर्थः । किं च संसारोऽपि निवृत्त एवेत्याशयेनाह । त्वत्पादभाज इति । अध्वनः पारं मोक्षम् ॥ ५ ॥ भगवते निरतिशयैश्वर्याय । ब्रह्मणे पूर्णाय । परमात्मने सर्वजीवनियंत्रे । तत्र हेतुः । न यत्रेति । लोकसृष्टिं विकल्पयति या माया सा यत्र न श्रूयते । अविद्यमानेव तिष्ठतीत्यर्थः ॥ ६ ॥ अजानता मद्भृत्येन त्वत्पित्राहरणं यत्कृतं तदिति ॥ ७ ॥ नंदं विमुच्य समर्पयति । गोविंदेति ॥ ८–९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति । "अद्य मे सफलो देहस्त्वत्पादांबुजदर्शनात्" इत्यादिना बल्यादिभिरुक्तत्वादिति भावः : जन्मसाफल्येऽपि मनोरथानाप्तौ किञ्चिद्वैकल्यमेवेत्यरुच्याह—यद्वेति । इत्यर्थ इति । 'निश्चले निभृतो मतः' इत्युक्तेरपूर्णमनोरथस्य नैश्चल्यं न संभवतीति भावः । मनोरथपूर्त्तेरप्यधिकलाभमाह–किञ्चेति । सर्वेषां रत्नानां वज्रमुक्तादीनामाकरः समुद्रस्तत्पतिनापि । इतः त्वद्दर्शनात् । एवंविधः त्वद्दर्शनसदृशः । इत्यर्थ इति । दुःखप्रदप्रायवज्राद्यपेक्षया परमानंदावाप्तिरूपनित्यसमृद्धिप्रदं त्वद्दर्शनमेव भावः । तदेवाह–किञ्चेति । अध्वनः भवाटव्याः ॥ ५ ॥ तत्र परमात्मत्वे । यत्र त्वयि । लोकसृष्टिम् विश्वरचनाम् । विकल्पयति विविधं करोति । माया बंधकशक्तिः । इत्यर्थ इति । स्वकार्याकरणमेवाविद्यमानत्वम् । "विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया" इत्याद्युक्तेः ॥६॥ अयम् नंदः । कार्यं कर्तुमुचितं न वेत्तीत्यकार्यवेदी तेन अजानतेति । त्वत्पितायमित्यजानता । द्वादश्या अल्पत्वेऽरुणोदयात्प्रागपि जले प्रवेष्टव्यमिति भक्तिशास्त्रमजानता वेति । भृत्यापराधेन ममैवापराधः "तन्नामानि च गृह्णाति लोको भृत्ये कृतागसि" इत्युक्तेः । अत एव मूढेन । मम भृत्योऽपि मत्कार्यं न जानातीत्याह—अकार्यवेदिना तव पितानीतः । अयमिति रत्नचतुष्किकामध्य आसीनं स्वेनार्चितं स्वेष्टदेवस्मरणरतं श्रीनंदं स्वांजलिना दर्शयति । क्षंतुमर्हसीति । तव क्षमासिन्धुत्वान्मम त्वपराधसिंधुत्वाद्दंडयिष्यसि चेद्यथेष्टं दंड्यतामिति भाव इति विश्वनाथः । यच्च 'नंदं च मोक्ष्यति भयाद्वरुणस्य पाशात्' इति, तत्र च पाशाद्यद्भयं तस्माद्विमोक्ष्यति न तु पाशादिति पाशसंबंधो निरस्त इति तोषिणी ॥ ७ ॥ गोविंदेति । महापराधिनापींद्रेण कृतस्य गोविंदतयाभिषेकस्य स्वीकारेण परमकारुण्यं सूचितवान् । पितृशब्दोत्र पूज्यपरः । त्वद्गतपूज्यत्वाधिकारस्य ममापर्यपि वत्सलतैवोचितेति संबुद्ध्यभिप्रायः । तदेवाह–ममापीति । अशेषदृगित्युक्त्या निजापराधाभावं ध्वनयतीति भावः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रभो, हे जगदीश्वर ! इति परमदौर्लभ्यादिकमुक्तं अवापुः अवहेलनेन लेभिरे अन्यत्तैः तत्र पूर्णमनोरथ इति पक्षे मे ममेति पूर्णो मनोरथो यत्रेति च व्याख्येयम् । यद्यपि पूर्वस्य हेतुवाक्यमुत्तरार्द्धं तथापि अस्यार्थस्यापि लाभादित्यभिप्रायेणाह-किञ्च, संसारोपीति । यद्वा; नितरां मृतः मुहुर्देहधारणस्य फलमद्यैव सम्यक् लब्धमित्यर्थः । कुतः ? अर्थः परमविचारेणार्त्रो नाम यः सोऽद्यैव मया प्राप्तः तत्र हेतुः त्वत्पादभाजस्त्वच्चरणकमलं प्राप्तवन्त एवाध्वनः प्राप्य परम्पराया अन्तं अव समन्तादापुरिति तदेव स्वयं भगवत्त्वादिति भावः ॥ ५ ॥ अतस्तन्माहात्म्यं वर्णयन् भक्त्या प्रणमति-नम इति । भगवते पूर्णषड्गुणैश्वर्येण स्वलोकादौ विराजमानाय परमात्मने सर्वान्तर्यामिरूपाव ब्रह्मणे क्वचिदधिकारिणि अप्रकाशिततत्तच्छक्तये "सत्यं ज्ञानमनन्तम्" इत्येवं केवलं प्रकाशमानाय न च मायया तत्तद्रूपत्वमित्याह–न यत्रेति । तत्र हेतुमाह–लोकेति । जीवानामेवं सृष्टिं विविधतया कल्पयितुं शक्नोति नचेश्वरे त्वयि प्रभवतीत्यर्थः । एवं चैश्वर्यरूपगुणादिभेदविकल्पिका स्वरूपशक्तिरन्यास्तीति दर्शितम् अत एव तादृशस्य तव निजगृहाभ्यन्तर एव सन्दर्शनेनाद्य परमकृतार्थोऽस्मीति तात्पर्यम् ॥ ६ ॥ अतो महापराधोऽपि मे त्वया क्षन्तुं युज्यत एवेत्याह अजानतेति । यतो मूढेन मूर्खेण । ननु, कथं तर्हि रात्रिस्नानदोषं ज्ञात्वा मत्पिता नीतः ? तत्राह, अकार्यं कर्त्तुमयोग्यमेव वेदितुं शीलमस्येति तथा तेन । यद्वा, त्वत्पितेत्यजानता । किञ्च, मूढेन भगवद्धर्मज्ञानहीनेन चेत्यर्थः । न केवलं मूढेन परमदुर्बुद्धिना चेत्याह–अकार्येति । अकार्य्यमसत्कार्यम् अयमिति स्वगृहे रक्षितं तमञ्जलिप्रसारणया निकट (मे) मिव तं निर्दिशति—स्वगृहे एव रक्षितत्वे हेतुः तव पितेति यत्तूक्तं द्वितीये "नन्दं च मोक्ष्यति भयाद्वरुणस्य पाशात्" इति तत्र च पाशात् यद्भयं तस्मात् विमोक्ष्येति नतु पाशात्" इति पाशसम्बन्धो निरस्तः तत् आनयनागः । ननु, महापराधोऽयं क्षन्तव्यो न स्यात् ? तत्राह–प्रभो, हे परमसमर्थ ! त्वया सोऽपि क्षन्तुं शक्यत इति भावः । यद्वा, हे अस्मत्स्वामिन् ! अतो दासानामस्माकम् अपराधः सर्व एव त्वया क्षन्तुं युज्यते एवेति भावः । तद्भवान् क्षन्तुमर्हतीति क्वचित् पाठः ॥ ७ ॥ ततश्च तदेव गृहमानीय तं दर्शयन्नाह—गोविन्देत्यर्द्धकेन । तत्र गोविन्देति महापराधिनापीन्द्रेण कृतस्य गोविन्दतयाभिषेकस्य स्वीकारेण परमकारुण्यादिकं सूचितम् हे पितृवत्सलेति पितृपुत्रौ तोषयति-तथा वयमेतज्जानीम एव स्वगृहे परमीदृशभागधेयाकाङ्क्ष्यैवैतावन्तं क्षणं रक्षित आसीदिति व्यञ्जयन्ति ॥ ८ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हृषीकेशं सर्व्वेन्द्रियवृत्त्यगोचरमपि प्राप्तं पार्श्वागतं वीक्ष्य साक्षात् दृष्ट्वा, लोकपाल इति महासपर्य्या-सामर्थ्यं द्योतितम्; यद्वा, तदैव लोकपालत्वं सफलं वृत्तमित्यर्थः, महासपर्य्यया तत्पूजनात्; किंवा, तल्लोकवर्त्तिनां भगवद्दर्शनादिना चक्षुःसाफल्यादि-सिद्ध्या परमकृतार्थतासम्पत्तेः; तद्दर्शनेन महान् उत्सव आनन्दो यस्य, अयं महासपर्य्यया पूजने हेतुः; यद्वा, तद्दर्शनमेव महोत्सवो यस्य स इति परमभक्तत्वमुक्तम्। अतस्तद्दर्शनार्थमेव श्रीनन्द आनायित इति भावः। व्रजे तदर्थं तन्निकटगमने अयोग्यत्वान्महा-पूजनसम्पत्तेश्च विशेषतो निजगृहान्तस्तत्सन्दर्शने सुखविशेषाच्चेति; वक्ष्यमाणस्य तद्वचनस्याप्युत्तमत्वं ध्वनितम्॥ ५॥ प्रभो! हे जगदीश्वर! इति परमदौर्लभ्यादिकमुक्तम्’ अवापुः—अवहेलयैव लेभिरे। अन्यत्तैर्व्यञ्जितम्; यद्वा, नितरां भृतं मुहुर्देहधारणस्य फलमद्यैव सम्यक् लब्धमित्यर्थः। कुतः? अर्थो मोक्षलक्षणः, अधिगतोऽधिकं प्राप्तः; तत्र हेतुमाह—त्वदिति; यद्वा, भक्तिलक्षणोऽधि-कारितया प्राप्तः, किंवा अर्थो निजप्रयोजनं त्वद्भक्तिलक्षणमद्यैव ज्ञातम्। ततः किमित्यपेक्षायां तत्फलं दर्शयन् भक्तिमाहात्म्यमाह—त्वदिति, त्वत्पादौ यथाकथञ्चिदपि ये भजन्ति तेऽपीत्यर्थः। अध्वनः पारं सर्व्वोपरिस्थितं वैकुण्ठलोकम्, तच्च युक्तमेवेत्याह-भगवन् हे निजमाहात्म्यविस्तारकेति; यद्वा, अहो किमपरं वक्तव्यम्? मया त्वद्य परमदुर्लभमेव प्राप्तमित्याशयेनाह—त्वद्भक्ता वैकुण्ठमेव प्राप्नुवन्ति, मया तु भगवतः श्रीनन्दनन्दस्य तव साक्षाद्दर्शनं स्वगृहान्तरेव प्राप्तमित्यर्थः॥ ६॥ अतस्तन्माहात्म्यं वर्णयन् भक्त्या प्रणमति—नम इति। भगवत्त्वादीनां यथोत्तरं हेतुहेतुमत्त्वोह्या; अन्यत्तैर्व्यञ्जितम्; यद्वा, ननु परमेश्वरस्य परब्रह्मणः परमात्मनो गोपासकानां वैकुण्ठप्राप्तिस्तत्साक्षात्कारेणालभ्यलाभश्च सत्यं सम्पद्यत एव, अहन्तु ततोऽन्यो गोपकुमार एव; तत्राह—नमस्तुभ्य-मिति। त्वमेव भगवदादिरूप इत्यर्थः। तत्र भगवत्त्वेऽपि परमात्मत्वेऽपि च ब्रह्मत्वविवक्षया (भा. १।२।११) ‘ब्रह्मेति परमात्मेति भगवानिति शब्द्यते’ इत्युक्तक्रमानपेक्षया ब्रह्मण इत्यस्य मध्य निर्देशः। न च मायया तत्तद्रूपत्वमित्याह—न यत्रेति। तत्र हेतुमाह-लोकेति; जीवानामेव सृष्टिं सा विवतया कल्पयितुं शक्नोति, न चेश्वरे त्वयि सा प्रभवतीत्यर्थः। एवञ्च ऐश्वर्य्य-रूप-गुणादिभेद-विकल्पिका सच्चिदानन्दशक्तिर्व्यवच्छिन्ना; अतः परमात्मत्वे परमेश्वरत्वेऽपि मायासम्बन्धराहित्येन परब्रह्मत्वमेव घटते, तथा निजशक्तिविशेषेणैकस्यापि तत्तद्रूपता घटेतैवेति भावः। अत एतादृशस्य तव निजगृहाभ्यन्तर एव सन्दर्शनेनाद्य परमकृतार्थोऽस्मीति तात्पर्य्यम्॥ ७॥ अतो महापराधोऽपि मे त्वया क्षन्तुं युज्यत एवेत्याह—अजानतेति, यतो मूढेन मूर्खेण। ननु तर्हि कथं रात्रि-स्नानदोषं ज्ञात्वा मत्पिता नीतः? तत्राह—अकार्य्यं कर्त्तुमयोग्यमेव वेदितुं शीलमस्येति तथा तेन; यद्वा, तत्पितेत्यजानता। ननु अन्योऽपि तदानीं स्नानादानेतुं न युज्यते, तत्राह—मूढेन भगवद्धर्म्मज्ञानहीनेनेत्यर्थः। न केवलं मूढेन, परमदुर्बुद्धिना चेत्याह—अकार्य्येति। अयं पूज्यवन्मदग्रे वर्त्तमान इति तद्बन्धनानयादिकं निरस्तम्, यतस्तव पिता; यच्चोक्तं श्रीब्रह्मणा द्वितीयस्कन्धे (भा. २।७।३१)—‘नन्दञ्च मोक्ष्यति भयाद्वरुणस्य पाशात्’ इति तस्य वरुणान्तिकनयनेन वरुणपाशाद् यद्भयं तस्मात् मोक्ष्यतीत्यर्थः। अतस्तद्भयमपि तेन न प्राप्तमिति सिद्धमेव। ‘तत्’ आनयनागः, आगोऽपराधः, तत्तस्मादिति वा, क्षन्तुं महापराधम्। ननु महापराधोऽयं क्षन्तव्यो न स्यात्; तत्राह–हे प्रभो! परमसमर्थ! त्वया सोऽपि क्षन्तुं शक्यत इति भावः; यद्वा, हे अस्मत्स्वामिन्! अतो दासानामस्माकमपराधः सर्व्व एव त्वया क्षन्तुं युज्यत एवेति भावः॥ ८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

लोकानां सृष्टिं चिदचितां सृष्टिं विकल्पयति, या माया प्रकृतिः यत्र न स्वकार्यकारिणीत्यर्थः॥ ६ १३॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह—अद्येति पञ्चभिः। हे प्रभो! अद्याधुना मे मया देहो निभृतः धृतः यदा त्वद्दर्शनं जातं तदैव देहसाफल्यं प्राप्त इत्यर्थः। यद्वा, निभृतः पूर्णमनोरथ इत्यर्थः। किञ्च, अर्थोऽद्यैवाधिगतः सकलरत्नाकरपतिनापीतः पूर्वं नैवंविधः पुरुषार्थः प्राप्त इत्यर्थः। तथाममाक्ष्णोः साकल्पं दर्शनाज्जातं त्वद्दर्शनान्मम मुक्तिरपि करस्थेत्यभिप्रायेणाह—हे भगवंस्त्वत्पादं भजन्तीति तथा तेपि संसाराध्वनः पारं त्वामापुः किमुत त्वद्दर्शनभागहमिति भावः॥ ५॥ एवं स्वकृतार्थतामाविष्कृत्याथ क्षमापयितुकामः क्षमाहेतुः केवलमञ्जलिमुद्रैवेत्यभिप्रयन्नसाधारणगुणैर्विशिंषन्नमस्करोति-नम इति। पूर्णषाड्गुण्याय स्वरूपेण गुणैश्च निरतिशयबृहते लोक-त्रयान्तः प्रविश्य व्याप्यगतधर्मास्पर्शाभ्यां नियन्त्रेभर्त्रे च तुभ्यं नमः यत्र त्वयि लोकस्य जीवलोकस्य दृष्टिं ज्ञानं विकल्पयति विविधं कल्पयति गुणत्रयोन्मेषानुगुणकर्मरुचिजननद्वारा ज्ञानसङ्कोचविकासादिहेतुर्माया न श्रूयते नाम्नापि न श्रूयते न सुतरां स्वकार्य-क्षमेति भावः। लोकसृष्टीति पाठे लोकसृष्टिं देवमनुष्यादिशरीरसृष्टिं नानाविधां कल्पयतीति तथा देवमनुष्यादिशरीररूपेण विक्रियमाणा यत्र त्वयि न श्रूयते तस्मै अप्राकृतस्वेच्छोपात्तदेहाय तुभ्यमित्यन्वयः॥ ६॥ अथ स्वापराधं निवेदयन् क्षमापयति अजानतेति। अकार्यवेदिना कार्यावेदिना विवेकशून्येनेति यावत् मूढेनाज्ञेन त्वत् पितरमजानेन! त्वत्प्रभावानभिज्ञेन मामकेन मद्भृत्येन तव पिता आनीत इति यत्तदिदं त्वं क्षन्तुमर्हसि हे प्रभो निग्रहानुग्रहसमर्थ!॥ ७॥ यद्यस्मादेष तव पिता मया आनीतोऽत एव हि दुर्लभमपि त्वद्दर्शनं नोऽस्माकं जातं भृत्यकृतापराधोपि महाफलाय बभूव हेति भावः। इत्युक्त्वा नन्दं समर्पयति। गोविन्देति हे गोविन्द हे पितृवत्सल एष तव पिता नीयताम्॥ ८॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मे मया विधृतो देहोऽद्य सफलो जातः इति शेषः । अर्थः पुरुषार्थः कथं तदिति तत्राह—यत्पादेति । अध्वनः पारं संसारसमुद्रस्य मार्गस्य तीरान्तरम् अद्धा वात्यनेनेत्यद्ध्वा ॥ ५ ॥ ब्रह्मणे देशादितोऽपरिच्छिन्नाय लोकदृष्टिं विकल्पयतीति लोकदृष्टिविकल्पना विपरीतज्ञानापादिकेत्यर्थः माया बन्धकशक्तिः परमात्मने उत्कृष्टानन्दस्य दात्रे ॥ ६ ॥ अकार्यवेदिना कार्यज्ञानी न भवतीति ॥ ७–८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नितरां भृतः अत्रैव सम्यक् साफल्यात् कुतः अर्थः परमविचार्येणार्थो नामः य सोऽद्यैव मया प्राप्तः तत्र हेतुः त्वत्पादभाजः त्वच्चरणकमलं प्राप्तवन्तः एताध्वनः पारं प्राप्य परम्परया अन्तम् अव समन्तात् आपुरिति तवैव स्वयं भगवत्त्वादिति भावः ॥ ५–६ ॥ अयमादरणीयत्वेन निजाग्रत एव वक्ष्यमाणः “नन्दञ्च मोक्ष्यति भयात् वरुणस्य पाशात्” इति पाशात् भयं यस्मात् नतु पाशादित्यर्थः ॥ ७–८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ गोवर्द्धनोद्धरणावलोकनेन परमविस्मितानां गोकुलवासिनां पुनरपि अतिविस्मयं दर्शयितुं वरुणस्य भगवत्स्तवमाह–नमस्तुभ्यमित्यादि । भगवते ब्रह्मणे नमः । सविशेषत्वं दर्शयति–अनन्तशक्तये अनन्ता अपरिमिता शक्तिर्यस्य, यत्र त्वयि माया न श्रूयते । सा कीदृशी ? लोकसृष्टेर्विकल्पनं यया सा तथा ॥ ८–११ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

न यत्र इत्यादि । यत्र त्वयि माया न श्रूयते, तद्दर्शनन्तु दूरादास्ताम् ॥ ८–१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अद्य नितरां भृतो धृतः एतावद्दिनपर्य्यन्तं सहस्रशो देहा वृथैव धृतास्त्वद्दर्शनलाभाभावादिति भावः । अर्थोऽद्यैवाधिगतः सर्वं रत्नाकरपतिनापि इतःपूर्वं नैवंविधोऽर्थः प्राप्त इति भावः । त्वत्पादौ भजन्त एवाध्वानः संसारस्य पारमवापुः अहन्त्वेतादृशं दर्शनमपि प्राप्त इत्यहो मद्भाग्यस्य परा काष्ठेति भावः ॥ ५ ॥ भक्त्या ज्ञानेन योगेन च त्वमेवोपास्य इत्याह—नम इति । मायाशाबल्यादेव तव भगवत्त्वादीत्याचक्षाणा भ्रान्ता एवेत्याह न यत्रेति । लोकसृष्टेर्विविधकल्पनं यतः सा ॥ ६ ॥ किं भो मामेवं स्तुवन् लज्जसे ? सत्यं महापराधो मे जात एवेत्याह—अजानता द्वादश्या अल्पत्वे अरुणोदयात् पूर्वमपि जले प्रवेष्टव्यमिति भक्तिशास्त्रानभिज्ञेन मामकेनेति भृत्यापराधेन ममैवापराध इति भावः । अतः मूढेन अकार्य्यवेदिना मम भृत्योपि मत्कार्य्यं न जानातीत्यर्थः । तव पिता आनीत अयमिति रत्नचतुष्किकामध्यासीनं स्वेन पूजितं स्वेष्टदेवस्मरणरतं श्रीनन्दं स्वाञ्जलिना दर्शयति—क्षन्तुमर्हसीति । तव क्षमासिन्धुत्वात् मम त्वपराधसिन्धुत्वात् दण्डयिष्यसि चेत् यथेष्टं दण्डयेति भावः ॥ ७–८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

देहश्चरणस्पर्शादिना निभृतः पूर्णमनोरथः अर्थः अर्पणेन किञ्च मोक्षभागप्यद्यास्मीत्याशयेनाह—त्वत्पादभाज इति । त्वत्पादौ भजन्ति सेवन्ते ये ते तथा अध्वनः पारं मोक्षम् ॥ ५ ॥ एवं देहधनयोः सफलत्वमात्मनो मोक्षभाक्त्वं चाविष्कृत्याथ क्षमापयितुं नमस्करोति—नम इति । भगवते स्वाभाविकषड्गुणसम्पन्नाय ब्रह्मणे बृहत्स्वरूपगुणाय यत्र भगवति लोकेषु देवलोकमनुष्यलोकादिषु सृष्टीः देवमनुष्यादिरूपाः प्रजाः विकल्पयति स्वार्थाद्भ्रंशयतीत्यर्थः । सा दम्भरूपा माया न श्रूयते त्वदन्ये वयं दम्भिनः स्वस्थाने स्थिता एव भृत्यानाज्ञापयामः न त्वमिव तत्तद्गृहे गच्छाम इति भावः ॥ ६ ॥ मामकेन मद्भृत्येन ॥ ७–९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अद्य मे देहो विभृतः । विधृत इति पाठे स एवार्थः । देहसाफल्यमायातमिति यावत् । न केवलमेतत्कलेवरमात्रसाफल्यं किन्त्वर्थः शुद्धचिद्देहभोग्यो मोक्षसुखादिरप्यधिगतं । एष्यन्नयेन प्राप्तः । यस्य तव पादभाजश्चरणपरिचारका अध्वनः संसृतिसृतेः पारमवापुः ॥ ६ ॥ अतोऽहमपि तत्कूटघटित इति नमति । भगवते ऐश्वर्यादिषड्गुणवते ब्रह्मगे गुणपूर्णतया तच्छब्दवाच्याय परमात्मने सकलोत्तमरमास्वामिने यत्र त्वयि लोकदृष्टं विकल्पयत्यसमर्थतां नयतीति सा माया प्रकृतिस्तद्बन्ध इति यावन्न श्रूयते । तस्मै तुभ्यं नमः । यद्वा हे नयत्र सकलनीतिरक्षक स्वयि लोकदृष्टिविकल्पना लोका ज्ञानिनो विध्याद्यास्तेषां दृष्टेर्ज्ञानस्य विकल्पनमेवमिति निर्धारणाभावो यया सा माया महिमा श्रूयत इति वा । माया तु महिमा प्रोक्ता प्राचुर्ये तु मयडथ्यत इति पाद्म इति तृतीयतात्पर्योक्तेः । भो लोकदृष्टिविकल्प लोकानां दृष्टिर्ज्ञानं तया विकल्पो युक्तागुणत्वमहत्त्वादिविकल्पो यस्य तत्सम्बुद्धिः । या मा तस्या वा माया लक्ष्म्या वा ना परमपुरुष इति पतिरिति यावत् । भवाञ्छ्रूयत इति तुभ्य नम इति वा । हे नयत्र लोकदृष्टिविकल्पन

लोकदृष्ट्या विकल्पनं स्थाम्यत्यत्र न वेति यस्याः सा तयाऽमा सह **तुभ्यं नम** इति वा योजना ॥ ७ ॥ स्तुत्यैव किं पर्यवसानं प्रस्तुतकार्यस्य किमुत्तरमित्यत आह ॥ अजानतेति । अजानता **मूढेनाकार्यवेदिनेति** भूयो भूयो यमज्ञ इति द्योतयितुं पर्यायेण वचनत्रिकमिति ज्ञेयं । हे अ अगेनाजया ब्रह्मणा रमया वा नत । अशब्दवाच्यमामकेन दूतेनावेदिनाऽजानता मया तव पिताऽऽनीत इति यदकारि स्वशिष्यदासवर्गकैः समर्थयन्ति भूभुज इत्यादेस्तत् हे प्रभो क्षन्तुमर्हसि । मामकाहृतस्तव पितैषो नीयतां । गोविन्देति सम्बोधयन्स्वस्येन्द्रस्थापितैकान्तिकाभिधाबोधोऽस्तीति ध्वनयामास वारीश इति ज्ञेयं । ते पितेत्यनेन लोकपितुस्तवाप्येकः पिता किमापणश्रेणीमिलित इति ममापि नन्दानयनं सम्मतमन्तरङ्ग इति तव पिता पितेति पुनः पुनरुच्चरन्सरिदुच्चोपाहसद्धरिपितृत्वं नन्दस्येति तात्पर्यं ध्येयं । एष इत्यनेन न चाङ्गभंङ्गोऽस्येति ध्वनयति ॥ ८ ॥

श्रीसुबोधिनी

अशक्तौ स्वोपकारमात्रं वक्तव्यमतस्तदेवाहाद्य **मे विधृतो** देह इति, यद्यपि देवयोनिः प्राप्ता तथाप्यधिपत्यं दैत्येष्वतस्तत्सङ्गान्न भगवत्परता भवत्यतः प्राप्ताप्युत्तमा योनिरप्राप्तप्राया तदिदानीं स्वामिदर्शनाज् जाते फले साधनाभावेपि सफलजन्मत्वं, तदाहाद्यव मे मया **विशेषेण धृतो देह** इति, साधनपरत्वं निराकुर्वन् हेतुमाहाद्यैवार्थः पुरुषार्थः प्राप्त इति, ननु साधनाभावेन कथं फलं भवेत् साधने च पुनरङ्गीक्रियमाणेद्यैवेतिवचनं बाधितं स्यात् ? तत्राह **प्रभो** इति, **समर्थो भवान् साधनाभावे फलं दातुं साधनतापि स्वकृतैवेति**, ननु कथमेवमलौकिकं भवेत् ? तत्राह–**यत्पादभाज** इति, त्वत्सेवकानामेवालौकिककर्तृत्वं यत्र त्वयि तत्र किं वक्तव्यमिति, यस्य भगवतश्चरणारविन्दं ये भजन्ति **तेऽध्वनः पारमवापुर्नातः** परं गन्तव्यमस्ति, लोके चरणसमागता गच्छन्ति यथा पादुकादयः, अन्यथा तांश्चरणे नानयेदतो यथैतद् विपरीतमेवं फलमपि, अत एव **स्वामिदर्शनं भक्तिः पूजेत्यपि साधनं भवतीति निराकृतमानन्दनिधेरन्यस्य प्राप्तव्यत्वाभावात्** ॥ ५ ॥ अतः **सफलजन्मवता प्राप्तफलेन भगवति** यत् कर्तव्यं तदाह **नमस्तुभ्यमिति, नमस्कारो न जीवानां कर्तव्यस्तुल्यत्वाद् देहादेरागन्तुकत्वादतो भगवानेव नमस्कर्तव्यः**, सोपि सर्वसिद्धान्तसिद्धश्चेत्, विवादे सत्सु विषयदौर्बल्यमेव कल्पनीयमतः **श्रुतिस्मृतिपुराणेषु यत्रैकवाक्यता स नमस्कर्तव्यः**, तत्रापि यदि तथानुभवो न भवेत् तदा महताम 'प्यन्तःकरणं प्रमाण'मिति नमस्कर्तव्यो न भवेदतश्चतुष्टयमाह तुभ्यमिति साक्षात्कृताय भगवत इति वैष्णवसिद्धान्तसिद्धाय **ब्रह्मण** इति श्रौताय **परमात्मन** इति स्मार्ताय, **श्रुतिव्यतिरिक्तपक्षेषु मायायाः सृष्ट्युपयोगः करणत्वेन प्रधानत्वेन वा** पाषण्डेषु निमितत्वेनापि, सा चेद् भगवति नास्ति तदा तत्कृता दोषाः कामादयः सुतरामेव न भवन्ति तत आत्मन आत्मत्वस्य सिद्धत्वाद् दोषाणामभावाच्च ते न किञ्चिद् विज्ञाप्यनित्यभिप्रायेणाह **न यत्र श्रूयते मायेति**, लोकानां सृष्ट्यर्थं सृष्टिरूपेण वा **विशेषेण कल्पना** यया सा कार्यकारणरूपिणी सर्वा चेन्निषिद्धा तदा न किञ्चिद् विज्ञाप्यम् ॥ ६ ॥ तथापि स्वापराधो निवेदनीयोन्यथा स्वकृतादेव नश्येदत आहाजानतेति, **मामकेन सेवकेन धर्मतत्त्वमजानता भवत्सम्बन्धं चाजानताय तव पिता** लीलायां पितृत्वेन कृतः **समानीतः**, यदि स्वरूपतोस्मिन्नुत्कर्षः स्यात् तदाज्ञोपि नानयेत् सम्बन्धस्तु न ज्ञातस्तदज्ञानादेव वैष्णवधर्मोप्यज्ञातः, अज्ञापने हेतुर्मामकेनेति, अयं दैत्यो यदि भगवद्धर्मान् जानीयात् तदा दैत्यत्वमेव गच्छेत् ततः कोपि सेवको न भवेत्, स्वतस्त्वस्य न ज्ञानं तदाह **मूढेनेति**, ननु तथापि सेवकेन स्वाम्युक्तमेव कर्तव्यं ततः कथमानीतवान् ? तत्राहाकार्यवेदिनेति, नास्य **कार्यवेदनं** कार्यज्ञानमस्ति किं कार्यं किमकार्यमित्यतः सामान्यत उक्तमपि कर्त्रा विशेषाकारेण कर्तव्यमतोस्य स्वाभाविक एवं दोषः, **अयं च** तव पिता वेपमानः पुरो वर्ततेतः स्वामिन् लीलायामपराधः कृतो वर्तते तद् **भवान् क्षन्तुमर्हति, तव पितेतिवचनादपराधः सोढव्यो लीलायां प्रविष्ट** इति, **न हि लीलाप्रविष्टानामपराधो भवति**, अतो **भवानित्यप्युक्तं, भवानेव क्षन्तुमर्हति** न त्वहं क्षमापयितुं योग्यः, **'गोविन्द नीयता'मिति** विगीतं, तथा चेद् वदेदपराधी स्यात् ॥ ७ ॥ एवं प्रार्थनायां कृतायां तत्सिंहासन उपविष्टस्तं कृतार्थीकृत्य तत आगत इत्याहैवमिति, **प्रसादितो भृत्यापराधेनातो दण्डमकृत्वैव कृष्णः** सदानन्दस्तस्याप्यानन्दमुत्पाद्य ततः समागमने समानयने वा प्रार्थनीयरहितो **भगवान् सर्वशक्तिः स्वपितरमादायागात्**, भगवत्स्पर्शेन दैत्यसम्बन्धकृतो दोषो निवर्तितः, ननु तथापि वरुणेनागन्तव्यमनुवृत्तिश्च कर्तव्या तत् कथं नागत इति चेत् तत्राहे**श्वरेश्वर** इति, ईश्वराणामपि वरुणादीना**मीश्वरो** नियन्तातोनुल्लङ्घ्यशासनत्वात् स्वामिलीलास्थाने न गन्तव्यमितिनीतिशास्त्रान् नागतः, **साधनादिकं** तु नापेक्षते एवं **स्मरणमात्रेणैव गोकुलप्राप्तेः**, आगत्य **बन्धूनां मुदं चावहत् आवहन्** वा समागतः ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

नमस्तुभ्यं भगवत इत्यत्र । **विवादे सत्स्वित्यादि** । ननु 'यावज्जीवमग्निहोत्रं जुहुया'दित्यादिकर्मकाण्डेन । यदहरेव विरजेतदहरेव प्रव्रजेत्' 'यामिमां पुष्पितां वाच'मित्यादिना च विरोधात् कथं तत्तदुपास्यानां न नमस्यतेत्याशङ्क्य तत्र विषयव्यवस्थामाहुः **विवाद** इति । विषयस्य विवादविषयस्येत्यर्थः । देहाद्यध्यासकृताधिकारकत्वेनाज्ञानमूलकत्वेन कर्मणो जघन्यत्वात् 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः, न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह'ति प्रभुवचनाद्भक्तिमार्गान्मार्गान्तरस्य दौर्बल्यम् । तत्रोपास्यरूपाणां भक्तिमार्गसेव्यपुरुषोत्तमरूपाद् दौर्बल्यमिति भावः भक्तिमार्गाज्ञानदशायामेव वार्ता तेषां दौर्बल्यम्

अत एव 'मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायत' इति भगवतोक्तम्। ननु चार्वाकादिभिरीश्वरो नाङ्गीक्रियत इतीश्वरोऽपि न सर्वसिद्धान्तसिद्धः। किञ्च, ईश्वरवादिनामपीदं स्वरूपं शुद्धं ब्रह्मरूपमिति न सर्वेषां सम्मतमित्यत आहुः सत्स्विति। मोहकशास्त्रजमोहरहिताः सन्तः, तेषु परस्परं यस्मिन्विषये विवादस्तत्र तथेत्यर्थः। अत एवाग्रे श्रुत्यादिकमेवोक्तम्। **न यत्र श्रूयते मायेत्यत्र,** लोकानामित्यादि। मायया मोहिता एव तथा कल्पयन्तीति तथा। कार्यो मोहः; कारणं सा। एतदेवाहुः **कार्यकारणरूपिणीति।** **आनीतोऽयं तव पितेत्यत्रे**दंप्रयोगं विनापि चारितार्थ्ये तत्प्रयोगात् तत्तात्पर्यमुक्तं **वेपमानः पुरो वर्तत** इत्यनेन। तत्र भगवदैश्वर्यदर्शनजसात्त्विकभावात्तथेति ज्ञेयम्॥ ७॥

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नमस्तुभ्यमित्यत्र प्रधानत्वेनेति प्रकृतित्वेनेत्यर्थः, **निमित्तत्वेनेति** कर्तृत्वेनेत्यर्थः॥ ६॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

त्वत्पादभाज इत्यत्र **लोके चरणसमागता गच्छन्तीति** चरणस्य गतिमत्त्वाच् चरणे ये समागताः पादुकादयो गतिमन्तो भवन्तीत्यर्थः, **अत। यथैतद्विपरीतं एवं फलमपीति** भगवच्चरणे समागतस्य तु परिभ्रमणशीलस्यापि सर्वगतिराहित्यं भवतीति विपरीतत्वं, **एवं फलमपि** विपरीतं यद्गतिरहितस्याध्वपारप्राप्तिरिति॥ ५॥ **नमस्तुभ्यं भगवत** इत्यत्र **चतुष्टयमाहेति** श्रुतिस्मृतिपुराणानुभवानां चतुष्टयमित्यर्थः, **तुभ्यं भगवते ब्रह्मणे परमात्मने** इतिविशेषणचतुष्टयेन, तदेतदाहुः **तुभ्यमिति साक्षात्कृताये**त्यारभ्य **स्मार्तायेत्यन्तेन, साक्षात्कृताय** अनुभवसिद्धायेत्यर्थः, **वैष्णवसिद्धान्तसिद्धायेति** पुराणसिद्धायेत्यर्थः, **ब्रह्मण इति श्रौतायेति** श्रुतिसिद्धायेत्यर्थः, **स्मार्तायेति** स्मृतिसिद्धायेत्यर्थः, **प्रधानत्वेन वेति** प्रकृतित्वेनेत्यर्थः, **पाषण्डेष्विति** मायावादादिमार्गेष्वित्यर्थः, **निमित्तत्वेनापीति** कर्तृत्वेनेत्यर्थः, मायावादिमते मायाया एव कर्तृत्वस्वीकारात्॥ ६॥ **आनीतोयं तव पितेत्यत्र वेपमानः पुरतो वर्तत** इत्यस्यार्थष्टिप्पण्यां स्फुटः, **आनीतोयं तव पितेत्यस्य** विवरणे **तव पितेतिवचनादपराधः सोढ** इति वरुणेन लीलाया एव मुख्यत्वं स्वीकृतं, लीलायामेव नन्दे पितृत्वं **तव पितेत्यनेनोक्तं** केवलब्रह्मधर्माङ्गीकारे तु भगवतो जन्मराहित्यान् न पितृत्वं व्रजपतौ सम्भवति, लीलायां पितृत्वेनाङ्गीकारात् तस्य भगवदङ्गीकृतपितृत्वस्यैव वरुणेनोक्तत्वात् सन्तुष्टो भगवानतोपराधः सोढ इतिहार्दम्॥ ७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वरुणकृतां स्तुतिमाह–अद्येति चतुर्भिः। प्रभो हे स्वामिन्! अद्य अधुना मे मया देहो निभृतः धृतः, त्वद्दर्शनादिना मम जन्मसाफल्यं जातमित्यर्थः। अद्यैवार्थः परमं फलमधिगतः प्राप्तः, सर्वरत्नाकरपतिनापि मयेतः पूर्वं नैवंविधोऽर्थः प्राप्तः, तवैव परमार्थत्वादित्यर्थः। संसारोऽपि त्वद्दर्शनादिना निवृत्तप्राय एव' इत्याशयेनाह—त्वत्पादेति। त्वच्चरणभक्ता अध्वनः जन्ममरणादिलक्षणस्य संसारमार्गस्य पारं त्वामवापुः प्रापुः॥ ५॥ एवं स्वकृतार्थतामाविष्कृत्य, अथ स्वापराधं क्षमापयितुकामो भगवतः सर्वशास्त्रसिद्धान्तसिद्धफलरूपत्वं वर्णयन् नमस्करोति–नम इति। भगवते वैष्णवे सिद्धान्तसिद्धाय, ब्रह्मणे श्रुतिसिद्धान्तसिद्धाय, परमात्मने स्मृतिसिद्धान्तसिद्धाय, तुभ्यं प्रत्यक्षप्रमासिद्धाय नमः। ननु 'ममापि सर्वजनसाधारणतया प्रत्यक्षत्वात् कथं सर्वशास्त्रसिद्धफलरूपत्वम्?' इत्याशङ्क्याह—नेति। यत्र भवद्विग्रहे लोकानां जनानां सृष्टिं देवमनुष्यादिशरीरं विकल्पयति या माया प्रकृतिः सा नियामकतया कस्मिन्नपि शास्त्रे न श्रूयते, अतो न सर्वजनसाधारणत्वशङ्का युक्ता॥ ६॥ अथ स्वापराधं निवेदयन् क्षमापयति—अजानतेति। मामकेन मद्भृत्येन अयं तव पिता आनीत इति यत् तत् मद्भृत्यकृतत्वान्मदपराध क्षन्तुमर्हसि। 'तर्हि किमित्यानीत' इत्याशङ्क्याह—अकार्यवेदिनेति। कार्यं कर्तव्यमजानता। तत्र हेतुमाह—अजानतेति। त्वद्धर्म त्वत्प्रभावं चाजानतेत्यर्थः॥ तदज्ञाने हेतुमाह—मूढेनेति, अविद्यामोहितेनेत्यर्थः॥ ७॥ 'प्राप्तकामत्वेन्वाद्यैश्वर्यस्य तव न काचिदपेक्षा' इत्याशयेन सम्बोधयति—गोविन्देति। एष ते पिता त्वया नीयताम्। 'महांश्चायमपराध' इति सूचयन् सम्बोधयति–पितृवत्सल इति। 'तथापि सदानन्दरूपस्य तव अनुग्रह एव युक्त' इत्याशयेन सम्बोधयति—कृष्णेति। ममाप्यनुग्रहं कर्तुमर्हसि। कोऽसावनुग्रहोऽपेक्षित' इत्यपेक्षायां 'तं त्वमेव जानासि, सर्वसाक्षित्वात्' इत्याशयेनाह—अशेषदृगिति॥ ८॥

अन्वितार्थप्रकाशिका

अद्येति॥ हे प्रभो! हे भगवन्! अद्य अधुना मे मया देहो निभृतः धृतः। त्वद्दर्शनात् देहधारणसाफल्यं जातमित्यर्थः। यद्वा। निभृतः पूर्णमनोरथः जातः। अद्यैवार्थः परमं फलमधिगतः प्राप्तः। सर्वरत्नाकरपतिनापि एवंविधोऽर्थः पूर्वं न प्राप्तः। त्वत्पादभाजः त्वत्पादयोर्भक्ताः अध्वनः संसारमार्गस्य पारं त्वामवापुः प्रापुः॥ ५॥ नम इति॥ भगवते ब्रह्मणे परमात्मने तुभ्यं नमः। यत्र भवति लोकानां सृष्टः कल्पना यस्याः सा माया न श्रूयते अविद्यमानेव तिष्ठति॥ ६॥ अजानतेति॥ अजानता पूर्वोक्तं शास्त्रवचनं तव पितेति वा अजानता मूढेन अकार्यवेदिना कर्त्तव्यमजानता मामकेन मद्भृत्येनायं तव पिता आनीत इति

यत् तत् मद्भृत्यकृतत्वान्मदपराधं भवान् क्षन्तुमर्हति ॥ ७ ॥ गोविन्देति अर्द्धम् । हे गोविन्द ! हे पितृवत्सल ! एष ते पिता त्वया नीयताम् । ममेत्यर्द्धमसार्वत्रिकं स्पष्ट च ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे प्रभो अद्यैव मे मया देहो निभृतः धृतः यदा त्वत्समागमः प्राप्तस्त दैवदेहधारणस्य सफलत्वं जातमित्यर्थः अर्थः सकलधनसंघः अद्यैवाधिकृतः सर्वधनप्राप्तिभ्योऽप्याधिक्येन प्राप्तः यतः त्वत्पादभाजो जनाः अध्वनः संसारमार्गस्य पारमंतं मुक्तिमवापुः ॥ ५ ॥ नम इति भगवते सर्वैश्वर्यसंपन्नाय ब्रह्मणे बृहत्त्वाद्यसंख्येय गुणैर्महते परमात्मने बद्धमुक्तेभ्यः श्रेष्ठमूर्त्तये तत्र हेतुः यत्र तव मूर्त्तौलोकानां सृष्टिं त्रिगुणात्मकसर्गं विकल्पयतीति तथा भूताया माया प्रकृतिः सा नं श्रूयते श्रुतिभिर्नोच्यते तव विग्रहे मायानास्तीत्यर्थः ॥ ६ ॥ इदानीं वक्तव्यमाह अजानतेति तव पितरमजानता ज्ञातृत्वेऽपि अकार्य वेदिनाकार्या कार्यविवेकशून्येममानुचारेण हे पितृवत्सलपितरिदयालो ॥ ७ ॥ बंधूनां गोपगोपीनां गोकुलमगात् ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह पञ्चभिः ॥ अद्येति ॥ हे प्रभो, अद्याधुना, मे मया, देहः निभृतो धृतः । यदा त्वद्दर्शनं जातं तदैव देहसाफल्यं जातमित्यर्थः । यद्वा मे मम, देह आत्मा निभृतः पूर्णमनोरथो जात इत्यर्थः । किं च अद्य एव, अर्थः अधिगतः । सर्वरत्नाकरपतिनापीतः पूर्वं नैवंविधोऽर्थः प्राप्त इत्यर्थः । त्पद्दर्शनान्मम मुक्तिरपि करस्था जातेत्यभिप्रायेणाह । हे भगवन्, त्वत्पादं भजन्तीति त्वत्पादभाजः, ये तेऽपि, अध्वनः संसाराध्वनः, पारं पारभूतं त्वां, अवापुः । किमु त्वद्दर्शनभागहमिति भावः ॥ ५ ॥ एवं स्वकृतार्थतामाविष्कृत्याथ क्षमापयितुकामः क्षमाहेतुः केवलाञ्जलिमुद्रैवेत्यभिप्रयन्नसाधारणगुणैर्विशिषन्नमस्करोति ॥ नम इति ॥ भगवते पूर्णषाड्गुण्याय, ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते, परमात्मने लोकत्रयस्यान्तः प्रवेशव्याप्यगतधर्मास्पर्शाभ्यां नियन्त्रे, तुभ्यं नमः । यत्र त्वयि, लोकस्यं जीवलोकस्य दृष्टिं ज्ञानं विकल्पयतीति तथाभूता, गुणत्रयोन्मेषानुगुणकर्मरुचिजननद्वारा ज्ञानसंकोचविकाशादिजननहेतुरित्यर्थः । सृष्टिमिति पाठान्तरे लोकसृष्टिं विकल्पयति विविधतया रचयति तथाभूता माया, न श्रूयते । अप्राकृतस्वेच्छोपात्तदेहाय तुभ्यं नम इत्यन्वयः ॥ ६ ॥ अथ स्वापराधं निवेदयन् क्षमापयति ॥ अजानतेति ॥ कार्यवेदि न भवतीत्यकार्यवेदी तेनाकार्यवेदिना विवेकशून्येनेति यावत् । मूढेन, नन्दं भगवतस्तव पितरमित्यजानता, अजानता तव प्रभावानभिज्ञेन, यद्वा भगवच्छास्त्रमजानता, तच्छास्त्रं तु 'कलार्द्धा द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि ॥ आमध्याह्नाः क्रियाः सर्वाः कर्त्तव्याः शंभुशासनात्' इति । मामकेन मद्भृत्येन, अयं तव पिता, आनीत इति यत्, तदिदं हे प्रभो, क्षन्तुं, अर्हसि । यद्यस्मात्तव पिताऽनेन आनीतः, अत एव हि दुर्लभमपि त्वद्दर्शनं नोऽस्माकं जातं ततो भृत्यकृतापराधोऽपि मम तु महाफलाय बभूवैवं महाफलप्रदो भवानेतदपराधं क्षन्तुमर्हसीति भावः ॥ ७ ॥ इत्युक्त्वा नन्दं समर्पयति ॥ गोविन्देति ॥ हे गोविन्द, हे पितृवत्सल, एषः ते तव, पिता नीयताम् । कृतापराधे स्वस्मिन्ननुग्रहं प्रार्थयते । प्रजा इति । हे प्रभो, सापराधाः अपि, वयं प्रजास्त्वत्प्रजाभूताः, अतः, त्वया, अनुग्राह्याः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अद्य मे इति : १०.२८.५.

यत्रोरगेन्द्ररसना श्रुतिवासनाऽपि श्रुत्यास्यवागपि च पञ्चमुखस्य दृष्टिः ।
आसीद् विकुण्ठगतिरेष जडप्रवृत्तिस्तत्राहमच्युत कियानिह ते महिम्नि ॥ ११ ॥
सर्वाप्रतिष्ठितपदादिमभूमिरासमेतावदीश पदयोस्तव दर्शनेन ।
सद्योगिमानसमिवामृतसिन्धुपूर्णलीलाविहाररसिकोऽभवमद्य सत्यम् ॥ १२ ॥
प्रभुः प्रगल्भोऽस्म्यहमप्रगल्भः प्रभुः प्रकृष्टोऽस्म्यहमप्रकृष्टः ।
ततश्च सर्वेश्वर किं न सिद्धं सेव्यस्त्वमद्धा लघुसेवकोऽहम् ॥ १२ ॥
हृदयं यस्य यासीश सोऽनन्तं सुखमश्नुते । सदनेऽद्य ममायातस्तम्ने भाग्यं वदामि किम् ॥ १४ ॥
मात्स्यन्यायः सदन्यायस्थितिं बोधयतीह न । तदस्तु साम्प्रतं स्वेष्टसाधको विनयो हि मे ॥ १५ ॥

अजानतेति : १०.२८.७.

सर्वेश्वरस्य जनकः सकलाधिकश्रीर्मान्यो न चान्यवदनादरणीय एषः ।
एवं प्रभो यदि विविक्तमतिश्चरश्चेत् तद्वारुणीस्थितिफलं भविता किमस्य ॥ १६ ॥
अस्माभिरब्धितनयाश्वशुरोऽस्ति कीदृगत्रस्थितैरपि न जातुचिदप्यलोकि ।
एवं मयाऽनुचरसंसदि कौतुकेन प्रोक्तं ततस्तमयमानयदन्तिकं मे ॥ १७ ॥

यत् सर्वतोमुखगतिर्भुवनाधिकश्रीरस्म्यम्बुजातवसतिर्विधिवत् तदस्मिन् ।
भाव्या पितामहपदाप्तिरपीति लोकताताहृतस्तव पितेति न धत्स्व रोषम् ॥ १८ ॥
मदीयोऽयमिति श्रीश यं त्वमङ्गीकरोष्यहो । तस्य भीतिर्न कुत्रापि भवत्यस्य तु का पुनः ॥ १९ ॥
नन्दद्वारानन्दलाभो भवेत् त्वद्दर्शनोद्भवः । अपूर्वैव ममाशेयमपूर्वाशा विलासिनः ॥ २० ॥
न चित्रं किमिदं देव प्रमादाशाविलासिना । त्वया मुदा मदाशेयं न मदाशेति लक्षिता ॥ २१ ॥
एवं ममेश हृदि या तव दर्शनाशा सा पूर्णतां करुणया भवताऽद्य नीता ।
तत् किं ब्रवीम्यहमितो भुवनेषु धन्यो भक्तेष्वपाशपदभाक् च सदाऽप्रतिष्ठः ॥ २२ ॥
एतद्दराशयेनैव ज्ञात्वापि पितरं तव । नाहं प्रेषितवान् शीघ्रमिति मन्तुं क्षमस्व मे ॥ २३ ॥

गोविन्द नीयतामिति : १०.२८.८.

गृहीत्वा स्वजनानन्दं नन्दमेनमनेनसम् । गोकुलालङ्कृतो भूत्वाऽऽनन्दगोपं सुखं दिश ॥ २४ ॥
भूयो नातिशतं कृत्वा प्रार्थये त्वामिदं हरे । नेतः कदापि भूयान्मेऽपूर्वाशा पतिता मतिः ॥ २५ ॥

कृष्णप्रिया

श्री वरुण देव कहने लगे, हे नाथ हे भगवन् ? वास्तविक रूप से मैंने आज शरीर धारण किया ऐसा लगता है। सचमुच आज ही मेरा जन्म हुआ ऐसा मानता हूँ। परम पुरुषार्थ आज ही पाया यह निश्चय है, क्योंकि आपके पादारविन्द आज इस दास के द्वार पर पधारें। हे भगवन् ? आपके श्रीचरणों की सेवा करने वाले लोग ही भवसागर से पार हो जाते हैं ॥ ५ ॥ हे दयानिधि ? आप ही परमात्मा है, आप ही परब्रह्म है, आपका ऐश्वर्य सर्वश्रेष्ठ है। जन जीवन में भ्रम पैदा करने वाली और लोकसृष्टि का कारण माया आष में नहीं, आप को छु सकती नहीं। माया पर आपका प्रभाव है आप पर माया का प्रभाव नहीं। अन्त में आपके श्रीचरणों में प्रणाम ॥ ६ ॥ नाथ ? धर्म का सिद्धान्त को न समझने वाले और आपके पितृचरण श्रीनन्द बाबा को न जानने वाले और कार्याकार्य का तत्व के अनभिज्ञ मेरे सेवक ने मोहवश यह अपराध किया। पूज्य पितृचरणों को यहाँ ले आया और कष्ट पहुँचाया। हे नाथ इस अपराध को क्षमा करें ॥ ७ ॥ श्रीशुकाचार्यजी ने कहा– राजन् ? जलाधिपति वरुण देव ने विनय पूर्ण भक्ति सभर व्यवहार से, सर्वेश्वर भगवान् श्रीकृष्ण को प्रसन्न किया। भगवान् श्रीकृष्ण भी वरुण लोक से अपने पितृचरण श्रीनन्दराय जी को साथ लेकर व्रज में पधारे और निज जन निज बन्धुजन को सपरिवार पारावार सुख दिया ॥ ८ ॥

नन्दस्त्वतीन्द्रियं दृष्ट्वा लोकपालमहोदयम् । कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥ ९ ॥
ते[1] त्वौत्सुक्यधियो राजन् मत्वा [2]गोपास्तमीश्वरम् । अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः ॥ १० ॥
इति स्वानां स भगवान् विज्ञाया[3]खिलदृक् स्वयम् । सङ्कल्पसिद्धये तेषां कृपयैतदचिन्तयत् ॥ ११ ॥
जनो वै लोक एतस्मिन्नविद्याकामकर्मभिः । उच्चावचासु गतिषु न वेद [4]स्वां गतिं भ्रमन् ॥ १२ ॥

कर्वमक्षमा

अन्वयः—नन्दः तु महोदयम् अतीन्द्रियम् लोकपालम् दृष्ट्वा च तेषाम् कृष्णे सन्नतिम् दृष्ट्वा विस्मितः ज्ञातिभ्यः अब्रवीत् ॥ ९ ॥ राजन् ! औत्सुक्यधियः ते गोपाः तम् ईश्वरम् मत्वा, अधीश्वरः अपि नः सूक्ष्माम् स्वगतिं उपाधास्यत् ॥ १० ॥ अखिलदृक् सः भगवान् इति, स्वानाम् तेषाम् संकल्पसिद्धये स्वयम् कृपया एतत् अचिन्तयत् ॥ ११ ॥ एतस्मिन् लोके अविद्या कामकर्मभिः उच्चावचासु गतिषु भ्रमन् जनः स्वाम् गतिम् न वेद ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतींद्रियमदृष्टपूर्वं लोकपालस्य महोदयमैश्वर्यम् ॥ १० ॥ अत्यौत्सुक्ययुक्ता धीर्येषां ते। अपि किं स्वगतिं स्वस्थानं सूक्ष्मां ब्रह्माख्यां चोपाधास्यदुपाधास्यति। नोऽस्मान्प्रापयिष्यतीति संकल्पितवंत इत्यर्थः ॥ ११ ॥ इत्येवंभूतं स्वानां तेषां संकल्पमखिलदृक् सर्वज्ञः स्वयमेव विज्ञाय तेषां संकल्पसिद्धये कृपयैतद्वक्ष्यमाणमचिंतयत् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमुक्तविधया। ईश्वराणां हिरण्यगर्भादीनामपीश्वरो नंदनंदनः। बंधूनां गोपानाम्। अवहत्प्रापयामास। ईश्वरेश्वरत्वं दर्शयति–तथाहि–बीजांकुरतरूपमेष्वीशसूत्रविराट्स्वनंतबीजगर्भफलोपमः श्रीकृष्णोऽनंतकोटिब्रह्मांडनायक इति प्रसिद्धम्।

---

१. ते चौ–वीर. । २. स्वधी–विज । ३. य स्थिरनिश्चयम्–प्रा. पा. । ४. स्वगतिं–विज. ।

अयमेवार्थः श्रीशंकरभगवत्पादैर्वेदांतसारे वनवृक्षदृष्टांतेन समष्टिव्यष्टिरूपेण स्थूलसूक्ष्मकारणानि प्रतिपाद्य समष्टिवनदृष्टांतेन प्रतिपादितः। "शास्त्रेऽप्यंतस्तद्धर्मोपदेशात्" इत्यत्र "य एषोंत्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवाक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद" इति नामरूपवंतमादित्यमंडलांतर्वर्त्तिनं नारायणमुदाहृत्य तस्य च ऋक्सामचगेष्णाविति नारायणस्य कृत्स्नप्रपंचात्मके ऋक्सामे अंगुलिपर्वणी इत्युक्तं ततोनंतकोटिब्रह्मांडाश्रयत्वं सर्याकृतेर्ब्रह्मणो युज्यते। अयमेव नंदनंदनो महामायावी सुप्तिप्रलयकैवल्येषु कर्मोपरमे सति जगदिंद्रजालं स्वमूर्त्त्या सह तिरोधायापास्तसमस्तविशेषं ब्रह्मात्मानं प्रापयति कर्मशेषसत्त्वे पुनरुद्भावयति च ततश्चास्य स्वाविद्याभावादसंगत्वं पराविद्याकल्पितोपाधिसंबंधात्प्रतिमायाभोजकत्ववन्नियंतृत्वमविद्यायाश्चाद्यंतशून्यत्वात्तन्नित्यत्वं चेति सिद्धम्। नन्वसंगस्य "अस्थूलमनणु निष्क्रियं शांतम्" इत्यादिश्रुतेः सर्वविशेषशून्यस्य नामरूपनियंतृत्वादिकं च कथं घटेतेति चेत्। अत्र ब्रूमः। "कौलिके प्रतिमाद्वारा चैत्रे भोग इवेशता। असंगे भूम्नि जीवौघकल्पितोपाधियोगतः ॥" अनादौ संसारे जीवेश्वरविभागस्याप्यनादित्वाद्रज्ज्वां भुजङ्ग इव जीवौघस्याविद्यया शुद्धेपि चिदात्मनीशसूत्रादिकं कल्पितमिदमेव ब्रह्मणः शरीरम्। यथा कौलिकः प्रतिमां कृत्वेदमेव चैत्रशरीरमिति भावयति तद्वत्। यथा च प्रतिमाद्वारा चैत्रस्य सुखदुःखादिभोगो भवति तस्या हस्तवेधे चैत्रस्यापि हस्तवेधो जायते तस्यै पायसे समर्पिते चैत्रस्यापि पायसभोगो जायते एवं शुद्धयामपि चिति जीवौघकल्पितो पाधिद्वारा ईशनादिकं भवति। इयांस्तु विशेषः—जीवस्य स्वाविद्यया कल्पितं शरीरांतरमस्तीति प्रतिमानिमित्तकोऽपि भोगः स्वदेहावच्छेदेनैव जायते न प्रतिमावच्छेदेन। चितस्तु तदभावाद्विभुत्वाच्च परकल्पितोपाध्यवच्छेदेनैव नियंतृत्वादिकं भवति। तच्चाकर्मजत्वाच्चितौ न संसृज्यते यथा जीवे भोगः यथा वा कल्पितसर्पगतं भीषणत्वं रज्ज्वाम्। एवं च व्यवहारतः संसारस्याद्यंतशून्यत्वात्तत्कारणीभूतस्येशादेरपि तथात्वं वक्तव्यं किमुतेशादिकारणीभूतायाः श्रीकृष्णमूर्त्तेः। ईशः समष्टिकारणोपाधिः सूत्रात्मा समष्टिसूक्ष्मशरीरोपाधिः विराट् समष्टिस्थूलोपाधिः। ते च बीजोपमे ईशः अकुरोपमः सूत्रात्मा वृक्षोपमो विराडित्येवं ज्ञेयाः। श्रीकृष्णस्तु परिपक्वानंतबीजगर्भफलोपमोस्त्यत एव सर्वकारणकारणेश्वरेश्वरसर्वेश्वरपुरुषोत्तमोत्तमादिशब्दैन्तन्नामोदाह्रियते। निरूपितं चैतद्विस्तरेण नीलकंठाचार्यैश्श्रीमहाभारतसभापर्वभावदीपे इत्यलं प्रपंचेन। आगात् सूर्योदयात्पूर्वमेवेति ज्ञेयम् ॥ ९ ॥ अतिचमत्कारवन्ति इन्द्रियाणि यतस्तम्। महोदयं महैश्वर्यम्। तेषां लोकपालानाम्। अब्रवीदिति द्वादशीमध्य एव पारणं कृत्वा आस्थान्यामुपवेश्यैवेति ज्ञेयम् ॥ १० ॥ स्वगतिं स्वोपासकानाम्। सूक्ष्मां ब्रह्मानन्दरूपां वैकुण्ठाप्तिरूपां वा। उपधास्यति नोऽस्मान् प्रापयिष्यते। भो व्रजराज त्वयैव पूर्वं गर्गोक्त्याऽस्य नारायणसाम्यमुक्तं न तु नारायणत्वम्, संप्रति तु वरुणस्तुत्या साक्षाद्दृष्ट्वा यदि नारायणत्वमेव निर्द्धारयसि तदा बन्धूनामस्माकं सांसारिकाणामप्यवश्यमेव मनोरथमयं पूरयिष्यत्येव। यतस्तव पुत्र एव मम भ्रातुः पुत्रोऽस्य भगिनीपुत्रोऽस्य दौहित्रः परमेश्वरोऽयमस्मिन्नेते वयं स्निह्याम एव, अयमप्यस्मास्वासज्जत्येव। तद्भो गोपाः परमेश्वरत्वादस्मात्स्वस्ववांछनीयं यथेष्टं गृह्णीतेत्युक्ते केचिदाहुर्वयं मुक्ता एव बुभूषाम इति, अन्ये वयं वैकुण्ठवासिन एव बुभूषामेति पृथक्पृथग्विविधमतयो विविधसंकल्पवंतो बभूवुर्न तु "युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ" इति, 'तत्ते गतोऽस्म्यरणमद्य पदारविंदम्' इति, 'सखेति मत्वा प्रसभं यदुक्तम्' इत्याद्युक्तिमंतो वसुदेवार्जुनादय इव ऐश्वर्यज्ञानो परागात्स्वसंबंधशैथिल्यवन्तो बभूवुरित्यर्थः ॥ ११ ॥ स्वानां स्वेषां ज्ञातीनाम् 'स्वोऽर्थज्ञात्यन्यवाच्यपि' इत्युक्तः। अज्ञातिथनाख्यायमित्युक्तेः अज्ञातिधनाख्यायमित्युक्तेः सर्वनामकार्याभावः ॥ इतो वस्तुतः स्वानां ज्ञातीनां संकल्पं विज्ञाय तु स्वयं अखिलं ब्रह्मानुभवं सुखं वैकुण्ठवाससुखं च पश्यति जानातीत्यखिलदृक्। स्वपरिकप्रेमतारतम्येन तत्सान्निध्य ऐश्वर्यावरणतारतम्यत्वेऽपि तदानीं लीलाशक्तिप्रेरणवशादेव सम्पूर्णसर्वज्ञत्वोदयात् गोपीनाम्, तेषां तु तत्प्रेममाधुर्यकणिकयाऽपि ब्रह्मसुखवैकुण्ठसुखयोर्नीचीनीकृतत्वेपि तेषां नरलीलत्वेन मुग्धानां संकल्पसिद्धये तत्संकल्पितं ब्रह्मसुखं वैकुण्ठसुखं च ताननुभावयिष्यन्निदमचिंतयत् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमुक्तप्रकारेण व्यवहारेण वचनेन व्यवसायेन च। ननु, एतावन्महापराधे तावन्मात्रेणैव कथं प्रसन्नोऽभूत्? तत्राह, भगवान् सर्वज्ञः तत्त्वतस्तद्दोषो नास्तीति विज्ञानादवित भावः भगवत्त्वे हेतुः अखिलानामीश्वरः प्रवर्त्तकः ईश्वरेश्वर इति पाठः क्वचित् ॥ ९ ॥ एवं यद्गोविन्दत्वं दर्शितं तस्यैव महिमदर्शनाय तदास्पदस्य महिमानं दर्शयति—नन्दस्त्वित्यादिना। तुशब्दो भिन्नोपक्रमे तेषां वरुणस्य तल्लोकवासिनां च विस्मित इति केवलमधुरनरलीलावेशादिति सिद्धान्तितमेव श्रीकृष्णप्रेमैव हि सर्वोत्कर्षहेतुर्न सम्पदादय इति तदपेक्षा चेत्तेऽपि हि दर्शयिष्यन्त इति भावः ॥ १० ॥ ते तादृशतन्नित्यपरिकरा अपि प्रेमविशेषेण गोपाः केवलतद्बान्धवगोपत्वाभिमानिनः अत औत्सुक्यधियः लोकपालमात्रस्य तादृशं लोकादिवैभवम् अस्य वाऽस्मदीयरूपस्याप्यधीश्वरस्य कीदृशं स्यादित्युत्कण्ठितधियः अतः स्वगतिशब्देनात्र स्वस्थानमित्येव लभ्यते न तु ब्रह्माख्या सूक्ष्मामित्यनेन च न सा प्रोच्यते स्वगतिमित्यस्यैव विशेषणत्वेन प्रतीतेः शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति न्यायविरोधादस्यैव पुनरावृत्तिश्च न स्यादिति सूक्ष्मां दुर्ज्ञेयां तदेवमेषां तादृशस्वगति दिदृक्षा च तत्प्रेम्णैव अधीश्वरताज्ञानेपि स्वाभाविकपुत्रतादिविज्ञानानुपमर्दात् ॥११॥ स्वानां

ज्ञातीनां "स्वमज्ञातिधनाख्यायाम्" इति शब्दस्मृतेः इति कृष्णस्य तथैव तत्प्रेममयाभिमानं दर्शयति स व्रजजनाखिलमनोरथपरिपूर्णव्यग्रः स्वयमिति तैर्लज्जादिना साक्षादविज्ञापितमपि स्वयमेव विज्ञाय ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तथाप्यन्तः क्रोधं श्रीभगवन्तं दृष्ट्वा भीतः श्रीनन्दप्रदर्शनादिना प्रशमयन्नाह—गोविन्देति; गां स्वर्गमिन्द्रत्वेन विन्दतीत्येवं निजप्रभुत्वमेव साधितम्। यद्वा, महापराधीनापीन्द्रेण कृतस्य गोविन्दतयाभिषेकस्य स्वीकारेण परमकारुण्यादिकं सूचितम्। तव पिता एष साक्षाद्वर्त्तते, अत एतदग्रेऽपि पितृभक्तस्य तव क्रोधो न युज्यत इति भावः; अतो नीयतां गृहीत्वा गम्यतामित्यर्थः। यद्वा, गोविन्दत्वेन तव एष एव पिता पितृत्वयोग्य इत्यर्थः। अतएव हे पितृवत्सल! नीयताम्; यद्वा, एष नीयतां सत्वरं निजस्थानं प्राप्यताम्, द्वादश्यन्तरेवास्य पारणापेक्षणात्। पितृवत्सलेत्यत्र गूढोऽयं भावः—पितृवत्सलत्वात् पित्रर्थमेव श्रीभगवानत्रागच्छेत्, तत एव निजगृहान्तः स्वच्छन्देन तत्सन्दर्शनं महार्च्चनं च सम्पद्यत, न चान्यथेति मन्त्रणयायमत्रानीतः पूज्यतया भक्त्या निजान्तिक एव स्थापितः, तदभिप्रेतमस्माकं सिद्धम्, अतोऽधुनानीयतामिति ॥९॥ एवमुक्तप्रकारेण व्यवहारेण वचनेन व्यवसायेन च। ननु एतावन्महापराधे तावन्मात्रेणैव कथं प्रसन्नोऽभूत्? तत्राह—भगवान् सर्व्वज्ञः, तत्त्वतस्तद्दोषो नास्ति, विशेषतश्च मत्सन्दिदृक्षयैव तथा कृतम्, पितुरपि भयदुःखादिकं विचारयन्नित्यर्थः; भगवत्त्वे हेतुः—अखिलानामिन्द्रादीनामीश्वरः प्रवर्त्तकः; यद्वा, जगतां बहिरन्तः प्रभुः; यद्वा, जगदीश्वरोऽपि स्वस्य पितरमिति तस्मिन् भक्तिविशेषः; तस्य च तत्-पितृत्वे स्वत एव भयविकाराद्यभावो दर्शितः, अत आदाय हस्ते धृत्वा स्वस्थानमागतः, अतएव बन्धूनां व्रजजनानां मुदं प्रवाहरूपेण निरन्तरं प्रापयामासेत्यर्थः; च-शब्दात् श्रीनन्दस्य द्वादश्यन्तः पारणामहोत्सवश्च सूचितः। प्रसादित इति स्वल्पापराधतया भगवद्दिदृक्षया महापूजया वरुणस्येन्द्रान्महाविशेषं बोधयति; अतएव तेन संकीर्त्तित एवेत्युक्तम्, न च प्रसादित इति महापराधेनान्तः प्रसादनाशक्तेः, अतएव वरुणस्य भक्त्यपेक्षया तद्गृहे भगवतो गमनमिति ॥ १० ॥ एवं निजभक्तानां देवानां मनोरथपूरणमुक्त्वा परमप्रियाणां व्रजजनानां तद्वदन् तत्राग्रे श्रीगोपिकानां वक्ष्यन् सूचीकटाह—न्यायेनादौ गोपानामाह—नन्दस्त्वित्यादिना। तु-शब्दो भिन्नोपक्रमे। तत्तदुक्त्या ज्ञातीनामौत्सुक्यार्त्तिविवर्द्धनात् लोकपालानामपि महान्तमुदयं वैभवं दृष्ट्वा, तेषामपि कृष्णे सन्नतिं परमभक्तिञ्च दृष्ट्वा, इति वरुणलोकादागच्छन् पथीन्द्रादीनामपि महोदयं सन्नतिं चापश्यदिति बहुत्वेन बोध्यते। यद्वा, तेषां वरुणादीनां वरुणलोकेऽन्येषां च सुरश्रेष्ठानां वृत्तेस्तदपेक्षया बहुत्वम्; यद्वा, महोदयादिदृष्ट्या महत्त्वेन बहुत्वेन बहुत्वम्, अतीन्द्रियमिन्द्रियाग्राह्यं विचित्रानन्तरूपमित्यर्थः। विस्मितः, तेषां तादृशसन्नत्यसम्भवात्; अतो ज्ञातिभ्य उपनन्दादिभ्यस्तं तां चाब्रवीत्; यद्वा, अव्ययानामनेकार्थत्वादप्यर्थे तु-शब्दः। अकारप्रश्लेषश्च तादृशं तं तांश्च दृष्ट्वापि अविस्मितः, केवलं ज्ञातीनां सन्तोषार्थं तान् प्रत्यब्रवीत् ॥ ११ ॥ गोपाः स्वभावतः प्रेमविवशा अपि, हे राजन्निति स्नेहभराक्रान्तचित्तानामपि तेषां तथामननेन कौतुकात् सम्बोधनम्, अन्यत्तैर्व्यञ्जितम्। यद्वा, औत्सुक्यधियः कौतुकाक्रान्तचित्ता बभूवुः, यतो गोपाः कृष्णवत् विचित्रविनोदपराः; कथम्? तदाह—अपीति, स्वगतिमात्मतत्त्वं सूक्ष्मां तद्दर्शनाद्यपेक्षया स्वल्पतरामपि नोऽस्मानपि किमुपायत्वेन भक्त्युपकरणत्वेन बाधास्यदर्पयिष्यति। ननु परमपददातासौ स्वल्पद्रव्यमेतत् कुतो दास्यति? तत्राहुः—अधीश्वरो भक्तानामस्माकं परमप्रभुः। यथानेकामूल्यरत्नादिविभूषितेनापि बालकेन कदाचित् क्रीडाकौतुकेन प्रार्थ्यमानं काचखण्डमपि पिता स्नेहेन दद्यात्तद्वदिति भावः। यद्वा, स्वस्य तस्य गतिं गम्यं स्थानं सूक्ष्मव्यक्तं प्रपञ्चातीतं वास्मान् प्रापयिष्यति किम्? न तु तस्य स्थानमिदमेव, तत्राहुः—अधीश्वरो ब्रह्मादीनां सर्व्वेषां लोकपालानामपीश्वरः, अतो ब्रह्मादीनामिव तस्याप्यैश्वर्य्यानुरूपमस्मदगम्यं स्थानान्तरं भविष्यतीति भावः। इति कौतुकविशेषेणैव तद्दिदृक्षैषामिति; यद्वा, सूक्ष्मामस्मद्दुर्वितर्कां स्वेषां निजप्रियजनानां गतिं गम्यं पदं वैकुण्ठम्, यद्वा, वैकुण्ठस्योपरितनप्रदेशस्थं गोलोकाख्यमस्मान् न प्रापयिष्यति किम्? स व्रजजनाखिलमनोरथपरिपूरणव्यग्रः, स्वयमिति तैर्लज्जादिना साक्षादविज्ञापितमपि स्वयमेव विज्ञाय कृपयैव केवलं पितृस्नेहाक्रान्तपुत्रन्यायेन एतद्वक्ष्यमाणमचिन्तयत्, अन्यथा स्वत एव तेषां तदशेषसम्पत्त्या संकल्पसिद्ध्यर्थं चिन्तनानुपपत्तेः। अन्यत्तैर्व्याख्यातम्, यद्वा, इति उक्त प्रकारमौत्सुक्यधीत्वं स्वानां व्रजजनानामशेषदृक् सर्व्वतत्त्वं जानन्नपीत्यर्थः। विज्ञाय तेषामौत्सुक्यभरेण साक्षादिवानुभूय, यतो भगवान् सर्व्वैश्वर्य्ययुक्तः, अन्यत् समानम् ॥ १२-१३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कृतापराधे स्वस्मिन्ननुग्रहं प्रार्थयते-प्रजा इति। प्रजाः पुत्रप्रायाः वयमत एव हे प्रभो! सापराधा अप्यनुग्राह्या एव त्वयेति शेषः ॥ ९ ॥ इत्थं वरुणेनेति शेषः प्रसादितः प्रसन्नीकृतः कृष्णः पित्तरमादाय बन्धूनां मुदं हर्षमावहन् जगाम ॥ ९ ॥ नन्दस्त्वतीन्द्रियमदृष्टपूर्वं वरुणस्य महोदयमैश्वर्यं तेषां वरुणादीनां कृष्णे सन्नतिं नम्रतां भृत्यतामितियावत् दृष्ट्वा अतीव विस्मितः तत् ज्ञातिभ्योऽन्ववर्णयत् ॥ १० ॥ ततस्ते नन्दस्थ ज्ञातयो गोपाः हे राजन्! त्वं कृष्णं साक्षात् जगदीश्वरं परमपुरुषं मत्वौत्सुक्ययुक्ता धीर्येषां तथाभूताः अयमीश्वरः कृष्णः सूक्ष्मामतीन्द्रियां स्वगतिं स्वस्वरूपरूपगुणविभूतिप्रकारं नोऽस्माकमुपाधास्यत्यपि दर्शयिष्यति किमिति सङ्कल्पितवन्तः उपाधानमत्र दर्शनं धातूनामनेकोर्थत्वादुत्तरानुगुण्याच्च ॥ ११ ॥ इत्थं स्वानामभिप्रायमिति शेषः। अखिलदृक् हेतुगर्भमिदं तत्त्वात् स्ववमेव विज्ञाय तेषां मनोरथसिद्धये कृपयैतद्वक्ष्यमाणमचिन्तयत् ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

बन्धूनां च मुदमवहत् ॥ ९ ॥ अतीन्द्रियम् इन्द्रियाविषयम् ॥ १० ॥ नन्दवर्णितकृष्णमाहात्म्यं श्रुत्वा गोपानां बुद्धौ किमन्वर्त्तत ? तत्राह–त इति । तुशब्दोऽवधारणार्थो विशेषार्थो वा औत्सुक्यधियः पूर्वस्माद्विशिष्टभक्त्या हृतबुद्धयः ते गोपाः तं कृष्णमधीश्वरं ब्रह्मादेरप्यधिकम् ईश्वरमेवं मत्वा ज्ञात्वा एषोऽधीश्वरो नोऽस्माकम् इष्टमकरिष्यत् तर्हि सूक्ष्मामतीन्द्रियां स्वगतिं स्वस्थानमप्युपाधास्यददर्शयिष्यदिति ॥११॥ बुद्ध्या मनीषितम् एवं कथमवगतमित्यतः कृष्णचिन्तनेनावसीयत इत्याशयेनाह–इतीति। स्वानामिति सर्वनामसंज्ञामन्तरेण प्रयोगो ज्ञातित्वविशेषद्योतनाय स्वानां ज्ञातिनां हार्दं विज्ञाय तत्र हेतुरखिलदृगिति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विस्मित इति केवलमधुरनरलीलावेशादिति सिद्धान्तितं नन्दस्त्वित्यादिना ॥ १०–१२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अतोऽनुपहित शुद्धचैतन्यं भगवान् । एवं स्तुत्वा ब्रह्माख्यां सूक्ष्मां शक्ति दिदृक्षवस्ते मनोरथं चक्रुरित्याह–अपि न इत्यादिः । अपिः सम्भावनायान्, अधीश्वरः सर्वेश्वरः, सूक्ष्मां स्वगतिं स्वयदवीमपि उपाधास्यदर्शयेदिति स्वानां ज्ञातीनां स स्वयं भगवान् श्रीकृष्णः सर्वज्ञो विज्ञाय विशेषेण ज्ञात्वा कृपयैतदचिन्तयदिति परेणान्वयः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आगादिति सूर्य्योदयात् पूर्वमेवेति ज्ञेयम् ॥ ९ ॥ अतीन्द्रियं अतिचमत्कारवन्ति इन्द्रियाणि यतस्तं महोदयं महैश्वर्य्यं तेषां लोकपालानां अब्रवीदिति द्वादशीमध्य एव पारणं कृत्वा आस्थान्यामुपवेश्यैवेति ज्ञेयम् ॥ १० ॥ औत्सुक्ययुक्ता धीर्येषां ते स्वगतिं स्वोपासकानां गतिं सूक्ष्मां मायातीतां ब्रह्मानन्दरूपां वैकुण्ठप्राप्तिरूपां च उपाधास्यत् उपधास्यति नोपधास्यति नोऽस्मान् प्रापयिष्यते भो व्रजराज ! त्वयैव पूर्वं गर्गोक्त्या अस्य नारायणसाम्यमुक्तं नतु नारायणत्वं संप्रति तु वरुणस्तुत्या साक्षाद्दृष्ट्या यदि नारायणत्वमेव निधारयसि तदा बन्धूनामस्माकं संसारिकाणामप्यवश्यमेव मनोरथमयं पूरयिष्यत्येव यतस्तव पुत्र एव मम भ्रातुः पुत्रः अस्य भगिनीपुत्रो अस्य दौहित्रः परमेश्वरोऽयमस्मिन्नेते वयं स्निह्याम एवायप्यस्मास्वासज्जति तद्भो गोपाः ! परमेश्वरादस्मात् स्वस्ववाञ्छनीयं यथेष्टं गृह्णीतेत्युक्ते केचिदाहुर्वयं मुक्ता एव बुभूयामेत्यन्ये वयं वैकुण्ठवासिन एवं बुभूयामेति पृथक् पृथग्विविधमतयो विविधसङ्कल्पवन्तो बभूवुर्नतु युवां न नः सुतौ साक्षात् प्रधानपुरुषेश्वराविति“तत्त गतोऽस्म्यरणमद्य पदारविन्दम्” इति सखेति मत्वा प्रसमं यदुक्तमित्याद्युक्तिमन्तो वसुदेवार्जुनादय इव ऐश्वर्यज्ञानोपरागात् स्वसम्बन्धशैथिल्यवन्तो बभूवुरित्यर्थः ॥ ११ ॥ इति एवंभूतं स्वानां ज्ञातीनां सङ्कल्पं विज्ञाय स्वयन्तु अखिलं ब्रह्मानुभवसुखं वैकुण्ठवाससुखं व्रजभूमिप्रेमसुखं च पश्यति जानातीत्यखिलदृक् स्वपरिकरतारतम्येन तत्सान्निध्ये ऐश्वर्य्यावरणंतारतम्यवत्त्वेपि तदानीं लीलाशक्तिप्रेरणवशादेव सम्पूर्णसर्वज्ञत्वोदयात् गोपानां तेषान्तु तत्प्रेममाधुर्य्यकणिकयापि ब्रह्मसुखवैकुण्ठसुखयोर्नीचीनीकृतत्वेऽपि तेषां नरलीलत्वेन मुग्धानां सङ्कल्पसिद्धये तत्सङ्कल्पितं ब्रह्मसुखं वैकुण्ठसुखं चताननुभावयिष्यन्निदमचिन्तयत् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अतीन्द्रियमदृष्टपूर्वं लोकपालस्य वरुणस्य महोदयमैश्वर्यं तेषां वरुणादीनामनेन वरुणपुत्रकलत्रादिभिरपि भगवान् सन्नत्यादिना पूजित इति गम्यते ॥ १० ॥ तं श्रीकृष्णमोश्वरं साक्षात्परमपुरुषं मत्वा औत्सुक्ययुक्ता धीर्येषां ते अपि स्वगतिं गम्यते इति गतिर्नित्यविभूतिरूपा तामुपाधास्यत् उपाधास्यति न अस्मान् प्रापयिष्यतीति सङ्कल्पितवन्त इत्यर्थः ॥ ११ ॥ इतीत्थम्भूतं स्वानां सङ्कल्पम् अखिलदृक् सर्वज्ञः स्वयमेव विज्ञाय तेषां सङ्कल्पसिद्धये कृपयैतद्वक्ष्यमाणमचिन्तयत् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रसादितो वरुणेन बन्धूनां मुदमावहन्सन्स्वपितरमादायागात् । कीदृशीं गोशालां प्रत्यतोऽप्याह । बन्धुना नन्दरूपेणोना न्यूना तां प्रतीति । मुदं च बन्धूनामावहन्निति वा ॥ ९ ॥ अतीन्द्रियं साधारणमानवगोचरं लोकपालस्य वरुणस्य यो महानुदयस्तं नन्दस्तेषां वरुणादीनां कृष्णे सन्नतिं प्रणवतां च दृष्ट्वा ज्ञातिभ्यो ग्रामगतगोपेभ्यो विस्मितः सन्नब्रवीत् ॥ १० ॥ नन्दस्तन्नन्दनमहिमानमाकलय्य गोपा एवं स्वमनसि दध्युरित्याह ॥ ते त्विति । औत्सुक्येन सहिता धीर्येषां प्रोक्तोऽपि विशेषतोऽशेषाणां, भक्तिरुदभूदिति विशेषद्योतकस्तुः । स्वौत्सुक्यधीरिति पदमेकं । बह्वौत्सुक्यसहितचेतस्काः प्राक् । इदं च स्वं स्वानुभूतविलक्षणमन्यदौत्सुक्यं यस्यां सा त्वौत्सुक्यां सा च धीर्येषां त इति वा । अन्यथा तोरेकस्यातिरेकः स्यात्स्याच्चान्वयः क्लेशेन । अधीश्वरं त्वधीश्वरमेव मत्वा ज्ञात्वा नोऽस्माकमधीश्वरो यद्यन्वग्रहिष्यत्तर्हि सूक्ष्मां स्वगतिं वैकुण्ठाख्यामुपाधास्यत् । दर्शयामासेत्युत्तरस्वारस्याददर्शयिष्यत् लृङ् ॥ ११ ॥ स्वानां ज्ञातीनां गोपानामिति चिन्तितं स च भगवान्विज्ञाय तत्सम्भावकं स्वयमखिलदृक् अखिलं पश्यतीति तदखिलदृक् तं न रमादिवदन्याधीनमिति स्वयमित्यनेन सूचयति । तेषां गोपानां सङ्कल्पसिद्धये सङ्कल्पितसिद्ध्यर्थं कृपयेदं चिन्तयत्॥१२॥

श्रीसुबोधिनी

यथैकं वचनं बहु कार्यं करोति तथैवं कृतिरपि बहु कार्यं कृतवतीत्यग्रिमं वृत्तान्तमाह **नन्दस्त्वति**, नीतोपि नन्दः पूर्वं तत्रैव स्थापितोपि न किञ्चित् दृष्टवान् पश्चाद् भगवदागमनानन्तरं सर्वं दृष्टवानतोतीन्द्रियदर्शनोतीन्द्रियत्वे हेतुं वदन् सर्वमेवातीन्द्रियमित्याह **लोकपालस्य महान् उदयो यत्रेति**, किञ्च योस्माभिः कृष्णा यथाकथञ्चिद् व्यवह्रियते तादृशे ते सम्यङ् नतास्तद्गर्भदासा इव, इदं च तत्रत्यानां स्त्रीपुरुषाणां सर्वेषामेव सेवनं दृष्ट्वा **ज्ञातिभ्य** उपनन्दादिगोपेभ्योब्रवीत्, नन्वतीन्द्रियं भगवता स्वार्थमेव प्रदर्शितं नान्येभ्यो वक्तव्यं तत् कथमुक्तवानिति चेत् तत्राह **विस्मित** इति, तस्याश्चर्यरस एवोत्पन्नोता भगवन्तं पुत्रत्वेन नाङ्गीकृतवान् नायं सर्वथा पुत्रो गर्गश्छलवादी भ्रान्तो वात एवं सति किं कर्तव्यमिति विचारणीयं किञ्चित् प्रार्थनीयमाहोस्विदधिका प्रतिपत्तिः कर्तव्येति, तत्र प्रतिपत्त्यर्थं फलार्थं वादौ भगवतो निर्णीतं स्वरूपं ज्ञातव्यमवान्तरभेदा एवैत उत्कर्षा अतः परमोत्कर्षो ज्ञातव्यस्ततः फलप्रार्थना प्रतिपत्तिर्वा कर्तव्येति निश्चित्य प्रथमतो भगवदुत्कर्षदर्शनार्थमुत्सुका जाताः ॥ ९ ॥ ततो निःसन्दिग्धं तं **परमेश्वरं** ज्ञात्वा यावन्न दृश्यते तावत् सम्यक् प्रतीतिर्न भवतीति, **गोपा** विशेषज्ञानरहिताः किञ्चित् प्रार्थितवन्त इत्याह **ते त्विति**, तुशब्देन न तेषामन्यः पक्ष उद्गतो नाप्यसम्भावना किन्त्वौत्सुक्यधिय एव दर्शनार्थं जाताः, **राजन्निति** तथोत्सुका राजानोपि भवन्तीति ज्ञापयितुं, अयमीश्वरो भवतीति निश्चितं तथा सति, अपीतिसम्भावनायामीश्वरे मित्रे जाते स्वकीयं प्रदर्शयिष्यत्यथ यद्यस्मान् न मन्यते तदा दण्डं करिष्यतीति निश्चित्य **सूक्ष्मां स्वगतिं** वैकुण्ठाख्यामधीश्वरः स्वामी **नोस्मभ्यमुप** समीप एवाधास्यद् धास्यति किम्? अस्मन्निकट एव तं किं प्रकटीकरिष्यतीतिमनोरथं कृतवन्त स्वस्य तथासाधनाभावेपि फलं भविष्यतीत्यत्र भगवदैश्वर्यमेव हेतुः ॥१०॥ एवं तेषां चिन्तनानन्तरं यद् भगवांश्चकार तदाहेतीति **स्वा भक्ताः भक्तेष्टं पूरणीय यतः स तेषामेवार्थे समागतो** नापि तस्याशक्यं किञ्चिद् यतो **भगवान्**, ते तु स्वमध्य एव सङ्कल्पं कृतवन्तो न तु प्रार्थितवन्तस्तथापि भक्तकामनापूरक इति तद् **विज्ञायैतद्** वक्ष्यमाण**मचिन्तयदि**तिसम्बन्धः, ज्ञाने उपायान्वेषणादौ च सामर्थ्य**मखिल-दृगि**ति, सर्वमेव सर्वदैव स्वयमेव पश्यति न तु करणाद्यपेक्षाप्यतस्तेषां सङ्कल्पसिद्धये सङ्कल्पनिर्वाहार्थमेतद् वक्ष्यमाण**मचिन्तयत्** किमेते साधने योजनीया आहोस्विन् मर्यादामुल्लङ्घ्य फलमेव देयमिति, तत्र साधनप्रवृत्तौ तेषां क्लेशः स्यादिति कृपया द्वितीयमेव पक्षं कर्तव्यत्वेनाचिन्तयदित्यर्थः ॥ ११ ॥ चिन्तामेवाह **जन** इति, **एतस्मिल्लोके** यो जायते स सामान्यत एव न स्वगतिं जानाति, स्वगतिज्ञानानन्तरं दोषनिवृत्तिपूर्वकं तत्प्राप्त्युपायज्ञानं ततः क्रमेण यथाशास्त्रं साधनानुष्ठानं तत आत्मप्राप्तिस्ततो ब्रह्मात्मभावस्ततो भक्तिस्ततो भगवज्ज्ञानं ततो मत्स्थानदर्शनमित्येतावदेतेषां जन्मकोटिभिरपि न भवति यतः प्रथम एव पक्षे एतेनधिकृता इति, तदेवाह **वै** निश्चयेनास्मिल्लोकेतितामसे जातोमेध्यपर्यवसायी **न स्वां गतिं जानाति**, तत्र हेतु**रविद्याकामकर्मभिः**, प्रथमतः पञ्चपर्वाविद्या जीवमावृत्य तिष्ठति ततस्तत्सम्बन्धात् **काम**स्ततो नानाविधानि **कर्माणि** तैरयं जायते तेन मूलाशुद्धः कथमुत्कृष्टां गतिं गच्छेत् ॥ १२ ॥

यद्वा ननु स्वरूपानन्दमनुभवतो व्रजजनस्यानुभूयमानवस्तुस्वरूपज्ञाने कथमन्यविषयकोभिलाषः सङ्गच्छते? गृहादिस्थितिरिव चेत् सापि कथं सङ्गच्छते? अनुभूयमानवस्तुनः सर्वतोधिकत्वात्, किञ्च यदि तस्य तथाभिलाषस्तर्हि 'ये यथा मां प्रपद्यन्त' इतिवाक्याद् भगवतापि स एव पूरणीयः किं तत उद्धृत्य स्वतो दीयमानेन भजनानन्देनेत्याशङ्कामपनेतुं मनोरथस्य प्रासङ्गिकत्वेन व्रजस्थस्य सर्वस्यापि स्वातिरिक्तं गत्यभावं प्रभुः प्रतिजानीते **जन** इति, **एतस्मिन्** काले व्रजे स्थितो **जनः स्वां** स्वकीयां **गति**मैहिकीमामुष्मिकीं वा मत्तोन्यां **वै** निश्चयेन **न वेदा**पि तु मामेव तथात्वेन जानातीत्यर्थः, "नन्वपि नः स्वगतिं सूक्ष्मामुपाधास्य" दितिगत्यन्तराभिलाषस्योक्तत्वात् कथमेवमुच्यत इत्यत आहो**च्चावचासु गतिषु भ्रम**न्निति, **उच्चा** गतिर्वैकुण्ठाख्या मनोरथरूपा**वचा**स्तु लीलानवसरे निर्वाहार्थं गृहादिसम्बन्धिन्यः; **उच्चत्वं** मनोरथाभिप्रायेण न तु वस्तुत इति ज्ञेयं, अथ वो**च्चः** पुरुषोत्तमो**वच**मक्षरं क्षरं च "यस्मात् क्षरमतीतोहमक्षरादपि चोत्तम" इतिवाक्यात्, तस्मा**दुच्चात्** पुरुषोत्तमा**दवचाः** सर्वा एव वैकुण्ठाद्या गतयः वैकुण्ठस्याप्यक्षरात्मकत्वात् तासु **भ्रमन्** वैकुण्ठे मानसिकं गृहादिषु कायिकं भ्रमणं कुर्वन्नपि पुष्करपलाशवन्निर्लेपतया तत्र तत्र **स्वां गतिं न वेदे**तिभावः, ननु हेत्वभावात् कथं भ्रमणमित्याशङ्क्याहा**विद्याकामकर्मभि**रिति, **अविद्या**पदेनात्र माहात्म्यज्ञानाभावो निरूप्यते न तु शक्तिरज्ञानं वा स्वरूपसम्बन्धि, अविद्याशक्तिस्तु मायया निर्मिता, माया च भगवच्छक्तिरतोपि "विलज्जमानया यस्य स्थातुमीक्षापथेमुये" तिवाक्याद् यत्र मायया भगवदीक्षापथेपि स्थातुं न शक्यते तत्र तत्सम्बन्धिनमविद्या कथं व्यामोहयेत्? तथा सति तत्कार्यमज्ञानं तु नोपपद्यत एव, माहात्म्यज्ञानाभावस्य तु स्वेच्छया कृतत्वाल्लीलोपयोगित्वाच्च नाज्ञानता; वस्तुतस्तु यथा ब्रह्मज्ञाने तदितरज्ञानाभावोपि ज्ञानस्वरूपमेवमत्रापि स्वरूपभजने माहात्म्यज्ञानस्य प्रतिबन्धकत्वात् तदभावोपि स्वरूपज्ञानांश एवेति मन्तव्यं, तस्माद**विद्य**या माहात्म्यज्ञानाभावेन **कामो** लोकान्तराभिलाषः **कर्माणि** लोकजात्यादिविहितानि गृहसम्बन्धीनि तैः प्रत्येकमुक्तरीत्योभयत्र **भ्रमण**मित्यर्थः, माहात्म्यज्ञाने तु न लोकान्तर**कामो** न वा लौकिक**कर्माणि** न वा लीलारसानुभवः किन्तु मुक्तिरेव स्यादतस्तदज्ञानं विधाय सर्वमेतावत् प्रभुरेव कृतवानिति निर्श्चीयतेन्यथा स्वातिरिक्ताभिलाषपूरणे स्वयं यत्नं न कुर्यात् प्रत्युत दीयमानस्वरूपानन्दमपि न प्रयच्छेदग्रे भजनानन्दाय का वार्ता? अतो **भ्रमणं** न व्रजजनस्य दोषः किन्तु स्वकृतामति मत्वा तत्कामितप्रदर्शने तत **उद्धरणे च** करुणातिशययुक्तो जात इति वक्तुं श्रीशुकोनेन श्लोकेन भगवदभिप्रायमुक्तवानिति सर्वमुपपद्यते ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

नन्दस्त्वतीन्द्रियमित्यस्याभासे; यथैकं वचनमिति । गोसवकर्तव्यताबोधकं वचनं व्रजानन्यतेन्द्रमानभङ्गगोवर्धनोद्धरणजनाप्यायनतन्माहात्म्यज्ञानेन्द्रप्रणतिगोविन्दनामधारणाद्यनेककार्यं करोति तथेत्यर्थः ।। ९ ।।

(३) श्रीमद्वल्लभमहाराजकृतः श्रीसुबोधिनीलेखः

नन्दस्त्वित्यत्र तल्लोके स्थितस्य पूर्वं दर्शने लौकिकसन्निकर्षेणैव दर्शनं भवेत् तथा चातीन्द्रियत्वं न स्यादतो भगवदागमनानन्तरं भगवद्दृष्ट्या दर्शनमित्याशयेनाहुः नीतोपीति ।। ९ ।। ते त्वौत्सुक्येत्यस्याभासे **प्रार्थितवन्त** इति मनसीति शेषः, **अपीति सम्भावनोक्तेस्तात्पर्यमाहुरथ यदीति ।।१०।। जनो वै** इत्यत्र "ते तु ब्रह्महृद"मित्यत्र टिप्पण्यां द्वितीयव्याख्याने साधारणरीतिप्राकट्यमुक्तमत एवं कथनम् ।। १२ ।।

इति पञ्चविंशाऽध्यायव्याख्या ।। २५ ।।

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

नन्दस्त्वतीन्द्रियं दृष्ट्वेत्यस्याभासे यथैकं वचनमित्यादेरर्थष्टिप्पण्यां स्फुटः ।। ९ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं वरुणेन प्रसादितः प्रसन्नीकृतो भगवान् कृष्णः स्वपितरं नन्दमादाय बन्धूनां व्रजवासिनां मुदं हर्षमावहन् व्रजमगात् 'वरुणेऽपि तत्प्रार्थितमनुग्रहं कृतवान्' इति सूचयन्नाह—ईश्वरेश्वर इति । ईश्वराणां वरुणादीनामपीश्वर इत्यर्थः ।। ९ ।। नन्दस्त्वतीन्द्रियमदृष्टपूर्वं लोकपालस्य वरुणस्य महोदयमैश्वर्यं दृष्ट्वा तेषां वरुणादीनां कृष्णे सन्नतिं नम्रतां भृत्यतां च दृष्ट्वा अतीव विस्मितः सन् ज्ञातिभ्यः उपनन्दादिभ्यस्तदब्रवीत् अवर्णयत् ।। १० ।। ततस्ते तु गोपाः कृष्णमीश्वरं मत्वा तद्वैभवदर्शनाय औत्सुक्ययुक्ता धीर्येषां तथाभूताः सन्तः अयमधीश्वर अपि किं सूक्ष्मामदृष्टपूर्वां स्वगतिं स्वविभूतिं नोऽस्माकमुपाधास्यत् दर्शयिष्यतीति मनोरथं कृतवन्तः ।। ११ ।। इत्येवं स्वानां भक्तानामभिप्रायं स्वयमेव विज्ञाय तेषां सङ्कल्पस्य मनोरथस्य सिद्धये वक्ष्यमाणमचिन्तयदित्यन्वयः । 'कथं तैरकथितं ज्ञातवान् ?' तत्राह—अखिलदृगिति । सर्वसाक्षीत्यर्थः । 'तन्मनोरथपूरणचिन्तया तस्य किं प्रयोजनम् ?' इत्याशङ्क्याह—कृपयेति ।। १२ ।।

अन्वितार्थप्रकाशिका

एवमिति ।। एवं वरुणेन प्रसादित ईश्वरेश्वरो भगवान् कृष्णः स्वपितरं नन्दमादाय बन्धूनां व्रजवासिनां मुदं हर्षमावहन् व्रजमगात् । सूर्योदयात् पूर्वमेवेति ज्ञेयम् ।। ९ ।। नन्द इति ।। नन्दस्त्वतीन्द्रियमदृष्टपूर्वं लोकपालस्य वरुणस्य महोदयमैश्वर्यं दृष्ट्वा तेषां वरुणादीनां कृष्णे संनतिं नम्रतां भृत्यतां च दृष्ट्वाऽतीव विस्मितः सन् आस्थान्यामुपविश्य ज्ञातिभ्यः उपनन्दादिभ्यस्तदब्रवीत् अवर्णयत् ।। १० ।। ते इति ।। ततस्ते तु गोपाः कृष्णमीश्वरं मत्वा तद्वैभवदर्शनाय औत्सुक्ययुक्ता धीर्येषां तथाभूताः सन्तः अयमधीश्वरः अपि किं सूक्ष्मामदृष्टपूर्वां स्वगतिं स्वस्थानं सूक्ष्मां ब्रह्माख्यां च नोऽस्माकमुपाधास्यत् दर्शयिष्यतीति मनोरथं कृतवन्तः । दिदृक्षा चेयं प्रेम्णैव न तु मुमुक्षया । ऐश्वर्यज्ञानेऽपि पुत्रज्ञानानुपमर्दात् ।। ११ ।। इतीति ।। अखिलदृक् हरिः इत्येवं स्वानां तेषां ज्ञतीनामभिप्रायं स्वयमेव विज्ञाय तेषां सङ्कल्पस्य मनोरथस्य सिद्धये कृपया एतद् वक्ष्यमाणमचिन्तयत् ।। १२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अतीन्द्रियं मनुष्येंद्रिया गोचरं वरुणस्य महोदयं समृद्धिं तेषां वरुणादीनां तल्लोकस्थानां च सन्नतिं सनमानं ।। ९ ।। औत्सुक्यं आनंद भरस्तद्युक्ताधीर्येषां ते सूक्ष्मां प्रकृतेः परांस्वगतिं स्वगमनस्थानंरमणस्थानं ब्रह्मपुरं उपाधास्यत् उपाधास्यति नोस्मान् दर्शयिष्यतीति संकल्पितवंत इत्यर्थः ।। १० ।। इतोति इतीत्थं भूतं स्वानां स्वकीयानां संकल्पं अखिलद्रष्टित्वात् स्वयमेव विज्ञाय तेषां संकल्पसिद्धये कृपया हेतुना यतत्करिष्यमाणं अचिंतयत स्वानामिति सर्वनामसंज्ञात्वाभावस्तुस्वमज्ञातिधनाख्यायमिति पर्युदासाद्बोध्याः ।। ११ ।। तदेवाह जनोगोपजनसमूहः अविद्या आत्मा परमात्मस्वरूपाज्ञानं तयाकामोनानाविधप्राकृतविषयाभिलाषस्तदर्थं कृतैः कर्मभिः उच्चाव चासु श्रेष्ठकनिष्ठसुदेव मनुष्यादिगतिषु भ्रमन् सन् स्वां मदीयां गतिममगमनस्थानं रमणस्थानमिति यावत् स्वधामनि ब्रह्मणि रंस्य तेनम इति शुकोक्तेः तां न वेद ।। १२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ।। एवमित्थं, वरुणेनेति शेषः । प्रसादितः सम्यक् प्रसन्नीकृतः, ईश्वरेश्वरः, भगवान् कृष्णः, स्वपितरं आदाय, बन्धूनां, मुदं हर्षं, च आवहन्, अगात् स्वभवनं प्रति इति शेषः ।। ९ ।। नन्द इति ।। नन्दः तु, अतीन्द्रियमदृष्टपूर्वं लोकपालमहोदय वरुणस्यैश्वर्यं, तेषां वरुणादीनां कृष्णे संनतिं नम्रतां भृत्यतां चेति यावत् । दृष्ट्वा, विस्मितः अतीव विस्मययुक्तः सन्, ज्ञातिभ्यः अब्रवीत्तन्न्यवर्णयत् ।। १० ।। त इति ।। ततः, ते नन्दस्य ज्ञातयः, गोपाः तु, हे राजन्, तं श्रीकृष्णं, ईश्वरं साक्षाज्जग-

दीश्वरं परमपुरुषमित्यर्थः। मत्वा, औत्सुक्ययुक्ता धीर्येषां तथाभूताः सन्तः, अधीश्वरः, अयं श्रीकृष्णः, सूक्ष्मामतीन्द्रियां स्वगतिं स्वस्वरूपगुणविभूतिप्रकारं, नोऽस्माकं अपि, उपाधास्यत् उपाधास्यति। दर्शयिष्यति किमिति संकल्पितवन्तः। उपाधावनमत्र दर्शनं धातूनामनेकार्थत्वादुत्तरानुगुण्याच्च ॥ ११ ॥ इतीति ॥ इतीत्थंभूतं, स्वानां स्वेषां, स्वकीयानामित्यर्थः। अभिप्रायमिति शेषः। यद्वा संकल्पसिद्धये इत्युक्तेः संकल्पमिति शेषः। अखिलदृक्त्वादित्यर्थः हेतुगर्भमिदम् अखिलदृक्त्वादित्यर्थः। सः भगवान् कृष्णः, स्वयमेव विज्ञाय, तेषां संकल्पसिद्धये मनोरथसिद्ध्यर्थं, कृपया एतद्वक्ष्यमाणं, अचिन्तयत् ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवमिति : १०.२८.९.

यदानन्दः समानीतः प्रभुणा करुणाब्धिना। युक्तं तदानन्दमयमासीन्निखिलगोकुलम् ॥ २६ ॥
नन्दो वारुणलोकपाशकलितो यातोऽपि तस्यालयं यत्तस्मात्पुनरागमन्निजगृहं तत्प्रार्थनापूर्वकम्।
योगिध्येयपदेशदर्शनमपि प्रेम्णाऽभवत् तत्र तत् किं वा दुर्घटमत्र जाग्रति हरौ संरक्षके सर्वतः ॥ २७ ॥
निजाधीने भक्त्या भुवि मयि कृते क्वापि विधितो जडे मग्नः स्याद् यद्यनुपदमिहास्योद्धरणकृत्।
सदैवास्म्यालस्सं विजहदिति स व्यक्तमकरोदभिप्रायं स्वीयं वरुणगृहनन्दानयनतः ॥ २८ ॥

नन्द इति : १०.२८.१०.

कदाचित्क्वचित्केनचित्किंचिदेव व्यलोक्यद्भुतं चेत्तदैवास्य चित्तम्।
स्वमित्रश्रुतिस्थं विधातुं समुत्कं भवत्यत्र युक्तं स तत्तान् जगौ यत् ॥ २९ ॥
व्यक्तीकृते प्रसंगेन गर्गगीतेऽद्रिधारिणः। दृष्ट्वाऽद्भुतं तत्कथनं युक्तमित्यब्रवीत् स तान् ॥ ३० ॥

ते त्वौत्सुक्यधिय इति : १०.२८.११.

इत्यर्थलाभविषयातिशयार्थयुक्ता तृष्णोत्तरोत्तरमृप्तिमिवर्धिमेति।
ज्ञात्वा तमीश्वरमृषेर्वचसा पुनस्ते तत्सूक्ष्मगत्यवगतिस्पृहयालवो यत् ॥ ३१ ॥

इति स्वानामिति : १०.२८.१२.

मात्राऽलोकि पुराऽधुना विधिवशात्पित्रापि चैतत् पुरो मद्रूपामृतमग्नधीरनुभविष्यत्येव गोपीजनः।
शिष्टेभ्योऽपि जनेभ्य एभ्य इह तन्मद्रूपवीक्षासुखं देयं श्रौतमितीव भक्तसदयस्तद्दातुमैषीत् प्रभुः ॥ ३२ ॥

कृष्णप्रिया

श्री नन्द बाबाजीने अपने नयनों से 'अतीन्द्रिय वरुणलोक, वरुणके लोकोत्तरवैभव, लोकपाल वरुणदेव, का दर्शन किया और श्रीवरुणदेवने किए हुए भगवान का आदर सत्कार बहुमान अर्चन, प्रणाम आदि का दर्शन किया' यह सब देखकर नन्दबाबा विस्मित हुए। श्रीनन्दरायजी ब्रजमें पधारे और अपने ज्ञाति बन्धुजनों और स्वजनों से सब समाचार दिए ॥९॥ राजन् परीक्षित्! जब श्रीनन्दरायजी के मुख कमल से सुना और अपने अनुभव से जाना कि भगवान् श्रीकृष्ण साक्षात् पुरुषोत्तम हैं–तब उन सब के मन में यह उत्कण्ठा उत्पन्न हुई कि कभी कृपानिधि प्रभु हमें भी वैकुण्ठका दर्शन करायेंगे और वैकुण्ठ ले जायेंगे जो वैकुण्ठ भगवान की सूक्ष्म गति है ॥ १० ॥ पूर्ण पुरुषोत्तम सर्वज्ञ भगवान् श्रीकृष्णने स्वयं निजभक्तजनों के मनोरथ को जान लिया पुनः उन जनों की पुण्य अभिलाषा की पूर्ति या पुष्टि के लिये कृपायूर्वक ऐसा सोचने लगे ॥ ११ ॥ भगवानने विचार किया कि इस जगतमें अविधा अज्ञात जनित विभिन्न कामनायें एवं कामनाजन्य कर्मों से होने वाली विविध प्रकार की ऊँची नीची गतियों से घूमने वाला जीव अपने वास्तविक स्वरुप को जानता नहीं है ॥ १२ ॥

इति सञ्चिन्त्य भगवान् महाकारुणिको [1]विभुः। दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥ १३ ॥
[2]सत्यं ज्ञानमनन्तं [3]यद् ब्रह्म ज्योतिः सनातनम्। यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः ॥ १४ ॥

कर्दमक्षमा

अन्वयः—महाकारुणिकः विभुः भगवान् इति सञ्चिन्त्य गोपानाम् तमसः परम् स्वम् लोकम् दर्शयामास ॥ १३ ॥ गुणापाये समाहिताः मुनयः यत् सत्यम् ज्ञानम् अनन्तम् ब्रह्म ज्योतिः सनातनम् यत् हि पश्यन्ति ॥ १४ ॥

---

१. हरिः–श्रीधर. वीर. विश्व. शुक. सु. ध.। २. "सत्यं" तथा "ते तु ब्रह्म" इति द्वौ श्लोकौ विपर्यस्तौ वर्तते विज.। ३. तं–प्रा. पा.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अविद्या देहाद्यहंबुद्धिस्ततः कामस्ततः कर्म तैरुच्चावचासु देवतिर्यगादिषु योनिषु भ्रमन् स्वीयां गतिं न वेद ॥ १३ ॥ स्वं ब्रह्मस्वरूपं लोकं वैकुंठाख्यं च । तमसः प्रकृतेः परम् ॥ १४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतस्मिन् लोके सांसारिकसंचारस्थाने स्वां स्वबिंबभूतनारायणावाप्तिरूपाम् ॥ जनः प्रस्तुतत्वान्मत्पित्रादिव्रजवासी एतस्मिन् भूर्लोके । अविद्या आत्मस्वरूपाज्ञानम् , ततः कर्म तत उच्चावचासु गतिषु वरुणादिलोकगत सुखैश्वर्यमयीषु भूर्लोकगतमनुष्यतिर्यगादिदुःखानैश्वर्यमयीषु च दृष्टासु भ्रमन् नरलीलत्वादेव स्वेषां सांसारिकत्वबुद्ध्या भ्रमं प्राप्नुवन् , स्वां गतिं सर्वैरपि दुर्लभां वर्तमानां स्वपदवीं न वेद । यदयं मत्पिता वरुणलोकगतस्तत्रत्यां मायिकीमेव संपदं दृष्ट्वा निखिलवैकुण्ठसारमपि वृन्दावनं तस्मादपि न्यूनं मन्यते, यथा मुग्धः कश्चित्कृत्रिममुक्ताया आकारतेजः सौष्ठवं दृष्ट्वा लब्धचमत्कारो वास्तवानर्घ्यमुक्तां ततो न्यूनां वेत्ति, तथैव ब्रह्मादिदुर्लभचरणरेणूनप्यात्मनो वराकाद्वरुणादपि निकृष्टानेव मन्यते, तथैव नित्यमास्वाद्यमानमहामाधुर्य्यान्मद्विषयकपुत्रादिभावमयप्रेमवतोऽपि मुक्तिवैकुण्ठावधिकौ मन्यते, न तु तयोरहमधीनः केनचित्कचिद्दृष्टः प्रेम्णस्त्वहमधीन एव सर्वैर्दृश्यमान एवास्मीति विवेकं न भजते । किञ्च, मुक्तौ खलु ब्रह्मैवास्वाद्यते, तच्च ब्रह्म ‘यस्य प्रभा प्रभवतः’ इत्यत्र ‘तद्ब्रह्म निष्कलमनंतम्’ इति ब्रह्मसंहितोक्तेः, ‘ब्रह्मणो हि प्रतिष्ठाहम्’ इति मदुक्तेः, “मदीयं महिमानं च परं ब्रह्मेति शब्दितम्” इति मदंशमत्स्यदेवोक्तेश्च मदीयं निर्विशेषं व्यापकमतीद्रियं ज्योतिरेव । सोऽहमेव यस्य प्रेमकरणकास्वादविषयीभूतमाधुर्यः पुत्रादिरूपतया सदा वर्त्त एव । तथा “अहो मधुपुरी धन्या वेकुण्ठाच्च गरीयसी” इति पाद्मोक्तेर्मथुरामण्डलमध्यवर्तीदं वृदावनं बैकुण्ठादपि श्रेष्ठ यस्य निवासतया सदा वर्त्तत एव । न च महाप्रलयेप्यस्य काचित् क्षतिः “भूगोलचक्रे सप्तपुर्यो भवन्ति तासां मध्ये साक्षाद्ब्रह्म गोपालपुरी हीति । यथा पयसि पद्मं तिष्ठति तथा भूम्याम्” इति गोपालतापिनीश्रुतेः ! “प्राकृते प्रलये प्राप्ते व्यक्तेऽव्यक्त गते पुरा । शिष्टे ब्रह्मणि चिन्मात्रे कालमायातिगेऽक्षरे ॥ ब्रह्मानदमयो लोको व्यापी वैकुण्ठसंस्थितः । नगुणोनाद्यनंतश्च वर्तते केवलेऽक्षरे ॥” इति बृहद्वामनवाक्याच्च मुक्तिवैकुण्ठलोकादृष्टचरत्वादेव यल्लब्धं स्पृहयति तदेनं तौ साक्षादुपलंभयामीति भावः । अत्र जनोयं व्रजवासी अविद्याकामकर्मभिरुच्चावचसु देवतिर्यगादिषु भ्रमन्पुनःपुनः पर्यटन् स्वां इति मया दास्यमानां मुक्ति वैकुण्ठस्थितिञ्च न वेद इति कुव्याख्यानं न घटेत । व्रजवासिनो नंदादेः कृष्णे पुत्रादिभावततो नित्यसिद्धत्वादेवाविद्याकामकर्मघटितः संसारो न संभवेत् । यदुक्तम् “तासाम- “तासमविरतं कृष्णे कुर्वतीनां सुतेक्षणम् । न पुनः कल्पते राजन् संसारोऽज्ञानसंभवः ॥” इति । न च मुक्तिवैकुण्ठस्थित्योरपि दास्यमानत्वम् ‘एषां घोषनिवासिनामुत भवान् किं देव रात—’ इत्यादिब्रह्मोक्तेरेवेत्यखिलं पूतनावधान्ते सयुक्तिकं व्याख्यातं द्रष्टव्यम् ॥ १३ ॥ इति उक्तविधया । प्रकृतेः परम् अप्राकृतमित्यर्थः ॥ इति संचिंत्य स नित्यास्पदस्य श्रीवृंदावनस्य सर्वोत्कर्षब्रह्मवैकुण्ठसुखानुभावनयैव सांप्रतं ज्ञापयामीति विचार्य स्वं ब्रह्मस्वरूपं लोकं वैकुंठ च दर्शयामास । वृन्दावनाद्विय द्वयं पंचषान् क्षणान् ते एव प्रापयामासेसि भावः । यतो महाकारुणिकः व्यतिरेकेणव वृन्दावनस्य माधुर्य ताभ्यामप्युत्कृष्ट ज्ञापयितुमिति भावः । ननु ब्रह्मदर्शनैव ब्रह्मप्रापणा सैव सायुज्यमुक्तिस्तेषां ततो निष्क्रमणासंभवात् कथं तेषां पुनर्वृन्दावनमाधुर्येऽनुभावानेत्यत आह विभुः । सायुज्यमोक्षाद्वैकुण्ठाच्च निष्कमयितुमपि समर्थ इत्यर्थः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जन इति । अत्र स्वां स्वीयां गतिं स्वरूपमित्युच्यते चेत्पूर्वोक्तस्वगतिमित्यस्यानुवादो न स्यात् स्वस्वरूपं ज्ञानमिति पक्षे च स्वशब्देनात्र नात्मोच्यते तत्र तस्य नपुंसकत्वात् गति शब्देन ज्ञानं नोच्यते वेदेत्यनेन पौनरुक्यात् तद्वाचकत्वे हि स्वं न वेदेत्ये वावक्ष्यत सङ्कल्पसिद्धये तेषामित्युक्तत्वाच्च न तदर्थताघटते नन्दस्त्वतीद्रियं दृष्ट्वेत्यत्र हि तेषां लोकपालस्य लोकादिमहोदयस्य तथापि कृष्णे सन्नतेश्च श्रवणेन तल्लोकादिमहोदयदर्शनस्य विवक्षितत्वात् स्वगतिं सूक्ष्मामित्यत्र च द्वयोः सामानाधिकरण्यमेवावगम्यते सूक्ष्मां दुर्ज्ञेयाम् तस्मात् जनशब्देनापि न प्राकृतो जन उच्यते तेषां संसार एव गतिर्नतु तल्लोकादिरिति । यदि च स एवोच्यते तर्हि सर्वस्यापि तस्य तथा कृपाप्राप्तिप्रसङ्गः स्यात् किन्तु तच्छब्देन तदीयस्वजन एवोच्यते तर्हि सर्वस्यापि तस्य तथा कृपाप्राप्तिप्रसङ्गस्स्यात् सालोक्यसार्ष्टीत्यादिपद्ये जना इति वत् अत्र तु प्रस्तावबलात् व्रजवासिजन एवोच्यते तस्य हि तदीयपरमस्वजनत्वं स्वयमेव श्रीभगवता भावितम्—

“तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् । गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः” ॥ इति ।

उक्ते च तदीयस्वजने तस्याविद्यादिमयोच्चावचगतेः सिद्धान्तासिद्धत्वात् प्रस्तुतस्वयमेवार्थः जनो व्रजवासिलक्षणो मदीयस्वजनसमूहो यमविद्यादिभिर्हेतुभिर्या उच्चावचा गतयो देवतिर्यगादयः तास्वभिव्यक्तत्वेन स्वां गतिं भ्रमन् तन्निर्विशेषतया जानन् तामेव स्वां गतिं न वेद न जानात्यहो कष्टमिति यन्माधुर्यावेशेन ज्ञानांशावरणात् इति भावः । यद्वा, जनो व्रजवासी मदीयस्वजनोऽयम् एतस्मिन् सम्प्रति स्वावताराङ्गीकृते लोके प्रापञ्चिके अविद्यामल्लीलावेशादन्याननुसन्धानं कामः मद्विषयक-

विचित्रमनोरथः कर्म मदीयानुकूल्यमयक्रिया "नाविदन् भववेदनाम्" "यद्धामार्थसुहृत्" इत्यादिदर्शनात् तैरुच्चावचासुनानाविधासु गतिषु प्रेमजनेषु स्वां गतिं अनादिसिद्धां परमगोलोकादिवैभवरूपां भ्रमन् विस्मरन् तामेव स्वां गतिं न वेद न जानातीत्यर्थः। अविद्यादिशब्देनोपादानं च कारुण्यकृतानुतापेनाधिक्षेपादेव ॥ १३ ॥ गोपानां सम्बन्धि स्वं लोके श्रीगोलोकमित्यर्थः। तस्य प्रकृतिविकारेऽभिव्यक्तत्वमपि निषेधति–तमसः परमिति। क्वाहं तम इत्यादौ तमः शब्देन प्रकृतिनिर्देशात् विभुरिति तस्य तादृशवैभवस्य सदा सर्वत्र सिद्धत्वादित्यर्थः ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एतस्मित् लोके मर्त्त्यलोके, किंवा प्रपञ्चे वर्त्तमानः सर्वोऽपि, वै प्रसिद्धौ, अन्यत्तैर्व्यञ्जितम्। तत्रायं भावः–अन्यो जनो न वेदैव, एते च योगीन्द्रपूज्यपादाः सर्व्वज्ञानसेविता वैकुण्ठनित्यपार्षदेभ्योऽपि मन्नित्यप्रियतमास्तिलमात्रमद्विरहासहिष्णवो मया कदाचित् कथञ्चित् क्षणमपि त्यक्तुमशक्याः परमपरिपूर्णार्थां एव, तथापि प्रेमभरातृप्त्या कौतुकस्वभावेनैव वा यामिच्छां कुर्य्युस्तमप्यवश्यं पुरयिष्याम्येवेति, यद्वा, जनो मत्सेवको गोपवर्गलक्षणो वा अयम्, विद्या मद्भक्तितत्त्वादिज्ञानम्, ततः कामो मद्विषयकविचित्रमनोरथः ततः कर्म मत्परिचर्य्यालक्षणम्, तैरुच्चावचासु गतिषु प्रेमविलासेषु मया सह नृत्यादिविहारेषु वा भ्रमन्, सदा परिवर्त्तमानोऽपि स्वां गतिमात्मतत्त्वं स्वगम्यवैकुण्ठलोकं न न वेद, नञ्–द्वयेन वेदैवेत्यर्थः। मत्प्रियतां सर्वेषामेव ज्ञानज्ञेयानामन्तर्भावात् तथाप्येषामौत्सुक्यं सफलं करिष्याम्येवेति भावः ॥ १४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

स्वं वैकुण्ठम् ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

चिन्तितमेवाह–जन इति। जनोऽयं गोपजन्मभृज्जीवलोकोऽस्मिन् लोकेऽविद्यादिभिरुत्तममध्यमाधमासु देवतिर्यङ्मनुष्यादि देह प्रवेशन रूपासु गतिषु भ्रमन् स्वां मदसाधारणां गतिं न वेदयत् तत्राविद्या देहात्मभिमानस्वतन्त्रात्माभिमानमूलमज्ञानं कामः शब्दादिविषयाभिलाषः कर्म तदनुगुणचेष्टा ॥ १३ ॥ इत्थं सञ्चिन्त्य महाकारुणिको विभुः हेतुगर्भमिदं तत्त्वात् गोपानां स्वलोकं दर्शयामास स्वं स्वरूपं लोकं स्वनित्यविभूतिं च दर्शयामासेत्यर्थः। तत्र सत्यं ज्ञानमित्यर्द्धेन स्वं विशिनष्टि–तमसः परमित्यनेन यद्धीत्यर्द्धेन च लोकमिति विवेकः तमसः परं प्रकृतिमण्डलाद्बहिर्भूतं "क्षयं तमस्य रजसः पराके "आदित्यवर्णं तमसः परस्तात्" इत्यादि श्रुतेः। लोका रजांस्युच्यन्ते क्षयन्तं निवसवन्तमित्यर्थः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सन्निहितत्वादिदमित्युक्तं विव्रिणोति–जन इति। एतस्मिन् लोके सांसारिकसञ्चारस्थाने अविद्याकामकर्मादिभिर्भ्रमन् परिवर्त्तमानोऽत एव उच्चावचासु उत्कृष्टापकृष्टासु गतिषु पतितो जनः स्वं गतिं गम्यत इति गतिः स्वबिम्बभूतो नारायणस्तं स्वस्वरूपं च न वेद न जानातीति ॥ १३ ॥ सञ्चिन्त्य गोपानुद्दिश्य लोकं वैकुण्ठं कीदृशम्? तमसः प्रकृतेः परं व्यतिरिक्तम् अप्राकृतमित्यर्थः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यद्वा जनो व्रजवासी मदीयस्वजनोऽयम् एतस्मिन् सम्प्रति स्वावताराङ्गीकृते लोके प्रापञ्चिके अविद्या मल्लीलावेशेनान्याननुसन्धानं कामः मद्विषयकविचित्रमनोरथः कर्म मदीयानुकूला क्रिया 'नाविन्दन् भववेदनाम्' यद्धामार्थसुहृत्प्रियात्म" इत्यादिदर्शनात् तैरुच्चावचासु नानाविधासु गतिषु प्रेमजनेषु स्वां गतिं अनादिसिद्धां परमगोलोकादिवैभवरूपां भ्रमन् विस्मरन् तामेव स्वतर्तिं न वेद न जानातीत्यर्थः। अत्रेदं विवेचनीयम् अत्र स्वशब्देन स्वरूपं नोच्यते तत्र तस्य नपुंसकत्वात् गति शब्देन च ज्ञानं नोच्यते वेदेत्यनेन पौनरुक्त्यात् तद्वाचकत्वे हि स्वं न वेदेत्येव वक्ष्यते सङ्कल्पसिद्धये तेषामित्युक्तत्वाच्च न तदर्थता घटते नन्दस्त्वतीन्द्रियं दृष्ट्वेत्यत्र हि तेषां लोकपालस्य लोकपालादिमहोदयस्य तथापि कृष्णे सन्नतेश्च श्रवणेन तल्लोकादिमहोदयदर्शनस्य विवक्षितत्वात् स्वगतिं सुक्ष्मामित्यत्र च द्वयोः सामानाधिकरण्यमेवावगम्यते सुक्ष्मां दुर्ज्ञेयां तस्माज्जनशब्देनापि न प्राकृतो जन एव उच्यते तेषां संसार एव गतिः नतु तल्लोकादिरिति किन्तु तच्छब्देन भागवतो जन उच्यते सालोक्यसार्ष्टीत्यादिपद्ये जना इतिवत् उक्तञ्च भागवते जने रस्याविद्यदिमयोच्चावचगतेरसिद्धान्तत्वादुक्त एवार्थः समञ्जसः ॥ १३ ॥ अत्राविद्यादिशब्दप्रयोगस्तु कारुण्यतो निर्वेदादेवेति ज्ञेयम् गोपानां सम्बन्धिस्वलोकं तस्य प्रकृतिमयत्वं निषेधति तमस इति ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जनः प्रस्तुतत्वान्मत् पित्रादिर्व्रजवासी एतस्मिन् भूर्लोके अविद्या आत्मस्वरूपाज्ञानं ततः कामस्ततः कर्म तत उच्चावचासु गतिषु वरुणादिदेवलोकगतसुखैश्वर्यमयीषु भूर्लोकगतमनुष्यतिर्य्यगादिदुःखानैश्वर्यमयीषु च दृष्टासु भ्रमन् नरलीलत्वादेव स्वेषां

सांसारिकत्वबुद्ध्या भ्रमं प्राप्नुवन् स्वाङ्गतिं सर्वैरपि दुर्लभां वर्तमानां स्वपदवीं न वेद यदयं मत्पिता वरुणलोकं गतस्तत्रत्यां मायिकीमेव सम्पदं दृष्ट्वा निखिलवैकुण्ठसारवृन्दावनं तस्मादपि न्यूनं मन्यते यथा मुग्धः कश्चित् कृत्रिममुक्ताया आकारतेजः सौष्ठवदृष्ट्या लब्धचमत्कारो वास्तवानर्घ्यमुक्तां ततो न्यूनां वेत्ति तथैव ब्रह्मादिदुर्लभचरणरेणूनप्यात्मनो वराकाद्वरुणदपि निकृष्टानेव मन्यते तथैव नित्यमास्वाद्यमानमहामाधुर्य्यान्मद्विषयकपुत्रादिभावमयप्रेमतोपि मुक्तिवैकुण्ठलोकावधिकौ मन्यते तौ खलु मदधीनावेव नतु तयोरहमधीनः केनचित् क्वचित् दृष्टः प्रेम्णस्त्वहमधीन एव सर्वैर्दृश्यमान एवास्मीत्यपि विवेकं न भजते किञ्च, मुक्तौ खलु ब्रह्मैवास्वाद्यते तच्च ब्रह्म यस्य प्रभा प्रभवत इत्यत्र "तद्ब्रह्मनिष्कलमनन्तम्" इति ब्रह्मसंहितोक्तेः "ब्रह्मणोहि प्रतिष्ठाहम्" इति मदुक्तेः "मदीयं महिमानं च परं ब्रह्मेति शब्दितम्" इति मदंशमत्स्यदेवोक्तेश्च यदीयं निर्विशेषं व्यापकमतीन्द्रियं ज्योतिरेव सोहमेव यस्य प्रेमकरणकास्वादविषयीभूतमाधुर्य्यः पुत्रादिरूपतया सदा वर्ते एव तथा "अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी" इति पाद्मोक्तेर्मथुरामण्डलमध्यवर्त्तीदं वृदावनं वैकुण्ठादपि श्रेष्ठं यस्य निवासतया सदा वर्त्तत एव नच महाप्रलयेप्यस्य "काचित् क्षितिभूगोलचक्रे सप्तपुर्यो भवन्ति तासां साक्षाद्ब्रह्मगोपालपुरीहीति यथा सरसि पद्मं तिष्ठति तथा भूम्याम्" इति गोपालतापनीश्रुतेः—

"प्राकृते प्रलये प्राप्ते व्यक्ते व्यक्तं गते पुरा। शिष्टे ब्रह्मणि चिन्मात्रे कालमायातिगेऽक्षरे ॥
ब्रह्मानन्दमयो लोको व्यापिवैकुण्ठसंज्ञितः। निर्गुणोऽनाद्यनन्तश्च वर्त्तते केवलेऽक्षरे" ॥ इति।

वृहद्वामनवाक्याच्च तदपि मुक्तिवैकुण्ठलोकावदृष्टचरत्वादेव यल्लब्धुं स्पृहयति तदेनं तौ सम्प्रति साक्षादुपलम्भयामीति भावः। अत्र जनोऽयं व्रजवासी अविद्याकामकर्मभिरुच्चावचासु देवतिर्य्यगादिषु च भ्रमन् पुनः पुनः पर्य्यटन् स्वां गतिं मया दास्यमानां मुक्तिं वैकुण्ठस्थितिं च न वेदेति कुव्याख्यानं न घटते व्रजवासिनो नन्दादेः कृष्णे पुत्रादिभागवतो नित्यसिद्धत्वादेवाविद्याकामकर्मघटितः संसारो न सम्भवेत्। यदुक्तम्—

"तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणम्। न पुनः कल्पते राजन्! संसारोऽज्ञानसम्भवः" ॥ इति

नच मुक्तिवैकुण्ठस्थित्योरपि दास्यमानत्वं "एषां घोषनिवासिनामुत भवान् किं देवरात" इति ब्रह्मोक्तेरेवेत्यखिलं पूतनावधान्ते सयुक्तिकं व्याख्यातं द्रष्टव्यम् ॥ १३ ॥ इति सञ्चिन्त्य नित्यास्पदस्य श्रीवृन्दावनस्य सर्वोत्कर्ष ब्रह्मवैकुण्ठसुखानुभावनयैव साम्प्रतं ज्ञापयामिति विचार्य्य स्वं ब्रह्मस्वरूपं लोकं च वैकुण्ठाख्यं दर्शयामास वृन्दावनाद्वियोज्य पञ्चषा क्षणात् ते एव प्रापयामासेति भावः। यतो महाकारुणिकः व्यतिरेकेणैव वृन्दावनस्य माधुर्य्यं ताभ्यामुत्कृष्टं ज्ञापयितुमिति भावः। ननु ब्रह्मदर्शनैव ब्रह्मप्रापण: सैव सायुज्यमुक्तिस्तेषां ततो निष्क्रमणासम्भवात् कथन्तेषां पुनर्वृन्दावनीयमाधुर्य्येऽनुभावनेत्यत आह—विभुः सायुज्यमोक्षात् वैकुण्ठाच्च निष्क्रमयितुमपि समर्थ इत्यर्थः। स्वं लोकं च विशिनष्टि तमसः प्रकृतेः परम् ॥ १४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

जनः सर्वोपि जन अस्मिन् लोके अनित्यविभूतिरूपे अविद्या आत्मानात्मपरमात्मापरिज्ञानं ततः कामः ततः कर्म तैरुच्चावचासूत्तमाधमासु गतिषु देवतीर्य्यगादियोनिषु भ्रमन् स्वां स्वप्राप्यां नित्यविभूत्याख्यां न वेद नैव जानाति तत्प्राप्तीच्छायास्तु का कथा एते तु तां प्राप्तुमिच्छन्त्यतस्तत्प्राप्त्यधिकारिण एवातः एतेषां तत्प्राप्तिस्तु यथा यथं तत्तदवसरे भविष्यत्येव तद्दर्शनं त्विदानीं भवत्वित्यचिन्तयदिति फलितोर्थः ॥ १३ ॥ विभुः स्वयं व्यापकः साक्षात्परमपुरुषः तल्लोकाधिपति रित्यर्थः। स्वं लोकं स्वासाधारणं लोकं तमसः प्रकृतेः परम् "आदित्यवर्णं तमसः परस्तात्" इत्यादिश्रुतिप्रसिद्धं लोकं दर्शयामास ॥ १४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणि

इदमित्युक्तमिदमिति वदति ॥ जन इति। एतस्मिंल्लोकेऽविद्याकामकर्मभिस्तदादिभिरुच्चावचासु गतिष्वनेकभेदकगतिषूदक् चावाक् चेति द्वयोरुच्चावचेत्यादेशौ। मयूरव्यंसकादिरिति साधुः। उच्चावचं नैकभेदमित्यमरः। भ्रमन्स्वगतिं न वेद स्वप्राप्यं न वेद ॥ १३ ॥ एवं स्वयं सञ्चिन्त्य महाकारुणिक इति कृपया गोपानां तमसः प्रकृतेः परं विलक्षणमप्राकृतं स्वलोकं वैकुण्ठं दर्शयामास। अयमप्येको गोपालश्चेत्कथमेतादृशं सामर्थ्यमित्यप्याह ॥ आस इति। लोक इत्यादि तं परं दर्शयामासेत्यन्वयः ॥१४॥

श्रीसुबोधिनी

किञ्चोच्चावचासु गतिषु परिभ्रमन्नपि वर्तते न तूत्तमं प्राप्य ततोप्यग्रे गच्छति किन्त्वधमतामेव प्राप्नोत्यतः कारणविचारेण कार्यविचारेण वा न कोप्यस्याधिकार आत्मज्ञाने तस्माद् यदेते वाञ्छन्ति तदेतेषामयोग्यमेवेति निश्चित्यापि प्रमेयबलमाश्रित्यापि किञ्चित् प्रदर्शितवानित्याहेताति, एवमनधिकारं **सञ्चिन्त्य भगवान्** सर्वकरणसमर्थोपि मर्यादारक्षकस्ततो **महाकारुणिकश्च,** करुणायां परमकाष्ठामापन्न उभयोरन्यतरनाशमाशङ्क्योभयमपि कर्तुं समर्थो **विभुः स्वलोकं दर्शयामास,** एतादृशं वैभवं ममास्तीति ज्ञापयितुं तत्रैव स्थित्वा न तु क्वचिद् गत्वा यतस्ते **गोपा** मित्राणि धर्मपराश्च, यत्र ते भगवन्तमेव पश्यन्ति तत्र किमाश्चर्यं तस्य

लोकं द्रक्ष्यन्तीति, भगवतो बहवो लोकाः सन्तीति तद्व्यावृत्त्यर्थमाह **तमसः परमिति** प्रकृतेरप्युपरि 'तम आसीत् तमसा गूढमग्रे प्रकेत'मितिश्रुतेः, तस्यापि **तमसो** वस्तुविचारेण भगवत्त्वमुक्तं, ततोऽप्यग्रे व्यापिवैकुण्ठाख्यं, तत् प्रदर्शितवान् ॥ १३ ॥ मायोद्घाटनेन तस्य स्वरूपमाह **सत्यमिति**, अक्षररूपं तत्, यदा भगवानीश्वरत्वेन तेषां हृदये जातस्तदाक्षरमपि लोकत्वेनाविर्भूतमन्यथा तस्य कृत्रिमत्वं स्यात् स्वरूपं च तस्य **सत्यं ज्ञानमनन्तं** देशकालापरिच्छिन्नमबाधितज्ञानरूपतापरिच्छिन्नता चोक्ता, अन्यानपि तत्रत्यान् गुणान् वक्तुं प्रमाणमेवातिदिशति **यद् ब्रह्मे**ति; **यद्** वैकुण्ठाख्यं 'सर्ववेदान्तप्रत्ययं' **यद् ब्रह्मै**व, अनेन बृहत्त्वं बृंहणत्वं चोक्तं प्रामाणिकत्वं च **गुणोपसंहारन्यायेन** सर्वे गुणाश्च, दोषाभावार्थमाह **ज्योतिरिति**, तत् स्वप्रकाशं कोटिसूर्याधिकप्रकाशरूपं, न चैतदिदानीमेवैवं जातमिति शङ्कनीयं, यतः **सनातनमनादिसिद्धमिदमेतादृशमेव**, ननु तर्हि सगुणं भवतु वैलक्षण्य**प्रतीते**रविकृतेनुभावच एकरसे ब्रह्मणि लोकत्वानुपपत्तेरित्याशङ्क्याह **यद्धि पश्यन्तीति**, तत् तादृशं स्वभावत एवेति मन्तव्यं, **गुणेष्वागतेषु यत् सामर्थ्यं यानुपपत्तिश्च परिहृता भवति सा स्वरूपेणैव परिहर्तव्या सर्वभवनसमर्थं स्वरूपमेवेति**, ननु कोयं निर्बन्धो गुणेन वा तथास्तु विनिगमनाभावादिति चेत् तत्राहुर्यद् **वैकुण्ठाख्यं** भगवत्स्थानं **मुनयो मननशीला** अपि **गुणापाय** एव **पश्यन्ति**, मनने क्रियमाणे यदावस्थात्रयं गुणकार्यं बुद्ध्यादयोपि स्वभावगुणा अपि यदा विलीना भवन्ति तदा निर्गुणावस्थायां प्राप्तायां पश्चादाविर्भूतं तत् **पश्यन्ति**, तत्रापि सावधाना अतस्तद्द्रष्टारोपि यदा गुणातीतास्तदा का वार्ता तस्य सगुणत्वे ? ॥ १४ ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

इति सञ्चिन्त्येत्यत्र उभयोरन्यतरनाशमाशङ्क्येति मर्यादारक्षकत्वमहाकारुणिकत्वयोरन्यतरस्य **नाशमाशङ्क्ये**त्यर्थः, यदि साधनराहित्येपि फलं स्यात् तदा मर्यादारक्षकत्वं भज्येत यदि साधनाभावे फलं न दद्यात् तदा महाकारुणिकत्वं भज्येतेतिशङ्का ॥ १३ ॥ **सत्यं ज्ञानमनन्तं यद् ब्रह्मे**त्यस्य विवृतौ **यद् वैकुण्ठाख्यं सर्ववेदान्तप्रत्ययं यद् ब्रह्मै**वेति "अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिं यद् गत्वा न निवर्तन्ते तद् धाम परमं ममे"ति भगवद्गीतासु अक्षरब्रह्मणः धामत्वोक्तेः, "तदाहुरक्षरं ब्रह्म सर्वकारणकारणं विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मन" इत्यत्राप्यक्षरब्रह्मणः धामत्वोक्तेः, "ब्रह्मानन्दमयो लोको व्यापिवैकुण्ठसञ्ज्ञकः" इतिबृहद्वामनपुराणे वैकुण्ठस्य ब्रह्मानन्दमयत्वोक्तेश्च ॥ १४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तच्चिन्तामेवाह—जन इति । 'वै' इति निश्चयेन । एतस्मिल्लोके संसारे जनः अविद्या स्वरूपाज्ञानं, ततः कामः शब्दादिविषयभोगाभिलाषः, ततश्च तत्प्राप्त्यनुगुणकर्माणि । तैरुच्चावचासु उत्कृष्टापकृष्टासु गतिषु देवतिर्यङ्मनुष्यादियोनिषु भ्रमन् गच्छन्नपि स्वां गतिं स्वपरमार्थभूतं मत्स्वरूपं न वेद न जानाति, अतः एतेषां व्रजवासिनां स्वसाधनवशात् ममालौकिकस्वरूपवैभवदर्शनं सुदुर्लभमेव । तथापि परमभक्तत्वादेतेषां मनोरथानुरोधेन मया प्रदर्शनीयमिति शेषः ॥ १३ ॥ इत्येवं सञ्चिन्त्य भगवान् सर्वथा सर्वकरणे समर्थः श्रीकृष्णः गोपानां लोकव्यापिवैकुण्ठाख्यं तथा स्वं स्वरूपं च दर्शयामासेत्यन्वयः । तदुभयं विशिनष्टि—तमसः परमिति । प्राकृतप्रपञ्चातीतमित्यर्थः । 'तत्प्रदर्शने केवलं कृपैव हेतुः, न तेषां तद्दर्शनानुरूपं साधनमस्ति' इत्याह—महाकारुणिक इति । कृपायामपि तच्छीलमेव हेतुमाह—हरिरिति । आश्रितजनदुःखहरणशील इत्यर्थः ॥ १४ ॥

अन्वितार्थप्रकाशिका

जन इति ॥ अविद्या देहाद्यहंबुद्धिः ततः कामः ततः कर्माणि तैः एतस्मिन् लोके उच्चावचासूत्तमाधमासु गतिषु देवतिर्यगादियोनिषु भ्रमन् जनः व्रजवासी स्वां स्वीयां गतिं न वेद । अत एषां सा दर्शनीयेति शेषः ॥ १३ ॥ इतीति ॥ इत्येवं संचिन्त्य महाकारुणिको भगवान् हरिः गोपानां तमसः प्रकृतेः परं स्वं ब्रह्मस्वरूपं लोकं वैकुण्ठाख्यं च दर्शयामास ॥ १४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इतीति तमसः प्रकृतेः परं स्वं स्वकीयं लोकं ब्रह्मपुराख्यं स्वभक्तैः सह स्वनिवासस्थानं वैकुंठसंज्ञस्य हरेर्निवासस्थानात् वैकुंठ इति केचिद्वदंति तं दर्शयामास ॥ १३ ॥ तदेवस्थानं निरूपयन्नाह सत्यमिति सत्यं सर्वदा अविनाशित्वेन वर्त्तमानं ज्ञानं ज्ञानधर्म न तु जडं अनंतमपारं ज्योतिः अनवधिकातिशयप्रकाशमयं सनातनं अनादिसिद्ध ब्रह्मसंज्ञं ब्रह्मपुरसंज्ञं च अक्षरसंज्ञं च श्रुतिस्मृतयो यद्वदंति यच्च ब्रह्मपुरं गुणांपाये त्रिगुणानाशे सति सावधाना मुनयः पश्यंति उक्तेष्वर्थेषु प्रमाणानि एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधामेति एतत्सत्यं ब्रह्मपुरमिति दिव्ये ब्रह्मपुरे ह्येष इति न तत्र चंद्रार्कवपुः प्रकाशतेन वांति वाता न च यांति देवता इति दिव्ये ब्रह्मपुरे विरजं निष्फलमिति तद्विष्णोः परमंपदं सदा पश्यंति सूरय इति स्वधामनि ब्रह्मणि रंस्यते नम इति तद्वैपदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरिति तदाहुरक्षरं ब्रह्म सर्वकारणकारणं विष्णोर्धाम परमिति यद्गत्वा न निवर्तन्ते तद्धाम परमं ममेति गच्छंत्यमूढाः पदमव्ययं तदिति ब्रह्माख्यं धाम तेयांतीत्यादि श्रुतिस्मृतयः ॥ १४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चिन्तितमेवाह ।। जन इति जनः अयं गोपजातिजन्मभूर्जीवलोकः, एतस्मिन् लोके, अविद्याकामकर्मभिः, उच्चावचासु उत्तमाधमासु, गतिषु देवतिर्यङ्मनुष्यादिदेहप्रवेशरूपासु गतिषु, भ्रमन् सन्, स्वां मदसाधारणां, गतिं न वेद वै। मद्धाम मदैश्वर्यं मद्वैभवं न जानातीत्यर्थः। तत्राविद्या देहात्माभिमानस्वतन्त्राभिमानमूलमज्ञानं, कामः शब्दादिविषयाभिलाषः। कर्म तदनुगुणचेष्टा ।।१३।। इतीति ।। इतीत्थं, सचिन्त्य, महाकारुणिकः, विभुः हेतुगर्भ तत्त्वात्, भगवान् श्रीकृष्णः, गोपानां, तमसः परं प्रकृतिमण्डलाद्बहिर्भूतमित्यर्थः स्वमात्मीयं, लोकं दर्शयामास। अत्र लोको ब्रह्मपुराख्यः। केचित्तु वैकुण्ठमित्याहुः। क्वचिन्महाकारुणिको हरिरित्यपि पाठस्तत्र हरिः श्रीकृष्णः ।। १४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दर्शयामासेति : १०.२८.१४.

अस्योद्बुद्धापरोक्षानुभवरसजुषो मत्स्वरूपार्थिका वाक् श्लाघ्यान्तेवासिनोऽभून्मदनुगतमतींश्चेत्कृतार्थान्न कुर्यात्।
नैवास्याब्रह्मवित्स्यात् क्वचिदपि हि कुले स्याच्छ्रुतिर्नैयमर्थोल्लासिन्येवं विचिन्त्य प्रभुरखिलगुरुर्दर्शयामास किं तत् ।। ३३ ।।

जीवन्मुक्तिमहानन्दो यः सदा सगुणाश्रितः। जडाशयेऽपि तस्याऽस्मिन् युक्तमेवात्मदर्शनम् ।। ३४ ।।
सत्यं स्वजनसंकल्पं करोमीति प्रबोधयन्। स्वलोकमृषिदुष्प्रापमीशो गोपानदर्शयत् ।। ३५ ।।

कृष्णप्रिया

परम कारुणिक सर्व समर्थ भगवान् श्रीकृष्ण ने कृपावश होकर अपने भक्त गोपजनों को माया से पर अपने दिव्य गोलोक का दर्शन कराया ।। १३ ।। राजन्! सुनो यह दिव्य लोक कैसा था वह सुनो! सत्य, ज्ञान, अनन्त, स्वयं प्रकाश, नित्य, सनातन यह ब्रह्म लोक है। मुनिजन भी, निर्गुण एवं एकाग्रचित्त बनकर मनन पूर्ण मन से इस लोक का दर्शन कर सकते हैं ।। १४ ।।

ते तु ब्रह्मह्रदं नीता मग्नाः कृष्णेन[1] चोद्धृताः। ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात् पुरा ।। १५ ।।
नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः। [2]कृष्णं च तत्रच्छन्दोभिः स्तूयमानं सुविस्मिताः ।। १६ ।।

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] [5]अष्टाविंशोऽध्यायः ।। २८ ।।

समाप्तं तामससाधनप्रकरणम्

कर्दमक्षमा

अन्वयः—ते तु ब्रह्महृदम् नीताः तत्र मग्नाः च कृष्णेन उद्धृता ब्रह्मणः लोकम् ददृशुः यत्र अक्रूरः पुरा अध्यगात् ।। १५ ।। नन्दादयः तत्र छन्दोभिः स्तूयमानम् च तम् कृष्णम् दृष्ट्वा सुविस्मिता परमानन्द निर्वृताः ।। १६ ।।

अन्वयेषु अष्टाविंशोऽध्यायः समाप्तः ।। २८ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

देहादिपिहितानां तद्दर्शनमशक्यमिति प्रथमं देहादिव्यतिरिक्तं ब्रह्मस्वरूपं दर्शयामासेत्याह। सत्यमिति। सत्यमबाध्यं ज्ञानमजडमनंतमपरिच्छिन्नं ज्योतिः स्वप्रकाशं सनातनं शश्वत्सिद्धं ब्रह्म गुणापाये गुणापोहे ज्ञानिनो यत्पश्यंति तत्कृपयैव दर्शयामास ।। १५ ।। एवं ब्रह्मह्रदं ब्रह्मैव ह्रदवबद्ध्रदः तत्र निमग्नस्य विशेषविज्ञानाभावात्तं ब्रह्मह्रदं ते तु नीताः प्रापिता अथास्मिन्मग्नाश्च। तु शब्दोक्तं विशेषमाह। पुनः कृष्णेनोद्धृताः समाधेरिवोत्थापिताः संतो ब्रह्मणस्तस्यैव लोकं वैकुंठाख्यं ददृशुरिति। ननु ब्रह्मनिमग्नानां पुनर्लोकदर्शनमघटिमेवेत्याशंक्याह। यत्रेति। यत्र यस्मिन्कृष्णे निमित्ते सति पूर्वमक्रूरोऽध्यगात् दृष्टवान्। शुकपरीक्षित्संवादात्संवादात्प्राक्तनत्वात्पुरेति भूतनिर्देशः। न ह्यतक्यैँश्वर्ये भगवति किंचिदप्यसंभावितमिति भावः। अथ वा अक्रूरो यत्र दृष्टवांस्तस्य यमुनाह्रदस्य ब्रह्मह्रद इति नाम तं ह्रदं नीताः संतो ब्रह्मणो लोकं ददृशुः पुनश्च कृष्णेनोद्धृताः पूर्ववत्तं दृष्ट्वा विस्मिता बभूवुरिति व्यवहितान्वयोऽप्रसिद्धकल्पना च सोढव्येति ।। १६ ।।

इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायामष्टाविंशोऽध्यायः ।। २८ ।।

---

१. कृष्वमचक्षत–विज. । २. कृष्णं च समभिष्टूय मानयन्तः:–वीर. । ३. पारमहंस्यां संहितायां–प्रा. पा. । ४. पूर्वार्द्धे नन्दविमोक्षणमष्टा । ५. षड्विंशः–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

देहादिपिहितानाम् देहादिष्वात्मदृष्टीनाम्। यद्गुणापाये तदावरणसंक्षये मुनयः पश्यन्ति तदिति द्वयोरन्वयः। अबाध्यम् ज्ञानांतरेण विषयासत्त्वप्रतीतिर्बाधः तद्योग्यं बाध्यम्, तद्धीनमबाध्यमित्यर्थः। अंत इयत्ता, तद्रहितमनंतम्! "सत्यं ज्ञानमनंतं ब्रह्म" इत्यादिबहुश्रुतिप्रतिपादितं दर्शयामासेति पूर्वेणान्वयः॥ स्वं लोकं विशिनष्टि—तमसः प्रकृतेः परम्। सत्यमबाध्यं ज्ञानमजमनंतमपरिच्छिन्नं सनातनं शश्वत्सिद्धम्। यन्मुनयो ज्ञानिनः गुणापाये गुणातीतत्वे सति पश्यंति वृंदावनस्यापि ब्रह्मानंदस्वरूपत्वेन तादृशत्वेऽपि मायाविभूतिमध्यवर्त्तित्वेनैव माधुर्याधिक्यं, यथा दीपज्योतिषस्तमोमध्यवर्त्तित्वेन। अत एव तमसः परं न तु तमोमध्यवर्त्तिसत्यज्ञानादिरूपं ज्योतिर्दर्शयामास। किञ्च, ब्रह्मस्वरूपतोऽपि विचित्रलीलामयं भगवत्स्वरूपमतिमधुरं शुकदेवादिभक्तात्मारामानुभवादवसीयते। तच्च भगवद्वपुः सर्वव्यापकमपि परिच्छिन्नम्, षड्विकाररहितमप्यप्राकृतजन्मास्तित्ववृद्ध्यादिसहितम्, तरंगादिदोषशून्यमपि क्षुत्पिपासाप्रस्वेदमयमोहसांग्रामिकशस्त्रघातादिसहितम्। अतर्क्यानन्तशक्तित्वादेव यथा तथैव। "पञ्चयोजनमेवास्ति वनं मे देहरूपकम्" इति भगवदुक्तेर्वृन्दावनमपि ब्रह्मदृष्टान्तकोटिब्रह्माण्डव्यापकमपि परिच्छिन्नम्। "स्मरेत्पुनरतन्द्रितो विगतषट्तरङ्गम्बुधः" इत्यागमादि वाक्यात्तरङ्गादिदोषरहितमपि क्षुत्पिपासाजन्मजराछेदभेदादिमन्मनुष्यपशुखगनगादिकमपि नित्यमेवेत्यनन्तचमत्काराश्रयमिति॥ १५॥ लोकदर्शनमाक्षिपति—नन्विति। तत्रोत्तरम्—यत्रेति। शास्त्रस्यानादित्वाद्व्यासादीनां प्राकट्यकर्तृत्वेन भूतनिर्देशो नानुचित इति समाधेयम्। इति भाव इति। न ह्यचिन्त्याद्भुतवैभवस्य किमप्यघटितमिति तात्पर्यम्। ब्रह्मणि ह्रदत्वकल्पनातः कालिन्द्यां ह्रदत्वकल्पनावरीयसी प्रसिद्धा च, ब्रह्मणि चाप्रसिद्धाऽप्रसिद्धः। प्रसिद्धिरेव वरेत्याशयेनाह—अथ वेति। अत्रेतिहासकल्पनापि विजयध्वजकृतास्ति, तथाहि—हे कृष्ण यदि त्वं परं ब्रह्म तर्हि नः स्वलोकं दर्शयेति गोपैः प्रार्थितेन श्रीकृष्णेनोक्तम्—यदि मल्लोकदिदृक्षा तर्हि शुद्धेन चक्षुषा भाव्यम्। अतोऽस्याः कालिन्द्या ह्रदे मज्जनानन्तरं द्रक्ष्यथेत्युक्तास्तथा कृत्वा शुद्धचक्षुषा तत्र स्थितं ब्रह्माऽभिन्नं कृष्णमपश्यन्निति। उद्धृताश्च—ब्रह्मलोकात्पुनस्तदभिप्रायेण व्रजमेवापिता इत्यर्थश्चादनुक्तसमुच्चायको ज्ञेयः। तदभिप्रायश्च "कालिन्दी न तथैव नास्ति पुलिनं गोवर्द्धनो नो गिरिर्वेणुर्नास्ति न चास्ति गोपसुखदो वंशीवटाख्यो वटः। अस्मिन्नास्ति च कृष्णकेलिविपिनं नो वा गवां चारणं किं कुर्मो मधुसूदनस्य नगरे सर्वेऽपि तूष्णीं स्थिताः॥" इत्यभियुक्तोक्तिबोधितलक्षणो बोध्यः॥ एवं ब्रह्मह्रदं ब्रह्मैव ह्रद इव ह्रदस्तत्र निमग्नस्य विशेषज्ञानाभावात्, तं ब्रह्मह्रदं ते व्रजवासिनो नीताः प्रापितास्तदा ते तस्मिन्मग्नाः कृष्णेनोद्धृताः स्वातर्क्यशक्त्या ब्रह्मसायुज्यादपि उद्धृतास्तस्मादुत्थापिताः सन्तस्तस्यैव ब्रह्मणो लोकं वैकुण्ठं ददृशुः। 'विकुण्ठमुपनेष्यति गोकुलं स्म' इति द्वितीयोक्तः। उद्धृता इति। यथान्ये संसारह्रदादुद्धृताः सन्तो ब्रह्मानुभवन्ति तथैवामी प्रेमवन्तो गोपाः ब्रह्मह्रदादुद्धृता वैकुण्ठलोकं ददृशुरिति। सर्वस्वनाशवत्याः सायुज्यविपदः सकाशाद्वैकुंठो निर्वृतिकर इति भावः। प्रेमरहिताद्ब्रह्मसुखानुभवात्प्रेमसहितो वैकुंठसुखानुभवः श्रेष्ठस्ततोऽपि प्रेममयो गोकुल सुखानुभवः श्रेष्ठ इति सिद्धांतो ज्ञापितः। यत्र वैकुंठे पुराऽक्रूरोऽभ्यगात् गतवान् स्वाभीष्टदेवं दृष्टवान् इति वा। शुकपरीक्षित्संवादतः प्राक्तनत्वाद्भूतनिर्देशः॥ १६॥ तम् कृष्णम्। तत्र ब्रह्मलोके। छंदोभिः मूर्तिमद्भिर्वेदैः स्तूयमानं दृष्ट्वा परमानंदनिर्वृता अत्याह्लादमग्ना अपि पुनः पूर्ववत् यादृक्पूर्ववेषस्वभावं गोपरूपं दृष्ट्वा सुविस्मिताः अत्यद्भुताकुला बभूवुः—अहो अस्य वैभवं; क्षणे परमैश्वर्यं प्रदर्श्य क्षणेन पुनस्तत्तिरोदधाविति। व्यवहितान्वयस्त्वाद्यपादांतस्थेन तं दृष्ट्वेत्यनेन सुविस्मिता इत्यंतापादांतस्थेन संबंधात्। स च काव्यदोषोस्ति। अप्रसिद्धकल्पना तु कालिंदीह्रदस्य ब्रह्मह्रदेति नामकल्पनेति॥ तं वैकुंठं दृष्ट्वा परमानंदपूरिता वैकुंठीयगोलोकस्थवृंदावनस्य वृंदावनसाधर्म्यदर्शनादिति भावः। यथा कोटीश्वराः कदाचिन्नष्टसर्वधनाः सन्तो दैवात् क्वचिद्दृष्टधनचिह्नाः परमानंदनिर्वृता भवन्ति तथेत्यर्थः। ततश्चास्मत्प्राणकोटिनिर्मंछनीयमुखारविंदप्रस्वेदबिन्दुः कृष्णः क्वेति तदन्वेषणानुसंधानवत्त्वे सति तञ्च ददृशुरित्याह—कृष्णं तत्रत्यैः छंदोभिर्मूर्तिमद्भिर्गोपालतापिन्यादिभिः स्तूयमानं दृष्ट्वा सुविस्मिताः हंहो क्वागच्छामस्तावदेते ज्योतिर्मयास्तावका अत्र वृंदावने खल्वपरिचीयमानाः प्रष्टुमस्माभिरशक्याः के, तन्मध्यवर्ती कृष्णश्चायमस्माननेकान्पित्रादीन् दृष्ट्वापि बाल्यविलासं प्रपञ्चयन्न सन्निधत्ते नापि भुजाभ्यां नः कण्ठं धत्ते, वयमपि सन्निधातुमेनमुत्सङ्गमारोहयितुं च संकुचामः, किमनेन क्षुत्पिपासा वैक्लव्यं विस्मृतं मातास्य कथमेनमभोजयंती जीविष्यतीत्येवंविधान्विस्मयान् दधानास्ते लीलाशक्तिप्रेरितया योगमाययैव पुनर्वृन्दावनमानिन्यिरे इति शेषः। एतत्प्रकरणस्यायमेवार्थः श्रीमत्प्रभुवरैः रूपगोस्वामिचरणैः स्तवमालायामुपश्लोकितः। स च श्लोको यथा—"लोको रम्यः कोऽपि वृंदाटवीतो नास्ति कापीत्यंजसा बंधुवर्गम्। वैकुंठं यः सुष्ठु संदर्श्य भूयो गोष्ठं निन्ये पातु स त्वां मुकुंदः॥ १७॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धेऽष्टाविंशोऽध्यायः॥ २८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, तमसः परं किं नाम वस्त्वित्यपेक्षायां तत्तावत्सामान्यतो निरूपयति—सत्यमिति॥ १५॥ अथ विशेषतोऽपि तन्निरूपयंस्तादृशं तद्दर्शनमाह—तेत्विति। ब्रह्म पूर्वोक्तप्रकृत्यनभिव्यक्तप्रकाशं यत् तदेव दुरवगाहत्वादिना ह्रद इव ह्रदः ते नीताः

स्वशक्त्या तदनुसन्धानं गमितास्तत एव ते मग्नाः तन्मात्रानुभवावस्थामपि प्राप्ताः पुनस्तस्मादपि तेनोद्धृताः प्रथमजां सामान्याकारतत्स्फूर्त्तिमतिक्रम्य स्वरूपशक्त्याभिव्यक्तविशेषाकारतत्स्फूर्त्त्याप्युत्कर्षिताः सन्तो ब्रह्मणो नराकृतिपरब्रह्मणस्तस्यैव लोकं ददृशुः चक्षुषापि साक्षात् कृतवन्तः नचाश्रुतचरमेतदित्याह—यत्र प्रकाशे अक्रूरोपि अध्यगात् वैकुण्ठलोकं दृष्टवान् तं स्तुतवान् वा द्वितीये च—

तस्मै स्वलोकं भगवान् समाजितः स दर्शयामास परं न यत्परम् ।
व्यपेतसंक्लेशविमोहसाध्वसम् स्वदृष्टवद्भिः पुरुषैरभिष्टुतम् ॥
प्रवर्त्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरेः" ।

इत्यादि तयोर्मिश्रं रजस्तमः सहचरं प्राकृतसत्वमित्यर्थः । इतिहाससमुच्चये मुद्गलोपाख्याने—

"ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदम् । शुद्धं सनातनं ज्योतिः परं ब्रह्मेति तद्विदुः ॥ इति

तस्मादूर्ध्वम् आवृत्तिरहितदेश इत्यर्थः । श्रीनारदपञ्चरात्रे जितन्तेस्तोत्र—

"लोकं वैकुण्ठनामानं दिव्य षाड्गुण्यसंयुतम् । अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥ इति

ब्रह्माण्डपुराणे—

"तमनन्तगुणावासं महत्तेजो दुरासदम् । अप्रत्यक्षं निरुपमं परानन्दमतीन्द्रियम्" ॥ इति

श्रुतयश्च "परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति" इत्यद्याः । अथवा । ब्रह्महृदमक्रूरतीर्थं नीताः तत्तीर्थमहिमज्ञापनाय कौतुकाय वा प्रापिताः ततस्तत्प्रेरणया मग्नाः पुनस्तेनैव तस्मादुद्धृताः उत्थापिताः ददृशुः श्रीवृन्दावनमेव विलक्षणत्वेनापश्यन्नित्यादि यत्र तीर्थे तदेवं सर्वप्रमाणचूडामणिना श्रीमद्भागवतेन प्रोक्तेनात्र प्रसिद्ध्यनादरमपेक्ष्यं क्रमव्याख्यानाच्च न परत्र व्यवहितयोजना चापतदिति गम्यम् ॥ १६ ॥ तथाप्यक्रूरतः श्रीमन्नन्दादीनां दर्शनवैशिष्ट्यवदानन्दवैशिष्ट्यमपि जातमित्याह–नन्देति । तं तेषामेव सम्बन्धिनं श्रीकृष्णलोकम् अतः स्वभावत एव परमानन्दनिर्वृता बभूवुः कृष्णं चेति तथाप्यव्यभिचारिपुत्रभावतो विस्मिताश्च बभूवुरिति छन्दोभिः कर्तृभूतैः करणभूतैर्वा उभयभूतैरेव वा श्रीगोपालतापन्यादिभिः अत्र स्वगतिमिति तैः स्वशब्दस्य श्रीकृष्णैकाभिप्रायेणैवोक्तिः गतिशब्दस्य च वरुणलोकदर्शनेन तल्लोकदर्शनाभिप्रायेणोक्तिः तथा श्रीकृष्णेन च स्वां गतिमिति श्रीगोपसम्बन्धितानिर्देशः श्रीमुनीन्द्रेण च गोपानामिति षष्ठ्या साक्षादेव तत्सम्बन्धनिर्देशः कृष्णं चेति साक्षात् श्रीकृष्णनिर्देशश्च वैकुण्ठान्तरं व्यवच्छिद्य परमगोलोकमेव स्थापयति अत एव "अह्नयाप्तं निशि शयानमतिश्रमेण लोकं विकुण्ठमुपनेष्यति गोकुलं स्म" इति श्रीब्रह्मवाक्येऽपि ब्रह्महृदस्याक्रूरतीर्थत्वपक्षे "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" इति न्यायेन दिवसे तदेकार्थव्यापारयुक्तं तत्परिश्रमेण रात्रौ च तदेकसमाधिरूपनिद्रापन्नं ब्रह्मानुभवपक्षे श्रीव्रजेश्वरान्वेषणार्थं तस्मिन्नह्नि नानाव्यापारयुक्तं तत्परिश्रमेण रात्रौ शयानं सत् गोकुलं तद्वासिजनं विकुण्ठं गोलोकाख्यम् उप समीपे तत्रैव दर्शयिष्यतीत्यर्थः । स यथा ब्रह्मसंहितायाम्—

"ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः । अनादिरादिर्गोविन्दः सर्वकारणकारणम् ॥
सहस्रपत्रं कमलं गोकुलाख्यं महत्पदम् । तत्कर्णिकारं तद्धाम तदनन्तांशसम्भवम्" ॥ इत्यादि ।

तथाग्रे ब्रह्मस्तवे—

चिन्तामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषु सुरभीरपि पालयन्तम् ।
लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानं गोविन्दमादिपुरुषं तमहं भजामि ॥
गोलोकानाम्नि निजधाम्नि तले च तस्य देवीमहेशहरिधामसु तेषु तेषु ।
ते ते प्रभावनिचया विहिताश्च येन गोविन्दमादिपुरुषं तमहं भजामि ॥ इत्यादि ।

"गोलोक एव निवसत्यखिलात्मभूतः" च इत्यादि अन्ते च—

श्रियः कान्ताः कान्तः परमपुरुषः कल्पतरवो द्रुमा भूमिश्चिन्तामणिगणमयी तोयममृतम् ।
कथागानं नाट्यं गमनमपि वंशीप्रियसखी चिदानन्दं ज्योतिः परमपि तदास्वाद्यमपि च ॥
स यत्र क्षीराब्धिः सरति सुरभीभ्यश्च सुमहान् निमेषार्द्धाख्यो वा व्रजति नहि यत्रापि समयः ।
भजे श्वेतद्वीपं तमहमिह गोलोकमिति यम् विदन्तस्तेसन्तः क्षितिविरलचाराः कतिपयाः ॥ इति ।

एवं स्कान्दे मोक्षधर्मस्य नारायणीयोपाख्याने च—

"एवं बहुविधैरूपैश्चरामीह वसुन्धराम् । ब्रह्मलोकं च कौन्तेय ! गोलोकं च सनातनम्" ॥ इति ।

तथा हरिवंशे यथाह शक्रः—

“स्वर्गादूद्र्ध्वं ब्रह्मलोको ब्रह्मर्षिगणसेवितः । तत्र सोमगतिश्चैव ज्योतिषां च महात्मनाम् ॥
तस्योपरि गवां लोकः साध्यास्तं पालयन्ति हि । स हि सर्वगतः कृष्णमहाकाशगतो महान् ॥
उपर्य्युपरि तत्रापि गतिस्तव तपोमयी । यां न विद्मो वयं सर्वे पृच्छन्तोऽपि पितामहम् ॥
गतिः शमदमाद्यानां स्वर्गः सुकृतकर्मणाम् । ब्राह्मये तपसि युक्तानां ब्रह्मलोकः परा गतिः ॥
गवामेव तु गोलोको दुरारोहा हि सा गतिः । स तु लोकस्त्वया कृष्ण ! सीदमानः कृतात्मना ॥
धृतो धृतिमता वीर ! निघ्नतोपद्रवान् गवाम्” ॥ इति ।

अस्यार्थः स्वर्गशब्देन स्वर्लोकमारभ्य सत्यलोकपर्यन्तं लोकपञ्चकमुच्यते—

“भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः । स्वर्लोकः कल्पितो मूद्र्ध्ना इति वा लोककल्पना” ॥ इति द्वितीयात् । तस्मादूद्र्ध्वमुपरि ब्रह्मलोकः परब्रह्मणो भगवतो लोकः ददृशुर्ब्रह्मणो लोकमित्युक्तत्वात् एवं द्वितीये “मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः” इति व्याख्यातं च तैः ब्रह्मलोको वैकुण्ठाख्यः सनातनोऽपि नित्यो नतु सृज्यप्रपञ्चान्तर्वर्त्तीत्यर्थः । इति ब्रह्माणि मूर्तिमन्तो वेदाः ऋषयश्च श्रीनारदादयः गणाश्च श्रीगरुडविष्वक्सेनादयः तैर्निषेवितः एवं नित्याश्रितानुक्त्वा तद्गमनाधिकारिण आह, तत्र ब्रह्मलोके उमया सह वर्त्तते इति सोमः श्रीशिवः तस्य गतिः “ज्योतिश्चरणाभिधानात्” (१।१।२५) इति न्यायेन ज्योतिर्ब्रह्म तदैकात्म्यभावानां ज्ञानिजीवन्मुक्तानामित्यर्थः । अत्र समासप्रविष्टस्यापि गतिपदस्याकर्ष आर्षः सोमेति छान्दस एव वा षष्ठ्या लुक् नतु तादृशानामपि सर्वेषामेवेत्याह—महात्मनां महाशयानां मोक्षनिरादरतया भजतां श्रीसनकादितुल्यानामित्यर्थः—

“मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने” ॥

इत्यादौ तेष्वेव महत्तापर्यवसानात् तस्य च ब्रह्मलोकस्योपरि सर्वोद्र्ध्वप्रदेशे गवां लोक इत्यर्थः । तं श्रीगोलोकं साध्या अस्माकं प्रापञ्चिकदेवानां प्राप्तव्यसायुज्यमूलरूपा नित्यतदीयदेवगणाः पालयन्ति तत्र दिक्पालत्वेनावरणरूपा वर्त्तन्ते “ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः” इति श्रुतेः “तत्र पूर्वे ये च साध्या विश्वेदेवाः सनातनाः । ते ह नाकं महिमानः सचन्ते शुभदर्शनाः” इति वैकुण्ठवर्णने पाद्मोत्तरखण्डाच्च हि प्रसिद्धौ स श्रीगोलोकः सर्वगतः श्रीकृष्णवत् सर्वप्रापञ्चिकवस्तुव्यापकः अत एव महान् भगवद्रूप एव “महान्तं विभुमात्मानम्” इति श्रुतेः । तत्र हेतुः महाकाशः परमव्योमाख्यं ब्रह्मविशेषणलाभात् “आकाशस्तल्लिङ्गात्” (१।१।२२) इतिन्यायप्रसिद्धेश्च तद्गतः ब्रह्माकारतयोदयानन्तरं तत्प्राप्तेः । यद्वा, महाकाशः परमव्योमाख्यो महावैकुण्ठः तद्गतः तदूद्र्ध्वभागस्थितः “गोलोकनाम्नि निजधाम्नि तले च तस्य देवीमहेशहरिधामसु” इति ब्रह्मसंहितायां तद्वर्णने व्युत्क्रमोक्तः एवमुपर्य्युपरि सर्वोपर्य्यपि विराजमाने श्रीगोलोकेऽपि तव गतिः नानारूपेण वैकुण्ठादौ क्रीडतस्तव तत्रापि श्रीगोविन्दरूपेण क्रीडा विद्यत इत्यर्थः सा कीदृशी तपोमयी अनवच्छिन्नैश्वर्य्यमयी “परमं यो महत्तपः” इति वत् अत एव ब्रह्मादिदुर्वितर्कत्वमप्याह—यामिति । अधुना तस्य गोलोक इत्याख्याबाजमभिव्यज्जयति, गतिरिति । ब्राह्मये ब्रह्मलोकप्रापके तपसि विष्णुविषयकमनःप्रणिधाने युक्तानां रतचित्तानां प्रेमभक्तानामित्यर्थः । ब्रह्मलोको वैकुण्ठलोकः परा प्रकृत्यतीता गवामिति “मोचयन् व्रजगवां दिनतापम्” इत्युक्तानुसारेण गोकुलवासिमात्राणां स्वतः तद्भावानां च साधनवशेनेत्यर्थः । अत एव तद्भावस्यासुलभत्वात् दुरारोहा धृतो रक्षितः श्रीगोवर्द्धनोद्धरणेनेति अत्रार्थान्तरे सप्तलोकता चेत्तर्हि स्वर्गादेवोद्र्ध्वं सत्यलोको न भवति महर्लोकादिव्यवधानात् तथा सोमगतिरित्यादिकं न सम्भवति ध्रुवलोकाधस्तादेव तद्गतेः अवरसाध्यगणानां तुच्छत्वात् सत्यलोकपालनेऽप्यनर्हात् तथा प्राकृतगोलोकस्य सर्वगतत्वं चासम्भाव्यम् अत एव तत्रापि तव गतिरित्यपिशब्दो विस्मये प्रयुक्तः यां न विद्म इत्यादिकञ्च तस्मात् प्राकृतादन्य एवासौ गोलोकः य एव पूतनामोक्षादौ निरूपितः य एव च प्रापञ्चिकजीवकृपया वृन्दवनादिरूपेण प्रपञ्चेप्यभिव्यक्तः सदा विराजते “सतु लोकस्त्वया वीर ! निघ्नतोपद्रवान् गवां धृत” इत्यभेदेनोक्तत्वात् भगवद्वदचिन्त्यशक्तिमयत्वेन तस्यैकस्याप्येकत्राप्यनन्तधा प्रकाशसामर्थ्याच्च योगमायाविभूतिवर्णने युगपत् प्रातरादिनानासमयादिवर्णनमयत्वेन तथैव द्वारकाया अपि दर्शितमिति गोलोकस्योद्र्ध्वलोकोपरितनत्वं च महिमदृष्ट्यपेक्षयाविर्भावात् वस्तुतस्तु सहि सर्वगत इत्येवोक्तम् अतो वाराहेप्यस्यामेव वृन्दाटव्यां प्रापञ्चिकेन्द्रियमात्रैस्तद्वस्तुमात्रैश्चास्पृष्टा नित्यसिद्धाः पृथिव्याप्यज्ञाताः कदम्बादयो वर्ण्यन्ते, यथा—

तत्रापि महदाश्चर्यं पश्यन्ते पण्डिता नराः । कालियह्रदपूर्वेण कदम्बो महितो द्रुमः ॥
शतशाखं विशालाक्षि ! पुण्यं सुरभिगन्धि च । स च द्वादशमासानि मनोज्ञः सुखशीतलः ॥
पुष्पायति विशालाक्षि ! प्रभासन्तो दिशो दश” ॥ इति ।

शतशाखमिति द्विगुः तद्यत्र वर्त्तते इत्यर्थः । प्रभासन्तः प्रभासयन्नित्यर्थः । तत्रैव ब्रह्मकुण्डलमाहात्म्ये—

"तत्राश्चर्यं प्रवक्ष्यामि तच्छृणु त्वं वसुन्धरे ! । लभन्ते मनुजाः सिद्धिं मम कर्मपरायणाः ॥
तस्य तत्रोत्तरे पार्श्वेऽशोकवृक्षः सितप्रभः । वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशी ॥
स पुष्पति च मध्याह्ने मम भक्तसुखावहः । न कश्चिदपि जानाति विना भागवतं शुचिम् ॥ इत्यादि

आदिवाराहे च ।

"कृष्णक्रीडा सेतुबन्धं महापातकनाशनम् । बलभीं तत्र क्रीडार्थं कृत्वा देवो गदाधरः ॥
गोपकैः सहितस्तत्र क्षणमेकं दिने दिने । तत्रैव रमणार्थं हि नित्यकालं स गच्छति ॥ इति ।

तथैव "गोलोक एव निवसत्यखिलात्मभूतः" इति नियमः श्रूयते । स्कान्दे मथुरामाहात्म्ये—

"ततो वृन्दावनं पुण्यं वृन्दादेवीसमाश्रितम् । हरिणाधिष्ठितं तच्च ब्रह्मरुद्रादिसेवितम् ॥

इति च श्रूयते । बृहद्गौतमीये च श्रीकृष्णवाक्यम्—

"इदं वृन्दावनं रम्यं मम धामैव केवलम् । अत्र मे पशवः पक्षिमृगाः कीटा नरामराः ॥
ये वसन्ति ममाधिष्ठे मृता यान्ति ममालयम् । अत्र या गोपकन्याश्च निवसन्ति ममालये ॥
योगिन्यस्ता मया नित्यं मम सेवापरायणः ।
पञ्च योजनमेवास्ति वनं मे देहरूपकम् । कालिन्दीयं सुषुम्णाख्या परमाऽमृतवाहिनी ॥
अत्र देवाश्च भूतानि वर्त्तन्ते सूक्ष्मरूपतः । सर्वदेवमयश्चाहं न त्यजामि वनं क्वचित् ॥
आविर्भावस्तिरोभावो भवेन्मेऽत्र युगे युगे । तेजोमयमिदं रम्यमदृश्यं चर्मचक्षुषा" ॥ इति ।

तस्मात् सदा प्रकृवावनाभिव्यक्ते श्रीवृन्दावनस्यैवास्य प्रकाशविशेषे गोलोकाख्ये यो नित्यं तैरेव नित्यपरिकरैः सह विहरति, स एव श्रीकृष्णः प्रापञ्चिकनिजभक्तकृपया प्रकृतावभिव्यक्तेऽस्मिंस्तत्प्रकाशे तैरेव स कदाचित् व्यक्ती भवति तस्य तत्परिकरत्वनियमश्च तत्परिकरत्वेनैवोपासनाशास्त्रादि दर्शनात् एवं षोडशसहस्रविवाहे श्रीवसुदेवादिवद्यदा ते प्रपञ्चाभिव्यक्तप्रकाशे प्रकाशान्तरेण व्यक्तीभवन्ति तदा लीलारसपोषाय लीलाशक्तिरेव प्रेमवैवश्यादिद्वारा तत्र तत्र प्रकाशे पृथगभिमानं परस्परमननुसन्धानं च सम्पादयति यतो नित्यसिद्धमपि तं निजवैभवादिकं तदा ते नानुसन्दधिरे तदेवमत्रैव स्थितस्यैव श्रीवृन्दावनस्य प्रकाशविशेष श्रीगोलोकं दर्शयामास प्रकाशभेदे कन्दर्प्यजेतृत्वे इति जीवानां कामनिवृत्त्यर्थः । न तान् विना नान्यांश्चान्तरङ्गपरिकरान् दर्शयामास छन्दसां तु बहिरङ्गत्वमेव वन्दिजनसाधर्म्यात् छन्दोभिः स्तुतेर्दर्शनं चेदं प्रामाण्यार्थमेवेति सर्वं शान्तम् ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां अष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इति उक्तं सञ्चिन्त्य विचार्य संकल्प्य वा । तत्र हेतुः महाकारुणिक इति, कृपयेतिवदुक्तार्थमेव, पुनरपि स एव हेतुः, कृपातिरेकव्यतिरेकेण हेत्वन्तरासम्भवात्, स्वं स्वकीयं लोकं स्वरूपं गोपानां गोपान् प्रति दर्शयामास साक्षात्कारयामास । तमेव विशिनष्टि—तमसः परमित्यादिना, भगवान् सर्व्वैश्वर्यपरिपूर्ण इति, तद्दर्शने अनायासोऽभिप्रेतः, यतो विभुर्व्यापकः, विभूतित्वेन ब्रह्मणोऽपि तदधीनत्वादित्यर्थः, यद्वा, दर्शयामास इत्यत्र हेतुः—भगवान् साक्षात् परमेश्वरस्तत्रापि महाकारुणिको विशेषतः कृपाभरप्रकटनपर इत्यर्थः, तत्रापि गोपानां विभुः प्रभुः, तेषां प्रेमपरवश इत्यर्थः, तादृशसञ्चिन्तने हेतुश्च पूर्वमुक्त एव । कृपयेति सत्यमित्यादिना ब्रह्मणः प्रपञ्चाद्वैलण्यमुक्तम् । तत्र यथोत्तरं हेतु हेतुमत्तोह्याः हि यत एवेति वा; यदेवेति तद्दर्शनं निरस्तम्, अप्यर्थे चकारः, कृष्णेनोद्धृता अपि ब्रह्मणो लोकं स्वस्वरूपमेव ददृशुः, तत्र मग्नतया परमाभिनिविष्टत्वात्, यत्र यस्मिन् कृष्णे विषये ब्रह्मणो लोकमक्रूरोऽध्यगात्, अंशत्वेन कृष्णान्तर्भूतमेव ज्ञातवान् । इति भक्तेषु परमकारुणिकत्वं तथा भगवत्त्वं विभुत्वं त्वभिव्यञ्जितम् । एव तत्र ब्रह्मणो लोके कृष्णं सच्चिदानन्दघनमूर्त्तिं भगवन्तं रश्मिजाले तेजोघनसूर्य्यामिव दृष्ट्वा न चात्र सन्देह इत्याह—छन्दोभिः स्तूयमानं तथैव संकीर्त्त्यमानमाहात्म्यमित्यर्थः । ब्रह्मस्वस्थानञ्चेति द्वयसंकल्पनपक्षे द्वयमिव दर्शयामासेति तैर्व्यञ्जितमेव । वैकुण्ठस्थ गोलोकस्य वा प्राप्तिसंकल्पपक्षे चायमर्थः—स्वं स्वकीय लोकं वैकुण्ठाख्यम्, यद्वा, गोपानां स्वं स्वाधीनं गोलोकमित्यर्थः । प्रकृतेः परमित्यादि-विशेषणबलाद् वैकुण्ठम्, किंवा गोलोकम्, प्रसंगबलात् गोपान् प्रत्येवेति प्राप्तं स्यादेव ॥ १५ ॥ लोकत्वेऽपि सच्चिदानन्दरूपतां वदन् तमेव विशिनष्टि सत्यमिति । ब्रह्मत्वमेव साधयति—यदिति, एवार्थे हि शब्दः, यद् यस्मात् मुनयो योगेश्वरा अपि गुणापाये मायागुणातिक्रमे सत्येव तत्रापि समाहिताः समाधिपराः सन्त एव पश्यन्ति, यत् यमिति वा, अतो गुणातीततया तस्यापि सच्चिदानन्दरूपत्वेन ब्रह्मत्वं सिद्धमेव, यद्वा, अकारप्रश्लेषेण अगुणो मोक्षस्तस्यापोहे त्यागे सत्येव आत्मारामा अपि भक्तौ सावधानाः सन्तो यत् पश्यन्ति, तथा चोक्तं द्वितीयस्कन्धे (भा० २।९।९–१०)

'तस्मै स्वलोकं भगवान् समाजितः सन्दर्शयामास परं न यत्परम् ।
व्यपेत-संक्लेश-विमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतम् ॥
प्रवर्त्तते यत्र रजस्तमस्तयोः सत्त्वञ्च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्च्चिताः ॥ इति ।

इति हाससमुच्चये श्रीमद्गलोपाख्याने—'ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदम् । शुद्धं सनातनं ज्योतिः परं ब्रह्मेति तद्विदुः ॥' इति । ब्रह्मणः सदनं ब्रह्मरूप सदनम्, राहोः शिर इति वदभेदेऽपि षष्ठी, विरजापरमव्योम्नोर्मध्यस्थमुक्तिपदमित्यर्थः । तथा च पाद्मोत्तरखण्डे—

'प्रधान-परमव्योम्नोरन्तरे विरजा नदी । तस्याः पारे परव्योम त्रिपाद्भूतं सनातनम् ॥
विरजा परमव्योम्नोरन्तरे केवलं स्मृतम् । तत्स्थानमुपभोक्तव्यमव्यक्तब्रह्मसेविना ॥'

तस्मात् श्रीनारदपञ्चरात्रे श्रीब्रह्मनारदसंवादे जितन्तेस्तोत्रे—

'लोकं वैकुण्ठनामानं दिव्यषड्गुणसंयुतम् । अवैष्णवानामप्राप्यं गुणत्रयविवर्ज्जितम् ॥
नित्यसिद्धैः सम्यकीर्णं तन्मयैः पाञ्चकालिकैः । सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभम् ॥
वापीकूपतडागैश्च वृक्षयण्डैः सुमण्डितम् । अप्राकृतं सुरैर्वन्द्यमयुतार्कसमप्रभम् ॥' इति ।

दिव्यैर्लोकातीतैरप्राकृतैः षड्गुणैरश्वर्य्यादिभिः संयुतं श्रीभगवत्तुल्यत्वात्, नित्यसिद्धैः श्रीगरुडादिनित्यपार्षदैः, पाञ्चकालिकैः पञ्चसु प्रातरादिषु कालेषु सेवापरैः । ब्रह्माण्डपुराणे श्रीमज्जन्माष्टमीमाहात्म्ये श्रीवैकुण्ठलोक वर्णने—'तमनन्तगुणावासं महत्तेजो दुरासदम् । अप्रत्यक्षं निरूपमं परानन्दमतीन्द्रियम् ॥' इति । अनन्तानामपरिच्छिन्नानामनन्तस्य वा श्रीभगवतो गुणानामावासं वसति स्थानम्, महतां श्रीब्रह्मादीनां तेजसा प्रभावेणापि दुरासदमलभ्यम्, यद्वा महदपरिच्छिन्नं यत्तेजः परमब्रह्म तत्स्वरूपं सच्चिदानन्दघनमित्यर्थः, अत एव दुरासदम्, यतोऽप्रत्यक्षं चक्षुरग्राह्यमतीन्द्रियं मन आदिवृत्त्यतीतम् ॥ १६ ॥ ब्रह्मणो ह्रदं महानिधानं ब्रह्मघनरूपं वैकुण्ठमित्यर्थः, नीता दर्शनद्वारा साक्षादिव प्रापिताः अत एव मग्नाः, तद्दर्शनाशक्ताः कृष्णेन तत उद्धृताः; आत्मना सह श्रीवृन्दावनक्रीडारसविघातकतया नात्यभीष्टादिव तद्दर्शनादुत्थापिता अपि ब्रह्मणो लोकं विवर्त्त विना ब्रह्मोपादानकं सच्चिदानन्दरूपं वैकुण्ठलोकमेव ददृशुः । तदावेशेन कृष्णस्येव सर्वतः परिस्फूर्त्तेः, साक्षात् श्रीकृष्णं पश्यतां तेन सह विक्रीडतां तेषां वैकुण्ठदर्शनं नाम कियदेतदित्याह—व्रजजनविरहदुःखहेतुरक्रूरोऽप्यध्यगात्, अन्यत्तैर्व्यञ्जितमेव । यत्रेत्यव्ययत्वेन यमिति वा, अध्यगादित्यनेन ज्ञानद्वारासौ ददर्श, एते च साक्षादेवाक्षिभिर्ददृशुरिति तस्मादप्येषां महात्म्यं दर्शितम् । यद्वा, कस्मिंश्चित् स्थाने कथमपश्यन्नित्यपेक्षायामाह—ते त्विति । मग्नाः स्नाता इत्यर्थः, पश्चात् तस्मात् कृष्णेनोद्धृताः, वैकुण्ठलोकदर्शनासक्त्या श्रीयमुनाप्रवाहेण नयनशंकातः, ब्रह्मह्रदे नयनञ्च रसविशेषमयव्रजभूमेर्बहिरेव तद्दर्शनोपपत्तेः, अन्यत् समानम्, यद्वा ब्रह्मह्रदं नीताः सन्तो वैकुण्ठलोकं ददृशुः, तद्दर्शने निमग्नाश्च सन्तः कृष्णेनोद्धृतास्तस्माद्विरमय्य क्रीडार्थं निजस्थानं नीता इत्यर्थः एवं व्यवहितान्वयादिकं तैरेव व्यञ्जितमस्ति ॥ १७ ॥ एवं गोपानामिष्टसिद्ध्या परमानन्दो जात इत्याह—नन्दादय इति । तं वैकुण्ठलोकं गोलोकं वा, परमानन्देन निवृता निःशेषेण व्याप्ता बभूवुः, स्वदिदृक्षित-तदीयस्थानविशेषदर्शनात्, तत्रापि स्वलोकत्वेन स्वाधीनताज्ञानोत्पत्तेः । अप्यर्थे चकारः । तत्र ब्रह्मलोकेऽपि कृष्णं दृष्ट्वा सुविस्मिता बभूवुः, यद्वा, तत्र छन्दोभि स्तूयमानं कृष्णं निजपार्श्वेऽपि स्तूयमानं पूर्ववत् दृष्ट्वा परमविस्मयं प्राप्ता इति तैर्व्याख्यातमेव । यद्वा, तु शब्दो भिन्नोपक्रमे, सर्वे गोपा औत्सुक्यधीरत्वेन वैकुण्ठलोकं दृष्ट्वा सुखं प्रापुरेव, श्रीनन्दादयः प्रियतमजनास्तु तत्र ब्रह्मलोके छन्दोभिः स्तूयमानं कृष्णं दृष्ट्वा सुविस्मिता अपि तं निजपार्श्वे पूर्ववद्वर्त्तमानं परमबन्धुं जीवनप्रभुं दृष्ट्वैव परमानन्दनिर्वृता न तु ब्रह्मलोकमित्यर्थः, आदि-शब्देन श्रीयशोदा श्रीदामादिसहचराः श्रीराधादिगोप्यश्च, यद्वा, तत्र तैः स्तूयमानमपि कृष्णं तं पूर्ववन्निजपार्श्वे वर्त्तमानं दृष्ट्वैव परमानन्दनिर्वृताः सन्तः, अत एव सुशोभनं विशेषतः स्मितं येषां तथाभूता बभूवुः, यद्वा, तं निजप्रियतमं कृष्ण तत्र छन्दोभिरपि स्तूयमानं दृष्ट्वा परमानन्दनिर्वृताः, यद्वा, तं गोलोकं भूर्लोकस्थगोकुलसदृशमेव दृष्ट्वा परमानन्दनिर्वृता बभूवुः ॥ १८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यामष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सत्यं निर्विकारं ज्ञानप्रकाशबहुलमिति ॥ १५ ॥ स्थानविशेषं ब्रह्मह्रदो नाम यमुनायां कश्चिद्ध्रदः ॥ १६-१७ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धीये श्रीसुदर्शनसूरिकृतशुकपक्षीये अष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सत्यं निर्विकारं नित्यासङ्कुचितापरिच्छिन्नज्ञानश्रयं ज्ञानात्मकं च त्रिविधपरिच्छेदरहितं स्वरूपेण गुणैश्च निरतिशयबृहत् स्वयं प्रकाशमनादिनिधनं समाधिनिष्ठा मुनयो गुणापाये त्रिगुणात्मकप्रकृतिसम्बन्धनिवृत्तौ सत्यां यत्पश्यन्ति तदति स्थानकटाक्षेण नपुंसकनिर्देशः ॥ १५ ॥ स्वलोकयोरतीन्द्रियत्वमालोच्य भगवता प्रकारान्तरेण दर्शितौ ददृशुरित्याह–त इति । ते गोपा ब्रह्महृदं प्रति भगवता प्रापिता तदाज्ञया तत्र मग्ना उद्धृताः समाधियुक्ताः ब्रह्मणो लोकं ददृशुः कोसौ ब्रह्महृदस्तत्राह—यत्रेति यत्र यस्मिन्यमुनाह्रदेऽक्रूरः पुराऽध्यगात् ब्रह्मलोकमित्यनुवर्त्तते दृष्टवान् स एव ब्रह्महृदाख्यः पुरेति कथावृत्तेः पूर्वकालो विवक्षितः ॥ १६ ॥ नन्दादयस्तं लोकं दृष्ट्वा परमानन्दभरिताः कृष्णं सम्यगभिष्टूय बहुमन्वानाः सुतरां विस्मिताश्चाभवन् ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां अष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किं विशिष्टं–कृष्णमिति तत्राह । सत्यमिति सत्यमबाधितं जानातीति ज्ञानं सर्वज्ञम् अन्तत्रयशून्यम् अविनाशि वा यत् ब्रह्मैवं विशिष्टं "सत्यं ज्ञानमनन्तम्ब्रह्म" इति श्रुतिसिद्धं यच्च ज्योतिः स्वयं प्रकाशमानम् "परंज्योतीरुपंसम्पद्य" इतिश्रुतिवेदितं यच्च सनातनं सदैकप्रकारम् "अजो नित्यः शाश्वतोऽयं पुराणः" इति श्रौतं यच्च समाहिताः मुनयो गुणापाये सत्त्वादिगुणनिवृत्तौ आवरणाभावात्पश्यन्ति "हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् तच्छुभं ज्योतिषां ज्योतिस्तद्यदात्मविदोविदुः" इत्यादि श्रुतिशतं हिशब्देन गृहीतम् एवंविधगुणविशिष्टं ब्रह्मशब्दवाच्यं कृष्णमचक्षतेति सम्बन्धः ! किंविशिष्टा गोपाः ? पुरा अक्रूरो यत्र ह्रदे मग्नः ब्रह्मकृष्णात्मकम् अध्यागात् अधिगतवान् चक्षुषाऽपश्यत् द्रक्ष्यतीति भूतपूर्वत्त्वेन व्यपदेशः कथायाश्चक्रवद्वर्त्तमानार्थस्तस्माद्ब्रह्मसन्निधानात् ह्रदान्मग्नाः स्नाताऽनीताः अत्रेतिहासमाचक्षते यदि परब्रह्मत्वं तर्हि नः स्वलोकं दर्शयेति गोपैः प्रार्थितेन कृष्णेन च उक्ते यदि युष्माकं मल्लोकदिदृक्षा तर्हि शुद्धेन चक्षुषा भाव्यं तदर्थमस्याः कालिन्द्याः ह्रदेमज्जनानन्तरं द्रक्ष्यथेत्युदितास्ते तथा कृत्वा शुद्धचक्षुषा तल्लोकं तत्र स्थितं सत्यादिगुणविशिष्टं ब्रह्माभिन्नं कृष्णमपश्यन्निति ॥ १५ ॥ ते गोपाः तं लोकं ददृशुः कस्येत्यतउक्त ब्रह्मण इति । अनेन कृष्णब्रह्मणोरैक्यं सूचितं शून्यागारमिव पश्यन्निति तत्राह—कृष्णमिति । तस्मिन् लोके कृष्णं चापश्यन्नित्यर्थः ॥ १६ ॥ ते गोपास्तं लोकं ददृशुः कृष्णस्येत्यत उक्तम्, ब्रह्मण इति । अनेन कृष्णब्रह्मणोरैक्यं सूचितं शून्यागारमिवापश्यन्निति तत्राह—कृष्णमिति । तस्मिन् लोके कृष्णं चापश्यन्नित्यर्थः ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां अष्टाविंशोऽध्यायः ॥ २८ ॥

(विजयध्वजरीत्या षड्विंशोऽध्यायः ॥ २६ ॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु तमसः परः किं नाम वस्त्वित्यपेक्षायां तत्तावत् सामान्यतो निरूपयति–सत्यमिति ॥ १५ ॥ अथ विशेषताऽपि तन्निरूपमं तादृशं तद्दर्शनमाह–ते त्विति । ब्रह्म पूर्वोक्तसामान्याकारात् नीता अनुसन्धापिता मग्नास्तन्मात्रानुभवं गताः अनन्तरमुद्धृताः विशेषाकारतत्स्फूर्त्ताप्युत्कर्षिताः सन्तो ददृशुः ब्रह्मण इत्यारि यत्र प्रकृतेः परोऽत्र अक्रूरोऽप्यगात् ॥ १६ ॥ वैकुण्ठं दृष्टवान् छन्दोभिः श्रीगोपालतपन्यादिभिः ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे अष्टाविंशोऽध्यायः ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

दर्शयामि न वेति चिन्तयन् यदकरोत्तदाह–इति सञ्चिन्त्येति । इति सन्देहतः सञ्चिन्त्य स्वलोकं दर्शयामास । कुत ? तत्राह—महाकारुणिकः । तत्सामर्थ्यमाह—विभुः सर्वशक्तिसम्पन्नः कीदृसम् ? तमसः परं निर्गुणम्; तमः शब्दोऽत्र गुणमात्रपरः ॥ १५ ॥ तदेव विशिष्य वर्णयति—सत्यं ज्ञानमित्यादि । सत्यम्, ज्ञानमवबोधस्वरूपम्, अनन्तमरिच्छिन्नम्, ब्रह्म चैतन्यरूपम्, ज्योतिः स्वप्रकाशकम्, सनातनं नित्यं सत्स्वरूपम् । यद्धि गुणापाये मुनयः पश्यन्ति (ऋक् १।२२।२०) 'तद विष्णो परमं पदं सदा पश्यन्ति सूरयः' (भा० ११।२०।३७) "क्षेमं विन्दन्ति मत्स्थानं यद्ब्रह्म परमं विदुः" इति च । ब्रह्माख्यं किमपि वस्तु तदेव तस्य स्वलोकः । उक्तञ्च–कैवल्यमिव मूर्त्तिमत्' इति वैष्णव सिद्धान्तमतानुवादः । उक्तञ्च भगवतैव–(भा० २।९।२१) मनीषितानुभावोऽयं मम लोकावलोकनम्" इत्यत्र मनीषिता तस्यैवेच्छा । एवं सति वृन्दावनमेव तथैव ददृशुः । भौमाभौमवैकुण्ठं यत् प्रागुक्तं तत्र भौमत्वं तिरोधाप्याभौमत्वं दर्शयामासेत्येषैव सूक्ष्मा दुर्बोधा गतिः पदवी । तस्यान्यथा (१२ श-श्लोक०) "अपि नः स्वगतिं सूक्ष्माम्" इत्यादिना कृतमनोरथेभ्यस्तेभ्यः स्वलोकं दर्शयामासेति वृन्दावनस्य स्वलोकाभावाद् विपरीतत्वमापद्यते ॥ १६ ॥ अथ तेऽपि तत्रैव ब्रह्माख्ये लोके मग्नास्तद्वासि-पार्षदवत् प्राणमनोवृति–रहितत्वेन केवलानन्द स्वरूपा यदाभवन्,

तदा कृष्णेनैव पुनरुद्धृताः प्राप्तेन्द्रियवृत्तयः कृताः सन्तः पुनरन्मदेव ददृशुरित्याह—ते त्वित्यादि । ते गोपाः प्राङ्मग्नास्तत्रव ब्रह्मानन्दे मग्नाः पश्चात् कृष्णेन त उद्धृत्य ब्रह्मह्रदञ्च नीता ब्रह्मणो लोकं नारायणलोकं ददृशुः । कोऽसौ ब्रह्मद्रुमः ? तत्राह–यत्राक्रूरोऽध्यगात् पुरा । शक परीक्षित कथनकालात् पूर्वमिति पुरा अक्रूरो यत्र यमुना ह्रदे मग्नः सन् यथा शेषपर्यङ्कशायिनं नारायणं ददर्श, पश्चात् श्रीकृष्णमपि ददर्श, तथैवामी इति । अथवा, यत्राक्रूरो द्रक्ष्यतीति कथयिष्यते तत्रैव पुरा पूर्वं ते ददृशुः ।। १७ ।। तत् पुनर्विशिष्य वदति—नन्दादय इत्यादि । तं नारायणलोकम्, तत्रैव छन्दोभिः स्तूयमानं नारायणरूपग्रहीतारं श्रीकृष्णं दृष्ट्वा सुविस्मिता वभूवुः ।। ।। १८ ।।

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे **अष्टाविंशोऽध्यायः** ।। २८ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

इति सञ्चित्य भगवानित्यस्यायं भावः (१२ श० श्लो०) “अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः” इत्यत्र स्वगतिं स्वस्थानं सूक्ष्मां प्राकृतैरदृश्यां ब्रह्मभूतां वा, स्वस्थानमेव तस्य ब्रह्म, (भा० ११।२०।३७) “क्षेमं विन्दन्ति मत्स्थानं यद्ब्रह्मपरमं विदुः” इति वक्ष्यमाणत्वात् इति तेषां संकल्पं विदित्वा ‘अहो ! भ्रमः मां दृष्ट्वापि द्रष्टव्यान्तराय स्पृहयति’ इति तेषां मोहे करुणावान् सन् स्वं लोकं दर्शयामास । कीदृश ? तमसः परम् ।। १५ ।। सत्यं ज्ञानमनन्तं सनातनं ज्योतिर्यद्ब्रह्म यद्धि ब्रह्म गुणापाये मुनयः पश्यन्ति, स एव तस्य लोकः ।। १६ ।। ते त्वित्यादि । ब्रह्म व ह्रदः पुनरुत्थानाभावात् कृष्णेन ब्रह्मह्रदं नीतास्ते अस्मिन् ह्रदे मग्नाः पश्चात् सुहृदो मे विपन्नाः कैः सह क्रीडितव्यमिति कृत्वा पुनस्तेनैवोद्धृता उत्तारिताः, ब्रह्मणि मग्नानां कुतः पुनरुत्थानमिति नाशङ्कनीयम् उभयोरपि तत्कर्तृकत्वात्, तस्य चाचिन्त्यशक्तित्वात् । एवम्भूताः शान्तास्ते पुनः किं कृतवन्त इत्याह—ददृशुरित्यादि । लोकं वैकुण्ठं ब्रह्मभूतं लोकं ददृशुरेव, न तु परमानन्दमवापुः यत्राक्रूरोऽध्यगात् पुरेति स्वामिचरणैरेवव्याख्यातम् । न विधते क्रूरा माया यस्य स तथा अक्रूरो नित्यपार्षदवर्गः, पुरा पूः शरीरं तया नित्य विग्रहः सन् अध्यगात् सेवितवान् ।। १७ ।। इदानीं तेऽप्यवतीर्णा इत्यतीत–कालविशेषः, अतो महाकारुणिकत्वं पूर्वोक्तं (१५ श० श्लो०) यत्तदेव स्फुटीकृतम्, अस्य दर्शनन्तु ब्रह्मसाक्षात्कारादपि परमानन्दकरमिति कृत्वा तथा कृतम् ।। १८ ।।

इत्यष्टाविंशोऽध्यायः ।। २८ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सत्यमबाध्यं ज्ञानमजडम् अनन्तमपरिच्छिन्नं सनातनं शश्वत् सिद्धं यत् मुनयो ज्ञानिनः गुणापाये गुणातीतत्वे सति पश्यन्ति वृन्दावनस्यापि ब्रह्मानन्दस्वरूपत्वेनैतादृशत्वेति मायाविभूतिमध्यवर्त्तित्वेनैव माधुर्य्याधिक्यं यथा दीपज्योतिषस्तमोमध्यवर्त्तित्वेन अत एव तमसः परं नतु तमोमध्यवर्ति सत्यज्ञानादिरूपं ज्योतिर्दर्शयामास किञ्च ब्रह्मस्वरूपतोपि विचित्रलीलामयं भगवत्स्वरूपमतिमधुरं शुकदेवादिभक्तात्मारामानुभवादवसीयते तच्च भगवद्वपुः सर्वव्यापकमपि परिच्छिन्नं षड्विकाररहितमप्यप्राकृतजन्मास्तित्ववृद्ध्यादिसहितं तरङ्गादिदोषशून्यमपि क्षुत्पिपासाप्रस्वेदभयमोहसांग्रामिकशस्त्रघातादिसहितमतर्क्यानन्तशक्तित्वादेव यथा तथैव “पञ्चप्रयोजनमेवास्ति वनं मे देहरूपकम्” इति भगवदुक्तेः वृन्दावनमपि ब्रह्मदृष्टानन्तकोटिब्रह्माण्डव्यापकमपि परिच्छिन्नं स्मरेत् पुनरतन्त्रितो विगतषट्तरङ्गावुध इत्यागमादिवाक्यात् तरङ्गादिदोषरहितमपि क्षुत्पिपासाजन्मजराच्छेदभेदादिमन्मनुष्यपशुखगनगादिकमपि नित्यमेव्येत्यनन्तचमत्काराश्रयमिति ।। १५ ।। एवं ब्रह्मह्रदं ब्रह्मैव ह्रद इव ह्रदस्तत्र निमग्नस्य विशेष ज्ञानाभावात् तं ब्रह्मह्रदं ते व्रजवासिनो नीताः प्रापिताः तदा ते तस्मिन् मग्नाः कृष्णेन तु उद्धृताः स्वातर्क्यशक्त्या ब्रह्मसायुज्यादपि उद्धृताः तस्मादुत्थापिताः सन्तस्तस्यैव ब्रह्मणो लोकं वैकुण्ठं च ददृशुः “लोकं विकुण्ठमुपनेष्यति गोकुलं स्म” इति द्वितीयोक्तेः । उद्धृता इति यथान्ये संसारह्रदादुद्धृताः सन्तो ब्रह्मानुभवन्ति तथैवामी प्रेमवन्तो गोपाः ब्रह्मह्रदादुद्धृता वैकुण्ठ लोकं ददृशुरिति सर्वस्वनाशवत्याः सायुज्यविपदः सकाशात् वैकुण्ठो निर्वृतिकर इति भावः प्रेमरहिताद्ब्रह्मसुखानुभवात् प्रेमसहितो वैकुण्ठसुखानुभवः श्रेष्ठस्ततोऽपिप्रेममयो गोकुलसुखानुभवः श्रेष्ठ इति सिद्धान्तो ज्ञापितः यत्र वैकुण्ठे पुरा अक्रूरोऽध्यगात् गतवान् स्वाभीष्टदेवं दृष्टवानिति वा शुकपरीक्षित् सम्बादात् प्राक्तनत्वाद्भूतनिर्देशः ।। १६ ।। तं वैकुण्ठलोकं दृष्ट्वा तु परमानन्दनिर्वृताः वैकुण्ठीयगोलोकस्थ वृन्दावनस्य वृन्दावनसाधर्म्यदर्शनादिति भावः । यथा हि कोटीश्वराः कदाचिन्नष्टसर्वधनाः सन्तो दैवात् क्वचिद्दृष्टस्वधनचिह्नाः परमानन्दनिर्वृता भवन्ति तथेत्यर्थः ततश्चास्मत्प्राणकोटिनिर्मन्थनीय मुखारविन्दप्रस्वेदविन्दुः कृष्ण क्वेति तदन्वेषणानुसन्धानवत्त्वे सति तं च ददृशुरित्याह, कृष्णं तत्रत्यैश्छन्दोभिमूर्त्तिमद्भिस्तूयमानं दृष्ट्वा सविस्मिताः हंहो कागच्छाम तावदेते ज्योतिर्मयाः स्तावका अत्र वृन्दावने खल्वपरिचीयमानाः प्रष्टुमस्माभिरशक्याः के । तन्मध्यवर्त्ती कृष्णश्चायमास्मान् अनेकान् पित्रादीन् दृष्ट्वापि बाल्यविलासं प्रपञ्चयन्न सन्निधत्ते नापि भुजाभ्यां नः कण्ठं धत्ते वयमपि सन्निधातुमेनमुत्सङ्ग मारोहयितुं च सङ्कुचाम किमनेनाद्य क्षुत् पिपासादैवलव्यं विस्मृतं मातास्य कथमेनमभोजयन्ती जीविष्यतीत्येवं विविधान्

विस्मयान् दधानास्ते लीलाशक्तिप्रेरितया योगमाययैपुनर्वृन्दावनमानिन्यिरे इति शेषः। एतत् प्रकरणस्यायमेवार्थः श्रीमत्प्रभुवररुपगोस्वामिचरणैः स्तवमालायामुपश्लोकितः सच श्लोको यथा—

"लोको रम्यः कोऽपि वृन्दाटवीतोनास्ति क्वापीत्यञ्जसा बन्धुवर्गम् ॥
वैकुण्ठं यः सुष्ठु सन्दर्श्य भूयोगोष्ठं निन्ये पातु स त्वां मुकुन्दः" ॥ इति ।

गोस्वामिव्याख्यानुसारेण व्याख्यातं व्याख्यानन्तरं तु वैष्णवतोषिण्यां द्रष्टव्यम् ॥ १७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । अष्टाविंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यस्य दर्शनं कार्यकारणरूपप्रकृत्यतिक्रमानन्तरं मुमुक्षूणां भवति तमिहैव दर्शयामासेति विरिमतः श्रीशुकः श्रीकृष्णाख्यं ब्रह्म वर्णयति, यो भवान् स्वं लोकं दर्शयामास कथंभूतः सत्यं यद्ब्रह्म किं प्रधानम् ? नेत्याह, ज्ञानं किं जीवतत्त्वम् ? नेत्याह, अनन्तम् ज्योतिः स्वप्रकाशम् सनातनं शश्वत्सिद्धं यत् गुणापाये गुणव्यत्यये हे समाहिताः ! पुनस्तदभ्युत्थाननिवारणे युक्ताः यद्ध्याने पश्यन्ति गुणापाये त्रिगुणाप्रपञ्चातिक्रमे वा यत्पश्यन्ति तद्ब्रह्म भगवान् श्रीकृष्णः स्वं लोकं दर्शयामासेति पूर्वेणैवान्वयः ॥ १५ ॥ कथं दर्शयामासेत्यत आह—तेत्विति। यत्रावयोः सम्वादात् पुराऽक्रूरः अध्यगात् दृष्टवान् तं ते तु नीताः तत्र मग्नाश्च तु शब्दः स्वयं बहिःस्थित एव ह्रदेऽपि तल्लोकाधिपतित्वेन तैर्दृष्टः इति सूचयति अत एवानन्तर श्लोके कृष्णं च दृष्ट्वेत्युक्तिः सङ्गताः मग्नाः सन्तः ब्राह्मणः श्रीकृष्णस्य लोकं ददृशुः चकाराद्बहिस्थितमपि श्रीकृष्णं तत्रापि ददृशुः पुनः उद्धृताः ॥ १६ ॥ सन्तो विस्मिता बभूवुरित्याह—नन्दादय इति ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टाविंशोऽध्यायार्थप्रकाशः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गोपा ब्रह्मणो लोकं ददृशुः। तच्च कृष्णादनन्यदित्याह ॥ सत्यमिति। सकलसद्भावप्रापकमबाधितमिति वा ज्ञानं संविदात्मकमनन्तमन्तत्रयशून्यं नित्यमबद्धं वा ब्रह्म गुणपरिपूर्णं ज्योतिः प्रकाशरूपं ज्योतिर्जातं जगद्‌तिरूपं यस्मिंस्तदिति वा सनातनं पुराणं वेदवेद्यं वा गतं। सत्यं ज्ञानमनन्तं ब्रह्म। परं ज्योतिः शाश्वतोऽयं पुराण इत्यादेः। यत्सर्वत्र यातीति व्याप्तमिति यत् बाह्ये यथा तथाऽन्तरपीति यद्वा। यथोक्तं बृहद्भाष्ये। यथा बाह्ये तथैवान्तस्ततो यदिति चोच्यत इति। ततत्वादन्यथाज्ञानं तीत्येवं समुदीर्यते। तस्याधस्तात्सदात्मा तु सादयन्ननृतं हरिः। उपरिष्टाच्च यन्नामा ह्यनृतं नाशयन्स्थित इति बृहद्भाष्यात्सत्यशब्दार्थो ज्ञेयः। भावेऽप्यभावे सूर्यादेर्जीवानां विष्णुरेव हि। ज्योतिस्तथाऽप्यभावे तु तज्ज्ञेयं हि विशेषत इति बृहद्भाष्याज्ज्योतिरर्थोऽनुसन्धेयः। गुणापाये गुणनिवृत्तावावरणापसरण इति यावत् यन्मुनयः गतं। न दूरे तदित्याह। समाहितं हृदयगुहानिहितं पश्यन्ति हीतीदं ज्योतिर्हृदय आहितं यदिति। तथा हिरण्मये परे कोशे विरजं ब्रह्म निष्कलं। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुरित्यादिमानान्यत्र भवन्तीति सूचयति ॥ १५ ॥ कथं तं लोकं ददृशुरित्यत आह ॥ त इति। ते गोपाः नीताः कृष्णेन स्वस्थलाद्ब्रह्महृदात्तं प्राप्य तत्र मग्ना आदौ सत्यादिपदवाच्यब्रह्माभिन्नं कृष्णमाचक्षतापश्यन्। अनन्तरं ब्रह्मणः कृष्णस्य लोकं ददृशुः। पुरा यत्र ब्रह्महृदः कृष्णमध्यगात्। कथायाः प्राक्तनत्वाद्ग्रथनस्य शुकपरीक्षित्संवादेनानन्तरिकत्वात्पुरेति सम्भवतीत्येके। चक्रवद्वर्तमानत्वाद्भूतपूर्वगत्येत्यपरे। यत्र ते गोपदा ददृशुस्तत्राक्रूरः श्वफल्कजः पूरोत्तरत्र। अध्यगादधिगमिष्यति। अतिनिश्चितत्वाल्लङुपपद्यते। यथोक्तमेतायामोपगव्यन्तमित्यृग्भाष्यटीकयोः। अतिनिश्चितेऽर्थे भूते शब्दश्चेत्याह सूत्रं परेशः। नन्वयामेति कोऽयं शब्दः। यातेर्लङि रूपमेतत्। लङ् भूते वर्तते। न चात्र तत्सम्भवतीत्यत आह ॥ अतीति। अतिनिश्चितेऽपि धात्वर्थे भूतत्ववाची शब्दः प्रयोक्तव्य इत्यस्यार्थस्य प्रतिपादकं सूत्रमाहेत्यर्थः। अन्यत्रैप्यत्तु निश्चितं यत्तदतीतत्वेन भण्यत इतीति। पुरा पुराणे निकटे प्रबन्धातीति भविष्यतीति विश्वः। तत्र स्नापयित्वा दिव्यं चक्षुश्च दत्वाऽनन्तरं स्वं दर्शयित्वा तद्योग्यतां वितार्य ब्रह्मणः स्वस्य लोकं दर्शयामास तान्प्रतीति भावोऽवसेयः। ब्रह्महृदं नीता इति पाठस्तु स्फुटार्थो युक्तश्चेति। तुर्विशेषद्योतकः ॥ १६ ॥ नन्दादयो गोपाः। तुशब्दस्तद्दर्शनतरतमभावो योग्यतातारतम्येनेति विशेषसूचकः। तं लोकं दृष्ट्वा तत्र छन्दोभिर्वेदैः स्तूयमानं कृष्णं च दृष्ट्वा सविस्मिताः सन्तः परमानन्दनिर्वृताः केचन परमानन्दाश्च केचन निर्वृता आनन्दिनश्चाभवन्नित्यन्वयो ज्ञेयः। यः परं स्वान्यज्जगद्दर्शनं कृत्वोपर्यागमनात्परमानन्दाः पुनर्मायया बन्धनं कृष्ण दृष्ट्वा निवृताः सुखिता विस्मिताश्च बभूवुरिति शेषः। परमानन्देन निर्वृता निभृताः परमानन्दो नितरां वृत्तो यैरिति वा ॥ १७ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे षड्विंशोऽध्यायः ॥ २६ ॥

श्रीसुबोधिनी

ततो दर्शनानन्तरं सर्वत्रैव तत् प्रकटं जातमिति गोकुलस्य सर्वस्यापि विलय एवाभूदतोग्रे लीला बाधिता स्यादिति पुनस्तेषां प्रत्यापत्त्यर्थं यत्नमाह ते त्विति, लोकस्य तिरोभावेपि तदात्मकांशस्य लोकस्य न तिरोभावः काष्ठाग्निवत्, तेषां पुनः

काष्ठतार्धज्वलितानामपि सम्पादनीयान्यथाग्रे लीला नोपपद्येत, तच्च वेदात्मके ब्रह्मणि योजिते भवति, तद्धि तस्य जलात्मकं, अत एव शब्दब्रह्मणो जलरूपता क्वचित् प्रकटीकृता तत्कार्यमिदमग्रे च वक्ष्यति, अतोक्षरात्मकानेतान् **ब्रह्महृदे नीत्वा** स्नानं कारितवान्, तदैतेषु स्थितोपि लोकस्तिरोहितस्तत्रापि **नीताः पुनर्मग्ना** जाताः, उत्तमाधिकारिणो हि ते शब्दब्रह्मात्मका एव जाताः, **क्रमश्चायं परब्रह्म** तदुत्थं शब्दब्रह्म तदुत्थं जगदिति, अत एवादूरविप्रकर्षण ज्ञापकं, ततोपि भगवतात **उदधृताः**, चकाराद् वेदैरपि भगवदाज्ञया अन्यथा **प्रमाणगृहीता लोलायां नोपयुक्ता भवेयुः**, तर्ह्य तावत् कृतं व्यर्थमेवासीदित्याशङ्क्य प्रयोजनार्थं जातमित्याह **ददृशुरिति**, **शब्दब्रह्मणो लोकं ददृशुर्यस्तदार्द्रनयनास्तस्य** न तावन्मात्रपरत्वमिति ज्ञापयितुं राजानं प्रति शुक आह **यत्रैव स्थानेक्रूरः पुरा पूर्वमध्यगाद्**, भगवत्स्वरूपमधीतवान् ज्ञातवानित्यर्थः, प्रमाणतस्तत्रैव परिज्ञातवानत एतेषामपि प्रमाणतो ज्ञानं कारणीयमिति तथा कृतवान्,

ब्रह्मानन्दान् महानन्दो भजने वर्तते स्फुटः। तारतम्यं च विज्ञातुं प्रदर्श्योद्धृतवांस्ततः ॥ १५ ॥

ततो यज् जातं तत्पर्यवसितमाह **नन्दादय** इति तं ब्रह्मलोकं **दृष्ट्वा नन्दादयः** प्राप्तस्वरूपाः **परमानन्देन निवृता** जाताः तद्धि सर्वाविद्यानाशकमावरणनिवारकमतः प्रमाणेन तदनुभूय **निर्वृताः**, पूर्वं त्वेकरसतामापन्नाः, किञ्च **तत्रापि** मध्ये कृष्णस्तं च वेदाः स्तुवन्ति, अत आह **च्छन्दोभिः स्तूयमानं कृष्णं दृष्ट्वा** परमाश्चर्यं प्राप्ताः, तस्याप्येतत् फलं वैकुण्ठस्याप्येतत् फलमिति ज्ञात्वेतराभिलाषं परित्यज्य परमाश्चर्यरसे निमग्ना जाताः ॥ १६ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे द्वितीये तामसप्रकरणेवान्तरसाधनप्रकरणे
सप्तमस्य स्कन्धादितः पञ्चविंशाध्यायस्य विवरणम् ॥ २५ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

ते तु ब्रह्महृदमित्यस्याभासे विलय एवाभूदिति। अयमर्थः। लोकस्याक्षरात्मकत्वेनानन्दरूपस्य सर्वत्राविर्भावेन सर्वेषां देहेन्द्रियप्राणान्तःकरणात्मस्वप्याविर्भावे प्रकटाग्निसम्बन्धात् काष्ठान्तर्गताग्निप्रादुर्भावे तस्याप्यग्निरूपतापत्त्या काष्ठताविलयवदेतद्देहादीनामप्यानन्दतापत्त्या देहादिभावविलयोऽभूदिति। **प्रत्यापत्त्यर्थमिति**। पूर्वभावसम्पत्त्यर्थमित्यर्थः। **तदात्मकांशस्येति**। सर्वत्राविर्भावात् तत्तद्देहादिष्वप्याविर्भूतांस्येत्यर्थः। **काष्ठाग्निवदिति** काष्ठान्तर्गताग्निप्राकट्यार्थं योऽन्योऽग्निस्तत्र प्रविष्टस्तस्यापि तदतिरोधाने तिरोधानं न यथा, तथेत्यर्थः। **अर्धज्वलितानामिति**। अत्रैवं ज्ञेयम्। व्रतवासिमनोरथपूर्त्यर्थं ब्रह्मानन्दाद् भजनानन्दे तारतम्यज्ञापनार्थं च स्वलोकस्य हि प्रदर्शनम। तारतम्यज्ञानं चाग्रे नैतन्स्मृतिं विना सभवति। सा चाधुनैतदनुभवं विना तथेत्यधुनैतदानन्दानुभवोऽपि वाच्यः। स च स्वस्मिंस्तद्भिन्नत्वाज्ञानं विनानुपपन्नः। एवं सत्यानन्दात्मकत्वं स्वस्य भेदज्ञानपूर्वकमक्षरानन्दानुभवश्चेत्यर्धज्वलितत्वम्। पुनः काष्ठता तु पूर्वोक्तदेहादिष्वाविर्भूतलोकस्य तिरोधानेन तत्सम्बन्धजनितानन्दात्मकत्वभानतिरोधानेन च यथापूर्वं स्थितिः। एवं करणस्यावश्यकतामाहुः **अन्यथेति**। तद्धेतुमाहुस्तच्चेति। अत्रायं भावः। ज्वलितांशस्य पुनः काष्ठतावदानन्दात्मकतामापन्नस्य देहादेः पुनर्जडभावो ह्यशक्यः। प्रकृते तु लीलोपयोगित्वात्सर्वेषां देहादिभावे सत्येव च तथात्वसम्भवाद्देहादिभाव प्रकृतिः, मुक्त्यवस्था विकृतिरेव। एवं सति विकृतिमपास्य प्रकृतिसम्पादकमेतादृशानां वेदब्रह्मैव भवितुमर्हति। कार्यस्यामर्यादत्वादेतदपि न मर्यादामध्यपाति तथा भवितुमर्हत्यतो यथा ह्रदा नद्यन्तर्गत एव प्रवाहाद् भिन्नः सन् सदातिनिर्मलः स्रवन्मकरन्दारविन्दोदयहेतुः सततमतिगभीरतया स्वान्तःपतितपदार्थपूरणपटुस्तथा वेदान्तःपात्येव मर्यादामार्गीयाद् भिन्नं सद्ब्रह्मत्वेन निर्दोषभजनानन्दानुभवहेतुविचित्रभावजनकं पुष्टिमार्गीयमेवेति ज्ञापनाय मूले वेदस्य ब्रह्मत्वं ह्रदत्वं चोक्तम्। एतदेवोक्तं **तद्धितस्य जलात्मकमित्यनेन**। न चाक्षरात्मकत्वेन लोकस्य तदानन्दवाचकं ब्रह्महृदपदमिति वाच्यम्, ब्रह्मानन्दस्य महत्त्वेन ह्रदस्याल्पत्वेन तत्त्वोक्त्यनुपपत्तेः। आनन्दपदं हित्वा ह्रदपदोक्तावश्यं तात्पर्यं वाच्यम्। तत्तूक्तरूपमेव संभवति। एतेनैवाक्षरपरत्वं ब्रह्मपदस्य निरस्तम्। तत्त्वस्य पूर्वमेवोक्तेश्च। मध्ये शब्दब्रह्म योजनायां हेतुमग्रे वक्ष्यन्ति **प्रमाणतो ज्ञानमित्यादिना**। एवं सत्यत्र ह्रदत्वमज्जनोक्तिभ्यां जलरूपतापि शब्दब्रह्मणोस्तीति मन्तव्यम्। तदाहु **रत एवेति**। एतस्यापि व्यापकत्वात् क्वचिद् गोकुलनिकटे प्रकटीकृतयेत्यर्थः। एवं कृतेरावश्यकतामाहुः **तत्कार्यमिदमिति**। एतादृशानां पूर्वभावसम्पादनलक्षणं कार्यं प्रमाणतो ज्ञानं च तदेकसाध्यमित्यर्थः। अत्रोपपत्तिमाहुरग्रे **चेति**। 'यत्राक्रूरोध्यगात् पुरे'त्यनेन। तत्र हि शब्दब्रह्मात्मके जले भगवत्स्वरूपं स ज्ञातवानिति। मज्जनपदार्थमाहुः **शब्दब्रह्मात्मका एव जाताः**। तत्र हेतु**रुत्तमाधिकारिण** इति। नन्वस्मादप्युद्धरणस्यावश्यकत्वे पूर्वस्मादेव किमिति नोद्धृत्य प्रकृतिभावं सम्पादितवानित्याशङ्क्य तत्र हेतुमाहुः **क्रमश्चाय**मित्यादिना। स्वकृतमर्यादास्थापनार्थं तथाकृतिरित्यर्थः। तमेवाहुः **परब्रह्मे**ति। परब्रह्मणा पूर्वं स्वस्मिन् स्थितं पश्चात् स्वस्माद्विभक्तं यद्वस्तु तच्छब्दब्रह्मात्मकं भवति। ततस्तेन तथा कृतं जगद्रूपं भवतीत्यर्थः। इदमत्राकूतम्। साक्षाल्लीलोपयोगि जगद्धि सच्चिदानन्दात्मकं स्वस्मिन् स्थितं क्रीडेच्छया स्वस्माद्विभक्तं करोति प्रभुः। यतोन्तःस्थितं न बहिःकार्यक्षमम्। तच्चानन्दस्वरूपाद्वियुक्तं सत् स्वरूपमलभमानमिव न किञ्चित्कार्यक्षमं भवति। तदा प्रवृत्तिनिवृत्तिभ्यामलौकिकीभ्यामलौकिकार्थसम्पादनक्षमं शब्दब्रह्मेति तदात्मकतायां लीलोपयोगि प्रवृत्तिनिवृत्तिक्षमं भविष्यतीति ज्ञात्वा तथा सम्पाद्योक्तसामर्थ्ये सम्पन्ने तस्य प्रमाणरूप-

त्वाल्लीलायां प्रवृत्तिनिवृती स्नेहाधीने इति न तदुपयोग इति तस्मादप्युद्धृता इति । एतदेवोक्तम**न्यथा प्रमाणगृहीता** इत्यादिना । लीला हि स्वतन्त्रा । एते प्रमाणाधीनत्वे विहितमेव कर्म कुर्युर्नेतरदपीति तत्रानुपयुक्ता भवेयुरित्यर्थः । यद्वा । प्रमाणमार्गगृहीतत्वं प्रमाणैकवशचित्तत्वम् । तच्च पुष्टिलीलाप्रवेशानधिकाररूपमेवेति तथेत्यर्थः । **तदार्द्रनयना** इति । जले निमग्नानामार्द्रे ते भवत एव । प्रकृते च तस्य शब्दब्रह्मात्मकत्वेन यादृशं श्रुतिसिद्धं भगवत्स्वरूपं तादृशमेव दृष्ट्वापि पश्यन्तीत्येतदेवार्द्रत्वम् । तदानन्दाश्रुभिरपि तथात्वं ज्ञेयम् । सर्वस्यापि प्रघट्टकस्य तात्पर्यरूपं गूढाभिसन्धिमुद्घाटयन्ति **ब्रह्मानन्दा**दिति ।

यद्वा । **ते तु ब्रह्मह्लदं नीता** इत्यस्याभासः । **ततो दर्शनानन्तर**मित्यादि । अत्रायं भावः । अक्षरानन्दाल्लीलात्मकानन्दस्याधिकत्वेऽप्येतेषां तद्रूपत्वेन तन्मध्यपातित्वेऽप्यक्षरानन्दस्येयदवध्यननुभवेन तारतम्याज्ञानाद् भगवता च लोकमध्य एव लीलाकरणात् स्वस्येतरलोकसाधारण्यं मन्यमानानां स मनोरथोभूत् । तत्पूर्त्यर्थं स्वलीलात्मकत्वांशं हस्तपिहितमिव कृत्वा साधारणीं रीतिं प्रकटितवान् । तस्यां तु सच्चित्प्राकट्यमेव जीवेषु, नानन्दांशस्य । तत्प्राकट्ये च ब्रह्मभावः सम्पद्यते । स चाक्षरानन्दांशभूतः । अक्षरानन्दाविर्भावे च जीवस्वरूपात्मकानन्दोपि तथाभूत् । बाह्याग्निसम्बन्धे दार्वन्तःस्थवह्निरिव । इदमेव विलयशब्देनोच्यते । अन्तरार्द्रदारुणो यथा बाह्यांश एवाग्नित्वम्, तथैतेष्वग्रे लीलायाश्चिकीर्षितत्वेन तदात्मकत्वमार्द्रतास्थानीयमतो नाक्षरानन्दात्मकत्वसम्पत्तिः । बाह्यांशस्थानीयो जीवत्वांश एव । इदमेवार्धज्वलितत्वम् । अक्षरानन्दानुभवार्थं लीलात्मकत्वं यल्लीलात्मककार्योन्मुखं कृतवानासीत् साधारणीं च रीतिमप्रकट्यत्तद्दूरीकृत्य पुनर्लीलाकार्योन्मुखत्वसम्पादनमेव काष्ठतासम्पादनम् । लोके ज्वलितांशस्य काष्ठता त्वशक्या कर्तुम्, अतस्तादृशमग्नितिरोधायकमपेक्षितं येन तत्तिरोधानं पुनः पूर्वरूपता च सम्पद्यते । तादृशं शब्दब्रह्मैव । अतो देहाद्यध्यासवत एव विषयीकृत्य देहधर्मरूपवर्णाश्रमधर्मान् कर्मज्ञानोपासनारूपान्निरूपयति । तत्सम्बन्धेऽक्षरानन्दाविर्भावाविर्भूतजीवस्वरूपात्मकानन्दतिरोभावेन जीवभावः सम्पद्यते । स चात्र पूर्वल्लीलोपयोगित्वमेव । मूले ब्रह्मणो ह्रदत्वोक्त्या तस्य च जलरूपत्वेनैतस्य जलात्मकत्वमुच्यते । जलनिर्वाप्योऽग्निरिति तदपनेयस्याक्षरात्मकत्वस्याग्नित्वनुच्यते । अतः क्वचिद् गोकुलनिकट एव शब्दब्रह्म जलात्मकं प्रकटितवान् । अक्षरात्मकतातिरोधानमेव तत्कार्यम् । उक्तेऽर्थे प्रमाणमाहुरग्रे च वक्ष्यतीति । 'यत्राक्रूरोऽध्यगात्पुरे'ति शेषः । तस्य जलमध्य एव तदवगमादेतद्वचनेन तदभेदोक्त्या ह्रदत्वोक्त्या च जलरूपत्वं शब्दब्रह्मणो निष्प्रत्यूहं गन्तव्यमिति भावः । सर्वांशेन तत्सम्बन्धज्ञापनार्था स्नानोक्तिः । **शब्दात्मका एव जाता** इति । ह्रदनयनोक्त्यैव तत्सम्बन्धप्राप्तावपि मज्जनोक्तेस्तदात्मकत्वमेव तस्यार्थ इति भावः । एवं करणे हेतुमाहुः **क्रमश्चाय**मिति । पुष्टिमार्गप्रवेशनक्रम इत्यर्थः । शब्दब्रह्मणः सकाशात्परत्वेनाक्षरब्रह्मैव परब्रह्मशब्देनोच्यते । तथा च 'मुक्तोपसृप्यव्यपदेशा'दादौ ब्रह्मभावाद्वैकुण्ठाद्वा पृथक्कृत्वा 'न स पुनरावर्तत' इत्यादिवाक्यैस्तादृशानां पुनर्देहादिसम्बन्धस्य मर्यादाश्रुतिविरुद्धत्वात्, ततोपि पृथक्कृत्वा पुष्टिलीलात्मकजगत्त्वसम्पादनमित्यर्थः । **अत एवेति** । पुरुषोत्तमस्वरूपं साक्षाद्वक्तुमशक्तं कार्यद्वारा स्वानुभवज्ञापनद्वारा वा शक्तमित्यर्थः । यथा चैतत्तथा 'मनोरथान्तं श्रुतयो यथा ययु'रिति दृष्टान्तव्याख्यानविवरणे प्रपञ्चयिष्यते । **चकारादित्यादि** । वेदास्तु मर्यादानिरूपकाः । ब्रह्मानन्दनिमग्नानां ततः पृथक्करणं न तत्सम्मतम् । अतः श्रीकृष्णाज्ञारूपपुष्टिश्रुतिसम्मत्या पुष्टिलीलापरिगृहीता नास्मद्विषयाः, किन्तु मर्यादामार्गीया एवेति स्वस्माद् भिन्नाः कृताः । तदेतदुक्तं **वेदैरपि भगवदाज्ञयोद्धृता** इति । तस्यावश्यकत्वायाहुरन्यथेति । मर्यादामार्गीयत्वे पुष्टावप्रवेशः स्यादित्यर्थः । **यतस्तदार्द्रनयना** इति । 'नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृता' इत्यनुपदमेव वक्ष्यमाणत्वात्तदानन्दाश्रुभिस्तथेत्यर्थः । अथवा । अग्रिमपदेनैतेषां प्रमाणतो ज्ञानकरणार्थं लोकं प्रदर्शितवानिति वक्ष्यमाणत्वाल्लोकदर्शनेन माहात्म्यज्ञानपूर्वकः स्नेह आर्द्रनयनत्वोक्त्या सूच्यते ।

नन्वेवं व्याकृतौ को हेतुः ? यथाश्रतव्याकृतेरपि साधीयसीत्वेन प्रतीयमानत्वात् । तथाहि । अतिगभीरत्वेन शुद्धत्वेन तापहारकत्वेन ब्रह्मानन्द एव ब्रह्मह्रदपदेनोच्यते । यथा ह्रदे मग्नो बाह्यमर्थं न जानाति, तथा तदानन्दभरेण देहाद्यनुसन्धानरहिता जाता इति ज्ञापनाय मज्जनोक्तिः । ततः कृष्णेन पूर्णानन्देन ततो गणितानन्दात्पृथक्कृताः देहाद्यनुसन्धानयुताः कृताः । तदा तल्लोकं ददृशुः । अत एव ब्रह्मण इति व्यस्तं पदमुक्तम्, दर्शनक्रियायाः पूर्वमसम्भवात् । एवं साधारणानां व्यवस्थामुक्त्वा श्रीनन्दादीनां विशेषत आह **नन्दादय** इति । किञ्च, 'दर्शयामासे'ति पूर्वं भगवत्कार्यमुक्त्वैतत्कर्तृकदर्शनं 'ददृशु'रित्यनेनोक्तम् । एवं सति तावत्पर्यन्तमेकवाक्यतैवोचिता, न तु वाक्यभेद इति चेत् । स्यादेतदेवं यदि दर्शयामासेत्युक्त्वा विषयस्वरूपं चोक्त्वानुपदमेव ददृशुरित्युक्तं स्यात् । उच्यते च ब्रह्मह्रदप्रापणं तत्र मज्जनं तत उद्धृतिश्चेति क्रियान्तरसमुदायः । तत्रापि तुशब्देन पूर्वार्थव्यवच्छेदपूर्वकम् । त्वदुक्तरीत्या तु दर्शनात्पूर्वमेव तदानन्दे मज्जनमुक्तं भवति, तच्च नोपपद्यते, हेत्वभावात् । किञ्च, दर्शयामासेत्यनेनैवैतद्दर्शनस्य प्राप्तेस्त्वदुक्तरीत्या पुनस्तस्यैव दर्शनं ददृशुरित्यनेन न वदेत् । तस्मादाचार्योक्त एव ग्रन्थार्थ इति ज्ञेयम् ॥

पञ्चविंशत्यध्यायविवरणं समाप्तम् ॥

इति साधनप्रकरणम् ॥

(४) श्रीमद्दीक्षितलालुभट्टयोजिता श्रीसुबोधिनीयोजना

ते तु ब्रह्मह्लदं नीता इत्यस्याभासे **गोकुलस्य सर्वस्य विलय एवाभू**दित्यस्यार्थष्टिप्पण्यां स्फुटः, पुनः प्रत्यापत्यर्थमित्यस्याप्यर्थः स्फुटः, ते तु ब्रह्मह्रदमित्यस्य विवृतौ **तदात्मकांशस्य लोकस्ये**त्यस्यार्थः, **काष्ठाग्निव**दित्यस्यार्थः, तेषां पुनः

काष्ठता अर्धज्वलितानामपि सम्पादनीयेत्यस्यार्थः, **अन्यथाग्रे लीले**त्यस्यार्थः, **तच्च वेदात्मकब्रह्मणी**त्यस्यार्थः, **तद्धि तस्य जलात्मक**मित्यस्यार्थः **अत एव शब्दब्रह्मणः जलरूपते**त्यस्यार्थस्ततकार्यमिदमेतस्यार्थः, अग्रे वेत्यस्यार्थः, **उत्तमाधिकारिणो हि हि ते शब्दात्मका** एवेत्यस्यार्थः **क्रमश्चाय**मित्यादेरर्थः, **अन्यथा प्रमाणगहोता** एतस्यार्थष्टिप्पण्यां स्फुटः, **ददृशुर्ब्रह्मणो लोक**मित्यस्य विवृतौ **तदार्द्रनयना** इत्यस्यार्थष्टिप्पण्यां स्फुटः, सुबोधिन्यां **शब्दब्रह्मणो** जलरुपतोक्ता सा तु युक्तैव, जलस्य शब्दात्मकतयाः स्फुटमभिधानात्, तथा चोक्तं पद्मपुराणे प्रयागमाहात्म्ये श्रीयमुनायास्त्रिंशन्नामात्मकस्तोत्रे "त्रयी रसमयी सौरी ब्रह्मविद्या सुधावहे"ति, अनेन श्रीयमुनाजलस्य वेदत्रयीरूपतोक्तेति जलशब्दब्रह्मणोरभेदो ज्ञातव्यः ॥ १५ ॥

इतिश्रीमद्गोवर्धनधरश्रीवल्लभाचार्यवरश्रीविट्ठलेश्वरचरणानुचरसेवकेन लालूभट्टोपनामदीक्षितबालकृष्णेन विरचिता
दशमस्कन्धपञ्चविंशाध्यायसुबोधिनीयोजना सम्पूर्णा ।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

ते तु ब्रह्महृदं नीता इत्यत्र **ब्रह्मानन्दादिति का० २४५३/४ ।स्फुटार्थकम् ॥**

इति पञ्चविंशोध्यायः ॥ २५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रकृतेः परं वेदप्रतिपाद्यं स्वरूपमेव वर्णयति – सत्यमिति । सत्यं परमार्थभूतम्, ज्ञानं चैतन्यरूपम्, अनन्तं देशकालपरिच्छेदरहितम्, ज्योतिः स्वप्रकाशम्, सनातनं शश्वत्सिद्धं गुणापाये गुणानां निरासे सति समाहिताः सावधाना मुनयः मननशीला ज्ञानिनो यत् पश्यन्ति यच्च वेदप्रसिद्धं ब्रह्म तत्स्वरूपं दर्शयामासेत्यन्वयः ॥ १५ ॥ प्रदर्शनप्रकारं प्रदर्शयन्नुक्तमेव स्पष्टयति ते त्विति द्वयेन । ते तु गोपा ब्रह्महृदं नीताः प्रापितास्तस्मिन्निमग्नाश्च सन्तो ब्रह्मणस्तस्यैव लोकं वैकुण्ठाख्यं ददृशुरित्यन्वयः । 'कोऽसौ ब्रह्महृद' इत्यपेक्षायामाह-यत्रेति । यत्र यमुनाह्रदे अक्रूरोऽध्यगात् वैकुण्ठादिकं दृष्टवांस्तस्यैव ब्रह्महृद इति नाम । शुकपरीक्षित्संवादात् प्राक्तनत्वात् पुरेति भूतनिर्देशः ॥ १६ ॥ नन्दादयो गोपास्तु तं लोकं दृष्ट्वा तथा तत्र लोके छन्दोभिः मूर्तिमद्भिर्वेदैः स्तूयमानं श्रीकृष्णं च दृष्ट्वा परमानन्देन निर्वृतः पूर्णा अभवन् । ततश्च पुनः श्रीकृष्णेन उद्धृताः समाधेरिवोत्थापिताः पूर्ववत्त दृष्ट्वा विस्मिता बभूवुरिति व्यवहितेनान्वयः ॥ १७ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने । अष्टाविंशो गतो वृति लोकदर्शनबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

देहादिविहितानां दर्शनमशक्यमिति प्रथमं देहादिव्यतिरिक्तं ब्रह्मस्वरूपं दर्शयामास । तदाह—सत्यमिति ॥ यत् सत्यमबाध्यं ज्ञानमजडमनन्तमपरिच्छिन्नं ज्योतिः स्वप्रकाशं सनातनं शश्वत्सिद्धं ब्रह्मगुणापाये गुसापोहे समाधिनिष्ठा मुनयो ज्ञानिनो यत्पश्यन्ति तत्कृपयैव दर्शयामास ॥ १५ ॥ त इति ॥ एवं ब्रह्महृदं ब्रह्मैव हृदवत् हृदः तत्र निमग्नस्य विशेषविज्ञानाभावात् तं ब्रह्महृदं ते तु नीताः प्रापितास्तस्मिन्मग्नाश्च कृष्णेनोद्धृताः समाधेरिवोत्थापिताः सन्तः ब्रह्मणस्तस्यैव लोकं वैकुण्ठाख्यं ददृशुः । यत्र यस्मिन् कृष्णे निमित्ते सति पूर्वमक्रूरोऽध्यगात् दृष्टवान् । शुकपरीक्षित्संवादात्प्राक्तनत्वाद्भूतनिर्देशः अथवा अक्रूरो यत्र दृष्टवान् तस्य यमुनाह्रदस्य ब्रह्महृद इति नाम । तं हृदं नीताः सन्तो ब्रह्मणो लोकं ददृशुः । पुनश्च कृष्णेनोद्धृताः पूर्ववत्तं दृष्ट्वा विस्मिता बभूवुः । व्यवहितान्वयोऽप्रसिद्धकल्पना च सोढव्येति ॥ १६ ॥ नन्दादय इति ॥ नन्दादयो गोपास्तु तं लोकं दृष्ट्वा तथा तत्र लोके छन्दोभिः मूर्तिमद्भिर्वेदैः स्तूयमानं श्रीकृष्णं च दृष्ट्वा परमानन्देन निर्वृताः पूर्णा अभवन् । पुनश्च पूर्ववत्तं दृष्ट्वा विस्मिता बभूवुः ॥१७॥

इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायामष्टविंशोऽध्यायः ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नंदादयः तत्र पूर्वोक्ते ब्रह्मपुरे स्थितं व्रजवासिनं कृष्णं तत्रस्थितैः छंदोभिः चतुर्वेदाद्यसंख्यातश्रुतिगणैः सूयमानं दृष्ट्वा परमानंदेननिर्वृताः संतः सूविस्मिता बभूवुः हरेर्ब्रह्मपुरनिवासे प्रमाणाणकारणं विष्मोर्धामपरमिति यद्गत्वाननिवर्त्तंते तद्धामपरमं ममेति गछंत्यमूढाः नवांतिवातान च यांति देवताः यत्र देवक्रतुभिर्भूतभावनः स्वयं विभूत्या विरजः प्रकाशतनियः सर्वज्ञः सर्वविद्यस्यैष महिमाभुविदिव्ये ब्रह्मपुरेह्येष सव्योम्न्पात्मा प्रतिष्ठित इति न तत्र चंद्रार्कवपुः प्रकाशते इति मुंडकोपनिषद्वचनानि योऽक्षरे संचरतीति दिव्ये ब्रह्मपुरे विरजं निष्फलं शुभ्रंयद्ब्रह्मविभातीति श्रुत्यंतरवचनानि निरस्तसाम्यातिशयेनराधसास्वधामनिब्रह्मणि रंस्यते नम इति ददर्शतत्राखिला सत्वतां पतिं स्वपार्षदमुख्यैः परिसेवितं विभुं किरीटिनं कुंडलिनमिति स्कांदवचनं सहोदितोर्कायुत वद्धास्वरे तत्र तेजसि वासुदेवं ददर्शासौरम्य दिव्यासिताकृतिमिति ब्रह्मवैवर्त्त प्रकृतिखंड वचनं ददर्शकृष्णं ग्रीष्मस्य कोटि सूर्यसमप्रभं द्विभुजं मुरलीहस्तं किशोरंगोववेशमित्यादि श्रुतिस्मृतयः ॥ १५ ॥ ब्रह्मपुरदर्शनप्रकार माहतेत्विति ते नंदादय

आदौ ब्रह्मरुदं ब्रह्मैव रुदवत् इदस्तं नीतैः प्रापिताः अत एव मग्नाः ब्रह्मतेज सिलीनतयास्थिताः पुनः कृष्णेन उधृताः अप्राकृतदिव्यदेहैः प्रकटीकृताः संतः ब्रह्मणः परब्रह्मणः श्रीकृष्णस्य लोकं ब्रह्मपुर स्वपार्षदैः सहस्वनिवासस्थानंददृशुः यत्रलोकेकृष्णानुभावेनपुरापूर्वं अक्रूरोध्यगात् गतवान् शुकपरीक्षित्संवादेन ब्रह्मपुर दर्शनस्य प्राचीनत्वाद् भूतनिर्दे शंकावकाशो नास्ति ।। १६ ।।

इति श्रीशुद्धकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने ब्रह्मपुरदर्शननामाष्टाविंशोऽध्यायः ।। २८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

लोकशब्दव्यवहृतं ब्रह्मपुरं विशिनष्टि ।। सत्यमिति ।। सत्यं सर्वदा अविनाशित्वेन वर्त्तमानं, ज्ञानं ज्ञानधर्मयुक्तं न तु जडम् । अनन्तमपारं, ज्योतिरनवधिकातिशयप्रकाशमयं, सनातनमनादिसिद्धं, यत् ब्रह्म ब्रह्मपुरसंज्ञं, श्रुतिस्मृतयो वदन्तीति शेषः । यद् ब्रह्मपुरं, गुणापाये प्राकृतगुणत्रयविनाशे सति, समाहिताः सावधाना मुनयः, विपश्यन्ति । अत्र प्रमाणानि 'एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम्, । 'एतत् सत्यं ब्रह्मपुरम्' 'दिव्ये ब्रह्मपुरे ह्येषः' । 'न तत्र चन्द्रार्कवपुः प्रकाशते न वान्ति वाता न च यान्ति देवताः । दिव्य ब्रह्मपुरे विरज निष्कलम्' 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' 'स्वधामनि ब्रह्मणि रंस्यते नमः । तद्वै पद भगवतः परमस्य पुंसा ब्रह्म' इति । तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् । विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः' । 'यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम' । 'गच्छन्त्यमूढाः पदमव्ययं तत्' । 'ब्रह्माख्यं धाम ते यान्ति' । इत्याद्याः श्रुतिस्मृतयः ।।१५।। ।। ते त्विति ।। ते गोपाः । तु, ब्रह्महृदं चिदानन्दसिन्धुह्रदं, नीताः भगवता प्रापिताः तदाज्ञया तत्र प्रविष्टा इति शेषः । मग्तास्तत्रैव निमज्जनतां प्राप्ताः ब्रह्मनिमग्नानां स्वतस्ततो निष्कमितुमशक्यतामालोच्येति शेषः । कृष्णेन च श्रीकृष्णेनैव उद्धृताः । कथंभूतो ह्रदः । यत्र ब्रह्महृद, पुरा अक्रूरः अध्यगात् गतवान् । शुकपरीक्षित्सवादात् प्राक्तनत्वाद् भूतवन्निर्देशः । यदा ते कृष्णेनोद्धृतास्तदन्तरमिति शेषः । ब्रह्मणा गुणावभूत्यैश्वर्यादिभिः सर्वेभ्या बृहतः श्रीकृष्णस्य, लोकं, ददृशुः ।। १६ ।। नन्दादय इति नन्दादयस्तु नन्दादयोऽपीत्यर्थः । त भगवल्लोक दृष्ट्वा, परमानन्दनिर्वृताः परमानन्दनिर्भरिताः आसन् । ततश्च तत्र ब्रह्मपुराख्यभगवतो लोके, कृष्णं च श्रीकृष्णमपि, छन्दोभिः मूर्त्तिमद्भिर्वेदैः, स्तूयमानं दृष्ट्वा, सुविस्मिताः सुतरां विस्मययुक्ताश्चाभवन् । ब्रह्मपुराख्यभगवल्लोकसंसिद्धौ भगवतस्तत्र निवासित्वे च प्रमाणानि, 'यः सर्वज्ञः सर्वविद्यस्तस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष स व्योम्न्यात्मा प्रतिष्ठितः । न तत्र चन्द्रार्कवपुः प्रकाशते न वान्ति वाता न च यान्ति देवताः । यत्र देवः क्रतुभिर्भूतभावनः स्वयं विभूत्या विरजः प्रकाशते' इति मुण्डके 'योऽक्षरे सचरति' इति सुबालोपनिषदि । 'दिव्ये ब्रह्मपुरे विरजं निष्कलं शुभ्रं यद्ब्रह्म विभाति' इति ब्रह्मोपनिषदि । 'स्वधामनि ब्रह्मणि रंस्यते नमः । ददर्श तत्राखिलसात्त्वतां पतिम्' इति । अत्र ग्रन्थ एव । 'सहोदितार्कायुतवद्भास्वरे तत्र तेजसि । वासुदेवं ददर्शासौ रम्यदिव्यसिताकृतिम्' इति स्कान्दे 'ददर्श कृष्णं श्रीष्मस्य कोटिसूर्यसमप्रभम् । द्विभुजं मुरलीहस्तं किशोरं गोपवेशकम्' इत्यादिश्रुतिस्मृतयः ।। १७ ।।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसुनुभगवत्प्रसादाचार्यविरचिता यामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे अष्टाविंशोऽध्यायः ।। २८ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ते तु ब्रह्महृदमिति : १०.२८.१६.

अस्मिन्नेव जडे ममास्ति वसतिर्गूढा नभोवद्विभोः प्रत्यक्षीक्रियतेऽत्र तैश्च भुवने ये मत्कृपागोचराः ।
इत्थं श्रुत्युपपाद्यर्थमखिलप्रत्यक्षतां प्रापयंश्चक्रे तज्जल एव तान् प्रति तदा लोकं स्वमीशः स्फुटम् ।। ३६ ।।
यद्यप्यखिले व्याप्तिस्तदपि ब्राह्माशयेष्वलं व्यक्ता । शंभोरिव तल्लिङ्गेष्विति तद्वदतत्प्रदर्शनाद् ध्वनितम् ।। ३७ ।।
तद्दर्शितात्मरूपेक्षासुखदं सुकृतं मम । नास्ति चेन्मास्तु तत्केलियोग्यमेवेश दर्शय ।। ३८ ।।

इति श्रीमन्नासिकनिवासि-कविवर-हरिसुरिविरचिते भक्तिरसायने अष्टाविंशोऽध्यायः ।। २८ ।।

कृष्णप्रिया

भगवान श्रीकृष्ण, उन ब्रजवासियों को ब्रह्महृद में ले गए । सारे ब्रजजन उस ब्रह्महृद में निमग्न हो गये ।। भगवानने कृपया उनका उद्धरण किया । उस निमज्जित भूमिसे उनको बाहर निकाला । यह ह्रद वह स्थान था कि जिस स्थानमें पहले श्री अक्रूरजीने भी श्रीयमुनाजलके भीतर भगवत्स्वरूप के दर्शन किए थे ।। १५ ।। राजन् परीक्षित् ! श्रीनन्दरायजी एवं गोपजन इस दिव्य ब्रह्मलोक का दर्शन पा कर अत्यन्त प्रमुदित हुए । यह लोक ऐसा दिव्य था कि दिव्य देह धारी सर्ववेद भगवान् श्रीकृष्ण की स्तुति कर रहे थे यह देखकर उन लोगों की आश्चर्य की सीमा न रही ।। १६ ।।

इति श्रीमद्भागवते दशमस्कन्धे तामसप्रकरणे हिन्दीभाषान्तरे अष्टाविंशोध्यायः सम्पूर्णः ।। २६ ।।

❧ ❧

श्रीहरिः

श्रीकृष्णः शरणं मम

श्रीमद् वल्लभाचार्यचरणा विजयन्तेतमाम्

श्री कृष्णद्वैपायन - वेदव्यास-महर्षिप्रणीतमनेकव्याख्या-समलङ्कृतं

श्रीमद्भागवत-महापुराणम्

सात्वत-संहिता

दशमस्कन्ध-पूर्वार्द्धः

निरोधलीलायां एकोनत्रिशंदध्यायतः पञ्चत्रिशंदध्यायपर्यन्तं

तामस प्रकरणे-चतुर्थ

फल-प्रकरणम्

आचार्यवर्याणां- प्रांचेतसाञ्च विविधाष्टीका :

संकलन कर्ता - भागवतऋषि : कर्दमऋषि शास्त्री

संपादक : परिवेषकश्च - कृष्णशंकर शास्त्री

प्रकाशक : श्रीभागवतविद्यापीठ :

वि.सं. - २०५४

श्रीकृष्णः शरणं मम

श्रीमद्वल्लभाचार्यचरणा विजयन्तेतमाम्

श्रीकृष्णद्वैपायन-वेदव्यास-महर्षिप्रणीतमनेकव्याख्यासमलङ्कृतं

श्रीमद्भागवतमहापुराणम्

सात्वतसंहिता

दशमस्कन्ध –पूर्वार्द्धः

निरोधलीलायां एकोनत्रिंशदध्यायतः पञ्चत्रिंशदध्यायपर्यन्तं
तामसप्रकरणे चतुर्थं
फल–प्रकरणम्

आचार्यवर्याणां-प्राचेतसाद्य विविधाष्टीकाः

* * *

कर्दमक्षमा (अन्वयः), श्रीधरस्वामिविरचिता—भावार्थदीपिका, श्रीवंशीधरकृतः—भावार्थदीपिकाप्रकाशः, श्रीमज्जीवगोस्वामिकृता—वैष्णवतोषिणी, श्रीमज्जीवगोस्वामिकृता—वृहद्वैष्णवतोषिणी, श्रीसुदर्शनसूरिकृतशुकपक्षीयम्, श्रीमद्वीरराघवाचार्यकृता—भागवत चन्द्रचन्द्रिका, श्रीमद्विजयध्वजतीर्थकृता–पदरत्नावली, श्रीमज्जीवगोस्वामिकृतः–क्रमसन्दर्भः, श्रीमज्जीवगोस्वामिकृतः—वृहत्क्रमसन्दर्भः श्रीनाथचक्रवर्तिपादविरचिता—चैतन्यमतमञ्जूषा, श्रीमद्विश्वनाथचक्रवर्तिकृता—सारार्थदर्शिनी, रसिकाह्लादिनी-टीका, विशुद्धरस-दीपिका, श्रीरामनारायणकृता—भावभावविभाविका श्रीधनपतिसूरिकृता—भागवतगूढार्थदीपिका, रास-रहस्यम्, गूढार्थदीपिनी, श्रीमच्छुकदेवकृतः–सिद्धान्तप्रदीपः, श्रीसत्यधर्मकृता—श्रीभागवतटिप्पणी, श्रीमद्वल्लभाचार्यचरणविरचिता—श्रीसुबोधिनी, श्रीसुबोधिनी—सारः, (१) श्रीप्रभुचरणविरचिता—श्रीटिप्पणी, गोस्वामिश्रीगिरिधरलालकृता—बालप्रबोधिनी, श्रीगङ्गासहायप्रणीता—अन्वितार्थप्रकाशिका श्रीगोपालानन्दमुनिविरचित–निगूढार्थप्रकाशव्याख्यानम्, श्रीभगवत्प्रसादाचार्यविरचितः–भक्तमनोरञ्जनी, श्रीहरिसूरिविरचितम्—श्रीभक्तिरसायनम्, इत्येताभिर्व्याख्याभिः कृष्णशङ्करशास्त्रिनिर्वातित–कृष्णप्रियाभाषानुवादेन—च समलङ्कृतम् ।

संकलनकर्त्ता—	**सम्पादकः परिवेषकश्च**
कर्दमऋषितनुजो भागवतः ऋषिः	**कृष्णशङ्कर शास्त्री**
विक्रम संवत्सरः २०५२	शालिवाहनः १९१४

सम्पादकः
कृष्णशङ्करः शास्त्री । श्रीभागवतविद्यापीठः । कृष्णधाम सोला । कर्णावती–३८२४८१

— श्रीभागवतविद्यापीठन्यासिपरिषद् —

कृष्णशङ्करः शास्त्री
जशवन्तराय उपाध्याय
गिरिधारीलाल महेता
दीपकभाई शेठ
इन्द्रकान्त परीख
नटवरलाल दलाल
पंडित देवेन्द्र विजय
शान्तिलाल शाह
नरेन्द्रभाई शास्त्री
सुरेशभाई व्यासः
क्षमा कर्दम शास्त्री
दिनेशभाई महेता
जयंतिलाल रामराम
भोगीलाल यादव
भागवत शास्त्री
गांडाभाई पटेल

— सर्वेऽधिकाराः श्रीभागवतविद्यापीठाधीनाः —

प्राप्तिस्थानानि

श्रीभागवतविद्यापीठ :	कृष्णधाम : सोला : कर्णावती अ. ३८२४८१ दूरध्वनि ७४७३८३९
श्रीमती वीणावहिन मनहरलाल	५ आनंद, ५ वाँ रोड नबयुग सोसायटी वीले पारले मुम्बई ५६ टे. नं. ६१४२६५३
सरला दलाल	३५–न्युनवरंग ३ मजला पेडररोड मुम्बई–२६ दूर० ३८८२४३३
श्री वल्लभनिधि कार्यालय :	३०२ रीलीफ शोपींगसेन्टर जी. पी. ओ. पास कर्णावती अ. १ ५५०२९४३

मुद्रकः—आचार्य मुद्रणालय ए १/१२ गायघाट, वाराणसी ।



श्री गोवर्धननाथजी

जगद्गुरु श्रीमद् वल्लभाचार्य वंशावतंस
सप्त-स्वरुप-महोत्सव-कर्ता
आचार्यवर्य गोस्वामी तिलकायत

श्री १०८ श्रीगोविन्दलालजी महाराज

नाथद्वारा (राज.)

जन्मतिथि : मार्गशीर्ष : कृष्ण : ७ संवत् १९८४
दिनांक : १५ : नवम्बर सन् १९२७

श्रीहरिः

—श्री गोवर्धननाथो विजयतेतमाम्—

समाधिभाषा–सात्वतसंहितायाः श्रीमद्भागवतस्य दशमस्कन्धस्य निरोधलीलायाः फलप्रकरणोपायनप्रस्तावे
सुमनोभ्यः श्रीगोस्वाभिवर्येभ्यः १०८ श्री गोविन्दराजमहाराजतिलकायतेभ्यः सप्रश्रयं सुमनसा—

सुमनसामञ्जलि

व्योमस्तम्भगिरेरतीवनिकटे कृष्णातटे भारते
भारद्वाजकुले वरेण्यचरिते कृष्णे यजुर्वैदिके ।
दिव्ये श्रोत्रियधर्मकर्मनिरते वेल्लाटनाडोगृहे
जाता लक्ष्मणदेशिका ऋषिवरास्तेषां वदान्यान्वये ॥ १ ॥
श्रीकृष्णः करुणानिधी रसमयो वंशीकरः श्रीवरः
सौन्दर्याम्बुदगौरदिव्यवसनः स्रग्वी रमावल्लभः ।
दैवीजीवदयावशः परवशान् दृष्ट्वा कलौ चर्षणीन्
उद्धर्तुं किल नन्दनन्दनविभुः कृष्णास्यरूपोऽभवत् ॥ २ ॥
स्वयं सर्वज्ञः सन् गुरुकुलनिवासस्य नियमात्
कृतः काश्यां वासः सफलतपसैकादश समाः ।
अधीत्याध्यात्मत्वं विमतमतवादान् विजयता
मतं शुद्धाद्वैतं श्रुतिमतमभिस्थाप्य भुवने ॥ ३ ॥
जयो लब्धः स्नेहात् विबुधपदपद्मादरवता
चतुःप्रस्थानेषु सकलसुखबोधाय सरलम् ।
कृतं भाष्यं पश्चाच्छरणपथमादिश्य भुवि यः
चरन् श्रीकृष्णास्यः जयतु विशदादर्शचरितः ॥ ४ ॥
तेषां कुलेऽष्टादशमे, उदारा गोविन्दरायास्तिलकायता नः ।
आचार्यवर्येषु सदाग्रगण्याः नैषां गुणानां महिमानुवर्ण्यते ॥ ५ ॥
पुरोत्तमश्लोकपदानुरक्तावजातशत्रू स्पृहणीयशालौ ।
कौन्तेयकायाधवसत्तमाख्यौ श्रुतौ समैः किन्तु न नेत्रगोचरौ ॥ ६ ॥
हरेः कृपातोऽवनिमण्डलेऽद्य श्रीनाथपादार्चनलब्धदीक्षान् ।
गोविन्दरायान् तिलकायताख्यान्-अजातशत्रूनवलोकयामः ॥ ७ ॥
तेषां गुणैस्तच्चरितानुरक्तैराकृष्टचित्तैश्चरणानुरक्तैः ।
तेषां सुधन्ये करकञ्जसम्पुटे निरोधलीलासुफलं समर्प्यते ॥ ८ ॥
उदारवृत्तास्तिलकायताः श्री राधाधरस्वादनलोलुपस्य ।
लावण्यधाम्नो ललिताप्रियस्य कुर्वन्तु हस्ते सदुपायनं तत् ॥
पुनः पुनः सन्तु प्रणामपुञ्जाः आचार्यवर्याङ्घ्रिसरोजरेणुषु ।
अङ्गीकृतास्तैः कृपयाकृपालुभिः कृताः कृतार्थाः करुणार्द्रदृष्ट्या ॥

श्रीरघुनाथगाथासत्रविश्वशान्तिमङ्गलप्रस्तावः
उद्गाता पुण्यलोक श्रीमुरारि बापू
श्रीभागवतविद्यापीठः कर्णावती पुरी
मार्गशीर्षकृष्णैकादशी २०५१

तदीयजनपदसरोजरेणुरकिञ्चनः
किङ्करः कृष्णशङ्करः
दासानुदासः भागवत ऋषिः
साष्टाङ्गं प्रणमतः उभौ ।



परम भागवत श्री रामकृष्ण जी डालमिया

श्रीहरिः

श्रीगोवर्द्धननाथो विजयतेतमाम्

श्रीनाथचरणाम्बुजयोः तुलसीदलानि

तत्र किल भगवाननुश्रवो हि निरपेक्षो निरूपमो निरुपाधिर्निरुपधिरनादीनवोऽपौरुषेयो निरवधिः शेवधिः सर्वविधानाम्। अयमेव पीयूषपारावारो हि वेदश्रुतिनिगमादिभिरभिधानैरभिधीयते। लम्भनबोधनज्ञानसत्ताद्यर्थवाचकाद् विद्धातोर्वेदशब्दो निष्पद्यते स किल सच्चिदानन्दार्थमेव प्रतिपादयति। अस्मिन् निरवद्ये पीयूषार्णवे चिन्तामणिनिभानि सर्वानन्दप्रदायकानि तत्वज्ञानमयानि भास्वन्ति सन्ति रत्नानि न तानि गीर्वाणगुरुणा गिरा वा निर्वक्तुं वचसाऽपि शक्यानि। लौकिकमलौकिकं किमपि सुखं वा लौकिकोऽलौकिको वाऽऽनन्दस्तदनुशीलनात् तदुदिताऽनुष्ठानाच्चिन्तनादत्रोपलभ्येत।

आनन्दस्यास्ति महाननुभावो यत् प्राणिन आनन्दस्य मात्रामेवोपजीवन्ति किन्तु ते परमानन्दानुभूतिमेव मन्वतेऽत आनन्दस्य स्वरूपमवगन्तव्यम्। तत्वचिन्तनानुसारमानन्दस्तु केवलमेकविधस्तथापि लोके त्रिधाभिगीयते। विषयानन्दः-ब्रह्मानन्दः-भजनानन्दश्चेति त्रिधा व्यवह्रियते।

लौकिकानन्दस्तु क्षणिकः क्षुल्लकः परिणामपरमदुःखदायी तस्माच्छास्त्रे न समादृतः। न सद्भिश्चिन्तितः यो हि वेदविहितः सर्वहितोऽन्तरात्मनिनिहितः स एव ज्ञेयो ध्येयो विमर्शनीयश्च। कस्तावद् ब्रह्मानन्दः को वा भजनानन्दः कियदन्तरमुभयोः किं वा स्वरूपमिति जिज्ञासायां श्रुतिरेव प्रमाणं शब्दप्रमाणस्यैवाप्तत्वात् प्रामाणिकत्वान्निर्दोषत्वाच्च। सर्वाणि भूतानि ह्यानन्दस्य मात्रामुपजीवन्ति श्रुतिवचनादानन्दस्य महिमानं को जानीयाद्वा कथं वक्तुं शक्यते।

उपनिषत्सु श्रूयते सैषाऽऽनन्दस्य मीमांसा तद्यथा

श्रीकृष्णयजुर्वेदीयस्य तैत्तरीयाऽऽरण्यकस्य सप्तमाष्टमनवमप्रपाठकाः श्रीतैत्तरीयोपनिषन्नाम्ना ह्याख्यायन्ते। तत्र सप्तमः प्रपाठकः शीक्षावल्ली (शिक्षावल्ली) ति संज्ञयाऽपि व्यवह्रियते। तस्य प्रपाठकस्य "सांहिती" उपनिषदित्यपराऽपि संज्ञा वर्तते। अष्टमनवमप्रपाठकयोर्ब्रह्मानन्दवल्ली भृगुवल्लीत्यपरे संज्ञे वर्तेते। दशमस्य प्रपाठकस्य नारायणोपनिषन्नामाऽपि वर्तते। नारायणोपनिषद्याज्ञिक्युपनिषदस्ति। तत्राष्टमनवमोपनिषदोर्वा प्रपाठकयोर्वारुणी" उपनिषदिति नामाऽपि वर्तते। वरुणो भगवानस्य ब्रह्मर्षिविद्यासम्प्रदायस्य प्रवर्तकः। तयोरुभयोर्वल्लयोर्ब्रह्मर्षिविद्येत्यभिधानमस्ति।

अस्यां विद्यायां ब्रह्मानन्दस्य मीमांसा श्रूयते। तत्राऽऽनन्दस्य श्रेणीमाह—

युवा स्यात् साधु युवाऽध्यापकः। आशिष्ठो दृढिस्थो वलिष्ठः। तस्येयं पृथिवी सर्वा पूर्णा स्यात्। स एको मानुष आनन्दः। ये ते शतं मानुषानन्दाः स एको मनुष्यगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य। ये ते शतं मनुष्यगन्धर्वाणामानन्दाः स एको देवगन्धर्वाणामानन्दः श्रोत्रियस्य चाकामहतस्य। ते ये शतं पितॄणां चिरलोकलोकानामानन्दाः स एक आजानजानामानन्दः श्रोत्रियस्य चाकामहतस्य ॥ २ ॥

ये ते शतमाजानजानां देवानामानन्दाः स एकः कर्मदेवानां देवानामानन्दः श्रोत्रियस्य चाकामहतस्य। ये शतं देवानामानन्दाः स एकः इन्द्रस्यानन्दः। श्रोत्रियस्य चाकामहतस्य ॥ ३ ॥

ये ते शतमिन्द्रस्यानन्दाः स एको बृहस्पतेरानन्दः श्रोत्रियस्य चाकामहतस्य ये ते शतं बृहस्पतेरानन्दाः स एकः प्रजापतेरानन्दः श्रोत्रियस्य चाकामहतस्य ॥ ४ ॥

"आनन्दो ब्रह्मेति व्यजानादिति श्रुतेः" आनन्दादेव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति। आनन्दं प्रत्यभिविशन्ति। सैषाऽऽनन्दस्य मीमांसा। इदमत्र निश्चीयते यद् ब्रह्मादिपर्यन्ताः सर्वे सचेतना आनन्दं कामयन्ते तथाऽऽनन्दाय यतन्ते। भगवत्या श्रुत्योपनिषदा चानन्दस्य मीमांसा दर्शिता।

बहवः सन्त्युपायाः शास्त्रविहितास्तेषु ज्ञानभक्तिभ्यामेवानन्दप्राप्तिः सुनिश्चिता। अन्ये ये सन्ति सदुपायास्तेषां तयोः सम्यगन्तर्भावो भवत्येव तेन न ते चिन्त्याः। ज्ञानमार्गिणो मोक्षकामा भक्तिमार्गिण भगवल्लोककामाः। ज्ञानैकधना ब्रह्मानन्दं गणितानन्दमश्नुवते सेवैकपरायणाः श्रीकृष्णं प्राप्नुवन्ति सेवन्ते। समर्पणसेवैकशीलास्ते तु सालोक्यादि चतुष्टयं भगवता दीयमानं

न गृह्णन्ति तर्हि परेषां पदार्थानां का कथा। ब्रह्मानन्दो हि निजानन्दस्वरूपो वाऽऽत्मानन्दस्वरूपो ब्रह्मविद्भिरुपालभ्यते मनोनिग्रहादिभिर्ब्रह्मचिन्तनादिभिर्ध्यानधारणादिभिस्तत् तच्छास्त्रनिर्दिष्टैरुत्कृष्टैरूपायैरेव किं तु तत्राप्यनुग्रह एव कारणम्।

भजनानन्दस्तु मनोमोहनस्यानुवृत्तिवृत्योपलभ्यते। पुनः निगमकल्पतरोः रसैकमयस्य चरमस्य परमस्य फलस्याऽऽसेवनानुशीलनश्रवणादिभिरनुपदमेवाप्यते। तस्य चरमस्य रसैकरूपस्य फलस्य समाधिभाषा-सात्वतसंहिता-महापुराणं-पुराणार्कः–पुराणतिलकं-ब्रह्म-वाङ्मयविग्रहो नामात्मकस्वरूपं श्रीमद्भागवतं श्रीमद्भागवताऽऽख्योऽयं प्रत्यक्षः कृष्ण एव हि इत्यादीनि बहून्यभिधानानि सूरिचरणैराख्यातानि हितानि तानि चानेकैस्तत्वज्ञैर्विज्ञातानि भवेयुः। निगमकल्पतरोर्गलितं फलमिति श्रीकृष्णद्वैपायनमहर्षिभिरेव फलाभिधानमभिधायि। फलेभ्योऽन्येभ्योऽस्य फलस्येदमत्र वैशिष्ट्यं वैलक्षण्यञ्च यदस्मात् किञ्चिदपि त्वगादिकं हेयं न भवति किन्तु सर्वमेवादेयमास्वाद्यञ्च भवति रसैकरूपत्वात्। किं बहुना यदशेषशेमुषीजुषां वाऽशेषशेमुषीमुषितानां वा वारिवासिनां वारिजानिवासिनामखिलजीवजन्तूनां वा नभस्वदधिवासिनां नराणाममराणां पामराणां नाऽतलातलनिवासिनामखिलजीवजन्तूनामर्थागोचरत्वेऽपि केवलं कर्णगोचरत्वेन कैवल्यप्रदा वाऽशेषानन्ददानपरायणेयं सात्वतसंहिता।

यदुक्तं पाद्मे—अलौकिकोऽयं महिमा मुनीश्वराः सप्ताहजन्योऽद्यविलोकितो मया।
मूढाः शठा ये पशुपक्षिणोऽत्र सर्वेऽपि निष्पापतमा भवन्ति॥

सन्त्येतानि मङ्गलवाचकानि बहूनि वचांसि। यावान्महिमा श्रीकृष्णस्य तावानेव महिमा श्रीमद्भागवतस्य। द्वादशाऽङ्गोऽयं पुरुष इति वचनादुभयोरभेदः। एकस्तावद्भगवतोऽर्चाविग्रहः सेव्यस्वरूपः। अपरो भगवतो वाङ्मयो विग्रहः सेव्यः स्मर्तव्यः कीर्तितव्यो निदिध्यासिव्यः श्रोतव्योऽपि।

तत्र भगवान् श्रीकृष्णस्तु पूर्णपुरुषोत्तमो नन्दनन्दनगेहे नन्दयशोदोत्सङ्गलालितस्वरूपेण रसस्वरूपेणाविर्बभूव। एवमेव श्रीवसुदेवगृहे व्यूहसहितः पुरुषोत्तमः प्रादुर्बभूव। उभयत्र सारस्वतकल्पे पूर्णपुरुषोत्तम एवावततार वसुदेवगेहे वंशविस्तार खलसंहारादीनि व्यूहकार्याण्यासनतस्तद्रूपेण भगवानवतीर्णः। ब्रजे केवलो नन्दनन्दनः। भगवदादेशेन श्रीमानानकदुन्दुभिर्व्यूहात्मकं पुरुषोत्तमं नीतवान् तस्मिन्नेव पुरुषोत्तमविग्रहे भगवानाविवेश तेन रूपद्वयं नाभवत्। यदा नेतुमक्रूरताता उपस्थितास्ते तु स्वभ्रात्राऽऽनककुन्दुभिना स्थापितास्तानेव नीतवन्तः। केवलानन्दविग्रहो नन्दनन्दनस्तु व्रजे नित्यमेव निवसति। "कृष्णस्तु केवलां लीलां करोति रसरूपिणीम्। भूभारहरणं चक्रे कलाभ्यामेव सर्वथा।" वासुदेवव्यूहस्वरूपेण ज्ञानं यच्छति संकर्षणव्यूहेनासुरनिकन्दनं प्रद्युम्नस्वरूपेण वंशं विस्तारयितीति विवेकः। व्यूहात्मको नित्यं वसुदेवगृहेऽतिष्ठत्। केवलो रसानन्दविग्रहो नित्यं व्रजेऽवसत्। रासलीलाविहारादिकं पूर्णानन्दमयः श्रीपुरुषोत्तम एव चक्रे। अक्रूरचरणा भगवन्तं वासुदेवमनयन्। तथापि "पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥ इति श्रुत्यनुसारं पूर्णा एव व्रजे स्थिताः पूर्णा एव वसुदेवगेहे गताः।

अस्याऽऽनन्दविग्रहस्य श्रीकृष्णस्य वाङ्मयविग्रहस्य श्रीमद्भागवतस्य दर्शनं समाधौ श्रीकृष्णद्वैपायनव्यासाः श्रीदेवर्षिचरणानामनुनयेन समस्तानां लोकानामत्यन्तानन्दाऽऽप्तये प्राचीसरस्वतीतीरे शम्याऽऽप्रासाश्रमे चक्रुः। चक्रे सात्वतसंहितामितिवचनं मानम्। तस्योपरि संस्कृतभाषायां १४४ टीका आसन्। काश्चन कालेन कवलीकृताः तर्हि काश्चन कालक्रूरैर्यवनैर्भस्मीकृताः। महता प्रयत्नेन महत्पुरुषैः संरक्षिता सम्पादिताः वाराणस्यां सरस्वतीसंग्रहालये वटपत्तने राजकीयपुस्तकालये मद्राससङ्ग्रहालये वृन्दावनपुस्तकालये एवं विविधस्थलेषूपलभ्यन्ते। ते कृतिनो धन्यवादार्हास्तेषामुपकारभारानेवं शास्त्रानुरागांश्च कथं वयं विस्मरामहे। तासु श्रीधरस्वामिपादानादाय रूपगोस्वामिजीवगोस्वामिवीरराघवविजयध्वजचित्सुखाचार्यवर्यश्रीमदाचार्यतरणि श्रीमद्वल्लभाचार्य श्रीविठ्ठलेश श्रीप्रभुचरण श्रीपुरुषोत्तम प्रभुचरण प्रभृतीनाचार्यपादान् भूयोभूयो नमामः।

श्रीमद्भिर्वल्लभाचार्यचरणैस्तत्वदीपनिबन्धे भागवतार्थनिबन्धे पुनश्च श्रीसुबोधिनी महाभाष्येऽतीव चिन्तनीयानि विवेचनानि समालोचितानि। तैरित्थं विवेकः प्रदर्शितः श्रीमद्भागवतं भगवतो व्रजनन्दस्य वाङ्मयविग्रहः। तत्र दशमस्कन्धः श्रीकृष्णचरणानां हृदयं निरोधाऽभिधम्। तेषामयमादेशः—निगमकल्पतरोः फलं श्रीमद्भागवतम्। तच्चानन्दविग्रहस्य द्वादशाङ्ग स्वरूपं तत्र दशमः स्कन्धः श्रीयशोदोत्सङ्गलालितस्य ललिताविशाखाचन्द्रावलीमञ्जुभाषिण्याप्याद्याभीरकन्याभिरभिसेवितस्य श्रीराधाधरसुधापानचतुरातुरचञ्चरीकस्य पुण्डरीकवदनस्य व्रजनन्दनस्य श्रीकृष्णस्य सर्वरसमयं हृदयम्। हृदयस्यापि हृदयं फलस्याऽपि फलं रहस्यस्याऽपि रहस्यं किल रासलीला। तत्र दशमे स्कन्धे जन्मतामसराजससात्विकगुणाभिधानि पञ्चप्रकरणानि सन्ति। क्रमशस्तेषु ४–२८–२८–२१–६ अध्यायाः सन्ति तत्र त्रयोऽधिकाः कल्पान्तरकथाया इत्याहृत्य नवतिरध्याया निरोधलीलायाः। द्वितीयस्य प्रकरणस्य तामसप्रकरणमिति संज्ञा। तामसशब्दस्तावद्भक्तिसम्प्रदायस्य रूढः। येषां भक्तानां समीपे भगवत्प्राप्तये ज्ञानं तपो योगः त्याग इत्यादीनि साधनानि न विद्यन्ते केवलमनुरागः स्नेह एकमेव साधनं तेषां निरोधाय कृपया तदनुकूलं भगवता चरितमाचरितं तेन तल्लीलानां तामसलीलेति संज्ञा।

तामसलीलायां चत्वार्यवान्तरप्रकरणानि प्रमाणप्रमेयसाधनफलसंज्ञकानि सन्ति। तत्र चतुर्थं फलप्रकरणं यस्मिन् सप्ताध्यायाः। रूपरमणस्य पञ्चाध्याया नामरमणस्याऽध्यायद्वयी। प्रथमस्य रासपञ्चाध्यायीति प्रसिद्धा संज्ञा। लीलेयं रसमयी रहस्यमयी परमानन्दमयी किन्तु सामान्यजनानां कृते तु सन्देहमयी। रासलीलायां प्रथमं रासशब्दार्थः विचारणीयः। "रसो वै सः" स सर्वरसः "स सर्वगन्धः" रसमेवं लब्ध्वा ह्यानन्दी भवति" सदेव सौम्य इदमग्र आसीदित्यादिश्रुतिभिर्ब्रह्मण एव रसत्वं बोध्यते। कोशेषु रसशब्दस्यानेकेऽर्था निर्दिष्टाः—यथाहि रसनाग्राह्ये गुणे-स्वादे-द्रवद्रव्ये-सारभूते पदार्थे-लौकिकसुखे-स्वर्गादिकविलाससुखे-संगीतादि– श्रवणानन्दे-नाट्याद्यभिनयावलोकनाह्लादे-साहित्यरसे-रतिरमणे-ब्रह्मणि-मोक्षे-ब्रह्मानन्दानुभूतौ-भजनानन्दे च रसशब्दो व्यवह्रियते। तेष्वर्थेषु प्रकृते कोऽर्थो ग्राह्यो वा विवक्षित इत्याकाङ्क्षायां "रसमेवं लब्ध्वा ह्यानन्दी भवति को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयति" इत्यनेन रसस्यानन्दत्वं प्राणधारणप्रयोजकत्वं हृदयाकाशस्थत्वमानन्दजनकत्वं च तस्य बोध्यते। तेन हृदयस्थः प्राणिनामानन्दजनको य आनन्द स रस इति सिद्ध्यति। तत्र यद्यपि आनन्दोत्पत्तिरूपस्य कार्यस्य तत्तदवयवेषु ह्यनुभूयमानत्वेनानन्दरूपस्य सर्वशरीरस्थत्वं तथाप्युक्तश्रुत्या सः मानसीन आत्मा जनानाम्" इति श्रुत्यन्तरेण च मनस्येव तस्य विशेषतः स्थितिरिति निश्चीयते। एवं सति रसप्रणाल्या जायमानो यो मानसो विकारः प्रमोदात्मा सः किल रसात्मनो भगवतो नन्दनन्दनस्य श्रीकृष्णस्यएव कार्य भूतः "एष ह्येवानन्दयति इति सावधरणश्रुतेः तथा तदंशभूतश्च "एतस्यैवानन्दस्यान्यानि मात्रामुपजीवन्ति" इति श्रुतेर्निश्चीयते। आनन्दः भजनानन्दः रसः श्रीकृष्णः श्रीनन्दनन्दनः परंब्रह्मेति पर्यायाः वा ह्येकार्थवाचकाः शब्दाः।

रसविषये तु श्रीमदाचार्यचरणा आहुः "रसस्तु तच्छास्त्रसिद्ध एव गृह्यते। तच्छास्त्राणीति निर्देशेन रसगङ्गाधरकाव्यप्रकाशसाहित्यदर्पणप्रभृतीनि ज्ञातव्यानि। तेषु शास्त्रेषु तच्चिन्तकैः रसस्वरूपं वर्णितम्। तस्य स्वरूपमाहुः—

कारणान्यथ कार्याणि सहकारीणि यानि च। रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः। व्यक्तः सर्वैर्विभावाद्यैः स्थायीभावो रसः स्मृतः॥

विभावानुभावव्यभिचारिभावानां संयोगाद्रसाविर्भावो भवति। अयमेव रसस्याविर्भावप्रकारः। नाऽयं लौकिकश्रृङ्गाररसः। अयं तु भगवद्रसः भगवद्रूपः—यतो हि विभावैर्ललनादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः, तदन्तरं अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्या रामादावनुकार्ये तद्रूपताऽनुसंधानात् नर्तकेऽपि प्रतीयमानो रसः, प्रतिभाति। तत्र नायिकानायकाश्च विभावास्तेकिलाम्बनविभावाः पुनः चन्द्रादयोहि तत्रोद्दीपनविभावाः। आलम्बनोद्दीपनविभावाभ्यां हृदि रतिः प्रादुर्भवति किन्तु कटाक्ष-भुजाक्षेपारूपैरनुभावैः रतिः संवर्धते। तदनन्तरं द्रष्टुर्यथा प्रतीतिर्भवेत् यदस्य हृदि रतिः स्नेहो वर्तते तावान् स्थायिभावो व्यक्तो भवति। ततो ग्लानिनिर्वेदादयस्त्रयस्त्रिंशद्विधा व्यभिचारीभावा दृश्यन्ते। ते भावाः क्षणिका भवन्ति। एते भावाः सहकारिणो मताः तैर्भावैः रामादीनामभिनयकर्तृषु रसो दृश्यते। तत्रोपस्थिता द्रष्टारः सामाजिकास्तेषु नटेषु श्रृङ्गारहास्यादिरसाननुभवन्ति। कि तु सामाजिकानां चेतसि रसवासना भवेत्तदा रसाननुभवेयुः। अतएव रसनिरूपकैरुक्तं यद् "सवासनानां नाट्यादौ रसस्यानुभवो भवेत्। निर्वासनास्तुरङ्गान्तर्वेश्मकुड्याश्मसन्निभाः॥" अतएव रसविदः "सामाजिकानां वासनया चर्व्यमाणः रसः" इतिलक्षणमाहुः। नाट्यशास्त्रेषु रसानामष्टविधत्वं नवविधत्वं दशविधत्वमप्याहुः। "श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः। वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥" अन्ये शान्तमपि रसं मन्वते। वात्सल्यं नाम स्थायिभावात्मको यो भक्तिरसस्तमपि दशममप्याहुः। स्नेहो भक्तिर्वात्सल्यमेते रतेरेव भेदाः। तुल्ययोरुभयोरन्तरा रतिः स्नेहः कथ्यते। अनुत्तमानामुत्तमेषु रतिर्भक्तिरुच्यते। उत्तमानामनुत्तमेषु स्नेहो वा रतिर्वा वात्सल्यमुच्यते। रतिस्तु मनोऽनुकूलेषु ह्यर्थेषु सुखसंवेदनम्। यूनोरन्योन्यविषयस्थायिनीच्छा रतिः। स्मरकरम्बिन्तःकरणयोः स्त्रीपुरुषयोः परस्परं रिरंसा रतिः। तयोर्निष्कामतया मिथोरतिमैत्रीत्थं रतिविषये विविधानि विवेचनानि लक्षणानि च सन्ति। अवसरे वरे रतिर्भक्तिः। सचेतनानामचेतने रतिराबन्धः। पुनः स्नेहलक्षणं श्रूयते अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया। सहि स्नेहात्मकस्तन्तुरन्तममर्माणि सीव्यति॥ रसेषु मुख्यः श्रृङ्गार एव ज्ञेयः स एव सर्वानन्दमयः संयोगविप्रयोगात्मको द्विदलः सः। श्रृङ्गाररसोऽयं साहित्यशास्त्रप्रणाल्या चर्चितः।

प्रकृतमनुसरामः—निरोधलीलायां रासलीलान्तर्गतो योहि रसो ब्रह्मरूपः। यथा ब्रह्मणो नित्यत्वं तथैव रसस्याऽपि। नित्यत्वं तद्रूपत्वात्। नाऽयं रसो मनोविकाररूपः किन्तु भगवद्रूपः। तथाहि भगवत् स्वरूपं हि श्रुत्यैकसमधिगम्यं तत्र" "सर्वकामः सर्वगन्धः सर्वरसः" इत्यनेन रसकामरूपत्वं तद्वत्वं च सर्वरसरूपत्वं तद्वत्वेन सर्वरसभोक्तृत्वं च प्रतिपाद्यतेगे तैत्तरीयकेऽपि "रसो वै सः" रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति इति पठ्यते। रसेषु श्रृङ्गारस्य मुख्यत्वात् तस्य च रत्याख्यस्थायि भावस्वरूपत्वात् तद्रूपत्वं तद्वत्वं चावश्यं वाच्यम्। तत्र व्रजसुन्दरीभावालम्बनविभावत्वेन तद्भावानुसारेणैव च सर्वकरणेनैवैतद्रसरूपत्वम्। भगवानपि तासु तादृशभाववानिति तद्वत्वम्। भगवद्रूपत्वं च। भगवति भावानामपि स्वरूपातिरिक्ता-

नामभावात् । नवमस्कन्धे भगवानेव स्वमुखेनैव अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ॥ ९।४।६३ इत्यारभ्य–मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपि ॥ ९।८।६८ पर्यन्तं कथयामास । तत्र रसस्तु ह्येकरूप एव किन्तु प्राकट्यप्रकारास्त्वनेकाः सन्ति । दशमस्कन्धे त्रिचत्वारिंशेऽध्याये सप्तदशश्लोके रङ्गमुपगतं रसात्मानं रसराजं वर्णयामासुर्वादरायणाः—

मल्लनामशनि र्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपते विराडविदुषां तत्वं परं योगिनां
वृष्णीनां परदेपतेति विदितो रङ्गं गतः साग्रजः ॥

यो हि रासः स एव भजनानन्दः । तमानन्दं भगवानेव प्रदातुमीहेत तदोपलभ्येत । अस्यानन्दस्य दलद्वयमेकं संभोगात्मकमपरं विरहात्मकमित्थं सप्ताध्यायेषूभयात्मकशृङ्गारस्य निरूपणं स्पष्टं दृश्यते । यथा कार्योपयमने तच्छास्त्रमाह–"ययोरात्मसमं वित्तं ययोरात्मसमं कुलम् । तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् । भगवता वासुदेवेन सहोद्वाहे श्रीरुक्मिणीमुखेन श्रीकृष्णद्वैपायना अवोचन् ।

का त्वा मुकुन्द महती कुलशीलरूप-विद्यावयो द्रविणधामभिरात्मतुल्यम् ।
धीरा पतिं कुलवती न वृणीत कन्या काले नृसिंह नरलोकमनोऽभिरामम् ॥

एवं लौकिकाऽलौकिकयोर्विवाहयोः कक्षा कथिता तथैव रासलीलायामपि चिन्त्यम् । समशीलसमकुलसमदक्षसमकक्षसमशिक्षयोरेव संयोगः सुखावहस्तथैव रासलीलायामपि विषमयोश्चेत्संबन्धो भवेत् तदा तु रासः कुतः संभवेत् यतः एते तु जीवा, भगवानानन्दमयः कथं वैषम्याद्रसोत्पत्तिरिति चेत्तत्रोत्तरमिदं दशमे रासलीलायाः पञ्चमाध्यायस्य द्वितीयश्लोके "तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः । स्त्रीरत्नैरन्वितः प्रीतैरन्योन्यावद्धबाहुभिः" गोपीनां साम्यत्वं स्पष्टमुक्तम् । यथा भगवानानन्दमात्रकरपादमुखोदरादिस्तथैव गोप्योऽपि भगवत्सदृश्योऽलौकिकविग्रहाः सन्ति । भगवतैव स्वस्वरूपादेव लीलार्थमेव प्रकटिताः । याभिर्मुख्यं फलं रासलीलायामुपलब्धं ताः श्रुतिरूपाः इति बृहद् वामनपुराणे निर्दशितम् । ब्रह्मा निजपुत्रान् सनत्कुमारानाह–वत्साः ! मया तासां व्रजसुन्दरीणां पादरजांस्युपलब्धुं षष्टिवर्षसहस्राणि तपश्चरितं तथाप्यहं न लेभे । "न स्त्रियो व्रजसुन्दर्यः पुत्र ताः श्रुतयः श्रुताः" इति विस्तृता कथा । गोपीना स्वरूपपरिचयेऽस्ति विवेकः श्रुतिरूपाः ऋषिरूपाः प्रकीर्णाः चन्द्रावलीव्यूहाः, ललिताव्यूहाः स्वामिनीव्यूहाः तास्वनन्यपूर्वा अन्यपूर्वाः निर्गुणा राजस्यः तामस्यः सात्विक्य इत्येनवधा विभक्तास्ताः सन्ति । भगवानानन्दविग्रहः श्रुतिभिर्बहुधा गीतस्तदा श्रीकृष्णो भगवानलौकिकेन सौन्दर्यमयेनानन्दमयरसमयश्रीविग्रहेण स्वस्वरूपं दर्शयामास तदा ताः श्रुतयः सकामाः समभवन् कृपानिधानेन तदा वरो दत्तो भवत्यो व्रजे गोप्यो भविष्यन्त्यहं तदा वो मनोरथान् पूरयिष्यामीति वरं पूरयितुं नन्दगेहे ह्याविर्भूतः श्रुतयश्च गोप्यः संवृत्तास्ता एव प्रधाना मुख्यं फलं प्राप्नुवन् । त्रेतायुगे-दण्डकारण्ये षोडशसहस्रमृषयस्तपस्यन्तः समासन्तेषां नैकट्याल्लोकाभिरामः श्रीरामोऽभिससार तदा ते मुनयः सेवाकामाः समभवन् भगवदनुग्रहेण ते मुनयःसेवानुरूपविग्रहा गोप्यः समभवन्ताः ऋषिरूपाः गोप्यः सन्ति । याः भद्रकालीं समानर्चुः ताः अपि भगवद्रूपा एव तथापि श्रुतिरूपाभिर्भिन्नाः । चीरहरणव्याजेन नन्दनन्दनेन ताः संस्कृताः । मयेमा रंस्यथ क्षपा इति वचनानुसारं ता रमयामास । एकोऽन्तर्गृहगतानां गोपीनां कदम्बः । ताः सकामा आसन् तेनानेन देहेन रन्तुं नप्राभवन् ताभिर्देहस्त्यक्तस्ततो भगवति लीनाः । बलभद्रेण सह या रासं चक्रुस्ता अप्याभिर्भिन्ना आभीरकन्याः । विस्तारभयादेतावदेवालमिति विरमितम् । मर्यादापुष्टयोरिदमन्तरं कृष्णाधीना तु मर्यादा स्वाधीना-पुष्टिरुच्यते इति न्यायेन भगवान् श्रीकृष्णस्तु श्रुतिरूपाधीनः ! मर्यादायां वियोगः साधनरूपः पुष्टौ वियोगः फलस्वरूपः । रासरमणे राधारमणस्य तिरोधानलीलाऽपि फलरूपैव तासां भगवद् वियोगे विकलत्वं तथा स्वास्थ्यं प्रकृतिः प्राकृतं नहि इति सिद्धान्तानुसारं वियोगः फलरूप एव न तु साधनरूपः । कुमारिकाणां तु संयोगः फलं तदा शुद्धपुष्टिभक्तानां तु वियोगस्तु महाफलम् । अत्र रासलीलायां तु शुद्धभक्तानां फलं विचारणीयम्–"भगवानेव हि फलं स यथाविर्भवेद् भुवि । गुणस्वरूपभेदेन तथा तेषां फलं भवेत् ॥ भगवान् श्रीकृष्णः प्रकटो भवेत्स एवानन्द इति तदीयाः कामयन्ते दयित दृश्यतामिति गोपीगीते । आनन्दो धर्मधर्मिरूपो द्विविधोऽधिकारानुसारं यच्छति तं वासुदेवः । स तु केनापिसाधनेन वोपलभ्यते तदेवाह भगवती श्रतिः "नायमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" ॥ स आनन्दमयो भगवान् वरणैकलभ्यः साध्यरूपोऽयं श्रीकृष्णः स्वयं साधनरूपो भवति ।

श्रीवल्लभाचार्यमते फलं तत् प्राकट्यमेवाव्यभिचारहेतुः ।
प्रेमैव तस्मिन् नवधोक्त भक्ति स्तत्रोपयोगोऽखिलसाधनानाम् ॥



परम भागवत श्री जयदयाल जी डालमिया



परम भगवदीया श्रीमती कृष्णादेवी जी डालमिया

अस्मिन् मार्गे भगवदाविर्भावो हि फलं, भगवति केवलमहैतुकः स्नेहः साधनं नवधाभक्तिरेवस्नेहस्य साधनं तस्यां भक्तौ स्त्रीपुत्रादीनां सर्वेषां विनियोगस्तेन तेषामपि कृतार्थता सिध्यति । छान्दोग्योपनिषदि श्रीनारदसनत्कुमारसंवादे भगवान् सर्वात्मभावैकलभ्य इति निरूपितम् । सः सर्वात्मभाव एव निरुपधिः स्नेहः । स्नेहोऽपि भगवता कृतः । भगवत्कृतः स्नेहः रासपञ्चाध्यायां निरुप्यते । तेषु पञ्चाध्यायेषु क्रमशो वा प्रत्येकस्मिन्नध्याये पञ्चधा रमणं हरिणैव क्रियते तदेव वर्ण्यते ।

तत्र प्रथमाध्याये "वीक्ष्यरन्तुं मनश्चक्रे" इति स्पष्टं भगवदिच्छैव रमणे हेतुरिति निरूपितम् । रमणाऽनुकूला सर्वाऽपि सामग्री भगवतैव सम्पादिता । ततस्ताः "जगौ कलं वामदृशां मनोहरमिति" स्नेहेनाहूताः । ऐतद्गानेन सर्वा गोप्यः समाहूताः समागता इति न कथ्यते । या हि भगवता वृतास्ता एव तेन रासेश्वरेणाहूतास्तत्र प्रथमं कुमारिका अनन्यपूर्वाः श्रुतिरूपाः समागताः । ततश्चान्या नवविधा वा दशविधाः षोडशसहस्रसंख्याकाः समागतास्तासामुल्लेखे." दुहन्त्योऽभिययुरित्यादिना कृतः । समागतानां स्वागतं सत्कारो वार्तालापो रमणमभिमानस्तिरोधानमित्यादयः प्रथमे ह्यात्मरमणे निरूपिताः। अस्मिन्नष्टचत्वारिंशच्छ्लोकाः संति ।

ततो द्वितीयाऽध्यायेऽन्तर्हितं भगवन्तं ये सन्ति भगवदीयास्तांस्ताः पृच्छन्ति । इतस्ततश्चाटन्ति किन्तु न कुत्रापि पश्यन्त्यस्तत्र यत्रपूर्वं प्रियतमेन रमितास्तत्र भगवदिच्छयैवोपस्थिताः । ये हि भगवन्तं दृष्टकामा भवेयुस्तेऽस्याध्यायस्य सततं रटणं करिष्यन्ति तर्हि हृदि भगवदाविर्भावो भविष्यति । समवेताः जगुः कृष्णं तदागमनकाङ्क्षताः । द्वितीयेऽध्याये ४४ श्लोकाः । प्रथमे ह्यात्मरमणं द्वितीये मनोरमणम् ।

तृतीये तावद्वाग्रमणं प्राणरमणञ्च वर्ण्यते । एकोनविंशतिः श्लोका वाग्रमणस्य भक्तिरसोद्रेकं समर्पयन्ति । तत्रायं विवेकः १-२-३-५-६-७-८-१३-१४-श्लोकैः कुमारिकाभिर्गोविन्दो गीयते । चतुर्थश्लोको हि गुणातीतगोपीनां श्रूयते । ९-१०-११-१२-१५-१६-१७-१८-१९ श्लोकैरन्यपूर्वाभिर्गोपीभिर्गोविन्दो गीयते । "जयति" पदेन स्तुतिरारभ्यते । जयति हि पदं मङ्गलवाचकं सूचयति वदियं स्तुति भगवत्प्राकट्यात्मकं फलं दास्यति । ये हि भक्ताः ह्यनया स्तुत्या गोविन्दं गास्यन्ति तेऽपि भगवन्तं प्राप्स्यन्ति ।

चतुर्थेऽध्याये तावदिन्द्रियरमणं वर्ण्यते—"न हि साधनसम्पत्या हरिस्तुष्यति कस्यचित् । भक्तानां दैन्यमेवैकं हरितोषण साधनम् ॥ १ ॥ सन्तुष्टः सर्वदुःखानि नाशयत्येव सर्वतः । अतः निर्णयवाक्यानि भजनार्थं न्यरूपयन् ॥ २ ॥ "काचित्कराम्बुजं शौरैर्जगृहेऽञ्जलिना मुदा" इत्यादिभिर्वाक्यैरिन्द्रियरमणं रमणनाथस्य स्पष्टीक्रियते । यो हि श्रेष्ठतमो भवति तस्मै एवोत्तरीयमासनं प्रदीयते । पूर्वोत्तर मीमांसारूपाः श्रुतय एवोत्तरीयवासांसि व्रजराजायासनानि प्रायच्छन् । व्रजसुन्दरीणामुत्तरीयानि द्विविधानि भवन्ति बहिर्गमने यान्युपरितनभागे धार्यन्तेऽन्तर्गृहेऽन्यानि धार्यन्ते । ताभि स्तानि सर्वविधानि निजान्युत्तरीयाणि सर्वेश्वराय सर्वरसाय सर्वरसदानाय निवेदितानि । अस्मिन्नध्याये २२ श्लोकाः ।

पञ्चमे श्रीविग्रहेण रमणं विहितं रमणवरेण । "तत्रारभत गोविन्द" इत्यारभ्य नृत्यारम्भो वर्ण्यते । सर्वाङ्गीणो रसस्तु नृत्यादेवाविर्भवतीति देहरमणं नृत्येन निरूपितम् । त्रीणि विशेषणानि गोपीनां श्रुतानि "अनुव्रतैः-स्त्रीरत्नैः-प्रीतैः" तेन ता भगवता सह रन्तुं योग्याः इति निश्चीयते । प्रायो मनुष्यजातीयाश्चतुर्विद्याः पद्मिन्याधा वर्णिताः शास्त्रेषु । अश्वप्रकृतिकाश्चतुर्दश स्वभावाः नाट्य शास्त्रे दर्शिताः । तासु सर्वासु सर्वोत्तमा असाधारणा इति सूचयितुं स्त्रीरत्नैरित्युक्तम् । अनुव्रतैरिति रसोत्पादनानुकूलत्व माख्यातम् । प्रीतैरितिपदेन भगवता सह रमणार्हत्वमपि कथितम् । "ननु एते जीवाः भगवानानन्दमयः कथं वैषम्याद्रसोत्पत्तिः" इति शङ्का त्रिभिरेभिः पदैरपास्ता यतो हि ताः स्वसदृश्यः स्वेनैव हरिणा स्वलीलायै विहिताः । भगवता प्रथमं स्थलरासः समारब्धः । अष्टौ श्रीकृष्णस्वरूपाणि षोडशगोप्य इत्येकप्रकारकं मण्डलं द्वितीये यावत्यो गोप्यस्तावन्तो भगवद्विग्रहाः ।

रासपञ्चाध्याय्याः पञ्चाध्यायाः रूपरमणस्य पञ्चविधत्वात् ततो द्वावध्यायौ नामरमणस्य द्विविधत्वात् । रूपरमणे संप्रयोग शृङ्गारः नामरमणे विप्रयोगशृङ्गारः । "रूपनामविभेदेन जगत्क्रीडति यो यतः" इति वचनेन नामरमणस्यषष्ठोऽध्यायः । नामलीलायां वेदरूपया वाचा भगवतः स्तुतिर्भवति सा तु विरहावस्थायामेव संभवति । "सर्पो मां ग्रसते तात प्रपन्नं परिमोचय" इति स्पष्टमहिग्रसनकाले भगवता नन्दराजेन या स्तुतिर्विहिता सा नाम रमण लीला । सुदर्शनेनापि भगवतः स्तुतिर्विहिता साऽपि वेदरूपा । पश्चादध्यायेऽस्मिन् वेदात्मस्वरूपेण बलभद्रेण सह रासरमणमित्थं षष्ठोऽध्यायः समाप्यते ।

सप्तमेऽध्याये युगलगीतम् । फलप्रकरणस्यान्तिमोऽध्यायस्तस्मिन् षड्विंशतिः श्लोकाः । विरहावस्थायां व्रजस्थाभिर्वा गृहे स्थिताभिः व्रजसुन्दरीभि भगवान्नन्दनन्दनो गीतः । प्रथमान्तिमौ श्लोकावनुष्टुभौ चतुर्विंशतिः श्लोकाः स्वागताच्छन्दसि गीताः । "गोप्यः कृष्णं वने याते तमनुद्रुतचेतसः । कृष्णलीलाः प्रगायन्त्यो निन्युर्दुःखेन वासरान् ॥ श्लोकेऽस्मिन् "गोप्यः" पदेन सूच्यत इमा रासारम्भे या रासलीलायां वेणुनादेनाहूतास्ताः ज्ञेया बलभद्रेन सह याभिराभीरस्त्रीभी रासो विहितो न ताः ।

श्लोकेऽस्मिन् "कृष्णलीलाः" पदं निहितं तत्सहेतुकं यथा भगवान् कृष्णः सदानन्दस्तद्वृत्तकथा अपि सदानन्दरूपा एवेत्यत्र फलप्रकरणं समाप्यते। अलमधिकपल्लवितेन-फलप्रकरणप्रस्तावे समुपस्थिते किञ्चिद्वक्तव्यमिति प्रजल्पितम्। योहि गोपीजनसंवेद्यो रासरसः कथं केनापि शब्दैरभिधीयते। सितामाधुर्यमपि रसनया न निरूप्यते तर्हि भजनानन्दरसानुभवस्तु वागविषयो गोपीजनसंवेद्यो भक्तिरसः स्नेहरसः प्रेमरसो वा।

वेदमार्गीयानां मोक्षमार्गेऽपि सेवा भवत्येव तेऽप्याहुः—

व्रजेम भवदन्तिकं प्रकृतिमेत्य पैशाचिकीं किमित्यमरसंपदः प्रमथनाथ नाथामहे।
भवद्भवनदेहली–विकटतुण्डदण्डाहति–त्रुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते ॥ १ ॥

उमापतिपदपङ्कजपरागानुरक्ताः परा भक्ताः श्रीसाम्वसदाशिवयोरहैतुकीं सेवामेवानन्दसीमां मन्वते तदाऽन्येषां तु का वार्ता वैष्णववराणाम्। कश्चिदाह "अपि वृन्दावने शून्ये शृगालत्वं स इच्छति। न तु निर्विषयं मोक्षं गन्तुमर्हति गौतम ? ॥ २ ॥ अन्येषाममराणां का चर्चा स्वयममराधिपतिराह श्रीमद्भागवते दशमे चतुर्दशाऽध्याये विंशत् श्लोके—

तदस्तु मे नाथ स भूरिभागो भवोऽत्र वाऽन्यत्र तु वा तिरश्चाम्।
येनाहमेकोऽपि भवज्जनानां भूत्वा निषेवे तव पादपल्लवम् ॥

श्रीमदणुभाष्ये "लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि इति सूत्रे सर्वात्मभावस्य मीमांसायां निरूपधिस्नेह एव सर्वात्मभावस्वरूपं निर्दशितं स स्नेहस्तु निमित्तजन्यो न भवति। किं पुनः प्रेमाऽपि हरिणा कृतम् इति श्रीकृष्णास्येन भगवता वेणुगीते वर्णितं तच्च वागगोचरं तथापि भावातिशयेन तदीयास्तद् वर्णयन्ति यथा प्रेमैकस्वरूपाः श्रीवल्लभतनुजा श्रीमद् विठ्ठलेशपादा वदन्ति प्रेमामृतटीकायाम्—

आविर्भावदिने न येन गणितो हेतुस्तनीयानपि। क्षीयेतापि न चापराधविधिना नत्वा न वैवर्धते।
पीयूषप्रतिवादिनस्त्रिजगतां दुःखद्रुहःसाम्प्रतं प्रेम्णस्तस्य गुरोः किमद्य करवे वाङ्निष्ठतालाघवम् ॥ १ ॥

श्रीमन्तः श्रीरूप गोस्वामिनः प्रेमस्वरूपं वर्णयन्ति यत्स्नेहावस्था कीदृशो काऽप्यनिर्वचनीया तस्य स्थितिः—

स्तोत्रं यत्र तटस्थतां प्रकटयच्चित्तस्य धत्ते व्यथां निन्दाऽपि प्रमुदं प्रयच्छति परीहासश्रियं बिभ्रती ॥
दोषेणागुरुतां गुणेन गुरुतां केनाप्यनातन्वती। प्रेम्णाः स्वारसिकस्य कस्यचिदियं नैसर्गिकी प्रक्रिया ॥

कश्चिदनुरागरिशकः स्नेह मीमांसां निरूपयति—

पर्यङ्क स्थितिरेव यत्र भवति प्रत्युद्गम प्रक्रिया। रे शब्दोऽपि भवत्पदप्रतिनिधिः यत्र प्रसङ्गोदितः ॥
चेतस्तुष्यंति यत्र लाभत इव द्रव्यस्य भूरिव्ययात्। अद्वैतप्रतिपादकाय हरये स्नेहाय तस्मै नमः ॥ ३ ॥

अन्ततो गत्वेदं निश्चीयते ये ह्यलौकिकभावयुक्तास्तादृशजना भगवता स्वानन्दपुष्टये स्वसंतुष्टये स्वस्वरूपादेव प्रकटीकृतास्त एव भक्ता रासलीलायां भगवता वृता आहूतास्त एव सम्प्राप्तास्तैरेवानन्दमयैर्जीवैः साकं रासरमणं विहितमित्यलम्।

सन्नतयः

ये तु सुकृतिनस्तेषामुपकृतिप्रदर्शनमपि क्षणं यावदवतिष्ठेत्तत्तुल्यं रङ्गभूमौ दृश्यमानदृश्यसंमितं भाति किं तेन कृतेन सुकृतिनां प्रयोजनम्। सुरभीणि सुमनांसि स्वभावत एव सुवासदानवदान्यव्रतानि सन्तोऽपि तादृशाः। ग्रन्यप्रकाशनसाहित्यसंकलनं बहूनामाप्तजनानामनुग्रहादेव सम्पन्नम्। तत्र वृन्दावनस्य महतः पुस्तकालयस्याचार्यवर्यश्रीवासुदेव चतुर्वेदिशास्त्रिपादानामुपकारान्नतितत्यामानयामः। काश्चन टीकाः श्रीमतां परमभागवतानां श्रीजयदयालडालमियासुजनवराणां भूयसा श्रमेण सम्पादितास्ते सुकृतिनः सततं जयन्तु। श्रीमतां परमविदुषां वंशीधराणां टीका बालप्रबोधिनी टीका च श्रीमद्वल्लभचरणसरोजचञ्चरीकाणां नरहरिलालशास्त्रिमहाराजानां सारल्यसौजन्यभरेणाऽनुग्रहेणोपलब्धा तत्पादपद्मपरागान्नतेन मूर्ध्ना धारयामि।

फलप्रकरणे किञ्चिदधिकं साहित्यमुपलब्धं श्रीनाथमनोरथेन मुद्रणादिकमारब्धं ग्रन्थोऽपि वृहद्विग्रहः संवृत्तः। तत्र श्रीनाथानुग्रहेणायं वृत्तान्तः श्रीवल्लभविश्वधर्मार्चननिरतैर्निपुणैर्वदान्यैः कुलपरम्पराऽऽगतपुष्टिभक्तैः श्रीमद्भिः श्रीनवनीतलालशोधनस्वजनैरेवं तदनुवर्त्तिभिस्तत्सदृशलक्षणैः श्रीइन्द्रकान्तश्रेष्ठिभिरन्यैश्च तन्निभैः प्रन्यासिभिर्विदितलततस्तैःसुजनैर्मङ्गलमयः द्विलक्षात्मक श्रीनिधिः श्रीकृष्णसात्कृतस्तेनावरुद्धं मुद्रणं प्रारब्धम्। जयतु जयतु सा पुष्टिपथपोषिका श्रीवल्लभधर्मसंस्था जयन्तु ते कृतिनः प्रन्यासिनः।

पुष्टिपथजुषोजनानुत्साहेन पोषयन्तः पुष्टिपथमाधुर्यं पाययन्तो विद्ववरवरेण्यवरणीया वाग्मिनः श्रीदीक्षितजिदाचार्यचरणा एवास्य विविधटीका संकलित श्रीमद्भागवतमुद्रणप्रकाशनवितरणस्य भगवत्कार्यस्य पुण्यश्लोका मनोरथिनस्तेषां पादयुगलपद्मपरागरेणून्नतेन मूर्ध्ना धारयामि। तेषामेवात्मतुलयानात्मजान् श्रीश्याममनोहर गोस्वामिपादाननुनयशीलेन शिरसा दैन्येन भक्त्या स्पृशामि। यदा यदाऽवरुद्धं मुद्रणं तदा तैः संस्मारितं कथमवरुद्धं कः प्रत्यूहस्तदावोचमहमावश्यकं निजमार्गीयं निजाचार्यपरम्परया भूयसाऽऽयासेनालेखितं मुद्रितमद्रुदितञ्च—वाङ्मयं मार्गयामीति ज्ञात्वा तस्मिन्नेवाऽसरे तैः कृपया समर्पितं भूयो भूयो नमस्तेभ्यः आचार्यचरणेभ्यः।

गौस्वामिकुलकौस्तुभान् करुणावरणीयानाचार्यकुलकौस्तुभान् मां मदीयवंशजाननुग्रहमार्गदीक्षयाशिक्षया प्रेम्णा वात्सल्येनानुगृह्णतः १०८ श्रीगोस्वामिवर्यान् सेवैकप्राणान् सेवापथमर्मज्ञान् श्रीरणछोडलालगुरुचरणपङ्कजपरागपुञ्जान् पुनः श्रीकर्दमऋषिगुरुकुलकुलपतीन् पुष्टिमार्गीयमर्मज्ञान् सेवामार्गीयकलाकीर्तनरसान् वर्धयन्तः श्रीकृष्णसेवारसरसिकान्पोषयत श्रीब्रजरायचरणानहर्निशं नमामि तैरहं वर्द्धितः कृपया पोषितश्च।

वाराणस्यां मुद्राप्यतेऽयं वाङ्मयविग्रहः। सततमहं प्रवासी तदा वाराणस्यां मम भ्रातृनिर्विशेषस्नेही नितरामकिंचनोऽपि श्रीकृष्णपादपङ्कजभक्तिकिञ्चन आसीत् वेदान्ताचार्य श्रीप्राणलाल आचार्यः। आजीवनमनेन सुहृदा सेवा विहिताऽद्याऽप्यवशिष्टा प्रकाशनसेवा तदनुगेन तदीयतनुजेन राजेन्द्राचार्येण वितन्यते। अहं दूरेवर्ते कार्यजालं नालं क्षतिसंशोधनादि कार्यमुत्तरदायित्वपूर्णं मुद्रणञ्चहस्तैस्तत्रापिसंस्कृतं तथाप्युत्साहपूर्णाः कार्यकराः मदीया करा एवाऽभवन् तान्सर्वानार्द्रेण मनसा मानयामि।

उपकारातिशयस्तु श्रीमद्भागवतवाङ्मयरसलिप्सूनां परमविदुषां महानेव यदि न तेऽवगाहनं कुर्युस्तर्हि पुरस्कर्तव्यं केषां पुरस्तात्। पुनः प्रह्वीभूतेन चेतसा प्रणतेन शिरसाऽनेकानेकाः भाष्यभूताष्टीकाः पुरस्कर्तॄन् श्रीधराचार्यचरणेभ्य आरभ्य इदानीं पर्यन्तान् बहुश्रुतान् विविधविदुषः सूरिवरान् नमामि मनसा मानयामि। विशेषतस्तु बदरीभूमौ परिक्रमार्थमुपस्थितान् पुष्टिपथप्रदर्शकान् श्रीमद्भागवतसर्वस्वान् ब्रह्मवादानुसारेण यथार्थं श्रीमद्भागवतार्थं निरूपयतः सुबोधिन्याख्यया सुधया रसं पाययतोवेदानुकूलमेवार्थमाधिदैविकं भगवतः श्रीनन्दनन्दस्य श्रीविग्रहस्वरूपमवबोधयतः श्रीवल्लभाचार्यचरणान्निजगुहायामादरेणाऽनुरागेणामन्त्रयित्वा सत्कारयामासु बादरायणाचार्या वेदव्यासाः सर्वविद्याप्रवर्तकाः आद्याः आचार्याः श्रीकृष्णद्वैपायनाः। पुनः परस्परं नुतवन्तस्तुतवन्तः किन्तु बादरायणपादान्नतेन मूर्ध्ना न्यवेदयन् श्रीकृष्णास्याः प्रभवो यन्मामाज्ञाप्यानुगृह्णन्तु। तदा तै बादरायणचरणैरावेदितं यन्मां युगलगीतं भवदनुमेतन मतेन श्रावयन्तु। तदन्तरं श्रीवल्लभवराः श्रीमद्भिः पाराशर्यव्यासचरणैः साकं दिनत्रयमवसन्। पुनः श्रीमद्भिर्वल्लभवरैर्युगलगीतं दैन्येनाश्रावि। तच्छ्रुत्वाऽतीवमोदमनुभूयाऽवोचन् श्रीकृष्णाद्वैपायनाः श्रीकृष्णास्यं यद्भवन्तो मदीयं मन्तव्यं मतं मतश्च यथार्थं जानन्ति वर्णयन्त्यतोहं निवेदयामि गूढमिदमाधिदैविकं समाधिभाषामाधुर्यं सुबोधिन्या निरूपयन्तु ततः परमानन्दमनुभूय श्रीमदाचार्यचरणैः श्रीसुबोधिनी समुत्साहेन निरूपिता।

यदा श्रीनिरोधलीलायाः फलप्रकरणसमर्पणस्य पावनं महोदयपर्वसमुपस्थितं तस्मिन्पर्वणि रसैकविग्रहाः श्रीनाथचरणा हृदि प्रादुर्भूता तेषामेवेदं हृदयं तेभ्य एवोपायनीकर्तव्यमिति भक्तिभावे समुद्भूते श्रीनाथप्रभूणां कराम्ब्रुजयोः समर्पयितुं के क्षमाः केऽधिकृताः के नाथप्रियतमाः इति विमर्शे जाते करुणैकविग्रहास्तिलकायतचरणा एव प्रभव इति समालोच्य पूज्यपादानां समीपे समुपेत्य तेषां पुरस्तादञ्जलिपुरःसरं फलप्रकरणस्य सात्वतसंहितायाः रसमयं फलं पुरस्कृतं कृपया भगवतः श्रीनाथस्य चरणाम्बुजयोः पुरस्कुर्वन्त्विवति सप्रणतितति निवेदयति विरमति दासे तैः स्वकीयेषु करसरोजेषु कृपया स्वीकृत्य कथितं प्रसन्नोऽस्मि स्वीकरोमि। ततः श्रीतिलकायतचरणैराज्ञप्तं यद् श्रीमतां श्रीज्येष्ठलालकुमाराणां श्रीराजीवकुमाराणां तदनुजानां द्वितीयलालकुमाराणां श्रीराकेशकुमाराणां वा नित्यमङ्गलेषु करपङ्कजेषु श्रीभागवतविद्यापीठे मोहमय्यां श्रीनाथद्वारे वासमर्पयन्तु येषामानुकूल्यं भविष्यति ते कुमाराः भगवच्चरणेषूपायनं करिष्यन्ति।

श्रीनाथचरणानामिच्छया तच्चरणसरोरुहाश्रये श्रीनाथद्वारधाम्नि श्रीकांकरोली नरेश श्रीगोस्वामिकुलकौस्तुभानां सारस्वतवराणां वदान्यानां वाग्मिनां १०८ श्रीव्रजेशकुमाराचार्याणां स्वागताध्यक्षपदे परमभागवत पुण्यश्लोक श्रीमुरारिबापुवर्याणां समुपस्थितौ त्रिवेणो प्रस्तावे प्रस्तावोऽयं समुस्थितः।

तेन सफलोऽयं प्रस्तावः सम्पन्नः सफलाः सकला आशिष आचार्यपादानां तिलकायतचरणानां पितृपादानां श्रीगोविन्दरायानामाज्ञेच्छानुसारमद्य कृपापारावाराणां सुकुमाराणां १०८ श्रीगोस्वामिवर्याणां श्रीराजीवकुमारतिलकायतानां वरदेषु वरेण्येषु करसरोजेषूपायनं विधीयते सात्वतसंहितायाः रसालं फलं फलप्रकरणं त एव पुरस्कुर्वन्तु पूर्णपुरुषोत्तमानां श्रीनाथपादाम्बुजानां करकमलेषु। भगवदिच्छया वा मत्प्रमादेन फलप्रकरणपुरःस्करणे विलम्बो जातः किन्तु क्षमां कुर्वन्तु क्षमाशीलाः शीलनिधय इति निवेदयन् विरमति—

रासोत्सवमहोत्सवः २०५२
श्रीनाथद्वारधाम

श्रीवल्लभवरकुलपरिवारचरणकमलरजसामकिंचनः
किङ्करः कृष्णशङ्करः

दशमस्कन्धः पूर्वार्द्धः

अध्याय सूची

अध्याय	विषयाः	पृष्ठाङ्काः
१.	वेणुनादं श्रुत्वाऽऽगतानां गोपीनां श्रीकृष्णेन सह संवादः, रासारम्भः, तासां मानापनोदाय भगवतोऽन्तर्धानं च ।	१
२.	गोपीद्वारा भगवतोऽनुसन्धानं तदाचरितानुकरणं यमुनापुलिने तदागमनप्रतोक्षणं च ।	३१९
३.	गोपीगीतम्–विरहार्तगोपीनां भगवदुपस्थानाय प्रार्थनम् ।	४८३
४.	भगवतः प्रादुर्भावः, गोपीनामाश्वासनं च ।	६११
५.	महारासवर्णनं परीक्षित्कृतशङ्कायाः शुकद्वारा समाधानं च ।	७०८
६.	अजगरमुखान्नन्दस्य मोचनम्, अजगरस्य पूर्वविद्याधरस्वरूपप्राप्तिः ।	८७१
७.	युग्मगीतम्—गोचारणाय वनं गतस्य भगवतो गोपीजनकृतं गुणगानम् ।	९१०

श्रीहरिः

* श्रीगणेशाय नमः *

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः पूर्वार्धः—रासपञ्चाध्यायी

—:-❀❀-:—

अथैकोनत्रिंशोऽध्यायः

श्लोकाः	अनु.	वसं.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४८	३०	१४	४	७	१९३६	३९	५६	२०३१	६३।	७

श्रीशुक[1] उवाच

भगवानपि ता रात्रीः[2] शरदोत्फुल्लमल्लिकाः[3] । वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः[4] ॥ १ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—शरदोत्फुल्लमल्लिकाः, ताः, रात्रीः, वीक्ष्य, योगमायाम्, उपाश्रितः, भगवान्, अपि, रन्तुम्, मनः, चक्रे ॥ १ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ऊनत्रिंशे तु रामार्थमुक्तिप्रत्युक्तयो हरेः । गोपीभी राससरंभे तस्य चान्तर्द्धिकौतुकम् ॥ १ ॥

ब्रह्मादिजयसंरूढदर्पकंदर्पदर्पहा । जयति श्रीपतिर्गोपीरासमंडलमंडनः ॥ २ ॥

ननु विपरीतमिदं परदारविनोदेन कंदर्पविजेतृत्वप्रतीतेः । मैवम् । योगमायामुपाश्रितः आत्मारामोऽप्यरीरमत् "साक्षान्मन्मथमन्मथः, आत्मन्यवरुद्धसौरत, इत्यादिषु स्वातंत्र्याभिधानात् । तस्माद्रासक्रीडाविडंबनं कामविजयख्यापनायेत्येव तत्त्वम् । किंच शृंगारकथापदेशेन विशेषतो निवृत्तिपरेयं पंचाध्यायीति व्यक्तीकरिष्यामः । ता रात्रीः 'यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः' इति प्रतिश्रुता इत्यर्थः ॥ १ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गोपीभिः सह हरेः उक्तिः पूर्वपक्षः, प्रत्युक्तिरुत्तरपक्षः । रासस्य नृत्यविशेषस्य संरंभे प्रारंभे । उत्सवे वा कर्तव्य इति शेषः । तस्य हरेः । अंतर्द्धेरंतर्द्धानस्य कौतुकं कुतुहलं च (१) ब्रह्मादीनां जयेन संरूढः प्राप्तो दर्पो यस्य एतादृशश्चासौ कदर्पः कामस्तस्य दर्पं गर्वं हन्तीति तथा । मंडयति शोभयतीति मंडनः (२) । रासानौचित्यं शङ्कते—नन्विति । इदं रासक्रीडनम् । परिहरति—मैवमिति । न हि प्राकृतवद्भगवतो विनोदः स्वातन्त्र्यादनन्याधीनत्वात् । विडम्बनम् अनुकरणम् । अपदेशः छद्म । निवृत्तिपराः निवृत्तितात्पर्यिका "आत्मा कामाद्विरज्येत कामानामतिसेवया" इत्याद्युक्तेः । ऐहिकामुष्मिकसर्वविषयत्यागपूर्वकव्रजाङ्गनाकृतभगवत्परप्रेम्णो निवृत्तेः परावस्थत्वं स्फुटीभविष्यति । ताः काः—या इत्येवं प्रतिश्रुताः प्रतिज्ञाताः । इत्यर्थ इति । न त्विह तच्छब्दः प्रसिद्धिपर इति ज्ञेयम् । यद्वा—ताः अज्ञाः प्रजा वीक्ष्य, किं भूताः—रात्रीः रात्रिवत्तमोव्याप्ताः । तथा शर इव द्यन्ति खण्डयन्तीति शरदा दुःखदाः पुत्राद्यास्तेषूत्फुल्लमल्लिकादिवत्सुखबुद्धयस्ताः, स्वरमणादि विना तदुद्धारमपश्यन् । अयोगेषु या माया कृत्वा तामशुभाद्ययोगाय वा स्वस्मिन्योगाय या माया तामुपाश्रितः "माया कृपायां लालायां मूलाज्ञाने छले तथा" इति शाश्वतः । यद्वा–ताः जिज्ञासुरूपाः प्रजाः, किंभूताः–'रा–दाने' इत्यस्मात्त्रि रात्रीः उदारास्त्यागशीला आत्मनिवेदिका वा । तथा शर इव द्यन्ति उत्फुल्लमल्लिकापलक्षितानि विषयसुखानि याः ता विरक्तास्तासामयोगाय उपाध्यध्यासबाधाय कृपामाश्रितः । यद्वा–योगाय ब्रह्माभेदाय या मा प्रमा तदर्थं ताभिरुपाश्रितो वा । यद्वा—ता गोपीः रात्रीः स्वात्मसमर्पिकाः । स्ववियोगे शर इव द्यंति

---

१. बादरायणि–प्रा. पा. । २. तां रात्रिं–विज. । ३. मल्लिकां–विज. । ४. मयोऽच्युतः–प्रा. पा. ।

इति शरदाः ताः उत्फुलमल्लिका यासां ताः तासां कुललज्जादिभिरयोगाय स्वस्मिन् योगाय वा कृपामाश्रितः। यद्वा—अयोगा अन्यायोग्या स्वस्यैव योग्या वा या मा तदंगशोभा तस्यां दत्तचित्तः। यद्वा—यो भगवान् यामुपाश्रितः सा राधा, किं भूता—अगमा नित्या मा अंगशोभा यस्याः सा। योगे संयोग एव मा शोभा यस्यास्तस्यां दत्तचित्तः सोपि। समानमितरत्। यद्वा—योगाय व्रजसुंदरीणां संयोगाय मायः शब्दो यस्याः सा योगमाया वंशी। 'माङ्—शब्देऽपि' इत्यस्य घञि रूपम्। तामुपाश्रितः जठरपटयोरन्तरतो निष्कास्याधरे दधौ। यद्वा—योगस्य संभोगस्य मा शोभा तां याति प्राप्नोति योगमाया श्रीराधा तां मनसोपाश्रितः, रासक्रीडायाश्च तद्धेतुत्वादिति। यद्वा—योगैर्योगिभिर्ब्रह्मादिभिर्मीयते ज्ञायते इति योगमा राधा 'यच्चिंत्यमखिलेश्वरैः' इति ब्रह्मांडे नारदोक्तेः। यत्तेजः रन्तुं मनश्चक्रे। यामुपाश्रितो भगवानपि रन्तुं मनश्चक्रे इत्यर्थः। किं कृत्वा—उत्फुल्लमल्लिका वीक्ष्य। किं भूताः—तारा नक्षत्राणि त्रपन्ते लज्जन्ते याभ्यस्तास्ता रात्रीः। तारोपपदात्त्रपतेरौणादिको डट्। केन साधनेन—शरेभ्यः कामबाणेभ्यो दयते रक्षतीति शरत् स्त्रीसंघस्तेन शरदा। क्विप्यार्षं आलोपः। गोपीसमूहेनेत्यर्थः। यद्वा—यो भगवान् श्रीकृष्णः अपिता रक्षकांतररहितः स्वतंत्र इति यावत्। सोप्यगमाय कामाय जेतुं रन्तुं मनश्चक्रे। अगे हिमाद्रौ मीयते हिंस्यते शिवेनेत्यगमस्तस्मै "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी। एतद्वृत्तं शैवे स्फुटम्। किं कृत्वा—अरात् कामशस्त्रात्त्रायंत इत्यरात्रयस्ताः। स्त्रीपंक्तीरित्यर्थः। 'यामाश्रित्येंद्रियारातीन्दुर्जयान्' इत्याद्युक्तेः। किंभूताः—उत्फुल्लाः मल्लिकाः तत्पुष्पाणि यासु ताः। कृतशृंगारा इत्यर्थः। वीक्ष्य। यद्वा—शराच्छरवद्दारणस्वभावात्संसाराद्दयते पालयतीति शरदाः शुद्धबुद्धिस्तया, अमनम् आमु संसारे भ्रमणं ततः पातीत्यामुपं ज्ञानम्, तदाश्रितः। अयं कामः स्त्रीभिर्लीलामिषेण मया जेय इति बुद्ध्या विचार्य रमणं चक्र इति भाव इत्यलं प्रपंचेन। अत आरभ्यैतश्च चिह्नतः परं विश्वनाथचक्रवर्तिकृतां सवैष्णवतोषिणीं रासपंचाध्यायीव्याख्यां सर्वामेव प्रतिपद्यं निवेशयामः एतदल्पपर्यायैरपरितोषात्॥ श्रीरामकृष्णगंगाचरणान्नत्वा गुरूनुरुप्रेम्णः। श्रीलनरोत्तमनाथश्रीगौरांगप्रभुं नौमि॥ प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम्। लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये॥ गोपरामाजनप्राणप्रेयसेऽतिप्रभूष्णवे। तदीयप्रियदासाय मां मदीयमहं ददे॥ अथ पंचभिरध्यायैः पंचप्राणसमैर्मुनिः। रासं प्राह हरेः सर्वलीलासंपच्छिरोमणिम्॥ रासो जयति यद्वृत्तसौभाग्या गोपयोषितः। धरास्था अधरीचक्रुः सर्वोदूर्ध्वस्थां रमामपि॥ ऊनत्रिंशे वेणुनादपारुष्यविषवर्णनम्। गोपिकाप्वातकीष्वाभिः क्रीडांतर्द्धिश्च वर्ण्यते। इह खलु सप्तवर्षवयसि वर्तमानेन भगवता कार्तिकस्यामायां कर्मवादोत्थापेनेन्द्रमखभंगः कृतः। तच्छुक्लप्रतिपदि गोवर्धनमहोत्सवः। द्वितीयायां यमुनातीरे महोत्सवो भ्रातृद्वितीयायाञ्च भोजनोत्सवः श्रीमुनीन्द्रेणावर्णितोपि ज्ञेयः तत्रैव, वर्णिता इन्द्रकृतकोपोक्तयश्च। तृतीयामारभ्य नवमीपर्यन्तं गोवर्धनधारणम्। दशम्यां गोपानां विस्मयकथाबाहुल्यम्। एकादश्यां गोविंदाभिषेकः। द्वादश्यां वरुणलोकगमनम्। पौर्णमास्यां ब्रह्मलोकगमनम्। ततश्च शरदः समाप्तत्वादुत्तरे वर्षेऽष्टवर्षवयस्त्वे सत्याश्विनपूर्णमायां सर्वलीलोत्सवशिरोमणी रासोत्सवस्तं वक्तुमारभते—भगवानपि षडैश्वर्यपूर्णोपि रन्तुं मनश्चक्रे। रमणस्योद्दीपनालंबनानां कालदेशपात्राणां शरद्यामिनीवृंदावनव्रजवनितानां सर्वोत्कृष्टमाधुर्येणाकृष्टत्वादिति भावः। शतकोटिविलासिनीनामुज्ज्वलरसचिंतामणीनां सौस्वर्यसौन्दर्यसौकुमार्यसौरभ्यमाधुर्यवैदग्ध्यतौर्यत्रिकाणि बहुविधानि परमरुचिराणि स्वीयश्रोत्रेन्द्रियैर्जिघृक्षुः स्वीयसौस्वर्यादीनि तदीयश्रोत्रादिभिस्ता जिग्राहयिषुश्च बभूव। प्रेमवश्यत्वादेकस्यामेव रजन्यामव्यवधानेन यदा तदा सत्यसंकल्पताशक्त्या प्रेरितया योगमायया दुर्घटघटनपटीयस्या स्वशक्त्या प्रहरचतुष्टयवत्यास्तस्या एव रात्रेर्मध्ये तावद्विलाससमायत्यः परःशतकोटिरात्रय आनीय दर्शिताः। अत एव ता रात्रीर्वीक्ष्येति बहुवचनम्, 'ब्रह्मरात्र उपावृत्त' इत्यग्रेपि वक्ष्यते। प्रसिद्धार्थतत्पदोपन्यासान्नानागुणवतीरिति रात्रीणामुत्कर्षः। शरदा टाबंतः। शरदायामपि उत्फुल्ला मल्लिका यासु ताः। शरद्यपि मल्लिकाः, 'कुंदस्रजः कुलपतेरिह वाति गंधः' इति कु[illegible]न्यपि। 'रेमे तत्तरलानंदिकुमुदामोदवायुना' इति रात्रावपि कमलानि पुष्पयतीति वृंदावनस्योत्कर्षः। 'शारदोत्फुल्लमल्लिकाः' इति पाठे—शारद्यश्च ता उत्फुल्लमल्लिकाश्चेति ताः। रन्तुमारेभे, रेमे इत्युक्ते आत्मारामस्य स्वत एव पूर्णकामस्य भगवतस्तस्य व्रजवनितासु रमणं बाह्यं नरविडंबनमेवेति कश्चिद्व्याचक्षीतेत्यतो रन्तुं मनश्चक्र इत्युक्त्या रमणमिदमांतरमेव न तु बाह्यमिति ज्ञापितम्। सत्यमांतरमेवेदं रमणं किन्तु व्रजसुंदरीणां भक्तत्वात्तदनुरोधेनैवेति कश्चिद्व्याचक्षीतेत्यतश्चक्र इत्यात्मनेपदं प्रयुक्तम् रमणस्य स्वसुखार्थकत्वं बोधयति। ततश्चेत्थम्भूतप्रमाणो व्रजसुंदर्यो यत्तासु भगवान् स्वतः सुखपूर्णापि रन्तु मनश्चक्रे। 'आत्मारामाश्च मुनयः' इत्यत्र 'इत्थंभूतगुणो हरिः' इतिवत्। अतो व्रजसुंदरीणामपि परमोत्कर्षः। तथा "सापि कैशोरकवया मानयन्मधुसूदनः। रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः॥" इति। "युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित्। कैशोरकं मानयानः सह ताभिर्मुमोद ह॥" इति विष्णुपुराणहरिवंशयोः। मानयन् आदृतं कुर्वन्नित्यर्थः। ताभिः सह विहाराभावे स्वीयकैशोरवयोप्यमानितं स्यादत एवोक्तमभियुक्तमहानुभावैः "कैशोरं सकलीकरोति कलयन्कुंजे विहारे हरिः" इति सर्वथैव व्रजवनितानामप्युत्कर्षो ध्वनितः। तत्र चोक्तानुक्तसर्वेतिकृत्यसमाधानार्थमाह—योगमायां स्वीयाचिंत्य शक्तिवृत्तिम्। उप आधिक्येन आश्रित इति। स्वाश्रितामपि तामाश्रित इति प्रयोगात्तस्या अप्यत्र संभोग्याधिक्यम्॥ अत्र तोषिणी—अत्र टीकायां रासरंभ इति। तस्मिन्निमित्ते रासारंभसम्बन्धिनं मानं वीक्ष्येत्यर्थः (१)। कंदर्पजेतृत्वप्रतीतेरिति। कदर्पकर्तृकस्यैव जेतृत्वस्य प्रत्ययादित्यर्थः (२)। अथ मूले श्रीबादरायणिरुवाचेति। वक्ष्यमाणमहा-

महिम्नः प्रसंगस्यास्य बलात्तदिदं लंभयति बदरिकाश्रमे महातपश्चरणाद्भगवान् श्रीबादरायणः। तच्च तपः श्रीकृष्णोपासनलक्षणमेव, सर्वज्ञस्य तस्य परमोत्तमे तस्मिन्नेव व्यवसायौचित्यात्। तस्य च तादृशतपः फलरूपपुत्र इति सर्वज्ञत्वश्रीभगवत्प्रेममयत्वादिकं यद्यपि स्फुरति तथापि तन्नामनिरुक्तेर्माहात्म्यपर्यवसानमत्रैव जातं, ततस्तादृशभक्तैरेवैतच्छ्रोतव्यमिति व्यंजितम्। 'श्रीशुक उवाच' इति पाठे तु परमोज्ज्वलरसस्वाभाव्येन परमकोमलालापता दर्शिता। ततस्तादृशचित्ततयैव श्रोतव्यमिदमिति व्यंजितम्। तथाहि—सर्वातिशयिप्रेमवतीनां श्रीव्रजसुंदरीणां मनोरथपरिपूरणमेव प्रियमात्रसुखार्थं सर्वं कुर्वतो भगवतो मुख्यतरप्रयोजनं दर्शयंस्तदेव तस्य सर्वातिशायिमुख्यसुखमिति च प्रकटयंस्तत्र च 'साक्षान्मन्मथमन्मथः' इति, 'त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधत्' इति, 'गोप्यस्तपः किमचरन्' इति दृष्ट्या सर्वात्मारामैरपि दुर्लभानां भगवद्रूपरसगंधस्पर्शशब्दानां वैशिष्ट्येनानुभवात्। तदीयरसस्याधरामृतस्य तु सर्वथैवान्यत्राऽसंभवात्प्रेमविशेषविस्तारसुसिद्ध्या तद्योग्याभिस्ताभिः सह रासक्रीडां पञ्चेन्द्रियतुल्यप्रियैः पञ्चभिरध्यायैर्वर्णयति। यत्र "पीत्वा मुकुंदमुखसारघमक्षिभृंगैः" इत्यादिना, "गोपीनां परमानंद आसीद्गोविंददर्शने" इत्यादिना, 'इत्थं शरत्स्वच्छजलम्' इत्यादिना, "हेमन्ते प्रथमे मासि' इत्यादिना च तासां तस्य च नवरागं विशिष्य स्वेन वर्णितचरम् 'शरदुदाशये साधुजातसत्सरसिज—' इत्यादिना, 'प्रहसितं प्रिय प्रेम—' इत्यादिना, 'रहसि संविदं हृच्छयोदयम्' इत्यादिना च ताभिः स्वयं वर्णयिष्यमाणं च स्मृत्वातिविशिष्टतया वर्णयितव्यत्वेन नवसंगमं स्मरन्नाह—भगवानपीति। अपिशब्देन तासां पूर्वपूर्ववर्णितं नवरागं स्मारयति। पूर्वेण वाक्येन तु संगमस्यास्य नवत्वमेवावगमयति। एतावन्तं कालं ता अनुरागचपलचित्ततया रन्तुं मनः कुर्वन्त्य एवासन्, भगवांस्तु जातानुरागत्वेपि धैर्येण समयविशेषं प्रतीक्षमाणो न चक्रे। सम्प्रति ताः कैशोरमध्यं प्राप्ताः सर्वसुखप्रदतया सर्वमंगलतया प्रकटितवेणुशिक्षादिविशेषतया च विलक्षणाः। कुमारिषु च 'मयेमा रंस्यथ क्षपाः' इति प्रतिश्रुता रात्रीर्वीक्ष्य तत्रापि राकारात्रेरागमनारंभे दीप्तानुरागत्वेन गलितधैर्यतया तच्चक्र एवेति प्रतिपत्तेः। श्लेषेण 'आत्मारामाश्च मुनयः' इत्यादिवद्भगवान्सर्वार्थपूर्णोपि ता रात्रीर्वीक्ष्योद्दीपनत्वेनानुभूयेति कैमुत्येनालंबनरूपाणां तासां प्रेममहिमा दर्शितः। तत एव व्यक्तसर्वार्थं तस्य कैशोरमपि मानितं जातमिति विष्णुपुराणे दर्शितम्—"सोऽपि कैशोरकवया मानयन्मधुसूदनः रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः ॥" इति। हरिवंशे च—"युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित्। कैशोरकं मानयानः सह ताभिर्मुमोद ह ॥" इति। अत्र कालविदित्यस्य व्याख्यानं ता रात्रीर्वीक्ष्येति। 'सह ताभिर्मुमोद ह' इत्यस्य सूचकम्—रन्तुं मनश्चक्र इति। आत्मनेपदनिर्देशः खल्वयं स्वार्थक्रियतां बोधयति "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति विशेषविध्याश्रयणात्। तदेवं ता इत्यनेन स्वस्यापि चमत्कारकरं कालवैशिष्ट्यं व्यज्य तदुज्ज्वलितां श्रीवृन्दावनशोभामपि दर्शयति—शरदेति। शरदा हेतुना उच्चैः फुल्ला मल्लिका यासु ताः। परस्परयोगार्थास्फूर्तेरनेनास्याः शरदो मल्लिकानां चापूर्वत्वं व्यजितम्। तेन च सर्वाण्येव पुष्पाणि लक्ष्यन्त इत्यालंबनकालदेशानां श्रीकृष्णाय प्रेममयपरमसुखप्रदत्वं दर्शितम्। यस्माद् ह्लादिनीशक्तिविलासलक्षणतत्प्रेमविशेषमय्येवैषा रिरंसा न तु प्राकृतकाममयीति तेषां कंदर्पदर्पहेति व्याख्यातमपि तथा युक्तमेव। निवृत्तिपरेयं पंचाध्यायीत्यपि च स्वयमेव वक्ष्यते—"द्वात्रिंशे विरहालापविक्लिन्नहृदयो हरिः। तत्राविर्भूय गोपीस्ताः सांत्वयामास मानयन् ॥ स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः सदयं नंदयन् गोपीहृद्गतो नंदनंदनः ॥" इति। मुनीन्द्रेणापीदमेव वक्ष्यते—'विक्रीडितं व्रजवधूभिरिदं च' इत्यादौ। तत्र दुर्घटघटनां समादधदाह—योगमाया पराख्याचिंत्यशक्तिस्तामुप सामीप्येनाश्रितः। यत्र यत्र विहरति तत्र तत्रैव सूर्यः स्वदीधितिमिव सद्यः प्राप्त इति स्वाभाविकतादृशशक्तित्वं व्यजितम्। तेन च दुर्घटतत्तल्लीला च सेत्स्यतीति भावः। श्लेषेण योगः संयोगस्तदर्थं माया कृपा 'माया दंभे कृपायां च' इति विश्वः। तामुपाधिक्येनाश्रितः। किञ्च, ता वीक्ष्य क्रमेण राकापर्याप्तमधिकमधिकं मनोरथं चक्रे इत्यर्थत्वे लब्धे विशेषोयमभिज्ञेयः—तस्यां राकायां सायं गृहमागतो भोजनादिकं विधाय मातुः स्थानाच्छय्यागृहचंद्रशालिकाद्वारमागतः सन् सद्यः संपाद्यत्वेन निश्चितवानित्यर्थः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नमः श्रीरासरसिकेभ्यः

अत्र टीकायां राससंरम्भ इति तन्निमित्ते रासारम्भसम्बन्धिनं मानं वीक्ष्येत्यर्थः। कन्दर्पजेतृत्वप्रतीतेरिति कन्दर्पकर्तृकस्यैव जेतृत्वस्य प्रत्ययादित्यर्थः। अथ मूले श्रीबादरायणिरुवाचेति वक्ष्यमाणमहामहिम्नः प्रसङ्गस्यास्य बलात् तदिदं लम्भयति बदरिकाश्रमे महातपश्चरणात् भगवान् श्रीबादरायणः वेदव्यासः तच्च तपः श्रीकृष्णोपासनलक्षणमेव सर्वज्ञस्य तस्य परमोत्तमे तस्मिन्नेव व्यवसायौचित्यात् तस्य तादृशतपःफलरूपः पुत्र इति सर्वज्ञत्वश्रीभगवत्प्रेमरसमयत्वादिकं तत्राधिकं यद्यपि स्फुरति तथापि तन्नामनिरुक्तेर्माहात्म्यपर्यवसानमत्रैव जातं ततस्तादृशभक्तैरेवैतत् श्रोतव्यमिति व्यञ्जितं श्रीशुक उवाचेति पाठे तु परमोज्ज्वलरसस्वाभाव्येन परमकोमलालापता दर्शिता ततस्तादृशचित्ततयैव श्रोतव्यमिदमिति व्यञ्जितं तथाहि सर्वातिशयिप्रेमवतीनां श्रीव्रजसुन्दरीणां मनोरथपरिपूरणमेव प्रियमात्रसुखार्थं सर्वं कुर्वतः श्रीभगवतो मुख्यतरं प्रयोजनमिति दर्शयन् तदेव तस्य सर्वातिशायिसुखमिति च प्रकटयन् तत्र च "साक्षान्मन्मथमन्मथः" इति "त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधत्" इति "गोप्यस्तपः किमचरन्"

इति दृष्ट्या सर्वात्मारामैरपि दुर्लभानां भगवद्रूपरसगन्धस्पर्शशब्दानां वैशिष्ट्येनानुभवात् तदीयरसस्याधरामृतस्य तु सर्वथैवान्यत्रासम्भवात् प्रेमविशेषविस्तारसुसिद्ध्या तद्योग्याभिरताभिः सह रासक्रीडां पञ्चेन्द्रियतुल्यैः पञ्चभिरध्यायैर्वर्णयति—यत्र "पीत्वा मुकुन्दमुखसारघमक्षिभृङ्गैः" इत्यादिना "गोपीनां परमानन्द आसीद्गोविन्ददर्शने इत्यादिना "इत्थं शरत्स्वच्छजलम्" इत्यादिना 'हेमन्ते प्रथमे मासि, चरम् इत्यादिना च तासां तस्य च नवरागम् विशिष्य स्वेन वर्णितचरम्'—"शरदुदाशये साधु जातसत्सरसिज' इत्यादिना "प्रहसित प्रिय" इत्यादिना "दिनपरिक्षय" इत्यादिना "रहसि संविद हृच्छयोदयम्" इत्यादिना च ताभिः स्वयं वर्णयिष्यमाण च स्मृत्वाऽतिविशिष्टतया वर्णयितव्यत्वेन नवसङ्गमं स्मरन्नाह—भगवानपीति अपिशब्देन तासां पूर्वपूर्ववर्णितं नवरागं विस्मारयति—पूर्वेण वाक्येन तु सङ्गमस्यास्य नवत्वमेवावगमयति—एतानन्तं काल ता अनुरागचपलचित्ततया रन्तु मनः कुर्वन्त्य एवासन् भगवांस्तु जातानुरागत्वेऽपि धैर्य्येण समयविशेष प्रतीक्षमाणो न चक्रे सम्प्रति ताः कैशोरमध्यप्राप्ताः सर्वसुखप्रदतया सर्वमङ्गलतया प्रकटितवेणुशिक्षादिविशेषतया च विलक्षणाः कुमारीषु च "मयेमा रंस्यथ क्षपाः" इति प्रतिश्रुता रात्रीर्वीक्ष्य तत्रापि राकारात्रेरागमनारम्भ दीप्तानुरागत्वेन गलितधैर्य्यतया तच्चक्र एवेति प्रतिपत्तेः श्लेषेण "आत्मारामाश्च मुनयः" इत्यादिवत् भगवन् सर्वार्थपरिपूर्णोऽपि ता रात्रीर्वीक्ष्य उद्दीपनत्वेनानुभूयेति कैमुत्येनालम्बनरूपाणां तासां प्रेममहिमा दर्शितः तत एव व्यक्तसर्वार्थं तस्य कैशोरमपि मानितं जातमिति श्रीविष्णुपुराणे दर्शितम्—

"सोपि कैशोरकवयो मानयन् मधुसूदनः । रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः" ॥ इति

श्रीहरिवंशे च—

युवतीर्गोपकन्याश्च रात्रौ सङ्कल्पकालवित् । कैशोरकं मानयानः सह ताभिर्मुमोद ह" ॥

इत्यत्र कालविदित्यस्य व्याख्यानं ता रात्रीर्वीक्ष्येति सह ताभिर्मुमोद ह इत्यस्य सूचकं रन्तुं मनश्चक्र इति आत्मनेपदनिर्देशः । खल्वयं स्वार्थक्रियतां बोधयति "स्वरितञितः कर्त्त्रभिप्राये क्रियाफले" (१।३।१०२) इति विशेषविध्याश्रयणात् तदेवं ता इत्यनेन स्वस्यापि चमत्कारकरं कालवैशिष्ट्यं व्यज्य तदुज्ज्वलितां श्रीवृन्दावनशोभामपि दर्शयति शरदेति । शरदा हेतुना उच्चैः फुल्ला मल्लिका यासु ताः परस्परयोगाप्रसिद्धेरनेनास्याः शरदो मल्लिकानां चापूर्वत्वं व्यञ्जित तेन च सर्वाण्येव पुष्पाणि लक्ष्यन्ते इत्यालम्बनकालदेशानां श्रीकृष्णाय प्रेममयपरमसुखप्रदत्वं दर्शितं यस्मात् ह्लादिनीशक्तिर्विलासलक्षणतत्प्रेमविशेषमय्येवैषा रिरंसा नतु प्राकृतकाममयीति तेषां कन्दर्पदर्पहृति व्याख्यानमपि तथा युक्तमेव निवृत्तिपरेयं पञ्चाध्यायीत्यपि स्वयमेव च वक्ष्यते—

"द्वात्रिंशे विरहालापविक्लिन्नहृदयो हरिः । तत्राविर्भूय गोपीस्ताः सान्त्वयामास मानयन् ॥
स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः । सदयं नन्दयन् गोपीहृद्गतो नन्दनन्दनः" ॥ इति

श्रीमुनीन्द्रेणापि इदमेव वक्ष्यते "विक्रीडितं व्रजवधूभिरिदं च विष्णोः" इत्यादौ तत्र दुर्घटघटनां समादधदाह—योगमाया पराख्याचिन्त्यशक्तिः तामुप सामीप्येनाश्रितः यत्र यत्र विहरति तत्र तत्रैव (तां) सूर्य्यः स्वदीधितिमिव सदा प्राप्त इति स्वाभाविकतादृशशक्तित्वं व्यञ्जितम् । तेन च दुर्घटतल्लीला च सेत्स्यतीति भावः । श्लेषेण योगः संयोगः तदर्थं माया कृपा "माया दम्भे कृपायाञ्च" इति विश्वः । तामुप आधिक्येनाश्रितः । किञ्च, ताः वीक्ष्य क्रमेण राकापर्य्यन्तमधिकमधिकं मनोरथं चक्र इत्यर्थत्वे लब्धे विशेषोऽयमपि ज्ञेयः । तस्यां राकायां सायं गृहमागतो भोजनादिकं विधाय मातुः स्थानात् शय्यागृहचन्द्रशालिकाद्वारं गतः सन् सद्यः सम्पाद्यत्वेन निश्चितवानित्यर्थः ॥ १ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नमः कृष्णाय रासरसिकाय

श्रीयुक्तबादरायणिरुवाचेति, बदरिकाश्रमे महातपश्चरणाद्भगवान् श्रीव्यासो बादरायणः, तस्य तपः फलरूपः पुत्र इति सर्वज्ञत्वश्रीभगवत्प्रेमरसमयत्वादिकं ध्वनितम्, तेनोक्तत्वादस्याख्यानस्य सर्वथा यथा साधनसाध्यत्वं प्रेमरसमयत्वं चाभिप्रेतम्, अतो भक्त्यैतच्छ्रोतव्यमिति भावः । इदानीं श्रीगोपिकामनोरथपरिपूरणद्वारा प्रेमविशेषविस्तारणरूपं तदवतारमुख्यतरप्रयोजनं दर्शयन् ताभिः सह विहरणमेव तस्य सर्वातिशायि सुखमिति च प्रकटयन्, तत्र चाधरामृतपानादिना स्त्रीसदृशीनामेव श्रीभगवद्रूपादिमाधुरीविशेषानुभवात् प्रेमविशेषविस्तारसुसिद्ध्या तद्योग्याभिः सह श्रीरासक्रीडां पञ्चप्राणतुल्यपञ्चाध्याय्या वर्णयन्, आदौ तत्सामग्रीं दर्शयन् तत्र च श्रीगोपिकावर्गाकर्षणं कथयन् तद्धेतुत्वेन श्रीभगवतो भावविशेषप्राकट्यमाह—भगवानिति । एषा च क्रीडा तदुचितकाले कैशोरे ज्ञेया, तथा चोक्त श्रीविष्णुपुराणे (५।१३।५९)—'सोऽपि कैशोरकवयो मानयन् मधुसूदनः । रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः ॥' इति, श्रीहरिवंशे च (विष्णु १-२०।२८) 'युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित् । कैशोरकं मानयानः सह ताभिर्मुमोद ह ॥' इति, तच्च रासारम्भे तस्य सौन्दर्य्यादिविशेषस्मारणेन परममोहनत्वात् श्रीबादरायणिना (भा० १०।१५।१) 'ततश्च पौगण्डवयः श्रितौ व्रजे' इत्यादिवद् व्यक्तं वक्तुं न शक्तम्, क्रीडा सा च समग्रमेव कैशोरं

व्याप्येत्यादिकं सर्वमग्रे यथास्थानं विवरणीयम्' तत्रोपलक्षणार्थं कैशोरारम्भे प्रथमैकरात्रक्रीडेयमुच्यते—भगवानिति रासक्रीडायां निजाशेषभगवत्तासारप्रकटनाभिप्रायेण। नन्दादयः परमानन्दनिर्वृता बभूवुः, भगवानपि स्वयं परमानन्दनिर्वृतो भवितुं रन्तुं क्रीडाविशेषं कर्त्तुं मनश्चक्रे ऐच्छदिति अपि शब्दार्थः। ता रात्रीरिति तैर्व्यञ्जितार्थमेव। यद्वा, ता अनिर्वचनीयाः सर्वकालश्रेष्ठतराः परमानन्दरसमयीस्तत्क्रीडायोग्या इत्यर्थः। बहुवचनेन बह्वीषु रात्रिष्वेव तत्क्रीडा बोध्यते, तच्चान्ते सविशेषं व्यक्तं भावि। शरदा कृत्वा उच्चैः फुल्ला विकसिता मल्लिका यासु ताः, यद्यपि सर्वर्त्त्वाश्रये श्रीवृन्दावने सदा सर्वपुष्पाण्युद्भवन्ति, विशेषतश्च शरदि जातीकुमुदकमलादीन्यपि विकसन्ति, तथाप्युत्फुल्लमल्लिका इति रात्रिविषयकविकासविशेषाभिप्रायेण। एवमग्रेऽपि 'कुमुद्वन्तम्' इति। इत्युद्दीपनानि वीक्ष्य रतियोग्या इति आलोच्य योगमाया पराख्यसच्चिदानन्दशक्तिविशेषस्तामुपकरणत्वेनाश्रितः प्रकटितवान् सन्, इति सर्वलीलातो विशेषेण रासक्रीडायाः परमानन्दविशेषादिकमभिप्रेतम्, सर्वस्या अपि लीलायाः सच्चिदानन्दरूपत्वं प्रागष्टमाध्याये बाल्यलीलायां विवृतमेवास्ति। यद्वा, योग ऐश्वर्यं तद्युक्ता माया दया, 'माया दम्भे कृपायाञ्च' इति विश्वः, तामुपाश्रित उपाधित्वेन प्राप्तः सन् रासक्रीडया स्वस्यैश्वर्यं कृपाञ्च विस्तारयामासेत्यर्थः। यद्वा, अपि शब्दस्यात्रैवान्वयः, योग आत्मारामता, माया आवरणात्मिका वा कापट्यं वा, योगयुक्तां मायामुप सामीप्येन नित्यमाश्रितोऽपि, इति तदानीं योगो माया च नातिष्ठत्, किन्तु निजपदाब्जप्रेमसम्पद्विस्तारणरूपसत्यस्वभावो व्यक्तोऽभूदित्यर्थः। यद्वा, योगे संयोगे या माया यज्ञपत्नीष्विव वञ्चना तामुपाश्रितोऽपि, इति तदानीं तस्य संगमे माया न निवृत्तेत्यर्थः, सर्वाभिरेव गोपीभिः सह साक्षात् संयोगविशेषसिद्धेः, सिद्धिं गताभिरपि तत्प्राप्तेः। यद्वा युनक्ति नित्यं वक्षसि संयोगं प्राप्नोतीति योगा या मा लक्ष्मीस्तस्यां नित्यं वर्त्तमानः, तया सदा सेव्यमानोऽपीत्यर्थः, इति रासक्रीडा तया न सम्पद्येत, तद्दुर्लभा च सेत्याद्यभिप्रेतम्। यद्वा, योगाय संयोगाय मायः शब्दो यस्याः सा योगमाया वंशी, 'माङ् माने शब्दे च' इत्यस्य घञि रूपम्, तामुपाश्रितः, यद्वा, योगस्य संयोगस्य मायो मानं पर्य्याप्तिर्यस्यां स योगमाया श्रीराधा, अथवा योगस्य संयोगस्य मा लक्ष्मीः सम्पत्तिरिति यावत् तां याति प्राप्नोतीति योगमाया श्रीराधैव, तां मनसा उपाश्रितः रासक्रीडायास्तद्धेतुकत्वात् तत् पाद्मे प्रसिद्धमेव ॥ १ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भगवानपीत्यादि—

"भगवानितिशब्दोऽयं तथा पुरुष इत्यपि। निरुपाधी च वर्त्तेते वासुदेवे सनातने" ॥

वक्ष्यते च "स्मारितो भगवानद्य देवो नारायणो मम" इति। वासुदेवब्रह्मनारायणादिभिः—

भगवत्पुरुषोत्कृष्टनामानि व्योमवासिनः। परस्यैवेति तानीह परमात्मनि सन्ति हि ॥

इति प्रबलप्रामाण्यात् ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ विवक्षितानि यूनो भगवतः शारदिकानि चेष्टितान्यनुवर्णयति, पञ्चभिरध्यायैः तत्र यदुक्तं भगवता "मयेमा रंस्यथ क्षपाः" इति तस्य सत्यत्वमापादयितुमित्यर्थः। अनुजिघृक्षैकशीलत्वात्केनापि व्याजेन गोपीः कृतार्थयितुं च ताभिः सह चिक्रीडिषुस्तावद्वेणुगीतेनैव ताः समाहूय ततः परीक्षापूर्वकं ताभिः सह विजहारेत्याह—एकोनत्रिंशेन। भगवानपीति। "नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः" इत्युक्तभगवल्लोकदर्शनजानन्दपारवश्यप्रयुक्तात्मारामानन्दादिसमुच्चयार्थोपिशब्दः ताः याः "मयेमा रंस्यथ क्षपा इति प्रतिज्ञातास्ता इत्यर्थः। शरदा हेतुभूतया उत् फुल्लाः मल्लिकाः यासु ताः रात्रीः अवलोक्य रन्तुं मनश्चक्रे चिक्रीडिषायाः प्रसक्तं कर्ममूलत्वं निराचिकीर्षुर्विशिनष्टि योगमायामुपाश्रितः। युज्यत इति योगा तां मायामात्मीयसङ्कल्पमाश्रितः स्वसङ्कल्प एव केवलं तन्मूलं न तु कर्मेति भावः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

निर्दोषभक्तिजनितब्रह्मज्ञानमेव मुक्तिसाधनमिति या शास्त्रतात्पर्यार्थनिर्धारणा तदर्थमर्थवादं वदत्यस्मिन्नध्याये तत्र वैकुण्ठदर्शनानन्तरं कः कथाप्रसङ्गः इति तत्राह—भगवानपीति। यद्रात्रिमुखे लोकदर्शनं तां रात्रिं शारदेन शरदृतुसम्बन्धिना कालेन उत्फुल्ला विकसिता मल्लिका नवमल्लिका यस्यां सा तां योगमायां स्वरूपसामर्थ्यम् ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

भगवानपीत्यपिशब्देन तत्प्रेयस्याऽपीति समुच्चीयन्ते ताः निजमाधुर्येणाद्याप्यस्मन्मनोहारिणीः शरदापि मल्लिकोत्फुल्लतातादृशरसमयलीलासमयरूपत्वात् योगमायां दुर्घटघटनाशक्तिम् उप समीपे आश्रितः तादृशतत्सेवावसरापेक्षया निकटस्थे तादृशशक्तिरित्यर्थः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ ब्रह्मेन्द्राग्नि-वरुणादीनां दर्पं शमयित्वा कन्दर्पस्य दर्पं शमयितुं युगपदनेकरमणीकदम्ब-सम्वलितं रासाख्यं लास्यमारिप्सुर्भगवानेकदा स्वयोगवैभवं प्रादुश्चकार। तत्र रासस्य लक्षणं यथा 'नर्तकीभिरनेकाभिर्मण्डले विचरिष्णुभिः। यत्रैको नृत्यति नटस्तद्वै हल्लीशकं विदुः॥ तदेवेदं तालबन्धगतिभेदेन भूयसा। रासः स्यान्न स नाकेऽपि वर्तते किं पुनर्भुवि इत्यस्य दुष्करतया परमरमणीयतया च बहुकालसाध्याच्च तथा च बह्वीरेव रात्रीरेकत्र कर्तुं कृतसङ्कल्पत्वात्तत्कालं समुपस्थिता रात्र्यभिमानिनीर्बह्वीरेव देवताः पुरतो वीक्ष्य रन्तुमिच्छां चकारेत्याह—भगवानपीत्यादि। भगवानचिन्त्यवैभवोऽपि योगमायामुपाश्रितः सन् रन्तुं मनश्चक्रे। अयं भावः—अस्मिन् विलासे बह्व्य एव दुर्घट-संघटनाः सम्भाव्याः, तास्तु केवलं योगैश्वर्यसाध्याः स्वयमिच्छामात्रेण कर्तुंशक्या अप्यग्रिमरसस्य मधुरकोमलतायामैश्वर्य-प्रकाशनं नातिसुरसमिति तत्तत्कर्मणि (भा० १०।१।२५) 'कार्यार्थे सम्भविष्यति' इति प्रागेवावतीर्णां मूर्तिमतीं स्वयोगशक्तिं 'त्वयास्मिन् विलासे सर्वमेव समर्थनीयम्' इत्युपाश्रितो विधेयत्वेनोपाश्रित आज्ञप्तवानित्यर्थः; इत्ययमपेरर्थः। किं कृत्वा ? ता रात्रीर्वीक्ष्य ताः पूर्वसङ्कलिताः, अनेका रात्रय एकत्र मिलिता भवन्त्विति मनसि कृत्वेत्ययं तच्छब्दार्थः। अनेकानां रात्रीणां क्रमादागामिनीनां युगपद्दर्शनाभावात् रात्रीरिति रात्र्यधिष्ठात्रीर्देवता इत्ययं बहुवचनार्थः। आनन्दघने श्रीविग्रहेऽन्तःकरणाभावादिच्छाशक्तिमात्रस्यैव सम्भवादलौकिक—कृतिसाध्यक्रियाविषयत्वेऽपि लौकिक—कृतिसाध्यक्रियाविषयत्वाय मनश्चक्रे, मनः स्वीचकारेति मनः शब्दार्थः, मनः स्वीकारान्मनोभवस्यापि स्वीकारः। रात्रीः कीदृशीः ? शरदोत्फुल्लमल्लिकाः। शरत्सम्बन्धिन्यः शारद्यः, उत्फुल्लमल्लिका उन्मल्लिकाः फुल्लमल्लिकाश्च; वसन्ते उन्मुखमल्लिकाः, ग्रीष्मे फुल्लमल्लिकाः; पश्चात् कर्मधारये पुंवद्भावात् सिद्धम्। एतेन शरद्वसन्तग्रीष्मसम्बन्धिन्यो रात्रय एकत्र मिलिताः सत्यो अशीत्युत्तरशतरात्र्यभिमानिन्यो देवता एव युगपदागता इत्यर्थः। न केवलं शारद्य एव, भगवानिति ऐश्वर्यपरम्; तथा सति मातापितृसमीपे पूर्ववदेकरात्रमिव शयितवदासीत्, इदं हि तस्यैश्वर्यम्॥ १॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

भगवानपीत्यादि। भगवानपि कर्तुमकर्तुमन्यथाकर्तुं समर्थोऽपि तस्मिन् रासविलासे दुर्घटेन घटना पटीयसीं योगमायामुपाश्रितः, अत्र भगवत्या यद्-दुर्घटं तत् समर्थनीयमित्यादिष्टवान् सन् रन्तुं मनश्चक्रे इत्यन्वयः। योगमायाकार्यन्तु (भा०१०।१।२५) कार्यार्थे सम्भविष्यति" इति दिशा सर्वमेवेदम्। तथा हि गोपीनां गृहाद्विनिर्गमे तत्पतिपुत्रादीनामगोचरत्वम्-(भा० १०।३३।३८) "मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः" इत्यादि तेषां तथा ज्ञानम्, (भा० १०।२९।६) "अश्नन्त्योऽपास्य भोजनम्" इत्यादिना यथास्थिता···गमनादिषु, रासलास्यसमये तत्तदनुकूलवेश-भूषादि सम्पादनम्, तादात्म्यदशायां प्रतिकूल-पूतनादिरूपग्रहणम्, रासान्ते जलविहारानन्तरं वस्त्रभूषान्तरादि—सम्पादनम्, एवमन्यदप्यूह्यम्। ता रात्रीरित्यत्र बह्वीनां रात्रीणामेकदादर्शनाभावात्। अयमेवार्थः—तथाहि वस्तुतस्तु बहुरात्रिसम्पाद्येयं रासलीला तेन बह्व्य एव रात्रय एकत्र मिलिता भवन्त्विति यः सङ्कल्पः कृतस्तेन तत्क्षणमेव तथा मूर्त्तिमतीबद्धाञ्जलीरुपस्थिता रात्रीर्वीक्ष्येति बहुवचनद्योत्यं वस्तु सर्वनाम्नो मर्यादा चेयम्, शरदा सम्वत्सरेण या रात्रीरिति वा। उत्फुल्लानि मल्लिकाकुसुमानि यासु। यद्वा, उत्फुल्ला उल्लसिता मल्लिका हंसविशेषा यासु शरत्कालीया रात्रिरित्यर्थः। तेन शरत्काले या रात्र्यो रात्रयस्ता इति वा॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रीरामकृष्णगङ्गाचरणान्नत्वा गुरून् प्रेम्णः। श्रीलनरोत्तमलोकनाथ श्रीगौराङ्गप्रभुं नौमि॥
प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम्। लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये॥
गोपरामाजनप्राणप्रेयसेऽतिप्रभुष्णवे। तदीयप्रियदास्याय मां मदीयमहं ददे॥
अथ पञ्चभिरध्यायैः पञ्चप्राणसमैर्मुनिः। रासं प्राह हरेः सर्वलीलासम्पच्छिरोमणिम्॥
रासो जयति यद्दत्तसौभाग्या गोपयोषितः। धरास्था अधरीचक्रुः सर्वोद्र्ध्वस्थां रमामपि॥
ऊनत्रिंशे वेणुनादः पारुष्यविषवर्षणम्। गोपिकाचातकीष्वाभिः क्रीडान्तर्द्धिश्च वर्ण्यते॥

इह खलु सप्तवर्षवयसि वर्त्तमानेन भगवता कार्तिकस्यामावास्यायां कर्मवादोत्थापनेन इन्द्रमखभङ्गः कृतः तच्छुक्लप्रतिपदि गोवर्द्धनमखोत्सवः द्वितीयायां यमुनातीरे भ्रातृद्वितीयाभोजनोत्सवः श्रीमुनीन्द्रेणावर्णितोपि ज्ञेयः। तत्रैव वर्णिता इन्द्रकोपोक्तयश्च तृतीयामारभ्य नवमीपर्य्यन्तं गोवर्द्धनधारणं दशम्यां गोपानां विस्मयकथाबाहुल्यम् एकादश्यां गोविन्दाभिषेकः द्वादश्यां वरुणलोकगमनं पौर्णमास्यां ब्रह्मलोकगमनम्, ततश्च शरदः समाप्तत्वात्तदुत्तरे वर्षे अष्टवर्षवयस्त्वे सत्याश्विपूर्णिमायां रासोत्सवः सर्वलीलोत्सवमुकुटमणिस्तं वक्तुमारभते भगवानपि षडैश्वर्य्यपूर्णोऽपि रन्तुं मनश्चक्रे रमणस्योद्दीपनालम्बनानां कालदेशपात्राणां शरद्यामिनी बृन्दावनव्रजवनितानां सर्वोत्कृष्टमाधुर्य्येणाकृष्टत्वादिति भावः। शतकोटिविलासिनीनामुज्ज्वलरसचिन्तामणीनां सौस्वर्य्य-

सौन्दर्य्यसौकुमार्य्यसौरभ्यमाधुर्य्यवैदग्ध्यतौर्य्यत्रिकाणि बहुविधानि परमरुचिराणि स्वीयश्रोत्रादीन्द्रियैर्जिघृक्षुःस्वीयसौस्वर्य्यादीनि तदीयश्रोत्रादिभिस्ता जिग्राहयिषुश्च बभूव प्रेमवश्यत्वादेकस्यामेव रजन्यामव्यवधानेन यदा तदा सत्यसङ्कल्पताशक्त्या प्रेरितया योगमायया दुर्घटघटनापटीयस्या शक्त्या प्रहरचतुष्टयवत्यास्तस्या एव रात्रेर्मध्ये तावद्विलाससमापयित्र्यः परश्शतकोटिरात्र्य आनीय दर्शिताः, अत एव ता रात्रीर्वीक्ष्येति बहुवचनं ब्रह्मरात्र उपावृत्त इत्यग्रेऽपि वक्ष्यते प्रसिद्धार्थं तत् पदोपन्यासान्नानागुणवतीरिति रात्रीणामुत्कर्षः, शरदा टाबन्तः शरदायामपि उत्फुल्ला मल्लिका यासु ताः शरद्यपि मल्लिकाः "कुन्दस्रजः कुलपतेरिह वाति गन्धः" इति कुन्दान्यपि "रेमे तत्तरलानन्दीकमलामोदवायुना" इति रात्रावपि कमलानि पुष्यन्तीति वृन्दावनस्योत्कर्षः शारदोत्फुल्लमल्लिका इति पाठे शारद्यश्च ता उत्फुल्लमल्लिकाश्चेति ता रन्तुमारेभे रेमे इत्युक्ते आत्मारामस्य स्वत एव पूर्णकामस्य भगवतस्तस्य व्रजवनितासु रमणं बाह्यं नरविडम्बनमेवेति कश्चिद्व्याचक्षीतेत्यतो रन्तुं मनश्चक्र इत्युक्त्या रमणमिदमान्तरमेव नतु बाह्यमिति ज्ञापितं सत्यमान्तरमेवेदं रमणं किन्तु व्रजसुन्दरीणां भक्तत्वात् तदनुरोधेनैवेति कश्चिद्व्याचक्षीतेत्यतश्चक्र इत्यात्मनेपदं प्रयुक्तं रमणस्य स्वसुखार्थकत्वं बोधयति ततश्च इत्थंभूतप्रेमाणो व्रजसुन्दर्य्यो यत्तासु भगवान् स्वतः सर्वसुखपूर्णोपि रन्तुं मनश्चक्रे "आत्मारामाश्च मुनयः" इत्यत्र "इत्थम्भूतगुणो हरिः" इति वदतो व्रजसुन्दरीणामपि परमोत्कर्षः तथा "सोऽपि कैशोरकवयो मानयन् मधुसूदनः। रेमे ताभिरमेयात्मा क्षपासु क्षपिताहित" इति "युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित्। कैशोरकं मानयानः सह ताभिर्मुमोद ह" इति श्रीविष्णुपुराणहरिवंशयोः मानयन्नादृतं कुर्वन्नित्यर्थः। ताभिः सह विहाराभावे स्वैरकैशोरवयोऽप्यवमानितं स्यादत एवोक्तमभियुक्तमहानुभावैः "कैशोरं सफलीकरोति कलयन् कुञ्जे विहारं हरिः" इति सर्वथैव व्रजवनितानामुत्कर्षो ध्वनितः तत्र चोक्तानुक्तसर्वेतिकृत्यसमाधानार्थमाह—योगमायां स्वीयाचिन्त्यचिच्छक्तिवृत्तिम् उप आधिक्येन आश्रित इति स्वाश्रितानामपि तामाश्रित इति प्रयोगात्तस्या अप्यत्र सौभाग्याधिक्यम् ॥ १ ॥

श्रीरसिकाल्हादिनी टीका

वन्दे गुरुं कृपासिन्धुं सच्चिदानन्दविग्रहम्। प्रापुर्भागवतं ज्ञानं बहवो यदनुग्रहात् ॥ १ ॥
सर्ववेदान्समुन्मथ्य क्षीरवार्द्धेरिवामृतम्। तच्छ्रीभागवतं ज्ञानं प्रोक्तं भगवता स्वयम् ॥ २ ॥
तत्सारभूत–निखिला पंचाध्यायी निगद्यता ॥

तत्र तावत् दशमस्कन्धार्थो निरोधो निर्णीतः, अतोऽत्र पञ्चाध्यायां श्रीकृष्णप्रियवर्गयोः परस्परनिरोधोऽनुवर्ण्यते, स तु इतररसाभिभवपूर्वकं विलासात्मकं प्रेमणि देहेन्द्रियमनसा स्थितिः निरोध इति, प्रेमलक्षणं रसार्णवे–"स प्रेमा भेदरहितं यूनार्यत् भावबंधनमिति"।

अत्र प्रेम्णि श्रीकृष्णप्रियवर्गयोः क्षीरनीरवदाश्लेषः सामरस्यान्न्यूनाधिकभावेन विवेक्तुं न शक्यते, तदुक्तं—

स्वांतयोः सर्वभावेन सेव्यसेवकयोस्तथा। क्षीरनीरवदाश्लेषो विषयाधारता तथा ॥
अङ्गनामपि तादृक्त्वं स प्रेमा विनिगद्यते। द्वाविंशतिविधः श्लेषो विज्ञेयोऽत्र सुबुद्धिभिः ॥

तथाहि प्रियवर्ग-श्रीकृष्णमनसोः सर्वांशेन संश्लेषः क्षीरनीरवत् अन्यत्सर्वं भक्तिरसतरंगिण्यां विवृतमेव तत्र हृदयेन्द्रियमनसां श्रीकृष्णदेहेन्द्रियमनःसु एकीकरणं, व्रजदेवीभिः स्वहृदयमेवोद्घादितं वक्ष्यमाणश्लोकेन–"चित्तं सुखेन भवताऽपहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये। पादौ पदं न चलतस्तत्र पादमूलाद् यामः कथं व्रजमथो करवाम किं वा"। स्वचित्तेन संश्लेषः स्वपादयोः पादाभ्यां संश्लेषः अन्येन्द्रियोपलक्षणं अयं संश्लेषो व्रजदेवीकर्तृकः, श्रीकृष्णकर्तृकमाह—बाहुप्रसारपरिरंभेत्यादिनोक्तः। अन्यत्र गत्यानुरागेति अयं संश्लेषस्तु निरोधेनैव तत्रोदाहरणम्। "कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ। दृष्टिं दृष्ट्याङ्गमंगेन बुद्धिं बुद्ध्या ववंधतुरिति"। "तत्र भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे", "देवस्यैव स्वभावोऽयमाप्तकामस्य का स्पृहेति" "लोकवत्तु लीलाकैवल्यमिति" सूत्राच्च, कुत्रचित् लीला कुत्रचित् क्रीड़ा कुत्रापि कर्मेति तत्र योगमायाकर्तृका क्रिया लीला, प्रियवर्गैः सहाविर्भाविता क्रिया, क्रीड़ासामान्यात्तु शरीरव्यापारं कर्मेति एतत् त्रितयमपि विलासं न व्यभिचरति। मधुररसाविर्भाविता क्रिया विलास इति लक्षणांतलीलोदाहरणं "योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः। प्रविष्टेनो"क्ति, अनायासेन तत्तन्मध्ये प्रवेशो लाघवशक्त्या, सा लीला विलास एव "ताभिः समेताभिरुदारचेष्टित" इति।

क्रीड़ा विलास एव "ततश्च कृष्णोपवन" इति सामान्यतः शरीरव्यापारोपि विलास एव अन्यत्र स तु भिन्नान्याधिकारिनि वत्सलसख्यादिरसेषु इह तु समानाधिकरणत्वम् एवं भिन्नरसालम्बनेभ्यो निरोधमुक्त्वात्र सजातिभ्यो निरोध उच्यते। "आजग्मुरन्योन्यमलक्षितोद्यमा" इति देहःसु ऐश्वर्यात्। श्रीकृष्णस्य निरोध उच्यते मुनीन्द्रेण भगवान् अपि, संबन्ध-विषय-प्रयोजनविशिष्टेन ग्रन्थस्योत्कर्षमाह–प्रतिपाद्यप्रतिपादक—संबंधः अत्र प्रतिपाद्यं प्रियवर्गश्रीकृष्णयोः विलासः, प्रतिपादकः श्रीशुकस्तस्य विलासप्रतिपादने प्रवृत्तिः निरोधेनैव। तदुक्तं "परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया। गृहीतचेता राजर्षे आख्यानं यदधीतवान्"

इति "आत्मारामोऽप्यरीरमत्" "भगवानपीति" ऐश्वर्यान्निरोधः। यथा श्रीकृष्णस्य ऐश्वर्यान्निरोधेनैव विलासे प्रवृत्तिस्तथा मुनीन्द्रस्यापि विलासव्याख्याने प्रवृत्तिः, अतः प्रतिपाद्यप्रतिपादकसंबंधस्योत्कर्षमाह–प्रियवर्गस्य श्रीकृष्णो विषय आधारश्च चन्द्रचन्द्रिकावत् , श्रीकृष्णस्य प्रियवर्गो विषय आधारश्च अन्यथा एकतराभावे आभासः स्यात् प्रियवर्गस्वान्तस्य श्रीकृष्णो विषयः आधारश्च, श्रीकृष्णस्वान्तस्य प्रियवर्गो विषय आधारश्च, प्रियवर्गस्य श्रीकृष्णाङ्गं विषयः आधारश्च प्रियवर्गस्वांतस्य श्रीकृष्णो विषयः आधारश्च श्रीकृष्णस्वांतस्य प्रियवर्गो विषय आधारश्च, प्रियवर्गस्य श्रीकृष्णाङ्गं विषयः आधारश्च, श्रीकृष्णस्य प्रियाङ्गं विषय आधारश्च, श्रीकृष्णस्वांतस्य प्रियवर्गाङ्गं विषय आधारश्च, प्रियवर्गस्थितस्य श्रीकृष्णचित्तं विषय आधारश्च, श्रीकृष्णस्य प्रियवर्गाङ्गं विषय आधारश्च, प्रियवर्गस्थितस्य श्रीकृष्णचित्तं विषय आधारश्च, श्रीकृष्णचित्तस्य प्रियवर्गचित्तं विषय आधारश्च, प्रियवर्गचक्षुषः श्रीकृष्णो विषयः श्रीकृष्णचक्षुश्च एवमन्योन्यस्य विषयीविषयस्यावस्थोक्ता ग्रन्थस्यापि स एव विषय उक्तो नान्य इति।

अनेन विषयवैशिष्ट्यमुक्तं प्रयोजनवैशिष्ट्यमाह–नित्यकिशोरविलासस्फूर्त्या हृद्रोगस्य प्राकृतकामस्य शांति (क्षांति) द्वारा लौकिककामेन श्रीकृष्णप्रियवर्गयोः परस्परविहारदर्शनौत्कंठ्यं तदनुकूलत्वं चेदमेव प्रयोजनं अग्रे वदिस्यति। "विक्रीडितं व्रजवधूभिरिति" एतदनुसंधानवान्मुनीन्द्रः स्वाभिप्रेतं विलासं कथयिष्यन् तावच्छ्रीकृष्णस्य मानसीलीलां विवृणोति–भगवानिति। तत्रादौ भावोत्पत्तिमाह—तदुक्तं रसार्णवे "निर्विकारस्य चित्तस्य भावः स्यादादिविक्रिया"। साहित्यदर्पणे–"निर्विकारात्मके चित्ते भावः प्रथमविक्रिया"। प्रेमलक्षणं "स प्रेमा भेदरहितं यूनोर्यद्भावबंधन"मिति। भावविशेष एव प्रेमा द्वयोरपरपर्यायत्वं, यद्यप्यखण्डो नित्यसिद्ध एव प्रेमा तत् साधकाश्च नित्यसिद्धा एव तथाप्यंगांङ्गिनोः क्रमेण संबंधस्योत्पत्तिः संबधिन्युपचर्यते राज्यसंबंधवत्। अथावधिभूतो भाव उच्यते तदुक्तं तत्र "प्रेम्णस्तु प्रथमावस्था भाव इत्यभिधीयते। भावोत्पत्तौ हि हावः स्यात्ततो हेला प्रवर्तते॥ भ्रूनेत्रादिविकारैस्तु संभोगो वा प्रवर्त्तकः। भावः एवाल्पसंलक्ष्यविकारो हाव इष्यते॥ हाव एव विलासस्य पूर्णतां प्रतिपद्य वै। हेला नाम समाख्याता प्रेम पूर्वं गतांगता॥

तत्र विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः। विषयैः परिचारैश्च कृष्णो हि रतिमाप्नुयात्॥

तत्रालम्बनविभावः श्रीकृष्णः प्रियवर्गश्च, उद्दीपनविभावश्चन्द्रचन्द्रिकाचन्दनलेपनशरदृतुमल्लिकाद्याः, परस्परं यूनोर्भ्रूनेत्रादिविकाराः अनुभावाः, व्यभिचारिणस्तु त्रयत्रिंशत् नेत्रागोचरे प्रिये ग्लानिमोहमूर्च्छादैन्यादयः विषयास्तु अन्यान्यमुभयोरङ्गादीनि, परिचारस्तु सखी इत्यादि एतैः स्थायीभाव इष्यते। भावस्तु मानसो धर्म्मं उद्दीपनविभावेन मनसि विकारमापन्ने सति भावोद्बोधः तस्मिंश्च सति उज्ज्वलस्थायीभावः सिध्यति तस्मिश्च सिद्धे श्रीकृष्ण आत्मानन्दपूर्णं मन्यतेऽतस्तदर्थं मयारंभः। तत्राचार्यैरुपोद्घातत्वेनोक्तं पद्यं व्याख्यायते "ब्रह्मादि-जयसंरूढदर्पकन्दर्पदर्पहा। जयति श्रीपतिर्गोपी रासमण्डलमण्डन इति"। तथाभूतो जातः, यद्वा गोपी-रास-मण्डलं मण्डनं यस्य स साधारणो भूषण-भूष्य भाव इत्युक्तात् प्राकृतकामस्येदं पौरुषं यच्चरमधातुपातेन ब्रह्मादीनप्यभिभवतीति कामस्तु श्रीकृष्णेनाभिभूतः, अग्रे वक्ष्यते। "आत्मन्यवरुद्धसौरत" इति लिगात् निरोधः लक्षणेनालौकिकेन कामेन जित एव यतः श्रीपतित्वमुपेक्ष्य गोपी-रासमण्डलमण्डनो जातः, वक्ष्यति च "आत्मारामे ऽप्यरीरमत्",। अपि च आत्मारामता गौणीकृता दृश्यते गोपीरमणेन मधुररसस्फूर्त्त्या स्वरूपलाभस्य विवक्षितत्वाच्च। किंच साक्षात् मन्मथ इत्यनेन मन्मथस्यापि मोहेन सामर्थ्याभावोऽत्र "आत्मन्यवरुद्धसौरत" इत्ययमेव चित्रं, यद्व्रजसुन्दरीणां विलासैः श्रीकृष्णमनसि निरुद्धे सति मनोजन्यकार्यस्यापि निरोधोऽतो मनः कार्यविशेषस्य चरमधातोरपि निरोधो जात इति अयमर्थः इति ज्ञेयं, अन्यथाऽनेकयूथयुवतीनां व्रजवल्लबीनः समाधानं न स्यादिति तासां निरोधस्य वैलक्षण्यान्तरं निरूपयिष्यते "तदङ्गसङ्गप्रमुदाकुलेन्द्रियाः केशान् दुकूलं कुचपट्टिकां वा। नाञ्जः प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमालाभरणाः कुरूद्वह:" इति प्रस्तुतमाह—

लीलात्र त्रिविधा प्रोक्ता मानसी वाचिकी तथा। शरीरेण तृतीया च तासां भेदा पृथक् पृथक्॥

मानसी लीला यथा—

"आगतासु विधास्येऽहं स्वागतं तासु सुन्दरम्। भयं प्रदर्शयिष्येऽहमिहामुत्र च यन्महत्॥
पश्चाद्धर्मं प्रवक्ष्यामि तासां हार्द परीक्षया। श्रोष्यामि तासु युक्तिञ्च धैर्यच्युतिमहं पराम्॥
रासक्रीडां करिष्यामि ताभिः सर्वाभिरद्भुताम्। आलिङ्गनं नखोल्लेखं संलापं–नर्म चोत्तमम्॥
ताभिः सह करिष्यामि वरदानं यथा कृतम्। एवं ही मानसी लीला ध्यानानन्दमयी स्वयम्"॥

किंच –

"स्वागतं वो महाभागा प्रियं किं करवाणि वः।
तासां भावपरीक्षार्थमित्याद्याः वाचिकी स्मृता। बाहुप्रसारितेत्याद्या शरीरा बहुधा मतेति"॥

ननु यदि वेदपुराणप्रमान्या लीला नित्यत्वं श्रूयते विष्णुपुराणे-"सोऽपि कैशोरकवयो मानयन् मधुसूदन" इति "सदा रासरसोन्मत्त" "तद्व्रजदेवीकदम्बस्थः क्रीडत्येव" सादिवद्रास–क्रीडा कथमुच्यते तत्राह। यथोक्तं–"पुण्यं मधुवनं यत्र सांनिध्यं

नित्यदा हरेः'' । अन्यच्च ''मथुरा भगवान् यत्र नित्यं संनिहतो हररिति'' मथुरायां नित्यधिष्ठानत्वे देवक्यामाविर्भावेन सादित्वमिव वर्ण्यते । तथात्र कुमारीणां वरदानप्रयुक्तोऽयं रासविलासः सादिरिव निरूप्यते अत्र वृन्दारण्ये त्वृतवो देशविभागेन तदा वर्तन्त एव तथा शरदृतुनिवासप्रदेशे शरत्संपादितां श्रियं दृष्ट्वा प्रतिश्रुता रात्रयः स्मृतिपथमवतीर्णाः मयेमा रंस्यथ क्षपा इति ताः प्रतिश्रुता रात्री वीक्ष्य शरदा उत्फुल्ला–मल्लिकाश्च वीक्ष्य रात्रिविशेषणं, भगवानपि ऐश्वर्यसुपूर्णोऽपि तदुपेक्ष्य निरोधात्मकविलासेनैव व्रजसुन्दरीभिः सह रमणे मनश्चक्रे मनो चकारेत्यर्थः ॥

व्रजे पञ्च विधा गोप्यः, नित्यसिद्धा १ उपासनासिद्धाः २ श्रुतयः ३ ऋषयः ४ देव्यश्च ५ । नित्यसिद्धा दृष्टा, श्रुतीनां रिरंसाजनि तदुक्तं बृहद्वामनपुराणे–'तत्कदम्बकमध्यस्थः किशोराकृतिरच्युत'' इति तं दृष्ट्वा रिरसा जाता, ताभ्यो भगवता वरो दत्तः, ''पुरा सारस्वते कल्पे व्रजे गोप्यो भविष्यथ'' एता कुमार्यस्तु श्रुतय इदानीमपि पूर्वानुरागं दृष्ट्वा कात्यायन्यर्चनप्रभवपुण्याःव्याजेन वरो दत्तो मयेमा रंस्यथ क्षपा इति । तास्तु कुमार्यो नवानुरागेण रिरंसया तं कालं प्रतीक्ष्यमाणा एव स्थिता कदास्मानाहूय रमयिष्यतीति अतः तस्मिंस्तस्मिन् प्रतिश्रुते समये ताः प्रतिश्रुता रात्री वीक्ष्य रन्तुं मनश्चक्रे । इदानीं शरत्कालीना रात्रय एव भावोद्बोधिका जाता इति भावः, भावोद्बोधे लिङ्गं अग्रे वक्ष्यति । ''जगौ कलं वामदृशां मनोहरमिति'' । यद्यपि व्रजे द्वादशा रसाधिकारिणो वर्तन्ते सर्वैरपि ध्वनिराकर्णत् तथापि वेणुध्वनिना मधुररसाधिकृतानामेवाकर्षणं नान्येषामिति ।

ननु वरदानसमय एव किमिति नाभिरमितास्तत्रायमभिसन्धिः पूर्वमल्पवयस्कत्वेन रमणार्थमाकारणं नोचितमिति, अधुना रमणानुकूलवयस्तेन योग्या दृष्टा कारिता । श्रीकृष्णस्य सदा कैशोरकमेव वयो जातं ततो रमणयोग्यता जाता, एतदुक्तं पराशरेण ''सोऽपि कैशोरकवयो मानयन् मधुसूदनः । रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः'' । हरिवंशे–''युवतीर्गोपकन्याश्च रात्रौ संकल्पकालवित् । कैशोरकं मानयानः सह ताभिर्मुमोद हेति'' । उत्फुल्लमल्लिका इत्यनेन वृन्दावनलतानामुद्दीपनत्वं सूचितं, शरदेति शरदृतोऽपि साहाय्यं सूचितम् । नन्वेकेन श्रीकृष्णेन बह्वीनां तासां रमणं कथं ? सर्वासामेवैकदैव सांनिध्यं च कथं ? वक्ष्यति चाग्रे तासां मध्ये द्वयोर्द्वयोः प्रविष्टेनेति चेत्तत्राह—योगमायामुपाश्रित इति । तत्र केचिदाहुः योगमाया लीलोपयोगिनी काचिदचिन्त्यशक्तिः, अग्रे वक्ष्यति योगेश्वरेणाचिंत्यशक्तिमतेति तामुप समीपे आश्रितः सा च कृष्णविलासानुकूला यया सर्वेषु व्रजवासिषु कृष्णानंदं संचार्यते । स्वस्वरसाधिकारेषु ते ते निरूध्यन्ते अग्रे वक्ष्यति मन्यमाना स्वपार्श्वस्थान् स्वान् स्वान्दारान् व्रजौकस'' इति । यद्वा योगे संयोगे या माया कृपा स्नेह इति यावत् तामुपाश्रितः ''स्यात् कृपादम्भयोः मायेति'' विश्वः, यद्वा योगो व्रजसुन्दरीभिः संयोगः तस्मिन् या मा लक्ष्मीः शोभेति यावत् तस्या आयः प्राप्तिः यया मुरल्या तां मुरलीमुप समीपे आश्रितः कदाचिदपि न त्यजति यथाऽन्योपि नायकः नायिकाभिसरणे रतिमाश्रितो भवति तथा श्रीकृष्णोऽपि मुरलीं सहचरीमिव मन्यमानस्तदाश्रित एव तिष्ठति, जगौ कलमिति लिङ्गाच्चेति । यद्वा योगस्यैश्वर्य्यादेर्मा संपत् तत्र उपाश्रितोऽपि रन्तुं मनश्चक्रे, यद्वा योगस्यैश्वर्य्यादेर्मा संपत् तस्याम् उप समीपे स्थितायामपि तामनादृत्येत्यर्थः, रमणानुकूलत्वेन वीक्ष्य प्रतिश्रुता रात्रीरेवाश्रित इत्यन्वयः, यद्वा योगमायां योगे वक्षसो योगे निमित्ते सप्तमी वर्तमाना या मा लक्ष्मीस्तथाश्रितायामपि तामुपेक्ष्येत्यर्थः याभिः सह रमणं चिन्तनं ता एवाश्रित इत्यर्थः आर्थिकोऽयमर्थः व्यञ्जनावृत्या वा, यद्वा योगमाया काचिद्वृद्धा तपस्विनी रमणानुकूलामुपाश्रितः, यद्वा अभिज्ञास्त्वेवं वदन्ति योगे सम्भोगलक्षणे संयोगे या माया अघटितघटनाचातुरी तामुप आधिकेनाश्रित उपाधिके चेति कर्मप्रवचनीयत्वं यया एकेन स्वरूपेण बह्वीनां सांनिध्यं ''तासां मध्ये द्वयोर्द्वयोरि''ति वक्ष्यमाणत्वाच्च स्वैकनिकटत्वमान इति । यद्वा योगे माया स्वाभाविकी लाघवशक्तिरेवेति रात्री वीक्ष्येति रात्रयोऽपि स्त्रियः शरदपि स्त्री मल्लिका अपि स्त्रीजातयः अतः, एवभूते पुरुषप्रवेशशून्ये वृन्दावनप्रदेशे रमणयोग्यां नित्यसिद्धां सामग्रीं दृष्ट्वा व्रजदेवीभिः सह रन्तु मनश्चक्रे पूर्णमनोरथं चकारेत्यन्वयः । तस्य सत्यकामत्वात् सत्यसंकल्पत्वाच्च, ''सत्य कामः सत्य-संकल्प'' इति श्रुते'' । यद्वा भगवानपि भगो भागस्तद्वानपि नन्दपुत्रत्वात् वात्सल्यरसालम्बनत्वात् नन्दयशोदाभ्यां लाल्यमानत्वात्सकलसुखपूर्णोपि वर्षपर्य्यन्त धैर्यमवलम्बमानोऽपि ता प्रारुद्धाः मधुररसोद्दीपका रात्री वीक्ष्य रन्तुं मनश्चक्रे रात्रिदर्शनेन धैर्यच्युतिर्जातेति सूचितं, तत्रापि विशेष व्याचष्टे शरदेति उत्फुल्लमल्लिका इति शरत्कृत्साहाय्यमिति भावः, यद्वा अयोगे माया दम्भका पद्यमिति यावत् तामुपाश्रितः व्रजौकसां समीपे कपटप्रकाशनात् । अयमर्थः व्रजसुन्दरीभिः सदा सम्बन्धेऽपि नान्योपलक्षितो विलासं करत्येव यतो रसः परोक्ष्यं प्रकाशते इति श्रुतेः स्यात् । ''कृपादम्भयोर्मायेति विश्वः'', मधुररसावलम्बनाश्रयमन्तरेण नात्मानं पूर्ण मन्यते । अत एव रन्तु मनश्चक्रे । यद्वा योग भगवानपि सोऽपि ऐश्वर्यं तिरस्कृत्य रन्तुं मनश्चक्रे । अगमायां अगेषु स्थावरेषु तरुषु या माया कृपा तामुप समीप एवाश्रितः वृंदावनतरुषु स्नेहमाश्रितः तेषाम् असङ्कोचनं कुर्वन् एते विलासोपयोगिनो मद्विलाससाक्षिण इत्येवं विचार्य तेषां मध्ये स्थितः सन् रन्तु मनश्चक्रे इति व्रजसुन्दरीमनोऽनुरजनानुकूलं सङ्कल्पं कृतवान् इत्यर्थः । अहो अमी देववरामरार्चितमिति तरुषु श्रीकृष्णस्नेहस्य प्रसिद्धत्वाच्च ॥ १ ॥

विशुद्धरसदीपिका

श्रीमिश्रनारायणपादपल्लवं प्रणौमि सद्भागवतं पुराणम् ॥
यत्र क वा येन स्वयं प्रकाशितं स्वयं निपीतं स्वयमेव गीतम् ॥
लोकवल्लीलया येन मुनीन्द्रवरदानतः । लब्धा महापुराणस्य यथार्थाख्यानशक्तयः ॥

नवधा भक्तयो यस्य मूर्त्तिमत्योऽग्रतः जनाः । शुद्धां भक्तिं प्रपुष्णन्ति तत्पदाम्बुजसेविनाम् ॥
किशोरीरमणो यस्य देवः सख्येन सेवितः । लक्षितानुगतप्रीत्या साक्षादानन्ददायकः ॥

प्रणम्य प्रद्युम्नपदारविन्दं वर्षन् महाप्रेमसुधामरन्दम् ॥
श्रीराधिकाकृष्णकिशोरलीलां व्याख्यामि चाख्यामि सदाऽप्रमीलाम् ॥
श्रीवंशिकां नौमि ययात्मसात्कृताः कृता न के कुञ्जसुखाब्धिमग्नाः ।
निपीय यस्या ध्वनिमाशु याता जाता व्रजे राधितराधिकास्ताः ॥

रामकृष्णप्रसादेन संवादेन सतामियम् । क्रियते रासलीलाया विशुद्धरसदीपिका ॥
यदुच्छिष्टामृतेनायं मूर्खोपि मुखरीकृतः । साधवस्ते कृपापूर्णाः क्षम्यन्तामक्रमं मम ॥

अपि च—

उद्दीप्यतामियं सद्भिर्यतः स्यात्तत्त्वदीपका । ईक्षन्तामिच्छया सन्तः सहन्तां मम साहसम् ॥

तत्र भगवल्लीलाया नित्यत्वप्रतिपादकं श्रीदशमस्कन्धवाक्यं यथा, जयतीति—

जयति जननिवासो देवकीजन्मवादो, यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम् ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्द्धयन् कामदेवम् ॥

अथ विश्वविस्मापकं श्रीभगवच्चरितामृतं निपीयावितृप्ततयाऽहोभाग्यं तदानीन्तनानां ये तादृशलीलं भगवन्तं साक्षादपश्यन्निति समुत्कण्ठया विषीदन्त राजानं ज्ञात्वा तल्लीलाया नित्यत्वं सूचयन् मास्तु चक्षुर्गोचरोयं नित्यविहारी "श्रोतव्यो मन्तव्यः" इत्यादि श्रुतिसिद्धः श्रवणमनो गोचरस्तु शश्वत् क्रीडतीति समादधदाह—जयतीति । स इति प्रकरणलब्धं सजयति सर्वोत्कर्षेण वर्त्तते इति वर्त्तमानप्रयोगेण नित्यत्वं सूचितम् । अत एव परमोल्लासेन प्राक् प्रयोगः कथमित्याकाङ्क्षायां "द्वे विद्ये वेदितव्ये शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इति श्रुतिप्रतिपादित्तं रूपद्वयं निर्दिशति—तत्र पूर्वार्द्धेन शब्दब्रह्म-रूपत्वम् उत्तरार्द्धेन तु परब्रह्मरूपत्वम् इति विवेकः । तथा हि जननिवासः जनेषु भक्तेषु नितरां वासो यस्य सः तेषां तादृशत्वम्—

"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत । दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" ॥

इति श्रीतृतीयोक्तेः तत्कुतः ? देवकीजन्मवादः दीव्यति नित्यं क्रीडतीति देवो नित्यविहारी तं कायति शब्दायते सा देवकी श्रीहरिकथा—

"कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह । कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः" ॥

इति प्रथमोक्तेः । तस्यामेव जन्म प्रादुर्भावो यः स एव वादः तत्त्ववित्सम्मता कथा यस्य सः तत्कुतः यत् यतः उ इति विस्मये वराणां श्रेष्ठतमानां श्रीभागवतप्रवराणां परिषदः सभायाः स्वैः सर्वभूतैर्दोर्भिरिव सद्धर्मपालनसचिवैर्महाभागवतैस्तद्द्वारेत्यर्थः । अधर्मं "धर्मो मद्भक्तिकृत्प्रोक्तः" इत्युक्तेस्तद्विपरीतं सर्वमप्यधर्मम् अस्यन् निजभक्तवरद्वारा श्रवणकीर्तनादिव्यतिरिक्तं कर्मज्ञानादिकं निरस्यन्नित्यर्थः । एवं च शब्दब्रह्मस्वरूपेण श्रीभगवतः श्रावणप्रत्यक्षत्वं साधितम् । अथ सुस्मितेन रसोल्लासान्नित्यविकसितेन । श्रयते आश्रयते हरिरेनामिति श्रीः तस्याः श्रियः परमायाः श्रीराधाया मुखकमलेन उपलक्षितस्सन् स्थिरचराणाम् अर्थान्नित्यधामगतानां स्थावरजङ्गमानां वृजिनं विरहखेदं निहन्ति तथा अत्रेत्थम्भूतलक्षणतृतीया यया नित्यसम्बन्धः सूचितः "वामभागे स्थितां तस्य राधिकां परदेवताम्" इति तन्त्रोक्तेः । अत्र परदेवतामिति परस्य पुरुषोत्तमस्य तस्यैव देवतामिवाराध्यामिति तस्याः प्राधान्यमप्यर्थादुक्तं तथा तेनैव रूपेण व्रजेत्यादि "व्रजनं व्याप्तिरित्युक्ता व्रजनाद् व्रज उच्यते" इति स्कान्दनिर्वचनानुसारेण व्रजपुरस्य श्रीगोलोकाख्यमुख्यप्रकाशस्य वनितानां परमानुरागवतीनां नित्यसहचरीणां कामो नवनवोऽभिलाषस्तस्य देवोऽधिष्ठाता शुद्धः प्रेमा तं वर्द्धयन् तासु विद्यमानमेव बहुलीकुर्वन् एवं च युगलरूपेण श्रीराधाप्राधान्येन च क्रीडन्नित्यदा वर्त्तत इति तस्य तेनैव रूपेण परब्रह्मत्व प्रतिपादितमिति "योऽसौ परं ब्रह्म गोपालः" इति तापनीश्रुतेः । एवं च यत्र तत्राप्येकत्वेन पुंस्त्वेन च निर्देशोऽभेदाभिप्रायेणेति मत तदुक्तं सम्मोहनतन्त्रे "तत्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकम्" इति व्यतिरेके दोषस्तत्रैवोक्तः—

"गौरतेजो विना यस्तु श्यामं तेजः समर्चयेत् । जपेद्वा ध्यायते वापि स भवेत्पातकी शिवे !" ॥

इति सङ्क्षेपः। अत्र कारिकाः—

अनन्तलीलस्य हरेस्त्रिधा लीलास्ति नित्यदा। व्रजे वने निकुञ्जे च श्रैष्ठ्यमत्रोत्तरोत्तरम्॥
पुनः सा द्विविधा चैका प्रकटाऽप्रकटाऽपरा। आद्या साधकसिद्ध्यै स्वसुखस्मृद्ध्यै तथाऽपरा॥
कदाचिद्द्वापरान्तेऽन्या यया सम्भूय भूगते। गोलोकस्य प्रकाशे हि किञ्चित्कालं प्रकाशते॥
स्वैः स्वैः परिकरै राधाकृष्णौ प्रकटतां गतौ। तत्तद्भावेन भजतां तां तां सिद्धिं विधाय च॥
पोष्यवर्गान् समादाय पुनरप्रकटौ सदा। कुञ्जे कुञ्जे विहरतस्तदेका सक्तमानसौ॥
प्राकट्ये चाप्यप्रकटप्रकाशेनैकतां गतौ। तां तां लीलां प्रकुरुतस्तां गायन्ति मुनीश्वराः॥
केवलाऽप्रकटा लीला रहस्यत्वान्न गीयते। साक्षादिति मुनीन्द्राद्याः प्रकटाप्रकटं जगुः॥
साधकानुग्रहस्तत्रासक्तौ हेत्वन्तरं मतम्। अष्टाविंशतिभिस्तत्राध्यायैः श्रीदशमे स्फुटम्॥
वात्सल्यसख्याविष्टानां योगे सिद्धिं समादिशत्। अथ माधुर्यसिद्धानां तामाख्यातुमुपक्रमः॥
मुनीन्द्रस्यातिहर्षेण पञ्चाध्यायेति निर्णयः॥

अथ श्रीरासपञ्चाध्यायी व्याख्याते।

तत्र श्रीबादरायणिरुवाचेति श्रीशुक उवाचेति पाठद्वयं तत्रातिहर्षज्ञापकं पुण्यविशेषमेतस्मिन्नुपकल्पयन् बादरायणिरुवाचेत्याह श्रीसूतः—तथाहि बदराणां समूहो बादरम् "बदरीखण्डमण्डिते" इति प्रथमोक्तेः। तदयनमाश्रयो यस्यासौ बादरायणो व्यासः तस्यापत्यं बादरायणिः ततश्च—

"अन्यत्र दशभिर्वर्षैर्यत् पुण्यमुपलभ्यते। मनुजैरेकरात्रस्य वासाद्बदरिकाश्रमे"॥

इति पाद्मात्। तत्र चिरतरवासेन समासादिततद्देशाभिधानस्य मुनेः पुण्यपुञ्जफलमत्रैव सत्पुत्रे निष्पन्नमिति सूचितम् तच्च पुण्यं श्रीकृष्णाराधनमेव सर्वज्ञस्य तस्य परमोत्तमे तस्मिन्नेव व्यवसायस्यौचित्यात् तादृशपुण्यफलरूपोऽसौ तत्पुत्र इति सर्वज्ञत्वश्रीभगवत्प्रेमरसमयत्वादिकं तस्मिन्नित्यसिद्धमेवेत्यपि दर्शितम्, ततश्च तादृशभक्त्यैवेयं वक्तृभिः संसेव्या रासकथेति सूचितम् यद्वा रहस्यप्रकाशने स्वेष्टदेवापराधोऽप्रकाशने च ज्ञानखलतादोष इत्युभयतः पाशारज्जुरिति चिन्तयन् मुनीन्द्र एव स्वदेहकृत्पुण्यसमूहं निष्प्रत्यूहमूहयन् सचिवम् आत्मानमभिजातं तज्जातं चाभिमन्यमान आख्यातवानाख्यानमित्यादिशन्नाह—बादरायणिरुवाचेति। यत्र च श्रीशुक उवाचेति पाठः श्रीरत्रातियोग्यत्वाच्छ्रीराधैव "आत्मया रमया रेमे" इति ब्रह्मसंहिताभ्यः "रेमे तया चात्मरत" इति वक्ष्यमाणाच्च तस्याः शुकः तत्क्रीडानिकुञ्जपञ्जरस्थः कलवाङ्नामा सुखधामा इति तल्लीलागानयोग्यतां तदेकपरतां तदुत्कर्षहर्षितां तद्रहस्यप्रकाशनेप्यतिरस्यतां रसतां च तद्वाक्यजातस्य कोमलालापतां च सूचयन् श्रीशुक उवाचेत्याह—अथ पूर्वाध्यायान्ते—

"नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः। कृष्णं च तत्रच्छन्दोभिः स्तूयमानं सुविस्मिताः"॥

इत्युक्तम् अस्यार्थः नन्दादयः "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशया त्वत्कृते" इत्युक्तदिशा तदेकवत्सला तं तेषामेव सम्बन्धिनं लोकं दर्शयामास "लोकं स्वं गोपानाम्" इति प्रागुक्तेः। न तु निर्विशेषं सत्यज्ञानादीनां तस्यैव विशेषणत्वात् नीरूपस्योत्तरस्य दर्शनानुपपत्तेश्च अत एव परमानन्दनिर्वृता बभूवुरिति शेषः। कृष्णं च सर्वाकर्षकपरमानन्दघनं नराकारं परं ब्रह्म छन्दोभिस्तदेकपरैरतिरहस्यैः गोपालतापिन्याद्युपनिषद्विशेषैः यद्वा, "सर्ववेदेतिहासानां सारं सारं समुद्धृतम्" इत्युक्तेरस्यैव महापुराणस्य प्राणभूतैः समनन्तरवर्ण्यमानैः। "भगवानपि ता रात्रीः" इत्यादिभिर्नियताक्षरविशेषैः स्तूयमानं दृष्ट्वा तदंतलीलायास्तेषु गोप्यत्वाच्छ्रुत्वेति नोक्तम् तावतापि सुविस्मिताः विस्मृतदेहदैहिका बभूवुरित्यर्थः। एवं तन्मनोरथपूरणं श्रुत्वा श्रीव्रजदेवीनामसमोर्द्ध्वमनुरागमभिलाषं च "पीत्वा मुकुन्दमुखमहौरघ", इत्यादिना "अक्षण्वताम्" इत्यादिना च तत्र तत्र वर्णितं पीत्वा अहो अतिकाठिन्यं श्रीभगवतो यदीदृशप्रियवर्गाणामुपेक्षेत्यन्तसमनुतप्यन्तं राजानमुपलभ्याह—भगवानपीति। अत्र "मयेमा रंस्यथ क्षपाः" इति दत्तवरासु या मनसा प्रतिश्रुतास्ता रात्रीर्वीक्ष्य भगवानपि परमस्वतन्त्रोऽपि रन्तुं मनश्चक्र इत्यहो तासां प्रेमप्राबल्यमिति भावः। वस्तुतस्तु रासोऽयं द्विविधः नित्यरासो महारासश्चेति—

"रहोविहारश्रयतान्नित्यरासोत्सवादपि। मनो मे हर्षमापन्नं न तृप्यति तृषार्तवत्"॥

इत्यादिपुराणोक्तेः। अत्र महारासश्रवणादिति प्रकरणादन्वेयं तत्रोत्तरस्य महत्त्वमपि हर्षप्रदत्वं च साधकानुग्रहापेक्षयेति सङ्गृहीतः श्रीमुनीन्द्रैः प्रकटलीला चाप्रकटप्रकाशस्यैक्येनैव जायत इति तथैव व्याख्यायते वस्तुतस्तु "नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः" "भगवानपि ता रात्रीः" "वीक्ष्य रन्तुं मनश्चक्रे" इत्यन्वयः। अत्र तम् अप्रकटं लोकं तास्तत्रोपलभ्यमाना रात्रीरित्यर्थः अपिरत्र समुच्चये कास्ता इत्यपेक्षायामाह—शरदा उपलक्षिताः तथा उन्मल्लिकाः फुल्लमल्लिकाश्चाति क्रमेण शरद्वसन्तग्रीष्मसम्बंधिनीः रात्रीरित्यर्थः। वीक्ष्येति तासां देवतात्वं ध्वनितम् अन्यथा कालावयववत्वादर्शनानुपपत्तेः। ततश्च तदभिमानिनी-

देवता एव राससम्पत्तिसम्पादयित्रीः साक्षादागता विशेषेणेक्ष्येत्यर्थः। एवं च ऋतुत्रयसम्बंधिन्य एकत्र मिलिता अशीत्युत्तरशतं रात्र्यभिमानिन्यो देवतास्तत्रैव यमुनापुलिनस्याप्रकटप्रकाशे स्वस्वसेवाऽन्यप्रकराः समागता इति ज्ञेयम् सोऽयं शरदामादाख्यो निकुञ्जविशेषः यत्र हि सर्वकालं रासादिसम्पत्तिः स्वभावसिद्धैव वर्त्तते तामेव समीक्ष्य साधनसिद्धानां व्रजाङ्गनानां मनोरथपूर्त्तिस्फूर्त्तिरुदयते स्म ताश्च द्विविधाः श्रुतिरूपा मुनिरूपाश्च पुनर्द्विविधाः "युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित्" इति श्रीहरिवंशोक्तेः। कालविदिति तासां मनोरथपूरणसमयज्ञ इत्यर्थः। तत्राद्याः परकीयाभिमानिन्यः अपरा स्वकीयाभिमानिन्यश्च गान्धर्ववृत्त्या स्वीकारात् स्वीयात्वमिह साम्प्रतमित्युज्ज्वलोक्तेः परन्तु "प्रच्छन्नकामिता ह्यासां गोकुलेन्द्रस्य सौख्यदा" इति"तन्त्रोक्तेस्तदनुकरणमपि मतम् पूर्वासां परकीयात्वमपि समुत्कण्ठावर्द्धनायाभिमानमात्रमेव न तु वास्तवं "माया कलिततादृक्स्त्रीशीलनेनानुसूभिः। "न जातु व्रजदेवीनां पतिभिः सह सङ्गमः" इति तत्रैवोक्तेः। अथ तासां मुनिरूपात्वं पाद्मोत्तरखण्डे—

"पुरा महर्षयः सर्वे दण्डकारण्यवासिनः। दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम्॥
ते सर्वे स्त्रीत्वमापन्ना समुद्भूताश्च गोकुले। हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात्॥

अत्र गोकुल इत्यनेन हरिं सम्प्राप्येत्यनेन च "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति न्यायादेते पूर्वमेव तादृशभावेन श्रीब्रह्मणोपासका आसन्निति सूचितम् तत्र श्रीरामं दृष्ट्वा तत्सारूप्येणोद्बुद्धसंस्काराः हरिं परममनोहरं धीरोदात्तधीरोद्धतधीरललितधीरशान्तभेदेन चतुर्विधनायकेषु धीरललितं स्वोपास्यमेव भोक्तुमैच्छन् सुविग्रहमित्युक्तेः न तु धीरशान्तं श्रीराममिति भ्रमः कार्य्यः रसाभासापत्तेः ते सर्वे गोकुलस्त्रीगर्भतः समुद्भूताः केचिच्च देशान्तरगोपस्त्रीभ्यः समुद्भूताः गोकुले विवाहिता इति विवेकः। तथा बृहद्वामने "अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे" इति। आसां नामानि कृष्णयामले—

"अथातः सम्प्रवक्ष्यामि गोपीः मुनिचरीः पराः। याः कृष्णं तपसा प्राप्य रमन्ते स्म निरन्तरम्॥
चित्रगन्धा सुगन्धा च स्रगन्धा हरिवल्लभा। रङ्गवल्ली च सारङ्गी शारदा च शुचिश्रवा॥
स्निग्धा सुवर्चा मृदुला मधुरा च मधुश्रवा। सुधाधारा चित्रकला रत्नचूडा कलस्वना॥
अमृता शोभना चैवामृतानन्दाऽमृतप्रिया। रत्नाभृङ्गी परिमला तथा रत्नकला शची॥
हारावली मालिनी च शुभा काञ्चनमालिनी। रुक्ममाला सुगन्धा च कस्तूरी पद्मिनी सती॥
कुमुद्वती रसाला च चित्ररूपा सनातनी। विपुला नन्दनी मेधा मेध्या सिद्धिर्धृतिर्ध्रुवा॥
कुमुदा कामिनी काम्या कौलिनी कमलावती। कलिका कामनीया च कामचारा कलावती॥
कुशला वकुला धोरा विधुरा विधुराङ्गिका। जयन्ती जयनी जाती जगन्मोहनसुन्दरी॥
रुचिरा चारुसर्वाङ्गी शुभ्रा सर्वाङ्गसुन्दरी। मङ्गला महिला मौञ्जी मदना मदनप्रिया॥
नीलावती नीलदीप्तिः प्रभा शोभा जया कृपा। मधुप्रियेति विज्ञेया अशीतिर्मुनिसुन्दरी॥
ज्ञानप्रेमान्वितैर्भावैर्भजन्त्यः कृष्णमन्वहम्। श्रीकृष्णरससम्मोदमुदिताः प्रमदा इमाः॥
अधनाप्तधनं यद्वन्न त्यजन्ति निजप्रियम्। इति।

तथैव श्रुतयोऽपि "गोप्यो जाताः" इति तत्रैवोक्तम्। यथा—

"ब्रह्मानन्दमयो लोको व्यापी वैकुण्ठसंज्ञितः। तल्लोकवासी तत्रत्यैः स्तुतो वेदैः परात्परः।
चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान् गिरा। तुष्टोऽस्मि ब्रूत वो प्राज्ञा वरं यन्मनसेप्सितम्॥

श्रुतयः ऊचुः —

कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः। कामिनीभावमासाद्य स्मरक्षुब्धा न संशयम्।
यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः। भजन्ति रमणं मत्वा चिकार्षाऽजनि नस्तथा॥

श्रीभगवानुवाच—

आगामिनि विरञ्चौ तु जाते सृष्ट्यर्थमुद्यते। कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ॥ इति

अत्र कामतत्त्वेनेति भगवद्विषयत्वात् कामोऽपि तत्त्वरूप इत्यर्थः। अन्यथा तत्त्वपदवैयर्थ्यादिति भावः। "स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियः" इति श्रुतिः स्तुतौ च "गायत्री चासु जाता" इति पाद्मसृष्टिखण्डे प्रसिद्धम्। द्विविधानामेवासां परकीयात्व तदेतन् प्रकटलीलायामेव क्वचिदप्रकटलीलायामपि तथा श्रुतिलीलयोरभेदाभिप्रायेणेत्यनवद्यं ततश्चैता एवोद्दिश्य कामेनेत्युक्तं पाद्मे। गोप्यः कामादिति सप्तमे च। पर्य्यवसानेति तु "जिघांसयाऽपि हरये स्तनं दत्वाऽऽप सद्गतिम्" इति वद्गिरंस्यापगमः स्पष्ट एव "ततो मुक्ता भवार्णवात्" इत्युक्तेः भवार्णवः कामवासनैव "दुःखं कामसुखापेक्षा" इति श्रीएकादशोक्तेः। आसां च "वितर वीर नस्तेऽधरामृतम्" इत्यादिना वक्ष्यमाणरिरंसावशेषेण कामादित्युक्तिरविरुद्धैव "प्रेमैव गोपरामाणां कामः, इत्यगमत्

पृथाम्” इत्यादिकं तु सिद्धावस्थापरम् आस्वेव कासाञ्चित् सहचरीत्वोपलब्धेः सुतरां प्रेमपरत्वमिति ज्ञेयम् अत एवासां सिद्धिरपि द्विविधा कासाञ्चिद्रिरसावशेषेण यूथेश्वरीत्वं कासांचित् शुद्धभावेन सहचरीत्वं च, तत्राद्यानां व्रजनिष्ठत्वमेव, उत्तरासां व्रज निकुञ्जनिष्ठत्वं यथायोगं नहि निकुञ्जेऽनेकनायिकात्वं “गोप्यकया युतस्तत्र परिक्रीडति नित्यदा” इति ब्रह्मयामले—

अत्रैवाहं पुमानेकः केवलोऽगम्य ईश्वरः। स्त्री द्वितीया तु राधैव तस्याः सख्यः स्त्रियोऽपराः” ॥

इत्यादिपुराणोक्तेश्च। अत एवैतासां चतुर्विधत्वमुक्तं पाद्मे—

गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः। देवकन्याश्च विप्रेन्द्र ! न मानुष्यः कथञ्चन ॥

तत्र श्रुतिमुनिरूपास्तूक्ताः तत्र श्रुतिचरीनामानि कृष्णयामले—

अथ वक्ष्ये श्रुतिचरीर्गोपीः कृष्णमनोरमाः। कृष्णस्य दक्षिणे पार्श्वे दीव्यन्ती चारुदर्शना ॥
सुतपोग्रतपाश्चैव सुव्रताथ प्रियम्वदा। सुरेखा च सुपर्य्योया रत्नरेखा बहुश्रवाः ॥
विश्रामधारणीचैव धरित्री क्षान्तिरेव च। सुमेधा सुमुखी धन्या सुखदा च सुलक्षणा ॥
सुन्दरी च सुखोत्पन्ना सुरभी गुणवत्यथ। सुलोचना सुफलिनी सुशीला सुभ्रुवा तथा ॥
उद्गीता च सुगीता च कलगीता कलस्वना। कलकण्ठी कलोत्ताना मातङ्गी च कलावती ॥
क्रमप्रदा च बहुदा बहुहूता बहुक्रिया। सुप्रयोगा विप्रयोगा बहुभोगा सुनासिका ॥
चत्वारिंशदमूर्गोप्यो ज्ञानप्रेमरसाश्रिताः। गायन्त्यः सामगानोत्थं सङ्गीतं मधुरं स्वरम् ॥
नानायन्त्रविधानेन तोषयन्ति निजेश्वरम्। इति

गोपकन्या नित्यसिद्धाः प्रकाशभेदेन व्रजनिकुञ्जगताश्च आद्याः द्विविधाः कान्तभावाः सख्यभावाश्च पराश्च सख्य एव देवकन्यास्तु—

देवेष्वंशेन जातस्य कृष्णस्य दिवि तुष्टये। नित्यप्रियाणामंशास्तु या जाता देवयोनयः ॥
अत्र देवावतरणे जनित्वा गोपकन्यकाः। ता अंशिनीनामेवासां प्राणसख्योऽभवन् व्रजे ॥ इति

श्रीमदुज्ज्वललोक्तौ। आसामेव सङ्गात् श्रुतिमुनिरूपासु काश्चिद्यूथेश्वरीत्वं काश्चिच्च तत्सहचरीत्वं प्राप्ताः काश्चित्तूत्कटेन शुद्धप्रेम्णा श्रीललितादिनां सङ्गाच्छ्रीराधा सहचरीत्वमिति विवेकः। तदुक्तं श्रीएकादशे “मत्कामा रमणं जारमस्वरूपविदोऽबलाः। ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः” ॥ व्याख्या। मम इमा मत्काः मयि कं सुखं यासामिति वा मन्मुखसुखिन्य इत्यर्थः। तासां मा रमणं श्रीराधारमणं प्रापुः याश्चास्वरूपविदः शुद्धप्रेमैकपरवानहमिति मम स्वभावानभिज्ञाः ता जारमिति जारबुद्धिवेद्यमेव नतु पापपतिम्। श्लेषेण जरयति कामवासनामिति जारस्तं प्रसिद्धजारत्वस्य स्वस्मिन्नसिद्धत्वमाह, ब्रह्मेत्यादि। ता अपि शुद्धप्रेमवतीनां सङ्गात् शतसहस्रशः परमं परा उत्कृष्टा मा श्रीराधाख्या यस्यासौ परमस्तं नराकृतिपरब्रह्मैवापुः ब्रह्मत्वमस्य कथमस्यावतारस्य ब्रह्मता भवतीति “योसौ परं ब्रह्म गोपाल” इति च तापिनीश्रुतेरपि सङ्क्षेपः विशेषजिज्ञासायां भक्तिमञ्जूषा दृश्या सा च प्राप्तिः कासाञ्चिद्भावपरिपाकभेदेन रासक्रीडायां कासाञ्चित् कुरुक्षेत्रयात्रायामिति “सिद्धिं कतिचिदेवासां रासारम्भे प्रपेदिरे’ इत्युज्ज्वलोक्तेः ‘‘तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन्’ इति श्रीदशमोक्तेश्च भावपरिपाकश्च कामवासनापगमेन निष्पद्यते स च शुद्धसख्योदयेनेति सिद्धान्तः एतदभिप्रेत्याहुः श्रीधरस्वामिपादाः—

ब्रह्मादिजयसंरूढदर्प्पकन्दर्प्पदर्प्पहा। जयति श्रीपतिर्गोपीरासमण्डलमण्डनः ॥ इति

अत्र श्रीपतिरिति दाम्पत्यरीतिः श्रीराधामाधवयोरेवेत्यभिप्रायेणोक्तं गोपीरासमण्डलमण्डन इति गोपीनामेवान्योन्यबद्धकराणां रासमण्डलस्य श्रीपतिरूपेणैव मण्डन इत्यर्थः। ततश्च कामविजय एव पर्य्यवसित इति भावः। एवमेवाग्रे व्यक्तं भावि अत एवानन्दवृन्दावनचम्पूमनु “अथ चतुर्मुखशर्वगर्वगरिमखण्डनानन्तरं मदकलकन्दर्प्पदर्प्पदमनाय निजमुरलिकालिकाशिक्षापरीक्षायै च” इत्यादिना अत्र मुरलिकाशिक्षा आलिपरीक्षेति क्रमः। यद्वा, मुरलिकैव या आलिका प्रियसखीत्यर्थः। वंशीप्रियसखीति ब्रह्मसंहिताभ्यः एवं च “योगमायामुपाश्रित” इत्यपि सुसङ्गतं योगोऽत्राघटितघटना सा चैकेनैव स्वरूपेण विविधभाववतीनां वाञ्छा पूरणम् तदर्थं मायः शब्दोऽस्यामिति योगमाया वंशी मीयते प्रमीयते वक्तानेनेति मायः इति व्युत्पत्तेः “लिङ्गं यद्द्रष्टृदृश्ययोः” इति श्रीद्वितीयोक्तेश्च। तथा वंशीप्रियसखीत्युक्त्या तदुपाश्रयणं युक्तमेव अपि च महारुद्रस्तु वंशिकेति श्रीकृष्णोपनिषच्छ्रवणात् कामदर्प्पदलनाय तदाश्रयणमिन्द्रदर्प्पदमनाय गिरिराजाश्रयणमिवावश्यकमिति भावः। यद्वा, योगमाया अचिन्त्यमहाशक्तिः श्रीभूलीलेति मुख्यतमशक्तित्रयी मुख्या लीलाख्यात्र च वृन्दापदाभिधेया तामुपाश्रित इत्यनवद्यम् अथवा योऽयं भगवान् यामुपाश्रितः सन् रन्तुं मनश्चक्रे सा आगमा दुर्गमा दुर्ज्ञेयेति यावत् “गोविन्दप्रियवर्गदुर्गमसखीवृन्दैरनालक्षिता” इति श्रीमत्सुधानिधेः। “ये गत्यर्थास्ते ज्ञानार्थाः” इत्यनुशासनाच्च सोऽपि रन्तुं मनश्चक्रे इत्यन्वयः। यद्वा, सा अगमा रन्तुं मनश्चक्रे सा का यामुपाश्रितः

भगवानपि रन्तुं मनश्चक्रे इति परिवृत्यान्वयः। सुगोप्यत्वाच्छ्लिष्टपदैरुपादानमशेषं प्राग्वत् अत एवास्यास्तथाविधं ध्यानमुक्तं श्रीमृत्युञ्जयतन्त्रे यथा—

"ध्यायेत्तत्र महादेवीं स्वयमेव तथाविधः। रक्तपद्मनिभां बालां बालार्ककिरणोज्ज्वलाम् ॥
पीतवस्त्रपरीधानां वंशयुक्तकराम्बुजाम्। कौस्तुभोद्दीप्तहृदयां वनमालाविभूषिताम् ॥
श्रीमत्कृष्णाङ्कपर्य्यङ्कनिलयाम्परमेश्वरीम्। सर्वलक्ष्मीमयीं देवीं परमानन्दनन्दिताम् ॥
रासोत्सवप्रियां राधां कृष्णानन्दस्वरूपिणीम्। भजेच्चिदमृताकारां पूर्णानन्दमहोदधिम् ॥ इति।

अत्र तथाविधः सखीभाववान्। तदुक्तं श्रीमत्सुधानिधौ—

"दुकूलं बिभ्राणामथ कुचतटे कञ्चुकपटम्। प्रसादं स्वामिन्याः स्वकरतलदत्तं प्रणयतः ॥

स्थितां नित्यं पार्श्वे विविधपरिचर्य्यैकचतुराम्। किशोरीमात्मानं किमिह सुकुमारीं नु कलये" ॥ इति।

अत्र भाव एव कार्य्यो न तु वेषोऽपि आर्य इति हृदयम्। तदुक्तं भक्तिभावप्रदीपे—

"परात्परेश्वरे भावश्चिदानन्दरसात्मकः। स दैहिकप्रकाशस्य बाध्यतेऽनुभवे नहि ॥

तथा—

भावो यावदहं योषित् पुमान् षण्ढस्तनोर्भ्रमात्। तावत्तु गोपीभावस्य कथमभ्युदयो भवेत् ॥ इति।

विवृत्तमिदं भक्तिमञ्जूषायाम्। यद्वा, श्रीवैष्णवतोषिण्यां सदैव योगो यया सह सा योगमाया श्रीराधा तामुपाश्रितः समीपस्थितः सन् तदाज्ञया ता व्रजसुन्दर्य्यो वीक्ष्य रात्रीश्च प्रतिज्ञाता वीक्ष्य रमणयोग्या ज्ञात्वा स्वयं श्रीराधासहितस्ताभिस्ताभिः सह चक्राकारं मण्डलं कृत्वा रन्तुं क्रीडयितुं मनश्चक्रे। यद्वा, अन्तरङ्गलीलायां सदैव सङ्गोद्योगम् आयते श्रूयते सा योगमाया श्रीराधा तामुपाश्रितः मुख्यतया स्वीकृतवान् पश्चात्तदाज्ञया मुरलीसङ्केतेन तस्याः सख्योऽन्याश्च चन्द्रावलीप्रभृतयोप्याकारिता इति एवं च प्रकटलीलायामपि तया सह नित्यक्रीडा सूचकानि "पूर्णाः पुलिन्द्यः" इत्यादीनि "यर्ह्यम्बुजाक्ष" इत्यादीनि च वाक्यजातानि सुसङ्गतानि भवन्तीति ज्ञेयम् अन्यथा कल्पनागौरवं रसाभास उपासनाविरोधश्चापद्येतेति दिक्। ततश्च यतो योगमायामुपाश्रितस्ततो भगवान् "भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्त्तिषु" इति कोशात् श्रीमानित्यर्थः। नित्ययोगे मतुप् नित्यदा तया युक्तः अतिशायने वा तदनुगतश्चेत्यर्थः। नित्ययोगो नाम परस्पराव्यभिचारित्वं तच्च—"राधया माधवो देवो माधवेनैव राधिका। विभ्राजन्ते जनेष्वा" इति बह्वृचपरिशिष्टश्रुतेः ॥ व्याख्यातेयं भक्तिम० यतो "नित्यरूपो हरिस्तां तु राधां न मुञ्चत्यथो सापि तं न क्षणार्द्धम्" इति माहेश्वरीसंहिताभ्यः तदनुगतिश्च तद्भक्तिः सा च तद्भक्तानां समधिगम्यते एव भक्ताः कृष्णं भजन्ति सततं तदनुग्रहतामाहेश्वरीसंहिताभ्यः अथवा—

स्तम्भनं मोहनं रूपं बलं वैदग्ध्यमेव च। अभिलाषोपपन्नत्वं षण्णां भग इतीङ्गना ॥ इति।

लक्षितो नित्यमधुरलीलो धीरललितो भगवान् योगमायामुपाश्रितः सन् रन्तुं मनश्चक्रे एवं चात्मनेपदप्रयोगोपि साधुः श्रीराधिकाराधनं कृते एवाय समुद्यमः रेमे तयेत्यत्र च तस्या एव तदात्मत्वेन स्थापयिष्यमाणत्वादिति सङ्क्षेपः। अत्र कारिकाः–

तदेवं ज्ञायते राधा नामबीजं कलं जगौ। ययौ सखीजनस्तयाः सुखायान्या स्वहेतवे ॥
श्रुतयो मुनयो गोप्यो दुर्गाव्रतपरा हि याः। सर्वाः संरमयन् रेमे दर्शयन्नेकतानताम् ॥
स्वस्य तस्यां रहस्येनां रमयामास तास्त्यजन्। प्रकाशभेदेन तया बहुरूपः स्वलीलया ॥
तस्या बिम्बभ्रमेणैव रमयामास काश्चन। अतः स्वाधीनपतिका राधिका राधनाय हि ॥
रासक्रीडेति निर्णेतुमस्माकमयमुद्यमः।

तत्रादावलङ्कारव्यङ्ग्यमर्य्यादयोभयोः गान्धर्वविवाहमेव रासापदेशेन सूचयति, स च दर्शितः श्रीराधाशतके राघवेन्द्रसरस्वतीपादैः—

श्रीकृष्णस्तिलकं चकार सुदृशो भाले निमाल्याननं त्वं वृन्दावनवल्लवीमणिरसि प्राणाधिके राधिके ॥
इत्युक्ते मुरवैरिणा जयजयेत्याकाशवाणी जगौ नेदुर्दुन्दुभयोपि पेतुरसकृन्मन्दारपुष्पस्रजः ॥
गान्धर्वोयं विवाहः समभवदनया राधया माधवस्य प्रायो गन्धर्वमुख्यैः सुरनरपतिभिर्गास्यते सर्वलोके ॥
आचन्द्रार्कं च वृन्दावनभुवि भविता कुञ्जगेहे विहारो रासे गोपीकुमारस्तव भवतु चिरं राधिके कण्ठहारः ॥

योगं यथावासरं रसनीयः ॥ १ ॥

श्रीरामनारायणकृता भावभावविभाविका

श्रीनिकुञ्जविहारिणे नमः ॥

श्रियं श्रीशं गिरां दुण्ढिं शिवां शिवमजं सुरान् । गुरून्विप्रानदो भक्तान्विश्वं वन्दे हरेर्वपुः ॥
शेषं सनत्कुमारादीन्साङ्ख्यायनपराशरौ । नारदं भगवद्व्यासं शुकं सूतं द्विजान् नृपम् ॥
सद्गुरुर्दर्शितो येन हरिनाथप्रदर्शकः । सुचेतरामराजाख्यं भवघ्नभवदं भजे ॥
क्षमाम् ईमातरं वन्दे सेवाकुञ्जं समाश्रिताम् । स्वान्ते सखीभिराहूतां राधाशृङ्गारतत्पराम् ॥
पापपुञ्जान्ध्यहर्तारं सावित्र्या प्रभया स्वया । भवानीदासशर्माणं शर्मकृत्कर्मवर्त्मदम् ॥
दोषाकरस्य मनसो दोषाकरकरङ्करौ । हरिनाथनखव्रातं भजे दोषाकराकरम् ॥
रामसिंहस्य चरणौ भजेऽहमरुणप्रभौ । मोहनैशतमोजाड्यभयभ्रान्तिहरौ द्युभिः ॥
सदा सुखार्कसच्छास्त्रसुतर्कैः कर्कसुद्युभिः । वन्दे कुतर्कनीहारहरं हृत्कञ्जकाशनम् ॥
वन्दे श्रीशङ्कराचार्यान् शङ्करान् जनसङ्करान् । बौद्धनाशङ्करान्स्वैस्यात्सर्वराजवशङ्करान् ॥
वन्दे श्रीनानकगुरून् शास्त्रबोधगुरुर्गुरून् । गुरुशिष्यतया ख्याता यच्छिष्या एव केवलम् ॥
वन्देऽहम्वैष्णवाचार्यान् श्रीशपादरतान्खलु । एतद्धामादिसत्त्वापद्वैतसत्वमवर्णयन् ॥
श्रीमद्भागवतव्याख्या कृता यैः श्रुतिसम्मता । विरतिज्ञानिरत्याख्यश्रीधारान् श्रीधरान् भजे ॥
वन्दे श्रीवल्लभाचार्यान् कृष्णपादैकतत्परान् । पुष्टिमार्गविधायान्ते न्यासात्स्वाचार्य्यमाश्रितान् ॥
मध्वाचार्यानहं वन्दे ये स्वाचार्याश्रिता अपि । मन्दानात्मज्ञकृपया भक्त्यै भेदमवर्णयन् ॥
केशवं कृष्णचैतन्यं हरिं स्वाचार्यमाश्रितम् । प्रेमभक्तिप्रवृत्त्यर्थं नामगानैकतत्परम् ॥
गौरपादाश्रितान् वन्दे जीवरूपसनातनात् । गोपितं यैः सदद्वैतं रसिकैरसलोभितः ॥
वन्दे तच्चिन्मयं धाम रसरासमुखात्मकम् । श्रुतिभिर्गोपिकाभूत्वा ब्रह्म यत्र विलोकितम् ॥
अहो चित्रमहो चित्रं वन्देऽहं प्रेमबन्धनम् । यद्बद्धं मुक्तिदं मुक्तं ब्रह्मक्रीडामृगीकृतम् ॥
मायासन्नर्तको नृत्यद्यद्वशे दारुदारवत् । वन्दे प्रेमसुखं ब्रह्म खं च प्रेमसुखास्पदम् ॥
सर्वश्रुतिशिरोरत्ननीराजितपदाम्बुजम् । गोपिकामध्यगं वन्दे श्रुत्यर्थं श्रुतिसङ्गतम् ॥

रूपलावण्यमाधुर्य्यमागाधिकां प्रेमभाजां सदा प्रेमसंसाधिकाम् ॥
बाधिकाबाधिकां वामवामाधिकां कृष्णसंराधिकां राधिकां त्वां भजे ॥
सारिकासारसंसारसन्तारिकाम् सारिकाधारिकां दीनासूद्धारिकाम् ॥
हारशृङ्गारसद्धारशृङ्गारिकां कृष्णसंराधिकां राधिकां त्वां भजे ॥
कृष्णहृद्धारिकां कृष्णहृद्धारिकां कृष्णहृद्धारिकां कृष्णहृद्धारिकाम् ॥
कृष्णाहृद्धारिकां कृष्णहृद्धारिकां कृष्णसंराधिकां राधिकां त्वां भजे ॥
भानुजां भानुजातीरसत्केलिनीं कामसङ्ग्रामसद्वीरसक्ष्वेलिनीम् ॥
नन्दनन्दाङ्गमृद्वङ्गसम्मेलिनीं कृष्णसंराधिकां राधिकां त्वां भजे ॥
कृष्णहृद्वासिनीं श्वेतसद्धासिनीं नित्यसद्रासिनीं चित्तसूल्लासिनीम् ॥
प्रीतिसङ्काशिनीं भीतिसन्नाशिनीं कृष्णसंराधिकां राधिकां त्वां भजे ॥
कृष्णसौदामिनीं कामसन्तापिनीं भामिनीं कामिनीं कोकिलालापिनीम् ॥
स्वामिनीं स्वामिनो नामसञ्जापिनीं कृष्णसंराधिकां राधिकां त्वां भजे ॥
नायिकानायिकां नेत्रसत्सायकां भक्तिसन्दायिकां सौख्यसञ्चायिकाम् ॥
प्रीतहृत्स्फीतसद्गीतसङ्गायिकाम् । कृष्णसंराधिकां राधिकां त्वां भजे ॥
चन्द्रभागाकृतं यः पठेदष्टकं कष्टसन्नाशकं स्विष्टकं मिष्टकम् ॥
प्रेष्टकृष्णेष्टकं शिष्टकं तं कुरु कृष्णसंराधिकां राधिकां त्वां भजे ॥

क्षीराभक्षं चौर्य्ये दक्षं गोप्रत्यक्षं वन्देऽध्यक्षम् । वध्वाकक्षं मायातक्षं रक्षापक्षे भाले पक्ष्मम् ॥
विद्युद्धामावामावामं मेघश्यामं हृत्स्वारामम् । उद्धर्षं सद्धर्षावर्षं वन्दे तर्षामर्षाकर्षम् ॥
वेदश्वासं जीवाभासं चित्तोल्लासं मध्वाहासम् । मायादासं मायोदासं क्षीरोदासं भूतावासम् ॥
तं संसारासारापारे पारावारे सारं सारम् । वन्दे कीर्त्याकारातारं विश्वोद्धारं सर्वाधारम् ॥

पिच्छापीडं पीडापीडं गोपाक्रीडं व्रीडाव्रीडम् । आध्यं माध्यं बाध्याबाध्यं साध्वं साध्यं प्रेमाराध्यम् ॥
विपद्गणध्वान्तसहस्रभानवः समीहितार्थार्पणकामधेनवः । अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादरेणवः ॥
वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः । यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥
पद्मापयोधरतटीपरिरम्भलग्न काश्मीरमुद्रितमुरो मधुसूदनस्य । व्यक्तानुरागमिव खेलदनङ्गखेदा स्वेदाम्बुपूरमनुपूरयतु प्रियन्नः ॥
श्रीमद्भागवते कृष्णे पञ्चप्राण इव स्थिताः । पञ्चाध्यायास्तु रासस्य व्याख्यातु तत्समाश्रये ॥
गोपिकावाहनं चाद्ये उक्तिप्रत्युक्तयो मिथः । ताभी राससमारम्भे कृष्णान्तर्ध्यानकौतुकम् ॥

श्रीमत्कृष्णद्वैपायनस्य भगवतो बदरोपलक्षितमहापुण्यप्रदश्रीनारायणाश्रमनिवासतदाचरितमहत्तपसाविर्भूतप्रेममयश्रीकृष्ण एव श्रीबादरायणिशब्देन तत्र तत्र सूचितप्रभावो मधुरालापश्रियातिमाधुर्यरसिकतया च शुकत्वेन देवदेवाविर्भावात्मकतया क्रीडानिरूपणपरत्वेन च देवतया प्रसिद्धः श्रीशुकदेवोऽत्र निगमकल्पतरुरसात्मकफलरूपे श्रीमन्नारदप्रेरणया प्रवृत्तश्रीभगवद्व्याससमाध्याविर्भूते—

"कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह । कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः" ॥

इत्यादिवर्णितमाहात्म्ये शुद्धात्मकपरब्रह्मकृष्णविग्रहे श्रीमद्भगवतेऽपि पञ्चप्राणात्मना निवसतामेतेषामध्यायानां प्राधान्यमवगत्य –

"यावानहं यथाभावो यद्रूपगुणकर्मकः । तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात्" ॥

इति भगवद्वचनात् यावान् विभुः सच्चिदानन्दानन्तस्वरूपो यथा प्रेमरसिकेषु प्रेमभाववान् नृत्यादिषु च नेत्रकटाक्षकरचालनादिविचित्रभावदर्शकश्च यदखिलमाधुर्यादिनिधिः श्यामसुन्दररूपवान् सौष्ठवादिविचित्रानन्दमात्रगुणनृत्यरतिविहारादिकर्मको भगवानध्यायपञ्चकविषयस्तज्ज्ञानस्य भगवदनुग्रहाधीनतामाकलय्य तदारम्भे भगवानितिशब्देन मङ्गलमङ्गलभगवत्स्वरूपस्मारकमङ्गलमनुचरन् रासप्रसङ्गमाह—भगवानपीति । स च शब्दो ध्वनिना मङ्गलात्मकोऽपि वाक्यार्थेऽप्यन्वितः तत्र भगवच्छब्दे—

"ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना" ॥ इति

वाक्योक्तैश्वर्य्यादिषट्काधारतया सच्चिदानन्दानन्तविभुसर्वावयवः स्वगतभेदवर्जितो माधुर्यादिचिदानन्दात्मकगुणविग्रहः—

"सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे । नमो विज्ञानरूपाय परमानन्दरूपिणे" ॥

"तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनन्द आत्मा ब्रह्मपुच्छं प्रतिष्ठा" इत्यादिश्रुतिभिः—

"निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः ।
आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा" ॥

इत्यादिस्मृतिभिश्च प्रतिपादितो हरिर्मतुप्प्रत्ययेन प्रतिभाति तथा च नित्यनिर्दुःखे सुखघने भगानां दुःखनिवारकत्वसुखकरत्वासम्भवादपार्थकत्वेन तत्स्मरतां दुःखापनोदपरमानन्दापादनादिनिखिलाभिमतपूरकत्वेनैव सार्थक्यमिति तत्स्मरणरूपमङ्गलस्य निष्प्रत्यूहसाफल्यसिद्धिः भगवानपि रन्तुं मनश्चक्रे इत्यन्वयः । ननु, "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति न्यायात् प्रवृत्तिमात्रस्य "प्रयोजनाकाङ्क्षत्वात् प्रयोजनमात्रस्य च लोके सुखदुःखाभावयोरेवान्तर्भावात् निर्दुःखसच्चिदानन्दरूपस्य तु तयोर्नित्यसिद्धत्वेन तत्प्रयुक्तरमणेच्छानुपपत्तिरेव न च सच्चिदानन्दरूपस्यापि जीवस्य दर्शनात् कृष्णेऽपि तथैवेच्छा सम्भवात्कानुपपत्तिरिति वाच्यम् -

"सपदजयात्वजामनुशयीत गुणांश्च जुषन् भजति सरूपतां तदनुमृत्युमपेतभगः" ॥

इत्यादिवाक्येनापेतभगस्य लुप्तज्ञाननेत्रस्याज्ञानप्रतिबद्धस्वरूपानन्दभानस्य जीवस्येच्छोपपत्तावपि—

"त्वमुत जहासि तामहिरिव त्वचमात्तभगो महसि महीयसेष्टगुणितेऽपरिमेयभगः" ॥

इत्यादिनाऽऽत्तापरिमेयभगस्येच्छानुपपत्तेस्तादवस्थ्यात् अतो भगवानपि कथं रन्तुं मनश्चक्रे तत्राह—ताः प्रजा वीक्ष्य मनश्चक्र इति कथम्भूतास्ता रात्री रात्रिवत्तमोव्याप्ताः ज्ञानभास्करोदयाभावेन मुद्रितहृत्कमलेन स्वरूपानन्दभानशून्याः एवमज्ञानावरणे निर्दिश्य विक्षेपशक्त्या भ्रान्तत्वमाह—शरदोत्फुल्लमल्लिका इति । शरदि जाड्यमये उत्फुल्लमल्लिकाद्युपलक्षितसुखसम्भावनाशून्ये गृहादावपि भ्रान्त्यैवासमन्तादुत्फुल्ला मल्लिका यासामसुखे सुखं पश्यन्तीः प्रजा आलोक्य अयोगेषु चित्तनिरोधादियोगशून्येषु स्वस्मिन्नयुज्यमानेषु वा सर्वथा अयोग्येषु वा या माया कृपा तामुपाश्रितः । यद्वा, तासामयोगाय स्वस्वरूपविच्छेदाय प्रवृत्ता या माया तामुपाश्रितस्तदुपहितस्तथा च—

"भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्य्ययोऽस्मृतिः । यन्माययातो वुध आभजेत्तं भक्त्यैकयेशं गुरुदैवतात्मा" ॥

"दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" ॥

विचक्षणोऽस्यार्हति वेदितुं विभो—

रनन्तपारस्य निवृत्तितः सुखम् ।

प्रवर्त्तमानस्य गुणैरनात्मन—

स्ततो भवान् दर्शय चेष्टितं विभोः ॥

इत्यादि वाक्यैरीदृक् स्वलीलागानाद्यतिरिक्तं सुखसाधनमपश्यन् रन्तुं मनश्चक्रे । यद्वा । तासां योगाय स्वमनोहरलीलाप्रवणगानादिना स्वस्मिन्योजनाय या माया कृपा "माया दम्भे कृपायां च" इति कोशोक्तेस्तामुपाश्रितो रन्तुं मनश्चकारेत्यर्थः । यद्वा, ता एव प्रजा वीक्ष्य अमां निश्चलां मायां कृपामुपाश्रितः स स्वयं भगवानपि प्रयोजनशून्येपि तयाऽनपगामिन्या कृपया रन्तुमुद्यत इति भावः । यद्वा, तां मुमुक्षुरूपाः प्रजाः वीक्ष्य रन्तुं मनश्चक्रे ताः कीदृशीस्तदाह—रात्रीः "रादाने" इत्यस्मात् दानपरा उदाराः सर्वत्यागशीला वा भगवत्यैवैहिकस्वसर्वस्वस्यामुष्मिकसर्वक्रियाफलस्य स्वमनोवाक्कर्मणश्च समर्पणशीला वा तत्रैहिकामुष्मिकात्सर्वतो निर्विद्य भगवत्परत्वे हेतुमाह—शरदोत्फुल्लमल्लिका इति । "दोऽवखण्डने" इत्यस्मात् शरा इव द्यन्ति अवखण्डयन्ति उत्फुल्ला मल्लिका यासां मल्लिकाद्युपलक्षितविषयसुखे शरादिवदवखण्डनादिदोषदृष्ट्या सर्वत्यागादिना भगवत्पराः प्रजा आलोक्य तासाम् इतरसुखनिर्विण्णानां परमानन्दघने स्वलीलासुखे योगाय माया कृपा तामुपाश्रितः । यद्वा—

"वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥
मद्भक्ति विमुखानां हि शास्त्रगर्तेषु मुह्यताम् । न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि ॥

इत्यादिनान्वयव्यतिरेकाभ्यां ज्ञानप्राप्तेर्भक्त्यधीनतया तासाम् अम्र-निश्चले कूटस्थाविकारिणि स्वस्वरूपे या मा प्रमा उपाधिविविक्तस्वरूपसाक्षात्काररूपा तस्यां तत्सम्पादने ताभिरुपाश्रितो यः स भगवानपि रन्तुं मनश्चक्रेः । यद्वा, तासाम् अयोगाय योग उपाध्यध्यासस्तदपवादाय या मा प्रमा । यद्वा, न युज्यते उपाधिसङ्गं न भजते असङ्गो न हि सज्जते य आत्मा तद्विषया मा प्रमा । यद्वा, तासां योगाय स्वस्वरूपाभेदाय या मा भाग (त्याग) लक्षणया महावाक्यजन्यप्रमा । यद्वा, 'योगश्चित्तवृत्तिनिरोधः' तदन्विता मा प्रमा तस्यामुपाश्रितः—

"सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनम् । गुणप्रकाशैरनुमीयते भगवान् प्रकाशते यस्य च येन वा गुणः" ॥

इत्यादिवाक्यैस्तथाभूतज्ञानस्य भगवल्लीलानुसन्धानाद्यधीनतया रन्तुं मनश्चक्रे । यद्वा, मा प्रज्ञा द्विविधा अस्थिता स्थिता चेति तत्र या अगा स्थिता मा प्रज्ञा तस्यां मुमुक्षुरूपाभिस्तत् सम्पादके उपाश्रितो यः स मनश्चक्रे इति । यद्वा—

"या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" ॥

इति वचनात् यत्र संसारे भूतानि जाग्रति तत्र यासां रात्री रात्रयो भवन्ति यस्मिंश्च स्वरूपे सर्वभूतानां निशेवशरज्जाड्येनाननुभवस्तत्रोत्फुल्लमल्लिका इव सुखं यासां ता ज्ञानिरूपाः प्रजा वीक्ष्य तन्मनो हर्तुम् आवरणतन्निवृत्तिभ्यां विभुसच्चिदानन्दानन्तश्यामसुन्दरमाधुर्यनिधिसर्वाङ्गस्य क्वचित्तिरोधानेन क्वचिदाविर्भावेन नृत्यलीलादि सम्पादयितु योगमायामुपाश्रितो रन्तुं मनश्चक्रे । यद्वा, भगवल्लीलाधाम्नि "न यत्र माया किमुतापरे" इत्यादिना मायाया अप्रवेशाद्भगवल्लीलाऽऽविर्भावतिरोभावादीनामपि स्वरूपात्मकत्वादयोगमायामुपाश्रित एव रन्तुं स्वरूपात्मकलीला आविर्भावयितुं मनश्चक्रे—

"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे । कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥
परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया । गृहीतचेता राजर्ष ! आख्यातं यदधीतवान्" ॥

इत्यादि वचनात् । यद्वा, ताः चीरहरणवरप्रदानावसरे "मयेमा रंस्यथ क्षपाः" इत्यत्र नित्यसिद्धतया तदापि वर्तमानत्वेन इदमा निर्दिष्टास्तदारभ्यस्तद्भावनापरिपाकेनेदानीमाविर्भूता रात्री वीक्ष्य रन्तुं मनश्चक्रे । यद्वा, कथम्भूता रात्रीः ता अतिविलक्षणाः ब्रह्मरात्र उपावृत इत्यत्र ब्रह्मरात्रिसमकालत्वेन वक्ष्यमाणास्तथा—

"तास्ता क्षपाः प्रेष्ठतमेन नीता मयैव वृन्दावनगोचरेण । क्षणार्द्धवत्ताः पुनरङ्ग तासां हीना मया कल्पसमा बभूवुः" ॥

इत्यत्र च कल्पकालत्वेनाभिहिताः अयमत्रार्थः भगवानपि ता रात्रीरित्यत्र निर्दिष्टस्य ता इति शब्दस्य प्रत्यभिज्ञानार्थमतिविलक्षणत्वसूचनार्थं च भगवतापि तास्ता इत्युक्तम् तास्ताः कल्पसमा क्षपा मयैव सह क्षणार्द्धवन्नीताः तत्र कल्पसमानां क्षणार्द्धवन्नयने हेतुगर्भितं विशेषणं प्रेष्ठतमेनेति प्रियतमसमागमे सुखातिशयेन समाधिवद्बहुकालस्याप्यल्पवन्नयनोपपत्तः पुनःकथम्भूतेन वृन्दावनगोचरेण तत्र प्रत्यक्षेण न हि व्यापकमद्विग्रहस्य कदाचित्तत्रावस्थितिः कदाचिदत्रेति किन्तु गोचरत्वागोचरत्वमात्रं विशेष इति । यद्वा तत्र गाश्चारयतीति तथा तेन तथा च साजात्येन प्रेष्ठतमत्वेन च निश्शङ्कनिरतिशयप्रेमास्पदत्वध्वनिः यद्वा, अन्यत्र

"अनश्नन्नन्यो अभिचाकशीति" इत्यादिश्रुतिभिरभोक्तृत्वेन प्रसिद्धोऽपि वृन्दावने एव गा इन्द्रियाणि चारयतीति तथा तेन तथा च प्रेमनिधौ वृन्दावने प्रेमिसन्निधौ प्रेमप्रभावाद्व्यावहारिकस्यापि जीवेशविभागस्यानवस्थितिरिति भावः। 'यद्वा, वृन्दावने या गा इन्द्रियाणि गोपीगोगणमृगखगादिचक्षुरादीनि तानि स्वीयरूपमाधुर्यगानसौष्ठवाङ्गसौरभ्यस्पर्शाधरामृतादौ सञ्चारयतीति वृन्दावनगोचरस्ते (न) नायं भावोऽन्यत्र—

"न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चिदेनम्। न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैर्मनसा कर्मणा वा ॥

इत्यादि श्रुत्येन्द्रियागोचरत्वेऽप्यत्र प्रेमान्वितेन्द्रियविषयो भवति यथा रत्नतत्त्वमन्येन्द्रियादिष्वगमप्यधीतरत्नपरीक्षाशास्त्रसंस्कृतेन्द्रियस्य विषयं यथा च ब्रह्मात्मतत्त्वं "यन्मनो न मनुते" इत्यादिभिर्मनोऽपि विषयमपि वेदान्ताभ्यासंस्कृतमनसो "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" इत्यादिना गोचरं भवति तद्वन्नचेन्द्रियगम्यत्वे दृश्यत्वेन मिथ्यात्वानुमानं मनोगम्यत्वेऽपि तुल्यत्वात् इन्द्रियगम्यत्वेन मिथ्यात्वसाधने मिथ्या वस्तुमात्रस्येन्द्रियाविषयतया विरुद्धत्वापाताच्च न च मनसावरणनिवृत्तिरेवात्र सप्रेमेन्द्रियैरपि तथैव स्वीकारात् तद्भानस्य स्वप्रकाशतयैव करणाविपर्यासमात्रस्य प्रेमप्रभावत्वमिति सन्तोष्टव्यम् तद्रात्र्यपेक्षयान्या रात्रयः क्षणार्द्धवदपि मया हीना विरहखेदेन कल्पसमा बभूवुरिति तथा—

"एवं शशाङ्कांशुविराजिता: निशाः स सत्यकामोऽनुरताबलागुणः।
सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः" ॥

इत्यत्र वक्ष्यमाणाविलक्षणत्वं ताः शब्देन द्योत्यते अत्र तु सर्वाः निशाः शशाङ्कस्य पूर्णचन्द्रस्यांशुभिर्विशेषेण राजिताः शोभिताः नान्यत्र चन्द्रस्य दक्षशापान्नित्यपूर्णत्वं नापि सर्वनिशानां चन्द्रवत्त्वं नापि तदंशुभिर्विशेषेण राजमानत्वं किन्तु क्वचित्तमः क्वचित्प्रकाश इति महद्वैलक्षण्यम्। किञ्च, शरदि भवा इत्युपलक्षणम् ऋत्वन्तराणामपि तथाकाव्येषु कथ्यमाना ये रसाः तेषामेवाश्रया नतु तद्दोषाणामित्यप्यतिवैलक्षण्यं नह्यन्या रात्रयः सर्वाः सर्वरसाश्रया दोषवर्जिताश्च भवन्ति दोषानाम्ना प्रसिद्धत्वात् तदेव सर्वर्तुगुणाश्रयत्वं व्यञ्जयन् रात्रीर्विशिनष्टि शरदोत्फुल्लमल्लिका इति। शरदि आ समन्तात् उत्फुल्ला मल्लिका यासु तास्तथा तथा च शरदि मल्लिकाविकासरूपवसन्तगुणकथनेन तापादितद्दोषाकथनेन च सर्वर्तुगुणाश्रयत्वं दर्शितम् न चात्र वैलक्षण्येऽप्यसम्भावनावसरः यदा स्वस्वरूपस्याप्यभानहेतुना महामोहनैशतमसा व्याप्तेऽस्मदादिहृदाकाशे भगवल्लीलानुसन्धानमात्रेण परमाह्लादाद्यमृतरसमयभक्तिप्रभान्वितनित्यनिरतिशयभगवत्सत्त्वचन्द्रप्रकाशे सति दैवसम्पन्निरूपितसर्वगुणाविर्भावो दोषसङ्क्षयश्च नान्यदेति—

"यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः।
हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः" ॥

"न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे" ॥

इत्यादिभिर्निरूपितस्तदा किमु वाच्यं भगवल्लीलाधाररात्रीणां यद्वा, शरदोत्फुल्लमल्लिका वीक्ष्य रन्तुं मनश्चक्रे शरदि सत्यपि जाड्ये विकासविरोधिनि भगवल्लीलोत्साहेनैवोत्फुल्ला या मल्लिकास्ता वीक्ष्येत्यनेन यथा हृद्भूमौ प्रेमोल्लासेन सत्यपि जाड्ये विकासविरोधिनि भगवत्प्रसादप्रोत्फुल्लिते सुमनसि तत्र मोहशरज्जाड्ये सत्यपि भगवतो रन्तुमुत्साहस्तथात्रापीति ध्वनिः। तथा च प्रेमोल्लास एव भगवत्प्रसादहेतुर्न जडचेतनविभागः। यद्वा, शरदि स्वविकासकालाभावेपि मल्लिकानां भगवल्लीलाप्रेम्णैवोत्फुल्लतादर्शनेन वृन्दावनलताद्रुमादीनां न जडत्वमत एव नन्दनन्दनवनलतादीनामनपवर्गदनन्दनवनगतकल्पद्रुमाच्छ्रैष्ठ्यं किमु वाच्यं वेदद्रुमपुष्पितवचसामर्जुनं प्रति भगवता निन्दितत्वेपि वृन्दावनपुष्पाणां श्रीसङ्कर्षणं प्रति प्रशसनात्ततोऽपि श्रैष्ठ्यमेव तदुक्तमभियुक्तैः "निगमद्रुमे मृगय माम् वृन्दाविपिने द्रुमे द्रुमे पश्य। यद्व्रजवनिता भूत्वा श्रुतिभिरिहैवावलोकितं ब्रह्म" अत एव कथम्भूता मल्लिकास्ता अतिविलक्षणाः क्रीडोपयोगितया पूर्वमेव बलरामं प्रति प्रशंसिता इति वा पुनः कीदृशीः रात्रीः "रा दाने" इत्यस्मादेवोदाराः—

"अहो एषां वरं जन्म सर्वप्राण्युपजीविनाम्। सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥
पत्रपुष्पफलच्छायामूलवल्कलदारुभिः। गन्धनिर्यासभस्मास्थितोग्मैः कामान् वितन्वते ॥
एतावज्जन्मसाफल्यं देहिनामिह देहिषु। प्राणैरर्थैर्धिया वाचा श्रेय एवाचरेत् सदा ॥

तथा चागानां मल्लिकादीनां या मा स्वस्मिन् रतिमती मतिः तस्याम् अगमायां तेषु अगमेषु मायां कृपां वा उपाश्रितो यः स भगवानपि रन्तुं मनश्चक्रे। किञ्चाकाले मल्लिकाविकासोक्त्या ऋतुराजेनातिराजनीतिदक्षेणातिसुमनसा रुद्रदग्धस्य स्वमित्रस्यानङ्गस्य भगवत्तत्सखीमागमे उद्भवमभिकाङ्क्षिणा निपतितपुष्पास्तरणशय्यादिभिः कुसुमितद्रुमाराममण्डपैः सुमनोमुक्तादामलतावितानादिभिः सेवा कृता युक्तं चैतदतिसुमनसां मित्रसौहृदं भगवत्सेवा च तदालक्ष्य भगवानपि मनसा मनोजमुद्भावयितुं मनश्चक्रे। यद्वा, नीतिज्ञेन तेन कामविजयाय प्रभोरुद्यममालक्ष्य ब्रह्मेन्द्रवरुणादिविजयिकृष्णमहात्म्याभिज्ञेनापि स्वमित्रमपि तादृशमाकलय्य

सख्यधर्मपालनौचित्यमवगत्य भगवता पराजयेपि हान्यभावं तत्त्रोटनेऽपि हारादिरूपेण तदङ्गसौख्यं च सम्भाव्य द्रुमलताकुञ्जादिकुसुमशरदुर्गाणां कुसुमशरैः पूर्णता कृता तदेवाह—शरदोत्फुल्लमल्लिका इति। शरान् ददतीति शरदाः कुसुमबाणाय तदायुधसमर्पिका उत्फुल्ला मल्लिकाः तथा विरहिजनहृदयविदारणाय कुन्दकलिकाः शूलानि केवलाः कुन्ताकाराः किंशुकपुष्पाणि विरहिहृदयरक्ता रक्तार्द्धचन्द्रशररूपाणि वीक्ष्य रन्तुं रमणेनैव समित्रमन्मथमनो मन्थितुं मनोद्वारा मनोजपराभवमालक्ष्य मनश्चक्रे। यद्वा, शरदोत्फुल्लमल्लिकेत्युपलक्षणं कुसुमितलतासख्यालिङ्गितान् वनस्पतीन् पतीन् वायुना शाखाभुजचालनेन नृत्यतो वीक्ष्य जातोत्साहो रन्तुं पुलकिततनुस्वसख्यालिङ्गितवपुषा नृत्यादिना विहर्तुं मनश्चक्रे। यद्वा, ताः स्वयं दत्तवराः चीर्णगौरीव्रताः पूर्वतप्ततपसो मुनिरूपाः श्रुतिरूपा देवाङ्गनारूपाः स्वधाम्नोऽवतीर्णा नित्यसख्यः सखीभावनालब्धतद्रूपाः साधनसिद्धाश्च गोपीर्वीक्ष्य तत्प्रेमरशनया निबद्धाकृष्टचितः सच्चिदानन्दघनः कृष्णो भगवानपि रन्तुं मनश्चक्रे यथा—

"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे। कुर्वन्त्यहेतुकीं भक्तिमित्थम्भूतगुणो हरिः" ॥

इत्यादौ भगवद्गुणानामात्मभूतानामात्माराममुनिमनःकर्षकत्वमित्यत्यद्भुतत्वं तथा प्रेमरसात्मकव्रजवनितागुणानां नित्यसर्वज्ञसच्चिदानन्दघनभगवत्कृष्णमनःकर्षकत्वमिति ततोऽप्यतिचमत्कृतत्वं चमत्कृतत्वेऽपि यथा मुनीनामात्मारामत्वाद्भगवतस्तु "आत्मा नारायणः परः" "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्—

"ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी। दधार सर्वात्मभूतं काष्ठा यथानन्दकरं मनस्तः" ॥

प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन्।
"नित्यप्रिये" अखिलदेहिनामन्तरात्मदृक् "अहमात्मा गुडाकेश! सर्वभूताशयस्थितः" ॥ इत्यादि

श्रुतिस्मृतिवृन्दशतैरात्मस्वरूतत्त्वात्तद्गुणानां च "यद्रूपगुणकर्मकः" इत्यादौ यद्रूपा एव गुणाः कर्माणि च यस्येति तद्रूपत्वादुचितमेव तन्मनसां तत्र रमणम्—

"रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि। इति रामपदेनासौ परं ब्रह्माभिधीयते" ॥ इति।

श्रुतिसिद्धत्वात्तत्र तद्रमणस्य तथा भगवतः कृष्णस्य प्रेममधुमधुकरत्वात्तत् तु सुमनसां सुमनसां तु तन्मध्वाकरत्वाद्योग्यमेव तदाकर्षणं तत्र रमणं च कथम्भूतास्ता गोप्यस्तत्र तेनैव प्रेमोत्कर्षेण विशिनष्टि–रात्रीः शरदोत्फुल्लमल्लिका इति। रात्रीरित्यत्र "रा दाने" इत्यस्मात्स्वसर्वस्वस्य स्वात्मनश्च दात्रीः—

"यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते। यज्जीवितं तु निखिलं भगवान् मुकुन्दः ॥
या दुस्त्यजं स्वजनमार्य्यपथं च हित्वा भेजुमु कुन्दपदवीम् ॥
"वक्षः श्रियैकरमणं च भवाम दास्यः" श्यामसुन्दर! ते दास्यः करवाम तवोदितम् ॥

इत्यादिवचनात्। यद्वा, वर्णितान्योन्यविशेषणविशेष्यता रात्रीश्च शरदोत्फुल्लमल्लिकाश्च ता गोपीश्च वीक्ष्य रन्तुं मनश्चक्रे यद्वोक्त पक्षेषु सर्वत्र भगवल्लीलाधाम रात्रीणां मल्लिकाद्युपकरणानां सखीनां च तत्पदलक्ष्यभगवत्स्वरूपत्वद्योतनाय "नन्दादयस्तु ते दृष्ट्वा परमानन्दनिर्वृताः "तास्ताः क्षपाः प्रेष्ठतमेन नीताः "भगवानपि ता रात्रीः" इत्यादौ सर्वत्र तच्छब्दप्रयोगः तद्वीक्ष्य (कथं) किं भूतः सन् रन्तुं मनश्चक्रे? तदाह—ताः प्रेमायस्कान्तमणिरूपाः गोपीः प्रति अयोवत्स्वत एव प्रेमानुगस्वभावतया गच्छतीति अयोगा या माया कृपा तामुपाश्रितः। यद्वा, तासां स्वबाहुदृढबन्धार्हाणां स्वस्नेहगुणगणकुललज्जाबन्धनाभ्यामुभयतः कृष्यमाणानां कुललज्जाबन्धनायोग्यतामालक्ष्य तदयोगाय विच्छेदाय या माया कृपा तामुपाश्रितः। यद्वा, तासां स्वस्मिन् योगाय योजनाय स्वात्मना तासां संयोगाय वा मायां कृपामुपाश्रितः। यद्वा ताः प्रति अमा निश्चला या माया कृपा तामुपाश्रितो यः सः। यद्वा स्वश्यामसुन्दरवपुः प्रति अयस्कान्तमणिं प्रति अयोवत्स्वतो गता अयोगा गोपदारास्तेषु मायां कृपामुपाश्रितः। यद्वा, स्वस्मिन् युज्यन्ते इति योगाः। गोपदारास्तेषु मायां कृपामुपाश्रितः। यद्वा यो भगवांस्तेषां अगेषु गोपदारेषु निश्चलेषु निश्चलमतिषु च—

"चित्तं सुखेन भवताऽपहृतं गृहेषु यन्निर्विशत्युतकरावपि गृह्यकृत्ये।
पादौ पदान्न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किम्वा" ॥

इति वक्ष्यमाणतद्वचनात् या माया कृपा तामुपाश्रितः। यद्वा, तासां स्वस्मिन् अयोवत् गता या मा प्रमा यथार्थमतिस्तस्यामुपाश्रितः। यद्वा, तासामन्येषु वित्तबन्धुप्रभृतिषु अयोगा अयुज्यमाना अन्यायोग्या वा या मा मतिः तस्यामुपाश्रितः। यद्वा, स्वस्मिन्नेव युज्यमाना स्वस्यैव वा योग्येति योगा मा तासां मतिस्तस्यामुपाश्रितः यद्वा, यो भगवांस्तासामगा निश्चला या मा मतिस्तस्यामुपाश्रितः। स रन्तुं मनश्चक्रे। यद्वा, यः स इति पूर्ववत् "अकारो वासुदेवः" स्वयमेव तद्गता या तासां मा मतिस्तस्यामुपाश्रितः। यद्वा, अन्या योग्या अयोग्या या तासां मा अङ्गशोभा तस्यामुपाश्रितो लग्नमनाः। यद्वा, स्वयोग्यत्वेन योगा या तासां माऽङ्गशोभा तस्यामुपाश्रितः। यद्वा, यः स इति पूर्ववत् तासाम् अगा अनपगामिनी नित्या या मा शोभा तस्यामुपाश्रितः। यद्वा, योगा वक्षसि

संस्थिता या मा लक्ष्मीस्तस्यामुपाश्रितोऽपि ता वीक्ष्य रन्तुं मनश्चक्रे इति लक्ष्म्या अपि अतिशयितं तासां प्रेमसौभाग्यं भगवतः प्रेमवश्यत्वात्। यद्वा, अमा स्वचाञ्चल्यं परित्यज्य नित्यमुरसि संसक्ता या मा तस्यामुपाश्रितोऽपि यः स तां वीक्ष्यैव तत्प्रेमोत्कर्षितविह्वलितच्छविमालोक्यैव अनागता अपि ता वेणुसाहाय्येनाहूय रन्तुं मनश्चक्रे इति चित्र प्रेमसौभाग्यसौष्ठवं तासाम् योगाय स्वात्मना योजनाय यद्वा, तासां माङ्माने शब्दे च" इत्यस्मान्मायः शब्दो मीयतेऽर्थो वक्ता च यस्मात्सः लिङ्ग यद्द्रष्टृदृश्ययोः" इति भागवतोक्तेर्वा मायः शब्दो यस्यास्तां मुरलिकामुपाश्रितः। यद्वा, तासां बन्धुगृहादिभ्योऽयोगाय तल्लज्जादिव्यवच्छेदाय वा मायः शब्दो यस्यास्तामुपाश्रितः। यद्वा, स्वस्मिन् योगाय या मा मतिस्तामापयति प्रापयति स्वमधुरध्वनिना या सा योगमाया वंशी तामुपाश्रितः। यद्वा, अन्येष्वयोगाय मां मतिमापयति ध्वनिनैव तामुपाश्रितः। यद्वा, स्वस्मिन्नगां निश्चला मा मतिमापयति मधुनादेनेव या वंशी तामुपाश्रितो यः स भगवान्। यद्वा, स्वस्मिन्योगायान्येष्वयोगाय या मा मतिः अगा निश्चला या मतिस्तामदृष्टद्वारेणापयति या कात्यायनी स्वचरितदर्शनेन सत्सङ्गद्वारेणापयति या श्रीमती राधा मोहनद्वारेणापयति या स्वकान्तिः उद्दीपनद्वारेणापयति शरच्छोभा वनादिशोभा वा तासुपाश्रितः तत्रागमा इति पक्षे यः स इति पूर्ववत्। यद्वा, स्वस्मिन्योगायान्येष्वयोगाय वा याऽन्तर्य्यामिणः स्वस्यैव मा सङ्कल्पात्मिका प्रमा तस्यामुपाश्रितः। यद्वा दर्शनेनैव स्वस्मिन् योजयन्ती अन्येष्वयोजयन्ती या आत्मना मा अङ्गश्रीस्तस्यामेवोपाश्रितः यद्वा, स्वात्मनः प्रार्थ्यमानब्रह्मादिदेवान् परित्यज्य भगवद्वक्षः समाश्रयणदर्शनेन स्वस्मिन् योगायान्येष्वयोगाय वा या मा उरसि स्थिरा लक्ष्मीः तस्यामुपाश्रितः। यद्वा, तत्र रासे सर्वासा गोपीनामात्मनश्च भाविप्रमविह्वलत्वं सम्भाव्य क्रीडा तदुपकरणादिसाकल्यमापादयितु विश्वकर्ममाययोः स्वलीलाप्रवेशाभावेन तत्सर्वमुपकरणादि योजयतीति योगा तत्र योग्या वा योगा स्वयोगैश्वर्य्यात्मिका वा योगा अघटनघटनापटीयस्त्वेन माया काचित् स्वरूपात्मिकैव शक्तिस्तामुपाश्रितः। यद्वा, तासामपि योगाय नृत्यरतिविहारादिना भगवतः संयोगाय माया कृपा यस्यास्तां राधामुपाश्रित एव रन्तुं मनश्चक्रे तत्कृपयैव भगवतस्ताभी रमणाय प्रवृत्तिः। अनेन भगवति भागवतां सर्वजनानां भगवद्रमणाय श्रीमत्याः राधायाः कृपा भवति तामाश्रितो भगवानपि तद्रमणे प्रवर्त्तत इति न तस्यां कदापि मात्सर्य्यादिसम्भावनालेशोऽपि यदा तद्भक्तानामपि न क्रोधमात्सर्य्यादिसम्भावना तदा भगवत्याः किमु वाच्यम् किञ्च, यत्र स्वामिनः सुखदाने परिमिताशक्तिस्तत्र स्वभोगसङ्कोचभयात्तामराणां सापत्न्यभावो भवति यत्रापरिमेयशक्तिर्भगवान् स्वामी तत्र स्वभोगसङ्कोचभयासम्भवादसम्भावित एव तद्रतानां मात्सर्य्यादिरिति भावः। यद्वा, भगवतो योगे एव मा यस्याः यस्या योगे एव वा भगवतो मा तस्यां राधायामुपाश्रित एव। यद्वा, स्वलीलागानश्रवणादिद्वारा सर्वस्याप्यज्ञमुमुक्षुब्रह्मविज्जनस्य योगाय तत्प्राप्तये माया करुणा यस्या राधायास्तामुपाश्रितः। यद्वा, सर्वस्यापि जनस्य भगवति योगायाभेदाय मां प्रमां तत्त्वज्ञानं लीलादिसुखे योगाय निवेशाय वा मां प्रेमश्रियम् आपयति या राधा तामुपाश्रितः। यद्वा, सर्वस्यापि सखीभावानुगतस्य तदानीन्तनगोपीजनस्याधुनिकस्य वा तदनुगभावस्तस्य जनस्य भगवल्लीलादौ योगाय योग्यत्वाय भगवता योगाय वा स्वांशभूतां मां शोभाम् आपयति या राधा तामुपाश्रित एव रन्तु मनश्चक्रे इत्यनेनेश्वरी राधां विनेश्वररमणासम्भवाद्यत्र यत्र भगवद्रमणं भाव्यं वा भावनाप्रभावेन तत्र तत्र राधाकृपया तदंशमाप्रवेश इति ध्वनिः। यद्वा, भगवानपि यामुपाश्रितः सा राधाऽपि पूर्वोक्तसर्वपक्षा अत्रानुसन्धेयाः ता अज्ञरूपा मुमुक्षुरूपा ज्ञानिरूपाः प्रजा निशा मल्लिका गोपीश्च वीक्ष्य रन्तु मनश्चक्रे सा कथम्भूता अयोगमा अन्यासामयोगाय मा शोभा यस्याः यां दृष्ट्वा नान्यस्यां कृष्णमनो रमते। यद्वा, यद्योगे एवांशप्रवेश एव सर्वासां मा भवतीत्यकारमश्लेषं विना योगमा। यद्वा, य इति भागवद्विशेषणतया पृथग्व्यवस्थाप्य अगमा अकारो हरिस्तद्वृता एव मा मतिर्यस्याः। यद्वा, अगा निश्चला मा शोभा यस्या इति अगमा। यद्वा, अन्यत्र लक्ष्म्याः "चञ्चला चपला चला" इति प्रसिद्धत्वात् इयं तु अगा हरिगता अगा निश्चला वा लक्ष्मीरेव। यद्वा, अगमा सर्वथा दुरवगममाहात्म्या सा यदा रन्तु मनश्चक्रे तामुपाश्रितो भगवानपि मनश्चक्रे इति भावः। अयमत्राभिप्रायः मनसो जीवोपाधित्वेन ईश्वरस्य मन उपाध्यभावान्मायायाश्च स्वरूपात्मकीलीलाप्रवेशाभावात् रन्तुं स्वरूपात्मकमेव मन आविर्भावयामास "आकाशं शरीरं ब्रह्म सत्यात्मप्राणारामं मन आनन्दं शांतिसमृद्धममृतम्" इति श्रुतेः। आ समन्तात् रासमण्डले रतिविहारादौ व्यापकतया चिद्रूपतया च कासते प्रकाशते इति तादृक् शरीरं ब्रह्म कृष्णः सत्य आत्मा देहः प्राणा मुख्या इन्द्रियाणि च आरामो धाम क्रीडोपस्करं च यस्य तथा शान्तिसमृद्धं दुःखशून्यम् अमृतमनश्वरमित्यर्थः॥ १॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

श्रीमते नन्दसूनवे नमः

गोपाङ्गनागुणाकृष्टचेतोखिलजनाश्रयः। तस्य कृष्णस्य पादाब्जमाश्रयेऽभीष्टसिद्धये॥
उमां श्रीबालगोपालतीर्थान् व्यासमुखान्मुनीन्। विघ्नहर्तॄन् गणेशादीन्पण्डितांश्च विभत्सरान्॥
अथ पञ्चभिरध्यायैः रासक्रीडामहोत्सवः। वर्ण्यते मुनिना कृष्णसद्गुणाकृष्टचेतसा॥
ऊनत्रिंशे कलं वेणोः श्रुत्वा गत्वा व्रजस्त्रियः। वने वादादिकं प्रापुः कान्तेनेति निगद्यते॥

इन्द्रवरुणादिविजये किं चित्रं ब्रह्मादिजयसंरूढदर्प्पः कामोऽपि भगवता पराजितः इति ख्यापनायक्रमप्राप्तां भगवत्कृतां रासक्रीडां वर्णयितुमुपक्रमते–भगवानपीति। कामकृतो हि ब्रह्मादिपराजयः प्रसिद्धः तदुक्तम्—

"अहल्यायै जारः सुरपतिरभूदात्मतनयाम्। प्रजानाथोऽयासीदभजत गुरोरिन्दुरबलाम्।
इति प्रायः को वा न पदमपथे कार्यंत मया श्रमो मद्बाणानां क इह भुवनोन्माथविधिषु" ।। इति।

ये तु स्मरादिकमपहाय तपश्चर्यायां रताः न तैः कामः पराजितः किन्तु तस्मात्पलाय्य ते गतास्तत्रापि तत्कृतनग्नादिदुर्द्दशां प्राप्ताः तदुक्तम्—

"स्त्रीमुद्रां झषकेतनस्य विकसत्सर्वार्थसम्पत्करीं ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ।।
ते तेनैव निहत्य निर्द्दयतरं नग्नीकृता मुण्डिताः केचित्पञ्चशिखीकृताश्च जटिलाः कापालिकाश्चापरे" ।। इति।

श्रीकृष्णस्तु शतकोटियूथगोपाङ्गनारयसैन्यवता कामेन युद्ध्यमानोऽपि आत्मन्यवरुद्धसौरतत्वात्तं विजितवानित्यनेन ग्रन्थेन ख्याप्यते–योगमायामुपाश्रितः "आत्मारामोऽप्यरीरमत्, साक्षान्मन्मथमन्मथः, आत्मन्यवरुद्धसौरतः" इत्यादिषु स्वातन्त्र्याभिधानात् रासलीलोत्सवश्च नववर्षवयस्त्वे सत्याश्विनपूर्णिमायां यतः सप्तमवर्षे वयसि वर्त्तमाने भगवति कुमारिकाणां व्रतचर्य्या ततः सप्तवर्षोत्तरकार्तिकस्य अमावास्यायाम् इन्द्रमखभङ्ग तच्छुक्लप्रतिपदि गोवर्द्धनमखोत्सवः द्वितीयायां भ्रातृभोजनोत्सवः तृतीयाप्रभृति इन्द्रकृतोपद्रवमवलोक्य नवमीपर्यन्तं गोवर्द्धनधारणं दशम्यां गोपानां विस्मयं कर्मबाहुल्यम् एकादश्यां गोविन्दाभिषेकः द्वादश्यां वरुणलोकगमनादि पौर्णमास्यां नन्दादीनां ब्रह्महृदनयनादि ततश्च शरदः समाप्तिरिति शुक उवाच इत्यनेन कोमलालापवच्छुकोक्तिः, एवमिदं भागवतं कोमलचित्ततयैव श्रोतव्यं चित्ताकर्षकं च तत्रापि रासक्रीडोत्सववर्णनं सर्वस्यापि श्रीमद्भागवतस्य सारभूतमिति ध्वनितं परमहंसशिरोमणिना श्रीशुकेन परमप्रेम्णा वर्णितोऽयं रासक्रीडोत्सवोऽतः परमहंसैरप्यादरेण श्रोतव्य इत्यपि सूचितं भगवानपि—

"ऐश्वर्य्यस्य समग्रस्य धर्मस्य यशयः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना" ।।

इत्युक्तषड्विधैश्वर्य्यवानपि रन्तुं मनश्चक्रे शृङ्गाररसालम्बनशिरोमणिभूतानां शतकोटियूथविलासिनीनां सौस्वर्य्यसौन्दर्य्य-अधरामृतसौरभ्याणि परमशोभनानि स्वीयश्रोत्रादीन्द्रियैरनुभवितुं स्वीयानि तानि तदीयश्रोत्रादिभिस्ता अनुभावयितुमिच्छितवान् एतावन्तं कालं गोप्य एव वर्द्धमानानुरागचलचित्ततया रन्तुं मनश्चक्रिरे भगवांस्तु वयोविशेषं प्रतीक्षमाणो न चक्रे सम्प्रति प्राप्तवयाः ताः "मयेमा रंस्यथ क्षपाः" इति पूर्वं प्रतिज्ञाता रात्रीश्च वीक्ष्य भगवानपि रन्तुं मनश्चक्र इत्यपरोऽर्थः पूर्णोऽपि ता रात्रीरुद्दीपनत्वेनानुभूय किमु ताः गोपीर्वीक्ष्येति तासां सौन्दर्य्यप्रमाद्यतिशयो व्यज्यते। यद्वा, ता, इति प्रसिद्धार्थकतत्पदप्रयोगान्नानागुणवतीरिति तासामुत्कर्षो बोधितः ताः, इति बहुवचननिर्देशाद् ब्रह्मरात्र उपावृत्त इति वक्ष्यमाणत्वाच्चैकस्यामपि रात्र्यां तादृशविलासानुकूलाऽसंख्यातरात्रीः स्वसङ्कल्पिताः वीक्ष्येति बोधितं तथा च तादृशरमणानुकूलाः कोटिकोटिरात्रीः स्वसङ्कल्पिताः वीक्ष्येति एवं तत्त्वमन्मथा राकारात्रेश्चन्द्रोदयात्पूर्वमप्रवेशाच्चन्द्रोदयस्य च वीक्षणानन्तरं वर्ण्यमानत्वाद्वीक्ष्येत्युक्तिरसङ्गता स्यात्। अथ वृन्दावनशोभामप्युद्दीपिकामाह–शरदिति। शरदाहेतुभूतया यद्वा शरदेति टाबन्तत्वात् शरदायामपि उत्फुल्ला मल्लिका यासु उत्फुल्लाश्च ताः मल्लिकाश्चेति वा एतद्वाक्यतः "कुन्दस्रजः कुलपतेरिह वाति गन्धः" रेमे तत्तरलानन्दिकुमुदामोदवायुना" इति वक्ष्यमाणत्वाच्च वृन्दावनमाहात्म्यात्सर्वकाले सर्वपुष्पविकासो बोधितः रन्तुं मनश्चक्र इत्युक्त्या आन्तरमिदं रमणं न तु बाह्यं नरविडम्बनमात्रमिति सूचितम् अन्यथा रेमे रन्तुमारेभे इति वा ब्रूयात् तत्रापि चक्र इत्यात्मनेपदप्रयोगादपि न गोपिकानुरोधेन तदर्थमेवापितु स्वस्य सुखार्थमपीति सूचयति यथा—

"आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे। कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः" ।।

इत्यात्रात्मारामाणामपि मुनीनां चित्ताकर्षणसामर्थ्यवत् गुणाकृष्टचेतसां भगवद्गुणेषु रमणमुक्तं तद्वद्गोपाङ्गनानां तादृशगुणाकृष्टचेतसो भगवतोऽपि तासु रमणमुक्तम्। ननु, स्वल्पकाले कथमनल्पकालसमवेशः कथं च स्वल्पदेशे तावद्यूथगोपाङ्गनाक्रीडनसम्भवः ? कथञ्चैकस्याऽसङ्ख्यातगोपिकाभिः रमणसम्भव ? कथञ्चाऽमनस्कस्य भगवतस्तद्रमणासक्तमनस्त्वमित्यादिशङ्काजालनिरासायाह-योगमायामुपाश्रित इति अघटितघटनापटीयसीति मायां तु प्रकृतिं विद्यात्' मम माया दुरत्यया"इत्यादिनोक्तं योगमायामुपाश्रितः स्वाश्रितां तां कर्तव्यलीलोपकरणसाधनत्वेनाश्रितवान् यद्वा योगः स्वेन गोपीनां संयोगस्तदर्थम्मा मायं कृपामाधिक्येनाश्रितः यद्वा स्वस्मिन्वात्सल्यरसाक्रान्तचेतसां नान्दादीनान्तया तथा लीलया आनन्दसागरे निमज्जितवान् पुनश्च ब्रह्महृदप्रवेशादिना स्वस्वरूपानन्दप्राप्तिपर्य्यन्तामप्यवस्थां दर्शितवान् यास्तु सखीभावमाश्रिताः चिरकालमारभ्य स्वेन रमणोत्कटोत्कण्ठावत्यस्तासां गोपाङ्गनानां मनोरथपूर्तिः कथं कृतवानित्यपेक्षायामाह—भगवानपीति। यद्यप्यसौ पूर्णकामस्तथापि पूर्वकोटिजन्मसु अस्मिंश्च जन्मनि उपाश्रितः रमणार्थमेव सम्यगाराधितोऽतस्ताभिरन्वितस्तासामभिलषितरमणानुरूपा रात्रीश्चक्रे एकस्यां रजन्यामसङ्ख्यातरजनीप्रदर्शनसङ्कल्पं कृतवान्, कथम्भूताः ? शरदोत्फुल्लाः मल्लिकाः यासु शरदोत्फुल्लमल्लिकाश्च चक्रे इति वा मल्लिकेति पुष्पेत-

राणामप्युपलक्षणं तथा अमना अपि भमवान् रमणानुरूपं मनोऽपि चक्रे इदं च सर्वमघटितघटनापटीयस्याऽस्य योगमायाशक्त्या सम्पादितवानित्याशयेनाह—योगमायां वीक्ष्य सर्वसम्पादनाय कटाक्षेणोद्बोध्य मम योगमाया एतस्या एतासां मनोरथपूर्तिर्भविष्यति तत्र मम का हानिरित्याशयेन ता वीक्ष्येति वा । यद्वा, तासां योगार्थं मायां वीक्ष्य तथा च मयि केन संयोगेन नास्ति मम पूर्णकामत्वादिस्वरूपहानिरिति भावः । महाभगवानपि योगमायामुपाश्रितो योगमायामधिष्ठाय प्रकटीकृतनन्दनन्दनविग्रहस्ताः स्वस्मिन्नासक्तस्वान्तगोपीर्वीक्ष्यालोच्य तन्मनोरथपूर्त्यर्थं रात्र्यादिकं चक्र इत्यर्थः । यद्वा, ता रात्रीर्वीक्ष्य तासां मनश्चक्रे रन्तुं योगमायामधिष्ठाय स्थितः योगमायया कृष्णेन सार्द्धं सम्यक् रमणं कृतवत्यो वयमिति तासां मनसि दृढतरां प्रतीतिमुत्पादयितुं प्रवृत्त इत्यर्थः । पञ्चाध्यायात्मकोऽयं सर्वशास्त्रसारसर्वस्वभूतो ग्रन्थ इति सूचयितुं मङ्गलाचरणार्थमादौ भगवानिति पदं प्रयुक्तम् । अत्र भक्तिशान्तिरसप्रधाने श्रीमद्भागवते पारमहंस्यां संहितायां प्रसङ्गात्परशास्त्रार्थशृङ्गाररसमनुवदता मुनीन्द्रेण स्वसिद्धान्तोऽपि गूढतया निर्दिष्टः अत एव शृङ्गारकथापदेशेन विशेषतो निवृत्तिपरेयं पञ्चाध्यायीति श्रीधरस्वामिभिरप्युक्त—

"निवृत्तिमार्गसंसक्तचेतसां विदुषां मुदे । व्यक्तीकरोम्यहं पक्षमिमं कृष्णप्रसादतः" ॥

सविशेषसुखं निखिलमपि दुःखसम्भिन्नमेव—

"ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय ! न तेषु रमते बुधः" ॥ इति

भगवद्वाक्यादतो विवेकवता निर्विशेषब्रह्माविर्भावाऽभिलाषुणा तत्प्रतिवेशान्निवृत्तिरेव सर्वोपायैः सम्पाद्येति ब्रह्मरात्र्यावच्छिन्नकालपर्य्यन्तं तुच्छीकृतकोटिकन्दर्पविग्रहेण भगवतापि रममाणानां गोपाङ्गनानां दुःखनिवृत्तिः तृप्तिश्च न सम्पन्नेति वर्णयता भगवता मुनिना सूचितं तदुक्तम्—

"न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ॥ इति ।

एवंविधविवेकोत्पत्तियोगे इह जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासानानुष्ठाननितान्तनिर्मले स्वानुग्रहपात्रेऽन्तःकरणे श्रुतिरूपस्वकान्ताभिरभिरन्तुं भगवानपि मनश्चक्रे "यमेवैष वृणुते तेन लभ्यः" इत्यादिश्रुत्या भगवदनुग्रहादेव श्रुत्यर्थविचारे प्रवृत्तिर्भवति नान्यथेति भावः । भगवदनुग्रहपात्रताबोधनायाह—ताः रात्री रसङ्ख्यातजीवजन्मसु अनुभूता अहङ्श्चित्तमनोबुद्धिरूपा अतःकरणवृत्तो रात्रीः अज्ञानरूपतमोव्याप्तत्वादात्मतत्त्वावरणरूपत्वाद्रात्रीसदृशाः सम्प्रति शरदोत्फुल्लमल्लिकाः शरत्स्थानापन्नेन भगवदाराधनलक्षणेन निष्कामकर्मणा अन्तःकरणशुद्धिसाधनेन फुल्ला विकसिताः मालत्यादिपुष्पस्थानापन्नाः शान्त्यादयो यासु ताः "वीक्ष्य शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धान्वित आत्मन्येवात्मानं पश्येत्" इति श्रुतेः । ननु, निर्गुणस्य जातिगुणादिशब्दप्रवृत्तिनिमित्तरहितस्य श्रुतिप्रतिपाद्यत्वासम्भवात्कथं ब्रह्मणि तासां रमणमित्याशङ्क्याह—योगमायामुपाश्रित इति । तथा च तन्निरसनेन निर्विशेषब्रह्मोपलक्षणमेव तासां रमणमिति भावः ॥ १ ॥

रास-रहस्यम्

मङ्गलाचरणम्

अज्ञानवारणविनाशपटुं मृगेन्द्रं उद्दण्डविघ्नपरिखण्डनलोहदण्डम् ।
श्रीपार्वतीसुतमनन्तमनाथनाथं नित्यं भजेऽखिलसुरासुरवन्द्यपादम् ॥ १ ॥

यद्वक्त्राम्बुजनिःसृतं सकृदिमे पीत्वोपदेशामृतं शिष्याः मोहमयं विधूयगरलं ब्रह्मस्वरूपे स्थिताः ।
योऽसौ मस्करिवृन्दवन्दितपदो यो वेद विद्यानिधिः कैलासाधिपतिर्नमामि सततं तं विष्णुदेवं गुरुम् ॥ २ ॥
धियां साक्षी शुद्धो निजसुखवपुः नित्यशरणः नियन्तासु ध्येयः सुरमुनिनृणां मोक्षवरदः ।
श्रियाश्लिष्टः कृष्णस्त्रिजगदघहा भ्रान्ति हरणः समाधावासक्तं हृदयनलिनं मे प्रविशतु ॥ ३ ॥

१. अवतरणम् —धर्मार्थकाममोक्षेषु चतुर्विधेषु पुरुषार्थेषु मोक्ष एव परम पुरुषार्थ इति वेदान्तेषु प्रतिपद्यन्ते विपश्चितः । तत्संप्राप्तिश्च श्रवणादिना आत्मसाक्षात्कारायत्ता । "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।" इति श्रुत्या साधनान्तरस्य निराकृततयाऽऽत्मतत्त्वज्ञानमेव तदुपाय इति । एतादृशात्मतत्त्वसाक्षात्कारेण सविलासाविद्यानिवृत्तिपूर्वकनित्यनिरतिशयानन्दप्राप्तिरेव मोक्षः । तदर्थं "तद्विजिज्ञासस्व" तै० आ० ९।१।। "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ।" "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।" वृ० २।४।५।। इत्यादिः श्रवणविधिरुपलभ्यते । अस्य श्रवणविधेः को विषयः, किं फलं, कः सम्बन्धः, को वाधिकारी ? इति जिज्ञासायां—"वेदान्त विज्ञानसुनिश्चितार्थाः ।" मु० ३।२।६।। वेदान्तानां च प्रत्यग्ब्रह्मैक्यं विषयः । "तत्त्वमसि" । छा० ६।८।७। "अहं ब्रह्मास्मि" । वृ० १।४।१० इति श्रुतेः । एवं विचारविधेः ज्ञानद्वारा मुक्तिः फलम्, "तरति शोकमात्मवित् ।" छा० ७।१।६।। "ब्रह्मविद् ब्रह्मैव भवति ।" इत्यादि श्रुतेः । प्रतिपाद्यप्रतिपादकताभावः सम्बन्ध । "आनन्दं ब्रह्म" । वृ० ३।९।२८।। आनन्दश्च संवेद्यः । आनन्दात्मकत्वे आत्मनः, आत्मानुरागान्मुमुक्षुप्रवृत्तिः स्यात् ? रागनि-

बन्धना च प्रवृत्तिः संसारबीजमिति न मुक्तये स्यात्। शान्तस्य दान्तस्य चात्मनि दर्शनमुच्यते। "शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धावित्तो भूत्वाऽऽत्मन्येवात्मानं पश्येत्।" इति श्रुतेः। न चानन्दरासगात्प्रवर्तमानः शान्तो भवति। तस्मात् सकलदुःखातिगे आत्मतत्त्वे दुःखेभ्य उद्विग्नः सुखेभ्यश्च वीतरागः प्रवर्तमानो मुच्यते। "परीक्ष्यलोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।" मु० १।२।१२॥ अकृतः मोक्षः कृतेन कर्मणा न सम्भवति। एवं समित्पाणेः गुरूपसत्ति पूर्वकश्रवणानन्तरं वक्ष्यमाणरीत्या विवेको जायते। तथाहि—इह जगत्याब्रह्मस्तम्बपर्यन्तं सर्वेषां प्राणिनां सुखप्राप्तये दुःखनिवृत्तये च निसर्गत एव प्रवृत्तिर्दृश्यते। ब्रह्मलोकपर्यन्तं 'अनित्यमसुखं लोकम्।' "दुःखालयमशाश्वतम्।" इति कुत्रापि सुखस्य दुःखस्य वा चरमावधिर्न ज्ञायते। अथ आत्यन्तिकदुःखनिवृत्तिपूर्वकनिरतिशयसुखमस्ति न वा? दृष्टं सर्वविधं सुखं सातिशयमालोच्य तद्दृष्टान्तेनादृष्टमपि स्वर्गादि सर्वं सुखं सातिशयमेव स्यात् यत्कृतकं तदनित्यमिति तर्कबलेन। "तद्यथेह कर्मजितो लोकः क्षीयते, एवमेवामुत्र पुण्यजितो लोकः क्षीयते।" इति श्रुतिबलेन च ब्रह्मपर्यन्तलोकेषु निरतिशयसुखस्यासिद्धिरिति। नित्यनिरतिशयसुखप्राप्तिश्च श्रूयते "सोऽश्नुते सर्वान् कामान्।" तै० २।१।१॥ "अथ सोऽभयंगतो भवति।" तै० २।७।१ "न स भूयोऽभिजायते।" अ० वि० ३८॥ सर्वान् कामानश्नुते इत्यनेन निरतिशयसुखावाप्तिस्तथा अभयं गतो भवति–न स भूयोऽभिजायते इत्यनेनात्यन्तिकदुःखनिवृत्तिश्च, या मुक्तिरित्यभिधीयते। यद्विषयकमज्ञानं तद्विषयकमज्ञानं तद्विषयकज्ञानेनैव निवर्त्यमिति ज्ञानाज्ञानयोः समानविषयत्वनियमः आत्माज्ञानं च भयस्य मूलम्। भयं हि दुःखं—दुःखसंयुक्तं सुखं सातिशयम्। आत्मसाक्षात्कारश्च मुक्तिरिति विवेकोत्पत्तियोगे इह जन्मनि जन्मान्तरे वा ऐहिकामुष्मिकसर्वविषयभोगविरागपूर्वकं, काम्यनिषिद्धवर्जनपुरःसरं, नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन नितान्तनिर्मलस्वान्तःकरणः साधनचतुष्टयसम्पन्नोऽधिकारी कश्चिन्मुमुक्षुः आत्मकामनया "आत्मनस्तु कामाय सर्वं प्रियं भवती"ति श्रुतिप्रमाणं गृहीत्वा स्वात्मानुकूलवृत्तिभिरित्थमात्मरमणं कृतवानिति।

संसारदुःखसागरे निमग्नान् जीवान् दृष्ट्वा शोचतीति शुक उवाच।

रहस्यटीकाः याः अविद्यातमोयुक्ताः विषयभोगलोलुपाः वृत्तयः ता रात्रीः रात्रीवदज्ञानतमोव्याप्ताः तथा शरवत् द्यति अवखण्डयतीति शरत्, शरदा मल्लिकावदुत्फुल्लाः विकासप्राप्ताः वीक्ष्य दृष्ट्वा, भगवान् भगो भाग्यं तद्वान् मुमुक्षुः योगः मायामुपाश्रितः योगाय स्वस्वरूपाऽभेदाय या भागत्यागलक्षणया महावाक्यजन्या मा–या प्रमा सा योगमाया। मय ज्ञाने इति धातोः। तां उपाश्रितः आश्रितः सन् रन्तुं "अयमात्मा ब्रह्म" इति तद्रूपेणावस्थानाय, मनश्चक्रे चित्तसमाहितमकुरुत। आत्मनेपदनिर्देशः खल्वयं स्वार्थक्रियतां बोधयति। "स्वरितञितः" इति कर्त्रभिप्राये क्रियाफले इति विध्याश्रयणात्॥ १॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नौमि सर्वेश्वरं कृष्णं श्रीगुरुं तत्पदाश्रयम्। पूर्वाचार्यं दयासिन्धुं श्रीनिम्बार्कं हरिप्रियम्॥
कन्यावस्त्रापहारादिलीलां षड्वार्षिको हरिः। हेमन्ते कृतवान् भूयः सप्तवर्षः सुशोभनम्॥
गिरेः पूजादिकं कर्म शरदं तेऽखिलेश्वरः। हल्लीसाख्यं महानृत्यं कृतवान् वै तदोपरि॥
रमणीये शरत्काले रात्र्यां रात्र्यां त्वयं क्रमः। अनेनैव पुराणेन ज्ञातव्यो वै सुबुद्धिभिः॥
सर्वेषां संयमः प्रोक्तस्तत्स्वभावानुसारतः। प्रोच्यते पञ्चभिः सर्वजयिनः पुष्पधन्विनः॥
तत्रोनत्रिंशकेऽध्याये कलगीतप्रणोदिताः। गोप्यश्चक्रुः सुसम्वादं कृष्णेनेति निरूप्यते॥

ताः रात्रिरिति "याताबलाः! व्रजं सिद्धाः मयेमा रंस्यथ क्षपाः" इति प्रतिश्रुताः वीक्ष्य रन्तु रासक्रीडां कर्त्तुं मनश्चक्रे गोपाङ्गनाभिरिति शेषः। ननु, स्वस्वगृहगताभिः अजिज्ञासितनृत्यवाद्यगानशास्त्राभी रासक्रीडोचितपदार्थवर्जिते वने कथं रन्तुं मनश्चकार इत्यत आह—योगमायां लीलासौष्ठवार्थं प्राङ्नियुक्तां स्वशक्तिभूताम्। यद्वा, युज्यते इति योगः प्रयोजनं तदर्था माया वयुनात्मिका दुर्घटघटनापटीयसी वासुदेवासाधारणसङ्कल्परूपा तयैव वनेपि सर्वविहारोपकरणसिद्धिस्तासां च सर्वकलाकुशलता तद्भर्त्रादीनां चानसूयत्वं चेति बोध्यं तामुपाश्रित्येत्यर्थः। ननु, परदाराभिः सह लीला लोकविरुद्धेत्यत आह–भगवानिति। समस्तैश्वर्यादिगुणनिधिः सर्वात्मा पूर्णकामः स्वात्मिकाभिः सह विहरन् न लोकविरुद्धं करोति यथा पाणिग्रहणविधिनापि स्वकीयया विहरन् जनो न लोकविरुद्धं करोत्यन्यथा दण्ड्यो भवतीति भावः। शरदा उत्फुल्ला मल्लिकाः यासु ताः, अनेन रासोत्सवोद्दीपनता रात्रीणां दर्शिताः॥ १॥

श्रीवैष्णवशरणकृता सिद्धान्तार्थदीपिका

श्रीमते रामानुजाय नमः

दृष्टिपथपतितवनितातूष्णीम्मोचनकथादवीयासम्। कञ्चन विटावतंसङ्कलये मुनिमानसैककलहंसम्॥

अथ श्रीभागवताभिधश्रीकृष्णविग्रहे पञ्चप्राणभूतायां श्रीरासपञ्चाध्याय्यां स्वरसनां पावयितु काचित् सिद्धान्तार्थदीपिका नाम टिप्पणी निवेश्यते।

"परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया। गृहीतचेता राजर्षे ! आख्यानं यदधीतवान् ॥"

इत्युक्तरीत्या उत्तमश्लोकलीलाविष्टचेता मृदुलाच्छबालुके सुरसरित्तटेऽनेकसुरनरमुनिजनैरावृते परीक्षित्समाजे परमासने सन्निविष्टः परमपुरुषस्य वसुदेवगृहजन्मारभ्य बाल्यादिलीलाः कथयन् राजानं परीक्षितमुत्तमाधिकारिणं दृष्ट्वा "नापृष्टः किञ्च न ब्रूयात्" इति नियममनादृत्य—

"ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत"

इति वचः सार्थयन् पञ्चाध्याय्या व्रजसुन्दरीभिः सह श्रीहरे रासक्रीडां वक्तुं बादरायणिरुवाच—भगवानपीति। अत्रत्यभगवच्छब्दो ब्रह्मशिवयोरुपास्यं अवाप्तसमस्तकामम् ऐश्वर्यादिषड्गुणपरिपूर्णं पूर्णपुरुषोत्तमं वक्ति—

"अथापि यत्पादनखावसृष्टं। गजद्विरिञ्चोपाहृतार्हणाम्भः ॥
सेशं पुनात्यन्यतमोमुकुन्दात्। को नामलोके भगवत्पदार्थः" ॥

इति प्रथमोक्तेः—

"धन्या अहो अमी आल्यो गोविन्दाङ्घ्र्यब्जरेणवः। यान् ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तये" ॥ इति

वक्ष्यमाणत्वाच्च अपिना व्रजस्थसामग्र्या तादृशात्माराममनोविकारजनकता बोध्यते भगवानपि शरदोत्फुल्लमल्लिकास्ता चीरहरणलीलायां गोपसुन्दरीभ्यः प्रतिज्ञातास्ताः शारदी रात्रीर्वीक्ष्य रन्तुं मनश्चक्रे यतो योगमायामुपाश्रितः योगो गोपीनां रासमुखचीरहरणलीलायां—

प्रापणं तस्मै या माया दया तामुपाश्रितः यद्वा, अखण्डितब्रह्मचर्यो वैराग्यवानपि गोपीष्टयोगाय कपटमाश्रितः न वस्तुतस्तथा रन्तुमना इत्यर्थः। "भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्त्तिषु" इति मेदिनीकोशात्। रमणं च भगवतः सर्वत्र स्वानुरक्तभक्तजनमनोरथपूरणमेवेति सिद्धान्तः। यद्वा, योगमायामघटितघटनापटीयसीं निजासाधारणशक्तिं तया विना व्रजवासिजनमोहनाद्यसम्भवात् "नासूयन् खलु कृष्णाय मोहितास्तस्य मायया" इति वक्ष्यमाणत्वात्। यद्वा, योगमायां निजप्रेयसीनां योगाय मायारूपां मुरलिकां नहि विचित्रकार्यकरीं वंशीं विना गोपवनिताकर्षणं सम्भवति, "जगौ कलं वामदृशां मनोहरम्" इत्यव्यक्तमधुरमनोहारिस्वनस्य तद्व्यतिरेकेणासम्भवात् ॥ १ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ भक्तिरेव ज्ञानद्वारा मोक्षसाधनं सा चानेकविधेति निरूप्यतेऽस्मिन्नध्याये। तत्रादौ याताबला व्रजं सिद्धामयेमा रंस्यथः क्षपा इति स्वोक्तं किं भगवान्विसस्मार याश्च यदर्थमत्यर्थं तपश्चेरुस्ताः कथं तूष्णीकाः किंवा तदुपरि रात्रिरेवाधुना नायाताथवा किञ्चित्तद्दुर्दैवयोगेनान्तरायाति निपात इति सन्दिग्धबुद्धिं परीक्षितं परीक्ष्य स्वयमेव शुको दयया वक्तीति वक्ति ॥ श्रीशुक इति। भगवानपि गोपोपदर्शितस्वस्वलोकः कृष्णोऽपि शरदृतोः सम्बन्धी कालः शारदस्तेनोत्फुल्ला विकसिता मल्लिका यस्यां सा तां प्रमदाः प्रति प्रतिज्ञातक्षपासु प्राथमिकीं रात्रिं वीक्ष्य रन्तुं ताभिः सह मनश्चक्रे। सकलधर्मशास्त्रवेत्तुः परकलत्रसंसर्गस्तु न मन्मथमथितचेतस्कत्वेन किन्तु तत्तपोवैपुल्यफलतयेति सूचयितुं स्वयं मनश्चक्र इति। सम्भावकमावेदयति। योगमायामुपाश्रित इति। युज्यतेऽनेनेति योगो हरिरिति पञ्चमतात्पर्योक्तेर्योगः स्वय तदात्मिका मायेच्छा तां योगो निरन्तरमस्या अस्तीति योगा सा च सा माया चित्प्रकृतिस्तामुपाश्रितः सकलपरकलत्रसन्निहिता रमा तयैव सङ्गो न पुनरन्यःाङ्गनासङ्ग इति भावः ॥ १ ॥

श्रीसुबोधिनी

शृंगारकथोपदेशतः पंचाध्यायी वर्ण्यते वै स्फुटार्थतो निवृत्तिपरा जानंति कवयोत्र। "आत्मारामोप्यरीरमत् इत्युक्तेर्निष्क्रियोपि वस्तुतो योगमायामुपाश्रितो भगवानपि शरदा उत्फुल्ला मल्लिका यासु ता रात्रीर्वीक्ष्य रंतुं मनश्चक्रे "मयेमा रंस्यथ क्षपाः" इति पूर्वं प्रतिज्ञातत्वात्। योगमाया राधिका रंतुं मनश्चक्रे यामाश्रितो यदधीनो भगवानपि इति वा अयोगार्थं स्वरूपविच्छेदार्थं या माया तां योगाय स्वस्मिन् लीनतार्थं वा या माया कृपा ताम् "माया दंभे कृपायां च" इत्युक्तेः। यद्वाऽयोगा या माया कृपा यद्वा गा निश्चला या माया तामाश्रितो य इत्यर्थः ॥ १ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

फलप्रकरणम्।

षड्विंशाध्याये प्रकरणार्थोक्तौ, ब्रह्मानन्दात् समुद्धृत्येति। ननु सर्वसमर्थत्वेन ब्रह्मानन्दवत्स्वगृहस्थिताभ्य एव स्वामिनीभ्यो भजनानन्दं कुतो नादात्, लोकवेदत्याजनपूर्वकं विवक्षितरीत्या कुतो दत्तवानित्यत आह**ब्रह्मानन्दा**दिति। तथैवैतद्दाने एतस्यापि ब्रह्मानन्दमध्यपातित्वेन तत उद्धृतेर्वैयर्थ्यं स्यात्, भजनानन्दस्वरूपं चैतादृशमेवेत्येवं रूपानन्ददाने तददत्तमेव च स्यादिति भावः। ननु स्त्रीभ्य एवैतद्दाने को हेतुः। तत्रापि पूर्वमन्यविवाहितासु। कुमारीष्वतथात्वेपि भगवता समं विवाहा-

भावात्तन्न्याय एव। अत एव वरदानानन्तरमपि 'लब्धकामाः कुमारिका' इत्येवोक्तमित्याशङ्क्य तत्र हेतुमाहुः लौकिकस्त्रीष्विति। भजनानन्दो हि स्वरूपात्मकः। तच्च 'रसो वै स' इत्यादिश्रुतिभी रसरूपम्। स च यादृक् स्वशास्त्रसिद्धस्तादृगेव। तत्र च स्वाविवाहितायामेव मुख्यो रस इति निरूपितम्। अतो लोकसम्बन्धिन्यो लौकिक्यो भगवदतिरिक्तलोके विवाहलक्षणसम्बन्धवत्य इति यावत्। एतादृशीषु सम्यक् सिद्धो भवति। तत एतत्कथाश्रवणेन तद्भावोदये पुरुषेपि स रसो भवेत्, नान्यथेति स्त्रीष्वेव तद्दानमित्यर्थः। सिद्ध इति पदेनैतद्रसस्वरूपसिद्धिश्चेत्पूर्वं भूलोके स्यात्तदान्यत्रापि तत्प्राप्तिः स्यात्। सा चैतास्वेव सम्भवतीति तथेति ज्ञाप्यते।

किञ्च लक्ष्मीतुल्यतायां हि भगवद्रमणमिति मर्यादा। सा च ब्रह्मानन्दरूपा। तथा च पूर्वाध्याये ब्रह्मभावोक्त्या तद्रूपत्वमुक्तं जातमित्युक्तमर्यादापि संपन्नेतीतोप्यत्र रमणमित्याहुः स्वानन्दानुभवार्थमिति। यद्यपि स्वामिनीष्वेतावता न कोपि विशेषः, तथा 'प्यधिकं तत्रानुप्रविष्टं न तु तद्धानि'रिति न्यायोत्रापिशब्देन ज्ञाप्यते। तथा च स्वपदस्य स्वामिनीवाचकस्यानुभवपदेन समं सम्बन्धो ज्ञेयः। आनन्दपदं भजनानन्दपरम्। यद्वा। बलदेवे स्वधर्मान्निरूपयता भगवता 'गोप्योन्तरेण भुजयोरपि यत्स्पृहा श्री'रिति वाक्ये श्रियोपि स्पृहानिरूपणेन तस्या अपि दुर्लभो यो रसस्तं प्राप्य गोप्यो धन्या इति व्रजस्त्रीष्वेव स्वानन्दानुभवयोग्यता निरूपिता, नान्येष्वन्यासु वेत्यर्थः। तथा च तत्रैवैतदधिकारवत्त्वात्तथेति भावः। यद्वा। 'हेमन्ते प्रथमे मासी'त्यत्र तेषां प्रसादरूपा शक्तिः स्त्री भवतीत्यत्र या शक्तिरुक्ता तत्प्रवेशो यत्र, तत्र प्रभुसम्बन्धयोग्यता, स चैतास्वेव सम्पन्न इति पूर्वं निरूपितमित्यर्थः। एवं सत्येतत्प्रवेशो यत्र पुरुषेपि भविष्यति, तत्रैवंभावो भविष्यतीत्याशयेनाहुः तद्द्वारेति। तासामनुग्रहद्वारेति वार्थः। यत्रापि तत्प्रवेशोनुग्रहो वा तत्रापि स्त्रीत्वमृते नैतद्रसप्राप्तिरित्याहुः स्त्रिय एव हीति। तं पुरुषरूपं भगवन्तमित्यर्थः। ततः स्त्रीकर्तृकपानानन्तरं पुमान् भगवांस्तासु प्राक्पीतरसाधिकरणभूतासु तमेव रसं पातुं शक्त इत्यर्थः रसाधिक्ये पुंभावात्तथेति भावः। यतस्ता एव रसयोग्यास्तत्पाने शक्ताश्चातो न कदाचिद्रमणे व्यवधानं करोतीत्याहुः, अतो हि भगवानिति। आन्तर त्विति। सखीवृन्दे मिथो गुणानुवादे लीलासहितप्रियतमप्राकट्येनान्तर्ये भावविशेषा उत्पद्यन्ते, न ते संगमेपीत्यस्य परत्वम्। 'नामरूपे व्याकरवाणी'ति श्रुतेः प्रपञ्चस्य द्विरूपत्वेन लीलाप्रपञ्चस्यापि तथात्वाद् गुणगानलक्षणनामात्मकभगवत्स्वरूपस्य परमानन्दरूपभावात्मकरमणलक्षणा लीला प्रिये दोषारोपादिदोषरहिताग्रे निरूप्यत इत्याहुः ततः शब्दात्मिकेति। सप्तमाध्यायव्यवस्थेषा। शब्दात्मिकाया अपि लीलायाः प्रवृत्तिनिवृत्तिभेदेन द्विरूपत्वेनोत्तरा सप्तमाध्याये निरूपिता। पूर्वस्याः सदोषत्वादत्रापि तत्पूर्वाध्याये वेदात्मक शेषरूपत्वेन बलदेवस्य तत्साहित्येन कृतलीलायां शङ्खचूडोक्त्या सदोषत्वं तद्वधोक्त्यात्र सापि निदुष्टेति ज्ञाप्यत इत्यर्थः। अत एवाध्यायद्वयेन निरूपणमिति भावः।

यतो रूपं पञ्चात्मकमतस्तद्दानं पञ्चधातस्तन्निरूपणमपि तावद्भिरध्यायैः कृतमित्याहुः तत इति। पञ्चात्मके रूपे येनांशेन या लीला कृता तां तां लीलां क्रमेणाहुः आत्मनेति सार्धेन। 'यथेन्द्रियादिरूपत्वं शुद्धस्य ब्रह्मणस्तथा। आत्मत्वादिरूपत्वं मन्तव्यं श्रुतिवाक्यतः। यथेन्द्रियादिसङ्घातं आत्मनो मुख्यता तथा। प्रकृते स्वामिनीभावप्राधान्यं तत आदिमे। स एवोक्तः प्रभुर्यस्माद्रसरूपः श्रुतेर्मतः। आत्माधीनं यथा कार्यं सर्वमेवमिहापि हि। भावाधीनमतः प्रोक्तमात्मनेत्यादि सुष्ठु हि। अन्याप्राधान्यतः पूर्वं केवलेनेति तत्तथा। तत्तत्प्राधान्यतस्तत्तल्लीलेत्यग्रे तथोदितम्। मनप्रभृतिसर्वंस्वं तासु नास्ति हरेः परम्। इति ज्ञापितमेतेन विप्रयोगदशासु वै'। यद्वा। आत्मना प्रथमेत्यादिनोक्तं पञ्चविधत्वं प्रत्यध्यायोक्तलीलायामपि ज्ञेयम्। तथाहि। प्रियाभ्यः फलं दातुं तथा रूपप्राकट्यं कृत्वा स्थित इति भगवत्पदेनात्मना लीलोक्ता। 'मनश्चक्रे' 'कृष्णगृहीतमानसा' इत्यादिनाऽन्योन्यं चित्तव्यतिषङ्गो निरूपित इति मनसा। ततः 'स्वागतं व' इत्यादिकथनाद्वचसा। तादृग्वचनश्रवणेपि प्राणानां स्थितिस्तु, प्राणरूपेण भगवानेव वाग्द्वारा प्रविष्ट इति प्राणैः सा। अत एव मूले 'प्रतिभाषमाण'मित्युक्तम्। बल हि प्राणानां धर्मः, एते चालौकिका इति भगवद्वशीकरणलक्षण बलं संपन्नमिति स्वामिनीवाग्रूपत्वं प्राणरूपत्वं चेति तथा। तत इन्द्रियशरीरयोः सेति स्पष्टम्। तिरोधानमपि कायिकमिति तथेति प्रथमाध्यायस्थिति तिरोधानदशायामेतासामात्मा भगवत्येव प्रविष्ट इति स एवात्मत्वेनैतासु स्थितः कार्यं कृतवानित्यात्मना सा। एवमेव मनः प्रभृतीन्द्रियान्तं ज्ञेयम्। 'नात्मागाराणि सस्मरु'रिति वाक्याद्देहस्मृतिरहितानां पुनः पुलिनागमनं स्वतो न सम्भवतीति शारीरी सा। तृतीयेध्याये व्रजोत्कर्षहेतुत्वं दर्शनाभावेन वधहेतुत्वं रक्षकत्वमलौकिकत्वे सति ब्रह्मप्रार्थनया प्राकट्यं च स्वरूपमात्रस्यैवेत्यात्मना या लीला सा चतुर्भिरुक्ता। ततोग्रे निकटागमनद्विविधरमणमुख्यरसदानानि प्रार्थितानि, तानि चोद्दीप्तभावपूर्वकाणि। भावाश्च मनोनिष्ठा इति तल्लीला चतुर्भिरुक्ता। तत एकेन प्राणस्थितिहेतुत्वेन कथास्वरूपं निरूपितम्। तत्र वाक्प्राणरूपत्वं स्पष्टम्। ततोग्रे प्रहसितेक्षणादिकं चेन्द्रियकार्यमिति तल्लीलोक्ता। ज्ञानकर्मभेदेनेन्द्रियं द्विविधमिति द्वाभ्यामेवोक्ता। ततो दिनान्ते स्वयमागत्याननं प्रदर्शयतीति शारीरी सा। एतदग्रे शारीरीत्वं स्पष्टम्। अधरामृतदानस्य रतान्तःपातित्वेन तदपि तथा। अटव्यटनं स्पष्टम्। दर्शनन्तरायस्य दुःखदत्वे हेतुः स्वरूपमेवेति सापि तथा अग्रे त्यागोपि दैहिक एवेति तथा। अग्रे चाननोरसोर्देहमध्यपातित्वेन सापि लीला तथा। ततोग्रे स्वरूपाभिव्यक्तिप्रार्थनमिति तथा। अग्रे चरणाम्बुजरुहं देह इति स्पष्टम्। स्वामिनीनां हि बहिःप्राकट्यमेव भगवतोभीष्टम्, तदैवेश्वरवादोन्यदा शून्यवाद इति ज्ञापनायैश्वर्यसमान-

संख्याकैः श्लोकैः दैहिकी सा निरूपिता। तुरीयेध्याये प्रियप्राकट्येन पूर्वदशाखिलापि विस्मृतेति ज्ञापनायोक्तक्रमातिक्रम उच्यते। दैन्यभावबहिःप्रकटनरूपाभ्यां साधनफलरूपाभ्यामात्मना सा। ततः सर्वासामुत्थानं भगवन्मनसैवेति सा तथा। तत इन्द्रियैरिति स्पष्टम्। ततोग्रिमलीलायोग्यस्थले गतिः, तत्रासन उपवेशनादिकं शारीरम्। ततो वाग्रूपत्वं भगवता चातिरोधानकथनाद्वाचः प्राणरूपत्वं चेति। पञ्चमेध्याये प्रतिबन्धकनिवर्तनेन स्वाङ्गैः पोषणेन च पूर्ववद् भावसंपन्नाः प्रियाः कृता इत्यात्मना सा। क्रीडाया मानसरसोद्गमहेतुत्वेन तदारम्भस्तथा। शोभोभयोरपि क्रीडासामयिकीति सापि मानस्येव। ततोग्रे भगवत्साम्येन गानं वाक्प्राणैः सा। ततः स्कन्धग्रहणघ्राणरसास्वादनादिहस्ताब्जधारणान्तेन्द्रियैः सा। ततोग्रे शारीरी। अथवा। 'शास्त्राणां विषयस्तावद्यावन्मन्दरसा नराः। रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रम' इति वाक्यादत्रोभयोरुद्भटभाववत्त्वेन सर्वत्र सर्वा लीलात्रोच्यत नायं क्रमो विवक्षितः। एतच्च यथा तथा स्वयमेव भावनीयम्।

रूपं प्रतिष्ठितमिति। हरिप्रियास्विति शेषः। पूर्णस्वरूपानन्दो दत्तोभवदित्यर्थः। आद्येध्याये प्रभुरुक्तरूपात्मना लीलां कृतवानिति भक्तानामप्यात्मन्येव स्वानन्दं पूरितवानित्याहुः **जीवानानन्दयदिति**। आत्मन इत्यर्थः। अत एव प्रभुणा तादृग्रसभावः पूर्णोत्र कृतो येन प्रभुवचनेभ्योपि निरपेक्षा जाताः। ततः क्रमेणातिशयितभावस्तथा कृतो येन स्वरूपादपि निरपेक्षा जाताः, यतो मानोभून्। तथा च भगवद्भावस्य नित्यत्वादयं भावः स्थायिभाववत्सदा स्वामिनीष्वस्तीति ज्ञेयम्। यतोस्मिन् रसे नायिकाप्राधान्यमेव निर्वहति। अग्रे यदार्त्यादेः कथनं तदेतस्यैव भावस्यावस्थाविशेषसम्बन्धिव्यभिचारिभावानामेव। अत एवाग्रे 'ईषत्कुपिता' इति वक्ष्यते। द्वितीयतृतीयादिलीलाकरणभूतमनोवाक्प्राणादिषु रसपूरणं च तथैव भवेदिति तथेति भावः। 'यमेवैष वृणुत' इति श्रुतेरेतावत्स्वतो भगवता कृतम्, न तु साधनबलेनैतास्वित्याहुः स्वजमिति। तर्हि, नादेनाकारणं गमनबोधनादिकं चानुपपन्नमित्याशङ्क्य, तत्रोपपत्तिं वदन्तो भगवान् लीलां कुर्वन् शास्त्रमर्यादामपि प्रदर्शयतीत्याशयेनाहुः **ते चेत्समर्पितात्मान** इति सार्धेन सर्वात्मभाववन्तश्चेद्भक्ता भवन्ति, तदैवायं रसः प्राप्यो, नान्यथेत्यर्थः। एतेनैतास्वेवैवं रमणं कुतो नान्यास्विति शङ्कापास्ता। सोपि भगत्कृत एव भवति, नान्यथेति ज्ञापनाय तदुपायरूपरिरंसाचन्द्रोदयगाननिषेधवचनान्युक्तानीत्याहुः **तत्रोपायश्च रूप्यत** इति। तत्र समर्पितात्मत्व इत्यर्थः। अन्तर्गृहगतकथयैतद्भावरहितानां नैतत्प्राप्तिरित्यत्र निदर्शनमप्युक्तमिति चकारार्थः। मानतिरोधानाभ्यामन्यापि सा मर्यादा ज्ञाप्यत इत्याहुः आत्मेति। लडर्थे लुङ् छान्दसः। रसमर्यादामग्रे स्वयमेव वदिष्यन्त्यन्त्यश्लोकद्वये। अन्तःप्रपत्त्यभावे बाह्यतस्तिरोधत्ते। तत्र हेतुरन्तःकरणसम्बन्धीति। यथा पतिपुत्रादिः शरीरसम्बन्धी, तथा हरिः सर्वभावप्रपत्त्येकलभ्य इति, सा चान्तःकरणधर्म इति तथा। तथा च हेत्वभावे कार्याभावो युक्त इति भावः। तिरोधानमपि मानजदुःखहरणार्थमेवेत्याहुः **हरिश्च स इति**। अत्र हरिपदस्यायं भावः। 'एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः। नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासी'दिति वाक्याद्यथान्यैररक्षणे जाते स्वयमाविर्भूय रक्षितवान्, एवमन्वेषणादिसाधनानामसाधकत्वेतिदैन्ये सति तन्निवारणाय स्वयमाविर्भूय सर्वं कृतवानिति। अथवा। अन्तःकरणसम्बन्धी सन् तत्र स्थितः सन् बाह्यतस्तिरोधत्त इत्यर्थः। यद्वा। मानस्यायं हि सहजो धर्मो यन्नायकतिरस्कारोऽवचनानीक्षणादिभिः प्रकृते च तत्कार्यं स्वयमेव प्रभुः कृतवान्। न केवलमधुनैवं, किन्तु सार्वदिकीयं व्यवस्थेत्याहुः **सोऽन्तः करणेति**। सः पूर्वोक्तरसभावात्मक एव प्रभुः स मानात्मकः सन्नन्तःकरणसम्बन्धी चेत्तदा बहिस्तथेत्यर्थः। यद्वा। कायिकचेष्टया मानापनोदनं कुतो न कृतवानित्याशङ्क्य तत्र हेतुमाहुः **स इति**। अन्तर्ज्ञानादिकार्यकरणं येनेत्यन्तःकरण आत्मा तत्सम्बन्धी यतोऽतस्तथेत्यर्थः। आद्येध्याय आत्मनैवैतदात्मनि स्वानन्दं पूरितवानित्यन्तरेव च सोस्तीत्यन्तरेव प्रविश्य तद्धर्मापनोदनं कृतवानित्युच्यते। यदा कायिकमानन्ददानं करिष्यति, तदा बहिरेव तथा करिष्यतीति भावः। अत एव गीतगोविन्दादिषु तथैव गीयते। **हरिरिति** पूर्ववत्।

आद्य श्लोके **सर्वास्वेव रात्रिष्वित्यादि**। ननु तासां रात्रीणां नित्यत्वाद् दिवापि सत्त्वेन तेष्वप्येतद्रात्रिप्राकट्यं कृत्वा रमते, उत लौकिकीषु रात्रिष्वेव तथा कृत्वा तथेति शङ्कानिरासायाहुः **सर्वास्वेवेत्यादि**। यावतीषु ता आरोपितवांस्तावतीषु सर्वासु रात्रिष्वेव लौकिकीष्वित्यर्थः। अन्य'थैवं शशाङ्कांशुविराजिता' इति श्लोकेन लौकिकीनां तासामतिदेशो न सङ्गच्छेत। दिवापि तथोक्तौ दोहनपयोधिश्रयणसंयावसिद्धयादिकं गोपानां दिवा गोचारणादिपराणामेतासु स्वपार्श्वस्थत्वेन माननं च न सङ्गच्छत इति भावः। **पूर्णत्वादिति**। रसशास्त्रीयाभिः सर्वाभिः कलाभिः पूर्णत्वादित्यर्थः। सकलकलापूर्णभगवन्मनःसम्बन्धिचन्द्रस्यापि सदा तथात्वात्तासु तत्प्राकट्यकरणेन तथात्वकरणमित्याशयेनाहुः **पूर्णमित्यादि**। अन्यदा सदोषस्य जलादेर्दोषनिवर्तकत्वं कमलादिलक्षणगुणाधायकत्वं च शरदो लोके दृश्यत इति तस्यामसाधारणो धर्मोस्तीति ज्ञायते। इहापि रसानुपयोगिवस्तुनिरासपूर्वकं भगवद्भावपोषिकाऽलौकिकी शरद्भविष्यतीति तामेव कृतवानित्याहुः **ऋतुमपीति**। पुंसां सदोषभावस्त्रीणामप्यत्र न प्रवेश इत्यपि ज्ञापयितुं वसन्तादीनां प्रावृषश्चाकरणमिति हृदयम्। ननु रात्रीणां नित्यत्वेन तद्धर्माणामपि नित्यत्वात् तासां कालात्मकत्वेनत्वैवश्यंभावाच्च तत्करणोक्तिर्विवरणे कथमुपपद्यते। न च मनस इवेति वाच्यम्। तथात्राश्रुतेरिति चेत्। इत्थम्। अत्र हि वीक्षणस्य तथामनःकरणे हेतुत्वमुच्यते। तथा च सर्वविषयकापरोक्षानित्यज्ञानवतो नित्यरात्रिदर्शनस्यापि तथात्वेन तत्कार्यस्यापि तथात्वापत्तौ तत्समाधानाय वीक्षणे पूर्वस्माद्विशेषो वाच्यः। स चात्र विषयरूप एव वक्तुं युक्तः। स च विशेषणांश एव। पूर्वं तस्यानावि-

भावनादधुनैव तथाकरणाद्रसोद्दीपिकां सामग्रीं प्रभुरेव कृतवानिति सुष्टूक्तमाचार्यैं कृत्वेति । यद्यपि विशेषणस्यापि नित्यत्वेनोक्तदूषणानुद्धारस्तथापि भक्तानामपि दर्शनयोग्यता तत्र सम्पादितेति तथा । नायकभावेनेक्षणमेव विशेष इति ज्ञेयम् । अत एवोपसर्गो वीति । वस्तुतस्तु तत्तत्क्षणसम्बन्धिनी लीला नित्यैवोच्यत इति नानुपपत्तिः काचित् । **यद्यपी**त्यादिनाऽपिशब्दार्थ उक्तः । **तथापि मर्यादे**ति । रसमर्यादेत्यर्थः । **एवं कार्ये योगमायाया** इति । भजनानन्ददानलक्षणे कार्ये इत्यर्थः । **अन्यत्र स्थितं प्रमाणम्** । वेदात्मानं सङ्कर्षणं देवक्यां स्थितं रोहिण्यां योजितवती, स्वयमाविर्भूय मथुरायां स्थितमानन्दरूपं प्रभुं गोकुले, तथात्रापि पूर्वं गोपानां गृहेषु स्थिता ऋचोऽधुना भगवति योजयति, भगवति स्थितमानन्दं च तास्वित्यर्थः ।

अत्र कश्चिदाह । आनन्दस्य सुखरूपत्वादमूर्तस्यान्यत्र गमनासम्भवात्प्रियसङ्गनिमित्तकः स्वामिनीषु सुखविशेष उत्पन्न इत्येव वक्तुं युक्तम्, अतो योगमायाश्रयणनिमित्तकथनमनुपपन्नमिति । स वक्तव्यः । 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इत्यादिश्रुतिभ्य 'आनन्दमयोभ्यासा'दित्यादिन्यायेभ्यश्च धर्मिग्राहकप्रमाणभूतेभ्य आनन्दमयत्वं भगवत्स्वरूपे मन्तव्यम्, अनिच्छतापि त्वया । तथैव चिद्रूपस्य धर्मरूपभगशब्दार्थज्ञानरूपत्वव'त्प्रकाशाश्रयवद्वा तेजस्त्वा'दिति न्यायाद्धर्मरूपतापि । तथा च 'तदेजती'ति श्रुतेस्तस्य गतिरूपत्वमप्यङ्गीकार्यम् । अत एव व्यापकत्वेपि गतिलीलोपपद्यते, दामोदरलीलेव । वस्तुतस्तु स्वरूपमर्यादामप्यतिक्रम्य भक्तार्थे लीलां करोतीति नानुपपत्तिः काचित् । अत एव 'रसं ह्येवायं लब्ध्वानन्दो भवती'ति श्रुतिः । सर्वात्मभावलक्षणः स्थायिभावो रसस्तमेव लब्ध्वानन्दवान् भवति । तादृशे प्रभुः स्वरूपानन्दं ददातीति तथा लाभकथनेन भगवद्दत्त एव प्राप्यते, नान्यथेति सूच्यते । एवकारः सर्वत्रानुषज्यते । तथाहि । रसमेव लब्ध्वा तथा । तं लब्ध्वा तथा भवत्येव । तथा भूत्वा आनन्द्येव भवति, न तु लौकिकदुःख्यपीति च । अतः **प्रमाणातिरिक्तमार्ग** इति प्रमाणमार्गातिरिक्तो मार्ग इत्यर्थः । यतोन्यत्र स्थितं प्रमाणमन्यत्रापि याजयत्यतोन्यभजनरहितं विवाहितपतिभजनं विदधच्छास्त्रं तत्त्यागपूर्वकं भगवत्सेवामेव विधत्त इत्यर्थस्तु स्वामिनीनां तथा भजनेन तेन च फलसिद्ध्या 'या माभज'न्निति वाक्येन भगवता प्रत्युपकृतित्वेन कथनात्फलरूपेण चाधुना ज्ञाप्यते । तस्य मार्गत्वं च । अन्यथोन्मार्गत्वमेव भवेत् । अस्त्वेवमेतदित्यादिना प्रतिपादितं च ताभिः । ईश्वरवाक्यस्याखिलप्रमाणाधिकबलवत्त्वेपि स्वामिनीवाक्यैर्दुर्बलत्वमपि प्रमाणातिरिक्तो मार्ग इति ज्ञेयम् । यद्वा । प्रभुप्राप्त्यर्थं गुरूपसत्तिस्तदुक्तकरणं च भक्तानां प्रमाणमार्गः । प्रकृते च स्वामिनीप्राप्त्यर्थं योगमायाश्रयणादिकं प्रभुः करोति करिष्यत्यपीति प्रमाणातिरिक्तो मार्गः, यतोन्यत्र प्रतिष्ठितमानन्दमन्यत्र योजयत्यत एतद्भावेन भजनरूपोत्युत्कटस्नेहजविरहभावेन सर्वत्यागपूर्वकं स्वदेहादिविस्मृतिपूर्वकं भगवदन्वेषणपरत्वलक्षणश्च भक्तिमार्ग इत्यर्थः । इदं च द्वितीयतृतीयाध्यायादिषु स्पष्टम् । एवं सत्यस्मिन्मार्गे स्वामिन्य एव गुरव इति ज्ञापितं भवति । स्वामिनीनां विप्रयोगभावे सौभाग्यमदादिर्हेतुः । तत्र च भगवद्धर्मप्रवेश एव हेतुः । अन्यथा पादरजः प्रपन्नानामेतासां मदो मानश्च न स्यातामिति भावः । नन्वेवं 'शशांकांशुविराजिता निशा' इति वाक्याल्लौकिकीष्वपि रात्रिषु रमणमिति ज्ञायते । एवं सत्यलौकिकीतत्परिग्रहे गौरवं विशेषाभावश्चेत्याशङ्क्य लौकिकीनामपि तासां स्वरूपमाहुः **याश्च रात्रय** इति । **निर्मिता** इति पदात्सर्गादावेवैतदर्थमेव भगवता सृष्टाः काश्चन रात्रयो भगवत्येव स्थिता एतावत्पर्यन्तं, लीलासमये लौकिकीष्वेव रात्रिषु स्थापयित्वा ता कृतवानिति ज्ञाप्यते । लौकिकेन्दुप्रकाश्यत्वेन गीतगोविन्दाद्युक्तप्रकारेण लौकिकरात्यैव रमणेन चैतासां लौकिकीत्वमुच्यते । तासु विवक्षितेन्दुप्रकाश्यत्वेन नायकमानोक्त्या नायकाप्रणिपातोक्त्यैतन्माननायकान्तर्धाननायिकादैन्योक्त्यैतद्धेतुकतदाविर्भावे तदधीनत्वोक्त्या प्रश्नोत्तरे परोक्षभजनोक्तौ पूर्वमननुभवेपि प्रत्यक्षबाधेपि तदनुभवतद्वाग्विश्वासोक्त्या भगवद्विचारितानुपूर्वीकस्वरजात्युन्नयनादिभिश्चालौकिकरीत्यैवालौकिकरसदानमिति ज्ञाप्यते । उक्तार्थेषु लौकिकवैलक्षण्यं स्पष्टम् । एवं सति स्वरूपत एवालौकिकत्वमितिविवेकः । एवं कथन उपपत्तिमाहुः **अन्यथे**ति । साधारणीनां रात्रीणां तल्लीलाश्रयत्वे तासां सर्वत्रैव तुल्यत्वात् सर्वेषु देशेषु सर्वेषामेतदानन्दप्राकट्यं स्यादित्यर्थः । अन्यथेत्यस्यैव विवरणं **साधारणा**त्यादि । भूम्येकत्वेपि लीलाश्रयभूम्यधिष्ठानत्वेनास्या नानुपपत्तिरिति भावः । ननु सर्वज्ञस्य रात्रिदर्शनमपि सार्वदिकमित्यधुना को विशेष इति चेत्तत्राहुः **शरदि ऋता**वित्यादि । विशिष्टदर्शनं विशेष इत्यर्थः । ननु विशेषणस्यापि नित्यत्वान्न तथेति चेत् । सत्यम् । यादृशी लीलोच्यते तादृश्या एव नित्यत्वादधुनैवोक्तविशेषणवैशिष्ट्यमित्युक्तेपि न दोषः । एतद्यथा तथा विद्वन्मण्डने निरूपितमस्माभिः । ईश्वरस्यान्याश्रयणं हि लौकिकी रीतिः, तदुक्त्वात्र तद्रीत्यापि रमणं सूच्यते । एवं सति मध्यस्थत्वेन तदा तस्या विशेषत उपयोग इति तदाश्रयणमुक्तमिति ज्ञेयम् । किञ्च । स्वाशक्ये ह्यर्थेऽन्याश्रयणं क्रियते । तथा च सर्वसमर्थस्यापि स्वानन्ददानसमये ईश्वरत्वादिधर्माज्ञानं सम्पादयितुं रसपरवशत्वेन न कर्तुं शक्यं, गोपानां चैतल्लीलाविषयकाज्ञानं तथा, आगमनसमये निषेधोक्त्या तज्ज्ञानस्य कथनात् । अत एतदादिकार्यसिद्ध्यर्थं योगमायाश्रयणमलौकिकरीत्या रमणेपीति ज्ञेयम् । अत एव 'मोहितास्तस्य मायया' 'मन्यमानाः स्वपार्श्वस्था'निति वक्ष्यति । अत एव रसोपयोगि यद्यत्कार्यं तत्तदा तदा सम्पादयितुं शक्तेयमिति स्वनिकट एव मूर्तिमत्यास्तस्याः स्थापनमिति ज्ञापनायोपेत्युपसर्गः । एतदेवोक्तं **समीप एवाश्रित्ये**त्यनेन ॥ १ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

षड्विंशाध्याये ब्रह्मानन्दादिति का० २४६$\frac{३}{४}$–२५४$\frac{३}{४}$। **ब्रह्मानन्दात् समुद्धृत्ये**त्यादि "ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता" इतिप्रकारेण **ब्रह्मानन्दात् समुद्धृत्य भजनानन्दयोजने** कर्तव्ये सति **या लीला युज्यते** योग्या भवति **सा** (लीला) **तुर्ये फलप्रकरणे निरूप्यते, लौकिकस्त्रीष्विति** रसात्मको भजनानन्दो हि रसशास्त्ररीत्या लौकिकस्त्रीषु परकीयासु **संसिद्धः** कुमारीणामपि भगवता सह विवाहाभावात् तन्न्याय एव, **तद्द्वारा** तत्कथाश्रवणेन तद्भावोदये पुरुषेपि स रसो भवेन् नान्यथेत्यर्थः, ब्रह्मानन्दानुभवोक्तेर्मुख्यप्रयोजनं ब्रह्मानन्दभजनानन्दयोस्तारतम्यज्ञापनं पूर्वाध्यायसमाप्तिकारिकायामुक्तं, गौण-प्रयोजनमाहुः **स्वानन्दानुभवार्थ**मिति, पुरुषोत्तमानन्दानुभवार्थं लक्ष्मीतुल्यतारूपा योग्यतापि स्वामिनीषु निरूपितेत्यर्थः, लक्ष्मी-तुल्यतायां हि भगवद्रमणमिति मर्यादा, सा च ब्रह्मानन्दरूपा, तथा च पूर्वाध्याये ब्रह्मभावोक्त्या लक्ष्मीरूपत्वमुक्तं जातमित्युक्त-मर्यादापि सम्पन्नेतिभावः, अथवा द्वादशाध्याये "गोप्योन्तरेण भुजयोरपि यत्स्पृहाश्री"रितिवाक्ये व्रजस्त्रीष्वेव **स्वानन्दानुभवार्थं योग्यता निरूपितेत्यर्थः**, तथा च तत्रैव एतदधिकारवत्त्वात् तत्रैव भजनानन्ददानमितिभावः, यद्वा "हेमन्ते प्रथमे मासी"त्यत्र कात्यायनीप्रवेशरूपा **प्रभुसम्बन्धयोग्यता निरूपितेत्यर्थः**, एवं टिप्पण्यनुसारेण त्रिधा व्याख्यानं, **तद्द्वारा पुरुषाणां** चेति, कात्यायनीप्रवेशद्वारा तासामनुग्रहद्वारेति वार्थः, **स्त्रिय एव हि तं पातुं शक्ता** इति तं पुरुषरूपं भगवन्तमित्यर्थः, तत्स्त्रीकर्तृक-पानानन्तरं **पुमान् भगवान् तासु** तं रसं पातुं **शक्त** इत्यर्थः, रसाधिक्ये पुम्भावादितिभावः, यतस्ता एव रसयोग्यास्तत्पाने शक्ताश्च, अतो न कदाचित् रमणे व्यवधानं करोतीत्याहुः **अतो हि भगवानिति, आन्तरं त्विति** सखीवृन्दे मिथो गुणानुवादे लीलासहित-प्रियतमप्राकट्येन अन्तर्ये भावविशेषा उत्पद्यन्ते न ते सङ्गमेपीत्यस्य परत्वं, **ततः शब्दात्मिका लीले**ति युगलगीताध्यायोक्तगुण-गानलक्षणशब्दात्मिकेत्यर्थः, **निर्दुष्टे**ति रूपलीलायां मानादिजनितेन **प्रभौ** दोषारोपेण सदोषत्वं, नामलीलायां तु प्रभौ दोषारोपा-त्मकदोषाभावेन निर्दुष्टत्वमित्यर्थः, शब्दात्मिकापि लीला प्रवृत्तिनिवृत्तिभेदेन द्विरूपा, तत्र पूर्वा षष्ठाध्याये उत्तरा सप्तमाध्याये, तत्र पूर्वस्याः सदोषत्वादत्रापि पूर्वाध्याये वेदात्मकशेषरूपत्वेन बलदेवस्य तत्साहित्येन कृतायां लीलायां शङ्खचूडोक्त्या सदोषत्वं, तद्वधोक्त्यात्र सापि निर्दुष्टेति ज्ञाप्यत इत्यर्थः, रूपस्य पञ्चात्मकत्वात् तन्निरूपणं तावद्भिरध्यायैः कृतमित्याहुः **ततो रूपप्रपञ्चस्ये**त्यादि, पञ्चात्मके रूपे येनांशेन या लीला कृता तां तां लीलां क्रमेणाहुः **आत्मने**त्यादिसार्धेन, अत्र पञ्चस्वध्यायेषु एकैकस्मिन्नध्याये एकैका लीला, अथ वा प्रत्यध्यायोक्तलीलायामपि पञ्चविधत्वं ज्ञेयं, अत्र सैन्धवघनवत् एकरसे भगवद्रूपे कथं पञ्चविधत्वमित्याशङ्क्य टिप्पण्यां **यथेन्द्रियादिरूपत्व**मित्यादिसार्धपञ्चकारिकाभिरुपपादितं, **रूपं प्रतिष्ठित**मिति **हरिप्रियास्विति**शेषः, **पूर्णः** स्वरूपानन्दो दत्त इत्यर्थः, **जीवानानन्दयत्** स्वयमिति, एतावत् स्वतो भगवता कृतं न तु साधनबलेनेत्यर्थः, तर्हि नादेनाकारण "प्रतियात व्रजं नेह स्थेयं"मित्यादिना गमनबोधनादिकं चानुपपन्नमित्याशङ्क्य तत्रोपपत्तिं वदन्तो भगवान् लीलां कुर्वन् शास्त्रमर्यादामपि प्रदर्श-यतीत्याशयेनाहुः **ते चेत् समर्पितात्मान** इतिसार्धेन, सर्वात्मभाववन्तश्चेद् **भक्ता भवन्ति** तदैवायं रसः प्राप्यो नान्यथेत्यर्थः, सर्वात्मभावोपि भगवत्कृत एव भवति नान्यथेतिज्ञापनाय तदुपायरूपरिरसाचन्द्रोदयगाननिषेधवचनान्युक्तानीत्याहुः **तत्रोपायश्च रूप्यत** इति, तत्र समर्पितात्मत्वे इत्यर्थः, मानतिरोधानाभ्यामन्यापि सा मर्यादा ज्ञाप्यत इत्याहुः **आत्मा यावत् प्रपन्नोभूदि**ति, भवतीति वक्तव्ये अभूदितिप्रयोगे लडर्थे लुङ् छान्दसः, **आत्मा यावत्**पर्यन्तं **प्रपन्नो** भवति **तावदेव हरी रमते** बहिः प्रकटो भवति अन्यदा तु बाह्यतस्तिरोधत्ते, कुत इत्याकाङ्क्षायामाहुः **सोन्तःकरणसम्बन्धी स हरिरन्तःकरणसम्बन्धो**, अतोन्तःप्रपत्त्यभावे बाह्यतस्तिरोधानं युक्तमितिभावः, एतच्च टिप्पण्यां चतुर्धा व्याख्यातम्, **ता वार्यमाणाः पतिभिरि**त्यत्र एकवाक्यत्वबाधनाय याज्ञवल्क्यस्मृतिमाहुः "**रक्षेत कन्यां पिता विन्नां पतिः पुत्रस्तु वार्धके अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियाः**" इति, अस्यार्थः, **कन्या**मविवाहितां **पिता रक्षेत्, विन्नां** विवाहितां **पतिः, वार्धके पुत्रः**, तेषां पुत्रादीनामभावे ज्ञातयो रक्षेयुः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पतिर्ब्रह्मादीनां सकलजगतां यः कलयिता वनेऽनृत्यद्गोपीजनगणगतः प्रेमवशगः।
सदा पूज्यो देवैरपि मुनिगणैश्चिन्तितपदः स वा ईशः कुर्यान्मम सकलवांछागतफलम् ॥ १ ॥
अथ पञ्चभिरध्यायै रासक्रीडामहोत्सवः। वर्ण्यते मुनिना कृष्णसद्गुणाकृष्टचेतसा ॥ २ ॥
ऊनत्रिंशे व्रजस्त्रीणामागमं तु वनेऽन्तिकम्। तासां गर्वेण कृष्णस्य चान्तर्धानं निरूप्यते ॥ ३ ॥

एवं सप्तवर्षवयस्कस्य भगवत इन्द्रादिगर्वनिवृत्त्यर्था गोवर्धनपूजादिलीलाऽनुवर्णिता। अथ "सोऽपि कैशोरकं वयो मानयन् मधुसूदनः। रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः" इति विष्णुपुराणवचनात् प्रकटितकैशोरवयस्कस्य तस्य ब्रह्मादि-विजयेन संरूढगर्वस्य कामदेवस्य गर्वनिवृत्त्यर्थं रासलीलां निरूपयति—भगवानपीति। भगवानपि याः "याताबला व्रज सिद्धा मयेमा रंस्यथ क्षपाः" इति रमणार्थं प्रतिश्रुतास्ता रात्रीर्वीक्ष्य रन्तुं मनश्चक्रे इत्यर्थः। "अपिशब्दात्, गोपीनां तु भगवता सह रमणेच्छा सदैवास्ति, तदर्थमेव कात्यायन्यर्चनादिप्रयत्नस्य कृतत्वात्। इदानीं तु भगवान् वैराग्यादिगुणपूर्णोऽपि स्वभक्तानां तासां

मनोरथपूरणार्थं ताभिः सह रन्तुं मनश्चक्रे" इति सूचितम्। ननु "तासां बह्वीनां मनोरथं स एकः पूरयितुं कथं शक्तः ?" इत्याशङ्क्याह—योगमायामुपाश्रित इति। युज्यते कार्यार्थं नियुज्यते सा योगा एवंभूता या माया अघटितघटनापटीयसी स्वाचिन्त्या शक्तिस्तां विधेयतयोपाश्रितः, अतस्तस्य न किमपि दुर्घटम्। तासु रात्रिषु रमणयोग्यतामाह शरदेति। शरदा हेतुना उत्फुल्ला मल्लिका यासु ताः। यद्यपि शरदि न मल्लिकाकुसुमानि प्रफुल्लानि भवन्ति, तथापि भगवत्प्रभावात् वृन्दावने तथा नियमो नास्ति। निदाघोऽपि 'वसन्त इव लक्षित' इत्युक्तत्वात्। 'रात्रिः' इत्यनेन शृङ्गाररसस्य रात्रिष्वेव प्राढत्वाद्दिवसे तन्निषेधाच्च तास्वेव रमणसमय इति सूचितम्। बहुवचनेन बह्वीषु रात्रिष्वेव रमणं सूचितम् ॥ १ ॥

अन्वितार्थप्रकाशिका

ऊनत्रिंशे तु गोपीभिः संवादो रासवर्णनम्। अन्तर्द्धानं च कृष्णस्य तत्र श्लोका गजाब्धयः (४८) ॥
अनुष्टुभः सार्द्धषष्टिरुवाचेति (६०॥) च सप्तकम् (७) ॥ २९ ॥

इह सप्तमवर्षे भगवता कार्त्तिकामावास्यायां कर्मवादोत्थापनेन इन्द्रमखभङ्गः कृतः। तच्छुक्लप्रतिपदि गोवर्द्धनमखोत्सवः। द्वितीयायां यमुनातीरे भ्रातृद्वितीयाभोजनोत्सवः श्रीशुकेनावर्णितोऽपि ज्ञेयः। तत्रैव वर्णिता इन्द्रकोपोक्तयश्च। तृतीयामारभ्य नवमीपर्यन्तं गोवर्द्धनधारणम्। दशम्यां गोपानां विस्मयकथाबाहुल्यम्। एकादश्यां गोविन्दाभिषेकः। द्वादश्यां वरुणलोकगमनम्। पौर्णमास्यां ब्रह्मलोकगमनम्। ततश्च शरदः समाप्तत्वादष्टमे वर्षे सत्याश्विनपूर्णिमायां रासोत्सवः पूर्वं नवमवर्षोक्तिष्टीकान्तरानुसारेणेति। तं वर्णयति—भगवानिति ॥ प्रकटितकिशोरवया भगवानपि योगमायां स्वशक्तिमुपाश्रितः सन् शरदा हेतुना उत्फुल्ला मल्लिकाः यासु ताः रात्रीः "मयेमा रंस्यथ क्षपाः" इति पूर्वं प्रतिश्रुताः वीक्ष्य रन्तुं मनश्चक्रे। शरदि मल्लिकाविकासाभावेऽपि भगवत्प्रभावात्तथात्वम्। एवमग्रेऽपि। कुन्दस्य रात्रौ कमलादेश्च विकासः। रात्रीरिति बह्वीषु रात्रिषु रमणं सूचितम्। एकस्या रात्रेर्बहुरात्रितुल्यत्वापादनं वा भगवत्प्रभावात् ॥ १ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ पंचभिरध्याये रासरमणंनिगद्यते।
तत्रादौ वेणुनाहुतगोपीसलापकौतुक रासक्रीडासमारंभस्तत्रांतर्धानमद्भुतम् ॥ १ ॥

भगवानपीति एतावंतं कालं वर्द्धमानानुरागाः चपलचित्ततयालव्रजयुवतयः क्रीडितुं मनः अकुर्वन् भगवांस्तु वयस आधिक्यं प्रतीक्ष्यमाणो न चकार इदानीं भगवानपि विषयविजयत्वस्वतंत्रत्वयुवतीकटाक्षाक्षोभ्यत्वाद्यसंख्यैश्वर्यसंपन्नोपि भक्तमनोरथपूरत्वात् गोपीजनपरमानंदप्राप्तये शरदामल्लिकाविकाशाजनकेनापि शरद्धतुना उत्फुल्ला विकसिता मल्लिका यासु ताः ताः मयेमा रंस्यथ क्षपा इति पूर्वप्रतिज्ञाता रात्रीः वीक्ष्य योगमायां प्रतिगोपिस्वस्वरूपकरणरूपं योगसामर्थ्यमुपाश्रितः स्वीकुर्वन् सन् यद्वा योगो गोपीसंयोगस्तदर्थं मायां कृपां आधिक्येनाश्रितो रंतुं मनश्चक्रे गोपीप्रीत्यर्थमेव रमणं नतु स्वप्रीत्यर्थमिति भावः तदुक्तमत्रैव आत्मारामोप्यरीरमदिति साक्षान्मन्मथमन्मथ इति आत्मन्यवरुद्धसौरत इति ॥ १ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ऊनत्रिंशेऽथ रासार्थमुक्तिप्रत्युक्तयः प्रभोः। रासारम्भे तु गोपीभिस्तस्य चान्तर्द्धिकाद्भुतम् ॥ १ ॥
पद्मासनप्रमुखनिर्जयजस्मयस्य दर्पं स्मरस्य नितरामखिलं हरन् यः ॥ स श्रीपतिर्हरिरलं जयति स्म गोपीसद्रासमण्डलविभूषणदिव्यमूर्त्तिः ॥२॥

ननु विपरीतमिदं परदारविनोदेन कन्दर्पविजेतृत्वप्रख्यापनमिति चेन्मैवं 'योगमायामुपाश्रितः। आत्मारामोऽप्यरीरमत्। साक्षान्मन्मथमन्मथः। आत्मन्यवरुद्धसौरतः' इत्यादिषु स्वातन्त्र्याभिधानात्। किं च। मूर्तिमच्छृङ्गाररसमिव मदनमोहनमूर्तिं भगवन्तं निरीक्ष्य नित्यं वर्द्धमानभगवन्मूर्त्यनुरागा एतावन्तं कालं चपलचित्तास्तद्यौवनप्राप्तिं प्रतीक्ष्यमाणा गोपिका यूनश्चेष्टाः प्रदर्शयन्तं किंचिद्वयोऽधिकतावन्तं च श्रीकृष्णं निरीक्ष्य स्वयं युवतयः सत्यः कृष्णेन क्रीडितुं मनोऽकुर्वन् तदा 'मयेमा रंस्यथ क्षपाः इति स्वप्रतिश्रुतं स्मृत्वा तत्सत्यापयितुमनुजिघृक्षैकशीलत्वात्केनापि व्याजेन गोपीः कृतार्थयितुं च ताभिः सह चिक्रीडिषुस्तावद्वेणुगीतेनैव ताः समाहूय ततस्तन्मनः परीक्षापूर्वकं ताभिः सह विजहारेति तस्माद्रासक्रीडाविडम्बनं कामविजयख्यापनायेत्येव तत्त्वम्। किं च। शृङ्गारकथोपदेशेन विशेषतो निवृत्तिपरेयं पञ्चाध्याय्यस्ति, ततः विवक्षितानि यूनो भगवतः शारदिकानि चेष्टितान्यनुवर्णयति मुनिः ॥ भगवानपीति ॥ भगवानपि, 'नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः' इत्युक्तभगवल्लोकदर्शनजानन्दपारवश्यप्रयुक्तसुखातिशयमग्नानन्दादीनालक्ष्य स्वासक्तगोपीजनमपि तथाविधं विधातुं समर्थः। विषयविजयत्वस्वतन्त्रत्वयुवतिकटाक्षाक्षोभ्यत्वाद्यसंख्यैश्वर्यसंपन्नो वा, श्रीकृष्णोऽपीत्यर्थः। ताः 'मयेमा रंस्यथ क्षपाः' इति याः प्रतिज्ञातास्ता इत्यर्थः। रात्रीः विशुद्धरसदीपिकाख्यायामेतद्व्याख्यायां, शरदादिसंबन्धिनीः रात्रीरिति व्याख्यातमस्ति। शरदा हेतुभूतया, उत्फुल्ला मल्लिकाः कुन्दकुसुमानि यासु तास्तथाभूता, वीक्ष्य दृष्ट्वा

युज्यते इति योगा सा चासौ माया तां आत्मीयं संकल्पमित्यर्थः। यद्वा योगमायां स्वकीययोगसामर्थ्यं, । यद्वा योगो गोपीजनसंयोगस्तदर्थं माया कृपा तां योगमायां, उपाधिक्येन आश्रितः सन् रन्तुं क्रीडितुं, मनः चक्रे। गोपीजनप्रीत्यर्थमेव रमणं न तु स्वप्रीत्यर्थमिति भावः ॥ १ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

श्रीमद्गोकुलसद्वृत्तिपूर्णानन्दरसप्रदम् । भक्तप्रेष्ठगुणं वन्दे श्रीगोविन्दपदाम्बुजम् ॥ १ ॥

प्राणाः सर्वशरीरवृत्तिषु बुधोद्याने च देवद्रुमा विष्णवाद्या विबुधेषु मन्युषु महायज्ञा वरिष्ठा यथा ।
श्रीमद्भागवते स्फुटं रसमया रासाभिधेयास्तथाऽध्यायाः पञ्च भवन्ति यत्र लसति प्रेष्ठप्रबोधोदयः ॥ २ ॥

योगी योगगतिं क्रियाफलमलं तत्कृत्तथोपासनासिद्धिं तन्मतिरक्षजातविषयांस्तत्कामुकः संविदम् ।
ज्ञानी किं बहुना विलोकयति यो यद्यद्धिया चाखिलं तत्तत्स्वेष्टफलं ध्रुवं स लभते यत्संश्रितार्थेक्षणात् ॥ ३ ॥

गोपकान्तानन्तवृत्तिवाञ्छितार्थपयःप्रदा । सेयं विजयते कामधेनू रासोत्तमाभिधा ॥ ४ ॥ (युग्मम्)

योगेनाप्यलमीश्वरोऽतिसुलभः श्रुत्यैवमुद्गीयते तत्स्यात्कीदृगसौ कथं विधिरिति प्रश्नाशयं भूपतिम् ।
प्रागावेदितयोगवित्स्थितिरपि ज्ञानी स योगीश्वरः प्रोद्यद्रासमिषादवोचदखिलं सद्भक्तियोगं मुनिः ॥ ५ ॥

गोपीपदार्थो गोपानामङ्गनेति स्फुटं पुनः । श्रुतिनाडीवृत्तिरूपैर्गूढार्थोऽप्यत्र बुध्यताम् ॥ ६ ॥
योगस्तदुत्तरोपास्तिस्ततोऽधिष्ठानचिन्तनम् । ततोऽपरोक्षं तदनु पूर्णानन्दरसोदयः ॥ ७ ॥

पञ्चाध्यायीक्रमाच्छ्रीशगोपीक्रीडानिरूपणात् । व्यञ्जितास्तत्र संयोगस्त्वाद्य इत्यभिवीक्ष्यताम् ॥ ८ ॥ (युग्मम्)

भगवानपीति : १०.२९.१.

सत्यानन्तगुणान्वितोऽपि परमानन्दोऽपि मायाश्रितो भूत्वा यच्चकमे वने स जनवत्क्रीडां स कामश्रियम् ।
तन्मन्येऽखिलगोकुलातुलरतिं स्वस्मिन् विधातुं तथा स्वं सर्वश्रुतिगोचरं च सदयः कर्तुं प्रसादोन्मुखः ॥ ९ ॥

आनन्दा बह्वो भवन्ति भुवने राज्यादिलाभोद्भवाः स्वानन्दस्तु स एक एक विमलो यश्चित्तजातोच्छ्रयः ।
यस्मात् षड्गुणवानपि प्रभुरसौ यस्याप्तये योगतः स्वीचक्रे मन इत्यवोचदपि ना श्रीमान्मुनिस्तत्त्ववित् ॥ १० ॥

रन्तव्यं रमणीभिरद्य भगवानेवं यदैषीद्वने गोप्योऽपि प्रमदास्तदैव हृदि तत्सङ्गस्पृहां चक्रिरे ।
तद्योगो विधिचोदितो बत मिथोऽप्यासीत्तदेति स्फुटोप्यर्थोऽभूदपियोजनेन भगवांश्चक्रे मनस्ता अपि ॥ ११ ॥

शरादिसंपद्विकलो यदि स्याज्जय्यस्तदा जातु भवेन्मनोजः ।
सत्यां तु तस्यां न तथेत्यबोधि प्रफुल्लमल्लीसुमनोभिवर्णनात् ॥ १२ ॥

विलोक्य पुष्पिणी रात्रीर्यद्रिरंसुरभूत्प्रभुः । तद्युक्तमेव स्मृतिकृल्लोके साजात्यदर्शनम् ॥ १३ ॥

विना मनो न चानङ्गद्वयस्याप्युदयो भवेत् । अतस्तदर्थकं चक्रे मनश्चक्रधरो हरिः ॥ १४ ॥

यत्प्राग्वत्सपहृत्यनेहसि विभुः सङ्कल्पभर्त्रात्मकस्तासामास ततो हि दूषणलवस्पर्शो न नारायणे ।
तत्राप्यल्पधियां कदाचिदुदितस्तं चापि माष्टुं मनश्चक्रे रन्तुमशेषवित्प्रभुरिति स्पष्टीकृतस्वाशयः ॥ १५ ॥

अघटितघटनापटुत्वमत्र प्रकटयितुं निजमेव रासकेलौ । रतिरससुखभागकारि नूनं यदुपतिनाऽपि मनो नपुंसकं तत् ॥ १६ ॥

विनान्तरङ्गं नान्यस्त्रीसंयोगो जनदृष्टिगः । सिद्ध्यत्यनन्तरायोऽस्मिन्निती‌शस्तदकल्पयत् ॥ १७ ॥
अमनस्कोऽपि प्रभुरिह रन्तुं शक्नोत्यचिन्त्यवैभवतः । यदकृत मनस्तदर्थं तद्बीजं तत्स्वरूपरक्षैव ॥ १८ ॥

स्वीया चेदनुकूलतामुपगता निर्विघ्नमन्याङ्गनाभोगः सिद्ध्यति तद्वशीकृतिरपि प्रेम्णा रहोऽवस्थितौ ।
ज्ञात्वेमां रसशास्त्रपद्धतिमभूद्गोपाङ्गनानां वशीकारायाप्यथ भुक्तये च भगवान्मन्ये स मायाश्रितः ॥ १९ ॥

नाहं चेत्प्रकृतिं श्रयेय न च वा कुर्यां मनःसर्जनं न स्याद् बोधविधूदयो निखिलसत्संतापसर्वंकषः ।
मय्यासामपि वा प्रवृत्तिरगुणे न स्याच्छ्रुतीनामतश्चक्रे दीनदयालुरेष विलसन्मायः सकामं मनः ॥ २० ॥

हृदाकाशे ताराधिकविलसिते वृत्तिरमणीविहारेच्छा जाता यदि भवनिशायामतिशयात् ।
विधेयं योगाध्वश्रयणमशुभध्वंसि सुधिया ततः स्वेष्टं सिद्ध्यत्यवगतमिदं योगपदतः ॥ २१ ॥

तत्तत्प्राण्युपभोगकालविलसत्सत्त्वश्रियश्चित्सुखो दृष्ट्वा हन्त तमस्विनीर्बहुविधा विद्यारजोरञ्जिताः ।
स्वां मूलप्रकृतिं भजन् भववने रन्तुं सकामो भवत्यार्तत्राणपरायणः स भगवानूह्योऽयमर्थो ध्रुवम् ॥ २२ ॥

कृष्णप्रिया

तामस प्रकरण में चतुर्थ फलप्रकरण का प्रारम्भ

श्रीशुकाचार्यजी महाराज ने कहा कि—राजन्! भगवान् श्रीकृष्ण अलौकिक आधिदैविक रसरूप है। उनकी लीलाएँ भी आधिदैविक है इसलिए लीला की सर्वसामग्री भी अलौकिक एवं आधिदैविक होनी चाहिए अतः श्रीकृष्णचन्द्रजी ने इस फलरूप भजनानन्द लीला करने के लिए सर्व सामग्री आधिदैविक प्रकट की है" इतना चित्त में दृढकर आप दशमस्कन्ध की फलात्मक लीला कथा का श्रवण करें, षडैश्वर्यसम्पन्न भगवान् ने शरद् ऋतु के कारण मालती के पुष्पों के विकास के साथ उन वचनदत्त रात्रियों की भी अच्छी तरह आधिदैविक बनाकर योगमाया को साथ में लेकर रमण के लिये निश्चय किया। भगवान् ने अपने मन को आधिदैविक चन्द्र बनाया इससे ये सारी रात्रियाँ भी पूर्णिमा बन गई। ऋतु को भी शरद्-आधिदैविक बना दी मालती के पुष्प खिला दिए। अपने मन को चन्द्र बना दिया ॥ १ ॥

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणेन [1]शन्तमैः।
स चर्षणीनामुदगाच्छुचो [2]हरन् प्रियः प्रियाया इव दीर्घदर्शनः ॥ २ ॥

कर्दमक्षमा

अन्वयः—तदा, दीर्घदर्शनः, प्रियः, प्रियायाः, मुखम्, अरुणेन, इव, प्राच्याः, ककुभः, मुखम्, शंतमैः, करैः, विलिम्पन्, चर्षणीनाम्, शुचः, मृजन्, सः, उडुराजः, उदगात् ॥ २ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदा तस्मिन्नेव क्षणे तत्प्रीतये उडुराजश्चद्र उदगादुदितः। किं कुर्वन्। दीर्घकालेन दर्शनं यस्य स प्रियः स्वप्रियाया मुखमरुणेन कुंकुमेन यथा विलिंपति तथा प्राच्याः ककुभो दिशो मुखं शंतमैः सुखतमैः करै रश्मिभिररुणेनोदयरागेण विलिपन्नरुणीकुर्वन्नित्यर्थः। स प्रसिद्ध उडुराजः। तथा चर्षणीनां जनानां शुचस्तापग्लानीर्मृजन्नपनयन् ॥ २ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदा भगवतो रिरंसासमये। तस्य हरेः प्रीतये। तमसि गोपांगनास्फुटदर्शनं स्यादित्यभिप्रेत्येत्यर्थः। उडुभिस्ताराभिः राजत इति। यथाहमुडुभिराकाशे राजे तथा भगवानपि व्रजांगनाभी राजत्वित्यभिप्रायक उडुराज इति शब्दः। दीर्घं बृहत् दर्शनं स्वरूपं यस्य सः। पूर्णिमेंदोः पूर्णकलत्वादित्यर्थः। प्रियः भर्ता। स्वप्रियायाः। "अरुणं कुंकुमे रक्ते संध्यारागेऽर्कसारथौ" इति धरणिः। प्राच्याः ककुभ इन्द्रेशायाः। परपत्न्या इत्यर्थः। अनेन 'यद्यदाचरति श्रेष्ठः' इति न्यायेन यद्यस्मद्वंशप्रवर्तकश्चद्र इन्द्रभार्यायाः प्राच्या मुखं विलिंपति, तदा कुलपरंपरागतत्वादस्माकमेतत्सदृशकर्मणि न दोष इति विमृश्य भगवान्प्रीतो भवत्वित्युक्त स्वामिचरणैः—तत्प्रीतये इति। इत्यर्थ इति। अरुणतापादनमेवात्र विलिंपनपदार्थः। चर्षणीनां मनुष्याणां वा सस्यानाम् "अर्यम्णो मातृकापत्नी तयोश्चर्षणयः सुताः। यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥" इत्युक्तेश्चर्षणयो मनुष्याः। "चर्षणिर्मानुषे सस्ये श्रांते चाध्वनि वाहने" इति निरुक्तिकोशः। सस्यपक्षे खरकिरणसंतापम्लानरूपाः शुच इति ज्ञेयम् ॥ तदेवोद्दीपनानन्तरं प्रादुर्बभूवेत्याह—तदेति। उडुराजश्चंद्र उदगात्। किञ्च, न केवलमयमुद्दीपन एव अपि तु गोपस्त्रीरमणस्य तस्य प्रमाणीभूत इत्याह—ककुभ इति। दीर्घकालेन दर्शनं यस्य सः। प्रियो रमणः। प्रियायाः स्वरमण्या मुखमरुणेन कुंकुमेन स्वकरधृतेन यथा विलिंपति तथा प्राच्याः ककुभो दिशो मुखं शंतमैः सुखतमैः करैः किरणैः धृतेनारुणेनोदयरागेण लिंपन्नरुणीकुर्वन्नित्यर्थः। स प्रसिद्ध एव। चर्षणीनाम् 'अर्यम्णो—' इति षष्ठोक्तेर्मनुष्यजातीनां शुचः संतापान् मृजन् अपनयन्। अयमर्थः—श्रीकृष्णस्य सः कुलादिपुरुषः पुरातनोऽपि द्विजराजोपि रमणार्हबहुतरस्त्रीमानपि प्राच्या दिश इन्द्रभार्यत्वात्परस्त्रिया मुखं स्वकरैः स्पृशति, स्वयं तस्यामनुरक्तस्तामप्यनुरागवतीं करोति यदि, तदा कृष्णस्य तद्वंश्यस्यः नवीनवयसो गोपजातेरलब्धविवाहत्वास्वीयस्त्रीरहितस्याथ च स्वसौंदर्येण मानुषजातीरानंदयतो गोपस्त्रीरमणे कः खलु दोष इति ॥ अत्र तोषिणी—एवं निजरिरंसया चंद्रमपि प्राचीदिशा सह प्रियः प्रिययेव रन्तुमुद्यतं मन्यमानस्य श्रीभगवतो भावमभिव्यंजयंस्तासां रात्रीणामुत्तमांगतारूपायामस्यामभिव्यक्तसर्वमंगलसूचकमन्यदप्याह—तदेति। उडूनां राजेति। ता अपि तत्परिवारत्वेनोदगुरिति ध्वनितम्। रश्मिभिररुणेनेति करणद्वयमुभयेषामपि साधकतमत्वात्। रश्मिधृतेन रागेणेत्यर्थः। विशेषेण लिंपन्निति पूर्णचंद्राभिप्रायेणैव, ततो राकैवेयं तिथिः। 'उत्फुल्लमल्लिका रात्रीर्वीक्ष्य' इतिवत्तस्याप्युद्दीपनत्वेन सहजोद्गमौचित्यात्। 'राकेशकररंजितम्' इति वक्ष्यमाणानुसारेण तत्तिथावेव तात्पर्यात्। स इति ता इतिवत्। न केवलमेवममुना

---

१. न्नरुणैश्च—विज. । २. मृजन्—श्रीधर. वशी. जीव. वीर. विज. विश्व. सु. शु. घ. ।

प्राचीदिश एव तापोऽपहृतः किं तु सर्वेषां जनानामपीत्याह–चर्षणीनामिति । शुचः शरदर्कजसंतापदुःखानि । यद्वा–मनोदुःखानि । भगवतः सर्वशक्त्याश्रयपरमशक्तिरूपाणां तासामनुल्लासोल्लासाभ्यां स्वत एव सर्वेषां तत्तद्भावात्, श्रीकृष्णजन्मदिनादिवत् । प्रियः प्रियाया इवेति । सरागत्वसाधुत्वानन्यत्वादिनान्योन्यं रुचेरविशेषो दर्शितः । अत एव तत्परिजनानां शोकाश्रूणि मार्जयन्यथाऽसौ परमसुखकरेण करेण लिंपति तथेति व्यंजितम् । दीर्घदर्शन इत्यनेन परमौत्कंठ्यं सूचितम् । एवं सर्वमिदं श्रीभगवतो रिरंसाविर्भावनमेवोक्तम् ॥ २ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं निजरिरंसया चन्द्रमपि प्राचीदिशासह प्रियः प्रिययेव रन्तुमुद्यतं मन्यमानस्य श्रीभगवतो भावमभिव्यञ्जयन् तासां रात्रीणामुत्तमाङ्गरूपायामस्यामभिव्यक्तसर्वमङ्गलसूचकमन्यदप्याह—तदेति । उडूनां राजेति ता अपि तत्परिवारत्वेनोदगुरिति ध्वनितं रश्मिभिररुणेनेति करणद्वयम् उभयेषामपि साधकतमत्वात् रश्मिधृतेन रागेणेत्यर्थः । विशेषेण लिम्पन्निति पूर्णचन्द्राभिप्रायेणैव ततो राकैवेयं तिथिः पूर्णत्वं च तस्य तिथ्यन्तरे श्रीभगवदिच्छापेक्षया तदेत्युक्तिस्वारस्यात् किम्वा उत्फुल्लमल्लिकारात्रीर्वीक्ष्येति वक्तस्याप्युद्दीपनत्वेन सहजोद्गमौचित्यात् "राकेशकररञ्जितम्" इति वक्ष्यमाणानुसारेण तत्तिथावेव तात्पर्य्यात् स इति ता इतिवत् न केवलमेवममुना प्राचीदिश एव तापोपहृतः, किन्तु सर्वेषां जनानामपीत्याह—चर्षणीनामिति । शुचः शरदर्कजसन्तापदुःखानि यद्वा मनोदुःखानि भगवतः सर्वशक्त्याश्रयपरमशक्तिरूपाणां तासामनुल्लासोल्लासाभ्यां स्वत एव सर्वेषां तत्तद्भावात् श्रीकृष्णजन्मदिनादिवत् प्रियः प्रियाया इवेति सरागत्वसाधुत्वानन्यत्वादिनान्योन्यं रुचिविशेषो दर्शितः । अत एव तत्परिजनानां शोकाश्रूणि मार्जयन् यथाऽसौ परमसुखकरेण करेण लिम्पति तथेति व्यञ्जितं दीर्घदर्शन इत्यनेन परमौत्कण्ठ्यं च सूचितम् एवं सर्वमिदं श्रीभगवतो रिरंसाविर्भावनमेवोक्तम् ॥ २ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं निजरिरंसया चन्द्रमपि प्राचीदिशा स प्रियमेव रन्तुमुद्यतं मन्यमानस्य श्रीभगवतो भावमभिव्यञ्जयन्निव तद्रिरंसास्मरणेनोदितभावविशेषः प्राचीदिशा नायिकया सह चन्द्रस्य नायकभावप्रदर्शनेनोदयमाह—तदेति । यदा मनश्चक्रे तदानीमेव उडूनां तारकाणां राजेति ता अपि तत्परिवारत्वेनोदगुरिति ध्वनितम्, तासां च पूर्णचन्द्ररात्रावल्पप्रकाशताविवक्षया परिवारत्वापेक्षया चोदयस्य गौणतयोक्तिः । विशेषेण लिम्पन्निति पूर्ण चन्द्राभिप्रायेणैव पूर्णत्वञ्च तस्य पौर्णमास्या किंवा तया विनाऽपि तिथ्यन्तरे भगवद्रिरंसापेक्षया, शन्तमैरमृतमयैरित्यर्थः, सर्वतापापहारित्वात् स काम्यम्बुराशिपरिवर्द्धनतया प्रसिद्धः । न केवलमेवममुना प्राचीदिश एव तापोऽपहृतः, किन्तु सर्वेषां जनानामपीत्याह—चर्षणीनामिति शुचः शरदर्कजसन्तापदुःखानि एतच्च श्रीभगवतो रंसोद्दीपनद्वारा प्रायो गोपकन्यावर्गचिरविरहतापापनोदनाभिप्रायेण, जगत्पूज्यानां तासां शुगपनोदनेन जगतामेव स्वतः शुगपनोदनसिद्धेः । प्रियः प्रियाया इवेति सरागत्वसाधुत्वानन्यत्वादिनाऽन्योन्यं प्रीतिविशेषो दर्शितः । अत एव परिजनानां शोकाश्रूणि मार्ज्जयन् यथाऽसौ परमसुखमयकरेण लिम्पति । दीर्घदर्शन इत्यनेन परमौत्कण्ठ्यं सूचितम्, एवं सर्वमिदं श्रीभगवद्रिरंसाविर्भावनमुह्यम् ॥ २ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

करैररुणेन तद्गतोदयरागेण ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा यदा रन्तुं मनश्चक्रे तदैव तत्प्रीतये स शारदः उडुराजश्चन्द्रः उदगादुदितः, किं कुर्वन् ? दीर्घेण कालेन दर्शनं यस्य सः चिरं प्रोष्यागतः प्रियः स्वप्रियायाः मुखमरुणेन कुङ्कुमेन यथा विलिम्पति तथा प्राच्याः ककुभो दिशः मुखं शन्तमैः सुखतमैः करैः रश्मिभिररुणेनोदयरागेण विलिंपन् अरुणीकुर्वन्नित्यर्थः । तथा चर्षणोनामोषधीनां मनुष्याणां च शुचस्तापग्लानीमृ जन्नपनयन् चेतनाचेतनतापं निराकुर्वन्नित्यर्थः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उडुराजश्चन्द्रः प्राच्याः ककुभो दिशः मुखं शन्तमैः सुखकरैः कुङ्कुमपुष्पवदरुणैः "कुम्भ मन्दायां गतौ" इति धातोः ककुबिति योगात्मकः शब्दः भृश मन्दगामिन्या प्राच्या सौन्दर्यातिशयेन पूज्यायाःस्त्रियो मुखं यौवनातिशयेन उडुकल्पस्य जनस्यानुरागजनकत्वेन राजशब्दवाच्यः पुरुषः शन्तमेनारुणेन करेण हस्तेन कलहोद्भूतदुखाश्रुकलिल यथा विलिम्पति निर्मार्ष्टि तथेति शब्दाक्षिप्त इति शेषः । कीदृशः उडुराजः चर्षणीनां सस्यानां खरकिरणसन्तापम्लानलक्षणाः शुचः मृजन् परिहरन् हिमकिरणकरेण पाणिना वा दीर्घदर्शनः दीर्घकालादर्शनं यस्य स तथा अन्यत्र बहुकालप्रवासेन दृष्टिमार्गं प्राप्तः प्रियो भर्ता दर्शनीयो वा ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

करैररुणेन तद्गतोदयरागेण ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तदोक्तप्रकारासु सर्वास्वेव रात्रिषु पूर्णत्वेन चन्द्रमा अप्येक एव नायकत्वेनासीदित्याह—तदोडुराज इत्यादि। तदा तस्मिन्नेव समये यदा भगवान् रन्तुं मनश्चक्रे, तदैव सेवकस्येयमेव रीतिरीश्वरेच्छा समकालमेवोपसत्तिरिति यत्, स इति पूर्णत्वेन प्रसिद्धः। उडुराज उदगादुदियाय। किं कुर्वन्? करैः किरणैः प्राच्याः ककुभो मुखमरुणेन अरुणिम्ना, गुणवचनोऽयम, विलिम्पन् रञ्जयन्नित्यर्थः। यद्यपि बह्वीनां रात्रीणां पतिस्तथापि प्राची दिगेव तस्य प्रियेति तामेवादौ शारदमनुनयन्। पुनः किं कुर्वन्? चर्षणीनां जनानां शुचो मृजन् निर्मलीभावं कुर्वन्। अत्र दृष्टान्तः—प्रियः श्रीकृष्णः सर्वासां व्रजदेवीनां वल्लभोऽपि चर्षणीनां सखीजनानां शुचो मृजन् अरुणेन कुङ्कुमेन करैः करव्यापारविशेषैः प्रियाया राधाया मुखं लिम्पन्निति वाक्यार्थोपमा। कीदृशः? उडुराजः प्रियो वा दीर्घदर्शनः, बह्वीषु रात्रिषु परिपूर्णतयैकरूप्येण वर्तिष्यमाणत्वाद्दीर्घमपरिच्छिन्नं दर्शनं यस्य, पक्षे प्रियया सह दीर्घं सर्वकालीनं, दर्शनं यस्य, स्वाधीनभर्तृकत्वात्तस्याः; अथवा दीर्घदर्शनो दीर्घलोचन इत्यर्थः ॥ २ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तदेत्यादि। तदा तस्मिन्नेव समये यदा रन्तुं मनश्चक्रे तदैवेत्यर्थः। सेवा-समयमाकलय्य भृत्य इवोपसन्न इति यावत् ॥२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदैवोद्दीपनानन्तरं च प्रादुर्बभूवेत्याह—तदा उडुराजश्चन्द्र उदगात्। किञ्च, न केवलमयमुद्दीपन एव अपि तु गोपस्त्री-रमणस्य तस्य प्रमाणीभूत इत्याह—ककुभः इति। दीर्घकालेन दर्शनं यस्य स प्रियो रमणः प्रियायाः स्वरमण्या मुखम् अरुणेन कुङ्कुमेन स्वकरधृतेन यथा विलिम्पति तथा प्राच्याः ककुभो दिशः मुखं शन्तमैः सुखतमैः करैः किरणैर्धृतेन अरुणेन उदयरागेण लिम्पन्नरुणीकुर्वन्नित्यर्थः। स प्रसिद्ध एव चर्षणीनां—

"अर्य्यम्णो मातृकापत्नी तयोश्चर्षणयः सुताः। यत्र वै मानुषी जातिर्ब्रह्मणा परिकल्पिता" ॥ इति

षष्ठोक्तेर्मानुषजातीनां शुचः सन्तापान् मृजन् अपनयन् अयमर्थः कृष्णस्य स्वकुलादिपुरुषः सः पुरातनोऽपि द्विजराजोऽपि रमणार्हबहुतरस्वस्त्रीमानपि प्राच्या दिशः इन्द्रभार्यात्वात् परस्त्रियो मुखं स्वकरः स्पृशति स्पृशन्नेव स्वयं तस्यामनुरक्तस्तामप्यनु-रागवतीं करोति यदि तदा कृष्णस्य तद्वंश्यस्य नवीनवयसो गोपजातेरलब्धविवाहत्वात् स्वीयस्त्रीरहितस्याथ च स्वसौन्दर्य्येण मानुषीर्जातीरानन्दतो गोपस्त्रीरमणे कः खलु दोष इति ॥ २ ॥

श्रीरसिकाल्हादिनी टीका

तदेवं श्रीकृष्णमनसि रिरंसापूर्णेऽपि भावरूपां प्रथमविक्रियामापन्ने सति चन्द्रस्यापि तत्कार्यत्वादुद्दीपनविभावत्वाच्च "चन्द्रमा मनसो जात" इति श्रुतेः कार्योन्मुखे सति कार्यं स्वयमेवोदेति, यथा रात्री–शरन्मल्लिकानामुद्दीपनविभावत्व तथा चन्द्रस्यापि उद्दीपनविभावत्वमतः तस्योदयमाह–तदेति, तास्वनुरागशैथिल्यं कुर्वन्, यथा श्रीकृष्णो रमायामनुरागशैथिल्य कृतवान् तथैव चन्द्रोऽपि स्वकीयासु पूर्णमुज्ज्वलरसं प्राप्नुवत् परकीयायां प्राच्यां दिशि पूर्णरसमनुभवितुमुदत्, "प्राची इन्द्रस्यैव स्याद्दिग्दे-वानामिति" श्रुतेः। कि कुर्वन् प्राच्याः ककुभो मुखं शन्तमैः करैररुणेन विलेपनं प्राची पूर्वानुरागवती अतस्तस्याः सूर्येण सम्बन्धमात्रं ज्ञात्वा सक्रोध इवारुण्यमभिव्यञ्जन् उदगात् फुल्लैः कुमुदकुन्दादिभिर्मुखविकासेन पूर्वानुरागं विचिन्त्य तामनुसरन् शन्तमैः करैरस्मिभिः करतुल्यैः प्रणयकोपं कुर्वन् तेनोदयरागेण तस्याः ककुभो मुखं विलिम्पन् दिवाकरे तस्या अनुरागभावमालक्ष्य चण्डांशुत्वात् अनुरागमन्तरेणोपभोग्यभावमालक्ष्य यत् परित्यज्यान्यत्र गतत्वात् वस्तुतस्तु श्रीकृष्णमनसोऽनुराग एव चन्द्रमस्य-मित्युक्त आसीत् मनः कार्यत्वात् नवकुङ्कुमारुणमित्युत्तरश्लोके वक्ष्यति कारणगुणा हि कार्यगुणानारम्भत इति न्यायात् पुनः किं कुर्वन् चर्षणीनां कृताकृतज्ञनावतां जनानां शुचः दिवा शरदकांशुजां तापान् मृजन्नाशयन् यद्वा चर्षणीनां सर्वत्र यदि भ्रमतां भगवद्व्र-जमन्तरे कश्चिद्दैत्यभयप्राप्नुवतां जनानां शुचः पश्चात् तापान् मृजन् दूरीकुर्वन् भगवदानन्दस्य पूर्णचन्द्रद्वाराभिव्यञ्जितत्वात् तस्मिन्नेव समये सर्वेषां व्रजौकसां तापमार्जनं जातमितिभावः, अन्यथैष्याकुला भवेयुरिति। वक्ष्यति च "मन्यमाना स्वपार्श्व-स्थानिति", तस्मिन्नुदिते सर्वेषां परमानन्दो भवत्येव, तापहरणमवान्तरव्यापार अन्धकारनिवृत्तिश्च किं च यथा श्रीकृष्णस्य व्रज-वल्लवीमनोऽनुरञ्जनमुद्देश्यं तथा चन्द्रस्याऽपि प्राचितापापनोदनमुद्देश्यं सर्वजनतां पापहरणमानुषंगिकमिति। चन्द्रेण कार्यद्वयं साधितमित्यत्रानुरूपं दृष्टान्तमाह–प्रियः प्रियाया इवेति दीर्घकालेन दर्शनं यस्य स प्रियः प्रीतिविषयः दीर्घोत्कण्ठायुक्तः प्रियादर्शनेन गतव्यथः प्रियाया विरहतापमपनेष्यन् नवकुङ्कुमेन मुखं विलम्पतीतिवत् अनेन विरहतापहरण परमानन्ददातृत्वं च कार्य्यद्वयं सूचितमिति ॥ २ ॥

विशुद्धरसदीपिका

अथ "प्रियमनुसुकृतां हि स्वस्पृहाया विलम्ब" इति न्यायेन यदैव भगवान् रन्तुं मनश्चक्रे तदैव तदभिप्रायमभिनयन् उडुराज उदगादिति सम्बन्धः। एवं च तद्देशगतानां चन्द्रीनां तदिच्छानुगतत्वम् "समानादितचन्द्रार्कम्" इति बृहद्गौतमीयोक्तेः अत्र उडूनां तारकाणां राजेति उडुशब्देन रात्र्युद्भासिन्यस्तस्मिन् कान्तभाववत्यो व्रजाङ्गना अध्यवसीयन्ते किं कुर्वन् प्राच्या ककुभः मुखम् अग्रभागं शन्तमैः करैः किरणैः अरुणेन गुणेनोपलक्षितैर्लिम्पन् अरुणीकुर्वन् पक्षे प्राच्याः प्राचीनाया नित्यप्रियायाः, इत्यर्थः। मुखमाननं करैः बहुत्वं व्यापाराभिप्रायेण अत्र करैररुणेनेति करणद्वयं वा उभयेषामपि साधकतमत्वात् ततश्च रश्मिधृतेन रागेणेत्यर्थः। पक्षे करधृतेन ततश्च "नेपथ्यरचनागम्या प्राच्या" इत्यनेन नवसङ्गमो रासक्रीडायामेवेत्यपि निरस्तं "यर्ह्यंबुजाक्ष" इत्यादौ वक्ष्यमाणत्वात् श्रुतिमुनिरूपाणां च नव एव एवेत्यविरोधः तथा तन् सम्बन्धेनोडुराजस्य पूर्णत्वमनुरागित्वं च विलिम्पन्निति सेवापरत्वं च तेन तस्यास्तस्याश्च स्वाधीनपतिकात्वं साधितं शन्तमैरिति मृदुत्वशीतलत्वाभ्यां वैदग्ध्यं किं कुर्वन् चर्षणीनां "चरगतिभक्षणयोः" इत्यनुशासनात् वक्ष्यमाणगतिभक्षादिमतां गृहगतानां गोपीजनानां शुचः कदासौ प्रियोऽस्मान् मिलिष्यतीति रमयिष्यतीति चिन्तारूपाः। यद्वा, चर्षणं श्रीकृष्णं गन्तुं शील यासां ताः वस्तुतस्तु चर्षणीनां जनसमूहानां ततश्च योग्यत्वात् सखीजनसमूहानां शुचः तयोः प्रणयमानादिकृताः परस्परानासक्तिसम्भावनाम्लानीर्मृजन्नपनयन् एतदेव हि सख्यं यथा श्रीगोविन्दलीलामृते प्रहेलिकाप्रसङ्गे—

> "तृप्ता वन्यजनस्य तृप्तिमयिता दुःखे महादुःखिता लब्धैः स्वीयसुखालिदुःखनिचयैर्नोहर्षबाधोदया ॥
> स्वेष्टाराधनतत्परा इह यथा श्रीवैष्णवश्रेणयः कास्ता ब्रूहि विचार्य चन्द्रवदने ता मद्वयस्या इमाः" ॥ इति ।

क इव प्रियाया इव इति नित्यप्रेष्ठत्वं दीर्घदर्शन इति दीर्घे दर्शने लोचने यस्य सः तेनोत्फुल्लत्वं निर्निमिषेक्षणत्वञ्च सूचितम्। अत्र च वाच्यार्थपुरस्कारेणोद्दीपकतया चन्द्रोदये प्रस्तुतेऽतिप्रस्तुतस्य स्वाधीनपतिकावृत्तान्तस्योपमामुखेन स्वयमेव कविनाऽऽविष्कृतत्वादन्यापदेशध्वनिरयम्, यदाह ध्वनिकारः—

> "शब्दार्थशक्त्याक्षिप्तोऽपि व्यङ्ग्योर्थः कविना पुनः । यत्राविष्क्रियते सोक्त्या सान्यैवालङ्कृतिर्ध्वनेः" ॥ इति ।

केचित्तु प्राच्या इत्यनेनैन्द्र्या इत्युपलक्ष्य परकीयामध्यवस्यन्ति तन्मतेन प्रार्थत्वं स्यादित्युपसङ्क्षेपणीयरुक्षेपः ॥ २ ॥

श्रीरामनारायणकृता भावभावविभाविका

ततः किं वृत्तमित्यत आह—तदोडुराज इति। यथा यदैव भगवान् चर्षणीनां "चरगतिभक्षणयोः" इत्यस्मात् भोक्तृणां जीवानां भगवन्मार्गगमनशीलानां वा शुचस्ता यत्र यार्तीः तत्तापोपशमनशमादिसाधनाशक्तिप्रयुक्तशोकान्वा प्रियतमस्वात्मभगवद्वियोगशुचो वा मृजंस्तेषां सुमनस्पदे हृदयारण्ये रन्तुं मनः करोति तदैव उडुराजः उडुषु मोहनैशतमोव्याप्तहृदयवनकिञ्चित्प्रकाशनशीलेषु स्वयं प्रकाशमानेषु शमादिषु राजते प्रकृष्टाह्लादप्रकाशात्मिकया भक्तिप्रभया शोभते इति "यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुरा" इत्यादिभिस्तैरुडुभिः शमादिभी राजमानो वा यो भजनानन्दचन्द्रः तथा ककुभः कं सुखं तद्रूपतयैव कुषु कुत्सितेष्वपि स्त्रीशूद्रादिषु पापयोनिषु दुराचारेषु च भातीति तथा—

> "अहो बत श्वपचोऽतोगरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यम् । तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृह्णन्ति ये ते" ॥
>
> "अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः" ॥

इत्यादिवचनात् पुनः कीदृशः सभजनानन्दः प्रियः सर्वेषामपि विषयिमुमुक्षुमुक्तानां प्रेष्ठतमस्तथा दीर्घदर्शनः दीर्घमनपबाध्यन्दर्शन ज्ञानं यस्मात् अत एव सः अतिविलक्षणः स तेषां तच्छुचः स्वयं शन्तमैरतिशयसुखरूपैरन्येषु करैः कं सुखं रान्तीति तथाभूतैः करैः स्वरश्मिरूपैः भगवल्लीलागुणगानतानवितानादिभिर्मृजंस्तथा प्राच्याः प्राक् सिद्धायास्तमोव्याप्ताया अपि धियो मुखं सत्त्वात्मकमुख्यभागं प्रियाया अरुणेन कुङ्कुमेनेवारुणेनानुरागरागेण विशेषतो लिम्पन्नुदगच्छति तथा यदा वृन्दावने रन्तुं मनश्चक्रे तदैव सभजनानन्दः सर्वत्रोदगात्। यद्वा, यदैव भगवान् रन्तुं मनश्चके तदैवोडुभिरुडुसदृशैर्नानाहावभावकटाक्षादिभी राजते इत्युडुराजः शृङ्गारात्मको रसेन्दुः तथा ककुभः कं सुखं तद्रूपतया कौ पृथिव्यां पार्थिवदेहे प्राकृतेऽपि भातीति तथा तथा च किमुवाच्यं प्रेमरसानन्दात्मकगोपीदेहेषु तथा प्रियः सर्वमनोरमः तथा दीर्घदर्शनः दीर्घं दर्शनं यस्मात्तेन रूपेणात्मदर्शनीया अपि शृङ्गारेण दीर्घकालमनिमेषतया दर्शनार्हा भवन्ति किमु वाच्यमतिसुन्दरीणां तथा स अतिविलक्षणः चर्षणीनामुक्तधातोरेव कृष्णरसास्वादाय गमनशीलानां शुचः एतावत् कालं प्रियासङ्गमजनितविषादान् शन्तमैः सुखरूपैः करैः सुखप्रदैरनुकूलनायकतया कृष्णाचरितकेलिकौतुकाद्युद्दीपनविभावैर्मृजन् तथा तासां प्रियतमसङ्गमाभावपीतमुखम् अरुणेन सम्भावितसन्निहिततत्समागमोत्साहजनितारुण्येन प्राच्याः पूर्वाया नित्यकृष्णप्रियाया इव विलिम्पन्नुद्गतः। यद्वा, यदैव भगवान् रन्तुं मनश्चक्रे तदैव उडुसदृशर्तुषु राजते इत्युडुराज ऋडुराजः रकारडकारयोः सावर्ण्येनाभिप्रेताख्या राजमाना वा तथा ककुभः कः स्वर्गस्तस्मादपि कुः भूमिर्विक-

सितसुमनोभिर्भातयनेनेति तथा प्रियः प्रियतमकृष्णसारूप्यतया प्रेष्ठः तथा दीर्घदर्शनः वर्तमानशरत्समयात् दीर्घकाले सम्भावितं दर्शनं यस्य तथा स्वयमेव कालातिक्रमेण भगवद्रमणोत्साहेन प्रादुर्भूतत्वात्सबहुविलक्षणो वसन्तः विरहिणां शुचः करैः प्रियसङ्गतानां शन्तमैः स्वोद्दीपनविभावैः चर्षणीनामुक्तव्युत्पत्त्यैव रन्तु गन्तुमुद्यतानां शुचो मृजन् प्राच्याः प्रकर्षेण पूज्यायाः कृष्णप्रियाया व्रजभुवः मुखं मुख्यं श्रीमद्वृन्दावनम् अरुणेन विविधोज्ज्वलितस्वानुरागतया सम्भावितकिंशुकादिशोणसुमनःसमूहेन विलिम्पन् उद्गतः अत्र प्रियाया मुखम् अरुणेन विलिम्पन्नित्युक्त्या वसन्तसम्भावितहोलिकाद्योतनमपि ज्ञेयम् तथा यदैव भगवान् रन्तुं मनश्चक्रे तदैवोडुराजश्चन्द्र उदगात् तथा च यदा सर्वेषां तदिच्छाधीनतया रमणानुकूल्येन तन्मनः सहोद्गमस्तदा किमु वाच्यं चन्द्रमसस्तद्भक्तविराटमनसः तन्मनसः सहकारित्वे एवं चन्द्रमसो भगवद्भक्तविराण्मनस्त्वेन यस्तत्रारुणरागः सभगवदनुरागः यस्तत्र श्यामाङ्कः सध्यानव्यक्तभगवदाभासः यश्च तन्मन उल्लासे रोमहर्षः सद्रुमलतादिविकासः यश्च तदुत्साहे भगवत्स्मितानुतत्प्रहासः सविश्वव्यापिसितामृतमयपरमाह्लादप्रकाशः यश्च व्याप्यरुणप्रकाशः सोऽधराभासः यश्चोडुगणचमत्कारः तद्विहसनव्यक्तदशनलसनम् इति पुनः कथम्भूतश्चन्द्रः ककुभः के स्वर्गे मण्डलेन कौ भूमौ कान्त्या भातीति तथा पुनः कीदृशः प्रिय उरोधृतश्यामसुन्दराभासेन प्रेष्ठतमः पुनः स कृष्णमन आनुकूल्येन नित्यमुरोव्यक्तकृष्णाभासतया चातिविलक्षणः प्राच्याः ककुभः सुरपतिप्रियाया दिशोऽपि मुखं शन्तमैराह्लादिप्रभान्वितैः करैरश्मिभिररुणेन तद्गतशोणरागेण करधृतहोलिकारोलिकादिवद्भासनेन स्वप्रियाया इव विशेषतो लिम्पन् चर्षणानां जनानां दिनतापादिशुच इव चर्षणानां कृष्ण प्रत्यभिसरणशीलानां स्वहृच्छुचो गोपिकानामपि गोपिकानां शुचः पूर्वप्रियविरहशोकान् गमने क्रीडायां च तम आदिप्रतिबन्धसम्भावितचिन्ताविशेषान् भगवतः स्वकुलसदाचारसङ्कोचसम्भावितग्लानीश्च मृजन्नुदगादिति कृष्णमनोवदुदयमगादित्यर्थः। अत्रैव हेतुगर्भितं विशेषणं दीर्घदर्शन इति दीर्घमर्थं दर्शयतीति तथा अयमभिप्रायः उडुभी राजते इत्युडुराज इत्यात्मन उडुराजत्वेन यथाऽहं बहुभिरुडुभिः स्वकान्ताभी राजमानस्तथैव मद्वंशप्रादुर्भूतेन त्वया भाव्यमिति दर्शयति न चात्र बहुदारसङ्ग्रहे यशोहानिचिन्ता यथोडुभी राजमानस्य ममोज्ज्वला प्रभा के स्वर्गे कौ पृथिव्यां च प्रसृता तथैव तवापि कीर्तिः शुभ्रामृतरसमयी लोकतमस्तापापहारिणी मनोह्लादिनी बहुदारसमागमेन कं कुम्भासयिष्यतीति दर्शयति न च कुत्रापि तव परदारत्वशङ्कावतारः तारापतित्वेपि मम बुधोद्भवप्रभाविस्तारवत्तव पूर्णावतारत्वेन रमणेऽपि तव यशसा सर्वस्यापि बोधोद्भवो निस्तारश्चेति न मम प्रतारकस्य प्रतारकत्वम्। किञ्च, सर्वमनोरूपस्य मम यदा न कुत्रापि परत्वदृष्टिस्तदा सर्वात्मकस्य तव न तत्सम्भावनागन्धोपीति दर्शयति। किञ्च, यथोडुभी राजमानेनापि मया निःशङ्केन सुरराजप्राच्या मुखं चारुणेन विलिप्यते तथा त्वयापि स्वकान्तया प्रियायुक्तेनापि निःशङ्केन सर्वासां मुखमरुणेन कुङ्कुमाद्यङ्गरागेण हृत्खं चारुणेनानुरागेण श्रोत्रखं च स्ववंशरागेण लेपनीयमिति दर्शयति—किञ्च, यथा उडुराजस्यापि मम प्राच्याः पूर्वसिद्धायाः आदरस्तथा त्वया प्रियाया इव बहुदाररमणेपि प्राच्याः पूर्वसिद्धायाः प्रकृष्टपूज्याया नित्यप्रियाया आदरो न विस्मर्त्तव्य इति दर्शयति, यदा मम कुलवृद्धस्यापीदृग्विलासस्तदा किमु वाच्यं तव तत्कुलनवकिशोरस्येत्यादिदर्शयतो दीर्घदर्शनत्वं युक्तमेव। यद्वा, यदैव भगवान् रन्तुं मनश्चक्रे तदैव यथा प्राच्याः पूर्वसिद्धायाः प्रकर्षेण पूज्याया वा नित्यप्रियायाः श्रीमत्या राधाया मुखमरुणेन कुङ्कुमाद्यङ्गरागेण विलिम्पन् उपलक्षणमेतत्समस्तशृङ्गाररचनारतिविहारादेः तत्तच्छृङ्गारविहारादि कुर्वन् प्रतिनिशामुख व्रजाद्विहारस्थलमुद्गच्छति तदिव चर्षणीनामात्मरसास्वादाय गन्तुमुद्यतानां गोपीजनानां शुचः स्वविहाराप्राप्तिप्रयुक्तमनोग्लानीः शन्तमैः "आनन्दमात्रकरपादमुखोदरादिः" इत्यादिवचनान्निरतिशयसुखस्वरूपैः परमाह्लादसौन्दर्य्यसुरभिमार्दवतापोपशमनादिभिः कं सुख रान्तीति तैः करैः स्वहस्तैः, बहुवचनमत्र रासमण्डलरतिविहारादौ सर्वासां सन्निधौ बहुधाविर्भावाभिप्रायेण मृजन्नपनयन् अत्र लिम्पन् मृजन् उभयप्रयोगयोर्भूतभविष्यदर्थकयोः वर्त्तमानवन्निर्देशस्तु "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" (३।३।१३१) इति सूत्रानुसारेण साधु उदगात् व्रजादुद्गत्य वंशीवटमगात् तत्रोद्गमने यशोदावैक्लव्यमाशङ्क्य विशेषयति, उडुराज इति। रकारडकारयोः सवर्णासवर्णयोरपि सावर्ण्यसंभवादुरुधा राजते इति तथा रासादावग्रेबह्वाः ष्विकारस्य वक्ष्यमाणत्वात्तथैव व्रजेप्याविर्भावसद्भावान्न तद्वैक्लव्यशङ्कावकाशः पुनः कीदृशः ? प्रियः तथा दीर्घदर्शनः "यः सर्वज्ञः सर्ववित् नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते विनाशित्वात्" इत्यादिश्रुतेरलुप्तदृक्तया स्वस्मिन् सर्वासां प्रीतिं वात्सल्यशृङ्गाररसभेदेपि समानां पश्यन् दीर्घे पद्मदलायते दर्शने नेत्रे यस्येति वा। ननु, पृथिव्यां नरत्वेनावतीर्णस्य कथमीदृक्त्वं तत्राह—ककुभः कं सुखं तद्रूपेणव कौ पृथिव्यामवतीर्णोऽपि भातीति न तत्र सुखभानरूपे भगवति तच्छङ्कावसरः कं सुखं तद्रूपा कुः पृथिव्यपि भाति यस्मादिति वा कस्य ब्रह्मणोर्थे कौ अवतीर्य भातीति वा ब्रह्मापि कुत्सितो भाति यस्मादिति वा के ब्रह्मणि कुत्सितेऽस्मदादौ च समान एव भातीति वा ककुभः सर्वेश्वरत्वादलुप्तदृक्त्वम्। यद्वा, तद्रमणमनोनुसारेण यदैवोडुराजश्चन्द्रः प्रियायाः प्राच्याः ककुभः मुखम् अरुणेन विलिम्पन्नुदगात् तदैव स प्रियो दीर्घदर्शनो भगवानपि चर्षणीनां तासां शुचो शन्तमैः करैर्मृजन् व्रजादुद्गत्य विहारस्थलमगादिति सम्बन्धः॥ २॥

श्रीधनपतिसूरिकृता गूढार्थदीपिका

तदैवं चन्द्रमा अपि भगवद्भावमुद्दीपयन्नुदगादित्याह—तदा तस्मिन्नेव क्षणे सः प्रसिद्धः, उडूनां नक्षत्राणां राजा चन्द्रः उदगात् उदयं प्राप्तः उडुपदेन नक्षत्राणामपि तत्परिवारत्वेनोदयः सूचितः किञ्च "मनसापि न गन्तव्याः परदाराः कदाचन"

इति निषेधमनुसन्धाय महत्तमलज्जया वा रमणाच्चेतसः परावृत्तिमपि निराकरोदित्याशयेनाह—ककुभ इति। प्राच्याः इन्द्राधिष्ठितायाः दिशो मुखं शन्तमैः परमसुखकरैः किरणलक्षणहस्तैर्धृतेनारुणेनोदयरागेण विलिम्पन्नरुणीकुर्वन् तथाचानया प्रवृत्त्या कृष्णमेवमुपदिशति स्म, भगवांश्चन्द्रः भो यदुकुलावतंस! यथोक्तदोषशङ्कया रमणयितुं मा निवर्तय मद्वंश्यत्वात् यथा अहं तव कुलादिपुरुषो द्विजराजस्तत्रापि पुरातनस्तत्रापि राजमत्याक्रान्तस्तत्रापि परमसुन्दरानेकस्त्रीपतिः प्राच्या दिशः परस्त्रीयो मुखं स्पृशन्न व स्वयं तस्यामनुरक्तस्तामप्यनुरागवतीं करोमि तद्वत्त्वमपि मद्वंश्यस्तत्रापि नवीनतया तत्राप्यविवाहितत्त्वात् स्वभार्यारहितस्तत्रापि सर्वदोषविनिर्मुक्तपरमसुन्दरविग्रहस्तत्रापि सम्प्रति गोपजातिनिविष्टो यथेष्टं गोपाङ्गनाभिः रमणं कुरु नास्ति तव दोषगन्धोपि "यद्यदाचरति श्रेष्ठस्तत्तथैवेतरे जनाः" इति न्यायात् वस्तुतः "तेजीयसां न दोषाय" इत्युक्तत्वादेतावता नास्ति मम दोषसम्पर्कस्तव त्वतितेजस्वित्वात्सुतरामित्यपि स एव बंधितवानित्याशयेनाह—चर्षणीनामिति—

अर्य्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः। यत्र वै मानुषी जातिर्ब्रह्मणा परिकल्पिता" ॥

इति षष्ठस्कन्धोक्त्या मानुषजातीनां शुचः शरदर्कजसन्तापदुःखानि मृजन् अपनयन् तथा च समस्ततापनिवर्तकस्य नास्ति तादृक् दोषजनिततापावाप्तिसम्भावनेति भावः। तत्रानुकूलं दृष्टान्तमाह—प्रिय इति। दीर्घकालेन दर्शनं यस्य प्रियः स्वरमणः प्रियायाः स्वरमण्याः मुखमरुणेन अनुरागेण स्वकरधृतेन कुङ्कुमेन च यथा लिम्पन्ति तद्वत्। यद्वा, मनःकरणसमकालमेव चन्द्रोऽपि तादृशाऽसङ्ख्यातरात्र्यानुकूलः राकोत्पादित इत्याह, तदेति। तदा तस्मिन्नेव क्षणं स्वसङ्कल्पितश्चन्द्र उदगात् स प्रसिद्धश्चन्द्र उदगात् स च किञ्चिद्विज्ञापयन्निवोदगादित्याशयेनाह—ककुभ इति। तथा च "चन्द्रमा मनसो जात" इति श्रुतेः। त्वत्त उत्पन्नस्य त्वत्प्रसादलब्धप्रतापस्य ममापि नास्त्येवेम्विधकर्मलेपः तव तु सर्वेश्वरस्यैव कुतः सः, अतः स्वभक्तानामाशां मनोरथं पूरयेति बोधयन्निवेति भावः। किञ्च, सर्वसन्तापनिवृत्त्यर्थं प्रवृत्तौ लोकदृष्ट्या प्रतीयमानोपि दोषो न संस्पृश्यत इत्यपि विज्ञापयन्नित्याशयेनाह—चर्षणोनामिति। यद्वा, यथा मम प्राच्याः ककुभः सम्बन्धः परदारसम्पर्कवत्प्रतिभाति नतु वस्तुतः तत् सम्पर्कः किन्तु सर्वजनतापनिवृत्त्यर्थं प्राच्याः दिशि समुदायमात्रं तया भगवतोऽपि स्वजनसन्तापनिरासार्थं कृतावतारस्य तत्तल्लीलया स्वभक्तसुखसम्पादकप्रवृत्तौ मूढजनानां लौकिकरमणादिप्रतीतावपि नास्ति किञ्चिद्बाधकमिति विज्ञापयन्निवोदगादित्याशयेनाह, ककुभ इति। निर्वृत्तिपक्षे तदा भगवत्प्रसादोदयक्षण एवोडूनां तत्स्थानापन्नानां शुभवृत्तीनां राजा विवेकाख्यश्चन्द्र उदगात् किं कुर्वन्नित्यपेक्षायामाह—ककुभ इति। प्राच्या अनेकजन्मप्रवृत्ताया अविवेकदशायाः मुखं जाड्यलक्षणं करस्थानापन्नैस्तत्तद्विचारैः सम्पादितेनारुणेन तत्तत्पदार्थबोधलक्षणेन रागेण लिम्पन् तिरोहितं कुर्वन् अत एव चर्षणीनाम् अधिकारजनानां तत्तद्वस्तुविषयकान् शोकान् मृजन् अपनयन् अत्र दृष्टान्तमाह प्रिय इति॥ २॥

रास–रहस्यम्

तदा तस्मिन्नेव क्षणे तज्जिज्ञासोः प्रीतये उडुराजश्चन्द्रः चन्द्र इव आह्लादकरः मनः प्रसादातिशय इति यावत्, उदितः वैराग्योदयोऽभून्, किं कुर्वन् दीर्घदर्शनः दीर्घकालेन बहुकालेन बहुजन्मजन्मान्तरेणापि दर्शनं यस्यात्मनः सः, चर्षणीनां मनुष्याणां शुचः तापं ग्लानिं मृजन्नपनयन् यथा प्रियः स्वप्रियायाः मुखमरुणेन तापापनोदनेन सुखीकरोति तथा प्राच्याः, यतः ज्ञान सूर्योदयस्य पूर्वरूपं वैराग्यमेव "वैराग्यबोधौ पुरुषस्य पक्षिवत् पक्षौ विजानीहि विचक्षणत्वम्। विमुक्तिसौधाग्रतलाधिरोहनं ताभ्यां विना नान्यतरेण सिद्ध्यति।" तस्मात्तदेव ककुभः कं सुखं तद्रूपतया कुत्सित विषयेष्वपि भातीति ककुभो दिशः मार्गस्यमुखमग्रभागं शन्तमैः सुखतमैः कल्याणतमैः करैः किरणैररुणोदयेनेव वैराग्यरागेण विलिम्पन् घनीभूतं कुर्वन्नित्यर्थः॥ २॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदुद्दीपनानन्तरमाह–तदेति। तदा तस्मिन्नेव क्षणे सः प्रसिद्धः शारदः उडुराजश्चन्द्रस्तत्प्रीतये उदगात् उदितोऽभूत् किं कुर्वन्? दीर्घदर्शनः दीर्घेण कालेन दर्शनं यस्य सः प्रियः स्वप्रियायाः मुखमरुणेन कुङ्कुमेन यथा लिम्पति एवं प्राच्याः ककुभो दिशो मुखं शन्तमैः करैः किरणैः अरुणेनोदयरागेण विलिम्पन् अरुणीकुर्वन् तथा चर्षणीनां शुचस्तापग्लानीर्मृजन्नपनयन् "अर्यम्णो मातृकापत्नी तयोश्चर्षणयः सुताः। यत्रैषा मानुषी जातिर्ब्रह्मणा परिकल्पिता" इति षष्ठस्कन्धात् चर्षणयो मानुषाः बह्वीषु शरद्रात्रीषु रासक्रीडा भगवता कृता ताः रात्रीरिति बहुवचनात् पूर्णोडुराजयोगस्तु पूर्णिमायामन्यासु च यथा सम्भवम्॥ २॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रियः प्रोषित इति दीर्घदर्शनो दीर्घं बहुघस्रव्यवहितत्वाद्दीर्घकालिकमन्यत्राहर्व्यवधानाद्दीर्घदर्शनः प्रियायाः स्वभार्याया अन्यत्र तत्त्वेन वृत्तायाः ककुभो दिशः प्राच्या मुखमाननमन्यत्र यत्रोदयस्तं भागमरुणैः किञ्चिद्रक्तैः पल्लवसमतया करौ। आदरातिशयाद्द्वयोरेव बहुत्वेनोत्प्रेक्षण। करैरङ्गुलिभिरिति वा रज्जुपाशानितिवत्। अन्यत्र किरणैः शन्तमैः सुखकरेषु करेष्वतिशयेन सुखरूपतोक्तिः। सममुभयत्रेदं। तदोडुराजः पुरुषोऽपरत्र चन्द्रश्चर्षणीनां प्रजाश्चर्षणयः स्मृता इत्यृग्भाष्योक्तेः प्रजानामपत्यादिप्रजानामन्यत्र सोमो वै राजा ब्राह्मणानामित्यादेर्ब्राह्मणादीनां शुचः किञ्चिद्गृहकलहहेतुकशोकानन्यत्र तपनतापजनितशोकान्मृजन्प-

रिहरन्समम्। प्रसिद्धो यः प्रियः स इवोदगात्। कस्मादित्यतोऽप्याह। उदगादिति। उच्चोऽगो ह्युदग उदयशैलस्तस्मात्तमारुह्येति वा। दिशस्तु ककुभः काष्ठा इत्यमरः। ककलौल्ये बाहुलकादुभप्रत्ययः। यद्वा कं वातं कुभ्नाति विस्तारयति। स्कुभ् इति सौत्रो धातुः। ततः क्विप् पृषोदरादित्सलोपः। ककुभः स्त्रियां प्रवेणी दिक्शोभास्विति भानुः। दिशादान्तिककुबिति शब्दार्णवः। विलिम्पन्मृजंश्चोद्गच्छति तथोदगादित्यन्वयः॥ २॥

श्रीसुबोधिनी

तदा तस्मिन्नेव काले प्राच्याः ककुभो दिशाया मुखं शंतमैरतिसुखैः करैः किरणैररुणेनोदयरागेण विलिंपन्नरुणीकुर्वन् चर्षणीनां जनानां शुचस्तापग्लानीमृजन् दूरीकुर्वन् स प्रसिद्ध उडुराजश्चंद्र उदगात् उदितोऽभूत् दीर्घेण बहुकालेन दर्शनं यस्य स प्रियः पतिः स्वप्रियाया मुखमरुणेन कुंकुमेनेव॥ २॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

तदोडुराज इत्यस्याभासो नूतने तस्मिन्नित्यारभ्य ससृज इत्यन्तः। अत्रेदं प्रतिभाति। आश्रितत्वोक्त्यात्रेश्वरत्वमर्यादामुल्लंघ्य भगवानधुना प्रवृत्त इति ज्ञायते। अन्यथा रसमर्यादोच्छिद्येत। एवं सति यदवधि सर्वविकाररहित्येन नैवंविधं मनः प्रकटितमिति सपद्येतादृशस्य तस्य नूतनत्वम्। लौकिकीं रीतिमनुसृतवतस्तद्देवतापेक्षापि घटते। लोके देवताधिष्ठितस्यैव कार्यक्षमत्वात्, अन्यथा नियामकाभावेन सामर्थ्याभावेन चाल्पेनैव यथापूर्वमेव भवेत्, न तु रसैकपरवशं सदा। अत एवात्तगजेन्द्रलील इति वक्ष्यति। करिणीस्पर्शमात्रेण परवशत्वं तत्र प्रसिद्धम्। युक्तं चैतद्यद्विभावादिकं विना न रसपोष इति। 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति'रिति वात्स्यायनसूत्रात्। वस्तुतस्तु 'रसो वै स' इत्यादि श्रुतिभ्यो रसरूपत्वात्प्रभोः स यादृशस्तच्छास्त्रसिद्धोऽस्ति तादृशो निरूप्यत इति नानुपपत्तिः काचित्। अत एवैवं भूतस्यैव नित्यत्वमपि। एतद्विद्वन्मण्डने द्रष्टव्यम्। तस्मात्सुष्ठूक्तमनधिष्ठितं चेत्यादि। ननु चन्द्रस्योदयकर्तृत्वं मूले प्रतीयत इति भगवतः सृष्टिकर्तृत्वोक्तिरत्र विरुद्धेति चेत्। न, अनवबोधात्। यदा मनश्चक्रे तदैव य उडुराजोर्थादुत्पादितः स उदगादिति मूलार्थस्य विवक्षितत्वात्। अन्यथा तदेति न वदेत्। सोप्युदगादित्येव वदेत्। किञ्चाग्रिमश्लोकोक्तचन्द्रदर्शनान्यथानुपपत्त्यैव चन्द्रोदयप्राप्ते रेतच्छ्लोकवैयर्थ्योपातः। एवं सति चिकीर्षितलीलाया वेदलोकयोरप्रतीतत्वेनापूर्वत्वात्तत्सामग्र्यप्यपूर्वैव सर्वा सम्पादितेति ज्ञापनाय तदेत्युक्तिपूर्वकं तदुदयवर्णनमिति ज्ञायते। अत एव भगवन्मनश्चन्द्रस्येत्यारभ्य कदाचिदपीत्यन्तो ग्रन्थो युज्यते। अन्यथा मूले पूर्णत्वादिधर्माः कण्ठोक्ता नेत्याचार्या अपि न वदेयुः। अत एव पूर्वश्लोके मनसोपि करणमुक्तं चक्रे इति पदेन। क्रीडायां मनस एव मुख्यत्वात्तस्य नूतनतया करणोक्त्यैव सर्वस्या अपि सामग्र्यास्तथात्वं ज्ञातं भविष्यतीत्यभिप्रायेण। एवं सति तादृशं चन्द्रं च प्रभुः ससृज इति हेतोरग्रे तदुदयमाह। शुक इत्याभासार्थो ज्ञेयः। तथापि क्रमेणैवेति। अन्यथा रजन्येषेति प्रभुर्न वदेदिति भावः। नन्वस्या रात्र्या नित्यत्वेनैकयेव चारितार्थ्ये बह्वीनां तासां परिग्रहः किमर्थ इति चेत्। अत्र वदामः। नायिकाविशेषेषु प्रतिपदादितिथिनियतकर्तव्यताकबन्धादिविशेषैरेव रसः प्रादुर्भवतीति वात्स्यायननयसिद्धत्वात्तदर्थमेवोक्तरूपाणां तासां परिग्रह इति। रात्रीणामलौकिकत्वेन प्राकृतनक्षत्रारक्षत्वेप्येतद्रात्रिप्रकाश्योडूनां चा प्रसिद्धत्वेपि यदुडुपदोपादानं तत्त्वेतद्रात्रिष्वेव प्रकाशमानत्वेन स्वामिनीनां मनांस्येवात्रोडुत्वेनाभिमतानीत्याहुः सोऽपि चन्द्र इत्यादिना। इन्दोर्नक्षत्रसजातीयत्वं 'नक्षत्राणामहं शशी'ति वाक्यात्सिद्धम्। एतन्मनस्तु तत्त्वोक्त्यैतच्चन्द्रसजातीयत्वं सूच्यते। तच्च भगवन्मनः सम्बन्धित्वम्। तत्त्वं चात्र भगवन्मनोंशत्वं स्वमनःप्रवृत्तिनिवृत्तितोषादिकार्यार्थमाविर्भावितत्वं च। प्राच्याः ककुभ इत्यत्र, प्रतिस्पर्धिन्यामिति। प्रतीच्यां दिशीत्यर्थः। उत्तरसन्ध्यायामखिलद्विजोपास्यत्वेनेयमेव दिङ् मुख्येति मर्यादामार्गीयत्वं लक्ष्यते। रविश्च तथा। अतस्तेन तत्र रागसम्भवः। यत्रोक्तरूपेन्दुप्राकट्य सा दिक्पुष्टिमार्गीयेति तस्या एतत्प्रतिस्पर्धिनीत्वम्। एतेन मर्यादामार्गे ताप एव, पुष्टिमार्गप्रवेशे तन्निवृत्तिरिति सूचितम्। प्रातः प्राच्या अपि तथाभूताया एवाधुनैवंभूतात्वकथनात् अधुना प्रभोरेवेन्द्रत्वेन तद्देवताकात्वेनाप्यस्यास्तस्याः सकाशादुत्कर्षः। पुष्टिमार्गोत्कर्षमेव प्रभुः करोति, नान्यत्रास्मादुत्कर्षं सहत इत्येतत्सर्वं हृदि कृत्वा तस्या मुखे न राग इत्याद्युक्तं प्रतिस्पर्धिनात्वमप्युक्तमिति ज्ञेयम्। स चर्षणीनामित्यत्र। इदं ज्ञेयम्। चृष् प्रजननैश्ययोरिति पाठादयं धातुराविर्भावन ईशधात्वर्थ गमने च शक्तः। अथवेशस्य भाव ऐश्यं तत्र तथा प्रकृते तु सर्वात्मभावैकलभ्यरसाधिकारिमात्रसृष्टावेव याः शक्तयोऽधिकृतास्ता भगवदाविर्भावं ज्ञात्वा तादृशीराविर्भाव्य फलसिद्धिं प्रतीक्ष्यन्त्यस्तत्पर्यन्तमन्यभावेभ्यस्ता रक्षन्तीति चर्षणीशब्देनोच्यन्ते। यद्यपि शाब्दिकैरैश्यशब्दस्य गत्यर्थकत्वमेवोक्तं, तथापि गत्योरित्यनुक्त्वा यदैश्ययोरित्युक्तं तत् सोप्यर्थोत्र ज्ञेय इति ज्ञापनायेत्यस्माभि तथोक्तम्। गमनार्थत्वे तु यत्र ता आविर्भावितास्तत्र गत्वा तत्फलसिद्ध्यनुकूलप्रयत्नवत्यो भवन्तीति तथा। तथा च स्वस्वामिनीषु भगवद्भोगयोग्यास्वपि तद्विलम्बं दृष्ट्वैतदार्तिं च चर्षणीनां परमस्नेहवशाच्छोकाजनि। एवं सत्ययमिन्दुः प्रियसंगाभावजदुःखं स्वामिनीनामपनयन्न केवलानां तदपनयति, किन्तु चर्षणीसहितानामिति मूलार्थः सम्पद्यते। स्वामिनीदुःखनिमित्तकस्तासां शोक इत्येतद्दुःखनिवारणेनैव तासामपि स निवर्तत इत्यमुख्यत्वात्सहभावस्तासामुक्तः। एतदिन्दुस्वाभाव्यादेतदुदये संगमनिश्चयेन च तन्निवृत्तिः। इदमेवोक्तं चर्षणीसहितानां जीवानां वेत्यादिना। आद्यपक्षे तु यत्सम्बन्धिनामेव परमानन्दानुभवस्ताः शक्तयः स्वयं तदर्थिन्यो भगवद्भक्ते-

ष्वेतदतिरिक्तेष्वेतावत्कालपर्यन्तं परिभ्रान्ताश्चर्षणीशब्देनोच्यन्ते। मुक्तौ तदभावं ज्ञात्वा तादृशेभ्यः स्वयमेव निवृत्ता भवन्ति। भगवतैव तादृश्य एव ताः सृष्टा इति तेषु न प्रवेश इति ज्ञापनाय न लभन्त इत्युक्तम् अत एवाग्र स्वत एव निवृत्ता भवन्तीत्युक्त, न तु निवर्तिता इति। तथा चैतदुदये तच्छोकनिवृत्तिर्जातेति तथा। अस्मिन्पक्षे पुनश्चन्द्रपरामर्शस्य प्रयोजनाभावादेकस्मिन्वाक्ये वारद्वयं तत्कथनासम्भवात्पूर्वमप्रसिद्धत्वेनास्येन्दोः प्रसिद्ध्यर्थकत्वमपि तच्छब्दस्य न वक्तु शक्यमित्यरुच्याग्रिमः पक्ष उक्त इति ज्ञेयम्।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यदैवं भगवान् रन्तुं मनश्चक्रे तदा तन्मनसः उत्पन्नः स प्रसिद्धः उडुराजश्चन्द्रः सर्वनक्षत्राधिपतिश्चन्द्रः अरुणेन उदयरागेण प्राच्याः ककुभो दिशः मुखं विलिम्पन् तथा शन्तमैः सुखतमैः करैः किरणैः चर्षणीनां स्थावरजङ्गमात्मकप्राणिनां शुचस्तापान् ग्लानीमृंजन् अपनयन् उदगात् उदितो जात इत्यन्वयः। तत्र दृष्टान्तमाह—प्रिय इति। दीर्घकालेन दर्शनं यस्य स प्रोष्यागतः प्रियो भर्ता यथा प्रियाया भार्याया मुखमरुणेन कुङ्कुमेन विलिम्पन्नागच्छति तथेत्यर्थः॥ २॥

अन्वितार्थप्रकाशिका

तदेति॥ यदैव भगवान् रन्तुं मनश्चके तदैव उडुराजश्चन्द्रः दीर्घकालेन दर्शनं यस्य स प्रोष्यागतः। प्रियो भर्ता यथा प्रियाया भार्याया मुखमरुणेन कुङ्कुमेन विलिम्पति तथा अरुणेन उदयरागेण प्राच्याः ककुभो दिशः, इन्द्रसम्बन्धिन्या नायिकायाश्च मुखमारम्भभागमाननं च विलिम्पन् अरुणीकुर्वन् तथा शन्तमैः सुखतमैः करैः किरणैर्हस्तैश्च चर्षणीनाम् "अर्यम्णो मातृकापत्नी तयोश्चर्षणयः सुताः। यत्र वै मानुषी जातिर्ब्रह्मणा परिकल्पिता।" इति षष्ठस्कन्धोक्तेर्मानुषजातीनां शुचस्तापान् ग्लानीमृंजन् अपनयन् भगवत्प्रीतये उदगात् उदितो जातः। अयमर्थः। श्रीकृष्णस्य कुलस्यादिपुरुषो द्विजराजोऽपि परभार्याया रमणं करोति तदा कृष्णस्य यूनो गोपजातेर्गोपस्त्रीरमणे कः खलु दोषः॥ २॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं निशाकरमपि पूर्वदिशासह विहर्त्तुमुद्यतं मन्यमानस्य हरेरभिप्रायं प्रकटयन्नाह तदेति तदा तस्मिन् समये श्रीकृष्णप्रसन्नतायै प्राच्याः पूर्वस्याः ककुभो दिशः मुखमुदयस्थानं शंतमैः अतिशयसुखजनकैः करैः स्वकिरणैः कृतेन अरुणेन उदयरागेण विलिंपन् रक्तं कुर्वन् तथा चर्षणीनां जनानां शुचः शरदर्कजतापदुःखानि मृजन् निवारयन् स लोकप्रसिद्धः उडुराजो नक्षत्राणां राजा चंद्रः, उदगात् उदयं प्राप्तः क इव दीर्घकालेन दर्शनं यस्य सः पतिर्यथा स्वप्रियायाः मुखं करधृतेन अरुणेन कुंकुमेन यथा विलिंपति तस्याः स्वसंबंधिजनानां च विरहजं तापं यथा निवारयति तथा॥ २॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेति॥ तदा तस्मिन्नेव काले, यदा भगवान् रन्तुं मनश्चक्रे तस्मिन्नेव काले इत्यर्थः। दीर्घेण कालेन दर्शनं यस्य सः चिरं प्रोष्यागतः, प्रियः पतिः, प्रियाया निजाङ्गनायाः, मुखं करेण अरुणेन कुङ्कुमेन विलिम्पन्, तस्याः तत्संबन्धिजनानां च, शुचोः मृजन् इव, यथा तथा, दीर्घेण कालेन श्रीकृष्णेच्छया दर्शनं यस्य सः। सः प्रसिद्धोऽपि प्रोष्य चिरेणागत इत्यर्थः। प्रियः सर्वेषामाह्लादकत्वात् प्रेमास्पदीभूतः, उडुराजो नक्षत्रपतिश्चन्द्रः, प्रियायाः स्वाङ्गनाभूतायाः, प्राच्याः ककुभः पूर्वदिग्रूपस्वस्त्रिया इत्यर्थः। मुखं मुखवद्वर्त्तमानं तत्प्रदेशविशेषं, शंतमैः स्पर्शमात्रत एव सुखकारिभिः, करैः पाणिस्थानीयमयूखैः, अरुणेन कुङ्कुमवद्रक्तवर्णोदयरागेणेत्यर्थः। विलिम्पन्नरुणीकुर्वन्, तस्याः तथा चर्षणीनां मनुष्याणामौषधीनां च, शुचः दिनानुभूततापजशोकान्, मृजन्नपनयन्, चेतनाचेतनतापं निराकुर्वन्नित्यर्थः। उदगादुदयं प्राप्तः॥ २॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तदोडुराज इति : १०.२९.२.

मायामुपाश्रित्य यदा करोति सत्संकल्पमीशः स तदैव संसृतिः।
व्यक्ता भवत्यत्र निदर्शनं स्फुटं यच्चित्तजातेन्दुविलासवर्णनम्॥ २३॥
पूर्णाः स्वान्वयधर्मसंस्तवकृते वंशोद्भवान्पूर्वजाः पुत्रादीन् प्रति दर्शयन्ति तदनुष्ठानं विधायादरात्।
तद्युक्तं सुरतोत्सवोत्सुकहृदं दृष्ट्वेशमादर्शयच्चन्द्रस्तादृशसंप्रदायमतनुश्रेयस्करं दीर्घदृक्॥ २४॥

कृष्णप्रिया

राजन् कोई चिरविरही पति प्रिया को मिलते हुए अपनी प्रियतमा के संतप्त मुखकमल को अपने कोमल करकमलों के स्पर्श से प्रमुदित कर देता है वैसे ही उस समय शीतलता देनेवाली अपनी लाल किरणावली से पूर्वदिशा नाम की प्रियतमा के मुखकमल को लेपन करते हुए और लोगोंका तापक्लेश को हटाते हुए आधिदैविक मनश्चन्द्रमा उदित हुए॥ २॥

दृष्ट्वा [1]कुमुद्वन्तमखण्डमण्डलं [2]रमाननाभं नवकुङ्कुमारुणम् ।
वनं च तत्कोमलगोभिरञ्जितं[3] जगौ कलं वामदृशां मनोहरम्[4] ॥ ३ ॥

कर्दमक्षमा

अन्वयः—अखण्डमण्डलम्, रमाननाभम्, नवकुंकुमारुणम्, कुमुद्वन्तम्, दृष्ट्वा, च, तत्कोमलगोभिः, अञ्जितम्, तत्, वनम्, दृष्ट्वा, वामदृशाम्, मनाहरम्, कलम्, जगौ ॥ ३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कुमुत्कुमुदं विकसनीयं विद्यते यस्य तं कुमुद्वंतं न खंडं मंडलं यस्य त रमाया आननस्याभेव आभा यस्य तं नवकुंकुममिवारुणमेवंविध चंद्रं दृष्ट्वा तथा वनं च तस्य कोमलैर्गोभी रश्मिभिरभिरंजितं दृष्ट्वा कलं मधुरं जगौ अगायत। कथम्। वामदृशां वामा मनोहरा दृशो यासां तासां मनोहरं यथा ॥ ३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कुमुदं रात्रिविकाशिकमलम्। विकसनीयम प्रकाशनीयम्। यद्वा–कौ भूमौ मुद् यतः सा प्रभा तद्वन्तम्। तस्य चंद्रस्य। गोभिः किरणैः। "नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु" इति केशवोक्तेः। रंजितम् मंडितम्। कलम् "कलं शुक्ले त्रिष्वजीर्णे नाट्योक्तमधुरध्वनौ" इति मेदिनी। गूढार्थस्तु—वामदृक् ईकारस्तद्युक्तं कलं क्लीमिति बीजम्। अं वासुदेवं मानयति विज्ञापयतीत्यं मनः सांतोऽयं द्वितीयाया अलुगार्षः। तच्छ्रुत्वा वासुदेवो वादयतीति ज्ञायते। पुनः औ अकारौ हरति त्यजतीत्यहरम्। कलमित्यत्र अकारयोस्त्यागपूर्वकमीकारसंगत्या क्लीमिति संपद्यते। तथा च - कामबीज जगौ। वंशपर्वद्वारा विरहकर्षितप्रेमरसार्द्रतद्धृदयक्षेत्रे काममुद्भावयामास वपनेनेवेति तत्त्वम् ॥ ततश्च तद्दर्शनेनोद्भूतकंदर्पविकारः "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति स्मृत्या स्वकुलादिपुरुषस्य तस्य धर्मं स्वस्मिन्नपि पश्यन्निःशंकमेव परस्त्रीरानेतुं कमप्यमोघं यत्नमकरोदित्याह—दृष्ट्वेति। कुमुत् कुमुदम् 'कुमुदेऽपि कुमुत्प्रोक्तम्' इति विश्वः। तत् विकाशनीयत्वेन वर्तते यस्य तम्। कोः पृथिव्या अपि मुत् कर्तव्यत्वेन वर्तते यस्य तमात्मानञ्च दृष्ट्वेत्यपि व्याख्येयम्। विशेष्यविशेषणानुक्तेः। न खंडं मंडलं बिम्बं स्वरूपं यस्य तम् पूर्णमित्यर्थः। रमा लक्ष्मीः तद्भ्रातृत्वात्तदाननाभम्' यद्वा—"सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परा" इति स्मृतेः रमा श्रीराधा, रमन्ते रमयतीति वा रमाः गोप्यश्च, तासामाननस्येवाभा यस्य तमिति। तद्दर्शनेन ताः स्मृतिपथमारूढा इति भावः। पक्षे—रमाणां तासामानने आभा अन्तः कंदर्पविकारद्योतिनी सम्यक् कांतिर्यतस्तमात्मानमुदयरागव्याप्तत्वान्नवकुंकुमपिंडवदरुणम्। पक्षे—नवकुंकुमचर्चयाऽरुणं तथा वनं च तस्य कोमलैर्गोभिः किरणैरंजितं म्रक्षितम् अभिरंजितमिति समासो वा। पक्षे–तैः प्रसिद्धैर्गोभिः स्वांगकांतिभिः स्वपाल्यमानगवाभिर्वाऽभिरंजितम्। अभिरंजितरुचमित्यर्थः। टजभाव आर्षः। इत्युद्दीपनालंबनविभावौ दृष्ट्वा कलं मधुरमगायत। वेणुनेति शेषः। 'कामं गते कलपदामृतवेणुगीते' इत्यग्रिमोक्तेः। कथम्–वामा मनोहरा दृशो यासां तासां युवतीनामेव मनोहरं यथा स्यात्तथा गायन्तम् "स्त्रियः कामयन्ते" इति श्रुतेः। श्लेषेण ककारलकारम्। वामदृशामिति लुप्तविभक्तिकं पदं, वामदृक् चतुर्थः स्वरः तया सह पंचदशं कामबीजं जगाविति रहस्यम्। मनोहरं मनस आकर्षकत्वात्स्वस्वरूपभूतमहामन्मथमंत्रमित्यर्थः। अत्र तोषिणी—ततश्च तं दृष्ट्वा भावविशेषाविर्भावेण वनमागत्य तच्च तद्रश्मिभी रंजितं तत्र यमुनातीरभागमद्यापि 'रसौली' इति प्रसिद्धव्रजस्थापितग्रामचत्वरमागत्य च कर्षणवेणुना किमपि गीतमगायदिति। पूर्ववत्तस्यां रात्रौ प्रकटितवेणुशिक्षाविशेषत्वमप्याह–दृष्ट्वेति। तच्च रमाननाभं रमयंतीति रमास्तासां रमाणां परमरमारूपाणामेव तासां तत्प्रेयसीनां मध्ये परमप्रेयसीनां मध्ये परमप्रेयसी या राधा तत्प्राप्त्यर्थमेव वेणुशिक्षाविशेषं प्रकटयितुम्। नूनमेतावन्तं कालं तासामपि संगमे शिथिलोऽभूत्, तस्या यदाननं तदाभं दृष्ट्वा तत्तया वितर्क्य तेन तत्स्मृत्वा कलं जगावित्यन्वयः। वितर्काद्युपपादनाय साम्येन विशेषणानि–कुमुत् कुमुदं, तथा च विश्वः 'कुमुदेऽपि कुमुत्प्रोक्तम्' इति तद्वंतमिति वा। स्वप्रकाशनाय च कुमुदानि तदानीं विकसितानीति ध्वन्यर्थः। अत्र विशेषणैरेव विशेष्यचन्द्रो लभ्यते। "अयमुदयति मुद्राभंजनः पद्मिनीनाम्" इतिवत्। आननस्य पक्षे–कोः पृथिव्या मुत् कर्तव्यत्वेन विद्यते यस्य तदिति विशेष्यवशाल्लिंगपरिणामेन ज्ञेयम्। परमरमारूपत्वात्तस्याः अखंडमंडलं षोडशकलम्। पक्षे—यथावत्परिमाणसंवलितं मंडलमवयववृंदं यत्र। नवकुंकुमपिंडवदरुणम्। पक्षे—नवकुंकुमरागेणारुणम्। एवं कालस्य रतियोग्यतां प्रदर्श्य स्थानस्यापि दर्शयति—वनञ्चेति। तस्य प्रथमोदयेनाल्पमात्रप्रकाशवद्भिर्गोभिः रंजितम्। दीर्घत्वाभावश्छांदसः। एवं भावोद्दीपनमेव दर्शितम्। कल मधुराव्यक्त ध्वनिं जगौ, वेणुनेति ज्ञेयम्। 'का स्त्र्यंग ते कलपदामृतवेणुगीत—' इत्यादिवक्ष्यमाणत्वात्। तत्र मधुरत्वं मनोहरणाय, अस्फुटत्वं सर्वासामपि तासां स्वस्वनाममयत्वादिभ्रमाय। वामदृशां मनोहरमिति—तादृशभाववतीनामेव मनाहरं यथा स्यात्तथेति। आदिरसमात्रोद्दीपनं रागविशेषं जगावित्यर्थः। वक्ष्यते च—'अनंगवर्द्धनम्' इति। स च नूनं मध्यमादिनामा। यत उक्त मोडररागभेदे–

---

१. मुकुन्दस्त–विज. । २. रामा–विज. । ३. रङ्कितं–वीर. । ४. मनोरमम्–विज. ।

"मध्यमादिर्मग्रहान्तो मध्यमग्रामरागजः । अयं सायं तु गातव्यः शृंगारे ऋषवर्जितः ।।" इति । मेति मध्यमः । ऋषेति ऋषभधैवतौ स्वरौ । "ग्रहः स्वरस इत्युक्तो यो गीतादौ समर्पितः" इति । पूर्वं तु "इति वेणुरवं राजन्सर्वभूतमनोहरम्" इति सामान्यविषयकत्वात्स्वभावानुसारेण तासां मोहनमात्रं जातम्, अधुना तु रसविशेषोद्दीपनत्वादाकर्षणमिति । तत्र तत्र वंश्या अपि वैशिष्ट्यमस्ति । यथोक्तम्—"अर्द्धांगुलांतरोन्मानं तारादिविवराष्टकम् । ततोंगुलांतरे यत्र मुखरंध्र तथांगुलम् ।। शिरो वेदांगुलं पुच्छं त्र्यगुलं सा तु वंशिका । नवरंध्रा स्मृता सप्तदशांगुलमिता बुधैः ।। दशांगुलांतरा स्याच्चेत्सा तारमुखरंध्रयोः । महानंदेति विख्याता तथा संमोहिनीति च ।। भवेत्सूर्यान्तरा सा चेत्तत आकर्षणी मता । आनंदिनी तदा वंशी भवेदिंद्रांतरा यदि ।। गोपानां वल्लभा सेयं वंशुलीति च विश्रुता । क्रमान्मणिमयी हैमी वैणवीति त्रिधा च सा ।।" इति । अतो द्वादशांतरे तारमुखरंध्रा हैमीयं ज्ञेया । एवं गानवैशिष्ट्यमपि ज्ञेयम् । वामदृशामिति—श्लेषेण स्वस्मिन्कुटिलमेव पश्यंतीनां तासां मनोरूपमूलाकृष्ट्या दृष्ट्यादिसर्वेन्द्रियवृन्दमेवाक्रष्टुमिवेत्यर्थः । अत्र श्लेषेण कामवीजं जगाविति रहस्यम् । यतो वामदृक्सम्बन्धि यत् तत्सहितं कलमिति प्रथमाक्षरत्रयं व्यंजितम् । कीदृशम्—मनोहरम् । मनःशब्देन तदधिष्ठाता चंद्र उच्यते, स च तदाकारत्वेन लवकस्तं हरति आकर्षतीति । तत्संवलितमित्यर्थः । नादयुक्तत्वं तु वेणुनादस्वाभाव्यादेवेति भावः । तदुक्तम्—"कला तु माया लवका तु मूर्तिः कलक्वणद्वेणुनिनादरम्यः" इति ।। ३ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च तं दृष्ट्वा भावविशेषाविर्भावेन वनमागत्य तच्च तद्रश्मिभी रञ्जितं दृष्ट्वा तत्र यमुनातीरभागमद्यापि रासौलीति प्रसिद्धं श्रीवज्रस्थापितं ग्रामचत्वरमागत्य चाकर्षणवेणुना किमपि गीतमगायदिति पूर्ववत्तस्यां रात्रौ प्रकटितवेणुशिक्षाविशेषत्वमध्याहृत्य दृष्ट्वेति । तं च रमाननाभं रमयन्तीति रमाणां परमरमारूपाणामेव वा तासां तत्प्रेयसीनां मध्ये परमप्रेयसी या राधा यत्प्राप्त्यर्थमेव वेणुशिक्षाविशेषं प्रकटयितुं नूनमेतावन्तं कालं तासामपि सङ्गमे शिथिलोऽभूत् तस्या यत् आननं तदाभं दृष्ट्वा तत्तया वितर्क्य तेन तत् स्मृत्वा वा स्वप्रकाशनाय कलञ्जगावित्यन्वयः । वितर्कापद्युपादनाय साम्येन विशेषणानि कुमुत् कुमुदं तथा च विश्वः "कुमुदेपि कुमुत्प्रोक्तम्" इति तद्वन्तमिति वा स्वप्रकाशनाय कुमुदानि च तदानीं विकसितानीति ध्वन्यर्थः । अत्र विशेषणैरेव विशेष्यश्चन्द्रो लभ्यते "अयमुदयति मुद्राभञ्जनः पद्मिनीनाम्" इति वत् आननस्य पक्षे कोः पृथिव्या मुत्कर्त्तव्यत्वेन विद्यते यस्य तदिति विशेष्यवशाल्लिङ्गविपरिणामेन ज्ञेयम् । परमरमारूपत्वात्तस्याः, अखण्डमण्डलं षोडशकलं पक्षे यथावत् परिमाणसम्बलितं मण्डलमवयववृन्दं यत्र नवकुङ्कुमपिण्डवदरुणं पक्षे नवकुङ्कुमरागेणारुणम्, एवं कालस्य रतियोग्यतां प्रदर्श्य स्थानस्यापि दर्शयति वनं चेति । तस्य प्रथमोदयेनाल्पमात्रप्रकाशवद्भिर्गोभिः, अभितो रञ्जितम्, यद्वा, भावे निष्ठा तैरभिरञ्जितम् अर्थात् कृष्णस्याभिरञ्जना यत्र तत् दीर्घत्वाभावः छान्दसः एवं भावोद्दीपनमेव दर्शितं कलं मधुरमस्फुटं च यथा स्यात्तथा जगौ वेणुनेति ज्ञेयम् । "का स्त्र्यङ्ग ते कलपदामृतवेणुगीते" त्यादिवक्ष्यमाणात् तत्र मधुरत्वं मनोहरणाय अस्फुटत्वं सर्वासामपि तासां स्वस्वनाममयत्वादिभ्रमाय अन्येषां वेणुवाद्यमिदमिति विशेषानवधारणाय च । ननु, मधुरत्वेन कथं सर्वेषामेवाकर्षणं नाभूत् ? तत्राह—वामदृशां तादृशभाववतीनामेव मनोहरं यथा स्यात्तथेति आदिरसमात्रोद्दीपनं रागविशेषं जगावित्यर्थः । वक्ष्यते च अगङ्गवर्द्धनमिति स च नूनं मध्यमादिनामा यत उक्ते मौडवरागभेदे—

"मध्यमादिर्मग्रहान्तो मध्यमग्रामरागजः । अयं सायं तु गातव्यः श्रृङ्गारे ऋधवर्जितः" ।। इति

मेति मध्ययः ऋधेति ऋषभधैवतौ स्वरौ "ग्रहः स्वरस इत्युक्तो यो गीतादौ समर्पितः" इति पूर्वं तु "इति वेणुरवं राजन् ! सर्वभूतमनोहरम्" इति सामान्यविषयकत्वात् स्वभावानुसारेण तासः मोहनमात्र जातम् अधुना तु रसविशेषोद्दीपनत्वादाकर्षणमिति तत्र तत्र वंश्या अपि वैशिष्ट्यमस्ति यथोक्तम् —

"अर्द्धाङ्गुलान्तरोन्मानं तारादिविवराष्टम् । ततोङ्गुलान्तरे यत्र मुखरन्ध्रं तथाङ्गुलम् ।।
शिरो वेदाङ्गुलं पुच्छं त्र्यङ्गुलं सा तु वंशिका । नवरन्ध्रा स्मृता सप्तदशाङ्गुलमिता बुधैः ।।
दशाङ्गुलान्तरास्याच्चेत् सातारमुखरन्ध्रयोः । महानन्देति विख्याता तथा सम्मोहनीति च ।।
भवेत्सूर्य्यान्तरा सा चेत् तत आकर्षणी मता । आनन्दिनी तदा वंशी भवेदिन्द्रान्तरा यदि ।।
गोपानां वल्लभा सेयं वंशुलीति च विश्रुता । क्रमात् मणिमयी हैमी वैणवीति त्रिधा च सा" ।। इति

अतो द्वादशाङ्गुलान्तरे तारमुखरन्ध्रा हैमीयं ज्ञेया एवं गानवैशिष्ट्यमपि ज्ञेयं वामदृशामिति श्लेषेण स्वस्मिन् कुटिलमेव पश्यन्तीनां तासां मनोरूपमूलाकृष्टया दृष्ट्यादिसर्वेन्द्रियवृन्दमेवाकृष्टमिवेत्यर्थः । अत्र श्लेषेण कामबीजं जगाविति रहस्यं यतो वामदृक्सम्बन्धि यत् तत्सहितं कलमिति प्रथमाक्षरत्रयं व्यञ्जितं कीदृशं मनोहरं मनः शब्देन तदधिष्ठता चन्द्र उच्यते स च तदाकारत्वेन लवकः तं हरति आकर्षतीति तत्सम्वलितमित्यर्थः । नादयुक्तत्वं तु वेणुनादस्वाभाव्यादेवेति भावः । तदुक्तं "कला तु माया लवका तु मूर्तिः कलक्वणद्वेणुनिनादरम्यः" इति ।। ३ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्च भावविशेषाविर्भावेन श्रीगोपीनामाकर्षणार्थं मोहनमन्त्रमिव वेणुना किञ्चिद्गीतमगायदित्याह—दृष्ट्वेति । कुमुत् कुमुदम्, तथा च विश्वः—'कुमुदेऽपि कुमुत् प्रोक्तम्' इति तद्वन्तमिति, कुमुदानि च तदानीं विकसितानीत्यर्थः, अत एव वक्ष्यते श्रीगोपीभिः (भा० १०।४७।४३) 'वृन्दावने कुमुदकुन्दशशांकरम्ये' इति, यद्वा, कुः पृथ्वी तस्या मुत् हर्षः, तद्वन्तमिति तदुदयेन सर्वेषामेवानन्दोऽभूदित्यर्थः । तत्र हेतवः—अखण्डेत्यादीनि, अखण्डमण्डलत्वाद्रमाननाभमिति; लक्ष्मीमुखस्मारणेन रिरंसा विभावितेति ज्ञेयम् । ननु रमाननं सदा सत्कुंकुमाक्तं चन्द्रस्तु शुक्ल एव, तत् कथं तत्सादृश्यम् ? तत्राह—नवेति । एतच्च प्रथमोदयमात्रविवक्षया, नवकुंकुमस्य भावोद्दीपनत्वेनैव प्रयोगः, एवं कालस्य इतियोग्यतां प्रदर्श्य स्थानस्यापि दर्शयति—वनं चेति तस्य चन्द्रस्य कोमलैः प्रथमोदयेनाल्पमात्रप्रकाशवद्भिर्गोभिरभितो रञ्जितं रक्तीकृतमनुरागविषयीकृतं वा । यद्वा, गोभिरिति तृतीयान्तं पदम्, अञ्जितं म्रक्षितम्, अत्रापि स एवार्थः, एवं भावोद्दीपनमेव दर्शितम्, कलं मधुरं किञ्चिद्गीतम्, यद्वा, कलं यथा स्यात्तथा जगौ वेणुनेति ज्ञेयम्, (भा० १०।२९।४०) 'का स्त्र्यंग ते कलपदामृतवेणुगीत—' इत्यादिवक्ष्यमाणत्वात् । वामा मनोहरा दृशो नेत्राणि यासां परमसुन्दरीणामित्यर्थः, यद्वा, वामा कुटिला दृक् दृष्टिर्यासां परमविदग्धानामित्यर्थः । एतच्च स्वरूपनिरूपणमात्रम्, व्रजस्त्रीणां सर्वासामेव स्वभावतस्तादृशत्वात् मनो हरति आकर्षति संकेतविशेषेण रागतालादिविशेषेण वा मनोहरं तद् यथा स्यात् इति दिनान्तरापेक्षया तदानीं गानविशेषोऽभिप्रेतः, दिनान्तरेषु वेणुगीतेन तादृशत्वावृत्तेः ॥ ३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कुमुद्वन्तं चन्द्रं गोशब्दः किरणपरः ॥ ३–९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दृष्ट्वेति । कुमत्कुमदं विकसनीयं विद्यते यस्य तम् । यद्वा, कोः पृथिव्याः मुदस्यास्तीति तं भूमेरानन्दकरं चन्द्रं तस्य कुमुद्वतः कोमलैर्गोभिः किरणैरङ्कितं रमणीयं वनं च दृष्ट्वा वामदृशां कामिनीनां मनोहरं मधुरं च यथा भवति तथा भगवानिति शेषः । जगौ वेणुमवादयदित्यर्थः । कुमुद्वन्तं कथम्भूतम् अखण्डं सम्पूर्णं मण्डलं यस्य तं नवकुङ्कुममिवारुणमतः कुङ्कुमारुणकान्तामुखसदृशम् ॥ ३ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मुकुन्दः अखण्डमण्डलं पूर्णमण्डलं रामस्य बलभद्रस्याननमिव शोभमानं रामाणामाननमिव रमणीयं कुङ्कुमपुष्पवदरुणं तमुडुराजं दृष्ट्वा तस्य चन्द्रस्य कोमलगोभिः मृदुतररश्मिभिः रञ्जितं मण्डितं वामदृशां स्त्रीणां मनोरमं मनोहरं वनं सेवायोग्यस्थलं च दृष्ट्वा कलमव्यक्तमधुरस्वरं जगावित्यन्वयः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

महालक्ष्मीरूपत्वेन वा रमा अत्र श्रीराधा "इति वेणुरवं राजन् सर्वभूतमनोहरम्" इति पूर्वोक्तात् वैशिष्ट्यमाह—वामदृशां मनोहरमिति । आदिरसोद्दीपनगानविशेषादिति भावः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

भगवानपि तमुदितं दृष्ट्वा विहारार्थं क्षणमपि विलम्बं नाकरोदित्याह—दृष्ट्वेत्यादि । कुमुद्वन्तं प्रकाश्येन कुमुदं वर्तते अस्येति कुमुद्वान् नडादित्वादतो लोपः, चन्द्रस्तं दृष्ट्वा कलं जगौ गीतवान् वेणुनेति शेषः;—'चुकूज वेणुम्' इत्युक्तेः । किं जगौ ? इत्यत्राह—वामदृशां मनोहरं यत्तदेवेत्यर्थः । वामदृशामित्यस्यायमर्थः—यज्जगौ तद्वामदृश एव शुश्रुवुः, न तु पूर्वपूर्वोक्तवत् सर्वभूतमनोहरमिति । तथा सति सर्व एवाश्रौष्यन्; तन्न चेद्वामदृश एवाजग्मुर्न तु सखायः, सखीनान्तु मते पित्रोर्गृह एव वर्तते; पित्रोरपि तथैव पूर्वपूर्वदिनवत् यथास्थानं यथाकालं शयनादि–क्रियां कुर्वन्नेवास्ते, दृश्यते च ताभ्याम् । तथैदृश्येव तस्य योगशक्तिरचिन्त्या, अनयैव दिशा वृन्दावनस्थो नित्य इति यन्मतं तदपि साधयितव्यम् । कुमुद्वन्तम्; कीदृशम् ? अखण्डमण्डलं पूर्णम्; पुनः कीदृशम् ? रमाननाभं रमां विहाय गोपीभिः सह क्रीडायां तस्याः सदैव कोपेनारुणमाननं तत्समानम् । तदेव प्रकटयति—नवकुङ्कुमारुणम्; न केवलं तं दृष्ट्वा; वनं च कीदृशम् ? तत्कोमलगोभिरञ्जितं तस्य कोमलैर्गोभिः किरणैरञ्जितं म्रक्षितम्; अभिरञ्जितमिति समस्तं वा पदम्; अत एव नवकुङ्कुमारुणमिति वनस्य च विशेषणमवगन्तव्यम् ॥ ३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

वनञ्चेत्यादि । तत् कोमलगोभिरञ्जितं म्रक्षितं तत् कोमलगोभिराञ्जितमिति समस्तं वा पदम् । जगौ कलमिति गानमतो मुरली—करणकमिति ज्ञेयम्;—(भा० १०।२१।२) "चुकूज वेणुम्" इति पूर्वपूर्वोक्तत्वात् । कलमित्यस्यायं भावः—ध्वनौ तु मधुरास्फुटे कलः, अस्फुटत्वे सति सर्वासामेव मन्नाम्ना गीतमिति प्रतीतिरभूत् ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च तद्दर्शनेनोद्भूतकन्दर्पविकारो "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति स्मृत्वा स्वकुलादिपुरुषस्य तस्य धर्मं स्वस्मिन्नपि पश्यन्निःशङ्कमेव परस्त्रीरानेतुं कमप्यमोघं यत्नमकरोदित्याह—दृष्ट्वेति। कुमुत् कुमुदं "कुमुदेपि कुमुत् प्रोक्तम्" इति विश्वः। तद्विकासनीयत्वेन वर्त्तते यस्य तं कोः पृथिव्या अपि मुत् कर्तव्यत्वेन च वर्तते यस्य तमात्मानं च दृष्ट्वेत्यपि व्याख्येयं विशेष्यविशेषणानुक्तेः, अखण्डं मण्डलं बिम्बं स्वरूपं यस्य तं पूर्णमित्यर्थः, रमा लक्ष्मीः तद्भ्रातृत्वात्तदाननाभम्। यद्वा, "सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परा" इति स्मृतेः रमा श्रीराधा रमन्ते रमयन्तीति वा रमा गोप्यश्च तासामाननस्येवाभा यस्य तमिति तद्दर्शनेन तास्स्मृतिपथमारूढा इति भावः। पक्षे रमाणां तासाम् आनने आभा अन्तःकन्दर्पविकारद्योतिनी सम्म्यक् कान्तिर्यतस्तमात्मानम् उदयरागव्याप्तत्वात् नवकुङ्कुमपिण्डवदरुणं पक्षे नवकुङ्कुमचर्च्चयाः–अरुणं तथा वनं च तस्य कोमलैर्गोभिः किरणैः रञ्जितं म्रक्षितम् अभिरञ्जितमिति समासो वा पक्षे तैः प्रसिद्धैर्गोभिः स्वाङ्गकान्तिभिः स्वपाल्यमानगवीभिर्वा अभिरञ्जितम् अभिरञ्जितचरमित्यर्थः। टजभाव आर्षः इत्युद्दीपनालम्बनविभावौ दृष्ट्वा कलं मधुरमगायत वेणुनेति शेषः। "का स्त्र्यङ्ग ते ! कलपदामृतवेणुगीते"त्यग्रिमोक्तेः, कथं वामा मनोहरा दृशो यासां तासां युवतीनामेव मनोहरं यथा स्यात्तथा "गायन्तं स्त्रियः कामयन्ते" इति श्रुतेः। श्लेषेण कलं ककारलकारं वामदृशामिति लुप्तविभक्तिकं पदं वामदृक् चतुर्थः स्वरः तया सह पञ्चदशस्वरं कामबीजं जगाविति रहस्यं मनोहरं मनसः, आकर्षकत्वात् स्वस्वरूपभूतमहामन्मथमन्त्रमित्यर्थः ॥ ३ ॥

श्रीरसिकाल्हादिनी टीका

एवमुद्दीपनविभावस्योदयमुक्त्वा विलासाधिकरणस्यापि श्रैष्ठ्यमाह उद्दीपनविभावं दृष्ट्वा शब्दात्मिकालीलां प्रादुश्चकार दृष्ट्वेति कुमुद्वन्तं चन्द्रं दृष्ट्वा कलं यथा स्यात् तथा जगौ वेणुं वादितवानिति। आकाशस्थितोऽपि कौ पृथिव्यामुत्–आनन्दो विद्यते यस्य सः कुमुद्वान् पृथिव्यामिति पृथिवीस्थजनेष्वानन्ददातृत्वं सूचितमिति। यद्वा कुमुत् कुमुदं विकसितं यस्मिन् अन्योपलक्षणं रात्री-विकाशिनि अन्यान्यपि पुष्पाणि विकसितानीत्यर्थः। श्रीकृष्णमनसि रसपूर्णे अखण्डने सति चन्द्रस्याऽप्यखण्डत्वं जातं तत्कार्यत्वादित्याह—न खण्डं मण्डलं यस्य अनेन सर्वजने पूर्णानन्ददातृत्वं सूचितं, पुनः किं भूतं रमाया आननस्येवाभा यस्य लक्ष्मीसहोदरत्वात् अत एव चन्द्रदर्शने रमामुखस्मरणहास्यभावोद्दीपकत्वं व्यञ्जितम्। मुनीन्द्रोऽपि मत्यभिज्ञया सादृश्यं वदतीति। यद्वा रमयतीति रमा या काचिद्व्रजदेवी तदाननतुल्यं, पुनः कथं भूतं नवकुङ्कुमारुणम् अस्य दर्शनेनैतत्सूचितं रमाननं विवाहसमये नवकुङ्कुमेन रञ्जितम् अत एवारुणं चन्द्रस्योदयारुण्यं नरस्याननस्याऽप्यारुण्यमनुमीयते उद्दीपके पुनः कुङ्कुमस्यापि गणितत्वात् वनमपि मधुररसोद्दीपकं दृष्ट्वा तच्च तस्य चन्द्रस्य कोमलैः सुखस्पर्शैन नवानुरागसंवलितैर्गोभिः किरणैः, अभि निशङ्कं यथा स्यात् तथा रञ्जितं यद्यपि पत्राणां हरितत्वं पुष्पाणां श्वेतत्वं तथापि किरणैरुद्धयारुण्येनारुणीकृतमिति पोषकत्वमुक्तम्, यद्वा तस्य कोमलैः सुखस्पर्शैं उदयरागपिञ्जीरितैर्गोभिः, अञ्जितं कान्तिविशेषं शयितं "अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु" इति धातुः, न केवलं वनमेव रञ्जितं किन्तु श्रीकृष्णमनोऽपि रञ्जितं यतः कोमलमव्यक्तं मधुरं जगौ वेणुं वादितवान्। अयं भावः–कृष्णस्याऽपि मनः कृष्णमेव तेन चन्द्रमसा स्वस्योदयरागेण रक्तं कृतमितीदमेव चित्रम्। यद्वा कं सुखं लाति गृह्णातीति कलं सुखं पूर्णमित्यर्थः, तच्च गानं कीदृशं वामदृशां मनोहरं वामा मनोहरा दृशो यासां तासाम्, यद्वा वामा वक्रा दृशोरपाङ्गा यासाम्, यद्वा वामा शोभना दृशो दर्शनानि ज्ञानानीति यावत् यासाम्, मुनीनामपि मनोहरं मोहकम् इत्यर्थः। अयमभिप्रायः–व्रजे द्वादश रसाधिकारिणो वर्तन्ते तथापि मधुररसाधिकृतानां निरोधो वर्णितः तदर्वाधिकृतानां सुखविशेषानुभवे तन्निरोधो वर्णितः तत्रैव स्थिता यतो वेणुध्वनिमार्गेणागता ॥ ३ ॥

विशुद्धरसदीपिका

ततश्च तद्दर्शनेन प्राणप्रियाया रासक्रीडाभिलाषामध्यवस्यन् प्रोत्साहितमनारतम् सखीजनानाकारयितुमन्यासां साधकचरीणां च भावमवधारयितुं यत्कृतवांस्तदाह—दृष्ट्वेति। अत्र भगवान् इत्यध्याहार्थं कलं जगौ "ध्वनौ तु मधुरास्फुटे कलः" इत्यमरः। तत्र मधुरत्व सर्वासां मनोहरणाय अस्फुटत्वं चाऽनवधारणेन स्वस्वनामभ्रमाय तच्च गानं वंश्यैव योगमायामित्युक्तेः ततस्तस्या अपि वैशिष्ट्यं ज्ञेयम् तदुक्तम्—

अर्द्धांगुलान्तरोन्मानं तारादिविवराष्टकम्। ततोङ्गुलान्तरे यस्या मुखरन्ध्रं तथाङ्गुलम् ॥
शिरो वेदाङ्गुलं पुच्छं त्र्यङ्गुलं सा तु वंशिका। नवरन्ध्रा स्मृता सप्तदशाङ्गुलमिता बुधैः ॥ १ ॥

दशाङ्गुलान्तरा सा चेत् स्यात्तारमुखरन्ध्रयोः। महानन्देति विख्याता तथा संमोहनीति च ॥
भवेत्सूर्य्यान्तरा सा चेत्तत आकर्षणा मता। आनन्दिनी स्मृता वशी भवेदिन्द्रान्तरा यदि ॥
गोपीनां वल्लभा सेयं वंशलीति प्रकीर्तिता। क्रमान्मणिमयी हैमी वैणवीचेत्यसौ त्रिधा ॥

ततो हैमीयमाकर्षणी संमोहिनी च ज्ञेया गानेपि वैशिष्ट्यं तदुक्तं मौडवरागभेदे "मध्यमादिर्मग्रहान्तो मध्यमग्रामराजकः अयं सायं तु गातव्यः शृङ्गारे ऋधवर्जितः" स च नूनं मध्यमः तत्रापि "धन्या श्रीश्च तथा गौरी राधिकाया रतिप्रदा" इति गणोद्देशोक्तस्ते एव गीते इति गम्यते कीदृशं कलं वामदृशां मनोहरम् "वामौ वल्गुप्रतीपौ च" इत्यमरः। वामे सुन्दरे दृशौ यासामिति किशोरीणामित्यर्थः। न तु पूर्ववत् सर्वभूतमनोहमिति भेदः। वस्तुतस्तु वामे थीकृष्णस्य वामपार्श्वे स्थितायां श्रीराधायमेव दृग्ज्ञानं परिचयो यासामिति तत्सहचरीणामित्यर्थः। "दृग्ज्ञाने ज्ञातरि त्रिषु" इत्यमरः। श्लेषेण च कलमित्यादिना वाक्येन गुप्तबीजमेवोद्धृतमिति ज्ञेयम् तथाहि कलं ककारं लकारं च वामदृक् ईकारः मन अनुस्वारः हरमर्द्धमात्रात्मकमिति ततश्च श्रीराधिकायाः स्वस्य महामन्त्रादिबीजमुभयोरेकीभावसूचकं जगावित्यर्थः। अत एव तासां तासां च मनोहरमिति किं कृत्वा कुमुद्वन्तं दृष्ट्वा "कुमुदेऽपि कुमुत् प्रोक्तम्" इति विश्वः। कुमुदो हि रात्रिविकासिकमलिनीजातयः ता विकसनीया यस्य सः कुमुद्वन्तम् आननपक्षे कौ पृथिव्या मुत्कर्त्तव्यत्वेन विद्यते यस्य तमिति परमरमारूपत्वात् तस्याः सखीनां कुमुदिनां तदेकविकसनीयत्वेनानन्यनिष्ठत्वं च सूचितं कीदृशम्? अखण्डमण्डलं षोडशकलं ततश्च पूर्णत्वं पक्षे यथावत् परिमाणसम्बलितं मण्डलम् अवयववृन्दं यत्र तत् पुनः कीदृशं रमाननाभं रमात्र श्रीराधा तस्या आननस्याभा इव आभा यस्येति प्रतीपेन तस्याः रासोत्साहप्रतीतिः नवकुङ्कुमारुणं नवकुङ्कुमपिण्डवदरुणं नवकुङ्कुमरागेण प्राक्सूचितेनारुणं तद्वदारुणमिति सहजसौन्दर्य्यं तथा वनं च दृष्ट्वा कीदृशं तस्य कोमलैः गोभिः किरणैः, अञ्जितं म्रक्षितमिति वनशब्देन तरुलतासमुदायस्तेन च सहचरीसमुदायो लक्ष्यते तदेतत्सूचितं श्रीगोविन्दलीलामृते—

"साहचर्य्यञ्च दास्यञ्च राधेशालोकमोदतः। स्तब्धाः कण्टकितामूर्तिभेदैर्गुल्मतया स्थिताः" ॥

इत्यादिना। तथा चैवं ज्ञायते सोयं मुख्यतमः श्रीभगवत्प्रकाशो नित्यदाऽप्रकाशं विहरत्यस्मिन् विपिनवरप्रदेशे व्रजगतश्च प्रकाशः प्रकटलीलायां साधकानुग्रहाय तेनैकीभूय तत् परिकरैश्च प्रकटलीलागतान् परिकरानेकीकृत्य क्रीडति तत्र च लीलाशक्तिरेव तस्मिन् तेषु तेषु परिकरेषु च प्रेमवैवश्यादिद्वारा तत्र तत्र प्रकाशे पृथगभिमानं परस्परमननुसन्धानं च सम्पादयति यतश्च नित्यसिद्धमपि निजवैभवादिकं स च ते च नानुसन्दधुरिति स्थिते प्रकाशान्तरेण "सायं गतो यामयमेन माधवः" इत्यादिषूक्तम् श्रीव्रजेश्वरीलालनादिसुखमनुभवति भवति च प्रकाशान्तरेण राजरसाविष्ट इति सर्वमनवद्यम् अन्यथा चन्द्रशालिकायां सुखसुप्तं परितो गुप्तं स्वात्मजमात्मनैवानिशं प्रतिशमुत्थायोत्थायानिशं भालयन्त्याःश्रीव्रजेश्वर्य्या आभीलं दुर्ल्लङ्घ्यमलं स्यादिति सूक्ष्मदृशावधेयं तदेवं नित्यसिद्धाभिः संभूय पुलिनं गता इत्यादिकमुज्ज्वलोक्तमपि ससङ्गतिः स्यादिति दिक् ॥ ३ ॥

श्रीरामनारायणकृता भावभावविभाविका

ततः किं वृत्तमित्यत आह—दृष्ट्वेति। स भगवानित्यनुषज्जते स भगवान् रमणप्रवृत्तस्वमनोनुसारेणोद्गतं भक्तानां भजनानन्दगोपीनां शृङ्गाररसं वसन्तं चन्द्रं प्रियामुखं गोपीसमूहं वनं च दृष्ट्वा कलं जगावित्यन्वयः। तत्र भजनानन्दपक्षे कौ पृथिव्यां तद्गतसर्वजनेषु मुद्यस्याः कुत्सितेष्वप्यन्यत्र स्वोद्धारमपश्यत्सु वा मुद्यस्या तादृग्भक्तिप्रभावन्तम् अन्यधर्माणामिव विघ्नैर्न खण्डं मण्डलं यस्य रामा मनोरमा भक्तानामाननेषु आभा उत्कृष्टा दीप्तिर्यस्य न वा सर्वतो विलक्षणा कुः भूमिरवस्था यस्य कुत्सितेष्वपि मा प्रमा अरुणमनुरागं च यस्मात् तादृशं वनं स्वीयं वृन्दावनं च तद्भजनानन्दसम्बन्धिन्यो याः कोमलाः कठोरताशून्या गावो वाचस्ताभिरञ्जितं दृष्ट्वा शृङ्गाररसपक्षे तु कौ भूमौ या मुत्तद्वन्तं कुमुदादिकुसुमरचनावन्तं वा न प्राकृतजनशृङ्गारवन्नखण्डं मण्डलं यस्य रमाणामाननेषु आभा कान्तिर्यस्मात्। यद्वा, रमाननसम्बन्धेनैवाभा कान्तिर्यस्य तदाननेष्वेवा समन्ताद्भातीति वा नवकुङ्कुमादिना अरुणत्वं यस्मिन्नवकुङ्कुमवदरुणोऽनुरागो वा मुखरागो वा यस्मात् तादृशं वनं च तच्छृङ्गाररसान्वितगोभिर्वचोभीरञ्जितं दृष्ट्वा वसन्तपक्षेपि तथैव कुमुद्विकासो यस्मिन्सकलवनगतपुष्पलतादिविकासेन न खण्डं मण्डलं यस्य कामोद्दीपनतया वा न खण्डं भवति कामिनीनां मण्डलं यस्मिन् रमाननानामिव विकसितसुमनसामाभा यस्मिन् नवा विलक्षणवर्णा कुः पृथिवी यस्मिन् कोः पृथिव्याः शोणपुष्पादीनामाभा शोभारुणा यस्मिन् तादृशं वनं च तत्सम्बन्धिनीभिः कोमलाभिः कोकिलादिगोभिरञ्जितं दृष्ट्वा चन्द्रपक्षे तु कुमुच्चन्द्रिका तद्वन्तं कुमुदो विकसनीया वर्त्तन्ते यस्येति वा नित्यपूर्णतया न खण्डं मण्डलं यस्य रमाया आननमिवाभा यस्य तद्भ्रातृत्वात् नवकुङ्कुमवदरुणमुदयरागो यस्य तादृशं तत्र चन्द्रिकाया रमास्मितसाम्यं कुमुद्विकासस्य रमाननेन कृष्णदृग्विकाससाम्यम् अखण्डमण्डलत्वेन मुखवर्तुलत्वसाम्ये आभाया आह्लादकत्वसाम्यं शृङ्गाराङ्गरागेणोदयरागसाम्यं वनं च तत्कोमलाभिः सुस्पर्शाभिः गोभिः किरणैः रञ्जितं दृष्ट्वा कलं जगौ तथा च वनस्य चन्द्रभाभिरञ्जितत्वकथनेन तमोरजोवर्णा यत्रपुष्पसमुदायस्य सितप्रकाशाह्लादात्मकसत्वाभा चन्द्रप्रभाभिभवद्योतनेन सत्वेन रजस्तमाभिभवे भगवद्रमणे योग्यता दर्शिता तथा चन्द्रेण स्ववंशप्रभवकृष्णदर्शनजाताह्लादेनामृतरसात्मकसितप्रभया विश्वमभिव्याप्य स्ववंशोत्सवे स्वपितुः क्षीरनिधेरतिवृद्धिः कृता तत्र च व्यापकपयःपयोधौ वृन्दावनं श्वेततद्भाभिरञ्जितं श्वेतद्वीपो बहुबाहवो द्रुमा एव पार्षदा हरिरेव हरिः राधैव रमा तत्सख्य एव सख्य इति तदाह्वानाय कलं जगौ इति ध्वनिः। प्रियामुखपक्षे तु कुत्सितेष्वपि मुत् मोदोऽनुग्रहो यस्य तथा अखण्डं वर्तुलं मण्डलं यस्य अखण्डं कृष्णं मण्डयति लात्यनुगृह्णातीति वा तथा रमाणां गोपीनामाननेषु आभा यस्य रमाननेषु आ समन्तादंशप्रवेशेन भातीति वा तथा नवकुङ्कुमेन कृष्णार्पितेनारुणं तादृशं भावनाय दृष्ट्वा वनं च तत् स्वप्रियधामतया तत्कोमलाभिः प्रशंसिकाभिर्गोभिरञ्जितं दृष्ट्वा

गोपीसमूहपक्षे तु कृष्णतत्प्रियामुखचन्द्रस्मितप्रभाविकसनशीलकुमुदाकारनेत्रवन्तं तथा नित्यनिरतिशयप्रीतिमत्तया नयगामित्वेन न खण्डं रासमण्डलं येन तं तथा रमाया अंशावेशात् आननेषु आभा यस्य अत एव रमा कृष्णरमणार्हा आननाभा यस्य तं बहिः शृङ्गारधृतेन नवेन कुङ्कुमेनारुणं मनसि च नवकुङ्कुमसदृशेनानुरागेणारुणं दृष्ट्वा तथा वनं च समस्तवृन्दावनं यत्र तत्र तत्कामलाभिर्विरहखेदेन रमणाभिलाषेण च विनयरूपाभिगुणगानरूपाभिश्च गोभिरञ्जितं दृष्ट्वा कलं जगौ मधुरास्फुटे कलः, इति कोशोक्तेः, मधुरं रसमयं परमाह्लादकम् एकमपि गानगतं रवं स्वस्वनाम्नाह्वानतया भासमानत्त्वादस्फुटं च तथा समस्तव्रजव्याप्तमपि रासानधिकारिणां श्रवणगोचरत्वेनास्फुटं केन सुखेन लाति अनुगृह्णातीति वा कलं केन सुखातिशयेन लीयते चित्तमस्मिन्निति वा कलं पुनः कीदृशं वामदृशां मनोहरं वामे दृशौ यासां स्वविलासाहृतया तासां मनोहरं वामे सुन्दरे कृष्णे वा संलग्ने दृशौ यासां वामे कुलमर्यादादिभ्यो विपरीते वा दृशौ यासां तासां प्रेमातिशयवत्वेन वा मनोहरं वामे स्ववामभागे पतिभावनया दृशौ यासां तासां "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति स्वप्रतिज्ञातभावनापूरकत्वेन वा मनोहरं, यद्वा, जगौ इत्युक्त्वा तज्ज्ञानविषयकामबीजोद्धारमेवाह—कलं वामदृशां मनोहरमिति। कलमिति ककारं लकारं च वामदृक् ईकारः मन अनुस्वारः हरमर्द्धमात्रात्मकमिति यद्वा, कलमित्यत्रैव ककारलकारानुस्वारसङ्ग्रहः वामदृक् ईकारः ककारलकारयोरुच्चारणार्थाभिहिताकारापवादेन तत्र ईकारसम्बन्धविधानार्था षष्ठीबहुवचनं चात्राविवक्षितं मनोहरमिति पदं पृथगेव अर्द्धमात्राया अनुच्चार्यत्वेनानभिधानं गानं चात्र वश्यैव योगमायामुपाश्रित इत्यत्रोक्तत्वात् तथा च यथा लोके वंशपर्वच्छिद्रद्वारा क्षेत्रे उप्तं बीजं बहुप्ररोहति तथा विरहकर्शिते घनश्यामप्रेमरसार्द्रे तासां हृदयक्षेत्रे वंशपर्वात्मकमुरलिकाद्वारा उप्तं कामबीजं शीघ्रमेव बहुफलिष्यतीत्यवधार्य वश्या कलं जगौ इति ध्वनिः तदेव चाग्रे वदयति अनङ्गवर्द्धनमिति यद्वा, रात्रीः शरदोत्फुल्लमल्लिका वीक्ष्य रन्तुं मनश्चक्रे रमाननाभ कुमुद्वन्तमखण्डमण्डलं दृष्ट्वा कलं जगौ इत्यस्यायमभिप्रायः—निशां राधाकारां दृष्ट्वोद्दीपितमनोजो रन्तुं मनश्चक्रे कलं च जगौ तत्र चन्द्रं रमा राधा तदाननाभं चन्द्रगतश्यामाङ्कं मृगमदबिन्दु चन्द्रिकां स्मितम् अरुणं तदीयसीमन्तसिन्दूरं नीलाम्बरं तन्नीलाम्बरं भगणस्तद्भूषणानि इति विभागः ॥ ३ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तथा विज्ञापयन्तं चन्द्रमवलोक्य यत्कृतवांस्तदाह—दृष्ट्वेति, "कुमुदेपि कुमुत्प्रोक्तः" इति विश्वात्। कुमुदं विकासनीयं तेन विद्यतेऽस्येति तथा यथास्वभक्ताः कुमोदिन्यः समुद्यमात्रेन मया विकासं प्राप्ताः तथा स्वभक्ताः गोप्यस्त्वयापि विकासनीयाः "उदयन्नेव सविता पद्मेष्वर्पयति श्रियम्। विभावयन् समृद्धीनां फलं सुहृदनुग्रहम्" इत्युक्तेरिति विज्ञापयन्तमिव पुनश्चाऽखण्डमण्डलं बिम्बं यस्य तं परोपकारशीलस्य क्वापि हानिर्न भवतीति सूचयन्तमिव अनेन राकेति ध्वनितं पुनश्च रमाया लक्ष्म्याः आननाभावदाभा कान्तिर्यस्य तद्भ्रातृत्वात् तथा च लक्ष्म्याः स्मारकत्वेन रमणेच्छामुद्दीपयन्तमिव स्वभार्याभ्रातृत्वात् श्यालकस्य मम सन्निधौ सङ्कोचो न विधेय इति वा सूचयन्तमिव। यद्वा, "सर्वलक्ष्मीः सर्वकान्तिः सर्वसम्मोहिनी परा" इति स्मृतेः रमा श्रीराधा रमन्ते रमयती वा रमा गोप्यश्च तासामाननस्याऽऽभेवाऽऽभा च यस्य तं स्वदर्शनेन ताः स्मृतिपथमारोहयन्तमिव तथा उदयरागव्याप्तत्वान्नवकुङ्कुमपिण्डवदरुणं विवाहसमये वल्लक्ष्म्यादिमुखं तत्तुल्यत्वान्नूतनकाममुद्दीपयन्तमि वनं च तस्य तथाभूतस्य चन्द्रस्य कोमलाभिः किरणैरभिरञ्जितं गोभिः, अञ्जितं व्याप्तमिति वा। यद्वा, भावे क्तः तत्कोमलगोभिरञ्जनं यत्र किरणानां सुधादोग्धृत्वं वन एव पाल्यमानत्वं च ज्ञापयितुं गोपदं तत्रापि शीतबाधाकरत्वनिरासाय कोमलादं तथा च यथोक्तविशेषणविशिष्टं चन्द्रं रमणयोग्यं वनं च दृष्ट्वा कलं जगौ अत्र विशेष्यस्यानुक्त्या आत्मा मुखं वाऽपि विशेष्य ज्ञातव्यम् अस्मिन् पक्षे कोः पृथिव्या अपि मुत्कर्तव्यत्वेन विद्यते यस्य तमात्मानं मुखपक्षे कुमुद्वदिति लिङ्गविपरिणामः, अनेन भूचरसुखार्थं कृतावतारेण मया मय्यासक्तमनसा गोप्यापि मयाऽभिरमणेन सुखिन्यो विधेया इति ध्वनितं पुनश्चाऽखण्डमन्यूनानतिरिक्तं मण्डलं नासाकरणाद्यङ्गचक्रं यस्मिन् अनेन गोप्यर्थमेव तुच्छीकृतकोटिकन्दर्पविग्रहस्य प्रादुष्कृतत्वादवश्यं रमयितव्या इति सूचितम् पुनश्च रमाणां तासामाननानामाभा यस्मिन् अनेन स्वस्मिन्तासां स्वचित्तत्वदर्शनेन तत्कुलप्रदानस्यावश्यकत्वं सूचितम् पुनश्च ताभिर्लिप्तेन नवकुङ्कुमेनारुणम्। यद्वा, अत एव तन्मुखलिप्तेन नवकुङ्कुमेन प्रतिबिम्बितेनारुणम्। अनेन स्वविग्रहस्य तद्विग्रहगतरागरञ्जितत्वदर्शनेन तन्मनोगतरागेण स्वमनसो(ऽति) चिररञ्जितत्वमावश्यकमिति ध्वनितं तद्विकसितकुसुमाद्यलङ्कृते पुनश्च स्वस्य स्वमुखस्य कोमलगोभिरभिरञ्जितम् एवमुद्दीपनालम्बनविभावैर्दृष्ट्वा कलमव्यक्तमधुराक्षरं यथा स्यात्तथा जगौ गानं कृतवान् तदपि वेणुनेति ज्ञातव्यं कलपदामृतवेणुगीतेति वक्ष्यमाणात् तत्र मधुरमिति मनोहरणशक्तिमत् अव्यक्तमिति सर्वासां स्वस्वाऽऽह्वानोत्पादकम् अन्येषां तदाह्वानाऽनिश्चायकञ्चेति बोधितं मधुरत्वात्सर्वाकर्षणं वारयति—वामेति। वामा मनोहराः दृशः कटाक्षा यासां वामं सुन्दरं दृक् दर्शनं यासामिति वा तासां युवतीनां सौन्दर्यादिगुणालङ्कृतानामेव मनोहरं यथा स्यात्तथा 'गायन्तं स्त्रियः कामयन्ते' इति श्रुतेः। वामा स्वस्मिन्कुटिला दृशो यासां तासां मनोहरमिति श्लेषेण सर्वदा स्वस्मिन् कुटिलमेव पश्यन्ति तासां सर्वेन्द्रियप्रवर्तकमन आकर्षणेन तथादर्शनाऽभावायेत्यपि द्रष्टव्यम् कलं वामदृशामित्यत्र श्लेषान्तरेण कामबीजं क्लीमित्याकारकं जगाविन्यपि ज्ञेयम् तथाहि कल ककारलकारौ वामदृशेति टाबन्त वामदृशा ईकारः मन्त्रशास्त्रे वामदृगिति चतुर्थस्वरस्य संज्ञा ईकारश्च

भूतवामदृशामिति समाहारद्वन्द्वे अमो लुकि रूपं तथा च इमिति च तेन क्लीमिति सिद्धं निवृत्तिपक्षे अथ भगवत्कृतमनुग्रहान्तरं दर्शयति—दृष्ट्वेति । कुत्सिता अनित्याशुचिविषयप्राप्तिजन्यमुदकुमुदनकुमुदत्तभावः कर्तव्यत्वेन विद्यते अस्य विवेकलक्षणचन्द्रस्य तं तत्राप्यखण्डमण्डलं वैराग्यशान्त्यादिसाधनसमूहो यस्य तं पूर्णवैराग्यादियुक्तं यतो रमाननाभं रमायाः सम्प्रत्यप्रमादादिरूपेण परिणता या आनने मुखे आभा दीप्तिर्यस्य तं विषयमात्रसौन्दर्यं बुद्धिनिवर्त्तकं पुनश्च नवकुङ्कुमारुणं पूर्वं हि नात्मवर्ग एवानुरागः स्थितः सम्प्रति नवीनेन कुङ्कुमस्थानापन्नेनाभिरञ्जितं वा । यद्वा, तदन्तःकरणलक्षणं वनं कोमलैस्त्यक्तग्रहभावैः शास्त्रश्रवणसत्पादस्पर्शभगवन्मूर्तिसज्जनदर्शनभगवन्नैवेद्यास्वादनभगवच्चरणारविन्दार्पिततुलस्याघ्राणभगवन्नामस्मरणाऽर्चनादिपरैः गोभिन्द्रियैस्तज्जन्याभिर्वृत्तिभिरीरञ्जितं शोभितं च दृष्ट्वा कलम् अनेकार्थसूचकं मधुराक्षरं "अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, शास्त्रयोनित्वात्, तत्त्वसमन्वयात्" इत्यादि सूत्रजात कृष्णद्वैपायनात्मनाऽऽविभूय जगौ कथम्भूतं कलं वामदृशां वामस्य परमसुन्दरस्य परमात्मनो दृक् ज्ञानं याभ्यस्ता उपनिषदः "तन्त्वौपनिषदं पुरुषं पृच्छामि" इति श्रुतेः तासां मनोहरं परब्रह्मणि तात्पर्याधारणकारणं वामा सुन्दरा दृक् ज्ञानं यासामिति । यद्वा, वामा कुटिला दृशो यासामस्पष्टब्रह्मलिङ्गभेदाद्यनुवादकानां मनोहरं प्रत्यगभिन्ने ब्रह्मणि तात्पर्याऽपहरणपरं यद्वा, कुटिलज्ञानानां वादिना मनोहरं तदभिप्रेतार्थनिरासकरम् । यद्वा, वामदृशां शोभनज्ञानवतां विवेकिनां वेदान्तशास्त्राऽधिकारिणां सतां मनोहरं मनोज्ञं नतु विषयासक्तचेतसां यद्वा, आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः सोन्वेष्टतव्यः स विजिज्ञासितव्यः" इत्यादिरूपकलं जगौ कीदृशं वामदृशाम् अनात्मपदार्थविषयाणां कुटिलवृत्तीनां मनोहरन्तत्कारणभूताऽनात्मप्रवणमनउपशामकम् । यद्वा, यथोक्तविवेकिजनमनोज्ञमित्यर्थः ॥ ३ ॥

रास-रहस्यम्

रा० टी०—अखण्डमण्डलं अखण्डं पूर्णवैराग्यादिसाधनानां मण्डलं समूहो यस्य तं पूर्णवैराग्यादियुक्तं, रमाननाभं रमयति आनन्दयतीति रमा तस्याः सुनिर्मलबुद्ध्याः, आनने सम्मुखे या आभा कान्तिर्यस्य तं विषयबुद्धिनिवर्तक, नवकुंकुमारुणं नवात्मरागेण रञ्जितं, कुमुद्वन्तं कुत्सितानित्याशुचिविषयजन्यामुत् मोदः तस्मिन् न वत् संश्लेषः यस्य तं चन्द्रं विवेकं, वनं च संसाराण्यं च दुःखदावानलतापेन तापित दृष्ट्वा, कोमलगोभिः रञ्जितं कोमलैः स्वल्पप्रकाशैः तमोरजोऽभिभवेन सत्त्वस्य गोभिः किरणैः, अभितो रञ्जितं रमणीयं कृतं च दृष्ट्वा, वामदृशां वामस्य परमसुन्दरस्य परमात्मनः दृक् ज्ञानं याभ्यः, उपनिषद्भ्यः तासां "तं त्वौपनिषदं पुरुषं पृच्छामि ।" इति श्रुतेः । यद्वा वामा कुटिला दृशो ज्ञानं येषाम् अस्पष्टब्रह्मभेदानुवादकानां प्रत्यगभिन्ने ब्रह्मणि तात्पर्यहरणपराणां, यद्वा वामदृशां शोभनज्ञानवतां विवेकिनां, मनोहरं मनोहरतीति मनोहरस्तं मनोनाशकरं "न कर्मणा न प्रजया धनेन त्यागेनैकेन अमृतत्त्वमानशुः ।" "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।" इत्यादि कलं कुटिलविषयनिन्दनेन आत्मज्ञानप्रशंसनेन च मधुरं जगौ अगायत् ॥ ३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवान् कुमुद्विकसनीयत्वेन विद्यते यस्य तम् "कुमुदेऽपि कुमुत्प्रोक्तम्" इति विश्वः । अखण्डमण्डलं बिम्बं यस्य तं रमाया आननस्य आभेवाभा यस्य तम् नवकुङ्कुममिवारुणम् उडुराजं दृष्ट्वा तस्योडुराजस्य कोमलैः सुस्पर्शैः, गोभिः किरणैरञ्जितं रमणीयं कान्तियुक्तम् "अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु" वनं च दृष्ट्वा मनोहरा दृशो यासां तासां मृगशावाक्षीणां मनोहरं यथा भवति तथा जगौ अगायत वेणुमवादयदित्यर्थः ॥ ३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

य उदगात्तमुडुराजं मुकुन्दो दृष्ट्वा । कुमुद्वन्तमिति पाठे कुमुदशब्दपर्यायोऽयं कुमुच्छब्दः । कुमुत्कुमुदं विकास्यत्वेनास्त्यस्येति कुमुद्वांस्तमखण्डो मण्डलो यस्य तम् । अनेन पौर्णिमासीति वा तदासन्नतिथिर्वेति ध्वन्यते । रामाननाभं रामस्य स्वाग्रजस्याननस्याभेवाभा यस्य स तम् । पाठः पाङ्क्तश्चेदपि नार्थोऽयं सरलः । अप्रकृतत्वात् । नवकुङ्कुमारुणमित्यसानुगुण्याच्च । गोपाला अपि धरन्ति ललाटे कुङ्कुमतिलकमित्यतोऽप्रकृतत्वं सुस्थिरं रामाणां स्वरमणयोग्यरमणीनामाननाभमिति श्लिष्टोऽर्थः । रमाननाभमिति मनोरमः पाठः । नवकुङ्कुमारुणं नव इति उद्यन्निति कुङ्कुमवादगुणस्तमन्यत्र नवेन कुङ्कुमेनारुणमिति ! तत्कोमलगोभिरञ्जितमिति पदमेकम् । तस्य चन्द्रमसः कोमलं च तद्गोभिः किरणैरभिरञ्जितं विशदीकृत प्रकाशितमिति यावत् । रञ्जित विशदे दन्तिदन्तयोस्तारहारयोरिति विश्वः । कोमलं च तद्गोभिरञ्जितं चेति विग्रहः । गोभिरभिरञ्जितं गोभिरञ्जितं तस्य विमलैर्गोभिरञ्जितं तद्विमलगोभिरञ्जितमिति वा विग्रहः । द्वितीये रञ्जितपदसमस्तेऽपि गोपदे तदर्थे तादात्म्यसम्बन्धेन विमलपदार्थान्वयः । सप्तघटिकाभोजनत्रिलोकनाथ इत्यादिवदिति नापूर्वः । पक्षद्वन्द्वेऽपि न च टक् च कथ कथञ्चन रोरात्याद्यप्रवृत्तिरिति शङ्काद्वन्द्वं नास्तीत्यप्रतिद्वन्द्वमिति मन्तव्यम् । तादृशं वनं च दृष्ट्वा वामदृशां वामाः सुन्दरा दृशश्चक्षूंषि यासां तास्तासां मनोहरं कलमव्यक्तमधुरं च यथा तथा जगावगायत ॥ ३ ॥

श्रीसुबोधिनी

कुमुत् विकसनीयमस्यास्तीति तं रमाया लक्ष्म्या आननस्य मुखस्याभा इव आभा यस्य तं नवकुंकुममिवारुणमखंडमंडलं पूर्णचंद्रं दृष्ट्वा तस्येंदोः कोमलैर्गोभिरंजितं वनं च दृष्ट्वा वामदृशां सुंदरनेत्राणां स्त्रीणां मनोहरं कलं मधुरं जगौ ॥ ३ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

दृष्ट्वा कुमुद्वन्तमित्यस्याभासे, तस्य शब्दयोनित्वं निरूपपन्निति । वाचः पूर्वरूपं हि मनस्तच्च समानाधिकरणाया एव तस्यास्तथा । प्रकृते च गान एतच्चन्द्रदर्शनस्य हेतुत्वोक्त्यापि गानसमानाधिकरणमनोधिष्ठातृत्वं तत्र ज्ञाप्यत इति भावः । न चैवं वनेपि तत्त्वापत्तिरिति वाच्यम्, विशेषणस्यैव तत्र प्रयोजनकत्वेनोक्तेः । **रमाननाभमित्यत्र, लक्ष्म्या अयं भ्रातेत्यादि** । भगवान् रमणेच्छायां तद्रसपूरणार्थं ब्रह्मानन्दं लक्ष्म्यात्मकनायिकारूपमाविर्भावितवान् । तस्यैव रमणस्थानत्वात् चन्द्रोपि तथैवायमाविर्भावित इत्यस्य तद्भ्रातृत्वमत एव समानाकारत्वमिति भावः । **नवकुङ्कुमारुणमित्यत्र**, नवपदस्य तात्पर्यमाहुः **विवाहसमय** इत्यादि । कलत्वे गानस्य हेतुमाहुः **यदि व्यक्तमित्यादि** । यद्यपि स्वरूपदिदृक्षा न तच्छ्रवणनिवर्त्या, तथापि गीतस्यार्थः स्वरूपमेवेति, तच्चार्थसंयुक्तमेवेति गीतस्य व्यक्तत्वेऽर्थस्यापि तथात्वं स्यात् । तथा च 'तदनङ्गवर्धन'मितिवाक्यात्स्वरूपरसानुभवेच्छाया एवोद्भूतत्वेन तदनुभवेनैवागमनप्रतिबन्धः, स्यादिति भावः, **वामदृशामित्यत्र** । **यासां पुनर्दृष्टिरित्यादि** । पुष्टिमार्गानुसारिभजनपरत्वमेवोत्तमत्वं दृष्टेः । अन्यथा चार्वादिपदान्यपहाय वामपदं न वदेदिति भावः ॥ ३ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

कुमुत् कुमुदं विकसनीयतया विद्यते यस्य तम्, यद्वा कौ पृथिव्यां मुत् अस्यास्तीति तं भूमेरानन्दकरम् । तत्र हेतुमाह—अखण्डं सम्पूर्णं मण्डलं यस्य तम् । रमाया लक्ष्म्या आननस्य आभा इव आभा यस्य तम् । अयं च लक्ष्मीमुखदृष्टान्तः 'तद्विवाहादिसमये कुङ्कुमयुक्तमुखावस्थायाम्' इति सूचयति—नवकुङ्कुमवदरुणमिति । एवंविधं चन्द्रं दृष्ट्वा तथा तस्य कोमलैः स्वल्पप्रकाशैः गोभिः अभितो रञ्जितं रमणीयं कृतं वनं च दृष्ट्वा वामा मनोहरा शोभा यासां तासां मनोहरं मनसः आकर्षण यथा स्यात्तथा कलं मधुरं जगौ वेणुनादं कृतवानित्यर्थः । 'कोमलगोभिः' इति तृतीयान्तपाठस्वीकारे दीर्घाभाव आर्षः । 'अञ्जितम्' इति वा पदच्छेदः ॥ ३ ॥

अन्वितार्थप्रकाशिका

दृष्ट्वेति ॥ अखण्डं संपूर्णं मण्डलं यस्य तं रमाया लक्ष्म्या आननस्य आभा यस्य तं नवकुङ्कुममिवारुणं कुमुद्वन्तं चन्द्रं दृष्ट्वा तथा तस्य कोमलैः स्वल्पप्रकाशैः गोभिः किरणैः अभितो रञ्जितं रमणीयं कृतं वनं च दृष्ट्वा वामदृशां स्त्रीणां मनोहरणं कलं मधुरं जगौ । वेणुमवादयदित्यर्थः । कोमलगोभिरिति तृतीयान्तत्वस्वीकारे दीर्घाभाव आर्षः । अञ्जितमिति वा पदच्छेदः । गोन्तादृजभावस्तु सर्वत्रार्षः । यद्वा । कलं ककारलकारात्मकं वामदृशा ईकारेण साक्षात्पठितेनानुस्वारेण च सहितं क्लीमिति कामबीजं सर्ववशीकरणमन्त्रं जगौ इत्यर्थः ॥ ३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कुमुद्वंतं कुमुदविकाशकम् अखंडमंडलं षोडशकलायुक्तं रमाननाभं लक्ष्मीमुखसदृशं नवीनं कुंकुमवदरुणं चंद्रं दृष्ट्वा तस्य चंद्रस्य कोमलैः, गोभिः किरणैः रंजितं वनं च दृष्ट्वा वामदृशां सुंदरनेत्राणां स्त्रीणां मनोहरं कलम् अव्यक्ततया मधुरं जगौ वेणुना प्रागायत् ॥ ३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दृष्ट्वेति ॥ अखण्डं संपूर्णं मण्डलं यस्य तं, रमाया लक्ष्म्या आननस्याभा इवाभा यस्य तं, नवं यत् कुङ्कुमं तद्वदरुणो रक्तवर्णस्तं, कुमुत् कुमुदं विकसनीयं विद्यतेऽस्य तं चन्द्रमित्यर्थः । दृष्ट्वा, उदितमिति शेषः । तस्य चन्द्रस्य कोमला मृदुलाश्च ते गावः किरणास्तैः, अञ्जितमारुण्येन रमणीयतां प्राप्तं, वनं च दृष्ट्वा, वामदृशां कामिनीनां, मनोहरं यथा भवति तथा, कलं मधुरं, जगौ वेणुमवादयत् । केचित्तु कलमित्यादिचरमपदेन गुप्ततयोक्त 'क्लीं' इति काममन्त्रबीजमुद्धारयन्ति । कलं व्यञ्जनककारलकारसमाहारः । वामदृक् शब्देन मन्त्रशास्त्रीयसंकेततः दीर्घ ईकारोऽभिहितः । मनोहरमित्यत्र मनोऽनुस्वारः । हरमर्द्धमात्रात्मकमिति सर्वस्त्रीजनमनःसमाकर्षककाममन्त्रमगायतेत्याहुः ॥ ३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दृष्ट्वेति : १०.२९.३.

गायन्तं कामयन्तेऽस्मिन् स्त्रियो नरमिति श्रुतेः । अन्वर्थतां स जिज्ञासुर्जगौ कलमधोक्षजः ॥ २५ ॥
माभूदासामणुरप्यधर्मसंस्पर्श इत्यनन्तात्मा । सुकृतासुकृतनिदानं मन एवादौ जहार सद्गीत्या ॥ २६ ॥

निःसीमपुण्यफलमत्र सदेतदेव या स्वाङ्गनाविलसिताङ्गजवैभवेक्षा।
तद्वो मनांस्यचिरमेत तदीक्षणार्थमेवं मनोहृतिमधात् बहुधा स गीत्या ॥ २७ ॥

कृष्णप्रिया

अखण्डमण्डलवाले, श्री लक्ष्मीजी के मुखसरोज के समान सौन्दर्यवाले, नयाँ खिला हुआ कोमल एवं आरक्त केसर के अरुण, पृथ्वी को प्रमोद-आनन्द देनेवाले, रासलीलानुकूल चन्द्रमा को देखकर-बनाकर और चन्द्रकी सुकुमार किरणावली से रंजित वन को देखकर-बनाकर रसराज श्रीकृष्ण ने, वामलोचनाओं के चित्त को चुरानेवाला मन का आकर्षण करने वाला कला-अव्यक्त एवं मधुर मुरली गान किया ॥ ३ ॥

निशम्य गीतं तदनङ्गवर्धनं व्रजस्त्रियः कृष्णगृहीत [1]मानसाः।
आजग्मुरन्योन्यमलक्षितोद्यमाः[2] स यत्र कान्तो जवलोलकुण्डलाः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—अनङ्गवर्धनम्, तत्, गीतम्, निशम्य, कृष्णगृहीतमानसाः, अन्योन्यम्, अलक्षितोद्यमाः, जवलोलकुण्डलाः, व्रजस्त्रियः, यत्र, सः, कान्तः, तत्र, आजग्मुः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

असापत्न्यायान्योन्यमलक्षितो न ज्ञापित उद्यमो याभिस्ताः स कांतो यत्र तत्र गीतध्वनिमार्गेण जग्मुः। जवेन वेगेन लोलानि चंचलानि कुंडलानि यासां ताः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

असापत्न्याय सापत्न्यनिवृत्तये। सहगमने त्वीर्ष्या स्यादित्यर्थः। सः कृष्णः। यत्र स्थाने। कुंडलानां रथत्वं पक्षत्वमंकुशत्वं च, किं वा भूमिः संकुचिता सैवाग्रे विवृता भविष्यतीति जवलोलकुंडला इत्यनेन ध्वनितम्॥ कलगीतसूत्रगुम्फिताः पञ्चालिका इव ताः कृष्णांतिकमायाता इत्याह—तद्गीतं मनोहरमपि मनोजवर्धनम्। किं च, कृष्णो हि वेणुगीताख्यं महाचारं व्रजे प्रेषितवांस्तेन च व्रजस्त्रीणां निष्कपाटेन कर्णद्वारेणांतःकरणकोशागारं प्रविश्य मनसा सह धैर्यलज्जाविवेकादीनि महाधनान्यपहृत्य झटित्यानीय कृष्णाय दत्तानीत्याह—कृष्णेन गृहीतानि मानसानि मनांसि च, मानसानि मनःसंबंधीनि धृतिस्मृतिविवेकलज्जाभीतिमत्यादीनि, यासां ताः, आजग्मुः। महाचौरचक्रवर्तिनः कृष्णात् तानि स्वस्वधनानि प्रार्थयितुमिवेति भावः। तदैव मन्ये तं महाचौरं धर्तुं व्यग्राणामन्योन्यं न लक्षित उद्यमो यासां ताः चौरस्य पश्चात्पश्चाद्वाजग्मुः। क—स कान्तो यत्र। जवेन वेगेन लोलानि कुंडलानि कुंडलोपलक्षितानि कंकणकिंकिण्यादीन्यपि यासां बहिष्करणगृहस्थितानि अल्पमूल्यत्वबुद्ध्या चौरेण तेन नापहृतानीति भावः अत्र तोषिणी—अन्ये तु तद्गीतं न श्रुतवन्तः किन्तु तेन ता एवाकृष्टा इति तस्य शक्तिविशेषं द्योतयन्नाह—निशम्येति। तत् पूर्वोक्तप्रकारं श्रीकृष्णवेणूद्गतम्। अनंगं श्रीभगवद्विषयं कामं प्राग्वर्तमानमेवाधुना वर्द्धयतीति तथा तत्। यद्यपि वामदृशां मनोहरमित्यनेनानंगवर्द्धनत्वमायातमेव तथापीयमुक्तिस्तदतिशयविवक्षया। अनंगशब्दप्रयोगश्च पूर्वं बीजांकुररूपेणैव स्थितः सम्प्रति पल्लवित इत्यर्थं बोधयति। एतेन तद्गानस्यामृतसेकत्वमप्युत्प्रेक्ष्यते सद्यस्तथाभावात्। व्रजस्य स्त्रियस्तद्विशेषाः प्रकरणबलात्। अत एव कृष्णेन परमाकर्षकेण पूर्वमेव गृहीतमाकृष्टं मानसं मनस्तदीयाशेषं वा यासां ताः, विशेषतश्चेदानीं गीतं श्रुत्वाऽऽजग्मुः। अन्योन्यालक्षितत्वे हेतुर्व्याख्यातः। यद्वा—स्वस्वयूथे मिथः सख्यवतीनामपि तासाम्। तत्र हेतुः—कृष्णेति। तदानीं कृष्णाकृष्टचित्तत्वेन विचारापगमादितिः भावः। अत एव जवेति। आजग्मुरिति—श्रीबादरायणेः श्रीकृष्णांतिके सदैव स्फूर्तेः, किं वा—तासां तद्गमनवार्तया भावविशेषोदयेन तासामिव स्वस्यापि तत्र गमनस्फूर्त्या साक्षादिव श्रीकृष्णांतिकतायाः स्फुरणात्। अग्रे तु ययुरिति चलनार्थकमेव। स इति तादृशतत्स्मरणोत्कंठावचनम्, परममोहनरूपगुणवेणुभावैः प्राचीनैस्तदानींतनैश्च तासामस्माकञ्च मुहुत्यर्थमभीप्सित इत्यर्थः। कान्तो रमणो यत्रेति तत्रैव परमसुखमयस्थान इत्यर्थः। तस्य वेणुवाद्यस्य परमाकर्षकविद्यारूपत्वादन्यत्र भ्रमणादिकमपि नासीदिति भावः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अन्ये तु च तद्गीतं न श्रुतवन्तः किन्तु तेन ता एव चाकृष्टा इति तस्य शक्तिविशेषं द्योतयन्नाह—निशम्येति। तत्पूर्वोक्तम् प्रकारं श्रीकृष्णवेणूद्गतम् अनङ्गं श्रीभगवद्विषयं कामं प्राग्वर्त्तमानमेवाधुना वर्द्धयतीति तथा तत् यद्यपि वामदृशां मनोहरमित्यनेनानङ्गवर्द्धनत्वमायातमेव तथापीयमुक्तिस्तदतिशयविवक्षया अनङ्गशब्दप्रयोगश्च पूर्वं बीजाङ्कुररूपेणैव स्थितः सम्प्रति तु पल्लवित

---

[1] निषक्त–विज.। [2] लक्षिताशयाः विज.।

इत्यर्थं बोधयति। एतेन तद्गानस्यामृतसेकत्वमप्युत्प्रेक्ष्यते सद्यस्तथाभावात् व्रजस्य स्त्रियस्तद्विशेषाः प्रकारणबलात् अत एव कृष्णेन परमाकर्षकेण पूर्वमेव गृहीतम् आकृष्टं मानसं मनस्तदीयाशेषं वा यासां ताः विशेषतश्चेदानीं गीतं श्रुत्वा आजग्मुः अन्योन्यालक्षितत्वे हेतुस्तैर्व्याख्यातः। यद्वा, स्वस्वयूथे मिथः सख्यवतीनामपि तासां तत्र हेतुः कृष्णेति तदानीं कृष्णाकृष्टचित्तत्वेन विचारापगमादिति भावः। अत्र एव जवेनेति आजग्मुरिति श्रीबादरायणेः श्रीकृष्णान्तिके सदैव स्वस्थितिस्फूर्त्तेः किम्वा तासां तद्गमनवार्त्तया भावविशेषोदयेन तासामिव स्वस्यापि तत्र गमनस्फूर्त्त्या साक्षादिव श्रीकृष्णान्तिकतायाः स्फुरणात् अग्रे तु ययुरिति चलनार्थकमेव स इति तादृशतत्स्मरणोत्कण्ठावचनं परममोहनरूपगुणवेणुभावैः प्राचीनैस्तदानीन्तनैश्च तासामस्माकं च मुहुरत्यर्थमभीप्सित इत्यर्थः कान्तो रमणः यत्रेति तत्रैव परमसुखमयस्थान इत्यर्थः। तस्य वेणुवाद्यस्य परमाकर्षणविद्यारूपत्वादन्यत्र भ्रमणाविकमपि नासीदिति भावः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत् पूर्वोक्तप्रकारं श्रीकृष्णवेणूद्गतमनंगं श्रीभगवद्द्विषयकं कामं प्राग्वर्त्तमानमेवाधुना वर्द्धयतीति तथा तत्, यद्यपि वामदृशां मनोहरमित्यनेनानंगवर्द्धनत्वमायातमेव, तथापीयं विशेषोक्तिस्तदतिशयविवक्षया, अनंगशब्दप्रयोगश्च तासां प्रेमरूपकामविशेषेण ग्राम्यधर्म्महेतु–प्राकृतकामांशाभावविवक्षया, यद्वा, श्रीभगवद्विषयत्वेनानंगस्यापि सांगीभावाद्यभिप्रायेणेति दिक्। व्रजस्य व्रजे वा याः स्त्रियो नवयुवत्यस्ताः, कृष्णेन परमाकर्षकेण पूर्व्वमेव गृहीतमाकृष्टमाविष्टं वा मानसं मनस्तदीयाशेषं वा यासां ताः, विशेषतश्चेदानीं तादृशं गीतं श्रुत्वा आजग्मुः। यद्वा, स्वयूथे मिथः सख्यवतीनामपि तासामन्योऽन्यमलक्षितोद्यमत्वे हेतुः—कृष्णेति। तदानीं कृष्णाकृष्टचित्तत्वेन विचारापगमादिति भावः। यद्वा, तेनैव प्रेमविशेषस्वाभाविक–तद्विलासात्मकसापत्न्यस्य यूथान्तरे प्रादुर्भावात्। यद्वा, गमनेऽत्यन्तत्वरया तज्ज्ञापनाशक्तेः, अत एव जवेन गमनवेगेन लोलानि कुण्डलानि कर्णभूषणानि यासां ताः, आजग्मुरिति श्रीबादरायणेः श्रीकृष्णान्तिके सदैवात्मस्थितेः परिस्फूर्त्तेः। किंवा, तासां तद्गमनवार्त्तया भावविशेषोदयेन तस्मिन्निव स्वस्यापि तत्र गमनस्फूर्त्त्या साक्षादिव श्रीकृष्णान्तिकतायाः परिस्फूर्त्तेः, यद्वा, आजग्मुरभिसस्रुरित्यर्थः। यद्वा, आ सम्यक् सर्व्वपरित्यागेन जग्मुर्ययुरित्यग्रे बहुशो वक्ष्यमाणत्वात्, स परममोहनवेणुगीतगायकः, यद्वा, चिरं व्रतादिनाभीप्सितः, यतः कान्तः स्वामी निजमनोहर इति वा, यद्वा, कस्य सुखस्यान्तो निष्ठा यस्मात् सः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

निशम्येति। तन्मन्मथोद्दीपकं गीतमाकर्ण्य व्रजस्त्रियः स कृष्णो यत्र तत्राजग्मुः, कथम्भूताः ? कृष्णेन गृहीतमाकृष्टं कृष्णे निवेशितं वा मानसं यासां परस्परमलक्षितो न ज्ञापित उद्योगः कृष्णं प्रति गमनोद्योगः यासां जवेन वेगेन लोलानि चञ्चलानि कुण्डलानि यासां तथाभूताः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अनङ्गवर्द्धनं कामोद्रेककारणम् अन्योन्यं परस्परमलक्षिताशयाः अज्ञातमनोभावाः पूर्वगदृष्टवनस्थाना वा स कृष्णो यत्रास्ते तत्रेति शेषः। कार्तस्वरं सुवर्णं तेन रचितानि लोलानि कुण्डलानि यासां तास्तथा ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आजग्मुः प्राप्तवत्यः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

(३ य-श्लो०) "वामदृशां मनोहरम्" इति यदुक्तं तदेवानन्यसाधारण्यमाह—निशम्येत्यादि। यत् कलं वेणुगीतं व्रजस्त्रियो निशम्य श्रुत्वा आजग्मुः, नान्यः कोऽपि,–तच्छ्रवणाभावात्। कुत्र आजग्मुरित्याह— स यत्रेत्यादि। स कीदृशः ? कान्तः कमनः। कीदृशं गीतम् ? अनङ्गवर्द्धनम् अङ्गं कामकला, अङ्गी प्रेमा, अतोऽनङ्गवर्द्धनम् अङ्गिवर्द्धनम्; प्रेमवर्द्धनमिति यावत्। ताः कीदृश्यः ? कृष्णेन गृहीतं मानसं यासाम्; तेन तत्रानङ्गस्य नावसरः, अन्योन्यमलक्षित उद्यमो याभिः, आकस्मिकत्वेन पूर्वसंवादाभावात्, नत्वीर्षया। यद्यप्येवं तथापि सर्वा एकसूत्रनद्धा दारुपुत्रिका इव एकदैव जग्मुर्न तु पौर्वापर्यक्रमेण। जवेन वेगेन लोलानि कुन्तलान्येव यासां तादृशवेगवता गमनेनापि कुन्तलानामेव लोलतासीदिति गमनस्य स्वाभाविक-गाम्भीर्य-सूचनम् ॥ ४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अनङ्गवर्द्धनम्—अनङ्गो मत्कामोऽङ्गी प्रेम्णा अङ्गे वर्द्धनमित्यर्थः। अन्योन्यमलक्षितोद्यमा इति—संवादविरहात्; यद्वा, पत्यादिभिरलक्षितोद्यमाः सत्योऽन्योन्यं मिलित्वा आजग्मुः। जवलोलकुण्डला इति जवेनापि कुण्डलयोरेव लोलत्वम्, तेन मान्थर्यातिशयस्तेन च कलहंस-गामित्वम्। कुण्डलानाञ्च पाश्चात्यदेशीय-कुण्डलविजातीयत्वम्। यद्वा, अजवलोलकुण्डलाः—न जवेन लोलानि कुण्डलानि यासां ताः, ईषल्लोल इत्यर्थः ॥ (४–७)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कलगीतसूत्रगुम्फिताः पञ्चालिका इव ताः कृष्णान्तिकमायाता इत्याह—तद्गीतं मनोहरमपि मनोजवर्द्धनं किञ्च, कृष्णो हि वेणुगीताख्यं महाचौरं व्रजे प्रेषितवांस्तेन च व्रजस्त्रीणां निष्कपाटेन कर्णद्वारेणान्तःकरणकोशागारं प्रविश्य मनसा सह धैर्य्यलज्जाभयविवेकादीनि महाधनान्यपहृत्य झटित्येवानीयकृष्णाय दत्तानीत्याह—कृष्णेन गृहीतानि मानसानि मनांसि च मानसानि मनःसम्बन्धीनि धृतिस्मृतिविवेकलज्जाभीतिमत्यादीनि यासां ताः, आजग्मुः महाचौरचक्रवर्तिनः कृष्णात् तानि स्वस्वधनानि प्रार्थयितुमिवेति भावः। तदैवं मन्ये तं महाचौरं धर्तुं व्यग्राणाम् अन्योऽन्यं न लक्षित उद्यमो यासां ताः चौरस्य पश्चात्पश्चादेवाजग्मुः क स कान्तो यत्र जवेन वेगेन लोलानि कुण्डलानि कुण्डलोपलक्षितानि कङ्कणकिङ्किण्यादीन्यपि यासां तास्तेन सह तासां बहिष्करणगृहस्थितानि धनान्यल्पमूल्यत्वबुद्ध्या चौरेण तेन नापहृतानीति भावः ॥ ४ ॥

श्रीरसिकाल्हादिनी टीका

ततो वेणुगीतगतस्वस्वनामाङ्कितमाह्वानं श्रुत्वा किं कृतमित्यपेक्षामाह।–निशम्येति–तद्गीतं निशम्य व्रजस्त्रिय आजग्मुः। सर्वा एवागताः यद्यपि श्रीकृष्णेन याभ्यो वरो दत्तस्ता एवाकारितास्तथापि पूर्वानुभूतकृष्णानन्दाः सर्वा एव समागताः। कीदृशं गीतम् अनङ्गवर्द्धनं श्रीकृष्णविषयकमलौकिकं काममेव वर्द्धयति पूर्वसिद्धमेवेदानीं वृद्धिं प्राप्तः अनङ्गवृद्धौ आकारणसंवलितवेणुगीतस्यैवासाधारणकारणत्वम्। अनङ्गस्तु मानसो धर्मो मनो भवत्वात् नान्योपलक्ष्यः। पूर्वं श्रीकृष्णस्यैवमनङ्ग आर्विभूतो यतो रन्तुं मनश्चक्र स एवानङ्गो वेणुनादद्वारा व्रजसुन्दरीसञ्चारितः। एतासां पूर्वसिद्धो सुरूपो वर्तत एवातोऽनेन सह सम्भूय महतीं वृद्धिं प्राप्त इति भावः। श्रीकृष्णस्य कामेनैव तासां कामं स्वस्मिन् क्रोड़ीकृतस्तद्द्वारा आसां श्रीकृष्णे निरोध उक्तो यत आजग्मुः तत्र हेतुः कृष्णगृहीतमानसाः कृष्णेनैव गृहीतमाकृष्टं मानसं यासां ता मनस्याकृष्टे सति मनो धर्मस्य स्वत एवाकर्षणादीत्यर्थः। यद्वा तदनङ्गवर्द्धनं तस्य श्रीकृष्णस्यैव पूर्वमनङ्गं वर्द्धयतीति तथा। यद्वा तत् मोहनार्थं प्रयुक्तं गीतम् अनङ्गो नित्यसिद्धः स्थित एवालौकिकस्तं कामं वर्द्धयति उच्छलितं करोतीति। तथा मोहनार्थं प्रयुक्ते गीते अभिलाषवर्द्धकत्वम्। किञ्चाप्याजग्मुरिति आगमने हेतुः कृष्णेन स्वरूपेण माधुर्येण च गृहीतं मानसं यासां ताः न तु केवलेन मोहनगीतेन। यद्वा अन्योन्यमनङ्गवर्द्धनं यथाऽऽजग्मुरिति प्रवक्तृणा श्रीशुकेन स्वानुभवोक्तिः, कृतेति, यद्यपि स्वस्व-यूथेन चलिताः तथापि अन्योन्यज्ञापकमलक्षितोद्यमाः श्रीकृष्णाकृष्टमनस्त्वेन देहेन्द्रियाणामप्याकर्षणात् परस्परमलक्षितो न ज्ञापित उद्यमो याभिस्ता इन्द्रियाणां मध्ये वागीन्द्रियस्यापि तेनाकर्षणात् स्वाभीष्टं नोक्तवत्य इति भावः। शरीरानुसन्धानमकुर्वत्यो यतो वेणुगीतमागत तेनैव मार्गेणागताः कुत्रेत्यपेक्षायां स इति समये दृष्टचरः कान्तः कोटिकन्दर्पकमनीयस्वरूपस्तत्रानुरागसम्वलितो वरदान उद्दीपनविभावसंस्कृते रहसि प्रथमं कुमार्य्य एवागता अनास्वादितरमणानन्दास्तल्लिङ्गं जवलोलकुण्डलाः, कुमारीणाम् एव कुण्डलधारणम् अन्यासां सामान्यपूर्वाणां ताटङ्कधारणमिति विवेकः। यद्वा यत्र कान्तः कस्य रमणात्मकस्य परमसुखस्यान्तः पराकाष्ठा यस्मिन् सः, यद्वा अधिकरणस्यैव विशेषणम् ॥ ४ ॥

विशुद्धरसदीपिका

एवमाकारितानां तासामागमनं वर्णयन् तद्दर्शनोत्कण्ठया आत्मानं श्रीकृष्णोपकण्ठगतं च भावयन्नाह—निशम्येति। व्रजस्त्रिय आजग्मुरित्यन्वयः। व्रजशब्देनात्र स्नेहैकपुष्टजनावास उच्यते ततश्च स्नेहपुत्तलिका इत्यर्थः—

आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः।
गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामि ॥ इति

ब्रह्मसंहितोक्तेः जग्मुरिति वक्तव्ये आजग्मुरित्युक्तिरात्मनः श्रीकृष्णसमीपस्थत्वभावनया किं कृत्वा गीतं निशम्य कीदृशं तदनङ्गवर्द्धनम् अङ्गं कामकला अङ्गी प्रेमा अतोऽङ्गिवर्द्धनं प्रेमवर्द्धनमित्यर्थः। साधकचरीपक्षे यथाश्रुत एवार्थः। अथ स्वस्वयूथे सख्यवतीनामपि तासां तद्गीताकृष्टमानसत्वेन विचारापगमात् अन्योन्यमलक्षितोद्यमा इति यद्वा कृष्णगृहीतमानसा इति हेतुगर्भं विशेषणं किं वायं हेतुः केवलप्रेमवर्द्धनत्वे एव परमानन्दकर्षकानन्दवशीकृतमानसाः तथासति कुतो जवावकाशः कुत्रेत्यपेक्षायामाह—स यत्र कान्तः परममनोहरः यद्वा कानां स्वमुखानामन्तः पर्य्याप्तिर्यस्मिन् इति केवलप्रेमपात्रमित्यर्थः, उत्कण्ठातिशयमाह—जवेति। जवेन वेगेन लोलानि कुण्डलानि यासां ताः तेन कुण्डलानां रम्यत्वं व्यञ्जितम् ॥ ४ ॥

श्रीरामनारायणकृता भावभावविभाविका

तद्गानसाफल्यं निरूपयति—निशम्येति। व्रजस्त्रियस्तद्वंशगीतमनङ्गवर्द्धनं निशम्य कृष्णगृहीतमानसाः सत्योऽन्योन्यमलक्षितोद्यमाः तथा जवलोलकुण्डला यत्र स कान्तस्तत्राजग्मुरित्यन्वयः। तत्र व्रजस्त्रिय इत्यत्र व्रजस्य स्नेहमयधामत्वात्स्नेहमय्यः तेन स्नेहप्रभावेनैव कृष्ण प्रतिव्रजनशीला इति वा वंशगीतस्यानङ्गवर्द्धनमिति विशेषणे चायं ध्वनिः यथाशुष्केन्धने स्नेहपूरिते स्थितोऽग्निर्वंशद्वारा धमनेन वर्द्धते तदा च घनश्याममवर्षितजीवनमेव तदुपशमोपायः तथा विरहार्कतापशुष्केऽतिस्नेहपूरिते तासां

देहे हृच्छयो हृच्छयाग्निः स च वंशधमनोद्गतगीतेन प्रज्वलितः वंशानां चायं स्वभावः स्वस्मिन्पवनसम्पर्के वह्निमुत्पाद्य स्ववंशं दहन्ति येषां स्ववंशदाहे प्रवृत्तिस्तद्वंशभववंशस्यान्यदाह किमु वाच्यं किं च भगवन्मुखतद्वाय्वोरपि "मुखादग्निरजायत, वायोरग्निः" इति श्रुत्या स्वत एवाग्निजनकयोः किमु वाच्यं हृच्छयाग्निवर्द्धने कामश्च रुद्रदग्धः स्वयमनङ्गः सर्वेषामप्यात्मवद्दाहमिच्छन् विशेषतः शम्भुवैरं स्मरन् कुचशम्भोरुन्मूलतो दग्धुं तन्मूले हृदयेऽनलरूपतया निवसन् कृष्णमुखानिलबन्धुतया वृद्धप्रतापः प्रलयायैव प्रववृते तथा च प्रज्वलिते हृच्छयाग्नौ घनश्यामरसवृष्ट्या तदुपशममालक्ष्य तज्जन्याग्नेः स्वकारणादेवोपसंहारं विचिन्त्य दावाग्निपानेन च विश्वस्य यत्र स घनश्यामस्तत्कारणत्वेन तदुपसंहारसमर्थः कान्तः कं जलं तस्यान्तोऽवधिभूतो रसजलनिधिः तत्राजग्मुः। यद्वा, यत्कामबीजं भगवता वंशपर्वच्छिद्रद्वारा हृत्क्षेत्रे उप्तं तत्प्रेमार्द्रभूमिलाभेन रोमपुलकरूपेणाङ्कुरितं पुनश्च विरहार्कतापेन शुष्यदवगत्याशुसलिलेन सिञ्चितेऽपि तापोष्णजलेन तद्रक्षणासम्भवमाकलय्य य एव बीजं वपति स एव सिञ्चति यदि बीजवपनकर्त्तैव घनश्यामो भवेत्तदुप्तं बीजं शुष्येत्तन्महदद्भुतमिति तदुद्भवाय सबीजवप्ताघनश्यामो यत्र तत्राजग्मुः। यद्वा, ब्रह्मेन्द्रादीन् स्व प्रभावैः पराभाव्य तद्विजयीकामः श्रीरुद्रेण दग्धोप्यनङ्गः सन् भूतपतेरपि भूतवद्बहुधा क्षोभकोऽभूत् तद्विजयाय समुद्यतो भगवान् नह्यपूर्णमनोजमिन्दुं राहुरपि द्रुह्यति यत्र योगेश्वरः कृष्णस्तत्र ध्रुवानीतिरिति वचनात् रिपुर्वर्द्धयित्वा जेतव्य इति-नृपनीतिमनुसृत्य स्वानुरागिमनसो गृहे तद्धृदये गानरसान्वितकामबीजक्षेपेण तमनङ्गमपि तदङ्गैः पूर्णीभाव्य यावन्मनः स्वास्थ्यं मनोजस्वातन्त्र्यमसम्भाव्य तदस्वातन्त्र्ये च रतिरणासम्भवमाकलय्य मनोहरेण स्वगीतेन श्रवणपथा तद्बृहद्धृदयप्रविष्टेन तन्मनः स्वरागरागित्वात् गृहात्प्रव्राज्य दृग्दरदच्छदनरमासदनषदनादि विविधविवधविबुधविबुधीकरणविविधकुसुमास्पदस्वच्छस्वच्छविवेन प्रस्थाप्य तत्क्षेत्रजमनोजं विविधदृग्रदनस्वेन्द्रनीलवज्रमणिरत्नाद्युपस्करगोपीतनुकामगकाञ्चनपुरेषु हृत्कमलसिंहासनेषु अरुण-सितासिततन्नयनतीर्थराजसलिलैरभिषेचयामास स च कुसुमायुधः कामः कृतघ्नतया तदुपकारं विस्मृत्य मनः स्वपितरं कृष्णगृहीतं मत्वा रतिरणाय कामगानकुसुमस्रगिषुचयमुक्ता मालभिन्दिपालालकादिपाशकण्ठशङ्खवक्त्रकचक्रकचभ्रूयुगासिधनुर्नेत्रशल्यकापाङ्ग-भल्लकरणोपस्करयुतान् स्वसुवर्णदुर्गान् गोपीवपूंषि स्वायुधकुसुमपूरितस्वमित्रवसन्ताक्रान्तवनान्तर्गतं कृष्णं स्वसम्मिलितसुवंशजत-दीयगीतदूतेनावगत्य तं प्रति मदनत्वान्मदोत्साहेन प्रेरयामास तत्प्रेरितास्ता रतिरणस्य कान्तेनैवोचितत्वाद्यत्र स कान्तस्तत्राजग्मुः किं भूताः जवलोलकुण्डलाः जवेन मदनप्रेरितरतिरणायागमनवेगेन लोलानि मकराकृतानि मकरध्वजध्वजरूपाणि कुण्डलानि यासां ताः, इति पूर्वोक्तपदसमुदायाभिप्रायः। पुनः कथम्भूताः अन्योन्यमलक्षितोद्यमाः गृहीतमनस्त्वेन परस्परविचाराक्षमत्वात् कामनृप-प्रेरणया प्रवृत्तावलब्धविचारावसरत्वाच्च ॥ ४ ॥

श्रीधनपतिसूरिकृता गूढार्थदीपिका

अथ तादृशगानानन्तरं यद्वृत्तं च तदाह—निशम्येति। तद्गीतमनङ्गस्य कामस्य वर्द्धनम् अङ्कुरितस्य कामस्य सर्वाङ्ग-सम्पूर्णतापादकम् एतेन एतस्याऽमृतसेकरूपत्वं सूचितम्। यद्वा, तद्गीतम् अनङ्गस्य सर्वाङ्गरहितस्य अनङ्कुरितस्यापि कामवर्द्धनं तत्क्षणमेवोत्पाद्याभिवृद्धिपर्यन्तानयनसामर्थ्यं नानास्तु व्रजस्त्रियश्चिरकालमारभ्य तद्विषयककामाविष्टस्वान्तास्तादृशं गीतं निशम्याकर्ण्य कलगीतलक्षणसूत्रगुम्फिताः पाञ्चालिका इवाऽऽजग्मुरिति वक्तव्ये स्वस्य कृष्णसन्निधानावेशादाजग्मुरित्युक्तम्। ननु, किं सर्वाऽपि व्रजस्त्रियः आजग्मुः तथा सति वामदृशां मनोहरमित्यनेन विरोध इति चेत्तत्राह—कृष्णगृहीतमानसाः कृष्णेनैव पूर्वमेव गृहीतवत्यः पतितत्वेनाङ्गीकृतवत्यः "सम्भ्रमः स्नेहमाख्याति" इत्युक्तत्वात् स्नेहव्यापकं तासां सम्भ्रममाह—जवेन लोले सकम्पे कुण्डले यासां ताः, अनेन कर्णव्यथानुसन्धानाभावः सूचितः। यद्वा, मां रक्षतीमालप्स्येयमपि यास्यतीति सापत्न्याभयात् कृष्ण-गृहीतमनुसत्वेन विचारास्फूर्त्तेर्वा अन्योन्यमलक्षितगमनोद्योगाः अत एव जवेन चञ्चलकर्णाभरणाः कुत्रेत्यत आह सः पूर्वमुपागतः कान्तो यत्र स्थितस्तत्र यद्वा, चोरचक्रवर्तिना श्रीकृष्णेन गृहीतानि मानसानि मनांसि तत्सम्बन्धीनि धृतिस्मृतिविवेकलज्जाभीतिमत्यादीनि च यासां ता आजग्मुः, अनेन कृष्णो हि महाचोराधिराजा वेणुगीताख्यं स्वभृत्यं महाचोरं व्रजे प्रेषितवांस्तेन च व्रजाङ्गनानां निवृत्तकर्णद्वारेणाऽन्तःकरण कोशागार प्रविश्य धैर्यादिमहारत्नपूरितमनोमञ्जूषाम् अपहृत्य झटित्येवानीय स्वस्वामिने दत्तां तां कृष्णात्प्रार्थयितुमिवेति सूचितम् अत एव महाचौरं धतु व्यग्रत्वात् सूचकमन आदेरऽपहृतत्वाद्वा अन्योन्यमलक्षितोद्यमाः अत एव जवलोलकुण्डलेति कङ्कणकिङ्किण्यादेरप्युपलक्षणम् अनेन बहिर्गृहस्थानापन्नस्थूलदेहस्थधान्यादिस्थानीयभूषणान्यल्पत्वबुद्ध्या चौरेण तेन नापहृतानीति ध्वनितं निवृत्तिपक्षेप्येवं भगवदनुग्रहीतस्य विवेकवैराग्यादिसाधनसम्पन्नस्यान्तःकरणेऽपि ब्रह्मणा श्रुतिरूपकान्ता-नामभिरमण सर्वतो वृत्तिनिरोधनं च सम्पन्नमित्याह—निशम्येति। तद्यथोक्तं गीतं व्रजस्त्रियः श्रुतीनां गवामवस्थिति स्थानं वेदो व्रजशब्देनाभिधीयते तत्सम्बन्धिन्यः स्त्रियः श्रुतयः श्रुत्वा सः कान्तः कमनीयः परमपुरुषार्थभूतः परमात्मा यत्र विवेक्यन्तःकरण-लक्षणे वने वर्तते तत्राजग्मुः ब्रह्मप्रतिपादकत्वेन स्फूर्तिगताः—

"तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता" ॥

इति भगवद्वाक्यात्स्वभक्तान्तःकरण स्थितः श्रुतिभिरभिरममाणः तदज्ञानं नाशयतीति विज्ञायत इत्यर्थः। आजग्मुरित्युक्त्या स्वान्तःकरणवर्तिपरमात्मन्येवाजग्मुरिति सूचयति, गीतं विशिनष्टि—अनङ्गवर्द्धनम् अस्मात् आदेशानेति नेत्युक्तस्य मूर्त्तामूर्त्त-

लक्षणाङ्गविनिमु क्तस्य निर्विशेषस्य ब्रह्मणो वर्द्धनमज्ञानावृतस्य तस्याज्ञाननिवर्तनेनाविर्भावकरम्, यद्वा, अङ्गानां देहानां वर्द्धनसङ्ख्यात देहोत्पत्तिकारणमज्ञानमङ्गवर्द्धनं तद्विरोध्यनङ्गवर्द्धनं कथम्भूताः व्रजस्त्रियः कृष्णेन सदानन्दस्वरूपेण परमात्मना गृहीतं मानसं तात्पर्यं यासां ताः कृष्णे तात्पर्येण समन्विताः पुनश्चान्योन्यमलक्षित उद्यमः परमात्मप्रतिपादनरूपोद्यमो यासा ताः परस्पराकाङ्क्षारहिताः प्रत्येकं स्वत एव प्रमाणभूता इति यावत् पुनश्च जवेन लोलानि झटिति नाशोन्मुखानि कुण्डलानि आशादिरूपाः पाशा याभ्यस्ताः विचारिताः सत्यः आशा जीवात्मपाशनिवर्त्तिका इति यावत् "कुण्डल कर्णभूषायां पाशेऽपि विलयेऽपि च" इति मेदिनी, मनसो वृत्तयोऽपि इन्द्रियलक्षणगवां वासस्थानत्वाद्देहो व्रजशब्देनोच्यते तदन्तरवस्थानाद्व्रजस्त्रियः कृष्णेन गृहीतं कारणभूतं मानसं यासां ताः कृष्णसक्तमनः सम्बन्धिन्यः। यद्वा, कृष्णेन गृहीतः स्त्रियत्वेनाङ्गीकृतः कृष्णानुगृहीतो विवेकादिसाधनसम्पन्नतस्य मानसः मनःसम्बन्धिन्यः नत्वऽनधिकारिणः परस्परं निरपेक्षव्यापारवत्यः तत्तदिन्द्रियद्वारा निस्सृत्य स्वस्वविषयप्रकाशने स्वतन्त्राः सः कान्तो यत्र वर्तते तत्र आजग्मुः बहिर्मुखतां विहायाऽन्तर्मुखतां प्राप्ताः तदानीं जवेन झटिति लोलानि कम्पितानि कुण्डलानि पाशाः याभ्यस्ताः समानमन्यत् ॥ ४ ॥

रास-रहस्यम्

र० टी०—अनङ्गवर्धनं अनङ्गस्य वर्धनं, न अङ्गं यस्य मूर्तामूर्तलक्षणविनिर्मुक्तस्य निर्विशेषस्यात्मनः, तस्य वर्धनं अज्ञाननिवर्तनेनात्मभावोद्दीपकं गीतं वेदान्तात्मकं हितं वाक्यं, यतो विवेकिनां हितवाक्यमेव प्रियं भवति, तन्निशम्य श्रुत्वा कृष्णेन कृषि-विलखने इति कर्षति जीवहृदयमिति कृष्णः, आकर्षयति आत्माभिमुखीकरोतीति वा कृष्णः तेन गृहीतमाकृष्ट मानसं मनः सम्बन्धिवृत्तयः, अन्योऽन्यमलक्षितोद्यमाः परस्परं न लक्षितो न ज्ञापितो आत्माभिमुखगमनोद्यमोऽध्यवसायो याभिस्ताः, जवलोलकुण्डलाः जवेन वेगेन लोलानि चंचलानि कुण्डलानि पाशानि रज्जुरिव बन्धनकारणानि यासां ताः "कुण्डलं कर्णभूषायां पाशेऽपि विलयेऽपि च।" इति कोशात्, व्रजस्त्रियः अन्तःकरणवृत्तयः, यत्र हृदयारण्ये सः कान्तः कं परमपुरुषार्थरूपं सुखं तनोतीति कान्तः आत्मा मुमुक्षुः इति यावत्, तत्रैव गीतध्वनिमार्गेण उपनिषदोक्तमार्गेण आजग्मुः, आजग्मुरिति वक्तव्ये आजग्मुरिति उक्त्या वृत्तीनां आत्मान्तिकत्वमेव ध्वन्यते इति भावः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अनङ्गवर्द्धनं कामोद्दीपकं गीतं निशम्याकर्ण्य भक्तेच्छापूरकेण कृष्णेन गृहीतमाकृष्टं मनो यासां ताः व्रजस्त्रियः अन्योन्यमलक्षितः अत्यौत्सुक्येन गमनवशात् उद्यमः श्रीकृष्णं प्रति गमनोद्योगो याभिस्ताः स श्रीकृष्णः कान्तो यत्र तत्र गीतध्वन्यनुसारेण आजग्मुः जवेन वेगेन लोलानि चञ्चलानि कुण्डलानि यासां ताः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सद्वंशजेति साध्वीव मुरली मुरहराधरसङ्गता स्वयं करकलिताऽप्यनिर्वाहपक्षे स्वस्वाम्यभिमतमियद्वा कर्तव्यमिति मती युवतीसमाह्वानतत्सङ्गमसाहितीमात्रं व्यतनोदिति ध्वनयन्नाह ॥ निशम्येति। कृष्णनिषक्तमानसा व्रजस्त्रियोऽन्योन्यं परस्परमलक्षितो विज्ञात आशयोऽन्तःकरणमभिप्रायो वा यासां तास्तदपेक्षयाऽहमेव प्राग्गत्वा तदङ्गसङ्गसौभाग्यभाग्या भवेयमिति परानवगमितवृत्ता इति यावत् कार्तस्वरलोलकुण्डलाः कृतस्वराख्याकरजसुवर्णमयानि लोलानि चलन्ति कुण्डलानि कर्णवेष्टनानि हस्ते बलया वा यासां ताः। कुण्डलं वलये पाशे कुण्डलं कर्णवेष्टन इति विश्वः। यत्र स गायनोऽनङ्गवर्धनं हरिसङ्गात्प्राङ्मन्मथोत्थापकत्वेनानन्तरं कन्दर्पदर्पछेदकत्वेनापीति तद्गीतं निशम्यास्ते तत्स्थलं प्रत्याजग्मुः। वर्धन छेदने वृद्धाविनि विश्वः। यथोक्त बृहदारण्यकभाष्ये। मयं तु मानुषं स्वर्णं पीतं गान्धर्वमेव च। इन्द्रगोपनिभं नाम्ना जाम्बूनदमिति स्मृत। दैवं चामीकरं नाम प्राग्धदादित्यसन्निभं। नैजो विशेषः स्वर्णानामेतेषां सर्वदैव च। नाग्न्यादिनाऽपि रूमतां यान्ति तानि कथञ्चनेति। अतः कार्तस्वरमिति सामान्यनामेति ज्ञेयम् ॥ ४ ॥

श्रीसुबोधिनी

अनंगं कामं वर्द्धयतीति तथा तद्गीतं निशम्य श्रुत्वा कृष्णेन गृहीतं मानसं यासाम् अन्योन्यं मिथोऽलक्षितो गुप्त उद्यमो याभिस्ता जवेन वेगेन लोलानि चंचलानि कुंडलानि यासां ता गोप्यो यत्र स कांतः श्रीकृष्णस्तत्राजग्मुः ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

निशम्य गीतमित्यत्र, यद्यपीति। उपक्रम एतत्सम्बन्धिरात्रिदर्शनस्यैव रिरंसाहेतुत्वेनोक्तेरिति भावः। **तथापीति**। **तदनङ्गवर्धन**मितिवचनाद्भगवदीयोनङ्गो यत्रास्ति त तत्र वर्धयत्येवेत्यतास्वपि स्थितः, स तेन तथा कृत इत्येता अप्यागता इत्यर्थः। **अत** एव वर्धकत्वमुक्त, न तु जनकत्वमिति भावः। एतदेवोक्त**माह्वानं सदृश**मित्यनेन। पूर्वापेक्षयाधुनात्युत्कटो जात इत्याशयेन **नूतन उत्पन्नः काम** इत्युक्तम् ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अनङ्गस्य कामस्य वर्धनमुद्दीपकं तस्य गीतं व्रजे स्थिताः स्त्रियो निशम्य यत्र स्थाने वने स कान्तः कमनीयतया पतित्वेन स्वीकृतः कृष्णोऽस्ति तत्र जग्मुरित्यन्वयः। असापत्न्याय अन्योन्यमलक्षितो न ज्ञापितो गमनोद्यमो याभिस्ताः। तासां गमने त्वरां सूचयन्नाह—जवेन वेगेन लोलानि चञ्चलानि कुण्डलानि यासां ताः। एवंगमने हेतुमाह—कृष्णेन स्वसौन्दर्यसौस्वर्यादिभिर्गृहीतानि आकृष्टानि मानसानि देहेन्द्रियादिप्रवर्तकानि मनांसि यासां ता इति ॥ ४ ॥

अन्वितार्थप्रकाशिका

निशम्येति ॥ अनङ्गस्य कामस्य वर्धनमुद्दीपकं तस्य गीतं निशम्य कृष्णेन गृहीतमाकृष्टं मानसं मनः गृहीतानि मानसानि मनःसंबन्धानि धृतिलज्जादीनि वा यासां ताः असापत्न्याय अन्योन्यमलक्षितो न ज्ञापितो गमनोद्यमो याभिस्ताः जवेन वेगेन लोलानि चञ्चलानि कुण्डलानि यासां ताः व्रजस्त्रियो गोप्यः यत्र स्थाने वने स कान्तः श्रीकृष्णोऽभूत् तत्रैव गीतध्वनिमार्गेण आजग्मुः। जग्मुरिति वक्तव्ये आजग्मुरिति वदन् श्रीशुकः श्रीकृष्णान्तिकस्थमिवात्मानं मन्यते स्म ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनंगस्य श्रीकृष्णस्पर्शाभिलाषस्य वर्द्धनं तत् व्रतकारकवनिताकर्षणं गीतं निशम्य श्रुत्वा कृष्णेन गृहीतमाकृष्टं मानसं यासां ताः सेर्ष्यभावादन्योऽन्यमलक्षितः, अज्ञापितो गमनोद्यमो याभिस्ताः जवेन गमनवेगेन लोलानि चंचलानि कुंडलानि यासां ताः यत्र सः कांतो मनोहरः श्रीकृष्णः स्थितोऽस्ति तत्र स्थाने गीतशब्दवर्त्मना आजग्मुः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निशम्येति ॥ अनङ्गवर्द्धनं मन्मथोद्दीपकं, तत् गीतं, निशम्याकर्ण्य, कृष्णेन गृहीतं मानसमन्तःकरणं यासां ताः। यद्वा, कृष्णे श्रीकृष्णे गृहीतं निवेशितं मानसं यासां ताः, अन्योन्यं परस्परमलक्षितो न ज्ञातः उद्यमः श्रीकृष्णं प्रति गमनोद्योगो यासां ताः, जवेन चलनवेगेन लोलानि चञ्चलानि कुण्डलानि यासां ताः, व्रजस्त्रियः, यत्र स कान्तः स्वमनोहरः श्रीकृष्णोऽस्ति, तत्र आजग्मुः गीतध्वनिमार्गेणायन् ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

निशम्य गीतमिति : १०.२९.४.

शारदागमविशारदराका नायकाधिकविकासितकामा। यामि यामुनतटीनिकटस्थं श्यामधाम निजधाम विहाय ॥ २८ ॥
कुञ्जे शरदि वसन्तं कुसुमेष्वनुभूतविविधरसगन्धम्। भ्रमरं द्रष्टुं यामीत्यूचे काचित्स्फुटं स्वगुरुसविधे ॥ २९ ॥
त्यजन्तु बत मां पतिश्वशुरबन्धुवर्गाश्चिरं ब्रवीतु किमपि व्रजस्थितजनो व्रजाम्येव तम्।
करोति मुरली यतः कुशलदूत्यकं मत्कृते ततश्च परमाधरामृतरसं पिबाम्यञ्जसा ॥ ३० ॥
मुरली तरलीकरोति कस्मात्सरलां मां गरलायमानशब्दा। विरलाङ्गुलि तत्करस्य लोल्यं परनारीज्वरकारि वा तदेतत् ॥ ३१ ॥
दैत्यारिरेष तनुतां तनुतापदानं यत्तस्य विश्रुतमिहाश्मविशोभिवक्षः।
त्वं कोमलाऽसि सरला सकलानुरागा चित्रं मुरल्यतनुतापमलं तनोषि ॥ ३२ ॥
लब्ध सुखं स्वमपहाय परंपरस्याः का वा यतेत सहचर्यपि सौख्यदाने।
एकैव तत्त्वमसि धन्यतमा यदन्यामाकारयस्यतुल-रत्यधरामृताप्त्यै ॥ ३३ ॥
श्रीजानिरेष तनुतापहरः सदैवाऽऽनन्दप्रदः शुभयशा विशदस्वभावः।
तद्युक्तमेव करवृत्तिरमुष्य च त्वं यन्मनमनोभवसमृद्धिसुखं तनोषि ॥ ३४ ॥
इत्युत्साहकृतानेक-कल्पनाक्षिप्तमानसाः। निम्नोन्नतमजान्त्यो गोपिकाः प्रस्थितास्तदाः ॥ ३५ ॥
सर्वा इन्द्रियवृत्तयोऽपि विषयं स्वं स्वं विभाव्याञ्जसा तत्रायान्ति न तद्गतावपि मनागन्योन्यसापेक्षता।
एकश्चेद्विषयस्तदा तु सकला एकीभवन्त्यादरादेतद्व्यक्तमभूदलक्ष्यगमनैः श्रीकामिनः सन्निधौ ॥ ३६ ॥
यस्मादस्त्यधुनेशः स सदारामे विरामवृत्तिरतः। अस्मच्चित्तविरामो नियतं भवितेति तत्र तं जग्मुः ॥ ३७ ॥
यत्पत्यपत्य-धनधामधियोऽपि गोप्यस्त्यक्त्वाखिलं हरिपदाब्जमगुर्न चात्र।
चित्रं मनागपि यतः श्रुतिसारभूतं गीतोपदेशमकृत प्रभुरेव साक्षात् ॥ ३८ ॥

कृष्णप्रिया

ब्रजवनिताओं ने आनन्दरसवर्द्धक कल गान सुना, इनका चित्त श्यामसनोहर श्रीकृष्ण में ही लग गया, अब सब ब्रजवनिताओं ने प्रियतम के समीप जाने की न परस्पर सूचना दी और जाने का अन्य को पता भी न लग जाय इस प्रकार से

अपने कमनीय कान्त श्रीकृष्ण जी जहाँ विराजमान थे वहाँ वेगगति से दौड़ने लगी, तब सांख्य और योग नाम के उन श्रुतियां गोपीओं के कानों के कुण्डल भी लालायित बनकर हिल रहे थे ॥ ४ ॥

दुहन्त्योऽभिययुः काश्चिद् दोहं हित्वा समुत्सुकाः । पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ॥ ५ ॥
परिवेषयन्त्यस्तद्धित्वा पाययन्त्यः [१]शिशूनथ । शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोजनम् ॥ ६ ॥

कर्दमक्षमा

अन्वयः—समुत्सुकाः, काश्चित्, दुहन्त्यः, दोहं, हित्वा, अभिययुः, काश्चित्, पयः, अधिश्रित्य, अभिययुः, अपराः, संयावम्, अनुद्वास्य ययुः ॥५॥ काश्चित्, परिवेषयन्त्यः, तत्, हित्वा, ययुः, अथ, (काश्चन) शिशून्, पाययन्त्यः, तत्, हित्वा, ययुः, काश्चित्, पतीन्, शुश्रूषन्त्यः, ययुः, (अन्याः) अश्नन्त्यः, भोजनम्, अपास्य, ययुः ॥ ६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीकृष्णसूचकशब्दश्रवणेन तत्प्रवणचित्तानां तत्क्षणमेव त्रैवर्गिककर्मनिवृत्तिं द्योतयंत्य इवार्धावसितं कर्म विहाय ययुस्तदाह । दुहंत्य इति । पयः स्थालीस्थं चुल्ल्यामधिश्रित्यैतत्काथमप्रतीक्षमाणाः काश्चिद्ययुः । संयावं गोधूमकणान्नं पक्कमनुद्वास्य अनुत्तार्य ॥ ५-६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

श्रीकृष्णसूचकशब्दो वेणुनादः । तस्मिञ्श्रीकृष्णे प्रवणं संलग्नं चित्तं येषां ते तथा 'प्रवणं नतलग्नयोः' इति धरणिधरः । तत्क्षणम् भगवत्संबन्धिशब्दश्रवणक्षण इत्यर्थः । हरिसंलग्नमनसामपि लोकसंग्रहार्थं त्रैवर्गिककर्म कार्यमिति सूचयितुमिवशब्दमाह—द्योतयंत्य इवेति । अर्द्धावसितम् अर्द्धसमाप्तम् "अवसितमृद्धे ज्ञातेऽप्यवसानगते च वाच्यलिंगं स्यात्" इति मेदिनी । तत् अर्द्धावसितम् । चुल्ल्याम् अग्निसंरोधयंत्रे उद्धाने 'चुल्ली चितायामुद्धाने' इति मेदिनी । अधिश्रित्य श्रपयितुमारोप्य । एतत्काथम् पयःक्वथनम् । प्रतीक्षमाणाः कालविलम्बमसहमानाः । अनवतार्य अनवरोप्य ॥ तासां तत्पार्श्वगमनकाले परमोत्कंठया विलंबस्यासह्यत्वात् । ममताहंतास्पदकर्मापेक्षाभावं श्लोकत्रय्या वदन् कासांचित्स्वज्ञातिधर्मपरित्यागमाह—दुहन्त्यः गाः दोहयन्त्यः, तं दोहं दोहनकर्म हित्वाऽभिययुरभिसस्रुः । पयो दुग्धं पात्रस्थं चुल्ल्यामधिश्रित्याध्यारोह्य एतत्काथमप्रतीक्षमाणाः । काश्चित्संयावं गोधूमकणान्नं पक्कमप्यनुद्वास्यानवतार्य ॥ अत्र तोषिणी—एवं तत्प्राप्तिमुक्त्वापि परममोहनतद्गीतेनाऽऽवेगान्निजदेहदैहिकाद्युपेक्षयात्मकर्मलोकधर्मादिकं परित्यज्य चलितानां श्लोकत्रय्या विशेषप्रतिपत्तये पुनः प्रस्थानोद्यममेव वर्णयंस्तत्रादौ कासांचित्स्वजातिकर्मपरित्यागमाह—दुहन्त्य इति । युग्मकमिदम् । दुहन्त्यो गाः, अंतर्भूतण्यर्थत्वाद्दोहयन्त्य इत्यर्थः । अभिययुः, वेणुगीताभिमुखं ययुः । काश्चिदित्यादिकं बहुषु यूथेषु कासांचिदेकक्रियासंघटनात् 'वनिताशतयूथपः' इति वक्ष्यमाणत्वात् । दोहं दोहनं दुग्धं वा । तथाऽभियाने हेतुः—समुत्सुकाः कालविलंबसहनाद्यसमर्थाः । एष हेतुरग्रेपि सर्वत्रानुवर्त्यः । अपरा इत्यस्य पूर्वेण परेणाप्यन्वयः, एवमग्रेपि । अन्यत्तैः । यद्वा—पयश्च्चुल्ल्यामधिश्रित्यानुद्वास्य पक्कमपि ततोऽनवतार्य संयावञ्चाधिश्रित्यानुद्वास्येति ॥ ५ ॥ परिवेषयन्त्यः भुंजानानां पात्रेषु भोक्तव्यं विन्यस्यन्त्यः । सुतान् पयः क्षीरं पाययन्त्यः । स्तनपानं कारयन्त्य इत्यर्थः । शुश्रूषंत्यः पादसंवाहनादिना । अश्नंत्यः भुंजानाः । अपास्य हित्वा ॥ स्त्रीमात्रधर्मत्यागमाह—परिवेषयन्त्यः । तत् परिवेषणम् । पतीनुष्णोदकप्रदानादिना शुश्रूषन्त्यः ॥ अत्र तोषिणी—एवं कासांचित्सायंतनमुख्यकर्मत्रयत्यागमुक्त्वा तत्रैव कासांचिल्लोकधर्मत्यागं पादत्रय्या वदंस्तत्रादौ कासांचित्सामान्यबंधुभृत्यादिपरित्यागमाह—परीति पादेन । परिवेषयन्त्यः बंधुभृत्येभ्य इति शेषः । तत्परिवेषणं हित्वा ययुरिति पूर्वेणैवान्वयः । अतिस्नेहास्पदपरित्यागमपि कासांचिदाह—पाययन्त्य इति पादेन । हित्वेत्यनुवर्तते वक्ष्यमाणानुसारेण । भगिनीयातृपुत्रादीन् हित्वा अन्यथा रसाभासापत्तेः । एवंलोकपरित्यागमुक्त्वा धर्मपरित्यागमाह—शुश्रूषंत्यः शुश्रूषमाणाः । स्नानाद्यर्थोष्णोदकार्पणादिना सेवमानाः । कासांचिद्देहापेक्षात्यागमाह—अश्नन्त्य इति । अश्नन्त्यः भुञ्जानाः । अनेन तत्प्रेमाविष्टेषु दैहिकशुद्ध्यशुद्धिविचारो नास्तीति गम्यते । अत्रैवं संदर्भः—शिशून्भगिनीयातृपुत्रादीन् 'पयो गवां सुतान् स्तनम्' इत्युक्तेरालंबनवैरूप्यात्, 'सर्वाः शरत्काव्यकथारसाश्रयाः' इति वक्ष्यमाणरसाश्रयविरोधाच्चेत्याह—शुश्रूषंत्य इत्यन्तगृहीतिकाः काश्चिदेव ज्ञेयाः, अन्यासाम् 'यत्पत्यपत्यसुहृदाम्' इत्यादिना तदस्वीकारादिति ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं तत्प्राप्तिमुक्त्वापि परममोहनतद्गीतेनावेगान्निजदेहदैहिकाद्यपेक्षया आत्मकर्मलोकधर्मादिकं परित्यज्य चलितानां श्लोकत्रय्या विशेषप्रतिपत्तये पुनः प्रस्थानोद्यममेव वर्णयन् तत्रादौ कासाञ्चित् स्वजातिकर्मपरित्यागमाह—दुहन्त्य इति युग्मक-

---

[१] पयः-श्रीधर. वंशो. जीव. वीर. विज. विश्व. शुक. सु. ध. ।

मिदम्। दुहन्त्यो गाः अन्तर्भूतण्यर्थत्वात् दोहयन्त्य इत्यर्थः। अभिययुः वेणुगीताभिमुखं ययुः काश्चिदित्यादिकं बहुषु यूथेषु कासाञ्चिदेकक्रियासङ्घट्टनात् "वनिताशतयूथपः" इत्यग्रे वक्ष्यमाणत्वात् दोहं दोहनं दुग्धं वा तथाभियाने हेतुः समुत्सुकाः कालविलम्बसहनाद्यसमर्थाः एष हेतुरग्रेपि सर्वत्रानुवर्त्त्यः, अपरा इत्यस्य पूर्वेण परेणाप्यन्वयः एवमग्रेपि। अन्यत्तैः। यद्वा, पयश्चुल्यामधिश्रित्य अनुद्वास्य पक्वमपि ततोऽनवतार्य्य संयावं च अधिश्रित्याऽनुद्वास्येति एवं कासाञ्चित् सायन्तनमुख्यकर्मत्रयपरित्यागमुक्त्वा तत्रैव कासाञ्चिल्लोकधर्मत्यागं पादत्रय्या वदन् तत्रादौ कासाञ्चित् सामान्यबन्धुभृत्यादिपरित्यागमाह—परीति पादेन। परिवेषयन्त्यः बन्धुभृत्यादिभ्य इति शेषः। तत्परिवेषणं हित्वा ययुरिति पूर्वेणैवान्वयः। अतिस्निग्धपरित्यागमपि कासाञ्चिदाह—पाययन्त्य इति पादेन। हित्वेत्यनुवर्त्तते वक्ष्यमाणानुसारेण भ्रातृपुत्रादीन् हित्वा अन्यथा रसाभासापत्तेः एवं लोकपरित्यागमुक्त्वा धर्मपरित्यागमाह—शुश्रूषन्त्यः शुश्रूषमाणाः स्नानाद्युष्णोदकार्पणादिना सेवमानाः स्थापयिष्यते कासाञ्चिद्देहापेक्षात्यागमप्याह, अश्नन्त्य इति। अश्नन्त्यो भुञ्जानाः अनेन तत्प्रेमाविष्टेषु दैहिकशुद्ध्यशुद्धिविचारो नास्तीति गम्यते ॥ ५–६ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

परमोहनतद्गीतेन निजदेहदैहिकाद्युपेक्षयात्मकर्म्मलोकधर्म्मादिकं परित्यज्य गता इति श्लोकत्रय्या वर्णयन् तत्रादौ कासाञ्चित् स्वजातिकर्म्मपरित्यागमाह—दुहन्त्य इति। दुहन्त्यो गा दोहं दोहनं दुग्धं वा तदानीमत्र गोपीनामपि कृष्णार्थं गोदोहने प्रवृत्तेः; यद्वा, अन्तर्भूतण्यन्तं दोहयन्त्य इत्यर्थः। अभिययुर्वेणुगीताभिमुखं ययुः, काश्चिदित्यादिकं बहुलयूथभेदापेक्षया 'वनिताशतयूथपः' इत्यग्रे वक्ष्यमाणत्वात्, तत्तन्नाम्नामग्रहणं गौरवभरात्, किंवा तेषां स्मरणविशेषत्वेन प्रेम-वैकल्पादनभयात्, एतच्च श्रीभागवतामृतपूर्व्वखण्डे विवृतमेव। तथाभियाने हेतुः समुत्सुकाः कालविलम्बसहनासमर्थाः; एष हेतुरग्रेऽपि सर्व्वत्रानुवर्त्त्यः। अपरा इत्यस्य पूर्व्वेण परेणाप्यन्वयः, एवमग्रेऽपि; अन्यत्तैर्व्याख्यातम्; यद्वा, पयश्चुल्ल्यामधिश्रित्य अनुद्वास्य पक्वमपि ततो नोत्तार्य्य संयावं चाधिश्रित्यानुद्वास्येति ॥ ५ ॥ एवं कासाञ्चित् सायन्तनमुख्यकर्म्मत्रयपरित्यागमुक्त्वा तत्रैव कासाञ्चिल्लोकधर्म्मत्यागं पादत्रय्या वदन् तत्रादौ कासाञ्चित् सामान्यबन्धुभृत्यादिपरित्यागमाह – परीति पादेन परिवेषयन्त्यः बन्धून् भृत्यादींश्च प्रति अन्नादिकं संविभाज्यार्पयन्त्यः स्थिताः, तत् परिवेषणं हित्वा ययुरिति पूर्व्वेणैवान्वयः। यद्यप्येतदपि सायन्तनकृत्यान्तरेव प्रविशति, तथापि स्त्रीणां भर्त्तुर्बन्धुभृत्याद्युपेक्षया लोकधर्म्मत्यागान्तरेव सुखं संगच्छेतेति दिक्। अनुपेक्ष्याणामपि परित्यागं कासाञ्चिदाह – पाययन्त्यः इति पादाभ्याम्। हित्वेत्यनुवर्त्तते, शिशून् भगिनीपुत्रादीन् हित्वा। एवं लोकपरित्यागमुक्त्वा धर्मपरित्यागमाह—शुश्रूषन्त्यः शुश्रूषमाणाः, स्नानाद्यर्थोष्णोदकार्पणादिना सेवमानाः, अश्नन्त्यः आशयन्त्य इत्यन्तर्भूतण्यन्त्यं, पतीन् भोजयन्त्यो भोजनं भोजयितृत्वम्; यद्वा, एवं पूर्व्वं धर्म्मादिपराणामपि परमसतीनां लोकधर्म्मत्याग उक्तः। कासाञ्चिद् देहापेक्षात्यागमाह—अश्नन्त्य इति पादैस्त्रिभिः। अश्नन्त्यो भुञ्जानाः, एवं भोजनत्यागेन भगवत्प्रीणनस्य देहस्योपेक्षोक्ता। अनेन तत्प्रेमाविष्टेषु दैहिकशुद्ध्यशुद्धिविचारो नास्तीति गम्यते। लिम्पन्त्यश्चन्दनपङ्कादिना निजदेहानुलेपं कुर्व्वत्यः, लेपनादिकमपास्येति ज्ञेयम्। एवं भोगसंस्कारस्यापि त्यागेन देहोपेक्षा सिद्धैव ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कृष्णगृहीतमानसत्वमेव तच्चेष्टाभिः प्रपञ्चयति—दुहन्त्य इति त्रिभिः। काश्चिद्व्रजस्त्रियो गाः पयो दुहन्त्यः सत्यो दोहं हित्वा समुत्सुकाः कृष्णे इति शेषः। तमभिययुः प्रापुः अपरास्तु स्थालीस्थं क्षीरं चुल्ल्यामधिरोप्य तत्क्वाथमप्रतीक्षमाणा ययुः काश्चित्तु संयावं गोधूमकणान्नं पक्वमनुद्वास्याऽनवरोप्य ययुः ॥ ५ ॥ काश्चित्परिवेषयन्त्यः पत्यपत्यादीन् भोजनार्थं निवेश्यान्नादिकं पात्रेषु ददत्यः तत्परिवेषणं हित्वा अपरास्तु शिशून् पयः पाययन्त्यः तद्धित्वा अन्यास्तु पतीन् शुश्रूषन्त्यः, उपचरन्त्यः शुश्रूषां हित्वा अपरास्त्वश्नन्त्यो भोजनम्पात्रमपास्य हित्वा ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तदा तासां भावविशेषं कथयति, दुहन्त्य इति। दोहनक्रियां दोहनपात्रं वा अधिश्रित्य पयः श्रपयितुं चुल्ल्यामारोप्य संयावं क्वाथदन्नमनुद्वास्य अनवरोप्य ॥ ५ ॥ परिवेषयन्त्यः भुञ्जानानां पात्रेषु भोक्तव्यं विनिक्षिपन्त्यः तत्परिवेषणं पाययन्त्यः स्तनादिकमिति शेषः। पादमर्दनादिना शुश्रूषन्त्यः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

दुहन्त्यः दोहयन्त्यः, अभिययुः चलितवत्यः शिशून् भगिनीयातृपुत्रादीन् पयो गव्यं सुतान् स्तनमित्युक्तेरालम्बनवैरूप्यात् "सर्वाः शरत्काव्यकथारसाश्रयाः" इति वक्ष्यमाणरसाश्रयविरोधाच्च शुश्रूषन्त्यः इत्यन्तगृहरीतिकाः काश्चिदेव ज्ञेयाः अन्यासां यत् पत्यपत्यसुहृदामित्यादिना तदस्वीकारात् ॥ ५–८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तासामौत्कण्ठ्याधिक्य–प्रकटनाय पूर्वमाजग्मुरित्यतीतकालं निरूप्य पुनरागमन–प्रकारमादितः कथयन्नावेगनामानं भावं दर्शयति—दुहन्त्योऽभिययुरित्यादि बहुभिः। दुहन्त्य इत्यन्तर्णिजन्तम्, भ्रात्रादि–द्वारा दोहयन्त्य इत्यर्थः। दोहं हित्वेति दोहस्थानात् पुनर्गृहं न गतास्तत एवाययुरित्यर्थः। पराः पयोऽधिश्रित्य, न त्वपाश्रित्य, अपरा संयावमनुद्वास्य नावतार्य, काश्चित् परिवेषयन्त्यो भुञ्जानेषु गुरुषु परिवेषणं कुर्वत्यस्तदपराः शिशून् बालान् रक्ष्यतोकान् गव्यं पयः पाययन्त्यो लिम्पन्त्योऽनुलेपनं कुर्वत्योऽन्याः प्रमृजन्त्यः प्रकर्षेणाङ्गमार्जनं कुर्वत्योऽञ्जन्त्यो नयनमञ्जनेन रञ्जयन्त्यः, काश्चित् पतीन् पत्यभिमानिनः शुश्रूषयन्त्य उपचारादिनानुरञ्जयन्त्यः अन्या अश्नन्त्यो भोजनं कुर्वत्यस्तदपास्य ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तासां तत्पार्श्वगमनकाले परमोत्कण्ठया विलम्बस्यासह्यत्वात् ममताऽहन्तास्पदकर्मापेक्षाभावं श्लोकत्रय्या वदन् कासाञ्चित् स्वजातिधर्मपरित्यागमाह—दुहन्त्यः गा दोहयन्त्यः तं दोहं दोहनकर्म हित्वा अभिययुरभिसस्रुः पयो दुग्धं पात्रस्थं चुल्लयामधिश्रित्य अध्यारोह्य एतत् क्वाथमप्रतिक्षमाणाः काश्चित् संयावं गोधूमकणान्नं पक्वमप्यनुद्वास्य अनवतार्य्य स्त्रीमात्रधर्मत्यागमाह–परिवेषयन्त्यस्तत्परिवेषणं पतीनुष्णोदकप्रदानादिना शुश्रूषन्त्यः ॥ ५–६ ॥

श्रीरसिकाल्हादिनी टीका

एवं कृष्णाकृष्टमनस्त्वेन सामान्यतो गमनमुक्त्वा देहदैहिकाद्यनादरं कुर्वन्त्य ऐहिक—पारलौकिक–कर्मस्वभिनिवेशमकुर्वन्त्यो योगिन इवाप्रत्यभिपत्तिरूपेण गृहादित्यागेन ययुरित्याह दुहन्त्य इति। तत्र काश्चिद्दुग्धाभिनिवेशवत्वं स्वजीवनभूतदुग्धाग्रहं हित्वा चलिता इत्याह दुहन्त्य इति, उपासनासिद्धानामागमनमुक्तम्। दुहन्त्य णिजर्थोन्तर्भूत एव दोहयन्त्य इत्यर्थः। दुह्यत इति दोहो दोहनकर्म दुग्धं वा पात्रं वा तत्रैव त्यक्त्वा कथं भविष्यतीत्यनुसन्धानमप्यकुर्वन्त्यो ययुः, अभिनिशङ्कं यथा तथा पत्यादिभ्यो भयमकुर्वन्त्यो ययुरिति यतः समुत्सुकाः कालविलम्बमसहमानाः काश्चित्पयो आनीतं दुग्धं चुल्ल्यामधिश्रित्य क्वथितमप्रतीक्षमाणाः ययुः। अपराः संयावं गोधूमकणामपक्वमप्यनुनूयेयुः समुत्सुका इति सर्वासां विशेषणम् ॥ ५ ॥ एवं लौकिकजीवनोपाययुक्तानां गृहं त्यक्त्वा कासांचिद्गमनमुक्तम्। इदानीं पत्यादिशुश्रूषणलक्षणस्य धर्मस्य त्यागमाह परिवेषयन्त्य इति। काश्चित्सिद्धमन्नं बन्धुभ्यः परिवेषयन्त्यस्तेष्वपेक्षितमदत्वा ययुः परिवेषयन्त्य इति ऋषिरूपाणामागमनमुक्तम्, काश्चित्वात्सल्यप्रेमविषयान् स्तनन्धयान् शिशूंस्तन्यमपाययन्त्यस्तेषां तृप्तिमप्रतीक्षमाणाः स्नेहं त्यक्त्वा ययुः पाययन्त्य इति दण्डकारण्यवासिरूपाणामुक्तम्, काश्चिद्पतीन् शुश्रूषन्त्यस्तच्छुश्रूषालक्षणं धर्मं त्यक्त्वा ययुः। शुश्रूषन्त्य उपासनासिद्धानां मुनिरूपाणामागमनमुक्तम्। यद्यपि पतिशुश्रूषणया धर्म सिद्ध्यतीति कामतापशान्तिश्च भवति तथाय लौकिकधर्मेन लौकिकधर्मेति रसमुक्तम्। लौकिकतापापनोदनहेतूनामपि— लौकिककामतापः निवार्यते सामर्थ्याभावसूचितः। काश्चिदश्नन्त्यो भोजनं कुर्वन्त्यस्तदपास्य त्यक्त्वा ययुः, उदरपूर्त्तिमप्रतिक्ष्यमाणाः ॥ ६ ॥

विशुद्धरसदीपिका

अथ श्रीकृष्णसूचकध्वनिश्रवणानन्तरं तत्प्रवणचित्तानाम् अनुषङ्गेण तत्क्षणमेव त्रैवर्गिककर्मनिवृत्तिं द्योतयंस्तासां स्वस्वभावाभिव्यञ्जकां क्रियां तन्निवृत्तिं च दर्शयति—दुहन्त्य इत्यादित्रिकेण। तत्रादौ "तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः" इति महापुरुषानुज्ञानुसारेणावतारितदेव्यंशानां ता अशिनीनामेवासां प्राणसख्योऽभवन् व्रज इति तत्प्राणसखीत्वं दर्शयन् स्वजातिकर्मपरित्यागपूर्वकं तत्तद्यूथेश्वरीकरणीयं दोहनादिकं ताः कुर्वत्यः प्रस्थिता इत्याह—दुहन्त्य इत्यादिस्पष्टम्। एवं चान्तर्भावितण्यर्थकल्पनापि परास्ता किं कृत्वा ? दोहं हित्वा तत्र हेतुः समुत्सुका इति, कालविलम्बमसहमानाः पयः स्थालीस्थं चुल्यामधिश्रितं तदुत्तारणमप्रतीक्षमाणाः संयावं गोधूमकणमेलितं क्वथितं पयः "थूली" इति प्रसिद्ध तदनुद्वास्य अनवतार्य्य ययुः, एवं च सायन्तनमुख्यकर्मपरित्यागः सूचितः। एताः परिचारिकाप्रायत्वाद्देव्यंशा एवेति मुख्यव्यक्तम् ॥ ५ ॥ कासाञ्चित्साधकचरीणां सामान्यबन्धुपरित्यागमाह—परिवेषयन्त्य इति। अन्याः भ्रातृजायादयः परिवेषणं कुर्वतीः प्रयोजयन्त्य इत्यर्थः। शिशून् प्रजावत्यादिबालान् पयः पाययन्त्यः इति स्नेहादिपरित्याग उक्तः ते च भ्रातृपुत्रादय एव ज्ञेयाः अन्यथा रसाभासापत्तेः तथा तत्पेयं गवामेव पयः, अत एव सुतान् स्तनमिति नोक्तं ततश्चैता दुर्गाव्रतपरा धन्याद्याः कन्या इति ज्ञेयम्। शुश्रूषन्त्यः पतीनीति श्रुतिमुनिरूपाः वक्ष्यमाणदेहत्यागपूर्वकं प्राप्तियोग्याः पतीनिति पतिम्मन्यानित्यर्थः कासाञ्चिद्देहापेक्षापरित्यागमाह—अश्नन्त्य इति। एता नित्यसिद्धाः परिचारिकाः देव्यंशानामेताभिः सम्मिलितानां तादृशत्वं संभवत्वित्यत्र सम्पूर्वस्य भवतेर्मिलनार्थत्वादिति ज्ञेयम् ॥ ६ ॥

श्रीरामनारायणकृता भावभावविभाविका

तत्र पृथक् पृथक् तासां गमनदशामाह—दुहन्त्योभिययुरिति। अत्र भगवत्प्रेमपथाचार्यभूता गोप्यः स्वयं राधाकृष्णस्वरूपा अपि कलिजनोद्धारायान्यधर्मादिसामर्थ्यमपश्यता धर्मसंस्थापनायावतीर्णेन भगवता सर्वावतारशिरोमणिना सर्वधर्मशिरो-

मणिमुद्भावयताऽऽविर्भावितप्रेमपथप्रवृत्त्यै लीलामिषेण तदङ्गधर्मानुपदिशति—तत्र गृहादिभ्यो विच्छिद्य भगवत्प्रापकतदीयगीतं तद्वंशा येऽच्युतगोत्रा गुरवः तद्द्वाराश्रवणमात्रेणातिविक्लवितमनस्त्वेन सुसमृद्धाद्बन्धुजनपूर्णाद्गृहादप्यैहिकामुष्मिकनिष्कामतया सद्यः परिव्रज्य तल्लीलासुखप्रापकवनं प्रति गमनं "नैवारब्धं परित्यजेत्" इत्यादिवाक्यानामपूर्णकर्मत्यागे दोषविधायकानामन्याधिकारप्राप्तानां न प्रेमपथप्रवेशः। अत्र तु "यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति श्रुत्या नैहिकामुष्मिककर्मपूर्णतापेक्षा असमाप्य तत्कृत्यं सर्वमुत्सज्य तद्वंशानुगतया भगवद्धामतल्लीलाप्रवेशाय समुद्यम एवोचित इति स्वयमनुष्ठाय स्वाचरितेन बोधयन्ति—

"परोपदेशवेलायां सर्वे व्याससमा द्विजाः। तदनुष्ठानवेलायां मुनयोऽपि न पण्डिताः" ॥

इतिवन्न कथनमात्रम् तत्र काश्चिद्दुहन्त्यो गाः दोहयन्त्योऽभूवन्निति त्यागात्पूर्वं स्वकुलविहितधर्मानुष्ठानं यथा द्विजाः "स्वर्गकामो ज्योतिष्टोमेन यजेत्" इत्यादिसकामश्रुतिगोरसममृतादिप्राप्तिमिच्छन्त्यस्ताः श्रुतीर्गाः तत्कर्मानुष्ठानेन दोहयन्तोऽच्युतगोत्रमुखात्तद्गीतं गीताद्युपश्रुत्य तद्धित्वा समुत्सुका गृहात् प्रव्रजन्ति तथा दोहं हित्वा इत्यपूर्णकर्मत्याग उपदिष्टः समुत्सुकाः सम्यगुत्साहवन्त्योऽभिययुः वंशमभिमुखीकृत्य भगवदभिमुखं ययुरिति गुरुहरिसन्मुखतोपदिष्टाः तत्र दोहत्यागगमनोत्साहयोरयमभिप्रायः दोग्ध्रा गोपालनन्दनेन श्रुतिगोरसगीता दोहनवत् श्रुतिरूपगोपिकान्तरिन्द्रियगोरसं प्रेमबन्धनेनाच्छाद्य वंशध्वनिनैव दुग्धम् अथ बाह्येन्द्रियगोरसं भुजबन्धनेनाच्छाद्य कुचमर्दनेन दोहयितुं गृहगतं लज्जाबन्धनम् उत्साहजवेन त्रोटयित्वा रतिरसपूरितस्तनभारनमितक्षीणमध्या गृहसुखं तृणवत्त्यक्त्वा समुत्सुका ययुः अन्तरङ्गप्रयोजनप्राप्तौ बहिरङ्गत्यागवदन्तरङ्गगोदोहने बाह्यगोदोहनत्याग उचित एव अन्यासां चरितमाह—पयोधिश्रित्येति। उपदेशः पूर्ववत् अयमत्र विशेषः यथा केचित्सज्जनाः स्वजीवनं सफलीकर्त्तुं स्नेहसारान्विते श्रुतिगोरसे समन्वितं कृत्वा विरहज्वालतापेन तत्सुपक्वतां सम्पादयन्ति तथाऽपरा गोप्यः स्वजीवनान्नं सुस्निग्धे पयसि मेलितं संयावं सुस्वादुसुपक्वकरणायाग्नावधिश्रित्य भगवता वंशधमनेन हृच्छयहृच्छयाग्नौ प्रज्वलिते तापाधिक्योद्वलिते स्नेहरसेऽन्तस्तापसन्तप्ता बाह्यानुसन्धानशून्यास्तमनुद्वास्यैव ययुः तथा च यदान्तरतापवर्द्धिर्बहिः स्वजीवनसाफल्याय सेवितगोरसमपि त्यज्यते तदा किमु वाच्यं सकामश्रुतिगोरसत्यागे अत्रास्माभिरन्यनिरूपितगोपीनां न्यूनाधिकभाव उपेक्ष्यते भगवत्सम्बन्धिनां भगवद्रूपताऽनुसन्धानात् ॥ ५ ॥ अन्यासां चरितमाह—परिवेषयन्त्य इति। उपदेशः सर्वत्र समानः काश्चित्तु सुस्निग्धमध्वन्नमन्येभ्यः परिवेषयन्त्यः शुष्कनीरससुबहुच्छिद्रस्य हृदयशून्यसग्रन्थोच्चमानवंशवंशजातस्य वंशस्यापि मधुगानसम्पादककृष्णाधररसं तद्गण्डूषगीतरूपतया गतं कर्णपुटकद्वारे सदास्वाद्याऽहो एतद्रसलुब्धा मुनयोऽपि देवेभ्यो हविर्दानात्मकयज्ञकर्माणि त्यजन्ति वयं कामिन्योऽपि कथं तत्पानं हित्वा लौकिकपरिवेषणे प्रवृत्ता इत्यवधार्य्य तद्रसभाजनं हित्वा भाजनं च भित्वा ययुरिति पूर्वेण सर्वत्रास्मिन् श्लोकेऽन्वयः। अत्र तु स्वयं विषयरसाभोक्तॄणामन्येभ्यो दातॄणामत्युदाराणामपि कृष्णरसास्वादाय तद्विक्षेपकदानादिकर्मत्याग उपदिष्टः। काश्चित्तु शिशुन् पयः पाययन्त्य इत्यत्र सुतान् स्तनमित्यनुक्त्वा शिशून् पय इति प्रयोगादन्यासां बालानां गवादिक्षीरमिति भाति यथा भक्तिज्ञानवैराग्यादिशिशूनां पुष्टितां सम्पादयत्यपि प्रेमोत्कर्षदध्वनिं शृण्वन्त्येव तत्सर्वं विस्मृत्य भगवत्स्वरूपमात्रं पर्यवस्यति तथा पोष्यान् शिशूनपि हित्वा ययुः तथा च लोके न केचिदेव प्रेमिणः किन्तु सर्वे एव परन्तु पुत्रबन्धुधनादौ विभक्ता प्रातिर्न प्रेमत्वेनाभिधीयते सर्वतो निर्विधंकविषयाचेत्सैव प्रेमादिसञ्ज्ञां भजते तदुक्त श्रीप्रह्लादेन—

"या प्रीतिरविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु" ॥

काश्चित्तु पतीन् शुश्रूषन्त्यः तद्धित्वा ययुरिति सर्वत्र सम्बध्यते न चाऽत्र पतित्यागप्रयुक्तो दोषः यथा विष्णुबुद्ध्याऽश्वत्थः सेव्यस्तत्र विष्णोरेव मुख्यं सेव्यत्वं नाश्वत्थस्य तथा विष्णुरूपतया पत्युः सेव्यत्वे विष्णोरेव मुख्यं सेव्यत्वं पतित्व चेति प्रतीकमुपेक्ष्य साक्षात्पतिहरिसेवनेन दोषशङ्का कलङ्कः "वरोऽसौ विष्णुरूपेण प्रतिगृह्णात्ययं विधिः" इति वाक्येन तन्निर्द्धारात् वस्तुतस्त्वेताः श्रुतिरूपास्तथा च यथाश्रुतयस्तत्तद्देव कर्मपरत्वेन प्रतीयमाना अपि ब्रह्मैकपराः "सर्वे वेदा यत्पदमामनन्ति" इति श्रुतेः। नित्यश्रुतीनामनित्यदेवसम्बन्धानुपपत्तेश्च तथाऽत्र या या गोपी यस्याः श्रुतेरवतारस्तदर्थत्वेन प्रतीयमानो देवोऽत्र तत्पतित्वेनावभासते यथा सा सा श्रुतिस्तत्तद्देवपरत्वेन भासमानापि तदसम्बन्धान्न तत्परा किन्तूक्तश्रुतिब्रह्मपरैव तथा ता गोप्योऽपि तत्तत्पत्नीत्वेनावबुद्ध्यमाना अपि न तत्पत्न्यस्तत्सम्बद्धा वा किन्तु कृष्णब्रह्मैकपरा अतो यावच्छ्रुतानां ब्रह्मैकपरत्वबोधकगुरूपदेशाभावस्तावत्तासां तत्तद्देवपरत्वप्रतीतिवत्पतिशुश्रूषा अच्युतगोत्रगुरूपदेशात्तद्देव परत्वमपहाय ब्रह्मपरत्ववत् हरिवंशनादश्रवणात्तर तच्छुश्रूषां हित्वा कृष्णपरत्वमित्यनवद्य काश्चित्तु अश्नन्त्यो भोजनमपास्य ययुः यथा योगभ्रष्टा विषयभोगासक्ता अपि गुरोर्हरिगीतश्रवणमात्रेण "रसो वै सः रसँ ह्येवायं लब्ध्वानन्दीभवति" इति श्रुत्या ब्रह्मण एव रसरूपत्वमवधार्य तद्रसानुभवाय तान् भोगान् विषमिव मन्वानास्तानपास्य परिव्रज्य हरिं भजन्ति तथा अश्नन्त्योऽपि हरिवंशरवं श्रुत्वैव तदपास्याकृताचमना एव तदधररसास्वादाय ययुः ॥ ६ ॥

श्रीधनपतिसूरिकृता गूढार्थदीपिका

आजग्मुरित्युक्त्या विप्रतिबन्धकानां तत्तद्ध्यानपराणां सत्त्वात् कथं स्वस्वगृहात्तासां निस्सरणमित्यपेक्षायां प्रेष्ठसूचकशब्दश्रवणमात्रेण तत्प्रवणमानसानां तत्क्षणमेव त्रैवर्णिककर्मनिवृत्तिर्जातेति सूचयंस्तासां निर्गमनप्रकारमाह–दुहन्त्य इति। दुहन्त्यो

दोहयन्त्यः तत्क्रियामध्य एव दोहं दोहनं हित्वा काश्चित् अभिययुः वेणुगीतकृत्प्रेष्ठाभिमुखं ययुः। यद्वा, दोहनपात्रं गृहीत्वा काश्चित् स्थितास्तत्समये गीते तत्पात्रं विहायाभिययुः। यद्वा, दोहनानन्तरं दुग्धपात्रं गृहीत्वा काश्चित्स्थितास्तत्क्षणे वेणुगीते श्रुते च तत्त्यक्त्वाऽभिययुः काश्चित्तु स्थालीस्थं पयश्चुल्ह्यामधिश्रित्य तत्काथार्थं तदधिसेचननिवृत्त्यथ च तत्सन्निधौ स्थितास्तत्समये वेणुगीतमन्तःप्रविष्ट ततस्तत्काथमप्रतीक्ष्यमाणास्तद्रक्षणं विहायाभिययुः, अपराः संयाव पक्वं गोधूमकणान्नम् अनुद्वास्य तन्नाशमप्यननुसन्धायाभिययुः यतः समुत्सुकाः उत्कटोत्कण्ठावत्यः तद्विलम्बसहनाऽसमर्थाः, एतेन स्वजातिधर्म विहायाभिययुरित्युक्तम् ॥५॥ अथ स्त्रीमात्रधर्मत्यागमाह—परिवेषयन्त्यो बन्धुभृत्याद्यग्रे परिवेषण कुर्वत्यः तत्परिवेषण विहाय काश्चिदभिययुः, अतिस्निग्धान् शिशून् पयो दुग्धं स्तन्यमितरद्वा पाययन्त्यस्तत्पयः पान हित्वा काश्चिदभिययुः पतीन् सर्वथा सेवनीयान् शुश्रूषन्त्यः पादप्रक्षालनादिसेवां कुर्वत्यस्तां सेवां विहायाभियुः काश्चित्तु भोजनं कुर्वत्योः भोजनं त्यक्त्वा अनाचान्ता एवाभिमुखं ययुः कृष्णान्तिक ययुरित्युत्त्युरेणवान्वयः। एतेन बन्धुभृत्यत्यागः अतिस्निग्धत्यागः स्वदेहपोषणत्यागश्चोक्तः ॥ ६ ॥

रास–रहस्यम्

र० टी०—आत्मसमीपे गन्तुमुत्सुकाः काश्चित् वृत्तयः उपनिषद्रूपाः गाः दुहन्त्यः मननेन तत्त्वनिःसारणकर्म हित्वा अभिययुः। काश्चित् पयः दुग्धं निःसारितं तत्त्वम् अधिश्रित्य आधिक्येनाश्रित्य विचारात्मकं ज्ञानमपि त्यक्त्वा ययुः। अपरास्तु संयावं पयसि पच्यमानान् गोधुमकणान्, अत्र यत् मननेन परिपक्वतत्त्वनिश्चयं तदनुद्वास्य हृदयादनवतार्थ अभिययुः। काश्चित्तु परिवेषयन्त्यः पात्रेऽवन्नं भोजयितुं ददत्यः, सच्छास्त्राद्यालोचनमेव मनसः भोजनं तस्यैव हृदये अवतारणं परिवेषण तदपि हित्वा ययुः। काश्चित् शिशूनिति आत्माभिमुखीभावस्य प्रथमावस्थासम्पन्नं मनः, पयः तत्त्वं पाययन्त्यः बोधयन्त्यस्तद्धित्वा ययुः। काश्चित् पत्यादिवन् प्रियान् विषयान् शुश्रूषन्त्यः सेवमानाः तां शुश्रूषां हित्वा ययुः। अन्यास्तु लिम्पन्त्यः शरीरे चन्दनादि लेपनं कुर्वत्यः, वृत्तिशरीरसम्बन्धिन लेपनमत्र सुसमाहितत्वम् अर्थात् समाधियोग्यता हित्वा ययुः। तथा अन्याः प्रमृजन्त्यः अङ्गोद्वर्तनादिकं कुर्वत्यः, शरीरसम्बन्धि विलासं हित्वा ययुः। काश्चित् लोचने अञ्जन्त्यः रूपसौन्दर्यादि दर्शनं हित्वा ययुः। काश्चित् व्यत्यस्तवस्त्राभरणाः विपर्ययप्राप्तानि वस्त्राण्याभरणानि चेति शरीराध्यासमूलकानि आवरणानि हित्वा कृष्णान्तिक ययुः, आत्मध्यानमग्नाः बभूवुः इत्यर्थः ॥ ५–७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तासां कृष्णेऽनुरक्तिं तदन्यत्र विरक्तिं च सूचयन् गमने प्रकारमाह–दुहन्त्य इति त्रिभिः। काश्चित् श्रीकृष्णसमीपगमने समुत्सुकाः गाः पयो दुहन्त्यः सत्यो दोहं दुग्धं दोहनकर्म वा हित्वा अभिययुः श्रीकृष्णाभिमुखं जग्मुः, अपराः समुत्सुका इति सर्वत्र योज्यं पयो दुग्धं पात्रस्थं चुल्यामधिश्रित्य अध्यारोप्य तत्काथमप्रतीक्षमाणाः ययुः, अपराः संयाव गोधूमकणान्न पक्वमनुद्वास्यानवरोप्यः ययुः ॥ ५ ॥ काश्चित्परिवेषयन्त्यः बन्धून् भोजनाद्यर्थं निवेश्य अन्नादिक ददत्यः तत्परिवेषणं हित्वा ययुः काश्चित् शिशून् बालान् पाययन्त्यः काश्चित्पतीन् शुश्रूषन्त्य उपचरन्त्यः ॥ ६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तासां गीतश्रवणसमनन्तरं काऽवस्था जातेत्यत आह ॥ दुह्यन्त्य इति। गाः काश्चिद्दुह्यन्त्यो दोहनं हित्वा समुत्सुका लालसा अभिययुः। दुहन्त्योऽभिययुरित्यनेनैव दोहनयानाभियानप्रतीतौ दोहमेव हित्वा काश्चिदभिययुस्तत्समयेऽपीत्यधिकारिविशेषपरतया तत्सार्थक्यं ज्ञेयम्। अपराः पयोऽधिश्रित्य पक्वं कृत्वा संयावं च गोधूमकणिकान्नमधिश्रित्यानुद्वास्य चुल्लीतस्तत्पात्रमनवतार्य ययुः ॥ ५ ॥ काश्चित्परिवेषयन्त्योऽन्नादिपरिवेषणं पात्रे कुर्वत्यश्छन्दः समत्वान्नैकाक्षराधिक्यं दोषाय। तत्परिवेषणं शिशून्मातृभ्रात्रादिबालान्पाययन्त्यो गोक्षीरमलमपास्य। स्पृहात्यागोऽनेन ध्वन्यते। पतीन् शुश्रूषन्त्यः शुश्रूषमाणाः सेवामपास्य काश्चित्स्वयमश्नन्त्यो भोजनं चापास्य ययुः ॥ ६ ॥

श्रीसुबोधिनी

तद्यथा। काश्चित् समुत्सुका दुहंत्यो दोहं हित्वाभिययुः पयोदुग्धमधिश्रित्य चुल्ल्यामारोप्य संयावगोधूमविक्रियामनुद्वास्यानुत्तार्याऽपरा ययुः ॥ ५ ॥ परिवेषणं कुर्वत्यः तत् परिवेषणं हित्वा शिशून् बालान् पयः पाययंत्यः शुश्रूषत्यः काश्चित् पतीन् हित्वाऽश्नंत्यो भोजनं कुर्वत्यो भोजनमपास्य त्यक्त्वा ॥ ६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

दुहन्त्यः इत्यस्याभासः। **प्रसङ्गादित्यादि**। अत्र पक्षद्वयं सम्भाव्यते। कुमारीणामेवाह्वानं मुख्यमित्येकः अविशेषेण तथेत्यपरः। तत्राद्य **प्रसङ्गादित्यादि**। द्वितीये **तासामित्यादि**। एवमग्रेपि। **गुणशब्दोत्र सर्वत्र भावपरो ज्ञेयः**। भाववैलण्य-

ज्ञापनाय तथोक्तिः । **जातीत्यादि** । धर्मपदं त्रिष्वप्यनुषज्यते ॥ ५ ॥ दोहनाद्यपेक्षयाञ्जनस्यान्तरङ्गत्वादन्यस्मिन्मण्डने सत्यप्येतद्विना तेषां सौन्दर्याजनकत्वादसम्पूर्णस्याशोभाजनकत्वाच्च मुख्यत्वमिति तत्त्यागोऽशक्य इति तत्करणाद्दुर्लभाधिकार इत्युक्तम् । **ज्ञानमार्गशोधिका इति** तु शास्त्ररीत्या बुभुत्सूनां बोधायोक्तम् ॥ ६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

"कृष्णप्राप्तिमिच्छद्भिस्त्रैवर्गिकं कर्मोपेक्ष्य तत्प्रवणैकचित्ततया तत्प्राप्तये प्रयतितव्यम्, अन्यथा तत्प्राप्तिः सुदुर्लभा" इति सूचयन्नर्धावसितत्रैवर्णिककर्मत्यागपूर्वकं गोपीनामागमनप्रकारमाह—दुहन्त्य इति त्रिभिः । व्रजे गवां बहुत्वेन काश्चिद्द्रोण्यो गा दुहन्त्यो दोहमर्धदुग्धपूर्णपात्रं हित्वा अभिययुः कृष्णाभिमुखं ययुः । तत्र हेतुमाह—समुत्सुका इति । तत्समये वेणुनादश्रवणेन तत्प्राप्तौ सम्यगुत्साहयुक्ता इत्यर्थः । सर्वासां गमनेऽयमेव हेतुर्बोध्यः । दोहनसमये च गोवत्सौ बद्धौ भवतस्तथैव तत्त्यागे धर्मोपेक्षा दुग्धत्यागेऽर्थोपेक्षा च बोध्या ॥ काश्चित्तु स्थालीस्थं पयोऽधिश्रित्य चुल्ल्यामारोप्य त्यक्त्वा एतत्क्वाथमप्रतीक्षमाणा अभिययुः । अनेनाप्यर्थोपेक्षा ॥ अवरास्तु संयावं गुडघृतमिश्रितं गोधूमकणं पक्वं स्थूलीति प्रसिद्धम् । यद्वा पयसि पच्यमानाः गोधूमकणा एव संयावमनुद्वास्य चुल्ल्या अनवतार्य अभिययुः । इयमप्यर्थोपेक्षा ॥ ५ ॥ काश्चित्तु परिवेषयन्त्यः पत्यपत्यादीन् भोजनार्थं निवेश्य अन्नादिकं पात्रेषु ददत्यः तत्परिवेषणं हित्वा, तथा काश्चित् पयः शिशून पाययन्त्यस्तद्धित्वा तथा काश्चित् पतीन् शुश्रूषन्त्यः सेवमानास्तां शुश्रूषां हित्वा अभिययुः । एतैस्तु धर्मोपेक्षा दर्शिता ॥ काश्चिच्चाश्नन्त्यो भोजनमपास्य त्यक्त्वाऽभिययुः । अनेन कामोपेक्षा सूचिता ॥ ६ ॥

अन्वितार्थप्रकाशिका

अथ तत्क्षण एव गोपीनां त्रैवर्गिककर्मनिवृत्तिं वदन् आदौ जातिकर्मत्यागमाह—दुहन्त्य इति ॥ कृष्णसमीपे गन्तुं समुत्सुकाः काश्चिद्द्रोण्यो गा दुहन्त्यः । नुमार्षः । दोहमर्द्धदुग्धं पात्रं दोहनकर्म वा हित्वा अभिययुः । काश्चित् पयो दुग्धम् अधिश्रित्य चुल्ल्यामारोप्य तत्त्यक्त्वा ययुः । अपरास्तु संयावं गुडघृतमिश्रितं गोधूमकणं पक्वं थूलीति प्रसिद्धम् । यद्वा । पयसि पच्यमानाः गोधूमकणा एव संयावस्तमनुद्वास्य चुल्ल्या अनवतार्य अभिययुः ॥ ५ ॥ बन्ध्वादित्यागमाह—परीति ॥ काश्चित्तु परिवेषयन्त्यः पुत्रादीन् भोजयितुं पात्रेष्वन्नं ददत्यः तत्परिवेषणं हित्वा तथा काश्चित् पयः शिशून् पाययन्त्यस्तद्धित्वा । धर्मत्यागमाह । तथा काश्चित् पतीन् शुश्रूषन्त्यः सेवमानाः । शता आर्षः । तां शुश्रूषां हित्वा अभिययुः । दैहिकत्यागमाह । काश्चिच्चाश्नन्त्यो भोजनमपास्य त्यक्त्वाऽभिययुः । नुमार्षः ॥ ६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तासां चित्ताकर्षणं ज्ञापयन्नाह दुहंत्य इति दोहं गोदोहनं हित्वा त्यक्त्वा समुत्सुकाः कृष्णालिंगनाभिलाषे उत्साहयुक्ताः पयो दुग्धं स्थालीस्थं चुल्ल्यामधिश्रित्य संस्थाप्य ययुः पयः स्थालीस्थ चुल्ल्यां संस्थाप्य पक्वमनुत्तार्य ययुर्वा अपराः चुल्ल्यां स्थितं संयायं घृतगुडमिश्रं पक्वं गोधूमकणान्नम् अनुद्वास्य ततोऽनुत्तार्य ययुः ॥ ५ ॥ परिवेषयंत्यः पत्यादीन् परिवेषणेन भोजयंत्यः तत्परिवेषणं हित्वा त्यक्त्वा काश्चिद्ययुः ॥ ६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

श्रीकृष्णगृहीतमानसत्वमेव तच्चेष्टाभिः प्रपञ्चयति । दुहन्त्य इति त्रिभिः ॥ दुहन्त्य इति ॥ काश्चिद्व्रजस्त्रियः, गोः पय इति शेषः । दुहन्त्यः सत्यः, दोहं गवां दोहनं, हिंत्वा त्यक्त्या, समुत्सुकाः कृष्णालिङ्गनाभिलाषे उत्साहयुक्ताः सत्यः, तमभिययुः । अपरा अन्यास्तु, पयः स्थालीस्थं दुग्धं, अधिश्रित्य चुल्ल्यामधिरोप्य तत्क्वाथमप्रतीक्षमाणाः, ययुः । काश्चित् संयाव गोधूमकणान्नं, पक्वं अनुद्वास्यानुत्तार्य, ययुः ॥ ५ ॥ परिवेषयन्त्य इति ॥ काश्चित् परिवेषयन्त्यः पत्यपत्यादीन् भोजनार्थं निवेश्यान्नादिकं पात्रेषु ददत्यः सत्यः, तत्परिवेषणं हित्वा, ययुः । अपराः शिशून् स्वबालान्, पयः स्तन्यं क्षीरं, पाययन्त्यः सत्यः, तान् शिशून् हित्वा, ययुः । काश्चित् पतीन् शूश्रूषन्त्यः उपचयन्त्यः सत्यः, तच्छुश्रूषण हित्वा, ययुः । अपरास्तु, अश्नन्त्यः भुञ्जन्त्यः सत्यः तत् भोजनं अपास्य हित्वा, ययुः ॥ ६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दुहन्त्य इति : १०.२९.५

श्वस्तनेऽपि सुलभो भवेदयं गोस्तने रस इहेति किं ततः ।
स्वस्तनद्वय—सुखाधिकारणं स्वस्तनी व्युदितमाश्रये रसम् ॥ ३९ ॥
यत्स्वयं तापभाक् तत्किं कुर्यात्परमतापकम् । घनं तत्तापहर्तारं कलये कलितामृतम् ॥ ४० ॥

सुस्निग्धमुग्धमधुरप्रकृतिं विहाय संयावकामितपदाम्बुजरागमीशम् ।
का वाऽन्यलब्धमधुरादिगुण गुणज्ञा संयावमल्परसमत्र समाश्रयेत ॥ ४१ ॥

परिवेषयन्त्य इति : १०.२९.६.

बुधश्लाघ्यं शुद्धं मधुरसरसं सुप्रकृतिकं भुजङ्गेशध्येयं भवति पदमेकं यदुपतेः ।
तदन्यस्मिन्नर्थादधिगतमशुद्धत्वमिह तद्विधेया तद्व्यक्त्यै किमिति परिवेषादिरचना ॥ ४२ ॥
स्वसुतानपहाय तास्तदा ययुरत्रास्ति न चित्रमण्वपि । स्फुटमेव यदङ्गसङ्गिनी सुतमालाधिकशालिनी रुचिः ॥ ४३ ॥
पतिशुश्रूषणं कार्यं स्त्रियेत्येत्येतद्वचो ध्रुवम् । विदेहावस्थितौ सत्यां युक्तं श्रीपतिसेवनम् ॥ ४४ ॥
भवत्यस्माद्भक्तादुदरभणं तत्क्षणशिवं पुनर्वाञ्छा भुक्तिः पुनरिति किमस्याप्यशनतः ।
लसच्छ्रीकं नित्याभिनवमधुरं सौख्यजनकं सुधामुख्यं भक्तात्तममिह हि भोक्ष्यामि शिवदम् ॥ ४५ ॥

कृष्णप्रिया

राजन् ! श्रुतिरूपा एवं ऋषिरूपा कुमारियों का तो आगमन हुआ ही लेकिन उनके अतिरिक्त भी व्रजसुन्दरियों का भी आगमन होने लगा । श्रीश्यामसुन्दरजी ने किए हुए वेणुनाद के श्रवण से जिनके उरपुर में प्रियकान्त प्रभु से मिलने की उत्कट उत्कंठा जगी थी, उन गोपीओं मे से, कितनीक दुहती हुई बीच में ही दुहना छोड़कर दौड़ी; तब कितनीक गोपियाँ चूल्हे पर चढ़े हुए दूध को नीचे बिना उतारे चल पड़ी; तब कितनीक दूध में पकी हुई गेहूँ की खीर चूल्हे पर धरी हुई छोड़कर चल पड़ी; राजन् ! इस प्रकार प्रियतम के पास, अतने-अपने गृहकार्य का परवाह न कर त्वरित गति से चल पड़ी । राजन् ! सर्वप्रथम सोलह हजार जो कुमारिकायें थी, वे सब आई उनके अलावा और दस प्रकार की गोपियाँ भी पधारने लगी । वे गोपियाँ जातिधर्म, कुलधर्म और लोकधर्म ऐसे तीन-तीन भाव वाली थी । वैसे प्रथम सात्विक राजस गोपियाँ जो दोहनकार्य छोड़ के आई थी; दूसरी राजस-राजस थी, जो दूध का चूल्हे पर छोड़कर आई थी और जो तामस राजस वे चूल्हे पर खीर को रखकर दौड़ी ॥५॥ राजन् ! अब और तीन प्रकार की गोपियाँ जो पधारी वे तीन प्रकार की सात्विक गोपियाँ थी । जो राजस सात्विक गोपियाँ थी वे कितनीक परिवेषण को छोड़कर चल पड़ी और जो सात्विक-सात्विक थी वे गोपियाँ अपने स्तनंधय शिशुओं को स्तन्यों पिलाती उसको बीच में छोड़कर दौड़ पड़ी । पुनः जो कितनीक तामस सात्विक गोपियाँ थी वे निज पतियाँ की सेवा में संलग्न थी उस सेवा को आधे में छोड़कर चली आई । उपरोक्त जातिकुल परायण गोपियाँ के पधारने पर जो लौकिकधर्मपरायण होने से तामस गोपियाँ थी वे भोजन को आधे में छोड़ जहाँ निज कान्त श्रीनन्दनन्दन विराजमान थे वहाँ आ पहुँची ॥ ६ ॥

लिम्पन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च लोचने । व्यत्यस्तवस्त्राभरणाः काश्चित् कृष्णान्तिकं ययुः ॥ ७ ॥
ता वार्यमाणाः पतिभिः पितृभिः [1]पुत्रबन्धुभिः । गोविन्दापहृतात्मानो न न्यवर्तन्त [2]मोहिताः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—काश्च, लिम्पन्त्यः, ययुः, अन्याः, प्रमृज्जन्त्यः, ययुः, काश्च, लोचने, अञ्जन्त्यः, ययुः, काश्चित्, व्यतस्तवस्त्राभरणाः, कृष्णान्तिकम्, ययुः ॥ ७ ॥ पतिभिः, पितृभिः, पुत्रबन्धुभिः, वार्यमाणाः, अपि, गोविन्द–अपहृतात्मानः, मोहिताः, ताः, न, न्यवर्तन्त ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अन्याः प्रमृजंत्योंगोद्वर्तनादि कुर्वत्यः । काश्च काश्चित् । कृष्णतुष्ट्यर्थं कर्म तदासक्तमनसामन्यथा कृतमपि फलत्येवेति द्योतयन्नाह । व्यत्यस्तेति । स्थानतः स्वरूपश्चोर्ध्वाधोधारणेन विपर्ययं प्राप्तानि वस्त्राभरणानि यासां ताः ॥ ७ ॥ न च कृष्णाकृष्टमनसां विघ्नाः प्रभवंतीत्याह । ता वार्यमाणा इति ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदासक्तमनसां कृष्णासक्तचेतसाम् । स्थानतो विपर्ययः पादभूषणं बाह्वोर्बाहुभूषणं पादयोः । उपर्यंगावरकमधोंगेऽधोंगावरकमूर्ध्वांगे इति । स्वरूपतो विपर्ययः अधोवस्त्रस्योर्ध्वभागेन धृतिरूर्ध्ववस्त्रस्याधोभागेन । एवं भूषणेष्वपि ज्ञेयम् ॥ कासांचिदावश्यकदैहिकत्रैषत्यागमाह–लिंपन्त्यः देहेऽनुलेपं चंदनादिना कुर्वत्यः । प्रमृजंत्यः, उद्वर्तनादिकं कुर्वत्यः । कासांचिदावेगवशाद्देहावयवविशेषस्यापि परिचयो नाभूदित्याह—व्यत्यस्तेति । विभ्रमाख्यानुभावोयम् । तदुक्तम्—“वल्लभप्राप्तिवेलायां मदना-

---

भिर्भातृ श्रीधर, वशी. जीव. वीर. विज. विश्व. शुक. सु घ. । २. काश्चन–वीर. ; योषितः–विज. ।

वेशसंभ्रमात्। विभ्रमो हारमालादिभूषास्थानविपर्ययः ॥" इति। अत्र तोषिणी—कासांचिच्चाहरहस्तत्प्रत्याशया 'विरहेऽप्यंगेष्वाभरण करोति वल्लभ—' इति गीतगोविन्दरीत्या श्रीभगवत्प्रेमविलषितस्यापि निजांगवेषस्य परमोत्कंठया परित्यागमाह—लिंपन्त्य इत्यादिना। लिंपन्त्योंगरागं कुर्वत्यः। लेपनादिकमप्यपास्येति ज्ञेयम्। अन्या इत्यस्य लिंपन्त्य इत्यादिपदद्वयेनान्वयः। तत्रैव हेतु दर्शयन् किं वक्तव्यं दैहिकदेहाद्यपेक्षापरित्यक्तेति कासांचिद्देहावयवविशेषाननुसंधानं जातमिति व्यनक्ति—व्यत्यस्तेति। पूर्वोक्तसर्वत्यागानुभावकस्यौत्सुक्यस्य विभ्रमाख्योयमनुभावः। तल्लक्षणं पूर्वमुक्तमेव। अनेन तद्विधानां प्रेम यथा भगवतोऽपेक्षितं न तथा वेशादीति गम्यते। किं तु, पश्चात्तेनैव परिहितस्य स्वयं तथावत्परिधापितमिति ज्ञेयम्। एवं दोहनादीनामन्येषामवश्यापेक्ष्यत्वेन यथोत्तरं श्रैष्ठ्यमूह्यम्। तदेवं सर्वा अपि कृष्णस्यांतिकमभिययुः प्रस्थितवत्यः ॥ ७ ॥ हरिपरायणानां सर्वविघ्नहानिरित्याह—न चेति। प्रभवन्ति समर्था भवंति। पतिभिः पत्नीशुभाशुभभागित्वाद्वार्यमाणा धर्मोपदेशेन हस्तादिना वा, स्नेहात्पितृभिः, दुष्कीर्तिभयात्स्नेहाच्च भ्रातृभिः, कुलदोषशंकया बन्धुभिरिति। "रक्षेत्कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके। अभावे ज्ञातयस्त्वेवम्" इति स्मृतेश्चत्वारो रक्षकाः। प्रायः पुत्रानुत्पत्तेस्तेऽत्र नोक्ता इति भावः। गोविन्देनापहृत आत्मा जीवाख्यो यासामिति। निवृत्तौ जीवनेन विच्छेदः स्यादिति जीवनार्थं गता इति भावः। मोहिता मोहावेशवशादपि निवृत्तिज्ञानशून्या बभूवुरिति भावः ॥ ननु ताः प्रेमप्राबल्यात्सर्वापेक्षां तत्यजुरित्युचितमेव तासामपेक्षां तत्पत्यादयः कथं तत्यजुस्तत्राह—ताः कुलवध्वः पतिभिः कुलकन्याश्च ताः पित्रादिभिर्वार्यमाणा न न्यवर्तन्त। तत्र हेतुः—गोविन्देति। भयलज्जादीनां का वार्ता तासामात्मनामपि गोविन्देनापहृतत्वात्। मोहिताः मूर्च्छिता इति, सूत्रसंचारितपञ्चालिका इवेत्यर्थः। पत्यादिभिर्गतप्राणानामपि भार्यादिदेहानामप्रतिष्ठाभयादेवान्यत्र सञ्चारो न सह्यते इति चेत्—सत्यम्। विप्रतिपत्तिरियं योगमाययैव समाहिता ज्ञेया। तच्च समाधानं तयैव कल्पितानां तत्क्षण एव तादृशगोपीनां स्वस्वभार्यादिकत्वेन प्रत्यायितानां स्वस्वगृहान्प्रति पत्यादिभिः परावर्त्तनमेव ॥ अत्र तोणिषी—अपि ताः पत्यादिभिः क्व नु रात्रौ बहिर्गम्यत इत्यादिनिबन्धेन मुहुर्वार्यमाणा अपि न न्यवर्तन्त, किन्तु ययुरेवेत्यर्थः। कुतः—मोहिताः हतविवेकाः। तत्कुतः—गोविन्देनापहृत आत्मा चित्त यासां ताः। अयं पत्यादीनामपि शैथिल्ये हेतुर्ज्ञेयः, तद्भक्तिमात्रस्य सर्वविघ्नापहारिप्रभावत्वात्। तत्तदन्तिकवर्तिभिः पतिभिः काश्चित्पित्रादिभिश्च काश्चन, तत्र च पित्रादिभिरविवाहिताः स्ववासिन्यश्चेति "रक्षेत्कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके। अभावे ज्ञातयस्त्वेवं न स्वातन्त्र्यं क्वचित्स्त्रियः ॥" इति स्मृतेः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कासाञ्चिच्च हरहस्तत्प्रत्याशया विरहेपि "अङ्गेष्वाभरणं करोति बहुशः" इति गीतगोविन्दरीत्या श्रीभगवत्प्रेमविलसितस्यापि निजाङ्गवेषस्य परमोत्कण्ठया परित्यागमाह—लिम्पन्त्य इत्यादिना। लिम्पन्त्यः अङ्गराग कुर्वत्यः लेपनादिकमप्यपास्येति ज्ञेयम् अन्या इत्यस्य लिम्पन्त्य इति पदद्वयेनान्वयः। तत्रैव हेतुं दर्शयन् किं वक्तव्यं दैहिकदेहाद्यपेक्षापरित्यक्तति कासाञ्चिद्देहावयवविशेषाऽननुसन्धानमपि जातम् इति व्यनक्ति—व्यत्यस्तेति पूर्वोक्तसर्वत्यागानुभाव (क) स्यौत्सुक्यस्य विभ्रमाख्योऽयमनुभावः यथोक्तम् –

"वल्लभप्राप्तिवेलायां मदनावेशसम्भ्रमात्। विभ्रमो हारमाल्यादिभूषास्थानविपर्य्ययः" ॥ इति।

अनेन तद्विधानां प्रेमभगवतो यथाऽपेक्षितं न तथावेशादीति गम्यते किन्तु पश्चात् तेनैव परिहितस्य स्वयं तथावत्परिधापितमिति ज्ञेयम् एवं दोहनादीनामेषामवश्यापेद्यत्वेन यथोत्तरं श्रैष्ठ्यमूह्यं तदेवं सर्वा अपि कृष्णस्यान्तिकं प्रतिययुः प्रस्थितवत्यः ॥ ७ ॥ अधुना स्वैः स्वार्यैर्बलात्कारितबाह्यानुसन्धानानामपि तासां कुलवधूस्वाभाविकत्वेन परमदुस्त्यजस्य लज्जादेरपि त्यागमाह—ता इति। सर्वा अपि ताः पत्यादिभिः क्व नु रात्रौ बहिर्गम्यत इत्यादिनिर्बन्धेन मुहुर्वार्य्यमाणा अपि न न्यवर्त्तन्त किन्तु ययुरेवेत्यर्थः। कुतः मोहिताः हतविवेकाः तत्कुतः गोविन्देनापहृत आत्मा चित्तं यासां ताः, अयं पत्यादीनामपि शथिल्ये हेतुर्ज्ञेयः तद्भक्तिमात्रस्य सर्वविघ्नापहारिप्रभावत्वात् तत्तदन्तिकवर्त्तिभिः पतिभिः कश्चित् पित्रादिभिश्च काश्चन तत्र च पित्रादिभिरविवाहिताः स्ववासिन्यश्चेति—

"रक्षेत्कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके। अभावे ज्ञातयस्त्वेवं न स्वातन्त्र्यं क्वचित् स्त्रियः" ॥

इतिस्मृतेः ॥ ८ ॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कासाञ्चित च परमोत्कण्ठया श्रीभगवत्सन्तोषणार्थं तद्भजनसाधननिजांगभूषणपरित्यागमप्याह—लिम्पन्त्य इत्यादिना लिम्पन्त्योऽङ्गरागं कुर्वत्यः, लेपनादिकमप्यपास्येति ज्ञेयम्। अन्या इत्यस्य लिम्पन्त्य इति पदत्रयेणान्वयः। तत्रैव हेतुं दर्शयन् किं वक्तव्यम् ? दैहिकदेहाद्यपेक्षापरित्यक्तेति कासाञ्चित् देहाविस्मृतिरपि जातेत्याह—व्यत्यस्तेति। पूर्वोक्तसर्वत्यागभावकस्यौत्सुक्यस्य विभ्रमाख्योऽयमनुभावः, यथोक्तम् (उ० नी० ११।३९)—'वल्लभ-प्राप्तिवेलायां मदनावेशसम्भ्रमात्। विभ्रमो हारमाल्यादिभूषास्थानविपर्य्ययः ॥' इति। अनेन तद्विधानां प्रेमभगवतो यथापेक्षितं न तथा वेशादीति गम्यते, किन्तु पश्चात्तेनैव परिहितस्य

स्वयं यथावत् परिधापितमिति ज्ञेयम्। एवं दोहनादीनामेषामवश्यापेक्ष्यत्वेन यथोत्तरं श्रेष्ठ्यमूह्यम्। यद्वा केवलमत्र प्रारब्धनिजनिजकर्म्मपरित्याग एव तात्पर्य्यम्, तत्र च व्यत्यस्तवस्त्राभरणत्वे वस्त्रादिधारणरीतित्याग एव, सर्वत्र च तत्र तत्र हेतुः—कृष्णगृहीतमानसा इति। समुत्सुका इति च प्रोक्तम्, एवं सर्व्वा अपि कृष्णस्य परमाकर्षकस्य श्यामसुन्दरस्य श्रीयशोदानन्दनस्य अन्तिकमेव ययुः। न तु लज्जादिना विघ्नादिना वा दूरे तस्थुरित्यर्थः, परममोहितत्वात्? यद्यपि स यत्र कान्तस्तत्राजग्मुरित्यनेन तदन्तिकगमनमेवोक्तम् तथापि परममोहेनातिवेगेनात्यन्तनिकटगमनविवक्षया पुनर्विशेषोक्तिरिति दिक्॥ ७॥ अधुना स्वीयैः प्रबोध्यमानानामपि श्रीभगवदपहृतचित्ततया तासामशेषविचारान्तर्द्धानमाह—ता इति। सर्वा एव ताः पत्यादिभिर्वार्य्यमाणाः धर्मप्रदर्शनादिना हस्तधारणादिना च गन्तुं निरुध्यमाना अपि न न्यवर्त्तन्त, किन्तु ययुरेवेत्यर्थः। कुतः? मोहिता हृतविवेकाः, तत् कुतः? गोविन्देन गोकुलेन्द्रेण, यद्वा, गा इन्द्रियाणि ईश्वरत्वेन विन्दतीति तथा, तेनापहृत आत्मा चित्तं यासां ताः, महत्तमेनापहृते द्रव्ये स्वल्पानाम्, पक्षान्तरे च अन्तरीश्वरेण महामोहनेन प्राणकोटिप्रेष्ठेनान्तरपहृते बाह्यानामन्येषां तत्प्रत्यर्पणसामर्थ्याभावात्, अत्र प्रवाहवेगनीयमाना नौर्यथा तटस्थानां तिष्ठ तिष्ठेत्याद्युक्त्या नावारूढानां वा नौधारणेनापि न तिष्ठेदिति दृष्टान्तो द्रष्टव्यः। गोविन्देनापहृत आकृष्ट आत्मा जीवाख्यो यासामिति निवृत्तौ जीवेन विच्छेदः स्यादिति जीवनार्थमेव गता इति श्लेषार्थः, तत्रादौ पतिभिरिति तेषां पत्नीशुभाशुभभागित्वेन मुख्यत्वात्, ततश्च केवलं कन्यावैगुण्येन दोषस्पर्शात् स्नेहाच्च पितृभिः, ततश्च दुष्कीर्तिभयात् स्नेहविशेषाच्च भ्रातृभिः, ततश्च कुलदोषशंकया बन्धुभिरिति 'रक्षेत् कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके। अभावे ज्ञातयस्त्वेवं न स्वातन्त्र्यं क्वचित् स्त्रियः॥' इति स्मृत्युक्ताश्चत्वारो रक्षका अत्रोक्ताः, तत्र प्रायः पुत्रानुत्पत्तेरत्र पुत्रा नोक्ताः, पत्यादीनां चैषां यथोत्तरं न्यूनत्वमूह्यम् तासामुत्तरोत्तरं तत्तद्वश्यतासम्बन्धयोर्न्यूनत्वात्, तथापि पूर्वपूर्वेषां निवारणे प्रवृत्तावपि परपरेषां तत्र प्रवृत्तिः कुटुम्बसमुदायतापेक्षया, यद्वा, पूर्वपूर्वैः परित्यागे कृते परपराश्रयणशंकया तैस्तैः क्रमेण निवारणम्। यद्वा, तत्तदन्तिकवर्त्तिभिः पतिभिः काश्चित् पित्रादिभिश्च काश्चन तत्र च पतिभिः पत्न्य एव पित्रादिभिश्च प्रायोऽविवाहिताः स्ववासिन्यश्च पुत्र्य इति विवेचनीयम्, अन्यत् समानम्॥ ८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमन्या लेपनमार्जनाञ्जनादीन् कुर्वाणा लेपनादीन् विहाय लोचने अञ्जन्त्य इत्यन्वयः। काश्चित्तु व्यत्यस्तानि विपरीतस्थानानि वस्त्राण्याभरणानि च यासां तथाभूताः सत्यः कृष्णसमीपमाययुः॥ ७॥ एवं गच्छन्त्यः पित्रादिभिर्वार्यमाणा अपि कृष्णगृहीतमानसत्वात्काश्चिन्न न्यवर्तन्त न गृहानाजग्मुः॥ ८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रमृजन्त्यः शरीरोन्मार्जनं कुर्वत्यः स्थानसम्मार्जनं वा अञ्जन्त्यो मष्यादिना मुखकण्ठादिषु आभरणादि दधानाः कण्ठादिषु वस्त्राणि वसाना इति व्यत्यस्तवस्त्राभरणाः॥ ७॥ वार्यमाणा निरोध्यमाना गोविन्देनापहृता आकृष्टा आत्मानो मनांसि यासां तास्तथा॥ ८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु, कथं तासां पितृपतिभ्रातृभिर्वारणं न कृतमित्याह, ता वार्य्यमाणा इत्यादि। ताः पतिभिः भ्रातृभिर्बन्धुभिश्च न वार्य्यमाणा बभूवुरित्यर्थः। ऊढाः पतिभिः, अनूढा पित्रादिभिः, अत एव न न्यवर्त्तन्त बाधकाभावात् कथं तैस्तैर्न वारिताः तत्राह—मा ऊहिता वितर्किताः योगमायाभावात् ते ते तास्ताः समीपस्था एव विदुः ता एव वा कथं विचारेण न न्यवर्त्तन्त तत्राह—गोविन्दोपहृतात्मानः आत्मनि सति बुद्ध्यादयो गुणाः स्युः तेषु सत्सु विचाराः प्रवर्त्तन्ते आत्महरणेन सर्वहरणमित्यर्थः। काकाक्षिगोलकन्यायेन नकार उभयत्र योज्यः॥ ८॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ननु कथं तासां पितृ-पति-भ्रातृभिर्वारणं न कृतमित्याह—ता वार्यमाणा इत्यादि। ताः पतिभिः पितृभिर्भ्रातृभिर्बन्धुभिश्च न वार्यमाणा बभूवुरित्यर्थः। ऊढाः पतिभिः, अनूढाः पित्रादिभि, अत एव न न्यवर्तन्त, बाधकाभावात्। कथं तैस्तैर्न वारिताः? तत्राह—मा ऊहिता वितर्किता योगमायाप्रभावात्ते ते तास्ताः समीपस्था एव विदुः। ता एव वा कथं विचारेण न न्यवर्तन्त? तत्राह—गोविन्दापहृतात्मानः, आत्मनि सति बुद्ध्यादयो गुणाः स्युः तेषु सत्सु विचाराः प्रवर्तन्ते आत्महरणेन सर्वहरणमित्यर्थः। काकाक्षिगोलक-न्यायेन नकार उभयत्र योज्यः॥ ८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ता वार्यमाणा इत्यादि। पत्यादिभिर्वार्यमाणा बभूवुरिति नकारेण दूरेणान्वयः। अतो मा न्यवर्त्तन्त, यत ऊहितास्तर्किताः—किं गृहे तिष्ठति, किं कार्यान्तराय क्वचिद् गता इति वितर्किताः, श्रीकृष्ण-मुरलीनादापहृतचेतसस्तत्र गच्छन्तीति न ज्ञाताः

अतः (भा० १०।३३।३८) मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः" इति वक्ष्यमाण-सङ्गतिः, अथवा ता वा इति च्छेदः, पत्यादिभिस्ता वा अर्यमाणा गम्यमाना न, वा शब्दोऽत्र काकुपरः, पत्यादयस्तासामनुगता नेत्यर्थः । कुतः ? मोहिताः—मा ऊहिता न वितर्किताः, यतो गोविन्दापहृतात्मानः—गोविन्देनोपहृत्य आत्मानो देहा यासाम्, अतस्तैर्न लक्षिताः । अथवा, पत्यादिभिर्वार्यमाणा सत्यो न न्यवर्त्तन्त, यतो मोहिता मा ऊहिताः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कासाञ्चिदावश्यकदैहिकवेशत्यागमाह—लिम्पन्त्यः देहे अनुलेपं चन्दनादिना कुर्वत्यः प्रमृजन्त्यः उद्वर्त्तनादिकं कुर्वत्यः कासाञ्चिदावेगवशाद् देहावयवविशेषपरिचयस्याप्यभावमाह–व्यत्यस्तेति । विभ्रमाख्योऽनुभावोऽयं यदुक्तम् — "वल्लभप्राप्तिवेलायां मदनावेशसम्भ्रमात् । विभ्रमो हारमाल्यादिभूषास्थानविपर्ययः" इति ॥ ७ ॥ ननु, ताः प्रेमप्राबल्यात् सर्वापेक्षां तत्यजुरित्युचितमेव तासामपेक्षां तत्पत्यादयः कथं तत्यजुस्तत्राह—ताः कुलवध्वः पतिभिः कुलकन्याश्च ताः पित्रादिभिर्वार्य्यमाणा अपि न न्यवर्तन्त तत्र हेतुर्गोविन्देति, भयलज्जादीनां का वार्ता तासामात्मनामपि गोविन्देनापहृतत्वात् मोहिता मूर्च्छिता इति सूत्रसञ्चालितपाञ्चालिका इवेत्यर्थः । पत्यादिभिर्गतप्राणानामपि भार्य्यादिदेहानामप्रतिष्ठाभयादेवान्यत्र सञ्चारो न सह्यते इति चेत् ? सत्यं विप्रतिपत्तिरियं योगमाययैव समाहिता ज्ञेया तच्च समाधानं तयैव कल्पितानां तत्तत्क्षण एव तादृशगोपीनां स्वस्वभार्यादिकत्वेन प्रत्यायितानां स्वस्वगृहान् प्रति पत्यादिभिः परावर्त्तनमेव प्रकारश्चाग्रे वक्ष्यते ॥ ८ ॥

श्रीरसिकाल्हादिनी टीका

एवं तावद्देहपर्यन्तं श्रीकृष्णाकृष्टमनस्त्वेन सर्वसङ्गपरित्यागमुक्त्वा भूषितमेतदङ्गं रमणयोग्यं स्यादित्यननुसन्धानवत्यः स्वाङ्गभूषामप्यनादृत्य ययुरित्याह । लिम्पन्त्य इति काश्चित् लिम्पन्त्यः स्वाङ्गे चन्दनादिना लेपं कुर्वत्यः तदर्द्धावसितमपास्य ययुः, अन्या प्रमृजन्त्य अङ्गोद्वर्त्तनादि कुर्वत्यः सर्वावयवोद्वर्तनमप्रतीक्षमाणा ययुः । काश्चित् लोचने अञ्जनम् अञ्जं त्यक्त्वा ययुः काश्चिद् व्यत्यस्तवस्त्राभरणाः । एवं देहदैहिकाननुसन्धानजाते वस्त्राभरणादावपि हस्तपादादिषु उद्र्ध्वार्द्धधारणादि–व्यत्ययेन विभ्रमो वर्णितः स चौत्सुक्य एव क्रीडाकृतः । एवं सर्वा अपि कृष्णान्तिकं ययुः । कुमार्यस्तु प्रतीक्षन्त्य एवाप्रमत्ताः स्थिताः तास्तु गृहत्यागमेव कृत्वाऽगता अन्यपूर्वास्तु देहगेहसम्बन्धिष्वनुसन्धानं त्यक्त्वा ययुरिति ॥ ७ ॥ यदा देहगेहादिकार्यव्यग्राणां पत्यादिशुश्रूषाव्यग्राणामपि ममतां त्यक्त्वागमनं दृष्ट तदा काश्चित्पत्यादिनिवारिताः स्मृतिश्च "रक्षेत्कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके । अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित्स्त्रियः" इति पूर्वमैहिकपारलौकिको धर्मस्त्यक्ता एव कुलवधूत्वेन लज्जायुक्ता अपि लज्जां प्रतिबन्धं चावगम्य ययुरित्याह । ता इति या ऊढागमनसमयेन बन्धूनां दृष्टिगोचरमवतीर्णास्तास्तु तैरेव निवारिताः परन्तु न न्यवर्तन्त गता एव यतो मोहिता अयं भावः–एतास्तु कृष्णेनाहूताः वेणुगीतश्रवणेनासां सम्भ्रममालक्ष्य निवारणे प्रवृत्ता, अनन्तरं वेणुगीतं श्रुत्वा तेऽपि तासां निवारणात् शिथिला जाताः, अत एव दृढप्रयत्नेन न निवारितास्ततोऽन्यथा वर्तन्ते चेद्वेणुगीतसुखे निमग्ना न भवेयुस्तदा पत्यादीन् अवगणय्य कथमासामागमनं भवेत्, यत एते मोहिताः । पूर्वमेवोक्तं योगमायामुपाश्रित इति, अग्रे वक्ष्यति च "मन्यमानाः स्वपार्श्व स्थानिति" अत्र हेतुमाह–गोविन्देनापहृत आत्मा चित्तं देहश्च यासां ताः किं च यथा गङ्गा समुद्रं गच्छन्ती पर्वतादिप्रतिबन्धनमवगणय्य समुद्रमेव प्रविशति तस्मिन् प्रेमाधिक्यात् तथा एता अपि पत्यादिभिर्दृष्टा भयप्रदर्शनेन निबध्यमाना अपि न न्यवर्तन्त किन्तु मोहिताः हतविवेकाः कृष्णप्राप्त्यतिरिक्तविवेकरहिताः ॥ ८ ॥

विशुद्धरसदीपिका

कासाञ्चिन्नित्यसहचरीणां स्वस्वयूथेश्वरीपरिचरणस्यापि परित्यागं कथयन्वंशीध्वनेः परममोहनतामाह—लिम्पन्त्य इति । अङ्गरागं कुर्वत्यः प्रमृजन्त्यः उद्वर्त्तयन्त्यः शेषं स्पष्टम् सर्वमिदं यूथेश्वरीकर्मकमेव ज्ञेयम् अन्यथा ण्यर्थकल्पनागौरवात् नचात्र सहचरीधर्मविघातः, यूथेश्वरीणां तत्प्रागेव गमनात् व्युत्क्रमेणोक्तिस्तु मुनीन्द्रस्य भावावेशेनेति ज्ञेयम्, अथ कासाञ्चिदनेकजन्मसिद्धानां गोपीनां पतिरेव वा "नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्द्धनः" इत्यादिना गौतमीयतन्त्रोक्तानां नित्यसिद्धयूथेश्वरीणां देहावयवविशेषाननुसन्धानमाह—व्यत्यस्तेति । विभ्रमोऽयं तदुक्तम्—

"वल्लभप्राप्तिवेलायां मदनावेशसम्भ्रमात् । विभ्रमो हारमाल्यादिभूषास्थानविपर्ययः" ॥ इति ॥ ७ ॥

कासाञ्चित् साधकचरीणां भावौत्कण्ठ्यप्रदर्शनाय लज्जादित्यागमाह—ता इति । पतिभिरिति धर्मपरित्यागोऽपि सूचितः एते च पत्यादयः साधनसिद्धानां श्रुतिमुनिरूपाणामेव ज्ञेयाः नतु नित्यसिद्धानां गोपीनाम् अनेकजन्मसिद्धानां पतिरिति तमेवोद्दिश्य मन्त्रार्थकथनविरोधात् "श्रियः कान्ताः कान्तः परमपुरुषः" इति ब्रह्मसंहिताविरोधाच्च क्वचित्तदनुकरणं तु साधकचरीणां भावप्रपोषाय श्रीकृष्णस्य लोकवल्लीलानुकरणवदविरुद्धमेव ननु, कथमाग्रहेण ग्रस्तैर्न निवारितास्तत्राह—मोहिताः मा ऊहिता योगमायाकल्पितपतिपाञ्चालिकाप्रायैस्तैरतर्किता इत्यर्थः । ननु, ता एव स्वविचारेण कथं न न्यवर्त्तत तत्राह—गोविन्देति । यूथेश्वरी साधकचरीपक्षे गोकुलेन्द्रापहृतात्मानः सहचरीपक्षे वृन्दावनेश्वरापहृतात्मानः "वृन्दावने तु गोविन्दम्" इति वाराहतन्त्रात् ॥ ८ ॥

श्रीरामनारायणकृता भावभावविभाविका

अन्यासां दशामाह—लिम्पन्त्य इति। गृहं वा स्वाङ्गं वा अङ्गरागेण लिम्पन्त्योऽन्या गोप्योऽभूवन् तावच्चन्द्रमसोऽसङ्ख्यातसितसूक्ष्ममृदुरश्मिलेपिन्यकूर्च्यारुणोदयरागेण प्राचीमुखलेपनाल्लब्धलेपनावबोधेन प्रेष्ठतमेन प्रथममेव स्वविहारास्पदे तासां हृदयालये रासाद्रिमालक्ष्य स्वमुखचन्द्रकरैः सूक्ष्ममृदुनानागानतानवितानैः कूर्च्याः निर्माणं कृत्वा स्ववंशदण्डे सन्निवेश्यानुरागरागेण लिप्ते तन्मृदुशन्तमकरैरेवाङ्गरागेणाङ्गान्यपि लेपयितुमिच्छन्त्यो गृहाङ्गलेपनाद्यपास्य कृष्णान्तिकं ययुः, अनेन कृष्णाङ्गीकृतयोगक्षेमाणां स्वगेहदेहलालताद्यपास्य तन्नित्याभियुक्तत्वमेव युक्तमित्युक्तं भवति, काश्चित्तु प्रमृजन्त्यः शुद्धान्तःकरणानामपि मलावशेषशङ्कया तन्निवृत्त्यै सत्कर्माभ्यासवत् शुद्धचिदानन्दघनस्वरूपेप्यारोपिता विद्यामलनिरासाय ज्ञानाभ्यासायासवत् शुद्धेऽपि स्वाङ्गेऽसम्भावितमलसम्भावनया कृष्णयोग्यतामाकलय्य तन्निवारणायोद्वर्तनं कुर्वत्योऽपि सन्मुखरितकृष्णगीतहृतमनसां तत्तदभ्यासशैथिल्ये तदेकपरत्ववत्तदप्यपास्य कृष्णान्तिकं ययुः, एतेन कृष्णग्रहगृहीतमनसां नात्मनः कृष्णसम्भोगयोग्यतासम्पादनायापि कर्माद्यायास इति सूचितम्, काश्चित्तु लोचने अञ्जन्त्योऽभूवन् तत्रायमभिप्रायः—निरञ्जनस्य श्यामस्य नेत्रयोः संयोगे तत्र निवसतः सर्वदृग्दोषमलमञ्जनत्वं सुखव्यञ्जनत्वं चाज्ञायाञ्जनस्यापि श्यामत्वेन दृशि समर्पयन्त्यः। यद्वा, अञ्जनस्य श्यामरजस्त्वेन श्यामपदाब्जरजस्त्वं मत्वा रागरागान्वितस्वनेत्राब्जयोः परागरजस्त्वेन परागरजसा नेत्राब्जयोः शोभां रजोद्वारा नेत्राब्जयोः प्रियपदाब्जाभ्यां सम्बन्धं च भगवतो दीनवत्सलत्वात्तत्पदाब्जरजोधारणेन नेत्रयोरभिव्यक्तिसम्भावनया विरहनिवृत्तिं चाकलय्य निवेशयन्त्यः। यद्वा, नेत्रयोर्विरहानललालिमा व्यक्तिं दृष्ट्वा भस्मना वह्न्याच्छादनवत्कृष्णरजसा तदाच्छादनमभिप्रेत्य निवेशयन्त्यः तदैव कृष्णेन वंशद्वारा धमनेन हृच्छयहृच्छयाग्नावपि प्रज्वालिते नेत्रयोर्द्विगुणरागदाहयोर्वृद्धौ वैक्लव्ये जाते नेत्रस्थलकमलाभ्यां तापाधिक्येन प्रोद्भूततद्रसात्मकाश्रुसलिलैर्हृच्छयाग्न्यास्य हृदयं सिञ्चन्त्यस्तैस्तदशान्तिं प्रत्युत हृत् कुम्भोद्भूतकामाग्निना कुम्भजेनेव सिन्धोस्तदखण्डाश्रुधारासलिलशोषं दृष्ट्वा पदजलेन सिन्धुपूरकं नाम्नैव महद्भवदहनशमनं दवानलपानकर्त्तारं घनश्याममधरामृतवर्षं तदुपशमाय ययुः, एवं भगवद्गतानां भगवदनुरागजान्यत्र विरागेणैहिकामुष्मिकसर्वत्यागमारब्धत्यागाभीतिं परिव्रज्य भगवद्धामोपगमनं च तद्वंशगुरूपदेशेन दर्शयित्वा तत्सेवोपकरणव्यत्यस्ततापि न भगवत्यथ प्रवृत्तिमतां तत्स्वरूपप्राप्तौ बाधिकेत्यपि स्वाचरितैरेवोपदिशन्ति—व्यत्यस्तेत्यादिना। प्रेमवैक्लव्येन देहानुसन्धानस्यैवाभावे क्व वस्त्राद्यनुसन्धानं भगवता नित्याभियुक्तानां योगक्षेमोद्वहनस्य प्रतिज्ञातत्वेप्यात्मनोऽपि प्रेमवैक्लव्यादेव तदकरणम्, यद्वा, प्रेमपथिभूषणादिव्यत्यासस्यैव भूषणत्वात्तदकरणं वस्तुतस्तु कृष्णगोप्योर्भेदाभावात् कृष्ण एवोभयरूपतया तथा विहरन् सर्वजीवोद्धारार्थं प्रेमपन्थानमुपदिशतीति न कोऽपि शङ्कावसरः॥ ७॥ अथ अधुना—

"त्वां सेवतां सुरकृता बहवोन्तरायाः स्वौको विलङ्घ्य परमं व्रजतां पदन्ते।
नान्यस्य बर्हिषि बलिं ददतः स्वभागान् धत्ते पदं त्वमविता यदि विघ्नमूर्द्धिन" ॥

इत्यादिवचनात्स्वौको विलङ्घ्य परमं पदं भगवद्विहारस्थलं व्रजतां सुरकृतान्तरायस्य तदकिञ्चित्करत्वस्य च निर्दिष्टत्वात्तदेव दर्शयति—ता वार्यमाणा इति। तत्र पतिभिरिति श्रुतिरूपाणां गोपीनां तत्तन्मन्त्रप्रतिपाद्यत्वेनापातदृष्ट्या भासमानानामुक्तन्यायेन तदसम्बद्धानामपि देवानां पतित्वेन लोके प्रतीयमानत्वात्तैरित्यर्थः। न च तत्र सुरकृता बहवोन्तराया इत्युक्तम् अत्र तु पतिपित्रादिभिरित्यर्थभेदः शङ्कनीयः "देवादारादिरूपिणः" इत्यत्र देवानामपि तत्कुटुम्बजनरूपतयैव विघ्नकारित्वस्योक्तत्वात् विशेषतो गोपानां तु -

"नन्दाद्या ये व्रजे गोपा याश्चामीषां च योषितः।
वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः॥ सर्वे वै देवताप्राया उभयोरपि भारत !" ॥

इत्यादिभिर्देवत्वे शङ्काया अप्यभावात् तथा च ता वार्यमाणा इत्यनेनान्तरायं निर्दिश्य न न्यवर्तन्तेति तदकिञ्चित्करत्वनिर्देशः तत्र हेतुर्मोहिताः कृष्णानुसन्धानेन स्वदेहानुसन्धानशून्यत्वे किमु वाच्यं तद्वारणाननुसन्धानस्य तत्रापि हेतुमाह गोविन्दापहृतात्मान इति। गोविन्देनापहृता आत्मानो मनांसि यासां तत्र गोविन्द इत्यत्र गवां बहिरन्तरिन्द्रियाणामिन्द्रः स्वामी गा बहिरन्तःकरणानि विन्दते प्राप्नोति वशीकरोतीति वा सर्वथा मनोहरणयोग्यतोक्ता, अत एव मोहिता इति मा ऊहितं तद्वारणं याभिस्ताः, यद्वा गोविन्देन गोभिः श्रुतिवचोभिर्विन्दते तात्पर्यवृत्त्या बोध्यते इति तथा तेनापहृत आत्मा तात्पर्यं यासामनेन यथा श्रुतीनां तात्पर्येण ब्रह्मपर्यवसितानां न देवान्तरपर्यवसानं तथा तासामपि न तत्रावस्थितिः यद्वा गवामिन्द्रेणैवापहृता वंशीरवेण मनोहरेण मनोपहृत्योत्थाप्य स्वैश्वर्यादेव स्वसमीपं नीता आत्मानो देहा एव यासामित्यनेन देवेन्द्रविजयिगवेन्द्रापहृतात्मनां न देवप्रतिबन्धः किञ्चित्करः तत्र साक्षादात्महरणे हेतुर्मोहिता इति मा तपोलक्ष्मीरूपेणोहिता भगवताऽऽत्मीयत्वेन सम्मता इति परस्परं वा हेतुहेतुमद्भावः, वस्तुतस्तु भगवतो नित्यसहचरीणां सर्वथा वारणागाचरत्वात् देवाङ्गनानामपि ब्रह्माज्ञया तत्तद्देवानुज्ञया च भगवत्प्रियार्थावतार्णानां तद्वारणासम्भवात्—

तद्भूरि भाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेपि कतमाङ्घ्रिरजोभिषेक ।
यज्जीवितं तु निखिलं भगवान्मुकुन्दस्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ॥

इति ब्रह्मवचनात् व्रजवासिनां सर्वेषामपि भगवदेकजीवनत्वात् परमानन्दघननिरावरणपरमप्रेमास्पदकृष्णब्रह्मसाक्षात्कारेपि केषाञ्चित्प्रेम केषाञ्चित्तदभाव इति वक्तुमप्यशक्यत्वात् तथात्वे तु तत्परमानन्दघनत्वप्रेमास्पदस्वभावत्वे सन्देहापत्तेः, न च मायामोहितानां तथात्वसम्भावना तत्साक्षात्कारे तल्लीलाधाम्नि च मायामोहासम्प्रतिपत्तेः, न चासुराणां मोहितत्वं व्रजजनेष्वसुरत्वासम्भवात् असुराणामपि तत्र निविष्टानां तत्साक्षात्कारवतां मायामोहानौचित्यात् भगवद्दर्शने उद्भूतानुरागानामपि तेषां लीलानुसारितया गोपबालानामिव युद्धादिलीलोपपत्तेरन्यथा प्रेमैकलभ्यभगवत्प्राप्त्यसम्भवापत्तेश्च "मन्येऽसुरान्भागवतांस्त्र्यधीशे संरम्भमार्गाभिनिविष्टचित्तान्" इत्यादिवचनात् भगवता सङ्केते सन्दर्शितस्वगतानुसारेण तु सर्वेषामाधुनिकानामपि व्रजवासिनां भगवद्रूपत्वात्किमु वाच्यं तदानीन्तनानां तथा च सर्वथा लीलाप्रतिबन्धकवारणाद्यसम्भवेपि प्रेमपथोपदेशगानादिना सर्वोद्धारार्थं प्रकाशितलीलोपयोगतया गोपगोपीनां तच्चेष्टोपपत्तिरिति सर्वमनवद्यं काश्चित्तु प्रेमिणां भगवदेकजीवनत्वेन तन्मिलनप्रतिबन्धेन जीवनं किन्तु प्रतिबद्धगुणमयदेहत्यागेन भगवल्लीलाप्रवेश इति स्वचरितेनैवोपदिशन्ति–अन्तर्गृहगता इत्यादिस्त्रिभिः । यद्यपि भगवल्लीलाधामानुगतानां विभागानुपपत्तिः तथापि ऋषिरूपाणामाधुनिकसाधनसिद्धानां चरितानुकारेणैव तदुपदेशोपपत्तिः तत्रायमर्थः—अन्तर्गृहगता दैवात्तथा भावित्वात् पूर्वमेव गृहान्तःप्रदेशे स्थिताः, अत एव पत्यादिवारणेनालब्धविनिर्गमाः न लब्धो विशेषतो निर्गमो याभिस्ताः न लब्धो वीनां पक्षिणामिव निर्गमो याभिरिति वा अनेनैव पूर्वपद्यवर्णितानामन्तर्गृहगतत्वाभावेन लब्धविनिर्गमानां तद्वारणाप्रतिबन्धत्वमुक्तं तथा च गुणमयदेहे एव तत्प्रतिबन्धसम्भवमालक्ष्य तत्त्यागाय कृष्णम्—

"कृषिर्भूवाचकः शब्दोऽणश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" ॥

इति वाचनान्नित्यानन्दरूपं श्यामसुन्दरं मनःकर्षकं वा दध्युः, ननु ग्राम्याणां गोपाङ्गनानां कथं ध्यानप्रकारावगतिस्तत्राह, तद्भावनायुक्ता इति । मुनिरूपत्वेन साधनसिद्धत्वेन च पूर्वमपि जन्मान्तरे तत्संस्कारादिह च तद्भावनाध्यानं तेन युक्ता इति तत्र लिङ्गमाह—मीलितलोचना इति । यद्वाऽन्यविषयसंस्कारो ध्यानविरोधी स च पूर्वविषयसम्पर्कजनितभावनासंस्कारात्मक आधुनिकेन्द्रियसन्निकर्षजातश्च द्विविधः तत्र प्रथमाभावे हेतुमाह–तद्भावनेति । पूर्वमपि तद्भावनयैव युक्ता इत्यन्यभावनाभावात् केन ध्यानप्रतिबन्धो भवेत् द्वितीयाभावे हेतुमाह मीलितलोचना इति । ततश्च कृष्णध्यानेनैव दृष्टादृष्टद्वारा गतदेहाध्यासत्वात्प्रतिबद्धं यद्गुणमयं देहं तत्सद्यो जहुः, ननु सति कर्मबन्धशेषे गताध्यासत्वमात्रेण कथं जहुस्तत्राह–प्रक्षीणबन्धना इति । प्रकृष्टतयाऽनवशिष्टलेशतया क्षीणानि निवृत्तानि कर्मबन्धनानि यासां ताः, ननु यथा कथञ्चिदागामिसञ्चितयोरश्लेषविनाशाभ्यां क्षीणात्वसम्भवेपि भोगैकनाश्यप्रारब्धपापपुण्ययोः कथं निवृत्तिरिति शङ्कायामाह–दुःसहप्रेष्ठविरहेति । पूर्वं दुःसहो यः प्रेष्ठस्य कृष्णस्य विरहस्तेन यस्तीव्रस्तापो दुःखं सर्वाशुभफलीभूतदुःखानां ततोन्यूनत्वेन तदन्तर्भावात्तेनैव भोगद्वारा धुता अशुभा याभिस्ताः तथा तदनन्तरं ध्याने एव प्राप्तो योऽच्युतस्याश्लेषो निबिडपरिरम्भस्तेनोद्भूताया निर्वृत्तिः सर्वशुभफलीभूतसुखानां "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुत्या तल्लेशत्वात्तयैव सर्वशुभफलानां प्राप्तत्वाद्भोगद्वारैव क्षीणानि प्राचीनशुभानुष्ठानजनितादृष्टरूपाणि मङ्गलानि यासां ताः, न च नियतकालभोगयोग्यानां शुभाशुभानां युगपद्भोगानुपपत्तिरिति वाच्यं सर्वकर्मफलभोगदेशकालनियमस्य फलप्रदेशाधीनतया तदिच्छयैव तदुपपत्तेः किञ्चादृष्टोद्बोधकदेशकालनिमित्तानां फलैकानुमेयतयाऽत्रैवं फलदर्शने एवमेव तत्स्वीकारापत्तेः शङ्कानवसर एव । ननु, ध्यानमात्रेण योगिनामिव देहाप्रतीतावपि बोधाभावे कथमध्यासतिः सत्यामपि देहाप्रतीतावज्ञयोगिनां सुषुप्तिं गतानां च पुनरुत्थाने तदध्यासानुवृत्तिदर्शनात् तत्राह—तमेवेति । जारबुद्ध्याऽपि तं परमात्मानमेव सङ्गतास्तथा च दीपप्रज्वालनपाकाद्यर्थमङ्गारबुद्ध्या मणौ प्रवृत्तस्य मणिलाभवद् भोगाय जारबुद्ध्याऽपि परमात्मानमेव सङ्गतानां तल्लाभो गुणमयदेहत्यागश्चेति सर्वमनवद्यं वस्तुतोऽस्मिन्पक्षेपि न तासां गुणमयो देहः न वा तत्त्यागः किन्तु तदनुकारेणोपदेशमात्रं यद्वा, मुनिरूपासु गोपिकासु काश्चित्पूर्वमेव दृढभावनया गुणमयदेहत्यागेन लीलोपयोगिसच्चिदानन्दघनस्वरूपात्मकदेहा एव जातास्तास्तु कृष्णाह्वानमात्रेणाप्रतिबद्धतया गताः, याः काश्चित्तु यथा वामदेवस्य पूर्वं भावनापरिपाकाभावाज्जन्मप्राप्तावपि गर्भ एव भावनापरिपाकात्तत्प्राप्तिस्तथा भावनाया यथावदपरिपाकेन गुणमयदेहेन जातास्तास्तु आह्वानात् पूर्वमत्र गोपीदेहे दुःसहप्रेष्ठविरहतीव्रतापधुताशुभत्वेन ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणामङ्गलत्वेन प्रक्षीणबन्धना नष्टादृष्टप्रतिबन्धा अतोऽधुना कृष्णमुरलिकाह्वानसमये लीलाप्रवेशाय तद्योग्यस्वरूपात्मकदेहस्य नित्यसिद्धस्य सर्पारोपतिरोहितरज्जुवत् गुणात्मकदेहारोपतिरोहितत्वात्तदपवादाय कृष्णं ध्यातुमन्तर्गृहगतास्तत्रापि मीलितलोचनास्तथा तद्भावनायुक्ता अत एव ध्यानविक्षेपकेन्द्रियनिरोधात्तद्भावनायुक्तत्वेन क्षोभकान्यान्तर्वासनाभावाच्चालब्धविनिर्गमा न लब्धो बहिः कस्मिंश्चिदपि विषये चित्तविनिर्गमो यासां तथाभूताः कृष्णं नित्यानन्दविग्रहं श्यामसुन्दरं मनःकर्षकं दध्युः, ध्यानप्रभावेनैव गुणमयं देहं जहुः ततश्च तमेव श्यामसुन्दरं परमात्मानं सङ्गताः गुणमयदेहाभावात्सम्यक्प्राप्ताः, ननु जारबुद्ध्या कथं सङ्गतास्तत्राह–जारबुद्ध्यापीति । अङ्गारबुद्ध्या मणिमिव जारबुद्ध्यापि परमात्मानमेव सङ्गताः, यद्वा, अपिना

बुद्ध्यन्तरमपि द्योतयते तथा च जारो रमणस्तद्बुद्ध्या परमात्मबुद्ध्या च सङ्गतास्तत्र परमात्मबुद्ध्या गुणमयदेहाय वादो रमणबुध्या रमण च "तं यथा यथोपासते तदेव भवति" इति श्रुतेः, न च परमात्मप्राप्तौ रमणसम्भवो वाच्यः "यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान्सह ब्रह्मणा विपश्चिता" इति श्रुत्या तथाऽवगमात्, अत्र जारशब्दो रमणमात्रवाची न तूत्पत्तिविषयः, अग्रे कान्तं विदुरित्युक्तः पूर्वमपि "पतिं मे कुरु ते नमः" इति निर्देशात्, यद्वा, काश्चिद् गोप्यो वंशध्वनिश्रवणोत्तरं पूर्वं प्रेष्ठविरहतापेन शुष्कदेहतया ध्वनिसौष्ठवमोहिततया चालब्धविनिर्गमा गन्तुमशक्ता अन्तर्गृहगता एव प्रथमं तद्भावनायुक्ता मीलितलोचनाः सत्यः कृष्णं दध्युः ततश्च ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या यो दुःसहप्रेष्ठविरहेण देहशोषणहेतुभूतस्तीव्रतापः स एव धुतोऽशुभो यासां तासामन्याशुभासम्भवात् तयैव निर्वृत्या क्षीणानि गृहसौख्यप्रदान्यन्यानि मङ्गलानि भोगोपयोगिशृङ्गारसौष्ठवादीनि यासामिति वा तथा च धुततापत्वेन लब्धदेहसामर्थ्यत्यक्तसमस्तगृहकृत्याः सम्पन्नसर्वमङ्गलाः सत्यः, आदौ जारबुद्ध्या सङ्गता अपि तां गुणभूतां जारबुद्धिं जहुः, अथ च सर्वथा प्रतिबन्धाभावात्तं परमात्मानमेव गुणमयं देहं सम्यक् मुख्यकान्तधिया गताः निश्चेतनात्मकशरीरगुणैश्च हीन इत्यादिवचनात्तद्देहगुणयोः स्वरूपात्मकतया देहदेहिगुणगुणिविभागाभावात्। यद्वा, काश्चिद् गृहान्तर्गता अत एवालब्धविनिर्गमास्ततश्च दुःसहप्रेष्ठविरहतीव्रतापेन धुताः कम्पिताश्च ता एवासमन्ताच्छुभा शुद्धा ध्यानं कर्त्तुं योग्याश्चातः कृष्णप्राप्तये कृष्णमेव नित्यं तद्भावनायुक्ता मीलितलोचना दध्युः ततश्च ध्यानप्राप्ताच्युताश्लेषनिर्वृत्त्या क्षीणमङ्गलाः सत्यः, येन गुणमयदेहसम्बन्धेन कृष्णे जारबुद्धिर्भवति स हेय इति व्यवस्य जारबुद्ध्या निमित्तभूतया गुणमयं देहं सीतासञ्ज्ञाभ्यां छायादेहत्यागवत्पतिम्मन्यसमीपे जहुः ततः सद्यः प्रक्षीणबन्धना अप्राकृतदेहेन तमेव परमात्मानं सम्यग् गताः, अत एवान्ते च वक्ष्यति—

"नासूयन् खलु कृष्णाय मोहितास्तस्य मायया। मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः" ॥ इति ॥ ८-११ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

काश्चिच्चन्दनकुङ्कुमादिना भगवदङ्गसङ्गसम्भावनायाऽङ्गरागं कुर्वत्योऽप्युत्कण्ठया तल्लेपनं हित्वा आकर्षकस्य प्रेष्ठस्य समीपं ययुः, अन्याः प्रमृजन्त्यः—अङ्गोद्वर्त्तनादिकं कुर्वत्यः, अनेनावश्यकदेहावेशादित्याग उक्तः कासाञ्चिद् गमनत्वरावेशवशाद् हावयवविशेषाऽनुसन्धानाभावमाह—व्यत्यस्तेति। स्थानतः स्वरूपतश्चोद्ध्वाऽधोधारणेन विपर्ययं प्राप्तानि वस्त्राभरणानि यासां ताः "वल्लभप्राप्तिवेलायां मदनावेशसम्भ्रमात्। विभ्रमो हारमाल्यादिभूषास्थानविपर्ययः" इत्युक्तो विभ्रमाख्योऽनुभावोऽयम्। अनेन भगवत्तुष्ट्यर्थं कर्म तदासक्तचेतसामन्यथा कृतमपि फलत्येवेति ध्वनितं निवृत्तिपक्षे आगमनप्रकाराकाङ्क्षायां श्रुतिः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन" "सर्वापेक्षा च यज्ञादि श्रुतेः" (३।४।२६) इति श्रुतिसूत्राभ्यां सर्वकर्मणामिव संयोगपृथक्त्वन्यायेन तत्प्रतिपादकश्रतीनामपि परमात्माभिमुख्यमाह—दुहन्त्य इति। "जुहुयाद्यजेत दद्यात्" इत्यादि श्रुतयस्तत्तत्कर्मफलप्राप्तिं प्रतिपादयन्ति अहोहं तत्फलं हित्वा तत्प्रतिपादने मुख्यं तात्पर्यं विहायाभिययुः ब्रह्मणि समन्वयं गन्तुं प्रवृत्ताः—"सर्वे वेदा यत्पदमामनन्ति" इत्यादिश्रुतेः। काश्चित्तु समुत्सुकाः "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पाप कर्म न श्लिष्यते, तद्यथेषीकातूलमग्नौ प्रोतम्प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते" इत्याद्याः श्रुतयः। पयःस्थानीयं क्रियमाणं सञ्चितं च कर्माऽधिश्रित्य तदपरिपाकं तद्भोगपर्यन्तं प्रतीक्षानिन्यस्सम्प्रतिपाद्याभिययुः "तस्य तावदेव चिरं यावन्न विमोक्षे अथ सम्पत्स्ये" इत्याद्याः, अपराः परिपक्वगोधूमकणान्नस्थानीयं प्रारब्धकर्मानुद्वास्य भोगं विना तत्क्षयाभावं प्रतिपाद्य अपराः "सूर्याय जुष्टन्निर्वपामि अग्नये जुष्टं निर्वपामि" इत्याद्यास्तत्तद्धविः परिवेषयन्त्यस्तत्र तात्पर्यं हित्वा तथा अपरा "अक्षय्यं वै चातुर्मास्ययाजिनः सुकृतं भवति अपामसोमममृता अभूम" इत्याद्याः शिशून्पयः स्थानीयं कर्मफलमक्षयत्वेन प्रतिपादयन्त्यस्तत्र तात्पर्यं हित्वा। यद्वा, सर्वकर्मा "सर्वकामः सर्वगन्धः सर्वरसः" इत्याद्याः परिवेषयन्त्यः "ऋतं पिबन्तो सुकृतस्य लोके" इत्याद्याः पयः स्थापनायसुकृतफलपानं चेतनकर्मकं प्रतिपादयन्त्यः काश्चित् "स होवाच प्राणोऽहमस्मि प्रज्ञात्मानं मामयुष्मन्तमित्युपास्व" इत्याद्याः पतीन्स्वर्गादिपतीन् इन्द्रादीन् प्रतिपादयन्त्यः तत्प्रतिपादनतात्पर्यं हित्वा काश्चित् "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः, मृत्युर्यस्यापसेचनं, क इत्था वेद यत्र सः" इत्याद्याः अन्यादि कर्तृकाशनं प्रतिपादयन्त्यः भोजनमृत्य्वादिरूपम् अपास्य तत्प्रतिपादनं विहाय तथा अन्याः "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति" इत्याद्याः लिम्पन्त्यो लेपनमध्यारोपम्प्रतिपादयन्त्यः, अन्या "अथा त आदेशो नेति नेति नेह नानास्ति किञ्चन, अस्थूलमनणु" इत्याद्याः प्रमृजन्त्यः प्रकर्षेण मार्जनमपवादं प्रतिपादयन्त्यः काश्चन "अनीशया शोचति मुह्यमानः, यः सर्वज्ञः सर्ववित्, सर्वस्य वशी सर्वस्यैशानः" इत्याद्याः लोचनस्थानीये जीवे सञ्चैतन्ये अञ्जयन्त्यः उपाधिमत्तया प्रदिपादयन्त्यः काश्चित्तु "त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि तत्त्वमसि, अहं ब्रह्मास्मि" इत्याद्याः व्यत्यस्तवस्त्राभरणाः स्वस्वरूपाच्छादकम् अहं कर्तत्यादिप्रनीत्यापादकं जीवत्वं वस्तुस्थानीयम् ऐश्वर्याद्यलङ्कृतिप्रतीत्यापादकहारेण प्रतिपादिते वस्त्राभरणे याभिस्ता। यद्वा, व्यत्यस्तौ सम्यक् परिक्षिप्तौ वस्त्राभरणमीश्वरत्वस्थानीयं व्यत्यस्ते व्यस्तप्रतिस्थानीयौ आवर्णविक्षेपौ याभिस्ता वृत्तयो बहिर्मुखतां विहायान्तर्मुख्या जाता इत्यपि द्रष्टव्यम् ॥ ७ ॥

ननु—

"रक्षेत् कन्यां पिता कान्तां पतिः पुत्रस्तु वार्द्धके। अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियः" ॥

इत्युक्त्या तासां रक्षकानां विघ्नभूतानां सत्त्वे कथं कृष्णान्तिकं ययुरित्यादिशङ्क्य "त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्द्धसु प्रभो"! इत्युक्तत्वात् कृष्णाकृष्टचेतसां न विघ्नाः भवन्तीत्याशयेनाह–ता इति। तत्र चतुर्विधा गोप्यः पद्मपुराणेऽभिहिताः—

"गोप्यस्तु श्रुतयः प्रोक्ता ऋषिजा गोपकन्यकाः। देवकन्याश्च राजेन्द्र न मानुष्यः कथञ्चन" ॥

इति प्राकृतमानुषभावरहिताः तत्र गोपकन्याः काश्चिन्नित्यसिद्धाः काश्चित् साधनसिद्धाः तत्र नित्यसिद्धा आह्लादिनीशक्तिरूपाः "आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिः" इति ब्रह्मसंहितायामुक्तत्वात् ह्लादिनी या महाशक्तिरिति बृहद्गौतमीयाच्च तथा च सच्चिदानन्दघनः परमात्मा गोपालरूपमसङ्ख्यातगोपालिकारूपं चादाय क्रीडार्थं प्रकटिते गोलोके क्रीडति स चात्र ताभिः सार्द्धमवतीर्णस्ततस्तासां नित्यसिद्धत्वादिकमुच्यते द्वितीयास्तु काश्चित् गोपीजनवल्लभोपासनया प्राक् गोपीभावं गोलोकं प्राप्य भगवता लब्धक्रीडा आज्ञयावतीर्णा काश्चित्सम्प्रति गोकुले एव गोपीभावास्ताः पूर्वोपासनकात्यायनीव्रताचरणादिसाधनसिद्धत्वात्साधनसिद्धाः श्रुत्यादयस्तु सर्वा अपि साधनसिद्धा एव साधनं च प्रार्थनादि तदुक्तं बृहद्वामनपुराणे—

"कन्दर्प्यकोटिलावण्ये त्वयि दृष्टे मनांसि नः। कामिनीभावमासाद्य स्मरक्षुब्धान्यसंशयः" ॥
यथा त्वल्लोकवासिन्यः सकामत्वेन गोपिकाः। भजन्ति रमणं मत्वा चिकीर्षाऽजनि नस्तथा" ॥

इति ऋषीणां श्रीमद्रामचन्द्रप्रसादात् गोपिकाजन्मप्राप्तिरुक्ता पाद्मोत्तरखण्डे—

"पुरा महर्षयः सर्वे दण्डकारण्यवासिनः। दृष्ट्वा रामं हरिं तत्र भोक्तुमिच्छन् स्वविग्रहम् ॥
ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले। हरिं सम्प्राप्तकामेन ततो मुक्ता भवार्णवात्" ॥

इति श्रीमद्राममवलोक्य स्वोपास्यगोपविग्रहं हरिं स्मृत्त्वा तमेव भोक्तुमिच्छावता लज्जाया तदवृतवता कल्पतरोरिवावदतोऽपि श्रीरामाभीष्टसिद्धिर्जातेत्यर्थः। सम्भवन्तु सुरस्त्रियः इति प्राग्भावाय भगवदाराधनलब्धब्रह्माज्ञयाऽवतीर्णत्वाद् वाङ्गनानां साधनसिद्धता तत्र "नैते सुरेशा ऋषयो न चैते" इत्युक्तत्वात्सुराणामृषीणाञ्च गोपालादिरूपेणावतीर्णत्वाद् वाङ्गनाः स्वपतिभिर्द्वैवैः तत्तत्प्रतिविवाहादिकम् ऋषिचरीणां तु ऋषीणां दम्पतीरूपेणावतीर्णत्वात्तत्स्वरूपभूतैरेव पतिभिर्विवाहादिकं श्रुतीनां कासाञ्चित्तु तत्तत्प्रतिविवाहादिकम् ऋषिचरीणां तु ऋषीणां दम्पतीरूपेणावतीर्णत्वात्तत्स्वरूपभूतैरेव पतिभिर्विवाहादिकं श्रुतीनां कासाञ्चित्तु मायया प्रकटीकृतैर्गोपैः वा माद्यर्थैः प्राप्तगोपालरूपैः भगवत्प्रतिपादकानां नित्यसिद्धगोपीनां च स्वसमानमायामयवैग्रहाणां गोपैः मायया प्रकटीकृतैर्गोपैः वा माद्यर्थैः प्राप्तगोपालरूपैः भगवत्प्रतिपादकानां नित्यसिद्धगोपीनां च स्वसमानमायामयवैग्रहाणां गोपैः विवाहादिकं सञ्जातं तत्र ऋषिचर्य्यैः भगवत्प्रतिपादिकाः श्रुतयश्च सर्वा अप्यभिज्ञाः साधनसिद्धगोपीनां देवकन्यानां च मध्ये काश्चिदभिज्ञाः काश्चिदनभिज्ञाश्च नित्यसिद्धानां मध्ये भगवत्सङ्कल्पाऽनुसारेण नरनाट्यमवलम्ब्य काश्चिन्मानिन्यः काश्चिद्दाक्षिणाः भगवत्स्वरूपप्रतिपादकश्रुतीनां मध्येपि अतन्निरसना खण्डार्थाः गृहीतमानिनीस्वरूपाः अन्यास्तु गृहीतदक्षिणारूपास्तत्रैवम्भूतानां गोपाङ्गनानां मध्ये काश्चित् पितृभिः काश्चित्पतिभिः काश्चिद् भ्रातृभिः काश्चिद् बन्धुभिः काश्चित् पुत्रैरित्यपि द्रष्टव्यं वार्यमाणा अपि न न्यवर्तन्त यतः गोविन्देन वेदोद्धारकेण गोलोकविहारिणां गवेन्द्रेण प्रेष्ठेन भगवता अपहृतः आत्मा अन्तःकरण यासां ताः तथा चान्तःकरणारूढेन भगवता यद्गतांततष्करणानां श्रोत्रं निवारणमकिञ्चित्करं प्रवाहपतितनौकायां स्थितस्य तिष्ठतिष्ठेति निवारणं यथाननुमयात्स्वधर्मोद्धातास्वंतःकरणां निरुह्य किमिति न निवृत्ता इत्याशङ्क्याह—मोहिता इति। भगवत्स्वरूपाशक्तिः, उक्तदशायायथाननुमयात्स्वधर्मोद्धातास्वंतःकरणां निरुह्य किमिति न निवृत्ता इत्याशङ्क्याह—मोहिता इति। भगवत्स्वरूपाशक्तिः, उक्तदशाया-

कर्मान्यथा कृतमपि कृष्णप्रियं भवतीति सूच्यते ।। ७ ।। श्रीकृष्णशक्तजनैः कृष्णप्रातिकूल्यविषया स्वजनाज्ञाप्युपेक्षणीयैवेति सूचयन् ता वार्यमाणाः, अपि न न्यवर्तन्तेत्याह ता इति ।। ८ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

लिम्पन्त्यो गन्धादिभिरङ्गं वा गोमयेन गृहं वा प्रमृजन्त्यः शरीरशुद्धिं कुर्वत्यः काश्च लोचने अञ्जन्त्यः कज्जलेन । अन्याः काश्चिद्व्यत्यस्तवस्त्राभरणा व्यत्यस्तानि वस्त्राणि परिधानीयमौत्तरीयं परिधानीयमिति वस्त्राणि तथा करभूषणं पादे पादभूषणं कर इत्याभरणानि च यासां ताः कृष्णान्तिकं ययुः ।। ७ ।। पतिभिः स्वभर्तृभिः पितृभिर्भ्रातृभिर्बन्धुभिर्भगिनीभिर्भर्त्रादिभिर्वार्यमाणा न गच्छेति निवार्यमाणा योषित ई आ नित्यमुषितोरसि यस्य स योषितस्तद्गोविन्दहृतात्मानो गोविन्देन कृष्णेन हृत आत्मा मनो यासां ता न न्यवर्तन्त । यत्र रमा मोहिता चञ्चलाऽपि चाञ्चल्यं विहाय तत्र तद्गमनं न चित्रमिति भावः । हे गोविन्देति । अपहृता आत्मनोऽपेन पालकवर्जितेन हृतात्मानो योषितो न न्यवर्तन्तेति वा । लोके चैकैकस्मिन्पतित्वादिकमत्र तु तत्समुदितमिति तत्त्यागेनागमनमङ्गनानां युक्तमिति तात्पर्यम् ।। ८ ।।

श्रीसुबोधिनी

लिंपंत्यो गात्राणि प्रमृजंत्य उद्वर्तनं कुर्वत्योऽन्याः काश्च लोचने अंजंत्यः विपरीतवस्त्राभरणाः काश्चित् कृष्णसमीपं ययुः ।। ७ ।। पत्यादिभिर्वार्यमाणा अपि कृष्णेनाकृष्टचित्ता मोहितास्ता गोप्यो न न्यवर्त्तन्त ।। ८ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

काश्चित्कृष्णान्तिकमित्यत्र, तन्मध्येपीति । अन्यथा पूर्ववाक्ये काश्चिदित्युक्तत्वाद्वस्त्रादिव्यत्यासस्य जवकृतस्य सर्वसाधारणत्वादग्रे काश्चिदितिपदमसम्बद्धं स्यादिति भावः ।। ७ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्यास्तु लिम्पन्त्यः शरीरे चन्दनादिलेपनं कुर्वत्यो लेपनं हित्वा कृष्णान्तिकं ययुः । तथाऽन्याः प्रमृजन्त्यः अङ्गोद्वर्तनादिकं कुर्वत्यः तद्धित्वा ययुः । काश्चित् लोचने अञ्जन्त्यः अञ्जनं हित्वा ययुः । एतेनापि कामोपेक्षा ।। 'श्रीकृष्णासक्तमनसां तत्तुष्ट्यर्थमन्यथाकृतमपि कर्म फलत्येव' इति द्योतयन्नाह—व्यत्यस्तेति । व्यत्यस्तानि स्थानतः स्वरूपतश्च ऊर्ध्वाधोधारणेन विपर्ययं प्राप्तानि वस्त्राणि आभरणानि च यासां ताः काश्चित् कृष्णस्यान्तिकं ययुः ।। ७ ।। 'पत्यादिभिस्तासां प्रतिबन्धः कुतो न कृतः ?' इत्यपेक्षायामाह—ता इति "रक्षेत् कन्यां पिता विन्नां पतिः पुत्रस्तु वार्द्धके । अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियः" इति शास्त्रानुसारेण यथायथं ता गच्छन्त्यः स्त्रियः पत्यादिभिर्वार्यमाणा अपि न न्यवर्तन्त, किन्तु कृष्णान्तिकं ययुरेवेत्यन्वयः । ननु 'तासां लोकभयं परलोकनाशभयं वा कुतो न जातम् ?' इत्याशङ्क्याह—मोहिता इति । तत्र हेतुमाह—गोविन्देति । गो इन्द्रियाणि नियम्यतया विन्दत इति गोविन्दः सर्वेन्द्रियनियन्ता श्रीकृष्णस्तेनापहृतः आत्मा अन्तःकरणं यासां ताः । अन्तःकरणारूढा जीवाः, अन्तःकरणप्रवर्तकश्च भगवान्, अतः कथं तासां वाङ्मात्रेण निवारणं स्यात् ? नहि प्रवाहवेगेन गच्छन्ती नौका तिष्ठ तिष्ठेत्युक्ता तिष्ठतीति भावः ।। ८ ।।

अन्वितार्थप्रकाशिका

स्वाङ्गवेषस्य त्यागमाह—लिम्पन्त्य इति ।। अन्यास्तु लिम्पन्त्यः शरीरे चन्दनादिलेपनं कुर्वत्यो लेपनं हित्वा कृष्णान्तिकं ययुः । तथान्याः प्रमृजन्त्यः अङ्गोद्वर्तनादिकं कुर्वत्यः तद्धित्वा ययुः । काश्चित् लोचने अञ्जन्त्यः अञ्जनं हित्वा ययुः । नुमाषः । व्यत्यस्तानि स्थानतः स्वरूपतश्चोर्ध्वाधोधारणेन विपर्ययं प्राप्तानि वस्त्राणि आभरणानि च यासां ताः काश्चित् कृष्णस्यान्तिकं ययुः ।। ७ ।। ता इति ।। पतिभिः पितृभिर्भ्रातृभिर्बन्धुभिश्च वार्यमाणा अपि गोविन्देन अपहृत आत्मा यासाम् अतो मोहिताः सत्यः न न्यवर्तन्त अपि तु कृष्णान्तिकं ययुरेव । अत्र पत्यादिभिर्वारण लालाप्रदर्शनार्थं गोपीनां प्रेमोत्कर्षोद्भावनार्थं च । वस्तुतो मन्यमाना स्वपार्श्वस्थान् इत्यादियोगमायाबलमेव सर्वत्र समाधानम् ।। ८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गृहान् लिंपंत्यः प्रमृजंत्यः तैलादिनांगानि मर्दयंत्यश्च अंजंत्यः लोचनयोः अंजनं कुर्वत्यः काश्च ययुरिति सर्वत्र योज्यं व्यत्यस्तवस्त्राभरणाः व्यत्यस्तानि स्वधारणां गतः स्वरूपताश्च विपरीतधृतानि वस्त्राणि याभिस्ताः ।। ७ ।। हरावतिप्रीतिमतां तत्संगयोगे अतराया न सतीत्याहता इति मोहिताः परमेश्वरे मूढत्वेन संलग्नाः यश्च मूढतमो लोके यश्च बुद्धेः परंगतः द्वाविमौ सुखमेधेते क्लिश्यत्यंतरितो जन इत्युक्तेः ।। ८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

लिम्पन्त्य इति ॥ काश्चित् लिम्पन्त्यश्लक्ष्णमृद्भ्यां गृहलेपनं कुर्वत्यः तद्धित्वा, अन्याः प्रमृजन्त्यः अङ्गोद्वर्त्तनादिकं कुर्वत्यः तद्धित्वा, काश्च काश्चन, लोचने अञ्जन्त्यः सत्यः तद्धित्वा, ययुः । काश्चित् व्यत्यस्तानि विपरीतानि स्थानतः स्वरूपतश्चोर्ध्वाधोधारणेन विपर्ययं प्राप्तानि वस्त्राण्याभरणानि च यासां तथाभूताः सत्यः, कृष्णान्तिकं श्रीकृष्णसमीप, ययु राजन्मुः ॥७॥ न च कृष्णाकृष्टमनसां विघ्नाः प्रभवन्तीत्याह ॥ ता इति ॥ ता एवं कृष्ण प्रति गच्छन्त्यस्ता गोप्यः, पतिभिः स्वस्वामिभिः, पितृभिः स्वतातैः, भ्रातरश्च बन्धवश्च तैः, वार्यमाणाः निषेधिताः सत्योऽपि, मोहिताः परमेश्वरे मूढत्वेन सलग्नतां प्राप्ताः, 'यश्च मूढतमो लोके यश्च बुद्धेः परं गतः ॥ द्वाविमौ सुखमेधेते क्लिश्यत्यन्तरितो जनः' इत्युक्तेः । गोविन्देन श्रीकृष्णेन अपहृता आकृष्टा आत्मानो मनांसि यासा तथाभूताः सत्यः, न न्यवर्त्तन्त गृहान् प्रति नाजग्मुः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

लिम्पन्त्य इति : १०.२९.७.

सिद्ध्येत्किमिष्टमेतेन लेपोऽयमवलेपकृत् । स लेपो यद्विलेपेनातनुतापहृतिः स्फुटा ॥ ४६ ॥
क्षालनं किल जलैरलमेभिर्यत्क्षमं न बहिरंगविशुद्ध्यै ।
यत्स्मृतिर्हरति पंकमशेषं तद्धि पादजलजातमुपैति ॥ ४७ ॥
अञ्जनेन किमनेन लोचने यत्करोति समले तनुश्रिया ।
पूर्णशोभममलं मलापहं कृष्णरूपमलमेकमञ्जनम् ॥ ४८ ॥
सञ्जायते कृष्णपदाम्बुजेऽनुरागो यदा यस्य तदास्तमेति ।
भेदभ्रमस्तस्य भुवीति युक्तं व्यत्यस्तवस्त्राभरणास्तदा ताः ॥ ४९ ॥
आसां पूर्णसुरेशभक्तिरुदिता तन्मुक्तिभाजोऽङ्गना जाता एव तदङ्गसङ्गतिवशाज्जाता वयं चेत्तदा ।
अन्योन्यालयवाससौख्यविषया शिष्टा भवेद्वासना तत्तत्पूर्तिकृते बभूवुरखिलास्तेऽन्योन्यवासाश्रिताः ॥ ५० ॥
सर्वासां श्रुतनादतुन्दिलहृदां बाह्यावकृष्टात्मनां संयोगध्वनिताध्वना सुविदितश्रीशस्थितीनां पुनः ।
वृत्तीनां न हि दुर्घटं भगवतो विष्णोः स्वरूपेक्षणमेवं गोकुलयोषिदागमनतो व्याख्यायि योग्यो विधिः ॥ ५१ ॥

कृष्णप्रिया

अब राजस राजस, राजससात्विक राजस तामस एवं निर्गुण के क्रम से चारों प्रकार की गोपियाँ भगवान के श्रीचरणों की सेवा में पहुँची उनका निरूपण करते श्रीशुकाचार्यजी कह रहे हैं कि राजन् ! कितनीक गोपियाँ अपने शरीर पर अरगजा लगा रही थी अथवा निजगेह को लींप रही थी, कितनीक गोपियाँ तेल फुलेल से उबटन कर रही थी अथवा तो वर्तन एवं आभूषणों को मल रही थी वे सब काम छोड़कर आ पहुँची । जो निर्गुण गोपियाँ थी वे नयनों में अञ्जन आँज रही वह छोड़कर चली आई और कितनी एक गोपियाँ जल्दी पहुँचने के कारण अनुसंधान भूलकर उलट पलट वस्त्र एवं अलंकारों को पहनकर त्वरित गति से श्रीकृष्णचन्द्र जी के समीप आ पहुँची ॥ ७ ॥ राजन् ! वेणुनाद श्रवणकर जो गोपियाँ भगवान् श्रीकृष्ण के समीप जा रही थी तब उन गोपियों को उनके पति पिता पुत्र बन्धुओं ने जाने से रोका फिर भी जिनका अन्तःकरण हरि ने हरण कर लिया है वे नहीं रुकी, क्योंकि गोविन्द ने उनके चित्त को हर लिया था ॥ ८ ॥

अन्तर्गृहगताः काश्चिद् गोप्योऽलब्धविनिर्गमाः । कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ९ ॥
दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः । ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः ॥ १० ॥
तमेव परमात्मानं जारबुद्ध्यापि सङ्गताः । जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥ ११ ॥

राजोवाच

कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने । गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥ १२ ॥

कर्दमक्षमा

अन्वयः –काश्चित्, अन्तर्गृहगताः, गोप्यः, अलब्धविनिर्गमाः, तत्, भावनायुक्ताः, मीलितलोचनाः, कृष्णम्, दध्युः ॥ ९ ॥ दुःसहप्रेष्ठविरहतीव्रतापधुत–अशुभाः, ध्यानप्राप्त-अच्युत-आश्लेषनिर्वृत्या, क्षीणमङ्गलाः ॥ १० ॥ तम्, एव, परमात्मानम्, जारबुद्ध्या, अपि, सङ्गताः, सद्यः, प्रक्षीणबन्धनाः, ताः, गुणमयं, देहम्, जहुः ॥११॥ राजोवाच––मुने ! (गोप्यः) कृष्णम्, परम्, कान्तम्, विदुः, किंतु, ब्रह्मतया, न विदुः, गुणधियाम्, तासाम्, गुणप्रवाह-उपरमः, कथम्, (जातः) ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

न लब्धो विनिर्गमो याभिस्ताः प्रागपि तद्भावनायुक्तास्तदा नितरां दध्युरित्यर्थः ॥ ९ ॥ किं च तदानीमेव तं परमात्मानं श्रीकृष्णं ध्यानतः प्राप्ताः सत्यो गुणमयं देहं जहुरित्याह श्लोकद्वयेन । दुःसहेति । ननु कथं जहुः ? परमात्मेति ज्ञानाभावादित्याशंक्याह । जारबुद्ध्याऽपीति । न हि वस्तुशक्तिर्बुद्धिमपेक्षते । अन्यथा मत्वापि पीतामृतवदिति भावः । ननु तदपि प्रारब्धकर्मबंधने सति कथं जहुस्तत्राह—सद्यः प्रक्षीणबधना इति । ननु कथं भोगमंतरेण प्रारब्धं कर्म क्षीणं भोगेनैव सद्यः क्षीणमित्याह—दुःसहेति । दुःसहो यः प्रेष्ठस्य विरहस्तेन तीव्रस्तापस्तेन धुतानि गतान्यशुभानि यासां तदप्राप्तिपरमदुःखभोगेन पापं क्षीणमित्यर्थः। तथा ध्यानेन प्राप्ता अच्युतस्य आश्लेषेण या निर्वृतिः परमसुखभोगस्तया क्षीणं मंगलं पुण्यबधनं यासां ताः, अतो ध्यानेन परमात्मप्राप्तेस्तत्कालसुखदुःखाभ्यां निःशेषकर्मक्षयाद् गुणमयं देहं जहुरिति ॥ १०-११ ॥ ननु यथा पतिपुत्रादीनां वस्तुतो ब्रह्मत्वेऽपि न तद्भजनान्मोक्षस्तथा बुद्ध्यभावादेवं कृष्णेऽपि ब्रह्मबुद्ध्यभावेन तत्संगतिः कथं मोक्षहेतुरिति शंकते । कृष्णं विदुरिति । परं केवलं कांतं कमनीयम् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अंतर्गृहं गृहमध्यं तत्र गतास्तत्र निरुद्धाः काश्चिन्महालक्ष्म्यंशभूताः । विनिर्गमो बहिर्गमनम् । यद्वा—न लब्धोऽन्यगोपीवत् वीनां पक्षिणामिवातिशीघ्रं निःसरणं याभिः । यद्वा—वेः पक्षिणोऽपि निर्गमो यस्माच्छिद्रात्तदपि न लब्धं याभिस्तदधिकं कृत्वा तस्करावेशवन्निस्सरणार्थमिति भावः । तस्य कृष्णस्य भावना भक्तिसंस्कारस्तया युक्ताः । प्राक् वेणुनादश्रुतेः पूर्वमपि । तदा वेणुध्वनिश्रवणक्षणे । इत्यर्थ इति । तच्छ्रवणस्य तदाविर्भावबोधकत्वेन ध्यानहेतुतेत्यर्थः ॥ अत्रोज्ज्वलनीलमण्युक्तरीत्या विविच्यते—गोप्यस्तावद्द्विविधाः—नित्यसिद्धाः साधनसिद्धाश्च । साधनसिद्धाश्च द्विविधाः—यौथिक्योऽयौथिक्यश्च । यौथिक्यश्च द्विविधाः—श्रुतियूथभूयत्वाच्छ्रुतिचर्याः, ऋषियूथभूतत्वादृषिचर्याश्च । ततश्चासां चतुर्विधत्वमुक्तं पाद्मे—"गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः । देवकन्याश्च राजेंद्र न मानुष्यः कथंचन ।" इति । गोपीत्वेनैव मानुषीत्वे लब्धेऽपि न मानुष्य इति निषेधस्तासां प्राकृतमानुषीत्वाभावं ज्ञापयति । अत्र गोपकन्यका एव नित्यसिद्धास्तासां साधनाऽश्रवणात् । गोपीत्वे सत्यपि कात्यायन्यर्चनस्य तु साधनत्वं नरलीलत्वमेव ज्ञापयति, गोपीत्वस्य सिद्धत्वादेवेति तत्प्रसगे एव प्रपञ्चितम् । तासां नित्यसिध्यत्वे 'आनन्दचिन्मयरसप्रतिभाविताभिः' इति ब्रह्मसंहितोक्त्या तासां ह्लादिनीशक्तित्वप्रतिपादनात्, 'ह्लादिनी या महाशक्तिः' इति बृहद्गौतमीयाच्च, ताभिस्सह कृष्णस्य रमणस्यानादित्वाच्च, दशाष्टादशाक्षरादिमंत्रेषु तासां निर्देशात्, तन्मन्त्रोपासनानां तद्विधायकश्रुतीनां चानाद्यन्तकालभावितत्वाच्च । 'संस्तुवन्त्वमरस्त्रियः' इति प्रमाणावगतानां देवकन्यानां नित्यसिद्धगोपिकांशभूतत्वं व्याख्यातमुज्ज्वलनीलमणौ । श्रुतिचरीणां साधनसिद्धत्वम् "कंदर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः । कामिनीभावमासाद्य स्मरक्षुब्धान्यसंशयः ॥ यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः । भजन्ति रमणं मत्वा चिकीर्षाऽजनि नस्तथा ॥" इत्यादिबृहद्वामनवचनेभ्योऽवगतम् । ऋषिचरीणाञ्च "गोपालोपासकाः पूर्वमप्राप्ताभीष्टसिद्धयः" इत्युज्ज्वलनीलमण्युक्तानां तथाभूतत्वम् । "पुरा महर्षयः सर्वे दंडकारण्यवासिनः । दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन्सुविग्रहम् ॥ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले । हरिं संप्राप्य कामेन ततो मुक्ता भवार्णवात् ॥" इति पाद्मोत्तरखंडात् । अत्र रामं दृष्ट्वा हरिं भोक्तुमैच्छन्निति रामसौंदर्यदर्शनेन स्वोपास्यस्य हरेर्गोपालस्य स्मरणात्तमेव भोक्तुमैच्छन्नित्यर्थः । लज्जया तु साक्षात्तं न वृतवंतः । ततश्च कल्पवृक्षस्येवावदतोऽपि रामस्य प्रसादात्तेषामभीष्टसिद्धिर्जातेत्याह—ते सर्वे इति । हरिं कामेन संप्राप्य इत्यनुसंहितं फलम्, ततः कामादेव हेतोर्भवार्णवात्संसारान्मुक्ता इत्यनुसंहितं फलम् । अत्र 'मातरः पितरः पुत्राः' इति 'यत्पत्यपत्यसुहृदामनुवृत्तिरंग' इति 'पतिसुतान्वयभ्रातृबांधवान्' इत्याद्यग्रिमग्रन्थदृष्टेरपत्यवत्यो गोप्य एवांतर्गृहनिरुद्धा बभूवुरिति श्रीकविकर्णपूरगोस्वामिकृतदशमटीकायां दृष्टमतस्तदनुसारेण सार्वत्रिकं मूलार्थमव्याकोप्यैवं व्याख्यायते । गोपालोपासका ऋषयस्तु श्रीराममूर्त्तिमाधुरीदर्शनाद्रागमयभक्तेर्निष्ठारुच्यासक्तिरत्यङ्कुरभूमिका आरूढाः सम्यगपरिपक्वकषाया अपि श्रीयोगमायया देव्या गोकुलमानीय गोपीगर्भे जनिताः कन्यका बभूवुः । तासामेव मध्ये काश्चिन्नित्यसिद्धगोपीसंगभूम्ना वयःसंधिदशामारभ्यैव लब्धपूर्वानुरागाः स्फूर्तिप्राप्तकृष्णांगसंगाः, दग्धसम्यक्कषायाः प्रेमस्नेहादिभूमिका आरूढा गोपैर्व्यूढा अपि योगमाययैव तदंगस्पर्शदोषाद्रहिताश्चिन्मयदेहीभूताः कृष्णोपभुक्तास्तस्यां रात्रौ वेणुवादनसमये पतिभिर्वार्यमाणा अपि योगमायासाहाय्यप्रसादान्नित्यसिद्धगोपीभिः सहिता एव प्रेष्ठमभिसस्रुः । काश्चित्तु नित्यसिद्धादिगोपीसंगभाग्याभावादलब्धप्रेमत्वाददग्धकषाया गोपैर्व्यूढा गोपोपभुक्ता अपत्यवत्यो बभूवुः । ताः खलु तदनंतरमेव नित्यसिद्धादिगोपीसंगभूम्ना कृष्णांगसंगस्पृहोद्रेकात्पूर्वरागवत्यस्तासां कृपापात्रीभवंत्योऽपि कृष्णांगसंगायोग्यदेहत्वेन योगमायासहाय्याकरणात्पतिभिर्वारिताः कृष्णमभिसर्तुमक्षमा महाविपद्ग्रस्ताः पतिभ्रातृपुत्रादीन्स्वप्राणवैरित्वेन पश्यन्त्यो मरणदशायामुपस्थितायां सत्यां यथान्या मात्रादिबधुजनं स्मरन्ति तथैव स्वप्राणैकबन्धुं कृष्णं सस्मरुरित्याह—अन्तरिति । न लब्धो विनिर्गमो गतिर्याभिस्ता इति पतीनां द्वार्येव सतर्जनं सयष्टिकमुपविष्टत्वादिति भावः । सदैव तद्भावनया युक्ता अपि तदानीं दध्युः—हाहा प्राणैकबन्धो वृन्दावनकलानिधे जन्मान्तरेऽपि त्वत्प्रेयसीभूयासमस्मिन्नन्तकाले

त्वन्मुखचन्द्रं नाऽपश्यं, भवतु मनसापि पश्यामीति प्रत्येकं स्वगतमनुलपन्त्यो मुद्रितलोचनाः सत्यो नितरां दध्युः ॥ अत्र तोषिणी– यदि च तास्तादृशविघ्नेन वारिता अभविष्यंस्तर्हि सद्य एव दशमीं दशामिव दशामगमिष्यन्निति तासां सर्वासामेव भावविशेषं दृष्टान्तेन प्रदर्शयंस्तासां प्रस्थितवतीनामेव मध्ये कासांचिदवस्थाविशेषमाह–अन्तरिति त्रिभिः। अयमर्थः–श्रीकृष्णस्य व्रजप्रेयस्यस्तावद्द्विविधाः–नित्यसिद्धाः साधनसिद्धाश्च। तत्रैकासां नित्यसिद्धात्वमष्टादशाक्षरादावाभिर्विशिष्टत्वेनैव तदाराधनविधानाद्व्यक्तम्, तच्छ्रुतीनां तदाराधनानाञ्चानाद्यनंतभावितत्वात्। अतो ब्रह्मसंहितायाम्–'चिन्तामणिप्रकरसद्मसुकल्पवृक्षलक्षावृतेषु' इति, आनन्दचिन्मयरसप्रतिभाविताभिः' इति, "श्रियः कान्ताः कान्तः परमपुरुषः" इत्येता एव तदीयलक्ष्मीत्वेनोक्ताः। तत्र च श्रीराधिकाया वैशिष्ट्यं बृहद्गौतमीये–"देवी कृष्णमयी प्रोक्ता राधिका परदेवता। सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परा ॥" इति। अत एव ऋक्परिशिष्टे च परस्परमव्यभिचारित्वं प्रोक्तम्—"राधया माधवो देवो माधवेनैव राधिका। विभ्राजन्ते जनेषु—"इति। अतो मात्स्यादौ—"रुक्मिणी द्वारवत्यास्तु राधा वृन्दावने वने" इति शक्तित्वसाधारण्येनानयोर्गणनेऽपि वैशिष्ट्यं ज्ञेयम्। ब्रह्माण्डे तु श्रीकृष्णस्वरूपत्वं कृष्णस्याप्याराध्यत्वं चोक्तं ब्रह्मणा—"राधा कृष्णात्मिका नित्यं कृष्णो राधात्मको ध्रुवम्। वृंदावनेश्वरी राधा राधैवाराध्यते मया ॥" इति। अथावरासां साधनसिद्धत्वं यथा पाद्मोत्तरखंडे—"पुरा महर्षयः सर्वे दण्डकारण्यवासिनः। दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन्सुविग्रहम् ॥ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले। हरिं संप्राप्य कामेन ततो मुक्ता भवार्णवात् ॥" इति। गोकुल इत्यस्य हरिं संप्राप्येत्यनेनाप्यन्वयात् 'ये यथा मां प्रपद्यन्ते' इति न्यायाच्च। महर्षयः पूर्वं तादृशभावेन श्रीकृष्णोपासका इत्यर्थः। अतो रामं दृष्ट्वेति सारूप्येण जातस्वोपासनसंस्कारा हरिं स्वोपास्यं श्रीकृष्णमेवोपभोक्तुमैच्छन्, लज्जया तु साक्षान्न वृतवन्त इति। ततश्च कल्पवृक्षस्येवावदतोपि श्रीरामस्य प्रसादात्तेषामिष्टसिद्धिर्जातेत्याह—ते सर्व इति। गोकुले गर्भतः स्त्रीत्वमापन्ना गोकुल एव समुद्भूता गोकुल एव च हरिं श्रीकृष्णं कामेन स्ववासनानुसारेण संप्राप्य तस्मिन्नन्तर्गृह एव स्वयमाविर्भूतं लब्ध्वा ततस्तदनंतरमेव भवार्णवान्मुक्ता इति। न च वक्तव्यं गोकुलजातानां प्रापञ्चिकदेहादित्वं न संभवतीति, अवतारलीलायाः प्रापञ्चिकमिश्रत्वात्। श्रीदेवकीदेव्यामपि षड्गर्भसंज्ञकानां जन्म श्रूयत इति, 'कदाचिच्छ्रुतयो गोप्यो जाताः' इति बृहद्वामनपुराणप्रसिद्धिः, आदिपुराणीयवृन्दावनमाहात्म्येप्येतद्वृत्तं स्फुटमस्ति। तत्रत्यवाक्यजातमिह विस्तरभिया नोक्तम्। अत एव यथा व्याख्यास्यते "स्त्रिय उरगेंद्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समादृशोङ्घ्रिसरोजसुधाः" इति। 'गायत्री तासु जाता' इति पाद्मे सृष्टिखण्डे। यथा ब्रह्मणा गोपकन्यारूपाया गायत्र्या उद्वाहे गोपेषु श्रीविष्णुवरः "मया जाता ततः कन्या दत्ता चैषा विरिञ्चये। युष्माकं च कुले चाहं देवकार्यार्थसिद्धये ॥ अवतारं करिष्यामि मत्कान्ता तु भविष्यति।' इति। अतः 'तत्प्रियार्थं संभवन्तु सुरस्त्रियः' इत्यत्रापि तथा व्याख्यातम्। अत एव तासां चतुर्विधत्वमुक्तं पाद्मे—"गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः। देवकन्याश्च राजेन्द्र न मानुष्यः कथञ्चन ॥" इति। अत्र गोपकन्यका एव नित्याः 'न मानुष्यः कथञ्चन' इति प्राकृतमनुष्यतानिषेधात्। तासु च पाद्मोत्तरखण्डे निर्दिष्टानामन्तर्गृहगता इत्युक्तानामप्येकत्वमुक्तत्वसादृश्येन लब्धानां लभ्यते। एता एव 'शुश्रूषन्त्यः पतीन्काश्चित्' इति प्रोक्ता ज्ञेयाः तासां दोहनादिपृथक्कर्मानुक्तेरंतर्गृहगतत्वस्य पतिशुश्रूषायां तात्पर्याच्च। तथा च सति याः काश्चन गोकुले समुद्भूताः साधनवशात्सिद्धपूर्णभावाः न तु सिद्धदेहाः नितरामन्या इव नित्यसिद्धाः पतिशुश्रूषणार्थमंतर्गृहगता गृहमध्यस्थिता एव पत्यादिभिः साग्रहद्वारादिनिरोधान्न लब्धो विशेषेण केनापि प्रकारेण निर्गमो याभिस्ताः। अत्र तासां साक्षाच्छ्रीगोविन्दसंगमे तादृशदेहस्थितेरेव विघ्नत्वात्पूर्ववत्तद्भक्तेरतिशैथिल्यविधानादावप्रवृत्तिरिति ज्ञेयम्। अलब्धनिर्गमत्वादेव तद्भावनायुक्तास्तस्मिञ्छ्रीकृष्णे समुत्कंठितचित्ताः सत्यः कृष्णं निजचित्ताकर्षकं तमेव दध्युर्ध्यातवत्यः। तत्रानुभावमाह–दुःखविशेषेण ध्यानविशेषेण च मुद्रितनेत्राः। यद्वा—मीलितमंतर्हितं लोचनमन्याशेषज्ञानं यासां ताः ॥ ९ ॥ न केवलं दध्युरेव किन्तु तमेवापुरित्याह–किं चेति। तदानीमेव ध्यानसमकालमेव। गुणमयं त्रिगुणकार्यम्। ननु देहत्यागोऽस्तु यथाकथञ्चिद्भेदेन रूपेण तत्संगस्त्वज्ञानामतिदुःशक इत्याशंकते–नन्विति। वस्तुनो वह्न्यादेः शक्तिः दाहिकादिरूपा। बुद्धिम् अयमग्निर्दाहक इत्येवंरूपज्ञानवंतमेव दहति, ज्ञानं नापेक्षते नेच्छति। अन्यथा मत्वापि जलमिदमित्येवं ज्ञात्वापि यथा जलबुद्ध्या पीतामृतो जरामृत्युवर्जितो भवति तद्वदिति ज्ञेयम्। इति भाव इति तात्पर्यम्। अन्यथा पीताऽमृतोऽपि मृतो भवेदिति। "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्" इत्यादिस्मृतिमनुसृत्य पुनराशंकते–नन्विति। तथापि ज्ञाने सत्यपि वस्तुशक्त्या तत्प्राप्तिरस्तु देहं कथं जहुरिति ज्ञेयम्। तत्र प्रश्ने। सद्यः तत्क्षणमेव। किञ्च, बंधनध्वंसोऽपि प्रारब्धपुण्यपापप्रणाशेनैव दृष्टस्स चात्र कथमिति शंकते–नन्विति। अत्रोत्तरम्—दुःसहेति। दुःसह सोढुमशक्यो यः प्रेष्ठस्य परमात्मनः श्रीकृष्णस्य विरहः सांसारिको वियोगस्तेन तीव्रोऽत्युत्कटस्तापो ज्वरानुभवस्तेन धुतानि निरस्तान्यशुभानि पापानि। तदप्राप्तिरूपं यत्परमदुःखं तद्भोगेनानुभवेन। इत्यर्थ इति—दुःखभागेनैव पापं क्षीयत इति तात्पर्यम्। कथमित्याकांक्षायामाह—तथेति। यतः परमात्मप्राप्तिरेव गुणमयदेहत्यागे हेतुरतो हेतोः। यदि कश्चिदनारब्धफलानां कुतो नाश इत्याशंकेत तं प्रत्याह—जारेतिः। जारः उपपतिः पत्युरप्यधिकप्रियो भवति, तं कृष्णं परमात्मानं नारायणमेव संगताः सम्यग्ज्ञातवत्यः। गत्यर्थानां ज्ञानार्थताप्रसिद्धेः। अनेन बिम्बभूतहरिज्ञानेनारब्धकर्मणामपि नाश इति सूचितम्। तदधिगमः "उत्तरपूर्वाघयोरसंश्लेषविनाशौ" इति सूत्रात्। "तस्य सुहृदः साधुकृत्यां द्विषंतः पापकृत्याम्" इति श्रुतेः। तस्य ज्ञानिन इत्यर्थः। किं

चाहिकंचुकवत्त्यक्तदेहानामप्यंतर्धापनं योगमायया कृतं यावदब्दमघासुरशरीरांतर्धापनवत्, तथा रोधकानां विस्मृतिश्च जनिता, अन्यथा रोधनादिकृतो लोकापवादो दुर्वारः स्यादिति ॥ अत्र गोपीनां प्राप्यमतिरहस्यं वस्तु बहिरंगलोकेभ्यो गोपयंस्तान्प्रति बाह्यमर्थमंतरंगान्भक्तिसिद्धान्तविज्ञान्प्रति स्वाभीप्सितमाभ्यंतरमेवार्थं ज्ञापयंस्तन्त्रेणाह—दुःसहेति । तत्र बहिर्मुखान्प्रति ताभ्यः कृष्णो मोक्षं ददावित्याह–दुःसहो यः प्रेष्ठविरहस्तेन धूतानि गतानि अशुभानि यासां ताः; ध्यानेन प्राप्तस्याच्युतस्याश्लेषेण या निर्वृतिरानंदस्तेन क्षीणं मंगलं पुण्यं यासां ताः । अतः प्रक्षीणप्रारब्धबंधना जारबुद्ध्याऽपि तमेव परमात्मानं प्राप्ता देहं जहुरिति । अन्यमुखान्प्रति तु तदानीं स्वप्रेष्ठविरहसंयोगोत्थानि दुःखसुखान्यपरिमितानि प्राप्य लब्धमनोरथा एव ताः क्रमेण बभूवुरित्याह—दुःसहेन प्रेष्ठविरहेण यस्तीव्रतापस्तेन धुतानि कंपितीकृतानि अशुभानि याभिस्ताः । यासां प्रेष्ठविरहतापस्य तीव्रतां वीक्ष्य कोटिब्रह्मांडस्थवाडवानलमहाकालकूटादिरूपाणि परःसहस्राण्यपि अशुभानि स्वतीव्रताहंकारं परित्यज्य स्वपराजयबुद्ध्या चकंपिरे इत्यर्थः । ध्यानेन प्राप्तः स्फूर्त्याऽऽगतो योऽच्युतस्तेन तदैवोद्भूतस्य प्रेमपूर्णचिन्मयस्य तादृशस्वभावाभिमानादिमतो देहस्य य आश्लेषस्तेनाश्लेषेण या निर्वृतिस्तया क्षीणानि कृशीभूतानि मंगलानि प्राकृताऽप्राकृतानि यासां ताः । यासां स्फूर्तिप्राप्तं प्रेष्ठाश्लेषोत्थसुखं वीक्ष्य कोटिब्रह्मांडगतविषयसुखनिर्विषयब्रह्मानुभवसुखसहस्राणि मंगलशब्दवाच्यानि क्षीणानि । यदपेक्षया निकृष्टान्येव बभूवुरित्यर्थः । भगवद्विरहसंयोगोत्थदुःखसुखाभ्यां प्रारब्धपापपुण्यानि नष्टानि तेषां स्वफलभोगैकनाश्यत्वादिति व्याख्यातुं वैष्णवानां मते न युज्यते, भगवद्विरहसंयोगयोः पापपुण्यफलत्वाभावात् । तादृशानां प्रारब्धनाशस्तु भजनदशायामेवानर्थनिवृत्तिभूमिकारूढानामित्याहुः । ततश्च तमेव परमात्मानं परमप्रेमास्पदं जारबुद्ध्यातिनिकृष्टयापि संगताः, अत्युत्कृष्टपतिबुद्धिमतीभ्यो रुक्मिण्यादिभ्योऽपि सकाशात्सम्यक् प्राप्ताः, पतिबुद्धेः सकाशादपि जारबुद्धौ 'या दुस्त्यजं स्वजनमार्यपथञ्च हित्वा' इत्युद्धववाक्यनिर्धारितान्निरंकुशप्रमोत्कर्षात् । तथाऽस्मिन्नवतारे निकृष्टवस्तून्यप्युत्कृष्टीकुर्वती लीला दृश्यते । यथा महाराजराजेश्वरलीलातः सकाशादपि "विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये" इति भीष्मोक्तेः पार्थसारथित्वलीलाया उत्कर्षः, तथोत्कृष्टाच्छांतरसादपि निकृस्य शृंगाररसस्य तत्रापि दास्यभावादप्यौपपत्यभावस्य तथोत्कृष्टाद्रत्नालंकारादपि गुंजागैरिकशिखिपुच्छादेरुत्कर्षो दृष्ट एवेति । संगताः काश्चिद्योगमायाकृतानुकूल्यान्निरोधमुक्ता अपि तस्यामेव रात्रौ रासविहारिण तं प्राप्ताः, काश्चिदन्यस्यामपि । ननु पुरुषांतरोपभुक्तदेहाभिस्ताभिः सह भगवद्विलासो न युज्यत इति तत्राह—जहुरिति । देहमिति जात्यपेक्षयैकत्वम् । तस्य देहस्य योगमाययैवालक्षितमंतर्द्धापनमित्येके । अन्ये त्वेवमाहुः—अत्र हेयो देहो गुणमय एव भवत्यतो गुणमयमिति । विशेषणस्याधिक्यात्तासां देहा वेणुवादनात्पूर्वं द्विधाभूता गुणमयाश्चिन्मयश्चासन्निति बुध्यते । तत्र ये गुणमयाः स्वपत्युपभुक्ता देहास्तानेव जहुः । अयमत्र विवेकः—गुरूपदिष्टभक्त्यारंभदशात एव भक्तानां श्रवणकीर्तनस्मरणदंडवत्प्रणतिपरिचर्य्यादिमय्यां शुद्धभक्तौ श्रोत्रादिषु प्रविष्टायां सत्याम् 'निर्गुणो मदपाश्रयः' इति भगवदुक्तेर्भक्तस्स्वश्रोत्रादिभिर्भगवद्गुणादिकं विषयीकुर्वन्निर्गुणो भवति, व्यावहारिकशब्दादिकमपि विषयीकुर्वन्गुणमयापि भवतीति भक्तदेहस्यांशेन निर्गुणत्वं गुणमयत्वं च स्यात् । ततश्च 'भक्तिः परेशानुभवो विरक्तिः' इति, 'तुष्टिः पुष्टिः क्षुदपायोऽनुघासम्' इति न्यायेन भक्तिवृद्धितारतम्येन निर्गुणदेहांशानामाधिक्यतारतम्यं स्यात्, तेन च गुणमयदेहांशानां क्षीणत्वतारतम्यं स्यात् । संपूर्णप्रेमण्युत्पन्ने तु गुणमयदेहांशेषु नष्टेषु सम्यङ् निर्गुण एव देहः स्यात्, तदपि स्थूलदेहपातस्तु बहिर्मुखमतोत्थताभावार्थं भक्तियोगस्य रहस्यत्वरक्षार्थञ्च भगवतैव मायया प्रदर्श्यते यथा मौसललीलायां यादवानाम् । क्वचित्तु भक्तियोगोत्कर्षज्ञापनार्थं न प्रदर्श्यते च यथा ध्रुवादीनाम् । अत्र प्रमाणमेकादशे पञ्चविंशतितमाध्याये श्रद्धादयो निर्गुणा गुणमयाश्चेति प्रदर्शितम्—"येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः । भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ॥" इति अनेन भक्त्यैव गुणमयवस्तूनां निर्जयो नाश एवोक्तो भगवता । अत एव धुतानि विधूतानि रंधितानि अशुभानि गुणमयशरीराणि यासां ता इति । आश्लेषनिर्वृत्याऽक्षीणानि विवर्द्धितानि मंगलानि चिन्मयशरीराणि यासां ता इत्यप्यर्थश्चिकार्षितो भवति । अतः प्रक्षीणबंधनाः, अविद्याबंधात्पत्यादिवारणाच्च योगमायानुकूल्यं प्राप्य विच्युता इत्यर्थः । मरणवशाद्देहपात एव तासामिति तु न व्याख्येयम् "या मया क्रीडिता रात्र्यां वनेस्मिन्व्रज आस्थिताः । अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिंतया ॥" इति भगवद्वाक्येन कल्याण्य इति पदोपादानात् । पतिकृतवारणान्मद्विरहसन्तापाच्च स्वदेहांस्तदा जिहासूनामपि तासां परममंगलरासोत्सवारंभे मरणस्यामंगलस्य सदनभिमतत्वात्ताः कल्याणवत्य एवाभवन्निति भगवदभिप्रायात्, तथा "ऊचुरुद्धवं प्रीतास्तत्संदेशागतस्मृताः" इति शुकवाक्याच्च । ता ऊचुः याः पूर्वमलब्धरासा अन्तर्गृहनिरुद्धा आसन्निति । तेन मरणं विनैव ता गुणमयान्देहाञ्जहुरिति । विरहतीव्रतापरंधितास्तासां गुणमयदेहा गुणमयत्वं परित्यज्य चिन्मयत्वं परित्यज्य चिन्मयत्वं ध्रुवादीनामिव प्रापुरेव । एव देहत्याग इत्यर्थोऽवगम्यते, तथाऽत्र 'अलब्धविनिर्गमाः' इति, तत्र व्रज आस्थिताः, इति तथाऽत्र 'ध्यानप्राप्ताच्युताश्लेष०' इति, तत्र 'मापुर्मद्वीर्यचिन्तया' इति तुल्यार्थतैव । किन्त्वत्र संगता इति तत्रालब्धरासा इत्यर्थभेददर्शनादेवांतर्गृहनिरुद्धगोपीनां द्वैविध्यं व्याख्यातम् । यथा सम्रष्ठानां फलानां सम्यक्पाकेऽवगते सत्याम्रवृक्षोऽयं पक्वफल इति ज्ञात्वा सर्वाण्येव फलानि वृक्षादवचित्य गृहमानीयन्ते, आनीय च यानि यानि च समुचितकालेन सौरकिरणादिना च सौरूप्यसौरभ्यसौरस्यसौकुमार्यवन्ति राज्ञो भोगार्हाणि रोचकानि जातानि फलानि विचक्षणपरिजनेन परिष्कृत्य समये राज्ञो भोगाय कल्प्यन्ते, यानि तु अन्तःपक्वानि बहिरपक्वानि सौरूप्यादिगुणरहितत्वा-

दरसनीयानि राज्ञोऽनर्हाणि ज्ञायंते तान्यूष्मविशेषयोगेन परिकृत्यैव द्वितीयतृतीयदिनादिषु राज्ञे समर्प्यन्ते । तथैव गोकुले जनितानां मुनिचरीणां गोपीनां मध्ये याः प्राकृतगुणमयशरीरतां परित्यज्य प्रथममेव शुद्धचिन्मयीभूतशरीरा अजनिषत, ताः पुरुषांतरास्पृष्टाः श्रीयोगमायया नित्यसिद्धादिगोपीभिः सहैवाभिसारिताः, यास्तु बहिर्गुणमयशरीरवत्यस्ता अपि श्रीकृष्णविरहोष्मप्रापणया गुणमयशरीरभावत्याजनयैव विनष्टपुरुषांतरस्पर्शदोषाश्चिन्मयीभूतशरीराः काश्चित्तस्यां रात्रावेव सर्वासां पश्चादभिसारिताः, काश्चिदीषन्मात्रस्थितकषायाः प्रेक्ष्य विरहौष्म्येणैव तन्निवर्तनार्थं रात्र्यन्तरेष्वभिसारिताः, ततश्च ताः प्राप्तरासादिविलासा रात्र्यंते नित्यसिद्धगोपीभिः सह पतिगृहमागत्य तदारभ्य पतिसंगतो योगमाययैव रक्ष्यमाणाः पत्यपत्यादिषु ममताशून्याः कृष्णप्रेमातिभरपरिप्लुताः शुद्धपयस्तन्यः स्वापत्यान्यपुष्णत्यो ग्रहग्रस्तत्वेनैव तद्बंधुभिः प्रतीयन्ते स्मेति सर्वमनवद्यम् । अन्ये तु—अन्तर्गृहनिरुद्धा अपि नाऽपत्यवत्यः अग्रिमग्रंथेषु अपत्यादिशब्दैः सपत्नीपुत्रः प्रोष्यपुत्रो भ्रातृपुत्रो वा लक्षणीय इत्याहुः ॥ अत्र तोषिणी—एवं ततश्च सद्य एव श्रीकृष्णेन सह संयोगं प्राप्ता इत्याह–दुःसहेति युग्मकेन । तत्रोत्कंठापरिणामं दुःसहेत्यर्धेन, ध्यानपरिणामं ध्यानेत्यर्द्धेन । उत्कंठया दुःसहप्रेष्ठविरहः विप्रलंभोत्थो भावस्तेन तीव्रतापस्तेन धुताऽशुभाः । ध्यानेन हेतुना प्राप्ता याऽच्युतस्य निजभक्तेषु च्युतिरहितत्वेन प्रसिद्धस्याश्लेषनिर्वृतिस्तया क्षीणमंगलाः । अत्र दुःसहशब्देन तीव्रशब्देन च दुःखस्य परा काष्ठा दर्शिता, अच्युतशब्देन निर्वृतिशब्देन च सुखस्य च । अशुभं भगवन्नित्यसंयोगप्राप्तिः प्राचीनदशायां दुःखजनिका, तद्विरहस्फूर्तिः मंगलं च तद्दशायामेव सुखजनिका । प्राप्तव्यतत्संयोगस्फूर्तिः यावतीभ्यां ताभ्यां वृत्तिभ्यामेव प्रौढभावः साधकः सिध्यति तावत्योश्च तयोः शनैर्भोग्ययोरपि संप्रति युगपदेव भोगो जात इति धूतत्वं क्षीणत्वञ्चोक्तम् ॥ १० ॥ अत्र तोषिण्येव – अतस्तत्रैव तं श्रीकृष्णमेव संगता मिलिताः । तथा च वासनाभाष्यधृतं मार्कण्डेयवचनम्—"तदानीमेव ताः प्राप्ताः श्रीमन्तं भक्तवत्सलम् । ध्यानतः परमानंदं कृष्णं गोकुलनायिकाः ॥" इति । तयोः शब्दयोः पापपुण्यपर्यायत्वाभावात्, तयोः स्वस्वप्रतिनियतफलदातृत्वात्, पापस्य तु सुतरां भगवद्विरहमयप्रेमस्फोरकत्वाभावात्, "न कर्मबंधनं जन्म वैष्णवानाञ्च विद्यते" इति पाद्मकार्तिकमाहात्म्यानुसारेण तासां सुतरां तत्प्रारब्धजन्मत्वाभावात् । किञ्च, 'गुरुपुत्रमिहानीतम्' इत्यादिन्यायेन प्रारब्धरक्षणारक्षणयोः स्वप्रेमवर्द्धनविदग्धश्रीभगवदिच्छैकमयत्वान्नान्यथा व्याख्यातम् । ननु किं जारत्वेन संगताः नेत्याह—तादृशरागौत्सुक्येन सोपानीकृतया जारबुद्ध्यापि परमात्मानं सर्वांशिपरमस्वरूपत्वेन सर्वेषामपि स्वभावत एव यदुपपत्यादिशब्दवत्पालकत्वेनापि पतित्वे सिद्धे भावविशेषधारिणीनां तासां रमणत्वेनापि पतिरसाविति पतिरूपमेवेत्यर्थः । रमणत्वालाभेनैव जारबुद्ध्यापि तस्मिन्संगम्यमाने रमणलिप्सायाः प्रगल्भत्वाज्जारत्वस्य तस्मिन्सर्वांशिन्यसंभवात् । 'जिघांसयापि हरये' इत्यादिवज्जारबुद्ध्यापीति हेयतयैव निर्देशात् । प्राचीनस्य पत्युर्देहस्य च त्यागादिति भावः । तथाहि—"पटोलमूले रमण स्यात्तथा रमणः प्रिये" इति विश्वप्रकाशकोशात्, "धवः प्रियः पतिर्भर्त्ता जारस्तूपपतिः समौ" इत्यमरकोशाच्च रमणपत्यादिशब्द वाच्यजारादिशब्दवाच्ययोर्नैकत्वं मंतव्यम् । किं तु, पूर्वस्य स्वामित्वादुत्तरस्य चोपपतित्वाद्विरुद्धवस्तुत्वमेव । तत्रापि सभ्यशब्दांतरमप्रयुज्य प्रयुक्तस्यासभ्यशब्दशब्दस्य जारशब्दस्य जिघांसाशब्दस्येव निंदातात्पर्यत्वमेव प्रतीयते 'जारः पापपतिः' इति त्रिकांडशेषादिकोशाल्लोकाच्च । किन्तु, येन रागेण ता जारभावमयनिंद्यलोकधर्ममर्यादातिक्रममपि कृतवत्यस्तं सूचयित्वा तस्यैव प्रशस्तत्वं दृश्यते, चेष्टाविशेषसाम्यात् । कामतया व्यपदिष्टत्वेऽपि प्रियानुकूल्यतात्पर्येण प्रेमैकरूपत्वं च । तथा च वक्ष्यते–'यत्ते सुजातचरणांबुरुहं स्तनेषु' इत्यादि । अत एवोक्त तादृशैरपि–'आसामहो चरणरेणु–' इत्यादौ 'या दुस्त्यजं स्वजन–' इत्यादि । 'एताः परम्' इत्यादौ 'वाञ्छंति यद्भवभियो मुनयो वयञ्च' इति । एवं हेयांशपरित्यागपूर्वकमहाप्रेमलभनीयश्रीकृष्णलक्षणपरमपुरुषार्थशिरोमणिप्राप्तिर्दर्शिता । तत्रानुषङ्गिकफलमाह–गुणमयञ्च देहं जहुरिति । यतः पूर्वोक्तप्रकारेण सद्यः प्रक्षीणबंधनाः, एवं सच्चिदानंददेहप्राप्तिरपि सूचिता । एतदुक्त भवति—अपिरत्र जारबुद्धेर्हेयत्वम् "जिघांसयापि हरये स्तनं दत्त्वाप सद्गतिम्" इत्यत्र जिघांसयेव व्यनक्ति, गर्हावचनेन तत्तच्छब्देनान्वयात् । अत्र हेतुः–परमात्मानमिति । न हि परमात्मा तादृशनिंद्यशब्दवाच्यो भवितुमर्हति । तत्र च हेतुः—हरये इति । हरिशब्दोऽत्र कारुण्यादिमहागुणैः सर्वमनोहरतापरः । न ह्येवंभूतो जिघांस्यो भवितुमर्हति । तत्तदनर्हत्वेऽपि सा सा च कथञ्चिज्जाता चेत्तर्हि परमात्मत्वाद्धरित्वाच्च सर्वहितकारित्वेनासौ परित्याजयेदेवायोग्यांशं तस्यामिवामूषु पुनश्च तस्या भक्त्याभासद्वेषं स्तनदानमात्रत्वेन भक्तिं मत्वा तदुपलक्षितां धात्रीगतिं ददावेव । अमूषु 'दुःसहप्रेष्ठविरह'–इत्यादिपद्योक्तमहाभक्तिविशेषेणांतः संगममनुभवंस्तदुचितनिजप्रेयसीं गतिं कथं न दद्यादिति । संगतिश्चेयं पूर्वोक्तगोलोकाख्ये गोकुलप्रकाशविशेषे एव ज्ञेया । अत एवोद्धवद्वारा श्रीभगवता संदिष्टम्–"या मया क्रीडता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः । अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्तया ॥" इति । रासश्चायं तद्दिनगत एव तस्यैव विवक्षितत्वात् । तस्मिन्नपि प्रकाशे गोपलीलत्वेन दिनांतरेपि तत्संभवात् । किन्त्वत्र 'नासूयन्खलु कृष्णाय' इति वक्ष्यमाणानुसारेण तत्पत्यादिषु दुःखाद्यनुत्पत्तये तन्माययैव त्यक्तानां देहानामंतर्द्धापनं, तत्सदृशीनामन्यासां स्फोरण च गम्यते । एवं तावत्कालमेव तद्रहस्यं लब्धरासा भगवत्प्रेयस्योऽपि नाऽजानन्, यावदुद्धवद्वारा यथार्थानुभावकप्रभावम् 'या मया' इत्यादि संदेशं नाशृण्वन्निति च । अथ वा–तासां मुरलीवाद्यानुसरणेन तदन्तिकगतौ किमाश्चर्यम्, यतः काश्चिन्निरुध्यमाना अप्यंतर्गृह एव तं प्राप्ता इत्याह–अन्तरिति । तादृशतीव्रतापेन धुतं

श्रीकृष्णकृपया खण्डितमशुभं विरहरूपं यासां ताः। तेन जगतामपि धुतमशुभं याभिस्ता इति वा। 'मद्भक्तियुक्तो भुवनं पुनाति' इतिवत्। तथा तादृशनिर्वृत्याऽक्षीणं क्षीणताविरुद्धं पुष्टं मंगलं निजतादृशतत्संयोगरूपं यासां ताः। तथा पुष्टं जगतामपि मंगलं याभ्यस्ता इति वा पूर्ववत्। गुणमयम् विरहभावमयम्, देहमावेशमित्यर्थः। तथा तृतीये सृष्टिप्रसंगे ब्रह्मणा दर्शितम्। अन्यत्समानम्। संगतिस्तस्मिन्नन्तर्गृह एव तस्य प्राकट्यात्, अन्तर्गृगता इत्यन्वयात्। अत एव सद्यः प्रक्षीणं बंधनं सर्वतत्संगविरोधो यासां ताः, एवमलब्धरासास्तस्यामेव रात्राविति ज्ञेयं पूर्वहेतोरेव ॥ ११ ॥ यथावद्ब्रह्मज्ञानस्य मोक्षहेतुत्वात्तासां तदभावदर्शनात्कथं मोक्ष इत्यजानन्निवाशङ्कते—नन्विति। तद्भजनात् पतिपुत्रसेवनात्। तथा बुद्ध्यभावात् ब्रह्मबुद्ध्यभावात्। तस्य कृष्णस्य संगतिः। मुने तत्तल्लीलामननशील। परं कांतं जारं पतिम्। गुणेषु विषयेषु धीः बुद्धिर्यासां ताः। गुणप्रवाहस्य संसारप्रवाहस्य उपरमो निवृत्तिः। निवृत्तिमार्गलभ्या प्रवृत्तिमार्गेण कथं संसारनिवृत्तिः "उत्तिष्ठत जाग्रत" इति श्रुतेः। यद्वा–गुणेषु भगवत्सौंदर्यादिषु धीर्यासां भक्तानामिति यावत्। गुणस्य भगवत्सेवारूपस्य प्रवाहो यस्मिन् स देहस्तस्योपरमः कथं जातः "त्वयि भक्तस्तु कीटोऽपि भूयासं जन्मजन्मसु" इत्यादिवाक्यैर्भक्तौ तात्पर्यम्, भक्तिवृद्ध्यर्थं न मोक्ष इति भावः॥ तत्रत्यानां बहिरङ्गाणां केषांचिन्मुखदर्शनेनैव हृद्गतं संदेहमालक्ष्य राजा स्वयं शुकवाक्यस्याभिप्रेतमर्थं तत्प्रसादाज्जानन्नपि तेषां संदेहनिवर्त्तनार्थमेव संदिहान इवाह— कृष्णमिति। हे मुने सर्वज्ञ कृष्णं परमात्मानमपि परं परपुरुषं कान्तं स्वरमणं विदुः, ब्रह्मतया तु न विदुः। अतो गुणधियां कृष्णेन सह विहरामेति गुणविषयकबुद्धीनां तासां गुणप्रवाहस्योपरमः कथम् 'तमेव विदित्वाऽतिमृत्युमेति' इति "आत्मानमात्मात्मतया विचक्षते" इत्यादिश्रुतिस्मृतिवाक्यैः परमात्मज्ञानस्यैव मोक्षहेतुत्वोक्तेः॥ अत्र तोषिणी— परि सर्वतोभावेनेक्षते सर्वेषां भावं जानातीति परीक्षिदित्यस्यायं भावः—यद्यपि स्वयं तन्माहात्म्यं जानात्येव तथाप्यंतर्मुखसंदिहानां संदेहनिरासार्थमर्थविशेषेण संदेहविशेषः प्रपञ्चितः, बहिर्मुखसंदिहानानां च संदेहांतरनिरासार्थं ब्रह्मज्ञानवाद इव संदेहः प्रपञ्चितः। 'राजोवाच' इति क्वचित्पाठः। अत्रापि सर्वभाववैचक्षण्य एव राजशब्दस्य तात्पर्यात्तथैवार्थः। श्रीमुनीन्द्रेणापि तथैव प्रतिवक्ष्यते। तत्र बहिर्मुखरीतितोऽर्थः प्रसिद्ध एव। अन्तर्मुखरीतया त्वयमर्थः—ननुः गुणमयं देहं जहुरित्युक्तम्, तत्र गुणशब्देन सत्त्वादिगुणत्रयमुच्यते, मयट्प्रत्ययेन विकारः, ततश्च देहस्य स्वतस्तन्मयत्वप्राप्तेः किं तन्निर्देशेन, तस्मात्पूर्वेण मानससाद्गुण्यपरंपरा उत्तरेण तु प्राचुर्यं वाच्यम्। तत्रेदं पृच्छामः – कृष्णं विदुरिति। यदि च प्राप्तरासानां निस्त्रैगुण्यदेहतासूचनार्थमासामेव वा प्राप्तव्यदेहस्य तत्सूचनार्थमत्र गुणमयमिति विशिष्यते, तदपि तादृशस्य देहस्योपलक्षणत्वेन मासगुणप्रवाहस्यापि तादृशत्वेन लब्धिः स्यात्। तत्रापि पृच्छाम इत्याह—कृष्णं विदुरिति। अर्थश्चायम्–कृष्णं परं केवलं कांतं सर्वाश्चर्यगुणमनोहरतया परमं श्रेष्ठं विदुः, न तु ब्रह्मतया निर्गुणतदाविर्भावविशेषतया। तर्हि तासां ब्रह्मनिष्ठाया अपि त्याजकतया प्रसिद्धेषु तदीयतादृशगुणेषु धीरंतःकरणं यासां तादृशभूतानां तदेकनिष्ठत्वेन तद्गुणैक्यानुबंधतत्प्रेमवृत्तिगुणत्वादप्राकृतगुणानामित्यर्थः। ततो देहस्यं तु तासामसिद्धत्वाद्भवतु नामोपरमः, कथमविच्छिद्दुरतादृशगुणपरंपराया उपरमः स्यादित्यर्थः। ब्रह्मोपासकेष्विव न तत्स्वरूपमात्राविर्भावः। किं तु, गुणैरपि सह तदाविर्भावः। ततो ब्रह्मोपासकेषु ये गुणास्ते प्राकृतसत्त्वमया एवेति तेषामेव गुणप्रवाहोपरमः संभवति नाविर्भूतभयवद्गुणानां तद्विधानामिति वाक्यार्थः। श्लेषेण चेदं पृच्छति—कृष्णं परं केवलं कांततया विदुर्न तु ब्रह्मतया व्यापकतया, तर्हि 'ये यथा मां प्रपद्यन्ते' इति न्यायेन तासु व्यापकतागुणस्याप्रकाशादन्तर्गृहे प्राकट्यभावेन कथं विरहाभावो गुणप्रवाहोपरमश्च। गुणधियां सुंदरोयं विदग्धोयमितिमात्रबुद्धीनाम्। मुने हे सर्वज्ञ ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यदि च तास्तादृशविघ्नेन वारिता अभविष्यन् तर्हि सद्य एव दशमीदशामिव दशामगमिष्यन्निति तासां सर्वासामेव भावविशेषं दृष्टान्तेन प्रदर्शयन् तासां प्रस्थितवतीनामेव मध्ये कासाञ्चिदवस्थाविशेषमाह–अन्तरिति त्रिभिः। अयमर्थः–श्रीकृष्णस्य व्रजे प्रेयस्यः खलु द्विविधा। नित्यसिद्धाः साधनसिद्धाश्च तत्रैकासां नित्यसिद्धात्वमष्टादशाक्षरादौ(आ)ताभिर्विशिष्टत्वेनैव तदाराधनविधानादृथक्तं तच्छ्रुतीनां तदाराधनानां चानाद्यनन्तभावित्वात् अतो ब्रह्मसंहितायाम् —

"चिन्तामणिप्रकरसद्मसुकल्पवृक्षलक्षावृतेषु सुरभीरभिपालयन्तम्।
लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानम्।' इति ॥
आनन्दचिन्मयरसप्रतिभाविताभिः। स्ताभिर्य एवनिजरूपतया कलाभिः।
गोलोक एव निवसत ॥ इति।

"श्रियः कान्ताः कान्तः परमपुरुष" इत्येता एव तदीयलक्ष्मीत्वेनोक्ताः तत्र च श्रीराधिकाया वैशिष्ट्यं बृहद्गौतमीये–

"देवी कृष्णमयी प्रोक्ता राधिका परदेवता। सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनीपरा" ॥ इति।

अत एव ऋक्परिशिष्टे परस्परमव्यभिचारित्वं प्रोक्तम् "राधया माधवो देवो माधवेनैव राधिका । विभ्राजन्ते जनेष्वा" इति । अतो मात्स्यादौ "रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने" इति शक्तित्वसाधारण्येनानयोर्गणनेऽपि वैशिष्ट्यं ज्ञेयम् अथावरासां साधनसिद्धत्वं यथा पाद्मोत्तरखण्डे—

"पुरा महर्षयः सर्वे दण्डकारण्यवासिनः । दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम् ॥
ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले । हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात्" ॥ इति ।

गोकुल इत्यस्य हरिं सम्प्राप्येत्यत्राप्यन्वयात् "ये यथा मां प्रपद्यन्ते" इति न्यायाच्च महर्षयः पूर्वं तादृशभावेन श्रीकृष्णोपासका इत्यर्थः । अतो रामं दृष्ट्वेति सारूप्येण जातस्वोपासनासंस्काराः हरिं स्वोपास्यं श्रीकृष्णमेवोपभोक्तुमैच्छन् लज्जया तु साक्षान्न वृतवन्तः ततश्च कल्पवृक्षस्येवावदतोऽपि श्रीरामस्य प्रसादात् तेषामिष्टसिद्धिर्जातेत्याह—ते सर्वे इति । गोकुले गर्भतः स्त्रीत्वमापन्ना गोकुल एव समुद्भूताः गोकुल एव च हरिं श्रीकृष्णं कामेन स्ववासनानुसारेण सम्प्राप्य तस्मिन्नन्तर्गृहे एव स्वयमाविर्भूतं लब्ध्वा ततस्तदनन्तरमेव भवार्णवात् मुक्ता इति, न च वक्तव्यं गोकुलजातानां प्रापञ्चिकदेहादित्वं न सम्भवतीति अवतारलीलायाः प्रापञ्चिकमिश्रत्वात् श्रीदेवकीदेव्यामपि षड्गर्भसञ्ज्ञकानां जन्म श्रूयते इति कदाचित् श्रुतयो गोप्यो जाता इति बृहद्वामनप्रसिद्धिः अत एव तथा व्याख्यास्यते—

"स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते सभाः समदृशोऽङ्घ्रिसरोजसुधाः" ॥

इति गायत्री च तासु जातेति पाद्ये सृष्टिखण्डे यथा ब्रह्मणा गोपकन्यारूपाया गायत्र्या उद्वाहे गोपेषु श्रीविष्णुवचनम्—

"मया ज्ञाता ततः कन्या दत्ता चैषा विरिञ्चये । युष्माकं च कुले चाहं देवकार्य्यार्थसिद्धये ॥
अवतारं करिष्यामि मत्कान्ता तु भविष्यति" । इति ।

अतः तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः" इत्यत्रापि तथा व्याख्यातम् अत एव तासां च चतुर्विधत्वमुक्तं पाद्मे—

"गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः । देवकन्याश्च राजेन्द्र ! न मानुष्यः कथञ्चन" ॥ इति ।

अत्र गोपकन्या एव नित्याः, न मानुष्यः कथञ्चनेति प्राकृतमानुषत्वनिषेधात् आसु च पाद्मोत्तरखण्डनिर्दिष्टानामन्तर्गृहगता इत्युक्तानामप्येकत्वं मुक्तत्वसादृश्येन लब्धानां लभ्यते यत एव "शुश्रूषन्त्यः पतीन्काश्चित्" इति प्रोक्ताः, इति ज्ञेयाः, आसां दोहनादि पृथक्कर्मानुक्तेः अन्तर्गृहगतत्वस्य पतिशुश्रूषायामेव तात्पर्य्याच्च एतासां च साधकत्वं देहत्यागश्रवणात् पाद्मोत्तरखण्डाच्च कल्प्यते तथा च सति याः काश्चिद् गोकुले समुद्भूताः साधनवशात् सिद्धपूर्णभावा न तु सिद्धदेहा नितरामन्या इव नित्यसिद्धाः पतिशुश्रूषणार्थमन्तर्गृहगता एव पत्यादिभिः साग्रहद्वारादिनिरोधात् न लब्धो विशेषेण केनाऽपि प्रकारेण निर्गमो याभिस्ताः, अत्र तासां साक्षाद्गोविन्दसङ्गमे तादृशदेहस्थितेरेव विघ्नत्वात् पूर्ववत्तद्भक्तेः पतिशैथिल्यविधानादावप्रवृत्तिरिति ज्ञेयम् अलब्धनिर्गमत्वादेव तद्भावनायुक्तास्तस्मिन् श्रीकृष्णे समुत्कण्ठितचित्ताः सत्यः कृष्णं निजचित्तापकर्षकं तमेव दध्युर्ध्यातवत्यः तत्रानुभावमाह—दुःखविशेषेण ध्यानावेशेन च मुद्रितनेत्राः । यद्वा, मीलितमन्तर्हितं लोचनमन्याशेषज्ञानं यासां ताः ॥ ९ ॥ ततश्च सद्य एव श्रीकृष्णेन सह संयोगं प्राप्ता इत्याहुः, दुःसहेति युग्मकेन । तत्रोत्कण्ठापरिणामं दुःसहेत्यर्द्धेन ध्यानपरिणामं ध्यानेत्यर्द्धेनाह—उत्कण्ठया दुःसहप्रेष्ठविरहः विप्रलम्भाख्यो भावः तेन तीव्रतापः तेन धुताऽशुभाः ध्यानेन हेतुना प्राप्ता याऽच्युतस्य निजभक्तेषु च्युतरहितत्वेन प्रसिद्धस्याश्लेषनिर्वृतिः तया क्षीणमङ्गलाः, अत्र दुःसहशब्देन तीव्रशब्देन च दुःखस्य पराकाष्ठा दर्शिता अच्युतशब्देन निर्वृत्तिशब्देन च सुखस्य अशुभं भगवन्नित्यसंयोगप्राप्तिप्राचीनदशायां दुःखजनिका तद्विरहस्फूर्त्तिः मङ्गलं च तद्दशायामेव सुखजनिका प्राप्तव्य तत्संयोगस्फूर्त्तिः यावतीभ्यां ताभ्यां वृत्तीभ्यामेव प्रौढभावः साधकः सिद्ध्यति तावत्योश्च तयोः शनैर्भोग्ययोरपि सम्प्रति युगपदेव भोगो जात इति धुतत्वं क्षीणत्वं चोक्तम् ॥१०॥ अतस्तत्रैव तं श्रीकृष्णमेव सङ्गता मिलिताः तथा च वासनाभाष्यधृतं मार्कण्डेयवचनम्—

तदानीमेव ताः प्राप्ताः श्रीमन्तं भक्तवत्सलम् । ध्यानतः परमानन्दं कृष्णं गोकुलनायिकाः ॥ इति ।

तयोः शब्दयोः पापपुण्यपर्य्यायत्वाभावात् तयोः स्वस्वप्रतिनियतफलदातृत्वात् पापस्य तु सुतरां भगवद्विरहमयप्रेमस्फोरकत्वाभावात् "न कर्मबन्धनं जन्म वैष्णवानां च विद्यते" इति पाद्मोत्तरकार्त्तिकमाहात्म्यखण्डानुसारेण तासां सुतरां तत्प्रारब्धजन्मत्वाभावात् किन्तु गुरुपुत्रमिहानीतमितिन्यायेन प्रारब्धरक्षणारक्षणयोः स्वप्रेमवर्द्धनविदग्धश्रीभगवदिच्छैकमयत्वात् नान्यथा व्याख्यातं ननु किं जारत्वेन सङ्गताः नेत्याह तादृशरागौत्सुक्येन सोपानीकृतया जारबुद्ध्यापि परमात्मानं सर्वांशिपरमस्वरूपत्वेनापि सर्वेषामपि स्वभावत एव यदुपपत्यादिशब्दवत्पालकत्वेन पतित्वे सिद्धे भावविशेषधारिणीनां तासां रमणत्वेनापि पतिरसाविति पतिरूपमेवेत्यर्थः । रमणत्वालाभेनैव जारबुद्ध्याऽपि तस्मिन् सङ्गम्यमानेऽपि रमणत्वलिप्सायाः प्रगल्भत्वात् जारत्वस्य तस्मिन् सर्वांशिन्यसम्भवात् जिघांसयापि हरय इत्यादिवत् जारबुद्ध्यापीति हेयतयैव निर्देशात् प्राचीनस्य पत्युर्देहस्य च त्यागात् इति भावः । तथाहि पटोलमूले रमणं स्यात् तथा रमणः प्रिय इति विश्वकोशात् "धवः प्रियः पतिभर्त्ता जारस्तूपपतिः समौ" इत्यमरकोशाच्च रमणपत्यादिशब्दवाच्यजारादिशब्दवाच्ययोर्नैकत्वं मन्तव्यं किन्तु पूर्वस्य स्वामित्वादुत्तरस्य चोरत्वाद्विरुद्धवस्तुत्व-

मेव तत्रापि सभ्यशब्दान्तरमप्रयुज्य प्रयुक्तस्यासभ्यस्य जारशब्दस्य जिघांसाशब्दस्येव निन्दातात्पर्य्यत्वमेव प्रतीयते "जारः पापपतिः" इति त्रिकाण्डशेषादिकोशाल्लोकाच्च किन्तु येन रागेण ता जारभावमयं निन्द्यं लोकधर्ममर्य्यादातिक्रममपि ताः कृतवत्यस्तं सूचयित्वा तस्यैव प्रशस्तत्वं दर्शिते चेष्टाविशेषसाम्यात् कामतया व्यपदिष्टत्वेपि प्रियानुकूल्यतात्पर्य्यत्वेन प्रेमैकरूपत्वं च तथा च वक्ष्यते "यत्ते सुजातचरणाम्बुरुहं स्तनेषु" इत्यादि अत एवोक्तं तादृशैरपि "आसामहो चरणरेणू" इत्यादौ "या दुस्त्यजं स्वजनमार्य्यपथं च हित्वा" इत्यादि एताः परमित्यादौ "वाञ्छन्ति यत्तव भियो मुनयो वयञ्च" इति एवं हेयांशपरित्यागपूर्वकमहाप्रेमरसनीयकृष्णलक्षणपरमपुरुषार्थशिरोमणिप्राप्तिर्दर्शिता तत्रानुषङ्गिकं फलमाह गुणमयं च देहं जहुरिति यतः पूर्वोक्तप्रकारेण सद्यः प्रक्षीणबन्धनाः, एवं सच्चिदानन्ददेहप्राप्तिरपि सूचिता एतदुक्तं भवति अपिरत्र जारबुद्धेर्हेयत्वं "जिघांसयापि हरये स्तनन्दत्वाप सद्गतिम्" इत्यत्र जिघांसाया इव व्यनक्ति गर्हावचनेन तत्तच्छब्देनान्वयात् अत्र हेतुः परमात्मानमिति नहि परमात्मा तादृशनिन्द्यशब्दवाच्योपि भवितुमर्हति तत्र च हेतुः हरये इति हरिशब्दोत्र कारुण्यादिमहागुणैः सर्वमनोहरतापरः नह्येवंभूतो जिघांस्यो भवितुमर्हति तत्तदनर्हत्वेपि सा सा च कथञ्चित् जाता चेत् तर्हि परमात्मत्वाद्धरित्वाच्च सर्वहितकारित्वेनासौ परित्याजयन्नेवायोग्यांशं तस्यामिवामूषु पुनश्च तस्या भक्त्याभासवेषं द्वेषं स्तनदानमात्रत्वेन भक्तिं मत्वा तदुपलक्षितां धात्रीगतिं ददावेव अमूषु तु दुःसहप्रेष्ठविरहेत्यादिपद्योक्तमहाभक्तिविशेषेणान्तःसङ्गममनुभवंस्तदुचितनिजप्रेयसीं गतिं कथं न दद्यादिति सङ्गतिश्चेयं पूर्वोक्ते गोलोकाख्ये गोकुलप्रकाशविशेषे एव ज्ञेया अत एवोद्धवद्वारा श्रीभगवता संदिष्टम्—

"या मया क्रीडता रात्र्यां वनेऽस्मिन् व्रज आस्थिताः। अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्तया" ॥ इति।

रासश्चायं तद्दिनगत एव ज्ञेयः तस्यैव विवक्षितत्वात् तस्मिन्नपि प्रकाशे गोपलीलत्वेन दिनान्तरेपि तत्सम्भवात् किं त्वत्र "नासूयन् खलु कृष्णाय" इति वक्ष्यमाणानुसारेण तत्पत्यादिषु दुःखाद्यनुत्पत्तये तन्माययैव त्यक्तानां देहानामन्तर्द्धापनं तत्सदृशीनामन्यासां स्फोरणं च गम्यते एवं तावत्कालमेव तद्रहस्यं लब्धरासाः श्रीभगवत्प्रेयस्योऽपि नाजानन् यावदुद्धवद्वारा यथार्थानुभावकप्रभावं या मयेत्यादि सन्देशं नाशृण्वन्निति च अथवा तासां मुरलीवाद्यानुसरणेन तदन्तिकगतौ किमाश्चर्यं यतः काश्चिन्निरुद्ध्यमाना अप्यन्तर्गृह एव तं प्राप्ता इत्याह—अन्तरिति। तादृशतीव्रतापेन धुतं श्रीकृष्णकृपया खण्डितम् अशुभं विरहरूपं यासां ताः तेन जगतामपि धुतमशुभं याभिस्ता इति वा "मद्भक्तियुक्तो भुवनं पुनाति" इति वत् तथा तादृशनिर्वृत्याऽक्षीणं क्षीणताविरुद्धं पुष्टं मङ्गलं निजतादृशतत्संयोगरूपं यासां ताः तथा पुष्टं जगतामपि मङ्गलं याभ्यस्ता इति वा पूर्ववत् गुणमयं विरहभावमयं देहम् आवेशमित्यर्थः। तथा तृतीये सृष्टिप्रसङ्गे ब्रह्मणो दर्शितम् अन्यत् समानं सङ्गतिस्तस्मिन्नन्तर्गृहे एव तस्य प्राकट्यात् अन्तर्गृहगता इत्यन्वयात् अत एव सद्यः प्रक्षीणं बन्धनं सर्वेतरसङ्गविरोधो यासां ताः, एवमलब्धरासाः, इति तस्यामेव रात्रौ ज्ञेयं पूर्वहेतोरेव ।११।

परि सर्वतो भावेन ईक्षते सर्वेषां भावं जानातीति परीक्षिदित्यस्यायं भावः। यद्यपि स्वयं तत्तन्माहात्म्यं जानात्येव तथाप्यन्तर्मुखसन्दिहानानां सन्देहनिरासार्थमर्थविशेषेण सन्देहविशेषः प्रपञ्चितः बहिर्मुखसन्दिहानानां च सन्देहान्तरनिरसनार्थं ब्रह्मज्ञानवादमय इव सन्देहः प्रपञ्चितः राजोवाचेति क्वचित्पाठः, अत्रापि सर्वभाववैचक्षण्य एव राजशब्दस्य तात्पर्यात्तथैवार्थः श्रीमुनीन्द्रेणापि तथैव प्रतिवद्यत इति तत्र बहिर्मुखरीतिकोर्थः प्रसिद्ध एव अन्तर्मुखरीत्या त्वयमर्थः। ननु, गुणमयं देहं जहुरित्युक्त तत्र गुणशब्देन यदि सत्त्वादित्रयमुच्यते मयट्प्रत्ययेन विकारः ततश्च हेयस्य देहस्य स्वतस्तन्मयत्वप्राप्तेः किन्तन्निर्देशेन तस्मात् पूर्वेण मानससाद्गुण्यपरम्परा उत्तरेण तु प्राचुर्य्यं वाच्यं तत्रेदं पृच्छामः कृष्णं विदुरिति यदि च प्राप्तरासानामन्यासां निस्त्रैगुण्यदेहतासूचनार्थमासामेव वा प्राप्तव्यदेहस्य तत्सूचनार्थमत्र गुणमयमिति विशिष्यते त(द)थापि तादृशस्य देहस्योपलक्षणत्वेन मानसगुणप्रवाहस्यापि तादृशत्वेन लब्धिः स्यात् तत्रापि पृच्छाम इत्याह कृष्णं विदुरिति। अर्थश्चायं तं कृष्णं परं केवलं कान्तं सर्वाश्चर्यगुणमनोहरतया परमप्रेष्ठं विदुः नतु ब्रह्मतया निर्गुणतदाविर्भावविशेषतया तर्हि तासां गुणधियां ब्रह्मनिष्ठाया अपि त्याजकतया प्रसिद्धेषु तदीयतादृशगुणेषु धीरन्तःकरणम् यासां तथाभूतानां तदेकनिष्ठत्वेन तद्गुणकानुबन्धतत्प्रेमवृत्तिगुणत्वादप्राकृतगुणानामित्यर्थः। ततो देहस्य तु तासामसिद्धत्वाद्भवतु नामोपरमः कथमविच्छिदुरतादृशगुणपरम्पराया उपरमः स्यादित्यर्थः। ब्रह्मोपासकेष्विव न तत्स्वरूपमात्राविर्भावः किन्तु गुणैरपि सह तदाविर्भावः ततो ब्रह्मोपासकेषु ये गुणास्ते प्राकृतसत्त्वमया एवेति तेषामेव गुणप्रवाहोपरमः सम्भवति नाविर्भूतभगवद्गुणानां तद्विधानामिति वाक्यार्थः। श्लेषेण चेदं पृच्छति कृष्णं परं केवलं कान्त विदुः, नतु ब्रह्मतया व्यापकतया तर्हि "ये यथा मां प्रपद्यन्ते" इति न्यायेन तासु व्यापकतागुणस्याप्रकाशादन्तर्गृहे प्राकट्याभावेन कथ विरहाभा(वो)वमयगुणप्रवाहोपरमः गुणधियां सुन्दरोयं विदग्धोयम् इति मात्रबुद्धीनां मुने! हे सर्वज्ञ! ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

यदि तास्तादृशविघ्नेन निवारिता अभविष्यन्, तर्हि सद्य एव दशमीं दशामगमिष्यन्निति तासां सर्व्वासामेव भावविशेषं दृष्टान्तेनैव प्रदर्शयन् कासाञ्चिदवस्थाविशेषमाह—अन्तरिति त्रिभिः। काश्चित् महालक्ष्म्यंशभूताः साधनसिद्धा वा गृहमध्यस्थिताः, अत एव नाममात्रपत्यादिभिर्द्वारादिनिरोधात्; यद्वा, पित्रादीनां द्वारदेशोपवेशान्न लब्धो विशिष्टः श्रीभगवदभिसरणयोग्यः, यद्वा,

अन्यगोपीवत् वीनां पक्षिणामिवातिशीघ्रगमनार्थं निर्गमो बहिर्निःसरणं पन्था वा, यद्वा, वेः पक्षिणोऽपि निर्गमो यस्मात् छिद्रात्तादृशमपि याभिस्ताः, अत एव कृष्णं निजचित्ताकर्षकं परमानन्दघनमूर्त्तिं वा दध्युर्विशेषतश्चिन्तयामासुः, (भा० १०।३१।१३) 'ध्येयमापदि' इत्याद्युक्तन्यायेन, तन्महापन्निस्तारार्थं किंवा अभीष्टाप्राप्त्या स्वत एव तच्चिन्ताविशेषोत्पत्तेः, कथं दध्युः ? तस्य प्रस्तुतस्य श्रीकृष्णेन सह विलासस्य किंवा सुगोप्यस्य सम्भोगस्य या भावना तया युक्ताः संयुक्ताः योगवत्यो वा सत्यः । किञ्च, मीलितलोचना अर्द्धमुद्रितनेत्राः सत्य इत्यर्थः, यद्वा, दुःखविशेषेण ध्यानविशेषेण वा मुद्रितनेत्राः सत्यः, यद्वा, मीलितमन्तर्हितं लोचनमन्याशेषज्ञानं यासां तथाभूताः सत्यः ॥ ९ ॥ ततश्च सद्य एव श्रीकृष्णेन सह संयोगं प्राप्ता इत्याह—दुःसहेति द्वाभ्याम् । ध्यानेन विशेषतस्तद्रूपगुणादिपरिस्फूर्त्त्या दुःसहः श्रेष्ठविरहः, अत एव तेन तीव्रतापस्तेन धुताशुभाः, परमात्मानमपि तं कृष्णं जारबुद्ध्यैव प्रेमाग्निविशेषेण सदा जरयतीति जार उपपतिस्तद्बुद्ध्या तद्भावेनैव, न तु परमात्मबुद्ध्या संगताः सम्यक् प्राप्तास्तेन सह मिलिता इत्यर्थः, इति नित्यपरमप्रेमसंगोऽभिप्रेतः । कथं गुणमयं देहं जहुः ? किन्तु गुणातीतं नित्यभगवत्प्रेमसंगतियोग्यं देहं प्रापुरित्यर्थः । सच्चिदानन्दघनरूपप्राप्त्या संगता इति भावः । सगतिश्च नित्यवक्षःस्थलस्थश्रीवत् महाशक्त्यादिवद्वा नित्यसंयोगलक्षणा ज्ञेया, तत्रापि जारबुद्ध्या संगतत्वाद्विशेषः कश्चिदूह्यः, तथा चोद्धवद्वारा श्रीभगवदुक्तौ (भा. १०।४७।३७)—'या मया क्रीड़ता रात्र्यां वनेऽस्मिन् व्रज आस्थिताः । अलब्धरासाः कल्याण्यो मापुर्मद्वीर्य्यचिन्तया ॥' इति । अत्र च कल्याण्य इत्यनेन मद्वीर्य्यचिन्तयेत्यनेन च प्राप्तिविशेष एवाभिप्रेतः, तच्चाग्रे तत्रैव व्यक्तं भावि, अन्यत्रैव्यञ्जितमेव । तत्र दुःसहशब्देन तीव्र–शब्देन चानन्तकोटिकल्पेषु महानरकादिभोगैर्यावांस्तापस्ततोऽपि कोटिगुणस्तापः सूच्यते, तथा अच्युत-शब्देन निर्वृति-शब्देन च अनन्तकोटि-कल्पेषु साम्राज्य-स्वाराज्यादिभोगैर्यत् सुखं मोक्षसुखं च ततोऽधिकमपि तत् सुखं ध्वन्यते । श्रीभगवदाश्लेषसुखमहोदधेस्तत्सर्व्वस्य कणमात्ररूपत्वात्, तत्र च श्रीभगवत्सम्बन्धेन तत्तद्वासनाक्षयोऽपि ज्ञेयः, अत एव प्रक्षीणेति प्र-शब्दः, तथा अशुभं नाम श्रीभगवन्नित्यसंयोगप्रतिबन्धककर्म्मविशेष एव, मंगलञ्च मानादिषु श्रीभगवदनुनयादिजन्यसुखविशेषहेतुः सत्कर्मविशेषः, तत्तत्प्रक्षयश्च नित्यसंयोगसिद्धेः, अत एव विरहेण मानादिना च सम्पद्यमानप्रेमानन्दविशेषाभावात् तासामत्रस्थिताभ्योऽन्याभ्यः सौभाग्ये न्यूनतोह्या । अथवा ततश्च सर्व्वसद्गुणमयमपि देहं सद्यो जहुः, पत्यादिभिर्गृहान्तर्निरुद्धेन तेन श्रीकृष्णाप्राप्तेः, अतस्तद्योग्यदेहान्तरेण तं श्रीनन्दकिशोरमेव संगता इत्यर्थः । कुतः ? परमात्मानं परमप्रियमित्यर्थः । तत्र हेतुः—जारबुद्ध्येति । अन्यत् समानम् । यद्वा, ध्यानप्रभावेण सद्यः प्रकर्षेण क्षीणानि बन्धनानि पत्यादिकृतद्वारबन्धा यासां तथाभूता अपि गुणमयं सर्वसद्गुणमयमपि देहं जहुः, दुःसहो यः प्रेष्ठस्य प्रियतमस्य श्रीकृष्णस्य विरहः, अत एव तेन यस्तीव्रतापः, अन्तर्महाज्वरस्तेन धुता नष्टा आशु शीघ्रम्, यद्वा, आशु अभिनवा भा कान्तिर्यासां ताः; किञ्च, ध्याने ध्यानेन वा हेतुना प्राप्तः संगतो योऽच्युतः, मया परोक्षं भजतेत्यादि-तद्वचनप्रामाण्येन विरहेऽपि च्युतिरहितो भगवान् श्रीकृष्णस्तस्य, किंवा अच्युतेन अविच्छिन्नेन, अर्थात् प्रेष्ठस्यैवाश्लेषेण या निर्वृतिः परमसुखं किंवा आश्लेषरूपा निर्वृतिस्तया ध्यानविशेषेणैव साक्षात्सम्भोगसुखमयत्वेन प्रतीयमानया निर्वृत्या विशिष्टा अपि जहुः; कुतः ? क्षीणमंगला अन्तर्गृहे निरोधाय पत्यादिभिर्धारणादिना बहिर्निःसरणार्थोद्यमे भित्तिकपाटादिसंसर्गेण वा नष्टतिलकादिमंगलाः, महोत्तापजर्ज्जरत्वात् कान्तिविनाशेन तिलकादिक्षयेण च तादृङ्मलिन-प्रक्षीणदेहस्य श्रीभगवत्सेवायामयोग्यत्वमननादित्यर्थः । यद्वा, प्रश्लेषेण ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या अक्षीणं क्षयमप्राप्तं मंगलं रासक्रीडादिलक्षणं वा यासां तयैवाशेषरतिसुखसिद्धेः, तथाभूता अपि जहुः, कुतः ? दुःसहप्रेष्ठविरहतीव्रतापेन धुतम्, धुतिर्निधूननं पीड़नमिति यावत्, तदेवाशुभममंगलं महादौर्भाग्यं वा यासां ताः, पुनर्विरहभयादित्यर्थः । यद्वा, धुता कम्पिता अपगता आशुः शीघ्रा अविलम्बा भा प्रतिभा यासाम्, अत्यन्तविरहतापेन विचारापगमादिति भावः । अत एव सद्यः प्रक्षीणबन्धनाः, सद्यः सपदि प्रकर्षेण क्षीणं बन्धनमाशाबन्धो यासाम्, देहरक्षया रासादिकेलिं प्राप्स्याम इत्याशाबन्धोऽपि नष्ट इति भावः । अन्यथा अन्यगोपीवत् श्रीवृन्दावने व्रजान्तःसाक्षादवस्थित्यादिपरित्यागायोगः, अत एव ताभ्योऽत्र निवसन्तीनां श्रीगोपीनां सौभाग्यमधिकमेव, केवलं नित्यसंयोगेन विरहदुःखाभावात्, कैश्चिद्भावविशेषेणातृप्तास्ताः प्रशंस्यन्ते । विरहेऽपि प्रेमविशेषोदयेनानन्दविशेषः स्यादिति श्रीभागवतामृते विवृतमेवास्ति । यद्वा, जहुरन्तर्धापयामासुः, यद्वा, तं परमात्मानं जारबुद्ध्यैव संगमासक्तिं प्राप्ता अपि । दुःसह-प्रेष्ठ-विरह-तीव्र तापेनैव धुताशुभाः धुतं विनाशितं जगतामेवाशुभं तापत्रयं याभिः, तादृक्तापविशेषस्य श्रीभगवदीय-गाढ़प्रेमोद्रेकमयत्वात् जगत्तापत्रयनाशकत्वम्, तथा ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या अक्षीणमंगलाः, अक्षीणं पुष्टं वृद्धिमेव गतं जगतां मंगलं याभ्यः, तादृग्ध्यानस्य जगतामभ्युदयकारित्वान्मंगलवृद्धिकारित्वम्, एवम्भूताः सत्यो गुणमयं देहं जहुः । गुणा भावास्तत्रान्तरा भावा आर्ज्जव-स्थैर्य्य-मार्द्दव-बहिर्निष्क्रमोपायाज्ञता-गुरुजनादि-संकोचादयः, बाह्याः सन्तप्तता-गृहान्तस्थता-बद्धतादयः, तन्मयं तत्प्रधानं देहं जहुरिति, तत्तद्भावत्याग एवात्र देहत्याग उक्तः, यथा सृष्टिप्रसंगे ब्रह्मणस्तत्तद्भावत्याग एव देहत्याग इति तृतीयस्कन्धे कथितम् । अतः प्रक्षीणबन्धनाः प्रक्षीणानि बन्धनानि दिनान्तरे श्रीभगवत्केलिप्राप्तौ प्रतिबन्धा आन्तरा बाह्या आर्ज्जव-सन्तप्तादयो यासां तद्रात्रौ अच्युताश्लेषनिर्वृत्या कालक्षेपादलब्धरासाः कल्याण्य इति, एवं ज्ञानेन मोक्षो भवेत्, प्रीतिभक्त्या वैकुण्ठलोकः प्रेम्णा च श्रीभगवद्वशीकरणम्, तत्र च जारतया प्रेमविशेषेण नित्यप्रेष्ठतया व्रजे संयोग इति सिद्धान्तः । अतस्तादृशभावोत्पत्तये रासक्रीड़ा सर्व्वथा

सर्व्वैः सेव्येति तात्पर्य्यम् ॥ १०–११ ॥ श्रीयुक्तः परीक्षिदित्यन्येषां परीक्षणार्थमिवोवाच, न चाज्ञानेन संशयादिति भावः। परं केवलं कान्तं गतिं सुन्दरं वा, यद्वा, परं कान्तं रमणं जारमित्यर्थः। अत एव गुणेषु तस्य सौन्दर्य्य-माधुर्य्य-वैदग्ध्य-कारुण्यादिष्वेव, न तु तत्त्वे धीबुद्धिर्यासां तासां गुणप्रवाहः संसारस्तस्योपरमो निवृत्तिः कथं भवति ? सर्वपुरुषार्थचूडामणिर्मोक्षः कथं घटेत ? (श्वे० ३।८) 'तमेव विदित्वातिमृत्युमेति' इत्यादि श्रुतिप्रामाण्येन भगवत्तत्त्वज्ञानेनैव संसारनिवृत्तिसिद्धेः। मोक्षस्य सर्वतः श्रेष्ठतामननेन दौर्लभ्यमभिप्रेत्य, किंवा मोक्षस्य साधनं शास्त्रे यदुक्तं तद्भावमवेक्ष्यायं प्रश्नः। यद्वा; परं कान्तं कन्दर्पकोटिमनोहरमात्मकोटिप्रेष्ठं वा, अत एव गुणेषु तस्य सौन्दर्य्य-माधुर्य्य वैदग्ध्यानुरागादिष्वेव, न तु स्वस्वरूपत्वे धीर्यासां तासां तृणीकृतमोक्षैः सद्भक्तैरपि सेव्यपादानां श्रीकृष्णप्रेयसीनामतिफल्गुतमो मोक्षः कथं सम्भवेदिति मोक्षस्यातितुच्छतामननादयं प्रश्नः। मुने ! हे सर्वज्ञ ! इति तद्वृत्तं त्वया ज्ञायत एव, अतस्तत्परिहारस्त्वयैव कर्त्तुं शक्यत इति भावः। किन्तु वस्तुतस्तु 'नाथ योनिसहस्रेषु' इति त्वयि भक्तस्तु कीटोऽपि', भूयासं जन्मजन्मसु' इत्यादि वचनैर्भक्तानां भक्तावेव तात्पर्य्येण भक्तिवृद्ध्यर्थं जन्मादिप्रार्थनात् जन्मादिलक्षणसंसारोपरमोऽनुचितः, अतो निर्वेदादिना भक्तिपुष्टिहेतुगुणमयदेहत्यागेन गुणातीतदेहग्रहणमप्ययुक्तमेवेति सद्गुणमयतापक्षे गुणधियां गुणज्ञानामित्यर्थः। गुणानां श्रीभगवत्सन्तोषणरूपलावण्यादीनां प्रवाहो यस्मिन् देहे तस्योपरमः कथं स्यात्, श्रीभगवत्सेवायां देहस्यायोग्यत्वमननात्, असमोद्र्ध्व दुःखभराद्वा तासां तादृशदेहत्यागायोगात्, यद्वा, गुणेषु श्रीकृष्णस्य लावण्यसौरभ्यादिषु रासक्रीडादिषु वा धीर्यासां तासामपि गुणोऽन्यगोपीवच्छ्रीवृन्दावने व्रजान्तःसाक्षान्निवासादिलक्षणः रासक्रीडादिलक्षणो वा सौभाग्यविशेषस्तस्य प्रवाहः, आवृत्त्या नित्यनूतनतया वा परम्परा तस्योपरमः कथं स्यात्, सर्वसद्गुणमयदेहत्यागेन तदसिद्धेः ? किञ्च, विचाराद्यपगमात् ताभिस्त्यज्यमानस्यापि तादृशदेहस्य तादृशनिजस्वभावेन कथ पातः स्यादित्यर्थः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

दुःसहेत्यादिना प्रारब्धकर्मक्षयप्रकार उच्यते—क्षीणमङ्गला क्षीणपुण्याः ॥ १०–१२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

काश्चिद्गोप्यस्त्वन्तर्गृहगताः पतिभिरन्तर्गृहनिरुद्धा इत्यर्थः, अत एव न लब्धो निर्गमो यासां ताः प्रागपि कृष्णभावनायुक्तास्तदा नितरां कृष्णं दध्युः ध्यातवत्यः कथम्भूताः मीलिते लोचने याभिस्तथाभूताः ॥ ९ ॥ एवं ध्यातवतीनां प्रारब्धकर्मक्षयपूर्वकभगवत्प्राप्तिमाह—द्वाभ्यां दुस्सहेति। दुःखेनापि सोढुमशक्यो यः प्रियतमस्य कृष्णस्य विरहः तेन यस्तीव्रतापः तेन धुताः निरस्ताः, अशुभाः प्रारब्धपापकर्माणि यासां ध्यानेन प्राप्तो योऽच्युतस्याश्लेषस्तेन या निर्वृतिरानन्दस्तया क्षीणानि मङ्गलानि प्रारब्धपुण्यानि यासां तथाभूताः ॥ १० ॥ एवं सद्य एव प्रक्षीणानि बन्धनानि संसृतिबन्धनिमित्तानि पुण्यपापात्मकानि यासां ताः परमात्मानं कृष्णमेव जारबुद्ध्यापि सङ्गताः सत्त्वादिगुणप्रचुरं देहं तत्यजुः, एवकारापिशब्दाभ्यां कोपि भावो भगवदनन्यविषयो मुक्तये अवकल्पत इत्यभिप्रेतम् ॥ ११ ॥ तदेव तन्मुखेन विशदयितुं पृच्छति राजा–कृष्णमिति। हे मुने ! कृष्णं परं केवलं कान्तमेव विदुर्न तु परब्रह्मत्वेन तासामेवंभूतानां गुणधियां विषयासक्तधियां गोपीनां कथं गुणप्रवाहस्य सत्त्वादिगुणमयदेहपरम्पराया उपरमो निश्शेषक्षयः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अलब्धविनिर्गमाः-न लब्धं विनिर्गमनं याभिस्तास्तथा तस्य कृष्णस्य भावनया भक्तिसंस्कारेण युक्ताः ॥ ९ ॥ काश्चन ताः स्त्रियः गुणमयं सत्त्वादिगुणविकृतदेहं जहुरित्यन्वयः। अयं देहत्यागः संसारिण एव न किन्तु मुच्यमानस्येवेत्याह–सद्य इति। बन्धनध्वंसोऽपि प्रारब्धपुण्यपापप्रणाशेन दृष्टत्वात्तत्रापि तथैवेत्याह, दुःसहेति। दुःसहः सोढुमशक्य प्रेष्ठस्य कृष्णस्य विरहः सांसारिको वियोगस्तेनोत्पन्नस्तीव्रतापः अत्युत्कटज्वरानुभवः तेन धुताशुभाः निरस्तपापाः ध्यानेन प्राप्तः अच्युतस्याश्लेषः ध्यानप्राप्ताच्युताश्लेषः, तेन उद्धृतया निर्वृत्या स्वरूपानन्दाविर्भावलक्षणया क्षीणानि प्रारब्धानि मङ्गलानि पुण्यानि याभिस्तास्तथा॥१०॥ अनारब्धफलानां कुतो निवृत्तिरिति तत्राह–तमिति। जारः उपपतिः पत्युरप्यधिक इति सम्भावितस्तं कृष्णं परमात्मानं नारायणमेव सङ्गताः सम्यग्ज्ञातवत्यः अनेन विम्बभूतहरिज्ञानेनाप्रारब्धप्रणाश इति सूचितम् ॥ ११ ॥ जारबुद्ध्यापि सङ्गता इत्युक्त तस्य तात्पर्यमजानन्निव राजा पृच्छति—कृष्णमिति। गोप्यः कृष्णं परं कान्तं जारं पतिं विदुः ब्रह्मतया श्रुतिशतगीतपरब्रह्मत्वेन न विदुः, अनधिकारित्वात् या एवंविधास्तासां गुणेषु विषयेषु धीबुद्धिर्यासां तास्तथा गुणप्रवाहोपरमः संसारप्रवाहनिवृत्तिः कथं सम्भाव्यते निवृत्तिमार्गलभ्याप्रवृत्तिमार्गेण कथं संसारनिवृत्तिः स्यादिति। "उत्तिष्ठत जाग्रत" इति श्रुतेः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अन्तरित्याद्यष्टकम् ॥ ९–१७ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अपत्यवत्यस्तु अधिकाराभावात्तद्वपुर्हित्वा वपुरन्तरेण सद्य एव तत्र गता इति दर्शयन्नाह—अन्तर्गृहगता इत्यादि-त्रिभिः। काश्चिदपत्यवत्योऽनधिकारवत्यो दैवादन्तर्गृहगताः, अनधिकारित्वेनाङ्गसङ्गाऽयोग्या अपि दर्शनमात्रकाङ्क्षया बहिर्गन्तुमिच्छन्त्योऽप्यलब्धविनिर्गमास्तद्भावनायुक्ताः सत्यः कृष्णं दध्युः। भावनालिङ्गमाह–मिलितलोचनाः ॥ ९ ॥ दुःसहेन प्रेष्ठस्य श्रीकृष्णस्य विरहेण तीव्रतापस्तेन धूतान्यशुभानि यासां तेनाशुभकर्मक्षयः, ध्याने प्राप्तो योऽच्युतस्याश्लेषस्तत्कृतया निर्वृत्या क्षीणानि मङ्गलानि शुभकर्माणि यासां तास्तथा। अनेन शुभकर्मक्षयः, यावद्दुःखक्षय एकेन कृष्णविरह-दुःखेन जात इति तद्विरहस्य दुःखत्वाधिक्यम्। एवं यावत् सुखक्षय एकेन कृष्णस्य ध्यानानन्देन जात इति तद्ध्यानानन्दस्य सर्वसुखातिरिक्तत्वं व्यङ्ग्यम् ॥ १० ॥ तथा तदा शुभाशुभकर्मक्षये तदारब्धदेहपात उपसन्ने यदभूत्तदाह—तमेवेति। जारबुद्ध्या गुणमयं देहं जहुः। अस्मिन् देहे सति असौ जारो भवति, तदयं देहस्त्याज्य इति। जारबुद्धिस्तत्त्यागे कारणम्। गुणमयं जहुः; निर्गुणं देहमवापुरित्याक्षेपः। तास्त्वन्ते तदङ्गसङ्गयोग्यं वपुरासेदुरिति दर्शयति। सद्यस्तत्क्षणेनैव तमेव श्रीकृष्णमेव परमात्मानं सङ्गता अपि बभूवुरित्यर्थः। एतेन शुभाशुभकर्मारब्धं लौकिकमेव शरीरमलौकिकं तु भक्तशरीरं श्रीकृष्णलीलाख्यमित्यायातमत एतास्तत्कालसिद्धाः प्रागुक्तयज्ञपत्नीवत् अतः प्रक्षीणबन्धना नित्यमुक्ताः ॥११॥ अथात्र परीक्षित् सविस्मयं पृच्छति कृष्णं विदुरित्यादि। हे मुने ! ताः कृष्णं परं कान्तं प्रियतमत्वेन विदुः, न तु ब्रह्मतयेश्वरत्वेन। तत् कथं तासां गुणप्रवाहोपरमः ? यतो गुणधियामयं मे कान्त इति गुणे धीर्यासाम् ॥ १२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अन्तर्गृहगता इत्यादि। यस्यान्तर्गृहस्य द्वारि गुरव उपविश्यासन्निति बोद्धव्यम्। अथवा, काश्चिदिति गमनानधिकारवत्यः, अन्यथा (६ ष्ठ–श्लो०) "शुश्रूषन्त्यः पतीन् काश्चिद्" इत्यत्र "परिवेशयन्त्यस्तद्धित्वा" इत्यत्र च "अश्नन्त्योऽपास्य भोजनम्" इत्यत्र चान्तर्गृहवर्त्तित्वं पत्यादिसन्निहितत्वं किलास्ति, तत् कथं तास्तत्र गताः, यत एता गोप्य एव याः किल बालापत्या इति प्राक् (१०।२१।७) लिखिताः। तासां तदङ्गसङ्गे न योग्यतेति भाव इति वा ॥ ९ ॥ दुःसह प्रेष्ठविरह–तीव्रतापधुताशुभाः–धुताशुभत्वं क्षीणमङ्गलत्वञ्च तद्देहारम्भकं प्रारब्धरूपदुःखसुखभावत्वम्। अतोऽमूर्नृदेहा एव पूर्वश्लोकव्याख्या संवादात् स्वभावसिद्धानान्तु तस्मिन् देहे श्रीकृष्णदर्शनादर्शनजन्यसुखदुखयोस्तु न नाशः, ते तु न नश्वरे नित्ये एव तयोर्द्वयोरेवानन्दमयत्वात् ॥१०॥ अतो गुणमयं देहं जहुः, न तु देहे त्यक्त्वा कैवल्यमवापुः, निर्गुणं श्रीकृष्णाङ्गसङ्गोचितं देहं प्रापुरित्यर्थः। जारबुद्ध्या इति जार-शब्दः केवलं प्रतीतिपर; यद्वा, जरयति गुणमयदेहमिति जारः, जारा चासौ बुद्धिश्चेति तथा यया बुद्ध्या गुणमयं देहं जहुः, निर्गुणं देहं प्राप्य किम्भूता बभूवुः ? तत्राह सङ्गता अपि बभूवुरित्यर्थः। तं कीदृशम् ? परमात्मानम्, ताः कीदृश्यः ? गोप्यः केवलं गोपवध्व एव पुनरन्तः अन्तःकरणे लब्धविनिर्गमाः—कृष्णसङ्गोऽनेन देहेन न भावीति लब्धो विनिर्गमो नैराश्यं याभिः पुनर्गृहगता गृह एव स्थिताः सत्यः। अथवा, गृह शरीरं मानुष्यं तत्र स्थिताः केवलगोपवधूत्वात् पुनः सद्यः प्रक्षीणबन्धनाः, बन्धनं गृहादि; निर्गुणदेहलाभादिति त्रिभिः सहान्वयः। अथवा, जारबुद्ध्या गुणमयं देहं जहुः, एतेन गोप्यो विविधा इति प्रागेवोक्तम् ॥ ११ ॥ कृष्णं विदुः परं कान्तमिति। कृष्णं परं कान्तमेव विदुर्न तु ब्रह्मतया, अतस्तासां गुणप्रवाहोपरमो गुणधियां संसारिणां कथम् ? ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अत्रोज्ज्वलनीलमण्युक्तरीत्या विविच्यते गोप्यस्तावद्विविधाः नित्यसिद्धा साधनसिद्धाश्च, साधनसिद्धाश्च द्विविधाः यौथिक्योऽयौथिधिक्यश्च यौथिक्यश्च द्विविधाः श्रुतियूथभूतत्वात् श्रुतिचर्य्यः ऋषियूथभूतत्वादृषिचर्य्यश्च ततस्तासां चतुर्विधत्वमुक्तं पाद्मे —

"गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः। देवकन्याश्च राजेन्द्र ! न मानुष्यः कथञ्चन" ॥ इति।

गोपीत्वेनैव मानुषत्वे लब्धेऽपि न मानुष्य इति निषेधस्तासां प्राकृतमानुषत्वाभावं ज्ञापयति अत्र गोपकन्यका एव नित्यसिद्धास्तासां साधनाश्रवणात् गोपीत्वे सत्यपि कात्यायन्यर्चनस्य तु साधनत्वं नरलीलत्वमेव ज्ञापयति गोपीत्वस्य सिद्धत्वादेवेति तत्प्रसङ्ग एव प्रपञ्चितं तासां नित्यसिद्धत्वन्तु "आनन्दचिन्मयरसप्रतिभाविताभिः" इति ब्रह्मसंहितोक्त्या तासां ह्लादिनीशक्तित्वप्रतिपादनात् "ह्लादिनी या महाशक्तिः" इति बृहद्गौतमीयाच्च ताभिः सह कृष्णस्य रमणस्यानादित्वाच्च दशाष्टादशाक्षरादिमन्त्रेषु तासां निर्देशात् तन्मन्त्रोपासनानां तद्विधायकश्रुतीनां चानाद्यतत्कालभावित्वाच्च "सम्भवन्त्वमरस्त्रियः" इति प्रमाणावगतानां देवकन्यानां नित्यसिद्धगोपिकांशभूतत्वं व्याख्यातमुज्ज्वलनीलमणौ श्रुतिचरीणां साधनसिद्धत्वम् –

"कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः। कामिनी भावमासाद्य स्मरक्षुब्धान्यसंशयः ॥
यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः। भजन्ति रमणं मत्त्वा चिकीर्षाऽजनि नस्तथा" ॥

इत्यादि बृहद्वामनवचनेभ्योऽवगतम् ऋषिचरीणां च "गोपालोपासकाः पूर्वमप्राप्ताभीष्टसिद्धयः" इत्युज्ज्वलनीलमण्युक्तानां तथाभूतत्वं "पुरा महर्षयः सर्वे दण्डकारण्यवासिनः। दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम्। ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले। हरिं संप्राप्य कामेन ततो मुक्ता भवार्णवात्" इति पाद्मोत्तरखण्डात्। अत्र रामं दृष्ट्वा हरिं भोक्तुमैच्छन्निति रामसौन्दर्य्यदर्शनेन स्वोपास्यस्य हरेः गोपालस्य स्मरणात्तमेवभोक्तुमैच्छन्नित्यर्थः लज्जया तु साक्षात्तं न वृतवन्त्यः ततश्च कल्पवृक्षस्येवावदतोऽपि श्रीरामस्य प्रसादात्तेषामभीष्टसिद्धिर्जातेत्याह – ते सर्वे इति। हरिं कामेन सम्प्राप्येत्यनुसंहितं फलं ततः कामादेव हेतोर्भवार्णवात् संसारान्मुक्ता इत्याननुसंहितं फलम् अत्र "मातरः पितरः पुत्राः" इति "यत्पत्यपत्यसुहृदामनुवृत्तिः" इति "पतिसुतान्वयभ्रातृबान्धवान्" इत्याद्यग्रिमग्रन्थदृष्टेरपत्ययत्यो गोप्य एवान्तर्गृहनिरुद्धा बभूवुरिति श्रीकविकर्णपूरगोस्वामिकृतदशमस्कन्धटीकायां दृष्टमतस्तदनुसारेण सार्वत्रिकं मूलार्थमव्याप्यैव व्याख्यायते अत्रेदं तत्त्वं गोपालोपासका ऋषयस्ते श्रीराममूर्तिमाधुरीदर्शनाद्रागमयभक्तेर्निष्ठारुच्यासक्तिरत्यङ्कुरभूमिका आरूढाः सम्यगपरिपक्वकषाया अपि श्रीयोगमायया देव्या गोकुलमानीय गोपीगर्भे जनिताः कन्यका बभूवुः तासामेव मध्ये काश्चिन्नित्यासिद्धगोपीसङ्गभूम्ना वयःसन्धिदशामारभ्यैव लब्धपूर्वानुरागाः स्फूर्त्तिप्राप्तकृष्णाङ्गसङ्गाः दग्धसम्यक्कषायाः प्रेमस्नेहादिभूमिका आरूढा गोपैर्व्यूढा अपि योगमाययैव तदङ्गस्पर्शदोषाद्रहिताश्चिन्मयदेहीभूताः कृष्णोपभुक्तास्तस्यां रात्रौ वेणुवादनसमये पतिभिर्वार्य्यमाणा अपि योगमायया साहाय्यप्रसादान्नित्यसिद्धगोपीभिः सहिता एव प्रेष्ठमभिसस्रुः काश्चित्तु नित्यसिद्धादिगोपीसङ्गभाग्याभावादलब्धप्रेमत्वाददग्धकषाया गोपैर्व्यूढा गोपोपभुक्ता अपत्यवत्यौ बभूवुः ताः खलु तदनन्तरमेव नित्यसिद्धादिगोपीसङ्गभूम्ना कृष्णाङ्गसङ्गस्पृहोद्रेकात् पूर्वरागवत्यस्तासां कृपापात्रीभवन्त्योऽपि कृष्णाङ्गसङ्गायोग्यदेहत्वेन योगमायया सहाय्याऽकरणात् पतिभिर्वारिताः कृष्णमभिसर्तुमक्षमाः महाविपद्ग्रस्ताः पतिभ्रातृपित्रादीन् स्वप्राणवैरित्वेन पश्यन्त्यो मरणदशायामुपस्थितायां सत्यां यथान्यामात्रादिस्वबन्धुजनं स्मरन्ति तथैव स्वप्राणैकबन्धुं कृष्णं सस्मरुरित्याह—अन्तरिति। न लब्धो विनिर्गमो याभिस्ता इति पतिभिर्द्वार्य्येव सतर्जनं सयष्टिकमुपविष्टत्वादिति भावः। सदैव तद्भावनया युक्ता अपि तदानीं दध्युः, हा हा प्राणैकबन्धो! वृन्दावनकलानिधे! जन्मान्तरेऽपि त्वत्प्रेयसी भूयासमस्मिन्नन्तकाले त्वन्मुखचन्द्रं चक्षुषा नाऽपश्यं भवतु मनसाऽपि पश्यानीति प्रत्येकं स्वगतमनुलपन्त्यो मुद्रितलोचना सत्यो नितरां दध्युः॥ ९॥ अत्र गोपीनां प्राप्यमतिरहस्यं वस्तु बहिरङ्गलोकेभ्यो गोपयंस्तान् प्रति बाह्यमर्थमन्तरङ्गान् भक्तिसिद्धान्तविज्ञान् प्रति तु स्वाभीप्सितमाभ्यन्तरमेवार्थं ज्ञापयंस्तन्त्रेणाह–दुःसहेति। तत्र बहिर्मुखान् प्रति ताभ्यः कृष्णो मोक्ष ददावित्याह–दुःसहो यः प्रेष्ठविरहस्तेन तीव्रतापस्तेन धुतानि गतानि अशुभानि यासां ताः ध्यानेन प्राप्तस्याच्युतस्याश्लेषेण या निर्वृतिरानन्दस्तया क्षीणं मङ्गलं पुण्यं यासां ताः, अतः प्रक्षीणप्रारब्धबन्धनाः जारबुद्ध्यापि तमेव परमात्मानं प्राप्ता देहं जहुरिति अन्तर्मुखान् प्रति तु तदानीं स्वप्रेष्ठविरहसंयोगोत्थानि दुःखसुखान्यपरिमितानि प्राप्य लब्धमनोरथा एव ताः क्रमेण बभूवुरित्याह–दुःसहेन प्रेष्ठविरहेण यस्तीव्रस्तापस्तेन धुतानि कम्पितीकृतान्यशुभानि याभिस्ता यासां प्रेष्ठविरहतापस्य तीव्रतां वीक्ष्य कोटिब्रह्माण्डस्थवाडवानलमहाकालकूटादिरूपाणि परःसहस्राण्यपि अशुभानि स्वतीव्रताहङ्कारं परित्यज्य स्वपराजयबुद्ध्या चकम्पिरे इत्यर्थः। ध्यानेन प्राप्तः स्फूर्त्या आगतो योऽच्युतस्तेन तदैवोद्भूतस्य तस्य प्रेमपूर्णचिन्मयस्य तादृशस्वभावाभिमानादिमतो देहस्य यः श्लेषस्तेन श्लेषेण या निर्वृतिस्तया क्षीणानि कृशीभूतानि मङ्गलानि प्राकृताऽप्राकृतानि यासां ताः, यासां स्फूर्तिप्राप्तप्रेष्ठाश्लेषोत्थसुखं वीक्ष्य कोटिब्रह्माण्डगतविषयसुखानिर्विषयब्रह्मानुभवसुखसहस्राणि मङ्गलशब्दवाच्यानि क्षीक्षाणि यदपेक्षया निकृष्टान्येव बभूवुरित्यर्थः। भगवद्विरहसंयोगोत्थदुःखसुखाभ्यां प्रारब्धपापपुण्यानि नष्टानि तेषां स्वफलभोगैकनाश्यकत्वादिति व्याख्या तु वैष्णवानां मते न युज्यते॥ १०॥ भगवद्विरहसंयोगयोः पापपुण्यफलत्वाभावात् तादृशानां प्रारब्धनाशस्तु भजनदशायामेवानर्थनिवृत्तिभूमिकारूढानामित्याहुः ततश्च तमेव परमात्मानं परमप्रेमास्पदं जारबुद्ध्या अतिनिकृष्टयापि सङ्गताः, अत्युत्कृष्टपतिबुद्धिमतीभ्यो रुक्मिण्यादिभ्यः सकाशादपि सम्यक् प्रकारेण प्राप्ताः पतिबुद्धेः सकाशादपि जारबुद्धौ "या दुस्त्यजं स्वजनमार्य्यपथं च हित्वा" इत्याद्युद्धववाक्यनिर्द्धारितात् निरङ्कुशप्रेमोत्कर्षात् तथास्मिन्नेवावतारे निकृष्टवस्तुन्यप्युत्कृष्टीकुर्वत्येव लीला दृश्यते यथा महाराजराजेश्वरत्वलीलातः सकाशादपि "विजरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये" इति भीष्मोक्तेः पार्थसारथित्वलीलाया उत्कर्षः तथा उत्कृष्टात् शान्तरसादपि निकृष्टस्य शृङ्गाररसस्य तत्रापि दाम्पत्यभावादप्यौपपत्यभावस्य तथा उत्कृष्टाद्रत्नालङ्कारादपि निकृष्टस्य गुञ्जागैरिकशिखिपुच्छादेरुत्कर्षो दृष्ट एवेति सङ्गताः काश्चिद्योगमाया कृतानुकूल्यान्निरोधमुक्ता अभिसृत्य तस्यामेव रात्रौ रासविहारिणं तं प्राप्ताः काश्चिदन्यस्यामपि ननु, पुरुषान्तरोपभुक्तदेहाभिस्ताभिस्सह भगवद्विलासो न युज्यते इति तत्राह–जहुरिति। देहमिति जात्यपेक्षया एकत्वं तस्य देहस्य योगमाययैवालक्षितमन्तर्द्धाधनमित्येके, अन्ये त्वेवमाहुः, अत्र हेयो देहो गुणमय एव भवत्यतो गुणमयमिति विशेषणस्योधिक्यात् तासां देहावेणुवादनात्पूर्वं द्विधाभूता गुणमयाश्चिन्मयाश्चासन्निति बुध्यते तत्र ये गुणमयाश्चिन्मयाश्चासन्निति बुध्यते तत्र ये गुणमयाः स्वपत्युपभुक्ता देहास्तानेव जहुः। अयमत्र विवेकः गुरूपदिष्टभक्त्यारम्भदशात एव भक्तानां श्रवणकीर्त्तनस्मरणदण्डवत्प्रणतिपरिचर्य्यादिमय्यां शुद्धभक्तौ श्रोत्रादिषु प्रविष्टायां सत्यां "निर्गुणो मदुपाश्रयः" इति भगवदुक्तेर्भक्तः स्वश्रोत्रादिभिर्भगवद्गुणादिकं विषयीकुर्वन्निर्गुणो भवति व्यावहारिकशब्दादिकमपि विषयीकुर्वन् गुणमयोपि भवतीति भक्तिदेहस्यांशेन निर्गुणत्वं गुणमयत्वं च स्यात् ततश्च "भक्तिः परेशानुभवो विरक्तिः" इति "तुष्टिः पुष्टिः क्षुदपायोऽभूयासम्" इति न्यायेन भक्तिवृद्धितार-

तम्येन निर्गुणदेहांशानामाधिक्यात्तारतम्यं स्यात् तेन च गुणमयदेहांशानां क्षीणत्वतारतम्यं स्यात् सम्पूर्णप्रेमण्युत्पन्ने तु गुणमयदेहांशेषु नष्टेषु सम्यक् निर्गुणं एतद्देहस्स्यात् तदपि स्थूलदेहपातस्तु बहिर्मुखमतोत्खाताभावार्थं भक्तियोगस्य रहस्यत्वरक्षार्थं च भगवतैव मायया प्रदर्श्यते यथा मौशललीलायां यादवानाम् क्वचित्तु भक्तियोगोत्कर्षज्ञापनार्थं न दर्श्यते च यथा ध्रुवादीनाम् अत्र प्रमाणमेकादशे पञ्चविंशतितमेऽध्याये श्रद्धादयो निर्गुणां गुणमयाश्चेति प्रदर्शयता—

"येनेमे निर्जिता सौम्य गुणजीवेन चित्तजाः। भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते" ॥

इत्यनेन भक्त्यैव गुणमयवस्तूनां निर्जयो नाश एवोक्तो भगवता अत एव भूतानि विधूतानि तानि रब्धितानि अशुभानि गुणमयशरीराणि यासां ता इति आश्लेषनिर्वृत्या अजीर्णानि विवर्द्धितानि मङ्गलानि चिन्मयशरीराणि यासां ता इत्यप्यर्थश्चिकीर्षितो भवति। अतः प्रक्षीणबन्धना अविद्याबन्धात् पत्यादिवारणाच्च योगमायानुकूल्यं प्राप्य विच्युता इत्यर्थः। मरणवशात् देहपात एव तासामिति तु न व्याख्येयं -

"या मया क्रीडता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः। अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्तया" ॥ इति

भगवद्वाक्ये कल्याण्य इति पदोपादानात् पतिकृतवारणान्मद्विरहसन्तापाच्च स्वदेहांस्तदा जिहासुनामपि तासां परममङ्गलरासोत्सवारम्भे मरणस्यामङ्गलस्य मदनभिमतत्वात्ताः कल्याणवत्य एवाभवन्निति भगवदभिप्रायात् तथा "ता ऊचुरुद्धवं प्रीतास्तत्सन्देशागतस्मृतीः" इति शुकवाक्याच्च ता ऊचुर्याः पूर्वमलब्धरासा अन्तर्गृहनिरुद्धा आसन्निति तेन मरणं विनैव ताः गुणमयान् देहान् जुहुरिति विरहतीव्रतापरन्धितास्तासां गुणमयदेहा गुणमयत्वं परित्यज्य चिन्मयत्वं ध्रुवादीनामिव प्रापुरेष एव देहत्याग इत्यर्थोऽवगम्यते तथा अत्र अलब्धविनिर्गमा इति तत्र व्रज आस्थिता इति तथा अत्र ध्यानप्राप्ताच्युताश्लेषेति तत्र मापर्मद्वीर्यचिन्तयेति तुल्यार्थतैव किन्स्वत्र सङ्गता इति तत्रालब्धरासा इत्यर्थभेददर्शनादेवान्तर्गृहनिरुद्धगोपीनां द्वैविद्ध्यं व्याख्यातं यथा सम्प्राप्तानां फलानां सम्यक्पाकेऽवगते सत्याम्रवृक्षोयं पक्वफलः, इति ज्ञात्वा सर्वाण्येव फलानि वृक्षादपचित्य गृहमानीयन्ते आनीय च यानि यानि समुचितकालेन सौरकिरणादिना च सौरूप्यसौरभ्यसौकुमार्यवन्ति राज्ञो भोगार्हाण रोचकाणि जातानि तानि फलानि विचक्षणपरिजनेन परिष्कृत्य समये राज्ञो भोगाय परिकल्पन्ते यानि त्वन्तःपक्वानि बहिरपक्वानि सौरूप्यादिगुणरहितत्वादरसनीयानि राज्ञोऽनर्हाणि ज्ञायन्ते तान्युष्मविशेषयोगेन परिपक्वीकृत्यैव द्वितीयतृतीयदिनादिषु राज्ञे समर्प्यन्ते तथैव गोकुले जनितानां मुनिचरीणां गोपीनां मध्ये याः प्राकृतगुणमयशरीरतां परित्यज्य प्रथममेव शुद्धचिन्मयीभूतशरीरा अजनिषत ताः पुरुषान्तरास्पृष्टाः श्रीयोगमायया नित्यसिद्धादिगोपीभिः सहैवाभिसारिताः यास्तु बहिर्गुणमयशरीवत्यस्ता अपि श्रीकृष्णविरहौष्ण्यप्रापणया गुणमयशरीरभावत्याजनयैव विनष्टपुरुषान्तरस्पर्शदोषाश्चिन्मयीभूतशरीराः काश्चित्तस्यां रात्रावेव सर्वासां पश्चादभिसारिताः काश्चिदीषन्मात्रस्थितकषायाः प्रेक्ष्य विरहौष्ण्येनैव तन्निवर्तनार्थं रात्र्यन्तरेष्वेवाभिसारिताः ततश्च ताः प्राप्तरासादिविलासाः रात्र्यन्ते नित्यसिद्धादिगोपीभिः सह पतिगृहमागतास्तदारभ्य पतिसङ्गतो योगमाययैव रक्ष्यमाणाः पत्यपत्यादिषु ममताशून्याः कृष्णप्रेमातिभरपरिप्लुताः शुष्कपयस्तन्यः स्वापत्यान्यपुष्णत्यो ग्रहग्रस्तत्वेनैव तद्बन्धुभिः प्रतीयन्तेस्मेति सर्वमनवद्यं अन्ये तु अन्तर्गृहनिरुद्धा अपि नापत्यवत्यः, अग्रिमग्रन्थेषु अपत्यादिशब्दैः सपत्नीपुत्रः पोष्यपुत्रो भ्रातृपुत्रो वा लक्षणीय इत्याहुः ॥ ११ ॥ तत्रत्यानां बहिरङ्गाणां केषाञ्चिन्मुखदर्शनेनैव हृदयगतं सन्देहमालक्ष्य राजा स्वय शुकवाक्यस्याभिपेतमर्थं तत्प्रसादाज्जानन्नपि तेषां सन्देहनिवर्तनार्थमेव सन्दिहान इवाह—कृष्णमिति। हे मुने सर्वज्ञ! कृष्णं परमात्मानमपि परं परमपुरुषं कान्तं स्वरमणं विदुः, वस्तुतया तु न विदुः तु अतो गुणधियां कृष्णेन सह विहरामेति गुणविषयकबुद्धीनां तासां गुणप्रवाहस्योपरमः कथं "तमेव विदित्वा अतिमृत्युमेतीति "आत्मानमात्मात्मतया विचक्षते" इत्यादिश्रुतिस्मृतिवाक्यैः परमात्मज्ञानस्यैव मोक्षप्रापकत्वोक्तेः ॥१२॥

श्रीरसिकाल्हादिनी टीका

किं च ताः सर्वाः प्रतिबन्धकशैथिल्येन कृष्णान्तिकं प्राप्ता यास्तु प्रतिबन्धकप्राबल्येन निरुद्धास्तासां सद्यो देहपातं कथयन् ताभ्यः पूर्वमेव तासां श्रीकृष्णान्तिके प्राप्तिकारमाह—अन्तरिति। काश्चिदुपासनासिद्धाः कस्यचिद्गृहकर्मणश्चिकीर्षयात् गृहगताः वेणुगीतश्रवणान्तरमेवान्यासामागमनसंभ्रनमालोक्य पत्यादिभिरवरुद्धा जाता अत एवालब्धविनिर्गमा न लब्धो विनिर्गमो याभिस्ताः तदुक्तं—"गोप्यस्तु श्रुतयो ज्ञेया ऋषिजाः गोपकन्यकाः। देवकन्याश्च राजेन्द्र न मानुष्यः कथञ्चन"। किं च–"नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा। यमुनां गोपकन्यांश्च तथा गोपालबालकानिति"। एतास्तु सादयो नित्याश्च प्रतिबन्धनिरासार्थं कृष्णमेव दध्युः ध्यातवत्यः सक्रोधं यथा तथा पत्यादिमुखं पश्यंत्यो निर्गमद्वारमलभमाना मीलितलोचना जाताः कीदृश्यः निरोधात् प्रागपि तद्भावना रहस्यभावनायुक्ताः। यदा तस्य भावनायुक्ता आसन् "विघ्ने जाते प्रेम-पूरस्य प्रावल्यं भवतीति" श्रूयते। यथा नदीप्रवाहस्य पर्वतादिना प्रतिबंधत्वं प्रतिवेत्सतीति वेगाधिक्यं भवतीति। अतो यथा पूर्वं श्रीकृष्णेनाभिरमिताश्चुम्बनालिंगनादिभिरानन्दिता तयैव भावनया युक्ता दध्युः नह्यननुभूतं स्मर्यते। यद्वा तद्भावना तत्पूर्व रमणं भावयन्त्यः युक्ताः श्रीकृष्णस्वरूपे योगं प्राप्ताः। यद्वा युक्ता योगिन इव अत्र इवार्थो द्रष्टव्यः स्वदेहविस्मरणपूर्वकं तत्तदंगविभावनपूर्वकं दध्युः स्मृतिवत्यः कीदृश्यः मीलित-

लोचनाः, अबहिर्वृत्तिनेत्रा यद्वा मीलितं शिथलीकृतं लोचनं विचारसामर्थ्यं याभिस्ताः, अन्यज्ञानरहिता अपि तमेव दध्युः, श्रीकृष्णप्राप्तये ध्यानमंतरेणोपायांतरविचारे शैथिल्यं जातमिति भावः ॥ ९ ॥ किंचिदिदानीं तासां मनसश्चेंद्रियाणां श्रीकृष्णाकृष्टत्वेन तन्निरोधे पत्यादीनां सामर्थ्याभावात् देहमात्रप्रतिबंधे जाते किं वृतमित्यपेक्षायां तद्वृतान्ताभिज्ञो मुनीन्द्रः प्रत्यक्षमिव दृष्ट्वाह विप्रकृष्टं व्यवहितं सम्यक् पश्यन्ति योगिन इत्युक्तमेव ततश्च प्राकृतानां मानुषीभावप्रतीत्या गुणमयत्वेन प्रतीयमानं देहं पत्यादिमनाविष्टमंतर्द्धाय छायामयं तत्रैव स्थापयित्वा सद्य एव श्रीकृष्णं प्राप्ता इत्यादिश्लोकयुग्मेन दुःसहेति दुःसहः सोढुमशक्यः प्रेष्ठस्यातीवप्रियस्य विरहो विप्रलंभस्तेन तीव्रो यस्तापस्तेन धुतान्यशुभान्यमंगलानि यासां ताः दुःसहशब्देन प्रतिक्रियाशून्यत्वमुक्तम् । अन्यत्र विप्रलब्धे सख्योऽपि तैस्तैर्हितकथनैरासां बन्धादिभिः प्राणरक्षां कुर्वन्ति । अत्र तु सख्यादिसाहचर्याभावात् स्वयमेव विरहतापमनुभूतवत्यः । यद्वा दुःसहो यः प्रेष्ठस्य विरहस्तस्मात्तीव्रोऽनिवार्यस्तापस्तेन धूतो निरस्तः, अशुभः श्रीकृष्णसंगतिप्रतिबन्धरूपो शुभाभावनाख्यो वा संस्काराख्यो वा देवत्वप्रापकं कृत्वादिजन्यं यासां ताः । ननु कृत्वादिजन्या पूर्वस्याशुभत्वं कथमुच्यते । परिणामे स्वर्गसुखजनकत्वात् न त्वशुभेन शुभं जन्यत इति च तत्र समाधत्ते-साम्प्रतं दुःखप्रदत्वेन प्रतीयमानत्वाद् शुभत्वं तपोवत् । यथा तपः कायःक्लेशजनकत्वादशुभमिव प्रतीयते तेन शुभं स्वर्गादिसुखं जन्यत एव तथात्रापि अशुभेन कृत्वाद्यपूर्वेण शुभं मङ्गलरूपं स्वर्गसुखं सुसाद्यत एव यथा योगे तमुभयमपि हेयं ब्रह्म–प्राप्तिप्रतिबंधकत्वात्तथा श्रीकृष्णप्रियाणामप्युभयं प्रतिबंधकमेवोक्तं धुता शुभाः, अशुभजनस्य शुभस्यापि निरसनमाह ध्यानेति । ध्यानेन प्राप्तस्यास्याच्युतस्य क्षणमात्रमपि विलासच्युतिरहितस्य कृष्णस्याश्लेषालिङ्गन–सर्वावयवसंस्पर्शन या निवृत्तिः सुखम् । यद्वा ध्याने प्राप्ता अच्युताश्लेषनिर्वृत्तिः श्रीकृष्णसुखं तेन क्षीणं दूरीकृतमङ्गलं शुभं कृत्वादिफलं स्वर्गादिसुखं यासां ताः कारणनाशे कार्यनाशस्यावश्यं भावित्वात् अत एव ता शुभात्मकत्वेन प्रतीतं गुणमयं देहं जहुः । शुभाशुभत्यागस्य गुणमयदेहत्यागेनोपचर्यमाणत्वादिति । ननु कृष्णप्रियाणां देहस्य गुणमयत्वं कथं अप्राकृतत्वादलौकिकत्वाच्च सत्यं साकं विजह्रुः कृतपुण्यपुञ्जा इतिवत् । उपासनासिद्धानां पूर्वकृतपुण्यपुञ्जानां देहस्य पुण्यविशिष्टत्वात् ॥ १० ॥ अलौकिक्या उपासनया श्रीकृष्णविलासयोग्यदेहस्य प्राप्तत्वात् देवत्वप्रापकं कूटरूपं तदपूर्वं स्थितमेवासीत् । अत एव तद्गुणमयं देहं जहुरिति गुणत्यागे गुणमयस्यापि त्याग उक्तं सद्य एव सम्बन्धत्यागः सम्बन्धिन्युपचर्यते राज्यत्यागवत् स्फुटत्वप्रदशनार्थं पृथगुक्तो गुणमयं जहुरिति । किं च यद्येतासां कृत्वादिजन्यं देवत्वाद् देवत्वादिप्रापकमपूर्वं नाभविष्यत् तदा पत्यादिभिरेताः प्रतिबद्धा नाभविष्यन्निति क्रियातिपत्या ज्ञायतेऽनुमीयते च एता कृत्वाद्यपूर्वविशिष्टा पत्यादिनिरुद्धत्वात् प्राकृतस्त्रीवत् । अत एव कारणस्यापूर्वस्य नष्टत्वाज्जहुरिति । प्राकृतगुणस्य चेत्त्यागस्तर्हि निर्गुणत्वेन प्राकृतगुणरहितेन विलासप्रधानेन माधुयपुंजात्मकेन नित्यसिद्धव्रजदेवीसदृशेन देहेन तं प्रापुरिति । नन्वलौकिकदेहप्राप्तौ किं कारणमित्युक्तमाह—ध्यानप्राप्ताच्युतश्लेषनिवृत्यालिंगनाक्षीणं परिपुष्टं मण्डलप्रवेशहेतुर्यासां ताः । ननु देहत्यागे सति चैतन्येन देहान्तरेण वा तत्प्राप्तेः चेत्तर्हि गुणमयेत्युक्तेर्वैयर्थ्यं देहं जहुरेतावदेव वक्तुमुचितम् । तत्र समाधत्ते देवांगनानां देवत्वादेव नित्यत्वं सिद्धेस्तु नित्येन चैतन्यघनेन देहेन तत्प्राप्तिरुच्यते । न तु देवांगनासदृशेन तत्र हेतुमाह—सद्यः प्रक्षीणबन्धनाः प्रशब्देनातिशयोक्तिः सवासनस्य बन्धनस्य देवत्वादिसंस्कारस्य क्षीणत्वान्नित्यसिद्धानादिसदृशेन प्रापुरेव ताः समंजसः । न हि देवांशरूपया देवानामिव पुनरपि देवत्वप्रापकं सर्वदैव तासां कृष्णप्रियाणां प्रारब्धमस्तीति । न च चैतन्येनाशरीरिणा सर्वलावण्यविशिष्टस्यालिंगनं रसजनकं केनाप्येत्यपगम्यत इति, यद्वा दुःसहो यः प्रेष्ठस्य विरहस्तेन यस्तीव्रस्तापस्तेन धुतमपास्तं पत्यादिनिरोधलक्षणमशुभं यासां ताः मधुररसस्य विप्रलंभसंभोगात्मकत्वात् । विप्रलंभस्य दुःखवत् प्रतीयते, 'धुता शुभा इति वाचो युक्तिः वस्तुतस्तु विप्रलंभस्यापि परिणामतः सुखरूपत्वोक्तेः मानत्वात् विरहतापेन दुःखभोगात्त्रुटिः द्रष्टव्या बन्धन–विशिष्टं जहुरिति । जारबुद्धिस्तु न त्यक्ता रसविशेषजनकत्वात् संस्कारजन्या प्रतीतिः । संस्कारसिद्धयेऽनुयोगिनमपेक्षते न प्रतियोगिनमिति । ननु जारबुद्धिर्निद्यते एव यस्यां विद्यमानायां नित्यमण्डलप्रवेशे संभावनानुत्पद्यते तत्कथमुच्यते तमेवसंगता इति चेत्तत्राह—यद्येतासां जारबुद्धिर्गर्हिता स्यात्तदा परमतत्वविदा महाभागवतेनोद्धवेन चरणरजःप्रार्थना कथं क्रियत इति । एतापरं तनुभृत इति अत एवाग्रे श्रीमुखेनोद्धवं प्रत्युक्तं–"या मया क्रीडता रात्र्यां वनेऽस्मिन् व्रज आस्थिताः । अलब्धरासाः कल्याण्यो माऽऽपुर्मद्वीर्यचिन्तया ॥ इदमत्र तत्वं याः पत्यादिभिर्निवारितास्तेभ्यो छायामयं दत्वा व्यासाय छायाशुकवत् श्रीकृष्णध्यानानुभावेन स्वदेहमंतर्द्धाप्य तत्सदृशेन लौकिकेन देहेन तं प्रापुरिति । अत एवाग्रे वक्ष्यति–मन्यमानः स्वपार्श्व स्थान् स्वान् स्वान् दारान् व्रजौकस इति तासां पत्यादयोऽपि न दुःखं प्रापणीया इति । एतेऽपि स्व स्वरसे आकुलं–वन्तः पाल्याश्चेति अस्यानुसंधानस्य योगमाययैव कृत्वात् यद्वा तमेव देहं ध्रुववदलौकिकं विधाय तत्सदृशं तत्रैव स्थापयित्वा तं प्रापुस्तदभिप्रायेणोक्तं गुणमयं जहुः पत्यादिभ्यः समपितवत्य इत्यर्थः । ननु कपाटादिभिः संवृत्ते अंतर्गृहे रुद्धस्य देहस्यालौकिकत्वे जातेऽपि श्रीकृष्णान्तिके कथं गमनं संभवेत्तत्र समाधानं—यथाऽर्जुनेन शरपंजरावृते ब्राह्मणपुत्रस्य दर्शनमुक्तं महाकालपुरगमनं चोक्तं न चायं योगमायाया अतिभारः तस्या अचिंत्यशक्तित्वात् । यद्वा तद्भावनायुक्ताः तं ध्यातवत्यस्तद्विषयकरमणभावनायुक्ताः तद्रमणयोग्यं देहं जगृहुः । पत्यादिषु रमणभावनायुक्तं जहुरिति । अत्र तु भावना–त्यागस्य शरीरत्यागेन विवक्ष्यमाणत्वात्

शरीरत्यागस्तु सर्वथा न विवक्षित इति शरीरांतर्द्धाप्य विवक्षितत्वात् च छायामयस्य तत्रैव स्थापितत्वात् यथा ब्रह्मणो भावनात्याग एव शरीरत्यागत्वेनोक्त इति अत एव गुणमयदेहत्यागपूर्वकपरमात्मप्राप्तेरेव सर्वजनप्रतीत्या मुक्तिपदत्वेनाभिधास्य मानत्वमिति न किंचिदसमंजसम् ॥ ११ ॥ ननु गुणमयं देहं जहुरित्युक्तेः यास्तु रुद्धास्ताः ध्यानेन मुक्ताः जाता इति सर्वेषां प्रतीतिर्जातास्तत्र "ज्ञानादेव हि कैवल्यमिति" श्रुतेः तच्च ज्ञानं कैवल्यविषयं न तु गुणविषयं गुणविषयत्वेपि। एतासां जारविषयं तत्सद्भावे सुतरां मुक्तिसंभावनापि कुत इति। सर्वेषामपि वैष्णवानां मुक्तेर्हेयत्वमुक्तं किमुत कृष्णप्रियाणामिति स्वमनसि संशयरहितो तासां नित्यमण्डलप्रवेशं जानन्नपि सर्वेषां मुखाप्रसन्नतया संदिहानचित्तवृत्ती परीक्षित् पप्रछ प्रश्नं कृतः श्रीकृष्णपरीक्षणात् सर्वेषां हृद्वृत्तिपरीक्षणात् रसपरीक्षणाच्च हेतुत्रयेण परीक्षित् न चाज्ञानेन वा प्रश्नः किन्तु सर्वेषामनुरोधेनोवाच। परं केवलं कृष्णं कान्तं ऐश्वर्य्याद्यमिश्रं, यद्वा कान्तं रमणीयं जारमित्यर्थः। विदुर्ज्ञातवत्यः एवं श्रूयते ज्ञानिनां मुक्तिः संभवतीति तत्र च श्रीकृष्णतया ज्ञानतो मुक्तिर्भवति न तु तदस्तीत्याह न तु ब्रह्मत्वज्ञानवतो वा तत्साधनं परस्य वा मोक्षः संभाव्यते न च तदस्तीत्याह—गुणधियां गुणे श्रीकृष्णलावण्यादौ धीर्यासां, यद्वा गुणे रहसि श्रीकृष्णेन सह रमणे धीर्यासां यद्वा गुणे रासोपयोगिनृत्यगानादौ धीर्यासां तासां गुणप्रवाहोपरमः गुणो रासविलासादिस्तस्योपरमो निर्वृत्तिः कथमिति प्रश्नः देहत्यागे स्वत एव तत्संभवात् गुणप्रवाहः रासविलासादिप्रवाहः उपरमः कथं एतास्तु नित्यसिद्धाभ्योपि कृष्णानंदास्वादविशेषेण स्वादितवत्यः। नित्यसिद्धानामेतादृशविरहदुःखाभावात् विप्रलम्भेन रागौत्कंठ्यं भवति। उज्वलस्य संभोग-विप्रलंभात्मकत्वात् तदुपेक्षया नित्यसिद्धानां न्यूनत्वमेतासामुक्तमत्वं देहत्यागेन रासविलासाऽप्राप्तेः गुणप्रवाहो न्यूनत्वं कथम् उक्तं च "न विना विप्रलंभेन शृंगारं पुष्टिमश्नुते। काषायिते हि वस्त्रादौ भूयान् रागोऽभिजायते"। इति यदा गुणमयं देहं जहुस्तदा तमेव परमात्मानं संगता इत्यनेन सायुज्यलक्षणं मोक्षं प्राप्ता इति सर्वेषां प्रतीतिर्जाता तदसंभावने राजप्रश्नः रासविलासभावनाविशिष्टानां रासविलासप्राप्तिरेवोचिता सायुज्यब्रह्मभावनायुक्तानां सायुज्यमुचितं न तु रासविलासप्राप्तिः। "अंते या मतिः सा गतिः प्रसिद्धेः। यद्वा गुणे गौणे उपपतित्वात् तस्मिन् गुणप्रवाहहेतौ धीर्यासां तासां गुणप्रवाहस्य संसारस्योपरमो नाशो मोक्ष इति यावत् कथं घटेत एतास्तु देव्य उपासनासिद्धाः पूर्वजन्मनि इदानीमपीति—"तत्वमस्यादि—महावाक्यालोचनतत्साधनमंतरेण मोक्षः कथं जातः एताभिस्तु विलासभावनाकृतदेहं जहुरिति देहमन्तरेण रासविलासप्राप्तिः न घटेतेति। अन्यथा देवत्वसाधकेन कृत्वाघपूर्वेण सुरत्वं स्यात् असुरत्वसाधकेन ब्रह्मद्रोहेण देवत्वं स्यात् अति प्रसंगात् विनिर्गमकामात् मोक्षस्य तु "दुरवगमात्मतत्वनिगमायेति" श्रुतिभिर्हेयत्वेनोक्तत्वात्। अन्येषामपि वैष्णवानां मोक्षानामनभिरुचेस्तत्र तत्र श्रूयमाणत्वात् न नाकपृष्ठमित्यादिना कथितत्वाच्च कृष्णप्रियाणामेतासां किमुतेति प्रश्नः हे मुने अस्य मननस्य बहुशोऽभ्यस्तत्वात् ॥ १२ ॥

विशुद्धरसदीपिका

एवं च श्रुतिमुनिरूपाणां मध्ये काश्चिद्विजितकषाया निराबाधायवुरित्युक्तम् इदानीं कासाञ्चन दुष्पचोलमदृशां गतवति कषाये तदाभासे वा भक्तिप्रभावाजनिमन्तरेणैव सिद्धशरीरा सादनपूर्वका नित्यप्राप्तिमाह—अन्तरिति त्रिभिः। तत्रान्तर्गृहगता इति पत्यादिपरिचरणे लिङ्गं किं वा तद्दर्शनादिष्वौदासीन्येन सदैवान्तःस्थितिप्रदर्शनाय तथोक्तं किं वा मुनिचरीत्वेन प्राक्तनसंस्कारवशातद्ध्याननिष्ठत्वप्रदर्शनाय तत एव च पत्यादिभिस्तद्रक्षापरैः सावधानैरपि स्थीयत इति गम्यते वार्य्यमाणा इत्याद्युक्तेः एते च तदुत्कण्ठावर्द्धनार्थं योगमायाकल्पिता एव तत्कल्पितव्रजाङ्गनावदिति गम्यम् अन्यथा तद्रोधनाकृतो लोकापवादो दुर्वार एव स्यादिति ध्येयम् तथा तत्त्यक्तदेहानामप्यन्तर्द्धापनं तथैव ज्ञेयम् यावदब्दमघासुरशरीरान्तर्द्धापवत् तदेवं याः काश्चित्साधनवशात्सिद्धपूर्णभावा न तु सिद्धदेहा नितरामन्या इव नित्यसिद्धास्तासामवस्थेयमिति ज्ञेयम् श्लोकार्थोऽयं गृहस्यान्तरित्यन्तर्गृहम् यद्वा, अन्तः अन्तःकरणे गृहगता गृहाभ्यन्तरे गता वयमिति भावो यासां ताः तद्भावना युक्ता इति निर्देशात् एवञ्च भावनयैव चालब्धविनिर्गमाः सत्यः कृष्णं स्वचित्ताकर्षकपूर्णानन्दस्वरूपं श्यामसुन्दरं दध्युर्ध्यातवत्यः कथमित्यपेक्षायामाह—मीलितलोचना इति इदमेव प्राग्भवीयमुनिवरत्वे लिङ्गम्—

"एतेऽलिनस्तव यशो ऽखिललोकतीर्थं गायन्त आदिपुरुषानुपदं भजन्ते।
प्रायो अमी मुनिगणा भवदीयमुख्या गूढं वनेपि न जहत्यनयात्मदैवी ॥ इत्यादिवत् ॥ ९ ॥

ततश्च तादृशध्यानावेशात्तत्क्रतुन्यायेन तादृशस्यैव तस्य प्राप्तिमाह—दुःसहेति। अत्र प्रेष्ठेति विरहस्योत्कटत्वे हेतुः सोऽपि संयोगपुष्ट्यै इति ज्ञेयम् "न विना विप्रलम्भेन संयोगः पुष्टिमश्नुते" इत्युक्तेः तथा अच्युत इति संयोगदार्ढ्ये हेतुः तेन नित्यसंयोगो ध्वनितः तथाऽशुभमत्र श्रीभगवन्नित्यसंयोगप्राप्तिप्राचीनदशायां दुःखजनिकात् तद्विरहस्फूर्तिः मङ्गलं च तद्दशायामेव सुखजनिका प्राप्तव्यतत्सम्योगस्फूर्तिः यावतीभ्यां ताभ्यां ताभ्यां वृत्ताभ्यां प्रौढभावः सिद्ध्यति तावत्योश्च तयोः शनैर्भोग्ययोरपि युगदेवभोगो जातः इति धुतत्वं क्षीणत्वं चोक्तं तयोः शब्दयोश्च पुण्यपापपर्य्यायत्वाभावात्तथात्वं न शङ्कनीयम् उभयोः स्वस्वानियतफलदातृत्वनियमात् पापस्य तु सुतरां भगवद्विरहमयप्रेमस्फोरकत्वाभावाच्च "न कर्मबन्धनं जन्म वैष्णवानां च विद्यते" इति

सुतरामेव तत्प्रारब्धजन्मत्वाभावात् स्वामिव्याख्यायां तु “गुरुपुत्रमिहानीतं निजकर्मनिबन्धनम्” इतिवत्प्रारब्धरक्षणारक्षयोः स्वप्रेमवर्द्धनविदग्धश्रीभगवदिच्छयैव ययैव हि परिकीयात्वादिस्फूर्त्तिरपि तस्यास्तद्वर्द्धनमाह रुद्रः—

“बहुवार्य्यते यतः खलु यत्र प्रच्छन्नकामुकत्वञ्च । या च मिथो दुर्ल्लभता सा परमा तन्मयस्य रतिः”॥ इति दिक् ॥

इदमत्र विचार्य्यते श्रीभगवत्प्राप्तिमार्गो द्विविधः विधिमार्गो भावमार्गश्चेति सोऽपि प्रत्येकं द्विविधः सङ्कीर्णशुद्धभेदात् तत्राद्यः कर्मज्ञानाविमिश्रः तत्राप्याद्यः सकामकर्म्ममिश्रोनिष्कामकर्म्ममिश्रश्च त योराद्येन श्रीमदुपेन्द्रादिलोकप्राप्तिः तत्रापि तदुपासकत्वे तत्रैव नित्यस्थितिः स्वयं रूपोपासकत्वे च तद्भोगानन्तरक्रमेण तत्प्राप्तिः सोऽपि तद्वदेव तदुपासकत्वे स्वयं रूपोपासकत्वे च तत्प्राप्तिः ज्ञानमिश्रेण च महाकालपुराधिपतिप्राप्तिः अथ शुद्धेन विधिमार्गेण निष्ठातारतम्याद्भावप्राप्तिः अथ भावमार्गेऽपि सङ्कीर्णशुद्धभेदेन द्विविधः तयोराद्यो रिरंसामिश्रोऽपरमिश्रश्च तत्र प्रथमेन प्रेयसीव प्राप्तिः तत्रापि विधिमिश्रत्वे पुरगतप्रेयसीभावप्राप्तिः तत्रैवोद्वाहादिश्रवणात् केवलेन व्रजाङ्गनात्वप्राप्तिरिति अत एव विवाहाद्यश्रुतिरिति विवेकः शुद्धेन च सहचरीभावप्राप्तिः तत्रापि श्रीकृष्णस्याहमित्यभिमानेन तत्सखीत्वं श्रीराधाया अहमित्यभिमानेन तत्प्राणसखीत्वम् इति नचायं विभागोऽनुपपन्नः सामान्यविशेषवाचका हि शब्दाः यथास्थानमेव तं तमर्थं प्रकाशयन्ति यथा ब्राह्मणा नावमन्तव्या इति सर्वेऽपि गृह्यन्ते यथा च ब्राह्मणा वरणीया इति वरणयोग्या एव तथा प्रकृतेऽपि व्रजस्त्रीणां प्रागुक्तास्ते च तेच प्रकाराः स्वस्वाधिकारानुसारेण तत्तत्परा द्रष्टव्याः अन्यथा बलदेवक्रीडितगोपीष्वपि तथा प्रयोगस्य सामान्यार्थस्वीकारे “वक्त्रं व्रजेशसुतयोः” इत्यादिना तदेकमतिगतीनां तासामन्यत्रासक्तिवर्णने रसभङ्गो मर्य्यादातिक्रमश्च दुर्वारः स्यादिति ध्येयम् अत्र च प्रामाणपर्येषणायां श्रीबृहद्भागवतादिगवेषणीयं मूले च परमहंसादिसभायां तद्गोपनाय प्राप्तेश्च गुणातीतत्वद्योतनाय परमपुरुषार्थरूपायास्तस्या दृष्टान्तस्थानीयस्य परमपुरुषार्थस्य मोक्षस्योपन्यासः कृत इति न कोऽपि विरोधः ॥ १० ॥ एवं च प्रारब्धकर्मणोरिव मङ्गलाशुभयोर्बहुकालभोग्ययोरपि श्रीभगवद्भक्तिप्रभावेन युगपद्भोगात्तत् क्षणमेव क्षीणयोस्तदनन्तरं ब्रह्मप्राप्तिरिव श्रीभगवत्प्राप्तिर्जातेत्याह—तमिति । तमेवेत्येव पदेन ब्रह्मप्राप्तिव्यावृत्तिः तर्हि, कमित्याकाङ्क्षायामाह–परमात्मानमिति । परा च मासौ परमा महालक्ष्मीरित्यर्थः । सा श्रीराधैव तस्या आत्मानं परमप्रेष्ठं यद्वा, परमा आत्मा यस्येति प्रथमे पक्षे राज्ञः पुरुष इतिवत्तस्याः प्राधान्यमपि साधितं ननु, तासामुपपत्तिभावाक्रान्तमानसत्वेन “ये यथा मां प्रपद्यन्ते” इत्यादिन्यायेन विरोधात्कथं प्राप्तिरित्यत आह–जारबुद्ध्यापीति । अपिरत्र जारबुद्धे हेयत्वं “जिघांसयापि हरये” इति जिघांसाया इव व्यनक्ति । तत एव च प्रकटार्थे परमात्मानमिति । नहि परमात्मा तादृशनिन्द्यशब्दवाच्यो भवतीति भावः ततश्च जारशब्देन रागौत्कण्ठ्यमेव तथाहि येन रागेण ता जारभावमयनिन्दालोकधर्म्ममर्य्यादातिक्रममपि कृतवत्यस्तादृशरागौत्सुक्येन सोपानीकृतया जारबुद्ध्या तमेवापुः उत्कटेन प्रियानुकूल्यभावेन तस्याः’ कबलितत्वादिति भावः । अत्र शुद्धभाववतीनां सङ्गे नेत्यूह्यं यथा श्रुतार्थस्वीकारे हि—

“आसामहो चरणरेणुजुषामहं स्याम् बृन्दावने किमपि गुल्मलतौषधीनाम् ॥
या दुस्त्यजं स्वजनमार्य्यपथं च हित्वाभेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्” ॥

इत्यादौ तत्प्रशंसा न सङ्गच्छेत् जारः पापपतिरिति त्रिकाण्डशेषात् तद्वतीनां तासामङ्घ्रिरेणुसेवनाभिलाषस्य तादृशसदाचारिवर्गपूज्यपादेषु महाभागवतेष्वसम्भवादिति भावः । यद्वा, जारबुद्ध्या गुणमयं देहमपि जहुरित्यन्वयः । अस्मिन्देहे सत्यसौ जारो भवति तदयं देहापि त्याज्य इति जारबुद्धिस्तत्त्यागे कारणमिति भावः । ततश्च सङ्गतो अपीत्याह—सङ्गतिश्चेयं निभृतनिकुञ्ज एवेति स्वरसः तत्र कान्तभाववतीनां विशेषं वक्ष्यामः । ननु, कथं विरजोत्तरणमन्तरेण गुणमयदेहद्वयत्यागस्तथा सति “अथासौ पुण्यपापे धुनुते” इति श्रुतिगतानन्तर्य्यार्थाथशब्दविरोधः स्यादित्यत आह, सद्यः प्रक्षीणबन्धनाः अहिकञ्चुकवत् त्यक्तप्राकृतदेहाः परिशेषेण लब्धसच्चिदानन्दशोभारूपशरीरा इत्यर्थः । शारीरिकशास्त्रे हि विरजोत्तरणात्प्रागपि पुण्यपापविधूननस्य स्थापितत्वात् “यथा पुष्करपलाशमापो न स्पृशन्ति एवमेवं विदि पापं कर्म नाश्लिष्यति” इत्यादिश्रुतेः अत्र च गुरुपुत्रमिहानीतमितिवद्भगवतैव तासां प्रेमवर्द्धनाय तादृशजनेषु तद्यशःस्थापनाय प्रत्यायितयोः पुण्यपापत्वेनोपचरितयोर्मङ्गलाशुभयोः प्रक्षीणत्वं श्रीभगवद्भक्तिप्रभावादेवेति साधु व्याख्यातम् ॥ ११ ॥ ननु गुणमयं देहं जहुरिति वदतस्तत्र भवतः कोऽभिप्रायः किं गुणशब्देन सत्त्वादिगुणविकार इति किम्वा गौणं देहं जहुरिति स्वरूपे मलडिति आद्ये हेयस्य देहस्य स्वतस्तन्मयप्राप्तेः किन्तर्न्निर्देशेन यदि च पूर्वेण गुणशब्देन मानससाद्गुण्यपरम्परा उत्तरेण तु प्राचुर्य्यं तत्रेदं पृच्छामः यदि च प्राप्तरासानामन्यासां निस्त्रैगुण्यदेहतासूचनार्थमासामेव वा प्राप्तव्यदेहस्य तत्सूचनार्थमत्र गुणमयमिति विशिष्यते तदापि तादृशदेहस्योपलक्षणत्वेन मानगुणप्रवाहस्यापि तादृशीत्वेन लब्धिः स्यात्तत्रापि पृच्छाम इत्याह—कृष्णं विदुरिति । यदि च मायया कलिततादृक्स्त्रीशीलनेनानुसूयुभिरित्युज्ज्वलोक्तानुसारेण श्रीसीतासच्छायादिवद्गुणमयं प्राकृतं छायामयमेव जहुः पतिं मन्येष्वर्प्पयामासुरिति तदा शान्तमेव पापमित्यभिप्रायेण प्रश्नः तत्र परीक्षिदुवाचेति पाठे परि सर्वत ईक्षते इति परीक्षिते विचारनिपुण इत्यर्थः । राजोवाचेति च तत्तद्भावज्ञतयातिविचक्षण इति ततश्च सामाजिकानां समाधानायैव प्रश्न इत्यभिप्रायः । कृष्णमिति हे मुने ! तत्रायमर्थः हे मुने ! मननशील ! कृष्णं नराकृति-

मानन्दविग्रहं परं केवलं कान्तं कानां स्वसुखानामन्तः पर्य्याप्तिर्यस्मिन्निति परमप्रेमास्पदं विदुः न तु प्राकृतगुणत्यागकारणब्रह्मतया निर्गुणतदाविर्भावविशेषतयेत्यर्थः । तथा सति गुणप्रवाहोपरमः कथमासां जातः ? अथवा गुणधियां ब्रह्मनिष्ठाया अपि त्याजकत्वेन प्रसिद्धेषु तादृशगुणेषु धीरन्तःकरणं यासां तासां ततो देहस्य तासामसिद्धत्वाद्भवतु नामोपरमः कथमविच्छिद्रुस्तादृशगुणपरम्परया उपरमः स्यादित्यर्थः । ततश्च ब्रह्मोपासकेष्विव न तत्स्वरूपमात्राविर्भावः ततो ब्रह्मोपासकेषु ये गुणास्ते प्राकृतसत्त्वमया एव न ह्याविर्भूतभगवद्गुणानां तद्विधानामिति वाक्यार्थः अत्रोपरमशब्देन सङ्कोच उच्यते ततश्च गुणप्रवाहमयदेहावेशसङ्कोचेन सिद्धदेहावेशेन ययुः अत एव योगमाययान्तर्धापितमुक्तं टिप्पण्याम् एवं च गुणमयदेहभिमानत्यागमात्रमेव विवक्षितं ततश्च तादृशतीव्रतापेन धुतं तत्तापजनितश्रीकृष्णकृपया खण्डितम् अशुभं विरहरूपं यासां ताः तथा तादृशनिवृत्त्याऽक्षीणं क्षीणताविरुद्धं पुष्टं मङ्गलं तत्संयोगरूपं यासां ताः गुणमयं विरहभावमयं तदावेशं जहुरित्यर्थः । अतः सद्यः प्रक्षीणबन्धनं तत्सङ्गविरोधो यासामित्यर्थः । अत्र श्रीतृतीयस्कन्धविंशाध्याय उदाहरणं तथा सति लोकापवादादिदोषोपि परास्तः कथमिति प्रश्नकाकुः ततश्च गौणदेहाभिमानत्यागपूर्वकमुख्यपरिकरदेहोपलम्भेन सङ्गता इति राद्धान्तः वक्ष्यते च स्वयं भगवतोद्धवं प्रति दशमे—

या मया क्रीडिता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः । अलब्धरासाः कल्याण्यो मापुर्मद्वीर्य्यचिन्तया" ॥ इति

अत्र कल्याण्य इति देहत्यागव्यावृत्तिः एषैव मुक्तिरित्यपि ज्ञेयं "विष्णोः परिकरत्वं हि मोक्षमाहुर्मनीषिणः" इति पाद्मात् न च पुरुषाभिमानवतां मुनिवराणां कथं गोपीदेहप्राप्तिः कथं वा तादृशत्वेन परिकरत्वप्राप्तिरिति शङ्कनीयं अन्यथाप्रतीतस्य पुरुषत्वादेः त्यागेन शुद्धप्रेमसुखास्वादनयोग्यसखीदेहोपलब्धेरेव तत्त्वात् "मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिः" इति द्वितीयोक्तेः स्वरूपत्वमस्य "द्वासुपर्णौ सयुजौ सखायौ" इत्यादिश्रुतेः पुरञ्जनोपाख्यानुष्वानुसन्धेयं तथा चादिपुराणे—

"यदाहमेव पुरुषः सर्वा प्रकृतयस्तदा । अयं पुमानियं योषिन्मायया कल्पितो भ्रमः" ॥

जीवानां प्रकृतित्वं श्रीभगद्गीतासु—

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्य्यते जगत्" ॥ इति

परां प्रकृतिमित्युक्त्या नित्यत्वं प्राकृतत्वं चाभिप्रेत्यमित्यलं प्रसक्तानुप्रसक्त्या विवृतमिदं भक्तिमञ्जूषायाम् एवं प्रश्नभङ्ग्या सिद्धान्त एवोद्धृतः बहिर्मुखसन्देहनिरासाय ब्रह्मज्ञानवादमये प्रसिद्धार्थे प्रश्नस्तु स्फुट एव ॥ १२ ॥

श्रीरामनारायणकृता भावभावविभाविका

अत्र व्याख्यातपक्षचतुष्टयेपि प्रथमे प्रतिबद्धगुणमयदेहत्यागः द्वितीये गुणमयदेहापवादः तृतीये गुणभूतगौणपतिरूपजारबुद्धित्यागः चतुर्थे गुणमयदेहानां व्रजे स्थापनं तत्र राज्ञोऽतिदक्षतया सर्वसामाजिकाभिमताभिज्ञत्वसम्भवात् केषाञ्चिन्मनः—शङ्कामाकल्य्य राजा पृच्छति, राजोवाच कृष्णमिति । ता गोप्यः कृष्णं कान्तमेव परं केवलं विदुः न तु ब्रह्मतया अत्र मुने इति सम्बोधनेन शास्त्रश्रवणादवगत्य मननशीलानां निदिध्यासनात्मकमौनव्रतवतां ब्रह्मबोधेन गुणप्रवाहोपरमो भवति नतु ब्रह्मबुद्ध्यभावे "तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय" इतिश्रुतेरिति विद्वन् तासां गुणधियां लौकिकगुणेष्वेव रमणत्वकान्तत्वादिषु धीर्यासां तासां गुणप्रवाहोपरमः गुणमयदेहत्यागो गुणमयदेहापवादो वा कथम् यद्वा, परं कान्तं जारमेव विदुः तथा च गुणधियां गुणभूतपतिबुद्धानां गुणप्रवाहोपरमः गुणपतित्वरूपजारबुद्धिप्रवाहोपरमः कथम् यद्वा, कृष्णं नित्यानन्द परं सर्वोपाधिशून्यमसङ्गं कान्तं कानां सर्वेषां सार्वभौमादिहिरण्यगर्भपर्यन्तशतशतगुणत्वेन परिसङ्ख्यातानां सुखानाम् अन्तःपर्यवसानं यस्मिन् तथाभूतमपि ब्रह्मतया न तु विदुः तथा च ब्रह्मबुद्ध्यभावादेव गुणधियां प्राकृतगुणात्मकविग्रहमतीनां तथा पूर्वोक्तगुणप्रवाहोपरमः कथम् ? यद्वा, ताः कृष्णं नित्यानन्दं परमसङ्गं कान्तं सुखावधिं ब्रह्मतयैव विदुः लीलाधाम्नि मायाप्रवेशाभावेन कस्या अप्यज्ञानासम्भवात् किमु वाच्यं तासां नित्यसिद्धानां श्रुतिमुनिरूपाणां वा तथाच नतु गुणधिययां तासां पूर्वं "जहु गुणमयं देहम्" इत्यत्रोक्तो गुणप्रवाहोपरमः कथम् ? सति गुणप्रवाहे तदुपरमो भाव्यः गुणबुद्ध्यभाववतां लीलाधामगतानां गुणप्रवाहस्यैवासम्भवात् कथं तदुपरम इत्यभिप्रायः ॥ १२ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथ जन्मान्तरेषु मोक्षाभिकाङ्क्षया कृतया गोपीजनवल्लभोपासनया लब्धगोपीभावानामवस्थामाह—अन्तरिति । कश्चिद्गोप्यो मोक्षप्रदभगवत्सङ्कल्पानुसारेण पतिभिर्द्वाराणां मुद्रितत्वात् अन्तर्गृहगताः अलब्धविनिर्गमाः कृष्णं दध्युः मरणदशोपस्थितौ तमेव प्रेष्ठं दध्युः यतः यस्य सर्वदा भावना भवति तदेवान्तकाले ध्यानपथमारोहति ताश्च सर्वदा कृष्णभावनायुक्ता आसन्नित्याशयेनाह—तद्भावनायुक्ताः नेत्रद्वाराऽन्यत्र चित्तवृत्तिगमनभयान्मीलितानि लोचनानि यासां ताः ध्यानावेशेन मुद्रितनेत्रा इति वा । यद्वा, मीलितानि लोचनानि इतरज्ञानानि यासां ताः । केचित्तु काश्चित्तु नित्यसिद्धादिगोपीसङ्गभाग्याभावादऽलब्धप्रेमत्वाद-

दग्धकषायामूढगोपोपमुक्ता अपत्यवत्यो बभूवुस्ताः खलु तदनन्तरमेव नित्यसिद्धादिगोपीसङ्गभूकृष्णसङ्गस्पृहादेका तासां कृपापात्रीभवत्योऽपि कृष्णाङ्गसङ्गा योग्यदेहत्वेन योगमायया सहायकारणोत्पत्तिभिर्वारिताः कृष्णमभिसर्तुमक्षमाः महाविपद्ग्रस्ताः पतिभ्रातृपुत्रादीन्स्वप्राणचौरत्वेन पश्यन्त्यो मरणदशायामुपस्थितायां सत्यां यथाऽन्ये मात्रादिस्वबन्धुजनान् स्मरन्ति तथैव स्वप्राणैकबन्धुं कृष्णं सस्मरुः इति वर्णयति, निवृत्तिपक्षे स एव रसानां रसतमः परमः पराद्ध्योष्टमोयमुद्गीथ इत्याद्याः उद्गीयादिरुपान्तगृहगता अपि काश्चिद्गोपस्य भगवतः सम्बन्धिन्यः अलब्धोऽवशेषेण निर्गमः प्रतिपादनं याभिस्ताः तस्य परमात्मनो भावनायामुपासनायां युक्ता नियुक्ताः कृष्ण दध्युः परमात्मध्यानं विदध्युः यतो विचारेण मुद्रितया श्रुतार्थप्रकाशस्तथाचोद्गीथादिस्तुतिप्रतापा निरुद्धा अपि तत्र न तस्थुरित्यर्थः । वृत्तयोपि काश्चिदत्यन्तप्रियवस्तुरूपगुहान्तर्गताः अलब्धविनिर्गमा अपि तत्र कृष्णाभावनायुक्ताः कृष्णं दध्युमुद्रितविषयिकप्रकाशाः ॥ ९ ॥ तथा च वर्तमानकालीनविरहध्यानाभ्यां पूर्वोपासनया लब्धाभ्यां स्वाभिसन्धितत्फलं प्रापुरित्याह—दुःसहेति । दुःसहो यः प्रेष्ठविरहो महानग्निस्तेन यस्तापः कोटिब्रह्मकल्पेषु कुम्भीपाकादिनरकेषु यावद्दुःखं भवेत् ततोऽप्यधिकं भगवद्विरहक्षणमात्रेण जातं दुःखं तेन धुतानि निर्द्धूतानि भस्मसात्कृतानि अशुभानि यासां तथा च सर्वपापफलभोगसमाप्तिः पुण्यक्षयप्रकारमाह–ध्यानेन प्राप्तोऽच्युतस्य सदैकरसस्य परमात्मनः आश्लेषः सम्यगालिङ्गनन्तदादीं न जारत्वेनाऽऽश्लेषः किन्तु परमात्मात्वेनेति बोधयितुम् अच्युतपदं तेन या निर्वृतिः सुखं कोटिब्रह्मकल्पेषु स्वर्गादौ यावत्सुखं भवेत्ततोऽप्यधिकं भगवत्सन्नप्रेष्ठविरहेण यस्तीव्रस्तापस्तेन धुतानि कम्पितीकृतानि अशुभानि याभिस्तासां प्रियविरहतापस्यातितीव्रतां वीक्ष्य कोटिब्रह्माण्डस्थवाडवानलमहाकालकूटादिरूपाणि परःसहस्राण्यपि अशुभानि स्वतीव्रताऽहङ्कारं परित्यज्य पराजये बुद्ध्या च कम्पिता इत्यर्थः । ध्यानेन प्राप्तः आगतो योऽच्युतस्तेन तदैवोद्भूतस्य प्रेमपूर्णचिन्मयस्य तादृशस्वभावादिमतो देहस्य य आश्लेषस्तेन या निर्वृतिस्तया क्षीणानि कृषीकृतानि मङ्गलानि सुकृतानि यासां ताः यासां स्फूर्तिप्राप्तप्रेष्ठाऽश्लेषस्य सुखं वीक्ष्य कोटिब्रह्माण्डगतविषयसुखनिर्विषयब्रह्मानुभवानन्दस्य क्षीणत्ववर्णनं "यं लब्ध्वाचापरं लाभं मन्यतेनाऽधिकं ततः" इत्यादि शास्त्रज्ञानविजृम्भितं निवृत्तिपक्षे दुःसहो यः प्रेष्ठस्य परमात्मनो विरहः अत्र परमात्मोपासनानस्तीति केनचिन्निरूप्यमाणस्तेन जातो यस्तीव्रतापस्तेन धुतानि अशुभानि याभिस्ताः तथा ध्यानेन परमात्मोपास्तायोऽच्यताश्लेषस्तेन केनचिद्विदुषा वर्णितेन या निर्वृतिस्तया हेतुभूतया क्षीणानि क्रोडीकारितानि मङ्गलानि याभिस्ताः । यद्वा, अक्षीणानि न नाशितानि वर्द्धितानि वा मङ्गलानि याभिस्ताः निर्वृतिपक्षे स्पष्टोर्थः॥१०॥ यत एवमतः सद्यः प्रक्षीणबन्धनाः तत्क्षण एव प्रकर्षण क्षीणं प्रारब्धकर्मकृतं बन्धनं यासां तास्तथाभूताः सत्यः गुणमयं देहं जहुः त्रिगुणमयं "स्थूलसूक्ष्मकारणाख्यशरीरत्रयं जहुः विमुक्ता इत्यर्थः । ननु, प्रत्यगभिन्नब्रह्मसाक्षात्कारभावात्कथं तासां मुक्तिरित्यपेक्षायामाह—जारबुद्ध्येति । यद्यपि तासां भगवति जारबुद्धिरासीत्तथापि वस्तुमाहात्म्याद्भगवत्प्रसादो जातः न हि वस्तुशक्तिर्बुद्धिमपेक्षते अन्यथा बुद्ध्यापि पीतममृतं यथा तज्जनितभगवत्प्रसादेन तमेव प्रत्यगभिन्नपरमात्मानं सङ्गताः तत्प्रसादलब्धसाक्षात्कारेण तदभिन्नतां प्राप्ता इत्यर्थः । अपिशब्दस्तद्बुद्धिनित्याभिव्यञ्जनद्वारा वस्तुमहिम्ना तदतिप्राशस्त्यमभिव्यनक्ति । यद्वा, प्रथमं जारबुद्ध्यापि भगवता सङ्गताः यश्चाद्विरहदशायां ध्यानादिना भगवत्स्वरूपं ज्ञात्वा ततः प्रक्षीणबन्धनास्सत्यो विमुक्ता इत्यर्थः । तथा च सर्वमपि निकृष्टमुत्कृष्टसम्बंधादुत्कृष्टं भवति यथा भगवत्सन्बन्धाद्गोपाः ब्रह्मादीनामपि दर्शनीयतां प्राप्ताः तत्कृतं चौर्यं कर्म स्मरणादिना ह्यनेकाऽशुभनाशकरं तद्धस्तसम्बन्धाद्गोवर्द्धनस्येन्द्रादेरप्युत्कर्षः । शान्तिरसादतिनिकृष्टस्य शृङ्गाररसस्य तत्राप्यौपपत्यसम्बन्धिसर्वपरमहंसशिरोमणिशुकमुखेन गायमानत्वेनेति भावः । निवृत्तिपक्षे तमेव "रसो वै स रस ह्येवायं लब्ध्वाऽऽनन्दी भवति" इत्यादि श्रुतिप्रतिपादितं परमरसरूपं जारबुद्ध्या तत्तच्प्रतिपत्तौ योपासनाबुद्धिस्तद्विधायकतयापि सङ्गतास्तस्मिन्सङ्गतिमत्यः अत एव सद्यो विचारक्षणे एव प्रक्षीणं बन्धनं श्रप्यमाणार्थबन्धनकारणं यासां ता गुणमयं उद्गीयादिगुणस्तुतिमयं देहं तत्परत्वं जहुः व्रतपक्षे जारबुद्ध्या ये सङ्गताः गुणमयं देहं यदा जहुस्तदा किमु वक्तव्यं प्रेष्ठबुद्ध्या सङ्गताऽविवेक्यन्तःकरणवृत्तय इति योज्यम् ॥ ११ ॥ ननु "तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्थाविद्यतेऽयनाय" "यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति" ऋते ज्ञानान्नमोक्षः" इत्यादिश्रुत्या ज्ञानस्यैव मोक्षसाधनत्वाभिधानं तच्च ज्ञानम् "अहं ब्रह्मास्मि" इत्यादिरूपं स्यात् तमात्मानमात्मतया विगुञ्जागैरिकशिखिपिच्छादेर्ब्रह्मादिभिरुपमानत्वसारस्यादेः "परमाश्रये क्षणीयत्वं चक्षते" इत्युक्तत्वात् "तत्त्वमसि, अहं ब्रह्मास्मि" इत्यादिश्रुतेश्च तत्साधनं च भक्तियोगः—

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" ॥

"यमेष वृणुते तेन लभ्यः"

"मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् । कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
भक्त्या मामभिजानन्ति यावान्यश्चास्मि तत्त्वतः" ।

"पुरेह भूमन्! बहवोपि योगिनस्त्वदर्प्पितेहानिजकर्मलब्धये ।
विबुध्य भक्त्यैवं कथोपनीतया प्रपेदिरेऽञ्जाच्युत! ते गतिं पराम्" ॥

इत्यादिशास्त्रं तथा च कृष्णे ब्रह्मबुद्धया भाववतीनां जारबुद्धया कथं मोक्षः न हि पतिपुत्रादीनां वस्तुतो ब्रह्मभूतानामपि कृष्णमिति भजनेन मोक्षो भवतीति शङ्कानिवृत्त्यर्थं राजा पृच्छति–कृष्णं परं केवलं कान्तं कमनीयं पतिं वा जारं वा विदुः। यद्वा, परं परपुरुषं कान्तं स्वरमणं विदुः न तु ब्रह्मरूपं विदुः अतो गुणधियां गुणकार्यविषयाक्रान्तबुद्धीनां गुणप्रवाहस्य संसारस्योपरमो मोक्षः कथं मुनिभावेन तन्निर्णयं कर्तुं समर्थोऽसीति सूचयन्सम्बोधयति–हे मुने ! विषयबुद्धयापि मोक्षसिद्धौ श्रवणमननादेर्वैयर्थ्यं स्यादिति वा सम्बोधनाशयः निवृत्तिपक्षे कृष्णं सदानन्दरूपं परं कान्तं परमरसं ब्रह्मतया गुणबुद्ध्या न विदुः नावेदयन्ति अतो गुणमात्रधियां तासां श्रुतीनाम् उद्गीयादिगुणवर्णने यो प्रवाहस्तस्योपरमः कथं तृतीयोऽपि याः कृष्णं ब्रह्मतया न विदुस्तासां गुणप्रवाहोपरमः कथं न हि ब्रह्माकारतां विना गुणप्रवाहोपरमो भवतीति भावः ।। १२ ।।

रास–रहस्यम्

र० टी०—काश्चित् गोप्यः वृत्तयः अन्तर्गृहगता अन्तर्गृहे हृदयगुहायां याः निविष्टाः, अलब्धविनिर्गमाः न लब्धो विशेषो निर्गमो बहिर्विषयेषु गमनं याभिस्ताः मीलितलोचना मीलिते लोचने याभिस्ताः, कृष्णमात्मानं तद्भावना युक्ता आत्मभावनायुक्ताः सत्यः दध्युः ध्यातवत्यः ।। ९ ।। दुःसहः दुःखेनापि सोढुमशक्यो यः प्रेष्ठस्य प्रियतमस्य आत्मनः “तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादान्तरतरं यदयमात्मा।” बृ० १।४।९।। इति श्रुतेः, विरहरूपोऽग्निस्तस्य यस्तीव्रतापः भवमरुद्भवविषयवासनाजन्यदुःखानि तानि धूतानि विनष्टानि, अशुभानि पुण्यपापानि यासां ताः, तथा ध्यानेन प्राप्तो यः अच्युताश्लेषः ब्रह्मात्मभावस्तेन प्राप्ता या निर्वृति आनन्दस्तया क्षीणमंगलाः क्षीणानि अपगतान्नियमंगलानि पुण्यात्मकानि बन्धनानि यासां ताः “तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्।” ब्र० सू० ४।१।१३।। इति सूत्रात्। तस्य सुहृदः साधुकृत्यं द्विषन्तः पाप कृत्यम्।” इति श्रुतेश्च ।। १० ।। तमेव परमात्मानमेव जारबुद्ध्यापि सगुणात्मकजड्ध्यानेन बुद्धिं जरयतीति जारः रमणः, सगुणमेव परमरमणीयमिति भेदबुद्ध्यापि, परमप्रेमास्पदत्वेन संगताः सम्यग्रूपेण तत्स्वरूपतां प्राप्ताश्चेत् ता अपि कालान्तरेण ब्रह्मलोकोचितभोगानन्तरं तत्रैव तेन ब्रह्मणोपदिष्टाः सत्यः, प्रक्षीणबन्धनाः प्रकर्षेण क्षीणं प्रारब्धभोगरूपं बन्धनं यासां ताः, “यो वेद निहितं गुहायां परमव्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति।” “तं यथायथोपासते तदेव भवति” इति श्रुतेश्च, सद्य इति कथनेन पुनः शरीरग्रहणाभावो लक्ष्यते, गुणमयं देहं त्रिगुणात्मकं स्थूलशरीरं जहुः तत्यजुः इत्यर्थः ।। ११ ।। कृष्णं नित्यानन्दस्वरूपं, परं सर्वोपाधिशून्यमसंगमात्मानं, कान्तं कानां सर्वेषां सार्वभौमहिरण्यगर्भपर्यन्तानां शतशतगुणत्वेन परिसंख्यतानां सुखानामन्तः पर्यवसानं यस्मिन्स्तथाभूतमपि आत्मानमसंगत्वेन परोक्षतया जानताऽपि यावत् “अहं ब्रह्मास्मी”ति रूपेण न ज्ञातः तावत् गुणप्रवाहोपरमो न सम्भवति। ताः वृत्तयः, तं ब्रह्मतया न तु विदुः ज्ञातवत्यः, एवं प्राकृतगुणात्मकविग्रहमतीनां वृत्तीनां गुणप्रवाहोपरमो मोक्षः कथमिति ? ।। १२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णं दध्युर्ध्यातवत्यः ।। ९ ।। मुख्यपतिबुद्ध्या सङ्गतानाम् “यत्पत्यपत्यसुहृदाम्” इत्यादिषु कृष्णतत्त्वज्ञतया निर्दिश्यमानानां गोपीनां कृतार्थतायां कः संशय इति सूचयन् जारबुद्ध्याऽपि भगवन्तं सङ्गतानां कासाञ्चित् इत्थं ध्यानपराणां पुण्यापुण्यरूपप्रारब्धकर्मक्षयपूर्वकं भगवत्प्राप्तिलक्षणं मोक्षमाह–दुःसहेति द्वाभ्याम्। दुःखेनापि सोढुमशक्यो यः प्रेष्ठस्य प्रियतमस्य श्रीकृष्णस्य विरहो वियोगस्तेन यस्तीव्रो दारुणस्तापस्तेन धुतान्यशुभानि प्रारब्धापुण्यकर्माणि यासां ताः तथा ध्यानेन प्राप्तो योऽच्युतस्तस्य आश्लेषेण या निर्वृतिः सुखसम्पत्तिस्तया क्षीणानि मङ्गलानि प्रारब्धपुण्यकर्माणि यासां ताः ।। १० ।। तमेव प्रतिप्रकरणमनुवर्णितनिरतिशयस्वरूपगुणशक्तिं परमात्मानं बाल्यात् जारबुद्ध्याऽप्युपपतिबुद्ध्यापि सङ्गताः सत्यः सद्य एव प्रक्षीणानि बन्धनानि संसारबन्धनिमित्तानि शुभाशुभानि कर्माणि यासां ताः गुणमयं देहं जहुस्तत्यजुः त्रिगुणप्रपञ्चातीतमप्राकृतशरीरं श्रीकृष्णं प्राप्ता इत्यर्थः ।। ११ ।। श्रीशुकानुग्रहात् ज्ञाततत्त्वोऽपि लौकिकजनभ्रान्तिनिराकरणार्थं श्रीविष्णुरातः पृच्छति–कृष्णमिति। “को ब्रह्मणि समीरात्ममयमदक्षेषु भास्करे। कामग्रन्थौ चक्रिणि च” इति मेदीनिकारकोशात् कस्य कामग्रन्थेरन्तः परिहारो यस्मात्तं केवलं कान्तं रतिकोविदमेव विदुः नतु ब्रह्मतया मुमुक्षुजिज्ञास्यत्वेनेत्यर्थः। अतः गुणधियां गुणेषु विषयेषु धियो यासां तासां गुणप्रवाहोपरमः कथम् “ब्रह्मविदाप्नोति परं, तमेव विदित्वाऽतिमृत्युमेति” इति श्रुतिविरोधात् एवम्विधा अपि काश्चन तासु बभूवुः तद्विषयकोयं राजप्रश्नः बह्वयस्तु श्रीकृष्णस्वरूपगुणादियथार्थज्ञानयुक्ताः बभूवुः तासां तादृशज्ञानयुक्तताऽस्मिन्नेवाध्याये वक्ष्यते ।। १२ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

काश्चिदन्तर्गेहगता गोप्यो द्वारि प्रतिबद्धेऽलब्धोऽप्राप्तो बहिर्निर्गमो निःसरणं याभिस्तास्तद्भावनायुक्ता अनुभवसंस्कारोपेता मीलितलोचना नश्यत्स्वपत्याद्यनिरीक्षणं सूच्यते। तेन दध्युर्ध्यातवत्यः ।। ९ ।। श्लोकद्विकमेकान्वयि। तमेव परमात्मानमिति श्लोके कामिन्यः काममात्रेण प्रक्षीणबन्धनाः सत्यः सद्यो गुणमयं देहं जहुरिति मुक्तिरुच्यत इति भ्रमं प्रमाणतस्तत्तात्पर्यार्थं

दर्शयन्भ्रंशयति ॥ कृष्णकामा इति । कृष्णकामा गोप्यस्तदा त्यक्त्वा देहं दिवं स्वर्गं गता न तु मुक्ता आसन्नित्यर्थः । सम्यग्विष्णुं परं ब्रह्म सर्वोत्तमं ज्ञात्वा कालात्कञ्चित्कालमतिगमय्य परं हरिं ययुः । तर्हि न ताः पूर्वं ज्ञानवत्य इत्यत आह ॥ पूर्वं चेति । पूर्वमपि ता ज्ञानयुक्ता एव । तत्र कृष्णकामतावस्थायां च प्रायशो बाहुल्येन तथा ज्ञानिन्यः । निगमयति ॥ अत इति । अत एतद्धेतोस्तासां परब्रह्मगतिरासीत् । ननु कामाद्द्रोष्य इत्यादेर्न देवगतिस्तासां कुत इत्यत आह ॥ नेति । ज्ञानमृते । ज्ञानसूर्यमृते इत्याद्युदाहृत्य द्वितीयोपपत्तिः प्राक् टीकिताऽनुसन्धेया । विना न मोक्षः स्मृतिरपि स्वमूलं लपति हि यस्मान्नान्यः पन्थेति श्रुतिरस्ति तत इति । पन्थेति नलोपः प्रातिपदिकान्तस्येति वत्प्रातिपदिकनिर्देश इति ज्ञेयं । सदा तासु हरौ भक्तिस्तज्ज्ञानं चास्ति यतोऽतः कालयुक्ता अपि विमुक्तिगा अतो मोक्षेऽपि तद्गमनानन्तरमप्येतासां यः कामः स भक्त्यानुवर्तत एव । पुरस्तादुक्तमेतत्त इति श्लोके द्वेषस्य मुक्तिहेतुतोच्यत इति प्रतीयते । तस्यापि गतिं मानेनाह । अतादृक्त्वेन भक्तिराहित्यान्न गोपीसादृश्यमित्यतादृक्त्वेन । अतोदकत्वेनेति पाठे कामो मुक्तावन्यथाजनकत्वेनानुवर्तत इत्यन्वयः । सदा द्वेषिणां जयादिभिन्नानामसुराणां यत्र मुक्त्युक्तिस्तत्र मुक्तिशब्देन तमं एवोच्यत इत्याह ॥ अधरन्तम इति । मुक्तिशब्देनोदितं चैद्यप्रभृतौ द्वेषभागिनः सकाशात्पृथग्विद्यमानो जयादिः स विष्णुप्रसादस्तं प्राप्यं मुक्तिमगात् न तु द्वेषभागीत्यर्थः । चैद्यशब्दो जीवद्वयवाचीति चैद्यशब्देन यदा सन्वाच्यस्तदाऽऽनन्दाविर्भावादिकं यदा स्वसंस्तदा तमः सिद्धिशब्देन ग्राह्यमिति विवेकः । ननु त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामक्रोधस्तथा लोभ इति गीतायां कामस्याशुभफलनरकद्वारतोक्तेः कथं तन्मुक्त्यवस्थानोक्तिरित्यत आह ॥ कामस्त्विवति । तुशब्दो गीतागीतकामादेतत्कामव्यावृत्त्यर्थः । अशुभकृच्चाच्छुभकृच्चेति भेदवान्विष्णोः प्रसादकृच्च शुभकृत्स च गोपिकासु विद्यमानया श्रीहरिभक्त्या । तर्हि विषसम्पृक्तभक्तवत्कथं दुरसुरसहवासिनो दासानपि जयादीन्दयोददीधरद्धरिरित्यत आह ॥ द्वेषिजीवयुतमिति । विष्णुः काल आयाते विमोचयेद्द्वेषिजीवयुक्तं भक्तम् । एतेन भक्तिमत्वान्मोचयेदित्युक्तिरतो देवोऽतिकरुणः कृपायुततम इदमहो आश्चर्यम् । ओदिति प्रगृह्यसंज्ञाप्रकृतिभावश्च न छान्दसतयेति ज्ञेयमिति केचित् । वस्तुतस्तु प्रकृतिभावस्यानित्यतया तत्सम्भवति । हिनत्वाद्धेयत्वाद्धः स न भवतीत्यहोऽयं सज्जीवसङ्गो त्याज्य इति करण इति वा । नित्यं हीन इति काठककाष्योक्तेस्तत्र हरिपरत्वात्पूरितं योग्यतया सर्वदोषैरिति हशब्दहीनार्थकत्वमक्षुण्णम् । अहपदमधिकारिविशेषणमतो विकरण इति सुललितम् । तत्कथङ्कारं कारुण्यं ज्ञातमित्यत आह ॥ शिशुपालस्य तदादेर्मोक्षणान्मोचनादिति । अहो हन्तीति हो नाशयत्येनं दुःसहवासिनं स नेत्यहो नृसिं हन्ता नृसिंहोऽसावित्यादेरिति वा । जारबुद्ध्याऽपीत्यत्रत्योऽपिशब्दो न समुच्चायकः । समुच्चेयबुद्धेरन्यस्यास्तास्वसत्त्वादित्यतः सत्यं तथाऽपि स न निरर्थः किन्तु सम्भावितत्वगर्हितत्वार्थवान्व्यस्थयेति तत्रापि कुत्र किमर्थ इत्यतो गृहान्तर्वर्ति गोपिकासु सम्भावितत्वं जारबुद्धेरप्सरस्सु द्वितीयमितरापेक्षयेति मानानेनेन दिदर्शयिपुरादावानन्दतीर्थमुनिः स्वयं हेतुं सूचयन्गर्हितत्वमपिशब्दार्थमप्सरः स्त्रीव्यतिरिक्ते दर्शयति । तथाऽपि जगत्प्रपितामहे के जगत्प्रपितामहे जगतो जारबुद्धिर्न युक्ता । एतस्य तु पितामहत्वान्न जातु जारबुद्धिर्जगता कर्तव्या सा गर्हितेत्यर्थः । इदं प्रपितामह इति मानिकपतित्वपितृत्वश्वशुरत्वादेरुपलक्षकम् । जारबुद्धिर्न युक्तेति यद्यपि न समुच्चयाऽर्थोऽपिशब्दः । तथाऽपि न व्यर्थः किन्तु सम्भाविता गर्हिता चेत्यर्थः । तत्तदुपध्युपासकानां जारबुद्धिर्गर्हिता । करिष्यत्याचार्योऽधिकारिविवरणम् । तत्रैव विवरिष्याम इति केचित् । गर्हितत्वमात्रमर्थः इत्यर्हिताः । न युक्तेत्येव श्रीमदुक्तेः । महे तेजः परस्यां देवतायां तेजोऽभिधां तु श्रियमिति भाष्यानुव्याख्यानोक्तेर्महसा च महर्विदुरिति द्विरूपकोशोक्तेर्महःशब्दस्य तेजोऽर्थे उत्तमार्थे च पूज्यार्थे च प्रयुज्यते । महच्छब्दो महो मान्यशब्दस्तथैव चेति शब्दनिर्णय इति चतुर्थतात्पर्योक्तेर्महःशब्दस्य तेजोऽर्थः । ततश्च महे तेजसि रमाविषयेऽजारबुद्ध्या जार उपपतिः स तद्भिन्न इति पतिः सबुद्ध्योपास्तिर्महे उपासनोत्सवे आसन्ने जगत्प्रपिता । नियेनमुष्टिहत्ययेत्यादिवत्प्रशब्दः प्राग्योज्यः प्रजगता जगत्प्राणः समीरण इत्युक्तेर्वायुवाची जगच्छब्दः । मुख्यप्राणेन ब्रह्माऽप्यनेन ग्राह्यः । तृतीयायाः प्रथमानिर्देशो वा निर्विभक्तिकतया निर्देशो वा । विधिमुख्यप्राणाभ्यां पितेति । जगत्प्रकृष्टजङ्गम इति पतिः सतीनां तस्य पिता श्वशुर इत्युपास्तिर्देवयोषितां प्रजगतो देवास्तेषां पितामहे हरौ तत्त्वेनोपास्तिः कर्तव्येति यावत् जगत इतरस्य प्रपितामहे हराविति साक्षादसाक्षाद्वा पदोपरि केचित्केचिदानयन्त्यधिकारिणः ॥ ततश्चायं श्लोकद्विकार्थः ॥ काश्चन कामिन्यो गुणमयं गुणविकृतं देहं जहुस्तत्यजुः । तत्र पापं तथाऽनिष्टं पुण्यमप्यासामेवं बभूवुरित्याह ॥ दुःसहेति । प्रेष्ठस्य स्वेष्टस्य दुःसहः सोढुमशक्यो यो विरहो वियोगस्तज्जातो यस्तीव्रोऽत्युल्बणस्तापस्तेन धूतानि कम्पितानि विश्लिष्टानीति यावत् अशुभानि प्रारब्धेतराणि यासां ता ध्यानेन खण्डेनाखण्डेन च प्राप्तोऽन्तर्बिम्बरूप आविर्भूतो योऽच्युतस्तस्याश्लेष आलिङ्गनं तज्जनिता निर्वृतिः परमानन्दस्तया क्षीणं क्षयिष्णवनिष्टमङ्गलं याभिस्ताः । भोगेन हीतरे । उपमर्दं चेत्यादेः । अच्युतो दृढ आश्लेषस्तन्निवृत्त्याऽक्षीणमङ्गला इति पदमेकं वा ॥ १० ॥ तमेव परिष्वक्तं परमात्मानं परमत्यन्तं जारबुद्ध्यापि जार उपपतिरिति बुद्धिर्जारबुद्धिर्या चेतरगर्हिता तथाऽपि तया सङ्गताः क्वचिद्गृहान्तर्वर्त्यनिर्गताङ्गनासु सम्भावितयेत्यप्यर्थः । अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेष्विति स्मरणात् । सङ्गतास्तेन मिलिता गुणमयं देहं सद्यो जहुरनन्तरं सं किञ्चित्सारभूतं स्वर्गं गतास्तत्र स्थित्वा काल आयाते प्रक्षीणबन्धनाः सत्यस्तमेव सङ्गता सम्यग्ज्ञाततत्का गुणमयमाविर्भूतगुणात्मकं जहुः । ओहाङ्गतौ । प्रापुरित्यर्थोऽपि ज्ञेयः । पदव्यत्ययश्छान्दसः । सङ्गत इत्यनेनान्वयो वा । याः सङ्गता गुणमयं देहं जहुस्ताभिर्गुणमयं देहमपीत्यन्वयो वा । कायो देहः क्लीबपुंसोरित्यमरः । धुताशुभा इति

पूर्तौ यत्पुनः प्राह प्रक्षीणबन्धना इति तेनैव सूचयामासाव्यास इत्यवसेयम्। स्वबिम्बदर्शने सत्यपि सत्यः स्वर्गतः सत्यादिकं प्राप्य ब्रह्मणा सह काले मुच्यन्त इति सद्य इति प्रतिबन्धभावपरम्। प्रक्षीणबन्धना इति सलिङ्गभङ्गतामङ्गनानामाहेति तात्पर्यं ज्ञेयम् ॥११॥ कृष्णं विदुः परं कान्तमिति श्लोके न तु ब्रह्मतया मुन इति ब्रह्मतयाऽनवगतिस्तथाऽपि गतिः परासीदासामिति जानानोऽजानान इव तात्पर्यं परीक्षिदप्राक्षीदिति तत्तात्पर्यं किञ्चिदव्याहृत्य दर्शयति ॥ ब्रह्मतया न सम्यगिति। परं कान्तमित्यत्रत्यपरमित्यस्यार्थोऽत्यन्तं सम्यगिति न शेषक्लेश इति वा। अनेन सामान्यतो ब्रह्मज्ञानं तासामस्ति। सम्यङ्नासीदित्येव। ज्ञानसामान्याभावे नान्यः पन्था इति श्रुतज्ञानप्राप्यलोकः कथमासां स्यादिति भावः। तथात्वं तद्वचनादेवावसीयत इति तत्पठति॥ प्रेष्ठो भवांस्तनुभृतां सुहृदन्तरात्मा रमाया दत्तक्षणमित्यादिवचनादिति। ननु दुःसहप्रेष्ठविरहतीव्रतापधुताशुभा इत्यनुपदमुक्तेस्त्यक्त्वैतदाचार्याः किं दवीयः पदवीस्थश्लोकोदाहरणमचीचरन्निति चेन्न। अतद्वचनत्वात्। भवांस्तमिति साक्षादधोक्षजं सम्बोध्यैवोक्तेस्तद्वादाक्षोदात्। वचनादिति वचनेऽपि तद्वचनादिति भावोऽस्माकमिति ध्वनयामासुर्मध्वमुनय इति ज्ञेयम्॥ ततश्चायं श्लोकार्थः॥ अजानन्निव जनाधीशः पृच्छति॥ राजेति गोप्यः कृष्णं परं कान्तं कान्तात्कान्तं जारमिति यावत् हे मुने गोप्यो विदुर्न तु ब्रह्मतया परम्। सम्यक् परमित्यावर्तते। विदुरेवं गुणधियां गुणेषु विषयेषु धीर्यासां तासां गुणप्रवाहोपरमो गुणप्रवाहस्य संसारस्योपरमो निवृत्तिः कथं सम्भवेन्न कथमपि। निवृत्तमार्गलभ्यगुणप्रवाहोपरमस्य कथं प्रवृत्तप्रवर्तमानमानिनीलभ्यता तत्कथयेति परीक्षित्प्रश्नाशयः॥ १२॥

श्रीसुबोधिनी

गृहमध्यं गताः काश्चिद्गोप्यो न लब्धो निर्गमो याभिस्तास्तस्य भावनया युक्ता मीलितनेत्रा कृष्णं दध्युः॥ ९॥ दुःसहोऽसह्यः प्रेष्ठस्य श्रीकृष्णस्य विरहस्तेन तीव्रोऽत्युग्रस्तापस्तेन धुतानि गतानि अशुभानि पापानि यासां ता ध्यानेन प्राप्तस्याच्युताश्लेषेण कृष्ण संपर्केण निर्वृत्या सुखसंभोगादिजानंदेन क्षीणं मंगलं पुण्यबंधनं यासां ताः॥ १०॥ तं परमात्मानं जारबुद्ध्या संगताः प्राप्ताः सद्यः तत्क्षणमेव प्रक्षीणं नष्टं मंगलं यासां ता गुणमयं देहं तत्यजुर्मुक्तिमापुरिति भावः॥ ११॥ राजप्रश्नः। हे मुने कृष्णं परं केवलं कातं सुंदरं जारं वा विदुः न तु ब्रह्मत्वेन गुणेषु विषयेषु धीर्यासां तासां गुणप्रवाहोपरमः संसारनिवृत्तिः कथम्॥ १२॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अन्तर्गृहगता इत्यस्याभासे, **यासां काल** इत्यादि। नन्वासां भक्तत्वात्कालस्तथा कर्तुं न शक्नोतीति चेत्। अत्रेदमाकूतम्। 'उक्तं पुरस्ता'दित्यस्य द्वितीयव्याख्यानानन्तरं 'यासां साक्षा' दित्यादिनोक्तप्रयोजनार्थं प्रतिबन्धोवश्यं कार्यः। भगवांस्तु भक्तानां स्वप्राप्तिप्रतिबन्धं न साक्षात्करोतीति वस्तुस्थितिः। अतोधिकारी कालः प्रभुकार्यं कृतवानिति नानुपपत्तिः काचित्॥ ९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'कथंचिन्निरुद्धानां तु सद्य एव भगवत्सायुज्यं जातम्' इत्याह—अन्तरिति त्रिभिः। काश्चिद्गोप्यो गृहान्तर्गताः गृहमध्य एव स्थिताः, अतः पत्यादिभिर्द्वारपिधानादिना न लब्धो विशेषो भगवदभिसरणयोग्यो निर्गमो याभिस्ताः, दुःखेन मीलिते लोचने याभिस्ताः कृष्णं दध्युः। तत्र हेतुमाह—पूर्वत एव तद्भावनायुक्ता इति॥ ९॥ ततश्च जारबुद्ध्याऽपि तमेव सङ्गताः तस्मिन्नेव सायुज्यं प्राप्ता इत्यन्वयः। तत्सायुज्यस्य मुक्तिरूपत्वाद्दुर्लभत्वं सूचयन्नाह—परमात्मानमिति। अपि शब्दाद्यद्यपि जारबुद्धिः संसारहेतुरेव, तथापि भगवद्विषयकत्वान्मोक्षहेतुर्जातेति सूचितम्। ननु 'प्राकृतदेहसत्त्वे कथं मोक्षः?' तत्राह—जहुर्गुणमयं देहमिति। ननु 'प्रारब्धकर्मबन्धसत्त्वात् कथं देहत्याशङ्क्याह—सद्य इति। सद्य एव प्रकर्षेण सहवासतः क्षीणं बन्धनं यासां ताः। ननु "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि। अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्" इति शास्त्रसिद्धान्तात् 'अनेकजन्मभोगेन क्षययोग्यानां कर्मणां कथं सद्य एव क्षयः?' इत्याशङ्क्याह—दुःसहेति। दुःखेनापि सोढुमशक्यो दुःसहो यः प्रेष्ठस्य कृष्णस्य विरहरूपोऽग्निः तस्य यस्तीव्रस्तापः अनेकजन्मस्वनेकविधनरकादिभोग्यं दुःखं तेन धुतानि विनष्टानि अशुभानि पापानि यासां ताः, तया ध्यानेन प्राप्तो यः अच्युतस्याश्लेषस्तेन या निर्वृतिः आनंदस्तया क्षीणानि मङ्गलानि अनेकजन्मसु साम्राज्यादिसुखजनकानि पुण्यानि यासां ताः। एवं तत्कालतीव्रसुखदुःखभोगेन निःशेषकर्मक्षयात् युक्त एव तदधीनदेहत्यागेन मोक्ष इति भावः॥ १०–११॥ अत्र राजा श्रुतिविरोधमाशङ्कते—कृष्णमिति। 'मननशीलत्वादेतन्निर्णये तव सामर्थ्यमस्ति' इति सूचयन् सम्बोधयति—मुने इति। "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति मर्यादामार्गे श्रुतौ ज्ञानमेव मोक्षसाधनत्वेनोक्तम्, तथा "भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित्। स एव मुक्तिदाता च भक्तिस्तत्रैव कारणम्" इति पुष्टिमार्गे भक्तिरपि तत्साधनत्वेनोक्ता, सापि "ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः। द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः" इत्यत्र निर्गुणेति निर्णीतम् तत्रापि सा ज्ञानद्वारा मुक्तिसाधनम्, "भक्त्या मामभिजानाति" इत्यादौ तथा निर्णयात्। एतास्तु कृष्णं परं केवलं कान्तं जारबुद्ध्या कमनीयमेव विदुः, निर्गुणब्रह्मतया तु न विदुः। अतस्तासां भगवति स्वस्मिंश्च सौन्दर्यादिगुणबुद्धिरेव॥ गुणबुद्धिश्च गुणप्रवाहस्य जन्ममरणादिलक्षणसंसारस्य मूलमेव, अन्यथा गुणबुद्धिनिवारकाणि सर्वाणि शास्त्राणि व्यर्थान्येव स्युः। अतस्तासां गुणधियां गुणप्रवाहस्योपरमो निवृत्तिः कथं घटते ?॥ १२॥

अन्वितार्थप्रकाशिका

अन्तरिति ॥ गोप्यः कृष्णप्रेयस्योऽनेकविधाः तत्र गोलोकादिवासिन्यो भगवता सहावतारभाजो नित्यसिद्धाः काश्चित् अपराः साधनसिद्धाः । यथा पाद्मोत्तरखण्डे । "तदा महर्षयः सर्वे दण्डकारण्यवासिनः ॥ दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् स्वविग्रहैः ॥ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले ॥ हरिं संप्राप्य कामेन ततो मुक्ता भवार्णवात् ॥" इति । बृहद्वामनपुराणोक्ताः काश्चन श्रुतिरूपाः । "संभवन्तु सुरस्त्रियः" इति प्रागुक्तेदवकन्या अपि काश्चित् । उक्तं च पाद्मे । "गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः ॥ देवकन्याश्च राजेन्द्र न मानुष्यः कथंचन ॥" तत्र ऋषिजानां साधनवशाच्छ्रीकृष्णे सिद्धभावानां प्राकृतदेहवतीनां मध्ये कासांचिदवस्थेयमुच्यते । काश्चिद्गोप्यः अन्तर्गृहे गृहस्यान्तर्गता अतः पत्यादिभिर्द्वारपिधानान्न लब्धो बिशेषो भगवदभिसरणयोग्यो निर्गमो याभिस्ताः पूर्वासामिव नासां भावः पक्वः । दुःखेन मीलिते लोचने याभिस्ताः प्रागपि तस्य कृष्णस्य भावनया युक्ताः तदा कृष्णं नितरां दध्युः ॥ ९ ॥ दुःसहेति युग्मम् ॥ दुःखेनापि सोढुमशक्यो दुःसहो यः प्रेष्ठस्य कृष्णस्य विरहरूपोऽग्निः तस्य यस्तीव्रस्तापः अनेकजन्मस्वनेकविधनरकादिभोग्यं दुःखं तेन धुतानि विनष्टानि अशुभानि पापानि यासां ताः तथा ध्यानेन प्राप्तो यः अच्युतस्याश्लेषस्तेन या निर्वृतिः आनन्दस्तया क्षीणानि मङ्गलानि अनेकजन्मसु साम्राज्यादिसुखजनकानि पुण्यानि यासां ताः अतस्तीव्रदुःखसुखभोगेन समस्तप्रारब्धपापपुण्यनाशेन सद्यः प्रक्षीणं बन्धनं यासां ताः गोप्यः तदानीं तमेव परमात्मानं कृष्णं जारबुद्ध्याऽपि संगता ध्यानतः प्राप्ताः सद्यः गुणमयं देहं जहुः । नहि वस्तुशक्तिर्बुद्धिमपेक्षते । अन्यथा मत्वापि पीतामृतवत् अत्र प्रारब्धकर्मनाश उक्तः । सञ्चितक्रियमाणकर्मनाशस्तु श्रीकृष्णाख्यब्रह्मसाक्षात्कारेण ध्यानमहिम्ना तदैवोत्पन्नब्रह्मसाक्षात्कारेण वा ज्ञेयः ॥ १०-११ ॥ ननु पत्यादीनां वस्तुतो ब्रह्मत्वेऽपि यथा ब्रह्मत्वज्ञानाभावान्न तद्भजनान्मोक्षस्तथा कृष्णेऽपि ब्रह्मबुद्ध्यभावात्कथं मोक्ष इति शङ्कते—कृष्णमिति ॥ हे मुने ! ज्ञानेन भक्त्या वा मोक्षः इति हि शास्त्रम् गोप्यस्तु कृष्ण परं केवलं कान्तं जारबुद्ध्या कमनीयमेव विदुः । निर्गुणब्रह्मतया तु न विदुः । अतो गुणधियां तासां गुणप्रवाहस्य उपरमो निवृत्तिः कथं जाता ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अंतरिति गृहस्य मध्येगताः न लब्धो न प्राप्तो निर्गमो गमनमार्गो याभिस्ताः पूर्वमपि तस्मिन् कृष्णे भावनया दृढतरप्रीत्या युक्तास्तदानीं अत्यंतं दध्युः ॥ ९ ॥ एवं कृते सति किं जातमित्याशंक्य तदुत्तरमाह दुःसहेति । द्वाभ्यां दुःसहेन प्रेष्ठस्य हरेः विरहेण वियोगेन तीव्रः तीक्ष्णो यस्तापस्तेन धुतानि नष्टानि अशुभानि पापानि यासां ताः ध्यानेन प्राप्तः अच्युतस्य यः आश्लेषः आलिंगनं तेन या निर्वृतिः परमानंदस्तदा क्षीणानि मंगलानि शुभकर्माणि यासां ताः सुखदुःखभोगेन प्राक्तशुभाशुभकर्मरहिता जाता इत्यर्थः ॥ १० ॥ इदानीं जनानां परमेश्वरे येनकेनापि भावेनात्यासक्तिः साधनसंपत्ति विनापि प्राकृतगुणमयं देहं नाशयतीति पुरुषोत्तमस्वरूपबलमाह तमिति जारबुध्या जारोयमस्तीति बुध्याज्ञानेनापितं गोपरूपमेव परमात्मानं परमेश्वरं संगताः सम्यगासक्त्या प्राप्ताः तयाऽऽसक्त्या प्रक्षीणं नष्टं शुभाशुभकर्मणां बंधनं यासां ता गोप्यः सद्यः गुणमयं त्रिगुणात्मकं देहं जहुः ॥ ११ ॥ ननुजारबुद्ध्या श्रीकृष्णं भजंतीनां तासां गुणमयदेहत्यागपूर्वको मोक्षः कथं जात इति शंकयन् राजोवाच कृष्णमिति परं केवलं कांतं रमणं न तु ब्रह्मतया परब्रह्मभावेन गुणेषु विषयेषु धीर्यासां तासां गुणप्रवाहस्य संसृते उपरमो नाशः कथं भवेत् ।१२।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्तरिति ॥ काश्चित् गोप्यस्तु अन्तर्गृहगताः पतिभिरन्तर्गृहे निरुद्धा इत्यर्थः । अत एव, न लब्धो विनिर्गमो यासां ताः, प्रागपि, तस्मिन् श्रीकृष्णे भावना दृढतरा प्रीतिस्तया युक्ता, अत एव तदानीं मीलितलोचनाः सत्यः, कृष्णं दध्युः ध्यातवन्त्यः ॥ ९ ॥ एवं ध्यानवतीनां प्रारब्धकर्मक्षयपूर्वकं भगवत्प्राप्तिं जनानां परमेश्वरे येन केनापि भावेनात्यासक्तिः साधनसंपत्तिं विनापि प्राकृतगुणमयं देहं नाशयतीति पुरुषोत्तमस्वरूपबलं चाह द्वाभ्याम् ॥ दुःसहेति ॥ दुःखेनापि सोढुमशक्यो दुःसहः यः प्रेष्ठस्य प्रियतमश्रीकृष्णस्य विरहो वियोगस्तेन यस्तीव्रतापस्तेन धुतानि निरस्तानि अशुभानि प्रारब्धपापकर्माणि यासां तास्तथाभूताः, ध्यानेन प्राप्तो योऽच्युतस्य श्रीकृष्णस्याश्लेष आलिङ्गनं तेन या निर्वृतिरानन्दस्तया, क्षीणानि मङ्गलानि प्रारब्धपुण्यानि यासां तथाभूताश्च ॥१०॥ तमेवेति ॥ सद्य एव, प्रक्षीणानि विनाशं प्राप्तानि बन्धनानि संसृतिबन्धननिमित्तानि पुण्यपापात्मकानि यासां ताः, परमात्मानं, तं श्रीकृष्णं एव, जारबुद्ध्या उपपतिमत्या, संगताः संप्राप्ताः सत्यः अपि, गुणमयं सत्त्वादिगुणप्रचुरं, देहं जहुस्तत्यजुः । न हि वस्तुशक्तिर्बुद्धिमपेक्षते अन्यथामत्यापि पीतामृतवदिति भावः । एवकारापिशब्दाभ्यां कोऽपि भावो भगवदन्यविषयो मुक्तये एव कल्पते इत्यभिप्रतम् ॥ ११ ॥ एतदेव तन्मुखेन विशदयितुं पृच्छति राजा ॥ कृष्णमिति ॥ हे मुने, ताः कृष्णं, परं केवलं, कान्तं धवमुपपतिमित्यर्थः । विदुः । न तु ब्रह्मतया परब्रह्मत्वेन । अतः गुणेषु विषयेषु धीर्बुद्धिर्यासां तासां तासां गोपीनां, गुणप्रवाहस्य सत्त्वादिगुणजदेहपरंपराया उपरमो निःशेषक्षयः, कथं आसीदिति शेषः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अन्तर्गृहगता इति १०.२९.९

बाह्याभ्यन्तरवृत्तयः सविषया याः स्वैरतो गोकुले ताश्चैत्स्वान् विषयानपास्य भगवत्पादैक-वद्धस्पृहाः ।
तत्तासां भवतीश्वराप्तिरुचिता तत्रांतराणां द्रुतमित्यावेदितमंगनोभयविधोद्योगार्थकोल्लेखनात् ॥ ५२ ॥
काचिद्वृत्तिर्बहिर्गत्वैवाच्युतं प्राप्य मोदते । काचिद् गोकुल एवालं लीना सत्यूह्यतामिदम् ॥ ५३ ॥

कृष्णं विदुरिति : १०.२९.१२.

या वृत्तिर्निखिलानपास्य बिषयान्संजायते सुस्थिरा सैवार्हा पदमैशमीक्षितुमहो नैवापरो जातुचित् ।
जागर्त्येष विधिः श्रुतेरनुभवो विज्ञानिनां चापि तत्तत्प्राप्तं विषयात्मभिः कथमिति प्रश्नाशयो भूपतेः ॥ ५४ ॥

कृष्णप्रिया

राजन् ! कितनीक अन्तर्गृहगत गोपियाँ थी जो घर के भीतर ही उनके पति पुत्रादि के रोकने से रूक गई और प्रभु के समीप जाने का अवसर न मिला, तब उन्होंने नेत्रों को बन्दकर भगवन्मिलन की भावना करने लगी उन्होंने विशुद्ध भाव से भगवान् श्रीकृष्ण से आलिङ्गन किया ।। ९ ।। अपने प्रियतम भगवान श्रीकृष्ण के असह्य विरह के तापक्लेश होने से उनके सारे पाप कर्म धुल गए, पुनः ध्यान से प्राप्त प्रिऊतम श्रीकृष्ण के आलिङ्गन-आश्लेष से प्राप्त आनन्द के भोग से उनके पुण्य कर्मों का नाश हुआ ।। १० ।। राजन् ! पतिपुत्रादि से अवरुद्ध गोपियों के जार भाव से भी भगवान् का ध्यान करने पर प्रतिबन्धक कर्मों के फलभोग के निवृत्त हो जाने से एवं हृदय में भगवान के आलिङ्गन से उनके गुणमय शरीर एवं उनकी अविधा भी निबृत्त हो गई उन्होंने सायुज्य मुक्ति प्राप्त कर ली ।। ११ ।। परीक्षित राजा ने श्रीशुकाचार्य जी से प्रश्न किया कि भगवन् गोपियों के भगवान कृष्ण को अपना प्रियतम कान्त मानती थी किन्तु यह परब्रह्म है ऐसा ज्ञान नहीं था तो फिर वे गुणबुद्धि वाली ही रही तो उनके गुणप्रवाह का निवर्तन कैसे हुआ ? ।। १२ ।।

श्रीशुक उवाच

उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः । द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ १३ ॥

कर्दमक्षमा

अन्वयः—एतत् ते पुरस्तात् उक्तम् , (यत्) हृषीकेशम् द्विषन् अपि चैद्यः सिद्धिम् गतः, उत ? अधोक्षजप्रियाः किम् किं न सिद्धिं गच्छेयुः ।। १३ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

परिहरति । उक्तमिति । अयं भावः । जीवेष्वावृतं ब्रह्मत्वं कृष्णस्य तु हृषीकेशत्वादनावृतमतो न तत्र बुद्ध्यपेक्षेति । १३।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भक्त्या संततहरिमहिमसंस्मृतिसमुदितसंविदा निवृत्तियोग्या मुक्तिर्न तु कामादिना, तेन स्वर्गादिप्राप्तिरेवेति "कृष्णकामास्तदा गोप्यस्त्यक्त्वा देहं दिवं गताः" इति विजयध्वजोक्तेर्नात्रेदं शोभनं प्रतिभाति । किन्तु, स्वामिचरणोक्त एव परिहारः सुष्ठु इति तदाह परिहरति–उत्तरं वक्ति । किंचिदमर्षादिनाऽव्यक्तवाक् । अहो भगवन्माहात्म्ये संदिहानोऽयमिति क्रुद्ध इवाह–उक्तमिति । न ह्यस्मदादिवद्भगवतः प्राकृतरूप इत्याह–अयं भाव इति । आवृतमिंद्रियादिरूपेण परिणतेनाज्ञानेन ब्रह्मत्वं ब्रह्मभाव आच्छादितं भस्मना वह्निरिव "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इत्याद्युक्तेः । हृषीकेशत्वादीश्वरत्वात्सर्वज्ञत्वेन वशीकृतमायत्वात्तत्कृतावरण नास्ति, ततस्तस्मात्तत्र श्रीकृष्णे बुद्ध्यपेक्षा साक्षात्परब्रह्मैवायमिति ज्ञानापेक्षा नति भाव इति । अनावृतोग्निर्यथा प्रकाशदाहादिकार्यं करोति न त्वावृतः, एवं जीवानामावृतब्रह्मरूपत्वात्तत्र तु ब्रह्मात्मरूपज्ञानं द्वारिकृत्वैव मोक्षो, भगवतोऽनावृतब्रह्मरूपत्वात्तादृशज्ञानं विनापि मोक्षप्रदत्वमिति तात्पर्यम् । किं च, प्रेष्ठविरहजक्षोभातिशयात्ताभिर्देहध्वंसोंगीकृत इत्याकूतम् । पुरस्तात् सप्तमस्कंधे एतत् तव प्रश्नोत्तरम् । द्विषन्नपि द्वेषं कुर्वन्नपि यथा संततं वैरधिया चेतोनिवेशेन सिद्धिं सायुज्यं गतः । अधोक्षज इन्द्रियजज्ञानाविषयसाक्षात्परब्रह्मैव प्रियोऽनुरागविषयो यासां ताः सोपाधिको निरुपाधिको वा चेतःप्रवाहस्तत्प्राप्तिहेतुरिति तत्त्वम् ॥ श्रीमुनींद्रोपि नायं राज्ञः प्रश्न इति मनसा जानन्नेव त्वमेवं पृच्छन्मेधाशून्य एवासीति तद्व्याजेनानभिज्ञानेव तान्भर्त्सयन्नाह–उक्तमिति पुरस्तात् सप्तमस्कंधे एव । द्विषन्नपीति द्वेषलक्षणप्रतिकूलभावेनापि यदि सायुज्यं लभ्यते तर्हि कामलक्षणस्यानुकूलभावस्य

का वार्तेति भावः। हृषीकेशमिति। निरुपाधिकृपया स्वयमवतीर्य ब्रह्मादीनामपि हृषिकैरग्राह्योपि मर्त्यलोके परमनीचानामपि हृषीकेषु ईष्टे स्वाचिंत्यशक्त्या विषयभूतो भवति तानुद्धर्तुमितीदमप्येकं तस्य कृपैश्वर्यमिति भावः। इमास्तु अक्षोक्षजस्य अतींद्रियस्य तस्य प्रियाः प्रीतिविषयाश्रयभूता एव। अत्र 'अधः सिद्धिं यथा गतः' इति प्रत्यासन्नमघासुरं हित्वा विप्रकृष्टचैद्यो यद्दृष्टांतितस्तेन राजानं प्रत्येतत्सरहस्यं प्राह,–चैद्यस्यापि द्वेषाभिनिवेशोद्रेकान्मुनिशापनिबंधनगुणमयदेहस्यैवोपरमः, अन्तश्चिन्मयपार्षददेहस्तु तस्यानश्वरो नित्यो वर्त्तत एव। यदुक्तम्–'विष्णुचक्रहतांहसौ' इति। विष्णुचक्रेण हतमंह एव ययोर्न तु ताविति। सिद्धिं गतः अभीष्टां गतिं पार्षदतां प्राप्त इत्यर्थः। यदुक्तम्–"वैरानुबंधतीव्रेण ध्यानेनाच्युतसात्मताम्। नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ॥" इति॥ अत्र तोषिणी–श्रीयुक्तः शुक इति परीक्षिद्वचनस्य बहिर्मुखप्रतारणबुभुत्सुसंदेहनिरसनार्था प्रवृत्तिमवगम्यापि तद्व्याजेन बहिर्मुखान्भर्त्सयन्निव किंचित्सामर्षत्वेनाव्यक्तवचनात्तथैवाह–उक्तं पुरस्तादिति। सिद्धिम् अभीष्टां गतिम् पुनः पार्षदताम्। "वैरानुबंधतीव्रेण ध्यानेनाच्युतसात्मताम्। नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ॥" इति सप्तमात्। ततस्तस्य द्वेषेऽपि जाते लीनतया स्थितैरपि स्वगुणैरेव सह पुनस्तत्प्राप्तिरिति सुतरामेवाधोक्षजप्रीतिविषयाश्रयाणां तासां वर्द्धिष्णुप्रेमतया प्रकटैस्तैरेव सह तत्प्राप्तिरित्यर्थः। मया तु गुणमयं देहमिति स्वरूपशक्तिवृत्तिरूपांतर्बहिर्देहप्राप्त्या समूलप्रकृतिप्राकृतसद्गुणैः सौन्दर्यादिभिः संवलितमपीत्येव विवक्षितम्, देहस्यैव विशेषणत्वादित्यर्थः। प्रश्नस्य श्लेषत्वे द्वितीयार्थे स्वयमुत्तरस्यार्थः प्रश्नस्य। 'ये यथा माम्' इत्यत्र तान्प्रत्येवान्यान् गुणान्न प्रकाशयामि स्वतस्तु मम सर्वेपि संत्येवेति विवक्षितम्। अतस्तादृशभक्त्यावेशात्तस्यानुसंधानाभावोऽपि तत्तच्छक्तय एव स्वावसरे तान्प्रकाशयन्ति। अन्यथा दूरतो भजतां केवलतन्माधुर्यनिष्ठानां तदप्राप्तिरेव स्यात्। तत्र कैमुत्येन दृष्टान्तं शृण्वित्याह–द्विषन्नपीति। अन्यथा तत्राप्यंतेन मोक्षादिदायकमैश्वर्यं प्रकाशेतेति भावः। तत्तत्प्रकाशे नामद्वयेन हेतुमाह–हृषीकेशमिति, अधोक्षजेति च। उभयनामनिरुक्त्या तज्ज्ञानापेक्षयैव तेषां सिद्धये तद्गुणविशेषः प्रकाशित इति दर्शितम्॥ १३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीयुक्तः शुक इति परीक्षिद्वचनस्य बहिर्मुखप्रतारणबुभुत्सुसन्देहनिरसनार्थं प्रवृत्तिमवगत्यापि तद्व्याजेन बहिर्मुखान् भर्त्संयन्निव किञ्चित् सामर्षत्वेनाऽव्यक्तवचनत्वात् तथैवाह—उक्तम् पुरस्तादिति। सिद्धिम् अभीष्टां गतिं पुनः पार्षदतां वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्म्यताम् "नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ" इति सप्तमात् ततस्तस्य द्वेषेऽपि जाते लीनतया स्थितैरपि पुनः स्वगुणैरव सह तत्प्राप्तिरिति सुतरामेवाधोक्षजप्रीतिविषयाश्रयाणां तासां वर्द्धिष्णुप्रेमतया प्रकटैस्तैरेव सह तत्प्राप्तिरित्यर्थः। मया तु गुणमयं देहमिति स्वरूपशक्तिवृत्तिरूपान्तर्बहिर्देहप्राप्त्या समूलप्रकृतिप्राकृतसद्गुणैः सौन्दर्य्यादिभिः सम्वलितमपीत्येव विवक्षितं देहस्यैव विशेषणत्वादित्यर्थः। प्रश्नस्य श्लेषत्वे द्वितीयार्थे त्वयमुत्तरस्यार्थः "ये यथा माम्" इत्यत्र तान् प्रत्येवान्यान् गुणान्न प्रकाशयामि स्वतस्तु मम सर्वेऽपि सन्त्येवेति विवक्षितम् अतस्तादृशभक्तावेशात् तस्यानुसन्धानाभावेऽपि तत्तच्छक्तय एव स्वावसरे तान् प्रकाशयन्ति अन्यथा दूरतो भजतां केवलतन्माधुर्यनिष्ठानां तदप्राप्तिरेव स्यात् तत्र कैमुत्येन दृष्टान्तं शृण्वित्याह–द्विषन्नपीति। अन्यथा तत्राप्यन्तेन मोक्षादिदायकमैश्वर्यं प्रकाशेतेति भावः। तत्तत्प्रकाशे नामद्वयेन हेतुमाह–हृषीकेशमिति। अधोक्षजेति च उभयनामनिरुक्त्या तज्ज्ञानानपेक्षतयैव तेषां सिद्धये तद्गुणविशेषः प्रकाशत इति दर्शितम्॥ १३॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीयुक्तः शुक इति। किञ्चिदमर्षादिना अव्यक्तवाक्तया कथनेन शुकतुल्यत्वात्; एवमग्रे च विवेचनीयम्; किन्तु राजानं स्वाभिप्रायविदं जानन्नपि तद्व्याजेन तत्प्रश्नहेतून् हेतुकान् कांचिदुद्दिश्य क्रुध्यन्निव प्रत्याह—उक्तमिति तत्र प्रथमपक्षे भक्तानां संसारोपरमेऽपि राज्ञः शंकया श्रीभगवन्माहात्म्ये तावदसम्भावनोत्पत्तेः क्रुध्यन्निव प्रत्याह—उक्तमिति। हृषीकेशं सर्व्वेन्द्रियवृत्तिप्रदत्वेन परमोपकारिणमपि; यद्वा, हृषी तृणविशेषस्तद्वत् सूक्ष्मदीर्घविरलाः, किंवा, हृष्यो रश्मयस्तद्वद्दीप्तिमन्तो बहुलाश्च केशा यस्य तं परमसुन्दरमित्यर्थः। तादृशमपि कृष्णं द्विषन्नपि चैद्यः शिशुपालः सिद्ध गुणातीत-सच्चिदानन्दविग्रहप्राप्तिलक्षणाम्; यद्वा, निजाभिष्टसिद्धिं पुनर्भगवत्पार्षदलक्षणां मुक्तिं गतः प्राप्तो यथावदेतत् पुरस्तात् पूर्व्वं सप्तमस्कन्धे ते तुभ्यमुक्तमेव। शकटाधः शयने शकटपातशकटाद्विमुक्ततयाऽक्षात् पुनर्जात इवेत्यधोक्षजः, श्रीयशोदानन्दनः प्रिया यासान्तास्तस्य वा प्रियाः सिद्धिं यान्तीति किमु वक्तव्यमिर्थः, अभिप्रायस्तैर्व्यञ्जितमेव, अतः प्रियतमविरहभयेन ताभिर्भक्तानभीष्टोऽपि जन्मादिध्वंसः स्वीकृत इति सिद्धान्तः। द्वितीयपक्षे चैद्योऽपि निजाभीष्टसिद्धिं प्राप्तः। अधोक्षजप्रियास्तु पुनर्विरहभयेनाभीष्टस्य नित्यतत्संयोगस्य सिद्धिं प्राप्स्यन्तीति किमु वक्तव्यमिति। तथा दुःसहविरहार्त्तिभयेनैव तादृशदेहस्यापि त्याग इति परिहारः। अहो जन्मत्रयासुरत्वप्रापकमुनिशापान्ते चैद्यः, श्रीकृष्णप्रियत्वेन च गोप्यः सिद्धिं याता इति किं वक्तव्यम्। गुणातीतसच्चिदानन्दविग्रहप्राप्तिलक्षणां न तु विदेहकैवल्यरूपां प्राप्तः, कृष्णप्रियास्तु तादृशीं सिद्धिं यान्तीति किमुत वक्तव्यम्? अतः, प्रेमविशेषोत्सेककृतात् प्रेष्ठविरहजक्षोभातिशयाद्भीताभिस्ताभिर्जन्मनादिध्वंसः स्वीकृतः। यदुक्त गुणातीतदेहग्रहणं भक्तानामप्ययुक्तमिति तत्र सदन्येन भावित भावविशेष सर्व्वोत्तमबुद्ध्या बृहद्भ्यो भक्तविशेषेभ्यो गुणातीतदेहः प्रेमविवर्त्तविशेषाभावात् प्रायो न रोचते, श्रीभगवत्प्रेयसीनान्तु प्रणयेनोन्नतमनसा तत्र

नातिशनिरिति । तृतीयपक्षे—हृषीकेशं द्विषन्नपि चैद्यः सिद्धिं निजाभीष्टस्य पूर्त्तिं पुनर्भगवत्पार्षदलक्षणां प्राप्तः, इत्यत्र हृषीकेशनामसामान्यस्य श्रीभगवत्स्वरूपस्य वाचकम्, अधोक्षज-नाम तु प्रोक्तनिरुक्त्या विशेषस्य तत्स्वरूपस्य, अतस्तस्यावतारेभ्योऽवतारिणश्च कामाप्यधिकां माधुरीं प्रकटयतः श्रीव्रजराजकुमारस्य प्रियाः परममधुरप्रेमशालिन्यः सर्व्वदा यथावदन्यव्रजदेव्य इव व्रजावस्थानेनाभीष्टस्य व्रजे प्रेमविलासादेः सिद्धिं प्राप्स्यन्तीति किमु वक्तव्यम्। एतत्तु हानमन्तर्द्धानतया लक्षयता किंवा भवत्यागमेव देहत्यागतया व्यञ्जयता मया सूचितमपि भवद्भिर्धैर्नावधारितमिति सर्व्वमनवद्यम् ॥ १३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

उक्तं पुरस्तादिति शिशुपालदृष्टान्तेन गोपीनामपि गोवर्द्धनोद्धरणादिभिरीश्वरत्वज्ञानमस्तीति परिहार उक्तः। यद्वा, वस्तुस्वभावान्मोक्षसिद्धिः वस्तुस्वभावः प्रतिबन्धकप्रारब्धकर्मक्षयः उद्देश्यान्तरप्रतिपत्तिश्च अत एव दशाननस्य मोक्षाभावः गोपीनां तु प्रतिबन्धकाभावात् वस्तुस्वभावायत्तो मोक्ष उपपन्न इति गुणधियां शब्दादिविषयगुणधियाम् ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अस्य प्रश्नस्योत्तरं सप्तम एवाभिहितम् इत्याह—उक्तमिति। एतदत्र वक्तव्यमुत्तरं तुभ्यं पुरस्तात्सप्तमस्कन्ध एवोक्तम् "गोप्यः कामाद्भयात्कंसः" इत्यादिना कोपि भगवत्यनन्यभावो मुक्तिहेतुरेवेत्युक्तमेवेत्यर्थः। उक्तेप्युत्तरे कैमुत्यन्यायेनोपपत्तिमाह चैद्य इत्यादिना। चैद्यः शिशुपालो हृषीकेशं द्विषन्नपि यथा सिद्धिं पुनः द्वाःस्थतां प्राप्तः यथेति निदर्शनं वा द्विषन्नपि सिद्धिं गतः किमु तस्य प्रिया गोप्यः सिद्धिं ययुरिति ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भक्त्या सन्ततमधुमथनमहिमासंस्मरणसमुदितसम्विदानिवृत्तियोग्या मुक्तिर्नतु कामादिना तेन स्वर्गादिप्राप्तिरेव "कृष्णकामास्तदा गोप्यस्त्यक्त्वा देहं दिवं गताः" इत्यादिस्मृतेरित्यभिप्रायं हृदि कृत्वाऽर्थवादस्यापि स्वार्थसाधनसमर्थकत्वात्तेन चोद्यं परिहरति शुकः—उक्तमिति। द्वे मुक्ती ह्यानन्दानुभवलक्षणां नित्यदुःखानुभवलक्षणेति ते उभे अपि सिद्धिशब्दोक्ते तत्र यथाशास्त्रविहितमङ्गीकर्तव्यमिति तदुक्तम् सदा द्वेषिणामधरं तमः इति मुक्तिशब्दोदितं चैद्यप्रभृतावित्यादि लोकसङ्ग्रहार्थं किमुताधोक्षजप्रिया इति अन्यथा "कामस्त्वशुभकृच्चापि भक्त्या विष्णोः प्रसादकृत्" इत्यादिनोदाहरिण्यत् जगत्प्रपितामहे विष्णौ जारबुद्धिः कथं घटत इति चेत्? अत एव जारबुद्ध्यापीत्यत्रापिपदेन जारबुद्धिं गर्हयामास स्त्रीणां जारे हि प्रेष्ठत्वबुद्धिः साऽपि न घटत इति चेत् न सर्वेषां हरौ प्रेष्ठत्वबुद्धेरविगाहतया वृत्तेः "तदेतत्प्रेयः" इति श्रुतेः अयं भावः कुतो ऽवगत इति चेन्न जगत्प्रपितामहे जारबुद्धिर्न युक्तेत्याचार्यवचनात् ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

प्रश्नानन्तरं किञ्चिज्जातक्रोध इव सगाम्भीर्यं प्रत्युत्तरं दास्यतः श्रीशुकाचार्यस्यायमाशयः—हे राजन्! साधयिष्यमाणे हि वस्तुनि सन्देहः प्रवर्तते, न तु सिद्धे; गुणमयं देहं त्यक्त्वा निर्गुणं देहमासाद्य तं सङ्गता इति यदुक्तम्, तत् सिद्धानुवाद एव कृतः न तु मयारोप्य कथितम्। तदत्र कः सन्देहः? कृष्णे प्रेमैव तथा संपादयति, न तु ब्रह्मज्ञानम्। किं बहुना? आसां तु प्रेमैव। येषां तस्मिन् द्वेषस्तेषामपि गुणप्रवाहोपरम आसीत्। प्रेम्णः पुनरयं महिमा, यदसौ स्वानुकूलं निर्गुणं शरीरमापादयति। एतत्तु सर्वं श्रीकृष्णाधिकरणतामूलमेवेति क्रोधावेशः प्रकटयन्नाह—उक्तमित्यादिबहुभिः पुरस्तादेवोक्तमस्ति, तथापि भ्रान्तोऽसीत्यर्थः। किं तदित्याह—द्विषन्नपि चैद्यः सिद्धिं प्राक्सिद्धपार्षदभावम्, न तु कैवल्यम्। यथा यथावद्गतः; किमुताधोक्षजप्रियाः कान्तत्वेन भजन्त्यो हि तस्य प्रिया भविष्यन्तीति यत्तत् किमुत। अतः कान्तत्वेन ज्ञानमेव गुणप्रवाहोपरमस्तासां न पुनर्ब्रह्मत्वेन ज्ञानम् ॥१३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तेषां गुणप्रवाहोपरमो न भवेत्येवेति पूर्वपक्ष एव सिद्धान्तः, वक्ष्यति च—(भा० १०।९०।२७) "याः संपर्यचरन् प्रेम्णा पादसम्वाहनादिभिः। जगद्गुरुं भर्त्तृबुद्ध्या तासां किं वर्ण्यते तपः ॥" इति परमकान्तत्वेनैव भजनं गुणप्रवाहोपरमो गुणप्रवाहोपशमनकारीति अन्तर्भूतः सिद्धान्तः कृतः सरस्वत्या। तथापि श्रीशुकः सिद्धान्तयति—उक्तं पुरस्तादित्यादि। साक्षेप-वचनेन पुनः पुनः कथितमपि भवान्नावगच्छति, चैद्यः कथं सिद्धिं गतः, सतु द्विषन्नपि द्वेष्टापि, किमुताधोक्षज-प्रियाः— अधोक्षजस्य श्रीकृष्णस्य; प्रियाः सिद्धिं स्वामीष्टतनुम् ॥ १३–१५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रीमन्मुनीन्द्रोपि नायं वस्तुतो राज्ञः प्रश्न इति मनसा जानन्नेव त्वमेवं पृच्छन्मेधाशून्य एवासीति तद्व्याजेनानभिज्ञानेव तान्भर्त्सयन्नाह—उक्तमिति। पुरस्तात्सप्तमस्कन्धे एव द्विषन्नपीति द्वेषलक्षणप्रतिकूलभावेनापि यदि सायुज्यं लभ्यते तर्हि कामलक्षणानुकूलभावस्य का वार्तेति भावः। हृषीकेशमिति निरुपाधि कृपया स्वयमवतीर्य्य ब्रह्मादीनामपि हृषीकैरग्राह्योपि मर्त्यलोके परम-

नीचानामपि हृषीकेषु दृष्टेः स्वाचिन्त्यशक्त्या विषयीभूतो भवति तानुद्धर्तुमितीदमप्येकं तस्य कृपैश्वर्यमिति भावः। इमास्तु अधोक्षजस्य अतीन्द्रियस्य तस्य प्रियाः प्रीतिविषयाश्रयभूता एव अत्र चैद्यः सिद्धिं यथागत इति प्रत्यासन्नमघासुरं हित्वा विप्रकृष्टश्चैद्यो यत् दृष्टान्तितस्तेन राजानं प्रत्येतत्सरहस्यमाह, चैद्यस्यामि द्वेषाभिनिवेशोद्रेकात् मुनिशापनिबन्धनमयदेहस्यैवोपरमः अन्तश्चिन्मयपार्षददेहस्तु तस्यानश्वरो नित्यो वर्तते एव यदुक्तम् "विष्णुचक्रहतांहसौ" इति विष्णुचक्रेण हतमंह एव ययोर्नतु ताविति सिद्धिं गतः अभिष्टां गतिं पार्षदतां प्राप्त इत्यर्थः। यदुक्तम् —

"वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम्। नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ" ॥ इति ॥ १३ ॥

श्रीरसिकाल्हादिनी टीका

अधुना राज्ञः प्रश्नं सम्यगवधार्य हेतुवादिनां केषांचिद् हृद्वृत्तिं विदित्वा कृतप्रश्नं स्वाभिप्रायविदं राजानं प्रति स्वमतं सक्षोभं व्यंजन्निव हेतूक्तिनिपुणाभिरूत्तरीकरिष्यन् कृष्णप्रियाणां ईदृक् प्रश्नस्यानौचितीं दर्शयन् तासां कृष्णप्राप्त्यावसंभावनाविपरीतभावनानामनर्थाबहुत्वं प्रकटयन् तासां द्वित्रिक्षणादिना व्यवधानमङ्गीकृत्योत्तरयति गुणप्रवाहोपरमः रासविलासनिवृत्तिः कथमिति प्रश्नस्योत्तरं द्वित्रिक्षणमात्रोपरमेऽपि पुनरपि ततोऽप्याधिक्येन विलासप्राप्तिर्जातेति सूचयन्नाह उक्तं पुरस्तादित्यादिभिः। भगवन्माहात्म्ये रसभावनायुक्तान् लक्षीकृत्याह। युधिष्ठिरस्य राजसूयं द्विषतोपि चैद्यस्य श्रीकृष्णेन परोक्षं प्रवेशं दृष्ट्वापि संदिहाना भवतीति। चित्रं पुरस्तात् सप्तमस्कंधे ते तुभ्यं मयोक्तमेव तत्किंत्वया विस्मृतमिति सानुशयोक्तिः। हृषीकेशमपि इन्द्रियप्रवर्तकमपि, अपिशब्द उभयत्र संबध्यते ईश्वरत्वेन तमजानन् द्विष्यन्नपि चैद्यो नित्यपार्षद एव कालबिलंबेन यथा सिद्धिं पुनः पार्षदरूपतां गतः न तु ब्रह्मणि लयरूपं सायुज्यं गतः। यदि व्रजदेवीनां मुक्तिरभिप्रेता स्यात्तर्हि चैद्यं न दृष्टांतीकुर्यात्। अधोक्षजप्रियाः किमुतेति अधोक्षजेषु अंतर्मुखेस्वक्षेषु ईन्द्रियेषु जायते आविर्भवतीति तथा, यद्वा शकटाधः शयाने श्रीकृष्णे शकटाद्विमुक्ते सति व्रजेश्वरीं प्रति गोपीभिरुक्तं दिष्ट्या तव सुतः पुनर्जात इवेति। तदा यशोदयोक्तं 'न मतो जातः किन्तु अधोक्षाज्जातोऽधोक्षाज्जातो अधोक्षज इति तस्य अधोक्षजस्य यशोदानन्दनस्य स्वप्रियाः सिद्धिं तत्स्वरूपं गता किमुत वक्तव्यमित्यर्थः। निर्गुणस्वरूपग्रहणमन्येषां भक्तानामयुक्तमिति। भावनात्यागस्यैव देहत्यागत्वेन मया व्यंजितत्वात्। अतो भवद्भिर्नैवंविधः प्रश्नः कर्तव्य इति नियम्यत इति ॥ १३ ॥

विशुद्धरसदीपिका

अथ तादृशेनैवोभयार्थस्पृशा वाक्येनोत्तरं तत्र प्रसिद्धार्थस्तु श्रीस्वामिपादैः प्रतिपादितः द्वितीयो विचारणीयः तथाहि नहि वस्तुशक्तिर्बुद्धिमपेक्षते विषबुद्ध्या पीतामृतवत् इति जारबुद्धेस्तादृशत्वमध्यवस्यन्समादधाति—श्रीशुक उवाच। उक्तमिति। तत्प्रश्नाभिप्रायं ज्ञात्वा सामर्थ्योक्तिर्बहिर्मुखप्रतारणाय तत एव च पुरस्तादित्यव्यक्तवचनेनोत्तरमपि चैद्य इति नामानुक्तिः प्रतिकूलभावत्वात् सिद्धिं पुनः पार्षदरूपामभीष्टां गतिं विष्णुपार्षदाविति श्रीसप्तमोक्तेः अयम्भावः साधयिष्यमाणे हि वस्तुनि सन्देहः प्रवर्त्तते न तु सिद्धे ततो गुणमयं देहं त्यक्त्वा निर्गुणं देहं सङ्गता इति तत्सिद्धानुवादः श्रीकृष्णप्रेमैव सर्वसम्पादक इति वक्तव्यं येषां तस्मिन् द्वेषस्तेषामपि सिद्धिरभूदिति सा च सिद्धिः प्राप्तसायुज्ययोरपि पुनर्विकुण्ठासुतपार्षदता प्राप्तिरेव प्रकृते तु तयोर्वैरभावोपनतकैवल्यप्रतिबन्धेन पार्षदताप्राप्तिवज्जारबुद्ध्युपनतप्रेयसीत्वप्रतिबन्धेन शुद्धसहचरीत्वोपलब्धिरिति ज्ञेया अपि च उभयनामनिरुक्त्या तज्ज्ञानानपेक्षतयैव तेषां सिद्धये तद्गुणविशेषः प्रकाश इति दर्शितं तत्र हृषीकेशमिति सर्वान्तर्य्यामित्वेन वस्तुशक्त्यैव सिद्धिर्नतु भावापेक्षेति भावः। अधोक्षजः प्रियो यासामिति तत्कर्तृकप्रियताविषय इति कैमुत्यसिद्धिः ततश्च द्वेषेऽपि जाते लीनतया स्थितैरपि पुनः स्वगुणैरेव तत्प्राप्तिरिति सुतरामेवाधोक्षजप्रीतिविषयाणां वर्द्धिष्णुतया प्रकटितैस्तैरेव सह तत्प्राप्तिरित्यर्थः। अतो न बुद्ध्यपेक्षेति भावः। अधोक्षजपदेन च अधः अक्षजा प्रकटलीला यस्यासाविति व्युत्पत्या नित्यकिशोरतया स्थितिः सूचिता—

"बृहच्छरीरोप्यविमानरूपो युवा कुमारत्वमियाय कृष्णः। रेमे श्रियासौ जगतां जनन्या स्वज्योत्स्नया चन्द्र इवामृतांशु" ॥

इति पाद्मोत्तरखडोक्तेः तादृशतया नित्यस्थितमुख्यप्रकाशप्रीत्याश्रया इत्यर्थः। अत्रैवं विवेचनीयं पाद्मोत्तरखण्डोक्ता मुनिचर्य्य एता द्विविधाः काश्चित्त्यक्तप्राकृतदेहाः परिशिष्टसच्चिदानन्दरूपाः सिद्धिमेव ययुः काश्चित्तु सीतासंज्ञादिवत्पतिस्मन्येभ्यः छायाकल्पितदेहं दत्वा अप्राकृतरूपेण रासलीलासुखमनुभूय भूयो व्रजमागत्य पुनरपि व्रजगतदेहेनैकीभूतदेहाः स्नेहमेव प्रपुष्णन्ति स्मेति या एता उद्दिश्य स्वयं भगवतोक्त"तास्ता निशाः प्रेष्ठतमेन नीता मयैव वृन्दावनगोचरेण। हीना मया कल्पसमा बभूवुः" इत्यादिना एता एवावशिष्टकषायाभासा विरहलीलायोग्या इति ज्ञेयम्। एताश्च पतिस्मन्यानां सेवां प्राकृतदेहेन श्रीकृष्णदेहे सेवां त्वप्राकृतसिद्धवपुषेति व्यवस्थितौ गोचारणगमनागमादावुभाभ्यां मिलिताभ्यामेव यथा गच्छन्ति तथैवाधुनापि वेणुनादमोहितत्वेन तदनुसन्धानशून्यांश्चलितास्तैर्निरुद्धाः पश्चाज्जातानुसन्धाना गुणमयदेहावेशं त्यक्त्वा ययुरिति तत्तदनुसन्धानं च योगमाययेति सर्वं समञ्जसमिति ॥ १३ ॥

श्रीरामनारायणकृता भावभावविभाविका

श्रीभगवान् शुकस्तदुत्तरमाह—श्रीशुक उवाच उक्तमित्यादिचतुर्भिः। तत्रायमभिप्रायः न हि वस्तुमाहात्म्यं बुद्धिमपेक्षते विषबुद्ध्या पीतामृतस्याप्यमृतत्वप्राप्तिवत्कान्तबुद्ध्या सङ्गतानां बुद्धिमनपेक्ष्य वस्तुमाहात्म्यादेव गुणप्रवाहोपरम इति प्रश्नगतपक्षत्रयोत्तरमभिप्रेत्य कैमुत्यन्यायेन तद्दर्शयति—पुरस्तात्सप्तमस्कन्धे चैद्यो यथा हृषीकेशं द्विषन्नपि सिद्धिं गतस्तथैतदुक्तम् इत्यन्वयः। अत्र हृषीकेशमित्यनेनैतदुक्तं भवति भगवतो हृषीकेशत्वान्न हि तत्प्रेरणं विना केनचिदपि तस्मिन् द्वेषं कर्त्तुं शक्यते न वा परमानन्दात्मकतया निरुपाधिनिरतिशयप्रेमास्पदे साक्षादपरोक्षे तत्र द्वेषः सम्भवति न वा शापोद्भूतासुरस्वभावजमोहेन द्वेषसम्भावना न हि भगवत्पार्षदानां ब्राह्मणेष्वन्यथाबुद्धिः सम्भवति न वा सनकादीनां कोपः शापो वा न वा "यद्गत्वा न निवर्तन्ते तद्धाम परमं मम" इत्यादिवचनैर्वैकुण्ठगतानां पातित्यं न वा शापावसरे एव भगवत्स्मृतिघ्नमोहाभावं प्रार्थयतां मोहसम्भवस्तस्मात्सर्वजनोद्धारार्थमाविर्भावयितव्यलीलोपयोगितया हृषीकेशप्रेरितानामेव तत्तद्द्वेषनिन्दादिचेष्टोपपत्तिस्तथा च द्वेषानुकारे प्रेरितानामपि यदा वस्तुमाहात्म्यादेव गुणप्रवाहोपरमेण स्वप्राप्तिर्दर्शिता तदा किमु वाच्यं प्रेमिणां तत्प्राप्तावित्याह, किमुताधोक्षजप्रिया इति। अधोक्षजम् ऐन्द्रियकं ज्ञानं यस्मात् अधस्सु अधमेषु अक्षजा कृपार्द्रदृष्टिर्यस्येति वा अधः सुखचरणशरणप्राप्तेषु अक्षजा कृपार्द्रा दृष्टिर्यस्येति वा अधः अक्षजः सूर्यः प्रकाशो यस्मादिति वा अधः अक्षमिन्द्रियं मनस्तस्माज्जातश्चन्द्रो आह्लादे वा यस्मादधः अक्षजो मुखजो वह्निस्तेजसि वा यस्मात् अधः अक्षजाः सूर्यचन्द्राग्नयोध्येयासने वा यस्य अधः अक्षजो मनोजो मनोहरत्वादौ यस्मात् स अधोक्षजः प्रियो यासां तथा च प्रेमभावनया तत्र निविष्टा इति किमु वाच्यं तस्मादधोक्षजस्तत्प्रिया इति वा तथा च तेनैव स्वप्रिया गुणप्रवाहोपरमेण स्वस्मिन्सङ्गमिता इति वस्तुमाहात्म्यादेव सर्वसम्भावान्न शङ्कास्पदम् ॥ १३ ॥

श्रीधनपतिसूरिकृता गूढार्थदीपिका

अहो एवंविधरसवत्यां कथानां प्रतिबन्धकमात्रमुक्त्वोत्तरप्रश्नं करोत्यभिप्रेत्य सामर्षमाह—श्रीशुक उवाचेति। पुरस्तात् सप्तमस्कन्धे उक्तमर्थं पृष्टत्वात्करुणया पुनः स्मारयति, चैद्यः शिशुपालः हृषीकेशं भगवन्तं द्विषन्नपि सिद्धिं गतः हृषीकाणामीशं नियन्तारमित्यनेन यथाधिकारं द्वेषादिकं भगवत्प्रेरणयैव भवतीति सूचितम्। यद्वा, नावृतैश्वर्यं द्विषन्नित्यनेन आवृतब्रह्मभावानां जीवानां परस्परं द्वेषादिना सिद्ध्यभावेपि कृष्णेनावृतब्रह्मभावे यथा कथञ्चिन्मनः प्रवेशे सिद्धिर्भवतीति ध्वनितं यथैवं तथा पुरस्तान्मयोक्तं तथा च कृष्णे विरोधवृत्यापि यदि सिद्धिर्भवति तर्हि, परमानुकूलवृत्यासक्तचेतसां गोपीनां सिद्धिप्राप्तौ किं चित्रमित्याह, किमुतेति। अधोक्षजः प्रियो यासां ताः अधोक्षजस्य प्रिया इति वा अध अक्षजन्यं ज्ञानं यस्मादित्यर्थकेनाधोक्षजपदेन "शब्दमस्पर्शरूपमव्ययम्" इत्यादिश्रुत्या सर्वगुणातीतम् आवरणविनिर्मुक्तं परमात्मानं जारबुद्ध्याऽपि सेवन्तीनां या बुद्ध्यास्ता वस्तुमाहात्म्याद्ब्रह्म बुद्धिपरा एव गुणबुद्धय इति ध्वनितं सप्तमस्कन्धे चेत्यमभिहितम्—

"तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा। स्नेहात्कामेन वै युञ्ज्यात्कथञ्चिन्नेक्षते प्रथक् ॥
कामाद्द्वेषाद्भयात्स्नेहाद्यथाभक्त्येश्वरे मनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥
गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृप !। सन्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो" ॥ इति

यद्वा पूर्वं—

"ब्रह्मन्परोद्भवे कृष्णे इयान्प्रेमा कथं भवेत्। योऽभूतपूर्वस्तोकेषु स्वद्भवेष्वपि कथ्यताम् ॥ इति

पृष्टवतस्तवैतदुत्तरं कथनेन मयोक्तम्—

"सर्वेषामपि भूतानां नृप ! स्वात्मैव वल्लभः। इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ॥
कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्। जगद्धिताय सोप्यत्र देहीवीभाति मायया ॥

इत्यादिना किञ्च सप्तमेप्यभिहितमित्याह, यथा वा चैद्य इति। निवृत्तिपक्षेपि समानमिदं पञ्चश्लोकात्मकं प्रकरणम् ॥१३॥

रास-रहस्यम्

र० टी०—"कामाद् द्वेषाद् भयात् स्नेहाद् यथाभक्त्येश्वरेमनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥
गोप्यः कामाद् भयात् कंसो द्वेषाच्चैद्यादयः नृपाः। सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभोः ॥

यथा अनावृतोऽग्निः दाहप्रकाशादिकार्यं करोति न तु आवृतः, एवं पुरस्तात् सप्तमे स्कन्धे उक्तं कथितं "चैद्यः हृषीकेशं द्विषन्नपि सिद्धिं गतः।" अर्थात् आवृताग्निनापि यदि दाहप्रकाशादि सम्भवति तदा किमुतानावृतेन, एवं द्वेषादपि यदि सिद्धिरभीष्टप्राप्तेः सम्भवः किमुताधोक्षजप्रियाः अधोक्षजस्य अतीन्द्रियस्यात्मनः प्रियाः प्रीतिविषयीभूताः सिद्धाः भवन्तीति अर्थात् बहिर्मुखचित्तानामपि कथंचित् भगवच्चिन्तया चेदभीष्टसिद्धिः सम्भवति, कथं नान्तर्मुखचित्तानामिति कैमुतिकस्य भावः ॥ १३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सप्तमस्कन्धोक्तया रीत्या समाधीयते—उक्तमिति। पुरस्तात् सप्तमस्कन्धे एतदत्र वक्तव्यमुत्तरं पुरस्तात् सप्तमस्कन्धे ते तुभ्यमुक्तमेव हृषीकेशं सर्वेन्द्रियेशं सर्वात्मानं द्विषन्नपि सिद्धिं भगवत्प्राप्तिलक्षणां यथाप्रातिकूल्येन कृष्णप्रावण्येन चैद्यो गतः किमुताधोक्षजप्रियाः आनुकूल्येन कृष्णप्रावण्येन सिद्धिं प्राप्ता इति वक्तव्यम् ॥ १३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शुकः किञ्चित्स्मारयन्परिहरति ॥ उक्तमिति। सप्तमे हिरण्यकशिपुप्रस्तावे द्वेषाच्चैद्यादय इत्यादिना चैद्यस्तच्छब्दवाच्यः संश्चासंश्च तथा सिद्धिं सदसद्रूपिणीं मुक्तिं गत इति यदेतत्ते निरूपितम्। द्विषन्नेकस्तत्सङ्गतया द्विषन्निवापरस्तु साक्षात्तयेति विवेकः। फलमुभयानुरूपं यच्छतो हरेरेतज्ज्ञानं तथा तत्तत्कर्मानुसृत्य कारयितुर्न वैषम्यादीत्यादिसम्भावकं हृषीकेशमिति सकलेन्द्रियप्रेरकतया तत्स्वामिनमधोक्षजप्रिया अतदसदाविष्टाः सिद्धिं सतीं समुपेयुरिति किं वक्तव्यम्। तदेतत्प्रेय इति सतां हरिर्हि सर्वप्रेष्ठः। गोपीनां स्वर्गादिमार्गतो गतानां क्लप्ते काले मुक्तिं ऐश्वर्यकृज्ज्ञानभक्त्याद्यनुवृत्तेरिति तात्पर्यमवधेयम् ॥ १३ ॥

श्रीसुबोधिनी

शुकोक्तिः। ते तव पुरस्तात् अग्रे एतदुक्तं यथा चैद्यः शिशुपालः सिद्धिं प्राप्तः हृषीकेशं द्विषन्नपि वैरं कुर्वाणोपि अधोक्षजप्रियाः श्रीकृष्णभक्ताः सिद्धिं यांतीति किमुत वक्तव्यम् ॥ १३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं पृष्टः शुको "निर्गुणज्ञानभक्त्योर्भगवत्प्रादुर्भाव एवोपयोगः। तत्र ज्ञानेन भक्त्या स्वेच्छया वा यदि भगवान् प्रादुर्बभूव तदा तत्सम्बन्धमात्रेणैव मोक्षज्ञानादेरावश्यकत्वम्। नहि वस्तुशक्तिर्ज्ञानादिकमपेक्षते, अन्यथा बुद्ध्याग्निस्पर्शेऽपि दाहदर्शनात्" इत्याशयेनोत्तरमाह—उक्तमेव कैमुत्यन्यायेन द्रढयति—चैद्य इति। यदि हृषीकेशमिन्द्रियादि नियन्तारं कृष्णं द्विषन्नपि चैद्यः शिशुपालो यथा यथावत् सिद्धिं भगवत्सायुज्यं गतः प्राप्तस्तदा अधोक्षजस्य तत्कृपां विना अतीन्द्रियस्य प्रियाः प्रीतिविषया गोप्यः सायुज्यं गतास्तत्र किमुत किमाश्चर्यमित्यर्थः ॥ १३ ॥

अन्वितार्थप्रकाशिका

जीवस्यावृतं ब्रह्मत्वं कृष्णस्य हृषीकेशत्वादनावृतं ब्रह्मत्वमतो न तत्र बुद्ध्यपेक्षेत्युत्तरयति – उक्तमिति ॥ यदत्रोत्तरं वक्तव्यं तदेतत्ते तुभ्यं पुरस्तात्सप्तमस्कन्ध एवोक्तम्। "गोप्यः कामाद्भयात्कंस" इत्यादिना। यदि हृषीकेशं द्विषन्नपि चैद्यः शिशुपालो यथा यथावत् सिद्धिं भगवत्सायुज्यं गतः प्राप्तस्तदा अधोक्षजस्य प्रियाः प्रीतिविषया गोप्यः सायुज्यं गतास्तत्र किमुत किमाश्चर्यमित्यर्थः। निर्गुणज्ञानभक्त्योर्भगवत्प्रादुर्भाव एवोपयोगः। तत्र ज्ञानेन भक्त्या स्वेच्छया वा यदि भगवान् प्रादुर्बभूव तदा तत्सम्बन्धमात्रेणैव मोक्षो न ज्ञानदेरावश्यकत्वम्। नहि वस्तुशक्तिर्ज्ञानादिकमपेक्षते अन्यथाबुद्ध्याऽग्निस्पर्शेऽपि दाहदर्शनात् ॥ १३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्य प्रश्नस्योत्तरं कुर्वन् शुक उवाच उक्तमिति हृषीकेशं द्विषन्नपि चैद्यः शिशुपालः सिद्धिं मोक्षं यथा गतस्तथा त्वां प्रत्येतद्वृत्तांतं मयोक्तं गोप्यस्तु अधोक्षजप्रियाः मोक्षं गतास्तत्र किमुत वक्तव्यं ॥ १३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अस्य प्रश्नस्योत्तरं सप्तकस्कन्ध एवाभिहितमित्याह श्रीशुकः ॥ उक्तमिति ॥ एतदत्र ववतव्यमुत्तरं, ते तुभ्यं, पुरस्तात् सप्तमस्कन्धे एव, उक्तं 'गोप्यः कामाद्भयात् कंसः' इत्यादिना कोऽपि भगवत्यनन्यभावो मुक्तिहेतुरेवेत्यभिहितम्। उक्तेऽप्युत्तरे-कैमुत्यन्यायेनोपपत्तिमाह चैद्य इत्यादिना। चैद्यः शिशुपालः, हृषीकेशं भगवंतं, द्विषन्नपि, यथा यदा, सिद्धिं गतः पुनर्द्वास्थतां प्राप्तः। तदा, अधोक्षजप्रियाः गोप्यः, सिद्धिं ययुः इत्यत्र, किमुत किं वक्तव्यमित्यर्थः। यथेति निदर्शनं वा। यथा चैद्यः द्विषन्नपि, सिद्धिं ययुः। किमुत अत्र किं वक्तव्यमित्यर्थः ॥ १३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

उक्तं पुरस्तादिति : १०.२९.१३.

भाव्या निर्विषयैव वृत्तिरिति न श्रौताशयः किंत्वाहो नित्यानन्दघनात्ममात्रविषया सा चेदिहाव्याहता।
तत्सिद्धैव कृतार्थता सविषयेस्थाने स्थितानामपीत्येतद्भाति तदुत्तरं मुनिकृतं श्रीशौकवृत्त्युक्तितः ॥ ५५ ॥

कृष्णप्रिया

श्रीशुकाचार्य जी महाराज राजा की शङ्का का चार श्लोकों से समाधान करते कहते है कि भैया परीक्षित आ विसर जाने वाले श्रोता कैसे बने ? सप्तम स्कन्ध में शिशुपाल वध प्रसङ्ग में मैं कह चुका हूँ कि जो शिशुपाल का श्रीकृष्ण में शत्रुभाव था तो भी उस शत्रु ने सायुज्य मुक्ति प्राप्त कर ली ॥ १३ ॥

नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप । [1]अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १४ ॥

कर्दमक्षमा

अन्वयः—नृप अव्ययस्य अप्रमेयस्य निर्गुणस्य गुणात्मनः, भगवतः व्यक्ति नृणाम् निःश्रेयसार्थाय (भवति) ॥ १४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु देही कथमनावृतः स्यादत आह । नृणामिति । गुणात्मनो गुणनियंतुः । भगवत एवंरूपा अभिव्यक्तिरतो न देहिसादृश्यमत्र वक्तुं युज्यत इति भावः ॥ १४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

देह संबन्धेनावृतत्वं वदतो–व्याघातो देहावरणस्य मूढेनापि ज्ञातत्वादित्याशङ्कते–नन्विति । वस्तुतो भगवतो देह एव नास्ति 'देहीवाऽऽभाति मायया' इत्यत्रेव शब्दोपादानात् "अशरीरं वा वसंतम्" इति श्रुतेश्चेत्यभिप्रेत्याह–नृणामिति । एवंरूपा प्राकृतरूपा दिव्या अभिव्यक्तिः अवतारः, प्राकट्यमिति यावत् । यतो लौकिकप्रभावचिद्घनमूर्तिरतो हेतोर्न देहिसादृश्यं प्राकृतजनसादृश्यम् । अत्र श्रीकृष्णे । युज्यते युक्तम् । इति भाव इति । भक्तजनार्तिप्रशमनार्थं प्रदर्शितलीलाविग्रहानेककोटिब्रह्मांडाधीशेन नंदनंदनेन कथमन्यस्य तुल्यता संभवेदिति तात्पर्यम् ॥ यतः श्रेयस्साधनहीनानपि मयि यत्किञ्चित्संबंधमात्रवतो जनानहमुद्धरामीति मनसि कृत्वैव भगवतावतीर्णमित्याह नृणामिति द्वाभ्याम् । निश्रेयसं केषुचित्सालोक्यादिकं केषुचित्प्रेम चार्थस्तस्मै । भ्रूविजृंभमात्रेण ब्रह्माडकोटिसंहारसमर्थस्य भूभारभूतकंसादिवधार्थमेव व्यक्तिरन्यथा नोपपद्यत इति भावः । अव्ययस्य प्रतिभक्तजनं स्वात्मदानेनापि न व्येतीत्यव्ययस्तस्य । केन प्रकारेणेति चेदत आह—अप्रमेयस्य, प्रमातुमशक्यस्य । कस्तत्र तत्त्वं जानातीति भावः । यतो निर्गुणस्य प्राकृतगुणरहितस्य, अथ च गुणात्मनः स्वरूपभूतकल्याणगुणमयस्य । न हि अप्राकृतचिदानंदमयगुणसागरः प्रमातुं शक्यो भवेदिति भावः ॥ अत्र तोषिणी—तदेवं तद्ध्यानप्रभाव उक्तः । तत्र भगवद्व्यक्तिसमये तु भगवत्पार्षदस्यागंतुकदैत्यभावस्य चैद्यस्य तथा तादृशश्रीभगवत्प्रेमवतीनां तासां तत्संपादनाय भगवतः साहाय्यमप्यस्ति कैमुत्येन कारणमित्याह—नृणामिति । नृणां जीवमात्राणां निःश्रेयसार्थाय सर्वसाधनफलाय तत्तद्योग्यतासम्पत्पूर्वकस्यलीलानन्दप्राप्तिरूपाय । तं साधयितुमेवेत्यर्थः । व्यक्तिः प्राकट्यं तदर्थावधारणत्वमाह—भगवत इति । जन्यथा भ्रूविजृंभमात्रेण ब्रह्मांडकोटिसंहारसमर्थस्य भूभारसंहरणमात्रार्थं व्यक्तेरनुपपत्तिरित्यर्थः । हे नृपेति । यथा नृणां क्षेकार्थमेवेतस्ततो भवादृशस्य राज्ञो गमनमिति भावः । भगवत्त्वमेवाह—अव्ययस्येत्यादिचतुर्भिर्विशेषणैः । नित्यं नानाप्रकाशैर्नानाभक्तेभ्यः आत्मदानादिनापि न व्येतीत्यव्ययस्तस्य । कुतः—अप्रमयस्यापरिच्छिन्नस्येत्यर्थः । तत्कुतः-निर्गुणस्य मायागुणातीतस्य । ततः कुतः–मायागुणानामात्मनः प्रवर्त्तकस्य । यद्वा–नृणां निःश्रेयसार्थायैव व्यक्तिमात्रं जन्म, अन्यथा कथञ्चिन्न संभवेदित्याह—अव्ययस्य जन्मादिविकाररहितस्य । किञ्च, प्रमेयस्य । तदर्थत्वे हेतुः—गुणात्मन इति । निजकारुण्याद्यशेषगुणानां सुप्तानामिव चेतयितुः प्रकटनपरस्येत्यर्थः । अन्यत्समानम् । श्लोकद्वयेऽस्मिन्नयं भाव इत्यादौ टीकायां बहिर्मुखसंदेहनिरासार्थस्तेषामयमभिप्रायः । ननु ब्रह्मणि कामादिकमपि चेदर्थकरं तर्हि जीवेष्वपि चित्सामान्येनैक्याद्ब्रह्मत्वमस्तीति पत्यादिष्वपि तादृशं स्यात्तत्राह—जीवेष्विति । आवृतत्वे हेतुर्वक्ष्यमाणवैपरीत्यरीत्या हृषीकाधीनज्ञानत्वमेव ज्ञेयम् । तत्र स्वस्मिन्नावृतत्वं बहिर्विक्षेपात्, परेषूपाधिमात्रग्रहणात् । हृषीकेशत्वादिति पूर्ववन्न हृषीकवशस्तदुदयः, अतः स्वप्रकाशतामयतामय एव, ततश्चानावृतमेव ब्रह्मत्वमिति स्थितम् । कामादिना केनापि तत्र प्रवृत्तिर्भवतु वस्त्वनुभवस्तु भवत्येवेत्यर्थः । ननु देहीति–पत्यादिवद्देहित्वेन प्रतीयमान इत्यर्थः । सिद्धान्तमाह—तत्तद्विशेषेण वैलक्षण्यादित्यर्थः । एवंरूपा अनावृतब्रह्मरूपा । न देहिसादृश्यं कुतो देहित्वमित्यर्थः । तद्विग्रहस्यैव स्वरूपशक्तिसिद्धवैचित्रिकपरमतत्त्वैकरूपत्वात्, तच्च विद्वदनुभवसेविततत्तच्छास्त्रप्रामाण्यात् । यथा च व्याख्यातम्—"नातः परं परम यद्भवतः स्वरूपम्" इत्यादि श्रुतिष्विति ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं तद्ध्यानप्रभाव उक्तः तत्र भगवद्व्यक्तिसमये तु भगवत्पार्षदस्यागन्तुकदैत्यप्रभावस्य चैद्यस्य तथा तादृशश्रीभगवत्प्रेमवतीनां तासां तत्तत्सम्पादनाय भगवतः साहाय्यमप्यस्ति कैमुत्येन कारणमित्याह—नृणामिति । नृणां जीवमात्राणां निःश्रेय-

---

[1] अव्यक्तस्य–विज. ।

सार्थाय सर्वसाधनफलाय तत्तद्योग्यतासम्पत्पूर्वकस्वलीलानन्दप्राप्तिरूपाय। तं साधयितुमेवेत्यर्थः। व्यक्तिः प्राकट्यं तदर्थ (त्वा) वधारणार्थमाह-भगवत इति। अन्यथा भ्रूविजृम्भमात्रेण ब्रह्माण्डकोटिसंहारसमर्थस्य भूभारहरणमात्रार्थं व्यक्तेरनुपपत्तिरित्यर्थः। हे नृपेति यथा नृणां क्षेमार्थमेव इतस्ततो भवादृशस्य राज्ञो गमनमिति भावः। भगवत्त्वमेवाह-अव्ययस्येत्यादिभिश्चतुर्भिर्विशेषणैः। नित्यं नानाप्रकारैर्नानाभक्तेभ्य आत्मदानादिनापि न व्येतीत्यव्ययः तस्य कुतः? अप्रमेयस्य अपरिच्छिन्नस्येत्यर्थः। तत्कुतः? निर्गुणस्य मायागुणातीतस्य तच्च कुतः मायागुणानामात्मनः प्रवर्त्तकस्य। यद्वा, नृणां निःश्रेयसार्थायैव व्यक्तिमात्रं जन्म अन्यथा तु कथञ्चित् सम्भवेदित्याह, अव्ययस्य जन्मादिविकाररहितस्य। किञ्च, अप्रमेयस्य तदर्थत्वे हेतुः गुणात्मन इति निजकारुण्याद्यशेषगुणानां सुप्तानामिव चेतयितुः प्रकटनपरस्येत्यर्थः। अन्यत्समानम्। श्लोकद्वयेस्मिन्नयं भावः इत्यादौ टीकायां बहिर्मुखसन्देह निरासार्थः तेषामयमभिप्रायः। ननु, ब्रह्मणि कामादिकमपि चेदर्थकरं तर्हि जीवेष्वपि चित्सामान्येनैक्यात् ब्रह्मत्वमस्तीति पत्यादिष्वपि तादृशं स्यात् तत्राह-जीवेष्विति। आवृतत्वे हेतुर्वक्ष्यमाणवैपरीत्यरीत्या हृषीकाधीनज्ञानत्वमेवेति ज्ञेयम्। तत्र स्वस्मिन्नावृतत्वं बहिर्विक्षेपात्परेषूपाधिमात्रग्रहणात् हृषीकेशत्वादिति पूर्ववन्न हृषीकवशस्तदुदयः, अतः स्वप्रकाशतामय एव ततश्चानावृतमेव ब्रह्मत्वमिति स्थिते कामादिना केनापि तत्र प्रवृत्तिर्भवतु वस्त्वनुभवस्तु भवत्येवेत्यर्थः। ननु, देहीति पत्यादिवद्देहित्वेन प्रयीयमान इत्यर्थः। सिद्धान्तमाह, भगवत एवेति। तत्तद्विशेषेण वैलक्षण्यादित्यर्थः। एवंरूपा अनावृतब्रह्मरूपा न देहिसादृश्यं कुतो देहित्वमित्यर्थः। तद्विग्रहस्यैव स्वरूपशक्तिसिद्धवैचित्रिकपरमतत्त्वैकरूपत्वात् तच्च विद्वदनुभवसेविततत्तच्छास्त्रप्रामाण्यात् यथा च व्याख्यातम्। "नातः परं परम! यद्भवतः स्वरूपम्" इत्यादिष्विति॥ १४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यथाकथञ्चित्सम्बन्धेनापि निजाभीष्टसंसाधकं भावविशेषं श्रीभगवन्तमेव वा श्रीभगवत्प्रभावेण सर्वे प्राप्नुवन्तीत्याह—नृणामिति द्वाभ्याम्। निःश्रेयसं भक्तिः, तदेवार्थः फलं तस्मै, यद्वा, निःश्रेयसं मुक्तिः, तस्यार्थो भक्तिः, यद्वा, निःश्रेयसं भक्तिरेव, तस्यार्थः प्रेमा तस्मै, तत्प्रदानार्थमित्यर्थः। व्यक्तिः प्राकट्यम्, इति साक्षाद्भगवत्त्वमेवाभिप्रेतम्, अत एव भगवतोऽवतारिणः परमेश्वरस्य। यद्वा, नृणां निःश्रेयसार्थायैवेत्यत्र हेतुः—भगवत इति। अन्यथा भ्रूविजृम्भमात्रेण ब्रह्माण्डकोटिसंहारसमर्थस्य भूभार-कंसादिवधार्थं व्यक्तेरनुपपत्तिरित्यर्थः। हे नृपेति, यथा नृणां क्षेमार्थमेवेतस्ततो भवादृशस्य राज्ञो गमनमिति भावः। भगवत्त्वमेवाह—अव्ययस्येत्यादिभिश्चतुर्भिर्विशेषणैः। आत्मदानादिनापि न व्येतीत्यव्ययस्तस्य। कुतः? अप्रमेयस्य अपरिच्छिन्नस्येत्यर्थः। तत् कुतः? निर्गुणस्य मायागुणातीतस्य। तच्च कुतः? मायागुणानामात्मनः प्रवर्त्तकस्य। यद्वा, नृणां निःश्रेयसार्थायैव व्यक्तिर्जन्म, अन्यथा तु कथञ्चिन्न सम्भवेदित्याह—अव्ययस्य जन्मादिविकाररहितस्य, किञ्च, अप्रमेयस्य, तादृशस्यापि व्यक्तौ हेतुः—गुणात्मन इति। निजकारुण्याद्यशेष गुणानां चेतयितुः प्रकटनपरस्येत्यर्थः। अन्यत् समानम्। अथवा ननु, तर्हि कथं परदाराकर्षणम्? तत्राह—अव्ययस्य परदारविनोदेनापि न किञ्चित्तस्य व्येतीत्यर्थः। ननु, तथापि तस्य तेन किं नाम प्रयोजनम्? तत्राह—अप्रमेयस्य दुर्वितर्क्यस्य तस्य लीला केन वितर्कयितुं शक्येत्यर्थः। कुतः? निर्गुणस्य गुणात्मनः, निर्गुणोऽपि सन् यो गुणानामात्मा आश्रयस्तस्य, निर्गुणत्वात्तद्दोषालेपः, गुणात्मत्वाच्च श्रीगोपीभिः सह रतिरिति सिद्धान्तः, यद्वा, ननु तथाप्यस्मत्प्रीत्यर्थं स्वयं विचार्य्योच्यतामिति चेत्तत्राह—निर्गुणस्यापि जनस्य गुणानामात्मनः प्रवर्त्तकस्य रासक्रीडया जगतामेव परमप्रेमसिद्ध्या सर्वसद्गुणसम्पत्तेः। एतदभिव्यक्तिरग्रे श्रीपरीक्षिच्छुकसंवादे प्रश्नोत्तराभ्यां भविष्यत्येव॥ १४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

व्यक्तिरवतारः॥ १४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च, केनापि स्वानन्यविषयकनिरन्तरभावेन भावितमानसानुग्रहीतुमवतीर्णे कामाद्यन्यतमं भावं ये कुर्वन्ति न तेषां मुक्तौ विस्मयः कार्य इत्याह-नृणामिति-अव्ययस्य जीववत्कर्मायत्तोत्पत्त्यादिविकाररहितस्य अप्रमेयस्यापरिच्छिन्नस्य वाङ्मनसागोचरस्य वा सत्त्वादिप्राकृतगुणरहितस्यानन्तकल्याणगुणाश्रयस्य भगवतो भुवि लोके व्यक्तिर्नृणां निःश्रेयसार्थायैव अव्ययस्येत्यादिविशेषणैरेवंभूतस्याप्युत्पत्त्यादि विकाराश्रयत्वादिवद्भावं केवलं लोकानुग्रहार्थम् एवेत्युक्तं तद्व्यक्तेः जीवव्यक्तिवैलक्षण्यञ्च॥ १४॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नन्वाचार्यस्यापि यथास्थितग्रन्थाभिप्रायकथनं विना वक्रगत्या व्याख्याने कोभिप्राय इत्याशङ्क्योत्तरग्रन्थानुकूल्यादित्याशयेनाह-नृणामिति। व्यक्तिरवतारः अन्यथाऽवतारो न घटत इत्यत्र हेतुमाह-अव्यक्तस्येति। ज्ञानादिगुणात्मनः। भगवतो व्यक्तिर्न केवलमसुरनिर्हरणार्थाय किन्तु मोक्षलक्षणपुरुषार्थाय पुरुषार्थस्तु भगवत्प्रसादेन स्यात्स च भक्त्या। सा हरेर्यथास्वरूप-

विज्ञानेन। विज्ञानञ्च गुणोत्कर्षज्ञानपूर्वकं। नत्वन्यथा। "गुणोत्कर्षज्ञातरि यादृशी स्यात्" इतिश्रुतेः तस्माद्द्वेषादिना नित्यसुखानन्दानुभवलक्षणमोक्षो वर्षानन्त्येनापि न स्यात् ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

एवमेव कृष्णस्य महिमा यदयं नृणां निःश्रेयसार्थं प्रादुर्भूतस्तेन तादृशीं लीकां करोतीत्याह—नृणामित्यादि। निर्गुणस्य प्राकृतगुणरहितस्य गुणात्मनो भक्तवात्सल्यादिगुणप्रयत्नस्य आत्मशब्दोऽत्र यत्नवाची ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यतःश्रयः साधनहीनानपि मयि यत् किञ्चित्सम्बन्धमात्रवतो जनानहमुद्धरामीति मनसि कृत्वैव भगवताऽवतीर्णमित्याह—नृणामिति द्वाभ्याम्। निःश्रेयसं केषुचित् सायुज्यं केषुचित्सालोक्यादिकं केषुचित् प्रेमाचार्थस्तस्मै भ्रूविजृम्भमात्रेण ब्रह्माण्डकोटिसंहारसमर्थस्य भूमारभूतकंसादिवधार्थमेव व्यक्तिरन्यथा नोपपद्यते इति भावः। अव्ययस्य प्रतिभक्तजनं स्वात्मदानेनापि न व्येतीत्यव्ययस्तस्य केन प्रकारेणेति चेदत आह अप्रमेयस्य प्रमातुमशक्यस्य कस्तत्र तत्त्वं जानातीति भावः। यतो निर्गुणस्य प्राकृतगुणरहितस्य अथ च गुणात्मनः स्वरूपभूतकल्याणगुणमयस्य न हि अप्राकृतचिदानन्दमयगुणसागरः प्रमातुमशक्यो भवेदिति भावः ॥ १४ ॥

विशुद्धरसदीपिका

ननु, कथमधोक्षजः प्रत्यक्षलीलो जात इत्यत आह, नृणामिति। कामादिविक्षिप्तचेतस्त्वेन भावान्तराभिनिविष्टचेतसां साधकजनानां निःश्रेयसार्थाय शुद्धपरिकरकलेवरप्राप्तिपूर्वकसर्वफलरूपनिजलीलानन्दप्रदानाय व्यक्तिः प्रकटलीला भगवतः भगेन निजश्रिया श्रीराधया नित्ययुक्तयेत्यर्थः। अभेदव्यवक्षया यत्र तत्रापि समानाभिधानमिति ज्ञेयम्। नन्वेवं "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इति श्रीकपिलदेवाभिहितानां विविधभाववतां कथं सिद्धिरित्यपेक्षायामाह—अव्ययस्येति। नित्यं नानाप्रकाशैर्नानाभक्तेभ्य आत्मदानादिना न व्येतीत्यव्ययस्तस्य तदुक्तं श्रीतृतीये "सन्तं वयसि कैशोरे भक्तानुग्रहकातरम्" इति सन्तमिति स्वरूपेण तु नित्यकिशोरं भक्तानुग्रहकातरत्वेन तत्तल्लीलम् इत्यर्थः। तदुक्तं प्रबोधानन्दसरस्वतीपादैः—

> "अयं बृहदधीश्वरो न गणितावतारोप्ययं स्थितो यदुपुरीमसौ मधुपुरी च दिव्याकृतिः।
> व्रजे च मधुरः परो वनचरे च गोभिः समं सखीभिरहरन्मनो मम तु राधिकाकुञ्जगः" ॥

तत्तदलक्ष्यत्वं चोक्तं तैरेव यथा "एकं सख्यापि नो लक्षितमुरसि लसन्नित्यतादात्म्यकान्तं तादृश्यो दूरतोऽन्यद्व्रजति नवगृहेऽन्यत्तु तन्नर्म्मशर्म्म। अन्यत् वृन्दावनान्तर्विहरदथपरं गोकुले प्राप्तयोग्यं विच्छेद्यन्यत्तदेवं लसति बहुविधं राधिका कृष्णरूपाम्" इति एतत्तारतम्येनोपासकतारतम्यमपि तत्रैव—

> "धन्यो लोके मुमुक्षुर्हरिभजनपरो धन्यधन्यस्ततोऽसौ धन्यो यः कृष्णपादाम्बुजरसपरमो रुक्मिणीशप्रियोऽतः ॥
> याशोदेयप्रियोतः सुबलसुहृदतो गोपकान्ताप्रियोऽतः। श्रीमद्वृन्दावनेश्वर्य्यतिरसविवशा राधिकासर्वमूर्द्धा" ॥ इति

तत्कुतः गुणात्मनः मायागुणानाम् आत्मनः प्रवर्त्तकस्य अथवा भक्तवात्सल्यादिगुणवत इत्यर्थः। नृपेति यथाहि भवतो देशयात्रा साधुजनसुखाय दुष्टदमनाय निजानन्दलाभाय चेति तथा भगवतोऽपि प्रकटनमिति भावः ॥ १४ ॥

श्रीरसिकाल्हादिनी टीका

ननु चैद्यस्य ब्रह्मशापाल्लब्धदैत्यदेहस्य जन्मत्रयान्ते पुनः पार्षदरूपतां प्राप्तये लब्धसंभावनस्य देहपातमन्तरं पार्षददेहप्राप्तिरुचिता, स एतासां गुणमयदेहत्यागान्तरमेव नित्यमण्डलप्रवेशः कथमिति चेत्तत्राह येन केन मधुररसातिरिक्तान्यतररसानुभावेनापि संबन्धः श्रीकृष्णं प्रार्थयति बहुशो दृष्टचरत्वादित्याह—नृणामिति भगवतोऽचिन्त्यैश्वर्य—स्वरूपस्य इच्छामात्रेणापि भूभारहरणसमर्थस्य श्रीकृष्णस्यावतारिणोऽभिव्यक्तिः—सामान्यतो भूचरमात्राणां निःश्रेयसेन मोक्षेन सहार्थः। "परमपुरुषार्थो भक्तियोगस्तत्प्राप्तये" यद्वा निःश्रेयसं भावस्तस्यार्थः परं प्रेमा तत्प्राप्तये तत्प्राप्तमित्यर्थः। अवतारिणः श्रीकृष्णस्य भूभारहरण मुख्यं प्रयोजनं नास्ति, किन्तु यादृशो भावो व्रजसुन्दरीषु तादृशं भावं सर्वत्र संचारयितुमभिव्यक्तिः, नृणामित्युपलक्षणं पशु-पक्षि-वृक्षादिष्वपि ज्ञेयम्। तथोक्तं "गावस्ततो गोष्ठमुपेत्य सत्वर"मिति "प्रायो बताम्ब विहगाः मुनयो वनेऽस्मिन्निति"। "अहो अमी देववरामरार्चितमिति"। तेष्वपि भावस्याभिव्यक्तित्वादिति। भगवतः स्वैश्वर्येण ब्रह्मादीनपि वसयितुं समर्थस्य अवतारिणो व्यक्तिरवतारकलाविभूतीनां कार्यकरणार्थमपि हे नृपेति संबोधनम्। यथा श्रीकृष्णेन नरमात्रः प्रेमामृतदानेनानन्दितः तथा त्वयाऽत्रत्येषु नरमात्रेषु भक्तिप्रवर्त्तनेन नराः पालनीया इति। निःश्रेयसार्थायेति तादर्थ्ये चतुर्थी तत्र हेतुत्वेन प्राण-विषय-चतुष्टयम् अव्ययस्येति भक्तेभ्यो निजाङ्गदानेऽपि व्ययरहितस्य तत्किमर्थमात्मानं ददाति तत्र हेतुः गुणात्मनः गुणाः कारुण्यादयस्तैस्तादात्म्यं

प्राप्तस्यात एव कारुण्येनैव भक्तेभ्यः आत्मानं ददाति स्वभावत्वादिति। नन्वात्मदानेऽव्ययत्वं कथं तत्राहः अप्रेमयस्यातर्क्यस्यापरिच्छिन्नस्येत्यर्थः, परिच्छिन्नस्य दाने व्ययो भवति किं च "अचिंत्याः खलु ये भावाः नस्तांस्तर्केण योजयेदिति" तत् कुतः निर्गुणस्य मायागुणातीतस्य तत्रापि हेतुः गुणात्मनः मायागुणप्रवर्तकस्य यद्वा निर्गुणस्य स्वयं गुणरहितस्य गुणात्मनः व्रजसुन्दरीणां गुणे आत्मनि स्वरूपे यस्य आत्मन आदर्शस्थानीयत्वे च तासां नृत्यगानादिकलाकोशलादिगुणानां प्रतिबिंबितत्वात् गुणात्मकत्वं जातमिति भावः। यद्वा गुणात्मनः व्रजदेवीनां गुणाः सौन्दर्यादयः आत्मनि चित्ते यस्य स्वयं निर्गुणस्य आत्मारामस्यात एव निर्गुणत्वमवगणय्य तद्गुणाकृष्टत्वेन तासां गुणमयदेहान्तर्धापनेन शंकू परि दिव्यचक्रगतमंडलप्रवेशः कारितः। ननु निर्गुणश्चेत्कथमेवं कृतवान् तत्राह—अप्रमेयस्य "तर्काप्रतिष्ठानादिति"। यद्वा निर्गुणस्यापि मादृशस्य गुणात्मनः गुणाः कीर्त्तनादयस्तत्प्रवर्त्तकस्य निर्गुणस्याप्यस्मदादीन् रासक्रीडादिवर्णनगुणेषु प्रवर्तयितुं तस्याभिव्यक्तिरिति भावः। अत एवावसाने "विक्रीडितं व्रजवधूभिरिति" सर्वजनं स्वपरं कर्त्तुं रासक्रीडानिर्गमनं स्पष्टीभविष्यतीति। अतो यथा कथंचित्संबंधमात्रं सर्वेषां संसारापगमहेतुः किं पुनः कृष्णप्रियाणामिति ॥ १४ ॥

श्रीरामनारायणकृता भावभावविभाविका

ननु, भगवतः सर्वात्मत्वात्सर्वेषामपि तदभिन्नतया वस्तुमाहात्म्येन बुद्ध्यनपेक्षायां सर्वत्र वस्त्वैक्यात्पुत्रकलत्रादावप्यनुरागमात्रेण गुणप्रवाहोपरमे सर्वमुक्त्या परिदृश्यमानप्रपञ्चोच्छेदापत्तिस्तत्राह—नृणामिति। अयमत्राशयः यद्यपि पुत्रकलत्राद्यात्मनापि सर्वत्र परमात्मन एवावस्थितिस्तथापि तत्राविद्यादिजीवोपाध्यावरणसद्भावेन बुद्धिं विना तदावरणनिरासासम्भवात् तत्र क्रियमाणा प्रीतिर्न गुणप्रवाहोपरमाय अत्र तु नृणामित्युपलक्षणं जीवमात्रस्य वृन्दावनपशुपक्षिद्रुमलतादीनामपि तत्रानुरागस्य वर्णितत्वात् श्रेयोर्थधर्मादिनिःश्रेयसं तु भगवदनुरागो मोक्षश्च तयो भगवत्स्वरूपव्यक्तिं विनानुपपत्तेस्तदर्थाय भगवतो व्यक्तिः, अन्यत्र तु जीवैः साङ्ख्यनैयायिकादिभिर्वैराग्यादिसाधनान्यनुष्ठाय ज्ञानं सम्पाद्यते नाज्ञानबाधद्वारा भगवत्स्वरूपव्यक्तिः सम्पाद्यतेऽत्र तु भगवता स्वेच्छयैव स्वीयभगशब्दाभिधेयनित्यज्ञानेनैव जीवानां निःश्रेयसाय तेषामज्ञानं पराभाव्य व्यक्तिः कृताऽत आवरणाभावाद्बुद्धिमनपेक्ष्य वस्तुमाहात्म्यादेव सिद्धिः। नृप इति सम्बोधनेऽप्ययमभिप्रायः नॄन् पातीति नृप इति व्युत्पत्त्या यथा भवान् स्वेच्छयैव स्वैश्वर्येण नॄन् पाति रक्षति पालयति च तथा भगवानपि स्वेच्छया स्वैश्वर्येणैव नृणां निःश्रेयसाय व्यक्तिं करोतीति भगवतः स्वभगेन सर्वनिःश्रेयसापादने भगव्ययमाशङ्क्याह–अव्ययस्येति, ननु, चक्षुर्गोचरस्य किमिति स्वभगव्यक्तत्वमुच्यते तत्राह, अप्रमेयस्यति—

"नैतन्मनो विशति वागुत चक्षुरात्मा प्राणेन्द्रियाणि च यथाऽनलमर्च्चिषः स्वाः" ॥

इत्यादिवचनात्। ननु, रूपादिमतः कथमप्रमेयत्वं तत्राह–निर्गुणस्येति। "निश्चेतनात्मकशरीरगुणैश्च हीनः" इत्यादिवचनात् प्राकृतरूपादेरेव प्राकृतेन्द्रियगोचरत्वमिति भावः। कथं तर्हि रूपादिप्रतीतिस्तत्राह–गुणात्मनः इति। गुणा अप्यात्मभूता यस्येत्यर्थः। अथ राज्ञो वा सापेक्षरूपचतुर्थोर्थस्य समाधानपक्षे तु यतो नृणां निःश्रेयसार्थाय इयं लीलात्मिका व्यक्तिरतस्तासां गुणप्रवाहाभावेन तदुपरमस्यासम्भवेऽपि यथा यथा नृणां निःश्रेयसं भवेत्तथा तथा लीलाव्यक्त्योपदेशः क्रियते इति भावः। शेषं समानम् ॥ १४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

भक्तितत्त्वज्ञानाऽनधिकारिणोप्युद्धर्तव्या इतीच्छयैव भगवदवतरणम् अतो यदर्थं भगवदवतारस्तस्मिन्नेवार्थे भगवतः शङ्का न युज्यत इत्याशयेनाह—नृणामिति। भगवतः षड्गुणैश्वर्यसम्पन्नस्याभिव्यक्तिकारणरहितस्याभिव्यक्तिः प्रादुर्भावः नृणामविशेषेण सर्वेषां निःश्रेयसार्थाय साक्षात्परम्पदाय वा मोक्षरूपपरमपुरुषार्थलाभायैव न तु भूभारभूतकंसादिवधाय भ्रूविजृम्भणमात्रेणाऽनन्तकोटिब्रह्माण्डसंहारसमर्थस्य क्वचित्संहारकशक्तिलेशमात्रेणावतारेणापि तस्य सुकरत्वात् न च नृणां निःश्रेयसमन्यथा सुकरं भक्तितत्त्वज्ञानयोरधिकारिणोरत्यन्तदुर्लभत्वात्—

"मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः" ॥

इत्यादिना च भगवदिच्छायास्सुकरं तस्या अपि जीवकर्मसापेक्षत्वात् अन्यथा वैषम्यनैर्घृण्यापातात् तस्मात्करुणासागरो भगवान् संसाराऽनले पच्यमानान् जीवानालोच्यावतीर्ण इति भावः, यथा नृपरूपेण भगवतोऽवतरणं नृणां पालनाय तद्वदिति सम्बोधनाशयः "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति श्रुत्या परमात्मनो जीवरूपेण प्रवेशे नामरूपात्मकं संसारविस्तारायान्तःप्रविष्टस्य तिरोहितस्य परमात्मनः पतिपुत्रादिरूपेण स्थितस्य संसृतिचक्रारूढस्य स्नेहादिसम्बन्धेन संसृतिचक्रे भ्रमणातिशय एव न तु तन्निवृत्तिः भगवतस्तु अभिव्यक्तिरित्युक्तमतो यस्तु रूपसाक्षात्कारेण मोक्षः श्रुतिमस्तकेष्वभिहितस्तत्स्वरूपं भगवतोभिव्यक्तिमेवास्तीत्याशयेन भगवन्तं विशिनष्टि–अव्ययस्येत्यादि। अव्ययस्य क्षयरहितस्य सत्यस्य यतोऽप्रमेयस्य प्रत्यक्षादिप्रमाणजन्यवृत्तिफलितचैतन्याविषयस्याऽदृश्यस्य दृग्रूपस्य तत्रापि हेतुमाह—निर्गुणस्य प्रत्यक्षादिप्रवृत्तहेतुगुणविनिर्मुक्तस्य "सत्यं

ज्ञानमनन्तं, विज्ञानमानन्दं ब्रह्म विज्ञातारमरकेन विजानीयात् "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कथं पश्येत् यत्साक्षादपरोक्षाद्ब्रह्म "साक्षी चेताः केवलो निर्गुणश्च" इत्यादिश्रुतेः तथा च सत्यज्ञानानन्दात्मकस्याऽनावृतस्य परब्रह्मणो नन्दनन्दनादिरूपेणाभिव्यक्तिर्नतु जीवस्येव तद्देहाद्यभिमानेन तिरोधानं तस्माद्विषबुद्ध्यापि पीतममृतं यथासुरत्वायैवावकल्पते इति न कोपि विरोधः। ननु, यथोक्तस्य निर्गुणस्य परमात्मनो महावाक्यजन्याखण्डार्थवृत्या आवरणभङ्गमात्रं सम्पद्यते स तु स्वयम्प्रकाशत्वात्स्वयमेव प्रकाशते तस्मात्कथं चक्षुरादीन्द्रियजन्यवृत्तिविषयाकारेणाभिव्यक्तिर्नहि दृश्यमानघटाद्याकारं ब्रह्माभिव्यक्तिमित्युच्यते तावद्विघ्नितस्य दृश्यमानत्वमभिव्यक्तब्रह्मरूपत्वं चेत्येतदुभयं विरुद्धमिति चेत्तत्राह–गुणात्मन इति। गुणानां सत्त्वरजस्तमसां तदात्मिकाया महामायादिशब्दप्रतिपाद्यायाः प्रकृतेरात्मनो नियन्तुः सत्तास्फूर्त्तिप्रदस्याधिष्ठानचैतन्यस्य तथा च सच्चिदानन्दरूपे परब्रह्मणि सर्वथाऽघटितमप्यज्ञानाहङ्कारादिकं यथा प्रतीयते तथा साधकानुग्रहार्थं भगवतस्तत्तद्विग्रहरूपेण भानमपि न विरुद्ध्यते ततो ज्ञानादीनां संसारकारणत्वात्तद्भानं संसारापादकं भगवद्विग्रहस्य तु मोक्षार्थप्रकटितत्वं तद्दर्शनादिकं मोक्षकरमिति विशेषः। "प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया" "मया ह्यद्य मया सृष्टा यन्मां पश्यसि नारद !" इत्यादिशास्त्रात्स्वेच्छोद्बोधिततत्तद्विग्रहस्वानुकूलमायाशक्त्या तथाभूते परमात्मनि तत्तदाकृतिभानमिति सर्वमनवद्यम् ॥ १४ ॥

रास–रहस्यम्

र० टी०—हे नृप ! नॄन् पाति रक्षतीति नृपः, तस्य सम्बोधनम्। मनुष्यशरीरग्रहणेनैव मोक्षाख्या परमकल्याणप्राप्त्यात्मिका रक्षा सम्भवति। यतः मनुष्या एव श्रेयप्रेयविविक्तुं शक्यते नान्याः। "श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः। श्रेयोहि धीरोऽभिप्रेयसो वृणीते प्रेयोमन्दोयोगक्षेमौ वृणीते।" इति श्रुते, अव्ययस्य निर्विकारस्य, अप्रमेयस्य बुद्ध्याद्यगोचरस्य अवाङ्मनसगोचरत्वात्, निर्गुणस्य गुणादिरहितस्य, गुणात्मनः गुणानामात्मा यः सः गुणात्मा तस्य भगवतः परमात्मनः व्यक्तिः मुमुक्षोः स्वस्वरूपेणाविर्भावः अपरोक्षसाक्षात्काररूपः, निःश्रेयसार्थाय मोक्षाय भवतीत्यर्थः ॥ १४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

व्यक्तिः अभिव्यक्तिः प्रादुर्भाव इत्यर्थः। निःश्रेयसार्थाय तत्तदधिकारिकल्याणसिद्धये निर्गुणस्य हेयगुणरहितस्य गुणात्मनः गुणानां कल्याणगुणानामात्मन आश्रयस्य ॥ १४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

न कृत्यमेतदाद्युद्दिधीर्षया प्रवृत्तस्य हर्यवतारस्य निःश्रेयसातिसर्जनं विनेति तं बोधयति॥ नृणामिति। हे नृप गुणात्मनो ज्ञानादिस्वरूपस्य निर्गुणस्य भिन्नगुणा वा सत्त्वादयो वा तद्रहितस्याव्यक्तस्य प्रसादमन्तरेण प्रयत्नसहस्रेण व्यक्तिमगच्छतः। तथाऽपि न सामस्त्येनेत्याह॥ अप्रमेयस्येति। नृणामित्यधिकारित्रितयग्रहः। निःश्रेयसमपि त्रिविधं मतभेदतः। नित्योपलब्धिसूत्राच्च भाषणाट्टीकणादपि। नित्यसंसारिणां लिङ्गभङ्गोऽस्तीति सतां मतमिति श्रीसत्यप्रियगुरुराजैस्तथा श्रीमद्वादिराजतीर्थश्रीपादैश्च तत्स्थानतल्लिङ्गभङ्गहेत्वादिप्रतिपादकपुराणाद्युदाहरणपूर्वकं रचितग्रन्थग्रथनपूर्वकं ललाललातायिनां पतये नम इति नमकव्याख्याने चेमानि कर्माणीति महाभारततात्पर्यनिर्णयलोकस्य चास्माकं विततयोक्तः स चानुसन्धेय इति नात्र विस्तरदरतो व्यालेखि। सदसत्सदसदात्मकविमुक्तिरूपप्रयोजनाय न लिङ्गभङ्ग इति पक्षे व्यावृत्तनिःश्रेयसार्थपदस्य मध्यमविवक्षायां निःश्रेयसनिवृत्तये नित्यबन्धायेति यावदित्यर्थः। तामसविवक्षायां निःश्रेयसपदस्य सन्मोक्षपरतार्थशब्दस्यार्थ स एवेति ज्ञेयम्। सत्पक्षेऽर्थ्यते मनसा प्रार्थ्यत इति स निःश्रेयसं चासावर्थश्चेति सन्मुक्तिस्तस्मा इति नार्थातिरेक इति विवेकः। अचतुरनिपातितो निःश्रेयसशब्दः। भगवतो व्यक्तिर्नास्तीतीतरतदवतारकृत्यमिति तन्मोचनं युक्तमिति। अप्रमेय इति केवलं विशेष्यसङ्गतं चेन्न सरसमिति गुणात्मन इत्यात्मपदसमस्तगुणपदेनान्वेति। ततश्चाप्रमेया ये गुणास्तदात्मान इत्यर्थः सम्पद्यते। ततश्च त्रिलोकनाथः सप्तघटिकाभोजनमित्यादाविवान्वयो ज्ञेयः। न च तत्र समस्तत्वाद्भवत्वयोग्यतयाऽत्र तु कथं समञ्जसोऽन्वयः समस्तेन व्यस्तस्येति वाच्यम्। दीप्तानलार्कद्युतिप्रमेयमिति प्रमेयदीपिकायामुक्तेर्जातां द्युतैर्मितत्वशङ्कामेतच्च सविशेषणविशेषणत्वाद् द्युत्या सम्बध्यत इत्युक्तमिति का कथन्ता। पूर्वं विस्तृतं च ॥ १४ ॥

श्रीसुबोधिनी

हे नृप भगवतो व्यक्तिः प्रकटता मूर्तिरिति यावत् नृणां मोक्षाय अव्ययस्याऽप्रमेयस्य निर्गुणस्य गुणानामात्मनो नियंतुः ॥ १४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

भगवतो नृपेत्यत्र, सर्वैश्वर्यसम्पन्न इत्यारभ्य निरपेक्ष इत्यन्तेन ग्रन्थेन भगशब्दार्थवत्त्वं विवृतं प्रकृतोपयोगित्वेनेति ज्ञेयम् ॥ १४ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

भगवदवतारप्रयोजनमाह–नृणामिति । 'तवाप्येतत् सम्मतम्' इति सूचयन् सम्बोधयति–नृपेति । नृणां निःश्रेयसार्थाय मोक्षार्थमेव भगवतो व्यक्तिः प्राकट्यम् । 'साप्यभिव्यक्तिः स्वेच्छयैव, न कर्माधीना' इत्याशयेनाह–अव्ययस्येति । विकारशून्यस्येत्यर्थः । तत्र हेतुमाह–निर्गुणस्येति, गुणपारतन्त्र्यरहितस्येत्यर्थः । अत एव अप्रमेयस्य, बुद्ध्यगोचरस्येत्यर्थः । 'भूभारहरणादि कार्यं तु सङ्केतमात्रेणापि कर्तुं शक्त' इत्याशयेनाह–गुणात्मन इति । सत्त्वादिगुणनियामकस्येत्यर्थः ॥ १४ ॥

अन्वितार्थप्रकाशिका

ननु देही कथमनावृतः स्यात्तत्राह—नृणामिति ॥ हे नृप ! अव्ययस्य निर्विकारस्याप्रमेयस्य बुद्ध्यगोचरस्य निर्गुणस्यैव गुणात्मनो गुणनियन्तुर्भगवतः घृतस्येव कठिनीभावः, अनावृतब्रह्मरूपा व्यक्तिः प्राकट्यं नृणां निःश्रेयसार्थाय मोक्षार्थमेव अन्यथा न भवेत् । भूभारहरणादिकं त्वन्यथापि भवति अतो न देहिसादृश्यमत्र वक्तु युक्तम् ॥ १४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भगवत इह प्राकट्यं नृणां मोक्षायैव भवति नत्वन्यप्रयोजनार्थम् अतस्तत्र का शंकेत्याशयेनाह—नृणामित्यादित्रिभिः भगवतः सर्वैश्वर्यसंपन्नस्य इह व्यक्तिः देवमनुष्यादिरूपेण प्राकट्यं नृणां निःश्रेयसार्थाय मोक्षार्थं भक्तानां तु स्वलीलादर्शनेनैव परमानंदप्राप्त्यर्थम् अन्यथा भ्रूविजृंभमात्रेण अनेककोटिब्रह्मांडसंहारसमर्थस्य अक्षरब्रह्मादिनित्यमुक्तादिनियमनसमर्थस्य भूभारसंहारमात्रार्थमवतारानुपपत्तिरित्यर्थः, कथंभूतस्याव्ययस्य अविनाशिमूर्त्तेः, अप्रमेयस्य ज्ञानिभक्तप्रसंगहीनैः प्रमानुशक्यस्य निर्गताः गुणाः प्राकृताः सत्वादयो यस्मात्तस्य निर्गुणस्य गुणाः अप्राकृताः सत्यशौचादयः अपहतपाप्मादयश्चासंख्याता आत्मनि मूर्त्तौ यस्य तस्य तदुक्तं श्रुतिस्मृतिषु साक्षी चेताः केवलो निर्गुणश्चेति य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघशोऽपिपासः सत्यकामः सत्यसंकल्प इति श्रुतयः विष्णुपु० सत्वादयो न संतीशे यत्र च प्राकृता गुणाः स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदत्विति सगुणो निर्गुणैर्विष्णुर्ज्ञानगम्योह्यसौ स्मृतः न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि वक्तु शक्या वियुक्तस्य सत्वाद्यैरखिलैर्गुणैरिति एकादेशे च मां भजंति गुणाः सर्वनिर्गुणं निरपेक्षकं सुहृदं प्रियमात्मानं साम्याः संगादयोऽगुणा इति स्कंदे च भुवि धृताकृतेर्जन्म मंगलं चरितमद्भुतं लोकपावनं भवति निर्गुणं सर्वमेव ते भवसि निर्गुणं ब्रह्म यत्परम् तव समाश्रयत्तामसा जना अपि च राजसाः सात्विकाश्च ये ननु भवंति ते निर्गुणास्तस्तो वयमुपास्महे त्वां हि निर्गुणमित्यादिषु ॥ १४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च येन केनापि स्वानन्यविषयकनिरन्तरभावेन भावितमानसान् अनुग्रहीतुमवतीर्णे भगवति कामाद्यन्यतमं भावं ये कुर्वन्ति न तेषां मुक्तौ विस्मयः कार्य इत्याह—नृणामिति ॥ अव्ययस्य जीववत् कर्मायत्तोत्पत्त्यादिविकाररहितस्य, अप्रमेयस्य अपरिच्छिन्नस्य, वाङ्मनसागोचरस्येति वा । निर्गुणस्य सत्त्वादिप्राकृतगुणरहितस्य, गुणात्मनः अनेककल्याणगुणाश्रयस्य, भगवतः भुवि, व्यक्तिः अत्र लोके प्रादुर्भाव इत्यर्थः । नृणां, निःश्रेयसार्थाय एव भवति । अव्यक्तस्येत्यादिविशेषणैरेवभूतस्याप्युत्पत्त्यादिविकाराश्रयत्वादिवद्भावनं केवलं लोकानुग्रहार्थमेवेत्युक्तम् । तद्व्यक्तेर्जीवव्यक्तिवैलक्षण्यं च ॥ १४ ॥

कृष्णप्रिया

परीक्षित् ! वास्तव में भगवान् प्रकृति सम्बन्धी वृद्धि-विनाश, प्रमाण–प्रमेय, और गुणगुणीभाव से रहित हैं । वे अचिन्त्य अनन्त अप्राकृत परम कल्याणस्वरूप गुणों के एकमात्र आश्रय हैं । उन्होंने यह जो अपने को तथा अपनी लीलाको प्रकट किया है उसका प्रयोजन केवल इतना ही कि जीव उसके सहारे अपना परम कल्याण सम्पादन करे ॥ १४ ॥

कामं क्रोधं भयं [1]स्नेहमैक्यं सौहृदमेव [2]वा । नित्यं हरौ विदधतो[3] यान्ति तन्मयतां हि ते ॥ १५ ॥

कर्दमक्षमा

अन्वयः—कामम्, क्रोधम्, भयम्, स्नेहम्, ऐक्यम्, सौहृदम्, एव, च, नित्यम्, हरौ, विदधतः, ते, हि, तन्मयताम्, यान्ति ॥ १५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतो यथाकथंचित्तदासक्तिर्मुक्तिकारणमित्याह । काममिति । ऐक्यं संबंधम् । सोहृदं भक्तिम् ॥ १५ ॥

---

[1] मोहं मैत्रीं–विज. । [2] च–श्रीधर. वंशी. वीर. विज. जीव. विश्व. ध. रा. शु. सु. । [3] विदधते–प्रा. पा. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतोऽनावृतं ब्रह्मैव श्रीकृष्णोऽतो हेतोः। यथाकथंचित् येन केन प्रकारेण। तत्रासक्तिरतिशयेन व्यासंगः। कामम् कांतप्रेमाणम्। क्रोधम् ज्वलनात्मकं, द्वेषमित्यर्थः। भयम् अयं मे मृत्युरिति हेतोः सदा तन्निवृत्त्युपायचिंता। स्नेहः अनुरागः। ऐक्यसौहृदे व्याख्याते एव स्वामिचरणैः। ये विदधते कुर्वन्ति ते तन्मयतां तत्सायुज्यम्, स्फुटीकृतमेतत्सप्तमस्कंधे ॥ तस्मात्त्वया सामान्यतस्तावदेष सिद्धान्तोऽवधार्यतामित्याह – कामं गोपीजनादयः, क्रोधं द्वेषं चैद्यादयः, भयं कंसादयः, स्नेहं वात्सल्यं नंदादयः ऐक्यमात्मारामाः, सौहृदं वृष्णिपांडवादयः नित्यं विदधते। अधुनापि ते ते तं तं भावं कुर्वन्तस्तन्मयतां यांतीति। तासां तासां लीलानां नित्यत्वं ज्ञापयति। तन्मयताम् गोप्यादयस्तदासक्ततां, यथा—स्त्रीमयः कामुक इति। अन्ये सायुज्यम् ॥ अत्र तोषिणी—अस्तु तावद्भगवद्व्यक्तिसमयगतानां वार्ता किन्तु सर्वदातनानामपीयं रीतिरित्याह—काममिति। अत्र कामं द्विविधम्—श्रीगोप्यादीनामिव प्रेममयं, सौरन्ध्र्यादीनामिव रिरंसामयञ्च। क्रोधं द्वेषं चैद्यादीनामिव, भयं कंसादिकानामिव, स्नेहं वृष्णिपांडवानामिव श्रीमद्व्रजवासिनामिव वा, ऐक्यम् आत्मारामाणामिव, सौहृदं क्रथकौशिक्यादीनामिव। तत्र भयद्वेषौ तु नानुमतौ, यः खलु कल्याणगुणमप्यात्मानं भीषणं मन्यते गूढं द्विषतोऽपि तस्य भीतस्य तथा मत्सरादिना साक्षादपि द्विषतो धृष्टस्य भद्राय कल्पते, तस्मिन् कः परमपामरस्तच्च तच्च कुर्यात्। किन्तु, स्नेहं सौहृदमेव वा सर्वेपि कुर्युरिति हि तात्पर्यम्। तदित्थमेवोक्तं श्रीनारदेन–"तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्" इति। केनापीति तत्र योग्येनेत्यर्थः। अतस्तत्रैव तदुक्तम्—"यथा वैरानुबंधेन मर्त्यस्तन्मयतामियात् न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥" तत्र च शास्त्राज्ञा गौरवमयभक्तियोगमतिक्रम्य भावमार्गे हेयस्यापि तस्य तन्मयताकारित्वाय प्राबल्यं दृश्यते इति व्यज्य स्नेहसौहृद्ये एवानुमते। तदित्थमेवोक्तम्–द्विषन्नपीति, तद्वदैक्यञ्च नानुमतम्, तत्र तादृशशतगुणा स्फूर्तेरिति। एवशब्दः एकैकतः कृतार्थीभावाय। पाठांतरे ये विदधते। हि निश्चितम्। तन्मयताम् तत्तद्भावसमुचिताविर्भावं तदेकस्फूर्तिम्। किन्तु, श्रीभगवान्खलु "भक्त्याऽहमेकया ग्राह्यः श्रद्धयात्मा परः सताम्" इति भगवद्वाक्यात्, "योगिभिर्दृश्यते भक्त्या नाऽभक्त्या दृश्यते क्वचित्। द्रष्टुं न शक्यो रोषाच्च मत्सराच्च जनार्दनः ॥" इति पाद्मोत्तरखंडात्, "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीगीतोक्तेश्च। यद्यपि द्वेष्टृप्रभृतिभिस्तस्य याथार्थ्यं नाऽनुभूयते किं त्वन्यथैवेति तथापि तत्प्रभावात्परं परयाऽप्युत्तरकाले याथार्थ्यं स्फुरतीति क्रोधभये अप्यत्र गणिते। 'किमुताधोक्षजप्रियाः' इत्यनेन कामस्तु प्रियत्वातिशयादुत्कर्षित इति विवेचनीयम्। चेति वेति पाठौ समानार्थौ ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अस्तु तावत्तद्व्यक्तिसमयगतानां वार्त्ता किन्तु सर्वदातनानामपीयं रीतिरित्याह—काममिति। तत्र कामं द्विविधं गोप्यादीनामिव प्रेममयं सैरन्ध्र्यादीनामिव रिरंसामयं च क्रोधं द्वेषं चैद्यादीनामिव भयङ्कंसादीनामिव स्नेहं वृष्णिपाण्डवानामिव श्रीमद्व्रजवासिनामिव वा ऐक्यमात्मारामाणामिव सौहृदं क्रथकैशिकादीनामिव तत्र भयद्वेषौ तु नानुमतौ यः खलु कल्याणगुणमात्मानं भीषणं मन्यते गूढं द्विषतोपि तस्य भीतस्य तथा मत्सरादिना साक्षादपि द्विषतो धृष्टस्य भद्राय कल्पते तस्मिन् कः पामरः तच्च तच्च कुर्य्यात् किन्तु स्नेहं सौहृदमेव वा सर्वेपि कुर्य्युरिति हि तात्पर्यम् तदित्थमेवोक्तं श्रीनारदेन "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्" इति केनापीति तत्र योग्येनेत्यर्थः। अतस्तत्रैव तदुक्तम्—

"यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात्। न तथा भक्तियोगेन इति मे निश्चिता मतिः" ॥ इति।

तत्र च शास्त्राज्ञागौरवमयभक्तियोगमतिक्रम्य भावमार्गे हेयस्यापि तस्य तन्मयताकारित्वाय प्राबल्यं दृश्यत इति व्यज्य स्नेहसौहृदे एवानुमते तदित्थमेवोक्तं द्विषन्नपीति तद्वदैक्यं च नानुमतं तत्र तादृशतद्गुणास्फूर्त्तेरिति एवशब्दः एकैकतः कृतार्थीभावाय पाठान्तरे ये विदधते ते हि निश्चितं तन्मयतां तत्तद्भावसमुचिताविर्भावं तदेकस्फूर्त्ति चेति वेति च पाठः समानार्थः। किन्तु, श्रीभगवान् खलु "भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम्" इति श्रीभगवद्वाक्यात् –

"योगिभिर्दृश्यते भक्त्या नाभक्त्या दृश्यते क्वचित्। द्रष्टुं न शक्यो रोषाच्च मत्सराच्च जनार्दनः" ॥ इति

पद्मोत्तरखण्डवचनात् "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीगीतातश्च यद्यपि द्वेष्टृप्रभृतिभिस्तस्य याथार्थ्यं नाऽनुभूयते किन्तु अन्यथैवेति तथापि तत्प्रभावात् परम्परयाप्युत्तरकाले याथार्थ्यं स्फुरतीति क्रोधभयेऽप्यत्र गणिते "किमुताधोक्षजप्रियाः" इत्यनेन कामस्तु प्रियत्वातिशयादुत्कर्षित इति विवेचनीयम् ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतो हरौ यथाकथञ्चित् सम्बन्धमात्रेणापि सर्व्वचित्ताकर्षके सर्व्वदोषहरे वा, अप्यर्थे एव-शब्दः, कामादिकमपि नित्यं कुर्व्वतस्ते कामादि विदधाना जनाः, यद्वा, कामादिना प्रसिद्धा दण्डकारण्यवासिमुनयः केशीकंसादयश्च। यद्वा, ते तव यो हरिस्तस्मिन्नित्यन्वयः। 'विदधते' इति क्वचित् पाठः। हि निश्चितम्। तन्मयतां ध्यानेन हर्य्येकनिष्ठताम्, यद्वा, सारूप्यादिप्राप्त्या

तत्स्वरूपतां प्राप्नुवन्ति। नित्यमिति तत्र तत्राभ्यासेन निष्ठया तन्मयतायामविलम्बत्वं बोधयति, अन्यथा कादाचित्कतया तत्तदावेशाभावेन शीघ्रतन्मयत्वासिद्धिः, सारूप्ये च भक्ताभक्तादिभेदेन सुखविशेषलाभ-केवलदुःखध्वंसादिना तथा श्रीवैकुण्ठपार्षदत्वसिद्धलोकवासित्वादिना वैष्णवसिद्धान्तानुसारेण भेदः स्यादेव। यद्वा, नृणां निःश्रेयसार्थायैवेत्यत्र हेतुमाह—हि यतः कामादिकमपि कुर्व्वन्तस्तन्मयतां यान्तीति। अन्यत् समानम्। सौहृदमिति दृष्टान्तः। वेति क्वचित् पाठः, ततश्च वा-शब्द उपमार्थ एव, तथा चोक्तं श्रीनारदेन सप्तमस्कन्धे (भा० ७।१।२९–३०) 'कामाद् द्वेषाद्भयात् स्नेहाद्‌यथा भक्त्येश्वरे मनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥' इति, किञ्च, 'गोप्यः कामाद्भयात् कंसो द्वेषाच्चैद्यादयो नृपाः। सम्बन्धाद्‌वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ॥' इति तत्र गोप्य इति बहिर्दृष्ट्या केवलमौपपत्यकाममात्रापेक्षया; यद्वा, तन्मयताप्राप्तिमात्रापेक्षयैव कामादीनां सर्व्वेषामेकत्र गणना, फलतस्तु महान् विशेष एवेति दिक्। एतच्च सर्व्वं श्रीभागवतामृते विवृतमेवास्ते, रसामृतार्णवे च महानुभावैः तत्तद्विशेषाभिव्यञ्जनेन विस्तारितमस्ति, अत्रापि यथास्थानमग्रे विवरणीयम् ॥ १५ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तन्मयतां द्वेषादिविस्मरणेन तज्ज्ञानप्रचुरतां शिशुपालो हि कृष्णसौन्दर्यचित्ततया द्वेषं विसस्मार अत एव सर्वेषां भगवच्छेषाणां मोक्षप्रसङ्गः ॥ १५–२० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नित्यं कामाद्यन्यतरं भावं ये हरौ विदधतः कुर्वाणा वर्त्तन्त इति शेषः कामादिविदधज्जनसंसृतिबन्धहारिणि प्रीतिं कुर्वन्तीत्यर्थः। ते तन्मयतां यान्ति स्वार्थेत्र मयट् तत्प्रकारतां तत्साधर्म्यं यान्तीत्यर्थः। हीति प्रसिद्धिश्चैद्यादिषु द्योत्यते प्राचुर्येण वा मयट् ये कामाद्यन्यतमं कुर्वन्ति ते ततस्तज्ज्ञानप्रचुरतां यान्ति तद्‌द्वारा मुक्ता भवन्तीत्यर्थः। कामादीन् कुर्वाणा नित्यं तत्सौन्दर्यचिन्ताप्राचुर्येण कामादीनपि विस्मृत्य मुक्ता भवन्तीति भावः। शिशुपालो हि कृष्णसौन्दर्यचिन्ताप्राचुर्येण द्वेषं विस्मृतवान् तत्र कामो मन्मथप्रयुक्ताभिलाषविशेषः ऐक्यम् एककुलप्रसूतत्वानुसन्धानं स्नेहः सख्यं सौहृदं भक्तिः गोप्यः कामादित्यादिस्थानप्रमाण्यात् हरावित्यनेन कामाद्यन्यतमभावविधायिजनबन्धहरत्वरूपवस्तुस्वभावोभिप्रेतः अज्ञानेनापि स्पृष्टस्याग्नेर्दाहकत्ववत्तत्र वस्तुस्वभावान्मुक्तिप्रतिबन्धकः प्रारब्धकर्मक्षयाभावः उद्‌देश्यान्तरप्रतिपत्तिश्चात एव उद्‌देश्यान्तरप्रतिपत्तेर्दशाननस्य मोक्षाभावः गोपीनान्तु दुःसहेत्यादिना प्रारब्धकर्मक्षयोक्तिर्भगवद्व्यतिरेकेणोद्‌देश्यान्तराभावेन तत्प्रतिपत्त्यभावाच्च वस्तुस्वभावायत्तो मोक्ष उपपन्नः वस्तुतस्तु गोपीनामपि गोवर्द्धनोद्धरणादिभिरीश्वरत्वज्ञानमस्त्येव ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नन्वेवं तर्हि द्वेषादिना कां सिद्धिमाप्नोतीति तत्राह—काममिति। ये हरौ कामादिकं विदधत उपासते ते तन्मयतां यान्ति कामाद्यात्मतामाप्नुवन्ति नतु भगवन्मयतां नित्यस्तिमितानन्दवारिधेः हरेः कामाद्यवाद्धिशब्दो—

"यं यं वापि स्मरन्भावं त्यजन्त्यन्ते कलेवरम्। तं तमेवेति कौन्तेय सदा तद्भावभावितः" ॥

इत्यादिस्मृतिं सूचयति अवधारणार्थो वा कामिनः कामित्वमेव क्रोधिनः क्रोधित्वमेवेत्यादि तदुक्तम्

"विमुक्तावपि कामिन्यो विष्णुकामा व्रजस्त्रियः। द्वेषिणश्च हरौ नित्यं द्वेषिणस्तमसि स्थिता" ॥

इति विशेषद्योतको वा तदुक्तम् –

"भक्त्या हि नित्यकामित्वं न तु भक्तिं विना भवेत्। अन्तः कान्ततया वापि मुक्तिर्भक्तिमतां हरौ ॥

इति च। मनुष्यविशेषवद्‌देवविशेषद्योतनार्थोपि भवति "स्नेहभक्ताः सदा देवाः कामित्वेनाप्सरस्त्रियः" इत्यादेर्भक्त्यैवमोक्षो नान्ये साधनेनेममर्थविशेषं च वक्ति "क्त्या वा कामभक्त्या वा मोक्षो नान्येन केनचित्" इत्यतः कामभक्त्या मोक्षं स्त्रीणां वक्ति "कामभक्त्याप्सरस्त्रीणाम्" इत्यादेः, उपासनायाः विशेषोस्तीति सूचयति "उपास्यः श्वशुरत्वेन देवः स्त्रीणां जनार्दनः" इत्यादेः तत्तद्योग्यतोपासनामन्तरेण मुक्तिः कस्यापि न स्यादितीमं व्याचष्टे "योग्योपासां विना नैव मोक्षः कस्यापि सेत्स्यति" इत्यादेः पतित्वपितृमत्त्वादिविशेषं सूचयति"पतित्वेन श्रियोपास्यो ब्रह्मणा मे पितेति च" इत्यादेः गुरुत्वविशेषमपिब्रूते "गुरुः श्रीब्रह्मणो विष्णुः सुराणाञ्च गुरोर्गुरुः" इत्यादेः सर्वेषामपि ज्ञानेन गुरुत्वं ब्रह्मण उपास्य दैवत्वं विष्णोरितीमञ्चाह "गुरुर्ब्रह्मास्य जगतो देवं विष्णुः सनातनः" इत्यादेः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तेन तस्मिन् ये कामादिकमपि कुर्वन्ति तेपि तन्मयतां यान्ति किं पुनः प्रेमाणमित्याह—कामक्रोधमित्यादि। कामः कुब्जायाः क्रोधः शिशुपालादेः भयं कंसादेः स्नेहं पित्रोः, ऐक्यं व्रजबालानां सौहृदं प्रेमगोपाङ्गनानां तन्मयतामिति यथाधिकारं बोद्धव्यं क्वचित्तन्मात्रमूर्तिः क्वचिल्लयश्च ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्मात्त्वया सामान्यतस्तावदेष सिद्धान्तोऽवधार्य्यतामित्याह, कामं गोपीजनादयः क्रोधं द्वेषं चैद्यादयः भयं कंसादयः स्नेहं वात्सल्यं नन्दादयः ऐक्यम् आत्मारामाः सौहृदं वृष्णिपाण्डवादयः नित्यं विदधत इत्यधुनापि ते ते तं तं भावं कुर्वन्तस्तन्मयतां यान्तीति तासां तासां लीलानां नित्यत्वं ज्ञापयति तन्मयतां गोप्यादयस्तदासक्ततां यथा स्त्रीमयः कामुक इति अन्ये सायुज्यम् ॥१५॥

विशुद्धरसदीपिका

एवं च द्वेषेपि यथोचितसिद्धिरिति स्थिते यथाकथञ्चिदपि तदासक्तिस्तत्प्राप्तिहेतुरिति दर्शयन् सुप्रीतेः कैमुत्यमाह काममिति। साधकचरोणां श्रुतिमुनिरूपाणां गोपीनामिवेति यथाश्रुत एवार्थः "हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात्" इति पाद्मोक्तेः –

"कामाद्द्वेषाद्भयात् स्नेहाद्यथा भक्त्येश्वरे मनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः" ॥

इति सप्तमोक्तेः गोप्यः कामादिति च अन्यथा हेयवर्गप्रथमपठितस्य कामस्योपादेयत्वेन प्रक्रमभङ्गः कल्पनागौरवं च स्यादिति ध्येयम् द्वेषं चैद्यादीनामिव भयं कंसादीनामिव स्नेहं वृष्णिपाण्डवव्रजवासिनामिव ऐक्यम् आत्मारामाणामिव सौहृदं क्रथकैशिकादीनामिव यथाकथञ्चिदेव सहचरीगणानां तु मुख्यं सौहृदं भक्तिमिति टीका च "सा चेश्वरे परानुषक्तिः" इति शाण्डिल्यसूत्रात् अनुषक्तेः परात्वं तत्सुखसुखित्वमेव मूल एव चेत्युक्त्या सौहृदस्यैवान्ययोगव्यवच्छेदेन मुख्यत्वं प्रदर्शितम् अत एव—

"ये मां भजन्ति दाम्पत्ये तपसा व्रतचर्य्यया। कामात्मनोऽपवर्गेशं मोहिता मम मायया" ॥ इति ॥

"जुगुप्सितं च सर्वत्र ह्यौपपत्यं कुलस्त्रियः"।

इत्यादिना च दाम्पत्यमौपपत्यं च यथा तत्र तत्र निन्द्यते न तथा क्वचित्सौहृदमपि प्रत्युत "न पारयेहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः" इत्यादिनास्तूयतेतरामिति साधुव्याख्यातं हरौ सर्वदुःखहरे मनोहरे चेति यथायोगं तन्मयतां क्वचित्तत्तद्भावानुकूलतनुतां क्वचिन्निलीनतामिति विवेकः ॥ १५ ॥

श्रीरसिकाल्हादिनी टीका

व्रजदेवीनां श्रीकृष्णप्राप्तौ संदिहानान् प्रति इममर्थमन्यार्थं निदर्शनेन दृढीकुर्वन् कृष्णप्रियासु कैमुत्यन्यायेन सर्वोत्कृष्टत्वमाह तत्र भगवत्प्राप्तौ इह साधकं तान्युक्तानि तावत्तन्मध्ये द्वेषस्यापि हेतुत्वं तत्प्राप्तौ चैद्यदृष्टांतत्वेन दृष्टार्थकत्वमुक्तम्। एवमन्येषामपि ते तत्प्राप्तिसाधनत्वं वक्ष्न् आद्यत्रिकस्यानूद्यत्वं अन्तत्रिकस्य विधेयत्वमाह। अनूद्यविधेयभेदेन विभिन्नानां सह प्रयोगदर्शनात्। कामोऽनूद्यः स्नेहो विधेयः। कामस्याधिकरणेन स्नेहविशेषदर्शनात्। एवं क्रोधमनूद्यम् ऐक्यं विधेयं क्रोधाधिकरणेन सह ऐक्यं चेद्भवति तदा क्रोधनिवृत्तिदर्शनात्। एवं भयमनूद्यं सौहार्दं विधेयं यदुपादानं भयं तेन सह सौहार्द चेद्भवति तदा भयनिवृत्तिदर्शनात् गृहं संमार्ष्टीतिवत्संभवत्येकवाक्यत्वे वाक्यभेदो हि दूषणमिति–न्यायात्। काममिति हरौ स्वमहिम्ना सर्वदोषहरणशीले कामादिकं विदधतः कुर्वन्तस्तन्मयतां ते यान्ति, हीति निश्चितमेव तत्। चैद्यदृष्टान्तेन तत्र कामं स्त्रीभावेनाभिलाषं कुर्वन्तो दंडकारण्यमुनयः स्वाभीष्टंव्रजे जन्म श्रीकृष्णेन सह रमणं प्रापुः। क्रोधं वैरभावेन कुर्वन्तः चैद्यादयः स्वाभीष्टं पुनः पार्षदत्वं प्रापुः। भयं कुर्वन्तः कंसादयः कीटभृंगवद् भावेन सारूप्यलक्षणं मोक्षं प्रापुः। स्नेहं कुर्वन्तो युधिष्ठिरादयो धर्मांशरूपाः नित्यसेव्यं यथाभिलषितं कृष्णमेव प्रापुः। ऐक्यं सम्बन्धं कुर्वन्तो यादवाः देवांशरूपाः स्वाभिलषितसिद्धलोकवासत्वादिकं प्रापुः। सौहृदं प्रेमलक्षणां भक्तिं कुर्वन्तो ये वैष्णवास्ते स्वाभिलषितम् आश्रयरूपं कृष्णमेव प्रापुरिति सर्वत्राभिषज्यते। नित्यं मरणपर्यन्तं निरन्तरं व्यवधानशून्यमित्यर्थः। यद्यपि कामादिषट्के क्रियमाणे विषयमहिम्ना संसारोपरमो भवत्येव परन्तु साधनभेदात् साध्यभेदः। एतत्साधनकदम्बस्य कदाचित्प्राप्तत्वे तन्मयत्वं न सिध्येदिति। "न वेनः कतम" इत्युक्तेः। तदुक्तं सप्तमस्कंधे कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः" इति नारदवाक्यप्रमाण्यात् अन्येऽप्येवं कुर्वन्तो भगवन्तमेव प्राप्नुवन्ति भावो हि भवकारणमिति प्रसिद्ध्या भावस्यैवानन्यथासिद्धम्। किं च "गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः। संबन्धाद् वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो" ॥ इति कामादिनां पंक्तौ सामान्यतो यद्यपि गणनोक्ता तथापि पुनस्तत्रैवोक्तं "यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात्। न तथा भक्तियोगेन इति मे निश्चिता मतिः" इति। वैरानुबन्धनस्योत्कर्षानुक्तः वैरानुबन्धे विधेये द्वेषाभिनिवेशस्योत्कंठादर्शनादिति। अन्यत्र कामस्याधिकरणेऽभिनिवेशस्य बाहुल्यदर्शनात्। शास्त्राज्ञागौरवे भक्तिमार्गगौरवे कामादेरपकृष्टत्वमेवायाति। तथापि न तथा भक्तियोगेनेति, अभिनिवेशात्कथने वैरानुबन्धस्योत्कृष्टत्वमुक्तम्। ततोऽपि कामानुबन्धे विधेये प्राकृतकार्यविषयमभिनिवेशाधिक्यं भवत्येव अत्र त्वलौकिके कामानुबन्धे विधेये योगादिनामलौकिकाभिनिवेशात्। रसमार्गविचारे क्रियमाणे साधनषट्कमध्ये कामस्यैवोत्कर्षो विषयोत्कर्षात् अन्यथा परमतत्व-

विदोद्भवेनासामहो चरणरजः प्रार्थना कथं क्रियते, किं च एताः परं तनुभृतो भुवि गोपवध्व इत्यभिधानं न स्यात्। ननु कामानुबन्धस्य चेदुत्कर्षस्तर्हि भीष्मेण कथमुक्तं "प्रकृतिमगमन् किल यस्य गोपवध्व" इति कामानुबन्धस्यापकृष्टत्वं सत्यं, भीष्मस्य माहात्म्यज्ञान एवाधिकारः स्वरूपनिष्ठत्वाभावात्। अन्यथा माधुर्यपुंजे शिरीषपुष्पाधिकसौकुमार्य्ये श्रीविग्रहे शस्त्रैः प्रहारो न संभाव्यते अतो रसमार्गाधिकाराभावादेवमुक्तम् अतो न विरोधः। किंच कामादिस्थायिभावेषु विचार्यमाणेषु श्रीकृष्णाख्य-वस्तुसंस्पर्शाव्यभिचारभावे तस्या एव रतेरुत्कर्षः तदुक्तम्—

कामं शरीरसंबन्धविशेषस्पृहयालुता। संनिधानासंनिधानभेदेन संभवेत् द्विधा॥
तज्जन्यायां द्रुतौ चित्ते या स्यात् श्रीकृष्णनिष्ठता। संभोगविप्रयोगाख्यरतिः तासां क्रमाद्भजेत्॥
क्रोध ईर्ष्यानिमित्तं हि चित्ताभिज्वलनं भवेत्। तज्जन्यायां द्रुतौ सा तु द्वेषशब्देन कथ्यते॥
भयं चेतोव्याकुलत्वं स्वोपद्रवकदर्शनात्। उपद्रवकनाशार्थं तत्प्रीत्यर्थं बत द्विधा॥
तत्राद्यं द्वेष एव स्यात् द्वितीयं रतिशब्दभाक्। स्नेहः पुत्रादिविषयः पाल्यपालकलक्षणः॥
सेव्यसेवकभावोऽन्यः सोऽप्युक्तस्त्रिविधो बुधैः। भगवद्दास्यसख्याभ्यां मिश्रितं चापरं जगुः॥
या कृष्णाकारिता चित्ते तज्जन्यद्रुतिशालिनी। पाल्यपालकभावेन सा वत्सलरतिर्भवेत्॥
सेव्यसेवकभावेन या रतिप्रीतिरीर्य्यते। संवधजारतिर्याति पूर्वोक्तां रसतां द्वयी॥
एका वत्सलभक्त्याख्या प्रेयो भक्तिस्तथापरा। तदैक्यं प्रीतिसंयोगात् दृश्यते भोजवृष्णिषु॥

सौहृदं सौहार्दं तच्च भक्तिरेव, तदुक्तं तृतीये "मद्गुणश्रुतिमात्रेण मयि सर्वे गुहाशये। मनोगतिरविच्छिन्ना यथा गंगाम्भसाम्बुधौ। लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम" एषु षट्षु साधनेषु आलम्बनोत्कर्षात्कामजारतेरुत्कर्षः। "शृंगारमिश्रिता भक्तिः कामजा रतिरिष्यते"। यथा वैरानुवंधजरतौ भयजन्यायां च रतौ वैरानुवंधभयत्यागपूर्वकं भगवत्प्राप्तिः, भगवतो यादवत्वानुकरणे सम्बन्धस्य कारणत्वं तदनुकरणपुरस्कृते सम्बन्धेत्युक्तेः। प्राकृतसम्बन्धत्यागपूर्वकमेव कामवत्प्राप्तिः। पाल्यपालकत्वपुरस्कृतः स्नेहः पाण्डवेषु स च प्राकृतेषु भावं त्याजयित्वाऽलौकिकेन भावेन भगवत्प्राप्तिहेतुर्जातः भक्तेर्माहात्म्यं नारदादिषु च दृष्टचरमेवेति दिक्॥ १५॥

श्रीरामनारायणकृता भावभावविभाविका

ननु, कथमनया व्यक्त्या निःश्रेयससिद्धिरित्याशङ्कायां सत्यामस्यां व्यक्तौ ब्रह्मबुद्धौ तदभावे कामादिनापि ब्रह्मभावापत्त्यात्मकनिःश्रेयसमभिप्रेत्य कामादिविदधत्समाधत्ते—कामं क्रोधमिति। हरौ कामादि विदधतो तन्मयतां तत्स्वरूपात्मकं मोक्षं प्रेम्णा तत्र मनोलयं वा यान्तीत्यन्वयः। तत्राभ्यर्हितं हि पूर्वमिति न्यायात् सखिभावनयानुष्ठेयकामस्य विधेयेष्वभ्यर्हितत्वात् गोपिप्रसङ्गप्राप्तत्वाद्वा पूर्वनिपातः, अत्रैवास्य स्वरूपात्मकत्वेन नित्यसिद्धत्वात्तज्ज्ञानस्याऽपि कृत्यनधीनत्वेनाविधेयत्वात् तन्मयतालक्षणफलस्याप्यैक्याभेदात्तत्र विध्यभाव एव। यद्वा, ऐक्यशब्दादभेदोपासनस्वीकारे भवतु तत्रापि विधिः न च विध्यर्थकलकाराश्रवणाद्विध्यभावशङ्कावसरः "य एता रात्रीरुपयन्ति ते प्रतितिष्ठन्ति" इत्यत्रापूर्वार्थत्वेन फलश्रवणेन च "प्रतिष्ठाकामो रात्रिसत्रमुपेयात्" इत्यावश्यकविधिकल्पनवत् यत्र यत्रापूर्वार्थः फलश्रवणं वा तत्र तत्र विधिकल्पनावश्यकत्वात्तथात्रापि भगवद्विषयककामादीनामपूर्वत्वात्तन्मयताफलश्रवणाच्च विधिस्वीकारस्यावश्यकत्वात् न च कामादीनां निषिद्धत्वादविधेयत्वमेवेति वाच्यं "न हिंस्यात्सर्वा भूतानि" इत्यत्रातिनिषिद्धाया अपि हिंसाया "वायव्यं श्वेतमालभेत" इत्यादौ तत्तद्देवयागसम्बन्धेन विधेयत्वं यथा तथान्यत्र निषिद्धस्यापि कामादेर्देवदेवसम्बन्धेन विधेयत्वमेव—

"न मय्यावेशितधियां कामः कामाय कल्पते। भर्जिताः क्वथिता धानाः प्रायो बीजाय नेष्यते॥

इति तन्निषिद्धत्वनिषेधस्य भगवतैव दर्शितत्वात्। किञ्च, कानिचित्कर्माणि स्वरूपत एव श्रेयस्कराणि सन्ध्यादीनि कानिचिदाश्रयमाहात्म्यात् यथा कृष्णचौर्यादीनि कानिचित्तु विषयमाहात्म्यात् यथाभगवद्विषयकामादीनि किञ्च कामस्नेहयोः सख्यभावक्रोडीकृतयोरैक्यस्य च "द्वासुपर्णा सयुजा सखायौ, तत्त्वमसि, अहं ब्रह्मास्मि" इत्यादि श्रुतिसिद्धत्वेन वास्तवतया, विधेयतया च प्रधानत्वेन न निषेधगन्धोपि यत्तु कैश्चित्तत्सुखसुखित्वेन सौहृदस्य प्राधान्यकथनं तत्र यद्यपि मधुराधिपतेरखिलं मधुरमिति श्रीवल्लभाचार्योक्तेः "येन केन प्रकारेण मनः कृष्णे निवेशयेत्" इत्यादिवचनाच्च कृष्णविषयकसर्वभावानां श्रैष्ठ्यमेव निष्कामसेवारूपसौहृदस्य भवतु श्रैष्ठ्यं तथापि नित्यनिर्दुःखपरिपूर्णानन्दविग्रहे दुःखापनोदसुखसम्पादनासम्भवात्—

"नैवात्मनः प्रभुरयं निजलाभतुष्टो मानं जनादविदुषः करुणो वृणीते॥
यद्यज्जनो भगवते विदधीतमानं तच्चात्मनः प्रतिमुखस्य यथा मुखश्रीः"॥

इत्यादिवचनात् जीवानां च सौहृदप्रवृत्तानां "अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्" इत्यादिभिरसुखानां प्रत्युत दुःखिनां भगवति दुःखापनोदसुखकरणसामर्थ्याभावाच्च तथोक्तानुपपत्तिरेव न च कामादिवत् क्रोधेपि विधिस्वीकारे कथमाधुनिकानां केषाञ्चिदपि तत्राप्रवृत्तिरिति वाच्यम् आधुनिकानां शास्त्रैकगम्यभगवतः सैश्वर्यस्यैवावगतौ परमेश्वरत्वबुद्ध्या क्रोधप्रवृत्तिप्रीतबन्धेपि क्रोध विदधतो तन्मयतां यान्तीति वचनात् शिशुपालादीनां फलदर्शनाच्च विध्यभावशङ्कानवतारात् ।। १५ ।।

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अतो यथाकथञ्चित्तदासक्तिमुक्तिकारणत्वात्सम्पाद्येत्याह–कामं प्रेममयं रिरंसामयं वा गोप्यादयः क्रोधं द्वेषं शिशुपालादयः भयं भीतिः कंसादयः स्नेहं पाण्डवादयः, ऐक्यं सम्बन्धे वृष्ण्यादयः स्नेहं भक्तिं नारदादयः ऐक्यमभेदमात्मारामं इति व्याख्या ननु सम्बन्धाद्वृष्णय इति पूर्वोक्तविरोधादभेदस्य यथार्थत्वेन मया कथञ्चिद्रूपत्वाभावात्स्वामिभिर्न व्याख्यातं नित्यं हरौ बन्धहरणायाऽवतीर्णे भगवति विदधतः कुर्वाणा ये ते तन्मयतां सच्चिदानन्दाह्वस्वरूपभगवत्स्वरूपतां यान्ति एवकारेण प्रत्येकं सम्बध्यते न कामादीनां मध्येऽन्यतमस्य यथाधिकारम् अवश्यकर्त्तव्यतां बोधयति वाकारेण कामादीनां तन्मयताप्राप्तौ प्रत्येकं स्वातन्त्र्यं ज्ञापयति एवकारस्य यान्तीत्यनेनापि सम्बन्धस्तथा तथा च यातेवेत्येकत्वं बोधितं नित्यमित्यनेन शूर्पणाख्यादिव्यभिचारे कामादिव्यभिचारे कामादिव्यावृत्तिः यातीति वर्त्तमानापदेशेनेदानीमप्येवं विदधतो यान्त्येवेति द्योतयति ।। १५ ।।

रास–रहस्यम्

र० टी०—यदि संसारे कामं काम्यं किञ्चित् स्यात् तदात्मा एव परमप्रियत्वात् "आत्मनस्तु कामाय सर्वं प्रियं भवतीति श्रुतेः, तं, तथा क्रोधं अधुनाऽपि कथं मे आत्मदर्शनं न भवतीति स्वस्मिन्नेव उचितं, न तु अन्यत्र, भयं यदि इह जन्मनि मे आत्मदर्शनं न भवेत् तदा तु अवश्यमेव महादुःखनिलये जननमरणात्मकसंसारचक्रे पतनं भविष्यतीति, स्नेहं परमप्रेमास्पदे आत्मनि एव कर्तव्यं, सांसारिकवस्तुनः बन्धनकारित्वात्, ऐक्यं ब्रह्मात्मनावस्थानं, सौहृदं सखीभावं समानगुणशीलत्वमन्यत्राभावात् आत्मपरमात्मनोः एव सम्भवाच्च "द्वा सुपर्णा सयुजा सखायाः समाने वृक्षे परिसष्वजाते ।" इति श्रुतेः एवं नित्यं सर्वदा हरौ विदधतो सर्वदुःखहर्तरि आत्मनि धारणं कुर्वतः तन्मयतां ब्रह्मरूपतां यान्ति हि प्राप्नुवन्ति एव ।। १५ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कामं व्रजाङ्गनादिवत् क्रोधं चैद्यादिवत् भयं कंसादिवत् स्नेहं नन्दवसुदेवादिवत् ऐक्यं भेदसहिष्णवभेदसम्बन्धमात्मत्वेनावगच्छन्ति ग्राहयन्ति चेति सूत्रप्रोक्तमौपनिषदानामिव सौहृदं सुहृदां युधिष्ठिरादीनामिव हरौ विदधतः "ब्रह्मविदाप्नोति परम्" इत्यादि श्रुतिप्रोक्ते ज्ञानविषये ब्रह्मणि वासुदेवे ये कुर्वाणाः सन्ति ते तन्मयतां तत्साधर्म्यं यान्ति औपनिषदानां ज्ञानविषयं यत्तत्त्वं तदेव कान्तत्वादिभावेन व्रजाङ्गनादीनां ज्ञानविषयमतो न श्रुतिविरोध इति भाव ।। १५ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कामं क्रोधमिति श्लोके तन्मयतामिति भगवदात्मकताभ्रमं भ्रंशयितुं स्वयं व्याख्याय कामस्य मुक्तावप्यनुवर्तने विहाय कामान्यः पुमांश्चरति निस्पृह इत्यादिविरोधोपरोधं मानाननत उपासनाव्यवस्थां च दर्शयति ।। कामिन इति । नात्र तच्छब्देन हरिपरामर्शः किन्तु कामादिपरामर्श इत्याह । कामिनोयं क्रोधिनो निन्दितकामक्रोधवत इत्येतदादेः सर्वदा सृतावसृतौ चेति सदा भवतीति तन्मयता कामिनो ज्ञानभक्तिसम्पन्नस्य कामिनो तथा क्रोधिनो ज्ञानादिहीनस्य सदा सृतौ तमसि चेत्यादौ क्रोधाद्यात्मकत्वेनैव तन्मयता ज्ञेया । विमुक्तावपि तदवस्थायामपि व्रजस्त्रियः कामिन्यो नित्यं तमसि स्थिता इत्यप्रत्यावृत्तिं कथयति । नित्यमिति द्वेषिविशेषणे द्वेषयोग्यतया सान्तत्यं समर्पयति । इति द्वेषमता इति च स्कान्द इति शेषः । कामना कामिनीनामीदृशीत्याह ।। भक्त्या हीति । कान्ततयोपपतितयाऽप्सरःस्त्रीसामान्यस्य यो यो यदा सङ्गतः स तदा तदा पतिरेवेति कान्ततयेत्यर्थः । भक्तिमतां स्त्रीजनानां चान्मुक्तिर्भवेत् । स्नेहभक्ता देवाः सदा । अत्र स्नेहशब्दः सामान्यप्रीतिमात्रपरो देवशब्दश्च योग्ययशोदादिसत्कामिन्युपलक्षक इति ज्ञेयम् । अन्यथा तदादीनां मुक्त्यनुक्त्यापत्तेः । काश्चिद्यशोदादयः केवलभक्त्यैव कामेन नेत्येवकारार्थविवरणमिति न वैय्यर्थ्यम् । अप्सरः स्त्रियः कामित्वेन भक्ता इत्यन्वयः । कश्चित्काश्चिदप्यनेन कामादिनैव योग्यां भक्तिं भक्त्या देवादीनां कामभक्त्या गोपाङ्गनाऽप्सर आदीनामन्येन भक्तिविरहितकामादिना । गीतोक्ताः कामाश्च मोक्षप्रतिबन्धका इति नात्र ते ग्राह्याः। अपि त्विच्छारूपः स चानुवर्तते मुक्तावपीति न तद्विरोध इति मन्तव्यम् । तदेव मन्दानन्दार्थ विशदयति । अन्येषां न कामतो मोक्ष इत्यर्थः । देवस्त्रीणाम् । कृत्यानां कर्तरि वेति स्मरणाद्देवस्त्रीणामुपास्यापि मोक्षं न सेत्स्यति । अन्यथोपासने किं भविष्यतीत्यत आह ।। अयोग्योपासनेति । उपासना कर्ता तस्यानर्थोऽनिष्टमिष्टनाशश्च भविष्यति तस्मात् । तुस्तरतमभावसूचकः । स्वयाग्यतां ज्ञात्वा हरेरुपासनं कार्यम् । भद्रिकानामके ग्रन्थे श्रिया पतित्वेनोपास्यो ब्रह्मणो ब्रह्मप्राणयोः पितेत्युपास्योऽन्येषां त्रिदशानां पितामहतयोपास्यो मे प्रपितामह इति सर्वजनस्योपास्यो गतं श्रीब्रह्मणोर्विष्णुर्गुरुस्तत्र श्रीमुख्यस्य तथा श्रीरपि गुरुरिति तन्मुख्यं ज्ञानशब्दयोरितिवज्ज्ञेयम् । सुराणां च गुरोर्गुरुर्गुरुर्विरिञ्चस्तस्य गुरुः परमगुरुरिति यावत् सर्वजनानां पुरुषोत्तमो मूलभूतगुरुरस्य

जगतो गुरुर्ब्रह्मा सनातनो विष्णुर्दैवम्। सर्वजनानामित्यन्वेति। इति पूर्वोक्तप्रकारेणोपासनं कार्यम्। अन्यथा तु कथञ्चन न कार्यम्। अनर्थश्रुतेरिति भावः॥ ततश्चायं मूलार्थः॥ कामं क्रोधं स्नेहं प्रीतिमात्रं मैत्रीं सौहृदं चैत्यादिकं हरौ नित्यं विदधतः कुर्वन्तो ये नाभ्यस्ताच्छतुरिति नुमाभावस्ते तन्मयतां कामाद्यात्मकतां यान्ति। क्रोधमयतां तु तामसा यान्तीति। हिते। हितगतौ वृद्धौ चेति स्मरणात्। आमन्दादिहितसहितत्वाद्धितेति नित्याभिवृद्धये मोक्षे हिते गतिरूपे तमसीत्यर्थः। प्राप्ते सतीत्यर्थः॥ १५॥

श्रीसुबोधिनी

नित्यं तदासक्तिर्मोक्षहेतुरित्याह कामादिकं नित्यं हरौ विदधतस्ते तन्मयतां तद्रूपतां यांति॥ १५॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कामं क्रोधमित्यत्र। नन्ववतारसमये पूर्वोक्तभक्तनिमित्तं पृथगाविर्भावोपेक्षितोथवा तेनैव तत्फलसाधनमिति सन्देहे निर्णयमाहुः **एकस्येति**। उक्तस्थले तेनैव तत्फलसाधनं न पृथक्तदपेक्षेत्येकस्यैवाविर्भावस्योभयरूपत्वं भवति। एकत्र विनियुक्तस्यान्यत्र विनियोगो न न्यायसिद्ध इत्याशङ्कानिरासाय निर्णायकन्यायमाहुः **संयोगेत्यादि**। यथा होम एव नियुक्ता जुहूः पर्णमयीत्वगुणयोगात्पापश्लोकश्रवणाभावमपि साधयति, न त्वेतदर्थं पृथक्सा तन्मयी क्रियते, 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोती'ति श्रुत्या होमार्थाया एव तन्मय्यास्तस्या एतत्फलसाधकत्वोक्तेः, तथा प्रकृतेपि भूम्यादिक्लेशव्ययनिमित्तकाविर्भावस्यैव तन्द्भक्तयोगे तत्तत्फलसाधकत्वमिति न पृथक्तदपेक्षेत्यर्थः। अत्रेदमपि ज्ञेयम्। पुष्टिमर्यादाभेदेन द्विविधानामपि भक्तानां फलसाधनं सर्वशक्तिप्राकट्यपूर्वकमवतीर्णेन पूर्णनैकेनैव स्वरूपेणैव कर्तुं शक्यम्। तत्रापि केवलमर्यादामार्गस्थापनायाविर्भूतेन पुष्टिमार्गीयभक्तेष्टपूरणं न क्रियते। एवं केवलपुष्टिमार्गीयेणाप्याविर्भावेन। अत एव दण्डकारण्यस्थर्षीणामिष्टपूर्तिर्न कोसलेन्द्रेण कृता। श्रीमद्गोकुलचन्द्रेण च यज्ञपत्नीनां, पुष्टिलीलानधिकारात्। अग्रे मथुरादिषु प्रद्युम्नादिरूपेण लीलाकरणात्तत्तदनुरूपं फलदानमिति। **नित्यं हरावित्यत्र, स हि सर्वदुःखहर्तेति**। भावनाविषयस्वभावादेव न दुःखभानमित्यर्थः। नित्यमित्यादिना तन्मयत्वं विवृतम्। तथा स्फुरण उपपत्तिमाहुः **सर्वत्र भगवदावेशादिति**। अतिविगाढभगवद्भावनायां देहेन्द्रियप्राणान्तःकरणजीवेष्वपि तदावेशात्तेषु तथा स्फूर्तौ तत्सम्बन्धिष्वपि तथैव भानमित्यर्थः। एतदेव **जीव** इत्यादिना विवृतम्। ननु प्रश्नोत्तरं वाक्याभ्यामेव सम्पन्नम्, अनेनापि श्लोकेन स एवार्थः पर्यवस्यतीत्येतत्कथनं व्यर्थमित्याशंक्य तत्तात्पर्यमाहुः **तादृशीमिति**। एवं बोधनार्थमित्यर्थः॥ १५॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

कामं क्रोधं भयं स्नेहमित्यत्र जीवे इति का० २५५$\frac{३}{४}$, २५६$\frac{३}{४}$। एतेन तन्मयतां यान्तीत्यत्रोपपत्तिरुक्ता, **यतो** भावनातो जीवादिषु हरिराविष्टो भवेत्, **यथा ज्ञाने** सति **पूर्वप्रपञ्चलयो भवति तथा यतो** भावनातोपीत्यर्थः॥ १५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अतः गोप्य इव कामम् शिशुपालादिवत् क्रोधं वा, कंसादिवद्भयं वा, यशोदादिवत्स्नेहं वा ऐक्यं पाण्डवादिवत् सम्बन्धं वा ज्ञानिवदभेदं वा, सौहृदं नारदादिवद्भक्तिं वा, नित्यं निरन्तरं ये हरौ विदधतः कुर्वाणाः भवन्ति ते हि तन्मयतां यान्ति तत्सायुज्यं प्राप्नुवन्त्येव। प्रत्ययान्तरस्य प्रतिबन्धकत्वमाशङ्क्य नित्यमित्युक्तम्॥ १५॥

अन्वितार्थप्रकाशिका

काममिति॥ अतो गोप्य इव कामं शिशुपालादिवत् क्रोधं वा कंसादिवद्भयं वा यशोदादिवत्स्नेहं वा पाण्डवादिवत् ऐक्यं सम्बन्धं वा ज्ञानिवदभेदं वा नारदादिवत्सौहृदं भक्तिं वा नित्यं निरन्तरं ये हरौ विदधतः कुर्वाणा भवन्ति ते हि तन्मयतां यान्ति तत्सायुज्यं प्राप्नुवन्त्येव। प्रत्ययान्तरस्य प्रतिबन्धकत्वमाशङ्क्य नित्यमित्युक्तम्॥ १५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ऐक्यं सख्यसंबंधं सौहृदं भक्तिं तन्मयतां तस्य श्रीकृष्णस्य सायुज्यादि चतुर्विधां मुक्तिं तदेकपार्षदत्वं च॥ १५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अतो यथाकथंचित्तदासक्तिर्मुक्तिकारणमित्याह॥ काममिति॥ कामं, क्रोधं, भयं, स्नेहं, ऐक्यं, सौहृदं च, नित्यं हरौ, विदधतः कुर्वाणाः, ये भवन्ति, ते तन्मयतां यान्ति एव हि। स्वार्थेऽत्र मयट्। तत्प्रकारतां तत्साधर्म्यं यान्तीत्यर्थः। हिशब्दश्चैद्यादिष्वेतत्प्रसिद्धिद्योतकः। तत्र कामो मन्मथप्रयुक्ताभिलाषविशेषः, क्रोधभये प्रसिद्धे, स्नेहः सख्यं ऐक्यमेककुलप्रसूतत्वानुसंधानं, सौहृदं भक्तिः॥ १५॥

कृष्णप्रिया

भगवान् से केवल सम्बन्ध हो जाना चाहिए। वह सम्बन्ध चाहे जैसा हो—काम का हो, क्रोध का हो या भय का हो; स्नेह, नातेदारी या सौहार्द का हो। चाहे जिस भाव से भगवान् में नित्य-निरन्तर अपनी वृत्तियाँ जोड़ दी जाय वे भगवान् से ही जुड़ती हैं। इसलिए वृत्तियाँ भगवन्मय हो जाती हैं और उस जीव को भगवान् की ही प्राप्ति होती है ॥ १५ ॥

न चैवं विस्मयः कार्यो भवता भगवत्यजे। योगेश्वरेश्वरे कृष्णे यत एतद् विमुच्यते ॥ १६ ॥

कर्दमक्षमा

अन्वयः—यतः, एतत्, विमुच्यते, अजे, भगवति, योगेश्वरेश्वरे, कृष्णे, एवम्, भवता, न च, विस्मयः, कार्यः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

न च भगवतोऽयमतिभार इत्याह। न चैवमिति। यतः श्रीकृष्णादेतत्स्थावरादिकमपि विमुच्यते ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न तत्रेदमाश्चर्यमित्याह—न चेति। अतिभारः दुर्घटः। एवं विस्मयः गुणधियां गुणप्रवाहोपरमः कथमित्येवंरूपः संदेहः। भवतेति। गर्भादारभ्य श्रीकृष्णभक्तेन त्वया न कर्तव्योऽन्येन क्रियतां नामेत्याह—यतः श्रीकृष्णादेतज्जगद्विमुक्तं भवति, यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते "नाऽपरेण" इति श्रुतेः। स्थावरम् वृक्षादि। अत एवोक्तं ब्रह्मणा—'वृंदावने किमपि गुल्मलतौषधीनाम्' इत्यादि। आदिना पाषाणादिग्रहः। तत्प्रसिद्धमहिल्योपाख्याने रामायणे अवतारभेदेप्यवतारिणोऽभेदात् "य एव रामश्च स एव कृष्णः" इति चिरंजीवभट्टोक्तेः॥ न चेति। अन्येन विस्मयं क्रियतां नामात्रार्थे भवता तु गर्भादारभ्य तन्महिमाऽभिज्ञेन न कार्यः। गोचारकत्वेऽपि भगवति, देवकीपुत्रत्वेऽप्यजे, गोपस्त्रीलांपट्येपि योगेश्वराणामपीश्वरे। कृष्णे सर्वावतारिणि। यत 'एतत्स्थावरादिकमपि विमुच्यते' इति स्वामिचरणाः। यद्वा–तल्लीलापरिकराद्भिन्नमपि जगदधुनापि तत्तत्कामस्नेहादिभावमनुस्मृत्य विमुच्यते गुणप्रवाहान्मुक्तं भवति॥ अत्र तोषिणी–न चेति। अन्येन क्रियतां भवता गर्भादारभ्य तन्महिमाभिज्ञेन न कार्य एवेत्यर्थः। अत एव भवतेति गौरवेणोक्तं न तु त्वयेति। विस्मयाऽकरणे हेतुविशेषः—भगवति अशेषैश्वर्ययुक्ते। ननु कथं तर्हि देवकीगर्भतो जन्म तत्राह—अनेन जीववन्न जायते किन्तु स्वेच्छयैव, भक्तवात्सल्यादिना स्वयमाविर्भवतीत्यर्थः। भगवत्त्वादेव योगश्वरेश्वरे तत्रापि कृष्णे सर्वतः परिपूर्णाविर्भाव इत्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न चेति अन्येन क्रियतां नाम भवता गर्भादारभ्य तन्महिमाभिज्ञेन न कार्य्य एवेत्यर्थः। अत एव भवतेति गौरवेणोक्तम् नतु त्वयेति विस्मयाकरणे हेतुविशेषः भगवति अशेषैश्वर्ययुक्ते। ननु, तर्हि कथं देवकीगर्भतो जन्म ? तत्राह—अजे जीववन्न जायते किन्तु स्वेच्छयैव भक्तवात्सल्यादिना स्वयमाविर्भवतीत्यर्थः। भगवत्त्वादेव योगेश्वरेश्वरे तत्रापि कृष्णे सर्वतः परिपूर्णाविर्भाव इत्यर्थः ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमीदृशो विस्मयः सन्देहः, आश्चर्य्यबुद्धिर्वा पुनर्न कार्य्य इत्यर्थः, भवतेति; अन्येन क्रियतां नाम, भवता तु गर्भादारभ्य तन्महिमाभिज्ञेन न कथञ्चिदपि कदाचिदपि कार्य्य एवेत्यर्थः। अत एव गौरवेण भवतेति, न च त्वयेत्युक्तम्, विस्मयाकरणे हेतुः—भगवति अशेषैश्वर्य्ययुक्ते। ननु तर्हि कथं देवकीगर्भतो जन्म ? तत्राह—अजे जीववन्न जायते, किन्तु स्वेच्छयैव भक्तवात्सल्यादिना स्वयमाविर्भवतीत्यर्थः। ननु, तर्हि देवक्यादीनां पुत्रतया कथं प्रतीतिरस्तु ? तत्राह—योगो दुर्घट-सुघटनायां सामर्थ्यविशेषस्तस्येश्वराः, श्रीशिवसनकादयस्तेषामपीश्वरे, अतः स्वेच्छया स्वयमाविर्भावेऽपि शक्तिविशेषेण श्रीदेवक्यादिपुत्रतापि सम्भवेदित्यर्थः, अचिन्त्यैश्वर्य्यत्वात्तस्याः, अत एव यतः कृष्णे नराकृतिपरब्रह्मणि, यद्वा, अत एव कृष्णे दुर्वितर्क्यानन्तमाहात्म्यामृतसागरतया सुप्रसिद्धे इत्यर्थः। अथवा भगवति परमेश्वरे, अतोऽजे जीववत् प्राकृतजन्मरहिते, कृपया स्वयमेवाविर्भावात्, अत एव योगेश्वराणां भक्तियोगनिष्ठानां श्रीनारदादीनामीश्वरे भक्त्या सेव्ये भक्तिविशेषप्रकटनात्, किंवा योगेश्वराणां महाश्चर्य्यशक्तिमतामीश्वरे निजाश्चर्य्याशेषैश्वर्य्यप्रकटनात्, तत्रापि कृष्णे श्रीगोकुलोत्सव इत्यर्थः। यतः कृष्णादेतच्चराचरात्मकं सर्वमेव जगदशेषसाधनरहितमपि तदिच्छामात्रेण तदीय-यत्किञ्चित् सम्बन्धाभासमात्रेणापि स्वयमेव विशेषेण मुच्यते, श्रीवैकुण्ठलोकं प्राप्नोतीत्यर्थः। एतच्च भावीन्द्रप्रस्थादि-तरुलतादि श्रीवैकुण्ठप्राप्त्यभिप्रायेण; तथा च प्रथमस्कन्धे श्रीकुन्तीस्तुतौ (भा० १।८।४०) 'इमे जनपदाः स्वृद्धाः सुपक्वौषधिविरुधः। वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षिताः ॥' इति अत स्वृद्धा इति पुनरेधन्त इत्यनेन च श्रीवैकुण्ठप्राप्तियोग्यतैवाभिप्रेता, अन्यत्तद्व्याख्यातम्। यद्वा, ननु बहुलयागयोगादिमहासाधनेन दुःसाध्यापि तन्मयता

कथं यथाकथञ्चित् कामादिसम्बन्धेन सिध्येत् ? तत्राह —न चेति। अर्थः स एव, अतोऽस्या रासक्रीडायाः श्रवणादौ मुक्त्यादिपरैरपि कामक्रीडामयत्वबुद्ध्या नोदासितव्यम्, किन्तु सर्वैरेव निजेष्ट-तदतीतसिद्धये विशेषतो भक्तैः परमफलत्वेनेयं सदा सेव्यैवेति प्रागेतत्प्रकरणोत्थापनतात्पर्य्यं दृढीकृतमिति दिक्। अथवा श्रीव्रजेन्द्रव्रजगोपीत्वेन भाग्यविशेषात्ता अपि हतविघ्नास्तेनैव देहेन सद्य एव श्रीकृष्णं संगतास्तदानीमेव रासक्रीडामलभन्तेति व्याख्येयम्, तथाहि—अन्तर्गृहे गताः पाशैर्बद्धा पत्यादिभिर्गृहान्तःस्थापिताः, अत एव कथमप्यलब्धविनिर्गमास्तद्भावनायुक्तास्तस्याः श्रीकृष्णेन सह रासक्रीडाया भावनायुक्तास्ततश्च प्रक्षीणबन्धना ध्यानस्य प्रभावेणैव सुश्लथीभूतबन्धनाः सत्यो गुणमयं पत्यादिभिर्बहुधा बद्धत्वात् पाशमयं पाशप्रचुरं देहं ध्यानेनैव जहुः, नाहं केनापि बद्धास्मि, किन्तु मुक्तैवेति प्रत्येकं भावितवत्य इत्यर्थः। इति भावनात्यागेनैव देहत्याग उक्तः, यथा श्रीब्रह्मणः सृष्ट्यारम्भे तत्तद्भावनात्याग एव तत्तद्देहत्यागः, तथा च तृतीयस्कन्धे ततश्च ध्यानप्रभावेण सद्य एव प्रक्षीणबन्धनं पत्यादिभिः कृतं पाशैर्नियन्त्रणं किंवा द्वारबन्धादिप्रतिबन्धो यासां तथाभूताः सत्यः, विशेषणे तात्पर्य्यम्—देहस्य पाशमयतां जहुरित्यर्थः। ततश्च परमात्मानमपि तं श्रीनन्दकिशोररूपमेव संगताः। तत्र हेतुः–जारबुद्ध्या विशिष्टा इति। यद्वा, परमात्मानं परमप्रियमित्यर्थः अयं जारबुद्धौ हेतुः, अन्यथा तादृशप्रियतमतासिद्धेः। ध्यानप्रभावमाह–ध्यानेनैव दुःसहो यः प्रेष्ठविरहतीव्रतापस्तेन धुतं निरस्तं तुच्छीकृतमशुभं जगतामशेषदुःखभोगो याभिस्तस्मादपि तद्विरहदुःखस्याधिक्यात्, किञ्च, क्षीणं तुच्छतां गतं मंगलं जगदशेषसुखभोगो याभ्यस्तस्मादपि श्रीकृष्णाश्लेषसुखस्याधिक्यात्। अन्यं समानमेव। ततश्च (भा० १०।४७।३७) 'या मया क्रीडता रात्र्याम्' इत्यस्यायमर्थः—पत्यादिभिर्बद्धत्वाद् व्रज आस्थिता अपि पश्चान्मद्वीर्य्यचिन्तया अनालब्धरासा नाप्राप्तरासा बभूवुः, किन्तु आपु रासमेवेति श्रीपरीक्षित्प्रश्नस्य चायमर्थः–कान्तबुद्ध्या ध्यानेन गुणेषु श्रीकृष्णस्य कारुण्यादिषु, न तु गुणातीतरूपे धीर्यासामिति ध्यानस्य न्यूनता सूचिता, तथापि पत्यादिभिर्बन्धनार्थं प्रयुक्तायाः पाशपरम्पराया उपरमो निवृत्तिः कथमिति श्रीशुकदेवश्च, यथा कथञ्चिद्ध्यानेन संसारबन्धादपि विमुक्तिः स्यात्। श्रीकृष्णप्रियतमानां तासां तद्ध्यानविशेषेण पाशबन्धनान्मुक्तिर्जातेति किं वक्तव्यमिति कैमुतिकन्यायेनैव। द्वेषादिना ध्यानादप्यभीष्टसिद्धिमाह—उक्तमित्यादिना। अन्यत् सुसंगतमेव ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

न चेति। एवमेवं सति कृष्णविषये भवता विस्मयो न कार्यः, विस्मयासम्भावनां द्योतयितुं विशिनष्टि—अधोक्षजे अधःकृता अनितरविषया अक्षजा इन्द्रियवृत्तयो यस्मात्तस्मिन् स्वविषयककामक्रोधादिमज्जनेन्द्रियाणामन्यविषयानभिमुख्यावहे तथा कर्त्तुं समर्थानामपीश्वरे नियन्तरि कामादिप्रयुक्तसमाधिनिर्वाहकजनेश्वरे वा भगवति तदुपयुक्तज्ञानादिगुणाश्रये यतः कृष्णाद्धेतोरेतत्स्थावरादिकमपि विमुच्यते तस्मिन् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यथा हिशब्दोपक्षिप्ता बहवो विशेषाः शास्त्रान्तरसिद्धाः सन्ति तस्माद्भगवति विस्मयो न कार्य इत्युपसंहरति—न चैवमिति। विस्मयः आश्चर्यबुद्धिर्भगवताप्येवमकारि किमुतास्माभिरिति दर्पो वा "चित्रे दर्पे च विस्मयः" इति यादवः। भगवत्यैश्वर्यादिगुणसामग्रीमतीत्ययं हेतुरौत्पत्तिकलक्षण इत्याह, अज इति। न जायते इत्यजः सौभर्यादियोगेश्वरा अपि योगबलेनातिमानुषं कुर्वन्ति किमुत तदीश्वरोयमिति भावेनाह–योगेश्वरेश्वर इति। कृष्णविषयः प्रश्नः परिहारोन्यविषय इवेयते अतः कथं संशयनिस्तारः ? इति शङ्कानिरासाभिप्रायेणाह, कृष्ण इति। हेत्वन्तरमाह—यत इति। यतो यस्मात्कृष्णादेतज्जगद्विमुच्यते संसारमुक्तं भवति यस्य प्रसादात्परमार्त्तिरूपादस्मात्संसारान्मुच्यते "नापरेण" इतिश्रुतेः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

एवं क्रोधावेशं विहाय शिष्यवात्सल्यादुपदिशति न चैवमित्यादि। पुनरेवं विस्मयो न च कार्य्यः नैवं कार्य्य इत्यर्थः भवता श्रीकृष्णप्रभावज्ञानां पौत्रेण कुत्र कृष्णे अन्यत्रवरं सन्देहः क्रियतां कीदृशे अजे स्वप्रकाशे भगवति अचिन्त्यपरमैश्वर्य्ये योगेश्वराणामपि ईश्वरे कर्तुमकर्तुमन्यथाकर्त्तुं समर्थे एतेन तस्मिन् ब्रह्मज्ञानेनापि न किञ्चिद्भवति कान्तज्ञानेनापि तदङ्गसङ्गमङ्गलत्वं भवतीत्यन्यथाकर्तृत्वे योगेश्वरेश्वरता गत एतत्तरुगुल्मादिकमपि विमुच्यत इति मुक्तिकर्तृत्वे योगेश्वरेश्वरता अभक्तानां कृतार्थताकरणे अकर्तृत्वे योगेश्वरश्वरता ॥ १६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अन्यत्रावतारे विस्मयः कर्त्तुं युज्यते, नैवात्रेत्याह न चैवमिति। कृष्णे योगेश्वरेश्वरे एवं विस्मयो न च कार्यः, च-कारः पुनरर्थे, पुनर्न कार्य इत्यर्थः। यतो यं वीक्ष्य एतत्तरुगुल्मादिकमपि विमुच्यते, तस्य किं ब्रह्मतया ज्ञानेन ? अतः कृष्णे परमकान्तबुद्धिर्यथा सुरसा श्रेयस्करी च भवति, तथास्मिन् ब्रह्मधीरिति अत्र विस्मयो न कार्य इति महावाक्यार्थः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

न चेति अन्येन विस्मयः क्रियतां नाम अत्रार्थौ भवता तु गर्भादारभ्य तन्महिमाभिज्ञे न न कार्यः गोचारकत्वेपि भगवति देवकीपुत्रत्वेष्यजे गोपस्त्रीलाम्पट्येपि योगेश्वराणामपीश्वरे कृष्णे सर्वावतारिणि यत एतत्स्थावरादिकमपि विमुच्यते इति श्रीस्वामिचरणाः, यद्वा तल्लीलापरिकराद्भिन्नमपि जगत् अधुनापि तत्तत्कामस्नेहादिभावमनुसृत्य विमुच्यते गुणप्रवाहान्मुक्तं भवति॥ १६ ॥

विशुद्धरसदीपिका

न च भगवतोयमतिभार इत्याह—न चैवमिति। विस्मयः विरुद्धभावनामपि शुद्धभावोपलब्धावद्भुतत्वं सादरमाह—भवता नित्यपरिकरेणेत्यर्थः। यत्र केवलनिष्ठावतां माहेश्वरीसंहितोक्तानां महासिद्ध्यादिसहचरीत्वप्राप्तिर्निबाधका तत्र बाधानवरतभावानां तत्तत्प्राप्ताविति भावः। भगवतीति पूर्ववत् पूर्णप्रकाश इत्यर्थः, अजे स्वेच्छयाविभूतत्वेपि नित्यकिशोर इत्यर्थः। बृहच्छरीर इत्यत्र प्रतिपादितमेव। ननु, योऽपानामयोग्यानां च समाना गतिरसमञ्जसेत्यत आह—योगेति। परमोपायज्ञ इत्यर्थः। यद्वा, योगोत्र परिकरदेहसंयोगः तदीश्वरास्ते ते च प्रकाशास्तेषामपीश्वरे मूलरूप इत्यर्थः। ततश्चायोग्यानां ब्रह्माख्यतत्प्रभावविशेषप्राप्तियोग्यानां च तत्तद्भावानुसारेण यत्तद्रूपप्राप्तिरिति लब्धवासुदेवसायुज्य–चैद्यादेर्विकुण्ठासुतपार्षदत्वप्राप्तिवदिति साक्षात्तत्प्राप्तिनिर्देशस्तु अभेदाभिप्रायेण तदुक्तं श्रीरसामृतसिन्धौ—

"यदरीणां प्रियाणां च प्राप्यमेकमिवोदितम्। तद्ब्रह्म कृष्णयोरैक्यात्किरणार्कोपमाजुषोः" ॥ इति

कुतः यतो हेतोः एतदखिलमपि जगद्विमुच्यते कस्तत्र तत्तद्भावाविष्टानां निजनिजोचितपरिकरत्वप्राप्तौ सन्देह इति भावः। यद्वा, एतदिति स्वहृदि हस्ते निधायाह—एतन्नित्यमुक्तं मम स्वरूपं ब्रह्म तदपि विमुच्यते विशिष्टां मुक्तिपरिकरतां लभते "विमुक्तश्च विमुच्यते" इति श्रुतेः, किमुत भावका मुच्येयुरिति दैन्यमपि सूचितम्॥ १६ ॥

श्रीरसिकाल्हादिनी टीका

तथापि विस्मृतमुखं राजानं तमालक्ष्य सोपालंभवचनेन विस्मयमपाकरोति न चैवमिति। अतोऽसंभावना विपरीतभावनाविष्टाः भक्त्यभावात् विस्मयं कुर्वन्तु नाम भवतोऽनुचितमेतत्। श्रीकृष्णमाहात्म्यस्य बहुशः श्रुतपूर्वत्वात् दृष्टचरत्वाच्च भवता कृष्णे एवंविधे विस्मयो न कार्यः। कीदृशे भगवति अचिन्त्यैश्वर्ये स्वैश्वर्य्येण संसारहेतूनपि कामक्रोधादीन् गुणप्रवाहोपरमहेतून् विधातुं समर्थे तदुक्तं श्रीमुखेन "न मय्यावेशितधियां कामः कामाय कल्पते। भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते" इति, अनुभवाननुभवे यदि चेत्त्वया विस्मयः क्रियते तदा ह्यन्योपि करिष्यति अनुभवाननुभवादेवेति, पुनः कीदृशे अजे यदि शुक्रशोणितसम्बन्धेन प्राकृतजीववत् श्रीकृष्णस्यापि जन्म भवेत्तदा विप्रतिपत्तिपूर्वकः प्रश्नः स्यात् तत्तु नास्तीत्याह यतो अजे प्राकृतजन्मरहिते देवक्यां वत्सलरसालम्बनभूतायां नित्यमातृत्वेन सिद्धायां जन्म स्वीक्रियत एव स्वेच्छया भक्तवात्सल्येनाविर्भवति। यशोदानन्दनेति देवकीनन्दनेति स्वरूपं अजत्वं धर्मः। बहिस्थाप्यतः प्रवेशघटनार्थमुक्तम्। यथा बहिरानन्दपूर्णत्वेन स्थितिः तथाऽनन्दरूपे देवकीगर्भप्रवेशोऽभिलाषिगेति अतोऽजे विस्मयो न कार्यम्। ननु देवकीनन्दने प्रसिद्धेऽजत्वं कथमिति चेत्तत्राह–योगेश्वरेश्वरे इति योगस्तु "अघटितघटनासामर्थ्यं" तेन योगबलेन भोगार्थमनेकानि शरीराणि कृत्वा भगवत्प्रसादलब्धसामर्थ्याः संतो योगिनः कायव्यूहेन भोगं भुक्त्वा स्वाभिलाषितां गतिमाप्नुवन्ति। तेषां योगस्त्वागन्तुको धर्मः भगवत्यनागन्तुक इत्येतावानेव विशेषः। भगवांस्तु तद्धर्म्मविषिष्टोऽपि अन्येषां योगफलदाता योगमापद्यतस्तद्देहानामलौकिकत्वं संपादनेन नित्यमंडलप्रवेशे विस्मयो न कार्य इति। पुनः कीदृशे कृष्णे कृषिभू वाचक इत्याद्यर्थस्तु यौगिको रूढस्तु यशोदास्तनन्धये रूढिर्योगमपहरतीति न्यायात्। यशोदासम्बन्धेनैव व्रजौकसस्सु स्नेहाधिक्यं सूचितं सर्वे सर्वेपु स्वसम्बन्धिपु स्निग्धा भवन्तीति प्रसिद्धिः, इयं लीला निर्दोषपूर्णगुणविग्रहे कृता एतदनुभवायोग्येषु विस्मये विद्यमानेऽपि भवता विस्मयो न कार्य इति। एतत् सम्बन्धवैभवमाह—यतः श्रीकृष्णाद्धेतोः एतत्स्थावरादिकमपि विमुच्यते। अयं भावः कोऽनुराजन्निन्द्रियवानिति। इन्द्रियवत्तेनाधिकारे सति यत्र भजनक्रिया दृश्यते तया चेदनर्थनिवृत्तिरिति सिद्धान्तस्य न काचिद्विप्रतिपत्तिः। यतो भजनक्रियायोग्ये स्थावरादिके भगवत्संबन्धमात्रेणाप्यनर्थनिवृत्तिः दृश्यते। दृष्टार्थकत्वेन तदा विस्मयो न कार्यः। यमलार्ज्जुनादौ श्रीकृष्णसंबंधस्यानन्यथासिद्धत्वेन दृष्टचरत्वात्। श्रीमुखेनाप्युक्तं—"अहो अमी देववरामरार्चितमिति" बहुशः श्रुतत्वाच्च श्रीशुकः स्वानुभूतं कथयित्वा राजानमपहतविस्मयं कृतवानिति॥ १६ ॥

श्रीरामनारायणकृता भावभावविभाविका

फलितमाह—न चैवमिति। एवं सति यत्र भगवतो जीवोपाध्यावृतत्वं तत्रावरणनिवृत्यै बुद्ध्यपेक्षायामपि यत्र भगवतः स्वकृपमा स्वेनैव भगेन व्यक्तिस्तत्र मुणप्रवाहोपरमाय बुद्ध्यपेक्षानावश्यकत्वे सति यत्र च यथा जनोद्धाराय भगवतो लीलाव्यक्तिस्तत्र निर्मोहवैरादीनां ततल्लीलोपयोगिमोहवैराद्यानुकारे तथा गुणप्रवाहशून्यानामपि तत्तद्गुणप्रवाहतदुपरमाद्यनुकारे सम्भवति सति भवता गर्भे एव दृष्टभावनरूपस्वकृपाभगव्यक्तभगवत्प्रभावेण, भगवति विस्मयो न कार्य्यः। न हि स्वतः सिद्धनिरतिशयषडैश्वर्यस्य किमप्यसम्भावितम्। ननु, गोपसुतस्य कथमीदृक्त्वं ? तत्राह—अजे इति। कथं शरीरस्याजत्वं तत्राह, कृष्ण इति—

"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" ॥

इति वचनात् । सत्यानन्दस्वरूपे श्रौतसत्यानन्दत्वसम्भवनाय योगेश्वराराध्यत्वमप्याह—योगेश्वरेश्वर इति । कैमुत्यन्यायेन तद्गुणप्रवाहोपरमं दृढयति—यत इति । यतो यन्नामग्रहणध्यानमात्रेण एतदिति एतत्समस्तविश्वमपि विमुच्यते—

"अहो बत श्वपचोऽतो गरीयान्यज्जिह्वाग्रे वर्तते नाम तुभ्यम् । तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृह्णन्ति ये ते" ॥

"सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम् । सद्यस्तपस्वी भवति पङ्क्तिपावनपावनः" ॥

"अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः" इत्यादिवचनात् तदा किमु वाच्यमधोक्षजप्रियाणां गुणप्रवाहोपरमे पक्षान्तरे तु किमर्थमीदृग्लीला व्यक्तिः यत्र गुणप्रवाहशून्यानामपि गुणप्रवाहतदुपरामयोरनुकार इत्याकाङ्क्षायामाह—यत एतदिति । यतः सत्यामीदृग्भगवल्लीलायान्तद्गानध्यानादिना एतद्विश्वं विमुच्यते भगवतो भगवतीनां च न स्वप्रयोजनाय किमपि कृत्यं किन्तु जनोद्धारायैव ॥ १६ ॥

श्रीधनपतिसूरिकृता गूढार्थदीपिका

ननु, उक्तेऽप्यर्थे विस्मयाच्छिष्येण पुनः प्रश्नः क्रियतेऽतः किमिति सामर्षं भवद्भिरुत्तरं दत्तमिति चेदप्रसिद्धे ह्यर्थे उक्तेऽपि कदाचिद्विस्मयावेशात्पुनः प्रश्नो भवेदनेकवारमनुभूते समस्तशास्त्रेषु प्रसिद्धे परमात्ममुखात्सम्यक् श्रुतेसुमनस्कस्य विस्मयोऽपि कर्तुमयोग्य इत्याशयेनाह—न चेति । गुणप्रवाहेत्येवमसम्भावनालक्षणो विस्मयः भवता तु गर्भवासकालादारभ्यैतावत्कालपर्यन्तं भगवन्माहात्म्यमनुभूतवता अवारितमपि ब्रह्मास्त्रं यो वारितवान् तस्य ह्येनोऽनिवर्तनीयसंसारनिवर्तने कः परिश्रमः इति सर्वविस्मयनिवारकजन्मवता जन्मकाल एव कोऽसौ मम रक्षक इति परीक्षणेन परीक्षिदिति नामवता न च कार्य्यः । कदापि न कर्तव्यः, एवम्भूतो विस्मयस्तु अज्ञानिनाम् अश्रद्दधानानां संशयाविष्टचेतसां वा भवति न तद्विलक्षणतावतां भवादृशानाम् अज्ञत्वादिकन्तु सर्वानर्थकारणत्वाद्दूरतः परिहरणीयं तदुक्तम्—

"अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति । नायं लोकोऽस्ति न परो न सुखं संशयात्मनः" । इति

तत्रापि भगवति षड्गुणैश्वर्य्यसम्पन्ने येन तस्योद्धारो यद्विषयकाङ्क्षया वा तस्य प्रतिबन्धस्तदाविर्भावेन तदाकाङ्क्षापूर्त्या वा मोचनसमर्थे अत एव अजे जन्महेत्वविद्याकामकर्मवासनादिविनिर्मुक्ताज्जन्मशून्ये लोकानुग्रहायाविर्भूत्या दिव्यजन्मादित्वेपि नास्त्यजत्वादिव्याघात इति भावः । किञ्च, योगेश्वरेश्वरे योगेश्वराब्रह्मादयः तेषामपीश्वरे आदिकारणे नियन्तरि भगवत्त्वाजत्वमहेश्वरत्वादिज्ञानवतोपि मुक्तिप्रदे तदुक्तम्—

"अहमादिर्हि देवानां महर्षीणां च सर्वशः । यो मामजमनादिञ्च वेत्ति लोकमहेश्वरम् ॥
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते" । इति

यद्वा, यत्प्रसादाद्योगेश्वरा अपि मोक्षदानक्षमास्तेषामीश्वरे को विस्मयः, एवं त्रिभिः पदैः मोचनसामर्थ्यमभिधाय किञ्च, मुक्तिप्राप्योऽपि स एवेत्याह—कृष्णे सदानन्दस्वरूपे यतो येन केनापि प्रकारेणाश्रिताद्येतच्चराचरं सर्वमपि विमुच्यते तथा च गुणैश्वर्ये प्रादुर्भूतजन्माद्यनर्थसमूहे स्वस्यापि मोक्षोपाययोगादिशून्ये आवृतसदानन्दस्वरूपे अनृतजडदुःखदेहादितादात्म्यापन्ने जीवेऽस्त्येवं विस्मयः, न तु यथोक्ते परमात्मनि तत्रापि भवत इति भावः ॥ १६ ॥

रास-रहस्यम्

र० टी०—एवं पूर्वोक्तप्रकारेण साधनसम्पन्ने सति अजे जन्महेत्वविद्याकामकर्मवासनादिविनिर्मुक्तत्वातज्जन्मरहिते योगेश्वरेश्वरे योगीनां सनकादिनामीश्वराः ब्रह्मादयः तेषामपि ईश्वरे आदिकारणे "भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ।" इति श्रुतेः, कृष्णे "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥" इति कृष्णाख्ये परब्रह्मणि, भगवति "ब्रह्मवेद ब्रह्मैव भवती"ति श्रुतेः, भगो भाग्यं तद्वाति मुमुक्षोः, अन्तःकरणे आविर्भूते स्वस्वरूपेण प्रकटीभूते, यतः प्राक् स्वस्यानात्मजन्मजरादुःखदेहादितादात्म्यापन्ने मोक्षोपाययोगादिशून्ये आवृतसदानन्दस्वरूपे जीवे सम्प्रति ब्रह्मात्मैक्यस्थितिदर्शनेन न विस्मयः कार्यः भवता परीक्षितेन परिसमन्तात् आत्मेक्षणयोग्येन इत्यर्थः । यतः यस्मात् एतत् जीवत्वं विमुच्यते निवर्तते ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

न च तत्तदधिकारिनिःश्रेयसकरणे कश्चिच्छ्रम इत्याह, न चैवमिति । यतः श्रीकृष्णादेतत् स्थावरादिकमपि विमुच्यते तस्मिन्कृष्णे कामादिनिमित्तेन स्वाशक्तानपि विमोचयतीति विस्मयो न कार्यः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उक्तमर्थं पर्यवसाययति ॥ न चेति ॥ परदाररत्यादिश्रेष्ठापराधान्नान्यदोषस्य लेपस्तेजीयसामित्यादेर्देवादितेजीयसां यदि न दोषावहस्तदा का कथा यस्य श्रीशस्य प्रसादादसारसंसारनिवृत्तिस्तस्येत्याह ॥ योगेश्वरेश्वर इति । यत एतज्जगद्विमुच्यते तस्य कथमेवं प्रवृत्तिरिति तात्पर्यं सत्सम्भावकम् । योगेश्वराश्चतुराननादयस्तेषामीश्वरे स्वामिनीति । इदमत्रैवेति कुत इत्यतोऽज इति । विस्मयो भवताऽकार्यो न कर्तव्य इत्यर्थः ॥ १६ ॥

श्रीसुबोधिनी

योगेश्वरेश्वरे भगवत्यजे कृष्णे भवता त्वयैवं विस्मयो न कार्यः यतो हरेरेतत्सर्वं विमुच्यते ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्ये विस्मयं कुर्वन्तु, भवता तु गर्भ एव प्रभावस्य दृष्टत्वाद्भगवति कृष्णे एवं मोक्षदाने असम्भावनारूपो विस्मयो नैव कार्य इत्यन्वयः । तत्र हेत्वन्तरमाह—यतः कृष्णात् एतत्कृपापात्रं स्थावरजङ्गमप्राणिमात्रं विमुच्यते । मोक्षदाने सामर्थ्यमाह—योगेश्वरेश्वर इति । तत्र हेतुमाह—अज इति । कर्माधीनजन्मरहित इत्यर्थः । तत्र हेतुः—भगवतीति ॥ १६ ॥

अन्वितार्थप्रकाशिका

न चेति ॥ यतः कृष्णात् एतत्कृपापात्रं स्थावरजङ्गमप्राणिमात्रं विमुच्यते तस्मिन् अजे योगेश्वरेश्वरे कृष्णे भगवति भवता एवं मोक्षदाने असंभावनारूपो विस्मयो नैव कार्यः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

योगेश्वराणां महामुक्तानामपि ईश्वरे नियमनसमर्थे यतः श्रीकृष्णात् तं प्राप्य एतत्संबंधप्राप्तो स्थावरजंगममपि विमुच्यते ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नेति ॥ हे राजन्, एवं सति भवता, अजे जीववत्कर्माधीनजन्मवर्जिते, योगेश्वराणामपीश्वरस्तस्मिन्, यतः श्रीकृष्णाद्धेतोः, एतत् स्थावरादिकमपि, विमुच्यते । तस्मिन् कृष्णे भगवति, विस्मयः, न च नैव कार्यः ॥ १६ ॥

कृष्णप्रिया

परीक्षित् ! तुम्हारे जैसे परम भागवत भगवान् का रहस्य जाननेवाले भक्त को श्रीकृष्ण के सम्बन्ध में ऐसा सन्देह नहीं करना चाहिए । योगेश्वरों के भी ईश्वर अजन्मा भगवान् के लिए भी यह कोई आश्चर्य की बात है ? अरे ! उनके संकल्प मात्र से भौहों के इशारे से सारे जगत् का परम कल्याण हो सकता है ॥ १६ ॥

ता दृष्ट्वान्तिकमायाता भगवान् व्रजयोषितः । [1]अवदद् वदतां श्रेष्ठो वाचः पेशै[2]र्विमोहयन् ॥१७॥

कर्दमक्षमा

अन्वयः—वदतां श्रेष्ठः, भगवान्, ताः, व्रजयोषितः, अन्तिकम्, आयातः, दृष्ट्वा, वाचः पेशैः, विमोहयन्, अवदत् ॥१७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रस्तुतमाह । ता दृष्ट्वेति । वाचःपेशैर्वाग्विलासैः ॥ १७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रकृतमनुसरति—प्रस्तुतमिति । वदतां श्रेष्ठः चतुर्मुखशतमुखसहस्रमुखव्यासादिश्रेष्ठः । ताः गोप्यः । 'पेशोंगे दीप्तौ हेलायां चूर्णने पुंसि' इति माधवः । उपेक्षाप्रार्थनाबोधकद्व्यर्थकवाक्यैर्विमोहयन्नवदत् । तत्रोपेक्षाद्योतकैर्विशेषेण मोहयन् आमुग्धा इव कुर्वन् । प्रार्थनागमकैस्तु विशेषेण स्नेहवतीः कुर्वन्निति विशेषः । अवाच इति छेदे लज्जया किमप्यवदन्तीरिति पेशैः सौंदर्यैरित्यर्थः ॥ प्रासंगिकं विरोधं समाधाय प्रस्तुतमाह– भो वेणुनादाकृष्टाः । वदतां कालदेशपात्रौचित्येन वचनचातुर्यवतां मध्ये श्रेष्ठः । पेशैः अवयवैः 'पिश– अवयवे' घञन्तः प्रयोगः । वाचोऽवयवाः वाच्यलक्ष्यव्यङ्गबोधका ये रूक्षाः स्निग्धाश्चांशास्तैर्विमोहयन् । वेणुनादेन मोहिता अपि ता विशेषेण मोहयितुमत्र ताः प्रति रूक्षोक्त्यैव भगवतस्त्रयो मनोरथाः सेत्स्यंति । प्रीतिविषयस्य कान्तस्य ममौदासीन्ये दृष्टेऽप्यासां प्रीतिलेशोऽपि न ह्रसतीति प्रीतेः शुद्धतां लोके दर्शयिष्यामीति, तथा– संप्रयोगे वैपरीत्यमिवाद्य नायिका-

---

१. उवाच–वीर. । २. पाशैः–विज. ।

धर्ममवहित्थामयं वाम्यमहं ग्रहीष्यामि नायकधर्मौत्सुक्यप्रकटनमयं दाक्षिण्यमेता ग्राहयिष्यामीति मननेऽपि वैपरीत्यं रचयिष्यामीति, तथा—परमलज्जावतीनां युवतीनां स्वाभाविक्यावहित्थया संगोपितान्यान्तरीणानि वचनानि प्रकृतिविपर्यासप्रापणया श्रोष्यामीति। यद्यपि कामिनीनां कुचाद्यवयववृन्दं वस्त्रावृतत्वेन गूढमेव चमत्कारकारकमिव तासामन्तरीणमौत्सुक्यमपि बहिर्वाम्येनावृतमेव चमत्कारकारकं रसज्ञा मन्यंते न तूद्घाटितम्, तदपि कदाचित्कश्चिन्नायकः संभोग्याया नायिकाया अनावृतान्येवांगानि यथा दिदृक्षते, तथैव वाम्येनावृतमान्तरीणमौत्सुक्यवचनञ्च शुश्रूषते, किन्तु, पुरुषांतरस्य स्ववयस्यादेरपि सन्निधौ न दिदृक्षते नापि शुश्रूषते, तथैव कृष्णोऽदृष्टचरानावृतगोपीसर्वांगं संप्रति तासां वाम्यानावृतमान्तरीणं वचनवृन्दं शुश्रूषत इत्यत एव प्रियं नर्मसखमपि स्वसंगिनं तदानीं न चकारेति ज्ञेयम्॥ अत्र तोषिणी—अतः परं परमरसमयरासलीलाप्रसंगोऽस्मिन्नंतरायानौचित्येऽपि सर्वेषामेकचित्ततापादनार्थमेवेदृशः प्रश्नो भवता कृतः, मयाऽपि भवदनुरोधेनैव सिद्धांतप्रक्रियेयं व्यञ्जितेति व्यंजयन् पुनरप्रार्थितोऽपि स्वयमुत्कंठया सहसा प्रस्तुतमेवाह —ताः वेणुगीताकृष्टाः परमविह्वलाः। तदेव दर्शयति—व्रजस्य योषितः व्रज एव स्थातुं योग्या न हि बहिर्वनमागन्तुमित्यर्थः। तत्रापि निजांतिकमेवायाताः प्राप्ता न तु लज्जादिना दूरतः स्थिता दृष्ट्वाऽवदत्। वाचःपेशैः वाग्विलासैः। ते च द्विविधाः—शाब्दिका आर्थिकाश्च। पूर्वे तु सुललितवर्णविन्याससुगमसुभगसमुच्चारणस्मितवलितश्रीमुखलोचनचिल्लीचालनविशेषादयः। उत्तरे रसा भावालङ्कारवस्तुरूपाः। एतेऽपि चतुर्विधाः—उपेक्षाभंगिमयाः, प्रार्थनाभङ्गिमयाः, तद्युगलार्थसंधापनमयाः, वास्तवार्थमयाश्च। तथा च सति विमोहयन्निति हृतचित्ता हृतविवेकाश्च कुर्वन्नित्यर्थो यथायथमूह्यः। तत्र पूर्वत्वं शाब्दिकप्रार्थनामयवास्तवार्थमयेषु, उत्तरोत्तरत्वं चान्ययोः। तत्र च शाब्दिकाः स्वभावेन विशेषतस्तु भावेन। आर्थिकेषूपेक्षामयाः स्वस्मिन्नुत्कंठावर्धनार्थमेव न तूपेक्षार्थं कृताः। 'रन्तुं मनश्चक्रे', 'जगौ कलं वामदृशाम्' इत्युक्तत्वात्। अत एवैतत्पक्षे वाक्ये शब्दमात्रता न तु तात्पर्यंत इत्यर्थः। एवं मनस्यन्यद्वचस्यन्यदित्यवहित्थया तासामुत्कंठया विषण्णतासंपादनं, तेन च विवेकहरणमिति। तत्रापि प्रार्थनामया निजौत्सुक्यमात्रहेतुकाः, तद्युगलार्थसंधापनं तु नर्मकौतुकार्थमिति। तथा वचने योग्यतां कैमुत्येनाह—वदतां श्रेष्ठः निखिलवाग्वैदग्ध्यविदां वरिष्ठः, यतो भगवान्स्वाभाविकतादृशज्ञानादिभिः सर्वातिशयी। यद्वा—सर्वत्रांतर्भूतोऽपि शब्दो द्रष्टव्यः। तथाहि—व्रजयोषितः सहजनिजप्रेमपरत्वेन प्रसिद्धा अपि, तत्रापि तास्तादृशं प्रेमविकारं प्राप्ता अपि, तत्रापि तदानीं निजांतिकमायाता अपि, साक्षाद् दृष्ट्वा अपि, स्वयं च भगवान्सर्वज्ञत्वेन तासां भावाभिज्ञोऽपि वाचःपेशैः कपटवाक्यैर्विमोहयन् परमवैकल्यं प्रापयन्नवदत्। किमर्थम्—वदतां नर्मोक्तिचतुराणां मध्ये श्रेष्ठ, नर्मविशेषणार्थमित्यर्थः॥ १७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अतः परमरसमयरासलीलाप्रसङ्गेऽस्मिन्नन्तरायाऽनौचित्येऽपि सर्वेषामेकचित्ततासम्पादनार्थमेवेदृशः प्रश्नो भवता कृतः मयापि भवदनुरोधेनैव सिद्धान्तप्रक्रियेयं व्यञ्जितेति व्यञ्जयन् पुनरप्रार्थितोऽपि स्वयमुत्कण्ठया सहसा प्रस्तुतमेवाह—ता वेणुगीताकृष्टाः परमविह्वलाः तदेव दर्शयति, व्रजस्य योषितः व्रज एव स्थातुं योग्याः नहि बहिर्वनमागन्तुमित्यर्थः। तत्रापि निजान्तिकमेवायाताः प्राप्ताः नतु लज्जादिना दूरतः स्थित्वा दृष्ट्वा अवदन् वाचःपेशैर्वाग्विलासैः ते च द्विविधाः शाब्दिका आर्थिकाश्च पूर्वे तु सुललितवर्णविन्याससुगमसुभगसमुच्चारणस्मितवलितश्रीमुखलोचनचिल्लीचालनविशेषादयः, उत्तरे रसभावालङ्कारवस्तुरूपाः एतेऽपि चतुर्विधा उपेक्षाभङ्गिमया प्रार्थनाभङ्गिमयाः तद्युगलार्थसन्धापनमयाः वास्तवार्थमयाश्च तथा च सति विमोहयन्निति हृतचित्ताः हृतविवेकाश्च कुर्वन्नित्यर्थो यथायथमूह्यः तत्र पूर्वत्वं शाब्दिकप्रार्थनामयवास्तवार्थमयेषु उत्तरोत्तरत्वं चान्ययोः तत्र च शाब्दिकाः स्वभावेन विशेषतस्तु भावेन आर्थिकेषु उपेक्षामयाः स्वस्मिन्नुत्कण्ठावर्द्धनार्थमेव नतूपेक्षार्थं कृताः रन्तुं मनश्चक्रे, जगौ कलं वामदृशाम्मनोहरमित्युक्तत्वात् अत एवैतत् पक्षे वाक्पेशमात्रतो नतु तात्पर्य्यंत इत्यर्थः। एवं "मनस्यन्यद्वचस्यन्यत्" इत्यवहित्थया तासामुत्कण्ठया विषण्णतासम्पादनं तेन च विवेकहरणमिति तत्रापि प्रार्थनामया निजौत्सुक्यमात्रहेतुकाः तद्युगलार्थं सन्धापनन्तु नर्मकौतुकार्थमिति तथा वचने योग्यतां कैमुत्येनाह, वदतां श्रेष्ठः निखिलवाग्वैदग्धीविदां वरिष्ठः यतो भगवान् स्वाभाविकतादृशज्ञानादिभिः सर्वातिशायी। यद्वा, सर्वत्रान्तर्भूतोऽपि शब्दो द्रष्टव्यः तथाहि व्रजयोषितः सहजनिजप्रेमपरत्वेन प्रसिद्धा अपि तत्रापि तास्तादृशं, प्रेमविकारं प्राप्ता अपि तत्रापि तदानीं निजान्तिकमायातां अपि साक्षाद् दृष्ट्वापि स्वयञ्च भगवान् सर्वज्ञत्वेन तासां भावाभिज्ञोऽपि वाचःपेशैः कपटवाक्यैर्विमोहयन् परमवैकल्यं प्रापयन्नवदत् किमर्थं ? वदतां नर्मोक्तिचतुराणां मध्ये श्रेष्ठः नर्म्मविशेषार्थमित्यर्थः॥ १७॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ता वेणुगीताकृष्टाः परमविह्वला व्रजस्य योषितः सर्वा एव नव-तरुणीः। यद्वा, व्रज एव स्थातुं योग्याः, नहि बहिर्वनान्तरागन्तुमित्यर्थः। तथापि निजान्तिकमेवायाताः प्राप्ताः, न तु लज्जादिना दूरतः स्थिताः, दृष्ट्वा अवदत्, (भा० १०।२९।१८) 'स्वागतम्' इत्यादिना वक्ष्यमाणम्। किमर्थम्? वाचःपेशैर्वाग्विलासैर्विशेषेण मोहयन् चित्तं हरन्, स्वविषयकं कामं नितरां वर्द्धयितुमित्यर्थः। तच्चाग्रे व्यक्तं भावि। ननु, वाग्विलासमात्रेण कथं विमोहनं स्यात्? तत्राह—वदतां श्रीचतुर्मुखसहस्रमुखादीनां वाग्मिनां

श्रीव्यासादीनां वा कवीनां मध्ये श्रेष्ठः, कुतः ? भगवान् साक्षात् सर्वैश्वर्य्ययुक्तः । यद्वा, वाचः पेशैर्भंगीविशेषैः–एकैव वाक् समुपेक्षामयी सत्प्रार्थनामयी चेति मिथो विरोध्युभयकोटिस्पर्शादेव कैतवपरिपाटीपाटवैरित्यर्थः । साक्षाद्धर्म्मादिबोधनपरत्वेऽपि निजात्यन्तरिरंसातात्पर्य्येण स्वविषयकभावविशेषदृढीकरणात्, तत्र हेतुः—वदतां श्रेष्ठ इति । यद्वा, (भा० १०।२९।१) 'रन्तुं मनश्चक्रे' इति, (भा० १०।२९।३) 'जगौ कलं वामदृशां मनोहरम्' इत्यादिना तस्य ताभिः सह रिरंसा व्यक्तैव । एवं मनस्यन्यदेव धर्म्मादिपरवाग्विलासैश्च वचस्यन्यदेवेत्येवमवहित्थया ता विमोहयन्, वाक्यार्थनिर्द्धारणाशक्तेः, वस्तुतस्तु वाचःपेशैः सौन्दर्य्यैरित्युक्तिपरिपाटीमात्रमेव तत्, न तु तादृशो भाव इति बोधयत्येव । यद्वा, सर्वत्रान्तरभूतोऽपि शब्दार्थो द्रष्टव्यः । तथाहि–व्रजयोषितः सहजनिजप्रेमपरा अपि, तत्रापि तास्तथाभूता अपि, तत्रापि तदानीं तत्र निजान्तिकमायाता अपि, साक्षाद्दृष्ट्वापि, स्वयं च भगवान् सर्वज्ञत्वेन तासां भावाभिज्ञोऽपि, वाचःपेशैः कपटवाक्यैर्विमोहयन् परमवैकल्यं प्रापयन्नवदत् । किमर्थम् ? वदतां नर्म्मोक्तिचतुराणां मध्ये श्रेष्ठः, नर्म्मविशेषार्थमित्यर्थः । यद्वा, वाचःपेशैस्तासां वाग्विलासैर्हेतुभिस्तच्छ्रवणार्थमित्यर्थः, यद्वा, पेशैर्निजसौन्दर्य्यैर्विमोहयन्नवदत्, कुतः ? अकारप्रश्लेषेण अवाचो लज्जया किमप्यवदन्तीरित्यर्थः । अतस्तासां प्रत्युक्तिश्रवणानन्दायेत्यर्थः । कुतः ? वदतां श्रेष्ठः, उक्तिभंगीकुशलानां स्वत एव परोक्तिचातुरीश्रवणरसिकत्वादित्यर्थः । अन्यत् समानम् । एवं सर्वथा वस्तुतो मिथो भावविवृद्ध्यर्थमेव ज्ञेयम् ॥ १७ ॥

विदग्धावलिपूज्यासु विदग्धालिशिरोमणेः । वाचोऽर्थलिखने मे ताः स चानन्यगतेर्गतिः ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

प्रस्तुतमाह–ता दृष्ट्वेति । ता आगता गोपीर्दृष्ट्वा वदतां निपुणवादिनां मध्ये श्रेष्ठो भगवान् वाग्विलासैर्विमोहयन्नुवाच तन्मनःपरीक्षार्थमाहेत्यर्थः ॥ १७ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

परीक्षित्प्रश्नं परिहृत्य बुभुत्सितकथाशेषं वक्ति–ता इति । वाचः परिभाषणादुदितैः पाशैः स्नेहलक्षणैः वदतां व्यक्तवाचां कवीनां श्रेष्ठः प्रशस्तमः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ प्रकृतमाह—ता दृष्ट्वेत्यादि । भगवानवदत् । वदतां वाग्मिनां श्रेष्ठः । किं कुर्वन् ? वाचःपेशैर्वाचामवयवैर्विमोहयन्, अवयवा नानाप्रकारभावाः, 'पिश अवयवे' इत्यस्मात् । ते च स्वीकारताटस्थ्य-परिहारादिभिर्भेदैः, निषेधे विधिः, विधौ निषेध इत्यादि विपरीत-लक्षणार्थः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रासङ्गिकं विरोधं समाधाय प्रस्तुतमाह—ता वेणुनादाकृष्टा वदतां कालदेशपात्रौचित्येन वचनचातुर्यवतां मध्ये श्रेष्ठः पेशैरवयवैः "पिश अवयवे" घञन्तप्रयोगः वाचो अवयवाः वाच्यलक्ष्यव्यङ्ग्यबोधका ये रूक्षाः स्निग्धाश्च अंशास्तैर्विमोहयन् वेणुनादेन मोहिता अपि ता विशेषेण मोहयितुम् अत्र ताः प्रति रूक्षोक्त्यैव भगवतस्त्रयो मनोरथाः सेत्स्यन्ति प्रीतिविषयस्य कान्तस्य ममौदासीन्ये दृष्टेऽप्यासां प्रीतिलेशोऽपि न ह्रसतीति प्रीतिः शुद्धतां लोके दर्शयिष्यामीति तथा सम्प्रयोगे वैपरीत्यमिवाद्य नायिकाधर्ममवहित्थामयं वाम्यमहं ग्रहीष्यामि नायकधर्म्ममौत्सुक्यप्रकटनमयं दाक्षिण्यमेता ग्राहयिष्यामीति मिलनेऽपि वैपरीत्यं रचयिष्यामीति तथा परमलज्जावतीनां युवतीनां स्वाभाविक्या अवहित्थया सङ्गोपितान्यप्यान्तरीणानि वचनानि प्रकृतिविपर्यासप्रापणया श्रोष्यामीति यद्यपि कामिनीनां कुचाद्यवयववृन्दं वस्त्रावृतत्वेन गूढमेव चमत्कारकारकमिव तासामस्तरीणमौत्सुक्यमपि बहिर्वाम्येनाऽऽवृतमेव चमत्कारकारकं रसज्ञा मन्यन्ते नतूद्घाटितं तदपि कदाचित् कश्चिन्नायकः सम्भोग्याया नायिकाया अनावृतान्येवाङ्गानि यथा दिदृक्षते तथैव वाम्यानावृतमान्तरीणमौत्सुक्यवचनञ्च शुश्रूषते किन्तु पुरुषान्तरस्य स्ववयस्यादेरपि सन्निधौ न दिदृक्षते नापि शुश्रूषते तथैव कृष्णोऽदृष्टचरानावृतगोपीसर्वाङ्गः सम्प्रति तासां वाम्यानावृतमान्तरीणं वचनवृन्दं शुश्रूषते इत्यत एव प्रियनर्मसखमपि स्वसङ्गिनं तदानीं न चकारेति ज्ञेयम् ॥ १७ ॥

श्रीरसिकाल्हादिनी टीका

एवं प्रासङ्गिकं परिसमाप्य प्रस्तुतमाह ता इति, या बेणुनादमाधुर्येण तन्नाम्ना आहूता, दुहन्त इत्यादि गृहकर्म हित्वा शुश्रूषन्त्य इति धर्मं हित्वा अंजन्त्य इति दैहिकसंस्कारं हित्वा केवलं प्रेम्णैव संगताः व्रजयोषित इत्यनेन पंचविधानामागमनमुक्तं चातुरीविशेषानभिज्ञाः, अन्तिकं समीपमागताः चातुरीविशेषेऽवहित्थया दूरतः स्थितिर्भवेत् तत्तु नास्तीति ससंभ्रमागमनेन जायते। किं च मोहितासु चातुरी–विशेषो नोदेति, ता दृष्ट्वा अवदत् किमवदत् इत्यपेक्षायां मनश्चक्र इत्यत्र मानसलीलायां यच्चिंतितं पूर्वं तदधुना प्रोवाच किं कुर्वन् वाचः पेशैर्विमोहयन् । वाग्विलासैः विशेषेण मोहं प्रापयन् पूर्वं वेणुनादेन मोहिता इदानीं भावपरिक्षार्थं

“स्थूणानिखननन्यायेन” तमेव भावं दृढीकरिष्यन् तावत् वचनेनैव स्वान्तिकमेव विप्रलंभमुत्पाद्य ‘मधुररसपरिपाटीं शिक्षयितुं रुक्षमुद्रया—स्वागतमित्याद्युवाच । ननु वेणुनादेनास्मानाहूयाधुना भावपरीक्षार्थमेव यथार्थेन वचनेन निवर्त्तयतीति तासां मनसि कथं न भवेत्तत्राह वदतां वाग्मिनां शेषादीनां मध्ये श्रेष्ठः, तत्र हेतुगर्भं विशेषणमाह भगवान् वचनेन विप्रलंभमुत्पाद्य रसैश्वर्येण परिपोषयितुमनेकासु एकेनैव विग्रहेण स्वविलासं संचारियितु समर्थः । यद्वा वाचः पेशैः बहिर्धर्माबोधकैः भयप्रदर्शनेन निवर्त्तनपरैः रिरंसाप्रच्छादकैरंतस्तूद्दीपनविभावप्रदर्शकैः मम धर्माद्युपेक्षापूर्वकं रसाधिकरणपोषकैः कपटपाटवविदग्धैरित्यर्थः, मनस्यन्यद् वचस्यन्यदिति विमोहनाभिप्रायः ग्रहणशक्त्या प्रापयन्, यद्वा पेशैः निजांगसौष्ठवैर्विमोहयन् इति कर्त्तव्यता शून्या कुर्वन् अत एव तद्वपुषस्तेजःपुंजेन प्रताड़िताक्षित्वात् युगपत् समग्रमुखशोभाग्रहणाशक्त्या प्रथमं चरणारविन्दार्पितलोचनत्वाद् वाच अधोवदनाः, यद्वा मुखे रुक्षमुद्रामाकलय्य तावत्किमपि वक्तुमपारयंति यद्वा अत्यावेशेनागमनवशात् स्वरसाधिक्येन वाचः नमनादितादृग्व्यवहारमपि कर्तुमशक्नुवतीः, दृष्टिं परिचित्य किं वदिष्यतीति अवाचो मौनमवलम्बमानाः, अत्यवदन् ।। १७ ।।

विशुद्धरसदीपिका

ततश्चैवं समाहितमाहितचेतसं च राजानमाकलय्य प्रकृतमनुसरति—ता इति । असमोर्द्ध्व सौभाग्या । यद्वा, ता वञ्चयितुं योग्या इत्यर्थः । तदादीनां प्रकृतप्रसिद्धानुभूताद्यर्थे शक्तेः अन्तिकमायाताः अन्ति समीपे कं सुखम् आयाताः प्राप्ताः शुद्धप्रीतिमयसुखसन्निहिताः । यद्वा, पार्श्वं निजपार्श्वं स्थिताऽऽनन्दमूर्तिं श्रीराधामुद्दिश्यागता इत्यर्थः । पक्षे समीपगताः कर्त्तरि क्तः स्वयमागता इत्यर्थः । भगवान् भगो भाग्यं तद्वान् स चास्यात्मत्वेन वक्ष्यमाणपरमप्रेमास्पदं प्राणप्रिया श्रीराधैव तत्त्वं च “आत्मनस्तु कामाय सर्वं प्रियं भवति” इति श्रुतेः । ततश्च तदिच्छया रासक्रीडासुखाय दत्तवराणां च मनोरथपूर्णाय तदिच्छयैव मुरलीकलेन तत्सखीनां साधकचरीणां चाकारणे जाते तस्याः सुहृद्वर्गैः सह तटस्थविपक्षादिवर्गाणामागमने वृत्ते प्राणप्रियायाः प्रणयकोपमाशङ्क्य तामन्वात्मन आनुकूल्यमासु चौदासीन्यमभिनयन्नवदत् तत्र हेतुः वदतां श्रेष्ठ इति । अनुनयकोविद इत्यर्थः । वाचः पैशैरिति वाग्विलासैरिति टीका स्वस्य प्राणप्रियायाश्चैकमतप्रदर्शनायेति भावः । यद्वा, ‘पिश अवयवे’ इत्यनुशासनात् वाचामवयवैरित्यर्थः । ते च नानाप्रकारा अपि तावत् द्विविधाः शाब्दिका आर्थिकाश्च पूर्वे सुललितवर्णविन्याससुगमसुभगसमुच्चारणस्मितवलितश्रीमुखलोचनचिल्लीचालनादयः परे रसभावालङ्कारवस्तुस्वरूपाः पुनश्च ते द्विविधाः उपेक्षाभङ्गिमयाः प्रार्थनाभङ्गिमयाश्च तत्र पूर्वे कान्तभाववतीषु आत्मनः औदासीन्यद्योतनेन सख्यभाववतीष्वानुकूल्यप्रदर्शनाय परे च पूर्वासु वैदग्ध्येन प्रतारणाय परासु च प्रोत्साहनायेति च विवेकः सर्वोऽप्ययं कामवासनाप्रसारणशुद्धभावावधारणरूपः साधकचरीष्वनुग्रहः तदनुगतेषु साधकेष्विति च गम्यते अत एव विमोहयन्नित्युक्तं नत्वपसारयन्निति विमोहनमत्र दाम्पत्यसंस्कारावशिष्टकामलेशस्थगनमेव सखीनां च । मनोहरणत्वमिति ततश्च यथास्वहृतविवेका हृतचित्ताश्च कुर्वन्नित्यर्थः । यद्वा, सर्वत्रान्तर्भूतोऽपिशब्दो द्रष्टव्यः व्रजयोषितः सहजनिजप्रेमपरत्वेन प्रसिद्धा अपि तत्रापि ताः तादृशप्रेमविकारं प्राप्ता अपि तत्रापि तदानीं निजान्तिकमायाता अपि साक्षात् दृष्ट्वापि स्वयं भगवानपि सर्वज्ञत्वेन तासां भावाभिज्ञोऽपि वाचः पेशैः कपटवाक्यैर्विमोहयन् परमवैकल्यं प्रापयन् अवदत् सर्वमिदं कामकैतवनिरसनायैव अन्यथा प्रेमैकपरवति स्वयं भगवति तत्तद्विरुद्ध्येत् नतु तादृशप्रेमवतीष्वपि कपटपटुतारसभङ्गकरी स्यादित्यत आह—वदतां श्रेष्ठः नर्मोक्तिचतुर इत्यर्थः । प्रहस्य सदयमिति वक्ष्यमाणानुसारेण नर्म्मोक्तौ पर्य्यवसाययन्निति भावः ।। १७ ।।

श्रीरामनारायणकृता भावभावविभाविका

एवं नृपप्रश्नं समाधाय प्रकृतमाह—भगवान् शुकः, ता इति । तत्र ता इति पुनः पुनस्तत्पदप्रयोगेण वस्तुतस्तु महावाक्यस्थ तत्पदबोध्यभगवत्स्वरूपात्मकत्वादात्मारामस्य भगवतो रमणयोग्याः लीलानुसारेण तु ताः पूर्वन्दत्तवराः तथा श्रीवक्षसा भगवतापि मुरलिकागानाह्वानेनातिविलक्षणनिरतिशयसौभाग्यवत्यः तथा ता हरिवंशोच्चरितगीतश्रवणमात्रेण हृतचित्तास्तन्निर्वृत्त्या त्यक्तपत्यपत्यगृहकृत्याः तथा ता अतिविलक्षणप्रेमविह्वलितचित्तत्वेन व्यत्यस्तवस्त्राभरणाः तथापि रूपमाधुर्यसौष्ठवत्वेनैव मनो हरन्त्यः तथा ताः ब्रह्मादिजयजनितदर्पेण कन्दर्पेण सर्वस्वायुधसम्पद्य कामगस्वर्णया नतया रतिरणाय प्रस्थापिताः व्रजयोषितः, इति व्रजस्य स्वभावत एव प्रेमरसान्वितस्य योषित इति शृङ्गाररसोद्दीपितानुरागाः । यद्वा, व्रजन्तीति व्रजाश्च ता एव योषित इति तथा एवं पुरुषम्मानिनीर्भामिनीः प्रति व्रजन्तीति रसरीतिः, एतास्तु प्रीतिवैक्लव्येन स्वतः तद्रीतिम् हित्वैव स्वयं व्रजिताः तथा अन्तिकं स्वसमीपमायाताः । यद्वा, अन्ति समीपे कम् सुखम् यथा स्यात्तथा आयाताः । यद्वा अन्ति आत्मने कृष्णाय वा सुखं यथा स्यात्तथा आयाताः यद्वा अन्तिकं साक्षात्स्वयं समागतं स्वर्गमिवायाता । यद्वा, कं नित्यस्वर्गं लीलाधाम पुलिनाख्यमायाता यद्वा कं नदीजलमिव कं सिन्धुजलं प्रति वा अन्तरनिरुद्धप्रेमप्रवाहाविकसितहृत्कमलाननोत्साहतरङ्गास्त्रोटितलज्जासेतुबन्धाबहिश्चानिरुद्धगतिप्रवाहाः शोभितमुखकरचरणादिकमला विविधभावविभावकटाक्षादितरङ्गास्त्रोटितकुलमर्यादादिसेतुबन्धाः घनश्यामस्य वेणुगर्जनपूर्वकरसवृष्टिप्रवृद्धकामजवात् कम् आनन्दसिन्धुमायाताः । यद्वा, अन्ति समीपे प्राप्य कं सुखयिनं कृष्णं दृष्ट्वैव कं सुखमायाताः समाधाविव सुखे निमग्नाः कोदृशं कृष्णं दृष्ट्वा वेदद्रुमे ब्रह्मैव कदम्बमूले वृन्दावनभूम्याविर्भावितप्रेमप्रकाशविकसितस्वहृत्कमलमिव भ्राज-

मानमणिकञ्जकर्णिकासने स्थितं तरणिवर्णारुणपदतलेन मृदुतमः श्यामोर्द्ध्वभागेन नखचन्द्रवातश्रियान्वितेन पदद्वयेन स्वभजतामविरोधमात्मानस्तीर्थराजास्पदत्वम्विमुक्तभवबन्धादिदोषत्रिवर्णत्रिगुणमायालिङ्गितत्वं स्वाश्रयणे भवबन्धिकाया अपि मायायाः ततो मोचकत्वं मुक्तैरपि प्रार्थ्यमानस्वसत्त्वोत्कर्षात्मकप्रेमगुणबन्धकत्वं स्वस्मिन् संलग्नस्वपदकंजाकारप्रतिदलसत्त्वप्रकाशान्वितानुरागपूरितश्यामच्छव्यङ्कितभक्तहृदत्वानुकारित्वं च दर्शयन्तं स्वपादाब्जाश्रितश्यामचक्रस्निग्धमृदुपुष्टजङ्घजघनाभ्यां कमलालयालयनिवसितस्वच्छवि भक्तहृत्कमलत्वखण्डैकदण्डं ब्रह्मणोऽप्यनेकत्वं त्रिभङ्गत्वं च शृङ्गारभावान्वितोपासकानां तु कामेषु कञ्जद्वयसन्धितसन्नमिततदीयधनुर्युगरूपत्वं कञ्जविशोर्द्ध्वमूलसुकुसुमरंभा कृतमृदु विचित्रेन्द्रनीलमणिरचितरूपातिभारनमितकामगृहयुगस्तम्भरूपत्वं वा सुरूपनिधिरक्षकत्वेन स्थापितबहुमणिधरबहुफणयुगमणिधररूपत्वं वामिनीयं व्यञ्जयन्तं तरणिकिरणगणावृतेन्द्रनीलाद्रिद्वयसङ्गमपीताम्बरावृतनितम्बयुगलसन्निहितागाधरूपामृतसरोनाभिनिमग्नामितमदनानुश्यामदर्शनेन ब्रह्महृदनिमग्नानामनावृतिं बोधयन्तं तन्नाभिसरोनिकटोरसि हारमुक्ताहारेण स्वाभ्यवहारव्यवहारमाकलय्य कटितटोल्लासिमणिकिङ्किणिहंसनिकरमुखरतया स्वगुणगणमुक्ताभ्यो जीवनं सम्भाव्यमानानां शुकादिपरमहंसानां जीवन्मुक्तानामपि समाधिरूपोपरमादुपरम्यगुणगानपरत्वयोग्यतां सूचयन्तं मुखचन्द्रस्मितचन्द्रिकासम्भाविता श्यामरूपनिशायां मुक्ताहारगङ्गान्तर्गतरोमावलियमुनाधारासम्भावितर्तीर्थराजतटयोरद्वन्द्वावाक् चक्रवाकद्वन्द्वस्तनाभ्यां तीर्थसेविनामद्वन्द्वतां भगवदेकाश्रयत्वं च द्योतयन्तं श्यामस्निग्धमृदुपीवरबहुफणमणिधरभुजाङ्गभुजङ्गभीतशङ्खकण्ठस्थहारगङ्गाद्वारेण भगवन्मुखमुन्मुखतया भीतानामात्मैकशरणत्वं गमयन्तम्। यद्वा, भक्तानामविद्यास्मितरागद्वेषाभिनिवेशाख्यपञ्चबाणपञ्चवाणपञ्चवाणवारणनिर्वाणकरणाय वाण्याः परत्वेन निर्वाणस्य आत्मनः कामरूपस्य श्याममृदुमञ्जुपटवेष्टितविविधभूषणमणिजटितपञ्चमृदुलाङ्गुलिसुमनोऽन्वितभुजयुगनिषङ्गाभ्यामभयं भावयन्तं वर्त्तमानचिबुकगम्भीरगर्त्तावत्तम्

विविधरतिरङ्गतरङ्गसङ्गिनं विमलयुगकपोलदोललोलालकपाशावृत्तमीनाकृतिमणिकुण्डलाभ्यां स्नेहपाशबद्धालिमनोमीनानुकुर्वद्भ्यां शुक्तिनिर्मुक्तव्यक्तमुक्ताकृतनामाश्रितजलजेन अहर्निशसमप्रभनित्यपूर्णमितेन्दुविन्दुसमीकरणाननचन्द्रेण स्मितसुधया वक्त्रश्रिया च क्षीरनिधिमन्दरं लक्ष्म्या अपि प्रलोभकविद्रुमाधररदनं वज्रनखमणिविविधभूषणरत्नाकरं रूपसुधासिन्धुं मनोजविजयाय कृष्णोद्यममालक्ष्य सौभ्रात्रं दर्शयता मनोजचन्द्रेण कृष्णमुखचन्द्रविजयाय विविधभूषणमणिग्रहभगणसैन्यमादाय बहुबर्हचन्द्रकरूपतया मनोजपक्षपूरणेपि तद्ग्रहभगणसैन्यमात्माङ्गीयं सम्पाद्य सुभूषणभूषणाङ्गभूषणतया प्रतिष्ठाप्य तद्बर्हचन्द्रकचन्द्रान्स्वमुखचन्द्रचन्द्रिकया पराभाव्य स्वीयश्यामकान्त्या तद्बाह्याभ्यन्तरमापूर्य शिराधारणादरेण स्वपक्षे कृत्वा च शिष्टकामरणायोद्यतमालोक्य कं सुखमायातास्ता दृष्ट्वा भगवान् धर्मादिषट्सम्पन्नः धर्मज्ञानविरागपुरस्कारेण रासरतिविहारादौ शृङ्गारैश्वर्ययशोविस्तारेणालुप्तभगः कामविजयाय तद्विरोधिधर्मज्ञानाग्रणी करणेन नीतिज्ञत्वाद्वदतां श्रेष्ठः यद्वा धर्मज्ञानोपदे शात्स्थूणानिखनन्न्यायेन शृङ्गारानुरागपुष्टीकाराद्वदतां श्रेष्ठः यद्वा विनया विनयानेकार्थकवत्मकथनाद्वदतां श्रेष्ठोऽवदत्, किं कुर्वन्नित्यत आह—वाचः पेशैर्विमोहयन्निति। तत्र वाचः पेशैर्वाग्विलासैः यद्वा "पिश अवयवे" इत्यस्मात् वाचामवयवैः ते च द्विविधाः मञ्जुवर्णानिवेशसुगमसुभगोच्चारसुस्मितवलितललितमुखलोचनभ्रूचालानादयः शाब्दाः रसभावालङ्कारादयश्चार्थिका यद्वा उपेक्षाव्यञ्जकाः प्रार्थनाव्यञ्जकाश्च तैर्विमोहयन् मुग्धा साधकचरीः प्रागलब्धविहारा गोपीरुत्कण्ठावृद्ध्यर्थमेवोपेक्षाद्योतनेन विभ्रमापन्नाः कुर्वन् मानिनीः पूर्वमपि लब्धविहाराः प्रियाः प्रार्थनाभावेन विशेषेण मोहयन् स्वानुरागविविधमुखदृगपाङ्गदर्शनसुखसमाधिनिमग्नतया विगतदेहाद्यनुसन्धानाः कुर्वन् प्रौढाः कामिनीरसविभावादिकुशला उभयार्थाभिज्ञाः स्वरसिकत्वविविधभावकुशलत्वद्योतनेन विशेषतः स्नेहात्मकमं हपाशैः स्वगुणगणगुणान्वितैर्निबध्नन्॥ १७॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अहो बहूक्तमितः परमलं प्रश्नोत्तराभ्यां लोकोत्तररसवभ्यां भगवद्रासक्रीडाकथायां विच्छेदकाभ्याम् इति ध्यायन् स्वयमेव प्रकृतमनुसरति—ता इति। ताः स्वयं कलगीतेनाहूताः अतः व्रजयोषितो व्रज एव वासयोग्या अपि झटिति स्वसमीपमागता उपलब्धाः। यद्वा, ताः व्रजयोषितः सर्वदा व्रजे एवोपलब्धास्तदानीं स्वस्य वने स्थितस्यान्तिकमायाता दृष्ट्वा वाचःपेशैः विलासैः स्वचित्तानुसारैर्निषेधप्रार्थनार्थप्रतीतिजनकैः पूर्वं कलगीतेन मोहिताः पुनर्विशेषेण मोहयन् अभाषत यतो वदतां सर्वेषां वक्तॄणां मध्ये श्रेष्ठः यतो भगवान् इदं च व्यामोहोत्पादनं विशेषरसोद्भवाय तथा चेमाः, स्वात्मानं धैर्य्या भावाद्बहिरपि प्रार्थयति, तासां प्रेम्णापेक्षावाक्यैरेवोद्दीपनं भवति याः स्वान्तर्गतप्रार्थनावत्योऽपि धैर्य्यवशात् मानवत्यो बहिर्नेति नेतीत्येव वदन्ति तासां प्रेम्णा प्रार्थनावाक्यैरेवेत्यन्तस्तन्त्रेणोभयार्थवाक्यान्यभिहितवान् पृथक् पृथक् यतोक्तार्थवाक्यप्रयोगस्य परस्परकलहोत्पादकत्वेन रसाभासकरत्वात् यद्वा, सर्वत्रापि यद्वातभावेनेत्थं व्याख्येयं व्रजयोषितः साहजिकप्रेमवत्योपि ताः प्रेममयकामविकारं प्राप्ता अपि अन्तिकमायाता अपि साक्षाद्दृष्टा अपि स्वयं भगवांस्तासां भावज्ञोपि कपटवाक्यैर्व्यामोहयन् वैकल्यं प्रापयन् अवदत् यतो नर्मोक्तिवादिषु श्रेष्ठस्तथा च नर्मविशेषार्थमेवमभाषत इत्यर्थः। निवृत्तिपक्षे भगवानेव वदतां श्रेष्ठः स्यात् तद्वादिरूपेण वदतामग्रगण्यः सन्वाचःपेशरापातरम्यैर्विलासैः विमयानिरुद्धप्रभया विपरीतसिद्धान्तेन ता ऊहयन् तर्कयन्नुवाचेत्यर्थः॥ १७॥

रास-रहस्यम्

र० टी०–भगवान् भगो भाग्यं तद्वान् मुमुक्षुः ताः व्रजयोषितः व्रजन्तीति व्रजाः, व्रजाश्च ताः योषितश्च, गमनागमनशीलाः अन्तर्मुखवृत्तयस्ता एव योषितः, अन्तिकमायाताः अन्तिकं समीपे हृदयान्तःपुरे सुखस्वरूपमात्मसकाशमायाताः सुखस्वरूपमात्मसन्निकर्षं प्राप्ताः दृष्ट्वा कथम् ? अविद्यास्मितारागद्वेषाभिनिवेशाविष्टभेदवादिवारणनिवारणकरणाय "यद्वाचा अनभ्युदितं येन वागभ्युद्यते।" इत्यादि श्रुतेः, वदतां श्रेष्ठ आत्मा अधिष्ठानत्वेन सर्वोत्तमत्वात्, किं वदता ? श्रेयमार्गमेवाश्रयणीय इति वदतां "अयमात्मा ब्रह्म"। "अहं ब्रह्मास्मि" इत्यादि महावाक्यरूपवाग्विलासैः विमोहयन् विशेषेण देहादिभावं प्रविलापयन् अवदत् अगर्जत्, उक्तं च "तावत् गर्जन्ति शास्त्राणि जम्बुको विपिने यथा। न गर्जति महाशक्तिर्यावद्वेदान्तकेशरी" ॥ १७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रासङ्गिकमुक्त्वा प्रस्तुतमाह–ता इति। वदतामुचितवाक्प्रयोगकुशलानां मध्ये श्रेष्ठः वाचः पेशैरवयवैः तासां स्वानन्यतानिश्चायकैर्वाण्यंशैरित्यर्थः। "पिश अवयवे" धातुः, विमोहयन् धर्मोपदेशेन स्वसमीपतः प्राच्या चयन्निव ॥ १७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सामाधायैवं वसुधाधिपमङ्गनागमनानन्तरमनन्तः किं ततान तत्र रात्रावित्यतस्तां कथां कथयति ता इति। ता व्रजयोषितः कन्या अकन्याश्च कात्यायनीव्रतधराः स्वपतित्वहेतोर्मयेमा रंस्यथ क्षपा इत्यादौ तथोत्तरत्र पतयश्च व इत्युक्त्यानुकूल्यात्। भगवान्स्वान्तिकं समीपमायाताः प्राप्ताः। किं तत्र रात्रावागमनकारणमित्यतोऽप्याह ॥ अन्तिकमायाता इति। अन्ति समीपे कं स्वरूपसुखं यया सा माया च स्वेच्छा च तयैवायन्तीति तास्तथा स्वेच्छात एवायाताः। यदन्ति यच्चेत्यादेः। स योऽत इत्यादेः। वदतां वाग्मिनां श्रेष्ठो भगवान्वाचः पाशैर्वागात्यकवागुरैः राहोः शिर इत्यादिवदभेदे षष्ठी विमोहयन्नवदत्। विमो विशिष्टज्ञानसम्पद्रमासहिता इति। ता हयन्निव गच्छन्निवावददिति वा। हय गतामिति स्मृतिः ॥ १७ ॥

श्रीसुबोधिनी

अंतिकं समीपमायातास्ता व्रजस्त्रियो दृष्ट्वा वदतां श्रेष्ठो भगवान् वाचःपेशैर्वाग्विलासैर्विमोहयन् अब्रवीत् ॥ १७ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

ता दृष्ट्वेत्यत्र, **यास्त्वत्यादि**। अन्तर्गृहगता अनाकारिता एव नादं श्रुत्योद्युक्ता इति प्रतिबन्धोभूदिति शंकानिरासायाहुः याः पूर्वोक्तास्ता अप्याहूताः। तत्रोपपत्तिमाहुः **समागता** इति। अन्यथा तथा न स्यादिति भावः। गेहस्य देहसम्बन्धित्वात्तस्य नष्टत्वेनैतासां गृहाभावात्तत्र गमनं बाधितमिति न निवार्यन्ते। दोषनिवारणार्थं प्रतिबन्ध इत्युक्तम्। यावद्भिर्गुणैर्भगवद्रमणं भवति तावद्गुणसम्पन्ना अन्यत्र विवाहतो रसशास्त्रोक्तरसविशेषोपयोगिगुणवत्यश्च याः समागतास्ता अपि यद्यपि न निवारयितुं योग्यास्तथापि स्थातुमशक्ताः सत्यः स्वतो नागताः किन्तु शब्दश्रवणे सति। तथा च तावानंशो निवारणीय इति शब्देनैव निवारणं कृतं, न तु हृदा। तदनङ्गीकारेण शब्दोपाधिकमागमनं चेत् स्यान्निवृत्तिरपि स्यादिति तदभावो ज्ञाप्यत इत्याहुर्याः पुनरित्यादिना। एवं करणे हेतुमाहुरन्यशेषतयेति। एतेन भक्तिमार्गमर्यादा ज्ञापितेति भावः। **अपावृता** इति। अन्तर्बहिर्विसंवादो नागरीणां कदाचिद् भवेदपि, न त्वेतासाम्। व्रजसम्बन्धेनान्तरधर्मावरणासम्भवात्तथा चागमनं सर्वांशेनैव नत्वन्यत्रापि केनाप्यंशेन हृदयं स्थापयित्वेति भावः। एतासां निवर्तने यावत्स्वसामर्थ्यमुपयुज्यते तावत्पूर्णमत्र प्रकटीकृतवान्प्रभुरिति ज्ञापनाय भगवानित्यादीनि प्रभुविशेषणानीति ज्ञेयम्। तेन स्वामिनीभावस्य महाबलवत्त्वं ध्वन्यते। तेन भक्तिमार्गोत्कर्ष एव सिध्यति। भावस्य भगवद्रूपत्वात्तदुत्कर्ष एवैवमपि पर्यवस्यतीति **हृदयमाचार्याणाम्**। नन्वत्र मोहने विशेष उक्तोन्यथा "मोहिता" इत्युक्तत्वेन पौनरुक्त्यं स्यात्। तथा च पूर्वस्मादाधिक्यस्य विशेषपदार्थत्वात्पूर्वस्य च भगवद्विषयकस्यैव तस्योक्तत्वात्तद्गत एव विशेषो वक्तुं युक्तो न तु गृहादिविषयकस्य पूर्वमसत्त्वादित्यरुच्या पक्षान्तरमाहुः, **अथवेति**। स्थूणानिखननन्यायेनेति भावः। न च भगवद्विषयकमोहाद्विशेषो वक्तुं शक्यः, असम्भवात्, तथा सति गच्छेयुश्चेत्याहुः **अन्यथेति**। ननु तच्छब्देन सर्वत्यागसर्वात्मभावाद्युक्तधर्मपरामर्शात्तस्य स्वत एव दृढत्वात्तथा सत्युभयविशेषणकथनप्रयोजनाभावाच्च नैतत्साधीय इति चेत्। सत्यम्। उक्तानुपपत्त्या प्रभुणा स्ववाक्यानां गमनार्थकत्वाबोधनाच्चाद्य एव पक्षे तात्पर्यमस्तीति यद्यपि ज्ञायते तथापि स्वरूपस्य रसरूपत्वेन भावात्मकत्वं यदुच्यते तत्तु तद्विरोधिवचनाविर्भावेनानुपपन्नमिति शङ्कानिरासाय तदविरोध्यर्थकत्वमप्युच्यते वाक्यानां तात्पर्यविषयत्वेन। एतदेवाहुरतोर्थंत इत्यादिना। यतः स्थितावेव भगवत्तात्पर्यमतो हेतोरापाततः प्रतीयमानार्थप्रत्यायनान्निवारयन्नपि फलतः स्थित्यर्थकानीत्यप्युच्यन्त इत्यर्थः ॥ १७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं प्रासङ्गिकं राजप्रश्नोत्तरमुक्त्वा प्रस्तुतमाह–ता इति। ता वेणुनादश्रवणेन निजान्तिकमायाता व्रजयोषितो दृष्ट्वा वाचः पेशैर्वाग्विलासैः विमोहयन् स्वविषयकं भावं दृढीकर्तुं भगवान् 'स्वागतम्' इत्यादि वक्ष्यमाणमवददित्यन्वयः। ननु 'वाग्विलासमात्रेण कथं मोहनं स्यात्?' तत्राह—वदतां चतुर्मुखादिकवीनां श्रेष्ठ इति ॥ १७ ॥

अन्वितार्थप्रकाशिका

प्रस्तुतमाह—ता इति ॥ वेणुनादश्रवणेन निजान्तिकमायाताः ताः व्रजयोषितो दृष्ट्वा वाचः पेशैः, अनयवैः विलासैरिति यावत्। "पिश अवयवे" घञन्तः। विमोहयन् स्वविषयकं भावं दृढीकर्तुं वदतां मध्ये श्रेष्ठो भगवान् स्वागतमित्यादि वक्ष्यमाणमवदत्। तत्र वाग्विलासाश्च द्विधा। शाब्दिका आर्थिकाश्च। शाब्दिका ललितवर्णविन्यासादयः। आर्थिका उपेक्षाप्रार्थनामयत्वेन द्विधा। उपेक्षामया अप्युत्कण्ठावृद्धये नतूपेक्षार्थम् ॥ १७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवमुपोद्घातमुक्त्वा इदानीं पूर्वप्रसंगमाह ता इति। अंतिकं समीपम् आयाताः आगताः वाचः पेशैर्वचनयुक्तिभिः ॥१७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रस्तुतमाह ॥ ता इति ॥ अन्तिकं स्वसमीपम्, आयाता आगताः, ताः व्रजयोषितो गोपीः दृष्ट्वा, वदतां निपुणवादिनां मध्ये, श्रेष्ठः भगवान्, वाचःपेशैर्वाग्विलासैः, विमोहयन् सन्, अवदत्तन्मनःपरीक्षार्थमित्युवाचेत्यर्थः ॥ १७ ॥

कृष्णप्रिया

जब भगवान् श्रीकृष्ण ने देखा कि व्रज की अनुपम विभूतियाँ गोपियाँ मेरे बिल्कुल पास आ गई हैं, तब उन्होंने अपनी विनोदभरी वाक्चातुरी से उन्हें मोहित करते हुए कहा। क्यों न हो—भूत, भविष्य और वर्तमान काल के जितने वक्ता हैं, उनमें वे ही तो सर्वश्रेष्ठ हैं ॥ १७ ॥

श्रीभगवानुवाच

स्वागतं वो महाभागाः प्रिय किं[1] करवाणि वः। व्रजस्यानामयं कच्चिद् ब्रूतागमनकारणम् ॥ १८ ॥

कर्दमक्षमा

अन्वयः—महाभागाः, वः, स्वागतम्, वः, प्रियम्, किम्, करवाणि, कच्चित्, व्रजस्य, अनामयम्, आगमनकारणम्, ब्रूत ॥ १८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सर्वाः ससंभ्रममागता विलोक्य सभयमिवाह। व्रजस्येति ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भो महाभागाः वो युष्माकं वने सुष्ठु आगमनं जातं किम्? अपि तु न, अतो वः प्रियं किं करवाणि, न मया किमपि कर्तुं शक्यम्। सर्वा गोप्यः। ससम्भ्रमं ससाध्वसं यथा सभयं प्रत्युच्यते तथाह–व्रजस्येति। व्रजस्य किंस्वित् अनामयं क्लेशाऽभावोऽस्ति? एवं सम्भ्रमेणाऽऽगमने कारणं ब्रूतेत्युपेक्षायाम्। प्रार्थनायां तु मम महद्भागरूपा मदीयभाग्यरूपा वा महत्याभा कांतिर्यस्याः सा महाभा राधा तां गच्छंति सखीभावेनेति तथा। यद्वा–मह्यते पूज्यते मयेति महा राधा तस्या भा दीप्तिरागता यासु ताः। वः सुंदरमागमनं जातम्। व्रजगतपत्यादिभीतिमालक्ष्याह-व्रजस्य व्रजसंबन्धिनीनां वः, अनामयम् अभयम्। ते श्रांता मायामोहिताः सुप्ताः स्वागमनकारणमशंकितं ब्रूत यद्वा–आगमनस्य कं सुखं तदेवारणं यस्य तं मां किञ्चित्संभाषणं कुरुतेति गूढोऽर्थः। अथ स्त्रीपुरुषाणां रसज्ञानां मेलने तावदियं रीतिः—यत्पुमांसो रतौत्सुक्यमाविष्कुर्वते,, स्त्रियस्तु तत्राऽसहिष्णवः कुप्यंतीत्यतस्तामेव रसरीतिं प्रथममाश्रित्य कृष्ण आह—स्वागतं वो युष्माकं कच्चित्सुखमयमागमनं वृत्तम्। ततो यूयं महाभागा जन्मारभ्य दुःखस्य मुखं भवतीभिः कदापि न दृष्टमिति भावः। यद्वा–नायं प्रश्नः किन्तु प्रत्युक्तिः, अतो युष्माकं शोभनमद्यागमनं वृत्तं यदत्रागतं तत्सम्यक् कृतम्, यतो महाभागा भाग्यवतीनां हि सर्वाः क्रिया एव सफलीभवन्त्यः स्वस्य च परस्य च सुखदा भवन्तीति भावः, अतो वः प्रियं किं करवाणि-अधुना रात्रावत्र निर्जने वने एकाकिना यूना मया युवतीनां वो यत्प्रियमातिथ्यं कर्तुं शक्यं स्यात्तद् ब्रूत, युष्मत्प्रियचिकीर्षौ मयि

---

[1] करवाम–विज.।

सारल्येन स्वप्रियं कृपया स्पष्टं वक्तव्यं, यथा निःसंदेहं तत्राहं प्रवर्त्तेयेति भावः। ततश्च भो महासाहसिक लंपट अस्मानपि पतिव्रता यदेवं वक्तुमुत्सहसे तत्किं धर्मतो राजतश्च न बिभेषीति समुचितमुत्तरमप्राप्तवता प्रियं किं करवाणीत्यस्य व्यंजितेंगसंगरूपेर्थे सम्मतिलक्षणं लज्जाहेतुकं मौनमेव दृष्टवता भगवता विचारितम्—यद्येताभिः स्वयमुचितं वाम्यमद्य नांगीक्रियते तर्हि मयापि समुचितमौत्सुक्यं न बहिष्करणीयम्, किन्तु वाम्यमिश्रमेव। ततश्च संभोगभेदे संप्रयोगे यथा वैपरीत्यमपि चारु भवति तथैव संभोगभेदे मेलनेऽपि वैपरीत्यं चारु भवतु, किन्त्वासां महामोहनवेणुनादमाध्वीकपानोत्थातिवैवश्यादेव प्रकृतिविपर्ययस्तत एव दाक्षिण्यम्, मम तु वैवश्याभावात्तदनुरोधादेव कृत्रिमं वाम्यं बहिरेव कार्यमन्तस्तु स्वाभाविकमौत्सुक्यमस्त्येवेत्यादिकं विचार्य च वाम्यपदवीमारोढुं सभयमत्र संपृच्छते—व्रजस्येति। कच्चिद् व्रजस्यानामयं मंगलम्, न जाने सांप्रतं व्रजे कश्चिदिंद्रादिकृत उपद्रवो वर्तते, यदा सर्वा एव भवत्यो भीताः पलाय्य स्वत्राणार्थं मदंतिकमायाता इति भावः। तत केयमद्यतन्यस्य धूर्ततालहरीति मिथः सस्मितमविस्मयावलोकं वितर्कयंतीषु तास्वहो युष्माकं मौनेनैवावगम्यते नोपद्रवस्तर्हि कुतः किमर्थमायाताः। अहं तु नात्यूहितुं समर्थ इति भावः॥ अत तोषिणी-प्रथममवहित्थयौदासीन्यमवलंबमानः सादरमाह-स्वागतमिति। वो युष्माकं शोभनमागमनं वृत्तमित्यर्थः। यद्वा—वो युष्माभिः सुष्ठु आगतं कच्चिदिति प्रश्नः। महान् भाग्यं यासां तासां संबोधनम्। अतो वो युष्माकं किं प्रियं करवाणि, अपि तु न किंचित्कर्तुं शक्नोमीत्यर्थः। यद्वा—किं करवाणि तदाज्ञापयन्त्वित्यर्थः। महाभागानां प्रियाचरणेन ममापि धर्मविशेषो भावीति भावः। पूर्वं यज्ञपत्नीः प्रत्येवमेवोक्तं किन्तु तत्रास्यतामिति गौरवं विधाय किं कर्तुं शक्नोमि अपि तु न किमपीति केवलमौदास्यम्। अत्र तु प्रियं किमिति श्लेषेण साकांक्षत्वमपीति शेषः। वस्तुतस्त्वेतासां तादृशागमनं दृष्ट्वा परमप्रीत्यैवाह—स्वागतमित्यादि। महाभागा इति सर्वपरित्यागेन तदेकापेक्षया तासामागमनात् स्वस्य च नानाप्रियजनापेक्षया तादृशत्वाभावमननेन स्वस्मादपि प्रेममहत्त्वविवक्षयोक्तम्। भागोत्र भजनम्। अतस्तासां प्रेमवशः सन्नाह—प्रियमिति। तच्च प्रियजनवशीकरणचतुरस्य विदग्धशिरोमणेः स्वाभाविकमेवेति दिक्। तदित्थमेव परत्र च वस्तुत इत्यादिक इति शब्दपर्यन्तो वास्तवार्थो ज्ञेयः। तदनन्तरं तु नर्मादिमयो ज्ञेयः। तथाहि—स्वागतमित्यादिना नर्मणा सदाचारमिवाश्रित्य समागतजनेषु वक्तुं योग्यमुक्त्वा सर्वा एव युगपत्ससभ्रंममागता वीक्ष्य स्वयमपि कैतवेन सभयमसंभ्रममिव पृच्छति—व्रजस्येति। अनामयं मंगलं कच्चित्। ननु चतुरसिंह तथा सति गोपादयोऽप्यागताः स्युरिति चेत्—सत्यम्, तर्हि अंगनाविषयकः केषामप्युपद्रवो भवेदिति धूर्ततयाऽऽशंकयेव साटोपमाह—ब्रूतेति। निजागमनस्य कारणं हेतुं प्रयोजनं वा। अथ वा तदुक्त्यभिप्रायाऽनिर्धारणेन लज्जया चानुत्तरास्ता वीक्ष्य मन्ये शोकवेगेनामंगलस्याश्राव्यत्वेन वा किञ्चिन्न वदथेति व्यंजयन् किञ्चिदन्यदेव चोत्थापयन्सवैयग्र्यमिव पृच्छति—व्रजस्येति। एवं सर्वमग्रेप्याशंकादिकं कैतवेनैवेति ज्ञेयम्। तथाप्यवदंतीः प्रसन्नमुखीश्चालोक्यास्वस्थतामभिनयन्सलज्जमिवाह—ब्रूतेति। भवतु मद्दुर्वितर्क्यत्वं यूयमेव स्वयं ब्रूतेत्यर्थः। अत्रैकैकैव वाक् समुपेक्षामयी संप्रार्थनामयी चेत्युक्तम्। तत्र तस्याः समुपेक्षामयीत्वं प्रपञ्चितं संप्रार्थनामयीत्वं कथ्यते। इदमेव श्लेषार्थत्तयाऽग्रेऽपि प्रतिश्लोकं बोध्यम्। तथाहि—हे महाभागाः महान् भागो भाग्यं यासाम्। ईदृशी ज्यौत्स्नी, तत्रापीदृशं वनं, तत्रापीदृशं वो नवयौवनादि, तत्रापीदृशोऽनुवर्ती जनोऽयमनुकूल इति महदेव भाग्यमिति। अत्रेष्टप्रश्नरूपं प्रार्थनासोपानमाह—कच्चिद्वो युष्माकं स्वागतम्। प्रार्थनामाह—वो युष्माकं किं प्रियं करवाणि अतो यद्भवतीनां हृद्गत किमपि प्रियमस्ति तदेव मम प्रार्थनीयमित्यर्थः। तत्र निरुत्तरा वीक्ष्य पुनः प्रार्थनार्थं सोपानांतरमाह—व्रजस्येति। प्रार्थनामाह—ब्रूतेति। मा लज्जतेति भावः॥ १८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रथममवहित्थयौदास्यमवलम्बमानः सादरमाह—स्वागतमिति। वो युष्माकं शोभनमागतं वृत्तमित्यर्थः। यद्वा, वो युष्माभिः सुष्ठु आगतं कच्चिदिति प्रश्ने महान् भागो भाग्यं पातिव्रत्यादिलक्षणं यासां तासां सम्बोधनम् अतो वो युष्माकं किं प्रियं करवाणि अपि तु न किञ्चित्कर्त्तुं शक्नोमि इत्यर्थः। यद्वा, किं करवाणि तदाज्ञापयन्त्वित्यर्थः महाभागानां प्रियाचरणेन ममापि धर्मविशेषो भावीति भावः। पूर्वं यज्ञपत्नीः प्रत्यप्येवमेवोक्तं किन्तु तत्रास्यतामिति गौरवं विधाय किं कर्त्तुं शक्नोमि अपि तु न किमपीति केवलमौदास्यमत्र तु प्रियं किमिति श्लेषेण साकाङ्क्षत्वमपीति विशेषः। वस्तुतस्तु एतासां तादृशागमनं दृष्ट्वा परमप्रीत्यैवाह – स्वागतमित्यादि। महाभागा इति सर्वपरित्यागेन तदेकापेक्षया तासामागमनात् स्वस्य च नानाप्रियजनापेक्षया तादृशत्वाभावमननेन स्वस्मादपि प्रेममहत्वविवक्षयोक्तं भागोऽत्र भजनम् अतस्तासां प्रेमपरवशः सन्नाह—प्रियमिति। तच्च प्रियजनवशीकरणचतुरस्य विदग्धशिरोमणेः स्वाभाविकमेवेति दिक्। तदित्थमेव परत्र च वस्तुत इत्यादिकम् इति शब्दपर्यन्तो वास्तवोऽर्थो ज्ञेयः। तदनन्तरं तु नर्मादिमयो ज्ञेयः। तथाहि स्वागतमित्यादिना नर्मणा सदाचारमिवाश्रित्य समागतजनेषु वक्तुं योग्यमुक्त्वा सर्वा एव युगपत् ससम्भ्रममागता वीक्ष्य स्वयमपि कैतवेन सभयसम्भ्रममिव पृच्छति—व्रजस्येति। अनामयं मङ्गलं कच्चित्। ननु, चतुरसिंह! तथा सति गोपादयोऽप्यागताः स्युरिति चेत्? सत्यं तर्हि अङ्गनाविषयकः केषामप्युपद्रवो नूनं भवेदिति धूर्त्ततया आशङ्क्येव साटोपमाह—ब्रूतेति। निजागमनस्य कारणं हेतुं प्रयोजनं वा। अथवा तदुक्त्यभिप्रायानिर्द्धारणेन लज्जया चानुत्तरास्ता वीक्ष्य मन्ये शोकवेगेनामङ्गलस्याश्राव्यत्वेन वा किञ्चित् न वदथेति व्यञ्जयन् किञ्चिदन्यदेव चोत्थापयन् सवैयग्र्यमिव पृच्छति—

व्रजस्येति । एवं सर्वमग्रेऽप्याशङ्कादिकं कैतवेनैवेति ज्ञेयं तथाप्यवदन्तीः प्रसन्नमुखीश्चालोक्यास्वस्ततामभिनयन् सलज्जमिवाह—ब्रूतेति । भवतु मद्दुर्वितर्कत्वं यूयमेव स्वयम् ब्रूतेत्यर्थः अत्रैकैकैव वाक् समुपेक्षामयी सम्प्रार्थनामयी चेत्युक्तं तत्रास्याः समुपेक्षामयीत्वं प्रपञ्चितं सम्प्रार्थनामयीत्वं कथ्यते इदमेव श्लेषार्थतयाग्रेपि प्रतिश्लोकं लेख्यं तथाहि हे महाभागाः ! महान् भागो भाग्यं यासाम् ईदृशी ज्योत्स्नी तत्रापीदृशं वनं तत्रापीदृशं वो नवयौवनादि तत्रापीदृशोऽनुवर्त्ती जनोऽयमनुकूलः, इति महदेव भाग्यमिति तत्रेष्टप्रश्नरूपं प्रार्थनासोपानमाह—कच्चित् वो युष्माकं स्वागतं प्रार्थनामाह–वो युष्माकं किं प्रियं करवाणि अतो भवतीनां यत् हृद्गतं किमपि प्रियमस्ति तदेव मम प्रार्थनीयमित्यर्थः । तत्र निरुत्तरा वीक्ष्य पुनः प्रार्थनार्थं सोपानान्तरमाह—व्रजस्येति । प्रार्थनामाह—ब्रूतेति । मा लज्जतेति भावः ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रथममवहित्थयौदास्यमवलम्बमानः सादरमाह–स्वागतमिति । वो युष्माकं शोभनमागमनं वृत्तमित्यर्थः, यद्वा, युष्माभिः सुष्ठु आगतं किम् ? महान् भागो भाग्यं पातिव्रत्यादिलक्षणं यासां तासां सम्बोधनम् । अतो वो युष्माकं किं प्रियं करवाणि, अपि तु न किञ्चित् कर्तुं शक्नोमीत्यर्थः । यद्वा, किं करवाणि, तदाज्ञापयन्त्वित्यर्थः । महाभागानां प्रियाचरणेन ममापि धर्म्मविशेषो भावीति भावः । एतत् सर्व्वं स्वत एवौदासीन्यं गमयत्येव । लोके प्रायो गौरवेणैवैतादृशप्रश्नप्रवृत्तेः, अत एव पूर्व्वं यज्ञपत्नीः प्रत्यप्येवमेवोक्तम्, केवलं तासु तत्र ब्राह्मणीत्वेन परमादरादारयतामिति, आसु च व्रजांगनात्वेन प्रकृत्यैव प्रियत्वात् प्रियं व इति विशेषः । यद्वा, वः किं प्रियं करवाणीति साक्षान्मुखोक्त्या ताभ्योऽप्यासु परमौदासीन्यमेव सूच्यते । वस्तुतस्तु एतासां तादृशागमनं दृष्ट्वा परमप्रीत्यैवाह—स्वागतमित्यादि । महाभागा इति रासक्रीडया महालक्ष्मीतोऽतिसौभाग्यविशेषाभिप्रायेण; किंवा सर्व्वपरित्यागेन तदेकापेक्षया तासामागमनात्, स्वस्य च तादृशत्वाभावेन स्वस्मादपि महत्त्वविवक्षयोक्तम्, अतस्तासां प्रेमपरवशः सन्नाह–प्रियमिति । तच्च प्रियजनवशीकरणचतुरस्य विदग्धशिरोमुकुटमणेः स्वाभाविकमेवेति दिक् । अत एव यज्ञपत्नीषूक्तेरासु विशेषः; प्रियं व इति युक्त एवेति; अत्र एकैव वाक् समुपेक्षामयी, संप्रार्थनामयी चेत्युक्तम्, तत्र समुपेक्षामयीत्वं प्रपञ्चितम्, संप्रार्थनामयीत्वं श्लेषरूपेण कथ्यते । तथाहि—भो महाभागाः ! महान् भागो भाग्यं यासां वो युष्माकं स्वागतम्, यतो महाभागाः, ईदृशी ज्योत्स्नी, तत्रापीदृशं वनम्, तत्रापीदृशोऽनुवर्ती जनोऽयमनुकूलस्तत्रापीदृशं वो नवयौवनादि, इति महद्भाग्यमेव, अतो युष्माकं किञ्चित् प्रियं करवाणि । यद्वा, व इत्यस्य अन्त्यपदेनान्वयः, निजेष्टं किं करवाणि, किमपि साधयिष्यामीति, यद्यप्यर्थश्लेषोक्तौ सम्यगक्षरार्थे संगतिर्नापेक्ष्यते, तथापि विदुषां सतां प्रीतये कथञ्चिद् यतेमहि । एवमादौ सदाचाररीत्या समागतजनेषु वक्तुं योग्यमुक्त्वा सर्व्वा एव युगपत् ससम्भ्रममागता वीक्ष्य स्वयमपि कैतवेन सभयसम्भ्रममेव पृच्छति—व्रजस्येति । अनामयं मंगलम्, कच्चित् प्रश्ने । ननु चतुरसिंह ! तथा सति गोपादयोऽप्यागताः स्युरिति चेत्, सत्यम्, तर्हि अंगनाविषयकः केषामपि दैत्यादीनामुपद्रवो नूनं भवेदिति धूर्त्ततया आशंक्येव साटोपमाह—ब्रूतेति । निजागमनस्य कारणं हेतुं प्रयोजनं वा । अथवा तदुक्त्यभिप्रायानिर्द्धारेण लज्जया वा अनुत्तरास्ता वीक्ष्य शोकवेगेनामंगलस्याश्राव्यत्वेन वा किञ्चिदवदन्तीर्मत्वेव किञ्चिदन्यदेवोत्थापयन् सवैयग्र्यं पृच्छति—व्रजस्येति । एवं सर्वमग्रेऽप्याशंकादिकं कैतवेनैवेति ज्ञेयम्, तथाप्यवदन्तीः प्रसन्नमुखीश्चालोक्याश्वस्ततामभिनयन् सलज्जमिवाह—ब्रूतेति । शक्रकृत–दुर्वृष्ट्यादिनेव मत्पार्श्वेऽत्र रात्रौ प्रायः सर्व्वासामीदृशागमनकारणं मद्दुर्वितर्कत्वाद्यूयमेव स्वयं ब्रूतेत्यर्थः । वस्तुतश्चेयं नर्म्मभंगिरेव । श्लेषार्थश्चायम्, किञ्च, युष्माकमागमनेनैव व्रजस्य मंगलं व्यक्तम्, अत आगमनकं युष्माकमागमनसुखं तदेव अरणं शरणं यस्य तं मां किञ्चित् किं ब्रूत, मया सहालापं किं करिष्यथेत्यर्थः । यद्वा, अव्ययानामनेकार्थत्वात् कच्चित् किञ्चिद्ब्रूतेत्यर्थः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तमेवाह–स्वागतमित्यादिना इति विप्रियमित्यतः प्राक्तनेन मत्प्रेष्ठानां वो भाग्यं वाचामगोचरमित्यभिप्रायेण सम्बोधयति हे महाभागा इति वो युष्माकं स्वागतमागमनं शोभनं जातं किन्तु व्रजस्यानामयमाधिव्याधिराहित्यं किलेति प्रश्नः तत्कच्चिदस्मदिष्टमित्यर्थः यद्यनामयं तर्ह्यागमनकारणं ब्रूत तदनामयापादनादन्यद्वः किं प्रियं करवाम ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

वः किं प्रियं करवाणि युष्माकं मयाभीष्टं कर्तव्यं तत्किं तदभीष्टं जानन्नप्यज्ञ इव पृच्छति—व्रजस्येति । कच्चिद्व्रजस्य स्थानम् अनामयं न आमयो रोगो यस्मिन् तत्तथा ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स्वागतमित्यादिकमुत्तरप्रत्युत्तरम् ॥ १८–२३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तत्रादौ स्वीकारपूर्वकमाह—स्वागतमित्यादि । हे महाभागाः स्वागतपरमसौभाग्यभाजः ! स्वागतं सुखेनागतं प्रियं किं करवाणि वः, वो युष्माकं किं करवाणि युष्माकमनुरागोचितं प्रियमीश्वराप्यहं कर्त्तुमसमर्थ एव तेनाहं व ऋणीव इति स्वीकारः । ताटस्थ्यमाह व्रजस्यानामयं कच्चित् ? आगमनकारणं ब्रूत किमर्थमागताः स्थ तत्कथयत ॥ १८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तत्रादौ स्वीकारमाह—स्वागतमिति सुखेनागतम् अत्यनुमोदनेन स्वीकारः, हे महाभागा वो युष्माकं प्रियं किं करवाणि भवतीनामनुरागोचितं मया किं कर्तव्यम्, तदहमृणीव इति च स्वीकार एव । ताटस्थ्यमाह–व्रजस्येत्यादि आगमनकारणं ब्रूत ॥१८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथ स्त्रीपुंसां रसज्ञानां मिलने तावदियं रसरीतिर्यत् पुंमांसो रतोत्सुक्यमाविष्कुर्वते स्त्रियस्तु तत्रासहिष्णवः कुप्यन्तीत्यतस्तामेव रसरीतिं प्रथममाश्रित्य कृष्ण आह—स्वागतं यो युष्माकं क्वचित्सुखमयमागमनं वृत्तं (त) यतो यूयं महाभागाः जन्मारभ्य दुःखस्य मुखं भवतीभिः कदापि न दृष्टमिति भावः । यद्वा, नायं प्रश्नः किन्तु प्रीत्युक्तिरतो युष्माकं शोभनमागमनमद्य वृत्तं यदत्रागतं तत्सम्यक्कृतं यतो महाभागाः भाग्यवतीनां हि सर्वाः क्रिया एव सफलीभवन्त्यः स्वस्य परस्य च सुखदा भवन्तीति भावः । अतो वः किं प्रियं करवाणि अधुना रात्रावत्र निर्जने वने एकाकिना यूना मया युवतीनां वो यत् प्रियमातिथ्यं कर्तुं शक्यं स्यात् तद् ब्रूत युष्मत्प्रियचिकीर्षामपि सारल्येन स्वप्रियं कृपया स्पष्टं वक्तव्यं यथा निःसन्देहं तत्राहं प्रवर्तेयेति भावः । ततश्च भो महासाहसिक ! लम्पट ! अस्मानपि पतिव्रताः यदेवं वक्तुमुत्सहसे तत्किं धर्मतो राजतश्च न विभेषीति समुचितं प्रत्युत्तरमप्राप्नवता प्रियं किं करवाणीत्यस्य व्यञ्जितेऽङ्गसङ्गरूपेऽर्थे सम्मतिलक्षणं लज्जाहेतुकं मौनमेव दृष्टवता भगवता विचारितं यद्येताभिः स्वसमुचितं वाम्यमद्य नाङ्गीक्रियते तर्हि मयापि स्वसमुचितमौत्सुक्यं न बहिष्करणीयं किन्तु वाम्यमिश्रमेव ततश्च सम्भोगभेदे सम्प्रयोगे यथा वैपरीत्यमपि चारु भवति तथैव सम्भोगभेदे संमिलनेपि वैपरीत्यं चारु भवतु किन्त्वासां महामोहनवेणुनादमाध्वीकपानोत्थातिवैवश्यादेव प्रकृतिविपर्ययस्तत एव दाक्षिण्यं मम तु वैवश्याभावात्तदनुरोधादेव कृत्रिमं वाम्यं बहिरेव कार्यमन्तरतु स्वाभाविकमौत्सुक्यमस्त्येवेत्यादिकं विचार्य्य च वाम्यपदवीमारोढुं सभयसम्भ्रमं पृच्छति—व्रजस्येति । कच्चिद् व्रजस्यानामयं मङ्गलं न जाने साम्प्रतं व्रजे कश्चिदिन्द्रादिकृत उपद्रवो वर्त्तते ? यतः सर्वाः, एव भवत्यो भीताः पलाय्य स्वत्राणार्थं मदन्तिकमायाता इति भावः । ततश्च केयमद्यतन्यऽस्य धूर्त्ततालहरीति मिथः सस्मितसविस्मयावलोकं वितर्कयन्तीषु तास्वहो युष्माकं मौनेनैवावगम्यते नोपद्रवस्तर्हि ब्रूत किमर्थमायाता अहन्तु नाभ्यूहितुं समर्थ इति भावः ॥ १८ ॥

श्रीरसिकाह्लादिनी टीका

तावत्तासां भावपरिक्षार्थे स्वागतमित्यादि वाक्यान्याह । व्रजे पंच विधा गोप्यः नित्यसिद्धाः उपासनासिद्धाः दंडकारण्यमुनिरूपाः श्रुतिरूपाः देवांगनाश्च क्रमशः पद्ययुग्मेन पृथग् यूथे मुख्या प्रत्याह तत्र नित्यसिद्धाः प्रति स्वागतमिति पद्यद्वयेन उपासनासिद्धाः प्रति मातर इति पद्यद्वयेन मुनिरूपाः प्रति तद्यातेति द्वाभ्यां श्रुतिरूपाः प्रति भर्तुः शुश्रूषणमिति द्वाभ्यां देवांगनाः प्रति अस्वर्ग्यमिति द्वाभ्यां एवं दश वाक्यानि भवन्ति । औदासीन्यमकामत्वं सापेक्षत्वं सकामता एकस्मिन्नेव वाक्ये तु तात्पर्य्यं हि चतुर्विधं आद्यद्वयेन भवति । विप्रलंभो तु तापकृत् अंत्यद्वयेन भवति । संभोगस्तापशांतिकृत् भो महाभागाः परमसौभाग्यवत्य वो युष्माकं स्वागत प्रियं स्वस्मिन्नागतप्राप्तमेवातः परं किं प्रिय वो युष्माकं करवाणि पूर्णानां कृतेनालमित्यर्थः । किंचिदपर्याप्तं चेत्तर्ह्याज्ञापयंत्वित्यर्थः । आदरविशेषेणौदासीन्यं व्यञ्जितं, नास्माकं कामविशेषोऽस्ति भवतीनां प्रियाचरणमेव धर्म–विशेषप्राप्तिरिति अकामत्व सूचितम् । यद्वा वास्तवोऽर्थः स्वयमेव हे महाभागाः महान् भागो भाग्यं यासां ताः, यद्वा महान् भागो भजनं यासां ताः, यद्वा महती चासौ भा प्रीतिस्तां गता इति । पत्यादित्यागेनागतानां मुखेषु प्रतिभाविशेषोदयात् । यतः प्रतिबंधमवगणय्यागता वो युष्माभिः स्वागतं स्वे स्वस्थाने रमणस्थाने आगतं वो युष्माकं किं प्रियं करवाणि वेणुनादश्रवणानन्तरमेवागता । एतादृश्यां मच्चित्तानुवृत्तौ जातायां तत्समं नान्यत्पश्यामीत्यर्थः । रमण प्रतीक्ष्यमानेनाऽपि स्थिते यत्समयेऽनंतरमेवागताः तत्सुष्ठुकृतं अतः परं यथेच्छं रमणं भविष्यतीति सूचितं अतः सापेक्षत्वं सकामत्वं सूचितम् । एवं तासामागमनमनुमोद्य संभ्रममालक्ष्याह । व्रजस्येति व्रजस्य भवतीनां निवासस्थानस्यानामयं निरुपद्रवं मंगलमिति यावत् किंचिदिति कोमलप्रश्ने सर्वस्य चेदुपद्रवोऽभविष्यत्तदा सर्वे वृद्धा युवानो बालाश्चागताऽनामयत्वे लज्जामालक्ष्य तामपनुदन्नाह । आगमनकारण ब्रूत कथयत मम शक्यं चेत्तदा शान्तिं विधास्ये नो चेत्तदा व्याबुध्य गमतामेति । अत्र मम कश्चित् स्वार्थो नास्ति कामोऽपि नास्ति व्यञ्जनया वास्तवमर्थमाह । व्रजस्य सर्वस्य भवतीनां पतिपुत्रादेरनामयमारोग्यं उपद्रवकत्वाभावो वर्त्तते कश्चिदिति संदेहपूर्वकप्रश्ने मया चातुरीविशेषेण तथैव कृतम् । यथा कश्चिदत्र

नागमिष्यतीति । शंका चेत्कथयत् संकोचेनाकथयंतीः प्रत्याह आगमनकारणमागमने कारणमभीष्टविशेषं ब्रूत येन रमणाभिलाषेणागताः तत्सर्वं मुखेन कथयत तदहं सर्वमेव संपादयिष्ये । यद्वा अनामयप्रश्नेन वानुरागेन तूष्णींभावस्थित्या मुखप्रसत्या च उपद्रवाभावमाकलय्याह । आगमनकारणमागमने स्थितौ यत् कं मुखं तस्यारणं शरणमाश्रयस्तं मां प्रति ब्रूत, यद्वा आगमनेन स्थित्या यत्कं सुखं तत्रारणम् आश्रयः स्थलमिति तावत् तद् ब्रूत, वने वा पुलिने वा जले वा विहरिष्यथेति कथयत तथैव संपादयिष्ये व्यञ्जनावृत्या तन्मनोरथपूर्णं प्रतिश्रुतीत्यर्थः । सापेक्षत्वसकामत्वे दर्शिते ॥ १८ ॥

विशुद्धरसदीपिका

तानेवाह—श्रीभगवानिति । तत्र प्रथमे पक्षे अवहित्थयौदासीन्यमवलम्बमानः सादरमाह–स्वागतमिति । सुष्ठु आगमनं वृत्तमिति प्रश्नः काकुः अनवसरे कथमागतमिति भावः । तथोक्तौ विस्मिता इवालक्ष्याह—व इति । युष्मान् पृच्छामीत्यर्थः नत्वन्याः काश्चिदिति । ननु, किमस्माकं सकपटादरेणेत्यत आह–महाभागा इति । सौभाग्यादिगुणवतीनामादरस्यौचित्यादिति भावः । अहो किमनेन केवलकुशलप्रश्नवञ्चनेनेत्यत आह–प्रियमित्यादि । मया तु सदाचारप्राप्तमुचितं स्वागतमात्रमनुष्ठितं परिशिष्टमत्र भवतीभिर्वक्तव्यमिति भावः । अत्र वारद्वयं युष्मत्पदप्रयोगो व्यग्रतया सम्भ्रमद्योतनाय अथवा वः स्वागतमात्रमेव मया कर्तुं शक्यते वः प्रियन्तु न किञ्चित्कर्तुं शक्नोमीत्यर्थः । तत्र हेतुः महाभागा इति महाभागविशिष्टानां मल्लक्षणेन साधारणजनेन किं प्रियं कर्तुं शक्यमिति सोल्लुण्ठम् एवं प्रश्नेन जातलज्जाः परिवर्त्तितदृष्टीरालक्ष्य साकूतमाह–व्रजस्येति । अहो मौनव्रताभिर्व्रजमनु किमिति दृष्टिराक्षिप्यत इति भावः । अहो भीरुप्रकृते ! तथा सति सर्व एव समागताः स्युरत आह–तर्हि स्वयमेव ब्रूतेति आगमनकारणम् अभिप्रायमित्यर्थः । तदज्ञानेनात्मनस्तत्रोदासीनता सूचिता पक्षान्तरे कच्चिचदिति मधुरोक्तौ एतासां तादृशमागमनं दृष्ट्वा परमप्रीत्यैवाह—स्वागतमित्यनुमोदनं भवतीनां स्वामिन्या प्राणप्रियया प्रेरितेन मया यथा समाहूतास्तथैव झटिति समागताः इति भावः । अत एव महाभागाः प्राणेश्वरीसमाहूतत्वादिति भावः । अतः परं वः प्रियं मया किं करणीयं न किमपीत्यर्थः अहो श्रुतमुरलीरवाः सर्वेऽपि व्रजवासिनः आगच्छेयुरिति वैषम्याद्बिभिमेत्यत आह—व्रजस्येति । अनामयं भयाभावः अत आगमनकारणं रासक्रीडामुखे यदनुष्ठेयं तद् ब्रूतेत्यर्थः ॥ १८ ॥

श्रीरामनारायणकृता भावभावविभाविका

भगवद्वाक्यमेवाह—स्वागतमिति । तत्रौदासीन्यपक्षे प्रीतिपरीक्षार्थं भगवदौदासीन्येऽपि प्रेमिणामनुरागवृद्धिरित्युपदेशः तथौदासीन्येऽपि सादरभाषणमिति सज्जनयथोपदेशाय सादरोक्तिः वः सुष्ठ्वागमनं जातम् । ननु, किमत्यादरः क्रियते ? तत्राह–महाभागा इति । यूयं महासौभाग्यवत्यः स्वस्वगृहे प्रतिष्ठिताः प्रतिष्ठार्हाः स्वज्ञातिवर्गैः सौभाग्यवतीनामादर उचित एव । यद्वा, यतो यूयं महाभागा महत्सौभाग्यवत्यः, अतो वोऽस्मिन् वने किं स्वागतं सुष्ठ्वागमनमपि तु न तथात्र वः किं प्रियं न किमपीत्याक्षेपः यद्वा औदासीन्येन प्रश्न एव वोऽत्र किमिति स्वागतं किमुद्दिश्य सुष्ठ्वागमनं वृत्तं स्वागतमेवेति चेत्तत्र पुनः प्रश्नः किमत्र वः प्रियमहं न जानामि त्वदधीनमेवास्मत्प्रियमिति चेत्तत्राह—वः किं करवाणि भवत्प्रिये कर्तव्यमपि मया न ज्ञायते । यद्वा, किं करवाणीति मया किमपि कर्त्तुं न शक्यते । ननु, सर्वदा सर्वापत्सु समन्तात् व्रजरक्षणादिप्रियं त्वयैव क्रियतेऽधुनास्मदागमने किमित्यौदासीन्यं ? तत्राह—व्रजस्येति । कच्चिद्व्रजस्यानामयं वर्तते ? कोऽप्युपद्रवस्तु नैव जातः सत्युपद्रवे स्वागमनकारणं ब्रूत प्रार्थनापक्षे तु वः स्वागतं मदाह्वानमात्रेण मदुपरि कृपया मत्कृपया वा वः सुष्ठ्वागमनं जातं यतो यूयं महाभागाः महत्सौभाग्यवत्यः स्वसौभाग्येन ममापि भाग्यं वर्द्धयन्त्यः । यद्वा, मदनुग्रहाद्वरदानेन प्रीत्यावाहनेन मदेकान्तदर्शनलाभेन चोद्बुद्धमहाभाग्याः । यद्वा, यूयं ममैव महाभागाः नान्यस्य कस्यचिद्युष्मासु साम्यम् । यद्वा, श्रीमत्या प्रियया महाभागा महान्तोंऽशाः, अतो ममैव योग्याः । यद्वा, महती भा दीप्तिर्यासां ता महाभा आ समन्तात् लोके गानं यासां ताः आगाः आगच्छन्त्यो वा आगा अं वासुदेवं प्रति गच्छन्त्यो वा न कुत्रचिद्गच्छन्त्यो निश्चलमतयो वा आगा ताश्च ताश्च महाभागाः महत्याभा आगता यासु वा सर्वथा प्रियार्हत्वेनाहं वः प्रियं किं करवाणीति प्रियज्ञानेपि प्रश्ने तदिच्छानुज्ञाधीनत्वमात्मनो द्योतयति—व्रजगतबन्धुवर्गभयेनाज्ञापयितुं शङ्कमाना आलक्ष्याह—व्रजस्येति । कच्चिदिति कोमलालापेनाभयद्योतनं व्रजस्येति सम्बन्धसामान्ये षष्ठी व्रजजननिमित्तं वः युष्माकमनामयं चिन्तारोगाभावः तन्निमित्तकचिन्ता न कार्या ते मम मायामोहिताः स्वान्स्वान् दारान् स्वपार्श्वस्थान् पश्यन्तः सुखमासते सेवापराय मह्यं स्वागमनकारणं ब्रूत ॥ १८ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

यदवदत्तदुदाहरति स्वागतमिति । तत्र त्रिविधाः गोप्यः स्वावतारं विज्ञाय रमणाभिलाषवत्योऽभिज्ञानाः प्रथमाः जारबुद्ध्या तद्वत्योऽनभिज्ञा द्वितीयाः स्वप्रेमातिरेकेण वशीकृतप्रेष्ठाः मानवत्यस्तृतीयाः । तत्राभिज्ञापक्षे वः युष्माकं स्वागतं सुष्ठु शोभनम् आगतम् आगमनं जातं प्रेष्ठसन्निधावागमनमात्रस्याप्यत्यन्तशोभनत्वात् यद्वा, स्वागतमिति कुशलप्रश्नः, अतः परमप्रेम्णा

समागतानां युष्माकं प्रसन्नोऽहं किं प्रियं करवाणि युष्मन्मनोऽभिलषितप्रियकरणेन भवतीनां सन्तोषस्य सम्पादनीयत्वात् अहो रमणेच्छयाऽऽराधनपराणामस्माकं मन्दभाग्यत्वादद्यापि सर्वज्ञेनाप्यऽभिप्रायो न बुद्ध्यते यतः एवं पृच्छति यद्वा, अस्मत्प्रेममन्दतामालोच्यैवं वदति तस्मादतः परं किं वक्तव्यम् इति विचार्य्य खिन्नचित्ता आलक्ष्याऽऽश्वासयति, हे महाभागाः ! महद्भाग्यं भवतीनां यतो ब्रह्मादिभिरति प्रार्थनीयं मत्सन्निधानं लब्धवत्यः । यद्वा, महान्भागो भजनं यासां मत्प्रेमातिरेकविनिर्मुक्तानां कथं मत्सम्बन्ध इति भावः । एवमुक्ता अपि लज्जया वक्तुमशक्ताः व्रजाभिमुखीः स्थिताः दृष्ट्वा पुनराह, व्रजस्येति । व्रजस्थसम्बन्धिजनस्योपद्रवोपस्थितौ भवतीनामागमनं जातं स्यादिति मया ज्ञातमतः पृच्छामि व्रजस्य कच्चिदनामयम् उपद्रवाभावः सम्प्रति वर्त्तते एवं श्रुत्वा अहो सर्वज्ञोऽपि भगवानज्ञवत्पृच्छतीति नरनाट्यमालक्ष्य विस्मयेन मन्दस्मितवतीरुपलभ्य स्वयमपि मन्दहसितालङ्कृतमुखसरोरुह आह–ब्रूतेति । आगमनकारणं ब्रूत किमिह तूष्णीमवस्थानेन सन्देहापादकेन स्वाभिलषितप्रार्थनप्रतिबन्धकलज्जाभिभवकारणप्रेमातिरेकसम्पादनार्थं भगवता ताः प्रत्येवमुक्तम् अनभिज्ञापक्षे स्वस्मिन्नाशक्तचित्ता अस्मत्कलगीतश्रवणसमकालमेव व्रजाद्बहिर्निःसृत्य स्वसन्निधौ समागताः, अत एव तासामन्तःकरणस्थो भावोपि बहिर्निस्सारणीय इत्याशयेन दाक्षिण्यलक्षण नायका स्वभावतां ग्राहयितुम् अवहित्थालक्षणनायकस्य स्वभावमङ्गीकृत्याह—स्वागतमिति । वः शोभनमागमन भवतु यस्मादागमनं सम्यक् शुभसूचकमहं लक्षये यतो हे महाभागाः ! महाभाग्यैर्लब्धो महान्भागः स्वपतिभजनं यासां ताः पतिव्रतास्तथा च महाभागानां युष्माकमागमनं मद्भाग्यं सूचयति, इति भावः । अतः, आज्ञापयन्तु भवत्यो वः प्रिय किं करवाणि केन प्रियाचरणेन स्वात्मानं कृतार्थं करोमीत्यर्थः । एवं विपरीतमाकर्ण्योद्विग्नमानसाः शुष्यन्मुखारविन्दा अहो वृथैव व्रजात्सहसा निस्सृत्याऽत्र समागता इति पश्चात्तापेन व्रजाभिमुखीरुपलभ्याह—व्रजस्येति । यदि व्रजस्य कश्चिदुपद्रव उपस्थितस्तच्छान्त्या च यदि युष्मत्प्रियं भवति तर्हि वक्तव्यं झटित्येव तच्छान्तिं करोमीति भावः । ननु, भो चतुरशिरोमणे ! तथा सति गोपा आगताः स्युरिति चेत्तत्राह–ब्रूतेति । युष्मदागमनेन तत्रत्यस्त्रीणामेव कश्चिदुपद्रव उपस्थित इति तर्कवशान्मैवमुच्यते अतः स्वमुखादपि झटिति तत्कारणं ब्रूत अहो एतत्स्वरूपासक्तचित्ताभिरस्माभिर्व्रजस्य दत्तजलाञ्जलित्वं जानन्नपि फलकाले किमस्मासु व्रजासक्तचित्ततामारोप्यैवं वदतीति स्वमुखारविन्दाभिमुखीरवलोक्याह–ब्रूतेति । वा तिष्ठतु मदीयस्तर्कः स्वयं वक्तुमुद्यता यूयं स्वमुखादेव स्वागमनप्रयोजनं ब्रूतेत्यर्थः । यद्वा, स्वसम्भ्रममाह—वः स्वागतं यतो भवत्यः पतिपुत्रादिसकलसम्पत्सम्पन्नत्वेन महाभागाः तथाभूतानामागमनावकाशरहितानामत्रागमनेन ममातिविस्मयो जातः, इति भावः । तस्माद्युष्माकं किञ्चित्प्रियाचरणे मम महत्युत्कण्ठा जातेत्याशयेनाह, प्रियमिति । यत्प्रिय भवत्यः प्रथयन्ति तदहं करवाणीत्यर्थः । एवमुक्ताः नर्मोक्तिमबुद्ध्वा लज्जया स्वाभिलषितं प्रियं प्रार्थयितुमशक्ताः व्रजाभिमुखीरवलोक्याह, अहो ज्ञातं मया व्रजे कश्चिदुपद्रव उपस्थितः स्याद्यद्भयात्पलाय्य स्वत्राणार्थं मदन्तिकमागता अतः पृच्छामीत्याशयेनाह, व्रजस्येति । तथा च तत्र सम्भावितोपद्रवशान्तिरूपं प्रिय किङ्करवाणि इति भावः । एवमुक्ता अहो अस्य धूर्ताधिराजस्याऽद्यापूर्वोऽयं वाग्विलासो द्रष्टव्य इति तर्कयन्ति सस्मितं परस्परं विलोकयन्तीरालक्ष्याह—ब्रूतेति । अहो भवतीनां मौन्येन मिथः सस्मितं निरीक्षणेन चोपद्रवाभावोस्ति इति मया ज्ञातमतः स्वमुखादेवागमनप्रयोजनं ब्रूतेत्यर्थः । मानिनी पक्षे तासां दुर्लभदर्शनसंभाषणाः स्वान्तिकमायाता दृष्ट्वातिविस्मितस्वान्तः सोत्कण्ठमाह–स्वागतमिति । अहो युष्माभिः सुष्ठु समीचीनमागमनं कृतम् एतादृशचन्द्रकराभिरञ्जिते समस्तोद्दीपनविशिष्टे वने युष्मदागमनाकाङ्क्षया यदवस्थानात् । ननु, किमित्येवं ब्रवीषि मन्दभाग्यप्रेरिता वयमत्र समागता इति तु कदापि न वाच्यमित्याह–हे महाभागाः ! एवम्विधयौवनादिमतीनामेवंविधे वने एवंविधेन प्रियेण समागमो महता भाग्येन लभ्यतेऽतो नाऽल्पस्य तपसः फलमिदमिति भावः । एवमुक्ताः नासाकुञ्चनभ्रुकुटिबन्धपूर्वकम् अवलोकयन्तीरुपलभ्याह–प्रियमिति । अहो नायं कोपकालः किन्तु कोपौदासीन्यादिकं विहाय रमणस्य समयोऽतो येन प्रियाचरणेन भवत्यः प्रसन्नाः भवन्ति तत्किं वर्त्तते तदहं करोमीति दैन्यं व्यञ्जते । यद्वा, किमेवं मुद्रयाऽवस्थिताः यद्युष्माकं मनसः प्रियं तदहं जानामि तदेव च ममापि प्रियं तद्वः प्रियं देशकालानुकूल्ये सति किं करवाणि भवतीनामनुज्ञा वर्त्तते किमिति ससम्भ्रमोक्तिः, एवमुक्ताः व्रजाभिमुखीरवलोक्य तासां पलायनं सम्मान्याह—व्रजस्येति । अहो प्रियाः ! प्रियाचरणानुज्ञा किमिति न दीयते किमथ वाऽविकसितमुखपद्माः भवत्यः पुनर्व्रजमवलोकयन्त्यतोऽहं पृच्छामि व्रजस्य तु कच्चिदनामयम् एवमुक्ताः किञ्चिद्विकसितवदना ईषत्कटाक्षवतीरवलोक्य सस्मितमाह—ब्रूतेति । आगमनप्रयोजनं झटिति ब्रूत प्रार्थनायां लोट् किं वा वदिष्यन्तीति भयान्मद्धृयकम्पमपाकुरुतेति दैन्यं व्यञ्जते सम्प्रत्यभीप्सितकार्य्यनाशकरीं लज्जां विहाय कथयतेति भावः । निवृत्तिपक्षे आस्तिको भूत्वा वदति स्वागतमिति वः श्रुतीनां सुष्ठु आगतं आगमनं भवति यतो भवत्यो महाभागाः प्रमाणमूर्द्धन्यभूता अतो युष्माक किं प्रियं करवाणि अभिधेयं किं धर्मक्रिया ब्रह्म तदपि किं सविशेषमुत निःशेषमेकमनेकं कर्मप्राप्यमुपासनाप्राप्यमुभयप्राप्यं केवलज्ञानप्राप्यं कर्मसमुचितज्ञानप्राप्यं वा प्रतिपादयामि । ननु, यथा कथञ्चिद्यत्किञ्चित् प्रतिपादने को दोष इत्याशङ्क्याह–व्रजस्येति । व्रजस्याऽपौरुषेयस्य वेदस्याऽनामयं कश्चिद्दोषगन्धोऽपि न सम्भाव्यतेऽपौरुषेयवाक्येषु तथा चेदस्तु नामेति भावः । ननु, आगता एव परब्रह्मणि वयमतः किमिति एवं पृच्छसीत्याशङ्क्याह–ब्रूतेति । स्वागमनवतीनां युष्माकमागमनकारणं विनाऽऽगमनं नोचितमिति कृत्वा तस्य कारणं जातिगुणसंज्ञाधन्यमतः ब्रूतेत्यर्थः ॥ १८ ॥

रास-रहस्यम्

र० टी०—हे महाभागाः! महत्यां भायामगाः प्रामाण्यमूर्धन्यभूतमहावाक्योत्थप्रकाशयुक्ताः स्थिरबुद्धिवृत्तयः वो युष्माकं स्वागतं सुष्ठु आगतं आत्माभिमुखीत्वात्, वः किं प्रियं करवाणि—किं ज्ञानकर्मसमुच्चयं केवलं ज्ञानं वा करवाणि प्रतिपादयामि। व्रजस्य व्रजत्यस्मिनात्मा इति व्रजमन्तःकरणं तस्य अनामयं विषयवासनारूपमामयं चिन्तारोगात्मकं दूरीभूतं न वा? आगमनकारणं—संसारे आगमनकारणं वासनाबीजं कच्चिदस्ति न वा? ब्रूत कथयत ॥ १८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वपरित्यागपूर्वकं मत्प्रावण्यं बहुभाग्यलभ्यमित्याशयेन सम्बोधयति—भो महाभागाः! इति। वो युष्माकं स्वागतं शोभनमागमनं जातं मां प्रत्यागमनं सद्यः सफलं भवतीत्यभिप्रायेणाह—वो युष्माकं किं प्रियं करवाणीति यद्भयाद्बृहद्वनादिहागता वयं ते उत्पाताः, अत्रापि प्रवर्तन्ते किमित्याशयेन पृच्छति—व्रजस्यानामयं कच्चिदिति। यदि कश्चिद् व्रजे उपद्रवो नास्ति तदान्यदागमनकारणं ब्रूतेत्यन्वयः ॥ १८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे महाभागा वः स्वागतं युष्माकं समीचीनमागमनं वः प्रियं किं करवाणि। व्रजस्यानामयं नीरोगता क्षेममिति यावत् कच्चित् आगमनकारणं ब्रूत व्रजस्य तत्स्थलोकस्य ॥ १८ ॥

श्रीसुबोधिनी

हे महाभागा वो युष्माकं शुभमागमनं वो युष्माकं किं प्रियं करवाण्यहं व्रजस्याऽनामयं सुखं कच्चित्किम् आगमने कारणं यूयं ब्रूत वदत ॥ १८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

भगवद्वाक्यसंख्यातात्पर्यमाहुः **दशविधानामिति**। सगुणनिर्गुणभेदेन दशविधानां तथा, नत्वेतासामिति भावः। एतासां वस्तुतो निर्गुणत्वेपि लीलारूपत्वेन प्रसक्त्यभावेन तदभावोपि न वक्तुं शक्य इति तथा। तर्हि निषेधस्य कोपयोगः। क्षुब्धदध्नो नवनीतस्येव क्षोभकवाक्यैस्तथाभूताभ्यो हार्दप्रकटने प्रभुशुश्रूषापूर्तौ वाचनिक्या अपि प्रपत्तेः सिद्धौ लोके सर्वात्मभावमार्गप्राकट्ये चोत्कटभावोद्दीपने रसपोषादिषु चेति बुध्यस्व। एतासु नायिकाभेदेन भावभेदो बोधनीयः, ते च क्वचिदेकरूपाः, क्वचित्कदाचिन्मिश्राः, क्वचित्कदाचिदुत्तरेणोपमर्दिताः, केचित्कचिच्चिरं स्थिराः, केचित्किञ्चित्कालं, केचिदाशु नाशिन इत्येवंरूपत्वं सत्त्वादिगुणेष्वस्तीति तद्दृष्टान्तेन बोधयितुं तावद्भिः श्लोकैरेता निवार्यन्त इत्याशयेनाहुः **तमो रज** इत्यादि। तथा सत्युपचारेण भावा एव तमआदिशब्दैरुच्यन्ते। तथा च तेषां भेदा यत्रैतादृश्यस्ता निरूप्यन्त इति सम्बन्धः। वस्तुतस्तु लीलामध्यस्थाः सत्त्वादयः प्राकृतेभ्यस्तेभ्यो भिन्ना एतासु सन्ति। यतः प्रभुसंगमविलम्बहेतोर्लयं कर्तुं प्रिये स्वसंगविलम्बासहिष्णुत्वहेतुभूतभावमुत्पादयितुमेतस्यैव पालनेन स्थैर्यं कर्तुं च समर्थाः। अत एवादौ तम एवोक्तं, ततो रजस्ततः सत्त्वम्। एतदेवाहुः **स्वान्तेति**। स्वस्य तम आदेरन्तः फलं लयादि। उक्तरीत्यैतद्गुणानां तत्र पर्यवसानात्तथा निरूप्यन्त इत्यर्थः। **प्रियं किमित्यत्र, अर्थादेतासामिति**। स्वातिरिक्तस्य प्रश्नविषयीकरणादिति भावः। किञ्च। प्रियस्यानेकविधत्वे हि तेषां मध्ये किं करवाणीति प्रश्नः संगच्छते। तेन तदनेकविधत्वं विवृण्वन्ति **तत्प्रयोजन**मित्यादिना। देशादिव्यवहितत्वमेवेष्टात् कामिते विशेषः। व इत्येकेनैव चारितार्थ्ये द्वितीयपदेपि तदुक्तर्भिन्नविषयकत्वं तस्यावगम्यत इत्याशयेन पक्षान्तरमाहु**स्तत्रापीति**। स्वामिनीष्वप्युक्तरूपसत्त्वादिभिस्तथात्वमस्तीत्येकैकविधाः प्रत्येकैकचरण इत्यर्थः ॥ १८ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

स्वागतं वो महाभागा इत्यत्र **तम** इति का० २५७$\frac{३}{४}$। तमोरजःसत्त्वानां भेदा यत्र तादृश्यः स्त्रियो निरूप्यन्ते, **स्वान्तपर्यवसानत** इति तमसः फलं लयः, रजसः फलं भावविशेषोत्पादनं, सत्त्वस्य फलं तस्य भावस्य पालनं, तथा च स्वस्य तम आदेरन्तः फलं तत्र गुणानां **पर्यवसानात्** तथा निरूप्यन्त इत्यर्थः, **तासु** सगुणनिर्गुणभेदेन दशविधासु स्त्रीषु विषये **भगवद्वाक्यान्यपि** "स्वागतं वो महाभागा" इत्यादीनि **यथायथं** यथोचितानीत्यर्थः ॥ १८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'मयि स्नेहवतामेव भाग्यस्य महत्त्वम्, स्वस्य परस्य च सुखहेतुत्वात्' इति सूचयन् सम्बोधयति—महाभागा इति। वो युष्माकं स्वागतमागमनं शोभनम्। 'स्वस्थाने आगतानां सत्कारः कर्तव्य' इति सदाचारं दर्शयन्नाह—वो युष्माकं किं प्रियं करवाणीति। सर्वाः ससम्भ्रममागता विलोक्य स्वयमपि सभयमिवाह—व्रजस्येति। कच्चित् मदिष्टव्रजस्यानामयं मङ्गलमस्ति चेत्तर्ह्यागमनस्य कारणं ब्रूत ॥ १८ ॥

अन्वितार्थप्रकाशिका

स्वागतमिति ।। तत्रोपेक्षापक्षे हे महाभागाः ! कच्चित्प्रश्ने वो युष्माकं स्वागतं शोभनमागमनं वो युष्माकं किं प्रियं करवाणि । कच्चित् व्रजस्यानामयमस्ति असमये भवतीनामागमादनिष्टं शङ्के । अन्यद्वा आगमनकारण ब्रूत । प्रार्थनापक्षे हे गोप्यः ! कच्चिद्वः स्वागतं सुष्ठु रमणार्थमागमनं यूय महाभागाः ज्योत्स्नादिविलाससामग्रीसम्पत्तेः, अतोऽनुवर्ती प्रियोऽहं वः किं प्रियं करवाणि । तदेव ममापि प्रियमिति व्रजस्यानामयमस्तीति जानामि । भवतीनाम् आगमनकारणं ज्ञातमपि मत्प्रीतये स्फुटं ब्रूत मा लज्जध्वमित्यर्थः । अग्रेऽपि प्रथममुपेक्षामयस्ततः प्रार्थनामयोऽर्थो ज्ञेयः ।। १८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वो युष्माभिः सुष्ठु आगतम् ।। १८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह–स्वागतमित्यादिना इति विप्रियमाकर्ण्येत्यतः प्राक्तनेन ग्रन्थेन ।। स्वागतमिति ।। मत्प्रेष्ठानां वो भाग्यं वाचामगोचरमित्यभिप्रायेण संबोधयति महाभागा इति । हे महाभागा महाभाग्ययुक्ताः, वो युष्माकं स्वागतं भवतीनामागमनं शोभनं जातमित्यर्थः । किं च हे अङ्गनाः, व्रजस्य अनामयं कच्चित् आधिव्याधिराहित्यमस्ति किं वा । अस्मदिष्टं तदेवास्तीति भावः । यदि उच्यते व्रजस्यानामयमस्तीति तर्हि, युष्माकमिति शेषः । आगमनकारणं ब्रूत । तदनामयतापादनादन्यदिति शेषः । वः, किं प्रियं करवाणि करवामेत्यर्थः ।। १८ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स्वागतं व इति : १०.२९.१८.

या या वृत्तिरुपैति मां शमनिशं तस्यास्तदैवाचरम् । यच्चाभीष्टतरं तदन्तरगतं तच्चापि संचिन्तयन् ।
संघातावनमप्यनालसधियैवालोचयँल्लीलया पश्यंश्चागमनस्य हेतुमभितोऽकामं सकामं च वा ।। ५६ ।।
मायारात्रिभयं प्रदर्श्य च ततः संघातवासे स्पृहां भूयः संजनयन्ममत्कलिते सत्वकर्मधर्मैरलम् ।
जीवस्यैव निषेवणं विधिगिरा लोकोत्तरं दर्शयन्नेवं युक्तिचयैरहं प्रथमतः सम्मोहयाम्येव ताम् ।। ५७ ।।
एवं कृतेऽपि न हि या विनिवर्तते मत्पादान्मदेकविनिवेशितसर्वकामा ।
तस्यै रसं निरुपमं प्रदिशामि सैव योग्येत्यबोधि बहुधा विभुना निजोक्त्या ।। ५८ ।। (विशेषकम्)
यथा मद्भजनं लोके मत्प्रसादविधायकम् । कलौ तथा न योगादीत्युक्तमप्यूह्यतां मुहुः ।। ५९ ।।
सौम्या रात्रिरियं न यात सदनं स्थेयं भयं नाप्ततोऽरण्यं पश्यत सेन्दुभूरिलतिक सेवध्वमादौ हि माम् ।
गोष्ठादीन्परतो मदेकरतितस्त्यागोऽपि नाघप्रदः पत्यादेरिति भासते प्रभुगिरोऽर्थोऽपीति वीक्ष्यं बुधैः ।। ६० ।।

कृष्णप्रिया

भगवान् श्रीकृष्ण ने कहा—महाभाग्यवती गोपियों । तुम्हारा स्वागत है । बतलाओ, तुम्हें प्रसन्न करने के लिए मैं कौन सा काम करूँ ? व्रज में तो सब कुशल मङ्गल है न ? कहो इस समय यहाँ आने की क्या आवश्यकता पड़ गयी ।। १८ ।।

रजन्येषा घोररूपा घोरसत्त्वनिषेविता । प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ।। १९ ।।

कर्दमक्षमा

अन्वयः—हे सुमध्यमाः, एषा, रजनी, घोरसत्त्वनिषेविता, व्रजं, प्रति, यात, इह, स्त्रीभिः, न, स्थेयम् ।। १९ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

लज्जया मंदहसितमालक्ष्याह । रजन्येषेति ।। १९ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गोपांगनानां मंदहसितं स्मितम् । रजनी व्यभिचारिजनानुरंजन्यप्येषा घोराणां भयदानां रूपं प्रकाशो यस्यां सा । तदेवाह–घोरसत्त्वा व्याघ्राद्यास्तैर्निषेविता । यद्वा–रात्रिचरत्वाद्घोरसत्त्वा राक्षसा वा । स्त्रीभिः भीरुस्वभावाभिः । यद्वा–घोरसत्त्वैरस्माभिः यष्टिकंबलधारिभिः निषेविता । सुमध्यमाः क्षीणकटिप्रदेशाः । न गोपयोग्या इति संबुद्ध्यभिप्रायः, प्रार्थनापरमिदम् । तांस्त्यक्त्वा मां सेवध्वमित्यभिप्रायः ।। द्वितीयोऽर्थः–उदितपूर्णचंद्रा जनानुरंजनी अघोररूपा । अघोरसत्त्वाः योगिनस्तैर्जनसंबाधाभावान्निषेविता । तस्माद्व्रजं प्रति न यात इह स्थेयम् । अन्यत्र तिष्ठंतु नाम मत्पार्श्वे स्त्रीभिर्न स्थेयं ममाबालब्रह्मचारित्वेन स्त्रीसंगपरिहारात् ।। हन्त हन्त कुलधर्मधैर्यलज्जादिकं ध्वंसयित्वा प्रतिदिनमस्मानुपभुंजानोऽयमद्य वेणुनादेनाकृष्यानीय कारणं पृच्छतीत्यपांगचालनैरेव

परस्परमाक्षाणासु तासु सत्यं देवपूजोपयोगिरात्रिविकाशिपुष्पाहरणार्थमागच्छाम इति किं लतास्वपाङ्गनिक्षेपेण ब्रूध्वे, अयुक्तमिदं कालदेशपात्रानौचित्यादित्याह—रजनीति। एषा चंद्रिकाबहुलापि घोररूपा रात्रित्वादेवेति वल्लीमूलपल्लवादिषु सूक्ष्मसर्पवृश्चिकादेर्दुर्लक्ष्यत्वात्पुष्पाहरणस्य कालोऽयमनुचित इति भावः। घोरसत्त्वा व्याघ्रादयस्तैर्निषेवितेति कालसंबंधेन वृंदावनदेशोऽप्ययमनुचित इति भावः। तस्माद्व्रजं प्रति यात। ननु क्षणं विश्रम्य यास्यामस्तत्राह नेह स्त्रीभिः स्थेयमिति। कालदेशसंबन्धेन युष्मल्लक्षणानि पात्राण्यप्यनुचितानीति भावः। तत्रापि हे सुमध्यमा इति। यूयं युवतयः सुंदर्यः स्थ अहं च सुंदरो युवैवात्रास्मि, यद्यपि यूयं परमसाध्य एव अहं च “कृष्णो ब्रह्मचारी” इति गोपालतापिनीश्रुतिप्रामाण्येन ब्रह्मचार्येव, सहावस्थानेऽपि न कश्चिद्दोषस्तदपि मनः खल्वविश्वास्यं युष्माकं मम चेति भावः। एवं व्यञ्जितौत्सुक्यं श्लिष्टार्थेनापि स्पष्टीभवति। तद्यथा—आगमनकारणं लज्जया न ब्रूध्वे चेन्मा ब्रूत तदहं जानाम्येव तस्मात्तत्त्वं शृणुतेत्याह—रंजयतीति रजन्येषा ज्योत्स्नामयत्वादघोररूपा, तस्मादघोरैः सत्त्वैर्मृगादिभिरेव वृन्दावनस्वभावेनाहिंस्रत्वाद्व्याघ्रादिभिरपि वा निषेवितेति। तेनात्र न भेतव्यमिति भावः। यद्वा—नात्र स्वस्वपत्यादिभ्यो भेतव्यं यतो घोरसत्त्वनिषेवितेति। तेऽत्र नागमिष्यन्तीति भावः। अतो व्रजं प्रति न यात इह मदंतिके स्थेयम्। कुतः—स्त्रीभिः। किं स्त्रीमात्रमेव स्वांतिके स्थापयसीत्यत आह—हे सुमध्यमा इति। सौंदर्ये तारुण्ये च सति याः स्त्रियः शोभनमध्यदेशा भवन्ति ताभिर्भवतीभिरेव नान्याभिः स्थेयमिति भावः। एवमुपेक्षामयाः, अपेक्षामयाश्चार्थाः कृष्णोक्तीनां ज्ञेयाः॥ अत्र तोषिणी—एषा प्रत्यक्षेति तासां तर्कवाग्मितामाशंक्य द्रढयति। ततः कुलवधूनां बहिर्वनादावागमनं नोचितमिति भावः। ननु समुदित्य बह्वीनामागमनं न दोषभाक्, यदि च दोषभाक् तर्हि व्रजेऽपि किमेषा रजनी नास्ति तत्राह—घोरेति। इह वन एव घोरं रूपं तामसस्वभावाभिव्यक्तिर्यस्या न तु व्रजे इहाऽसहायत्वात् तत्र मम सहायत्वादिति भावः। तथा इह घोरैः प्राणिभिर्नितरां सेविता व्याप्ता चातो व्रजं प्रति यात निवृत्य गच्छत नात्र विलम्बो युक्त इत्याशयेनाह—नेति। ननु तर्हि कथमत्र भवता स्थीयते तत्राह—स्त्रीभिरिति। न तु स्त्रिय इव पुरुषा अल्पसत्त्वा इति भावः। किञ्च हे सुमध्यमा इति। ‘यत्राकृतिस्तत्र गुणा वसन्ति’ इति न्यायेन सुंदरीणां गुणवतीनां च भवतीनां नात्रागमनं युक्तमिति भावः। अन्यत्तैः। यद्वा—ननु रसिकशेखर भवानिव वयमप्यत्र विहर्तुं पुष्पाद्याहर्तुं वा समागतास्स्म इति छद्मना तासामवस्थितिमाशंक्याह—रजनीति। एषा रजन्येव न तु दिनम्। ननु रात्रिविलासिनस्ततः को नाम दोषस्तत्राह—घोरेति। हे कमललोचन ज्यौत्स्नीयं रात्रिस्तत्राह —घोरसत्त्वेति। श्लेषेण यूयं यूथशो बह्व्यो व्रजं तत्र स्थितान्स्वपतीन्प्रति यात भजत, एकाकिना मया बह्वीनां प्रियाचरणस्याशक्यत्वात्। ततोऽत्र न स्थेयमिति नर्मविशेषः। ननु भीरुप्रवर घोरसत्त्वेभ्योऽस्माकं न भयं तत्राह—सुमध्यमाः हे कृशमध्याः, तनुमध्यत्वात् कृशांगीनामबलानां बलिष्ठेभ्यो भय स्यादेवेति भावः। वस्तुतश्चैतत्तासां स्वविषयकभावस्य व्यंजनार्थं नर्मणोत्कंठावर्द्धनार्थञ्च। श्लेषार्थश्चायम्—भयसंभावनया च निजाभीष्टं मा निवर्त्तयतेत्याह–प्रथमार्द्धेन। एषा उदितपूर्णचन्द्रा जनान् रंजयतीति रजनी घोररूपेत्यादिकयोः, तस्मादत्र न कोऽप्यायास्यतीति भावः। तस्मादिह मम वीरस्यैव सन्निधौ स्थेयम्। यद्वा—अघोररूपा तमोपगमात्। अघोरैर्वृन्दावनस्वभावेन मिथो मित्रत्वप्राप्त्या भयाऽजनकैरेव सत्त्वैः सर्वप्राणिभिः दिवसप्रायत्वात्तस्या ज्योत्स्नाऽघोरैः सत्त्वैर्भ्रमरकोकिलादिभिरेव वा निषेविता। यद्वा–घोरं दुष्टानां भयजनकम्। अकारविश्लेषेण केषांचिदपि भयाऽजनकं वा सत्त्वं बलं यस्य मम तेन निषेवितेति बालाश्वासनार्थम्। तच्छ्रुत्वा पृष्ठवर्तिनीः सस्मितं परावृत्य पश्यंतीः प्रत्याह—उत्तरार्धेन। अतः सर्वदा व्रजं प्रति यात न, इहैव स्थेयं युष्माभिः। कुतः—स्त्रीभिः। स्त्रीजातीनामीदृशस्थान एव स्थातुं योग्यत्वादित्यर्थः। तत्रापि च हे सुमध्यमाः परमसुंदरीत्वान्मदंतिक एवात्र स्थातुं युज्यत एवेत्यर्थ इति॥ १९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एषा प्रत्यक्षेति तासां तर्कवाग्मितामाशङ्क्य दृढयति—ततः कुलवधूनां बहिर्वनादावागमनं नोचितमिति भावः। ननु, समुदित्य बह्वीनामागमनं न दोषभाक् यदि च दोषभाक् तर्हि व्रजेपि किमेषा रजनी नास्ति? तत्राह—घोरेति। इह वन एव घोरं रूपं तामसस्वभावाभिव्यक्तिर्यस्या न तु व्रजे इहासहायत्वात् तत्र ससहायत्वादिति भावः। तथा इह घोरैः प्राणिभिर्नितरां सेविता व्याप्ता च अतो व्रजं प्रतियात निवृत्त्य गच्छत नात्र विलम्बो युक्त इत्याशयेनाह—नेति। ननु, तर्हि कथमत्र भवता स्थीयते तत्राह–स्त्रीभिरिति। नतु स्त्रिय इव पुरुषा अल्पसत्त्वा इति भावः। किञ्च, हे सुमध्यमाः! इति “यत्राकृतिस्तत्र गुणा वसन्ति” इति न्यायेन सुन्दरीणां गुणवतीनां च भवतीनामत्रावस्थानं न युक्तमिति भावः। अन्यत्तैः यद्वा, ननु रसिकशेखर! भवानिव वयमप्यत्र विहर्त्तुं पुष्पाद्याहर्त्तुं वा समागताः स्म इति छद्मना तासामवस्थितिमाशङ्क्याह—रजनीति। एषा रजन्येव नतु दिनं ननु, रात्रिविलासिनः ततः को नाम दोषः तत्राह—घोरेति। हे कमललोचन! ज्योत्स्नीयम् रात्रिः तत्राह—घोरसत्त्वेति। श्लेषेण यूयं यूथशो बह्व्यो व्रजं तत्र स्थितान् स्वपतीन् प्रति यात भजत एकाकिना मया बह्वीनां प्रियाचरणस्याशक्यत्वात् अतोऽत्र न स्थेयमिति नर्मविशेषः ननु, भीरुप्रवर! घोरसत्त्वेभ्योऽस्माकं न भयं तत्राह—सुमध्यमाः! हे कृशमध्याः! तनुमध्यत्वात् कृशाङ्गीनामबलानां बलिष्ठेभ्यो भयं स्यादेवेति भावः। वस्तुतश्चैतत्तासां स्वविषयकभावस्य व्यञ्जनार्थः नर्मणोत्कण्ठावर्द्धनार्थं च श्लेषार्थश्चायं भयसम्भावनया च निजाभीष्टं मा निवर्तयतेत्याह—प्रथमार्द्धेन। एषा उदितपूर्णचन्द्रा जनान् रञ्जयतीति रजनी घोररूपेत्यादिकयोस्तस्मादत्र न कोप्या-

यास्यतीति भावः। तस्मादिह मम वीरस्यैव सन्निधौ स्थेयम् यद्वा, अघोररूपा तमोऽपगमात् अघोरैर्वृन्दावनस्वभावेन मिथो मित्रत्वप्राप्त्या भयाजनकैरेव सत्त्वैः सर्वप्राणिभिः दिवसप्रायत्वादस्या ज्योत्स्न्या अघोरैः सत्त्वैर्भ्रमरकोकिलादिभिरेव वा निषेविता यद्वा, घोरं दुष्टानां भयजनकम् अकारविश्लेषेण अघोरं केषाञ्चिदपि भयाजनकं वा सत्त्वं बलं यस्य मम तेन निषेवितेति बालाश्वासनार्थं तच्छ्रुत्वा पृष्ठवर्त्तिनीः सखीः सस्मितं परावृत्य पश्यन्तीः प्रत्याह—उत्तरार्द्धेन। अतः सर्वथा व्रजं प्रति न यात इहैव स्थेयं युष्माभिः कुतः स्त्रीभिः स्त्रीजातीनाम् ईदृशस्थान एव स्थातुं योग्यत्वादित्यर्थः। तत्रापि च हे सुमध्यमाः! परमसुन्दरीत्वान्मदन्तिक एवात्र स्थातुं युज्यते एवेत्यर्थ इति ॥ १९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एषा प्रत्यक्षा, प्रत्यक्षत्वमेवाह—घोरं रूपं स्वरूपं यस्याः सा, तामसत्वात्। किञ्च, घोरैः सत्त्वैः प्राणिभिर्नितरां सेविता व्याप्ता, अतः प्रतियात निवृत्त्य गच्छत, नात्र विलम्बो युक्त इत्याशयेनाह—नेति। इह वने। किञ्च, हे सुमध्यमाः! सुन्दरीभिरस्मिन् भयानककाले भयस्थाने च स्थातुं न युज्यत एवेति भावः। अन्यत्तैर्व्यञ्जितमेव। यद्वा, ननु रसिकशेखर! भवानिव वयमप्यत्र विहर्तुं पुष्पाद्याहर्त्तुं वा आगताः स्म इति चेत्तत्राह—रजनीति। एषा रजन्येव, न तु दिनम्। ननु, रात्रिविलासिन्! ततः को नाम दोषः? तत्राह—घोरेत्यादि। स्वभावतो भयजनिका, तत्रापि घोरसत्त्वैर्निषेविता, यद्वा, हे कमललोचन! ज्योत्स्नीयं रात्रिः, तत्राह—घोरसत्त्वेति। अतः स्त्रीभिरिह वने न स्थेयं स्थातुं न योग्यमिति व्रजं प्रतियात, श्लेषेण यूयं यूथशो बह्व्यो व्रजपुरुषसमूहं स्वस्वपतीनिति यावत् प्रतियात भजत, एकाकिना मया बह्वीनां प्रियाचरणस्याशक्यत्वात्, अतोऽत्र न स्थेयमिति नर्म्मविशेषः। ननु, भीरुप्रवर! घोरसत्त्वेभ्योऽस्माकं न भयम्, तत्राह—सुमध्यमा हे कृशमध्याः! कृशांगीनामबलानां बलिष्ठेभ्यो भयं स्यादेवेति भावः। वस्तुतश्चैतत्तासां स्वविषयकभावस्य दृढीकरणार्थं किंवा नर्म्मणा उत्कण्ठाविवर्द्धनार्थं वा, श्लेषार्थपक्षे च घोरसत्त्वादिनात्र न कोऽप्यायास्यतीति भावः। किञ्च, एषा उदितपूर्णचन्द्रमा, जनान् रञ्जयतीति रजनी, अकारप्रश्लेषेण—अघोररूपा, तमोऽपगमात्, यद्वा, शान्ता आसन्नशुद्धसात्त्विकपुण्यमास-कार्त्तिकसम्बन्धात्, इति रासमंगलयोग्यत्यर्थः। किञ्च, घोरैः रसविघातकत्वेन भयजनकैः सत्त्वैर्युष्मत्पत्यादिभिर्दिनवन्निषेविता, यद्वा, अघोरैर्वृन्दावनस्वभावेन मिथो मित्रत्वप्राप्त्या भयाजनकैरेव सत्त्वैः सर्व्वप्राणिभिः, किंवा, अघोरैः सत्त्वैर्हरिणमयूरादिभिरेव रतिजनकैः, यद्वा, घोरं दुष्टानां भयजनकम्, किं वा, अघोरं केषाञ्चिदपि जनानां भयाजनकं सत्त्वं बलं यस्य ममेति बालाश्वासनार्थम्, किंवा, अघोरं शान्तं सुखदं स्वभावो यस्य तेन मया निषेविता, इति निजवैदग्धीविज्ञापनम्। अतः सर्व्वथा व्रजं न प्रतियात, इहैव स्थेयं युष्माभिः। कुतः? स्त्रीभिस्तत्रापि हे सुमध्यमाः! परमसुन्दरीभिरित्यर्थः, अत मदन्तिक एवात्र स्थातुं युज्यत एवेत्यर्थः ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

लज्जाप्रयुक्तमन्दहासमालक्ष्याह-रजनीति। एषा रात्रिः स्वयं भयङ्करा भयङ्करैः सत्त्वैर्व्यालव्याघ्रादिभिर्निषेविता च अतो व्रजं प्रति गच्छत हे सुमध्यमाः! इहास्मिन्वने रात्रौ स्त्रीभिर्न स्थातुं युक्तम् ॥ १९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ननु, यत्किञ्चिन्निमित्तमपेक्षते भवदागमनम् अन्यथाऽस्यामवस्थायां नोचितमिति तत्राह— रजनीति। घोरसत्त्वा राक्षसादयः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

परिहासपूर्वकनिषेधे विधिमाह—'रजन्येषा' इत्यादि। एषा रजनी घोररूपा यतो घोरैः सत्त्वैः प्राणिभिर्निषेविता, तस्माद् गृहं प्रतियात। इह स्त्रीभिर्न स्थेयम्; स्त्रियः स्थातुं नार्हन्ति। अथवा, स्त्रीभिः सह मया न स्थेयम्। यूयं चेन्न गच्छत, तदाहमेव गमिष्यामीति तत्रावस्थानं प्रति निषेधः। गृहं प्रतियातेति विधिः; पुनर्निषेधविध्योर्विधिनिषेधावत्रैव। रजन्येषा अघोररूपा, चन्द्रिकाविशदत्वात्; अघोरैः शान्तैर्मृगादिभिः सत्त्वैर्निषेविता, तस्माद्भयाभाव एवात्र; तेन गृहं न प्रतियात, इह वृन्दावने स्त्रीभिर्भवतिभिः स्थेयम्। इतः परं वृन्दावन एव स्थेयम्, गृहं मा गन्तव्यमित्यर्थः। सुमध्यमाः! यद्वा स्त्रीभिः स्त्रीणां मध्ये ईभिः लक्ष्मीभिः, स्त्रीणां लक्ष्मीभिरिति वा ॥ १९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

निषेधे विधिमाह—रजन्येषा घोररूपेत्यादि। एषा रजनी घोरैः सत्त्वैर्निषेविताः, अत इयं रात्रिर्भयङ्करी, तस्मादिह न स्थेयम्, व्रजं यात-इत्यवस्थाने निषेधः। तत्रैव विध्यर्थश्च-तथाहि एषा रजनी अघोररूपा-अघोरैः सत्त्वैर्हरिणादिभिरेव सेविता, न तु व्याघ्रादिभिः प्रतियात व्रजं न, इह स्थेयं हे सुमध्यमाः। स्त्रीभिः स्त्रीणामीभिर्लक्ष्मीभिर्भवतीभिरिति ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हन्त हन्त कुलधर्मधैर्य्यलज्जादिकं ध्वंसयित्वा प्रतिदिनमस्मानुपभुञ्जानोऽयमद्य वेणुनादेनाकृष्यानीय कारणं पृच्छतीत्यपाङ्गचालनैरेव परस्परमाचक्षाणासु तासु सत्यं देवपूजोपयोगिरजनिविकासिपुष्पाहरणार्थमागच्छामेति किं लतास्वपाङ्गनिक्षेपेण ब्रूध्वे अयुक्तमिदं कालदेशपात्रानौचित्यादित्याह–रजनीति। एषा चन्द्रिकाबहुलापि घोररूपा रात्रित्वादेवेति वल्लिमूलपल्लवादिषु सूक्ष्मसर्पवृश्चिकादेर्दुर्लक्ष्यत्वात् पुष्पाहरणस्य कालोऽयमनुचित इति भावः। घोरसत्त्वा व्याघ्रादयस्तैर्निषेवितेति कालसम्बन्धेन वृन्दावनदेशोऽप्ययमनुचित इति भावः। तस्माद् व्रजं प्रति यात। ननु, क्षणं विश्रम्य यास्यामस्तत्राह, नेह स्त्रीभिः स्थेयमिति कालसम्बन्धेन युष्मल्लक्षणानि पात्राण्यप्यनुचितानीति भावः, तत्रापि हे सुमध्यमाः! इति यूयं सुन्दर्य्यो युवतयः स्थ अहं च सुन्दरो युवैवात्रास्मि यद्यपि यूयं परमसाध्व्या एव अहं च "कृष्णो ब्रह्मचारी" इति गोपालतापिनीश्रुतिप्रामाण्येन ब्रह्मचार्य्येवेति सहावस्थानेपि न कश्चिद्दोषस्तदपि मनः खल्वविश्वास्यं युष्माकं मम चेति भावः, एवं व्यञ्जितमन्तरौत्सुक्यं श्लिष्टार्थेनापि स्पष्टीभवति तद्यथा आगमनकारणं लज्जया न ब्रूध्वे चेन्मा ब्रूत तदहं जानाम्येव तस्मात्तत्त्वं शृणुतेत्याह–रञ्जयतीति रजन्येषा चन्द्रिकामयत्वादघोररूपा तस्मादेवाघोरसत्त्वैर्मृगादिभिरेव वृन्दावनस्वभावेनाहिंसत्वाद्व्याघ्रादिभिरपि वा निषेवितेति तेनात्र भेतव्यमिति भावः। यद्वा, नात्र स्वस्वपत्यादिभ्यो भेतव्यं यतो घोरसत्त्वनिषेवितेति तेऽत्र नागमिष्यन्तीति भावः। अतो व्रजं प्रति न यात इह मदन्तिके स्थेयं कुतः? स्त्रीभिः किं स्त्रीमात्रमेव स्वान्तिके स्थापयसीत्यत आह, हे सुमध्यमाः! इति सौन्दर्य्ये तारुण्ये च सति याः स्त्रियः शोभनमध्यदेशा भवन्ति ताभिर्भवतीभिरेव नान्याभिः स्थेयमिति भावः, एवमुपेक्षामयाः, अपेक्षामयाश्चार्थाः कृष्णोक्तीनां ज्ञेयाः।१९।

श्रीरसिकाल्हादिनी टीका

घोररूपा घोरं भयंकरं रूपं यस्या तामसभावत्वात्। घोरैर्भयंकरैः हिंस्रैरित्यर्थः। तैः सत्वैः प्राणिभिर्बलिभिः निषेविता, अतो व्रजं प्रतियात गच्छत, स्वयमेव समाधत्ते इह वने स्त्रीभिः न स्थेयं सामान्यतो भीरुस्वभावाभिरपि किं पुनर्युवतीभिर्भवतीभिस्तत्र साभिप्रायं संबोधयन्नाह हे सुमध्यमाः कृशोदर्य्यः दिनेऽप्यत्रावस्थानं नोचितं भवतीनां किं पुनः रात्राविति, किं च युष्माकमागमनं दृष्ट्वा ममाप्येषा रजनी घोररूपा जाता युष्मत्संगतं मां यदि कश्चित्पश्येत्तदा को वेद किं स्यादिति, विजने वने निःकामस्योदासीनस्यैवंस्थिति रुचिता न तु सकामस्य कृशांगीनां भवतीनां ससाहसागमनं दृष्ट्वा एषा रजन्यपि रंजनकर्त्र्यपि मम घोररूपा जाता। यूथशो मिलितानां भवतीनां सांत्वनस्याशमत्वात्, अतो निःकामस्योदासीनस्य मम भवतीभिः सह रहसि स्थिति रुचिता न भवति। निःकामत्वमुदासीनत्वं च सूचितम्। सुमध्यमा इतिपदेनेदं लभ्यते। घोरसत्वनिषेवितापि सुन्दरीभिः निषेवितेति चित्रं विरोधलक्षणं या सापेक्षसकामत्वे सूचयन् रात्रेरेवोद्दीपनविभावत्वमाह–एषा परिदृश्यमाना रजनी रंजयतीति रजनी सकामानोचितमिति। कीदृशी अकारप्रश्लेषेणाघोररूपा चन्द्रकिरणैर्दिवैव प्रकाश्यमानत्वात्। यद्वा मादृशानामघोररूपापि युष्मत्पत्यादिनां घोररूपैव प्रतीयते यतः कोऽप्यत्र नायास्यतीति निशंकं विहरतेति द्योतितं, किं च घोरैः स्वरूपेण भयंकरै स्वभावेन शांतैः सत्वैः प्राणिभिः निषेविता, तदुक्तमत्रैव "यत्र नैसर्गदुर्वैराः सहासन्नृमृगादय" इति। इत्यनेन रमणप्रतिबन्धकप्राणिराहित्यं सूचितमिति। यद्वा अघोरैः सत्वैः पारावतान्यभृत्सारसशुकसारिकादिभिः निषेवितेति उद्दीपनविभावप्रदर्शनं, यद्वा अघोरैः सत्वैः शांतिदं कामतापनिवर्तकं सत्यं बलं यस्य तेन परकामिना मादृशेन निषेविता, यद्वा घोरैः राजसैः सत्वैर्युष्मत्सदृशैर्महासाहसिकैः निषेविता, अतो व्रजं न प्रतियात, कुत्र स्थातव्यमिति चेत्तत्राह इह रहसि स्त्रीभिः स्थेयं किं पुनः परमविदग्धाभिर्भवतीभिरियत् व्यंजनया रमणं द्योतितं स्वस्य कामत्वसापेक्षत्वे सूचिते ॥ १९ ॥

विशुद्धरसदीपिका

प्रथमे पक्षे। ननु, व्रजे वने चाऽस्माकं गमागमावजस्रं जायेत एव किमागमनकारणजिज्ञासयेत्यत आह—रजनीति। कुलाङ्गनानां रजन्यां बहिर्गमनमनुचितमिति भावः। ततः किमत आह–घोररूपेति। रतिलम्पटपाटच्चरादिघोरप्रकृतिजनेष्ववसरप्रदेत्यर्थः। ननु, मनसि परिशुद्धे न कोऽपि दोषः तत्राह–घोरेत्यादि घोरत्वं हि रजसो धर्मस्तेन चापलं लक्ष्यं तच्च सुचरित्राणामकीर्तिकरमिति भावः। ननु, जातमेव किं तदनुतापेनेत्यत आह–प्रतीतिप्रमादेनानुचरितं पुनः सम्यगाचरणीयमिति भावः। ननु, झटिति गन्तुं न शक्नुमस्तत्राह–नेति। इह न स्थेयं, कुतः? स्त्रीभिरिति परस्त्रीभिः परपुरुषसविधेऽवस्थानं न विधेर्विषय इति भावः। ननु, पुंसः प्रकृत्यात्मकं जगदिति न्यायात् को विरोधस्तत्राह–सुमध्यमाः सुन्दरीभिरात्मच्छायातोऽपि शङ्कनीयमिति भावः। पक्षान्तरे ननु, लोकापवादभिया व्रजं प्रतियानमेवोचितमस्माकमित्यत आह—रजनीति। दिवसे गन्तव्यमिति भावः। इदानीं का भीतिस्तत्राह–घोररूपेति। प्रकृतिदुर्गमेत्यर्थः। ततः किमत आह –घोरैः सत्त्वैर्व्याघ्रादिभिः सेवितेति। ततः किं विधेयमत आह–व्रजं न प्रतियात कुत्र स्थेयमत आह–इहेति। ननु, रतिलम्पटस्य भवतः शङ्कनीयत्वादनुचितमित्यत आह–स्त्रीभिः नहि बहूनामेकत्र स्थितौ लोकापवाद इत्यर्थः। किञ्च, निरपत्रपत्वे सति भवत्यपवादः भवत्यस्तु सुमध्यमाः सुशोभने मध्ये मान्ति निलीयन्त इति लज्जया स्वाङ्गेष्वेव निलीना इत्यर्थः। अथवा एषा उदितपूर्णचन्द्रा जनान् रञ्जयति अनुरागं वर्द्धयतीति रजनी अकारप्रश्लेषः

अघोररूपा तमोऽपगमात् तथा अघोरैः वृन्दावनस्वभावेन मिथो मित्रत्वप्राप्त्या भयाजनकैरेव सत्त्वैः सर्वप्राणिभिर्दिवसप्रायत्वात्। यद्वा, अघोरसत्त्वैः भ्रमरकोकिलादिभिर्निषेविता वस्तुतस्तु अघोरसत्त्वैः सौहृदाक्रान्तमानसैर्भवादृशैः परिकरैरेव नितरां सेविता सेवितुं योग्येत्यर्थः। अतो व्रजम् अनेकभावानां समूहं न प्रतियात तत्प्रतिक्रियां सङ्कोचं वा न कुरुत श्रीवृन्दावनगुणैरेव शुद्धसख्यावेशो भविष्यतीति भावः —

"वृन्दावनं जनाजीव्यद्रुमाकीर्णं समाप्रियम्। यत्र नैसर्गदुर्वैरा सहासन्नृमृगादयः॥
मित्राणीवाजितावासद्रुतरुट्तर्षकादिकम्"॥

इति प्रागुक्तेः, अस्यार्थः–वृन्दावनमिति ब्रह्मवैवर्त्तोक्तेषु श्रीराधिकाषोडशनामसु वृन्देति तन्नामोक्तेः श्रीराधावनमित्यर्थः तानि यथा—

"राधा रासेश्वरी रासवासिनी रसिकेश्वरी। कृष्णप्राणाधिका कृष्णप्रिया कृष्णस्वरूपिणी॥
कृष्णवामाङ्गसम्भूता परमानन्दरूपिणी। कृष्णा वृन्दावनी वृन्दा वृन्दावनविनोदिनी॥
चन्द्रावली चन्द्रकान्ता शतचन्द्रनिभानना"॥ इति

वृन्दाख्यसख्यास्तु तयैव प्रसादितत्वादिति प्रसिद्धं कीदृशं जनास्तस्याः सखीजनाः "नामैकदेशे नामग्रहणम्" इत्यनुशासनात् सत्यभामावत् तेषामाजीव्या ये कुञ्जद्रुमास्तत्तल्लीलाप्रकाशकत्वात् तैराकीर्णं सर्वतो व्याप्तं तथा "मा शब्देनोच्यते राधा तया सह कृतः समः" श्रीकृष्णस्तस्य आ सर्वतः प्रियं तत्रैवानवरतस्थितेः पुनः कीदृशं यत्रेति, नृमृगादयोऽत्राधिष्ठानाधिष्ठेययोः अभेदोपचारात्तत्तद्रसाश्रया एवोच्यन्ते, अयं भावः–सिंहं दृष्ट्वा नराणां भयं तान् दृष्ट्वा सिंहस्य क्रोधः तयोर्बाध्यबाधकता भवत्येव अत्र तु शुद्धे प्रेमैकदेशे तदभाव इति तत्र हेतुः, अजितेति अजितः रसान्तरैरनाक्रान्तः शुद्धः प्रेमा तदावासेन नित्यनिवासेन द्रुता निरस्ता रुट् तर्षश्च तदादयोऽन्ये च गौणा रसा यत्र तस्मिन् अयं भावः—सापत्न्यै रुट् परकीयात्वेऽनेकनायिकात्वे च तर्षः, अत्र तु "गोप्यैकया युतस्तत्र परिक्रीडति नित्यदा" इति ब्रह्मयामलोक्तेरेकनायिका स्वाधीनपतिका साम्राज्ये तयोरभाव इति सङ्क्षेपः। विवृतमिदं भक्तिमञ्जूषायाम्। तर्हि किं विधेयम्? इह मयाऽऽरब्धे रासक्रीडाविशेषे एव स्थेयम्। ननु, वयं न तद्योग्या इति सोत्प्रासोक्तिमाशङ्क्याह—सुमध्यमा अतिसुन्दर्य इत्यर्थः। एतज्ज्ञात्वैव मम प्राणप्रियया आकारिता इति भावः॥ १९॥

श्रीरामनारायणकृता भावभावविभाविका

औदासीन्यपक्षे तु भगवता पूर्वमागमनकारणप्रश्नेऽस्माभिर्गोपजातितया व्रजे वने वाऽऽगमनादि क्रियते एव किं कारणं प्रश्ने? तत्राह—रजनीति। दिने सम्भवत्यप्यागमने रात्रौ तदनौचित्यमेव ननु कोत्र दोषः? तत्राह—एषा घोररूपा तत्रापि हेतुः घोरैः सत्त्वैः प्राणिभिर्निषेवितेति, तर्हि किं कुर्मः? तत्राह- व्रजं प्रति यात वाढं यास्यामः, किं त्वरया? तत्राह—नेह स्थेयं, त्वया कथं स्थीयते? तत्राह, स्त्रीभिरिति। पुरुषस्य गोचारिणो ममावस्थानं सम्भवेपि न स्त्रीभिः स्थातव्यमिति भावः। स्त्रीभिरपि वन्यशबर्यादिभिरवस्थानमाशङ्क्याह, सुमध्यमा इति। अयम्भावः—अन्येषु घोरसत्त्वैर्व्याघ्रादिभिरेव भयं सुन्दरीणां तु तैरपि भयं घोरं रजसा कामेन व्याप्तसत्वमन्तःकरणं येषां तैरपि भयं तादृशैर्निषेवितायां रजन्यां सुमध्यमाभिरिह वने न स्थेयमेव प्रार्थनापक्षे तु प्रियं किं करवाणि व इति प्रियाचरणानुज्ञाप्रश्ने किं ब्रूमो जनाः दूरात् द्रक्ष्यन्तीति चेत्तत्राह—घोररूपेति। गृहसुखं परित्यज्य मद्रतिपराणामेवैषा रजन्यघोराऽन्येषां तु घोररूपेति नहि कश्चिद्बहिर्निस्सरतीत्यभिप्रायः तत्र हेतुः घोरसत्त्वैर्वन्यवृकादिभिर्निषेवितेत्यर्थः। यद्वा, घोराणि (निद्रा) तमोव्याप्तानि सत्वानि अन्तःकरणानि येषां व्रजवासिनां तैर्नितरां सेविताः सर्वे सुप्ताः न कोपि जागर्तीति भावः। यद्वा, प्रियाचरणानुज्ञायां प्रोत्साहयति एषा रजनी मनोरञ्जनी मदनप्रेमोत्साहप्रफुल्लितयुष्मदङ्गवद्विकसितविविधकुसुमसुरभिवासितशीतमन्दसमीरभवन्मुखसदृशपूर्णचन्द्रस्मितानुकारिचन्द्रिकाद्युद्दीपनविभावैः भवद्दर्शनाद्यालम्बनविभावैर्मनोह्लादिनी। ननु, रजनी प्रतिदिनान्ते भवत्येव कोऽद्य विशेषस्तत्राह, अघोररूपेति। दिनमातपतापेन घोररूपं भवति रात्रिस्तु तमसा इयं तु पूर्णचन्द्रान्वितत्वेन न तथा किन्तु अघोररूपेति भावः। यद्वाऽन्या रजन्यो युष्माकमस्माकं च परस्परविरहेण घोररूपा प्रियादर्शने कुसुमानि कामशरवद्धृच्छेदकानि तादृक्समीरः शेषमुखश्वासश्चन्द्रः प्रलयार्कसन्निभः एवं घोराणि सर्वाणि रूपाणि यासु तथा भवन्ति इयन्तु प्रियदर्शनेनाघोररूपेति भावः। उत्कर्षान्तरमाह, अघोरसत्त्वनिषेवितेति। अघोरैः शोभनैः पिकचातकमधुकरहंसादिभिर्निषेविता यद्वाऽन्या रजन्यः घोरैरजस्तमोमयैर्वेतालासुरादिभिर्निषेविता भवन्ति इयन्तु विलक्षणा अघोरैः सत्त्वात्मकैर्भवद्रासादिदर्शनयशोयानोत्सुकैर्विविधतालस्वराद्यभिज्ञैर्देवर्षिगन्धर्वादिभिर्निषेविता यद्वा, अघोरं सत्वमन्तःकरणं येषां तैर्निषेवितेति न कोपि विहारविरोधी यद्वा, अघोरं रजस्तमोभ्याममिश्रं यन्मदीयं सत्त्वं तेनैव निषेविता न प्राकृतरजनीनामिव त्रिगुणात्मिका यद्वा, अघोरं घोरगुणा प्रकृतिस्तद्रहितं यत्सत्त्वं सत्तामात्रं तेन निषेविता तदात्मिका लीलाधाम्नि माया गुणाप्रवेशात्। ननु, समागमो जातः, अद्य व्रजं गत्वा श्वो भाविन्यां रजन्यामागमिष्यामस्तत्राह, हे सुमध्यमाः! व्रजं प्रति न यात व्रजं गोपनिवासत्तं प्रति न यात गोपास्ते रसानभिज्ञाः न सुमध्यमानां भवतीनां मनो रञ्जयितुं योग्याः किन्तु स्त्रीभिर्भवतीभिर्विविधरतिरसाभि-

लाषवतीभिरिहैव रसिकशिरोमणेर्मम सन्निधावेव स्थेयमिति भावः। यद्वा, व्रजतीति व्रजः नश्वर ऐहिकगृहादिरामुष्मिको जातिकुलधर्मफलभूतस्वर्गादिश्च तं प्रति न यात किन्तु इहैव नित्ये मदनुरागलीलासुखे एव स्थेयं "ष्ठा गतिनिवृत्तौ" इत्यस्मात् नित्यस्थितिः कार्या चले व्रजे ऐहिकामुष्मिकरूपे गत्यभावात्मकस्थित्यसम्भवात् स्त्रीभिरित्यस्याप्ययमभिप्रायः स्त्रीभिः पुरुषसमीपे एव स्थेयं न कोपि मदन्यः पुरुषः "एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते" इत्यादिना नश्वरव्रजस्थजीवघनत्यागेन परं पुरुषेक्षणस्य श्रुतिसिद्धत्वात् किञ्च, यतो यूयं सुमध्यमाः सुष्ठु सूक्ष्मकट्यः, अत एव इहैव स्थेयं सुमध्यमानां रसानां रसानभिज्ञव्रजगोपरतिभारसहिष्णुत्वासम्भवात् यद्वा सुष्ठु मध्ये हृदि मा मद्विषया यथार्था मतिर्यासामपि निबद्धमतयः यद्वा, सुष्ठु मध्ये समस्तदेहमध्ये मा शोभा यासां शोभितसमस्ततनवः यद्वा सुष्ठु मध्ये यूथेश्वरीतया वर्तमाना मा मन्नित्यप्रिया यासामिति मत्प्रियान्विताः यद्वा, सुष्ठु स्वांशप्रवेशेन मध्येऽनुगता मा मत्प्रिया यासामिति माधवसन्निधावेवावस्थितिः समुचितेति भावः ॥ १९ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवमुक्ताः लज्जाविष्टमानसाः किञ्चिदपि वक्तुमक्षमा अवलोक्य प्रेमोद्दीपनार्थमीषत्कर्णकठोरं वाक्यमाह–रजन्येषेति। युष्माकं मौनेन कारणभावो मया ज्ञातो निष्कारणं चागमनमुन्मत्तचेष्टितसमन्तस्माद्वृथागमनवद्वृथावस्थानस्यानुचितत्वादिह वने न स्थेयं यज्जातं तत्तु जातमिति मास्तु वृथा चेष्टितमिति भावः। तर्हि किं सफलचेष्टितमित्यपेक्षयामाह–व्रजं प्रति यात गच्छत गत्वा गृहकृत्यपरता सम्पाद्येति भावः, व्रजमित्यनेनात्रागमनस्यापि निष्फलत्वं सूचितम्। ननु, भवतु क्षणमात्रं स्थित्वा गमिष्याम इति चेत्तत्राऽऽह—रजनीति। एषा उपलभ्यमाना तथा च सम्यक् नेत्राण्युन्मील्य द्रष्टव्या एषा रजनी वर्त्तते न तु दिनं दिनादौ विलम्बेपि कृते उत्तरोत्तरप्रकाशबाहुल्यसम्भवान्नास्ति बाधा रजन्यां त्वत्रोत्तरोत्तराऽन्धकारबाहुल्यसम्भवाद्विलम्बो नोचित इति भावः। किं च ज्योत्स्नाबहुलापि घोररूपा रात्रित्वादेव तथा च महानिशीथागमे गमनमत्राऽवस्थानं च दुर्घटं भविष्यतीति भावः। ननु, भवत्येवं तस्याप्यकस्मादागताः फलमूलादिकं किञ्चिदादाय यास्याम इति चेत्तत्राह घोरसत्त्वैर्व्याघ्रसर्पवृश्चिकादिभिर्निषेविता कालसम्बन्धाद्वृन्दावनेऽपि घोरसत्त्वसम्भावनयाऽत्रावस्थानं विसरणं वा नोचितमिति भावः। ननु, एवं तर्हि भगवतापि किमर्थमत्राऽवस्थीयते? व्रज एव चलनीयमिति चेत्तत्राह—स्त्रीभिरिति। तत्रापि हे सुमध्यमाः! सुकुमारमध्यभागाः भयोपस्थितौ पलायनादावसमर्था अत एव कोमलचित्तत्वात् घोरसत्त्वं द्रष्टुमप्यक्षमाः, एतेन तव सन्निधौ नास्त्यस्माकं किञ्चित् दुःखमिति शङ्कापि निरस्ता अनभिज्ञापक्षे एतच्छ्रुत्वा अहो द्रष्टव्यं धूर्त्ताधिराजस्य वाग्विलासचातुर्य्यं लोकोत्तरसौन्दर्य्यक्रीडादिकं प्रदर्शयित्वा धैर्य्यकुललज्जादिकं नाशयितुं सम्प्रति कलगीतेन स्वयमाहूय कारणं पृच्छतीत्यपाङ्गचालनैरेव परस्परमाचक्षाणासु तासु अहो मया बुद्धं देवपूजोपयोगिपुष्पाद्याहरणाय भवत्य आगताः स्युरतस्तथा चेच्छृणुतेत्याह—रजन्येषेति। भो चतुरशिरोमणे! किमेवमागमनकारणं पृच्छसि? भवानिव वयमपि क्रीडार्थं वने समागताः, इति छद्मनावस्थानपरा आलक्ष्याह—रजन्येषा घोररूपेति। भो विशालनेत्राः! नेदन्दिनमत एवं विधायां रजन्यां कुलवधूनां युष्माकं प्रासाद एव क्रीडोचिता नतु बहिरागत्य वने, ननु, घोररूपायां रजन्यां प्रासादेऽपि क्रीडा कथं स्यादिति चेत्तत्राह—इह वने एव घोररूपा नतु व्रजे सहायबाहुल्यादिति भावः। ननु, भोः कमलनयन! एवंविधज्योत्स्नावत्त्वेनोपलभ्यमाना रजनी किमिति घोररूपेत्युच्यते त्वयेति चेत्तत्राह–घोरसत्त्वनिषेविता अतो व्रजं प्रति यात अहो भवतु क्षणमात्रं विश्रम्य यास्याम इति चेत्तत्राह–नेति अवश्यकर्तव्ये विलम्बो न युक्त इति भावः। ननु, भवता कथं स्थीयत इति चेत्तत्राह—स्त्रीभिरिति। ननु, बह्वीनामस्माकं तव सन्निधौ स्थितानां का भयसंभावनेति चेत्तत्राह—सुमध्यमा इति। यद्वा, ननु त्वमेव भीरुरसि नतु वयं वनमपि साधारणं नतु तव पित्रा पितामहादिभिर्वा मौल्येन क्रीतम् अतो वयमत्रैव विहरिष्याम इति चेत्तत्राह–नेति। भवतु यथेष्टं विहरन्तु भवत्यः परन्तु रहः मत्पार्श्वे न स्थेयम् आबालब्रह्मचारिणा मया स्त्रीसङ्गस्य परिहृतत्वात् तत्राऽपि बालवृद्धाभिः सहावस्थाने नास्ति दोषः, यूयं तु युवतयः सुन्दर्य्यश्चाऽतो दूरतः परिहरणीया इत्याशयेनाह—हे सुमध्यमाः! इति। तथा च सुन्दरीणां युवतीनां सुन्दरेण मया रात्रौ निर्जने वने सहावस्थानं नोचितं यद्यपि यूयं परमपतिव्रताः, अहं च ब्रह्मचार्य्यग्रमण्यो जितेन्द्रिय एवाऽतः सहावस्थानेपि नास्ति विकारशङ्का तथापि मनसोऽविश्वसनीयत्वादपकीर्त्युद्भवाच्च नेदमुचितमिति भावः। यद्वा, अत्रागमने भवतीनां प्रयोजनमहं न पश्यामि पृष्टेपि तूष्णीम्भावाद्भवत्योऽपि न पश्यन्त्यतो यद्ब्रवीमि तत्कुरुध्वमित्याशयेनाह—रजनीति। संप्रति व्रजं प्रतियात यतः, एषा दिवा तद्व्यापारवशादलब्धावसरयोर्दम्पत्योः सुखजनकत्वेन बहुशोऽनुभूयमाना रजनी रञ्जनकारी वर्त्तते। ननु, यद्येवं तथापि रजन्यां गन्तुमशक्ता इति चेत्तत्राह–अघोरसत्त्वैः भ्रमरकोकिलादिभिरेव निषेविता वृन्दावनमाहात्म्यात्तु घोरसत्त्वैर्व्याघ्रादिभिरित्यर्थः। किञ्च, पतिभिः सार्द्धमत्रस्थितौ नास्ति क्षतिः सिंहेनेति स्त्रीभिः पतिविरहिताभिरिह निर्जने वने तत्रापि मत्पार्श्वे केवलानामत्र परपुरुषसन्निधाववस्थानस्य सुखहान्यपकीर्त्यादिकरत्वात् मम स्वविवाहितस्य पुरुषस्य यत्र कुत्रापि स्थितौ नास्ति काचित् क्षतिरित्यपि स्त्रीभिरनेन ध्वनितम्। ननु, एकस्यां रजन्यां वियुक्ता एव स्थास्यामस्त्वं कस्मादस्मान् दृष्ट्वा ग्लायसि इति चेत्तत्राह–हे सुमध्यमाः! इति। क्षणान्तरं को वेद किं भविष्यति एवंविधं सौकुमार्य्यादिकं वृथा न क्षपणीयं ममापि भवतीनां सौन्दर्य्यादिर्वृथा नाशसम्भावनया तदपलापाग्लानिर्भवतीति भावः। मानिनीपक्षे अथैवमुक्ताः व्रजं प्रति गन्तुमुद्यता आलक्ष्याह—रजनीति। अहो आगमनकारणं लज्जादिना

नोच्यते चेत्तर्हि मा ब्रूत तथापि व्रजं प्रति तु न यात अत्रापि प्रार्थनायां लोट्, कुत इत्यत आह—एषाऽनुभूयमाना रजनी रञ्जनकरी एवंविधा पुनर्मिलिष्यति न वेति भावः। यतो ज्योत्स्नाव्याप्तत्वात् अघोररूपा पुनश्च क्रीडोपकरणभूतैरघोरैर्भृङ्गमृगादिभिर्नितरां सेविता यद्वा अघोरं समत्वं बलं यस्य तेन रूपा निषेविता अतो नास्ति भयसम्भावनापीति भावः। यद्वा, पित्राद्यागमनभयाविष्टमानसा वयं कथं न याम ? इति चेत् तत्राह—घोररूपा रात्रित्वात् पुनश्च घोरसत्त्वनिषेविता तस्मादत्र कोऽपि नायास्यन्तीति भावः। अतः सर्वशङ्कां विहायेह मत्पार्श्वे स्थेयं यतः स्त्रीणां हि एवंविधे देशे काले चैवंविधरमणसन्निधाववस्थानं बहुयोग्यमिति भावः। तत्रापि न स्त्रीमात्रस्यापितु युष्मद्विधानामित्याशयेनाह—हे सुमध्यमा इति। निवृत्तिपक्षे ब्रूतागमनकारणमित्युपक्षिप्तं कारणाभावमुपपादयति-रजनीति। एषा अहेतुवाद्यभिमतनिर्विशेषा चित्तरञ्जनी रात्रितुल्या सर्वस्यापि तत्राध्यात् अत एव घोरं सर्वविशेषविनिर्मुक्तत्वादत्यन्तशून्यारण्यवदत्यर्थभयङ्करं रूपं यस्याः सा अत एव घोरं सर्वपरात्यन्तदुःखकरं सत्त्वं बलमन्तःकरणं वा येषां सर्वनिषेधप्रतिपादनपराणां तैर्नितरां सेविताः, अतो व्रजं प्रतियात बहुवाक्यानुसरणं कुरुत इह निर्विशेषचितिप्रतिपादकतया न स्थेयं स्त्रीस्थानापन्नाभि श्रुतिभिः यतो हे सुमध्यमाः! शोभनार्थप्रतिपादनेन सुन्दर्यः। अयं भावः–ब्रह्मणि वेदान्तो न प्रमाणं तत्र तत्प्रामाण्यस्याशक्यनिरूपणत्वात् तथा हि ब्रह्म मानान्तरगम्यं न भवति ? किंवा ? नाद्यः, मानान्तरविषयत्वे योग्य एव सिद्धे शब्दप्रवृत्तिदर्शनात् न द्वितीयः वेदान्तप्रतिपाद्ये ब्रह्मणि मानान्तरानुपलब्धः। ननु, लोकेपि न वाक्यार्थस्य मानान्तरापेक्षा वाक्यार्थस्य सर्वत्रापूर्वत्वात् सिद्धबोधिवाक्यमपि नास्वार्थप्रमितौ तदभावशङ्कानिवृत्तये वा मानान्तरमपेक्षते किन्तु वाक्यस्य वक्तुर्दोषप्रवृत्ताप्रामाण्यशङ्कानिवृत्तये ब्रह्मत्वपौरुषेयत्ववेदान्तलक्ष्यमखण्डसंद्वाक्यार्थम् एवास्तल्लक्षकवेदान्तानां न मानान्तरापेक्षा अतः कथं ब्रह्मणि वेदान्तानामप्रामाण्यमिति चेज्जात्यखण्डार्थत्वस्य लोकवेदयोरसिद्धत्वात् न हि नानापदार्थसंसर्गविषयस्य वाक्यस्यैकप्रतिपादकार्थाविषयत्वं सम्भवति वाक्यं हि अभिधां गौणीं लक्षणां वा वृत्तिमादय स्वार्थं बोधयति इति प्रसिद्धम् नचास्वन्यतमयापि वृत्या वेदान्ता अखण्डमर्थं बोधयन्ति मुख्यवृत्त्या वेदान्तानामेकार्थवृत्तित्वाऽनुपपत्तेः स्पष्टत्वात् गौणीलक्षणयोः स्वीकारेप्यन्तरपदवाक्यार्थत्वालक्ष्याह—अधिकयोर्लक्ष्यमाणगुणान्यतरपदवाच्यार्थयोः सत्त्वाद्वाक्यार्थस्यैकपदार्थमात्रवृत्तित्वसिद्धेः। ननु, पदद्वयेपि लक्षणाङ्गीकाराल्लक्षणापक्षे नास्ति दोषं इति चेन्नार्थभेदाभावे पदानां पर्यायत्वादाकाङ्क्षादेरभावाद्वाक्यत्वभङ्गापत्तेः। ननु, वाक्यार्थभेदान्न पर्यायता वाक्यस्य पदानातिरिक्तत्वेपि प्रमितिजनकत्वेनार्थवत्त्वान्नापि वाक्यवैयर्थ्यमिति चात्र वेदान्तनामाऽनुदितानस्तमिति चैतन्यमात्रस्वरूपपरब्रह्मविषयमितिजनकत्वाङ्गीकारेऽविषयत्वसिद्धान्तभङ्गापत्तेः प्रमाणवैफल्यात्तस्मान्नश्रुतिमस्तकप्रतिपाद्यं ब्रह्मेति॥ १९॥

रास–रहस्यम्

र० टी—एषा स्थितिः रजनी तुल्या, कथम् ? सर्वविशेषविनिर्मुक्तत्वात् अत्यन्तशून्यारण्यवत् घोररूपा सर्वनिषेधप्रतिपादनपराणां श्रुतीनां सेविततया विषयभोगसुखादबहिर्भूता अतः शून्यवादरूपत्वेन घोरान्धकारमयाः सत्त्वरूपाः शून्यवादपराः जीवाः तैः निषेविता निश्चयेन सेविता। यदि तु वासनाबीजं स्यात् तदा स्त्रीभिः ऐहिकामुष्मिकवासनावासितचपलमतिभिः नेह स्थेयमस्मिन् स्थितौ न स्थातुं योग्यं, सुमध्यमाः सुष्ठु मध्ये हृदि मा प्रमाणानि आत्मविषयनिश्चयमतयः ताभिरेव स्थेयं अन्यथा यदि तु ऐहिकामुष्मिकपरकर्मवादे अधुनापि वासनालेशो वर्तते तदा व्रजं व्रजतीति व्रजः गमनागमनपरः संसारः तं प्रतियात प्रतिनिवृत्य गच्छत॥ १९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यद्यकस्मादेवागता तर्हि व्रजं प्रतिगच्छत इह मत्समीपे स्त्रीभिर्न स्थेयं न स्थातुं योग्यम् तत्र हेतुमाह, रजन्येषेति॥ १९॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

घोरैः सत्त्वैः पिशाचादिभिः सर्पादाभिर्वा निषेविता स्वयं च घोररूपा भीतिहेतुरेषा रजनी रात्रिः। चेत्किमित्यतो मनः पूर्वकं किञ्चिद्विनोदं नटयन्नाह। सुमध्यमा इह वने स्त्रीभिर्न स्थेयं व्रजं प्रति यातेति। कुत इत्यतोऽस्वतन्त्रा यूयमित्यप्याह। सुमध्यमाः पत्यपत्यादिप्रोक्तकारिण्योऽत्यन्तमिति। सुमध्यमा इति सौन्दर्यातिशयेन दुर्दृष्टिबाधा स्यादतः प्रतियातेत्याशयो द्योत्यते। सुमानि धीयन्तेऽस्मिन्निति सुमधिर्मन्मथस्तेनामो रोगो यासां ता इति वा। आमो रोग इत्युक्तेः। यद्वा स्वसम्बोधितस्य सुमध्यमा इत्यस्य सुमनां धीस्तद्विलोकनमतिस्तयाऽमन्तीति तास्तथा। अम गत्यादिष्विति स्मरणात्। पुष्पविलोकनायाता इत्यायताक्ष्युत्तरपरतयाऽप्यर्थं मनसि कृत्वा तदुत्तरयति। सुमानि धीयन्तेऽस्मिन्निति सुमधि वनमिति वा॥ १९॥

श्रीसुबोधिनी

स्मितमालोक्याह। रजनी रात्रिरेषा भयंकरा घोरैः सत्त्वैः प्राणिभिर्निषेविता इह वने स्त्रीभिर्न स्थातव्यं हे सुमध्यमा व्रजं प्रति गच्छत यूयम्॥ १९॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

'अत्र स्थित्यर्थमेवागमनम्' इति चेत्तत्राह–रजनीति । 'भवत्यो यदि वृद्धाः स्युस्तदापि न तादृशी चिन्ता' इति सूचयन् सम्बोधयति—सुमध्यमेति, सुमध्यमाः हे सुकुमार्यः ! इह वने स्त्रीभिर्न स्थेयम् अतो व्रजं प्रतियात । तत्र हेतुमाह–एषा रजनी रात्रि घोरा भयङ्कररूपा, तथा घोरसत्त्वैः भयङ्करप्राणिभिः व्याघ्रसर्पादिभिर्निषेविता ॥ १९ ॥

अन्वितार्थप्रकाशिका

रजनीति ॥ हे सुमध्यमाः ! एषा रजनी घोररूपा घोरैः सत्त्वैर्व्याघ्रादिभिः निषेविता । अत इदानीं व्रजं प्रति यात । इह स्त्रीभिर्न स्थेयम् । अथ च एषा उदितचन्द्रा रजनी अघोररूपा अघोरैरेव सत्त्वैर्भृङ्गकोकिलाद्यैर्निषेविता नतु व्याघ्राद्यैः वृन्दावनमाहात्म्यात् । अतो व्रजं प्रति मा यात । स्त्रीभिः इहैव स्थेयम् ॥ १९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

घोरसत्त्वैर्व्याघ्रादिभिः निषेविता हे सुमध्यमाः ॥ १९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

लज्जाप्रयुक्तमन्दहासमालक्ष्याह ॥ रजनीति ॥ एषा रजनी रात्रिः, घोररूपा स्वयं भयंकरा, घोराणि भयंकराणि यानि सत्त्वानि व्यालव्याघ्रादीनि तैर्निषेविता समाचरिता च, तस्मात्, हे सुमध्यमाः, व्रजं प्रति यात गच्छत । इहास्मिन् वने, रात्रौ, स्त्रीभिः न स्थेयम् । स्त्रीणां स्थातुं युक्तं न भवतीत्यर्थः ॥ १९ ॥

कृष्णप्रिया

सुन्दरी गोपियों ! रात का समय है, यह स्वयं ही बड़ा भयावना होता है और इसमें बड़े-बड़े भयावने जीव-जन्तु इधर-उधर घूमते रहते हैं । अतः तुम सब तुरन्त व्रज में लौट जाओ । रात के समय घोर जंगल में स्त्रियों को नहीं रुकना चाहिए ॥ १९ ॥

मातरः पितरः पुत्रा भ्रातरः पतयश्च व । [1]विचिन्वन्ति ह्यपश्यन्तो मा कृध्वं बन्धुसाध्वसम् ।

कर्दमक्षमा

अन्वयः—वः, मातरः, पितरः, पुत्राः, भ्रातरः, पतयः; च, अपश्यन्तः, हि, विचिन्वन्ति, बन्धुसाध्वसं, मा, कृध्वम् ॥२०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च मातर इति । विचिन्वन्ति मृगयन्ते । बन्धूनां साध्वसं भयं मा कृध्वं मा कुरुतेत्यर्थः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदप्याह—इह स्थितौ भवद्बंधूनां क्लेशो भवेदित्याह—किञ्चेति । मातरः स्नेहवशात्, पितरो निंदाभयात्, पुत्रा बालाः स्तन्यादिहेतोः, भ्रातरोऽपि निंदाभयादेव, पतयो व्यभिचारशङ्कया । 'भीतिर्भीः साध्वसं भयम्' इत्यमरः । बंधूनां मध्ये साधोः साधुत्वस्य असं क्षेपं मा कुरुत, न हि साध्वीनां रात्रौ बहिर्गमनमुचितमिति भावः । इत्यर्थ इति । साध्वसपरिगामित्वात्परस्मैपदप्रयागेणार्थः कार्य इति तात्पर्यम् । प्रार्थनायां तु तेऽपश्यन्तो विचिन्वंतीति बंधुभयप्रयुक्तं साध्वसं मा कृध्वम् मा कुरुध्वं, यतस्ते मोहिताः । किञ्चात्रागता युष्मान्मत्पार्श्वे पश्येयुस्तदा युष्माकं मम च लज्जाभयं स्यादेव । अपश्यन्तो मा विचिन्वंति अतो बंधुभ्यो भयं मा कुरुत । माङ् उभयत्रान्वेति ॥ ननु रात्रावपि वनेऽपि युवतीनामपि संघशो गमने दोषो न जनैरुद्घोष्यते—सत्यम्, तदपि बन्धवो भवतीरनिष्टशंकया सांप्रतमवश्यमन्विष्यन्त्यतस्तान्मा व्याकुलयतेत्याह—मातर इति । वो युष्मान्विचिन्वंति मृगयंते । अत्र पुत्रा द्वित्रिमास्या एव नान्वेषणे चतुराः 'पाययन्तः शिशून्पयः' इति, 'क्रंदंति वत्सा बालाश्च' इति पूर्वापरोक्तेः, तदपि भगवता स्वस्मिंस्तत्तद्विशेषज्ञानाभावमभिनीतवतैवोक्तमित्यदोषः । अतो बंधूनां साध्वसं युष्मद्दर्शनोत्थं भयं मा कृढ्वं मोत्पादयत। पक्षेऽपश्यन्तो विचिन्वंत्येव न त्वतिदूरे, निबिडे वनेऽस्मिन् वो न द्रक्ष्यन्त्यता बंधुभ्यः सकाशाद्भयं मा कृढ्वं स्वच्छन्देन मया सह रात्रौ विलसतेति भावः ॥ अत्र तोषिणी—ननु पुरुषसिंह परमबलीयसस्तवांतिके स्थितानां न कुतो भयमित्याशंक्य सशंकमाह—मातर इति । अत्र मातरः पितरो भ्रातर इति कुमारिका दृष्ट्वा भणितम् । व्यूढतया प्रतीता दृष्ट्वा पतयः पुत्रा इति यदुक्त तत्खलु परिहासार्थं कल्पनामात्रमिति स्थापयिष्यते । चशब्दः उक्तसमुच्चये । हि निश्चये । अतो यदि कदाचित्तेष्वेकोऽप्यत्रागत्य मत्पार्श्वे युष्मान्पश्येत्तदोभयेषामपि लज्जाभये स्यातामिति भावः । अतोऽत्रावस्थित्या निजबंधुभ्यो मम आत्मनश्च साध्वसं भयं मा कृढ्वं

---

[1] न्वन्तो–विज. ।

नोत्पादयत। यद्वा—महामंत्राभिज्ञ ते सुदुर्गमवनमध्ये नागमिष्यंति आगता अपि न द्रक्ष्यन्त्येव तत्राह–युष्माकमप्राप्त्या बंधूनामनिष्टाऽऽशंकातो भयं नोत्पादयत, 'साध्वयो हि बंधुवत्सलाः' इति न्यायात्। अतस्तेषु स्नेहेन च निवर्त्तध्वमिति भावः। अथवा श्लोकद्वयेऽस्मिन्प्रत्यावृत्त्येदं व्याख्येयम्–हे सुव्रत त्वत्पार्श्वेस्थिता न कुतश्चिदपि बिभीम इत्याशंक्य चक्षुमुद्रणपूर्वकं साभिनयमाह–नेहेति। मत्पार्श्वे स्त्रीभिर्न स्थेयमाबालब्रह्मचारित्वेन मम स्त्रीसंगपरिहारादित्यर्थः। अहो बत बालिकानां वृद्धानां वा सहवासे दोषोऽपि न किल घटेत, यूयं तु नवयौवनारूढा इत्याह—हे सुमध्यमा इति। ननु महाकपटपटो! व्रजेऽस्माभिः संगो भवता बहुधा भवत्येव तत्राह—इहेति। इह निर्जनवने समये च प्रदोष इति दोषविशेषं श्रीमुखभंगिविशेषेण सूचयति। अत इहेदानीं युष्मत्संगान्मम दुष्कीर्तिरेव बाढं स्यादिति सर्वथा प्रयातैवेति। ननु सुप्रतिष्ठ! न कोऽपि ज्ञास्यतीति दुष्कीर्तेर्मा भैषीस्तत्राह—मातर इति। अतोऽत्रागता नूनं द्रक्ष्यन्त्येवेति भावः। अतो मद्बंधूनां मद्दुष्कीर्तेर्भयं मा संपादयत। अन्यत्समानम्। वस्तुतस्तु तेभ्यो भयोत्पादनेन वंशीवादनस्थानात् दूरे सुगुप्तस्थाने नेतुं तथोक्तमिति। श्लेषार्थश्चायम्—न चात्र स्वस्वबंधुजनागमनमाशंक्यम्, यतः मातर इत्यादि। एवार्थे हिशब्दः। गहने वनेऽस्मिन्नंधा इवापश्यंत एव विचिन्वंति, अतो बहुमार्गणेनापि न द्रक्ष्यंतीत्यर्थः। ततश्च बंधुभ्यो भयं मा कुरुतेति॥ २०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, पुरुषसिंह! परमबलीयसस्तवान्तिके स्थितानां नः कुतो भयमित्याशङ्क्य सशङ्कमाह–भ्रातर इति। अत्र मातरः पितरो भ्रातर इति कुमारिका दृष्ट्वा भणितं व्यूढतया प्रतीता दृष्ट्वा तु पतयः पुत्रा इति यदुक्तं तत् खलु परिहासार्थं कल्पनामात्रमिति स्थापयिष्यते चशब्द उक्तसमुच्चये हि निश्चये अतो यदि कदाचित्तेष्वेकोप्यत्रागतो मत्पार्श्वे युष्मान् पश्येत् तदोभयेषामपि लज्जाभये स्यातामिति भावः। अतोऽत्रावस्थितया निजबन्धुभ्यो ममात्मनश्च साध्वसं भयं मा कृढ्वं नोत्पादयत यद्वा, हे महामन्त्राभिज्ञ! ते सुदुर्गमवनमध्ये नागमिष्यन्ति आगता अपि न द्रक्ष्यन्त्येव तत्राह, युष्माकमप्राप्त्या बन्धूनामनिष्टशङ्कातो भयं नोत्पादयत "साधवो बन्धुवत्सलाः" इति न्यायात् अतस्तेषु स्नेहेन च निवर्त्तध्वमिति भावः। अथवा श्लोकद्वयेऽस्मिन् प्रत्यावृत्येदं व्याख्येयं हे सु (व्रत) वृत्त त्वत्पार्श्वेस्थिता न कुतश्चिदपि बिभिम इत्याशङ्क्य चक्षुमुद्रणपूर्वकं साभिनयमाह–नेहेति। मत्पार्श्वे स्त्रीभिर्न स्थेयं आबालब्रह्मचारित्वेन मम स्त्रीसङ्गपरिहारादित्यर्थः। अहो बत बालिकानां वृद्धानां वा कदाचित् सहवासे दोषोऽपि किल न घटेत यूयं तु नवयौवनारूढा इत्याह, हे सुमध्यमा इति। ननु, महाकपटपटो! व्रजेऽस्माभिः सङ्गो भवतो बहुधा भवत्येव तत्राह, इहेति। इह निर्जने वने समये च प्रदोषे इति दोषविशेषं श्रीमुखभङ्गीविशेषेण सूचयति अत इहेदानीं युष्मत्प्रसङ्गात् मम दुष्कीर्त्तिरिति वा पाठः कीर्तिरेव बाढं स्यादिति सर्वथा प्रयातैवेति ननु सुप्रतिष्ठ न कोपि ज्ञास्यतीति दुष्कीर्त्तेर्मा भैषीः तत्राह, मातर इति। अतो नूनमत्रागता द्रक्ष्यन्त्येवेति भावः। अतो मद्बन्धूनां मद्दुष्कीर्त्तेर्भयं मा सम्पादयत। अन्यत्समानं वस्तुतस्तु तेभ्यो भयोत्पादनेन वंशीवादनस्थानात् दूरे सुगुप्तस्थाने नेतुं तथोक्तमिति श्लेषार्थश्चायं न चात्र स्वस्वबन्धुजनागमनमाशङ्क्यं यतः मातर इत्यादि एवार्थे हिशब्दः गहनवने अस्मिन्नंधा इवापश्यन्त एव विचिन्वन्ति अतो बहुमार्गेणापि न द्रक्ष्यन्तीत्यर्थः। अतश्च बन्धुभ्यो भयं मा कुरुतेति॥ २०॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु, पुरुषसिंह! परमबलीयसस्तवान्तिके स्थितानां नः कुतो भयमित्याशंक्य सशंकमाह—मातर इति। आदौ स्नेहविशेषात् मातरः, ततस्तासां वने बहुपरिभ्रमणाशक्त्या स्नेहेन कलंकभयेन च पितरः, विवाहितकन्याविषयकापेक्षाविशेषाभावेन तेषां शैथिल्ये सति पुत्राः पुत्रतुल्याः, मातृदोषेण लज्जाविशेषोत्पत्तेः, मातृजारसंगोपनार्थं धाष्टर्य परिहारार्थं वा बाल्येन बहुपरिभ्रमणाशक्त्या वा तेषां तेपां शैथिल्ये भ्रातरः, स्वभावतः परमस्निग्धत्वात्, तेषामपि लज्जादिना कथञ्चिच्छैथिल्ये पतयो विचिन्वन्त्येव, पत्नीगुणदोषभागित्वात्, एवमन्वेषणे तेषां यथोत्तरं श्रैष्ठ्यम्, तेन च पतीनामवश्यमागमनमभिप्रेतम्। यद्वा, काश्चिन्मातरः, काश्चित् पितर इत्येवं यथास्थितम्, किंवा उक्तयुक्त्यैव स्नेहादिना कुत्रापि मातरः, कुत्रापि पितर इत्येवं ते सर्वे एवापश्यन्तो गृहेषु वनेषु वा अनालोकयन्तो विचिन्वन्ति, इतस्ततो मृगयन्ते हि वितर्के। अतो यदि कदाचित्ते अत्रागता मत्पार्श्वे युष्मान् पश्येयुः, तदा युष्माकं मम च लज्जा भयञ्च स्यादेवेति भावः, अतोऽत्रावस्थितया निजबन्धुभ्यो ममात्मनश्च साध्वसं भयं मा कृढ्वं नोत्पादयत। यद्वा, महामन्त्राभिज्ञ! तेऽत्र सुदुर्गमवनमध्ये नागमिष्यन्ति, आगता अपि न द्रक्ष्यन्त्येव, तत्राह–युष्माकमप्राप्त्या व्याघ्रादिभ्यो युष्माकमनिष्टशंकया बन्धूनां भयं शंका नोत्पादयत 'साधवो बन्धुवत्सलाः' इति न्यायात्, अतस्तेषु स्नेहेन निवर्त्तध्वमिति भावः। यद्वा, वो युष्मान् (भा० १०।४७।३७) 'मापुर्मद्वीर्य्यचिन्तया' इत्यादिवत् मा माञ्चापश्यन्तो युष्मन्मात्रादयो विचिन्वन्ति। ननु निर्भयसिंह! विचिन्वन्तु पश्यन्तु वा, ततः किमित्यत्राह–बन्धुभ्यो भयमकृढ्वम्। अवश्यकृत्यतापेक्षयाऽतीतनिर्देशः, कुरुतेत्यर्थः अन्यथा स्त्रीणां स्वातन्त्र्यापत्त्या बहुदोषोत्पत्तिरिति भावः। अथवा सुव्रत! त्वत्पार्श्वस्थिता न कुतश्चिदपि बिभीम इत्याशंक्य चक्षुमुद्रणपूर्वकं साभिनयमाह—इह मत्पार्श्वे स्त्रीभिर्न स्थेयम्, आबालब्रह्मचारित्वेन मम स्त्रीसंगपरिहारादित्यर्थः। अहो वत शिव शिव, बालानां वृद्धानां वा कथञ्चित् संगेन दोषोऽपि किल न घटेत, यूयञ्च नवयौवनारूढा इत्याह—हे सुमध्यमा इति।

ननु, महाकपटपटो ! गृहेष्वस्माभिः सह संगो भवतो बहुधा भवत्येवेत्याशंक्याह—इहेति इह निर्ज्जनवने समये च, प्रदोष इति दोषविशेषं श्रीमुखभंगीविशेषेण सूचयति, अतोऽत्रेदानीं युष्मत्संगान्मम दुष्कीर्त्तिरेव वाढं स्यादिति सर्वथा प्रयातैवेति । ननु सुप्रतिष्ठ ! न कोऽपि ज्ञास्यतीति दुष्कीर्त्तेर्मा भैषीः, तत्राह–मातर इति । अतो नूनमात्रागता द्रक्ष्यन्त्येवेति भावः । अतो मद्बन्धूनां मद्व्रतभंगान्मद्दुष्कीर्त्तेर्वा भयं मा सम्पादयत । यद्वा, वो मात्रादयो युष्माकं गृहेभ्यो निर्गमादिना मत्पार्श्वे गमनमाशंक्य मा मां तत्र कुत्राप्यपश्यन्तो विचिन्वन्ति, सामीप्ये वर्त्तमाना, विचेष्यन्त्येवेत्यर्थः । ततश्चात्रायातैस्तैर्मयि युष्माभिः सहिते दृष्टे युष्मद्धेतुक-मद्दुष्कीर्त्त्या युष्मान् प्रति क्रुद्धेभ्यो मद्बन्धुभ्यो भयं कुरुतेत्यर्थः । अन्यत् समानम् । वस्तुतस्तु तेभ्यो भयोत्पादनेन दूरे सुगुप्तस्थाने ता नेतुं तथोक्तमिति । किंवा वाग्भंग्या बन्धूनामुपेक्षां तेभ्यो भयाभावञ्च तासां द्रढयतीति दिक् । श्लेषार्थश्चायम् । एवार्थे हि शब्दः । अन्धा इवापश्यन्त एव विचिन्वन्ति, अतो बहुमार्गणेनापि न द्रक्ष्यन्त्येवेत्यर्थः । यद्वा, अप्यर्थे हि शब्दः । अन्धा इव अपश्यन्तोऽपि विचिन्वन्ति किम् ? काक्वा, नैवेत्यर्थः । भवतीभिस्तेषामुपेक्षणात्, अतो बन्धुभ्यो भयं मा कुरुतेति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च, मात्रादयो युष्मानपश्यन्तो मृगयेयुरतो बन्धूनां मात्रादीनां साध्वसं भयं मा कृढ्वं नोत्पादयत ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

विचिन्वन्तः मृगयन्तः कृढ्वं कुरुध्वं साध्वसं भयम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

पुनः प्रतियात गृहमित्युक्तस्य युक्तिं वक्ति मातर इत्यादि । मातर पितर इति कुमारीः प्रति, पुत्राः पुष्टपुत्राः, भ्रातरः पितरश्चेति यथातथमूढाः प्रति । अथवा, पितरः पुत्रा इति परस्पर-साक्षेपतया पितॄणामेव पुत्रा इति बोद्धव्यम् । यथा पिता पुत्रश्चागत इति पितुरेव पुत्रोऽधिगम्यते, तेन पितृशब्दसन्निकृष्ट-पुत्रशब्देन वैमात्रेयभ्राताधिगन्तव्यः । भ्रातृशब्देन सहोदर इति च । अपश्यन्तः सन्तो विचिन्वन्ति, तस्माद्बन्धुसाध्वसं मा कृढ्वम् मा कुरुतेत्यर्थः । न गृहं प्रतियातेति पक्षान्तरे युक्तिः । वो युष्माकं मात्रादयोऽपश्यन्तः सन्तो मा विचिन्वन्ति, मम योगमायाप्रभावात् पश्यन्त एव वर्त्तन्ते, कथं विचेष्यन्तीत्यर्थः । (भा० १०।३३।३७ ; मन्यमानाः स्वपार्श्वस्थान्" इति वक्ष्यमाणत्वात्, तस्माद् बन्धुसाध्वसमकृढ्वम्, न कुरुत, अकारः प्रश्लेषणीयः । 'अभावे नह्य नो ना' इति केवलस्य अकारस्य निषेधवाचकत्वम् ॥ २० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

'मातरः पितरः' इति कुमारीः प्रति, पतय इति ऊढाः प्रति, पुत्रा इति पुष्टपुत्राः प्रति, अपत्यवतीनां देहान्तरेण गतत्वात् अपश्यन्तो मा विचिन्वन्ति, ते तु तत्रस्था एवेत्येवं जानन्ति मत्प्रभावादेवेति बोद्धव्यम्–(भा० १०।३३।३८) "स्वान् स्वान् दारान् व्रजौकसः" इति वक्ष्यमाणत्वात् । अतोबन्धुभ्यः साध्वसं मा कृढ्वमिति मा–शब्दः काकाक्षिगोलकन्यायेनोभयत्र योज्यः । अथवा, बन्धुसाध्वसमकृढ्वं छिन्नवत्यः 'कृञ् हिंसायाम्' इति सिद्धम् । बन्धुसाध्वसं नास्त्येवेत्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, रात्रावपि वनेऽपि युवतीनामपि सङ्घशो न गमने दोषो न जनैरुद्बुध्यते सत्यं तदपि बन्धवो भवतीरनिष्टाशङ्कया साम्प्रतमवश्यमन्विष्यन्त्यतस्तान् मा व्याकुलयतेत्याह, मातर इति । वो युष्मान् विचिन्वन्ति मृगयन्ते तत्र पुत्राः द्वित्रिमास्या एव नान्वेषणपराः पाययन्त्यः शिशून् पय इति क्रन्दन्ति वत्सा बालाश्चेति पूर्वापरोक्तस्तदपि भगवता स्वस्मिंस्तद्विशेषज्ञानाभावमभिनीतवतैवोक्तमित्यदोषः, अता बन्धूनां साध्वसं युष्मददर्शनोत्थं भयं मा कृढ्वं नोत्पादयत पक्षे अपश्यन्त्यो विचिन्वन्त्येव न त्वतिदूरेऽतिनिबिडे वनेऽस्मिन् वो न द्रक्ष्यन्त्यतो बन्धुभ्यस्तेभ्यः सकाशाद्भयं माकृढ्वं स्वच्छन्देन मया सह रात्रावत्र विलसतेति भावः ॥ २० ॥

रसिकाह्लादिनी–टीका

उपासनासिद्धाः यूथमुख्याः प्रत्याह मातर इति । ऊढाः मातृगृहे स्थितास्तत्स्नेहपरवशाऽपि वेणुनादमाधुर्येण कृष्टाः प्रतिवदति मातरो युष्मान् विचिन्वन्ति स्नेहविशेषात् गृहेष्वपश्यंत्यो वनेप्यायास्यंति । तदा रसभंगो भविष्यति, तासां वनेषु परिभ्रमणाशक्तिमालक्ष्य कुलकलंकभीत्या पितरोऽपि इतस्ततो विचिन्वन्ति व्यूढापि भर्तृगृहगमनाभावात् विचिन्वन्तोऽपि कुत्रापि भवतीरप्राप्य वनेऽप्यायास्यन्ति तदा महाननर्थो भविता । प्रौढाः प्रत्याह मातुरुपेक्षणमाकलय्य पुत्रा विचिन्वन्ति तेषां परिभ्रमणवैफल्यमालक्ष्य भ्रातरो विचिन्वन्ति, भ्रातृगेहादागताः पतीनां गृहेषु स्थितास्तत एवागताः प्रति वदति पतयो भवंतीः विचिन्वन्ति पत्नी पापानि भर्त्तरीति कलंकभिया च सर्वत्रान्वेष्यन्ति । अन्येषामागमनं कदाचित्कं पतीनामागमनं त्वावश्यकं संभावितमिति अतोऽत्रागत्य

मन्निकटे भवतीर्दृष्टा व्रजराजपार्श्वे गत्वा यदि निवेदयेयुस्तदा मम महती लज्जा भवेत्। तदा च युष्मास्वपि कोऽपि विस्रम्भं न करिष्यति युष्मद्धेतुदुष्कीर्तेर्मम भयं यद्धेतुकं कुलकलंकाद्भवतीनां भयमिति, अतो मम युष्माकं च क्षेमाय वनेऽवस्थानमसांप्रतमेव, अतो बन्धूनां साध्वसं भयं कुत्र गता इति मा कुढ्वं मा कुरुत भयमविगणय्य भवतीनामत्रावस्थानेनोदासीनस्याकामस्य च मम किं प्रयोजनाभावात्। अयं शब्दोत्थोऽर्थः सापेक्षत्वसकामत्वपक्षेऽर्थोत्थमर्थमाह–युष्माकं मात्रादयो विचिन्वन्ति अन्वेषयन्ति, वाग्भंग्या श्लेषार्थं प्राह विचिन्वंतु किं तेषामन्वेषणेन मया तु तादृशानुसंधानस्य कृतत्वात् यथा युष्मान् मात्रादयः पश्यन्तोऽपि अंधा इव परिभ्रमिष्यन्ति अत्र नायास्यन्ति यतो भीतिसहिता रतिर्न सुखप्रदा अतो निर्भयाः सत्यो मया सह विहरतेति सूचितं अन्यथा ममौदासीन्ये मात्रादयोऽत्रागता भवेयुः तस्मादर्थोत्थमुक्त इति ॥ २० ॥

विशुद्धरसदीपिका

तत्र मास्तु घोरसत्त्वादिशङ्का गुरुजनभीतिस्तु सम्भाव्यत इत्याह–मातर इति। प्रथमे पक्षे साधकचरीरुद्दिश्याह – व इति। भवतीः प्रति ब्रवीमीति भावः। अत्र पतय इति साधकचरीषु पतिम्मन्याः नित्यसिद्धासूपहासमात्रमेव पुत्रास्तु सुतरामुपहासः यथाश्रुते तु मातृवेषणयोग्यपुत्रादिसद्भावे तासामर्द्धजरतीत्वापत्तौ परमो रसाभास अनौचित्यं चेति ध्येयम्। यद्वा, व इत्याग्रहेणाह–अपश्यन्तः गृहेष्विति शेषः। ततश्च बन्धुभ्यो मम साध्वसं मा कुढ्वं यूयं तु निर्भया इत्यर्थः। पक्षे ननु, मास्तु लोकापवादबाधा निर्बाधा भवत्पार्श्वे स्थितिर्बन्धुभयजनकेति याम इत्यत आह–मातर इति। विचिन्वन्तोऽपि मम मुरलीकलमोहिता न द्रक्ष्यन्ति। यद्वा, कापि मयाऽन्तर्द्धानविद्या साधिता इति यद्वा अपश्यन्तः सन्तोऽपि विचिन्वन्ति ते तु मम योगमायाप्रभावात् स्वान् स्वान् दारान् पश्यन्त एव कथं विचेष्यन्तीत्यर्थः। अतो बन्धुसाध्वसं मा कुढ्वम् ॥ २० ॥

श्रीरामनारायणकृता भावभावविभाविका

औदासीन्यपक्षे घोरसत्त्वादिभयं सम्भाव्य कुलजनभयमपि दर्शयति—मातर इति। पुत्रा इति पुत्रसदृशा भ्रातृपुत्रादयः ते सर्वे वो युष्मानपश्यन्तो विचिन्वन्ति मृगयन्ति तथा च तेषां बन्धूनां साध्वसं सम्भ्रमो जायते तन्मा कुध्वं मा कुरुत इति पक्षान्तरे तु सत्यमत्र स्थितिः सुखदा परन्तु बन्धुसाध्वसभयाद्व्रजे गन्तव्यमेव तत्राह, मातर इति। ते अपश्यन्तो विचिन्वन्त्येतन्निमित्तं यद्बन्धुप्रयुक्तं वो युष्माकं मनसि साध्वसं तन्माकुध्वं ते तु गोचारणगृहकृत्यादिश्रान्ताः घोरं गाढं निद्रा तमो रूपयतीति घोररूपा रात्री तस्यां निद्रिता मन्मायामोहिताः स्वान् दारान् स्वपार्श्वे स्थानेव मन्यमानाश्च, यद्वा, तथाभूतास्ते अपश्यन्त इति मा किन्तु योगमायाप्रभावात्स्वपार्श्वेस्थानेव पश्यन्तः, अत एव मा विचिन्वन्ति तथा च तद्भीतिप्रयुक्तं बन्धोः प्रेष्ठस्य मम साध्वसं मा कुध्वं मम तु वः समागम एव जीवनमिति भावः ॥ २० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु, भवत्प्राप्तीच्छया समागतानां भगवद्गीतादिनोद्दीपितास्मादारण्यं विलम्बसहनाक्षमाणां स्वभक्तानामस्माकं त्यागो नोचितः, इति चेत्तत्राह–मातर इति। कासाञ्चिन्मातरः कासाञ्चित्पुत्राः कासाञ्चिद्भ्रातरः कासाञ्चित् पतयः कासाञ्चित्सर्वे गृहजना अपश्यन्तो विचिन्वन्ति मृगयन्ते। ननु, अन्वेषणान्निवृत्ता अतो मात्रादि कोपि यद्यागत्य मत्पार्श्वे युष्मानपि पश्येत्तदोभयेषां भयलज्जौ स्यातामतोऽत्र स्थितया बन्धुभ्यः स्वस्य भयं बन्धूनां मम चापकीर्तिभयं च मा कुरुत अतो बन्धूनां साध्वसपरिहाराय व्रजं प्रति यात अन्यत्र वा चलत तथा च सम्प्रत्यस्ति भवतीनां प्रतिबन्धकमतो मम को दोष इति भावः। अनभिज्ञापक्षे। ननु, नास्त्यस्माकं किञ्चिदपि भयं समुदायनिविष्टत्वाद्भवत्समीपस्थत्वाच्च नाप्यपकीर्तिभयं सङ्घश आगतत्वादज्ञातस्थाने स्थितत्वाच्चेति चेत्तत्राह—मातर इति। भवतीनां नियामकाः युष्मान् गृहेऽदृष्ट्वा विचिन्वन्ति अतस्तासां साध्वसं मा कुढ्वं ननु, आग तेप्येवंविधा एवाऽतः स्त्रीत्वाद्वा नागमिष्यन्तीति चेत्तत्राह-पितर इति। ते स्वकुले कलङ्कपातशङ्कया विचिन्वन्त आगमिष्यन्तीत्यर्थः। ननु, तेऽपि नागमिष्यन्ति सङ्घश आगतास्वस्मासु शङ्कानुत्थानात्स्त्रीस्वभावस्य तैरपि ज्ञातत्वाच्चेति चेत्तत्राह—पुत्रा इति। पुत्राणां रक्षणाग्रहो महती लज्जा च वर्तत इति भावः। ननु, ते बाला इति चेत्तत्राह भ्रातर इति ते ह्यन्वेषणे समर्थाः लज्जावन्तश्चाऽतस्ते अदृष्ट्वा लज्जया कदाचिच्छरीरमपि त्यजेयुरिति भावः। ननु, तरुणास्ते वयं च तरुण्योऽतो लज्जयान्वेषणार्थं नागमिष्यन्तीति, यद्वा, ननु रात्रौ पतिसन्निधौ स्थितिसम्भावनया तेऽन्वेषणाय न प्रवर्त्तन्त इति चेत्तत्राह—पतय इति। ते रात्रौ भोगापेक्षया भवत्यो नो दृष्ट्वा अन्वेषयन्तोऽत्रागमिष्यन्ति तस्मात्तदीयो रसोऽन्यस्मै न देयो भोगसिद्धेस्तत एव सुकरत्वात् इति भावः। नन्वेवं तर्हि ते यदा आगमिष्यन्ति तदा तैः सार्द्धमेव गमिष्यामोऽतस्तावत्त्वं तूष्णीं तिष्ठेति शङ्कानिरासाय विचिन्वन्तीत्युक्तं तथा च गृहान्निर्गताः मध्ये स्फुटितैर्मार्गान्तरैर्गताः सन्तो विचिन्वन्त्येव अतोऽत्रागमनं तेषां दुर्घटमतो विचिन्वन्तो खेदं मरणं वा प्राप्नुयुरित्यर्थः। नन्वस्तु किमस्माकं तैरिति चेत्तत्राह–परिजनैः सार्द्धमेवावस्थानयोग्यानां कुलाङ्गनानां युष्माकं तत्साध्वसोत्पादिकाप्रवृत्तिर्नोचितेति भावः। मानिनीपक्षे, ननु, किमित्येवं निर्लज्जः सन् बृहत्परिवाररक्षिता लज्जावतीरस्मान्प्रति ब्रवीषि वयमत्र क्षणमात्रमप्यवस्थातुं न शक्नुमः यतः परमप्रेमास्पदा अस्मानपश्यन्तोऽस्मन्मात्रादयोऽन्वेषणाय निस्सृताः स्युरतस्तेषां मध्ये यद्येकोप्यत्रागत्यात्रास्मान्पश्येत्तर्हि

महाननर्थो भवेत्तस्मात्तदागमनात्पूर्वमेव झटिति वाऽस्माभिर्गन्तव्यमिति चेत्तत्राह–मातर इति। बन्धुभ्यः साध्वसं यतस्ते मात्रादयोऽपश्यन्तः विचिन्वन्त्येव न तु गहनेऽस्मिन् वने तेषामागमनं सम्भाव्यम् इति भावः। यद्वा, विचिन्वन्ति नत्वत्राऽऽयान्ति नाप्यायास्यन्ति हि यतोऽपश्यन्तो न द्रक्ष्यन्तो वनस्याऽस्यातिनिबिडत्वान्मया तामस्या विद्यैतस्थामस्याच्छादितत्वाच्च तस्तद्भयं विहाय मया सार्द्धं यथेष्ट रमतेति भावः। निवृत्तिपक्षे। निर्विशेषमखण्डं ब्रह्म यथोक्तरात्रिकल्पमिति त्वया कथं ज्ञातमित्याशङ्क्य बहुविद्वत्सम्प्रतिपत्तेरित्याह–मातर इति। वो मात्रादिस्थानापन्नाः साङ्ख्यध्वरमीमांसकादयः विचिन्वन्ति यथोक्तं ब्रह्म श्रुतिप्रमाणिकमस्ति न वेति विचारयन्ति तथापि न पश्यन्त्येव तथा च यदि स्यात्तर्हि परमविचक्षणैरन्वेष्यमाणमवश्यमुपलभ्यते नोपलभ्यतेऽतः स्फीतालोकवर्तिघटानुपलब्ध्या घटाभाववत्तदभावो निश्चीयत इति भावः। तस्माद्यथोक्तरात्रिकल्पत्वात्त्राणाय परमोद्योगवत्वादेते वो बन्धवः तेषां साध्वसं तन्मताननुमोदनेन वेदबाह्यत्वप्राप्तिभयं मा कृध्वं स्वरक्षकस्य रक्षणमेवोचितं नतु मयप्रदानमिति भावः ॥ २० ॥

रास-रहस्यम्

२० टी—वः युस्माकं मात्रादिस्थानापन्नाः शरीरसम्बन्धेनैव विचारशीलाः चार्वाकमीमांसकादयः विचिन्वन्ति स्वस्वानुकूलश्रुतियुक्तिप्रमाणैः प्रबोधयन्त्यपि वः युस्मान् ते अपश्यन्तः मार्गप्रदर्शयितुमशक्नुवन्तश्चेत् तथापि बन्धुसाध्वसं बन्धुरूपेण प्रतीयमानं तेषां साध्वसं तत्तन्मतखण्डनात्मकं भयं मा कृध्वं मा उत्पादयत अपितु तावन्मात्रानुमोदनेन समाश्रयस्व ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हेत्वन्तमाह—मातर इति। बन्धूनां साध्वसं भयं मा कृढ्वं मा कुरुतेत्यर्थः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पुत्राः पत्युरग्रजादीनां स्वज्येष्ठभगिन्यादीनां वा विचिन्वन्त्यश्च विचिन्वतश्च। पुमांस्त्रियेत्येकशेषः। एवमेवापश्यन्त्यो मृगयन्तो हि यतो पश्यन्तस्ततो भीता भवेयुः। एवं बन्धूनां साध्वसम्भीतिं मा कृध्वं न कुरुत। मा तत्कृध्वं ततः प्रतियातेत्यन्वयः ॥ २० ॥

श्रीसुबोधिनी

किं च वो युष्मान् मातृपित्रादयो मार्गयंति तत्र हेतुरपश्यंतोऽनवेक्ष्यमाणाः बंधूनां साध्वसमपराधं माकृढ्वम् ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

भ्रातर इत्यत्र, अदृष्ट्वेत्यादिना प्रासंगिको लोकस्थित्या प्राप्तोर्थ उक्तः ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किंच वो युष्माकं मात्रादयो युष्मानपश्यन्तो विचिन्वन्ति मृगयन्ते, अतस्तेषां बन्धूनां साध्वसमदर्शनजन्यं भयं मा कृध्वं नोत्पादयतः। यद्यप्यविवाहिताभिरेव पत्यर्थं कात्यायन्याराधनं कृतं, तथाप्यत्र पतिपुत्रादिमतीनामपि तत्सौन्दर्याद्याकृष्टचित्तानामागमनं मूले स्पष्टमेव ॥ २० ॥

अन्वितार्थप्रकाशिका

मातर इति ॥ वो युष्माकं मातरः पितरः पुत्रा भ्रातरः पतयश्च युष्मानपश्यन्तो विचिन्वन्ति मृगयन्ते। अतस्तेषां बन्धूनां साध्वसमदर्शनजन्यं भयं मा कृध्वं नोत्पादयत। ढत्वाभाव आर्षः। अथ च युष्माकं मात्रादयः गहनेऽस्मिन् वने अन्धा इव अपश्यन्त एव विचिन्वन्ति नतु द्रक्ष्यन्ति। हिरेवार्थे। अतो बन्धुभ्यः भयं मा कुरुत ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विचिन्वंति मार्गयंति बंधूनां साध्वसं भयं मा कृढ्वं मा कुरुत इत्यर्थः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मातर इति ॥ मातरः जनन्यः, पितरो जनकाः, पुत्राः स्वतनयाः, भ्रातरः सहोदराः, पतयश्च, वो युष्मान् अपश्यन्तः, विचिन्वन्ति मृगयेयुरित्यर्थः। हि अतः, बन्धुसाध्वसं मात्रादीनां भयोत्पादनं, मा कृढ्वं मा कुरुत ॥ २० ॥

कृष्णप्रिया

तुम्हें न देखकर तुम्हारें माँ, बाप, पति, पुत्र, और भाई–बन्धु ढूँढ रहे होंगे। उन्हें भय में न डालों ॥ २० ॥

दृष्टं वनं [1]कुसुमितं राकेशकररञ्जितम् । यमुनानिल[2]लीलैजत्तरुपल्लवमण्डितम्[3] ॥ २१ ॥

कर्दमक्षमा

अन्वयः—कुसुमितम्, राकेशकररञ्जितम्, यमुनाऽनिललीलैजत्तरुपल्लवमण्डितम्, वनम्, दृष्टम् ॥ २१ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ईषत्प्रणयकोपेनान्यतो विलोकयंतीः प्रत्याह । दृष्टमिति । राकेशस्य पूर्णचंद्रस्य करै रंजितं यमुनास्पर्शिनोऽनिलस्य लीला मंदगतिस्तया एजन्तः कंपमानास्तरूणां पल्लवास्तैः शोभितम् ॥ २१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यतो वनम । उपेक्षायाम्-भवतीभिर्वनं दृष्टम् । किंभूतम्-कुसुमानि संजातान्यस्येति हासो लक्ष्यते भवतीनामनुचिताचारं वीक्ष्य वनमपि हसतीति भावः । ततोऽपि परावृत्याऽऽकाशदत्तदृष्टीर्दैवमुपालंभंतीरिवालक्ष्याह—राकेति । राकेशोऽपि वनेनैकरसं योगं कृत्वा हसत्येव । पुनरतिकोपेन यमुनाभिमुखीरालक्ष्याह—यमुनेति । यमुनापि समीरकंपितनीरतरुपल्लवचालनच्छलेन नेह स्थेयमित्युपदिशतीति भावः । पक्षेऽतीवशोभनरमणोपयोगि स्थलमिदं ततो रमणं कुरुतेति द्योतयति ॥ ततश्च ता लज्जया परितो विलोकयंतीराह—दृष्टमिति । आः ! ज्ञातं वनदर्शनार्थमागता इति । ततश्च तासामूर्द्ध्वावलोकने सत्याह—राकेशेति । यमुनादिगवलोकने सत्याह—यमुनास्पर्शिनोऽनिलस्य लीला मंदगतिस्तया एजन्तः कंपमानास्तरूणां पल्लवाः पुष्पितास्तैः शोभितमित्यभीप्सितं वनादिदर्शनमपि निव्यूढमतो मा विलम्बध्वमिति भावः । पक्षे वृंदावनमिदं सर्वोत्कृष्टं, तत्रापि पूर्णचंद्रा रजनी, तत्रापि चतुर्दिक्षु यमुना, तत्रापि शैत्यमांद्यसौगन्ध्यवन्तोऽनिला इत्युद्दीपनविभावा एते, आलंबनविभावश्चाहं वर्त्त एवेत्यद्य युष्माकं रसिकता परीक्षिता भविष्यतीति भावः ॥ अत्र तोषिणी—ततस्तासां प्रणयकोपेन यदन्यतो दर्शनं तदन्यथोत्प्रेक्ष्यते—दृष्टमिति । तद्यातेति परेणान्वयः । कुसुमितमित्यादिविशेषणैर्दर्शयतोक्ता । तत्र चेषत्प्रणयकोपतो वनावलोकने दृष्ट वनमित्युक्तम् । तत ऊर्द्ध्वावलोकने च राकेशकररंजितमिति । ततः कालिंदीतीरावलोकने तु यमुनेति विवेचनीयम् । अन्यत्तैः । यद्वा—ननु महामोहनवाक्याद्यतिक्रमेण तेऽस्माभिरुपेक्षिता एवेति कुतो भयमिति चेत्तर्हि तादृशप्रयत्नेन रात्रावत्रागमनस्य किं नाम प्रयोजनमिति सकैतवं क्षणं ध्यात्वा—आः ! ज्ञातम्, दिष्ट्या पूर्णचंद्रायां रात्रौ मदीयश्रीवृंदावनशोभानिरीक्षणार्थमागतमिति । भवतु तच्च संपन्नमेवेत्यगुल्यादिना दर्शयन्सलीलमाह—दृष्टमिति । अर्थः स एव । वस्तुतस्तु साक्षात्तथा तादृशवनादिप्रदर्शनेन भावमेव विवर्द्धयतीति । श्लेषार्थश्चायम्—न केवलं तद्भयाभाव एव अपि तु परमसुखनिधानत्वमप्यत्रास्तीति भावोद्दीपनाय स्वयं दर्शयति—दृष्टमिति । ईदृशसर्वगुणयुक्त वनं दृष्टमेव तत्तस्माद्घोषं यातेत्यन्वय इति २१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तासां प्रणयकोपेन यदन्यतो दर्शनं तदन्यथोत्प्रेक्ष्यते दृष्टमिति तद्यातेति परेणान्वयः । कुसुमितमित्यादिविशेषणैर्दर्शयतोक्ता तत्र चेषत्प्रणयकोपतो वनावलोकने दृष्टं वनमित्युक्तं तत ऊर्द्ध्वावलोकने च राकेशकररञ्जितमिति ततः कालिन्दीतीरावलोकने तु यमुनेति विवेचनीयम् अन्यत्तैः । यद्वा ननु, महामोहनवाक्याद्यतिक्रमेण तेऽस्माभिरुपेक्षिता एवेति कुतो भयमिति चेत्तर्हि तादृशप्रयत्नेन रात्रावत्रागमनस्य किं नाम प्रयोजनमिति सकैतवं क्षणं ध्यात्वा आं ज्ञातं दिष्ट्या पूर्णचन्द्रायां रात्रौ मदीयश्रीवृन्दावनशोभानिरीक्षणार्थम् आगतम् इति भवतु तच्च सम्पन्नमेवेत्यङ्गुल्यादिना दर्शयन् सलीलमाह—दृष्टमिति । अर्थः स एव । वस्तुतस्तु साक्षात् तथा तादृशवनादिप्रदर्शनेन भावमेव विवर्द्धयति श्लेषार्थश्चायं न केवलं तद्भयाभाव एवात्र अपि तु परमसुखनिधानत्वमपीति भावोद्दीपनाय स्वयं दर्शयति —दृष्टमिति । ईदृशं सर्वगुणयुक्तं वनं दृष्टमेव तत्तस्मात् घोषं मा यातेत्यन्वयः इति ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

कुसुमितमित्याविशेषणैर्दर्शयतोक्ता । यद्वा, ईषत्प्रणयकोपतो वनावलोकनेन दृष्टं वनमित्युक्तम्, ऊर्द्ध्वावलोकनेन च राकेशकररञ्जितमित्युक्तम्; कालिन्दीतीरावलोकनेन च यमुनेत्युक्तमिति विवेचनीयम् । तत्र यमुनेति तत्सम्बन्धेन शैत्यम्, लीलेति मान्द्यम्, वनस्य कुसुमितत्वेन स्वत एव सौगन्ध्यमित्यनिलस्य गुणत्रयमूह्यम्, अन्यत्तैर्व्यञ्जितम् ! यद्वा, ननु महामोहनवाक्याद्यतिक्रमेण तेऽस्माभिरुपेक्षिता एवेति कुतो भयमिति चेत्तर्हि तादृशप्रयत्नेन रात्रावत्रागमनस्य किं नाम प्रयोजनमिति सकैतवं क्षणं ध्यात्वा आं ज्ञातम्, दिष्ट्या पूर्णचन्द्ररात्रौ मदीयश्रीवृन्दावनशोभानिरीक्षणार्थमागतमिति, भवतु, तच्च सम्पन्नमेवेति ससान्त्वमभिनयेनाह, यद्वा, ननु गृहबन्धाद्युपेक्षया श्रीवृन्दावनचन्द्रं श्रीकालिन्दीविहारलीलां चानुभवितुमागताः स्म इति कुतो

---

१. कुमुदितं—च. पु. मूले । २. नीरंजत—विज. । ३. शोभितम्—श्रीधर. वंशो. जीव. वीर. विज. विश्व. ध. रा. शु. सु. ।

भयमिति चेत् सत्यम्, तर्हि परमशोभायुक्तवृन्दावनस्य तत्रोदितचन्द्रस्य तथा सुन्दरकालिन्दीविहारिवातगतिलीलायाश्च दर्शनमिदं दिष्ट्या सम्पन्नमेवेत्यङ्गुल्यादिना दर्शयन् सलीलमाह—दृष्टमिति। अर्थः स एव, वस्तुतस्तु साक्षात्तथा तादृशवनादिप्रदर्शनेन काममेव विवर्द्धयति, श्लेषार्थश्चायम्। एतत्पक्षे दृष्टमिति द्वाभ्याम्! ईदृशं सर्वगुणयुक्तं वनं दृष्टमेव, तत्तस्मात् घोषं मा यातेत्यन्वयः यद्वा, एतादृशे वने साक्षाद्दृष्टेऽपि रात्रौ रतौ विलम्बनमयुक्तमेवेति तद्योग्य-यमुनातीरं प्रयाम इति ॥ २१ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

राकेशश्चन्द्रः ॥ २१-२५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं प्रत्याचक्षाण ईषत्प्रणयकोपान्विता विलोकयन्तीः प्रत्याह-दृष्टमिति। राकेशस्य पूर्णचन्द्रस्य करैः रञ्जितं यमुनास्पर्शिनोऽनिलस्य लीलया मन्दगत्या कम्पमानैस्तरूणां पल्लवैः शोभनं वनं दृष्टं हि ॥ २१ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

राकेशश्चन्द्रः यमुनाया अनिलेन वायुना निर्भयेन एजद्भिः कम्पमानैः तरुपल्लवैः शोभितं यद्वा, यमुनानिलानीतनीरेणैजद्भिः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

पुनर्यात गृहम्, न यातेति पक्षद्वयमेव लक्ष्यीकृत्याह-दृष्टं वनमित्यादि सार्द्धेन। वनशोभादिदृक्षया यदागताः तद्दृष्टम्। वनं कीदृशम्? कुसुमितमित्यादिविशेषणत्रयम्। तस्माद्घोषं यात, मा चिरम् विलम्बो मा कार्य इत्यर्थः। तत्र गत्वा किं कार्यम्? तत्राह—पतीन् शुश्रूषध्वम्। पतीनिति पान्तीति पतय इति योगार्थत्वाद् यथातथं पालकमात्रे बोद्धव्यम्। अन्यच्च क्रन्दन्ति बालाश्च वत्सास्तान् पाययत, पश्चाद् दुह्यतेत्यर्थः। बाला इति वत्सविशेषणम्। हे सतीः साध्व्यः। पक्षे दृष्ट वनमित्यादिना उद्दीपनविभावः प्रकटीकृतः। तत्तस्माद् घोषं मा यात, पतीन् मा शुश्रूषध्वम्, बालाश्च वत्सा मा क्रन्दन्ति, तान् मा पाययत, मा दुह्यत चेत्यर्थः। चिरमेव न यात इहैव सर्वदा तिष्ठतेत्यर्थः। प्रतिक्रियं मा शब्दो योज्यः ॥ २१-२२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

दृष्टं वनमित्यादि। कुसुमितत्व-राकेशकररञ्जितत्वादिना पुनरुद्दीपन-विभावं प्रतिपाद्य तत्तस्माद्यात मा चिरं विलम्बो कार्यः, एष च विधिः। एष निषेधार्थः—तत्तस्मात् मा यात, गोष्ठमचिरं तत्कालं विलम्बेन तु यास्यथः, शुश्रूषध्वं पतीन् मा इति सर्वत्र योज्यम्, मा पतीन् गृहपतीन् शुश्रूषध्वं प्रियतमं तु मां शुश्रूषध्वं यतो भवत्यः सतीः सत्यः प्रथमार्थे द्वितीया। सत्यो हि मामेव भजन्ति। यद्वा पतीनस्मानिति सर्वोत्कृष्टत्वे बहुगौरवत्वे बहुवचनम्। अथवा, उद्दीपन-विभावो वनं दृष्टम्, आलम्बनविभावस्त्वहमपि दृष्टं, तद्यात यातुं चेत् शक्यते, तदा यातेति साक्षेपोक्तिः। दुह्यतेत्यन्तं बालाश्चेति परकीया इति बोद्धव्यम्। मां दृष्ट्वापि गृहादि-सम्बन्धोऽद्यापि न दूरीभूत इत्यसन्तमपि गमनमनोरथमुद्भाव्य कौतुकत्वेनाक्षिपति ॥ २१-२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च ता लज्जया परितो विलोकयन्तीराह—दृष्टमिति। आं ज्ञातं वनदर्शनार्थमागता इति ततश्च तासामूर्द्ध्वावलोकने सत्याह—राकेशेति। यमुनादिगवलोकने सत्याह यमुनास्पर्शिनो अनिलस्य लीलामन्दगतिस्तया एजन्तः कम्पमानास्तरूणां पल्लवाः पुष्पितास्तैः शोभितमित्यभीप्सितं वनादिदर्शनमपि निर्व्यूढमतो मा विलम्बध्वमिति भावः, पक्षे वृन्दावनमिदं सर्वोत्कृष्टं तत्रापि पूर्णचन्द्रा रजनी तत्रापि चतुर्दिक्षु यमुना तत्रापि शैत्यमान्द्यसौगन्ध्यवन्तो अनिला इत्युद्दीपनविभावा एते आलम्बनविभावश्चाहं वर्त एवेत्यद्य युष्माकं रसिकतापरीक्षिता भविष्यतीति भावः ॥ २१ ॥

श्रीरसिकाह्लादिनी टीका

शब्दोत्थार्थप्रतीत्या वास्तवमर्थमजानतीः, ऊद्ध्वाधो दृष्टिप्रसरणेनान्यतो विलोकयन्तीः किंचित्संरम्भक्षुभितदृष्टीः प्रत्याह दृष्टमिति अतिमुद्रामाकलय्येषत्प्रणयकोपेनेतस्ततो विलोकमानाः दृष्ट्वाऽन्यथोत्प्रेक्षणं निर्वार्य नूनं गृहेषु पत्यादिशुश्रूषया व्याकुलत्वेन दुःखमनुभूय वृन्दावनविलोकनौत्सुक्यतयाऽऽगता एव तर्हि क्षणं वनदर्शनेन हृदयं निर्वापयन्तु इत्याह तीर्यक् प्रेक्षणेन वनदर्शनं संभाव्याह निर्धारितमिवार्थं वदति। वनं दृष्टं तच्च कुसुमितं शोभातिशयोक्तिः सूचिता, ऊद्ध्वावलोकन-मन्मथोत्प्रेक्ष्याह राकेशकररञ्जितमिति। कालिंदीप्रदेशस्थवृक्षखंडेषु प्रसरंतीर्दृष्टीरन्यथोत्प्रेक्षमाणमाह—यमुनेति यमुनासम्वासिनोऽनिलस्य लीलाऽनायासकृतिस्तया एजन्तः कम्पमानास्तरुपल्लवास्तैः शोभितं, वृक्षा अपि भवतीमत्रावस्थानमनुचितं मन्यमाना अंगुलितुल्यैः पल्लवैरेव निवारयन्ति वनदर्शनविषयिणी उत्कंठोपसंपन्नैवातः परं गृहं यातेति वननिरीक्षणायागता भवतीरत्रावस्थापयतो ममोदासीनस्यानौ-

चितीयमिति। सापेक्षत्वपक्षेऽर्थस्तु–स एवाभिप्रायस्त्वन्य एव रमणार्थं चेदागतास्तर्हि उद्दीपनविभावं पश्यतेत्याह—दृष्टमिति, वनं दृष्टं काक्वा प्रश्नः वनं विशिनष्टि कुसुमितं भवतीनामागमनं दृष्ट्वा वनस्यापि भावविशेषेण रोमांचितत्वमिव जातं किं पुनर्ममेति भावः। अनेनाग्रे करिष्यमाणमाकल्प–शय्याव्यंजनादिरचनं सूचितमिति। वनं कीदृशं राकेशस्य करैः किरणैः रञ्जितं चन्द्रस्यापि अस्मद्रमणानुकूल्यं दर्शितं करैः हस्तैः हि मार्द वेन कान्तिविशेषयोजितमनेन वनस्योज्ज्वलत्वं तमोनाशकत्वं सूचितम्, पुनः कीदृशं यमुनासम्बन्धिनोऽनिलस्य लीला तया संचलनं तेन एजत् कम्पमाना तरूणां पल्लवानि धुवने करधूननमिव शिक्षयन्तः, यद्वा ईदृशं सुखं नान्यत्रास्तीति गतागतैः दर्शयंत इव वनैः पल्लवैः शोभितमनेन शरदृतुः शैत्येन च युष्मदागमनेन मत्सम्बन्धेन च वृक्षेष्वपि सात्विकभावः सूचितः, ईदृशं सर्वसद्गुणविशिष्टं वनं दृष्टमेवातो व्रजे गमनमयुक्तमिति तात्पर्यार्थः ॥ २१ ॥

विशुद्धरसदीपिका

प्रथमपक्षे एवमौदासीन्यमनुभूय परिवर्त्तितमुखीरालक्ष्याह दृष्टमिति। वनशोभावलोकनलोभादागता न तु मदर्थमिति भावः, तत्तु दृष्टं संरम्भक्षुभितदृष्टीरालक्ष्य धाष्ट्र्यमभिनयति कुसुमितमिति। कुसुमानि सञ्जातान्यस्येति तारकादिः ततश्च हासो लक्ष्यते भवतीनामनुचिताचाराद्वनमप्युपहसतीति भावः। ततोऽपि परावृत्त्याकाशदत्तदृष्टीर्दैवमुपालभन्तीरिवालक्ष्यापलपन्नाह, राकेति। तेन पूर्णत्वं ततश्च द्विजराजत्वात् परमाप्तत्वं तस्य करैः किरणैः रञ्जितमतिधवलितम् एवं च राकेशोपि भवतीनां गृहगमनसाचिव्यं करोतीति भावः। पुनरतिकोपेन यमुनाभिमुखीरभिलक्ष्य तथैवाह—अहो साधु निष्टङ्कितं यमुनेति, यमुनापि समीरकृततीरतरुपल्लवचालनच्छलेन नेह स्थेयमित्युपदिशतीति भावः। पक्षे ननु, मास्तु बन्धुसाध्वसं स्वगृहान् गन्तव्यमेवेत्यत आह, दृष्टमिति। तत्र किमित्यत आह–कुसुमितं गृहगमनोन्मुखीर्वनमप्युपहसतीति पूर्ववत् अपि च नागरीणां वनशोभानिभालनायापि किञ्चित्कालं स्थितिरेव योग्येत्याह–राकेति। तथा भवतीनां सख्या यमुनयाऽप्यनिललीलैजत्तरुपल्लवचालनेन मौनमुद्रया मा यातेति निवारणमेव क्रियत इत्यर्थः ॥ २१ ॥

श्रीरामनारायणकृता भावभावविभाविका

प्रथमपक्षे उदासीनवाक्यश्रवणेऽपि यदर्थमागताः स एव कथमेवं वदतीति चकिताः पत्यौदासीन्यमभिनयन्नेव प्रेमवृद्ध्यै उद्दीपनमाह—दृष्टमिति। यूयं नहि मदर्थमागताः किन्तु यदर्थमागतास्तद्वनं दृष्टम्। ननु, को वने विशेषः ? यदर्थमस्मदागमनमुच्यते तत्राह—कुसुमितमिति। विरहिणां कामशररूपतया हृद्वेधकं पतिसङ्गतानामेव सुखदं पतिसहकारं विनाऽलमतिवनदर्शनेन ननु निशि तमसि कथं गन्तव्यं ? तत्राह–राकेशकररञ्जितं पूर्णचन्द्रकिरणैर्धवलितमिति। न गमनप्रतिबन्धि तमोऽपि किञ्च मनोजचन्द्रोद्दीपितमनोजानां कुलाङ्गनानां नात्र सुखलेशोऽपि पतिसङ्गतानामाह्लादकोऽपि पूर्णचन्द्रः प्रियवियुक्तानां प्रलयार्कसन्निभ एव भवतीति ध्वनिः, औदासीन्यमालक्ष्य यमुनां प्रति दत्तदृष्टीः प्रत्याह—यमुनेति। यमुनासम्बन्धिनः मदनकुमदवर्द्धनकुमुदादिगन्धहारिणः शीतस्यानिलस्य वायोर्या लीला मन्दगतिस्तेनैजितानि यानि कुसुमिततरुपल्लवानि तैः शोभितमिति त्रिगुणसमीरान्वितं तदपि पतिसमागमोत्साहकमिति भावः। यद्वा, इति चित्रमिदं यद्वनदर्शनविहारार्थं युष्मदागमनं तद्वनमपि कुसुमितं सत्सितकुसुमदर्शनदर्शनेनारुणसुमनोहरविकसनेन भवदाचारमुपहसति चन्द्रोऽपि सितचन्द्रिकया प्रहासमभिनयति यमुनानिलोपि तरुपल्लवकरचालनेनात्रावस्थानमपि वारयति सर्वेषां वृन्दावनगतानां धर्ममर्य्यादाप्रियत्वान्न केवलमहमेव दाक्षिण्यपक्षे तु बन्धुसाध्वसाभावमुक्त्वा वनादिशोभां वर्णयन्नुद्दीपनेन प्रोत्साहयति—दृष्टमिति। वनं वृन्दावनमावयोर्नित्यलीलास्पदं भवतीभिर्दृष्टं स्वत एव सुखदं किमु वाच्यं कुसुमितमिति ऋतुराजेन स्वमित्रमदनवीराणां भवतीनां रतिरणप्रोत्साहायैव कालमनवेक्ष्य सर्वर्त्तु कुसुमैः पूरितम्। किञ्च, राकेशकररञ्जितं युष्मद्विहारायैव राकाया ईशेन पूर्णचन्द्रेण स्वकरैरेव रञ्जितमिति राकेशस्यैवमादरे न कस्यापि सङ्कोचः न च मद्वक्षःस्थश्रियः सापत्न्यशङ्कापि तया मयापि मया सह युष्मदालिङ्गनमभिलषितमालक्ष्यैव तद्भ्रात्रापि सेवारब्धेति भावः। किञ्च, यमुनासम्बन्धिनाऽप्यनिलेन त्रिगुणसमीरेण तरुमृदुपल्लवकरचालनैर्विहारार्थमावाहनेन न यमुनाया अपि सापत्न्य किन्तु भवद्विहाराभिलाष एव भवतीनां च सहागमनेनैव मम प्रेमपथि स्वतस्सिद्धसापत्न्याभावेन न शङ्कागन्धोऽपि किञ्च मत्कुलवृद्धैन युष्मदादरेण स्वकरैर्वनरञ्जनदर्शनेनैव स्वकुलवृद्धशङ्काप्यपनेया सर्वेषां मत्स्नेहव्याप्तहृदयत्वात् ॥ २१ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवमुक्ता अहो भगवदनुग्रहालाभान्निष्फलमेवास्माकमागमनं जातमिति विचार्य खिन्नचित्ताः आश्वासयति—दृष्टमिति। युष्माभिरत्रागत्य वनं दृष्टमेतेनैवं चेत्तर्हि कलगीतेन किमर्थमत्र वयमाहूता इत्याशङ्कापि परिहृता। वनं दृष्ट्वा मया विचारितमहो इदं वनं स्वभक्ताभ्योऽपि प्रदर्शनीयमित्याशयेन कलगीतेन मयाऽऽहूता इति भावः। ननु, का वा अत्र दर्शनीयतेति चेत्तत्राह–कुसुमितमिति। ननु, कुसुमितवनमेव यद्यस्माकं प्रदर्शयितव्यं तवाभीप्सितं स्थितं तदा दिन एव वयं कुतो नाकारिता इति चेत्तत्राह–राकेति। राकेशः पूर्णचन्द्रस्तस्य करैः किरणैः रञ्जितं तथा च दिने रात्र्यन्तरे वा नास्त्येवंविधा शोभेति भावः। किं च वायुरप्येवंविधः समयान्तरे दुर्ल्लभ इत्याशयेनाह—यमुनास्पर्शनाऽनिलस्य वायोर्लीला मन्दगतिस्तया एजन्तः कम्पमानास्तरूणां पल्लवास्तैः

शोभितं तस्मान्नास्त्यागमनवैयर्थ्यमिति भावः। अनभिज्ञापक्षे। ननु, भवतु तव निकटे न स्थीयतेऽन्यप्रदेशे गत्वा स्थास्याम इत्यभिप्रायवतीरालक्ष्याह–दृष्टमिति। एवंविधप्रदेशान्तरं नास्ति अयं च प्रदेशो दृष्ट एव भवतीभिरतोऽल वृथा कालक्षेपेणेति भावः। यद्वा, किमेवं मात्रादिबन्धुभयं प्रदर्श्यते तत्तु अस्माक दत्तजलाञ्जलिप्रायमेवाऽन्यथा तान् परित्यज्य रात्रौ बहिरागमनं कथं भवेत् त्वं बिभेषि चेत्तर्हि त्वमेवेतो गच्छेति प्रणयकोपवतीरालक्ष्याह, दृष्टम् अहो मयापि ज्ञायते निर्दोषाणां नास्ति कुतोऽपि भयं तथापि बुद्धिमतीनां वृथा गृहान्निःसरणस्यायुक्तत्वात् वनशोभेक्षणार्थमागताः स्युस्तच्च सम्पन्नमितो वृथाऽत्र न स्थेयमिति भावः। यद्वा, तच्छ्रुत्वा लज्जयेतस्ततो विलोकयन्तीरवलोक्याह—दृष्टमिति। अहो ज्ञातं मया साध्वीनां भवतीनां गृहान्निर्गमनं वनेक्षणाय तच्च जातमतो गन्तव्यमिति भावः, ननु प्रसङ्गादत्रागताः फलानि गृहीत्वा यास्याम इति चेत् तत्राह–कुसुमितं ननु फलिनम् एतच्छ्रुत्वा दृष्टीरालोक्याह, राकेशकररञ्जितम् अतो शरत् पूर्णचन्द्रचन्द्रिकाशोभेक्षणाय भवत्यः समागताः स्युस्तदपि जातमिति भावः। यमुनाभिमुखीः समालोक्याह, यमुनेति। मानिनीपक्षे ननु, तथापि गृहाद्बहिरस्माकं मनो न रमतेऽतः कथमत्र तिष्ठाम इति चेत्तत्राह–दृष्टमिति। कुसुमितमिदं वनं भवतीभिरदृष्ट तथा च नास्ति गृहेष्वेव स्वधकुसुमशोभाऽतोऽत्र कस्य मनो न रमते प्रत्यक्षोपलब्धस्यापलापो न युक्त इति भावः। किञ्चैवंविधं राकेशकररञ्जनं यमुनानिललीलैजत्तरुपल्लवशोभा च गृहेषु क्वास्ति तस्मादेतत्सर्वमवलोक्यैव प्रायशो भवत्यो मया स्मृताः स्मृत्वा च कलगीतेनाहूताः भवत्योऽप्यागत्य तथैव दृष्टवत्यो नो गमनाग्रहं विहायेह स्थेयं गोष्ठं प्रति मा यातेति परेणान्वयः। निवृत्तिपक्षे। ननु, भवतो विवेकचन्द्राऽनुदयाद्वैराग्यादिरहिता अस्मदभिप्रायं न जानन्ति विवेकादिसाधनसम्पन्नान्तःकरणास्तु जानन्तीत्याशङ्क्याह, दृष्टमिति। राकेशस्य विवेकचन्द्रस्य करैर्विचारभेदैः रञ्जितं शान्त्यादिलक्षणकुसुमशोभितमन्तःकरणलक्षणं वनं दृष्टमित्युपहासः नाममात्रेण श्रुत्यर्थमाशायविवेकादिमत् इति भावः। यतो यमुनास्थानीयाविद्या सम्बन्धिनोऽनिलस्य तत्स्थानीयस्य विक्षेपस्य लीलया तत्तद्विषयलालसया राजन्तस्तरुस्थानीयस्य वैराग्यस्य पल्लवास्तत्स्थानीयाप्तविचारोत्थावैराग्यभेदास्तैश्शोभितं यद्वा, यथोक्तयमुनानिललीलया विलासेन एजन्तश्चलन्तः प्रवेपिताः संसारवृक्षस्य पल्लवाः विषयप्रबालास्तैश्शोभितं तथा च श्रुतवेदान्तानामपि यथा पूर्वसंसारोपलंभ तेषां विवेकाद्यऽमास समवलोक्य तन्मतानुसरणं नोचितमिति भावः॥ २१॥

रास–रहस्यम्

र० टी०—यदि युस्माभिः संसाराटवीशोभेक्षणायागताभिः कुसुमितं कुसुमवत् विकसितं संसारप्रपंचं राकेशकररञ्जितं चन्द्रकिरणवत् क्षणस्थायिविषयसुखरागेण रक्तं, पुनः कथम्भूतं यमुनास्पर्शिनोऽनिलस्य लीला मन्दगतिः तया एजन्तः कम्पमानास्तरवस्तेषां पल्लवास्तद्वत् वासनावातताड़ितस्य चलायमानस्य मनसः संसारवृक्षस्य नानाविषयभोगैषणात्मकाः पल्लवाः विस्ताराः तैः शोभितं मनोऽभिरामं कृतं वनं संसारारण्यं दृष्टम्॥ २१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रात्रिसम्योगजां वनशोभां द्रष्टुं यद्यागतास्तर्हि यमुनास्पर्शिनोऽनिलस्य लीलया मन्दगत्या एजद्भिः कम्पमानैस्तरुपल्लवैः शोभितं राकेशकरैः पूर्णचन्द्रकिरणैः रञ्जितं कुसुमितं वनं वृन्दावनं दृष्टमेव॥ २१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अत्रागमनकृत्यं लोकावलोकनतः सम्पन्नमित उत्तरत्र गृहगमनं युक्तमङ्गना इत्याह॥ दृष्टमिति। कुसुमितम्। तारकादीतच्। राकेशश्चन्द्रस्तस्य करैः किरणै रञ्जितं प्रकाशितं यमुनाया उपर्यायातो मातारिश्वा तथा यमुनाया नीराणि तैरेजन्त एजमानाः कम्पमानास्तरवो मध्येगङ्गं मञ्जुलवञ्जुलादीनां समीरणेन नीरभूरुहाणां च कम्पनं युक्तं तेषां पल्लवैः शोभितं वनं दृष्ट युष्माभिरिति शेषः। यमुनाया अनिलेन च नीरा नीला रलयोरभेदात्। एजन्तस्तरुपल्लवा इति क्रमतोऽन्वयः। यमुनानैल्यान्नीलतानिलैजमानता च तरुपल्लवानां ज्ञेया॥ २१॥

श्रीसुबोधिनी

वनं द्रष्टुमागताः प्रत्याह। राकायाः पूर्णिमाया ईशश्चन्द्रस्तस्य करैः किरणै रंजितं यमुनासंपृक्तस्यानिलस्य वायोर्लीलया मंदगत्यैजंतः कंपमानास्तरवस्तेषां पल्लवैः शोभितं कुसुमितं पुष्पितं वन दृष्टम्॥ २१॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

दृष्टं वनमित्यत्राप्युक्ता गुणाः पूर्वोक्ता ज्ञेयाः। स्थितिपक्षे गृहे न गन्तव्यमिति यदुक्तं तत्र हेतुमाहुर्यदि गृहगमनेत्यादि। सर्वं त्यक्त्वा वनं प्रविष्टस्य तदपेक्षायामेव प्रायश्चित्तं कृत्वा तत्र गमनं स्मृतिवचनेन बाध्यते यत इत्यर्थः। प्रकृते तदभावान्न गन्तव्यमेवेति भावः॥ २१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वनशोभादर्शनार्थमागमनं प्रकल्प्याह—दृष्टमिति। कुसुमितं नानाविधसुगन्धिपुष्पयुक्तम्। राकेशः पूर्णचन्द्रस्तस्य करैः किरणै रञ्जितं प्रकाशितम्। यमुनास्पर्शिनोऽनिलस्य लीला मन्दगतिः, तया एजन्तः कम्पमानास्तरूणां पल्लवाः तै शोभितं वनं दृष्टम्॥ २१॥

अन्वितार्थप्रकाशिका

दृष्टमिति॥ यदि यूयं वनशोभेक्षणायागताः तर्हि कुसुमितं नानाविधसुगन्धिपुष्पयुक्तं राकेशः पूर्णचन्द्रस्तस्य करैः किरणैरञ्जितं प्रकाशितं यमुनास्पर्शिनोऽनिलस्य लीला मन्दगतिस्तया एजन्तः कम्पमानास्तरूणां पल्लवास्तैः शोभितं वनं दृष्टम्। अतो वनशोभेक्षणायागतानां वः कार्यं सम्पन्नमेवातो व्रजं यात। अथ च सर्वगुणयुक्तं कामोद्दीपकं वनं दृष्टमेवातो व्रजं मा यात॥ २१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ईषत्कोपयंतीः प्रत्याह दृष्टमिति। राकेशस्य पूर्णिमाचंद्रस्य करैः रंजितं यमुनास्पर्शयुक्तस्य अनिलस्य लीला मंदगतिस्तया एजंतश्चाल्यपमानास्तरूणां पल्लवास्तैः शोभितम्॥ २१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं प्रत्याचक्षाणः, ईषत्प्रणयकोपान्विततयाऽन्यतो विलोकयन्तीः प्रत्याह दृष्टमिति॥ राकेशस्य पूर्णचन्द्रस्य करैः रश्मिभिः रञ्जितं, यमुनानिलस्य यमुनाजलस्पर्शिनो वायोर्या लीला मन्दगतिस्तया एजन्तः कम्पमाना ये तरूणां वृक्षाणां पल्लवाः किसलयास्तैः शोभितं कुसुमितं प्रचुरकुसुमयुतपादपं, वनं च दृष्टम् अतोऽत्रागमनप्रयोजनमपि जातमिति भावः॥ २१॥

कृष्णप्रिया

तुम लोगों ने रंग-बिरंगे पुष्पों से लदे हुए इस वन की शोभा को देखा। पूर्ण चन्द्रमा के कोमल रश्मियों से यह रंगा हुआ है, मानों उन्होंने अपने हाथों चित्रकारी की हो, और यमुना जी के जल का स्पर्श करके बहने वाली शीतल समीर की मन्द-मन्द गति से हिलते हुए ये वृक्षों के पत्ते तो इस वन की शोभा को और भी बढ़ा रहे हैं। परन्तु अब तो तुम लोगों ने यह सब कुछ देख लिया॥ २१॥

तद् यात माचिरं [1]गोष्ठं शुश्रूषध्वं पतीन् सतीः। क्रन्दन्ति वत्सा बालाश्च तान् पाययत दुह्यत॥ २२॥

कर्दमक्षमा

अन्वयः—तद्, गोष्ठम्, यात, मा चिरम्, सतीः, पतीन्, शुश्रूषध्वम्, वत्साः, बालाः, च, क्रन्दन्ति, तान्, पाययत, दुह्यत॥ २२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सतीः हे सत्यः॥ २२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतो युष्मानपश्यंतो बंधवो भयमाप्नुवन्ति ततो हेतोर्यूयं मा चिरं शीघ्रं गोष्ठं यात, तान्वत्सान् पाययत गवां पार्श्वे त्यजत, बालांश्च दुह्यत स्वांगरसं तेषु पूरयत। दैवादिकत्वं दुहेरार्षम्। पक्षे माशब्दस्य सर्वत्रान्वयः। गोष्ठं मा यात किंभूतं चिरं चिरानुभूतमित्यर्थः। पतीन्मा शुश्रूषध्वं यतस्ते सुप्ताः। वत्सा मा क्रंदंत्यतस्तान्मा पाययत। बालाश्च मा क्रंदंति तानपि मा दुह्यतेत्यनेन ध्वनितमत्रैव रमध्वमिति॥ तत्तस्मान्मा चिरं यात, अपि तु शीघ्रमेव यातेत्यर्थः। सतीः पतिव्रता अपि शुश्रूषध्वम्, तद्धर्मग्रहणार्थं ता अपि भजनीया एवेति। इति परोढा उक्त्वा कुमारीः प्राह—वत्सा गवां क्रंदंति तान् दुह्यत दोहयत। मुनिचरीः प्राह—बालाः क्रन्दन्ति तान्पाययत। पक्षे—तत्तस्माच्चिरं समस्तामपि रात्रिं व्याप्य मा यात मया सह रमध्वमिति भावः। पतीन्साध्वीश्च मा शुश्रूषध्वं विधात्रा दत्तस्यैतादृशसौंदर्यस्य यौवनस्य च वैयर्थ्यप्रापणानौचित्यादिति भावः। एवं मा दोहयत मा पाययत मदनुरागिणीनां भवतीनां किं तैरिति भावः॥ अत्र तोषिणी—तत्तस्माद्वनशोभादर्शनेन निजमनोरथपूरणान्मदोच्चैर्गीतदधिमंथन-गवादिशब्दैर्घोषयति शब्दायते इति घोषः। श्लेषेण तु सर्वेषां सर्ववृत्तं घोषयतीति तं गोपाऽऽवासं संयात। 'गोष्ठम्' इति क्वचित्पाठः। तत्रैव भवतीनां सर्वा सामग्रीति तदेव गन्तुं युज्यत इति भावः। मा चिरम् अचिरादेवेत्यर्थः। यद्वा—तत्र विलंबं मा कुरुतेत्यर्थः। किमर्थम्? पतिं शुश्रूषध्वं सेवध्वम्। कुतः—सतीः। हे सत्यः अन्यथा साध्वीत्वभंगः स्यात्। अतः परपुरुषस्य मम पार्श्वे युष्माकमवस्थानमयुक्तमिति भावः। ननु परमसेव्यत्वत्सेवामसहमानाः सदाऽसूयावंतो दुष्टतरास्तेऽस्माभिः परित्यक्ता एव, पतिव्रतात्वमपि

---

१. घोषं—इति कस्यचित्।

त्वत्पादाब्जं निर्मंछनीकृत्य दूरतः क्षिप्तमित्याशंक्य सकरुणमिव पक्षान्तरमाश्रयन् वत्सादिषु स्नेहं जनयति—क्रंदंतीति। अतस्तान्वत्सान्पाययत बालार्थं च दुग्धं दुह्यत दोहयत, एतच्च तत्तत्संनिधानविश्रंभितत्तत्प्रियगवाद्यपेक्षया। अत्रेदं तत्त्वम्—ताः खलूद्दिश्य "स वो हि स्वामी भवति" इति गोपालतापन्याम् "श्रियः कान्ताः कान्तः परमपुरुषः" इति ब्रह्मसंहितायाम्। दशाक्षरादिमंत्राश्च तथा श्रुत्यागमादौ कृष्णवध्व इति चात्रैव तदेव श्रीकृष्णैककान्तानां परमलक्ष्मीणां तासामन्यत्र विवाहो न संभवति तत्प्रतीतिश्च तासामुत्कंठावर्द्धनार्थम् 'योगमायामुपाश्रितः' इत्यादौ तदर्थं निर्दिष्टया योगमाययैवेति गम्यते। यैव खलु तत्प्रतिरूपकल्पनया तत्पतिंमन्यांस्तान्वंचयति। वक्ष्यते हि-'नासूयन्खलु कृष्णाय' इत्यादि। ततस्तैः सहांगसंगाभावेनाऽजातापत्या एव केवलं स्नेहविशेषेण भ्रातृप्रभृतिपुत्रान् यान् पालयन्ति ते एव पुत्रा इति उच्यन्ते, तेषामपि लोके पुत्रतया व्यवहाराद्विशेषतस्तथा पाल्यमानत्वात्। श्रीबलदेवसांबावप्युद्दिश्य "ससुतः सस्नुषः प्रायात्सुहृद्भिरभिनंदितः" इति श्रीशुकवाक्येऽपि प्रयुक्तत्वात्। ततः स्तन्याभावेन गोदुग्धमेव तान्पाययत दुह्यतेत्युच्यते। अत एव मुनिनाप्युक्तम्-'पाययन्त्यः शिशून्पयः' इत्यत्र शिशूनित्येव पय इत्येव च न तु सुतान्स्तनमिति। यदि च तासामुदरजा एव ते स्युस्तदा रासनृत्यनायिकानामादिरसनायिकानां च तासां वैरूप्येण तस्य रासनृत्यस्य रसस्य च वैरूप्यं स्यात्। 'मातरः पितरः पुत्राः' इत्यत्र श्रीभगवद्वाक्ये केषांचिद्भ्रात्रावपि वनेऽपि मात्रादिविचेतृत्वेन कासांचिदर्द्धजरतीत्वमप्यायाति तत्र पुनरतीव तत्स्यात्। तत्तु श्रीवैशंपायनस्यासंमतम्—"युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित्" इत्यनेन। तथा तदिदं तासामालंबनरूपाणामुद्दीपनसौष्ठवमपि वर्णयता मुनीन्द्रेण न मतम्। 'भगवानपि ता रात्रीः' इत्यादावुद्दीपनसौष्ठवेनालंबनरूपाणां तासां सौष्ठवमनुस्मृत्य रन्तुं मनश्चक्र इति च गमितम्। वक्ष्यते च तासां सौष्ठवं श्रीभगवंतमपेक्ष्य प्रौढत्वं च "मध्ये मणीनां हैमानां महामारकतो यथा" इत्यनेन, 'व्यरोचतैणांक इवोडुभिर्वृतः' इत्यनेन, 'तडित इव ता मेघचक्रे विरेजुः' इत्यनेन च। अत एव 'मातरः पितरः पुत्राः' इत्यादिकं च कल्पनामयमेव जल्पितम्, परिहासवचनं वा 'वाचः पेशैर्विमोहयन्' इत्यत्र सदयं गोपीः' इत्यत्र च परिहासस्य स्फुटतरत्वात्। तस्माच्छ्रीभगवतस्तासां सपुत्रतया निर्देशस्तु परिहासपर एव न तु दोषोद्गारपरः। दोषोद्गारे 'निंदामि च पिबामि च' इति न्यायेन च तासां स्वीकारे परमवैरस्यमेव च स्यात्। आस्तां तावत्तासां स्वयं दोषोद्गारः तादृशस्यालंबनदोषस्यास्तित्वमात्रेऽपि रसव्याघातः स्यात्। तच्चान्यत्रापि सन्नायके कविभिर्वर्जनीयत्वेन स्वीकृते न संभवति किमुत परमपुरुषोत्तमे महाकविवर्णनीये लीलारसविशेषवर्षणार्थमवतीर्णे तस्मिन्। वक्ष्यते च-"भजते तादृशीः क्रीडा या श्रुत्वा तत्परो भवेत्" इति, 'सिषेव आत्मन्यवरुद्धसौरतः। सर्वाः शरत्काव्यकथारसाश्रयाः' इति च। तस्मात्पतयोऽप्यासां मायामात्रप्रतीताः, पुत्राश्च गौणार्था इति। श्लेषार्थश्चायम्—तत्तस्माद्बंधुभ्यः साध्वसाभावात् वनशोभारतिसामग्रीसद्भावाच्च अचिरं शीघ्रं मा यात। यदि यास्यथ तदा विलंबेन रात्र्यंत एव यास्यथेत्यर्थः। चकारान्माशब्दस्याग्रेऽपि सर्वत्र संबंधः—पतीन् मा शुश्रूषध्वम्। सतीः साध्वीर्मा शुश्रूषध्वं न सेवध्वम्, तत्पदवीमपि न यातेत्यर्थः। स्वातंत्र्यादिसुखभंगादिति च नर्मैव। वत्सा बालाश्च मा क्रंदंति तस्मान्मा पाययत मा दुह्यत चेति स्वातंत्र्यं सूचितम्॥ २२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्तस्माद्वनशोभादर्शनेन निजमनोरथपूरणात् सदोच्चैर्गीतदधिमन्थनगवादिशब्दैर्घोषयति शब्दायते इति घोषः श्लेषेण तु सर्वेषां सर्ववृत्तं घोषयतीति तं गोपावासं यात गोष्ठमिति क्वचित्पाठः तत्रैव भवतीनां सर्वा सामग्रीति तदेव गन्तुं युज्यत इति भावः। माचिरम् अचिरादेवेत्यर्थः। यद्वा, तत्र विलम्बं मा कुरुतेत्यर्थः। किमर्थं पतीन् शुश्रूषध्वं सेवध्वं कुतः सतीः हे सत्यः! अन्यथा साध्वीत्वभङ्गः स्यात् अतः परपुरुषस्य मम पार्श्वे युष्माकमवस्थानमयुक्तमिति भावः। ननु, परमसेव्यत्वत्सेवामसहमानाः सदासूयावन्तो दुष्टतरास्तेऽस्माभिः परित्यक्ता एव पतिव्रतात्वमपि त्वत्पादाब्जं निर्मञ्छनीकृत्य दूरतः क्षिप्तमित्याशङ्क्य सकरुणमिव पक्षान्तरमाश्रयन् वत्सादिषु स्नेहं जनयति क्रन्दतीति अतस्तान् वत्सान् पाययत बालार्थं च दुह्यत दुग्ध दोहयतेत्यर्थः। एतच्च तत्तत्सन्निधानमात्रविश्रम्भिततत्प्रियगवाद्यपेक्षया। अत्रेदं तत्त्वं ताः खलूदीश्य 'स वो हि स्वामी भवतीति गोपालतापिन्यां "श्रियः कान्ताः कान्तः परमपुरुषः" इति ब्रह्मसंहितायां दशाक्षरादिमन्त्राश्च तथा श्रुत्यागमादौ कृष्णवध्व इति चात्रैव श्रीकृष्णैककान्तानां परमलक्ष्मीणां तासामन्यत्र विवाहो न सम्भवति तत्प्रतीतिश्च तासामुत्कण्ठावर्द्धनार्थं योगमायामुपाश्रित इत्यादौ तदर्थं निर्दिष्टया योगमाययैवेति गम्यते। यैव खलु तत्प्रतिरूपकल्पनया तत्पतिम्मन्यास्तान् वञ्चयति वक्ष्यते हि "नायूयन् खलु कृष्णाय" इत्यादि। ततस्तै सहाङ्गसङ्गाभावेनाजातापत्या एव केवलं स्नेहविशेषेण यातृभ्रातृप्रभृतिपुत्रान् यान् पालयन्ति एव पुत्रा इत्युच्यन्ते तेषामपि लोके पुत्रतया व्यवहाराद्विशेषतस्तथा पाल्यमानत्वात् श्रीबलदेवसाम्बावप्युद्दिश्य "ससुतः सस्नुषः प्रायात् सुहृद्भिरभिनन्दितः" इति श्रीशुकेनापि प्रयुक्तत्वात् अतस्तन्याभावेन गोदुग्धमेव तान् पापयन्तीति तान् पाययत दुह्यतेत्युच्यते अत एव मुनिनाप्युक्तं "पाययत्न्यः शिशून् पयः" इत्यत्र शिशूनित्येव पय इत्येव च नतु सुतान् स्तनमिति यदि च तासामुदरजा एव ते स्युस्तदा रासनृत्यनायिकानामादिरसनायिकानां च तासां वैरूप्येण तस्य रासनृत्यस्य रसस्य च वैरूप्यं स्यात् "मातरः पितर पुत्राः" इत्यत्र श्रीभगवद्वाक्ये केषाञ्चिद्भ्रात्रावपि वनेपि मात्रादिविचेतृत्वेन कासाञ्चिदर्द्धजरतीत्वमप्यायाति तत्र पुनरतीव तत्स्यात् तत्तु श्रीवैशम्पायनस्यासम्मतम् "युवतीर्गोपकन्याश्च रात्रौ सङ्काल्य कालवित्" इत्यनेन तथा तदिदं तासामालम्बनरूपाणामुद्दीपनसौष्ठवमपि वर्णयता श्रीमन्मुनीन्द्रेण न मतं "भगवा-

नपि ता रात्रीः” इत्यादावुद्दीपनसौष्ठवेनालम्बनरूपाणां तासां सौष्ठवमनुस्मृत्य रन्तुं मनश्चक्रे इति च गमितं वक्ष्यते च तासां सौष्ठवं श्रीभगवन्तमपेक्ष्याप्रौढत्वं च “मध्ये मणीनां हैमानां महामारकतो यथा” इत्यनेन“व्यरोचतैणाङ्क इवोडुभिर्वृतः” इत्यनेन“तडित इव ता मेघचक्रे विरेजुः” इत्यनेन च तस्मात् श्रीभगवता तासां पुत्रतया निर्देशस्तु परिहासपर एव न तु दोषोद्गारपरः वाचः पेशैर्विमोहयन्नित्यत प्रहस्य सदयं गोपीरित्यत्र परिहासस्य स्फुटतरत्वं दृश्यते यत एव मातरः पितरः पुत्रा इत्यादिकं च कल्पनामयमेव जल्पितं परिहासं विना तु दोषोद्गारे “निन्दामि च पिबामि च” इतिन्यायेन तासां स्वीकारे परमवैरस्यमेव च स्यात् आस्तां तावत्तासां स्वयं दोषोद्गारः तादृशस्यालम्बनदोषस्यास्तित्वमात्रेपि परमरसव्याघातः स्यात् तच्चान्यत्रापि सन्नायके कविभिर्वर्णनीयत्वेन स्वीकृतेन सम्भवति किमुत परमपुरुषोत्तमे महाकविवर्गवर्णनीये लीलारसविशेषवर्षणार्थमवतीर्णे तस्मिन् वक्ष्यते च “भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत्” इति “सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः” इति च तस्मान् पतयोप्यासां मायामात्रप्रतीताः पुत्राश्च गौणार्था इति श्लेषार्थश्चायं तत्तस्मात् बन्धुभ्यः साध्वसाभावात् वनशोभारतिसामग्रीसद्भावाच्च अचिरं शीघ्रं मा यात यदि यथा तदा विलम्बेन रात्र्यन्त एव यास्यथेत्यर्थः। चकारान्माशब्दस्याग्रेपि सर्वत्र सम्बन्धः पतीन् मा शुश्रूषध्वं सतीश्च साध्वीर्मा शुश्रूषध्वं तत्पदवीमपि न यातेत्यर्थः। स्वातन्त्र्यादिसुखभङ्गादिति नर्मैव वत्सा बालाश्च मा क्रन्दन्ति तस्मात् तान् मा पाययत मा दुह्यत इति च स्वातन्त्र्यं सूचितमिति ॥ २२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत् तस्माद्वनशोभादर्शनेन निजमनोरथपूरणात् सदोच्चैर्गीतदधिमथन–गवादिरावैर्घोषयति शब्दं करोतीति, श्लेषेण सर्वेषां सर्ववृत्तं घोषयतीति घोषस्तं गोपावासं यात, मा चिरमचिरादेवेत्यर्थः। यद्वा, तत्र विलम्बं मा कुरुतेत्यर्थः। किमर्थम् ? पतीन् शुश्रूषध्वं सेवध्वम्, कुतः ? सतीः, हे सत्यः! अन्यथा साध्वीत्वभंगापत्तिः, अतो मत्पार्श्वे युष्माकमवस्थानमप्ययुक्तमिति भावः। ननु, परमसेव्य-त्वत्सेवामसहमानाः सदासूयावन्तो दुष्टतरास्तेऽस्माभिः परित्यक्ता एव, पतीत्वमपि त्वत्पादाब्जयोर्निर्म्मञ्छनीकृत्य दूरतः क्षिप्तमित्याशंक्य सकरुणं पक्षान्तरमाश्रयन् वत्सादिषु स्नेहं जनयति—क्रन्दन्तीति। अतस्तान् बालान् पाययत दुग्धम्, वत्सार्थं च दुह्यत दुग्धं गा इत्यर्थः। वत्सेभ्यो बालेषु स्नेहविशेषात्तेषां पश्चान्निर्देशः, एवं सर्वत्र निवर्त्तनार्थं पूर्वपूर्वस्माद्वाक्यादुत्तरोत्तरस्य गरिष्ठत्वमूह्यम्, पाययतेस्यस्यादावुक्तिस्तस्य द्रुतमवश्यकार्य्यत्वात्। यद्वा, गोपचूडामणे! वत्सान् गोपैर्गोदोहनेन पाययिष्यन्त्येवेत्यत आह–बालाश्चेति। तेषां मातृर्विना स्तन्यपानासम्भवात्। यद्वा, तान् वत्सान् बालांश्च पाययत पयः, कथम् ? तत्राह—दुह्यत गाः, गोदोहने स्वत एव वत्सानां बालानां च तद्दुग्धस्यैव पानं भावीत्यर्थः अत्रेदं तत्त्वम्—श्रीकृष्णैकप्रिया भगवत्यस्ता गोप्यः कथञ्चित् काश्चिज्जातविवाहा अपि नाममात्रेणैव पतिमत्यो विविधव्याजेन पतीन् वञ्चयन्त्यस्तैः सह ग्राम्यधर्माभावेनाजातापत्या एव केवलं पत्यादीनामाग्रहेण निजौत्सुक्यविशेषेण वा तास्वेव काश्चित् परपुत्रान् पुष्टपुत्रतया पालयन्तीति स्वतः स्तन्याभावेन तान् गोदुग्धमेव पाययन्तीति। वस्तुतस्तु सर्वमेतन्नर्मणैव, अत एव सतीरिति, श्लेषार्थश्चायम्, तत्तस्माद्बन्धुसाध्वसाभावात् वनशोभादिरतिसामग्रीसद्भावाच्च, अकारप्रश्लेषेण अचिरं शीघ्रं मा यात, यदि याथ, तदा विलम्बेन रात्र्यान्त एव यास्यथेत्यर्थः। यद्वा, चिरं चिरन्तनोऽस्वातन्त्र्यादि दुःखप्रदत्वेन बहुशोऽनुभूतो यो घोषस्तं मा यात, पुनर्न यास्यथेत्यर्थः, चकारात् माशब्दस्याग्रेऽपि सर्वत्र सम्बन्धः, पतीन् मा शुश्रूषध्वं सतीश्च साध्वीर्मा शुश्रूषध्वं न सेवध्वम्, तत्पदवीमपि न यातेत्यर्थः, स्वातन्त्र्यादिसुखभंगादिति नर्म्मैव, वत्सादयो न क्रन्दन्त्येव, गोपादिभिर्गोदोहनादिना पयः पानसिद्धेः, अतस्तान्न पाययिष्यथ, न तु धोक्ष्यतेत्यन्यकृतयाभावेन स्वातन्त्र्यं सूचितम्, यद्वा, इतः प्रभृति पतिशुश्रूषणादिकर्म्मसु न प्रवर्त्स्यथेत्यर्थः। तेनापि कथञ्चिदपि युष्माकं धर्मविघातो नास्तीत्याह—सतीः हे साध्व्य इति तत्त्वतस्तेषां पतित्वाभावात् मद्भजनाच्च ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अतोऽत्रागमनप्रयोजनं जातमिति व्रजं प्रति यात चिरं विलम्बं मा कार्ष्ट गत्वा किं विधेयं तत्राह–सतीः हे सत्यः! विभक्तिव्यत्यय आर्षः पतिव्रतानामेवम्बिधमागमनमनुचितमिति साक्षेपं सम्बोधयति पतीन् शुश्रूषध्वं परिचरत। किञ्च, वत्साः गवां इति शेषः। बालाश्च क्रन्दन्ति क्रन्देयुरतस्तान्वत्सान् बालांश्च पाययत क्षीरमिति शेषः। दुह्यत गा इति शेषः तदर्थं गाः दुह्यतेत्यर्थः ॥ २२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ततो युष्मानपरयन्तो बन्धवो भयमवाप्नुवन्ति यस्मात् तस्मात् सतीः सत्यः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्तस्मान्मा चिरं यात अपि तु शीघ्रमेव यातेत्यर्थः। सतीः पतिव्रता अपि शुश्रूषध्वं तद्धर्मग्रहणार्थं ता अपि भजनीया एवेति भावः। इति परोढा उक्त्वा कुमारीः प्राह–वत्सा गवां क्रन्दन्ति तान् दुह्यत दोहयत मुनिचरीः प्राह—बालाः क्रन्दन्ति तान् पाययत पक्षे तत्तस्माच्चिरं समस्तामपि रात्रिमभिव्याप्य मा यात मया सह रमध्वमिति भावः। पतीन् साध्वीश्च मा शुश्रूषध्वं

विधात्रा दत्तस्यैतादृशसौन्दर्यस्य यौवनस्य च वैयर्थ्यप्रापणानौचित्यादिति भावः। एवं मा दोहयत मा पाययत मदनुरागिणीनां भवतीनां किं तैरिति भावः ॥ २२ ॥

श्रीरसिकाह्लादिनी टीका

इदानीं मुनिरूपाः यूथमुख्याः प्रति पद्यद्वयेनाह—तद्यातेति, वनदर्शनेन मनोरथपूर्त्तिश्चेज्जाता तर्हि गोष्ठं व्रजं यात, ननु व्रजं त्यक्त्वैवायाताः पुनस्तत्रैव गमनेन किं प्रयोजनमिति चेत्तत्राह व्रजे धर्मार्थ-काम-लाभो भविष्यतीति उपदिशन्नाह—हे सतीः सत्यः पतिशुश्रूषणं त्यक्त्वाऽऽयाता अतो धर्महानिर्जाता धर्ममूला कामप्राप्तिः, धर्मे नष्टे कामहानिरपि जाता दुग्धहान्यर्थनाशोऽपि जातः स्तनंधयत्यागेनोपलालनादिसुखनाशोऽपि जातः, एतच्चतुष्टयप्राप्त्यर्थं व्रजं यात। माचिरं विलंबो न कार्यः। यास्तु पतीन् त्यक्त्वागतास्ता यूयं पतीन् शुश्रूषध्वं यास्तु दोहं हित्वागतास्तासां वत्सा बद्धा एव क्रंदन्ति, यासां स्तनंधया अतृप्ताः क्रन्दन्ति तान् दुह्यत दोहयतेत्यर्थः। अतृप्ताः बालाः क्रन्दन्ति तान् स्तनं पाययत। उदासीनस्य मम निकटे स्थित्या धर्मादिहानिर्भविष्यति तत्र गतानां सर्वं संपत्स्यत इति रहस्योपदेशः स्वस्य सापेक्षत्वं, पक्षे व्यंग्यार्थमाह—हे सतीः सत्यः मुख्यपत्यौ स्निग्धत्वात् पारिभाषिकपतिं त्यक्त्वाऽऽगतत्वाच्च एतासां साध्वीत्वं ज्ञात पूर्वं नर्मणा निषेधमुक्तम्। इदानीं वास्तवमर्थमाह। तत्तस्माच्चिरं बहुकालपर्यन्तं गोष्ठं मा यात किंतु मया सहात्रैव रमध्वं, यद्वा चिरं बहुकालपर्यन्तं मामायात प्राप्नुवत, यद्वाऽचिरं शीघ्रं गोष्ठं व्रजं मा यात गमने दोषस्य बहुशोऽनुभूतत्वान् रात्र्यादिदुःखमनुभूयागतत्वात्। अन्यथा दुःखं तदवश्यमेव भविष्यति। यदि पत्यादीनां संकोचः तदा पूर्णं रमणं विधाय रात्रिशेषे यास्यथ मा शब्दस्य सर्वत्रान्वयः। पतीन् मा शुश्रूषध्वं मद्रूपणे तेषां बहुशः प्रातिकूल्यानुभवस्य सिद्धत्वात् ननु क्रन्दन्तो वत्सान् बालान् त्यक्त्वाऽऽगताः, अतः तत्स्मरणे रमणस्य विफलत्वं भविष्यतीति चेत्तत्राह—वत्सा बालाश्च न क्रन्दन्ति तदर्थस्यान्यथासिद्धत्वात्। गोपैरेव गोदोहनस्य कृतत्वात् पयसोपि तदपेक्षितत्वाच्च, तच्चिन्ता न कार्या बालानां सांत्वनस्य वृद्ध-धात्री-प्रभृतिभिरेव कृतत्वात्। अतस्तच्चिन्ता न कार्या स्पष्टार्थमाह—तान् बालान् पयो मा पाययत, वत्सान् मा दुह्यत मा दोहयत तस्यार्थस्य स्वत एव सिद्धत्वात्। अतो निशंकं मया सह रमतेत्यर्थः ॥ २२ ॥

विशुद्धरसदीपिका

तत्र प्रथमपक्षे तत्तस्माद्गोष्ठं यात चिरं मा त्वरितमेवेत्यर्थः ननु, व्रजकार्यं कृत्वैवागता नेदानीं किञ्चित्करणीयमतः शनैः शनैः यास्यामस्तत्राह—भवतु पतीन् शुश्रूषध्वं यतः सतीरिति तेऽपि शुश्रूषितास्तत्राह—क्रन्दन्तीति। स्पष्टं पक्षे तत्तस्मात् "गोष्ठं गोस्थानकम्" इति कोशात्पशुप्रायावासे नागरीणां व्यवस्थितिरनुचितेति भावः। ननु, पतयस्तु सेव्यास्तत्राह पतीन् मा शुश्रूषध्वं बहुवचनश्लेषेण सतीनां बहुपतिसेवनमनुचितमित्युपहासः योगवृत्त्या पतीन् पालकानित्यर्थः। एवं च मात्रादीनामपि सङ्ग्रहः तर्हि वत्सबालादिपालनं तु कृपापात्रत्वादावश्यकं तत्राह—क्रन्दन्तीति। अत्र माशब्दस्य प्रतिपदमन्वयः ॥ २२ ॥

श्रीरामनारायणकृता भावभावविभाविका

तर्हि किंकर्त्तव्यं तत्राह—तद्यात मेति। प्रथमपक्षे यतोऽत्र बहुस्थितिरनुचिता वनादिशोभादर्शनमपि सम्पन्नं तत्तस्माद्गोष्ठं यात यास्याम इति चेत्तत्राह—मा चिरं किं त्वरया तत्राह—पतीन् शुश्रूषध्वम् अत्र बहुवचनमुपहासेन। यद्वा, बहूनां प्रत्येकमेकपतित्वेपि बहुत्वाभिप्रायेण। यद्वा, योगवृत्त्या पालकानिति यतः सतीः सत्य इत्यर्थः। सतीनामिदमेवोचितं पतिसेवां संपाद्यागता इति चेत्? तत्राह—क्रन्दन्तीति। वत्साः क्रन्दन्त्यतो दुह्यत बालाः भ्रातृपुत्रादयः क्रन्दन्ति तान् गोदुग्धम् पाययत। यद्वा, बाला वत्सा इति समानाधिकरणं द्वितीयपक्षे तु तत्तस्मात् गोष्ठं गवां पशुसदृशानां स्थानं गवामिन्द्रियाणां वा विहारात्मकगतिनिवृतिस्थलं नागरीणां रसविलासायोग्यं चिरं मा यात पतिशुश्रूषार्थं याम इति चेत्तत्राह—यतो यूयं सतीः सत्यः, अतः पतीन् मा शुश्रूषध्वम् अयं भावः—नश्वरपतिस्वीकारे प्रतिशरीरं पतिभेदे बहुपतित्वमापद्येत अविनाशिनो मम पतित्वे एव सतीत्वं वत्सबालाद्यर्थगमनमाशङ्क्याह—वत्सा बालाश्च क्रन्दतीति। मा दुह्यत तान् मा पाययत इति माशब्दस्य प्रत्येकमन्वयः। यद्वा, अस्माननश्वरपतीनेवात्र शुश्रूषध्वं स्वमहत्त्वदृष्ट्या आविर्भावयितव्यबहुविग्रहाभिप्रायेण वा बहुवचनम् एक विग्रहस्यैव मम बहुत्वेन प्रतीतावप्येकत्वेनैव न सतीत्वक्षतिः। ननु, त्वमाप्तकाम इति किं तव शुश्रूषा स्यात् तत्राह—अन्यत्र तथात्वेपि अत्र स्नेहपथे न तथा किन्तु मम श्रीवत्सरूपाबाला अपि भवतीनां विरहे श्रीहीना वत्सा बालाः सन्तः क्रन्दन्ति अतः स्वगवामिन्द्रियाणां रसं दुह्यत तेषु पूरयत तानपाययत तेषां भवदालिङ्गनतृषां निवर्त्तयतेति भावः ॥ २२ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अहो नाद्यापि भागवतोत्तमा तस्मासु जाता वर्ततेऽतस्तदर्थं कमुपायमनुतिष्ठाम इति चिन्तयतीर्व्याकुलचित्ता अवलोक्याह "वर्णाश्रमाचरवता पुरुषेण परः पुमान्। विष्णोराराध्यते पन्था नान्यस्तत्तोषकारणम्" इत्युक्तत्वात्स्वधर्माचरणमेव मत्तोषोपायो अतस्तत्रैवाऽभ्यास उचित इत्याशयेनाह—तद्यातेति। यस्मादत्रावस्थानं निष्फलं तत्तस्माद् गोष्ठं यात तत्राऽपि मा चिरं शुभकार्ये

विलम्बो नोचित इति भावः। तत्र गत्वा पतीन् सेवध्वं यतो हे सत्यः! पतिव्रतानां युष्माकमिदमेवाऽनुष्ठेयमिति भावः। यद्वा, सतीः पतिव्रताः श्वश्र्वाद्याः स्त्रीः सेवध्वं "संसर्गजा दोषगुणा भवन्ति" इति न्यायात् गुणवतीनां सेवनेन भवत्योऽपि तथाविधाः भविष्यन्तीति भावः। ननु, स्वधर्माचरणस्य भवच्चरणाभिमुख्यमेव फलं तस्य जातत्वात्ततोनिवृत्तिरेवाऽधुना श्रेयसी "आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारुढस्य तस्यैव शमः कारणमुच्यते" इत्यादि शास्त्रादतस्त्वदाभिमुख्यमसहमानास्ते कथं सेवनीयास्ततस्तादृशं पातिव्रत्यन्त्वदङ्घ्रिपाथोरुहयोर्नीराजिनीकृत्य दूरतस्त्यक्तमस्माभिरित्याशङ्क्य दया सर्वभूतेष्विति दयाया मदाराधनाङ्गत्वात्सात्वाऽऽवश्यमपेक्षितेत्याशयेनाह—क्रन्दन्तीति। अतस्तानात्वादुग्धं पाययत तदर्थं गाश्च दुह्यत अनभिज्ञापक्षे एवं व्याजेनोद्दीपयित्वा निषेधेनाऽत्यासक्तिमुत्पादयति–तदिति। यद्यस्मादत्राऽवस्थाने फलं किञ्चिदपि नास्ति तत्तस्माद् गोष्ठं यात तत्रापि मा चिरं यतः पतिशुश्रूषासमयो वर्त्तत इत्याशयेनाह—शुश्रूषध्वं पतीन् यतो हे सत्यः! अतः क्षणमात्रमात्रमपि परपुरुषस्य मम पार्श्वेऽवस्थानं पतिव्रतानां युष्माकं नोचितमिति भावः। यद्वा, कथम्भूतान्पतीन्सतीः, एते युष्मत्पतयः पूर्वजन्मनि पतिव्रताः स्त्रियः स्थिताः पुरुषभावनया पुरुषत्वं प्राप्ताः भवत्यस्तु पूर्वं पुरुषाः स्थिताः स्त्रीषु आसक्तचित्तत्त्वात्स्त्रीत्वं प्राप्ताः, अतः पुनर्वैपरीत्यर्थं पतीन् शुश्रूषध्वमित्याशयः। किञ्च, करुणापि स्त्रीणां स्वाभाविकी भवति, अतः करुणावतीनां युष्माकं बाला वत्साश्च क्रन्दन्तीत्यतो गत्वा तान् पाययत दुह्यतेति मानिनीपक्षे यद्यस्माद् बन्धुभयं नास्ति वनशोभादिरूपा रमणसामग्री चैतादृशी तत्तस्माद् गोष्ठम् अचिरात् शीघ्रं मा यात किन्तु रासानन्तरं रात्र्यन्ते यास्यथेत्यर्थः। ननु, पतिशुश्रूषादिबहुव्यापारस्योर्वरितत्वान्नास्त्यस्माकं चिरकालमवस्थानावकाश इति चेत्तत्राह—पतीन्मा शुश्रूषध्वं सतीः श्वश्रुप्रमुखाश्च मा शुश्रूषध्वं सतीः पदवीं मम सेवध्वम्। ननु, अस्माकं बाला वत्साश्च क्रन्दन्त्यतः कथमत्र स्थेयमित्याशङ्क्य क्षणं नेत्रे निमील्य सकैतवं ध्यात्वाऽऽह वत्सा बालाश्च मा क्रन्दन्ति अहमत्र स्थित एव सिद्धकलयाजानामि ते सुखेन वर्त्तन्ते नत्वाऽऽक्रोशन्ति तस्मान्मा यात दासादिभिः पायितत्वान्मा दुह्यत तैरेव दोहनस्यापि कृतत्वादित्यर्थः। निवृत्तिपक्षे यस्मान्निर्विशेषब्रह्मप्रतिपादनं न सत् तत्तस्मादाशु गोष्ठक्रियार्थकश्रुतिसमुदायं यात स्वसमुदायनिविष्टाभवति क्रियामेव प्रतिपादयत तदुक्तम् "आम्नायस्य क्रियार्थत्वादानर्थक्यमदर्थानाम्" इति ब्रह्मणः परिनिष्ठितरूपत्वात्परिनिष्ठितवस्तुनि च प्रत्यक्षादीनामपि प्रवृत्तिसम्भवात्तैरसंवादे प्रामाण्यस्य दुर्लभत्वात्स्वसार्थक्याय क्रियामेव प्रतिपादयतेत्याशयः। ननु, पौरुषेयवाक्यानि प्रमाणान्तरापेक्षत्वात्तत्संवादविसम्वादाभ्यां प्रामाण्यमप्रामाण्यं वा लभते अपौरुषेयाणां वेदवाक्यानां तु प्रामाण्यम् एवाधिगम्यविषयतया चक्षुरादिवदनपेक्षमेव प्रामाण्यमिति चेत् सत्यं तथा अपेक्ष्यप्रामाण्ययोरपि चक्षुः स्पर्शनयोरर्थे विसवादाद्याथाऽन्यतरस्याप्रामाण्यं तथा ब्रह्मैकत्वं श्रुतीनामहं मनुष्य इत्यादि प्रत्यक्षस्य च परस्परव्याघातात् शब्दस्याऽप्रामाण्य तस्मात्तत्रैव स्थित्वा पतीनिन्द्रचन्द्रादिरूपान् तत्तत्कर्मप्रतिपादनेन शुश्रूषध्वं यतो हे सत्यः! स्वाध्ययविध्युपात्तत्वादप्रामाण्यशङ्काकलङ्कायोग्याः। किञ्च। सर्वमिथ्यात्वसिद्धान्तमाकर्ण्य। वत्सबालस्थानीयाः कर्माधिकारिणः सर्वेऽपि क्रन्दन्ति अतस्तान्पाययत दुह्यत तत्तत्कर्मफलं सत्यमिति प्रतिपादनेन तत्सन्तोषं सम्पादयतेत्यर्थः॥ २२॥

रास–रहस्यम्

र० टी०—यूयं सतीरिति आर्षप्रयोगः, सत्यः, इत्यर्थः। यतः इन्द्रियाधिष्ठिताः देवाः, एव इन्द्रियाणि पालयन्ति अतस्ते एव इन्द्रियाणां पतयः, तत् तस्मात् तान् देवानेव शुश्रूषध्वं, देवाः सत्त्वगुणविशेषवत्त्वात् सात्त्विकविषयप्रदानेन सेवय, यथा—"जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं, पाणिद्वन्द्वसमर्चयाच्युत कथाः श्रोत्रद्वय तं शृणु। कृष्ण लोकय लोचनद्वय हरेर्गच्छांघ्रिपद्मालयं, जिघ्र घ्राण मुकुन्दपादतुलसीं शीर्ष नमोऽधोक्षजम्।" तथा गोष्ठं गवां इन्द्रियाणां स्थानं गोलोकं यात गच्छत। तत्रापि वत्सा बालाश्च "अधीतान्यन्यान्यशास्त्राणि अनधीतवेदान्तशास्त्राणि यैस्ते बालाः सांख्यमीमांसकादयः" "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्।" एवं क्रन्दन्ति, आत्माभिमुखीत्वं दृष्ट्वा "अहोऽस्माकं कर्मोपासने तु व्यर्थं गते" इति रुदन्ति, अतः तानपि पाययत दुह्यत चित्तशुद्ध्येकाग्रताप्रसाधनरूपं फलं दत्त्वा आश्वासनं कुरुत। अत्र शून्याबस्थायां चिरं मा तिष्ठत इति भावः॥ २२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्तस्मात् गोष्ठं व्रजं यात सतीः स्वानुकूलाः पतयः परीक्षन्ते इति शेषः। अतस्तान् शुश्रूषध्वं परिचरतेत्यर्थः॥ २२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्तस्मान्निष्पन्नागतिफलत्वात्। माऽचिरं गोष्ठं यात हे सतीः सत्यस्तदुपलक्षितार्यान्। पूर्वत्र मातरः पितरः पुत्राः पतय इत्युक्तौ तेषामेवात्रोक्तिस्तद्विलक्षणतां स्वस्मिन्द्योतयितुमिति मन्तव्यम्। वत्साः क्रन्दन्ति दोहनसमयोऽतीत इति तरणका अतो दुह्यत गा इति शेषः। बालाः पूर्वोक्ताः क्रन्दन्ति तान्पाययत स्तनमिति शेष। यथायथं सर्वं बालवत्सपदान्वययोग्यमिति प्रदर्शनाय व्युत्क्रमत उक्तिरिति ज्ञेयम्॥ २२॥

श्रीसुबोधिनी

तत्तस्मात् गोष्ठं यात मा चिरं मा विलम्बः क्रियतां पतीन् सेवध्वं हे सतीः सत्यः वत्सा बालाश्चाक्रोशन्ति तान् पाययत स्तनं गा दुह्यत ॥ २२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पतीन् सतीरित्यत्र, द्वितीयाबहुवचनान्यथानुपपत्त्याहुः **पतिविशेषणं वे**ति । तेषामुपहासवचनमिदं भवति । यतो लोकव्यवस्थैतादृशीति तामुक्तवन्तः **पूर्वजन्मनी**त्यादिना । **भवन्तश्चे**ति जायमाना इत्यर्थः ॥ २२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत् तस्मात् वनदर्शनरूपकार्यस्य जातत्वात् गोष्ठं व्रजं यात, मा चिरं विलम्बो न कार्यः । 'गत्वा किं कर्तव्यं' तत्राह– पतीन् शुश्रूषध्वमिति । 'पतिशुश्रूषा च युष्माकं पतिव्रतानां परो धर्म' इति सूचयन् सम्बोधयति—सतीरिति । हे सत्यः ! वत्सा बालाश्च क्षुधार्ताः क्रन्दन्ति तान् दुग्धं पाययत गाश्च दुह्यत ॥ २२ ॥

अन्वितार्थप्रकाशिका

तदिति ॥ तत्तस्माद्वनदर्शनरूपकार्यस्य जातत्वात् गोष्ठं व्रजं यात मा चिरं विलम्बो न कार्यः । हे सतीः सत्यः ! आर्षः । पतीन् शुश्रूषध्वं वत्सा बालाश्च क्षुधार्ताः क्रन्दन्ति तान् दुग्धं पाययत गाश्च दुह्यत । श्यन्नार्षः । अत्रेदं तत्त्वमाहुः । "युवतीर्गोपकन्याश्च" इति हरिवंशोक्त्या कात्यायनीव्रतलब्धवराणां पत्यन्तरैर्न विवाह इत्युक्तम् । अन्यासामुत्कण्ठावर्धनार्थं पत्यन्तरैर्विवाहप्रतीतावपि न संभोगः किंतु मन्यमानाः स्वपार्श्वस्थान्स्वान्दारानिति वक्ष्यमाणरीत्या तासां पतीनां ताभिरङ्गसङ्गभ्रममात्रम् । अत एव तासां न जातापत्यत्वमपि स हि वो स्वामीति तापिनीश्रुतेः । कृष्णवध्व इति अत्रैवोक्तेः । श्रियः कान्तः "कान्तः परमपुरुषः" इति ब्रह्मसंहितोक्तेश्च । भगवत्पत्नीत्वेनोक्तानां रासात्पूर्वं पश्चाद्वा पत्यन्तरसंभोगानौचित्यात् जातापत्यानां जघन्यनायिकात्वेन पुरुषोत्तमे नायके आलम्बनविभावत्वे वर्णनीयरसवैरस्यापातात् न ह्येतस्मात्परो वर्णनीयः शृङ्गारोऽस्ति । "सर्वा शरत्काव्यकथारसाश्रयाः" इति वक्ष्यमाणात् । अतो देवरादिपुत्रा एव पुत्रत्वेनोक्ताः । पानं च गोदुग्धस्यैव न स्तन्यस्य । अत एव पूर्वमपि "पायन्त्यः शिशून्पयः" इत्युक्तम् । नतु सुतान्स्तनमिति । तस्मात्पतयो लोके तथा प्रतीताः पुत्राश्च गौणार्थाः । परे तु नित्यसिद्धास्तु भगवद्रमणाय तत्र प्रथममेवागन्तुं प्रवृत्ताः । गोकुले जनितानां मुनिचरीणां मध्ये या प्राकृतगुणमयशरीरतां परित्यज्य प्रथमेव शुद्धचिन्मयभूतशरीरा अजनिषत । ताः पुरुषान्तरासंस्पृष्टा योगमायया नित्यसिद्धाभिः गोपीभिः सहैवाभिसारिताः । यास्तु बहिर्गुणमयशरीरवत्यस्ता अपि श्रीकृष्णविरहौष्ण्यप्रापणया गुणमयशरीरभावत्याजनयैव विनष्टपुरुषान्तरस्पर्शदोषाश्चिन्मयीभूतशरीराः काश्चित्तस्यां रात्रावेव सर्वासां पश्चादभिसारिताः काश्चिदीषन्मात्रस्थितकषायाः प्रेक्ष्य विरहौष्ण्येनैव तन्निवर्तनार्थं रात्र्यन्तरेष्वेवाभिसारिताः प्राप्तरासादिविलासाः रात्र्यन्ते नित्यसिद्धादिगोपीभिः सह पतिगृहमागतास्तदारभ्य पतिसङ्गतो योगमाययैव रक्ष्यमाणाः पत्यपत्यादिषु ममताशून्याः कृष्णप्रेमातिभरपरिप्लुताः शुष्कपयःस्तन्यः स्वापत्यादीन्पुष्णत्यो ग्रहग्रस्तत्वेनैव तद्बन्धुभिः प्रतीयन्ते स्मेत्याहुः । अथ च तत्तस्मात् अचिराच्छीघ्रं गोष्ठं मा यात किन्तु रासानन्तरं यास्यथ । माशब्दस्याग्रेऽप्यनुषङ्गः । पतीन् मा शुश्रूषध्वं वत्सा बालाश्च मा क्रन्दन्ति । तत्तन्मातॄणां दासादीनां च सत्त्वात् । तस्मान्मा पाययत मा च दुह्यत ॥ २२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सतीः हे सत्यः गाः दुह्यत ॥ २२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति ॥ यतोऽत्रागमनप्रयोजनं जातं तत्तस्मात्, गोष्ठं व्रजं प्रति, यात गच्छत । मा चिरं विलम्बं मा कार्ष्ट । तत्र गत्वा किं विधेयमस्माभिस्तत्राह । सतीर्हे सत्यः, विभक्तिव्यत्यय आर्षः । पतिव्रतानामेवविधमागमनमनुचितमिति साक्षेपसंबोधनम् । पतीन् स्वस्वस्वामिनः, शुश्रूषध्वं परिचरत । वत्सा गवां तर्णकाः, बाला डिम्भाश्च, क्रन्दन्ति क्रन्देयुरित्यर्थः । अतः, तान् वत्सान् बालाश्च, पाययत । क्षीरमिति शेषः । दुह्यत गा इति शेषः । बालेभ्यः पयो दातुं गादोहनं कुरुतेत्यर्थः ॥ २२ ॥

कृष्णप्रिया

अब देर मत करो, शीघ्र-से-शीघ्र व्रज में लौट जाओ । तुम लोग कुलीन स्त्री हो और स्वयं भी सती हो; जाओ, अपने पतियों की और सतियों की सेवा शुश्रूषा करो । देखो, तुम्हारे घर के नन्हें-नन्हें बच्चे और गौओं के बछड़े रो-रंभा रहे हैं, उन्हें दूध पिलाओ, गौएँ दुहो ॥ २२ ॥

अथवा मदभिस्नेहाद् भवत्यो यन्त्रिताशयाः । आगता ह्युपपन्नं[1] तत् प्रीयन्ते [2]मम जन्तवः ॥ २३ ॥
भर्तुः शुश्रूषण स्त्रीणां परो धर्मो ह्यमायया । तद्बन्धूनां च कल्याण्यः[3] प्रजानां चानुपोषणम् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—अथवा, मद्-अभिस्नेहात्, यन्त्रिताशयाः, भवत्यः, आगताः, तत्, उपपन्नम्, हि, मम, जन्तवः, प्रीयन्ते ॥ २३ ॥ हे कल्याण्यः, अमायया, भर्तुः, तत्-बन्धूनाम्, च, शुश्रूषणम्, प्रजानाम्, च, अनुपोषणम्, स्त्रीणाम्, परः धर्मः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

संरंभक्षुभितदृष्टीः प्रत्याह । अथ वेति । यंत्रिताशया वशीकृतचित्ताः । उपपन्नं युक्तम् । प्रीयन्ते प्रीता भवन्ति ॥ २३ ॥ दृष्टादृष्टभयप्रदर्शनेन विवर्तयति भर्त्तुरित्यादिश्लोकत्रयेण ॥ २४–२५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

संरंभः कोपावेशस्तेन क्षुभितदृष्टीर्भ्रांतेक्षणाः । अथ वेति निपातद्वयं संभ्रमे मंगले वा । मयि विषये जंतवो जीवमात्राणि । अतो रमध्वमिति पक्षः ॥ अथ वेति । हंत मया वृथैव तान्यागमनकारणानि कल्पितान्यधुनैव कारणमवगतमित्याह—मयि योऽभि सर्वतो भावेन स्नेहस्तस्मात् यंत्रिताशया वशीकृतचित्ता अत एवागतास्तदुपपन्नं मद्दर्शनलाभात् सिद्धम्, यतो मयि जंतवः प्राणिमात्राणि प्रीयन्ते इत्यौत्पत्तिकं मे सौभाग्यं न त्वौपाधिकमिति भावः । तेन भवत्यो मयि प्रीतिसामान्यवत्य एव न तु कामोपाधिकप्रीतिविशेषवत्य इति ध्वनितम् । पक्षे—मदभिस्नेहः कांतभावमयः प्रेमा तस्माद्धेतोर्यंत्रीकृत आशयो याभिस्ताः । भवतीनां मनसा यंत्रेणैवाहमाकृष्टो वर्ते इत्यर्थः । तत् आगमनमुपपन्नमुचितमेव, न तूपपत्तिरहितमित्यर्थः । मयि जंतवोऽपि प्रीयंते किमुत भाववत्यो भवत्य इति भावः ॥ २३ ॥ शास्त्रसिद्धांतमाह—दृष्टं भयं राजनिंदादि, अदृष्टं नरकादि । अमायया अवंचनया । तद्बंधूनाम् भर्तृबंधूनां श्वशुरादीनाम् । प्रजानाम् संततीनां पालनं च परो धर्मः शास्त्रविहितत्वात् । अन्यथा कल्याणं नश्यतीति संबुद्ध्याह—हे कल्याण्य इति । भर्तुः सर्वपालकस्य मम अमायया नैष्कापट्येन सेवनं परोऽत्युत्तमो धर्मः, मम प्रसादहेतुत्वात् । “अमाययाऽनुवृत्त्या वै तुष्यत्यात्मप्रदो हरिः” इत्याद्युक्तेः । तद्बंधूनां देवानां ब्रह्मादीनां च यज्ञादिना सेवनं प्रजानां स्थावरजंगमानां यथोचितमनुपोषणं पौनःपुन्येन पालनं स्थावराणां नित्यं जलादिप्रसेचनेन जंगमानामन्नवस्त्रादिप्रदानेनेत्यर्थः ॥ ननु भवदभिस्नेहवत्यो वयं भवाम इति चेत्—जानामि । तर्हि तद्यात गोष्ठमिति मुहुः किं ब्रवीषि, न हि स्नेहाश्रयो जनः स्नेहविषयं जनं त्यक्तुं शक्नुयात्—सत्यम्, येन धर्मः सिध्येत्तदेव स्नेहवतापि व्रजजनेन कर्तव्यमिति शास्त्रम् । अत एतद्ब्रवीमीत्याह—भर्तुरिति । पर उत्कृष्टः । अमाययेति न तु पुंश्चलीत्वे सतीत्यर्थः । तद्बंधूनाम् श्वश्रवादीनाम् । पक्षे स्त्रीणां प्रस्तुतत्वात् स्त्रीविशेषाणां व्रजसुंदरीणां भवतीनामित्यर्थः । भर्तुः शुश्रूषणं परो धर्मो न त्वात्मीयोऽतः स नानुष्ठेय इति भावः । यदुक्तम्—“विधर्मः परधर्मश्च आभास उपमाच्छलः । अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् ॥” इति । मम विष्णुत्वाद्भवतीनां च वैष्णवीत्वान्मद्भजनमेव भवतीनां स्वधर्मोऽन्यस्तु परधर्म एव । “धर्मान्संत्यज्य यः सर्वान्मां भजेत्स च सत्तमः” इति धर्मांतरत्यागपूर्वकस्य मद्भजनस्य विधिरिति भावः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ संरंभक्षुभितदृष्टीस्ता निवर्त्तयितुमिव जंतुमात्रसाधारणतानिर्देशेनातिक्षोभयन्नाह—अथ वेति । पक्षांतरमिदम् ‘दृष्टं वनम्’ इत्यादिनिरसनापेक्षया । मयि योऽभिस्नेहः प्रीतिसामान्यातिशयः तस्मादिति । रत्यर्थः पुंस्त्रीभावविशेषो न गृहीतः विशेषणाभावात् । अत एव सहौदास्यमाह—हि यतः सर्वेऽपि प्राणिनो मयि प्रीतिं कुर्वन्तीति । मदभिस्नेहादिति साक्षादुक्त्या तमपि शिथिलयति अत एव गौरवेण भवत्य इति । अन्यत्तैः । यद्वा—अहो बत परित्यक्ता एव ते सर्वे तत्किं पुनस्तन्नामग्रहणेनेत्याशंक्य सश्लाघं पक्षांतरमाह—अथ वेति । अर्थस्तथैव । वस्तुतस्तु एवमौदासीन्यं चातुर्यभंग्या भावविवर्द्धनार्थमेवेति । श्लेषार्थश्चायम्—एवं यद्यप्यन्यप्रयोजनायागतास्तथापि मत्प्रार्थनया कियंतं क्षणमत्र विश्राम्यतेत्येवमुक्त्वा पक्षांतरमाह—अथ वेति । अभिशब्देन स्नेहस्य सम्यक्त्वोक्त्या रत्याख्य भाव एव सूच्यते । ततश्च यदि वा मदभिस्नेहादागतास्तर्हि तदेतदुपपन्नं युक्तमेवेत्यर्थः । तत्र हेतुः—जन्तवः प्राणिमात्राणि । मम मत्संबंधे । प्रीयंते मयि प्रीता भवंतीत्यर्थः । ततस्तादृशभाववतीनां वा का वार्तेति भावः । अत एव प्रेमादरेण भवत्य इति । अतोऽधुना मया सह स्वच्छंदं रमध्वमिति भावः ॥ २३ ॥ ननु यद्यस्माकं भवदभिस्नेहो निश्चितस्तदा

---

१. वः–श्रीधर. वंशी. जीव. वीर. विज. विश्व. रा. ध. शु. सु. ; तत्–वीर. । २. मयि–श्रीधर. वंशी. जीव. वीर. विज. विश्व. रा. ध. शु. सु. ; मम–विज. । ३. कल्याणं–विज. ।

भवच्छुश्रूषाऽपि युक्तेक्त्याशंक्य धर्मशास्त्रेण भावयति—भर्तुरिति त्रिभिः। भर्त्रादीनामेव शुश्रूषणादिकं धर्मः न तु तदितरेषामस्माकम्, स चान्यधर्मापेक्षया परः। ननु तदप्यस्माभिर्यथायुक्तं क्रियत एव तत्राह—अमाययैवेति। परपुरुषस्य मम भजने सकपटमेव स्यात्ततः सोऽपि दुष्यदिति भावः। कल्याण्यो हे साध्व्यस्तदेव युष्माकमुचितमिति भावः। एतच्च कैतवेन प्रोत्साहनम्। वस्तुतस्तूपहास एव तस्य परमधमत्वाभावात्। "एतावानेव लोकेऽस्मिन्पुंसां धर्मः परः स्मृतः। भक्तियोगो भगवति तन्नामग्रहणादिभिः॥" इति श्रीधर्मराजवाक्यादिति। श्लेषार्थश्चायम्—न केवल मदभिस्नेहहेतोरेवोपपन्नमपि तु धर्महेतोरपीत्याह—भर्तुरिति। अमायया कल्याणीभिर्निजसद्भाववृत्तत्वेनैव न तु बलादापादितत्वेन। यो भर्ता तस्यैव शुश्रूषणं परो धर्मस्तथा तद्बंधूनां चेत्यादि। अन्यत्र परमधर्मविदा श्रीभीष्मेणाबायाः परित्यागाद्धर्मतो भर्तृत्वाऽसिद्धेः। तदेवं सद्भावावृतत्वेन ते मायया कपटेनैव भर्तारः सद्भाववृत्तत्वेन त्वहमेव सत्यभर्ता भवतीभिः शुश्रूषणाय इत्यर्थः। अत्र बाल्यमारभ्य भवतीनां हृदयमेव मम साक्षीति भावः। वस्तुतश्च स एष एवार्थः स्थापयिष्यते ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मयि योऽभिस्नेहः प्रीतिविशेषस्तस्मादिति मधुरप्रेमाख्यः पुंस्त्रीभावविशेषो निरस्तः, अत एव सौदास्यमाह—हि यतः सर्वेऽपि प्राणिनो मयि प्रीतिं कुर्वन्तीति मदभिस्नेहादिति साक्षादुक्त्या तमपि श्लथयति, अत एव गौरवेण भवत्य इति। यद्वा, ननु प्रियम्वदप्रवर! तर्ह्यस्माकमभीष्टं सम्पाद्यताम्, तत्राह—प्रीतिमेव कुर्वन्तीति प्रीतेर्भक्तिविशेषत्वादंगसंगकर्म्मणालमिति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, अहो बत परित्यक्ता एव ते सर्वे, तत् किं पुनस्तन्नामग्रहणेनेत्याशंक्य सश्लाघं पक्षान्तरमाह—अथवेति, अर्थस्तथैव। यद्वा, मम यो युष्माभिरभिस्नेहस्तस्मात् तेनेत्यर्थः। अकारप्रश्लेषेण—अयन्त्रिताशयाः परमसाध्वीत्वात्। यद्वा, मद्विषयकाभिस्नेहेनायन्त्रिताशयाः, पातिव्रत्येन परपुरुषे स्नेहविशेषायोगात्। एवमुभयथा भावविशेषो निरस्तः, तथाप्यागता यत्, अन्यत् समानम्। वस्तुतस्त्वेवमौदासीन्यं चातुर्य्यभंग्या भावविवर्द्धनार्थमेव। श्लेषार्थश्चायम्—अहो परमानुरक्तास्वपि भवतीषु किमुद्दीपनगर्भैः प्रार्थनैरित्याह – अथवेति। अभि शब्देन स्नेहस्य सम्यक्त्वोक्त्या मधुरप्रेमैव लक्ष्यते, सामान्यतः सर्वेऽपि प्राणिनो मम प्रीयन्ते यतः, अतः सर्वोत्तमा गोप्यो भवत्यो मदभिस्नेहाद् यन्त्रिताशया वशीकृतचित्ताः सत्यः, किंवा पत्यादिभयेनास्वच्छन्दा अपि मदभिस्नेहाद्धेतोरागता यत् तदुपपन्नमेव, सर्वतोऽपि विशिष्टमद्विषयकप्रीतिमत्त्वात्, अत एव आदरेण भवत्य इति, अतोऽधुना मया सह स्वच्छन्दं रमध्वमिति भावः॥ २३ ॥ शुश्रूषणं धर्म्मः, स चामायया शुद्धभावेन धर्म्मैकापेक्षया वा चेत्तर्हि पर उत्कृष्ट इत्यर्थः, हि निश्चितम, तद्बन्धूनां श्वश्रू-श्वशुरादीनाञ्च शुश्रूषणम्, तथा प्रजानां पुत्रभृत्यादीनामनुपत्यादिशुश्रूषान्तरं पोषणं च धर्म्म एव, अमायया चेत् पर एव, चकाराभ्यां द्वयोरपि मुख्यतया साम्यमपि सूच्यते। कल्याण्यः! हे साध्व्यः! तदेव युष्माकमुचितमिति भावः। यद्वा, हे शुभादृष्टवत्यः! अतो युष्माकमेव तत् सिध्यतीति भावः, एतच्च कैतवेनैव प्रोत्साहनम्। अन्यत्तैर्व्याख्यातम्। यद्वा, जन्तवः प्रीयन्ते नाम, किंवा आगता यत्तद्युक्तमेव, किन्तु परमधर्म्मणैवाहं लभ्येय, न त्वन्यथेति तमेव शिक्षामुद्रया बोधयन्नाह—भर्त्तुरिति। अर्थः स एव, वस्तुतश्चेर्ष्ययोपहास एव, तस्य परमधर्म्मत्वाभावात्। द्वितीयपक्षेऽपि नर्म्मैव, तुच्छीकृतचतुर्वर्गश्रवणादिभक्तिसाध्यप्रेमैकलभ्यस्य तस्य पतिशुश्रूषणादिबाह्यधर्म्मेणालभ्यत्वात्, अतस्तस्य धर्म्मस्य परत्वोक्तिरपि नर्म्मत एवेति। अत एवोक्तं गीतादौ (१८।६६) 'सर्वधर्म्मान् परित्यज्य' इत्यादि। श्लेषार्थश्चायम्—न केवलं भर्त्तुस्तद्बन्धूनां मद्विधानां च शुश्रूषणं परो धर्म्मः, यद्वा, हे कल्याण्यः! परमवैष्णव्यः! स्त्रीणामन्यासां प्राकृतयोषितामेव धर्म्मः, न तु सर्वस्त्रीवर्गश्रेष्ठानां युष्माकं भक्तौ प्रवृत्तानामपि स्वधर्म्मानादरात्तथोक्तम् (भा० ११५।१७) 'त्यक्त्वा स्वधर्म्मं चरणाम्बुजं हरेः' इत्यादिना, एतत्तु हरिभक्तिविलासे एकान्तिलक्षणादौ बहुशो विवृतमेवास्ति यद्वा, भर्त्तुर्जगत्पतेर्मम, किंवा परमात्मत्वात् तत्त्वतो भर्त्ताहमेव, तस्य, यद्वा, वृष्ट्यादिभ्यो गोष्ठादिरक्षणात् साक्षादहमेवात्रत्यानां सर्वेषां भर्त्ता तस्य, अप्यर्थे च-शब्दः, किं वक्तव्यम्, भर्तुर्मम शुश्रुषणमिति। मद्बन्धूनां श्रीनन्दबलदेवादीनामपि तत् शुश्रूषणम्, तथा प्रजानां मद्भृत्यानां श्रीदामादीनां श्रीनन्द-गृहदासादीनां वा, किंवा सामान्यतः सर्ववैष्णवानामनुपोषणमपि परो धर्म्मः, अन्यत् समानम्, अतः शुद्धभावेन मम सेवा क्रियतामिति, यद्वा, अतोऽत्रागता यत्तद्युक्तमेवेति भावः। किञ्च, श्रीभगवतो रसोपयुक्तेऽर्थे प्रयुक्तामपि वाचं बहवोऽर्था अनुवर्त्तन्ते, तत्रैश्वर्य्यरूपोऽयमर्थः। यद्वा, धर्मरहस्यसारसर्वस्वं शृणुतेति परमार्थमेव नर्म्मणैवाह—भर्त्तुरिति त्रिभिः। व्रजस्त्रीणां युष्माकं भर्त्तुः शुश्रूषणमधर्म्मः पापममायया तु परोऽधर्म्मो महापापमेव, भक्तिपराणां श्रवणादिभक्तिरूपस्वधर्मपरित्यागेन पतिसेवादिपरधर्मप्रवृत्त्या महानर्थोत्पत्तेः, तथा चोक्तं गीतासु (३।३५)—'स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः' इति, यद्वा, अकारो विष्णुरहमेव, तस्मिन्मयि मायया भक्त्यादि-त्यागेन वञ्चनया यद्भर्तुः शुश्रूषणमिति, अन्यत् समानम्। भगवद्भक्तिहीनानां सर्वकर्मणो वैफल्याद्वैपरीत्याच्च, तथा चोक्तं बृहन्नारदीये—'किं वेदैः किमु शास्त्रैर्वा किं वा तीर्थनिषेवणैः। विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः॥', स्कान्दे च रेवाखण्डे—'धर्म्मो भवत्यधर्म्मोऽपि कृतो भक्तैस्तवाच्युत। पापं भवति धर्म्मोऽपि तवाभक्तैः कृतो हरे॥' इति, एतच्च भक्तिविलासे श्रीवैष्णव-माहात्म्यादौ व्यक्तमेव॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु त्वयि स्नेहाद्वयमागताः, अतः कथमेवं वक्तुमर्हसीत्यत्राह–अथवेति । मयि प्रेमप्रकर्षाद्वशीकृतचित्ता यदि यूयमागतास्तर्हीदमागमनमुपपन्नं युक्तमेव कुतः हि यस्माज्जन्तवो मयि प्रीयन्ते मयि प्रीतियुक्ता भवन्ति सर्वान्तर्यामिणि सर्वसुहृदि मयि सर्वजन्तुसाधारणं प्रीतिमात्रं भवतीनामप्यविरुद्धम् ॥ २३ ॥ न केवलं त्वदभिस्नेहमात्रादागताः किन्तु त्वया सह रन्तुमिच्छयेत्यत्र दृष्टादृष्टभयप्रदर्शनेन प्रत्याचष्टे—भर्तुरिति त्रिभिः । यदमायया निष्कापट्येन भर्त्तुः शुश्रूषणं परिचरणं तदेव स्त्रीणां परो माया यस्मात्तथाविधः धर्मः तथा हे कल्याण्यः तस्य भर्त्तुर्बन्धूनां पितृभ्रात्रादीनां प्रजानां स्वापत्यानां च यथार्हं शुश्रूषणं च परमो धर्मः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

व्रतागमनकारणमित्ययुक्तमुक्तम् रागमूलत्वात्प्रवृत्तेरिति तत्राह—अथवेति । मदभिस्नेहान्मदधिकरणस्नेहात् यन्त्रिताशयाः बद्धान्तःकरणाः नियमिताभिप्राया वा हि यस्मात्तस्मादागमनमुपपन्नं तत्कथमत्राह–प्रीयन्त इति । मम प्रीयमाणस्य सतः सर्वेपि प्रीणन्ति न चेत् तवेत्यन्वयव्यतिरेकाभ्यां प्रमितत्वात् ॥ २३ ॥ किञ्च, अन्यदेकं शास्त्रविहितं वदामीत्याशयेनाह—भर्त्तुरिति । स्त्रीणाममायया अवञ्चनया भर्त्तुः पत्युः शुश्रूषणं धर्मो हि लोकवेदसिद्धः भर्त्तरि सन्निहितो नारायण इति बुद्ध्या शुश्रूषणं परो धर्मो हि यस्मात्तस्मात्तस्य भर्त्तुः बन्धूनां कल्याणं च श्रेय इति च न केवलं तद्बन्धूनां श्रेयः, अपि तु प्रजानां सन्ततिलक्षणानां चानुपोषणं समृद्धिकरणं च भवतीत्यर्थः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

किम्वा प्रार्थनापक्षे भर्त्तुरिति अमायया अमिथ्यात्वेनैव यो भर्त्ता तस्य कौमारमारभ्य भवतीनां मय्येव नतु तत्कान्तभावः, इति मिथ्यैव भर्त्तुरित्यर्थः कन्या–वैमत्येन बलात् पतित्वाभवात् परमधर्मविदा श्रीभीष्मेणाम्बायाः परित्यागादिति भावः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

पुनर्व्रजं यातेत्यस्यैवानुकूलं वदति अथवेत्यादि । न वनादि–दिदृक्षया समागताः स्म । तद्दर्शनार्थमेवागताः स्म इति चेत्, तदुपपन्नमेव, मदभिस्नेह–यन्त्रितत्वं हि साधूनामेव, यतः प्रीयन्ते मयि जन्तवः प्राणिमात्रमेव मयि प्रीयन्ते, किं पुनर्भवत्यः । तन्मद्दर्शनं तूपपन्नमेव । सम्प्रति घोषं यातेत्यर्थः । पक्षान्तरे–भवत्यो मदभिस्नेहाद् यन्त्रिताशया इति जानीमः, तेनागताश्च, अतोऽतः परं यदुचितं तदुपपन्नं भविष्यत्येव, यतो मयि जन्तवः प्रीयन्ते, प्रीता एव भवन्ति तद् यूयं यत् प्रीता भविष्यथ, तत् किमिति । मा घोषं यातेत्यर्थः ॥ २३ ॥ पुनः (२२ श० श्लो०) “तद्यात मा चिरं घोषम्” इति यदुक्तं तदनुकूलं वक्ति—भर्तुरित्यादि सुगमम् । पक्षे भर्तुर्ममेत्यर्थः, एकवचनप्रयोगात् अमायया अकैतवेन, हि निश्चितम्, हे कल्याण्यः ! तस्य मम बन्धूनां मत्सुहृदाम्, प्रजानां प्रकृष्ट–जन्मनामनुपोषणमन्योन्य–परिपालनञ्च धर्मः परमः, मच्छुश्रूषणमन्योन्य–प्रीतिश्चेति द्वयं परमो धर्म इति वाक्यार्थः । तेनान्योन्यसौहार्दपुरःसरं मच्छुश्रूषणमेव कुरुतेति भावार्थः ॥ २४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पुनस्ताटस्थ्यमाह –अथवेत्यादि । परिहारमाह—भर्तुरित्यादि । यात यात, भर्त्तारः शुश्रूष्यन्तामिति विधिः तत्र निषेधः भर्त्तुरित्येकवचनेन स्वस्यैव भर्त्तृत्वं सूच्यते, भर्त्तुस्त्रैलोक्यभर्त्तुर्मम शुश्रूषणं क्रियताम्, मच्छुश्रूषणमेव परो धर्मः । स्त्रीणां लक्ष्मीणां भवतीनां पूर्ववत् । तद्बन्धूनां तस्य मम बन्धवो भवद्विधा एव । बन्धुशब्दात् स्त्रियामुङ्प्रत्ययः, तासामन्योन्यासां प्रजानां प्रकृष्टजन्मनां मया सहावतीर्णानामित्यर्थः । अनु अन्योन्यं पोषणं प्रतिपालनञ्च परो धर्मः, यद्भजनं मदुक्तसौहृदञ्च परो धर्म इत्यर्थान्तरम् ॥ २३–२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथवेति हन्त मया वृथैवैतान्यागमकारणानि कल्पितान्यधुनैव कारणमवगतमित्याह—मयि योऽभिसर्वतोभावेन स्नेहस्तस्मात् यन्त्रिताशयाः वशीकृतचित्ताः, अत एवागतास्तदुपपन्नं मद्दर्शनलाभात् सिद्धं यतो मयि जन्तवः प्राणिमात्राणि प्रीयन्त इत्यौत्पत्तिकं मे सौभाग्यं न त्वौपाधिकमिति भावः । तेन भवत्यो मयि प्रीतिसामान्यवत्य एव नतु कामोपाधिकप्रीतिविशेषवत्य इति ध्वनितम् पक्षे मदभिस्नेहः कान्तभावमयः प्रेमा तस्माद्धेतोर्यन्त्रीकृत आशयो याभिस्ताः भवतीनां मनसा यन्त्रेणैवाह—माकृष्टो वर्त्ते इत्यर्थः । तत् आगमनमुपपन्नमुचितमेव नतूपपत्तिरहितमित्यर्थः । मयि जन्तवोऽपि प्रीयन्ते किमुत भाववत्यो भवत्य इति भावः ॥ २३ ॥ ननु, भवदभिस्नेहवत्यो वयं भवामेति चेज्जानासि तर्हि तद्यात गोष्ठमिति मुहुः किं ब्रवीषि नहि स्नेहाश्रयो जनः

स्नेहविषयं जनं त्यक्तुं शक्नुयात् सत्यं येन धर्मः सिद्ध्येत् तदेव स्नेहवतापि (व्रज)जनेन कर्तव्यमिति शास्त्रमत एतद्ब्रवीमीत्याह—भर्त्तुरिति। परः उत्कृष्टः अमाययेति नतु पुंश्चलीत्वे सतीत्यर्थः तद्बन्धूनां श्वश्र्वादीनां पक्षे स्त्रीणां प्रस्तुतत्वात् स्त्रीविशेषाणां व्रजसुन्दरीणां भवतीनामित्यर्थः। भर्त्तुः शुश्रूषणं परो धर्मः न त्वात्मीयः, अतः स नानुष्ठेय इति भावः, यदुक्तम्—

विधर्मः परधर्मश्च आभास उपमा छलः। अधर्मशाखाः पञ्चमा धर्मज्ञोऽधर्मवत्त्यजेत् ॥

मम विष्णुत्वाद्भवतीनां च वैष्णवीत्वान्मद्भजनमेव भवतीनां स्वधर्मोऽन्यस्तु परधर्म एव "धर्मान् सन्त्यज्य यः सर्वान् मां भजेत्स च सत्तमः" इति धर्मान्तरत्यागपूर्वकस्य मद्भजनस्य विधिरिति भावः ॥ २४ ॥

श्रीरसिकाह्लादिनी टीका

ननु पत्यादि–स्नेहत्यागपूर्वकं त्वय्यनुरक्तत्वात् त्वां सेवितुमागतास्त्वं तु कथमस्मान्निवर्तयसीति यथाश्रुतार्थग्रहणेन संरंभेण रुक्षमुद्रामवलंवमानाः प्रत्याह। जन्तुमात्रसाधारण्यनिदर्शनेन स्वस्यौदासीन्यमाविष्करोति अथ वेति, ननु कथमस्मान्नत्राहूय विडम्बयसीति चेत्तत्राह। अथ वेति पक्षांतरम्। मदभिस्नेहादत्रागता भवत्य इति गौरवोक्तिः मयि योऽभितः स्नेहस्तस्मात् पत्यादिषु यः स्नेहस्तस्मादाकृष्य मय्यर्पितत्वात् अत एव यंत्रिताशयाः वशीकृतचित्ता अतः परमसाध्वीत्वात् न तु रमणार्थमागता अथवा एवं वो मत् मन्निमित्तमभि निशंकं यथा तथा स्नेहाद्वाऽऽगता यत अयंत्रिताशया अस्वाधीनचित्ताः सत्यः, अत एव चित्तनियमनमुपदिशति चित्तनियमने कृते सति परपुरुषे मयि भावविशेषमुदयेन सतीत्वभंगो न भविष्यतीति भावः। पूर्वं मनसोऽनियमने यज्जातमेवाधुना मदभि मम सम्मुखमागता स्नेहात् यंत्रितो बद्ध आशयश्चित्तं यासां ता तत् वो युष्माकमुपपन्नं युक्तमेव जातं, यतः केनापि न प्रतिबद्धाः, यद्वा वो युष्माकमपि उपपन्नं युक्तमेव यस्य यस्मिन् प्रेम-विशेषस्तदन्तिके तस्य गमनमयुक्तं न भवतीति। स्वस्याकामत्वं व्यञ्जयति यतो मयि जन्तवः प्राणिमात्राः प्रीयन्ते प्रीतिं कुर्वन्ति। ननु तेषु अङ्गसङ्गं क्रियते प्रयोजनाभावात् मम ब्रह्मचर्य्यं भवतीभिः श्रुतपूर्वमेवातो व्याबुध्य यातेतिशब्दोत्थोऽर्थः। इदानीमर्थोत्थमर्थमाह–अथवा तद्यातेति पूर्वश्लोकोक्तव्रजगमननिषेधमबुद्ध्वा क्षुभितदृष्टी सांत्वयन् सापेक्षत्वं व्यंजयन् वने रमणं दृढयति, पद्यार्थस्तु स एव भावार्थो भिन्न एव मम अभि भयरहितः स्नेहप्रसूताख्यश्चतुर्थो रत्याख्यो भावस्तस्मात्तं प्राप्येत्यर्थः, यंत्रिताशयाः मयैव यंत्रितो निरुद्ध आशयश्चित्त यासां ताः, चित्ते निरुद्धे स्वत एवागताः, मम चित्तेन भवतीनां चित्तमाश्लिष्टं "क्षीरनीरवत्" केवलं शरीरमात्रमनाश्लिष्टम्। तदिदानीं रमणं सर्वं सेत्स्यतीति भावः, यस्मादागतास्तदुपपन्नं, वो युष्माभिरुचितं कृतमिति। मनश्चक्र इति पूर्वं चिन्तनमेवागमनमात्रं प्रतीक्ष्यमाणेन मया स्थितं तत्संपन्नं अतो यावदाकाङ्क्षं रमणं भविष्यतीति भावः, युक्तार्थत्वे कैमुत्यन्यायेनाह–यतो जन्तवः प्राणीमात्राः मम प्रीयन्ते मद्विषयां प्रीतिं कुर्वन्ति किमुत मत्प्रेम–रत्नमंजूषा भवत्य इति, तदुक्तं "को नु राजन्निन्द्रियवानेति"। प्रीतौ इन्द्रियवत्वमात्रमेवाधिकारिविशेषणमिति ॥ २३ ॥ इदानीं श्रुतिरूपा यूथमुख्याः प्रति भाव-जिज्ञासार्थं धर्मनिरूपणमाह–बृहद्वामनपुराणे भृगुं प्रति ब्रह्म–वाक्यं "न स्त्रियो व्रजसुन्दर्यः पुत्र ताः श्रुतयः किल। नाहं भवो न चानन्तो न च श्रीस्तत्समा क्वचित्" इति। भर्तुरिति भर्तुः पोषणकर्तुर्लौकिकस्य पत्युः शुश्रूषणं प्रजानां पुत्रकन्यादासदासीनां तदनु यथोचितं शुश्रूषणं धर्मः। हे कल्याण्यः मंगलरूपा अहं तु लौकिकपतिर्न भवामि, स्त्रीणां ये देवताराधनादयो धर्मोक्तास्तदपेक्षया पतिशुश्रूषणस्य धर्मस्योत्कृष्टत्वं न तु भगवद्धर्मापेक्षयोत्कृष्टत्वमतो निरपेक्षस्योदासीनस्य च मम भजनेन तदसिद्धेः, वास्तवमर्थमाह—भर्तुः शुश्रूषणं स्त्रीणां साधारणस्त्रीणामेव परः श्रेष्ठो धर्मो न तु मत्प्रियाणां भवतीनां, हे कल्याण्यः शुभरूपाः भवतीनां मदाराधनमेव परमो धर्मः। यस्त्वलौकिको भर्त्ता रसपोषणकर्त्ता अहमेव। लौकिकपत्यादीनां शुश्रूषणस्य परमधर्मत्वाभावात् अतस्तेष्वनिष्टनिवारणसामर्थ्याभावाद्भर्तृत्वं तद्बंधूनां बंधुत्वं पारिभाषिकमेव तदुक्तमत्रैव–"गुरुर्न स स्यात् स्वजनो न स स्यात् पिता न स स्याज्जननी न सा स्यात् दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युम्" इति। तस्मान्मच्छुश्रूषणं परो धर्मः तद्बंधूनां तस्य मम बान्धवो मत्सहचरा, यद्वा मम बान्धवो वैष्णवास्तेषामपि शुश्रूषणे पर्यवसति तदुक्तं "साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्। मदन्यत् ते न जानन्ति नाहं तेभ्यो मनागपि"। यद्वा भर्त्तुः पालकस्य मम शुश्रूषणं प्रियाचरणं रमणमिति यावत् स्त्रीणां मत्प्रियाणां भवतीनां अमायया अप्रतारणेन चेद्भवति तर्हि परो धर्मः प्राकृतस्य भर्तुः शुश्रूषणं स्त्रीणां भवतीनां अमायया अकृपया स्नेहाभावेन चेद्भवति तदा परो धर्मः स्यात्कृपादंभयोर्मायेति विश्वः, स्नेहस्य मयि निर्बन्धत्वात् तदुक्तं—"विषयाविष्टचित्तानां कृष्णावेशः सुदूरतः। वारुणीदिग्गतं वस्तु व्रजन्नैन्द्रीं किमाप्नुयादिति"। किं च "त्यक्त्वा स्वधर्ममित्युक्तेन" स्वधर्मत्यागेन मच्छुश्रूषणं स्वधर्मत्वं यदा स्वीक्रियते तदा अधर्मत्यागेन मदाराधनस्य को वा धर्मत्वं त्यागेन मदाराधनस्य को वा धर्मत्वं स्वीकुर्यात्। न ह्यधर्म–त्यागेन धर्मो भवति केनाप्यभ्युपगतं शक्यते। ननु लोकप्रतीत्या पत्यादिशुश्रूषणस्य धर्मत्वं श्रूयते सत्यं तथा स्वधर्मत्याग–पूर्वक–मद्भजनस्य परमधर्मत्वं प्रसिद्धेः तदुक्तं गीतायाम् "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज" इति मयैवोक्तत्वात्। यतः पत्यादिषु स्नेहस्य त्यक्तात् त्यागदर्शनलिंगेन तस्मान्मच्छुश्रूषणमेव भवतीनां मुख्यो धर्मः, यद्वा तद्बन्धूनां तस्य मम बन्धूनां मत्सहचरीणां सखीनां शुश्रूषणं आनुकूल्येनानुरञ्जनं तदनुप्रजानामप्यनुरक्तानां दासीनां मनोऽनुरञ्जनं भवतीनां परमो धर्म इति। किं च मच्छुश्रूषणस्य त्यागेनेतरधर्माचरणस्य कुत्राप्यश्रूयमाणत्वात् अतः सापेक्षेऽपि रमणानुकूलव्यापारकर्त्रीभिर्भाव्यमिति अर्थोत्थार्थ इति ॥ २४ ॥

विशुद्धरसदीपिका

इत्थमाकस्मिकागमनाभिप्रायेण प्रत्याख्याता अप्यायान्तीः संरम्भक्षुभितदृष्टीः साधारणप्रीत्याश्रयनिर्देशेनातिक्षोभयन्नाह–अथवेति। मदभिस्नेहात् प्रीतिसामान्यातिशयात् यन्त्रिताशयाः वशीकृतचित्ताः सत्यः आगता इति चेदुपपन्नमेव युष्मासु यतो मयि विषये जन्तवोऽपि श्रीवृन्दावनगताः स्थिरचराः सर्वेऽपि प्रीयन्त इत्यर्थः। पक्षे अभिस्नेहात् अभितः स्नेहात् यतो मयि प्रीतिसामान्यं तु जन्तुमात्रमपि करोतीत्यर्थः। तत्र भवत्यस्तु मम प्राणप्रियायाः प्राणसख्यः सर्वदा मयि परमप्रीतिमत्यः ततश्चात्रावस्थानेन रासाद्यनुष्ठानेन विशिष्टामेव प्रीतिं कर्त्तुमर्हथेत्यर्थः ॥ २३ ॥ प्रथमे पक्षे ननु, प्रीत्यतिशयादेव वयं न याम इत्याशङ्क्य दृष्टादृष्टभयं दर्शयन्नाह—भर्त्तुरिति, त्रिभिः। तत्र भर्तुरिति स्पष्टम् ॥ २४ ॥

श्रीरामनारायणकृता भावभावविभाविका

प्रथमपक्षे नास्माकं पत्यादिना वनशोभया वा कृत्यं किन्तु त्वत्स्नेहादागताः किमेवमुच्यते तत्राह—अथवेति। मया तु भवदागमनं वनशोभार्थमेव ज्ञातम् अथवेति अर्थान्तरे मदभिस्नेहादेव यन्त्रिताशया भवत्य आगता यतो न केवलं भवत्य एव प्रीयन्ते मयि सर्वेऽपि जन्तवः प्रीयन्ते तदपि मद्दर्शनमुपपन्नं नाधुना विलम्ब उचित्त इति भावः। द्वितीयपक्षे तु किं बहुप्रार्थनया त्वदर्थमेव वयमागतास्तत्राह—अथवेति। मदभिस्नेहाद्यन्त्रिताशया भवत्य आगतास्तत्तु उपपन्नमेव यदा मत्स्नेहाविषया जन्तवोपि मयि प्रीयन्ते तदा मत्प्राणप्रियाणां भवतीनां तु तत्प्रेमोपपन्नमेव योग्यमेवेति भावः ॥ २३ ॥ प्रथमपक्षे वयं त्वां त्यक्तुं न शक्नुमः याम इत्यपेक्षायां धर्मोपदेशमाह–भर्त्तुरिति। नन्वन्यान् धर्मान् करिष्यामः तत्राह–स्त्रीणामिदं भर्तृसेवनमेव परो धर्म इति न तत्सदृशोऽन्यो धर्मः शुश्रूषणं कृत्वैवागतास्तत्राह—अमाययेति। निष्कपटसेवैवोचिता नतु सेवया वञ्चयित्वान्यत्र गमनम् अन्यत्स्पष्टम् द्वितीपक्षे तु मयि प्रेमाचरणमुपपन्नमित्युक्तमेवोपपादयति—भर्त्तुरिति। यतोऽमायया भर्त्तुः शुश्रूषणं तद्बन्धूनां प्रजानामनुपोषणं च स्त्रीणां परो धर्मः, अतो परमार्थभर्त्तुर्मम सेवनं मदङ्गरसदानमेवोचितमिति भावः ॥ २४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एतच्छ्रुत्वाऽत्यन्तखिन्नचित्ता आलक्ष्याह—नास्ति भवतीनां वनशोभेक्षणेच्छा नापि मदपेक्षयाऽधिकं पुत्रादौ स्नेहोऽतो मद्दर्शनार्थमत्र समागता इत्याह—अथवेति। मयि यः स्नेहस्तेन यन्त्रिताशयाः वशीकृतचित्ताः सत्यो मद्दर्शनार्थं यूयमागता इति स्यात् तदेतदुपपन्नमुपपत्तियुक्तं न तत्ते पक्षः हि यतः सर्वेपि जन्तवो मयि प्रीयन्ते प्रीता भवन्ति। यद्वा, उपपन्नं सिद्धं यतो मयि दृष्टे जन्तवः प्रीयन्ते अतो भवत्यो मद्दर्शनेन प्रसन्नाः सत्यः गच्छतेति भावः। अनभिज्ञापक्षे एवं श्रुत्वा संरम्भक्षुभितदृष्टीरालक्ष्य ततोप्यधिकक्षोभमुत्पादयति, अथवेति। वनादिकं द्रष्टुं नागतास्ते पक्षा वृथैव मया कल्पिताः भवत्यस्तु मयि योऽभितः स्नेहः स्वाभाविकी प्रीतिः न तु कामाद्युपाधिका तेन यन्त्रिताशयाः आगतास्तदुपपन्नम् अयमेव पक्ष उपपन्नो हि यतः सर्वेपि प्राणिनो मयि प्रीयन्ते तथा च सामान्यप्रीत्यतिशयवत्यो मद्दर्शनार्थं समागतास्तस्यापि जातत्वाद्गन्तव्यमिति भावः। अथवा यतो मयि जन्तवः प्रीयन्ते अतो मत्स्नेहाद्भवत्योपि यन्त्रिताशयाः तदेतदुपपन्नं यत आगताः मानिनीपक्षे पूर्वं यद्यपि प्रयोजनान्तरार्थमागताः भवत्यस्तथापि मन्मनोरथपूर्त्यर्थमत्र तिष्ठतेत्युक्तमिदानीं भवतीनां मयि स्नेहातिशयो वर्त्तते इति चिरकालान्मया बुद्ध्यतेऽतः किमर्थं ते तिरोधानां क्रियत इत्याशयेनाह—अथवा मदभिस्नेहाद्भवत्यो यन्त्रिताशया यत आगता भवत्यस्तु योग्या एव मयि तु सर्वेपि जन्तवः प्रीयन्तेऽतो मत्स्नेहाकृष्टचेतसामत्रागमनमुपपन्नं बहुयोग्यं जातमतोऽत्र स्थित्वा तत्फलं सम्पाद्यमिति भावः। निवृत्तिपक्षे पूर्वं श्रुतीतां समस्तानां क्रियापरत्वमुक्तं तत्र ब्रह्मप्रतिपादकश्रुतीनां क्रियापरत्वासम्भवादानर्थक्याहङ्कारादिवज्जयमात्रोपयोगित्वं वास्त्विति सूचितमिदानीमध्ययनविध्युपात्तानां वेदान्तानामानर्थक्यायोग्यं प्रतीयमानार्थस्य प्रत्याख्यानाऽसम्भवं चाभिप्रेत्यास्तु वा कर्मापेक्षितकर्तव्यस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वमुपनिषदामिति पक्षान्तरमाह–अथवा मयि अस्मत्प्रत्ययगोचर आत्मनि अभिस्नेहात्प्रतिपादनपरत्वात् यन्त्रिताशया आनर्थक्यं जयोयोगित्वं वा गमयितुमशक्यास्तत्तर्हि उपपन्नं कर्मणा सम्बद्धं कर्तृदेवतादिरूपमात्मानमागतास्तत्स्वरूपप्रकाशने सङ्गता एवं रीत्याप्रतिपाद्यमाने मयि आत्मनि सति जन्तवः सर्वेपि लोकाः प्रसन्ना भवन्तीत्यर्थः ॥ २३ ॥ यद्यपि भवत्यो मयि स्नेहातिशयवत्यो मद्दर्शनार्थमत्रागता इत्यहं जानामि तथापि श्रुतिस्मृतिबोधितस्वधर्मत्यागोयमनिष्ट इत्याशयेनाह—भर्तुरिति। भर्तुः शुश्रूषणं स्त्रीणां पर उत्कृष्टो धर्मः स्त्रीणामिति विशेषणेन—

"एतावानेव लोकेऽस्मिन् पुंसां धर्म्मः परः स्मृतः। भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥"

इत्यादि शास्त्रात्पुरुषाणां साक्षान्मद्भजनमभिहितं स्त्रीणां तु स्वपतिरूपस्य ममाराधनोक्तम्—

"नैव यज्ञक्रिया काचिन्न श्राद्धं नोपवासकम्। या तु भर्तरि शुश्रूषा तया स्वर्गं जयत्युत ॥"

इत्यादिशास्त्रात् तत्राप्यमायया कपटराहित्येन तस्य बन्धूनां तस्य श्वश्वादीनां च शुश्रूषा प्रजानां पुत्रादीनां चानुपोषणं स्तनादिदानेन पित्रादिभिः पोष्यमाणानां तदनु स्वे पोषणमिति वा हि शब्दो यथोक्तधर्मस्य लोकवेदप्रसिद्धिं द्योतयति—

"श्रुतिस्मृती ममैवाज्ञास्तामुल्लङ्घ्य प्रवर्तते। आज्ञाभङ्गी मम द्वेषी मद्भक्तो हि न वैष्णवः ॥" इत्यादि

अनभिज्ञापक्षे ननु, मत्स्नेहाकृष्टमानसाः मदर्थमागता इति यदि जानासि तत्तर्हि प्रतियात व्रजं तद्यातेति किमिति निष्ठुरं ब्रवीषि न हि परस्परस्निग्धानामियं रीतिरित्याशयवतीरालोक्याह, "पापान्निवारयति योजयते हिताय" इति मित्रलक्षणेऽभिहितत्वाल्लोकद्वयहितार्थमिदं मदीयं वाक्यमतिकोमलमित्याशयेनाह, भर्तुरिति। एतेन त्वयि स्निग्धात्वात्त्वच्छुश्रूषणमधुना कर्त्तुं प्रवृत्ता अतो भवतापि तदनुमोदनं कर्तव्यमिति शङ्कापि निरस्ता यथायोग्यस्नेहस्य शुश्रूषणस्य च युक्तत्वात् तथा भर्त्तरि कर्तव्यं स्नेहादिकमन्यत्र न कार्य्यमतो मय्यपि यथा जन्तवः प्रीयन्ते तथा प्रीतिः कर्तव्येति भावः। मानिनीपक्षे न चात्र धर्म्मशङ्काहमेव युष्मद्भर्तृत्वेन मत्सेवनस्य परमधर्मत्वादित्याशयेनाह—अमायया भर्तुः बालभावादारभ्य निष्कपटतया भर्तृत्वेन वृतस्य मम शुश्रूषणं परो धर्म्मः न तु बन्धुभिर्बलात्कारेणापादितस्य भीष्मेणाम्बायाः परित्यागेन बलापादितस्य धर्म्मतो भर्तृत्वासिद्धज्ञापनाय तस्मात्कपटागतभर्तुस्तद्बन्ध्वादिसेवादिकं विहाय मम मद्बन्ध्वादिसेवनादिकमेव भवतीनां धर्मतोपि प्राप्तत्वादावश्यकमित्यर्थः एवं कृते नास्ति कदाप्यकल्याणमिति सम्बोधनाशयः निवृत्तिपक्षे तस्माद्भर्तुः स्थानीयस्य प्रतिपाद्यार्थस्य सेवनं तत्परत्वमेव स्त्रीस्थानापन्नानां श्रुतीनां धर्म्मः शक्त्यादिलक्षणः ननु, तात्पर्य्येणाऽन्यपरत्वेपि स्वार्थपरता न हीयत इति चेत्तत्राह—अमाययेति। यत्परः शब्दः स शब्दार्थ इति न्यायात् तथा च निर्व्याजेन स्वार्थपरत्वं परमो धर्मः उभयपरत्वे वाक्यभेदादेकपरत्वमावश्यकं सम्भवति स्वार्थपरत्वेऽन्यपरता न न्याय्येति भावः। क्वचिच्छक्यार्थासम्भवे तद्बन्धूनां शक्यार्थसम्बन्धिनां सेवाप्रतिपादनमपि धर्म्मः प्रजानां तत्स्थानीयानां मतानां विद्वद्भावितर्तर्कैः पुष्टानामनुपोषणं तत्रैव प्रमाणतयोपस्थिततया पुनरतिपुष्टत्वसम्पादनं च यतो हे कल्याण्यः! कृत्यप्रवृत्तिनिवृत्तिबोधनपरा शास्त्ररूपाः, अन्यथा शास्त्रपदप्रतिपाद्यत्वमेव भवतीनां न स्यात् प्रवृत्तिर्वा निवृत्तिकानित्यनेन कृत्यकेन वा पुंसा येनोपदिश्यते तच्छास्त्रमभिधीयत इति शास्त्रलक्षणाभिधानात् ॥ २४ ॥

रास–रहस्यम्

र० टी०—यदि स्वधर्माचरणे रुचिः न स्यात् अपितु मयि अस्मत्प्रत्ययगोचरे आत्मनि अभिस्नेहः, अभितः सर्वान्तःकरणेन स्नेहः प्रीतिः, वर्तते ततः, यन्त्रितः वशीकृतः, आशयोऽन्तःकरणं यासां ताः, तथा सत्यः, भवत्यः आगतास्तर्हि वो युष्माकमुपपन्नमेव युक्तमेव कृतम्। हि यस्मात् मयि आत्मनि जन्तवः सर्वेऽपि प्राणिनः प्रीयन्ते प्रीतियुक्ताः भवन्ति "आत्मनस्तु कामाय सर्वं प्रियं भवति।" इति श्रुतेः ॥ २३ ॥ "श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः। श्रेयो हि धीरोऽभिप्रेयसं वृणीते प्रेयो मन्दो योगक्षेमौ वृणीते।" इति श्रुतेः, हे कल्याण्यः कल्याणं श्रेयः अपवर्गस्तत् प्राप्तुमभिप्सा यासां ताः मुक्तिकामा इत्यर्थः। स्त्रीणां श्रुत्यनुकूलवृत्तीनां ह्यमायया अकापट्येन तात्पर्येण लक्षणावृत्त्या भर्तुः परमपतेः परमात्मनः शुश्रूषणं सेवनं भजनमेव परः श्रेष्ठो धर्मः कर्तव्यः। "यत् परः शब्दः सः शब्दार्थः" इति न्यायात् क्वचित् वाक्यार्थाऽसम्भवेऽपि तद्बन्धूनां लक्ष्यार्थानां तत्प्रजानां श्रुत्यनुकूलतर्कजातार्थानां च पोषणं प्रतिपादनं कर्तव्यम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यदि नोत्पातान्नवा कस्मान्न वनशोभेक्षणाय वागताः किन्तु यन्त्रिताशयाः वशीकृतचित्ताः भवत्यः मदभिस्नेहादागतास्तर्ह्यागमनमुपपन्नं युक्तम् हि यतो जन्तवः सर्वेपि प्राणिनोऽविशेषेण मयि प्रीयन्ते प्रीता भवन्ति अनुरक्तिं कुर्वन्तीत्यर्थः ॥ २३ ॥ एवं सर्वसाधारणं मदनुरक्तिलक्षणं धर्मं पुरस्कृत्य स्वासाधारणः स्त्रीधर्मो भवतीरत्यादरेणानुष्ठेय इत्याह—भर्तुरिति द्वाभ्याम् ॥२४–२५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वनविशेषविलोकनमात्रं नात्र रात्रावगतिफलमन्यदस्त्येतद्रूपमिति स्वयमेव ताः प्रति विकल्प्य तद्युक्ततां वक्ति ॥ अथवेति। मदभिस्नेहान्मद्भक्तेर्यन्त्रिताशया नियमितान्तःकरणाः। भवन्त्यो भवत्य इति च समार्थौ पाठौ। आगतास्तर्ह्युपपन्नं भवदागमनं युक्तम्। कुत इत्यत आह। हि यतो मम मद्विषये जन्तवः प्राणिनः प्रीयन्ते स्वतः प्रीतिं कुर्वन्ति ततो भवतीनां मां प्रति यदागमनमङ्गनानां तदुपपन्नमिति भावः। मयीति पाठेऽप्यनामयः ॥ २३ ॥ धर्ममर्मनर्मतः शंसन् स्वाशां विशदीकुर्वन्काञ्चनलीलां लालयन्नालपति ॥ भर्तुरिति। अमाययाऽकापट्येन हि यतो भर्तुः पत्युः। स्त्रीणामिति बहुवचनेन भर्तुरित्येकवचनेन च शाश्वतिकं भर्तृत्वं स्वस्यैवेति कटाक्षयतीति ज्ञेयम्। शुश्रूषणं सेवा परो धर्मो महान्धर्मस्तद्बन्धूनां कल्याणं तत्करम्। परो धर्म इत्यत्रेवोत्तरत्राप्यन्वेति। प्रजानामनुपालनं च ॥ २४ ॥

श्रीसुबोधिनी

पक्षांतरमाह। मत्प्रेमतो यंत्रिताशया वशीकृतमानसा भवत्यो यद्यागताः, इति वो युष्माकमुपपन्नं युक्तं मयि प्राणिनः प्रीतिं कुर्वन्ति ॥२३॥ धर्मोपदेशेन निवर्त्तयति। अमायया निष्कपटतया भर्त्तुः पत्युः सेवनं परो धर्मः, हि युक्तं तस्य पत्युर्बंधूनां देवराणां च शुश्रूषणं पुत्राणां पोषणं च परो धर्मः ॥ २४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

भर्तुरित्यत्र, **स्त्रीणामिति** बहुवचनेन भर्तुरित्येकवचनेन च सर्वासां य एको भर्ता तत्सेवाविधानाद् भगवत एव तथात्वाद्भजनमेव विहितं क्रियत इत्याशयेन स्थितिपक्षार्थमाहुः **स्वभावतो जीवानामित्यादिना**। अत्र बन्धुप्रजाशब्दाभ्यां तत्सखीभावपरम्परे उच्येते ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथवा मयि योऽभितः स्नेहः तस्माद्यन्त्रितः वशीकृतः आशयोऽन्तःकरणं यासां ताः। तथा सत्यो भवत्यः, आगतास्तर्ह्येतद्वो युष्माकमुपपन्नं युक्तमेव। हि यस्मात् मयि जन्तवः सर्वेऽपि प्राणिनः प्रीयन्ते प्रीतियुक्ता भवन्ति ॥ २३ ॥ पतिसेवायाः परमधर्मत्वमाह—भर्तृशुश्रूषणमिति। अमायया कापट्यपरित्यागेन भर्तृशुश्रूषणं तस्य भर्तृबन्धूनां पित्रादीनां च शुश्रूषणं तत्प्रजानां पुत्रभृत्यादीनां चानुपोषणं स्त्रीणां पर उत्कृष्टो धर्मः। हीत्यर्थः न सन्देहः। 'युष्माकं च पत्यादयः सर्वेऽपि सन्ति' इति सूचयन् सम्बोधयति—कल्याण्य इति ॥ २४ ॥

अन्वितार्थप्रकाशिका

अथवेति ॥ दृष्टं वनमिति पक्षापेक्षया पक्षान्तरे अथवा मयि योऽभितः स्नेहः तस्माद्यन्त्रितः वशीकृतः आशयोऽन्तःकरणं यासां ताः तथा सत्यो भवत्यः आगतास्तर्ह्येतद्वो युष्माकमुपपन्नं युक्तमेव। हि यस्मान्मयि जन्तवः सर्वेऽपि प्राणिनः प्रीयन्ते प्रीतियुक्ता भवन्ति। मद्दर्शनमपि जातमेवेत्यतो व्रजं यात। अथ च मत्स्नेहादागताः, अतोऽधुना मया सह रमध्वम् ॥२३॥ भर्तुरिति ॥ हे कल्याण्यः! अमायया कपटपरित्यागेन भर्तुः शुश्रूषणं तस्य भर्तुर्बन्धूनां पित्रादीनां च शुश्रूषणं तत्प्रजानां पुत्रभृत्यादीनां चानुपोषणं स्त्रीणां पर उत्कृष्टो धर्मः। अथ च अमायया कन्याभावादारभ्य वृतो यो भर्ता नतु पित्रादिभिर्बलादापादितस्तस्यैव शुश्रूषणं परो धर्मः तथा तद्बन्धूनां चेत्यादि प्राग्वत् भीष्मेणाम्बायाः परित्यागेन बलादापादितस्य धर्मतो भर्तृत्वासिद्धेः। अतस्ते कपटेन भर्तारः सद्भाववृत्तत्वेन त्वहमेव सत्यभर्ता वः शुश्रूषणीयः ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं स्वोक्तवचनेनौदासीन्यं प्राप्तास्ताः। सांत्वयन्नाह अथेति अथवा पक्षान्तरे मयि अभिस्नेहादत्यनुरागात्। यंत्रिताशयाः दृढबंधांतःकरणाः, अतो मद्दर्शनार्थं यूयमागताः स्थ। वो युष्माकं एतदागमनम् उपपन्नं योग्यं यतो जंतवो दैवीसंपद्युक्ता जनाः, मयि प्रीयंते प्रसन्ना भवंति ॥२३॥ एवंभूतानामपि धर्मे स्थितिरेव युक्तेत्याशयेनाह भर्तुरित्यादित्रिभिः, अमायया अकापट्येन स्त्रीभिः परपुरुषभजने कृते सति भर्त्रादीनां संकटापत्तिः स्यादित्याशयः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु त्वयि स्नेहातिशयाद्वयं त्वदन्तिके आगता अतः कथमेवं वक्षीति संरम्भक्षुभितदृष्टीः प्रति प्राह ॥ अथवेति ॥ अथवा, मदभिस्नेहात् मयि प्रेमप्रकर्षात्, यन्त्रिताशयाः वशीकृतचित्ताः सत्यः, भवन्त्यो यूयं यर्हि आगताः, तर्हि, वो युष्माकं, इदमागमनमिति शेषः। उपपन्नं युक्तमेव। कुतः। हि यस्मात्, मयि जन्तवः, प्रीयन्ते मयि प्रीतियुक्ता भवन्ति। सर्वान्तर्यामिणि सर्वसुहृदि मयि सर्वजन्तुसाधारणं प्रीतिमात्रं भवतीनामप्यविरुद्धमित्यर्थः ॥ २३ ॥ न केवलं त्वदभिस्नेहमात्रादागताः, किं तु त्वया सह रन्तुमिच्छयेत्यत्र दृष्टादृष्टभयप्रदर्शनेन प्रत्याचष्टे भर्तुरिति त्रिभिः ॥ भर्तुरिति ॥ यत् अमायया निष्कापट्येन, भर्तुः स्वस्वामिनः, शुश्रूषण परिचरणं, तथा हे कल्याण्यः, तद्बन्धूनां पितृभ्रात्रादीनां भर्तुर्बन्धुजनानां, प्रजानां स्वापत्यानां च, अनुपोषणं यथार्हं शुश्रूषणं च, हि तदेव, स्त्रीणां परः, धर्मः ॥ २४ ॥

कृष्णप्रिया

अथवा यदि मेरे प्रेम से परवश होकर तुम लोग यहाँ आयी हो, तो इसमें कोई अनुचित बात नहीं हुई, यह तो तुम्हारे योग्य ही है। क्योंकि जगत् के पशु-पक्षी तक मुझसे प्रेम करते हैं, मुझे देखकर प्रसन्न होते हैं ॥ २३ ॥ कल्याणी गोपियों स्त्रियों का परम धर्म यही है कि वे पति और उसके भाई-बन्धुओं की निष्कपट भाव से सेवा करें और सन्तान का पालन-पोषण करें ॥ २४ ॥

दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा। पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥ २५ ॥

कर्दमक्षमा

अन्वयः—दुःशीलः, दुर्भगः, वृद्धः, जडः, रोगी, वा, अधनः, अपि, पतिः, अपातकी, लोकेप्सुभिः, स्त्रीभिः, न हातव्यः ॥ २५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पत्युः दौश्शील्यादिसत्त्वेऽपि स्त्रीभिस्त्यागो नोचित इत्याह—दुःशील इति। दुःशीलः कलहादिज्ञानसंपन्नः। दुर्भगः निर्वीर्यः, कांतिहीनो वा। वृद्ध प्रवयाः। जडः कर्तव्याकर्तव्यज्ञानहीनः। रोगी भग्नांगोऽल्पांगो वा। यद्वा—कुष्ठादिव्याध्यार्तः। दौशल्यादिसत्त्वेऽपि ब्रह्महत्यादिपंचमहापातकरहितश्चेत्तर्हि शुचिरेवेति। "आ शुद्धेः संप्रतीक्ष्यो हि पतिः पातकदूषितः" इति याज्ञवल्क्योक्तेः। लोकेप्सुभिः स्वर्गादिफलेच्छुभिः। पक्षे—एतादृशोऽप्यहं चेत्तर्हि न त्याज्यः। पातीति पतिः तद्वत्त्वात्। किं वा पतिर्व्रजवासी युष्माभिर्न हातव्यो न गन्तव्यः। 'ओहाङ्—गतौ'॥ ननु भवदभिस्नेहवतीनामस्माकमननुरूपाः प्रतिकूललीला अरोचकास्ते पतयः कथं सेव्या भवन्त्वित्यत आह–दुःशील इति। अपातकीति 'पतिं त्वपतितं भजेत्' इति स्मृतेः। पतनहेतुपातकवानेव पतिस्त्याज्य इत्यर्थः। लोकेप्सुभिः पतिलोकसुखवांछावतीभिः। पक्षे–लोकेप्सुभिः, इह लोके परलोके चातिक्षुद्रकीर्तिसुखाद्यपक्षावतीभिरेव न हातव्यः, युष्माभिस्तु लोकद्वयाय जलांजलीन्दत्त्वा मन्माधुर्यसुखवारिधौ खेलंतीभिः प्रथमत एव पतिस्त्यक्त एव॥ २४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु परोपदेशपंडित सर्वथा पतयः त्यक्ता एवाधुना किं तदीयशुश्रूषाद्युपदेशेन तत्राह—दुःशील इति। दुश्शील चौर्यादिरतः। दुर्भगः भाग्यादिहीनः, निष्फलोद्यम इत्यर्थः। वृद्धः जराभिभूत.। जडः कर्मादिषु सामर्थ्यहीनः। रोगी महारोगग्रस्तः। अधनोऽतिदरिद्रः, निजोदरभरणेप्यसमर्थ इत्यर्थः। अपिशब्दस्य प्रत्येकमन्वयः। दौश्शील्यादियुक्तोऽपि न हेयः व्रजवासी तु सर्वसद्गुणयुक्त एवेति कथं त्याज्यः स्यादित्यपिशब्दार्थः। लोकेप्सुभिः लोकद्वयापेक्षावतीभिः। अन्यथेह लोके परत्र च दुःखमेवेत्यर्थः। तत्र च पातक्येव परित्याज्य इत्याह—अपातकीति। पातकं पतनहेतुः पापविशेषः। तथा च स्मृतिः 'पतिं त्वपतितं भजेत्' इति। अतोऽत्रत्यानां सर्वेषामपि पापमात्राभावान्न हातुं योग्य एवेति भावः। वस्तुतस्तु तासां निश्चितेऽपि दृढभावे उत्कंठावर्धनार्थमेव तथोक्तमिति। श्लेषार्थश्चायम्—तस्माद्वस्तुतोऽहमेव पतिरिति स्थिते दुःशीलेत्यादिवचनानुसारेण तत्तद्दोषयुक्तोऽपि पतिर्न हातव्य इति स्थिते निखिलकल्याणगुणयुक्तः पतिरहं कथं हातव्यस्ते पुनस्तत्तद्दोषयुक्ता न च पतय इति कथं न हातव्या इत्याह—दुःशील इत्यादि॥ २५॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु परोपदेशपण्डित! सर्व्वथा पतयः परित्यक्ता एव, अधुना किं तदीयशुश्रूषाद्युपदेशेन? तत्राह—दुःशील इति। चौर्य्यादिरतः, दुर्भगो भाग्यादिहीनः, निष्फलोद्यम इत्यर्थः। वृद्धो जराभिभूतः, जडः कर्म्मादिषु सामर्थ्यहीनः, रोगी महारोगग्रस्तः, अधनोऽतिदरिद्रो निजोदरभरणेऽप्यसमर्थ इत्यर्थः। 'अपि'–शब्दस्य प्रत्येकमन्वयः, दौःशील्यादियुक्तोऽपि न हेयः, व्रजवासी तु सर्व्वसद्गुणयुक्त एवेति कथं त्याज्यः स्यादित्यपि–शब्दार्थः। दुःशील इत्यादीनां यथोत्तरमधमत्वं द्रष्टव्यम्। तत्र दुःशीलात् दुर्व्बलात् दुर्भगोऽधमः, दैवकृतत्वेन दौर्भाग्यस्यापरिहार्य्यत्वात्, तस्मादपि वृद्धः, वृद्धत्वस्य सर्व्वशक्तिह्रासात्, कामिनीनां प्रायोऽप्रियत्वाद् गृहकर्म्माद्यसिद्धेश्चाधमत्वमेव, तस्मादपि जड़ो धर्म्माधर्म्माज्ञानेन सत्कर्म्मसाधनाशक्त्या च सर्व्वदोषसम्भवात्तस्मादपि रोगी,—सघृणादिना सर्व्वलोकैः सदानादरात्, तस्मादप्यधमः क्षुद्वैकल्येनाशेषगुणमर्य्यादादिलोपादिति दिक्। स्त्रीभिरिति तासां पत्येकगतिकत्वात्, अतः सेवकैः कदाचिद्धेयोऽपीति सूचितम्। लोकेप्सुभिर्लोकद्वयापेक्षावतीभिः, अन्यथा इह लोके दुष्कीर्त्त्यादिकम्, परत्र च नरकादिकमित्यर्थः। तत्र च महापापरतः परित्याज्य एवेत्याह—अपातकीति; तथा च स्मृतिः—'पतिं त्वपतितं भजेत्' इति, अतोऽत्रत्यानां सर्व्वेषामप्यपातकित्वान्न हातुं योग्य एवेति भावः। वस्तुतस्तु पश्चात् कदाचित् कुतोऽपि धर्म्मादिविचारे सति स्वविषयक-भावविशेषे शैथिल्यं सम्भवेदिति। तन्निरसनेन स्वयमेवादौ धर्म्मश्रावणेन तासां भावो दृढीकृत इति। यद्वा, इदमपि पूर्ववन्नर्म्मैव तद्भजनापेक्षया सौशील्यादिषड्गुणयुक्तस्यापि पत्युर्हेयत्वात्तन्निरूपितमेव, श्लेषार्थश्चायम्—आपद्भ्यः पातीति पतिरहं दौःशील्यादियुक्तोऽपि सन्, तथा अपातकी धर्म्मादपतितोऽपि सन्, लोकद्वयेप्सुभिरपि पतिपुत्रादीच्छुभिरपि वा, स्त्रीभिर्व्रजांगनाभियुष्माभिर्न हातुं योग्य एव, किन्त्वालिंगनादिना सदा संगम्य एवेत्यर्थः। अहं तु न तादृशो भवाम्येव, सर्व्वसद्गुणवत्त्वेन युष्मदेकप्रियत्वेन च तद्वैपरीत्यात्; यूयञ्च मदपेक्षया लोकानपेक्षिका एव, तदधुनापि कथं नालिंग्येयेति भावः। यद्वा, प्राकृतस्तादृशषड्दोषयुक्तोऽपि पतिर्न हेयः, अहं तु तत्त्वतः पतिरेव, साक्षात् षड्गुणैश्वर्य्ययुक्तश्च, कथं हेयः स्यामिति। सर्व्वत्यागेन यूयमागता यत् तदुपपन्नमेव। यद्वा, लोकेप्सुभिरेव न हातव्यः, परमार्थेप्सुभिस्तु सौशील्यादियुक्तोऽपि अपातक्यपि हातव्यः, भवत्यस्तु मयि परमानुरागाकृष्टत्वाल्लोकद्वयमर्य्यादातिगा एवेति भावः। तत्र सिद्धान्तो लिखित एव। यद्वा, गोपेभ्योऽभ्यसूयन्नाह—स्त्रीभिर्व्रजस्त्रीभिरपातक्यपि दुःशीलादिरूपः पतिर्न हातव्यो न गन्तव्यः 'ओहाङ् गतौ' इत्यस्य; दुःशीलः क्रोधनः, दुर्भगः कुरूपः, वृद्धो जीर्णः, जड़ो मूर्खः, रोगी सदा व्याधितः, अधनो बहुगोधनहीनः, लोकेप्सुभिर्मल्लोककामाभिः॥ २५॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दुश्शील इति। दुश्शीलो दूराचाररतः दुर्भगः कुरूपी वृद्धो जरितः रोगोऽस्यास्तीति तथा न विद्यते धनं वित्तं यस्य तथाभूतोऽपि पतिः लोकेप्सुभिः पुण्यलोकानिच्छन्तीभिः स्त्रीभिर्न त्याज्यः महापातकसंयुक्तस्तु हातव्य इत्यभिप्रायेण विशिनष्टि-अपातकीति। यद्वा, एवम्भूतोपि पतिरपातकी स्त्रीणां निदुष्ट एवातः स न हातव्य इत्यर्थः, लोकेप्सुभिरित्यनेनादृष्ट भयं प्रदर्शितम् ॥२५॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पत्युः दौःशील्यादिदोषसद्भावेऽपि स्त्रीभिस्तत्त्यागो न विहित इत्याह—दुःशील इति। दुःशीलः कलहादिशीलसम्पन्नः दुर्भगो निर्वीर्यः कान्तिविहीनो वा वृद्धः गतवयाः जडः स्वकार्यमूढः रोगो भग्नाङ्गोऽल्पाङ्गः कुष्ठादिव्याधिपीडितो वा ब्रह्महत्यादिदोषसद्भावे कथं न हातव्य इति तत्राह, लोक इति। दौःशील्यादिदोषसद्भावेऽपि ब्रह्महत्यादिपञ्चमहापातकरहितश्चेत् पतिः शुचिरेव न हातव्योऽन्यथा विदोष इति भावेन लोक इत्युक्तम् ॥ २५ ॥

श्रीमज्जोवगोस्वामिकृतः क्रमसन्दर्भः

एवमेव दुश्शील इत्यादि योज्यम् ॥ २५–४२ ॥

श्रीमज्जीवगोस्वामिकृतोः बृहत्क्रमसन्दर्भः

पुनस्तेनैव क्रमेणार्थद्वयं प्रकाशयति दुःशील इत्यादि। प्रकृतपक्षे सुगमम्। तस्माद् घोषं गत्वा पतीनेव शुश्रूषध्वमिति भावः। पक्षे—लोकेप्सुभिरेवेदम्, न तु मदीप्सुभिः। मदीप्सुभिस्तु पतीन् हित्वाप्यहमेव भजनीयः–ममैव वास्तवपतित्वात्। तस्मान्मा घोषं व्रजत इहैव स्थित्वा मां भजतेत्यर्थः ॥ २५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

दुःशील इत्यादि। लोकेप्सुभिरेव, न तु मदीप्सुभिः मदीप्सवस्तु मामेव भजन्ति लभन्ते च, (गी० ९।२५) "यान्ति मद्याजिनोऽपि माम्" इतिवत् ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, भवदभिस्नेहवतीनामस्माकमननुरूपाः प्रतिकूलशीला अरोचकास्ते पतयः कथं सेव्या भवन्त्वित्यत आह–दुःशील इति। अपातकीति "पतिं त्वपतितं भजेत्" इति स्मृतेः। पतनहेतुपातकवानेव पतिस्त्याज्य इत्यर्थः। लोकेप्सुभिः पतिलोके सुखवाञ्छावतीभिः पक्षे लोकेप्सुभिः इह लोके परलोके चातिक्षुद्रकीर्त्तिसुखाद्यपेक्षावतीभिरेव न हातव्यः युष्माभिस्तु लोकद्वयाय जलाञ्जलीर्दत्त्वा मन्माधुर्यसुखवारिधौ खेलन्तीभिः प्रथमत एव पतिस्त्यक्त एव ॥ २५ ॥

श्रीरसिकाल्हादिनी टीका

आत्म–शुश्रूषणं त्याजयित्वा पत्यादि-शुश्रूषणमुपदिशति शाब्दप्रतीत्या मन्यमाना पित्ताक्रांन्तः रसनायां सितां त्याजयित्वा कणाप्रयोगं कुर्वन्निवेति किमस्मान् क्षारमिवापर्यन् दुःखी करोतीति वीक्षमाणाः प्रति आत्मशुश्रूषणं द्रढयितुं पुनरपि तमेव धर्मं कथयति फलादर्शनात् वृद्धः वयः विपरिणामवान्, कर्मकरणैर्शिथिलः मूढत्वात् रोगी राजरोगाक्रांतः पूर्वजन्मनि महापातकीत्वात् "ब्रह्महा क्षयरोगादिति" स्मृतेः, अधनः दरिद्रः निजोदरभरणेऽप्यपर्याप्तत्वात्, षट्–दोषयुक्तोपि पतिश्चेत्पालकश्चेत् तदा स्त्रीभिरन्याभिः लौकिकीभिर्न त्याज्यस्तेन स्वत एव त्यक्ताभिरपि अपिशब्दः यतो लोकेप्सुभिः लोकद्वयमिच्छतीभिः, इह लोके निंदाश्रवणात् परलोके नरकदुःखश्रवणाच्च महापातकसम्बन्धश्चेत्तदा त्याज्य एवेत्याह अपातकी चेत् न त्याज्यः पातकी त्याज्यः तथा भवतीनां पतयस्तु नैवंविधाः किं तु सुशीलाः शुभगास्तरुणाः कर्मकरणे दक्षाः अरोगाः बहु-गोधनधान्ययुक्ता भवतीषु सस्पृहा अपातकिनश्च ते कथं त्याज्याः, एकस्यापि दोषस्य सद्भावे सर्वथा उचितो नान्यथेति अन्यच्च सदा निरपेक्षे औदासीन्ययुक्तेप्यनुरागः नोचित इति भावः। इदानीं वास्तवमर्थमाह-दुःशोल इत्यादि षट् दोषयुक्तोऽपि पति स्त्रीभिर्साधु कुर्वतीभिर्भवतीभिर्न हातव्यः किमुताहं सुशीलत्वादि-गुणयुक्तः, अन्यैः षट्-गुणैः युक्तत्वात् मुख्यपतिवृरहमेवातिष्ट्यादि–भयनिवारणसमर्थत्वात्। युष्मत्सदृशीभिर्मत्सदृशः पतिर्न हातव्यः पातकीत्यस्यायमभिप्रायः। व्रजे पापमात्रस्थायिसंभावना नास्ति किमुत महापातकसंभवः सत्यां निषेधः संभवतीति। तदुक्तं "अवैष्णवनमस्कारादय-माना जनार्दने। वैष्णवे कलहाच्चैव, पतन्तीह न संशयः ॥ ता वार्यमाणा इत्युक्त्वा कलहेन निवारणे जाते इति कलहात्पातसंचारो जातः, मत्प्रवणवितानां निवारणात् मदीर्ष्याकुलत्वात् ममाप्यपमानो महापातकसंचारो जातस्तस्मात् सर्वथा त्याज्या एवेति लोकेप्सुभिः लोक्यते प्रकाश्यते इति लोको रमणानन्दप्रकारस्तदिच्छुभिर्युष्माभिः निजाभीष्टप्रदः पतिरहं न हातव्यः किं दयालुना मया सह रमध्वमिति गूढोभिऽप्राय इति ॥ २५ ॥

विशुद्धरसदीपिका

ननु, परोपदेशपण्डित ! सर्वथा परित्यक्ता एव हि ते किं तदीयशुश्रूषाद्युपदेशेनेति तत्राह—दुःशील इति । चौर्य्यादिरतः दुर्भगः निष्फलोद्यमः वृद्धो जरावान् जडः कर्म्मादिषु सामर्थ्यहीनः रोगी पापरोगवान् अधनः अतिदरिद्रः पतिरित्यादिस्पष्टम् अपातकी "पतिं त्वपतितं भजेत्" इति सप्तमोक्तः कृतमहापातकस्याकृतप्रायश्चित्तस्य शुद्धिपर्य्यन्तमभजनमुपदिष्टमिति पक्षे दुर्गाव्रतपरा उद्दिश्याह–भर्त्तु रिति । अमाययेत्यन्वेयं कन्याभिर्निजसद्भाववृतत्वेनेत्यर्थः । ननु बलात्पित्राद्यापादितत्वेन यो भर्त्ता मल्लक्षणस्तस्यैव शुश्रूषणं परा धर्मः तथा तद्बन्धूनामित्यादि अन्यत्र परमधर्मविदां भीष्मादीनामम्बादिपरित्यागाद्धर्मतो भर्तृत्वासिद्धेर्न सद्भावः दुष्यन्तादिभिश्च गान्धर्ववृतेः स्वीकारादयमेव सद्भाव इति भावः । अथवा परकीयाभिमानिनीरालक्ष्याह—वस्तुतस्तु सर्वमिदं तासां प्रतारणार्थं ज्ञेयम्, वस्तुतस्तु सखीराह–भर्तुः शुश्रूषणं स्त्रीणां परो धर्मः नच यूयं कस्यापि स्त्रियः, नच भवतीनां कश्चित्पतिरिति यदि चास्ति स चाहमेव सोप्यमायया माया शब्दोत्र कैतववचनः नच सकामत्वमेव तत्रापि दाम्पत्यमेव तदभावोऽमाया तया शुद्धसख्यवतीनां प्राणसख्याः पतिरहमेव पतिरित्युपचरितः शुश्रूषणीय इति भावः ॥ २५ ॥

श्रीरामनारायणकृता भावभावविभाविका

प्रथमपक्षे नास्मत्पतयस्त्वत्समगुणवन्तो येन सेवार्हा भवेयुस्तत्राह–दुःशील इति । क्रोधादियुक्तः दुर्भगः कुरूपः वृद्धो गतयौवनः जडो मूर्खः अधनो दरिद्राक्रान्तोऽपि पतिः यावदपातकी लोकेप्सुभिः स्त्रीभिर्न हेयः, अतो व्रजे गत्वा तत्सेवनमेव कार्यम्॥ द्वितीयपक्षे तु यदीदृशोऽपि पतिर्न हातव्यः किन्तु सेव्य एव तदा मत्सदृशः सुशीलः सुभगो नवकिशोरो रसिकशिरोमणिर्नित्यनिरामयसच्चिदानन्दविग्रहो लक्ष्मीपतिः परमार्थपतिः सेव्य इति तु किमु वाच्यमिति ॥ २५ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

यतः परिरेव स्त्रियः परमं दैवतं तदाराधनं च परमो धर्म्मः तेनैव च लोकद्वयविजय इति लोके शास्त्रे च घण्टाघोषस्तस्मात् दुश्शीलत्वाद्यनेकदोषयुक्तोऽपि न त्याज्यः किमुत दोषविनिर्मुक्त इत्याशयेनाह–दुःशील इति । दुष्टं शीलं द्यूतादिव्यसनं यस्य सः दुर्भगो मन्दभाग्यः वृद्धो जर्ज्जरीभूताङ्गः जडो मूर्खः रोगी महारोगग्रस्तः अधनः स्वोदरपूरणेऽप्यसमर्थः एवमुक्तदोषेष्वेकैकदोषवान् किं वा सकलदोषयुक्तोऽपि पतिः लोकद्वयविजयेच्छावतीभिः स्त्रीभिर्न हातव्यो नैव त्याज्य पातकी तु यावत् पातकी तावद्धातव्यः "पतिं त्वपतितं भजेत् आशुद्धेः सम्प्रतीक्ष्यैव महापातकदूषितः" इत्यादिशास्त्रवचनात् अनभिज्ञापक्षे । ननु, अस्माकं पतयो नाऽस्मदनुकूला अनुरूपाश्चेतरासक्ता एवाऽतः किं तत्सेवाद्युपदेशेनेति चेत्तत्राह–दुःशील इति । षड्विधैश्वर्ययुक्तमपि परपुरुषमवलोक्य षड्विधदोषयुक्ताऽपि स्वपतिर्न हातव्यः, व्रजवासी तु सर्वसद्गुणयुतो निष्पापश्चातः कथं त्याज्यो भवेदित्याशयः मानिनीपक्षे तस्माद्बलात्कारेण हृतयाम्बया यत्स्वमनसा वृतः पतिः न त्यक्तो यथा च सावित्र्या पितुर्वाक्यात् सत्यवान्न त्यक्तस्तथान्याभिः युष्मदादिभिः स्त्रीभिर्मनसा वृतः पतिर्न हातव्यः तत्रापि षड्विधैश्वर्य्यसम्पन्नोऽहं न तु दुःशीलेत्यादियुक्तो वस्तुतः सर्वदोषयुक्तोऽपि न त्याज्यः पतिरित्येकवचनात् स्त्रीभिरिति बहुवचनात्स्वस्यैव सर्वासां पतित्वं दृढीकृतं तथा च तेषां वस्तुतः पतित्वाऽभावान्न तत्त्यागे कश्चिद्दोप इति भावः । निवृत्तिपक्षे तत्र दृष्टान्तमाह–दुःशील इति । वाशब्द इवार्थे तथा च यथा पतिसम्पृक्तत्वं पतिव्रतायाः स्त्रियस्तथा वाचापि स्वार्थसम्पृक्तत्वमिति भावः ॥ २५ ॥

रास–रहस्यम्

र० टी०—अपातकी पतनमनिच्छन्तीभिः लोकेप्सुभिः लोकनं दर्शनं आत्मदर्शनमिच्छन्तीभिः स्त्रीभिः वृत्तिभिः पतिः आत्मा चेतना दानेन परमपालयितृत्वात् दुःशीलः दुःखेन शीलयितुं वाचा मनसा ज्ञातुमशक्यत्वात्, "अवाङ्मनसगोचरम् ।" इति श्रुतेः, दुर्भगः निष्फलोद्यमः भवितुं शक्यः, वृद्धः पुरातनतमत्वात्, जड़ अव्ययत्वात् अवयवी एव व्यति हीयते चलति च, कुटवत् स्थितत्वात् वा, रोगी "रागा जीर्णेन जीर्यतः ।" रागवानिव दृश्यते इति रागी, रागी एव रोगी, अधनः न धनेन प्राप्तुं योग्यः "न प्रजयाधनेन" इति श्रुतेः, न हातव्यः न त्यक्तुं योग्यः ॥ २५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पतिरेवमनेवं चेत्सेवनीयोऽसेवनीयश्च वनिताभिरित्याह ॥ दुःशील इति । दुःशीलो दुराचारो दुर्भगो निर्वीर्यो वृद्धो जरठो जडो मूढो रोगी कुष्टादियुतोऽधनो दरिद्रो लोकेऽवलोकने योऽशुचिर्निर्नैर्मल्यः सोऽपि न हातव्यो न त्याज्योऽपातकी पञ्चमहापातकरहितः । अनेन पातकित्यागे समयसम्मतिं सूचयति । यदि स्यान्नैव पातकीत्यादेः । लोकेप्सुभिरपातकीति पाठे लोकमीप्सवो लोकेप्सवस्ताभिः ॥ २५ ॥

श्रीसुबोधिनी

दुःशीलो दुर्भगो वृद्धो मूर्खो रोगी च निर्द्धनः पतिः स्त्रीभिर्न त्यक्तव्यः लोकमिच्छंतीभिः अपातकी शुद्धः ॥ २५ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

दुःशील इत्यादिना क्रमेण यश ऐश्वर्यवीर्यज्ञानवैराग्यश्रीविरुद्धा धर्मा उक्ता इत्याशयेनाहुः **षड्दोषः स इतीति**। स्थिति पक्षे स्वतोपि धर्मी दुष्ट इति पातकसम्बन्धोक्त्या ज्ञाप्यते। कदाचित्त्याज्यत्वेन नित्यमभजनीय इत्यपि तथा ॥ २५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तथापि दुष्टस्य त्यागो युक्तः' इत्याशङ्क्याह–दुःशील इति। दुष्टं शीलं यस्य सः द्यूतस्तेयादिव्यसनवान्, दुर्भगो-निष्फलोद्यमः, वृद्धः विकलेन्द्रियः, जडो मूर्खः, रोगी महारोगग्रस्तः, अधनो दरिद्रः, एवंभूतोऽपि पतिः स्त्रीभिर्न हातव्यः। 'तर्हि कुतः काश्चित्त्यजन्ति ?' तत्राह–लोकेप्सुभिरिति। पुण्यलोकमिच्छन्तीभिः। त्यज्यन्त्यस्तु नारक्यो ज्ञेया इत्याशयः॥ परन्तु "आ विशुद्धेः प्रतीक्ष्यो हि महापातकदूषित" इति स्मृतेः 'ब्रह्महत्यादियुक्तो दूरत एव सेव्यः, तत्सम्पर्कस्तु वर्जनीय' इत्याशयेनाह— अपातकीति ॥ २५ ॥

अन्वितार्थप्रकाशिका

दुःशील इति ॥ **दुष्टं शीलं यस्य सः** द्यूतस्तेयादिव्यसनवान् दुर्भगो निष्फलोद्यमः वृद्धः विकलेन्द्रियः जडो मूर्खः रोगी महारोगग्रस्तः अधनो दरिद्र एवंभूतोऽपि पतिः अपातकी महापातकरहितश्चेत् लोकेप्सुभिः स्त्रीभिर्न हातव्यः। अतः व्रजं गत्वा पतीन् शुश्रूषध्वम्। अथ च वस्तुतोऽहमेव पतिरिति स्थिते दुःशीलतादियुक्तोऽपि पतिर्न हेयः किं पुनः सर्वगुणसम्पन्नोऽहमिति अतोऽत्रैव मया सह रमध्वम् ॥ २५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अपातकी महापापादिपातकैरदूषितः एवंभूतोपि पतिः लोकं स्वर्गमाप्तुमिच्छंतीति लोकेप्सवस्ताभिः न त्याज्यः ॥ २५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दुःशील इति ॥ दुःशीलो दुराचारः, दुर्भगः कुरूपी, वृद्धः जर्जरितः, जडो मूर्खः, रोगी रोगाक्रान्तः, वा न विद्यते धनं वित्तं यस्य तथाभूतः अपि, पतिः, लोकान् पुण्यलोकानाप्तुमिच्छन्तीति तथाभूताभिः, स्त्रीभिः, न हातव्यः न त्याज्यः। महापातकयुक्तस्तु हातव्य इत्यभिप्रायेण तं विशिनष्टि। अपातकी पतिरपि महापातकयुक्तश्चेद्धातव्य इत्यर्थः ॥ २५ ॥

कृष्णप्रिया

जिन स्त्रियों को उत्तम लोक प्राप्त करने की अभिलाषा हो, वे पातकी को छोड़कर किसी भी प्रकार के पति का परित्याग न करें। भले ही वह बुरे स्वभाव वाला, भाग्यहीन, वृद्ध, मूर्ख, रोगी या निर्धन ही क्यों न हो ॥ २५ ॥

अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम्। जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः ॥ २६ ॥

कर्दमक्षमा

अन्वयः—कुलस्त्रियाः, औपपत्यम्, अस्वर्ग्यम्, अयशस्यम्; फल्गु, कृच्छ्रम्, भयावहम्, सर्वत्र, जुगुप्सितम्, च ॥२६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

फल्गु तुच्छं कृच्छ्रं दुःसंपाद्यम् औपपत्यं जारसौख्यम् ॥ २६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कामस्य पुरुषार्थत्वेन पतिदोषेण तदप्राप्त्या जन्मनो नैष्फल्यापनुत्तये प्रकारांतरेण किं जन्मसाफल्यं न कार्यमिति चेत्–तत्र बाधकमाह। चोऽवधारणे। उपपतिः—पत्युः प्रतिनिधिरुपपतिर्जारः 'जारस्तूपपतिः समौ' इत्यमरः। तत्संबंधि कर्म ग्राम्यलक्षणं तत्कुलस्त्रियाः सर्वत्र पत्युरुत्तमाधममध्यमेषु पुरुषेषु जुगुप्सितं गर्हितमेवेत्यन्वयः। कथम्, तदुच्यते—अस्वर्ग्यम् स्वर्गविरोध्येव, प्रत्युत सप्तसूर्म्यादियातनाप्रदम्। किञ्च, अयशस्यम् इहामुत्र दुष्कीर्तिकरम्। तथापि न बहुलं फल्गु तुच्छफलम्। अल्पकालविषयत्वात्कादाचित्कत्वेनेत्यर्थः। कृच्छ्रमिति व्याख्यातं स्वामिपादैः। दुःसंपाद्यमिति कर्तुरतिश्रमसाध्यत्वात्। भयावहम् मरणादिभयकरम्। निधुवने तत्पत्यादिसमागमादिनेत्यर्थः। पक्षे—उप समीपे पतिर्यस्याः सोपपतिस्तस्या भावस्तत्त्वम्, अष्टयामं पतिसामीप्यम्। कु कुत्सितं लात्याददातीति कुला सा चासौ स्त्री च तस्या एव न तु मन्निष्ठानां युष्माकम्। ताराहल्यादीनां तु व्यभिचारादप्यौपपत्यं जुगुप्सितं न जातं पुनः पतिभिरंगीकरणादिति ॥ मयि स्नेहसामान्यवत्यो भवत्यः स्वभावाद्भवन्त्येव किन्तु धर्मप्रतिकूलधर्मविशेषस्तु सर्वथैव त्याज्य इत्याह—अस्वर्ग्यमिति। मास्तु स्वर्ग इति चेत्—अयशस्यम्। यशोऽपि मा स्यादिति चेत्—फल्गु। मिथ्यैव ब्रूषे नेदं फल्गु सर्वोत्कृष्टत्वेनानुभूतत्वादिति चेत्—कृच्छ्रम्,–पत्यादिवारणकष्टमयम्। ननु "वामता दुर्लभत्वं च

स्त्रीणां या च निवारणा । तदेव पंचबाणस्य मन्ये परममायुधम् ॥" इति, "दुःखमप्यधिकं चित्ते सुखत्वेनैव रज्यते" इति च रसशास्त्रोक्तेः प्रत्युत तत्कृच्छ्रं रागवतीनामस्माकं सुखाशयहेतुरेवेति चेत्—भयावहम्, लोकशास्त्रनिषिद्धत्वादैहिकपारत्रिकभयप्रदम्। ननु "यत्र निषेधविशेषः सुदुर्लभत्वं च यन्मृगाक्षीणाम्। तत्रैव नागराणां निर्भरमासज्जते हृदयम् ॥" इति रसशास्त्रोक्तेः प्रत्युत रसाधायकमेवैतदिति तत्राह—जुगुप्सितमिति। सर्वदेशे सर्वकाले औपपत्यमुपपतिकर्तृकं कर्म कुलस्त्रिया जुगुप्सितमिति। सर्वत्र तद्वती कुलस्त्री निंद्यत इत्यर्थः। तत्र यद्यपि स्वाभीष्टसिद्ध्या स्वनिंदापि सुसहैव तथापि मत्प्रणयास्पदानां युष्माकं निंदा मयापि कथमुत्पादनीयेति। अतो गोष्ठमेव यातेति भावः। पक्षे—सर्वत्रेति जुगुप्सितमिदं सार्वत्रिकमेव, प्रस्तुते तु मम नारायणसमत्वं गर्गमुखपरंपरया श्रुतमेव युष्माभिरित्यतो ममौपपत्येऽपि नैव निंदा। परमेश्वरत्वेन शुभाशुभकर्मातीतत्वादिति भावः॥ २६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु श्रीव्रजयुवराज भवदाज्ञया नैव पतयस्त्याज्याः किं तु सदा नाम्नैव तेषां पतित्वं पतित्वव्यवहारस्तु त्वया सहैवास्तामित्याशंक्य तासां दीर्घाभीष्टनिंदनेन परमाप्रियमवहित्थया साभ्यसूयमिवाह—अस्वर्ग्यमिति। अस्वर्ग्यम् स्वर्गप्राप्तौ प्रतिकूलम्। अयि कामिन्यो दृष्टत्वाभावान्मास्तु स्वर्गापेक्षा इह लोके यशोऽपेक्षा त्वस्त्येव तद्बाधकं चेत्याह—अयशस्यमिति। पूर्वसंचितयशसोऽपि लोपकम्। ननु सुगुप्तमेवैतत् को नाम जानातु तत्राह—तथापि फल्गु तुच्छम् अस्थिरत्वात्। ननु भो अच्युत त्वया सहास्माकं तत्सुस्थिरमेव तत्राह—तथापि कृच्छ्रं दुःखसाध्यम्। ननु स्वैरसिंह व्रजे श्रीवृंदावने च स्वच्छंदविहरणात्सुखसाध्यमेव तत्राह—तथापि भयं परलोकात्कदाचित् स्वाम्यादिभ्यश्च तत् आ सम्यग्वहति प्रापयतीति तत्। ननु अमृतनिर्मंछनीयमधुराधरत्वदपेक्षयास्माभिः सर्वमुपेक्षितमेवेति कुतोपि न भयं तत्राह–तथापि सर्वत्र स्वदेशपरदेशयोर्व्यवहारपरमार्थयोश्च जुगुप्सितं निन्दितम्। हि निश्चितम्। ननु तत्त्वज्ञेन्द्र निजाभीष्टसिद्ध्या जुगुप्सापि सुसहैव तत्राह—कुलस्त्रिया इति। जातावेकत्वम्। कुलकलंकतोऽपि कुलस्त्रीणां परमानुचितमिति सर्वथा परिहार्यमेवेति भावः। वस्तुतस्तु पूर्ववदुत्कंठावर्द्धनार्थमेवेति। श्लेषार्थश्चायम्—पूर्ववदेव धर्मोपात्तः पतिस्तद्विपरीतस्तूपपतिरिति। अथ च लोकेऽप्यन्यथा प्रसिद्धिमालक्ष्य स्मृतिवाक्यमिदं छलार्थतया नर्म व्यंजयति। उप समीपे पतिर्यस्याः सा उपपतिस्तस्या भाव औपपत्यम्। पत्युः सामीप्यमित्यर्थः। तत्सर्वथाऽस्वर्ग्यादिदोषयुक्तमिति। एवं भर्तुः शुश्रूणमित्यत्र परः सर्वाधिक एवाऽधर्म इति व्याख्येयम्॥ २६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु श्रीव्रजयुवराज! भवदाज्ञया नैव पतयस्त्याज्याः, किन्तु नाम्नैव खलु तेषां पतित्वम्, पतिव्यवहारस्तु त्वया सहैवास्तामित्याशंक्य तासां दीर्घाभीष्टनिन्दनेन परमाप्रियमवहित्थया साभ्यसूयमिवाह—अस्वर्ग्यमिति। स्वर्गाप्तौ प्रतिकूलं किंवा पूर्वपुण्यार्जित–स्वर्गनाशकमित्यर्थः। अयि कामिन्यः! अदृष्टत्वान्मास्तु स्वर्गापेक्षा, लोके यशोऽपेक्षास्त्येव, तद्बाधकञ्चेदमित्याह–अयशस्यमिति। पूर्वसञ्चितयशसोऽपि लोपकमित्यर्थः। ननु लोकातीत! सुगुप्तमेतत् को नाम जानातु? तत्राह—फल्गु तुच्छमस्थिरत्वात्। ननु, भो अच्युत! त्वया सहास्माकं तत् सुस्थिरमेव, तत्राह—कृच्छ्रं दुःखसाध्यमित्यर्थः। नतु, स्वैरिसिंह! व्रजे श्रीवृन्दावने च स्वच्छन्दविहरणात् सुखसाध्यमेव, तत्राह—भयं स्वाम्यादिभ्यो नरकादिभ्यश्च, तत् आ सम्यक् वहति प्रापयतीति तत्। ननु अमृतकोटिमधुराधर! त्वदपेक्षयास्माभिः सर्वमप्युपेक्षितमिति कुतोऽपि न भयम्, तत्राह—सर्वत्र स्वदेशे परदेशे च, यद्वा, लोके परमार्थेऽपि जुगुप्सितं निन्दितम्, लज्जाकरत्वात् घृणावहत्वाद्वा। हि निश्चितम्। ननु तत्त्वज्ञेन्द्र! निजाभीष्टसिद्ध्या जुगुप्सापि सुसह्यैव, तत्राह—कुलस्त्रिया इति जातावेकत्वम्, कुलकलंकतस्तत् कुलस्त्रीणां परमानुचितमिति सर्वथा परिहार्य्यमेवेति भावः। वस्तुतस्तु पूर्ववत् स्वविषयकभावदाढर्य्यार्थमेव। श्लेषार्थश्चायम्,—अप्यर्थे चकारः, अस्वर्ग्यादिरूपमप्यौपपत्यं कुलस्त्रिया अपि भवत्येव, ताराहल्यादीनामपि तच्छ्रवणात्; अतः साधारण्यापत्त्या दोषविशेषो नास्तीति भावः। किञ्च, कुत्सितं लाति आददातीति कुला या स्त्री तस्या एवास्वर्ग्यादिकम्, युष्माकन्तु निखिलसर्वस्वसारं मद्भावमाददानानां तन्नेति, तात्पर्य्येण नर्म्म च ज्ञेयम्। यद्वा, नर्म्म आह—उप समीपे पतिर्यस्याः सा उपपतिः, तस्या भाव औपपत्यं पत्युः सामीप्यमित्यर्थः। तत् सर्वथा अस्वर्ग्यादिदोषयुक्तम्, कुलस्त्रिया इति राधामुद्दिश्योक्तम्॥ २६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

औपपत्यमुपपतित्वम्॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ दृष्टभयप्रदर्शनेन प्रत्याचष्टे–अस्वर्ग्यमिति। कुलस्त्रियः, औपपत्यं भर्त्तरि सत्यसति वा योऽन्यः सङ्गम्यते स उपपतिः तस्य कर्मौपपत्यं तत्सङ्गमनं "पत्यन्तपुरोहितादिश्यो यक्" (४।१।१।२८) इति कर्मणि यक् अथवा भावे यक् उपपतिमत्त्वं तदस्वर्ग्यमसुखकरमयशस्करं तुच्छं दुःखावहं भयावहं च सर्वत्र निन्दितं च॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कामस्य पुरुषार्थत्वेन पतिदोषेण तदप्राप्त्या जन्मनो निष्प्रयोजनत्वमापन्नमिति प्रकारान्तरेण साफल्यमापादनीयम् । हीति विपक्षे बाधकमाह–अस्वर्ग्यमिति । चशब्द एवार्थे उपपतिः पत्युः प्रतिनिधिः उपपतिः जारस्तत्सम्बन्धि कर्म ग्राम्यलक्षणं तत्कुलस्त्रियः सर्वत्र पत्युरुत्तमाधममध्यमेषु पुरुषेषु जुगुप्सितमेवेत्यन्वयः । कथं तदुच्यते अस्वर्ग्यं स्वर्गविरोध्येव न भवति किन्तु अयशस्यम् इहामुत्र च दुष्कीर्त्तिकरं च तथापि न बहुलं फल्गु तुच्छफलम् अल्पकालविषयत्वात् कृच्छ्रं कष्टं "स्यात्कष्टं कृच्छ्रम्" इत्यमरः । कृच्छ्रं कर्त्तुः श्रमसाधनं वा मरणादिभयजनकम् ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

पुनस्तेनैव क्रमेणाह—अस्वर्ग्यमित्यादि । कुलस्त्रिया उपपत्यमुपपति–करणं सर्वत्रास्वर्ग्यमित्यादि । तस्माद्घोषं गत्वा पतीन् भजतेत्यर्थः । पक्षान्तरे–कुलस्त्रिया उपपत्यं सर्वत्रास्वर्ग्यमित्यादि, न तु सर्वातीते मयि, उपपत्याभावात्; वास्तवः पतिरहमेव, तस्मादविचारमेवेह स्थित्वा मां भजतेत्यर्थः ॥ २६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पतित्यागस्तु महद्दूषणमित्याशङ्क्याह—अस्वर्ग्यमित्यादि । सर्वत्र प्रपञ्चे, सर्व–शब्दोऽत्र विश्वपरः सर्वत्र ब्रह्मादि-पर्यन्तेऽपि उपपत्यमस्वर्ग्यमयशस्यादि च, सर्वातीते मयि तु न तथेति द्वितीयोऽर्थः । मम उपपत्यं नास्ति, पतिरेवाहमिति भावः । तथा च लक्ष्मीः (भा० ५।१८।१९,२०) "स्त्रियो व्रतैस्त्वा हृषीकेश्वरं स्वतो ह्याराध्य" इति, स वै पतिः स्यादकुतोभयः स्वयम्" इत्यादि ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मयि स्नेहसामान्यवत्यो भवत्यः स्वभावाद्भवन्त्येव किन्तु धर्मप्रतिकूलः स्नेहविशेषस्तु सर्वथैव त्याज्य इत्याह—अस्वर्ग्यमिति । मास्तु स्वर्ग इति चेदयशस्यम् यशोऽपि मास्त्विति चेत् फल्गु मिथ्यैव ब्रूवे नेदं फल्गु सर्वोत्कृष्टत्वेनानुभूतत्वादिति चेत् कृच्छ्रं पत्यादिवारणकष्टमयं ननु "वामतादुर्लभत्वं च स्त्रीणां या चानिवारणा । तदेव पञ्चबाणस्य मन्ये परममायुधम्" ॥ इति "दुःखमप्यधिकं चित्ते सुखत्वेनैव रज्यते" इति रसशास्त्रोक्तेः प्रत्युत तत् कृच्छ्रम् रागवतीनामस्माकं सुखातिशयहेतुरेवेति चेत् भयावहं लोकशास्त्रनिषिद्धत्वादैहिकपारत्रिकभयप्रदं ननु "यत्र निषेधविशेषः सुदुर्ल्लभत्वं च यन्मृगाक्षीणाम् तत्रैव नागरीणां निर्भरमासज्जते हृदयम्" ॥ इति रसशास्त्रोक्तेः प्रत्युतरसाधायकमेवैतदिति तत्राह—जुगुप्सितमिति ॥ सर्वदेशे सर्वकाले औपपत्यम् उपपतिकर्तृकं कर्म कुलस्त्रियाः जुगुप्सितमिति सर्वत्र तद्वती कुलस्त्री निन्द्यते इत्यर्थः । तत्र यद्यपि युष्माभिः स्वाभीष्टसिद्ध्या स्वनिन्दापि सुसहैव तथापि मत्प्रणयास्पदानां युष्माकं निन्दा मया कथमुत्पादनीयेत्यतो गोष्ठमेव यातेति भावः । पक्षे सर्वत्रेति जुगुप्सितमिदं सार्वत्रिकमेव प्रस्तुते तु मम नारायणसमत्वं गर्गमुखपरम्परया युष्माभिः श्रुतमेवेत्यतो ममौपपत्येपि नैव निन्दा परमेश्वरत्वेन शुभाशुभकर्मातीतत्वादिति भावः ॥ २६ ॥

रसिकाह्लादिनी–टीका

अधुना यूथमुख्यादेवीः प्रत्याह अस्वर्ग्यमिति, औपपत्यं उपपतिजनितं सुखं कुलस्त्रिया इति जातावेकवचनं कुलस्त्रीणामन्यासामपि सर्वत्र जुगुप्सितं निंदितमिति । निन्दाभयमवगणय्यागतानां निन्दा न किंचित्करोति चेत्तत्राह अस्वर्ग्यं स्वर्गप्राप्तिप्रतिबन्धकं यागादिजन्यपुण्यविनाशकत्वात् । ननु स्वर्गापेक्षारहितानां किं स्वर्गसाधनेनेति चेत्तत्राह अयशस्यं दुःकीर्तिसंपादकं विगीताचरणात्तु "संभावितस्य चाकीर्तिर्मरणादतिरिच्यते" इति गीतोक्तेः । ननु केनाप्यलक्षितारागमनमत्र को वा ज्ञास्यतीति चेत्तत्राह फल्गु तुच्छं अल्पकालभोग्यत्वात् ननु भवतो यावदाकाक्ष थास्याम इति चेत्तत्राह—कृच्छ्रं दुःखसाध्यं कंटकहिंस्रादिवल्यावृतप्रदेशात् । ननु वृन्दावनस्य सुखरूपत्वात् त्वया सह स्वेच्छारमणात् सुखमेव प्राप्स्याम इति चेत्तत्राह भयावहं इह लोके पत्यादिभयं तस्मिन् भये प्रतिकार्येऽपि राजभयं दुःपरिहरमिति । अमुत्र भयमप्रतीकार्यमेव भय–संवलित–सुखेन रत्यादिकं भयानकस्य बलवत्वात भयमगणयंतीः प्रत्याह सर्वत्र स्वदेशे परदेशे च जुगुप्सितं निन्दितं कुलकलंकावहत्वात् । तस्मात् कुलस्त्रीणां साध्वीनां तत्परिहार्यमेवेति तदुक्तं । "अस्वर्ग्यं लोकविद्विष्टं धर्ममथाचरेन्न तु" । अयं भावः—निरपेक्षस्योदासीनस्य ममाविगीतेऽपि वृत्तिर्नास्ति । विगीते रागभवस्य नित्यसिद्धत्वादिति । इदानीं वास्तवमर्थमाह औपपत्यं सर्वत्र सर्वदेशेषु सर्वेषु पुरुषेष्वेव कुलस्त्रीणां जुगुप्सितं निन्दितं मम तु सर्वान्तरत्वान्मुख्यपत्युः संबन्धेनाविगीतमेव "विक्रीडितं व्रजवधूभिरिति" अग्रे वक्ष्यमाणत्वात् । कीदृशं अस्वर्ग्यमिति, अन्येषामपि मद्भक्तानां स्वर्गे इच्छानुदयात् किं पुनर्मत्प्रियाणामिति तदुक्तं "स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः" इति भवत्यस्तु पूर्वं देव्यः मत्संबद्धमौपपत्यं स्वर्गगतिप्रतिबंधकं जातमित्यर्थः । "एता परं तनुभृत" इति । "वंदे नन्द–व्रजस्त्रीणां

पादरेणुमिति" उद्धवादिभिस्तूयमानत्वात्। अत एव भवतीनां उत्तमाधिकारसंपादकमिति। फल्गु अल्पं कृच्छ्रं यत्र कंटकितप्रदेशोल्लंघनात् परिणामे बहुसुखप्रदत्वात् किं च भयावहं भयं न वहति प्रापयतीति, वेणुनादेन सर्वेषां मोहितत्वात्। अत्र कस्यापि भयमाकुरुत निःशङ्कं रमतेत्यर्थः। यद्वा कुलस्त्रीणां भवतीनां औपपत्यं पत्युर्मम समीपे यत्सुखं तदस्वर्ग्यं स्वर्गं न भवतीति। अत्रैव सुखं नास्त्यन्यत्रेति। पुनः कीदृक् अयशस्यं अयेन शुभदृष्टेन शस्यत्युत "अयः शुभावहो विधिरिति" कोशः। किं च फल्गु अत्यल्पं कृच्छ्रं दुःखं यत्र व्यभिचारिभावानां दुःखवत्प्रतीयमानत्वात्। भयावहं भयं कालभयं न वहति प्रापयतीति। सर्वदा निकटस्थितेः सर्वत्र मद्व्यतिरिक्तेषु पुरुषेषु युष्मद्व्यतिरिक्तानामन्यासां स्त्रीणामौपपत्यं युगुप्सितम्, औपपत्यं रसवृद्धिहेतुत्वान्मयः स्वीकृतं अन्यत्र नरकहेतुत्वात् वक्ष्यति न "नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः। विनश्यत्याचरन्मौढ्याद्यथा रुद्रोऽब्धिजं विषम्" इति। औपपत्यं रसवृद्धिहेतुत्वान्मया स्वीकृतमित्यभिप्रायः॥ २६॥

विशुद्धरसदीपिका

प्रथमे पक्षे। ननु, श्रीव्रजराजयुवराज! भवदाज्ञया नैव पतयस्त्याज्याः किन्तु नाम्नैव तेषां पतित्वमित्याशङ्क्य तासां दीर्घाभीष्टनिन्दनेनावहित्थया साभ्यसूयमाह—अस्वर्ग्यमिति। सतीलोकगमनावरोधकम् अयशस्यं लोकापवादकरम् फल्गु तुच्छम् अस्थिरत्वात् कृच्छ्रं दुःसम्पाद्यं भयावहं भयं दृष्टमदृष्टं च तमावहति तथा तत् औपपत्यं "जारस्तूपपतिः समौ" इत्यमरः। कुलस्त्रिय इति सङ्कोचोत्पादनं पक्षे ननु, भवदाज्ञया न त्यजामो लोकसंग्रहाय तत्समीपस्थितिरावश्यकीत्यत आह, श्लेषेण उपसमीपे पतिर्यस्याः सा उपपतिः नित्यमेव स्ववल्लभसान्निध्यवतीत्यर्थः "कृष्णरूपापि सा राधा नित्यं कृष्णामनुव्रता। तन्न भिन्ना निमेषार्द्धम्" इति माहेश्वरीसंहितोक्तेः। तादृशी श्रीराधा तस्याभाव औपपत्यं तस्याः सह वास इत्यर्थः। कुलस्त्रियः कुलशब्दः समूहवचनः तेन सखीसमूहो लक्ष्यते सहचरीसमूहैः स्वप्राणेश्वरी योगक्षेमपरैस्तस्याः समीपस्थैरेव भाव्यमिति भावः। तदुक्तमलङ्कारकौस्तुभे "क्वचिदग्रे क्वचित्पश्चात्क्वचित्पार्श्वे पदान्तयोः। सूर्यानुराधाच्छायेव सा राधा अनुवर्त्तत" इति तच्च अस्वर्ग्यं स्वर्गभिन्नं स्वर्गसदृशमिति "पर्युदासः सदृशग्राहीति स्मृतेः, मम नित्यधामप्रदमित्यर्थः "यातुधान्यपि सा स्वर्गम्" इत्यादिन्यायात् एवमयशस्यमपि अलौकिकसर्वलोकश्लाघनीययशःप्रदमित्यर्थः। "एता परं तनुभृतः" इत्यादेः। तथा फल्गूनां दाम्पत्यादिभावेन तुच्छानां कृच्छ्रं कष्टसाध्यं नहि कान्तभावाध्यासवतां शुद्धप्रेमव्यवहारः सुकर इति भावः। भयं न वहतीति भयावहं प्रत्युत न पारयेहमित्यादिना प्रेष्ठवंशकरं चाप्यर्थे तथा सर्वत्र जुगुप्सितमिति काकुः अपितु नेत्यर्थः तत्सम्बन्धिप्रेमावहत्वादिति भावः। कान्तभाववतीषु च अहमेव वास्तवः पतिरिति मत्पार्श्वे एव स्थेयमित्यर्थः। शेषं प्राग्वत्॥ २६॥

श्रीरामनारायणकृता भावभावविभाविका

कुलस्त्रीणामौपपत्यनिन्दामाह—अस्वर्ग्यमिति। पुण्यलोकनिवर्तकं प्रत्युत तद्विरुद्धनिरयार्तिहेतुः, एवमयशस्यं लोकापवादकरं फल्गु स्वल्पं क्षणिकं कृच्छ्रं दुःखसाध्यम् इहामुत्र च भयापादकं सर्वत्र लोकपरलोकयोर्जुगुप्सितं तत्र प्रथमपक्षे लौकिकभ्रान्त्यनुसारेण व्रजस्थपतिम्मन्यानां मुख्यपतित्वं कृष्णस्योपपतित्वं द्वितीयपक्षे परमार्थदृष्ट्या कृष्णस्य मुख्यपतित्वं तेषामुपपतित्वमेतावान् विशेषोऽन्यत्समानम् यद्वा, उपसमीपे पतिर्यस्याः सा उपपतिः श्रीः श्रीराधा वा तस्या भावं कृष्णैकपरत्वम् यद्वा, नित्यम् उप समीपे वर्तमानः पतिः उपपतिः कृष्णः तत्सेवैकपरममौपपत्यम् अन्ये पतिम्मन्यास्त्वनित्यत्वेनागमापायित्वेन च नोपवर्त्तमाना न वा पतयः पालकाश्च तदुक्तम्—

"सन्तं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय। अकामदं दुःखभयाधिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा"॥

स्त्रियो वृतैस्त्वां हृषीकेश्वरं स्वतोप्याराध्य लोके पतिमाशासतेऽन्यम्॥
तासां न ते वै परिपान्त्यपत्यं प्रियं धनायूंषि यतोऽस्वतन्त्राः॥
स वै पतिः स्यादकुतोभयः स्वयं समन्ततः पाति भयातुरं जनम्॥
स एक एवेतरथा मिथो भयं नैवात्मलाभादधिमन्यते परम्॥
ज्ञातस्य ते पादसरोरुहार्हणं न कामये साखिलकामलम्पटा।
तदेव रासीशितभीप्सितोऽर्चितो यद्भग्नयाञ्चा भगवन्प्रतप्यते"॥

अखिलेषु जीवेषु कामलम्पटा अनादिसंसारचक्रे क्रमेण सर्वेषां तत्पतित्वापत्तेरित्यर्थः। तथा चान्यत्र पतिमतयो न सत्यः मत्कामा एव पतिव्रताः तस्मात्तदौपपत्यं नित्यसमीपस्थनित्यपतिसेवनं अस्वर्ग्यमित्यादि पदेषु सर्वत्र काका तद्विरुद्धबोधनं यद्वा, अस्वर्ग्यं तद्भिन्नतदभावतद्विरुद्धेषु नञ् विधानात्स्वर्गभिन्नं तद्विलक्षणं भगवद्धाम तत्प्रापकं अयशस्यं विलक्षणयशःप्रदम् अकारो वासुदेवस्तत्स्वरूपभूतो यः स्वर्गो नित्यसुखं "यन्न दुःखेन संभिन्नं नच ग्रस्तमनन्तरम् अभिलाषोपनीतं यत्तत्सुखं स्वपदास्पदम्" इति श्रुतिसिद्धः तस्मै हितमस्वर्ग्यं तत्सुखप्रापकं तथा अयशस्यम् अकारो हरिरेव तत्सम्बन्धि यशसे हितं तत् प्रापकं पुनः कथम्भूतमुपपत्तिहरिसेवनं फल्गु कृच्छ्रं फल्गुभिः सकामैः कृच्छ्रं दुःखसम्पाद्यम् यद्वा, फल्गुकृच्छ्रं स्वल्पायासम्—

"कोऽति प्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः।
स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः॥

इत्यादि वचनात्। यद्वा, फल्गूनि कृच्छ्रोपलक्षितानि सर्वाणि तपांसि यस्मात् तथा सर्वत्र भयावहं वहतीति वहः न वहः अवहः भयानामवहो भयावहस्तम् अन्यसेवनं तु भयावहम् अभयं वै जनकप्राप्तोसि द्वितीयाद्वै भयं भवति "भीषास्माद्वातः पवते" इत्यादि श्रुतेः विष्णोः पदं निर्भयम्भयद्वितीयाभिनिवेशितः स्यात् "मर्त्यो मृत्युबालभीतः पलायन्" इत्यादिस्मृतेश्च तथा जुगुप्सितं गोप्तुमीशितं अतिरहस्यम्॥ २६॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु, परमेश्वरः असतत्वे तासामस्माकं नास्ति जारपरमनसामिव पतित्यागेपि कृते दोष इत्याशङ्कामोक्षार्थं तथा चेदस्तु तथा रमणेच्छया तु मय्यासक्त्या स्वपतित्यागे दोष इत्याशयेनाह–अस्वर्ग्यमिति। कुलस्त्रियाः सर्वत्र सर्वस्मिन्नपि पुरुषे औपपत्यम् अस्वर्ग्यं परलोकनाशकरम् अयशस्यम् अतल्लोकनाशकं तत्रापि फल्गु अतिक्षुद्रं तथाभूतमपि कृच्छ्रं महाप्रयाससाध्यम् किञ्च, संभोगकालेपि भयजनकं पुनः साध्यकर्मणि प्रवृत्तावऽपि जुगुप्सितं निन्दितं चकाराभ्यां नरकपातजातिबहिष्कारादिसङ्ग्रहं तस्मान्मदाराधने यदि युष्माकमाग्रहस्तर्हि भगवद्बुद्ध्या तदनुष्ठेयं न तूपपतिबुद्ध्येति भावः। अनभिज्ञापक्षे विपक्षे दोषमाह–अस्वर्ग्यमिति। ननु, नास्माकं स्वर्गापेक्षेति चेत्तत्राह–अयशस्यम् ननु, तदपि नापेक्षितम् यद्वा, रहसि तन्नास्ति तन्नाश इति चेत्तत्राह–फल्गु क्षणिकत्वात् ननु, मिथ्या ब्रवीषि त्वया सह तस्याऽनन्तसुखजनकत्वनिश्चयादिति चेत्तत्राह—कृच्छ्रं पत्यादिवारणाद्दुस्साध्यम् ननु, निर्जने वने निवारकस्यादर्शनान्नास्ति दुःसाध्यमस्तु वा तथापि "वामता दुर्लभत्वं च स्त्रीणां या च निवारणा। तदेव पञ्चबाणस्य मन्ये परममायुधम्" इत्यादिवचनाद्दुःसाध्यता प्रत्युद्गता तत्वऽतिशयहेतुरिति चेत्तत्राह—भयावहं लोकशास्त्रनिषिद्धत्वाद्यमराजादिदण्डजनितभयप्रापकम् ननु, त्वदधरसुधालोभात् सर्वमपि भयमस्माभिस्त्यक्तम् यद्वा, "यत्र निषेधविशेषो दुर्लभता यन्मृगाक्षीणाम्। तत्रैव नागराणां निर्भरमासज्जते हृदयम्" इति रसशास्त्रोक्तेर्भयमपि प्रत्युत्तररसाधायकमेवेति चेत्तत्राह—सर्वत्रेति। सर्वत्र स्वपरदोषयोर्व्यवहारपरमार्थयोर्निन्दितम् औपपत्यं जारसौख्यम् ननु, स्वाभीष्टसिद्धौ निन्दाप्यस्माभिः स्वीकृता इति चेत्तत्राह—कुलस्त्रियाः कुलस्त्रीभिरेवं न वक्तव्यमिति भावः। अनेन यद्यप्यासक्तचित्तत्वाद्भवतीभिः किमपि नो गण्यते तथाप्युत्तमवंशोद्भवेन मया कुलस्त्रियो नैव कलङ्कनीया इत्यपि ध्वनितं कुलस्त्रिय इति सम्बोधनं वा मानिनीपक्षे पूर्वोक्तरीत्याऽहमेव मुख्यः पतिस्त एवोपपतय इति तत्सङ्गतं सुखमेवास्वर्ग्यादिरूपम् यद्वा, उत्प्रेक्षितानि स्मृतिवाक्यान्यस्माभिस्तव भर्तृसेवादिः परो महानधर्म इत्युच्यते स्वस्मिन्नासक्तचित्तस्य प्रेष्ठस्य दुःखजनकत्वात् तथा अपातक्यपि दुःशीलत्वादिदोषविशिष्टः किं न हातव्योऽपि तु हातव्य एव स्वस्य दुःखजनकत्वात् तथा चैवंविधपत्युः सामीप्यमस्वर्ग्यादिदोषयुक्तमेवेति नर्मव्यञ्जनपरत्वेन श्लोकत्रयं व्याख्येयम् यद्वा, मदासक्तचित्तत्वाद्भर्तृसेवादौ नास्ति भवतीनामधिकार इत्याह—भर्तुरिति। अमायया निष्कपटतया न तु भवतीनामन्यासक्तानि सत्वे मायावतीनां तथा पतित्यागनिषेधोऽपि नास्ति भवतीनामधिकारो मय्यनुरक्ततया लोकद्वयाभिलाषरहितत्वादित्याह–दुश्शील इति। किञ्चाऽपातकी चेत्तन्न हातव्यो युष्मद्भर्तारस्तु पातकिन एव जन्तुमात्रप्रीतिपात्रे जगत्प्रभृतिरक्षापरायणे मयीर्ष्यावत्त्वेन साधुपरत्वात् कृतघ्नत्वात् कृतघ्नश्चातिपातकित्वेनोक्तः तदुक्तम्—

"ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा। निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः" इति

ननु तत्सेवादावनधिकारेप्यौपपत्यस्य निषिद्धत्वात्तदङ्गीकारे स्वर्गादिबाधास्त्वऽवश्यं भवतीति चेत्तत्राह—अस्वर्ग्यमिति। कुलस्य ब्राह्मणाद्युत्कृष्टकुलस्य स्त्रियस्तदस्वर्ग्यादिदोषावहं न तु गोपाङ्गनानां युष्माकं तथाऽऽच तन्निषेधवाक्यानि तत्पराणीति भावः। निवृत्तिपक्षे यथा कुलस्त्रिया औपपत्यं दोषावहं तथा श्रुतमर्थं परित्याज्याच्युतार्थपरत्वं श्रुतहान्यश्रुतकल्पनादिदोषावहमित्यर्थः॥२६॥

रास-रहस्यम्

र० टी०—कुलः आगमः वेदोपनिषत् तत्र स्थिता स्त्री वृत्तिः तस्याः कुलस्त्रियाः, सर्वत्र औपपत्यं उप समीपे स्थित्वा उपहितरूपेण पालयतीति उपपति आत्मा प्रत्यक्तमत्वात् तत् साहित्यं, "तदन्यस्तद्भावस्तद्विरुद्धेषु नञ्विधानात्।" अस्वर्ग्यं न स्वर्प्राप्तिकारकं, अयशश्यं यशः कीर्तिः सांसारिकफलरूपा तद्विलक्षणं, फल्गुः सांसारिकभोगानां सर्वोत्कृष्टत्वेनाननुभूतत्वात् अस्थिरत्वाच्च, तुच्छः, कृच्छ्रं सकामैः दुःसम्पाद्यं, भयावहं वहतीति वहः न वहः अवहः भयानामवहं तत् "अभयं वै जनक प्राप्तोऽसि।" "द्वितीयाद्वै भयं भवति।" इति श्रुतेश्च, जुगुप्सितं भेदवादिभिः निन्दितम्॥ २६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वासाधारणधर्मनाशकः औपपत्यलक्षणो धर्मः सर्वदा वर्ज्यः, एवेत्याह—अस्वर्ग्यमिति। अस्वर्ग्यं परलोकानर्हम् अयशस्यं यस्मिन् अयशस्करम् फल्गु तुच्छम्॥ २६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे कुलस्त्रिय औपपत्यमुपपतेः पतिप्रतिनिधिधवस्य कर्मौपपत्यं ग्राम्यकर्मेति यावत्। तात्कालिकं सन्ध्यभावं सूचयितुं निस्सन्धिनिर्देशः। इयद्विपत्प्रदमिति तन्न कार्यमित्याह ॥ अस्वर्ग्यमिति। स्वर्गसाधनं न चेदैहिकं किञ्चित्सुखं वर्ततेत्यत आह ॥ अयशस्यमिति। यशोनाशकं काकमांसं शुनोच्छिष्टं स्वल्पमिति फल्गुफलं कृच्छ्रं कष्टवद्भयावहं तत्पत्यादिदर्शने भवेत्ताडनादिकमिति भयावहं जुगुप्सितं शास्त्रतो निन्दितं। इति सर्वत्र सर्वाम्नायत इति स तथा कृष्णः प्रतियातेत्यवददिति वाऽन्वयः। सर्वत्रेत्थमपि क्वचिदुत्कर्षहेतुर्भवतीत्यतोऽप्याह ॥ अयशस्यमिति। अये शुभावहे दैवे सति शस्यं भवतीन्द्रादौ। यथोक्तं गीताभाष्ये। अहल्याजारत्वाद्यपि दोषकृतोऽपि तेन बहुतरो लेप आसीदित्युत्कर्षमेव वक्तीति। इदं काचित्कं तत्तु प्रायिकत्वाभिप्रायमिति ॥ २६ ॥

श्रीसुबोधिनी

"तमः पातः कीर्तिहानिस्तुच्छं निद्यं महद्भयम्। कष्टसाध्यं जारसुखं भवत्येव कुलस्त्रियः" ॥ २६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अस्वर्ग्यमित्यत्र, उपपतिसम्बन्धे दोषोक्त्या प्रभोश्च सहजपतित्वेन स्पष्टः स्थितिपक्षः। कुलसम्बन्धाभिमानवतीनामुक्त्या तत्र तदभावादपि तथा ॥ २६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'त्वया सह रमणेच्छया वयमागता' इति चेत्तत्र षड् दोषानाह—अस्वर्ग्यमिति। सत्कुलस्त्रियाः औपपत्यं परपुरुषसम्बन्धः, उपपतिः तज्जन्यं सुखमौपपत्यम् अस्वर्ग्यं धर्मेण प्राप्तप्रायस्यापि स्वर्गस्य धर्मविनाशद्वारा नाशकम्। अयशस्यं चेति। इह लोके यशोनाशकम्, चकारान्नरकहेतुश्च ॥ तत्र हेतुं वदन्नपयशस्करत्वमप्याह—सर्वत्र लोके शास्त्रे च जुगुप्सितं निन्दितं चेति। तथापि कृच्छ्रं कष्टसाध्यम्। तथापि न महत्, किन्तु फल्गु तुच्छं क्षणभङ्गुरमित्यर्थः। तथापि भोगकालेऽपि भयमेवावहतीति तथा तत्। अस्यार्थस्य प्रसिद्धिं सूचयति—हीति ॥ २६ ॥

अन्वितार्थप्रकाशिका

अस्वर्ग्यमिति ॥ कुलस्त्रियाः औपपत्यम् उपपतिर्जारः तत्संबन्धाज्जातं सुखमौपपत्यम्। पत्युत्तरपदाण्ण्यः। सर्वत्र अस्वर्ग्यं स्वर्गाप्तौ प्रतिकूलम् अयशस्यं यशोलोपकं फल्गु तुच्छं कृच्छ्रं कष्टहेतुः, इहामुत्र च भयावहं सर्वत्र जुगुप्सितं च। अथ च मम मुख्यपतित्वात् तेषामेवोपपतित्वम्। अतोऽहमेव सेव्यः ॥ २६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उपपतिर्जारस्तस्येदं भोगसौख्यं औपपत्यम् अस्वर्ग्यं स्वर्गहानिकरं फल्गु अत्यल्पं कृच्छ्रं कष्टसाध्यं सर्वत्र इह परत्र च जुगुप्सितमुपहास्यजनकम् ॥ २६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

लोकेप्सुभिरित्यनेनादृष्टं भयं प्रदर्शितमथ दृष्टभयप्रदर्शनेन प्रत्याचष्टे ॥ अस्वर्ग्यमिति ॥ कुलस्त्रियः सत्कुलजातानां स्त्रीणामित्यर्थः। भर्तरि सत्यसति वा योऽन्यः संगम्यते स उपपतिस्तस्य कर्म औपपत्यं, 'पत्यन्तपुरोहितादिभ्यो यक्' इति कर्मणि यक्, तत्संगम इत्यर्थः। अथवा भावे यक् उपपतिमत्त्वमित्यर्थः। अस्वर्ग्यं स्वर्गादिसाधकसाधनान्तरेषु सत्स्वपि तद्भ्रंशकरं अयशस्यमयशस्करं च। फल्गु तुच्छं, कृच्छ्रं दुःखसंपादकं भयावहं भयापादकं, सर्वत्र जुगुप्सितं निन्दितं भवति हि ॥ २६ ॥

कृष्णप्रिया

कुलिन स्त्रियों के लिए जार पुरुष की सेवा सब तरह से निन्दनीय ही है। इससे उनका परलोक बिगड़ता है, स्वर्ग नहीं मिलता, इस लोक में अपयश होता है। यह कुकर्म स्वयं तो अत्यन्त तुच्छ, क्षणिक है ही; इसमें प्रत्यक्ष-वर्तमान में भी कष्ट-ही-कष्ट है। मोक्ष आदि की तो बात ही कौन करे, यह साक्षात् परम भय नरक आदि का हेतु है ॥ २६ ॥

श्रवणाद् दर्शनाद् ध्यानान्मयि भावोऽनुकीर्तनात्। न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥ २७ ॥

कर्दमक्षमा

अन्वयः—श्रवणात्, दर्शनात्, ध्यानात्, अनुकीर्तनात्, च, मयि, भावः, तथा, सन्निकर्षेण, न, ततः, गृहान् प्रति, यात ॥ २७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च श्रवणादिति ॥ २७-२८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वप्रीतिसाधनमाह—किञ्चेति। अन्यदाहुः—तव मुख्यभर्तृत्वात्त्वत्सेवनं जारसेवनवदस्वर्ग्यादि न किन्तु पतिसेवनतोऽपि मुख्यं स्वर्ग्यादिसाधनमेवेति चेत्—तथापि मच्छ्रवणादिना मयि भावो भक्तिस्स्यान्न तथा सन्निकर्षणात्यंतसामीप्येन तेजस्विनामत्यंतसामीप्यं वह्निवद्भयंकरमिति तात्पर्यम्। अतो गृहानवाप्य मद्भक्तिर्विधेयेत्याह—प्रतियातेति। पक्षे – श्रवणादिना तथा न यथा संनिकर्षेण ततोऽगृहान् अकृतदारगमनान् प्रति यात भजत। किं वा गृहान्मदीयकुंजभवनानि विशतेत्यर्थः॥ ननु कथमन्यथा संभावयसि न वयं त्वदंगसंगार्थमागताः किन्तु गर्गोक्तिप्रामाण्यान्नारायणस्य समो नान्य इत्यतस्त्वामेव नारायणं ज्ञात्वा त्वद्भक्तिकामा वयमागतास्तदद्यतनीं रात्रिं स्वसमीप एवास्मान्स्थापयित्वा कृपया स्वचरणसरोजं परिचारयेति चेत्, तत्राह—श्रवणादिति। शुद्धभक्ताः खलु सामीप्यसालोक्यादिकमपि न कामयन्ते यथा श्रवणकीर्त्तनादिकमिति प्रसिद्धिर्भवतीभिर्वैष्णवीभिः श्रुतैवेति भावः। पक्षे—श्रवणादिभ्यो भावः कंदर्पस्तथा न भवति यथा सन्निकर्षणेत्यतो गृहान्प्रति न यातेति तत्र आवृत्त्यान्वयः। यद्वा—नञ्पर्यायस्याकारस्य प्रश्लेषेणाऽऽगृहान्, न गृहान्प्रति यातेत्यर्थः॥ २७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं बहुधा प्रत्याख्यानेऽप्यनिवृत्तिमाशंक्य भावापलापेनाप्यौदास्यं विधत्ते—श्रवणादिति। श्रवणादिना यथाभावो भवति तथा संनिकर्षणांगसंगेन न स्यात्। विरहे समुत्कंठया झटिति तद्वृद्धिः, संयोगे तूत्कंठाशैथिल्यादिति भावः। एवं परां काष्ठामापन्नोऽपि तासां भावोऽसिद्धता निर्देशभङ्ग्यापलपित एव। तत्र पूर्वरागे प्रायः पूर्वं श्रवणं, ततो दर्शनं, ततः संयोगप्राप्त्या निरंतरा तत्स्फूर्तिः, ततश्च तत्कथैवेति क्रमेणैव निर्दिष्टम्। वस्तुतस्तु परमकौतुकित्वान्निरंतरप्रेमभरसुकोमलितदक्षिणस्वभावानां तासां प्रेमवैयग्र्यदर्शनार्थमेवेति। श्लेषार्थश्चायम् ननु येन सद्भावेन स्वस्य भर्तृत्वं तद्वैपरीत्येन तेषामभर्तृत्वं स्थापितं स एव न संभवति तव विप्रकृष्टत्वात्, तेषां तु सन्निकृष्टत्वादित्यत्राह—श्रवणादिति। यथा येन रसविशेषप्रकारेण मयि श्रवणादितोऽपि भावो भवति तथा सन्निकर्षेणापि न। येऽन्ये संनिकृष्टाः पतिंमन्यास्तेष्वपि न स्यादित्यर्थः। मिथः प्रेमयोग्ययोर्यथा सन्निकर्षेण प्रणयबंधो भवति तथा न श्रवणादिनेति लोकप्रसिद्धत्वादन्यपदमर्थायत्तम्, प्रथमत एव तथोपक्रांतत्वात् प्रकरणप्राप्तञ्च। तस्माद्गृहान्प्रति न यातेत्युभयत्रापि नञोऽन्वयः। यद्वा—प्रतिषेधप्रत्याख्यानप्रतिपक्षादिषु प्रकृतार्थविरोधेऽपि प्रतिशब्दो दृष्टः, ततश्च प्रतियात गमनावरोधविषयान्कुरुतेत्यर्थः। एवं तासां पूर्ववत्संलापो द्विधा—कासुचिद्यथार्थमेव, कासुचिच्चानुरागविवर्तेन नवीभावादिति ज्ञेयम्॥ २७॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु प्रेमैकलभ्य! सर्वसाध्यप्रेम्णा बाह्यान्तरांगं किल स्वधर्म्म इति चेत्तर्हि मच्छ्रवणादिकमेवानुष्ठीयतामिति। यद्वा, श्रीपुरुषोत्तम! त्वत्प्रसाद एवापेक्ष्यते, नान्यत् किञ्चित् कुलादिकमेवेति चेत्तर्हि मत्प्रसादो मद्विषकप्रेम्णैव सिध्यति, स च श्रवणादिनैव सम्पद्यते, न त्वंगसंगेनेत्याह। यद्वा, ननु सर्वार्थसाध्यसौहृद! त्वत्प्रेम्णि सम्पन्नेऽपि न किञ्चित् जुगुप्सादिकं परमपुरुषार्थसिद्धेरिति चेत् तर्हि तदुपाय एवानुष्ठीयतामिति शास्त्ररीतिमभिनयन् दुःसहौदास्य विशेषेण परमाप्रियं सविवेकमाह—श्रवणादिति। श्रवणादीनां समुच्चयो विकल्पो वा तेषामेकतरेणापि भावसिद्धेः, तच्च श्रीभागवतामृतोत्तरखण्डादौ विवृतमेव। तत्र श्रवणं भगवत्कथादेः, दर्शनं श्रीमूर्त्त्यादेः, दूरतो ममैव वा, अनुकीर्त्तनं निरन्तरमन्नामप्रधानकीर्त्तनम्, (भा० ११।२।४०)–'एवंव्रतः स्वप्रियनामकीर्त्त्या जातानुरागः' इत्यादिना तस्यैव भावोदयेऽन्तरंगत्वोक्तेः, दर्शनार्थं सन्निकर्षोऽपेक्ष्यत एवेति, तत्परिहारार्थं तद्दर्शनस्य गौणता विवक्षया आदौ निर्देशः, एषां च हेतुहेतुमत्ता यथोत्तरमूह्या, तत्रादौ श्रवणमेव, तेन विना सर्व्वाज्ञानात्, अतएव (भा० १।२।१४)–'श्रोतव्यः कीर्त्तितव्यश्च' इत्यादौ तस्यैवादौ विधेयताद्यभिधानम्, श्रवणानन्तरं श्रीभगवद्दिदृक्षया श्रीमूर्त्त्यादिदर्शनम्, तस्माच्च ध्यानं सुखमेव सम्पद्यतेतराम्, तस्माच्चानुकीर्त्तनं स्वत एवोदेति, मनोभिनिवेशसम्पत्तेः, तस्माद्धेतोर्यथा मयि भावो भवति, तथा सन्निकर्षेण सान्निध्येनांगसंगेन वा न भवति, 'सन्निकर्षो हि मर्त्यानामनादरणकारणम्' इत्यादिन्यायात्, शास्त्राविरुद्धत्वेन मनःसंकोचाद्वा, तथेत्यनेन तादृशो न भवति, किन्तु ततो न्यून एवेति, किंवा तेन प्रकारेण न भवति, किन्तु लोकधर्म्मातिक्रमेण सर्वापेक्षया परमप्रयत्नादिनैव भवति, अतः सन्निकर्षत्यागेन श्रवणादिकमेव कार्य्यमिति भावः। अतस्तदर्थं गृहानेव यात, सर्वसंकोचाद्यभावेन तत्रैव तत्सुखसिद्धेः। वस्तुतस्तु सर्वमेतत् परमकौतुकित्वात्, किंवा निरन्तरप्रेमभरसुकोमलितसरलस्वभावानां तासां प्रेमवैयग्र्यदर्शनार्थमेवेति दिक्। श्लेषार्थश्चायम्,—उक्तन्यायेन सर्वथा मयि भावोऽसंकोचेन युष्माभिः सदा कार्य्य एव, न च वक्तव्यं श्रवणादिनापि प्रेमाख्यो भावः सम्पद्यत इति, यतोऽङ्गसंगनैव नितरां सिध्यति। न च श्रवणादिनेत्याह,–श्रवणादेर्हेतोर्न तथा यथा सन्निकर्षेण भवतीति योज्यम्। ततस्तस्माद्धेतोः, अकारप्रश्लेषेण—अगृहान् अगृहस्थान् अकृतदारानस्मान् प्रति यात

भजतेत्यर्थः। तासां वशीकरणार्थमात्ममाहात्म्यविवक्षया बहुत्वं साक्षादात्मानुक्तिर्वैदग्ध्यादिना, यद्वा, अगृहान् गृहव्यतिरिक्तप्रदेशान् यमुनापुलिनादीन्, यद्वा, गृहान् मदीयान् निकुञ्जरूपान् प्रविशतेत्यर्थः। गृहानित्यनेन निकुञ्जादीनामेव क्रीडागृहत्वेन निजगृहत्वेन वा सदैतेष्वेव वस्तव्यमित्यभिप्रैति।

दशश्लोकेन्धनैस्तासां प्रेमकोमलितात्मनाम्। आशासु सर्वास्वौदास्यवह्निं कौतुक्यजृम्भयत्॥

तत्रोत्क्रमेणैते श्लोका द्रष्टव्याः। अधोदिशि श्रवणादिति श्लोकः, तेन सन्तापविशेषादूर्ध्वशिखाधः प्रज्ज्वालिताग्निरेव अस्वर्ग्यमित्यूद्र्ध्वदिशि तदभीष्टनिन्दनेन शिरोज्वरवद्दुःखभरात्। एवं पूर्वाद्यष्टदिक्षु दुःशील इत्यादयो यथायथमुत्क्रमेणैव विवेचनीयाः अथवा दोहनत्यागाद्येकादशधा युथश आगतानामेकादशविधानां तासां मध्ये काश्चित् प्रति कश्चनेत्येवं दशश्लोकास्तत्र प्रागुत्क्रमेणैव कतिचित् पश्चात्क्रमेणापीत्येवं यथायथं विवेक्तव्याः। तत्रादौ व्यत्यस्तवस्त्राभरणाः प्रति तासां तथाभूतत्वेन परमसम्भ्रम-दृष्टया व्रजस्येति पूर्वार्द्धञ्चास्य प्राक् सर्वाः प्रत्येव, तथान्तेऽस्वर्ग्यमित्यादिद्वयञ्च तत्राद्यः, सर्वासामेव तदेकाभिमतत्वात्, परश्च सामान्यतो भावोदय प्रकारोपदेशात्, अञ्जन्तीः प्रति रजन्येषेति लोचनाञ्जनेन घोरसत्त्वादिदृष्टयभिप्रायेण प्रमृजन्तीः प्रति मातर इति देहापेक्षया देह–सम्बन्धिनामपि बन्धूनामपेक्षोपपत्तेः, लिम्पन्तीः प्रति दृष्टमिति गन्धापेक्षया पुष्पापेक्षाया अपि योग्यत्वात्, अश्नन्तीः प्रति तद्यातेति पादः, स्त्रीभोजनस्य संक्षेपे इंगिताभ्यामेव कथ्यत्वात्, पतिं शुश्रूषन्तीः प्रति शुश्रूषध्वमिति नित्यत्वविवक्षया विधेयमात्रत्वेनादौ संक्षेपोक्तिः। अग्रेऽस्य विस्तारो भावी। शिशून् पाययन्तीः प्रति पाययतेति तत्र शैघ्र्यार्थम्, क्रन्दन्तीत्यादि भर्त्तृशुश्रूषायामपेक्षितायामेव तदेकहेतुक दोहनादिगेहदेहकर्मस्वपेक्षा स्यादित्यतः सर्वमूलभूतायास्तस्या विस्तरेणाग्रे गुणादेः कथ्यत्वादादौ सूचीकटाहन्यायेन दुहन्तीः प्रति दुह्यतेति। अधुना भर्त्तुशुश्रूषणदार्ढ्यार्थं सामान्यतः सर्व्वा एव प्रति अथवेति त्रयं तत्राथवेति स्वविषयकप्रीत्यपेक्षया भर्त्तृशुश्रूषण त्याज्यमित्याशकानिरासार्थं कण्टकोद्धार-न्यायेन निजप्रीत्युत्थापनं पयोऽधिश्रयण संयावपाक-परिवेषणकर्त्रीस्त्रिविधाः प्रति तत्तत्कर्मणां भर्त्तुः तद्बन्धादिशुश्रूषणाद्यर्थकत्वेन भर्त्तृशुश्रूषायामेव पर्य्यवसानात्, शुश्रूयन्तीः प्रत्युक्त्वैव तत्त्रिविधाः प्रत्यपि तत्सिद्धेः पृथङ्नोक्तम्। अत एव शुश्रूषणादेशे तद्बन्धादिशुश्रूषणादिकमपि तद्बन्धूनां चेत्यादिष्टम्, अन्योन्यमभेदात्, अथवा कौतुकभरेण नर्माद्यर्थमेव तत्तदुक्तेः। तथा तासामन्योन्यमैकमत्येन एकां प्रत्युक्तमन्यामपि व्याप्नोतीति सर्वेषामेव वचनानां परस्परं सर्वास्वेव पर्य्यवसानात्, सर्वाण्यपि वचनानि सामान्यतः सर्वाः प्रत्येव द्रष्टव्यानि, तत्प्रकारः प्रागुलिखित एवेति दिक्॥ २७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

श्रवणादिभिः यथा मयि भावो भवति तथा सन्निकर्षणाऽङ्गसङ्गेन ने भवतीत्यर्थः॥ २७–२८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

"पतिं विश्वस्य"एष भूताधिपतिः, "माता पिता भ्राता निवासः शरणं सुहृद्गतिश्च नारायणः" इत्युक्तरीत्या नित्यो निरुपाधिकश्च पतिर्बन्धुश्च त्वमेवेत्याशयवतीरालक्ष्याह—श्रवणादिति। न च गोपीनामेवंविधाभिप्रायसङ्गतिस्तस्मिंस्तासां परब्रह्मत्वज्ञानाभावादिति शङ्क्यम् अनुपदं वक्ष्यमाणैरेव तासां वचोभिः "श्रेष्ठो भवान् तनुभृतां किल बन्धुरात्मा" यह्यम्बुजाक्ष तव पादतलं रमायाः, श्रीर्यत्पदाम्बुजरजश्चकमे" इत्यादिभिरेव तज्ज्ञानाविष्कारान्मयि नित्ये निरुपाधिके पत्यौ बन्धौ च मयि श्रवणादिभिर्यादृशो भावो भवति न तथा सन्निकर्षणाङ्गसङ्गे भवत्यतो गृहान् प्रतियात गच्छतेति भावः। प्रीत्यात्मकोऽभिप्रायविशेषः तत्र श्रवणं मत्स्वरूपरूपगुणविभूत्यादिश्रवणं कीर्त्तन गुणनामकीर्त्तनं ध्यान तत्पूर्वकमनुचिन्तन तद्दर्शनं तत्पूर्वकसाक्षात्कारः॥ २७॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ननु, तत्र मुख्यभर्तृत्वात्त्वत्सेवनं जारसेवनवदस्वर्ग्यं न भवति किन्तु पतिसेवनान्मुख्यसाधनमेव स्यादित्याशङ्क्य सत्यं तथापि मच्छ्रवणादिना युष्माकं मयि भक्तिः स्यात् न तथा मम सन्निकर्षनिषेवणेन यस्मात्तस्माद्भवतीभिः गृहानवाप्य मयि भक्तिः कर्तव्येत्याह—श्रवणादिति॥ २७॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

पुनस्तेनैव क्रमेणार्थद्वयेनोपसंहरति—श्रवणादित्यादिना। एष मद्भावः सुरसो भवति, न तु सन्निकर्षेण। यथेत्यनेन तथा-शब्दो गम्यते। श्रवणादिना यथा सुरसस्तथा न सन्निकर्षण। तस्माद् गृहान् प्रतियात। पक्षे—यथा सन्निकर्षेण मयि भावस्तथा न श्रवणादिना; यतः श्रवणादेरपि साक्षात्कारः फलम्, ततो गृहान् अप्रतियात 'अभावे नह्य नो ना' इति केवलस्याकारस्य निषेधवाचित्वात्॥ २७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

श्रवणादित्यादि। चेदनुरक्ताः स्थ, तदा श्रवणादिभिरेव स्थीयतामिति बाह्योऽर्थः। आन्तरस्तु श्रवणादिना मयि भावो न तथा यथा सन्निकर्षण संयोगेन ततः प्रतियात गृहानिति बाह्योऽर्थः, आन्तरस्तु अगृहान् अकृतदारानस्मानिति बोद्धव्यम्। प्रतियात इति पूर्ववद् बहुवचनम्; अगृहान् त्यक्तगृहान् भवद्विधानां सङ्गार्थमेव वनं गतानिति वा ॥ २७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, कथमन्यथा सम्भावयसि न वयं त्वदङ्गसङ्गार्थमागताः किन्तु गर्गोक्तिप्रामाण्यान्नारायणस्य समो नान्य इत्यतस्त्वामेव नारायणं ज्ञात्वा त्वद्भक्तिकामा वयमागतास्तदद्यतनीं रात्रिं स्वसमीप एवास्मान् स्थापयित्वा कृपया स्वचरणसरोजं परिचारयेति चेत्यत आह—श्रवणादिति। शुद्धभक्ताः खलु सामीप्यसालोक्यादिकमपि न कामयन्ते यथा श्रवणकीर्त्तनादिकमिति प्रसिद्धिर्भवतीभिः वैष्णवीभिः श्रुतैवेति भावः। पक्षे श्रवणादिभ्यो भावः कन्दर्पस्तथा न भवति यथा सन्निकर्षेणेत्यतो गृहान् प्रति न यातेति। नञ् आवृत्यान्वयः, यद्वा नञ्पर्य्यायस्याकारस्य प्रश्लेषेण अगृहान् न गृहान् प्रति यातेत्यर्थः ॥ २७ ॥

श्रीरसिकाह्लादिनी टीका

इदानीं पूर्वानुभूतं रमणसुखं स्मारयितुमौदासीन्यस्थित्या संश्लेषसुखाच्छ्रवणादिसुखस्योत्कर्षमाह श्रवणादिति। श्रवणं नायकशिरोमणेः सद्गुणानां, दर्शनं लावण्यसारस्य श्रीविग्रहस्य यथा बर्हापीड़मित्यादिनोक्तं, ध्यानं तत्तदंगविभावनं, कीर्त्तनं मम जन्म-कर्म-गुणानां कथनं, एतत्समस्तं व्यस्तं वा भावोत्पत्तौ प्रयोजकं कुत्रचिच्छ्रवणादेव भावोदयः यथा रुक्मिण्यादेः यः "श्रुत्वा गुणानिति," कुत्रचिद्दर्शनात् यथा भौमगृहे "तं प्रविष्टं स्त्रियो वीक्ष्य नरवीरं विमोहिताः। मनसा वव्रिरेऽभीष्टं पतिं दैवोपसादितमिति" कुत्रचित् ध्यानात् यथा देवहूतेः "तदेव ध्यायती देवमपत्यं कपिलं हरिम्। बभूवाचरतो वत्सनिस्पृहा तादृशे गृहे,"। कुत्रचिदनुकीर्तनात् यथा नारदस्य "प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः। आहूत इव मे शीघ्रं दर्शनं याति चेतसि," एषां समुच्चयो वा विकल्पो वा भावोदयहेतुः। अन्यतरसद्भावोऽपि भावोदयदर्शनमिति चेन्मयेतेषां समफलत्वेऽपि श्रवणस्य सर्वत्रानुस्यूतत्वेनैतदेव मुख्यत्वम्। यद्यपि सन्निकर्षस्यापि हेतुत्वं श्रूयते तथापि श्रवणादीनां यथाऽनन्यथा सिद्धत्वं तथैतस्य न तदुक्तम्। संनिकर्षोत्र मत्यीनादरकारणमिति। दृढतरभावोत्पत्तौ हेतुत्वाभावात् अत्र तु सन्निकर्षोऽङ्गसंगः तस्मिंश्च सति भावशैथिल्यदर्शनाच्च ततो हेतुर्गृहान् प्रतियातेति शब्दोत्थार्थेन स्वस्यौदासीन्यमकामत्वं च व्यंजितम्। इदानीमर्थोत्थार्थमाह नन्वत्र विधेयं किं भावो वा विधेयः संनिकर्षो वा विधेयः तत्रोच्यते—भावस्यैव विधेयत्वं तत्र श्रवणादि—चतुष्टयस्यैवानन्यथासिद्धत्वं न तथा संनिकर्षेणेत्युक्तेः मधुररसस्य विप्रलम्भसंभोगात्मकत्वात्। विप्रलम्भे श्रवणादीनां भावसाधकत्वं निर्णीतमेव, यत्र तु संनिकर्षस्यापि भावोदयं प्रति हेतुत्वं श्रूयते यथा "कुररि विलपसि त्वमित्यादौ" तन्न कदाचित्कत्वविवक्षयोक्तमिति। तस्माद्भावस्यैव विधेयत्वं संनिकर्षस्य भावं प्रति न हेतुत्व न च पृथग्विधेयत्वमिति। नन्वेवं चेत्तदा सर्वथा सर्वदाङ्गसंगाभावे मधुररसस्य विकलांगत्वं भवेत्। तस्य चोभयात्मकत्वात् तस्मात्संनिकर्षेऽपि विधेयस्तथा सति वाक्यभेदः स्यात् तस्मात् संनिकर्षस्योद्देश्यत्वं भावस्य विधेयत्वम्। संनिकर्षोऽत्र फलं न हि कुत्रापि फलस्य विधेयत्वं श्रूयते। यथा यागेन स्वर्गं भावयेत् इत्यत्र स्वर्गमुद्दिश्य यागस्य विधेयत्वं यागमुद्दिश्य माकपुरोडाशादिनिर्वपनस्य विधेयत्वं तथात्राऽपि संनिकर्षमुद्दिश्य भावस्य विधेयत्वं भावमुद्दिश्य श्रवणादिचतुष्टयस्य विधेयत्वम् अतः सम्यगुक्तं न तथा संनिकर्षेणेति न हि कुत्रापि केनाप्युद्दिश्य विधेयत्वमभ्युपगम्यत इति पूर्वं श्रवणादिजन्यभावोदयेन संनिकर्षफलरूपो जात एव अत फलं त्यक्त्वा गृहान्न प्रतियात नकारस्योभयत्राप्यन्वयः। यद्वा श्रवणादिहेतुचतुष्टयादपि संनिकर्षाभावे जाते सति तथापि भावो न भवति। श्रवणादीनामनैकान्तिकत्वेन भावासिद्धस्तस्मिन्नसिद्धे सुखं कुतः, यद्वा श्रवणादेर्हेतोर्मयि जात एव तथानेन प्रकारेण संनिकर्षे मत्समीपगृहान् विलासस्थानानि वनपुलिनयमुनाजलादीनि, न प्रतियातेति किंतु सातत्येन प्रतियात। तथा भवतीनां मनोरथपूर्त्तिर्भवेदिति तात्पर्य्यार्थः। एवं स्वस्यौदासीन्यं परिहृत्य व्यंजनावृत्या गृहगमननिषेधपूर्वकं रमणार्थं वै मध्ये स्थितिं दृढीकृत्वा अयमर्थोत्थ इति ॥ २७ ॥

विशुद्धरसदीपिका

एवं च बहुभिः प्रकारैः प्रत्याख्याता अप्यनिवृत्ता आलक्ष्य तद्भावापलापेनाप्यौदासीन्यं विधत्ते—श्रवणादिति। श्रवणादिना यथा तथा न सङ्गेनेत्यर्थः। विरहे समुत्कण्ठया झटिति तद्वृद्धेः संयोगे तूत्कण्ठाशैशिल्यान्न सेति भावः। एवं च परां काष्ठामापन्नोऽपि तासां भावो सिद्धतादृक्तेनापलपित एवेति भावः। अत्र पूर्वरागे प्रायः पूर्वं श्रवणं ततो दर्शनं ततः संयोगप्राप्त्या निरन्तरा तत्स्फूर्तिः ततस्तत्कथेति क्रमेणैव निर्देशः, अतो मम प्रेमवर्द्धनार्थं गृहानेव प्रतियातेति पक्षे यत्तदोर्नित्यसम्बन्धात् यथा सन्निकर्षेण मयि भावः शुद्धा प्रीतिर्जायते तत्तदवसरे यथारुचि यथाकालं परिचरणादिसम्भवात् तथा श्रवणादिना न जायते ततो गृहान्न प्रतियातेति नञः परिकृत्यान्वयः। यद्वा, ततोऽगृहानिति प्रश्लेषः "अभावेन ह्यनोनापि" इत्यमरकोशात् अयातेत्यन्वयः, न यातेत्यर्थः। यद्वा, प्रतिषेधप्रत्याख्यानप्रतिपक्षादिषु प्रकृत्यर्थविरोधेपि प्रतिशब्दो दृष्टः ततश्च प्रतियातगमनविरोधविषयान् गृहान्

कुरुतेत्यर्थः। यद्वा, गृहानिति "देवविश्वद्रहोपि हि" इतिवत् कुञ्जगृहानित्यर्थः प्रतियातेति सरलोऽन्वयः सुहृदं प्रतियातीति वत्कुञ्जगृहागमनोन्मुखी भवतेत्यर्थः ॥ २७ ॥

श्रीरामनारायणकृता भावभावविभाविका

प्रथमपक्षे एवं धर्मोपदेशादिना बहुधा प्रत्याख्याता अपि यदा प्रेममार्गाद् गृहमार्गं प्रति न चेलुस्तदा प्रेमसाधनान्तरोपदेशेन न्यवसितभगवदङ्गसङ्गसौख्याश्चालयन्निव परीक्षां करोति, श्रवणादिति। प्रथमं तद्गुणाभिज्ञमुखेन गुणश्रवणाद्गुणपरोक्षज्ञानान्मयि भावोत्पत्तिस्ततो दर्शनादपरोक्षगुणोत्कर्षाद्भाववृद्धिस्ततो ध्यानान्निरन्तरप्रत्ययप्रवाहरूपात् दीर्घकालनैरन्तर्यसत्कारसेवितो दृढभूमिरिति सूत्राद्भावदार्ढ्यं तथानुकीर्तनात्—

"तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्। एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः" ॥

इत्यत्रोक्ताभ्यासरूपाद् दृढभावरक्षणं यथा तथा सन्निकर्षेण न भवति प्रत्युत भावशैथिल्यं ततो गृहान्प्रतियात तत्रैव श्रवणध्यानादि कुरुत। द्वितीयपक्षे तु यथाश्रवणादिना मयि भावो भवति तथा सन्निकर्षेण ततोप्यधिकसुखापरोक्षानुभवेन दर्शनलाभभोगेषु सुखतारतम्यस्य श्रुतिलोकोभयसिद्धत्वात् भावातिशयो भवति ततो गृहान् प्रति न यात। यद्वा, किं न तथा सन्निकर्षेण अपि तु ततोऽप्यधिकतममिति सन्निकर्षार्थं गृहान् लताद्रुमनिकुञ्जगृहान्प्रतियातेति भावः ॥ २७ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

न तु तत्सर्वं लोकदृष्ट्या भगवतोक्तं वयं तु पुरुषोत्तमे त्वय्यासक्ता अतो नास्माकं स्वधर्मत्यागयुक्तो दोषो भगवदाराधनस्य सर्वोत्तमधर्मत्वादित्याशङ्क्येवं तर्हि न लौकिकस्नेहस्यापाहो विधेयः कामशेषस्य लौकिकस्य हीनत्वादित्याशयेनाह, श्रवणादिति। आदौ श्रवणं भगवत्प्रतिपादकवाक्यादीनां भगवति शक्तितात्पर्य्यावधारणं पश्चात्तेषामनुकीर्त्तनम् अवधारितार्थस्य स्थिरीकरणायाभ्यासो मननमिति यावत् ततो ध्यानं श्रुते मतेऽर्थे चित्तस्य स्थिरीकरणं निदिध्यासनं ततो दर्शनं तदर्थस्यानुभवः भगवत्कृपया साक्षात्कारस्तस्माद्यो मयि भावः परप्रीतिलक्षणो यथा भवति न तथा सन्निकर्षेण भावो भवति लौकिकसङ्गमेन लौकिक एव कामशेषभूतभावो भवतीत्यर्थः। ततस्तस्माच्छ्रवणाद्यर्थं गृहान् प्रतियात। यद्वा, न वयं सम्भोगार्थिन्योऽपि न प्रेमलक्षभक्तिमात्रेच्छावत्योऽतः सर्वं विहायात्रागता अतस्तदर्थं भवत्सन्निकृष्टतया स्थास्याम इति चेत्तत्राह–श्रवणादिति। स च मयि भावः श्रवणादिना यथा भवति न तथा सन्निकर्षेण ततस्तदर्थं गृहान्प्रतियात। यद्वा, अहो भगवत्सन्निधाववस्थानेऽपि वयमयोग्या इति खिन्नचित्ता आलक्ष्याह, श्रवणादिति। मन्मुख्यभक्ताः सामीप्यसालोक्यादिकमपि न कामयन्ते किन्तु श्रवणकीर्तनादिभिरेव रमन्तेऽतो युष्माभिरपि श्रवणादिभिर्निरुपाधिकोपि भावः सम्पाद्यः किं सन्निकर्षप्रार्थनयेति भावः, अनभिज्ञापक्षे अहो दैव! यस्मिन्वयमनुरक्तचित्ताः प्रेमाभिकामाः कदापि वियोक्तुमयोग्यास्ताभ्यः स्थानस्वाङ्गसङ्गं च प्रयच्छति स्वसन्निधावपि निषेधत्यऽतः किं कुर्म्मः क्व गच्छामः इति व्याकुलमानसाः लिखितचित्रवदवस्थिताः दृष्ट्वा तासां पूर्णभावमालक्ष्य तस्य परमदार्ढ्यसिद्ध्यर्थमाह–श्रवणादिति परिपाकपर्य्यन्तं सम्पादनीयो भावो यथा श्रवणादिना भवति न तथा सन्निकर्षेण सन्निकर्षस्योत्कण्ठाशैथिल्यकरत्वादपक्वे भावे त्वङ्गसङ्गो न रसावहः तस्मात्तत्परिपाकहेतूत्कण्ठावृद्ध्यर्थं गृहान् प्रति यातेत्यर्थः। यद्वा, "अथवा मदभिस्नेहात्" इत्यनेन मयि साधारणे प्रीतिमत्यो भवत्य इत्युक्त्या कामोपाधिकप्रीतौ भर्तुरित्यादिना दोषमुद्भावितवानथेदानीं तस्याभिवृद्धावुपायमाह—श्रवणादिति। यद्यपि वर्त्तमानकाले कुलस्त्रीणां युष्माकं निषिद्धो भावो नास्तीत्यहं सम्यग्जानामि तथापि शुद्धभावे दोषप्रवेशभयात्तत्र दोषोद्भावनं मया कृतं शुद्धभावश्च श्रवणादिना यथा पूर्णतां गच्छति न तथा सन्निकर्षेण प्रेत्यऽतः सन्निकर्षेण सन्निकटस्थित्यामालिन्यं भजेन्निन्दाद्युत्थाने न निवर्त्तते च तस्मात्तदर्थं गृहगमनमेव युष्माकमुचितं नन्वत्रावस्थानमिति भावः। यद्वा, कृष्णसङ्गमोत्कटोत्कण्ठायुतानां कोटिब्रह्मकल्पपर्यन्तं कुम्भीपाकादिनरकपातादप्यभीतानां त्यक्तलोकद्वयानामस्माकमाशयमभिज्ञाय किमनेन प्रलाप आरब्ध इति कोपेन व्याकुलस्वान्ता आलक्ष्य तत्कोपमन्यथा प्रकल्प्याह—श्रवणादिति। अहो भर्तृशुश्रूषादिधर्मनिधिभूतासु यथोक्तदोषगन्धेनापि विनिर्मुक्तास्वस्मासु दोषमारोप्यायं प्रलपति इति कोपो न कार्य्यः, उक्तवाक्यस्य प्रासङ्गिकत्वात् युष्मदभिप्रेतस्तु भावः शुद्ध एवेत्यहं सम्यग्जानामि स च मयि यथा श्रवणादिना भवति न तथा सन्निकर्षेण ततो गृहान् प्रतियातेत्यर्थः। मानिनीपक्षे ननु, किमेवं कल्प्यते सद्भावग्रहीतोऽहमेव भवतीनां भर्ता ननु पित्रादिदत्ता गोपा इति सद्भावस्यापि सम्प्रति सन्निकृष्टेषु तेष्वेव सत्त्वादुत्पन्नस्याप्यसन्निकृष्टत्वेपि सम्प्रति निवृत्तित्वाद्विरतिं चेत्तत्राह, श्रवणादिति। यथा श्रवणादिना मयि भावो युष्मदन्तःकरणेषु वर्त्तते तथा सन्निकर्षेणापि यत्पत्यादिषु नास्तीत्यहं सम्यक् जानामि अतः किमिति स्वभावतिरोधाने भवत्यः प्रवृत्तास्तस्मात् गृहान् प्रति न यातेति ततोऽनुषङ्गः। यद्वा, ततो गृहानित्यत्राऽकारप्रश्लेषः "अभावे न ह्यनोनाचे" इत्यमराद्यात न प्रतियातेत्यर्थः। यद्वा, ननु, मदभिस्नेहाद्भवत्यो यन्त्रिताशया इति भवता कथं ज्ञातमिति चेत्तत्राह–श्रवणादिति। अहर्निशं मच्छ्रवणादिना तथा सन्निकर्षेण सन्निकटागमनेन भवतीनां मयि भावो वर्त्तत इति मया ज्ञायते ततः कपटेन पतिसेवाद्यर्थं गृहान्प्रति न यातेत्यर्थः, यद्वा, ननु, पत्यादिसन्निधावेव सर्वदा स्थास्यामस्तत्सन्निकर्षेण च तत्र भावोऽपि भविष्यति तत्पूर्वकतत्सेवनादिना धर्मादिकमपि सेत्स्यति चेत्तत्राह श्रवणादिति। तत्सन्निधाववस्थितानामपि युष्माकं यथा मयि भावो

भविष्यति मच्छ्रवणादिपरत्वात् तथा पत्यादियुक्तदभावात्ततो गृहानित्यादी न्यवर्त्तत एतेन किमित्येवं स्वपत्यादिषु भाववतीनामस्माकमधर्म्माधिकारं भावं वदसीत्युपालम्भोपि निरस्तः, निवृत्तिपक्षे एवं वेदवचसां भूतेर्थे प्रामाण्यं नास्त्यतो वेदान्तवाक्यानामपि कृत्वर्थकर्त्रादिप्रतिपत्तिपरत्वमभिहितमधुना तु उपनिषदा ब्रह्मणि प्रामाण्यं तथापि स्वप्रकारणगतमनोव्यापारविधिशेषतैव तथा यूथाऽऽहवनीयादीन् अलौकिकान्यपि शास्त्रेण समर्प्यते तद्वद्विधिशेषस्तथा चोपनिषद्भिर्ब्रह्म समर्प्यत इत्याह–श्रवणादिति "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "य आत्मा अपहतपाप्मा सोन्वेष्टव्यः स विजिज्ञासितव्यः, आत्मेत्येवोपासीत आत्मानमेव लोक उपासीत, ब्रह्म वेद ब्रह्मैव भवति" इत्यादिना विहिताच्छ्रवणाद्दर्शनान्निदिध्यासनान्मननाद्यर्थमपि आत्मनि भावः कार्योचितस्वार्थपरत्वविधया तत्परता प्रामाण्यं भवति न तथा सन्निकर्षेण तत्त्वमस्याद्यभेदमात्रबोधनेन सिद्धार्थकथनमात्रेण प्रामाण्यं भवति तथा च यथोक्तविधानेषु सत्सु कोसावात्मा किं ब्रह्मेत्याकांक्षायां नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यः शुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्देत्येवमादितत्स्वरूपसमर्प्पणेन सर्वा उपनिषद उपयुक्ताः तदुपासनाच्च शास्त्रदृष्टो उदमोक्षः फलं भविष्यति तर्कव्यधिया ननु प्रवेशे वस्तुमात्रकथने हानोपादानासम्भवात् "सप्तद्वीपा वसुमती राजाऽसौ गच्छति" इत्यादिवाक्यादुपनिषद्वाक्यानामानार्थमेव स्यादिति भावः। तस्मात् गृहान्कार्य्यसंसृष्टरूपान्यात गच्छत तत्परतैव युष्माकं न्याय्येत्यर्थः ॥ २७ ॥

रास–रहस्यम्

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।" "य आत्मा अपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः।" "आत्मा इत्येवोपासीत।" "आत्मानमेव लोकमुपासीत।" इत्यादि विधिश्रवणात् श्रवणं, दर्शनं, ध्यानं, भाव अवस्थितिः, अनुकीर्तनं मननं, एतानि मयि आत्मनि एव कर्तव्यानि, कथम्? न तथा सन्निकर्षेण सामीप्यसालोक्यादिमत्वेन कामनया न कर्तव्यानि, ततो तस्मात् गृहान् "हृदयपुण्डरीकं वेश्म।" इति श्रुत्या हृदयपुरः प्रतियात मनस एकाग्रतां सम्पादयत, समाधिनिष्ठां भवत इत्यर्थः ॥ २७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु, सत्यमेतदन्यविषये सर्वस्वमिति तु येन केनाप्युपायेन त्वयि भक्तिः स्थिरीकर्तव्या इत्यत आह—श्रवणादिति। भावो भक्तिः ॥ २७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यामिनीमलक्षयित्वा लक्षयित्वा त्वां प्रत्यागतानामङ्गनानां त्वत्सङ्गमङ्गलमप्रदाय यातेति कथं कथयसि मधुनाथेत्यत आह ॥ श्रवणादिति। श्रवणात्कथाश्रवणाद्दर्शनात्प्रस्तुताद्ध्यानाद्दृष्टमदाकारचिन्तनादनुकीर्तनान्नामचरितकीर्तनान्मयि भावो भक्तिर्यथोदेति तथा सन्निकर्षेणाङ्गसङ्गादिना न भवति यत्ततो गृहान्प्रतियात ॥ २७ ॥

श्रीसुबोधिनी

श्रवणाद्दर्शनाद्ध्यानादनुकीर्त्तनात् यथा मयि भावः प्रेम तथा संनिकर्षेण समीपवासतो न ततो गृहान् प्रतियात ॥ २७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'एव पत्यादिसेवने त्वयिभक्तिर्न सिद्ध्येत्, अतस्तत्सिद्ध्यर्थं त्वत्सम्बन्धः कर्तव्य' इत्याशङ्क्याह–श्रवणादिति। यतो यथा श्रवणादिभ्यो मयि भावः स्नेहातिशयो भवति तथा तादृशः सन्निकर्षेण अङ्गसम्बन्धेन न भवति, ततस्तस्मात् गृहान् प्रतियात ॥ २७ ॥

अन्वितार्थप्रकाशिका

श्रवणादिति ॥ यतो यथा श्रवणात् दर्शनात् ध्यानात् अनुकीर्तनाच्च मयि भावः स्नेहाधिक्यं भवति तथा तादृशः सन्निकर्षेण अङ्गसम्बन्धेन न भवति। तस्माद् गृहान्प्रति यात। अथ च श्रवणादिना मयि भावो न स्यात् यथा सन्निकर्षेण स्यात् ततो गृहान् प्रति न यातेति नञोऽनुषङ्गः। यद्वा। अगृहानिति अकारस्य निषेधार्थकाव्ययस्य छेदः। "अभावे न ह्यनो नापि" इत्यमरोक्तेः। अयात न यातेत्यर्थः ॥ २७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु त्वया सह निवासं विना प्रेमवृद्धिः कथं स्यादिति चेत्तत्राह श्रवणादिति यथा मयि भावः प्रेमातिशयः स्यात्तथा सन्निकर्षेण सन्निधिवासेन न भवेत् ॥ २७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पतिं विश्वस्य 'एष भूतपतिः माता पिता भ्राता निवासः शरणं सुहृद्गतिश्च नारायणः' इति श्रुत्युक्तरीत्या नित्यो निरुपाधिकश्च पतिर्बन्धुश्च त्वमेवेत्याशयवतीरालक्ष्याह ॥ श्रवणादिति ॥ मयि नित्ये निरुपाधिके पत्यौ बन्धौ च मयीत्यर्थः। श्रवणात्, दर्शनात्, ध्यानात्, अनुकीर्त्तनात्, यथा यादृशः भावः प्रीत्यात्मकोऽभिप्रायविशेषः भवति, तथा तादृशो भावः, संनिकर्षेणाङ्गसङ्गेन, न भवति। ततः, गृहान् प्रतियात गच्छत। तत्र श्रवणं तत्स्वरूपगुणविभूत्यादेराकर्णनं, अनुकीर्त्तनं गुणनामादेः पुनः पुनः संकीर्त्तनं, ध्यानं तत्पूर्वकमनुचिन्तनं, दर्शनं तत्पूर्वकः साक्षात्कारः, ननु गोपीनामेवंविधाभिप्रायसंगतिस्तस्मिन्नास्ति तासां तस्य परब्रह्मत्वज्ञानाभावादिति न च शक्यमनुपदं वक्ष्यमाणैरेव तासां वचोभिरेव तज्ज्ञानाविष्कारात्। तानि यथा। 'प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा'। 'यर्ह्यम्बुजाक्ष तव पादतलं रमायाः' 'श्रीमत्पदाम्बुजरजश्चकमे' इत्यादीनि ॥ २७ ॥

कृष्णप्रिया

गोपियों ! मेरी लीला और गुणों के श्रवण से रूप के दर्शन से, उन सबके कीर्तन और ध्यान से मेरे प्रति जैसे अनन्य प्रम की प्राप्ति होती है, वैसे प्रेम की प्राप्ति पास रहने से नहीं होती। इसलिये तुम लोग अभी अपने-अपने घर लौट जाओ॥२८॥

श्रीशुक उवाच

इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम्। विषण्णा भग्नसङ्कल्पाश्चिन्तामापुर्दुरत्ययाम् ॥ २८ ॥

कर्दमक्षमा

अन्वयः—इति, विप्रियम्, गोविन्दस्य, भाषितम्, श्रुत्वा, विषण्णाः, भग्नसंकल्पाः, दुरत्ययाम् चिन्ताम्, आपुः॥२८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इति श्रुत्वा भगवन्पुनः किमुक्तं ताभिरिति पृच्छंतं परीक्षितं श्रीशुक उवाचेति। इतीत्थम् 'प्रतियात, नेह स्थेयं सुमध्यमाः' इतिप्रकारम्। विप्रियं चित्तौत्सुक्यनिवर्तकम्। विषण्णाः स्थातुं गन्तुं वाऽशक्ताः। भग्नः संकल्पो नंदनंदनेन रंस्यामह इत्येवंरूपो मनोरथो यासां ताः। चिंतां दुःखेन मनसोऽस्वास्थ्यम्। दुरत्ययाम् विना भगवत्प्रसादमनिवार्याम्। पक्षे—विशेषेण प्रियम्। विगतं सन्नमवसादो यासां ता विषण्णास्ताश्च ता अभग्नसंकल्पाः संजातमनोरथास्तास्तथेत्येकं पदम्। दुरत्ययाम् मनोभवकृतदुःखहरां चिंतां चर्चां विचारं वा 'चिंता चर्चाविचारयोः' इति यादवः॥ गाः नानाविधान् वाग्विलासान्प्रयोक्तुं विंदते लभत इति गोविंदस्तस्य भाषितम् 'भाष्—व्यक्तायां वाचि' इत्यतो व्यक्तवाक्यं विप्रियमाकर्ण्य तदेव ध्वनिश्लेषयुक्तमव्यक्तवाक्यं तस्य प्रियत्वे बुद्धया सम्यगवगतेऽपीत्यर्थः। व्यक्तवाक्यस्य विप्रियत्वे कारणमपृष्ट्वाऽव्यक्तवाक्यस्यापि प्रियत्वे संदिहानास्ता अनुरागस्थायिभावोत्थदैन्योदयात्सत्यमयोग्या अस्मानयमुपेक्षते स्मैवेति निश्चित्य विषण्णाः,—यदर्थमहो पतिकुलपितृकुलधर्मधैर्यभयलज्जादिकमुपेक्ष्याऽऽयाताः स खल्वस्मानुपेक्षत इति भग्नसंकल्पाश्चिन्तामापुः। किं सकाकुपादग्रहणमिममनुनयेम, किं वा प्रयत्नतो धैर्यमवलंब्य कृत्रिमशाठ्येन व्रजं प्रति निवृत्य दुरवगाहगांभीर्यस्याप्यस्याशयं निर्धारयेम, किं वा प्राणान्परित्यजेम, तत्र चास्य साक्षादेव परोक्षं वा, यमुनाप्रवेशादिना वा हंत प्राणांस्त्यक्त्वास्य श्रीमुखं कथं पश्येम। अत्यक्त्वा वा कथमत्र स्थातुं प्राप्स्यामः, एतदादिष्टं पत्यादिभजनरूपं वान्तभक्षणं कर्तुं वा कथं प्रभवाम, क्व याम, किं करवामेत्यादीतिकर्तव्यतामूढा बभूवुरित्यर्थः। "आहूय गोपीततिचातकावलीः स्ववेणुनादेन ववर्ष यद्विषम्। कृष्णस्तदेवाशु पपुः सुविस्मिता विश्वस्य ताः का जहति व्रतं निजम्॥" २८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति एतद्गोविंदस्य गोकुलेंद्रत्वेन गोकुलमात्रे हि तस्यापि किमुत स्वेषु भाषितं स्फुटमेव वचनं विप्रियमिति। अर्थद्वयस्यस्पर्शित्वेनानिश्चिताशयत्वात्। उत्कंठास्वभावेन तासामुपेक्षैव स्फुरितेति विषण्णाः, अन्तस्तप्ताः सत्यः। यतो भग्नः संकल्पस्तदंगसंगविषयश्चिरंतनमनोरथो यासां ताः। अतो दुरत्ययामनतिक्रम्यां चिंतामिष्टानवाप्तिजन्यं ध्यानमापुः। अयं प्रेमार्द्रकोमलस्वभावोऽपि परमकाठिन्यमस्मद्दौर्भाग्येन गतः, तदधुना किं सपादग्रहणकाकुभिरमुमनुनयेम उत प्रतिवचनेन वा प्रयत्नतः क्षणं धैर्यावलंबनेन वा शाठ्यतो व्रजं प्रति निवृत्त्या वा दुरवगाहगांभीर्यस्यास्याशयं निर्धारयेम, किं वा सद्य एव प्राणांस्त्यजेम। अत्र चास्य साक्षादेव परोक्षं वा, यमुनाप्रवेशादिनेत्यादि चिंतयामासुरित्यर्थः॥ २८॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्येतत्, गोविन्दस्य गोकुलेन्द्रत्वेन निजसहजप्रेमभरविषयस्य भाषितं तेनोक्तं वा विप्रियं परमप्रेमवेगतः सद्यस्तात्पर्यानवधारणेनाप्रियार्थस्य दर्शनेन वा अनिष्टं किंवा प्रियविपरीतं विद्विष्टमाकर्ण्य, यद्वा, अर्थद्वयस्पर्शित्वेनानिश्चिताशयत्वादुत्कण्ठाभरेण तासां विप्रियत्वेनैव ज्ञातमित्यर्थः। विषण्णा अन्तस्तप्ताः सत्यः, यतो भग्नः संकल्पस्तद्भजनविशेषविषयक-मनोरथो यासां ताः,

अतो दुरत्ययामनन्तामनतिक्रम्यां वा चिन्तामनिष्टाप्तिजन्यं ध्यानं प्रापुः । अयं प्रेमार्द्रकोमलस्वभावोऽपि परमकाठिन्यमस्मद्दौर्भाग्येन गतः, तदधुना किं सपादग्रहणकाकुभिरयमनुनयेम ? किंवा प्रतिवचनेन प्रयत्नतः क्षणं धैर्य्यावलम्बनेन वा शाठ्यतो व्रजं प्रतिनिवृत्त्या वा दुरवगाहगाम्भीर्य्यस्यास्याशयं निर्द्धारयेम, किंवा सद्य एव प्राणान् परित्यजेम, तत्र चास्य साक्षादेव परोक्षं वा यमुनाप्रवेशादिनेत्यादि चिन्तयामासुरित्यर्थः । यद्वा, अहो बत किं करवाम कुत्र यामेत्याद्यविशेषां चिन्तां वैकल्यलक्षणाम्; यद्वा, विषण्णाः सत्यश्चिन्तामापुः; विषण्णत्वे हेतुद्वयम्—विप्रियमाकर्ण्येत्येकः, प्रियतमजनस्य विप्रियोक्तिश्रवणमात्रेण स्वयमेव परमदुःखोत्पत्तेः । किञ्च, भग्नेत्यन्यः, विशेषतोऽशेषापेक्षया निजचिराभीष्टार्थस्य भंगादित्यर्थः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं स्वमनोरथाननुगुणं गोविन्दस्य वचो निशम्य गोप्यो भग्नः सङ्कल्पो यासां ता अत एव विषण्णा दुःखिताः, अत एवानवधिकां चिन्तां प्रापुः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

"प्रतियात व्रजं नेह स्त्रीभिः सुमध्यमाः !" इति गोविन्दभाषितम् अधुना विप्रियं पश्चाद्विशेषतः प्रियं चिन्तां मनसि दुःखचर्य्यांविचारं "चिन्ताचर्चिक्ययोश्चर्चा" इति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ भगवद्वचसां गाम्भीर्यात् स्वकीयौत्कण्ठ्यगाढत्वाच्च विशेषविदग्धा अपि यथाश्रुतमेवार्थं विदित्वा 'अनिष्टशंसीनि बन्धुहृदयानि' इति न्यायेन तद्वचसः काठिन्यमेव जानन्त्यो यामवस्थामापुस्तामाह—इतीत्यादि । गोप्यो गोविन्दभाषितमाकर्ण्य चिन्तामापुः । कीदृशम् ? इति विप्रियमेवं प्रकारं विप्रियम्; पक्षे—एवं प्रकारकं विशिष्टं विविधं वा प्रियमपि, इत्यपिशब्दोध्याहार्यः ॥ २८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

इति विप्रियमित्यादि । इति गूढार्थं तद्वचो विप्रियमिव आकर्ण्य चिन्तामापुः, अभिप्रायमबुद्ध्वा चिन्तिता बभूवुरिति भावः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गाः नानाविधान् वाग्विलासान् प्रयोक्तुं विन्दते लभते इति गोविन्दस्तस्य भाषितं "भाष व्यक्तायां वाचि" इत्यतो व्यक्तवाक्यं विप्रियमाकर्ण्य तदेव ध्वनिश्लेषयुक्तम् अव्यक्तवाक्यं तस्य प्रियत्वे बुद्ध्या सम्यगवगतेपीत्यर्थः । व्यक्तवाक्यस्य विप्रियत्वे कारणम् अदृष्ट्वा अव्यक्तवाक्यस्यापि प्रियत्वे सन्दिहानास्ता अनुरागस्थायिभावोत्थदैन्योदयात् सत्यमयोग्या अस्मानयमुपेक्षते स्मैवेति निश्चित्य विषाण्णा यदर्थमहो पतिकुलपतृकुलधर्मधैर्यभयलज्जादिकमुपेक्ष्यागताः स खल्वस्मानुपेक्षत इति भग्नसङ्कल्पाः चिन्तामापुः किं सकाकुपादगृहणमिममनुनयेम किम्वा प्रयत्नतो धैर्यलम्ब्य कृत्रिमशाष्ठ्येन व्रजं प्रति निवृत्त्या दुरवगाहगाम्भीर्यस्यास्थाशयं निर्द्धारयेम किम्वा प्राणान् परित्यजेम तत्र चास्य साक्षादेव परोक्षं वा यमुनाप्रवेशादिना वा हन्त प्राणांस्त्यक्त्वास्य श्रीमुखं कथं पश्येम अत्यक्त्वा वा कथमत्र स्थातुं प्राप्स्याम एतदादिष्टं पत्यादिभजनरूपं वान्तभक्षणं कर्त्तु वा कथं प्रभवाम क याम किङ्करवामेत्यादीतिकर्त्तव्यमूढा बभूवुरित्यर्थः ।

"आहूय गोपीततिचातकावलीः स्ववेणुनादेन ववर्ष यद्विषम् ॥
कृष्णस्तदेवासु पपुः सुविस्मिताः विश्वस्य ताः का जहति व्रतं निजम्" ॥ २८ ॥

श्रीरसिकाह्लादिनी टीका

एवं श्रीकृष्णाभिप्रायमजानतीनां गोपीनां विरहतापतप्तानां हृद्वृत्तिमाकलय्य सर्वान् श्रावयित्वा शुको वदति पूर्वोक्तप्रकारं कथयति । प्रतियातेत्याग्रहेणोक्तेऽस्मत्पारत्यागं करोतीत्यर्थे निर्धारिते सति पुनर्गृहगमनं बान्तत्वमिव मन्यमाना व्रजेश्वरपुत्रत्वात् तद्वाक्यमनुल्लंघ्यमित्यपि मन्यमानाः प्रियकलंकभीत्या शरीरत्यागचिकीर्षारहिताः स्वस्व—नामाङ्कितवेणुनादामृताह्वानस्मृत्या किंचिदाश्वस्ता "मयेमा रंस्यथ क्षपा" प्रतिश्रुतार्थस्मरणेन तदप्राप्ताः प्रियविषये व्याकुला वनमध्य प्रसह्यास्मात्स्थत्या श्रीकृष्णस्यान्यत्र गमनमाशंकमानाः अत्राहूय विडंबयसीति प्रतिवचनमनुचितमिति मन्यमाना अभ्रलिहे ज्वलने पतितमात्मानमीक्षमाणा इति कर्तव्यताशून्याः गोप्यः चातुर्यविशेषानभिज्ञाः, यद्वा स्वानुरागं परस्परम् कथयन्त्यः, यद्वा रुक्षवाक्ये रसभंगं गोपयंत्यः, यद्वा तेन सह रसं क्षपयंत्यः । दुरत्ययां पर्य्यवसानरहितां चिन्तामापु चिंताप्राप्तौ हेतुमाह—गोविन्दभाषितं गोकुलरक्षाबद्धव्रतो गोविन्दः "गोपायस्वात्मयोगेन सोऽयं मे व्रत आहित" इति उक्तात्, यद्वा गाः इन्द्रियाणि भोग्यत्वेन विंदतीति गोविन्दः

यद्वा गाः श्रुतिरूपनिषश्रूपा स्वपरिग्रहत्वेन विंदतीति गोविन्दः तस्य भाषितं वचनं विप्रियं विगतं प्रियं यस्मात् रुक्षोक्त्या वस्तुतस्तु विप्रियं विशिष्टं प्रियं यस्मिन् तात्पर्यवृत्या स्थापनस्यादृढीकृतत्वात्! इदानीं तात्पर्य्यावलोकनात्। अप्रियमेव ज्ञानं बलबदनिष्टानुबंधित्वात्। प्रियस्यास्मत्प्रेमविषयस्याप्रियमाश्चर्यमिवाकर्ण्य विषण्णं विषादं प्राप्तास्तदनुरूपोत्तरं दातुमपारयंत्यः वा वागादीन्द्रियवृत्तीना तेनैव विरुद्धत्वात् मनसि जाडय़ं प्राप्ते सति कर्तव्यताशून्यत्वात् मरण–निश्चयाभावादपि कुडयादि सादृश्यं प्राप्ताः।

तदुक्तं रसार्णवे—

प्रारब्ध–कार्यानिर्वाहादिष्टानाप्तेः विपत्तितः। अपराधपरिज्ञानादनु तापस्तु यो भवेत्॥
विषादः स त्रिधा ज्येष्ठ-मध्य-नीचसमाश्रयात्। सहायान्वेषणोपाय-चिंताद्या ह्यु त्तमे स्मृताः॥
अनुत्साहश्च वैचित्यमित्याद्या मध्यमा स्मृताः। अधमस्यानु भावाः स्युर्वैवर्ण्यमवलोकनम्॥
रौदनं स्वासितध्यानं मुखशोषादयोऽपि चेत्॥

तत्र हेतुमद्विशेषणमाह–भग्नसंकल्पाः भग्नसंकल्पो मनोरथो यासां ताः।

मनोरथमेवाह—

"गत्वा वृन्दावनं देशं कृष्णं द्रक्ष्यामहे किल। प्रियेण सह संलापस्त्वपांगेन समीक्षणम्॥
आलिंगनं नखोल्लेखस्परश्चापि तथाविधः। अधरामृतपानं च भोगो रोमोद्गमस्तथा॥
स्वाभीष्टकथनं तत राघ्राणं चापि सर्वतः। तदन्तिकगतिनित्यमेवं तद्भावनं सदा"॥

एतादृशस्य मनोरथस्य भग्नत्वात् चिन्तां प्रापुः। वरदानावसरे नैवंविधो ज्ञातः अधुना अस्मद्वैवैमुख्यादप्रियोक्ति चतुरो जातः इदानीं व्रजं प्रतिगमने कृते सति को वेद किं स्यादिति अत्र क्षणमपि स्थातुं न शक्यते। निषेधवाक्यप्राबल्यात् कुत्र यामः किं वा करवामेति दुरन्तां चिन्तां प्रापुरिति॥ २८॥

विशुद्धरसदीपिका

उपसंहरति—इतीति। एवं प्रकारं यद्वा, एतदेव विप्रियम् अप्रियं यतः गोविन्दभाषितं गोकुलेन्द्रत्वात्परमप्रेष्ठत्वेन सम्भावितस्य साक्षाद्वचनमाकर्ण्य सम्यक् श्रुत्वा नतु परम्परया गोप्यः तदेकजीवनाः अत एवार्थद्वयस्पर्शित्वेनानिश्चिताशयत्वादुत्कण्ठातिशयस्वभावेन तासामुपेक्षैव स्फुरितेत्याह–विषण्णा इति। अन्तः सन्तप्ता इत्यर्थः। तादृश्यः सत्यः चिन्तामापुः तथाहि अयं प्रेमार्द्रकोमलस्वभावोपि परमकाठिन्यमस्मद्दौर्भाग्येन गतस्तदधुना सपादग्रहणकाकुभिरनुनयेम उत प्रतिवचनेन वा प्रयत्नतः क्षणं धैर्यालम्बनेन वा शाठ्यतो व्रजं प्रतिनिवृत्त्य वा दुरवगाहगाम्भीर्य्याशयस्याशयं निर्द्धारयेम किम्वा सद्य एव प्राणांस्त्यजेम तत्र चास्य साक्षादुत परोक्षं वा यमुनाप्रवेशेन वेति दुरत्ययाम् अपाराम् इति कान्तभावानां तु कासाञ्चिच्चिन्तानुकरणमात्रं कासाञ्चिस्साधकचरीणां प्राग्भावीयसंस्कारवशेन मौग्ध्येन वा चिन्ताभासमात्रमिति विवेकः॥ २८॥

श्रीरामनारायणकृता भावभावविभाविका

एवं भगवतोक्ते तासां गोपीनां या दशा जाता तामाह–भगवान् शुकः इति विप्रियमित्यादित्रिभिः। तत्र या गोप्यो मानिन्यः प्राग्लब्धविहारा बहुधाऽनुभूतभगवद्दाक्षिण्यभावाः कदाप्यदृष्टोपेक्षास्तासामुपेक्षार्थस्फूर्त्त्यभावाद्भगवद्दाक्षिण्यभावेन सानुरागप्रार्थनामात्रभानेन गत्सौख्यं जातं तद्वर्णयति—इति। विप्रियमिति। इति भगवदुक्तपद्येषु द्वितीयपक्षे व्याख्यातं विप्रियं विशेषेण प्रेष्ठतमानुरागातिशयोद्घाटकतयाप्रियं मनोऽनुकूलं गोविन्देन गवामिन्द्रेण गोपालतयैव देवेन्द्रादपि लब्धमानेन गोपगोपिकार्थं देवेन्द्रमानापहारिणा सर्वथा स्वानुकूलेन साक्षाद्भाषितं नत्वन्यमुखाच्च्युतमाकर्ण्य यद्वा, गोविन्देन गवां बहिरन्तरिन्द्रयाणामिन्द्रेण गाः इन्द्रियाणि स्वनिम्नतया विन्दते इति तथा हृषीकेशेन भाषितमतो यद्बोधाय तदर्थतया प्रयोगस्तत्प्रेरणया ताभ्यस्तदर्थप्रतीतिसम्भवान्न शङ्काऽवसर इति द्व्यर्थकमपि वाक्यं विशेषेण प्रियं यथा भवति तथाऽऽकर्ण्येति वान्वयः। विषण्णा विगताऽवसदा जातातिप्रमोदा इत्यर्थः भग्नसङ्कल्पा भग्नो गृहगमनसङ्कल्पोपि यासां तथाभूताः सत्यः दुरत्ययामव्युच्छिन्नां चिन्तां चित्तस्य भगवति प्रत्ययैकतानतां आपुः "चिन्तयेन्मामतन्द्रितः" इत्यादौ चिन्ताशब्दस्य ध्यानार्थकत्वलाभात् दुरत्ययत्वनिर्देशेन समाधिर्द्योतितः भगवद्रूपमाधुर्ये समाधिवल्लीना बभूवुरिति भावः याश्च प्रागलब्धविहारा मुग्धास्ता गोप्यस्तु इति द्व्यर्थकमपि वाक्यं विप्रियं प्रियविरुद्धं यथा स्वात्तथैवाकर्ण्य गोविन्दभाषितमित्यस्याप्ययं भावः। अयं गवां गोभूमीन्द्रियवेदादीनामिन्द्रो गोपीग्राम्या नः उपेक्ष्यत इति तथा च विषण्णा विषादापन्नाः भग्नसङ्कल्पाः निवृत्तोत्साहाः दुरत्ययामचिकित्सां चिन्तां चितातोपि दशगुणाधिकामापुः तद्यथा—

"चिन्ताचिता बिन्दुमती चितातो दशधाऽधिका। चिता दहति निर्जीवं सजीवो दह्यतेऽनया॥ २८॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवं भगवद्वाक्यान्युदाहृत्य ततः किं वृत्तमित्यपेक्षायां गोपिकावाक्यान्युदाहर्त्तुं श्रीशुक उवाच—इति, यथोक्तप्रकारमत एव विगतं प्रियं यस्मात्तद्विप्रियं नच प्रियवचने विप्रियत्वभ्रमः यतो भाषितम् "भाष व्यक्तायां वाचि" इति स्मरणाद्व्यक्तं प्रतियात व्रजमित्यादिस्पष्टनिषेधरूपम्। ननु, यथावदश्रवणं स्पष्टार्थकमपि वाक्यमन्यथा प्रतीयत इत्याशङ्कानिरासायाह—आकर्ण्य समन्तान्मनो दत्तया अक्षरशः श्रुत्वा तत्रापि तात्पर्य्यावधारणापर्य्यन्तं श्रुत्वा एतेन तद्वाक्यस्य परीक्षार्थत्वमपि वारितम् तत्रापि गोविन्दस्य गां वेदादिरूपां वाणीं विन्दतीति गोविन्दस्तस्य वेदार्थसम्प्रदायप्रवर्तकस्य सर्वज्ञस्य परमात्मनः भाषितं प्रतीकारभाषिते हि संशयो भवति किमभिप्रायेणानेन प्रयुक्तमिदं वाक्यमिति न तु परमात्मभाषितमिति भावः। एताश्च गोप्यः प्रस्तवायत्वात्प्रतारणायोग्यास्तस्माद्यथार्थं गमनमेव वदतीति तद्वाक्यान्निश्चित्याऽहो गृहादिकं त्यक्त्वाऽत्र वयं समागताः वान्ताऽशनमिव पुनस्तद्गृहान् गन्तुमशक्ताः भगवद्वाक्योल्लङ्घने चाऽक्षमाः इति विचार्योभयविरोधे शरीरपरित्याग एव कर्त्तव्य इति निश्चित्य विषण्णाः विषादश्च इति कर्तव्यतायां मूढतां गताः यतो भग्नः सङ्कल्पो भगवत्सङ्गमानन्दविषयिको यासां ताः दुरत्ययां जन्मान्तरेष्वपि अनिर्वर्त्यां चिन्तामहो भगवता किमिदमुक्तमतःपरं किं भविष्यतीत्येवमादिरूपां प्रापुः। अनभिज्ञापक्षे इति यथोक्तं गोविन्दस्य भाषितं प्रार्थकमप्युत्कण्ठास्वभावाद्विप्रियमेव निर्धार्य्य गोवर्द्धनधारणेन सर्वदा रक्षापरायणस्य महात्मनः स्वामिन इदं वाक्यम् अतो नानृतमिति तासां चित्ते प्रतीतिर्जातेति बोधयितु गोविन्दपदनैपुण्यराहित्येन यथाश्रुतार्थमात्रग्रहणसमर्था इति द्योतनाय गोप्य इत्युक्तं ततो विषण्णाः परमापदमापिता यतो भग्नस्तद्रतिविषयः सङ्कल्पो मनोरथो यासां ताः दुरत्ययामनन्तां चिन्तामापुः। अहो कलगीतमाकर्ण्याऽऽह्वानभ्रमात्कुलधर्मधैर्य्यभयलज्जादिकं विहाय तथैवाऽत्र समागताः प्रेमार्द्रोऽप्ययमस्मदभाग्येन कठोरतां गतः किं वा ऽस्मत्परीक्षार्थं दाक्षिण्यं विहाय वामतागतिमङ्गीकृतवान्? कि वा अस्य मनसि प्रेमलेशोपि नासीत् भ्रमादेव जन्मप्रभृत्येतस्मिन्वयमनुरक्ताः? किं वा ऽस्मदीयं किञ्चिदपराधमनुसन्धाय तद्दण्डदानायोद्यमः? ततः किममुं नत्यादिभिरनुनयामः? किं वा प्रतिवचनेन व्रजं प्रतिनिवृत्याचैतदाशयं निर्धारयेम? एतदाज्ञापालनं वा करवाम? एतदादिष्टं वान्ताशनसमं पत्याराधनं तु कथं कर्तुं प्रभवाम? किं वैतत्समक्षे यमुनाप्रवेशादिना सद्यः प्राणांस्त्यजेम? एवञ्चेत्पुनरेतन्मुखसरोजं कथं पश्येम? एतदनुज्ञां विनाऽत्रापि स्थातुं कथं प्रभवाम? अहोऽतिकष्टं किमु कुर्मः क्व गच्छाम? इत्येवमादिरूपां चिन्तां प्राप्तवत्यः॥ मनिनीपक्षे इति विशेषेण प्रियं गोविन्दभाषितमाकर्ण्य विषण्णाः भग्नसङ्कल्पा इव दुरत्ययां चिन्तां प्रापुरङ्गीकृतवत्यः निवृत्तिपक्षे इत्येवं विगतप्रिया गोविन्दस्य वेदबाह्येभ्यो वेदत्राणाय स्वीकृततद्वादिविग्रहस्य भाषितमाकर्ण्य विषादं प्राप्ताः यतो भग्नः प्रत्यगभिन्नब्रह्मप्रतिपादसङ्कल्पो यासां ताः गोप्यः परमात्मसम्बन्धिन्यः श्रुतयो दुरत्ययां चिन्ताम् आस्तिकामप्यस्मन्नाशाय प्रवृत्ताः अहो कथं भविष्यतीत्येवंरूपां प्रापुरित्यर्थः॥ २८॥

रास-रहस्यम्

र० टी०—इति पूर्वोक्तप्रकारं गोविन्दभाषितं गावः इन्द्रियाणि तेषां नियमनेन विन्दते मुक्तिफलमिति गोविन्दं मुमुक्षुर्जीवः, तेन भाषितं "भाष व्यक्तायां वाचि" इत्यतः स्पष्टतया उक्तं, विप्रियं विशेषेण प्रियं, प्रियतमवाक्यत्वात्, आकर्ण्य श्रुत्वा अवधारणं कृत्वा, भग्नसंकल्पा बहुजन्मकृताभ्यस्तः सांसारिकविषयवासनाजन्यसंकल्पः भग्नः यासां ताः, अतः प्रथमं तु विषण्णाः शोकमग्नाः, पश्चात् दुरत्ययां दुस्त्यजां, तदर्थं चिन्तां विचारमार्गं, आपुः प्राप्तवत्यः॥ २८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विप्रियं स्वमनोरथाननुरूपम्॥ २८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणि

गोविन्दभाषितं मये मा रंस्यथा क्षपा इति प्रागभिहितमाकर्ण्यायाता यास्ता इति गृहान्प्रति यातेति विप्रियं सद्यस्तथाभूतमाकर्ण्य विषण्णा भग्नसङ्कल्पा विषादयुक्ता रमारमणेन सह रमणसङ्कल्पो भग्नः स इव यासां ता गोप्यो दुरत्ययां रङ्गे शाङ्गसङ्गं विनाऽप्येतुमशक्यां तस्य खेदपूर्वकस्मृतिमापुः॥ २८॥

श्रीसुबोधिनी

इत्येवं विप्रियं गोविंदेन भाषितम् आकर्ण्य श्रुत्वा विषण्णा उदासीना भग्नमनोरथा गोप्यो दुरत्ययां चिंतामापुः॥ २८॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

इत्येवंभूतं गोविन्दस्य भाषितमाकर्ण्य श्रुत्वा गोप्यो दुरत्ययां तदनुग्रहं विना अनिवर्त्यां चिन्तामापुरित्यन्वयः। चिन्तायां हेतुमाह—विषण्णा इति। विषादं प्राप्ता इत्यर्थः॥ तत्र हेतुमाह—भग्नसंकल्पा इति। भग्नो भगवता सह रमणविषयकः सङ्कल्पो मनोरथो यासां ताः। तत्र हेतुमाह—विप्रियमिति। गृहगमनविषयकमित्यर्थः॥ २८॥

अन्वितार्थप्रकाशिका

इतीति ॥ इत्येवं भूतं विप्रियं गोविन्दस्य भाषितं श्रुत्वा अनेकार्थत्वेनाशयानिश्चयात् उत्कण्ठास्वभावेनोपेक्षार्थस्यैव स्फुरणाच्च गोप्यो विषण्णाः विषादं प्राप्ताः भग्नः भगवता सह रमणविषयकः संकल्पो यासां तादृश्यः सत्यो दुरत्ययां भगवदनुग्रहं विना अनिवर्त्यां चिन्तामापुः ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विप्रियं अप्रियं विपरीतं वा विषणाः खिन्नाः दुरत्ययां अनिवार्यां ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं, गोप्यः विप्रियं स्वमनोरथाननुगुणं, गोविन्दभाषितं गोविन्दस्य वचः, आकर्ण्य निशम्य, भग्नः संकल्पो यासां ताः, अत एव विशण्णाः दुःखिताः दुरत्ययामनवधिकां, चिन्तां, आपुः संप्रापुः ॥ २८ ॥

कृष्णप्रिया

श्रीशुकदेवजी कहते हैं—परीक्षित् ! भगवान् श्रीकृष्ण का यह अप्रिय भाषण सुनकर गोपियाँ उदास, खिन्न हो गई। उनकी आशा टूट गई। वे चिन्ता के अथाह एवं अपार समुद्र में डूबने-उतराने लगी ॥ २८ ॥

कृत्वा मुखान्यव शुचः श्वसनेन शुष्यद्बिम्बाधराणि चरणेन भुवं लिखन्त्यः ।
[2]अस्रैरुपात्तमषिभिः कुचकुङ्कुमानि तस्थुर्मृजन्त्य उरुदुःखभराः [3]स्म तूष्णीम् ॥ २९ ॥

कर्दमक्षमा

अन्वयः—शुचः, श्वसनेन, शुष्यद्बिम्बाधराणि, अव, कृत्वा, चरणेन, भुवं, लिखन्त्यः, अस्रैः, उपात्तमषिभिः, कुचकुङ्कुमानि, मृजन्त्यः, उरुदुःखभराः, तूष्णीं, तस्थुः ॥ २९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चिंतां प्राप्तानां स्थितिमाह । कृत्वेति । शुचः शोकादुद्गतेन श्वसनेन शुष्यंतो बिंबफलसदृशा अधरा येषु मुखेषु तानि अवअवांचि कृत्वा तथा चरगेन चरणांगुष्ठेन महीं लिखंत्यः । तथा गृहीतकज्जलैरश्रुभिः कुचकुंकुमानि क्षालयंत्यस्तूष्णीं स्थिताः । यत उरुर्महान् दुःखस्य भरो भारो यासां ताः ॥ २९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

चिंतायुताः कीदृश्यो बभूवुरिति चेदाह—कृत्वेति । उद्गतेन निःसृतेन श्वसनेन प्राणवायुना । बिंबफलम् अतिमृदुलरक्तम्। अधरा ओष्ठाः "अधरस्तु पुमानोष्ठ हीनेऽनूर्द्ध्वे च वाच्यवत्" इति मेदिनी । अंतर्गतशोकाग्नितापेन शुष्यदोष्ठा जाता इति भावः । अत्र "कामबाणप्रविद्धांगी स्विन्नयोनिर्वरांगना । पादांगुष्ठनखेनाधोवदना लिखती भुवम् ॥" इति कामशास्त्रप्रसिद्धं भावं दर्शितवत्य इति ज्ञेयम् । अस्रैरिति नेत्रद्वारांतस्थां कामपीडां बहिराविर्भावयामासुरिति सूचितम् । कोमले मुखे कर्कशवचनस्यानौचित्याऽऽदर्शो ध्वनितः—मुखान्यधः कृत्वेति । तूष्णीं स्थिता वितर्कयंति—अयं प्रेमार्द्र कोमलस्वभावोऽपि परमकाठिन्यमस्मद्दौर्भाग्येन गतः सपादग्रहणचिबुकस्पर्शादिभिरनुनीयेत, किं वा प्रतिवचनेन प्रयत्नतः क्षणं धैर्यावलंबनेन वा, शाठ्यतो व्रजं प्रतिनिवृत्त्या दुरंतगाहगांभीर्यस्यास्याशयं निर्धारयेम, किं वा सद्यः प्राणान्परित्यजेम तत्र चास्य प्रत्यक्षं परोक्षं वा यमुनाप्रवेशादिना वेति तर्काः । किं च किं वास्मद्भ्रांत्याऽन्या एवागतास्तास्वेवायमेवं वदतीति मौग्ध्येनात्मनोऽवलोकनाय किं वेदानीं किं विधेयमिति निजस्य पृच्छायै, किं वाऽतिनिष्ठुरमीदृशं वाक्यजातं निशम्याधुनापि जीवाम इति स्ववीक्षायै, किं मुखदर्शनेन दुःखाग्निश्वासधूमेनाधरबिंबमुखपद्मानां शोषः मुकुलितप्रायत्वं तिरश्चीनत्वात्, किं वा निजानां चंद्रत्वानुभवात्तद्दर्शनेन नेत्रकमलसंकोचात्स्वादर्शनं भ्रमनिवारणायेत्येवं बहुधाऽन्येपि सन्तीत्यलं प्रपचेन ॥ चिंताया अनुभावानेवाह—कृत्वेति । मुखानि अव अधः कृत्वेति लज्जा ध्वनिता । प्रेम्णोऽनुरोधादस्माकं स्वाभाविकलज्जात्याग एव संप्रति लज्जां प्राप । यतः कुलवतीनां पुंजीभूतलज्जानामप्यस्माकं लज्जात्यागः खलु प्रेमहेतुक एव । स च प्रेमरसविदां मते संगीत एव न तु विगीतः । प्रेम्णस्तु लक्षणमेतदेव यत्स्वविषयं परमेश्वरमप्यतिशयेन वशीकरोति तत्प्रेमेति । ततश्च यदस्माकं प्रेमविषयोऽयं कृष्णो न वशोऽभूत्तदस्माकं प्रेमैव नास्तीत्यवगतम्, लज्जात्यागोयं किंहेतुकोऽभूदित्यनुतापो लज्जा चिंता च । तत्रानुतापं विवृण्वन् मुखानि विशिनष्टि—कीदृशानि शुचः शोकादुद्भूतेन श्वसनेनोष्णश्वासेन शुष्यतो बिंबाधरा येषु तानि । सूर्याततेन पक्वबिंबफलानां शोषे सति स्थौल्यस्यापगमः स्पष्टमलिनत्वं च यथा भवेत्तथाऽधराणामप्यभूदिति भावः । लज्जाचिंते विवृणोति—चरणेन वामपदांगुष्ठेन भुवं लिखंत्य इति । हे धरित्रि विदीर्णा भव त्वयि

---

१. न्यक्कृत्य वनजात्यतितापशुष्यद् बिंबाधराणि चरणेन महीं लिखन्त्यः—विज. । २. मलिनैः—प्रा. पा. । ३. भराश्च—वीर. ।

वयं प्रविशाम इति। शोकसंतापौ विवृणोति—उपात्तमषिभिः कज्जलाक्तैरस्रैः कुचयोः कुंकुमानि मृजंत्यस्तेन विच्छेदवर्द्धकेन महासंतापक्रकचेन द्विधा विदारयितुं श्यामसूत्ररेखे दत्ते इति संभावना ध्वनिता। अस्रैरिति बहुवचनेन मृजंत्य इति वर्तमानकालेन चास्राणां प्रवाहवती धारा सूचिता। तावद्भिरप्यस्रैरंतरीयवस्त्राण्यप्याद्र्रयंतीत्यमुयोक्त्या एवं संभाव्यंते—नयनोत्थयमुनाद्वयहृद्योत्थसंतापानलयोर्निर्वापणशोषणकामयोर्विवादेन कस्यापि जयः पराजयो वा दृष्ट इति। उरुदुःखस्य भरो भारो यासां ताः। तूष्णीमिति—भारासहिष्णुतयैव चेतनाया अपगमादिति भावः। ततश्च तस्थुरिति तासां गतचेतनानां पांचालिकानामिवोद्ध्र्वावस्थितिरेव गम्यते ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत एव तूष्णीं तस्थुः, क्षणं परमचिन्तावेशेन वागिंद्रियवृत्त्यस्फूर्तेः। शुच इत्यनेन शुष्यदित्यनेन च श्वासस्योष्णता दीर्घता च ध्वनिता। शतृप्रत्ययेन शोषाऽविच्छेदः। बिंबेत्यरुणता कोमलता च। अतोऽधराणामतिशोषो म्लानता च सूचितैव। चरणेन वामपादांगुष्ठेन भूलिखनं चिन्तानुभावः। हे भूमे विदीर्णा भव प्रविशामो वयमित्यस्य भावः, एवमूद्ध्र्वावस्थितिरेव गम्यते। उपात्तमसिभिरिति कुचकुंकुमानि मृजंत्य इति चास्राणां धारा सूच्यते। तस्या अपि बाहुल्यविवक्षया बहुत्वम्। तत्र सर्वत्र हेतुः—उरुदुःखस्य विषादस्य भरो भारो यासु ताः। अनेनानुक्तमपि संतापक्लेशादिकं गृह्यते। तेन वैवर्ण्यस्तंभादयोपि जाता इत्यर्थः। स्मेति प्रसिद्धौ। नर्मोक्त्यापि तासां तादृशशोके त्वया संभावना कार्या इति भावः। यद्वा—विस्मये तयापि तादृशदुःखमभूदहो प्रेममहिमेति। एते च चिंतानुभावा न तासां वक्ष्यमाणनिषेधरूपप्रतिवचनार्थविशेषभंजकाः, कामिकृतप्रार्थनायां कुलवतीनां तत्संभवात् तासां रसाविरोधिभावोदयस्वभावाच्च ॥ २९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत एव तूष्णीं तस्थुः—क्षण परमचिन्तावेशेन वागादीन्द्रियवृत्त्यस्फूर्त्तेः। शुच इत्यनेन शुष्यदित्यनेन च श्वासस्य दीर्घतोष्णता च ध्वनिता। बिम्बेति पक्वबिम्बफलसादृश्येनारुणता कोमलता च, अतोऽधराणामतिशोषोम्लानता च सूचिता। चरणेन वामपादेन भूमिलिखनं चिन्ताविशेषकार्य्यम्, हे भूमि! विदीर्णा भव, वयं प्रविशाम, इत्यस्य भावः। एवमूद्ध्र्वावस्थितिरेव गम्यते, उपात्तमसिभिरिति कुचकुंकुमानि मृजन्त्य इति चास्राणां धारा सूच्यते, तस्या अपि बाहुल्यविवक्षया बहुत्वम्, तत्र सर्वत्र हेतुः उरुर्दुःखस्य भरो भारो यासु, महादुःखव्याप्ता इत्यर्थः। यद्वा, अनेनानुक्तमन्यदपि सन्तापक्लमादिकं संगृह्णाति, तेन वैवर्ण्य कम्प-स्तम्भादयोऽपि जाता इत्यर्थः, यद्वा, बाह्यस्थितिप्रकारमुक्त्वा आन्तरमप्याह—उर्विति। अनेन मूर्च्छातुल्यावस्था बोध्यते, तस्याश्च दुःश्रवत्वात् साक्षादनुक्तिः। स्मेति प्रसिद्धौ, नर्म्मोक्त्यापि तासां तादृशशोकऽसम्भावना न कार्य्येति भावः। यद्वा; विस्मये तयापि तादृशदुःखमभूदहो प्रेममहिमेतिः यद्वा, अव्ययानामनेकार्थत्वात् खेद एव ॥ २९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अव अवाङ्मुखानि कृत्वा ॥ २९–३१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

चिन्तां प्राप्तानां स्थितिमाह–कृत्वेति। अव अर्वाक् मुखानि कृत्वा कथम्भूतानि शुचः शोकाद्यः श्वसनः सोष्णो निश्वासमारुतः तेन शुष्यन्तो बिम्बफलवदधरा येषु तथाभूतानि तथा वामचरणाङ्गुष्ठेन महीं लिखन्त्यः तथा गृहीतानि कज्जलानि यैस्तैरश्रुभिः कुचयोः कुङ्कुमानि क्षालयन्त्यः उरुः दुःखभारो यासां तथाभूताः तूष्णीं स्थिताः बभूवुः ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दुःखं लक्षयितुमाह—न्यक्कृत्वेति। वक्त्रवनजानि मुखकमलानि न्यक्कृत्य अधःकृत्वा बिम्बफलतुल्यान्यधराणि बिम्बाधराण्यन्तर्गतशोकाग्न्यतितापेन शुष्यन्ति बिम्बाधराणि येषु तानि तथा—

"कामबाणप्रविद्धाङ्गा स्विन्नयोनिर्वराङ्गना। पादाङ्गुष्ठनखेनाधोवदना लिखती क्षितिम्" ॥

कामशास्त्रात्प्रसिद्धभावं दर्शयति–चरणेनेत्यादिना। उपात्तमषिभिरङ्गीकृताञ्जनैरास्रैर्बाष्पैः उरूणां दुःखानां भारो यासां तास्तथा स्म कृष्णवाक्याभिप्रायं संस्मृत्य—

"कामस्य दहनास्त्रैस्तु दग्धाङ्गोत्पादिताश्रुभिः। नेत्रद्वारेण निर्याति दुःखमन्तर्गतं स्त्रिय" ॥ इति ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

चिन्ताप्रकारमाह—कृत्वेत्यादि। मुखानि अव अधः कृत्वा कीदृशानि? शुचः शोकाद्धेतोर्यः श्वसनः श्वासस्तेन शुष्यन्तोऽधरा येषुः एतेन श्वासस्य दीर्घोष्णत्वं व्यङ्ग्यम्। चरणेन भुवम्, न तु भुवि किमपि बुद्धिपूर्वं लिखन्त्य उपात्तमसिभिर्गृहीता-

रस्रैर्लोचनजलैः कुचकुङ्कुमानि मृजन्त्यस्तूष्णीं तस्थुः, न किञ्चिदूचिरे । कथं नोचुः ? तत्राह–उरूणां दुखानां भरो यासु दुःखभर भावितत्वेन कष्टरोधाद्रोगप्रवृत्तेः । स्मेति निश्चयः ॥ २९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

चिन्तामेवाहुः—कृत्वेत्यादि । एतास्तु सर्वा उक्तप्रकारेण धीराधीरादिभेदेन त्रिधा । तथा च (साहित्यदर्पणे ३।७५) "प्रियं सोत्प्रास–वक्रोक्त्या मध्या धीरा वदेद्रुषा । धीराधीरा तु रुदितैरधीराः परुषोक्तिभिः ॥" संभूय युगपद् भाषणे सर्वासां त्रिविधानामेव त्रिविधं भाषणम् । (२९ श–श्लो०) "अश्रैरुपात्तमसिभिः" इति; (३० श–श्लो०) "नेत्रे प्रमृज्य" इत्यादौ धीराधीराः, "संरम्भगद्गद्गिरः" इत्यधीराः, (३४ श–श्लो०) "पादौ पदं न चलतः" इति वक्ष्यमाणे मध्या धीराः ॥ २९–३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चिन्ताया अनुभावानाह—कृत्वेति । मुखानि अव अधःकृत्वातलज्जा ध्वनिता प्रेम्णोऽनुराधादस्माकं स्वाभाविकलज्जात्याग एव सम्प्रति लज्जां प्रापयतः कुलवतीनां पुञ्जीभूतलज्जानामप्यस्माकं लज्जात्यागः खलु प्रेमहेतुक एव स च प्रेमरसविदां मते सङ्गीत एव नतु विगीतः प्रेम्णस्तु लक्षणमेतदेव यत् स्वविषयं परमेश्वरमप्यतिशयेन वशीकरोति तत्प्रेमेति ततश्च यद्यस्माकं प्रमविषयोऽयं कृष्णो न वशोऽभूत्तदास्माकं प्रेमैव नास्तीत्यवगतं लज्जात्यागोऽयं किं हेतुकोऽभूदित्यनुतापो लज्जाचिन्ता च तत्रानुतापं विवृण्वन् मुखानि विशिनष्टि मुखानि कीदृशानि ? शुचः शोकादुद्भूतेन श्वसनेनोष्णश्वासेन शुष्यन्तो बिम्बाधरा येषु तानि सूर्य्यातपेन पक्वबिम्बफलानां शाषे सतिस्थौल्यस्यापगमः स्पष्टमलिमत्त्वं च यथा भवेत्तथा अधराणामप्यभूदिति भावः । लज्जाचिन्ते विवृणोति–चरणेन वामपादाङ्गुष्ठेन भुवं लिखन्त्य इति हे धरित्रि ! विदीर्णा भव त्वयि वयं प्रविशाम इति भावः । शोकसन्तापौ विवृणोति–उपात्तमषिभिः कज्जलाक्तैरस्रैःकुचयोः कुङ्कुमानि मृजन्त्यः तेन विच्छेदवर्द्धकिना महाऽनुतापक्रकचेन द्विधा विदारयितुं श्यामसूत्ररेखे दत्ते इति सम्भावना ध्वनिता अस्रैरिति बहुवचनेन मृजन्त्य इति वर्त्तमानकालेन चास्राणां प्रवाहवती धारा सूचिता तावद्भिरप्यस्रैरन्तरीयवस्त्राण्यार्द्रयन्ति इत्यनुक्त्या एवं सम्भाव्यते नयनोत्थयमुनाहृदयोत्थसन्तापानलयोर्निर्वापणशोषणकामयोर्विवादेन कस्याऽपि जयः पराजयो वा दृष्ट इति उरुदुःखस्य भरो भारो यासां तास्तूष्णीमिति भारासहिष्णुतयेव चेतनाया अपगमादिति भावः । ततश्चतस्थुरिति तासां गतचेतनानां पाञ्चालिकानाविदूर्ध्वावस्थितिरवगम्यते ॥ २९ ॥

रसिकाह्लादिनी–टीका

यथाश्रुतार्थग्रहणेन चिन्ताभिभूतानां बाह्याभ्यन्तरस्थितिमाह कृत्वेति क्षणमात्रं तूष्णीं तस्थुः चिन्ताजन्यजाड्य सति प्रतिवचनास्फूर्तेः । किं कृत्वा मुखानि अवाच कृत्वा श्रीकृष्णमुखे रूक्षतां दृष्टमसहमानत्वात् । तत्र हेतुगर्भं विशेषणमाह उरुर्महान् दुःखस्थ भरो भारो यासां ताः, अन्योऽपि भाराक्रांतो मुखमवागेव करोति तद्वदिति शुचः शोकादुत्भूतेन श्वसनेनातीवोष्णेन शुष्यंति–बिम्बफलसदृशान्यधराणि येषु मनसि दुःखभरेण तप्ते न सति श्वासवायोरपि तप्तत्वं जातं तेनाधराणामारूण्यकोमलत्वे शोषिते व्यभिचारिभावानामयमेव स्वभाव इति दैन्यं सूचितमिति । चरणेन लक्षणेन पादाङ्गुष्ठनखेन भुवं लिखंत्यः विवरप्रवेशमिवाभिकांक्ष्यंत्यः, यद्वा भूरपि बराहभोग्यतां प्रत्युपालंभसि पत्युरौदासीन्येन यदुःखं भवति तत् त्वमपि न जानासि किमित्यस्मत्प्रवेशाय स्थानं न ददासीत्यभिप्रायेण भूमेः उल्लिखनं, यद्वा भर्त्तुरौदासीन्येन दुःखभराक्रान्ताया सीतादेव्याः यथा स्थानं दत्तवती तथैवास्मभ्यं स्थानं दातुमर्हसीति । कीदृश्य उपात्तमषिभिः उपात्ता गृहीता मषि कज्जलं यैस्तैरस्रैः कुचकुङ्कुमानि मृजन्त्यः क्षालयंत्यः श्रीकृष्णोपेक्षितानां कज्जलेन कुचकुङ्कमेनालमिति भावः । अनेन वैवर्ण्यस्तम्भादयो व्यभिचारिणो भावा ज्ञेया इति । किं च उरु दुःखभरा इत्यान्तरमूर्छादयो ज्ञेया इति । तूष्णीं तस्थुरित्यनेनानुत्साहवैचित्ये दर्शिते ॥ २९ ॥

विशुद्धरसदीपिका

तत्र चिन्ताप्राप्तानां स्थितिमाह—कृत्वेति । मुखानि अव अवाञ्चिकृत्वा अवाङ्मुखीकरणमिदं निजमुखस्य चन्द्रत्वाऽनुभावात् तदवलोकनेन तन्नेत्रकमलसङ्कोचात्स्वेषामनाकलनभ्रमनिवारणाय किम्वा तूष्णीं भव मैवं वाच्यमिति चेष्टितेनैव तद्वारणाय किम्वा अस्मद्भ्रान्त्या काश्चिदन्या एवागताः किम्वा यास्वेवं वदत्ययमिति मौग्ध्येनात्मनोऽवलोकनाय यद्वा किमिदानीं विधेयमिति निजस्य पृच्छायै किम्वातिनिष्ठुरमिदमीदृशं वाक्यजातं निशम्याधुनापि जीवाम इति स्ववीक्षायै किम्वाऽस्य वाक्शरैरस्माकं हृदयानि विदीर्णानि न वेति परीक्षायै इत्याद्यूह्यम् अथ स्वयमेव तत्कारणमाह श्रीमुनीन्द्रः–शुचः श्वसनेन शुष्यद्बिम्बाधराणीति । इदं चोछ्वासैः सह जीवोपि किं निर्गत इत्याकलनाय किम्वा शुष्यद्बिम्बाधरावलोकननायमस्माकं कातर्य्यं मा जानात्विति गाम्भीर्य्येण तदाच्छादनाय किम्बा पूर्वं तु स्वभावसुन्दरावधरौ सादृश्यमसहमानावेव स्थितौ सम्प्रतिशुचः श्वसनेन शुष्यन्तौ बिम्बसदृशौ जाताविति ततश्च बिम्बफलानां मतिघ्नत्वं धर्मशास्त्रप्रसिद्धमिति किमेतयोरवलोकनादस्य मतिभ्रमो जात इति तयोर्गोपनाय किम्वा कथं चिद्बहिः कठोरतामप्यनुकृतवतोप्यन्तः प्रियस्यास्य त्वस्माकं शुष्यद्बिम्बाधरदर्शनेन वैमनस्यमुदेष्यतीति

तयोराच्छादनायेति तथा चरणेन भुवं लिखन्त्यः अयमप्यवाङ्मुखत्वे हेतुः। भुवोलिखनं च हे सर्वंसहे। खलु मृदुला भव देहि किञ्चिदवकाशं येन त्वयि प्रविशाम इत्यभिप्रायेण किम्वा हे प्राणनाथ ! भवता यथारुचि कथ्यतां विधात्रो लिखितमेवेदमस्मल्ललाटपटले प्रतिदर्शयाम किम्वा रुपती वागतिवातव्याहताः कदाचित्परिवर्त्तिताः स्याम इति शङ्कया निजचरणानां भूमौ निखननायेति तथा अस्रैः कुचकुङ्कुमानि मृजन्त्यः अपयाप्यावाङ्मुखत्वे हेतुः तादृशं च सम्यक् मार्जनाय उपात्तमसिभिरिति स्वेषामन्तःकरणानामपि श्यामरागद्योतनाय विरहतप्तानां हृदयानां भर्जितत्त्वात्स्फोटो माऽभूदिति तादृशश्यामवर्णनीरसेकेन श्यामत्वसूचनायेति तथा उरुदुःखभरनमितकन्धरत्वादवाङ्मुखत्वमिति विङ्मात्रप्रदर्शितम् ॥ २९ ॥

श्रीरामनारायणकृता भावभावविभाविका

ततः किं कृतवत्य इत्यपेक्षायामाह—कृत्वेति। दाक्षिण्यविदां पक्षे तु आनन्दाब्धिनिमग्ना भगवन्माधुर्य्यसमाधिलीनचित्तास्तूष्णीमेव तस्थुः किं कृत्वा तदाह–स्वमुखशोभया खे पश्यन्तीनां देवाङ्गनानां मुखानि अव अधःकृत्वा न्यूनानि विधाय तथा कृष्णाल्लब्धमानतया स्वसौभाग्यातिशयेन तन्मुखानि शुचः श्वसनेन शुष्यद्बिम्बाधराणि कृत्वा तथा चरणेन भुवं लिखन्त्यः अङ्कितां कुर्वन्त्यः भुव उत्कर्षेण तदीयस्वर्गशोभां क्षिपन्त्यस्तासामुपात्तमषिभिरस्रैस्तदीयकुचकुङ्कुमानि मृजन्त्यः ताश्च उरुदुःखभराः कृत्वा तूष्णीं तस्थुः। यद्वा, स्वीयैरेवानन्दास्रैः स्वीयान्येव कुचकुङ्कुमानि उरुदुःखभरा विरहचिन्ताश्च मृजन्त्यस्तूष्णीं तस्थुः शेषं समानम्। उपेक्षाविदां पक्षे तु ताः उपेक्षार्थविदः स्वमुखानि अवःकृत्वा तूष्णीं तस्थुरित्यन्वयः। तत्र मुखस्यावाक्करणं कृष्णस्तु नैवं कटु वदति अयं स एवान्यो वा कश्चिदिति सन्दिह्य नान्यं पश्याम इत्यवधार्य यद्वा, कृष्ण एव परन्तून्मत्तप्रलापतया केनचिद्यक्षेणाऽऽक्रान्त इति न तादृशं पश्याम इति यद्वाऽस्माकं स्वत आगमनेन जातगर्व एवं वदति अवाङ्मुखत्वे उदासीना आलक्ष्याऽनुनेष्यति यद्वा, अस्मत्प्रेमाह्लादवन्मुखचन्द्रमालक्ष्य सकपटस्वनेत्रकमलसङ्कोचेनैवं वदतीति तन्माभूदिति स्वमुखाऽवाकरणम्। यद्वा, तन्मुखचन्द्रदर्शनाय स्वनेत्रकुमुदविकासे तत्कटुवचनतिग्मांशुभिस्तिग्मांशुतामाकलय्य नेत्रकुमुदसङ्कोचेन मुखाऽवाकरणम्। यद्वा, ख चेष्टयैव कटुवचनवारणायावमुखत्वाचरणं यद्वा नास्मान्कदाचिदेवं वदति ता एव वयमन्या वा इति प्रेममुग्धभावेन स्वावलोकनायावाङ्मुखत्वम्। यद्वा, किमघकार्यमित्यात्मानं प्रष्टुं यद्वा, निष्ठुरवाक्य श्रुत्वा कथं जीवाम इति द्रष्टुम्। यद्वा, वाणीबाणैर्हृच्छेदन जातं न वेति परीक्षितुम्। यद्वा, शुचः श्वसनेन शुष्यद्बिम्बाधराणीति शुकमुनीन्द्रेण विशेषणात् शोकदवदाहान्वितत्तनुतरुहृत्त्रीडनिःसृतश्वासशुकाः पुनरागमिष्यन्ति नवेत्यवलोकितुम्। यद्वा, शुष्यद्बिम्बाधराणि दृष्ट्वा नः कातर्य्यमाकलयत्विति तद्गोपनाय। यद्वा, "सद्यो बुद्धिहरी बिम्बा" इति वचनादनुपमावप्यधरौ शोषेण बिम्बसाम्यं गतावस्य मतिघ्नौ जाताविति तद्गोपनाय। यद्वा, अनेन कटुवचसाऽस्मच्छोकसम्पादनेऽप्यस्माभिः शुष्यदधरदर्शनेनास्य वैमनस्यं न कार्यमिति। यद्वा, शुष्यन्तो बिम्बाधरा पक्वद्राक्षावज्जातास्तद्गोपनदर्शनेन तन्माधुर्येण प्रलोभयितुम्। यद्वा, चरणेन भुवं लिखन्त्य इति निर्देशात्तल्लेखनाय। यद्वा, भुवं लिखन्तीनामवाङ्मुखत्वं तत्र प्रवेष्टुं मार्गार्थं भूविनयाय। यद्वा, अस्मद्भाले विधिनेदमेव किं लिखितमिति भालदर्शनाय। यद्वा, तीक्ष्णवचोतिवातसङ्घातघातपरावृतमतयः कदापि विमुखा न भवाम इति भूमौ पादप्रवेशाय तथा, अस्रैरित्यस्यायं भावः, अस्मन्नेत्रे द्रवताङ्गते त्वं वज्रचेता नाधुनापि द्रवसि। यद्वा, घनश्यामरसवृष्टिमिच्छतीभिः स्वदृग्जलवृष्ट्यैर्व्योत्पादनं यद्वा स्वनेत्रकञ्जमधुधारात्मकास्रैस्तन्मधुमधुपमाधवमनोलोभनम्। यद्वा, बाह्यसहस्रदृग्जलवृष्टेस्त्वया गोवर्द्धनमुद्धृत्य व्रजरक्षा कृता अधुना व्रजगतबहुसहस्रदृक्सिवासितारुणघनजलवृष्टौ गृहभेदे त्वया किं कार्यम्। कुचकुङ्कुमानि मृजन्त्य इत्यस्यायमभिप्रायः सहस्रदृग्वृष्टेर्गिरिरक्षा त्वया कृता अधुना प्रत्येकदृग्वृष्ट्यसङ्ख्यातकनकगिरिकुचशोभापहारः क्रियते इति महल्लज्जास्पदं यथा तत्र तद्गिरिकरधारणेन गिरिरक्षा कृता तथात्रापि स्तनगिरिकरधारणेनैव तद्रक्षासम्भाव्या नान्यथा यद्वा, सहस्रदृङ्मानघनगृहास्मद्धृत्काञ्चनकलशश्रिय एकदृष्ट्या पहारे इत्यात्पादनाय। यद्वा, त्वद्वैपरीत्ये किमस्माकं कुङ्कुमशृङ्गारेण उपात्तमषिभिरित्यस्याप्ययं भावः त्वदर्थं धृताञ्जनं वृथा वहतीति पश्य। यद्वा, मल्लोचनाञ्जनमपि श्यामस्य द्रवीभूततां दर्शयति श्यामोऽपि सन् भवान्नैव द्रवतीति महच्चित्रं किञ्च, नेत्रयोः श्यामजलप्रवाहे यदि श्यामतारापि द्रवेत्तर्हि केन त्वां द्रक्ष्याम इति नैष्ठुर्यं त्यक्त्वा शीघ्रं प्रसीद। यद्वा, त्वदीयवक्त्रतिग्मांशुतिग्मांशुवचोभिरश्रुरूपतया द्रवीभूय प्रवहत्यप्यन्तःकरणे श्यामराग एव व्याप्तो दृश्यते बहिरन्तस्त्वमेवानुगतोऽपि निष्ठुरतां भजसि अतः प्रसीद। यद्वा, विरहतप्तहृदये स्फोटभियोपात्तमषिभिरस्रैः सिञ्चन्त्यः तथा उरुदुःखभराः दुःखभरेण नम्रकन्धरत्वादवाङ्मुख्यस्तेनैव च रुद्धकण्ठत्वात्तूष्णीं तस्थुः तथोपेक्षादर्शनात्स्वमुखेन किमपि वदनेनौचित्यं सम्भावयन्त्यो भावैरेव स्वदशाः सूचयन्त्यः तूष्णीं तस्थुः। यद्वा, "यः सर्वज्ञः सर्ववित्" इति विशेषतोपि तव सर्ववित्त्वं श्रुतं नो मुखानि शुचः श्वसनेन शुष्यद्बिम्बाधराणि जातानि त्वन्तु नास्मद्दुःखमधुनापि वेत्सि इति चित्रमतः अव नो दुःखमवगमय तथाप्यश्रृण्वानमाहुः—"स शृणोत्यकर्णः" इत्यकर्णस्यापि ब्रह्मणः श्रोतृत्वश्रवणात्त्वं सकर्णोपि न शृणोषि अवशृणु नः प्रार्थनां किं शृणोम्मत आहुः—शुचः श्वसनेन शुष्यद्बिम्बाधराणि नो मुखानि तेनैव कामविरहशोकानलबन्धुश्वासानिलेन दह्यमाना नश्च अव रक्ष कथं रक्षाम्यत आहुः अव आलिङ्ग्य विरहानलज्वलिताकुलितकाञ्चनललितलतात्मकास्मदङ्गानां स्वाङ्गविशालतमालालिङ्गनेन अव वर्द्धय तथाअव अधरामृतं देहिशुष्यद्बिम्बाधराणि मुखानि तेनैवामृतरसेन अव तर्पय तव बन्धुजीवाधरयोरस्मदधरबन्धुजीवनस्यावश्यकत्वात्

शुष्यन्ति नो मुखादीन्यङ्गानि अव कान्तिमन्ति दीप्तिमन्ति च विधेहि अन्यदारास्वीकारमाशङ्क्याहुः-अव स्वस्वाम्यमवगम्य अव प्रसीद तदैव यथार्थपतित्वेनान्यदीयसम्भावनानौचित्यम् अत एव अव स्वावाद्धोः प्रवेशय नोचेच्चरणेन भुवः खननेन भुवं प्रविशाम इति भावः। एवमव स्वाङ्गरसानऽस्मदङ्गेषु विभजस्व नोचेदव हिंसय त्वद्विरहे जीवनस्य दुस्सहत्वात् हिंसनमेव परमोपकार इत्यर्थः। इत्येवम् केवलम् अव अवकृत्वा तूष्णीं तस्थुः "अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थपाचनक्रियेच्छादीप्त्यवालिङ्गनहिंसादानभागवृद्धिषु" इति विधानात् अत्र प्रेमिणां मानाय मानयोः समाना भगवत्प्रीत्यभिवृद्धिः भगवता प्रवृन्युपदेशेपि न गृहाद्यभिमुखत्वं किन्तु तदेकपरत्वमेवेति हितयथोपदेशः ॥ २९ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

चिन्ताप्राप्तानामवस्थानमाह—कृत्वेति। अवशुचः प्राप्तशोकाः श्वसनेन शुष्यद्बिम्बाधराणि मुखानि कृत्वा, यद्वा मुखानि अव अवाञ्चि अधोमुखानि कृत्वा मुखानां तथा करणं च कासाञ्चिदहोऽस्माकं नास्त्यद्यापि प्रेमोद्रेको नो चेत्तेन वशीकृतो भगवानेवं ब्रूयादित्यभिप्रायेण, कासाञ्चिदहो परमप्रेमास्पदेन भगवतैवमनङ्गीकृतानामस्माकमूद्ध्र्वमधो वा क्वाप्यवस्थातुं योग्यता नास्तीत्याशयेन, कासाञ्चिदहो सर्वगुणगणालङ्कृतविग्रहस्य करुणासागरस्य सर्वज्ञस्य भगवत एवंविधोक्तिर्मन्दभाग्यताऽस्मल्ललाटदर्शनजन्या अतः स्वललाटमस्मै न प्रदर्शनीयमित्यभिप्रायेण, कासाञ्चिदहोऽस्मदीयं कञ्चिदपराधं स्मृत्वा भगवानेवंवदतीत्यतो नम्रीभूय क्षमापनीय इत्याशयेन, कासाञ्चिदहोऽस्माकमधो भूमौ निकृष्टजन्मादानं निष्फलमेव सम्पन्नं मित्याशयेन अधःकृतानि मुखानि विशिनष्टि शुचः शोकादुद्भूतेन शोकसम्बन्धिना वा श्वासवायुना शुष्यन्तः शोषं गच्छन्तो बिम्बफलतुल्या अधरा येषु शोकेन ज्वालाव्याप्तश्वासेन शुष्यन्तः शुचः शुचशुचराषाढस्य श्वसनेन वायुना शुष्यद्बिम्बसदृशा अधरा येष्विति वा एवम्भूतश्वसनेनाधरादिसमस्तशरीरं शोषयित्वा मरिष्याम इत्याशयः चरणेन पादाङ्गुष्ठेन भुवं लिखन्त्यः, काश्चिदहो श्रुत्यादिरूपं तिरोधाय भूमौ गोपाङ्गनाविग्रहो वृथैवास्माभिराश्रित इति पश्चात्तापं सूचयन्त्य इव अहो किं भूमिभारभूता अस्मानेव निश्चित्यानेन प्रकारेण अस्मन्नाशायाऽयमवतीर्ण इति, काश्चिदहो भगवती सीतामिव अस्मानपि भूमिं प्रवेशयितुं प्रवृत्तोऽसीति, तथा व्याप्तकज्जलैरश्रुभिः स्तनकुङ्कुमानि क्षालयन्त्यः अहो नास्तीदानीं नेत्रस्थकज्जलस्य स्तनस्थकुङ्कुमस्य च किमपि प्रयोजनमतः क्षालनीयमुभयं तत् क्षालनं चाऽस्मिन् समयेऽन्यजलालाभादश्रुजलैरेव कार्यं कूचेषु चातःपरं मषिलोपो विधेय इति सूचयन्त्य इव मृजन्त्य इति वर्त्तमानापदेशेन मार्जनाय प्रवृत्ताभिरपि यमानुजाप्रवाह-तुल्याभिरश्रुधाराभिस्तन्मार्जनं न सम्पन्नं वडवानलप्रतापसन्तापशोष्यमाणत्वादिति ध्वनितम् उरुभरपदाभ्यां दुःखस्य परा काष्ठोच्यते महद्दुःखातिशयवत्यः दुःखसागरनिमग्नास्सत्यः किञ्चिदपि वक्तुमशक्तत्वात् तूष्णीं तस्थुः स्म मुखस्यावाञ्चिकरणेन भगवदाभिमुख्यस्य शोकेनान्तःकरणस्य बिम्बाधरशोषेण कामरसस्य पदा भूमिलेखनेन शरीरस्य अस्रैारन्द्रियाणां कुङ्कुमाभावेन कान्तेः उरुदुःखभरेणानन्दस्य तूष्णीं स्थित्या चैतन्यस्य च तिरोभावेऽभिधानात् श्वसनेनेति प्राणपीडाकथनान्मूर्च्छिताः केवलं स्थाणुरिव स्थिता इत्यर्थः। अनभिज्ञापक्षे मुखानामधःकरणं कासाञ्चिदहो वयमत्रागताः सम्मानार्हा अप्येतेन न सम्मानिताः प्रत्युत प्रतियातेत्यादिवाक्यैरवमानिता इति लज्जासागरनिमग्नहृदयत्वेन, कासाञ्चिदहो पत्यादिकं विहायैवंविधं कर्म कर्तुं प्रवृत्तानामप्यस्माकं प्रवृत्तिर्निष्फला जाता इतः परं किं करिष्याम इति लज्जाव्याकुलचित्तत्वेन, कासाञ्चिदहो एतेनाऽनाहूताः वंशीशब्दमाकर्ण्याह्वानभ्रमेणैव समागताः अतोऽस्माकं मौर्ख्यमेव प्रकटितमिति लज्जया, कासाञ्चिदहो एवंविधां दशां प्राप्ताः इतःपरं व्रजं गताः कथं तत्रत्यसखीजनेभ्यो मुखं प्रदर्शयिष्याम इति लज्जया, कासाञ्चिदहोविनाऽऽह्वानं समागताः इतःपरं दृष्टो भवदीयसौभाग्यसौन्दर्य्य इति वदतोऽस्य कृष्णस्य समक्षे मुखं कथं करिष्याम इति लज्जया कासाञ्चिदहो सर्वालङ्कारालङ्कृतमप्यस्मदीयं मुखमस्मै न रोचते एतत्समक्षं स्थापनमुयोग्यमिति लज्जया, कासाञ्चिदहोस्मन्मुखमवलोक्याऽस्य महानानन्दो भविष्यतीत्याशया समागतानां परं विपरीतं जातमिति लज्जया, कासाञ्चिदहास्मदन्तःकरण निविष्टप्रेमातिशयमबुध्येवेतेनैवमुक्तगतोऽनभिज्ञसमीपे एव समागमनमनुचितं जातमिति लज्जया, कासाञ्चिदहो नास्त्ययं कान्तानां स्वभावः सर्वथा नेति नेतीत्येवं वदतीनां स्वभाव एवम्भूताऽनर्थकरो योऽस्माभिरङ्गीकृतोऽतस्ताभिरुपहास्या भविष्याम इति लज्जाविष्टचित्तत्वेन, कासाञ्चिदहो इयं मां किं वदिष्यतीयं मां कथं पथि मिलिष्यतीति परस्परप्राप्तलज्जया, कासाञ्चिदहो एतन्मुखनिस्सृतैवंविधोक्तश्यनलज्वालया वृथाऽस्मन्मुखदाहो मा भवत्वित्याशयेन, कासाञ्चिदहो यद्यप्ययमेव मद्दुःखायायुक्तस्तथापि प्रज्वलितास्मदन्तःकरणान्मुखनेत्रादिद्वारा निःसृताभिरति प्रचण्ड ज्वालामालाभिः सन्तापं न प्राप्नुयादित्याशयेन, कासाञ्चिदहो पूर्वं प्रसन्नचेतस्तया वने विहरणपरो वंशीवादनिरतोऽप्यस्मन्मुखं दृष्ट्वैवंविधं क्षोभं गतोऽतः तस्मै क्षोभकरं स्वमुखं न प्रदर्शनीयमित्यभिप्रायेण, कासाञ्चिदहो नेत्रद्वारा काचिन्मोहनशक्तिः अस्मदन्तःकरणे प्रविश्याऽस्मान्व्यामोहत्येतन्नेत्रसमक्षे स्वनेत्रस्थापनं न कार्यमिति भावेन, कासाञ्चिदहो शोकाक्रान्तमस्मन्मुखमवलोक्य कोपाक्रान्तं मे मदीयं मुखमिति भ्रान्त्याऽतोऽप्यधिकमौदासीन्यं मा गच्छत्वित्याशयेन, कासाञ्चित्तथाभूतोक्तिजन्यशोकादुद्भूतसमुद्रकल्पाऽश्रुजलप्रवाहभाराक्रान्तशिरस ऊद्ध्र्वस्थापनाऽशक्त्या, कासाञ्चिदेवम्भूतमप्यस्मदीयं मुखमस्य प्रीतिकरं न भवति किमुताश्रुधारासम्पर्कमलिनीकृतमन्तःशोकोद्भूताश्रुप्रवाहोऽधःपातनीय इति प्रेष्ठचेतसि प्रीत्युत्पत्त्याशया, कासाञ्चिदहो धिक् स्त्रीचाञ्चल्यं येन प्रीतिलेशेनापि हीनस्य पाषाणवदतिकठिनस्वान्तस्य समीपं

ऽतिरभसा समागता अतः परं त्वस्य स्वयमाहूयैवं वक्तुं प्रवृत्तस्य कृतघ्नस्य मुखमपि नावलोकनीयमित्याशयेन, कासाञ्चिदहो विधातरतिकठोरान्तःकरणपरदुःखानभिज्ञदुखपात्रभूता अस्मान्विनिश्चित्यातिदुःखं दातुं प्रवृतोऽसि भवतु शपथोस्ति तव यदि यावत् सामर्थ्यं दुःखं न प्रदास्यसीति तस्मादितोऽप्यधिकं दुःखं यद्यस्ति तव समीपे तर्हि तदप्यस्मभ्यं प्रयच्छ विलम्बं मा गच्छेदं शिरस्तवाग्रेऽस्माभिः स्थापितमिति विधातरि कोपावेशेन, कासाञ्चिदहो परस्परनेत्रसंयोगवशात्परस्परस्वभावविपर्ययो जातः एतस्य कान्तस्य दाक्षिण्यरूपः स्वभावोऽस्मच्चेतसि प्रविष्टः कान्तानामस्माकमवहित्थालक्षणस्वभावोऽस्य मनस्यतस्तथा मा भवत्वित्याशयेन, कासाञ्चिदहो बहूक्तं त्वया भवत्वन्यदपि यद्वक्तव्यं तद्वदस्वेदं शिरस्तवाग्रे स्थापितमित्यभिप्रायेण, कासाञ्चिदहो एवंविधोक्तिनाराचधारया पुनः पुनः किमर्थमस्मान्वेधने प्रवृत्तोऽसि यदि मारणीया एव वयं तर्हि सद्य एव तीक्ष्णासिना ग्रीवोपरि निपातनेनास्माकं शिरांसि छिन्धीत्याशयेन, कासाञ्चिदहो कृतमेवंविधव्याहारप्रयासेन तं विनैव नैवं सौन्दर्यशस्त्रोन्मूलितवर्गद्रुमाणामस्माकं सर्वदैव नम्रीभावोऽस्तीति भावेन, कासाञ्चिदहो विधातस्त्वया किमेवंविधमस्मदीयं मुखं रचितं यदस्य गोपालबालस्यापि प्रीत्यजनकत्वात्तत्समक्षं स्थापयितुमयोग्यमिति पश्चात्तापेन, कासाञ्चिदहो मानलेशेनापि विनिर्मुक्तानामेतासां धिक् स्त्रीत्वमिति विमानस्थदेवाङ्गनादिकृताज्ञानभयेन, कासाञ्चिदहो ऽयं चौरचक्रवर्ती वंशीरवेण स्वभृत्येनास्मदायमनारत्नमञ्जूषाम् अपहृत्य परमसाधुवदेव वदतीत्यतोऽस्माकं बिभतव्यमिति भावेन, कासाञ्चिदहो किमस्मास्वेवमुपदिशसि न वयमुपदशार्थं तव समीपमागताः स्वयमेवोपदिशसि चेत्तर्हि विषसम्मृक्तामष्टान्नवत्तथाभूतोपदेशकृत्तव मुखं नावलोकनीयामत्यभिप्रायेण, कासाञ्चिदहो गोवर्द्धनाधस्तात्स्वहस्तेन वधार्थमेव किं वयं रक्षिता इति सूचनाय, कासाञ्चिदहो सर्वं त्वत्तोऽधोभूतमेव ज्ञात्वा वयमागता अतः किमर्थमेवं बहुभाषस इति ज्ञापनाय, तथा शुचः शोकादुद्भूतेन श्वसनेनोद्गमश्वासेन शुष्यत् सूर्य्यातपेन शोषे सति विगतस्थौल्यैः स्पष्टबलिमद्भिर्बिम्बफलैः सदृशा अधरा येषु अस्मदधरामृतं प्रियो धास्यतीत्याशया समागतानां तदाशाभङ्गोत्थशोकानलस्तच्छोषणे प्रवृत्त इति भावः। पुनश्चरणेन वामपादाङ्गुष्ठेन भुवं लिखन्त्यः, काश्चिदहो नास्ति तवापराधः किन्त्वस्माकमेव यतो यस्मिन्काले "याता ऽबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः" इति त्वयोक्तम् तदा कुहुकशिरोमणेस्तव वचसि कृतविश्वासाभिरस्माभिरभिलाषा यापितवानस्यापि (?) मतोऽधुना किं कुर्मोऽस्मन्मौख्यं मेवास्माकमनर्थकरं सम्पन्नमिति ध्वनयन्त्य इव, काश्चिद्वचनसाक्षी कोऽपि नास्तीति निर्भयता नोचिता किन्तु सर्वाधारभूता भगवती वसुन्धरा साक्षीभूता विद्यत एवेत्यस्या एव बिभेतव्यमिति सूचयन्त्य इव, कश्चिद्भुवनैकसुन्दरेण जारेण गृहीतचेतसां नास्त्यस्माकं तथाविधं पातिव्रत्यं किमर्थमेवं वक्तुं प्रवृत्तोऽसीति बोधनाय जारवतीलक्षण स्वास्मन्दर्शयन्त्य इव, काश्चिदहो वृथैव मुखाद्यलङ्क्रियाऽतः परं मृदमुत्पाद्य तया सर्वाण्यङ्गानि लेपनीयानीति शोकोद्भूतमुत्कटं वैराग्यं बोधयन्त्य इव, काश्चिदहो भूमिरपीयमस्मदपेक्षया वरा यस्यामस्मत्प्रेष्ठपादारविन्दसंस्पर्शः सदैवास्तीति ज्ञापयन्त्य इव, काश्चिदहो यादृशं दुःखमनेनास्मभ्यं दत्त तादृशं दुःखमस्मै प्रदेयं तच्चाऽस्मदङ्गसंस्पर्शादेकस्य भविष्यतीत्यत्युग्र तपः सम्पाद्य भूमिभाव प्राप्य स्वाङ्गसंस्पर्शनायं पीडनीय इति ध्वनन्त्य इव, काश्चिदहोऽस्माकमस्मिन्व्रजभूमावेवंविधाऽति कठोरचित्तः कोऽपि नास्त्यतोऽयमीदृशः कथमत्र जात इति सूचयन्त्य इव, काश्चिदहो किमेवंविधमन्याय्यं कर्त्तुं प्रवृत्तोसि किं भूशर्कराद्यपेक्षयाप्यस्मदीयानि स्तनाद्यङ्गानि कर्कशानि यत्संस्पर्शजन्यदुःखमयादेवं जल्पसीति सूचयन्त्य इव, काश्चिदहोऽस्मद्दुःखाय यत्त्वया चरितमारब्धं तदस्माभिर्लिखित्वा स्थाप्यतेऽस्मिन् जन्मनि जन्मान्तरे वाऽस्य प्रतीकारं करिष्याम इति ज्ञापयन्त्य इव, काश्चिदहोऽत्याश्चर्यमेवविधं मिथ्याप्रतिज्ञमियं भूमिर्द्धारयत्येतद्भारेण विदीर्णा भविष्यतीति सूचयन्त्य इव, काश्चिदहो मातर्वसुन्धरे ! नास्मत्साहाय्यकृत्कश्चिदस्त्यतस्त्वयैवाऽयम्बोधनीयोऽस्य त्वयि प्रीत्यतिशयस्य दर्शनादिति भूमिं प्रार्थयन्त्य इव, काश्चिदहोऽस्य पाषाणवदन्तः करणमतिकठिनमस्मत्प्रेमोद्रेकातिरेकभूमिं न जानात्यत एवंविधं दुःखमवलोक्यापि न द्रवतीति ध्वनयन्त्य इव, काश्चिदहोऽस्मद्धृदयं पाषाणादपि कठोरतरं यत एवंभूतेऽपि कष्टे सत्यपि न विशीर्यत इति सूचयन्त्य इव, काश्चिदहो नास्तीतः परं जीवनकृतमतो भो मातर्वसुन्धरे ! कृपया विशीर्णा भव त्वयि प्रविशाम इति भूमिं प्रवेशाभिमुख्यं बोधयन्त्य इव, पुनश्चास्रै रुपात्तमर्षिभिः कज्जलाक्तैरस्रैः कुचकुङ्कुमानि मृजन्त्यः अहो नेत्रस्थश्यामतैवानर्थकरी ययाऽतिनिष्ठुरान्तःकरणे कृष्णे स्नेहमुत्पाद्यैवम्विधां दशां वयं नीताः अतो मष्यन्तरंहसापि निःसारणीया यत एवं विविधचक्षुष्मत्ताऽपेक्षयाऽन्धतैवास्माकं श्रेयस्करीत्याशयः। अनेन त्वत्प्राप्त्याशानिवर्त्या काष्ठभूतेष्वस्मच्छरीरेषु निःसीमतापक्रकचेन विहारणाय विरहतक्षकृतं श्यामसूत्ररेखाद्वयमित्यपि ध्वनयन्त्य इव, अस्रैरिति बहुवचनेन तत्प्रवाहधारा बोधिता। मृजन्त्य इति वर्त्तमानापदेशेन न मनोत्थनमुनाद्वयजलपाश्रधाराद्वयस्य कुङ्कुममार्जनाद्युद्युक्तस्य हृदयोत्थसन्तापाऽनलस्य तच्छोषणोद्युक्तस्य विवादे कस्याऽपि जयो वा पराजयो वा न संवृत इति द्योतितम्। उरुदुःखस्य भरो भारा यासां ताः भारासहिष्णुतयैव चेतनापगमात्तूष्णीं पाञ्चालिका इव तस्थुरित्यर्थः प्रमानिनीपक्षे, मुखानामधःकरणं कासाञ्चित्परपुरुषमुखावलोकनमप्यस्मभ्यं न रोचत इति सूचनाय, कासाञ्चिदस्मन्मुखावलोकनमपि तवाऽतिदुर्लभमन्यत्तु दुर्निरस्तमित्यपि दर्पख्यापनार्थम्, कासाञ्चिदहो न वयं व्यभिचारिण्यः किन्तु कुलाङ्गनाः तल्लक्षणास्वस्मासु ? तपत्वादिति ज्ञापनाय, कासाञ्चिदहो कृष्ण त्वन्त्वतिधूर्त्तोऽसि परदारानेवं प्रार्थयन् लज्जालेशेनापि विनिर्मुक्तोऽसौ वयं तु लज्जासागरे निमग्ना इति स्वस्य

लज्जावतीत्वबोधनाय, कासाञ्चिदहो अधो गतिसम्पादकमौपपत्यं धर्म्मशास्त्राभिज्ञानामस्माकं सर्वथा परिहरणीयमिति स्वस्य परलोकभयाविष्टताख्यापनाय, कासाञ्चिदहो वयं लोकमर्य्यादाभिज्ञा अधोमुखतापादकं कर्म कर्त्तुं नार्हाः किमर्थमेवं बहुजल्पसीति स्वस्यापकीर्तिभयाविष्टताख्यापनाय, कासाञ्चिदन्तःकरणस्थामुत्कण्ठां मुखादिविकासमवलोक्यैव मा गच्छन्त्वित्याशयेन, अहो स्वपतिविरहजनितशोकोद्भूतौष्णव्याप्ता यतः श्वासाश्च स इति ब्रवीति जनकश्वसनेनेति यदप्यस्यदधरपानाशा तव महती वर्त्तते तथापि तत् सिद्धिः स्वप्नेपि दुर्घटा प्रबलेन त्वया बलात्कारेणाबलानामस्माकमधरामृतपाने क्रियमाणे तत्स्थं पीयूषन्तु न लप्स्यसि तस्याशक्यमाणत्वादित्याशयः । चरणेन भुवं लिखन्त्यः काश्चिदस्मत्पादरजोऽपि तव दुर्लभतरमितरस्तु दूरगतमिति ध्वनयन्त्य इव, काश्चिद्भूमिप्रवेशं करिष्यामस्तव वशीभूतास्तु न भविष्याम इति सूचयन्त्य इव, काश्चिद्बलात्कारेण स्पर्शादिकं करिष्यसि चेत्तर्हि भूमियतये नन्दाय कंसाय वा गत्वा कथयिष्याम इति द्योतयन्त्य इव, अहो बलात्कारेणाऽयमस्मान् गृहीष्यतीति भयादिव मृषाश्रुभिस्त्वदर्थमस्माभिरुपलिप्तानि तव तथाभ्रमश्चेत्तर्हि तानि प्रक्षाल्य तेषु मषिलेपोऽस्माभिः क्रियत इति सूचयन्त्य इव, मार्जनादेः कृतत्वान्मृजन्त्य इत्युक्तम् । उरुदुःखभरा इव तूष्णीं तस्थुः स्म ॥ निवृत्तिपक्षे यथोक्तवाद्युक्तयुक्तिभिः श्रुतीनां महती पीडा जातेत्याशयेनाह—कृत्वेति । चरणेन मूलरूपेण भुवं खाद्युत्पत्तिस्थानं परमात्मानं लिखन्त्यः तत्प्रतिपादने मुख्यतात्पर्य्यवत्यः सर्वाः श्रुतयः अवशुचः प्राप्तशोकाः सत्यः श्रुत्यन्तभागलक्षणानि मुखानि वाद्युक्तस्वार्थलक्षणेन श्वसनेन शुष्यद्बिम्बाधरस्थानीया मोक्षप्रतिपादनभागा येषु तथाभूतानि कृत्वा अस्त्रैः स्वरुधिराश्रुभूतैलाक्षारसैरुपात्तमषिभिस्तत्तद्वादिकरस्थलं खिन्यारूढैः कुचस्थानीयानां सन्दिग्धकठिनभागानां समीचीनार्थलक्षणानि कुङ्कुमानि मृजन्त्यः उरुदुःखभराः तूष्णीं तस्थुः स्म उपरुध्यतता इत्यर्थः ॥ २९ ॥

रास-रहस्यम्

र० टी०—भुवं भूमिं तत्स्थानीयं शरीरं, पञ्चीकरणन्यायेन पार्थिवाधिक्यात्, चरणेनेति एकपादेन लिखन्त्यो अन्यपादोपरि स्थापयन्त्यः "ऋजुकायशिरग्रीवमि"ति आसनं दर्शयति, पुनः मुखान्यवशुचः आत्मदर्शनविरहात् शोकः तस्मात् मुखमवाक् कृत्वा अर्थात् उड्डियानजालन्धरादिमुद्रां गृहीत्वाः पुनः श्वसनेन प्राणायानेन शरीरान्तःकरणसम्बन्धिनः मलनाशं कृत्वा, पुनः बिम्बधराणि शुष्यत् "सद्यः बुद्धिहरी बिम्बा ।" इति वचनात् बिम्बा इव धारयन्तीति बिम्बाधराः विषयाः येषां तानि शुष्यत् विरसा कुर्वन्त्यः वृत्तयस्तासामग्रभागान् अन्तर्मुखं कृत्वा, कथम् ? कुचकुकुमानि कुसु कुत्सितविषयेषु चरतीति कुचः मनः, तत्र कुंकुमं रागो अभिमानं येषां तानि, अतः उपात्त गृहीत असिवत् दोषयुक्ताः तान् अन्तःकरणदोषान् अस्त्रैः परितापाश्रुभिः मृजन्त्यः दुरीकुर्वन्त्यः अधुनापि अपरोक्षानुभवं कथं न स्यादिति उरु महत् दुःखं तद्भराः भाराक्रान्ताः सत्यः तूष्णीं स्म तस्थुः॥२९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तथाभूतानां स्थितिं वर्णयति—कृत्वेति । उरुरपारो दुःखभरो यासां ताः चरणेन भुवं लिखन्त्यः तथा उपात्तमषिभिर्गृहीताञ्जनैरस्त्रैरश्रुभिः कुचकुङ्कमानि मृजन्त्यः क्षालयन्त्यः शुचः शोकात् शोकसन्तापान् उष्णीभूतेन श्वसनेन सबलनिश्वासमारुतेन शुष्यन्तो बिम्बफलनिभाः अधरा येषु तानि मुखानि अव अवाञ्चिकृत्वा तूष्णीं तस्थुः निर्वचनाः स्थिताः बभूवुः ॥ २९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यदा दामोदरो नान्वमोदत तदा तासां दशेदृश्यासीदिति श्लोकद्विकेन शुको वक्ति ॥ न्यक्कृत्येति । वक्त्रवनजानि वक्त्राण्येव वनं जलं तज्जानीति मुखकमलानि न्यक्कृत्य न्यग्भावं प्राप्याधः कृत्वेति यावत् अतितापेन प्रियविप्रियभाषाजेन शुष्यन्तो बिम्बविडम्बका अधरा ओष्ठा येषां तानि । अधरो दन्तवसने खर्वे हीनेऽधरोन्यवदिति विश्वः । ओष्ठाधरौ तु रदनच्छदावित्यमरश्च । चरणेन तन्नखमुखेन महीं भूमिं लिखन्त्यः कोकतन्त्रसिद्धोऽयं भावो भामिनीनां चिन्तावसरे यद्यपि तथाऽपि हे महि महिमाऽयं तव यतस्त्वत्प्रार्थनयाऽयमवतारो जातो न जातश्चास्मन्मनोरथः फलितः फलितार्थस्तु न इयद्विपत्तिमूलं त्वमिति तत्त्वमिति मेदिनीविदारणमिति ध्वनयति । तथा हि कामतन्त्रे कामबाणप्रविद्धाङ्गी खिन्नयोनिर्वराङ्गना । पादाङ्गुष्ठनखेनाधोवदना लिखति क्षितिमिति तत् । उपात्ता मष्यः कज्जलानि यैस्तेऽस्त्रैरश्रुभिः । अस्रममश्रुवेत्यमरः । जलगलनलवकज्जलविगलनमुचितं सदपि यदा नीरदनीलविश्लेषस्तदाऽत्मत्संश्लेपोऽपि माऽस्तु सावर्ण्यादिति ध्वनयति तदनया धाट्येति मन्तव्यं । कुचकुङ्कुमानि मृजन्त्यो मार्जयन्त्य उरुदुःखस्य भरो भारो यासां तास्तूष्णीं तस्थुः स्मेति तदुक्तस्मृतिमत्य ॥ २९ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

श्रीशुक उवाच

भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः । वीक्ष्य रन्तुं मतश्चक्रे योगमायामुपाश्रितः ॥ १ ॥

ब्रह्मानन्दात्समुद्धृत्य भजनानन्दयोजने । लीला या युज्यते सम्यक् सा तुर्ये विनिरूप्यते ॥
लौकिकस्त्रीषु संसिद्धस्तद्द्वारा पुरुषो भवेत् । स्वानन्दानुभवार्थं हि योग्यतापि निरूपिता ॥
ततो हि भजनानन्दः स्त्रीषु सम्यग्विधार्यते । तद्द्वारा पुरुषाणां च भविष्यति न चान्यथा ॥
स्त्रिय एव हि तं पातुं शक्तास्तासु ततः पुमान् । अतो हि भगवान् कृष्णः स्त्रीषु रेमे ह्यहर्निशम् ॥
बाह्याभ्यन्तरभेदेन आन्तरन्तु (परं) महत्फलम् । ततः शब्दात्मिका लीला निर्दुष्टा सा निरूप्यते ॥
ततो रूपप्रपञ्चस्य पञ्चधा रमणं मतम् । आत्मना प्रथमा लीला मनसा तु ततः परा ॥
वाग्घ्राणैस्तु तृतीया स्यात् इन्द्रियैस्तु ततः परा । शारीरी पञ्चमी वाच्या ततो रूपं प्रतिष्ठितम् ॥
षड्विंशे तु हरिः पूर्वं जीवानानन्दयत्स्वयम् । ते चेत्समर्पितात्मानस्तत्रोपायश्च रूप्यते ॥
आत्मा यावत्प्रपन्नोऽभूत्तावद्वै रमते हरिः । सोऽन्तःकरणसम्बन्धी तिरोधत्ते हरिश्च सः ॥

प्रथमं भजनानन्दं निरूपयितुं स्त्रीषु स्वानन्दः स्थापनीय इति तासु रत्यर्थमिच्छां कृतवानित्याह भगवानपीति । "मयेमा रंस्यथ क्षपाः" इति या रात्रयो वरत्वेन दत्ताः स्त्रीणां रमणार्थाः ता रात्रीर्भगवान् परिगृह्य सर्वास्वेव रात्रिषु ता आधिदैविकीरारोप्य पूर्णत्वात्तासां पूर्णिमारूपाः कृत्वा ऋतुमपि शरदमेव कृत्वा तस्यापि कार्यं पुष्पाण्येव कृत्वा रसोद्दीपकत्वेन सर्वां सामग्रीं विधाय पश्चाद्रमणार्थं स्वानन्दप्रकाशकं कामायितामहंमन उत्पादितवान् तत्र सर्वासु स्वस्मिन्नपि बोधनीयः तत्र वेणुरपि सहायतां प्राप्स्यति सङ्कल्पः ततः कामवर्णनं अतः प्रथमं तादृशं मनः कृतवान् यद्यपि एतत्प्रणालिकाव्यतिरेकेणापि स्वानन्दं तत्र स्थापयितुं शक्तः तथापि मर्यादा तिष्ठत्विति भगवानपि मनश्चक्रे नन्वेवं सति स्वानन्दः स्थानत्यागात् अन्यथा भवेत्ततः स्वरूपादपि प्रच्युतः स्यादित्याशङ्क्याह—योगमायामुपाश्रित इति । योगमाया हि यथास्थितमेवान्यत्र स्थापयति यथा सङ्कर्षणं लीलार्थं सापि पूर्वं सापि परिगृहीतेति नाऽपूर्वं किञ्चित् यथा प्रमाणे रक्षायां च बलभद्रोपयोग एवं कार्ये योगमायायाः तत्राप्यन्तरङ्गा योगमाया अन्यत्र स्थितं प्रमाणमन्यत्रापि योजयति अन्यत्र स्थितं चानन्दमन्यत्र अतः प्रमाणातिरिक्तमार्गो भक्तिमार्गेऽग्रे विततौ भविष्यतः याश्च रात्रयो रमणार्थमेव निर्मिताः ता एव परिगृहीताः अन्यथा साधारणीपरिगृहे सर्वत्रैवानन्दः स्यात् शरदि ऋतावुत्फुल्ला मल्लिका यासु ता दृष्ट्वा रमणार्थं मनः कृतवान् योगमायां च समीप एवाश्रित्य स्थितः ॥ १ ॥

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणेन शन्तमैः ।
स चर्षणीनामुदगाच्छुचो हरन् प्रियः प्रियाया इव दीर्घदर्शनः ॥ २ ॥

नूतने तस्मिन्मनसि देवता नास्तीति अनधिष्ठितं च कार्यं न साधयिष्यतीति तदधिष्ठातृदैवं चन्द्रं च ससृज इत्याह—तदोडुराजः इति । यदैव मनः कृतवान् तदैव तस्याधिदैवतमुडुराजः उदगात् उदितो जातः यद्यप्येकदा रात्रयो दृष्टास्तथापि क्रमेणैव तासां स्थितिः भगवन्मनश्चन्द्रस्याधिदैविकत्वात् पूर्ण एव सः निष्कलङ्कश्च मनस्येवाविर्भूते तस्याविर्भावः क्रीडायामुपरतायामुपरतिः मध्याकाशपर्यन्तमेव गमनं नास्तमयः कदाचिदपि सोऽपि चन्द्रः स्त्रीणां मनांसि उडुस्थानानीति तेषामपि रक्षकः इदं प्रथमतया जात इति पूर्वस्यामेव दिशि तस्योदय उच्यते सा दिग्देवानामिति तस्या दिश इन्द्रो देवता अधिपतिश्च इदानीं भगवानेवेन्द्र इति तस्य रेतोरूपः तस्यामुद्गतः अतः प्राच्याः ककुभः मुखं मध्यभागं स्वकरैः स्वकिरणैः विलम्पन् उदगात् तस्या मुखेन रागः स्थितः प्रतिस्पर्धिन्यां सूर्यसम्बन्धेन रागसम्भवात् अतः अस्या अपि मुखं कुङ्कुमसदृशैः करैरारक्तं क्रियते यदि चन्द्रः स्वदिशो मुखं न रञ्जयेत् तदा भगवन्मनोऽपि स्त्रीणां हृदयं न रञ्जयेत् कराः शन्तमाः शीतलत्वात् तापहारकाः । किञ्च, अरुणेन गुणेन कृत्वा अत्यन्तं कल्याणरूपाः अरुणो हि रागप्रधानः पुरुषोपि यद्यनुरागेण स्पृशति तदा सुखं भवति । ननु, अस्य चन्द्रस्य यदि अधिष्ठातृत्वमात्रं तदा मनस्येव उदयो भवेत् यद्यन्धकारनिवृत्तिः प्रयोजनं तदाभगवतैव अन्धकारो निवर्त्तेत यदि वा उद्दीपकत्वं तदापि भगवतैव तत्सम्भवः अतोऽस्यासाधारणं कार्यं वक्तव्यमिति चेदत आह—स चर्षणीनां शुचो हरन्निति । चर्षण्यः सर्वत्र परिभ्रमणशक्तयः ताः सर्वत्र परिभ्रान्ता अपि न क्वापि परमानन्दसम्बन्धिन्यो जाताः यदि वा कश्चिन्मुच्येत तथापि ता न प्रवेशं लभन्ते ततः पूर्वमेव ता निवृत्ता भवन्ति अतस्तासां शोकस्तिष्ठत्येव चर्षणीसहितानां जीवानां वा तासां शोकः इदानीमेव निवृत्तः शक्तिसहितानामेव परमानन्दानुभवस्य वक्तव्यत्वात् प्रायेण तदानीन्तना जीवाः तादृशशक्तियुक्ताः तस्मिन्नुदिते परमानन्दानुभवोऽवश्यं भावीति तथा सति प्रयोजनत्रयं दिग्देवताया मुखसम्मार्जनं चर्षणीनां शोकदूरीकरणं अन्धकारनिवृत्त्यादिश्च कण्ठोक्तं

द्वयमपि तदेकसाध्यमिति वक्तुं दृष्टान्तमाह—प्रियः प्रियाया इवेति। दीर्घकाले दर्शनं यस्य महता कालेनागतो भर्त्ता प्रियः प्रियायाः पतिव्रतायाः शोकं दूरीकृत्य मुखसम्मार्जनं च करोति न चैतत्कार्यमन्मथासिद्ध्यति ॥ २ ॥

दृष्ट्वा कुमुद्वन्तमखण्डमण्डलं रमाननाभं नवकुङ्कुमारुणम्।
वनं च तत्कोमलगोभिरञ्जितं जगौ कलं वामदृशां मनोहरम् ॥ ३ ॥

एवं मनस उत्पत्तिमुक्त्वा तद्देवतायाश्च ततः सङ्कल्पोत्पत्त्यर्थं तच्छब्दयोनित्वं निरूपयन् तद्दर्शनेन वेणुनाद उत्पन्न इत्याह—दृष्ट्वेति। कुमुद्वांश्चन्द्रः पृथिव्यां सर्वत्रैव मुदं कृतवानिति तथा करणे सामर्थ्यम् अखण्डमण्डलमिति। न खण्डं मण्डलं यस्य एतस्य रसोत्पादने विभावकत्वमप्यस्तीति ज्ञापयितुं रमाननाभमिति उक्तं लक्ष्म्या अयं भ्राता भवतीति रमाया आननवत् आभा अस्य तथोक्तः। किञ्च, नवकुङ्कुमवदरुणवर्णमपि तेन विवाहसमये यथा लक्ष्मीमुखं तथा अयं वर्त्तते अतो नूतनकामजनकः। किञ्च, वनमपि रसपोषकं तस्य कोमलगोभिरल्पकिरणैः अभितो रञ्जितमारक्तयुक्तं किरणानां रसदोग्धत्वं वन एव पाल्यत्वं च ज्ञापयितुं च गोपदं रमाननाभत्वेन पूर्वं निरूपणाद्यथा तन्नूतनकटाक्षाभावोदयहेतवस्तथैतेपीति ज्ञापनाय च गोपदमिन्द्रियस्यापि वाचकमिति तथा अधुना भावोत्पत्तिरेव तत्पोषस्तु स्वामिन्यागमनादिनाग्रे भावीति ज्ञापयितुं कोमलपदं यत्र तेन वनमपि रज्यते तत्र यदर्थमागतः तद्रागं कथं न कुर्यात् ततः सङ्कल्पद्वारा कामजननेन सर्वं कार्यं भविष्यतीति कलं यथा भवति तथा जगौ गानं कृतवान् तच्च गानं वामदृशां सुन्दरदृष्टीनां स्त्रीणां मनोहरमिति तस्मात् "गायन्तं स्त्रियः कामयन्ते" इति श्रुतेः। अर्थाद्गीतेन सर्वाः समाहूता इति यदि व्यक्तमधुरं गीतं कुर्यात् तदा गीतमेव शृण्वन्त्यस्तत्रैव स्थिता भवेयुः यासां पुनर्दृष्टिर्नोत्तमा तास्तु नाकारिता एव ॥ ३ ॥

निशम्य गीतं तदनङ्गवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः।
आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कान्तो जवलोलकुण्डलाः ॥ ४ ॥

ततः सर्वाः स्त्रियः समागता इत्याह—निशम्येति। यद्यपि भगवता कुमारिका एवाहूताः तथापि आह्वानं सदृशमिति निरोधोऽपि कर्त्तव्य इति सर्वा एव समागताः। किञ्च, यद्भगवता गीतं तदनङ्गमेव वर्द्धयति—अङ्गं तु नाशयत्येव अतो नूतनाः कामः ता आनीतवान्। किञ्च, व्रज (स्य) स्त्रियः पूर्वमपि भगवदीयाः अतः कृष्णेनैव गृहीतं मनो यासाम् अतः शीघ्रमेव यत्र कान्तः तत्रागताः अनेन आकारिता एव प्रथममागताः इत्युक्तं तासां मुख्यः कान्त इति अत एवान्योन्यमलक्षित उद्यमो यासां ता हि प्रत्येकमेव भगवन्तं पतित्वेन स्वीकृतवत्यः स पूर्वमुपात्तो यः कान्तः तासां शरीरविचारेऽपि दृष्टिर्न जातेति वक्तुं जवेन लोले कुण्डले यासामिति कर्णपीडाऽननुसन्धानं प्रदर्शितम् ताः स्त्रियो गौडदेशस्थाः तत एव कुमारिकाः समागता इति पूर्वं मथुरादेशस्थितानामपि अनागरीणां कुण्डले एव ताटङ्कयोरेव वा कुण्डलत्वम् ॥ ४ ॥

दुहन्त्योऽभिययुः काश्चिद् दोहं हित्वा समुत्सुकाः पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ॥ ५ ॥

प्रसङ्गादन्यासामप्यागमनमाह—तासां वा क्रियापराणां तत्र काश्चन षोडशसहस्रव्यतिरिक्ताः नवविधाः समागताः दशविधा वा गुणानां त्रैविध्यात् नवविधत्वं निर्गुणाश्चैकविधाः जातिकुललोकधर्मपरास्तिस्रस्तिस्र उदीरिताः तत्र गोपजातीयाः दुग्धपराः तत्र दुग्धस्योत्पत्तिस्थितिप्रलयान् कुर्वन्ति तास्तिस्रः प्रथममुदीरिताः एवंविधा अपि गणश इति वक्तुं सर्वत्र बहुवचनं काश्चित् दुहन्त्य एव दोहं दोहनलक्षणं कर्म मध्ये त्यक्त्वा भगवदाभिमुख्येन ययुः गौर्वत्सश्च बद्धौ दोहनपात्रं च अर्द्धदुग्धं यः समयः सर्वथा त्यक्तुमशक्यः तस्मिन् समये समागताः तथा समागमने हेतुः समुत्सुका इति। सम्यगुत्सुकाः (क्यः) को वद क्षणान्तरे भगवान् क्वगमिष्यतीति अन्याः पुनः पयः अधिश्रित्य तथैव ययुः भोजनार्थं पयसि पच्यमानाः गोधूमकणाः संयावशब्देनोच्यते तेषां दोहे सर्वनाश इति पक्वदशैव संयावशब्देनोच्यते अतस्तदप्यनुद्वास्य काश्चन अभिययुः अपरा इति सर्वत्र गुणैर्भिन्नस्वभावत्वम् ॥ ५ ॥

परिवेषयन्त्यस्तद्धित्वा पाययन्त्यः शिशून्पयः। शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोजनम् ॥ ६ ॥

एवं तिस्रो राजस्यः सात्विकीराह—परिवेषयन्त्य इति। भर्तुरपत्यस्यापि सेवा स्त्रीधर्मः तत्र भर्तुः भोजने शयने च सेवा स्वधर्मः अतिबालकानां पुत्राणां स्तनदानं च परिवेषणं च सृष्टिरिव रेतस उत्पादकत्वात् स्तनदानं पालनं शिष्टमन्यत् सर्वत्र तत्तद्धित्वेति ज्ञेयम् अन्या इत्यपि तामसीराह, अश्नन्त्योपास्यभोजनमित्यादि ॥ ६ ॥

लिम्पन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च लोचने। व्यत्यस्तवस्त्राभरणाः काश्चित् कृष्णान्तिकं ययुः ॥ ७ ॥
ता वार्यमाणाः पतिभिः पितृभिः पुत्रबन्धुभिः। गोविन्दापहृतात्मानो न न्यवर्तन्त मोहिताः ॥ ८ ॥

लिम्पन्त्यः शरीरानुलेपनं कुर्वन्त्यः प्रमृजन्त्यः उद्वर्त्तनादिकं कुर्वन्त्यः गृहं वा लिम्पन्त्यः प्रमृजन्त्यः आभरणानि भाण्डानि वा प्रमृजन्त्यः अत्रापि पूर्ववदेव क्रमः शरीरसेवातो गोसेवा मुख्या ततः पतिसेवेति अञ्जन्त्यः काश्च लोचने इति गुणातीता अतः

काश्चनेति दुर्लभाधिकारः सूचितः ज्ञानमार्गशोधिका इति निर्गुणत्वं तासामागमने दैहिकविचारोऽपि न जातः किं पुनस्तद्धर्माणामितिवक्तुं वस्त्राभरणयोर्व्यत्यासमाह—व्यत्यस्तेति। व्यत्यस्तानि विपरीतानि वस्त्राण्याभरणानि च यासाम् एवमुद्यमः सर्वासामेव साधारणो निरूपितः व्यत्यासो मार्गगताविति केचित् तन्मध्येपि काश्चित् कृष्णान्तिकं ययुः काश्चिन्न याः पुनः शब्दपरा जाताः ता उद्युक्ता अपि नाऽऽगताः याः पुनः शब्दापेक्ष्यां त्यक्तवत्यः ताः सर्वतो निरपेक्षा विपरीतावश्यकदेहधर्माः भगवदन्तिकमागताः ॥ ७ ॥ सर्वासामनागमने हेतुमाह—ता वार्यमाणा इति—

"रक्षेत् कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके। अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियः" ॥ इति

चत्वारो रक्षकाः अतो यथायथं पतिभिर्वार्यमाणा जाताः काश्चन पितृभिः तथैव पुत्रैः बन्धुभिश्च ते हि निरुद्धा अपि फलरसानभिज्ञाः साधनप्रवणाः स्वद्वारैव स्त्रीणां भजनं मन्यन्ते न तु स्वातन्त्र्येण तथापि गोविन्देनापहृत आत्मा अन्तःकरणं यासां निवारणं हि श्रौत्रं प्रवर्तकश्च भगवान् अन्तःकरणारूढाश्च पुरुषाः न हि नौकाप्रवाहवेगाद्गच्छन्ती तिष्ठतिष्ठेत्युक्ता तिष्ठति भयं स्वधर्मो वा तासां नास्तीत्याह—मोहिता इति। यदि ताः कृष्णान्तिकं न गच्छेयुः तदा मूर्च्छिता इव प्राणांस्त्यजेयुः सर्वात्मभावज्ञापनार्थं वाधुना व्रजस्थानामेतदागमनज्ञानं कारितवानिति ज्ञेयम् अन्यथाऽग्रे मन्यमानाः स्वपार्श्वस्थानिति वाक्याद्यथा वनस्थित्यज्ञानं सम्पादितवानेवं पूर्वमेवागमनाज्ञानमेव कथं न सम्पादयेत् "प्रक्षालनाद्धिपङ्कस्य" इति न्यायेन तज्ज्ञानं सम्पाद्य तत्सम्भावितदोषाभावसम्पादनात्तदसम्पादनस्यैव वरीयस्त्वादिति ॥ ८ ॥

अन्तर्गृहगताः काश्चिद् गोप्योऽलब्धविनिर्गमाः। कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ९ ॥
दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः। ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गलाः ॥ १० ॥

एवं दशविधानां भगवत्समीपगतिमुक्त्वा यासां कालः प्रतिबन्धकः पूर्वमेव भक्तियुक्तास्ता भजनानन्दमननुभूयैव प्रतिबद्धा एव भगवत्सायुज्यं प्राप्तवत्य इत्याह—अन्तर्गृहगता इति त्रिभिः। दैवगत्या काश्चिद्गृहमध्ये स्थिताः गोपभार्याः चातुर्यानभिज्ञाः अप्रौढाः पतिसहिताः पतिभिरेव संरक्षिताः अलब्धविनिर्गमा जाताः ततः प्रतिबन्धनिवृत्त्यर्थं कृष्णमेव ध्यातवत्यः परं तद्भावनायुक्ताः भगवान् जारः स्वयमभिसारिका इति अन्यथा प्रतिबन्धो न स्यात् तादृश्योऽपि मीलितलोचनाः सत्यो भगवन्तं दध्युः ध्यातवत्यः ततो मुक्ता जाताः ॥ ९ ॥ ननु, तत्र ज्ञानाभावात् विहितभक्त्यभावात् भगवतोपि सान्निध्याभावात्कथम्मुक्ता इत्याशङ्क्य कर्मक्षयात् मुक्ता इति वक्तुं कर्मक्षयप्रकारमाह—दुःसहो यः प्रेष्ठविरहः स एव महानग्निः तस्य यस्तीव्रः तापः तेन धुतानि निर्धूतानि ज्वालितानि भस्मसात्कृतानि अशुभानि यासां फलभोगे कर्म क्षीयत इत्यविवादं कोटिब्रह्मकल्पेषु कुम्भीपाकादिनरकेषु यावत् दुःखम्भवेत् तावद्दुःखं भगवद्विरहे क्षणमात्रेण जातं ततः सर्वपापफलभोगः समाप्तः। पुण्यक्षयप्रकारमाह—ध्यानप्राप्तेति। सर्वपापक्षये भगवान् ध्याने प्राप्तः अच्युतः परमात्मा न तु समागतोऽपि जारत्वेन अन्यथा ततोऽपि कर्मशेषः स्यात् तस्य योयमाश्लेषः तेन या निर्वृतिः तथा क्षीणं मङ्गलं पुण्यम् यासां कोटिब्रह्मकल्पेषु स्वर्गादिलोकेषु यावत्सुखमनुभूयते तावद्भगवदाश्लेषे क्षणमात्रेणैवानुभूतम् अतः पुण्यक्षयोऽपि जातः ॥ १० ॥

तमेव परमात्मानं जारबुद्ध्यापि सङ्गताः। जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥ ११ ॥

ततो मुक्ता जाता इत्याह—तमेव परमात्मानमिति। सुखभोगार्थमेव भगवान् पूर्वमाश्लिष्टः भोगे जातेपि वियोजकपापाभावात् न वियुक्ताः अतः सङ्गता एव स्थिताः शरीरं तु प्रारब्धकर्मनिर्वाणम् अपतत् यद्याश्लिष्टो भगवान्न भवेत्तदा तत्र प्रविष्टाः तद्गतं धर्माधर्मफलं बुभुजुः भगवति प्रविष्टत्वात् मुक्ता एव जाताः तदाह, तमेव परमात्मानमिति। पूर्वं सम्बन्धसमये यद्यपि जारबुद्ध्यापि सङ्गता एव ततः कर्मबन्धस्य प्रक्षीणत्वात् गुणमयं देहं जहुः। तदा अज्ञानमन्यथाज्ञानं वा त्रिक्षणावस्थायीति न तयोः प्रतिबन्धकत्वम् वियोजकाभावात् शरीरान्तरोत्पादकाभावाच्च अविद्या परं तिष्ठति सा भगवच्छक्तिः भगवत्सङ्गतं न व्यामोहयतीति सापि निवृत्ता ततः मुक्ता जाता इत्यर्थः ॥ ११ ॥

राजोवाच

कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने। गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥ १२ ॥

अत्र राजा श्रुतिविरोधमाशङ्कते, कृष्णमिति "तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय" इति श्रुतौ ज्ञानमेव साधनत्वेनोक्तं तत्रैव पुनः "भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित्। स एव मुक्तिदाता च भक्तिस्तत्रैव कारणम्" उभयोश्च निर्णयः—

"ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः। द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः" ॥ इति।

"भक्त्या मामभिजानाति" इत्यपि भगवतोक्तं ततो मर्यादायां ज्ञानेनैव मुक्तिः पुष्टौ भक्त्या ज्ञानेन वा एतासां तु न
द्वयम् भक्तिरपि सगुणाज्ञानमपि स गुणमुभयं च तामसम् अतः कथं मुक्तिरिति तदाह, ताः कृष्णं कान्तं परं विदुः कान्तः पतिर्जारो
वा न तु ब्रह्मतया विदुः मुने इति सम्बोधनम् अत्र निर्णयपरिज्ञानार्थं निरोधस्तु स्पष्टः तासां भगवति स्वस्मिंश्च गुणबुद्धिरेव गुण-
बुद्धिश्च गुणप्रवाहस्य मूलम् अन्यथा गुणबुद्धिनिवारकाणि सर्वाण्येव शास्त्राणि व्यर्थानि भवेयुः वैदिकपक्षस्त्वसम्भावित एव अतो
गुणधियां गुणबुद्धियुक्तानां गुणप्रवाहोपरमः कथम् ॥ १२ ॥

श्रीशुक उवाच

उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः । द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ १३ ॥

तत्रोत्तरमाह—उक्तमिति, चतुर्भिः । एतत्सप्तमस्कन्ध एवोक्तं शिशुपालमुक्तौ यथा शास्त्रद्वयं भक्तिज्ञानप्रतिपादकं साधनं
तथा भगवत्स्वरूपमपि भगवान् हि मुक्तिदानार्थमेवावतीर्णः सच्चिदानन्दरूपेण प्रकटः अतो यः कश्चन येन केनाप्युपायेन भगवति
सम्बन्धं प्राप्नोति स एवमुच्यते ज्ञानभक्त्योस्तु आविर्भावार्थमुपयोगः आविर्भावश्चेदन्यथा सिद्धः तदा न ज्ञानभक्त्योः उपयोगः
अत्र तु भगवान् स्वत एवाविर्भूतः मुक्तिदानार्थं सर्वसाधारण्येन ईश्वरेच्छाया अनियम्यत्वात् अत आविर्भावः स्वेच्छया भक्त्या
ज्ञानेन वा भगवदवतारातिरिक्तकाले द्वयमेव हेतुः । अवतारदशायां तु न तयोः प्रयोजकत्वं वर्षाकाले जलं सर्वत्र सुलभमिति न
कूपनदीनामनुपयोगः शङ्कनीयः तदाह, पुरस्तात्सप्तमस्कन्धे यथा चैद्यः शिशुपालः सिद्धिं भगवत्सायुज्यं गतः द्विषन्नपि द्वेषं कुर्वन्नपि
यद्यपि द्वेषकृतो दोषः प्रतिबन्धको भवति तथापि स्मरणेन तदघं हित्वा तत्र सायुज्यं प्राप्तः । किञ्च, नापि तस्य दोषोऽस्ति कश्चन
द्वेषादयोऽपि भगवतैवोत्पादिताः तदाह—हृषीकेशमिति । इन्द्रियप्रेरकोऽयं यथासुखं भावानुत्पादयति यत्र द्वेषस्यापि मोक्षसाधकत्वं
तत्र अधोक्षजप्रियाः किमुत वक्तव्याः मुक्तिं गच्छन्तीति ॥ १३ ॥

नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप । अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १४ ॥

अत्र मुख्यामुपपत्तिमाह–नृणां निःश्रेयसार्थायेति । प्राणिमात्रस्य मोक्षदानार्थमेव भगवानभिव्यक्तः अत इयमभिव्यक्तिः
निःश्रेयसार्थैव अन्यथा न भवेत् असाधारणप्रयोजनाभावात् भूभारहरणादिकं च अन्यथापि भवति अतो निःश्रेयसार्थमेव भगवतोऽ-
भिव्यक्तिः प्राकट्यं नृपेति सम्बोधनं कदाचिद्राजा कथञ्चिद्गच्छति तद्वदिति ज्ञापयितुं प्रकारान्तरेण तादृशस्य नाभिव्यक्तिः
सम्भवतीति वक्तुं भगवन्तं विशिनष्टि—आदौ भगवान् सर्वैश्वर्यसम्पन्नः अपराधीनः कालकर्मस्वभावानां नियामकः सर्वनिरपेक्षः
किमर्थमागच्छेत् । किञ्च, स्वार्थं गमनाभावेपि परार्थं वा स्यात् तदपि नास्तीत्याह—अव्ययस्येत्यादिचतुर्भिः पदैः । अन्येषां
कृतिसाध्यं ज्ञानसाध्यं वा यद्भवति तदुपयुज्यते भगवांस्तु अव्ययत्वात् अविकृतत्वात् न कृतिसाध्यः अप्रमेयत्वात् ज्ञानसाध्योऽपि
न देहादिभजनद्वारा भजनीयो भविष्यतीत्यपि न यतो निर्गुणः निर्गता गुणा यस्मात् गुणेषु विद्यमानेष्वेवान्यस्य प्रतिपत्तिः तत्र
भवति यथा क्षुधि सत्यामन्नदानं कामे सति स्त्र्युपयोगः इन्द्रियेषु सत्सु तद्विषयाणाम् अतो भगवतः सेवकपूरणीयांशः कोपि
नास्तीति भजनीयोऽपि न भवति किञ्च लीलार्थं यद्यपेक्षेतापि न तथापि सर्वन्तस्यैव यतः सर्वगुणानां स एवात्मा अतः साधन-
प्रकारेण नान्यस्याप्युपयोगः अतः स्वपरप्रयोजनाभावात् यदि साधननिरपेक्षां मुक्तिं न प्रयच्छेत् तदा व्यक्तिः प्रयोजनरहितैव
स्यात् ॥ १४ ॥

कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा । नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥ १५ ॥

एवं सति येन केनाप्युपायेन स एव सम्बध्यते तस्यैव मुक्तिर्भवतीत्याह–काममिति । कामादयः षट्साधनानि भगव-
त्सम्बन्धे तत्र कामः स्त्रीणामेव क्रोधः शत्रूणामेव भयं वध्यानामेव स्नेहः सम्बन्धिनामेव ऐक्यं ज्ञानिनामेव सौहृदं भक्तानामेव
सख्यं तेष्वेव सिद्ध्यतीति पूर्वसिद्धज्ञानभक्त्योः नात्रोपयोगः तेषां मर्यादया स्वतन्त्राविर्भावस्य नियतत्वात् एकस्य तूभयत्वे
संयोगपृथक्त्वन्यायेन निर्णयः वेत्यनादरे अन्यो वा कश्चनोपायो भवेत् परं सर्वदा कर्त्तव्यः अन्यथा अन्ते या मतिः सा गतिः
इति अन्यशेषतामापद्यते कर्मवशाच्च नान्ते भगवतः स्मरणमन्यस्येव प्रपञ्चविरोधत्वात् भगवतः अतो नित्यं ये विदधते ते तन्मयता-
मेव प्राप्नुवन्ति । ननु, कामादिषु क्रियमाणेषु दुःखान्तराभिभवे कथं नित्यं करणं सम्भवति तत्राह–हराविति । स हि सर्वदुःखहर्त्ता
नित्यं तद्भावनायां जगदेव तदात्मकं स्फुरति दृष्टिः कामेनानुरक्तेति किं पुनः स्वात्मा अतः तदात्मका एव भवन्ति सर्वत्र भगवदा-
वेशात् "जीवेन्तःकरणे चैव प्राणेष्विन्द्रियदेहयोः विषयेषु गृहेर्थे च पुत्रादिषु हरिर्यतः—

तादृशीं भावनां कुर्यात् काम क्रोधादिभिर्यथा । पूर्वप्रपञ्चविलयो यथा ज्ञाने तथा यतः" ॥ इति ॥ १५ ॥

न चैवं विस्मयः कार्यो भवता भगवत्यजे । योगेश्वरेश्वरे कृष्णे यत एतद् विमुच्यते ॥ १६ ॥

किञ्च, आदावेव गोप्यो मुक्ताः किमाश्चर्यं बहव एवाग्रे मुक्ता भविष्यन्तीति तदाह—नचैवमिति । एवम् असम्भावना-
रूपो विस्मयो न कार्यः असम्भावितबुद्धीनाम् अन्यथा स्फुरणनियमात् यतो भगवान् यत्किञ्चिन्मोक्षे ज्ञानादिकमुपयुज्यते तत्सर्वं

भगवत्येवास्ति यदि ज्ञानव्यतिरेकेण मोक्षो न भवेदिति ज्ञास्यति तदा सिद्धत्वात् ज्ञानस्य तदपि दास्यति। किञ्च, अन्यसन्देहं कुर्यादपि भगवतो माहात्म्यं न दृष्टमिति भवता तु न कार्यः गर्भ एव माहात्म्यदर्शनात्। किञ्च, निर्दुष्टे सर्वं सम्भवति तत्र दोषाणां मूलं जन्म तदभावे दोषाभाव इति तेन अजत्वात् निर्दुष्टः अन्ये सर्वे हि जायन्ते न तैस्तैषां मुक्तिः सम्भवति तुल्यत्वात्। किञ्च, यो हि साधनपरः स मुच्यते तत्र साधनं मनः सर्वतो निवृत्तं तथा योगेन भवति तस्य योगस्य च नियामको भगवानेव यद्यन्यस्यापि मोक्षो भवेत् भगवदिच्छयैव भवेत् योगादिसाधनानां तन्नियम्यत्वात्। किञ्च, सदानन्दो भगवान् फलात्मा यः कश्चिन्मुच्यते स एतमेव प्राप्स्यति अतः साधनैरप्ययमेव प्राप्यः सोऽपि स्वयमेव सम्बध्यत इति न किञ्चिदनुपपन्नम् किञ्च, एतत्परिदृश्यमानं सर्वमेव जगत् यतो विमुक्तिं यास्यति भावनया गोकुले स्थित आह—ज्ञानदृष्ट्या वा साक्षात्परम्परया वा सर्वानेव मोचयिष्यतीति तदग्रे वक्ष्यति स्वमूर्त्येति श्लोकद्वयेन। यद्वा, कृष्णमिति एताः कृष्णं कान्तं परं विदुर्न तु ब्रह्मतया अतो गुणप्रवाहोपरमः कथं सङ्गच्छते? इति अत्रायं भावः ब्रह्मत्वेन विज्ञानं हि शास्त्रीयं तच्च सात्त्विकं भवितुमर्हति "सत्त्वात् संजायते ज्ञानम्" इति वाक्यात् एतास्तु गुणातीतस्यानन्दमात्रकरपादमुखोदरादेः प्रकटस्यानन्तगुणपूर्णस्य सौन्दर्यादिगुणेषु परिनिष्ठितधियः अतो निर्गुणत्वाद्गुणप्रवाहोपरम कथं सङ्गच्छते उपरमस्याभावरूपत्वेन प्रतियोगिसापेक्षत्वादत्र च प्रतियोगिन एवाभावादिति मुने इति सम्बोधनं शुद्धसत्त्वाविर्भावे ज्ञानोदयस्यानुभवसिद्धत्वेन सम्वादार्थम् अस्योत्तरमाह—उक्तमिति पुरस्तात्सप्तमस्कन्धे गोप्यः कामादित्यादिना अत्रायमर्थः यथा भगवति गुणातीत एव परिनिष्ठितबुद्धित्वेऽपि द्वेषस्य तत्र प्रयोजकत्वाच्चैद्यादीनां तामसत्वं तथैतासामपि निर्गुण एव परिनिष्ठितबुद्धित्वेपि जारत्वबुद्धिः तत्र प्रयोजकत्वात्सगुणत्वमेवेति लक्ष्यते अयं च रसः सर्वभावप्रपत्त्यैकलभ्यः न हि जारत्वबुद्धौ सर्वभावप्रपत्तिः कामपूरकत्वेनैव तत्सम्भवनियमात् अत्र च सगुणत्वस्य प्रतिबन्धकत्वात् यथा चैद्यादीनां स्वाधिकारानुसारेण तादृशशरीरनाशे तत्पदप्राप्तिः तथैतासामपि स्वाधिकारानुसारेण तथात्वे सगुणत्वोपरमेण सर्वभावप्रपत्त्यैव ततो निजपतिभजनमिति सर्वभवदातम् अन्यथा "ये यथा मां प्रपद्यन्ते" इति मर्यादा भज्येत एतदेव मनसि कृत्वाऽऽह–उक्तं पुरस्तादेतत्त इति। ननु, तथापि तादृशप्रपत्तेरेव मूलत्वात् कथं सर्वभावप्रपत्तिसाध्यं फलं भविष्यतीत्यत आह–द्विषन्नपीति। अयमर्थः मोक्षसुखानभीप्सुः तद्विरुद्धद्वेषकर्त्ता च चैद्यः तस्मै यथा ज्ञानिनामपि दुर्लभां मुक्तिं दत्तवान् एवं तादृक्प्रतिपत्तिमूलानामप्येतासां तादृशं फलं दत्तवानिति एतेन यथा द्वेषमुक्त्योस्तारतम्यं त यथाऽन्यशेषभजनैतद्रसयोरपीति सूचितम्। ननु, गोकुलस्य भगवत्क्रीडोपयोगित्वेन सर्वथाङ्गीकृतस्य सर्वस्यैव निर्गुणत्वे कथमेतासां सगुणत्वमुच्यते। किञ्च, अग्रेऽपि यदि सर्वभावप्रपत्तिलभ्यमेव फलं दित्सितं भगवतस्तदा पूर्वमेव स एव भावः किमिति नोत्पादित इति चेत्? अत्र वदामः यासां साक्षाद्भगवत्सम्बन्धस्तासां सर्वासामेव रासमण्डलमण्डनानां शरीरमपि गुणातीतमेवेति ज्ञापयितुं भगवानेव कतिपयगोपीः सगुणदेहाः स्थापयित्वा पूर्वोक्तानां भावोऽपि निर्गुण इति ज्ञापयितुम् आसां सगुणं भावमुत्पाद्यैतन्निवर्त्तकोपि स्वयमेव नान्य इत्यपि ज्ञापयितुं तन्निवृत्तिं विधायाग्रे भाविस्वविरहजदुःखस्वसङ्गमजसुखयोः कर्माजन्यत्वमपि ज्ञापयितुं कर्मक्षयप्रकारेण स्वप्राप्तिं विधाय मत्स्वाम्येव सर्वमिदं कृतवानिति निगर्वः अत्र पुष्टिमार्गोङ्गीकारात् मर्यादामार्गीयानुपपत्तयोऽनवसरपराहता इति सर्वमनवद्यम् अत एव श्रीशुकोपि "जहुर्गुणमयं देहम्" इति सगुणदेहत्यागमेवोक्तवानग्रे गुणातीततत्प्राप्त्यभिप्रायेण गोप्यत्वात् स्पष्टं नोक्तवान् अन्यथा गुणमयपदं वैयर्थ्यं स्यात्। ननु, पूर्वोक्तज्ञापनायैवेदं कृतवानिति कथं ज्ञेयमुपपत्त्यभावात् इत्याशङ्क्योपपत्तिमाह–नृणामिति। अयमाशयः लीलायांतस्थितभक्तेषु च सुतरां रासस्थासु या साधारणत्वबुद्धिः सा सदोषत्वारोपापरपर्याया तासामगुणत्वात् तस्य दोषरूपत्वात् भगवत्स्वरूपे लीलायां च सगुणत्वप्रसङ्गकत्वाच्च एवं सत्येतल्लीलाया मुक्तिप्रतिबन्धकत्वमेव स्यात् न तु तद्धेतुत्वं तथा सत्यवतारप्रयोजनं विरुध्येतेत्यन्यथानुपपत्त्यैव तथोच्यत इति ज्ञापनप्रयोजनमपीदमेवेति ज्ञेयम् व्याख्यानं पूर्ववत् नन्वियदवधिसगुणास्वेतासु कृताया लीलायाः पूर्वोक्तदोषप्रसङ्गकत्वं दुर्वारमित्याशङ्क्य पूर्वलीलाकृतितात्पर्यमाह—काममिति। इदं हि साधारण्येनोच्यते य एवं नित्य विदधते ते तन्मयतां यान्तीति नत्वेतद्गोपभार्याविषयकमेव अत एव क्रोधाद्युक्तिरपि अन्यथाऽप्रस्तावे नात्र तन्निरूपमयुक्तं स्यात् तथा च सगुणेनापि भावेन भजते भगवान् स्वानुरूपमेव फलं ददातीति ज्ञापनाय पूर्वलीलेत्यर्थः। अन्यथा मुख्याधिकारिणामेव भगवत्प्राप्तिरिति ज्ञाने अन्येषामप्रवृत्त्या मुक्त्युच्छेदः स्यात् एवं शास्त्रमप्रयोजकं च स्यात् मुख्याधिकारिणां स्वत एव प्रवृत्तेः स्वरूपलीलयोस्तु न कदाचित्सगुणत्वं लीलाविषायाणां स गुणानामपि निर्गुणत्वापादकत्वात् न हि दोषनिवर्त्तकमौषधं रोगिसम्बद्धः सत्तद्द्भवति तथा सति तदनिवर्त्तकत्वापत्तेः लीलाया विषयसाजात्यनियमेन सगुणनिर्गुणभक्तयोरेकया वेणुवादनादिलीलया निरोधो नोपपद्यते क्रोधादिवत्कामोपाधिकभावस्यापि जघन्यत्वज्ञापनायापि क्रोधादिनिरूपणं ज्ञेयम् तन्मयतां निर्गुणतामित्यर्थः। ननु, साक्षादङ्गसङ्गित्वेपि सगुणत्वस्थितिं वस्तुशक्तिः कथं सहते? वह्निसम्बन्ध इव तूलस्थितिमित्येको विस्मयः लौकिकरीत्या कामभाववतीष्वलौकिकस्य रमणं द्वितीयः क्रोधादिभाववतां तत्फलमननुभूयैव भगवत्प्राप्तिश्चापरः स्नेहवत्समानफलत्वं च यशोदानन्दनेहिताभाववत्यस्तस्य च वनस्थितस्यैतद्ध्यानप्राप्तिश्चान्यः एतासां तदैव निर्गुणदेहाप्राप्तिंविनैव तत्साधनमिति चेतरः सर्वात्मभाववतामेव करिष्यमाणलीलाया अनुभवः अन्यस्यास्तु तद्रहितानामपीत्यनेकविस्मयाविष्टं राजानं ज्ञात्वा तन्निवारकं क्रमेण वदन् पूर्वश्लोकोक्तभाववतां भगवत्प्राप्तौ हेतुनप्याह—नचैवमिति। आद्यविस्मयाभावार्थमाह—भवतेति। अत्रायं भावः पूर्वमनिर्वृत्त्य

ब्रह्मास्त्रतोऽपि गर्भेपि रक्षितवान् भवन्तं प्रयोजनमस्तीति अधुना तु तदभावात् बालवाक्यादपि न रक्षतीति भवतैवानुभूयते न ह्येतावता वस्तुशक्तौ काचिन्यूनता इच्छाशक्त्यधीनत्वात्सर्वासां शक्तीनां तस्याः सर्वतोऽधिकत्वात् न हि मन्त्रप्रतिबन्धदशायामग्नेरदाहकत्वमिति तच्छक्त्यपगम एवेति वक्तुं युक्तम् प्रकृतेऽपि यासां साक्षादित्यादीनोक्तप्रयोजनार्थं भगवता तथा कृतमिति ज्ञात्वा भवता तु विस्मयो न कार्यः अनुभावाननुभवेनान्यः कुर्यादपीति द्वितीयतृतीयादिकं परिहरति—भगवतीति । तत्रेश्वरो हि सर्वरसभोक्ता भवति "सर्वरसः" इति श्रुतेः कामरसो हि तादृशभाववतीषु विशिष्टोऽनुभूतो भवति कामशास्त्रे तथैव निरूपणात् तथा चैश्वर्य्यवत्ययं विस्मयो न कार्यः तथा भगवद्वीर्यस्येतरसाधनासाध्यसाधकत्वेनात्युग्रत्वात् क्रोधादिदोषमन्यानिवर्त्यमपि स्ववीर्येण हरिर्निवारयितुं समर्थ इति तादृशे स विस्मयो न कार्यः यशोह्यसाधारणमसाधारणे कर्मणि सति भवति यदिस्नेहवत्स्वेव मुक्तिं दद्यान्न द्विषत्सु तदान्यसाधारण्येनासाधारणं यशो न स्यात् भयद्वेषादिमत्स्वपि स्नेहादिमत्समानफलदाने ह्यसाधारणत्वेनासाधारणं यशः स्यात् नथा च तादृशयशसः सहजत्वेन तद्ज्ञापकधर्मा अपि हरौ सहजा एवेति नायं विस्मयः कार्यः श्रीर्लक्ष्मीः सा चैतादृशस्नेहवती यद्वक्षसि स्थितिं प्राप्यापि कामयते प्रत्यवतारं चावतरति सदा तद्वत्त्वेन हरिः स्नेहरसाभिज्ञ इति तद्वत्सु स्वरूपदानं युक्तम् ऐक्यं हि ज्ञानमार्गे हरेश्च ज्ञानवत्त्वेन तेषु तथा युक्तं सौहार्दं हि सख्ये सति भवति तच्च समानशीलव्यसनेष्वेव-

"नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना । श्रियं चात्यन्तिकीं ब्रह्मन् ! येषां गतिरहं परा ॥
साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यत्ते न जानन्ति नाऽहं तेभ्यो मनागपि" ॥

इत्यादिवाक्यैर्यथा भगवतो भक्तातिरिक्ते रागाभावो भक्तेष्वेव च राग इति वैराग्यवत्त्वं तथा भक्तानामपि भगवतीति सौहार्दयोग्येषु सौहर्द्दं ददातीति पूर्वोक्तवैराग्यवत्त्वात् तेषु तथाकरणं युक्तमिति भावः । यशोदानन्दन इत्यादिनोक्तविस्मयाभावार्थमाह—अज इति । यदि भगवतो जीववत् कुत्रापि जन्म स्यात्तदान्यत्र बहिःस्थितोऽत्रान्तर्हृदि कथमागतस्तत्र सन्नेवेति शङ्का स्यात् तदभावात्स्वेच्छया यथा मायायवनिकां दूरीकृत्य यशोदागृहे प्रकटस्तथा वने तथैवान्तर्हृद्यपीत्यजे नायं विस्मयः कार्यः अग्रिमोक्ततदभावार्थमाह—योगेश्वरेति । योगिनो हि योगबलेन योगार्थमनेकानि शरीराणि युगपत् क्षणमात्रे सृजन्ति तेषां च योग आगन्तुको धर्मः भगवांश्च तादृग्धर्मसम्पादकः फलदाता चेति तेषामपीश्वर इति "सहजानन्तशक्तिमान्" इति तास्वलौकिकदेहसम्पादनमात्रं न विस्मयसेतुर्भवितुमर्हति अग्रिमतदभावायाह—कृष्ण इति । "कृषिर्भूवाचक" इति वाक्यात्सदानादस्वरूपो भगवान्निर्दोषपूर्णगुण इति यावत् तेन कृष्णातिरिक्तस्य वस्तुमात्रस्यैव सदोषत्वात् तत्रापि स्वास्थ्यहेतुत्वं जानतः सदोषत्वमेवेति निश्चयः इयं च लीला स्वरूपानन्दरूपा तादृश्येवेति सर्वात्मभावरहितेष्वेतदनुभवायोग्यत्वान्नायं विस्मयः कार्य इत्यर्थः किञ्च, एतासां तु स्नेहः पूर्वोक्तः साधनत्वेनासीद्गोकुलं त्वहृयापृतं निशि शयान इति वाक्यात्सर्वसाधनविमुखं तदपि प्रतिक्षणं स्वरूपे लीयते अग्रिमाग्रिमलीलारसानुभवार्थं भगवान् परं पुनः पुनः पृथक्कृत्यतामनुभावयतीत्यचिन्त्यानन्तशक्तिमिति न किञ्चिदाश्चर्यमित्याशयेनाह—यत एतदिति । शुकस्त्वधुना लीलेतराननुसन्धानात् भावनया तत्रैव स्थित इत्येतदित्युक्तवान् वर्त्तमानप्रयोगं च कृतवान् तामेव लीलामनुभवतीति सर्वमनवद्यम् नन्वेतद्वैपरीत्यमपि सुवचं तथाहि एता अपि पूर्वोक्तमध्यपातिन्य एव अत एव पूर्वश्लोके तासामनिवृत्तिमुक्त्वा तादृशी सालोकेत्यसम्भावितेति सा कथमुपपाद्यत इत्याशङ्कानिरासायाह—अन्तर्गृहेत्यादि । अत्रायं भावः पूर्वं हि वचनेन निवर्त्तनं तथा सति निवृत्तिर्हि विपरीतस्वक्रियया भवति सा चातिदूरे यतस्तत्सजातीयाः काश्चिद्भर्त्रादिकृते क्रियया प्रतिबन्धे तत्प्रतिबध्यं देहमपि त्यक्त्वा भगवत्सङ्गता जाताः तथाचैतादृशः पूर्वोक्ताः सर्वा इति युक्तवानिवृत्तिः । किञ्च, तद्भावनायुक्ता इति पदे तच्छब्दस्य पूर्वपरामर्शित्वेन पूर्वं च पूर्वोक्तानामेव भावस्योक्तत्वादेतद्भावसजातीयभाववत्त्वं पूर्वोक्तानामपीति गम्यते तेनैतन्निष्ठाशेषधर्मवत्त्वं तत्रापि सिद्ध्यति एतासां मुक्तिदत्तेति तन्निवृत्तिं विना न सेति तथोक्तं तासां न तथेति न तथोक्तमिति चेत् ? अहो शङ्काढ्यमानिनो मौढ्यदाढ्यं तव यस्मादालोचनलोचनराहित्येन बहिर्मुख्यासत्सङ्गीगरिगर्त्तापातविवशाशयः परोक्तमपि नानुसन्धत्से तथाहि यच्छङ्कानिरासायैतत्कथावतारिता तद्भावश्च त्वया वर्णितस्तत्र त्वां पृच्छामस्तदर्थमियं कथा कल्पितातः सिद्धैवानूदिता अन्त्य एव सम्मतश्चेत् तत्रापि त्वां पृच्छाम एतासां प्रतिबन्धे को हेतुरिति स्वप्रियास्वपि सगुणत्वं ख्यापयितुमेतासां प्रतिबन्धो हरिणैव कृत इति केद्ब्रवीषि हन्तैवं विचारकस्य तव शतधा हृदयं नास्फुटत्कुतस्तन्न जानीमः यतो मर्यादा भक्तिमार्गीयसेवाविषयकश्रद्धाया अपि निर्गुणत्वं तत्र साक्षादङ्गसङ्गिनीषु सगुणत्वं ब्रवीषि किञ्च "तामन्मनस्का मन्प्राणा मदर्थे त्यक्तदैहिकाः" इत्यादिना प्रभुणैव "एताः परं तनुभृतः" इत्यातिनोद्धवेन "नोद्धवोऽण्वपि मन्न्यूनः" इत्यादिना भगवता स्तुतेनापि चरणरेणु प्रार्थनापूर्वकं स्तुता इति कृतगन्धशङ्कापि । ननु, कामोपाधिस्नेह वत्त्वेन तथोच्यत इति चेत् ? न तथा स्नेहे भगवतोपि विषयान्तरतुल्यत्वेन "संत्यज्य सर्वविषयान्" इति कथनानुपपत्तेः विषयार्थमेवागमनात् नच भगवतो विषयत्वेपि तदतिरिक्तविषयाणां त्यागोऽनूद्यत इति वाच्यं तव पादमूलं प्राप्ता इत्युक्तिविरोधात् न हि कामिन्य एवं वदन्ति किन्तु भक्ता एव किञ्चातितोके पूतनासुपयःपानानन्तरं रक्षाकरणे श्रीशुकेन हेतुरुक्तः "इति प्रणयवद्धाभिर्गोपीभिः" इति न हि तादृशे कामोपाधिकः सम्भवति न वा तादृशीनामञ्जनादित्यागः सम्भवति प्रत्युत तदादिसर्वं प्रसाध्यागमनं कुब्जावत् तदनन्तरं यद्रमणं तत्तु "रसो वै स" इति श्रुतेः स्वरूपस्य रसात्मकत्वाद्रसरीत्या स्वरूपानन्ददानमेव—

सात्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् । तामसं मोहदैन्योत्थं निर्गुणं तु मदाश्रयम् ॥

इति भगवद्वाक्याद्भगवत्सम्बन्धिसुखस्यापि गुणातीतत्वमेव ॥ १६ ॥

ता दृष्ट्वान्तिकमायाता भगवान् व्रजयोषितः । अवदद् वदतां श्रेष्ठो वाचः पेशैर्विमोहयन् ॥ १७ ॥

एवं प्रासङ्गिकं परिहृत्य प्रस्तुतमाह–ता दृष्ट्वेति । यास्तु समाहूताः समागता ता न निवार्यन्ते याः पुनः सगुणाः समागताः अन्यसम्बन्धिन्यः ताः शब्दश्रवणात्समागता इतिशब्देन निवारणीयाः अन्यशेषतया भजनमयुक्तमिति करिष्यमाणलीला तु सर्वभावप्रपत्तिसाध्या अतो निबारणार्थं यत्नमाह–ताः दुहन्त्य इत्याद्याः अन्तिकमायाता दृष्ट्वा स्वार्थमेवागता इति निश्चित्य भगवान् सर्वज्ञः सर्वसमर्थोऽपि ता अपि व्रजयोषितः अपावृताः स्वकीयाश्च अतः सर्वानुपपत्तिरहिता अपि दृष्ट्वा अवदत् धर्मप्रबोधनार्थं वक्ष्यमाणमुक्तवान् । ननु, ताः पूर्वं निवार्यमाणाः समागताः कथमेतद्वाक्येन निवृत्ता भविष्यन्ति अतो व्यर्थो वाक्प्रयास इति चेत्तत्राह–वदता श्रेष्ठ इति ये क्वचिद्वदन्ति तेषां मध्ये श्रेष्ठः अतो हृदयगाम्यस्य वचनं भवति अतो यावद्वचनेन निवृत्ता भवन्ति तावन्न कृतौ योजनीयाः । किञ्च, अलौकिकमप्यानिवर्त्तने सामर्थ्यमस्ति तदाह–वाचःपेशैर्विमोहयन्निति । वाचः पेशा वाक्सौन्दर्ययुक्ताः शब्दाः तैर्विशेषेण मोहयन् अथवा ता दृढीकर्त्तुमेव सम्यक् मोहनार्थं निषधवाक्यान्युक्तवान् अन्यथा गच्छेयुरेव अतो अर्थतः निवारयन्नपि पर्यवसानतो न निवारयति ॥ १७ ॥

श्रीभगवानुवाच

स्वागतं वो महाभागाः प्रियं किं करवाणि वः । व्रजस्यानामयं कच्चिद् ब्रूत गमनकारणम् ॥ १८ ॥

भगवद्वाक्यान्याह–स्वागतमित्यादिदशभिः । दशविधानां निवारकाणि तमोरजःसत्त्वभेदाः स्वान्तपर्यवसानतः निरूप्यन्ते स्त्रियस्तासु वाक्यान्यपि यथायथं प्रथमतस्तामससात्त्विक्यो निवार्यन्ते ततस्तामसराजस्यः ततस्तामसतामसस्यः एवमग्रेपि विभाव्याः प्रथमं समागतानां लौकिकन्यायेनाह—स्वागतमिति । कुशलप्रश्नोऽयं वो युष्माकमागमनं स्वागतं किमिति स्तुतिमाह, महाभागा इति । भवतीनां महद्भाग्यम् अतः स्वागमनमेव तथापि प्रच्छद्यन्त इति । लौकिकोक्तिः वस्तुतस्तु निष्प्रत्यूहं भगवत्सामीप्यमागता इति समागतानामुपचारमाह—प्रियं किं करवाणि व इति । किञ्चित् प्रार्थयितुमागता इति लक्ष्यन्ते तथा सति तद्व्यक्तम् अर्थादेतासां नाहं स्वभावतः प्रियः किं तु कामतप्रिया इति ज्ञापितं तत्प्रयोजनं त्रिविधं भवति दृष्टरूपमनिष्टनिवृत्तिरूपं देशाकालव्यहितं कामितं च तत्रापि त्रैविध्यमस्तीति वाकयत्रयं वा यद्भवत्यो धावन्त्यस्समागताः तत्तत्र किं व्रजे कश्चन उपद्रवो जातः यज्ज्ञापयितुं तासां समागमनं पूर्वपूर्वानङ्गीकारे उत्तरोत्तरवाक्यं यदि प्रियमपि न किञ्चित् कर्त्तव्यं व्रजे च न काप्यनुपत्तिः तदा आगमनकारणं ब्रूत ॥ १८ ॥

रजन्येषा घोररूपा घोरसत्त्वनिषेविता । प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥ १९ ॥

तत्राप्यनुत्तरे स्वयमेव पक्षान्तरं कल्पयति, यथा भवन्तः समागताः तथा वयमपीत्याशङ्क्याह—रजनीति । एषा रजनी न तु दिनं दिवस एव ह्यरण्ये कार्यार्थं गम्यते अयं तु चन्द्रः न तु सूर्य इति भावः । नन्वस्तु रजनी तथापि प्रकाशस्य विद्यमानत्वात् आगन्तव्यमेवेति चेत्तत्राह, घोररूपेति प्रकाशयुक्तापि एषा वस्तुतो घोररूपा भयजनिका प्रकाशयुक्तायामपि रात्रौ गच्छन् पुरुषो बिभेतीति किञ्च घोरसत्त्वनिषेविता घोराण्येव सत्त्वानि रात्रिं निषेवन्ते न त्वघोराणि अतो रात्रावघोरो निर्गतो घोरैरुपहन्यते अतः स्वभावधर्मसंसर्गिणां स्वरूपं ज्ञात्वा व्रजं प्रति यात नन्वेवं सति तवव स्थाने स्थास्यामः परिचितो भवानिति चेत्तत्राह–नेह स्थेयं स्त्रीभिरिति । वयं हि पुरुषाः रात्रिश्चेयं अतोऽत्र स्त्रीभिर्न स्थातव्यं तथा सत्युभयोरपि विक्रिया स्यात् किञ्च, भवत्यो यदि वृद्धा बाला वा भवेयुस्तदा स्थीयेत अपि भवत्यस्तु सुमध्यमाः रसात्मिकाः अतो देहाध्यासे विद्यमाने सर्वथैव गन्तव्यं स्थितिपक्षे नञः प्रश्लेषो घोरपदयोर्ज्ञेयः न प्रतियातेति च ॥ १९ ॥

मातरः पितरः पुत्रा भ्रातरः पतयश्च वः । विचिन्वन्ति ह्यपश्यन्तो मा कृढ्वं बन्धुसाध्वसम् ॥ २० ॥

अथ वयमभिसारिका एव त्वामुद्दिश्य समागताः किमिति प्रेष्यन्ते इत्याशङ्क्याह—मातर इति । भवतीनां मातरो नियामिकाः तास्तु नागताः अतो भवतीनामन्वेषणमपि करिष्यन्ति अतः तासां साध्वसं भयं माकृढ्वं मा कुरुत न च वक्तव्यं ता अपि तथा स्त्रीत्वाद्वा नागमिष्यन्तीति चेत्तत्राह, पितर इति । तेषां कुले कलङ्कशङ्कया ते समागमिष्यन्त्येव तर्हि तैः सह गन्तव्यमिति चेत्तत्राह—विचिन्वन्ति ह्यपश्यन्त इति । गोकुलान्तर्गतानां कृष्णस्थानागमने मध्ये बहवो मार्गाः स्फुटिताः सन्ति तत्र भगवन्माया तिष्ठति यथा न कोपि भगवत्समीपं गच्छति अतो मार्गान्तरेणैव गताः अपश्यन्तः सन्तो विचिन्वन्त्येव अनेन स्थितौ शङ्काभावोप्युक्तः बन्धुभ्यः साध्वसमिति च तस्मात् सर्वा नागता इति न गन्तव्यं कुले च कलङ्को भविष्यतीति च ननु, (च) तेपि स्त्रीस्वभावं

जानन्तोति नागमिष्यन्तीति चेत् भगवदर्थं वा समागता इति तत्राह पुत्रा इति पुत्राणां सर्वथा रक्षकत्वं महती लज्जेति तेषु दयया भयाभावार्थं गन्तव्यम् ननु, ते बालका इति चेत्तत्राह, भ्रातर इति। ते हि समर्था अन्वेषणे लज्जावन्तश्च अतो लज्जया अदृष्ट्वा कदाचित् शरीरमपि त्यजेयुः अतो भ्रातृस्नेहाद्गन्तव्यम् ननु, ते अपकीर्तिभयादन्वेषणेन गमिष्यन्ति तरुणास्ते तरुण्यो वयमिति चेत्तत्राह वः पतय इति तेषां भोगापेक्षाप्यस्ति तेषामेव चायं रसः अतः परं स्वं नान्यस्मै देयं भोगश्च ततोपि सिद्धः सर्व एव अपश्यन्तः गृहे अदृष्ट्वा अवश्यं विचिन्वन्ति अतो बहुकालमदृष्ट्वा नाशशङ्कया अपहारशङ्कया च भयं प्राप्स्यन्ति न च वक्तव्यं किमस्माकं तैः तत्राह बन्धुसाध्वसमिति ते हि बान्धवाः तैः सहैव स्थातव्यम् अतो बलवद्बाधकस्य विद्यमानत्वात् व्याद्युद्यगन्तव्यामति ॥२०॥

दृष्टं वनं कुसुमितं राकेशकररञ्जितम्। यमुनानिललीलैजत्तरुपल्लवमण्डितम् ॥ २१ ॥

एवमुक्ते परितो विलोकयन्तीराह—दृष्टं वनमिति। एषा हि राजसराजसी अग्रिमा राजसतामसी यदि वनदर्शनामागनं तदा दृष्टमेव पनन् अतः प्रतियातेति अथात् सर्वदा दृष्टमेवैं तद्वनं नात्र भयमिति ज्ञापितं गृहे च न गन्तव्यमिति "यदि गृहगमनापेक्षा तदैव गन्तव्यम्" इति वचनात् तच्च वनं कुसुमितमिति वर्णयति, यथा तासामत्यासक्तिर्भवति इदानीं पुष्पाण्येव जातानि न फलानीति वा कुसुमिते वने रतिः कर्त्तव्येति भावः। सर्वत्र मोहः प्रेषणं चानुस्यूतं किञ्च; राकेशस्य चन्द्रमसः करैः रञ्जितम् उद्दीपका एते वनं तामसं पुष्पाणि राजसानि चन्द्रकिरणाः सात्त्विका इति अयं राकेश इति पूर्णचन्द्रः अतः पूर्णत्वे स्थातव्यं पर्वादिबुद्धौ तु गन्तव्यमिति वायुमपि तत्रत्यं वर्णयति—यमुनेति। यमुनासम्बन्धिना ऽनिलेन लीलया ये एजन्तः कम्पमानास्तरुपल्लवाः तैर्मण्डितमिति जलसम्बन्धात् लीलया चलनात् तरूणां सुगन्धानां सम्बन्धात् त्रिगुणो वायुरुक्तः वर्णनायां रसोद्बोधके चोपयुज्यते ॥ २१ ॥

तद् यात माचिरं गोष्ठं शुश्रूषध्वं पतीन् सतीः। क्रन्दन्ति वत्सा बालाश्च तान् पाययत दुह्यत ॥२२॥

एवं वनं वर्णयित्वा अत्यासक्तिमुत्पाद्य ततो गन्तव्यमित्याह—तद्यातेति तत्तस्माद्वनं दृष्टमिति कार्यस्य सिद्धत्वात् यात एतादृशं वनमिति मायातेत्यपि ध्वनिः चिर माविलम्बो न कर्त्तव्यः चिरं मा यातेति च न हि कश्चिद्भगवन्तं विहाय गोष्ठं गच्छति किञ्च, गोष्ठं यात तत्र गवां शुश्रूषणमपि भवति किञ्च, त्रत गतानां धर्मः सिध्यतीत्याह—शुश्रूषध्वमिति। पतिसेवा स्त्रीणान्धर्मः तत्रापि भवत्यः सतीः सत्यः पतिविशेषणं वा पूर्वजन्मनि ताः पतिव्रताः स्त्रियः स्थिताः पुरुषभावनया पुरुषा जाताः भवन्तश्च पुरुषाः विपरोता जाता इति अग्रेऽपि वैपरीत्यं भविष्यन्तीति विचार्य गन्तव्यमिति भावः। धर्मस्तत्र रसस्त्वत्रैवेति पतीनिति बहुवचनात् धर्माभावश्च या भवतीनां मध्ये पतिव्रताः ता वागच्छन्त्विति सर्वासामेवातथात्वे न गन्तव्यमेवेति न हि पतिव्रताः समायान्ति लौकिकधर्मपरायणाः अतो भगवद्वाक्यं रसालत्वात् तदभावमेव सूचयति किञ्च, वत्साः तथैव बद्धाः बालाश्च क्षुधिताः ते क्रन्दन्ति अतः तेषां रोदननिवृत्त्यर्थं तान् पाययत स्तनं दुह्यत च गाः परार्थं च भवतीनां जीवनं न स्वार्थम् अतो दुःखितानां स्थाने सुखाकाङ्क्षिभिर्न गन्तव्यमिति ॥ २२ ॥

अथवा मदभिस्नेहाद् भवत्यो यन्त्रिताशयाः। आगता ह्युपपन्नं तत् प्रीयन्ते मम जन्तवः ॥ २३ ॥
भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया। तद्बन्धूनां च कल्याण्यः प्रजानां चानुपोषणम् ॥ २४ ॥

एवमुक्ते याः स्निग्धदृष्टयो जाताः ताः प्रत्याह—अथवेति। मया वृथैवैते पक्षाः कल्पिताः वस्तुतस्तु मां द्रष्टुमेवागताः स्नेहात् सिद्धान्तोऽयं पूर्वपक्षार्थमनूद्यते निरुक्तो भावो गुणात्मको दोषात्मको वा न फलं प्रयच्छति लौकिको भवति अतः अनूद्यन्ते मयि योऽयमभितः स्नेहः सर्वभावेन तेन कृत्वा यन्त्रित आशयो यासां ता दृश्यश्चेद्भवत्यः इहागताः तदुपपन्नमेव तर्हि को विलम्ब इति चेत्तत्राह "प्रीयन्ते मम जन्तवः" इति मम सम्बन्धिनः सर्व एव जन्तवः स्वयमेव प्रीता भवन्ति न तु मया किञ्चित् कर्त्तव्यं स्नेह एव मयि न तु कृतिरिति ततः साधारणमिममर्थं ज्ञात्वा प्रतियात स्थितिपक्षे तु स्पष्ट एवार्थः तद्यातमेति फलिष्यति न हि स्नेहादागतः प्रर्यमाणापि गच्छति यन्त्रितो वशीकृतः अन्तःकरणे अन्याधीने जाते न किञ्चिदवशिष्यते निष्कपटा च प्रीतिः कर्त्तव्येत्युभयत्र भावः ॥ २३ ॥ एवं राजसीर्निरूप्य सात्त्विकीर्निरूपयति—सत्त्वयुक्ताः निरूप्यन्ते ततो रजोयुक्ताः स्त्रीणां मुख्यो धमः भर्तृशुश्रूषणमित्याह—भर्त्तुरिति। स्वभावतो जीवानां भगवानेव भर्त्ता तत्रापि स्त्रीणां स्त्रीशरीरं प्राप्तानां व्यभिचाराभावाय भगवानेव सेव्यः लौकिके तु परिग्रहात् भर्तृत्वेनाभिमतः सेव्यः स एव परो धर्मः तत्राप्यमायया कापट्ये तु न सेवायां फलम् अन्ये सर्वे धर्मा अवरा तद्बन्धूनां श्वशुरादीनां कल्याण्य इति सम्बोधनात् भवतीनां सर्वे सन्तीति ज्ञापितं प्रजानां च पुत्रादीनामनुपोषणम् अन्नादि दानेन स्तनादिदानेन च पित्रादिभिः पोष्यमाणानां स्वतोपि पोषणं वा ॥ २४ ॥

दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा। पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥ २५ ॥

तथापि स पतिः समीचीनो न भवतीति चेत्तत्राह—दुःशील इति। दुष्टे शीले यस्य द्यूतादिव्यसनवान् दुर्भगो दरिद्रः वृद्धः इन्द्रियविकलः जडा मूर्खः रागो महारागग्रस्तः अधना वा अधनापि भाग्यवांश्चेत्तदा सम्भावनया स्त्रीभिर्न त्यज्यते एवं

षड्दोषयुक्तोपि स्त्रीभिरनन्यगतिकाभिः पतिर्न हातव्यः स्पष्ट एव विरोधः षड्गुणो भगवान् षड्दोषः स इति पातकी तु हातव्य एव "भजेदपतितम्पतिम्" इति वाक्यात्। किञ्च, तत्रापि लोकेप्सुभिः येषामिह लोके परलोके च कीर्त्त्याद्यपेक्षा तैर्न हातव्य एव अन्यथा अपकीर्त्तिर्भवेत् ॥ २५ ॥

अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम् । जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः ॥ २६ ॥

ननु, कामरसे निविष्टमनसां न धर्मो बाधकः परस्मिन्नेव रसोत्पत्तेरिति तत्राह—अस्वर्ग्यमिति। कुलस्त्रियाः औपपत्यं जारसम्बन्धः तद्रसालमपि बहुदोषग्रस्तं तत्रत्यान् षड्दोषानाह्–अस्वर्ग्यंपरलोकनाशकं पूर्वधर्मेण सिद्धोऽपि स्वर्गः तस्मिन्नपगच्छति किञ्च, इह लोकेऽपि यशो दूरीकरोति चकारान्नरकोपि नापि तत्र रसभोगो महानित्याह्–अल्पमेव तत्सुखं क्षणमात्रसाध्यं स्वरूपतो सहदपि कालतः परिच्छिन्नं परिच्छिन्नमपि कृच्छ्रमिति कष्ट साध्यं नाल्पेन प्रयासेन सिद्ध्यति अतो बलवदनिष्टानुबन्धि। किञ्च, अनुभवकालेऽपि न रसमुत्पादयति यतो भयजनकं शृङ्गारविरोधी भयानकरसः अत एव व्यभिचारशब्दवाच्यः मुख्यतया भयानकमेव रसमुत्पादयेत् विशेषतः प्रथमतः किञ्च, सर्वत्रैव जुगुप्सितं सर्वदेशेषु सर्वकालेषु तत्कृत्वा यदि सत्कर्मापि कुर्यात् ततोऽपि जुगुप्सितो भवेत् धर्मबुद्धेस्तत्र विचिकित्सैव भवति अतो बहुदोषग्रस्तत्वात् उत्तमाया नैतद्युक्तम् ॥ २६ ॥

श्रवणाद् दर्शनाद् ध्यानान्मयि भावोऽनुकीर्तनात् । न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥२७॥

एवं सगुणाः प्रबोध्य गुणातीताः प्रबोधयति—श्रवणादिति। ननु, लौकिकदृष्टावेते दोषा नतु भक्तिमार्गे परमार्थदृष्टौ वा भवांस्तु पुरुषोत्तम इति चेत्तत्राह—श्रवणादिति। न हि भक्तिमार्गे सम्बन्धः एव कर्त्तव्य इति शास्त्रमस्ति भक्तिर्हि नवविधा श्रवणादिरूपा प्रेमरूपा च स्वतंत्रपक्षे तु सुतरामेव नापेक्षा स्नेहस्तु भगवद्विषयकः अलौकिकः स एव सर्वाधिको भवति लौकिकस्तु कामशेषतां प्राप्तः हीन एव भवति तस्यालौकिकस्य कारणानि त्रीणि श्रवणं दर्शनं ध्यानमिति आदौ श्रवणं भगवद्वाचकानां पदवाक्यानां भगवति शक्तितात्पर्यावधारणं तथा सति विषयो व्यावर्त्तितो भवति अन्यथा अन्यत्रापि स्नेहः स्यात् तदनुदर्शनं तदर्थस्यानुभवः कृपया भगवत्साक्षात्कारो वा भगवत्कामार्थः नारदादिभिरिव ततो ध्यानं योगेन चिन्तनम् एतैरेव मयि भावो भवति स चोत्पन्नो भावः अनुकीर्त्तनात् स्थिरो भवति यथायमुपायः शास्त्रीयः साधीयान् न तथा निरन्तरसान्निध्येन जातो लौकिकः स हि कामशेष इत्यवोचाम अतो गृहान् प्रतियातः अतः परमार्थविचारेऽपि न स्थातव्यमिति तथेत्यत्र प्रकार एव निषिद्धः न स्वरूपतो महत्त्वं निषिद्धं गृहस्थितानां च विहितं भवतीति गृहगमनमाज्ञापितम् ॥ २७ ॥

श्रीशुक उवाच

इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम् । विषण्णा भग्नसङ्कल्पाश्चिन्तामापुर्दुरत्ययाम् ॥२८॥

एवं तासां गृहगमने बोधिते तत्परित्यागानन्तरं पुनर्ग्रहणमिदं वान्ताशनमिव मन्यमानाः भगवद्वाक्यं चानुल्लङ्घ्यमिति विचार्य अतिविरोधे उभयानुरोधिशरीरपरित्यागः कर्त्तव्यः इति निश्चित्य तत्रापि भगवत्सम्बन्धानन्दाभावादितिकर्त्तव्यतामूढा जाता इत्याह—इति विप्रियमिति। विगतं प्रियं यस्मादिति उभयथापि प्रियाभावः किं परीक्षार्थमाह् अहोस्विदभिप्रेत एवायमर्थः इति आ समन्तात् श्रुत्वा वाक्यतात्पर्यं (यर्थं) निर्द्धार्य सत्यं गमनमेव वदतीति निश्चित्य अनभिप्रेतत्वेपि तत्प्रसवहेतुमलभमानाः गोप्यो नैपुण्यरहिता गोविन्दस्य स्वामिनो देवभाषितत्वेन अनृतशङ्कारहितमीश्वरवाक्याच्च निर्द्धाररहितमाकर्ण्य विषण्णा जाताः मनसि परमं विषादं प्राप्ताः तत्र हेतुर्भग्नसङ्कल्पा इति तदा परां चिन्तामापुः कथमस्मद्विचारिणं भगवद्वाक्यं च एकमुखं भवतीति सा चिन्ता त्रैलोक्यं व्याप्य चेदं जन्मजन्मान्तराणि च निर्द्धारमलभमाना दुरत्यया जातावसानरहिता जाताः ॥ २८ ॥

कृत्वा मुखान्यव शुचः श्वसनेन शुष्यद्बिम्बाधराणि चरणेन भुवं लिखन्त्यः ।
अस्रैरुपात्तमषिभिः कुचकुङ्कुमानि तस्थुर्मृजन्त्य उरुदुःखभराः स्म तूष्णीम् ॥ २९ ॥

ततश्चिन्तया यज्जातं तदाह—कृत्वेति। चिन्तया प्रथमं मूर्च्छिता जाताः ततः मुखानि अव अवाङ्मुखानि कृत्वा कमपि स्वमुखं न प्रदर्शयिष्याम इत्यावाङ्मुखानि कृतवत्यः अवगताः शुचो याभिः ताः शोकसम्बन्धिन्यो वा जाताः शुचः श्वसनेन शोकसम्बन्धिना श्वासवायुना शुष्यन्ति बिम्बवदधराणि येषां तादृशानि मुखानि कृत्वा चरणेन च भुवं लिखन्त्यः तथैवावस्था भवतीति भूमिं विवरमिव प्रार्थयन्त्यः उपात्तमषिभिः अस्रैः कुचकुङ्कुमानि मृजन्त्यः तूष्णीं तस्थुः मुखस्य अवाक्त्वेन भक्तितिरोभावः श्वसनेन प्राणपीडाशोकेनान्तःकरणस्य बिम्बाधरशोषेण कामरसस्य पदा भूमिलेखनेन शरीरस्य अस्रैः इन्द्रियाणां कुङ्कुमाभावेन कान्ते दुःखभरेण आनन्दस्य तूष्णीं स्थित्या चैतन्यस्य तिरोभावो निरूपितः केवलं स्थाणुवत् स्थिताः ॥ २९ ॥

श्रीसुबोधिनी-सारः

शुचः श्वसनेन शोकसंबंधिश्वासेन शुष्यंतो बिंबफलसदृशा अधरा ओष्ठा येषु तानि मुखान्यवाऽधः कृत्वा चरणेन पादेन भुवं पृथिवीं लिखंत्यः उपात्ता धृता मषा यैस्तैरस्र रश्रुभिः कुचकुंकुमानि मृजंत्यः क्षालयंत्य उरुर्महान् दुःखस्य भरो भारो यासां ताः तूष्णीं तस्थुः स्म प्रसिद्धम् ॥ २५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

चिन्तां प्राप्तानां स्थितिमाह—कृत्वेति। शुचः शोकादुद्गतेन श्वसनेनोष्णवातेन शुष्यन्तो बिम्बफलसदृशा अधरा येषु तानि मुखानि अव अर्वाञ्चि कृत्वा तथा चरणेन पादाङ्गुष्ठेन विवरं प्रार्थयन्त्य इव महीं लिखन्त्यः। तथा उपात्तमषिभिर्गृहीतकज्जलैरस्रैरश्रुभिः कुचगतानि कुङ्कुमानि मृजन्त्यः क्षालयन्त्यस्तूष्णीमेव तस्थुः। स्म इत्यवधारणे। तत्र हेतुमाह–उरुर्दुःखभरो यासां ताः इति ॥ २९ ॥

अन्वितार्थप्रकाशिका

कृत्वेति ॥ शुचः शोकादुद्गतेन श्वसनेनोष्णवातेन शुष्यन्तो बिम्बफलसदृशा अधरा येषु तानि मुखानि अव अवाञ्चि कृत्वा तथा चरगेन पादांगुष्ठेन विवरं प्रार्थयन्त्य इव भुवं महीं लिखन्त्यः तथा उपात्तमषिभिर्गृहीतकज्जलैरस्रैरश्रुभिः कुचगतानि कुङ्कुमानि मृजन्त्यः आलयन्त्यः। नुमार्षः उरुर्दुःखभरो यासां ताः तूष्णीमेव तस्थुः ॥ २९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

चिंताचिह्नान्याह कृत्वेति शुचः शोकादुत्पन्नेन दीर्घनिःश्वासेन शुष्यंतो बिंबफलतुल्या अधरा येषु तानि मुखानि अव अधःकृत्वा चरणांगुष्ठेन भुवं लिखंत्यः खनंत्यः उपात्ता गृहीता मषिः कज्जलं यैस्तैः अस्रैरशुभिः स्तनकुंकुमानि मृज्यंत्यः प्रक्षालयंत्यः तूष्णीं तस्थुः यतः उरुदुःखभरा भवंति ॥ २९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चिन्तां प्राप्तानां स्थितिमाह ॥ कृत्वेति ॥ शुचः शोकाद्धेतोः, श्वसनेन सोष्णनिःश्वासमारुतेन, शुष्यन्तो बिम्बफलवदधरा येषु तथाभूतानि मुखानि, अवार्वाक् कृत्वा वर्तमानाः, चरणेन वामपादाङ्गुष्ठेन, भुवं महीं, लिखन्त्यः खननं कुर्वाणाः, तथा उपात्तमषिभिः गृहीतकज्जलैः, अस्रैरश्रुभिः, कुचकुङ्कुमानि कुचयोः संबन्धीनि कुङ्कुमानि, मृजन्त्यः क्षालयन्त्यः, उरुदुःखभरः कष्टभारो यासां तथाभूताः सत्यः, तूष्णीं, तस्थुः स्म ॥ २५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

भुवं लिखन्त्य इति : १०.२९.२९.

भक्तानामिह कामपूरक इति प्रायः प्रशस्तिः भोस्त्वय्यस्यास्त्यकलंकितेति धरणि प्राप्तास्तदास्तामितः।
मैवं वञ्चितधीर्भवत्वपर इत्युल्लिख्यते साऽन्यथाकारा स्वानुभवात्तदत्र च भव त्वं साक्षिणीत्यालिखत् ॥ ६१ ॥
वस्त्वस्ति सर्वमपि कौ विपुला यदेषेत्येषा प्रथा तव जनप्राथितास्ति पृथ्वि।
ईदृक् चरित्रमपि कुत्रचिदच्युतस्य दृष्टं त्वयैकमनुयोक्तमिवालिखंस्ताः ॥ ६२ ॥
विमोहास्ता अपि श्रीशवागशयविदस्तदा। प्रत्यूचिरे गताशंके व्यक्ताव्यक्तार्थकं वच ॥ ६३ ॥
स्वागतं वो महाभागा इति ते वदतः प्रभो। नैवोचितं ततो वक्तुं प्रतियात गृहानिति ॥ ६४ ॥
प्रियं किं करवाणाति वाणी वाणीश पूज्य ते। अप्रियार्थकरं वीक्ष्य भवन्तं ह्रेपयेन्न किम् ॥ ६५ ॥
कर्तुस्तव व्रजस्थानां प्रपन्नानामुपेक्षणम्। व्रजस्यानामयप्रश्नो न किं स्यादुपहासकृत् ॥ ६६ ॥
व्याकुलं निखिलमेव गोकुलं जातमित्यचिरमागता इमाः। जानतोऽपि भवतो ह्यनामयप्रश्न एष भगवन् किमर्थम् ॥ ६७ ॥
एकस्मिन् विदिते सजाति सकलं विज्ञायते वस्त्विति श्रुत्यर्थात्त्वदुदीरितात्सुमनसः पश्यन्ति तादृग्विधम्।
त्वं तच्छ्रुत्युपपादकः स्वमनसा ज्ञातेन चास्मान्मनोजातं वेत्सि कथं न वेत्सि यदि वा तत्कि वृथा पृच्छसि ॥ ६८ ॥
न चेद्रात्रिरियं घोरा घोरसत्त्वनिषेविता। तद्व्रजानादरः कस्मात् कस्माद्वा शरण भवान् ॥ ६९ ॥
घोरेयं बहुघोरसत्त्ववसती रात्रिस्ततः कैरपि नास्यां त्वय्यपि रक्षके निरलसे कार्यं विहारादिकम्।
इत्थं चेद् गृह एव कृष्ण विदितं तत्रागतं स्यादिह प्राप्तानां कथनेन किं तदधुना पाहीश कुमः पुरः ॥ ७० ॥
ज्ञानशक्तिक्रियाशक्ती त्वय्युभे हि समर्पिते। कैः श्राव्यं कैरनुष्ठेयं प्रतियातेति ते वचः ॥ ७१ ॥
याः स्युः स्त्रियस्ताभिरिह स्थेयं नेत्युचितं वचः। वयं तु देवपुष्पेषोरस्त्रीभूता जगत्पते ॥ ७२ ॥
ते शोधयन्ति नः सर्वे वयं त्वां शोधयामहे। तदलं तद्विचारेण सर्वे स्वार्थपरायणाः ॥ ७३ ॥

प्रेष्ठस्य ते जगद्बन्धोर्मा भूदागो मनागिति । प्राप्तानामपि नस्तेऽङ्घ्रिं किमद्याप्यस्ति बन्धुभीः ॥ ७४ ॥
लतोल्लसत्पल्लवशोभितं वनं यतोऽस्ति राकेशकराभिरंजितम् ।
लताभिलाषस्तत इत्यवेहि न स्वतन्त्रमत्राच्युत किं वदाम तत् ॥ ७५ ॥

गोपदेषु लसद्वास तत्पतिं त्वामुपास्महे । अतः शुश्रूषतेत्येषा कमर्थं ते लभेत गीः ॥ ७६ ॥
अबला इमा इति वदञ्जानन्नपि यथार्थतः । यदुक्तं ते प्रजावत्यो यूयमित्वद्भुतं न किम् ॥ ७७ ॥
मय्यस्ति निखिलानामप्यरं रतिरिति ब्रुवन् । त्वमेवैवं यदि ब्रूषे तर्ह्यनुत्तरमुत्तरम् ॥ ७८ ॥
अमायया भर्तृसेवा स धर्म इति ते वचः । त्वद्गीतिमोहितास्वस्मास्वधुना न प्रसज्जते ॥ ७९ ॥
प्रजापतिपतिर्भूत्वाप्यस्मान्वक्षि प्रजाऽवनम् । तत्स्त्रीभावं भजस्व त्वं भजामः पुरुषायितम् ॥ ८० ॥
श्रीशाङ्घ्रिसेवनतिरस्कृतिकृत्स पापीत्यालोच्य वीक्ष्य च पतीन् प्रतिषेधवाचः ।
अस्माभिराचरितमीदृशमीश पत्युस्त्यागोऽघस्य यदसौ निगमे निषिद्धः ॥ ८१ ॥

मा पतिस्त्वमिति भाषिते पुरा मेति मा वदत यत्त्वमब्रवीः । अर्थतः पतिरिति स्फुटं तदा ह्यौपपत्यमधुना तु कीदृशम् ॥ ८२ ॥
अयं पतिरयं सुतः कुलमिदं च चन्द्रोज्ज्वलं सुहृत्सहजबान्धवा जनकवंशजाता इमे ।
मनोज्ञमुरलीरवाहृतमनोभिरेवं मनाः गपीश विदितं यदि प्रभवितैष दोषस्तदा ॥ ८३ ॥
कान्तस्त्वं मदनः सुतस्तव करे वंशोऽस्ति वंशोत्तमो भ्राताऽस्मत्सहभूर्लतादिनिचयो वृक्षाः सदाप्ता इति ।
ज्ञात्वा त्वत्सविधे स्वलोकवसतिं प्राप्तासु नास्मासु तत्स्वीयोल्लङ्घनजं मुधैव भगवन् दोषांशमाविष्कुरु ॥ ८४ ॥

पुत्रादयोऽत्र निखिला अपि नाथ देहसम्बन्धिनः खलु ततो भविता सुखं किम् ।
आलोच्य विच्युतविकल्पनमच्युतैवं तं त्वामनङ्गसुखदायकमागताः स्मः ॥ ८५ ॥
कथं त्वदनुशासनं भुवि विलङ्घ्यमित्यागता सखे कथमनादरामदयवद् गिरं भाषसे ।
महत्कृतमसाधु चेदपि सदेव नीचैः कृतं समञ्जसमसाध्विति स्फुटमिहास्ति सार्वत्रिकम् ॥ ८६ ॥

वद सदय सदारताभियोगो जगति जनैर्जगदीश वर्णितो यः ।
तव कथमुदिता परागताऽस्मिन् स्फुटमितराश्रमशाखिशोभमाने ॥ ८७ ॥
सुरतरुचिरशोभ पल्लवस्त्वं वदतु जनो निखिलोऽपि बाह्यदृष्ट्या ।
अतनुरुचिलतानुभावभाक् चेद्भवसि ऋतं हि तदेश तद्वदामः ॥ ८८ ॥
तनुसुखमिह दातुं नेहसे चेत्तदास्तां वयमपि करुणाब्धे नाल्पसौख्यार्थकामाः ।
हृदयगतसमीहापूरणेनाधुनैतदतनुसुखमखण्डं देहि देहीश पूर्णम् ॥ ८९ ॥

देयादेयव्यवस्था यदि मनसि तवास्त्येव पात्रानुसारिण्यास्तामेतावतापि प्रभुवर न मनाग्घानिरस्माकमस्ति ।
देयानि द्राङ् मुनिभ्यस्तरुवरजफलान्याम्ररम्भादिकानि क्षुद्राभ्यस्तद्दिशेश त्वमधरमुचितं विम्बमस्मभ्यमेव ॥ ९० ॥
अन्यस्मै प्रददातु वा न भगवन् पुत्रार्थितं त्वर्पयत्येवाल्पोऽयमनल्पमप्यतितरां सम्पाद्य यत्नाज्जनः ।
धीरोदारमना अपि त्वमधुना कामार्थदानालसस्तद्वाच्यं किमु वाऽर्थ्यमिष्टमपरैरौदार्यमीदृग्यदि ॥ ९१ ॥

मूर्तः स्मरोऽस्तु मयि चेदिति वाञ्छसि त्वं लक्ष्मीपते कलय सम्प्रति कामदानम् ।
सुज्ञोऽसि तत्तव पुनः किमुवाच्यमन्यैर्नादत्तमश्नुत इति श्रुतमस्ति शास्त्रम् ॥ ९२ ॥
अस्मत्तोऽसुलभं यदा दधिपयोऽयासीत्तदैत्यालयं भूत्वा दैन्यमुखः सखे मुहुरहो तत्प्रार्थनामाचरः ।
सर्वस्वार्पणमद्य कल्पितमपि त्वं नैव गृह्णासि तद्युक्तं प्रीतिरलब्धवस्तुनि पुनर्लब्धे त्वनास्थोदयः॥ ९३ ॥
रमालीलाग्राहिन् व्रजवनचरीभिर्युवतिभिः सह क्रीडाव्रीडाकृदिति हृदि मा चिन्तय विभो ।
समत्वं योऽप्यङ्कं नयति नृपतिर्वाऽनधिकृतिं गुरुः शिष्यं लोके भवति हि स एवातुलयशाः ॥ ९४ ॥

सौन्दर्यात्स्ववशे विधेय इति चेत् सर्वेश तत्त्वत्प्रियादासीनामपि दासिकापदनखेनातुल्यभावा वयम् ।
चातुर्याद्यनवस्थितेस्तु सततं खेटस्थितिर्बोधिका प्रेमैकं यदि हेतुरत्र तदलं वीक्ष्यानुकम्पां कुरु ॥ ९५ ॥

सरसमसरसं वा सारसं प्रेमपात्रं भजति जगति भृङ्गस्त्वेवमेवेश जारः ।
चतुरमचतुरं वा प्राप्तमेवोपभुङ्क्ते युवतिजनमिति श्रीनाथ वक्तुं त्रपा नः ॥ ९६ ॥
इमा यथेष्टाचरणे प्रवृत्ताः कथं परेणात्र हि वर्तितव्यम् ।
त्वदुक्तवृत्तीरपि बक्षि नश्चेत् त्वमीदृशं तत्किमितोऽपि वाच्यम् ॥ ९७ ॥
अविधिमज्जनकिल्विषहानये कुरुत सूर्ययुतिं व्रतपूर्तये । विधिमिमं समुदीर्य तदा वयमृजुधियः प्रतिभातिसुवञ्चिताः ॥ ९८ ॥

स्त्रीबुद्ध्याऽऽचरणं निषिद्धमितिचेद् बुद्धौ गृहीतं तदा नास्मद्वाचमुरीकुरु त्वमथवा तद्बोधितार्थक्रियाम् ।
साध्वेतत्तु तवैष वीर मकराङ्कस्य ध्वजो मूर्तिमांल्लग्नः कर्णपदे वदन्निव ततस्तत्प्रोक्तदृष्टिर्भव ॥ ९९ ॥

विभावय विभावरीं हिमकरोऽयमासेवते प्रसर्पति चकोरकोऽप्यमृतमर्पयङ्गनाम् ।
कथं त्वमिह केवलो भवसि सालसः सालसं जडाशयचलं बुधा भुवि वदन्ति तद्दृश्यताम्॥ १०० ॥
मनांस्यपि नपुंसकान्यतनुभान्यहो वश्यतां क्षणेन मुरली निजैर्नयति सानुरागैः स्वरैः ।
पुमानपि भवानहो न खलु लेशवश्यः स्वरैर्भवत्यतनुरागिभिर्न इति चित्रमेतन्न किम् ॥ १०१ ॥

दैत्यैः साकं संगरे दुःखमासीदेवं स्मारे संगरे मा स्म संधेयक् ।
आप्रारम्भं चावसानं बतायमानन्दात्मेतीक्ष्यतां स्वानुभूत्या ॥ १०२ ॥

अयं गुरुरयं बुधः कविरयं च वंशादिमः पुमानिति कथं मया रतिरहो विधेयाऽनया ।
अलं वितर्थचिन्तया यदिह सत्पथालम्बिनः त्वदेकसुरतोत्सवोत्सुकधियः समग्रा अपि ॥ १०३ ॥

पुत्रे सुतासमभिलाषिणि वंशजाद्ये ताराभिलाषिणि विधावविधिं श्रिते यत् ।
मध्ये त्वयैव परदारविचारकोऽयमुट्टङ्कितो विधिरिहेति वयं न विद्मः ॥ १०४ ॥

देवस्त्वमेवाग्निरनङ्गदीप्तिरनेकशाखाश्रयिणो द्विजाश्च ।
तद्देवताग्निद्विधसन्निधाने विधिर्विधेयो विहितोऽस्तशंकम् ॥ १०५ ॥

चरन्ति भुवि वे भवद्वचनबोध्यमानं विधिं भवन्त्यमृतभाजिनस्त इति वेदघण्टाध्वनिः ।
सतीत्थमधुना त्वदुक्तविधिमाश्रितानामहो विलम्ब इह तत्कुतोऽधरसुधारसप्राप्तये ॥ १०६ ॥

पतिं सुरतरागदं सुतमखेदतापादकं कुलं विमलमच्युताविरतभव्यदं भ्रातरम् ।
सदाचरणदर्शकानपरबान्धवानप्यहो विहाय वनमागताः किमधिकं त्वितः पश्यसि॥ १०७ ॥

देवस्त्वं पुरुषोत्तमोऽसि भुवने स्त्रीरत्नभूता वयं कोको यत्प्रभवोऽखिलोपि घटकः सोस्त्यावयोश्चित्तभूः ।
कुञ्जः कान्तगृहं रहः सुमलता चन्द्रः समुद्दीपकः सत्येवं यदि नेष्टसिद्धिरपरं वाच्यं न दुर्दिष्टतः ॥ १०८ ॥
त्वं शीतांशुरहं चकोरललना सिन्धुस्त्वमस्म्यापगा त्वं सूर्यस्त्वहमब्जिनी जलधरस्त्वं केकिकान्ताप्यहम् ।
किं वच्म्यच्युत भूरि शुद्धममृतं त्वं दीनमीनाङ्गनाऽहं तत्त्वामपहाय नास्ति कतमाप्यन्याऽधुना मे गतिः ॥ १०९ ॥

शिवस्वरूपस्त्वमहं सुमङ्गला समुज्ज्वलाङ्गस्त्वमहं च गौर्यहो ।
धृताङ्गभूतिस्त्वमिहाचलोद्भवाऽऽगता त्वदर्धाङ्गसमागमाशया ॥ ११० ॥

प्राचीनवाग्विलसिते बहुशोभिनेत्रेहल्यास्थिताधिकरतौ बुधगोत्रभव्ये ।
गोपालके मघवतीव भुवि त्वयीशे गोपालिका कथमहं शरणं न यामि ॥ १११ ॥
सत्पुष्पके सततपुण्यजनाभिसेव्ये पद्माश्रिते च वसुमत्यधिकामितार्थे ।
सद्राजराजपदभाजि सति त्वयीशे कं यामि कान्त शरणं वद शालकाहम् ॥ ११२ ॥
संकल्पशालिनि विदेहपदाभिधेये कान्तोल्लसत्पदगतौ मकराङ्कभूषे ।
उग्रोत्तमस्थिति रुषि त्वयि नाथ कामे कामं सदा मम रतेरुचितो विहारः ॥ ११३ ॥

पद्माधिकप्रियमनन्तपदं तमोभिन्नामात्मकं कृतरथाङ्गविहारशोभम् ।
भास्वन्तमच्युतभवन्तमधिश्रिता सच्छायेव भूरि विहरेयमहं सुखेन ॥ ११४ ॥

नित्याचलावनपरे सरसे सुराढ्ये सन्मन्दरक्षण विचित्ररुचौ सुकल्पे ।
रत्नाकरस्थितिजुषि त्वयि सर्वयोषिद्रत्नाभिधाऽहमत एव समागताऽस्मि ॥ ११५ ॥
सामोदसर्वगतिके सुरसालशोभे राधान्तरंग विलसत्परिपूर्णभावे ।
कान्ते वसन्तसदृशे सुरभीड्यनाम्नि प्राप्तेक्षितुं त्वयि लतोदयवृद्धिभावम् ॥ ११६ ॥
सर्वाचलोन्नतपदे सुमनः सुदृष्टे सूर्याद्यनेकविधसत्पथिकाभिसेव्ये ।
सत्कान्तया युवसुराधिकयाऽतिभव्ये मेराविव त्वयि कथं न च राधिकेच्छा ॥ ११७ ॥
सर्वे नरास्त्वदवरा जगतीति भूयो भूयोदयाहृदय लोकमुखाच्छ्रुतं मे ।
त्यक्त्वा पतिं निजमतस्तरसाऽऽगताऽहमीड्यं वरं वरयितुं भगवन्भवन्तम् ॥ ११८ ॥
उभयकुलतटाया भर्तृनक्राश्रितायाः स्वजनमकरभाजोऽगाधलज्जापगायाः ।
परतटमुपगन्तुं जातकामाऽऽगता यत्त्वमलमुडुपवंशालम्बि विख्यातकीर्तिः ॥ ११९ ॥

सर्वज्ञचूडामणिवंशभूषण त्वयाऽखिलं ज्ञायत एव यद्यपि ।
न पल्लवो भात्यलतोदितः क्वचित् तथाप्यहं शंसितुमेतदागता ॥ १२० ॥
सत्यं ब्रूहि जनाधिनाथ मदनासक्तं न वा त्वन्मनस्तच्चेदस्त्युचितं न ते यदुपते मत्कामनिर्भर्त्सनम् ।
नो चेन्मय्यनुराग एव फलितस्तन्मा दयालो परीहासेनापि वदाधुना निजगृहं याहीत्यनाथाऽस्म्यहम् ॥ १२१ ॥
का त्वं ददासि किमु वेति तवाशयश्चेज्जानीहि मां यदुपते तनुदानशौण्डाम् ।
यद्यङ्गमिच्छसि गृहाण नचेदनङ्गं दास्ये यथाभिरुचि काममुरीकुरुष्व ॥ १२२ ॥

पद्माब्जोत्पलकञ्जकुन्दकलिकाबन्धूकसच्चम्पकान्यादायादरतः सुमान्यभिनवान्यासक्तचित्ताऽस्म्यहम् ।
सत्पुष्पेष्वनुरक्तिरस्ति भवतः श्रुत्वेति याता द्रुतं तद्योगेन कृतार्थतां नय विभो तान्याश्रितां मामपि ॥ १२३ ॥
आयातो यदि जातुचिद्धि कपिलाषष्ठीष्टयोगस्तदा कुर्वन्त्यद्भुतपुण्यकृद्धितरणं सर्वे सुपर्वोत्सवम् ।
श्लाघ्ये त्वत्पदपर्वणीह कपिलाकोटीविशेषोत्सवे सर्वस्वार्पणमद्य कर्तुमहमप्यद्धाऽऽगता गोपते ॥ १२४ ॥
लप्स्ये सुधामाप्तजनाधरास्थितामित्याशयेनैव मया दयोदधे ।
त्यक्ताः कुधामाप्तजनाधरास्थितास्तत्ते किमन्याय्यमिहैक्षि कर्म मे ॥ १२५ ॥
व्रजेऽतिविरहं विभो तव विभाव्य यातामिमां व्रजेति कथमुच्यते भृशमरुन्तुदं कर्णयोः ।
ददासि यदि नाधरामृतरसं रसान्तर्गता भवामि सरसा नदी शरणमस्तु वा दिष्टतः ॥ १२६ ॥
निशम्य सुरतोत्सवप्रदमिहावतारं तवाऽच्युतालमहमागता हृदि निधाय तत्प्रार्थनाम् ।
ऋतं यदि तदस्ति तद्दिश विलम्बदम्भैरलं कथं न सुरतोत्सवप्रदगतिर्भवेन्माधवः ॥ १२७ ॥
त्वं गोकुलाधिपसुतो भगवन् वयं च तद्वासिसज्जनसुता इति युक्तमेव ।
स्वर्णोल्लसत्करसमर्पणमस्मदीयं तत्संग्रहोऽपि च तवेति कुतो विलम्बः ॥ १२८ ॥
युष्मद्दासः प्रीतिकारीति पूर्वं साक्षादुक्तं श्रीमता यद्वृत्तान्ते ।
सम्प्रत्येतद्विस्मृतं भाति यस्मादस्मद्दासोऽजन्यहो त्रासकृत्ते ॥ १२९ ॥
सरलभावमवेक्ष्य सुवंशजं निजकराकलितं पुरुषे सदा ।
तदधिगम्य विभो मुरलीस्थितेर्वयमपीह तथैव धृताशयाः ॥ १३० ॥

धृत्वा मौनमस्थितं यदि पुनर्नोच्येत चेन्मत्कृतिगुर्वभ्रे तदहं करोमि नितरां यद्धृत्प्रियं वो भवेत् ।
अस्मन्मन्दिरदुग्धमोषणविधावस्माभिरालोकिते यत्त्वं भूर्यवदस्तदेतदधुना कुर्वद्य सत्यं वचः ॥ १३१ ॥
वेदास्तथा स्मृतिचयाश्च पुराणसंघाः सिद्धाः स्वकार्यकथने भुवि सत्प्रमाणम् ।
कात्यायनीव्रतफलानुभवे कथं वेत्त्येतद्विचारयितुमत्र समागताः स्मः ॥ १३२ ॥

वक्तव्यं बहु चेद्वदिष्यसि महावाचाटिकाश्चेटिकाः स्थातव्यं यदि नाम मौनमुररीकृत्य प्रभो तज्जडाः ।
तत्कर्तव्यमतः परं किमिति युक्तार्थं न धीर्धावति धन्यास्ता निजवाग्भिरीशमनिशं स्वं प्रीणयन्त्यञ्जसा ॥ १३३ ॥
अलं वाग्भिरेताभिरुक्तार्थिकाभिमुकुन्दैकमेवात्र सारं वदामः ।
विना तेऽधरोद्यत्सुधापानलाभं धरासुस्थितिर्दुर्लभा नः प्रभाति ॥ १३४ ॥
विशिण्ढि रागं प्रणयावलोकैर्निष्पिण्ढि रोगं स्मितभेषजेन ।
प्रदेहि भोगं विविधोपचारैर्निधेहि कीर्तिं भुवि किंकराणाम् ॥ १३५ ॥
पतिर्भव रतिं देहि मतिरस्तु पदाम्बुजे । भक्तवत्सल किं ब्रूमस्त्वदन्या नैव नो गतिः ॥ १३६ ॥
भर्तुः पितुश्च शरणं शरणं सतीनां तत्त्वच्युत च्युतमिति प्रविहाय याताः ।
नाथ त्वयापि विपिने समुपेक्षिताश्चेत् सर्वात्मनाप्यशरणा इति किं न वेत्सि ॥ १३७ ॥
न विद्मो विज्ञप्तिप्रचरणविधिं नैव युवतिस्वभावस्थान् विद्मो वशितपुरुषानप्यभिनयान् ।
न विद्मो वा सेवाऽऽचरणमपि दासीसमुचितं न जानीमस्त्वन्यत्सदय तव पादप्रणमनात् ॥ १३८ ॥
आकारिते बत मया निजकार्यजातं त्यक्त्वाऽऽगतो निशि वने जन एष नूनम् ।
एतावदेव सदय स्मर नैजचेतस्येतावतैव भविताऽखिलदुःखभङ्गः ॥ १३९ ॥
यदि हास्यतामिति सकृद्भवतोक्ते जनहास्यतापदमहो न भवामः ।
त्वमुपेक्षणं वितनुषे यदि न स्यात् तदुपेक्षणं बत कुतोऽपि विभो नः ॥ १४० ॥
न धर्मं नाप्यधर्मं वा विद्मोऽस्मिन् श्रीश कर्मणि । जानीमस्त्वेकमेवेदघ्नस्त्वं व्रजार्तिहा ॥ १४१ ॥
त्वत्पादजलजोपास्य दास्यस्ते त्वामुपागताः । स्वामी त्वमसि तल्लोके न नयस्वोपहास्यताम् ॥ १४२ ॥

कृष्णप्रिया

उनके बिम्बाफल (पके हुए कुँदरू) के समान लाल-लाल अधर शोक के कारण चलने वाली लंबी और गरम साँस से सूख गये। उन्होंने अपने मुँह नीचे की ओर लटका लिये, वे पैर के नखों से धरती कुरेदने लगीं। नेत्रों से दुःख के आँसू बह-बहकर काजल के साथ वक्षःस्थलपर पहुँचने और वहाँ लगी हुई केशर को धोने लगे। उनका हृदय दुःख से इतना भर गया कि वे कुछ बोल न सकी, चुपचाप खड़ी रह गयी ॥ २९ ॥

प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्तितसर्वकामाः।
नेत्रे विमृज्य रुदितोपहते स्म किञ्चित् संरम्भगद्गदगिरोऽब्रुवतानुरक्ताः॥ ३० ॥

कर्दमक्षमा

अन्वयः—तदर्थं, विनिवर्तितसर्वकामाः, अनुरक्ताः, गोप्यः, रुदित, उपहते, नेत्रे, विमृज्य, किञ्चित्, संरम्भ-गद्, गद, गिरः, प्रियेतरम्, , प्रति, भाषमाणम् इव, प्रेष्ठम्, कृष्णम्, अब्रुवत, स्म ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च। प्रेष्ठमिति। किंचित्संरंभेण कोपावेशेन गद्गदा गिरो यासां ता अब्रुवत स्म। संरंभे कारणं प्रेष्ठमित्यादि। प्रियेतरमिव प्रतिभाषमाणं प्रत्याचक्षाणम् ॥ ३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न केवलं तूष्णींभावमाश्रित्य स्थिता एव, अपि तु किंचिदब्रुवतेत्याह—किञ्चेति। दुःखकथनं त्वतिप्रियायोचितमित्याह—प्रेष्ठमिति। गद्गदाः स्खलिताक्षराः। संरंभपदेनाधरदशनं सूचितम्। प्रियेतरम् शत्रुम्। प्रत्याचक्षाणम् खण्डयन्तम्। चिंतां त्यजत, मा रुदत, स्वस्था भवत, गृहान्यातेत्यादि तदानीमपि वदंतमित्यर्थः। तदर्थं कृष्णकृते विनिवर्त्तितस्त्यक्तः,–सर्वे–कामा यस्मात्स सर्वकामः पतिः वांछितविषयो वा याभिस्तास्तथा। रुदितेन रोदनेनोपहते क्लिष्टे। अनुरक्ताः तत्परित्यागं कर्तुमशक्ताः॥ ततश्च किमरण्यरोदनं कुरुध्वे प्रसन्नमुख्यः सत्यः स्वस्वगृहं किं तूर्णं न गच्छतेत्युच्चैरुच्चरितेन भगवद्वाक्येन कर्णाध्वनांतःप्रविष्टवता मूर्छातस्ताः प्रबोधिताः किञ्चिद्विज्ञापयामासुरित्याह–प्रेष्ठम्, पूर्वं बहुशः कृतांगसंगात् प्रियतमम्। अथ च कारणं विनैव प्रियेतरमिव प्रतिकूलं स्वस्वपतिं भजध्वमित्यतिकठोरं भाषमाणम्। एतच्च नैव संभवेत्, यतस्तदर्थं विशेषेण पुनर्यथा संबंधगंधोपि तेषां न स्यात्तथा निवर्तिताः सर्वे कामा याभिस्ताः। अत्रान्यशब्दस्याप्रयोगाच्च भगवत्सुखार्थककामः कामशब्देन नोच्यते इति श्रीशुकाभिप्रायः। रुदितेनोपहते अंधीभूते नेत्रे विमृज्येति। अयमंतकालोऽस्माकमागतस्तत्सकृदप्येतस्य मुखकमलं दृष्ट्वा म्रियामहे इत्याकांक्षयेति भावः। हंतहंत प्रेयसापि भूत्वा विनैवापराधं कथमेतावान्प्राणांतो दंडः क्रियते इति संरंभः, तथा वयमेतदनुरूपगुणाद्यभावादंगसंगाऽयोग्या एव भवामोऽतस्त्यज्यामह इति मननात्संरंभाभावश्चेत्यतः किञ्चित्संरंभेण गद्गदागिरो यासां ताः। ननूभयथाऽपि प्रेमशून्यात्तस्मान्निवृत्तिरेवोचितेत्यत आह—अनुरक्ता इति। अनुरागांधा हि विचारं न सहन्त इति भावः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रेष्ठं प्रियतममपि प्रियेतरमिव प्रियमात्रादितरमिव प्रत्याख्यानं कुर्वन्तम् ननु, तर्हि तस्मात् मनः कथं न न्यवर्त्तयन्? तत्राह, तदर्थं श्रीकृष्णप्राप्तये विशेषेण निवर्त्तिताः पुनर्यथा सम्बन्धगन्धोऽपि तेषां न स्यात्तथा निरस्तास्तद्व्यतिरिक्ता शेषाभिलाषा याभिस्ताः अतस्तन्निवर्त्तयितु नाशक्नुवन्निति भावः। कुतः कृष्णं परमानन्दघनतया सर्वचित्ताकर्षकतया च तन्नाम्ना प्रसिद्धं श्रीव्रजेन्द्रनन्दनम्; ननु उरुदुःखाक्रान्ताः कथं वक्तुमपि शक्तास्तत्राह संरम्भेति। अमर्षण विषादकार्येणैव विषादावरणादिति भावः। तत्र नेत्रमार्जनं भावद्वयसन्धिजं तच्च प्रणयकोपस्वभावतः किञ्चित् श्रीमुखावलोकनपूर्वकवचनार्थम् इति परमार्त्त्यो लज्जा शैथिल्यमपि गम्यते किञ्चिदिति विषादांशस्यान्तर्भूतत्वात् तद्द्वयकार्यं गद्गदत्वम् अनुरक्ता इति विषण्णतादौ सर्वत्रैव हेतुः ॥ ३०॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रेष्ठं प्रियतममपि प्रियेतरमिव, अप्रियजनवत् प्रत्याख्यानं कुर्वन्तम्, ननु, तर्हि तस्मान्मनो निवर्त्त्यताम्, तत्राह—तदर्थं श्रीकृष्णप्राप्तये किंवा तस्मै अनिर्वाच्याय सुगोप्याय वा अर्थाय तेन सह क्रीडाविशेषाय विशेषेण निवर्त्तिताः स्वभावतोऽनुलग्ना अपि बलान्निरस्ताः सर्वे कामा विषयभोगास्तदतिरिक्ताशेषाभिलाषा वा याभिस्ताः, अतस्तं विना कथञ्चिदप्यन्यत् किञ्चिन्न रोचत इति भावः। कुतः? कृष्णं परमानन्दघनमूर्त्तिं चित्ताकर्षकं श्रीयशोदानन्दनम्, अत एवानुब्रुवेन स्वेत्यत्राप्ययिप्रसिद्ध्याद्यपेक्षयोक्तम् यद्वा, पश्चादर्थे, उरुदुःखरेण सद्यः प्रत्युक्त्यनुदयात् पश्चादब्रुवन्। ननु, अतिनिर्बन्धेन कदाचित्तस्यावज्ञापि शंक्यते, तत्राह—अनुरक्ता अनुरागेण तच्छंकानिरसनात्, यद्वा, अवज्ञायामपि सत्यां तत्त्यागाशक्तेः, विचारापगमाद्वेत्यर्थः। ननु, उरुदुःखाक्रान्ताः

कथं वक्तुमपि शक्ताः ? तत्राह—रुदितैर्महादुःखेन स्वयमेव गलदस्रैरुपहते व्याप्ते नेत्रे विशेषेण मृष्ट्वा शोधयित्वा अश्रूण्यपसार्य्य, पाठान्तरे प्रमृज्येति पाठेऽप्यर्थः स एव । परमप्रयत्नेन क्षणं धैर्य्यमालम्ब्येत्यर्थः, यद्वा, उरुदुःखेऽप्युक्तिशक्तावनुराग एव हेतुर्भाति प्रेम्णो विचित्रविलासत्वात् ततश्च नेत्रे विमृज्येति स्नेहजननाय प्रेमोद्रेकस्वभावत एव वा किञ्चिच्छ्रीमुखावलोकनपूर्वकोक्त्यर्थमिति परमार्त्त्या लज्जापगममपि गम्यते । किञ्चिदिति संरम्भस्याल्पत्वं स्वतः प्रेष्ठत्वात्, निजप्रेमकोमलशीलत्वाद्वा । यद्वा, अनिर्वचनीया महासंरम्भेण गद्गदगिरः, यतोऽनुरक्ताः । अन्यत्तैर्व्यञ्जितम् । यद्वा, किञ्चित् संक्षिप्तमेवमेवमित्यादिकमब्रुवन्, कुतः ? संरम्भगद्गदगिरः, प्रणयकोपावेशेन बाष्परुद्धकण्ठत्वादित्यर्थः । तत् कुतः ? अनुरक्ताः, पूर्वमपि स्वभावत एव रक्ताः, अधुना च तादृशोक्तिश्रवणादधिकोत्कण्ठया विशेषतो जाताधिकरागा इत्यर्थः । यद्वा, कृतरागविशेषा न तूपेक्षयापि निर्विण्णा इत्यर्थः । यद्वा, किञ्चिदनिर्वचनीयम्, अनुरागेण तत्तदुक्त्या तस्यापि मनोहरत्वात् तादृगुक्तौ हेतुः—प्रेष्ठमित्यादि । अप्रिय प्रतिपदं भाषमाणं इति पूर्वमेव, किंवा वर्त्तमाननिर्देशेन तदानीमपि चिन्तां त्यजत, मा रुदित, स्वस्था भवत, गृहान् यातेत्यादिकमनिष्टं प्रतिक्षणं वदन्तमित्यर्थः । इवेति तत्त्वतस्तात्पर्य्यविचारेण नर्म्मादौ पर्य्यवसानात्, तच्च पूर्वं लिखितमेव—

यासामेव प्रसादेन या सात् श्रीनागरेश्वरे । उक्तेर्विज्ञायतेऽर्थस्ता वन्दे श्रीनागरीश्वरीः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च प्रेष्ठमिति ततः शनैरुदितेन रोदनेन उपहते शोकाश्रुपूर्णतया लुप्तदर्शने नेत्रे विमृज्य प्रमृज्य किञ्चित्संरम्भेण कोपावेशेन गद्गदा गिरो यासां तथाभूताः अनुरक्तास्तस्मिन्नेवानुरागयुक्ता अत एव तदर्थं कृष्णार्थमेव त्यक्ताः सर्वे मनोरथा याभितास्तथाभूताः गोप्यः कृष्णमूचुः, कथम्भूतं ? प्रेष्ठं तथापि प्रियेतरं वैरिणमिव भाषमाणम् इदं विशेषणद्वये संरम्भकारणम् ॥ ३० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तदर्थे कृष्णकृते विनिवर्तितः सर्वकामो यासां तास्तथा रुदितेन रोदनेन उपहते क्लिष्टे संरम्भेण प्रणयकोपेन गद्गदपदं स्खलदक्षरपदं यासां तास्तथा ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ भगवद्वचसोऽर्थद्वयवत्तायां तत्तत् स्मरणं संस्कारतः 'इदं वा इदं वा' इति परामर्शो नोत्तरस्यापि घटमानत्वमाशङ्क्य किञ्चिच्छिथिलदुःखभरतया वक्तुं शक्तिर्जातेति तासां विवक्षां प्रकटयति—प्रेष्ठमित्यादि । प्रेष्ठः प्रेयानयं कदाचिदपि नैवमप्रियं वक्ष्यति । तदा कथमवादीति विमृश्य । प्रियेतरमिवेति । इव-शब्दः कृष्णमब्रुवतेत्यन्वयः । कीदृश्यः ? तदर्थं विनिवर्तिता विशेषेण निवृत्तिं प्रापिताः सर्वे कामा याभिः । किं कृत्वा ? नेत्रे विमृज्य तन्मुखदर्शनार्थमर्थान्तरमत्रासीदिति निर्णीय सरम्भो जातः, तेन गद्गदा अर्द्धस्फुटा गिरो यासाम् नेत्रे कीदृशे ? रुदितेनोपहते उच्छूनारक्ते अनुरक्तो इति स्वरूपकथनम्; स्मेति वैचित्र्ये; वहुवचनमत्र क्रमशः सर्वा एवोचुः; नैकदेति मन्तव्यम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च किमरण्यरोदनं कुरुध्वे प्रसन्नमुख्यः सत्यः स्वस्वगृहं किं तूर्णं न गच्छतेत्युच्चैरुच्चरितेन भगवद्वाक्येन कर्णाध्वनान्तः प्रविष्टवता मूर्च्छितास्ताः प्रबोधिताः किञ्चिद्विज्ञापयामासुरित्याह—प्रेष्ठ पूर्वं बहुशः कृताङ्गसङ्गत्वात् प्रियतमम् अथ च कारणं विनैव प्रियेतरमिव प्रतिकूलं स्वस्वपतिं भजध्वमित्यतिकठोरं भाषमाणम् एतच्च नैव सम्भवेत् यतः तदर्थं विशेषेण पुनर्यथा सम्बन्धगन्धोपि तेषां न स्यात्तथा निवर्त्तिताः सर्वे कामा याभिस्ताः अत्रान्यशब्दस्याप्रयोगात् सर्वशब्दप्रयोगाच्च भगवत्सुखार्थकः कामः कामशब्देन नोच्यते इति श्रीशुकाभिप्रायः रुदितेन उपहते अन्धीभूते नेत्रे विमृज्येति अयमन्तकालोऽस्माकमागतस्तत् सकृदप्येतस्य मुखकमलं दृष्ट्वा म्रियामहे इत्याकाङ्क्षयेति भावः । हन्त हन्त प्रेयसापि भूत्वा विनैवापराध कथमेतावान् प्राणान्तो दण्डः क्रियते ? इति संरम्भस्तथा वयमेतदनुरूपरूपगुणाद्यभावादङ्गसङ्गा योग्या एव भवामः अतस्त्यज्यामहे इति मननात्संरम्भाभावश्चेत्यतः किञ्चित्संरम्भेण गद्गदा गिरो यासां ताः ननूभयथापि प्रेमशून्यात्तस्मान्निवृत्तिरेवोचितेत्यत आहुः—अनुरक्ता इति । अनुरागान्धा हि विचारं न सहन्त इति भावः ॥ ३० ॥

श्रीरसिकाह्लादिनी टीका

व्यभिचारिभावोदये विप्रियवर्णनमेव हेतुरुक्तः, इदानीं स्थायिभावस्य दृढत्वात् किंचिल्लब्धश्वासाः कोपावेशस्फुरदधराः सत्यो वागारम्भं कृतवत्य इत्याह प्रेष्ठमिति । प्रेष्ठ अतिप्रियमपि प्रियेतरमिवाप्रियमिव न त्वप्रियं तासां भावपरीक्षया न तु हृद्वृत्त्या स्थूणानिखननन्यायेन तमेवभावं द्रढाकर्त्तुं प्रतिभाषमाण प्रतीचक्षाणमपि प्रातिविषयस्थायिभावस्य दृढत्वात् व्याबुध्य गृहं गतुमपारतन्त्यः कृष्णं यशोदानन्दनं सदानन्दं न तु कृषिभूवाचक इत्यर्थगोचरं रूढीर्योगमपहरतीति न्यायात् कृष्णशब्दस्य यशोदानन्दने रूढत्वात् । व्रजेश्वरीप्रोषितत्वात् सर्वासां मनोरथपूर्त्तौ समर्थं धीरललितगुणैर्युक्तम् । लक्षण रसार्णवे—"पितृभ्यां ग्रामतोऽत्यन्त

नैश्चिन्त्यः प्रेयसीप्रियः । विदग्धो नवतारुण्यो धीरलालित्यधर्मभाक् । स्वरूपमेतदाख्यातं गुणाः सर्वे गुणा मता” । ननु प्रत्याख्याने लाते कथं गृहं न गतास्तत्राह तदर्थविनिवर्त्तितसर्वे कामा स एवार्थः पुरुषार्थस्तत्प्राप्तये विनिवर्त्तितास्त्यक्ता सर्वे कामा ऐहिकामुष्मिका विषया याभिस्ताः पूर्वानुभूतरमणानन्दस्फूर्त्या तेषामाच्छादितान्नवद्भासमानत्वात् “एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति” श्रुते अनन्यगतित्वात् तत्रैव स्थिताः कथंचिद्धैर्य्यमवलम्ब्य पूर्वं दुःखभराक्रांतत्वाद्वाक्स्तंभो जातः, इदानीमपीषत्कारुण्येन संकुचितां दृष्टिमालक्ष्यान्न वन् प्रत्युत्तरं दत्तवत्यः यतोऽनुरक्ताः दृढतरानुरागेण नायकदोषास्फूर्तेरितिभावः । किं कृत्वा रुदितोपहते नेत्रे विमृज्य औत्सुक्येन समग्रलावण्यदर्शनप्रतिबन्धकत्वादश्रुमार्जनं कृतेत्यर्थः । तत्रश्चानुरागभरगर्वितत्वात्प्रत्याख्यानस्मृत्या किंचित्संरंभं गद्गदगिरा ईषत्प्रणयकोपेन गद्गदा अस्फुटा यासां ताः । न तु निर्विण्णा जाता इति भावः ।। ३० ।।

विशुद्धरसदीपिका

किञ्च, प्रेष्ठमिति । प्रकर्षेणेष्टं प्रियतमं प्रियेतरमिव प्रतिभाषमाणमिति परमानौचित्यं तत्रापि कृष्णं मुरलीवादनादिना चित्ताकर्षकम् आत्मना च तदर्थविनिवर्त्तितसर्वकामाः तत्कृते विनिवर्त्तिताः निरस्तास्तद्व्यतिरिक्ताः सर्वेऽभिलाषा याभिस्ताः एवं च तत्सुखमेव सूचितं तत एव च विस्रम्भप्रणयेन नेत्रे विमृज्य प्रागनास्थया रुदितोपहते अपीति स्वभावसरलत्वम् एवं च नेत्रमार्ज्जनमिदं भावद्वयसन्धिजं प्रणयकोपस्वभावतः किञ्चिच्छ्रीमुखावलोकपूर्वकव्याहाराय तेन च तस्य लज्जोत्पादनाय तत्कुतः किञ्चित्संरम्भगद्गद्गिर इति विषादकार्येण संरम्भेण विषादावरणादिति भावः तथा संरम्भेणैव विषादांशस्यान्तर्भूतत्वात्तदर्थकार्य्यं गद्गदत्वमपि सर्वत्र हेतुः अनुरक्ताः इति स्मेति विस्मये नर्म्मोक्त्याप्यहो तादृशदुःखमभूदित्यद्भुतः प्रेममहिमेति एवं च वैवर्ण्यस्तम्भादयोन्येऽपि जाता इत्याद्यूह्यम् ।। ३० ।।

श्रीरामनारायणकृता भावभावविभाविका

प्रागलब्धविहारतया सम्भावितोपेक्षाणां कृष्णकृपार्द्रस्वभावज्ञतया सम्भावितानुग्रहाणां रसविभावाद्यभिज्ञकुशलमतीनामुभयार्थविदां चरितमाह—प्रेष्ठमिति । कृष्णं स्वरूपतः सत्यानन्दरूपं कृपार्द्रस्वभावतश्च कृष्णं भक्तानां दुःखकर्षणं तथा प्रेष्ठं नित्यस्वप्रीतिविषयतया प्रियतमं प्रियेतरवत्प्रियेतरवचनरचनायोग्यं स्वयञ्च तदर्थमेव विशेषेण निर्वर्तिताः सर्वे ऐहिकामुष्मिकाः कामा भविष्यद्विषयाभिलाषरूपाः काम्यन्ते इति कामाः प्राप्ताः भोगाश्च याभिस्तथाभूताः प्रत्याख्यानायोग्याः प्रेष्ठमेव दाक्षिण्यार्थकवाक्यमात्मनः प्रतिभाषमाणमपि उपेक्षार्थस्यापि सूचनेन प्रियेतरमिव अप्रियवाक्यमिव भाषमाणमुपलभ्योपेक्षार्थभानेन प्रथमं रुदितोपहते नेत्रे दाक्षिण्यार्थक्यभानेन लब्धधैर्या विमृज्य किञ्चित्संरम्भगद्गदगिर इत्यत्र संरम्भस्य किञ्चितानिर्देशेन रागमिश्रतापि गम्यते तथा च प्रथमं रागादागमनेन रक्ताः पुनरुपेक्षार्थभानेन रागादेर्हृदि जातो यो रजोरूपसंरम्भस्तदुभयकलिले निमग्नितया बहिर्यथावन्निःसरणाशक्ता अत एव गद्गदा गीर्यासां ताः पुनर्दाक्षिण्यार्थज्ञाने जाते तदनुरक्ताः पुनः संवृद्धरागाः तं कृष्णमब्रुवत ।।३०।।

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ततो विनिवृत्तमूर्च्छास्तूष्णीं स्थितं भगवन्तमालक्ष्य किञ्चिद्विज्ञापयामासुरित्याह—प्रेष्ठमिति । गोप्यो रुदितोपहते नेत्रे विमृज्याऽहो यद्भवितव्यं तद्भविष्यत्येव सम्प्रति भगवद्दर्शनं तु सम्यक्कर्त्तव्यमित्याशयाः कृष्णमब्रुवत स्म भगवतः सदानन्दरूपत्वात्तदाभिमुख्यमेव सदानन्दाविर्भावकरमतः सर्वानर्थकरं तद्वैमुख्यं कथमपि नोचितमिति भावः । प्रेष्ठं परप्रेमास्पदत्वादात्मानं प्रियेतरमिवानात्मवत्प्रतिभाषमाणं प्रत्याचक्षाणम् अहो सर्वात्मा सन् किमर्थमेवं वदतीति किञ्चित्संरम्भेण प्रणयकोपेन गद्गदा अस्फुटस्खलिताक्षरा गीर्यासां ताः । ननु, भगवति ईषत्संरम्भोऽप्यनुचितस्तासां मुखात् भगवद्वाक्यप्रत्युक्तिरूपा वाणी च कथं निस्सृता ? इति चेत्तत्राह—अनुरक्ता इति । स्वल्पस्यापि रागस्य भयनिवर्त्तकत्वात्परमानुरागवतीनां तासां का भयसम्भावनेति भावः । यतस्तदर्थैविनिवर्त्तितसर्वकामाः तदर्थं भगवदर्थं विशेषेण तद्वासनासाहित्येन निवर्त्तिताः सर्वे कामाः याभिस्ताः तथा च भगवद्तिरिक्तसर्वकाम्यस्य तदिच्छायाश्च त्यक्तत्वाद्भगवद्विषयिककामस्य च मोक्षकामवदकामरूपत्वात्तन्मात्रनिष्ठायां तदनुरक्तचेतसां तासां नास्ति किञ्चिदपि भयमिति भावः । अनभिज्ञापक्षे तथाभूतां दशां प्राप्ता अपि ता अहो किमेत्येवमरण्यरोदनं कर्त्तुमुद्यताः स्वस्थाः प्रसन्नमुख्यः सत्यः स्वस्वगृहं तूर्णं किं न गच्छत इत्येवं प्रहसन् यदोच्चैरुवाच तदा तानि वाक्यानि तासां कर्णाध्वनाऽन्तःप्रविष्टानि ततश्च तैरबाद्बाधितास्तत्सजातीयवाक्यैर्भगवद्वाक्यानां प्रत्युत्तरं वक्तुमारेभिर इत्याशयेनाह—प्रेष्ठमिति । बहुकालमारभ्य परमप्रेमास्पदत्वेन निश्चितमिदानीम् प्रियेतरमिव यथा प्रियेतरः शत्रुर्वदति यथा प्रतियातेत्यादि वज्रादप्यतिकठोरं प्रत्याख्यानं रुषती कर्णभीषण प्रियेतरमिवाऽप्रियवाक्यसदृशं वाक्यमिति वा तत्रापि कृष्णं सम्प्रत्यपि वेणुनादेन चित्तरत्नामञ्जूषाम् आकृष्य सौचित्येन स्थितम् अत एव तदर्थं विनिवर्त्तितास्सर्वे कामाः रुदितोपहते अन्धीभूते नेत्रे विमृज्य अहो मरणसमयोऽयमस्माकमागतस्तस्मात्सकृदपि प्रेष्ठस्य मुखपद्ममवलोक्य मरिष्याम इत्याकाङ्क्षयेति अहो प्रेष्ठत्वेनाश्रितोयं विनाऽपराधं कथमेवंविधप्राणान्त्यदण्डं दातुमुद्युक्त इति संरम्भः स्वस्मिंस्तदङ्गसङ्गायोग्यतां विचार्य्य तच्छैथिल्यमित्युक्तं किञ्चित्संरम्भेगेत्युक्तं ननु, सर्वथापि

प्रेमशून्येन तेनाऽलं भाषणादिनेति चेत्तत्राह–अनुरक्ता इति । अनुरागान्धाः विचाररहितत्वात् प्रत्याख्याता अपि पुनस्तत्रैवानुषज्यत इति भावः । मानिनीपक्षे विस्मिताः परमप्रियं प्रियेतरमिव प्रतीयमानं वाक्यं प्रतिभाषमाणं कृष्णमब्रुवत स्म अहो कथमस्मान् परदारानित्यं वदसीति कोपेनान्तःकरणस्थोत्कटोत्कण्ठया शिथिलीकृतत्वात् । संरम्भेण गद्गदभूता गिरो यासां ताः यथोक्तं प्रार्थनारूपं वाक्यमाकर्ण्य ततोऽप्यधिकमनुरक्ताः । निवृत्तिपक्षे प्रेष्ठं "सर्वे वेदा यत्पदमामनन्ति" इति "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादि श्रुतिस्मृतिभ्यां वेद्यत्वेनात्यर्थमभिमतं तत्तद्वादिरूपेण श्रुतीनां ब्रह्मणि प्रामाण्यं नास्तीत्वेवमादिरूपं प्रियेतरमिव प्रतिभाषमाणं प्रत्याचक्षाणं कृष्णं फलरूपं सदानन्दात्मकं परमात्मानं तदर्थं परमात्मप्राप्त्यर्थं विशेषेण निवर्त्तिता अधिकारिणां सर्वे कामा याभिस्ताः तथा च श्रुति :—

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिस्थिताः । तदा मर्त्योऽमृते भवत्यत्र ब्रह्म समश्नुते" ॥

इत्यादौ रुदितेन स्वार्थानभिज्ञाद्युहिततर्ककृतेन रुदितेनोपहते नेत्रे यथाभूतार्थप्रकाशनसमर्थे शक्तिलक्षणालक्षणे विमृज्य किञ्चित्संरम्भेणाहो आस्तिक्यरूपेण स्थितोऽपि भगवानित्थं वदतीति ईषत्कोपेन गद्गदाश्छान्दसा गिरो यासां ताः । किञ्च, तस्मिन्नेवानुरक्ताः ॥ ३० ॥

रास–रहस्यम्

र० टी०—"काममयश्चायं पुरुषः ।" स एव आत्मा तं कृष्णमात्मानं प्रेष्ठं प्रियतममन्यमानिन्यो वृत्तयः "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ।" इति तदर्थं आत्मार्थं विनिवर्तिता परित्यक्ताः सर्वे कामाः वासनाजालं याभिस्ताः, सांख्यादिना स्वस्वानुकूलश्रुतियुक्तिप्रमाणेन प्रियेतरमिव प्रियतमादितरं आत्मसम्बन्धिभिन्न अर्थात् अपेक्षाकृताल्पप्रियमिव प्रतिभाषमाणं विरुद्धकथनं श्रुत्वा रुदितोपहते स्वार्थानभिज्ञाद्युहिततर्ककृते उपहते मनसि आघातप्राप्ते सति नेत्रे विमृज्य नेत्रोपलक्षितैन्द्रियकशब्दादिविषयाणां विशेषेण मार्जनं बाधं कृत्वा कथमधुनाऽपि अपरोक्षानुभूतिर्न स्यात् इति स्वात्मन्येव किंचित् संरम्भः क्रोधः तेन गद्गद गिराः स्खलिताक्षराः वृत्तयः अनुरक्ताः आत्मानुरागेण रञ्जिताः सत्यः अब्रुवत वक्तुमारभत अर्थात् पुनरपि मननमारभत इति भावः ॥ ३० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदनन्तरं स्वमनोरथं श्रीकृष्णं प्रत्यूचुरित्याह—प्रेष्ठमिति किञ्चित् संरम्भेण गद्गदाः स्खलिताक्षराः गिरो यासां ताः रुदितेन रोदनेन उपहते अन्धीभूते नेत्रे विमृज्य अब्रुवत स्म संरम्भे हेतुमाह—प्रियेतरवानिष्टामिव प्रतिभाषमाणं प्रत्याचक्षाणमिति तदर्थं कृष्णार्थं विनिवर्तिताः सर्वे कामाः याभिस्ताः इति च ॥ ३० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रियेतरमिवाप्रियमिव प्रेष्ठमपि प्रतिभाषमाणं कृष्णं तदर्थविनिवर्तितसर्वकामास्तदर्थं तद्रत्यर्थं विनिवर्तिताः सर्वे कामाः काम्या भर्त्रादिविषया याभिस्ता रुदितं रोदनं तेनोपहते नेत्रे । नेत्रे इत्युक्तिरेकैकस्त्रीविवक्षया । गतं । नेत्रे नियामकायानुरनियामक इति वा । नाथाय विमृज्य पाणिभ्यां किञ्चित्संरम्भगद्गद्गिरा संरम्भेण गद्गद्गिरः स्खलद्वचना अनुरक्ताः सत्योऽब्रुवतावदन् ॥३०॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमपि स्थितौ तूष्णीं स्थितं भगवन्तमालक्ष्य किञ्चिद्विज्ञापयामासुरित्याह–प्रेष्ठमिति । भाषणं पूर्वोक्तमेव अथवा तस्यामप्यवस्थायां किमिति रोदनं क्रियते स्वस्था भवत गृहे गच्छतेत्येवं वदति परं हसन्मुखः तदा तासां हृदये वाक्यामृतानि प्रविष्टानि सजातीयानि वाक्यान्युत्पादितवन्ति तदा भगवदुद्बाधिता एव ताः भगवद्वाक्यानि पूर्वपक्षयितुम् आरेभिरे इत्याहुः, प्रेष्ठमिति । प्रेष्ठो भवत्येव स्वसामग्र्या तथा सम्पादितत्वात् परं वदत्यन्यथा तथाप्यप्रियमिह प्रतिभाषमाणमिति नोक्तं न हि कदाचिदपि भगवानप्रियवद्भवति किन्तु प्रियो भवतीतरोपि भवति सर्वभवनसामर्थ्यात् इतरत्वेन प्रियत्वं बाध्यते यथा जगज्जगदतिरिक्तरूपश्च तदाह, प्रियेतरमिव प्रतिभाषमाणमिति यः प्रियोंशः तं न तिरोधारयति किन्तु वाक्यं न तेन रूपेण वदति किन्तु रूपान्तरेण तदा तेन सह वादः कर्त्तुं शक्य इति न हि फलं क्वचित्साधनं भवति मां वृणुतेति वा वदति परं बलादपि प्रतिबन्धानिराकरणं कृत्वा स ग्राह्य एव तदाह, कृष्णं सदानन्दमिति । ननु, कोऽयं निर्बन्धः स एव काम्य इति महांश्चेन्न मन्यते तदा अल्पतरा अपि काम्या इति तत्राह–तदर्थविनिवर्त्तितसर्वकामा इति । तदर्थं भगवदर्थं विशेषेण निवर्त्तिताः सर्वे कामा याभिः अयमेव काम्य इति निश्चित्य पूर्वमेव सर्वे कामास्त्यक्ताः "काममयश्चायं पुरुषः" यदि त्यक्तोऽपि गृह्येत तदा भगवदुक्तमेव गृहं कथं न गृह्येत तस्मादयमेव कामः अवशिष्यते स चेन्न भवेत्स्वरूपहानिरेवेति निश्चित्य फले मानमकृत्वा दृढीभूय रुदितोपहते नेत्रे विमृज्य यथास्थानं सर्वं प्रापयित्वा किञ्चित्संरम्भेण वादार्थमुद्यमः संरम्भः । भगवान् हि वाक्येन निराकरोति न तु स्वरूपतः वाक्यं तु निराकार्य्यमिति तदर्थं संरम्भः तदर्थं संरम्भः सर्वोऽप्यन्तं गत्वा परावर्त्तते परं संरम्भेण गद्गदा गीर्यासां वर्णानाम् न स्फुटनिर्गमनम् ईश्वरवाक्यनिराकरणे यतो

वाणी बिभेति यद्यपि ईश्वरभीत्या निर्गमासम्भवे कुतो गद्गदत्वं गिरस्तथापि यथा भगवतो भीतिस्तथाचेत्प्रियाभ्योपि भीतिरस्तीति ज्ञायते तेन प्रभुभीतिकृतमस्फुटत्व तत्प्रियाभीतिकृतो निर्गम इति नोक्तानुपपत्तिरिति भावः। एतासां तु न भयं यतः अनुरक्ताः, रागो हि भयप्रतिपक्षः यत्र रागः स्वल्पोऽपि न तत्र भयम् अतः अब्रुवत उक्तवत्यः ॥ ३० ॥

श्रीसुबोधिनी-सारः

तदर्थं श्रीकृष्णार्थं विनिवर्त्तिताः सर्व कामा याभिस्ताः किंचित्संरंभेण कोपावेशेन गद्गदा गिरो यासां ता अनुरक्ताः प्रिया गोप्यो रुदितेनोपहते नेत्रे विमृज्य प्रष्ठ कृष्ण प्रियेतर शत्रुमिव भाषमाणमब्रुवत ॥ ३० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

प्रेष्ठं प्रियेतरमिवेत्यत्र, ज्ञानजर्थानुपपत्त्या पक्षान्तरमाहुः अथवा तस्यामित्यादि। भाषणेनैव सर्वतिरोधानमुक्तमिति पुनरपि तथैव चेद् भाषणं स्यान्न स्यादेव विशेषाभावादतः पूर्वविलक्षणमेतद्वाक्यम्। ततो जीवनमुक्तिसामर्थ्यं चात्र जातम्, अन्यथैतन्न स्यादिति वैलक्षण्यमेव निरूपितं तस्यामप्यवस्थायामित्यादिना। अत एव प्रतिभाषणमुक्तुं मूले। औदासीन्यपूर्वकपूर्वभाषणविरोधिसहासभाषणाभिप्रायेण। तदर्थविनिवर्तितेत्यत्र, यदि त्यक्तोऽप्योपि। भगवदर्थं सर्वत्यागो भगवतोक्तः, पूर्वं त्यकार्थापरिग्रहोपि, यतः शुकादयोपि तथा चरन्ति, अधुना गृहपरिग्रहं वदति, एवं सति भगवदुक्तमिति गृहं चेद् ग्राह्यं, तदा तदविशेषात्सर्वत्यागपूर्वकं भगवानेव कुतो न ग्राह्यः, गृहस्यैव ग्रहणे विनिगमकाभावादित्यर्थः ॥ ३० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्च प्रेष्ठमिति। रुदितेन रोदनेन उपहते शोकाश्रुपूर्णतया लुप्तदर्शने नेत्रे प्रमृज्य प्रोञ्छतेन शोधयित्वा किञ्चित् संरम्भेन कोपावेशेन गद्गदाः स्खलिताक्षरा गिरो यासां ताः गोप्यः कृष्ण प्रति अब्रुवन् ऊचुरित्यन्वयः। एवं गृहगमनाज्ञायामपि रुषा कथने हेतुं सूचयन्नाह—अनुरक्ता इति। तस्मिन्नेव रागयुक्ता इत्यर्थः। अनुरागे हेतुमाह—प्रेष्ठमिति। 'प्रेष्ठ प्रत्यनुरक्तानां भाषणे विलम्बो नैव भवति' इति लोकप्रसिद्धमेव इति सूचयति—स्मेति। अनुरागं स्पष्टयन्नेवाह—तदर्थेति। तत्प्राप्त्यर्थमेव विशेषेण निश्चयेन निवर्तितास्त्यक्ताः सर्वे कामाः विषया याभिस्ताः। 'तर्हि कथं संरम्भ ?' इत्याशङ्क्य तत्र हेतुमाह—प्रियेतरमिव 'स्थितम्' इति शेषः। अप्रियसादृश्ये हेतुमाह—प्रतिभाषमाणमिति। स्वमनोरथप्रत्याख्यानं कुर्वन्तमित्यर्थः ॥ ३० ॥

अन्वितार्थप्रकाशिका

प्रेष्ठमिति ॥ प्रेष्ठं प्रियतममपि कृष्णं प्रियेतरं प्रियसामान्यादपि भिन्नमिव प्रतिभाषमाणं प्रत्याचक्षाणमवबुद्ध्य तदर्थं तत्प्राप्त्यर्थम् एव विशेषेण निश्चयेन निवर्तितास्त्यक्ताः सर्वे कामाः विषया याभिस्ताः कृष्णे अनुरक्ताश्च गोप्यः किञ्चित् संरम्भेण कोपावेशेन गद्गदाः स्खलिताक्षरा गिरो यासां तादृश्यः सत्यः रुदितेन रोदनेनोपहते शोकाश्रुपूर्णतया लुप्तदर्शने नेत्रे प्रमृज्य प्रोञ्छनेन शोधयित्वा तं प्रति अब्रुवत स्म ॥ ३० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रियाज्जनादितरमन्यपुरुषमिव प्रतिभाषमाणं विपरीतं वदंतं प्रेष्ठं कृष्णं अनुरक्ताः अत्यासक्ताः गोप्यः रुदितेन रोदनेन उपजहते शोफिते नेत्रे विमृज्य वस्त्रेण मार्ज्जयित्वा किंचित्संरंभेण कोपेन गद्गद्गिरः अस्फुटवाण्यः सत्यः अब्रुवत जगदुः कथंभूता तदर्थं श्रीकृष्णार्थं विनिवर्त्तितास्त्यक्ताः सर्वे कामाः विषयाभिस्ताः ॥ ३० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रेष्ठमिति ॥ किं च प्रेष्ठं सन्तमपि, प्रियेतरमिव वैरिणमिव, प्रतिभाषमाणं प्रत्याचक्षाणं, कृष्णं प्रति, तदर्थं श्रीकृष्णार्थमेव विनिवर्त्तिता' संपरित्यक्ताः सर्वकामाः सर्वे मनोरथा याभिस्ताः गोप्यः, रुदितेनोपहते शोकाश्रुपूर्णतया लुप्तदर्शने, नेत्रे लोचने, विमृज्य शनैः प्रमृज्य अनुरक्तास्तस्मिन्नेवात्यनुरागयुक्ताः सत्योऽपि, किंचित् संरम्भेणेषत्प्रदर्शितकोपावेशेन गद्गदा गिरो यासां तास्तथाभूताः सत्यः, अब्रुवत स्म ऊचुः। 'प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणम्' इत्येतद्विशेषणद्वयं संरम्भे कारणम् ॥ २० ॥

कृष्णप्रिया

गोपियों ने अपने प्यारे श्यामसुन्दर के लिये सारी कामनाएँ, सारे भोग छोड़ दिये थे। श्रीकृष्ण में उनका अनन्य अनुराग, परम प्रेम था। जब उन्होंने अपने प्रियतम श्रीकृष्ण की यह निष्ठुरता से भरी बात सुनी, जो बड़ी ही अप्रिय-सी मालूम हो रही थी, तब उन्हें बड़ा दुःख हुआ। आँखें रोते-रोते लाल हो गयीं, आँसुओं के मारे रुँध गयी। उन्होंने धीरज धारण करके अपनी आँखों के आँसू पोंछे और फिर प्रणयकोप के कारण वे गद्गद वाणी से कहने लगीं ॥ ३० ॥

गोप्य ऊचुः

मैवं विभोऽर्हति भवान् गदितुं नृशंसं सन्त्यज्य सर्वविषयांस्तव पादमूलम् ।
[1]भक्ता भजस्व दुरवग्रह मा त्यजास्मान् देवो यथाऽऽदिपुरुषो [2]भजते मुमुक्षून् ॥ ३१ ॥

कर्दमक्षमा

अन्वयः—श्रीगोप्यः, ऊचुः—विभो ! भवान्, एवं, नृशंसं, गदितुम्, मा, अर्हति, हे, दुरवग्रह, सर्वविषयान्, सन्तज्य, तव, पादमूलम्, (आश्रिताः) भक्ताः, अस्मान्, मा त्यज, यथा, आदिपुरुषः, मुमुक्षून्, भजते, (तथा अस्मान्) भजस्व ॥३१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं नृशंसं क्रूरम् । हे दुरवग्रह स्वच्छंदं तव पादमूलं भक्ताः सेवितवतीरस्मान्भजस्व मा त्यजेति ॥ ३१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विभो प्राणनाथ । नृशंसम् वज्रसारवत्काठिन्येन हृदयविदारकम् । मेति प्रयोगो दुःखवैषम्येण स्त्रीस्वभावाद्वा । भक्ता अस्मान्मा भजस्व अन्यथा "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इत्युक्तिरनर्थो स्यात् । हे स्वेषु दुरवग्रह दुराग्रहः । यद्वा–हे स्व हे बंधो दुरवग्रहं हठम् आ आसमंतात्त्यजेति । दृष्टान्तः–आदिपुरुषो महाविष्णुः यथा मुमुक्षून्मुक्तिकामनया भजतो न त्यजति 'ये यथा मां प्रपद्यन्ते' इत्याद्युक्तेः । वस्तुतस्तु अवग्रहो वृष्टिविघातस्तद्रहितो दुरवग्रहः, भक्ताभीष्टवर्षणशीलेर्थः । यद्वा–भानि नक्षत्राणि गभस्तयो वा विद्यंतेऽस्येति भवांश्चंद्रः, आ समयदा दूताः संत्यस्येति भवान्यमराजः । चंद्रेणापि रोहिणी प्रीत्याऽन्या भार्यास्त्यक्ताः । यमश्च लोकानां दुःखप्रदोस्त्येव स च स च नृशंसं गदितुमर्हति यतस्त्वं ताभ्यामन्योऽतो मैवम् । एवं मा वदेत्यर्थः ॥ अस्मान्धर्ममुपदिशस्यथ च स्वयं पापराशिं चिकीर्षसीत्यनुचितमित्याहुः—मैवमिति । नृशंसं घातुकं साक्षात्मारकं यथा स्यात्तथा गदितुं भवान् प्रतिपुरुषं धार्मिकत्वख्यातिमतो नंदस्य पुत्रः सन्नार्हति । अन्यस्तु प्रतिरुरूपं मानुषमारणवृत्तिको वरमर्हतु नामेति भावः । 'नृशंसो घातुकः क्रूरः' इत्यमरः । त्वया कोटिसंख्या अपि वाक्शरास्तथैकदैवास्मान्प्रति निक्षिप्ता यथाधुनैव शरीराणि परित्यज्य यमपुरं सर्वा एव वयं यामो न तु त्वदुपदिष्टं गोष्ठपुरम्, त्वं तु शतकोटिस्त्रीवधपातकानि गृहीत्वा स्वयमेव गोष्ठं याहि । स्त्रीवधान्नो चेज्जिघृक्षसि, तर्हि सर्वविषयांस्त्यक्त्वा तव पादमूलं भक्ताः सेवितवतीरस्मान्भजस्व । अत्राऽन्यविषयानित्यनुक्त्वा सर्वविषयानित्युक्त्या च भगवदंगसंगो हि विषयो न भवतीति ध्वनितम् । ननु भोः कामिन्यः स्वस्वपतिभ्यो भवतीनां कामो नोपशाम्यति ? यतस्तान्परित्यज्य मामेव भजध्वे, तत्राहुः–हे दुरवग्रहेति । "अवे ग्रहो वर्षप्रतिबंधे" इति पाणिनिस्मरणात् दुष्टो दोषयुक्तोऽवग्रहो वृष्टिप्रतिबंधोऽनावृष्टिर्यस्येत्यत्रान्यपदार्थस्य मेघस्यैवोपयुक्तत्वाद्दुःशब्दप्रयोगाच्च । हे विषमात्रवर्षुक मेघेत्यर्थः । तेन चातकीनामस्माकं दूरस्थोपि त्वमेव कृष्णमेघो बंधुः, स च दैवदोषाद्यदि विषं विर्षसि, अवग्रहवत्वात्सलिलं न चेद्वर्षसि तर्हि मा वर्ष त्वद्वृष्टं विषमेव पीत्वा वयं म्रियामहे न तु निकटस्थानां ह्रदादीनामपि जलं पिबामेत्यस्माकं स्वभावं जानीहीति भावः । अतोऽस्मान्मा त्यज यद्यात्मनः कृतज्ञत्वं दधासीति भावः । ननु च चातक्यो मेघमपेक्षंतां नाम मेघस्तु चातकीर्नापेक्षते, चातक्यो म्रियन्तां जीवन्तु वा मेघस्य न कापि हानिरिति चेत्–सत्यम्, न त्वं जडात्मको मेघ एव किन्तु विदग्धचूडामणिर्नारायणसमो नारायणवदेव वर्त्तस्वेत्याह–देव इति । मुमुक्षून् त्वदुपासनार्थं सर्वविषयांस्त्यक्तुमिच्छूनपि तदभीष्टोपपादनया भक्तवश्यत्वाद्भजते अस्मांस्तु त्वदर्थं संत्यक्तसर्वविषयश्रेणीका अपि त्वं कथं न भजसीत्यर्थः ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीगोप्य ऊचुरिति अत्रैवं विवेचनीयं यद्यपि समानभावापन्नत्वेन युगपत् समानवचनस्फूर्त्तिरपि सम्भवति तथाप्येकदोक्तावतिकोलाहलतया नातिरसाधायकत्वात् कासाञ्चित् मुख्यानामेव वचनं ज्ञेयम् तच्च युगपद्वा तत्तन्महावाक्योपसंहारे तन्नः प्रसीद वरदेति, सिञ्चाङ्गेति, तन्नः प्रसीद वृजिनेति, तन्नो निधेहीति, स्वस्वविवक्षितं वचनचतुष्टयान्तं क्रमशो वा पूर्वपूर्वासां वाक्यस्थापनपूर्वकमेवोपन्यस्तमस्ति चतुष्टयत्वं च यूथशो दिक्चतुष्टयस्थितत्वात् तासां तथापि सर्वासां तत्सम्मुखत्वं च कृष्णस्य विष्वक् पुरुराजिमण्डलैरभ्याननः इति वत् "यासामेव प्रसादेन यासां श्रीनागरेश्वरे । जल्पतत्त्वं ज्ञायते ता वन्दे श्रीनागरेश्वरीः" श्रीगोपीगणप्राणवल्लभाय भगवते नमः । अथ पत्यादिपरित्यागेन त्वद्भजने ऽस्माकं धर्मोऽधर्मो वेति पश्चाद्विचारयिष्यते अहो तवैव तावदस्मत्परित्यागे धर्मदोषो दुष्परिहर इत्याहुः—मैवमिति । मेति निषेधस्यादौ प्रयोगः परमार्त्तिवैयग्र्येण एवम् ईदृशं कथञ्चिदेतद्वचनसदृशमपि किमु वक्तव्यम् एतदित्यर्थः कुतः नृशंसं वज्रसारवत्काठिन्येन हृदयविदारकमित्यर्थः । यद्वा, साक्षान्मारकं "नृशंसो घातुकः क्रूरः" इत्यमरः । गदितुं व्यक्तं वक्तुं किंवा गदितुमपि किमुत व्यवहर्त्तुमर्हति तत्र च भवान् प्रेमार्द्रस्वभावतया

---

१. भक्ताः-श्रीधर. वंशी. जीव. विश्व. रा. ध. शु. सु. ; प्राप्तः–वीर. ; भक्त्या भजस्व–विज. । २. भजतो–वीर. विज. ।

प्रसिद्ध इत्यर्थः। तत्रापि विभो, हे अस्मत्प्राणनाथ ! अतोऽस्मान् प्रति नार्हत्येवेति भावः अत्र संरम्भगद्गदेत्युक्तत्वात् सर्वत्र शब्देन स्वरेण वा दैन्यादावपि प्रणयकोपो व्यञ्जनीयः एवं "स्वागतं वो महाभागाः" इत्यादिकं भवता सादरं सन्यायं मृदूक्तमपि निवर्त्तनार्थमेवेति रसविघातकत्वादर्थतो विपरीतमेवेति भावः। अनेन स्वागतमित्याद्यपादस्योत्तरमूह्यम्। ननु, भोः प्रियवादिन्यः ! तर्हि किं कर्त्तुमर्हामि इत्यपेक्षायामाहुः—अस्मान् भजस्व मनोरथपूरणेनानुवर्त्तस्व कुतः तव पादयोर्मूलं तलं भक्ता इति दैन्योक्तिः अब्जादिरूपकानुक्तिर्नृशंसतोक्त्या काठिन्याद्यभिप्रायेण अनेन प्रियं किमिति पादस्योत्तरम् ननु, श्रीगोपगृहिण्यः सत्यमेव भजामि किन्तु भवत्पत्यादिहिताचरणरूपमेव युक्तं नत्वीदृशमिति तत्राहुः—सन्त्यज्येति। सर्वान् विषयान् इन्द्रियार्थान् पत्यादिरूपान् सम्यक् अपुनरङ्गीकारदार्ढ्यं न त्यक्त्वा तेषां त्वद्भजने प्रातिकूल्यात् अनेन व्रजस्यानामयमित्यादिकस्य दुह्यतेत्यन्तस्य सर्वस्याप्युत्तरं तेषां सर्वेषामपि विषयान्तःपातात् तत्त्यागेन देहेपि गलितप्रेमत्वात् तत्प्रेम विना रजन्येषेत्यादिवाक्यस्याप्यनुपादेयत्वात् व्यतिरेकेणाहुः—हे दुरवग्रह, दुराग्रह ! अस्मान् अनन्यगतीर्मा त्यजेत्यर्थः। अन्यथैव दोषः स्यादिति भावः। कथमित्याशङ्क्य धर्माधर्मातीतस्येश्वरस्यापि तद्धर्मपालनावश्यकता दर्शनादित्याहुः—देव इति। तत्रापि मुमुक्षूनपि किमुत तदेकेप्सून् किंवा अमुमुक्षून् मोक्षमप्यनिच्छून् भक्त्येकनिष्ठानित्यर्थः। यद्वा, मुमुक्षून् तस्मादन्यत् सर्वं त्यक्तुमनिच्छून् यथासौ भजनमात्रापेक्षया सर्वानेव भजते स्वीकरोति तथात्वमस्मान् भजस्वेति भजत इति द्वितीयान्तः क्वचित्पाठः तत्र तु मुमुक्षूनिति विशेषणं साधनसाध्ययोर्द्वयोरप्यवस्थयोस्तेषामात्मसात्करणात् सकामान् व्यावर्त्तयति—यथा तान् भजते न त्यजतीत्यर्थवशाद्भजस्वेत्यस्य विभक्तिं विपरिणमय्य व्याख्येयम् अत्र श्रीगोपेन्द्रनन्दनत्वेनैव कृष्णे लब्धनिष्ठानामपि "यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासतेऽसुराः" इत्युक्तत्वात् "हरिभक्तिमहादेव्याः सर्वा मुक्त्यादिसिद्धयः। मुक्तयश्चाद्भुतास्तस्याश्चेटिकावदनुव्रताः" इति श्रीनारदपञ्चरात्रोक्तानुसाराच्च नादृतमपि सर्वं ज्ञानादिकं ताः परिचरति तस्मात्केवलप्रेममयोपि वचसि पारमैश्वर्यज्ञानमयोऽप्ययमर्थस्तासामेव महिमसूचनार्थं ज्ञानादिशक्तिप्रेरिततया भक्तविशेषाणां चमत्काराय स्फुरति अथवा दैन्येन महिमस्फूर्त्तेरीश्वरत्वं सम्भाव्यैदृशं वचनं तथाहि विभो, हे बहिरन्तर्व्यापक ! इति भवानस्माकं सर्वं भावं जानात्येव अतस्तव पादमूलं भक्ता आश्रिता अस्मान् भजस्व अन्यथा "ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम्" इत्यादिवचनानां वैयर्थ्यापत्तिः। ननु, तत्त्वज्ञपूज्यपादाः। कथं विषयसुखमिच्छथ ? तत्राहुः, सन्त्यज्येति। अतो वयं परमार्थसुखमेवेच्छाम इति भावः। त्वया सह क्रीडाविशेषस्य तस्य प्रेमपरिपाकविलासरूपत्वेनाशेषपुरुषार्थसारसर्वस्वात्मकत्वात् इति "ये यथा मां प्रपद्यन्ते" इत्येतन्निजवचनस्य सत्यतापेक्षया त्वमप्यस्मद्वदन्याशेषत्यागेनास्मान् भक्तुमर्हसीति गूढोभिप्रायः। हे दुरवग्रह, स्वच्छन्द ! अस्मान् प्रपन्नान् मा त्यज परमेश्वरत्वात् त्वामधर्मो न स्पृशत्येव सत्यसङ्कल्पत्वश्रुतिविरोधात् प्रतिज्ञाहानिस्तु परमानुचितैवेति भावः। सर्वान् विषयान् साम्राज्यप्रभृतिवैकुण्ठावधि पदानि सन्त्यज्यापि ते त्वाम् अमुमुक्षून् मोक्तुमनिच्छून् अशक्नुवतो जनानन्यानपि भज स्वीकुरु, द्वितीयायां षष्ठी ते तुभ्यं त्वां प्राप्तु मुमुक्षूनिति च चतुर्थी वा यतो देवः जगत्पूज्यस्त्वम् अन्यथा देवत्वासिद्धिः तत्रापि यथा यथावत् सम्पूर्णतया आदिपुरुषो भगवानिति अत्र चाभिरपि यज्ञपत्न्युक्ताद्यपद्याद्यपादानुवाद आर्तिसाम्यांशेन ज्ञेयः "आर्त्तावपि स्वभावेन वैदग्धीवलितात्मनाम्। प्रार्थने गोपरामाणां निषेधार्थोपि वीक्ष्यते"॥ तथाहि एवमीदृशं किञ्चित्प्रियं करवाणि मया सह किञ्चिद्ब्रूतेत्यादिकं नृशंसं वक्तुं नार्हति तत्र हेतुः सन्त्यज्येति याः सर्वविषयान् सन्त्यज्य तव पादमूलं भक्तास्ता एव दुरवग्रहं स्वच्छन्दं यथा भवति तथा भजस्व अस्मान् आ सर्वांशेनैव त्यज प्रभवो भक्तजनानेव भजन्ते न त्वभक्तानित्यत्र दृष्टान्तमाहुः—देव इति। अस्मिन्नर्थे वस्तुतस्तु सर्वमेतन्नर्मैवेति भाव एव व्यञ्जित इति॥ ३१॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीभगवता यज्ञपत्नीयुक्ताद्यपद्यपादस्यात्र सम्यगुक्तत्वादिव भगवत्यः श्रीगोप्योऽपि तथैव यज्ञपत्न्युक्तपद्याद्यपादमाहुः, वस्तुतस्तु तस्य वञ्चनोक्तेस्तासां चार्त्युक्तेः साम्येन सम्वादापत्तेर्मैवमिति। मेति निषेधस्यादौ प्रयोगः, परमार्त्तिवैयग्र्येणैवमीदृशं कथञ्चिदेतद्वचनसदृशमपि किमु वक्तव्यमेतदित्यर्थः। कुतः ? नृशंसं वज्रसारवत् काठिन्येन हृदयविदारकमित्यर्थः। यद्वा, साक्षान्मारकम्, 'नृशंसो घातुको हिंस्रः' इत्यमरः, गदितुं व्यक्तं वक्तुं किंवा गादितुमपि, किमुत व्यवहर्त्तुमर्हति, तत्र च भवान् प्रेमार्द्रस्वभावः, अतोऽन्यो वदतु नामेत्यर्थः। भवानिति प्रागनुनयार्थस्तुत्या गौरवात्, श्लेषेण भानि नक्षत्राणि तदीशतया तद्वान् चन्द्रः, कामाब्धिवर्द्धनत्वाच्चन्द्रो यः स नार्हत्येवेत्यर्थः, तत्रापि हे विभो ! अस्मत्प्राणप्रभो ! किंवा बहिरन्तर्व्यापकेति त्वमस्माकं सर्वभावं जानास्येव, अतोऽस्मान् प्रति नार्हत्येवेति भावः। एवं (भा० १०।२९।१८) 'स्वागतं वो महाभागाः' इत्यादिकं भवता सादरं सन्यायं मृदूक्तमपि प्रेमरसविघातकत्वात् विवर्त्तनार्थमेवोक्तत्वाच्चार्थतो विपरीतमेवेति भावः। अनेन 'स्वागतम्' इत्याद्यपादस्योत्तरमूह्यम्। ननु भो प्रियवादिन्यः ! तर्हि किं कर्त्तुमर्हामि, इत्यपेक्षायामाहुः—अस्मान् भजस्व, मनोरथपूरणे नानुवर्त्तस्व, यद्वा, सेवस्व नित्यं प्रीत्योपभुङ्क्ष्वेत्यर्थः। कुतः ? तव पादयोर्मूलं तलं रजः पादुका वेत्यर्थः। अब्जादिरूपकानुक्तिर्नृशंसोक्त्या काठिन्याद्यभिप्रायेण। यद्वा, पाद एव मूलं सर्वार्थस्य कारणमाश्रयो वा, तद्भक्ताः (पाणिनिः ३।४।७१) 'आदिकर्म्मणि क्तः कर्त्तरि च' तद्भजनं कर्त्तुमारब्धाः, अद्यापि समग्रभजनासम्पत्तेः। एषा दैन्यविनयोक्तिर्दासीत्वेच्छया, यद्वा, सेवितवती आश्रिता

इत्यर्थः। अन्यथा (गी. ४।११) 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' इत्यादिवचनानां वैयर्थ्यापत्तिः, अनेन 'प्रियं किम्' इति पादस्योत्तरम्। ननु श्रीगोपगृहिण्यः! सदा विषयासंगेन गृहाभिरतत्वात् दुर्लभसंगा यूयं किमिति मया भजनीयाः? अविरक्तानां युष्माकं कुतो मद्भक्तत्वं नाम? तत्राहुः—सन्त्यज्येति। सर्वान् विषयानिन्द्रियार्थान् पत्यादिद्वारा साध्यान् सम्यक् समूलतया अपुनरंगीकारदार्ढ्येन च त्यक्त्वा सर्वार्थमूल—त्वत्पादाब्जप्राप्त्यैव सर्वार्थसिद्धेः, त्वद्भजनप्रातिकूल्याद्वा, विषयत्यागेन पत्यादित्यागोऽपि ज्ञापित एव, पत्यादीनां तन्मूलकत्वात्। यद्वा, ननु तत्त्वज्ञपूज्यपादाः! कथं विषयसुखमिच्छथ? तत्राहुः—सन्त्यज्येति। अतो वयं परमार्थसुखमेवेच्छाम इति भावः। त्वया सह क्रीडाविशेषस्य प्रेमपरिपाकविलासरूपत्वेनाशेषपुरुषार्थसारसर्वस्वात्मकत्वादिति, (गी० ४।११)—'ये यथा मां प्रपद्यन्ते' इत्येतन्निजवचनस्य सत्यतापेक्षया त्वमप्यस्मद्वदन्याशेषत्यागेनास्मान् भक्तुमर्हसीति गूढोऽभिप्रायः, अनेन (१८ श० श्लो०) 'व्रजस्यानामयम्' इत्यस्योत्तरमूह्यम्। सर्वविषयत्यागेन तस्याप्युपेक्षापत्त्या तन्मंगलकथनेनालमिति तात्पर्य्यात्। ननु चपलाः! अधर्म्माद्बिभेमि, तत्र सैव्यमाहुः—दुरवग्रह! हे स्वैरशिरोमणे दुराग्रहेति वा, अस्मान् प्रपन्नाः (अनन्यगतीः) मा त्यज। दुरवग्रहत्वेन प्रपन्नपरित्यागादधर्म्मस्यैवोत्पत्तेः, विशेषतश्च सुव्रतत्वादिप्रतिज्ञाहान्यापत्तेः, परमेश्वरत्वात्त्वामधर्म्मो न स्पृशत्येव, प्रतिज्ञाहानिस्तु परमानुचितैवेति भावः। यद्वा, दुरवग्रहं दुराग्रहम्, आ सम्यक् त्यज। ननु, वाचालाः! यूयं कामिन्यो मद्योग्या न भवथेति चेत्, सत्यम्, तथापि सर्वत्यागेन भजतां जनानां सर्वेषामपि स्वीकारो महापुरुषधर्म्म इति दृष्टान्तेनाहुः—देव इति। देवत्वेनावश्यं स्वभक्तेष्टपूरणं कार्य्यमित्यभिप्रेतम्, तत्रापि आदिपुरुषः पुरुषोत्तमः, तेन भक्तमनोरथरिपूरणस्यावश्यकृत्यत्वात्, तत्रापि मुमुक्षुनपि, किमुत तदेकेप्सून्, किंवा, अकारप्रश्लेषेण (अमुमुक्षुन्) भक्त्येकनिष्ठानित्यर्थः। यथासौ भजते स्वीकरोति तथा भजस्वेत्यन्वयः, यथावदिति वा, तथाप्यर्थापत्त्या दृष्टान्त एव पर्य्यवस्यति। यथासौ तान् भजनमात्रापेक्षया सर्वानेव भजते स्वीकरोति, तथा त्वमप्यस्मान् भजेति भावः। यद्वा, ननु साध्व्यः! तत् कर्म्म ममानुचितमिति चेत्तत्राहुः—देवो भजतोऽर्वापेक्षकोऽपि आदिपुरुषोऽपि मुमुक्षुनपि भजते, मुक्तिदानेनापि तन्मनोरथं पुरयतीत्यर्थः। अतो भक्तेच्छानुसारव्यवहारेण न दोषो घटत इति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, श्रीगोपेन्द्रनन्दनत्वेनैव कृष्णे लब्धनिष्ठानां व्रजसुन्दरीणामान्तरीणं महाभाववैचित्रीसहचरीपरमैश्वर्य्यज्ञेषु तद्भक्तविशेषेषु सर्वाभिज्ञतादिरूपस्य तासां माहात्म्यस्य प्रख्यापनाय स्वमनोऽनुकूलेऽर्थे ताभिः प्रयुक्तयैव भारत्या कृष्णैश्वर्य्यं स्वप्रयोजनानुपयुक्तमपि वर्णयति, अन्यथा व्रजसुन्दर्य्यो भगवत्स्वरूपानभिज्ञा इति ते मन्येरन्, तच्चैश्वर्य्यवर्णनं परमार्त्तिसमय एव, न त्वानन्दसमये तदैश्वर्य्यज्ञानस्यापि तासामसुखानुभव एव पर्य्यवसानात्, तत्रापि निजभावमाधुर्य्यस्यान्यथात्वं नास्त्येव, यदैश्वर्य्यवर्णनेऽपि (भा० १०।३१।४) 'सख उदेयिवान्' इत्यादौ सख्यस्याव्यभिचारः, तथाहि विभो, हे बहिरन्तर्व्यापक! इति भवानस्माकं सर्वं भावं जानात्येव, अतस्तव पादमूलं भक्ता आश्रिता अस्मान् भजस्व, अन्यथा (गी० ४।११) 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' इत्यादिवचनानां वैयर्थ्यापत्तिः। यद्वा, सप्रणयशेषमाहुः—हे भक्ताभज! भजतीति भजः, न भजः अभजः, हे भक्तानामप्यभज! भक्ताभज! भक्तानपि न भजतीति तथाभूत! हे स्वेष्वपि दुरवग्रह! इति सर्वान् विषयान् भोगान्; यद्वा, साम्राज्यप्रभृति–वैकुण्ठविधिपदानि सन्त्यज्यापि तव पादमूलममुमुक्षून् भोक्तुमनिच्छून्नशक्नुवतो जनान् त्वत्पादमूलस्य सर्वतो माधुर्य्यविशेषाद् भज स्वीकुरु, यतो देवो जगत्पूज्यस्त्वमन्यथा देवत्वासिद्धिः, तत्रापि यथावत् सम्पूर्णतया आदि पुरुषो भगवान्, अन्यथा निजभगवत्ताप्रकटनासम्पत्तिः। सामान्येनोक्तिर्युक्तिप्रदर्शनेन निजस्वीकारदार्ढ्यार्थम्, अतस्ते त्वदीया अस्मान् मा त्यज, अन्यत् समानम्।

आत्तुक्तेरपि गोपीनां श्लेषार्थं भारती सखी। रक्षन्ती गौरवत् तासां कृष्णभक्तेषु गायती॥

तथाहि—ईदृशमप्रियं नृशंसं करवाणि, मया सह किञ्चिद्ब्रूतेत्यादिकं वक्तुं नार्हति। तत्र हेतुः—सन्त्यज्येत्यादि, विषयपरित्यागेन प्रपन्नानां नः पुनस्तद्भोगे प्रवर्त्तनस्य दोषत्वादित्यर्थः। किञ्च, दुरवग्रहं दुराग्रहम्, आ त्यज, अतो यथा मुमुक्षून् आदि पुरुषो भजते, तथैव अस्मान् भजस्व, परमं पदं देहि, न च विषयसुखमित्यर्थः। तदैवास्माकं स्वागतत्वं महाभागत्वञ्च व्रजस्यानामयमिति, यद्वा, याः सर्वविषयान् सन्त्यज्य तव पादमूलं भक्ताः, ता एव दुरवग्रहं स्वच्छन्दं यथा स्यात् तथा भजस्व, अस्मान् आ त्यज सम्यक् त्यज प्रभवस्तु भक्तजनानेव भजन्ते, न त्वभक्तजनानित्यत्र दृष्टान्तमाहुः—देव इति॥ ३१॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह–मैवमित्येकादशभिः। हे विभो इत्थं नृशंसं क्रूरं यथा भवति तथा वक्तुं भवान्नार्हति हे दुरवग्रह! स्वच्छन्द सर्वान् विषयान् भोग्यानपत्यादीन् विहाय सर्वनिगममिति पाठे सर्वेषां पत्यादीनां निगममाज्ञां सन्त्यज्य तव पादमूलं प्राप्ताः भक्ता इति पाठे भजमाना अतोऽस्मान्न त्यज किन्तु भजस्व अनुकूलो भव मुमुक्षून् भजमानान् भक्तानादिपुरुषो भगवान् यथा न त्यजति तद्वदित्यर्थः॥ ३१॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तथा विचार्थं किमब्रुवन्निति तत्राह–मैवमिति । नृशंसं परुषं वचनमेवं गदितुं वक्तुं नार्हसि कुतः ? इत्यत्राह–सन्त्यज्येति । हे दुरवग्रह, अवग्रहो वर्षविघातः तद्रहित ! भक्ताभीष्टवर्षणशीलेत्यर्थः । शब्दादिसर्वविषयान् सन्त्यज्य भक्त्या तव पादमूलं भजेम सेवितुमवाप्ता इति यत्तस्मात् मास्मान् त्यज अत्र दृष्टान्तमाह–देव इति ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तत् किमित्याह—मैवमित्यादि । एता मध्या धीराः, तेन विभो इति वक्रोक्त्या सम्बोधनम् । भवान् (गी० ४।११) 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' इति सत्यप्रतिज्ञः । एवं नृशंसं क्रूरं गदितुं मार्हति । तर्हीति । तर्हि किं कर्तव्यमित्याहुः—अस्मान् भजस्व मा त्यजस्वेत्यात्मनेपदं कर्त्रभिप्राये क्रियाफले । अस्मद्भजने स्वप्रतिज्ञारक्षणमेव फलम् । केन प्रकारेण भजिष्ये ? तत्राहुः—आदिपुरुषो नारायणो देवो यथा मुमुक्षून् भजेत, तथेत्यर्थः । स तु तेभ्य आत्मानमेव ददाति । ननु स तावत्तेभ्यो मोक्षमेव ददाति, भवत्यश्चेत्तदाकाङ्क्षिण्यस्तदा दास्याम्येव । गृहं यात, नेत्याहुः–तव पादमूलं भक्ताः श्रिता वयम् । भक्तास्तु मोक्षं कदापि नाद्रियन्ते । तेन दृष्टान्तगम्यं तावदिदमेव मोक्षे यथा न पुनरावृत्तिस्तथास्माकमपि गृहे न पुनरावृत्तिर्भवतु । सहैव स्थातव्यमिति यत्तदेव किं कृत्वा भजनीया भवत्यस्तत्राहुः–सर्वविषयान् सन्त्यज्त तांस्तथैवेत्याद्युक्तेः यतो वयमपि तथा, हे दुरवग्रह ! दुष्प्राप ॥ ३१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मैवमित्यादि । आसां हि दुःखानुभवदशायां श्रीकृष्णे समग्रैश्वर्यबहुप्रतीतिः केवलसुखानुभवदशायां परमप्रियत्वस्फूर्त्तिः, न हि प्रेम्णा ईश्वरस्फूर्तिर्बाध्यते, ईश्वरत्वाज्ञानं हि भ्रमजन्यम्, प्रेमा तु भ्रमज्ञान–नाशकः, प्रमाया हि करणं प्रेमा श्रीकृष्णे तु दुःखानुभूतेरबाधेश्वरत्व–स्फुर्तौ यथार्थमेवाहुः—हे विभो । न वयं कुत्रापि सापेक्षाः, केवलं त्वदेकपरायणाः एव इत्याह–सन्त्यज्य सर्वविषयान् सर्वत्यागेन त्वत्पादमूलं भक्ताः, अस्मान् मा त्यज न वयं कामुक्यः । त्यागे लिङ्गमाह–नृशंसं क्रूरं यतो गदसि, अतो मैवं नृशंसं गदितुमर्हति भवानिति धर्मज्ञत्वेनाक्षेपः । एतावन्तं कालं धर्ममेवोपदिष्टवानसि, अधुना वयं ते धर्ममुपदिशामः । भक्ता भजस्व, भक्तत्यागो ह्यधर्म एव, स्वतन्त्रस्य मम किं धर्माधर्माभ्याम् ? तत्राह दुरवग्रह स्वच्छन्द ! यथा आदिपुरुषो मुमुक्षून् भजते, तथा त्वमपि नोऽस्मान् भज । आदिपुरुषो नारायणः, स तु मुमुक्षून्न त्यजति, पक्षे, स्वतन्त्रो न भवति, तथा कथं भजतीत्यर्थः । तर्हि भक्तस्वीकारोऽयं धर्म एव, स तु मुमुक्षूनपि न त्यजति, त्वं भक्तानपि त्यजसीत्यहो ते काठिन्यमित्याक्षेपः ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अस्मान् धर्ममुपदिशस्यथ च स्वयं पापराशिं चिकीर्षसीत्यनुचितमित्याहुः–मैवमिति । नृशंसं घातुकं साक्षान्मारकं यथा स्यात्तथा गदितुं भवान् प्रतिपुरुषं धार्मिकत्वख्यातिमतो नन्दस्य पुत्रः सन्नार्हति अन्यस्तु प्रतिपुरुषं मानुषमारणवृत्तिको वरमर्हतु नामेति भावः । "नृशंसो घातुकः क्रूरः" इत्यमरः । त्वया कोटिसंख्या अप्यस्मान् प्रति वाक्शरांस्तथा एकदैव निःक्षिप्ता यथा अधुनैव शरीराणि परित्यज्य यमपुरं सर्वा एव वयं यामो न तु त्वदुपदिष्टं गोष्ठपुरं त्वन्तु शतकोटिस्त्रीवधपातकानि गृहीत्वा स्वयमेव गोष्ठं याहि स्त्रीवधान्नोचेत् जिघृक्षसि तर्हि सर्वविषयांस्त्यक्त्वा तव पादमूलं भक्ताः सेवितवतीरस्मान् भजस्व अत्रान्यविषयानित्युक्त्वा भगवदङ्गसङ्गो हि विषयो न भवतीति ध्वनितम् । भोः कामिन्यः ! किं स्वस्वपतिभ्यो भवतीनां कामो नोपशाम्यति ? यतस्तान् परित्यज्य मामेव भजध्वे तत्राहुः—हे दुरवग्रह । "अवे ग्रहो वर्षप्रति बन्धे" (३।३।५१) इति पाणिनीस्मरणात् दुष्टो अवग्रहो वृष्टिप्रतिबन्धोऽनावृष्टिर्यस्येत्यत्रान्यपदार्थस्य मेघस्यैवोपयुक्तत्वात् दुःखप्रयोगाच्च हे विषमात्रवर्षक ! मेघेत्यर्थः । तेन चातकीनामस्माकं दूरस्थोपि त्वमेव कृष्णमेघो बन्धुस्त्वं दैवदोषाद्यदि विषं वर्षसि अवग्रहत्वात्सलिलं न चेद्वर्षसि तर्हि मा वर्ष तद्वृष्टं विषमेव पीत्वा वयं म्रियामहे नतु निकटस्थानां ह्रदादीनामपि जलं पिबामेत्यस्माकं भावं जानीहीति भावः । अतोऽस्मान्मा त्यज यद्यात्मनः कृतघ्नत्वं दधासीति भावः ननु च सत्यं चातक्यो मेघमपेक्षन्तान्नाम मेघस्तु चातकीर्नापेक्षते चातक्यो म्रियन्तां जीवन्तु वा मेघस्य न कापि हानिरिति चेत् सत्यं न त्वं जडात्मको मेघ एव किन्तु विदग्धचूडामणिर्नारायणसमो नारायणवदेव वर्त्तस्वेत्याह—देव इति । मुमुक्षून् त्वदुपासनार्थं सर्वविषयांस्त्यक्तुमिच्छूनपि त्वदभीष्टापपादनया भक्तवश्यत्वात् भजते अस्मांस्तु त्वदर्थं सन्त्यक्तसर्वविषयश्रेणीका अपि त्वं कथं न भजसीत्यर्थः ॥ ३१ ॥

श्रीरसिकाह्लादिनी टीका

इदानीं श्रीकृष्णस्य रूक्षमुद्रास्थित्या संश्लेषसुखमलभमानाः क्षणमपि नेतुमपारयंत्य उपालम्भरीत्या वदंत्यो मानमपि कर्तुमजानंत्यो अतिवार्ताः सत्यः प्रत्युत्तरमूचुः" मैवमिति । हे विभो व्रजेन्द्रसुतत्वादस्मदुपेक्षाऽनुचितेत्यर्थः । भवान् भवच्छन्दः

पूज्यार्थः एव स्वागतं व इति गौरवेण गदितं नार्हति यत् इयमुक्तिः स्वागतं केष्वतिथिष्वेवोचिता नास्मासु। ननु मया स्वागतप्रश्नेनादर एव कृत इति चेत्तत्राह नृशंसं क्रूरं परिणामदुःखजनकत्वात् मधुविषसंयुक्तान्नवत्। गदितमित्यस्यायमभिप्रायः गद व्यक्तायां वाचि धातुः मनसापि विचारयितुं किं पुनर्गदितुं रसपाकानभिज्ञा एवानर्हा भवान् परमरसज्ञः हे विभो! मधुररसपरिपाटीमस्मान् विशेषेण शिक्षयितुं समर्थः, न तु येन रसेन भवताऽऽकृष्टा वयमागताः तं रसं विघटयितुमाह। मधुररसालंबनेषु सादरं वाक्यं स्थायिभावविघटकमिति भावः। ननु स्वागतप्रश्ने मया किमपराधं तदपि किमित्याक्रोशः क्रियत इति चेत्तत्राहुः भवता प्रतिश्रुतं प्रियं किं करवाणि व इति स्मृतिपथमवतीर्णं चेत् तदास्मान् भजस्वेति सुन्दरपात्राणि चेद्विषं तदा किं, भजनमेव तु चित्तानुवृत्तिरित्यर्थः। अस्मच्चित्तानुवृत्या रमस्वेति, अन्यथा प्रतिज्ञाभंगः स्यादितिभावः। किंच व्रजस्यानामयं कच्चिदिति वचनं तव नोचितमित्याहुः सर्वान् विषयान्संत्यज्य तव पादमूलं भक्ता सर्वेन्द्रियार्थानप्रत्यापत्तिरूपतया त्यक्त्वा तव पादमूलं सेवितुमागताः दासीभवितुमित्यर्थः। विषयभोगस्तु पत्यादिमूलकः स तु सकारणस्त्यक्त एव ननु गृहस्वामिनिं विहाय किमिति दास्यं स्वीक्रियत इति चेत्तत्राहुः यत्सुखं त्वद् भजने गृहस्वामिना तत्सुखस्य गंधोऽपि न इति पूर्वमेव तारतम्यं ज्ञात्वा पत्यादयस्त्यक्ताः। त्वद्भजनं सुखावधिरूपं विषयसेवनं दुःखावधिरूपं अत एव त्वद्भजन–प्रतिकूल्यात् सकारणविषयांस्त्यक्त्वा दुःखरूपत्वानुसंधानेन तदुपेक्ष्याऽऽगतानां पुनरपि दुःखरूपस्य अनामयप्रश्नेन दुःखस्यानुस्मरणकार्यं तु सुखरूपात् त्वद्भजनाच्च्यावयितुं तव नोचितमिति भावः। यदुक्तं व्रूतागमनकारणमिति तदुत्तरयन्ति अस्मान्मा त्यजास्मत् स्वीकारं कुर्वित्यर्थः। स्वीकारं कारयितुमागता विद्धि कीदृशस्त्वं देवोऽसि सेवनार्होऽसि वयं दास्यार्हाः। इदं त्वतिदैन्यं निवेदितं। यद्वा देवः क्रीडास्वभावः क्रीडा तु स्वकीयसापेक्षऽतोऽस्मतः को वा तव स्वकीयोऽस्ति प्रियवर्गैः सहाविर्भाविता क्रिया क्रीडेति प्रियवर्गो दुःखे निमज्जनीय इति कस्यापि मनस्युदेतीति काक्वा प्रश्नः। हे दुरवग्रह बारंबारं गेयसि गृहान् प्रतियातेति। यद्वा दुष्टेष्वपि पूतनादिषु अव अवनं पचाद्यं च इति ग्रहोभिःनिवेशो यस्य "जिघांसयापि हरये स्तनं दत्वाप तद्गतिमि"त्युक्तत्वात्। यद्वा दुःखस्य अव अवरक्षणमिति यावत्। तद्रूपो ग्रह आग्रहो यस्य प्रियवर्गो दुःखे निमज्जनीय इतियत्। यद्वा दुष्टेस्वस्मत्पत्यादिषु त्वद्भजनप्रतिकूलेषु अव अवनं इति ग्रह आग्रहो यस्य अनामयप्रश्नेन स्वरहस्योच्चाटितत्वात्। एके दुष्टाः मारणीया एके दुष्टा रक्षणीया इति वैषम्यं तव नोचितमिति भावः। ननु निरपेक्षस्यौदासीनस्य मम किं फलं भविष्यति युष्मद्भजने इति चेत्तत्राहुः आदिपुरुषः पुरुषोत्तमोऽपि निर्लिप्तोऽपि यथा भजतो भजमानान् भक्तिपूर्णान् स्वीयपादपद्ममकरन्ददानेन भजते अथ च मुमुक्षून् मुक्तिदानेन भजते। त्वं तु देवः क्रीडाप्रधानोऽसि क्रीडा तु स्वकीयसापेक्षाऽतोऽस्मन्मनोरथपूरणे तव दोषो न घटतीत्यर्थः। यद्वा हे विभो सर्वान्तर्यामिन् अस्माकमन्तःकरणवृत्तिर्जानात्येवातो भक्तानामभजने भजनस्य लोपप्रसंगः स्यात् "तस्मान्मच्छरणं गोष्ठमिति" व्रतलोपेनाधर्मोत्पत्तेः। नन्वीश्वरस्य मम कोऽयमधर्म इति चेत्तत्राहुः हे दुरवग्रह दुष्ट आग्रहो यस्य तथाहि भक्तभजनरूपस्य धर्मस्य त्यागः स्वप्रतिज्ञाहानिरूपस्य स्वव्रजजनत्यागरूपस्याधर्मस्य स्वीकार इति। तद्दुराग्रहं त्यक्त्वा "न मे भक्तः प्रणश्यतो"त्याग्रहेणास्मान् भजस्वास्मन्मनोरथं पूरयेत्यर्थः॥ ३१॥

विशुद्धरसदीपिका

तदेवाह–श्रीगोप्य इत्येकादशभिः। अत्रैवं विवेकः पुरस्तादेतासां चतुर्विधत्वे साधितेऽप्यस्ति कश्चिद्विशेषः याश्च श्रुतिमुनिरूपाः साधकचर्य्यः ताः द्विविधाः प्रौढाश्च कन्याश्च आसां साधकचरीत्वाविशेषादकमत्यमित्येको वर्गः एतासामावेद्यम् श्लोकत्रयात्मकं महावाक्यम् एवं च प्राचीनसंस्कारावशेषस्वाभाव्यास्कान्तभावाच्चेश्वरज्ञानमप्यविरुद्धं तत एव चाधीरतयाऽग्रे सरक्षत्वं पूर्वदिक्स्थितत्वात्प्रतिवचने प्राथम्यमपि बोध्यम्। सिद्धा अपि द्विविधाः दाम्पत्यभावाः सहचरीभावाश्च तत्राद्यानां श्रीराधिका प्रतिपक्षत्वम् श्रीकृष्णनिष्ठत्वेनोदासीन्यमपीति द्वैविध्यम्। तत्राप्याद्यानां दक्षिणात्वम् अपरासां तटस्थात्वमिति नच स्वाधीनपतिका सौभाग्यवर्णनप्रस्तावे तद्विपक्षतटस्थादिवर्णनमयुक्तमहृद्यं चेति वाच्यम् मधुरातिमधुरलीलायाश्चास्या स्वभावोऽयं यत्खल्वीर्ष्यामदमानादिवैचित्र्यपरिकरतथैव च रसं पुष्णानि तत एव तादृशतयैव कविभिर्वर्ण्यते श्रीभगवतापि यथावसरं स्वलीलायामङ्गीक्रियते तदुक्तमुज्ज्वले—

"यथा स्युर्नायकावस्था निखिला एव माधवे। तथैव नायिकावस्था राधायां प्रायशो मता" इति॥

प्रायशः इति स्वरूपतः स्वाधीनपतिकैव अयमेव च व्रजनिकुञ्जलीलयोर्विशेषः। शृङ्गारप्राधान्येन प्रेमपरिपोषका व्रजलीला प्रमप्राधान्येन शृङ्गारपोषका निकुञ्जलीलेति तदुभयसन्धिगता रासलीलेति तद्द्वयमपि यथास्थानं पुष्णाति च प्रपुष्णाति च शुद्धं प्रमाणमिति ततश्च लीलाशक्तिरेव तासु तत्तद्भावं दधाति विदधाति चाखिलं तदनुगुणमिति गम्यं वस्तुतस्तु श्रीराधाया एव रासलीलेति परमोल्लासेन वर्णयन्ति "सैव चाष्टविधा राधा नानाभावविभावनी" इत्यादि पुराणोक्तेः। यद्वा, तास्ताः सर्वा अपि वञ्चयित्वा तस्यामेव परमाशक्त्या नित्यं रमत इति तत्सौभाग्योत्कर्षहर्षितास्तत्सुखाकर्षितास्तथा तथा वर्णयन्तीति दिक्। ततश्च सिञ्चेत्यादिश्लोकद्वयात्मकं दक्षिणानां महावाक्यं, ततस्तन्न प्रसीदेति वामानां श्रीश्यामसहचरीणां, रमाया दत्तक्षणर्मिति तत्सुखस्य सूचितत्वात्। न चासां दास्योक्तिर्विरुद्धा सहचरीभावः समये परिजनभावश्च वेषभूषादौ उपदेष्टृताच माने तस्मिन् गाढेति गर्ह-

कत्वञ्चेत्यादिनोज्ज्वलादौ तथाभिधानात् वस्तुतस्तु सख्यमासां श्रीराधामनुतत्प्रियत्वेन श्रीहरौ गौरवप्रीतिविषयत्वात्तथात्वमविरुद्धम् यद्वा, सखीभावो द्विविधः दासीभावः सहचरीभावश्चेति तत्राद्यानां तन्नः प्रसीदेति, अपरासां तन्नो निधेहीति, केचित् वस्तुतस्तु चरमं महावाक्यं तटस्थानामिति यथायोग्यं योजनीयम्, अपि च यद्यपि विरहे समानभावापन्नत्वेन युगपत्समानवचःस्फूर्त्तिरपि सम्भवति तथाप्येकदोक्तावतिकोलाहलतया नातिरसाधायकत्वं ततो मुख्यानामेव वाक्यमिति ज्ञेयम्। चतुर्दिशस्थितत्वेन सर्वासां साम्मुख्यं च कृष्णस्य विष्वगित्यादिवदिति सर्वं समञ्जसम्। मूलमनुसरामः–मैवमिति, आदावेव निषेधोक्तितदुक्तेरतिपारुष्यतया एवम् ईदृगपि किमुतेदमेव विभो, अस्मत्प्राणनाथ भवान् प्रेमार्द्रचित्ततया प्रसिद्धः नृशंसं क्रूरं स्वागतमित्यादिना बहिः सादरं सन्यायं मृदूक्तमपि निवर्त्तनार्थगर्भितत्वाद्रसविघातकत्वादन्तः क्रूरमेवेति भावः "नृशंसो घातुकः क्रूरः" इत्यमरः ननु, तादृशमधुरवचसां कथं घातकत्वमुच्यते? इत्याशङ्क्यास्मच्चित्तक्षोभकत्वादेवेति परिहरन्ति—सन्त्यज्येति। मूलत एव पत्यादिरूपान् सर्वविषयान्सम्यङ्मनसाप्यनङ्गीकारेत्यक्त्वेदानीं सर्वत्यागेनागतास्वौदासीन्यमतिक्षोभकमिति भावः। तव पादमूलमितिवक्रोक्तिः स्वागतमित्यादिप्रतिवचनाभिप्रायेण अन्वादिरूपकानुक्तिश्च काठिन्याभिप्रायेण भक्ता इति दैन्यं तेन कान्तभावाभिव्यक्तिः हे दुरवग्रह, स्वतन्त्र! किम्वा "वृष्टिर्वर्षं तद्विघातेऽवग्रहावग्रहौ समौ" इत्यमरकोशादवग्रहो वृष्टिविष्टम्भः स च श्यामघनस्य भवतोऽनुचित इति सम्बोधयन्ति—दुरिति। दुःखप्रदत्वमपि अस्मान् अनन्यगतीरित्यर्थः। अलमस्माकं दोषविचारेण प्रत्युतास्मत्परित्यागेन तवापि महानेव दोषः स्यादित्यभिप्रायेण धर्माधर्मातीतस्येश्वरस्यापि अनन्यजनतत्परतां दृष्टान्तयन्ति–देव इति। सतु मुमुक्षूनपि भजते अस्माभिस्तु सोऽपि विषयकोटावन्तर्भावितस्त्वप्रेमविघातकत्वादिति भावः। यद्वा, अमुमुक्षूनिति पदच्छेदः "इमं लोकं तथैवामुमात्मानमुभयायिनम्। आत्मानमनु ये चेह ये रायः पशवो गृहाः" इति तृतीयोक्तेः "हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे" इति नवमोक्तेः अथवा सर्वविषयान् सन्त्यज्यागता इति कथं प्रतीमस्तत्राहुः, देव इति। नारायणसमो गुणैः" इत्यादिमहाजनप्रसिद्ध्याऽस्माभिरादरणीय इत्यर्थः ननु, नन्दनन्दनोऽहं सादृश्योक्तिभ्रमेणैव तथा प्रतीत इति चेत्तत्राहुः, यथा यथावदित्यर्थः। ननु, मानुषे मयि कथं तथा प्रतीतिस्तत्राहुः आदिपुरुषः "योऽसावादित्ये पुरुषः" इत्यादि श्रुतेः परमपुरुष इत्यर्थः। श्लेषेण आदित आरभ्य पुरुषोऽस्माकं पतिरिति। ननु, परपुरुषः इदानीन्तनानामेव तथात्वादितिभावः कथमेवमिति तत्राहुः अमुमुक्षून् त्यक्तुमनिच्छून् यदा अस्मान् भजते इति "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति भजिष्यति भवांस्तदाज्ञास्यत्येवेत्यर्थः ।।३१।।

श्रीरामनारायणकृता भावभावविभाविका

गोपीवचनमवतारयति—गोप्य इत्याद्यकादशभिः। तत्र भगवता स्वयं प्रवृत्तिधर्मोपदेशे कृते तत्समाधानाय श्रुतिरूपगोपीपुरस्कारेण विरागान्वितसाधनभक्तितत्त्वबोधप्रेममार्गाभिधानेन क्रमेण पद्यत्रयेणोत्तरमाहुः—मैवमित्यादिना। हे विभो! प्राणनाथ! भवान् प्रियमेव वदन्नप्येवं द्व्यर्थकतयोपेक्षार्थस्यापि भानेन नृशंसं क्रूरं यथा स्यात्तथा गदितुं नार्हति किमघं नास्ति भगवद्धस्तगतादर्शमुद्रिकाऽस्ति चेत्स्वमुखं निरीक्षस्व नहि भवत् कोमलमुखसदृशीयं बाणसमा वाणी नहि मुखचन्द्रचन्द्रिकावाक् प्रलयाकाशुवतापि का युक्ता नहि मुखकञ्जमधोर्हालाहलवत्तीक्ष्णतोचिता तथा नान्यः कोप्यत्र वर्त्ततेऽयमुपेक्षार्थः बोधनेन वञ्चयितुमेवं द्व्यर्थकवचनोक्तिः सङ्गच्छेत वयन्तु नहि भवतैवं वदनार्हा यतः सर्वविषयान् पतिधनगृहसौख्यादीन् ऐहिकान् साक्षादामुष्मिकान् ब्रह्मलोकादिपर्यन्तान् काम्पभोगांश्च सन्त्यज्य सम्यक् सवासनं त्यक्त्वा तव पादमूलं भक्ताः सेवमाना अतो भजस्व तत्र विषयानित्यनेन "षिञ् बन्धने" इत्यस्माद्विशेषेण बन्धहेतुतया त्यक्तुं योग्यत्वं हातुमशक्यत्वं च सूचयन्ति। ननु, सर्वविषयत्यागे मम त्यागापि प्रसज्येतेत्याशङ्क्य विषयशब्दस्य बन्धकपरत्वं तब तु अबन्धकत्वेनप्रत्युत बन्धहरत्वेन विषयत्वाभावादेव समाहितत्वेपि विभो इति सम्बोधनेनापि त्यक्तुमनर्हत्वेन च समादधते तथाहि विभो इति भूमन् व्यापक इत्यर्थः। तथा च "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यो वै भूमा तत्सुखं नाल्पे सुखमस्ति" इति श्रुत्या तव विभुत्वेन भूमसुखरूपतया अहेयत्वमेव प्रत्युत तव प्राप्तावन्येषां दर्शनश्रवणस्मरणानर्हतया हेयत्वस्यैव श्रुतिसिद्धतया न तत्प्रतिगन्तव्यं तथा विभोर्देशापरिच्छेद्यतया तं कथं कोपि त्यजेत्त्यक्तुं वा समर्थो भवेत् नन्वहमेक एव बह्वीः कथं भजामि तत्राप्याहुः, विभो इति नहि व्यापकस्य तव तदशक्यमतो विभुत्वेनैव समर्थः सर्वमूर्त्तसंयोगित्वं विभुत्वमिति नान्यविदां स्थितिः विभोस्तवास्मच्छरीरसंयोग आवश्यक एव। ननु, किमतिप्रार्थनया बह्वयो मद्वशीकरणसमर्थास्तत्राहुः–दुरवग्रहेति। स्वच्छन्देत्यर्थस्तस्मात्त्वमेव भक्तानोऽस्मान्भजस्वमा त्यज। यद्वा, "वृष्टिर्वर्षतद्विघातेऽवग्रहावग्रहौ समौ" इति काशाक्तः दुःखं यथा स्यात्तथा रसवृष्टिविघातक! नैतत् घनश्याम त्वयि युक्तमिति भावः। यद्वा, दुगतम् रसवृष्टिविघातकत्वं यतस्तथाभूतस्वभाव नहि त्वयि स्वभावविरुद्धमिदं युक्तमिति ध्वनिः अत्र सर्वविषयान् सन्त्यज्येति वशीकारसंज्ञकवैराग्यपूर्वकन्यासोक्तिः पादमूलं भक्ता इति पादसेवनादिभक्तिनिर्देशः न च स्त्रीत्वेन तदनधिकार इति वाच्यं त्यागमात्रात्मकपरमहसन्यासे सर्वाधिकारात् मैत्रेयविदुरादीनां तथा दर्शनाच्च तत्र दृष्टान्तमाह-देव इति। "मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितः" इत्यत्र अन्यथा मिथ्याकल्पिताऽविद्योपाधिकजीवरूपं हित्वा स्वस्य कृष्णस्य रूपेणावास्थिरिति मोक्षस्य कृष्णस्वरूपात्मकत्वात् तदिच्छून् स्वस्वरूपकामान् यथा आदिपुरुषो देवो नारायणो भजते तथा

तव स्वरूपकामान्नो भजस्वान्यथास्मदभजने तव पुरुषत्वदेवत्वयोः क्षतिरित्यागतं देवानां प्रियत्वं गवामिन्द्रत्वं चेति व्यङ्ग्योक्तिः "दिवु कीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु"। यद्वा, यतस्त्वं कामक्रीडापरत्वेन कामाविजगीषुत्वेन अस्मदाह्वानादितद्व्यवहारतत्वेन द्युतिमत्त्वेन निगमस्तुत्यत्वेन रसिकजनगीतगुणत्वेन मोदात्मकत्वेन स्वकान्त्या मदनमदशमनोन्मदत्वेन कान्तत्वेन च सर्वथापि देवस्तत्सर्वं विहायास्मदुपेक्षया केवलस्वप्नपरत्वेन देवस्वीकारोऽयुक्त एव तया यथा इति यथावत् आदिपुरुषः आदित एव सर्वासां पुरुषः श्रुतिसिद्धः पतिर्नाधुनाऽस्माभिः स्वबुद्धिदोषेण कल्पितः अन्ये तु मध्ये एव कल्पिताः तस्मात्ते त्वाममुमुक्षून् नोऽस्मान् भजस्व मा त्यज इति पुनः पुनरुक्तिः प्रार्थनातिशये ॥ ३१ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तदुदाहरति—मैवमिति। यद्यपि वयं निकृष्टास्तथापि सर्वोत्तमो भवान् षड्विधैश्वर्य्यसम्पन्नः प्रतियातेत्येवं रूपं नृशंसं क्रूरमस्मत्प्राणापहारणसमर्थत्वात् घातुकं नृशंसमिति किञ्चित् संरम्भाविष्कारः यद्यपि भगवता प्रथमं स्वागतमित्यादिना स्तुतास्तथाप्यग्रे प्रतियातेति प्रतिगमनाभिधानात्तदपि नास्माकं प्रेमातिरेकवर्णनाभिप्रायकमपितु व्यङ्ग्योक्त्योपहासपरम् अतस्तदपि नृशंसमेव परिच्छिन्नस्य परकीयान्तःकरणवृत्त्यनभिज्ञस्यैवम्विधोक्तिः कदाचित् घटेत न तु विमोव्यापकस्य सर्वान्तरवस्थितत्वात् सर्वान्तःकरणवृत्तिसाक्षिण इत्याशयेन सम्बोधयन्ति—हे विभो! इति। अत एव व्रजस्यानामयं कच्चिदिति प्रश्नोपि न सङ्गच्छते तत्कुशलाकुशलयोरुदासीनभूतास्मदन्तःकरणवृत्तितत्त्वाविदित्याशयेनाह–सन्त्यज्येति। व्रजस्य का कथा अस्माभिः शब्दस्पर्शादयः सर्वेन्द्रियाणामपि विषयाः सम्यग्वासनोच्छेदपर्यन्तं त्यक्ताः सन्त्यज्य च तव पादमूलभक्ताः सत्यागताः तव पादमूलभजनार्थमेव न तु फलान्तरमस्माकमपेक्षितमित्यर्थः। सर्वविषयानित्यनेन त्वद्विषयकः कामः कामो न भवति धुनयति अस्मदन्तःकरणात्सर्वे विषया यदि निस्सृता न स्युः तव पादमूलभक्तिः कथं तत्राविर्भवेत् तथा च सैव तत्त्यागसाक्षिणीत्यप्यनेन ध्वनितं यच्च भगवतोक्तं प्रियं किङ्करवाणि वः ब्रूतागमनकारणमिति तत्राप्याहुः–भजस्वेति। तथा च भगवद्भक्तानामस्माकं स्वीयत्वेन ग्रहणमेवास्मत्प्रियं भगवता कर्त्तव्यमेतदरिक्तं किमास्माकं प्रियं नास्त्येतदेवास्मदागमनप्रयोजनमतस्तदेव सम्पादयेत्याशयः तस्मात्प्रतियात व्रज नेह स्थेयमिति त्यागाग्रहो भवतो नोचित इत्याहुः। हे दुरवग्रह मा त्यजास्मान्मद्भजनं न कर्त्तव्यमित्ययमाग्रहो दुष्टो भवति सर्वं कर्त्तव्यं भगवद्भजनं न कार्यमिति दुष्ट आग्रहो जीवानां वर्त्तते परमेश्वरस्याप्ययुक्त आग्रहश्चेत्तर्हि कथं जीवानामुद्धारः तस्मादस्माकमेव केवलमभाग्यवशादुक्ताग्रहो भवता आश्रित इति सम्बोधनाशया। ननु, न मया स्वभजनं निषिध्यते किन्तु कामोपाधिकं तदिति चेत्तत्राह–देव इति। यथा देव आदि पुरुषोऽवतार्य्य "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति प्रतिज्ञावान् भवान् यथा मुमुक्षून्भजते तत्तत्फलप्रदानेनाश्रयते स्वस्मिन्नेव स्थापयति न तु पुनस्तेषां पूर्वावस्थां सम्पादयति तद्वदस्मदाद्यर्थं तदवतारभूतस्त्वमेवाप्यस्मदङ्गसङ्गोत्कटाकाङ्क्षावतीर्मात्यज अपित्वस्मदभिलषितफलप्रदानेनाश्रय तथा च मोक्षोपाधिकमपि भगवद्भजनं यथा मुमुक्षूणां भगवता शुद्धत्वेनैवाङ्गीक्रियते तथा त्वदङ्गसङ्गोपाधिकमपि त्वमेवाङ्गीकर्तुं योग्योसीति भावः। सम्बन्धित्यागो न कर्त्तव्य इति वक्तुं स्वभक्तत्यागं च कर्तुं भवान्नार्हति नापि स उपदेशः सफलो भविष्यतीत्यप्यनेन ध्वनितम् अनभिज्ञापक्षे भो विभो, समर्थ! एवं गदितुमपि भवान्नार्हति चरितुं नार्हतीति किमु वक्तव्यमित्यर्थः। यद्यपि परमैश्वर्यवांस्तथापि परमधार्मिकत्वेन प्रख्यातस्य श्रीनन्दरायस्य पुत्रः स्वयं च रसाद्र इति सूचनाय भवानित्युक्तं नृशसं साक्षान्मारक तथा चास्मदुपदेशाय प्रवृत्त त्वया वाङ्नाराचकृतासङ्ख्यातस्त्रीवधजनितपातकोत्पत्तिर्न विचारितेति भावः। अथवा हे विभो, अस्मत्प्राणनाथ! तथा च विश्वनाथस्मत्प्राणरक्षणमेव तवोचितं न तु तन्नाशनीयमिति भावः। तत्रापि भवान्मयेमारंस्यथ क्षपा इति कृतप्रतिज्ञः "प्रतिज्ञाय करोमीति कर्त्तव्यं तदकुर्वतः। मिथ्या वचनदग्धस्य इष्टापूर्तिर्विनश्यति" इत्यादि शास्त्रज्ञो भवान् तथाचारमहादोषाद्धोटनाय प्रवृत्तस्त्वं स्वप्रतिज्ञानाशादि बृहद्दोषान्न पश्यसि तदुक्तं शकुन्तलायां—

"राजन्सर्षपमात्राणि परच्छिद्राणि पश्यसि। आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यसि" ॥

इति भावः। ननु, "स्वागतं वो महाभागाः" इति परमकोमलमपि प्रथमं मयैवोक्तं तत्किमर्थं विस्मर्य्यत इति चेन्न तस्याप्यलङ्कृत्य शिरश्छेदनवन्निवर्तनार्थं तया नृशंस एवान्तर्भावात् भवतु भवन्मुखचापनिःसृतवागस्त्रजालेन दग्धप्राणा वयमितः परं परलोकमेव यामो न तु व्रजम्। त्वन्त्वसङ्ख्याता अस्मान् हत्वा किं पदं प्राप्स्यसीति न विद्मः इत्याशयेनाहुः—सन्त्यज्येति। वान्ताशनवत्पुनर्गृहान्न यास्यामः सर्वविषयांस्त्यक्त्वा इति द्योतनायामभियुक्त तथा च व्रजस्यानामयं रजन्येषेत्यादिवाक्यजातं निरर्थकमेवेति भावः। ननु, किमित्येवमित्युपालम्भं दातुं प्रवृत्तः प्रियं किं करवाणि वः ब्रूतागमनकारणमिति मदुक्तीः श्रुत्वा तूष्णीं स्थिताः भवतीर्दृष्ट्वा पुनर्गन्तुकामाः निष्कामाश्चालक्ष्य रजन्येषेत्याद्युक्तं मया ततो मास्तु कोपो यत्प्रार्थनीयं तन्निःशङ्कं प्रार्थ्यतामिति चेत्तत्राहुः—अस्मान्मा त्यज त्वदतिरिक्तविषयाकाङ्क्षारहिताः भजस्व स्वीयत्वेन समाश्रयस्व सन्त्यज्येत्यादिना। ननु, कथ गोपगृहणीर्वोऽहं भजामीति शङ्कापि निराकृता तव पादमूलं भक्ता इत्यनेन वयं वनशोभादिनिरीक्षणार्थमागता इति दृष्टं वनमित्यादियुक्तं समाहितं पादपद्ममित्यनुक्त्या किञ्चित् संरम्भेण नृशंसवाक्यपादयोः काठिन्यं व्यञ्जयति। ननु, युष्माभिः सर्वं यथार्थमेवाभि-

धीगते तथापि नाहं भवतीर्भजामि स्वतन्त्रत्वादिति चेत्तत्राहुः –हे दुरवग्रहेति । अयमाग्रहो दुष्टो भवति स्वतन्त्रस्यापि तवैवंविध आग्रहो नोचितः चतुरशिरोमणित्वाद्दुराग्रहो हि मूढधर्म इति भावः । अतोऽनन्यगतीरस्मान्मा त्यज त्यागस्यानिर्वाच्यदोषोत्पादकत्वात् नन्वस्तु दोषस्तेन मम का हानिरित्याशङ्क्याहुः—अहो किमेवम्विधगर्वगिरमगमारूढोसि किमाप्तकामादात्मारामात्परमेश्वरादप्याधिक्यं प्राप्तोसि यतः साप्येवं न करोतीत्याशयेनाहुः—देव इति। तथा धर्माद्यनपेक्ष्यः सर्वलोकसंहारकृतपापासंस्पृष्टः सकलैश्वर्यसम्पन्नः स्वयंप्रकाशो ब्रह्मादिकारणभूतः स्वभक्तान्मुमुक्षून्भजते मोक्षप्रदानेन तथा त्वं स्वतन्त्रोप्यस्मन्मनोरथपूर्तिङ्कर्तुं योग्य इत्यर्थः । मुमुक्षूनित्यनेन ते मुमुक्षवः न तु तदेकेप्सव इति तेषां स्वतो निकृष्टतां सूचयति यद्वा, अमुमुक्षून् मोक्षाद्यनिच्छून् यद्वा मुमुक्षुनऽतदन्यकर्म त्यक्तुमिच्छून् शरणागतान् दुरवग्रह इत्यनेनाह—विषमात्रवर्षकमेघेत्यप्युक्तम् "अवग्रहोवृष्टिप्रतिबन्धे" इति पाणिनीयस्मरणात् दुष्ट अवग्रहो यस्मिन् स प्रतिषिद्धवृष्टिर्मेघस्तस्य दुष्टत्वं चोष्णवायुवर्षकत्वात् तथा चेतरजलस्थानीय स्वपत्यभिकाङ्क्षाविनिर्मुक्ता मेघस्थानीयस्त्वदेकशरणाश्चातकीकल्पा वयं त्वदधरामृतपानार्थमागतास्त्वे त्वस्मदभाग्योदयात्संप्रति विषं वर्षसि भवतु विषमेव पीत्वा मरिष्यामो न तु व्रजं यास्यामः चातकीस्वभावत्वात् तस्मादस्मान्मा त्यज कृतज्ञस्य तव नेदमुचितमिति भावः ननु, चातकीसमानानां भवतीनां मरणेन मम चातक्यपेक्षारहितमेघकल्पस्य का हानिरिति चेत्तत्राहुः—न त्वं केवलजडमेघसदृशः किन्तु परमाभिज्ञदुःखमात्रकचेतनरूपपरमात्मसदृशोसीत्याशयेनाहुः देव इति । यद्वा, भक्ता अस्मान् भजस्व दुराग्रहम् आ समन्तात्त्यज "बुद्धेः फलमनाग्रहः" इत्युक्तत्वात्परमबुद्धिमतस्तवाग्रह एव नोचितः दुराग्रहस्तु दुर्निरस्त इति भावः । मानिनीपक्षे एवं प्रियं किं करवाणि व इत्यादिरूपं नृशंसं क्रूरं गदितुं नार्हति यद्यपि भवान् सौन्दर्य्यादिगुणमग्नस्तत्रापि विभुः परमसमर्थस्तथापि परदारा एवं न वक्तव्याः इति भावः । यदि परदारास्वेव तव रमणेच्छा तर्हि याः सर्वविषयान्सन्त्यज्य तव पादमूलं भक्तास्तान् दुरवग्रहं स्वच्छन्दं यथा स्यात्तथा भजस्व अस्मानासमन्तात्सर्वप्रकारेण त्यज । यद्वा, अस्मान्दुःसाध्याः प्रति दुराग्रहं त्यज प्रभवोपि भजमानमेव भजन्तीत्याशयेनाहुः, देव इति । आदिपुरुषो देवो यदपेक्षयाधिकं प्रभुत्वाविशिष्टः कोपि नास्ति स यथेत्यर्थः। निवृत्तिपक्षे एवं प्रतिरुद्धाः श्रुतयः साक्रोशमाहुः—मैवमिति । एवं ब्रह्मणि श्रुतीनां प्रामाण्यं नास्तीत्यादिरूपं नृशंसं सर्वघातुकं गदितुं भवान्नार्हति । ननु, नाहं ब्रवीमि किन्तु शास्त्रतत्त्वाऽनभिज्ञास्ते ते वादिन एव जल्पन्त्यतो बाहमुपालम्भविषय इति चेत्तत्राहुः, हे विभो ! व्यापक ! तथा च "अनेन जीवेनात्मनाऽनुप्रविश्यनामरूपे व्याकरवाणि" इति श्रुत्या नामरूपात्मकंसंसारविस्ताराय तादृशजीवात्मना त्वमेव ब्रवीषीति भावः । यतः सन्त्यज्य सर्वविषयांस्तव पादमूलं भक्ता अस्मान्भजस्व दुरवग्रहम् मात्यज नायं मोक्षमार्गः किन्तु परमानर्थासद्भावप्रापकः "असन्नेव स भवति असद्ब्रह्मेति चेद्वेद" इत्यादिश्रुतेः । तस्माद्यथा मुमुक्षूणां मोक्षः स्यात्तथा करुणा विधेयेत्याशयेनाहुः—देव इति । यथा आदिपुरुषो देवो मुमुक्षून् भजते मोक्षदाता भवेत्तथाऽस्मान् भजस्व तथा च परमपुरुषार्थमोक्षलाभाय ब्रह्मण्यस्मत्प्रामाण्यमवश्यमास्थेयमित्यर्थः । अयमाशयः सर्वान्विषयान् प्रतिपाद्यान् सम्यक् परित्यज्य ब्रह्मणि समन्वितानां श्रुतीनामन्यपरत्वाभिधानं साहसमात्रं तत्र श्रुतिवाक्यानां द्विविधा ब्रह्मणि प्रवृत्तिः एका ब्रह्मात्मनोरेकत्वविषया अपरा सत्यज्ञानादिलक्षणब्रह्मविषया तत्राद्या यथा सोऽयं देवदत्त इति पदं तत्रैकस्मै कस्मिन् देवदत्ते पर्यवसानं तद्वत् तथाहि यथोक्तं वाक्यं सोयमिति विशिष्टाभिधायिभ्यां पदाभ्यां स्वार्थैकदेशव्यक्तिमात्रलक्ष्यपरं तथा तत्त्वमसि वाक्यमपि विशिष्टाभिधायिभ्यां पदाभ्यां स्वार्थैकदेशचैतन्यव्यक्तिमात्रलक्ष्यपरं ननु पूर्वं तत्रैव पदार्थानां संसर्गः संसृष्टादयोऽर्थाः वारवाक्यार्थं लक्षणमुक्तं तच्च द्विविधमप्यखण्डार्थं न सम्भवति ततः कथं वाक्यार्थलक्षणशून्यखण्डं ब्रह्म वाक्यार्थः स्यादिति चेन्न वेदान्तशास्त्राचार्य्य श्रीबादरायणाऽनुयायिभिः—

"संसर्गो वा विशिष्टो वा वाक्यार्थे नात्र सम्मतः । अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः" ॥

इति वदद्भिरखण्डस्य वाक्यार्थत्वाभिधानात् तत्रैवं सत्युक्तलक्षणस्य तत्राव्याप्तिः सामान्यलक्षणस्यैव तयावद्विशेषव्याप्तिनियमात् विशेषलक्षणयोरेतयोः परस्पराव्याप्तेरदूषकत्वात् सामान्यलक्षणं तु वाक्याप्रमेयत्त्वमात्रेप्यस्त्येव न चाखण्डवाक्यार्थस्य विशेषलक्षणाभावः अपर्यायानेकपदैकप्रातिपदिकार्थमात्रपरत्वस्यैव तल्लक्षणत्वात् । ननु, तत्त्वं पदलक्षितरूपे भिन्ने किं वा न अर्थ ऐक्यप्रमित्यसम्भवः द्वितीये पदार्थवाक्यार्थयोरेकत्वापत्तिरिति चेन्न द्वितीयपक्षोक्तदोषस्पष्टापत्तिग्रस्तत्वात् न च पदद्वयवैयर्थ्यं लक्षणयैकार्थबोधनार्थत्वात् त्वंपदस्य वाक्यार्थपरित्यागेन चिल्लक्षकत्वं तत्पदं सामानाधिकरण्ये सति द्यदत तथा तत्पदस्यापि वाक्यपरित्यागेन (?) चिह्नदाकत्वेकपदसामानाधिकरण्ये इति न पदद्वयवैयर्थ्यम् एवं सत्यनाद्यवान्तरवाक्याखण्डार्थत्वं यथा केनचित्पृष्टोस्मिन् ज्योतिर्मण्डले चन्द्रो नामेति तस्य प्रतिवचनं प्रकृष्टप्रकाशं चन्द्र इति वाक्यस्यात्र प्रकृष्टशब्दात् चन्द्रप्रातिपदिकार्थसिद्धिः प्रकृष्टं तम इति प्रकृष्टशब्दस्य प्रकृष्टसतमसेपि प्रयोगदर्शनात् तथा प्रकाशशब्दोपि न तत्सिद्धिः खद्योतादावपि तत् प्रयोगदर्शनात् तस्माद्वाच्यार्थपरित्यागेनाप्रकर्षाप्रकाशविरोधी चन्द्रप्रातिपदिकार्थः पदद्वयेन प्रतिपाद्यत इत्यखण्डार्थत्वसिद्धिरन्यथा चन्द्रप्रातिपदिकार्थमात्रप्रश्नोत्तरतया विशिष्टमर्थं बोधयतो वक्तुरनवधेयवचनं न स्यात्तथाहिमखण्डार्थलक्षणवाक्यत्वात्प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवदति सिद्ध यद्यपि प्रमाणान्तराभावात् ब्रह्मण्युपनिषदां प्रामाण्यमुक्तं किमपोधलक्षणप्रामाण्यं किम्वा प्रमाणान्तरसंभिन्नार्थविषयत्वात्पौरुषेयवदित्यापेक्ष्यं प्रामाण्यं किं वा प्रमाणान्तरयोग्यार्थविषयत्वात्तत्सिद्धार्थानुवादरूपमप्रामाण्यं नाद्यः गृहीतसङ्गति-

कस्य पुंसः सत्यादिवाक्यश्रवणे अबाधितानकगतार्थप्रमितदर्शनात्प्रामाण्येन हि प्रमीयमाणस्यार्थस्य प्रमाणान्तरसम्वादो न मिथ्यात्वापादकः सर्वप्रमाणानामनधिगतार्थगतत्वादन्यथा चक्षुषा गृह्यमाणस्य रूपस्य त्वचा गृहणात् मिथ्यात्वाशङ्का स्यात् न द्वितीयः प्रमाणान्तरसंभिन्नार्थत्वाभावात् पौरुषेयवचनप्रयुक्तत्व हि सम्भेदस्य भूतार्थप्रयुक्तत्वप्रत्यक्षादीनामपि संभेदः स्यात् नापि तृतीयः स्पर्शज्ञानयोग्यद्रव्यविषयस्य चक्षुषोऽनुबाधकत्वादर्शनात् एवं सिद्धे उपनिषदां ब्रह्मणि प्रामाण्ये तद्गतानां पदानामर्थान्तरकल्पना न युक्ताश्रुतहान्यश्रुतकल्पनाप्रसङ्गात् न च तेषां कर्तृस्वरूपप्रतिपादनपरता वक्तुं शक्या तत्तत्केन कं पश्यत् "एकमेवाद्वितीयम्" इत्यादिना क्रियाकारकफलादेर्निराकृतत्वात् नापि ब्रह्मण उपासनाविविधशेषत्वं सम्भवति एतत्केन हेयोपादेयशून्यत्वेन क्रियाकारकादिद्वैतविज्ञानोयमर्होपपत्तेः यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्ट तथापि ब्रह्मात्मविज्ञानस्य फलपर्य्यन्तत्वात् यत्तत्तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुं हि न शासना चोपनिषदां शास्त्रत्वमिति संक्षेपः एतेन स्वागतमित्याद्यपेक्षो निरस्तः यत्तु रजन्येषेत्यादि तत्तु यर्थार्थमेव तत्राऽनिद्रितानामज्ञानामपेक्षया ब्रह्मणो निशातुल्यत्वात् तदुक्तं "या निशा सर्वभूतानां तस्यां जागर्ति सम्यमी" इत्यादि यत्तु मातर इत्यादि तदपि न "असन्नेव सभवति असद्ब्रह्मेति चेद्वेद" इत्यादिना मात्रादितुल्यत्वाभिमानिनामास्तिकमत्यामसत्त्वाभिधानेन तेषां भयोत्पादनस्य समुचितत्वात्तथापि दृष्टं वनमित्यादिनोपहासः सोपि साहसनिबन्धनः अन्तःकरणतद्धर्माण्यसत्त्वसंवेद्यत्वात् अधिकार्य्यभावेति — "अतीत्यलोकान् कर्मचितान्ब्रह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन" इत्यादिश्रुतीनां निरालम्बनतापत्तेश्चेति दिक् ॥ ३१ ॥

रास-रहस्यम्

र० टी०–हे विभो ! व्यापक ! एवं कर्मसमुच्चयादि भेदवादात्मकं नृशंसं घातकं "द्वितीयाद्वै भयं भवति ।" आदि वचनं गदितुं व्यक्ततया "व्यक्तायां वाचि" इति "वेदाः निःश्वासवत् प्रश्वसिताः ।" "श्रुतिस्मृती ममैवाज्ञे ।" इत्यादि श्रतिस्मृत्यादिना स्पष्टरूपेण वक्तुं भवान् मार्हति न योग्यः भवति सन्देहास्पदत्वात्, दुरवग्रह दुःखेनापि ग्रहीतुं शक्य "अणोरणीयान् महतो महीयान् आत्मास्य जन्तोर्निहितं गुहायां ।" इति श्रुतेः, यथा देवः दिव्यति स्वयमेव प्रकाशते इति आदिपुरुषः परमात्मा सर्वान् भजमानोऽपि मुमुक्षून् मोक्षकामान् तु विशेषेण भजते अभेदरूपेण स्वीकुरुते "ज्ञानीत्वात्मैव मे मतमि"ति गीतायां, तथा सर्वविषयान् सर्वान् ब्रह्मलोकपर्यन्तान् विषयान् "षिञ् बन्धने" इति बन्धनकारित्वात् संत्यज्य सम्यग् विचारपूर्वकं हित्वा तव पादमूलं "शास्त्रयोनित्वात् ।" "तत्तु समन्वयात् ।" इत्यादि न्यायेन "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः" इत्यादि श्रुतिप्रमाणेन च सर्वशास्त्रोपदेशानां पदमधिष्ठानमात्मा एव सर्व प्रपंचानां मूलमुत्पत्तिस्थानं तमात्मानं भक्ताः सेवितुमारब्धवतीः, अस्मन् प्रत्यय गोचरत्वेनाभ्यस्यमानाः, मा त्यज भेद वादेन न दूरीकुरु अपितु भजस्व स्वस्मिन् प्रविलापय ॥ ३१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तासामुक्तिमेव वर्णयति–मैवमित्येकादशभिः । हे विभो ! व्यापक परमात्मन् ! इह मत्समीपे न स्थेयमित्येवं गदितुं भवान् सर्वव्यापकः नार्हति परिच्छिन्नमुखे तच्छोभते इत्यर्थः । ननु सर्वत्र सर्वदा सत एकत्र सङ्गमे कोयं दुराग्रहः ? अत्राहुः— हे दुरवग्रहेति । दुर्ल्लभः अवग्रहः ग्रहणं यस्य स तथा तत्सम्बुद्धौ हे दुरवग्रह ! सर्वगोपित्वं यत्र स्वेच्छया प्रकटोसि तत्रैव प्राप्योसीत्यर्थः । अतः देवः आदिपुरुषो भवान् यथा मुमुक्षून् भजते तथा भक्ताः किङ्करीः अस्मानपि भजस्व परिचर्यायां नियोजयेति फलितोर्थः केनापि हेतुना मा त्यज ननु मुमुक्षवः विषयान् त्यक्ता मां प्रार्थयन्तेऽतस्तान्भजाम्यत्राहुः नृशंसं यथा भवति तथा सर्वे विषया भोगाः येषु तान् पतिपुत्रादीन् निवारयितुं प्रवृत्तानपि सन्त्यज्य तव पादमूलं प्राप्ता इति ॥ ३१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणि

कामिन्योऽन्योन्यमालोच्याच्युतं प्रति किमब्रुवन्नित्यत आह ॥ मैवमिति । हे विभो दुरवग्रहः प्रमादास्वस्मासु प्रेमप्रवर्षणविघातकरहित नृशंसं कण्ठकर्तनरूपं यथा भवति तथा गदितुं व्यक्तं कर्तुं भवान्नार्हति न योग्यो भवति सर्वविषयानितरान्सत्यज्य तव पादमूलं भजेमेति यामिनीत्यनालक्ष्य कामिनीरूपयाता इत्यत्मान्मा त्यज । सपक्षमन्यमनाचक्षाणाः पुष्कराक्ष्य आहुः ॥ दैव इति । यथाऽऽदिपुरुषो देवो हरिर्मुमुक्षून्मोक्षापेक्षावतस्तथाऽऽत्मानं भजतो भजमानान्यथा न त्यजति तथा न त्यजेति । काऽपि कामिनीकामिता मयाऽहं चोर्ध्वरेता इति न वद स्वामिंस्त्वद्रतिपात्रमस्माभिर्विदितं किञ्चनस्माकं साक्षादधोक्षज तेऽङ्गसङ्गः किन्त्वित्थमित्याहुः ॥ मेति । एवं सङ्गमस्मदभीप्सितं मा रमाऽर्हति एवमस्मत्सङ्गः स्याच्चेदपि तत्सुखं माऽर्हतीति ॥ ३१ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

वाक्यानां बाधवाक्यानि तावन्ति प्रार्थनाधिका । एकादशविधास्तेन तासां वाचो जयन्ति हि ॥ यद्भगवता प्रथममुक्तं "स्वागतं वो महाभागाः !" इति यद्यपि भगवता वयं स्तुतास्तथापि प्रेषणाभिप्रायेण न तु स्वस्मिन्नागता इति तथा सति नेयं स्तुतिः किन्त्वतिक्रूरं वचनमनिष्टपर्यवसानात् नन्वशक्ये किं कर्त्तव्यं तत्राह—मैवं विभो ! इति । भवान् सर्वमेव कर्त्तुं समर्थः समर्थश्चेद-

न्यथा वदेत् नृशंसमेव भवति दयायां विद्यमानायां न वदेदिति यच्च भगवता उक्तं व्रजस्यानामयमिति तदस्माकं नोद्देश्यं यतः सर्वविषयानेव सन्त्यज्य तव पादमूलं प्राप्ताः अनेन त्यक्तार्थपरिग्रहोऽनुचितः नापि जारत्वेन समागतमिति निरूपितम् एकादशेन्द्रियाणामपि विषयास्त्यक्ताः सवासनास्तत्र विनिगमकं तत्र पादमूलं प्राप्ता इति अन्यथा पादमूलप्राप्तिरेव न स्यात् यदुक्तं "ब्रूतागमनकारणम्" इति तत्राहुः—भजस्वेति। अन्यत्कर्त्तव्यमिति चेत्तत्राहुः —हे दुरवग्रहेति। दुष्टोयमवग्रहः आग्रहः यद्भजनं न कर्त्तव्यमन्यत्कर्त्तव्यमिति यथा जीवानां ते हि सर्वं कर्त्तुं वाञ्छन्ति न भगवद्भजनं यथाऽयमाग्रहो जीवानां दुष्टः तथाऽत्रापि भवितुमर्हति "ये यथा मां प्रपद्यन्ते" इति तु नास्ति यदि तदभिप्रायेणैव तथा तदा मा त्यजास्मान् अस्माभिर्न त्यज्यत इति एतच्च भजनं न विषयवत् किन्तु प्रकारान्तरेणेति विशेषतो वक्तुमशक्ताः दृष्टान्तेनाहुः, देवो यथेति। देवो हि सर्वानेव भजते अन्यथा शास्त्रं व्यर्थं स्यात् तत्राप्यादिपुरुषो देवः पूर्वकाण्डेऽपि भजनं सार्थकं सुतरामुत्तरकाण्डे आदिपुरुषस्तु सेव्य एव भवति देवश्च न हि देवभजनं व्यभिचारजनकं भवति पुरुषान्तरभजनेऽपि प्रथमभर्त्ता विवाहितः अभजनीयो भवति अनङ्गीकारस्तूचितः न त्वभजनम् एतेन स यथा स्वातिरिक्तभजनं न सहते तन्निवृत्तिपूर्वकमेव स्वभजनं सम्पाद्य स्वयं भजते तथा त्वयापि कार्यमतस्तत्र प्रेषणं तवाप्यनुचितमिति ज्ञायते। किञ्च, यथा मुमुक्षून् भजते भगवान् न आत्मीयत्वेन परिगृह्णाति आत्मतया स्फुरति स्वानन्दं तेभ्यः प्रयच्छति "एष ह्येवानन्दयति" इति श्रुतेः स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हीति न्यायेन भगवान् तदर्थमात्मानं प्रकटीकरोतीति मुमुक्षून् भजत इत्युक्तम् अन्यथा मुमुक्षव एव भगवन्तं भजन्ते न तु भगवान् अतः फलद्वारा भजनं यथा तेषां पुनः पूर्वावस्थां न न सम्पादयति सततं स्वस्मिन्नेव स्थापयसि तथा अस्मदर्थमाविर्भूय स्वानन्देन वयं योजनीया इत्येतत्कर्त्तव्यमित्यर्थः। एतेन प्रार्थनया सकृदङ्गीकृत्य तूष्णीं भावपक्षो निरस्त अग्रे गृहगमनाज्ञापनगृहस्थितिसम्पादनादिकं तु रसपोषायैव न तु गृहार्थमिति ज्ञेयम् ॥ ३१ ॥

श्रीसुबोधिनी-सार

एवं नृशंसं क्रूरं वक्तुं भवान् मार्हति हे विभो हे दुरवग्रह सर्वभोगांस्त्यक्त्वा तव पादमूलं भक्ता भजतीरस्मान् भजस्व त्वं मा त्यज आदिपुरुषो देवो यथा मुमुक्षून् भजते ॥ ३१ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

देवो यथेत्यत्र, अनङ्गीकार इति। अन्यत्र रागोत्पत्त्या विवाहिते रागाभाव उचित इत्यर्थः। यद्वा। द्वितीयस्यानङ्गीकार उचितः, न तु भर्तुरभजनमित्यर्थः। अनेन दृष्टान्तेन स्वस्य सर्वत्यागपूर्वकं भगवद्भजनेप्युपपत्तिरुक्तेति ज्ञापनायैवमुक्तमाचार्यैः। अन्यथा मूले प्रभुकर्तृकभजने दृष्टान्तोक्त्या विरोधः स्यादिति ज्ञेयम् **स्वाप्ययेति आविष्कृतमिति** भावार्थकक्तान्तम्। तथा च सुषुप्तिमपेक्ष्य तत्साक्षिरूपस्य भगवतः सम्पत्तिर्ब्रह्मसम्पत्तिर्मोक्ष इति यावत्। तद्दानार्थं वा भगवतः स्वाविष्करणमित्यर्थः। केचित्तु स्वयंप्रकाशब्रह्मस्वरूपज्ञानातिरिक्तज्ञानाभावकथनम्, श्रुतौ तु तयोरन्यतरापेक्षम्, तत्र विनिगमकमाहाविस्कृतं हीति। हि यस्माद्धेतोस्तत्तत्प्रकरण एव तदुक्तमित्यर्थ इति वदन्ति। एवमपि सति ब्रह्मस्वरूपाविर्भावस्यैवोक्तज्ञानाभावे निमित्तत्वान्न पूर्वस्माद्विशेषः। प्रथमवचनश्रणानन्तरं चित्तवैयग्र्यमभूदित्यग्रिमवाक्यानां व्युत्क्रमेणोत्तरदानमिति ज्ञेयम् ॥ ३१ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

मैवं विभोर्हतीत्यस्याभासे वाक्यानामिति का० २५८३/४। **वाक्यानां** भगवद्वाक्यानां **बाधवाक्यानि** तासां वाक्यानि **तावन्ति** भगवद्वाक्यसमसङ्ख्याकानि दश, "व्यक्तं भवा"नितिप्रार्थनावाक्यं चाधिकं, तेनैकादशविधास्तासां वाचो जयन्तीत्यर्थः ॥ ३१ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह—**मैवमित्येकादशभिः**। 'अस्मन्मनोरथपूरणसमर्थस्त्वम्' इति सूचयन्त्यः सम्बोधयन्ति—**विभो** इति। 'एवंभूतस्य तव दुराग्रहेणास्मत्त्यागोऽनुचित एवं इत्याशयेन पुनः सम्बोधयन्ति—**दुरवग्रहेति**। एवमुक्तप्रकारकप्रत्याख्यानात्मकं **नृशंसं** क्रूरं घातुकं वचनं गदितुं व्यक्ततया वक्तुं **भवान् मा** नैवार्हति, अतोऽस्मान् मा त्यज, किन्तु भजस्वेत्यन्वयः। तत्र दृष्टान्तमाहुः—**देवो यथेति**। देवः सर्वभजनीयोप्यादिपुरुषः पुरुषोत्तमो भगवान् यथा मुमुक्षून् भजते तदभिलषितां मुक्तिं सम्पादयति तथा। 'भज' सेवायाम्। सेवा च चित्तानुवृत्तिरूपा, अतोऽस्मदभिलषितं सम्पादयेत्यर्थः। ननु मुमुक्षवस्तु सर्वतो विरक्ताः पुरुषोत्तमभक्ताः अतस्तदभिलषितं स सम्पादयति, युष्मदभिलषितं मया किमिति सम्पादनीयम्? इत्याशङ्क्याहुः—**सर्वविषयान् सन्त्यज्य तव पादमूलं भक्ताः** सेवितवतीरित्यन्वयः। 'भक्ता' इत्यत्र 'प्राप्ता' इति पाठान्तरम्। 'भजस्व' इत्यात्मनेपदप्रयोगेण 'भजनफलं तवापि भविष्यति' इति सूचितम् ॥ ३१ ॥

अन्वितार्थप्रकाशिका

अत्र सर्वासामुक्तौ कोलाहलेन रसानाधायकत्वान्मुख्यानामेवोक्तिः । सा च तन्नः प्रसीदेति सिञ्चाङ्गेति तन्नः प्रसीद वृजिनेति तन्नो निधेहीति च चतुः कृत्व उपसंहारानुसाराद्यूथशो दिक्चतुष्टयस्थितानां तासां क्रमेणेति ज्ञेयम् । मैवमिति ॥ हे विभो ! हे दुरवग्रह दुराग्रह स्वच्छन्द वा । एवं प्रत्याख्यानात्मकं नृशंसं क्रूरं घातुकं वचनं गदितुं व्यक्ततया वक्तुं भवान् मा नैवार्हति । अतः यथा देव आदिपुरुषः सर्वभजनीयोऽपि मुमुक्षून् भजते अभिषितसम्पादनेन सेवते तथा सर्वविषयान् संत्यज्य तव पादमूलं भक्ताः सेवितुमारब्धवत्यः । आदिकर्मणि विवक्षिते कर्तरि । क्तः । अतः पादमूलमिति द्वितीया प्राप्ता इति पाठान्तरम् । अस्मान् मा त्यज किन्तु भजस्व ॥ ३१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ पत्यादित्यागेन त्वद्भजनेऽस्माकं धर्मोधर्मो वेत्यस्तोतवैव तावदस्मत्यागे दोषः परिहार्य इत्याशयेनाहुः **नृशंसं** कर्णाप्रियत्वाद्वज्रवत्कठोरं तव पादमूलं प्राप्ताः भक्ता इति पाठे तु सेवमानाः अस्मान् भजस्व हे दुरवग्रह हे स्वतंत्र मा त्यज ये यथा मां प्रपद्यंते तांतथैव भजाम्यहमिति स्वोक्तिविरोधान्नास्माकं त्यागो योग इति भावः । यथा आदिपुरुषः सर्वेषामादिः स्वयं त्वनादिः सनातननित्यपुरुषाकृतिदेवः सर्वोपास्यो हरिरनेकाऽवतारैः ॥ ३१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाहैकादशभिः ॥ मैवमिति ॥ हे विभो, भवान् एवमित्थं, नृशंसं क्रूरं यथा भवति तथा, गदितुं वक्तुं, मा अर्हति । हे दुरवग्रह स्वतन्त्र स्वच्छन्देति यावत् । यतः सर्वविषयान् पत्यपत्यादिसकलान् भोग्यानित्यर्थः । संत्यज्य विहाय, सर्वनिगममिति पाठे, सर्वेषां पत्यादीनां निगममाज्ञामित्यर्थः । तव पादमूलं प्राप्ताः । भक्ता इति पाठे, भजमानाः, त्वच्छरणं विना सर्वथा अगतिका इत्यर्थः । अतः अस्मान् , मा त्यज । किं तु भजस्व अनुकूलो भव देवः ईश्वरः, आदिपुरुषो भगवान् , यथा मुमुक्षून् भजमानान् स्वभक्तान् भजते न परित्यजति तद्वदित्यर्थः ॥ ३१ ॥

कृष्णप्रिया

गोपियों ने कहा—प्यारे श्रीकृष्ण ! तुम घट-घट व्यापी हो । हमारे हृदय की बात जानते हो । तुम्हें इस प्रकार निष्ठुरता भरे वचन नहीं कहने चाहिये । हम सब कुछ छोड़कर केवल तुम्हारे चरणों में ही प्रेम करती हैं । इसमें सन्देह नहीं कि तुम स्वतन्त्र और हठीले हो । तुमपर हमारा कोई वश नहीं है । फिर भी तुम अपनी ओर से, जैसे आदि पुरुष भगवान् नारायण कृपा करके अपने मुमुक्षु भक्तों से प्रेम करते हैं, वैसे ही हमें स्वीकार कर लो । हमारा त्याग मत करो ॥ ३१ ॥

यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ।
[1]अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—हे अङ्ग ! धर्मविदा, त्वया, पतिअपत्यसुहृदाम् , अनुवृत्तिः, स्त्रीणाम् , स्वधर्मः, इति, यत् , उक्तम् , एतत् , उपदेशपदे, त्वयि, एवम् , अस्तु, तनुभृताम् , किल, भवान् , प्रेष्ठः, बन्धुः, आत्मा- (वर्तते) ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च यदुक्तं पत्यपत्येत्यादि त्वया धर्मविदेति सोपहासमेवमेतदुपदेशानां पदे विषये त्वय्येवास्तु । उपदेशपदत्वे हेतुः ईश इति । विविदिषावाक्येन सर्वोपदेशानामीशपरत्वावगमादिति भावः । ईशत्वे हेतुः । आत्मा किल भवानिति । भोग्यस्य हि सर्वस्य भोक्ता आत्मैवेश इत्यतः प्रेष्ठो बंधुश्च भवानेवेति सर्वबंधुषु करणीयं त्वय्येवास्त्वित्यर्थः । अथ वा धर्मोपदेशानां पदे स्थाने धर्मोपदेष्टरि त्वयि सत्यस्मासु च धर्मं जिज्ञासमानासु सतीषु त्वया धर्मविदा यदुक्तमेवमेतदस्तु न तु त्वं धर्मोपदेष्टा किं तु भवानात्मेति । अथ वा । यदुक्तमेतदुपदेशपदे तद्गोचरे पुरुषेऽस्तु नाम त्वयि तु ईशे स्वामिनि सत्येवं काका नैवमित्यर्थः । यतस्तनुभृतां त्वमात्मा फलरूप इति । यद्वा यदुक्तं पत्यादिशुश्रूषणं धर्म इति एवमेतत्त्वय्येवास्तु । कुतः उपदेशपदे शुश्रूषणीयत्वेनोपदिश्यमानानां पत्यादीनां पदेऽधिष्ठाने । कुतः । ईशे न हीश्वरमधिष्ठानं विना कोऽपि पतिपुत्रादिर्नामेति । अन्यत्समानम् । अलमतिविस्तरेण ॥३२॥

---

[1] अस्त्येव तत् तदपि देववरे त्वयीशे-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'शुश्रूषध्वं पतीन्सतीः' इति यदुक्तं तत्राहुः—अपि चेति। धर्मविदा स्त्रीधर्मशास्त्रविदा इति। सोपहासमिति–'आर्तत्राणं परो धर्मः' इति स्मृतेरस्मानार्तांस्त्यजतस्ते धर्मोपदेशो हास्यास्पदमेवेत्यर्थः। एवमेतत् यथोक्तमिदम्। उपदेशपदत्वे उपदेशविषये। इति भाव इति। "तमेतं वेदानुवचनेन यज्ञेन दानेन तपसा नाशकेन ब्राह्मणा विविदिषन्ति" इति श्रुत्या सर्वे वेदाभ्यासयज्ञदानाद्युपदेशाः परमेशावाप्तय एवेति तात्पर्यम्। भोक्तैवेश इति। भोक्तारं विना भोग्यानां वैयर्थ्यात्, अनीशगृहवत्। यत आत्माऽत एव प्रेष्ठो बंधुः, निरतिशयप्रेमास्पदत्वात्। तथा च श्रुतिः–"तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादांतर यदयमात्मा" इति। सर्वात्मत्वादिति भावः। किञ्च, सत्युपदेष्टृपार्थक्ये उपदेशोऽन्याय्यो न त्वैक्ये इत्याहुः—अथ वेति। यदुक्तं धर्मशास्त्रेण एतद्वचस्तस्योपदेशस्य गोचरे पुरुषे प्राकृतजनेऽस्तु नाम भवतु, त्वयि स्वामिनि परमेशाने एवमुपदेशगोचरत्वमस्ति किम्, नास्तीत्यर्थः। पूर्वोक्तेरन्यथाकरणं "काकुः स्त्रियां विकारो हि शोकभीत्यादिभिर्ध्वनेः" इत्यमरः। ईशस्योपदेशविषयत्वं कुतो न तत्राह—यत इति साधकस्यैवोपदेशविषयत्वेन साध्यस्योपदेशप्राप्यत्वमस्तीत्युक्तम्—फलरूप इति। यद्यपि त्वग्राऽपत्यादिसेवा धर्मत्वेनोक्ता सापि 'यथा तरोर्मूलनिषेचनेन' इत्याद्युक्तरीत्याऽधिष्ठानेऽर्चितेऽधिष्ठेयाः स्वयमेवार्चिताः स्युरित्याहुः–यद्वेति। हेतुमाशंकते–कुत इति। अधिष्ठाने अधिकरणे। तत्रापि हेतुमाशंकते—कुत इति। अधिष्ठानाभावेऽधिष्ठेयानामभावात्। अन्यत् अवशिष्टम्। यद्वा—पत्यादीनामनुवृत्तौ रंगो रागो यासां स्त्रीणां तासामेव स्वधर्म इति। न त्वस्माकं त्वद्भक्तानामिति भावः। तेषामविधिगोचरत्वादिति भावः। ईशे वृंदावने ब्रह्मेंद्रादिभिरपि स्तूयमाने। यद्वा—बंधुराः प्रेमशृंखलाबन्धयुक्ता आत्मानो जीवा यस्मिन्स तथा। यद्वा—तनुभृतामात्मा परमात्मैव बंधुर्न त्वन्येऽपत्यादयः 'बंधुर्गुरुरहं सखा' इत्युद्धवं प्रतिवक्ष्यमाणत्वात् 'आत्मैव ह्यात्मनो बंधुः' इत्याद्युक्तेश्च ॥ अथ काश्चिन्मुखरास्तद्वचनेनैव तं पराजेतुकामा आहुः—यदिति। पत्यादीनामनुवृत्तिः स्त्रीणां स्वधर्म इति यत्त्वयोक्तमेतदेवमस्तु अनेन प्रकारेण भवतु नात्र विवदामहे। एतदेवास्माभिः प्रतिक्षणं क्रियत इति भावः। ननु केन प्रकारेण, तत्राहुः उपदेशस्य पदे आस्पदे धर्मोपदेशकर्तरि त्वयि अनुवर्तिते सत्येव पत्यादीनामनुवृत्तिरुचितेत्यर्थः। 'प्रथमं धर्मोपदेष्टाऽऽचार्य उपसेव्यते पश्चात्तदुपदिष्ट आचरणीयो धर्मः' इति न्यायात् आचार्यानुवृत्त्यैव निष्कपटया धर्मः सिध्येदिति च शास्त्रम्। तत्रापि ईशे परमेश्वरे यद्याचार्य एव परमेश्वरः स्यात्तर्हि किमुतेति। किञ्चेश्वरत्वादेव तनुभृतां त्वमात्मा, आत्मत्वादेव प्रेष्ठः, प्रेष्ठत्वादेव बन्धुरिति। अयमर्थः—पत्यादीनां परमात्मसहितानामेवानुवृत्तिः शास्त्रोक्ता, आत्मराहित्ये तु सति सद्य एव गृहान्निःसारितानां तेषां नद्यादेस्तटे मुखानि दह्यंते इति धर्मशास्त्रम्। अतो मूर्तस्यात्मनस्तवैवानुवृत्त्या पत्याद्यनुवृत्तिसिद्धिः, किमन्यैस्तत्प्रतिकूलत्वादेव निरात्मकैर्दग्धमुखैः पत्यादिभिरिति। ननु पूर्णप्रेम्ण ऐश्वर्यज्ञानावरकत्वादासाञ्च संपूर्णप्रेमवत्वात्कथमेतादृशमैश्वर्यज्ञानं संभवेत्, उच्यते—नारदपंचरात्राद्युक्तलक्षणो भक्तिरसामृतादिषु व्याख्यातः प्रेमा ह्यनिशनैसर्गिकौष्णयशत्यवान् विरहसंयोगे रसानुभावकोपि "ब्रह्मानंदो भवेदेष चेत्पराधगुणीकृतः। नैति भक्तिसुखांभोधेः परमाणुतुलामपि ॥" इति रसामृतोक्तेर्ब्रह्मानंदानुभवपरः परार्धाधिकोपि विरहे तीव्रांशुकोटेरप्यधिकं संतापयन्वैश्वर्यमाधुर्यसंबंधिनः सर्वानेव भगवतो गुणान्प्रद्योतयत्येव, न तु कांश्चिदावृणोति विरहस्य सूर्यतुल्यत्वेन सर्वप्रद्योतकत्वात्। संयोगे तु सुधांशुकोटेरप्यधिकमाह्लादयन्माधुर्यमयानेव भगवतो गुणान्प्रद्योतयति, संयोगस्य शुद्धांशुतुल्यत्वेन सुधया मादनोदरैश्वर्यावरणात्। यत्र संयोगेप्यैश्वर्यं प्रद्योतते तत्र प्रेम्ण एवापूर्णत्वमवगन्तव्यम्। अत्र त्वासां भाविविरहभावनावतीनां विरह एवायम् माहात्म्यस्फूर्तिरपि प्रेमकृतैव, प्रेमा ह्यसदपि माहात्म्यं स्फोरयति किमुत सत्। अत स्तदतिशयस्तु तदतिशयमेव। यथादिभरतचरिते—'किं वा अरे आचरितं तपस्तपस्विन्या यदिमवनिः' इत्यादिति श्रीजीवगोस्वामिचरणाः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, उक्तो भर्तुः शुश्रूषणमित्यादिना स्वधर्मः कथमतिक्रम्यते इति तस्य कर्ममीमांसामतमाशङ्क्यः तदुपमर्दि ब्रह्ममीमांसामालम्ब्य प्रतिभात्र (ने) त्वेन तस्मिन्नात्मत्वमारोपयन्त्स्तन्मतदूषणेननास्माकमधर्म इति प्रतिपादयन्ति–यत्पत्यपत्येति। धर्मविदेति सोपहासमेव सर्वशास्त्रोपदेशानां पदे "शास्त्रयोनित्वात्" (१।१३) "तत्तुसमन्वयात्" (१।१४) इति न्यायेन तत्तात्पर्य्यविषये तत एवेशे त्वय्येकस्मिन्नेव एवं शुश्रूषणप्रकारेण एतदुपदेशवाक्यमस्त ननु, मयि तत्पदत्वमेव कथम्? तत्र सच्छलमाहुः—किल वितर्के भवानात्मा परमात्मा कथं तादृशत्वमपि तत्राहुः—तनुभृतां सर्वेषामेव प्रेष्ठः निरुपाधिप्रेमास्पदत्वं ह्यात्मत्वं तत्तस्मादात्मा तत्रापि सर्वेषां प्रेष्ठत्वात् परमात्मेति तथा बन्धुः सर्वेषां निरुपाधिहितकारी परमात्मा च सर्वावभासकत्वेन तादृशः ततश्च भवानेव स इति अनेनेशत्वमपि सिद्धं तस्मात् त्वमेव शुश्रूषणीय इति भावः। अथवा। ननु, सदाचारवर्गपूज्याः! युष्माभिस्त्यज्यन्तां नाम विषयाः स्वधर्मस्त्ववश्यमपेक्ष्यस्तत्र सासूयमाहुः—यत्पतीति एवमुपदेशकर्त्तरि त्वय्यैवेतदुपदेशास्पदत्वमस्तु त्वमेव तद्योन्यो भवसीत्यर्थः। ननु, कथमेतत्तत्राहुः–प्रेष्ठ इत्यादि। तनुभृतां प्राणिमात्राणां प्रेष्ठ, चित्ताकर्षकः बन्धुः सर्वाभिलषितहितकारी अत एवात्मा स इव हृदयाधिष्ठाता तत्प्रेरयिता वा तस्मादस्माकं वा को दोषः किन्तु भवत एवेति प्रत्युत भवानेव तादृशदोषपरित्याजनायोपदेश्य इत्यर्थः।

अथ पूर्ववदैश्वर्य्यपक्षोपि युज्यते स च तैर्व्याख्यात एव तत्र विवर्त्तवादमवलम्ब्यार्थद्वयम् अविशेषेणात्माभ्युपगमात् तथाप्यत्र भोक्तृत्वमीशितृत्वमेव ज्ञेयं राजनिर्द्देशभोक्तृत्ववत् अन्यथा जीवत्वापाते विवक्षितत्वासिद्धः सामान्यतो निर्द्देशस्तु जीवस्य दृष्टान्तत्वापेक्षया तस्य सर्वस्वरूपत्वस्थापनापेक्षया च द्वितीये न त्वित्यादिकं काकुगम्यं तथा पर एवोपदेष्टा भवति न ह्यात्मन आत्मैवेत्यनुपदेष्टृत्वं ततश्चास्माकमुपदेष्टृत्वाभावे साक्षात् कृतात्मत्वे च न पतिशुश्रूषणादिविधिगोचरत्वमिति भावः। श्रीवैष्णवमतेनान्यदर्थद्वयम् अथवा यदुक्तमिति तत्र प्रथमार्थे स्वामिनि आश्रयत्वेन वृत इत्यर्थः। "देवर्षि भूताप्तनृणां पितृणाम्" इत्यादेः तदेवं तदुपासनमहिमद्वारा धर्मं प्रत्याख्याय वस्तुविचारद्वारापि प्रत्याख्यायते यद्वेति अधिष्ठानत्वं तत्तत्स्फूर्त्त्याभयत्व "यस्य भासा सर्वमिदं विभाति" इति श्रुतेः अत्रैश्वर्य्यार्थेषु किलेति निश्चितम् उपदेशपद इति शास्त्रगुरूपदेश्य चरणारविन्द इत्यर्थः। इत्यपि व्याकुर्वन्ति अत्र नर्मेदं तत् त्वय्येवास्तु त्वमेव मोहिनीरूपेणाजितवत् स्त्रीभूत्वा पत्यादिसेवाधर्ममाचरेत्यर्थः कुतः उप देशपदे गुरावित्यर्थः। अन्यथा गुर्वननुनिष्ठिते कर्मणि शिष्याणामप्रवृत्तिः स्यात् तत्र च त्वमेव समर्थ इत्याहुः ईशे सर्वकलासमर्थे ननु च कृत्रिमस्त्रीत्वे न त्वयि न कोऽपि प्रीति कुर्य्यात् इति मन्तव्यं स्वभावत एव तव सर्वप्रेष्ठत्वादित्याहुः–प्रेष्ठ इति। बन्धुरात्मा मनोहरस्वभावः निषेधार्थश्चायम् अङ्ग हे कृष्ण! पत्यादीनामनुवृत्तिः स्त्रीणां स्वधर्मः सुष्ठु अधर्म इति यत् धर्मविदाऽपि त्वयोक्तम् अन्यादृशयोजनया छलेन प्रतिपादितमित्यर्थः। अमायया यो भर्त्तेत्याद्यभिप्रायात् एवमेतत् ईश एव सत्युपदेष्टार सर्वं वक्तुं व्यवहर्तुं च समर्थ इत्यर्थः। तस्मिंस्त्वय्येवास्तु तेन त्वमेवोपदेश्यो भवेत्यर्थः। कथं तत्राहुः तनुभृतां श्रीवृन्दावनादिस्थितचतुर्विधप्राणिनामपि प्रेष्ठः प्रेमविषयः बन्धु प्रेमकर्त्ता अत एवात्मा 'साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्', इति वत् परस्परहृदयाश्रय इत्यर्थः। तस्मात् यदि त्वमेवैतेष्वनन्तेषु विरक्तः स्यात् तदा वयमपि स्वेषु स्वल्पप्रमाणेषु यथास्थितयोजनया धर्मप्राप्तेषु च स्यामैवेत्यर्थः। तत्र चास्मास्वेव तावद्विरक्तो भवेति नर्मतात्पर्य्यम्। यद्वा, यथा तथा वा योजना भवतु भर्तुः शुश्रूषणमित्यादिना यत्पत्यादीनामनुवृत्तिः स्त्रीणां स्त्रियो धर्म इत्युक्तम् एवदुपदेशकर्त्तरि त्वयि ईश एवमस्तु अनुज्ञायां लोट् भवितु योग्यमित्यर्थः। यतः प्रेष्ठ इत्यादि। भर्तृविचारस्त्वस्माभिरेव ज्ञायत इति भाव इति॥ ३२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु सदाचारवर्गोच्चर्य्याः! युष्माभिस्त्यज्यन्तां नाम विषयाः, स्वधर्म्मस्त्ववश्यमपेक्ष्य एव, तत्र सोपहासमाहुः—यदिति, अंगेति सप्रेमसम्बोधने। ईशे, परमेश्वरे, वृन्दावने परमेष्ठिपुरन्दरादिभिरपि स्तूयमानत्वस्य दृष्टश्रुतत्वात्। यद्वा, सर्व्वव्रजस्य नाथे त्वयि, ईश इत्याद्युक्तिस्तदुक्तपरिहारायैव, न तु निजभावानुसारतः, सच्चिदानन्दघन-मधुरतरमूर्त्ति श्रीनन्दनन्दनत्वेनैव तस्य तासु सदा परिस्फूर्त्तेः, प्रेष्ठः प्रियतमः, न त्वन्यवत् प्रियमात्रं तत्र च तनुभृतां सर्व्वेषामपि जीवानां न चान्य इव द्वित्राणाम्, बन्धुश्च हितकारी सुहृद्वा, यत आत्मा परमात्मा, किल निश्चितम्। त्वत्सेवैव परमो धर्मस्तदपेक्षयान्यत् सर्व्व त्याज्यमेवेति भावः। तथा चोक्तम् (भा० ११।२०।९) 'तावत् कर्म्माणि कुर्व्वीत' इत्यादि तत्प्राग्लिखितमेव। अन्यत्तैर्व्यञ्जितम्। यद्वा, धर्म्मविदा धर्म्मतत्त्वाभिज्ञेनापि त्वया स्वधर्म्म इति यदुक्तं तत्पत्यादीनामनुवृत्तौ सेवायामानुकूलोऽपि वा, रंगो रागो यासां स्त्रीणां तासामेव, न त्वन्यासामस्माकं त्वदेकप्रियाणामित्यर्थः। अतस्तदपेक्षया सर्व्वमेवान्यदुपेक्ष्यमेवेति भावः। तत्र हेतुं दर्शयन्त्यः सर्व्वतोऽधिकतरं तस्य प्रियत्वं वदन्त्यः सन्यायं प्रार्थयन्ते—अस्त्विति। तनुभृतां सर्व्वेषामपि प्राणिनां प्रेष्ठः, किमुतास्माकम्। प्रेष्ठत्वे हेतु—बन्धुर्हितकारी आत्मा च, स्वतः प्रीतिविषय इत्यर्थः। चेतयितेति वा, इति बहिरन्तरुपकारित्वमुक्तम्। यद्वा, बन्धुराः प्रेमश्रृंखलाबन्धयुक्ता भक्त्या सुन्दरा वा आत्मानो जीवा यस्मिन् सः, अत एतदस्माकं सर्व्वतनुभृतां वा स्वधर्म इति यत् त्वय्येवास्तु, तत्र च एवमस्मदभिमतप्रकारेणेत्यर्थः। सुगोप्यत्वात् साक्षात्तदनुक्तिः। तत्र हेतुः—उपदिश्येते सर्व्वैः शास्त्रैर्गुरुभिर्वा सर्व्वत्यागेन भजनीयतया कथ्यते इत्युपदेश्योपदेशौ पदौ श्रीचरणौ यस्य तस्मिन्निति। इति त्वत्पादाब्जापेक्षया स्वधर्म्मोऽपि परित्याज्य इति युक्तमेवेति भावः। अथवा ननु, सारज्ञास्तद्यपेक्षितमभिव्यज्यतामित्यत्र सर्वैयभ्य प्रार्थयन्ते। एवमुक्तप्रकारेण, अत इति वा, तनुभृतां सर्व्वेषामपि जीवानामनुचरादीनाञ्च, किमुतास्माकं भवान् आत्मा स्वयमेव, न त्ववतारादिद्वारा प्रेष्ठः प्रियतमो बन्धुश्च हितकारी अस्तु। पदद्वयेनान्योऽन्यं प्रीतिरभिप्रेता, किमर्थम्? त्वयि निमित्ते, कथम्भूते? एतस्यास्मदभिप्रेतभजनविशेषस्य यो गुर्व्वादिभिः सख्यादिभिर्वा उपदेशस्तस्य पदे विषये, धाष्टर्य परिहाराय साक्षात्तदनुक्तिस्तत्सिद्धय इत्यर्थः। तत्र स्त्रीणां स्वत एव तत्सिद्धिः, पुंसां तु भावमात्रेण, किंवा तत्रैवोत्कटरागाणां दण्डकारण्यवासिमुनीनामिव जन्मान्तरे ज्ञेया, एषा सामान्येनोक्तिरत्यन्तप्रेमोत्कण्ठया। यद्वा, एतदुपदेशास्पदे त्वयि ईशेऽस्मद्विधानां नाथेऽस्तु, यतो भवान् बन्धुरात्मा सुन्दरस्वभावः, अतएव तनुभृतां सर्व्वेषां श्रेष्ठः। यद्वा, अन्त्येवमिति साभ्यसूयाभ्युपगमः, उपदेशानां त्वद्भजनपरगुर्व्वादिवाक्यानां सर्व्वेषामेव पदे, यत ईशे परमेश्वरे परमस्वतन्त्रे वा, यद्वा, तत्राप्यस्मत्प्राणेश्वरे त्वय्यपि एतदेतादृशं नृशंसत्वं तनुभृतां देहधारिणीनां सतीनामस्माकं किल किमात्मा देही देहो वा, बन्धुः प्रियः, अपि तु नैव, किन्तु भवानेव प्रेष्ठः। यद्वा, देहधारणादात्मैव बन्धुः, अकारप्रश्लेषेण भवांस्तु अप्रेष्ठः,

किं किलेति वितर्के वा, तथापि काक्वा स एवार्थः। वयं देहं त्यक्तुं न शक्नुम इति किं भवता वितर्क्यत इत्यर्थः। मुक्तदेहा इव वयमपि त्वदर्थेऽधुनैव देहं त्यक्ष्याम इति भावः। अनेन (१९ श० श्लो०) 'रजन्येषा इत्यस्योत्तरम्। देहानपेक्षया घोरादिभ्यो भयाभावात् तवैव भजनीयत्वेन व्रजं प्रति गमनप्रयोजनाभावाच्च, तदैश्वर्य्यं विनेदमर्थत्रयम्। अत्र नर्मेदम्, तत् त्वय्येवास्तु, त्वमेव स्त्री भूत्वा पत्यादिसेवाधर्म्ममाचरेत्यर्थः। कुतः ? उपदेशपदे गुरावित्यर्थः, अन्यथा गुर्व्वननुष्ठिते कर्म्मणि शिष्याणामप्रवृत्तिः स्यात्, तत्र च त्वमेव समर्थ इत्याहुः—ईशे परमसमर्थे, न च कृत्रिमस्त्रीत्वे न कोऽपि त्वयि प्रीतिं कुर्य्यादिति मन्तव्यम्, स्वभावत एव सर्व्वश्रेष्ठत्वादित्याहुः—प्रेष्ठ इति। श्लेषार्थश्चायम्—पति-पुत्र-सुहृदामनुवृत्तिः स्त्रीणां स्वधर्म्मः, तत्र सुहृदहम् (२४ श० श्लो०) 'तद्बन्धूनाञ्च कल्याण्यः' इत्युक्तत्वात्, अतो मे कामः पूर्य्यतामिति धर्म्मविदा त्वया यदुक्तम्, अपि कृष्ण! अस्त्वेवेमेतत्, 'अस्तु' 'एवं' 'एतत्' 'इति' चत्वारि पदानि। तदेव मे मम ईशे पत्यावेवास्तु, यत उपदेशपदे सर्व्वेषां 'पतिरेव गुरुः स्त्रीणाम्' इत्यादीनां शास्त्रसाधूपदेशानां पदे, भोः साध्व्यः! भवतु, पतिरेवानुवर्त्त्यताम्, किं त्वद्य शरज्ज्योत्स्निकायां सुन्दरे वृन्दावने सुहृत्त्वेन सर्व्वैर्व्रजवासिभिः प्रेमास्पदत्वेन स्वीकृतस्य मे पार्श्वे निःशंकं वनादिदर्शनसुखमनुभवन्तु, तत्राहुः—प्रेष्ठ इति। भवान् तनुभृतां व्रजसम्बन्धिनां प्रेष्ठोऽपि बन्धुरात्मा, विषमस्वभावः, विषमस्वभावत्वात् त्वयि न विश्वास इत्यर्थः। यद्वा, पत्यादीनामनुवृत्तिः स्त्रीणां स्वधर्मः—सुष्ठु अधर्म्म इति यत् धर्म्मविदा त्वयोक्तम्, एवमेतत् त्वय्येवास्तु, यत उपदेष्टरि। कथम्भूते ? ईशे सर्व्वं वक्तुं कर्त्तुं च समर्थे, न च तथोपदिशन्तं त्वां जना परिवदेयुः, प्रेष्ठ इति तनुभृतां प्रेष्ठादिरूपत्वान्न कोऽपि त्वां परिवदिष्यन्ति ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उपरेशपदे पद्यत इति पदम् उपदेशाधिगन्तव्ये त्वयि सम्भवतु न वयमिममर्थमप्राप्ताः किन्तु भवानस्माकं प्रेष्ठः प्रियतमः प्रियतमबुद्ध्या प्राप्त इत्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यदुक्तं "भर्त्तुशुश्रूषणं स्त्रीणाम्" इत्यादि तदनूद्य तत्रोत्तरमाहुः यदिति। अङ्ग हे कृष्ण! धर्मविदा त्वया पत्यादीनामनुवृत्तिरेव स्त्रीणां स्वधर्मः स्वानुरूपो धर्म इत्युक्तं तदेतत् त्वयि उपदेशपदे सति पद्यते गम्यते इति पदं त्वय्युपदेशार्थं गन्तव्ये सति एवमेवास्तु उपदेशपदत्वाभिप्रायेण सम्बोधयन्ति–ईशेति। ईश इति सप्तम्यन्तोपि पाठः न वयमुपदेशार्थं प्राप्ताः किन्तु त्वत्सङ्गतये इति भावः। तदेवाविश्चक्रुः–भवान्प्रेष्ठः प्रियतम इति बुद्ध्या प्राप्ता इत्यर्थः। प्रेष्ठत्वे हेतुः तनुभृतामात्मा निरुपाधिकबन्धुश्च किलेति श्रौतीं प्रसिद्धिं द्योतयन्ति यद्वा, यत् पत्यपत्याद्यनुवृत्तिरेव स्त्रीणां स्वधर्म इत्युक्तं तदेतत्पत्यादिषु कर्तव्यमनुवर्तनम् उपदेशपदे उपदिश्यत इत्युपदेशः अनुवर्त्तनीयत्वेनोपदेष्टव्यपत्यादिरूपेणावस्थिते साक्षात्त्वय्येवास्तु पत्यादीन्प्रीतिविषयान् बन्धूंश्चापादयति तदन्तरात्मतया तद्रूपेणावस्थिते नित्यनिरुपाधिकपत्यादिरूपे सर्वविधबन्धौ त्वय्येव तेषु कर्तव्यत्वेन उपदिष्टानुवृत्तिरस्त्वित्यर्थः। तदेवाभिप्रेत्य विशिंषन्ति प्रेष्ठ इत्यादिना ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

शुश्रूषध्वं पतीनिति यदुदितं तत्राहुः–यत्पतीति। हे अङ्ग! स्त्रीधर्मशास्त्रविदा त्वया स्त्रीणां पत्यादीनामनुवर्तनं स्वधर्म इति यत्तदस्त्येव न सन्दिग्धं तर्हि तान्विसृज्यात्र किमर्थमागतमिति तत्राह–तदपीति। देववरे अस्मत्पित्रादीनां जामातृस्थानीये त्वयि तदपि क्रियत इति शेषः। देवानां वरणीये वा देवाद्यभीष्टदातरि वा न केवलं पतिस्थानीये ईशे ऐश्वर्यादिगुणसम्पन्ने तस्माद्वरणीय इत्यर्थः। परमानन्दविषयोऽपि हि पतिरयं कथं तद्विषय इत्याशङ्क्य न केवलमस्माकमेव परमानन्दगोचरः अपितु सर्वेषामिति भावेनाह–प्रेष्ठ इति। अस्माकं विशेषतोऽपि प्रेष्ठ इत्याह–बन्धुरिति। बन्धुरूपः परमात्मा किल तथा पुरातनवार्ता "वार्ता सम्भाव्ययोः किल" इति यद्वाऽऽत्मभूतो बन्धुः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अनन्तरम् (११ श–श्लो०) "जहुर्गुणमयं देहम्" इति प्राकृतदेहत्यागेन तत्कालसिद्धा अपि अधीराभावेनैवाहुः—यत् पत्यपत्येत्यादि। अङ्ग! स्त्रीणां पत्यपत्य सुहृदामनुवृत्तिर्धर्म इति यदुक्तं धर्मविदा त्वया तदुपदेशपदे उपदेशकर्तरि त्वय्येवास्तु, नास्मासु; स पुनरस्माभिः शरीरैः सार्द्धं त्यक्तः। त्वय्यस्त्विति परुषोक्तिः, त्वं तथाविधदुःखभाग् भवेत्यर्थः। तद्दुःखं तवैव समुचितम्, ईशत्वात् सर्वमेव सोढुं समर्थोऽसीत्याह—ईश इति। अथ क्रोधवशादनुचितमेवोक्तमिति परामृश्य, शान्तं शान्तम्, तत् कदापि तव न भूयात्; यत्त्वं तनुभृतां प्राणिमात्रस्यैव प्रेष्ठो बन्धुरात्मा च। किल निश्चितमिति क्रोधभावशान्तिः। एतेन त्वयानुरक्तानां स्त्रीणां पत्यपत्याद्यनुवृत्तिर्महती यातनैव; सा कदापि कस्यापि मा भवत्वित्यर्थः ॥ ३२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

किञ्च, त्वं धर्मवित् वयं स्त्रियस्तत्रापि गोप्यः, तथापि यदुक्रमस्तत् किं धर्ममधर्मं वा जानीहीति काश्चित् प्रौढा ऊचुः—यत्पत्यपत्येत्यादि । स्त्रीणामिति सामान्यपरम् न त्वात्मपरम् । स्वासामेवापत्यासम्भावनया, हे अङ्ग ! धर्मविदा त्वयेत्याक्षेपः उक्तमित्यस्यायं भावः—'वचसि को दरिद्रः' इति न्यायादुक्तेन किम् ? अनुभावयितुं यदि शक्यते, तदैवोपदेशत्वं भजति, अतोऽयमुपदेशोऽनुभवाय न भवति, कथं भवतीत्याह–अस्त्वेवमित्यादि । एतदुपदेश-वचनं त्वयीशेऽस्तु, तदैवोपदेशः सार्थको भवतीति भावः । अथवा, 'मे इति प्रत्येकोक्तिः, मे मह्यं तत् तवोपदेशवचनं त्वय्येवास्तु, एव-कारः सर्वत्र योज्यः, त्वय्येव ईश एव अस्त्वेव मा स्खलत्वित्यर्थः । गौरवाल्लाघवमेवाभीष्टं प्रत्येकं पत्यादीनामनुवृत्तिर्गौरवमापादयति, त्वयानुवृत्तिस्तु सर्वत्रैव व्यापिनी; अतो लाघवात् सैव कार्येति भावः । यतस्त्वं तनुभृतामात्मा बन्धुः प्रेष्ठः, किल निश्चितम् । त्वत्सम्बन्धेनैव सर्वे प्रिया बान्धवा आत्मानो भवन्ति । अपत्यानुवृत्तिरपि त्वय्येवेति रसाभासता नाशङ्कनीया, सामान्यस्त्रीपरत्वोक्तेः, तेन सखिमातॄणां तथात्वं त्वयि जातप्रेम्णाम् । किमन्येषु पतिपुत्रादिष्वपेक्षयेत्येवमेव तात्पर्यम् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथ काश्चित्प्रखरास्तद्वचनेनैव तं पराजेतुकामा आहुः—यदिति । पत्यादीनाम् अनुवृत्तिः स्त्रीणां स्वधर्म इति यत्त्वयोक्तम् एतदेवमस्तु अनेन प्रकारेण भवतु नात्र विवदामहे एतदेवास्माभिः प्रतिक्षणं क्रियते इति भावः । ननु, केन प्रकारेण तत्राहुः उपदेशस्य पद आस्पदे धर्मोपदेशकर्तरि त्वयि अनुवर्त्तिते सत्येव पत्यादीनामनुवृत्तिरुचितेत्यर्थः । प्रथमं धर्मोपदेष्टा आचार्य्यः उपसेव्यते पश्चात्तदुपदिष्ट आचरणीयो धर्म इति न्यायात् आचार्यानुवृत्त्यैव निष्कपटतया धर्मः सिद्ध्येदिति च शास्त्रं तत्रापि ईशे परमेश्वरे, यद्याचार्य्य एव परमेश्वरः स्यात् तर्हि किमु तेति किञ्च ईश्वरत्वादेव तनुभृतां त्वमात्मा आत्मत्वादेव प्रेष्ठः प्रेष्ठत्वादेव बन्धुरिति अयमर्थः पत्यादीनां परमात्मसहितानामेवानुवृत्तिः शास्त्रोक्ता आत्मराहित्ये तु सति सद्य एव गृहान्निःसारितानां तेषां नद्यादेस्तटे मुखानि दह्यन्ते इति धर्मशास्त्रम् अतो मूर्त्तस्यात्मनस्तवैवानुवृत्त्या पत्याद्यनुत्तिसिद्धिः किमन्यैस्त्वत्प्रतिकूलत्वादेव निरात्मकैर्दग्धमुखैः पत्यादिभिरिति । ननु, पूर्णप्रेम्या ऐश्वर्य्यज्ञानावरकत्वादासां च सम्पूर्णप्रेमवत्त्वात् कथमेतादृशमैश्वर्य्यज्ञानं सम्भवेत् उच्यते नारदपञ्चरात्राद्युक्तलक्षणो भक्तिरसामृतादिषु व्याख्यातः प्रेमा–ह्यनिशनैसर्गिकौष्णशैत्यवान् विरहसंयोगरसादनुभावकोऽपि ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः "नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि" इति । रसामृतोक्तेः ब्रह्मानन्दानुभवपरः परार्द्धाधिकेऽपि विरहे तीव्रांशुकोटेरप्यधिकं सन्तापयन्नैश्वर्यमाधुर्य्यसम्बन्धिनः सर्वानेव भगवतो गुणान् प्रद्योतयत्येव ननु काश्चिदावृणोति विरहस्य सूर्यतुल्यत्वेन सर्वप्रद्योतकत्वात् संयोगे तु सुधांशुकोटेरप्यधिकमाह्लादयन्माधुर्य्यमयानेव गुणान् प्रद्योतयति संयोगस्य सुधांशुतुल्यत्वेन सुधया मादनादेवैश्वर्य्यावरणात् यत्र संयोगेऽप्यैश्वर्यं प्रद्योतते तत्र प्रेम्ण एवापूर्णत्वमवगन्तव्यम् अत्र त्वासां भाविविरहभावनावतीनां विरह एव इयं माहात्म्यस्फूर्तिरपि प्रेमकृतैव प्रेमा ह्यसदपि माहात्म्ये स्फोरयति किमुत सत् ततस्तदतिशयस्तु तदतिशयमेव यथादिभरतचरिते "किम्बा अरे आचरितं तपस्तपस्विन्या यदियमवनिरित्यादि"इति श्रीजीवगोस्वामिचरणाः ॥ ३२ ॥

श्रीरसिकाह्लादिनी टीका

ननु परिणामविरसत्वाद्विषयाः त्यक्तास्तत्साधुकृतं पत्यत्यादिशुश्रूषणलक्षणो धर्मस्त्यक्तस्तदसाधुकृतं धर्मस्य परिणामे सुखजनकत्वात् औपपत्यस्य स्वीकारो न साधु परिणामे दुःखजनकत्वात् इति चेत्तत्र श्रीकृष्णोक्तिक्रममुल्लंघ्य धर्मोपदेश सोढुमपारयन्त्यस्तावत् भर्त्तु शुश्रूषणं स्त्रीणामित्यस्योत्तरं सोपहासमाहुः । यत्पत्येति अंग हे सखे इति सम्बोधनेन धर्मोपदेशेन त्वया महानुपकारः कृत इति ज्ञायते । यतः यस्मात् पत्यपत्यसुहृदामनुवृत्तिः स्त्रीणां स्वधर्म इति एवंविधधर्मविदा त्वयोक्त तत्सर्वं त्वय्येवास्तु । कुत ईशे ब्रह्मादीनां नियन्तरि तानपि नियन्तुं समर्थ किं पुनरस्मान् यद्वा गर्गोक्त्या "नारायणसमो गुणैरिति" गोवर्द्धनोद्धरणादिना च प्रकटितसामर्थ्येऽत एवेशे सर्वस्य व्रजस्य स्वामिनि व्रजेन्द्रपुत्रत्वात् उपदेशपदे स्थाने आश्रय इत्यर्थः । यस्तु प्रभुर्भवति स तु सर्वेभ्यो धर्मोपदेशं करोति । अत एव प्रभुत्वात् पत्यादिषु करणीयं शुश्रूषणादि तत्सर्वं त्वय्येवास्तु । तदुक्तं "यथा तरोमूलनिषेचनेनेति" त्वय्याराधिते सर्वमाराधितं भवतीति श्रुतिरूपाः कुमार्यो वदन्ति सिद्धान्तमिति यतः सर्वेषां तनुभृतां सर्वप्राणिनां बन्धुश्चात्मा च त्वमेव त्वदाराधनेन सर्वं प्राणिनामाराधनं भविष्यत्येव । किं पुनरस्मत्पत्यादीनां अतः त्वदाराधनद्वारेण त्वदुक्त पत्यादि शुश्रूषणं क्रियत् एवं त्वदाराधनमन्तरेण क्रियमाणपत्यादि शुश्रूषणमशुश्रूषणपर्यवसार्थे भवेत् । शाखासेचनवत् । यद्वा अस्मत्सम्बन्धिनां पत्यपत्यसुहृदां स्त्रीणामस्माकं च अन्येषां तनुभृतामीशेऽनुवृत्तिः स्वधर्म इति त्वयैवोक्तम् । "अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः । कोन्तेय प्रति जानीहि न मे भक्तः प्रणस्यतीति" । अन्यच्च "स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यांति परां गतिमिति" त्वयो-क्तमेतत् त्वय्येवास्तु यतो भवान् प्रेष्ठः प्रीतिविषयः प्रीतिविषयेषु यत्कर्तव्यं तत्त्वय्येवास्तु तत्वतः न कोपि प्रीतिविषयः इतिभावात् । बन्धुश्च परस्परं प्रेम्णा वध्नातीति बन्धुः स एवंभूतस्तु भवतोऽन्यबन्धुषु यत्कर्तव्यं तत्त्वय्येवास्तु किं च भवानात्मेति यदात्मनि कर्तव्यं तत्त्वय्येवास्तु यद्वा यत्पत्यपत्यसुहृदामनुवृत्तिरंग स्त्रीणां स्वधर्म इति धर्मविदा

त्वयोक्तं न तु मादृशीनां भवत्–प्रियाणां एतदुपदेशः तेषामुपदेशानां पदे स्थाने एवमेवास्तु नैतदुपदेशस्थानं किंतु रमणस्थानं किं च त्वयीशे नियन्तरि सति प्रतिवचनस्यापि नावकाशः यतः त्व तनुभृतां त्वदर्थ्यमेव देहधारिणीनां नः प्रेष्ठो बन्धुश्चात्मा च भवानेवातस्त्वय्येवगुणविशिष्टे आत्मनि स्नेहमन्तरेण किंचित् न प्रतिभातीतिभावः। यद्वा स्वमतं कुमार्य उपन्यसन्ति। त्वद्भजनमन्तरेण स्त्रीणां नान्यो धर्मः। त्वया तु स्वभजनं त्याजयित्वा पत्यादिशुश्रूषण स्वधर्म इत्युक्तं। अस्मन्मते तु पत्यादीनामनुवृत्तिस्त्वद्भजनमन्तरेण सुतरामधर्मः। त्वद्भजनत्यागलक्षण एकोऽधर्मः द्वितायस्तु तत्त्यागपूर्वकपत्यादीनामनुवृत्तिलक्षणोऽधर्मः एतदधर्मद्वयं नास्माभिरभ्युपगन्तु शक्यतेऽत एतदुपदेशस्य पदे विषये त्वय्येवैतदधर्मद्वयमस्तु तिष्ठतु नास्मासु योग्यतास्ति कीदृशे त्वयि ईश ईश्वरे धर्माधर्मयोः ज्ञानाज्ञान–योरवस्थितिश्रवणात् येषां त्वयि ईश्वरत्वस्फूर्त्तिस्तेषामेव भवत्प्रेरितानामधर्मेषु प्रवृत्तिरस्तु अस्माकं तु भवान् स्वदृष्टांतेन सर्वेषामेव तनुभृतां प्रेष्ठो बन्धुहितकर्त्ता प्रतीयते, यद्वा पत्यपत्यसुहृदां स्त्रीणां चान्येषां तनुभृतां चानुवृत्तिः शुश्रूषणं तदनुकूलत्वं तत् स्वधर्मः स्वस्य तवैव धर्मं नास्माकमिति धर्मविदा त्वयोक्तं तदुक्तं गीतायां "शमोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः" इत्युपदेशपदे उपदेशविषये एतत्समदृष्टितया सर्वेषामनुवृत्तिरनुरंजनं तत्त्वय्येवास्तुप सादिनारानपेक्षेप कारकः। आत्मा अन्तर्यामितया प्रेरकश्च ईदृश धर्मं त्यक्त्वैववात्रागतानां त्वया प्रेरितानामपि पुनर्नैतस्मिन्धर्मे प्रवृतिर्भविष्यतीतिभावः, यद्वा पत्यादिशुश्रूषणेन किमपि न प्राप्तमित्यश्रद्धया इत्युक्त्वा इदानीं एताः स्त्रीधर्म–शिक्षणीया इति विचार्यास्मासु शिष्यत्वमारोप्य स्त्रीणामयं धर्म इति धर्मविदा गुरुरूपेण त्वयोक्तमुपदिष्ट धर्मविदेति मोहिनीरूपेण स्त्रीधर्मविदेति सोल्लुंठं वचनं तदा त्वया एके वांचता एके अमृतं पायिता इति वचनं कृतवता किमुदिष्ट तत्स्मर्त्तव्यं स्वदृष्टांतेनेदानीमपि वचनमेव शिक्षणीयम्। न तु पत्यादिशुश्रूषणमिति। अधुना परोपदेशं पदे पांडित्यमित्युपदिशता गुरुरूपेण स्थीयते। तत् त्यक्त्वा स्त्रीधर्ममाश्रित्यास्मत्पत्यादयस्तावत् शुश्रूषणीया इति तदुक्तं "यद्यदाचरति श्रेयानितरस्तत्तदीहते" इतिन्यायेन एतदुपदेशस्य पदे विषय त्वय्येवास्तु यत ईशो सर्वं कर्तुं समर्थो न हि तव किंचदप्यशक्यमित्यर्थः। भवान् प्रेष्ठोऽपि एतदुपदेशेनाप्रिय इव तनुभृतां बन्धुरात्मेव भाति वध्नाति। स्वसेवनं त्याजयित्वा पत्यादिसेवनं प्रवर्तयति। बन्धुरात्मा अविद्या तस्या आत्मापरैकोऽस्ति अत एवंविधस्वरूपं विजानतीनां "आत्मा वारे द्रष्टव्य" इति दृढतरसंस्कारवतीनां एतदुपासनात्यागपूर्वक शक्तानां शुश्रूषणोपदेशोऽकिंचिदेतदुपदेशस्य पदे आश्रये त्वय्येवास्तु। न त्वस्मासुपर्यवस्यति यतो भवान् सर्वेषां तनुभृतां प्रेष्ठः चित्ताकर्षकः। बंधुरभीष्टफलदाता आत्मा चेतयिता। अतस्त्वदेकजीवनानां त्वत् प्रेरितानामेव पत्यादिसेवनलक्षणो धर्मः सिध्येत् चान्यथा शास्त्रफलयोक्तरीतिन्यान्यायेन। अन्यथात्रात्विजनपि तत्फलं स्यादिति। स्वस्य निर्दोषत्वख्यापनायोपदिश्यमानं पत्यादिशुश्रूषणं नास्माकं धर्मः किं तु तवैव धर्मः पत्यादयोपि त्यक्ताः धर्मोपि त्यक्तः अतोऽस्माकमुपदेष्ट्यत्वाभावे निर्णीते तवोपदेष्टृत्वाभावोपि निर्णीत स्वानधिकारात् तदुक्तमेकादशे "देवर्षिभूताप्तनृणां पितृणां न किङ्करो नायमृणी च राजन्। सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्त्तम्" इति। नास्मासु विधिकिंकरत्वं अत एवापदेश्याभावे उपदेष्टृत्वमरण्यरोदनवदनर्थमितिभावः। अत्रेदं तत्वबुद्धिवृत्तिप्रवर्तकेन त्वया प्रेर्यमाणाभिरस्माभिः क्रियमाणं त्वच्छुश्रूषणस्मासु फलिष्यति बाह्यवृत्योपदिश्यमानं पत्यादिसेवनं नास्मासु संचरिष्यति। यद्वा पत्यादिसेवनं स्त्रीणां स्वधर्मः आत्मधर्म देहधर्ममात्मधर्मत्वेनोपदेशता त्वया यदुक्तं "जन्तु न समंजसं यत आत्मधर्मं विजानातीति"। नास्माकमग्रे एतत्सर्वमुपदेशस्यात्मसेवनरूपपदेऽधिष्ठाने त्वय्येवास्तु। यतो भवांस्तनुभृतां सर्वेषामपि बन्धुरात्मा अतोऽस्माभिरुपादिश्यमानो भवान् पत्यादिसेवनरूपं धर्ममनुतिष्ठतु धर्मपालकत्वात् मुख्यकर्त्तृत्वाच्च। त्वदुपदेशमन्तरेणापि विविदिषा वाक्येन स्वयमेव विचार्य त्वदाराधनमेवाचरिष्यामेति। वास्तवमस्माकमुपदेष्टृत्वमितिभावः। किं च पत्यादीनामनुवृत्तिः स्त्रीणां स्वधर्म इति धर्मविदेति सोपहासमित्यादि श्रीधराचार्यैरिव व्याख्यातमलमिति विस्तरेणेति ॥ ३२ ॥

विशुद्धरसदीपिका

किञ्च, यदुक्तं "भर्तृशुश्रूषणं स्त्रीणां परो धर्मः" इति तत्कर्ममीमांसामतमवगत्य तदुपमर्दिब्रह्ममामांसामतमाश्रित्य स्वप्रतिभावलेशेन तस्मिन्नात्मत्वमारोपयन्त्यस्तन्मतदूषणेऽपि नास्माकं दोष इति प्रतिपादयन्ति वस्तुतस्तु तस्मिन्नेव मुख्यपतित्वं साधयन्ति यत्पत्यपत्येति। त्वया धर्मविदेति सोपहासं येन स्वयमेव मुरलीकलेनाकारिताः सर्वे धर्मादिभिर्हारितास्तस्य धर्मोपदेष्टृत्वमुपहसनीयवेमेति भावः। अत्रोढानूढाभेदेन परकीयाद्वैविध्यमाह—ऊढानामध्यात्मकोटौ निक्षेप इति ज्ञेयम् यदि च पत्याद्यनुवृत्तिः स्त्रीणां स्वधर्म इति निश्चितमेव तदतदुपदेशानां पदे विषये त्वय्येवास्तु उपदेशपदत्वे हेतुः ईश इति। "तमेनमात्मानं वेदाऽनुवचनेन ब्राह्मणा विविदिषन्ति" इत्यादिविविदिषावाक्यावगतसर्वोपदेशानामीशपरत्वावगमात् "शास्त्रयोनित्वात्" इत्यादिसूत्राच्च "कृष्णमेवमवेहि त्वमात्मानम्" इत्युक्तेः परमात्मा किल भवान् भोग्यजातस्य हि भोक्ता आत्मैवेश इत्यर्थः। "ईशावास्यमिदꣳसर्वं यत्किञ्चिज्जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथाः" इत्यादिश्रुतेः। आवास्यं भोग्यमित्यर्थः। अन्यथा जीवत्वापातेन विविक्षितासिद्धिरिति भावः। अत एव पुत्रादिवत्प्रेष्ठः निरुपाधिप्रेमास्पद सुहृदादिवद्बन्धुश्च निरुपाधिहितकारी भवानेव पत्यादिषु तत्तदर्थस्याऽसम्भवादिति भावः। अतः सर्वबन्धुषु यत् करणीयं तत्त्वय्येवास्त्वित्यर्थः। अत्र तनुभृतामिति सामान्यानिर्देशेन परमात्मत्वं परमप्रेष्ठत्वं परमबन्धुत्वं च सिद्धम्। शास्त्र च तत्तदनुवृत्तिविधानं शराभ्यासवत्तदुपासनव्यवसायार्थवेति। सर्वं चतुरस्रम्। अथवा धर्मोपदेशानां

पदे स्थाने धर्मोपदेष्टरि त्वयि सति अस्मासु च धर्मं जिज्ञासमानासु सतीषु त्वया धर्मविदा यदुक्तं तदेवमेवास्तु न तु त्वं धर्मोपदेष्टा । किन्त्वात्मा पर एवोपदेष्टा भवति न त्वात्मेति भावः । अत्रापि धर्मविदेति सोपहासमेव “नापृष्टः कस्यकिद्ब्रूयात्” इत्यादि विरोधादिति भावः । इति व्याख्या द्वयीविवर्त्तवादमाश्रित्य अथ तत्त्ववादमाश्रित्य यथा धर्मविदेति प्रशंसा “धर्मो मद्भक्तिकृत्योक्तः” इत्येकादशोक्तेः धर्मसेतूनां वक्ता कर्त्ताऽभिरक्षितेत्यादिवक्ष्यमाणाच्च त्वया यदुक्तमेतत् “येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्” इत्याद्युपदेशानां तात्पर्य्यगोचर आदिपुरुषे त्वय्येवास्तु । ननु, तथाभावे विरुद्धधर्माक्रान्तत्वं प्रसज्येतेत्यत आहुः–ईश इति । सर्वाश्रये सर्वनियन्तरि चेत्यर्थः । “यस्य भासा सर्वमिदं विभाति, एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति” इत्यादिश्रुतेः यद्वा, भक्ताऽनुग्रहकातर इत्यर्थः । यतः तनुभृतां पत्यादीनामात्मा फलरूपो भवान् “देवर्षिभूताप्तेत्यादेः “कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्” इत्यादेश्च अत एव प्रेष्ठो बन्धुश्च । यद्वा, यदुक्तं पत्यादिशुश्रूषणं धर्म इत्येवमेतत् किन्तु त्वय्येवास्तु कुतः शुश्रूषणीयत्वेनोपदिश्यमानानां पदे अधिष्ठाने तत्कुतः ? ईश इति, न हीशमधिष्ठानं विना कोऽपि पतिपुत्रादिर्नामास्तीति भावः । अत्र श्रीपञ्चमस्कन्धस्य श्रीरमास्तुतिरनुसन्धेया अपि च परस्परविरुद्धस्वभावानां पत्यादीनामनुत्तिर्मण्डूकतोलनवदनुपपन्ना सती “अथात उपदेशो नेति नेति” इत्यादि श्रुतिसाचिव्येनाधिष्ठानभूतमीश्वरमेव सेव्यतयाध्यवसाययति इयमेव श्रुतार्थापत्तिर्नाम पत्यादिप्रयोगश्च दृष्टान्तत्वेन सङ्गमनीयः “भोजने जननीसमा” इत्यादि श्रीद्रौपदीमुद्दिश्य महाराजोक्तिन्यायादिति । यद्वा, अङ्ग स्त्रीणाम् अप्रधानस्त्रीणां सहचरीणामिति यावत् पत्याद्यनुवृत्तिः स्वधर्म इति यदुक्तमेतत् मम किल श्रुतिमाह—तदर्थिकां “नलमुखेन्दुपरां विबुधः स्मरः, इत्यादिवच्छुद्धप्रेमाख्यपरमगुरूपदेशस्य पदे गोचरे त्वय्येवास्तु तत्र पतिवदवश्यसेव्यत्वं पुत्रवन्ममतास्पदत्वं सुहृद्वदादरणीयत्वमभिहितं तदेतत्प्रकारत्रयसमुदिता शुद्धा प्रीतिः त्वद्विषयैवास्त्वित्यर्थः । यतः तनुभृतां लब्धसिद्धदेहानामात्मा प्राणेश्वरी तद्वत्प्रेष्ठः बन्धुरः “बन्धुरः सुन्दरेपि च” इति विश्वः । अत एव ईशे तद्वदाराध्ये भजनीय इत्यर्थः “रसं राधायामाभजति किल भावं व्रजमणौ” इति श्रीसुधानिधेः इयमन्तर्गृहगतासु लब्धसहचरीदेहानामुक्तिरिति सर्वमनवद्यम् लब्धयूथेश्वरीदेहानां तु मते नर्मेदम् तथाहि त्वया धर्मविदेति पूर्ववत्सोपहासमेव पत्यादिशुश्रूषणमुक्तमेतत्त्वमेव मोहिनीरूपेणाजितवत्स्त्रीरूपो भूत्वा पत्यादिसेवामाचरेत्यर्थः । कुतः ? उपदेशपद इति हेतुगर्भितं विशेषण गुर्वननुष्ठिते शिष्याणामप्रवृत्तेरिति भावः । तथा ईशे सकलकलाकुशले सर्वं कर्त्तुं समर्थ इत्यर्थः । नच कृत्रिमस्त्रीरूपे त्वयि कश्चित्प्रीतिं न कुर्य्यादिति शङ्कनीयं यतः प्रेष्ठो भवान् तथा बन्धुरः सुन्दर आत्मा स्वरूपं च यस्येत्यर्थः ॥ ३२ ॥

श्रीरामनारायणकृता भावभावविभाविका

एतदेव दृढयन् भर्तुः शुश्रूषणमित्यादेर्दाक्षिण्यार्थस्य सम्मतत्वादेवोपेक्षार्थस्योत्तरमाहुः—यत्पत्यपत्येति । अङ्ग हे प्रिय ! धर्मविदा त्वया पत्यपत्यसुहृदामनुवृत्तिः स्वधर्म इति यदुक्तं तदेतदुपदेशपदे त्वय्येवास्तु इत्यन्वयः । तत्र त्वया धर्मविदेति सोपहासं दृग्धर्मवित्त्वे तन्निष्ठत्वे च मुरलीरवेण न आह्वानं कथम् आवाह्यैवमुक्तौ तु विश्वासघातो महानधर्म एव, किञ्च त्वया नात्मतत्त्वदृष्ट्यैवमुक्तं किन्तु धर्मविदा तथा च धर्मविचारेऽपि “तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन” इति श्रुत्या सर्वेषां चतुराश्रमधर्माणामीशपरत्वप्रतीतेः ईशत्वात्सर्वोपदेशानां पदे त्वय्येवेशे एतदप्यनुवर्तनमस्तु शत्रुजयाय लक्ष्ये शराभ्यासवदन्यत्रानुवृत्तिः शास्त्रेषु त्वदाराधनायैवेति तत्त्वम् । यद्वा, उपदेशपद इति सेव्यत्वेनोपदिश्यमानानां पत्यादीनां पदेऽधिष्ठाने त्वय्येव तदनुवृत्तिरस्तु “ऐतदात्म्यमिदं सर्वं” तत्सत्यं स आत्मा तत्त्वमसि यस्य भासा सर्वमिदं विभाति एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति इत्यादिनान्येषां त्वदतिरिक्तसत्तामानाद्यलाभात् । यद्वा उपदेशपदे इत्यत्र पदशब्दस्याश्रयविषयोभयबोधकत्वादेतदुपदेष्टरि गुरावीशे च त्वय्येवानुवर्त्तनमस्तु प्रथमं गुरोस्तत ईश्वरस्योभयोरेवाराध्यत्वात् । ननु, मया पत्युस्तद्बन्धूनां च सेव्यत्वमुक्तमन्तःकरणशुद्धिविविदिषा द्वारा सर्वधर्माणां मयि पर्यवसानेऽपि यत्र यस्य यदाराधनमुपदिष्टं तेन तदेव कार्यं तत्राहुः प्रेष्ठ इत्यादि यतो भवांस्तनुभृतामस्माकं पतीनां चात्मा “आत्मा नारायणः परः”—

“अहमात्मा गुडाकेश ! सर्वभूताशयस्थितः । कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्” ॥

इत्यादि श्रुतिस्मृतिभ्यः अत एव प्रेष्ठोऽपि “न वा पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति नवा सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति”—

“सर्वेषामपि भूतानां नृप ! स्वात्मैव वल्लभः । इतरेऽपत्यवित्ताद्यास्तद्बल्लभतयैव हि” ॥

इत्यादि श्रुतिस्मृतिभ्यः । न त्वां विहाय पत्यादयः सेव्यास्तव पतीनामप्यात्मत्वात्तद्गेहसेवात आत्मसेवाया वरिष्ठत्वात् तथा “सयुजा सखाय” इति श्रुतेस्तवैव बन्धुरूपत्वाद्बन्ध्वनुवृत्तिरपि त्वय्येवास्तु नच “अनश्नन्नन्यो अभिचाकशीति” इति श्रुत्या ममाभोक्तृत्वात्कथं भोगादिनानुवृत्तिरिति वाच्यं पिप्पलशब्दाभिधेयकर्मफलाभोक्तृत्वेपि “तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः” इति स्मृतेराराध्यत्वेन भोक्तृत्वस्य सिद्धत्वात् । यद्वा, पत्यादीनामनुवृत्तियस्त्वत्स्त्रीणां स्वधर्म इति “धर्मसेतूनां वक्ता कर्ताभिरक्षिता” इत्यादिवचनैर्धर्मविदात्वयोक्तमेतत्तूपदेशपदे “सर्वे वेदा यत्पदमामनन्ति” वेदैश्च सर्वैरहमेववेद्यः, वासुदेवपरा वेदाः” इत्यादिश्रुति-

स्मृतिभ्यः सर्वोपदेशानां तात्पर्यविषये त्वय्येवेशेऽस्तु ननु, पत्याद्यनुवृत्त्युपदेशस्याहं कथं गोचरस्तत्राहुः—प्रेष्ठ इत्यादि । “येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्” इत्यादिभिस्तथावगमात् । यद्वा, उपदेशपदे त्वय्येवास्त्वित्यस्यायमभिप्रायः यथा तरोर्मूलनिषेचनेन पत्रशाखादिपुष्टिर्जायते नतु प्रत्येकपत्रादिनिषेचनेन तथा त्वदनुवृत्या सर्वाऽनुवृत्तिर्भवति न तत्प्रत्येकानुवृत्तेर्मण्डूकतोलनवदसम्भावितत्वेनापि त्वय्येवास्तु मण्डूकतोलने यथैकारोहेऽन्यानवरोहान्नपञ्च सेटकपूर्त्तिस्तथा पतिसेवनपरत्वे पुत्रपालनानुपपत्तिस्तदुपपत्तौ तदनुपपत्तिस्त्वत्सेवायां तव सर्वात्मकत्वात् सर्वानुवृत्त्युपपत्तिरिति भावः । यद्वा पत्यपत्याद्यनुवृत्तिः स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तं तदेतदुपदेशपदे त्वय्येवास्तु अत्रापि धर्मविदेति सोपहासम्—

“नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः । जानन्नपि हि मेधावी जडवल्लोकमाचरेत्” ॥

इति स्मृत्या प्रश्नाभावे कथनानौचित्यमिति भावः। नच वाच्यम् “अपृष्टमपि ते ब्रूयाद्यस्य श्रेयोभिवाञ्छति” इति वचनान्नायं दोष इति यतो धर्मबुद्ध्या तदुपदेष्ट्रा धर्मविदा तस्य स्वयमप्यनुष्ठेयत्ववात् अन्यथा—

“परोपदेशवेलायां सर्वे व्याससमा द्विजाः । तदनुष्ठानवेलायां मुनयोऽपि न पण्डिताः” ॥

इति न्यायात् तथा चैतदुपदेशपदे उपदिष्टार्थस्य स्वयमनुष्ठाय शिक्षयितुं तदुपदेशगोचरे त्वय्येवास्तु नचास्मासु अनुपदेष्टृष्वनुष्ठानाभावेपि दोषानुपपत्तेः किञ्च विद्वानर्थी समर्थश्च धर्ममीमांसायां धर्माधिकारी त्वं त्वेतद्धर्मवित् तत्फलोत्कर्षाकरणदोषयोर्निरूपणात्तत्फलार्थी च तथा ईशः कर्तुं समर्थश्चेति त्वय्येवेशेऽधिकारसम्भवादस्तु तत्कर्तृमनीशासु तत् धर्मवित्सु तत्फलानर्थिष्वस्मासु वृथा तदालाप नच वाच्यं नाहं स्त्रीति कथं तद्धर्माधिकार इति त्वं स्त्रीत्वं पुमानसि त्वं कुमारोथवा कुमारीति श्रुतिविरोधात् ननु, कादाचित्कक्रृत्रिमस्त्रीरूपे मयि कथं पत्यादिप्रीतिः स्यात्तत्राहुः प्रेष्ठ इत्यादि भवान् सर्वेषां तनुभृतां प्रेष्ठः स्त्रीधर्माननुचरति त्वयि पत्युः का कथा सर्वे जनाः प्रीयेरन् मोहिनीरूपे त्वति दग्धमन्मथस्य परमयोगेश्वरेश्वरस्यापि या दशा जाता तां त्वं वेत्स्येव यतः किल निश्चयेन भवान् बन्धुरात्मा बन्धुरः सुन्दर आत्मा यस्येति तथा “बन्धुरः सुन्दर आत्मा यस्येति तया “बन्धुरं सुन्दरेपि च” इति विश्वः । नचैवं सति कथं पुंस्त्वनिर्देशः क्रियते इति वाच्यं त्वयि सर्वसम्भवेप्यस्माभिः पतिभावनतया तथा निर्दिश्यते इति सर्वमनवद्यं यद्वा—

“यथा कण्टकविद्धाङ्गो जन्तोर्नेच्छति तां व्यथाम् । जीवसाम्यं गतो लिङ्गैर्न तथाऽविद्धकण्टकः” ॥

इति वचनात् त्वया धर्मविदोक्तं न त्वस्मद्दशाविदा यत्त्वयोक्तं तत्सर्वं त्वय्येवेशे समर्थेऽतु यदा वयमिव कस्मिंश्चित्त्वादृशे लग्नचित्ता भवसि त्वां च स प्रिय एवैवमुपदिशेत्तदास्मद्दशा तव प्रतीयेत । ननु, किं शापो दीयते युष्माभिर्नेत्याहुः प्रेष्ठ इत्यादिना, यतस्त्वं प्रेष्ठोऽतस्तथा नहि त्वयि प्रार्थयामः किन्तु स्वदशाविज्ञापनाय तथा ब्रूमः तस्मात्सर्वथात्वय्येवानुवृत्तिर्योग्यत्वेनास्तु नान्यत्रेति भावः ॥ ३२ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

यदप्युक्तम्—

“तद्यात माचिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः । भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया” ॥

इत्यादि । तत्राप्याहुः–यदिति । यत्पत्यपत्यसुहृदामनुवृत्तिः स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् एतदुपदेशपदे त्वय्येवमेवास्तु अङ्ग हे भगवन्निति कोमलामन्त्रणेन न वयं प्रतिकूलं वदाम इति सूचयन्ति-त्वं हि उपदेशविषयैस्त्वद्वाक्यैः पत्यादिसेवनमुत्कृष्टफलप्रदमतः साक्षाद्भगवति सति किं परम्परयेति भावः । यतः ईशं विविदिषा वाक्येन सर्वोपदेशानामीशपरत्वावगमादिति भावः यद्वा, ईशेऽन्तर्यामिणि जीवो हि यत्रान्तर्यामिरूपेण त्वया प्रेर्य्यते तत्रैव प्रवर्त्ततेऽतः स्वसङ्गमार्थं त्वयैव प्रेरिता वयं त्वदाराधनसमीहा यत्तस्मादन्तर्यामिरूपेण सदाराधने प्रियेण प्रेष्ठरूपेण पत्याद्याराधन इत्यस्मद्वाक्यलतापादिकाप्रवृत्तिर्भगवतो नोचिता अन्तर्यामिकृतप्रेरणस्यैवं प्रबलत्वादितिभावः । किञ्च, उपदेशनियोज्य उपदेशविषयश्च त्वमेवाऽतः त्वदाराधनेनास्ति किमपि बाधकमित्याशयेनाहुः—प्रेष्ठः परमप्रेमास्पदः अत एवात्मा परमप्रेमास्पदस्यैवात्मत्वात् स च तनुभृतां सर्वेषां तनुः यस्य कस्यचित् अतः सर्वेषां बन्धुरूपो भवानेव यतः संप्रत्यप्यस्मदनुग्रहार्थं नन्दनन्दनविग्रहस्तस्मादुपदेशकर्तृतदनुष्ठानतद्विषयात्मनस्तवाराधनमेव मुख्यं सर्वाराधनमिति भावः । यद्वा, त्वय्युपदेशपदे धर्मोपदेशकर्त्तरि सति अस्मासु धर्मजिज्ञासमानासु सतीषु एतत्त्वयोक्तमेवमस्तु न न वयं तथा नापि भावः न किन्तु भवानात्मेति अथवा एतदुक्तमुपदेशपदेपुरुपेऽस्तु नाम त्वयि तु ईशे स्वामिनि सति एवं क्व नैवमित्यर्थः । यद्वा, उपदेशपदे उपदेशेन निवर्त्तनीये लौकिकपुरुषासक्तचित्तत्वे एतदेवमस्तु ईश्वरे त्वयि तु नैवमित्यर्थः । यतस्तनुभृतां त्वमात्मा फलरूपः अथवा एवमेतत्त्वय्येवास्तु कुतः उपदेशपदे आराधनीयत्वेनोपदिशमानानां पत्यादीनां पदे अधिष्ठाने यतः ईशे न हीश्वरमधिष्ठानमृते कोऽपि पतिपुत्रादिर्नामाध्यस्तस्याऽधिष्ठानानतिरेकात् तस्मान्न वयमनुचिते कर्म्मणि प्रवृत्ता इति भावः। यद्वा, यत्त्वयोक्तमेतदेवमादावुपदेशकर्त्तरि आचार्य्ये त्वय्यऽस्तु आचार्य्यसेवनपूर्वकस्यैव धर्म्मानुष्ठानस्य सफलत्वप्रतिपाद-

नात्त्रापि ईशे परमेश्वर एवमाद्याचार्य्यः स्यात्तर्हि किमु वक्तव्यम् ईश्वरत्वादेव तनुभृतामात्मा तत एव बन्धुः सुहृत्तमात्मकानामेव पत्यादीनां सेवनं दृश्यते नतु मृतानां, तेषां तद्दाहविधानात् तेनास्मद्भाग्यवशात्सदानन्दात्मैव प्रकटितस्तस्मात्तत्सेवने प्रवृत्तानामस्माकं किन्तैरिति भावः। अनभिज्ञापक्षे अधिकारमबुद्ध्यैव धर्म्ममुपदेष्टुं प्रवृत्तोऽसि "निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः" इत्युक्तत्वाद्ब्रह्मज्ञानामस्माकं विधिनिषेधाधिकाराभावादित्याशयेनाहुः–यदिति। इति यद्धर्म्मविदा त्वयोक्तमेतदुपदेशास्पदे तदेकस्वभावे एवमस्तु क्रियतामेवमुपदेशो न वयं निवारयामः परन्तु स्वाधिकाराभावान्न तं गृह्णीम इति भावः। धर्मविदेति धर्मस्वरूपमात्रं वेत्सि नतु तदुपदेशाधिकारं यद्वा, यथापि धर्म्मविदसि न तु ब्रह्मविदत एवं ब्रवीषीति सोपहासं व्यङ्ग्यं यद्यपि निवारणमुचितमधिकारं विनाऽरण्यरोदनप्रायस्योपदेशस्य निषिद्धत्वात्तथापि ईश्वरत्वात्तव नास्त्यस्माकं निवारणसामर्थ्यमित्याशयेनाहुः ईश इति। यद्वा, अधिकारे विनोपदेशकर्तृत्वमनुचितमपि प्रभुत्वान्नो विरुद्ध्यते। ननु, वामैव विभुतेत्युक्तत्वे नविभुतायाः कुटिलप्रवृत्तिजनकत्वाऽवगमात् अधिकाराभावसाधकमात्मानुभवमावेदयन्ति, प्रेष्ठ इति। अस्मत्प्रेष्ठो भवानेव सर्वेषां तनुभृतां बन्धुर्हितैषी परमात्मा आत्मा च। यद्वा, सर्वेषां परमप्रेमास्पदभूतो य आत्मा यश्च सुहृत्परमेश्वरः स तत्त्वमसि वाक्येन तत्त्वं तदुपलक्षितो भवानेव तथा चाखण्डवाक्यार्थबोधवतीनां कुतस्त्वदुक्तधर्म्मेऽधिकारः कुतश्चाशुभसम्बन्धः—

"पश्यतः सर्वभूतानि सर्वावस्थासु सर्वदा। ब्रह्मभूतस्य संयोगो नाशुभस्योपपद्यते"॥

इत्यादिशास्त्रादितिभावः। ब्रह्मज्ञमन्यानां पक्षमवलम्ब्येयं युक्तिर्द्रष्टव्या तेषां तदभिमानेन यथेष्टाचरणेप्रवृत्तिदर्शनात्तदुदाहरणं तु "ब्रह्मैव सर्वमिति वेदविदो वदन्ति तस्मान्न सखि! पराऽपरभेदबुद्धिः। जारेऽथवा निजवरे सादृशाऽनुरागो व्यर्थं किमर्थमसतीति कदर्थयन्ति"इत्यादि। यद्वा, स्त्रीणां स्वधर्म इति यत्त्वयोक्तमेतदुपदेशपदे त्वय्यस्तु एतदुपदेशविषयो भवानेवाऽतो न वयमुपदेशनीयाः। ननु, मम कुत उपदेशविषयत्वमित्याशङ्क्य सौन्दर्य्यमाधुर्य्यादिगुणगणालङ्कृतस्यास्मच्चित्ताकर्षकस्य तवैवापराध इत्याशयेनाहुः—भवान्बधुरात्मा बन्धुरो मनोहर आत्मा स्वरूपं यस्य सः अत एव प्रेष्ठः किलेति अतस्तवैवंविधं त्वमेवास्मद्धर्म्मनाशे प्रयोजक इति भावः। यद्वा, इति यत्त्वयोक्तं तदस्माकं मनसि न प्रविशति यतस्त्वं धर्म्मवित् नतु तत्तदनुष्ठाता यो यस्य धर्म्मस्यानुष्ठाता न भवति केवलं धर्म्मं जानाति न तद्वाक्यात्कस्यचित्कस्मिंश्चिद्धर्म्मे प्रवृत्तिर्भवति अतः काश्चिन्महाभागाः पातिव्रतधर्म्मानुष्ठानपरा योषिद्वराऽस्मानुपदिशेच्चेत्तर्ह्यस्मन्मनसि तद्वाक्यं प्रविशेदतः किमर्थं जल्पसीति भावः। अस्मद्वाक्यमेतासां हृदि प्रविशत्विति यदि तवाग्रहस्तर्ह्येतदुपदेशपदे गुरौ त्वय्यस्तु तथाच विष्णुना यथा मोहिनीरूपं धृतं तथा त्वमपि स्त्रीरूपमादाय स्त्रीधर्ममाचर तत अस्मानुपदिश गुर्वनुष्ठिते कर्म्मणि शिष्यभूतानामस्माकमपि प्रवृत्तिः सौकर्य्येण भविष्यतीति भावः। ननु, अनुष्ठानायाप्यहं दर्शयामि परन्तु किं कर्तव्यं स्त्रीत्वं नास्ति ममेति चेत्तत्राहुः—ईश इति। सर्वकलासमर्थे त्वयि स्त्रीभावोपि न दुर्घट इति भावः ननु, कपटेन गृहीतस्त्रीभावस्य मम पाणिगृहीतुरऽलभ्यत्वात्कथं पातिव्रतधर्म्मानुष्ठानमिति चेत्तत्राहुः—प्रेष्ठो भवान्स्वभावत एव प्रियः मनोहरात्मा च तथा च मोहिन्यां जानन्नपि कपटस्त्रीभावं स्वाभाविकस्त्रीभावानां परमप्रियामुमां विहाय सन्दग्धकामः परमजितेन्द्रियोपि श्रीरुद्रस्तद्ग्रहणायाऽधावत्तथा लोकोत्तरसौन्दर्य्यवति त्वयि कपटेनापि गृहीतस्त्रीभावे जानन्तोऽपि कोटिशः स्वस्वदारान्परित्यज्य त्वद्ग्रहणायाऽधाविष्यन्त्यतो न पतिदौर्लभ्यमिति भावः। अनेन विधात्रा धर्म्मविनाशायैव त्वं रचितोसि पुरुषत्वे स्त्रीणां धर्म्मं नाशयसि गृहीतस्त्रीभावे पुरुषाणां तन्नाशयिष्यसि धर्ममनुष्ठातुं तत्त्वं कदापि न समर्थोसि यथेदानीं पुरुषधर्म्ममेकपत्नीव्रतलक्षणमनुष्ठातुमशक्तो बह्वीनां स्वस्मिन्नासक्तत्वात्तथा गृहीतस्त्रीभावेप्यऽसङ्ख्यातपुरुषाणामासक्तिजनकत्वात्तस्मादनुष्ठानोपदेष्टुमशक्तस्त्वं किमर्थं वृथा कण्ठशोषणाय प्रवृत्तोसि इत्यपि ध्वनितम् यद्वा, धर्मविदा त्वया इति यदुक्तमेतदुपदेशपदे त्वय्येवमऽस्तु त्वदङ्गेष्वेव जीर्णं भवतु ग्राहकाभावात् अहो ज्ञातमस्माभिर्नवीनधर्मवित्त्वं त्वया सम्पादितमतः शिष्याः सम्पादनीयाः यथोक्तधर्मश्चोपदेष्टव्य इति तव महत्युत्कण्ठा वर्तते ततोऽस्मानेवमुपदेष्टुं प्रवृत्तोऽसि परन्तु न वयं त्वां गुरुं कर्तुं समागताः अतः किमर्थमपात्रदानात्स्वधनं नाशयसि अप्रतिपित्सितमर्थं प्रतिपादयन्नऽनवधेयवचनो भवति तथा च धर्मविषये यद्यपि जातोसि तथाप्यधिकारानधिकारविवेकलेशेनापि विधुरोस्यतः सम्प्रत्येतत्तत्त्वयि तिष्ठतु गुरोः सकाशाद्यथोक्तविवेकमपि लब्ध्वैतदधिकारलाभे सुखेनोपदेशं करिष्यसीति भावः यतस्त्वमीशः यथोक्तोपदेशधारणेधिकस्वीकारेऽधिकारिसम्पादने च समर्थः भवत्यस्तर्हि किमर्थमागता इति चेत्तत्राहुः—तनुभृतां सर्वेषां चतुर्दशभुवनस्थानां सौन्दर्य्यादिविशिष्टविग्रहवतां मध्ये भवान्मनोहरस्वरूपोऽतोऽस्माकं प्रेष्ठस्तथा च त्वयि रमणबुद्ध्या समागता वयमतो न यथोक्तोपदेशार्हा इति भावः॥ मानिनीपक्षे पत्याद्यनुवृत्तिलक्षणः स्त्रीणां स्वधर्म इति यत्त्वयोक्तम् एतत्तूपदेशकर्तरि समर्थे त्वय्येवमस्तु सर्वदैवमेव त्वया वयमुपदेशनीयाः धर्म्मविदित्यनेनाऽहो ज्ञातमद्यास्माभिस्त्वन्धर्मविदसीति सूचितम् योग्यं चैवमुपदेशकर्तृत्वं तव यतः स्वस्मिन्प्रेमकृतः शुभं यथैव प्रवर्त्यते सज्जनैरित्याशयेनाह—हे प्रेष्ठ! इति भावः। प्रेमविषयः यतो बन्धुर्यथोक्तोपदेशकर्तृत्वाद्धितैषी अत आत्मा स्वात्मतुल्यस्तथा च कः सत्यभर्त्ता शुश्रूषणीयः? को वा कपटभर्त्तत्यादिविवेकवतीनामस्माकमग्रे स्वपाण्डित्यं नोद्घाटनीयमिति (स्वस्य च धर्मं नाशयेति) भावः। यद्वा, इति यत्त्वयोक्तमेतदेवमुपदेशपदे त्वय्यस्तु त्वमपि स्वधर्ममाश्रित्य तिष्ठ नत्वस्माकं स्वस्य च धर्मन्नाशयेति भावः। यतस्त्वमीशः नाशसंरक्षणमोः समर्थः यत्तु मदभिस्नेहवतीनां न स धर्म्मः कपटपूर्वकत्वादिति चेत्तत्राहुः—

प्रेष्ठ इति । तनुभृतां सर्वेषां प्राणिनां भवानात्मवत्प्रेष्ठः यतः सर्वेषां हितैषी तथा च सर्वेषां तनुभृतां यथा त्वयि प्रीतिः तथाऽस्माकमपि अतो विशेषप्रीतिभ्रमादस्मासु दोषमारोप्यास्मद्धर्म्मं नाशयितुमयोग्योसीति भावः। निवृत्तिपक्षे एव साक्षाद्ब्रह्मप्रतिपादकश्रुतिभिः स्वस्य ब्रह्मणि समन्वयोऽभिहितः इदानीं "इन्द्रो यतोऽवसितस्य राजा अग्निर्मूर्द्धोदिवम्" इत्यादिकाः श्रुतयः स्वाभिप्रायं ब्रह्मण्यो वेदयन्ति यदिति यत्स्त्री सधर्म्मिकाणां श्रुतीनामिन्द्रादिप्रतिपादकानामस्माकमिन्द्राद्यनुवृत्तिस्तात्पर्य्येण तत्र प्रवृत्तिः स्वधर्म्म इति धर्म्मविदा त्वयोक्तम् एतदेवं त्वय्यस्तु यतः उपदिश्यमानानामिन्द्रादीनां पदेऽधिष्ठाने यत ईश्वरे सर्वकारणभूते यतश्च भवानेव प्रेष्ठत्वात् तनुभृतां सर्वेषामिन्द्रादीनामात्मा तद्बन्धुस्तत्सम्बन्धीन्द्रादिविग्रहरूपश्च तथा च किमपि विकारजातं प्रतिपादयन्त्यः श्रुतयः सर्वाधिष्ठानभूतं सर्वात्मानं सर्वस्वरूपं परमात्मानमेव प्रतिपादयन्ति "सर्वे वेदा यत्पदमामनन्ति" इत्यादिश्रुतेरिति भावः॥ ३२ ॥

रास-रहस्यम्

र० टी०—हे अङ्ग ! हे प्रिय ! "आत्मनस्तु कामाय सर्वं प्रियं भवति ।" त्वया धर्मविदा, धारयति उन्मार्गप्रवृत्ते इति धर्मः तं वेत्तीति धर्मवित् तेन, यत् स्त्रीणां वृत्तीनां स्वधर्मः स्वमात्मा तत् सम्बन्धि धर्मः पतिवदवश्यसेव्यत्वं, अपत्यवत् ममतापादत्वं, सुहृद्वत् आदरणीयत्वं इत्यादि उक्तं एवमेतत् त्वयि ईशे "ईशावास्यमिदं सर्वं ।" इति व्यापकत्वात् "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ।" "त्वमेव माता च पिता त्वमेव " इत्यादि उपदेशे पदे आराधनीयत्वेन उपदिश्यमानानां पत्यादीनां पदेऽधिष्ठाने "अधिष्ठानातिरिक्तानां अध्यस्तानां प्रमाणातिरेकात् ।" इति न्यायात् अनुवृत्तिः स्मरणं मननं वास्तु भक्तु किल यस्मात् भवान् तनुभृतां जीवानां प्रेष्ठः प्रियतमः बन्धुः सुहृदात्मा च ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु, मद्भक्तिलक्षणं धर्मं पुरस्कृत्यान्योऽपि स्वधर्मोऽनुष्ठेय एवेति प्रागुक्ता ममाज्ञा पालनीयेत्यत्र विवित्सायां धर्मोपयोगः जाते त्वद्विषयके ज्ञाने सर्वात्मनस्तव भजनमेव सर्वथाऽनुष्ठेयमन्यत्तु त्वद्भजनेनैव सर्वं समञ्जं सम्भवतीत्याहुः—"भर्तुः शुश्रूषणं स्त्रीणाम्" इत्यादिना पत्याद्यनुवृत्तिः स्त्रीणां धर्म इति त्वया धर्मविदा अङ्ग हे प्रियतम ! यदुक्तम् एवमेतदुपदेशपदे उपदिश्यन्ते इत्युपदेशाः अनुवृत्तिविषयाः पत्यादयस्तेषां पदे आश्रये पद्यते सर्वात्मतया ज्ञायते इति पदं गत्यर्थानां ज्ञानार्थत्वात् तस्मिन्सर्वात्मतया सुज्ञाते त्वयि अस्तु पत्यादिषु पुत्रादिषु स्थानीयेषु याऽनुवृत्तिः त्वयोक्तानां कल्पद्रुमस्थानीये त्वयि करिष्याम इति फलितोर्थः । उपदेशपदत्वे हेतुरीशे इति ईशत्वादेव तनुभृतामात्मा आश्रयः अत एव बन्धुः हितकारी अत एव प्रेष्ठः ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शुश्रूषध्वं पतीन्सतीरित्युक्तमुत्तरयन्ति ॥ यदिति । अङ्ग हे देव कृष्ण स्त्रीणां पत्यपत्यसुहृदामनुवृत्तिः स्वधर्म इति यच्छास्त्रविदा त्वयोक्त तदपि वरेऽस्माभिर्व्रियत इति स तस्मिन्नीशे त्वय्यस्त्येव । न केवलं कुवलयलोचनानामस्माकं त्वं प्रेष्ठः किन्तु सामान्यतस्तनुभृतां बन्धुर्व आत्मा स्वामी भवान्किल समस्तसमयसिद्धमिदं प्रमेयं । अनश्वरेश्वरे पतित्वादिकं सर्वं सम्भवदिति तदादिसेवाऽपि वासुदेवात्रैव लभ्यत इति न गमनमनोऽस्माकमिति यातेति गदाग्रजेति तात्पर्यं ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदपि भगवतोक्तं स्त्रीणां स्वधर्मपरित्यागोऽनुचित इति अतः एषा रजनी घोररूपा नेह स्त्रीभिः स्थेयमिति तत्राप्याहुः-यत्पत्यपत्येति । पतिरपत्यानि सुहृदश्च एषामनुवृत्तिः स्त्रीणां स्वधर्म इति धर्मविदा त्वया उक्तबहिर्मुखा हि धर्मशास्त्रज्ञाः शारीरमेव धर्मं स्वधर्ममाहुः न त्वात्मधर्मं भगवद्धर्मं वा यतस्ते अनात्मविदः तथा धर्मविदैव त्वया न त्वस्मान्विचार्य आत्मानं वा त्वयोक्तं तस्याप्यस्माभिर्विषयनिर्द्धारः क्रियते न दूष्यते तदाहुः—अस्त्वेवमेतदिति । स्त्रीभिः स्वधर्मः कर्त्तव्यः इति यदुक्तं तदेवमेवास्तु न हि पत्यादयः धर्मस्वरूपं नाप्याधारः किन्तु निमित्तं स च धर्मः अनुष्ठीयमाणः प्रमीयमाणश्च भवति अनुष्ठीयमाणे पुत्रादयो निमित्तं प्रमीयमाणे गुरुः अतः सा अनुवृत्तिः प्रथमतो गुरावस्तु अन्यथा स्वधर्मो ज्ञात एव न स्यात् । न च भगवद्वाक्यमनुवादकं पूर्वमस्माकं धर्मज्ञानाभावात् अन्यथा तदेव क्रियेत नापि सेवाव्यतिरेकेणाऽयं धर्मः स्फुरति अन्यथा वचनमात्रेणैव गतं स्यात् अत उपदिष्टस्य सिद्ध्यर्थं सेवां कारय उपदेशस्य पदम् आश्रयः कर्त्तैव भवति अङ्गेति कोमलसम्बोधनात् नास्माभिः प्रतिकूलतया निरूप्यते । किञ्च, स्वधर्मा अनेकविधाः स्वापेक्षयोत्कृष्टविषयाः समानविषया हीनविषयाश्च तत्र पूर्वपूर्वधर्मप्राबाल्यं यथा स्त्रीणां पतिपुत्रादीनां स्वसमानानां सेवाधर्मः एवं स्वनियामकस्येश्वरस्यापि अनुवृत्तिर्मुख्यो धर्मः अन्यथा तत्प्रेरणाभावे पतिसेवादौ न प्रवर्त्तेत अतः प्रकृतेऽपि भवानीश्वरः अन्तर्यामी तादृशोऽपि भूत्वा पतिपुत्राद्यर्थं न प्रवर्त्तयसे किन्तु स्वसेवार्थमेव प्रेरयसि अतो वाक्योक्तधर्मसिद्ध्यर्थमपि भवानादौ सेव्यः । किञ्च, धर्मो धर्मिमूलः तदविरोधेन कर्त्तव्यः फलार्थश्च कर्त्तव्यः अन्यथा चेदनिष्टेपि पुरुष प्रवर्त्तयन् अनाप्तः स्यात् अत एव धर्मशास्त्रे प्रियत्वाच्छरीरस्य तदनुरोध उक्तः द्रव्यसंस्कारविरोधे द्रव्यं बलीय इति न्यायाच्च तत्कस्यचित्प्रियो देहः कस्यचिदात्मा कस्यचित्परमात्मा कस्यचिन्निर्वाहकः भवांस्तु सर्वरूपो भवति यतः अत्यन्तं प्रेष्ठः परमप्रेमानन्दः बन्धुर्दहनिर्वाहकश्च । किञ्च, न केवलमस्माकं किन्तु तनुभृतां सर्वेषामेव देहधारिणां भवाय नाशायेत्यत्र त्वया दत्तमेव

शरीरं त्वद्विचारितप्रयोजनार्थं जीवो गृहीत्वा तिष्ठतीति निरूपितम् अतः स देहः भगवदीयः भगवतैव स्थापितः तस्मै निवेद्य तदनुपयोगे जाते पश्चादन्यस्मै देयं चेतनो हि प्रेयः अतः यावद्भगवदुपयोगं ज्ञास्यति तावन्नान्यस्मै दास्यति बोधितोऽपि यतस्तनुभृतां त्वमेव प्रेष्ठःप्रेष्ठाय च देयं प्रियं वस्तु अत्रार्थे किलेति प्रसिद्धिरेव प्रमाणम् । किञ्च, न केवलं देहदाता किन्तु बन्धुरपि येन प्रयत्नेन शरीरं बिभर्ति स बन्धुः आत्मा धारकश्च अतोन्तरङ्गबहिरङ्गन्यायेन नित्यानित्यन्यायेन वा भवत्सेवैव मुख्या पुनस्त्वदनुपयोगस्तत्रापि चेत्तथा प्रेरणं तदाऽन्यस्मै दास्यामो नान्यथेति धर्मिविचारः धर्मादप्यधिकः एतच्च त्वदनङ्गीकृतं सर्वमेव विरुद्धं भवतीति प्रार्थ्यते अस्त्विति सर्वरूपत्वात्त्वमेव सेव्यं इति वा अन्यत्र एकदा सर्वसेवा प्राप्ता अंशतो बाधिता स्यात् विनिगमकाभावाच्च अनेन स धर्मोऽपि न भवति यः कालादिना बाध्यते अशक्यश्च भवति न हि प्रमाणं विरुद्धं विधत्ते अतः पत्यादिसेवाविधायकं च शास्त्रं त्वत्सेवामेव विधत्ते अतः अनुवादपक्षे स्वतन्त्रविधानपक्षे वा भवत्सेवैवोचितेति भावः ॥ ३२ ॥

श्रीसुबोधिनी-सारः

पतिपुत्रसुहृदामनुवृत्तिरनुकूलाचरणं स्त्रीणां स्वधर्म इति धर्मविदा त्वया यदुक्तम् एतत् उपदेशानां पदे बिषये स्थाने वा ईशे त्वय्यस्तु तनुभृतां देहिनां भवान् प्रेष्ठो बंधुरात्मा च किल एव ॥ ३२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अस्त्वेवमेतदित्यत्र, एवमित्यस्यस्य विवृतिः सर्वरूपेति । पत्यादिसर्वसेवारूपेत्यर्थः । एवमुक्तौ हेतुमाहुः अन्यत्रेत्यादिना । पत्यादिसेवाविवेर्भगवत्सेवाविधायकत्वोक्त्या त्वमेव सेव्य इति पक्षेप्युपपत्तिरुक्तेति ज्ञेयम् ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'भर्तृशुश्रूषणं स्त्रीणां परो धर्मः' इति यद्भगवतोक्तं तत्रोत्तरमाहुः—यदिति । 'अस्मद्दुःखेन तवापि दुःखित्वमुचितं स्नेहातिशयेनाभेदात्कथ प्रत्याख्यानेनास्मासु स्ववियोगजं दुःखमुत्पादयसि ?' इति सूचयन्त्यः सम्बोधयन्ति—अङ्गेति । पतिरपत्यानि सुहृदस्तद्बन्धवस्तेषामनुवृत्तिः स्त्रीणां स्वधर्म इति यत् त्वयोक्तं तदेवनेव, नात्र सन्देहः । सन्देहाभावे हेतुं सूचयन्त्य आहुः—धर्मविदेति । परं त्वेतत् पत्यादिषु कर्तव्यमनुवर्तनं त्वय्येवास्तु । ननु 'मद्भजनेन पत्यादिभजनं कथं सिध्येत्' तत्राहुः–उपदेशपदे इति । शुश्रूषणीयत्वेनोपदिश्यमानानां पत्यादिनां पदे अधिष्ठाने । तत्र हेतुमाहुः—ईश इति । सकलधर्मोपदेशानामीश्वराराधनार्थत्वात् तं त्वां विहाय पत्याद्याराधनेन किम् ? अतः साक्षात्तवाराधनमेव कर्तव्यमित्याशयः । किञ्च 'प्रेमास्पदस्य सेवा सुखकरी भवति' इत्याशयेनाहुः–तनुभृतां सर्वप्राणिनां भवान् प्रेष्ठ इति । सर्वप्रेष्ठत्वे तदाराधनेनैव पत्यादिसर्वाराधनसिद्धौ च हेतुद्वयमाहुः–बन्धुरिति हितकर्ता, आत्मेति च । पत्यादीनामप्यात्मसहितानामेव सेवा विहिता, तद्रहितानां तु गृहान्निष्कास्य दाहादिविधानादिति ज्ञेयम् । "न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति" इत्यादिशास्त्रसिद्ध एवायमर्थ इति सूचयन्ति—किलेति । नच 'गोपीनां कथमेवं भगवत्तत्त्वविज्ञानम्' इति शङ्कनीयम्, तासां श्रुत्याद्यवतारतया अलौकिकप्रकारेणैव तथाज्ञानसम्भवात् । गोपीनां चातुर्विध्यं पाद्मे उक्तम्–"गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः । देवकन्याश्च राजेन्द्र न मानुष्यः कथंचन" इति ॥ तत्र बृहद्वामनपुराणे श्रुतिभिर्भगवान् प्रार्थितः—"कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः । कामिनीभावमासाद्य स्मरक्षुब्ध्या न संशयः ॥ यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः । भजन्ति रमणं मत्वा चिकीर्षा जनिता तथा" इति ॥ भगवानपि तथैव वरं दत्तवान्–"आगामिनि विरिञ्चौ तु जाते सृष्ट्यर्थमुद्यमे ॥ कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ" इति । तथा ऋषिरूपास्तु याः प्रोक्तास्तास्तु ब्रह्मोतरखण्डवाक्याज्ज्ञेयाः—"पुरा महर्षयः सर्वे दण्डकारण्यवासिनः ॥ दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम् ॥ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले ॥ हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात्" इति । देवकन्यास्तु 'सम्भवन्तु सुरस्त्रियः' इत्यत्रैवोक्ताः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

यदिति ॥ अङ्ग हे प्रभो ! पतिः अपत्यानि सुहृदस्तद्बन्धवस्तेषामनुवृत्तिः स्त्रीणां स्वधर्म इति यत् धर्मविदा त्वयोक्तं तत् उपदेशपदे उपदेष्टरि ईशे त्वय्येवास्तु । अन्य एव भवता उपदेष्टव्यो न वयमिति । यद्वा । शुश्रूषणीयत्वेनोपदिश्यमानानां पत्यादीनां पदे अधिष्ठाने ईश्वरे त्वय्येवास्तु । सकलधर्मोपदेशानामीश्वराराधनार्थत्वात् । तं त्वां विहाय पत्याद्याराधनेन किमतः साक्षात्तवाराधनमेव योग्यम् । किल हेतौ । भवान् सर्वेषां तनुभृतां प्रेष्ठो बन्धुरात्मा चेति । यद्वा । बन्धुरः सुन्दर आत्मा यस्य सः ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे अंग कृष्णपत्यादीनां अनुवृत्तिः अनुसरणं स्त्रीणां स्वधर्म इति यत्त्वयोक्तं एतत्सर्वं उपदेशानां धर्मोपदेशानां पदे वक्तरि ईशे करणीया करणीयं विधातुं समर्थे त्वयि सर्वांतरात्मनि अस्त्वेव यतस्तनुभृतां प्रेष्ठः परमप्राप्यः आत्मा परमात्मा बधुः बंधुवद्धितकर्त्ता भवानस्ति अस्तवानुवृत्त्या सर्वेषामेवानुवृत्तिः सिद्धेति भावः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यदुक्तं 'भर्तृशुश्रूषणं स्त्रीणाम्' इत्यादि तदनूद्य तत्रोत्तरमाहुः ॥ यदिति ॥ हे अङ्ग श्रीकृष्ण, धर्मविदा त्वया, पतिश्च अपत्यानि च सुहृदश्च तेषां, अनुवृत्तिः, स्त्रीणां स्वधमः स्वानुरूपो धर्मः इति यत् उक्तं, एतत् एवं त्वदुक्तप्रकारेण, ईशे ईश्वरे त्वयि पद्यते गम्यते इति पदमुपदेशार्थं पदमुपदेशपदं तस्मिन् सति, अस्तु त्वय्युपदेशार्थं गन्तव्ये सत्येवमेवास्तु, न च भवान् सांप्रतं देशिकतां स्वीकृत्योपदेशं विधातुं स्थितः, न च वयं धर्मोपदेशग्रहणार्थं त्वां प्राप्ताः किं तु त्वत्सङ्गमत्येति भावः। एतदेवाविश्चक्रुः। भवान् प्रेष्ठः प्रियतमः। प्रेष्ठत्वे हेतुः। तनुभृतां आत्मा, बन्धुर्निरुपाधिकबन्धुश्च, अस्ति किल। 'स वै पतिः स्यादकुतोभयः स्वयम्' इत्यादि लक्ष्मीवाक्यात् सर्वान्तरात्मत्वान्निरुपाधिकबन्धुत्वात्त्वमेव प्रेष्ठ इति मत्वा लक्ष्मीवत् सत्यं पतिं त्वां विबुध्य त्वत्संगमार्थं त्वामेवानुप्राप्तास्ततस्त्वत्संगमेनैवापत्यसुहृदादिकानुवृत्तिफलं प्राप्यं भवतु नान्यथेति भावः॥ ३२॥

कृष्णप्रिया

प्यारे श्यामसुन्दर ! तुम सब धर्मों का रहस्य जानते हो। तुम्हारा यह कहना कि 'अपने पति, पुत्र और भाई-बन्धुओं की सेवा करना ही स्त्रियों का स्वधर्म है'—अक्षरशः ठीक हे। परन्तु इस उपदेश के अनुसार हमें तुम्हारी ही सेवा करनी चाहिये, क्योंकि तुम्हीं सब उपदेशों के पद (चरम लक्ष्य) हो, साक्षात् भगवान् हो। तुम्हीं समस्त शरीरधारियों के सुहृद हो, आत्मा हो और परम प्रियतम हो॥ ३२॥

कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन् [1]नित्यप्रिये पतिसुतादिभिरार्तिदैः किम्।
तन्नः प्रसीद [2]वरदेश्वर मा स्म [3]छिन्द्या आशां [4]धृतां त्वयि [5]चिरादरविन्दनेत्र॥ ३३॥

कर्दमक्षमा

अन्वयः—कुशलाः, हि, स्व, आत्मन्, आत्मनि, नित्यप्रिये, त्वयि, रतिम्, कुर्वन्ति, आर्तिदैः, पतिसुतादिभिः, किम्? तत्, तस्मात्, हे परमेश्वर ! नः, प्रसीद, हे अरविन्दनेत्र, त्वयि, चिराद्, भृताम्, आशाम्, मास्म छिन्द्याः॥ ३३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतत्सदाचारेण द्रढयंत्यः प्रार्थयंते। कुर्वतीति। कुशलाः शास्त्रनिपुणाः। तथा च शास्त्रम्। "किं प्रजया करिष्यामो येषां नोऽयमात्मा लोकः" इति॥ ३३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतत् पूर्वोक्तम्, तनुभृतामात्मैव बन्धुरित्येतत्। सदाचारेण सतां प्रवृत्त्या। शास्त्रनिपुणाः सारासारविवेकपटवः। आत्मन्निति सप्तम्यन्तम्, आर्षत्वान्ङिलोपः परमेव्योमन्निितिवत्। स्वे आत्मनि अनिमित्तबंधौ, पत्यादयस्त्वनित्यप्रिया अत एवार्तिदा इति। अनित्यप्रियाणामार्तिदत्वम् "प्रियं त्वां रोत्स्यति" इति श्रुतिराह। प्रियम् अनित्यप्रियम्। वियोगि पुत्रधनादि। नित्यप्रियस्यात्मनो वियोगाभावाद्रतिविषयत्वमुचितमेव अनेन 'क्रंदंति वत्सा बालाश्च' इति प्रत्युक्तम्। प्रजादित्यागे श्रुतिमाह—किं प्रजयेति। येषामस्माकमात्मालोक आत्मदर्शनं संसृतिहर, न पुत्रादिरिति तदर्थः। अरविंदवद्रात्रावप्रकाशमाने नेत्रे यस्यातः परमसुंदरोऽवस्मासूपेक्षा युक्तैवेति संबुद्ध्या सूचितम्। आशाम् तद्रूपां लतां प्रेमजलसेचनार्हां वचनकुठारेण मा छिंद्या इति भावः। परमेश्वरेति। ईश्वरोऽप्याशां पूरयति राजादिः। किमुत परमेश्वरस्त्वम्! ततो नायं परमेशधर्मो यदाशाच्छेद इति संबुद्ध्याऽऽहुः। 'वरदेश्वर' इति पाठे 'मयेमा रंस्यथ क्षपाः' इति वरं दत्त्वाधुना वरखंडको जात इति पूर्ववदभिप्रायः संबुद्धेः। "भुंक्ते परत्र दुःखानि कल्प आशाऽपहारतः" इत्यादि वाक्यात्समर्थानामाशापूरणमेव धर्म इति बोध्यम्॥ काश्चित्तदनुवादिन्यस्तमेवोक्तमर्थं सदाचारेणापि द्रढयन्ति—कुर्वंतीति। कुशलाः "य एतस्मिन्महाभागे प्रीतिं कुर्वंति मानवाः। नारयोऽभिभवंत्येतान्विष्णु पक्षानिवासुराः॥" इति गर्गोक्तिविश्वासाच्चतुराः। न च रतिं कुर्वंतीत्यपि वस्तुतो वाक्यं, यतस्त्वयि रतिः स्वभावत एव कुशलानामित्यर्थः। स्वे स्वीये इति त्वमेव तेषां ममतास्पदम्। आत्मनीति। त्वमेवाहंतास्पदश्चात एव नित्यप्रिये इति। प्रीतिरपि त्वयि नित्यैव, पतिसुतादिषु त्वौपाधिकी, अत एवानित्या। अस्माकं तेषु सापि नास्तीत्याहुः—आर्तिदैस्त्वदभिसारवारकत्वाद्दुःखदैः। तत्तस्मान्नोऽस्मभ्यम् अस्मान्, जीवयितुं प्रसीद। यदि वा अस्मानन्योढाः मा जीवय एताः अनूढास्तु किं रोदयसीत्याहुः—हे वरद 'संकल्पो विदितः साध्व्यः' इत्यादिना एताभ्यस्त्वं वरमदा एवेत्यर्थः। नन्वेतासु प्रसादे कात्यायन्यर्चनमेव कारणं, भवतीषु मत्प्रसादे किं कारणम्, तत्र निष्कारणमेव प्रसीदेति सकाकु प्रार्थयामासुः—हे ईश्वर स्वचिकीर्षिते स्वपरतंत्र! चिरात् बाल्यमारभ्य त्वयि धृतामाशाम् आशाकल्पलतां संप्रति फलवतीं मा छिंद्याः। फलवती लता हि सत्पुरुषेण छेदं नार्हतीति चिरादिति छिंद्या इति पदाभ्यां द्योतितम्। एषा ह्याशालताप्यस्मन्मनः केदारिकायां त्वयंवारोपितेत्याहुः—हे अरविंदनेत्र अस्मद्वयःसंस्कास्ते प्रथमदर्शनसमयेऽरविंदतुल्याभ्यां नेत्राभ्यां त्वत्प्रेषिताभ्यामस्मन्नेत्ररंध्रेषु प्रविश्य हृदयक्षेत्रे भावाभिधानमाशालताबीजमाहितमिति

---

१. नित्याप्रियैः—विज.। २. परमश्वर—श्रीधर. वंशी. जीव. विश्व. ध. रा. शु. सु.; वरदेश्वर वीर. विज.। ३. चिछन्द्याव-इति कस्यचित्। ४. भृता श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. ध. रा.। ५. परामरविन्द—विज.।

ध्वनितम्। "चक्षूरागः प्रथमं चित्तासंगस्ततोऽथ संकल्पः" इति रसशास्त्रोक्तरीत्या। सैवाशालता गुणरूपश्रवणदर्शनादिना वर्द्धिता फलवती भुक्तभुज्यमानफलापि कठोरोक्तिकुठारिकया कथमद्य छिद्यते। "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्" इति न्यायं जानास्येवेत्यनुध्वनितम् ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं शास्त्रबलेन पत्यादौ शुश्रूषणं प्रत्याख्याय सदाचारबलेनापि प्रत्याचक्षाणा "मातरः पितरः पुत्राः" इत्यादिना प्रपञ्चितं तत्स्नेहनिगडं विशेषतः परिहरन्ति—कुर्वन्ति हीत्यर्द्धकेन। हि प्रसिद्धौ कुशलाः "य एतस्मिन्महाभागे प्रीतिं कुर्वन्ति मानवाः" इत्यादि श्रीगर्गवाक्यानुसारेण साराऽसारविवेकचतुराः त्वयि नित्यप्रिये स्वाभाविकप्रेमास्पदरूपे रतिं प्रीतिं कुर्वन्ति इति तस्य स्वस्मिन्परस्मिंश्च सुखमयस्फुरणमभिप्रेतं पत्यादीनां तद्वैपरीत्यमाहुः—स्वे आत्मीये आत्मन् आत्मनि च आर्त्तिदैः दुःखप्रदैः तादृशभगवद्विमुखतापादकास्मन्निवारणतात्पर्य्यात् अतस्तैः पत्यादिभिरस्माकं किं प्रयोजनम् स्व इति सर्वनामत्वेऽपि पूर्वादित्वेन स्मात् स्मिनोर्विकल्पात् तदेवं प्रथमदिक्स्थिता, भक्ता भजस्वेत्युपक्रमानुरूपं विवक्षितमुपसंहरन्ति, तत् तस्मात् नोऽस्माकम् सम्बन्धे अस्मान् प्रतीत्यर्थः। प्रसादस्यैवावश्यकार्य्यताभिप्रायेण व्यतिरेकमुखेनाभिव्यञ्जयन्ति—मा स्मेति। चिरात् आबोधादयात् धृतां नैश्चल्येन कृताम् इति पतिभिः सह तत्सम्बन्धो निरस्तः मा छिन्द्याः किन्तु सफलयेत्यर्थः। अन्यथा तच्छेदेन तदेकालम्बनजीवनानामस्माकम् सद्यो जीवनच्छेदः स्यादिति भावः। आशामेव विशेषेण व्यञ्जयन्ति—हे वरद ! कुमारीषु सङ्कल्पो विदित इत्यादिना दत्तवरविशेष ! हे ईश्वर ! अन्यासामपि दुर्घटं मन आदिघटनाविशेससमर्थेति चिराद्धृतामित्यत्र हेतुः हे अरविन्दनेत्रेति शरदुदाशय इत्यादि वक्ष्यमाणात् अरं चक्रप्रान्तं तदिव अरं तत्पत्राग्रभागः हृदयच्छेदकत्वेन तद्विन्दतीति तु संरम्भस्यान्तस्थितेः श्लेषश्च अरविन्दवत् रात्रावप्रकाशमाने नेत्रे यस्येत्यतः परमसुन्दरीष्वप्यस्मासु सम्प्रति तवोपेक्षा युक्तैवेति नर्मद्योतना च। किञ्च, अरविन्दरूपकेण दृष्टयापि सर्वेषां तापहारित्वं ध्वनितम् अतोस्मासु तद्वैपरीत्यमयुक्तमिति भावः। ऐश्वर्य्यार्थस्तु हि शास्त्रप्रसिद्धौ कुशलाः श्रीनारदादयः रतिं भावं न तु श्रद्धामात्रं तच्च योग्यमित्याहुः नित्यप्रिये कुतो नित्यत्वं प्रियत्वञ्च तत्राहुः—स्वे आत्मन्यपि विषये आत्मनि परमात्मनि इत्यर्थः "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" इत्युक्तेः। एतेन तस्य सुखरूपत्वं च ध्वनितम् अन्यथा निरुपाधिप्रेमास्पदत्वं न स्यात् अतोऽस्माकं पत्यादिभिः किम् अपि तु न किञ्चित् प्रयोजनमित्यर्थः। ननु, भवतीनां पत्यादयोऽपि मादृशा नित्यप्रिया एव नेत्याहुः आर्त्तिदैः तादृशकुशलवृन्दाभिलषितास्मदीयभगवद्भजनविरोधिभिः किं ? हे वरदेश्वरेति वरस्याव्यभिचारित्व दर्शितमिति एवमुत्तरत्रात्यूह्य निषेधार्थश्चायं ननु, अहं तनुभृतां प्रेष्ठश्चेत् तर्हि स्वस्वोचितप्रेमकर्त्तारस्त इव भवत्योपि स्वोचितं रत्याख्यं भावमेव मयि कुर्वतामित्याशङ्क्याहुः—कुशलाः मङ्गलरूपाः साध्व्य इति यावत् आर्त्तिदैः दुःखावखण्डकैः पत्यादिभिर्हेतुभिः स्वे गृहादौ आत्मनि च नित्यप्रिये सति किं त्वयि रतिं कुर्वन्ति अपि तु न तत्र स्वादिनाशापत्तेः तत् तस्मात् हे वरद ! वाञ्छितप्रद ! ईश्वर ! गोकुलस्वामिन् ! नः प्रसीद प्रसादमेवाहुः चिराद्वयमत्र माऽऽस्म न तिष्ठाम अस्तेर्लुङ्लिङ्वत् प्रयोग आर्षः शीघ्रं गृहगमनायानुज्ञां देहीत्यर्थः। तथा त्वयि धृताम् अवस्थिताम् आशां चास्मदङ्गसङ्गेच्छारूपां छिन्द्याः छिन्धि "धृङ् अवस्थाने" इति अत्र वरदेश्वरेत्यत्र परमेश्वरेति पाठोऽपीश्वरवत्सङ्गमनीयः छिन्द्या इत्यत्र छिन्द्यादिति पाठे तु भवानित्यध्याहार्यम् ॥ ३३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु कामाब्धिचन्द्र ! न केवलमस्माभिः कामेनैवेदमुच्यते, किन्तु सदाचारादिविचारादपीति रुदत्यः सकाकु प्रार्थयन्ते—कुर्वन्ति हीति। हि एव, त्वय्येव, न त्वन्यत्र, रतिं प्रेम, न तु श्रद्धामात्रम्, तत्र हेतुः—स्वे बन्धौ, आत्मन् आत्मनि; चेतयितरि च, अतो नित्यप्रिये बहिरन्तरुपकारित्वात् सुखप्रदत्वाच्च, यद्वा, हे आत्मन् ! हे नित्येति सम्बोधनम्, तेन च पत्यादीनां जडत्वमनित्यत्वं च, तथा सा इति प्रिय इति च क्रमेण हितकारितया स्वाभाविकतया च प्रियत्वोक्त्या वैपरीत्यमपि तेषां ध्वनितम्, अतोऽस्माकं पत्यादिभिः किम् ? अपि तु न किञ्चित् प्रयोजनमित्यर्थः। पत्यादिप्रयोजनस्य तदधिकस्यापि त्वत्त एव सुसिद्धेः, विशेषतश्चार्त्तिदैः, संसारहेतुत्वात् नश्वरत्वेन शोकादिजनकत्वाच्च। आदि-शब्देन जननी-पितृभ्रात्रादयः। यद्वा, आर्त्तिदैरपि 'दो अवखण्डने' ते दुःखं सम्यगवखण्डयितुं न शक्ता एव, कथञ्चित् कदाचिद्वा किञ्चित् दुःखं खण्डयन्तु, तथापि तैः किमित्यर्थः। अन्यत् समानम्। यद्वा, कुशलाश्चतुरा नित्यप्रिये सर्वदा प्रेमास्पदे त्वयि रतिं कुर्वन्ति, एव आत्मन् स्वात्मनि स्वात्मविषये आर्त्तिदैर्दुःखदैः पत्यादिभिः किं प्रयोजनमित्यर्थः। तत्तस्मात् सदाचारप्राप्तत्वेनान्येषामार्त्तिदत्वेन च त्वद्रतेरेव कार्य्यत्वात्, 'नः' त्वद्भक्ता अस्मान् प्रति प्रसीद, स्वीकारप्रसादं कुरु। ननु, भूषणप्रियाः प्रायोऽङ्गनाः स्युरिति कश्चिदन्यो मत्तो भूषणादिप्रसादो गृह्यताम्, तत्राहुः—वरदानां ब्रह्मादीनां सर्वेषामपीश्वर इति, अतोऽसाधारणप्रसाद एव तवोपयुज्यत इति भावः। तमेवाभिव्यञ्जयन्ति—मा स्मेति। स्मेति प्रसिद्धया दृढीकरणम्, चिरात् आबाधोदयात्, आशरीरग्रहणाद्वा, धृतां नैश्चल्येन कृतां रत्याशामिति पतिभिः सह तत्सम्बन्धो निरस्तः, मा छिन्द्याः किन्तु सफलयेत्यर्थः। अन्यथा तच्छेदेन तदेकावलम्बजीवनानामस्माक सद्यो जीवनच्छेदापत्तिरिति

भावः । धृतामित्यत्र हेतुः—हे अरविन्दनेत्रेति परमसुन्दरेत्यर्थः । अतोऽग्रेऽपि गास्यते (भा० १०।३१।२) 'शरदुदाशये' इत्यादि, यद्वा, अरविन्दरूपकेण दृष्ट्यैव सर्वेषां तापहारित्वादिकं ध्वनितम्, अतोऽस्मासु तद्वैपरीत्यमयुक्तमिति भावः ।

किञ्च, वरदेश्वरेति पूर्वं वस्त्रहरणे दत्तो वरोऽपि स्मारितः, श्लेषेण, वरद (दो अवखण्डने) स्वदत्तवरच्छेदक ! तच्च युक्तमेवेत्याहुः—ईश्वर परमस्वतन्त्रेति । एषा प्रणयकोपोक्तिः । यद्यपि कृतकात्यायनीव्रताः कुमारीः प्रत्येव वरो दत्तोऽस्ति, तथापि छत्रिणो गच्छन्तीत्यादिन्यायेन अन्या अपि सख्येन साम्यात् गृहीताः । अन्यत्तैर्व्याख्यातम् । यद्वा, अहो महानागर ! कथञ्चिन्मुग्धा वा त्वां न भजन्तु, वयं कथं त्वां न भजेमेत्याहुः—कुर्वन्तीति । कुशला विदग्धाः, अतो विदग्धानामस्माकं तैः किमित्यर्थः । विशेषतश्चास्मान् प्रति त्वया वरोदत्तोऽस्तीत्यभिप्रायेणाहुः—तदिति । अन्यत् समानम् । अनेन 'मातरः' इत्यस्योत्तरं तेषामार्त्तिदत्वेनोपेक्ष्यत्वात् । यद्वा, पूर्वोक्तान्त्यपक्षानुसारेण मरणमेव द्रढयन्त्यः प्रार्थयन्ते—कुर्वन्तीति । स्वे गोलक्षणधने आत्मा चित्तं यस्य तत्सम्बोधनम्; अलुक्समासः । तेनावैदग्ध्यादिकमभिप्रेतम्, न विद्यते प्रियः कोऽपि यस्य तस्मिन् अप्रिये त्वयि, इति हेतोरार्त्तिदैर्दुःखच्छेदकैः पत्यादिभिः सह वर्त्तमानाः कुशलाश्चतुरा अस्मादृश्यः किमिति कुतो रतिं कुर्वन्ति, अपि तु अस्थाने कर्त्तुं नार्हन्तीत्यर्थः । तदस्मान् प्रति मा प्रसीद, आशां च छिन्द्याः, गां विन्दतीति गोविन्दवत् अरं परमतीक्ष्णं प्रान्ते अंगतया विन्दतीत्यरविन्दं चक्र तद्वत् छेदके नेत्रे यस्येति, श्लेषेण परमघातकत्वं च सूचितम्, एषा मुमुषया कोपोक्तिः । किञ्च, अरविन्दवत् रात्रावप्रकाशमाने नेत्रे यस्येति, अतः परमसुन्दरीष्वप्यस्मास्वधुनोपेक्षा युक्तैवेति भावः । अतस्त्वया मातरमित्यादिना यत्तेषामपेक्षणमुक्तम्, तद्युक्तमेवेत्येवमसूयाभ्युपगमद्वारा तदुत्तरमूह्यम् । श्लेषार्थश्चायम्—कुशला मंगलरूपाः साध्व्य इति यावत्, नित्यप्रिये स आत्मनि निजस्वरूपे विषये आर्त्तिप्रदैरपि पत्यादिभिर्हेतुभिः किं त्वयि रतिं कुर्वन्ति ? अपि तु नैव तत्तस्मात् हे वरद ! हे ईश्वर ! नः प्रसीद चिराद्वयमत्र मा स्म मा तिष्ठाम शीघ्रं गृहगमनाय अनुज्ञां देहीत्यर्थः । त्वयि तु अपि इति च्छेदः । अयि अरविन्दनेत्र ! अस्मदंगसंगार्थं त्वया स्वयं धृतां तु आशां छिन्द्याश्छिन्धिः, यद्वा, आशां व्रजगमदिशं मा स्मा छिन्द्याः, मा वर्त्म पातयेत्यर्थः । मा निह्नुष्व । ननु, स्वयमेव निरीक्ष्य गृह्णीध्वम्, तत्राहुः—त्वयि धृतां 'धृङ् अवस्थाने' इत्यस्य त्वय्येव स्थितां त्वयाक्रान्तामित्यर्थ ॥ ३३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

मास्मच्छिन्द्याः विफलां न कुर्याः ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अत्र सदाचारं प्रमाणयन्त्यो विज्ञापयन्ति—कुर्वन्तीति । कुशलाः शास्त्रनिपुणाः आत्मन्नात्मन्यत एव नित्यप्रिये त्वय्येव रतिं कुर्वन्ति नित्यप्रिय इत्यनेन सोपाधिकपत्यादीनामनित्यप्रियत्वं सूचित तथा चोक्तम्—

"तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते । तदेव कोपाय यतः प्रसादाय च जायते" ॥
तस्माद्दुःखात्मक नास्ति न च किञ्चित्सुखात्मकम् । इति ।

कुशला इत्यनेन "नवा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय" इत्यादिशास्त्रार्थाभिज्ञत्वमभिप्रेतं यत एवमतोन्ततो दुःखदैः सोपाधिकैःपत्यादिभिः किं न किञ्चित्साध्यमस्तीति भावः । तत्तस्मान्नोऽस्साकं प्रसीद त्वयि चिरं धृतां बद्धामस्माकमाशां मास्मच्छिन्द्याः विफलां न कुर्या आत्मपर्यन्तवदान्यस्य तवेदमाशाच्छेदनमनुचितमित्यभिप्रायेण वरदेश्वरेतिसम्बोधनं त्वत्सौन्दर्यावलोकनेन त्वय्येवाशा धृतेत्यभिप्रायेण सम्बोधयन्ति अरविन्दनेत्रेति ॥ ३३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इतोऽपि त्वमेवाऽस्स्माकं मुख्यः पतिरित्याशयेनाहुः—कुर्वन्तीति । कुशलाः सारासारविवेकपटवः स्वे आत्मन् अनिमित्तबन्धावात्मनि स्वामिनि वा त्वयि रतिं कुर्वन्ति नोऽस्माकं नित्याप्रियैः पत्यादिभिः किं प्रयोजनमिति शेषः । नित्याप्रियत्वं कथमिति तत्राहुः—आर्तिदैरिति । अनेन रुदंति वत्साः इत्येतत्परिहृतं ततः किमत्राहुः—तन्न इति । यस्मात्त्वं मुख्यो भर्ताऽतस्तस्मात्तर्हि किंरूपः प्रसाद इत्यत्राहुः—मास्मेति । आशामति तृष्णाम् "आशादिगतितृष्णयोः" इति यादवः ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

साध्व्यः खलु त्वय्येव रतिं कुर्वन्ति नान्यपतिषु नापत्यादिषु च, तस्मादयमुपदेशो न कार्यः, नाप्यस्माकमाशाछेद्येति रुदन्मुख्यः काश्चिद् धीराऽधीरा आहुः—कुर्वन्ति हीत्यादि । कुशलाः कल्याण्यः, त्वयि हि त्वय्येव रतिं कुर्वन्ति । कीदृशे त्वयि ? आत्मन् आत्मनि, आत्मन्निति सम्बोधनं वा । पुनः कीदृशे ? नित्यप्रिये नित्यसुहृदि, तासामार्त्तिदैः पतिसुतादिभिः किम् ? ताः पत्यन्तरे सुतादौ च तुच्छबुद्धिमेव कुवन्ति, अतः कुमार्य एव कुशलाः, यतस्त्वयि नित्यप्रिये रतिं कुर्वाणाः पत्यपत्यादि तुच्छीचक्रुः, त्वदितरानङ्गीकारात् । तत् तस्मान्नोऽस्मभ्यं प्रसीद, मैवं ब्रूयाः । हे वरदेश्वर ! चिरात्त्वयि घृतामाशां मास्म छिन्द्याः । आशालता

यथा फलवती, तथा हे अरविन्दनेत्र ! प्रसीदेति पुनरावृत्तिः । अरविन्दनेत्रेति सम्बोधनम् । रात्रावरविन्दस्य सङ्कोचान्मुद्रितनेत्रता गम्यते, तेन कटुभाषितम्, प्रसन्नया दृष्ट्या न कथ्यत इति लोकव्यवहारात्तथैव श्रीकृष्णेन च कथितमिति गम्यते ॥ ३३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

इदन्तु सप्रमाणमेवेत्याह–कुर्वन्ति हीत्यादि । कुशलाः सारासार–विवेकचतुरास्त्वयि हि त्वय्येव रतिं कुर्वन्ति । कुशला इति कुमारीरुद्दिश्य वदन्ति, एतास्त्वय्येव रति कुर्वाणाः पत्यादिषु निस्पृहा बभूवुः अन्यपत्याकाङ्क्षायाः सुताकाङ्क्षायाश्चासम्भवः, प्राकृतत्वात्, त्वत्पतित्वे तु न तथा, तैः किमपराद्धमित्याहुः–पतिसुतादिभिरार्त्तिदैः किम् ? ते केवलमार्त्तिदाः, न तु त्वम्, त्वं केवलं प्रिय एवेत्याहुः—नित्यप्रियनित्यश्च प्रियश्चेति तथा; अतोऽस्माभिर्विवेककौशलादेव पत्यादीन् हित्वा त्वय्येव रतिः कृता । ततोऽस्मभ्यं किंरूपः प्रसाद इत्यपेक्षायामाहु–मास्मच्छिन्द्या आशामित्यादि । हे अरविन्दनेत्र ! प्रसन्नया दृष्ट्या नो विलोकयेति भावः । नेत्र सङ्कोचेन कथमीक्षसे, रात्रौ अरविन्दस्य सङ्कोचादरविन्दनेत्रेति सङ्कोचपरम् स च दर्शने तात्पर्यमित्यूढमात्राणामुक्तिः ॥ ३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

काश्चित्तदनुवादिन्यस्तमेवोक्तमर्थं सदाचारेणापि दृढयन्ति कुर्वन्तीति कुशलाः—

"य एतस्मिन्महाभागे प्रीतिं कुर्वन्ति मानवाः । नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुराः" ॥

इति गर्गोक्तिविश्वासाच्चतुराः न च रतिं कुर्वन्तीत्यपि वस्तुतो वाक्यं यतस्त्वयि रतिः स्वाभाविक्येव कुशलानामित्याहुः–स्वे-स्वीये इति त्वमेव तेषां ममतास्पदम् आत्मनीति त्वमेवाहन्तास्पदं चात एव नित्यप्रिये इति प्रीतिरपि त्वयि नित्यैव पतिसुतादिषु तु औपाधिकी अत एवानित्या अस्माकं तु तेषु सापि नास्तीत्याहुः आर्त्तिदैस्त्वदभिसारवारकत्वाद्दुःखदैः तत्तस्मान्नोऽस्मभ्यम् अस्मान् जीवयितुं प्रसीद यदिवाऽस्मानन्योढा मा जीवय एताः अनूढास्त्वं किं रोदयसीत्याहुः–हे वरद ! "सङ्कल्पो विदितः साध्व्यः !" इत्यादिना एताभ्यस्त्वं वरमदा एवेत्यर्थः । नन्वेतासु प्रसादे कात्यायन्यर्चनमेव कारणं भवतीषु मत्प्रसादे किं कारणं तत्र निष्कारणमेव प्रसीदेति सकाकुप्रार्थनमाहुः–हे ईश्वर ! स्वचिकीर्षितं स्वपरतन्त्रचिरात्बाल्यमारभ्य त्वयि धृताम् आशाम् आशाकल्पलतां सम्प्रति फलवतीं मा छिन्द्याः फलवती लता हि सत्पुरुषेण छेदं नार्हतीति चिरादिति छिन्द्या इति पदाभ्यां द्योतितम् एषा ह्याशालताऽप्यस्मन्मनः केदारिकायां त्वयैवारोपितेत्याहुः, हे अरविंन्दनेत्र ! अस्मद्वयःसन्ध्यारम्भे प्रथमदर्शनसमये अरविन्दतुल्याभ्यां नेत्राभ्यां त्वत्प्रेषिताभ्यामस्मन्नेत्ररन्ध्रेषु प्रविश्य हृदयक्षेत्रे भावाभिधानमाशालताबीजमाहितमिति ध्वनितम् "चक्षूरागः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः" इति रसशास्त्रोक्तरीत्या सैवाशालता गुणरूपश्रवणदर्शनादिना वर्द्धिता फलवती भुक्तभुज्यमानफलापि कठोरोक्तिकुठारिकया कथमद्य छिद्यते "विषवृक्षोपि सम्वर्द्धय स्वयं छेत्तुमसाम्मतम्" इति न्यायं जानास्येवेत्यनुध्वनितम् ॥ ३३ ॥

श्रीरसिकाह्लादिनी टीका

किं च आत्मारामाश्च मुनय इति मुक्ता अपि भजन्तो दृश्यन्त तत्र सदाचारं त्याजयित्वा पत्यादिशुश्रूषणमुपदिश्यत इति कोऽयमाग्रह इति । मातरः पितरः पुत्रा इति । तेषामागमनशंकामुत्पादयता त्वया कथमस्मिन्निवारणं क्रियते । वयं तु त्वदाशहृदयाः सदाचारप्रवृत्तिदृष्टान्तेन दृढतरानुरक्ता वचनमात्रेण कथं निवृत्ता भविष्यामः इत्याशयेनाहुः कुर्वन्तीति—कुशला विवेचननिपुणाः नारदादयस्त्वयि रतिं प्रीतिं परमाराध्यपुरस्कृतत्वेन कुर्वन्ति । कथंभूते त्वयि आत्मनि लुप्तसप्तम्यन्तं स्वे सर्वस्वरूपे किं च नित्यप्रिये प्रीतिहेतुरादौदासीन्ये विद्यमानेऽपि त्यक्तुमनर्थ्यस्वभावमहिम्नांऽऽतरसुखप्रदत्वात् । यद्वा हे आत्मन् आत्मारामाणामपि देहेन्द्रियमनसामध्यक्ष । यद्वा कुशला विवेकवत्यो याज्ञिकपत्न्यः त्वयि रतिं उज्वलस्य स्थायिभावं कुर्वन्ति । हि इति निश्चयं कीदृशे स्वे आत्मनि स्वकीये आत्मनि अन्तर्यामिनि स्वरूपे तदुक्तं श्रीमुखेन "साधवो हृदयं मह्यमिति" । अत एव पत्यादिषु शक्त्यैवांतर्यामिनि मधुररसाधिकं कृतेषु स्वरूपेणेति । अत एव नित्यप्रिये सर्वदा स्वाभाविकपरमप्रेमास्पदरूपे स्वरूपे नित्यार्त्तिदैस्तत्प्रतिकूलैः पतिसुतादिभिः किं कियत्सुखं भविष्यति न किंचिदित्यर्थः । न हि धर्मस्य हेतवो भावाः दुःखप्रदाः प्रभवितुमर्हन्तीतिभावः । यद्येते दुःखप्रदाः भवेयुस्तर्हि त्यागार्हा न स्युरिति । यास्तु कुशला अविदग्धास्ता एव पत्याद्यनुवृत्तिं कुर्वन्ति, आत्मसुखानभिज्ञानां तदेवोचितं विदग्धानामस्माकमग्रे पत्यादिसेवनोपदेशस्त्वकिंचित्करः उषरे बीजोप्तमिव निःफलः । "किं च आत्मनः वै कामाय सर्वं प्रियं भवतीति" श्रुतेः । आत्मकामा विषयत्वावसितेति । प्रियाः यत आर्त्तिप्रदानां सेवा आर्तिप्रदा सुखप्रदानां सेवा सुखप्रदा तव तु सुखप्रदत्वात् त्वत्सेवा सुखरूपैवानुभवसिद्धा किं च "आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः" इति स्मृत्या स्वयमेवात्मानुसंधानवतीनामस्माकं न गुरुणा कृत्यमित्यर्थः, सुखदुःखाभावयोरेव पुरुषार्थत्वात्, पत्यादीनां सेवनं न सुखं न च दुःखाभावः अतस्त्वपुरुषार्थत्वान्नोपादेयत्वम् । किं च "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" । अन्यच्च "तच्चात्मने प्रतिबिम्बस्य यथा मुखश्रीरिति" । निर्धारितमेव नोऽस्माकमार्त्तिदैरस्मिन्निवारणेन त्वयि प्रतिकूलैः किं प्रयोजनं न किमपि नोचितं किं पुनः सेवनमिति । अत एव तेषु नात्मसम्बन्धगन्धोऽपीत्यर्थः । तस्मान्नोऽस्माकं प्रसीद औदासीन्यं परित्यज्येति स काकु दैन्यं ज्ञापयन्ति

हे वरद हे ईश्वरेति पदद्वयं अन्यथा रमणे विलम्बो नास्मृतिपथमवतरति। इदानीमेव कुमारीसंगतत्वात् सर्वा अपि नो नर्मोक्त्या किमिति व्याकुलयसीति। मयेमा रंस्यथ क्षपा इति कुमारीष्वपि प्रतिश्रुतं तत् परिपालनेन प्रसीद कौटिल्यं त्यजेत्यर्थः। यत् त्वं वरदः ईश्वरः समर्थश्च ईशितव्यानां कामसम्पादने ईश्वरत्वं न सिद्ध्येत्। वरदानां त्व सम्भवे जनाभावः पर्यवस्येत्। नन्वीश्वरत्वेन मयि ज्ञाते सति यत्र कुत्र स्थिता मच्चिन्तनं क्रियतां किमत्रावस्थानेनेति चेत्तत्राहुः हे अरविन्दलोचन नेत्रतापहरविलोचन अयं भावः अस्माकं सर्वलावण्यपुंजस्वरूपो भासि ईश्वरत्वं वैभवावस्थोपासकानां स्वरूपोपासकानां लावण्यमेव विषयः न त्वीश्वरत्वं प्रेमाभिभूतत्वात् क्वचिदुक्तिमूद्रारात् "नारायणसमो गुणैरिति" गर्गोक्त्या वा दावाग्निपानाद्यमानुषकर्मपरिशीलनेन वा परन्तु तत् ज्ञानं परोक्षमिव भाषते तदुक्तं "गोप्यो हि नित्य मुदित-हसित-प्रेक्षणं मुखम्। पश्यन्त्यो विविधा स्वाया स्तरंतिस्माश्रममुदेति"। प्रत्यक्ष्ये यथा चन्द्रे देवत्वममृतरूपत्वं च चकोरस्यामृतरूपत्वं विषयं न देवत्वं तथा श्रीकृष्णोऽपि, यद्यपि सर्वदा तापहरविलोचनत्वेन प्रतीतस्तथापि दासीनां कथं तापकरविलोचनत्वेन प्रतीयसे इदमेव चित्रं यदेव संयोगे शैत्यहेतुस्तदेव विप्रलम्भे तापहेतुरिति प्रतीमः। यद्वा वरदेश्वर वरदानामस्माकमीश्वर व्रजेश्वरपुत्रत्वात् तदा कदम्बाधिरुढाय तुभ्यं वरो दत्तः "श्यामसुन्दर ते दास्यं करवाम तवोदितमिति" अस्मत्प्रतिश्रुतानन्तरं "मयेमा रंस्यथ क्षपा" इति त्वयापि प्रतिश्रुतं तत्प्रभृति धृतामाशां त्वदंगसंगेच्छां ततोपि प्राक् पूर्वजन्मनि श्रुतिरूपाभिरस्माभिः प्रार्थितः चिकीर्षाजनितसातत्वया च वरो दत्तः "पुरा सारस्वते कल्पे व्रजे गोप्यो भविष्यथेति"। तत्प्रभृति चिरात् धृञ्अवस्थाने इति धातो रूपं धृगमवस्थितां श्रावयितुमशक्यां भवानिति शेषः मास्मच्छिद्या स्मेति वितर्कं मा छिंधि महाकालरूढज्वालाकराले क्षणमपि तद्वदिहाग्नौ पतितं शरीरं सद्य एव भस्मीभूतं स्यात् तदेव यदि जीवितहेतोराशा न स्यादिति। तव प्रतिश्रुते आशा जाता सा च बद्धमूला इदानीं प्रतिश्रुताकरणे आशा छिन्ना भवेत् अस्मच्छरीरपाते तवरमणं कुत्र भविष्यतीत्यभिप्रायः। किं च देहपातेप्यऽवश्यं त्वां प्राप्स्यामः। परन्तु अमूर्तेनास्माकमात्मना मूर्तस्य रमण कथं संभविष्यति रमणस्वभावत्वात्तवेति भावः॥ ३३॥

विशुद्धरसदीपिका

एतदेव सदाचारेण दृढयन्तः प्रार्थयन्ते–कुर्वन्तीति। कुशलाः लोकशास्त्रव्यवहारनिपुणाः त्वय्येव रतिं शुद्धां प्रीति कुर्वन्ति ये त्वयि रतिं कुर्वन्ति ते एव कुशला इति परिवृत्त्यान्वयो वा तथा च शास्त्रं "किं प्रजया करिष्याम येषां नो यमात्मा लोकः" इत्यादि कीदृशे स्वे आत्मीये पूर्वावित्वात्स्मिनो विकल्पः आत्मनि च यतः नित्यप्रिये एवं च विजातीयैरनात्मभिरनित्यप्रियैरार्त्तिदैश्च पत्यादिभिः किम्? न किमपीत्यर्थः यद्वा वरदेश्वरेत्युक्तेर्लब्धवराणां कात्यायनीव्रतपराणामियमुक्तिः तत्रायमर्थं वयं त्वयि रतिं कुर्वन्त्य एव कुशलाः अन्यथा पातिव्रत्यभङ्गादिति भावः। कीदृशे? स्वे ज्ञातौ आत्मनि परमप्रेमास्पदे नित्यप्रिये नित्ये इतीहामुत्र चेत्यर्थः। तत्तस्मात् नः अस्मान् प्रसीद वरदेश्वरेत्यनेन प्रसादप्रकारः सूचितः "मयेमा रंस्यथ क्षपाः" इति तदुक्तेः। ईश्वर इति सामर्थ्यं च व्यतिरेके दोषं सूचयन्ति–आशामिति। चिरात् जन्मारभ्य वरदानमारभ्य चेति धृतां निबद्धां मा स्म छिन्द्या तथा सति आशामययोषिद्वधः प्रसज्येतेति भावः। अरविन्दनेत्रेति रात्रिसङ्कुचनीयत्वं सूचितं ततश्च ज्ञात्वाऽस्मानेवमुक्तमित्याशाबन्ध एव दृढीकृतः लब्धसहचरीदेहानां तु मते यास्त्वयि रतिं शुद्धां प्रीतिं कुर्वन्ति ताः कुशलाः कामाद्यनावृतत्वात् कीदृशे स्वे धने निजप्राणेश्वरे भोग्ये आत्मनि पूर्ववत् नित्यप्रिये शुद्धप्रीतिविषयत्वात् एवञ्च पत्यादिभिः किम्? इति स्वभावत एव कामाद्यनाशक्तिः सूचिता ततश्च त्वय्यपि पत्यादिरूपेणासक्तिर्मा ऽस्तु किमुतान्यत्रेपि भावः॥ ३३॥

श्रीरामनारायणकृता भावभावविभाविका

एतदेव शिष्टाचारेण दृढयन्त्यः प्रार्थयन्ति–कुर्वन्तीति। हीति एवार्थतया सर्वत्र सम्बद्ध्यते ये कुशलाः स्वपरमार्थविदस्ते एव त्वय्येव रतिमेव कुर्वन्त्येवेति "तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते, ज्ञानी त्वात्मैव मे मतम्, अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति" इत्यन्वयव्यतिरेकाभ्यां ज्ञानिन एव रतेरज्ञस्य रत्यभावप्रयुक्तविनाशस्य चाभिधानात्—

"एषां बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम्। यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतम्॥
ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च सम्मतः। स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः"॥

इत्यादिना तवैव त इति विषयत्वाभिधानात् अत्रापवर्गशब्दस्य स्वरूपात्मकमोक्षातिरिक्तक्रममुक्तिपरत्वं मदृतेऽन्योर्थोऽपवर्गः स्वरूपातिरिक्तक्रममोक्षः स्वर्गश्च न प्रियः स्वरूपात्मकमोक्षस्याप्रियत्वे भगवत एवाप्रियत्वापत्तिः तथा च "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति, यो वै भूमा तत्सुखं, नित्यं विज्ञानमानन्दं ब्रह्म, आनन्दो ब्रह्मेति व्यजानात्, सच्चिदानन्दरूपाय कृष्णाय नमो विज्ञानरूपाय परमानन्दरूपिणे, आनन्दमात्रकरपादमुखोदरादिः" इत्यादिश्रुतिस्मृतिसिद्धपरमानन्दरूपस्य भगवतोऽप्रियरूपप्रतिकूलवेदनीयदुःखरूपत्वापत्तिः प्रेमपथाचार्यरूपाणांगोपीनामेव "तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन्। "नद्यःप्रविष्टा इव नामरूपे" इत्यादिस्वरूपात्मकमोक्षश्रवणविरोधश्च रतिमेव कुर्वन्त्यवत्यत्र हेतुत्वेन त्वयीत्यस्य विशेषणमाहुः, नित्यप्रिय इति, तत्रापि हेतुमाह—आत्मन्निति। लुप्तसप्तम्यन्तं पदं गौणात्मनि पुत्रादौ कदाचिदप्रियत्वदर्शनात्तद्व्यावृत्त्यर्थमाहुः स्वे मुख्यात्मनीति

"तत्त्वमसि, अयमात्मा ब्रह्म, अहमात्मा गुडाकेश" इत्यादिवचनान्नहि मुख्यात्मा कदाचिदप्रियो भवति "आत्मनस्तु कामाय सर्वं प्रियं भवति" इत्यादिश्रुतेः। नचाभेदे कथं रतिः सेव्यसेवकभावो वेति वाच्यं स्वात्मनि मुख्याभेदं मुख्यप्रतिः पुत्रादौ मुख्याभेदाभावे मुख्यप्रीत्यभावस्य तत्र गौणाभेदे गौणप्रीतेरन्यत्र शत्रुव्याघ्रादौ गौणाभेदस्याप्यभावे सर्वथा प्रीत्यभावस्य प्रत्युत भेदैकभावेन द्वेषस्यैव दर्शनादभेदतारतम्ये प्रीतितारतम्यस्य भेदतारतम्ये प्रीत्यभावतारतम्यस्य निश्चयेनाभेदस्यैव प्रीतिप्रयोजकत्वात् नित्येसवायाश्च स्वस्मिन्नेव दर्शनादन्यत्रेष्टगुरुपुत्रपत्यादौ स्वसम्बन्धनैव सेवा कादाचित्कत्वत्यात्युपलम्भात्स्वसम्बन्धाभावे सेवाया अदर्शनादीशादिसेवाफलस्यापि स्वस्मिन्नेव पर्य्यवसानात् तद्भावस्यापि अभेद एव सामञ्जस्यात् प्रायः सर्ववादिभिः स्वस्वाचार्याणां भगवदवतारत्वेन तदभेदाभिमतावपि तदनुरागित्वसेवकप्रधानत्वाङ्गीकारेण स्वस्मिंश्चेशभेददृष्ट्या तत्सदृशानुरागाद्यभावाभिमत्या भेदाभाव एवानुरागसेवयोः सामञ्जस्यसम्भवात् किञ्चाऽभेदवादिनमेव स्वरूपेणाभेदेप्यौपाधिकसेव्यसेवकभावश्चोपपद्यते उपाधेरध्यासेन स्वरूपान्तर्गतत्वात् स्वाभाविकश्च भेदवादिषु विभुत्वादिनां तु समानतया सेवकत्वानुपपत्तिः तदुक्तम्—

"अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा" ॥

इति। अणुवादिमतेषु तु कथमणुर्विभुसेवां कुर्यात् देहाद्युपाधिसम्बन्धेन सेवाया तु औपाधिकत्वेन स्वाभाविकत्वक्षतिः। किञ्च, नौपाधिकमपि सेवकत्वमणोः सम्भवति उपाधिनाणुसम्बन्धासम्भवात् नाणुदेहयोः समवायः अकार्यकारणद्रव्ययोः समवायादर्शनात् नापि संयोगस्तस्याव्याप्यवृत्तित्वेन निरंशेऽणौ तदनुपपत्तेः नापि तादात्म्यं भिन्नयोस्तदसम्भवात् नाप्यध्यासो भेदवादिमते तदनङ्गीकारात् त्वय्येवेत्येवकारव्यावर्त्यमाहुः पतिसुतादिभिः किमिति तद्व्यावर्त्यत्वे हेतुः आर्तिदैरिति। यद्वा, यास्त्वय्येव रतिमेव कुर्वन्त्येव ता एव कुशला नान्या इत्यन्वयः। तत्र हेतुः नित्यप्रिये इति अनित्ये पत्यौ जन्मान्तरे अन्यान्यपतिस्वीकारेण पातिव्रत्यभङ्गप्रसङ्ग इति भावः। स्वे आत्मनि अन्यत्र पत्युः पत्नीः पत्न्याः पतिः देहार्द्धत्वेन श्रूयते देहस्मानित्यत्वेन तत्सम्बन्धिपतित्वस्याप्यनित्यत्वं त्वन्तु न तथा किन्तु त्वं तत्सर्वजीवानां स्वात्मेति नित्यप्रियः अन्यत्र हेयत्वमाहुः पतिसुतादिभिरार्तिदः किम्? अनित्यत्वादेवादौ तत्सम्पादने आर्तिं पुनश्च प्रतिक्षणजरारोगापदादिभिरन्ते नाशेन प्रियस्त्वां रोत्स्यति—

"यावन्तः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान्। तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः" ॥

इत्यादि वचनैः एवमावश्यकत्वं भगवद्रतेरापाद्य प्रार्थनामाहुः, तन्न इति। यतो नास्माभिरनुचितमाचरितमतो नोऽस्मान् प्रसीद प्रसन्नेन मया किं कार्यं तत्राहुः—वरदेति। वरदत्वादेवास्मदभीष्टं स्वदत्तवरं च वेत्सि किमस्माभिर्वाच्यामिति भावः। ननु, बहुभ्यः कामवरो मया दत्तः परन्तु तत्सम्पादनमशक्यं तत्राहुः, ईश्वरेति। समर्थस्य तव न किमप्यसाध्यं तदुक्तं "दयालोरसमर्थस्य" तव न किमप्यसाध्यं तदुक्तम्—

"दयालोरसमर्थस्य दुःखायैव दयालुता। विश्वोद्धारधुरीणस्य सा तवैकस्य शोभते" ॥ इति।

तस्मात्समर्थत्वात्त्वयि चिराज्जन्मान्तरादिह च जन्मारभ्याऽस्माभिर्धृतामाशां वरदानेन भवता च धृतां मास्म छिन्द्यात् अरविन्दनेत्रेति तापभञ्जननयनास्मत्तापान् निवर्तय। यद्वा, हृदयकमलदृष्टः नास्मद्दुःखं तवाज्ञातमिति भावः ॥ ३३ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

सन्मार्गे प्रवृत्ता वयं प्रशस्याः न तूपालभ्मयोग्या इत्याशयेन सदाचारं प्रदर्शयन्ति–कुर्वन्तीति। कुशलाः कर्त्तव्याऽकर्तव्यादिविवेकवन्तः "किं प्रजया करिष्यामो येषां नोऽस्मात्मा लोकः" इत्यादि शास्त्रतत्त्वविद्भिः पुरुषधौरेया नारदादयो योषिद्वरा गार्गीसुलभाद्याश्च त्वयि रतिं कुर्वन्ति यतः स्वे स्वस्वरूपभूते आत्मनि अत एव नित्यप्रिये अन्यत्सर्वं यदाऽऽत्मानुकूलं भवति तदा प्रियं भवति न तु सर्वदा स्वात्मा तु सर्वदैव प्रियः तथा चैवंभूते त्वय्येव रतिं रुचितां तत्संस्थाऽमृतत्वमेति—

"यदात्मरतिरेवस्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्य कार्य्यं न विद्यते" ॥

इत्यादि शास्त्रादतः पतिसुतादिभिः किं मोक्षप्रतिबन्धकैः किं प्रयोजनम् "बन्धवो दृढबन्धनम्" इत्युक्तत्वात् प्रत्युतार्तिदैः संप्रति वियोगादिना जन्मादिना संसृतिचक्रनिःक्षेपादिना चार्तिप्रदायकैः "ये हि संस्पर्शजा भोगाः दुःखयोनय एव ते" इत्यादि शास्त्रात् एवं यथोक्तनिद्दुष्टत्वमुपपाद्य पूर्वदिक्याः प्रार्थयन्ते तदिति, यस्मात्पतिपुत्राद्यनुवृत्तिर्निन्दिता त्वदनुवृत्तिर्विहिता सदाचारप्राप्ता चाऽतोस्माभिर्योग्यमेव कृतं तस्मान्नोऽस्मान् प्रति प्रसीद ननु, मयि प्रसन्ने किं भवतीति चेत्" तत्राहुः—हे परमेश्वर! ब्रह्माद्यधीश्वरे त्वयि प्रसन्ने पुरुषार्थचतुष्टयमपि सिद्ध्यति—

"अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं परम्" ॥

इत्युक्तत्वात्। ननु, भवतु प्रसन्नोहं युष्मभ्यः मोक्षं ददामीति चेन्न वयं सम्प्रति मोक्षकामा इत्याशयेनाहुः-मास्मेति। चिराद्रामावतारादारभ्य त्वयि धृताम् अस्माभिः सह रमणं करिष्यति इत्येवं रूपामाशां भवान्मा छिन्द्यात् आशापूर्त्तिरेव प्रभुभिः क्रियते न तु तच्छेद इति प्रसिद्धिद्योतनार्थं स्मेति। ननु, सर्वात्मभावं जानतीनां युष्माकं स्वपतिरूपेण मया रमणेन सन्तोषः

किमिति न भवतीति चेत्तत्राहुः—हे अरविन्दनेत्र। अनावृत ब्रह्मात्मभावेन तुच्छीकृतकोटिकामविग्रहेण पुण्डरीकाक्षेण भगवता त्वया रमणाभिकाङ्क्षावत्यो वयं नत्वावृतब्रह्मात्मभावैर्मलमूत्रादिविग्रहैः स्वपतिभिस्त एतत्स्वरूपेणैवास्मदाशापूर्त्तिर्विधेयेति भावः। यद्वा, अरविन्दनेत्र श्रीरामचन्द्रविग्रहदर्शनजन्यैतद्विग्रहसङ्गमाशापूर्त्तिमेतद्विग्रहेणैव कर्तुं योग्योऽसीति सम्बोधनाशयः वरदेश्वर! इति पाठे वरदानामीश्वर! श्रीरामचन्द्रात्मना वने स्थितस्य तव दर्शनमात्रेणैव वरस्य लब्धत्वादिदानीं तत्साफल्यमपेक्षितमिति भावः। अनभिज्ञापक्षे यथोक्तात्मज्ञानां पक्षमवलम्ब्य यदुक्तं तत्र सदाचारं प्रमाणमाहुः—कुर्वन्तीति। कुशलाः मनीषिणो नित्यप्रिये स्वात्मभूते त्वय्येव रतिं कुर्वन्ति पतिपुत्रादिभिरार्तिदैः किमिति विचार्य्य तत्तस्मान्नः प्रसीद यतस्त्वं परमसमर्थः त्वत्प्रसादो न निष्फल इति भावः। वरदेश्वर इति पाठे "मयेमा रंस्यथ क्षपाः" इति त्वया वरो दत्तस्तं सार्थकं कर्तुं समर्थ इति भावः। तस्मादाशाच्छेदोऽत्यन्तनिषिद्ध इत्याहु—यास्मेति। चिराद्बालभावमारभ्य त्वयि धृतामाशां भवान् मा छिन्द्यात्। हे अरविन्दनेत्र! परमसुन्दर! तथा च लोकोत्तरसौन्दर्य्यविशिष्टो भवानेवास्मदन्तःकरणे प्रविश्य आशामुत्पादितवान् अतः स्वेनोत्पादितां स्वगुणैर्वर्द्धितां स्वेनैव पूरयितुं योग्यामाशालक्षणां लतां फलकाले कर्णकठोरोक्त्यादिकुठारेण छेत्तुं नार्हसि यतो "विषवृक्षोपि संवर्द्ध्य स्वयं छेतुमसम्मतम्" इति न्यायं जानास्येवेति भावः। यद्वा, आत्मज्ञानां पोषणे यदि त्वं भूतिकामस्तर्ह्याशापूर्तिरूपमस्मत्पूजनमवश्यं कुरु "आत्मज्ञमर्च्चयेद्भूतिकामः" इति श्रुतेः। इति ध्वनितं। यद्वा, य एतस्मिन्महाभागा इत्यादिगर्गोक्तिमणुस्मृत्याहुः कुर्वन्तीति। कुशलाः महद्भाग्याल्लब्धसाराऽसारविवेकिनस्त्वयि रतिं कुर्वन्ति यतः स्वीये आत्मनि अन्तःकरणे नित्यप्रिये। यद्वा, नित्यप्रिये स्वस्मिन् परस्मिश्च नित्यप्रिये त्वयि अतस्तद्विपरीतैः स्वीये आत्मनि चार्तिदैः दुःखप्रदैः प्रत्यादिभिरस्माकमपि कुशलानां किं प्रयोजनं तत्तस्मान्नः प्रसीद त्वयि चिराद्धृतामाशां भवान् मा छिन्द्यात् सर्वं परित्यज्य त्वदाशया जीवामः तदुच्छेदे त्ववलम्बनाभावात्सद्य एव मरिष्याम इति भावः। ननु, भवतीनां नाद्यापि तथाविधप्रेमातिरेको दृश्यत इत्यत एवं ब्रवीषीति चेत्तत्राहुः-हे अरविन्दनेत्र! अहो ज्ञातमस्माभिः भो सखे! रजनीयं भवांश्चारविन्दनेत्र अतो मुकुलितनेत्रकमलत्वादस्माकं प्रेम्णः पराकाष्ठां पश्यतीति सनर्मव्यङ्ग्यं मानिनीपक्षे ननु, सर्वेषां प्राणिनामहं प्रेष्ठ इति यदि भवत्यो जानन्ति? तर्हि स्वाधिकारानुरूपां रतिं कुतो न कुर्वन्तीत्याशङ्क्याहुः-कुर्वन्तीति। कुशलाः स्वधर्मनिपुणास्साध्व्यः। आर्त्तिदैः "दोऽवखण्डने" दुःखच्छेदकैः पत्यादिभिर्हेतुभूतैः स्वीये गृहादौ आत्मनि च नित्यप्रिये सति त्वयि रतिं रमणबुद्धिं कुर्वन्ति अपि तु न कुर्वन्ति इत्यर्थः। तत्तस्मान्नः प्रसीद हे परमेश्वर! व्रजाधीश्वरपुत्रत्वात्त्वत् प्रसादं प्रार्थयाम इति भावः। पाठान्तरे हे वाञ्छितप्रद! प्रसादमेवाहुः चिराद्वयमत्र मा आस्म न तिष्ठाम आस्तेर्लुङि रुपं छान्दसं शीघ्रं गृहान् गन्तुमनुजानीहीत्यर्थः। ननु चिरकालमारभ्य ममाशा वर्त्तते अत एवं न वाच्यमिति चेत्तत्राहुः—आशामिति। चिरात्त्वयि धृतां स्थिताम् अवस्थाने अस्मत्सङ्गाशान्नः परं भवान् छिन्द्यात् यतो हे अरविन्दनेत्र कमलवद्विशालनेत्रस्य प्रत्यहमस्याकं स्वधर्मनिष्ठतां पश्यतोऽत्यन्तासाध्येऽर्थे प्रार्थना नोचितेति भावः। यद्वा, कुशलाः स्वीये आत्मवन्नित्यप्रियेऽपि त्वयि पत्यादिभिः दुःखनिवारकैर्हेतुभूतैः रतिं कुर्वन्ति किम्? अपि तु न कुर्वन्ति समानमन्यत् यद्वा—

साध्वी वालयुता भ्रातृमती भर्तृप्रिया बहु। असाध्वी सा भवेन्नारी वर्जनीयाऽपमन्युदा॥

इत्युक्तमसाध्वीलक्षणं स्वस्मिन् सूचयन्त्य आहुः—कुर्वन्तीति। अहो कुशलाः अस्मदाद्याः पत्यादिभिः स्वीये आत्मनि दहादौ नित्यप्रिये तत्करणीयप्रीतिविषये सति त्वयि रतिं कुर्वन्ति किम्? तत्राप्यार्तिदैः पापसम्भावनयापि परमपीडापदैः समानमन्यत् यद्वा तिष्ठतु पतित्वविचारः, प्रीतिविचार अस्माकं तु सर्वतो विरक्तिं सम्पाद्यात्मरतिः कर्त्तव्येति सतां प्रवृत्तिदर्शनेन सम्प्रति मनीषा वर्त्तत इत्याशयेनाहुः—कुर्वन्तीति। तु अपि छदः अपि हे सौम्य हि प्रसिद्धं कुशलास्तु स्वे वस्तुतः स्वरूपभूते शुद्धं आत्मनि नित्यप्रिये रतिं कुर्वन्ति नतु तद्विपरीते देहादौ नोऽस्माकम् आर्तिदैः पत्यादिभिः किं प्रवोजनमिति विचार्य कथं कुर्वन्तीत्यपेक्षायामाहुः—तदिति। यतः सर्वदुःखस्वरूपं तस्मात् हे परमेश्वर! त्वं प्रसीद प्रसन्नो भूत्वा वयं यया विषयाशया त्वयि मा आत्मत्वदन्यभूता वयं न स्थितास्तामाशां हे अरविन्दनेत्र! भवान् छिन्द्यात् हे ईश्वर! परब्रह्मविषया मा प्रमाछिन्द्यादिति वा यद्वा हे अरविन्दनेत्र! परमेश्वरविषयिणी मा प्रमा चिरादनादिकालमारभ्य धृतां स्वीकृतां विषयाशां छिन्द्यात् ततस्त्वयि आस्म त्वदनन्याभवामेत्येवं प्रकारेण रतिं कुर्वन्तीत्यर्थः। यद्वा भो चतुरशिरोमणे नेयं परदारेषु रत्याशा शोभना कुशलास्तु स्वपतिभार्यादावपि रतिं विहाय स्वात्मन्येव रतिं कुर्वन्तीत्याशयेन आहुः—कुर्वन्तीति। तत्तस्मात्त्वमपि प्रसीद किमर्थं म्लायसीति भावः। "प्रसाद सर्वदुःखानां हानिस्योपजायते" इति प्रसिद्ध्या प्रसादे सति हे परम हे अरविन्दनेत्र ईश्वर! परमाचिरात्त्वयि अवस्थितां सर्वदुःखनिदानभूतामाशां छिन्द्यादित्यर्थः। निवृत्तिपक्षे "प्लवा ह्येते अदृढा यज्ञरूपाः, अष्टादशोक्तमवरं येषु कर्म एतच्छ्रेयोभिनन्दन्ति मूढाजरामृत्यु ते पुनरेवापियन्ति, पुरुष एवेदं विश्वं कर्म तपोब्रह्मपरामृतं, यद्विभाति, भिद्यते हृदयग्रन्थि" इत्याद्याः श्रुतयो वैराग्यादिसाधनसम्पन्नास्त्वय्येवात्मनि परमात्मस्वरूपे प्रत्यगभिन्ने यतो नित्यप्रिये रतिं कुर्वन्ति आर्त्तिदैः पत्यादिभिर्न किं प्रयोजनमिति विचार्य्य तस्मात् हे परमेश्वर चिरादनादिकालादारभ्य त्वयि धृतामाशामऽभिप्रायं कश्चिदपि मा छिन्द्यात् छेदनपरः परमेश्वरेण त्वया दण्डनीय इति सम्बोधनाशयः यद्वा तदन्तःस्थितेन त्वया न छेदनाय स न प्रेरणीय इत्याशयेनाहुः—हे अरविन्दनेत्र सर्वहृत्कमलप्रकाशन॥ ३३॥

रास-रहस्यम्

र० टी०—कुशलाः शास्त्रनिपुणाः मनीषिणः, त्वयि स्वे आत्मनि नित्यप्रिये स्वे आत्मविषये स्वरूपसुखात्मके रतिं प्रीतिं कुर्वन्ति "अतिप्रियानामार्तिदत्वं" "प्रियं त्वा रोत्स्यती"ति श्रुतेः किमार्तिदैः दुःखप्रदायकैः जन्ममृत्युरूपसंसारचक्रे निक्षेपकारकैः पतिसुतादिभिः "किं प्रजया करिष्यामो येषां नाऽयमात्माऽयं लोकः।" "ये हि संस्पर्शजा भोगाः दुःखयोनय एव ते।" इत्यादि श्रुतिस्मृत्यादिभिः, अतः हे परमेश्वर! ईश्वरादपि परमः परमात्मन्! हे अरविन्दनेत्र! अनावृतब्रह्मात्मभावेन हृदयकमल-प्रकाशक! चिराद् बहुजन्मनि त्वयि आत्मानं प्रति आशां दिशं भृतां धारणकारिणीनां नः अस्माक ब्रह्मात्मभावाभिमुखीवृत्तीनां ब्रह्मात्मत्वाप्तिविषयामाशां मा छिन्द्याः विफलां मा कुरु अपितु प्रसीद केवलाद्वैतरूपेण प्रतितिष्ठो भव ॥ ३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु, तर्हि मदात्मकत्वात्पत्यादीनामाप्यनुवृत्तिरुचितैवेत्यतस्तदनुवृत्तौ दोषं वदन्त्यः उक्तसिद्धान्तं सदाचारेण दृढयन्त्यः भगवत्यनुवृत्तिं प्रार्थयन्ते—कुर्वन्तीति। स्वे आत्मन् आत्मनि त्वयि रतिमनुवृत्तिं कुशलाः ज्ञाततत्त्वाः कुर्वन्ति न त्वन्यत्र "किङ्कर्मणा किं प्रजया किं धनेन त्यागेनैकेनामृतमानशुः" "किं प्रजया करिष्यामो येषां नोऽयमात्मलोकः" इत्याद्याः श्रुतयोऽत्रानुसन्धेयाः ॥ ३३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तदेवौत्सुक्यातिशयेन विशदयन्ति ॥ कुर्वन्तीति। कुशलाः शिक्षिताः सन्तः। कुशलः शिक्षित इति विश्वः। आत्मन्परमेव्योमन्निितिवदात्मनि स्वात्मनि त्वयि स्वे स्वतन्त्रे परः स्वो हरिरुद्दामोऽनन्याधीनशक्तित्वाद्धरिः स्व इति चोच्यत इति मात्स्य इत्यादितृतीयतात्पर्योक्तेः। हि यतो रतिं कुर्वन्ति तादृशे त्वयि सति नित्याप्रियैर्नित्यमप्रिया इति नित्याप्रियास्तैः पतिसुतादिभिरार्तिदैः पीडादैः किं किं प्रयोजनं। तत्तस्माद्वरदेश्वर समस्तमसमस्तं च हे अरविन्दनेत्र प्रसीद। त्वयि परां धृतामाशामभिलाषं मा स्म छिन्द्या अतोऽन्त्यन्तिके नोऽस्मान्कुर्वित्यावृत्त्याऽन्वयोऽपि। यदन्ति यच्चदूरके। तथा षष्ठाष्टके पञ्चमेऽध्यायेऽतिषद्भूतवामव इत्यव्याख्याने चान्त्यस्मदन्तिक इति परैरपि व्याख्यातत्वात्। अनेन क्रन्दन्तीत्याद्युत्तरितमिति ज्ञेयं अभिलाषकामादिपदं विहाय विशाललोचनां आशामिति गदन्त्यशशब्दतोऽपि नान्यपुंसङ्गोऽस्त्विति ध्वनयन्ति ॥ ३३ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं राजसीनां निरूप्य सात्त्विकीनां निरूपयति—कुर्वन्ति हीति। यदप्युक्तं मातरः पितर इति माकुध्वं बन्धुसाध्वसमिति तत्किमिदं प्रथमतया अस्माभिरेव क्रियते आहोस्वित् अन्येऽपि कुर्वन्ति तत्रापि किमधमा मात्राद्यनुवृत्तिं कुर्वन्ति आहोस्वित् उत्तमाः उत्तमा अपि त्वत्सेवायामशक्ताः आहोस्वित् शक्ता इति विचारणीयम् अस्मिन्नर्थे निर्णायकं महतां चरित्रमाहुः, यत्वात्मनि कुशलाः आत्महितार्थिनः न तु देहेन्द्रियाणां ते त्वय्येव रतिं कुर्वन्ति स्नेहेन हि क्रिया भवति भगवत्कृतमेव जीवगामि भवतीति तदुपपादितं "तच्चात्मने प्रतिमुखस्य" इत्यत्र प्रीत्या च सेवा भवति यदि पुत्रादिसेवापि धर्मः स्यात्तदा पुरुषार्थत्वेनात्मपर्यवसायिनी स्यात् कुशला इत्यनेन तेषां कौशलमेतत् प्रवृत्त्यपेक्षया निवृत्तिरुत्तमा इन्द्रियदमनसामर्थ्याभाव एव अन्यगामि कर्त्तव्यं यतो यतो निवर्त्ततेत्यत्र निरूपितं निरुद्धानीन्द्रियाण्यात्मगामीनि भवन्ति तत्राप्यात्मगामीनि तदैव भवन्ति यदि त्वदर्थमुपयुक्तानि भवन्ति अतः केवलनिग्रहकर्त्रपेक्षया ये त्वयि रतिं कुर्वन्ति ते कुशला इति हिशब्दार्थः। त्वयीत्येकवचनेन च पूर्ववदेकत्र सर्वसम्भवो निरूपितः। किञ्च, भवान् स्व.त्मा स्वरूपभूतः नरवध्यासन्यायेन तथा जातः। किञ्च, प्रियस्य हि सेवा कर्त्तव्या स चेत् प्रियः कालपरिच्छेद्यो न भवति स भवानेव अन्यथा जारसेवापि धर्मः स्यात् जन्मवद्दिनस्यापि परिच्छेदकत्वात्। किञ्च, पतिसुतादयश्च न धर्महेतवो भवितुमर्हन्ति यतः आर्त्तिदाः न हि धर्मनिमित्तानि कदाचिद्दुःखदानि भवन्ति अन्यथा संसारो न स्यात् अतस्तैः किम्? तेषां भयमस्तु अन्यद्वा, न तैः किञ्चित्प्रयोजनमित्यर्थः। परमेकमेव प्रार्थनीयं यदभावे सर्वशास्त्र युक्तिश्च व्यर्था स्यात्तदाहुः, तत्तस्मात्प्रसीद त्वं प्रसन्नो भव त्वदप्रसादादेव लोका भ्रान्ताः दुःखहेतुष्वपि प्रवर्त्तन्ते। ननु, किं साधनं प्रसादे भवतीनामिति चेत्तत्राहुः, वरदेश्वरेति। ये हि वरान् प्रयच्छन्ति ते लोकानां क्लेशं ज्ञात्वा यतो दयालवः अन्यथा तपसि क्रियमाणे वरं न प्रयच्छेयुः तेषामपि त्वमीश्वरोऽतिदयालुः तद्द्वाराऽपि सर्वेषां दुःखशमनं करोषि अतो वयं क्लिष्टाः क्लेश एव साधनं तपोवत् निषिद्धप्रकारस्तु यद्यत्र कश्चन भविष्यति स न कर्त्तव्यः। ननु यथैतावन्तं कालं पतिसेवा कृता एवमेवाग्रेऽपि कर्त्तव्या प्राप्तत्वात् गौणमपि कर्म समारब्धं समापयेदिति तस्मादविचार्यैव पतिसेवां कुरुतेति चेत्तत्राहुः मा स्म छिन्द्या आशां धृतामिति नास्माभिः पतिसेवा कृता तदर्थं वा स्थितं त्वदाशया स्थितं मध्ये स्थितिनिर्वाहार्थमेव तदङ्गीकारः इदानीं चेत्समागतानामभिलषितार्थो न सिध्येत् तदा आशा भग्ना भविष्यति तस्यां गतायां प्राणा एव गमिष्यन्तीति अत एव केनचित् स्त्रीहृदयज्ञेन निरूपितम् "आशाबन्धो हृदयं रुणद्धि" इति एतस्य मूलमपि स्त्रीशास्त्रे भविष्यति चिरात्त्वय्येव धृतां तस्यां छिन्नायाम् अवलम्बनाभावात् अधः पतिष्यामः इति स्मेत्ययमर्थः।

प्रसिद्धः अरविन्दनेत्रेति सम्बोधनं दृष्ट्यैवाप्यायकत्वं निरूपयति आशाहेतुरप्यनेनोक्तस्तापापहारकदृष्ट्या दर्शनात् भावोद्गारिण्या एव तथात्वात् इयदवधि जीवनमप्यत एवेति भावः ॥ ३३ ॥

श्रीसुबोधिनी-सारः

स्वे आत्मन् आत्मनि त्वयि नित्यप्रिये कुशला निपुणाः सारज्ञा रतिं प्रीति कुर्वंति आर्त्तिदैर्दुःखदैः पतिपुत्रादिभिः किं न किमपि हे परमेश्वर त्वयि चिरात् बहुकालात् भृतां धृतामाशां त्वं मा च्छिद्याः स्मेति प्रसिद्धम् । हे अरविंदनेत्र तत्तस्मान्नोऽस्माकं प्रसीद ॥ ३३ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कुर्वन्ति हीत्यत्र, स्नेहेन हीत्यादि । क्रियायाः स्नेहसमानविषयकत्वस्यौत्सर्गिकत्वादात्मन एव निरुपधिस्नेहविषयत्वाद् भगवति कृतस्यैव च तद्गामित्वात् त्वय्येव रतिं कुर्वन्तीत्यर्थः । अत्रौपाधिकस्नेहकथनस्यायं हेतुः । भगवता हि स्वातिरिक्ते स्वात्मौपाधिकी प्रीतिर्जीवस्येति पक्षमाश्रित्योक्तम् । स्वामिन्यस्तु वादिरीत्या प्रतिवादिमतमङ्गीकृत्य प्रौढ्या तत्पक्ष निराकुर्वन्तीति न कश्चिद्दोषः । **नित्यप्रिय** इत्यत्र, **अन्यथा जारसेवापीत्यादि** । ननु धर्मतत्वे विहितत्वस्य प्रयोजकत्वादत्र तदभावान्न तथेति चेत् । उच्यते । प्राग्जन्मनि विवाहिते पुंसि जीवति पुरुषान्तरेण विवाहे दोषाकथनात्तत्र जन्मावच्छेदकमिति वाच्यम् । एवं सत्येतत्समानयोगक्षेमत्वाद्दिनस्यापि तथात्वं सुवचम् । न च तत्र पतित्वाभावान्न तथेति वाच्यम् । 'स वै पतिः स्यादकुतोभयः स्वयं' 'जीवच्छवं भजति कान्तमतिर्विमूढा । या ते पदाब्जमकरन्दमजिघ्रती स्त्री'त्यादिवाक्यैः कालभयवति पतित्वाभावेनोभयोस्तुल्यत्वात् । एवं सति पतिभजनं विदधच्छास्त्रं हरिसेवामेव विधत्ते । प्रभोर्दुरापत्वेन व्यवहारनियमार्थं परं तथा स्मृत्यादिषु कथनमिति भावः । अत एव वाग्दत्तापि कन्या ततः श्रोत्रिय उपपन्ने तस्मै दीयते न पूर्वस्मै । **वरदेश्वरेति** सम्बोधनेन व्यञ्जितमर्थमाहुरतो **वयं क्लिष्टा** इत्यादिना ॥ ३३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतदेव सदाचारेण द्रढयन्त्यस्तत्प्रसादं प्रार्थयन्ते—कुर्वन्तीति । कुशलाः शास्त्राभ्यासेनार्थनिपुणे त्वय्येव नित्यप्रिये रतिं प्रीतिं कुर्वन्ति । तथा चास्माकमपि त्वय्येव रतिर्युक्ता, पतिसुतादिभिः किं प्रयोजनमित्यन्वयः ॥ नित्यप्रियत्वे हेतुमाहुः—आत्मनीति । देहादाविव औपचारिकमात्मत्वं वारयन्त्य आहुः—स्व इति । पतिसुतादीनामनादरे हेतुमाहुः—आर्तिदैरिति । अत्र शुश्रूषादिना परलोके च तदासक्त्या संसारप्राप्त्या पीडाप्रदैरित्यर्थः । 'त्वं तु सर्वतो रक्षितुं समर्थोऽसि, अतस्तव सेवैव युक्ता' इत्याशयेन सम्बोधयन्ति—परमेश्वरेति । 'प्रयासं विना तव कृपादृष्ट्यैव जनस्य संसारतापो निवर्तते' इत्याशयेन पुनः सम्बोधयन्ति अरविन्दनेत्रेति । हि यस्मात्त्वदनुवृत्तिरेव तत्तस्मात् प्रसीद प्रसन्ना भव । चिरात् बहुकालमारभ्य त्वयि भृतां निबद्धां नोऽस्माकं रमणाशां मा स्म च्छिन्द्याः विफलां न कुर्वित्यन्वयः ॥ ३३ ॥

अन्वितार्थप्रकाशिका

कुर्वन्ति इति ॥ कुशलाः शास्त्रज्ञाः नित्यप्रिये स्वे आत्मनि त्वय्येव रतिं कुर्वन्ति । अतः आर्तिदैः पतिसुतादिभिः किं प्रयोजनम् । तथा च श्रुतिः । "किं प्रजया करिष्यामो येषान्नोयमात्मायं लोकः" इति । तत्तस्मात् हे परमेश्वर ! हे अरविन्दनेत्र ! प्रसीद प्रसन्नो भव । चिरात् बहुकालादारभ्य त्वयि भृतां निबद्धां नोऽस्माक रमणाशां मा स्म छिन्द्या विफलां न कुरु ॥ ३३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुनस्तदेव प्रार्थयंत्य आहुः कुर्वंतीति नित्यप्रिये स्वकीये आत्मन् आत्मनि परमात्मनि त्वयि कुशलाः शास्त्रज्ञाः रतिं प्रीतिं कुर्वंति हे आत्मन्परमात्मन् इति संबोधनं वा आर्तिदैः दुखप्रदैः किं स्यात् तत्तस्मात् त्वयि चिरात्कौमारमारभ्य धृतां आशां त्वं माछिंद्याः छेदनं मा कुरु ॥ ३३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अत्र सदाचारं प्रमाणयन्त्यो विज्ञापयन्ति ॥ कुर्वन्तीति ॥ कुशलाः शास्त्रनिपुणाः, स्वे आत्मन्नात्मनि, आत्मात्मनीत्यर्थः। अत एव नित्यप्रिये, त्वयि हि त्वय्येव, रतिं प्रीतिं, कुर्वन्ति । नित्यप्रिये इत्यनेन सोपाधिकमपत्यादीनामनित्यप्रियत्वं सूचितम्। यत एवमतः, आर्त्तिदैरन्तत[illegible]ुःखदैः, सोपाधिकैरित्यर्थः। पतिसुतादिभिः, किम् । पत्यादिभिर्न किंचित् साध्यमस्तीत्यर्थः। तत्तस्मात्, नोऽस्माक प्रसीद । हे अरविन्दनेत्र, हे वरदेश्वर, त्वयि चिरात् धृतां बहुकालत एव त्वयि बद्धामित्यर्थः । आशां, मा स्म छिन्द्याः विफलां न कुर्याः । आत्मपर्यन्तं वदान्यस्य तवेदमस्मदाशाच्छेदनमनुचितमेवेत्यभिप्रायेण वरदेश्वरेति संबोधनम्। क्वचित्परमेश्वरेत्यपि पाठः । त्वत्सौन्दर्यावलोकनेन त्वय्येवाशा भृतेत्यभिप्रायेणारविन्दनेत्रेति संबोधनम् ॥ ३३ ॥

कृष्णप्रिया

आत्मज्ञान में निपुण महापुरुष तुमसे ही प्रेम करते हैं, क्योंकि तुम नित्यप्रिय एवं अपनी ही आत्मा हो। अनित्य एवं दुःखद पति-पुत्रादि से क्या प्रयोजन है ? परमेश्वर ! इसलिये हमपर प्रसन्न होओ। कृपा करो। कमलनयन ! चिरकाल से तुम्हारे प्रति पाली-पोसी आशा-अभिलाषा की लहलहाती लता का छेदन मत करो ॥ ३३ ॥

चित्तं [1]सुखेन भवतापहृतं गृहेऽपि यन्निर्विशत्युत करावपि गृह्यकृत्ये।
पादौ पदं न चलतस्तव पादमूलाद् यामः कथं व्रजमथो करवाम किं वा ॥ ३४ ॥

कर्दमक्षमा

अन्वयः—(हे नाथ !) भवता, सुखेन, अपहृतम्, चित्तम्, गृहे, अपि, न, निर्विशति, उत, करौ, अपि, गृहकृत्ये, न, निर्विशतः, तव, पादमूलात्, पादौ, पदम्, न, चलतः, व्रजम्, कथम्, याम, अथो, वा, किम्, करवाम ॥ ३४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च प्रतियातेति यदुक्तं तदशक्यं त्वयैव चित्तादीनामपहृतत्वादित्याहुः। चित्तमिति। यदस्माकं चित्तमेतावंतं कालं सुखेन गृहेषु निर्विशति तत्त्वयाऽपहृतं करावपि यौ गृहकृत्ये निर्विशतस्तावपि। सुखात्मना त्वयेति वा ॥ ३४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

निवृत्तौ प्रयोजनाभावपूर्वकं साधनाऽभावमाहुः—किञ्चेत्यादिना। गृहकृत्यनिष्पत्त्यर्थं सुखार्थं च गृहे वासो भवति तच्च सर्वं चेतसा भवति तत्तु त्वयाऽपहृतं तत्किं करिष्यामस्तत्र गत्वेति प्रयोजनाभावः। यद्वा—भवता येन संसारक्लेशेन हृतमपि यच्चित्तमिति योज्यम्। गृहे भवं गृह्यं तच्च तत्कृत्यमिति, तथा तस्मिन्मार्जनोपलेपनादिलक्षणे। कृत्यानां बहुत्वमपेक्ष्य चित्ते सतापो भवति न सुखमित्यरुच्या विशिनष्टि—सुखात्मना सुखरूपेण भवतेत्यस्य प्रतिपदं त्वयेति विशेष्यम्। पादयोरपि स्तंभो जात इत्याहुः—पादाविति। गतिसाधनाभावाद्गमनं कथं स्यादिति भावः। अत्रायमाशयः—त्वत्काठिन्येनात्र स्थातुमपि न युज्यते गन्तु च न शक्यते, हा कष्टमधुना किं कार्यमिति ॥ अन्यास्तु स्वार्यं प्रमाण परमं द्योतयंत्यो भोश्चोर चक्रवर्तिन् न वयमन्यार्थमागताः किन्तु त्वया चोरितं स्वं धनमेव प्रतिजिघृक्षव इत्याहुः—चित्तं भवतापहृतं न च तत्रान्यचोरस्येव तव कोप्यधिकः प्रयत्नोभूदित्याहुः—सुखेनेति। वेणुरन्ध्रेषु फूत्कारमात्रेणैवेत्यर्थः। न च तच्चित्तधनमस्माकमल्पतरमित्याहुः—यच्चित्तं गृहेषु सर्वेष्वेव निः निःशेषेण विशति अतस्तदपहारेण त्वयाऽस्माकं सर्वाण्येव गृहाणि लुठितानीति ध्वनितम्। वस्तुतो गृहेष्वस्माकं चित्ताभावात्तानि ज्वलन्तु समृध्यंतु वा किमस्माकं तैरित्यनुध्वनितम्। अतिशयोक्त्या गृहेषु श्रोत्रादींद्रियार्थेषु तत्तत्साफल्यार्थं यन्निर्विशति यद्विना सर्वेन्द्रियाण्यपि विफलीभवंतीति भावः। अतश्चित्तापहारादेव सर्वेन्द्रियाण्यपि त्वयाऽपहृतानीत्याहुः—करावपि यौ गृहकृत्येषु निर्विशतः उतेति नेत्रे श्रोत्रे अपि। एतानि सर्वाण्यपहृतानीत्यर्थः। ननु भो अद्य तावद्गच्छत श्वः परश्वो वा विविच्य वश्चित्तं दास्यामीति तत्राहुः—पादावस्माकं पदमेकमपि न चलतः। यद्विनेत्यर्थः। अत्तश्चित्तं देहि तत एव याम इति भावः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, गृहवाससुखरक्षार्थमपि न पत्यादित्यागो विधेय इत्याशङ्क्य तत्रापि तस्यैव दोषोट्टङ्कनपूर्वकमाहुः—चित्तमिति। सुखेन सुखरूपतया स्वदर्शकेनेति तदानीं गृहादीनां दुःखस्वरूपतास्फूर्त्तिः ध्वनिता सुखेन सहितमिति वा पादौ यौ गृहकृत्ये गमने वा निर्विशतस्तावप्यपहृतौ अतस्तव पादमूलात् पदमेकमपि न चलतः गन्तुं न शक्नुत इत्यर्थः। करयोः पादयोश्चापहारस्तत्तदिन्द्रियशक्त्यपहारात् अत आगमनं च त्वद्गीताकर्षणमात्रेणेति भावः। अथो अस्माद्धेतोः कथं व्रजं याम। ननु, अवला एवं चेत् अर्थवाग्रे गच्छता सह गम्यतां तत्राहुः—तत्र गत्वा किम्वा करवामेति वा शब्दः समुच्चये। यद्यपि चित्तापहारेण सर्वेन्द्रियापहारोऽप्यायाति तथापि विशेषतः करपादापहारोक्तिः पतिशुश्रूषणादिगृहकृत्यस्यान्यत्र निजगमनस्य च परिहाराय, अन्यत्तैः। यद्वा, यच्चित्तं सुखे विषये वा पूर्वं स्थितं तद्भवताऽपहृतं सत् उत अपि न प्रविशत्यपि कुतः ? तस्मिन् कृत्ये करादिकं प्रवेशयेदित्यर्थः। ननु, गृहेश्वर्यस्तथापि तद्विचारबलेन प्रवेश्यतां तत्राहुः—करावप्यपहृतौ गृहसम्बन्धि कृत्ये न निर्विशतः। ननु, तथाप्यत्र तु स्थातुमयुक्तमिति गच्छतैव तत्राहुः—पादौ च भवताऽपहृतौ स्वाभिमुख्येनाऽऽकृष्टौ पदमपि न चलत इति अन्यत्समानम्। अतस्त्वय्येव चित्तं त्वदर्थकृत्य एव करौ त्वत्स्थान एव पादौ प्रविशन्ति नान्यत्रेति सूचितम् अत्र नर्मेदं वनेऽस्माकं प्रयोजनाभावात् तद्दर्शनार्थं नागताः स्मः चित्तवित्तस्य भवताऽपहरणात् तदुद्देशेनात्रागताश्चौरं भवन्तं प्राप्ता अपि गृहीतुं नेतुं च तथा क्रोशनार्थं कुत्रापि गन्तुमपि न

---

१. चित्तं सखे न—विज.। २. गृहेषु—श्रीधर. वंशी. जीव. वीर. विज. विश्व. शु. षु. ध. रा.।

शक्नुमः भवता करपादापहरणात् अतो हृतधनाः कथं व्रजं यामः ? किम्वा करवामः स्तम्भनादिमहामन्त्रज्ञचोरवरे कस्याप्युपायस्याप्रभावादिति भावः। निषेधार्थश्चायम्। ननु, वेणुगीतेन मया गृहादाकृष्टाः सुष्ठु श्रान्ताश्च कथं गन्तुं शक्नुथ तत्राहुः—गृहेषु भवता उद्भवता सुखेन अपहृतं चित्त यत् यस्मात् गृहकृत्ये निर्विशति। यद्वा, चित्तं सुखं एव न तु भगवताऽपहृतं यस्माद्गृहेषु निर्विशति एव करावपि गृह्यकृत्ये निर्विशतः परिश्रान्तत्वमाशङ्क्याहुः—पादौ पदमपि कथं न चलतः अपि तु दूरमपि चलत एव ततः कथं न यामः अपि तु याम एव अत्र च किङ्करवामेति ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुखात्मकेनेति गृहादीनां दुःखात्मकत्वं ध्वनितम्। सुखेन सहितमिति वा, पादौ यौ ग्रहकृत्ये गतौ वा निर्विशतस्तावप्यपहृतौ, अतस्तव पादमूलात् पदमेकमपि न चलतः, गन्तुं न शक्नुत इत्यर्थः। करयोः पादयोश्चापहारस्तत्तदिन्द्रियशक्त्यपहारात् यद्वा, ननु मिथ्यावादिन्यस्तर्हि कथमत्रागता इति चेद्युक्तं तद्गीतेनाकर्षणान्न तु स्वशक्तेः, अन्यथा अधुना गमनं सम्भवेदित्याहुः-पदमिति। अर्थः स एव। अथो अस्माद्धेतोः कथं व्रजं यामः ? ननु अबलाः ! मयैव कथञ्चित् प्रेष्यध्वम् ? तत्राहुः—किं करवामेति। वाशब्द उक्तसमुच्चये कटाक्षे वा। यद्वा, अनुक्तसमुच्चये, ततश्च किंवा अनुसन्दधीमहि कुत्र वा यामेत्यर्थः। चित्तादीनां भवतापहृतत्वात् कर्म्मस्वप्रवृत्तेः, कथञ्चिच्छक्तौ सत्यां वा कर्म्मभिः प्रयोजनाभावादिति भावः। यद्यपि चित्तापहारेण सर्वेन्द्रियापहारोऽप्यायाति, तथापि विशेषतः करपादापहारोक्तिः पतिशुश्रूषणादिगृहकर्म्मकृत्यस्यान्यत्र निजगमनस्य च परिहाराय। अन्यत्तैर्व्याख्यातम्। यद्वा, यच्चित्तं सुखे निमित्ते सुखे विषये वा पूर्वं स्थितं तद्भवतापहृतं सत्, उत अपि न प्रविशत्यपि, कुतस्तत् कृत्यमपेक्ष्यतामित्यर्थः। ननु, गृहैश्वर्य्यस्तर्हि गृहकृत्यमनासक्त्यैव क्रियताम् ? तत्राहुः—करावप्यपहृतौ गृहसम्बन्धिकृत्ये न निर्विशतः। ननु तर्हि तत्र गत्वा केवलमधिष्ठातृत्वेन स्थीयताम् ? तत्राहुः—पादौ च भवतापहृतौ न चलत इति। अन्यत् समानम्। अतस्त्वय्येव चित्तम्, त्वदर्थकृत्य एव करौ, त्वत्स्थान एव पादौ प्रविशन्ति, नान्यत्रेति च सूचितम्। यद्वा, भवः संसारस्तेन तापस्तेन हृत नाशितमपि चित्तं लोकानां सुखेन अनायासेन स्वत एवेत्यर्थः, गृहेषु निर्विशत्येव, करावपि गृहकृत्ये निर्विशत एव, अतः पतिशुश्रूषाद्यर्थं तव प्रेरणयालमिति भावः। ननु तत्त्ववादिन्यः। तर्हि गम्यतामिति चेत्तत्राहुः—पादाविति। किन्तु त्वत्काठिन्येनात्र स्थातुमपि न युज्यते, गन्तुञ्च न शक्यते। अहो बताधुना किं कार्य्यमित्यार्त्त्या सवैयग्र्यमाहुः—किं करवामेति, अनेन 'दृष्टं वनम्' इत्यस्योत्तरं चित्ताद्यपहारेण पुष्पादिग्रहणाद्यशक्तेस्तद्दर्शनस्यापि वैफल्यात्, किं तेनेति। द्वितीयपक्षे च वन दिदृक्षादौ सत्यपि पादापहरणाद्भ्रमणाशक्त्या सम्यग्दर्शनासिद्धेः किं तद्दर्शनेनेति। श्लेषेण नर्मद-वनेस्माकं प्रयोजनाभावात् तद्दर्शनार्थं नागताः स्म, किन्तु चित्तवित्तस्य भवतापहरणात्तदुद्देशेनात्रागताश्चोरं भवन्तं प्राप्ता अपि ग्रहीतुं नेतुञ्च, तथा क्रोशनार्थं कुत्रापि गन्तुमपि न शक्नुमः, भवता करपादापहरणात्, अतो हृतधनाः कथं व्रजामो व्रजं यामः ? किं वा करवाम ? स्तम्भनादिमहामन्त्रज्ञचोरवरे कस्याप्युपायस्याप्रभावादिति भावः। श्लेषार्थश्चायम्—परतो वर्त्तमानस्य नकारस्य सर्वत्रैवान्वयः। सुखात्मकेनापि (भवता) यद्यस्माकं चित्तमपहृतं न भवति, तस्माद्गृहे तन्निर्व्विशत्येव, यत् करौ पादावपि अपहृतौ न भवतः, अतो गृहसम्बन्धिकृत्ये तौ तौ निर्विशत एव, अतः पदं निजस्थानं व्रज प्रति तौ चलत एव। अथो अतः कथं यामोऽन्यत्र कुतो वा करवाम त्वदुक्तिमिति। इति तेन श्लेषोक्तं यमुनातीरगमनादिकं निरस्तम्। यद्वा, गृहेषु भवता उद्भवता सुखेनापहृतं चित्तं यद् यस्माद्गृहकृत्ये निर्विशति। गृहेषु भवता सुखेनैवापहृतौ करावपि गृह्यकृत्ये निर्विशतः, पदं निश्चितं यथा स्यात्तथा पादावपि तथा तस्माच्चलतो धर्म्माद्विचलतस्तव पादमूलात् कथं व्रजं न यामः, किंवा करवामेति ॥ ३४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

गृहेषु गृहकृत्येषु गृहकार्येषु यौ निर्विशतः तौ च भवताऽपहृतावित्यर्थः। पदं पदमात्रमपि ॥ ३४–३५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यदुक्तं "तद्यातमाचिरं गोष्ठम्" इत्यादि तत्रोत्तरमाहुः—चित्तमिति। यच्चित्तं गृहेषु निर्विशति निर्विवेश गृहाद्यभिनिविष्टं यच्चितं इत्यर्थः। तत्सुखेनानायासेन भवताऽपहृतं तथोतापि च यौ गृह्यकृत्ये गृहकार्य्ये अभिनिविष्टौ करौ तावपि भवतापहृतौ व्यापाररहितौ कृतावित्यर्थः। तथा पादावपि तव पादमूलात्पादमात्रमपि न चलतः अतः कथं व्रजं यास्यामः अथोनन्तरं किम्वा करवाम ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रतियातेत्यस्योत्तरमाहुः—चित्तमिति। हे सखे ! नो यच्चित्तम् उत तदपि गृहेषु न निर्विशति उपभोगत्वेन न स्मरति कुत इत्यत्राहुः—भवतेति। भवताऽपहृतं तस्मादिति शेषः। "स हि सर्वमनोवृत्तिप्रेरकः समुदाहृतः" इति वचनात् करावपि कर्मसाधनेऽपि गृहकृत्ये गृहयोग्यकार्य्ये संमार्जनोपलेपनादिलक्षणे न तिष्ठत इति शेषः। अस्मत्पादौ गमनसाधनेऽपि तव पादमूलात् पदम् एकपादन्यासमात्रमपि न चलत इत्यथो तस्मात्कथं व्रजं यामः किं वा करवाम इति न ज्ञायते इति शेषः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

वयं तवाज्ञाभङ्गकारिण्यो न भवामः। तेन गन्तुञ्च शक्यते। किन्तु तवैव दोषात्तन्न घटत इति पुनरतिविदग्धा मध्याधीरा आहुः—चित्तं सुखेनेत्यादि। चित्तं भवता सुखेनापहृतमनायासेन चोरितम्, न तु चोरान्तरेण। त्वत्प्रयत्नविशेषेण यच्चित्तं गृहेषु निर्विशति, अतश्चित्ताभावात्तन्न भवति। किमस्माकं दूषणम्? तर्हि चित्तं दीयते, सचित्ताः सत्यो गृहं व्रजतेत्याशङ्क्याहुः—उत विस्मये। करावपि गृह्यकृत्ये न निर्विशतः। अतः परं त्वत्सेवायामेव करौ निर्विशतः, न गृह्यकृत्ये, इत्यर्थः। तेन तत्र गत्वैव किं प्रयोजनम्? ननु तथापि मदाज्ञातो यात, वरं गृहकृत्यं मा कार्यमित्याशङ्क्याहुः—पादाविति। तव पादमूलाच्चरणसमीपात् पदमपि पादौ न चलतः, तयोः स्तम्भो जातः, कथं याम इत्याहुः—यामः कथमिति। न गत्वा किं करिष्यथेत्याहुः—करवाम किं वा? तदेव न विद्महे, किं वा करिष्याम? अथवा, यच्चित्तं गृहेषु निर्विशति, तद्भवतापहृतम्, संसारतापतप्तमस्माकं तु चित्तं भवतापहृतम्। अतो गृहेषु सुखे सुखनिमित्तं न निर्विशति। सर्वमन्यत् समम् ॥ ३४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

काश्चिन्मध्या धीरा आहुः—चित्तमित्यादि। 'प्रियं सोत्प्रासवक्रोक्त्या' इत्यादि—पूर्वोक्तेः। सुखेनानायासेनैव भवता हृतम् यद् यस्माद् गृहेषु न निर्विशति। नहि धर्मविदा परकीयं द्रव्यमपह्रियते, तत्रापि स्त्रीणां चित्तं हृत्वा (२१ श० श्लो०) "प्रतियात ततो गृहान्" इति गृह-गमनञ्चोपदिश्यते। इयं ते धूर्त्तता, न केवलं चित्तमपहृतम्, करावपि हृतौ यतस्तवपादमूलाद् गृहकृत्ये न विशतः, त्वत्पादमूललग्नौ पादयोः संवाहनं विना नान्यदभिलषत इत्यर्थः। चित्तं हृतम्, करौ च हृतौ, तद्दृष्ट्वा पदौ च पादं न चलतः, अनयोस्तवान्यायं दृष्ट्वा स्तम्भं जातः, कथं व्रजं यामः? स्थित्वा वा तवौदासीन्यकठिना वाचः कति श्रोतव्याः? तर्हि मरणमेव शरणमिति भावः ॥ ३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अन्यास्तु स्वीयं प्रमाणं सरसं द्योतयन्त्यो भोश्चौरचक्रवर्तिन्। न वयमन्यार्थमागताः किन्तु त्वया चोरितं प्रतिस्वबन्धनमेव जिघृक्षव इत्याहुः–चित्तं भवता अपहृतं न च तत्रान्यचोरस्येव तव कोप्यधिकः प्रयत्नोऽभूदित्याहुः–सुखेनेति। वेणुरन्ध्रेषु फूत्कारमात्रेणैवेत्यर्थः। न च तच्चित्तधनमस्माकमल्पतरमित्याहुः–यच्चित्तं गृहेषु सर्वेष्वेव निःशेषेण विशति अतस्तदपहारेण त्वयाऽस्माकं सर्वाण्येव गृहाणि लुण्ठितानीति ध्वनितं वस्तुतो गृहेष्वस्माकं चित्ताभावात्तानि ज्वलन्तु समृद्ध्यन्तु वा किमस्माकं तैरित्यनुध्वनितम् अतिशयोक्त्या गृहेषु श्रोत्रादीन्द्रियेषु तत्तत्साफल्यार्थं यत् निर्विशति यद्विना सर्वेन्द्रियाण्यपि विफलीभवन्तीति भावः। अतश्चित्तापहारादेव सर्वेन्द्रियाण्यपि त्वयाऽपहृतानीत्याहुः—करावपि यौ गृहकृत्येषु निर्विशत उतेति नेत्रे श्रोत्रे अपि एतानि सर्वाण्यप्यपहृतानीत्यर्थः। ननु, भो अद्य तावद्गच्छत श्वः परश्वो वा विविच्य वश्चित्तं दास्यामीति तत्राहुः–पादावस्माकं पदमेकमपि न चलतः यद्विनेत्यर्थः। अतश्चित्त देहि तत एव याम इति भावः ॥ ३४ ॥

रसिकाह्लादिनी–टीका

ननु मदाज्ञोल्लंघनेनेहावस्थाने महदनिष्टं स्यात्। ततो यद् वह्निना भव दर्शनार्थमागतानां भवतीनां गृहगमनमेवोचितमिति चेत्तत्राहुः अशक्यत्वात्त्वादधीनमिति चित्तमिति। भवद्दर्शनात्प्राक् चित्तं गृहेषु गृहकृत्येषु निविष्टमासीत्। तच्चित्त सुखेन स्वरूपेण भवतापऽहृतम्, यद्वा सुखेन गृहसुखेन सहापहृतं सुखमपहृतमेवातो दुःखात्मकत्वाद्गृहास्त्यक्ताः किं च भवन्त्यः वनदर्शनार्थमागतास्तदपि च जातं दर्शनव्यापारस्य चित्ताधीनत्वात् एतावत्पर्यन्तं एवापि गृह्यकृत्ये निविष्टावास्ताम् तयोरपि कर्मकरणसामर्थ्यस्य त्वयैवापहृतत्वात्। इदानीं गृहकृत्येन निर्विशनः एतावत्पर्यन्तं पादावपि इतस्ततो गमने निविष्टा वास्तां तावपि गमने निविशतस्तयोरपि गतेस्त्वयैवापहृतम्। पादौ पदं स्वकीयं स्थानं प्रति न चलतः। तव पादमूलाद्व्रजं कथं यामः। अथ येन केनाप्यमानेन गत्वा किं करवामः करयोः पादयोश्च शून्यत्वात्। यद्वा "तद्यात माचिरं गोष्ठ शुश्रूषध्वं पतीन् सतीरिति"। तदेदमप्यशक्यमित्याहुः तच्चित्तं भवदपहारात्प्राक् सुखेन यत्नेन गृहे तत्तद् व्यापारेषु निविष्टमासीत्। तच्चेतनापहारिणा भवतापहृतं इदानीं न निर्विशति "श्यामसुन्दर ते दास्यः करवाम तवोदितमिति" प्रतिश्रुतं दास्यं सत्यं वोऽस्माभिः क्रियेत तदपि चित्तमपहृतं न भवेत्। शून्यचित्तासु तव योगस्याकिंचित्करत्वात् किंचित्पत्यादिशुश्रूषा कराधीना। तयोरपि क्रियाशक्तेस्त्वयैवापहृतत्वात्। क्रियाशक्तिमन्तरेण पत्यादिसेवनस्याशक्यत्वात्। न तु न किंचिन्नियुज्यते। इतो व्रजं यातेति तत्राहुः पादौ इतः ते च पादमूलस्थानात् एकमपि पदं न चलतः गमनमप्यशक्यं न दूरतः कर्म करणमित्यर्थः। गतिमन्तरेण पादयोः विद्यमानत्वेन यदि गमनं संभाव्यते तदा पादपानामपि गमनं संभवेत्। तेषामपि पदानां विद्यमानत्वात् अयं भावः—इयं लीला निरोधात्मिका व्रजदेवीनां चित्तं स्वयमाकृष्य स्वचित्ते निवेशितं क्षीरनीरवदाश्लिष्टं ततो निःकाशयितुमशक्यं चित्तमिति-सर्वेन्द्रियोपलक्षणम्। अतः सर्वस्वमपहृत्य प्रस्थानं नमणैवेति। ननु वेणुनादात्मकेन महामोहनमन्त्रेणास्मान् वने आहूय किमिति बिडंवयसीति मनसि निधायाहुः चित्तं

सुखेन रमणसुखेन निमित्तेन भवताऽपहृतं अत एव तत्र गृहेषु कुञ्जादिमन्दिरेषु यस्मात् निविशति रन्तुं प्रविशति, करावपि गृह्यकृत्येषु पुष्पशय्यादिरचनासु निर्विशतः, पत्यादिशुश्रूषणस्य त्यक्तत्वात्। पादौ तव पादमूलादन्यपदं स्थानं प्रति न चलतः। इहैवावस्थानाध्यवसायस्य कृतत्वात् तव चरणेन सह नृत्यं करिष्यतः। तस्मात् व्रजं कथं यामः किमर्थं यामः न किंचिदपि व्रजस्य त्यक्तत्वात्। अन्यथा वान्ताशिन्यो भवेमः। अथोऽस्माकमध्यवसायं ज्ञात्वा विलासोपयोगिनीकृत्ये नियुंक्षेति। किं चाभीष्टं करवामेति दासीभवितुमागता विद्धि। यद्वा चित्ताद्यपहृत्य व्रजप्रस्थापने कृते सति तव किमभीष्टं भविष्यति। अस्मदवस्थादर्शनेन पत्यादिभिः पृष्टाः किं वदिष्यामः। अतः किं दास्यं करवामेति स्वीकृतेऽस्मान् नियुंक्ष्वेति भावः। यद्वा तद्यातेति यदि सर्वात्मभावेन व्रजगमनं प्रत्यनुज्ञा दीयते तर्हि अस्माकं यच्चित्ताद्यपहृतं तत्पुनर्प्रत्यर्पयेति। तच्च तवाशक्यं यथा नीरक्षीरं तदेव पृथक्कर्तुं न शक्यं तथाऽस्मच्चित्ताद्यपहृत्य स्वचित्तादिष्वेकीकृतं पुनः पृथक्कृत्य तस्य प्रत्यर्पणं तवाशक्यमिति। तथा व्रजगमनमस्माकमपीति ॥ ३४ ॥

विशुद्धरसदीपिका

अथ द्वितीयदिक् स्थिताः प्रतियात ततो गृहानिति यदुक्तं तत्प्रतारणमात्रं त्वयैव चित्तादीनामपहृतत्वेनाशक्यत्वादिति परिहरन्ति-चित्तमिति। यदस्माकं चित्तं सुखेन हेतुना गृहेषु निर्विशति "निर्वेशोभृभृतिभोग्ययोः" इति कोशात् सुखभोगमनुभवतीत्यर्थः। तत् भवताऽपहृतं मास्तु चित्तं स्वकराभ्यामेव गृहकृत्यं सेत्स्यति वस्तत्राहुः—करावपि। ननु, हृतज्ञानक्रियाधिकरणाभिरत्र किं कार्यमिति तत्राहुः—गृह्यकृत्य इति तव सेवायां तु द्वयमपि चलत इत्यर्थः। ननु, तत्र गतानां तत्रत्यकरणीयपराणां चित्तादिकं तत्रैवाविशेदिति तत्राहुः, पादाविति। अत्रागमनं तु त्वद्गीताकर्षणेनेति भावः। नन्वबला मयैव गच्छता सह गम्यतामिति चेन्मैवं मैवमिति परिहरन्ति करवाम किं वेति ॥ ३४ ॥

श्रीरामनारायणकृता भावभावविभाविका

तद्यात मा चिरं गोष्ठमित्यस्यापि दाक्षिण्यार्थस्येष्टत्वात् द्वितीयार्थे तदशक्तत्वेनैव स्वानधिकारं मत्वोत्तरमाहुः-चित्तमिति यन्नोचितं सुखेनाञ्जसा भ्रान्त्यात्मकसुखबुद्ध्या वा गृहेषु निर्विशति तच्चितं भवतापहृतं स्वस्मिन्नाकृष्टं त्वय्येव निविष्टं यद्वा, यच्चित्तं गृहेषु निर्विशति तत्सुखेन सुखरूपेण भवताऽपहृतं नित्यपरमानन्दघनच्छविदर्शनेन दुःखग्रामगृहेषु विशतीति भावः। यद्वा, भवताऽपहृतं यच्चित्तमानिदाब्धिमज्ञात्वैव तत्तापोपशमाय भ्रमसिद्धमरुमरीचितोयसदृशगृहेषु निर्विशति तत्सुखेन सुखाब्धित्वत्साक्षात्कारेण भवतापहृतं भवसम्बन्धिकामादितापेन हृतं रहितं जातं तथा च सुखाब्धिलाभेन विगततापत्वेन मरुमरीचिरूपगृहेषु सुखजलभ्रमाभावेन च न तत्र निर्विशति यौ नः करावपि गृह्यकृत्ये निर्विशतस्तावपि भवताऽपहृतौ तव सेवामेव रोचयतः प्रतिपदं व्याख्यानन्तु पूर्ववत्। यद्वा, श्रुतिरूपाणां नश्चित्तं तात्पर्यं सुखेन सुखरूपेण भवताऽपहृतं न हि परमानन्दरूपं ब्रह्म विहाय निःसुखे निष्फले गृहाद्यर्थे श्रुतितात्पर्यं सम्भवात् फलवदर्थावबोधकत्वाद्वेदस्य तथाकरौ इति अनुष्ठानोपलक्षणं पादाविति पदप्रवृत्तिश्च नस्त्वद्विषयैवेति भावः। नन्वत्र स्थितानां मद्रूपमाधुर्यदर्शनलुब्धानां तादृग्दशा जाताऽतस्तत्र गन्तव्यं तत्र गमने पुनः पूर्ववदेव भविष्यति तत्राहुः—पादाविति। नः पादावपि तव पादमूलाच्चरणसन्निधानात्पदं चरणमात्रमपि न चलत अतो गमनप्रेरकचित्तस्य भवताऽपहृतत्वात् पादयोर्गतिलोपात्कथं व्रजं यामः करयोश्च भवतापहृतत्वात्कथं करवाम तत्कर्म स्विष्टसाधनत्वसुखत्वभ्रमाभावात् किं करवाम इति भावः। किञ्च, तवापि चित्ताद्यपहरणे गृहादिविमुखत्वापादने गृहगमनायैव मुक्तौ च कस्य चित्पित्रा स्वाप्ने ब्राह्मणस्वपुत्रयोः भोजनतन्निशारणज्ञापनन्यायापात्तः ॥ ३४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

यदपि वनदर्शनार्थमागतास्तस्य च जातत्वादितः परं प्रतियातेत्युक्तं तत्राप्याहुः-चित्तमिति। गृहादिषु यच्चित्तं सुखेन निर्विशति तत्त्वयाऽपहृतम् एवमग्रेपि यद्वा, तदपहारेण भगवतः प्रयास इत्याशयेनाहुः, सुखेनानन्दस्वरूपेण तथा च साक्षादानन्दस्वरूपे त्वयि लब्धावस्थानं चित्तं गृहेऽपि न निर्विशति दूरे वनदर्शनादौ तत्प्रवेशः तथा करावपि गृहोचितकृत्ये न निर्विशतो दूरे पुष्पफलाद्युपचयः नहि कररहितः कस्मिंश्चित्कर्मणि केनचिन्नियुज्यते इति भावः। तया च तव पादमूलात् त्वत्समीपात् पादौ पदं न चलतः नान्यत्र गच्छतः तव पादमूलादित्यनेन त्वत्पादसाहित्यं चेत्तदा सर्वत्र गन्तुं शक्ताविति सूचितम् अतो गमनसाधनाभावाद्व्रजं कथं यामः। ननु, भवतीनां पद्भ्यां गमनसामर्थ्यं नास्ति चेत्तर्हि शकटादिना प्रेषयिष्यामीति चेत्तत्राह, करवामेति। अथो अथ तत्र गत्वा किं करवाम तत्तद्व्यापारसाधनचित्तादेस्त्वया ऽपहृतत्वादिति भावः। अनभिज्ञापक्षे न वयं वनशोभादिदर्शनार्थमागताः नापि तव सङ्गमार्थमपि तु चोरितं स्वचित्तं गृहीतुमागता इति नर्म व्यञ्जयन्त्य आहुः, चित्तमस्माकमपहृतं केनोप चेत्तत्राहुः भवता चोरचक्रवर्त्तिना। ननु, भवत्योऽत्यन्तमिथ्यावादिन्यः वनस्थेन हि मया तदायासरहितेन कथमपहृतमिति चेत्तत्राहुः, सुखेनानायासेन वेणुरवादिभृत्यसद्भावे तदपहरणे को वा तव प्रयास इति भावः। न चेदं स्वल्पमेतदपहारेण सर्वस्यापि गृहादेर्लुण्ठितत्वादित्याशयेनाहुः, यच्चितं गृहेषु सर्वेषु बाह्येषु इन्द्रियादिरूपेषु च निर्विशेषेण विशति तदपहृतमित्यर्थः। अतः करावपि यौ

गृह्यकृत्येषु निर्विशतः उतेत्यनेन नेत्रादीनामपि सङ्ग्रहः। ननु, सम्प्रति गच्छत श्वः परश्वो वा दास्यामीति चेत्तत्राहुः, पादौ तद्विना तव पादमूलात्पदं न चलतः धृतस्य चोरस्य त्यागो न न्याय्य इत्यपि ध्वनितम् अथो अतो व्रजं कथं याम गत्वा च किं करवाम सर्वसाधनचित्तरूपधनाभावादित्यर्थः यद्वा, किं करवाम चित्तादेः सर्वस्यापहाराच्चौरं भवन्तं प्राप्याऽपि तद्दण्डं दातुं त्वां गृहीतुं नेतुं राजाद्यग्रे आक्रोशनार्थं गन्तुं चाशक्तत्वात्स्तम्भनादिमन्त्रज्ञेऽलौकिकचौरे किङ्करवामेति भावः। यद्वा सुखरूपेण भवता चित्तादेरऽपहृतत्वात् गृहादीनि ज्वलन्तु समृद्धयन्तु वा किम्मस्माकं तैरतस्तन्नामाप्यस्मदग्रे नोच्चारणीयमिति भावः। मानिनीपक्षे। ननु, तिष्ठतु विवादः सम्प्रत्येव भवत्यः समागताः रात्रावत्र विश्रम्य प्रातर्गमिष्यथेति चेत्तत्राहुः, चित्तमिति। सत्यमुक्तं त्वया तथापि गृहेषु भवता जायमानेन सुखेन चित्तमस्माकमपहृतं यद्यस्माद्गृहकृत्येषु निर्विशेति करावपि तत्र निर्विशतः। ननु, भवतु तथाप्यतिसुकुमारत्वात्पदमपि गन्तुमशक्याभ्यां पद्भ्यां कथं गमिष्यथेति चेत्तत्राहुः, पादौ तव पादमूलात्कथं पदं न चलतः किन्तु चलत एव ततः कथं व्रजं न याम अत्र स्थित्वा च किं करवामः। यद्वा, यद्यपि पादौ पदमपि गन्तुं न शक्तौ तथापि तव पादमूलात्कथञ्चिद्व्रजमेव शनैःशनैर्याम अन्यथाऽत्र स्थित्वा किं करवामेत्यर्थः। निवृत्तिपक्षे। ननु, सर्वासां श्रुतीनां ब्रह्मपरत्वे कर्मणस्तत्तात्पर्याविषयत्वात्तदनुष्ठानादेर्वैय्यर्थ्यं प्राप्तमित्याशङ्क्य तत्त्वज्ञानात्पूर्वं तद्वैयर्थ्यमाशङ्क्य तत्तदुत्तरं नाद्यः "यत्र तु द्वैतमिव भवति तदितर इतरं पश्यति" इत्यादिना संसारदशायां क्रियाकारकादेः सद्भावाभिधानात्तद्वैय्यर्थ्याऽनवगमात् न द्वितीयः "यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्"इत्यादि वा तदुत्तरं तद्वैय्यर्थ्यस्येष्टत्वादित्याशयेनाहुः, चित्तमिति। सुखरूपेण भवता चित्तं मदापहृतं सच्चिदानन्दघनेन प्रत्यगभिन्ने परमात्मनि तं यदा लीनं तदा गृहेषु बाह्येष्वाश्यन्तरेषु च न निर्विशति अत एव करावऽपि गृह्यकृत्ये न निर्विशतः पादौ पदमपि न चलतः यथा च सर्वेन्द्रियव्यापारनिवृत्त्या तत्त्वविदः कर्म्माधिकाराभावात्तदपेक्षेच्छया कर्म्माऽनुष्ठानादेर्वैय्यर्थ्ये नास्ति दोषः—

"नैव तस्य कृते नार्थो न कृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः"।

इत्यादिशास्त्रादिति भावः। अतस्तव पादमूलाद्वयं व्रजं कथं याम कर्मकाण्डेऽस्माकं तदानुगुण्याऽसम्भवो श्रुत्यानुगुण्यं कथं भजाम स्वासामप्यस्मदनुपातित्वात् गत्वा च किङ्करवाम क्रियाकारकादिप्रतिषेधबोधिकानामऽस्माकं तदानुगुण्याऽसम्भवादिति भावः॥ ३४॥

रास–रहस्यम्

र० टी०—"यत्र तु द्वैतमिव भवति तदितर इतरं पश्यति यस्मान्न द्वितीयमस्ति यत्र तु अस्य सर्वमात्मैवाभूत तत् केन कं पश्येत्।" इत्यादि श्रुत्या यदा चित्तं चित्तवृत्तयः गृहेषु "हृदयपुण्डरीकं वेश्म।" इति हृदयपुरे निविशति तथा सुस्थिरं भवति तदा सुखेन सुखस्वरूपेण भवतापहृतं कुर्माङ्गानीव समाहृतम्। उत अपि यौ करौ गृहकृत्ये गृहकृत्योपलक्षित कर्मकाण्डे निविष्टौ तावपि भवतापहृतौ व्यापाररहितौ कृतौ आत्मरतत्वात्, तथा पादावपि तव पादमूलात् पादः किरणं आत्मज्योतिस्त्यक्त्वा पदमात्रमपि किंचिदपि न चलतः न प्रसरतः, अतः व्रजं व्रजति चलति संसरतीति व्रजः तं संसारं, कथ यामः, सर्वेन्द्रियाणां व्यापाररहितत्वात्, आत्मरतानां कर्मण्यधिकाराभावात् क्रियाकारकादि प्रतिषेधाच्च किं कुर्म अर्थात् न किञ्चित् कर्थव्यशेषो विद्यते इत्यर्थः॥ ३४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यदुक्तं प्रतियात व्रजमिति तदशक्तमित्याहुः—चित्तमिति। यच्चित्तमेतावन्तं कालं गृहेषु निर्विशति तत्सुखेन परमानन्देन भवता अपहृतं स्वप्रवणं कृतं तथा करावपि यौ गृहकृत्येहकार्ये निर्विशतस्तावपि भवताऽपहृतौ स्वचरणस्पर्शलिप्सू कृतौ तथा पादावपि तव पादमूलात्पदमपि न चलतोऽतः कथं व्रजं यामः यास्यामः अथो ऽनन्तरं तव प्रियं किं करवाम वाशब्दात्किमप्रियं तव यन्न करवाम तदाज्ञापयेत्यर्थः॥ ३४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

व्रजं प्रति याता रात्रौ गात्रविस्त्राणतादिनाऽनुपपन्नास्मन्नाथेति विज्ञापयन्ति॥ चित्तमिति। यद्वै सखे भवतापहृतं भवे भवो यस्तापस्तस्य हृतं हृतिर्येन तच्चित्तं भवता त्वयाऽपहृतं गृहेषु न निर्विशत्युत करावपि गृह्यकृत्ये गृहकर्मणि न निर्विशतः। पादौ कराविति चैकाविवक्षया। पादौ पदमेकं चरणन्यासं कर्तुं न चलतः पदं किञ्चिल्लक्ष्यमुद्दिश्य न चलत इति या तव पादमूलाद्व्रजं कथं व्रजामः। अथो गमनानन्तरं किंवा करवाम त्वदत्तचित्तानां किञ्चित्पुरः प्रतिभातीति भावः। सुखेनेति पाठे तदात्मकेन भवतेत्यन्वयः। नेत्युभयत्र न चलत इत्यत आकृष्यते॥ ३४॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदुक्तं वनदर्शनार्थं किमागता इति ततश्च वनवर्णना कृता तत्राहुः—चित्तसुखेनेति। वनदर्शनेच्छा तदा भवति यदा चित्तं स्वस्मिन् न तिष्ठेत् तत्तु त्वयैवापहृतं तत्रापहारे न तव प्रयासः तथा सति सर्वं नापहृतं स्यात् तदाह–सुखेनेति। भवता वा आनन्द-

रूपेणापहृतं न हि साक्षात् परमानन्दे सति कश्चित् परम्परया पाक्षिकं साधनं गृह्णाति वनदर्शन दूरे गृहेपि यच्चित्तं निर्विशति अनेन ज्ञानशक्तेरपहार उक्तः नापि मन्तव्यं वने किञ्चित्कार्यार्थमागता इति तदर्थं क्रियाशक्तेरप्यपहारमाह–उत करावपीति। यौ गृह्यकृत्ये निर्विशतः दूरेणापास्तं वनकृत्यं कामेन बलस्य हृ हृत्वात् त्वात्स्पर्शेनैव करौ सजीवौ भवतः नोचेन्मृतौ अतः सेवाविधिरपि हस्ताभावात् कुण्ठितः न हि कररहितं कर्मणि कश्चिन्नियुङ्क्ते किञ्च यद्वयाघुष्य गन्तव्यमित्यभिप्रायेण वनदर्शनं जातमित्युक्तं तदप्यसंभावितं यतोऽस्माकं पादौ द्वावपि तव पादमूलादस्मात् स्थानात् एकमपि पदं न चलतः नान्यत्र गच्छतः पादानां गतियुक्तानां मूलभूतौ त्वत्पादौ तस्यापि चेन्मूलं गताः तदा कथमन्यत्र गच्छेयुः त्वत्पादौ तस्यापि चेन्मूलङ्गताः तदा कथमन्यत्र गच्छेयुः अन्यथा वृक्षाणामपि गतिः स्यात् मूलङ्गतानां अस्मात्स्थानादिति वक्तव्ये यत्तव पादमूलादित्युक्त ततस्त्वद्‌गमने न सर्वत्र गन्तुं शक्यते न तु त्वद्व्यतिरेकेणेति ज्ञापितम् अतः कथं यामः शकटादिना प्रेषणीया इति चेत्तत्राहुः अथो अथ तत्र गत्वा किं करवाम यया शकटादिकं गृहे पातनार्थं साधनमस्ति न चैवं हस्तयोः कार्यकारणे किञ्चिल्लौकिकसिद्धं न केवलं गमनेन प्रयोजनं किन्तु पित्रादिसेवार्थं गमनं तदभावाद्यर्थमेव गमनमिति भावः। तदाहुः अथो अथ किं वा करवामेति हस्तनिरपेक्षा कृतिः भिन्नप्रक्रमेण भगवद्भावेन भवतीति तथोक्तम् अनेन स्तनपानमप्यशक्यं निरूपितम् आशाभावे सर्वत्रैव शोषात्॥ ३४॥

श्रीसुबोधिनी-सारः

सुखेन गृहेषु यत् प्रविशति तच्चित्तं भवताऽपहृतं गृह्यकृत्ये गेहकार्ये करावपि विशत उत किं तव पादमूलात् पादौ पदं पदमात्रं न चलतः अतो व्रजं कथं यामो वयं गच्छामोऽथो किं करवाम॥ ३४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यदुक्तं 'तद्यात मा चिरं गोष्ठम्' इत्यादि तत्रोत्तरमाहुः—चित्तमिति। यदस्माकं चित्तं गृहेषु निर्विशति तत् सुखात्मकेन भवताऽपहृतम्, उत अपि तथा यौ करौ गृह्यकृत्ये गृहकार्ये निविष्टौ तावपि भवता हृतौ व्यापाररहितौ कृतौ। तथा पादावपि तव पादमूलात् पदमात्रमपि न चलतः। अतः व्रजं कथं याम? कथंचिच्छकटादिसाधनेन गत्वापि अनन्तरं तत्र किं करवाम? चित्तादिसङ्घातस्य त्वया स्तब्धीकरणत्वात् न त्वदुक्तपत्याद्यनुसरणं कर्तुं शक्ता इत्यर्थः॥ ३४॥

अन्वितार्थप्रकाशिका

द्वितीयदिक्स्थिता आहुः—चित्तमिति॥ यदस्माकं चित्तं गृहेषु निर्विशति तत् सुखात्मकेन भवताऽपहृतं सुखेन अनायासेन वेणुफूत्कारमात्रेणापहृतमिति वा। उत अपि तथा यौ करौ गृह्यकृत्ये गृहकार्ये निविष्टौ तावपि भवता हृतौ व्यापाररहितौ कृतौ। तथा पादावपि तव पादमूलात्पदमात्रमपि न चलतः। अतः व्रजं कथं यामः। कथंचिच्छकटादिसाधनेन गत्वाऽपि अनन्तरं तत्र किं करवाम। चित्तादिसङ्घातस्य त्वया स्तब्धीकरणात्॥ ३४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रतियात इति त्वया यदुक्तं तदयोग्यमित्याहुः चित्तमिति गृहेषु यदस्माकं चित्तं एतावत्कालपर्यंतं सुखेन निर्विशति प्रविशति तद्भवतापहृतं करावपि गृह्यकृत्ये प्रविशतः तावपि तव पादमूलादेकं पदमपि न चलतो न गच्छतः वयं कथं व्रजं यामो गच्छामः॥ ३४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यदुक्तं तद्यात मा चिरं गोष्ठम्' इत्यादिना तत्रोत्तरमाहुः॥ चित्तमिति॥ यत् चित्तं, गृहेषु निर्विशति निर्विवेश, गृहाद्यभिनिविष्टं यच्चित्तमित्यर्थः। तत्तु, भवता सुखेनानायासेन, अपहृतम्। उत तथा, यौ गृह्यकृत्ये गृहकार्येऽभिनिविष्टौ करौ भवतः तावपि, भवता अपहृतौ व्यापाररहितौ कृतावित्यर्थः। तथा पादावपि, तव पादमूलात् पदं पदमात्रमपि, न चलतः कथं व्रजं यामो यास्यामः। अथोऽनन्तरं, किं वा करवाम। कर्त्तव्यबोधो नोत्पद्यते॥ ३४॥

कृष्णप्रिया

मनमोहन! अबतक हमारा चित्त घर के काम-धंधों में लगता था। इसी से हमारे हाथ भी उनमें रमे हुए थे। परन्तु तुमने हमारे देखते-देखते हमारा वह चित्त लूट लिया। इसमें तुम्हें कोई कठिनाई भी नहीं उठानी पड़ी, तुम तो सुखस्वरूप हो न! परन्तु अब तो हमारी गति-मति निराली ही हो गयी है। हमारे ये पैर तुम्हारे चरणकमलों को छोड़कर एक पग भी हटने के लिये तैयार नहीं हैं, नहीं हट रहे हैं। फिर हम व्रज में कैसे जाँय? और यदि वहाँ जाँय भी तो करें क्या?॥ ३४॥

सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निम् ।
नो चेद् वयं विरहजाग्न्युपभुक्तदेहा[1] ध्यानेन याम पदयोः पदवीं सखे ते॥ ३५ ॥

कर्दमक्षमा

अन्वयः—हे अंग ! हास, अवलोक, कलगीतज, हृत्शयाग्निम् , त्वद्, अधरामृतपूरकेण, सिञ्च, नो, चेत् , हे सखे, विरहज, अग्नि, उपयुक्तदेहाः, वयम् , ध्यानेन, ते पदवीम् यामः ॥ ३५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतः अंग हे कृष्ण नोऽस्माकं त्वदधरामृतपूरकेण तवैव हाससहितेनावलोकेन कलगीतेन च जातो यो हृच्छयाग्निः कामाग्निस्तं सिंच । नो चेदयं तावदेकोऽग्निस्तथा विरहाज्जनिष्यते योऽग्निस्तेन चोपयुक्तदेहा दग्धशरीरा योगिन इव ते पदवीमंतिकं ध्यानेन याम प्राप्नुयाम ॥ ३५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वाभीष्टं निवेदयंत्य आहुः—सिंचेति । यतस्त्वया वयं सर्वव्यवहारसाधनापहारेणाऽसमर्थाः कृताः अतस्त्वमेव नः कामाग्निं निर्वापयेत्याहुः । कलगीतपदं पूर्वं व्याख्यातम् । यद्वा—कलगीतेन मधुरगानेन हृच्छय एव संतापजनकत्वसाम्यादग्निर्हृच्छयाग्निस्तम् । अधरनिष्ठामृतप्रवाहेण सिञ्च निर्वापय नो चेदन्यथा तावदधुना तेन द्वितीयेन च पदवीं सामीप्यम् "पदवी निकटे मार्गे विष्णौ च पादरक्षके" इति शाश्वतः । 'अंते या मतिः सा गतिः' इति न्यायेन वयं तु त्वां प्राप्स्याम एव । हस्तावेव मर्दयतस्तव शाठ्यमात्रं स्त्रीवधमात्रञ्चावशेक्ष्यतीति भावः । दृष्टान्तोऽत्र दीक्षितपत्नी ॥ अहो संप्रयोगसमरान्यसमयेऽपि सुंदरीणां निर्वस्त्राः काया दिदृक्षिता ये आसंस्ते चीरहरणदिने दृष्टास्तथैव मधुपानान्यसमयेऽपि भाववतीनामासां निर्लज्जं वचनं शुश्रूषितमासीत्तदधुनापि श्रूयते । हंतहंत वेणुनादेन काममयेन उन्मादिताः पुनश्च वाचःपेशैर्विह्वलीकृताः यच्चालंब्य विवेकलज्जाधर्मधैर्यादीनि तिष्ठंति तच्चित्तमप्यपहृतं तदप्येताः प्रायः सलज्जमेव भाषन्ते न त्वाभ्यन्तरभावमधुना वाचा मय्यराबुद्धाटयंतीति मनसि परामृशति सति श्रीकृष्णे काश्चिन्मुख्यतमा उन्मादसंचारिप्राबल्येन विपर्यस्तीकृतप्रकृतय आहुः—सिञ्चेति । अत्र हासेत्यस्य संबधिपदमर्थात्तवेत्येव लभ्यते । ततश्च अंग हे कृष्ण तव हाससहितेनावलोकेन कलगीतेन च जातः प्रोद्बुद्धः प्रोद्दीप्तो यो हृच्छयः काम एवाग्निस्तं तवैवाधरामृतपूरकेण सिंच निर्वापय । स्वार्थे कः । येनैवाग्निः प्रोद्दीप्यते तेनैव प्राप्तविवेकेन यदि निर्वाप्यते तदेव तदपराधोपशमः । अन्यथाऽग्निदाता गृहादिदाहोत्थं पापं प्राप्नोत्येवेति भावः । अत्र काममित्यप्रयुज्य हृच्छयपदप्रयोगेणैवं ध्वन्यते—अस्माकं कामो हि हृदि शेत एव तञ्च त्वया विना कोऽपि प्रबोधयितुं न शक्नोति तं च वंशीनादेन सहास्मत्कर्णरन्ध्रद्वारा हृदयं प्रवेश्य तत्र शयानं कामाग्निं प्रबोध्य हासावलोकघृतमधुभ्यां कलगीतवातेन च प्रोद्दीप्य तत्रत्यानस्मत्प्राणान् दग्धुमुपक्रमसे, अतस्तद्दाहपापाच्चेद्बिभेषि, तं, निर्वापय । न च तत्प्रोद्दीपनेन तन्निर्वापेन वा तवायासलेशोऽपि, यतस्ते हासावलोकस्तस्याग्नेरुद्दीपकः, अधरामृतं च तस्य निर्वापकमिति तद्वस्तुद्वयं तव मुखचंद्र एव वर्त्ततेऽतो दुर्ल्लीलराजपुत्रस्य तवाग्निज्वालननिर्वापणात्मिकैव खेला भूयसी भूरिशो दृष्टा न त्वग्निज्वालनमय्येव । एषा त्वय्येव दृश्यत इति । नन्वेतानि मे साहजिकान्येव हासावलोककलगीतानि एतैर्यदि युवतयो ज्वलेयुस्तदा कुत्रकुत्र कतिशो वा मया स्वाधरामृतैश्चिकित्सा कर्तव्येति चेत्—सत्यम् , परःसहस्रस्त्रीवधे प्राप्त एव तव तदुद्भूतादनुतापादयं हठोऽपास्यतीत्याहुः—नो चेदिति । विरहाग्निना उपयुक्तदेहा दग्धशरीरा योगिन्य इव ध्यानेन तव पदयोः पदवीं याम अधुनैव प्राप्नुयाम । अयमर्थः—वयं पूर्वजन्मन्यकृततपस्कानेवात्मनो जानीमो यदेतज्जन्मनि त्वं नांगीकुरुषे, तस्मादधुना तपश्चरणार्थं न बाह्यं लौकिकं वह्निं गृह्णीमः हृच्छयाग्नित्वद्विरहाग्न्योः स्वत एव सत्त्वात् । तत्रापि त्वद्विरहाग्निनाऽतिप्रबलीभविष्णुना हृच्छयाग्निरपि मंदीकरिष्यत एवातो विरहाग्नावेव प्राणेषु हूयमानेष्वस्माकं संकल्पश्चायम्—भो कृष्णविरहाग्ने कृष्णपादस्पर्शमाशास्समाना वयं त्वयि स्वप्राणान् जुहुमस्तस्मात्कृष्णस्य पादयोः पदव्यामन्यजनैरलक्षिता अस्मांस्तथा स्थापय यथाऽस्मत्कुचयोरुपर्यव तत्पादौ पतेताम् , न तु भूमाविति । ततश्च त्वत्पादभारेणैवोपशांतहृच्छयाग्नयो वयं सिद्धमनोरथा एव भविष्यामः, त्वञ्चानिच्छन्नप्यस्मत्कुचस्पर्शसुखं प्राप्नुवन्नपि स्त्रीवधानुतापमेव भूयांसं प्राप्स्यसीति । सख इति—सख्यादेवैवं चिकीर्षामः । सखीरप्यस्मांस्त्वमेवं संतापयसि चेद्वयमपि त्वां सखायमेवं कथं नानुतापयाम इति ध्वनिः । किन्तु, प्रेमहतकं खलु तदपि त्वदनुतापदुःखं कोटिगुणीकृत्यास्मभ्यमेव दास्यत इति जानीमः । किं कुर्मोऽस्माकं दग्धललाटमेवंविधमेव विधात्रा सृष्टम् । तस्मादये परिणामदर्शिन् स्वानुतापवल्लीबीजं किमर्थं वपसि कथं वा तत्फलभागिनीरस्मांश्च करोषि, मुंच हठमस्मानंगीकुरु इति भूयांस एवानुध्वनयः ॥ ३५ ॥

---

[1] युक्त–श्रीधर, वंशी, जीव, वीर, विज, विश्व, शुक, सु, ध, रा, ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं द्वितीयदिक्स्थिता अपि पुनराशामेवोत्कण्ठा स्फुटमेव वदन्त्यस्तत्पूर्त्तेरप्यवश्यंभावितां प्रौढ्या निर्दिशंत्यस्तदापातप्रत्याख्यानेन त्वयि दोषमात्रं पर्य्यवस्यतीति रीत्या विवक्षितम् उपसंहरन्ति—सिञ्चेति। निर्वापयेत्यर्थः। आदौ क्रियानिर्देशः परमार्त्तिवैयग्र्येण न इत्यस्य हृच्छयाग्निनैव सम्बन्धः। तत्पुरुषस्योत्तरपदप्रधानत्वात् हासस्य सम्बन्धिपदं तवेत्येव लभ्यते प्रकरणबलात् विनापि त्वच्छब्दमर्थबोधे सति तन्निर्देशस्त्वया जनिताग्नेस्त्वयैव निर्वापणं युक्तमिति विवक्षया पूरशब्देनाग्नेर्महत्त्वमपि ध्वनितम् स्वार्थे कः हासावलोककलगीतयोः क्रमेण घृतवातत्वं ध्वनितं हृदि शेते वसतीति हृच्छयः कामः अतस्तन्निवर्तनौषधस्याप्यन्तःप्रवेशनापेक्षयाऽधरामृतपूरस्य पानं तथाऽनन्यप्रतिकार्य्यत्वञ्च सूचितम्। इदञ्च सम्भोगस्य साक्षात् प्रार्थनं तदीयवेणुतनुमाधुर्य्यमधुमत्तचित्तानां लोकोत्तरप्रौढानुरागार्त्तिनर्त्तितमहोत्कण्ठावगुण्ठितानां रसेनापि न विरुद्ध्यते निषेधार्थाच्छन्नतयैवोक्तत्वात्तु नितरामिति व्यतिरेकेण तदेव दृढयन्ति नो चेत्? यदि न सिञ्चसि तदापि ध्यानेनेति "मरणे या मतिः सा गतिः" इत्यादिन्यायेन याम सम्प्रत्येव प्राप्स्याम इत्यर्थः। प्राप्तकाले लोट् तत्र च सखे इति सम्बोध्य स्वेषु स्नेहमुद्बोधयन्ति अत्रान्वयक्रमेणाभिप्रायाश्चैते। ननु, हासादिजहृच्छयाग्निसेकं साधनं मम जलभाजनमत्र किमिव दृश्यते इति परिहासमाशङ्क्याहुः—अमृतेति। अमृतेनैव तत् सिक्तं स्यात् नतु जलादिना तत्रापि तस्य पूरेण नतु यत् किञ्चिन्मात्रेण स्वार्थे कन् तेनैवेत्यर्थः। ननु, तदपि दुर्लभं कुत्र लप्स्ये तत्रापि तस्य पूरस्यात्यन्तासम्भव इत्याशङ्क्य कथमिदं गोपयसीत्याहुः, त्वदधरेति। अहो नान्येनामृतेन तच्छान्तिः स्यात् किन्तु त्वदधरसम्बन्धिनैव तत्रापि तस्याग्नेरत्यन्तवृद्धेर्युवतीकोटिभिरप्यपरिसमाप्येन तत्पूरेणैवेति महातृष्णा सूचिता एवमग्रे वक्ष्यमाणस्यामृतस्य च परमवैलक्षण्यं। ननु, ध्यानेन यामेति झटिति देहत्यागं सूचयन्तीनां भवतीनां तत्साधनं न दृश्यते तत्राहुः—विरहेति। अये अन्या इव किं वयमनुरागहीनाः येन बाह्यमग्न्यादिकं तत्साधनं मृग्यामः किन्त्वन्तरेव स्वत एव तदुदेष्यतीति भावः। अन्यत्तैः। यद्वा, एवं विवक्षितमुपसंहरन्त्यो ननु, दुर्घटे ऽस्मिन्नर्थे कथमतित्वरयथेत्याशङ्क्यातिदुःखात् दुर्घटत्वमेव सत्यमित्याहुः—नोचेदिति। ध्यानेपि नैव याम यतः विरहजाग्नेरेव उपयुक्ता उचिता देहा न तु संयोगामृतयोग्या यासां ता अधुनाऽत्र तदसिद्ध्या कालान्तरेऽपि जन्मान्तरेऽपि विरहस्यैव निश्चेयत्वादिति (निश्चितत्वादिति) भावः। सखे इति तस्यापि तत्र माविदुःखं दर्शयन्ति यद्वा, झटिति तत्प्राप्त्यभावेन देहत्यागं सूचयन्त्य आहुः, जन्मान्तरेपि ध्यानेनापि ते पदयोरन्तिकं मार्गमपि वा यामेति प्रार्थनं तत्र च सखीत्वेनैवेत्याशयेन सम्बोधयन्ति सखे इति। अनेन सुमध्यमा इत्यस्योत्तरं भवदाशयेदृशसद्गुणदेहोपि त्याज्यस्त्यक्तोपि तस्मिन् भवान्न त्याज्य इति श्लोकद्वयमिदमैश्वर्य्यमयार्थेऽपि प्रायः समानम् निषेधार्थश्चायं तस्मात् अङ्ग, हे महालम्पट! नः अस्माकं हासावलोककलगीतेन सहजेन जातो यस्तव हृच्छयाग्निस्तं त्वदधरामृतपूरकेणैव सिञ्च अस्माकं मध्ये सा काचिन्नास्त्येव यस्या अधरामृतेन स्वकामाग्निं सेक्ष्यसीत्यर्थः। इति स्ववर्ग्याणां सर्वथा नैरपेक्ष्यं सूचितम्। अथ च स्वाभीष्टपरममधुरवस्तुनि दुर्लभे सति लुब्धैः स्वस्यैवाधरपुटी लिह्यते इति नर्मभङ्गी व्यङ्ग्या नो चेत् यद्येवमश्रुत्वा पन्थानमस्माकं निरुन्धन् दुराग्रहान्न विरमसि तदा वयं स्वपतिविरहजाग्न्युपयुक्तदेहा भवेम वयं म्रियेमहीत्यर्थः। तथापि ध्याने चिन्तनेऽपि तव पादयोः पदवीमपि न याम न यास्याम सखे इति बाल्यक्रीडायां प्राप्तसख्यत्वेनाऽस्मद्धर्मनिष्ठां जानास्यपीति भावः। यद्वा, चेदिति निश्चये "धत्ते पदं त्वमविता यदि विघ्नमूर्द्ध्नि" इति वत् ततश्च नैव विरहजाग्न्युपयुक्तदेहा वयं ततो ध्यानेऽपि नैव यामेति ॥३५॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सिञ्च निर्वापयेत्यर्थः। जलप्रवाहेणाग्निमिवेति रूपकतो ज्ञेयम्, आदौ क्रियानिर्देशः, परमार्त्तिवैयग्र्येण। न इत्यस्य हृच्छयाग्निना समासान्तः प्रविष्टेनापि सम्बन्धः, त्वच्छब्दस्त्वया अनिताग्नेस्त्वयैव निर्वापणं सम्भवेदिति विवक्षया पूर-शब्देनाग्नेमहत्तादि ध्वनिता। अन्यथा अल्पेनैव जलेन निर्वापणसिद्ध्या पूरकेणेत्यनुपयोगः, स्वार्थे कः, हासादीनां क्रमेण घृतेन्धनवातत्वं ध्वनितम्, हृदि शेते वसतीति हृच्छयः कामः, अतस्तन्निवर्त्तकौषधस्याप्यान्तःप्रवेशनापेक्षयाधरामृतपूरस्य पानं तथानन्यप्रतिकार्य्यत्वं च सूचितम्। यद्यपि नायिकानां नायके सम्भोगप्रार्थनं व्यंग्यतयैवोपयुज्यते, न तु साक्षाद्व्यक्ततया, तथापि लोकोत्तरप्रौढानुरागाणां तासां परमार्त्तिभरेण विचारापगमात्तन्नात्र विरुध्यते। यद्वा, त्वदधरामृतपूरकेण त्वदधरामृतेन वर्णमयतामिव गतेन श्रोतृजनान् पूरयति आप्यायतीति त्वदधरामृतपूरकं वचनं तेन हृच्छयाग्निं हृदयवर्त्ति सन्तापं सिञ्च नाशयेति वचनामृतेनास्माकं तापं नाशयेत्यर्थः। नो चेत् यदि न सिञ्चसि ध्यानेनेति 'मरणे या मतिः सा गतिः' इत्यादि न्यायेन निजेष्टसिद्धौ परमोत्कण्ठया साधनविशेष उक्तः। यामेति सम्भावनायाम्, प्राप्स्याम वेत्यर्थः। तत्र चासम्भावना त्वत्सख्यप्रभावेण नास्तीत्याशयेन सम्बोधयन्ति—सख इति अन्यत्तैर्व्यञ्जितम् यद्वा त्वत्पादयोरेव ध्यानेन चिन्तया यो विरहाग्निस्तेनोपयुक्तदेहाः, तत्र ध्यानेनेति विरहाग्नेरधिकोद्दीपने साधनम्। यद्वा, विरहजाग्न्युपयुक्तदेहानां गोपीनामिव ध्यानेन पदयोः पदवीमन्तिकं नित्यात्यन्तसंयोगमित्यर्थः। याम यास्याम एव, अतः शाठ्यमात्रञ्च स्त्रीवधमात्रञ्च तवावशेक्ष्यति, वयं तु त्वत्संयोगमवश्यं प्राप्स्याम एवेति। यद्वा, विरहजाग्न्युपयुक्तदेहा अपि पदयोः पदवीं मोक्ष इत्यर्थः यामेति प्रार्थना, ननु कथं मद्भक्तानां मोक्षः स्यात्? तत्राहुः—

ध्यानेन मोक्षस्यैव चिन्तया वाञ्छयेत्यर्थः। ननु तथापि नासौ वो घटेत, तत्राहुः—सखे इति। सख्येनेदमेव हितं नः क्रियतामित्यर्थः, इति महार्त्त्यात्यन्ताभावप्रार्थनम् मोक्षस्यात्यन्ताभावता श्रीभागवतामृतोत्तरखण्डे विवृतैव। यद्वा, ध्यानेन पदवीं वैकुण्ठाख्यपदं तां यामेति कदाचिद्भक्तादीनां केनचिद्दुःखेन मोक्षादिप्रार्थनमिव वृन्दावनविहारैकप्रियाणां तासां श्रीवैकुण्ठलोकप्रार्थनमपि दुःखभरादेव। यद्वा, ध्यानविषये या विरहजाग्न्युपयुक्तदेहा गोप्यस्ता अपि भवत्पदाब्जान्तिकं नयामः प्रापयिष्यामः, किमुतात्मन इत्यर्थः। इयं प्रेममदोक्तिः, किं वा नयामेति सख्येन प्रार्थनमेव। यद्वा, तव पदयोर्ध्यानेन विरहजाग्न्युपयुक्तदेहा या गोप्यस्तासां पदवीं याम मरिष्याम इत्यर्थः। ततस्त्वमप्यनुतप्स्यस इत्यभिप्रेत्याहुः—सख इति। तासां तेनैव देहेन रासक्रीडाप्राप्तिपक्षे च पत्यादिभिर्बद्धत्वात्तन्मोचनार्थध्यानाच्च, क्षणं तासामनागमनेनान्त्यदशामननादिति दिक्। यद्वा, ध्यानेनापि तव पादयोरन्तिकं यास्यामः किम्, काक्वा, अपि तु त्वया पश्चात् प्रार्थिता अपि न यास्याम एवेति। किंवा सर्वसामग्रीयुक्तेऽस्मिन् जन्मनि तदसिद्ध्या परस्मिन् तस्यासम्भाव्यत्वादिति भावः। यद्वा, विरहजाग्नेरेव उपयुक्ता उचिता देहाः, न तु सम्भोगामृतयोग्या यासां ताः, अधुनात्र तदसिद्ध्या कालान्तरेऽपि जन्मान्तरेऽपि विरहस्यैव निश्चयत्वादिति भावः। यद्वा, जन्मान्तरे ध्यानेनापि ते पदयोरन्तिकं मार्गमपि न यामेति प्रेमार्त्तिभरेण प्रार्थनम्। तत्र च सखीत्वेनैव, इत्याशयेन सम्बोधयन्ति—सखे इति। अलमतिविस्तरेण, अनेन (२२ श० श्लो०) 'तद्यात' इत्यस्योत्तरम्, हृच्छयाग्निनिर्वाणे सति यत्नाद्यातुमपि शक्नुमः अन्यथा च मरिष्याम एवेति किं तत्र यानादिनेति। श्लेषार्थः—अंग! हे महालम्पट नोऽस्माकं हासावलोककलगीतेन सहजेन जातो यस्तव हृच्छयाग्निस्तं त्वदधरामृतपूरकेणैव सिञ्च। अस्माकं मध्ये सा काचिन्नास्त्येव, यस्या अधरामृतेन स्वकामाग्निं सेक्ष्यसीत्यर्थः। इति स्ववर्ग्याणां सर्वथा नैरपेक्ष्यं सूचितम्। अथ च, स्वाभीष्टपरममधुरवस्तुनि दुर्ल्लभे सति लुब्धैः स्वस्यैवाधरपुटी लिह्यते इति परिहासभंगी व्यंग्या, नो चेत् यद्येवमश्रुत्वा दुराग्रहान्न विरतोऽसि, तदा वयं स्वपतिविरहजाग्न्युपयुक्तदेहा वयं भवेम वरं म्रियेमहीत्यर्थः। तथापि सखे! सेन्द्रिये ध्याने चिन्तनेऽपि तव पदयोः पदवीमपि न याम न यास्याम इत्यर्थः॥ ३५॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तर्हि किं मया विधेयम्? इत्यत्राहुः—सिञ्चेति। अङ्ग हे कृष्ण! तवाधरामृतस्य पूरकेण प्रवाहेन नोऽस्माकं हासयुक्तेन तवाऽवलोकनेन मधुरवेणुनादेन च जातं हृच्छयाग्निं कामाग्निं सिञ्च शमय नो चेद्यद्येवं न करोषि तर्हि हे सखे! वयं भवद्वियोगजाग्निना दग्धदेहाः सत्यः त्वद्ध्यानेन साधनेन तव पदयोः पदवीं, याम प्राप्नुयाम त्वयाऽनुपभुक्तं व्यर्थमिदं शरीरं त्वद्विरहाऽग्निना दग्ध्वा त्वद्ध्यानेन त्वत्सन्निधिमेव प्राप्स्यामः मृत्वापि त्वां न त्यजेति भावः॥ ३५॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तर्हि भवतीनां किमभीष्टमित्यत्राहुः—सिञ्चेति। पूरकेण प्रवाहेण हाससहितावलोकेन कलगीतेन मधुरगानेन जातो हृच्छयः कामः स एवाग्निः तं सिञ्च अभिषिञ्च शमय, नो चेत् न शमयसि चेत्? विरहाज्जातेनाग्निना उपयुक्तो गृहीतो देहो यासां तास्तथा॥ ३५॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

हे विभो! करणीयं वर्तते, करिष्यामश्च। तदेव त्वं यद्येवं करोषि, तदा तत् करिष्याम एव। किं मया कर्तव्यमिति चेच्छ्रूयतामिति पुनर्मध्या-धीरा एवाहुः सिञ्चाङ्ग न इत्यादि। हे अङ्ग! नो गीतजं कथनज हृच्छयाग्निं सिञ्च हृदि शेते हृच्छयो योऽग्निर्भवदुपेक्षाप्रतिपादकवचनरूपोऽग्निस्तं निर्वापय। केन? त्वदधरामृतपूरकेण, प्रशंसायां कः। हे हासावलोक! कलहाससहिता अवलोककला निरीक्षणसौष्ठवं यस्य। नो चेद् यद्येवं न करोषि, तदाविरहजाग्युपयुक्तदेहा ध्यानेन ते तव पदयोः पदवीं याम, न तु यास्यामः। एकोऽग्निर्योऽयं वर्तते, स तु दाहक एव, न मारकः। मारकस्तु विरहज एव। अयं तु गीतजत्वाद्वाग्ज एव। तेनानेन शुष्कास्तेन तत्क्षणमेव भस्मीभविष्याम इति वाक्यार्थः॥ ३५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मरणमेव शरणमिति निश्चित्य मध्या आहुः— सिञ्चाङ्ग न इत्यादि हे हासावलोक! हासेन सहितोऽवलोको यस्य हे तथाभूत। कलगीतेन जनितो यो हृच्छयाग्निस्तं सिञ्च निर्वापय, हृदि शेते इति हृच्छयो मनोरथः, स एवाधुनाग्निरभूत्, दाहकत्वात्। केन सेकः? तत्राह—त्वदधरामृतपूरकेण। ननु तेन सेके स तु वर्द्धिष्यते, वैद्युतस्याग्नेर्वर्षाजलेन सेको हि वर्द्धापक एव, न तु तच्छामन इति प्रसिद्धिरिति चेद्वर्द्धतां नाम, त्वदधरामृतसिक्तहृच्छयाग्निना वयं न दह्यामहे, विरहाग्निना दह्यामह इत्याहुः—नो चेदित्यादि। नो चेद् यदि न सिच्येत, तदा विरहजाग्न्युपयुक्तदेहाः सत्यस्तव ध्यानेन तव पादयोः पदवीमन्तिकं याम गच्छेम—इत्याक्षापयेत्यर्थः। ध्यानेनेत्यस्यायमर्थः—मरणे या मतिः, सा गतिरिति॥ ३५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहो सम्प्रयोगसमयान्यसमयेऽपि सुन्दरीणां निर्वस्त्राः काया दिदृक्षिता ये अप्संस्ते चीरहरणदिने दृष्टास्तथैव मधुपानान्यसमयेऽपि भाववतीनामासां निलज्जं वचनं शुश्रूषितमास्ते तदधुनापि न श्रूयते हन्त हन्त वेणुनादेन काममयेन नोन्मादिताः पुनश्च वाचःपेशैर्विह्वलीकृताः यच्चालम्ब्य लज्जा विवेकधर्म्मधैर्य्यादीनि तिष्ठन्ति तच्चित्तमप्यपहृतं तदप्येताः प्रायः सलज्जमेव भाषन्ते न त्वाभ्यन्तरभावमधुनापि वाचा सम्यगुद्घाटयन्तीति मनसि परामृशति सति श्रीकृष्णे काश्चित् मुख्यतमा उन्मादसञ्चारिप्राबल्येन विपर्यस्तीकृतप्रकृतय आहुः, सिञ्चेति । अत्र हासेत्यस्य सम्बन्धिपदमर्थात्तवेत्येव लभ्यते ततश्च अङ्ग हे कृष्ण ! तव हाससहितेनावलोकेन कलगीतेन च जातः प्रोद्बुद्धः प्रोद्दीप्तो यो हृच्छयः काम एवाग्निस्तं तवैवाधरामृतपूरेण सिञ्च निर्वापय स्वार्थं कः येनैवाग्निः प्रोद्दीप्यते तेनैव प्राप्तविवेकेन यदि निर्वाप्यते तदैव तदपराधोपशमः अन्यथा अग्निदाता गृहादिदाहोत्थं पापं प्राप्नोत्येवेति भावः । अत्र काममित्यप्रयुज्य हृच्छयपदप्रयोगेनैवं ध्वन्यते अस्माकं कामो हि हृदि शेत एव तञ्च त्वया विना कोऽपि प्रबोधितुं न शक्नोति त्वञ्च वंशीनादेन सहास्मत्कर्णरन्ध्रद्वारा हृदयं प्रविश्य तत्र शयानं कामाग्निं प्रबोध्य हासावलोकघृतमधुभ्यां कलगीतवातेन च प्रादीप्य तत्रत्यानरमत् प्राणान् दग्धुमुपक्रमसे अतस्तद्दाहपापाद्बिभेषि चेत् तं निर्वापय नच तत्प्रोद्दीपने तन्निर्वापणे वा तवायासलेशोऽपि यतस्ते हासावलाकस्तस्याग्नेरुद्दीपकः अधरामृतं च तस्य निर्वापकमिति तद्वस्तुद्वयं तव मुखचन्द्र एव वर्त्तते अतो दुर्लीलराजपुत्रस्य तवाग्निज्वालननिर्वापणात्मिकैव खेला भूयसी भूरिशो दृष्टा नत्वग्निज्वालनमय्येव एषा त्वद्यैव दृश्यते इति नत्वेतानि मे साहजिकान्येव हासावलोककलगीतानि एतैर्यदि युवतयो ज्वलेयुस्तदा कुत्र कुत्र कतिशो वा मया स्वाधरामृतैश्चिकित्सा कर्तव्येति चेत्सत्य परस्सहस्रस्त्रीवधे प्राप्त एव तव तदुद्भूतादनुतापादयं हठो यास्यतीत्याहुः नोचेदिति विरहाग्निना उपयुक्तदेहा दग्धशरीरा योगिन्य इव ध्यानेन तव पादयोः पदवीं याम अधुनैव प्राप्नुयाम अयमर्थः वयं पूर्वजन्मस्वकृततपस्कानेवात्मनो जानीमः यदेतज्जन्मनि त्वं नाङ्गीकुरुषे तस्मादधुना तपश्चरणार्थं न बाह्यं लौकिकं वह्निं गृह्णीमः हृच्छयाग्नित्वद्विरहाग्न्योः स्वत एव सत्त्वात् तत्रापि त्वद्विरहाग्निनातिप्रबलीभविष्णुना हृच्छयाग्निरपि मन्दीकरिष्यते एवातो विरहाग्नावेव प्राणेषु हूयमानेष्वस्माकं सङ्कल्पश्चायं भोः कृष्णविरहाग्ने ! कृष्णपादस्पर्शमाशासाना वयं त्वयि स्वप्राणान् जुहुमस्तस्मात् कृष्णस्य पादयोः पदव्यामन्यजनैरलक्षिता अस्मास्तथा स्थापय यथा अस्मत्कुचयोरुपर्य्येव तस्य पादौ पतेत न तु भूमाविति ततश्च त्वत्पादभारेणैवोपशान्तहृच्छयाग्नयो वयं सिद्धमनोरथा एव भविष्यामस्त्वञ्चानिच्छन्नप्यस्मत्कुचस्पर्शसुखं प्राप्नुवन्नपि स्त्रीवधानुतापमेव भूयांसं प्राप्स्यसीति सखे इति सख्यादेवैवं चिकीर्षामः सखीरप्यस्मांस्त्वमेवं सन्तापयसि चेद्वयमपि त्वां सखायमेवं कथं नानुतापयाम इति ध्वनिः किन्तु प्रेमहतकः खलु तदपि त्वदनुतापदुःखं कोटिगुणाकृत्यास्मभ्यमेव दास्यत इति जानीमः । किं कुर्मोऽस्माकं दग्धललाटमेवम्विधमेवं विधात्रा सृष्ट तस्मादपरिणामदर्शिन् ! कृपासिन्धो ! स्वानुतापवल्लिबीजं किमर्थं वपसि कथं वा तत्फलभोगिनीरस्मांश्च करोषि मुञ्च हठमस्मानङ्गीकुर्विति भूयांस एवाऽनुध्वनयः ॥ ३५ ॥

रसिकाह्लादिनी–टीका

एवं दैन्यनिवेदनेन श्रीकृष्णस्य चित्तमार्द्रवामलक्षयन्त्यो विरहाग्निना दह्यमानाशयास्तं सोढुमपारयन्त्यः प्रार्थयन्ते। सिञ्चेति । अङ्ग भो कृष्ण नोऽस्माकं सिंच तर्पय, किमिति प्रेक्षायां प्रस्तुतं निवेदयन्ति तवेति प्रकरणवशात् ज्ञातव्यम् तवैव हाससहितोऽवलोकः कलगीतं च ताभ्यां जातो यो हृच्छयः कामः स एवाग्निः दाहकमिति । केन साधनेन निर्वापनीय इत्यपेक्षायामाहुः तवैवाधरामृतस्य पूरः प्रवाहस्तदेव कं जलं तेनेत्यर्थः । कि च कामरूपस्य हृद्रोगस्य निदानं जानीमः तन्निवर्तकमौषधमपि जानीमः परन्तु निदानमपि त्वदधीनमौपधमपि त्वदधीनमिति । अतोऽयमधुनैवोत्थितोग्निरस्माकं दग्धुमुपक्रान्तोस्ति यावन्निःशेषं न दहति तावत्प्रतीकारं क्रियताम् । यथा कालियदमने दावाग्निपानेन सर्वेषां व्रजौकसां रक्षा कृता तथा अस्मदादपि वह्नेरस्मान् रक्ष । किंत्वयमग्निः पातुं न शक्यो यतोऽन्तरेव दाहको न बहिरतस्त्वया पाते सति अस्माकमिव तवाप्येतद्दाहो भविष्यतीति पाने भवान्न युज्यते । किं चान्तरदाहकत्वमस्माभिरेवानुभूतं स तु दावाग्निः केनाप्यसुरेणोत्पादितः । अयमग्निस्तवैव हासावलोककलगीताभ्यां जनितोऽतस्तवैवाधरामृतपूरकेण शैत्यहेतुना दावाग्नेरपि एतस्याग्नेर्महत्वमालोक्य निर्वापयेति । दावाग्नेः सर्वाक्षिगोचरत्वं दृष्टं एतस्याग्नेः कस्याप्यक्षिगोचरत्वं न, अधरामृतपानेनान्तस्तापनिवृत्तौ सत्यां स्वयमेवाग्निः निर्वाणं गमिष्यतीति भावः । इदमत्र तत्वं निदाने निवृत्ते रोगोऽपि निवर्तत इति प्रसिद्धेः, रहस्यस्माभि' क्रियमाणेनाधरामृतपानेन सुखोत्पत्तौ जातायां तवाक्षिनिमीलने जाते सति हासावलोककलगीतयोरपि क्षणमात्रोपरमो भविष्यति। अत एव निदानोपरतौ केनाप्यलक्षितो हृच्छयाग्नेरप्युपरमो भविष्यतीति भावः । यद्यपि नायिकानां स्वयमेवाधरामृतप्रार्थनं कामशास्त्र–विरुद्धं रसजनकं न तथापि मोहितानां परमप्रेमवतीनां युक्तायुक्तकथनविवेक–रहितानामासां हृच्छयाग्निज्वालावलीढत्वात् एवमुक्तं व्यतिरेके तव महदीयं कीर्तिरस्माकं च महती सत्कीर्तिर्मविष्यतीत्याहुः नो चेत् यदि कृच्छयाग्निं न निर्वापयसि तदा वयं तव पादयोः ध्यानेन पदवीमन्तिकं याम यास्यामेत्यर्थः। यद्वातो ध्यानेन पदयोः पदवीं मार्गयामः इदानीमेव प्राप्नुयामः न तु कालांतरे । तत्र मरणे व्यवसायात्मकानां भगवद्विमुखानां पत्यादीनां संगजनितदोषस्य प्रायश्चित्तान्तरेणानिवर्त्यत्वमाशंक्याग्निप्रवेशजनितशुद्ध्या श्रीकृष्णप्राप्तियोग्यतां सम्भाव्याहुः

विरहजेति। विरहजाग्न्युपयुक्तदेहा इति हृच्छयाग्निरन्तरदाहकः मनो दग्ध्वा भस्मानि जाते तस्मादवशिष्टेन केनचिद्विस्फूलिंगेन हेतुनातस्तथा शुष्के शरीरे काष्ठप्राये जाते तस्मिन् पतितेनान्य एवाग्निरुत्पद्यते तमेवाहुः अधरामृताप्राप्ता विरहा जानिष्यते। तोऽग्निनोपयुक्ता दग्धा देहा यासां ता वयं, यद्वा विरहजाग्नेरेवोपयुक्तानुचिता न तु रमणयोग्यादेहा यासां ता भगवद्विमुखानां संसर्गेण मलिनत्वात्। अत एव मलिनस्य रमणायोग्यत्वमालक्ष्य भवता प्रत्याख्यातं "तद्यातेति" इदानीम्—योग्यं देहं दग्ध्वा ते पदयोः ध्यानेन हेतुना पदवीं सामयोग्यं स्थानं रमणयोगेन शुद्धेन देहेन यास्यामः। हे सखे इति सम्बोधनेनैतत् ज्ञायते। यस्तु सखा स तु सखीनां वंचको न भवति। ननु मया किं वञ्चनं कृतमिति चेत्तत्राहुः हृच्छयाग्निनिर्वापके औषधे विद्यमानेपि न ददासीदमेव यद्वा योगिन इव ध्यानेनेदानीं ते पदयोः पदवीं सान्निध्यं यामः प्राप्नुमः। क्षणान्तरे विरहाग्निदग्धदेहास्ते पदयोः पदवीं शुद्धचैतन्येनाव्यहितं सांनिध्यं प्राश्यामः अस्मिन् देहे दग्धे सति त्वयि निघृणत्वं दुःकीर्त्तिमत्वं पर्यवस्यति। अयमभिप्रायः हासावलोकः संधुक्षणं कलगीतं च वायुरत उभाभ्यां जानतो हृच्छयाग्निः स चालौकिकः तवाधरामृतपूरकेनोपशाम्यति, अधरामृतस्याप्यलौकिकत्वं अत एवालौकिकेनामृतेनालौकिकाग्निप्रशमं नतु देवभोग्यामृतेनोपशमः तस्य संसारतापहेतुत्वात्। यतः स एव हृच्छयाग्निरधरामृतपानाभावे विरहाग्निमुत्पाद्य देहं भस्मीकरोति अतो हृच्छयाग्नियुक्ता एव त्वां प्राप्स्यामस्तदा स तापस्त्वय्यपि संचरिष्यतीति ॥ ३५ ॥

विशुद्धरसदीपिका

तदेवमधीरतया दशमीमिव दशामासादयन्त्यः प्रत्याख्याने च तस्मिन्नेव दोषं पर्य्यवसाययन्त्यो विलम्बमसहमाना विवक्षितमुपसंहरन्ति–सिञ्चेति। ससम्भ्रमम् आदावेव क्रियानिर्देशः परमार्त्तिवैयग्र्येण तथा निर्वापयेति वक्तव्ये सिञ्चेत्युक्तिरग्नेराधिक्यसूचनाय न इति त्वदिति चासाधारण्यम् अधरामृतेति वैलक्षण्यं वह्निमात्रस्य जलसेकमात्रशम्यत्वागमात् पूरकेणेति प्राचुर्य्यं कमित्यत आहुः—हासेत्यादि। तत्र हासावलोकेत्यनेन कामाग्नेरुद्दीपितत्वं कलगीतेत्यनेन फूत्कारं हृच्छयेत्यनेन नित्यत्वं सूचितम् ततश्च दाम्पत्यावेशात्साक्षात्सम्भोगप्रार्थनमप्यविरुद्धम् एवं प्रार्थितेपि शैथिल्यमालल्य व्यतिरेकेण भीषयन्त्य आहुः–नोचेदिति! वयमिति सगर्वोक्त्याऽसारणत्वं विरहेति हृच्छयाग्निरेव परिणतो विरहाग्निः तदुक्तं भावप्रदीपे—

"यदापि कामिनः साक्षात्पश्यन्ति परमेश्वरम्। तथापि कामजो भावो विरहाद्यनुबन्धनः" ॥ इति ॥

यद्यपि "प्रेमैव गोपरामाणां काम इत्यगमत्प्रथाम्" इति तन्त्रोक्तेर्नैतासु कामः सम्भवति तथापि तादृशसाधकविशेषसङ्ग्रहाय तथानुकरणमविरुद्धमिति ज्ञेयम् ततश्चैकस्तावत्कामाग्निस्तदनन्तरं जनिष्यते विरहाग्निरित्येकस्यैव नामान्तरेणोपादानमत्याहितसूचनाय तेनोपयुक्तदेहाः दग्धशरीराः ध्यानेनेति योगिन इवाविज्ञातसखस्य ते पदयोः पदवीं याम इति नतु यास्याम इति कालविलम्बासहत्वं सख इत्यवश्यप्राप्यत्वं अयत्नस्मरणीयत्वं चाभिहितं तदुक्तं श्रीभगवद्गीतासु—

"यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय ! सदा तद्भावभावितः" ॥ इति।

यद्वा, सखित्वेन तवापिदुःखं भविष्यतीति अथवा देहान्तरप्राप्तावपि नित्यसख्यस्य तव सङ्गो भविष्यतीति वृथैवायं तवाग्रह इति सूचितम्। यद्वा, सखीत्वापादनेन कामवासनास्थागमं तच्च हृच्छयपदेनाभाग्यस्य त इति दक्षिणात्वमेवासां दृढीकृतमिति दिक् अधीरत्वाच्छ्लोकद्वयेनैव वाक्यपूर्त्तिरिति ॥ ३५ ॥

श्रीरामनारायणकृता भावभावविभाविका

किञ्चार्थित्वसमर्थत्वयोरधिकारिविशेषणतयाऽस्माकं गृहकृत्यसमर्थत्वयोरभावान्न तत्राधिकारस्तव तु मुरलिकानादेन कृताह्वानतयाऽस्मद्विलाससुखार्थित्वात्तत्कर्तुं समर्थत्वाच्चाधिकारित्वेन तदनुष्ठानस्यावश्यकत्वादावाहनं कृत्वा यजन विना विसर्जनानौचित्यात् एवं धर्मानुष्ठानं निधेहीति कामेष्टिविधिमाहुः श्रुतिरूपा गोप्यः सिद्धाः देवता फलरूपा चाङ्ग न इति अङ्ग हे प्रिय ! हास एवाध्वर्य्यवं कर्म कामाग्न्याधाने प्राधान्यात् अवलोकस्तु कृताकृतावेक्षकब्रह्मकर्मफलमिति फामबीजोपलक्षकतया मन्त्रात्मकऋक्पाठरूपहोत्रं गीतमेवोद्गात्रं तैर्मनोरगेगुणगणैर्मन्थनेन जातं मनोजाग्निं हृच्छयेति मणिमुक्ताहारादिसर्वतो भद्रालंकृतोरोवेदिकासंन्निहितहृत्कुण्डेशयं तत्राहितं त्वदधरयोः स्रक्स्रुवस्थानापन्नयोर्यदमृतं स्नेहात्मकं माधुर्यरसरूपसितान्वितगोघृतं तत्पूरकेण प्रवाहेण सिञ्चेति होमाधिक्यनिर्देशः यद्वा, पूरकमिष्टिं पूरकन्तेन पूर्णाहुतिरूपेण सिञ्च नः शब्दस्य योग्यताबलात्समासातर्गतेनापि हृच्छब्देनान्वयः यद्वा देवताफलरूपा नोऽस्मानेवोद्दिश्य सिञ्च न हि तत्र सर्वेश्वरस्य स्वतः परमानन्दघनत्वेन फलरूपस्य न प्रेमभक्ती विनाराध्यं फलं वा सम्भवति "राधैवाराध्यते मया, भगवान्भक्तभक्तिमान्" इत्यादि वचनात् नोचेत्त्वय्यैवमनुष्ठानाभावे सखे इति सख्यास्वेष्टया निर्वाहे तत्सख्या स्वाधिकारानुरूपतया निर्वहनीया अतो वयमेव स्वाधिकारमनुसृत्य "यच्छ्रद्धया विद्यया उपनिषिदा वा कुरुते तद्वीर्यवत्तरं भवति" इति श्रुत्याध्यानान्वितं यागस्य बलवत्त्वात् "यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्" इति विधानात्ते ध्यानेन ते विरहजाग्नावुपयुक्तदेहाद्धोमितस्वशरीरास्ते पादयोः पदवीं याम इत्येकयैवेष्टया नस्तव प्राप्त्या परस्पर-

फलान्तराभावादुभयेष्टिसिद्धिरिति भावः। यद्वा, अत्यातुरतयान्त्यदशामापन्ना इव कुलजांकुललज्जामुत्सृज्य स्वयं प्रार्थने रसभङ्गशङ्कापङ्ककालाङ्कमनाशङ्क्य स्वविवक्षितं स्फुटमाहुः। सिञ्चेत्यादि संभ्रमात् निर्वापणस्थले सिञ्चनोक्तिक्रियायाः पूर्वनिर्देशश्च त्वदधरामृतपूरकेणेत्यत्र सामान्यरोगवतामौषध्यन्तरसम्भवेपि दग्धानां तदमृतमृते नान्या गतिः। ननु, बहूनां दग्धानां वोऽधरामृतपूरकेण बिन्दुना किं भविष्यतीत्याशङ्क्याह–पूरकेणेति। यद्वा, नो नोऽधरणेरमृतमित्याशयमालक्ष्याहुरमृतपूरकेणेति 'वंशाच्छिन्ना तापशुष्का बिधा दग्धापि जीविता। वंशी जाता मृतापूरा ते धरामृतपूरिता॥ तत्ते ऽधरामृते का वाविश्वसेन्न हि धीमति। जीवयाशु घनश्यामाधरामृतमृते मृताः'' तत्तत्पतिमन्येभ्यः सेचनमाशङ्क्य नस्त्वदिति शब्दाभ्यां नोग्निशमनस्य त्वदधरामृतधाराधीनत्वमेवेत्यसाधारण्यनिर्द्धारणं कामाग्निं सिञ्चाम्यत आहुः—हासेत्यादि। कामाग्न्युद्दीपनहासावलोकसहकृतकलेत्युपलक्षितकामबीजान्वितवंशधमनरूपगीतप्रादुर्भूतहृच्छयाग्निं बहिरग्नेः पलायनसम्भवेपि हृच्छयाग्नेः पलायनासम्भवात्त्वदधरामृतसेचनं विनाऽस्मद्रक्षणानुपपत्तिरेवेति भावः। नोचेदकस्त्वद्धासादिवर्द्धितकामाग्निर्द्वितीयस्त्वद्वैमुख्यप्रभवो विरहाग्निस्तयोरुपयुक्तदेहाः—

"यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय! सदा तद्भावभावितः" ॥

इति स्मृतेः। ते ध्यानेन वयं स्वयं याम तथा च नत्वदुपकारः। यद्वा, यद्यपि वन्हिस्त्वयैव ज्वालित इति भवति तवामितस्त्रीवधदोषस्तथापि सखे! नास्माकं त्वयि दोषारोपौचित्त्यं वयं स्वयमेवोपयुक्तदेहा इति न तव कालात्मकस्य कालाङ्कशङ्का यद्वा, सखे इति सम्बोधनेनाविज्ञातस्य सखस्य ते पदयोः पदवीं योगिन इव याम। यद्वा, "सयुजा सखाया" इति श्रुतिसिद्धसख्ये तद्वैमुख्ये नः श्रुतिबाह्यत्वापत्त्या वयं तन्न सहामहे तवाप्यस्मद्वैमुख्ये तथात्वापत्तेर्धर्मविच्छित्तिमदापालकस्त्वं सख्यानुसारं भज। यद्वा, नो दाहे सख्येन तवापि खेदस्यादेवेति वृथा ऽयमाग्रहः। यद्वा, कामो रुद्रेण दग्धोऽनङ्गस्तदङ्गप्रविष्टः सम्मोहनीदर्शने भ्रंशयामास तथाऽधुना त्वं नोऽसामर्थ्यनैवावमन्यसे अनङ्गत्वे तु तदा मन्यसे एवेति सख्ये नावोचाम। यद्वा, साङ्गत्वे ऽनङ्गत्वे तव प्राप्तिः समा किंत्वनङ्गत्वेन प्राप्तौ तवाभेदेन नैष्ठुर्य्यं नो माभूदिति बिभीम। यद्वाऽविज्ञातसखत्वेनोहृज्ज्ञोपि रावणगृहवासात्सीताग्निप्रवेशवत् गोपगृहवासाच्छङ्कामाकल्प्य विरहाग्नौ परीक्षसे वयं तु नान्यचित्ता इति त्वद्ध्यानेन विरहाग्निनोपयुक्तदेहाः प्रह्लाद इवाभीताः परीक्षां दत्त्वा सदेहा एव त्वत्पदयोः पदवीं यामेति मास्त्वकल्माषाणां नो दाहशङ्का तवेति भावः॥ ३५॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवं दक्षिणादिग्गतास्तदुक्त्या प्रार्थयन्ते—सिञ्चेति। अङ्ग, हे भगवन्! अस्मद्धृच्छयाग्निं सिञ्च ननु निर्वापय त्वद्विषयककामस्य परमसुखरूपत्वात् यतस्त्वयैवोत्पादित इत्याहुः—हासेति। तव य उपहासपूर्वको ऽवलोकः कलगीतं च ताभ्यां जातो यो हृच्छयः कामः स एवाग्निस्तत्र हासः कामजनकः अवलोकः सन्धुक्षणकर्त्ता गीतं वायुरिव तत्रापि कलगीतं सर्वतो वायुः सिञ्चनं च न बाह्यघृतादिना न स्वर्गस्यामृतेन न चन्द्रस्य सुधया वा सम्भवति तेषां यथा कथञ्चिदुदरप्रवेशयोग्यानामप्य ऽनभिलषितत्वेन हृदये प्रवेशायोग्यत्वादित्याशयेनाहुः—त्वदधरामृतपूरकेणाऽलौकिकेनापूर्वकेणापि सिञ्चनोक्त्या यथोक्ताग्नेः परममहत्त्वं सूचितम् सिञ्चनप्रार्थनया भगवद्विषयः काम एवास्मज्जीवनं जाठराग्निवदितिध्वनितम् अन्यथा स्वस्य यदनुष्ठेयं तदावेदयन्ति—नो चेदिति। सिञ्चनेन यदि न जीवयसि तर्हि विरहजाग्निना उपयुक्तदेहाः दग्धशरीरास्ते पदयोः पदवीमन्तिकं योगिवद्यामः प्राप्नुयामः। उपयुक्तपदेन त्वयोपभोग्यदेहिनां यथोक्ताग्निनोपभुक्तत्वमयुक्तमिति ध्वनितम् ननु, सिञ्चनेनातिप्रवृद्धः कामाग्निर्दाहको भविष्यतीत्याशङ्कानिरासाय विरहाग्निनेत्युक्तम् तथा चातिप्रवृद्धोपि जाठराऽग्निर्यथेष्टभोजनलाभे सति न दहति अनशनादिना तदलाभे तु दहति तथा हृच्छयाग्निरपि स्वभोग्यालाभे तदाशानिवृत्त्या विरहाग्निरूपेण परिणता दहतीति भावः। यद्यपि तव प्राप्तौ नास्त्यस्माकं किञ्चिदपि प्रतिबन्धकं तथापि भगवदुपभुक्तदेहानां भगवत्प्राप्तिरभिलषिता तद्विपर्यये महद्दुःखमापतत्वखिलरूपेणावतीर्णस्य तव यथास्मन्मनोरथपूर्त्तिर्भवेत्तथाऽनुष्ठानं योग्यमिति सूचयन्त्यः सम्बोधयन्ति – हे सखे! इति। अथवा यद्यप्यस्मन्मरणे तव नास्ति काचिद्धानिस्तथापि सखित्वात्पश्चात्तापस्तु भविष्यतीति सम्बोधनाशयः॥ अनभिज्ञापक्षे अनेन निर्वस्त्राङ्गदर्शनार्थं यथा वस्त्राहरणलीलारब्धा तथा निर्लज्जवचनश्रवणार्थमियं लीला समारब्धेति विज्ञाय विस्पष्टं प्रार्थयन्ते—सिञ्चेति। आदौ क्रियापदप्रयोगेणोत्कण्ठाधिक्यं सूचयन्ति—अङ्ग, हे प्रिय! नः कामाग्निं सिञ्च निर्वापय यतस्तव हासावलोककलगीताभ्यां जातश्चोद्दीप्तस्तथाचास्मद्धृदयशयमेव कामाग्निर्हासावलोकाभ्यामधरोत्तरारणीभ्यां कलगीतलक्षणेन मन्थनदण्डेन प्रबोध्य वाचः पेशैः प्रदीप्य तत्रस्थानस्मत्प्राणान् दग्धुमुपक्रान्तोसि नेदमुचितमतस्तज्जनितपापाद्बिभेषि चेत्तर्हि तं निर्वापय येनैवाग्निः प्रदीप्यते तेनैव पश्चात्तापेन झटिति यदि निर्वाप्यते तर्हि तदैव तत्पापं निवर्त्तत इति भावः। ननु, सम्प्रति ममान्तिके जलपूर्णभाजनाऽभावात्कथं सिञ्चामि तथाचेद्भवतीनामाग्रहस्तर्हि यमुनासन्निधौ चलनीयमिति सोपहासमाशङ्क्याहुः—अमृतेन तत्राप्यग्नेः परममहत्त्वात्पूरकेण स्वार्थे कन् ननु, जलमपि यत्र दुर्ल्लभं तत्राऽमृतं कुतः स्यात्? तद्बिन्दोरपि दुर्ल्लभत्वात् तत्पूरः कुत इत्याशङ्क्य कथमस्मज्जीवनसाधनं गोपायसि प्रत्यक्षोपलभ्यमानस्य गोपनायोगादित्याशयेनाहुः—त्वदधरेति। अहो नान्येनामृतसमुद्रेणापि तच्छान्तिरतोऽस्तु तद्दौर्लभ्यं येनामृतेन तच्छान्तिस्तत्तव मुखचन्द्र एवास्त्यतो नास्ति तव कोऽप्यायास इति भावः। अनेन ज्वालनोपशमनयोरुभयोरपि

स्वायत्तत्वादुभयविधा क्रीडोचिता नत्वेकविधा दुल्लीलाकर्तृषु राजकुमारेष्वपि तथा दर्शनादित्यपि ध्वनितम् हृच्छयाग्निरित्यनेनान्तरीयदाहात्मको रोगविशेषः त्वदधराख्यपात्रविशेषं मुखे निधाय पीतेनाऽन्तः प्रवेशसमर्थेन तत्रस्थामृतपूरकेणैवोपशान्ति गमिष्यति नत्वन्यैः कोटिभिरप्युपायैरिति ध्वनितम् ननु, मम स्वाभाविकैर्हासादिभिर्यदि युवत्यो ज्वलेयुस्तर्हि कुत्र कति वा स्वाधरामृतदानेन चिकित्स्या इति चेत्तत्राहुः—नो चेदिति। यदि न सिञ्चसि तर्ह्य यमेकोऽग्निस्तेन शोषितदेहास्तथाविरहजाग्निना दग्धशरीरास्ते पदयोः पदवीं सान्निध्यमधुनैव ध्यानेन प्राप्नुयामः "अन्ते मतिः सा गतिः" इति न्यायात् प्राणान्विहायापि प्रेष्ठसन्निधानं सम्पाद्यमिति स्वप्राणेभ्योपि स्नेहाधिक्यं सूचयन्त्यः सम्बोधयन्ति–हे सखे! इति। यद्वा, पूर्वजन्मन्यकृततपस्का वयमता विरहाग्निना प्राणान् जुहुमः ततस्तव पादयोः पदवीं मार्ग प्राप्नुयामस्तद्रूपा भविष्यामस्ततोऽनिच्छतोऽपि तव पादावस्मत् स्तनेष्वेव पतेतां न तु भूमौ ततश्च त्वत्पादभारेणैवोपशान्त हृच्छयाग्नयो वयं सिद्धमनोरथाः भविष्यामस्त्वञ्चानिच्छन्नप्यस्मत् कुचस्पर्शसुखं प्राप्नुवन्नपि स्त्रीवधानुतापमेव भूयांसं प्राप्स्यसि तथा च सखीरस्मांस्त्वमेव सन्तापयसि चेत्तर्हि वयमपि त्वां सखायमेव कथं नानुतापयाम यस्तु प्रेमहतकस्तदनुतापदुःखमपि कोटिगुणीकृत्यास्मभ्यमेव दद्यते इति जानीमः। किङ्कुर्मोऽस्माकं दग्धललाटमेवंविधमेव विधात्रा सृष्टं तस्मात् भोः परिणामादर्शनकृपासागर! स्वानुतापवल्लीबीजं किमर्थं वपसि कथं वा फलभोगान्नीरसांश्च करोषि मुञ्चासदाग्रहमङ्गीकुर्वस्मानित्याशयः। यद्वा, अकर्त्तव्यप्रार्थनामाकर्ण्यापि विमुखमालक्ष्याहुः–नोचेद्वयमिति। चेत्तावत्पर्यन्तं कामाग्निना कथं दग्धा इत्याशङ्क्य तत्सिञ्चनाशया सञ्जीवनाय वयमपि अतः परं तन्निवृत्त्याशा अग्निर्विरहाग्निश्चेत्यग्निद्वयसत्त्वे जीवनं दुर्लभमिति भावः। ननु, अस्तु तेन मम का हानिरिति चेत्तत्राहु—ध्यानेनेति। तथा च निरवधिकदुःखं दातुं प्रवृत्तोसि तादृशं दुःखं तुभ्यं दातुं नास्त्यस्माकं सामर्थ्यं यस्माद्विरहेण तव दुःखानुदयात् संयोगस्यापि तादृशदुःखजनकत्वेप्यस्मिञ्जन्मनि तस्य दुर्लभत्वादिकं शरीरं दग्ध्वा तेन पादयोर्मार्गभावं यामः तेन च सर्वदा संयोगेनैवम्बिधं तव दुःखं दास्याम इति भावः। तथापि परस्परदुःखप्रदानं न सख्यधर्म इत्याशयेनाहुः–हे सखे! इति। यद्वा, नन्विदानीमिदं दुर्घटं जन्मान्तरं स्यादित्याशङ्क्याहुः नोचेदिदं दुर्घटमेवेति चेत्तर्हि ध्यानेनापि ते पदयोः सान्निध्यं न यामः यतः विरहजाग्नेरेवोपयुक्ता उचिता न तु संयोगामृतयोग्या देहा यासां ता अधुनैव जन्मान्तरेऽपि विरहस्यैव निश्चयादिति भावः। तस्मात्त्वया सम्पादितं सख्यं वृथैव सम्पन्नमिति सम्बोधनाशयः। मानिनीपक्षे अङ्ग, हे लम्पट! नोऽस्माकं सहजेन सादिना जातो यस्तव कामानलस्तत्त्वदधरामृतपूरकेणैव सिञ्च, तादृशी अग्न्युपशामकतादृशामृतदानयोग्यायाः कस्याश्चिदस्मास्वभावादिष्टे मधुरादिवस्तुनि दुर्लभे दृष्टे सति स्वौष्ठपुटी लोके यथा लिह्यते तद्वदिति नर्म व्यञ्जनम् यद्वा, नोस्मात्तव स्वनित्याशामेवाधरामृतेन पूरकेणेत्यर्थः। बलात्कारमालक्ष्याहुः, नो चेद्बलादस्मादधरामृतपानाय प्रवर्त्तसे चेत्तर्हि वयं स्वपतिविरहजाग्न्युपयुक्तदेहाभावे सप्रियेमहि तथापि ध्याने चिन्तनेऽपि ते पदयोर्मार्गमपि यास्याम न यास्याम आलक्ष्य सख्यादस्मात्स्वभावं जानासीतिसम्बोधनाशयः। निवृत्तिपक्षे "तरतिशोकमात्मवित, ब्रह्मविदाप्नोतिपरं, नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुत्या परमपुरुषार्थानन्यसाधनतत्त्वज्ञानस्यास्मदवलोकनादिना यथाकथञ्चिदपि जातस्य करुणामृतधारयाभिषिञ्चनवर्द्धनेन समुचितमिति प्रार्थयन्ते–सिञ्चेति। अङ्ग, हे परमात्मन् नोऽस्माकं श्रुतीनां हासपूर्वकं प्रसन्नतापूर्वकमवलोकनं श्रवणपूर्वकं मननं कलयति सर्वतश्चित्तवृत्तीः सङ्कर्षतीति कलं तच्च तद्गीतं गानं निदिध्यासनं च ताभ्यां जातो यो हृच्छयस्य सर्वाश्रयस्य कामादेर्दाहकत्वादग्निस्तज्ज्ञानाग्निं त्वदोष्ठपुटनिःसृतवाङ्मयामृतपूरकेण कृष्णद्वैपायनाद्यात्मना त्वं सिञ्च वर्द्धय यथा यथोक्ताग्निस्तत्तद्वादिकल्पितकुतर्कजलप्रवाहैर्नोपशाम्येत् तथा कुर्वित्यभिप्रायः कृष्णाद्यात्मनावतीर्णस्य भगवतो वचनामृतत्वमुक्तम्—

"प्रपन्नपारिजाताय　　तोत्रवेत्रैकपाणये। ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः॥
जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः। यस्यास्यकमलगलितं वाङ्मयममृतञ्जगत्पिबति॥

इत्यादिना। ज्ञानस्याग्निरूपत्वमुक्तं भगवता—

यथैधांसि समृद्धोग्निर्भस्मसात्कुरुतेऽर्जुन!। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥
यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः। ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥

इत्यादिना। तत्सेचनं तेनैव कृतम्—

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते। तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते॥
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्"॥

इत्यादिना। विपक्षे दोषमाहुः नोचेन्नोसिञ्चेत्तर्हि वयं तत्तद्वादिप्रतिपादितेन श्रुतिषु प्रत्यगभिन्नपरमात्मनिरूपणेनास्तीत्यादिरूपेण तव विरहलक्षणाग्निनोयुक्तदेहाः भक्षितस्वरूपाः नष्टाः भवेम तथापि ते पदयोः पदवीं तत्त्वं ध्यानेन याम तत्राभिप्रायवत्यो भविष्याम वस्त्वन्यथाभावस्य वादिसहस्रैरपि कर्त्तुमशक्यत्वादिति भावः। यस्माद्वागर्थयो सख्यं वर्त्ततेऽतस्तौ कदापि न विमुक्तौ भवत इति सम्बोधनाशयः॥ ३५॥

रास-रहस्यम्

हे अङ्ग ! हे सखे ! ब्रह्मात्मनोः समानलक्षणत्वात् अङ्ग इति सम्बोधनं नो अस्माकं श्रुतिशिखोत्थवृत्तीनां हास प्रसन्नता तत्पूर्वकमवलोकः प्रतिनियतात्मेक्षणं, कलगीतं कलं अव्यक्तमधुरं गीतं गानं मननमित्यर्थः, तेभ्यो जातो यो हृच्छयः हृद्यधिष्ठित आत्मकामत्वं तदेवाग्निः सञ्चितागामीकर्मणां दाहकारित्वात्, तदधरामृतपूरकेन तदोष्ठपुटनिःसृतः पूर्वोक्तश्रुतिस्मृतिरूपवाङ्मयामृतपूरकेन सिंच निर्वापय नो चेत् नो सिञ्चेत्तर्हि वयं तदद्वैतवादप्रतिपादितेन श्रुत्यनुसारेण विरहजाग्न्युपयुक्तदेहाः बहुजन्मन्यपि अलभ्यमानत्वात् विरहस्तेनोत्पन्नो यः मनसस्तापस्तदेवाग्निः तेनयुक्ताः देहाः ते तव पादयोः पादोपलक्षितात्मज्योतिर्ध्यानेन पदवीं केवल्यपदात्मिकां विदेहमुक्तिं यामः प्राप्नुमः ॥ ३५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवत्यनुरक्तिमन्यत्र विरक्तिञ्चाहुः–सिञ्चेति द्वाभ्याम् । हे अङ्ग, प्रियतम ! नोऽस्माकं भवदीयेन हाससहितेनावलोकेन अवलोकनेन मधुरेण गीतेन च जातं हृच्छयाग्निं कामाग्निं त्वदधरामृतपूरकेण सिञ्च शमय नोचेदेवं कामाग्निशमीकरणभावे हे सखे ! वयं कामाग्निना दग्धप्रायाः अपि पुनरपि विरहजाग्निनोपयुक्तदेहाः दग्धदेहाः सत्यः ते पदयोः पदवीं ध्यानेन याम प्राप्नुयामः इति ॥ ३५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कामिन्यो यामिन्यां मया किं कर्तव्यं तद्वदतेत्यतः सुदत्यो विज्ञापयन्ति ॥ सिञ्चेति । तत्राधरामृतस्य पूर एव प्रवाह एव पूरकस्तेन । अल्पार्थे कन्वा ! हासावलोकः सस्मितकटाक्षमोक्षः स च कलमव्यक्तमधुरं गीतं च तस्माज्जायत इति स चासौ हृच्छयो मदनः स एवाग्निस्तं सिञ्चाभिषिञ्च शमयेति यावन्नो चेन्न शमयसि चेद्वयं विरहो वियोगस्तज्जो योऽग्निस्तेन युक्तः समीप एव सम्बन्धो देहो यासां ता अङ्ग हे सखे ते पादयोर्ध्यानेन ते पदवीमपवर्गमार्गं याम ॥ ३५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यद्भगवता शीघ्रं गच्छतेत्युक्तं तत्राहुः—सिञ्चाङ्गेति । वयं शीघ्रमेव गमिष्यामः यदि त्वं प्रतिबन्धं न करिष्यसि अनेन तूष्णीभावेऽपि मरणं परावृत्तौ तु न किञ्चिद्वक्तव्यम् हे अङ्ग ! त्वदधरामृतपूरकेण त्वदधरामृतप्रवाहजलेन नो हृच्छयाग्निं सिञ्च स चाग्निः त्वयैवोत्पादित इति तत्कारणमाहुः—हासावलोककलगीतजेति । तव योऽयं हासपूर्वकः अवलोकः कलगीतं च ताभ्यां जातो यो हृच्छयः कामः स एवाग्निः हासः कामजनकः अवलोकः सन्धुक्षणकर्त्ता गतिवायुरिव तत्रापि कलगीतं सर्वतो वायुः सोऽपि जातो हृदये हृदयगामि च त्वदधरामृतमेव पूरो हि वस्तु प्रवाहयति तस्यात्र सिञ्चनकरणत्वेनोक्त्याग्नेरतिमहत्त्वं ध्वन्यते अतो युक्ता सिञ्चनोक्तिः अलौकिकश्चाग्निः अलौकिकेनैव शाम्यति कन्दर्पो हि मृतो ज्वलति स हि जीवन् अग्न्यवस्थां त्यजति नान्यथा अमृतेनैव च जीवति तत्रापि न देवभोग्येन अन्यथा तैरेव जीवितः स्यात् सृष्टिकारणत्वात् नास्य मोक्षः अतोतिगुप्तेनैवाधरामृतेन तस्य जीवनम् अतः सिञ्चनमेवोक्तम् अन्यथा निर्वापणमेव प्रार्थयेयुः कामे जीवति जीविष्यामः अन्यथा स स्वयं ज्वलन् अन्यानपि ज्वालयिष्यति तदाहुः—नोचेदिति । सिञ्चनेन यदि मन्त्रवादीव न जीवयिष्यसि तदा विरहेण जनितो योऽग्निः तेनोपभुक्तदेहा ध्यानेन ते पदयोः पदवीं यामः स्वयं स्वतन्त्रमार्गाज्ञानात् त्वं च सखा येन मार्गेण गमिष्यसि तेनैव वयमपि यास्यामः । यथा त्वमधुनास्मभ्यमार्त्तिप्रदस्तथा वयमपि तथाभूतास्तुभ्यं पश्चात्तापादिहेतवो भविष्याम इति गूढाभिसन्धिस्ते पदयोः पदवीं यामेति वक्त्रीणामिति ज्ञेयम् देहे गते त्वन्तर्यामिणा क्वचिद्गन्तव्यं देहान्तरस्य तु नोत्पत्तिः बीजस्य दग्धत्वात् हरेणैव दग्धो न कामः प्ररोहति स बिपरीतो रहोभवति तत्रापि विशिष्टो विरहः एकान्ताभावरूपो वा अनेन त्वया सह एकान्ताभावे विरहत्वं यद्यपि पूर्वोक्ताग्निनैव दाहः सम्भवति तथापि भस्मसात्करणेन तस्य सामर्थ्यं यावत्सर्वाङ्गेषु सूक्ष्मावयवेष्वप्यग्निः प्रविश्य नोद्बुद्धो भवति यथा वह्निसम्बन्धेन शुष्कं काष्ठं ज्वलति तत उपाधेरत्यन्तं गतत्वात्ते पदयोर्गमनम् अतो गमनं दूरापास्तं प्रत्युत मरणमुपस्थितमिति शीघ्रं प्रतीकारं कुरु ॥ ३५ ॥

श्रीसुबोधिनी–सार

हे अंग मित्र तवाधरामृतस्य पूरकेण हाससहितेनावलोकेन कलेन मधुरेण गीतेन च जातो यो हृच्छयः कामः स एवाग्निस्तं नोऽस्माकं त्वं सिंच नो चेत् सिंचसि तर्हि विरहाज्जातेनाग्निनोपयुक्ता दग्धा देहा यासां ता वयं ते तव ध्यानेन पदयोः पदवीं मार्गं याम प्राप्नुयाम हे सखे ॥ ३५ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सिञ्चाङ्गेत्यत्र । अत्र सिञ्चनस्यावश्यकत्वे हेतुरुत्तरार्धेनोच्यते । तत्रापि याम इति वर्तमानप्रयोगेण स्वजीवनस्य क्षणमात्रमपि तद्विलम्बासहिष्णुत्वं ज्ञाप्यते । एवं सत्येतत्कालीनं जीवनमुक्तिश्च प्रियकृतस्वसम्भाषणजनितमेवेत्यन्यथानुपपत्त्या कल्प्यते ।

यद्यप्युत्तरदानसमये न तदस्ति, तथापि, पूर्ववचनानामुत्तरदानार्थमेव हृदि स्थापितत्वात्तदनन्तरं तदभावे सति चेत्साक्षात्सुधादानमन्ततो भाषणमपि वा न भवेत्तदोक्तैव रीतिर्भवित्रीति हृदि कृत्वा **पितृचरणैरुक्तं वयमित्यारभ्य वक्तव्यमित्यन्तम्**। **नो चेद्वयमित्यत्र, हरेणैव दग्ध** इत्यादि। वियोगादिपदमनुक्त्वा विरहपदं यदुक्तवत्यस्तज्ज्ञापितं भावविशेषमाहुः **स विपरीत** इत्यादि। अयमग्निर्न पूर्वोक्तः। तथा सति पुनरग्न्युक्तिर्न स्यात्। तथा च पूर्वस्मादस्य कठिनत्वं वाच्यम्। तदाहुर्नामव्युत्पत्त्या। हरदग्धः कामोऽन्यवस्थोप्यस्ति। उक्तामृतेन जीवेदपि। अनेन तु दग्धः क्षणेनैव भस्मसाद् भवति पदार्थः, पुनर्जीवनाशारहितश्च। उक्तरूपदाहकर्तृवाचकपदत्थवर्णवैपरीत्येनैतदाच्कपदस्थवर्णयोरेतद्वाच्ये तद्विपरीतधर्मवत्त्वं लक्ष्यते। सोऽस्माभिरुक्तोऽनेन त्वित्यादिना। एवकारोप्यर्थे। तथा चोद्यरूपदाहकर्त्रा हरेणापि दग्धो यत कामोऽधुनापि न जीवति, तत्रोक्तरूपेण दग्धाः कथं पुनर्जीवेयुरिति भावः। पूर्वं सिञ्चनेन जीवनकर्तृत्वलक्षणोपि तद्विपरीतो धर्म उक्त इति प्रभुस्वरूपमेवात्र **रहः** पदेनोच्यते। तत्स्वत एव समर्थः, तत्रापि कोटिकन्दर्पाधिकलावण्येन विभावानुभावादिसामग्र्या च विशिष्ट किं किं न कुर्यात्। एतदेवोक्त **तत्रापि विशिष्टो विरह** इत्यनेन। लोकप्रसिद्धमर्थमाहु**रेकान्ताभावे**ति। ननूक्तरूपत्वे कदाचिदपि सुखदत्वं न स्यादित्याशंक्य श्लिष्टार्थकोयं प्रयोग इत्याशयेनाहु**रनेन त्वये**त्यादिना। स्वरूपस्यैव विरहत्वमित्यर्थः। शृंङ्गाररसस्य संयोगविप्रयोगात्मकत्वात्तद्रूपत्वात्प्रभोस्तथात्वं युक्तमिति भावः। ततः काष्ठात्। उपाधेरार्द्रेन्धनत्वस्य। दार्ष्टान्तिके स्वरूपातिरिक्तः स्नेहहेतुरुच्यते। तेन सोपधिस्नेहे त्वनेवंभाव इति भावः सूच्यते ॥ ३५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तर्हि मया किं विधेयम् ?' इत्यपेक्षायामाहुः—सिञ्चेति। हे अङ्ग हे सखे ! त्वदधरामृतस्य **पूरकेण** प्रवाहेण नोऽस्माकं तव हासपूर्वकोऽवलोकः कलगीतं मधुरवेणुनादश्च ताभ्यां जातो हृच्छयः कामः स एवाग्निस्तं सिञ्च प्रशमय। नो चेत् यद्येवं न करोषि तर्हि कामाग्निना शुष्कदेहा वयं त्वद्विरहेण जनिष्यते योऽपरोग्निस्तेनोपयुक्तदेहा दग्धशरीराः सत्यः त्वद्ध्यानेन योगिवत्तव पदयोः पदवीं सन्निधानं याम प्राप्नुयाम। मृत्वाऽपि त्वां न त्यक्ष्याम इत्यर्थः ॥ ३५ ॥

अन्वितार्थप्रकाशिका

सिञ्चेति ॥ अङ्ग हे सखे ! त्वदधरामृतस्य पूरकेण प्रवाहेण। स्वार्थे कन्। नोऽस्माकं तव हासपूर्वकोऽवलोकः कलगीतं मधुरवेणुनादश्च ताभ्यां जातो यो हृच्छयः कामः स एवाग्निस्तं सिञ्च प्रशमय। नो चेत् यद्येवं न करोषि तर्हि कामाग्निना शुष्कदेहा वयं त्वद्विरहेण जनिष्यते यो परोऽग्निस्तेनोपयुक्तदेहा दग्धशरीराः सत्यः त्वद्ध्यानेन योगिवत्तव पादयोः पदवीं सन्निधानं याम। प्राप्नुयाम मृत्वापि त्वां न त्यक्ष्यामः ॥ ३५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अतः अंग हे कृष्ण नोऽस्माकं तवाधरामृतपूरकेण भवतोहासयुक्तमवलोकनं च कलगीतं मधुरगानं च ताभ्यां उत्पन्नो यो हृच्छयाग्निकामरूपो वह्निस्तं सिंच तस्मिन्सेचनं कुर्वित्यर्थः। नो चेद्वयं गोप्यः एको यमग्निस्तेन तथा द्वितीयो विरहजोऽग्निस्तेन चोपयुक्तदेहाः भस्मीकृतशरीराः सत्यः योगाग्निना योगिन इव हे सखे तव पदयोः पदवीं मार्गध्यानेन याम गच्छामः ॥ ३५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तर्हि किं वा मया विधेयमित्यत्राहुः ॥ सिञ्चेति ॥ हे अङ्ग श्रीकृष्ण, तवाधरामृतस्य पूरकेण पूरणेन, नोऽस्माकं, हासावलोकस्तवैव हाससहितमवलोकनं च कलगीतं मधुरवेणुनादश्च ताभ्यां जातो यो हृच्छयाग्निः कामाग्निस्त, सिञ्च। तवैवाधरामृतसंदोहेन हासेन अवलोकनेन कलगीतेन च जातं न कामाग्निं सिञ्चेत्यर्थः। नो चेत् यद्येवं न कराषि तर्हि, हे सखे, वयं विरहो भवद्वियोगस्तेन जातो योऽग्निस्तेनोपयुक्तदेहा दग्धशरीराः, कामाग्निविरहजाग्निभ्यां विप्लुष्टशरीराः सत्य इत्यर्थः। ध्यानेन त्वद्ध्यानसाधनेन, ते तव, पदयोः पादयोः, पदवीं याम प्राप्नुयाम। त्वयानुपभुक्तत्वाद्व्यर्थमिद शरीरं त्वद्विरहाग्निना दग्ध्वा त्वद्ध्यानेन त्वत्संनिधिमेव प्राप्स्यामो मृत्वापि त्वां न त्यजामेति भावः ॥ ३५ ॥

कृष्णप्रिया

प्राणवल्लभ ! हमारे प्यारे सखा ! तुम्हरी मन्द-मन्द मधुर मुसकान, प्रेमभरी चितनन और मनोहर संगीत ने हमारे हृदय में तुम्हारे प्रेम और मिलन की आग धधका दी है। उसे तुम अपने अधरों की रसधारा से बुझा दो। नहीं तो प्रियतम ! हम सच कहती हैं, तुम्हारी विरह-व्यथा की आग से हम अपने-अपने शरीर जला देंगी और ध्यान के द्वारा तुम्हारे चरण कमलों को प्राप्त करेंगी ॥ ३५ ॥

यर्ह्यम्बुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य ।
अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्गः[1] स्थातुं त्वया[2]भिरमिता बत पारयामः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—हे–अम्बुजाक्ष ?, अरण्यजनप्रियस्य, तव, पादतलम्, यर्हि रमाया, क्वचित्, (मिलति "तव पादतलम्" अस्प्राक्ष्म, तत्प्रभृति, हे अङ्ग, त्वया अभिरमिताः, अन्यसमक्षम्, स्थातुम्, बत, न पारयामः ।। ३६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु स्वपतीनेवोपगच्छत त एनमग्निं सिंचेयुरिति चेत्तत्राहुः । यर्हीति । रमाया लक्ष्म्या दत्तक्षणं दत्तः क्षण उत्सवो येन तत् दत्तोत्सवं दत्तावसरं वा । तदपि क्वचिदेव न सर्वदा । अरण्यजनाः प्रिया यस्य तस्य तव अरण्यजनप्रियत्वादरण्ये क्वचिद्यर्ह्यस्प्राक्ष्म स्पृष्टवत्यो वयं तत्र च त्वयाऽभिरमिता आनंदिताः सत्यस्तदारभ्यान्यसमक्षं स्थातुमपि न पारयामः । तुच्छास्ते न रोचंत इत्यर्थः ।। ३६ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कामाग्निशमने तु युष्माकं पतय एव समर्था इत्याह–नन्विति । एनं कामजाग्निमित्युक्ते प्रत्युत्तरमाहुः–न केवलं रमाया एव दत्तोत्सवमस्माकं भक्तानामपि तथात्वादत आह–दत्तावसरम् दत्तावकाशं वेति । तदपि अवकाशदानमपि । अरण्यजनाः गोपाः 'वनशैलनिवासिनः' इत्युक्तेः । यर्हि यदा । तत्र च वने च । इत्यर्थ इति । न हि समुद्रतरणशीलस्य क्षुद्रखातकतरणेच्छा भवतीति भावः । यद्वा–अरण्यजनास्संन्यासिनः प्रिया यस्य स तथा । तथा च वयमपि सर्वांस्त्यक्त्वा वनमेवागतास्त्वत्प्रियार्थमिति हेतोरस्मान् गृहाणेति । यद्वा–रमत्यानंदयति त्वामिति रमा श्रीराधा तस्याः पादतलं तव दत्तक्षणम्, अतीव मृदुलसौभगवत्त्वेनेत्यर्थः । यर्हि अस्प्राक्ष्म तत्प्रभृति वयप्यन्यसमक्षं स्थातुं न पारयामः, किमुत सेति । अनेन तवांगस्पर्शनानतरमन्यांगस्पर्शशंका निरस्तेति ध्वनितम् ॥ ननु तर्हि स्वस्वपतीनेवोपगच्छत त एवैनमग्निं सिंचेयुस्तत्राहुः—यर्हीति । हे अंबुजाक्षेति–त्वन्नयनदर्शनक्षणमारभ्यैव वयं भ्रमरीभूय स्थिताः स्म इति "चक्षूरागः प्रथमं चित्ताऽऽसंगस्ततोऽथ संकल्पः" इति रसशास्त्रोक्तं प्रथमं लोचनालोचननिदर्शनमेवास्माकं पूर्वरागप्रवर्तकमिति भावः । तत्रापि यर्हि यस्मिन्नेव क्षणे तव पादतलं क्वचिद्गोवर्धनादिकुंजप्रदेशेऽस्प्राक्ष्म कुचाभ्यां स्पृष्टवत्यो वयम्, कीदृशम्–रमाया दत्तक्षणम्, वैकुंठवासिन्या लक्ष्म्या नारायणप्रियाया अपि रमणाभिलाषमयोत्सवदायकम् 'यद्वांछया श्रीर्ललना चरत्तपः' इति नागपत्नीवचनाद्गर्गादिमुखश्रुताच्च । अतो वनवासिनीनां गोपस्त्रीणामस्माकं तत्राऽभिलाषे किमाश्चर्यमिति भावः । ननु लक्ष्म्या अप्यभिलषणीये वस्तुनि कुतो वः प्राप्तियोग्यतेत्यत आहुः—अरण्यजना गोपजातय एव प्रिया यस्य तस्य तव । तत्प्रभृति तं क्षणमारभ्य अन्येषां स्वस्वपतीनां समक्षं गोपस्त्रियो वयं स्थातुमपि न पारयामः तान् दृष्ट्वा मनसि घृणोत्पद्यत इति भावः । किञ्च, न केवल वयमस्प्राक्ष्य एव अपि तु त्वयाऽभि सर्वतो भावेन रमिताः । यथेष्टं संयुज्य पुरुषवतीकृता अपीत्यर्थः । तेन संभुक्तपूर्वा अस्मानन्यत्र न प्रस्थापय पादयोस्ते पताम इति काकुर्ध्वनिता ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, कथं निरपराधे मय्यपराधः कल्प्यते मदीयस्वाभाविकसौन्दर्य्यादिदर्शनेन कामिनीनां वश्चित्तादिकं क्षुभ्यति तत्राहं किङ्करवाणि किञ्च यदि गृहकृत्येषु न शक्तिस्तस्तथापि कुलबधूनां युष्माकं तत्रैवावस्थानं युक्तं तत्राहुः यर्हीति ! हे अम्बुजाक्ष यर्हि यदा अस्मदनिर्वचनीयपुण्योदयसमये क्वचिदपि दुर्लभे देशे त्वयाऽभिरमिता निजभावव्यञ्जनया नन्दिता सत्यस्तव पादतलमस्माक्ष्म सूचकेन वाक्येन इति "पूर्णाः पुलिन्द्य उरुगायपदाब्जरागश्रीकुङ्कुमेन दयितास्तनमण्डितेन" इत्यत्र पूर्वकृतव्याख्यानुसारेण कयापि तया यथाकथञ्चित् लब्धस्य पादतलस्पर्शस्य तद्गोष्ठीष्वेव प्रसिद्धेः कृतकात्यायनीव्रतानां तु तत्स्पर्शस्याङ्गीकरणमात्रतात्पर्य्याच्चप्राप्तसङ्गा अपि प्राप्तसङ्गाभिरात्मैक्यं प्रकल्प्य ताभिर्मिलित्वा प्रोचुरित्रि ज्ञेयम् । कीदृशं पादतलं रमाया दत्तक्षणं तस्यामपि नूनमर्पितमहोत्सवमित्यर्थः । ननु, स्वप्न एवायं भवन्तीनाम् अन्यथा नित्यमपि तथाद्यापि तत्स्यात् तत्राहुः–अरण्यजनेषु पुलिन्दोहरिण्यादिष्वेव सन्ततनिजदर्शनादिदानेन प्रीतिकर्त्तुर्नेतु व्रजजनेषु ततोऽस्माकं तु सुतरामेव दुर्लभस्येत्यर्थः । इति रमाया अस्माकञ्च योग्यानां परित्यागात् तादृशानां च स्वाकारादुपालम्भश्च सूचितः । तदेवं यर्ह्यस्प्राक्ष्य तत्प्रभृतिः नान्येषां समक्षं स्थातुमृद्धूर्वावस्थानमपि कर्त्तुं पारयाम । अन्यदर्शनमस्मश्य न रोचत इत्यर्थः । अत एव एष कोऽप्युच्चाटनविद्यामयः स्पर्शगुण इति भावः । ननु, मिथ्यावादिन्यः ! सदा गोष्ठजनमध्ये वसथैव तत्राहुः–अङ्गः सुखेन अनायासेन ततो बलादेव तत्र वसाम इति भावः । अन्यैश्वर्य्यपक्षे क्वचित् स्पर्शने हेतुः क्वचित् केषु चिदाविर्भावेषु रमाया दत्तक्षण स्वय तु अरण्यजनप्रियस्य वृन्दावनवासिनां श्रीगोपादीनां प्रष्णा

---

१. मङ्ग—श्रीधर. वंशी. वीर. विज. जीव. विश्व. । २. विरहिता—विज. ।

तदन्यभिचारिणः अहो अभाग्यं तथापि यर्हि कदाचिदेवास्प्राक्ष्म अन्यत् समानम् ॥ अत्र तेषां व्याख्याने अरण्येति तज्जनसम्बन्वेनैवेत्यपि दैन्यमेवेति अनेनाथवेत्यस्योत्तरं स्वाभाविकप्रेमविशेषेणैवागताः स्म नत्वन्यजनवत्साधारणप्रेम्णेति निषेधार्थश्चायम् अये साधु स्मारितं सखे ! इत्यनेन यतो बाल्यक्रीडासख्ये भवतीनां स्पर्शोऽपि जातोऽस्तीत्याशङ्क्याहुः—यर्हीति। यर्हि यदा तव बाल्ये वानरादिप्रियस्यैव सतः पादतलं रमाया रमण्या दत्तावसरं तदभिसारोन्मुखं बभूवेत्यर्थः। तत्प्रभृति तदपि नास्प्राक्ष्म किमुतान्यदङ्गं कथम्भूता अपि त्वया अभिरमिता बाल्ये कारितक्रीडा अपि अत एवान्येषां श्वश्र्वादीनामपि समक्षं स्थातुं पारयामः अन्यथा तैरपि द्विष्येमहीति भाव इति ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु, महाकामिन्यः ! तर्हि श्रीबलदेवेऽपि युष्माकं भक्तिर्दृश्यते, अतस्तमेव कामपालं यात, किंवा अन्यदीया यूयं मया कथं स्वीकार्य्या इत्याशंक्य सशपथमाहुः—यर्हीति। हे अम्बुजाक्षेति। परमसौन्दर्य्यादिकं पूर्ववत् सूचितम्। तलं स्वरूपे भूतलादिवत्, किंवा अधोभागस्तदस्प्राक्ष्म, तदीषत्सम्बन्धं प्राप्ताः स्म इत्यर्थः। एषा प्रेम्णा विनयोक्तिः। सदा रमयतीति रमा लक्ष्मीस्तस्या अपि, क्वचिदेव दत्तक्षणम्, अतोऽरण्यजनानामस्माकं त्वद्रमणयोग्यत्वाभावेऽपि ते प्रिया यस्येति परमकारुण्यं सूचितम्। अन्यसमक्षमिति यदि कदाचित् कथञ्चिदन्येषामन्तिके तिष्ठेमः, तथा परोक्षमेव, न तु साक्षात् सम्मुखे। अङ्ग इति यदि वा कथञ्चित् समक्षं तिष्ठेम, तदा च परमदुःखनैवेत्यर्थः। स्थातुमपि, किमुत उपवेष्टुं शयितुं वेत्यर्थः। तच्च त्वयैव नागरशेखरेण सम्पादितमित्याहुः—त्वयाऽभितोरमिता इति। बत खेदे निश्चये वा, अन्यत्तैर्व्याख्यातम्। यद्वा, रमायाः सेव्यमपि तव पादमूलमरण्यजनप्रियत्वादरण्यजनानामेव दत्तक्षणम्, अतः क्वचित् कस्मिश्चित् स्थाने काले वा यर्हि यावदस्प्राक्ष्म क्वचिद्दत्तक्षणमिति वा, ततश्च क्वचिदिति क्वचिदनिर्वचनीयदेश इत्यर्थः। तावदारभ्य त्वयाभिरमिताः सन्तोषिताः, यद्वा, स्वप्नादौ रतिविशेषं कारिताः सत्यः, अन्यत् समानम्। यद्वा, अहो महामोहन ! कालान्तरे त्वदंगसंगाशया वा, गृहे गत्वा तिष्ठेम, तदपि न घटते, महाधूर्त्तेन त्वया गृहसुखस्याशेषस्यव विलुण्ठनादित्याहुः—यर्हीति। स्पर्शने हेतुद्वयम्—रमाया दत्तक्षणमिति रमाय रमणाय आदत्तक्षण गृहीतावसरमरण्यजनानां प्रियस्येति च, त्वयाऽभिरमिताः सत्यः कदाचिदस्प्राक्ष्मेति तत्र निजाविवेकदोषो निरस्तः, अतस्तत्प्रभृति किमप्यन्यन्न रोचते, कथं गृहं यामेति भावः। यद्वा, अरण्यजनप्रियस्य तव या रमा श्रीराधा तस्याः पादतलम्; अन्यत् समानम्। यद्यपि तत्रैव सापि समागतास्ति, तथा तत्संगावस्थितिनिष्ठाविज्ञापनेनान्याः सर्वा अपि तस्यामिव स्वेषु तस्य प्रीतिं जनयितुं तथोचुरिति ज्ञेयम्। अनेन (२३ श० श्लो०) 'अथवा' इत्यस्योत्तरम्। स्वाभाविकप्रेमविशेषेणैवागताः स्म, न त्वन्यजनवत् साधारणप्रेम्णेति। श्लेषार्थः—हे अरण्यजन ! सदा अरण्यचरत्वात् अरण्यमेव जनः परिजनो यस्येति वा, प्रियस्य पत्युः, पादतलं यर्हि अस्प्राक्ष्म। कथम्भूतम् ? तव रमाय रमणाय क्वचित् कुत्राप्यंशे अदत्तक्षणमदत्तावसरं तत्प्रभृति त्वयाऽभिरमिताः, तु अयाभिरमिताः, अनेन शुभावहेन विधिना अभिरमिताः, वयं तु अन्य समक्षं स्थातुमपि अङ्गस्तत्त्वेन न पारयामः ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

दत्तलक्षणं दत्तावसरम् अस्प्राक्ष्य स्पृष्टवन्त्यः ॥ ३६–३७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, स्वस्वपतय एवाधरामृतं सिञ्चेयुस्तत्राहुः—यर्हीति। हे अम्बुजाक्ष ! अरण्यजनानां मुनीनां प्रियस्य तव रमायाः लक्ष्म्याः दत्तक्षण दत्तोत्सवं दत्तावसंर वा तदपि कदाचिदेव न सर्वदा अरण्यजनप्रियत्वादिति भावः। एवम्विधं पादतलं यर्हि यदा वयमस्प्राक्ष्य स्पृष्टवन्त्यः अरण्यजनप्रियत्वादरण्ये क्वचिद्यदास्पृष्टवत्यः तत्र च त्वयाऽभिरमिता अभिनन्दिताः सत्यस्तत आरभ्य अङ्ग हे कृष्ण ! अन्यसमक्षं स्थातुमपि न पारयामः पुरुषान्तरसमक्षमवस्थातुमपि न शक्नुमस्तुच्छास्ते न रोचन्त इत्यर्थः ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यर्हि यदा क्वचिद्वने दत्तक्षणं दत्तावसरम् अस्प्राक्ष्य स्पृष्टवन्त्यः अरण्यजनः संन्यस्तजनः तत्प्रभृति तदानीमारभ्य अन्यसमक्षम् अन्यजनाभिमुखं न पारयामः न शक्नुभः बत अद्भुतमाश्चर्यं तव महिमा अनेन त्वदङ्गस्पर्शनानन्तरमन्यन्याङ्गस्पर्शनशङ्का निवारिता ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ननु उपयुक्तं द्रव्यमस्मदुपयुक्तं न भवति। भवत्यश्च पतिमत्यः, तेनास्मद्योग्या न भवथेत्याशङ्क्याह। पतिमत्य ऊचुः—यर्हीत्यादि। हे अम्बुजाक्ष ! यदि यदा कदाचित् कुत्रापि धूलिखेलादौ बाल्ये तव पादतलमस्प्राक्ष्म स्पृशाम, तत्प्रभृति अन्यसमक्षं स्थातुं न पारयामः। अस्तु तव सम्पर्कः, तदिदमन्यसम्बन्धित्वमस्माकं लोकप्रथैव, न वास्तवम्। त्वत्प्रिया एव वयम्। तव

कीदृशस्य ? अरण्यजनप्रियस्य वृन्दावनजनदयितस्य, अतएवास्माकं स्पर्शो जातः। पादतलं कीदृशम् ? रमाया दत्तक्षणं दत्तोत्सवं दत्तावसरं वा। अवसरे हि सा तत्स्पर्शं लेभे, वृन्दावनजनास्तु सदैव स्पृशन्तीत्यरण्यजनप्रियत्वम्। न चान्यत्र, किं प्रमाणम् ? यदन्यसमक्षं स्थातुं न पारयथेति स्वविशेषणद्वाराहुः। वयं कीदृश्यः ? त्वयाभिरमिताः, त्वया सर्वज्ञशिरोमणिना। कथमन्यथा स्वीकरिष्यामहे ? अत उचितमेवान्यसमक्षं स्थातुमसामर्थ्यमस्माकमिति शेषः ॥ ३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ननूपभुक्तं मद्योग्यं न भवति, कथमुपभोक्तव्या भवत्य इत्यूढमात्राः काचिदूचुः—यर्हीत्यादि। हे अम्बुजाक्ष ! यर्हि विवाहदिवस एव तव पादाम्बुजं क्वचित् कुत्रापि स्थले समये वा अस्प्राक्ष्म, तत्प्रभृति पूर्वं स्वीकृत्य सम्प्रति त्यक्तुं न युज्यते। अङ्गः सुव्यक्तमेतत्तवापि। पादतलं विशिनष्टि—रमाया दत्तक्षणं क्वचिद् कदाचिदेवेति वा, दत्तोत्सवं दत्तावसरं वा क्वचिदित्यस्य हेतुः—अरण्यजनस्य वृन्दारण्यजनानामस्माकमेव प्रियत्वात्तव, तस्यास्तद्दुर्लभमेव ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, तर्हि स्वस्वपतीनेवोपगच्छत त एवैनमग्निं सिञ्चेयुस्तत्राहुः—यर्हीति। हे अम्बुजाक्षेति त्वन्नयनदर्शनक्षणमारभ्यैव वयं भ्रमरीभूय स्थिताः स्म इति "चक्षूरागः प्रथमं चित्तासङ्गस्ततो ऽथ सङ्कल्पः" इति रसशास्त्रोक्तेः। प्रथमं लोचनालोचनिदर्शनमेवास्माकं पूर्वरागप्रवर्तकमिति भावः। तत्रापि यर्हि यस्मिन्नेव क्षणे तव पादतलं क्वचिद्गोवर्द्धनादिकुञ्जप्रदेशे अस्प्राक्ष्म कुचाभ्यां स्पृष्टवत्यो वयं कीदृशं रमाया दत्तक्षणं वैकुण्ठवासिन्या लक्ष्म्या नारायणप्रियाया अपि रमणाभिलाषमयोत्सवदायकं "यद्वाञ्छया श्रीललनाचरत्तपः" इति नागपत्नीवचनाद्दुर्गादिमुखतः श्रुतात् अतो वनवासिनीनां गोपस्त्रीणामस्माकमभिलाषमयोत्सवदायकं तत्राभिलाषे किमाश्चर्यमिति भावः। ननु, लक्ष्म्या अप्यभिलषणीये वस्तुनि कुतो वः प्राप्तियोग्यतेत्यत आहुः—अरण्यजना गोपजातय एव प्रिया यस्य तस्य तव तत्प्रभृति तं क्षणमारभ्य अन्येषां स्वस्वपतीनां गोपस्त्रीणामस्माकं समक्षं स्थातुमपि न पारयामस्तान्दृष्ट्वा मनसि घृणोत्पद्यत इति भावः। किञ्च, न केवलं वयमस्प्राक्ष्मैव अपि तु त्वया अभि सर्वतो भावेन रमिता यथेष्टं सम्भुज्य पुरुषायतीकृता अपीत्यर्थः। तेन सम्भुक्तपूर्वा अस्मानन्यत्र न प्रस्थापय पादयोस्ते पताम इति काकुर्ध्वनितः ॥ ३६ ॥

श्रीरसिकाह्लादिनी टीका

नन्वहं भवतीनां मित्रं परमकारुणिकश्च मयि असूया नोचिता दुःशील इत्यादिना धर्मोपदेशत्वात्। अत्रावस्थानं वलवदनिष्टानुवन्धि अतो व्याबुद्य तानेवोपयन्तु अत एवैनमग्निं निर्वापयिष्यतीति चेत्तत्राहुः यर्हीति हे अम्बुजाक्ष हृच्छयाग्नितापो शमनविलोचन किं पुनरधरामृतदानेति सूचितं तर्हि यदा यदा तव पादतलमस्प्राक्ष्म स्पृष्टवत्यो वयं, कीदृशं पादतलं रमाया लक्ष्म्याः क्वचिद्देशे काले वा दत्तक्षणं दत्तानन्दं दत्तावसरवान् सर्वदा। यतो वृन्दावनप्रदेशेषु रतत्वात् नैकत्र लब्धपदं श्रीः सुपर्यं केशयानं पारमेष्ठ्यं श्रिया विराजमानमेव परिचरति न तु गोचारणादौ यद्यपि लक्ष्मीर्नित्यं वक्षसि वसति तथा पादपद्-सौभगमधिकमिति ज्ञात्वा चरणतल एव साभिलाषा भवति न तु सर्वदाप्नोति। यतस्तस्या गौरवमेव करोति। अतः सदा सेवितुमवसरं न ददासि। अहो अचिन्त्यो पादतलरसस्य महिमा यदेष सर्वतः सर्वानेव निरुणद्धि। यथा श्रीरपि पादपरागाशया अरण्यजनो भवितुमिच्छति तथा वयमपि अरण्यजना भवितुमिच्छामः कथं भूतस्य अरण्यजनप्रियस्य अरण्यस्य वृन्दारण्यस्य जनाः पुलिन्द्याद्याः प्रिया यस्य कन्दमूलाद्युपहारसमर्पणशीलत्वात् धन्याः "पूर्णाः पुलिन्द" इति पूर्वमप्युक्तत्वादिति साभ्यसूयं वाक्यं न त्वस्मदादयो व्रजजनाः प्रिया अतः क्वचिद्वयमत्र हे अम्बुजाक्ष तत्प्रभृति तदारभ्य अन्य-समक्षं स्थातुमपि न पारयामः किं पुनः रमणापेक्षया तदुचिते स्थानेपि उपवेष्टितमिति। तस्मादस्माकं तन्न रोचत इत्यर्थः। विशेषतःस्त्वया अभिरमिता अत एव तद्रमणमनुभूय स्मृत्वा चागता न ह्यननुभूतं स्मर्यते। तस्मात् वृन्दावने वासं कर्तुमागतानां त्यागोऽनुचित इति तव त्वरण्यजनप्रियत्वात्। वयमपि तथा भवितुमागता विद्धि। यद्वा अरण्यं वृन्दावनं तस्मिन् जायत इति जनाः मृगपक्ष्यादयस्तेऽपि प्रियाः यस्य यदुक्तं-"प्रायो वताम्बेति" "धन्यास्म मूढमतयोपि हरिण्य" इत्युक्तत्वात्। अस्मद्भोग्यं वस्तु एते वृन्दावननिवासिनो दर्शनादिनाऽऽस्वादयन्तीत्यमर्षणेवागता न त्यक्तुमर्हसीति भावः। यद्वा अरण्यजनानां प्रियस्येति अत एव व्रजं त्यक्त्वा तेषु प्रीतिं कर्तुं वृन्दारण्ये कृतानिवासस्य, व्रजवासिनस्तु मत्सरग्रस्तत्वात् समक्षे तन्न सहते अरण्यजनानां मत्सरादेराहित्यं ज्ञात्वाऽऽगतानामस्माकं रमणं देहि। यत्त्वया पूर्वमभिरमिताः यतोऽत्र कापि प्रतिबन्धो नास्ति। तस्मान्निःशंकं विलासे प्रवृत्तिर्भविष्यतीति तदुक्त "यत्र नैसर्गदुर्वैराः सहासन् नृमृगादय" इति। अङ्गेति सम्बोधनेनैतत्सूच्यते त्वं त्वस्मत्सहायकर्त्ताऽनुकूलश्च एतावत्पर्यंतमीदृशो भूत्वा प्रतिकूलसङ्गं कारयितुमिच्छसीति चित्र बतेति खेदे अञ्ज इति पाठे दिवा तु अरण्यजनप्रियस्यारण्यजना गोपाः प्रियाः यस्य रात्रौ त्वया अभि निःशंकं रमिता तदा पादतल अस्प्राक्ष्म तत्प्रभृति अंज स्वभावेनैवान्यसमक्षं स्थातुं न पारयामः किन्तु त्वत्समीपे एव स्थातुं रोचते च त्वयाऽस्माकं स्वभावोऽन्यथा कर्तुं शक्यत इति भावः। रमणसंस्कारस्य त्वयैव जनित्वात् रमणमन्तरेण क्षणमपि नेतुं न शक्नुम इत्यर्थः ॥३६॥

विशुद्धरसदीपिका

अथ तृतीयदिक्स्थिताः सहचर्यो दास्यश्चात्मनि कामवासनाभ्रममपि निवारयन्त्यस्तद्व्यवहारेऽपि ग्लानिमावेदयन्त्योऽथवा मदभिस्नेहादित्यस्योत्तरमपि प्रदर्शयन्त्यः स्वाभिप्रायगोपनेन वञ्चनाय च पूर्वासां सवासनत्वमवलम्बमाना आहुः—यर्हीति। यदारभ्येत्यर्थः तत्प्रभृतीति वक्ष्यमाणान्वयानुरोधात्। हे अम्बुजाक्षेति कैशोरं सूचितं तव पादतलमिति पादशब्दो गौरवाभिप्रायेण अस्प्राक्ष्म स्पृष्टवत्यः कीदृशं रमाया दत्तक्षणं श्रीराधाया दत्तोत्सवं "आत्मना रमया रेमे" इति ब्रह्मसंहिताभ्यः रमापतेरिति वक्ष्यमाणाच्च। अत्र स्वाधीनपतिकायां तथा व्यवहारस्यानुपपत्त्या पादशब्दोयं स्वभावविनिमयेन पुरुषायितं सूचयति अन्यथा रसाभासापत्तेः। यद्वा, पादतलमित्यस्य देहलीदीपवदुभयत्रान्वयः। ततश्च तव रमायाश्च पादतलमित्यर्थः। कुत्रेत्याकाङ्क्षायां क्वचिदिति साकूतं यत्र क्वचिदित्यर्थः। त्वया ज्ञायतेऽस्माभिश्चेति तूष्णीं स्थेयमिति भावः। यद्वा, तव रमाया एव पादतलमिति शुद्धसख्यं सूचितम् ननु, यत्किञ्चित्सूचनीयमिति तत्राहुः, अरण्येत्यादि। अरण्यजनाः पुलिन्दीजनाः प्रिया यस्य तस्य तत्समक्षं विहारस्यासङ्कोचादेव मुक्तं तेषां वा प्रियस्येति "पूर्णाः पुलिन्द्यः" इत्यादिप्रागुक्तं सङ्गमितं तत्प्रभृति तदारभ्य (अभ्य) सपक्ष्यमित्यादिगतार्थम् अञ्जः स्वातन्त्र्येण परतन्त्रतायां नोस्माकं दोष इति भावः। अभिरमिताः आनन्दिताः अभिरामतां प्रापिता वा एवञ्चातः प्रागपि निभृतविहारः सूचितः अत्र प्रमाणं पाद्मे—

"बाल्येपि भगवान् कृष्णः कैशोरं रूपमाश्रितः। रेमे विहारैः विविधैः प्रियया सह राधया" इति।

तत्रैवान्यत्र "रेमे श्रिया ऽसौ जगतां जनन्या" इति दर्शितं प्राक् एतदनुसारेण श्रीमत्सुधानिधौ—

"श्रीमद्राधे ! त्वमथ मधुरं श्रीयशोदाकुमारे प्राप्ते कैशोरकमितिरसादर्हती सःधुयोगम्॥
इत्थं बाल्ये रहसि कथया नित्यलीलावयः श्रीः जातावेशा प्रकटसहजा किन्तु दृश्या किशोरी" इति।

एवं च प्रकटाप्रकटलीलायां नित्यविहारः श्रीराधायैवेति दर्शितं ततश्च प्रथमसमागमो रासक्रीडायामेवेति मते साधकचरीगणापेक्षया प्रकाशभेदेन वा सङ्गमनीयं प्रकाशभेदश्च स्वीकृतः श्रीप्रबोधे यथा—

"एकं सख्यापि नो लक्षितमुरसि लसन्नित्यतादात्म्यकान्तमृतद्दृश्यं द्वारतोन्यदद्व्रजति नवगृहे ऽन्यत्तु तन्नर्म्मशर्म्म।
अन्यद्वृन्दावनान्तर्विहरदथ परं गोकुलप्राप्तयोगं विच्छेद्यन्यत्तदेवं लसति बहुविधं राधिकाकृष्णरूपम्"॥ इति॥

मुख्यः प्रकाशस्तु "गोप्यैकया युतस्तत्र परिक्रीडति नित्यदा" इति ब्रह्मयामले दर्शितः। नित्यदेति आदिपुराणे "कुञ्जकुञ्जगता क्रीडा कदाचिद्विरमेन्न हि" इति न चैव प्रकटाप्रकटलीलयोर्भेदवैयर्थ्यमिति वाच्यं "कदाचिद्वापरस्याते प्रकाशं विहरत्यसौ इति श्रीकृष्णयामलादावुभयोरपि दर्शितत्वात् विवृतमिदं भक्तिमञ्जूषायाम्॥ ३६॥

श्रीरामनारायणकृता भावभावविभाविका

किञ्च व्रजं यात पतीन् शुश्रूषध्वम् इति कथनमनुचितमसमर्थे नियोगानुपयोगादित्याहुः—यर्ह्यम्बुजाक्षेति। तत्र श्रुतिरूपोक्तिः हे अम्बुजाक्ष ! हृत्कमलसाक्षिन्निति नास्मद्वृत्साक्षिणोऽस्मदुपेक्षेतीतेति भावः। अरण्यजना "आरण्यमावर्तयेत्" इत्यादिश्रुत्याऽरण्यावर्तनपरा जनाः परमहंसाः प्रिया यस्य तेषां प्रियस्य वा अरण्ये उपनिषदि जनिर्येषां मन्त्रादीनां तेषां प्रियस्य तात्पर्यगोचरस्य ते एवाभिव्यञ्जकतया प्रिया यस्यैते वा तस्य तव पादतलं "पादोऽस्य सर्वाभूतानि" इति श्रुतेः पादो विश्वं तस्य तलम् आधारमधिष्ठानमिति तत्सर्वाधिष्ठानमिति तत्सर्वाधिष्ठानात्मकस्वरूपं यर्हि क्वचित् अस्प्राक्ष्म अध्यारोपापवादन्यायेन लक्षणावृत्त्या गोचरीकृतवत्यः। ननु, "यता वाचो निवर्तन्ते अप्राप्य मनसा सह" इति श्रुत्या कथं लक्षणयाप्यसङ्गे मयि भवतीनां प्रवृत्तिस्तत्राहुः—रमाया दत्तक्षणमिति। तव स्वया शक्त्या विहरतः तस्या एव दत्तसत्तास्फूर्त्यात्मकोत्सवं राधाविहारिणं त्वां वयमिव वयमस्प्राक्ष्म "क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः" इत्यादिवचनात्सगुणप्रवृत्तास्तदाध्यासिकसम्बन्धेन तदधिष्ठाने निर्गुणेऽपि त्वयि पर्यवसिता त्वया चाभिरमितास्तं त्वौपनिषदं "वेदैश्च सर्वैरहमेव वेद्यः" इति स्वीयत्वेन स्वीकृता इति भावः। तत्प्रभृति अन्येषां तत्तन्मन्त्रसुरत्वेन प्रतिभासमानानां देवानां तदंशावतीर्णगोपानां वा समक्षं यथा स्यात्तथा स्थातुमपि न पारयाम नित्यश्रुतीनां नित्यदेवपरत्वेन नित्यत्वानुपपत्तेः मुनिरूपोक्तिपक्षे तु हे अम्बुजाक्ष ! कमलनयन ! यर्हि दण्डकारण्यजनप्रियस्य तत्सुखोत्पादनायैवारण्यं गतस्य रावणघातस्य राज्ये यज्ञार्थदिग्विजयादावपि संभवात् तज्जना एव वयं प्रिया अस्येति वा तस्य तव पादतलमित्यादरेण त्वामेव रमाया दत्तक्षणं दत्तोत्सवं यद्वा तस्या दत्तावसरं तयापि भगवत्या राधया इवास्मत्सुखायैव दत्तावसरमन्यथा त्वद्वृक्षो नित्यनिवासिनीं परमेश्वरीं कोवा दशमुखकीटो हर्तुं समर्थः क्वचित् अस्प्राक्ष्मास्मदनुरागभावमालक्ष्य व्यापकविग्रहेण युगपत् स्वस्वपत्रकुट्यामाविर्भूतमालिङ्गितवत्यः अभिरामेण रामेण त्वयाभिरमितास्तत्प्रभृति अन्यसमक्षं स्थातुमपि न पारयाम अन्यतया योगाद्यभिमुखतापि न रोचते इति भावः। साधनसिद्धव्रजकुमार्युक्तिपक्षे तु सम्बोधनं पूर्ववत् यर्हि अरण्यजनानां वृन्दावनवासिनीनां नः प्रियस्य ता वयमेव प्रिया यस्येति वा अस्माकं व्रतकर्शितानां कृपया अयमेव वरदानाय यमुनोपारण्यं गतस्य पादतलं

रमाया श्रीराधाया नित्यं दत्तोत्सवं क्वचिदस्प्राक्ष्म सन्निधानाच्चीरग्रहणमिषेण स्पृष्टवत्यस्त्वया च क्ष्वेल्यादिनाभिरमिताः पूर्वमपि त्वय्येव निविष्टचित्तत्वेन चीर्णव्रताः तत्प्रभृति तु अन्यसमक्षं स्थातुमपि न पारयामः बतेति सर्वत्रोपेक्षा श्रवणखेदे अङ्ग ति प्रीतिसम्बोधनसमानम् अञ्ज इति पाठे तु स्वातन्त्र्येण न स्थातुं पारयाम इत्यपि समानप्रियासख्युक्तिपक्षे तु यर्हि अरण्यजनेषु अस्मासु प्राणप्रिया यस्य तस्य तव रमायाः प्रियायाः पादतलं रमाया राधायास्तव च पादतलं वा क्वचित्त्वं वेत्सि वयं वा दत्तक्षणं दत्तोत्सवं यथा अस्प्राक्ष्म स्पृष्टवत्यः त्वया चाभिरमिताः प्रिया प्रसादायानुनीता इत्यनेन पूर्वविहारोऽपि सूचितस्तदुक्तं पद्मपुराणे—

"बाल्येऽपि भगवान्कृष्णः कैशोरं रूपमाश्रितः। रेमे विहारैर्विविधैः प्रियया सह राधया" ॥

इति अप्रकटनित्यलीलाभिप्रायं वा "कुञ्जकुञ्जगता क्रीडा कदाचिद्विरमेन्नहि" इत्यादिपुराणवचनात् तत्प्रभृतीत्यादि समानम् ॥ ३६ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु यद्यपि निःसीमप्रेमवत्यो भवत्यस्तथापि मर्यादापालनार्थं पत्यादिसन्निधौ स्थित्वैव मदाराधनं कर्तव्यमिति चेत्तत्राहुः यर्हीति। हे अम्बुजाक्ष! यर्हि यत्प्रभृति तव पादतलं वयमस्प्राक्ष्म स्पृष्टवत्यस्तत्प्रभृति अन्यस्य समक्षे स्थातुमपि न पारयामः। अशक्नुम इतःपरं तत्समक्षे स्थितकोटिनरकस्वेदाधिकस्वेदं करोतीति सूचनाय बतेत्युक्तं किञ्च नैतावन्मात्रमपि तु त्वयाभिरमिताः बालभावमारभ्य त्वया सार्द्धं त्वत्प्रसादात् क्रीडामपि लब्धवत्यः अम्बुजमन्तःकरणं कमलमश्नुते व्याप्नोतीत्यम्बुजाक्षः तथा चान्तःकरणवृत्तितस्त्वं सर्वं जानन्नपि किमेवमाग्रहं करोषीति सम्बोधनाशयः स्वस्य भगवत्पादतलस्पर्शयोग्यतामपि सूचयति क्वचिदरण्यजनाः प्रिया यस्य तथा च वयमप्यरण्यजनत्वात् क्वचिदस्प्राक्ष्मेति भावः। इतः परमन्यत्र क्वापि स्थातुमशक्ता इत्यत्र हेतुमाहुः—रमाया लक्ष्म्याः दत्तोत्सवं दत्तावसरं वा तदपि क्वचिदेव न सर्वदा तथा च रमाया अपि यत्प्राप्त्यं दुर्लभं तदेव पादतल स्पृष्ट्वाऽन्यसमक्षे स्थातुमस्माकं का शक्तिरिति भावः। यद्वा, हे अम्बुजाक्ष! दृष्ट्यैव तापनिवारक! यथा लक्ष्म्याः चाञ्चल्यं विहायैतत्प्राप्तं तयास्माभिरपि सर्वतश्चाञ्चल्यं परित्यज्य तत्प्राप्तये तदेकनिष्ठतैव संपादनीयेत्याशयेनाहुः—रमाया इति। किञ्चारण्यजनप्रियस्य सर्वसङ्गविनिर्मुक्तेषु वने स्थित्वा तवाराधनपरेष्वेव तव प्रीतिदर्शनात्त्वत्प्रीत्यर्थं तत्साम्यमेवास्माकमपि सम्पादनीयमित्याशयः। किञ्च स्वप्ने सर्वदा त्वयाभिरमिता अपि जाता अन्यथा जीवनस्यैव दुर्लभत्वात्तस्माद्वयमन्यत्र गन्तुं स्थातुं च न समुचिता इति भावः। क्वचिदञ्ज इति पाठस्तत्राऽञ्जः सर्वभावेन स्थातुमित्यर्थः॥ अनभिज्ञापक्षे ननु, कामाग्नितप्तानां यदि गृहकृत्येषु नास्ति शक्तिस्तथापि कुलाङ्गनानां युष्माकं पतिसन्निधावेव स्थातुमुचितमतः स्वपतीनेवोपगच्छ तत एवैनं कामाग्निमपि सिञ्चेयुरिति चेत्तत्राहुः—यर्हीति। हे अम्बुजाक्ष! तव नेत्रकमलदर्शनक्षणमारभ्यैव वयं भ्रमरीभूय स्थिताः स्मेत्युत्पन्नचक्षूरागेण लब्धचित्तसङ्गादिकान् किमेवं ब्रवीषि "चक्षूरागः प्रथमं चित्तसङ्गस्ततोऽति सङ्कल्पः" इति रतिशास्त्रं किन्न जानासीति भावः। तत्रापि यर्हि अस्मद्भाग्योदयक्षणे कदाचिदेव क्वचिदपि दुर्लभगोवर्द्धनाद्रिकुञ्जप्रदेशे त्वयाऽभिरमिता निजभावव्यञ्जनयाभिनन्दितास्ततस्तव पादतलमस्प्राक्ष्म करेण संवाहनाद्यर्थं कुचाभ्यां वा स्पृष्टवत्यो यतो रमायाः जातावेकवचनं रमणीनां दत्तोत्सवं "यद्वाञ्छया श्रीर्ललनाचरत्तपः" इति नो पतीनां मुखाच्छ्रुतत्वाद्भयाय वैकुण्ठवासिन्या लक्ष्म्याः नारायणप्रियाया अपि रमणाभिकाङ्क्षया उत्सवदायकं तथाऽस्माकं तदभिलाषे किं चित्रमिति भावः। स्वस्य योग्यत्वेन दुर्लभत्वामाशङ्क्याहुः, अरण्यजनाः गोपादय एव प्रिया यस्य यद्वा, अरण्यरमणीनामुत्सवजनकस्य कादाचित्कत्ववर्णनमसङ्गतमित्याशङ्क्याहुः—अरण्यजनाः पुलिन्द्यः प्रिया यस्य तथा च पुलिन्द्यादिषु दर्शनादिना प्रीतिजनकस्य पादतलस्य स्पर्शोऽस्माकं दुर्लभ इति भावः। अहो रमणाऽस्मान्विहाय तादृशीनां प्रीतिं प्रयच्छसीत्युपालम्भोपि व्यज्यते तत्प्रभृत्यन्यदर्शनमपि न रोचते तथा च कोऽप्युच्चाटनमन्त्ररूपस्तव पादतलमात्रस्पर्श एवेति भावः। अञ्ज इति पाठे ननु, भो मिथ्यावादिन्यो व्रजे वसथैवेति चेत्तत्राहुः—अञ्जः अनायासेन तथा च तत्र बलाद्वसाम नतु प्रीत्येति भावः। मानिनीपक्षे ननु, अङ्गस्पर्शादिना कामाग्निमुद्दीपयित्वा सम्प्रत्येवं वक्तुं प्रवृत्त इत्याशङ्क्याहुः—यर्हीति। बाल्ये त्वदङ्गस्पर्शः कदाचित्कृतः स्यात् परन्तु यत्प्रभृति तव पादतलं रमणीनां दत्तक्षणं जातं तत्प्रभृति क्वचिदपि कदाचिदपि नाऽप्राक्ष्म यतो वाऽरण्यजनप्रियस्य वानरादिप्रियस्य सतः त्वया कदादिना अभिरमिता अपि अत एवाऽन्येषां श्वश्रूप्रमुखानां समक्षं स्थातुं पारयाम अन्यथा तैर्द्विष्यतेमहीति भावः। अम्बुजवद्विशालनेत्रस्याऽस्मत्स्वभाव पश्यतो नैवं प्रार्थनमुचितमिति सम्बोधनाशयः। यद्वा, यदि तव पादतल वयमऽस्प्राक्ष्म तर्हि तत्प्रभृति अन्यसमक्ष स्थातुमपि न पारयामः बतेति खेदे तथा सति महान् खेदः स्यादिति भावः। ननु तथा जातमतो महत्कुशलमित्यर्थः। पादतलस्पर्शमात्रस्य यदेयं कथा तदा त्वयाभिरमितानां जायमानस्तु खेदो वाचामप्यऽगोचर इत्यभिप्रायेण त्वया अभिरमिता इत्युक्तम् ननु, मदङ्गस्पर्शवतीनां मयाभिरमितानां प्रतिदिनमानन्दास्वादनपराणां तत्समक्षाऽवस्थाने किं प्रयोजनमित्याशङ्कानिवृत्त्यर्थमुक्त रमाया दत्तक्षणं तथा चैवंविधपादस्य तव गर्वावस्वभावदखर्वगर्ववतीभिरस्माभिः सङ्गतः स्थायित्वासम्भवात्तादृशस्य सुखस्य तथाविधदुःखकारणत्वसम्भवात् मैवमिति भावः। तत्राप्यरण्यजनप्रियस्य मरणविरोधिभाववतस्तथा चोभयभ्रष्टत्वसम्पादकम् तव पादतलस्पर्शादिकमिति भावः। निवृत्तिपक्षे ननु, मया सिक्तोपि यथोक्तैर्वादिकल्पित-

दुस्तर्कैर्निर्वापणं यास्यतीति चेत्तत्राहुः—यर्हीति। हे अम्बुजाक्ष ! सर्वहृत्कमलव्याप्त ! यदा तव प्रसादोदयकाले प्राप्तसाधनसम्पदाधिकारिणा विचारिता वयं तव पादतलमस्प्राक्ष्म तत्प्रभृति नान्यसमक्षं स्थातुमपि पारयामः ब्रह्मातिरिक्तं किमपि यामर्थकं न प्रतिपादयामः अपाततोऽर्थान्तरप्रतीतावपि अतस्तात्पर्येणान्यपरत्वं नास्तीत्यर्थः। तत्रापि त्वया परमात्मना अभिरमिताः त्वय्येव समन्वयं प्राप्ताः। ननु, तथापि "यतो वा इमानि भूतानि जायन्ते" इत्यादि श्रुतीनामप्यविशेषपरत्वमेवावसीयते निर्विशेषस्य निर्व्यापारस्य जगत्कर्तृत्वाद्यसम्भवादित्याशङ्कानिरासायोक्तं क्वचिद्रमायाः आपातरम्याया महामायाया दत्तक्षणं न तु सर्वत्र सर्वदा च तथा शाखाग्रन्थानेन तासां सविशेषे वा निर्विशेष एव तात्पर्यं यश्चोरः स स्थाणुरितिवद्यो जगत्कर्तृत्वादिविशिष्टः स निर्विशेषः परमात्मेति जगत्कर्तृत्वादेर्निर्विशेषब्रह्मलक्षकत्वे नास्ति कश्चिद्विरोधः दृग्दृश्यसम्बन्धनिरूपणान्मासम्बन्धो ब्रह्मणि न वास्तव इति भावः ननु, श्रुतवेदान्तानामपि यथापूर्वसंसारानुवृत्तिदर्शनात्कथमुच्यते न पुनरन्यपरत्वमस्माक नास्तीत्याशङ्कानिवृत्त्यर्थमुक्तम् अरण्यजनप्रियस्य तथा च विवेकवैराग्यादिसाधनविधुरत्वच्चरणारविन्दाऽनभिमुखस्येयं कथा न तु सर्वसाधनसम्पदलङ्कृतस्येति भावः ॥३६॥

रास-रहस्यम्

र० टी०—हे अम्बुजाक्ष ! हृत्कमलवृत्ति साक्षिन् ! यर्हि यदा क्वचित् अरण्ये अरण्यजनप्रियस्य "अरण्यमावर्तयेत् ।" इति श्रुत्या अरण्यावर्तनपराः जनाः परमहंसाः प्रियाः यस्य तस्य तव रमायाः परमरमणीयायाः शुद्धबुद्ध्याः प्रज्ञाया अपि भजनवशात् प्रथमं क्वचिदेव न तु सर्वदा दत्तक्षणं दत्तः क्षणं एकात्मभावरूपरमणावसरो येन तथाभूतं पादतलं तत्पदलक्ष्यार्थः पाद आत्मज्योतिरतदेवतलमाधारमधिष्ठानं सर्वाधिष्ठानत्वेन अस्प्राक्ष्म स्पृष्टवत्यः अध्यारोपापवादेन लक्षणावृत्त्या च गोचरीकृतवत्यः। तत्र तेन परमात्मना चाभिरमिता सच्चिदानन्दरूपेण "तत्तु समन्वयात् ।" इति समन्वयं प्राप्ताः सत्यः तत्प्रभृति तदारभ्य अन्यस्य भेदवादपरस्य समक्षं सम्मुखमपि स्थातुं न पारयामः समर्थाः न भवामः। अतितुच्छास्ते न रोचन्ते इति भावः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पतिसङ्गेन हृच्छयाग्निः परिहार्य इत्यत्राहुः–यर्हीति। हे अम्बुजाक्ष ! क्वचित् रमायाः श्रियः दत्तक्षणं दत्तावसरम् अरण्यजनप्रियस्य अरण्यजनास्तावन्मुनयः वयमपि गोपजातीयत्वादरण्यजनास्ते प्रियाः यस्य तस्य तव पादतलं यर्हि यदा वयम् अस्प्राक्ष्म स्पृष्टवत्यः तदा त्वयाभिरमिताः आनन्दिताः सत्यः तत्प्रभृति तदारभ्य हे अङ्ग ! अन्यसमक्षं स्थातुमपि न पारयामः न शक्नुमः ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे अम्बुजाक्ष वयं रमाया दत्तः क्षणोऽवसरो येनोत्सवो वा येन तत्तव पादतलं यर्हि क्वचिद्वनेऽरण्यजनप्रियस्य वृन्दावनवासिजनप्रियस्य। आन्तरङ्गिको भावस्वरश्च वैण्यश्च सुधासमुद्रौ। अरश्च ह वैण्यश्चार्णवौ ब्रह्मलोक इत्याद्युक्तारण्याख्यसमुद्रवद्वैकुण्ठवासिजनप्रियस्येति। अस्प्राक्ष्म स्पृष्टवत्यस्तत्प्रभृति तत्क्षणमारभ्यान्यसमक्षं। प्रतिपरिसमनुभ्योक्षण इत्यच्। त्वविंतिनरसम्मुखे स्थातुं त्वया विरहिता न पारयामः न शक्नुमः। बत खेदे बताश्चर्यं नेति वा ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

किञ्च, यदप्युक्तम् अथवा मदभिस्नेहात् आगता इति यदस्माकं स्नेहः स्तुतः तत्र याथार्थ्यं शृणु इत्याहुः– यर्हीति। हे अम्बुजाक्ष ! दृष्ट्यैव तापनाशक ! यर्हिं यस्मिन् क्षणे तव पादतलं अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षम् अङ्गः सामस्त्येनापि स्थातुं पारयामः साक्षाच्चरणस्पर्शो दुर्ल्लभः यत्र पुनः पादः प्रतिफलितः तत्पादतलमुच्यते रमापि तेनैव जीवति तदुक्तं नागपत्नीभिः "तवाङ्घ्रिरेणुस्पर्शाधिकारो यद्वाञ्छया" इति अतः तत्फलस्थानीयं रमायाः क्षणं सुखं तेनैव दत्तं क्वचिद्धृदये समागतं सुखं तत्रैव भवतीति तस्य स्पर्श एवास्माकं भूमिष्ठस्य न तु लक्ष्मीवद्धृदये तत्तलमायाति अस्माभिर्विचारितं लक्ष्म्याचेदेतत्प्राप्तं तपसा चाञ्चल्यपरिहारेण तदास्माभिरपि चाञ्चल्यपरिहारेण तन्निष्ठतया स्थातव्यं किञ्च, अरण्यजनाः प्रियाः यस्य तेनापि सर्वसङ्गपरित्यागेन स्थातव्यं सङ्गाभाव एव भगवत्तोषहेतुरिति अरण्यं हि सात्त्विकं वैष्णवं च एतेन पुलिन्दीस्मारणं वा पादतलसम्बन्धिकुङ्कुमसम्बन्धेनैव ता अपि प्रिया आसन्निति तेन पादतलस्य फलपर्यवसायित्वं प्रभुप्रीतिसाधकत्वं च सहजमिति वयमप्यात्मनि तथैव जानीम इति भावः। स्फुटमिदं न वक्तुं शक्यमित्येवमुक्तम् अतः त्वत्प्राप्त्यर्थं नान्यसमक्षं स्थातुं शक्नुमः। सर्वथा त्वां यो न प्रपन्नः शक्त्यभावस्तद्धर्म्मप्रवेशात् यो हि यस्य घातकस्तद्भावापत्तौ तस्याग्रे स्थातुं न शक्तो भवति यथा व्याघ्राग्रे देहाभिमानी तथा भगवदीयः भगवद्व्यतिरिक्तो हि तद्भावं नाशयिष्यतीति तत्रैवं सूक्ष्मेक्षिका तत्रान्यस्य स्थाने गमनं तस्य च देवतात्वेन भावनं दूरापास्तम् अतः प्रीतिमात्रस्तुतिर्या सा अल्पीयसी अनन्यभावा एव वयं लक्ष्मीवत् किञ्च, यथा सर्वपरित्यागेन लक्ष्मीश्चेत् त्वां शरणं गता तदा अभिरमिता जाताः तथा वयमपि जाताः सर्वदैव स्वप्ने त्वत्सम्बन्धं प्राप्नुमः अन्यथा जीवनमेव न स्यात् एवं भुक्तपूर्वा वयं नान्यत्र प्रेषयितुमुचिता इति ॥ ३६ ॥

श्रीसुबोधिनी-सारः

न च पतिसंगमेनैतच्छांतिरित्याहुः हे अंबुजाक्ष यर्हि रमाया लक्ष्म्या दत्तः क्षणोऽवसरो येन तत् अरण्यजना वनेचराः प्रिया यस्य तस्य तव पादमूलमस्प्राक्ष्य स्पृष्टवत्यो वयं तत्प्रभृति तद्दिनादारभ्य त्वयाभिरमिता वयम् अन्यस्य समक्षं प्रत्यक्षं स्थातुं न शक्नुमः बतेति तेषामतितुच्छेनारुचिहेतुतां सूचयति हे अंग ॥ ३६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

यर्ह्यम्बुजाक्षेत्यत्र, तलविशेषणोक्तितात्पर्यमाहुरस्माभिर्विचारितमित्यादि । 'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवे'दितिवद्ब्रमावेदार्थं विचार्य निर्दोषपूर्णगुण एव सेव्यः ! स च भगवानेव । स च निर्दोषेणैव सेवितुं शक्य इति निश्चित्याधिदैविकाध्यात्मिकदोषावप्यपहाय तं वव्र इति तथा । **अरण्यजनेत्यत्र** । ननु चाञ्चल्यत्यागोक्त्यैवान्यसंगत्यागोऽप्युक्त एवेति **तेनापीति** ग्रन्थो न युक्त इत्यत आहुः **संगाभाव** एवेति । पूर्वं दोषाभाव उक्तोऽधुना प्रीतिहेतुगुण उच्यते इति न तथेति भावः । अत एव मूले प्रीतिरुक्ता । अन्यपदार्थमाहुः **सर्वथेति** । **तद्धर्मेति** । भगवद्भावप्राकट्यादित्यर्थः । **सर्वदैव स्वप्न** इति । पूर्वमपि रमणपक्षे तस्य गोप्यत्वादेवमुक्तमिति ज्ञेयम् ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'स्वपतीनेवोपगच्छत, त एवैनमग्निं स्वाधरामृतेन सिञ्चेयुः' इति चेत्तत्राहुः—यर्हीति । हे अम्बुजाक्ष कृपादृष्ट्यैव सर्वसन्तापनिवारक ! नोऽस्माकं न किञ्चित्त्वत्तो गोप्यम्, अस्मदङ्गत्वादित्याशयेन पुनः सम्बोधयन्ति—हे अङ्ग ! यर्हि यदा क्वचित् अरण्ये अरण्यजना व्रजवासिनः प्रिया यस्य तस्य तव रमायाः लक्ष्म्या अपि सेवावशात् दत्तः क्षणो भगवता सह रमणावसरो येन तथाभूतं पादतलं त्वत्कृपया अस्प्राक्ष्म स्पृष्टवत्यः । तत्र त्वया चाभिरमिता आनन्दिताः सत्यः तत्प्रभृति तदारभ्य अन्यस्य पत्युः समक्षं सम्मुखमपि स्थातुं न पारयामः समर्था न भवामः । अतितुच्छास्ते न रोचन्ते इत्यर्थः । तुच्छत्वेन पतीनां त्यागात् भगवता च प्रत्याख्यानात् कामपीडाया विद्यमानत्वात् स्वखेदं सूचयन्ति—बतेति ॥ ३६ ॥

अन्वितार्थप्रकाशिका

कामाग्निशान्त्यै पतीनेनोपसीदतेति चेत्तृतीयदिक् स्थिता आहुः—यर्हीति ॥ अङ्ग हे अम्बुजाक्ष ! यर्हि यदा क्वचित् अरण्ये आरण्यजना व्रजवासिनः प्रिया यस्य तस्य तव रमायाः लक्ष्म्या अपि सेवावशात् क्वचिदव नतु सर्वदा दत्तः क्षणो रमणावसरो येन तथाभूतं दुर्लभं पादतलं त्वत्कृपया अस्प्राक्ष्म स्पृष्टवत्यः । तत्र त्वया चाभिरमिता आनन्दिताः सत्यः तत्प्रभृति तदारभ्य अन्यस्य पत्युः समक्षं संमुखमपि स्थातुं न पारयामः समर्था न भवामः । अतितुच्छास्ते न रोचन्ते क्वचिदिति देहलीदीपन्यायेनोभयत्रान्वितम् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु स्वपतय एव युष्पाकं मनोरथं पूरयेयुः अतः स्वगृहान् गच्छतेति चेत्तत्राहुः यर्हीति हे अंबुजाक्ष रमायाः लक्ष्म्याः दत्तक्षणं पादसंवाहनाद्यर्थं दत्तावसरं क्वचिदरण्यजनप्रियस्य क्वचिदेव न सदा अरण्यजनाः वनवासिनो वयं प्रिया यस्य तस्य तव पादतलं अस्प्राक्ष्म स्पृष्टवत्यः तदा त्वया भिरमिता आनंदिता वयं । तत्प्रभृति तदारभ्य अंग हे हरे । अन्यस्य समक्षं दृष्टिपथं स्थातुं न पारयामः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु युष्मत्पतय एवाधरामृतं सिञ्चेयुरतस्तानेवोपगच्छतेति चेत्तत्राहुः यर्हीति ॥ हे अम्बुजाक्ष कमलनयन, अरण्यजना वनवासिनो मुनिजनास्तेषां प्रियः प्रेमास्पदीभूतस्तस्य, तव, रमाया लक्ष्म्याः, क्वचित् कदाचिदेव न सर्वदा, दत्तक्षणं दत्तोत्सवं दत्तावसरं वा, तवारण्यजनप्रियत्वादिति भावः । एवंविधं पादतलं यर्हि यदा, वयं अस्प्राक्ष्य स्पृष्टवत्यः । अरण्यजनप्रियत्वात् कदाचिद्यदा दृष्टवत्य इत्यर्थः । तत्र च त्वया अभिरमिताः सत्यः, तत्प्रभृति तत आरभ्य, अङ्ग हे श्रीकृष्ण, अन्यसमक्षं, स्थातुमपि, बत पारयामः पुरुषान्तरसमक्षं समवस्थातुमपि न शक्नुमस्तुच्छास्ते न रोचन्ते इत्यर्थः ॥ ३६ ॥

कृष्णप्रिया

प्यारे कमलनयन ! तुम वनवासियों के प्यारे हो और वे भी तुमसे बहुत प्रेम करते हैं । इससे प्रायः तुम उन्हीं के पास रहते हो । यहाँ तक कि तुम्हारे जिन चरणकमलों की सेवा का अवसर स्वयं लक्ष्मीजी को भी कभी-कभी ही मिलता है, उन्हीं चरणों का स्पर्श हमें प्राप्त हुआ । जिस दिन यह सौभाग्य हमें मिला और तुमने हमें स्वीकार करके आनन्दित किया, उसी दिन से हम और किसी के सामने एक क्षण के लिये भी ठहरने में असमर्थ हो गयी हैं— पति-पुत्रादिकों की सेवा तो दूर रही ॥ ३६ ॥

श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टम् ।
यस्याः स्ववी[1]क्षणकृतेऽन्यसुरप्रयासस्तद्वद् वयं च तव पादरजःप्रपन्नाः ॥ ३७ ॥

कर्दमक्षमा

अन्वयः —यस्याः, स्ववीक्षणकृते, अन्यसुरप्रयासः, "सा", श्रीः, वक्षसि, पदम् , लब्ध्वा, अपि, यत् , तुलस्या, भृत्यजुष्टम् , यत् , पदाम्बुजरजः, चकमे, तद्वद्, वयम् , च, तव, पादरजः, प्रपन्नाः ॥ ३७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्वत्पादसौभाग्यं त्वतिचित्रमित्याहुः । श्रीरिति । वक्षस्यसापत्नं स्थानं लब्ध्वाऽपि तुलस्या सपत्न्या सह तव पदांबुजरजः कामयते स्म । भृत्यैः सर्वैर्जुष्टमिति सौभाग्यातिरेकोक्तिः यस्याः स्ववीक्षणकृते श्रीरात्मानं विलोकयत्वित्येतदर्थमन्येषां ब्रह्मादीनां तपोभिः प्रयासः सा तद्रजस्तद्वद्वयमपि प्रपन्ना इति ॥ ३७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सौभाग्यम् सौंदर्यम् । अतिचित्रम् निखिलदेवप्रसाद्यः लक्ष्म्या कांक्षितधूलित्वादिति । श्रीयते सेव्यते निखिलैरिति श्रीर्लक्ष्मीः । असापत्न्यमेकाकिन्या लब्धत्वात् । भृत्यैः ऐकांतिकभक्तैर्नारदादिभिः । भगवतो विश्वंभरत्वेन सर्वपालकत्वात्तदपेक्षया निखिलानां भृत्यत्वमेवेत्यभिप्रेत्य स्वामिचरणैर्भृत्यपदं सर्वार्थपरतया व्याख्यातम्–भृत्यैः सर्वैरिति । अतिरेकः आधिक्यम् । यस्याः लक्ष्म्याः । स्वान् आत्मनः प्रति वीक्षणं स्ववीक्षणम् । आत्मनोऽस्मान् प्रपन्नास्तव पादरजस्सेवनाय प्राप्ता इत्यर्थः ॥ तदेवं त्वयैव वयं स्वप्रेयसीकृताः । किन्तु त्वच्चरणसेवामेव वयमाशास्महे इति सदृष्टांतमाहुः—श्रीर्लक्ष्मीर्यस्य नारायणस्य पदांबुजरजश्चकमे तद्वत्तुल्यस्य तवापि वयं पदांबुजरजःप्रपन्नाः । ततश्च गर्गोक्तिगम्येन तव नारायणतुल्यत्वेनास्माकमपि श्रीतुल्यत्वं स्वत एवायातमिति भावः । किञ्च, वक्षसि सर्वोत्तमे स्थले पदमास्पदं लब्ध्वापि तुलस्या सपत्न्या पदमपि भृत्यैर्जुष्टं सेवितमिति पुरुषजनसंघट्टवदपि तस्य पादरजश्चकमे स्वाभाविकीं प्रेयसीभावसमुचितां लज्जामपि परित्यज्य स्वन्यूनतामप्यंगीकृत्य कामयते स्मेति तस्याः प्रेयसीभावादपि दासीभावो यथाऽभीप्सितस्तथैवास्माकमपीत्यतस्तव रक्तकपत्रकादिदासैः सहापि लज्जां परित्यज्य पादौ संवाहयितुमिच्छामः । तथा वृंदावनीयपुलिंदानां कर्म तृणलग्नत्वच्चरणतलकुंकुमेन स्वीयभालप्रलेपनमपि स्वन्यूनतामप्यंगीकृत्य चिकीर्षामः । किञ्च, श्रीमन्नारायणदेवेन प्रतुष्यता नित्यं निवासार्थं स्ववक्ष एव दत्तम् । त्वया तु रसिकशेखरेणास्मभ्यं स्वपदतलनिकटप्रदेशेपि क्षणमपि स्थातुमपि न दीयते इत्यस्माकमेव दग्धललाटमिति ध्वनिः स्वयशः प्रेप्सुर्गर्गोक्तिप्रामाण्येन यदि नारायणतुल्यो बुभूषसि तदाऽस्मान्वक्षसावहेत्यपि भावगांभीर्यस्पर्शी ध्वनिः । ननु सा लक्ष्मीर्यथा चंचला तथैव यूयमपि पुण्यवतां जनानां गृहेगृहे चांचल्यधर्ममप्यंगीकुरुथेति नर्माशंका । केन मूर्खेणोच्यते श्रीश्चंचलेति, सा तु परमधीरैवेत्याहुः–यस्याः श्रियः स्वेषु वीक्षणकृते वात्सल्यरसमयकृपावलोनप्राप्तिकृतेऽन्यसुराणां ब्रह्मादीनां तत्पुत्रतुल्यानां प्रयास एव, सा तु तदपि तानपि प्रायो नावलोकते किन्तु तच्छक्तिरेव काचित्तेभ्योऽभीप्सितां संपदं दत्ते इति ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, मादृशतुल्यकुल्या एव यूयं ततो वत कथं पादतलमस्प्राक्ष्मेति वदथ इत्याशङ्क्य निजाभीष्टोत्कण्ठावगुण्ठिततयैवातिदैन्येनाहुः–श्रीरिति । यत् यस्य नारायणस्य वक्षसि पदं लब्ध्वापि पादपद्मरजः श्रीश्चकमे प्रेयस्युचितं सेवाभिलाषविशेषं परित्यज्य दासोचितमेवेष्टवतीत्यर्थः । यत एव दासाना बहूनां तत्र सङ्घट्टमप्यङ्गीचकारेति भावः । कीदृश्यपि सा तत्राहुः, यस्या इति । तदेवं दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाहुः—तद्वदिति "तस्मान्नन्दात्मजोऽयन्ते नारायणसमो गुणैः" इत्युक्तत्वात् स नारायण इव यस्त्वं तस्य तव पादरजो वयं च सत्कुलादिसम्पत्त्या प्रेयसीपदयोग्यतां लब्ध्वापि प्रपन्नाः तस्य तव च गुणमहिमैवायं यत्तस्या अस्माकं च लब्धतादृशपदसत्वेपि न्यूनताभिमानमेव कारयतीत्यर्थ' । तत्र श्रीरम्बुजसादृश्यमुपाधिमवलम्बमाना तस्य पदाम्बुजरजश्चकमे वयं तु तदुपाधिमनपेक्ष्यमाणास्तवपादरजःप्रपन्ना इति स्वेषां तत्पादस्य च वैशिष्ट्यमम्बुजरूपकारूपकाभ्यां (दर्शितम्) ध्वनितम् । (अथवा, नन्वेवं पूर्वोक्तहेतोराशङ्क्यते निजेन्द्रियतर्पण एव तत्परा यूयं न तु ममानुकूल्यायां प्रीताविति तत्राहुः—श्रीरिति । यत् यस्माद्धतोस्तस्मादेवेत्यर्थः । एवं सा यथा स्वपतौ तादृशरसाधिकृतापि तत्सेवामययद्दास्याभिलाषवती तथा त्वयि वयमपीति वाक्यार्थः) एवं क्षीरोदमथने यथान्वपरित्यागेन श्रियास्तदेकभजनं तथाऽस्माकमपि त्वदेकभजनमिति ज्ञापितम् अथवा ननु, नाहं

---

[1] क्षण. उता.–प्रा. पा. ; क्षण. कृतोऽन्य–विज. ।

स्वप्नेपि भवतीस्पर्शं स्मरामि भवतु वा तथाप्यविचारेण सकृत् स्खलनेपि न भूयः कर्त्तुमुचितं तच्चानौचित्यं भवतीनां साध्वीकुलाचारलङ्घनेन मम च तादृशभवदाचारध्वंसनेनेत्यत्र साध्वीकुलशिरोमणिं श्रियमेव दृष्टान्तयन्त्यः प्रत्युत्तरयन्ति—श्रीरिति। वक्षसि स्वभर्त्तुर्हृदये पदं स्थानं लब्ध्वापि श्रीः किल प्रसिद्धौ असमोर्द्ध्वमाधुरीभरमोहितत्वात् तथापि तवाङ्गसङ्गे निजायोग्यतामननाच्च यदिति यस्य वृन्दावनसम्बन्धिपादरजोमात्रं चकमे तस्य तव पादजो वयमपि प्रपन्ना इत्यन्वयः। तदुक्तं "यद्वाञ्छया श्रीर्ललनाचरत्तपः" इति तादृशप्रसिद्धिश्रवणाद्वक्ष्यते च स्वयं "जयति तेऽधिकं जन्मनाव्रजः श्रयत इन्दिरा शश्वदत्र हि" इति पादरजःशब्दस्य पुनरुक्तित्युत्कण्ठया ज्ञेया (तदुक्तं पक्षद्वयेपि) रूपकाप्रयोगाश्च पूर्ववदेव ज्ञेया पक्षद्वयेपि सा च न केवला किन्तु तुलस्या लीलारूपया वृन्दयापि सहसा च तुलसी तत्प्रेयस्यपि चकमे पाद्मे कार्त्तिकमाहात्म्ये जालन्धरोपाख्याने तस्या अपि तत्प्रेयसीत्वश्रवणात् तथा स्कान्दमथुरामाहात्म्ये—

"वृन्दावनं द्वादशमं वृन्दादेवी समाश्रितम्। हरिणाधिष्ठितं तच्च ब्रह्मरुद्रादिसेवितम्"॥ इति

वाराहे तन्माहात्म्ये च—

"वृन्दावनं द्वादशमं वृन्दया परिरक्षितम्। मम चैव प्रियं भूमे ! सर्वपातकनाशनम्॥ इति।

तदाश्रितत्वश्रवणाच्च कथम्भूतमपि रजः भृत्यगुष्टं त्वद्भृत्यगणसेवितावशिष्टमपि पुनारज एव विशेषयितुं तस्या वैशिष्ट्यान्तरमाहुः—यस्या इति। स्ववीक्षणं स्वपतिप्रेमपर्य्यन्तसम्पत्तिप्रदे अन्यसुराः श्रीविष्वक्सेनगरुडादयः तेषामपि प्रयासः यदि तस्याः तस्याश्च अप्येवं तदास्माकमेव को दोष इति भावः। ऐश्वर्य्यपक्षेऽपि प्रायः पूर्ववदेवार्थः किन्तु पूर्वत्र प्रेमकृतोत्कर्षदृष्टिप्राप्तत्वेन उत्तरत्र तु ज्ञानप्राप्तत्वेनेति भेदः तदेवं "भर्त्तुः शुश्रूषणं स्त्रीणाम्" इत्यादेरुत्तरं ज्ञेयम् निषेधार्थश्चायं ननु श्रीवृन्दे अपि स्वपतिपरित्यागेन मदाशया मद्वने तिष्ठतः काः यूयमित्यत्राहुः—श्रीरिति। यत् या श्रीः तुलस्या वृन्दया सदात्र वने स्थितं तव पदाम्बुजरजश्चकमे तत्कामनयाऽत्र वासं कृतवतीत्यर्थः। तद्वदिति सहैव वयं च वयमपि पादरजः प्रपन्नाः काका नैवेत्यर्थः। चपलात्वेन ख्यातया लक्ष्म्या यच्चापलं तथा जालन्धरभार्य्यात्वमपि लब्धाया वृन्दाया यद्व्यभिचारित्वं तत्तद्युक्तमेव नास्माकमेतादृशीनामिति भावः। अत्रापि भर्त्तुरित्यस्यैवोत्तरमिदमिति॥ ३७॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु, उदारशिरोमणे ! मा सिञ्चाधरामृतार्पणेनास्माकं हृच्छयाग्निं निजदास्यमात्रमपि देहीति चेत्तथापि भोः मुग्धबुद्धयो मयैका द्वित्रा वा स्वीकार्य्याः, अन्यथा युष्माकमत्यन्तबाहुल्येनान्योऽन्यं निरन्तरसापत्न्योदयादायतावपि दुःखं भवितैवेत्याशंक्य दृष्टान्तेन तत्परिहन्त्यः परमार्त्त्या दास्यमात्रेच्छयाहुः—श्रीरिति। उत अपि, यस्या स्ववीक्षणे निमित्तेऽप्यन्येषां त्वद्व्यतिरिक्तानां सर्व्वेषामेव सुराणां ब्रह्मादीनां प्रयासः, इति माहात्म्यविशेषेण मात्सर्य्यसम्भवात्, सपत्नीसंगासहिष्णुता सूचिता; अयमन्य-शब्दाभिप्रायः। एवं तस्य तस्यामनासक्तिश्च ध्वनिता, तथापि सा श्रीरपि सपत्न्या सहितापि पदाम्बुजरज एव यच्चकमे, तच्चोक्तं नागपत्नीभिः (भा० १०।१६।३६) 'यद्वाञ्छया श्रीर्ललनाचरत्तपः' इति; श्रीसनकादिभिश्च तृतीयस्कन्धे (भा० ३।१६।२०)- 'यं वै विभूतिरुपयात्यनुवेलमन्यै,–रर्थार्थिभिः स्वशिरसा धृतपादरेणुः। धन्यार्पिताङ्घ्रितुलसीनवदामधाम्नो, लोकं मधुव्रतपतेरिव कामयाना॥' इति। तत्र हेतुः—भृत्यैर्जुष्टमिति। सर्व्वतोऽधिकप्रीतिपात्र–दासवर्गसेवितत्वेन रजस एव परमोत्कृष्टत्वमननादित्यर्थः। यद्वा, वैकुण्ठनाथस्य वक्षसि पदं लब्ध्वापि श्रीर्यस्य तव पदाम्बुजरजः, किल निश्चये, असमोर्द्ध्वमाधुरीभरमोहितत्वाच्चकमे, तद्वत् श्रीवत् पादरज एव तद् वयं प्रपन्नाः शरणागतत्वेनाश्रिताः, तत्र पादरजसा दास्यं लक्षितम्। तत्र च परमभक्त्या निजनीचत्वविवक्षया पादरजः इत्येव, न तु साक्षाद्दास्यमित्युक्तम्, तत्र च परमदौर्लभ्येन किञ्चिन्मात्रविवक्षया एकत्वम्; यद्वा, दास्ये सत्येव पादरजः प्राप्यते, किंवा तस्मिन् प्राप्त एव दास्यं सम्पाद्यत इति पादरजसः कामना तत्प्रपन्नता च, यत्तदोर्नित्यसम्बन्धाद्यच्छब्दानीततच्छब्देन श्रीवत्तदेककामनानिष्ठा बोध्यते; यद्वा, यत् यस्मादिति पूर्व्वमम्बुजरूपकप्रयोगः, श्रियस्तेन सर्व्वतापहरणाद्यभिप्रायेण आत्मनि च तदभावात्तदप्रयोगः; यद्वा, लक्ष्मीस्तादृशमाहात्म्यसाक्षात्पादाब्जरज एव कामयाञ्चक्रे, वयन्तु नीचास्तद्योग्यताहीनाः पदं पादाब्जचिह्नं तत्सम्बन्धि रज एव यत्र कुत्रचिद्दूरे पतितमपि प्रपन्नाः, एषा परमदैन्योक्तिः, पादरजसः पुनरुक्तिर्दास्यमात्रैकापेक्षाबोधनार्थम्। सा यथा सापत्न्यदोषं त्वद्दास्य–लालसया न मेने, तथा वयमपीति भावः। यद्वा, अग्रे दास्यं प्रार्थयितुं तस्य सर्वाराध्यमहालक्ष्मीकाम्यत्वेन परमोत्कर्षं प्रतिपादयन्त्यस्तदेव प्रपद्यमाना आहुः—श्रीरिति, अर्थः स एव। अन्यत्तैर्व्याख्यातम्; यद्वा, तुलस्याः सम्बन्धि तस्या गोविन्दचरणप्रियत्वेन सदा तत्रैव निवासाद् भृत्यैरनन्तैर्जुष्टमिति। तत्र बहूनां संघर्षोऽपि दर्शितः; 'सारंगाणां पदाम्बुजम्' इत्युक्तेः। अन्येषां सुरेतराणां दैत्यादीनां सुराणां च प्रयास इति। अन्यत् समानम्। अनेन (२४श० श्लो०) 'भर्त्तुः' इत्यस्योत्तरम्। भर्त्तुः शुश्रूषणादिकं न हि परमो धर्म्मः, किन्तु त्वद्दास्यमेव, ब्रह्मादिप्रार्थ्यकृपाकटाक्षया श्रियापि तस्य प्रार्थ्यत्वादिति। यद्वा, यत्पदाम्बुजरजो यस्य नारायणस्य पादपद्मरजः श्रीश्चकमे तद्वत्तत् स इव यस्त्वं तस्य तव पादरजो वयं प्रपन्नाः, (भा० १०।८।१९) 'तस्मात् नन्दात्मजोऽयं ते नारायणसमो गुणैः' इत्युक्तत्वात्। शेषं समञ्जसमेव। एतदैश्वर्यं विनायमर्थः।

श्लेषार्थः—तादृशी सत्यपि तादृशस्थानं लब्ध्वापि तादृशं पादरज एव श्रीश्चकमे, न तु प्राप्नोतीति तस्या अविवेकः सूचितः; यस्या इति बहुजनकाम्यतया कश्चिद्दोषोऽप्यारोपितः, अतो निबुद्ध्यानन्यतारहितया तयैव त्वद्दास्यं काम्येतेति युक्तमेव, यद्वा, यस्याः स्ववीक्षणे सुष्ठु अवीक्षणे अन्येषां सुराणां च सात्त्विकानामपि, मां श्रीर्नवीक्षताम्,—एतदर्थं प्रयासः, स्थितिकाले मदादिभिरन्धीकरणात्, त्यागकाले गच्छन्त्या तया मूर्च्छाकरणाच्च सा श्रीरेव चकमे। कृष्णस्य वक्षसि वामे पीता सूक्ष्मा कापि रेखास्ति, सा च गर्गादिभिर्लक्ष्मीरिति व्रजे ख्यापिता, तदभिप्रायेण तासां सेर्ष्यं वचनम्, वयञ्च तद्वत् तादृश्यः किं यत्तव पादरजःप्रपन्ना भवेम, अपि तु सुबुद्धयः स्थिरप्रकृतयो भर्त्तृशुश्रूषणाद्यर्थं गृहं किल यास्याम एवेति भावः॥ ३७॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

त्वत्पादसौरभ्यं (भाग्यं) त्वतिविचित्रमित्याहुः—श्रीरिति। श्रीर्लक्ष्मीस्तव वक्षसि असापत्न्यम् उन्नतञ्च पदं स्थानं लब्ध्वापि तुलस्या सपत्न्या सह यत्तव पदाम्बुजरजः कामयते स्म कथम्भूतम्? भृत्यैः सर्वैर्जुष्टम् इति सौभाग्यातिशयोक्तिः कथम्भूता श्रीर्यस्याः श्रियः स्ववीक्षणकृते स्वावलोकनार्थम् श्रीरस्मानवलोकयतु इत्येतदर्थमन्येषां सुराणां ब्रह्मादीनां प्रयासः अन्यतपः प्रयास इति पाठेऽन्येषां ब्रह्मादीनां तपः क्लेश इत्यर्थः। सा श्रीश्चकम इत्यन्वयः। तद्वच्छ्रीवद्वयमपि तव पादरजःप्रपन्नाः॥ ३७॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अद्यापि लक्ष्म्या तव पादपद्मद्वन्द्वधूलिनिषेवणं काङ्क्षितं किमुतास्माकमिति भावेनाहुः—श्रीरिति। अन्येषां सुराणां ब्रह्मादीनां प्रयासः प्रयत्नः यस्याः श्रियः स्वबीक्षणकृतः स्वनिरीक्षणार्थं कृतः सा श्रीर्वक्षसि पदं लब्ध्वापि तुलस्या पदं यस्य तव पादाम्बुजरजः चकमे कामितवती यथा वयं च तद्वत् तथा तस्य तव पादरजोनिषेवणाय प्रपन्ना इत्यन्वयः स्ववीक्षणकृत इति पाठे स्वदर्शनार्थमित्यर्थः॥ ३७॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

इममेवार्थमन्याः प्रकटयन्त्यो लक्ष्मीतोऽप्यधिकत्वेनालौकिकत्वमात्मनो निरूपयन्ति—श्रीर्यदित्यादि द्वाभ्याम्। वक्षसि पदं लब्ध्वापि श्रीर्यत्पादाम्बुजरजश्चकमे कामयामास नतु लब्धवती कुतो न लब्धवती यतस्तुलस्या एव तत् भृत्यजुष्टं स्वाभाविकं भृतिः कर्ममूलं तेन अतुष्टं कर्मफलं न तत् सैव कीदृशी इत्याहुः—यस्या इति। स्ववीक्षणे स्वं प्रति दर्शने अन्येषां सुराणां प्रयास एव वयं तद्वत् तत्स्वरूपाः किन्त्वियान् विशेषः सा तु चकम एव वयन्तु तव पादरजःप्रपन्नाः प्राप्ता एवेति ततोऽधिका अपि वयमित्यलमन्यथाशङ्कया॥ ३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

रमायाः क्वचिदेव दत्तक्षणम्, न सर्वदेति यदुक्तं तदन्याः प्रपञ्चयन्ति—श्रीरित्यादि। हे सखे! वयं तव पादरजःप्रपन्नाः पादधूलीं प्रपद्यामहे इत्यर्थः। केवलं नमस्कूर्म एव तत्, तत्रापि भृत्यैर्जुष्टम्, यस्याः श्रिय इति श्रियो महिमानं प्रपञ्चयति—तत् कथं वयं प्राप्स्यामः। ननु तर्हि यूयं किं प्रार्थयत? तत्राहुः—तद्वत् त्वत्पादरजो वर्त्तते यत्र तत्स्थलमभिलषाम इति दैन्यम्। अथवा पादरजःप्रपन्नाः स्मः, एवञ्चेद् यत्रकुत्रादि पदपद्धतौ रजो गृह्यताम्? तत्राहुः—तद्वत् तत्सहितमेव पादस्थमेव रजः। अयमर्थः—पादसंवाहनं कुर्वत्यः, तत्र स्थिताः कुचकुङ्कुमरजः इत्यर्थः। केवलं रज एव भृत्यजुष्टम्, तदेव तुलस्या सह स्पर्द्धमाना श्रीः कामयते, अतस्तया सहास्माकं स्पर्द्धापि न भविष्यति। अथवा, यत्पदा यस्य पदा हेतुना श्रीः अम्बुजरधश्चकमे, तत्सादृश्यात् पद्मवन एव तस्थाविति भावः। वक्षसि पदं स्थानं लब्ध्वापि। पदं कीदृशम्? भृत्यजुष्टं भृतिः सेवामूलं तया अजुष्टं सेवनालब्धमिति, अपि तु स्वभावसिद्धं यस्या इति तत्तुल्यमेव वयञ्च। वयन्तु 'च-कारस्त्वर्थे' तद्वत्तुलसी सहितमेव पदरजः प्रपन्नास्तया सह विरोधो न क्रियत इत्यौत्कण्ठ्योदयः असूयाशान्ति-दैन्यादेः शबलता॥ ३७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदेवं त्वयैव वयं स्वप्रेयसीकृताः किन्तु त्वच्चरणसेवामेव वयमाशास्महे इति सदृष्टान्तमाहुः—श्रीर्लक्ष्मीर्यस्य नारायणस्य पदाम्बुजरजश्चकमे तद्वत्तत्तुल्यस्य तवाऽपि वयं पदाब्जरजः प्रपन्नाः ततश्च गर्गोक्तिगम्येन तव नारायणतुल्यत्वेनास्माकमपि श्रीतुल्यत्वं स्वत एवाऽऽयातमिति भावः। किञ्च वक्षसि सर्वोत्तमे स्थलं पदम् आस्पदं लब्ध्वापि तुलस्याः सपत्न्याः पदमपि भृत्यैर्जुष्टं सेवितमिति पुरुषजनसङ्घट्टवदपि तस्य पादाब्जश्चकमे स्वाभाविकी प्रेयसीभावसमुचितां लज्जामपि परित्यज्य स्वन्यूयतामप्यङ्गीकृत्य कामयतेस्मेति तस्याः प्रेयसीभावादपि दासीभावो यथाऽभीप्सितस्तथैवास्माकमपीत्यतस्तव रक्तकपत्रकादिदासैः सहाऽपि लज्जां परित्यज्य पादौ सम्वाहयितुमिच्छामः तथा वृन्दावनीयपुलिन्दीनां कर्म तृणलग्नत्वच्चरणकुङ्कुमेन स्वीयभालप्रलेपनमपि स्वन्यूनतामप्यङ्गीकृत्य चिकीर्षामः। किञ्च, श्रीमन्नारायणदेवेन प्रतुष्यता नित्यनिवासार्थं तस्यै स्ववक्ष एव दत्तं त्वया तु

रसिकशेखरेणास्मभ्यं स्वपदतलनिकटप्रदेशेऽपि क्षणमपि स्थातुमपि न दीयते इत्यस्माकमेव दग्धललाटमिति ध्वनिः स्वयशः-प्रेप्सुर्गर्गोक्तिप्रामाण्येन यदि नारायणतुल्यो बुभूषसि तदाऽस्मान् वक्षसा वहेत्यपि भावगाम्भीर्यस्पर्शी ध्वनिः। ननु, सा लक्ष्मीः यथा चञ्चला तथैव यूयमपि पुण्यवतां जनानां गृहे गृहे चाञ्चल्यधर्ममप्यङ्गीकुरुतेति नर्माशङ्क्य केन मूर्खणोच्यते श्रीश्चञ्चलेति सातु परमधीरैवेत्याहुः—यस्याः श्रियः स्वेषु वीक्षणकृते वात्सल्यरसमयकृपावलोकनप्राप्तिकृते अन्यसुराणां ब्रह्मादीनां तत्पुत्रतुल्यानां प्रयास एव सा तु तदपि तानपि प्रायो नावलोकते किन्तु तच्छक्तिरेव काचित्तेभ्योऽभीप्सितां सम्पद दत्त इति ॥ ३७ ॥

रसिकाह्लादिनी–टीका

त्वयाभिरमिता इत्युक्ते सति कदाचित्क्षुभेत पदे ता उत्तमाधिकारं प्राप्तुमिछतीति मनसि विचार्य्य यथा लक्ष्मी रुतस्य माधि परित्यज्य पादरजः कामयते तद्वद्भवामेति प्रार्थयन्त्य प्राहुः श्रीरिति श्रीरपि यस्य तव पादाम्बुजरजः सेव्यत्वेन चकमे कामित्ववती वक्षसि असापन्त्यं स्थानं लब्ध्वापि श्री तु उत्तमनायिका परमविदग्धा च पादतलस्य सौभाग्यातिशयं विचार्य पदाम्बुजरज एव सेवते स्म असापन्त्यं स्थानं त्यत्क्वा अपत्न्या तुलस्या सह सेवते वक्षसि एक एव रसः चरणतलं सर्वरसस्याश्रयभूतं रागसारस्य चरणाश्रितत्वात्। एवं सर्वरसानां रागे स्वादुविशेषमभिलाषमाना चरणरजः सेवते। नन्वासां श्रीसेव्यत्वज्ञानं कथमिति चेत्तत्राह एतास्तु श्रुतयः पूर्वजन्मनि ज्ञातैश्वर्या अतः श्रीसेव्यत्वमुदाहरन्ति। यद्वा "नारायणसमो गुणैरिति" गर्गोक्त्या श्रीसेव्यत्वोक्तिरिति न किंचिदनुपपन्नम्। कीदृशं पादरजः भृत्यजुष्टं रसविशेषेण भृत्या पोष्या द्वादश रसातलम्बनरूपास्तैर्जुष्टम्। ननु यदि तुलस्या अन्यैर्भृत्यैश्च सेवितं तर्हि कथं श्रियः स्पर्द्धा न जाता। तत्र समाधत्ते यथा तुलसी श्रीकृष्णस्यातीव प्रिया अन्यैर्भृत्यैः सेव्यमानं दृष्ट्वा तस्या मनसि स्पर्द्धा न जाता कित्वतीव हर्षेण सेवते स्म तथाश्रियोपि वृन्दावनमाहात्म्येन स्पर्द्धावसरो उक्तं च 'यत्र नैसर्गदुर्वैरा" इति। सेवासुखनिमग्नानां परस्परानभिज्ञानामिव निर्मत्सराणां चरणरजः सेविनां मनसि स्पर्द्धनावकाशं लभते इति भावः। सेवयेबाधिकारदाढ्यं नान्यथेति। यस्या श्रिय स्ववीक्षणकृते श्रीरस्मानवलोकयन्नेतदर्थं। अन्येषां सुराणां ब्रह्मादीनां प्रयासस्तपोभिरुद्यमः। सा यथा क्षीरोदमथने उद्भूता कामयमानान् ब्रह्मादीन् हित्वा चरण रज इव सेवते स्म तथा श्रीसादृश्ये कामायमानान् पत्यादीन्विहाय वयमपि पादरजः प्रपन्ना शरणप्राप्ता वयं तु नोत्तमाधिकारिण्यः किं तु दास–दासीनां स्वामिसेवाधर्मः स्वामिसम्बन्धिनां तदनुकूलानां च सेवाधर्मः। अस्मत्पत्यादयस्तु न त्वनुकूलाः प्रत्युतापकारिणः अत एव तेषां त्याग एवोचितः। यद्यपि वैकुण्ठलक्ष्मी चापलदोषमपहाय सदा वैकुण्ठनाथं भजत्येव तथा वृन्दावनविलासिनस्तव चरणरजः सेवने गुणाधिक्यमाकलय्य वृन्दावनभूमौ वसतिमभिलाषमाना तथा करोति। उक्त च "रमाक्रीडमभून्नपेति" अन्यच्च "यद्वांछया श्रीर्ललनाऽऽरत्तपो विहाय कामान्सुचिरं धृतव्रतेति"। अनेन भर्तुः शुश्रूषणमित्यस्याप्युत्तरं दत्तमेव। यद्वा श्रीरपि तु भार्यापिलस्यानुद्रणेन भृत्यजुष्टमं पादाम्बुजश्चकमे न तु प्राप भृत्यास्तु निश्चला यद्यपि तया चापलं त्यक्तां तथापि निष्किञ्चनानां तेषां मनोरोधेन तस्यामादरविशेषानुदयात्। यस्याः स्ववीक्षणकृते स्वस्मिन् श्रियामित्यर्थः। वीक्षणं भृत्या मां विलोकयन्तु सारंगानां पदाम्बुजमित्युक्तत्वात्। तेषां सर्वस्वमत एव प्रसन्नेस्तदर्थे पादरजसि तेषां कृपयाधिकारणी स्यामिति मनसि निधाय श्रीः प्रयासं करोति तद्वत्भृत्यजनवत् वयं तव रजः स्वत एव धन्यत्वं तव पादसम्बन्धेनातीबधन्यत्वमिति भावः ॥ ३७ ॥

विशुद्धरसदीपिका

ननु, भवत्यो मम प्राणेश्वर्य्यः प्राणसख्यः सर्वप्रकारैस्तत्समाः कथं मम पादतलं स्पृष्टवत्य इति चेत्सत्यं किन्तु परमरमानाथत्वात्त्वत्पादसौभाग्यमतिचित्रं प्रसिद्धलक्ष्म्यादिकामितत्वादित्याहुः–श्रीरिति। सर्वसम्पत्सौभाग्याद्यधिष्ठात्री चकमे कामितवतीत्यलभ्यत्वं तदपि लतादिरूपेण तथा दर्शितं श्रीगोविन्दलीलामृतं –

"श्रीभूलीलाराधिकासेवनाय लुब्धा लब्ध्वा स्थाष्णुतां भुरिपुण्यैः।
जातीधात्री श्रीतुलस्यात्मनाऽद्धा कुर्वत्यस्तद्यत्र नित्यं वसन्ति" ॥ इति

एवं च रमादिसेव्यरमानाथसेविता श्रीराधा परमरमेति सिद्धं तत्तन्नाम्नाभिधानं त्वभेदाभिप्रायेण लोकप्रसिद्धमनुसृत्यैवेति कीदृशं भृत्येति भृत्यैः भरणीयैर्नित्यपरिकरैर्जुष्टं प्रीत्या सेवितं तद्वत् श्रीवत् एतावांस्तु विशेष श्रीरम्बुजसादृश्यमुपाधिमवलम्बमाना वयं तु पादरज एव प्रपन्ना इति तुलस्या सहेति वृन्दादेव्या एव नामान्तरेण कथनमपह्नवाय सहेत्यनेन पाद्मोक्त साबल्यं परिहृतं तच्च "यत्र नैसर्गादुर्वैराः सहासन्" इत्यादि प्रागुक्त श्रीवृन्दावनस्वाभाव्यादेव किम्वा तत्प्राकृतांशसंसर्गजनितासुरावेशलीलाविलासितमिदं तु शुद्धमेवानयोश्चरितमिति विवेकः अन्यथा श्रीविष्णोरपि तच्छ्रायः कथं स्यादिति विचार्य्यम् अद्भुतमेतत् रेखारूपेण तव वक्षसि पदं लब्ध्वापि प्रेयस्युचितं सेवाभिलाषं परित्यज्य दास्युचितमेवेष्टवतीत्यर्थः। कोऽसावित्यत आहुः, यस्या इति। क्षीरोदजातयाऽभेदाभिधानम् इदं च नैश्वर्य्यज्ञानमवलम्ब्य किन्तु "यद्वाञ्छया श्रीर्ललनाऽचरत्तपः" इत्यादि महाजनप्रसिद्धैवेति ज्ञेयम् तद्वदिति तच्छीलस्यात्मन्यतिदेशः ॥ ३७ ॥

श्रीरामनारायणकृता भावभावविभाविका

लक्ष्म्यापि सेव्यत्वेन पादरजः सौभाग्यातिशयं दर्शयन्त्यः आत्मनस्तद्वत्प्रपन्नत्वमाहुः—श्रीर्यदिति। यस्याः श्रियः स्ववीक्षणकृते स्वस्मिन् कृपादृष्ट्यर्थं तत्करुणयैव समस्तैश्वर्यादिसम्भवादन्येषां सुराणां ब्रह्मरुदेन्द्रादीनां प्रयासस्तया आद्याचरणं सा श्रीः सर्वसम्पत्सौभाग्याद्यधिष्ठात्र्यपि। ननु, किं प्राकृतैश्वर्याद्यधिष्ठातृत्वेन परमार्थसुखालाभे तत्राहुः—नित्यनिरतिशयपरमार्थभूतपरमानन्दघनस्य तव वक्षस्यसापत्न्यपदं लब्ध्वापि यत्पदाम्बुजरजश्चकमे कथम्भूतं तुलस्या सपत्न्या सहासङ्ख्यातभृत्यैर्जुष्टमिति महच्चित्रं तव पादरजः सौभाग्यं येनासापत्न्योपरिपदलाभेऽप्यधः समापत्न्यमपि कामयति। यद्वा, वक्षोऽधिश्रिता श्रीरपि शिरोर्पितया तुलस्या सह पादरजश्चकमे इति चित्रं तत्सौभाग्यम्। यद्वा, वक्षःशिरोधिश्रिताभ्यां तुलसीश्रीभ्यां पादरजःकामनया भगवदङ्गानां समानपरमानन्दतया नोत्तमाधमभाव इति ध्वनिः। यद्वा, शिरोधिश्रितया तुलस्या सह सर्वत्यागशीलैः ब्रह्मलोकादिश्रियं तृणीकुर्वद्भिः परमनिष्कामैर्जुष्टत्वात् किमत्राद्भुतो रस इति चकिता श्रीरपि यच्चकमे। यद्वा, चरणाब्जरजो दास्येनैव वक्षःपदलाभात् कृतज्ञतया भृतैर्मधुपवत् जुष्टमपि रजश्चकमे नतूच्चपदलाभेन तदुपकारं विस्मरति भृत्यजुष्टमित्यत्रेदमाकूतं भृत्यैर्भगवद्दत्तबुद्धियोगेनाविर्भूततत्स्वरूपाभेदैरपि जुष्टमिति मत्वा वचोऽधिश्रितापि चकमे इति कृतज्ञेषु फलतोऽपि साधने आदराधिक्यं फलादरेण तदलाभात्साधनादरेण तु फललाभनिचयात्। यद्वा, श्रीरपि वक्षःस्थापि चकमे इत्यतस्तद्दृष्ट्यैव भृत्यैर्जुष्टम्। यद्वा, एकान्तवक्षोवासिन्या श्रिया भृत्यजुष्टरजःप्रार्थनया वक्षोधामैकान्तवासाभ्यां पादाब्जरजः सत्समागमयोः श्रैष्ठ्यमिति भावः। यद्वा, "तुलसीदलमात्रेण जलस्य चुलकेन च। विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सल" इत्यादिवचनैस्तुलस्या तदर्पणमात्रेण भृत्यजुष्टमिति श्रियार्पितैश्वर्यभोगाद्यर्पणं लघु मत्वा तुलस्यर्पणेनैव चकमे यद्वा, ब्रह्माद्यभिलषितवीक्षणश्रीर्यत्तुलस्या सह तदर्पणेन वाद्यापि चकमे तद्भृत्यैः पापयोनिभिरपि जुष्टमित्यहो रजःसौभाग्यं तव दीनवात्सल्यं चातः तद्द्वयं च श्रीवद्रतिरूपसौभाग्यवत्यः तुलसीवत्त्वदादरणीयाः भृत्यवत्सर्वत्यागेन दास्यरताश्च तद्वत्तादृङ्माहात्म्यं तव पादरजः तद्वदेवान्यत्र निष्कामतया त्वदेककामतया च तद्वदेव मनोवाक्कायैः प्रपन्ना इति त्वयापि तद्वदेवाङ्गीकार्या इति तद्वच्छब्दस्यानुषङ्गेण सर्वत्रान्वयः॥ ३७॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु, रमाया दत्तक्षणमित्युक्त्या तद्वदस्मानप्यङ्गीकुर्विति भवतीभिः सूचितं परं तु लक्ष्म्या दैवगत्या जातो यः सम्बन्धः स तु प्राथमिको भवतीनां तु न तथेत्यऽतः किं करोमीति चेत्तत्राहुः—श्रीरिति। श्रीर्यथायत्पादाम्बुजरजश्चकमे कामयते स्म तद्वद्वयमपि तव पादरजः प्रपन्नास्तथा च श्रीरपि न दैवगत्या भवन्तं प्राप्तवती किन्तु महता तपसेति भावः। तत्रापि तुलस्याः सपत्न्या सह न चाङ्गसङ्गालाभात्सापत्न्यमप्यङ्गीचकाराऽपितु भक्त्यतिशयादेवेत्याशयेनाहुः वक्षसि पदं लब्ध्वापि तुलस्या एवासाधारणमिति वा तथा च परमोत्कृष्टस्वतन्त्रस्थलं प्राप्यापि तादृशं रमा यच्चकमे तद्भक्त्याऽतिरेकविजृम्भितमिति भावः। ननु, कुत एवमित्याशङ्क्य रजसो माहात्म्यमाहुः भृत्यैर्नारदादिभिः सर्वैरपि तदेवाऽनन्यतया सेवितं किलेति प्रसिद्धं नात्र किञ्चिद्वक्तव्यं रज एवैवंविधसामर्थ्यं यत्तत्र संलग्नचेतसः पुनरन्यत्र गमनाभावसम्पादनन्नान्यस्याऽतो लक्ष्मीर्वक्षसि पदं लब्ध्वापि कदापि चेतसोऽन्यत्र प्रवृत्तिर्न भवेन्नाप्यन्यस्य कस्यापि स्पर्श इति मनसि निधाय रजश्चकम इति भावः। ननु, लक्ष्म्याः एव कुत एतावद्भयमित्यत आहुः—यस्या लक्ष्म्याः स्वस्य वीक्षणकृते श्रीरस्मान् करुणया पश्यत्वित्येतदर्थमन्येषां सुराणां ब्रह्मादीनां प्रयासः सर्वपुरुषार्थानां तदधीनत्वात् तथाच बहवो मां प्रार्थयन्ते कश्चित्कदाचिदत्यन्तं यदि तपःकुर्यात्तर्हि स को वेद किंकुर्यादिति विचारवत्यस्तस्यास्तावद्भयमिति भावः। तद्वद्वयमपि प्रार्थनावतां बहुत्वमालोक्य तद्भयात्प्रथममेव तव पादरजःप्रपन्नाः तस्मादस्मदर्थमेवावतीर्णो भवानात्मानं न गोपय गोपनासम्भवादतो मास्त्वाग्रह इति भावः। यद्वा, ननु पादस्पर्शस्य को वा तादृशो महिमेति चेत्तत्राहुः——श्रीरिति। यद्वा, ननु चरणस्पर्शादेव भवत्यः कृतार्थाः किमर्थमङ्गसङ्गार्थं विकलचित्ताः किञ्च अङ्गसङ्गमवाप्य पुनश्चरणस्पर्शे भक्तिर्न भविष्यति न चैवं का हानिरिति भ्रमितव्यं तस्या एव परमपुरुषार्थत्वादित्याशंक्याहुः——श्रीरिति। तथा च भगवत्पादरज एव तथाविधः यतोभवद्वक्षःस्थलनिवासिनी श्रीरपि तदेव चकमे परमभक्तायास्तुलस्याश्च तदेवासाधारणं स्वाश्रयश्च सर्वैर्भृत्यैस्तदेव जुष्टं तस्मात्तत्प्रतिबन्धकमङ्गसङ्गाभिलाषं निवर्त्य तदेकशरत्वमेवाश्रयिष्याम इति भावः। अनभिज्ञापक्षे ननु, सौन्दर्यादिगुणसम्पन्नाः शोभनकुलोत्पन्नाः महिषीपदयोग्याः किमेवं ब्रूथेत्याशङ्क्य महिषीपदापेक्षयेदमुत्कृष्टमिति लक्ष्मीदृष्टान्तेन समाधानमाहुः——श्रीरिति। यद्यस्माल्लक्ष्मीनारायणस्य पदाम्बुजरजो यथा चकमे तद्वद्वय नारायणसदृशस्य तव पादरजः प्रपन्नाः यद्यपि नारायणस्य तद्वत्तत्तुल्यस्य तवेति वा "नारायणसमो गुणैः" इति गार्गोक्त्या तव नारायणसमत्वमस्माकं लक्ष्मीसमत्वमर्थादागतमिति भावः। तत्रापि वक्षसि परमोत्कृष्टस्थले पदं रमणीभाव लब्ध्वापि तुलस्याः सपत्न्याः पदमपि भृत्यैर्जुष्टं पुरुषजनसम्प्रदाययुक्तमपि तथा च तस्या यथा प्रेयसीभावसमुचितां लज्जां स्वन्यूनताञ्चाऽगणय्य दासीभावोऽभिलषितस्तथैवास्माकमपि यद्यप्येवं न तथापि त्वं नारायणवदत्राचरसि वक्षःस्थलोद्वहनयोग्या अस्मान् स्वपादतलसन्निधौ स्थातुमपि ददास्यतो दग्धललाटा वयं किंकुर्म इति भावः। ननु, लक्ष्मीवच्चाञ्चल्यमपि युष्मासु प्राप्तमित्याशङ्क्याहुः——यस्या इति। तथा च या पुत्रतुल्याऽन्यसुरादीनपि यया कयाचिच्छक्त्या ऽनुगृह्णाति सा चञ्चलेति मूर्खप्रवाद इति भावः। श्रीः

पदाम्बुजरजश्चकमे वयं तु पादरजः इत्युक्त्या श्रियः स्ववासस्थानोपमसादृश्योपाधिकसेवनमस्माकं तु निरुपाधिकमिति व्यज्यते। यद्वा, ननु, स्वस्वपत्युः वक्षःस्थलरमणयोग्याः कथं दासीभावं प्रार्थयन्ते इत्याशङ्क्य "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति न्यायमवलम्ब्य समाधानमाहुः—श्रीरिति। स्वभर्त्तुर्नारायणस्य वक्षसि पदं लब्ध्वापि लब्धनारायणपादसम्बन्धया तुलस्या सह यस्य तव वृन्दावनसम्बन्धि पदाम्बुजरजश्चकमे तत्सेवनार्थं वृन्दावनशोभारूपेण प्रियवक्षसि रेखारूपेण श्रीरत्रास्ते तुलस्यापि वृन्दाख्यदेवीरूपेण वृन्दारूपेणचास्ते इति भावः। तस्मात्परमपतिव्रताया लक्ष्म्या यदैवं दशा तदानीं वयं कथं भर्तुः शुश्रूषणमित्याद्युपदेशार्हा इत्यपि ध्वनितम्। मानिनीपक्षे। ननु, श्रीवृन्दापि स्वपतिं त्यक्त्वाऽत्र वने मम सन्निधौ तिष्ठति यूयं किमित्येवंविधं मानं कर्तुं प्रवृत्ता इति चेत्तत्राहुः यद्यपि श्रीवृन्दया सहात्र स्थितं ते पादरजश्चकमे तद्वद्वयं किं पादरजः प्रपन्नाः अपितु नेति काक्वा योग्यं तयोरेव तद्युक्तं नास्माकमिति भावः। यद्वा, यस्य नारायणस्य पदाम्बुजरजः श्रीश्चकमे तद्वद्वयं तेन नारायणेन तुल्या वयमत एव तादृशलक्ष्म्यादिप्रार्थनीयं पादरजःसपत्न्याः तव लक्ष्म्यादिदशस्यातुल्याराधनीया इति भावः॥ निवृत्तिपक्षे। लक्ष्म्यादिवत्स्वस्य भगवत्परायणत्वमाहुः, श्रीरिति। तथा च श्रियादिसमस्ताराध्यपादपद्मे समस्तश्रुतितात्पर्य्यविषये परमात्मनि सर्वभावेन रतिः सम्पाद्येतिभावः॥ ३७॥

रास-रहस्यम्

र० टी०—यस्याः मुक्तिदेव्याः स्ववीक्षणकृते श्रीः मुक्तिदेवी अस्मान् अरुणया विलोकयतु, एतदर्थमन्येषां ब्रह्मादीनां सुराणां तप आदिभिराराधनप्रयासः परमपुरुषार्थरूपत्वात्, सा मुक्तिः यथा ताननादृत्य मुमुक्षोः वक्षसि हृदये पदमेकान्तस्थानं लब्ध्वापि तुलस्याः सपत्नीस्थानीयायाः अष्टसिद्ध्या सह सापत्न्यवत् नाना भोगमङ्गीकृत्य बहुभिर्भृत्यैः भक्तैः सेवितं भवति। विषयभोगसमये विवेकेन संघर्षेऽपि यस्य हृदये तव पादाम्बुजरजः ज्ञानसूर्यकिरणप्रकाशः प्रकमे प्रकष्टतया प्रकाशते तद्वत् वयं आत्माभिमुखीन्यो वृत्तयोऽपि सर्वं त्यक्त्वा तवपादरजः "राजृ प्रकाशे।" इति आत्मज्ञानकिरणप्रकाशं प्रपन्नाः प्रकर्षेण प्राप्तुकामाः॥ ३७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शिष्टाचारप्रामाण्यादपि त्वच्चरणरजःशरणं प्राप्ता इत्याहुः यस्याः स्ववीक्षणकृते स्वावलोकनार्थम् अन्येषां ब्रह्मादीनां सुराणां प्रयासः तपआद्याचरणरूपो यत्नः सा श्रीः वक्षसि सापत्न्यं पदं स्थानं लब्धा तुलस्या सह भृत्यैर्बहुभिर्भगवत्किङ्करैर्जुष्टमपि तव पदाम्बुजरजः चकमे कामयते स्म तद्वद्वयमपि प्रपन्नाः॥ ३७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अधोक्षज लक्ष्मीरपि काङ्क्षति त्वत्पदपद्मं कथा काऽस्माकमिति भावेन वदन्ति॥ श्रीरिति। वक्षसि पदं स्थानं लब्ध्वाऽपि अन्येषां सुराणां ब्रह्मादीनां प्रयासो यस्याः स्वनिरीक्षणार्थं कृतो लोकावलोकनं कथमस्माकं भवेदिति तदर्थं कृतयत्ना इतरेऽमराः सा भृत्यजुष्टं भक्तजनसभाजितं तुलस्याः पदमास्पदं भृत्या न जुष्टं भृत्यजुष्टं स्वोदरभरणार्थं सेवितं नेत्यर्थः। एतेन भृत्यजुष्टत्वं साधारणं वक्तव्यमिति निरस्तं। यत्पदाम्बुजरजश्चकमे तद्वत्सेव वय तव पादरजः प्रपन्ना आश्रिताः। यद्वा तद्वद्वयमिति पदमेकं। साऽस्यास्विति तद्वत्यस्ताश्च ता वयं च तद्वद्वयं तत्सन्निधानयुता वयमित्यर्थः। नायोग्यताप्रयुक्तत्याऽयत्वा वयमिति भावः॥ ३७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु, तस्या दैवगत्या सम्बन्ध आसीत् स च प्राथमिकः भवतीनां तु प्रथमतोऽन्यत्रैव सम्बन्धः अतो वैषम्यमिति चेत्तत्राहुः—श्रीरिति। लक्ष्मीरपि न दैवगत्या भवन्तं प्राप्तवती किं तु त्वच्चरणारविन्दार्थं महत्तपः कृतवतीं सा न स्त्रीत्वेन त्वदीया किन्तु भक्तत्वेन अन्यथा वक्षसि स्थलं प्राप्य स्वतन्त्रं तुलस्या सह सापत्न्यमप्यङ्गीकृत्य चरणरजो न कामयेत चरणरजस्तुलस्या भवति भक्ता हि भक्तेः तदुपपादितं प्रथमस्कन्धे तस्य रजसः माहात्म्यमाह—भृत्यजुष्टमिति। तद्रजसैव भृत्यानां शरीरोत्पत्तेः किलेति प्रसिद्धे सर्व एव भक्ताः त्वच्चरणरजसैव सम्पादितदेहवन्तः अतस्तुलसी तत्र भक्तिरूपा प्रतिष्ठिता तद्रजःप्राप्तिर्येषां ते त्वत्सेवका एव भवन्ति अतो लक्ष्मीः अन्तःकरणे स्थानं प्राप्यापि अन्यः स्प्रक्ष्यतीति चिन्तया रजश्चकमे तस्मिप्राप्ते तु शङ्कापि। ननु, किमेतावद्द्वयम् लक्ष्म्यास्तत्राहुः—यस्याः स्ववीक्षणकृते अन्यसुरप्रयासः अन्य सर्व एव ब्रह्मादयो देवास्तपः कुर्वन्ति लक्ष्मीरस्मान्पश्यत्विति अन्यथा तेषां कोऽपि पुरुषार्थो न सिद्ध्येदिति अतो बहुभिः प्रार्थ्यमाना भीता जाता कश्चिदत्यन्तमपि तपः कुर्यात् स को वेद किं कुर्यादिति रजः कामनायां तु नेयं शङ्का प्राप्तौ तु सन्देह एव न सम्भवति एवं चरणरजसः प्राप्तौ अनन्यगामित्वं निरूप्य स्वस्य तथात्वमाहुः—तद्वद्वयं चेति। अस्मामपि वहवः प्रार्थयन्ति तद्भयादेव पूर्वं चरणरजःस्पृष्टं ततो देहोऽपि त्वच्चरणरजसा समुद्भूत इति सर्वथा तव पादरजः प्रपन्नाः चकाराद्या अपि साम्प्रतं नागताः या बा महिष्यः ताः एतादृशशरीरयुक्ता एव अतोऽस्मदर्थं एव समागतो भवान् नात्मानं गोपय नापि गुप्तः स्थास्यति तस्मान्नाग्रहः कर्त्तव्य इति भावः॥ ३७॥

श्रीसुबोधिनी-सारः

तुलस्या सह भृत्यैर्जुष्टं वक्षसि हृदये पदं स्थानं लब्ध्वापि श्रीर्लक्ष्मीर्यस्य पदांबुजयोरजश्चकमे उवास स्ववीक्षणकृते आत्मदर्शनार्थम् अन्येषां सुराणां प्रयासः तपोव्रतादिखेदोऽस्ति सा तद्वत्तव पादरजो वयं प्रपन्नाः स्मः ॥ ३७ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

भगवच्चरणमाहात्म्यं द्योतयन्त्यः स्वमनोरथे लक्ष्मीमनोरथं दृष्टान्तमाहुः-श्रीरिति । यस्या श्रियः स्ववीक्षणकृते श्रीरस्मान् कृपया विलोकयत्वित्येतदर्थमन्येषां ब्रह्मादिसुराणां तपआदिभिराराधनप्रयासः सा श्रीर्यथाताननादृत्य भगवद्वक्षसि पदमेकान्तस्थानं लब्ध्वाऽपि तुलस्या सह सापत्न्वमङ्गीकृत्य बहुभिर्भृत्यैर्जुष्टं सेवितं ससङ्घर्षमपि यस्य तव पादरजः प्रपन्नाः तत्प्राप्त्यर्थमागता इत्यन्वयः । लक्ष्मीकृतोपासनायाः प्रसिद्धिं सूचयन्ति—किलेति ॥ ३७ ॥

अन्वितार्थप्रकाशिका

श्रीरिति ॥ यस्याः श्रियः स्ववीक्षणकृते श्रीरस्मान् कृपया विलोकयत्वित्येतदर्थमन्येषां ब्रह्मादिसुराणां तप आदिभिराराधनप्रयासः सा श्रीर्यथा ताननादृत्य भगवद्वक्षसि पदमेकान्तस्थानं लब्ध्वाऽपि तुलस्या सह सापत्न्यमङ्गीकृत्य बहुभिर्भृत्यैर्जुष्टं सेवितं ससंघर्षमपि यस्य तव पदाम्बुजयो रजश्चकमे इयेष । तद्वद्वयमपि सर्वं त्यक्त्वा तव पादरजः प्रपन्नाः त्वत्प्राप्त्यर्थमागताः॥३७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं चरणारविंद स्पृष्टरजसोपि दुलभत्वमाहुश्रीरिति मृत्यजुष्टं भृत्यैःप्रह्लादनारदादिभिः सेवकैः जुष्टंसेवेतं यत्तवपदांबुजरजोस्तिवक्षसिहृदये पदंस्थानं लब्ध्वाऽपि श्रीःरमा तुलस्या सह तद्रजः चकमेयस्याः रमायाः स्वेषु वीक्षणकृते प्रेक्षणार्थंत्वदन्येषां स्फुराणां प्रयासोस्तितप आदिभिः साधनैः तद्वत् श्रीवत् ॥ ३७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त्वत्पादसौभाग्यं त्वतिचित्रमित्याहुः ॥ श्रीरिति ॥ यस्याः श्रियः, स्ववीक्षणकृते स्वावलोकनार्थं, श्रीरस्मान्विलोकयत्वित्येतदर्थमित्यर्थः । अन्ये ये सुरा ब्रह्मादयो देवास्तेषां प्रयासः प्रकृष्ट आयासः, अन्यतपः प्रयास इति पाठे, अन्येषां ब्रह्मादीनां तपःक्लेश इत्यर्थः । सा श्रीर्लक्ष्मीः, तव वक्षसि पदं असापत्न्यमुन्नतं च स्थानं लब्ध्वापि, तुलस्या सपत्न्या सह, भृत्यजुष्टं अनेन सौभाग्यातिशय उक्तः । यत् तव पादाम्बुजरजः, तत् चकमे कामयते स्म । तद्वच्छ्रीवत् वयं च वयं गोप्योऽपीत्यर्थः । तव पादरजः, प्रपन्नाः किल ॥ ३७ ॥

कृष्णप्रिया

हमारे स्वामी । जिन लक्ष्मीजी का कृपाकटाक्ष प्राप्त करने के लिये बड़े-बड़े देवता तपस्या करते रहते हैं, वही लक्ष्मीजी तुम्हारे वक्षः स्थल में विना किसी की प्रतिद्वन्द्विता के स्थान प्राप्त कर लेने पर भी अपनी सौत तुलसी के साथ तुम्हारे चरणों रज पाने की अभिलाषा किया करती है । अबतक के सभी भक्तों ने उस चरणरज का सेवन किया है । उन्हीं के समान हम भी तुम्हारी उसी चरणरज की शरण में आयी हैं ॥ ३७ ॥

तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ।
त्वत्सुन्दरस्मितनिरीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यम् ॥ ३८ ॥

कर्दमक्षमा

अन्वयः—हे, वृजिनार्दन, तत् , नः, प्रसीद, त्वद्, उपासनाशाः, "वयम्" वसती, विसृज्य, ते, अङ्घ्रिमूलम् , प्राप्ताः, हे पुरुषभूषण, त्वत्, सुन्दर, स्मित, निरीक्षण, तीव्रकाम, तप्तात्मनाम् , "नः" दास्यम् , देहि ॥ ३८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे वृजिनार्दन दुःखहंतस्त्वदुपासने त्वद्भजन एवाशा यासां ता वयं वसतीर्गृहान्विसृज्य हित्वा योगिन इव प्राप्ताः । तत्कर्तृकसुंदरस्मितविलसितनिरीक्षणेन यस्तीव्रः कामस्तेन तप्तचित्तानां हे पुरुषरत्न दास्यं देहि ॥ ३८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतस्तव पादरजःप्रपन्नास्तत्तस्मात् । यद्वा-त्वदुपासनं त्वत्समीप उपवेशनं तत्राशा यासामिति ताः । यद्वा-वसतिविशेषणम्-त्वदुपासस्य नाशो यासु ता विसृज्येत्यन्वयः । योगिनः संन्यासिनः । यद्वा-दुःखिताः आमंत्रयन्ति-पुरुषस्य जीवस्य भूः

स्थानं हृदयमोषते पीडयतीति पुरुषभूषणेति । यद्वा—पुरुषभुवि वसतीति तथा, बहिरंतर्ज्ञस्यैतदुचितमिति भावः । दास्यम् दासीभावम् । अनेन संगादि लक्ष्यते ॥ तस्माद्गृहकुटुंबादिकं परित्यज्य नारायणस्य भक्ता इव वयं तव दास्यमेव कामयामहे इति । यतस्त्वं नारायणतुल्यस्तस्मादस्मान्प्रसीद । ननु मत्प्रसादप्रतिकूलं दुःखादृष्टं भवतीनामस्तीत्यतः कथं प्रसादः, नारायणोऽपि किं सर्वत्रैव प्रसीदतीत्यत आहुः—हे वृजिनार्दन । तदपि दुःखं त्वमेवार्दय, नारायणो ह्यवश्यमेव प्रपद्यमानानां दुःखमर्दयति । वयं च तेंघ्रिमूलं प्राप्तास्तत्रापि कामनांतरराहित्येनैवेत्याहुः—विसृज्य वसतीरिति । ननु गार्हस्थ्यसुखं परित्यज्यापि मतः सुखं किञ्चनावश्यर्थवध्वे इति जानीमस्तत्राहुः—त्वदुपासनायामेवाशा न तूपासनायाः फले, कस्मिंश्च न सुखे त्वया दास्यमाने आशा यासां ताः । अयमर्थः—उपासनया त्वां सुखयाम इत्येवाभिप्रायेऽपि त्वन्मुखदर्शनोत्थं यदि नः सुखमाकस्मिकं भवेत्तर्हि को दोष इति । ननु कथमुक्तमस्माकं हृच्छयाग्निं सिंचेति—सत्यम्, तदग्निज्वालाया अपि त्वमेव कारणमित्याहुः—तव सुंदरस्मितनिरीक्षणेन यस्तीव्रकामस्तेन तप्त आत्मा यासां तासामस्माकं ह्यास्यं दासीत्वमेय देहि न तु, पत्नीत्वम् ॥ अत्र श्रीमद्वल्लभाचार्यचरणानामपि व्याख्या अतो दास्यार्थिन्य एव वयं न तु विहारार्थिन्यः । अत उपनयनाद्यपेक्षापि न लोकव्यवहारेणेत्येषा तस्मादस्माकं कन्यात्वे परोढत्वे वा न कापि क्षतिः, उभयीभावेऽपि त्वद्दास्यसंभवादिति भावः । प्रकृतवैष्णवतोषिण्यां श्रीसनातनगोस्वामिचरणानामपि विवाहे सति पत्नीत्वेन भजनादप्यौपपत्येन भजनं परममहासुखं तच्च श्रीभागवताऽमृते काव्यादौ च प्रसिद्धमेव । अत एवात्र दास्यविशेष एव प्रार्थितः । अधुना च प्रार्थ्यते दास्यो भवाम इत्येव । अयं भावः—काममहोदधित्वादेव स्त्रीलंपटस्य तवास्माभिर्युवतीभिरुवासना स्वांगैरेव त्वत्सुखोत्पादनलक्षणा खल्वेषैवेत्यतो हृच्छयाग्निसेकप्रार्थनापि त्वदुपासनैव कामाग्निरप्यस्माकं त्वदुपासनोपकरणमेव मुख्यमित्यत एव समुचितमेव संबोधनपदम्—हे पुरुषरूपभूषण गौरांगीनामस्माकमिंद्रनीलमणिमयसर्वांगालंकारेति ॥३८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं तृतीयदिक् स्थिता अपि विवक्षितमुपसंहरन्ति—तन्न इति । तत् तस्मात् पूर्वोक्ताद्धेतोरेव प्रसादं कुरु तमेवाहुः दास्यमेव देहीति । ननु, नवयौवनोन्मत्ताः ! दास्यमपि तादृशं दुर्लभमिति चेत् कथं देयमित्यत्र सदैन्यमाहुः—प्राप्ता इत्यादि । अतः सर्वपरित्यागेन प्रपन्नानामाशामवश्यम् पूरयितुमर्हसीति भावः । अन्यथा चास्माकं महद्दुःखं स्यात् तच्च तवानुचितमित्याहुः—हे वृजिनार्दनेति । तत्र च निजभावोच्छलितचित्ताः सत्यः हे रसिकशेखर ! रसविशेषमयमेव दास्यं देयमित्याशयेनाहुः—त्वदिति । यद्वा, तत्तादृशनिरीक्षणतप्तात्मनामपि दास्यमेव देहीति तत्तापहरणेप्याशा परित्यक्तेत्यर्थः । दास्यं चोचितं मेवेत्याहुः—हे पुरुषभूषणेति । सर्वत्रैवाथ तवोपास उपास्तिः तस्य नाशो यासु ता इति श्लेषेण वसति विशेषणं च किम्वा हे सुन्दरस्मितनिरीक्षण ! अतो धूर्त्ततयैवेदं वदसीत्यवहित्थया गुह्यमाणं भावं वाक्चातुर्य्याऽभिव्यञ्जयन्ति त्वत् त्वत्तो यस्तीव्रः कामस्तेन तप्त आत्मा यासां तासां नः अनेन दुःशील इत्यस्योत्तरं त्वत्कामतप्तानां तत्त्यागे कथं विचारो दोषो वा ? नहि काममहाभुजङ्गग्रस्तानां तयोरेकतरोऽपि सम्भवतीति निषेधार्थश्च तत्तस्मात् नोऽस्माकं सम्बन्धे प्रसीद आग्रहं त्यजेत्यर्थः । हे वृजिनार्हेति छेदः यतः त्वदुपासनाशाः सत्यो वसतीर्विसृज्य तवाङ्घ्रिमूलं न प्राप्ता वयं तस्मात् यास्त्वत्सुन्दरेत्यादिलक्षणास्तासां ताः प्रति दास्यं देहि अस्माकं तु न तेन प्रयोजनमित्यर्थः । तासामपि नात्यन्ततदङ्गीकारात् सम्प्रदानत्वाभाव इति षष्ठ्यभिप्रायः पुरुषान् सखीनेव तत्तदुत्कण्ठया तत्तद्गोकुलवधूवेषेण भूषयसि नाद्यापि ता इति तत्राप्यसम्भावना दर्शिता । यद्वा, पुरुषभूस्तत् सत्ता पुरुषसामान्य इत्यर्थः । हे तस्य ऊषण ! पीडक ! तज्जातिमात्रकलङ्ककारिन्निति सकोपसम्बोधनम् ''ऊष रुजायाम्'' इति ॥ ३८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणो

तत्तस्मात् रजःप्रपन्नत्वात् प्रसादं कुरु, तमेवाहुः—दास्यमेव देहीति । ननु नवयौवनोन्मत्ताः । दास्यमपि लक्ष्म्यादिप्रार्थ्यं कथं देयमिति चेत्तत्र सदैन्यमाहुः—त्वदुपासनाशाः सत्यो वसतीः सर्वबन्धुपरिच्छदसहितगृहान् विसृज्याङ्घ्रिमूलं प्राप्ता वयम्, अतः सर्वपरित्यागेन प्रपन्नानामाशामवश्यं पूरयितुमर्हसीति भावः । अन्यथा चास्माकं महद्दुःखं स्यात्, तच्च तवानुचितमित्याहुः हे वृजिनार्दनेति । तत्र च हे रसिकशेखर ! रसविशेषमयमेव दास्यं देयमित्याशयेनाहुः—त्वदिति । तच्चोचितमेवेत्याहुः—हे पुरुषभूषणेति । अन्यत्तैर्व्याख्यातम् । यद्वा, ननु गृहिण्यस्तर्हि गृहेषु गत्वैव मद्भृत्यैर्गोपैः सह भक्तवर्गवन्मद्भजनं क्रियताम्, तत्रैव तदशेषोपकरणसम्पत्तेरिति चेत्, तत्र सकाक्वाहुः—वसतीर्विसृज्येति । तत्र हेतुः, तपोपास उपास्तिस्तस्य नाशो यासु नाः, तत्र त्वद्भजनासिद्धेरित्यर्थः । किञ्च, हे महामोहन ! नान्यभक्तवदस्माभिर्दास्यं प्रार्थ्यते, यद्गृहेषु गोपवर्गैः सह सिध्येत्, किन्तु दास्यविशेष एवेत्याशयेनात्यन्तार्त्त्याभिनय पूर्वकमाहुः—पुरुषो जीवस्तस्य भूः स्थानं हृदय तत् ऊषते पीडयति 'ऊष रुजायाम्' इति, हे तथाभूत ! तव सुन्दराभ्यां स्यितनिरीक्षणाभ्याम्, किंवा हे सुन्दरस्मितनिरीक्षण ! अतो धूर्त्ततयैवेदं वदसीत्यवहित्थया गुह्यमानं भावं वाक्चातुर्य्याभिव्यञ्जयन्तित्वत् त्वत्तो यस्तीव्रः कामस्तेन तप्त आत्मा देही यासां नः, अतस्तत्प्रतीकारमादौ द्रुतं कुरु, अन्यथा अन्त्यदशोपस्थितेरिति । यद्वा, तत्प्रतीकाररूपं दास्यं देहीति भावः, यद्वा, ननु मद्व्रजस्त्रियो मद्भक्तवराणां गोपानां कन्यात्वभार्य्यात्वादिना युष्माकं स्वतः सिद्धं मद्दास्यमस्त्येव, किं तत्प्रार्थनेनेति चेत्, सत्यम्, किन्तु असाधारणमस्मदुचितं तद्देहीति

सर्वैयग्रथमाहुः—तप्तात्मनां योग्यं यत् तद्दास्यमित्यर्थः। साक्षादात्मनिर्देशो विनयलज्जादिना, किंवा न इति पूर्वस्यानुषंगः, यद्वा, अत्यन्तार्त्या सतृणग्राहमाहुः तप्तात्मनां स्त्रीणां कासाञ्चिदपि दास्यं देहि अस्मभ्यम्, एतादृशीनां दास्ये प्राप्तेऽपि तव प्रसादविशेषोऽवश्यं भवितैवेति भावः। अनेन 'दुःशीलः' इत्यस्योत्तरम्। त्वदुपासनाशया सत्पतेरपि त्यागो युक्त एव, तत्सिद्धान्तो लिखित एव, विशेषतश्च वसतीनां त्वदुपासनाशत्वेन तत्र च तत्स्वामिनां तेषां सम्बन्धेन त्वद्भजनपातात्ते पातकिन एवेति त्याज्या एव। किञ्च, त्वत्कामतप्तात्मनां तत्त्यागे कथं वा विचारो दोषो वा? महाभुजंगग्रस्तानां को नामास्त्विति। श्लेषार्थः—वृजिनं पापम्, अन्येषामपि पापनाशनोऽसीति वयं त्वदङ्घ्रिमूलं प्राप्ताः, अधुना च तवैव पापे मतिर्लक्ष्यते, अतः प्रसीद, अस्माकमत्रागमनापराधं क्षमस्व, मनोऽवष्टभ्य पुण्ये निधेहीत्यर्थः। यद्वा, ननु मद्दास्यं लक्ष्म्या अपि दुर्लभं कृपया दीयमानमंगीकुरुतेति चेत्तत्र साभ्यसूयमाहुः–या वसतीर्विसृज्य त्वदुपासनाशाः सत्यस्तवाङ्घ्रिमूलं प्राप्ताः, दास्य इवाश्रितास्तासां तीव्रकामतप्तात्मनाम्, चतुर्थ्यर्थे षष्ठी। ताभ्यो दास्यं देहि, अस्माकं पतिव्रतानां तेनालमित्यर्थः। पुरुषान् सखीनेव, न तु स्त्रियो भूषयतीति तथाभूत! अतस्त्वया किमस्माकमिति किंवा हृदयदाहकेति पूर्ववदर्थः, तत् किं त्वयि भक्त्यापीति भावः॥ ३८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उपासनाशाः त्वत्सेवनेच्छावत्यः॥ ३८–३९॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे वृजिनार्दन! दुःखहन्तः! त्वदुपासने त्वद्भजन एवाशा यासां ताः वयं वसतीर्गृहान् विसृज्य योगिन इव तवाङ्घ्रिमूलं प्राप्ताः तत्तस्मान्नोऽस्माकं प्रसन्नो भव कीदृशः प्रसादः कार्य इत्याशङ्क्याहुः तव सुन्दरं स्मितं यस्मिंस्तेन निरीक्षणेन यस्तीव्रः स्मरतापस्तेन तप्ता आत्मनो नो देहा यासां ताः तासां नोऽस्माकं हे पुरुषरत्न! त्वद्दास्यं देहि॥ ३८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

वृजिनार्दन दुःखनाशन! वसतीः गृहान् त्वदुपासने आशा श्रद्धा यासां तास्तथा सुन्दरं च तत्स्मितं च सुन्दरस्मितं तन्निरीक्षणेन उद्भूतेन तीव्रेण कामाग्निना तप्त आत्मा देहो यासां ताः पुरुषभूषण! **पुरुषतिलक**!॥ ३८॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तस्मादस्मभ्यं प्रसीदेत्याहुः—तन्न इत्यादि। तस्मादन्यथाशङ्कानिरासतो नोऽस्मभ्यं प्रसीद। हे वृजिनार्दन दुःखार्दन! वयं कीदृश्यः? वसतिर्विसृज्य त्वदुपासनाशाः सत्यस्तवाङ्घ्रिमूलं प्राप्ताः तस्माद्दास्यं देहि, **अर्थादस्माकमित्याशयः**। कीदृशीनाम्? त्वत् त्वत्त एव तप्तात्मनाम्। हे सुन्दर! हे स्मितनिरीक्षणेन तीव्रोऽतिशयोग्रः कामोऽपि यस्मात् यत्स्मितनिरीक्षणेन कामोऽपि कुपितो यत इत्यर्थः॥ ३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अस्माकं कुत्रापि स्पर्द्धा नास्ति, नापि गर्वः, केवलं त्वय्येव रतिस्तस्मादस्मान् प्रति प्रसन्नो भूया इत्यन्या ऊचुः—तन्न इत्यादि। हे वृजिनार्दन दुःखार्दन! तत्तस्मात् नोऽस्मभ्यं प्रसीद। नन्वकिञ्चनेभ्य एव प्रसीदामीति चेद्वयमपि च तथैवेत्याहुः—हे पुरुषभूषण! दास्यं देहि दासीभावं देहि येनोपासना कर्त्तुं शक्यते। कीदृशीनामस्माकम्? त्वं त्वत्तः सकाशात् हेतोर्वा तप्तात्मनां त्वत्कृतस्तापस्तदुपासनयैव याति। हे सुन्दरस्मितनिरीक्षण! हे तीव्रकाम! तीव्रस्तीक्ष्णः कामोऽपि यस्मात्, कामादपि परममधुर इत्यर्थः॥ ३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्माद्गृहकुटुम्बादिकं परित्यज्य नारायणस्य भक्ता इव वयं तव दास्यमेव कामयामहे इत्याहुः—तन्न इति। यतस्त्वं नारायणतुल्यस्तस्मादस्मान् प्रति प्रसीद ननु मत्प्रसादप्रतिकूलं दुःखादृष्टं भवतीनामस्तीत्यतः कथं प्रसादः नारायणोपि किं सर्वत्रैव प्रसीदतीत्यतः आहुः—हे वृजिनार्दन! तदपि दुःखं त्वमेवार्दय नारायणो ह्यवश्यमेव प्रपद्यमानानां दुःखमर्दयति वयं च तेऽङ्घ्रिमूलं प्राप्ताः तत्रापि कामनान्तरराहित्येनैवेत्याहुः—विसृज्य वसतीरिति। ननु गार्हस्थ्यसुखं परित्यज्यापि मत्तः सुखं किञ्चनावश्यमर्थयध्वे इति जानीमस्तत्राहुः, त्वदुपासनायामेवाशा नतूपासनायाः फले कस्मिंश्चन सुखे त्वया दास्यमाने आशा यासां ताः अयमर्थः उपासनया त्वां सुखयाम इत्येवाभिप्रायेपि त्वत्सुखदर्शनोत्थं यदि नः सुखमाकस्मिकं भवेत्तर्हि को दोष इति। ननु, तर्हि कथमुक्तमस्माकं हृच्छयाग्निं सिञ्चेति सत्यं तदग्निज्वालाया अपि त्वमेव कारणमित्याहुः तव सुन्दरस्मितनिरीक्षणेन यस्तीव्रकामस्तेन तप्त आत्मा यासां तासामप्यस्माकं दास्यं दासीत्वमेव देहि नतु पत्नीत्वम् अत्र श्रीमद्वल्लभाचार्यचरणानामपि व्याख्या अतो

दास्यार्थिन्य एव वयं नतु विहारार्थिन्यः अत उपनयनाद्यपेक्षापि न लोकव्यवहारेणेत्येषा ततश्चास्माकं कन्यात्वे परोढात्वे वा न कापि क्षतिः उभयीभावेऽपि त्वद्दास्यसम्भवादिति भावः। प्रकृतवैष्णवतोषिण्यां श्रीसनातनगोस्वामिचरणानामपि विवाहे सति पत्नीत्वेन भजनादप्यौपपत्येन भजनं परममहासुखं तच्च श्रीभागवतामृतकाव्यादौ च प्रसिद्धमेव अत एवात्र दास्यविशेष एव प्रार्थितः अधुना च प्रार्थ्यते दास्यो भवामेत्येषा अयं भावः। काममहोदधित्वादेव स्त्रीलम्पटस्य तवास्माभिर्युवतिभिरुपासनं स्वाङ्गैरेव त्वत्सुखोत्पादनलक्षणा खल्वेषैवेत्यतो हृच्छयाग्निसेकप्रार्थनापि त्वदुपासनाप्रार्थनैव कामाग्निरप्यस्माकं तदुपासनोपकरणमेव मुख्यमित्यत एव समुचितमेव सम्बोधनपदं हे पुरुषरूपभूषणात् गौराङ्गीनामस्माकमिन्द्रनीलमणिमयसर्वाङ्गालङ्कारेति ॥ ३८ ॥

श्रीरसिकाह्लादिनी टीका

इदानीं विरहाग्निज्वालाबलीढमनस्त्वेन धैर्यं कर्तुमपारयन्त्यः सकाकुदैन्यमावेदयन्त्यः प्रार्थयन्ते तन्नः प्रसीदेति यस्मात्तव पादरजःसेवनमेव पुरुषार्थावधिः लक्ष्मीदृष्टान्तेन च गतानुगतिकत्वेन तव चरणरजःसेवनमेव गृहे स्थिताभिरेव व्यवसितं तस्मान्नोऽस्मान् प्रति प्रसीद प्रसन्नो भव वाग्भंग्या कौटिल्यं त्यजेति। हे वृजिनार्दन दुःखहन् गोवर्द्धनोद्धरणादिना परिशीलितव्रत कीदृशीः न तवांघ्रिमूलं चरणान्तिकं प्राप्ताः। किं कृत्वा वसतीः गृहान् विसृज्य त्यक्त्वा त्वदुपासनाशाः तवोपासने आशा यासां ताः नन्वेकान्ते वनमध्ये एकाकिना मया स्थीयते भवतीषु कथं प्रसादः कर्तव्य इति चेत्तत्राहुः तेऽघ्रिमूलं प्राप्ताः यस्तु चरणमूलमुपास्ते स एव प्रसादपात्रं भवति ! तत्र वयं वसती विसृज्य प्रत्यापत्तितया त्यक्त्वा आगताः। किं च "ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहमिति"। त्वयैवोक्तत्वात् वसतीरिति सपरिच्छद-सर्वलब्ध-परित्यागोपि विवक्षित इति। वृजिनार्दनेति कृपालुत्वं उक्तं त्वं कृपालुर्वयमार्ता आर्तानां दुःखनिवारणे तदसिद्धेः गृहत्यागे हेतुः त्वदुपासनाशाः यतः सर्वसंगपरित्यागेन योगिन इव निवृत्ताभिमानतया तवोपासनं कर्तुमागताः आशा नो छेतव्येति। अन्यथा तव प्रतिज्ञाभंगोऽपि भविता। "ये यथा मां प्रपद्यन्ते तान्स्तथैव भजाम्यह"मिति वयैवोक्तं अतो दास्यं देहि। यद्वा कीदृशीर्वसतीर्त्वदुपासनाशा त्वदुपासंस्तव समीपस्थितिस्तस्या नाशो यासु ताः गृहस्थित्या तदसिद्धिरित्यर्थः। यद्वा कीदृशीर्वसती त्वदुपासनां त्वत्सेवनरूपां भक्तिं स्यति तनुकुर्वन्ति तुच्छीकुर्वन्तीत्यर्थः। शो तनु करणे धातोरिति। ननु गृहस्वामिनं विहाय दास्यं किमिति प्रार्थ्यते। तत्र स्वीयामार्त्तिं निवेदयन्त्यस्तच्छान्तिहेतुं दास्यमेवाभिलष्यन्त्यः आहुः त्वत्सुन्दरस्मितनिरीक्षणतीव्रकामतप्तात्मनां तव सुन्दरं स्मितपूर्वं निरीक्षणं तेन तीव्रोऽसह्यैव यः कामस्तेन तप्तः आत्मा मनो यासां नः, यद्वा हे सुन्दरस्मित त्वत् त्वतो हेतोः निरीक्षणं तवावलोकनं तेन तीव्रो अनिवार्य्यो यः कामस्तेन तप्तः आत्मा क्षेत्रज्ञो यासां तासां, तव कपटस्मितेन मोहितानां स्वदृष्टान्तेन त्वयि शुद्धभावविजानतीनां इदानीं तव धर्मोपदेशेन औदासीन्यं जानतीनां अत एव रमणभिन्नान्यत्र निस्पृहानां नोऽस्माकं दास्यं देहि दास्यं दत्ते त्वयि व्रजेश्वरादिर्नासूयां करिष्यति। दास्येऽस्माभिर्ल्लब्धे सति पत्यादिरपि नासूयां करिष्यति इति भावः। यद्वा हे वृजिनार्दन ये त्वां प्रपन्नास्तेषां पापनिरसनं वयं तु तव पादमूलं प्रपन्नास्तथाप्यस्मासु कामकृतस्ताप इदमेव चित्रं येन पापेन पत्यादि सङ्गो जातस्तत्पापं तव चरणदर्शनेन विनष्टं। यतः पापमूला गृहा एव त्यक्ताः सम्प्रति तव सुन्दराभ्यां स्मितनिरीक्षणाभ्यां जातो यस्तीव्रोऽप्रतीकार्यः कामस्तेन तप्तात्मनां पीडितचित्तानां हृद्रोगस्य त्वमेव निदानं तस्य निवर्तकमौषधं त्वद्दास्यमेव दशम्यवस्थायाः प्रागेव देहगृहादिकं दुःखनिदानमिति ज्ञात्वा प्रागेव त्यक्तम्। त्वं तु कामतापं ददद्पि त्याजयितुं न शक्यः अतो दास्यं दत्वाऽस्मान् रक्षेति प्रार्थना। हे पुरुषभूषण पुरुषाणां सखानां गोपानामलंकरण सर्वदा सखिभिः सह विहर्त्तुं पुष्पपल्लवगैरिकादिभिस्तानलंकरोषि तथैव कदाचिदस्मानप्यलं कुर्विति भावः। यद्वा हे पुरुष ! अस्माकमन्तर्यामिन् अस्मासु जातां पीडां जानिषे अतो निवर्तय। हे भूषण वयं भूष्या त्वं तु भूषणं अतस्त्वमस्मान् भूषयेति। दास्यस्तु स्वामिसेवया लब्धप्रसादाः अकुतो भयाः सत्यो विचरन्ति अतो दास्येनालं कुर्विति प्रार्थना ॥ ३८ ॥

विशुद्धरसदीपिका

विविक्षितमुपसंहरन्ति तन्न इति। तत् तस्मात् यतो वयं श्र्यादिवत्सर्वपरित्यागेन तत्सुखसुखिन्य इत्यर्थः। यद्वा, तद्दास्यमेव नः अस्माकं प्रसीद प्रसादय हे वृजिनार्दन ! दुःखहन्तः ! दुःखं कामसुखापेक्षेत्येकादशादेवमुक्तम् अत एवाङ्घ्रिमूलमित्यजादिरूपकानुक्तिस्तस्याः प्रयसीभाव एवोचितत्वात् प्राप्ताः प्रकर्षेणाप्ताः प्रकर्षमेवाहुः—वसतीर्विसृज्येति। वसतीरित्यनेन गृहसुखमुपलक्षितं किमर्थमत आहुः त्वदुपासनाशाः तव परिचरणैकाभिलाषाः न तु विरहणाभिलाषा इत्यर्थः। ततश्च दास्यं द्विविधं सहचरीभावोचितं प्रेयसीभावोचितमिति सूचितं तत्राद्य एवास्माकमभिलाषणीय इति भावः। तद्व्यपरः कासामित्याशङ्क्य परदोषोद्घाटनस्यायोग्यत्वात् श्लेषेणैव सूचयन्ति—त्वदित्याद्युत्तरार्द्धेन। एवञ्च यास्त्वत्सुन्दरस्मितनिरीक्षणेन कामतप्तात्मानस्तासां पुरुषभूषण ! तासामेव प्रेयस्युचितं दास्यं देहीत्यन्वयः। श्लेषेण "दसु उपक्षये" इत्यस्मात् "ऋहलोर्ण्यत्" (३।१।१२४) दास्यमुपक्षयः सख्यापेक्षया तस्याल्पत्वादेवेति भावः। ततश्च न वयं कामतप्ता न चान्याभिलाषोपतप्तास्ततः सहचरीभावोचितमेवास्माकं धनमन्यन्निधनमिति दिक् ॥ ३८ ॥

श्रीरामनारायणकृता भावभावविभाविका

तदेवं प्रार्थयन्ति—तन्नः प्रसीदेति । यद्यस्माद्वयं लक्ष्मीवत्त्वां प्रपन्ना वसतीरित्युपलक्षणं पत्याद्याज्ञोल्लङ्घनेनैहिकामुष्मिकसुखं विसृज्य तेऽङ्घ्रिमूलं प्राप्ताः किमर्थं तर्हि सर्वत्यागेन प्राप्तास्तत्राहुः—त्वदुपासनाशाः तव उपासने सेवने वा आशाऽभिलाषो यासां तवैवोपसमीपे आसने निवसने वासाभिलाषो यासां त्वदुपासनैवाशा परा काष्ठा यासां तथाभूता इति वा तत्तस्माद्धे वृजिनार्दन ! स्वभावत एव सर्ववृजिनानां दुःखानां शमन ! तथा पुरुषभूषण ! पुरुषेषु भूषण ! यद्वा, पुरुषान्तरासंप्रतिपत्तेः पुरुषश्चासौ भूषणं चेति तथा नोऽस्मान् प्रसीदानुग्रहं कुरु नो दास्यं च देहि कथम्भूतानां वस्तदाहुः त्वदीये सुन्दरे स्मितनिरीक्षणे ताभ्यां तीव्र उद्दीपितो यः कामानलस्तेन तप्तात्मनाम् अयं भावः । सर्ववृजिनार्दनस्य तव कामसन्तापकत्वमनुचितं तव मुखचन्द्राह्लादप्रकाशात्मकस्मित निरीक्षणरूपचन्द्रिकया तापोत्पत्तिरप्यसम्भाव्या पुरुषस्य तव स्त्रीघातोऽप्ययोग्यः भूषणात्मकस्य च मनोरञ्जनस्य तवास्मद नमप्यनर्हं तस्माद्वृजिनार्दनत्वात्तप्तात्मनां प्रसीद तापमुपशमय पुरुषभूषणत्वाच्च दास्यं देहि ॥ ३८ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तथा च भगवदेकभोग्यशरीराणामस्माकं मनोरथं पूरयेति पश्चिमदिग्गताः प्रार्थयन्ते—तन्न इति । यस्माद्वयं भगवत्पादरज एव प्रपन्नाः प्रपत्तिश्च भगवत्प्रसादं विना दुर्लभात्तस्मात्प्रसीद प्रसन्नो भव त्वयि प्रसन्ने किमपि नावशिष्यत इति । ननु, दुःखप्रदं मत्सङ्गमप्रतिबन्धकं दुर्दृष्टं भवतीनां वर्त्तते तत्र मया किं कर्त्तव्यमिति चेत्तत्राहुः—हे वृजिनार्दन ! सकलदुःखनिदानभूतदुरितविनाशन ! स्मरणादिनापि समस्तपापतृणदावानलस्य तवाभिमुख्यं प्राप्तानामस्माकं पापनिवारणे को भार इति भावः । एतेन स्वपत्यादित्यागकृतमपि पापं नाशयेति सूचितम्—

"सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच" ॥
"तावद्रागादयस्तेनास्तावत्कारागृहङ्गृहम् । तावन्मोहोऽङ्घ्रिनिगडो यावत्कृष्ण ! न ते जनाः" ॥

इत्यादिशास्त्रात् अथ स्वस्य प्रसादादियोग्यतामाहुः—तेऽङ्घ्रिमूलं प्राप्ता इति । ननु, स्त्रीणां स्वभावः ईश्वरादपि प्रसन्नाद्गृहस्थाश्रमसुखमेव प्रार्थयन्ति ततस्तदनुकूलः किं प्रसादोपेक्षित इति चेत्तत्राहुः–वसतीर्विसृज्येति । गृहस्थाश्रम एवास्याभिस्त्यक्तो नतु गृहमात्रमिति सूचनाय वसतीरिति बहुवचनं यतो वयं त्वदुपासनाशाः भगवदुपासनां करिष्याम इत्येवंविधा आशा यासां ताः नतु तज्जन्यसुखमस्माकमपेक्षितं तथा च गन्धपुष्पादिनोपासनपराणमनन्यभक्तानामिवाऽवर्ज्जनीयतया प्राप्ते सुखोपनभोगे न कश्चिद्दोष इति भावः । यद्वा, तवोपास्यरयोपासनस्य नाशो यासु ताः वसतीः तथाप्चाऽभीप्सितानुकूल एव प्रसादो युक्तो नतु तत्प्रतिकूलस्तस्मादितः परं गृहसम्बन्धिवार्त्तापि न विधेया तत्र प्रेषणं तुदुर्निरस्तमिति भावः । एवं भगवन्तमभिमुखीकृत्य प्रार्थ्यमावेदयन्ति–त्वदिति । हे पुरुषभूषण ! दास्यं देहि अधिकारिभेदेन दास्यस्यानेकविधत्वात्तद्रूपं स्वतापोक्त्याभिव्यञ्जयति त्वत्सुन्दरं परमानन्दजनकं यत्स्मितपूर्वकं निरीक्षणं तेन तीव्रो यः कामस्तेन तप्तान्तःकरणानामस्माकं तथाचैतत्तापनिवर्तकं दास्यं देहीति भावः । दास्यस्य स्वयमसाध्यस्य देहीति प्रार्थनया यथोक्ततापनिवृत्तेस्तद्वारकत्वात्तस्य च त्वदधीनत्वाद्यथाऽस्माकं तन्निवृत्त्यर्थं त्वदपेक्षा तथा तवास्मदपेक्षायां स्वयमुत्पाद्यास्मदुपभोगः कार्य्यः प्रभुणाद्यपेक्षितवस्तुनि दत्ते दास्यं भवतीति भावः । ननु किमिदं कामोपाधिकं दास्यं प्रार्थ्यते शुद्धमेव प्रत्प्रार्थ्यतामिति चेत्तत्राहुः । पुरुषभूषणेति । पुरुषो भूत्वा भूषणरूपः यथा च भूषणं कण्ठादौ धार्य्यते तथा पुरुषाकारभूषणरूपस्त्वमपि न च धारणयोग्यस्तस्मान्मणिखचितभूषणधारणे लाक्षाधारणवन्मध्ये कोऽपि भोगो न तु तदुपाधिकृतं दास्यमिति भावः । यद्वा तत्तस्मान्नः प्रसीद हे वृजिनार्दन ! स्वप्राप्तिप्रतिबन्धकं पापं नाशय यतः प्राप्ता विसृज्य वसतीरिति । तस्मात्तव सुन्दरस्मितस्य नितरामीक्षणेन चिन्तनेन तीव्रो भजनाभिलाषस्तेन तप्तात्मनां तपः संयतचित्तानां दास्ये लब्धाधिकाराणामस्माकं लक्ष्म्या इवास्मद्योग्यं दास्यं देहि यतो हे पुरुषेषु भूषण ! तवापीदमेव योग्यमस्माकं च कामोपाधिकृतोऽपि तव सम्बन्धोऽलङ्कारायैवेति भावः । अनभिज्ञापक्षे नारायणसमो गुणैरित्युक्त्या त्वं नारायणगुणधारणे योग्यो वयं च तद्भक्तगुणधारण इत्याशयेनाहुः । तदिति । यस्मात्त्वं नारायणसमस्तस्मान्नस्तद्भक्ततुल्या अस्मान् प्रसीद ननु प्रसन्न एवाहमस्मि स्वस्मिन्मम कोपो भवतीभिः कदा दृष्ट इति चेत्तत्राहुः हे वृजिनार्दन ! दुःखविध्वंसकर ! ननु नास्ति भवतीनां किमपि दुःखं गृहाद्युपद्रवजनितदुःखहेत्वसुरादिविनाशाय ममोद्युक्तत्वात्तस्मात्किमित्येव दैन्यमाविष्कुरुतेति चेत् तत्राहुः । त इति । तथा च गृहादिकं महाग्निज्वालया प्रज्वलतु तिष्ठतु वा नास्त्यस्माकं तत्प्रयुक्तं किमपि दुःखं सुखं वेति भावः । ननु भवत्वेवं यदर्थं वसतीः विसृज्य मदङ्घ्रिमूलं प्राप्तास्तदेव पाल्यतामिति चेत्तत्राहुः । त्वदुपासनाशाः तवोपासानायां सेवायां श्लेषेण उप अङ्गसङ्गे न स्थितिरुपासना यासां न तु उपासनया दास्यमानेकस्मिंश्चित्सुखे तावत्सुखार्थमङ्गसङ्गदानादिरूपोपासनापराणामस्माकमप्यवर्ज्जनीयतया प्राप्तेन सुखोपभोगेन को दोष इति भावः । ननु तादृशमुपासनं तु स्वपतेरेव सम्भवति न चाहं युष्माकं पतिः ननु अस्तु सम्प्रति विवाह इति चेन्नोपनयनरहितस्य मम सम्प्रति विवाहानधिकारात् विवाहितानां भवतीनामपि तदयोग्याच्चेत्याशङ्क्याहुः । त्वदिति । तादृशकामतप्तात्मनामप्यस्माकं दास्यं दासीभावमेव देहि तथा च न वयं विवाहार्थिन्यः किन्तु दास्यार्थिन्य एव अतस्तवोपनयनादिरहितत्वेऽस्माकं च कन्यात्वे परोढत्वे वा न कापि हानिः सर्वथापि दास्यसम्भवादिति

भावः । यद्वा हे वृजिनार्द न ! अस्माकं विरहदुःखदानमनुचितमिति भावः । न चास्त्यस्मद्दुःखनाशने कश्च न तव प्रयास इत्याशयेन संबोधयन्ति । हे सुन्दरस्मितनिरीक्षण ! एतावतैवास्मद्दुःखनिवृत्तिरिति भावः । यतस्त्वत् स्मित एव यस्तीव्रः कामस्तेन तप्तात्मनामतस्तत्तापनिवृत्त्यर्थं विकसितमुखपङ्कजो भूत्वा दास्यमात्रं देहि न तु बहुप्रार्थयाम यद्वयादेवं स्वरूपमात्मानं कृतवानसीति भावः । किञ्च काममहोदधिभूतत्वादेव स्त्रीलम्पटस्य तवास्माभिर्युवतिभिः स्वाङ्गैरुपासनं सुखजनकमतस्तत्सेचनप्रार्थनमपि त्वदर्थमेवेत्याशयेन सम्बोधयन्ति हे पुरुषभूषण ! यद्वा गौराङ्गीनामस्माकमलङ्कारार्थं पुरुषाकारमिन्द्रनीलमणिमयं भूषणं विधात्रा रचितं तस्मात्स्वोत्पत्तिसार्थक्यायास्मत्कण्ठे सलग्नता त्वयावश्यं सम्पाद्येति नर्म व्यञ्जयन्ति हे पुरुषभूषणेति । मानिनीपक्षे ननु लोके परमसौन्दर्याकृष्टचेतसः स्त्रियो मद्दास्यं प्रार्थयन्ति भवत्यस्तु स्वामित्वमपि मत्प्रार्थनयापि नैवाङ्गीकुरुथेति महानन्याय इत्याशङ्कयाहुः तदिति । तत्तस्मान्नः प्रसीद आग्रहमत्यर्थं च त्यज हे वृजिनार्द न ! सर्वदुःखच्छेदकस्याऽस्मद्दुःखानुच्छेदनमनुचितमिति भावः । यद्वा वृजिनान्यर्द यत्यत एव स्वदुःखाऽनिवारणमनुचितमिति भावः । यद्वा वृजिनं दुःखमर्द यति प्रार्थयताति स तथा च दुःखोदर्कं वस्तु न प्रार्थनीयमिति भावः । यतो निरपेक्षस्यापेक्षा केवलं दुःखायैव भवतीत्याशयेनाहुः । नेति । वसतीर्विसृज्यत्वदुपासनाशाः वयं तवाङ्घ्रिमूलं न प्राप्ताः तस्मात्त्वत्सुन्दरस्मितनिरीक्षणतप्तात्मनामेव दास्यं देहि न त्वस्माकं स्वामिनीभावमप्रार्थितत्वात् न ह्यप्रार्थितमनुत्तममपि वस्तु कस्यचिदुपादेयं भवतीति भावः । पुरुषानेव भूपयतीति तथा च त्यक्तकामसन्तप्तचित्तो यदि जातोऽसि तर्हि गोपबन्धुरूपेण गोपान्भूषयेति भावः । यद्वा शरीरमात्रमस्माकं तव सविधे वर्त्तते मनस्तु स्वस्वगृहमेव प्रविष्टमत एवाग्रहेणात्रावस्थाने कृतेऽपि नास्ति किञ्चित्फलमित्याहुः । तदिति । तत्तस्मादितः परमस्मासु प्रसाद एव विधेयो न तु वृथाग्रहः न चेदं तवोचितं स्वदुःखजनकत्वादस्य कर्म्मण इत्याशयेन संबोधयन्ति ! हे वृजिनार्द नेति मत्सन्निधावेताः स्थिता इति न भ्रमितव्यं वयं तु तेऽङ्घ्रिमूलं विसृज्य वसतीः प्राप्ताः ननु अतच्चित्तानां त्वदुपासना न सम्भवति यतस्त्वदुपासनस्य समीपावस्थानादिरूपोपासनस्य नाशो यासु अतः स्वाभाविकास्मत्सुन्दरस्मितादिना तीव्रकामाक्रान्तता तव नोचितेति सूचयन्त्यः संबोधयन्ति हे सुन्दरस्मितनिरीक्षण तीव्रकाम नेदं पुरुषरत्नानां लक्षणमपि तु पुरुषापसदानामतः पुरुपभूषणस्य तव नेदमुचितमिति भावेन संबोधयन्ति हे पुरुषभूषणेति । तस्मात्पुरुषभूषणस्य तव त्वदर्थं तप्तात्मनामपि स्त्रीणां स्त्रीभावदानमयोग्यं किञ्चिद्दानावश्यकत्वे दास्यमात्रं दातुमुचितमित्याशयेनाहुः । रूपतस्त्वद्धियोत्तमप्राप्तात्मनामपि दास्यमात्रं देहि सर्वथा विमुखाभिस्तु भाषणमपि तव नोचितमित्यर्थः । निवृत्तिपक्षे "अथ य एषोऽन्तरप्यादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद, इत्याद्याः श्रुतयः परमात्मानमेवोपास्यमावेदयन्ति । तदिति । यस्मात्सर्वश्रुतितात्पर्य्यविषयो भवानेव तस्मादुपासनाय शेषानस्मानपि प्रसीदाऽस्मत्तात्पर्य्यविषयत्वमात्मनः स्वीकुरु यतो हे वृजिनार्द न ! सर्वपापासंस्पृष्टत्वात्तथात्वेनोपासितस्त्वमुपासकस्य दुःखमात्रबीजभूतपापमात्रं नाशयसि "स एष सर्वेभ्यः पाप्मभ्य उदित" इति सर्वपाप्मापगमादुक्तः स च परमात्मन एव सम्भवति । आत्मापहतपाप्मेत्यादिश्रुत्यन्तरात् "उदेति है वै सर्वेभ्यः पाप्मभ्यो य एवं वेद" इति त्वदुपासनात्सर्वपापनिवृत्तिः कथितेति भावः । ननु हिरण्यश्मश्रुरित्यादिरूपश्रवणात् य एषोऽन्तरादित्ये पुरुष इत्याधारश्रवणाच्च कथं रूपादिप्रतिपादनपराणां श्रुतीनां परमात्मपरत्वं प्रशब्देनास्पर्शमरूपमव्ययं स भगवः कस्मिन् प्रतिष्ठितः स्वमहिम्नि आकाशवत्सर्वगतश्च नित्य इत्यादि श्रुत्यारूपादिरहितब्रह्मस्वरूपावगमादित्याशङ्कयाहुः । त इति । वसतीरायतनानि प्रतीयमानपरमेश्वरातिरिक्तप्रतिपाद्यरूपा विसृज्य तेऽङ्घ्रिमूलं प्राप्ताः यतस्त्वदुपासनायामाशा आशयो यासां ताः वयं तथा च परमेश्वरस्यापीच्छावशात् साधकानुग्रहार्थं मायामयरूपादि स्वीकारो न विरुद्ध्यते—

प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया । माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ! ॥
सर्वभूतगुणैर्युक्तं न मां पश्यन्ति सूरयः ।

इत्यादि स्मृतेः । अशब्दमित्यादिशास्त्रं निरस्तसर्वविशेषज्ञेयब्रह्मपरं सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः हिरण्यश्मश्रुरित्यादिशास्त्रमुपास्य ब्रह्मपरं तथा स्वमहिमप्रतिष्ठस्याधारविशेषोपदेशोऽप्युपासनार्थो न विरुद्ध्यत इति भावः । तस्मादनुग्रहार्थं प्रकटितलावण्यसागरविग्रहस्य तव सुन्दरस्मितस्य निरीक्षणे यस्तीव्रः कामोऽभिलाषस्तेन तप्तात्मनां जीवानां हे पुरुषोत्तम ! दास्यं देहि त्वदनुग्रहं विना तत्र दास्यस्य दुर्लभत्वात्तेन विनोद्धारासम्भवात्तत्प्रदानेन जीवानुद्धरेति भावः । यद्वा तव सुन्दरं यत्स्मितं चराचरात्मकं निरीक्षणं भूतात्मकं च जगत्तत्र तीव्रो यः कामस्तेन तप्तात्मनां तथा च तादृशतापनिवृत्त्यर्थं स्वदास्यं देहीत्यर्थः । निःश्वसितमस्य वेदावीक्षितमेतस्य पञ्चभूतानि स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलय इत्यभियुक्तवाक्ये चराचरादेर्भगवत्स्मितादिरूपेण निरूपणं द्रष्टव्यम् ॥ ३८ ॥

रास–रहस्यम्

र० टी०—यस्य स्वात्मभूतेनापरोक्ष्येण सर्वाणि वृजिनानि सञ्चितागामिपुण्यपापानि अर्दितानि इषिकातुलवत् भस्मीभूतानि भवन्ति इति हे वृजिनार्दन ! तदुपासनाशा उपसमीपे आसने अवस्थातुं आशा अभिलाषो यासां ताः तथा भूताः सत्यः,

कथम् ? "य एषोऽन्तरादित्ये हिरण्मयः पुरुषः दृश्यते हिरण्यश्मश्रू हिरण्यकेशः आप्रनखात् सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मेभ्यो उदितः उदेति ह वै सर्वभ्यः पाप्मेभ्यो य एवं वेद ।" इत्यादि श्रुतयः परमात्मानमेवोपास्यमावेदयन्ति । ननु हिरण्यश्मश्रू इत्यादि श्रवणात् कथं निर्विशेषपरत्वमिति "स भगवः कस्मिन् प्रतिष्ठितः, स्वे महिम्नि ।" इत्यादि श्रुत्या रूपादिरहिते परब्रह्मणि एव तात्पर्यम् । वयं वसतीः गृहाणि आयतनानि "द्युभ्वायतनं ।" इत्यादि श्रुत्या गृहोपलक्षित सर्वकर्मफलासक्तिं विसृज्य त्यक्त्वा ते तव अंघ्रिमूलं सन्निकर्षं प्राप्ताः । त्वत् तव सुन्दरस्मितं आह्लादात्मकं प्रकाशविलसितं यत् निरीक्षणं अवलोकनं तेन जातो यस्तीव्र कामः अतिशयाभिलाषः, तेन तप्तः आत्मान्तःकरणं यासां तासां "यस्य ज्ञानमयं तपः ।" इति एवं तपोयुक्तानां नो अस्माकं हे पुरुषभूषण ! चेतना दानेन पुरुषं भूषयतीति, प्रसीद प्रकर्षेण स्वात्मरूपेण सीद प्रतिष्ठितो भव, अतः दास्यं दातुं योग्यं साक्षात्कारं देहि दीयताम् ॥ ३८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्तस्मात् हे वृजिनार्दन ! दुःखनिर्नाशक ! प्रसीद प्रसन्नो भव । ननु प्रसन्नेन किमनुष्ठेयमत आहुः । तव सुन्दरस्मितयुक्तेन निरीक्षणेन यस्तीव्रकामस्तेन तप्तचित्तानां नोऽस्माकं दास्यं देहि । ननु गृहाद्यासक्तो जनः कथं मद्दासो भवेदित्यत्राहुः । त्वदुपासने आशा यासां ता वयं वसतीः गृहान् विसृज्य तव पादमूलं प्राप्ताः "वसती रात्रिवेश्मनोः" इत्यमरः ॥ ३८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे वृजिनार्दन पापापनोदक यतो वसतीर्गृहान्विसृज्य त्वदुपासने आशा यासां तास्तेऽङ्घ्रिमूलं प्राप्ता इति तत्र उपरि प्रसीद । प्रसादश्चैदात्मेत्याहुः । त्वदिति । सुन्दरं च तत्स्मितं मन्दहासश्च सुन्दरं च तद्वीक्षणं चैताभ्यां तीव्र उद्रिक्तो यः कामस्तेन तप्त आत्मा देहो यासां ता हे पुरुषभूषण पुरुषालङ्काराकार ते दास्यं देहि वितर ॥ ३८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं स्वस्य भगवदेकभोग्यशरीरत्वमुपपाद्य प्रार्थयन्ति — तन्न इति । पूर्वश्लोकेनैव भर्तृशुश्रूषणविधिर्निराकृतः तदपरित्यागः सुतरामेव तेनैव निराकृतो भवति अनेनापि निराकरणं प्रार्थयन्ति भगवत्कृपाभावे तादृशेनैव सम्बन्धो भवेदिति कृपा हि सर्वतोधिका तत्तस्मात्कारणात्प्रसीद प्रसन्नो भव त्वयि प्रसन्ने सर्वं सेत्स्यतीति । ननु, भवतीनां प्रतिकूलमदृष्टं दुःखप्रापकमस्ति अतः कथं प्रसाद इति चेत्त्राहुः—वृजिनार्द्देनेति । वृजिनं दुःखजनकं पापं स्वभावत एव सर्वेषां येन केनापि सम्बन्धेन तदर्दयसि प्रसादे हेतुमाहुः—तेङ्घ्रिमूलं प्राप्ता इति यस्तु चरणतलं प्राप्नोति प्रसादमपि स च प्रसादः पशुपुत्रादिरूपो मा भवत्विति स्वाधिकारमन्येभ्यो व्यावर्त्तयन्ति विसृज्य वसतीरिति गृहस्थाश्रमस्त्यक्तः न तु गृहमात्रमिति वसतीरिति बहुवचनं परित्यागेपि हेतुमाहुः त्वदुपासनाशा इति त्वत्सेवां करिष्याम इति आशामात्रेणैव पूर्वसिद्धं त्यक्तं तत्र समागतानां पुनः गृहसम्बन्धे किं वक्तव्यमिति अतो देयं प्रार्थयन्ति त्वत्सुन्दरेति तव सुन्दरं यत्स्मितं मोहकमप्यानन्दजनकं त्वत्सम्बन्धात्परमानन्दरूपं तादृशस्मितपूर्वकं यन्निरीक्षणं तेन जातः तीव्रो यः कामः तेन तप्तान्तःकरणानाम् अस्माकं पुरुषाणां भूषणरूप अनन्तकोटिकन्दर्पलावण्यरूप स्वतः पुरुषार्थतामेव दास्यं देहि अधिकारिभेदेन दास्यस्यानेकविधत्वादेयं रूपं स्वतापोक्त्या व्यज्यते उक्ततापविशिष्टानां यदेतत्तापनिवर्त्तकं तदिति किञ्च प्रभोरपेक्षितवस्तुसमर्पणे हि दास्यं भवति न त्वन्यथा एवं सति यथास्माकमुक्ततापेन प्रचुरा त्वदपेक्षा तथा तवाप्यस्मदपेक्षायां स्वयमुद्यम्यास्मदुपभोगः कार्य इत्यर्थः पर्यवस्यति अन्यथा दास्यस्य स्वकृतिसाध्यत्वेन दानोक्तिरनुपपन्ना स्यात् अत एव तथा सम्बोधनं पुरुषो भूत्वा भूषणरूपेति तद्धि कण्ठादिषु सर्वेष्वङ्गेषु भवति त्वमपि तथा भूत्वा दास्यं देहीति वाक्यैकवाक्यतया प्राप्यते भूषणत्वोक्त्यैव स्वतन्त्र पुरुषार्थताप्युक्ता मणिखचितं तद्धि भूषणत्वसम्पत्त्यर्थं मध्ये लाक्षावदपि भवति तेन महानपि तद्धारणार्थं लाक्षामपि धारयति तुच्छामपि तथा मध्ये कामोपयोग इति न तदुपाधिकृतं दास्यवरणमपितु तद्विपरीतमिति भावः । अतो दास्यार्थिन्य एव वयं नतु विवाहार्थिन्यः अत उपनयनाद्यपेक्षापि न लोकव्यवहारेण कर्त्तव्येति भावः ॥ ३८ ॥

श्रीसुबोधिनी-सारः

हे वृजिनार्दन तपोपासने भजने आशा यासां ता वयं वसतीर्गृहान् विसृज्य हित्वा तेंघ्रिमूलं प्राप्ताः तत्तस्मात्त्वं प्रसीद तव सुंदरेण स्मितयुक्तेन निरीक्षणेन यस्तीव्रः कामस्तेन तप्त आत्मा चित्तं यासां तासां दास्यं त्वं देहि हे पुरुषभूषण ॥ ३८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यस्मात्त्वदुपासने त्वत्सेवने एव आशा अभिलाषो यासां ताः तथाभूताः सत्यो वयं वसतीः पतिसुतादिसहितान् गृहान् विसृज्य त्यक्त्वा तवाङ्घ्रिमूलं प्राप्ताः तत् तस्मात् हे वृजिनार्दन पापप्रतिबंधकारिनिरासे समर्थ ! हे पुरुषभूषण सौन्दर्यनिधे ! तव यत् सुन्दरस्मितं तद्विलसितं यन्निरीक्षणं तेन जातो यस्तीव्रो दुःसहवेगः कामस्तेन तप्तः आत्मा अन्तःकरणं यासां तासां नोऽस्माकं प्रसीद प्रसन्नो भव, प्रसन्नश्च सन् दास्यं देहि । त्वद्दास्यपूर्वकं रमणं सम्पादयेत्यर्थः । प्रकरणस्वारस्यात् ॥ ३८ ॥

अन्वितार्थप्रकाशिका

तदिति ॥ हे वृजिनार्दन पापनिवर्त्तक ! हे पुरुषभूषण ! यस्मात्त्वदुपासने त्वत्सेवने एव आशा अभिलाषो यासां ताः तथाभूताः सत्यो वयं वसतीः पतिसुतादिसहितान् गृहान् विसृज्य त्यक्त्वा ते तवांघ्रिमूलं प्राप्तास्तत्तस्मात्तव यत्सुन्दरस्मितं तद्विलसितं यन्निरीक्षणं तेन जातो यस्तीव्रो दुःसहवेगः कामस्तेन तप्तः आत्मा अन्तःकरणं यासां तासां नोऽस्माकं प्रसीद प्रसन्नो भव । प्रसन्नश्च सन् दास्यं देहि । त्वद्दास्यपूर्वकं रमणं सम्पादय ॥ ३८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे व्रजिनार्दन हे दुःखनाशकत्वदुपासने तव सेवने एव आशा यासां तथाभूता वयं वसतीः गेहानित्यक्त्वा शुकादियोगिवत्ते अंघ्रिमूलं प्राप्ताःस्म तत्तस्मात्नोस्मान् प्रसीद तव सुंदरं स्मितशोभितं निरीक्षणं तेन तीव्रो दुःसहो यः कामस्तेन तप्ताः आत्मानो मनांसि यासां तासां अस्माकं दास्यं देहि ॥ ३८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति । हे वृजिनार्दन दुःखहन्तः, तव यदुपासनं भजनं तस्मिन्नेवाशा यासां ताः वयं, वसतीर्गृहान् विसृज्य, योगिजना इवेत्यर्थः । ते तव, अङ्घ्रिमूलं प्राप्ताः । तत्तस्मात्, नोऽस्माकं, प्रसीद संप्रसन्नो भव । कीदृशः प्रसादः कार्य इत्यत्राहुः । तव सुन्दरं स्मितं यस्मिंस्तच्च तन्निरीक्षणं तेन तीव्रो यः कामः स्मरतापस्तेन तप्ता आत्मानो मनांसि देहा वा यासां तासां, नोऽस्माकं, हे पुरुषभूषण, दास्यं देहि ॥ ३८ ॥

कृष्णप्रिया

भगवन् ! अबतक जिसने भी तुम्हारे चरणों की शरण ली, उसके सारे कष्ट तुमने मिटा दिये । अब तुम हमपर कृपा करो । हमें भी अपने प्रसाद का भोजन बनाओ । हम तुम्हारी सेवा करने की आशा-अभिलाषा से घर, गाँव, कुटुम्ब-सब कुछ छोड़कर तुम्हारे युगल चरणों की शरण में आयी हैं । प्रियतम ! वहाँ तो तुम्हारी आराधना के लिये अवकाश ही नहीं है । पुरुषभूषण ! पुरुषोत्तम ! तुम्हारी मधुर मुसकान और चारु चितवन ने हमारे हृदय में प्रेम की–मिलन की आकांक्षा की आग धधका दी है, हमारा रोम-रोम उससे जल रहा है । तुम हमें अपनी दासी के रूप में स्वीकार कर लो । हमें अपनी सेवा का अवसर दो ॥ ३८ ॥

वीक्ष्यालकावृतमुखं तव [1]कुण्डलश्रिगण्डस्थलाधरसुखं हसितावलोकम् ।
दत्ताभयं च भुजदण्डयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ॥ ३९ ॥

कर्दमक्षमा

अन्वयः—कुण्डलश्रि, गण्डस्थलाधर, सुखम्, हसितावलोकम्, तव, अलकावृत, मुखम्, वीक्ष्य, च, दत्ताभयम्, भुजदण्डयुगम्, विलोक्य, च, श्रियैकरमणम्, वक्षः, विलोक्य, दास्यः, भवाम ॥ ३९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु गृहस्वाम्यं विहाय दास्यं किमिति प्रार्थ्यतेऽत आहुः । वीक्ष्येति । अलकावृतमुखं केशांतरैरावृतं मुखं तथा कुंडलयोः श्रीर्ययोस्ते गंडस्थले यस्मिन् अधरे सुधा यस्मिंस्तच्च तच्च तव मुखं वीक्ष्य दत्ताभयं भुजदंडयुग्मं वक्षश्च श्रिया एकमेव रमणं रतिजनकं वीक्ष्य दास्य एव भवामेति ॥ ३९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अयोग्यार्हं दास्यं यूयं योग्याः किमर्थमिच्छथेत्याशंकते—नन्विति । 'अलकाश्चूर्णकुंतलाः' इत्यमरः । अतिसुभगत्वात्तव सर्वेश्वरस्य दास्यमेवोचितमिति भावः । केचित्त्वत्रालकावृतमुखस्य जालत्वं, कुंडलयोर्वंसिकात्वं, गंडस्थलस्य विशालभूमित्वम्, अधरसुधाया लोभकत्वं, हसितावलोकस्य मोहिनीत्वं वेणुगीतस्य भैरवरागत्वं, गोपीजनानां वनचरत्वं नेत्राणां खंजनत्वं कल्पयंतीति यूयं यन्मम दास्यो भवथ तत्किं मया मूल्येन क्रीताः स्थ दत्तभृतयो वा, तत्र भवताऽस्मत्समुचितमूल्यात्कोटिकोटिगुणितेनास्मददृष्टाश्रुतचरेण महानर्घ्येण हसितावलोकचिन्तारत्नेनास्मान् वयस्संध्यारंभ एव क्रीत्वा स्वीयकुंजमंदिरमानीय नीलनिधिपद्मनिधिजांबूनदमकरयुगलचिंतामणिमयस्थलीविलासास्पदनीलमणिमंदिराण्यलकादिव्याजेन स्वसंपत्तीर्दर्शयित्वा दारैरपि दुर्लभममृतं प्रतिदिनं भोजयसीत्याहुः—वीक्ष्येति । यदा शोणवक्रोष्णीषं शिरसि बध्नासि तदा दासीजनेन कंकतिकयोत्कृष्योत्कृष्योर्ध्वं

---

[1] श्रीगण्ड–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. ध. ।

नयनात् त्वया च स्वांगुल्यायत्तान्निरुध्योष्णीषांतःप्रवेशनाद् भालवामदक्षिणप्रान्तयोरेव दृश्यमानमूलभागैरलकैरावृतमनाक्छन्नं मुखं वीक्ष्य यदा च चूडां बध्नासि तदा भालाग्रवामदक्षिणभागेष्वपि कुञ्चितैरनतिदीर्घैरलकैरा ईषदावृतं मुखं वीक्ष्याभ्यंगोद्वर्तनादिसमये संप्रयोगभरसमये चालकैरा सम्यक् प्रकारेणैवावृतमाच्छन्नं मुख वीक्ष्य ईक्षणाभ्यामास्वाद्यमानमाधुर्य्यभरीकृत्य वयं दास्यो भवामः। मुखं कीदृशम्—कुंडलाभ्यां समयभेदेष्वलकैरनावृताभ्यामीषदावृताभ्यां संपूर्णाभ्यां चाचपलाभ्यामीषच्चपलाभ्यामतिचपलाभ्यां च श्रीः पृथक्पृथक् शोभा यत्र तत्। हसितप्रहसितसमये गंडयोरपि सृक्किण्योर्विततत्वात् गंडस्थलेऽपि अधरसुधाऽधरमाधुर्योच्छलनं यस्य तत् गंडस्थलाद्‌गंडस्थलमारुह्य गोपीनयनचकोरैः पीयमानाऽधरसुधा यस्य तत्। रहस्यमयभेदे तु गोपीनां गंडस्थलेऽधरसुधा यस्य तत् गंडस्थलयोर्गोपीनामधरसुधा यस्य तत्। यद्वा—कुंडलयोः श्रीः प्रतिबिंबरूपशोभा ययोस्ते गंडस्थले यस्मिन्, अधरे सुधा यस्मिन् तच्च तच्च तदित्येकपदम्। हसितयुक्तोऽवलोको यत्र तत्। हसितं प्रफुल्लता गोपीनां कुमुदानां चावलोकाद्यस्मादिति वा। ननु युष्मत्पतयः एतदसहिष्णवः फूत्कारेण कंसराजतो मम भवतीनां च भयमुत्पादयिष्यन्ति तत्राहुः—दत्तमभयं महेंद्रदर्पकादिभ्योऽपि पर्वतधारणादिना येन तथाभूतं भुजदंडयुगमिति। तथा चेत्त्वद्भुजदंड एव कंसपशोः प्राणहारको भविष्यतीति भावः। एवं च व्यंजितेन वीररसेन श्रृंगाररसः पुष्टो भवति स्म। ननु परनारीरहं धर्मात्मा स्वदासीर्न करोमीति तर्जन्या केयमिति पृच्छंतयः—सत्यं भो धार्मिकचूडामणे गोपानां नारीर्न दासी करोषि किन्तु नारायणस्य नारीं लक्ष्मीमपि वैकुंठाद्बलादानीय स्ववक्षसा वहसीत्याहुः—वक्ष इति! श्रिया लक्ष्म्या कर्त्र्या लज्जावशात्सुवर्णरेखारूपया एकं मुख्यं रमणं यत्र तत् तस्मादधुना ते कियद्वयो बभूव त्रिचतुर्दशभवनेषु मध्ये तदूर्ध्वलोकेष्वपि ब्रह्मांडाद्बहिर्महावकुंठलोकस्थेष्वपि मध्ये कस्यापि कामपि सुंदरीं नारीं त्वं न त्यक्ष्यसीति जानीम इति व्यंजितं भवति ।। २९ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु भवत्यो न धनादिना मूल्येन क्रीता न वा दत्तभृतयः कुतो दास्यो भवेयुः उच्यते अन्यत्रैव खल्वसावन्योऽन्येन स व्यवहारः भवति तु स्वमुखादिदर्शनदानमेव मूल्यं भृतिश्चेत्याहुः। वीक्ष्येति। विशेषेण दृष्ट्वा विशेषमेवाहुः। अलकावृतेत्यादिविशेषणैः तत्र चालकैर्ललाटोपरि विलसद्भिरावृतमित्यूर्ध्वभागस्य कुण्डलश्रीति द्वयोः पार्श्वयोः हसितेनावलोको यस्मिन् इति अधोमध्यभागयोरित्येवं सर्वत्र शोभोक्ता स्थलरूपकेण गण्डयोर्विस्तीर्णत्वं कुण्डलश्रीत्यनेन स्वच्छत्वं च ध्वनितम् अधरे च सुधानुमानं दर्शनमात्राल्लोभविशेषोत्पत्तेः सौरभ्यविशेषानुभवाच्च तथा दत्तमभयं भक्तानां दैत्यवधादिना येनेत्यादि बलिष्ठत्वादिगुणः तेन च चातुर्य्येण पत्यादिभ्यो भयं परिहृतं वस्तुतस्तु गाढाश्लेषेण कामादिभयहरत्वमभिप्रेतं दण्डरूपकेण सुवृत्तपृथुदीर्घत्वाद्याकारसौष्ठवम् अत्राप्येवं वैशिष्ट्यमुक्तं तथा श्रिया वामभागस्थस्वर्णवर्णलक्ष्मीरेखारूपया लक्ष्म्या कर्त्र्या एकं श्रेष्ठ रमणं यस्मिन्निति परमसौन्दर्य्यादिसम्पत्तिनिधानत्वमुक्त चकारद्वयं विलोक्येति पुनरुक्तिश्च निजवासभुजवक्षसोर्विशेषाश्रयताविवक्षया तथोत्तरयोर्द्व-योरेका क्रिया चैकसंप्रयोजनजनकत्वात् तादृशगण्डाधरमण्डिते श्रीमुखे हि चुम्बनपाने भुजवक्षसोश्चालिङ्गनमात्रमभिलषितमिति अत्रालकादीनामुक्तिक्रमेणेदं गम्यते प्रथमतो मुखस्य तत्तत्सौन्दर्य्यदर्शने जातेऽपि लज्जया न चातुरक्षेण दर्शनं किन्त्वत्युत्कण्ठया पश्चादेव तत इच्छाविशेषेण येन भुजौ दृष्टौ तस्य तु विश्रामो वक्षस्येवेति तथा क्रमो ज्ञेयः एवं दासीत्वे हेतुः परममोहनतैवेति ध्वनितं किञ्च भृतिर्मूल्यं च खलु विषयदानमेव लोके दृश्यते तत्तु त्वयि तत्तद्रूपशोभावति मधुराधरसुधे लोभनीयभुजादिस्पर्शे पूर्णलक्ष्मीनिधानवक्षसि लब्धे स्वतः सिद्धमेवेति तथापि वीक्ष्येति स्वेषां नेत्रखञ्जनबन्धोऽपि ध्वनितः तत्रालकानां पाशत्वं कुण्डलयोस्तदन्तिमकुण्डलिकारूपत्वं गण्डयोस्तन्निधानस्थलत्वम् अधरसुधाया लोभ्याहारत्वहसितावलोकस्य विश्वासजनकस्वपालितखञ्जनद्वयाविलासत्वं तत्र भुजदण्डयुगस्य च दत्ताभयत्वमेव पल्लवयुक्तत्वादिति भावः। तादृशवक्षसश्च सुखचारप्रदेशत्वमित्यपि ज्ञापितम् अन्यत्तैः यद्वा कुण्डलयोः श्रीः शोभा येन तन्मुखं केषांचिन्मते श्रीति दीर्घः पाठः ततश्च कुण्डलयोः श्रीहेतुगण्डस्थले चाधरसुधा च तासां द्वन्द्वैक्यं तथा हसितं चावलोकश्च तत्तच्च वीक्ष्य इति सर्वेषां प्राधान्यं द्योतितं विलोक्यं सुदृश्यमिति निषेधार्थस्तु ननु यद्येवं तर्हि कथं ममाङ्गानि मुहुर्वीक्षमाणा एव तिष्ठथ तत्र साटोपमाहुर्वीक्ष्येति अत्रापि काक्वैव निषेधो व्यङ्ग्य इति ।। ३९ ।।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु दास्यरसिकास्तर्हि प्रायः एतादृशभावानां श्रीदामसुबलादीनामिव दास्यमंगीकुरुतेति चेत्तत्र किंवा दास्यविशेषप्रार्थने हेतुं सभावमाहुः—वीक्ष्येति। साक्षादन्तिके दृष्ट्वा प्राधान्येन श्रीमुखस्य भुजयोर्वक्षसश्च वर्णनं गण्डचुम्बनाधरामृतपान–गाढ़ालिगनाद्यभिप्रायेण, तत्र चालकैर्ललाटोपरि विलसद्भिरावृतमित्यूद्‌र्ध्वभागस्य, कुण्डलश्रीति द्वयोः पार्श्वयोः, हसितेनावलोको यस्मिन्निति अधोमध्यभागयोरित्येवं सर्व्वत्र शोभोक्ता, स्थलरूपकेण गण्डयोर्दर्पणादिभ्योऽपि सौन्दर्य्यं ध्वनितम्। दत्तमभयं भक्तानां दैत्यवधादिना येनेति बलिष्ठत्वादिगुणः, तेन च चातुर्य्येण पत्यादिभ्यो भयं परिहृतम्, वस्तुतस्तु गाढ़ाश्लेषेण कामादिभयहरत्वमभिप्रेतम्, दण्डरूपकेण सुवृत्तपृथुदीर्घत्वाद्याकारसौष्ठवं श्रिया लक्ष्म्या निजशोभया वा कृत्वा, एकं श्रेष्ठमद्वितीयं वा रमणमिति परमसौन्दर्य्यं शोभाधिक्यं चोक्तम्, चकारद्वयम्। विलोक्येति पुनरुक्तिश्च श्रीमुखवद्भुजवक्षसोरपि प्राधान्यविवक्षया। किंवा दासीत्वे

तत्तद्दर्शनमात्रैकहेतुतोक्त्या तत्तत्परममोहनतैव दर्शिता, अतो दासीत्वेन तत्तद्रसविशेषस्य यथायथं साक्षादनुभवसंसिद्ध्या दास्य एव भवाम इत्यर्थः। वर्त्तमानायां पञ्चमी। गूढोऽयमभिप्रायः,—विवाहे सति पत्नीत्वेन भजनादप्यौपपत्येन भजनं परममहासुखम्, तच्च श्रीभागवतामृते काव्यालंकारादौ च प्रसिद्धमेव, अतएवात्र दास्यविशेष एव प्रार्थितः, अधुना च प्रार्थ्यते—दास्य एव भवामेति। अन्यत्तैर्व्यञ्जितम्। यद्वा, कुण्डलयोः श्रीः शोभा येन तन्मुखम्, केषाञ्चिन्मते श्रीति दीर्घपाठः, ततश्च कुण्डलयोः श्रीस्वरूपे गण्डस्थलेऽधरसुधां च, द्वन्द्वैक्यम्, तथा हसितं चावलोकञ्च, इति सर्व्वेषां प्राधान्यं द्योतितम्, तच्चकाराभ्यां व्यञ्जितमेव। विलोक्यं सुदृश्यं परमसुन्दरम्, यद्वा, जगतामेव विशेषेण लोक्यं दृश्यं यद्वक्षस्तत्, पुंसामपि मनोहरत्वात्। अतएवोक्तं श्रीकपिलदेवेन (भा० ३।२८।२६)—'वक्षोऽधिवासमृषभस्य महाविभूतेः, पुंसां मनोनयननिर्वृतिमादधानम्' इति। अस्यार्थः—ऋषभस्य सर्व्वश्रेष्ठस्य श्रीकृष्णस्येत्यर्थः। निजाशेषभगवत्ताप्रकटनात् पुंसामपि, किमुत स्त्रीणाम्, साक्षात्तथानुक्तिर्मातर्य्युक्तेरिति। अप्यर्थे च-शब्दः। श्रिय एकं रमणं क्रीडास्थानमपि सदा तत्र निवासात्, किंवा सुखप्रदमपि सदा तदाश्लेषात्। यद्वा, श्रियः शोभाया अप्येकं श्रेष्ठमद्वितीयं वा रमणम्, विसर्गलोपेऽपि सन्धिरार्षः, ततश्च चकारोऽन्वाचये प्रथमः, अप्यर्थे द्वितीयः, एवं श्रीमुखाद्भुजयोर्गौणत्वम्, ततोऽपि वक्षसोऽभिप्रेतं शोभासुखातिशयवत्त्वेऽपि तस्य लक्ष्म्याक्रान्तत्वेन सापत्न्यादसूयया गौणत्वमधिकम्, यद्वा, चकाराभ्यां पूर्व्ववत् सर्व्वेषामेव प्राधान्यं द्योतितम्। सर्व्वेषामपि प्रत्येकं प्राधान्येन दासीत्वे हेतुत्वात्, यद्वा, पूर्वं दास्यविशेषप्रार्थनेन जारत्वेनैव भजनमभिप्रेतम्। ननु लोलप्रकृतयस्तदेव कथं प्रार्थ्यते? कृतकात्यायनीव्रतकुमारीवर्गवत् सर्वा अपि विवाहद्वारा पत्नीत्वं मे न कथमिष्यतेत्यत्र सवैदग्ध्यमाहुः—वीक्ष्येति, दास्य एव भवाम औपपत्येनैव त्वां भजाम इत्यर्थः। आशिषि पञ्चमी। अनेनव निर्भरप्रेमरसाविर्भूत्या यथायथं तन्मधुररसानुभव-विशेषसुसिद्धेः। तच्च श्रीभागवतामृते वर्णितमेव, काव्यालंकारादौ च प्रसिद्धम्। एतेन 'अस्वर्ग्यम्' इत्यस्योत्तरम्। त्वच्छ्रीमुखादिवीक्षणेन औपपत्यं जन्यते, तत्रास्माकं को नाम दोष इति। किंवा औपपत्येन तद्भजने मोक्षादपि वैकुण्ठलोकसुखादपि लक्ष्म्यादिभजनानन्दादपि च परमसुखविशेषसिद्धेः, किं नामास्वर्ग्यत्वादिकम्, अतः कुलस्त्रीणामेव त्वया सह तदुचितमिति। श्लेषार्थः —एतादृशं तव श्रीमुखादिकं वीक्ष्यापि तव दास्यः कर्म्मकार्य्योऽपि भवाम, सम्भावनायां पञ्चमी, भवेम किम्?—काक्वा, अपि तु नैवेत्यर्थः। तत्र हेतुः—श्रिय एव एकं रमणमिति सर्व्वेषामेव विशेषणं चञ्चलप्रकृतेस्तस्या एव, न तु स्थिरप्रकृतीनां पतिव्रतानामस्माकं त्वन्मुखादिना रमणमिति, यद्वा, कुण्डलश्रीत्यादिरूपमलकावृतमुखं तव त्वया वीक्ष्य विशेषेणेक्षयित्वा दर्शयित्वा भुजदण्डयुगञ्च विलोक्य विशेषेण लोकयित्वा दर्शयित्वा वक्षश्च दर्शयित्वा भयं प्रति वयं दत्ताः, भयाय समर्पिता वयमित्यर्थः। अतोऽस्माकं भयाभावाय अस्मदास्यो मदरहितमुखो भव॥ ३९॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु भोग्यं गृहादिकं विहाय किमिति ममदास्यं प्रार्थ्यते इत्यत्राहुः। वीक्ष्येति। कुण्डलयोः श्रीर्ययोस्ते गण्डलस्थले यस्मिन्नधरे सुधा यस्मिन् स्मितयुक्तोऽवलोको यस्मिंस्तथालकैश्चूर्णकुन्तलैरावृतं मुखमाश्रितानामभयप्रदं भुजदण्डयोर्युग्मं श्रियो लक्ष्म्या एकं मुख्यं रतिजनकं क्रीडायोग्यं वा वक्षश्चावलोक्य तवैव दास्यो भवाम त्वद्रूपस्य निरतिशयभोग्यत्वादिति भावः॥३९॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हे वीक्ष्य! दर्शनीय! वयं तव दास्यो भवामेत्यन्वयः "अशिषि लिङ्लोटौ" इति आशिषि लोट् दासीभूत्वाशिषं कामयामह इत्यर्थः। दासीभावे कारणमाहुः। अलकेति। कुण्डलश्रिया युक्तं गण्डस्थलम् अधरसुधा च यस्य तत्तथा हसितेन युक्तमवलोकं च प्रतिजनं दत्ताभयं भुजदण्डयोर्युगं च श्रिय एकरमणं प्रधानरतिस्थानं वक्षश्च विलोक्य दृष्ट्वा विचार्य वा वीक्ष्येति वा॥ ३९॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अद्य किं दास्यं दास्यसि? दास्यस्तु वयं भवाम एवेति सिद्धवदन्या आहुः—वीक्ष्येत्यादि। तव मुखं वीक्ष्य दर्शनीया येऽलकास्तैरावृतम्, पश्चात् कर्मधारयः। कुण्डलयोः श्रिया युक्तं गण्डस्थलं यस्य तत्तथा, अधरे सुधा यस्य तत्तथा, पुनः कर्मधारयः कीदृशम्? श्रियाहसितसहितोऽवलोको यत्र तत्तथा; भुजदण्डयुगञ्च कथम्भूतम्? दत्ताभयम्; विलोक्यं दर्शनीयं वक्षश्च कर्मधारयः कीदृशम्? श्रिया हेतुभूतया एकरमणम्। एतानि यथा स्वभावसिद्धानि भवन्ति, तथा वयमपि दास्यो भवामेत्यर्थः। अथवा, वीक्ष्य विलोक्येति पूर्वकाले क्यप्, तन्नाति सुरसम्॥ ३९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

'उपासनाशाः' इति यदुक्तम्, तत् कीदृशमित्यन्या ऊचुः। वीदयालकावृतमित्यादि। अलकावृतमुखं तव गण्डस्थलञ्च अधरसुधाहसितमवलोकं भुजयुगं वक्षश्च वीक्ष्य दास्यो भवामः, एतेषामुपासनायोग्या भवाम इत्यर्थः, वक्रोक्तिः॥ ३९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यूयं यन्मम दास्यो भवथ तत् किं मया मूल्येन क्रीताः स्थ स्वीयदत्तभृतयो वा तत्र भवता अस्मत्समुचितमौल्यात् कोटिकोटिगुणितेनास्मदृदृष्टाश्रुतचरेण महानर्घ्येण हसितावलोकचिन्तारत्नेनास्मान् वयःसन्ध्यारम्भ एव क्रीत्वा स्वीयकुञ्जमन्दिरमानीय नीलनिधि पद्मनिधि जाम्बूनदमकरयुगलचिन्तामणिमयस्थलीमणिस्तम्भलक्ष्मीविलासास्पदनीलमणिमन्दिराण्यलकादिव्याजेन स्वसंपत्तीर्दर्शयित्वा देवैरपि दुर्लभममृतं प्रतिदिनं भोजयसीत्याहुः। वीक्ष्येति। यदा शोणवक्रोष्णीषं शिरसि बध्नासि तदा दासीजनेन कङ्कतिकयोत्कृष्योत्कृष्योर्ध्वनयनात् त्वया च स्वाङ्गुल्या यत्नान्निरुध्योन्नीयोष्णीषान्तःप्रवेशनात् भालवामदक्षिणप्रान्तयोरेव दृश्यमानमूलभागैरलकैरावृतमनाच्छन्नं मुखं वीक्ष्येति यदा चूडं बध्नासि तदा भालाग्रवामदक्षिणभागेष्वपि कुञ्चितैरनतिदीर्घैरलकैरा ईषदावृतं मुखं वीक्ष्य अभ्यङ्गोद्वर्तनादिसमये सम्प्रयोगभरसमये च अलकैरासम्यक् प्रकारेणैव आवृतमाच्छन्नं मुखं वीक्ष्य ईक्षणाभ्यामास्वाद्यमानमाधुर्यभरीकृत्य वयं दास्यो भवामः मुखं कीदृशं कुण्डलाभ्यां समयभेदेष्वलकैरनावृताभ्यां सम्पूर्णावृताभ्यां च अचपलाभ्यामीषच्चपलाभ्यामतिचपलाभ्यां च श्रीः पृथक् पृथक् शोभा यत्र तत् हसितप्रहसितसमये गण्डयोरपि सृक्कण्योर्विततत्वात् गण्डस्थलेऽपि अधरसुधा अधरमाधुर्य्यच्छलनं यस्य तत् गण्डस्थलात् गण्डस्थलमधिरुह्य गोपीनयनचकोरैः पीयमाना अधरसुधा यस्य तत् रहस्यसमयभेदे तु गोपीनां गण्डस्थले अधरसुधा यस्य तत् गण्डस्थलयोर्गोपीनामधरसुधा यस्य तत् यद्वा कुण्डलयोः श्रीः प्रतिबिम्बरूपा शोभा ययोस्ते गण्डस्थले यस्मिन् अधरे सुधा यस्मिन् तच्च तच्च तदित्येकपदं हसितयुक्तोऽवलोको यत्र तद्धसितं प्रफुल्लता गोपीनां कुमुदानां च अवलोकाद्यस्मादिति वा ननु युष्मत्पतय एतदसहिष्णवः फूत्कारेण कंसराजतो मम भवतीनां च भयमुत्पादयिष्यन्ति तत्राहुः। दत्तमभयं महेन्द्रदर्पकादिभ्योऽपि पर्वतधारणादिना येन तथाभूतं भुजदण्डयुगमिति तथा चेत्त्वद्भुजदण्ड एव कंसपशोः प्राणहारको भविष्यतीति भावः। एवं च व्यञ्जितेन वीररसेन शृङ्गाररसः पुष्टो भवति स्म ननु परनारीरहं धर्मात्मा स्वदासीर्न करोमीति तर्जन्या कोऽयमिति पृच्छन्त्यः सत्यं भो धार्मिकचूडामणे गोपानां नारीर्न दासी करोषि किन्तु नारायणस्य नारीं लक्ष्मीमपि वैकुण्ठाद्बलादानीय स्ववक्षसा वहसीत्याहुः। वक्ष इति। श्रिया लक्ष्म्या कर्त्र्या लज्जावशात् सुवर्णरेखारूपया एकं मुख्यं रमणं यत्र तत् तस्मादधुना ते कियद्वयो बभूव चतुर्दशभुवनेषु मध्ये तदूर्ध्वलोकेष्वपि ब्रह्माण्डाद्बहिर्महावैकुण्ठलोकस्थेष्वपि मध्ये कस्यापि कामपि सुन्दरीं नारीं त्वं न त्यक्ष्यसीति जानीम इति व्यञ्जितं भवति॥ ३९॥

रसिकाह्लादिनी–टीका

ननु पूर्वं पादरजसेव्यत्वेन प्रार्थितं, इदानीमन्यदपि "भिक्षु पादप्रसारिका" न्यायेन प्रार्थयन्त्यो व्याजेन दास्यमेव स्वीकुर्वन्तीति ज्ञात्वा पृच्छन्ति गृहत्यागे को वा दोषो दास्यं भवामः, कीदृशं मुखं कुण्डलयोः श्रीर्ययोस्ते गण्डस्थले यस्मिन् अधरे सुधा यत्र तत्र पुनः कीदृक् हसितं हासस्तद्विलसितोऽवलोको यस्मिन् ततः प्रथमं तासां मनसि सुखमेव मुख्यस्वाद्यंतेनाभिप्रेतमतस्तदेव वर्णयन्ति –अलकावृतमिति। अलिकुलावृतनीलोत्पलसादृशेन वर्णितं मकरन्दाधिक्येन पेयत्वमभिप्रेतं कुण्डलश्रीति पार्श्वद्वये पीनयुगावृतत्वेन शोभातिशयः सूचितः गण्डस्थले स्वच्छत्वं द्योतितं, अधरसुधेति लोभाश्रयत्वं सूचितं, हसितावलोकमिति विलासप्रकासभरः सूचितः, भुजदण्डयुगं च विलोक्य-कीदृशं दत्ताभयं भक्तेभ्यो दत्तमभयं येन स्वसामर्थ्येन गोवर्द्धनोद्धरणादिना "न त्रास इह वः कार्य" इति त्वयैवोक्तत्वात् बहुशोऽनुभूतत्वाच्च विलोक्य कीदृक् श्रिय एकमेव रमणं रतिजनकं, यद्वा श्रिया शोभयासाकमेव रमणमिति शोभातिशय उक्तः। मधुररसालम्बनमेतत्सर्वं दृष्ट्वा दास्यं स्वीकारं एतद्वेशेनाप्यलं किमुत समुचितमेतत्सर्वमिति। गृहस्वाम्ये न किंचित् दास्ये सर्वमेव सम्पत्स्यते–अतएवामूल्यक्रीताः दास्यो भवामेति। यद्वा अस्वर्ग्ययशस्यं च फल्गु कृच्छ्रं भयावहमिति च तत्रोत्तरं अन्यत्रौपपत्यं जुगुप्सितमेव इह तु न यत एते दोषाः गुणत्वेन परिणताः नवभृत्येसु स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन इति तव मुखदर्शने जाते स्वर्गस्य हेयत्वदर्शनादिष्टापत्तिरेव मुकुरस्थानीययोर्गण्डयोः स्वप्रतिबिंबदर्शनाय स्वीकृतत्वात् जातेवौपपत्यं स्वीकृतं। अत्रापि देवभोग्यायाः सकाशात् उत्कृष्टाया अधरसुधायाः भोग्यत्वदर्शनात् औपपत्यस्वीकारः हसितावलोकमिति। अन्यत्रौपपत्यं यशसोः मलिनत्वं भवति। अत्र तु हसितमप्युज्वलं अवलोकोऽप्युज्वलः अयशसोप्युज्वलत्वं अतः स्वीकृतं अन्यच्च फल्गु स्वल्पकालभोग्यमपि अभयदेन भुजद्वन्द्वेन रक्षितत्वात्स्वीकृतं कृच्छ्रं दुःसाध्यमपि श्रीसेव्यत्वात्स्वीकृतं बहुदोषाक्रान्तत्वेन प्रतीतमप्यौपपत्यं अस्मच्चित्ताभिप्रायेण सुखात्मकमेव प्रतीयते। अन्येषां जुगुप्सितमप्यस्माकमजुगुप्सितमेवेति। गृहोचितं सुखं स्वर्ग्यं यशस्यं बहुकालभोग्यं सुखसाध्यं अजुगुप्सितं च एतादृशमप्यस्माभिः त्यक्तम्, "स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन" इत्युक्तत्वात्। अयशस्यं यशो हि स्वर्गस्य मूलं "यावत्कीर्त्तिर्मनुष्यस्य पुण्या लोकेषु गीयते। तावत्प्रमोदते स्वर्गे" इति स्वर्गहेतुत्वात् यशोपि त्यक्तम्। अस्वर्ग्यं स्वर्ग्यस्याकाम्यमानत्वात्। अन्येऽपि भक्ताः "स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिने"त्युक्तात्। यद्वा फल्गु स्वल्पकालभोग्यमपि स्वीकृतं बहुसुखपूर्णत्वात्। कृच्छ्रं दुःसाध्यमपि स्वीकृतं त्वत्पदप्राप्तिहेतुत्वात्। जुगुप्सितमपि स्वीकृतं पत्यादिभिरस्मत् त्यागस्य करिष्यमाणत्वात्। बहुकालभोगस्यापि परिणामविरसवत्वात् तदुक्तं "न नाकपृष्ठ"मिति।

अन्यासां पतिव्रतानां षट्दोषाक्रान्तमप्यौपपत्यमस्माकं षड्गुणयुक्तमेव जातं, तदुक्तं "क्वचिद्गुणोऽपि दोषः स्याद्दोषोऽपि विधिना गुण" इति, यथा ब्राह्मणस्याध्ययनमध्यापनं च गुणः शूद्रस्य तु दोषः एवमन्यासां दोषबुद्ध्यौत्पत्तौ विमुखानामप्रवृत्तौ सत्यां तव भजनो धर्म इति जानतीनामस्माकमौपपत्यं गुण एव अन्याभिरनास्वादितत्वाद्दोष एवातस्तास्वेवमयमुपदेशः। अत इयं बिभीषिका नास्मास्ववकाशं लभत इति वाक्यार्थः यत तव दास्यं परमपुरुषार्थसाधकं न हि परमपुरुषार्थसाधकं पापसाधकं भवति। मुखादिवीक्षणरूपेन मूल्येन क्रीताः दास्यो भवाम उपभोगस्तु भवन्प्रसादलभ्य एव, तस्मिन् जाते किमलभ्यं इति मुखादिदर्शनेनास्मदौपपत्यव्यवसायं दृढीकृत्येदानीमस्वर्ग्यमित्यादि बिभीषिकामुत्पादयन् किं न लज्जसे इति भावः॥ ३९॥

विशुद्धरसदीपिका

अथ तुरीयदिक्स्थितास्तदीयकथिते यत्किंचित्कृतावधानाः आत्मनिप्रेयसीत्वाभिमाना प्रखरोक्तिप्रधाना भवद्वयस्पर्शित्वात्ताटस्थ्यमवलम्बमानाः का नाम तव दास्यो न भवेयुरित्यभिप्रायेण प्रागुक्तमेव द्रढयन्ति। वीक्ष्येति। अत्र हे पुरुषभूषणेत्यनुवर्त्यं तव भवामेति संबन्धः। ननु भवत्यो न धनादिना क्रीताः न वा दत्तभृतयः नच वन्द्यानीता इति कथं दास्यो भवथेत्याशङ्क्य तत्त्रैविध्यमेवात्मनि प्रतिपादयन्ति। तत्र श्रियैकरमणं वक्षो वीक्ष्येति सर्वसम्पदाधिष्ठात्र्याः श्रिय एकमनन्यसाधारणं रतिप्रदमिति धनादिना क्रीतत्वं दत्ताभयं च भुजदण्डयुगमित्यभयदानमेव भृतिरिति द्वितीयस्योत्तरं सकलमेव वाक्यं तृतीयस्य तत्र प्रस्तुते अप्रस्तुतव्यवहारसमारोपरूपया समासोक्त्यात्मनि मृगीत्वमध्यस्य तस्मिन् लुब्धकत्वमध्यवस्यन्ति तेन वन्द्यानीतत्वं सेत्स्यति। तथाहि तत्रालकानां गुल्मत्वम् आवृतेति विसृत्वरत्वं मुखस्य कपटफलकत्वं कुण्डलयोर्मकरीत्वं गण्डस्थलयोरुभयतः पल्वलीत्वम् अधरसुधाया नीरत्वं हसितावलोकस्य लोभ्याहारत्वं भुजद्वयस्याभयप्रदत्वं श्रियैकरमणमिति सजातीयविश्रामस्थानत्वेनाश्वस्तत्वम् मुरलीकलस्य चाकर्षकध्वनित्वमध्यवसेयमिति विलोक्येति वक्षोविशेषणमिति न पौनरुक्त्यम् शेषं स्पष्टम्॥ ३९॥

श्रीरामनारायणकृता भावभावविभाविका

ननु किमिति स्वगृहस्वामिन्योऽस्मद्दास्यो भविष्यथ तत्राहुः। वीक्ष्येति। यद्वा न यूयं मया बद्ध्वानीता नवापद्रक्षिता नवा द्रविणक्रीता इति कथं दास्यो भविष्यथ तत्राहुः। वीक्ष्येति। तवालकावृतमुखं वीक्ष्य दास्यो भवामः इदमत्राभिप्रेतम् अस्माकं मनः प्रथमतः स्वभावत एव रजसा कुटिलं तमसा कृष्णं सत्त्वेन स्निग्धं च पुनश्च स्नेहोद्रिक्ततव ध्यानेन त्रिभङ्गललितश्यामसुन्दरसुस्निग्धत्वन्मूर्त्याकारतयापि तादृशं स्वसमानतादृक्त्रिगुणान्वितत्वदलकदर्शनेन बन्धुबुद्ध्या तत्र सङ्गतं तैरलकैर्बध्नातीति बन्धुरिति बन्धनमेव बन्धुकृत्यमात्मनश्च नागपाशाकारतया वन्धकस्वभावत्वमाकलय्य कुटिलकृष्णस्वभावतया भवानिव विश्वासघातमविगणय्य तत्रैव निबद्धमिति बद्ध्वानीतत्वेन दास्यार्हत्वं सूचितम् किञ्च कीदृशमलकावृतमुखं कुण्डलश्रिगण्डस्थलाधरसुधं बहिर्दिव्यमकराकृतमणिमयकुण्डलयोः श्रीर्ययोस्तादृशे इन्द्रनीलप्रभे कपोले यस्मिन् तथाधरयोः वज्रमुक्तामणिलसनदशनप्रभात्मकहसनसुधा यस्मिंस्तच्च तच्च तच्च तथा वीक्ष्य दास्यो भवाम अत्रायमाशयः यत्र धनिभिर्बहुनिधिनिर्धीयते तत्र प्रदीपः प्रज्वाल्यते ध्वजश्चारोप्यते तद्रक्षकतया नागश्चावधार्य्यते तथा मकरध्वजारोपितमणिगणनिकरमकरनिधौ मकरकुण्डल एव तन्मकराकारध्वजे तद्गतमणय एव मणिप्रदीपाः श्यामस्निग्धोज्वलकपोलेन्द्रनीलमणिमुकुरमेव संपुटम् अधरावेव तद्विद्रुमाभरणं तत्र दशनभगणा एव सुधास्त्राविचन्द्रमणयः तदावरकालकावेव रक्षकनागयुगलं तमेव लक्ष्म्या अपि प्रलोभकं निधिं वीक्ष्य तत्क्रीता एव दास्यो भवामः पुनः कीदृशं तत् हसितालोकमवलोक्यतेऽनेनेत्यवलोकः कूर्मवायुर्नेत्रे च तानि हसितानि दशनकुन्ददीधितिना पराभूतानि येन तत्तत्तथा चात्रेन्द्रनीलाकारे कपोले इन्द्रनीलनिधिदर्शनव्रातमेव कुन्दनिधिर्मकरकुण्डल एव मकरनिधिः अवलोकसूचितोन्मीलनकरकूर्म एव कूर्मनिधिः मणिगणपूरितकण्ठ एव शङ्खनिधिः नेत्रे पद्मनिधी तत्पूरितोऽनङ्गएवानङ्गनिधिरित्यष्टनिध्यावरण परिवृतभगवन्मुखं वीक्ष्य तन्निधिवलोकेन तदाराधनाय वा दास्यो भवाम तथा श्रिया सर्वसम्पदधिष्ठात्र्या चञ्चलत्वेन प्रसिद्धत्वेपि तद्वक्षःश्रीलोभेन स्वभावसिद्धचाञ्चल्यमुत्सृज्य स्थैर्येण न्युषितया लक्ष्म्या निर्णीतमेकं मुख्यं रमाया अपि रमण किमुतान्यासां यद्वक्षः तद्विलोक्य दास्यो भवाम यदा तल्लोभेन सर्वलोकेश्वरी श्रीरपि दास्यं गता तदालिङ्गनरसाभिज्ञाः प्रीत्येकमूर्त्तयोऽचलचित्तास्त्वदेकनिष्ठा वयं दास्यो भवाम इति किमत्र चित्रं तथेन्द्रवृष्ट्यादिसर्वापत्सु दत्ताभयं भुजदण्डयुगं विलोक्यापत्सु रक्षितत्वेनाग्रेऽपि तद्विरहकामचिन्ताग्निं दृग्जलवृष्ट्याद्यापद्रक्षायास्तदधीनत्वेन च दास्यो भवाम इति॥ ३९॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु यदि निरुपाधिकप्रेमवत्यो भवत्यस्तर्हि सालोक्यादिफलं प्रार्थ्यतां किमर्थं दास्यं प्रार्थ्यत इत्याशङ्क्याहुः! वीक्ष्येति। इदं सर्वं वीक्ष्य दास्य एव भवाम तत्र सारूप्यं नास्माकमपेक्षितं यतः अलकैः समानरूपैस्तदुपलक्षितैः समानरूपैर्भ्रमरैश्चावृत्तं मुखं तथा च सारूप्यं गतानामपि या भक्तिरवशिष्यते तदर्थिन्यो वयमिति भावः। तथा सामीप्यापेक्षामपि वारयन्ति कुण्डलाभ्यां श्रीः शोभा यस्य तयोः श्रीर्यस्मादिति वा तथा चात्यन्तसमीपयोस्तत्र प्रमाणभूतसांख्ययोगरूपयोरपि यदा मुखावलोकनपरत्वं तदान्यस्य

का कथेति भावः। गण्डौ विशालौ सुधापानार्थं स्थले यस्मिंस्तथा अधरे सुधा यस्मिन् गण्डस्थलं च तदधरसुधा च कुण्डलयोः श्रीर्ययोस्ते गण्डस्थले यस्मिन्निति वा एतेन सालोक्यापेक्षापि निवारिता सालोक्यं प्राप्तयोरपि कुण्डलयोर्मुखनिष्टष्टाक्षरामृतेनाभिलाषेण लोलत्वदर्शनात् किंच हसितपूर्वकमवलोकोऽवलोकनं यस्मिंस्तद्धसितावलोकमनेन सायुज्यापेक्षाप्यस्माकं नास्तीत्युक्तं यथोक्तमुखावलोकनजन्यान्यस्य पृथक् स्थितिं विनानुभवासंभवात् किंच इन्द्रादिपदमप्यस्माकं नापेक्षितमित्याशयेनाहुः। दत्ताभयं च भुजदण्डयुगं विलोक्येति। तथा चासुरादेर्विभ्यतः इन्द्रादेरप्यभयप्रदं लोकपालास्पदमपराधिजनदण्डरूपभुजद्वयालोकनपरायणानामस्माकमिन्द्रादिपदाभिलाषो नोपपद्यते इन्द्रादीनामपि भुजदण्डयोर्निविष्टत्वादिति भावः। ऐहिकैश्वर्य्यवाञ्छाप्यस्माकं नास्तीत्याशयेनाहुः। वक्ष इति। श्रिय एकम्मुख्यं रमणं वक्षःस्थलं विलोक्य चकाद्धर्मस्यापि संग्रहस्तथा च सर्वतः सम्प्लुतोदकह्रदवदन्तर्भूतसर्वपुरुषार्थं दास्यमेव प्रार्थयामः—

तुलयाम लेवनापि न स्वर्गं नापुनर्भवम्। भगवत्संङ्गिसङ्गस्य मर्त्यानां किमुताशिषः॥

इति भगवत्सङ्गिसङ्गस्यापि यदैवं माहात्म्यं तदा साक्षाद्भगवत्सङ्गस्य माहात्म्यं किमु वक्तव्यमिति भावः। एतेन भर्तृत्यागस्य पापरूपत्वं प्रकृते न संभवति दुःखरूपफलजनकत्वाद्भवन्तमवलोक्य लोकद्वयस्यापि त्यक्तत्वाच्चेत्यपि सूचितम् यच्च—

अस्वर्ग्यमयशस्यं च फल्गुकृच्छ्रं भयावहम्। जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियः॥

इति षड्दोषाभिधानं तदपि प्रकृते नोपपन्नं भगवतो यथोक्तषड्विधगुणत्वादित्यपि ध्वनितम् यद्वा ननु किमवलोक्य दास्यभावः प्रार्थ्यत इत्याशङ्क्याहुः। वीक्ष्येति। श्रियैकरमणमिति मुखस्यापि विशेषणं तथा च लोकोत्तरसौन्दर्यमवलोक्य दास्यो भवाम ननु दृष्ट्वैव वाञ्छा न विधेया प्रीत्ययोग्यानामापातरम्याणामपि बहूनां पदार्थानां सत्त्वादित्याशङ्कानिरासायोक्तम्। वीक्ष्येति भगवद्दास्यमेव सर्वापेक्षयोत्कृष्टम् अत एवंविधविग्रहप्रादुर्भावोऽस्माकं दास्यपददानायैव भगवता कृत इति सम्यग्विचार्य्येत्यर्थः। श्रियैकरमणमित्यनेन सर्वोत्तमा चतुरशिरोमणिभूता श्रीर्यत्र सर्वभावेनासक्ता तत्र का वयं वराक्यो दास्येऽप्यनधिकारिण्योऽतः श्रियैकरमणं मुखादिकमवलोक्यात्र यद्विचारणीयं तत्तल्लक्ष्म्यैव स्वयंवरकाले विचारितमिति न विचार्यते तदुक्तम्—

नूनं तपो यत्र न मन्युनिर्जयोज्ञानं क्वचित्तच्च न सङ्गवर्जितम्।
कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः॥
धर्म्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणम्।
वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः॥
क्वचिच्चिरायुर्न हि शीलमङ्गलम् क्वचित्तदप्यस्ति न वेद्यमायुषः।
यत्रोभयं कुत्र च सोऽप्यमङ्गलः समङ्गलः कश्च न काङ्क्षते हि माम्॥
एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतागुणाश्रयम्।
वव्रे वरं सर्वगुणैरपेक्षितम् रमा मुकुन्दं निरपेक्षमीप्सितम्॥ इति।

तस्मादस्मत्प्रवृत्तिर्नोऽप्रयुक्तात उपदेशसहस्रैरपि न निरोद्धुं शक्येति भावः सूचितः अनभिज्ञापक्षे ननु दास्यं देहीति भवतीभिरुक्तं तत्र मूल्यं श्रुत्वा यत्कर्त्तव्यं तत्करिष्यामीत्याशङ्क्य लब्धाऽनल्पमूल्या एव वयमतो मास्तु भवतस्तद्दानचिन्तेत्याशयेनाहुः। वक्ष इति। अलकैः केशप्रान्तभागैः शोणवक्रोष्णीषधारणसमये तदधोभागे लसद्भिरावृतमाच्छादित चूडाबन्धनबर्हापीडधारणसमये कुञ्चितैरनतिदीर्घैरलकैरीषद्वृतमाच्छादितमभ्यङ्गोद्वर्तनादिसमये आसमन्तात्तद्वृतमाच्छादितं मुखं वीक्ष्य ईक्षणाभ्यां सम्यगास्वाद्यानेन मुखोर्ध्वभागशोभोक्ता तथा कुण्डलयोः समयभेदेनालकैरनावृतयोरीषदावृतयोः सपूर्णावृतयोरचपलयोरीषच्चपलयोरत्यन्तचपलयोश्चालङ्कारप्रतिबिम्बरूपा श्रीर्ययोस्ते गण्डस्थले यस्मिंस्तत् अनेन पार्श्वयोः शोभोक्ता अधरसुध यस्मिंस्तच्च हसितं प्रहसितपूर्वकमवलोको यस्मिंस्तत् हसितं चावलोकश्चेति द्वन्द्वैक्यं वा नेपथ्याधोभागयोस्तथा चैतावदेव मूल्य कोटिचिन्तामणिविचित्ररत्नखचितमन्दिरसत्यलोकादिलभ्यामृतादेरप्येकमस्माकं तव च सहजत्वादनायाससाध्यमिति यथोक्तमूल्येन जातं वास्माकं दास्यं न किंचिदपि वक्तव्यं कर्तव्यं वावशिष्यत इति भावः। लोमविशेषोत्थानात्सौरभ्यविशेषाघ्राणाद्वाऽधरेसुधानुभवः ननु नैवं वाच्यं युष्मत्पतिभ्यो राज्ञश्च बिभेमि अहमित्याशङ्क्य किंचैवं प्रत्यक्षोपलब्धं स्वसामर्थ्यं गोपयसीत्याशयेनाहुः। दत्ताभयं च भुजदण्डयुगं तथाचाभयंकरभुजदण्डालंकृतस्य तव नास्ति भयसंभावनेति भावः। अनेन गोवर्द्धनोद्धारणादिना दत्तमभयं येभ्योऽस्मत्पत्यादिभ्यः तेनैव दत्तात्यन्तभयेभ्य इन्द्रादिभ्यश्च भयाभावात्तव दास्ये स्वीकृते नास्त्यस्माकं लोकद्वयेऽपि भयशङ्केत्यपि ध्वनितं गाढालिङ्गनेन कामभयहारित्वमप्यत्र व्यङ्ग्यं दण्डपदेन सुवृत्तादिशोभोक्ता एवं व्यञ्जितेन वीररसेन शृङ्गाररसोऽपि पुष्टो भवति ननु तथापि परदारसंबन्धलाञ्छनरानिष्कलङ्कोऽहं बिभेमीत्याशङ्क्य श्रीरेखोपरितर्ज्जनीं धृत्वा पृच्छन्त्य इवाहुः। वक्ष इति। श्रिया कीर्त्या एकं श्रेष्ठं रमणं यस्मिंस्तत् तथा च हे निष्कलङ्काग्रगण्य! यदि कलङ्काद्बिभेषि तर्हि श्रीमन्नारायणभार्यां लज्जया गृहीतरेखारूपां किमिति वक्षस्युद्वहसि अस्मान्मैवमवोचस्त्वं तु ब्रह्माण्डस्यान्तर्बहिर्वाऽवस्थितस्य कस्यापि कामपि नारीं न त्यक्ष्यसीति

सम्यग्जानीमो वयमतस्तादृशं स्वसामर्थ्यं मावलोपयेति भावः। क्रियाद्वयं च स्वानुरागवैशिष्ट्यस्य मुखचुम्बनभुजवक्षसोरालिङ्गनमिति प्रयोजनद्वयस्य च ध्वननाय अत्र वीनां पक्षिणामीक्षणीयेति श्लेषेण स्वनेत्राणां खञ्जनखगत्वं तत्राऽलककुण्डलपाशयोस्तद्बन्धःगण्डयोः पाशस्थानत्वं सुधाया आहारत्वं हसितावलोकमिति तन्नेत्रयोः स्वनेत्रखञ्जनाकर्षकजनत्वं भुजे वक्षसोः सञ्चारदेशत्वञ्च व्यज्यते तथा च यथोक्तस्वरूपदर्शननितान्तशक्तिमदन्तःकरणानां महाजालवद्धनयनखगानामस्माकं प्रतियात नेत्यादिवाग्वज्रप्रहारेण हृदयानि मा विदारयेत्याशयः मानिनीपक्षे ननु कथं तर्हि ममाङ्गानि निरीक्ष्यमाणा एव तिष्ठथेति चेत्तत्राहुः। वीक्ष्येति। विलोक्यापि किं वयं दास्यो भवामेति कापि नैवेत्यर्थः। यद्वा ननु साहसं भाक्तथा ममाङ्गानि विलोक्य विचार्य्य च वक्तव्यमित्याशङ्क्याहुः। वीक्ष्येति। तथा च न वयं दास्यो भवामेति कामितकोटिभिरङ्गैरपि धैर्य्याच्चालयितुं न शक्या इति भावः। यद्वा यदि तवास्मान् दासीकर्तुं महत्युकण्ठा वर्त्तते तर्हि योषिद्रूपस्य तव विश्वासाभावात् स्वपतिं कञ्चन दर्शय भवतु तं दृष्ट्वा वयं दास्यो भविष्याम इति नर्म व्यञ्जयन्त्य आहुः। वीक्ष्येति वक्षश्च श्रिया युक्तं वीक्ष्य यस्तव एको रमणः कान्तस्तद्दत्ताभयं भुजदण्डयुगवत्तं विलोक्य वयं दास्यो भविष्यामः तेषां बहुत्वख्यापनायैकेत्युक्तं स अस्माकं प्रदर्शनीय इत्युपाहासोक्तिः निवृत्तिपक्षे चित्तैकाग्र्यास्पदस्य भक्तानुग्रहार्थं गृहीतिलीलाविग्रहस्य भगवतो मुखादिकं विचार्य्य तथैवालोक्य च वयं तव दास्यं प्राप्रतियादयाम इति वक्ष्यति तथा च समस्तोपासनाविधायकश्रुतित्तात्पर्य्यगोचरस्यैवंविधस्वरूपस्य भगवतो यास्येनैवोद्धारो नान्यथेति भावः॥ ३९॥

रास–रहस्यम्

र० टी०—तव अलकावृतं कृष्णमेघान्तरितमध्याह्नसूर्यवत् प्रकाशितं कुण्डलश्रीगण्डस्थलाधरसुधं कुण्डलस्य श्रीरिव श्रीः शोभा यस्मिन् एवंभूतं, तथा अधरे सुनिर्मलाकाशे प्रकृष्टप्रकाशसुधाकरस्य सुधावर्षणवत् सुधास्वरूप हसितावलोकं आह्लादकरं मुखं आत्मज्ञानस्य प्रथमोदयं वीक्ष्य आपरोक्ष्येण अनुभवं कृत्वा तथा च दत्ताभयं भुजदण्डयुगं ज्ञानिभक्तेभ्यो दत्तं संसारादभयं येन तथाभूतं ज्ञानवैराग्यात्मकं बाहुद्वयं "वैराग्यबोधौ पुरुषस्य पक्षिवत् पक्षौ विजानाहि विचक्षणत्वम्। विमुक्तिसौधाग्रतलाधिरोहणं ताभ्यां विना नान्यतरेण सिद्ध्यति।" विलोक्य विशेषेण दृष्ट्वा, तथा श्रियैकरमण श्रिया मुक्ति देव्या एक मुख्य रमणं रतिप्रदायकं आनन्ददायकं वक्षः अन्तःकरणं च विलोक्य दास्यः तुरीयावस्थां त्वया दातुं योग्याः भवामः॥ ३९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गृहपरित्यागपूर्वकं दास्यप्रार्थनायां कारणमाहुः। वीक्ष्येति। कुण्डलयोः श्रीर्ययोस्ते गण्डस्थले यस्मिन् अधरे सुधा यस्मिन् तच्च तच्च तत् हसितयुक्तोऽवलोको यस्मिन् तदलकावृतमुखम् वीक्ष्य दत्तं बहुभ्यो भक्तेभ्योऽभयं येन तद्भुजदण्डयुगं च श्रिय एकमेव रमणं रतिजनकं वक्षश्च विलोक्य दास्यो भवाम॥ ३९॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वीक्ष्यालकावृतमिति वीक्ष्या दर्शनीया अलकाश्चूर्णकुन्तलास्तैरावृतं च तन्मुखं च कुण्डलश्रीमद्गण्डस्थलं च यस्य तदधरयोर्दन्तवसनयोः सुधामृतं यस्य तत्तच्च हसितेन हासेन सहितोऽवलोको यस्य तद्दत्ताभयं भुजदण्डयुगं च विलोक्य वस्त्रवितरणस्य भुजद्वितीयकार्यत्वात्तथा रंस्यथेति कथितालिङ्गनादितदङ्गस्यापि साध्यत्वात्तद्दत्ताभयता तद्द्वाराऽस्मदनुभूतेति सूचयन्त्येनेनेति ज्ञेयं। श्रियैकरमणं। यणागमो गतं। रमाविलासालयं वक्षश्च विलोक्य तव दास्यो भवामो लोट्। त्वं चामदस्मदभिमुखमागच्छदास्यं मुखं यस्य स भवेत्यप्यर्थः। एति हरिसम्बोधनं॥ ३९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु भवतीनां सर्वासामेव दास्यवरणे को हेतुः सालोक्यादेरपि फलस्य विद्यमानत्वात्तत्राहुः। वीक्ष्यालकावृतमुखमिति। अनेन लोकेप्सायां पतिर्न त्यक्तव्य इत्यत्रोत्तरमुक्तं लोके हि पुरुषार्थत्रयं चतुर्विधो मोक्षः इन्द्राद्यैश्वर्यभावेन स्वर्गप्राप्तिः इह लोके परमा लक्ष्मीः तदत्र त्रयमपि दास्ये सर्वोत्कृष्टमस्तीति। तदुपपादयन्ति। प्रथमं सारूप्यं सालोक्यं सामीप्यं सायुज्यमिति मोक्षभेदाः ते दास्याग्रे अप्रयोजकाः यतो मुखारविन्ददर्शनेन ते कामा निवर्त्तन्त इति भक्तिरूपमुखारविन्दस्य तदपेक्षयोत्कृष्टधर्मवत्त्वं निरूप्यते अलकाः सारूप्यमिव प्राप्ता भ्रमराः ते बहव एवात्र आवृत्य मुखं तिष्ठन्ति अतः सारूप्यं गतानामपि यदि भक्तिशेषत्वं तदा किं सारूप्येण किञ्च मुखं कुण्डलश्रिकुण्डलाभ्यां श्रीर्यस्य कुण्डलयोर्वा श्रीर्यस्मात् सामीप्ये हि नैकट्यं भवति। अत्यन्तसामीप्यं जायमानमपि कुण्डलादप्यधिकं न भविष्यति ते चेत्सांख्ययोगरूपे भगवत्प्रमाणावलम्बिनी भगवदधीनगतिमती पुनर्भगवन्मुखनिरीक्षके तदा किं सामीप्येन किञ्च गण्डस्थलाधरसुधीमति। गण्डौ स्थलरूपौ विशालौ स्थले हि रसः पातुं शक्यत इति अधरे च सुधा यस्मिन् गण्डस्थले स्थित्वा अधरसुधा पातुमत्र शक्येति सालोक्ये हि आनन्दमात्रमक्षरामृतपानञ्च अक्षरापेक्षयापि गण्डस्थले स्थितिः चुम्बनाद्यर्थमुत्तमाऽधररसश्च अक्षररसादुत्तम इत्युक्तं कुण्डलश्रीयुक्तं गण्डस्थलमित्यस्मिन्पक्षेऽपि सामीप्यात् भक्तौ शास्त्रीयो रसः अधिको निरूपितः परस्परं त्वद्गुणवादरूपः अक्षरादाधिक्यं तु अधररसे स्पष्टमेव किञ्च हसितावलोकमिति।

हसितपूर्वकमवलोको यस्मिन् ब्रह्मानन्दे प्रविष्टानां न भक्तिविलासः हासो हि सर्वरसोद्बोधरूपः ज्ञानं चाविर्भूतं ब्रह्मानन्दे तु द्वयमप्यव्यक्तं जले निमग्नस्य जलपानवत् अनुभवरसो हि भिन्नतया स्थितौ भवति। अतो भक्तिरूपमुखस्य दृष्टत्वात् दास्यमेव फलं न मोक्षः भुजदण्डयुगञ्च विलोक्य इन्द्रादिभावेनापि स्वर्गो न प्रयोजक इति निरूपयन्ति दत्ताभयमिति। स्वर्ग इन्द्र परमकाष्ठां प्राप्तः तेऽपि दैत्येभ्यो निरन्तरं भीताः इन्द्रादयः तेषामप्यभयदात् भगवतो भुजदण्डयुगलं तच्चेदत्रैवास्ति तत्परित्यज्य किमिन्द्रत्वेन चकारान्न केवमभयमात्रं प्रयच्छति। किन्तु क्रियाशक्त्या यज्ञादिना हविरपि प्रयच्छति। यथाग्रे इन्द्रः स्वाधिकारसमाप्तौ मुक्तो भवति। दण्डपदेनानुल्लङ्घ्यशासनत्वमुक्तम् उभयत्र च दण्डो युगपदेन निरूपितः ततो हि सर्वथा दैत्यनाशो भवति किञ्च वक्षोऽपि विलोक्य लोकानां श्रिया रमणं भवति। श्रीरपि तत्र रमते चकाराद्धर्मस्यापि अतो दास्य एव भवामः अत्र वीक्षणस्य दासीभवनहेतुत्वोक्त्या यत्रायं भावो नास्ति तेषां नैतद्वीक्षणमस्ति विधिप्रयुक्तत्वाभावेन तद्विपरीतविध्यनङ्गीकारश्च युक्त इति ज्ञाप्यते यदप्युक्तं भगवता अस्वर्ग्यमित्यादि स्वभजने दोषषट्कं तदपि षड्भिर्गुणैर्निवारितं नहि परमपुरुषार्थसाधकं पापं भवति फलत एव पापस्य निन्द्यमानत्वात् ॥ ३९ ॥

श्रीसुबोधिनी-सारः

ननु गृहस्वाम्यं त्यक्त्वा दास्ये को लाभ इत्यत आह अलकैः केशैरावृतं कुंडलयोः श्रीर्ययोस्ते गंडस्थले कपोले यस्मिन् अधरे सुधा यस्मिंस्तच्च तच्च हसितेन सहावलोको यस्मिन् तत्तव मुखं वीक्ष्य दत्तमभयं येन शरणं गतानां तं भुजदंडयोर्युगं युगलं विलोक्य श्रिया एकं रमणं रतिजनकं वक्षश्च वीक्ष्य दास्यो वयं स्मः ॥ ३९ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

वीक्ष्यालकेत्यत्र, चतुर्विधो मोक्ष इत्यादिना पुरुषार्थत्रयविवरणम्। अत्रालकावृतादिपदैर्मोक्षादिनिराकरणोक्तेरयमाशयः। मूले हि प्रभोरङ्गान्येवोक्तानि दासीभवनहेतुभूतेक्षणविषयत्वेन। तथा च त्वां वीक्ष्येत्येतावतैव चारितार्थ्येपि यत्प्रत्यङ्गनिरूपणं, तत्रापि भूषणानां, तत्साभिप्रायमिति स निरूप्यत इति। **सारूप्यमिवेति**। सारूप्यमुक्तिमिवेत्यर्थः। अत्रालिसारूप्यवदलकैः सारूप्यमुक्तिमन्तो भक्ता लक्ष्यन्ते। केशा बद्धा अपि भवन्ति, न त्वलकाः। इतोपि तथा। 'मत्सेवया प्रतीतं च' 'सालोक्यसार्ष्टिसामीप्ये'त्यादिवाक्यैश्च तासां चतुर्विधानामपि दास्यान्न्यूनत्वं सिद्धम्। तत्रैतद्रसप्राप्त्यभावादेतस्य च ततोधिकत्वाद्धि तद्वरणम्। अत एवात्राप्यावरणरूपत्वमेवोक्तम्। नह्यन्त स्थितिं विना परितः स्थितिमात्रेण रसपानमलीनां सम्भवति। मुखस्याम्बुजत्वमप्येतेषां रसपानाभावज्ञापनायैव नोक्तम्। किञ्च, कमलं हि न पेयमपि तु तत्स्थो रसस्तथा न तदास्यं किन्तु स्वयमेव रसात्मकमित्यपि ज्ञापयितुं तत्त्वं नोक्तमिति ज्ञेयम्। बहुभिरावरणान्महारसत्वं व्यज्यते। किञ्च। लीलाया नादस्य वा श्रवणेन पूर्वं जनितो यो भावः स एतद्दर्शनेन पुष्टः क्रियते। प्रचुरार्तेर्लयो विविधरसभावोत्पत्तिश्चेति स्थितिलयोत्पत्तिकर्तृवाचकवर्णात्मकनाम्ना सूच्यते। अतो युक्तं दासीभवनमिति भावः। त्वत्सुन्दरस्मितेत्यादिनोक्ताधिकारवतीनां देये दास्ये मुखं स्वाधीनं भवतीति तच्छेषभूतानामनङ्गीकारः सर्वत्र। **गण्डस्थलेत्यत्र, स्थले हीति**। एतज्ज्ञापनायैव स्थलपदम्, अन्यथा नोक्तं स्यादिति भावः। **भुजदण्डयुगमित्यत्र, उभयत्रेति**। इन्द्रादीनां भयदैरपि दैत्यर्भगवच्छासनमनुल्लङ्घ्यमित्यैहिकानिष्टनिवर्तकः। देवानामपि तत्तथा। यज्ञाकरणे द्विजान्दण्डयत्येवेत्यनुल्लङ्घ्याज्ञत्वेन मुक्तिहेतुभूतशुद्धिजनकहविर्दानेन पारलौकिकसुखप्रद इत्यर्थः। हविर्दानेन परलोकसाधने विशेषमाहुः **तत** इति। भगवत्क्रियाशक्तिरूपवैदिकक्रियासम्बन्धिहविर्भोगादित्यर्थः। सर्वथा अन्तःकरणस्थानामपीत्यर्थः। (भुजदण्डावित्यनुक्त्वा द्वित्वसंख्यावाचिपदमेकवचनान्तं यदुक्तं तत्रायं भावः। द्वयोः पृथक् प्रतीतौ ह्यपेक्षाबुद्धिः। तया च द्वित्वम्। प्रकृते चाश्लेषदशायामुभयोर्भुजयोरेकवत् प्रतीतिः। सा च न स्वाश्लेषसमये संभवति, किन्त्वन्यस्याः। तथा च तादृग्दर्शनं भावोद्बोधकं भवत्येवेति तथापि द्वयपदमनुक्त्वा युगपदं यदुक्तं तेन युगस्वभावो यथा न निवर्तयितु शक्यः केनापि, तथा भुजदण्डयोरप्येकवचनसूचितार्थलक्षणः स्वभावो न मर्यादाशास्त्रादिभिर्निवर्तयितुं शक्यो भवति च। तथैवेति ज्ञाप्यते। तेनास्माकं दासीभवनमावश्यकमिति।) ॥ ३९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'गृहस्वाम्यं विहाय किमिति दास्यं प्रार्थ्यते ?' तत्राहुः—वीक्ष्येति। अलकैः केशैरावृतं मुखं तथा कुण्डलयोः श्रीः शोभा ययोस्ते गण्डस्थले यस्मिन्, अधरे च सुधा यस्मिंस्तच्च तच्च तव मुखं वीक्ष्य दत्त भक्तेभ्यः संसारादभयं येन तथाभूतं च भुजदण्डयुगं विलोक्य श्रियो लक्ष्म्या एकं मुख्यं रमणं रतिजनकं तव वक्षश्च विलोक्य दास्यो भवामेति। श्रियैकेति सन्धिरार्षः ॥३९॥

अन्वितार्थप्रकाशिका

चतुर्थदिक्स्था आहुः—वीक्ष्येति ॥ अलकैः केशैरावृतं मुखं तथा कुण्डलयोः श्रीः शोभा ययोस्ते गण्डस्थले यस्मिन् अधरे सुधा यस्तिंस्तच्च हसितयुक्तोऽवलोको यत्र तत् तव मुखं वीक्ष्य दत्तं भक्तेभ्यः संसारादभयं येन तथाभूतं च भुजदण्डयुगं विलोक्य श्रियो लक्ष्म्या एकं मुख्यं रमणं रतिजनकं तव वक्षश्च विलोक्य दास्यो भवामेति। श्रियैकेति सन्धिरार्षः तृतीया वा ॥३९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु दासत्वं प्राप्तौको हेतुरित्याशंक्याहुः वीक्षति कुंडलयोः श्रीशोभाययो एवंभूतेगंडस्थले यस्मिन् अधरेस्फुटायस्मिन् तच्च तच्च तत् हसितमनेहास्येन युक्तोऽवलोको यस्मिन् तत् तव अलकैः स्निग्धकुटिलकेशैः आवृत्तमाछादितं मुखं वीक्ष्य दत्तं अभयं येन तत् भुजदंडयोर्युगं युगलं च विलोक्य श्रिया शोभयाक्तत्वा एकमेव रमणीं स्त्रीणं रतिजनकं वक्षो हृदयं च विलोक्य वयं दास्यो भवाम ॥ ३९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु गृहस्वाम्यं विहाय दास्यं किमिति प्रार्थ्यते अत आहुः ॥ वीक्ष्येति ॥ कुण्डलयोः श्रीर्ययोस्ते गण्डस्थले यस्मिंस्तत् अधरे सुधा यस्मिंस्तच्च तच्च, हसितयुक्तोऽवलोको यस्मिंस्तत्, तव अलकैश्चूर्णकुन्तलैरावृतं च तत् मुखं च तत्, वीक्ष्य, दत्ताभयं स्वाश्रितानामभयप्रदं, भुजदण्डयुगं दण्डसमानभुजयुग्मं च, श्रियो लक्ष्म्याः, एकं रमणं रतिजनकं क्रीडायोग्यं वा । संधिरार्षः । वक्ष उरःस्थलं च विलोक्य, तवैव दास्यः भवाम । त्वद्रूपस्य निरतिशयभोग्यत्वादिति भावः ॥ ३९ ॥

कृष्णप्रिया

प्रियतम ! तुम्हारा सुन्दर मुखकमल, जिसपर घुँघराली अलकें झलक रही हैं, तुम्हारे ये कमनीय कपोल, जिनपर सुन्दर-सुन्दर कुण्डल अपना अनन्त सौन्दर्य बिखेर रहे हैं, तुम्हारे ये मधुर अधर, जिनकी सुधा सुधा को भी लजाने वाली है, तुम्हारी यह नयनमनोहारी चितवन, जो मन्द-मन्द मुसकान से उल्लसित हो रही है, तुम्हारी ये दोनों भुजाएँ, जो शरणागतों को अभयदान देने में अत्यन्त उदार हैं और तुम्हारा यह वक्षःस्थल, जो लक्ष्मीजी के सौन्दर्य की एकमात्र देवी का नित्य क्रीडास्थल है, देखकर हम सब तुम्हारी दासी हो गयी हैं ॥ ३९ ॥

का स्त्र्यङ्ग ते [1]कलपदामृतवेणुगीतसम्मोहिताऽऽर्यचरितान्न चलेत्त्रिलोक्याम् ।
त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद् गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥ ४० ॥

कर्दमक्षमा

अन्वयः—हे अङ्ग, त्रिलोक्याम्, का, स्त्री, "वर्तते, या" ते, कल, पद, अमृत, वेणुगीत, सम्मोहिता, आर्य, चरितान्न, चलेत्, हे, अङ्ग ? यद्, गोद्विजमृगाः ? त्रैलोक्य, सौभगम्, इदम्, रूपम्, निरीक्ष्य, "च वेणु, नादं, श्रुत्वा", पुलकानि, अबिभ्रन् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु जुगुप्सितमौपपत्यमित्युक्तं तत्राहुः । का स्त्रीति । अंग हे कृष्ण कलानि पदानि यस्मिंस्तदायतं दीर्घं मूर्छितं स्वरालापभेदस्तेन । पाठांतरे कलपदामृतमयं यत् वेणुगीतं तेन संमोहिता का वा स्त्री आर्यचरितान्निजधर्मान्न चलेत् ! यन्मोहिताः पुरुषा अपि चलिताः किं चत्रैलोक्यसौभगमिति यद्यतः अबिभ्रन्न बिभरुः । त्वद्द्योतकशब्दश्रवणमात्रेणापि तावन्निजधर्मत्यागो युक्तः किं पुनस्त्वदनुभवेनेति भावः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पूर्वोक्तौपपत्ये जुगुप्सितत्वं परिहरंत्य आहुः—कलानि व्यक्तमधुराणि । निजधर्मात् पातिव्रत्यलक्षणात् । कलपदगानश्रवणजानंदमग्नानां धर्माऽधर्मस्मृतिरेव नोदेतीति भावः । गवादयोंतश्चेतनाः । येन वेणुनादेन मोहिताः पुरुषा अपि 'शक्रशर्वपरमेष्ठिपुरोगाः' इत्युक्तेः शंकरप्रभृतयः स्त्रीवेशं कृत्वा गोपीवृंदे मिलिता अभूवन्निति । स्त्रीणां तु का वार्तेति भावः । न केवलं मनुष्याणामेव मोहोऽपि तु तदितरेषामपीत्याहुः—किं चेति । त्रैलोक्यस्य सौभगमलंकारमिदमस्मद्दग्गोचरीभूतं रूपं सुंदरतरावयवोपक्लप्तमाकारम् । इति भाव इति-त्वद्द्योतकशब्दस्य मधुसूदनमुरारिगोविन्देत्यादिशब्दस्य श्रवणमात्रेण विनष्टा खिलद्वंद्वानां विधिनिषेधकैंकर्याभावान्निजधर्मस्य वर्णक्रमादागतस्य त्यागो युक्त एवं "यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वंद्वधर्मा विनष्टा" इत्युक्तेः । "श्रवणवर्णनभावमथापि वा न हि भवामि यथा विधिकिंकरः" इति वक्ष्यंति स्वामिचरणाः । पुनस्त्वदनुभवेनाहं ब्रह्मास्मीति साक्षादात्मसाक्षात्कारेणेत्यपि तात्पर्यम् । यथाश्रुतन्तु त्वद्द्योतकशब्दे वेणुध्वनिरिमं कृष्णो वादयत्येवंरूप इति ॥ ननु युष्माभिर्धर्माय जलांजलिर्दत्त एव तत्किमन्या अपि पतिव्रताः "विदूषयति निर्लज्जः स्वयं दुष्टः परानपि" इति न्यायेन दूषयथ । मद्वक्षस्यौत्पत्तिक्येवेयं लक्षणविशेषरूपा सुवर्णरेखा भ्राजते, तां च दृष्ट्वा पतिव्रता शिरोमणिं लक्ष्मीमपि दूषयंत्यस्तस्या-

---

[1] यतमूर्च्छितेन–श्रीधर. वंशी. जीव. वीर. विश्व. शुक. सु. रा. ध. ; मृतवेणुगीत–विज. ।

मप्यपराधिन्यः कथं भवथेति तत्र न कामपि दूषयामः किन्तु त्रिजगतामपि धर्मध्वंसनाय विधात्रा त्वं सृष्टोसीति सरोषचापलमाहुः—का स्त्री। अंग हे श्रीकृष्ण कलानि पदानि यत्र तदमृतरूपं यद्वेणुगीतं तेन 'कलपदायतमूर्छितेन' इति पाठे आयतं दीर्घं मूर्छितं स्वरालापभेदस्तेन संमोहितेति। न स्त्री दूष्यते किन्तु त्वत्कर्तृकं वेणुगीतमेवेति भावः। आर्य्यचरितात्पातिव्रत्यलक्षणनिजधर्मान्न चलेत्। अपि तु सर्वैव चलेदिति धर्मत्याजनलक्षणप्रत्यवायं त्वं प्राप्स्यस्येवेति भावः। न केवलं त्वद्गुणस्यैव धर्मध्वंसकताऽपि तु वद्रूपस्याऽपीत्याहुः—त्रैलोक्येति। ऊद्ध्वाधोमध्यदेशवर्तिषु प्राकृताप्राकृतलोकेष्वपि सौभगमेव यस्य तत्। न तु धर्मध्वंसकत्व-हेत्त्कस्याप्यत्र द्वेष इति भावः। न च स्त्रीणां स्वाभाविकः कामोऽपि मोहे हेतुरस्तीति वाच्यम्, यतो जंगमस्थावराणां सर्वेषामपि वैवश्यप्रापकौ तव रूपगुणावित्याहुः—यद्यतो गीतरूपाभ्यामबिभ्रन् अबिभरुः तस्माद्धे राजन् किं बहुना 'शक्रशर्वपरमेष्ठिपुरोगाः कश्मलं ययुः' इति वेणुगीताध्यायात्परमत्त्वविदामपि मोहः 'विस्मापनं स्वस्य इति। तव तस्यापि चमत्कारो दृष्ट इति श्रीशुकोक्तिरप्यासीदिति ज्ञेयम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वेवं पतिव्रताभिरुपहसनीया भविष्यथ तत्र स्फुटमेव सरोषदैन्यमाहुः। का स्त्रीति। त्रिलोक्या वर्त्तमाना का स्त्री न चलेत् अपि तु सर्वैव चलेदित्यर्थः। तच्च देव्यो विमानगतय इत्यादिना सूचितं कलेति पूर्वं व्याख्यातं पदेति प्रतिपदमपि तादृशं बोधयन्ति। आयतेति। तत्र श्रीकृष्णस्य निर्बन्धं बोधयन्ति स्वेषां च धैर्य्येणापि तत्कालक्षेपं वारयन्ति पाठान्तरे तस्यालौकिकस्वादत्वं व्यञ्जयन्ति तत्रादर्शन एवं वार्त्ता दर्शनेऽपि तथैवेत्येवं सर्वतो मार एवेति सभयमिवाहुः। त्रैलोक्येति। त्रैलोक्यस्य ऊर्ध्वाधोमध्यवर्त्तमानयावल्लोकस्य सौभगं सौभाग्यं जनप्रियत्वं सौन्दर्य्यं वा यस्मिन् यदन्तर्भूतमित्यर्थः। तदिदं प्रत्यक्षवर्त्तमानमित्यन्यथात्वं निरस्तं यद्वा इदमेतादृशमसाधारणमित्यर्थः। निरीक्ष्येति। यस्य श्रवणादिनापि मोहः स्यादिति कैमुत्यं बोधयन्ति का स्त्रीति। यत्र पुरुषा अपि स्वयं भगवानपि मुह्येयुरिति भावः। शक्रशर्वपरमेष्ठिपुरोगाः कश्मलं ययुरिति वक्ष्यमाणात् विस्मापनं स्वस्य चेति तृतीयोक्तेश्च अहो अस्तु तावत्तादृशसारासारविदां तेषां वार्त्ता याभ्यां वेणुगीतरूपाभ्यां गवादयोऽपीति श्रवणदर्शने लभ्येते ते स्वप्रकाशत्वान्नासम्भाव्ये अनेन लोकेष्वभिरित्यस्योत्तरं निषेधार्थश्चायम् ननु यदि ममाङ्गदर्शने युष्माकं न क्षोभस्तर्हि कथमितश्चलितुमिच्छा तत्राहुः। का स्त्रीति। का स्त्री तज्जातिमात्रं कलेत्यादिलक्षणापि आर्य्यचरितात् सदाचाराद्धतोः ते त्वत्तः सकाशात् न चलेत् नापयायात् तथा यत् यस्मात् गवादयोऽपि पुलकान्यबिभ्रन् तत इदमीदृशं रूपं निरीक्ष्य च समवलोक्यापि तस्मादेव हेतोः का नापयायात् अपि तु सर्वैवापयायादित्यर्थः। सुन्दरीणां सुन्दरपरपुरुषनिकटे स्थितिर्हि बाढं लोकविगानहेतुरिति तदेवं यद्यपि न तत्संमोहिता नापि सम्यक् तद्वीक्षणकारिकाः तथाप्यपयास्याम इति भावः ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु शिष्टवर्गशिरोधार्य्यास्तथापि महद्वल्लोकशिक्षार्थमवश्यं सदाचारः पालयितुं युज्यते, तत्र सदैन्यरोषमाहुः—केति त्रिलोक्यां वर्त्तमाना का स्त्री न चलेत्, अपि तु सर्वैव चलेदित्यर्थः। श्रीशिवांकस्थ पार्वत्यादीनामपि मोहश्रवणात्, तच्च स्कान्दादौ प्रसिद्धमेव। अत्रापि (भा० १०।२१।१२) 'देव्यो विमानगतयः' इत्यादिना सूचितमेव, कदाचिद्वा वेणुगीतं नोदेतु नाम, रूपञ्च परममोहनं सदा विराजते इति सविकारमाहुः—त्रैलोक्येति। त्रैलोक्यस्य ऊद्ध्वाधोमध्यवर्त्तमानलोकत्रयस्य सौभगं सौभाग्यं जनप्रियत्वं सौन्दर्य्यं वा यस्मिन् यस्माद् वा, तदिदं प्रत्यक्षवर्त्तमानमित्यन्यथात्वं निरस्तम्। यद्वा, असाधारणम्, अनेन श्रीरघुनाथस्य यत् सौन्दर्य्यं दृष्ट्वा मुनयोऽपि मोहिता भावविशेषं गताः। तथा च पाद्मोत्तरखण्डे—'पुरा महर्षयः सर्वे दण्डकारण्यवासिनः। दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम् ॥ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले' इत्यादि; महाकौर्म्ये च—'अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे। भर्त्तारञ्च जगद्योनिं वासुदेवमजं विभुम् ॥' इति, ततोऽपि वैशिष्ट्यमभिप्रेतम्, अधुना निजाशेषभगवत्ताप्रकटनात्, यद्वा, इदमनिर्वचनीयं परमाद्भुतमित्यर्थः। प्रतिबिम्बादौ दर्शनात्तत्रापि भावविशेषोत्पादनेन विस्मापनात्, तथा चोक्तमुद्धवेन (भा० ३।२।१२) 'विस्मापनं स्वस्य च' इति। निरीक्ष्येति वेणुगीतस्येव श्रवणस्मरणादिनापि मोहः स्यादेव, तत्रापि साक्षात् दृष्ट्वा का वा न चलेदित्यर्थः। यद्यस्माद् रूपात्, गोशब्देन वृषवत्समहिष्यजादयोऽपि ग्राम्यपशवो लक्ष्यन्ते, गावः पशुत्वेन विवेकहीना अपि, पुलकानीति बहुत्वेन सर्वांगेषु सदैवेति द्योत्यते, तैश्चान्येऽपि विकारा उपलक्ष्याः, (भा० १०।२१।१९) 'अस्पन्दनं गतिमताम्' इत्याद्युक्तेः। अबिभ्रन् भावविशेषोदयादिति वेणुगीतादपि रूपस्य परममोहनत्वमुक्तम्, यच्च श्रीरुक्मिण्या देव्या वक्ष्यते (भा० १०।५२।३७)—'रूपं दृशां दृशिमतामखिलार्थलाभम्' इति उद्धवेन चोक्तम्—'विस्मापनं स्वस्य च' इति तत्तद्वचनादप्यस्य वैशिष्ट्यं ज्ञेयम् चक्षुष्मतां सौन्दर्य्यग्रहणसम्भवात्, तथा परमविदग्धशिरोमणेस्तस्य सदसद्विचारनिष्ठासद्भावेनाश्चर्य्यविशेषदृष्ट्या विस्मयसम्भवाच्च, अत्र च गवादीनां तत्तदभावेऽपि प्रेमविकारोक्तेरिति दिक् अन्यत्तैर्व्यञ्जितम्। तत्र पुरुषा अपि चलिता इति द्विजद्रुम-मृगाणामपि पुलकोद्भेदस्य किं वा (भा० १०।३५।१५) 'शक्र सर्व-परमेष्ठि-पुरोगाः' इत्यादिना वक्ष्यमाणस्य देवादीनामपि मोहस्यानुसारेणेति। अथवा यदित्यव्ययम्, याभ्यां वेणुगीतरूपाभ्यामित्यर्थः।

वेणुगीतस्य मोहनत्वं विशेषत एकविंशाध्याये व्यक्तमेवोक्तम् , पञ्चत्रिंशे च वक्ष्यते । अन्यत् समानम् । एवं तस्य वेणुगीतरूपयोः परममोहनत्वमुक्तम् , कृष्णनाम्नो मोहनत्वमंगेत्यनेन सूचितमेव, परममोहनत्वेन श्रीकृष्णेति साक्षात् कुत्राप्यसम्बोधनात् । अतोऽशक्त्या शिष्टाचारपरित्यागे कोऽपि दोषो नाम न घटेतेति भावः । वस्तुतस्तु तादृशजनानां सदाचारेऽनधिकारात् , तच्च पूर्वं विवृतमेव, अत एव श्रीस्वामिपादैर्लिखितं तद्द्योतकशब्दश्रवणमात्रेणापि तावन्निजधर्म्मत्यागो युक्त इति, ईश्वरस्य च सर्वशक्तिमत्त्वाल्लोकसंग्रहार्थं सदाचारपरिपालनं तस्य सम्भवेदेव, तत् प्रेमविवशानां चाशक्त्या कथं सम्भवेत् ? एवमेव तेषां माहात्म्यविशेषो निगूढोऽपि तेनैव (भा० ११।१४।१६) 'निरपेक्षं मुनिं शान्तम्' इत्यादि वचनैरभिव्यञ्जित इति दिक् । अनेन (२७ श० श्लो०) 'श्रवणात्' इत्यस्योत्तरम् । पुरुषाणां तत्रापि मुनीनामपि पूर्वावतारे अत्र च गवादीनामपि साक्षात् मोहो यत्र स्यात् तत्रास्मादृशीनां का वार्त्तेति विवेकहानावस्माकं न दोष इति । किं वा यस्य निरीक्षणवेणुगीतश्रवणमात्रेण गवादीनामपीदृशानन्दलक्षणं सम्पद्यते, तस्य यथायथं साक्षादुपभोगेन प्रेमविशेषणलक्षणः परमानन्दः सम्पत्स्यत एवेति सन्निकर्षो हि युक्त एवेति । वस्तुतस्तु यस्य श्रवणादिनापि भावः स्यात् , तस्य सन्निकर्षण भावो विशेषतः सम्पद्येतैवेति । श्लेषार्थः—का स्त्री आर्य्यचरिताच्चलेत् , अपि तु न कापीत्यर्थः । यन्निरीक्ष्य गवादयः पुलकानि बिभ्रति स्म, इदं ते तव रूपं सौन्दर्य्यं त्रिलोक्यां नास्ति किम् ? काक्वा अपि त्वस्त्येवेत्यर्थः । अतोऽनेन त्वं मा गर्वमावहेति भावः । यद्वा, हे कलपदायतवेणुगीत ! हे सम्मोहित ! कामसम्मोहित ! इत्यधैर्य्यमुक्तम् , ते त्वत्तः सकाशात् , का न चलेत् , गृहं न यायात् ? किम्भूतात् ? आर्य्यचरितात् परमधार्मिकादिति सोल्लुण्ठम् , यद्वा, हे कलापदायतवेणुगीतसम्मोहितार्य्य ! इति परमधाष्टर्य मुक्तम् । ते तव चरितात् पारदारिकत्वलक्षणात् का न चलेत् , नापयायात् केदं स्वीकुर्यादित्यर्थः । अन्यत् समानम् ।। ४० ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

आर्यचरितात् यद्यत् स्वेन रूपेण यत्संबन्धितः ।। ४०–४४ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यदुक्तं जुगुप्सितं च सर्वत्र ह्यौपपत्यमिति तस्योत्तरमाहुः का स्त्रीति । अङ्ग हे कृष्ण ! कलानि मधुराणि पदानि यस्मिंस्तदायनं दीर्घं मूर्च्छितं स्वरालापभेदस्तेन संमोहिता सती कलपदायतवेणुगीतसंमोहितेति स्पष्टोऽर्थः । लोकत्रयसुन्दरमिदं रूपं निरीक्ष्य च त्रिलोक्यामपि का वा स्त्री आर्यचरितात्सतामाचारान्निजधर्मान्न चलेत्सर्वापि चलेदेवेत्यर्थः । यद्यतो गावो द्विजाः पक्षिणो मृगाश्चापि पुलकानि रोमाञ्चान् अबिभ्रन्नबिभरुः तद्द्योतकशब्दश्रवणमात्रेणापि तिरश्चामपि निजधर्मत्यागो दृष्टः किं पुनर्मादृशामिति भावः ।। ४० ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अस्मत्स्मरशमनं च न चित्रमिति भावेनाहुः । का स्त्रीति । ते तव कलपदैः अव्यक्तमधुरशब्दावयवैः अमृतं श्रवणानन्दकरं यद्वेणुगीतं वंशगानं तेन समोहिता त्रिलोक्यां त्रैलोक्ये का स्त्री त्रैलोक्यसौभगमलंकारभूतमिदं रूपं सुन्दरतरावयवोपक्लृप्ताकारं च नितरां दृष्ट्वार्याणां सतां चरितान्मार्गादिति शेषः । न चलेत्स्खलिता न भवतीन्वयः इदं न चित्रमित्याहुः । यदिति । यद्यस्माद्वेणुगानात् यस्य रूपस्य स्पर्शादिना वा गवादयोऽन्तःप्रज्ञाश्चेतनराशयः पुलकानि रोमाञ्चानि अबिभ्रन् दधुरिति ।। ४० ।।

श्रीमज्जीवगोस्वामिकृतो: बृहत्क्रमसन्दर्भः

ननु यद्येवं भवत्यः स्वभावसिद्धाभिमानिन्यः, तदा कथं मद्वचसामभिप्रायानभिज्ञाः सत्यः किं तप्यथ ? तत्राप्यन्या आहुः—का स्त्रीत्यादि । हे अङ्ग ! ते तव कलपदायतवेणुगीतसम्मोहिता सती आर्यस्य तव चरिताद्धेतोर्न चलेन्न भ्रमेत् । एवमेव तव भ्रामकं चरितम् , येन त्रिलोक्यां का स्त्री न चलेत् ? सर्वैव चलति । अत्र स्त्रीणां न दूषणम् , तवैवेत्यर्थः । न केवलं तव चरितादेव, इदं रूपं निरीक्ष्य च, यतो रूपाद्गोद्विजद्रुममृगा अपि पुलकान्यबिभ्रन् पुलकिनो भवन्ति ।। ४० ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नन्वेवमेवोपासना, भद्रं भो भद्रम् , तर्हि सरागा एव भवत्यः ? न हि न हि मद्भक्ता इत्याशङ्क्य मध्या धीराः प्रौढा आहुः—कास्त्र्यङ्ग ते इत्यादि । हे अङ्ग ! अयं तु तवैव वेणुध्वनेस्तव रूपस्य चायं दोषः, न स्त्रीणां यद्यस्माद् गोद्विजद्रुममृगा अपि पुलकानि बिभ्रति, तेन कलपदायतवेणुगीतेनैव संमोहिता सती त्रैलोक्यसौभगमिदञ्च रूपं निरीक्ष्य का स्त्री न चलेदार्यचरितात् कुलव्रतात् आर्यचरिताद्वेदवर्त्मनो वा, आर्यस्य तव चरितात् हेतोरिति वा न चलेत् , अस्थिरा न भवति ? एतेन स्त्रीणां न दोषः, स्त्रियस्तु त्वयि निरुपाधिरतिमत्य एव, त्वमेव वेणुध्वानेन तासु रागान्तरं जनयसीति प्रागल्भ्यम् ।। ४० ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु युष्माभिर्धर्ममार्गाय जलाञ्जलिर्दत्त एव तत् किमन्या अपि पतिव्रता "विदूषयति निर्लज्जः स्वयं दुष्टः परानपी"ति न्यायेन दूषयथ मद्वक्षस्यौत्पत्तिकयेव येयं लक्षणविशेषरूपा सुवर्णरेखा भ्राजते तां च दृष्ट्वा पतिव्रताशिरोमणिं लक्ष्मीमपि दूषयन्त्यस्तस्यामप्यपराधिन्यः कथं भवथेति तत्र न कामपि दूषयामः किंतु त्रिजगतामपि धर्मध्वंसनाय विधात्रा त्वं सृष्टोऽसीति सरोषचापलमाहुः। का स्त्री अङ्ग हे श्रीकृष्ण ! कलानि पदानि यत्र तदमृतरूपं यद्वेणुगीतं तेन कलपदायतमूर्च्छितेनेति पाठे आयतं दीर्घं मूर्च्छितं स्वरालापभेदस्तेन संमोहितेति न स्त्री दूष्यते किंतु त्वत्कर्तृकं गीतमेवेति भावः। आर्यचरितात् पातिव्रत्यलक्षणनिजधर्मान्न चलेत् अपितु सर्वैव चलेदिति धर्मत्याजनलक्षणप्रत्यवायं त्वं प्राप्स्यस्येवेति भावः। न केवलं त्वद्गुणस्यैव धर्मध्वंसकता अपि तु त्वद्रूपस्यापीत्याहुः। त्रैलोक्येति। ऊर्ध्वाधोमध्यदेशव तेषु प्राकृताप्राकृतलोकेष्वपि सौभगमेव यस्य तत् ननु धर्मध्वंसकत्वहेतुकः कस्याप्यत्र द्वेष इति भावः। नच स्त्रीणां स्वाभाविकः कामोऽपि मोहे हेतुरस्तीति वाच्यं यतो जङ्गमस्थावराणां सर्वेषामपि वैवश्यप्रापकौ तव रूपगुणावित्याहुः। यत् यतो गीतरूपाभ्याम् अविभ्रन्नबिभरुः तस्मात् हे राजन् ! किं बहुना "शक्रशर्वपरमेष्ठिपुरं गाः कश्मलं ययु"रिति वेणुगीताध्यायात् परमतत्त्वविदामपि मोहः विस्मापनं स्वस्येति च तव तस्यापि चमत्कारो दृष्ट इति श्रीशुकोक्तिरप्यासीदिति ज्ञेयम् ॥ ४० ॥

रसिकाह्लादिनी–टीका

ननु यथाहं लोकसंग्रहपरस्तथा भवतीभिरपि सदाचारः पाल्यः प्रमाणापंक्तिसिद्धमप्येतद् व्यवसितं न कार्यमिति चेत्तत्र सामर्थ्यमाहुः। अङ्गेति सम्बोधनेनैतत् ज्ञाप्यते यदि त्वमस्मद्भूयोऽभविष्यस्तवैवं नावदिष्यः अतोऽस्मदार्त्तिमज्ञात्वैवोपदिशसि परोपदेशे पाण्डित्यमिति स्मृतेः। त्रैलोक्यां सा का स्त्री या आर्य्यचरितान्निजधर्मान्न चलेत्। निजधर्मं न परीत्यजेदित्यर्थः। न काचिदित्यर्थः ते कलपदायता वेणुगीतेन सम्मोहिता कलानि अव्यक्तानि मधुराणि गीतेन तेन मोहिता यदुक्तम्–देव्यो विमानगतयः स्मरनुन्नसारा" इति। त्वदुद्भावितवेणुगीतेनैव यदा धर्मत्यागस्तदा तव रूपदर्शनेन धर्मविपर्ययो भवतीति न चित्रमाहुः। त्रैलोक्येति त्रैलोक्यस्थसौभगं सौन्दर्यं यस्मिन् त्रैलोक्ये सौभगं यस्मात् इति वा इदं प्रत्यक्षसिद्धं रूपं निरीक्ष्य यत् यस्मात् मोहिताः पुरुषा अपि चलिताः श्रीरघुवीरस्य सौन्दर्यं दृष्ट्वा दण्डकारण्यवासिनो मुनयोपि मोहिताः तदुक्तं पाद्मे "पुरा महर्षयः सर्वे दण्डकारण्यवासिनः। दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन्सुविग्रहम्। ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले"। प्रत्यभिज्ञया संस्कारवशाः एव वदन्तीति ज्ञायते। यद्वा इदं रूपं तवापि विस्मयजनकं तदुक्तं "विस्मापनं स्वस्येति", यद्वा हे कलपदकं सुखं लाति गृह्णाति पदं स्वरूपं यस्य वेणुवादेन यत्सुखं भवति तत्तावत् स्वस्वरूप एव निमग्नः भवति पश्चादन्यत्र संचरति। हे अमृतवेणुगीतसम्मोहित यतः सदैव वेणुं वादयसे न कदाचिद्विरमसि अस्मास्वेव केयं शङ्का यतो वेणुगीतेन त्वमपि मोहितोसि, यद्वा हे अमृतवेणुगीत हे मोहित इति पदद्वयं मोहितत्वात्सात्विकभावोदयः। अत एव तन्वितमनुकूलं वदन्नस्मान्निवारयसीति न चित्रं यत् यस्मात् विजातीया अपि गोद्विजद्रुममृगाः गोशब्देन वृषभ-वत्स-वत्सतरी प्रभृतयो ज्ञेयाः द्विजाः पक्षिणः तदुक्तं "प्रायो बताम्ब विहगा मुनय" इति। द्रुमाः "अहो अमी देववरे इति" श्रीमुखेनोक्तम्। "धन्याः स्म मूढमतयोपि हरिण्य" इति भावविशेषोदयेन पुलकान् अस्मत्सदृशीनां भाव-विशेष-ज्ञापकान् धर्मान् अविभ्रन्, किंच वेणुगीतेन मोहयित्वा निजधर्मस्त्याजितः मोहितत्वात्सदाचारपरित्यागेनास्मासु दोषः स्थाप्यते, धर्मत्यागस्य त्वयैव कारितत्वात् त्वय्येव दोषमावहेदिति शास्त्रफलं प्रयोक्तरीति–न्यायेन अन्यच्च। वयं तु "श्यामसुन्दर ते दास्य" इति प्रतिश्रुतमर्थं संस्मृत्य दास्यो जाताः दासीनां स्वामिवचनात् साध्वसाधुकरणेन गुणदोषौ स्वामिनि स्वामिसेवाव्यग्राणां दासीनां श्रवणादिहेतुचतुष्टयबद्धमूलसंनिकर्षः स्वत एव संपत्स्यते इति श्रवणाद्दर्शनादित्यस्याप्युत्तरं दत्तमिति वेदितव्यं त्वं तु "मयेमा" इति प्रतिश्रुतं दातुमस्वीकुर्वन् प्रतियातेति प्रसह्य दुःखवारिधौ मज्जयसीति कस्मादिति न जानीम इति भावः ॥४०॥

विशुद्धरसदीपिका

नन्वेवं पतिव्रताभिरुपहसनीया भविष्यथ तत्र स्फुटमेव सरोषदैन्यमाहुः। का स्त्रीति। त्रिलोक्यां वर्त्तमाना इति शेषः। का न चलेत् अपि तु सर्वैवेत्यर्थः। तत्र देव्यो विमानगतयः इत्यादिना देवीषु यज्ञपत्नीषु नागपत्नीषु च तथा तथानुभूतत्वात् कलेति व्याख्यातं पदेति प्रतिपदमपि तादृशत्वं बोधयन्ति आयतेति तत्र तस्यापि निर्बन्धं द्योतयन्ति अमृतेति पाठे तस्यालौकिकास्पदत्वं च इदं ते वेणुमाधुर्य्यस्यैव तत्रापि रूपमाधुर्य्यस्य किं ब्रूम इत्याहुः। त्रैलोक्यस्य सौभगं सौभाग्यजनप्रियत्वं सौन्दर्यं वा यस्मिन् तदिदं प्रत्यक्षवर्त्तमानं रूपमित्यन्यथा निरस्तम् ॥ ४० ॥

श्रीरामनारायणकृता भावभावविभाविका

नन्वेवमाचरणे कुलाङ्गना उपहसिष्यन्ति तत्र "यत्रोभयोः ! समो दोषः परिहारोऽपि वा समः। नैकः पर्य्यनुयोज्यः स्यात्तादृगर्थविचारणे" इति न्यायमाश्रित्योत्तरमाहुः। कास्त्र्यङ्गेति। अङ्ग हे प्रिय ! यदा सर्ववैदिकधर्माधिकारिणो ब्राह्मणादयोऽ-

च्युतगोत्रत्वेन हरिवंशा वैष्णवास्तन्मुखरितं कलपदामृतं ते भगवत्स्वरूपसूचकं गीतं निशम्य "पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षुचर्यां चरन्ति एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती"त्यादिश्रुत्यैहिकामुष्मिकफलसर्वकर्मत्यागेन त्वत्स्वरूपजिज्ञासवस्त्वदेकपरा भवन्ति विद्वांसोऽपि "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीत्यादिश्रुत्या त्रैलोक्ये सौभगं यस्मात्तद्रूपं निरीक्ष्य साक्षात्कृत्य सर्वधर्मानुत्सृज्य त्वदेकनिष्ठा भवन्ति तदा या स्त्री ते कलानि पूर्वव्याख्यातगुणान्वितानि त्वत्पादपद्मा॑विव मृदूनि पदानि यस्मिंस्तच्च शुष्कदग्धाबद्धवेणुमुखरतोत्पादनेनामृतं च आयतेति पाठे त्रिलोकविदितत्वेन विस्तृतं च यद्वेणुगीतं तेन संमोहिता सती आर्य्यचरितान्न चलेत्सा का तथा त्रिलोक्यां भवं त्रैलोक्यं सौभगं युगपत्साकल्येन यत्र तदिदं रूपञ्च विलोक्य या न चलेत्सा का न कापीत्यर्थः । श्रियः सुराङ्गनानां पुलिन्दीनां च मोहितत्वश्रवणात् यद्यतो गीतश्रवणाद्रूपदर्शनाच्च गावो द्विजाः पक्षिणो द्रुमाः मृगाश्च पुलकानि अबिभ्रन् रोमाञ्चिता अभवन् किमु वाच्यं स्त्रीणां तद्रतत्वम् ॥ ४० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु युष्माकमपि भावोऽपेक्षितः स च यथा मच्छ्रवणादिना भवति न तथामत्सन्निकर्षेणेति मयोक्तमेवातः किमर्थं लोकविद्विष्टमार्गानुसरणं कुरुथ गृहे गत्वा मच्छ्रवणादिकमेवाचरतेति चेत्तत्राहुः केति । शक्तस्यैवाधिकारश्रवणात् स्त्रीणां चैतदुपदिष्टार्थानुष्ठानेऽशक्तिस्त्वाद्यथोक्तोपदेशो न युक्तस्तस्मात्पुरुष एवैवमुपदेष्टव्य इति द्योतनाय का स्त्रीत्युक्तं किञ्च समाहिता एव धर्माधर्ममर्यादां विचारयन्ति नतु मोहिताः सम्यक् मोहिताश्चेत्किमु वक्तव्यमित्याशयेनाहुः । त इति । तव समस्तजीवसंमोहकरमायाशक्तेर्यत्कलपदामृतमयङ्गीतं तेन संमोहिताः तव वेणुगीतेति सर्वेन्द्रियाणाममृतेति प्राणस्य कलपदेत्यन्तःकरस्य व्यामोह उक्तः आयतेति पाठे कलानि अव्यक्तमधुराक्षराणि पदानि यस्य तत् आयतं दीर्घमूर्च्छितं स्वरालापभेदेनासम्यक् मोहिता का वा स्त्री आर्य्यचरितात् शिष्टाचारान्निजधर्म्मान्न चलेत् या स्त्री न चलेत्तथाविधा चतुर्दशभुवनेषु कापि नास्तीत्यर्थः । तथा च सर्वाविशिष्टदोषेणास्माकमुपालम्भो न युक्तः किञ्च "विद्यते न खलु कश्चिदुपायः सर्वलोकपरितोषकरो यः । सर्वदा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्प" इत्युक्तत्वाद् दुराराध्यलोकाराधनेनाप्येवंविधफलत्यागो न युक्तः अन्यथा सम्बन्धिजनानभिमतसंन्यासोऽपि केनचिन्न क्रियेतातः परलोकविरोधिकर्म नानुष्ठेयं नच परब्रह्मणस्तवाराधनेन सर्वकर्मफलभूतेनास्ति परलोकबाधः—

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि । यत्र क्व वाभद्रमभूदमुष्य किंको वार्थ आप्तो भजतां स्वधर्मतः ॥

नवै जनो जातु कथंचनाव्रजेन्मुकुन्दसेव्यन्यवदङ्गसंसृतिम् । स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यत इत्यादिशास्त्रात् सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते इत्यादिशास्त्रं तु जिजीविषुपरं लोकद्वयविरुद्धं कर्म्म निन्दापरं शिष्टनिन्दापरञ्च तत्र वयं त्यक्तसर्वैषणाः संन्यासिसदृशाः न त्वच्चरणसङ्गमरहितजीवनाभिलाषाः नापि परलोकविरोधिकर्मपरा नापि भगवत्स्वरूपाभिज्ञशिष्टविनिन्द्याचाररता इति भावः । का स्त्रीत्यनेन यन्मोहिताः पुरुषा अपि चलितास्तन्मोहिता स्त्री का न चलेदित्यपि सूचितं किञ्च यथा सूर्येण दिनं चन्द्रमसा रात्रिस्तथा त्रैलोक्यस्यापि सुभगत्वं सौन्दर्यं येन भगवद्रूपेण तत्त्रैलोक्यसौभगमिदमनुभूयमानं रूपं च निरीक्ष्य यत् यतः गोद्विजद्रुममृगाः पुलकानि अबिभ्रन् अबिभरुः गवादीनामनभिज्ञशिरोमणीनामपि यद्दशान्यथा दृश्यते तेन त्वत्स्वरूपाभिज्ञानां रसज्ञानामस्माकं स्वधर्मत्यागे किञ्चित्तं तत्रापि त्वद्योतकशब्दश्रवणमात्रेणापि निजधर्मत्यागो युक्तःकिम्पुनस्त्वदनुभवेनेति भावः । अनभिज्ञापक्षे ननु नेयं लक्ष्मीः किन्तु मद्वक्षसि सहजा लक्षणविशेषरूपा सुवर्णरेखा विराजते तां दृष्ट्वा पतिव्रताशिरोमणिभूतां लक्ष्मीमपि त्वयं दुष्टोऽन्यानपि दूषयतीति न्यायमनुसृत्य दूषयितुं प्रवृत्तास्तस्या मत्तश्च भयं न कुरुथेत्याशङ्क्य न वयं कामपि दूषयामः किन्तु सर्वधर्मध्वंसनाय त्वमेव विधात्रा सृष्टोऽसीति सरोषप्रलापमाहुः । केति । अङ्ग हे कृष्ण ! तव कलपदामृतवेणुगीतसंमोहिता आर्यचरितात्पातिव्रत्यलक्षणान्निजधर्म्मात्का स्त्री न चलेदपि तु सर्वापि चलेदेव ततस्त्वत्कर्तृकं गीतमेव दूष्यते धर्मत्याजनलक्षणं पापं च त्वं प्राप्स्यस्येवेति भावः । न केवलं तव गीतमेवैवम्विधम् अपितु रूपमपि त्वङ्गत्रैलोक्यसौभगमिति । ननु नास्ति मम गीतादेरयं स्वभावः किं तु स्त्रीणामेवायं स्वभावो यद्यत्किंचिदपि गीतादिकमुपलभ्य मोहिता भवन्तीति चेत्तत्राहुः । यदिति । याभ्यां गीतरूपाभ्यां यद्वा ननु एवं पतिव्रताभिरुपहसनीयाः भविष्यथेत्याशङ्क्य तव गीतादिप्रसादाच्चतुर्दशभुवन उपहासकरा कापि न भविष्यति सर्वासां मोहावश्यंभावादित्याशयेनाहुः । केति । किञ्च चराचरात्मकं सर्वमपि तव गीतादिना मोहितमतः कोपहासशङ्केत्याशयेनाहुः । त्रैलोक्येति । मानिनीपक्षे ननु यदि मदीयं गीतादिकं भवतीनां न क्षोभकरं तर्हि किमर्थं चलितुमिच्छथेति चेत्तत्राहुः । केति । गीतमोहितापि आर्यचरिताद्धेतोस्त्वत्वत्तः सकाशात् का स्त्री न चलेन्नोपयायात् किञ्च यस्माद्गवादयोऽपि सपुलकास्तदिदं त्रैलोक्यसौभगं रूपं दृष्ट्वा च सदाचारभङ्गभिया का नोपयायात् सुन्दरीणां सुन्दरसन्निधौ स्थितिर्निन्दानिदानमिति मोहितापि यदि चलेत्तर्ह्यमोहिताः वयं कथं नापसराम इतिभावः यद्वा तवास्ति स्वगीतादिप्रयुक्तवशीकारे शक्तिरिति वयं जानीमस्तथापि तस्याः अस्मास्वकिञ्चित्करतेत्याशयेनाहुः । केति । मोहितानामेव वशीकारो भवति या तु तव तादृशगीतेन न मोहिता सा स्त्री का आर्यचरिताच्चलेत्तादृशी कापि नास्तीत्यर्थः । किञ्च यतो गवादयः सपुलकास्तदिदं त्रैलोक्यसौभगं स्वीयं रूपं तु निरीक्ष्य त्वत्स्वरूपाभिज्ञा का सदाचाराच्चलेदिति निवृत्तिपक्षे तस्मात्त्रिलोक्यां नास्ति तथाविधा श्रुतिर्या त्वां न

प्रतिपादयेदित्याहुः । केति । तव सर्वे वेदा यत्पदमामनन्ति सदेव सौम्येदमग्रआसीदित्यादिरूपं यत्कलपदामृतवेणुगीतं तदेव समा सम्यक् प्रमाणं प्रत्यगभिन्नपरमात्मपराणामुपनिषदां विषयस्य कालत्रयाबाध्यत्वात्तद्विषयकप्रमाणस्य पारमार्थिकतत्त्वावेदकत्वरूपप्रामाण्यवत्त्वात्सम्यक् किं तदितरप्रमाणानां तु स्वविषयाणां व्यवहारदशायां बाधाभावात् व्यावहारिकतत्त्वावेदकप्रामाण्यकत्वाद्संयुक्तं तथा ऊहितो मननिदिध्यासनपूर्वकमवगतो यः प्रत्यगभिन्नः परमात्मा तस्य चरितात् सृष्टिकर्तृत्वादिलक्षणात्कापि स्त्री तदनन्यपरा श्रुतिर्न चलेन्न प्रचलति । अयमर्थः सृष्टिप्रतिपादकश्रुतीनां सृष्टिमुपन्यस्य तन्निषेधाभिविचिकित्समद्वितीयत्वं प्रतिपादितं भवतीति परम्परया निरस्ताखिलद्वैतविभ्रमेऽखण्डे सच्चिदानन्दैकरसे परमात्मनि तात्पर्य्यमन्यथा वायौ प्रतिषिद्धस्य रूपस्यान्यत्र सत्त्वाद्ब्रह्मणि प्रतिषिद्धस्य द्वैतस्यान्यत्र सत्त्वशङ्का स्यात् उपासनाप्रकरणपठितसगुणब्रह्मप्रतिपादिकानां तूपासनाविध्यपेक्षितगुणारोपमात्रपरत्वं न गुणपरत्वं निर्गुणप्रकरणस्थानां निषेधविध्यपेक्षिते निषेध्यसम्पादकत्वेन विनियोगः कर्मप्रकरणपठितानां संयोगपृथक्त्वन्यायेन विविदिषायामुपयोग इति कापि श्रुतिः यस्मात्तवात्मचर्यावर्णनान्न चलतीति ननु महेन्द्रादिप्रतिपादनपरतयोपलभ्यमानानां तासां कथं परमात्मपरत्वमिति चेत्तत्राहुः । त्रैलोक्येति । इदमनुभूयमानं रूपं सत्तास्फूर्त्यात्मकं येन सेश्वरं जगत् सुन्दरं दृश्यते तदालोच्यते तत्तद्देवादिप्रतिपादनपराणां मध्ये च कापि न चलति—

> यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ।। इति

भगवत एव इन्द्रादिरूपेणावस्थानादिति भावः । इदमेवादाहरणैः स्पष्टयति । यदिति । येन रूपेण—

> सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठतीति ।।

सर्वात्मभावप्रतिपादनादिति भावः ।। ४० ।।

रास-रहस्यम्

र० टी०—हे अङ्ग ! हे प्रियतम ! त्रिलोक्यां संसारप्रपंचे का स्त्री वैष्णवास्तेषां तन्त्रे ईश्वरातिरिक्ताः सर्वे जीवाः प्राकृतिरूपैव मन्यन्ते, कः जीव इत्यर्थः । ते तव विषये कलपदायत वेणुगीतं "सर्वे वेदाः यत्पदमामनन्ति ।" "ब्रह्मविद् ब्रह्मैव भवति" । इत्यादि रूपाणामुपनिषदां निरस्ताखिलद्वंतविभ्रमे अखण्डसच्चिदानन्दघनैकरसे प्रत्यगभिन्ने परमात्मनि कालत्रयाबाध्येऽद्वितीये पारमार्थिकतत्त्वावेदकप्रामाण्ये अनाहतलक्षणशब्दब्रह्मात्मकं ।

> "रुन्धन्नम्बुभृतश्चमत्कृतिपरं कुर्वन् मुहुस्तुम्बुरुं ध्यानादन्तरयन् सनन्दनमुखान् विस्मापयन् वेधसम् ।
> औत्सुक्यावलिभिर्बलिं चटुलयन् भोगीन्द्रमाघुर्णयन् भिन्दन्नण्डकटाहभित्तिमभितो बभ्राम: वंशीध्वनिः ।।"

इति व्यापकं—उद्घोषं निशम्य तेन सम्मोहिता आकृष्टचित्तासत्यः आर्यं चरितात् "सदाचारेणैव नराणमार्यत्वम् ।" इति वचनात् ऋषिभिराचरितमार्गात् को न चलेत् अर्थात् सर्वेऽपि प्रचलन्ति । यत् यस्मात् इदं प्रत्यकत्वेनानुभूतं त्रैलोक्यां लोकत्रयेऽपि सौभगं सुष्ठु भाग्यं ददातीति सौभगः तं सुकृतकर्मोद्भवरूपं सुन्दरतममात्मस्वरूपं निरीक्ष्य साक्षात्कृत्य गोद्विजद्रुममृगाः तत्स्थानीयाः द्वैताभिनिवेशशालीनाः मन्दमतयोऽपि पुलकान्यबिभ्रन् परमानन्दिनो भवन्ति अद्वैतवादीनां तु का कथा।।४०।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु यद्यप्युपदेशपदे इत्यनेन मुख्यः पतिरहमेव भवतीभिः प्रतिपादितोऽस्मि नात औपपत्यमस्ति तथाप्युत्सिद्धान्तानभिमतपरिजनानुकूल्यं कर्तव्यमेवेत्यत्राहुः । का इति । आर्यैः कुलवृद्धैश्चरितमनुष्ठितं पितृपुत्राद्यानुकूल्यं तत्तस्मात् यत् यतः कलपदायतवेणुगीतात् रूपदर्शनाद्वा अबिभ्रन् अबिभरुः ।। ४० ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

औपपत्यं जुगुप्सितमित्युक्तमर्यादुत्तरितं तथाऽपि कैमुत्येनाच्युतैस्तस्माच्च्युतिरार्यमार्गादननुभूतैतद्रसानां सारसाक्षीणां भवेत् । कथा तु कैतदनुभवतीनां नः । किञ्च स्थावरा अपि भवन्त्येवं देवेति वासुदेवं प्रति वदन्ति ।। केति । अङ्ग रङ्ग कलपदायतवेणुगीतसम्मोहिता अयतं मूर्च्छितं । अमृतेस्यपि पाठः स्फुटार्थः । तादृशगीतेन सम्मोहिता का स्त्री आर्यचरितात्सन्मार्गादव्यभिचरितायास्त्रिलोक्यां त्रयाणां लोकानां समाहारस्त्रिलोकी तस्यां न चलेद् भ्रष्टा न भवेत् । दूरतोऽपि त्वत्पूरितवेणुशब्दश्रवणतो मृगदृशां दशोदशी यदा तदा त्रैलोक्यसौभगं त्रिलोकीसुन्दरतरमिदं रूपं निराक्ष्य च काऽम्बुजाक्षी न चलेत् । यद्यतो मुरलीस्वरतो गाश्च द्विजाः पक्षिणश्च द्रुमाः सजीवा वृक्षाश्च मृगाश्चैते ये पुलका अस्माकमुद्भवन्तस्तत्रोमाञ्चान्यबिभ्रन्नितरामभृतवन्तः प्रायो बताम्ब मुनय इति प्रागभिहितत्वाद्द्रुमाणामन्तर्निरीक्षणमपि सम्भवतीति निरीक्ष्येत्यपि योजनीयमिति मन्तव्यं । न्यबिभ्रन्निति पुलका एतानीत्यन्वयेन पुलकः कृमिभेदे स्यात्तल्पेऽश्वमणिदोषयोः । गजात्तपिण्डे रोमाञ्चे हरिताले शिलान्तर इति विश्वमेदिन्यादयोऽनुकूलिता इत्याकलनीयं । चलेच्च याचन चञ्चललोचना सा का कुत्सिताऽयोग्येत्यप्यन्वयः । त्रिलोक्यामित्यत्र त्रिलोकी आमिति छेदः । त्रिभिर्नेत्रैर्लोकयितुमवलोकयितुं शीलमस्यास्तीति त्रिलोकी रुद्रस्त्रैलोक्यसौभगं रूपं निरीक्ष्य आ सम्यक् चचालेति वा ।। ४० ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु तथापि लोकविद्विष्टं स्त्रीणामभिसरणम् अतः सन्मार्गरक्षणार्थं प्रमाणसिद्धमप्येतन्न कर्त्तव्यमतः श्रवणदर्शनादिकमेव कर्त्तव्यमिति चेत्तत्राहुः। का स्त्रीति। अयं धर्मः पुरुषाणां वक्तव्यो नतु स्त्रीणामसम्भावितत्वात् नह्यसम्भावितो धर्मो भवति एवं धर्मनाशे धर्मस्थापकं स्वरूपमेव हेतुः अद्भुतकर्मत्वात् वस्तुतस्तु स्वरूपसम्बन्धिनां भक्तानां धर्मं स्वरूपेणैव रक्षति तच्चान्यभावेभ्यो रक्षणेमतद्भावपोषणं च स्वरूपधर्मसम्बन्धिनस्तांस्तैरेवेति न किञ्चिदनुपपन्नमिति भावः। अत एवैवं स्वरक्षणेन स्वान्तरङ्गज्ञापनायाङ्गेति सम्बोधनमतप्रतारणाय च या स्त्री लोके स्त्रीशब्दवाच्या सा कथमार्यचरितान्न चलेत् त्रिलोकयां सत्त्वरस्तमःकार्यरूपायां तामसीनां मौढ्यात् अर्यचरिते स्थितिं मत्वा तन्निराकरणं राजसीनां स्वभाव एवं सात्त्वकानां सत्त्वाद्धर्मबुद्धिमाशङ्क्य तन्निराकरणम् आर्यमार्गपरित्यागे हेतुः ते कलपदामृतवेणुगीतसम्मोहितेति सम्मोहिता आर्यचरिताच्चलत्येव सम्मोहः पञ्चपर्वाविद्यास्थानीयैः भगवत्सम्बधात् अविद्यातु न बाधते परमन्य एव बाधकाः तेषां बलं ते इति त्वदीया इति कलान्यव्यक्तमधुराणि यानि पदानि तत्राविर्भूतं यदमृतं तदेव वेणुद्वारा गीतं तेन सम्मोहः गीतं देहमोहजनकं गायन्तं स्त्रियः कामयन्त इति स्त्री तु देह एव इन्द्रियाणां व्यामोहको वेणुः रसात्मकत्वात् अमृतं प्राणानां पदान्यन्तःकरणस्य अव्यक्तता आत्मन इति सम्यग्विमोहिताः आर्याः प्रमाणबलविवेकिनः प्रमाणे हि इन्द्रमहेन्द्रयोरपि भेदस्वीकारः पृथगुपस्थिताः सर्वे एव भिन्ना इति अन्यथा इन्द्रयाजिनोऽग्रे सम्बत्सरान्ते प्रायश्चित्तश्रवणं न स्यात् सम्वत्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेदिति अतो देहव्यतिरिक्तः स्वरूपेणोपस्थितोऽपि प्रमाणबले विरुध्यते वस्तुविचारस्तु प्रमेयबलमाश्रित्य अन्यथा विधिनिषेधविधयो व्यर्थाः स्युः तदुत्तरत्र वक्ष्यति एकादशे अतो मार्गान्तरविरोधोनोपयुज्यत इति मर्यादाभङ्गोमार्गान्तरत्र न दूषणम् एतस्योत्तरमग्रेशुकश्च वक्ष्यति रासानन्तरं धर्मव्यतिकरो दृष्ट इति तस्मादत्र फलस्य सिद्धत्वात् साधनदृष्ट्या अपकीर्त्तिः नास्मत्प्रतिबन्धिका किञ्च न केवलं नाम्ना मर्यादाभङ्गः किन्तु स्वरूपेणापि तदाहुः। त्रैलोक्यसौभगमिति। त्रैलोक्यस्यापि सुभगत्वं यस्मात् यथा सूर्येण दिनं चन्द्रमसा रात्रिः तथा त्रैलोक्यमेव भगवद्रूपेण सुन्दरतां याति इदमिति प्रत्यक्षसिद्धं चकारादनुभवाच्च तच्छ्रुत्वा एतद्दृष्ट्वा का वा आर्यचरितान्न चलेत् अस्त्वयं प्रमाणवार्त्ता दुर्बला प्रकारान्तरेणापि चलति भगवतो रूपेण प्रमेयमर्यादाप्यपगच्छति या कथमपि भवति नान्यथा तदाह। यद्गो द्विजद्रुममृगा इति। गावो हि प्रमाणवार्त्तानभिज्ञाः मातरमपि गच्छन्ति द्विजाः पक्षिणः सर्वभक्षाः द्रुमाः स्थावराः कदाचिदपि बहिः सम्बेदनरहिताः निरिन्द्रिया एवेति केचित् मृगाः सर्वतोभयाः तेऽपि चेद्भगवद्रूपेण गीतेन वा आश्लिष्टरसाः पुलकानि धारयन्ति रसिकमनुष्यधर्मानाविष्कुर्वन्ति ये भगवता अन्यथैव सृष्टाः स्त्रियस्तु स्वभावतोऽप्यन्यथा भवन्तीति नाश्चर्यं किञ्चिदत्र ॥ ४० ॥

श्रीसुबोधिनी–सारः

निंदितं जारसंगं कथमीहथ तत्राहुः हे अंग ते तव कलानि मधुराणि पदानि यस्मिंस्तत् आयतं दीर्घं मूर्छितालापादिना वेणुगीतं तेन संमोहिताऽऽर्यचरितान्निजधर्मात्त्रिलोकयां का न चलेत् अपि तु सर्वाश्चलेयुरेव त्रैलोक्ये सुंदरमिदं रूपं च निरीक्ष्य का न चलेत् यद्यतः गोद्विजमृगवृक्षाः पुलकान्यबिभ्रन्नबिभरुः ॥ ४० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

का स्त्र्यङ्ग त इत्यत्र, भगवत्साक्षात्कारे सति मोहासम्भवमाशङ्क्याहुः **तेषां बलमिति**। मर्यादामार्गीयभगवद्धर्मेभ्योपि पुष्टिमार्गीयास्ते बलिष्ठा इति भावः। आर्यचरितादित्यत्र। नन्वार्या हि श्रेष्ठाः, ते च भक्ता एवेति तच्चरितमेव सर्वत्यागपूर्वकं भगवद्भजनमिति कथमेवं कथनं युज्यत इत्याशङ्कानिरासायार्यपदार्थमाहुः। **प्रमाणबलविवेकिन** इति। ननु विवाहितभजनं हि प्रमाणमार्गः, भगवान् सर्वात्मक इति 'गोपीनां तत्पतीनां च'त्यग्रे वक्ष्यमाणत्वाच्च तन्न हीयते, अधिकं परं सम्पद्यत इति नैषोपपत्तिरित्यत आहुः **प्रमाणे** हीत्यादि। तन्मार्गे हि पतित्वादयो धर्मा देहनिष्ठा एव। अतस्तद्भित्वेनोपस्थितस्तद्वचनविषयो न भवति। 'यावद्वचनं हि वाचनिक'मितिन्यायात्। एवं सत्ययं मार्गो वस्तुविचारं न सहते। न च विहितत्वेनैवोत्तमता, निषिद्धत्वेनैवाधमतेति वाच्यम्। 'शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुष्वि'ति भगवद्वाक्यविरोधात्। न चैतद्विरोधापरिहारात्तन्न कर्तव्यमिति वाच्यम्, प्रमेयमार्गस्य स्वतन्त्रत्वेनैतस्माद् बलिष्ठत्वेन चैतद्विरोधस्याप्रयोजकत्वात्। अन्यथा प्रेममार्गोच्छेदापत्तिः। एतदेवोक्तं **प्रमाणे** हीत्यारभ्य न दूषणमित्यन्तेन ग्रन्थेन। ननु प्रमाणमार्गीयाणां प्रमेयमार्गीयाणां च मिथो भेदात्प्रमाणवाक्यं न प्रमेयमार्गीयं विषयीकरोति, यागविधिर्यतिमिव, अतो न विरोध इति चेत्। स्यादेवं यदि प्रमेयमार्गेपि विधिः स्यात्, यत्याश्रम इव। तथा सत्यधिकारिविशेषणमहिम्नैवान्यस्याप्राप्तेरविरोधः स्यात्। प्रकृते च प्रभ्वनुग्रहैकलभ्यत्वेन विध्यभावाद्वर्णाश्रमविशेषाधिकारेण प्रवृत्तं वाक्यं न संकुचितुमर्हति। बाधकाभावात्। अतस्ततोन्यथाकरणे विरोधो दुर्निवारः। प्रमेयमार्गप्रामाण्यं तु 'धर्मव्यतिक्रमो दृष्ट' इत्यादिना 'याः श्रुत्वा तत्परो भवे'दित्यन्तेन शुकवाक्येनैव वक्ष्यत इति सर्वमनवद्यम् ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यदुक्तं 'जुगुप्सितं च ह्यौपपत्यं कुलस्त्रिय' इति तस्योत्तरमाहुः—का स्त्रीति। स्नेहं सूचयन्त्यः सम्बोधयन्ति—अङ्गेति। ते तव कलानि मधुराणि पदानि यस्मिंस्तच्च तत् आयतं दीर्घं मूर्छितं च यद्वेणुगीतं तेन सम्मोहिता आकृष्टचित्ता सती त्रैलोक्ये लोकत्रये सौभगं सौन्दर्यातिशययुक्तमिदं रूपं च निरीक्ष्य त्रिलोक्यां का सा स्त्री या आर्यचरितात् सदाचारात् स्वधर्मात् न चलेदित्यन्वयः। यद्यनधिकारिणां गवादीनामपि मोहस्तदाऽस्माकं मोहे किमाश्चर्यम्' इत्याशयेनाहुः—यदिति। याभ्यां वेणुगीतश्रवणरूपदर्शनाभ्यां गवादयः पुलकान्यबिभ्रन् अबिभरुरित्यर्थः ॥ ४० ॥

अन्वितार्थप्रकाशिका

का स्त्रीति ॥ अङ्ग हे प्रभो! ते तव कलानि मधुराणि पदानि यस्मिंस्तच्च तत् आयतं दीर्घं मूर्च्छितं स्वरारोहावरोहम्। कलपदायतवेणुगीतेत्यपि पाठः। तेन संमोहिता आकृष्टचित्ता सती त्रैलोक्ये लोकत्रये सौभगं सौन्दर्यातिशययुक्तमिदं रूपं च निरीक्ष्य त्रिलोक्यां का सा स्त्री या आर्यचरितात् सदाचारात्स्वधर्मान्न चलेत्। यत् याभ्यां वेणुगीतश्रवणरूपदर्शनाभ्यां गवादयः पुलकान्यबिभ्रन्। अबिभरुरित्यर्थे जुसभाव आर्षः। त्वद्द्योतकशब्दश्रवणमात्रेण धर्मत्यागो भवति किं पुनस्त्वदनुभवेन ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तव स्वरूपं केषां मोहजनकं न भवति सर्वेषामेव मोहजनकमित्याहुः का इति अंग हे हरे कलानि अव्यक्तमधुराणि पदानि उच्चारितवाक्यानि यस्मिंस्तत् आयतं मूर्छनालापयुतं यत् वेणुगीतं कलपदामृतेति पाठे तु कलपदमव्यक्तमधुरोच्चारितं यदमृतं अमृतमयं वेणु गीतं तेन संमोहिता त्रिलोक्यां का स्त्री आर्यचरितात् स्वस्ववृद्धमार्गानूचलेत् सर्वाश्चलेयुरित्यर्थः। गीतश्रवणमात्रणैवं स्यात्तर्ह्येति मनोहररूपदर्शनेन तु सर्वेषामेवं स्यादेवेत्याहुः यद्यतः त्रिलोकेपु भुवं सौभगं सौंदर्यं यस्मिंस्तदिदं तव रूपनिरीक्ष्यगवादयः पुलकानि रोमोद्गमानि अबिभ्रन् अबिभरुः दधुः अन्येषां तु का कथा ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यदुक्तं 'जुगुप्सितं च सर्वत्र ह्यौपपत्यम्' इति तस्योत्तरमाहुः ॥ का इति ॥ अङ्ग हे श्रीकृष्ण, ते तव, कलानि मधुराणि पदानि यस्मिंस्तच्च तदायतं दीर्घमूर्च्छनालापयुक्तं च यद्वेणुगीतं, पाठान्तरे कलपदामृतमयं यद्वेणुगीतं, तत् श्रुत्वेति शेषः। त्रैलोक्यसौभगं लोकत्रयसुन्दरं, इदं रूपं निरीक्ष्य च, संमोहिता सती, त्रिलोक्यामपि, का वा स्त्री आर्यचरितात् सतामाचारात् न चलेत्। निजधर्माच्चलेदेवेत्यर्थः। यद्यस्माद्वेणुगानाकर्णनात्त्वद्रूपनिरीक्षणाच्च, गावो धेनवश्च द्विजाः पक्षिणश्च द्रुमास्तरवश्च मृगा आरण्या हरिणादयः पशवश्च तेऽपि, पुलकानि रोमाञ्चान्, अबिभ्रन्नबिभरुः त्वद्द्योतकशब्दश्रवणमात्रेण तिरश्चामपि तावन्निजधर्मत्यागो दृष्टः किं पुनरस्मादृशां त्वदनुभवेनेति भावः ॥ ४० ॥

कृष्णप्रिया

प्यारे श्यामसुन्दर! तीनों लोकों में भी और ऐसी कौन-सी स्त्री है, जो मधुर-मधुर पद और आरोह-अवरोह-क्रम से विविध प्रकार की मूर्च्छनाओं से युक्त तुम्हारी वंशी की तान सुनकर तथा इस त्रिलोकसुन्दर मोहिनी मूर्ति को जो अपने एक बूँद सौन्दर्य से त्रिलोकी को सौन्दर्य का दान करती है एवं जिसे देखकर गौ, पक्षी, वृक्ष और हरिन भी रोमाञ्चित, पुलकित हो जाते हैं—अपने नेत्रों से निहारकर आर्य-मर्यादा से विचलित न हो जाय, कुल-काम और लोकलज्जा को त्यागकर तुममें अनुरक्त न हो जाय ॥ ४० ॥

व्यक्तं भवान् [1]व्रजभयार्तिहरोऽभिजातो देवो यथाऽऽदिपुरुषः सुरलोकगोप्ता।
तन्नो निधेहि करपङ्कजमार्तबन्धो तप्तस्तनेषु च शिरस्सु च किङ्करीणाम् ॥ ४१ ॥

कर्दमक्षमा

अन्वयः—यथा, आदिपुरुषः, देवः, सुरलोकगोप्ता, वर्तते, तथा, भवान्, व्रजभयार्तिहरः, अभिजातः, इति, व्यक्तम्, तत्? हे आर्तबन्धो? 'तव', किंकरीणाम्, नः, तप्तस्तनेषु, च, शिरस्सु, करपङ्कजम्, निधेहि ॥ ४१ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्यक्तं निश्चितम् ॥ ४१ ॥

---

[1] जनार्ति–वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सर्वस्वामित्वेन तवास्मद्भर्तृत्वात्समानकुलजातत्वेन संबंधयोग्यत्वादस्माकं तव संगत्यौपपत्यदोषो नास्ति, कुतो निंद्यत्वमित्यभिप्रेत्याहुः—व्यक्तमिति। यथादिपुरुषः सुरलोकगोप्ता वामनो जातस्तथा स एवादिपुरुषा भवाधुना व्रजस्य सर्वभक्तसमुदायस्य। यद्वा—अस्माकं व्रजस्थानां भयं संसृतिजम्, आर्तिराध्यात्मिकारूपादिरूपा त्रिविधा ते हरतीति तथा अभिजात इति। व्यक्तमसंदिग्धम्। "एष वः श्रेय आधास्यद्गोपगोकुलनंदनः। य एतस्मिन्महाभागाः प्रीतिं कुर्वन्ति मानवाः॥ नारयोभिभवंत्येतान्" इत्यादिना श्रीगर्गाचार्योक्तेः। अरयः कामादयः। यत इत्थं तत्तस्मात्सहजशीतलत्वात्संतापह्रारित्वादानंदस्यास्राविवात्कर एव पङ्कजस्तम्। यद्वा—पंकं क्लेशं जयतीति पंकजः कर एव पङ्कजस्तम्। तव करः पंकहरोऽस्ति अन्यथार्तबंधुत्वहानिः स्यादिति संबुद्धयभिप्रायः। किंकरीणामिति सर्वत्राभयार्थं दासीत्वदार्ढ्यार्थमेवोक्तम्। यद्वा—किंकरीतापः स्वामिनैवापह्रियत इति, त्वं चास्माकं स्वामीति। अन्यथा 'हितान्न यः संशृणुते स किं प्रभुः' इति न्यायेन तव किं प्रभुत्वं च स्यादिति भावः। तस्मादलं चातुरीप्रपंचेन मुंजावहित्थामित्याहुः—व्यक्तमिति। न तु कुत्राप्येतदाख्यानं गुप्तमित्यर्थः। किं तत्–भवान् व्रजस्य यद्भयं दावानलादिभ्यः, आर्तिः पीडा च वर्षवातादिभ्यस्ते हरतीति सः। 'व्रजजनार्तिहरः' इत्यपि पाठः। अभि सर्वतोभावेन नंदगृहे जातो यथा नारायण इति सर्वलोकैरुद्घुष्यते, अद्य यदि शतकोटिसंघा एता गोप्यो मरिष्यन्ति तदा व्रजजना नामेतत्पित्रादीनामार्तिः, कथमेकदैव ता वनमध्ये मृता इति भयञ्च भविष्यतीति भावः। तर्हि किमभीप्सितं वस्तत्राहुः—तत्तस्मात् हे आर्तबंधो अस्माकं तप्तेषु स्तनेषु करपंकजमर्पय। ननु तर्हि मृदुलमेतन्मे ज्वलिष्यतीति तत्राहुः—किंकरीणां त्वत्परिचारिकाणामस्माकं तप्तावप्येतौ त्वत्परिचर्यासाधनावेव। पंकजस्यापि सूर्योदयतापो न तापकः प्रत्युत सुखद एवेति भावः। शिरस्सु चेत्यतः परं मत्त्यागभयं मास्त्विति ज्ञापयितुं॥ ४१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं चतुर्थदिक्स्थिता अप्यात्मनि धर्म्मादिदोषं परिहृत्योपक्रमवदेव प्रत्युत तस्मिन्नेव धर्मदोषापत्तिमुपसंहरन्त्यः पुनर्विवक्षितमेवाहुः। किञ्च ननु भवतु तत्तत्सर्वं मम तु नारायणसमगुणत्वेन पूर्णकामत्वात् नान्यत्र प्रवृत्तिः स्यात् किमुतेदृशे कर्मणीत्याशङ्क्याहुः। व्यक्तमिति। व्रजस्य यद्भयं पूतनादिभ्यो दावादिभ्यश्च त्वदर्थस्त्रासः आर्त्तिश्च वर्षवातादिभ्यः पीडा तथा भयत्वद्विरहशङ्कया आर्त्तिस्त्वद्विरहेण तदुभयहरः सन् ते खण्डयितुमित्यर्थः—

तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम्। गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः॥ इति

स्वयमेव विभाव्य पर्वतभारस्य ग्रहणात् क्वाचित्कपाठान्तरे व्रजजनानामार्त्तिः बाह्यान्तराशेषबाधा अभिजातः सत्कुलाज्जात इति तत्रापि वैशिष्ट्यमतोऽस्माकं नाशे तत्रापि त्वदेकहेतुकनाशकत्वे व्रतभङ्गापत्तितोऽप्यधिको ऽधर्मदोषः स्यादिति भावः। ईश्वरस्य पूर्णकामस्यापि तादृशव्रतरक्षा तादृशकामना च दृश्यत एवेत्याहुः। देव इति। सर्वथा दीव्यति विराजत इति देवः आदिपुरुषः सर्वपुरुषेषु श्रेष्ठः सोऽपि यथा सुरलोकगोप्ता स्वेच्छयैव तज्जनमात्रस्य रक्षिता सन्नदित्यादावभिजातो भवति तत् तस्मात् करस्य पङ्कजत्वं तापहारितामात्रांशे रूपितं वस्तुतस्तु तापस्य तदप्राप्तिमात्रनिदानत्वात्तदारम्भ एवापगमः स्यादित्यभिप्रेत्यैव तप्तेष्वपि स्तनेषु परमस्निग्धाभिरपि ताभिस्तन्निधानप्रार्थनमिति ज्ञेयं पूर्ववत् सदैन्यमप्याहुः। शिरः सु च किङ्करीणामिति इत ऊर्ध्वं चास्मानात्मसात्कुर्विति विवक्षितं हे आर्त्तबन्धो! इति आर्त्तबन्धो साक्षाद्विराजमाने त्वद्दासीनां तापोऽनुचित इति सूचितं तथा कामेन च मा निधेहि किन्तु आर्त्तबन्धुत्वेनैव निधेहीति च गूढोऽयमभिप्रायः अवहित्थयाछाद्यमानोऽपि मनोभवोऽस्मदङ्गेषु हस्तार्पणेन स्वयमेवोद्भवितेति निषेधार्थश्चायं तथापि तं बलादिव स्पृशन्तमाशङ्क्याहुः। व्यक्तमिति। तत्र पूर्वोद्धेतोः धर्मभयादितोऽपि रक्षा तवोचिता ननु तन्नाश इति भावः। नो निधेहि मा निधेहि आर्त्तबन्धो! इति स्वेषां धर्मभयादार्तिं व्यञ्जयन्ति तप्त हे कामाग्निसन्तापितहृदय! किङ्करीणां स्वगृहदासीनामपि किमुत मादृशीनां तत्रापि शिरःसु च नो निधेहि मा निधेहि किमुत स्तनेष्वित्यर्थः। तदेवं स्वागतमित्यादिप्रकरणं संलापाख्योऽनुभावो ज्ञेयः "उक्तिप्रत्युक्तिमद्वाक्यं संलाप इति कीर्त्यते" इत्युक्तेरिति॥ ४१॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं प्रतिवचनैस्तदुक्तं सर्व्वं क्रमेण परिहृत्याधुना तस्यावतारप्रयोजनं प्रदर्शयन्त्यः परमार्त्त्यासकाकु प्रार्थयन्ते—व्यक्तमिति व्रजस्य भयं दावादित आर्त्तिश्चत्वदप्राप्तेः, यद्वा, भयं त्वदर्थं पूतनादिभ्यो दावादिभ्यश्च, आर्त्तिश्च वर्षवातादिभ्यः, यद्वा, भयं त्वद्विरहशंक्या, आर्त्तिस्त्वदुपेक्षया, पाठान्तरे व्रजजनानामार्त्तिर्बाह्यान्तराशेषबाधा, इदं न सर्वसम्मतम्, एतच्चात्मोद्देशेनोक्तम्, किंवा व्रजस्य जनाः कालान्तरेऽप्येतद्व्रजभूम्याश्रिता ये जनास्तेषामपि, किमुतास्माकं तद्धरः सन् तन्नाशनायेत्यर्थः। अभितोऽशेष भगवत्ताप्रकटनविशेषेण जातः प्रादुर्भूतः। यद्यपि भूभारहरणादिकमपि प्रयोजनम्, तथापि व्रजभयर्त्तिहरणमेव मुख्यं प्रयोजनम्। तत्र तदर्थकृतलीलयैव सर्वत्र मुख्यप्रयोजनम्, निजप्रेमरसविस्तारसिद्धेः तदर्थं दीनकारुण्यविशेषेण धर्म्मातिक्रमोऽपि कार्य्यं इति दृष्टान्तेन बोधयन्ति—देवो जगतामेव पूज्यः, यत आदिपुरुषो जगत्कारणभूतः परमेश्वरः सोऽपि यथा सुरलोकगोप्ता,

सुरलोकः स्वर्गस्तेन तत्रत्या लक्ष्यन्ते। यद्वा, सुराश्च लोकाश्चान्ये निजजनास्तेषां गोप्ता तत्प्रतिपक्षादिमारणेन रक्षकः सन् यथा जायते, गोप्ता यथा भवतीति वा, तथा तथा सर्वत्र तस्य साम्येऽपि भक्तापेक्षया वैषम्यमपि स्यात्, तथार्त्तानामस्माकमपेक्षया धर्म्मस्त्वया लङ्घ्य एव, तत्र च यथा तस्य न दोषो घटते, किन्तु गुण एव महान् तवापीति भावः। यद्वा, देवोऽपि आदिपुरुषोऽपि सुरलोकगोप्तापि भवान् व्रजभयार्त्तिहरः सन्, अत एव श्रीगोपेन्द्रनन्दनत्वेन यथावदाभिजातः, तच्च व्यक्तं निश्चितं स्पष्टमेवेत्यर्थः। तत्तस्मात् कर एव पंकजं सहजसुशीतलत्वात् सन्तापहरत्वादानन्दरसस्रावित्वाच्च, तदादौ नस्तप्तेषु स्मरज्वराक्रान्तेषु स्तनेषु निधेहि, तदार्त्तिनाशनार्थं पश्चात् शिरःसु निधेहि, सर्वत्राभयार्थम्; दासीत्वस्वीकारदार्ढ्यार्थं वा, चकारद्वयमुभयत्रापि प्राधान्यबोधनार्थम्। त्वदेकप्रियाणामस्माकं भयार्त्तिहरणेनैव सर्व्वव्रजस्य भयार्त्तिहरणम्, ततश्चाशेषभगवत्तासारप्रकटनरूपं तवावतारप्रयोजनमपि सिध्येदिति भावः। ननु, तप्तेषु कथं करो निधेयः? तत्राहुः—आर्त्तबन्धो! दीनवात्सल्येन दुःखादिकमपि सह्यमेवेति भावः। ननु, पतिव्रतानां व्रतपराणां शिरसि करनिधानाद्बिभेमि, तत्राहुः—किंकरीणामिति। आर्त्तबन्धो त्वयि साक्षाद्विराजमाने त्वद्दासीनां तापोऽनुचित इति च सूचितम्। यद्वा, ननु काममत्ताः! जितकामेन मया कथं स्तनेषु करो निधेयः, अतः शिरः स्वेव निधेयस्तत्राहुः—आर्त्तेति। कामेन मा निधेहि, किन्तु आर्त्तबन्धुत्वेन निधेहीत्यर्थः, अन्यथा सद्योऽस्माकमन्त्यदशापत्त्या तवार्त्तबन्धुत्वयशोहानिः। गूढोऽयमभिप्रायः—अवहित्थया छाद्यमानोऽपि मनोभवोऽस्मदंगेषु हस्तार्पणेन स्वयमेवोद्भवितेति। ननु वह्वीनां समक्षं लज्जे, तत्राहुः—किंकरीणां त्वद्वशगानां सर्व्वासामेवास्माकमैकमत्येन कोऽत्र लज्जावसर इति भावः। युथशो वह्वीनामपि तासामेकस्मिंस्तस्मिन् तादृशप्रार्थनं तच्छक्तिविशेषपरिस्फूर्त्त्या, किंवा अनुक्रमेणापि निधेहीत्याशयेनेति दिक्। श्लेषार्थः—भवान् अभिजात आभिजात्ययुक्तो व्रजेन्द्रात्मजत्वात् देव इत्यादिपदत्रयेणाधर्म्मे तव प्रवृत्तिरनुचितेत्युक्तम्। यथा आदिपुरुषः, सुरलोकगोप्ता सुरलोकभयहरस्तथा भवान् व्रजभयर्त्तिहर इति सतीनामस्माकं बलादभिभवेन व्रजस्य त्वत्तो भयमार्त्तिर्भवितैवेति, तच्च तवायुक्तम्, निजप्रयोजनप्रातिकूल्यात्। नो निषेधे, आर्त्तबन्धो! इति वयं नार्त्ताः, यदस्माकं बन्धुर्भविष्यसीति भावः। अकारप्रश्लेषेण कामाद्यभावात्, अतप्तेषु स्तनेषु, अतएव न निधेहि। यद्वा, हे तप्त! कामाग्निदग्ध हृदय! यद्वा, तप्तः सन् स्तनेषु करपंकजं नो निधेहि नार्पय, अप्यर्थे चकारः, तव राजकुमारत्वेन चास्माकमपि व्रजे निवासेन दासीत्वमिव प्राप्तानामपि शिरस्यपि न निधेहीत्यर्थः। यद्वा, किंकरीणां व्रजेन्द्रगृहदासीत्वेन वर्तमानानां किशोरीणामपि, किमुत मद्विधानाम्, एवं दशश्लोक्या प्रत्युत्तरेण तं निर्ज्जित्यैकादशेनानेनार्त्त्युद्रेकतो निजेष्टं स्पष्टमेव प्रार्थितम्, अत्र च श्लेषार्थोऽपि क्रमेण तदुक्तश्लेष—परिहारतयैव ऊह्यः, स च तत्र तत्रैव लिखितः। अथवा तदुक्त-दशश्लोकार्थस्य वैदग्धीविशेषेण एकादशानां श्लोकानामेषामेकैकेनैवोत्तरमूह्यम्, तत्र पौनः पुण्यं तथा तदुक्ततोऽप्यधिकमेकं पद्यम्, तत्र च दीर्घच्छन्दः, तदत्यन्तनिर्जयार्थम्, किंवा प्रणयशेषावेशेनोरुदुःखभरणैव वा ज्ञेयम्॥

तथापि विभो हे प्रभो! इति स्वागतमित्यर्द्धस्य, निजदासीषु तत्रापि भवानिति अस्मदुपेक्षावरं नृशंसं वक्तुं नार्हत्येवेति, सर्व्वविषयान्, संत्यजेति पादस्य, तेनाधुनास्माकं प्रयोजनमिति किं तद्वार्त्तयेति, तव पादमूलं भक्ता इति, रजनीत्यादि-श्लोकद्वयस्य त्वदाश्रितत्वेन घोरसत्त्वादिभ्यो बन्धुभ्यश्च भयं नास्तीति, भक्ता इति दृष्टमित्यस्यापि तव भजनार्थमेवागताः, न तु वनदर्शनार्थमिति। एतेन ब्रूतेति पादस्यापि सिद्धं त्वद्भजनमेवागमनकारणमिति। तथा तद्यातेत्यस्यापि व्रजगमनादिनिरस्तेः। भजस्वेति निजभावविशेषः सूचितः। अनेनाथवेत्यस्य तेनैवागताः स्मः, न त्वन्यजनवत् सामान्यस्नेहेनेति, दुरवग्रहेति भर्त्तुरित्यादि द्वयस्य, युक्त्युक्तभर्त्तृशुश्रूषणाग्रहस्य निरसात् मा त्यजेति अस्वर्ग्यमित्यादि द्वयस्य युक्तिसिद्धस्यापि सदैन्यप्रार्थनया परिहारसिद्धेः, देवो यथेति तत्र युक्तिरपि दर्शितैवेति, तत्तद्विशेषस्तु पूर्व्वलिखितानुसारेण ज्ञेय एव। एवमग्रेऽपि, यत्पतीति मातरः, तद्यात, भर्त्तुर्दुःशील इति चतुष्टयस्य सर्व्वबन्धेषु कृत्यानां तस्मिन्नेव प्रार्थनया तेषामुपेक्षणात्, किं तत्साध्वसादिनेति त्वयीशे इति व्रजस्येति पादस्य त्वत्प्रभावेनैव तत्रत्यमंगलमिति, एतेन रजनीत्यस्यापि त्वन्नैकट्येन भयाभावात्, तथा ब्रूतेति पादस्यापि त्वदर्थमेव गमनमिति तात्पर्य्यात्, तथा स्वागतमित्यर्द्धस्यापि पूर्व्ववत् ईशितव्य-जनेषु तादृशोक्तेरयोग्यत्वात्, एवमिति अथवेत्यस्य निजभावविशेषसूचनात्, उपदेशपद इति अस्वर्ग्यमित्यस्य सर्व्वत्र सर्व्वथा सर्व्वैर्भजनीयतयोपदिश्यमानस्य तवैव भजनाभासतः सर्व्वदोषहानेः सर्व्वगुणसिद्धेश्च। प्रेष्ठ इत्यादिना तत्त्वत औपपत्यामपि निरस्तम्। अनेन श्रवणादित्यस्यापि परमात्मत्वादिना परमार्थरूपस्य तवांगसंगोऽपि परमार्थरूप एवेति न्यायात्, अन्यथा तेजस्तिमिरयोरिव सम्बन्धो न घटेतैवेति। प्रेष्ठ इति दृष्टमित्यस्यापि तत्प्रेष्ठत्वेनैवास्य प्रेष्ठत्वम्, न तु पृथक्त्वेन, अतः किं केवलं तद्दर्शनेनेति, अत्र च तदुक्त-परिहारावेशेन तत्र च मुहुरुद्यत्प्रेमरोषेण तन्निर्जयार्थं प्रत्युत्तरमात्रापेक्षया क्रमोऽपि नापेक्षितः, एवमग्रेऽपि। कुर्व्वन्तीति स्वागतमित्यर्द्धस्य कुशलानां रतिविषयस्य तव नृशंसोक्तेरयोग्यत्वमिति। यद्वा, तादृशस्य तवान्तिकागमनात् स्वागतं महाभागाश्च सत्यं वृत्ताः स्मः, नान्यथेति तात्पर्य्यात्, पतीति व्रजस्येति पादस्य तथा पूर्व्ववन्मातर इत्यादि चतुर्णां स्व आत्मन्निति रजनीत्यस्य प्राणनाथबन्धोस्तव नैकट्येनाकुतोभयत्वात्, परमबन्धुपार्श्वस्थेयत्वात्वाच्च। (३३ श० श्लो०) 'वरदेश्वर' इति (२३ श० श्लो०) 'अथवा' इत्यस्य, पूर्व्वदत्तवरानुसारेण प्रेमविशेषणैवागताः स्म इति, अनेन (२१ श० श्लो०) 'दृष्टम्' इत्यस्यापि तदर्थमेवात्रगताः स्मः, न तु वनदर्शनमात्रार्थमिति (३३ श० श्लो०)

'प्रसीद' इति, (२१ श० श्लो०) 'अस्वर्ग्यम्' इत्यस्य, तव प्रसादे सति सर्व्वगुणसिद्धिर्दोषहानिश्चेति, मा स्म छिन्द्या इति शरणादित्यस्य अंगसंग एव, चिराशाधारणादिति विभाव्यमिति, (३४ श० श्लो०) 'सुखेन' इति, (१८ श० श्लो०) 'स्वागतम्' इति पादस्य सुखघनमूर्त्तेस्तव दुःखात्मकनृशंसोक्तिर्न युक्तेति, पूर्व्ववदिति वा, चित्तमपहृतमिति, (१८ श० श्लो०) 'व्रजस्य' इति पादस्य रजनीत्यादि त्रयस्य च चित्तहरणेन तत्तदनुसन्धानापगमात्, इति तात्पर्य्येण निजेष्टं व्यञ्जितमेव। तेन च प्रियमिति ब्रूतेति पादयोः हृतचित्तास्वस्मासु यत् कर्त्तुमुचितं तदेवास्माकं प्रियमागमनकारणञ्चेति, करवामेति तद्यातेत्यस्य भर्त्तुरित्यादि-द्वयस्य च विशेषतः कर्म्माशक्तेरिति चित्तमित्यनेनैव, अथवेत्यस्यापि सिद्धम्, भवता चित्तहरणादेवागताः स्म, न त्वन्यजनवत्, स्नेहमात्रेणेति पादावित्यर्द्धेन अस्वर्ग्यमित्यादिद्वयस्य तस्य परममोहनत्वसूचनेन निजाविवेकादिदोषपरिहारात्, तथा (३४ श० श्लो०) 'करवाम किंवा' इति कर्म्मान्तरस्य हेयत्वम्, तत्सन्निकर्षस्य चोपादेयत्वं सूचितमेवेति, सिञ्चेति स्वागतमिति पादस्य अभ्यागतानां महाभागानां हिताचरणोपपत्तेः; अनेन प्रियमिति ब्रूतेति पादयोश्च पूर्ववत्, तथा अथवेत्यस्यापि एतदर्थमेवागताः स्म इति नोचेदिति अन्येषां सर्व्वेषामेव सद्यो मरिष्यन्तीनां किमन्यच्चिन्तयेति। यर्हीति अम्बुजाक्षेति स्वागतमिति पादस्य दृष्ट्यैव सर्व्वतापहरस्य नृशंसोक्तिरयुक्तेति। यद्वा, सहजशीतलमधुरदृष्ट्यावलोकयसि चेत्तदैव स्वागतत्वं महाभागत्वञ्च। यद्वा, अम्बुजाक्षस्य परममनोहरस्य तव सन्दर्शनादेव तत्तद्वृत्तमिति अरण्यजनप्रियस्येति रजनीत्यस्य प्रियजनपार्श्वे प्रियजनानामकुतोभयात् स्थैर्यत्वाच्च, अनेन दृष्टमित्यस्यापि पूर्व्ववत् तत्प्रभृतीत्यादिवाक्येन व्रजस्येति पादस्य पूर्व्ववन्मातर इत्यादि चतुष्टयस्य च तेषु रुच्यभावेनालं तद्वार्त्तयापीति अभिरमिता इति, अथवेत्यस्य त्वदभिरमणभावविशेषेणैवागताः स्म इति, एतेन अभिरमणमेव नित्यप्रियमिति सूचितम्। तेन प्रियमिति ब्रूतेति पादयोः रमाया दत्तक्षणं पादतलमस्याक्ष्मेति अस्वर्ग्यमित्यादि द्वयस्य रमापतेरस्माकं पत्नीत्वासम्भवादौपपत्येनैव भजनसिद्धेः, तत्र च महत्तमायास्तरया प्राप्यस्य प्राप्तावस्माकं सिद्धायां किं नामास्वर्ग्यत्वादिकमिति। किञ्च, यथा तया सह तथास्माभिः सहांगसंगो घटेत एव, तेन च भावो नितरां सम्पद्येतैव, अन्यथा परमप्रेमवत्या भक्तवर्गपूजाया तया सह तदनुपपत्तेरिति श्रीर्यदिति व्रजस्येति पादस्य रजनीत्यादिद्वयस्य तद्यातेत्यस्य भर्त्तुरित्यादिद्वयस्य च ब्रह्मादिप्रार्थ्यकटाक्षापि सर्व्वोपेक्षया यथा श्रीश्चकमे, तथा सर्व्वोपेक्षया वयमपि प्रपन्ना इति किमन्यवार्त्तयेति। अनेन अथवेत्यस्यापि तत्सदृशप्रेम्णैवागताः स्म इति। दृष्टमित्यस्यापि त्वत्प्रियत्वावेक्षयैव यथा तस्याः क्षीरसमुद्रादि, तथास्माकं श्रीवृन्दावनमप्येतत्, अतोऽस्य केवलदर्शनेनेव न प्रयोजनमिति। तथा अस्वर्ग्यमित्यादि द्वयस्य च पूर्व्ववदेव, अतोऽस्माकं त्वद्दास्यमेव काम्यमिति तात्पर्य्येण प्रियमिति ब्रूतेति पादयोरपि सिद्धम्, तथा सत्येव महाभागाः स्मः। स्वागतप्रश्नस्य च योग्या इति स्वागतमिति पादस्येति तन्न इति प्रसीदेति स्वागतमित्यर्द्धस्य पूर्ववत्, अनेन प्रियमित्यादिपादयोश्च त्वत्प्रसादे एवास्माकं प्रियस्तदर्थमेवागमनमिति वृजिनार्द्दनेति व्रजस्येत्यस्य रजनीत्यर्द्धस्यापि तस्य, दुःखभयनाशनशीलत्वात् अङ्घ्रिमूलं प्राप्ता इति। प्रतियातेत्यर्द्धस्य त्वदङ्घ्रिमूलं प्राप्तानामन्यत्र यानानुपपत्तेः, तत्रैव स्थैर्यत्वाच्च, विसृज्य वसतीरिति पूर्व्ववन्मातर इत्यादि चतुष्कस्य, त्वदुपासनाशा इति दृष्टमित्यस्य त्वत्सेवार्थमेवागताः स्मः, न तु वनं द्रष्टुमिति, त्वत्सुन्दरेति वाक्येन अथवेत्यस्य कामतप्तात्मत्वेनैवागताः स्म इति। पुरुषभूषणेति अस्वर्ग्यमित्यादि द्वयस्य तव पुरुषोत्तमत्वादौपपत्ये कोऽपि न दोषः, तत्त्वतस्तवैव पतित्वात् परमसाध्यत्वाच्च, अतोऽङ्गसंगेन भावो वर्द्धतैव 'सन्निकर्षो हि मर्त्त्यानाम्' इत्यादिन्यायोऽन्यविषयक एवेति। वीक्ष्येति तव श्रीमुखादिकं वीक्ष्य दास्यो भवामेति व्रजस्येति पादस्य रजनीत्यादि चतुष्कस्य, भर्त्तुरित्यादि द्वयस्य च त्वद्दासीभूतानां किमन्यैरिति, अनेन अथवेत्यस्यापि दासीभावेनैवागताः स्म इति। श्रियैकरमणमिति अस्वर्ग्यमित्यादिद्वयस्य पूर्ववत्। एवं स्वागतमित्यर्द्धस्य ब्रूतेति पादस्यापि सिद्धं त्वद्दास्यमेवास्माकं प्रियं तदर्थमेवागमनं तत्सिद्धौ स्वागतत्वादिकं चेति। यद्वा, दत्ताभयमिति व्रजस्येति पादस्य रजनीत्यादि-द्वयस्य भर्त्तुरित्यादि-त्रयस्य च इह लोके घोरसत्त्वेभ्यो बन्धुभ्यश्च परमस्मिंश्च यमादिभ्योऽप्यभयसिद्धेः। अनेन तद्यातेत्यस्यापि न्यायेन भर्त्तृशुश्रूषणादेर्वैयर्थ्यात् त्यक्तसंग्रहेण दोषावहत्वाच्च, मुखं वीक्ष्येत्यनेनैव दृष्टमित्यस्यापि एतादृश-त्वच्छ्रीमुखवीक्षणेनान्यदिदृक्षाया अप्यनुदयात् श्रियैकरमणमिति श्रवणादित्यस्य। अन्यत् समानम्। का स्त्रीति स्वागतमित्याद्यष्टकस्य तद्वेणुगीतसम्मोहितानां किं स्वागतत्वादिना किंवा प्रियादिप्रश्नेन किंवा धर्म्मादिबोधनेनेति, त्रैलोक्येति अस्वर्ग्यमित्यादि-द्वयस्य एतादृशसौन्दर्य्योपभोगविशेषे किं नामाहो अस्वर्ग्यत्वादिकं भावोऽपि स्वतः एव वर्द्धिष्यतेतरामिति। यदिति माहात्म्यविशेषेण तस्यालौकिकतोक्त्या सन्निकर्षे लौकिकन्यायाद्युक्तदोषश्च परिहृतः व्यक्तमिति व्रजभयार्त्तिहर इति व्रजस्येति पादस्य रजनीत्यादि-द्वयस्य तद्यातेत्यस्य भर्त्तुरित्यादिद्वयस्य च पूर्ववत् कुतोऽपि भयासद्भावात् देव इत्यादि अस्वर्ग्यमित्यादि-द्वयस्य दीननात्सल्यापेक्षया तवाप्यत्र न दोषः। कश्चित्तथा तवादिपुरुषस्य संगादस्माकमपि न कथञ्चिदपि आदिपुरुषत्वेन। तत्त्वतस्तस्यैव पतित्वेनौपपत्यस्य तथा प्राकृतत्वेनांगसंगस्याप्यप्राकृततया सर्वदोषस्य पूर्ववत् परिहारात् साध्यत्वबोधनाच्च, तन्नो निधेहीति प्रियमिति ब्रूतेति पादयोः किंकरीणामिति अथवेत्यस्य दास्यविशेषेणैवागताः स्म इति। अनेन दृष्टमित्यस्यापि दासीनां वनदर्शनमानुषंगिकमेव, स्वामिसन्दर्शनमेव मुख्यमित्यत्रैव चिरात् प्रार्थितं सम्पादयेति तदैव स्वागतमित्याद्युक्तं तव यथार्थप्रियं च स्यादिति तत्पादस्याप्युत्तरं ज्ञेयमित्येषा दिक्। अलमतिविस्तरेण ग्रन्थबाहुल्यदोषात् विभिमः।

श्रीगोपीप्रियपादाब्जप्रसादरमितात्मभिः। यथारुच्यन्यथाप्यत्र कृतोऽर्थः स्यात् पदे पदे ॥
अन्योऽन्यं तस्य तासाञ्च वाचोऽर्थोऽन्योत्यमेव हि। हृद्येयोऽप्यधिया धाष्ट्र्योल्लिखितः प्रीतये सताम् ॥

इत्थं च पूर्व्वमंगसंगो नूनं न वृत्तोऽस्तीति गम्यते, अन्यथा तस्य तासां च तत्तदुक्त्यनुपपत्तिः। अतएव (द्वादशाध्याये) श्रीमुक्ताफलग्रंथकारादिभिः पूर्व्वरागे एकविंशाध्यायोक्तम् (भा० १०।२१।७) 'अक्षण्वतां फलम्' इत्यादिकं संगृहीतम्, अतएव श्रीस्वामिपादैरपि व्याख्यातम् (३६ श० श्लो०) 'त्वयाभिरमिता आनन्दिताः' इति मुख्यार्थत्वेऽपि श्रीवल्लभभट्टपादादिभिः स्वप्नादाविति व्याख्यातम्, तत्तच्च लिखितमेव। एवं पञ्चदशे (भा० १०।१५।४२)—'तं गोरजश्छुरितम्' इत्यादि पद्यद्वयम्, ऊनविंशे (भा० १०।१९।१६)–'गोपीनां परमानन्दः' इति पद्यम्, अन्यच्च अन्यत्रत्यं तादृशं तत्रैवोह्यम्। यद्वा, अंगसंगः पूर्व्वमपि सकृत् त्रिवारान् वा, तदेकरसिकत्वाद्वृत्तोऽस्त्येव, एवं सति अभिरमिता इत्यस्य मुख्यार्थ एव, अधुना चासकृत्तदाचरणे रासविलासविशेषे वा, तस्य तासां च तादृश्युक्तिर्मन्तव्या। यद्वा, परमप्रेमरससमग्नमनसां तासां (भा० १।११।३४) 'यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्याङ्घ्रियुगं नवं नवम्, पदे पदे' इत्यादि-न्यायेनासकृत् कृतमपि तं परममधुरवस्तुनस्तादृशस्वभावात् सदा नूतनमिव मन्यमानानां तथा तादृशस्यैव रसिकशिरोमणेस्तस्यापि तत्तदुक्तिर्घटेतैव, ततश्च 'अभिरमिताः' इत्यस्य श्रीस्वामिपादकृतव्याख्यापि संगच्छेतैव, एतच्च श्रीभागवतामृतोत्तरखण्डे विवृतमेवास्ति ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

व्रजजनार्त्त्यपाकरणायावतीर्णस्य पुनस्तदार्त्त्योपादनमनुचितमित्यभिप्रायेणाहुः। व्यक्तमिति। यथा आदिपुरुष उपेन्द्रादिरूपेण सुरलोकार्त्तिनिरसनेन तद्रक्षणार्थमवतीर्णस्तथा त्वमपि व्रजजनस्यार्त्तिहरो नूनं जातःतत्तस्माद्धे आर्तबन्धो ! किङ्करीणां तप्तेषु स्मरतापतप्तेषु स्तनेषु शिरःसु च पङ्कजवच्छीतलं कोमलं च करं निधेहि निधायार्त्तिशमयेति भावः। आर्त्तबन्धो इति तदनुगुणं सम्बोधनं किङ्करीणामित्यपेक्षणीयसम्बन्धाविष्कारः ॥ ४१ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सर्वस्य स्वामित्वेन भर्तृगुणयोगादस्मत्कुलेऽभिजातत्वेन बन्धुत्वेन सम्बन्धयोग्यत्वादस्माकं त्वत्सम्बन्धेन जारसंसर्गदोषापगमनेन निन्द्यत्वं दूरोत्सारितं स्यादिति भावेनाहुः। व्यक्तमिति। भगवान् यथा सुरलोकगोप्ता वामनतयाभिजातः तथादिपुरुषो देवो भवान् व्रजभयार्तिहरोऽभिजात इति व्यक्तम् इदमसंदिग्धमिति यत्तत्तस्माद्यथा यस्मादिति वा कामाग्नितप्तेषु उभयत्र योज्यम् ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अतः प्रथमतो वेणुगीतेनैव सम्मोहिताः, तदनु तव चरितादेव भ्रान्त्याः, तदनु त्रैलोक्य सौभगमिदं रूपञ्च निरीक्ष्य मूर्च्छिताः, अतः परमपि त्वया सहोक्तिपराः स्मः। इतः परं किमस्माकं धैर्यम् ? तस्मान्मा परं भ्रामय, प्रसीदेत्युपसंहरन्त्योऽन्या आहुः—व्यक्तं भवानित्यादि। व्रजस्य भयमार्त्तिश्च, तद्धरत्वेन भवान् प्रादुर्भूत इति व्यक्तमेव। सुरलोकगोप्ता देव आदिपुरुषो यथांशरूपेण भवानेव यथादिपुरुषत्वेन सुरलोकं गोपायसीत्यर्थः। व्रजे तु स्वयमेवेति भवच्छब्दार्थः। अतस्तवाधिक्यं करुणाया भवितुमर्हति। यद्वा, देवो यथादिपुरुषः सुरलोकगोप्ता, तथा त्वं व्रजभयार्तिहर इति। तस्मान्नोऽस्माकं किङ्करीणां तप्तस्तनेषु शिरःसु च करपङ्कजं निधेहि। हे आर्त्तबन्धो ! व्रजार्तिहरत्वेन समुचितमेवास्माकमार्तिहरणमित्युपसंहारः ॥ ४१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

उपसंहरन्त्य आहुः—व्यक्तं भवानित्यादि। व्रजस्य भयमार्त्तिरर्त्तिर्वा पीडेति यावत्, उभयोरेव हरणकृत त्वमभिजातः प्रादुर्भूत इति व्यक्तं स्फुटं सर्व एव जानन्ति। देवः क्रीडापरः सन् यथा आदिपुरुषो नारायणः सुरलोकगोप्ता त्वं तदधिकोऽपि दृष्टान्तान्तराभावात् तेन सहैवोपमा क्रियते। अतो व्रजस्यापि सुरलोकाधिकत्वम्। तत् कथं स्वयमेवार्त्तिजनयस्यस्माकम्, तत् तस्मात् नोऽस्माकं हे आर्त्तबन्धो ! तप्तस्तनेषु च शिरःसु च करपङ्कजं निधेहि—इत्युपदेशः ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्मादलं चातुरी प्रपञ्चेन मुञ्चावहित्थमित्याहुः। व्यक्तं ननु कुत्राप्येतदाख्यानं गुप्तमित्यर्थः। किन्तत् भवान् व्रजस्य यद्भयं दावानलादिभ्यः आर्त्तिः पीडा च वर्षवातादिभ्यस्ते हरतीति सः। व्रजजनार्त्तिहर इत्यपि पाठः। अभि सर्वतोभावेन नन्दगृहे जातो यथा नारायण इति सर्वलोकैरुद्घुष्यते अद्य यदि शतकोटिसंख्या एता गोप्यो मरिष्यन्ति तदा व्रजजनानामेतत्पित्रादीनामार्त्तिः कथमेकदैवैता वनमध्ये मृता इति भयञ्च भविष्यतीति भावः। तर्हि किमभीप्सितं वस्तत्राहुः। तत्तस्मात् हे आर्त्तबन्धो ! अस्माकं तप्तेषु स्तनेषु करपङ्कजमर्पय। ननु तर्हि मृदुलमेतन्मे ज्वलिष्यतीति तत्राहुः। किङ्करीणामिति। त्वत्परिचारिकाणामस्माकं

तप्तावप्येतौ त्वत्परिचर्यासाधनावेव पङ्कजस्यापि सूर्योदयतापो न तापकः। प्रत्युत सुखद एवेति भावः। शिरःसु चेत्यतः परं वो मत्त्यागभयं मास्त्विति ज्ञापयितुम् ॥ ४१ ॥

रसिकाह्लादिनी–टीका

एवं तदुक्तं सर्वमनूद्य तस्यावतारकार्यं कथयन्त्यः परमार्त्ताः स्वकीयार्तिशमनं प्रार्थयन्ते व्यक्तमिति, प्रतियातेति उक्तम्। क्षते क्षारमिवासहमानाः स्वमुखेन संनिकर्षमेव याचन्ते व्यक्तमिति। एतत् व्यक्तं निश्चितं भवान् व्रजजनार्त्तिहरोऽभिजातः। विश्वपालनायावतीर्ण इति केचिद्वदन्ति। तत्र विश्वपालनम् बतारान्तरेणापि भवति व्रजजनार्त्तिहरणप्रयोजनः सन्नवतीर्णः गोवर्द्धनोद्धरणादिना सर्वेषां बाह्याभ्यंतरार्त्तिहरणे जातेऽस्मदन्तरार्त्तिहरणाभावेन त्वयि वैशम्यं भविष्यतीति। प्रीतिकर्त्तृषु आर्त्तेषु सत्सु त्वयि प्रीतिं कोऽपि न करिष्यतीति भावः। भूभारहरणं तु तवेच्छयैव भवेत् ईश्वरत्वात् सामन्यतो व्रजजनार्त्तिहरणमस्मत्सम्बन्धपुरस्कारेण मुख्यमस्मादार्त्तिहरणमेव प्रयोजनम्। अस्मदार्त्तिहरणे मधुररसरक्षा भवेत् मधुररसे रक्षिते परमानन्दपूर्णं तव स्वरूपं सुरक्षितं भविष्यतीति भावः किं न्यायमाहुः यस्तु यस्मिम् प्रपन्नो भवति स तु तेन पाल्यो रक्षणीयाश्च भवति। तद्यथा—आदिपुरुषः श्रीनारायणः वामनादियज्ञावतारैः सुरलोकगोप्ता, सुरान् देवान् तत्तल्लोकांश्च गोपायति रक्षति। देवः सर्वपूज्योऽपि मोहिनीरूपेण दैत्यान् वंचयित्वा देवेभ्योऽमृतं दत्तवान्। यद्यपि परमेश्वरस्य सर्वत्र समस्य वैषम्यं नास्ति तथापि स्वकीयेषु प्रीतिं प्रकटयता तथा कृतम्। दिव्यते क्रीडति इति देवः क्रीडाप्रधानः सापेक्षश्च कथमस्मान् वंचयसि। त्वन्तु व्रजेश्वरपुत्रत्वात् सेव्यो वयं सेवक्यः। ननु कथमार्त्तिहरणं भवेत् तत्र विशेषेण कथ्यतामिति चेत्तत्राहुः। तदस्मात्तावत् करपङ्कजं आर्तिहरणशीलत्वात् अति शीतलत्वान्नोऽस्माकं मन्मथाग्निज्वालावलीढत्वात् नस्तनेषु तापशान्त्यर्थं निधेहि कामज्वरस्तु स्त्रीणां स्तनयोरेव तिष्ठति। हृदयशैल्ये जाते सति शिरस्सु करपङ्कजं निधेहि स्थापय अस्मदार्त्तिनिग्रहे तवावतारप्रयोजनजातमिति प्रसिद्धिं करिष्यामः। ननु बाल्यात्प्रभृति नैष्ठिकब्रह्मचारी अहम् भवतीनां कुचस्पर्शाद्बिभेम इति चेत्तत्राहुः किंकरीणमिच्छति किकरीकुचस्पर्शे कस्यापि न भयं न च संकोच आबाल्याद्व्रतस्य ब्रह्मचर्य्यस्य च फलं भविष्यतीवेति भावः। हे आर्त्तबन्धो बयमार्त्तास्त्वं बन्धुरार्तिनाशनः त्वयि बन्धौ विद्यमानेपि चेदार्त्तिस्तदा कृपालुत्वं न सेत्स्यते। यद्यपि त्वं निःकामस्तथापि त्वया परमार्त्तो गजेन्द्रो यथोद्धृतस्तत्रार्त्तबन्धुप्रसिद्ध्या तव कीर्तिर्जातैव ततः स्वकीर्तिरक्षार्थमधुनापि नोऽस्माकं शिरसि हस्तपंकजधारणेन स्तनयोस्तापशान्त्या च औचितीं विधत्स्व। यद्वा भवान् व्रजजनार्त्तिहरः व्रजस्य जनानां चार्त्तिहर इति व्यक्त सर्वलोकेपु प्रसिद्धम्, कालियदमनादिना अभिजातः अभिजातेनास्मानवेक्ष्य व्रजेश्वरपुत्रत्वात्। ननु भवत्यो न तापतप्ता आगता किन्तु चापल्यात् स्त्रीस्वभावादत्रागता इति चेत्तत्राहुः ततः स्तनेषु शिरस्सु च करपङ्कजं निधेहि हस्तं न्यस्य प्रतीयतां स्वयमेव तापोऽभिव्यक्तो भविष्यतीति भावः किंकरीणमिति अस्मत्तापानपगमेऽन्योपि तव कैकर्यं न करिष्यतीत्यर्थः। एवं प्रार्थनेन व्यञ्जनयाङ्गसङ्गः स्वयमेव प्रार्थितः ॥ ४१ ॥

विशुद्धरसदीपिका

किञ्च गम्भीराशयस्य नागरशिरोमणेर्भवतोऽभिप्रायं निर्धारयितुं न पारयाम आभीरबाला इति यथा जानीमस्तथाकुर्विति सदैन्यं सानुनयं ब्रुवन्त्य उपसंहरन्ति। व्यक्तमिति। प्रसिद्धं निश्चितमिति यावत् भवानित्यादि तत्र व्रजस्य भयं पूतनादावादिभ्यः आर्तिश्च त्वद्विरहेणेति यथायोगमूह्यं तथा अभिजातस्तु कुलजे बुध इत्यमरकोशात् हे आर्तबन्धो ! इति दैन्यं तप्तस्तनेष्विति। विरहेणेति शेषः तत्र करपङ्कजमिति तापापनोदनत्वं वस्तुतस्तु अवहित्थया छाद्यमानोऽपि मनोभवोऽस्मत्कुचस्पर्शादुद्भविष्यत्येवेत्यपदेशेन तद्भावोद्घाटनायाहुस्तप्तेति। किञ्च तप्तपदेन रसानुगुण दिव्यप्रदानमपि सूचितं तथा शिरःस्विति सोत्प्रासं कुरु शपथं नास्मासु तवाशक्तिरिति प्रणयोक्तिः यद्येवं कृतेऽपि तव धीरत्वमाकलयामस्तदावधीरयामः प्रेयसीभावमित्याशयेनाहुः किङ्करीणामिति। किं वा दैन्योक्तिः यद्वा नः अस्माकं तप्तस्तनेषु किङ्करीणां शिरःस्विति यथाक्रमं योज्यं ननु कथमनुचितमाचरेयामिति तत्राहुः आर्तबन्धो ! इति कामेन मानिधेहि किंत्वार्तबन्धुत्वेनेत्यर्थः ॥ ४१ ॥

श्रीरामनारायणकृता भावभावविभाविका

किञ्चास्तां बहुयोग्यायोग्यविचारो न वयं त्वां प्रतिवक्तुं शक्तास्तथापि त्वया सर्वव्रजभयार्तिहारिणा किं करीणां दुःखापहारः कैमुत्यन्यायेन कर्त्तव्य एवेत्याहुः। व्यक्तमिति। यथा आदिपुरुषो देवो विष्णुः सुरलोकगोप्ता तथा भवान् व्रजे भयार्तिहरोऽभिजात इति व्यक्तमित्यन्वयः। एवं दृष्टान्तकथनेन तेन स्वकृत्ये सुरक्षगे उपेक्षाभाववत्त्वयापि न वयमुपेक्षणीया इति भावः। यद्वा असमर्थस्य सम्भवेदप्युपेक्षा नतु तव समर्थस्येत्याहुः। व्यक्तमिति। सुरलोकगोप्तादिपुरुषो देवो विष्णुर्यथा समर्थस्तथा भवान् व्रजभयार्तिहरोऽभिजात इति व्यक्तं "नारायणसमो गुणैः" अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ" इत्यादिगर्गवचनैः प्रत्यक्षतोऽपि गोवर्द्धनोद्धरणासुरवधादिना व्यक्त यद्वा सुरलोकगोप्ता विष्णुरेव भवान् सर्वासामादित एव पुरुषः देवो रमणश्च यथेति यथावद्व्रजभयार्तिहराऽभिजात इति व्यक्तं तथा च स्त्रीणां न उपेक्षायां पुरुषत्वक्षतिः रमणाभावे देवत्वहानिर्व्रजजनानामेव नो भयार्तिहरणाभावे तदर्थं जन्मासाफल्यं तत्रापि तव किङ्कराणां नस्तद्विरहतापानिवृत्तौ दीपमूलेऽन्धकारन्यायापातश्चेति ध्येयं तत्तस्मात् हे

आर्तबन्धो ! स्वार्तवन्धुकत्त्वाद्यनुसन्धायास्मद्गुणदोषविचारमुपेक्ष्यानुपेक्ष्या चास्मान् किङ्करीणां नः शिरःसु तप्तस्तनेषु च करपङ्कजं निधेहि तत्र शिरःसु करधारणेनाभयदानाद्धाविविरहभयनिवर्तनं तप्तस्तनेषु तापापनोदनकरपङ्कजधारणेन वर्तमानार्तिहरणं तथा शिरःसु करधारणेन भयनिवृत्त्या चिन्ताग्न्युपशमनं स्तनेषु पाणिस्पर्शेन कामविरहाग्न्योर्निर्मूलनं तव करयोः पङ्कजत्वेन तापशमनस्येन्द्रत्वेन रसवृष्ट्या तापनिर्मूलनस्य सम्भावितत्वात् किञ्चार्तिहरणे त्वया गिरिकरधारण कृतमधुनापि स्तनकनकगिरिकरधारणेनार्तिमपहृत्य शिरः करधारणेनाश्वासय यद्वा नः स्वविरहकामाग्नितापाविश्वासश्चेत्तप्तस्तनेषु करं धृत्वा परीक्ष्य ततस्ततोऽभयं दातुं शिरःसु करं निधेहि यद्वा वृकासुरकरधारणेन शंभुरक्षा त्वया कृता अधुना तु शम्भुदग्धोऽनङ्गोयातुधानः सन् स्वाग्निना स्तनशम्भून्मूलतो दहति स्वकरधारणेन स्तनशम्भून् रक्ष यद्वा करपङ्कजं तप्तस्तनेषु निधेहि इति वदने प्रियकरयोस्तापो माभूदिति त्वरितं शिरःस्विति कथनं यद्वा शिरःसु करं धृत्वाश्वासनेन तापोपशमेनातप्तस्तनेषु करपङ्कजं निधेहि यद्वा न आर्तिहरणाय स्तनेषु करधारणे करयोः कामविरहाग्नितापभयं मा कुरु तव करधारणारम्भे करपङ्कजसंनिधानेनैवाग्निद्वयोपशमसम्भवेनातप्तेष्वेव स्तनेषु निर्भयं करपङ्कजं निधेहि यद्वा तथा व्यक्तत्वेऽपि नाहं व्रजभयार्तिहराऽभिजात एवं वदसि चेत्तर्हि किङ्कराणामिति सम्बन्धद्योतनं तत्र किं कुर्म्मः किंकुर्म इति किं किं कुर्वन्त्यः किंकर्यो दास्यः किमपि रहस्यत्वात्प्रकटयितुमयुक्तं विहारं कुर्वन्त्यः प्रियसख्यः किमपि वाचामगोचरं परमाह्लादं प्रेमसुखं कुर्वन्त्यः परमानन्दघनस्यापि ह्लादजनेनैव तव प्रेमास्पदाह्लादिन्यः शक्तयः किंकर्यस्तासां नः शिरःसु करधारणेन शपथं तप्तस्तनेषु च करधारणेन दिव्यं च विधेहि यद्वा न मयापेक्षाभिप्रायेणाक्त येनैवं प्रार्थना क्रियते किन्तु प्रार्थनयति चेत्तर्हि किङ्करीणां नः शिरःसु करं निधेहीति शपथं कुरु तेन तव शपथानस्तुवरो तथा तप्तस्तनेषु कर धृत्वा दिव्यं कुरु तेन तव दिव्यं नस्तुदिव्यं सुखामित्युभयं सम्पद्यत यद्वा नापेक्षा चेत्तर्हि तव स्नेहरसपूरितो वेदिस्थापितमणिमुक्ताहारादिसर्वताभद्रालक्रुतकनककुम्भात्मकत्वदाश्वासनगततापस्तनकलशेषु करपङ्कजं निधेहीत्येवं कलशस्थापनपूर्वकं नः शिरःसु करं निधेहि स्वीयत्वेन स्वीकुरु तथा च विधिवत्स्वीकारेण न कदाप्यावयोः शङ्का स्यात् यद्वा शिरःस्विति सामापे सप्तमा तथा च शिरः समीपे ग्रावाया करं निधेह्यालिङ्गयेति भावः ॥ ४१ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथोत्तरदिग्गताः प्रार्थयन्ते । व्यक्तमिति । आदिपुरुषो देवो भवान् यथा वामनादिरूपेण सुरलोकगोप्ता जातस्तवेदानीं व्रजभयार्त्तिहरोऽभिजातः प्रकटित इत्यस्माक व्यक्तं विस्पष्टमस्ति ज्ञानं वसुदेवगृहेऽवतीर्णस्य सद्यो व्रजे प्रवेश एव मुख्यमवतारप्रयोजनं जानीमस्तत्र व्रजस्थानां गोपादीनां भय भगवता नाशितं सम्प्रति तत्रत्यानामस्माकं कामार्त्तिहरणमवशिष्यते तदवतारसार्थक्याय तवावश्यकमिति भावः । ननु तथापि मर्यादयैवाऽऽर्तिहरणयुक्तमतः कामार्त्तिं ज्ञानेन हरिष्यामीत्याशङ्कानिरासायोक्तं देवः यथादिपुरुषः सर्वकारणभूतस्तस्ततश्च देवासुरादिषु समोऽपीन्द्रादिस्वभक्ताभिलाषानुसारेणोपेन्द्रादिदेवो भूत्वा दैत्यानां मारणमप्यङ्गीकरोति तथास्मदर्थं गृहीतगोपालविग्रहः स भवानस्मदार्त्तिहरणाय मर्यादोल्लङ्घनमपि करोत्विति भावः । तस्माद्यो यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति स्वप्रतिज्ञामनुसरेत्याहुः । तदिति । यस्मान्मनोरथानुसारिफलप्रदातृत्वेन भवान्प्रसिद्धस्तस्मान्नोऽस्माकं स्तनेषु कामार्तिनाशाय करपङ्कजं निधेहि तत्र योग्यं सम्बोधनं हे आर्तबन्धो ! शिरःसु च निधेहि कामोपाधिकापीयं भवतीनां भक्तिः शुद्धायामपि तस्यां पर्यवस्यतीत्याश्वासनार्थमिति भावः । यद्वा अस्माकमेव भयार्तिहरणं तवावतारस्य मुख्यं प्रयोजनं तेनास्माक हृदयतापनिवृत्त्यर्थं स्तनेषु करपङ्कजममृतस्राविवात्तापनाशकं निधेहि संसारभयनिरासार्थं च शिरःसु तन्निधेहीत्यर्थः । यतो वयं किङ्कर्योऽतोऽस्माकं भयार्त्तिनाशनमात्तबन्धास्तव योग्यमेवेत्याहुः । किंकरीणामिति । अनभिज्ञापक्षे तस्मादल चातुरीनिबन्धनैर्वैग्विलासैः सर्वथाप्यस्मदभिलषितं सम्पादयेत्याहुः । व्यक्तमिति । यथा आदित्याज्जात आदिपुरुषो देवः सुरलोकगोप्ता तथा व्रजस्य दावादिभयं वातवर्षादिपीडां च हर्तुं व्रजेश्वर्य्यां भवानभिजातः नारायणसमो गुणैरित्युक्तत्वाद्युक्तमिदं ननु गुप्तमतोऽस्माकं कामादिभयार्तिहरणमपि स्वव्रतरक्षणायावश्यकमिति भावः । ननु युष्मदङ्गीकारेण युष्मत्पतीनां भयार्ती भविष्यतस्तद्धरणार्थमभिजातस्य तत्प्रदानमनुचितमित्याशङ्क्य अग्रहणे सत्यस्मन्मरणावश्यंभावादस्मत्पत्यादीनां तत्कृतभयार्त्तिनाशस्यास्मद्ग्रहणं विनासम्भवात् भवतु स्वस्याभीप्सितमावेद्यतामित्यपेक्षायामाहुः । तदिति । यस्मादेवं तस्मात्तप्तेष्वस्माकं स्तनेषु करपङ्कजं निधेहि सम्यक् स्थापय तव हस्तस्य पङ्कजरूपत्वात्सूर्यतापेन कमलस्येव तस्मादस्मत्स्तनतापेन सुखमेव भविष्यतीति व्यङ्ग्य यतो हे आर्त्तबन्धो ! नोचेदिदं नामनिरर्थकं भविष्यतीति भावः । सदन्यमाहुः किंकरीणां शिरस्सु च निधेहि इतः परमेतावन्मात्रेणास्मान् दासीकुर्विति भावः । यद्वा शिरःसु करपङ्कजस्थापनेन त्यागभयेन निवर्त्तय यतो वयं किङ्कर्यस्त्वञ्चार्तबन्धुस्तस्मादस्माकमार्त्यादिकं त्वन्निबन्धनमन्यन्निमित्तं वा नोपपन्नमिति भावः । यद्वा नास्तीदमनुचितं यतो वयं किंकर्य्यस्ततः परीक्षार्थं वा तथा कर्त्तव्यमिति रसोक्तिः । मानिनीपक्षे बलात्स्तनादौ हस्तं धर्तुं प्रवृत्तमालक्ष्याहुः । व्यक्तमिति । व्रजस्य भयार्त्योर्हरणाय जातस्त्वमस्माकमुभयसाधने कर्मणि नियोजयितुं नार्हसीति भावः ! तस्मात्करपङ्कजं हे आर्तबन्धो ! धर्मभङ्गभयार्त्तिनाशक ! हे तप्त ! कामाग्निनापितु किंकरीणां दासीनामपि किमुत सतीनामस्माकं शिरस्स्वपि नो निधेहि किमुत स्तनेषु नो निधेहीति यद्वा व्रजभयार्तिहरणायाभिजातस्य तव तद्धारहरणादिना तत्प्रदानं नोचितमिति भावः । यद्वा वलात्कारेण यद्यस्मान्स्पृशसि तर्हि प्राणान्वयं त्यक्ष्यामस्तेन सर्वेषां

भयार्ती भविष्यतस्तच्च तथा भूतस्य तव नोचितमिति भावः। हे कामार्त ! किङ्करीणामपि त्वदभिलाष रहितानामतप्तेषु स्तनेषु शिरःसु च करपङ्कजं नो निधेहि यद्वा याः वः किङ्कर्यस्तासां तप्तस्तनेषु करपङ्कजं निधेहि उक्तिप्रत्युक्तिमद्वाक्यं संलाप इति कीर्त्यत इत्युक्तत्वात् स्वागतमित्याद्येतदन्तं प्रकरणं संलापाख्योऽनुभावः। निवृत्तिपक्षे। किञ्च जगत्कारणत्वेन प्रतिपादितो भवान् सर्वाधिष्ठानभूतोऽतस्त्वय्यध्यस्तस्य प्रतिपादनं त्वत्प्रतिपादनमेवेत्त्याशयेनाहुः। भवान् देवः स्वयप्रकाशचिदानन्दस्वरूपस्तथा च प्रावरणे एको देव इति अत एवादिपुरुषः एकोऽहं बहुस्यामित्यादि जगत्कारणत्वेन प्रतिपादितोऽभिजातः सच्च त्यच्चाभवत् तत्सृष्ट्वा तदेवान् प्राविशदित्यादिना सर्वस्वरूपापन्नत्वेन निरूपितः यथा सुरलोकगोप्ता तथा व्रजस्य काण्डत्रयात्मकस्य वेदस्य भयातिहरोऽपीति व्यक्त निश्चितं यद्वा यथा आदिपुरुषो देवो भवान् वामनादिरूपेण सुरलोकगोप्ताभिजातस्तथा मत्स्यरूपेण व्रजभयार्तिहरोऽप्यभिजात इति व्यक्तं यद्वा तत्तद्वादिकृतवेदभयार्तिहरणार्थं कृष्णद्वैपायनादिरूपेण प्रकटित इति व्यक्तमित्यर्थः। यस्मादेवं तत्तस्मात्करपङ्कजं करोतीति व्युत्पत्त्या करशब्देनाज्ञानमुच्यते तल्लक्षणात्पङ्काज्जातमधिकार्य्यन्तःकरणं नोऽस्माकं श्रुतीनां शिरःसु शिरोभागेषु वेदान्तेषु निधेहि तद्विचारार्थं प्रवर्त्तय यथा तप्तस्तनेषु ब्रह्मपरलम्भन प्रतिपादनेन तप्तेषु स्तनस्थानीयेषु कर्मोपासनद्वारा ब्रह्मपरभागेषु च निधेहि वेदैश्च सर्वैरहमेववेद्य इत्यादिप्रेरणेनेति भावः। यतो वयं सर्वा अपि भवत्किंकर्य्यः त्वय्येव तात्पर्य्यवत्त्यो भवांश्चार्त्तबन्धुस्तत्तद्वादिभिरसुरैश्च दत्तपीडानामस्माकं संसारिणां मुमूक्षूणां च बन्धुरतो योग्यमिदमिति संबोधनाशयः ॥ ४१ ॥

रास-रहस्यम्

हे आर्तबन्धो ! संसार तापेन तप्ता अत आर्ताः दुःखितास्तासां बन्धुः सुहृत्, तस्य सम्बोधनम्। यथादिपुरुषो देवो भगवान् सुरलोकस्य स्वर्गलोकस्य गोप्ता उपेन्द्रादि अवतारूपेण रक्षकः तथा भवानपि व्रजस्य व्रजति चलतीति व्रजः मनुष्यशरीरं तत्रैव मुक्तेः द्वाररूपत्वात् तस्य सर्वस्य भयार्तिहरः जननमरणात्मकं भयं तदेवार्तिः, तां हरतीति हरः अर्थात् संसृतिदुःखस्यात्यन्तिकनाशार्थमभिजातोऽसि स्व स्वरूपेणाविभूतोऽसि इति व्यक्तं स्वगतादिभेदशून्यत्वेन यस्मात् निश्चितमेव तस्मात् तव किंकरीणां किं किं करोतीति किंकरः स्त्रियां ङीप' किंकरी तासां नो अस्माकं वृत्तीनां तप्तस्तनेषु विषयवासनानलादुभूतः यस्तापस्तेन तापितस्तप्तः, तप्तस्तनेषु हृदयेषु, शिरस्सु च श्रुतिशिखोत्थ अखण्डवृत्तिसु च करपंकजं कर्मकाण्डरूपपकात् निष्कामकृतेन जायते चित्तशुद्धिलक्षण पंकजं तस्मादुत्पन्नमात्मज्योतिः एवंभूतं करं निधेहि स्थापय अर्थात् ब्रह्माकारत्वप्रदानेन आत्यन्तिकदुःखनिवृत्तिपूर्वकं परमानन्दं देहि इति भावः ॥ ४१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आदिपुरुषो भवान् अभिजात इति व्यक्तं सुनिश्चितम् ॥ ४१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्वदङ्गसङ्गेऽङ्गनानां न जारता यदज एवैवं जात इत्याहुः ॥ व्यक्तमिति। यो देव आदिपुरुषः पुरलोकगोप्ता नारायणः स एव व्रजभयार्तिहरो व्रजस्य तत्स्थजनस्य भय चार्तिश्च तयोर्हरोऽभिजातः प्रादुर्भूत इति व्यक्तमिदं निश्चितं न चाविष्टरूपमिदमित्याहुः ॥ यथेति। सम्यगनाविष्ट इत्यर्थः। स्वदृष्टान्तो हरेर्भवेदित्यृग्भाष्योक्तेर्यथाऽऽदिपुरुषो हरिस्तथैवाभिजातोऽसि नेषद्वैषम्यं तव तेनेति वा तत्तस्माददोषावहमिति। तव करपङ्कजं किङ्करीणां दासीनां न आर्तबन्धो आदितः शिरस्सु निधेह्यनन्तरं तप्तेषु मन्मथमयनतः स्तनेषु निधेहि। शिरःकरकरणेन दासीत्वेन परिग्रहस्तेत चोत्तरप्रार्थना सङ्गच्छत इति ज्ञेयम् ॥ ४१ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भगवदुक्तानां वाक्यानां निवारणार्थं पुष्टिसिद्धान्तं निरूप्य एतद्भगवत्कृपैकसाध्यमिति भगवत्कृपां प्रार्थयन्ति। व्यक्तमिति ! नापि त्वदुक्तमस्मदुक्तं वा किञ्चित्साधकं बाधकं वा तथापि स्वावतारप्रयोजनं विचार्य अस्मासु कृपा कर्त्तव्या तत्प्रयोजनमाहुः। भवान् व्रजभयार्त्तिहर एव व्यक्तमभिजातः व्रजस्य आर्त्तिः पीडा भयं च त्वया दूरीकर्त्तव्यम् अन्यथा साक्षाद्भगवतः अवतारे प्रयोजनं न पश्यामः भूभारहरणं तु सङ्कर्षणांशेन वसुदेवादिप्रियं प्रद्युम्नेन धर्मरक्षात्वनिरुद्धेन यदि व्रजभयातिनिराकरणं न क्रियेत तदा किमवतारान्तरकार्यं स्यात् अतो व्यक्तं भवान् व्रजभयार्त्तिहरः इदानीं यथार्त्तिरस्माकं तथा न कदापि अस्मदपगमने तु सर्वस्यापि व्रजस्य महती आर्त्तिः अत आर्त्तिनिवृत्तिः कर्त्तव्या ननु मर्यादयैव निवृत्तिकरणमुचितं नतु अमर्यादया तथा सति भवतीनां कामशान्तिः ज्ञानं वा भवत्विति चेत् तत्राहुः। देवो यथादिपुरुष इति। भवान् ब्रह्मरूपः सर्वसमः तथापि इन्द्रादिषु कृपां कुर्वन् दैत्यान्मारयन् विषमतामङ्गीकरोति नतु देवेभ्यो ज्ञानं प्रयच्छति यत्र स्वरूपमेव अन्यथा करोति तत्र वाचमन्यथाकरोतीति किं वक्तव्यम् अतो यथा आदिपुरुषोऽपि देवो भूत्वा सुरलोकगोप्ता जातः तथा भवानपि धर्ममर्यादारक्षकः अस्मत्संबन्धं करोत्विति भावः। तदेव रसपोषणार्थं व्याजेनाहुः तन्नो निधेहीति। आदावस्माकं शिरसि हस्तं स्थापय यथा अस्माकं शिरसि हस्तं स्थापय यथा अस्माकमभयं भवति ततोऽस्माकं हृदयतापनिवृत्त्यर्थं स्तनेषु च करपङ्कजममृतस्त्रावि तापनाशकं निधेहि अनौचिती तु नास्ति यतो बयं किङ्कर्यः परीक्षार्थं वा एतत् द्रष्टव्यमिति रसोक्तिः ॥ ४१ ॥

श्रीसुबोधिनी-सारः

व्रजभयदुःखनिवारणो भवान् अभिजातो व्यक्तं निश्चितं देवलोकरक्षको विष्णुरिव तत्तस्मात्किंकरीणां दासीनां नोऽस्माकं तप्तेषु स्तनेषु शिरस्सु च हस्तपद्मं स्थापय हे आर्त्तबंधो ॥ ४१ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

व्यक्तं भवानित्यत्र, ननु यथार्तौ सत्यामपीयदवधि तत्र स्थितम्, तथाधुनापि स्थेयमित्याशङ्कानिरासायाधुनार्तिहरत्वोक्तितात्पर्यमाहुः **इदानीं यथार्तिरिति** ॥ ४१ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'सकलव्रजजनार्त्यपाकरणाय अवतीर्णस्य स्वदासीनां मनोरथभङ्गेन आर्त्युत्पादनं न युक्तम्, किंतु तदपाकरणमेव युक्तम्' इत्याशयेन सम्बोधयन्ति—आर्तबन्धो इति । आदि पुरुषो भगवान् यथा सुरलोकगोप्ता रक्षार्थमुपेन्द्रादिरूपेणावतरति, तथा भवानपि व्रजस्य सर्वस्य भयार्तिहरो भयार्तिहरणार्थमभिजातोऽसीति व्यक्तं यस्मात् निश्चितमेव, तस्मात् तव किङ्करीणां नोऽस्माकं स्मरतापतप्तेषु शिरस्सु च सकलतापनिवर्तकत्वेन युक्तं निजं करपङ्कजं निधेहि संस्थापयेत्यन्वयः ॥ ४१ ॥

अन्वितार्थप्रकाशिका

व्यक्तमिति ॥ हे आर्तबन्धो ! आदिपुरुषो देवो भगवान् यथा सुरलोकस्य गोप्ता रक्षार्थमुपेन्द्रादिरूपेणावतरति तथा भवानपि व्रजस्य सर्वस्य भयार्तिहरो भयार्तिहरणार्थमभिजातोऽसीति व्यक्तं यस्मात् निश्चितमेव तस्मात् तव किङ्करीणां नोऽस्माकं स्मरतामुपतप्तेषु स्तनेषु च निजं करपङ्कजं निधेहि स्थापय ॥ ४१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वक्तव्यमिति यथा सर्वेषामादिपुरुषः स्वयं अनादिदेवः सुरलोकस्य गोप्ता रक्षिता तद्गोपनार्थं अदित्यादिषु अभिजातस्तथा व्रजस्य दावानलादिभयं अर्त्तिवर्षवातादि पीडांचहरतीति तथाभूतः तद्धरणार्थे अत्र जातः व्यक्तं निश्चितं ॥ ४१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

व्रजजनार्त्त्यपाकरणायावतीर्णस्य पुनस्तदार्त्त्यापादनमनुचितमित्यभिप्रायेणाहुः ॥ व्यक्तमिति ॥ यथा आदिपुरुषः देवः सन्, सुरलोकगोप्ता उपेन्द्ररूपेण सुरलोकरक्षणार्थमवतीर्य तदार्त्तिहरो जात इत्यर्थः । तथा भवांस्त्वमपि, व्रजजनार्त्तिहरः, व्यक्तं निश्चितमेव, अभिजातः । दृष्टान्तप्रदर्शनेन उपेन्द्र एव त्वं सर्वथास्मद्रक्षार्थं जातोऽसीति सूचितम् । वामनकृष्णयोरेकत्वं जन्मकाले वसुदेवं प्रति स्वोक्त्या लघुभागवतामृतोक्तवचनैश्च बोध्यम् । तत्तस्मात्, हे आर्त्तबन्धो, किंकरीणां नोऽस्माकं, तप्ताः स्मरतापपरितप्ता ये स्तनास्तेषु, च शिरःसु मूर्द्धसु च, करपङ्कजं पङ्कजवच्छीतलं कोमलं च करमित्यर्थः । निधेहि निधायार्त्ति शमयेति भावः । आर्त्तबन्धो इति तदनुगुणं संबोधनम् । किंकरीणामित्यपेक्षणीयसंबन्धाविष्कारः ॥ ४१ ॥

कृष्णप्रिया

हमसे यह बात छिपी नहीं है कि जैसे भगवान् नारायण देवताओं की रक्षा करते हैं, वैसे ही तुम व्रजमण्डल का भय और दुःख मिटाने के लिये ही प्रकट हुए हो। और यह भी स्पष्ट ही है कि दीन-दुखियों पर तुम्हारा बड़ा प्रेम, बड़ी कृपा है। प्रियतम ! हम भी बड़ी दुःखिनी है। तुम्हारे मिलन की आकांक्षा की आग से हमारा वक्ष स्थल जल रहा है। तुम अपनी इन दासियों के वक्षःस्थल और सिर पर अपने कोमल कर कमल रखकर इन्हें अपना लो, हमें जीवनदान दो ॥ ४१ ॥

श्रीशुक उवाच

इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः । प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत् ॥ ४२ ॥

कर्दमक्षमा

अन्वयः—योगेश्वरेश्वरः, इति, तासाम्, विक्लवितम्, श्रुत्वा, सदयम्, विहस्य, आत्मारामः, अपि, गोपी, अरीरमत् ॥ ४२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विक्लवितं पारवश्यप्रलपितम् । गोपीररीरमद्रमयामास ॥ ४२ ॥

---

१. न्यरी–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तासामार्तिश्रवणादुद्विग्नं राजानं प्रेक्ष्य तच्छांत्यै श्रीशुकः परसंतापापहारकारिण्या श्रिया सहितः परममुनिरुवाचेति। इति इत्थम्। तासाम् गोपीनाम्। योगिनः सनकाद्यास्तदीश्वराः शंकराद्यास्तेषामीश्वरः श्रीयशोदानंदनः। अनेन परमोत्कृष्टदयालुतोक्ता। दयालवो योगिनः, परमदयालवो योगेश्वराः, परमोत्कृष्टदयालुः श्रीकृष्ण इति। सदयं स्वहस्तेन तासामश्रुमोजनादिपूर्वम्। गोपीनामपि 'ता मन्मनस्का मत्प्राणाः' इति भगवदुक्तेस्तद्रूपत्वान्नात्मारामत्वहानिरिति ध्येयं विद्वद्भिः। वक्ष्यत्यपि 'यथार्भकः स्वप्रतिबिंबविभ्रमः' इति। पारवश्येन कामायत्तत्वेन प्रलषितं प्रपूर्वलपेरनर्थकवचः परत्वम् 'प्रलापोऽनर्थकं वचः' इत्यमरः। इत्युक्त्या स्वामिचरणैस्तासामपि वस्तुतोऽतथात्वं ध्वनितम् अतथात्वं कामादि पीडाराहित्यम्॥ विक्लवितं वैक्लव्यंजकं वाक्यं श्रुत्वा तच्छ्रवणेन स्वाभिलाषं पूरयित्वेत्यर्थः। प्रहस्य अहो भाववत्यो यूयं प्रतिदिनमेव मेलनसमये वाम्यमपारं कुरुध्वे, अहं त्वेकस्मिन्नेव दिनेऽद्यैवावहित्थया यत्किञ्चिद्वाम्यमकरवं तदपि दाक्षिण्यगर्भमेव, तेनाप्येतावद्वैक्लव्यवत्यो लज्जायाः श्राद्धं कृतवत्यो मां हासयध्वे, तस्माद्युष्मत्प्रात्यहिकावहित्थासिंधुचुलुकीकरणचंचुना मयैव जितास्स्थ, भो सुबुद्धिशेखरंमन्याः जितास्स्थ तत्स्वयमेवागत्य प्रतिबंधकलज्जाधृत्याऽद्यभावान्मकंठकनकमणिमालायुता भूत्वा स्वाधरसुधाः पाययत, चिरादुद्भूतमहातृष्णोऽस्मीति परिहस्य सन् अयः शुभावहो विधिर्यत्र तत् सस्नेहं वा यथा स्यात्तथा आत्मारामोऽपि ता गोपस्त्रीः रमयामास। इत्थंभूतत्प्रेमाणो गोपस्त्रिय इति 'आत्मारामाश्च मुनयः' इति पद्ये 'इत्थंभूनगुणो हरिः' इति वद् गोपीनां तदीयस्वरूपभूतह्लादिनीशक्तिवृत्तित्वात् 'ता अथात्मानः' इत्थात्मभूताभिस्ताभी रमणं संभवत्येव। यद्यपि तदपि "न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान्" इति "नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना" इत्यादिभगवदुक्तेस्तस्य स्वात्मतोऽपि भक्तानामानंदप्रदत्वाधिक्यावगमादासां च गोपीनां सर्वभक्तशिरोमणित्वादात्मारामस्यापि तस्यानंदाधिक्यार्थमेवैताभी रमणमिति ज्ञेयम्। ननु 'प्रमदाशतकोटिभिराकुलितः' इति क्रमदीपिकाद्यागमदृष्ट्या शतकोटिसंख्याभिस्ताभिरेकत्रैवैकदैकस्य तस्य रमणं नोपपद्यते, तत्राह—योगिनः सौभर्यादयः, योगेश्वरा रुद्रादयस्तेषामपीश्वर इति। सौभर्यादयः कायव्यूहं कृत्वैव रमंते कृष्णस्त्वतर्क्याचरितस्तं विना। यद्वक्ष्यते—'चित्रं वतैतदेकेन वपुषा' इत्यादीति॥ ४२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति निजोक्तिवदुभयार्थस्पर्शात्मकमेतद्विक्लवितं प्रेमैव वैक्लव्यमयरोपदैन्योक्तं श्रुत्वा तच्छ्रवणेन स्वाभिलाषं पूरयित्वेत्यथः। ततः प्रहस्य परिहासेऽपि तासां वैकल्यविशेषोदयात् ततो निजाभीष्टश्रवणसिद्धेस्तत्रापि स्ववचनसदृशप्रतिवचनसौष्ठवात्ततोऽवहित्थापगमेन रत्याख्यभावोदयाच्च। प्रकर्षेण चेतोविकाशिरूपतया रसशास्त्रप्रसिद्धमुखप्रसादानुभावं भावविशेषं लब्ध्वेत्यर्थः। तदेव च सप्रेमदैन्यवचनं श्रुत्वा सदयं चित्तार्द्रतासहितं यथा स्यात्तथा गोपीररीरमत्। रन्तुं स्वयमेव प्रयोजयामास अत्याग्रहञ्चकार इत्यर्थः। एवं तस्यैव च तत्रेच्छावैशिष्ट्यं लक्ष्यते। समानमपि क्रीडत्सु बालकेषु प्रयोजकबालकस्यैवेति भावः। अत एव परस्मैपदम्। "अणावकर्मकाच्चित्तवत्कर्तृकादिति कर्त्रभिप्रायेऽत्तद्विधानात्। ननु किमेतदाश्चर्यं नागरेषु तत्राह। आत्मारामोऽपि। अहो तासां प्रेमगुणप्राबल्यं यतः आत्मारामाश्च मुनय इत्यादौ हरिगुणेनात्मारामगण इव तेन सोऽप्यात्मवशीचक्रे इति भावः। अत एवापिशब्दः सार्थकः स्यादन्यथा तु प्रत्युत विरुद्ध एव यद्यपि नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विनेति सामान्यभक्तपरमप्यस्ति वचनं तथाप्यत्र वैशिष्ट्यविवक्षया तथोक्तमिति न पौनरुक्त्यवैयर्थ्यम्। ननु कथमेकः सन्नसंख्या रमयामास तत्राह। योगेश्वरेश्वर इति। योगेश्वरा अपि कायव्यूहादिकं विधाय युगपन्नाना कृत्यं विधातुं शक्नुवन्ति सतु तेषामपीश्वरत्वेनाचिन्त्यस्वाभाविकशक्तित्वात्तदादिकं विनापि शक्नोतीति। वक्ष्यते च श्रीनारदेन। चित्रं वतैतदेकेन वपुषा युगपत् पृथक्। गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहदिति भावः। गोपीशब्देन तत्तन्महामन्त्रप्रसिद्धं तासां तदीयनित्यवल्लभात्वं स्मारयित्वा तत्रापिनात्याश्चर्यतां सूचयतीति॥ ४२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इति एतत् विक्लवितं वैकल्योक्तं वाचामुभयकोटिस्पर्शादुभयत्र संगतं सदयं प्रकर्षेण हसित्वेति (भा० २।१।३१) 'हासो जनोन्मादकरी हि माया' इत्युक्त वञ्चना निरस्ता, तदिष्टस्यैव ताभिः प्रतिपादनात्। यद्वा, समयं स्वहस्तेन तासामश्रुमार्जनादिपूर्वकमरीरमदिति। तत्रौदासीन्यं निरस्तं प्रीतिश्च दर्शिता, यतो गोपीः प्रेमविशेषेण तादृशप्रसादयोग्या इत्यर्थः। प्रहस्येति निजाभिप्रायाज्ञानेन तासां वैकल्योक्तेः, तेन निजावहित्थासार्थकत्वाच्च। यद्वा, प्रतिवचनेन प्रहर्षोदयात् शुद्धभावे हसित्वा किंवा तासां तदुक्त्यावहित्थापगमने कामविकारोदयात्। हासो हि शृंगारस्य व्यभिचारी। ननु परस्परमासक्त्या वैदग्धीप्रकटनेन रतिः सम्पद्यते, तच्च तस्यामात्मारामत्वादिना न घटेत, तत्राह—योगश्चित्तैकाग्रता, तस्येश्वरा वशीकृतयोगाः सनकादयस्तेषामीश्वरोऽपि आत्मारामोऽपीति विचित्रवैदग्धीप्रकटनेन योगनिष्ठा आत्मारामता च तदानीं न स्थितेत्यर्थः। यद्वा, पूर्ववत् विक्लवितेन योगेश्वरेश्वरता, रमणेन चात्मारामता अपगतेति विवेचनीयम्, अन्यथा तच्छ्रवणरमणासम्भवः, यद्वा, योगेत्यनेनैकोऽपि बहुरूपः सन्निव पृथक् पृथक् युगपद्रमयामासेति सूचितम्; अन्यत्तुल्यम्॥ ४२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं तासां विक्लवितं पारवश्यप्रलपितमाकर्ण्य योगीश्वरेश्वरोऽप्यात्मारामोऽपि गोपीररीरमत् रमयामासः आत्मारामत्वाद्विषय विमुखोऽप्यार्त्तिहरस्वभावत्वात्ताभिः सह रेम इत्यर्थः ॥ ४२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विक्लवं चिन्तां कामार्तवचनं न्यरीरमत् नितरां रमयामास ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

इति पूर्वोक्तप्रकारेण विक्लवितं प्रेमवैवश्यवचः श्रुत्वा योगेश्वरेश्वर इति। तत्तदलौकिककर्मसमाधायकाचिन्त्यशक्तिरित्यर्थः। आत्मारामोऽपीति तासां प्रेमगुणप्राबल्यम् आत्मारामाश्च मुनय इतिवत्। अरीरमत् रन्तुं प्रयोजयामासेति तस्यैव तत्रासक्तिर्मुख्या दर्शिता। क्रीडत्सु बालकेषु प्रयोजकबालकस्येव ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतोः बृहत्क्रमसन्दर्भः

तदनन्तरं यदभूत्तत् श्रीशुकाचार्यः प्रकटयति—इतीत्यादि। योगेश्वरेश्वरोऽपि आत्मारामोऽपि आत्मनि स्वसुखे आरमत इत्यात्मारामः। तथाभूतोऽपि प्रहस्येत्यस्य कोऽर्थः? मम योगेश्वरेश्वरता, आत्मारामता च गलितेति प्रहासं कृत्वारीरमत्, न तु रेमे। उक्तोक्तप्रकारेण स्वाधिकरणकेश्वरताज्ञाननिराशपूर्वकं सङ्कोचाभावेन यथारुचि सर्वा एव मया सह रमन्तामिति णिच् प्रत्यय-महिमा ॥ ४२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

इतीत्यादि। प्रहस्येति प्रत्युत्तरान्तरदाने प्रतिभालोपात् हास एव जातः। योगेश्वरेश्वर इत्यादिना सर्वासां युगपत् मनोरथप्रतिपादकत्वम्, आत्मारामोऽपीत्यादि-शब्देन आत्मारामत्वमनासङ्गत्वमपहायेत्यर्थः। अथवा, आत्मसु आत्मभूतासु आरमत इत्यात्मारामः स्वयं रममाणोऽपि ता अरीरमत् रमयाञ्चकार ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विक्लवितं वैक्लव्यव्यञ्जकं वाक्यं श्रुत्वा तच्छ्रवणेन स्वाभिलाषं पूरयित्वेत्यर्थः। प्रहस्य अहो भाववत्यो यूयं प्रतिदिनमेव मिलनसमये वाम्यमपारं कुरुध्वे एव। अहन्त्वेकस्मिन्नेव दिने अद्यैवावहित्थया यत् किञ्चिद्वाम्यमकत्वं तदपि दाक्षिण्यगर्भमेव। तेनाप्येतावद्वैक्लव्यवत्यो लज्जायाः श्राद्धं कृतवत्यो मां हासयध्वे तस्मात् युष्मत्प्रात्यहिकावहित्था सिन्धुचुलुकीकरणचुञ्चुना मयैव जितास्थ भोः सुबुद्धिशेखरम्मन्याः जितास्थ तत् स्वयमेव वागत्य प्रतिबन्धकलज्जाधृत्याद्यभावान्मत्कण्ठे कनकमणिमालायिता भूत्वा स्वाधरसुधाः पाययत चिरादुद्भूतमहातृष्णोऽस्मीति परिहस्य सन् अयः शुभावहो विधिर्यत्र तत् सस्नेहं वा यथा स्यात्तथा आत्मारामोऽपि ता गोपस्त्रीः रमयामास इत्थम्भूतप्रेमाणो गोपस्त्रिय इति। आत्मारामाश्च मुनय इति पद्ये इत्थंभूतगुणो हरिरितिवत् गोपीनां तदीयस्वरूपभूतह्लादिनीशक्तिवृत्तित्वात् ता अप्यात्मान इत्यात्मभूताभिस्ताभी रमणं सम्भवत्येव यद्यपि नच सङ्कर्षणो न श्रीनवात्मा च यथा भवानिति नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विनेत्यादि भगवदुक्तेस्तस्य स्वात्मतोऽपि भक्तानामानन्दप्रदत्वाधिक्यावगमादासाञ्च गोपीनां सर्वभक्तशिरोमणित्वादात्मारामस्यापि तस्यानन्दाधिक्यार्थमेवैताभी रमणमिति ज्ञेयम्। ननु प्रमदाशतकोटिभिराकुलित इति क्रमदीपिकाद्यागमदृष्ट्या शतकोटिसंख्याभिस्ताभिरेकत्रैव एकदैव एकस्य तस्य रमणं नोपपद्यते तत्राह। योगिनः सौभर्यादयः योगेश्वरा रुद्रादयस्तेषामपीश्वर इति सौभर्यादयः कायव्यूहं कृत्वैव रमन्ते कृष्णस्त्वतर्क्याचारतस्त विना। यद्वक्ष्यते चित्रं बतैतदेकेन वपुषेत्यादीति ॥ ४२ ॥

रसिकाह्लादिनी–टीका

एवं गोपीनां प्रति वचनेन निरुत्तरीकृतस्तासामार्त्तिप्रलपनेन द्रवसात्विकभावेन जातक्षोभस्तत्रापि किंचिदनुक्तेव यतवांस्ततः मुनीन्द्रस्तद्दशाभिज्ञः कथयति इतीति। इत्यनेन प्रकारेण श्रीकृष्णोक्तवञ्चनानां तदनुरूपोत्तरैः प्रतिष्टम्भेन तासां विक्लवितं प्रणयरोषगर्भसदैन्यं स्वाभिलाषपूर्णप्रार्थनं श्रुत्वा समनन्तरं प्रहस्येति मया तु धर्मोपदेशेन भयदर्शनेन चैतासां भावपरिक्षार्थमन्तः स्नेहपूर्णैर्वहिरौदासीन्यव्यंजकैर्वचनैः कोपकारिताः, मदभिप्रायमनलोच्य सकाकुदैन्यमावेदयन्ति अतः परमावहित्थयालमित्युच्चैर्हास्यं कृत्वा, हासस्तु चित्तविकारव्यञ्जकः। तदुक्तं रसार्णवे "निर्विकारात्मके चित्ते भावः प्रथमविक्रियेति"। हासेन स्वहृदि स्थितं भावं लक्षयित्वा सदयं यथा भवति तथा, दया तु निरुपाधिरदुःखप्रहानेच्छा तत्सहितं यथा तथा आत्मारामोपि आत्मारामत्वं तिरस्कृत्याक्षीन्द्रियेनात्मना सुखविशेषमनुपलभमानोपि ता अरीरमत् रमयामास। कीदृशो योगेश्वरेश्वरः। अन्ये हि योगिनो लब्धभगवत्प्रसादाः परिचिताद्यभिज्ञा भवन्ति। अयं तु तेषामपीश्वरः। गोपीनां चित्तवृत्तिं जानन्नपि तासां तथाविधं

वाचं श्रोतुमिच्छन्नौदासीन्यं प्रकटितवान्। यद्वा योगः संयोगस्तस्थेश्वराः महाविलासिनः परमश्रृङ्गारिणः तेषामपीश्वरः परमविदग्धावधिर्महाश्रृङ्गारीत्यर्थः। औदासीन्यव्यंजनेन विप्रलम्भमुत्पाद्य परिपूर्णं मधुररसमनुभवितुं तथा कृतवानितिभावः। यद्वा अन्ये योगिनो योगजधर्मप्रत्यासत्यान्येषां कायेषु प्रविश्य स्वशरीरमन्तरेणापि तदीयैरेव शरीरेन्द्रियैः सुखमनुभवन्ति, अयं तु न तथा किन्तु शरीरेणैव सर्वसंनिहितः सन् यूथशस्ता बह्वीः रमयामासेति चित्रं अत एवाग्रे वदिष्यति तासां मध्ये द्वयो र्द्वयोरिति शक्तिविशेयेण लाघवेन सर्वसंनिहितत्वं सूचितमिति। विक्लवितमिति–श्रवणेनात्मारामतया निरोधः सूचितः। अयं तु दक्षिणो नायकः तदुक्तं रसार्णवे "नायिकास्वप्यनेकासु तुल्यो दक्षिण उच्यते"। प्रहस्येति "शुचौ हास्यस्तथा प्रेयानद्भुतश्च सुहृद्वरा" इति। एतेषां मधुररसपोषकत्वं सूचितम्। किंच भवतीभिर्ममौदासीन्यमाकलय्यैवं प्रत्युत्तरितं तदौदासीन्यमात्मना क्रोडीकृतम्। तद्वयमपि त्यक्तमपि प्रहस्य गोपीः बहुशोऽनुभूतमपि श्रीकृष्णानन्दं गोपायतीति अनुरागोत्कण्ठ्यं दर्शितम्। किंच आराध्यगुणैराराधका आकृष्यन्ते। तथा श्रीकृष्णोपि व्रजसुन्दरीणां प्रेमाकृष्टः आत्मारामतां शिथिलीचकारेति तात्पर्यार्थः॥ ४२॥

विशुद्धरसदीपिका

इति एवं प्रकारं वक्तुमशक्यत्वादतिदेशः यद्वा इति अलमधिकोऽत्यर्थः। विक्लवितं प्रेमवैकल्यमयरोषदैन्योक्तं पारवश्यप्रलपितं यद्वा विगतं कातरत्वं यस्मात्तत् उदारं वचः शुद्धसख्योद्गारमयत्वादिति भावः। तासामिति। प्रेयसीनां सखीनामिति यथास्वमूह्यं श्रुत्वा प्रहस्येति निन्हवः किं भवतीभिस्तथ्यमिति ज्ञातं मया तूपहासः कृतः इति भावः। एवं सरलस्वभावाः सदयं यथा स्यात्तथा नत्वासक्त्येतिभावः। तर्हि आसक्त्या कुत्र रमत इत्यत आह। आत्माराम इति। परमप्रेमास्पदत्वादात्मनि श्रीराधायामेव रामो रमणं यस्य सः तदुक्तं स्कान्दे श्रीभागवतमाहात्म्ये—

आत्मा तु राधिका तस्य तयैव रमणादसौ। आत्माराम इति प्राज्ञैरुच्यते गूढवेदिभिः॥ इति

तथाभूतः सन् गोपीरपि अरीरमत् परस्मैपदप्रयोगेण तन्मनोरथपूरणायैव नत्वासक्त्येति सूचितं ननु तर्हि पक्षतटस्थादिना विषमस्वभावा एकत्र मिलिताः कथमेको रमयामास तथा सति कथं वात्माराम इति तत्राह। योगेश्वरेश्वर इति। अत्र द्वितीयेनेश्वरपदेन कायव्यूहशङ्कापरास्ता ततश्चानन्यसाधारणेन प्रकाशभेदेनारीरमदित्यर्थः एवं च—

चित्रं वतैतदेकेन वपुषां युगपत् पृथक्। गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत्॥

इत्यादिषु प्रदर्शितात्प्रकारभेदादपि वैशिष्ट्यं दर्शितं तत्र हि पृथकगृहेष्वित्युक्तेर्देशभेदः नात्र सः इति योगेश्वरपदेन च कामाद्यनासक्तिः स्पष्टैव तादृशत्वेऽपि रमणं प्राणप्रियायाः सादृश्यभ्रमेणेति दर्शयिष्यामः॥ ४२॥

श्रीरामनारायणकृता भावभावविभाविका

एवं भगवान् शुकः स्वयं भगवता गृहगमनपतिपुत्राद्यनुवृत्तिप्रवृत्त्युपदेशेऽपि प्रेमिणां तदस्वीकारेण भगवदेकपरत्वं प्रेम यथा चार्यगोपीचरितेन दर्शयित्वा स्वाज्ञोल्लङ्घनेऽपि भगवतः कृपया तत्पारवश्यं तत्पारवश्येऽप्यात्मारामत्वमेवाह। इति विक्लवितमिति। तासामतिविलक्षणप्रेमवतीनां स्वानुगृहीतानां प्राणप्रियांशानुगतानां स्ववाक्यदाक्षिण्यार्थावबोधेऽप्युपेक्षाभासमात्रेणेत्येवं विक्लवितं खेदवाक्यं श्रुत्वा अहो आसां स्वभावसरलत्वमिति प्रहस्य ननु किमुपहसनीयतया तासां नेत्याह। सदयमिति। करुणान्वितं यथा भवति तथा ता गोपरिरीरमत् नन्वात्मारामस्य कथमन्यत्र रमणं तत्राह। आत्मारामोऽपीति। तस्य सामान्यतः सर्वात्मत्वात्सर्वत्र रमणेऽपि तदात्मारामत्वाक्षतेर्विशेषतो लीलाधामनि सर्वस्याप्यविवर्तितदात्मतया नात्मारामत्वे शङ्कास्पदं तत्रापि "आत्मा तु राधिका तस्येति वचनात्तदंशानुगतासु रमणे न शङ्कागन्धोऽपि किञ्च रमणस्य सुखैकगोचरत्वेन सुखमात्रस्य तु "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या तन्मात्रत्वेन तत्र रमणेऽप्यात्मारामत्वमेव किञ्च कैमुत्यन्यायेनापि तदात्मारामत्वमाह। योगेश्वरेश्वर इति। "यक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरं गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते" इत्यादिश्रुतिस्मृतिभिर्जीवन्मुक्तानां स्वसाधनतदनुग्रहसिद्धानां योगेश्वराणामपि प्राकृतविषयोपभोगेऽपि तदनुग्रहोद्भूतज्ञानमाहात्म्यान्नात्मारामत्वक्षतिस्तदा किमु वाच्यं तदीश्वरस्य तज्ज्ञानप्रदस्य स्वतो नित्यसिद्धबोधस्य यद्वा योगेश्वरेश्वर इत्यस्यायं भावः योगेश्वराः कामजयमिच्छन्तोऽपि सङ्गभीता रतिरणविमुखा इन्द्रियनिरोधेनात्मरक्षामात्रं कुर्वन्ति कृष्णस्तु योगेश्वरेश्वरः अपरिमितमदनकामगकाञ्चनदुर्गात्मकगोपीतनुषु रतिरणं सम्पाद्य स्वात्मन्यवरुद्धसौरतत्वेन कामविजयमिच्छन्नात्मारामोऽप्यरीरमत्॥ ४२॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ततः किंकृतमित्यपेक्षायामाह। इति इत्युक्तप्रकारेण तासां त्रिविधानां गोपाङ्गनानां विक्लवितं प्रेमपारवश्यप्रलपितं प्रार्थनोपालम्भनिषेधरूपं भाषितं श्रुत्वा तच्छ्रवणाभिलाषं पूरयित्वा प्रहस्य परिहासेनापि वैकल्यमुत्पाद्य यद्वा सुष्ठूक्तं भवतीभि-

रित्यपि तदुक्त्यानुमोदनेन रताख्यभावव्यञ्जनाय प्रकर्षेण हसित्वा यद्वा प्रहासेनाभिज्ञाः प्रति युष्मन्निष्ठया प्रीत्यात्यर्थमहं प्रसन्नोऽस्मीति अनभिज्ञाः प्रति अहो अद्यैकस्मिन्नेव दिने मया गृहीतेनावहित्थाभावेन ता भवत्यो लज्जायाः श्राद्धं कृतवत्य इति मानिनीः प्रति अहो अति कठिनाः भवत्यो जितं युष्माभिरिति सूचयित्वा सदयं यथा भवति तथा गोपीररीरमत् रमयामास अभिज्ञापक्षे सदयं सकरुणम् अनभिज्ञापक्षे सत्येनाह मानिनीपक्षे सत् अयःशुभावहोविधिर्यत्र तत् गोपीः अरमयदित्यनेन तत्तन्मनोरथानुसारेण भगवान् प्रेष्ठ आसक्त इत्येवं प्रतीतः सन् रमयामास स्वयं त्वसङ्ग एवेति सूचितं पूर्णकामस्य सङ्गनिर्विकारस्य परमात्मनो रमणे दयैव हेतुर्न कामेनेति बोधनाय सदयमित्युक्तम् आत्मारामोऽपीत्याश्चर्य्यबोधनाय अहो तासां प्रेमप्राबल्यं सनकाद्यात्मारामगणवशीकरणगुणगणोऽपि स्वयमात्मारामोऽपि ताभिर्वशीकृत इति ननु आत्मनि आरामः क्रीडा यस्य तस्य निरिन्द्रियस्यासङ्गस्य एकस्यासंख्याताभिः कथं रमणं सम्भवतीत्याशंक्याह । योगेश्वरेश्वर इति । योगिनस्सौभर्य्यादयः तेषामीश्वरन्तथाऽघटितघटनासमर्थऽज्ञतनप्रतीत्यनुसारेण प्रपञ्चमानवत्प्रतीत्यनुरोधेन रमणोपकरणभानस्याऽप्यविरुद्धत्वादिति भावः । यद्वा अरीरमदपि वस्तुत आत्माराम एव यतः योगेश्वरेश्वरः यद्वा ताभिः रममाणोऽप्यात्मरूपाभिस्ताभिरारामःक्रीडा यस्येति न तस्य लौकिकं रमणमिति भावः । निवृत्तिपक्षे इति मिथोक्तिप्रकारेण तासां श्रुतीनां सदैन्यं प्रार्थितं श्रुत्वा प्रहस्य प्रसन्नो भूत्वा सदयं यथा स्यात्तथा आत्मारामोऽपि स्वप्रकाशचिदानन्दस्वरूपत्वात्प्रमाणप्रवृत्त्ययोग्योऽपि गोपीः श्रुतीररीरमत् अतन्निरसनद्वारा तद्विषयतामगच्छत् यतो योगेश्वरस्य सकलसम्बन्धघटनसमर्थस्याव्याकृतस्य मायादिशब्दप्रतिपाद्यस्येश्वरस्तथा च जगज्जन्मादिकारणत्वप्रतिपादनेन श्रुतयो मयि पर्य्यवस्यन्तीत्यधिकारिचेतसि दृढतरं निश्चयमुत्पादितवानिति भावः ॥ ४२ ॥

रास–रहस्यम्

र० टी०—इति पूर्वोक्तप्रकारेण तासां आत्माभिमुखीवृत्तीनां विक्लवितं पारवश्यं श्रुत्वा मुमुक्षोरन्तः करणे अनुभूय योगेश्वरेश्वरः योगिनः सनकादयस्तेषामीश्वराः ब्रह्मादयस्तेषामीश्ववरः परमात्मा आत्मारामोऽपि आत्मरूपेणस्थितोऽपि गोपीः वृत्तीन् सदयं कृपया इव प्रहस्व प्रहस्य प्रकर्षेण हास कृत्वा विकाशं प्राप्य “नेति नेति ।” इति अतन्निरसनेन प्रविलाप्य अधिष्ठानरूपेण अरीरमत् “यक्षन् क्रीडन् रममाणः ।” इति श्रुत्या निष्क्रियरूपेण स्थितो बभूव ॥ ४२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विक्लवितं पारवश्यं प्रलपितं श्रुत्वा आत्मारामोऽपि निजानन्दपूर्णोऽपि गोपीररीरमत् रमयामास ॥ ४२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तासां विक्लवितं विह्वलितं वचनमिति श्रुत्वा स्वयमेकोऽनेकाः कामिनीः कथं रमयामास कथन्तरां ताः पत्नीः पतयोऽगृह्णन्सर्तत्रानुपलभ्यमानात्मारामताभिमता कथन्तमामित्यस्य सर्वस्याप्युत्तरं योगेश्वराणामीश्वर इति। अचिन्त्यशक्त्या वा बहुविग्रहग्रहणेन स्वपार्श्वस्थताप्रतिपत्तिप्रापणेन वा तत एवात्मारामतेति। सदयमित्येतत्प्रहस्येत्यनेन न्यरीरमदित्यनेनाप्यन्वेति। ता गोपीर्नितरामात्मारामः स्वरतोऽपि। अनेन करुणैवात्र कारणमिति सूच्यते। अरीरमद्रमयामास। संश्वासावश्च सदयश्च निमित्तीकृत्येति वा ॥ ४२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं प्रार्थनायां भगवान् यत्कृतवान् तदाह । इती—

षड्गुणैश्वर्यभावेन षोढा रेमे हरिः स्वयम् । स्वरूपेणापि शृङ्गारो द्विविधोऽपि निरूपितः ॥
सामान्यरमणं पूर्वं विशेषे मेलनं पुरा । वाह्येन रमणं पश्चादान्तरं च ततः परम् ॥
ततो नानाविलासेन जातकेलिविभेदतः । विप्रलम्भस्य सिद्ध्यर्थं तासां मान उदीर्यते ॥
तिरोभावस्ततश्चापि नायं लौकिककामुकः ।

प्रथमं तासां पापनोदार्थं सामान्यलीलामाह । इतीति । तासां विक्लवितं परमवैक्लव्यभाषितं श्रुत्वा प्रहस्य अरीरमत् । ननु निरिन्द्रियः कथं रेमे तत्राह । योगेश्वराणामपीश्वर इति । योगादिषु सर्वे पदार्थाः स्फुरन्ति अणिमादयोऽपि तथा तदैव स्वरूपमेवेन्द्रियादिभावेन प्रकटीकृतवान् नतु स्वस्य कामेन तथा सति वीजनिवृत्तौ कामो निवर्त्तेत तासां यथा न कदाचिदपि स भावो गच्छति तदर्थं प्रहस्य प्रकर्षेण हास्यं कृत्वा तासामुद्धारार्थं नतु भिन्नगणनया मर्यादायां पातयित्वा नाशार्थमिति तदाह । सदयमिति । गोपीरेवारमयत् स्वयं त्वात्माराम एव—

क्रियासर्वापि सैवात्र परं कामो न विद्यते । तासां कामस्य सम्पूर्त्तिर्निष्कामेनेति तास्तथा ॥
कामेन पूरितः कामः संसारं जनयेत् स्फुटः । कामाभावेन पूर्णस्तु निष्कामः स्यान्न संशयः ॥
अतो न कापि मर्यादाभग्नामोक्षफलापि च । अत एतत्च्छ्रुतौ लोको निष्कामः सर्वथा भवेत् ॥
भगवच्चरितं सर्वं यतो निष्काममीर्यते । अतः कामस्य नोद्बोधस्ततः शुकवचः स्फुटम् ॥

आत्मारामस्य आत्मनैव रमणं व्यावर्त्तयितुमपिशब्दः अरीरमत बहुधा रेमे उत्तरोत्तररसाधिक्यं च प्रकटितवान् ॥४२॥

श्रीसुबोधिनी-सारः

शुकोक्तिः इत्येवं तासां पराधीनताप्रभाषणं श्रुत्वा योगेश्वरेश्वरः कृष्ण प्रहस्य सदयं यथा भवति तथात्मारामोपि गोपीररीरमत् ॥ ४२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

इति विक्लवितमित्यत्र । अत्र षड्भिः श्लोकैः रमणं स्वकार्यसहितं निरूप्यते । तत्र संख्यातात्पर्यमाहुः **षड्गुणैश्वर्येति** । अत्रायं भावः । भागवते हि परमकाष्ठापन्नं वस्तु भगवच्छब्देनोच्यते । तस्य च षड्गुणवत्त्वमर्थः । प्रकृते च रमणमुच्यते । तच्च विविधभावसाध्यम् । ते च निर्विकारे ब्रह्मणि न सम्भवन्तीति मायया प्राकृतगुणसम्बन्धाद्वैतत्कृतमिति कश्चिद् बहिर्मुखः शङ्केत, तन्निरासो रमणनिरूपकश्लोकसंख्ययैव रमणस्वरूपनिरूपणेन क्रियत इति । एतदेवाहुः **षड्गुणैश्वर्येत्यादिना** । षड्गुणे यो भगवत एश्वर्यभावः स्वामिभावः । रमणे यदा यस्य गुणस्योपयोगस्तदा तत्प्राकट्यकरणेन रेम इत्यर्थः । न तु मायाद्याधीनत्वेनेति भावः । **अत एव स्वयं पदम्** । अन्त्येन श्लोकेन तिरोधानोक्त्या विप्रलम्भोपि निरूपितो भवतीति पूर्णो रसोत्र निरूपितो भवतीत्याहुः **स्वरूपेणापीति** । विशेषतो लक्षणानि त्वग्रे वाच्यानीति भावः । वाक्यार्थानाहुः **सामान्येत्यादि** । विशेषरमण बाह्याभ्यन्तरभेदेन द्विविधमिति । द्वितीयेन बाह्यं तदुक्तमित्याहुः **विशेष इति** । तृतीयेनान्तरम् । अजातस्मरकेलिजातस्मरकेलिभेदेन द्विबिधा विलासा इति द्वाभ्यां तदुक्तिः । ननु नायिकामानापनोदनं चाटुकारैरकृत्ववैवं कथं कृतवानित्यत आहुस्तात्पर्यं **नायं लौकिकेति** । एतच्च श्लोकविवृतौ स्फुटीभविष्यतीति तथा । **तदैव स्वरूपमेवेत्यारभ्य वचः स्फुटमित्यन्तग्रन्थस्यायं** भावः । प्राकृतपुरुषस्येव स्त्रीपेक्षणादिभिस्तदा सञ्जातः कामश्चेत्स्यात्, तज्जनितश्चाङ्गादिविकारः स्यात्, तदा प्राकृतस्येव तन्नाशोपि स्यात् । न चैवम्, किन्तु 'रसो वै स' इत्यादिश्रुतिभिः स्वरूपमेव रसात्मकमिति रसशास्त्रसिद्धा यावन्तो भेदास्तत्सर्वरूपं स्वरूपमेवेति तादृशमेव पुरुषोत्तमस्वरूपमिति नानुपपत्तिः काचिदिति । यथा दैत्यान्प्रति वीररूपेणैवाविर्भावः, तेषां तथैवाधिकारात्, तथात्रैवमाविर्भाव इति हृदयम् । हासस्य मोहकत्वेनाधुना तत्प्रयोजनाभावमाशङ्क्य तदाहुः **तासां यथेत्यादि** । हासे प्रकर्षोयमेव । सख्याङ्गीकार एव हास्यसम्भव इति तथा । अन्यथोक्तरूपेण समं साम्याभावाद्रसो न स्यात् । सख्यत्वभावादेव न स्वस्माद्भिन्नतया गणना । सा तु मर्यादायामङ्गीकारे भवति । तथा सत्येवंभूतानामपि मर्यादायां पातने भक्तिमार्गमर्यादानाशः स्यात् । तदेतदुक्त **नाशनार्थ**मित्यन्तेन । उद्धारोत्रैतदुक्ततापात् । उत्कटतापदर्शनेनैव तदुद्धरणार्थं दया । तथा च हासेनैव तापनाशः सूचितो भवति । अन्यथा रसाभासहेतुत्वेन तां न वदेत् । अथवा । मूले सदयं रेम इति सम्बन्धः । इदं हि रमणमभूतपूर्वमादावुक्त सामान्यरूपं च । अतोत्र न पूर्णरसदानं, किन्त्वग्रे । तेन न भगवत्समाणं सामर्थ्यमधुनास्तीत्यधिकक्रियाशक्त्याविर्भावने नायिकानामुपमर्देन रसनाशः स्यादिति, तदभावाय दयोक्ता । यद्यप्येवं रसः पुष्टो न भवति, तथापि रसाभासभावाभासैर्मुख्यो रसा पोष्यत इतीदं रमणमग्रिमरसपोषस्योपयुज्यते । अत एवाभासे तापापनोदनार्थं सामान्यलीलामाहेत्युक्तमाचार्यैः । (**क्रिया सर्वापी सैवेत्यत्र**, भगवतो भक्तानां चालौकिकत्वं लौकिककामाभावं चाहुः **क्रिया सर्वापिति** । अयमर्थः । लोके रससम्बन्धिनी क्रिया लौकिककामविषयिण्येव प्रसिद्धेति भगवच्चेष्टायाश्च तत्सजातीयत्वात्कामोपि लौकिक एव भविष्यतीति कस्यचिद्भ्रान्तस्याशङ्कां वारयितुमाहुः **परं काम इति** । लौकिकः कामो न विद्यत इत्यर्थः । ननु भगवान् पुरुषोत्तम इत्यस्तु नाम लौकिककामाभावः, एतासां लौकिकतद्वत्त्वमस्त्विति चेत्तत्राहुः **तासां कामस्येति** । अयमर्थः । यदि भक्तानां लौकिकः कामः स्यात्तर्ह्यलौकिकेन भगवत्कामेन पूर्णो न स्यात्, तयोः परस्परमेकजातीयत्वाभावात्, विजातीयेन विजातीयस्य पूरणासम्भात् । अतो भगवत्कामेनैव तासां कामस्य पूर्तेर्भगवत्तुल्यत्वं तासामपीति ज्ञापनायोक्तं **तास्तथेति** । यथा भगवानप्राकृतो लौकिककामरहितस्तथैता अपीत्यर्थः । अन्यथा भगवतः पूर्णरसोद्बोधो न स्यात्, न्यूनाधिकत्वेन भाववैजात्यात् । ननु कामो न विद्यत इति कथनाद्भगवति तत्सम्बन्धाद् भक्तेषु चोभयविधकामाभाव एवास्त्विति चेत् । न । पञ्चमाध्यायोक्तकारिकाविरोधात् । तत्र लौकिकनिषेधपूर्वकमलौकिकस्य भगवति निरूपित्वात् । तथा हि । 'अत्रैव लोके प्रकटमाधिदैविकमुत्तमम् । कामाख्यं सुखमुत्कृष्ट कृष्णो भुङ्क्ते न चापर' इति । अत्र कामसुखस्य आधिदैविकत्वोत्तमत्वविशिष्टस्य प्रभोर्भोक्तृत्वकथनाल्लौकिकस्यैव यस्य निषेधो, न त्वलौकिकस्यापि, अतो भगवद्भोग्यास्वपि तथैव, अन्यथा भगवतो भोक्तृत्वमेव न स्यात् । तस्मात् सुष्ठूक्तं **तास्तथेति** । विपक्षे बाधकमाहुः **कामेनेति** । प्राकृतेनेति शेषः । तादृशस्य

संसारजननावश्यकत्वात्, प्राकृतेषु सर्वत्रैव तथा दर्शनात्। अत्रत्यभक्तेषु संसाराभावात्प्राकृततदभावो निःसन्दिग्ध इति ज्ञापनायोक्तं **न संशय** इति। प्राकृतत्वाभावे हेत्वन्तरमाहुः **अतो न कापीति**। यतोस्य भावस्यालौकिकत्वम्, अत एव मर्यादामार्गीयमोक्षेच्छुनापि प्रवृत्तिर्न बाधितेत्यर्थः। मोक्षमार्गे कामाभाववतामेवाधिकारात्। तथा च श्रुतिः 'श्रोत्रियस्य चाकामहतस्ये'ति। तस्माद्यद्यस्य भावस्य प्राकृतत्वं स्यात्, तदा तत्कृतलीलाया अपि तथात्वात्तच्छ्रवणे लौकिककाव्यादिवत् कामोद्बोधात्तेषामेतल्लीलाश्रवणस्य विपरीतफलकत्वात् प्रवृत्तिर्न स्यादित्यर्थः। चकाराद् भक्तिमार्गीयापि मर्यादा न भग्नेत्यर्थः। तस्मादस्य भावस्यालौककत्वात्तेषामेतल्लीलाश्रवणे फलमुखां प्रवृत्तिमाहुः **अत एतच्छ्रुताविति**। एतल्लीलाश्रवणेन लोकः सर्वोपि साधारणोपि लौकिककामरहितो भवत्। नन्वेतादृक्श्रवणमात्रेण कथं लौकिकतदभाव इति चेत्तत्राहुः **भगवच्चरितं सर्वमिति**। वस्तुस्वभावादेवेत्यर्थः। यद्वस्तु यादृशं भवति तत्स्वनिष्ठमपि तादृशं करोति। एतल्लीलाया लौकिककामराहित्यादलोकतत्प्रतिपादकत्वात्तत्परोपि लौकिकतद्रहितः सन्नलौकिकनिर्हेतुकभगवद्भावयुक्तो भवतीत्यर्थः। श्रवणं तु लीलातात्पर्यावधारणपूर्वकं, न तु यथाकथञ्चित्। **अतः कामस्येति**। यत इयं लीला लौकिककामरहिता, अत एतच्छ्रवणेन लौकिककाव्यश्रवणवन्न लौकिकतदुद्बोधः। ततः कारणात् 'कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीर' इति शुकवचनं स्फुटं स्फुटार्थमित्यर्थः।) **अतो न कापीति**। मोक्षफला मर्यादा, कामे सति न मोक्षः, यदभाव एव सः इति लक्षणापि न भग्नेति सम्बधः। तथा च श्रुतिः मोक्षरूपब्रह्मानन्दप्राप्तौ 'श्रोत्रियस्य चाकामहतस्ये'ति। तत्रोपपत्तिमाहुः **अत एतच्छ्रुताविति**। ननु कामलीलाश्रवणेन लौकिकभावोत्पात्तेर्लौकिकस्यावश्यं भवतीति विपरीतं प्रयोजनं स्यादित्यत आहुः **भगवच्चरितमित्येक** श्लोकम्। वस्तुस्वभावादेवाद्भुतकर्मत्वाच्च प्रभोरेतच्छ्रवणे तदुद्बोधो नेत्यर्थः। यतो न भवत्यत एव शुक एतल्लीलाश्रवणादिफलं कामाभावमेव 'काममपहिनोती'ति प्रकटमेवाह। यद्यपि हृदोषमपाहिनीतित्येवमेव वाच्यम्, तावतैव चारितार्थ्यात्, तथाप्युक्तलीलास्वरूपं ज्ञापयितुं स्फुटमाहेत्यर्थः। ॥ ४२ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

इति **विक्लवितं तासामित्यत्र** षड्भिः श्लोकै **रमणनिरूपणे** सङ्ख्यातात्पर्यमाहुः **षड्गुणैश्वर्यभावेनेत्यादि** का० २५९३/४–२६२१/४। षड्गुणैश्वर्यभावेनैकार्थेन षड्भिः श्लोकै रमणनिरूपणे तात्पर्यमुक्तं, **स्वरूपेणापीति** स्वरूपेणापि रेम इत्यर्थः, अन्त्येन **विप्रलम्भोक्त्या द्विविधोपि शृङ्गारो निरूपित** इति सम्पूर्णेन स्वरूपेण रेमे इतिभावः, वाक्यार्थानाहुः **सामान्येत्यादि**, अत्र वाक्यार्थविभागो दुर्बोधोपि प्राचां व्याख्यानुसारेण यथाकथञ्चिदुच्यते, आद्येन सामान्यरमण, ततो विशेषरमणमित्याहुर्**विशेषे मेलनं पुरेति**, विशेषरमणनिमित्तं पूर्वं मेलनं ताभिः सह समागमः, तदुक्तं "ताभिः समेताभि"रितिश्लोकेन, ततःपश्चाद् द्वितीयेन श्लोकेनो"पगीयमान उद्गाय"न्नित्यनेन बाह्येन स्वरूपाद् बाह्यप्रकारेण गतिविलासादिना **रमण**, ततःपरं "नद्याः **पुलिनमाविश्ये"तितृतीयेन श्लोकेनान्तरं** स्वरूपनिष्ठं बन्धादिप्रकारेण **रमणमित्यर्थः**, **ततो नानाविलासेन जातकेलिविभेदत** इति अजातस्मरकेलिजातस्मरकेलिविभेदेन द्विविधा विलासा इति द्वाभ्यां तदुक्तिरित्युक्तं टिप्पण्यां, अयं टिप्पणीलेखो व्याख्यातः श्रीवल्लभगोस्वामिभिः, "नद्याः पुलिनमाविश्ये"तिश्लोकेन आन्तररमणनिरूपकेण अजातस्मरकेलिविलासा उक्ताः, "बाहुप्रसारे"तिश्लोकेन जातस्मरकेलिविलासा इति, अत एव सुबोधिन्यां 'नद्याः पुलिनमाविश्ये'तिश्लोकव्याख्यानान्ते 'एवं तासां सर्वभावेन जातस्मरकेलित्वं सम्पादित'मित्युक्तं, तथा च "इति विक्लवित"मित्याद्येन सामान्यरमणं, ततस्त्रिभिर्विशेषरमणं, तत्राद्येन समागमः, द्वितीयेन बाह्यरमण, तृतीयेन आन्तररमणं, तत्रैव अजातस्मरकेलिविलासः, एवं चत्वारः, "बाहुप्रसारे"त्यनेन जातस्मरकेलिविलासः, षष्ठश्लोकार्थमाहुः **विप्रलम्भस्य सिद्ध्यर्थमिति**, सप्तमार्थमाहुः **तिरोभावस्ततश्चापीति**, तिरोभावे हेतुमाहुः **नायं लौकिककामुक** इति अत्रैवाग्रे **क्रिया सर्वापीति** का० २६३१/४–२६६१/४। भगवतो भक्तानां चालौकिकत्वं लौकिककामाभावं चाहुः **क्रिया सर्वापीति**, भगवल्लीलायां **क्रिया सर्वापि सैव** लौकिकसदृश्येवास्ति परन्तु भगवति **लौकिकः कामो न विद्यते** इत्यर्थः, एवं भगवति लौकिककामाभावमुक्त्वा तासामपि लौकिककामाभावमुपपादयन्ति **तासां कामस्येति**, अलौकिककामेन **तासां कामस्य पूर्तिरिति**हेतोस्ता अपि तथा लौकिककामरहिता इत्यर्थः, विजातीयेन विजातीयस्य पूरणासम्भवात्, तासु लौकिककामवत्त्वे बाधकमाहुः **कामेन–पूरितः काम** इति, प्राकृतेन कामेनेत्यर्थः, अत्रत्यभक्तेषु संसाराभावात् प्राकृतकामाभावो निःसन्दिग्ध इति ज्ञापनायोक्तं **न संशय** इति, **अतो न कापीति मोक्षफला** मर्यादा, कामे सति न मोक्षः, कामाभाव एव मोक्ष इतिलक्षणापि न भग्नेतिसम्बन्धः, **अतः कामस्य नोद्बोध** इति भगवच्चरित्रस्य निष्कामत्वादेतच्छ्रवणे लौकिककाव्यवन् न लौकिककामोद्बोध इत्यर्थः, ततः कारणात् "कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीर" **इतिशुकवचनं स्फुटं** स्फुटार्थकमित्यर्थः।४२।

इति षड्विंशोध्यायः ॥ २६ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

इत्येवं तासां विक्लवितं पारवश्यप्रलपितं श्रुत्वा आत्मारामोऽपि निजानन्दपरिपूर्णोऽपि भगवान् सदयं यथा भवति तथा कृपया तदार्तिहरणार्थं प्रहस्य गोपीररीरमत् रमयामासेत्यन्वयः। 'कथमेकस्ता रमयितुं शक्तः?' इत्यपेक्षायामाह–**योगेश्वरेश्वर इति**। योगेश्वरा हि बहुरूपधारणेन बह्वीः स्त्रीः रमयितुं शक्नुवन्ति, तेषामीश्वरे भगवति तत्करणं किमशक्यमित्याशयः ॥ ४२ ॥

अन्वितार्थप्रकाशिका

इतीति ॥ इत्येवं तासां विक्लवितं पारवश्यप्रलपितं श्रुत्वा योगेश्वराणामीश्वरः आत्मारामो निजानन्दपूर्णोऽपि भगवान् सदयं यथा भवति तथा कृपया तदार्तिहरणार्थं प्रहस्य गोपीररीरमत् रमयामास। सदयमित्युक्त्या दयैव हेतुर्न कामुकतेति सूचितम् ॥ ४२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इतीति विक्लवितं प्रेमवैकल्यमयरोषदैन्योक्तिं श्रुत्वा योगानां कामक्रोधादिजयोपायानां नानाविधस्वरूपधारणोपायानां चाष्टादशमहासिधीनां च ये ईश्वराः नियामकामहामुक्तास्तेषामपीश्वरः स्वतन्त्रतया नियामकः सदयं दयमासहवर्त्तमानं यथा भवति तथा प्रहस्य मया सह एतेषामनिवार्या रमणेछावर्त्तते अतः आभिर्विहरणीयमिति ज्ञानपूर्वकं हास्यं कृत्वेत्यर्थः आत्मनि अनवधिकातिशयानंदमयस्वरूपे एव आरामः स्थितिर्यस्यैवं भूतोऽपि गोपीः रमयामास ॥ ४२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं, तासां गोपीनां, विक्लवितं पारवश्यप्रलपितं, श्रुत्वाऽऽकर्ण्य, योगेश्वरेश्वरः, सदयं यथा तथा प्रहस्य, आत्मारामः सन्नपि, गोपीः अरीरमत् रमयामास। आत्मारामत्वाद्विषयविमुखोऽपि आर्त्तिहरस्वभावत्वात्ताभिः सह रेम इत्यर्थः ॥ ४२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

इति विक्लवितमिति : १०.२९.४२.

मत्पादभक्त्यतिशयोपचयार्थमस्मिन् जातं कदाचिदपि चेदविधेयकर्म।
तद्धर्मतोऽपि गणयामि गरीय एवं सम्बोधयन् सुखमलभ्यमदात्स ताभ्यः ॥ १४३ ॥
न धर्मो विधिनिर्दिष्टो नाधर्मोऽप्यविधेयजः। किन्तु तौ यावुभौ श्रीशप्रीत्यप्रीतिविधायिनौ ॥ १४४ ॥
त्यागेनैके चामृतत्त्वं यदाहुर्वागेषैकादशिनी युक्तमेतत्।
यस्मात्स्त्रीभिः कृष्णसंगेऽप्यवाप्त कामाप्ताभिः स्वामृतं देवतेड्यम् ॥ १४५ ॥
संयोगाध्वविहारिणीभिरभितो नाडीभिरन्तर्वने सैकाभिः शतसख्यकाभिरतनुप्राप्त्युत्सुकाभिस्तदा।
भावं वीक्ष्य तदीयमुज्ज्वलमयं रेमे स योगीश्वरो योगार्थोऽयमुदीरितो मुनिपदैस्तत्तत्पदैरूह्यताम् ॥ १४६ ॥
यः सर्वलोकसत्प्रेमसीमापात्रमधोक्षजः। जातास्तत्प्रेमपर्याप्ता यास्तास्ता इव शोभनाः ॥ १४७ ॥

कृष्णप्रिया

श्रीशुकदेवजी कहते हैं—परीक्षित्! भगवान् श्रीकृष्ण सनकादि योगियों और शिवादी योगेश्वरों के भी ईश्वर हैं। जब उन्होंने गोपियों की व्यथा और व्याकुलता से भरी वाणी सुनी, तब उनका हृदय दया से भर गया और यद्यपि वे आत्माराम हैं—अपने-आप में ही रमण करते रहते हैं उन्हें अपने अतिरिक्त और किसी भी बाह्य वस्तु की अपेक्षा नहीं है, फिर भी उन्होंने हँसकर उनके साथ क्रीडा प्रारम्भ की ॥ ४२ ॥

ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः।
उदारहासद्विजकुन्ददीधितिर्व्यरोचतैणाङ्क इवोडुभिर्वृतः ॥ ४३ ॥

कर्दमक्षमा

अन्वयः—प्रियेक्षण, उत्फुल्लमुखीभिः, समेताभिः, ताभिः, वृतः, उदारचेष्टितः, उदारहासद्विजकुन्ददीधितिः, अच्युतः, उडुभिः, वृतः, एणाङ्कः, इव, व्यरोचत ॥ ४३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रियस्येक्षणेनोत्फुल्लानि मुखानि यासां ताभिः। उदारहासश्च द्विजाश्च तेषु कुंदकुसुमवद्दीधितिर्यस्य सः। एणांकश्चंद्रः ॥ ४३–४५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मया शोभया सह वर्तमाना समा श्रीराधा तामिताभिः प्राप्ताभिः। उदाराण्यंगस्पर्शपुष्पाद्यर्पणकटाक्षपातरूपाणि चेष्टितानि यस्य सः। प्रियेक्षणेति मुखानां कमलवनत्वमीक्षणस्य च भास्करत्वं सूचितम्। तेषूदारहासयुक्तद्विजेषु दंतेषु। यद्वा–द्विजा एव

कुंदा माध्यपुष्पाणि द्विजकुंदाः, उदारहासेनोत्कृष्टहास्येन विवृतानां द्विजकुंदानां दीधितिर्मरीचिर्यस्य सः । 'भानुः करो मरीचिः स्त्री' इत्यमरः । 'कुंदा माध्येऽस्त्री मुकुंदसमिनिध्यंतरेषु ना' इति मेदिनो । 'एणः कुरंगो हरिणः' इति हलायुधः । एणोंकश्चिह्नं यस्य स तथा "कलंकांकौ लाञ्छनञ्च चिह्नं लक्ष्म च लक्षणम्" इत्यमरः । एतेन हरेः कांत्या तासामाच्छादितकांतित्वमुक्तम् ।। उदारं तासां रतिसुखप्रदं भाविभक्तानां तच्छ्रवणाद्यैः प्रेमप्रदं च चेष्टितं लीला यस्य सः । अच्युतः युगपदेव तत्प्रत्येकरमणनिष्ठच्युतिरहितः । उदारैस्तासां सुखप्रदैर्महद्भिर्वा हासैर्द्विजानां दंतानां कुंदानामिव प्रकाशिता दीधितिर्यस्य सः ।। ४३ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

रमणप्रकारमेव ताभिरित्यादिभिश्चतुर्भिर्वर्णयन् तत्प्रयोजककर्तृताञ्च दर्शयन्नादौ ताभिः सह प्रेमसङ्गमेन तस्यापि शोभाविशेषं सदृष्टान्तमाह । ताभिरिति । समेताभिः स्वयमेव श्रीकृष्णेन कर्त्रा समागताभिः अरीरमदित्युक्तेः ततस्ताभिस्तादृशीभिर्वृतः परितो वेष्टितः सन् व्यरोचत विशेषेणाशोभत तत्राप्यच्युतः सर्वाभिः प्रत्येकमपि सङ्गमे च्युतिरहितः सन् अत एव उदारचेष्टितः उदाराणि रसविशेषोद्दीपनविचित्रवैदग्ध्यादिमयत्वेन सर्वोत्कृष्टानि परमसुखप्रदानि वा चेष्टितानि स्पर्शनपुष्पाद्यर्पणकटाक्षादिरूपाणि यस्य सः । अत एव प्रियस्य वीक्षणं स्वकर्तृकं तत्कर्तृकं वा ज्ञेयम् । उत्फुल्लशब्देन मुखस्य कमलत्वं व्यञ्जितं तदीक्षणे तदन्तःकरणतमोऽपगमेन तदीयदिवसता प्राप्तेरिति भावः । एवं तासां रसविशेष उक्तः । तस्यापि तमाह । उदारो हासो यया सा । द्विजकुन्ददीधितिर्यस्येति श्रीमद्दन्तानां प्रकाशेन हासस्याधिकशोभोक्ता । स्वतः परमकाष्ठाप्राप्तनित्यशाभामयस्यापि ताभिः शोभाविशेषं दृष्टान्तेन साधयति । एणाङ्क इति । चन्द्रस्य पूर्णत्व—एणाङ्कस्यैणाकारत्वेनोपलम्भादेणाङ्कः पूर्णचन्द्रस्ताराभिः सर्वतो विराजमनाभिः सतीभिर्वृतः सन् यथा विरोचते तद्वदिति एवं ताभिः सह तस्यान्योऽन्यं शोभनत्वं प्रेष्ठत्वं नित्यसाहित्यं तासां ततस्तन्वीत्वं च सूचितम् ।। ४३ ।।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

रमणप्रकारमेव ताभिरित्यादिभिश्चतुर्भिर्वर्णयन्नादौ ताभिः सह प्रेमसंगमेन तस्यापि शोभाविशेषं सदृष्टान्तमाह—ताभिरिति । समेताभिरत्यन्तान्तिकं गताभिः । यद्वा, प्रणयकोपादिपरित्यागेन मिलिताभिः । यद्वा, मा शोभा परमसौन्दर्य्यं तया सह वर्त्तते समा परमसुन्दरी श्रीराधा, तया इताभिः प्राप्ताभिः । एतेन प्रथममुक्तिप्रत्युक्तिसमये तासां मध्ये श्रीराधा नासीत्, किन्तु कृष्णस्यावहित्थागमे जात एव सा मिलितेति ताभिर्वृतः परिवृतो वेष्टितः सन्, अच्युतः कामादिभिरनिर्ज्जितोऽपि, तथा च विश्वः—'अनिर्ज्जिते चाच्युतस्तु' इति, यद्वा, कथमपि कस्याश्चिच्छोभाया न च्युत इत्यच्युतोऽपि, यद्वा, रसप्रसरात् कथमपि न च्यवते इत्यशेषरसपूर्णतोक्ता, अतएव विशेषेणारोचत अशोभत, समेतत्वे हेतुः—उदाराणि रसविशेषोद्दीपकविचित्रवैदग्ध्यादिमयत्वेन सर्व्वोत्कृष्टानि परमसुखप्रदानि वा चेष्टितानि स्पर्शन-पुण्याद्यर्पणकटाक्षादिरूपाणि यस्य सः, यद्वा, प्रहस्येति पूर्व्वोक्तो हेतुस्तत्र विराजत एव, यद्वा, प्रहस्यारीरमत् रञ्जयामास, रते रागार्थकत्वात्, तथा च विश्वः 'रतिः स्मरप्रियायाञ्च रागे च सुरते रतिः' इति । अयमेव संगतौ हेतुः । ततश्च उदारश्चेष्टित इति वक्ष्यमाणरमणोपकरणं विरोचनकारणञ्च ज्ञेयम् । अतएव प्रियस्येक्षणं स्वकर्त्तृकं तत्कर्त्तृकं वा । एवं शक्तिविशेषेणैश्वर्य्यमपि दर्शितम्, परितो वर्त्तमानास्ताः प्रति साम्येन युगपदीक्षणात् । उत्फुल्लशब्देन मुखस्य कमलत्वमीक्षणस्य भास्करत्वं ध्वनितम् । एवं तासां रसविशेषप्रकाश उक्तः, तस्यापि तमाहुः—उदारे हासे द्विजेषु च कुन्दपुष्पवद्दीधितिर्यस्य सः, इति हासस्य विशुद्धता दन्तानां च शुभ्रकान्तिरुक्ता, यद्वा, उदारहासे द्विजकुन्दानां दीधितिर्यस्य, यद्वा, उदारो हासो यया सा द्विजकुन्ददीधितिर्यस्येति श्रीमद्दन्तानां प्रकाशेन हासस्याधिकशोभोक्ता, स्वतः परमकाष्ठाप्राप्तस्य नित्यशोभामयस्यापि ताभिः शोभाविशेषं दृष्टान्तेन साधयति—एणांक इति । पूर्णचन्द्रस्ताराभिः सर्व्वतो विराजमानाभिः सतीभिर्वृतः सन् यथा विरोचते तद्वदिति । एवं ताभिः सह तस्यान्योऽन्यं शोभनत्वं प्रेष्ठत्वं नित्यसाहित्यञ्च सूचितम् ।। ४३ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेव प्रपञ्चयति । ताभिरित्यादिना । प्रियस्य स्वस्येक्षणेन उत्फुल्लानि मुखानि यासां ताभिः सङ्गताभिः गोपीभिः सहाच्युतः उदारहासश्च द्विजा दन्ताश्च तेषु कुन्दकुसुमवद्दीधितिर्यस्य तथाभूतो व्यरोचत रराज उडुभिर्वृतश्चन्द्र इव ।। ४३ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

समेताभिः मिलिताभिः उदार उत्कृष्टः हासः द्विजा दन्ताः कुन्दा मल्लिका आसां दीधितिः कान्तिर्यस्य सः द्विजा एव कुन्दाः द्विजकुन्दाः उदारहासेन विवृतानां द्विजकुन्दानां दीधितिर्यस्य स इति वा एणाङ्कश्चन्द्रः एणः कुरङ्गो हरिण इति हलायुधः ।४३।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रयोजकत्वमेवाह । ताभिरिति चतुर्भिः । समेताभिः श्रीकृष्णेनैव कर्त्रा सङ्गताभिः । उपगीयमानः तदीयस्वरतालाद्यनुरूपेण तन्नामगानेनोपगायकरीत्या गीयमानः । तदुक्तं विष्णुपुराणे—

कृष्णः शरच्चन्द्रमसं कौमुदीं कुमुदाकरम् । जगौ गोपीजनस्त्वेकं कृष्ण नाम पुनः पुनरिति ।। ४३–४६ ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तत्प्रकारमाह—ताभिरित्यादि। समेताभिः सहमिलिताभिर्वृतोऽच्युतो रराज। उदारं चेष्टितं लीला यस्य, ताभिः कीदृशीभिः ? प्रियेक्षणं प्रियकर्त्तृकं प्रियकर्मकं वा यद्दर्शनं तेनोत्फुल्लानि मुखानि यासाम्। उत् उत्कृष्ट आरः प्रसरणं यस्य, स चासौ हासश्चेति, तथा तास्मिन् द्विजकुन्दानां दीधितिर्यस्य। कः काभिरिव ? एणाङ्कश्चन्द्र उडुभिरिव। स कीदृशः ? उदारमूद्ध्र्वमियर्तीत्युदार चेष्टितं यस्य। प्रियेति तुल्यम्। अच्युतोऽनेकरात्रिव्यापी उदारो महान् यो हासः प्रकाशस्तेन द्विजानां कुन्दानां च दीधितिरिव दीधितिर्यस्य। 'उडु वा स्त्रियाम्' इति लिङ्गविशेषणम्॥ ४२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

उपगीयमान इत्यादि त्रिभिर्व्यतिक्रमेणान्वयः। नद्याः पुलिनमाविश्य वनं मण्डयन् रमयाञ्चकारेति परेणान्वयः। अन्यथा केवल-पुलिनस्थले तथाविध-रमणं न रम्यम्। अतो व्यचरन्निति क्रियान्तं पृथग्वाक्यम्। वनिताशतयूथप इति 'वनिता जनितात्यर्थानुरागायाञ्च योषिति' इत्यादि तथाभूतानां शतं यूथपा यत्र स तथा। यूथो हि सजातीयानामपरिमितो व्यूहः तान् पातीति यूथपास्तासां शतम्, शतशब्दोऽप्यसंख्यपरः। प्रधानभूता तव यूथपाः असंख्या यूथानामनन्तत्वे गणनायाः का कथेति भावः। बाहुप्रसारेति, बाहुप्रसार-परिरम्भणादिभिरिति प्रसार-शब्देन बाहू प्रसार्य एहि एहीत्युक्तेः स्वयं वक्षसि मिलितानां तासां परिरम्भणमिति भावः। व्रज सुन्दरीणां रतिपतिमात्मानमुत्तम्भयन् वर्द्धयन् नानेकभवन् आलिङ्गन-शैघ्र्यात् पूर्वोक्त-योगेश्वरप्रतिपादनं वा, अथवा, व्रजसुन्दरीणामसन्तमपि रतिपतिं कामं प्रादुर्भावयन्, अथवा, रतिः प्रेम तस्याः पतिमात्मानं रमयाञ्चकार॥ ४२–४७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उदारं तासां रतिसुखप्रदं भावभक्तानां तच्छ्रवणाद्यैः प्रेमप्रदं च चेष्टितं लीला यस्य सः अच्युतः युगपदेव तत्प्रत्येकं रमणनिष्ठाच्युनिरहितः उदारैस्तासां सुखप्रदैर्महद्भिर्वा हासैर्द्विजानां दन्तानां कुन्दानामिव प्रकाशिता दीधितिर्यस्य सः॥ ४२॥

श्रीरसिकाल्हादिनी टीका

आदौ युगपदेव तासां बह्वीनां सङ्गमं वर्णयन् अग्रे करिष्यमाणं दीर्घरमणं सूचयिष्यन् संक्षेपतो रमणशोभाविशेषपुरस्कृतं कथयति। ताभिरमिताभिः सह अच्युतः श्रीकृष्णो विशेषेण अरोचत अशोभत विप्रलम्भखिन्नायां यांसां विक्लवितं श्रुतवान् ताभिः पूर्वभावना—कलनात्तु दूरे स्थिताः इदानीं प्रहस्यतोत् भावः। आकलय्य समेताभिरन्तिकमागताभिः अच्युतो विलासच्युतिरहितः। मानसे लीलायां सर्वमाकलितमेव। अन्यरसालम्बनैः सहाविनाभ्यो लीलाभ्यो विशेषेणाधिक्येन रोचतेति। अन्यत्र लीला धर्मेण कृता अत्र तु धर्मिणा कृता लीला मधुररसभाविता। अत एव विशेषा उक्ता। सजातीयेभ्य एव न विजातीयेभ्य इति। यद्वा पूर्वं रमणाधिकेन शोभितः कीदृक् उदारचेष्टितः। सर्वासां तासां युगपदेव संमाननननिपुणं सर्वेन्द्रियास्वाद्यरसविशेषभावनानुभवयितुमुदारचेष्टितं कर-चरणादि-चालनं प्रेक्षणादिकं च यस्य। यद्वा उदारमविद्यां सर्वासामेकजातीयभावत्वात्। तदुक्तं रसार्णवे "उक्तवाकये गुणोत्कर्षप्रतिभानमुदारतेति"। पुनः कीदृशः उदारहासद्विजकुन्ददीधिति उदारः सर्वतः प्रशरणशीलो हासो येषु, यद्वा उदारस्तासां भावोद्बोधनदक्षो हासो येषु ते द्विजाः-दन्तास्तेषां कुन्दकुसुमवत्दीधितिः यस्मिन्, यद्वा उदारः प्रकटो हासो द्विजानां दन्तानां कुन्ददीधितौ यस्य, दन्ताः कुन्दकुसुमरूपमीयते। तेषामुपमानायोग्यत्वमालक्ष्य हसंतीति भावः। हासस्योज्वलत्वेनोज्वलरसस्य पल्लवितत्वं सूचितम्। कीदृशीभिः प्रियेक्षणोत्फुल्लमुखीभिः प्रियस्य प्रीतिविषयस्य कृष्णेक्षणं तत्कर्तृकं तत्कर्मकं वा तेनोत्फुल्लानि अतिविकासितानि मुखानि यासां ताभिर्वृतः व्यरोचत एकादश रसालम्बनेभ्योऽधिकशोभत तत्रानुरूपदृष्टान्तमाहुः। उडुभिर्नक्षत्रैर्वृत एणांकश्चंद्र इव अत्र श्रीकृष्णे भूष्यस्तास्तु भूषणं एवं परस्परं भूषणं भूष्यत्वं नित्यसंनिहितत्वं च सूचितम्। किंच एणांक इति पदेनोपादेये सकलंकत्वं व्यञ्जितम्। बहुषु प्रेम युक्तत्वान्नैकनिष्ठत्वं इदमेव कलङ्कत्वेनोच्यते। गोपीनामेकनिष्टत्वान्निःकलङ्कत्वमिति निःकलंकाभिः सकलंकस्यापि तस्य कलंकाच्छादनं कृतम् ताभिर्वृतत्वात् एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणैरिवाङ्कः इति प्रसिद्धेः॥ ४२॥

विशुद्धरसदीपिका

इदानीं ताभिः समेतस्य भगवतः सुषमाविशेष दर्शयति। ताभिरिति। अनिर्वचनीयप्रेमवतीभिः आत्मभूतायाः प्रतिबिम्बरूपाभिर्वा तत्सहचरीभिर्वा समेताभिः स्वयमेव भगवतैव वाचः पेशैरेकमत्यं प्रापिताभिः तथा स्वयमपि उदारेति उदाराणि रसविशेषोद्दीपनविचित्रवैदग्ध्यादिमयत्वेन सर्वोत्कृष्टानि परमसुखमयानि वा चेष्टितानि यस्य सः तानि चाङ्गस्पर्शनपुष्पाद्यर्पणकटाक्षादीनि किम्वा वक्ष्यमाणानि बाहुप्रसारेत्यादीनि वस्तुतस्तु प्राणप्रियायाः स्वाधीनपतिकायाः श्रीराधिकाया अनुग्राह्यत्वाभिमानेन तासु समेतासु चानुग्रहमयानि चेष्टितानि यस्य सः अत एव अच्युतः तासां भावहावादिभिरनाकृष्टचित्तः अत एव प्रियेति

स्वकर्तृकं वा यत्प्रियेक्षणं तेनोत्फुल्लानि मुखानि यासां ताभिः वृतः प्रीत्या स्वयं वृतः परिवारित इति यावत् किम्वा कान्तत्वेन यथोचितं वृतः वरणमात्र स्वीकारस्तेन गान्धर्ववृत्तिः सूचिता सा चानौचित्यपरिहारायेति ज्ञेयं तदुक्तम् "अनौचित्यादृते नान्यद्रसभङ्गस्य कारण"मिति गान्धर्ववृत्तेश्चौचित्यमुक्तं महाभारते शकुन्तलां प्रति दुष्यन्तेत—

आत्मनो बन्धुरात्मैव गतिरात्मैवचात्मनः। आत्मनैवात्मनो दानं कर्तुमर्हसि धर्मतः॥ इति

सोपपत्तिकं श्रैष्ठ्यमाह—

सा त्वं मम सकामस्य सकामा वरवर्णिनि। गान्धर्वेण विवाहेन भार्य्या भवितुमर्हसीति॥

एतदभिप्रायेणैव गान्धर्ववृत्त्येत्युक्तमुज्ज्वलाद्यैः इदं च प्रेयसीष्वेव सहचरीपक्षे तु वृतः परिवारित इत्येवार्थः व्यरोचत विशेणाशोभत पक्षे विशेषेण मह्यं रुचित इत्यर्थः क इव एणाङ्क इव इति ताभिः सह तस्यान्योऽन्यं शोभाविशेषत्वं प्रेष्ठत्वं नित्यसाहित्यं ततस्तन्वीत्वं च सूचितं वस्तुतस्त्वेणाङ्कपदेन वर्णसाम्यान्मेघाम्बरं लक्षते तेन च मेघाम्बरधरायाः श्रीराधायाः सान्निध्यमध्यवसीयते मेघाम्बर इति नीलाम्बरस्यैव नामान्तरङ्गणोद्देशादौ ततश्च ताभिर्नित्यसहचरीभिः परिततो नित्य एको युगलरूपो मुख्यतमः प्रकाशो वर्त्तते सच प्रेयसीभावाभिरलक्षितः सहचरीभिश्च लक्षित इति ज्ञेयं सच सच कीदृशः उदारहासेत्यादि प्रस्तुते हासस्योदारत्वं च तास्वनासक्त्या प्राणेश्वर्य्याः सानुकूल्यद्योतनाय वयस्यासु कलयत कलकण्ठ्यो मम कलाकौशलं यदेताः। सर्वा अपि वञ्चयन् प्राणप्रियामेवानुसरामीति चातुर्य्यद्योतनायेति॥ ४३॥

श्रीरामनारायणकृता भावभावविभाविका

रमणोद्यतस्य शोभामाह। ताभिरिति। अच्युतस्ताभिर्व्यरोचतेत्यन्वयः अयमत्राभिप्रायः यतोऽच्युतः न च्युतं स्वरूपं स्वरूपात्मगुणावा हावभावगाननृत्यादिकला वा भगशब्दवाच्या ऐश्वर्य्यादयो वा यस्येति सर्वथा पूर्णत्वात्स्वत एव वारोचत पूर्णपुण्याया अपि गङ्गाया नद्यन्तरसङ्गमे दशगुणमाहात्म्यश्रवणवत् नित्यसच्चित्परानन्दस्यापि परब्रह्मण उपनिषच्छ्रुतिगणविषयीकृतस्यैवाभिव्यक्तपरमानन्दत्ववत्ताभिर्विशेषेणारोचत ताभिः किं भूताभिस्तत्राह। समेताभिः ऐहिकामुष्मिकसर्वधर्मास्तत्र सेव्यत्वेनावभासमानतत्तद्देवाननाश्रित्य तात्पर्य्यवृत्त्या पूर्वापराविरोधसमन्वयाभ्यां श्रुतीनां मुमुक्षूणां च ब्रह्मण्येव सम्यक् पर्य्यवसानवत्सर्वगृहकुलधर्मादिकृत्यतत्सेव्यपतिपुत्रादिबन्धुवर्गमुत्सृज्य भगवदेकपरतया परस्परसापत्न्यभावं चानवेद्य सम्यक् प्राप्ताभिः साधनं निरूप्य फलोद्गममाह। प्रियेक्षणोत्फुल्लमुखीभिरिति। प्रियस्य नित्यनिरतिशय प्रेमास्पदस्य कृष्णस्येक्षणेन दर्शनेनोत्फुल्लानि मुखानि यासा यद्वा प्रियस्य तस्यैव कृपादृष्ट्या उत्फुल्लानि सर्वदिव्यकुसुमेभ्योऽप्युत्कृष्टतया फुल्लानि मुखपङ्कजानि यासां ताभिरनेन भगवदीक्षणस्य रविरूपतया तत्प्रेमात्मककृपादृष्टेर्मुखकमलविकाशनयोग्यतापि ध्वनिता कथम्भूतो हरिस्तत्राह। उदारचेष्टितः उदाराणि अतिशयेन सर्वजनसर्वसुखप्रदानि चेष्टितानि यस्य नित्यपूर्णसुखघनस्य भगवतः कर्मणां स्वसुखहेतुत्वासम्भवात्तद्विषयभूतानां प्रियाणां तत्स्मरणादिपराणां च भोगापवर्गप्रेमसुखादिदातृत्वेनोदारत्वं ज्ञेयं पुनः किंभूतः उदारहासद्विजकुन्ददीधितिः उदारे तथैव सुखप्रदे हासे द्विजानां कुन्दकुसुमवद्दीधितिर्यस्य तथा च हासस्य स्वत एवोज्ज्वलत्वेऽपि द्विजदीधित्या अत्युज्ज्वलत्वं ध्वनितं यद्वा उदारहासरूपा द्विजकुन्दानां दीधितिर्यस्य तथा च द्विजा एव कुन्दपुष्पाणि तद्दीधितिरेव कुन्दविकाशस्तेन मुखे नित्यद्विजदीधित्या नित्यप्रहसितत्वं सूचितं यद्वा यथा द्विजैः कुन्ददीधितिभिः मुखपद्महासाकारत्वेन सम्भावितैः सहासमुखपद्मरुचिस्तथा ताभिर्व्यरोचतेति दृष्टान्तसूचनं मुखतोऽपि दृष्टान्तमाह। उडुभिर्वृत एणाङ्कश्चन्द्र देव अत्र उडूनां यथा बहुत्वं दीप्तिमत्त्वं दीप्त्याह्लादादिमत्तया च चन्द्रसाजात्यं तत्पत्नीत्वं च तथा गोपीनां बहुत्वं कान्तिमत्त्वमाह्लादकत्वं प्रतीयमानगोपजातित्वेन वस्तुतः सच्चिदानन्दघनत्वेन च साजात्यं तत्पत्नीत्वं च ध्वनितं ताभिर्वृत इति पदेनापि श्लेषाद्वरणं पतित्वेन स्वीकरणं द्योतितं तच्चात्रैव गान्धर्वविधिना वा ब्रह्मणा वत्साहरणावसरे प्राजापत्यविधिनैवोद्वाहितत्वेन वा तत्पतीनावप्यात्मत्वेन वा बोध्यम् एणाङ्क इव कृष्णस्यैकत्वं कान्तिमत्त्वं तथैव साजात्यं तत्पतित्वं च द्विजकुन्ददीधितिरित्यत्र किरणवाचिदीधितिशब्देन द्विजानामुडुसादृश्यं मुखस्य चन्द्रसामान्यमपि द्योतितं तेन तस्यापि एणाङ्क इवोडुभिर्वृत इत्यस्योपमेयत्वम्॥ ४३॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

रमणप्रकारमाह। ताभिरिति। यथोडुभिस्ताराभिर्वृत एणाङ्कः पूर्णश्चन्द्रः शोभते तद्वत्ताभिर्वृतोऽच्युतः व्यरोचत विशेषेण शोभितः अनेन दृष्टान्तेनाऽन्योऽन्यापेक्ष्यशोभमानत्वं गोपीनां तन्वित्वं स्वणत्त्वं च व्यज्यते ताभिः समीपमागताभिरादौ समेताभिर्मिलिताभिः भगवांश्चोदारचेष्टित उदाराणि अलौकिकानिनिर्मलानि मुक्त्यादिफलदानि चेष्टितानि करस्पर्शेन पुष्पाणां कटाक्षादिरूपाणि यस्य सः तस्य तादृशचेष्टितैः तासां रसोदयमाह। प्रियकर्तृकमक्षिणं स्वकर्तृकं वा तदीक्षणेनोत्फुल्लानि विकशितानि मुखानि यासाम् अनेन भगवन्मुखस्य चन्द्रत्वं तन्मुखानां कुमुदत्वं बोधितम् अथ भगवतोऽपि रसोदयमाह। उदारो हासो यस्याः सा दन्तलक्षणकुन्दपुष्पकान्तिर्यस्याः सा ऊदारहासेन द्विजकुन्देषु दीधितिर्यस्येति वा तादृशाभिस्ताभिः मनस्व्यऽपि रसोदयेऽपि च्युतिर्न

जातेति ज्ञापनायाच्युत इत्युक्तं यद्वा यथान्वयेऽपि स्वस्वरूपादप्रच्युत एवासीदित्यच्युतपदेन ध्वनितं निवृत्तिपक्षे ताभिः सर्वाभि"र्गतिसामान्या"दिति न्यायादेकस्मिन्नद्वितीये ब्रह्मणि तात्पर्य्येण समेताभिः श्रुतिभिः उदाराणि सृष्टिकर्तृत्वादीनि चेष्टितानि यस्य सः प्रियस्यानन्दरूपस्य परमात्मन ईक्षणाय तद्विषयकं प्रेमोत्पत्त्या उत्फुल्लानि विकशितानि तत्प्रतिपादनोन्मुखस्थानीयानि पदानि यासां ताभिः उदारो यो हासः महामाया हासो जनोन्मादकरी च मायेत्युक्तत्वात्स्नेहकला द्विजानां तद्युक्तत्वात् द्विजपदेन स्नेहकला उच्यते उदारो महामायालक्षणो हासः स्नेहकलालक्षणा द्विजा दन्ताः यस्य स चासौ कुन्दः मुकुन्दः एव दीधितिः प्रतिमारूपापन्ना कीर्त्तिर्यस्य सः कुन्दो माध्ये मुकुन्दे च भ्रमे निब्यन्तरे पुमानिति मेदिनी मुकुन्दः कुन्दरः कुन्द इति भारते ॥ ४३ ॥

रास-रहस्यम्

र० टी०—प्रियस्य नित्यनिरतिशयपरमप्रेमास्पदस्यात्मनः ईक्षणेन अपरोक्ष्येणसाक्षात्कृतेन उत्फुल्लानि विकसितानि मुखानि अग्राणि यासां ताभिः समेताभिः मिलिताभिः वृत्तिभिः परिवेष्टितः, उदारचेष्टितः उदारं मनोरथपूरक चेष्टितं शरीराद्यभिमाननिषेधात्मकः प्रयासः यस्य, पुनः उदारहासद्विजकुन्ददीधिति उदारेण महताहासेन पूर्णपुण्याया अपि गंगायाः नक्षन्तरसंगमे माहात्म्याधिक्य श्रवणवत् परिपूर्णानन्दरूपस्यात्मनः श्रवणमनननिदिध्यासनादिभिर्व्यक्तानन्देन द्विजेषु "संस्कारात् द्विज उच्यते।" इति न्यायेन संस्कारसम्पन्नासु वृत्तिषु कुन्दकुसुमवत् दीधितिः प्रकृष्टप्रकाशो यस्य स अच्युत चिन्मयानन्दस्वरूपात् न कदापि च्यवति इति, उडुभिस्ताराभिर्वृत एणाङ्कश्चन्द्रः यथा विरोचते तथा व्यरोचत अशोभत ॥ ४३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अच्युतः अखण्डैश्वर्यः उदारं स्वभक्तमनोरथपूर्तिकरं चेष्टितं कर्म यस्य सः उदारहासश्च द्विजा दन्ताश्च तेषु कुन्दकुसुमवद्दीधितिर्यस्य सः प्रियस्येक्षणेन उत्फुल्लानि मुखानि यासां ताभिः समेताभिः सह व्यरोचत उडुभिर्वृत एणाङ्कः मृगाङ्क इव ॥४३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

समेताभिर्मिलिताभिस्ताभिरुदारं महच्चेष्टितं यस्य स प्रियस्य स्वस्येक्षणेनावलोकनेनोत्फुल्लं विकसितं मुखं यासां तास्ताभिः सहितोऽच्युत उदार उत्कृष्टो हासस्तेन किञ्चिद्विवृता द्विजा दन्तास्त एव कुन्दाः कुन्दानि वा । माध्यं कुन्दमित्यमरः । मारः कुन्दः कुरण्टक इति पुंस्काण्डे रत्नकोशः । कुं भुवं दापयति शोधयति दलतीत्युभयपक्षे तत्पुरुष इत्युलुग्द्वितीयाया दैप् शोधने दोऽवखण्डन इति धात्वोरात इति केरूपम् । माध्यपुष्पाणि तेषां दीधितिः कान्तिर्यस्य सः । कुन्दश्चक्रभ्रमे माध्येति निधिभेदे सुरद्विपीति विश्वः । स्वातन्त्र्येणोदारहासादीनां दीधितिर्यस्येति वा । उडुभिर्नक्षत्रैर्वृत एणाङ्कः । एणः कुरङ्गो हरिण इति हलः । एणोऽङ्को लाञ्छनं यस्य सः । अङ्कः स्थानेऽन्तिके मन्तौ रूपोऽङ्कछुङ्गलक्ष्मास्विति विश्वः । स चन्द्र इव व्यरोचत । उत्कृष्टं दारेषु स्वभार्यायां चेष्टितमिव चेष्टितं यस्य स इति वा ॥ ४३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं सामान्यलीलामुक्त्वा विशेषलीलामाह । ताभिरिति त्रिभिः । अजातस्मरकेलिभिः प्रथमतः ताभिः समेतो जातः मिलितः पूर्वं भयात् पृथक् स्थिताः ततः उदाराणि चेष्टितानि यस्य अत्र औदार्यं रसविषयकं यथा तासां महानेव रस आविर्भवति तथा कामशास्त्रसिद्धा लीलाः सर्वा एव कृतवान् ततस्ता अन्तः पूर्णरसाः प्रियस्य भगवत ईक्षणार्थमुत्फुल्लानि मुखानि यासां तादृश्यो जाताः प्रियेक्षणेन वा सूर्यकिरणैरिव उत्फुल्लानि मुखानि वस्तुतो लोभस्थितरसार्थमेव तथा करणम् एतावति कृते रसो निवर्त्तते तदभावायाह । अच्युत इति । तासामपि रससमाप्त्यभावाय उदारो यो हासः पूर्णकामप्रदः कामार्थमेव यो मोहस्तेनैव स्नेहः सम्बर्द्धितस्तदाह । हाससहिता ये द्विजाः त एव कुन्दपुष्पाणि आरक्तान्यपि हासेन शुभ्राणि तेषु दीधितिर्यस्य कुन्दत्वं स्नेहस्यैतन्मात्रपर्यवसानार्थं पूर्वं निरुपाधिरेव स्नेहः स्थितो भगवता परं रसशास्त्रोक्तरीत्या स्वरूपानन्दं दातुं तत्सजातीयः कामोपाधिकः स्नेहोऽधुना जनित इति ज्ञापनाय स्नेहरूपरदानां द्विजपदेन कथनं तथा सति फलभोगात् कान्त्यभावमाशङ्क्य तत्र दीधितिरुक्ता यद्यपि भगवान् तन्निर्वन्धेन रेभे जगद्दोषनिराकरणार्थं च नतु स्वयं तथापि न पूर्णमनोरथ इव किन्तु यथा लौकिकः तदाह । दृष्टान्तेन एणाङ्क उडुभिर्नक्षत्रैः सह तथा व्यरोचतेति बन्धातिरिक्ताः सर्वा बाह्या एव लीला उक्ताः एषा विशेषतः प्रथमलीला बाधककामनिवारिका ॥ ४३ ॥

श्रीसुबोधिनी-सार

उदारलीलोऽच्युतः उदारो हासो यस्य द्विजेषु दन्तेषु कुंदवद्दीधितिर्दीप्तिर्यस्य सः प्रियस्येक्षणेनोत्फुल्लानि मुखानि यासां ताभिः समेताभिः संमिलिताभिः गोपीभिर्वृतो युक्तो व्यरोचताशोभत उडुभिः ताराभिरेणांकश्चंद्र इव ॥ ४३ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

उदारहासद्विजकुन्देत्यत्र कुन्दत्वं स्नेहस्येति । काममात्रपर्यवसायी स्नेह इति ज्ञापनार्थमित्यर्थः । कुन्दानां रसमात्रोपयोगित्वादिति भावः । अत्रायं भावः । स्वामिनीनां सदा निरुपधिस्नेह एव चेत्स्यात्तदा खण्डितादिभावासम्भवेन पूर्णरसभोग उभयत्रापि न सम्भवतीति निरुपधित्वांशमाच्छाद्य कामोपाधिकत्वं सम्पादितवान् नैतावता भक्तिमार्गे हीनता । आद्यप्रवृत्तेर्निरुपाधिकत्वाद् भगवता स्वानन्ददानार्थं स्वयमेतद्भावजननादिति । तर्हि कामनिवृत्तौ तन्निवृत्त्यापत्तिरित्याशङ्कानिरासो दीधितिनिरूपणेन कृतः । स्नेहरूपदन्तेषु दीप्तिरुत्तरोत्तरमेकरूपेण प्रकाशमानत्वमेव । एतमेवार्थं परोक्षेणाहुः **तथा सतीत्यादिना** । ननु भगवानेतत्प्रार्थनया रमते, न तु स्वयं विनैव प्रार्थनाम् । तथा सति स्वामिनीष्वियदवधि यावान्भावः सम्पादितोस्ति तत्पूरणमेवोचितम् , न त्वधिक संपादनम् , प्रयोजनाभावात् , तावतैव श्रोतृणां कामदोषनिवृत्तिसंभवादुदारहासादिकरणं कुत इत्याशयेन **यद्यपीत्यादिना**शङ्क्यात्र भगवद्रिरंसाया एवोपक्रान्तत्वात्स्वानुरूपसर्वसामग्रीसम्पादनमावश्यकम् । अत एव न पूर्णमनोरथ इवौदासीन्येनैतत्सन्तोषार्थमेव रमते । तथा सति रमणस्वरूपाभावेनैतत्सन्तोषासम्भवप्रसंगः, किन्तु लौकिकनायकवद्विकारयुक्तः । एतज्ज्ञापनायैव मूले दृष्टान्तोयमुक्त इति तत्समाधानमाहुस्तथापीत्यादिना । कलङ्कवत्त्वोक्त्या प्रकृते विकारभाववत्त्वं सूच्यते । स यथा पूर्णोप्यपूर्णो भवति, पुनः क्रमेण पूर्णोपि, न तु सदा पूर्ण एव, तथात्रापीति ज्ञाप्यत इति भावः । **बन्धातिरिक्ताः सर्वा** इति । स्वामिनीनामुडुस्थानीयत्वात्तेषामेवावरकत्वोक्त्यावरणस्य च बहिः परितः स्थितिनियमेनात्रापि बाह्या एव लीला उक्ता भवन्तीत्यर्थः ॥४३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तद्रमणमेव प्रपञ्चयति—ताभिरिती चतुर्भिः । समेताभिर्मिलिताभिस्ताभिर्गोपीभिर्वृतः अच्युतः सर्वत ऐश्वर्यज्ञानादिधर्मतः च्युतिरहितः श्रीकृष्णः उडुभिस्ताराभिर्वृत एणाङ्कश्चन्द्रो यथा विरोचते तथा व्यरोचत अशोभतेत्यन्वयः । गोपीनां परमानन्दं सूचयंस्ता विशिनष्टि—प्रियस्येक्षणेन कृपादृष्ट्या उत्फुल्लानि मुखानि यासां ताभिः । तदानन्दहेतुत्वेन भगवन्तं विशिनष्टि उदारं गोपीनां मनोरथपूरकं भाविश्रोत्रादीनां पुरुपार्थप्रदं च चेष्टितं लीला यस्य स इति । चन्द्रसादृश्यमुपपादयन्नाह—उदारेण महता तासां सुखप्रदेन वा हासेन द्विजेषु दन्तेषु कुन्दकुसुमवद्दीधितिः प्रकाशो यस्य स इति ॥ ४३ ॥

अन्वितार्थप्रकाशिका

ताभिरिति ॥ प्रियस्य कृष्णस्येक्षणेन कृपादृष्ट्या उत्फुल्लानि मुखानि यासां ताभिः समेताभिर्मिलिताभिस्ताभिर्गोपीभिर्वृतः उदारं गोपीनां मनोरथपूरकं चेष्टितं यस्य उदारेण महता तासां सुखप्रदेन वा हासेन द्विजेषु दन्तेषु कुन्दकुसुमवद्दीधितिः प्रकाशो यस्य सः अच्युतो हरिः उडुभिस्ताराभिर्वृतः एणाङ्कश्चन्द्रो यथा विरोचते तथा व्यरोचत अशोभत ॥ ४३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रियस्य श्रीकृष्णस्य वीक्ष्यणेन प्रफुल्लमुखीभिः समेताभिः समंततः प्राप्ताभिः वृतः उदारचेष्टितः उदाराणि विचित्रचातुरीमयतया श्रेष्ठानि मोक्षादिफलदायकानि वा चेष्टितानि करस्पर्शन पुष्पाद्यर्पणकटाक्षादीनि चरित्राणि यस्य स उदारहासेन द्विजकुंदानां दंतरूपं कुंदकुसुमानां दीधितिः श्वेतकांतिर्यस्य तथाभूतः अच्युतः ताभिः सहरमणेऽपि वीर्यच्युतिरहितः यद्वा अखंडतैश्वर्यः उडुभिर्नक्षत्रैः वृतः एणांकः पूर्णिमेश इव बभौ ॥ ४३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेव प्रपञ्चयति ताभिरित्यादिना ॥ ताभिरिति ॥ प्रियस्य श्रीकृष्णस्येक्षणमात्मानं प्रत्यार्द्रभावेन निरीक्षणं तेनोत्फुल्लानि मुखानि यासां ताभिः, समेताभिः संगताभिस्ताभिर्गोपीभिः सह, उदारचेष्टितो महाचरित्रः, अच्युतः, उदारहासश्च द्विजा दन्ताश्च तेषु कुन्दकुसुमवद्दीधितिर्यस्य सः । यद्वा । उदारश्चासौ हासश्च तेन विवृतेषु द्विजेषु दन्तेषु कुन्दकुसुमवद्दीधितयो यस्य तथाभूतः सन्, उडुभिस्ताराभिः वृतः, एणाङ्कश्चन्द्र इव, व्यरोचत ॥ ४३ ॥

कृष्णप्रिया

भगवान् श्रीकृष्णने अपनी भावभङ्गी और चेष्टाएँ गोपियों के अनुकूल कर दी, फिर भी वे अपने स्वरूप में ज्यों–के त्यों एकरस स्थित थे, अच्युत थे । जब वे खुलकर हँसते, तब उनके उज्जवल–उज्जवल दाँत कुन्दकली के समान जान पड़ते थे । उनकी प्रेमभरी चितवन से और उनके सर्शन के आदन्द से गोपियों का मुठाकमल प्रफुल्लित हो गया । वे उन्हें चारों ओर से घेर कर खड़ी हो गयीं । उस समय श्रीकुण्ण की ऐसी शोभा हुई, मानो अपमी पत्नी तारि काओं से घिरे हुए चन्द्रभा ही हो ॥ ४३ ॥

उपगीयमान उद्गायन् वनिताशतयूथपः । मालां बिभ्रद् वैजयन्तीं व्यचरन्मण्डयन्[1] वनम् ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—वनिताशत, यूथपः, उपगीयमानः, वैजयन्तीम्, मालाम्, बिभ्रद्, उद्गायन्, वनम्, मण्डयन्, व्यचरत् ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उपगीयमानो गोपीभिः । स्वयञ्च चद्रमसमुद्गायन्नधिकं वर्णयन् कृष्णः शरच्चंद्रमसं कौमुदीकुमुदाकरम् जगौ । गोपीजनस्त्वेवं कृष्णनाम पुनःपुनरिति टीकांतरोक्तेः । शतशब्दोऽनेकवाची । यूथस्तु—"अर्बुद दशकोटनिामेक भवति शैलजे । दशार्बुदं भवेद्यूथमिति संख्याविदो विदुः ॥" इति तंत्रोक्तेः । वैजयंतीलक्षण पूर्वमुक्तम् ॥ ताभिरुपाधिक्येन गीयमानं रागस्वरतालाद्यैः । तत्र तालत्रयेण गीतं यथा—"वदनं मधुरिममदनं चलनं दलनं कवीन्द्रकीर्तीनाम् । हसितं सुदृगभिलषितं तव सवयः पातु मामनिशम् ॥" इति । स्वयं च वनितानां शतयूथानि पांति यास्ता मुख्य तमाः श्रीराधाचंद्रावल्याद्यास्तदनुगानरीत्या तेनैव गीतेन प्रत्येकमुद्गायन् । क्वचिदेकस्वरपरिवर्तेन परस्परगानम् । उद्गीतं यथा—"त्वद्वदनं मदनं मधुरिम्णा तत्र च हन्त दृगन्तविलासाः । तेष्वसमां सुषमामुपजग्मुः सुंदरि कमकलाः सकलास्ताः ॥" इति, "कान्ते त्वदास्याद्यदत्तमिंदुर्म्ृगच्छलाद्दुर्यश एव धत्ते । जनोपहासासहनोऽथ वा किं द्विजोऽपि मूढो गरलं जघास ॥" इति । अत्र सुंदरीत्यत्र सुंदरेति, कांत इत्यत्र कांत इति प्रयुंजानः प्रेयसीजनोऽनुगायति स्मेति रीतिः वैजयंतीम् पञ्चवर्णपुष्पग्रथिताम् 'पञ्चवर्णा वैजयंत' इति वचनात् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्थं शोभाविशेषोदयेन श्रीवृन्दावनमपि शोभयन् गीतेन पुष्पादिप्रदर्शनेन च भावमुद्दीपयितुं रतियोग्यं यमुनापुलिनं गन्तुञ्च गमनक्रमेण बभ्रामेत्याह । उपगीयमान इति । उद्गायन् भावोद्दीपनं चन्द्रादिकं हर्षेणोच्चैर्गायन् ताभिश्चोपगीयमानः उपगायनरीत्या तैरेव गीतैरनुक्रियमाणैर्वर्ण्यमानः श्लेषेण तत्रैव सङ्गमितार्थत्वात् तच्चैवं ज्ञेयम । यथा श्रीरसामृतसिन्धौ । अखिलरसामृतमूर्त्तिः प्रसृमररुचिरुद्धतारकापालिः । कलितश्यामाललितो राधाप्रेयान् विधुर्जयतीति । क्वचिदेकद्व्यक्षरपरित्तनाच्च । यथा । यामिनीकृतरुचिः शुचिकान्तिश्चन्द्रिकावलिविभाविकचश्रीः । षट्पदालिकलितैः कलगीतैः पश्य भाति कुमुदाकर एषः । यामिनीकृतरुचिः शुचिकान्तिश्चन्द्रकावालीविभाविकचश्रीः । सत्पदालिकलितैः कलगीतैः पश्य भाति कुमुदाकर एष इति । यद्वा तदीयस्वरतालादियुक्तेन तन्नाम्ने तदुपगायन् तया गीयमानः मनसि तदेकाविष्टतया वचसि तदेकस्फूर्त्तेः । यथोक्तं श्रीविष्णुपुराणे । कृष्णः शरच्चन्द्रमसं कौमुदीं कुमुदाकरम् । जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनरिति । तत्रार्थद्वयमपि रसनीयमिति । कृष्णश्च नाम च कृष्णनाम तदेवैकं केवलं जगाविति च व्याख्येयम् । वनिता जनितात्यर्थानुरागायाञ्च योषितीत्यमरः । तासां शतानि यूथानि पातीति तन्नायक इत्यर्थः । श्लेषेण यानि पिबति पिबन्त इव वक्षुर्भ्यामित्यादिवत् । आसक्त्या सेवते अधरामृतपानादिना साक्षात् पिबति वेति तथा सः तासां निजनिजभावसाजात्यानुसारेण वर्गशो यूथत्वं वैजयन्तीं पञ्चवर्णपुष्पग्रथितां चञ्चवर्णावैजयन्तीति वचनात् । यद्यपि वलयानां नूपुराणामिति वक्ष्यमाणादन्यान्यपि भूषणानि विद्यन्ते तथापि तां बिभ्रदिति वन विहारयोग्याङ्गत्वेनोक्तम् । सा च ताभिरेवाशु निर्माय समर्पिता तद्वनदेव्या वृन्दयैव वा तदर्थ तत्र तत्र कुञ्जादौ स्थापितेति ज्ञेय व्यचरत् परिबभ्राम ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं शोभाविशेषोदयेन श्रीवृन्दावनमपि शोभयन् गीतेन पुष्पादिप्रदर्शनेन च काममुद्दीपयतु किंवा रतियोग्य श्रीयमुनापुलिनं गन्तुम्, गमनक्रमेण बभ्रामेत्याह—उपेति । रूपगुणलीलादिवणनेन स्तूयमानः, यद्वा, बहुधा तद्गीतगानेन उप चतुर्षु पार्श्वेषु गीयमानः, अतो हर्षेणोच्चैर्गायन्, वनिताः जनितपुरुषात्यन्तानुरागाः स्त्रियः, तथा च विश्वः—'वनिताः जनितपुरुषात्यन्तानुरागाः स्त्रियः, तथा च विश्वः—'वनिता जनितात्यर्थानुरागायां च योषिति' इति तासां शतानि युथानि पाति सर्व्वदुःखाद्रक्षति, यद्वा, पिबति 'पिबन्त इव चक्षुर्भ्याम्' इत्यादिवदासक्त्या सेवत इति । यद्वा, अधरामृतपानादिना साक्षात् पिबतीवेति तथा सः, तासां निजनिजसाजात्यानुसारेण वर्गशो युथत्वम्, तत्र श्रीगोलोकादिवर्त्तिन्यो नित्यप्रियाः काश्चित्तेनैव सह ततोऽवतीर्णाः काश्चित्तदंशभूता देव्यः, या उद्दिश्य श्रीब्रह्मणादिष्टम् (भा० १०।१।२३) —'सम्भवन्तु सुरस्त्रियः' इति काश्चिच्च बहुलप्रयत्नैर्भावविशेषसिद्ध्या साधनद्वारा श्रीगोपीत्वं प्राप्ता द्विविधा मुनयः श्रुतयश्च दण्डकारण्यवासिनो मानससरस्तीरमहातपस्विनश्चेति मुनयः, श्रुतयश्चमहोपनिषदाद्याः काश्चित् । तत्तद्वृत्त पाद्मबृहद्वामनादौ व्यक्तमेव, तत्रैव भावविशेषेणावान्तरभेदं प्राप्ता इत्येवं विभागशो

---

[1] व्यचरत्सवनाद्-इति कस्यचित् ।

वर्त्तमाना अपि सर्व्वासां प्रायो भावसाजात्यात् सर्व्वा एव ताः साम्येन रमयामासेत्यर्थः। वैजयन्तीं पञ्चवर्णपुष्पग्रथितां 'पञ्चवर्णा वैजयन्ती' इति वचनात् 'नवरत्नखचिताम्' इति केचित्, यद्यपि रिरंसया पूर्व्वं धृतान्यन्यान्यपि भूषणानि विद्यन्ते, तथा चाग्रे वक्ष्यते, (भा० १०।३३।५) 'वलयानां नूपुराणां किंकिणीनाञ्च योषिताम्। सप्रियाणाम्' इत्यादि, तथापि तां विभ्रदिति रात्रौ तया शोभाविशेषाभिप्रायेण, किंवा ताभिः सद्यस्तत्रैव विरचय्य समर्पितत्वाद् व्यचरत् परिवभ्राम ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गोपीभिरुद्गीयमानः स्वयं चोद्गायन् वनिताशतानां यूथप इवेति भावः। वैजयन्तीं मालां बिभ्राणो वनमलंकुर्वन् व्यचरत् ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

शतशब्दोऽनेकवाची वैजयन्तीं विजयावहाम् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

प्रथमतो हर्षोत्कर्षात्तेन च ताभिरपि गानमारब्धम्। वस्तुतस्तु सङ्गीतप्रधानोऽयं रासविलासः सङ्गीतञ्च गानप्रधानम्। तेनासां मध्ये काः कथं गायन्तीति प्रत्येकं गानशुश्रूषया स्वयमपि गायन् वनविहारं कृतवानित्याह—उपगीयमान इत्यादि द्वाभ्याम्। उपगीयमान इत्यर्थात्ताभिरेव, गायन्नित्यर्थात्ता एव। वनितानां शतं यूथपं मुख्यं यस्य, एकैकस्या यूथपाया कोटियूथत्वेन ज्ञेया—"प्रमदाशतकोटिभिराकुलितः" इत्युक्तत्वात्। वनं मण्डयन् व्यचरत्! मालां बिभ्रदिति शुकदेवस्य स्फूर्तिसौभाग्यम् ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ताभिरुप आधिक्येन गीयमानः रागस्वरतालाद्यैः। तत्र तालत्रयेण गीतं यथा। वदनं मधुरिमसदनं चलनं दलनं करीन्द्रकीर्त्तीनाम्। हसितं सुदृगभिलषितं तव सवयः पातुमामनिशमिति। स्वयञ्च वनितानां शतयूथानि पान्ति यास्ता मुख्यतमाः श्रीराधाचन्द्रावल्याद्यास्तदनुगानरीत्या तेनैव गीतेन प्रत्येकमुद्गायन्। क्वचिदेकस्वपरिवर्त्तेन परस्परगानमुद्गीतं यथा त्वद्वदनं सदनं मधुरिम्णां तत्र हन्त दृगन्ताविलासाः! तेऽब्वसमा सुषमामुपजग्मुः सुन्दरि! कामकलाः सकलास्ता इति। कान्ते! त्वदास्योदयदत्तमिदुर्गच्छलाद्दुर्यश एव धत्ते। जनो पहासा सह नोऽथवा किं द्विजोऽपि मूढो गरलं जघासेति। अत्र सुन्दरीत्यत्र सुन्दरेति कान्ते इत्यत्र कान्त इति प्रयुञ्जानः प्रेयसीजनोऽनुगायति स्मेति रीतिः। वैजयन्तीं पञ्चवर्णपुष्पग्रथितां पञ्चवर्णा वैजयन्तीति वचनात् ॥ ४४ ॥

रसिकाह्लादिनी–टीका

पूर्वं श्रीमुखेनोक्तं दृष्ट्वं वनमिति आदौ मानसलीलायां विलासाधिकरणत्वेन वनस्य विचारगोचरक्षतत्वात् विहारमाह उपगीयमान इति। ताभिरुप समीपे गीयमानः पूर्वं कृष्णसम्मानितानामनुरागाधिक्येन गानं तदेव श्रीकृष्णगानोद्दीपकं जातमिति। अत एव श्रीकृष्णनिष्ठांरूपगुणलीलास्ताभिर्गीयमाना श्रुत्वा स्वयमप्युच्चैर्गायन्, तासां सर्वासां रूपगुणोत्कर्षप्रबन्धत्वेन गानं कुर्वन्, कीदृशः वनिताशतयूथपः वनिताः उत्पन्ननवानुरागास्तासां शतानि असंख्यातानि यूथानि पातीति सः। नवानुराग एव षड्जादिस्वरालापं भेदविशेषवानाविर्भूत इति भावः। काश्चिदुपनिषदः काश्चिद्दंडकारण्यमुनयः काश्चिदुपासनासिद्धाः काश्चिद्देव्यः काश्चिद् नित्यसिद्धाः। एवं पंचविधास्तासां भावसाम्यात् रसं पुष्णन् पातीति, पुनः कीदृक् वैजयन्तीं पंचवणपुष्पग्रथितां नृत्योपयोगिनीं मालामुरसि बिभ्रत् अयमभिप्रायः पंचविधा गाप्यः पंचविधा एव भूषणवसनाङ्गरागा। अतस्तत्सादृश्येन वैजयन्तीधारणमिति अनेन शोभाविशेषः सूचितः। किं वानर्घ्यमणिखचितभूषणसत्वेपि वृन्दावनोद्भवमाल्यधारणेन वनस्यापि सम्माननं कृतमिति भावः। अत उक्तं वनं मंडयन् अलंकुर्वन् व्यचरत् विशेषेण विजहार। लतादिपिहित-गह्वरपरिशीलनेन रसमाधुर्यपराकाष्ठां प्रापयन्नलं चकार पुष्पपल्लवादिनिर्मितासु शय्यासु प्रविश्य प्रियाः पुष्पाद्यलंकृतिं लम्भयन् ताभिरलंकृत बभूवेति भावः ॥ ४४ ॥

विशुद्धरसदीपिका

उदारचेष्टितानि दर्शयति। उपेति त्रिभिः। उप अधिकं गीयमानः ताभिरिति पूर्वस्मात् स्वयमप्युद्गायन् तत्र प्रेयसीभिस्तु तन्नामगुणादिकमेव गीयते भगवता च चन्द्रादिकं तदुक्तं श्रीविष्णुपुराणे कृष्णः शरच्चन्द्रमसङ्कौमुदीं कुमुदाकरम्। जगौ गोपीजनस्तेकं कृष्णनाम पुनः पुनरिति यदि वा श्लिष्टमेवोभाभ्यां गीयते यथा श्रीरसामृतसिन्धौ—

अखिलरसामृतमूर्त्तिः प्रसृमररुचिरुद्धतारकापालिः। कलितश्यामां ललितो राधा प्रेयान् विधुर्जयति ॥

सहचरीभिस्तु पूर्वश्लोकगतैणाङ्कपदोद्बोधिततद्युगलनित्यविलास विशेषं प्रणयपरिणयात्मकं गीयत इति भेदः इदं च गानं तत्तद्भिन्नभावाभिरनाकलितमेव योगमायाप्रभावेण रसावेशस्वभावेन वा ज्ञेयं तत एव च वनितेत्यादि "वनिता जनितात्यर्थानु-

रागायां च योषिती''ति कोशादनुरागवतीनां योषितां निजनिजभावसाजात्येन द्वित्राभिः पञ्चषाभिः सप्ताष्टाभिश्च शतसहस्राभिश्च वर्गेण भिन्नानि यूथानि पालयतीति वनिताशतयूथपः तच्च पालनं यथास्वं तत्तद्वाञ्छापूरणमेव तथा वैयन्तीं मालां बिभ्रत् सा चेयं तत्तद्रसाभिव्यञ्जकवर्णविशेषकुसुमादिरचिता पञ्चवर्णा वैजयन्तीत्युक्तेः ते च रसाः प्रेयसीनां व्रजलीलासम्बन्धिनः सहचरीणां च निकुञ्जलीलासम्बन्धिनः तदुक्तं—

व्रजे रसाः शान्तदास्यसख्यवात्सल्यसूचकाः । निकुञ्जे रतिसौहार्दमैत्रीभावाभिधा मताः ॥
वर्णाः सितासितहरिद्रक्तश्यामलसंज्ञकाः । रक्तावदातहरिता व्यक्तरागाः सिताः क्रमात् इति ॥

एषा च श्रीवृन्दादेवीनिर्मिता निजभावानुसारेण ताभिश्च वर्णमालाभिप्रायेणैव निवेदितेति ज्ञेयं किं कुर्वन् वनं मण्डयन् वनमालया मण्डितस्ताभिः प्राणप्रियाभिः प्राणसहचरीभिश्च स्वयं वनमपि भूषितं कुर्वन्निति शोभोद्गारः सूचितः ॥ ४४ ॥

श्रीरामनारायणकृता भावभावविभाविका

ततस्तच्चरितमाह । उपगीयमान इति । वनितानां शतान्यसंख्यातानि यूथानि पातीति तथा गजीयूथप इव वनं मण्डयन् व्यचरत् इत्यन्वयः पुनः किम्भूतः सन् व्यचरत् तदाह । मालामिति । तासां प्रियेक्षणोत्फुल्लमुखोपलक्षितसर्वाङ्गानां मालां वैजयन्तीं च बिभ्रन् डुभृञ्धारणपोषणयोरित्यस्माद्वैजयन्तीं धारयन् तन्मालां उदारहासद्विजकुन्ददीधितिरित्यादिना मुखचन्द्रचन्द्रिकात्मकस्मितसुधया पोषयन् यद्वा विभुत्वेन सर्वानुगतवपुषा प्रत्येकं सर्वासामालिङ्गनेन स्वगुणग्रथितोत्फुल्लसर्वावयवकुसुमास्ता मालामिव धारयन् तथा फुल्लितकुसुमाङ्गीस्ताः श्यामतन्मधुपतया श्याममधुपवदुद्गायन् स्वयं चोत्फुल्लनीलोत्पलाङ्गस्ताभिः स्वमधुपाभिः वैजयन्तीं सुरभिसमाकृष्टमुनिगन्धर्वपालिभिश्चोपगीयमानः तत्रायं भावः तास्तु बहुपुलकमुकुलकराङ्गुलिप्रवालाङ्कुरस्वबाहुलतालिङ्गिततया पुलकमुकुलव्याप्तरसालपरसालाङ्गं कृष्णमाकलय्य कोकिलकलकण्ठयस्त निर्वाणमपि कुसुमबाणव्याप्त मत्वा मदनमदोन्मदतया रतिरणायोच्चकलस्वरगीतेनोद्गायन्त्यः कातरतया पलायनशङ्कया तद्गुणान् गायन्ति सोऽपि स्वात्मनस्तदुद्यततां बोधयन् ताः रतिरणायैवोत्साहयस्तद्गुणान् गायति स्म ॥ ४४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथोदारलीलाभिर्वनपि शोभयन् व्यचरदित्याह उपगीयमान इति । ताभिरुपसमीपे गीयमानः भक्तपराधीनत्व प्रेयसीजनमनोऽनुरञ्जकत्वमानवतीमनोद्दीपकत्वादिगुणगणालंकृतकृष्णनाम्ना पुनः पुनरुपगीयमानः स्वयं च शरच्चन्द्रादिमयं गोपीजनप्रमातिरेकमयञ्च गीतमुत् ऊर्ध्वं ब्रह्मलोकपर्य्यन्तगामिगीतं गायन् तदुक्तं विष्णुपुराणे -

कृष्णः शरच्चन्द्रमसं कौमुदीं कुमुदाकरम् । जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनः इति ॥

तत् स्वयमनुरक्तस्त्रीशतयूथपस्तत्पतिकामनायाः पालक इति वा तदधरपानकर्त्तेति वा पुनश्च वैजयन्तीं मुक्तामाणिक्यमरकतेन्द्रनीलवज्राख्यरत्नरचितां स्वाभाविकैश्वर्यबोधिकां कीर्त्तिमयीं पञ्चवर्णा वैजयन्तीतिमिति वचनात्पञ्चवर्णपुष्पग्रथितां वा मालां बिभ्रत् वनमेव सर्वं मण्डयन् अलंकुर्वन् व्यचरत् तासां कामोद्दीपनाय लीलागतिं कृतवान् वनान्तरङ्गतवानिति वा निवृत्तिपक्षे उपगीयमानो मुनिभिः स्वयं च कृष्णाधिरूपेण—

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥

इत्यादिना स्वात्मानमुद्गायन् वनितास्थानीयश्रुतिशतयूथपस्तदर्थत्वात्तत्पतिस्तथा च सूत्रस्मृतिश्रुतिलक्षणप्रस्थानत्रयलभ्य इत्यर्थमयीं वैजयन्तीं मालां बिभ्रत्तदवच्छिन्न सूत्रस्मृत्यादिरूपः सः

पञ्चरूपातु तु या माला वैजयन्ती गदाभृतः । सा भूतहेतुसङ्घाता भूतमाला च वै हितेति ॥

विष्णुपुराणे अन्तःकरणलक्षणं वनं मण्डयन् व्यचरत् सर्वासु तद्वृत्तिषु स एवास्फुरदित्यर्थः ॥ ४४ ॥

रास–रहस्यम्

र० टी०—वनिताशतयूथपः सपत्नीशतस्थानीयानां नानावादिप्रयुक्तश्रुतियुक्तिशतानां यूथानि समूहानि तानपि अद्वैतब्रह्माणि तात्पर्य विषयत्वप्रदानेन ''सर्वं खल्विदं ब्रह्म ।'' ''मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।'' ''तत्तु समन्वयात् ।'' इति श्रुतिस्मृतिन्यायेन पालयतीति, तथा ''ब्रह्मविद् ब्रह्मैव भवति ।'' ''ब्रह्मविदाप्नोति परं ।'' इत्यादि उप आधिक्येन गीयमानः स्तूयमानः, उद्गायन् स्वयं च ''अहं ब्रह्मास्मि ।'' ''अयमात्मा ब्रह्म ।'' इति घोषयन्, तथा अविद्यास्मिता रागद्वेषाभिनिवेशानां श्रुतियुक्तिशतेन ग्रथितां विजयवहां प्रामाण्यरूपां मालां स्रक्कां बिभ्रत् धारयन् वनं संसारारण्यं मण्डयन् अलंकुर्वन् व्यचरन् परिबभ्राम ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गोपीभिरुद्गीयमानः स्वयमुद्गायन् ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वमुद्गायंस्ताभिरुगीयमानश्च वनिताशतयूथपः। शतशब्दो बहुवाची। यूथपो गजराजः। अनेन तासां करिणीत्वेनोत्प्रेक्षणम्। वनिताशतयूथं पातीति स इति वा। यूथनाथो गजश्रेष्ठे यूथं वृन्दमात्रे स्यादिति रभसविश्वौ। वैजयन्तीं तन्नाम्नीं मण्डयन्नलङ्कुर्वन् ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

द्वितीयलीलाया उद्बोधार्थं पूर्वं सामग्रीमाह। उपनीयमान इति। ताभिरुपगीयमानः निकटे गीयमानः स्वमप्युद्गायन् जातः ततः वनितानामनेकविधस्त्रीणामनेकविधानेव यूथान् पातीति तथा जातः यावतीभिर्मिलितो रसहेतुर्भवति तावतीनामेकं यूथम् एवमनेकरूपाणि कृतानि तेषामत्र रक्षणं दूरादेवाश्वासनेन च तदागायतो गच्छतः रूपमाह। मालामिति। वैजयन्तीं नवरत्नखचितां स्वाभाविकीमैश्वर्य्यबोधिकां कीर्त्तिमयीं मालां बिभ्रत् वनमेव सर्वं मण्डयन् अलं कुर्वन् व्यचरत् लीलागतिं कृतवान् एषा हि गतिः तासां कामोद्बोधिका स तासां कामपूरकः एकस्माद्वनात् वनान्तरं वा गत इति ॥ ४४ ॥

श्रीसुबोधिनी–सारः

ताभिरुपगीयमानः स्वयमुद्गायन् स्त्रीशतयूथपतिः वैजयंतीं मालां बिभ्रत्सन् वनं मंडयन्नलंकुर्वन् व्यचरत् ॥ ४४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

मालामित्यत्र। प्रकरणाद्रसपोषार्थत्वात्सर्वस्य चरणमपि तदर्थमेवेत्याशयेनाहुः एषा हि गतिरिति ॥ ४४ ॥

इति षड्विंशोऽध्यायः ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वनितानां शतयूथानि पातीति तथा सः कृष्णस्ताभी रूपाधिक्येन गीयमानः स्वयं चोद्गायन् वैजयन्तीं पञ्चवर्णपुष्पग्रथितां मालां बिभ्रत् वनं **मण्डयन्** अलंकुर्वन् व्यचरत् इत्यन्वयः ॥ ४४ ॥

अन्वितार्थप्रकाशिका

उपगीयमान इति ॥ वनितानां शतयूथानि पारीति तथा सः कृष्णस्ताभिः उप आधिक्येन गीयमानः स्वयं चोद्गायन् वैजयन्तीं पञ्चवर्णपुष्पग्रथितां मालां बिभ्रत् वनं मण्डयन् अलंकुर्वन् व्यचरत् ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मंडयन् शोभयन् वैजयंतीमालां पंचवर्णमालां ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उपगीयमान इति। उपगीयमान उद्गीयमानः, गोपीभिरिति शेषः। उद्गायन् स्वयं च चञ्चस्ववेण गानमाचरन्, वनितानां शतानि तेषां यूथानि पातीति तथाभूतः, वैजयन्तीं मालां बिभ्रत्, पञ्चरत्नमयी पञ्चवर्णकुसुममयी आपादलम्बिनी वा माला वैजयन्ती। एवंभूतः कृष्णः, वनं मण्डयन् व्यचरत्। वनमलंकुर्वन्विचचारेत्यर्थः ॥ ४४ ॥

कृष्णप्रिया

गोपियों के शत—शत यूथों के स्वागी भगवान् श्रीकृष्ण वैजयन्ती माला पहने वृन्दावन को शोभाय मान करते हुए विचरण करने लगे। कभी गोपियाँ अपने प्रियतम श्रीकृष्ण के गुण और लीलाओ का गान करतीं, तो कभी श्रीकृष्ण गोपियो के प्रेन और सौन्दर्य के गीत गाने लगते ॥ ४४ ॥

नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकम्। रेमे[1] तत्तरलानन्दि [2]कुमुदामोदवायुना ॥ ४५ ॥

कर्दमक्षमा

अन्वयः—हिमवालुकम्, नद्याः, पुलिनम्, आविश्य, तत्तरला नन्दि कुमुद आमोद वायुना, गोपभिः, रेमे ॥ ४५ ॥

---

१. जुष्टं–वीर. । २. सङ्गि–वीर. ; नदि–विज. ; नन्द–श्रीधर. वंशी. जीव. वीर. विश्व. शु. सु. रा. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नद्याः कालिंद्याः। हिमाः शीतलाः वालुकाः सिकता यत्र तत्तथा। तस्या नद्याः तरलैर्मंदकल्लोलैरानंदयितुं शीलमस्यास्तीति तत्तरलानंदी, कुमुदानामामोदो यत्र स वायुः कुमुदाऽऽमोदवायुः, तत्तरलानंदी चासौ कुमुदामोदवायुश्चेति तथा तेन। यद्वा–तया नद्या तरलानि नृत्यंतीव स्थितान्यानंदीन्युत्फुल्लानि कुमुदानि तत्तरलानंदिकुमुदानि तेषामामोदेन सौरभेण संपृक्तेन वायुना। एतेन मंद सुगंधिशीतलत्ववैशिष्ट्यं वायोर्ध्वनितम्। ननु तावति पुलिने शतकोटिस्त्रीभिः कथं विजहार ? दुर्घटघटनापटीयस्या भगवन्मायया सर्वस्यापि सुकरत्वात्, वृंदावनैकदेशे ब्रह्मणा कोटिशो ब्रह्मांडानां दृष्टत्वाच्च। तदुक्तम्—"स तु माथुरभूरूपः परिच्छिन्नोऽप्यथाद्भुतः। स्फारः संकुचितश्च स्यात्कृष्णलीलानुसारतः॥ अत्रैवाजांडमालापि पर्याप्तिमुपगच्छति। वृंदावनप्रतीकेऽपि याऽनुभूतैव वेधसा॥ इत्यतो रासलीलायां पुलिने तत्र यामुने। प्रमदाशतकोट्योऽपि ममुर्यत्ते किमद्भुतम्॥" इति भागवतामृतादौ स्फुटम्॥ तस्या नद्यास्तरलैस्तरंगैरानंदीति शैत्यमांद्याभ्यामानंददायकश्च रात्रावपि प्रफुल्लानां कमलानामामोदो यतः स च तेन वायुना रेमे। 'जुष्टम्' इति पाठे रमयांचकारेत्युत्तरेणाऽन्वयः। कुमुदामोदेति तरलानन्देति च क्वचित्॥ ४५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततः श्रीयमुनापुलिने ताः प्रापय्य वैदग्धीविशेषेण रमयामः सत्याह। नद्य इति युग्मकेन। हिमवालुका कर्पूरः तद्वद्वालुका यत्र तत् शकपार्थिवादि। एवं पूर्वत्र वनमपि वृन्दावनमेव। तस्या नद्यास्तरलैस्तरङ्गैरानन्दी सुखविहारी चासौ कमलामोदयुक्तवायुश्च तेन निशायामपि कमलविकाशः शरदि मल्लिकाविकाश इव तदीयतादृशलीलारसमयप्रभावेणानन्दीति जुष्टमिति च मान्द्यम्। सौरभ्यशैत्ये स्पष्टे। कुमुदेति आनन्देति च पाठः एकेषाम्। जुष्टमित्यत्र रेम इति क्वचित् अत एव पृथगङ्कः कृतः।४५।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततः श्रीयमुनापुलिने ता नीत्वा वैदग्धीविशेषप्रकटनेन रमयामासेत्याह—नद्या इति द्वाभ्याम्। नद्याः कालिन्द्याः, (भा० १०।३०।४५) 'पुनः पुलिनमागत्य कालिंद्याः' इति वक्ष्यमाणत्वात्, तस्या वनस्य च नामाग्रहणं तत्र तयोः प्रसिद्धत्वेन तथोक्त्यापि सुज्ञेयत्वात्, यद्वा, निर्ज्जनत्वमात्रापेक्षया वनत्वेन तस्य प्रवाहवत्त्वेन च पुलिनोत्तमत्वमात्रापेक्षया नदीत्वेनैव तस्या उक्तिः। गोपीभिः सह आविश्य प्रीत्या प्रविश्येत्यर्थः। हिमाः शीतला बालुका यस्मिन् तत्, इति श्रमापनोदनत्वेन कोमलत्वेन च रतिशय्यायोग्यता तस्य दर्शिता, तस्या नद्यास्तरलैस्तरंगैरानन्दी सुखविहारी चासौ कमलामोदयुक्तवायुश्च तेन, यद्वा, तत्तरलैरानन्दी रात्रौ मुद्रितामामपि कमलानां कम्पनेन प्रकाशमानः सुखकारको वा आमोदो यस्मिन् वायौ तेन जुष्टं सेवितम, कुमुदेति पाठः केषाञ्चित् सम्मतः, तरंगेण सम्बन्धेन शैत्यमानन्दीत्यनेन जुष्टमित्यनेन वा मान्द्यं सौरभ्यञ्च व्यक्तमेवेति गुणत्रयमुक्तम्, इति सर्र्वथा पुलिनस्य रतिभूयोग्यत्वं तेन कामोद्दीपनत्वं चोक्तम्॥ ४५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

नद्याः कालिन्द्याः॥ ४५॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हिममय्यो वालुकाः सिकता यस्मिंस्तन्नद्या यमुनायाः पुलिनं कथम्भूतं तस्या यमुनायास्तरलानां तरङ्गाणां सम्बन्धिनां कुमुदानामामोदो यस्य तेन वायुना जुष्टमासाद्याधिष्ठाय रमयाम्बभूवेत्युत्तरेणान्वयः॥ ४५॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हिमवालुकं शीतलसैकतं तस्या नद्याः तरलैः मदकल्लोलैः आनन्दयितम्। शीलमस्यास्तीति तरलानन्दी कुमुदानामामोदस्य वायुस्तत्तरलानन्दी कुमुदामोदवायुः तेन यद्वा तया नद्या तरलानि नृत्यन्तीव स्थितानि च तान्यानन्दीनि उत्फुल्लानि कुमुदानि तत्तरलानन्दिकुमुदानि तेषामामोदेन सौरभेण सम्पृक्तने वायुना॥ ४५॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

किं कृत्वा वनं मण्डयन् व्यचरत्? तत्राह—नद्याः पुलिनमागत्य। काभिः सह? गोपीभिः। किम्भूतम्? हिमवालुकेव वालुका यत्र मध्यमलोपी। हिमवालुका कर्पूरं तत्प्रसिद्धम्, तरलानि आनन्दीनि यानि कुमुदानि, तेषामामोदा यत्र, तथाभूतेन वायुना जुष्टं सेवितमपीति, अपि शब्दोऽध्याहार्यः। अयमाशयः—प्रथमं तावदाभिः सुरतलीलैव, पश्चादेव रासलास्यम्, पश्चाज्जलक्रीडेति, व्यञ्जवतीयं लीलातिरहस्या। सा तु पुलिने न सम्भवत्यनावृतत्वात्, विमानचारि-दृश्यत्वाच्चेति कृत्वा रासलास्यलीलैवात्र कार्येति पुलिनं दृष्ट्वैव पुनर्वनमगादिति। आगत्येति पूर्वकालार्थः॥ ४५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्यानद्यास्तरलैस्तरङ्गै रानन्दी शैत्यमान्द्याभ्यामानन्ददायकश्च रात्रावपि प्रफुल्लानां कमलानामामोदो यतः स च तेन वायुना रेमे जुष्टमिति पाठे रमयाञ्चकारेत्युत्तरेणान्वयः कुमुदामोदेति तरलानन्देति च क्वचित्पाठः।। ४५ ।।

श्रीरसिकाह्लादिनी टीका

एवं कुंजेषु प्रविश्य माल्यैरेवालंकृतिं विधाय यमुना-पुलिने विहर्त्तुं यत् कृतवांस्तदाहः नद्या इति वनमध्ये वनितायूथानामनन्तत्वात्संकोचेन विहृतं पुनः कालिन्द्याः पुलिनं विस्तीर्णमालक्ष्य तत्रासंकोचेन रन्तुं गोपीभिः सह नद्याः कालिंद्याः पुलिनमाविश्य रेमे, कीदृशं हिमवालुकं हिमजलसम्बन्धात् शीतलवालुका यस्मिन् तत् कोमलतया स्पर्शमात्रेण सुखहेतुत्वं सूचितमिति भावः। पुनः कीदृक् तस्याः कालिंद्यास्तरलैस्तरंगैरानन्दो यस्मिन् चलत् तरंगानां भावोद्बोधनहेतुत्वं सूचितमिति भावः। पुनः कीदृक् कुमुदामोदवायुनोपलक्षितायां रात्रौ विकसितानां कुमुदानामामोदः सौरभ्यं यत्र तेन वायुनेति अनेन वायोस्त्रैविध्यमुक्त श्रमापनोदं चोक्तम्। जुष्टमिति पाठे रमयांचकारेति अग्रिमश्लोकेनान्वयः। नदीतरलसम्बन्धेन वायौ शैत्यमुक्तं वननैकट्यात् मान्द्यं कुमुदसम्बन्धात्सौगंध्यं चोक्तमिति वनादपि पुलिनस्य विलासाधिकरणत्वं भावोद्दीपकत्वं च सूचितमिति भावः।। ४५ ।।

विशुद्धरसदीपिका

ततश्चङ्क्रमणेनातिरमणीयं रमणयोग्यं देशविशेषं गतस्य श्रीभगवतो रमणमाह द्वाभ्याम्। नद्या इति। न नदासु नदीषु श्रूयादिति निषेधात्तथोक्तिर्नद अव्यक्तायां वाचीत्यनुशानाद्योगवृत्त्या नादवतीत्वबोधनाय तथात्वञ्च कादम्वादिकूजितैरित्यूह्यं यथा—

चञ्चत्खञ्जनलोचनाम्वुजमुखी लोलालिमालाकिणा। खेलत्कोककुलालिभ्रंशितत या रक्तोत्पलोष्ठाधरा ।।
कूजत्सारसपालिरम्यरसनानीलोत्पलोत्तंसिका। कालिन्दीकलहंसकीरविरवैर्नाथौ सिषेवे निजौ ।।

पुलिने प्रसिद्धे आविश्य प्रविश्येत्यर्थः। अत्र प्रविश्येति वक्तव्ये आविशेत्युक्तिस्तत्रत्यनित्यप्रकाशेनाभेदं प्राप्येति विवक्षया पुलिनं विशिनष्टि। हिमवालुकमिति। हिमं वालुकं यत्र तत् कर्पूरो हिमवालुकेत्यमरः ततश्च हिमवालुकैव वालुका यत्रेति तद्रमणसम्पत्तिः सूचिता तथा तदित्यादित्तस्या नद्यास्तरलानालम्वते आश्रयति यः कुमुदामोदवान् वायुस्तेन उपलक्षितं पुलिनमिति वा तत्तरलानन्दीत्यपि पाठः ततश्च तत्तलैरानन्दीति विकसितानि यानि कुमुदानीत्यादि तत्र तत्तरलेतिशैत्त्यम् अनन्दीति मान्द्यमामोदेति सौगन्ध्यमिति त्रैविध्यं दर्शित तदेतद्वर्णितं श्रीगोविन्दलीलामृते—

ऋतुराजादिसर्वर्तुगुणसेवितकाननम्। वृन्दसंमृष्टगन्धाम्भः संसिक्ताध्वाङ्गनालयम् ।।
तथारतोणकोल्लोचपताकालम्वगुच्छकैः। पुष्पैश्चित्रितकुञ्जाध्वदोलाचत्वरमण्डपम् ।।
नवकमलदलालीपल्लवावृन्तनाना। कुसुमरचितशय्योच्छीर्षचन्द्रोपधानैः ।।
समधुचषकताम्बूलाम्वुपत्रादियुक्तैः। मुललिततललीलागारकुञ्जप्रपञ्चम् ।।
कल्हाररक्तोत्पलपुण्डरीकपङ्केरुहेन्दीवरकैरवाणाम्। क्षरन्मदारैश्च पतत्परागैः सुवासिताम्भः प्रसरं समन्तात्।
हंससारसदात्यूहमद्गुकोकादिपत्रिणाम् ।।
वरटालक्ष्मणादीनां कलालापैः श्रुतिप्रियम्। शारीशुकानामन्योऽन्यपृथगासङ्गरङ्गिणाम् ।।
राधाकृष्णरसोच्छ्वासिकाव्यालापमनोरमम्। जलदभ्रान्तिकृत्कृष्णकान्तिजप्रणयोन्मदैः ।।
नदन् नृत्यच्छिखिव्रातैर्व्याप्तारामतटाजिरम्। हारीतपारावतचातकादिप्रहृष्टनानाविधचित्रपक्षिणाम् ।।
प्रियेक्षणानन्दविफुल्लवर्ष्मणां कर्णामृतध्वानमनोज्ञकाननम्। राकेशावुर्दनिर्मन्थराधिकास्येन्दुपायिभिः ।।
चकोरैर्व्यक्ततत्यक्तचन्द्रैर्वृतनभस्तलम्।
कुसुमितवहुवल्लीमण्डलैर्भीतिकल्पैरुपरि च पटलाभैः श्लिष्टशाखासमूहैः।
निविडदलफलानां छादिताः पादपानाम् मणिमयगृहतुल्या यत्र कुञ्जा विभान्ति ।।
श्रीत्मकेलिस्थलाख्यं तटमिदममलं प्रेष्ठसंयोगपीठम्। वृन्दारण्योत्तमाङ्गं क्रमनतमभितः कूर्म्मपृष्ठस्थलाभम् ।।
कुञ्जश्रेणीदलाढ्यं मणिमयगृहसत्कर्णिकं स्वर्णरम्भाश्रेणीकिंजल्कमेषादशशतराजीवतुल्यं ददर्शति ।।

तत्र रेमे इत्यात्मनेपदप्रयोगादात्मना रमया रमे इति ब्रह्मसंहितोक्तनित्यरमणं सूचितं त्यक्तकालसिसृक्षयेति तत्रैव वाक्यशेषात् रहस्यातिरहस्यत्वात् प्रावश्येति नोक्तं ज्ञानखलतापरिहाराय सूचनं त्वावश्यकतमस्तदनुसारेणैव व्याख्यातम्।। ४५ ।।

श्रीरामनारायणकृता भावभावविभाविका

संक्षेपेण वनविहारं सूचयित्वा रतिविहाराय मुख्यविहारस्थलपुलिनागमनमाह। नद्या इति। गोपीभिः सह नद्याः पुलिनमाविश्य रमयाञ्चकारेत्युत्तरेणान्वयः तत्र यत्कैश्चिद्व्याख्यातं नद्याः पुलिनं प्रविश्य इति वक्तव्येऽपि तदनुक्त्वा आविश्येति कथनेन पुलिनमागत्य नित्यविहारस्थलपुलिनगतनित्यविग्रहे आवेशो विवक्षित इति तत्तु—

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥
मया ततमिदं सर्वं जगदव्यक्तमूर्तिना। विष्टभ्याहामिदं कृत्स्नमेकांशेन स्थितो जगत् ॥

इत्यादि वचनैरपरिच्छिन्नभगवद्विग्रहस्य परिच्छिन्नत्वविभागादनुपपन्नमपि प्रकाशभेदकल्पनया उपपन्नमेव नद्याः पुलिनमित्यनेन सर्वतीर्थात्मकगङ्गोद्भवचरणभगवत्सेव्यत्वेन समस्तभोगापवर्गवरदेश्वरहरितत्सखीजनकामप्रदत्वेन परतीर्थत्वं सूचितं पुलिनं विशिनष्टि। हिमवालुकम् अत्रायं भावः रवितनयया कालिन्द्या हरिपतिलाभस्य हरिहरिजनसेवनाधीनत्वमवधार्य्य हरिपदसेवनपथे मात्सर्य्याद्यभावं निश्चित्येर्षाद्यपहाय कलिन्दगिरिविविधमणिगणचूर्णं तूर्णं निजकरतरङ्गैरानीय कृष्णसुरसात्मकामलसलिलेन तच्छीतलत्वं सम्पाद्य तत्तल्पास्तरणेन तल्पसेवा कृता पुनः किम्भूतं तत् तत् तरलानन्दिकुमुदामोदवायुना जुष्टं तत्र तत्तरलानन्दिशब्देन वायोः शीतलत्वं कुमुदामोदशब्देन सुरभित्वं मुखत एवाभिदधता मन्दत्वमप्युपलक्ष्यते त्रिगुणसमीरेण जुष्टं सेवितामित्यर्थः। अत्राप्ययं ध्वनिः रवितनयया हृद्हृदये कृष्णागमनोत्साहेन तन्मुखस्मितचन्द्रिकासंनिधानेन बहुकुमुदाकारेणातिप्रेम्णा विकसितेऽपि स्वतरङ्गरूपभुजचालनेनानङ्गपरवशतयालिङ्गनमिच्छन्त्या नङ्गतया गन्तुमशक्ततया स्वसूक्ष्मरूपेण शैत्येन स्वहृदयकुमुदसूक्ष्मरूपेणामोदेन च पवनमधिरुह्यागत्य पुलिनं सेवितं वायुना च रवितनयातनु विकलतां कलयित्वा तत्प्राणत्राणाय स्वात्मनो जगत्प्राणत्वं निर्वाहयितुं कृष्णसेवया स्वभाग्यं सम्पादयितुं च तद्वाहनत्वं स्वीकृतमिति ॥ ४५ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ततश्च नद्याः श्रीयमुनायाः पुलिनमाविश्योपविश्य तस्योपवेशनयोग्यतामाह। हिमवालुकं हिमवालुकः कर्पूरस्तद्वद्वालुका यत्र शाकपार्थिवादिवत्समासः तस्याः नद्यास्तरलैस्तरङ्गैरानन्दयुक्तस्तत्करः स चासौ कुमुदामोदवांश्च वायुस्तेनोपलक्षितं युक्तमानन्दीति मान्द्यं शैत्यसौरभ्ये स्पष्टे यद्वा यथोक्तवायुना हेतुना हिमवालुकं यद्वा तत्तरलानन्दीति पृथक् पदं पुलिनविशेषणं तत्रोपविश्य गोपीभिः सह रेमे जुष्टमिति पाठे रमयाञ्चकारेति परेणान्वयः। निवृत्तिपक्षे नद्याः बुद्धिलक्षणायाः पुलिनं सात्त्विकं प्रत्ययमाविश्य प्रविश्य तत्तदारुह्येति यावत् ना पुरुषः परमात्मा गोपीभिः श्रुतिभिः सह रेमे तदुक्तं भगवता तेषा मेवानुकम्पर्थमहमज्ञानजन्तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति तत्तद्विषयाभिकाङ्क्षालक्षणतो—यस्य निवृत्तत्वाद्धिमवालुकस्थानीयं शान्तमत एव तस्या नद्याः तरला स्सृष्ट्यादिलक्षणास्तरङ्गा तत्तरलास्तैः शान्ततरलैरानन्दि अनन्दातिभावसाधनं यतः कुमुदामोदवायुः कुं पृथिवीं भारावतारणादिना मोदयतीति कुमुदः परमात्मा कुमुदपुष्पस्थानीयः तत्सम्बन्धिहर्षो गन्धस्थानीयः तद्युक्तः वायुस्थानीयः निरुद्धः प्राणवायुः ॥ ४५ ॥

रास–रहस्यम्

र० टी०—नद्याः बुद्धिलक्षणायाः पुलिनं सात्त्विकप्रत्ययं आवेश्य अवलम्ब्य गोपीभिः आत्माभिमुखीवृत्तिभिः हिमवालुकस्थानीयं प्रशान्तहृदयं कुमुदामोदवायुना कुः पृथिवी तत्स्थानीयं सर्वोपाधिविनिर्मुक्तमन्तःकरणं मोदयतीति कुमुदः तमप्यामोदयतीति कुमुदामोदः, कथम्भूतेन वायुना अनुकूलप्राणवृत्तिभिः तत् तत्पदलक्ष्य तरलानन्द "शुद्धोऽहं बुद्धोऽहं निरञ्जनोऽहं, संसारमायापरिवर्जितचिन्मयोऽहम्।" इत्यादिरूपेणानन्दसागरे निमज्जितः सन् रेमे आत्मारामो बभूव ॥ ४५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्या नद्याः तरलानन्दानां कुमुदानामामोदो यस्य तेन वायुना जुष्टमिति शेषः नद्याः पुलिनमाविश्य गोपीभी रेमे॥४५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हिमवालुकं शीतलसिकतामयं नद्या यमुनायाः पुलिनं द्वीपं तया नद्या प्रवहन्त्या तरलान्यानन्दीनि परानानन्दयितुं शीलमेषामिति तानि कुमुदानि कैरवाणि तेपामामोदः सौरभं यस्य तेन वायुना जुष्टं सेवितम्। सिते कुमुदकैरवे इत्यमरः ॥ ४५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमुद्बुद्धे कामे ताभिः सह बन्धादिभिः रेम इत्याह। नद्या इति। नद्याः पुलिनमच्छकोमलमाविश्य आसमन्तात्प्रविश्य रमणे बन्धादिभिरतिकोमलं कृत्वा गोपीभिरनेकविधाभी रेमे हिमाः शीतलाः वालुकाः यत्रेति अन्तरूष्मानिवारितः बहिः शैत्यं चाह। तत्तरलानन्देति। तस्या नद्यास्तरलास्तरङ्गाः तैः कृत्वा आनन्दयुक्तं पुलिनमेव आनन्दयुक्तो वायुवा कुमुदानां चानन्दयुक्तः सुगन्धः तस्यानन्दजनकत्वेनैव मान्द्यं निरूपितं शैत्यं च कुमुदानां जलसंबन्धात् तादृशवायुना सहितं पुलिनं महाबन्धेषु वायोरत्यपेक्षा ॥ ४५ ॥

श्रीसुबोधिनी–सारः

तस्या यमुनायास्तरलास्तरंगास्तेषामानंदेन युक्तानि कुमुदानि तेषां प्रमोदेन युक्तो वायुस्तेन शीतलवालुकं नद्याः पुलिन तटमुपविश्य गोपीभिः सह रेमे ॥ ४५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनो

तस्या यमुनायास्तरलैरानन्दः शैत्येनानन्ददायकश्चासौ कुमुदानामामोदो यस्मिन् स च तेन वायुना हिमाः शैत्ययुक्ता वालुका यस्मिन् तथाभूतं नद्यास्तस्याः पुलिनमाविश्य गोपीभिः सह रेमे इत्यन्वयः ॥ ४५ ॥

अन्वितार्थप्रकाशिका

नद्या इति ॥ तस्या यमुनायास्तरलैस्तरङ्गैरानन्दः शैत्येनानन्ददायकश्चासौ कुमुदानामामोदो यस्मिन्स च तेन वायुना हिमाः शैत्ययुक्ताः वालुका यस्मिन् तथाभूतं नद्यास्तस्याः पुलिनमाविश्य गोपिभिः सह रेमे। उत्तरलानन्दीति वा पाठः। यद्वा। हिमवालुका कर्पूरः स इव वालुका यत्र तत्तरलानन्दिकुमुदामोदवायुना उपलक्षितं नद्याः पुलिनमाविश्य रेमे। रेमे इत्यत्र जुष्टमिति पाठे अग्रेतनेन सह युग्मकम् ॥ ४५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हिमवालुकं हिमस्य कर्पूरस्य वालुका इव वालुका यस्मिंस्तत् तस्या यमुनायास्तरलैस्तरंगैरानंदयती तथा भूतश्चासौ कुमुदामोदयुक्त वायुश्च तेन सेवितं ॥ ४५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नद्या इति ॥ हिममय्यो वालुकाः सिकता यस्मिंस्तत्, तस्या यमुनायास्तरलास्तरङ्गास्तैरानन्दीनि यानि कुमुदानि तेषामामोदः सुगन्धो यस्य स चासौ वायुश्च तेन, जुष्टं, नद्या यमुनायाः, पुलिनं सैकतं, गोपीभिः सह, आविश्य आसाद्याधिष्ठाय, रमयांचकारत्युत्तरेणान्वयः ॥ ४५ ॥

कृष्णप्रिया

इसके बाद भगवान् श्रीकृष्ण ने गोपियों के साथ यमुनाजी के पावन पुलिन पर, जो कपूर के समान चमकीली बालू से जगमगा रहा था, पदार्पण किया। वह यमुनाजी की तरल तरङ्गों के स्पर्श से शीतल और कुमुदिनी की सहज सुगन्ध से सुवासित वायु के द्वारा सेवित हो रहा था। उस आनन्दप्रद पुलिन पर भगवान् ने गोपियों के साथ क्रीडा की ॥ ४५ ॥

बाहुप्रसारपरिरम्भकरालकोरु[1]नीविस्तनालभननर्मनखाग्रपातैः[2]।
[3]क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणामुत्तम्भयन् रतिपतिं रमयाञ्चकार ॥ ४६ ॥

कर्दमक्षमा

अन्वयः—बाहु, प्रसार, परिरम्भ, कर, अलक, उरु, नीवी, स्तनालभन, नर्म, नखाग्रपातैः, क्ष्वेल्या, अवलोकहसितैः, व्रजसुन्दरीणाम्, रतिपतिम्, उत्तम्भयन्, रमयाञ्चकार ॥ ४६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

बाहुप्रसारश्च परिरम्भश्च कराभ्यामलकादीनामालभनं स्पर्शश्च नर्म परिहासश्च नखाग्रपातश्च तैः क्ष्वेल्या क्रीडया अवलोकैश्च हासैश्च कामं तासामुद्दीपयंस्ता रमयामास ॥ ४६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परिरंभः आलिंगनम्। करादीनां स्पर्शः कामशास्त्रविहितमोचनलक्षणो ज्ञेयः। यद्वा—क्ष्वेल्यावलोकहसितैः बालसिंहनादनिरीक्षणमंदहासैः। तदुक्तं माघे—"बाहुपीडनकुचग्रहणाद्यैराहितेन नखदन्तनिखातैः। बाधितस्तनुशयस्तरुणीनामुन्मिमीलशनकैरपि मारः ॥" इति ॥ बाहुप्रसरस्तासां स्वस्य वक्षसि स्वस्तिकीभूतानां भुजानां प्रसारणम्। स च परिरंभश्च करादीनामालभनं स्पर्शश्च नर्मपरिहासश्च नखाग्रपातश्च तैः क्ष्वेलया क्रीडोक्याऽवलोकैश्च हसितैश्च रतिपतिं कामं तासां स्वस्य चोत्तंभयन्नुद्दीपयन्। तावद्भिरेव स्वप्रकाशैः प्रत्येकं रमयांचकार। ननु च तावत्येव पुलिने बहुगोपीजनसंवट्टे निरावरणत्वात्सौरततल्पाद्यभावाच्च प्रत्येकं ताभिः शतकोटिप्रमदाभिः सह संप्रयोगलीला न संगच्छते, सत्यम्, भगवन्मूर्तेरिव श्रीवृंदावनभूमेरपि विभुत्वात्तिलमात्रप्रदेशस्याप्यतिस्फारत्वं, सावरणविविधकुंजवत्त्वं, गंधमाल्यतांबूलादिसहितविचित्रसौरतपुष्पतल्पवत्त्वं च दुर्घटघटनापटीयस्या योगमाययैव प्रकाशितं, लीलांते पुनरावृतं चेति सुसंगतिकमेवैतत् ॥ ४६ ॥

---

१. केली-विज. । २. कराग्र-विज. । ३. क्ष्वेला ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सहजलज्जादिनाच्छाद्यमानमपि रतेः कान्तोचितप्रीतिलक्षणायाः पतिं तदुचितमहाभावाह्वयं परमप्रेमाणं वा बाहुप्रसारादिभिरुत्तम्भयन् इति तस्य रत्यासक्तिर्वैदग्धी च परमा दर्शिता । तत्र बाहुप्रसारः परिरम्भारम्भः यद्वा । बाहुप्रसारेण परिरम्भः गाढालिङ्गनमित्यर्थः । क्ष्वेलिः प्रस्तोभनादिरूपा व्रजसुन्दरीणामिति तद्योग्यं सौन्दर्यमत्र विवक्षितम् तेन च यत्राकृतिस्तत्र गुणावसन्तीति न्यायात्तादृशं वैदग्ध्यमप्युपलक्ष्यते रमणञ्च निजमोहनताशक्तिविशेषेणान्योऽन्यमलक्षितं ज्ञेयम् ॥ ४६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बाहुप्रसारादिभिरुत्तम्भयन्निति सहजलज्जादिना छाद्यमानमपि प्रकाशयन्, यद्वा, प्रेमविशेषविलासरूपत्वेन वर्त्तमानमेवाधुना विशेषतो वर्द्धयन्नित्यर्थः । अतएव श्लेषेणोक्तम्—रतेः प्रमैकलक्षणायाः पतिं पालकमिति तथा रतिपतिमिति दग्धांगस्यापि कामस्य रतिसुखार्थं पुनर्जननेनैव सामग्र्यमभिप्रेतमिति रतौ तस्यासक्तिर्व्वैदग्धी च परमा दर्शिता । तत्र बाहु-प्रसारो दूरस्थानामाकर्षणार्थम्, प्राक्परिरम्भानुकरणं वा; यद्वा, तासामेव बाहूनां प्रसारणम्; यद्वा, बाहुप्रसारेण परिरम्भो गाढ़ालिंगनमित्यर्थः । क्ष्वेलीः प्रस्तोभनादिरूपा अधरपानदंशनादिरूपा वा । व्रजसुन्दरीणामिति तासामपि तादृशमेव वैदग्ध्यं सूचितम्, अन्यथा तस्य तादृशीवैदग्धीप्रकाशनासम्पत्तिः, रमणे च निजशक्तिविशेषेणान्योऽन्यमलक्षितं युगपदेव ज्ञेयम् ॥ ४६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

रतिपतिं कामम् उत्तम्भयन् ॥ ४६–४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किं कुर्वन् बाहुप्रसारः स्कन्धस्योपरि बाहुप्रसारणं परिरम्भ आलिङ्गनं करेणालकादीनामालभनं स्पर्शश्च नर्म परिहासश्च नखाग्रपाताश्च नखाग्रक्षताश्च तैः क्ष्वेल्या क्रीडया चावलोकनैश्च मन्मथं तासामुद्दीपयन् ॥ ४६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

परिरम्भ आलिङ्गनं तदेव करालकेली तीव्रकाण्डं तस्यां नीवीवस्त्रग्रन्थिस्तस्यां स्तनेषु आलभनेन मोचनस्पर्शलक्षणेननर्म्मणा हास्योक्त्या च कराग्राणां नखानां पातैः उल्लेखलक्षणैश्च क्ष्वेल्यावलोकहसितैः बालसिंहनादनिरीक्षणमन्दहासैश्च रतिपतिं काममुत्तम्भयन् उज्जृम्भयन् उल्लोलयन्नित्यर्थः । रमयाञ्चकार रेमे बाहुपीडनकुचग्रहणाद्यैराहितेन नखदन्तनिखातैः बोधितस्तनुशयस्तरुणीनामुन्मिमीलयन् शनकैरपि मार इति माघः ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ प्रथमलीलामाह,—बाहुप्रसारेत्यादि । बाह्वोः प्रसारेण यः परिरम्भस्तेन करयोरलकानाञ्चोर्वश्च नीव्याः स्तनयोश्चालभनेन स्पर्शनेन नर्मणा च नखाग्रपातैश्च क्ष्वेल्या क्रीडयावलोकनेन हसितेन च व्रजसुन्दरीणां रतिपतिमुत्तम्भयन् वर्द्धयन् रमयाञ्चकार । वस्तुतस्तु तासा प्रेमैव साहजिकः, न तु कामः । तदभावे सा लीला सुरसा न भवतीति स्वयमेव तासामसन्तमपि कामं वर्द्धयामासेत्यर्थः । स च कामः प्राकृतो न भवति, अपितु स एव भगवान् येनांशेन कामावतारो भवति, स एवांशस्तासां मनस्यावेशितः । किं वा रतिः स्थायीभावः, तस्याः पतिं शृङ्गाररसम् । अथवा सेवासमयोऽयं ममेति उपपन्नं कामदेवम्, उत् उत्कर्षेण स्तम्भयन् केवलं धात्वर्थ एव निरस्यन्नित्यर्थः । त्वया सहायेन मा भूयतां स्वत एव सुरसेयं लीलेति किं त्वयेति तज्जयो बोद्धव्यः ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बाहुप्रसारस्तासां स्वस्ववक्षसि स्वस्तिकीभूतानां भुजानां प्रसारणं च परिरम्भश्च करादीनामालभनं स्पर्शश्च नर्म परिहासश्च नखाग्रपातश्च तैः क्ष्वेल्या क्रीडोक्त्या अवलोकैश्च हसितैश्च रतिपति प्रेमात्मकं कामं तासां स्वस्य च उत्तम्भयन् उद्दीपयन् तावद्भिरेव स्वप्रकाशैः प्रत्येकं रमयाञ्चकार ननु च तावत्येव पुलिने बहुगोपीजनसङ्घट्टे निरावरणत्वात् सौरततल्पाद्यभावाच्च प्रत्येकं ताभिः शतकोटिप्रमदाभिःसह संप्रयोगलीला न सङ्गच्छते सत्यं भगवमूर्त्तेरिव वृन्दावनभूमेरपि विभुत्वात् तिलमात्रप्रदेशस्याप्यतिरस्कारत्वं सावरणविविधकुञ्जवत्त्वं गन्धमाल्यताम्बूलादिसहितविचित्रसौरतपुष्पतल्पवत्त्वं च दुर्घटघटनापटीयस्या योगमाययैव प्रकाशितं लीलान्ते चेति सुसङ्गतिकमेवैतत् ॥ ४६ ॥

श्रीरसिकाल्हादिनी टीका

एवं पुलिनदर्शनेन भावोद्बोधने जाते ताभिः सह कृतां विलासपरिपाटीं वक्तुमाह बाहुप्रसारेति, बाहुप्रसारः पश्चात्परिरम्भ आलिङ्गनं तदनु श्रीकृष्णेन कराभ्यामलकोरुनीविस्तनालभनं नर्म नखाग्रपातैः अलकोरुनीवीस्तनानां कामवसतिस्थितानां आलम्भनं

स्पर्शस्तेन नर्म च नखाग्रपातैश्च एतैः, तदुक्तं रसार्णवे "परिहासप्रधानं यत्-वचनं नर्म तद्विदुरिति" क्ष्वेल्या प्रस्तोभनादिरूपया क्रीडया अधरपानदंशादिरूपया वा अवलोके यानि हसितानि तैः, यद्वा अवलोकैर्हसितैश्च रतिपतिमुत्तम्भयन् अयमर्थः प्राकृतकामस्यैयं प्रक्रिया धातुपातादूर्ध्वं न वर्द्धते, अयं त्वलौकिकः कामः धातुपातमन्तरेणापि उत्तरोत्तरं वृद्धिं प्राप्नुवत् न विश्रांतो भवतीति भावः ॥ ४६ ॥

विशुद्धरसदीपिका

एवं श्लिष्टैः पदैः पिशुनयेच्च रहस्यवस्त्विति कविसमयानुसारेण नित्यविहारं सूचयित्वा वैदग्ध्येन साधकानुग्रहमपि सूचयन् यन् यथोचितं ता अपि रमयामासेत्याह । बाह्विति । बाह्वोः प्रसारेण यः परिरम्भस्तेन गाढालिङ्गनेनेत्यर्थः । करयोरूर्वोर्नीव्याः स्तनयोरालभनेन स्पर्शेन नर्मणा केवलेन नखाग्राणां पातेन च क्ष्वेल्या प्रस्तोभनादिरूपया क्रीडया अवलोकितेन हसितेन चेति वचनविपरिणामेन व्याख्येयं तत्र परिरम्भः कराद्यालम्भनं च प्रौढानां नखाग्रक्षतं च कान्तभाववतीनां नर्मप्रस्तोभने च पतिभाववतीनां धन्यादीनाम् अवलोकितहसितानि च सहचरीगणस्येति विवेचनीन व्रजसुन्दरीणामित्यनेन बहुनायकता व्रजलीलायामेवेति सूचितं यथा श्रीमत्सुधानिधौ—

अकस्मात्कस्याश्चिन्नववसनमाकर्षति परा मुरल्या धम्मिल्ले स्पृशति कुरुतेऽन्या करधृतिम् ॥
पतन्नित्यं राधापदकमलमूले व्रजपुरे तदित्थं वीथीषु भ्रमति स महालम्पटमणिः ॥

अपि च—

एकस्या रतिचोर एव चकितं चान्यास्तनान्ते करं कुर्व्योत्कर्षति वेणुनान्यसुदृशो धम्मिल्लमल्लीस्रजम् ॥
धत्तेऽन्या भुजवल्लिमुत्पुलकितां सङ्केतयत्यन्यया राधायाः पदयोर्लुठत्यलममुं जाने महालम्पटम् ॥

तदेवमत्र तदाचरणं श्रीराधायामेकतानताप्रदर्शनेनोत्कर्षलाभायेति दर्शितं किं कुर्वन् रतिपतिम् काममुद्दीपयन्नित्यर्थः । कान्तभाववतीपक्षे पक्षान्तरे रतेश्चेतोरञ्जकतयाऽशुद्धप्रीतेः पतिं परमप्रेमाणमित्यर्थः । तदुक्तमलङ्कारकौस्तुभे चित्तद्रवस्थायीभावः प्रेमाख्यः प्रथमो रस इति चित्तद्रवस्थायिभाव इत्यर्थः । उत्तम्भयन् वर्द्धयन्नित्यर्थः । अथवा शुद्धप्रेमविलासे श्रीमति महारासे सर्वासामैकमत्याय कामं उत् उच्चैरतिशयेन स्तम्भयन् निरस्यन्नित्यर्थः । नायिकानायकविलाससाधारण्येन प्रवृत्तमपि कामं निरस्यन् पारिशेष्यात्प्रेम्णैव रमयांचकारेत्यन्वयः । रमणमिदं परस्परमलक्षितमेव ज्ञेयम् ॥ ४६ ॥

श्रीरामनारायणकृता भावभावविभाविका

विहारमेवाह । बाहुप्रसारेति । बाहुप्रसारादिभिर्निमित्तभूतैः व्रजसुन्दरीणां रतिपतिमुत्तम्भयन् उद्दीपयन् रमयाञ्चकारेत्यन्वयः । तत्र व्रजसुन्दरीणामेव रतिपतिमुत्तम्भयन्नित्युक्त्या भगवतो रतिरणसंमर्देऽपि तदनाक्रान्तत्वं दर्शितं तत्र बाहुप्रसारस्तु तत्परिरम्भतत्तदङ्गस्पर्शेन च तासां स्वीकरणाय कुसुमशरासनत्रस्ताङ्गुलिपञ्चसु मनः शरयुतभुजधनुर्द्वयप्रदर्शनाय वा कामद्वन्द्वसङ्ग्रामे बहुयुद्धप्रागल्भ्यसूचनाय वा तासां गौरीणामुरसि कुचशम्भुदर्शनेन तद्भूषणपञ्चफणमणिधरश्यामपीवरस्निग्धभुजभुगोत्साहाद्वा करालभनं पाणिस्पर्शनं तच्च लताकुञ्जवेदिमण्डपे पाणिग्रहणविधिप्रदर्शनाय स्तनालभनं तु पाणिग्रहणकर्मणि नखाग्रपातरोचनलिपिसंस्कृतमङ्गलकनककुम्भकुचयोः नखमणिदीपान्वितकरकमलधारणेन मङ्गलकलशोद्भवनाय नर्मादीनां च तत्रोचितमन्त्रभाषणादावुपयोगः सस्नेहालकस्पर्शस्तु अलकेषु तत्रोचितस्नेहार्पणरीतिसूचनाय परिरम्भोरुनीवीस्पर्शरमणादिना तदनन्तरशोभाग्यरात्र्युचितचेष्टासूचनं यद्वा स्मरसमरे मल्लयुद्धे प्रथमं करग्रहणवत्करालभनम् इषुवृष्टिवद्भ्रूयुगधनुःस्फूर्जनेनापाङ्गाक्षयबाणवर्षोऽवलोकः अलकस्पर्शश्च तन्नागपाशस्य स्वहस्तगतकरण परिरम्भो बाहुयुद्धम् ऊरुनीवीस्तनालभनं च तद्दुर्गप्राकारप्रावरणोपवनोच्चशृङ्गाणां वशीकारः नर्मोक्तिः सिंहवादः नखाग्रपातः तदीयदुर्गचैत्यप्रासादादौ स्वीयः कनकपत्रे मणिलिखितो रोचनलिपिजयलेखः हसितं संग्रामोत्साहकसुरकृता पुष्पवृष्टिः नूपुरादिभूषणरवः शूरोत्साहकजयवाद्यध्वनिः यद्वा कृष्णस्य भगवतो गोपी परिरभ्य बाहुप्रसारेण कण्ठकरकुण्डलितालकोरुस्पर्शो विष्णोः पद्मामालिङ्ग्य शङ्खपद्मचक्रगदाकरत्वद्योतकः स्तनालभनेन कञ्चुकबन्धवारणं तु हरेर्हरसेवकबन्धासहिष्णुतासूचकं नीवीस्पर्शनं तु काञ्चीसेवनपराया नीव्या मुक्तिप्रदानाय एवमुत्प्रेक्ष्य यथायथमूह्या एभिरुद्दीपनैरङ्गनाङ्गदुर्गेष्वनङ्गमुद्दीपयन् रमणेन स्ववशं चकारेत्यर्थः ॥ ४६ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवं सर्वप्रकारेण तासां जातपरस्परकेलित्वं सम्पाद्य सोपकरणरसविलासचित्रमाह । बाहुप्रसारेति । तत्राष्टविधालिङ्गनमादौ दर्शयति । दूरस्थितानामवयवविशेषेणस्प्रष्टुं प्रसारस्ततो बलादपि परिरम्भ आश्लेषः ततः करादीनामालभनान्यालिङ्गनानि तत्र करालभनं हस्तेन हस्तग्रहणम् एवं कचग्रहणार्थमलकानां स्पर्शः बाहुनान्यार्थमूरुस्पर्शः पुष्टे रसे नीवीमोचनाय तत्स्पर्शः रसोद्गमनार्थस्तने नखाग्रपाता तत्क्षतताडनादयः कामोद्दीपकनखक्षतादिभिस्तत्तत्स्थाने स्थितस्य कामस्योद्बोधाभिधानात् क्ष्वेल्या प्रस्तोभनादि

तत्पूर्वकान्येवावलोकनानि हसितानि च तैः रसस्थापकैः व्रजसुन्दरीणां रतिपतिं काममुद्दीपयन् रमयाञ्चकार ताः रमयामास संयुक्तः कामो रतिपतिः वियुक्तस्त्वग्निरूपस्तत्रापि तासां सुखमेव प्रकटितवान् नतु कामान्तेन विरतिमुत्पादितवानिति भावः। निवृत्तिपक्षे अविवेकावस्थायां बाहुप्रसारादिभिर्जातो यो रतिपतिः कामस्तमुत्तम्भयंस्तमनयन् व्रजसुन्दरीणामुपनिषदः कर्म्मणि षष्ठी रमयाञ्चकार अधिकारिचेतसि कामनिवृत्तिपूर्वकनिबोधितमखण्डैकरसानन्दस्वरूपमात्मानं प्रकटितवानिति भावः ॥ ४६ ॥

रास-रहस्यम्

र० टी०—व्रजसुन्दरीणां हृदयाधिष्ठितवृत्तीनां बाहुप्रसारैः इति सार्धत्रिहस्तपरिमितैः शरीरैः आनखाग्रशिखापर्यन्तैः परिरम्भैः गाढालिङ्गनैः तादात्म्यभावप्राप्तैः यथा कराः अलकाः उरवः नीव्यः एषां तत्तत्स्थानानामालभनेन स्पर्शनेन, तथा च नर्मनखाग्रपातैरिव ज्योतिरभागेन स्पर्शैः क्ष्वेल्या क्वचित् स्खलं क्वचित् मिलनरूपया क्रीडया, अवलोकहसितैः दर्शनेनोद्भासितैः रतिपतिं आत्मकामत्वमुत्तम्भयन् उद्दीपयन् रमयाञ्चकार रमणीयतां प्राप्तः ॥ ४६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रमणमेव वर्णयति। बाह्विति। बाहुप्रसारश्च परिरम्भश्च कराद्दीनामालम्भनं स्पर्शश्च नर्म परिहासश्च नखाग्रपातश्च तैः क्ष्वेल्या क्रीडया च अवलोकैश्च हसितैश्च व्रजसुन्दरीणां रतिपतिं काममुतम्भयन्नुद्दीपयन् ता रमयामास ॥ ४६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

बाहूनां प्रसारः प्रसर्पणं तज्जातो यो परिरम्भ आलिङ्गनं च तथा कराभ्यामलकाश्चोत्सङ्गाश्च नीव्यो वसनानि तद्ग्रन्थयश्च गतम्। स्तनाश्चेत्यादीनामालभनं मर्दनमोचनादिस्पर्शो यथायथं ग्राह्यः। तच्च नर्मपूर्वकं कराग्राणां नखराणामङ्गुलिप्रान्तानां वा पातश्च तैः। करालकेलीति पाठो न सरलः कर्णकठोरश्च। क्ष्वेला सिंहनादवन्नादोऽवलाका निरीक्षणं हसितानि हासाश्च तैर्व्रजसुन्दरीणां रतिपतिं मन्मथमुत्तम्भयंन्स्थिरीकुर्वन्पुनःपुनः सम्भोगाशां जनयन्निति यावत् रमयाञ्चकार रमयामास। रमयां चकारेति पदद्वन्द्वं तथाऽप्यनुप्रयोगो नियतः ॥ ४६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं सर्वभावेन तासां जातस्मरकेलित्वं संपादितमतः परम् अष्टविधालिङ्गनादिपूर्वकं चेष्टितकामादियुक्तं रसविलासचरित्रमाह बाहुप्रसारेति। दूरेस्थितानामवयवान् स्प्रष्टुं बाहुप्रसारण ततो बलादपि परिरम्भस्ततः करालकोरुनीवीस्तनानामालम्भनानि करालम्भनं हस्ते ग्रहणं पुरुषायितलीला समवन्धो वा एवं कचोन्नमनार्थमलकानां स्पर्शः उरुस्पर्शो बाहुबन्धार्थः नीवीस्पर्शः पुष्टे रसे मोचनार्थः स्तनयोस्तुरसोद्गमनार्थः एवं पञ्चस्पर्शा विहिताः नर्म परिहासवचनानि कामस्तम्भनार्थं ततो नखाग्रपाताः नखक्षतदन्तक्षतताडनादयः कामयुद्धनिरूपकाः तत्तत्स्थाने स्थितः कामः तैरुद्बोध्यते यथा सेनावधेन राजा समायाति क्ष्वेलिः श्वेलिक प्रस्तम्भनादिः तत्पूर्वकान्येवावलोककानि हसिदानि एवं द्वादशविधोऽपि कामः द्वादशाङ्गेषु स्थितः प्रवुद्धो भवति तदाह। व्रजसुन्दरीणामुत्तम्भयन्निति रतिसंयुक्तः कामो रतिपतिः वियुक्तस्त्वग्निरूपः एवमाधिदैविकं काममुद्बोधयन् रमथाञ्चकार गोपीनां सुखमेव प्रकटितवान् नतु कामान्ते विरतिमुत्पादितवान् ॥ ४६ ॥

श्रीसुबोधिनी-सार

तथा हि। बाह्वोः प्रसारः परिरंभ आश्लेषः करादीनामालंभनं स्पर्शश्च नर्म हासः नखाग्राणां पातो घातस्ते क्ष्वेल्या क्रीडयाऽवलोकैर्हसितैश्च व्रजस्त्रीणां रतिपतिं काममुद्दीपयन् रमयामास ॥ ४६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

रमणप्रकारमाह—बाहुप्रसारेति दूरेस्थितग्रहणार्थं बाहुप्रसारणं, परिरम्भः बलादाकृष्यालिङ्गनं, करादीनामालभनं स्पर्शश्च, नर्माणि परिहासवचनानि, नखाग्रपातश्च तैः दवेल्या क्रीडया अवलोकाश्च हसितानि च तैश्च व्रजसुन्दरीणां रतिपतिं काममुत्तम्भयन्नुद्दीपयन् रमयाञ्चकार ताः रमयामास ॥ ४६ ॥

अन्वितार्थप्रकाशिका

बाह्विति ॥ दूरे स्थितानां ग्रहणार्थं बाहुप्रसारणं परिरम्भः बलादाकृष्यालिङ्गनं कराः अलकाः ऊरवः नीव्यः स्तनाः एषामालभनं स्पर्शश्च नर्माणि परिहासवचनानि नखाग्रपातश्च तैः क्ष्वेल्या क्रीडया अवलोकाश्च हसितानि च तैश्च व्रजसुन्दरीणां रतिपतिं काममुत्तम्भयन्नुद्दीपयन् रमयांचकार ता रमयामास। अत्र भगवत्प्रभावादेव पुलिनभूमेरसङ्ख्यगोपीसुरतपर्याप्तत्वं सावरणविविधकुञ्जवत्त्वं गन्धताम्बूलादिसुरतसामग्रीवत्त्वं च सम्पन्नमिति बोध्यम् ॥ ४६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र रमणप्रकारं दर्शयन्नाह बाह्विति बाहुप्रसारः आलिंगनारंभश्च परिरंभः आलिंगनं चकारादीनां आलभनं स्पर्शनं च नर्माणि परिहासवाक्यानि च नखाग्रपाश्वतैः क्ष्वेल्या क्रीडया चावलोकनैर्हसितैश्च गोपीनां रतिपतिं मनोजं उत्तंभयन् उद्भावयन्तं ताः रमायांचकार नीवीशब्देन वस्त्रग्रथिः परिधानीय वस्त्रं वा ॥ ४६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यथा कुर्वन् रमयामास तदाह । बाह्विति । बाहुप्रसारः स्कन्धयोः बाहुप्रसारणं च परिरम्भ आलिङ्गनं च करेण अलकाः केशाश्च उरवः सक्थीनि च नीव्यः परिहितवस्त्रग्रन्थयश्च स्तना वक्षोजास्तेषामालभनं स्पर्शश्च नर्माणि नर्मोक्तयश्च नखानामग्राणि तेषां पाता नखक्षताश्च तैः, क्ष्वेलीक्रीडा च अवलोकाः कटाक्षादिपूर्वमवलोकनानि च हसितानि च तैः, व्रजसुन्दरीणां, रतिपतिं कामं, उत्तम्भयन्नुद्दीपयन् , रमयांचकार ॥ ४६ ॥

कृष्णप्रिया

हाथ फैलाना, आलिङ्गन करना, गोपियों के हाथ दबाना, उनकी चोटी, जाँघ, नीवी और स्तन आदि का स्पर्श करना, विनोद करना, नखक्षत करना, विनोदपूर्ण चितवन से देखना और मुसकाना—इन क्रियाओं के द्वारा गोपियों के दिव्य का काम को, परमोज्ज्वल प्रेमभाव को उत्तेजित करते हुए भगवान् श्रीकृष्ण उन्हें क्रीडा द्वारा आनन्दित करने लगे ॥ ४६ ॥

एवंभगवतः कृष्णाल्लब्धकामा[1] महात्मनः । [2]आत्मानं मेनिरे [3]स्त्रीणां मानिन्योऽभ्यधिकं भुवि ॥ ४७ ॥

कर्दमक्षमा

अन्वयः – एवं, महात्मनः, भगवतः, कृष्णात्, लब्धमानाः, मानिन्यः, आत्मानम्, भुवि, स्त्रीणाम्, अभ्यधिकम्, मेनिरे ॥ ४७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

महात्मनो विमुक्तचित्तात् ॥ ४७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवं बाहुप्रसारादिना । विमुक्तचित्तात् अनासक्तात्मनः । स्त्रीणाम् अभ्यधिकं भूलोकांतर्गतसुंदरीषु वयमभ्यधिकसुंदर्य इत्येवं मानिन्यो रूपादिगर्वोत्सेकाः । अधुना "न विना विप्रलंभेन संभोगः पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान्रागोऽभिवर्धते ॥" इति भरतन्यायाद्रसपुष्ट्यर्थं लीलाशक्त्यैवाऽऽविर्भावितं विप्रलंभबीजमाह—एवमिति । महात्मनः दिव्यातिदिव्यनायकेभ्यः श्रेष्ठद्भगवतस्तत्रापि कृष्णात्स्वयंरूपात् । लब्धमानाः प्राप्तादराः । श्रीकृष्णरमणप्राप्त्या भुवि भूतलस्थानामेव स्त्रीणां मध्ये आत्मानं प्रत्येकमेव स्वमभ्यधिकं मेनिरे । मानिन्यः प्रत्येकमहं सुभगेति मननान्मानवत्यः गर्ववत्यः ॥ ४७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अधुना न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते कषायिते हि वस्त्रादौ भूयान् रागोऽभिवर्द्धत इति भरतन्यायात्प्रेमविशेषोद्रेकादग्रे क्रीडाविशेषवर्णनार्थं विप्रलम्भरूपरसविशेषं वक्तुमारभते । एवमिति । महात्मनो दिव्यातिदिव्यसर्वनायकवृन्देभ्यः परमात् तत्र हेतुः भगवतः स्वयं भगवत इत्यर्थः । कृष्णात्तथैव प्रसिद्धात्तस्मादित्यर्थः । एवं पूर्वोक्ततत्प्रेमवशताप्रकारेण लब्धो मानः संमानः सौभाग्यं याभिस्तथाभूता भूत्वा मानिन्यो लब्धप्रणयमानाः सत्यो भुवि अन्यत्र चात्र च याः स्त्रियस्तासां सर्वासां मध्ये प्रत्येकमात्मानमेवाधिकं मेनिरे तं प्रति मानिन्यो बभूवुः स्त्रियः प्रतिगर्वितचित्ता बभूवुरित्यर्थः । तत्र मानः—

दम्पत्योर्भाव एकत्र सतोरप्यनुरक्तयोः । स्वाभीष्टाश्लेषवीक्षादिनिरोधी मान उच्यते ॥
अहेरिव गतिः प्रेम्णः स्वभावकुटिला भवेत् । अतो हेतोरहेतोश्च यूनोर्मान उदञ्चतीति ॥

रसशास्त्रानुसारात् गर्वश्च अन्यत्रत्यानाम् तादृशनायकालाभात् अत्रत्यानां तल्लाभेऽपि स्वसदृशसौभाग्यलाभामननात् यथोक्तं—

सौभाग्यरूपतारुण्यगुणसर्वोत्तमाश्रयः । इष्टलाभादिना चान्यहेलनं गर्व ईर्य्यत इति ॥
सञ्चारयन्ति ये भाव ते तु सञ्चारिणो मताः । उन्मज्जन्ति निमज्जन्ति स्थायिन्यम्बुनिधाविवेति ॥

रसतन्त्रात् गर्वोऽपि तादृशतत्प्रेमविशेषस्य स्थायिनः सञ्चारिभावत्वात्तन्मय एव ज्ञेयः अस्य हि रसस्यैवमेव स्थितिरुत्कर्षश्चेति ॥ ४७ ॥

---

१. कामा । २. स्वात्मानं–विज, । ३. माधिक्याभ्यधिकं–विज, ।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना प्रेमविशेषोद्रेकेणाग्रे क्रीडाविशेषार्थं विप्रलम्भरूपरसविशेषं वक्तुमारभते—एवमिति। उक्तवैदग्धीविशेषप्रकटनप्रकारेण महात्मन आत्मारामादपि लब्धो मानः सम्मानश्चित्तसमुन्नतिलक्षणभावविशेषो वा याभिस्ताः। तत्र हेतुः—भगवत इति, रसविशेषानुभवार्थं निजभगवत्ताप्रकटनादित्यर्थः। अत एव कृष्णाद् विचित्रमहारसार्णवात् परमचित्ताकर्षकाद्वा, अतो मानिन्यः सत्यो भुवि वर्त्तमानानां स्त्रीणां मध्ये आत्मानमभ्यधिकं परमश्रेष्ठं ता मेनिरे। यद्वा, भुवि विहारभुमाविति सर्व्वासां सामान्यमेवाभिप्रेतम्, तथापि स्त्रीणां तासामेव गोपीनां मध्ये प्रत्येकमात्मानमभ्यधिकं मेनिरे। तेनैव तथा रमणात्, अतो मानिन्योऽपि बभूवुरिति पृथक् वाक्यं वा, मदमानयोर्वक्ष्यमाणत्वात्, वस्तुतस्तु परमविदग्धानां तासां विदग्धवरप्रियसन्तोषार्थं रसस्वभावकृतं सेवाविलासरूपमेव। तदुह्यम्॥ ४७॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं महात्मनः असक्तचित्ताद्भगवतो हेतोर्लब्धो मानो गर्वो याभिस्त मानिन्यो गोप्य आत्मानं भुवि स्त्रीणां मध्येऽक्ष्यधिकं सर्वोत्कृष्टं मेनिरे॥ ५७॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भुवि स्त्रीणां मध्ये स्वात्माधिक्येनाभ्यधिकं मेनिरे॥ ४७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

महात्मनः दिव्यातिदिव्यसर्वनायकेभ्यः परमश्रैष्ठ्यात्। मानिन्यः सत्यो भुव यन्यत्र च या स्त्रियस्तासां मध्ये आत्मानमप्यधिकं मेनिरे। तस्मिन् प्रणयमानवत्यो बभूवुः स्त्रीषु च गर्वं धृतवत्य इत्यर्थः। अन्यत्रत्यानां तादृशकान्तालाभात् तत्रत्यानाञ्च तादृशसौभाग्यलाभामननादिति भावः॥ ४७॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

इयन्तु लीलातिरहस्या, वर्णनीया न भवति, तथापि शुकदेवेन संक्षेपादुक्त्वोपसंह्रियते स्म–एवमित्यनेन। एवमित्येवं प्रकारिकया बहुविधया लीलयेति वाग्विषयत्वाभावाद्दूरगम्ययेत्येवं शब्दार्थः। कृष्णाद् भगवतो लब्धमाना लब्धपूजाः महात्मनो महच्छब्दस्य बहुमानप्रदत्वात्, मानिन्यः सम्मानवत्यः तद्दत्तमानवत्वात् स्त्रीणामभ्यधिकं मेनिरं, कृतार्था वयमित्येव मेनिरे॥४७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अधुना न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते कषायिते हि वस्त्रादौ भूयान् रागोऽभिवर्द्धत इति भरतन्यायाद्रसपुष्ट्यर्थं लीलाशक्त्यैवाविभावितं विप्रलम्भव्याजमाह। एवमिति। महात्मनः दिव्यातिदिव्यनायकवृन्देभ्यः श्रेष्ठात् भगवतस्तत्रापि कृष्णात् स्वयं रूपात् लब्धमानाः प्राप्तादराः श्रीकृष्णरमणप्राप्ता भुवि भूतलस्थानामेव स्त्रीणां मध्ये आत्मानं प्रत्येकमेव स्वमभ्यधिकं मेनिरे मानिन्यः प्रत्येकमहमेवातिसुभगेति माननान्मानिन्यः गर्ववत्यः॥ ४७॥

रसिकाह्लादिनी–टीका

पूर्वं वनगमनमात्रेण विप्रलम्भमुत्पाद्य पुनः रसमाधुर्येण पोषितास्ततः स्वाधीनपतिका जाताः स्ववैदग्धीप्रकाशनेनात्मानं गरिष्ठं मन्यमाना रमणे मंथरां दृष्ट्वा सामान्यतः रसवृद्धये तदनु विप्रलम्भेन रसविशेषं प्रापणीया इति प्रकरणार्थं शुकोऽनुवदति एवमिति एवं पूर्वोक्तेन बाहुप्रसारेत्यादिप्रकारसम्माननेन कृष्णात् शृंगारसर्वस्वरूपात् कीदृशात् भगवतः षड्गुणैश्वर्यं तिरोधाय रसैश्वर्येण विराजमानात् एवमपि महात्मनः सर्वासु सुन्दरीषु मधुररसं चारयितुमुदारचित्तात् कृष्णात् लब्धो मानः सौभाग्यं सम्मत् याभिस्ता अतो मानिन्यो भूत्वा भुवि सर्वासां स्त्रीणां मध्ये यद्वा भुवि व्रजभूमौ सजातीयानां व्रजसुन्दरीणां मध्ये आत्मानमप्यधिकं अहमेव श्रेष्ठा नान्येति स्वं स्वं मेनिरे श्रीकृष्णेन तथैव सम्मानितत्वात् मानिन्यो गर्वयुक्ता बभूवुरिति। तदुक्तं रसार्णवे "दम्पत्योर्भाव एकत्र सतोरप्यनुक्तयोः। स्वाभीष्टाश्लेषवीक्ष्यादि निरोधी मान उच्यते"। "अहेरिव गतिः प्रम्णः स्वभावकुटिला भवेत्। अतोहेतोरहेतोश्च यूनोर्मान उदञ्चति" "सौभाग्यरूपतारूण्यगुणैः सर्वोत्तमभाश्रयैः। इष्टलाभादिना चान्यहेलनं गर्व उच्यते" गर्वस्यापि संचारिभावान्तरगतत्वात्। संचारयन्ति ये भावं तेऽत्र संचारिणो मताः। उन्मज्जन्ति निमज्जन्ति स्थायिन्यम्बुनिधाविवेति"। गर्वस्यापि संचारित्वं स्थायिपोषत्वात्। "न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते। काषायिते हि वस्त्रादौ भूयान् रोगो हि वर्द्धतेति"॥ ४७॥

विशुद्धरसदीपिका

इदानीं कामकलितमहाप्रेम्णोऽपि विरहानुबन्धित्वं दर्शयन् शुद्धभावस्य च तदनुक्तावप्यविकृतत्वख्यापनाय तदाश्रयविषयभूतायाः स्वाधीनपतिकायाः श्रीराधिकायाः परमसौभाग्यौत्कर्षास्वादनलोभाकृष्टचेताः श्रृङ्गारभावस्य विप्रलम्भपोष्यत्वावगमेन

पर्य्यवसाययन् विप्रलम्भलीलामुपन्यस्यति । एवमिति । प्रागुक्तातिदेशोऽयं भगवतः स्वनिष्ठकामिनः भगं श्रीकाममाहात्म्येत्यादिकोशात् लब्धो मानः सौभाग्याभिमानो याभिस्ताः पक्षे भगवतः निजभाग्यशेवधिपरमावधिरूपया श्रीराधया नित्ययुक्तादित्यर्थः । तदुक्तं श्रीहरिलीलामृताख्यतन्त्रे श्रीराधामुद्दिश्य—

एतस्य भाग्यरूपेयं परमानन्दविग्रहा । यन्नामस्मरणादे वि ! स्वपचोऽपि द्विजोत्तमः ॥ इति ।

भगवत्पदे तन्त्रेणोभयार्थमिति श्रीमुनीन्द्राभिप्रायः उपक्रमोपसंहारादिभिर्ग्रन्थस्यास्य युगलोपासनापरत्वावगमादिति निर्णीतं भक्तिमञ्जूषायां कृष्णात्तदानन्दाकृष्टात् नित्यं तदेकपरवत इत्यर्थः लब्धमानाः लम्भितसमानसौभाग्याः उपनतामितचेतःसम्मदाः निजप्राणेश्वरीसौभाग्योत्कर्षहर्षिता इत्यर्थः । महात्मनः परमोदारात् दिव्यातिदिव्यनायकवृन्देभ्यः परमात् पक्षे महाशयात् अनन्तकोटिलक्ष्मीविजित्वरगोपसुन्दरीगणप्रेमविषयोऽपि निजप्राणप्रियाप्रीत्याश्रयो यस्तस्मादित्यर्थः । तासां लक्ष्मीविजित्वरत्वं वराहतन्त्रे यत्कलाकोटिकोट्यंशा लक्ष्याद्यास्त्रिगुणात्मिका इति अत एव श्रीगोपालचम्पूमनु—

लक्ष्मीरभितः स्त्रीतमा गोप्यो लक्ष्मीतमाः प्रथिताः । राधागोपीतमाचेत्तस्याः का वा समा वामेति ॥

आत्मानं दाम्पत्येनानुरक्तानां स्त्रीणां कामुकीमित्यर्थः तथा त्वमुक्तं भक्तिभावप्रदीपे—

पुंसः स्त्रियां स्त्रियाः पुंसि सम्भोगं प्रति या स्पृहा । स एव कामजो भावः कदापि न तदर्थक इति ॥

अत एव मानिन्यः प्रतिस्वमभिमानवत्य इत्यर्थः । पक्षद्वयेऽपि श्लिष्टमिदं तथाहि प्रथमे पक्षे लब्धप्रणयमानाः तं प्रति मानवत्यो बभूवुः स्त्रियः प्रति गर्वितचित्ता बभूबुरित्यर्थः । तत्र मानः—

दम्पत्योर्भाव एकस्मिन् सतोरप्यनुरक्तयोः । स्वाभीष्टाश्लेषवीक्षादिनिरोधी मान उच्यते ॥

सच हेत्वहेतुजत्वेनानेकविधः ॥

तदुक्तम्—

अहेरिव गतिः प्रेम्णः स्वभावकुटिला भवेत् । अतो हेतोरहेतोश्च यूनोर्मान उदञ्चतीति ॥

विस्तृतमाकरे गर्वश्चान्यत्रत्यानां तादृशनायकालाभात्तत्रत्यानां च तल्लाभेऽपि स्वसदृशसौभाग्यलाभामननात् यथोक्तम्—

सौभाग्यरूपतारुण्यगुणसर्वोत्तमाश्रयैः । इष्टलाभादिना चान्यहेलनं गर्व ईर्य्यते इति ॥

उभयोरपि सञ्चारित्वाद्रसपोषकत्वे न विरोधः पक्षान्तरे भुवि विद्यमानानां स्त्रीणां प्रकटलीलापरिकराणां मध्ये अधिकं प्रकटाप्रकटोभयानुगतमात्मानं मेनिर इत्यर्थः शेषं पूर्ववत् ॥ ४७ ॥

श्रीरामनारायणकृता भावभावविभाविका

एवं लब्धमानानां भगवद्रतत्वेनासम्भावितमानानामपि मानस्य भगवद्विच्छेदकत्वोपदेशायैव यन्मानवदाचरणं तदाह । एवमिति । एवमुक्तप्रकारेण भगवतः निरतिशयस्वतः सिद्धषडैश्वर्य्यसम्पन्नात् कृष्णात् सत्यानन्दस्वरूपात्स्वरतानां सर्वदोषकर्षणात् महात्मनो विभोः कान्ताधीनरमणासम्भवेनैव रमणस्यानुग्रहमात्रत्वेन मानायोग्यतां भगवद्रतानां तदनुग्रहलब्धमानानां नितरां मानदोषासम्भवं सूचयित्वा केवलमुपदेशार्थमेव मानानुकारमाह । आत्मानमिति । ता मानिन्य आत्मानं स्त्रीणां मध्येऽभ्यधिकं मेनिरे इत्यन्वयः ॥ ४७ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवं संभोगशृङ्गारमुपपाद्य न विना विप्रलम्भेन सम्भोगः । पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान् रागोऽभिवर्धत इति भरतेनोक्तत्वात् तत्पुष्ट्यर्थं विप्रयोगमुपादयितुं पीठिकां रचयति । एवमिति । एवं पूर्वोक्तप्रकारेण भगवतः सर्वदानसामर्थ्यात् सदानन्दस्वरूपात् कृष्णात्परिपूर्णत्वेन न्यूनतामतिरहितत्वात् महात्मनः लब्धो मान आदरो याभिस्ताः सत्य अमानिन्यः साम्प्रतं मानवत्यो बभूवुः भुवि स्त्रीणां सर्वासां मध्ये प्रत्येकं सर्वा एवात्मानभिसर्वप्रकारेणाधिकं च मेनिरे स्त्रिय अतिगर्वितमानसाः यभूवुः "दम्पत्योर्भाव एकत्र सतोरप्यनुक्तयोः । स्वाभीष्टाश्लेषवीक्षादिविरोधी मान उच्यते । अहेरिव गतिः प्रेम्णः स्वभावकुटिला ततः । सनिमित्तोऽनिमित्तो वा यूनोर्मान उदञ्चति तथा चास्मत्समा न सन्त्यन्या अतोऽस्मान् यदि प्रार्थयिष्यति तदा रसं दास्यामस्तथा सविनयास्मत्प्रार्थनया यथा भगवानस्मद्वशे जातस्तथा तत्प्रार्थनया वयमपि भविष्यामः इति रसार्थमेवायं भावो न तु दोषरूपो भगवद्भावनया कृतत्वादिति भावः । निवृत्तिपक्षे इत्थं प्रत्यगभिन्नस्य परमात्मनः औपनिषदत्वं प्रतिपाद्य ताभिरपि दुर्ज्ञेयतयैव प्रतिपादनमुपक्रमते । एवमुक्तिप्रकारेण प्रतिपादिताद्भगवतो निरङ्कुशैश्वर्य्यवतः कृष्णाच्छुद्धात्सच्चिदानन्दरूपान्महात्मनः प्रत्यगभिन्नात्परमात्मनो लब्धो मानः प्रामाण्यं याभिः ततश्च "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद" इत्यादिश्रुत्या स्त्रीणां श्रुतीनां भुवि जन्मभूमौ परमात्मनि प्रामाण्यवत्यः सत्यः आत्मानमधिकं मेनिर इत्यर्थः ॥ ४७ ॥

रास-रहस्यम्

र० टी०—एवं पूर्वोक्तप्रकारेण भगवतः भगो भाग्यमिति भाग्यशालीन्यो महात्मनः आत्मनः महत्वेन विभुत्वेन दृष्टवत्यः कृष्णादन्तर्यामिणः सकाशात् लब्धमानाः प्राप्तं प्रामाण्यं, आत्मानं स्वं भुवि संसारे, स्त्रीणां अपरावृत्तीनां मध्ये प्रत्येकमात्मानं अभ्यधिकं अतिशयेनोत्कृष्टं मानिन्यो ''ब्रह्म मया विज्ञातमि''ति अभिमानयुक्ताः मेनिरे गर्वितमानसाः बभूवुः ॥ ४७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

महात्मनः मानदातुः अमानिनः ॥ ४७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मानिन्योऽभ्याधिकं भुवीत्यपि पठन्ति ॥ अधिक्याभ्यधिकं भुवीति । अत्राधिक्येति न सरलार्थ इत्युपर्येव ज्ञायते। मानिन्यः स्त्रीणां मध्ये आत्मानमधिकं मेनिर इत्यन्वः । तदहङ्कारहेतुरेवं कृष्णाल्लब्धमाना इति ॥ ४७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं संयोगशृङ्गारमुपपाद्य विप्रयोगमुपपादयितुं तासां मानमाह । एवमिति । पूर्वोक्तप्रकारो भगवतः सर्वरसदानसमर्थात् कृष्णात् सदानन्दात् फलरूपात् लब्धकामाः प्राप्तमनोरथाः सत्यः आत्मानमेव पूर्णं मेनिरे नतु भगवन्तं पूर्णं तेन वा स्वपूर्णतां ननु भगवानेवं कथं कृतवान् न्युना एव कथं न संरक्षितास्तत्राह । महात्मन इति । भगवान्महानेवात्मा नह्यगाडे जले प्रविष्टः अमग्नो भवति घटो वा अपूर्णो भवति किञ्च आत्मानं स्त्रीणां मध्ये अभ्यधिकं नेनिरे भुवि चाभ्यधिकं भुवि स्त्रीणां मध्ये वा अत एव मानिन्यो जाताः नह्यस्मत्सदृशोऽन्याः सन्ति अतो स्मान्यदि प्रार्थयिष्यति तदा रसं दास्याम इति मानयुक्ता जाताः भगवद्धर्मास्तासु समागताः तथा सति यथा प्रार्थनया पूर्वं भगवान् वशे जातः एवं वयमपि भविष्याम इति रसार्थमेवं भावः नतु दोषरूपो भगवद्भावात् ॥ ४७ ॥

श्रीसुबोधिनी-सारः

एवं महात्मनो भगवतः कृष्णात् लब्धमाना मानिन्यो गोप्यो भुवि कौ स्त्रीणां मध्ये आत्मानमुत्तमं मेनिरे ॥ ४७ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

एवमुक्तप्रकारेण महात्मनः अत्युदारचित्तात्, तत्र हेतुः—भगवतः ऐश्वर्यादिपूर्णतया सर्वसम्पादनसमर्थात् कृष्णात् सदानन्दरूपात् लब्धमानाः प्राप्तमनोरथास्ता गोप्यो भुवि वर्तमानानां स्त्रीणां मध्ये आत्मानमभ्यधिकमतिश्रेष्ठं मेनिरे, अतो मानिन्यो जाताः । 'न ह्यस्मत्सदृश्योऽन्याः सन्ति, अतोऽस्मान् यदि प्रार्थयिष्यति तदा रसं दास्यामः' इत्यभिमानयुक्ता जाता इत्यर्थः ॥ ४७ ॥

अन्वितार्थप्रकाशिका

अथ न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुत इति रसरीत्यनुसारेण विप्रलम्भबीजमाह—एवमिति ॥ एवं भगवतो महात्मनः गम्भीरचित्तात् कृष्णाल्लब्धमानाः आप्तमनोरथास्ता गोप्या भुवि वर्तमानानां स्त्रीणां मध्ये आत्मानमभ्यधिकमतिश्रेष्ठं मेनिरे । अतो मानिन्यो जाताः । नह्यन्यत्सदृश्योऽन्याः सन्ति इति प्रत्येकमभिमानयुक्ता जाताः ॥ ४७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

महात्मनः पुरुषोत्तमात् मानिन्यः श्रीकृष्णं प्रतिमानवत्यः सत्यः भुवि अत्रान्यत्र स्थितानां स्त्रीणां मध्ये स्वकीयमात्मानमधिकं मेनिरे ॥ ४७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ एवमित्थं, भववतः षाड्गुण्यपूर्णात्, महात्मनोऽसक्तचित्तात् कृष्णात्, लब्धः मानः सन्मानो याभिस्ताः, मानिन्यः संजातगर्वाः गोप्यः, आत्मानं स्वं स्वं, भुवि स्त्रीणां मध्ये, अभ्यधिकं मेनिरे ॥ ४७ ॥

कृष्णप्रिया

उदारशिरोमणि सर्वव्यापक भगवान् श्रीकृष्ण ने जब इस प्रकार गोपियों का सम्मान किया, तब गोपियों के मन में ऐसा भाव आया कि संसार की समस्त स्त्रियों में हम ही सर्वश्रेष्ठ है, हमारे समान और कोई नहीं है। वे कुछ मानवती हो गयी ॥ ४७ ॥

तासां तत् सौभगमदं वीक्ष्य मानं च केशवः । प्रशमाय प्रसादाय तत्रैवान्तरधीयत ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे[1] दशमस्कन्धे भगवतो रासक्रीडावर्णनं [2]नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

कर्दमक्षमा

अन्वयः—केशवः, तासाम्, तत् सौभगमदम्, च मानम्, वीक्ष्य, पशमाय, च प्रसादाय, तत्र, एव, अन्तरधीयत ॥४८॥

एकोनत्रिंशोध्यायः समाप्तः ॥ २९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्सौभगमदं तादृशं सौभगेन मदमस्वाधीनताम् । मानं गर्वम् । केशवः कश्च ईशश्च केशौ तौ वशयतीति तथा सः ॥४८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायामेकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तासाम् गोपसुंदरीणाम् । केशव इत्युक्ते ब्रह्मशिवयोः सर्वेश्वरयोरपि वशकर्तारं को वशयेदिति ध्वनितम् । वयं श्रीराधासमा यतोऽस्मानपि तत्सदृशमेव मनुत इत्यतस्तासां सौभगमदं, समानविहारेण च राधाया मानं च वीक्ष्य मानं च प्रशमनाय श्रीराधायाः प्रसादाय तत्रैव व्रजसुंदरीसमूहे कृष्णातटे वान्तरधीयत । तासां दृष्ट्याऽदृश्यो बभूवेत्यर्थः । अतर्द्धानमपि संभोगसमृद्ध्यर्थमेव, तदुक्तम्—"न विना विप्रलंभेन संभोगः पुष्टिमश्नुते । अहोराज्ञः कुटिलेव प्रेम्णः स्वभावकुटिला भवेत् ॥" इति । अंतरधीयतेत्यत्रैकत्वेनाग्रिमाध्याये "कस्याः पदानि चैतानि याताया नंदसूनुना" इत्युक्तेर्द्वयोक्तिर्विरुद्धा नानुसंधेया प्रसादायेत्युक्तेः । प्रसादायेत्युक्तेः । प्रसादायेत्युक्तेः । प्रसादस्त्वेकांत एवोचितोऽतस्तया सहैवंतर्द्धानं बोध्यम् । यद्वा—द्वयोरैक्याभिप्रायेणैकत्वम् "द्वयोरैक्याभिप्रायेणैकत्वम् "राधा कृष्णात्मिका नित्यं कृष्णो राधात्मको ध्रुवम्" इति ब्रह्मांडोक्तेः । "तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकम्" इति संमोहनोक्तेश्च ॥ ततश्च सर्वासु तासु भगवतः साधारण्येनैव रमणाद्या सर्वमुख्यतमा वृषभानुकुमारी सा राहसोद्भवदीर्ष्याकषायिताक्षी मानिनी बभूव, ततोऽन्यूना अन्याः सौभाग्यगर्ववत्यो बभूवुरित्युद्भूते वैमत्ये सति भगवतैव यत्तत्र समाहितं तदाह—तासामिति । ताश्च सा चेत्येकशेषेण तासां व्रजसुंदरीणां तस्या वृषभानुकुमार्याश्च क्रमेण तत् तं सौभगमदं मानञ्च वीक्ष्य, स चासौ सौभगमदश्चेति तमिति समासो वा 'तं सौभगमदम्' इति वा पाठः । प्रशमाय तासौ सौभगमदं प्रशमयितुं तां प्रसादयितु च । केशवः कश्च ईशश्च तावपि वयते प्रशास्तीति । तस्य सौभगमदप्रशमने कः प्रयास इति भावः । केशान्वयते संस्कारोतीति वा । केशप्रसाधनादिना तस्याः प्रसादनायां रसिकशेखरस्य चातुर्यमस्तीति भावः । अन्तरधीयतेत्यार्षम्, अंतरदधादित्यर्थः । 'धीञ्—अनादरे' इति दैवादिकस्य वा रूपम् । अत्राग्रिमग्रंथदृष्ट्यया बलाद्गृहीत्वैवेति तत्रैव न त्वन्यत्र । गच्छंस्ताभिर्दृष्ट इत्यर्थः । तच्च तदिच्छायां जातायां योगमाययैव संपादितम् ॥ ४८ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तासां तादृशीनां तदिति तं सौभगमदं सौभाग्यहेतुकं गर्वं तथा च विश्वः मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोरिति तं मानं च वीक्ष्य विशेषेण दृष्ट्वा तत्र गर्वपक्षे युक्त्यन्तरासाध्यं मत्वा मानपक्षे कृतैरप्यनुनयादिभिरसाध्यं दृष्ट्वेत्यर्थः । गर्वं प्रति प्रशमाय मानन्तु प्रति प्रसादाय प्रसादनाय तत्रैवान्तरधीयत अन्तरदधात् धीञ् अनादर इति हि दैवादिकः नत्वन्यत्र गच्छन् दृष्ट इत्यर्थः । अत्र वक्ष्यमाणानुसारेण श्रीराधयैव सहान्तर्द्धानं ज्ञेयं तच्च तस्य तदिच्छायां जातायां योगमाययैव सम्पादितमिति यद्यपि सहेतुकस्येर्ष्यामानस्यैव शान्तये क्वचित् नायकोपेक्षापेक्ष्यते—

हेतुजोऽपि शमं याति यथायोगं प्रकल्पितैः । सामभेदक्रियादाननत्युपेक्षारसान्तरैः ॥

इत्युक्तेः निर्हेतुकस्य प्रणयमानस्य तु विनैव प्रतीकारेण यत्किंचित्प्रतीकारेण वा तथापि तच्छान्त्यर्थमुपेक्षेयं परस्परगर्वसम्बन्धेन गाढतापत्तेः तत उभयभावशान्त्यर्थमेव सा प्रेमविपाकयोरपि तयोः शमनेच्छा च स्वेच्छामयलीलेच्छया युगपदेव सर्वा एव प्रति महारसदानमयरासेच्छया च तथा चायं विप्रलम्भः परमप्रेमार्थमेवोपयोक्ष्यतीति वक्ष्यते च नाहं तु सख्य इत्यादि अन्तर्धाने मूलं कारणं त्वेकयैव तया सह लीलायाः लालसैव अत्र केशव इति—

अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तमेति ॥

---

[1] पारमहस्यां संहितायां–प्रा. पा. । [2] पूर्वार्द्धे रासक्रीडायां कृष्णान्वेषणमेको–प्रा. पा. । [3] सप्तविंशोऽध्याया–विज. ।

भारतीयवाक्यात्परमदीप्तिमानित्यर्थः। ततश्च तदन्तर्द्धाने सर्वासु शोभासु विद्यमानास्वपि तत्र सहसैव शोभाराहित्यं व्यञ्जितमिति ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तेन निजवैदग्धीभरेण; यद्वा, उक्तेन अहमेवानेन रमितेति रमणप्रकारेण यत् सौभगं सौभाग्यं तेन, यद्वा, तं स्वप्रीत्यर्थकमपि सौभगेन मदं वीक्ष्य तस्य प्रशमाय, अन्यथा स्वाधीनत्वाभावेन निजेष्टरासविलाससिद्धिः, मानं च वीक्ष्य प्रसादाय मानरूपकेलिना सन्तोषात् प्रसादविशेषं कर्त्तुमन्तर्द्धानं विना रासार्हप्रेमविशेषासम्पत्तेरिति विवेचनीयम्। यद्वा, मदमानयोः प्रशमाय, प्रशमः किमर्थम्? तदाह—प्रसादायेति। रासेन अनुग्रह विशेषाय, यद्वा, अन्तर्द्धानद्वारा (भा० १०।३२।२२) 'न पारयेऽहं निरवद्य'—इत्यादिना वक्ष्यमाणनिजतदधीनतातिशयविज्ञापनरूपाय; यद्वा, तस्माद् यत् सौभगं तेन मदो मत्तता हर्षो वा। तथा च विश्वः 'मदो रेतसि कस्तूर्य्यां गर्व्वे हर्षेभदानयोः' इति। तद्रूपं मानं मानसोल्लासविशेषं वीक्ष्य, अतएव प्रकृष्टः शमः सुखं रासक्रीड़ात्मकं तस्मै, प्रसादाय च, अन्तर्द्धानेऽपि तदपरित्याग-तद्भजनविशेषाद्यनुग्रहाभि—व्यञ्जनाय, तच्चाग्रे व्यक्तं भावि। यद्वा, प्रशमाय प्रकृष्टसुखाय यः प्रसादस्तस्मै। अन्यत् समानम्। एवं सर्व्वथानुरञ्जनविशेषार्थमेवान्तर्द्धानम्, न त्वात्मारामत्वादिनासूयया वेति ज्ञेयम्। विदग्धवरस्य विदग्धवरासु तदव्यवहार्य्यत्वात्, अतएव तेनैवाग्रे वक्ष्यते (भा० १०।३२।२१) 'मया परोक्षं भजता तिरोहितम्' इत्यादि। तत्रैवेति साक्षात् कुत्राप्यगमनात्, अकस्मादेवादर्शनाच्च, तच्च तस्याशक्यं न स्यादित्याशयेन परमेश्वरत्वमाह केशव इति ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यामेकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः किमत आह। तासामिति। तासां गोपीनां स चासौ सौभगेन सौन्दर्याभिमानेन यो मदस्तं मानं चित्तसमुन्नतिमस्वाधीनतामिति यावत् तं च वीक्ष्य केशवः ब्रह्मरुद्रयोरपि नियन्ता भगवान् प्रशमाय तासां मदमानयोः प्रशान्तये प्रसादायोत्तरोत्तराभिनिवेशापादनरूपानुग्रहाय च तत्रैव पुलिनेऽन्तर्हितवान् ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सौभगमदं सौभाग्यनिमित्तं मदं मानमहङ्कारं मदाहङ्कारयोः प्रशमाय नाशाय प्रसादायानुग्रहाय च प्रकर्षेण प्रसादजननाय च अन्तरधीयत तासां दृष्ट्या अदृश्योऽभवदित्यर्थः ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृतो क्रमसन्दर्भः

सौभगमदं सौभाग्यजनितगर्वं गर्वस्य प्रशमनाय मानस्य च प्रसादनाय मानप्रशमायेति नत्युपेक्षा रसान्तरैरिति रसशास्त्रोक्तत्वात्। अत्र प्रणयमानत्वेन उपेक्षाया अत्र योग्यतेति तत् कृतिगर्वसाहित्येन गरिष्ठत्वात् ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथाभिमानेन पूर्णाभिः सह पुनः क्रीड़ा सुरसा न भवति, चेतसः प्रवणत्वं हि रसपोषकम्; तथा च—'न विना विप्रलम्भेन सम्भोगः परिपुष्यते' इति तत्रैवान्तर्द्धान लीलाञ्चकारेत्याह—तासामित्यादि। तासां तं तथाविधं सौभगमदम्, तथाविधं माणं चित्तसमुन्नतिं वीक्ष्य प्रशमाय तयोरुपशमाय तत्रैव तत्रस्थ एवान्तरधीयत अन्तर्दधे, कर्तरि कर्मप्रत्ययः, यथा कर्म कर्ता तथा कर्तृ कर्म च बोद्धव्यम्। तथा विकारहेतौ सति विक्रन्यते येषां न चेतांसि त एव धीराः' इत्यादि। तत्रस्थ एव तासामदृश्यो बभूवेत्यर्थः। प्रशमाय कीदृशाय? प्रसादाय प्रसादरूपाय तयोः प्रशम एव प्रसादः ॥ ४८ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

प्रशमायेत्यादि। सौभग—मदस्य प्रशमाय प्रसादाय प्रशमप्रसादायेत्यर्थः। सौभग-मदे हि चित्तस्य उत्तालता भवति, तस्यान्तु रसस्य द्रवरूपत्वात् उत्ताले ह्यसद्भावः तेन "न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते" इत्यादि—दिशा पुनः सम्भोग-

पुष्टि करणाय तत्रैवान्तरधात्, न तु स्थानान्तरं यतः, अन्तार्हित एव तत्रैव स्थित इत्यर्थः। यद्वा, प्रसादाय प्रसादः प्रसन्नता, उत्कण्ठां वर्द्धयित्वा मानक्षपणाय अन्योन्यसौहृदाय च। तं विशिनष्टि प्रगतः शम उपरमो यस्मादिति तथा तस्मै ॥

इत्येकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च सर्वासु भगवतः साधारण्येनैव रमणात् या सर्वमुख्यतमा वृषभानुकुमारी सा सहसोद्भवदीर्ष्याकषायिताक्षी मानिनी बभूव ततो न्यूना अन्याः सौभाग्यवर्ववत्यो बभूवुरित्यद्‌भुते वैमत्ये सति भगवतैव यत्तत्र समाहित तदाह। तासामिति। ताश्च सा चेत्येकशेषेण तासां व्रजसुन्दरीणां तस्या वृषभानुकुमार्याश्चेत्यर्थः क्रमेण तत् तं सौभगमदं मानं च वीक्ष्य स चासौ सौभगमदश्च तमिति समासो वा तं सौभगमदमिति वा पाठः। प्रशमाय तासां सौभिगमदं प्रशमयितुं प्रसादाय तां मानवतीं प्रसादयितुं च केशवः को ब्रह्मा ईशश्च तावपि वयते प्रशास्तीति तस्य सौभगमदप्रशभने कः प्रयास इति भावः। केशान् वयते संस्करोतीति केशप्रसाधनादिना तस्याः प्रसादनायां रसिकशेखरस्य तस्य चातुर्य्यमस्त्येवेति भावः। अन्तरधीयतेत्यार्षम् अन्तरदधादित्यर्थः धाञ् अनादर इति दैवादिकस्य वा रूपम् अत्राग्रिमग्रन्थदृष्ट्या श्रीवृषभानुनन्दिनीं बलाद्‌गृहीत्वैवेति ज्ञेयं तत्रैव नत्वन्यत्र गच्छस्ताभिर्दृष्ट इत्यर्थः। तच्च तस्य तदिच्छायां जातायां योगमाययैव सम्पादितम् ॥ ४८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। ऊनत्रिंशोऽपि दशमे सङ्गतः सङ्गतः सताम् ॥ २९ ॥

रसिकाह्लादिनी-टीका

इति गर्वोपशमनद्वारा रसवृद्धिं कारयितुं श्रीकृष्णच्चिकीर्षितमंतर्द्धानप्रकारमाह तासामिति, यासां बाहुप्रसारेत्यादिना सम्माननं कृतं तासां तत्सौभगमदं सौभाग्यहेतुकं गर्वं वीक्ष्य "मदो रेतसि कस्तूर्यां गर्वो हर्षेभदानयो"रिति विश्वः मानं च स्वाधीनतां च वीक्ष्य मदमानयोः प्रशमाय सत्वे रासविलासानुदयात् कृतेऽपि सम्मानने रसवृद्धिर्न जाता अत एव मदमाननिवृत्तौ सत्यां प्रसादाय विलासविशेषवैदग्धीप्रकटनेन प्रसादविशेषं दातुं तत्रैव गोपीमण्डल एवांतरधीयत तासामदृश्यो भूत्वा नत्वन्यत्र गतस्तासां प्रेमालापान् श्रोतुं रसोत्कर्षं संपादयितुं तत्रैव दृष्टयगोचरत्वेन स्थितः। अयमेव प्रेतविवर्त्ता यत्पुरः स्थितोऽपि प्रेष्ठो न दृश्यत इति। यद्वा प्रशमाय सुखाय अग्रे सुखं दातुं प्रसादाय विशेषेणानुरञ्जनं कर्त्तु यद्वा प्रशमाय मनोरथाप्राप्तिजनितपरितापसांतये मदमानसत्वे तदयोगात् ततस्तत्फलाय तासां प्रसादाय रमणस्य फल तत्प्रसन्नता अग्रे वक्ष्यति च "न पारयेऽहं निरवद्यसंयुजा"मिति। नन्वनेकयूथानां मदमानमेकेन कथं शक्यमिति चेत्तत्राह केशवः कश्च इशश्च केशौ तौ वशयतीति केशवः। अनेन सर्वसामर्थ्यमुक्तम्। यद्वा प्रशस्ता केशा यस्येति केशवः, यद्वा कस्य सुखस्य उत्तरोत्तरशतगुणितस्येश नियंतु अवधिभूतं स्वरूपसुखमित्यर्थः। तनु वाति गच्छति प्राप्नोतीत्यर्थः। वा गतिगन्धयोरिति धातुः अन्तरधानं तु मदमाननिवृत्य उपवनेत्वात्मारामतया आत्मारामोऽप्यरीरमत् इत्युक्तार्थमेव आत्मारामता तु पूर्वमुपेक्षितैव तदुक्तं मानो मदश्चेति "हेतुजोपि शमं याति यथा-योग्यप्रकासितैः। सामदानक्रियाभेदनत्युपेक्षारसान्तरै"रिति ॥ ४८ ॥

इति श्रीनारायणभट्टविरचितायां रसिकाह्लादिन्यां रासपंचाध्यायीटीकायां अन्तर्ध्यानवर्णनो नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

विशुद्धरसदीपिका

आसामपि त्यागः कान्तभाववतीसमुदितत्वेनैव आभिर्गवेषणमपि तथैवेति स्वरसः दिव्योन्मादादिकं तु रसोत्कर्षस्वभावादेवेति हृदयम् ततश्च—

आत्मनः परिभोगाय योऽनुरागो गुणादिषु। स एव कामजो भावः कदापि न तदर्थकः ॥

तथा—

यदापि कामिनः साक्षात्पश्यन्ति परमेश्वरम्। तथा ग्राम्येऽपि भावोऽत्र विरहाद्यनुबन्धन इति ॥

भक्तिभावप्रदीपोक्तानुसारेण श्रीभगवत्यकृतज्ञत्वं परिहरन्नतर्द्धानलीलामाह। तासामिति। उभयत्र यथायोगं तत्पूर्वोक्तप्रकारं सौभगमदं सौभाग्यहेतुकं गर्वं पक्षे सर्वनाम्नां बुद्धिस्थे शक्तिरित्युक्तेस्तत् तस्या निजैश्वर्य्याः सौभाग्यहेतुकं हर्षं तथा मानं संमानं चित्तसमुन्नतिमिति यावत् वीक्ष्य विशेषेण दृष्ट्वा तत्रैव तासामेव कामजन्यभावप्रतिबन्धसीमायामित्यर्थः। नहि भगवानकृतज्ञो यतस्तादृशप्रेमवतीः परित्यज्यान्यत्र गच्छेत् किन्तु तासां कामभावस्वभावेन तिरोहितोऽय श्रीराधासहितोऽप्तदृश्यो जात इति भावः। एवं च कामजभावाभासस्यापि प्रत्यूहनमूहितं पक्षे तत्रैव यस्मिन् क्षणे मानभ्रमो जातस्तस्मिन्नेव क्षण इत्यर्थः। ततश्चाधीरत्वं तेन च तत्प्रीतिनिघ्नत्वं च दर्शितं यतः केशव इति—

अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः। सर्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तमेति ॥

महाभारतीयनिर्वचनानुसारेण सहसान्तर्द्धाने सन्तमसमिव जातमिति दर्शितं यद्वा को ब्रह्मा ईशश्च तौ वाति ज्ञानप्रदत्वेन नियम्यत्वेन प्रेरयति सः "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वश" इति श्रीद्वितीयोक्तेः ततश्च रजस्तमोऽधिष्ठात्रोस्तयोर्वशीकारित्वेन तत्कार्य्ययोर्मदमानयोर्वशीकारोऽप्यर्थसिद्ध इति दर्शित तेन च तास्वनुग्रह एव स्पष्टीकृत इत्याह । प्रशमाय प्रसादायेति । मद मानयोरत्यर्थलभ्यं तत्प्रशमरूपाय प्रसादायेत्यर्थः । तदुक्तम् ।

हेतुजोऽपि समं याति यथायोगं प्रकल्पितैः । सामभेदक्रियादाननत्युपेक्षारसान्तरैरिति ॥

अत्रापीति शब्दान्निर्हेतुकस्य प्रणयमानस्य विनव प्रतीकारेण यत्किञ्चित्प्रतीकारेण वा शान्तिरिति स्थितावपि परस्परगर्वसम्बन्धेन गाढतापत्त्या सुखभङ्गः स्यादिति तदनुग्रहायैवं लीलेति ज्ञेयम् अत एवोक्तं श्रीगोपालचम्पूमनु अन्तर्हितवानेव नान्तर्हिवानिति वक्ष्यते च स्वयं भगवता मया परोक्षं भजता तिरोहितमिति वस्तुतस्तु प्रेयसीभावाक्रान्तचेतसां सचेतसामपि दूरतरं वरीवर्त्ति श्रीराधारमण इति ख्यापनाय आत्मनश्च तस्यामेवैकस्यां परमासक्तिद्योतनाय तासां च तस्यामेव सख्यतृष्णा तिशयप्रदर्शनाय विरहलीलेयं श्रीभगवतानुष्ठीयते स्तूयते च मुनीन्द्रादिभिः तस्यां च परमानुकूलस्य तस्य सोऽतिशयोऽतिशयेन रोचते तास्वपि तत्तद्भावाभिमानिनीष्वनुग्रह एवेति संक्षेपः ततश्चान्तर्धाने मूलं कारणं निभृतनिकुञ्जेषु श्रीराधाया वक्ष्यमामाणक्रीडैवेति सिद्धं तदेकपरवत्त्वं तस्य तस्याश्च स्वाधीनपतिकात्वमिति ।

इति श्रीभागवतरासपञ्चाध्यायीव्याख्याने विशुद्धरसदीपिकायां प्रथमोऽध्यायः ॥ १ ॥

मूलस्य एकोनत्रिंशोध्यायः ॥ २९ ॥

श्रीरामनारायणकृता भावभावविभाविका

एवं मानदोषबोधाय तदनुकारं दर्शयित्वा भगवतोऽपि स्वप्रेमास्पदालये भक्तहृदये मानादिदोषासहिष्णोस्तद्दोषोपशमनायतिरोधानेन सेवमानस्य भक्तानुपेक्षामाह । तासामिति । तासामतिप्रेमवतीत्वेनासम्भावितमदानां तज्जनोपदेशानुशीलितं सौभगमदं मानं च वीक्ष्य केशवः—

कः प्रजापतिरुद्दिष्ट ईशोऽहं सर्वदेहिनाम् । आवां तदङ्गसम्भूतौ तस्मात्केशवनामवान् इति ॥

शिववचचात् ब्रह्मेशयोरपीशस्य दीनेष्वशक्तेषु रोषदोषासंभवात् कृपया तासां सौभगमदशमनाय तासु प्रसादायानुग्रहाय तत्रैव तास्वेवान्तरधीयत यद्वा तासां तत्सौभगमदं तस्याः प्राणप्रियाया मानं च वीक्ष्य तासां तन्मदप्रशमाय तस्याः प्रसादाय तत्रैव तत्सहैवान्तरधीयतेत्यन्वयः ॥ ४८ ॥

श्रीश्रीशौ राधिकाकृष्णौ सखीः स्वीयान् गुरून् द्विजान् । गिराण्ढुण्ढि विदो भक्तान् वन्दे विश्वं हरेर्वपुः ॥

इतिश्री प्रन्द्रभागाख्य विष्णुसख्यापन्न श्रीरामनारायणविरचितायां श्रीमद्भागवतमहापुराणदशमस्कन्धान्तर्गत-
श्रीरासपञ्चध्यायीव्याख्यावां भावभावविभाविकायां प्रथमाध्यायव्याख्या समाप्ता ॥ १ ॥

मूलेएकोनत्रिशः ॥ २९ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ततो भगवान् यत्कृतवांस्तदाह । तासां स्वात्मानमभ्यधिकं मन्यमानानां सौभगान्मानाज्जातमस्वाधीनतापादकं मानस्य गाढावस्थारूपं येनादरणीयोऽपि तिरस्क्रियते तादृशं मदं तद्धेतुभूतमनुनयाद्यसाध्यं चित्तसमुन्नतिरूप मानं च वीक्ष्य विशेषतस्तदुपगम्य मदस्य निहृत्त्यर्थं तासां प्रशमाय चित्तोन्नतिवारणाय मानशान्तये तासां प्रसादाय प्रसन्नतया स्ववश्यतापादनाय केशवस्तत्रैवान्तरधीयत नत्वन्यत्र गच्छन् कयाचिदपि दृष्टः केशा अंशवो यस्य सन्तीति भारतीयव्युत्पत्त्या कृष्णकान्त्या तासां शोभा चन्द्रकान्त्या नारायणस्येव या शोभासीत्तासां तदन्तर्धाने विवृत्तेति व्यज्यते यद्वा कश्च ईशश्च तौ वशयतीति केशवस्तथा च ब्रह्मरुद्रयोरपि रजस्तमोपशमनने वशीकरणसमर्थस्य तासां मदमाननिरसने वशीकरणे किं चित्रमिति भावः । ननु मदमाननिरासायोपायान्तरं कुतो न रचितवानितिचेदसम्भवात् नहि प्रत्येकं प्रसादनं सम्भवति एकस्याः प्रथमं प्रसादने सैवादौ किमिति प्रसादितेत्यपरस्या मानाधिक्योद्भवात् तस्मात्सर्वाः प्रति रासरसं दातुं प्रेमवर्द्धनार्थं विप्रलम्भः यद्वा सर्वासां मदमानयोः प्रशमाय प्रयस्याः श्रीराधाभिधायाः सख्याः प्रसादाय वक्ष्यामाणग्रन्थानुरोधेन तया सहान्तरधीयत केशान् वपते संस्करोतीति केशवस्तथा च केशप्रसाधनादिव हुधोपायविधाने परमचतुर इति भावः निवृत्तिपक्षे तासां श्रुतीनां यः सौभगमदस्तं वीक्ष्य मानं स्वस्मिन्ननन्यसाधारण्यं च वीक्ष्य दुरापत्वख्यापनाय मदस्य प्रशमाय "नावेदविन्मनुते तं वृहन्तमिति श्रुत्या श्रतिरूपमानातिरिक्तमानागम्यत्वं ख्याप्यते तेन तासां प्रसादाय तत्रैव तत्तदन्तःकरणवृत्तिष्वेवान्तरधीयत सर्वप्रत्ययसाक्षित्वेनैवावगन्तुं शक्यतां प्राप्त इत्यर्थः । तथा च श्रुतिः यदि मन्यसेसुवदेति दह्रमेवापि नूनं त्वं वेत्थब्रह्मणो रूपं नो न वेदेति वेद च अविज्ञातं विजानतां विज्ञातमविजानतां विज्ञातमविजानतां प्रतिबोधविदिमतमित्याद्याः अत्र ब्रह्मणो दुर्बोधत्वं श्रुत्येकगम्यत्वं सर्वप्रत्यसाक्षित्वेन वेद्यत्वं च दर्शितम् ॥ ४८ ॥

इतिश्रीपरमहंसपरिव्राजकाचार्य्यवालगोपालतीर्थश्रीपाद शिष्यदत्तवशातसरामकुमारसूनुधनपतिमिश्र-
सूरिकृतायां भागवतगूढार्थदीपिकायां दशमस्कन्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

रास-रहस्यम्

र० टी०—तासां वृत्तीनां तत् पूर्वोक्तप्रकारं सौभगमदं सौभाग्यादुत्पन्नं मदं गर्वं, मानं च स्वस्मिननन्यसाधारणत्वं च वीक्ष्य साभिमानवत् दृष्ट्वा दुष्प्राप्यत्व ख्यापनार्थं केशवः कः ब्रह्मा ईशश्च केशौ सृष्टिसंहारकौ तौ वातीति केशवः यद्वा कश्च ब्रह्मा च ईशश्च तावपि वयते प्रशास्तीति केशवः परमात्मा "भयादस्य अग्निस्तपति भयात्तपति सूर्यः भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ।" इति श्रुतिप्रसिद्धः, तत्प्रशमाय प्रकर्षेण शमायाभिमाननाशाय "नावेदविन्मनुते तं बृहन्तम् ।" तथा प्रसादाय "यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम् ।" "नोन वेदेति वेद च ।" "अविज्ञातं विजानतां विज्ञातमविजानताम् ।" "प्रतिबोध विदितं मतम् ।" इत्यादि श्रुति प्रमाणेन सम्प्रसादप्राप्तये तत्रैव अन्तःकरणे एव अन्तरधीयत तिरोहितो बभूव ॥ ४८ ॥

इति रहस्ये प्रथमोऽध्यायः ।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तासां तत्सौभगमदं स्वकीयसौन्दयण मदं स्वस्वामिविवेकविप्लावकं मत्तत्वम् मानं गर्वं च वीक्ष्य केशवः कश्च ईशश्च तौ ब्रह्मशिवौ नियम्यौ स्तोऽस्य स केशवः "केशाद्वः, इति वः "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः" इति तयोस्तान्नियम्यत्वोक्तेः।४८।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकोनत्रिंशाध्यायार्थप्रकाशः ॥ २९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मानं स्वकृतं तद्योग्यतातिरिक्तं वीक्ष्य तज्जातं सौभगं सौन्दर्यं तत्सम्बन्धिमदमहन्तां च वीक्ष्य केशवः प्रशमायाहन्ताशान्त्यै अनन्तरं प्रसादाय तं विधातुं तत्रैव विद्यमानस्थल एवान्तरधीयतान्तर्हितोऽभूत् ॥ ४८ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे सप्तविंशोऽध्यायः ॥ २७ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

भगवांस्तु ऐक्येनैव रसं प्रयच्छन् बहिस्तिरोहितो जात इत्याह । तासामिति । मानः पूर्णता च न दोषाय स्त्रीषु भूमौ च यदाधिक्यज्ञानं स दोषो भवति तदनूद्य तत्परिहारार्थं तिरोहित इत्याह । तासां तत्प्रसिद्धं पूर्वोक्तं सर्वोत्तमत्वलक्षणं सौभाग्यमदं वीक्ष्य तस्य मदस्य प्रशमाय अन्तरधीयत ननु भगवद्रमणेन हि तासामेवं भावः अतः स्वकृत एवेति कथं तिरोधानं कृतवानित्याशङ्क्याह । वीक्ष्य मानं च प्रसादाय तत्रैवान्तरधीयतेति मानापनोदनं कर्त्तव्यं मानस्त्वान्तरः अशक्तो हि बहिरपनोदनार्थं यत्नं करोति चकारात्स्वधर्मं च अतः प्रसादाय प्रथमस्तासां पश्चात्स्वस्य च तत्रैव गोपिकासु यूथमध्ये वा अन्तर्द्धानं प्राप्तवान् नन्वेतद्द्वयमपि न कर्त्तव्यमुपेक्षिताः कुतो नेतिचेत्तत्राह । केशव इति । यथा रजोगुण ब्रह्मणो निवार्य तस्मै मुक्तिं दत्तवान् यथा वा शिवस्य तमोगुणं निवार्य एवमेतासामपि मदं मानं च निवार्य मुक्तिं दातुं तथा कृतवानित्यर्थः । कायिकतिरोभावोऽयं प्रथमाधिकारित्वाद्गोपीनाम् ॥ ४८ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे षड्विंशाध्यायविवरणम् ॥ २६ ॥

(अन्य मते एकोनत्रिंशोऽध्यायः ॥ २९ ॥)

श्रीसुबोधिनी-सारः

सा च ताश्च तास्तासां तत्सौभगमदं मानं च वीक्ष्य केशवः प्रशमाय गर्वनाशार्थं प्रसादार्थं च तत्र यमुनातटे एवांतरधात् ॥ ४८ ॥

इति श्रीमद्भागवते दशमस्कंधे सुबोधिन्यां टीकायामेकोनत्रिंशोऽध्यायः ॥ २९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तासां गोपीनां स पूर्वोक्तश्चासौ सौभगमदः सौन्दर्याभिमानश्च तं वीक्ष्य तथा तत्प्रयुक्तमानमस्वाधीनत्वं वीक्ष्य केशवः कृष्णः प्रशमाय गर्वविनाशाय तत्र पुलिन एवान्तरधीयत अन्तर्हितवान् । गर्वनाशप्रयोजनमाह—प्रसादायेति । गर्वस्यानन्दतिरोधायकत्वात्तस्मिन् सति तस्याभिव्यक्तिर्न स्याद्गर्वनिरासेन परमानन्दमनुभावयितुमित्यर्थः । केशवपदेन को ब्रह्मा, ईशो रुद्रः, तावपि वशयतीति तस्य गोपीवशीकरणं कियदिति सूचितम् ॥ ४८ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने । ऊनत्रिंशो गतो वृत्तिमन्तर्धाननिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

तासामिति ॥ तासां गोपीनां स पूर्वोक्तश्चासौ सौभगेन सौन्दर्येण श्रीकृष्णकर्तृकप्रेमातिशयेन वा मदः अस्वाधीनता च तं वीक्ष्य तथा तत्प्रयुक्तं मानं गर्वं च वीक्ष्य केशवः को ब्रह्मा ईशश्च तौ वशयतीति तादृशः कृष्ण प्रशमाय गर्वविनाशाय प्रसादाय अनुग्रहाय च तत्र पुलिन एव अन्तरधीयत अन्तर्हितवान् । नत्वन्यत्र गच्छन्दृष्टः । "धीङ् आधारे" दिवादिः ॥ ४८ ॥

इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायामेकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तन्नायकमोहजनकं सौभगं स्वसौंदर्यं तस्य मदं अस्वाधीनत्वेन गर्वं मानं च कानां ब्रह्मरुद्रादिप्रजापतीनामीशानियामका-केशाः प्रशस्ताः केशा अवतारा यस्य केशवः वीक्ष्यतयोः प्रशमाय नाशाय ॥ ४८ ॥

इति श्रीशुद्धकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धव्याख्याने रासक्रीडायामंतर्धानो नाम एकोनत्रिंशोऽध्यायः ॥ २९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ततः किमत आह । तासामिति । तासां गोपीनां, स चासौ सौभगमदः सौन्दर्याभिमानजो मदस्तं, मानं चित्तसमुन्नतिं च वीक्ष्य, केशवः ब्रह्मशिववशंकरः कृष्णः, प्रशमाय तन्मदमानयोः प्रशान्तये, प्रसादाय स्वस्मिन्नुत्तरोत्तराभिनिवेशापादनरूपानुग्रहाय च, तत्र पुलिने एव, अन्तरधीयत अन्तर्हितवान् ॥ ४८ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तासामिति : १०.२९.४८.

यस्याहंकृतिरन्तरे समुदिता तस्योत्तमस्यापि वा बाह्याभ्यन्तरभास्वरोऽप्यहमिह स्यामिन्द्रियागोचरः ।
साधूनामनहंकृतिस्थितिकृते संबोधयन् श्रीपतिर्गोपीमण्डलमण्डितोऽपि कुतुकादासीत्तदान्तर्हितः ॥ १४८ ॥

नानाविलासपरिरम्भगचुम्बानाद्यैरासां बहिर्हितमकारि यथा तथैव ।
अन्तर्हितं वत विधेयमिति प्रकाममन्तर्हितोन्तरगमानमवेक्ष्य सोऽभूत् ॥ १४९ ॥

भवत्यन्तर्हितो लोके सुहृत्साधारणोऽपि यः । सोऽभूत्तथाऽत्र किं चित्रं मित्र मण्डलमण्डितः ॥ १५० ॥

नीतो मे वशतां प्रभुर्निजगुणैः स्नेहार्द्रहार्दाशयैरेवं विश्वसितेन जातुचिदपि स्थेयं न पुंसाऽञ्जसा ।
मायारात्रिविहारिणाऽत्र निरहंकारेण किन्त्वन्तरे ध्येयोऽसौ न हि चेत्परस्य तु कथा का गोपिकानां पुरः ॥ १५१ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने एकोनत्रिंशोऽध्यायः ॥ २९ ॥

कृष्णप्रिया

जब भगवान् ने देखा कि इन्हें तो अपने सुहाग का कुछ गर्व हो आया है और अब मान भी करने लगी हैं, तब वे उनका गर्व शान्त करने के लिये तथा उनका मान दूर कर प्रसन्न करने के लिये वहीं–उनके बीच में ही अन्तर्धान हो गये ॥४८॥

इति उन्तीसवाँ अध्याय समाप्त ॥ २९ ॥

* * *

अथ त्रिशोऽध्याय:

श्लोकाः	अनु.	बसं.	वंश.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४५	३८	४	१	२	१	१८२४	६	२८	१८५८	५८	२

श्रीशुक उवाच

अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः । अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥ १ ॥

कर्दमक्षमा

अन्वयः—भगवति, सहसा, एव, अन्तर्हिते, तम्, अचक्षाणाः, व्रजाङ्गनाः, यूथपम्, अचक्षाणाः, करिण्यः, इव, अतप्यन् ॥ १ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्रिंशे विरहसंतप्तगोपीभिः कृष्णमार्गणम् । उन्मत्तवन्न नियतं भ्रमंतीभिर्वनेवने ॥ १ ॥

अचक्षाणा अपश्यंत्यः ॥ १ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृष्णस्य मार्गणमन्वेषणम् । तच्च नियतं यथावन्न, कुतः—उन्मत्तवत् विरहाकुलतयोन्मत्ता इव संजाता इति (१) । हरेरेव योगैश्वर्यं स्वाभाविकं नान्यस्येति ज्ञापनाय गोपीनां भक्त्यतिशयमाह—श्रीशुक इति । तम् श्रीकृष्णम् । करिण्यः इभ्यः 'करेणुरिभ्यां नेभे स्त्री' इत्यमरः । यूथपम् गजेन्द्रम् ॥ त्रिंशे तु विरहोन्मत्ताः कृष्णं पृष्ट्वा नगान् स्त्रियः । तल्लीलामनुचक्रुस्ताः संभुज्य स च तां जहौ ॥ अचक्षाणाः अपश्यंत्यः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदन्तर्धानकथनेन श्रीबादरायणेरप्यार्त्तिभरोदयात् कथाविच्छेदेनाध्यायापातः । तदेवं जातदुःखत्वेऽपि तासामेकां सर्वतः परमां यामादाय श्रीभगवानन्तर्हितः तस्याः सौभाग्यं क्षणादनुसन्धाय धैर्यमवलम्बमान आह । अन्तरिति । सहसैवान्तर्हित इति । अन्तर्धानस्य प्रकाराद्यतर्कणात् । अतर्किते तु सहसा इत्यमरः अयं तापाधिक्ये हेतुरूह्यः । व्रजस्याङ्गना इति तासां तदेकप्रियत्वेन विरहतापस्यौचित्यमाधिक्यञ्चाभिप्रेतम् । यूथपं मत्तगजेन्द्रं करिण्य इवेति तदेकालम्बनत्वेन तासां तद्विच्छेदात्तापाधिक्ये दृष्टान्तः ॥ १ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तदन्तर्द्धानकथनेन श्रीबादरायणेरप्यार्त्तिभवोदयात् कथाविच्छेदेन मध्येऽध्यायापातः । श्रीयुक्तः शुक उवाचेति श्रीभगवदन्तर्द्धानेन तस्यापि शोकोदयाच्छुकगदव्यक्तमधुरोक्तेः, एवमग्रेऽप्युह्यम् । क्षणात् स्वस्थः सन् विलपन्निवाह—अन्तरिति । सहसैवान्तर्हित इति, अन्तर्द्धानस्य प्रकाराद्यतर्कणात् 'अतर्किते तु सहसा' इत्यमेव । अयं तापाधिक्येऽपि हेतुरुह्यः । व्रजस्याङ्गना इति तासां तदेकप्रियत्वेन विरतापस्यौचित्यमाधिक्यं चाभिप्रेतम् । यूथपं मत्तगजेन्द्रं करिण्य इवेति 'रत्यां विदग्धो हि गजः' इत्यादिवचनानुसारेण तदेकावलम्बेनत्वेन वा तासां तद्विच्छेदात्तापाधिक्ये दृष्टान्तः ॥ १ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अचक्षाणा अदर्शनेन प्रतिदिशमीक्षमाणाः ॥ १–२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथान्तर्हितभगवद्दर्शनजतापतप्तानां भगवतो गत्यनुरागस्मितविभ्रमेक्षितालापविहारविभ्रमापहृतचित्तानामुन्मत्तायितानां च गोपीनां तच्चेष्टानुकरणं तावच्चेतनाचेतनाविभागेन प्रश्नपूर्वकमन्वेषणप्रकारमुपलक्षणतस्त्वन्तरासक्त्यध्यवसायप्रकारं स्त्र्यन्तरस्यापि तद्वन्मदमानप्रशमनार्थमन्तर्धानं तया सह पुनरन्वेषणप्रकारं चाह त्रिंशेन । अन्तर्हित इति । भगवत्यन्तर्हिते सति तमवीक्षमाणाः यूथपमपश्यन्त्यः करिण्य इव सहसाविमर्शेनैवान्वतप्यन् ॥ १ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हरेरेव योगैश्वर्यमौत्पत्तिकं नान्यस्येति ज्ञापनभावेन गोपस्त्रीणां श्रीकृष्णे भक्त्यतिशयं कथयत्यस्मिन्नध्याये । तत्र गोपीनां सन्तापादिप्रकारं प्रवक्ति शुकः । अन्तर्हित इति । यूथपं गजेन्द्रम् ।। १ ।।

श्रीमज्जीवगोस्वामिकृतोः बृहत्क्रमसन्दर्भः

तदनन्तरं यदभूत्तदाह—अन्तर्हिते इत्यादि । अचक्षाणा अपश्यन्त्यः सहसैवातप्यन्, सन्तापं चक्रुः ।। १ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्रिंशे तु विरहोन्मत्ताः कृष्णं पृष्ट्वा नगान् स्त्रियः । तल्लीलामनुचक्रुस्ताः सम्मुज्य स च तां जहौ ।।

अचक्षाणाः अपश्यन्त्यः ।। १ ।।

रसिकाह्लादिनी-टीका

यद्यपि श्रीकृष्णान्तर्ध्यानतप्तानां गोपीनां तापेन श्रीशुकोपि संतप्तस्तथापि तन्मंडलस्थं श्रीकृष्णं तत्प्राणरक्षां कुर्वन्तं जानन् मनः समाहितं कृत्वा तद्ध्यानानन्तरजातां लीलां कथयितुमाह—उपेक्षया स्वाधीनतां संपादयितुं किंचिदप्यकथयित्वा सहसंवाकस्मादन्तर्हिते, तासामन्तर्हितं यथा तथा चक्षुरविषयं प्राप्ते, भगवति रसैश्वर्यपूर्णे विलासस्य पूर्णतासिध्यर्थं तथा कृतवति सति व्रजांगना इति पदेन तासां तदेकजीवनत्वेन विरहतापाधिक्यं सूचितम् । कीदृश्यः संमाननकर्त्तारं आत्मनो जीवानुभूतं अचक्षाणा अपश्यंत्तदेकालम्बनत्वेन तद्विरहे तासां तापाधिक्येन दृष्टान्तः यूथपं मत्तगजेन्द्रमपश्यत्य करिण्यो यथा तथा भवन्ति तथा ता अतप्यत् । अयमभिप्रायः रतिं गज एव जानाति यतः स्पर्शमात्रेण बद्धा भवति, करिण्योऽपि स्पर्शसुखं जानाति । अत एवान्योन्यादर्शने तापाधिक्यमिति एतासां रत्यात्मकस्तापो नित्यसिद्ध एव श्रीकृष्णदर्शनालिंगनालापैरानन्दरूपो भवति । स एवं विप्रलम्भे दुःखत्वेन प्रतीतो भवति न तु तथा शृंगारस्योभयरूपत्वात् ।। १ ।।

विशुद्धरसदीपिका

एवं च प्रागेव तदन्तर्द्धानकथनेन श्रीवादरायणेरप्यार्त्तिभरोदयात्कथाविच्छेदेनाध्यायापातः तदनन्तरं च सर्वतः परमां परमरमां यामादायान्तर्तिहस्तस्या निजस्वामिन्याः सौभाग्योत्कर्षानुसन्धानहर्षितस्तासां तासां चेष्टितादिभिस्तदेव दर्शयन् श्रीशुक इव लीलागानेन तावपि हर्षयन् श्रीशुक उवाच । अन्तरिति । सहसैवान्तर्हित इत्यन्वयः तत्प्रकाराद्यतर्कणात्सहसेति अयं तापाधिक्ये हेतुः यतो व्रजाङ्गनाः तदेकजीवनादित्वेन प्रसिद्धाः ननु प्रीतेरन्योऽन्यनिष्ठत्वात्तस्य कथं न तापो जात इत्यत आह । भगवतीति। भगो भाग्यं तच्चास्य श्रीराधैव तद्वति नित्ययोगे मतुप्तप्सहित इत्यर्थः । तस्य तापाभावे हेतुरयम् अन्तर्धानमप्यन्ततः सुखनिधानमेव भविष्यतीत्यर्थः । ननु कान्तभावास्तप्यन्तु नाम सख्यस्तु सुखमेवानुभवेयुरिति चेत्सत्यं किन्तु अचक्षाणाः अपश्यन्त्य इत्यर्थः निजप्राणेश्वर्य्योः सौभाग्योत्कर्षस्य परोक्षत्वात्तास्वपि सन्तापः सम्भवेदेवेति भावः । एवं च तदेकालम्बनत्वेन तासां तासां च तापाधिक्य दृष्टान्तः । करिण्य इव पूथपमिति । तत्र पूर्वासां परमप्रेष्ठतमकान्तस्पर्शस्यालाभेनान्यासां च यूथपतिक्रीडनादिदर्शनालाभेनेति यथायथमूह्यं सजातीयैः कुलं यूथमिति कोशात्सजातीयत्वेन प्राणसखीत्वमेव श्लेषेण निर्दिष्टमिति दिक् ।। १ ।।

श्रीरामनारायणकृता भावभावविभाविका

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः । यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ।।
द्वितीये कृष्णचेतोभिर्विह्वलोन्मत्तबुद्धिभिः । वर्णितं प्रियचेष्टाभिर्वनेषु प्रियमार्गणम ।।

प्रियान्तर्धाने तत्प्रेयसीनां खेदमाह भगवान् शुकः । अन्तर्हित इति । अत्र श्लेषेणान्तर्हिते भगवति अन्तर्हिते सति व्रजाङ्गनास्तमचक्षाणा यूथपमचक्षाणाः करिण्य इव सहसैवातप्यन्नित्यन्वयः तत्रान्तः स्वमनसि हितं स्नेहो यस्मिन् यद्वान्तर्मनसि स्वविषयकं हितं यस्य यद्वान्तर्हृदयात् हितो विच्छेदकमदापहरणेन सर्वथोपकारकः तस्मिन्नन्तर्हिते भगवति अन्तर्हितेऽन्तर्धानङ्गते तत्र भगवति अन्तर्हिते इत्यत्रायं ध्वनिः नहि भगवतो विभुत्वेन कुत्रापि गमनेनादर्शनं मयापरोक्षं भजता तिरोहित मासूयितुमार्हथ तत्प्रियं प्रिया इति वक्ष्यमाणभगवद्वचनाच्च किन्तु स्वेच्छया स्वभगव्यक्तस्य स्वेच्छयैव तिरोधानमिति तथा च तस्मिन्नन्तर्हिते तमचक्षाणाः सहसैवातप्यन् तमानन्दघनं विना बहिरन्तर्व्याप्तविरहानलतप्तमनसः पूर्णचन्द्रमपि द्वादशरूपतां विहायैकतापन्नप्रलयार्कमिव किं शुकादीनि कुसुमानि दहनमिव स्वारुणवसनानि तप्तानि शुष्कस्वतनुव्याप्तदावज्वालवन्मन्यमानास्तप्ता अभूवन् युक्तं चैतत् एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः सर्वेषां चन्द्रादीनां यदानन्दमात्रयाल्हादकत्वं तदन्तर्धाने जीवनस्याप्यसम्भाव्यत्वात् किमु वाक्यं तापाधिक्यस्य किञ्च "चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमुत प्राणस्य प्राणं मनसो ये मनो विदुरि"त्यादि श्रुतेः प्राणवियोगे एव जीवनाभावदर्शनात्किमुवाच्यं प्राणप्राणविरहे ।। १ ।।

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

त्रिंशे विरहसन्तप्तचेतसां गोपयोषिताम् । तन्मयत्वमुखप्रश्नमुखलीला निरूप्यते ॥

अथ भगवदन्तर्धानानन्तरं जातां तासां दशां वर्णयिष्यन्नादा रसासक्तचित्तानां भगवत्सखीनामकस्मात्प्रेष्ठादर्शनजन्यं महान्तं तापमाह । अन्तर्हित इति । भगवति पूर्णाखिलैश्वर्य्यसंपन्ने परमावधिभूते सहसैवाकस्मादेवान्तर्हितेऽदर्शनङ्गते सहसैव तं भगवन्तमचक्षाणा अपश्यन्त्यः सहसैवान्तरतप्यन्त निःसीमसन्तापवत्यो जाताः रङ्कः सहसा प्राप्त सार्वभौमश्रियं सहसैवाचक्षाणो यथा सन्तप्यते तद्वत् यतो व्रजाङ्गना बालभावमारभ्य तस्मिन्नेवासक्तस्वान्ता इति भावः यद्वा अन्तर्हिते अन्तःकरण एव तासां प्रविष्टे सति बहिस्तं भगवन्तमचक्षाणाः बहिर्मुखत्वादन्तश्चाचक्षाणा अतप्यन् यतो व्रजाङ्गनाः अन्तरविचारकुशला इत्यर्थः । न च तासाङ्कामात्मात्वं स्थितं कामात्ननां दर्शनादिना शान्त्युपलम्भात् अतस्तासां परमप्रेमवतीनां दर्शनस्पर्शनादिकमेव मुख्यमिति द्योतयितुं दृष्टान्तमाह । करिण्यः हस्तिन्यः यूथपं महामत्तगजमचक्षाणा यथा तप्यन्ति तद्वत् करिणीणां यथा गजदर्शनाद्यभावे क्लेशो भवति तथा नान्यासामित्यतस्ता एव दृष्टान्तीकृताः निवृत्तिपक्षे अथ विजानतामविज्ञातत्वे तदपेक्षया अन्तर्हिते भगवति सहसैव तं परमात्मानमचक्षाणाः साक्षात्प्रतिपादयितुमशक्ताः स्वजन्यवृत्तिप्रतिफलितचैतन्येन विषयीकर्तुमशक्ताश्च व्रजाङ्गानाः श्रुतयः अतप्यन्त तप्ता बभूवुः ॥ १ ॥

रास–रहस्यम्

र० टी—एवं पूर्वोक्तप्रकारेण सहसैव अतर्कितेनैव भगवति आत्मनि अन्तर्हिते तिरोहिते सति "विज्ञातमविजानतामि" ति । श्रुत्या विज्ञाताभिमानिन्यः आत्माभिमुखीवृत्तयः तमात्मानं अचक्षाणाः स्वजन्यवृत्तिफलितचैतन्येन साक्षात् प्रतिपादयितुमशक्ताः सत्यः यूथपं गजराजमपश्यन्त्यः करिण्यः हस्तिन्य यथा तप्यन्ते तथा अतप्यन् तप्ता बभूवुः ॥ १ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

त्रिंशे भगद्वियुक्तानां गोपिकानां चेष्टितं वर्णयति । अन्तर्हिते इति अचक्षाणाः अपश्यन्तः ॥ १ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ कान्तारन्तः कान्तान्तर्धानानन्तरमनतमार्गणं कामिनीनां तथा साम्भक्त्युद्रिक्ततां च वर्णयत्यस्मिध्याये । तत्रादौ हरिमनिरीक्ष्य हरिणाक्षीणामनुतापं तापसो वक्तीति वक्ति ॥ श्रीशुक इति । भगवति सहसाऽनालोच्यैवान्तर्हितेऽदृश्ये सति वनरिण्य इभ्यो यूथपं गजमचक्षाणा अपश्यत्न्यो यथा तप्ता भविन्त तथा तमचक्षाणा अतप्यन् । तत्रापि नैकलो गच्छेत्किन्तु कन्तुबाधया कान्तामेकामेकान्ते निनायैव नायकः सैका सहसा सहसैव वयं त्वेवमिति मनसि चक्रुरिति तात्पर्यमवधेयम् । अन्तरङ्गे रङ्गेशेन सह गतामङ्गनां सम्बोध्य व्रज तवापि दशेदृशी भवेदेव देवस्य चाञ्चल्यादित्यप्यङ्गनाः कटाक्षयामासुरिति च ॥ १ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सप्तविंशे तिरोधानाल्लीलान्वेषणतत्पराः ॥ रसमन्तर्गतं चक्रर्गोपिका इति रूप्यते ॥

पूर्वाध्यायान्ते भगवतस्तिराभाव उक्तः ततस्तदनन्तरं प्रथमतः तासां रसासक्तचित्तानामापाततो महांस्तापो जात इत्याह । अन्तर्हिते भगवतीति । भगवति अन्तः प्रविष्टे षड्गुणैश्वर्यसहिते यावदन्तरनुसंधानं न कृतवत्यः तावत्सहसैव अकस्मादतप्यन् अन्तर्विचाराभावे हेतुः । व्रजाङ्गना इति । तापे हेतुः तमचक्षाणा इति तापः सहज एव स्थितः कामात्मा तद्दर्शनस्पर्शनादिभिः शान्तो भवति यदा पुनः पूर्वसिद्धं बहिर्दर्शनं न जानं तत्ताप उचित एव तासां स्पर्श एव मुख्य इति ज्ञापयितुं दृष्टान्तमाह । करिण्य इवेति ! यूथपो महामत्तगजः रतिं गज एव जानातीति वात्स्यायनः रत्यां विमर्दे गज इति विवृतश्च सन्ति च सिंहाः तथात्र कालः अतः करिणीनां यूथपादर्शने महानेव क्लेशः ॥ १ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । भगवत्यंतर्हिते सति सहसैवाकस्मात् व्रजांगनास्तं कृष्णमचक्षाणा अपश्यंत्योऽतप्यन् यूथपं गजेंद्रं करिण्य इव ॥ १ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सप्तविंशाध्यायायार्थनिरूपणाय पूर्वाध्यायोक्तान्तर्धानतात्पर्यवर्णने, **पुष्टो यथान्तरित्यादि** । अत्रायं भावः । संगमे ह्यग्रिमाग्रिमरसार्थं नवो नवः प्रयत्नो भाव्यते, न तु पूर्वानुभूतो रसः पोष्यते । सर्वेषां तेषां स्वतन्त्रत्वात् । संयोगे यथा यथा रसानुभवाधिक्यं, तथा तथा विप्रयोगे दुःखाधिक्यमित्यनुभवसिद्धम् । एवं भावे संस्कारमात्रशेषस्य पूर्वरसस्योपमर्दकाग्रिमसंगमरसाभावेनान्तरेवातिपुष्टो भवति तथा, यथा पूर्वानुभूतलीलास्वरूपात्मका देहेन्द्रियप्राणान्तःकरणात्मानो भवन्ति । किमुत ।

अत एवासावहमित्यादिरूपं ज्ञानं तथैव क्रिया च भवतः। एतदनन्तरं जाते संगमे पूर्वसंगमादधिकरसत्वस्फूर्तिरप्यत एव। अन्यथा संगमत्वाविशेषेण तदनुपपत्तेरिति दिक्। यद्यपि संगमोत्तरकालीनविप्रयोगमात्रं एवैतादृशत्वं सम्भवतीति नान्तःप्रवेशापेक्षा तथाप्येतद्विप्रयोगस्यातिविषमत्वेन क्षणमात्रेणैवान्यथाकरण एतद्रसदानं नोपपद्यत इति रसात्मकत्वात्स्वरूपस्य स्वयमेव प्रविष्ट इत्याहुस्**तदर्थं भगवानि**ति। **चत्वारोऽत्रे**ति प्रियप्राप्तिसाधनानुष्ठानरूपं तद्रसस्वभावप्राप्तं गुणगानं चतुर्थोर्थः। **रसासक्तिरि**ति। रसासक्त्यादित्रयमस्मिन्नध्याय उच्यते। एता हि रसासक्त्यैवान्वेषणपराः, अन्यथा गृहानेव गच्छेयुः। एवं सति यदैव बहिः संवेदनं तदैवान्वेषणमिति तदुक्त्या रसासक्तिरेवोक्ता भवतीति तथा। अग्रे स्पष्टम्। उक्तार्थत्रयनिरूपणे प्रकारविशेषमाहुः **उद्देशत** इत्यादि। आद्यैस्त्रिभिस्त्रयाणामुद्देशः कृतः। अन्वेषणं रसासक्तेर्लक्षणमसाधारणो धर्मोनुमापक इति यावत्। लीलाया एतदन्तःस्थित्यनुमापक एतासु तदाविर्भावः। गर्वाभावज्ञापकं सपत्नी भाग्याभिनन्दनादिकम्। अन्वेषणफलं च पददर्शनम्। लीलावेशफलं प्रियाधीनत्वस्वानधीनत्वदर्शनेपि प्रिये दोषारोपाभावपूर्वको 'रेमे तया चे'त्यादिनोक्तो भावः। गर्वाभावफलमितरविस्मृतिपूर्वकं तत्प्राप्त्यर्थैकः प्रयत्नः ॥ ० ॥

करिण्य इवेत्यत्र, **तथात्र काल** इति। अवतारसम्पूर्तिकाल इत्यर्थः ॥ १ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

सप्तविंशाध्याये स्वानन्देति का० २६७¼–२७०¼। पूर्वाध्यायोक्तान्तर्धानतात्पर्यमाहुः **स्वानन्दस्थापनार्थाये**त्यादिसार्धेन, **भगवता** कामलीला **स्वानन्दस्थापनार्थाय** कृता, तत्र बाह्यो बाह्यप्रकारेण **जनितः स** आनन्दो यथान्तः **पुष्टः सन्** देहेन्द्रियादिषु **निविशेत् तदर्थं लीलया सहितो भगवान् तास्वविशत्** प्रविष्टवान्, **चत्वारोत्र निरूप्यार्था** इति 'चतुर्थोर्थो गुणगान'मितिविवृतं टिप्पण्यां, उक्तार्थत्रयनिरूपणे प्रकारविशेषमाहुः **उद्देशत** इत्यादि, आद्यैस्त्रिभिः श्लोकैस्त्रयाणामुद्देशः कृतः, आशक्तेर्लक्षणमन्वेषणं हरेः क्रिया भगवतो लीला, सा च "कस्याश्चित् पूतनायन्त्या" इत्यादिना लक्षणतो निरूपिता, गर्वाभावलक्षणं च "अनयाराधितो नून"मित्यनेनोक्तं सपत्नीभाग्याभिनन्दनं, अन्वेषणफलं च "व्यचक्षत वनोद्देशे पदानि परमात्मन"इत्यत्रोक्तं पददर्शनं, लीलावेशफलं च प्रियाधीनत्वदर्शनेपि प्रिये दोषारोपाभावपूर्वको "रेमे तया चात्मरत" इत्यादिनोक्तो भावः, गर्वाभावफलमितरविस्मृतिपूर्वकं तत्प्राप्त्यर्थैकप्रयत्नः, स च "ततोविशन् वनं चन्द्रज्योत्स्ना यावद् विभाव्यते" इत्यादिनोक्तः, **गुणगानं तु** विशेषतोग्रिमाध्याये उक्तं, अत्राध्यायेपि "पुनः पुलिनमाविश्ये"त्यनेन सामान्यत उक्तमिति कारिकायां चकारेण सूचितं, एवं आसक्तिहरिलीलागर्वाभावगुणगानात्मकाश्चत्वारोर्था अत्र तिरोधानलीलायां **निरूप्या** इत्युक्तं, **लीलान्वेषणतत्परा** इति लीलायामन्वेषणे च तत्परा इत्यर्थः, "रसमन्तर्गतं चक्रु"रिति बहिस्तिरोधानादित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्रिंशे विरहतप्ताभिर्गोपीभिर्गहने वने। अन्तर्हितस्य कृष्णस्य मार्गणं विनिरूप्यते ॥ १ ॥

एवं सहसैव अकस्मादेव झटिति भगवति कृष्णेऽन्तर्हिते सति तमचक्षाणाः अपश्यन्त्यो व्रजाङ्गना अतप्यन् इत्यन्वयः। तत्र दृष्टान्तमाह—यूथपं गजराजमपश्यन्त्यः करिण्यो यथा तप्यन्ति तथेति ॥ १ ॥

अन्वितार्थप्रकाशिका

कृष्णस्य मार्गणं त्रिंशे गोपीनामुन्मदिष्णुना ॥ कृष्णलीलानुकाराद्यैस्तत्र श्लोकाः कृताब्धयः (४४) ॥
उवाचेत्येक (१) मर्द्धाढ्या गजवेदा (४८॥) अनुष्टुभः ॥ ३० ॥

अन्तर्हिते इति ॥ एवं सहसैव अकस्मादेव झटिति भगवति कृष्णेऽन्तर्हिते सति तमचक्षाणाः अपश्यन्त्यो व्रजाङ्गनाः यूथपं गजराजमपश्यन्त्यः करिण्यो यथा तप्यन्ते तथा अतप्यन् ॥ १ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं त्रिंशेऽध्याये प्रतिवनं विरहतप्तगोपीकृतं भगवन्मार्गणं वर्ण्यते। अंतर्हिते अंतर्धानं प्राप्तो अचक्षाणः अविलोकयंत्यः यूथपं करिणीयूथपतिं नागं हस्तिन्य इव ॥ १ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विरहात्तप्तगोपीभिस्त्रिंश श्रीकृष्णमार्गणम्। वने वने भ्रमन्तीभिरुन्मत्तवदुदीरितम् ॥ १ ॥

अथान्तर्हितभगवद्दर्शनजतप्तानां भगवद्गत्यनुरागस्मितविभ्रमेक्षितालापविहारभ्रमापहृतचित्तानामुन्मत्तायितानां गोपीनां तच्चेष्टानुकरणं तावच्चेतनाचेतनाविभागेन प्रश्नपूर्वकमन्वेषणप्रकारमुपलक्षणतः स्त्र्यन्तरासक्त्यध्यवसायप्रकारं स्त्र्यन्तरस्यापि तद्वत्संजातमदमानप्रशमनाय तत्सकाशादप्यन्तर्धाचरण तेन स्त्र्यन्तरेण सह पुनरन्वेषणप्रकारं चाह ॥ अन्तर्हित इति ॥ भगवति

श्रीकृष्णे, अन्तर्हिते अन्तर्धानं प्राप्ते सति, तं अचक्षाणाः अवीक्ष्यमाणाः, व्रजाङ्गना गोप्यः, यूथपं यूथाधिनाथं, अचक्षाणाः करिण्यो हस्तिन्य इव, सहसाऽविमर्शेनैव, अतप्यन् ॥ १ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सर्वात्मकोऽपि तद्भिन्नो मूर्तिमानप्यदृष्टिगः । अक्रीडोऽप्यद्भुतक्रीडः सोऽस्तु नः शरणं प्रभुः ॥ १ ॥
भेदाभेदोपास्यबुद्धिमालम्ब्याखिलवस्तुषु । वृत्तीनां या स्थितिः सोपासना सात्र निगद्यते ॥ २ ॥
संयोगेऽहंकृतिर्नोपासनायामिति तद्वरा । उपासनेति सारब्धेत्यपोह्याऽध्यायसंगतिः ॥ ३ ॥

अन्तर्हिते इति : १०.३०.१.

तदा तासां पूर्वाभ्यधिकशतभागः समभवद् व्रजस्त्रीणां तापः प्रियविरहदावानलभवः ।
अतस्तत्र भ्रान्तिभ्रमणमुचितं यत्स्फुटमिहाऽप्यलब्धाल्लधस्य च्युतिरतनुखेदाय भवति ॥ ४ ॥
लोकेषु लभ्यमविशेषमपीह यस्तुयात्तं यदि क्वचिदपि क्षणमात्रमेव ।
संभ्रान्तधीर्भवति तेन पुमान् किमत्र चित्रं स्त्रियः प्रभुकृते विपिने तथाऽऽसन् ॥ ५ ॥
अन्तर्हितस्वरूपः प्रकाशतेऽन्तर्हितं सदा कुर्वत् । नैवंविषया यावद्यद्धीस्तावत्स्फुटाऽस्य तापजनिः ॥ ६ ॥

कृष्णप्रिया

निरोधलीला दशमस्कन्ध की संज्ञा है। यह ३०वाँ अध्याय तामस प्रकरण के चतुर्थ फल प्रकरण का दूसरा अध्याय है। इस अध्याय में वीर्य धर्म का निरूपण किया गया है। पूर्वाध्याय में भगवत्तिरोधान का वर्णन आया। अब इस अध्याय में भगवद् दर्शन न होने से संतप्त व्रजाङ्गनाओं के उत्कट संताप का वर्णन शुकाचार्यजी करते हैं। भगवान के अन्तर्धान होने का यह तात्पर्य है कि प्रथम भगवान् श्रीकृष्णचन्द्रजी ने गोपीजन में निजानन्द की स्थापना के लिए गोपीजनों के साथ रासरमण किया। इस लीला से यह आनन्द बाहर प्रकट हुआ यह देखकर भगवान इस रसको अन्दर पुष्ट करने के लिए लीला सहित गोपीजनों के अन्तःकरण में प्रविष्ट हुए। इस अन्तःप्रवेश का नाम भगवान का तिरोधान है।

श्री शुकदेवजी कहते हैं कि राजन्! यकायक भगवान के अन्तर्धान होने से व्रजाङ्गनाएँ वैसे ताप को प्राप्त हुई जैसे हस्तनियाँ यूथनाथ गजराज के विना संतप्त होती है ॥ १ ॥

गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः ।
आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥ २ ॥

कर्दमक्षमा

अन्वयः—रमापतेः, गतिअनुरागस्मितविभ्रमईक्षितैः, मनोरमआलापविहारविभ्रमैः, आक्षिप्तचित्ताः, तदात्मिकाः, (ताः गोपिकाः) (कृष्णस्य) ताः, ताः विचेष्टाः, जगृहुः ॥ २ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गत्या चानुरागस्मिताभ्यां विभ्रमेक्षितानि सविलासनिरीक्षणानि तैश्च मनोरमा आलापाश्च विहारा क्रीडाश्च विभ्रमा अन्ये च विलासभेदास्तैश्च रमापतेर्गत्यादिभिरेतैराक्षिप्तान्याकृष्टानि चित्तानि यासां ता अतस्तस्मिन्नेवात्मा यासां तास्तस्य विविधाश्चेष्टा जगृहुस्तदनुकरणेनाक्रीडन् ॥ २ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गत्या बालसिंहखेलनगमनेन। अनुरागस्मिताभ्याम् स्नेहमंदहासाभ्याम्। 'विभ्रमः—सेवायां संशये भावे' इति हैमः। "चित्तवृत्त्यनवस्थानं शृंगाराद्विभ्रमो मतः" इति हरिदीक्षितः। रमतेऽनयेति रमा राधा तस्याः पतेः राधासहायस्य। तास्ता इति द्विरुक्तिः संभ्रमात्। पूर्वं या या लीलाः कृतास्तास्ता इत्यर्थः। तच्छब्दस्य पूर्वपरामर्शित्वात्। तदनुकरणेन तत्तुल्यदेशादिकरणेन अनु पश्चात् पूर्वं दृष्ट्वा यत्ताद्रूप्येण क्रियते तदनुकरणम्। तद्वत्तन्नेत्यर्थः॥ ततस्तमितस्ततः कुंजेष्वन्विष्यन्तीनां तमप्राप्तवतीनां प्रतिक्षणविवर्द्धमानविरहपीडया यः खलून्मादः संचारी प्राभूत्तस्य प्राकट्यप्रकारं वर्णयति—गत्येति द्वाभ्याम्। रमापतेः सर्वसौंदर्यसंपत्तिस्वामिनः कृष्णस्य गत्या स्वाभाविकेन पदविन्यासेन, प्रथमं स्वांतिकागमनम्, आगतानां यान्यनुरागयुक्तानि स्मितानि च, विशिष्टो भ्रमो भ्रमणं तारकायां यत्र तथाभूतानीक्षितानि च तैः। ततश्च मनोरम आलापः अयि स्थलकमलिनि अतितृष्णार्नाय मधुपाय स्वमकरंदं दास्यसि न वा, भो भ्रमर पद्मिन्याः पतिः सूर्य एव न तु भ्रमरस्तत्कथं त्वां स्वीयं मधु पाययिष्यति।

भोः पद्मिनि पद्मिनीनां भवतीनां स्वभाव एवायं यत्ताः स्वपतिं सूर्यं स्वीयं मधु नैव पाययन्ति किंतूपपतिं भ्रमरमेवेति। ततस्तदालापेनैव पराजितया विहसन्त्या तया सहाधरमधुपादिविहारः। एवं वा 'आं' जानामि मत्समीपस्थनीपतरुतलं गच्छंतीं त्वां महादर्पकः सर्पोऽदशत्, तद्विषं ते वक्षस्थलपर्यंतमुदसर्पत्, तदपि त्वं कुलवधूत्वादेव मां तदुपशमनं न पृच्छसि, तदहं दयालुत्वात्स्वयमेव त्वदंतिकमेत्य तद्विषोपशमकं मंत्रं पठन्करतलाभ्यां त्वदंगंसंघट्टयामि। भो भो जांगलिक न मां सर्पोऽदशत्, यां सर्पो दशति स्म तद्गात्रमेव करतलाभ्यां संघट्टय। भो कुलांगने त्वदीयगद्गदस्वरादेव विषज्वलाकुलत्वं तव ज्ञायते इति ज्ञात्वापि यद्यप्यहं त्वामुपेक्षे तदा मां स्त्रीवधदोषो लगिष्यतीत्यस्तद्विषमुपशमयिष्याम्येवेत्युक्त्वा तस्या वक्षःस्थले नखरार्पणादिकं चकार। ततो विहारः संप्रयोगः, ततो विभ्रमः कामोन्मत्तता। तदुक्तम्—"चित्तवृत्त्यनवस्थानं शृंगाराद्विभ्रमो मतः" इति। तैर्विरहावस्थायामतिशयेन स्मृत्यारूढैराक्षिप्तानि—अरे किमिह कुरुध्वे बहिर्भूय प्राणप्रेष्ठमन्वेष्टुं गच्छतेति तिरस्कृत्य देहतो निःसारितानीव स्वचित्तानि यामिस्ताः। यतः प्रमदाः प्रकर्षेणमाद्यंति ताः। ततश्चोन्मादं प्राप्य तदात्मिकास्तस्यैवात्मानो मनोबुद्ध्यादयो यासां ताः। अतस्तास्तास्तदीया विविधाश्चेष्टा जगृहुः। बुद्धिपूर्वकग्रहणादनुचक्रुरित्यर्थः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तापमेवाभिव्यञ्जयांते। गत्येत्यादिना पद्याधिकाध्यायद्वयेन। गतिः सामान्या अनुरागः स्वविषयकः कान्तयोग्यो भावः स्मितं विभ्रमेक्षितानि च तैः। विभ्रमोऽत्र भ्रूप्रभृतीनां तत्तन्मधुरचेष्टाः विहारः शृङ्गारचेष्टा उत्तरो विभ्रमः शृङ्गारभावविशेषः। तथाचोक्तं चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मत इति। तत्रानुरागाचित्तवृत्त्यनवस्थाने मानसे गतिस्मितविभ्रमयुक्तेक्षितविहाराः कायिकाः। आलापो वाचिक इति ज्ञेयम्। एतदुपलक्षणत्वेनान्येऽपि भावा ज्ञेयाः। अत्र च गतेः सामान्यत्वेन पृथगुक्तिः। स्मितादिकयोरनुरागारम्भमात्रजायामानत्वेन तत्समुदितोक्तिः आलापविहारयोर्विभ्रमजन्मनैव जायमानत्वेन तत्समुदितेति। तैर्गत्यादिभिस्ताभिः समेताभिरित्यादिवर्णितैः पूर्वाचरितैराक्षिप्तचित्ताः ततश्च तदात्मिकास्तन्मय्यः सत्यः प्रमादास्तास्ता बाहुप्रसारेत्यादिभिः पूर्वोक्ताः सर्वा विविधा चेष्टा जगृहुप्राप्ताः तत्र प्रमदाः योगिकार्यपुरष्कारेण जातित एव प्रकृष्टमदयुक्ताः किं पुनस्ततप्रेमवत्यस्ता इत्यर्थः। रमायाः सर्वरूपगुणमाधुर्यैश्वर्यसम्पदधिष्ठातृशक्तेः पत्युरध्यक्षस्य इति सर्वातिशायिता सूचिता। यद्वा। रमा श्रीराधा इति पूर्ववत्। इति वक्ष्यमाणतत्साहित्यं सूचितम्। तास्ताः बाहुप्रसारेत्यादिभिः पूर्वोक्ताः सर्वा विविधचेष्टा जगृहुः प्राप्ताः ॥ २ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तापमेवाभिव्यञ्जयति—गत्येत्यादिना पद्याधिकाध्यायद्वयेन। गत्येति कायिकी चेष्टा सर्व्वोपलक्ष्यते, अनुरागेण स्मितं विभ्रमेक्षितानि च तैर्मानसी, तेषामनुरागकृतत्वात्, मनोरमैरालापादिभिः, मनोरमालापेन वाचिकी, मनोरमविहारविभ्रमैस्त्रिविधैव तत्तत्समुचितत्वात्, विहारो गोवर्द्धनोद्धरणादिलीला वेणुवादनादिर्वा, विभ्रमः शृङ्गारचेष्टा, तथा चोक्तम् —'चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः' इति। एषां यथोत्तरं श्रेष्ठ्यम्। तैः पूर्व्वाचरितैराक्षिप्तचित्ताः, ततश्च तदात्मिकास्तन्मय्यः सत्यः, तदात्मिकाश्च बभूवुरिति पृथग्वाक्यं वा; अनुकरणतन्मयत्वयोर्द्वयोरपि वक्ष्यमाणत्वात् प्रकृष्टो मदो यासां ता इति पूर्व्वोक्तप्रकृष्टमानाभिप्रायेण, यद्वा, प्रमदो हर्षः, आनन्दरूपा अपि परमार्त्ताः सत्य इति भावः। रमाया लक्ष्म्याः पत्युरिति परमवैदग्धी, तया च पत्यादीनामुत्तमतापि सूचिता, यद्वा, रमा श्रीराधेति पूर्व्ववदिति वक्ष्यमाणतत्साहित्यं सूचितम्, तास्ताः परमानिर्व्वचनीया इति तदनुकरणस्याशक्यत्वमुक्तम्, तथापि जगृहुः, यद्वा, पूर्व्वोक्ताः सर्व्वा विविधचेष्टाः, अयञ्च प्रेमविलासो नागरीणां स्वाभाविक एव, अतएव, 'प्रियानुकरणं लीला' इत्यलंकारशास्त्रे लीलेत्युच्यते। यद्वा, तास्ता विचेष्टाः कृष्णस्य तास्ता लीलाः, कर्त्र्यः प्रमदाः कर्म्मभूता जगृहुः। कथम्भूताः प्रमदाः ? तदात्मिकास्तच्चित्ताः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गत्येति। रमापतेर्गत्या अनुरागस्मिताभ्यां यानि विलासनिरीक्षणानि तैश्च मनोरमालापाश्च विहाराः क्रीडाश्च विभ्रमा अन्ये विलासाश्च तैराक्षिप्तान्याकृष्टानि चित्तानि यासां ता अत एव तदात्मिकाः तस्मिन्नेवात्य चित्तं यासां तास्तज्ज्ञानप्रचुरा इत्यर्थः अत एव भगवतस्तास्ता विविधाश्चेष्टा जगृहुरनुचक्रुः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गत्या बालसिंहखेलनगमनेन अनुरागेण स्नेहेन उदितानि स्मितानि तैः रञ्जितानि सम्पर्कं गतानीक्षितानि निरीक्षणानि अनुरागस्मितरञ्जितेक्षिता तैः मनोरमौ आलापविहारौ तयोर्विभ्रमैः शृङ्गारैः आक्षिप्तचित्ताः आकृष्टमनसः या या भगवता रचिता विशिष्टचेष्टास्तास्ता जगृहुः न्यरूरुपन् तस्तिन् कृष्णे आत्मा मनो यासां तास्तथा ग्रहणम् अनुकरणे यत्तदत्मिकाः तदाकारमिता इति पाठार्थौ सुष्ठुतामादधाते ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गत्येत्यादि प्रकरणम् । अत्र रमापतेः सर्वरूपगुणमाधुर्यैश्वर्यसम्पदधिष्ठातृशक्तेः पत्युरधोक्षजस्येत्यर्थः । अथवा तास्ता बाहुप्रसारेत्यादिभिः पूर्वोक्ताः तत्र तदात्मकत्वमभिव्यञ्जयति ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तद्दर्शनसमकालमेव सौभगमदोमानश्च शान्तः । तत्प्रकारमाह—गत्येत्यादिद्वाभ्याम् । रमापतेः श्रीकृष्णस्य गत्यादिभिराक्षिप्रचित्ताः सत्यः प्रमदास्तास्ता विचेष्टा रमापतेरेव तास्ता लीला जगृहुश्चेतसिदधुरित्यर्थः ता कीदृश्यः ? तस्मिन्नेव आत्मा मनो यासां तास्तदात्मिकाः, न तु तास्ता लीलास्तदात्मिकाः सत्यो जगृहुरनुचक्रुः । तथा सति (४ र्थ श्लो०) "गायन्त्य उच्चैः" इत्यादीन्यसङ्गतानि स्युः । किन्त्वेषामन्ते (१४ श० श्लो०) लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिका इत्यादिकमेव तादात्म्यम् ॥ २–३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

गत्येत्यादि । तास्ता विचेष्टा जगृहुरित्यादि । पश्चाद् दर्शयिष्ये, अन्यथा 'गायन्त्य उच्चैरमुमेवं संहताः' इत्यादि न लगति । अथवा, काश्चित् तदात्मिकाः सत्य एवञ्चक्रुः काश्चिद् ध्यायन्त्यो वनाद्वनं विचिक्युरित्यर्वः । 'असौ कृष्णोऽहमेव' इति न्यवेदिषुः, परस्परं न्यवेदयन्, तु शब्द एवार्थः । अन्यथा देहरक्षा न भवतीति भगवानेव तासां तथान्तः करणे प्रादुर्भूय तादात्म्यं सम्पादयामास, अए एवोक्तं तत्रैवान्तरधीयतेति । तत्रैव तास्वेव अन्नर्वर्त्ती बभूव । संहता एकीभूय वनाद् वनमन्या विचिक्युः, न केवलं विचिक्युः पप्रच्छुः, आकाशवत् शून्यमिव । पृच्छा तु बुद्धिपूर्विका न भवतीति भावः । वनस्पतीन् लक्ष्यीकृत्य अन्तर्बहिर्भूतेषु सन्तमन्तर्यामिणं पुरुषमिव श्रीकृष्णं पप्रच्छुः 'पृच्छेर्द्विकर्मकत्वात्' प्रधानकर्म श्रीकृष्णेऽध्याहार्यः ॥ २–९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततस्तमितस्ततः कुञ्जेष्वन्विष्यन्तीनां तमप्राप्तवतीनां प्रतीक्षणविवर्द्धमानविरहपीडया यः खलून्मादः सञ्चारी अभूत्तस्य प्रकटप्राकट्यप्रकार वर्णयति । गत्येति द्वाभ्याम् । रमापतेः सर्वसौन्दर्य्यसम्पत्तिस्वामिनः कृष्णस्य गत्या स्वाभाविकेन पादविन्यासेन प्रथमं स्वान्तिकागमनम् आगत्य यानि अनुरागयुक्तानि स्मितानि च विशष्टो भ्रमो भ्रमणं तारकाया यत्र तथाभूतानीक्षितानि च तैः ततश्च मनोरम आलापः अयि स्थलपद्मिनि ! अतितृष्णार्ताय मधुपाय स्वमकरन्दं दास्यसि न वा भो भ्रमर ! पद्मिन्याः पतिः सूर्य एव ननु भ्रमरस्तत्कथं त्वां स्वं स्वीयं मधु पाययिष्यति भोः पद्मिमि ! पद्मिनीनां भवतीनां स्वभाव एवायं यत्ताः स्वपतिं सूर्यं स्वीयं मधुनैव पाययन्ति किन्तूपपतिं भ्रमरमेवेति ततस्तदालापेनैव पराजितया विहसन्त्या तया सह अधरमधुपानादिविहारः एवं वा आञ्जानामि मत्समीपस्थनीपतरुतलं गच्छन्तीं त्वां महादर्पकः सर्पोऽदशत् तद्विषं ते वक्षःस्थलपर्य्यन्तमुदसर्पत् तदपि त्वं कुलवधुत्वादेव मां तदुपशमं न पृच्छसि तदहं दयालुत्वात् स्वयमेव त्वदन्तिकमेत्य तद्विषोपशमकं मन्त्रं पठन् करतलाभ्यां त्वदङ्ग संघट्टयामि भो भो जाङ्गलिक ! न मां सर्पोऽदशत् यां सर्पो दशति स्म तद्गात्रमेव करतलाभ्यां संघट्टय भो कुलाङ्गने ! त्वदीयगद्गदस्वरादेव विषज्वालाकुलत्वं तव ज्ञायते इति ज्ञात्वापि यद्यहं त्वामुपेक्षे तदा मां स्त्रीवधो लगिष्यतीत्यतस्त्वद्विषमुपशमयिष्याम्येवेत्युक्त्वा तस्या वक्षःस्थले नखरार्पणादिकं चकार ततो विहारः सम्प्रयोगः ततो विभ्रमः कामोन्मत्तता यदुक्तं "चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मत,, इति तैर्विरहावस्थायामतिशयेन स्मृत्या रूढैराक्षिप्तानि अरे किमिह कुरुध्वे बहिर्भूय प्राणप्रेष्ठमन्वेष्टुं गच्छतेति तिरस्कृत्य देहतो निःसारितानि स्वचित्तानि याभिस्ताः यतः प्रमदाः प्रकर्षेण माद्यन्तीति ताः ततश्चोन्मादं प्राप्य तदात्मिकास्तस्यैवात्मानो बुध्यादयो तासां ताः अतस्तास्तस्तदीया विविधाश्चेष्टा जगृहु बुद्धिपूर्वकग्रहणादीननुचक्रुरित्यर्थः ॥ २ ॥

रसिकाह्लादिनी–टीका

संयोगे स्वरूपमात्रानुभवः विप्रलम्भे यावल्लीलानुभव अत एव विप्रलम्भे यावल्लीलाक्रांतः कृष्णस्तासां मनसि प्रविश्यवानित्याह गत्येति ताः प्रमदाः श्रीकृष्णेसम्मानेन प्रकृष्टमदयुक्ताः, इदानीं तदुपेक्षिता तद् विरहे रमापतेस्तास्ता विचेष्टा पूतनाप्राणशोषणादिलीला जगृहुरनुकृतवत्यः, कीदृश्यः प्रमदाः श्रीकृष्णस्य गत्यादिभिराक्षिप्तचित्ताः पुनः कीदृश्यस्तदात्मिकास्तन्मय्यः यद्वा स एवात्मा चेतयिता यासां अयं भावः संभोगात्मके शृंगारे भोक्तृभोग्यात्मका प्रतीतिरासीत् । विप्रलंभे प्रेष्ठस्यान्तप्रवेशात् ग्रहग्रहीतवत् स्वकीयचेष्टा विस्मिताः कृष्णात्मकत्वेन तदीया चेष्टा गृहीतवत्यः, तदाकारान्तःकरणावृत्तौ जातायां सत्यां तस्यैव गतिगंजस्यैव तथा अनुरागो मानसो भावस्तत्पूर्वकं स्मितं विभ्रमो विलासस्तत्पूर्वकानीक्षितानि तैः मनो रमयन्ति ये मनोरमा-आलापगुह्यभाषणानि विहारः क्रीडा विशेषविभ्रमो विलासविशेषः, यद्वा विविधं भ्रमणं कुञ्जान्तरं गमनम्, यद्वा विभ्रमो नाम सुवलनं एतैर्व्यस्तैः समस्तैर्वा, तत्र गतिविहारौ कायिकौ स्मितविभ्रमेक्षितानि चाक्षुषा, आलापो वाचिकः विभ्रमो मानसः तदुक्तं रसार्णवे-"चित्तवृत्त्यनुवस्थानं शृंगाराद्विभ्रमो मत" इति । रमयन्तीति रमा व्रजदेव्यस्तासां पतेः पालकस्यात एव तासां प्राणरक्षार्थं तदात्मा

जातस्तस्य एतैर्गत्यादिभिराक्षिप्तचित्ताः अपह्नवं प्रापितं चित्तं यासां ताः पूर्वं स्वभावत एव प्रकृष्टमदा इदानी विरहे गतमदाः प्रशब्दो गतार्थे श्रीकृष्णलीलानुकरणं कृतवत्यः तदुक्तं रसार्णवे—"प्रियानुकरणं यत्तु मधुरालापपूर्वकैः। चेष्टितैर्गतिभिः वा स्यात्सा-लीलेति निगद्यते"। ननु पूर्वमुक्तं भवाम दास्य इति प्रभोश्चेष्टानुकरणं नोचितं विडंवनपर्यवसानत्वात् तत्राह तदात्मिकाः स एवात्मनि स्वरूपे यासां ताः, कृष्णात्मकत्वे जाते स्वानुसंधानं विस्मृतवत्यः। एतासां च यदि स्वानुसन्धानं भवेत् तदायमुपालंभः स्यान्नतु तदस्तीति। अतः प्रियस्य लीलानुकरणं तापनोदार्थं उद्देशत उक्तं विस्तरतोऽग्रे वक्ष्यति ॥ २ ॥

विशुद्धरसदीपिका

इदानीं संतापकार्य्यं दिव्योन्मादं दर्शयति। गत्येत्यादित्रिभिः अहो कुत्र गतोऽस्माकं प्राणनाथ इति गमनस्यैवानुसन्धानात् गतिशब्दस्य प्राक्प्रयोगः एवमनुरागस्मितादिष्वपि निमित्तमनुसन्धेयम् उन्मत्तेष्वपि मानसस्य तस्य स्वीकारात् तत्र गतिः सामान्या तत एवास्याः पृथगुक्तिः स्मितादिकयोरनुरागारम्भमात्रजायमानत्वेन तत्समुदितोक्तिः आलापविहारयोर्विभ्रमजन्मनैव जायमानत्वेन तत्समुदितोक्तिरिति तत्र चानुरागः स्वविषयकः कान्तयोग्यो भावः स्मितं विभ्रमेक्षितानि च तैः तत्र विभ्रमः चित्तवृत्त्यनवस्थितिः तथा विहारविभ्रमः शृङ्गाचेष्टानुकूला मधुरलीलेत्यर्थः—

"चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः"। तथा—शृङ्गारचेष्टाविहृति विभ्रमो मधुराकृतिः ॥

इत्युक्तेः ततश्च तैस्तैराक्षिप्तचित्ताः तत्र तत्राविष्टचेतस इत्यर्थः। तत एव तास्ता विचेष्टाः बाहुप्रसारेत्यादिना प्रागुक्ता वा विविधाश्चेष्टाः जगृहुः आत्मनि स्वीचक्रुः तथा तथा क्रीडन्नित्यर्थः यतस्तदात्मिकाः तद्भावभावितान्तःकरणाः यतश्च प्रमदाः यौगिकार्थपुरस्कारेण जातित एव प्रकृष्टमदयुक्ताः किम्पुनस्तद्विरहेणेत्यर्थः। दिव्योन्मादस्य परमां भूमिमारूढा इति भावः तत्रानुरागचित्तवृत्त्यनवस्थाने मानसे गतिस्मितविभ्रमेक्षितविहाराः कायिकाः आलापो वाचिक इति विवेकः। रमापतेः आप्तकामस्येत्यर्थः। सहचरीपक्षे च रमते नितरामिति रमा श्रीराधा आत्मना रमया रेमे इति ब्रह्मसंहितायां हि तामुद्दिश्यैव तादृशप्रयोगात् साक्षान्नामानुक्तिश्चाऽऽदरविशेषाद्रति रहस्यत्वाद्रसरूपत्वाच्चेत्यादिनिर्णीतं भक्तिमञ्जूषायां नायं श्रियोऽङ्ग इत्यादिवक्ष्यमाणानुसारेणात्यन्तनिकृष्टायाः प्रसिद्धरमाया रूपकं च प्रस्तुतयोरुभयोरनपायिसम्बन्धद्योतनाय अनपायिनी भगवती श्रीः साक्षादात्मनो हरेरिति श्रीद्वादशोक्तेः वस्तुतस्तु मुकुन्दादिपदानां श्रीकृष्ण इव रमादिपदानां परमरमायां तस्यामेव मुख्यावृत्तिरिति सूचनाय "सर्वलक्ष्मीमयीसर्वकान्ति सम्मोहिनी परे"ति बृहद्गोतमीयोक्तेः तस्याः पतेःधवप्रियः पतिर्भर्त्तेति कोशात् राधावल्लभस्येत्यर्थः। ततश्च दाम्पत्यव्यवहारस्तस्यामेव समुचित इति सूचितं तदुक्तमलङ्कारकौस्तुभे—

राधामाधवयोरेव शृङ्गारः श्रुतिरोचकः। वैदग्ध्यं यत्र पर्य्याप्तं कृतार्थश्च मनोभवः इति ॥

अत्र पार्थ एव धनुर्द्धर इति वदेवकारोऽन्ययोगं व्यवच्छिनत्ति ॥ २ ॥

श्रीरामनारायणकृता भावभावविभाविका

नन्वेवं प्रलयसामग्रीसम्पत्तौ प्राणप्राणवियोगे च कथं तज्जीवनं संवृत्तं तत्राह। गत्यानुरागेति। गजराजराजहंसादिगतिं लज्जयन्त्या गतिमनिच्छतामपि परमहंसानां रुचिं जनयन्त्या आसमन्तात्सर्वतः सर्वविधानुरागश्च तत्पूर्वकं स्मितं च विशेषेण भ्रमयति देहगेहाद्यनुसन्धानादिभ्यः परावर्तयतीति तथाभूतं यदीक्षितं सोपाङ्गनिरीक्षणं तैः तथा मनोरमाहृदयंगमा ये आलापा मृदुचित्रगम्भीरार्थवाक्यविशेषा बिहारा विशेषेण हारा मनोहराः शृङ्गाररसोपयोगिविलासा विभ्रमाणि नृत्यावर्तनादीनि तैः करणै रमापतेः रमायाः सर्वसौभाग्यसम्पत्सौन्दर्यादिश्रियामाधिष्ठात्र्याः सर्वमनोरमाया लक्ष्म्या अपि सर्वत्र दोषदृष्ट्या तत्त्यागेन स्वस्मिनिःस्पृहत्वेऽपि गुणालयत्वेन वृतो यः पतिः तस्य तत्संबन्धिभिरेतैराक्षिप्तानि आकृष्टानि चित्तानि यासां यद्वा रमापतेरिति कर्तरि षष्ठी तथा च रमापतिना कर्त्रा एतैः करणैः प्रलयसन्निभार्तित्राणाय स्वस्मिन्नाकृष्टानि चित्तानि यासाम् अत एव प्रकृष्टप्रेमोन्मादलक्षणो मदो यासामिति प्रमदाः तथा स एवात्मनि मनसि रक्षकत्वेन वर्तमानो यासां यद्वा तस्मिन्नेवात्मा प्राणो यासां तथाभूतत्वे लिङ्गमाह। तास्ता इति। यतस्तथाभूता अतस्तत्तद्गुणाकृष्टचित्तत्वेन प्रकृष्टमदविगतदेहाद्यनुसन्धानत्वेन तदात्मकत्वेन च तदीयास्तास्ता विचेष्टाः जगृहुः यद्वा स्वीयगत्यादिभिर्मनोरमालापादिभिश्च रमापतेराकृष्टं चित्तं याभिरत एव रमापतेरपि प्रकृष्टो मद उन्मादो याभ्य इति प्रमदा ननु भगवत आत्मारामत्वात्कथं ताभिराक्षिप्तचित्तत्वं तत्राह। तदात्मिका इति। तासां तदात्मकत्वेन तदाक्षिप्तचित्तत्वेऽपि नात्मारामत्वक्षतिर्ननु तथाभूतानां कथं तद्वियोगविरहवैक्लव्याद्युक्तिस्तत्राह। तास्ता इति। सर्वोद्धारकप्रेमपथोपदेशाय तास्ता विरहव्याकुलत्वतल्लीलानुकारादिविचेष्टा जगृहुरिति भावः ॥ २ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तापानन्तरं जातां तासां दशामाह। गत्येति। रमापतेः प्रेष्ठस्य गत्या यत्स्वाभाविकेन नूपुरस्वनयुक्तेन पादन्यासेन अनुरागः स्नेहस्तत्पूर्वकं स्मितं मन्दहसितं तत्सहितो विभ्रमो विलासः तत्सहितानीक्षितानि कटाक्षास्तैः तथा मनो रमयति मनसि

रमते च य आलापः गुह्यं भाषणं वाचिकव्यापारः विहारः शृङ्गारचेष्टाः "चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः, इत्युक्तलक्षणो विभ्रमश्च तैराक्षिप्तान्याकृष्टानि चेतांसि यासां ताश्चातस्तदात्मिकाः तन्मय्यः यतश्च प्रमदाः जात्यैव प्रकृष्टमदयुक्ताः रमापतेः विविधाश्चेष्टा जगृहुस्तदनुकरणैरक्रीडन्नित्यर्थः अत्रानुरागचित्तवृत्त्यनवस्थाने मानसे आलापो वाचिकः गत्यादयः कायिका अन्यभावानामप्युपलक्षणमेतत् अत्राभिज्ञापक्षे रमापतेर्लक्ष्मीपतेः श्रीविष्णोरन्तरेवाविर्भूतस्वरूपस्य लक्ष्मीपतेः सह विलासरूपाः स्वात्मना च सहविलासरूपा याश्चेष्टास्तास्ताः जगृहुः ननु दासीनां तासां भगवल्लीलानुकरणमनुचितमित्याशङ्कानिवृत्त्यर्थमुक्तं तदात्मिकाः स भगवानेवाविर्भूत आत्मनि यासां ता अन्तस्तापनिवृत्त्यर्थं तल्लीलाग्रहणं न विरुध्यत इति भावः। किञ्च प्रमदास्तथा च प्रमदहेतुको यथा दासीभावं विहाय कान्ताभावस्तथा प्रभुचेष्टानुकरणमपीति भावः। अनभिज्ञापक्षे रमापतेः सर्वसौन्दर्यसम्पत्तिस्वामिनः मानिनीपक्षे गतश्चेद्गच्छतु नाम वयमेव तदीयास्ताश्चेष्टाः कर्तुं शक्ता इति वहिः प्रकटीकर्तुं तास्ताश्चेष्टा जगृहुः यतस्तदापि प्रकृष्टो मदो यासां ताः यतश्च तदात्मिकाः परस्परातिगाढप्रेमवशादभेदाभिमानवत्यः अतस्तस्य गत्यादिभिराक्षिप्तचित्ताः निवृत्तिपक्षे श्रोत्रस्य श्रोत्रं मनसो मनो वाचो ह वाक् प्राणस्य प्राण इत्यादिश्रुतयश्चेतनाद्यधिष्ठितैर्गत्यादिभिः परमात्मानं प्रत्याकृष्टचित्ताः यतः प्रकर्षेण मदः परमात्मप्रतिपादने हर्षो यासां ताः रमापतेः सत्तास्फूर्तिलक्षणशोभास्वामिनः चैतन्यस्यैव तारताः गमनादिरूपाश्चेष्टाः जगृहुः स्वयं वाच्यवाचकयोरभेदात्तदात्मिकाः ॥ २ ॥

रास–रहस्यम्

र० टी०—आत्मनः गत्या अवगत्या ज्ञानेन, अनुरागः आत्मनुरागः, स्मितं मृदुहास्यं, तद्वत् क्षणकाल निमित्तं दर्शनं च, ताभ्यः विभ्रमेक्षितानि सविलासनिरीक्षणानि पुंखानुपुंखरूपेण विवेचनानि, तैः मनोरमाः मनः रमयन्ति क्रीडयन्तीति मनोरमाः, एवंभूताः आलापाः मननात्मकानि अनुशीलनानि, विहारश्च तदनुसारणानि आचरणानि च, तैः आक्षिप्तानि विक्षिप्तानि चित्तानि यासां ताः, प्रमदाः वृत्तयः, तदात्मिकाः प्राप्ततदभेदाभिमानाः सत्यः, रमापतेः यस्याः सम्बन्धमात्रेण सर्वं रमणीयमिव भवति सा रमा माया, तस्याः पतिः रमापतिः महेश्वरः, "मायां तु प्रकृतिं विद्यान् मायिनं तु महेश्वरम्।" अखण्ड चैतन्यं, तस्य रमापतेस्तास्ता विचेष्टाः विविधाः चेष्टाः, नानोपाधियुक्तविग्रहधारणात्मिकाः जगृहुः गृहीतवत्यः ॥ २ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रमदा व्रजाङ्गनाः कृष्णात्मिकाः रमापतेः गत्या अनुरागस्मिताभ्यां यानि विभ्रमेक्षितानि सविलासनिरीक्षितानि तैश्च मनोरमाः मनोहराः आलापाश्च विहाराः क्रीडाश्च विभ्रमाः अन्ये च विलासास्तैश्च आक्षिप्तचित्ताः आकृष्टचित्ताः तस्य विविधाश्चेष्टा जगृहुरनुचक्रुः ॥ २ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गत्या गमनेनानुरागः स्नेहविशेषस्तत्पूर्वकं यस्मिंस्तं मन्दहासस्तेन रञ्जितानीक्षितानीक्षणानि तैर्मनोरमो मनोहरो य आलापः सौरतसल्लापो विहारं क्रीडा च तयोर्विभ्रमा विलासास्तैराक्षिप्तं चित्तं यासां ताः प्रमदा योषास्त्यागे प्रकृष्टो मदः प्राग्यासां ता इदानीं प्रगतो मदो यासां ता इति चान्तरङ्गिको भावः। तदात्मिकास्तस्मिन्नात्मा मनो यासां ता रमापतेर्विचेष्टा विशिष्टा चेष्टाश्चरितानि जगुः। एकैकां जगुरिति यावत् ॥ २ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

यदा पुनः स तापः अन्तःप्रवेष्टुमैच्छत् तावता भगवल्लीला अन्तः प्रविष्टा तापं दूरीकृत्य स्वयमेवाविर्भूतेत्याह। गत्येति। ताः भगवदीयैः कायवाङ्मनोभिर्वशीकृताः तद्भावमापन्नाः तास्ता एव भगवच्चेष्टा जगृहुः प्रथमतः कायिकीमाह। गत्या कायचेष्टया वशीकृताः इन्द्रियसहितमनश्चेष्टया वशीकृता जाता इत्याह। अनुरागेति अनुरागः स्नेहो मानसः तत्पूर्वकं स्मितं तस्य विलासः स्वनिष्ठतात्याजनार्थः अन्यथैवं सति ज्ञानमेवोदयं प्राप्नुयात् अतः स्मितेन मन्दहासेन ईषद्विमोहिताः न बहिर्गताः नान्तः स्थिताः किन्तु भगवति मध्ये स्फुरिते तद्धर्मेषु च समागताः अनुरागस्मितेन सहितो यो विभ्रमो विलासः अलसवलितादिः तत्सहितानीक्षितानि सर्व एव कटाक्षाः वाचिकैरपि विमोहमाह। मनोरमालापेति। मनोरमयतीति मनसि रमते इति वा मनोरमः योऽयमालापः भगवतो गुह्यभाषणानि केवलवाक्यस्य चित्ताक्षेपकत्वं न भविष्यतीति प्रामाण्यावधारणं स्त्रीणां प्रकारान्तरेण न भवतीति फलमेवादौ निरूपितं सुखार्थं हि भगवद्वाक्यानि तदानीमेव च सुखमुत्पादयन्ति ते चालापाः क्वचिद्बन्धादिबोधका लीलोपयोगिन इत्याह। विहार इति। तत्रापि विलासा अवान्तरभेदाः यथोत्तानकग्राम्यादयः तैः पूर्वकृतैः तमः सत्त्वरजोरूपैः त्रिविधमपि चित्तमाक्षिप्तमिति आक्षिप्तचित्ता जाता अतः तापं न प्राप्तवत्य इति भावः। प्रमदा इति बाह्याभ्यन्तराननुसंधानहेतुभूतोऽत्युत्कटरसभावोऽत्र मदपदेनोच्यते तेन प्रभुलीलाविष्करणमुचितमिति भावः। किञ्च प्रमदाः प्रकृष्टो मदो यासां स्वभावत एव अन्यथा दास्यभावान्न प्रच्युताः स्युस्तदा केवलभगवतः लीला स्वानुपयोगिनी सांप्रतं च नानुभूतेति रमापतेर्लक्ष्मीपतेः लक्ष्म्या सहविलासरूपां

चेष्टां जगृहुः एकस्या अपि वह्वयश्चेष्टा इति तास्ता उक्ताः नन्वीश्वरधर्माविष्करणं दासीनां निषिद्धमितिचेत्तत्राह। तदात्मिका इति। भगवानेवात्मनि यासां तथात्वेन स्फुरितः अतो भगवल्लीलाग्रहणं तापनिवारकत्वेनोद्दशत उक्त विस्तरमग्रे वक्ष्यति क्रमहेतुं च वक्ष्यामः ॥ २ ॥

श्रीसुबोधिनी-सार

रमापतेः कृष्णस्य गत्याऽनुरागस्मिताभ्यां विभ्रमेक्षितानि सविलासनिरीक्षणानि तैः मनोरमैरालापैर्विहारैर्विभ्रमैः आकृष्टचित्ताः तस्मिन्नेवात्मा चित्तं यासां ताः ताः ताः प्रसिद्धाः चेष्टा लीला जगृहुः संदधुः ॥ २ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गत्यानुरागेत्यत्र, अतःस्मितेन मन्दहासेनेति। अन्यथा प्रकृष्टोदारहासस्यैव पूर्वमुक्तत्वादधुना स्मितं न वदेदिति भावः ॥ २ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं वियोगेन सन्तप्तानामपि तासां तदेकपरतामाह—गत्येत्यादिभिः। प्रमदा गोप्यो रमापतेः कृष्णस्य तास्ता विविधाश्चेष्टाः पूतनापयःपानादिलीला जगृहुः कृतवत्यः। 'अन्यस्य तस्य लीलाकरणमन्याभिस्ताभिः कथं सम्भवति ?' इत्यपेक्षायामाह—तदात्मिका इति। प्राप्ततद्भेदाभिमाना इत्यर्थः। तत्रापि हेतुमाह—तस्य गत्यादिभिराक्षिप्तानि आकृष्टानि चित्तानि यासां ताः। अनुरागः प्रेम स्मितं च ताभ्यां विभ्रमेक्षितानि सविलासनिरोक्षणानि तैर्मनोरमा आलापाश्च विहाराः क्रीडाश्च विभ्रमाः अन्याश्च विविधाः मीहिकाश्चेष्टाः तैः ॥ २ ॥

अन्वितार्थप्रकाशिका

गत्येति ॥ रमापतेर्गत्या अनुरागः प्रेम स्मितं च ताभ्यां विभ्रमेक्षितानि सविलासनिरीक्षणानि तैर्मनोरमा आलापाश्च विहाराश्च क्रीडाविभ्रमाः अन्याश्च विविधाः मोहिकाश्चेष्टाः तैः आक्षिप्तानि आकृष्टानि चित्तानि यासां ताः प्रमदा गोप्यः तदात्मिकाः प्राप्ततद्भेदाभिमानाः सत्यः तस्य रमापतेः तास्ता विविधाश्चेष्टाः पूतनापयःपानादिलीला जगृहुः कृतवत्यः ॥ २ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गत्येति गत्यागमनेन अनुरागाः प्रेमस्मितं मंदहासं च ताभ्यां विभ्रमो विलासस्तद्युक्ता नीक्षितानि तैश्च मनोरमाः कमनीयाः आलापाः वचनानि च विहाराः शृङ्गारचेष्टाश्च विभ्रमश्चित्त वृत्त्यनवस्थानं च तैश्चैतैः रमापतेर्गत्यादिभिः आक्षिप्तानि आकृष्टानि चित्तानि यासां ताः अतएव तदात्मिकाः तस्मिन्नेव आत्मा मनो यासां ताः प्रमदाः हरेस्तास्ता विचेष्टाः पूर्वकृतविविधविहारान्न जगृहुः श्रीकृष्णक्रीडानुसारेण विहारान् चक्रुरित्यर्थः ॥ २ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गत्येति ॥ रमापतेः श्रीकृष्णस्य, गत्या गमनेन, अनुरागश्च स्मितं च ताभ्यां यानि विभ्रमेक्षितानि विलासनिरीक्षणानि तैः, मनोरमा ये आलापाः संलापनानि च विहाराः क्रीडाश्च विभ्रमा अन्ये विलासाश्च तैश्च, आक्षिप्तान्याकृष्टानि चित्तानि यासां ताः, अत एव तस्मिन्नात्मा चित्तं यासां ताः, तज्जानप्रचुरा इत्यर्थः। प्रमदा गोप्यः, भगवतः, ताः ताः विचेष्टाः विविधाश्चेष्टाः, जगृहुरनुचक्रुः ॥ २ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तदात्मिका इतिः १०. ३०. २.

विरहजतापो विरहे विरहश्च द्वैतधीकृतो भवति। अवधार्य युक्तमासंस्तापनिवृत्त्यै च तास्तदात्मानः ॥ ७ ॥
यदस्माभिः सम्प्रस्यतनुतरतापापहृतये धृतं तत्ताद्रूप्यं विरहसमभावेन भविता।
स चाप्यस्मद्रूपो युवतिजनदुःखानुभवभाक् क्षमं स्यान्मत्वाऽऽसन्निति विधृततद्रूपकृतयः ॥ ८ ॥

कृष्णप्रिया

भगवान् की ललित गति, अनुराग, मन्दस्मित, विलास सहित अवलोकन, हृदयंगम वार्तालाप, श्यामसुंदर के वनविहार, और रसमय विलासों से आकृष्ट चित्त गोपीवृन्द भगवन्मय दशा को प्राप्तकर प्यारे श्रीकृष्ण की दिव्यलीलाओं का अनुसरण करती हुई वैसी लीला करने लगी ॥ २ ॥

गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः ।
असावहं[1]त्वित्यबलास्तदात्मिका [2]न्यवेदिषुः कृष्णविहारविभ्रमाः ॥ ३ ॥

कर्दमक्षमा

अन्वयः—कृष्णविहारविभ्रमाः, तदात्मिकाः, प्रियस्य, प्रियाः, (तस्य कृष्णस्य) गतिस्मितप्रेक्षणभाषणआदिषु, प्रतिरूढमूर्तयः, (ताः) अबलाः, असौ, अहम् , इति, न्यवेदिषुः ॥ ३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च गतिस्मितेति । प्रियस्य गत्यादिषु प्रतिरूढा आविष्टा मूर्तयो यासां ताः । अतः कृष्णविहारविभ्रमाः कृष्णस्येव विहारविभ्रमाः क्रीडाविलासा यासां ताः । अहमेव कृष्ण इति परस्परं निवेदितवत्यः ॥ ३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न केवलमनुकरणेनैवाक्रीडन् , किन्तु तादृूप्येणापीत्याह— अपि चेति । प्रियस्य श्रीकृष्णस्य । आविष्टाः तदाकारतां नीताः । यतस्तदाविष्टा अतो हेतोः । हे अबलाः असौ कृष्णोऽहमेव । यद्वा—तदात्मिकास्तादूप्यं प्राप्ता अबला इति संबधः ॥ तस्यैवोन्मादस्य प्रौढत्वे सति तासामवस्थामाह—गतीति । प्रियस्य गत्यादिषु पूर्वोक्तेषु प्रतिरूढा मूर्तयो देहा यासां ताः । आदौ प्रियस्य गतिस्मितादय आसां प्रत्येकमूर्तौ चेंद्रियादिमध्यामारूढास्ततस्तेषु गतिस्मितादिषु आसां मूर्तिश्च प्रत्यारूढा इत्यर्थः । ततश्चोन्मादादेकीभावे सति असौ कृष्ण एवाहं किं वाहमेव कृष्ण इत्यादिसावधारणां भावनां विहाय असावहं कृष्णोऽहमिति रसास्वादप्रौढिमयीमवस्थां प्राप्य तदात्मिकाः प्राप्तकृष्णतादात्म्याः, न तु अहंग्रहोपासनावशादेवेति ज्ञेयम् 'प्रियाः प्रियस्य' इत्युक्तेः । न्यवेदिषुः परस्परं निवेदितवत्यः । न तु वयं व्रजस्त्रियो मनागपि का अपि जानन्ति स्मेत्यर्थः । तत्र हेतुः—कृष्णविहारैः स्मर्यमाणैर्विभ्रमो यासां ताः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र तदात्मकत्वमेवाभिव्यञ्जयति । गतीति । प्रियस्य गत्यादिषु उक्तेषु आदिशब्दाद्विहारविभ्रमौ उक्तानुवादित्वेन पूर्वोक्ततत्तद्विशेषणानि नोक्तानि । तेषु प्रतिरूढाः सदृशीभूता मूर्त्तयः इन्द्रियादिसङ्घातात्मकदेहा यासां ताः इत्यन्तर्बहिस्तद्भावापत्तिरुक्ता । अबलाः स्त्रियः इति स्त्रीचेष्टानुकरणमेव युक्तमिति ध्वनितम् । तथापि तु एव यत्र युष्माकमुत् कण्ठा अहमेवासौ तत्तद्विहारनागर इति प्रत्येकं सर्वा मिथो न्यवेदयन्त । कीदृश्यः सत्यः । कृष्णवद्विहारे विभ्रमो विलासो यासां कृष्णविहारस्य विभ्रमो भ्रान्तिर्याभ्यो वा तादृश्यः । तन्मयत्वञ्च प्रेमलीलाभरस्वभावेनैव नतु अहंग्रहोपासनावेशेनेत्याशयेनाह । प्रियाः प्रियस्येति । प्रियास्तस्मिन् स्वाभाविकप्रेमवत्यः प्रियस्य स्वस्मिन्नपि स्मर्यमाणतादृशप्रेमकस्येत्यर्थः । लीलाख्यश्चानुभावोऽयम् । प्रियानुकरणं लीलारम्यैर्वेशक्रियादिभिरित्युक्तः । तथा च प्रयोगः । मुहुरवलोकितमण्डनलीला, मधुरिपुरहमिति भावनशीला इति ॥ ३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र तदात्मिकत्वमभिव्यञ्जयति —गतीति । गत्यादिषु उक्तेषु, आदि-शब्दात् विहारविभ्रमौ, उक्तानुवादत्वेन पूर्वोक्ततत्तद्विशेषणान्यत्र नोक्तानि, प्रतिरूढलीलाभिराविष्टा मूर्त्तय इन्द्रियांगादिसङ्घातात्मकदेहा यासां ता इत्यन्तर्व्वहिस्तद्भावापत्तिरुक्ता, तथा चोक्तं श्रीप्रह्लादेन (भा० ७।७।३६)—'तद्भावभावानुकृताशयाकृतिः' इति । अबलाः स्त्रिय इति स्त्रीचेष्टानुकरणमेव युक्तमिति ध्वनितम् । तथापि यद्वा, तापभरेणाशेषबलरहिताः सत्यः, तु एव, अहमेवासाविति प्रत्येकं सर्व्वाण्यवेदयन्त इति विरहविवशतोक्ता लीलाविष्टता वा । तत्र हेतुः—तदात्मिकास्तन्मय्यः सत्य इति तच्छब्देन श्रीकृष्णस्तद्गत्यादयो वा, श्रीकृष्णोऽहमिति साक्षादनुक्तिर्विरहवैवश्यात्, तदात्मिकत्वादेव वा, तन्मयत्वं च प्रेमलीलाभरस्वभावेनैव, न त्वभेदज्ञानादिनेत्याशयेनाह—प्रियाः प्रियस्येति । कृष्णेति परमाकर्षकत्वाभिप्रायेण । अन्यत्तव्र्याख्यातम् । यद्वा, अनुकरणमेवात्रापि ज्ञेयम्, ततश्च पूर्व्वश्लोके तदात्मिका इत्यनुकरणसम्यक्त्वा बोधिता, तामेव दर्शयति—गतीति । हे अबलाः ! असौ तत्तद्विहारनागवोऽहमित्येतत् श्रीकृष्णवाक्यमिति शेषः, तच्च पूर्व्वं नर्म्मादिना कदाचित्तेनोक्तमस्तीत्यत एव ज्ञेयम् । कुतो वाक्यं न समापितमित्यपेक्षायामाह—तदात्मिका इति तन्मनस्काः, यद्वा, अयमनुकरणसम्यक्त्वाबोधनार्थं पुनरपि पूर्व्ववद्धेतुः, अतएव कृष्णविहारवद्विभ्रमश्चुम्बनालिंगनादिचेष्टाविशेषो यासाम्, यद्वा, कृष्णस्येव विहारविभ्रमः—विगतो हारो यस्मात्तादृशो विभ्रमो विलासो यासाम्, किंवा कृष्णविहार इति विशिष्टो भ्रमो याभ्यः, न निश्चेतुं शक्यते कृष्ण एवायं विहरति, ता वा तमनुकुर्व्वन्तीत्यर्थः । वाक्यासमापने च विरहविह्वलतैव हेतुर्विभाति ।

---

[1] न्वित्य–विज. । [2] ना–विज. ।

अथवा, असौ तत्तत्प्रकारैर्बहुशः श्रीकृष्णेन रमिता या सा अहमित्यर्थः । तदप्रकाशनं वैदग्ध्या विरहविह्वलतयैव वा । तादृशनिवेदने हेतुः—तस्मिन्नवाच्ये मरणे आत्मा चित्तं यासां ता इति अत्यन्तदुःखेन मुमूर्षया तन्न्यवेदयन्नित्यर्थः । यतः कृष्णविहारैर्विभ्रम उन्मादो यासां तद्विलासस्मरणेन परमविह्वला इत्यर्थः ।। ३ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्रतिरूढमूर्त्तयः असावहं कृष्णोऽहम् अनेन वक्ष्यमाणकारणस्य प्रस्तावः ।। ३ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेव प्रपञ्चयति ! गतीति । तदात्मिकाः अत एव प्रियस्य कृष्णस्य गत्यादिषु प्रतिरूढमूर्तयः भगवद्गत्याद्यनुकारेषु चिकिर्षितेति सत्सु हृदयारूढास्तस्य मूर्तयो यासां ताः अतः कृष्णविहारा इव विभ्रमाः क्रीडा यासां तास्तस्य प्रिया अबला गोप्यः असावहं कृष्णोऽहमिति मिथो निवेदितवत्यः ।। ३ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एतदेव विशिनष्टि । गतीति । प्रियस्य कृष्णस्य गत्यादिषु प्रतिरूढा अङ्कुरिता अङ्गीकृता मूर्तिर्यासां तास्तथा तत्र निमित्तं दर्शयति । असाविति । असौ कृष्णोऽहं वा नु इति विकल्प्यान्योऽन्यं पृष्टवा वा तदात्मिकाः तद्गतचित्ताः प्रश्ने विकल्पे नु स्विच्चेति यादवः न्यवेदिषुः आत्मानमिति शेषः कृष्णविहारविभ्रमवत्त्वं विवृतम् ।। ३ ।।

श्रीमज्जीवगोस्वामिकृतो क्रमसन्दर्भः

गतीति । गत्यादिषु प्रतिरूढाः सदृशीभूताः मूर्त्तय इन्द्रियादिसंघातात्मकदेहा यासां ताः ततश्च चिरात् प्राप्तावधानानां तासामवस्थां वर्णयति ।। ३ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्यैवोन्मादस्य प्रौढत्वे सति तासामवस्थामाह । गतीति । प्रेयस्य गत्यादिषु पूर्वोक्तेषु प्रतिरूढा मूर्तयो देहा यासां ताः आदौ प्रियस्य गतिस्मितादय आसां प्रत्येकं मूर्त्तौ चित्तेन्द्रियादिमय्यामारूढाः ततस्तेषु गतिस्मितादिषु आसां मूर्त्तिश्च प्रत्यारूढा इत्यर्थः ततश्चोन्मादादेकीभावे सति असौ कृष्ण एवाहं किंवा अहमेव कृष्ण इति सावधारणां भावानां विहाय असावहं कृष्णोऽहमिति रसास्वादप्रौढिममिमीमवस्थां प्राप्य तदात्मिकाः प्राप्तकृष्णतादात्म्याः नत्वहंग्रहोपासनावेशादेवेति ज्ञेयं प्रियाः प्रियस्येत्युक्तः न्यवेदिषुः परस्परं निवेदितवत्यः नतु वयं व्रजस्त्रिय इति मनागपि का अपि जानन्तिस्मेत्यर्थः । तत्र हेतुः कृष्णविहारैः रमर्यमाणैर्विभ्रम उन्मादो यासां ताः ।। ३ ।।

रसिकाह्लादिनी–टीका

तदावेशे जाते सति किं वृत्तमित्यत आह गतिस्मितेति, प्रियस्य प्रीतिविषयस्य गत्यादिषु प्रतिरूढमूर्त्तयः प्रतिरूढा लीलाभिराविष्टा देहा यासां ता अत एवाबलाः कृष्णग्रहगृहीतत्वात्पारतंत्र्यमुक्तम्, यतस्तदात्मिका कृष्णाविष्टेन्द्रियदेहा अन्योन्यं कृष्णोऽहमिति न्यवेदिषुः निवेदितवत्यः । ननु भोक्तृभोग्यात्मके भेदेविद्यमाने कथमभेदोक्तिर्जातेति चेत्तत्राह तदात्मिका इत्यनेन तासां देहेन्द्रियादिषु प्रविष्टस्य श्रीकृष्णस्यैवोक्त्या न तासामिति । यथा ज्ञानी आत्मसाक्षात्कारे जाते "ब्रह्माहमस्मि" इति वदति यथा च कर्मसु अस्मिन् कर्मणि त्वं ब्रह्मा भवेत्युक्ते स तु ब्रह्मास्मीति वदति यथा तत्र भावाभेदेनैव व्यवहारः तथात्रापि कृष्णाभेदप्रतीतिः तथोक्त "अभेदोक्तिस्त्रिधा दृष्टा ज्ञाने भक्तौ च कर्मणि । अत्राधिकारी स भवेत् यः फलेषु च भेदवानिति' । पुनः कीदृश्यः कृष्णविहारविभ्रमाः कृष्णस्यैव विहारः क्रीडा तस्यां विभ्रमो यासां ता काचित कृष्णवत् विहरति तां दृष्ट्वान्यासां विभ्रमो भवति। तदुक्तं रसार्णवे "प्रियागमनवेलायां मदभावससंभ्रमात् । विभ्रमो गदहारादिभूषास्थानविपर्ययः" इति कृष्णगत्यादिषु मूर्त्तयोऽध्यस्ताः मूर्त्तिषु गत्यादयोऽध्यस्ता एवमनोन्यधर्माभिनिवेशात् विलाशस्य पूर्णताऽविच्युतिश्च जाता, गतिः पादयोः स्मितं मुखे प्रेक्षणं चक्षुषि भाषणं वाचिकं रूपलक्षणमेतत् । सर्वोऽपि विभ्रमादयः लीलादयो वधा अपि प्रियसंबंधिनः संयोगावस्थायामनुभूताः स्मृतिपथमतीर्णाः संतो विपरीताः जाता रसाधिक्ये स्त्रियः पुरुषत्वमापद्यन्ते इति वात्स्यायनः । यद्वा स्वगत्यादिषु प्रियस्य प्रतिरूढमूर्त्तयः, अत एव कृष्णविहारविभ्रमाः कृष्णविहारविभ्रमश्चु बनालिंगनादिविलासविशेषो यासां ताः, यद्वा कृष्णस्यैव विहारः विगतस्त्रुटितो हारो यस्मात् तादृशो विभ्रमो विलासो यासां ताः, यद्वा कृष्णस्यैवायं विहार इति विभ्रमो भ्रांतिर्याभ्यस्ताः कृष्ण एवायं विहरति इति परस्पर चेष्टितवत्यः यतस्तदात्मिकाः तन्मनस्काः असमापितवाक्या एवान्योन्यरसावहमिति निवेदितव्यः विरह एव तासां तदात्मिकत्व कृतवानितिभावनं ह्यभेदज्ञानं तासां तात्विकं किं तु प्रेम्णा तस्मिन्नेव क्षणे तादात्म्यं जाते तात्विकं चेदभविष्यत् । तदा श्रीकृष्णाविर्भावे जाते तथात्वमभविष्यत् अग्रे वक्षति त विलोक्यागतं प्रेष्ठ प्रीत्युत्फुल्लदृशोऽवलाः । उत्तस्थुरिति उत्थानं न भवेत् । तथा चोक्तं गीतगोविन्दे "मुहरगलाकित मंडनलीला मधुरिपुरहमिति भावनशीलेति" ।। ३ ।।

विशुद्धरसदीपिका

तदेवं सहसान्तर्द्धानहेतुकां दिव्योन्मादस्यारोहभूमिकां केवलमानसचेष्टया वर्णयित्वा मानसवाचिकचेष्टया तदवरोहक्रमं दर्शयति । गतीति । प्रियस्य गत्यादिष्वारूढा आविष्टा मूर्तयस्तत्प्रायः पिण्डवदिन्द्रियावयवादिसङ्घातात्मका देहा यासामित्यन्तर्वहिस्तदेकभावापत्तिरुक्ता अत एव कृष्णेति कृष्णस्येव विहारविभ्रमाः क्रीडाविलासा यासां ताः न्यवेदिषुः यत्र युस्माकमुत्कण्ठा सोऽहमेव श्रीकृष्ण इति परस्परं सम्वेदितवत्यः ज्ञापितवत्य इत्यर्थः अयमेवोन्मादस्य पूर्वस्मादपकर्षः नहि तत्राहमेवासौ कृष्ण इत्यनुसन्धानं चेति तदात्मिकाः तन्मयाः तत्त्वं च प्रेमभरस्वभावादेव नत्वहंग्रहोपासनांवदित्याह प्रियाः प्रियस्येति । तस्मिन् स्वाभाविकप्रेमवत्यः स्वस्मिन्नपि स्मर्य्यमाणतादृशप्रेमकस्येत्यर्थः । अयं लीलानामनुभावः "प्रियानुकरणं लीला रम्यैर्वेषक्रियादिभिरित्युक्तेः यदाह श्रीजयदेवः—

मुहुरवलोकितमण्डनलीला । मधुरिपुरहमिति भावनशीलेति ।। ३ ।।

श्रीरामनारायणकृता भावभावविभाविका

तदात्मकत्वद्योतकचेष्टामाह । गतिस्मितेति । ता अबलाः तत्र स्त्रीत्वेन सामान्यत एवाबलात्वेऽपि विरहवैक्लव्येन विशेषतोऽप्यबलाः यद्वा बलशब्देनात्र बलहेतुः प्राणा अकाराभिधेये वासुदेवे एव प्राणा यासां यद्वा स्वतो निबलत्वेन अशब्दसञ्ज्ञस्य हरेरेव बलं तत्तच्चेष्टानिमित्तं यासु तथाभूता यतस्तदात्मिका अत एवात्मत्वेन निरतिशयप्रेमास्पदतया प्रियाःस्वात्धुतयैव नित्यप्रियस्य तस्य या मदनमदोन्मत्ततया स्खलितमृदुपदन्यासा न्यासिनामपि स्वगतिविगतिकरी गतिः यच्च स्मरस्यापि विस्मितकरं तदीयस्मितं यच्च प्रकृष्टमङ्गनाङ्गेष्वनङ्गसमर्पणेनापाङ्गीकरणापाङ्गवाणाक्षय्यनिषङ्गात्मकेक्षण गतिविगतगतीनां स्मितेन विस्मितानामपाङ्गेनापाङ्गीकृतानामपि सञ्जीवनामृतप्रियभाषणम् आदिशब्देन आलिङ्गनरासकरविलासादयः तेषु प्रतिरूढमूर्तयः तत्र प्रतिरूढमतय इति वक्तव्येऽपि मत्यावेशातिशयेन शरीरेऽपि तदभिव्यक्तिमवधार्य प्रतिरूढमूर्तय इत्युक्तं तथाचैवंभूततया कृष्णस्य चित्ताद्याकर्षकस्य विहारविभ्रमवद्विहारविभ्रमा यासां ता असौ कृष्ण एवाहमिति पवस्परं न्यवेहिषुर्निवेदयामासुः ।। ३ ।।

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तदात्मिका इत्युक्तं भगवत्स्वरूपपरिग्रहमाह । गतीति । प्रियस्य गत्यादिषु प्रतिरूढा मूर्तिर्यासां भगवद्धर्मान् स्वात्मन्येवाविरोधयन्त्यः यतः प्रियास्तथापि मनसा प्रतिरूढमूर्त्तयो नतु नरवद्द्वेषादिकं धृतवत्यो ऽवलास्तादृशवलरहिताः अतस्तदावेशवशात्तासां तथात्वमित्याह । तदात्मिकाः ततः कृष्णविहारविभ्रमाः कृष्णस्येव विभ्रमाः क्रीडा विलासा यासां ताः अतो यो ऽर्चिष्यतेऽसावहमिति परस्परं निवेदितवत्यः नतु वयं व्रजस्त्रिय इति मनागपि काश्चिदपि जानन्ति स्मेत्यर्थः कृष्णविहारैः स्मर्य्यमाणैर्विभ्रमः उन्मादो यासामिति वा लीलाख्यानुभावोऽयं समानमिदं पद्यमितरपक्षयोरपि निवृत्तिपक्षे गत्यादिषु देहेन्द्रियादिव्यापारेषु या प्रियास्तत्तदाकारवृत्तयस्ताः प्रियस्यात्मनः प्रतिरूढा आत्मन्यारूढा मूर्त्तयो यासां ताः अत एवास्य वासुदेवस्य विभोश्चिदात्मन एव बलं विषयप्रकाशनसामर्थ्यं यासां किञ्च तस्मिन्नारोपकृतत्वात्तदात्मिकास्तत्सत्तातिरिक्तसत्ताविधुरा इति कृष्णस्य सदानन्दस्वरूपस्य परब्रह्मणः सत्तास्फूर्तिप्रदातृत्वादिलक्षणविहारे तद्वर्णनविभ्रमो यासां ताः श्रुतयः न्यवेदिषुः बोधयामासुः तथा असौ परमात्माहमेवेति न्यवेदिषुरित्यर्थः । तथाच श्रुतयः यद्वाचानभ्युदितं येन वागभ्युद्यते यन्मनसा न मनुते येनाहुर्मनो मतं यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति अहं ब्रह्मास्मि योऽसावादित्ये पुरुषः योऽसावहमित्याद्याः ।। ३ ।।

रास–रहस्यम्

र० टी०—गत्यादिषु देहेन्द्रियादि व्यापारेषु याः प्रियाः तत्तदाकाराः वृत्तयस्ताः, प्रियस्य आत्मनः, प्रतिरुढा प्रति अञ्चतीति प्रत्यक्, प्रत्यकत्वेन आरुढाः, मूर्तयः स्वरूपाणि यासां ताः, अत एवास्य विभोश्चिदात्मनः अबलाः न बलं अधुना तत्प्रकाशनसामर्थ्यं नास्ति यासां ताः, तदात्मिकाः तत्सत्तातिरिक्तसत्ताविधुरास्तादात्म्यभावापन्नाः कृष्णविहारविभ्रमाः परब्रह्मणः सत्तास्फूर्तिप्रदातृत्पलक्षणो यो विहारः व्यापारविशेष तद्विषये विभ्रमः विशेषेण भ्रमो भ्रान्तिः यासां, अवाङ्मनसगोचरत्वात्, ताः वृत्तयः "यद्वाचानभ्युदितं येन वागभ्युद्यते ।" "यन्मनसा न मनुते येनाहुर्मनोमतम् ।" "असावहं त्विति ।" "असावहं त्विति ।" "यो सावसौ सोऽहमस्मि ।" "असावदो ओम् ।" "अहं ब्रह्मास्मि ।" इत्यादि रूपेण न्यवेदिपुः स्वात्मानमेव बोधयामासुः ।। ३ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदेव वर्णयति । गतिस्मितेति । तदातमिकाः कृष्णार्पितचित्ता प्रियाः कृष्णप्रियाः प्रियस्य कृष्णस्य गत्यादिषु प्रतिरूढाः आविष्टा मूर्तयो यासां ताः अत एव कृष्णविहारा इव विभ्रगा विलासा यासां ताः तुशब्दोऽवधारणे अहमेव असौ कृष्ण इति मिथो न्यवेदिषु निवदितवत्य ।। ३ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अनन्तस्मरणादनङ्गस्मरणास्ता इति चर्यां चेरुरिति वदति ।। गतीति । गतिर्गमनं स्मितं हासो वीक्षणं कटाक्षमोक्षणं भाषणं चादिर्येषां ते तेषु स्मितप्रेक्षण स्मितभाषणमिति वा प्रिया गोप्यः प्रियस्य कृष्णस्य प्रतिरूढा ध्यानेनानुकृता मूर्तिराकारो यासां ताः परस्परं कृष्ण इत्यङ्कूरितधिषणा इति यावत् असावहं न्विति विकल्पं नावेदिषुर्न व्यजानन् । तत्र तन्त्रं तदात्मकाः कृष्णविहारभ्रमा इति । कृष्णविहार एवाधुना मधुनाथः क्रीडत्यस्माभिरिति विभ्रमो भ्रान्तिर्यासां ताः । प्रश्ने विकल्पे नु स्विच्चेति यादवः । नु प्रश्ने च विकल्पार्थ इति विश्वः ।। ३ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो भगवतः स्वरूपपरिग्रहो जात इत्याह । गतिस्मितेति । धर्माश्चेत् स्वस्मिन्नागताः तदैकत्रोभयधर्मा विरुद्धा इति भगवति स्वधर्मानारोपितवत्यः कायवाङ्मनसां दृष्टेश्च चत्वारः प्रधानधर्माः तेषु सर्वेष्वेव प्रतिरूढा मूर्तिर्यासां भगवद्धर्मेषु स्वमूर्तिरारोपिता अन्यथा अन्योऽन्यधर्माभिनिवेशाभावे सम्यक विलासो न स्यात् तदाह । गतिः कायिकी स्मितं मानसं प्रेक्षणमैन्द्रियकं भाषणं वाचिकं तदादयो यावन्तो विभ्रमाः बन्धादयः रतिरूपा एव तेषु सर्वेष्वेव प्रियस्य सम्बन्धिषु स्वयं प्रियाः भोगावस्थामेव प्राप्ताः विपरीता जाताः रसाधिक्ये स्त्रियः पुरुषत्वमापद्यन्त इति वात्स्यायनः अत एव स्वयं प्रिया योग्याः प्रतिरूढा विपरीततया आरूढा मूर्त्तयः स्वरूपाणि यासामिति तत्र यासां भगवानल्पव्यवहितः पूर्वमासीत्ताभिर्भगवत्प्रश्ने कृते अन्तर्हिताज्ञानात्तत्रोत्तरवक्र्यो भवन्ति असौ कृष्णः अहं कृष्ण इति अथवा योऽन्विष्यते सोऽसावहमिति अन्यासां प्रतीत्यर्थं नटः कपटवेषं कृत्वापि वदति क्रीडायां तथा न किन्तु स्वत एवेत्याह । अबला इति । अवलाः स्त्रियः भगवद्रूपाविष्कारे च बलरहिताः । स्पष्टवैलक्षण्यं च स्त्रीपुरुषयोः तथा कथने प्रतारकत्वमालक्ष्याह । तदात्मिका इति । न केवलं धर्म्योपपत्तिः किन्तु तद्धर्माणामपीत्याह । कृष्णवद्विहार- कायवाङ्मनोव्यापारः विभ्रमाःतत्रत्या विलासा यासाम् ।। ३ ।।

श्रीसुबोधिनी-सारः

प्रियस्य कृष्णस्य गमनहाससहितदर्शनभाषणादिषु प्रतिरूढा आविष्टा मूर्त्तयो यासां ताः कृष्णस्येव विहाराः क्रीडा विभ्रमा विलासा यासां ताः प्रिया अबलाः स्त्रियस्तदात्मिकाः सत्योऽसौ कृष्णोहमिति व्यजिज्ञपन् ।। ३ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गतिस्मितेत्यत्र, भगवति स्वधर्मानिति । स्वगतौ प्रियगतिभावना जातेति तथा । **भगवद्धर्मे**ष्विति । भगवत एतासां च मिथो वैलक्षण्यं गत्यादिषु सहजम् । अधुना तु भगवद्गत्यादिवदेव गत्यादि, संस्थानविशेषोपि तथा, न तु प्राग्वत् । तथा च तद्भावापन्ना मूर्तिर्जातेत्यर्थः ।। ३ ।।

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

उक्तमेव स्पष्टयति—गतिस्मितेति । कृष्णस्य प्रिया अबला गोप्यस्त्वसौ कृष्णोहमेवेति न्यवेदिषुः परस्परं न्यवेदितवत्यः । तत्र हेतुमाह—कृष्णस्येव विहारविभ्रमाः क्रीडाविलासा यासां ता इति । तत्र हेतुमाह-तदात्मिका इति । तत्रापि हेतुमाह-प्रियस्य कृष्णस्य गत्यादिषु प्रतिरूढा आविष्टा मूर्तयश्चेतांसि यासां ता इति ।। ३ ।।

अन्वितार्थप्रकाशिका

गतीति ।। प्रियस्य कृष्णस्य गतिस्मितादिषु प्रतिरूढाः आविष्टाः मूर्त्तयो यासां ताः आदौ प्रियस्य गतिस्मितादय आसां मूर्त्तौ चित्तादिमय्यामारूढास्ततस्तेषु गत्यादिषु आसां मूर्त्तिश्च प्रत्यारूढा इत्यर्थः । कृष्णस्येव विहारविभ्रमाः क्रीडाविलासा यासां ताः तदात्मिकाः कृष्णतादात्म्यं प्राप्ताः कृष्णस्य प्रियाः अबला गोप्यः असौ कृष्णोऽहमेव इति न्यवेदिषुः ज्ञातवत्यः परस्परं निवेदितवत्यो वा ।। ३ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गतीति प्रियस्य श्रीकृष्णस्य गत्यादिषु प्रतिरूढाः प्रविष्टाः मूर्त्तयो देहेन्द्रियांतःकरणानि यासां ताः अतः कृष्णतुल्याः विहारविभ्रमाः रमणविलासा यासां ताः अबला असौ श्रीकृष्णोऽहमस्मीति अन्योऽन्यं न्यवेदिषुः कथितवत्यः ।। ३ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेव प्रपञ्चयति ।। गतीति ।। तदात्मिकाः अत एव प्रियस्य श्रीकृष्णस्य, गतिश्च स्मितं च प्रेक्षणं च भाषणं च तान्यादयो येषु तेषु, प्रतिरूढा आविष्टा मूर्त्तयो यासां ताः, कृष्णगत्यादिस्मृतौ सत्यां कृष्णचरितानुकाराविष्टमूर्त्तय इत्यर्थः । अतः कृष्णविहारा इव विभ्रमाः क्रीडा यासां ताः; प्रिया गोप्यः, स्वयं अबलाः स्त्रियः सत्योऽपि, असौ कृष्णः, अहं इति न्यवेदिषुः मिथो निवेदितवत्यः ।। ३ ।।

कृष्णप्रिया

प्रियतम भगवान श्रीकृष्णचन्द्रजी की लालित्यमयी गति, मन्दमुस्कराहट, अनुरागपूर्ण अवलोकन, एवं स्नेहसभर वार्तालाप आदि में अपने स्वरूप का संस्थापन किया इसका रहस्य यह है कि वे तद्रूप ही बन गई थी, भगवद्रूप बनी हुई गोपियाँ यद्यपि अबलाएँ नारी देहवाली थी फिर भी भगवान् की प्रियाएँ होने से भगवान कृष्ण के समान विहार विलास आचार एवं व्यवहार करती हुई कहने लगी देखो मैं श्रीकृष्ण हूँ ॥ ३ ॥

गायन्त्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद् वनाद् वनम् ।
पप्रच्छुराकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥ ४ ॥

कर्दमक्षमा

अन्वयः – संहताः (ताः गोपिकाः) अमुम् (कृष्णम्) एव, उच्चैः, गायन्त्यः, उन्मत्तकवत्, वनात्, वनम्, विचिक्युः, (च) आकाशवत्, भूतेषु, अन्तरम्, बहिः, सन्तम्, पुरुषम्, वनस्पतीन्, पप्रच्छुः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च गायंत्य इति । वनाद्वनांतरं गच्छंत्यो विचिक्युरमृगयन् । उन्मत्तस्य तुल्यत्वमाह वनस्पतीनिति । वनस्पतीन् पप्रच्छुः । भतेष्वंतरं मध्ये संतं पुरुषं बहिश्च संतमिति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ताद्रूप्यं प्राप्ता अप्यन्यदपि किंचिच्चक्रुरित्याह—किञ्चेति । गायंत्य इति—तं प्रति दूरान्निजार्तिश्रावणार्थम् । यद्वा — गीतप्रियस्य तस्य तेनाकर्षणार्थम् । अमुं श्रीकृष्णमेव न त्वन्यत्किञ्चिन् संहिता मिलिताः सम्यग्मार्गणार्थमन्योन्यार्त्युपशमार्थं वा । वनस्पतीन् पुष्पं विना फलधारिणः । सर्वव्यापिनः स्थानप्रश्नोऽत्युन्मत्ततामेवाह "यच्च किंचिज्जगद्वस्तु दृश्यते श्रूयतेऽपि वा । अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥" इति श्रुतेः ॥ यदा च स तासामुन्मादः स्वप्रौढिमानं विहाय मंदीबभूव तदा ता अर्धबाह्यानुसंधानवत्यो यथा चेष्टन्ते स्म तद्वर्णयति —गायन्त्य इति । कान्तविच्छेदेन दुःखिन्यो वयं व्रजस्त्रियस्तमन्वेषयाम इति बाह्यानुसंधानम् । संहता मिलिता वनाद्वनं गच्छन्त्यः । उन्मतकवत् ईषदुन्मत्ता इव । अल्पार्थकप्रत्ययः । पुरुषम् श्रीकृष्णम् । वनस्पतीन्पप्रच्छुरित्युन्मादलक्षणम् । ननु सर्वमुख्यया वृंदावनेश्वर्या सह कृष्णस्तदा सुखेन रमते एवेति जानामः । किन्तु, तद्विरहोन्मत्तानामासां गोपीनामुन्मादप्रश्नादिकं स जानाति न वेत्यतो विशिनष्टि—भूतेषु सर्वेष्वन्तरं बहिश्चाकाशवद्व्याप्य स्थितम् । तेन कृष्णस्वरूपस्यापरिच्छिन्नत्वेऽपि सर्वगतत्वात्तासां प्रश्नादिकं तत्रतत्रैवाऽलक्ष्यमाणः शृणोत्येवेति द्योतितम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च चिरात् प्राप्तावधानानां तासां पुनरुन्मादाख्यामवस्थां वर्णयति । गायन्त्य इति । गानमत्र गोकुले प्रसिद्धं पूतनाबधादिमयं तच्च विषजलाप्ययादित्यादि वक्ष्यमाणरीत्या स्वरक्षणाभिप्रायेण । उच्चैर्गानन्तु तं प्रति दूरान्निजार्त्तिश्रावणार्थम् । किम्वा गीतप्रियस्य तस्य तेनाकर्षणार्थं किम्वा आर्त्तिभरस्वभावादेव अमुमेवेति । यद्यपि त्यागेन परमदुःखदोऽसौ तथापि तमेवेत्यर्थः । गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते इत्यादिवत् । संहता अन्योऽन्यं मिलिताः सत्यः सर्वत्र सम्यङ्मार्गणार्थम् । किंम्वा सख्येनान्योऽन्यमार्त्युपशमनार्थम् । किम्वार्त्तिविशेषस्वभावादेव । गानान्वेषणयोर्यौगपद्यमिदं गायन्त्य एव भ्रमन्ति मध्ये मध्ये तु पृच्छन्तीत्यर्थः । वनस्पतीन् प्रति प्रश्ने हेतुः । उन्मत्तकवदिति । स्वार्थे कन् । तेन केशाद्यसम्वरणं व्यज्यते पुरुषं सर्वान्तर्यामिरूपमपि अत एवाकाशवद् भूतेषु अन्तरं बहिश्च व्याप्य सन्तमपि पप्रच्छुः । निजप्रेमावलम्बनकेवलनरलीलारूपेणैव तस्य तत्प्रश्नविषयत्वादिति भावः । यद्वा । अहो बत तासामिदं सर्वं किमरण्यरुदितमेव जातं नेत्याह । आकाशेति । वक्ष्यते च स्वयम् । मया परोक्षं भजतेति । यद्वा । पुरुषं स्वनायकं पप्रच्छुः । तञ्च भूतेषु स्थावरजङ्गमेषु आकाशवदन्तरं बहिश्च सन्तं साक्षादिव सत्तया स्फुरन्तं पप्रच्छुः । तादृशज्ञानस्फूर्त्तिश्च तासां प्रेमविवर्त्तविशेषादेव "वनलतास्तरवः आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्या इतिवत् । तत्र बहिःस्फुरणं दूरतः अन्तःस्तु निकटात् । तत्र च सत्युन्मादेनैवानिन्द्रियेष्वपि वनस्पतिजातिषु प्रश्नो योग्य इति भावः ।४।

श्रीमज्जीवगोस्वामिकृता बृहद्वैष्णवतोषिणी

न चैवं केवलमनुकरणं लीलाविष्टता वा, किन्तु विरहविह्वलाः सत्य इतस्ततोऽन्वेषयन्त्यः पुरो दृश्यमानात् सर्व्वानेवापृच्छन्नित्याह—गायन्त्य इति । उच्चैर्गानं तं प्रति दूरान्निजार्त्तिश्रवणार्थम्, किंवा गीतप्रियस्य तस्य तेनाकर्षणार्थम्, किंवा, आर्त्तिभरस्वभावादेवमेवेति, यद्यपि त्यागेन दुःखप्रदत्वेन च तद्गानादिकं न युज्यते, तथापि अमुमेवेति तदानीमपि तदेकप्रियत्वम्,

---

१. विचेरु ।

किंवा तदेकगानशीलत्वमुक्तम्, संहता अन्योऽन्यं मिलिताः सत्यः सर्व्वत्र सम्यङ्मार्गणार्थम्। किंवा सख्येनान्योन्यमार्त्त्युपशमनार्थम्, किंवा, आर्त्तिविशेषस्वभावादेव वनस्पतीन् प्रति प्रश्ने हेतुः। उन्मत्तकवदिति स्वार्थे कुत्सायां वा कः, तेन केशाद्यसंवरणं ध्वन्यते। तथान्वेषणे प्रश्ने च विचाराभावेनाभिनिवेशोऽपि निरस्तः, अन्यथा वृक्षेषु प्रश्नानुपपत्तिः। वनाद्वनमिति प्रतिवनेऽन्वेषणेनेतस्ततो बहुलपरिभ्रमणं तेनानेककालमन्वेषणमपि सूचितम्, आकाशो यथा बहिरन्तर्व्याप्यास्ते तथाभूतेषु सर्व्वजीवेषु पुरुषं पुरुषरूपेणान्तरमन्तर्व्वहिश्च व्याप्य सन्तम्, यद्वा, भूतेषु प्राप्तेषु कुब्जादिषु अन्तर्व्वहिश्च स्वनिकटे सन्तमप्युन्मादादेव वृक्षादीन् पप्रच्छुः। यद्वा, पुरुषं निजस्वामिनमिति तादृशे प्रश्ने मार्गणे च हेतुः, यद्वा, अहो बत सर्व्वत्र सन्तमपि स्वयं तथा ज्ञायमानमपि विरहजप्रेमार्त्तिभरेण वृक्षानपि ताः पृष्टवत्य इति स्वयमपि तादृशाप्याह—आकाशेत्यादि। अर्थः स एव, अहो शृणु प्रेमार्त्तिवैवश्यमाहात्म्यमिति भावः॥ ४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अन्तरं बहिः सन्तमन्तरं बहिश्च सन्तम्॥ ४–८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च गायन्त्य इति। सङ्गताः समुदिताः सङ्घीभूता इति यावत् अमुं कृष्णमेव गायन्त्यो वनाद्वनं गच्छन्त्यः उन्मत्तवद्विचिक्युरमृगयन् वनस्पतीन् प्रति पप्रच्छुश्च कथंभूतमाकाशवद्भूतेषु चराचरेष्वन्तर्वहिश्च व्याप्य सन्तं पुरुषं पुरुषाकारं पुरुषशब्दवाच्यं वा परमपुरुषं वा एवम्भूतमपि प्राकृतमिव पप्रच्छुरित्यर्थः। वनस्पतीन् पप्रच्छुरित्यनेनोन्मत्ततुल्यत्वं दर्शितम्॥ ४॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सङ्गताः मिलिताः आकाशवद्भूतेषु बहिरन्तरं सन्तं बाह्याभ्यन्तरदेशयोर्वर्तमानम् "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित" इति श्रुतिः॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गायन्त्य इति। गानमत्र गोकुलप्रसिद्धं पूतनावधादिमयं गानान्वेषणयोर्यौगपद्यमिदं गायन्त्य एव भ्रमन्ति मध्ये मध्ये तु पृच्छन्ति पुरुषं सर्वान्तर्यामिरूपमपि अत एवाकाशवत् भूतेष्वन्तरं बहिश्च व्याप्य सन्तमपि पप्रच्छुः। तत्र हेतुः। अमुं तासु तु निजप्रेमालम्बनरूपेणैव स्फुरन्तमित्यर्थः। यद्वा। पुरुषं स्वनातकं पप्रच्छुः। तञ्च भूतेषु प्राणिषु आकाशवदन्तरं बहिश्च व्याप्य सन्तं पप्रच्छुः। तस्य तत्र तत्र सत्तां पप्रच्छुरित्यर्थः। किञ्चित् प्रतिबिम्बं पृच्छन्तं पृच्छन्तीतिवत्। तादृशज्ञानञ्च तासां प्रेम्णा तत्र तत्र स्फूर्त्तेरेव "वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्या" इतिवत्॥ ४॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ तास्ता चेष्टा हृदि कृत्वैव तस्थुरिति न, अपि तु तद्गानपूर्वकं वनाद्वनञ्च विचारयामासुरित्याह—गायन्त्य उच्चैरित्यादि। उच्चैरिति कदाचिद्दूरे वा गतो वर्तत इत्याशङ्क्य उच्चैर्गानम्। अमुं श्रीकृष्णं संहता एव मिलिता एव कदाचिदात्समध्ये कापि वियुज्येतेति उन्मत्तकवत् उन्मत्तिका इव, अनुकम्पायां कन्, न केवलं विचिक्युः, पप्रच्छुश्च। प्रच्छि द्विकर्मकः, तत्रामुं श्रीकृष्णमिति मुख्यं कर्म। भूतेष्वाकाशवत्, अन्तरमन्तरे बहिर्वाह्ये च सन्तं पुरुषमात्मानमिति गौणं कर्म। तत्र प्रष्टव्यान्तराभावात्तां लक्ष्मीकृत्यैव पप्रच्छुरित्यर्थः। भूतेषु सन्तमिति भूतं लक्ष्मीकृत्येत्यायाते वनस्पतीनिति वनस्पतीन् प्रतीत्यर्थः। तेन गानं कर्म अमुमिति गौणं कर्म, पुरुषमिति वनस्पतीनिति कर्मप्रवचनीयार्थो द्वितीया, वनस्पतीन् प्राप्येति वार्थः। हारमित्युक्ते पिधेहीत्यादि क्रियाध्याहारेणान्वयबोधात्॥ ४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यदा च स तासामुन्मादः स्वप्रौढिमानं विहाय मन्दीबभूव तदा ता अर्धवाह्यानुसन्धानवत्यो यथा चेष्टन्ते स्म तद्वर्णयति। गायन्त्य इति। कान्तविच्छेदेन दुःखिन्यो वयं व्रजस्त्रियस्तमन्वेषयामः इति बाह्यःनुसंधानं संहता मिलिता वनाद्वनं गच्छन्त्यः उन्मत्तकवदीषदुन्मत्ता इव अल्पार्थे कः प्रत्ययः पुरुषं श्रीकृष्णं वनस्पतीन् पप्रच्छुरित्युन्मादलक्षण ननु सर्वमुख्यया वृन्दावनेश्वर्या सह कृष्णस्तदा सुखेन रमत एवेति जानीमः किन्तु तद्विरहदुःखोन्मत्तानां तासां गोपीनामुन्मादप्रश्नादिकं स जानाति न वेत्यतो विशिनष्टि। भूतेषु सर्वेष्वेव अन्तरं बहिश्च आकाशवद्व्याप्य सन्तमपि तेन कृष्णस्वरूपस्य परिच्छिन्नत्वेऽपि सर्वगतत्वात्तासां प्रश्नादिकं स तत्र तत्रैवालक्ष्यमाणः शृणोत्येवेति द्योतितम्॥ ४॥

श्रीरसिकाल्हादिनी टीका

तादात्म्यापन्नानां संचारिभावोदयेन दिव्योन्मादकृतं चेष्टितमाह गायंत्य इति संहता अन्योन्यमिलिताः सत्य वनाद्वनं गच्छन्त्य इतस्ततो विचिन्यु अमृगयन् यस्त्वंतर्द्धानेन दुःखदवत्प्रतीयमानस्तममुमेव उच्चैर्गायन्त्यः दूरं गतमिति मत्वा निजार्त्ति-

ज्ञापनार्थमुच्चैर्गानं, यद्वा कीर्त्तिः गायकेऽवति प्रीतियुक्तत्वात् तस्येत्युच्चैर्गानं उन्मत्तवत् स्वार्थे क प्रत्ययः। निजाङ्गावगुण्ठनविस्मृतिपूर्वकमन्वेषितवत्यः, न केवलमन्वेषणमपि तु पृष्टवत्योऽपि। तदुक्तं रसार्णवे—"उन्मादश्चित्तविभ्रांतिर्वियोगादिष्टनाशतः। वियोगजेतु चेष्टास्युर्धावनं परिवेदनम्। असंबद्धप्रलपनं शयनं सहसोत्थितम्। अचेतनैः सहालापो निर्निमिषस्मितोदयः"। इति उन्मत्तस्यैव तासामाचरितमाह—आकाशवत्, बहिरंतरमेकरूपमेव सन्तं पुरुषं पूर्षु शयनादन्तर्यामिनं। अत एव वनस्पतीन् महतो वृक्षान् पप्रच्छुः। अहो अमी देववरेत्यादिना श्रीकृष्णोक्तं स्मृत्वा तेषु स्नेहातिशयस्य दृष्टचरत्वात्। वृक्षेषु प्रश्नः भूतेषु जंगमेषु बहिरिन्द्रियव्यापारयुक्तेषु बहिः संतं बहिरिन्द्रियवृत्याऽपरोक्षमुपलभ्य मानत्वात्। स्थावरेषु अन्तरं संतं यतः पुरुषं तेष्वंतरेव निविष्टं एते निधि पालका इव प्रत्यक् वृत्तय इति संभाव्य पप्रच्छुरिति। यद्वा आकाशवत् शून्यवत् उन्मादाः प्रपच्छुरिति। यद्वा भूतेषु स्थावरजंगमेषु अन्तरं संतं वनस्पतीन् बहिः पृच्छवत्य इति उन्मादादेवात्मविवेकशून्याः जंगमान् पृष्ट्वा स्थावराणि पृच्छन्तिस्मेत्यर्थः॥ ४॥

विशुद्धरसदीपिका

ततश्चोन्मादस्यानवस्थिति स्वभावात्किञ्चिदवधानेनाधिगतदेहानुसन्धानानां कायिकीमपि चेष्टामाह। गायन्त्य इति। यद्यपि त्यागेनार्त्तिदोऽसौ तथाप्यमुमेव गायन्त्य इति सम्बन्धः। गानं यथा

नाथ हरे! बत नाथ हरे! करुणां कुरुपरिजननिकरे। गर्वितचित्तास्तव सुखवित्ता नान्यनिमित्ताः प्राणपते!॥
रसिकशिरोमणिरसि हृदयंगमरमणमहाशयविमलमते!।

इत्यादि उच्चैरित्यार्त्तिभरस्वभावादेव संहताः सम्यगैकमत्येन मिलिताः एवं च मैत्री सूचिता मनोवृत्तिमयी प्रीतिर्मैत्री स्पर्शादिकोचिता सा च परस्परं सख्येनैवेत्युक्तमलङ्कारकौस्तुभे वनाद्वनं विचिक्युः अमृगयन् अमुमेवेति परिवृत्त्यान्वयः उन्मत्तकवदित्यल्पार्थे कन् ततश्चावरोहः सूचितः वनस्पतीन् पप्रच्छुश्च कमित्याकाङ्क्षायामाह। पुरुषं स्वनायकं तञ्च भूतेषु स्थावरजङ्गमात्मकेषु आकाशवदन्तरं बहिश्च सन्तं साक्षादिव सत्तया स्फुरन्तं तादृशस्फूर्त्तश्च प्रेमविवर्त्तविशेषादेव "वनलतास्तरव आत्मनि विष्णुमित्यादिवक्ष्यमाणवत् तत्र बहिः स्फुरणं दूरतः अन्तःस्तु निकटादिति विवेकः तदेवं सत्युन्मादेनैवानिन्द्रियेष्वपि प्रश्नः सङ्गच्छत इति नचेदमसंभावितं मौढ्यादिनान्यत्रापि तथा दृष्टत्वात् तथाहि—

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाकोटकम्। वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते। न च्छायापि परोपकारकारिणी मार्गस्थितस्यापि मे॥

इत्यादि वस्तुतस्तु पृच्छतेर्द्विकर्म्मकत्वादयमर्थः अमुं श्रीकृष्णमिति मुख्यं कर्म्म भूतेष्वाकाशवदन्तरं बहिश्च सन्तं पुरुषमात्मानमिति गौणं कर्म्म तत्र प्रष्टव्यान्तराभावात्तं लक्ष्यीकृत्य व वनस्पतीन् पप्रच्छुः किम्वा वनस्पतीनिति कर्म्मप्रवचनीयार्थो द्वितीया ततश्च वनस्पतीन् प्राप्येत्यर्थः। अथवा प्रथमश्लोके कान्तभावानां चेष्टा द्वितीये च नित्यप्रेयसीनां तृतीये नित्यसहचरीणामिति क्रमो ज्ञेयः ततश्चायमर्थः वनस्पतीन् प्राप्य तदात्मानं पप्रच्छुः तेषामात्मा च द्विविधः परिकररूपो वनस्पतिरूपश्च तत्राद्यो नित्यसिद्धत्वादासां ज्ञातचर एव दिव्योन्मादेऽपि तमेव लक्ष्यीकृत्य पप्रच्छुरित्यर्थः "पश्याम चान्तर्नयनैः किशोरीं तथा किशोरं प्रचुरं प्रपन्ना" इत्यादिना पुराणादौ दर्शितत्वात्॥ ४॥

श्रीरामनारायणकृता भावभावविभाविका

अथ प्रेमविकलत्वादुन्मादस्य दिव्यदृष्टिसम्पादकत्वसूचकं तदन्वेषणप्रकारमाह। गायन्त्य इति। संहता अमुमेवोच्चैर्गायन्त्य उन्मत्तकवद्वनाद्वनं विचिक्युरित्यन्वयः तत्र संहता इत्यनेन ईर्ष्यामात्सर्यद्वेषादित्यागेन भगवत्परिजनसङ्गो भगवन्तमन्विषतां प्रेमपथप्रवृत्तानां प्रथमं साधनमुपदिष्टं गायन्त्य इत्यत्र "नाहं वसामि वैकुण्ठे योगिनां हृदये न च। मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद! इत्यादिभिर्भगवतो गुणगानप्रियत्वाद्भगवज्जनसमागमे गुणगानमुपदिष्टम् उच्चैरिति—

शृण्वन् सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके। गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरदेसङ्गः॥

इत्यत्र विहितगानगतविलज्जत्वोपदेशः। अमुमेवेति। प्रत्ययसातत्येन तदेकपरत्वमुपदिष्टं नत्वन्यत्र द्वेषः उन्मत्तकवदित्यत्रोच्चैर्गानमपि न दम्भेन किंतु प्रेमपरवशतया देहाद्यनुसंधानराहित्येनेति ध्वनितं तदप्युक्तम्—

एवं व्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः। हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यपि लोकबाह्यः॥ इति—

वनाद्वनमित्यनेन यत्र यत्र प्रियप्राप्तिसम्भावना तत्र तत्रान्वेषणोक्त्या मूढग्राहेण स्वसम्प्रदायाभिनिवेशेनान्यसत्सङ्गाभावनिवृत्तिर्दर्शिता विचिक्युरिति प्रियान्वेषणे अनलसत्वं तं विना विश्रामाभावश्च दर्शितः किं च तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवयेति वचनात् परिप्रश्नाभावे भगवदवगत्यसम्भवात्तदपि स्वाचरितेनैव बोधयन्ति तत्र गुरौ प्रश्नस्यावश्यकत्वेऽपि न गुरावेव प्रश्नेन तद्वेदनमित्यस्ति कश्चिन्नियमः किन्तु भगवन्मार्गप्रदर्शकानां सर्वेषां गुरुत्वमिति यत्र यत्र भगवदुपदेशस्य यथा कथञ्चिदपि

सम्भावना तत्र सर्वत्र प्रश्नविधानाय परिप्रश्नेनेत्युक्तं तमनुसृत्य सर्वत्र प्रश्नं कृतवत्य इत्याह । पप्रच्छुरिति । भगवतः सर्वत्र प्रश्नोपयोगमाह । आकाशवदिति । भूतेषु प्राणिषु अन्तरं प्रत्यगात्मरूपेण बहिः सर्वानुगतसच्चिदात्मना सन्तमाकाशवद्व्याप्तं पुरुषं वनस्पतीन् पप्रच्छुः यद्वा अन्तरं पुरुषं प्रत्यक्तया पुरिशयं बहिश्च भूतेषु पृथिव्यादिषु कारण सदात्मनानुगतम् अहमात्मा गुडाकेश सर्वभूताशयस्थितः । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति भगवद्वचनात् तत्राकाशस्य देशकालपरिच्छेदशून्यत्वेऽपि वस्तुपरिच्छेदवत्तया त्रिविधपरिच्छेदरहितभगवद्दृष्टान्तत्वासम्भवेऽपि न्यूनस्यापि चन्द्रकमलादेर्मुखनेत्रदृष्टान्तत्ववत्तदुदाहरणं वनस्पतीन् पप्रच्छुरित्यत्र प्रेमोन्मादनिदर्शनं प्रसिद्धमेव किञ्च मानिना स्वबुद्ध्यभिमानेनान्यत्र कुशलेष्वपि जडत्वबुद्धिः प्रेमिणां तु तृणादपि सुनीचेन तरोरपि सहिष्णुना । अमानिना मानदेन कीर्तनीयः सदा हरिरित्यादिवचनात् स्वाभिमानाभावेन न कुत्रापि जडत्वमातरिति भावः । वस्तुतस्तु प्रेमोन्मादो भूतदिव्यदृष्ट्या वृन्दावनद्रुमादिकं नाचेतनं किन्तु मुनिसुरादिरूपमिति पश्यन्त्यः प्रेमपथमुपदिशन्त्यश्च पप्रच्छुः ॥ ४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवं तदात्मतां प्राप्तानां लीलामुपवर्ण्य पुनः प्राप्तस्वशरीरानुसन्धानानां चेष्टामाह । गायन्त्य इति । अहो येन वयं रमिताः स प्रेष्ठ इदानीं क्व गत इति विचिन्त्य संहता मिलिताः प्रथमं प्रेष्ठमेव गायन्त्यः पूर्वं यथा वयं तदीयं कलगीतमाकर्ण्य झटिति तत्समीपमागतास्तथाऽस्मद्गीतमाकर्ण्य सोऽप्याश्वस्मत्सन्निधावायास्यतीत्याशयेन तथा जाता नागते प्रेष्ठ उन्मत्तकवद्वनाद्वनं विचिक्युः अस्मिन्वने प्रेष्ठः स्यादित्याशया तत्र वने प्रति वृक्षादिकमन्वेषणं कृतवत्यः परिपूर्णत्वात्तदतिरिक्तस्य सर्वस्याप्यनिरूपणाच्च तदन्वेषणतत्प्रश्नयोः परमोन्मत्तचेष्टितत्वमित्यभिप्रायेणोन्मत्तकवदित्युक्तं मयेति द्योतनायाऽऽहाऽऽकाशवद्भूतेष्वन्तर्बहिः सन्तमतएव पुरुषं पूर्णं सर्वात्मानमन्वेषणाद्ययोग्यमित्यर्थः । निवृत्तिपक्षे आकाशवत्सर्वगतश्च नित्यः सत्यं ज्ञानमनन्तं ब्रह्मेत्येवममुमेवाकाशवदन्तरं बहिश्च भूतेषु सन्तं पुरुषं गायन्त्यः सोऽन्वेष्टव्य इति तं विचिक्युस्तस्यान्वेषण प्रतिपादयामासुः तथा गुहाहितं गह्वरेष्ठं पुराणमित्यन्तःकरणलक्षणस्य वनस्पतीन् उन्मत्तकवदविद्यावशं सुखमात्मविशिष्टमन्तःकरणं वनं तस्माद्वनाद्वनं तद्वृत्ति विशिष्टादितरवृत्तिनिर्विशिष्टं तथात्मा विजिज्ञसितव्य इति प्रश्नपूर्वकं विचारं वनस्पतीन् अन्तःकरणवनस्पतीन् सत्त्वगुणादीनुद्दिश्य बोधयामासुरित्यर्थः ॥ ४ ॥

रास-रहस्यम्

र० टी०—सर्वा अपि वृत्तयः संहताः मिलिताः सत्यः, अभिमानवशात् अधःपतनात् पुनः स्वात्मानमुच्चैः ऊर्ध्वं नेतुं, "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ।" इति श्रुतिं गायन्त्यः चेतसि स्मरन्त्यः, वनाद्वनं एक विषयात् विषयान्तरं गच्छन्त्यः, अमुमात्मानं उन्मत्तकवत् विचिक्युरमृगयन्त, पुनः "आकाशवत् सर्वगतश्च नित्यः ।" "सत्यं ज्ञानमनन्तं ब्रह्म ।" इति आकाशवत् सर्वभूतेषु चराचरेषु बहिरन्तर्व्याप्तेषु सन्तं सर्वस्मिन् सत्तयास्फुरन्तं वर्तमानं अतएव तं पुरुषं प्रत्यक्तया पुरिशयमेव "गुहाहितं गह्वरेष्ठं पुरुषं ।" अर्थात् पुरुषविषये हृदयारण्यस्य वनस्पतीन् संस्कारान् पप्रच्छुः प्रश्नव्याजेन बोधयामासुः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किञ्च संहताः समुदिताः अमुं श्रीकृष्णमेवोच्चैर्गायन्त्यः वनाद्वनं गच्छन्त्यो विचिक्युः अमृगयन् भूतेषु अन्तर्मध्ये बहिश्च सन्तं पुरुषं श्रीकृष्णं वनस्पतीन् उन्मत्तकवत् पप्रच्छुश्च भूतेषु सन्तमित्यनेन तत्र तत्र तासां प्रेमोद्रेकविलसितां विरहव्यथां श्रीकृष्णस्त्वपश्यदेवेति सूच्यते ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सङ्गता मिलिता अमुमेवोच्चैर्गायन्त्यो वनाद्वनमुन्मत्तकवद्धतूरादनवन्मनुजवद्विचेरुः । आकाशवदन्तर्बहिरपि भूतेषु सन्तम् । ॐ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्चेति । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इत्यादेः । पुरुषं वनस्पतीन्पप्रच्छुः । ये गन्धर्वा अप्सरश्च देवीरेषु वृक्षेषु वनस्पतीष्वासते नैय्यग्रोधौदुम्बराश्वत्थप्लक्ष इतीध्मो भवति। एते वै गन्धर्वाप्सरसां गृहा इति मन्त्रब्राह्मणोक्तेः । कान्ताभिर्भ्रान्त्या कृतमपि भागवत्य इति भाविभगवदवगमनसाधनदेवताप्रसादसाधनं जातमिति वनस्पतिशब्देन ध्वनयामासेति ज्ञेयम् ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं तापलीला भगवता उद्देशतस्तासु सम्बन्धमुक्त्वा प्रथमं तापनिवृत्त्यर्थमन्वेषणं कृतवत्य इत्याह । गुणानामिव त्रयाणामेषामन्योऽन्योपमर्देनेन भगवदिच्छया विभाग इति न परस्परकार्यप्रतिबन्धकता आपाततः अतो यदा प्रपञ्चसम्वेदनं तदा पृष्टवत्य इत्याह । गायन्त्य इति । प्रथमतो मिश्रभावात् गायन्त्यो जाताः शब्दो हि धूमवल्लोके बाह्याभ्यन्तरयोगतः विराजते विनिर्गच्छन् तारतम्यं च गच्छति अतोऽत्र धर्मिधर्माणामाधिक्यात् ज्ञानमुत्तमं यथा भगवतो गानात् स्वयमागत्य सङ्गताः एवं स्वयं भगवतः आगत्यर्थं जगुः स्फुटं "कृत्रिमत्वात्तु भावस्य मिलिताश्च स्वतोऽन्यतः । ततो विशेषविज्ञानात् तिरोभावोऽस्फुरत् स्फुटः"

तदा विचिक्युः क भगवानस्तीत्यन्वेषणं कृतवत्यः तत्रापि न सर्वात्मना तिरोभावः स्फुरित इति अन्वेषणेऽपि अनियतवृत्तयो जाता इत्याह। उन्मत्तकवदिति। अज्ञात उन्मत्तः उन्मत्तकः कुत्सितो वा स यथा स्वपरविवेकं न जानाति वस्त्रादिरहितश्च भवति एवमवस्थां प्राप्ताः एकस्माद्वनाद्वनान्तरं गताः किञ्च न केवलमन्वेषणमात्रं किन्तु उन्मत्तवत् पृच्छन्ति स्मेत्याह। पप्रच्छुरिति। शुको हि भगवत्स्वरूपाभिज्ञः आनन्दमात्रकरपादमुखोदरादिकृष्णं सर्वत्रैव विद्यमानं पश्यति यदि भक्तिसहितं ज्ञानमाविर्भवति तदान्योऽपि पश्यति सर्वत्रैव तिरोधाननाशात् तादृशमेताः परिच्छिन्नं मत्वा पृच्छन्तीति तासामज्ञानकथनार्थमाह। आकाशवदन्तरं बहिर्भूतेषु सन्तमिति बाह्याभ्यन्तरविवेकहेतुराकाश इति पूर्वं निरूपितं तद्वदेवायमपि अत एवाकाशस्य ब्रह्मलिङ्गत्वम् एतादृशं सर्वत्रैव विद्यमानमदृष्ट्वा आत्मनि विचारं त्यक्त्वा चेतनांश्चापृष्ट्वा स्थावरान् पृच्छन्ति वनस्पतीन् पप्रच्छुरिति ते हि वैष्णवा इति मूढा अपि वैष्णवा एव हि विष्णुगतिं जानन्ति न त्वत्यन्तं निपुणा अप्यवैष्णवाः ॥ ४ ॥

श्रीसुबोधिनी-सारः

संहताः संघीभूताः अमुं कृष्णमेवोच्चैर्गायंत्यो वनाद्वनं विचिक्युर्मृगयामासुः उन्मत्तकवत् भूतेषु अंतर्बहिः संतं विद्यमानं पुरुषमाकाशवत् वनस्पतीन् पप्रच्छुः ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गायन्त्य उच्चैरित्यत्र, प्रथमतो मिश्रभावादिति। सुप्तप्रबुद्धन्यायेन बहिःसंवेदनासंवेदनाभ्यां संगमविरहविषयकसमूहालम्बनज्ञानं जनितमिति तथेत्यर्थः। ननु प्रभोरानन्दरूपत्वेन तद्भावेषु सत्सु सदानन्द एवोचितो, न तु वक्ष्यमाणावस्थेत्याशङ्काभावाय तस्याः स्वरूपमाहुः **शब्दो हि धूमवदिति**। अत्रेदमाकूतम्। एतावत्कालपर्यन्तं भगवता स्वरूपानन्दो न प्रकटितः। तस्य स्वरूपात्मकत्वेन तत्प्राकट्यं विना तदनुभवासम्भवात्। 'तथा परमहंसानाम्' इति वाक्यात्। यादृशेन भक्तियोगेन तत्प्राप्तिस्तादृक्तत्प्रकटनायाधुनैव पुरुषोत्तमावतारात् प्रभुप्राकट्यानर्थक्यापत्तिभिया श्रुत्याद्युक्तसाधनसाध्यत्वं स्वरूपानन्दस्यैतत्साधनभक्तियोगस्य च न वक्तुं शक्यम्। अत एव कुन्तीभिः पूर्णसाधनवतामप्ययं दुर्लभ इति ज्ञापनायैवाधिकारिविशेषणान्युक्तानि। एवं सति स्वरूपस्य रसात्मकत्वेन अत्रत्या भावाः सर्वे रसात्मका एवेति मन्तव्यम्। अन्यथैतच्छ्रवणमात्रेणापि स्नेहोत्पत्तिर्न स्यात्। एवं सति तद्वार्तानभिज्ञस्य तवेयमाशङ्का कण्टकवेधदृष्टान्तेन कामिनीकुचकुम्भे नखवेधस्यापि दुःखहेतुत्वसाधनमनुहरतीत्यलमुक्त्या। एवं सति तापकत्वेन विरहाग्निरेव। स यथार्द्रेन्धननिष्ठमग्निं स्वयं तत्संयुक्तः प्रकटीकुर्वन्नार्द्रत्वेन प्रतिबन्धात्तत्रासमर्थो धूममेव जनयति, तथायमप्यग्निरापाततो बहिःसंवेदनेन न सर्वात्मना तिरोधानास्फूर्तिरिति तज्जानितत्वेन तादृश एव जातः। बहिःसंवेदनाभावे तिरोधानास्फूर्तिरिति यावानंशस्तस्य तावात्सोऽत्रार्द्रत्वस्थानीयः। अन्यथैकदैव पूर्णतत्प्राकट्ये क्षणमात्रेण सर्वं भस्मसात्कुर्यादेव। तथा सत्यस्याग्नेर्धूमो गानरूपः शब्द एव। एवं सत्यर्धज्वलितदारुतुल्यता सिध्यति। तदेतदुक्तं **बाह्याभ्यन्तरयोगत** इत्यनेन। यथा स पूर्वमेकरूप एव भवति, ततोऽनेकधा, तथोत्तरोत्तरं विचित्रभावजननाद्गानमपि विचित्रं भवतीत्याहुः **विराजत** इति। यथाऽगर्वादिधूमस्य निर्गच्छतः शोभा, तथास्यापि शब्दस्य गानरूपत्वमिति ज्ञापनाय विराजत इत्युक्तम्। **अतोऽत्रेति**। यतो हेतोर्भगवान्रसात्मकः, तदात्मका एव च भावाः, अतो हेतोरखण्डाद्वैतभानादिदं स्वामिनीनां ज्ञानमुत्तममित्यर्थः। एतदेव स्फुटयन्ति **धर्मधर्मिणामिति**। एते भावाः स्थायिभावस्य व्यभिचारिभावा इति धर्मिणः श्रीकृष्णस्य तद्धर्माणां विहारादीनां जीवतद्धर्मापेक्षयोत्कृष्टत्वात् तथेत्यर्थः। उक्तज्ञाने जीवतद्धर्मयोरेव सत्त्वात्तदपेक्षयैतयोर्न्यूनत्वादिति भावः। अथवा। यथा प्रियवद्विहारादिस्तथैवेदं गानमपीत्याहुः **यथा भगवत** इति। प्रीतिविषयाणामाकारणं भगवद्धर्मः सोऽत्रोक्तः। अत एव तदा स्वागमनवदधुना न प्रभोरागमनम्, तस्य स्वधर्मत्वात्। भगवान् कौतुकार्थमत्रैव कुत्रचिल्लीनोऽस्ति रसपरवशश्च। अतोऽस्मद्गानेनागमिष्यतीति ज्ञात्वा जगुरित्यर्थः। अस्मिन् पक्षे बहिःसंवेदनमेवास्ति परं त्वदर्शनजात्यौक्तरीत्या तथा करणमिति ज्ञेयम्। सर्वथा बहिःसंवेदने हि विचयनमिति। तत्र हेतुमाहुः **कृत्रिमत्वादिति**। आत्मनि भगवद्भावस्य कृत्रिमत्वात्तिरोधानमावश्यकम्। तद्धेतुविचित्रभाववतीनां मिथो मिलनं तदाहुः। यतो हेतोर्मिलितास्ततो हेतोः स्वतोऽन्यतश्च **विशेषविज्ञानात्तथेति** योजना। यद्वा। भगवद्भावापन्नाऽपरां सखीं मत्वाश्लेषादिकं करोतीति स्वतो मिलनम्। पदान्यासामस्यां भगवत्त्वबुद्ध्यभावात् तद्भावानुरूपकरणेऽस्या विशेषविज्ञानमभून्। अन्यथापि भगवद्भावापन्नयाऽस्यां सखीत्वज्ञानेन मिलनमन्यतो मिलनम्। तत्रापि पूर्ववत्तथा। नन्वग्रे पूतनासुपानकरणदशापन्नप्रभुभावापन्नैव पूतनायन्त्या एव स्तनमपिबदिति यथा, तथात्रापि कुतो न। तथा सति विशेषविज्ञानासम्भव इत्यत आहुः **कृत्रिमत्वादिति**। अग्रे लीलाविर्भावस्य वक्तव्यत्वाद्यादृशी लीला तादृश्येवाविर्भवतीति सर्वमुपपद्यते प्रकृते तु प्रियादर्शने सत्युत्कटभावेन प्रियमात्रस्फूर्त्या स्वस्मिन्नपि तत्त्वेन भानमिति कृत्रिमत्वमस्य। एवं सत्यनेनैव भावेन यदोक्तन्यायेनान्यज्ञानं तदा तिरोभावस्फूर्तिरित्यर्थः। बहिःसंवेदने सत्यपि मादकद्रव्यस्वभावादुन्मत्तो विवेकरहितो भवति, एवं विरहभावस्वभावजवैकल्यात्तथेत्याशयेन तत्रापि न सर्वात्मनेत्याद्युक्तम्। **आकाशवदन्तरमित्यत्र, शुको हीत्याद्याभासमारभ्यायमपोत्यन्तम्**। अत्रायं भावः। 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह' इति भगव-

द्वाक्यात् भक्तिमार्गे ज्ञानं प्रतिबन्धकमिति मन्तव्यम्। युक्तं चैतत्। आत्मत्वेन भगवज्ज्ञाने तदिदृक्षादिजनितार्त्यसम्भवेन प्रभुप्रादुर्भावासम्भवात्सर्वस्वनाश एव यतः। एवं सति यत्र कालादिनियन्तृत्वज्ञानात्मकप्रतिबन्धके सत्यपि कंसादिभयज्ञानरूपः स्नेहकार्य एव देवक्यां जातः, तत्र प्रतिबन्धरहितानां स्नेहमात्रकार्यसम्भव इति किं वक्तव्यमिति कैमुतिकन्यायः सूच्यते। किञ्च। देवकीधर्मरूपं ज्ञानं प्रतिबन्धकत्वेनोक्तम्, अत्र तु विशेषणेन भगवद्धर्मस्तथोक्तः। एवं सति यत्रायमेव न प्रतिबन्धकः, तत्रान्यस्य का वार्तेत्यपि ज्ञापनायेदं विशेषणम्। तथा च हेतुसत्त्वेप्युक्तज्ञानाभावेन भक्त्युद्रेकः सूच्यते। एतदेवोक्तं **तासामज्ञानकथनार्थ**मित्यनेन। शुकस्यैवं ज्ञानाभावे त्वेतत्कथनेप्यशक्तिः स्यात्, जीवनं वा न स्यादिति शुकज्ञानोक्तितात्पर्यं वेदितव्यम्। अपरञ्च। सर्वेष्वित्यादिपदमनुक्त्वा नपुंसकलिंगभूतपददानेन प्रभो च पुरुषत्वोक्त्या यथा षण्ढस्य पुरुषनैकट्ये रसोत्पत्तिर्न, किन्तु स्त्रीणामेव, तथा प्रभुसान्निध्येपि भूताना रसानुत्पत्तिर्न, किन्तु स्त्रीणामेव, तथा प्रभुसान्निध्येपि भूतानां रसानुत्पत्तिः, एतासां तदुत्पत्तिश्च युक्तेति ज्ञाप्यते। तेनैतासामेव प्रभुरसाभिज्ञत्वमित्युक्त भवति। एतावान्परं विशेषो, बहिसम्बन्धे विलक्षणो भाव उत्पद्यते, अन्तरेव सम्बन्धे तु विलक्षण इति। कात्यायनीस्वरूपनिरूपणप्रस्तावे कथितं स्त्रीत्वमत्र विवक्षितमतो न शङ्का कापि। अपरञ्च। भगवति। **दृष्ट** एवासां बहिरिदमन्तरिदमिति ज्ञानम्, अधुना तदभावेन तयोरप्यभाववादप्यन्तरननुसन्धानमुचितम्। परन्तु प्राप्तिरपेक्षितेति यत्र कुत्रचित्प्रश्न इत्याशयेन बाह्याभ्यन्तरेत्यारभ्य पृच्छन्तीत्यन्तेनोक्तम्। सर्वत्रैव विद्यमानमित्याद्यविशेषणतात्पर्यम्। 'पुरि हृदयाकाशे शेत' इति व्युत्पत्त्या आत्मनीत्यादिद्वितीयविशेषणस्य। यद्वा। प्रकरणाद् भक्तिमार्गाद् भगवता ये बहिर्भाविता जीवास्ते बहिभूतपदेनोच्यन्ते। तथा च तेष्वेवाकाशवन्निराकार इवाप्रत्यक्षतयैव सन्तं तत्राप्यन्तरमेव न तु कदाचिदपि बहिःप्राकट्येन। वस्तुतस्तु भक्तिमार्गीयेषु पुरुषत्वेन साकारं बहिःप्रकटं भर्तृरूपमतो बहिर्विचयनमेवोचितम्। न हि स्त्रीणां स्वभर्तुरन्तरन्वेषणमन्तःस्थितिज्ञानं वा स्वास्थ्यहेतुः पुरुषार्थाय वा भवतीति मूलार्थः ॥ ४ ॥

(२) श्रीपुरुषोत्तमचरणप्रणीतः श्रीसुबोधिनीटिप्पण्योः प्रकाशः

"**गायन्त्य उच्चै**रित्यत्र **शब्द** इति का० २५१¾-२७३¾। एतदर्थष्टिप्पण्यां विस्तरेणोक्तः, तत एवात्र सङ्गृह्यते, ननु प्रभोरानन्दरूपत्वेन तद्भावेषु सत्सु सदानन्द एवोचितो न तु वक्ष्यमाणदुःखावस्थेत्याशङ्काभावाय तस्य अवस्थायाः स्वरूपमाहुः **शब्द. हि धूमवदिति**, एवं सति स्वरूपस्य रसात्मकत्वेन अत्रत्या भावाः सर्वे रसात्मका एवेति मन्तव्यं, भक्तानां भगवद्गुणगानात्मकः शब्दो हि अगरुप्रभृतिधूमवत् **विनिर्गच्छन्** सन् विराजते, **तारतम्यं** प्रतिक्षणं **वैचित्र्यं च गच्छति**, अत्र तापकत्वेन विरहोऽग्निरेव, अग्निर्यथार्द्रेन्धनसंयुक्तः सन् तन्निष्ठमग्निं प्रकटीकुर्वन् आर्द्रत्वेन प्रतिबन्धादग्निप्रकटनेऽसमर्थो धूममेव जनयति तथात्रापि बहिःसंवेदने सति सर्वथा तिरोधानस्फूर्तिरिति बहिःसंवेदनमेव आर्द्रत्वस्थानीयं, तस्मिन् सति विरहाग्निरपि गानरूपं धूममेव जनयति, एवं सत्यस्याग्नेर्धूमो गानरूपः शब्द एव, एवं सत्यर्धज्वलितदारुतुल्यता सिध्यति, अन्यथा एकदैव पूर्णतत्प्राकट्ये क्षणमात्रेण सर्वं भस्मसात् कुर्यादेव, यथा धूमः पूर्वमेकरूप एव भवति ततोऽनेकविधस्तथा गानमपि उत्तरोत्तरं विचित्रभावजननाद् विचित्रं भवतीत्युक्तं विराजत इति, **अतोऽत्रेति** यतो हेतोर्भगवान् रसात्मकस्तदात्मका एव च भावा अतो हेतोरखण्डाद्वैतभानादिदं **स्वामिनीनां ज्ञानमुत्तम**मित्यर्थः, एतदेव **स्फुटयन्ति धर्मधर्माणा**मिति, एते भावाः स्थायिभावस्य व्यभिचारिभावा इति **धर्मिणः** श्रीकृष्णस्य **तद्धर्माणां** "गतिस्मिते" तिश्लोकोक्तविहारादीनां च जीवतद्धर्मापेक्षया उत्कृष्टत्वात् "असावह"मिति स्वामिनीज्ञानमुत्तममित्यर्थः, अथ वा यथा प्रियवद् विहारादिस्तथैवेदं गानमपीत्याहुः **यथा भगवत** इत्यादि, **कृत्रिमत्वादित्यादि** "विचिक्युरुन्मत्तकव"दित्यत्रोक्तं विचयनं हि बहिःसंवेदने सति भवति, तत्र हेतुमाहुः कृत्रिमत्वादिति, तत्र हेतुर्विचित्रभाववतीनां मिलनं, तदाहुः **मिलिताश्च स्वतोन्यत** इति, यतो हेतोर्मिलितास्ततो हेतोः **स्वतोन्यतश्च** विशेषविज्ञानात् तिरोभावस्फूर्तिरितियोजना, अत्र "यद्वे"त्यादिना पक्षान्तरमुक्त टिप्पण्याम् ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्च गायन्त्य इति। सहता मिलिताः सत्य उच्चैर्गायन्त्यः वनाद्वनान्तरं गच्छन्त्योऽमुं श्रीकृष्णमेव उन्मत्तकवद्विचिक्युरमृगयन्। उन्मत्ततुल्यत्वमेव स्पष्टयति—पप्रच्छुरिति। आकाशवत् सर्वभूतेषु चराचरेषु बहिरन्तर्व्याप्य सन्तं वर्तमानम्, अत एव पुरुषं पूर्णमपि श्रीकृष्णं वनस्पतीन् पप्रच्छुरित्यन्वयः ॥ ४ ॥

अन्वितार्थप्रकाशिका

गायन्त्य इति ॥ संहता मिलिताः सत्य उच्चैर्गायन्त्यः वनाद्वनान्तरं गच्छन्त्योऽमुं श्रीकृष्णमेव उन्मत्तकवद्विचिक्युरमृगयन्त। आकाशवत्सर्वभूतेषु चराचरेषु बहिरन्तर्व्याप्य सन्तं वर्तमानमत एव पुरुष पूर्णं श्रीकृष्णं वनस्पतीन् पप्रच्छुः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गायंत्य इति अमुं श्रीकृष्णमेवमुच्चैर्गायंत्यः संहताः परस्परं सख्येन संगताः वनाद्वनं वनांतरं यांत्यः विचिक्युः मृगयांचक्रुः उन्मत्तकवत् उन्मत्तवत् स्वार्थे कन् वनस्पतीन् तरून् प्रति पुरुषं श्रीकृष्णं पप्रच्छुः तं कथं भूत भूतेषु चेतनाऽचेतनेषु अतरमंतर्यामिशक्त्यास्थितं आकाशवत्तत्कर्मलेपशून्यं बहिः पुरुषाकृत्यासतं वर्त्तमानम् ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च ॥ गायन्त्य इति ॥ संगताः समुदिताः संघीभूता इति यावत् । अमुं श्रीकृष्णमेव, उच्चैरुच्चस्वरेण, गायन्त्यः, वनात् वनं गच्छन्त्यः, उन्मत्तकवत् विचिक्युरमृगयन् । भूतेषु चराचरेषु, अन्तरमन्तर्बहिश्च, आकाशवत् व्याप्य सन्त विद्यमानं, पुरुषं पुरुषशब्दवाच्यं परमपुरुषं, वनस्पतीन् वृक्षान्, पप्रच्छुः । वनस्पतीन् पप्रच्छुरित्यनेनोन्मत्ततुल्यत्वं प्रदर्शितम् ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गायन्त्य इतिः १०.३०.४

एक एव प्रभुप्राप्तेरुपायो भुवनेषु यत् । वस्तुमात्रे तदध्यास इत्यकुर्वंस्तथैव ताः ॥ ९ ॥

कृष्णप्रिया

समूह में मिलकर समस्त गोपीवृन्द श्रीवृन्दावनविहारी जी के गुणों को उच्चस्वर से गाते हुए अत्यन्त उन्मत की तरह प्यारे श्यामसुदर को एक वन से दूसरे वन में ढूंढने लगी । आकाश के समान भूतमात्र में भीतर एवं बाहर विराजमान व्यापक पुरुष श्रीकृष्ण के लिए वृक्ष एवं लताओं से पूछने लगी ॥ ४ ॥

दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः । नन्दसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥ ५ ॥

कर्दमक्षमा

अन्वयः—हे अश्वत्थ ? हे प्लक्ष ? हे न्यग्रोध ? प्रेमहासावलोकनैः, नः, मनः, हृत्वा, गतः, नन्दसूनुः, वः, कच्चित्, दृष्टः ॥ ५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्प्रपंचयति नवभिः । तत्र महत्त्वादेते पश्येयुरित्याशयाश्वत्थादीन्पृच्छन्ति । दृष्ट इति । प्रेमहासविलसितैरवलोकनैरस्माकं मनो हृत्वा चोर इव गतो वो युष्माभिः किं दृष्ट इति ॥ ५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् प्रश्नवृत्तम् । तत्र वनस्पतिषु । एतेऽश्वत्थादयो महत्त्वादच्युतत्वाद्दूरदर्शिन इति । यद्वा—विष्णुब्रह्मरुद्राणां क्रमेणाधिष्ठानान्येतेऽतोऽपि महांत इति । अश्वत्थमुद्दिश्याहुः–न मया दृष्ट इति चलद्दलतया तच्चेष्टिताध्यवसानात्, श्वोऽपि न स्थास्यतीति निर्वेदाच्च । युक्तमुक्तम्, अक्षिरहितेनानेन कथं दृश्य इति परस्परमक्षिमतमुद्दिश्याहुः–प्लक्षेति । प्रकृष्टे अक्षिणी यस्येत्यकारस्य पूर्वरूपत्वं शकंध्वादित्वात् । रलयोरैक्याच्च सिद्धम् । अथ पश्यन्नपि वागिंद्रियाऽभावाद्वक्तुं न शक्नोत्यतस्तद्वंतं वटमध्यमस्याहुः—नवपल्लवान्यस्य जिह्वातुल्यानीति ज्ञेयम् । मनसो रत्नत्वम् । हृत्वेति–न चोरं युष्मान्साधून् पृच्छामेति ॥ प्रश्नं प्रपञ्चयति नवभिः । अत्रात्युच्चतरत्वादेते दूरवर्तिनमपि तमवश्यं पश्येयुरिति संभाव्य पृच्छंति–दृष्ट इति । प्लक्षः पीलुखर्त्विति ख्यातः । न्यग्रोधा वटः । किमर्थं पृच्छतेति तेषामपि प्रश्नमाशंक्याहुः–नंदस्य साधोस्सूनुरपि नोऽस्माकं स्त्रीजनानां मनो हृत्वा गतः । प्रेम्णा सर्वलोकोन्मादकमहामोहनौषधविशेषेण सहितैर्हासावलोकनैः प्रेषितैश्चोरैरस्माकं नेत्रद्वारतोऽतः करणमंतःपुरं प्रवेशितैर्मनोरत्नं चोरयित्वा पलायित इत्यर्थः । क्षणं स्थित्वा अहो किमेताभिः क्षुद्राभिरित्यस्मानवजानंतेऽमी, प्रत्युत्तरं न ददते तदलमेतैः क्षुद्रफलैः परोपकारधर्मानभिज्ञैरप्रफुल्लैरशुद्धान्तःकरणैरिति तान्विहायान्यत्र गताः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वो युष्माभिः प्रत्येकं पृथक् सम्बोधनं श्रीकृष्णप्रियत्वेनादरात् । ननु किमर्थमसौ युष्माभिः पृच्छ्यते तत्राहुः । नो मनो हृत्वा गत इति । हृत्वेति मनसो रत्नत्वं व्यज्यते । अतो नष्टोद्देशित्वेनागतास्तं चौरं साधून् युष्मान् पृच्छाम इति भावः । नन्दसूनुरिति स्वविश्वासहेतूपन्यासस्तथापीत्यर्थः । नन्देति । यौगिकवृत्त्या तस्य प्रत्युत सर्वब्रह्मानन्दहेतुत्वमेव युज्यत इति भावः । अत एव दुःखेन साक्षात्तन्नामोक्तिरपि साक्षात् श्रीकृष्णनामानुक्तिस्त्वीर्ष्ययापि । अपिशब्दाच्चोरस्य नाम्नोऽग्राह्यत्वेन सूचकस्यापि तद्ववदित्युक्तेः । कच्चित् । प्रश्ने । भवद्भिर्दृष्टे सति चास्यामेव दिशि विहरतीति समाश्वासमासाद्यान्वेषयाम इति भावः ॥ ५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वो युष्माभि युष्मदीयो वा, सम्बन्धज्ञापनं तद्दर्शनसम्भावनार्थम्, ततः स्नेहेन कथनार्थं च, यद्वा, प्रेमभरस्वभाव एवायं येन निजभावोऽन्यं स्वसदृशं लक्ष्यीकृत्योच्यत इति प्रत्येकं पृथक् सम्बोधनम्, वैष्णवत्वेनादरात्, तत्राश्वत्थस्य

---

१. किंशुक–विज. । २. रिहागार्तकिसहहा–विज. ।

विष्णुविभूतित्वेन वैष्णवत्वं प्रसिद्धमेव, 'वटे वटे च मां विद्धि' इत्यर्जुनं प्रति भूतलवर्त्ति मुख्य श्रीमूर्तिप्रसंगे श्रीभगवदुक्तेर्न्यग्रोधस्य च तथा, तयोः साहचर्य्येणप्लक्षस्यापि श्रीविष्णुशिवब्रह्मणां क्रमेण ते अधिष्ठानानीति केचित्। यद्यपि विरहविह्वलतयोन्मत्तवत्तान् प्रति प्रश्नात्तादृशाभिप्रायो न घटते, यश्चासौ कुत्र कुत्रापि श्रीस्वामिपादैर्व्याख्यातोऽस्ति, स तु निवृत्तिपरेयं पञ्चाध्यायीति व्यक्तीकरिष्यामान इति स्वप्रतिज्ञानुसारेणैव, न च श्रीगोपिकाभावानुसारेण। अतः केवलं पुरतो दृश्यमानान् प्रत्येकं प्रश्नः तथापि पूर्व्वापरवाक्यसंङ्गत्यर्थं तेषां व्याख्यानुसारेणैव किञ्चिदुल्लिख्यते, नन्दसूनुरिति निजस्वामिनं प्रति तथैवोक्त्युपपत्तेः, किंवा रसिकताद्यभिप्रायेण एवमग्रेऽपि, ननु किमर्थमसौ युष्माभिः पृच्छ्यत इत्यपेक्षायामाहुः—नो मनो हृत्वा गत इति हृत्वेति मनसो रत्नत्वं ध्वन्यते, अतो नष्टादिष्टत्वेनागतास्तं चौरं साधून् युष्मान् पृच्छाम इति भावः। कच्चिदिति प्रश्नात्, तर्हि कथ्यतामिति शेषः। विरहविह्वलतया वाक्यसमाप्त्यसम्भवात्, ततश्चात्रैव यत्नात् सम्यगन्वेषयामः, किं वात्र भवद्भिर्दृष्टे सत्यनुमीयते। सोऽत्र निकटेऽस्तीति तथाप्याश्वस्ताः प्राणान् निरुध्य रक्षेमेति भावः। यद्वा, उन्मत्तकवदित्युक्तेरत्यन्तार्त्तिविवशतया प्रत्युत्तरापेक्षाद्यसम्भवात्तथैव वाक्यसमाप्तिरिति ज्ञेयम्। एवमग्रेऽपि ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

भगवद्विरहव्यथामुषितचेतनाचेतनतिर्यगतिर्यग्विवेकानां प्रश्नप्रकारमाह नवभिः। अश्वत्थादीनां प्रत्येकसम्बोधनेन प्रश्नोऽपि प्रत्येकमवगन्तव्यः प्रेमहासविलोकनैरस्माकं मनोहरत्वाच्चोर इव नन्दसूनुर्गतः वो युष्माभिः किं दृष्टः अश्वत्थादीनां महत्त्वाद्यज्ञाङ्गत्वात्तत्राश्वत्थस्य भगवद्विभूतित्वाच्च ते पश्येयुरित्यादावश्वत्थादीन् पृच्छन्ति ततो महान्तः पुष्पैर्बहूपकारिणश्चेति कुरवकादीन् पृच्छन्तीत्येवं यथासम्भवं केचिद्व्याचक्षते ॥ ५ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उन्मत्तत्वं स्पष्टयति। दृष्ट इति। हे शब्दः प्रत्येकमभिसम्बध्यते हे न्यग्रोध वट ! न्यक् अधः रोधः आवरणं यस्य सः पादैरधोभूमिमावृणोतीति किंशुकः पलाशः पलाशः किंशुके पर्ण इत्यमरः रक्तपुष्पवान् ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नन्दसूनुरिति स्वविश्वासे हेतुः तथापीत्यर्थः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तदेव प्रपञ्चयति। दृष्टो व इत्यादि। अश्वत्थप्लक्षन्यग्रोधा वनस्पतयः तैरपुष्पाद्वनस्पतिरिति तथा कारणं विनापि फलवत्त्वेऽमी भाग्यभाज एव तदवश्यमेभिर्दृष्टोऽसावित्याशयेन तानेव प्रथमं पप्रच्छुःननु तत्पृच्छया किं व इत्यत आहुः। नोऽस्माकं मनो हृत्वा गत इति चेद् भवत्यो वह्व्यः, स त्वेकः, कथमहार्षीदित्याहुः—नन्दसूनुः नन्दस्य ब्रजराजस्य पुत्रः तेनासौ वलीभवतीत्यर्थः। केन साधनेनापहृतं वो मनस्तत्राहुः। प्रेमहासावलोकनैरस्माकमन्तरन्तस्थं मनो बहिराकृष्येत्यर्थः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रश्नं प्रपञ्चयति नवभिः तत्रात्युच्चतरत्वादेनं दूरवर्तिनमपि तमवश्यं पश्येयुरिति सम्भाव्य पृच्छन्ति। दृष्ट इति। प्लक्षः पीलुखन्विति ख्यातः न्यग्रोधो वटः किमर्थं पृच्छथेति तेषामपि प्रश्नमाशङ्क्याहुः नन्दस्य साधोः सूनुरपि नोऽस्माकं स्त्रीजनानां मनोहृत्वा गतः प्रेम्णः सर्वलोकोनमादकेन महामोहनौषधविशेषेण सहितैर्हासावलोकनैः प्रेषितैर्भृत्यैरस्माकं नेत्रद्वारतोऽन्तःकरणमन्तः पुरं प्रवेशितैर्मनोरत्नं चौरयित्वा पलायित इत्यर्थः, क्षणं स्थित्वा अहो किमेताभिः क्षुद्राभिरित्यस्मानवजानन्तः स्तब्धा अमी प्रत्युत्तरं न ददते तदलमेतैः क्षुद्रफलैः परोपकारधर्मानभिज्ञैरप्रफुल्लैः अशुद्धान्तःकरणैरिति तान् विहायान्यत्र गताः ॥ ५ ॥

श्रीरसिकाह्लादिनी टीका

एवं सामान्यतः प्रश्ने उन्मत्ततुल्यत्वमुक्त्वा, इदानीं ततः तामगृहीत्वा पृच्छन्ति दृष्ट इति, एते हि वैष्णवाः श्रीकृष्णं श्रुत्वायथार्थं कथयिष्यन्तीति मनसि विचिन्त्य पृच्छन्ति। भो अश्वत्थ भो प्लक्ष भो न्यग्रोध अश्वत्थस्य भगवद्विभूतित्वात् अश्वत्थस्य सर्ववृक्षाणामित्युक्तत्वात्। प्लक्षस्यापि रुद्रविभूतित्वात्, वटस्यापि ब्रह्मविभूतित्वात्। यद्यपि व्रजदेवीनामिदमनुसंधानं नास्ति तथाहि उपनिषद्रूपाणां पूर्वसंस्कारवसादुक्तिरनुसंधेया। वो युष्माभिर्दृष्टः कच्चिदिति कोमलप्रश्ने, यद्वा वो युष्माकं प्रभुः संबंधवान् ननु दृष्टश्चेत्तर्हि तेन किं तत्राहुः प्रेमहासावलोकनैः प्रेम्नान्तः प्रवेशः हासावलोकनाभ्यां हरणं अत एव न तस्य किंचिदप्यशक्यमिति भावः। न हि गोप्यं हि साधूनामिति प्रसिद्धया युष्मान् पृच्छामः भवद्भिरकथितान्यत्र गत्वाऽन्यान् प्रक्ष्याम इति ॥ ५ ॥

विशुद्धरसदीपिका

तत्प्रपञ्चयति । दृष्ट इति । गोपकन्यानामियमुक्तिः तारल्येनाग्रेसरत्वादिति ज्ञेयं यद्यप्यासां प्रकटलीलान्तः पातित्वात्तेषां वनस्पतीनां परिकररूपस्फूर्त्त्यसम्भवस्तथापि कासांचिन्नित्यसहचरीसङ्गेन तथाभावान्न विरोध इति प्राधान्येनैवमुक्त कच्चिदिति कोमलालापे अश्वत्थ इति श्रीभगवद्विभूतित्वादत्युच्चशिखरत्वाच्च प्राथम्यं श्लेषेण न श्वः स्थास्यतीत्यश्वत्थ इति निर्वेदसूचनं तथाहि –

भाभो भूरुह ! ते दिशो दश गताः शाखाः शिरश्चाम्बरम् । गोपः कोऽपि तमालकोमलरुचिः कश्चिन्न दृष्टस्त्वया ॥
एवं ताभिरुदाहृते बत मुहुर्वक्तु वचोऽनीश्वरः । पत्रैरेव निसर्गचञ्चलतरैः प्रत्युत्तरं दत्तवानिति ॥

ततश्च मया न दृष्ट इति चलद्दलतया तच्चेष्टि मध्यवस्याहो वत सख्यो युक्तमुक्तमक्षिरहितेनानेन कथं दृश्य इति परस्परमवगत्याक्षिमन्तमुद्दिश्याहुः । लक्ष्येते प्रकृष्टे अक्षिणी यस्येत्यकारस्य पूर्वरूपत्वमार्षं रलयोरैक्यं चेति सिद्धम् । अथ पश्यन्नपि वागिन्द्रियाभावाद्वक्तुं न पारयतीति तद्वन्तं वटमध्यवस्याहुः । न्यग्रोधेति । नवपल्लवान्यस्य जिह्वाकाराणि प्रकल्प्य न्यञ्चि अधः कृतानि रोधांस्यग्राणि येनेति व्युत्पत्तेः अस्मासु तत्स्थितिं सूचयितुमेव नम्रो जात इति भावः । कं पृच्छथ इत्याशङ्क्याहुः । नन्दसूनुर्नो मनो हृत्वा गत इति । मनसो रत्नत्वं सूचितं कैरित्याकाङ्क्षायां प्रेमेत्यादि तत्र प्रेम्णा वशीकृतं हासेन हस्ते कृतं अवलोकनेन बहिर्निष्कासितमिति तथोक्तं यद्वा चित्तादिभिर्हृतं कथं हृतमित्यत आहुः प्रेम्णा चित्तावरणं भेदितं हासेन बुद्ध्यावरणमवलोकनेनाहङ्कारस्येति प्रतिपदमवसेयं नन्देति साक्षाद्गुरुनामग्रहणं मुग्धत्वादेव हृत्वेत्यादिकमपि बालभाषितमेव वः युष्माभिरिति प्रत्येकमामन्त्रणमुक्ताभिप्रायेणादरणीयत्वादिति दिक् ॥ ५ ॥

श्रीरामनारायणकृता भावभावविभाविका

अत्र प्रश्नप्रकरणे रसविशेषास्वादाय प्रश्नयोग्यत्वतन्निवृत्तियोग्यत्वाभ्यां नामव्युत्पत्तयः प्रदर्श्यन्ते तत्र यत्र क्वचित्काचिदप्रसिद्धकल्पना उणादिगणान्तःपातितया तत्साधुत्वं ज्ञेयं तत्राश्वत्थप्लक्षन्यग्रोधान् उच्चतनुत्वेन दूरं पश्यतो हय्यंजहरविभूतित्वेन तद्रहस्यज्ञान् वनस्पतित्वेन वनजनपालकान् चोरग्रहणाधिकारिणश्च मत्वा पप्रच्छुस्तदाह । दृष्टो व इति । कच्चिदिति कामलालापे तेन स्वकार्यप्रार्थने सामो दर्शितः यद्वा जडानस्मात्किं पृच्छथ तत्राहुः । कच्चिदिति कदिति कुत्सितं चिदपि चेतनवर्गोऽपि यस्मादिति तस्य सम्बोधनं तथा परोपकारितनुत्वात् तीर्थवासित्वाद्द्वेषादिद्वन्द्वराहित्यात् भगवद्विभूतित्वाच्चेति भावः । हे अश्वत्थ ! न श्वः प्रभातपर्यन्तमपि स्थास्यतीति विश्वासार्हमिति भगवत्स्वरूपातिरिक्तस्य सर्वस्यानित्यत्वबुद्ध्या स्वीकृतपरोपकार ! हे प्लक्ष रलयोः सावर्ण्यात्प्रक्षप्रकृष्टतया परोपकारार्थं तीर्थे क्षयति निवसतीति तथा हे न्यग्रोध ! न्यक्कार याच्ञा नञ्जीकारं रोधयतीति तथा परोपकारित्वेनास्मदुपकारोऽपि विधेय इति एवं सम्बोध्य स्वप्रयोजनमाहुः । नन्दसूनुर्वः युष्माभिर्दृष्टः किमर्थं पृच्छथ तत्राहुः । हृत्वा गतः कस्यापि केनचिद्धरणे किम्भवतीनां तत्राहुः । न इति । किमपि पयोदधिफलादिहरणे किमन्वेषणेन तत्राहुः । मन इति । मनसः सर्वप्राधान्यात्तद्धरणे न किमप्यवशिष्टमिति भावः । ननु हृदन्तर्गतं मनः कथं हृतं तत्राहुः । प्रेमहासावलोकनैरिति । प्रेमस्नेहसुपक्वे मृदुमधुरहासे तीक्ष्णदृष्टिलक्षणं मदनमदेन मादकं मदनं मेलयित्वा तदा स्वादनेन मोहयित्वा हृत्वा गतः ननु गोपजातीयानां चौर्यं स्वाभाविकमेवेति किङ्कथनीयं तत्राहुः । नन्दसूनुरिति । नन्दस्य न समानगोपत्वं गोपराजसुतस्य तु स्वज्ञातिचौर्यमनुचितमेवेति भावः । किं युष्माभिर्दृष्ट इति दृष्टो नवेति तस्य छलित्वात्सन्देहप्रश्नः उच्चत्वात्तद्विभूतित्वाद्दृष्ट एव वाच्यमस्मभ्यमिति एवं प्रश्नेऽपि यदा न ब्रूयुस्तदा एतेषां वृन्दावनतरुत्वेन चित्त्वेऽपि कच्चित्त्वं कुत्सितं चित्त्वं परोपकाराभावात् विभूतित्वेऽपि कृष्ण एव चौरस्तद्विभूतित्वमश्वत्थस्य तत्सहकारिब्रह्मरुद्रविभूतित्व प्लक्षन्यग्रोधयोरिति चौरपक्षपातित्वमेव वनस्पतित्वेऽपि कलिनृपाणामिव चौरसाहाय्यम् उच्चतनुत्वमप्येषां निर्बुद्धित्वसूचकं स्वनाम्नाप्यश्वत्थस्यानवस्थितत्वं प्लक्षस्यापि प्रकृष्टात्सतः क्षयति नाशयतीति सद्द्वेषित्वं न्यग्रोधस्यापि न्यक्कारेण राधयतीति तथेति स्वनाम्नैव सतिरस्कारित्वं गम्यते इति तानुत्सृज्यान्यत्र गताः ॥ ५ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तत्कृतप्रश्नान् प्रपञ्चयति । दृष्ट इति । तत्रादौ विष्णुप्रजापतिरुद्रावतारभूता एतेऽश्वत्थादयोऽवश्यं पश्येयुरत एते प्रष्टव्या इत्याशयेनाश्वत्थादीन् पृच्छन्ति । हे अश्वत्थ हे प्लक्ष हे न्यग्रोध ! वो युष्माभिः कच्चित्किं नन्दसूनुर्दृष्टः नन्देन परमभक्तेन जन्मान्तर आराध्य पुत्रत्वेन लब्धः अस्मदनुग्रहाय वा तत्पुत्रत्वेन प्रकटितः अत एव नोऽस्माकं मनः प्रेमहासावबोकनैर्हृत्वा गतः अन्तर्हितः यद्यपि स सर्वत्र व्याप्तस्तथापि नन्दसूनूत्वेनास्माकं प्रेष्ठोऽतस्तद्रूपोऽन्विष्यते युष्माभिर्दृष्टश्चेत्तर्हि करुणया वक्तव्यं तं लब्ध्वा सुखिन्यः स्याम इति भावः । यद्वा ननु विष्णुः कथं चौर्यं कृतवानित्याशङ्कानिरासार्थं नन्दसूनुरित्युक्तं तथा च यथा दुग्धादिचोरितवांस्तथा मनोऽपीति भावः । ततस्तेभ्य उत्तरमलब्ध्वा अहो अलक्ष्मीसंस्थानभूतः पशुना देवाः स्वर्गलोकमायन् तत्तस्य शिरः छित्त्वा मेदः प्राक्षारयन् स प्लक्षोऽभवदितिश्रुतेरयमपि प्लक्षो लोकानामज्ञानहेतुरेव नितरां न्यग्राण्यधोभूतानि यस्येत्यधो दृष्टिर्न्यग्रोधोऽत एते न वदिष्यन्तीति विचार्यान्यत्र गताः अनभिज्ञापक्षे अत्युच्चतरत्वादेते दूरचरमप्यस्मत्प्रेष्ठमवश्यं पश्येयुरिति सम्भाव्य पृच्छन्ति दृष्ट्वा किमर्थं पृच्छथ इति चेत्तत्राहुः । नन्दस्य साधोः सूनुरपि नोऽस्माकं स्त्रीजनानां प्रेम्णा सर्वलोकमहामो-

हनौषधविशेषेण हसितैर्हासावलोकनैर्भृत्यैश्चौर्यकर्मकुशलैर्विवृतनेत्रादितिरिन्तः क्रणलक्षान्तः प्रवेषु समर्थैर्मनोरत्नमञ्जूषां चोरयित्वा पलायितोऽतस्तं पृच्छाम इत्यर्थः। तत उत्तरमलब्ध्वा महत्त्वपूज्यत्वाद्यभिमानादेते ऽस्मान्क्षुद्राः प्रति अवज्ञया न कथयेयुरिति विचार्य्यान्यत्र गताः। मानिनीपक्षे एते सर्वलोकपूज्याः प्रष्टव्या इत्याशयेन पृच्छन्ति। दृष्ट इति। दृष्टश्चेद्वक्तव्यः यतो नो मनो हृत्वा नत्वस्माभिस्तस्य मनो दत्त मितिभावः। ननु बलात्कथं भवतीनामन्तरस्थं मनो हृतवानितिचेत्तत्राहुः। प्रेमेति। स्वागतमित्यादिवचनैराविष्कृतेन प्रेम्णाऽन्तः हासेन ग्रहणमवलोकनैर्हरणं ननु तदुपरि भवतीभिर्विश्वासः किमर्थं कृत इति चेत्तत्राहुः। नन्दस्य सर्वानन्दप्रदस्य परमविश्वसनीयस्य सूनुरतोऽस्मभ्यं सुखमेव दास्यतीति मत्वा विश्वासः कृत इति भावः। ततो ऽलब्धोत्तराः क्षणं स्थित्वा अहो किमेताभिरित्यस्मानवजानन्तः स्तब्धाः प्रत्युत्तरं न ददते तदलमेतैः क्षुद्राभक्ष्यफलैरफुल्लैश्चेति न्यग्रोधो रुधिर आवरणे नोत्प्रेक्षत्यधो गच्छतीत्यर्थत्वात्प्रष्टुमयोग्यैश्चान्तर्बहिरत्यन्तकठोरैः परोपकारमाहात्म्यानभिज्ञैरिति विचार्य्यान्यत्र गताः निवृत्तिपक्षे गुणा न विदुरात्मानमित्युक्तत्वाद्गुणाद्यभास्यतामाविष्कुर्वन्ति। दृष्ट इत्यादिना। अश्वत्थादिपदैः सत्त्वरजस्तमाऽभिधा गुणा गृह्यन्ते नोऽस्माकं प्रेम प्रसन्नतापूर्वकमवलोकनैः श्रवणादिरूपैः मनो हार्द हृत्वा उद्धृत्य नन्दः आनन्दश्चासौ सूनुश्चानन्दः स्वयंप्रकाशरूपः परमात्मा गतोऽवगतः स युष्माभिर्दृष्टः कच्चिद्भवद्भिरप्रकाश्य इति भावः सनुः पुत्रे ऽनुजेऽर्के चेति मेदिनी ॥ ५ ॥

रास-रहस्यम्

र० टी० – सत्त्वरजस्तमोगुणाधिष्ठातृविष्णुब्रह्मरुद्रदेवतानां अश्वत्थप्लक्षन्यग्रोधरूपेणावतारग्रहण पुराणेषु प्रसिद्धम्। अत्र तु हे अश्वत्थ ! हे प्लक्ष ! हे न्यग्रोध ! इति सम्बोधनेन, अश्वत्थः न श्वः प्रभातपर्यन्तमपि स्थास्यतीति विश्वासार्ह इति आशरीरादहंकारपर्यन्तं सर्वेषां नश्वरत्वं द्योतयति, प्लक्षः रलयोरभेद इति पक्षः आत्माभिन्नं सृष्टिप्रपंच सर्व प्रकर्षेण क्षयतीति क्षयशीलत्वं दर्शयति, न्यग्रोधः न्यक्कारेण याच्ञानङ्गीकारेण रोधयति आत्मज्ञानमिति देवतादि याञ्चया प्रार्थनया ज्ञानप्राप्त्यसम्भवत्वं द्योतयतीति वृत्तयः तान् अश्वत्थाद्युपलक्षितविष्ण्वादिदेवान् पृच्छति, वो युस्माभिः कच्चिन्नन्दसूनुः दृष्टः? सः नन्दसूनुः नन्दः नन्दः ध्यानानन्दः तेनोत्पन्न आत्मसाक्षात्कारः नो अस्माकं प्रेमहासावलोकनैः प्रेमा अनुरागः सत्त्वगुणात्मिका वृत्तिः, हासः परिहासः चंचलात्मिका रजोगुणोद्भवावृत्तिः, अवलोकनं आत्मनः शरीरादिरूपेण दर्शनमेव अव अधःकृत्य लोकनं दर्शनं तमोगुणोद्भवा वृत्तिः ताभिः मनः चित्त हृत्वा हरण कृत्वा गतः पलायितः ॥ ५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उन्मत्तवत् प्रश्नप्रकारं वर्णयति। दृष्ट इति नवभिः। नोऽस्माकं प्रमहासविलसितैरवलोकनैर्मनो हृत्वा गतो नन्दसूनुः हे अश्वत्थादयः वो युष्माभिः कच्चित्किं दृष्टः अत्राश्वत्थादीनां महत्त्वादिरूपः कुरबकादीनां पुष्पादिभिः परोपकारित्वरूपः तुलस्यादीनां कृष्णचरणप्रियत्वादिरूपस्तत्तद्गुणविशेषः कृष्णसंनिधिभावनाजनकः स्पष्टत्वान्नोच्यते ॥ ५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उन्मत्तत्वं स्पष्टयितुं किञ्चिदश्वत्थः सर्ववृक्षाणाम्। मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे। अग्रतः शिवरूपाय वृक्षराजाय ते नम इत्यादिसमयस्यैतस्समयेऽप्यनुसन्धानमस्तीति तत्पुरस्कृत्य ध्वन्यत इति सूचयन्नाह॥ दृष्ट इति। अश्वत्थप्लक्षोऽपि तद्वृक्षविशेषः। प्लक्षो द्वीपविशेषे स्यात्पर्कटीगर्भभाण्डयोः। पिप्पले द्वारपार्श्वे च गृहस्य परिकीर्तित इति विश्वः। विज्ञेयः पर्कटीप्लक्षः प्लक्षः पिप्पलपादप इति शाश्वतः। पर्कटी वा न्यग्रोधो वटो वा शमी वा। न्यग्रोधो बहुपाद्वटो न्यग्रोधस्तु पुमान्व्यामवटयोश्च शमीतरावित्यमरभानू। किंशुकपलाशो गतम्। तदुपरि कीरमपि दृष्ट्वा तमपि पृच्छन्तीत्याह॥ शुकानन्दसूनुरागात्किमिति। हासावलोकनैः सहागात्किं वो युष्माभिर्दृष्टः कच्चित्॥ ५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्रापि प्रथमं विष्णुब्रह्मशिवतां लोके प्राप्ताः अश्वत्थप्लक्षवटास्तान्पृच्छन्ति। दृष्ट इति। अश्वत्थो हि वैष्णवो वृक्षः विष्णुवत् लोके सन्मानमर्हतीति प्रायेणायं ज्ञास्यति तथाप्ययं स्तब्धः स्वोत्तमभावनया न ज्ञास्यतीति तदर्थं हेतुभूतं नामाह। अश्वस्तिष्ठत्यस्मिन्निति अश्वत्थः लोकास्त्वश्वेति अस्मिंस्त्वश्वस्थितीति अश्वे रूपं कृत्वा यदश्वत्थे तिष्ठत इति श्रुतेः तर्हि प्राजापत्योऽश्व इति तदपेक्षया प्राजाप्रत्यो वृक्षः प्रष्टव्य इति प्लक्षं पृच्छन्ति। प्लक्षेति। तत्रापि तस्या ज्ञानं नाम्ना वदन्ति अयं हि मनुष्याणामज्ञानार्थं पावित्र्यक्षारणादुत्पन्नः अपवित्रः लोकानामज्ञानहेतुरेव अतः कथं वक्ष्यतीति पशुना वै देवाः स्वर्गं लोकमायन् ते ऽमन्यत मनुष्या नोऽन्वभविष्यन्तीति तस्य शिरश्छित्त्वा मेधं प्राक्षारयन् स प्लक्षोऽऽभवदिति श्रुतेः तर्हि कर्मसम्बन्धरहितवैष्णवधर्मोपदेष्टा शिवः प्रष्टव्य इति तद्रूपं न्यग्रोधं पृच्छन्ति। न्यग्रोधेति। तस्यापि दूषणं नितरामग्राण्यधो यस्येति अतोऽन्ते हीनभावं गच्छतीति अग्रे गमने हेतुर्भविष्यति वः युष्माकं सन्बन्धी भवद्भिः किं दृष्टः प्रश्नसम्भावनायां कच्चिदिति दृष्टोऽस्माभिः पूर्वं सर्वदैव वातः किम्भवतीनामिति चेत् नो मनः हृत्वा गत इति ननु स विष्णुः कथञ्चौर्यं करिष्यतीति तत्राहुः। नन्दसूनुरिति। नन्दस्य चेत्पुत्रो जातः तदा तत्कार्यं कर्त्तव्यं ते हि दधिदुग्धादिचौर्यं कुर्वन्ति अतो मनश्चौर्यमपि नात्यन्तं विरोधि भर्तृनामाग्रहणं वा अत एव हरणपर्यन्तं

प्रभुपुत्र इति न ज्ञातः अन्यया भोगं परित्यज्य कथं गच्छेत् नन्वन्तःस्थितं मनः कथं गृहीतमित्याशङ्क्य त्रिविधं मनः त्रिभिरपि धर्मैर्गृहीतवानित्याह । प्रेमहासावलोकनैरिति । प्रेमपूर्वकहास्यसहितावलोकनानि मनोहराणि तमो रजः सत्त्वभावा उक्तः प्रेम्णा अन्तः प्रवेशः हास्येन ग्रहणमवलोकनेन हरणमिति ॥ ५ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

नन्दसूनुर्गत इत्यत्र, **प्रभुपुत्र इति न ज्ञात** इति । चोरत्वेन न ज्ञात इत्यर्थः । प्रभुपुत्रो यतो न चौर्यं करोतीति भावः । **प्रेमहासावलोकनैरित्यत्र तमो रज** इत्यादि । यस्य यादृशं मनस्तस्य तादृश्यैव रीत्या तद्धरतीति भावः ॥ ५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रश्नमेव प्रपञ्चयति—नवभिः । तत्र 'महत्त्वादेते पश्येयुः' इत्याशयेनाश्वत्थादीन् पृच्छन्ति–दृष्ट इति । हे अश्वत्थादयः ! वो युष्माभिः कच्चिन्नन्दसूनुर्दृष्टः ? । 'किमर्थं पृच्छथ' इत्यपेक्षायामाहुः—प्रेमहासविलसितैरवलोकनैर्नोऽस्माकं मनो हृत्वा चोर इव गत इति ॥ ५ ॥

अन्वितार्थप्रकाशिका

महत्त्वादेते पश्येयुरित्यश्वत्थादीन् पृच्छन्ति—दृष्ट इति ॥ हे अश्वत्थ ! हे प्लक्ष ! हे न्यग्रोध वट ! वो युष्माभिः कच्चिन्नन्दसूनुर्दृष्टः स प्रेमहासविलसितैरवलोकनैर्नोऽस्माकं मनो हृत्वा चोर इव गतः ॥ ५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदेव विवृणोति दृष्ट इत्यादि नवभिः हे अश्वत्थादयः प्रेमहासयुक्तैः अवलोकनैः नोऽस्माकं मनोहृत्वातस्कर इव गतः वो युष्माभिः कच्चित् किं दृष्टो दृग्गोचरीकृतः यदिदृष्टश्चेच्छ्रुतेत्यर्थः ॥ ५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवद्विरहव्यथामुषितचेतनाचेतनतिर्यगऽतिर्यग् विवेकानां प्रश्नप्रकारमाह नवभिः । अश्वत्थादीनां प्रत्येकं संबोधनेन प्रश्नोऽपि प्रत्येकमवगन्तव्यः ॥ दृष्ट इति ॥ हे अश्वत्थ चलदलतरो, हे प्लक्ष पर्कटीतरो, हे न्यग्रोध वटतरो, प्रेमहासावलोकनैः, अस्माकं मनः हृत्वा, चोर एव नन्दसूनुः, गतः । वो युष्माभिः, दृष्टः कच्चित् । तत्राश्वत्थादीनां यज्ञाङ्गत्वान्महत्त्वाच्च पूर्वं प्रश्नः । तत्राप्यश्वत्थस्य पूर्वनिर्देशो भगवद्विभूतित्वात् ॥ ५ ॥

कृष्णप्रिया

हे अश्वत्थ ! हे पाकुर प्लक्ष ! हे न्यग्रोध वट वृक्ष ! प्रेमपूर्ण एवं हाससमर दृष्टि से निहाल कर हमारे चित्त को चुराकर चले गए प्यारे नन्द दुलारे को आपने कहाँ भी देखा ? ॥ ५ ॥

कच्चित् कुरबकाशोकनाग[1] पुन्नागचम्पकाः[2] । रामानुजा मानिनीनां गतो[3] दर्पहरस्मितः ॥ ६ ॥

कर्दमक्षमा

अन्वयः—हे कुरबक ! अशोक ! नाग ! पुन्नाग ! चम्पकाः, मानिनीनाम्, दर्पहरस्मितः, रामानुजः, (इतः) कच्चित् दृष्टः ॥ ६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

महांतः स्वपुष्पैर्बहूपकारिणश्चेति कुरबकादीन्पृच्छति । कच्चिदिति । हे कुरबकादयः दर्पहरं स्मितं यस्य सः इतो गतः कच्चिद्दृष्ट इति ॥ ६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कौ रवो यस्य स तथाऽनेनायं शब्दवान्वदिष्यतीत्याहुः—हे कुरवकेति । अन्या ऊचुः—अयं कु ईषद्रवो भ्रमराणां यत्रेति भ्रमरा अप्यत्र नो यान्ति । यद्वा—कुशब्दत्वाच्छोकवृद्धिकरोऽतोऽशोकं शोकनाशकं पृच्छत । नायं वक्तुं क्षमः, नाम त्वस्य जन्मशीलवर्करस्याज इव ज्ञेयम् । नागः नागकेसरः । केसरोपलक्षितपक्ष्मवत्त्वादयं सचक्षुरनेनावश्यं दृष्टः । अन्या ऊचुः–अयमस्मादपि तुंगः पुन्नागो दूरदर्शी वदिष्यत्ययम् । तदितरा ऊचुः—हसत्ययं पुष्पव्याजेन दृष्टोऽनेन युष्मच्चोर इति । रामो यथा मत्तस्तथा सोपीत्याह—रामानुज इति । मानिनीनां वयोरूपादिभिर्जातमानानामस्माकं तदैवाकस्मिकपवनेन चालिताग्रशाखांस्तानालक्ष्याहुः—

---

[1] नोपोदुम्बर चन्दना–वीर. । [2] चंपक–विज. । [3] मितो दर्प–श्रीधर. वंशी. जीव. विश्व. शुक. रा. सु. ध. ; गतो–वीर. ; दोषानन्दस्य चात्मजः–विज. ।

अहो शिरोधूननेन वयं न जानीम इति ब्रुवत एते ।। पुष्पोद्यानं प्रविश्याहो सत्यमिमे एव शुद्धान्तःकरणाः प्रष्टव्याः । यदहो स्वमकरन्दैर्मधुव्रातानतिथीन्सेवन्त इति वृक्षनामान्याहुः—कच्चिदिति । कुरबकः शोणाम्लानः । नागो नागकेशरः । कच्चिद्गतः किं वा कच्चिदिहैव निह्नुत्य स्थितो वेति भावः । ननु किमर्थं पृच्छथेत्याशंक्याहुः—मानिनीनां मानधनानामस्माकं दर्पं मानं हरति स्मितं यस्येति । वयं निर्धनीकृता एवाभूमेति भावः । तदैवाकस्मिकेन पवनेन चालिताग्रशाखांस्तानालक्ष्याहो अहो शिरोधूननेन वयं न जानीम इति ब्रुवते, तदलममीभिः पुरुषजातिभिरित्यन्यतो जग्मुः ।। ६ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महत्तमत्वादेतेऽस्मान् क्षुद्राः प्रत्यवज्ञया नूनं न कथयेयुरिति मत्वान्यान् पृच्छन्ति । कच्चिदिति । कुरवकः शोणोऽम्लानः नागो नागकेसरः किमितो गतः । यद्वा अत्रान्तर्हितो वर्त्तते पूर्वं दृष्ट इति पृष्टम् । अधुनात्वित इति दूरतोऽपि दर्शनं सम्भवेत् । तथापि न सुलभः स्यादिति निकटागतस्य सतोऽत्रैव तत्पदान्यन्विष्य तैश्च तमन्वेषयाम इति भावः । गत इति च पाठे बहुत्र तन्मते टीकायामित इत्यध्याहृत्य व्याख्यातम । रामानुज इति नन्दसूनुरितिवत् । ननु मानिनीनां युष्माकं कथं तेन मनो हृतं तत्राहुः । मानिनीनामिति । तासां दर्पहरं स्मितमपि यस्य तादृशोऽपीति तस्याविमृश्यकाकारित्वञ्च ध्वनितं दर्पो गर्वः । तदानीमेव तत् कृतेन कपटस्मितेन मानमयगर्वो हृतः । अत एवान्वेषयाम इति तथा तादृशमहामोहनस्य विच्छेदेन क्षणमपि जीवितुं न शक्नुम इत्यतः पृच्छाम इति भावः ।। ६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

महत्तमत्वादेतेऽस्मान् क्षुद्राः प्रत्यवज्ञया न नूनं कथयेयुरिति मत्वान्यान् पृच्छन्ति—कच्चिदिति । कुरुबकः शोणाम्लानः, नागो नागकेशरः, किमितो गतः, यद्वा, अत्र वर्त्तमाने, पूर्वं दृष्ट इति पृष्टमधुना चेत् इति दूरतोऽपि दर्शनं सम्भवेत्तथापि न सुलभः स्यादिति निकटागतस्य सतोऽत्रैव तत्पदान्यन्विष्य तैश्च तमन्वेषयाम इति भावः । ननु मानिन्यः ! कथं तं पृच्छत ? तत्राहुः—मानिनीनामिति । तत्सितमात्रेणैव मानो न तिष्ठेत्, केवलमात्मनो वैदग्धीविशेषेण तेनैवास्माकं मानो जनितो न तत्रास्माकमपराध इति किंवा तदानीमेव तत्स्मितेन मानो हतः, अत एवान्वेषयाम इति । किंवा तादृशमहामोहनस्य विच्छेदेन क्षणमपि जीवितुं न शक्नुम इत्यतः पृच्छाम इति भावः ।। ६ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कच्चिदिति । हे कुरवकादयः ! मानिनीनां दर्पहरं स्मितं यस्य स रामानुजः इहागतः कच्चिदितीष्टप्रश्नद्योतकमव्ययं दृष्ट आगतश्च किन्तदस्मदिष्टमित्यर्थः । एवमुत्तरत्रापि ज्ञेयम् ।। ६ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कुरबकः करञ्जः नागः नागकेसरः पुन्नागः पुरुषस्तुङ्ग इति दोग्धा जिह्वामधुरः ।। ६—७ ।।

श्रीमज्जीवगोस्वामिकृतो क्रमसन्दर्भः

इत इति इण धातोर्निष्ठाप्रयोगः मानिनीनां दर्पहरस्मित इति यश्च तादृशोऽपि गत इत्यविमृश्य कारित्वं तस्य व्यञ्जितम् ।६।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

हे सख्यः ! एभिरसौ न दृष्ट एव, तेषां कुसुमाभावात् समीपं स नायात् । तेन सकुसुमानेव तरून् पृच्छाम इत्याहुः—कच्चिदित्यादि । कच्चित् प्रश्ने, हे कुरवकादयः ! रामानुजा दृष्ट इत्याध्याहार्या पूर्वं एव वावर्तनीयः । तस्यैवं कार्यमयुक्तम्, किं तदाहुः—मानिनीनामस्माक दर्पहरणमिति यत इत्याहुः—मानिनीनां दर्पहरः स्मृतः ।। ६ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुष्पोद्यानं प्रविश्याहो सत्यमेव एते शुद्धान्तः करणः प्रष्टव्याः यदहो स्वमकरन्दैर्मधुव्रतातिथीन् सेवन्ते इति । वृक्षानासाद्याहुः । कच्चिदिति । कुरवकः शोणोऽम्लानः । नागो नागकेसरः । कच्चिद्गतः किम्वा कच्चिदिहैव निह्नुत्य स्थितो वेति भावः । ननु किमर्थं पृच्छथेत्याशङ्क्याहुः । मानिनीनां मानधनानामस्माकं दर्पं मानं हरति स्मितं यस्येति वयं निर्धनीकृता एवाभूमेति भावः । तदैवाकस्मिकेन पवनेन चालिताग्रशाखांस्तानालक्ष्याहो शिरोधूननेन वयं न जानीम इति ब्रुवते तदलममीभिः कठोरैः पुरुषजातिभिरित्यन्यतो जन्मुः ।। ६ ।।

रसिकाह्लादिनी-टीका

ततोत्तरमप्राप्यात्मानमवज्ञातमिति मत्वा एते क्षुद्राः सद् सेव्य फलाः किं ज्ञास्यंतीत्यवज्ञयाऽन्यत्र गत्वा सुगन्धपुष्पात् कुरवकादीन् पृच्छन्ति । एते कुरवकादयः पंच कामबाणा द्रवपुष्पसंपन्नाः एतेषां पुष्पावचयनं कुर्वन् दृष्टो भविष्यतीति सम्भाव्यमाहुः ।

हे कुरबक हे अशोक हे नागकेशर हे पुन्नाग हे चंपक भवन्तः परोपकारस्वभावाः सर्वान् सुरभीकुर्वंतस्तिष्ठन्ति। वो दृष्टः कच्चिदिति प्रश्ने कं पृच्छथेति चेत्तत्राहुः। रामानुजो गत इति साक्षान्नामानुक्तिः प्रियत्वादीर्ष्यया वेति। ननु युष्माकं किं हृतं अथ च भवत्यो मानिन्यः कथं पृच्छथेति चेत्तत्राहुः दर्पहरस्मितः दर्पो गर्वस्तं हरति स्मितं यस्य दर्पमेव सर्वस्वं हृत्वा गतः गर्वमूलको मानः गर्वे गते स्वत एव मानहानिर्जाता तदर्थं पृच्छते दृष्टश्चेत्तर्हि कथयतेति। गर्वलक्षणं रसार्णवे-"ऐश्वर्यमदातरूण्यकुलविद्याबलैरपि। इष्टलाभादिनान्येषामवज्ञा गर्व ईरितः" इति "य तु प्रेमानुबंधेन स्वातन्त्र्यं हृदयगमं। बध्नाति भावकौटिल्यं सोऽयं मान इतीर्यते" इति ॥ ६ ॥

विशुद्धरसदीपिका

अहो सख्यो! महत्तमत्वादेतेऽस्मान् क्षुद्रा इत्यवशया नूनं न कथयेयुः अपि च वनस्पतीनामेषामप्रसूनत्वान्नन्दसूनु" परिचय एव नास्तीति तद्वन्तः प्रष्टव्या इति तानेव निर्दिशन्ति। कच्चिदिति। कुरशकः शोणोऽम्लानः नागो नागकेसरः पुन्नागः केसरः रामानुज इति तज्ज्येष्ठनामग्रहणात्कान्तभावाभिनिवेशेन साक्षात्तन्नामाग्रहणाच्च परकीयाभिमानिनीनामिदं वाक्यं प्रष्टव्येषु च नर्म्मसचिवत्वमपि सम्भावितम् अत एव मानिनीनां दर्पहरस्मितः निजदोषाविष्कारेण तत्परिकरप्रायेष्वेतेषु तत्प्रतिक्रिया च सूचिता यद्वा स्मितमात्रसाध्ये दर्पोपशमने किमनेन पलाय्य गतमित्यधीरत्वमुक्तम् ॥ ६ ॥

श्रीरामनारायणकृता भावभावविभाविका

अन्यान् पप्रच्छुः। कच्चित्कुरबकेति। तत्र कच्चिदिति सर्वत्र सम्भावनासम्भावनयोः पूर्ववत् कौ पृथिव्यां परोपकारतया रवः सुयशो यस्य स कुरबः स्वार्थे कः यद्वा कौ रवेण सुयशसा कं सुखं यस्येति व्युत्पत्तिद्वयेन परोपकारिणं यशस्विनं कृष्णस्यापि कौरवः सुयशो यस्यास्मत्सम्मोहनवेणुरवो वा यस्य तेनैव कौ विस्तृतस्वयशोरवेण सतां कं सुखं वा यस्माद्वेणुरवेण वा रसिकसखीनां कं सुखं यस्मादेव कुरवकत्वात् तत्समाननामसीलत्वेन तद्रहस्यज्ञं सुमनोविकासामोदाभ्यां चोपलक्षितकृष्णदर्शनाल्हादं मत्वा तं पप्रच्छुः। हे कुरवक! रामानुजो नो मनो हृत्वा गतस्त्वयोक्तरीत्या समाननामगुणत्वात् दृष्ट इति पूर्वेणैवान्वयः तथा च नो ब्रूहीति प्रार्थना। ननु भवतीनामेव मानदोषेण तेन तथा कृतमिति स्वयमेव तत्प्रश्नोत्तरं सम्भाव्याहुः मानिनीनां दर्पहरस्मित इति। तथा चास्मद्दर्पहरणस्य तदीयस्मितमात्रसाध्यत्वादेतावन्नैर्घृण्यमनुचितमेवेति भावः। एवंप्रश्नेऽप्युत्तरालाभे यथा कृष्णो मृगयुरिव स्ववेणुगतिरवेण हरिणीरिव नो मोहयित्वा तन्मारणमिव विश्वासघाताचरणेन कुत्सितरवत्वात्कुरवकस्तथायमपि कुत्सितरवतया कुरवकत्वान्नावभाषते इति तमुत्सृज्यान्यत्र गच्छन्त्यः अशोकं दृष्ट्वा तरति शोकमात्मविदित्यादिश्रुत्यात्मस्वरूपकृष्णदर्शनं विना तदशोकत्वानुपपत्त्या तद्दर्शनं सम्भाव्य न शोको विद्यते यस्मादिति व्युत्पत्त्या पुनस्तत्त्ववित्त्वेन तरुतनुत्वेन करुणाशीलत्वञ्च सम्भाव्याशोकेति सम्बोधनेन त्वदुपसन्नानां नो नो शोको भवतु चन्दनद्रुमस्य स्वसमीपोपगतचन्दनत्वसम्पादनपदस्मदशोकत्वं सम्पाद्यतामिति पूर्ववत्सम्प्रार्थ्योत्तरमलब्ध्वा—

यथा कण्टकविद्धाङ्गो जन्तोर्नेच्छति तां व्यथाम्। जीवसाम्यं गतो लिङ्गैर्न तथाऽविद्धकण्टकः ॥

इत्यादिवचनात् शोकवानेव परशोकं ज्ञात्वा तन्निवृत्तय उपकरोति नाशोकः अयं चाशोकतया नास्मच्छोकं जानाति येनोपकारं विदध्यात् किञ्चाशोकस्यास्मद्विमुखद्रुमत्वात्सद्द्वेषित्वमेव असंख्याताशोकवने साक्षाल्लक्ष्मीः सर्वमान्या सीता शोकग्रस्ता निवसिता तैर्बहुभिर्बहुमान्याया अपि तस्या एकस्याः शोकहरणाय वचनमपि नोक्तम् एकेनाशोकेन बह्वीनां नः शोकग्रस्तानां शोकापनोदस्य सम्भावयितुमप्यशक्यत्वाद्वृथात्र प्रश्न इति मत्वाग्रे गच्छन्त्यौ नागपुन्नागाख्यौ वृक्षविशेषौ दृष्ट्वा न अगो नागः पुमांश्चासौ न अगश्चेति व्युत्पत्त्या पुलकादिना च तयोः समानद्रुमत्वाभावं निश्चित्य नागत्वादेव नागगतिकृष्णगतिज्ञत्वं पुंनागभोगभुजकृष्णभोगोपयोगित्वं नागशयनस्य तस्य नित्यसहकारित्वं च सम्भाव्य स कृष्णः कृष्णनाग इव मुखान्मुखमुखतया कामविषाग्निं नोऽङ्गेषु विस्तार्य सुरनागगतिनटनागरस्वरः नो मनो हृत्वा कृष्णो गतः इति प्रश्नेऽप्युत्तरमनवाप्याय नागः स्वयं विषविस्तारको मारकः कथं वचनामृतेन जीवयेत् पुंनागस्त स्वनाम्नैव पुंसो नागत्वं बोधयतीति मत्वान्यत्र गच्छन्त्यः चम्पकं विलोक्य तत्पीताम्बरवर्णतया च चपि चापल्ये इत्यस्मात् चम्पयतीति चम्पकः इति व्युत्पत्त्या तस्य चपलत्वेन चपलकृष्णसमानशीलतया तद्रहस्यज्ञत्वं यद्वा चपिगतावित्यस्माच्चम्पयतीति चम्पकः अत्र इदित्त्वान्नुम् ये गत्यर्थास्ते प्राप्त्यर्थास्तस्मात् प्राप्तत्वेन तदभिज्ञत्वं दूरेस्वामोदप्रदत्वेनोपकारकत्वं च सम्भाव्य पूर्ववत्प्रश्ने उत्तरानवाप्तौ च तदीयचपलत्वेनैवाविश्वस्य सुरभिविस्तारोऽपि कृष्णवत् मनोहरणायैव नोपकारायेत्यवधार्य्य काश्चित्त् स्ववक्तमपि कृष्णदर्शनविरहेण पीतवर्णं वैकल्येनैव भाषितुमशक्तमाकलय्यान्यत्र गताः ॥ ६ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथ कुरवकादीन दृष्ट्वा एते महान्तः पुष्पवन्तः सुगन्धाः मधुपैरतिथिभिरनिशं सेव्यमानाः शुद्धान्तः करणाः कथयिष्यन्तीति मत्वा पृच्छन्ति। कच्चिदिति। कुरवकः शोणोऽम्लानः नागरङ्गः केसर हे कुरवकादयः! रामानुजः कच्चिदितो गतः अनेन

मार्गेण गच्छन् दूरतोऽपि दृष्टः स्यादिति भावः। रामावतारे कृतस्य फलप्रदानायाऽस्मिन्नवतारे स्वीयं नाम ज्येष्ठत्वं च लक्ष्मणाय दत्तवान् स भक्ता अस्मांस्त्यक्तुमयोग्यस्त्यक्त्वा गतोऽतः पृच्छामस्तस्माद् दृष्टश्चेत्कृपया वदतेति रामानुजपदाशयः करुणासागरोऽपि भगवान् कठोरचित्तः क्षत्रियजात्युत्पन्नत्वात्स्वभावमनुकुर्वन्नस्मत्प्राणहरचेष्टो जात इति वा तदाशयः यद्यपि तेन रमितानामस्माकं मान उत्पन्नस्तथापि तन्निरासार्थमन्तर्धानं नोचितं यतः दर्पहरं स्मितं यस्य सः तथा च मिष्टौषधप्रदानेन रोगनिवृत्तिसंभवे विषप्रदानं नोचितम् अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदिति न्यायादतस्तदन्याय्यं विचार्य्य वक्तव्यमितिभावः। तेभ्योऽलब्धोत्तरास्तदैवाकस्मिकेन वायुना चालिताग्रशाखांस्तानालक्ष्याहो शिरो धूननेन न वयं जानीम इति सूचयन्त्यतोऽलमेभिः सम्पद्भर्वितैरिति मनसि निधायान्यत्र याताः। अनभिज्ञापक्षे अहो किमर्थं गत इति चेद्वृथैव गत इत्याशयेनाहुः रामानुजस्तथा च बलभद्रानुजस्य तस्य नास्ति भयसंभावनाऽतो भयनैमित्तिकमपि तद्गमनं न सम्भवति नाप्यस्मन्माननिरासार्थं तस्य स्मितमात्रेणैव वशीकरत्वादित्याहुः। दर्पेति। तथा च स्मितमात्रेण हृतमानास्तद्वियोगे क्षणमपि जीवितुमशक्ता अन्वेषयामः पृच्छामश्चातः कृपया वदतेति भावः। तेभ्योऽप्यलब्धोत्तरा अहो अयं कुरवकः मकरन्ददत्वादलीनां कुत्सित ईषद्वा रवो यत्र सः यद्वा कुत्सिताद्रोदनशब्दात्कं सुखं यस्य सः रोदनप्रियः अशोकः शोकरहितः पीडानभिज्ञत्वाद्दयावर्ज्जितः नागोऽयं नाम्नैव भयानकः अयन्तु पुंसामपि नागः चम्पकोऽपि परिणामविरसस्तस्मादेते न प्रष्टव्या यतो नास्मान्सुखयिष्यन्तीति विचार्य्यान्यत्र गतः मानिनीपक्षे कुरबकाशोकौ कामोद्दीपकौ नागादयः कामबाणपुष्पाः कामिनं व्यावर्त्तयन्त्यतः कामिनन्तं पश्चाद्येत ज्ञास्यन्तीति मत्वा तान्पृच्छन्ति। कच्चिद्गतः किंवा क्वचिदत्रैव निह्नुत्य वर्तते ननु किमर्थमन्विष्यत इत्याशङ्क्यास्मत्सर्वस्वमपहृत्य पलायितः इत्याहुः मानिनीनां मानैकधनानामस्माकं स्मितादिना दर्पं हृतवान्निर्द्धनाश्चास्मान्कृत्वा गतोऽतो धूर्त्तशिरोमणिरस्माभिर्धर्तव्य इति भावः। ननु अबलाभिर्युष्माभिः कथं धर्तुं शक्य इतिचेत्तत्राहुः। रामानुजः तस्य ज्येष्ठो भ्राता बलरामोऽप्यस्मदपेक्षया न प्रबलस्तस्यायमनुजः कथं प्रबलः स्यादन्यथा पलायनं न कुर्यादिति भावः। ततोऽलब्धप्रतिवचना अहो एते पुरुषजातित्वेन कठोरचित्ताः कृष्णपक्षपातिनो न कथयिष्यन्तीति मत्वान्यत्र गताः निवृत्तिपक्षे कुरबकादिशब्दैः कुरवकादिस्थानीयानामाकाशादीनां स्थूलसूक्ष्मभूतानां ग्रहणं रामा महामाया अनुजानगामिनी यस्य सः सर्वकार्य्योपादानमायाधिष्ठानभूतः कच्चिद्युष्माभिरितोऽवगतः सत्वरमाकं मानिनीनां तत्र प्रामाण्यवतीनामपि दर्पहरं स्मितं स्मयनीयं चराचरात्मकं जगद्यस्यास्माकमपि सत्त्वासत्त्वाश्यां वक्तुमशक्यत्वात् तथा च महाभूतेभ्योऽपि पर इति भावः॥ ६॥

रास–रहस्यम्

र० टी—“तस्याद्वा एतस्मादात्मनः आकाशः सम्भूतः, आकाशाद्वायुः वायोस्तेजः तेजसः आपः अद्भ्यः पृथिवी। इति श्रुतिमाश्रित्य रमयति आनन्दयति सर्वस्मिन् हृदये यः सः रामः, तस्मादनु पश्चाज्जायते भूतपंचकं, तत्कार्यं कुरवकाद्युपलक्षणीभूतः सृष्टिप्रपंचः, तस्मिन्नपि सकृत् व्यापकत्वेनानुभूतितः “विज्ञातमिति” उत्पन्नं दर्पं तदन्तर्हितत्वेन हरतीति दर्पहरः, मानिनीनामभिमानवतीनां स्मितः कपटहास्यमिव स आत्मा इतो अस्मात् प्रपञ्चादपि गतः तिरोहित इति स्वस्मिन्नेव आक्षेपः॥ ६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे कुरबकादयः! मानिनीनां दर्पहरं स्मितं यस्य स रामस्य बलस्य अनुजः इतो गतः कच्चित् किम्॥ ६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कुरबक कुरञ्ज। भवेत्कुरबकः शोणम्लानवार्टाप्रभेदयोरिति विश्वाद्वृक्षविशेषः। गोरण्टीत्यपभ्रष्टभाषेति केचित्। एवमेव कुरबकस्तबकेति माघव्याख्यायामप्युक्तम्। अशोक। अशोको वञ्जुले मानद्रुमनिः शोकयोरपि। अशोकः कटुरोहिण्यामिति विश्वः। नागपुन्नाग नागकेशर। नागं तु नागकेसरपुन्नागो नागदन्तकमुस्तके। देहानिलप्रभेदे च श्रेष्ठ स्यादुत्तरास्थित इति विश्वः। चम्पक। काञ्चनतरुरिति रभसो रत्नकोशश्च। मानिनीनामानन्दस्य दोग्धा तत्प्रपूरको दातेति यावत् नन्दस्यात्मनः पुत्रो रामानुजश्च दृष्टः कच्चित्॥ ६॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तेषामनुत्तरं मत्वा एते अमुख्यफला महान्तोऽपि काकसेव्या एवेति ये महान्तः पुष्पवन्तः सुगन्धाः तान् पृच्छाम इति कुरबकादीन् पृच्छन्ति। कच्चिदिति। कुरबकाशोकौ कामोद्दीपकौ एते कामबाणपुष्पाः नागो नागकेसरः पुन्नागश्च चम्पकश्च अतिसुगन्धपुष्पाः ते हि कामिनं व्यावर्त्तयन्ति अतः पश्चाद्येते ज्ञास्यन्तीति रामानुजः कच्चिद्भवद्भिर्दृष्ट इति पृच्छन्ति पूर्ववदेव प्रयोजनकथनं मानिनीनां दर्प्पहरं स्मितं यस्य व्यर्थमेव गतो भगवान् स्मितमात्रेणैव दर्पो गच्छति किं गमनेन भयं तु नास्त्येव यतो रामानुजः बलभद्रभ्राता भर्तृनामाग्राह्यमिति वयं सर्वा एव मानिन्यः स्थिताः मतोऽस्मद्दर्पदमनार्थं गतः प्रायेणैतैर्न दृष्टः कुत्सितरवात् कं सुखं यस्य रोदनप्रियोऽयम् अशोकश्च शोकनाशक एव न तु कस्यचित्सुखं प्रयच्छति नागोऽयं नाम्नैव भयानकः गजपक्षेऽपि पुंसामपि नागः चम्पकोऽपि परिणामविरसः अफलाश्चैते॥ ६॥

श्रीसुबोधिनी-सारः

हे कुरबकादयः मानिनीनां स्त्रीणां दर्पहरं स्मितं यस्य स रामानुजो दृष्टः कच्चित् ॥ ६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

तुलस्यास्तदुभयमिति । पुष्पकृतः फलकृतश्च यो विधिविनियोगस्तदुभयं नास्तीत्यर्थः ॥ ६ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

एवं प्रश्नेऽपि तदुत्तरमलब्ध्वा 'एते महान्तः स्वपुष्पैर्बहूपकारिणश्च, अतो वदेयुः' इत्याशयेन कुरबकादीन् पृच्छन्ति—कच्चिदिति । हे कुरबकादयः ! रामानुजः कृष्ण इतः अनेन मार्गेण गतः कच्चित् ? 'किमर्थं पृच्छथ ?' इत्यपेक्षायामाहुः—मानिनीनां गर्ववतीनामस्माकं दर्पहरं स्मितं यस्य सः । स्मितेन गर्वं हृत्वा चोर इव गत इत्याशयः । अनेन यदि गर्वो दूरीकर्तव्यस्तर्हि स्मितमात्रेणैव स दूरीकर्तव्यः, किमन्तर्धानेनेति तस्याल्पत्वमपि सूचितम् ॥ ६ ॥

अन्वितार्थप्रकाशिका

पुष्पैर्बहूपकारिण एते इति कुरबकादीन् पृच्छन्ति—कच्चिदिति ॥ हे कुरबकादयः ! मानिनीनां गर्ववतीनामस्माकं दर्पहरं स्मितं यस्य सः रामानुजः कृष्णः इतः एतन्मार्गेण गतः कच्चित् ॥ ६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुष्पछायाभिर्बहूपकारकानकुरबकादीन् पृच्छति कच्चिदिति कुरबकादयस्तरुविशेष्य मानिनीनां दर्पहरं गर्वनाशं कस्मितस्य सः हरिरितो गतः सः वः कच्चिद्दृष्टः ॥ ६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कच्चिदिति ॥ कुरबकादिचम्पकान्तानां द्वन्द्वः । हे कुरबक रक्तझिण्टीतरो, हे अशोक वञ्जुलतरो, हे नाग नागकेसरतरो, हे पुन्नाग केसरतरो, हे चम्पक हेमपुष्पकतरो, मानिनीनां दर्पहरं स्मितं यस्य सः, रामानुजः श्रीकृष्णः, यातः इहागतः कच्चित् । कच्चिदितीष्टप्रश्नद्योतकमव्ययम् ॥ ६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कच्चिदिति : १०.३०.६

कुरबकोऽयमिति द्रुम कीर्तितस्त्वमनयाऽभिधया त्रपसे यदि ।
कथय कृष्णपदं भवतोऽभिधां मुरवकोऽयमिति प्रथयामहे ॥ १३ ॥
अस्मत्पदाश्रयमवाप्य भवान्विकासं लब्ध्वा ह्यशोकपदमेत्य सुखान्वितोऽभूत् ।
तं चोपकारमधुना स्मरसि द्रुम त्वं तन्नोऽद्य कृष्णकथया लघु कुर्वशोकाः ॥ १४ ॥
नागोऽस्ति भूरुह भवानिह गूढपादः ख्यातोऽस्ति नागशयनो भुवि नः सखापि ।
भ्रान्त्वा चिरं कलितभूरि परिश्रमोऽसौ प्राप्तो यदीह शयितुं त्वयि तद्वदाशु ॥ १५ ॥
पुन्नागोऽस्ति भवान् स चापि पुरुषः प्रोत्तुङ्गकीर्तिस्तथा देवानामपि वल्लभः स च भवांस्तत्केसर त्वां नुमः ।
अस्मान्दर्शय तत्पदं त्वमसि यद्विज्ञाततत्तत्त्वको न ह्यल्पेन पुमांल्लभेत सुकृतेनैतत्स्वरूपं क्वचित् ॥ १६ ॥
धत्से सुवर्णकुसुमानि बहूनि भूमौ त्वं चम्पकेति तव पादमुपागताः स्मः ।
क्वास्मत्प्रियोऽस्ति कथयेति कृतेऽनुयोगे त्वेकं सुवर्णमपि नार्पयसीति किं तैः ॥ १७ ॥

कृष्णप्रिया

कामोद्दीपक हे कुरबक ! हे अशोक ! हे नागकेशर ! हे पुन्नाग ! हे चम्पक ! मानवती नारिओं के मान को हरने वाले मन्दहास्य करने वाले भी बलदाऊजी के नन्हे भैया को यहाँ से पधारते हुए आपने देखा ! ॥ ६ ॥

कच्चित्तुलसि कल्याणि गोविन्दचरणप्रिये । सह त्वालिकुलैर्बिभ्रद् दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥

कर्दमक्षमा

अन्वयः—हे गोविन्दचरणप्रिये ! हे कल्याणि ! हे तुलसि ! अलिकुलैः, सह, त्वा, बिभ्रत्, ते, अतिप्रियः, अच्युतः, (त्वया) दृष्टः ! ॥ ७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अलिकुलैः सह त्वा त्वां बिभ्रत्तवातिप्रियस्त्वया किं दृष्टः इति ॥ ७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे सख्यः इयमस्यातिप्रिया तुलसी, तदेनां मिलित्वैवाग्रे गतोऽत इयं प्रष्टव्येति प्राहुः तुलं तौल्यं स्यति दूरीकरोतीति तुलसी। यया तुल्याऽन्या नेति भावः। स्यतेरौणादिको डट् जल्पयः। दर्शस्पर्शादिनैव सर्वकल्याणकरी त्वमसि, तत्र हेतुः—गोविंदचरणप्रियेति। यथाऽन्योऽपि गोविंदप्रियो दर्शनादिना लोकं पुनाति "मद्भक्तदर्शनात्स्पर्शादर्चनाद्वंदनादपि। महापातकयुक्तोऽपि भवेत्कल्याणभाजनम् ॥" इत्यादिपुराणात्। अच्युत इति। वस्तुतस्तस्य स्त्रीषु रागाभावमाहेति ॥ एता अस्मत्पक्षग्राहिण्यः स्त्रीजातयः स्त्रीजनहृच्छयपीडाविदुष्यः कृपावत्यो भविष्यंति, तदिमाः पृच्छाम इत्यासाद्य तन्मध्ये परममुख्यतमां तुलसीं पप्रच्छुः—कच्चिदिति। हे कल्याणीति। वयमकल्याण्यः कृष्णविच्छेदात्, त्वमेव कुशलिनी, तत्र हेतुः गोविन्देति। यद्वा—चरणशब्दोऽत्रादरमात्रव्यंजकः आर्यचरणा वदन्तीतिवत्। ननु यूयमपि तच्चरणप्रिया भवथैव, सत्यम्, तदपि साद्गुण्याधिक्यात्त्वमेव सौभाग्यवती विच्छेदाभावादित्याहुः—त्वा त्वां बिभ्रदेव गतः, तत्र तत्र सौरभ्याधिक्यमेव कारणमिति व्यंजयामासुः। अलिकुलैः सहेति—परःसहस्रभ्रमरकृतोद्वेगमप्यगणयित्वा। त्वां बिभ्रदिति—सुगंधप्रियेण तेनास्माकमग्रहणमेतादृशसौरभ्यभाववत्त्वाभावादेवेति निश्चिनुम इति भावः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एते पुरुषजातित्वेन प्रायः श्रीकृष्णपक्षग्रहिणोऽस्माकं मानं विज्ञायासूयया न किल कथयेयुरिति स्त्रीजातित्वेनात्मपक्षग्राहिणीं मन्यमानाः शश्वत् दृष्टतत् प्रीत्यनुमितसौभाग्यविशेषेण च तस्याः श्रीकृष्णदर्शनं सम्भाव्य श्रीतुलसीं पृच्छन्ति कच्चिदिति। कल्याणि ! हे जगन्मङ्गलकारिणि ! परमसौभाग्यवतीति वा। अत्र हेतुर्गोविन्देति गोविन्दो गोकुलेन्द्रः तच्चरणप्रिया त्वं श्रीर्यत् पदाम्बुज इत्यादिवत्। यद्वा चरणशब्दोऽत्रादरमात्रव्यञ्जकः आचार्यचरणा वदन्तीतिवत्। आदरश्चाधुना दैन्येन हे गोकुलेन्द्रप्रिये इत्यर्थः। इति तस्यागमनावश्यकत्वं विवक्षितम्। तत् प्रियत्वे हेतुः सहेति। नच तत्र तवानवधानं सम्भवेत्। यतस्तेऽतिप्रिय इति श्लेषेणातिक्रान्तप्रियानस्मद्विधानित्यपि ध्वनितम्। अलिकुलैः सह इति तस्याः साद्गुण्यं दर्शितम् अलीनामप्यनिवार्यत्वसूचनात्। यद्वा। अतिप्रियत्वमेव विवृतं तत् प्रियत्वेनैव ते शिलीमुखा अपि न निवार्यन्त इति सूचनात् तथा मत्तानां तेषां झङ्कारेण निह्नवासम्भवत्वं च सूचितम्। अतोऽवश्यं त्वदन्तिकमागतस्त्वया दृष्ट इति भावः। अच्युत इति श्लेषेण कदापि त्वत्तो न विच्युतो भविष्यतीति तदेव दृढीकृतम् ॥ ७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एते पुरुषजातित्वेन श्रीकृष्णासेवका अस्माकं मानं विज्ञायासूयया न किल कथयेयुरिति निजसखीमिव मन्यमानाः सौभाग्यविशेषेण च सन्दर्शनं सम्भाव्य श्रीतुलसीं पृच्छन्ति कच्चिदिति। कल्याणि ! हे जगन्मंगलकारिणि ! परमसौभाग्यवतीति वा। तत्र हेतुः—गोविन्दस्य गोकुलेन्द्रस्य निजाशेषमाधुर्य्य प्रकटनपरस्य भगवतश्चरणौ प्रियौ यस्यास्तत्सम्बोधनम्, तयोः प्रियेवेति महालक्ष्मीतोऽप्यधिकसौभाग्यं सूचितम्, बहुलप्रयासेन लक्ष्मीकाम्यरजसस्तत्राप्यशेषभगवत्ताभिव्यञ्जकस्य श्रीकृष्णस्य चरणयोः स्वतः प्रियत्वात्, अब्जादिरूपकाप्रयोगस्तत्प्रियत्वेनेर्ष्यया; अतोऽलिकुलैः सह वर्त्तमानामपि त्वां बिभ्रत् पूर्व्वमेव वैजयन्त्यन्तर्गतत्वेनाधुनैव वावचित्य मालादिरूपेण धारयन्, अतएव तवातिप्रियत्वेन त्वया दृष्टोऽस्ति कश्चित् ? अलिकुलैरिति तस्याः सदा मकरन्दमयत्वं तेन च सदैवापरित्याज्यत्वं तथा मत्तानां तेषां झंकारेण निह्नुत्यसम्भवत्वं च सूचितम्; अतोऽवश्यं त्वदन्तिकमागतस्त्वया दृष्ट इति भावः। अच्युत इति कदापि त्वत्तो न विच्युतो भवतीति तदेव दृढीकृतम्, श्लेषेण अलिकुलैरिति बहुवल्लभामपि त्वां प्रियत्वेन विभर्त्ति, न च त्वदेकप्रिया अस्मान्, अतोऽतिक्रान्ताः प्रियाः, किंवा अतिक्रान्तं प्रियं सर्व्वमपि येन स तथेतीर्ष्यया असूयोक्तिः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे तुलसि ! गोविन्दचरणप्रियेऽत एव हे कल्याणि ! अलिकुलैः सह त्वां बिभ्राणस्तवातिप्रियश्चाच्युतस्त्वया दृष्टः कच्चित् ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गोविन्दस्य श्रीविष्णोश्चरणौ प्रियौ यस्याः हे तादृशे ! यद्वा। चरणशब्दोऽत्रादरमात्रव्यञ्जकः आचार्यचरणा वदन्तीतिवत्। आदरश्चाधुना दैन्येन हे गोकुलेन्द्रप्रिये इत्यर्थः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

हे सख्यः ! एते तत्सहचरप्रायाः दृष्ट्वापि न कथयिष्यन्ति। तया तु तुलसी स्त्रीत्वभावात् कोमलहृदयाः, अतः कथयिष्यत्येव दृष्टश्चानया स इति सम्भाव्यते, तत्प्रियत्वात्; तदेनमिव पृच्छाम इत्याहुः—कच्चित् तुलसीत्यादि। हे कल्याणि ! चिरजीविनि कल्याणीत्वे हेतुः—गोविन्दचरणप्रिये ! तेऽतिप्रियोऽच्युतो दृष्टः ? अति प्रियत्वे हेतुः—त्वा त्वां बिभ्रद्दधानः, अलिकूलैः सह एवमेव त्वयि तत्प्रेम। अलिकूलैराकुलामपि त्वां वहत्येव ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एता अस्मत् पक्षग्राहिण्यः स्त्रीजातयः स्त्रीजनहृच्छयपीडां विदुष्यः कृपावत्यो भविष्यन्ति तदिमाः पृच्छाम इत्यासाद्य तन्मध्ये परममुख्यतमां तुलसीं पप्रच्छुः। कच्चिदिति। हे कल्याणीति वयमकल्याण्यः कृष्णविच्छेदात् त्वमेव कुशलिनी। अत्र हेतुर्गोविन्देति। यद्वा। चरणशब्दोऽत्रादरमात्रव्यञ्जकः आचार्यचरणा वदन्तीतिवत् ननु यूयमपि तच्चरणप्रिया भवथैव सत्यं तदपि साद्गुण्याधिक्यात्त्वमेव सौभाग्यवती विच्छेदाभावादित्याहुः। त्वा त्वां बिभ्रदेव गतः। तत्र तव सौरभ्याधिक्यमेव कारणमिति व्यञ्जयामासुः। अलिकुलैः सहेति परःसहस्रभ्रमरकृतोद्वेगमप्यगणयित्वा त्वां विभ्रदिति सुगन्धप्रियेण तेनास्माकमग्रहणमेतादृशसौरभ्यवत्त्वाभावादेवेति निश्चिनुम इति भावः ॥ ७ ॥

रसिकाह्लादिनी-टीका

अश्वत्थादयस्त्वपुष्पाः कुरवकादयस्त्वफलाः एते पुरुषा अस्मात् दुःखं न जानन्ति प्रियस्य विश्वासपात्राणि च रहसि तदनुवर्त्तिनश्च ज्ञापिते सति तस्य क्षोभश्चेज्जायते तदा को वेद किं स्यादिति नोत्तरं दत्तवन्तः। तुलसी स्त्रीजातिः फलपुष्पाभावेति कृष्णप्रियास्ति इयं अस्मद्दुःखं ज्ञास्यतीति कृष्णदर्शनं संभाव्य पृच्छिन्ति हे तुलसि हे कल्याणि मंगलरूपे सदा सौभाग्यवति तत्र हेतुगर्भविशेषणं गोविन्दचरणप्रिये। गोविन्दचरणौ प्रियौ यस्याः, गोविन्दचरणयोः प्रिया वा तस्याः संबोधनं, गोविन्देति गोकुलरक्षावद्धव्रतः इदमप्यस्मासु प्रापकमिति। लक्ष्मीतोऽपि तव सौभाग्यमधिकमस्तीति। तस्यास्तु वक्षःस्थलैकवसतित्वात्, अत एवालिकुलैरनुगम्यमानां त्वां वहु वल्लभामपि त्यजति एकबल्लभा अपि अस्मान् त्यक्तवान्। कीदृशः तव अतिप्रियः, यद्वा अतिक्रांताः प्रिया अस्मदाद्याः येन सः, यद्वा अतिक्रान्तं प्रियं रतिसुखं येन स्वतन्त्रत्वात्। विलासच्युतिरहितं अस्मांस्त्यक्त्वाऽधुना त्वया सह विलासं करोत्येव अयं भावः यथा लक्ष्म्यां स्थितायामपि त्वय्येव तस्य प्रीत्यतिशयस्तथाऽस्मत्समक्षमपि त्वय्येव प्रीतिं करिष्यतेवातः किमर्थं गोप्यते कथने तव न कदाचित् क्षतिरतस्त्वया कथ्यतामिति ॥ ७ ॥

विशुद्धरसदीपिका

एते च पुरुषजातित्वात्तत्पक्षग्राहिणो मर्म्मसचिवप्रायाश्च प्रायोऽस्मान्मानवतीरित्यवज्ञया न किल कथयेयुरिति सम्भाव्य शश्वदङ्गसङ्गसौभाग्यवतीं तदादृतां निजपक्षग्राहिणीं च मन्यमानास्तुलसीं पृच्छन्ति। कच्चिदिति। नित्यसखीनामिदं वाक्यं आभासस्तु कान्तभावानां संग्रहाभिप्रायेण सङ्गमनीयः तत्र तुलसीति स्कान्देतिहासानुसारेण वृन्दादेव्या एव नामान्तरमिति तद्वनाधिदेवीं निजसहचरीं मत्वा साक्षान्नामोक्तिः कल्याणि ! जगन्मङ्गलकारिणीत्यर्थः। यद्वा परमभाग्यवतीति अथवाकुशलिनी भवसीति प्रश्नभङ्ग्या सम्बोधनं गोविन्देत्यादि वृन्दावने तु गोविन्दमिति वाराहतन्त्रोक्तेस्तस्य तस्याश्च नित्यसंबन्धः सूचितः गुरुचरणा इत्यादिवच्चरणपदं गौरवाभिप्रायं श्लेषेण चरणमाचरणं तच्च गोप्यैकया युतस्तत्र परिक्रीडति नित्यदेत्यादिब्रह्मयामलाद्यनुसारेण विहरणमेव एवं च तदेकप्रियत्वमादिश्य तस्यापि त्वं प्रियतमेति दर्शयन्ति। सहेति। अलिकुलैरिति श्यामलत्वाद्वर्णसाम्येन तदभिलाषैरेव मूर्त्तैरित्यर्थः अलीनामनिर्वाच्यस्वेन दोषानुद्भावनमपि सूचितम् अत एव तेऽपि सोऽतिप्रियः स च त्वत्तो ऽच्युत इति परस्परप्रीत्याश्रयविषयत्वेन शुद्धः प्रेमा दर्शितः ततश्च तादृशप्रेमप्रसंशयात्मनश्च सजातीयत्वं प्रदर्श्यावश्यकथनीयत्वमावेदयन्ति अन्यथा मित्रद्रोहः स्यादिति तत एव विश्रम्भेणाहुः। दृष्ट इति। अथ दृष्टो ज्ञात इति सापह्नवोक्तिः ॥ ७ ॥

श्रीरामनारायणकृता भावभावविभाविका

ततोऽग्रे तुलसीं दृष्ट्वा तां तुलसीं भाग्यवतीं भगवत्प्रियां सर्वसज्जनसेविताम्—

तुलसीदलमात्रेण जलस्य चुलकेन च। विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सलः ॥

इत्यादिवचनैः सर्वजनेषु भगवत्कृपोत्पादनेन तत्प्रापिकां स्त्रीत्वेन स्वपक्षपातिनीं स्वदुःखाभिज्ञां चावगत्य तामाहुः। कच्चित्तुलसीति। कल्याणि ! स्वयंसुखरूपे सर्वसुखकारिणि च तथा गोविन्दचरणप्रिये गोविन्दस्य गवामिन्द्रस्य चरणौ प्रियौ यस्या इति मुखहासविलासाद्यनभिज्ञत्वेन ज्ञातासि न वयमिव तव वैकल्यं यद्वा पादसेवापरतया प्रथमत एव दैन्येन तव सौभाग्यातिशयः अस्माकन्तु मानापराधेन दुःखवैकल्यं यद्वा गोभिः श्रुतिभिर्विद्यते चरणो यस्य स गोविन्दचरणः सर्वे वेदा यत्पदमामनन्तीति श्रुतेः वेदान्तवेद्यचरणेन मयैव गीतमिति स्मृतेश्च स प्रियो यस्याः तस्य प्रिया वा यद्वा आचार्यचरणा इत्यादिवदादरेण चरणशब्दप्रयोगः

यद्वा गोविन्दस्य चरणं प्रियं यस्यास्तस्याः सम्बोधनं तथा च तव तदाचरणस्यापि प्रियत्वेनोभयप्रीतिनिर्वाहः अस्माकन्तु तस्य प्रियतमत्वेऽपि तदाचरणं स्नेहिजनविरहदानान्तर्द्धानादिनाप्रियमतः खेदमनुभवाम इति भावः नन्वेवं बहुधा सम्बोधयन्त्यः किंपृच्छथ इति तदभिप्रायं सङ्कलय्य सहेति नोऽन्वेषयतीरनुचरीः संत्यज्य अलिकुलान्येव तवालिकुलानि तवानुगत्वे सति त्वद्यशोगानपरत्वात् तैः सह त्वा त्वां बिभ्रत्स्वस्कन्धे धारयन् अत एव तेऽतिप्रियोऽस्मद्भाग्यात्तु नित्यमच्युतो द्रवितचित्त एव स इतो गतस्त्वया दृष्टस्तव स्वाश्रितजनतत्प्रापकत्वादनुकम्पया ब्रूहि एवं प्रश्नेऽप्यलब्धोत्तरत्वे तस्यास्तदीयातिप्रियत्वेन दुर्मदत्वं सापत्न्यभावने मात्सर्य्यं सोऽन्त कर्मणीत्यस्मात्तत्प्रियात्वप्रसिद्ध्या तुल्या नः स्यति अन्तं प्रापयतीति उणादित्वाद्धातोरोकारलोपः एवमग्रेऽपि तन्नामव्युत्पत्त्या तद्वेषं सम्भाव्य कल्याणित्वेऽपि भद्राख्यकरणरूपतया विघ्नकारित्वमवगत्यान्यत्र गताः ।। ७ ।।

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथान्यत्र गत्वा तुलसीं ददृशुः तत इयं भगवतोऽतिप्रिया सर्वदा तन्निकटवर्तिनी स्यात्तद्ध्यानवती भगवदीया तथा दयावती वक्ष्यति चेति मत्वा तुलसीसन्निधौ गत्वा तां पृच्छन्ति । हे तुलसी त्वयाऽच्युतो भगवान् कच्चित् दृष्टः यतस्त्वङ्कल्याणी भगवत्प्राप्तिसाधनपुण्यपुञ्जानुष्ठानवती अत एव गोविन्दचरणौ प्रियौ यस्याः सा तच्चरणयोः प्रियेति वा अत एवातिप्रियः अत एवाच्युतस्त्वया कदापि न वियुक्तः अत एव त्वामलिकुलैः भ्रमरसमूहैः सह विक्षेपमप्यगणय्य बिभ्रत् धारयन् यत्तत् यद्यप्यस्माकमप्यतिप्रियस्तथापि नास्माकं तादृशं कल्याणम् येन कामापोधिं विना तच्चरणावेवातिप्रियौ भवेतामतो नास्माकमच्युतः किञ्च पलाय्यास्मत्सकाशाद्गतः सर्वस्यापि कल्याणकरी त्वमिति वा अतो दृष्टश्चेत्तर्हि कथयेति भावः । तस्या अप्राप्तोत्तरा अहो भगवदीयेयं भगवदाज्ञां विना न कथयिष्यतीति मत्वान्यत्र गताः । अनभिज्ञापक्षे हे तुलसि हे कल्याणि ! दर्शनभगवच्चरणार्पणादिना सर्वलोककल्याणप्रदे ! यतः गोविन्दस्य महाविष्णोश्चरणयोरतिप्रिये अत एव नारायणसदृशत्वादस्माकमतिप्रियोऽप्यच्युतः अलिकुलैः सह त्वा बिभ्रत्त्वया दृष्टः कच्चित् त्वत्सुगन्धप्रिया मधुव्रता अपि तेन न निवार्य्यन्ते वयन्तु तादृशसुगन्धरहितत्वात्तेन त्यक्ताः किं कुर्मस्तस्मादस्मज्जीवनाय तं कथयेति भावः अहो विष्णुपूजावर्तिनी जारासक्तमानसा अकल्याणी अस्मान्न ब्रूत इति मत्वान्यत्र गताः मानिनीपक्षे हे तुलसि ! हे कल्याणि ! परमकल्याणवति ! यतो गोविन्दचरणप्रिये चरगेत्यादरव्यञ्जकं गुरुचरणंरुक्तमितिवत् हे गोविन्दस्य प्रिय इत्यर्थः । यतो ऽलिकुलैः सह त्वां ज्ञात्वा बिभ्रन् अहो त्वदीयं भाग्यं यतोऽतिक्रान्ताः प्रिया अस्मादृश्यो येन सः त्वां सर्वदा बिभ्रदास्ते ऽत एव त्वया अच्युतस्तस्माद् दृष्टश्चेदवश्यं कथयेति भावः । अहो इयं ततो लब्धादरा जाता ऽखर्वगर्वा न कथयेदिति मत्वान्यत्र प्रस्थिताः निवृत्तिपक्षे अथ ज्ञानेन्द्रियपञ्चकमध्ये मुख्यत्वाच्चक्षुरिन्द्रियं पृच्छन्ति । हे तुलसि ! तत्स्थानीय चक्षुरिन्द्रिय कल्याणि कल्याणस्य साधनभूते गोविन्दस्यैतद्रूपकसुखभोक्तुश्चरणं तत्तद्विषयं प्रतिविवरणं यैरिन्द्रियैस्तेषु मध्ये प्रिये अलिकुलैस्तत्तद्वृत्तिरूपत्वात्सखिसमुदायैः सह त्वा बिभ्रत् प्रियत्वात्त्वतः वस्तुतः स्वरूपतः कदाचिदपि न प्रच्युतः स ते त्वया दृष्टः कच्चित् ।। ७ ।।

रास-रहस्यम्

र० टी०—हृदयारण्ये स्वान्तःकरणेस्थितां सात्त्विकवृत्तिमुद्दिश्य पृच्छति, हे तुलसि ! तुलसी इति सात्त्विकत्वादुपलक्षणं, कल्याणि कल्याणं श्रेयःप्राप्तिसाधनं त्वमसि इति सम्बोधनम् ! गोविन्दचरणप्रिये गोभिः श्रुतिभिः विन्दते यः चरणं मुमुक्षुः सः गोविन्दचरणः परंपदम्, "सर्वे वेदाः यत्पदमामनन्ति ।" इति श्रुतेः, स एव प्रियो यस्याः गोविन्दचरणप्रियाः, तस्याः सम्बोधनम्, ते तव अच्युतः स्वस्वरूपात् न कदापि च्यवते यः सः, अतिप्रियः प्रियतमः अलिकुलैः सह अलिकुलस्थानीयाभिमानयुक्तारजोवृत्तिभिः सह, त्वां सात्त्विकवृत्तिं, बिभ्रद् धारयन्, गतः गतवान्, कच्चित् दृष्ट इति पूर्ववत् ।। ७ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे तुलसि ! अलिकुलैः भ्रमरयूथैः सह त्वा त्वां बिभ्राणः ते तवातिप्रियोऽतो भवत्या किं दृष्टः ।। ७ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे कल्याणि मङ्गलरूपिणि गोविन्दचरणप्रिये तुलसि । अलिकुलैर्भ्रमरसमूहैः सह त्वा त्वां बिभ्रद्दधानोऽत्यतिक्रान्ताः प्रियाः कान्ता वयं येन प्रिया अस्मानतिक्रान्त इति वा सोऽच्युतस्ते त्वया दृष्टः कच्चित् । एवमन्वये गोविन्दचरणप्रिय इत्यनेनैव परस्परप्रेमलाभादतिप्रिय इति कृतमिति पराकृतम् । सहित्वेति काचित्कोऽपि सुमङ्गलः पाठः । सहेत्यनुक्तावपि वृद्धो यूनेत्यादिवत्तल्लाभसम्भवात् । सहत्वेति पाठे स आलिकुलैः सखीसङ्घैः सहास्मानिति शेषः । हत्वा त्वां बिभ्रद् दृष्टः कच्चिदित्यन्वयः । अतिप्रियः प्राङ्नो यः स इत्यावृत्त्याऽप्यन्वयः । नेह किं वध इति वक्ष्यमाणत्वादिदमेवमनेन हननं भवतीति भावः ।। ७ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

पूर्वोक्तास्त्वपुष्पा एते अफलाः फलपुष्पाभ्यां नानाविधविनियोगसम्भवादज्ञानं मत्वा तुलस्यास्तदुभयं नास्तीति भगवदीयत्वेन प्रसिद्धां पृच्छन्ति । कच्चिदिति । तुलसीति सम्बोधनं सखीमिव मत्वा सा चेत् पूर्वसम्बन्धस्मरणेन भक्तेव भगवन्तं

भजेत् तदा रसो न पुष्ट इति तां भगवत्पत्नीं मन्यमाना आहुः। कल्याणीति एवमपि सति भक्तिप्रधानेत्यस्मदाद्यपेक्षया उत्कृष्टेत्याहुः। गोविन्दचरणप्रिय इति किञ्च तव दर्शने उपायोऽप्यस्ति त्वत्सजातीयस्य तत्र विद्यमानत्वात् सजातीयो हि सजातीयं मार्गस्थं दृष्ट्वा गच्छति तदाहुः। अलिकुलैः सह त्वा त्वां बिभ्रत् दृष्ट इति किञ्च ते भगवानत्यन्तं प्रियः यद्यनेन मार्गेण गतः स्यादवश्यं त्वया दृष्टः स्यात् इति ॥ ७ ॥

श्रीसुबोधिनी-सारः

हे तुलसि हे कल्याणि हे गोविंदचरणप्रिये ते तवातिप्रियोच्युतः श्रीकृष्णः अलिकुलैर्भ्रमरैः सह त्वा त्वां बिभ्रत् धारयन् दृष्टः कच्चित् ॥ ७ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

क्वचित्तुलसीत्यत्र, सा चेत्यादि। पूर्वं हि भक्तात्वेन निष्कामा निरन्तरं चरणारविन्दमेव सेवमाना स्थिता, लक्ष्म्यादीनामप्यत एवैषा पूजासाधनमन्यथा सपत्नीत्वं ज्ञात्वा तथा लक्ष्म्यादयो न कुर्युः। तथा सति नायिकत्वे यो रसः स नानुभूतो भवतीत्यस्मद्रीतिमज्ञात्वा तूष्णीं तिष्ठतेति मत्वा तथाहुरित्यर्थः। अस्मदाद्यपेक्षयेति। अवस्थाविशेषकृतदैन्याविर्भावज्ञापनायैवमुक्तम्, अन्यथा सपत्नीत्वं ज्ञात्वापि नेमां पृच्छेयुरिति भावः ॥ ७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तेभ्योऽप्युत्तरमलब्ध्वा तुलसीं पृच्छन्ति–कच्चिचदिति। उत्तरार्थमादरेण तद्भाग्यमभिनदन्त्यः सम्बोधयन्ति–कल्याणीति। भाग्यातिशये हेतुं सूचयन्त्यः सम्बोधयन्ति—गोविन्दचरणप्रिये इति। हे तुलसि ! अलिकुलैः सह त्वां त्वां बिभ्रत् अच्युतः कृष्णः कच्चित्त्वया दृष्टः ?। 'अवश्यं त्वया दृष्टः स्यात्' इत्याशयेनाह—ते तवातिप्रिय इति ॥ ७ ॥

अन्वितार्थप्रकाशिका

कच्चिदिति ॥ हे कल्याणि ! हे गोविन्दचरणप्रिये ! गुरुचरणा इति वच्चरणशब्द आदराय गोविन्दप्रिये इत्यर्थः। बहुव्रीहिर्वा। हे तुलसि ! अलिकुलैः सह त्वा त्वां बिभ्रत् तेऽतिप्रियः अच्युतः कच्चित्त्वया दृष्टः ॥ ७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अन्यान् पृच्छन्ति कच्चिदिति गोविंदस्य चरणौ प्रियौ यस्याः सा तत्संबुद्धिः अलिकुलैः शिलीमुखवृन्दैः सहत्वा त्वां बिभ्रत् तवातिप्रियोच्युतः अतस्त्वया दृष्टो न वा ॥ ७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कच्चिदिति ॥ हे तुलसि, गोविन्दस्य चरणः प्रियो यस्यास्तत्संबुद्धिः। अत एव हे कल्याणि जगन्मङ्गलकारिणि, अलिकुलैर्भ्रमरवृन्दैः सह, त्वा त्वां, बिभ्रद्बिभ्राणः, ते तव, अतिप्रियः अच्युतः, दृष्टः त्वया विलोकितः कच्चित् ॥ ७ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम

कच्चित्तुलसीति : १०.३०.७.

अतुलशीलगुणां तुलसीमिमां मनुमहे वयमार्जवशेवधिम्।
अपि सपत्नजनानवलोक्य या प्रसभनम्रमुखी खलु विद्यते ॥ १८ ॥

अयि तुलसि धात्रि युवयोरतुलचरित्रो हि हार्दभावोऽस्ति। यत्त्वं पदगैतस्या यत्त्वं छत्रायिता भवसि ॥ १९ ॥

कृष्णप्रिया

हे सखि ! तुलसी तुम तो प्यारे कृष्ण की प्रिया हो पत्नी हो इसलिए कल्याणिनी हो, और श्री गोविन्दजी के चरणकमलों की सेवा में संलग्न हो, अलिवृन्द से समावृत तुलसीजी की मालाजी को धारण करने वाले आपके अत्यंत प्रिय प्यारे श्री अच्युतजी का आपने दर्शन पाया ? ॥ ७ ॥

मालत्यदर्शिः वः कच्चिन्मल्लिके जाति यूथिके। प्रीतिं वो जनयन् यातः करस्पर्शेन माधवः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—हे मालति ! हे मल्लिके ! हे जाति ! हे यूथिके ! करस्पर्शेन, वः, प्रीतिम्, जनयन्, यातः, माधवः, वः, अदर्शि, कच्चित् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गुणातिरेकेऽपि नम्रत्वादिमाः पश्येयुरिति पृच्छन्ति। मालतीति। हे मालति मल्लिके जातियूथिके वो युष्माभिः किमदर्शि दृष्टः। करस्पर्शेन वः प्रीतिं जनयन् किं यात इति। अत्र मालतीजात्योरवान्तरविशेषो द्रष्टव्यः॥ ८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

रूपधनविद्यावत्त्वे ये नम्रास्त एव भगवद्दर्शका नान्ये "जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः। यद्यस्य न भवेत्स्तंभस्तत्रायं मदनुग्रहः॥" इत्युक्तेरास् गुणातिरेकेऽपीति। माया राधाया रतिरस्यामिति मालती। रलयोरैक्यात्। बह्वादित्वान्ङीष्। अनेन तत्प्रियत्वात्तस्यापि प्रियैवेयम्। मल्लः सर्वपुष्पाधिको गंधोऽस्या अस्तीति मल्लिका "मल्लः पात्रे कपाले च मत्स्यभेदे बलीयसि" इति मेदिनी। सर्वोत्कृष्टगंधवतीयमपि तस्य प्रिया। जातिवत्सर्वप्रियत्वादियं जातीत्युच्यते। नायं क्तिन्नंतः किन्तु जातस्य जातमात्रस्येयं प्रिया जाती इदमर्थकाण्णतान्ङीप्, तत्संबुद्धौ। तथा 'जाती फले च मालत्याम्' इति मेदिनी। यूथं पुष्पसमूहरूपं गुच्छमस्या अस्तीति यूथिका शतपत्रिका इति विजयध्वजः। प्रियार्थमस्याः पुष्पगुच्छं ग्रहीतुं प्रवृत्तोऽनयाऽवश्य दृष्ट इति। मा परमरमा तस्या धवः कांतः माधवो वसंत इव प्रकाशकः दासीषु पुष्पिणीषु करस्पर्शेन नखक्षतादिसूचनेन सेर्ष्यं नर्म चेति सूचितम्॥ अहो सौभाग्यगर्वेणोन्मत्तेयमस्मान्न पश्यति, तदेतादृशसौभाग्यरहिता एतत्सपत्नीर्मादृशीरिमाः पृच्छाम इत्यन्यतो गत्वाहुः—मालतीति। युष्मत्पुष्पावचयनार्थं यत्करेण स्पर्शस्तेन। वर्षाशरदतिप्रफुल्लत्वलिंगेन मालतीजात्योरेवाऽवांतरभेदो द्रष्टव्यः॥ ८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथापि तदाद्रियमाणस्वाभिमानादियं खलु न कथयेदिति नम्रीभूय पुष्पार्पणेन नूनं श्रीकृष्णसेविका अपि निरभिमाना एता एव पृच्छन्ति। मालतीति। वैयग्र्येण प्रत्येकं सम्बोधनम्। अतः किमिति तैर्व्याख्यातम्। तत्र किमिति कच्चिदित्यस्यैवानुवर्त्तमानस्यार्थः। दर्शनं तावज्जातमेव तत्र स्पर्शोऽपि किं जात इति विशेषमेव पृच्छाम इति भावः। यद्वा तासां तद्दर्शनं सम्भावयन्ति प्रीतिमिति। करस्पर्शचिह्नदर्शनादिति भावः। तत्र हेतुश्च पुष्पप्रियत्वान्माधवो वसन्त इव माधव इति। करस्पर्शेनेति युष्मत्पुष्पाणामुत्कृष्टानां श्रीहस्तद्वारावचयेनेत्यर्थः। यात इति समानदुःखत्वेनास्मभ्यं तत् कथयितुं योग्यमेव च इति भावः एवं दासीषु पुष्पिणीष्वपि तासु नखक्षतादिसूचनेन सेर्ष्यं नर्म चाभिप्रेतम्॥ ८॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सापत्न्यादियं खलु तं न कथयेदिति श्रीकृष्णसेविकाः पृच्छन्ति मालतीति; सत्पुष्पार्पणेन श्रीकृष्णस्य दासीर्मत्वा स्नेहेन प्रत्येकं सम्बोधनम्। व इति पूर्ववत्, यातः किमिति तैर्व्याख्यातम्। यद्वा, पूर्ववत्तासां तद्दर्शनं सम्भावयन्ति-प्रीतिमिति, यातः सन् करस्पर्शेनेति युष्मत्पुष्पाणामुत्कृष्टानां श्रीहस्तद्वारावचयनेनेत्यर्थः। अतो युष्मत्पार्श्वे तदागमनं सम्भवेदेवेति भावः। श्लेषेण दासीषु तासु नखक्षतिर्नर्मणाभिप्रेता, नखैरेव पुष्पच्छेदनात् पुष्पावचयप्रयोजनं वितर्कयन्ति—माधव इति। मधुना मधुररसेन क्रीडतीति मधुररसक्रीड़ार्थमित्यर्थः; मायाया लक्ष्म्या धव इति लक्ष्म्यर्थमित्यर्थः। इर्ष्योक्तिरियम्। वस्तुतस्तु पूर्ववत् मा श्रीराधैव, तस्या भूषणार्थमेव, तच्च तासां तदनुसन्धानाभावेऽपि दैवगत्या विशुद्धप्रकृत्या वा स्वतः सर्वपरिस्फूर्त्तेः स्वयमेव मुखान्निःसरतीति ज्ञेयम्॥ ८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गुणातिरेकेऽपि नम्रा इति माः पश्येयुरिति पृच्छन्ति। मालतीति हे मालति! हे मल्लिके! हे जाति! हे यूथिके! वो युष्माभिरदर्शि कच्चिद् दृष्टः किं माधवः करस्पर्शेन युष्माकं प्रीतिं जनयन् यातः अत्र मालतीजात्योरवान्तरविशेषो द्रष्टव्यः॥ ८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मालती जातिभेदः वो युष्माभिरदर्शि दृष्टः यूथिका शतपत्रिका॥ ८॥

श्रीमज्जीवगोस्वामिकृतो क्रमसन्दर्भः

पुष्पप्रियत्वात् माधवो वसन्त इत्यभिप्रायः॥ ८॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

हे सख्यः! अनया दृष्टोऽसौ सापत्न्यादेव न कथ्यते। तदेता मालत्यादीः पृच्छाम एतास्वस्माकं सखीप्राया एवेति; तथा पृच्छन्ति—मालतीत्यादि। हे मालति! हे मल्लिके! हे जाति! हे यूथिके! माधवः करस्पर्शेन वः प्रीतिं जनयन् यात इति सिद्धवन्निर्दिष्टेन हेतुनाऽदर्शीति निःसन्देहपरम्, कच्चिदिति सम्बोधनार्थमेव। तेन नो वचनं याथातथ्यमेव कथ्यताम्, केन पथा गतोऽसावितिभावार्थः॥ ८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहो सौभाग्यगर्वेणोन्मत्तेयमस्मान्न पश्यति तदेतादृशसौ भाग्यरहिता एतत्सपत्नीर्मादृशीरिमाः पृच्छाम इत्यन्यतो गत्वा आहुः। मालतीति। युष्मत् पुष्पावचयनार्थं यत् करेण स्पर्शस्तेन वर्षाशरदतिप्रफुल्लत्वलिङ्गे न मालतीजात्योरवान्तरभेदो द्रष्टव्यः।८।

रसिकाह्लादिनी–टीका

तत उत्तरमलब्धा विचारयन्ति इयं सापत्न्यादीर्ष्ययति न कथितवती श्रीकृष्णसमानादतिगर्वितेति मत्वाऽग्रे पुष्पलताः दृष्ट्वा एषु पुष्पाभरणैश्चाभिमानारहिता अतो नूनं कथयिष्यतीति संभाव्यमाहुः मालतीति हे मालति हे मल्लिके हे जाति हे यूथिके वो युष्माभिरदर्शि दृष्टः कश्चित् तर्हि कथ्यतां सवृन्तपुष्पावचयं दृष्ट्वा ईर्ष्याकुलतया पृच्छतिकरस्पर्शेन युष्मत्पुष्पानां श्रीहस्तद्वाराऽवचयनेन वो युष्माकं प्रीतिसुखं जनयन् अनेन मार्गेण यातः। नखैरेव पुष्पच्छेदात् नर्मणा नखक्षतिरेवाभिव्यञ्जिता हेतुनेव पुष्पावचयं सम्भावयन्ति माधव इति लक्ष्मीपतित्वात्। तस्याः चूडाबन्धार्थं पुष्पावचयः, यद्वा मा शोभा सम्पत् तस्याः पतिः, पुष्पमयस्वाङ्ग शोभासम्पादनार्थं पुष्पावचयः, यद्वा माधवो मूर्त्तो वसंत इवात एव पुष्पावचय इति, यथास्मान् करस्पर्शालिङ्गनादिना सुखयित्वा वृजिनोऽर्णवे निक्षिप्य कुत्रापि गतस्तथा युष्मानपि करस्पर्शेन नखक्षतादिना प्रीतिं दत्वा कुत्रोऽपि गतः। यतोऽयं न दृश्यते, भवतीभिरपि विरहदुःखमनुभूयतेऽत एव दुःखभराक्रान्तत्वान्नोत्तरदाने सामर्थ्यमस्तीतिभावः। एताः स्त्रीजातयोऽपि प्रीतिनिभृतमनसः स्वपराः किमिति कथयिष्यन्ति अफलत्वात् इति विचार्य एते चूतादयः फलैः परोपकारिणः प्राप्ताश्च मुनय इव ध्यानपरा अत एतान् पृच्छामेति अग्रे गत्वा चूतादीन् पृच्छन्ति॥ ८॥

विशुद्धरसदीपिका

अथ काश्चिल्लताजातिषु तयोर्दासीत्वमारोपयन्त्यो निजसजातीयत्वमाविष्कुर्वन्ति। मालतीति। एतानि प्रायो दासिकानामेव नामानीति वक्त्रीणामपि तथात्व सुव्यक्तं श्रीकृष्णयामले "गोपयन्ति यतो देवि! श्रीकृष्णं विश्वनायकम्। अतस्ता गोप्य उच्यन्ते स्थानस्था व्रजनाथयोः। गोप्यः पञ्चविधाः साध्वि! स्थायिगोप्य इमाः स्मृताः! तासां मध्ये प्रधाना यास्तासां नामानि मे शृणु। माधवी मालती जाती लवङ्गा मल्लिकाह्वया। अशोकलतिकाकुन्दी शेवनी शतपर्विका। यूथिकारङ्गमल्ली च रङ्गिणी चापराजिता। स्वर्णाख्या मृदुला वृन्दा चन्द्रविम्वा मधुश्रिया। कुटिला पाटला कुब्जा केतकी कामदायिनी। बहुला झिल्लिका तारा वाणी ब्राह्मी विषघ्निका। मल्लिका सिंहिका कृष्णा वासन्ती नवमालिका। इत्येताः कथिताः स्थायिप्रधानाः सर्वकामदाः। याः कृष्णमङ्कमारोप्य रमयन्ति व्रजाङ्गनाः। समस्तवैभवैर्युक्ता रहस्या रासमण्डले। क्रीडाकुञ्जानि भूत्वा ताः सुपुष्पफलवैभवैः तर्पयन्त्यो वसन्त्यत्र वृन्दासख्यो लताह्वया" इति। ध्यानशतकेषु तासा स्वरूपं यथा "लोलद्वेण्यः पृथुभुजघनाः क्षाममध्याः किशोरीः सम्वीतश्रीस्तनमुकुलयोरुल्लसद्धारयष्टीः। नानादिव्याभरणवसनाः स्निग्धकाश्मीरगौरीवृंन्दाटव्यां स्मररसमयी राधिका किङ्करीस्ताः" इति। ततश्चापह्नवायार्थान्तरसमाच्छन्नप्रश्नव्याजेन हृदयज्ञतामावेदयन्ति। हे मालतीत्यादि। प्रत्यकं सम्बोधनमादरेण वः युष्माभिः अर्दार्शि दृष्टः क इत्यपेक्षायां माधवः वसन्त इत्यर्थः। वस्तुतस्तु मायाः श्रीराधाया धवः श्रीराधावल्लभ इत्यर्थः युष्माकमस्माकं च परमसेव्य इति भावः। किङ्कुर्वन् करस्पर्शेन प्रीतिं जनयन् प्रयोगविषया रतिः प्रीतिर्निगद्यते सा च मैत्रीस्पर्शादिकोचितेत्यादिना अलङ्कारकौस्तुभे लक्षिता तत एव करस्पर्शनेत्युक्तम् एवञ्च स्पष्टीकृतं दासीत्वम् आसां क्रियाशतकेषु "काश्चिच्चन्दनघर्षणाः सुघुसृणं काश्चित्स्रजो गुम्फतीः काश्चित्केलिनिकुञ्जमण्डनपराः काश्चिद्वहन्तीर्जलम् काश्चिद्दिव्यदुकूलकुञ्चनपराः संगृह्णतीः काञ्चनालङ्कारं नवमन्त्रपानविधिषु व्यग्राश्चिरङ्काश्चन। ताम्बूलोत्तमवीटिकादिकरणे काश्चिन्निविष्टा नवं काश्चिन्नर्तनगीतवाद्यसुकलासामग्र्यसम्पादकाः। स्नानाभ्यङ्गविधौ च काश्चन रताः सम्वीजनाद्यैः सदा काश्चित्सन्निधिसेवनातिमुदिताः काश्चित्समस्तेक्षिकाः। काश्चित्स्वप्रिययुग्मचेष्टितदृशः स्तब्धाः स्वकृत्ये स्थिताः क्षिप्त्वान्यालिषु वर्त्तितादपि तयोः काश्चित् सुखेलापराः इत्थं विह्वलविह्वलाः प्रणतयः श्रीराधिकाकृष्णयोर्दासीरद्भुतरूपकान्तिवयसो वृन्दावनेऽन्वीयतामिति" तत्रैताः स्तब्धेन लताप्राया इति सम्भाव्य प्रश्नोऽयम्॥ ८॥

श्रीरामनारायणकृता भावभावविभाविका

तत्रैवाग्रे मालतीमल्लिकाजातियूथिका दृष्ट्वा तासां मुकुलवालैः कृष्णदर्शनाह्लादजरोमहर्षं सितपुष्पैः तदीयसुमनोविकासपूर्वकस्मितं सुमन आमोदेन सुमन आमोद पुष्पमधुविन्दुभिरानन्दाश्रुकणांश्च सम्भाव्य पुष्पसमर्पकत्वेन तत्तन्नामभिश्च तत्किङ्करीत्वमवधार्य तत्र मा लक्ष्मीर्नित्यवक्षोऽधिवासिनी तत्प्रिया तस्या लतिकात्वेन मालत्या माधवप्रियात्वं मल्लिकाया रतिगणमल्लाः सर्वावयवाः सन्त्यस्येति मल्ली हरिस्तस्य कं सुखं यस्याः तस्माद्वा सुखं यस्याः इति व्युत्पत्त्या तत्सुखकारित्वं तल्लब्धसुखत्वं वा जात्यास्तु जनि प्रादुर्भावे इत्यस्माज्जनयति अर्थात्प्रियं कृष्णमिति जातिरिति तद्व्युत्पत्त्या तत्प्रापकत्वं यूथिकायास्तु सखीनां यूथोऽस्यास्तीति यूथी कृष्णस्तस्य यूथिनः तस्माद्वा कं सुखं यस्या इति व्युत्पत्त्या सखीयूथतत्प्रियमेळनेन सयूथस्य तस्य सुखप्रदत्वं तल्लब्धसुखत्वं च तथा सर्वासां सुमनोनम्रशिरस्त्वेनामोददातृत्वेऽपि निरभिमानित्वञ्चालक्ष्य पप्रच्छुः। माळत्यदर्शीति कच्चिदिति

सम्भावनासम्भावनयोः सर्वत्र पूर्ववत् बहूनां युगपत्सम्बोधनन्तु विरहकातर्येण कापि वैकल्यदर्शनेन करुणया प्रियं दर्शयेच्चेत् जीवितं स्यादित्यभिप्रायेण जातियूथिके इत्येकं पदं द्वयोः सम्बोधनं माधवो वो युष्माभिरदर्शि तथा च नो ब्रूत नो दृष्टमिति ब्रूयुश्चेत्तत्राहुः। प्रीतिमिति। यतः सोऽपि माधवः मा लक्ष्मीः तस्या धवत्वात्तल्लतिकादिप्रीतिमान् तथा मा श्रीस्तस्या धवत्वात्सर्वश्रीप्रदः तथा मा यथार्थमतिस्तस्या धवत्वाद्युष्माकं तस्मिन् या यथार्थमतिः सत्या प्रीतिस्तन्नियन्तृत्वेन तद्दाता तदभिज्ञस्तत्फलप्रदश्च तथा माधवस्य वसन्तस्य सुमनः प्रसादकत्ववत्सोऽपि माधवत्वात्सुमनःप्रीतिमांस्तत्प्रसादकश्चातो यथा चन्द्रः स्वकरस्पर्शेनाह्लादयति तथा पुष्पावचयमिषतया करस्पर्शेन वः प्रीतिं जनयद् यातोऽन्यथा तत्करस्पर्शं विना सुमनोविकासामोदयोरनुपपत्तेरस्माभिस्तत्करस्पर्शसुमनोविकासादिहेतुहेतुमद्भावस्य स्वस्मिन्ननुभूतत्वाद् एवंप्रश्नेऽप्युत्तरमलब्ध्वा माळत्या नित्यवक्षोऽधिरूढसपत्नीपक्षपातित्वं मल्लिकायूथिकयोस्तत्सुखप्रदत्वेन तदभिप्रेताचरणपरत्वं जात्यास्तु निपातेन जि अभिभवे इत्यस्मात्सज्जनाभिभवकारित्वं सुमनोविकासादिना खळानामिव स्वसुखपरदुःखदर्शने प्रहासकारित्वं चालक्ष्य निराशाः सत्योऽन्यत्र गताः तदुक्तमभियुक्तेन—

नृत्यन्ति भोजने विप्रा मयूरा घनगर्ज्जने। साधवः परकार्येषु खलाः परविपत्तिषु॥ ८॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

इति तुलसीमुक्त्वा अहो एताः तद्धारिण्यः स्त्रिय एवास्माकमुपकारं करिष्यन्तीति मत्वा मालत्यादिकाः पृच्छन्ति। मालनीति। हे मालति हे मल्लिके हे यूथिके मां लक्ष्मीं लतति वेष्टयतीति मालती मल्लते सुगन्धादिकं धारयतीति मल्लिका जायत इति जाती सुखजनकत्वात्सफलजन्मवती यूथमस्त्यस्या असौ यूथिका एवम्भूता अन्वर्थसंज्ञा यूयं चतस्रो लता अतिसुगन्धपुष्पाः भगवत्प्रिया अतो भवतीर्वयं पृच्छामः वो युष्माभिः कच्चिद् दृष्टः न दृष्ट इति न वक्तव्यं यतो वो युष्माकं हस्तकमलस्पर्शेन प्रीतिमुत्पादयन् यातः करस्पर्शजन्यस्यात्यन्तविकाशस्य दर्शनात् ननु तस्यास्मत्स्पर्शने किं प्रयोजनमिति चेत्तत्राहुः। माधवः लक्ष्मीपतिः सर्वदा तत्सहितस्य तदलङ्कारार्थं पुष्पावचय आवश्यक इति भावः। अहो एता अल्पाः फलरहिताः लक्ष्मीपक्ष्यपातिन्यो न कथयिष्यन्तीति मत्वान्यत्र गताः अनभिज्ञापक्षे मालतीजात्योरवान्तरभेदः यूथिका जूहीतिख्याता अतोऽहो सौभाग्यातिरेकवत्यो नम्रस्वभावाः सर्वसुखकरा विकसितवदनाः परोपकारिण्यो भविष्यन्तीति मत्वा मालत्यादिकाः पृच्छन्ति। मालतीति। हे मालत्यादयः कच्चिद्वोऽदर्शि भवतीनां न केवलं दर्शनमात्रमपितु स्पर्शोऽपि जात इत्यनुभीयते इत्याहुः। प्रीतिमिति। यतो माधवः परमशोभाधीशत्वात्स्पर्शेनापि शोभाजनकः स्पर्शश्च पुष्पप्रियत्वात्तस्यावश्यमेव जातः स्यात् माधवो वसन्त इवेतिश्लेषेण तद्वियोगो न भवतीनामप्यसह्योऽतस्तुल्यदुःखत्वादवश्यं वदतेति भावः। अहो एताः करस्पर्शेन निवारणं कृत्वा गतः स्यादतस्तद्भयान्न कथयन्तीति मत्वान्यत्र याताः मानिनीपक्षे अहो इमा मालत्यादयः सौभाग्यादिगुणैरस्मत्समाना अत एताः प्रष्टव्या इत्याशयेन पृच्छन्ति। मालतीति। यतो भवत्यः पुष्पिण्योऽतः करस्तर्शेन वः प्रीतिं जनयन् यात इति सनर्म्मोक्त्या व्यञ्जयन्ति परंत्वेतावता भवतीभिर्गर्वो न विधेयो यतः स न कस्यापि पतिः किन्तु मायाः शोभामात्रस्य धवः स्वामी तस्मादस्मत्पक्षपातिन्यो यूयमवश्यं कथयतेति भावः। अहो सद्यः स्पर्शोत्थाखर्वगर्ववत्य एता न ब्रुवत इति मत्वान्यत्र प्रस्थिताः निवृत्तिपक्षे मालत्यादिस्थानीयानि श्रोत्रत्वक्रसनाघ्राणाख्यानीन्द्रियाणि पृच्छन्ति। मालतीति। वः प्रीतिं विषयोपलब्धिसुखं तत्प्रकाशेन जनयन् यातोत्याविषयं व्याप्य स्थितः। ननु व्यापकस्य तस्य कथं गमनामिति चेत्तत्राहुः। माधवः मायायाः प्रेमवृत्तेः धवः स्वामी तथा च प्रमाणचैतन्यस्य गमनादिकमिति भावः॥ ८॥

रास–रहस्यम्

र० टी०—प्रथमार्धेन चक्षुरिन्द्रियजन्यदर्शनवृत्तिमुद्दिश्य मालत्यादिभिः रूपोपलक्षितान् सर्वान् रूपवान् पादार्थान् पृच्छति—अदर्शि वः इति पूर्ववत्।

उत्तरार्धेन पुनः स्पार्शनेन्द्रियवृत्तिमुद्दिश्य पृच्छति—मा माया तस्याः धवः स्वामी माधवः परमात्मा इत्यर्थः करस्पर्शेन करः किरणं तस्य स्पर्शेन स्पार्शनप्रत्यक्षेण वो युस्माकं प्रीतिं आनन्दं जनयन् उत्पादयन् यातः गतवान् किम्? दार्शनस्पार्शनप्रत्यक्षावसरसमये ब्रह्मानुभवः तिरोहितः किमिति प्रश्नार्थः॥ ८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे मालति! हे मल्लिके! हे यूथिके! करस्पर्शेन वो युष्माकं प्रीतिं जनयन् यातः माधवः वो युष्माभिः किमदर्शि दृष्टः मालतीजात्योरवान्तरजातिभेदो ज्ञेयः॥ ८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे मालति जातिविशेषः। मालती जातिभेदे स्यादिति विश्वः। मल्लिके हे जातियूथिके। आम्रातक। यूथिकाम्रातके पुष्पविशेऽपि च यूथिकेति विश्वः। माधवः करस्पर्शेन वः प्रीतिं जनयन्वातः। वो युष्माभिर्दृष्टः कच्चित्। पुष्पाणि युष्माकमस्माभिरतोतजातौ तच्चरणसंसर्गोऽदायाति स लब्धः पुनरपि तद्योधन एधनं तदर्पणेन भवितेत्यवितारं शंसेति तद्याच्ञेति तात्पर्यम्॥ ८॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्राप्यरुचिं मत्वा इयं सपत्नीवत् स्वोत्कर्षं ख्यापयन्ती कथमन्याभ्यो वक्ष्यतीति साधारण्यः स्त्रिय एवास्माकमुपकारिण्य इति ताः पृच्छन्ति। मालतीति। हे मालति वः युष्याभिः प्रत्येकं नानारूपाभिर्दृष्टः कच्चित्तथैव मल्लिके हे जाति हे यूथिके एताश्चतस्रो लता अतिसुगन्धपुष्पाः भगवत्प्रियाः अतो वः युष्माकं करस्पर्शेन प्रीतिं जनयन् पुष्पावचयं कुर्वन् माधवो लक्ष्मीसहितः लक्ष्म्या सह तिष्ठति अतस्तस्याः चूडाः बन्धनाद्यर्थं पुष्पावचय आवश्यक इति ॥ ८ ॥

श्रीसुबोधिनी-सारः

हे मालति हे मल्लिके हे जातियूथिके करयोः स्पर्शेन वो युष्माकं प्रीतिं जनयन् माधवः कृष्णो यातो गतः वो युष्माभिरदर्शि कच्चित् ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततोऽप्युत्तरमसम्प्राप्य 'इयं सौभाग्येन गर्विता सपत्नी कथं वदेत्? इमाः साधारण्यो वक्ष्यन्ति' इत्याशयेन पृच्छन्ति–मालतीति। हे मालत्यादयः! वो युष्माभिः कच्चित् माधवः कृष्णः अदर्शि दृष्टः? पुष्पग्रहणार्थं कराभ्यां स्पर्शेन वो युष्माकं प्रीतिं जनयन् कच्चित् यातः गतः?। माधवपदोपादानेन लक्ष्मीपतित्वात् सौन्दर्यातिशयं सूचयन्त्यस्तत्प्रश्ने हेतुरपि सूचितः ॥ ८ ॥

अन्वितार्थप्रकाशिका

मालतीति ॥ हे मालत्यादयः! वो युष्माभिः कच्चित् माधवः कृष्णः अदर्शि दृष्टः। पुष्पग्रहणार्थं कराभ्यां स्पर्शेन वो युष्माकं प्रीतिं जनयन् कच्चित् यातः गतः। मालतीजात्योरवान्तरभेदो ज्ञेयः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे मल्लिकादयः वो युस्माभिः माधवः कच्चिदर्शिदृष्टोनवास कथं भूतः पुष्पाद्यवचयार्थे करस्यार्शेन वो युष्माकं प्रीतिंजनयन्नुत्पादयन् सन् गतः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गुणातिरेके सत्यपीमा नम्रा इतीमाः पश्येयुरिति पृच्छन्ति ॥ मालतीति ॥ हे मालति, हे मल्लिके, हे जाति, हे यूथिके, करस्पर्शेन, वो युष्माकं, प्रीतिं जनयन्, यातः माधवः, वो युष्माभिः, अदर्शि कच्चित् पृष्टः किमित्यर्थः। मालतीजात्योरत्रावान्तरविशेषो द्रष्टव्यः। मल्लिकायूथिके कुन्दावान्तरविशेषौ ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मालतीति : १०.३०.८

मल्लीलायां विहरसि जानास्यखिलान्ततश्च मल्लीलाम्। तद्वद कुत्र सखा मम ममतापात्रं यतस्त्वमसि ॥ २० ॥
परपुंमनसो वशीकृतिं तां कथयास्मान् वनयूथिके यतस्त्वम्। गणिकासि तवैष मुख्यधर्मो वयमप्यत्र तवोपदेशभाजः ॥ २१ ॥
अपि पलाशशतं सुमनःशतं युगपदेव चकास्ति विमत्सरम्।
तदिह चित्रकरो गणिकालताऽतिशयवृद्धिवशीकरणक्रमः ॥ २२ ॥
हे मल्लि त्वमनन्तरागिणि मनोजाताय सच्छत्रवे कृत्वा बाणसमर्पणं प्रतिपलं दीनाः प्रियप्रोज्झिताः।
अस्मान् हंसि कुतोऽपराधरहितांस्तत्सर्वथा नोचितं सूनोल्लासिनि वा तव क्षममिदं त्वद्धर्म एवेदृशः ॥ २३ ॥

कृष्णप्रिया

हे मालति! हे मोगरि-मल्लिके? हे जाति-जाई! हे यूथिके-जुई? कोमल कर सरोज के स्पर्श से प्रीति को प्रकट करते हुए माधव को इस पथ से पसरते हुए आपने देखा? ॥ ८ ॥

चूतप्रियालपनसासनकोविदार जम्ब्वर्कबिल्वबकुलाम्रकदम्बनीपाः ।
येऽन्ये परार्थभवका यमुनोपकूलाः शंसन्तु कृष्णपदवीं रहितात्मनां नः ॥ ९ ॥

---

१. जम्बक्ष-विज.; जम्बीर-इति कस्यचित्; २. म्रकपारिजाताः-वीर. । ३. भविनो-विज ।

कर्दमक्षमा

अन्वयः—हे चूत ? प्रियालपनसअशन, कोविदार ? जम्बुअर्क, विल्वबकुलआमुकदम्बनीपाः ? परार्थभवकाः, ये, **अन्ये,** यमुनोपकूलाः (ते तरवः) रहितात्मनाम् , नः, कृष्णपदपीम् , शंसन्तु ॥ ९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

फलादिभिः सर्वप्राणिनां संतर्पका एते पश्येयुरिति पृच्छन्ति। चूतेति। चूताम्रयोरवांतरजातिभेदः कदंबनीपयोश्च। हे चूतादयः येऽन्ये च परार्थभवकाः परार्थमेव भवो जन्म येषां ते। यमुनोपकूलास्तस्याः कूलसमीपे वर्तमानाः। तीर्थवासिन इत्यर्थः। ते भवन्तो रहितात्मनां शून्यचेतसां नः कृष्णपदवीं कृष्णस्य मार्गं शंसन्तु कथयन्तु ॥ ९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

चूताम्रयोरम्लमधुरगुणभेदादवान्तरजातिः, अम्लाम्रजातिर्मधुराम्रजातिश्च। नीपोऽल्पपुष्पः, कदम्बो बहुपुष्पश्चेति। प्रियालो राजादनः। पनसः कंटकिफलः। असनः पीतसारः। कोविदारः काञ्चनारकः। जंबूः कृष्णफला स्निग्धपत्रा। अर्कः प्रसिद्धः, बिल्वोपि। बकुलो 'मौलसरी' इति प्रसिद्धः। इत्यर्थ इति—तीर्थसेवारूपतपोबलेन परतापनिवारणसमर्था इति भावः। रहितो विरहेण हत आत्मा ज्ञानं येषां गोपीजनानां तेषाम् , रहित आत्मा कृष्णो येषां श्रीकृष्णत्यक्तानामिति वाऽर्थः। एषूत्तमपुष्पफलरहितोप्यर्कः शिवप्रियत्वादुक्तः। यद्वा—श्रीवृंदावनीयत्वेन त्वमेव कथयसि चेत्तर्हि त्वामेव सर्वोपरितनत्वेन स्थापयाम इति। चूताम्रनीपकदंबानां पुनरुक्तिस्तु चेतोऽनवस्थानाद्वा बोध्या ॥ अहो एताः स्वसपत्न्यास्तुलस्यास्तस्मात्कृष्णाच्च भीत्या जानत्योपि न ब्रवते, तदलमेताभिः परतंत्राभिरित्यन्यतो गत्वा—सत्यमिमे एव यमुनातीर्थवर्तिनो निस्पन्दत्वेनैवानुमीयम।नविष्णुस्मरणवन्तो भवंत्यतो न मृषा वदिष्यन्तीति विश्वस्याहुः—**चूतेति।** चूताम्रयोर्लतावृक्षजातित्वेन भेदः। नीपो धूलिकदम्बो बृहत्पुष्पः। कदबः क्षुद्रपुष्पोऽतिसुगंधः। प्रियालः शालभेदः। असनः पीतशालः। कोविदारः काञ्चनारभेदः। अर्को निकृष्टोपि गोपीश्वरप्रियत्वात् तदा समीपे सदा वर्तमानः। अन्ये नारिकेलगुवाकादयः। ते भवन्तः आत्मशून्यानां नः कृष्णमार्गं कथयन्तु। ननु कस्मै प्रयोजनाय कथयामस्तत्राहुः—परार्थमेव भविकमभ्युदयो येषां ते। यमुना उपकूले येषां ते इति गड्वादिः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीकृष्णदास्य एताः शङ्कया तं वत न कथयेयुरिति मुनिप्रायत्वेनाप्तानन्यान् पृच्छन्ति। चूतेति। चूतो लताजातिः। आम्रो वृक्षजातिः। पूर्वत्रैव नत्वाम्रे कविभिर्लतात्वं प्रयुज्यते मध्यदेशादौ लताकाराश्च ते दृश्यन्ते इति नीपश्च नीपो भूलिकदम्बे स्यादिति विश्वप्रकाशात् परागप्रधानो महापुष्पोऽसौ ज्ञेयः प्रियाळः तस्यैव बीजं चारुवीजतया ख्यातं भुज्यते पनसः कण्टकिफलः असनः पीतसालः कोविदारो युगपत्रकः कोयिलाव इति विन्ध्यादौ प्रसिद्धः काञ्चनारतुल्यः काञ्चनारभेदोऽयम् अर्कोऽतिनिकृष्टोऽपि पृष्ट इति तासामुत् कण्ठातिशयः स्पष्टीकृतः। ननु युष्मान् प्रति तत् कथनेन किमस्मत् प्रयोजनं तत्राहुः। परेति। अत्र श्रीस्वामिपादमते भवका इति इकाररहितः पाठः भवो जन्मेति व्याख्यानात्। बहुव्रीहौ कः इकारयुक्तपाठस्तु सर्वत्र दृश्यते ततश्च भविकं मङ्गलम् अभ्युदय इत्यर्थः तस्याप्यर्थः स एव। तथापि यमनोपकूला इति तीर्थवासित्वेन सत्यवादित्वात् कृपालुत्वाच्च सत्यमेव शंसनीयं नतु वञ्चनीयमिति भावः। उपसमीपे कूलं येषां ते उपकूळाः यमुनाय उपकूळा यमुनोपकूला इति तु विग्रहः। ननु स्वयमेव युष्माभिरन्विष्य गृह्यतामित्याशङ्क्य निजार्त्तिज्ञापनेन कृपां जनयन्त्य सकातर्यमाहुः। रहितात्मनां विरह-हत-ज्ञानानामित्यर्थः। अतो मृतप्रायाः स्वयमन्वेष्टुं न शक्तुम इति भावः। पूर्वं सर्वेषु प्रायो दर्शनं पृष्टमेषु तु पूर्वपूर्वेषु प्रत्युत्तरालाभेन चातुर्यान्निश्चित्यैव केवळं तद्वर्त्मोद्देशप्रार्थनम् ॥ ९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीकृष्णस्य लक्ष्म्या वा दास्य एताः शंकया तं वत न कथयेयुरित्यन्यानाप्तान् पृच्छन्ति—चुतेति। चुताम्रयो रसभेदेन कदम्बनीपयोश्च वर्णादिभेदेन भेदः। प्रियालः सालभेदः, असनः पीतसालः, उत्तमपुष्पफलरहितोऽप्यर्कः श्रीशिवप्रियपुष्पत्वादत्रोक्तः। अन्ये पीलुकरीर–मधुक–नागरंग–नारिकेल–पूग–ताल कदलीलवली–वदरीप्रभृतयः। ननु युष्मान् प्रति तत्कथनेन किमस्मत्प्रयोजनम् ? तत्राहुः—परेति। अत्र श्रीस्वामिपादमते 'भवका' इतीकाररहितः पाठः भवो जन्मेति व्याख्यानात् , बहुव्रीहौ कः, इकारयुक्तपाठस्तु सर्व्वत्र दृश्यते। ततश्च भविकं मंगलमभ्युदय इत्यर्थः। तथाप्यर्थः स एव, तत्रापि यमुनोपकूला इति परदुःखासहिष्णुता सूचिता। तत्रापि श्रीसूर्य्यनन्दिन्यास्तस्या भ्रातुः श्रीयमस्य पापलोकदण्डाधिकारतः परदुःखासहिष्णुतयाबतीर्णायाः संगेन तादृशत्वात् तदाख्यायिका पद्मपुराणे श्रीयमुनामाहात्म्ये प्रसिद्धैव। यद्वा, तीर्थवासित्वेन सत्यमेव शंसनीयम् , न तु वञ्चनीयमिति भावः। ननु स्वयमेव युष्माभिरन्वष्य गृह्यतामित्याशंक्य निजार्त्ति–ज्ञापनेन कृपां जनयन्त्यः सकातर्य्यमाहुः—

रहितात्मनां विरह–हतज्ञानानामित्यर्थः, यद्वा, आत्माप्रियः श्रीकृष्णस्तत्त्यक्तानामित्यर्थः, अतो मृतप्रायाः स्वयमन्वेष्टुं न शक्नुम इति भावः। पूर्व्वं सर्व्वेषु प्रायो दर्शनं दृष्टम्, एषु च गुणविशेषेण तद्दर्शनस्य निश्चयसम्भावनया केवलं तद्वर्त्मोपदेश–प्रार्थनमिति ॥ ९ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

परार्थसम्भवाः परोपकारार्थमुत्पन्ना रहितात्मनां शून्यमनसाम् ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

फलादिभिः सर्वप्राणासन्तर्पका इमे पश्येयुरिति पृच्छन्ति चूतेति। चूताम्रयोः कदम्बनीपयोश्चावान्तरभेदः द्रष्टव्यः हे चूतादयः भवन्तः ये चान्ये परार्थमेव भविकं जन्म येषां ते यमुनाकूलसमीपे वर्त्तमानास्तीर्थवासिन इत्यर्थः। रहितात्मना शून्यचेतसामस्माकं कृष्णपदवीं शंसन्तु कथयन्तु ॥ ९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रियालो राजादनः देवदारुर्वा कोविदारः काञ्चनारकः असनः पीतसारकः अर्क्षं शुकनासं परार्थभविनः लोकोपकारार्थमुत्पन्नाः यमुनाकूलसमीपे जाताः राहत आत्मा स्वामी कृष्णो यासां तास्तथा तासाम् ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

चूतो लताजातिः। आम्रो वृक्षजातिः। पूर्वत्रैव लतात्वं प्रयुज्यते इति। नीप इति नीपो धूलिकदम्बे स्यादिति विश्वप्रकाशात्। महापुष्पोऽसौ ज्ञेयः। अर्कोऽतिनिकृष्टोऽपि पृष्ट इति तासाम् उत्कण्ठतिशयः स्पष्टीकृत इति ॥ ९–१० ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

हे सख्यः! तेनैवामू निषिद्धाः, यतो न कथयन्ति। तत् किमासामुपरोधकरणेन? अमी तावद्यमुनातीरवासित्वेन तीर्थवासी, तथा परोपकारित्वेन च सत्यवचस एव तरवः तदेतान् पृच्छाम इति पुनरन्यान् पृच्छन्ति—चूतेत्यादि। कदम्बनीपयोरवान्तरभेदात् पृथङ्निर्देशः। येऽन्येऽगृहीतनाम्नः प्रति तेषामभिमान निरासाय यमुनोपकूला इति तीर्थवासित्वम्, परार्थभवकाः परार्थकुशलाः इत्यवश्यमेवैभिर्वक्तव्यम्। ननु वयं मौनिन इत्याशङ्क्याहुः—कृष्णपदवीमिति। वाक्प्रयोगं बिनापि पल्लवादि—व्यापारेणापि पदन्याः कथनसम्भवात्। तस्मात् पदवीं पन्थानमेव तस्य कथयत न तु तम्! रहितात्मत्वेन निजदैन्य प्रकटनम् ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहो एताः स्वसपत्न्यास्तुलस्यास्तस्मात् कृष्णाच्च भीत्य जानन्त्योऽपि न ब्रुवते तदलमेताभिः परतन्त्राभिरित्यन्यतो गत्वा सत्यमिमे एव यमुनातीर्थवर्त्तिनो निस्पन्दत्वेनैवानुमीयमानविष्णुस्मरणवन्तो भवन्त्यतो न मृषा वदिष्यन्तीति विश्वस्याहुः। चूतेति। चूताम्रयोर्लतावृक्षजातित्वेन भेदः। नीपो धूलिकदम्वो बृहत्पुष्पः। कदम्वः क्षुद्रपुष्पीऽतिसुगन्धः। प्रियालः शालभेदः असनः पीतशालः कोविदार काञ्चनारभेदः अर्को निकृष्टोऽपि गोपीश्वरप्रियत्वात् तत्समीपे सदा वर्त्तमानः। अन्ये नारिकेलगुवाकादयः ते भवन्तः आत्मशून्यानां नः कृष्णमार्गं कथयत ननु कस्मै प्रयोजनाय कथयामस्तत्राहुः। परार्थमेव भविकमभ्युदयो येषां ते। यमुना उपकूले येषां ते इति गङ्वादिः ॥ ९ ॥

रसिकाह्लादिनी–टीका

चूतेति—चूताम्रयोः रसभेदेन भेदः, कदम्बनीपयोः वर्णभेदेन भेदः, "नीपो धूलि–कदम्बे स्यादिति"–विश्वः। परागप्रधानो महापुष्पो नीपः कदम्बस्तुल्यप्रमाणपुष्प इति। प्रियालश्चारुबीजतयाख्यातः पनसः कटंकीफलः असनः पीतशालाख्यः "कोविदारश्चमरिक" इत्यमरः। बृहत्पत्रं काञ्चनार इति ख्यातः जबादयः प्रसिद्धा एव मधूकनारिकेल–करीरपूगतालतमालप्रभृतयः ते सर्वे नोऽस्माकं कृष्णपदवी शंसन्तु। ननु कृष्णसूचने को वास्माकं लाभो भविष्यतीति चेत्तत्राहुः परार्थभवका परार्थं परोपकारार्थमेव भवो जन्म येषां ते, भाविका इति पाठे परार्थमेव भाविकं मङ्गलं प्रसस्तावरणमिति यावत् एषां ते "नित्यं प्रशस्ताचरणमप्रशत्तस्य वर्जनम्। एनद्धि मङ्गलं प्रोक्तं स्वयमेव स्वयं भवेत्"। पुनरपि कथनार्थं तेषां प्रशंसाय यमुनोपकूलाः यमुना भक्तिरूपा इव तस्याः जलेन सिक्ताः, अतो भक्ता एव श्रीकृष्णदर्शनार्थं यमुनाकूलवासिनः कृपालवश्चातः कथयन्तु। ननु स्वयमेव किमिति न मृग्यते किं प्रश्नेनेति चेत्तत्राहुः रहितात्मनां शून्यचित्तानां किन्दिर्शाकानां स्वयमेवान्वेष्टुमशक्तानामित्यर्थः। यद्वा रहितो विरहित आत्मा श्रीकृष्णो यासु तासां कृष्णेन त्यक्तानां दीनानां नः कृष्णपदवीं कृष्णप्राप्त्युपायं शंसन्तु। यथा भवद्भिः श्रीकृष्णः प्राप्तस्तमेवोपाय कथयन्त्विति भावः ॥ ९ ॥

विशुद्धरसदीपिका

अथ माधवपदश्रवणेनोद्बुद्धिविहारदर्शनसंस्कारास्तदेकहाराः प्राणसहचर्य्यः प्रख्यातप्रभावान् श्रीराधाकृष्णयोरसंकुचितलीलावलोकाय स्वीकृतवहिजडीमावानुभयोर्भावानुकूलस्वभावान् महानुभावानिव यमुनोपकूलांस्तरून् पृच्छन्ति। चूतेति। चूतो लताजातिः आम्रो वृक्षजातिरितिभेदः परागप्रधानो महापुष्पो नीपः स्तोकफलः कदम्ब इति च प्रियालश्चारुवीजवृक्षः पनसः कण्टकिफलः असनो बिजयसारः कोविदारः काञ्चनारः जम्बूः प्रसिद्धः अर्कोऽपि निकृष्टस्याप्यस्य प्रच्छोत्कण्ठातिशयेन यद्वा सूर्यनामभ्रमात् एवं विल्वस्यापि विल्वे शाण्डिल्यशैलूषाविति कोशादृषेर्नामान्तरभ्रमेणेति एवञ्च श्लिष्टपदयोरुपादानेन देवत्वमृषित्वं च सूचितं वकुलो ऽशोकः येऽन्ये इति तत्र तरूणां बाहुल्यं सूचितं परार्थभवकाः परोपकारैकफलः भवः प्रादुर्भावो येषान्ते इति प्रोत्साहनं भविका इति पाठे परायै परदेवतायै इति परार्थं चतुर्थी तदर्थार्थेति समासः राधिका परदेवतेति गौतमीयाद्राधिका अर्थः सुखमेव भविकं मङ्गलं येषां यद्वा पराभ्यामिति परार्थः सत्यम्परमितिश्रीप्रथमात् परः स्यात्पुरुषोत्तम इति कोशाच्च परः श्रीकृष्णः शक्तिः सम्मोहिनीपरेति गौतयीयात् श्रीराधेत्यर्थः। ततश्च द्वयोरेवार्थो मङ्गलं येषां तत्सुखसुखिन इत्यर्थः। यथाच—

द्रुमाश्च कल्पपूर्वा ये नानामोदविधायकाः। वृन्दावनस्थास्तान् विद्धि वलभद्रांशसम्भवानिति ॥

तस्य सखित्वात्तत्त्वं युक्तमेव ते चोक्ताः शतकेषु—

केचित्पीयूषसारोत्तमपरिणतरुचयःकेचन क्षीरसारैः। दिव्यैः सन्निर्म्मिताः केऽप्यतुलमरकता मासवानाङ्गनाङ्गाः ॥
केचिच्छैलोपलाः केप्यतिहिमकरकातुल्यरूपा इति श्रीवृन्दारण्ये दधति बहुविधा राधिका कृष्णतुष्ट्यै।
श्रीराधाकृष्णनर्म्मोत्त्यनुखरणपराबिभ्रतः केऽपिशाखा। भूलग्नाःसूनभारावहशतपरितो मण्डपाकाररम्याः।
हस्तग्राह्यं प्रसूनाद्युपरिच शिखरः स्थञ्च सन्धारयन्तः ॥

शाखीन्द्रा यत्र धन्या दिशतु मम शिदम् सैव वृन्दाटवीयम्। केचिन्माध्याह्निकादप्यतिवहलरुचश्चण्डमार्त्तण्डकोटि ॥
भ्राजद्दिव्यप्रभामण्डलितउरुरुचः केऽपिकल्पाग्नकोटेः। केचिद्राकेन्दुकोट्युज्ज्वलशिशिरलसच्चारुरोचिः गुञ्जापुञ्जा ॥
चन्द्रिकाभिरामद्युतिविततिमहामञ्जुलाः केऽपि यत्र। केचिद्विद्योतमानाद्युतिभिरगणितोदीप्तविद्युल्लतानाम् ॥
विस्फूर्जद्दिव्यकोटिस्फटिकमणि महास्वच्छभासोऽपि केऽपि।
केचिद्बालप्रवालाधिकललितमहः कन्दलीसुन्दराङ्गाः केचिन्निर्भान्त्यनन्तद्रुत कनकरुचोहारहीरत्विषोऽन्ये ॥
केऽपि प्रोल्फुल्लदिव्यस्थलकमलरुचः केऽपि नीलोत्पलाभाः। केचित्सत्पाटलप्रोच्चय रुचिररुचोऽन्येजबापुष्पभासः ॥
इत्थं स्वानन्दसच्चिद्रसघनवपुषो यत्र शाखीन्द्र वृन्दस्या। श्चर्यवर्णभेदा अथ विविधिरुचां वीचयोदुर्निरूपाः ॥
आकाराणां प्रकारा अपि परमचमत्कारिणः पत्रपुष्पा। द्यत्याश्चर्यैकसम्निः स्फुरतु मम सदासैव वृन्दाटवीयम् ॥

श्रीबृहद्भागवतामृते च—

यस्यैकवृक्षोऽपि निजेन केनचिद्द्रव्येण कामांस्तनुतेऽर्थिनोऽखिलान्।
तथापि तन्नैव सदाप्रकाशयेदैश्वर्यमीशः स्वविहारविघ्नत इति ॥

मूलं प्रमाणं श्रीरुद्रयामले—

वीथ्यां वीथ्यां निवासोऽधरमधुसुवचस्तत्र सन्तानकानामेके। एकेन्दुकोट्यातपविशदकरास्तेषु चैके क्रमन्ते ॥
रामे रात्रे विरामे समुदिततपनद्योतिसिन्धूपमेया। रत्नाङ्गानां सुवर्णाचित्तमुकुररुचस्तेभ्य एकेद्रुमेन्द्राः ॥
यत्कुसुमं यदा मृग्यं यत्फलञ्च वरानने। तत्तदेव प्रसूयन्ते वृन्दावनसुरद्रुमाः ॥

एवं च परार्थभाविका इति प्रतिपादितं स चार्थो विहार एव गोप्येकया युतस्तत्र परिक्रीडति नित्यदेन्यादिब्रह्मयामलवाक्यात् श्रीकृष्णयामले च—

तया सह विहारो यः कृष्णस्य परमात्मनः स एवोपनिषद्भिस्तु नित्यानन्द इतीर्यते ॥

इत्यादिबहुशः रेमे तयेत्यादि वक्ष्यमाणाच्च परं त्वतिरहस्यत्वात्कण्ठोक्तया न प्रकाशित इति विवृतं मञ्जूषायाम् अथ वक्षीणां प्राणसखीत्व-प्रतिपादनाय तासां स्वरूपं भेदाश्च प्रदर्श्यन्ते स्वप्राणसख्याः प्रेमैकपात्रीर्दात्रीः सुखस्य ताम्। वन्दामहे महोदारां मारास्पृष्टां विलासिनीम् आसां सामान्यलक्षणं श्रीकृष्णार्चनचन्द्रिकायाम्—

प्रेमलीलाविहाराणां सम्यग्व्यस्तारिका सखीति श्रीमदुज्ज्वलनीलमणौ च —

आत्मनोऽप्यधिकं प्रेम कुर्वाणान्योऽन्य मच्छलम्। विश्रम्भिणी वयोवेषादिभिस्तुल्या सखीमता ॥

सा च सखी नित्यसखी प्राणसखी प्रियसखी परमप्रेष्ठसखीति पञ्चविधा तत्र सखी यथा तत्रैव—

निरुपाधिप्रीतिपरा सदृशी सुखदुःखयोः । वयस्यभावादन्योऽन्यहृदयज्ञा सखी भवेदिति ॥
सख्येनैव सदा प्रीता नायिकात्वानपेक्षिणी । भवेन्नित्यसखी सा तु द्विधैकान्त्यतिकी लघुः ॥
आपेक्षिकलघूनाञ्च मध्येऽन्या काचिदीरिता ।
सैव प्राणसखी नित्यं तन्सुखासक्तमानसा । छायेव यानुसरति सा च प्रियसखी भवेत् ॥
सुरते नर्म्मणि रता सैव नर्म्मसखी भवेत् । आत्मनो मूर्त्तिरन्येव प्रियनर्म्मसखी हि सा ॥
अथासामपरः कोऽपि विशेषः पुनरुच्यते । असमं च समञ्चेति स्नेहं सख्यः स्वपक्षगाः ॥
श्रीकृष्णे राधिकायाञ्च वहन्त्यो द्विविधा मताः ।

तत्र हरौ स्नेहाधिका यथा—

अहं हरेरिति स्वान्ते गूढामभिमतिं गताः । अन्यत्र कथनासक्त्या स्वेष्टां श्रीराधिकां श्रिताः ॥
मनागेवाधिकं स्नेहं वहन्त्यत्र माधवे । तत्सहायपराश्चेमा हरौ स्नेहाधिका मताः ॥
याश्चात्र सख्य इत्युक्तास्ताश्च स्नेहाधिका हरौ । शेषाः स्नेहाधिकाः सख्यामुत्कर्षश्च यथोत्तरम् ॥
तत्रापि नित्यसख्यो याः प्राणसख्यश्च काश्चन । समस्नेहाः स्मृतास्तासामुदाहरणमुज्ज्वले ॥
तिस्र एता व्रजगता ज्ञेयाः काश्चिन्निकुञ्जगाः । अथ तुल्यप्रमाणकं स्नेहं वहन्त्योऽपि द्वयोरिमाः ॥
राधाया वयमित्युच्चैरभिमानमुपाश्रिताः । परमप्रेष्ठसख्यश्च प्रियसख्यश्च ता मताः ॥
उदाहरणमेतासां मञ्जूषायां विलोक्यताम् ।

अथ शुद्धायाः प्रीतेर्गीताकाष्ठापरा सख्ये रसे स्वरूपं तस्येदं गीयते सद्भिः अथसख्यलक्षणं—

आत्मोचितैर्विभावाद्यैः पुष्टिं नीता सतां हृदि । शुद्धा रतिर्भवेत्सख्यं तच्च निर्हेतुसौख्यदम् ॥

तत्र रतिश्चेतोरञ्जकत सुखभोगानुकूल्यकृन् चेतोरञ्जकाद्रवीभावः सा प्रीतिर्मैत्री सौहार्द भावसंज्ञां च गच्छति तत्र—

या सम्प्रयोगविषया सा रतिः परिकीर्तिता । सम्प्रयोगः स्त्रीपुरुषव्यवहारः सतां मतः ॥

स चात्र द्वयोरेव तदुक्तमलङ्कारकौस्तुभे राधामाधवयोरेव शृङ्गारः श्रुतिरोचक इति ।

अत्रैव पदमन्ययोगव्यवच्छेदि विशेष्यसङ्गतत्वात् पार्थ एव धनुर्द्धर इतिवत् असम्प्रयोगविषया सैव प्रीतिर्निगद्यते सा च द्वयो रपि स्त्रीपुरुषयोः स्त्रीणां सखीषु पुरुषाणांच सखिषु क्वचिन्मनोवृत्तिविशेषात्स्त्रीपुंसयोरपि यथा द्रौपदीकृष्णयोरिति मनोवृत्तिमयीप्रितिर्मैत्री स्पर्शादिकोचिता सा च श्रीराधासखीनां श्रीकृष्णसखीनां च परस्परविषया—

निर्विकारा सदैकाभा सा सौहार्दमितीष्यते । तत्सुखापरपर्य्याया सेयं श्रीलालतादिषु ॥

सदैकाभा सदैकरूपा सा चेतोरञ्जकता सौहार्दम् सेयं तत्सुखात्मिका परा रतिः सख्यमिति सिद्धं निर्हेतुसौख्यदमित्युक्तेः अत्र प्रमाणं सखीनामनुभव एव श्रीमदुज्ज्वले—

यथाधिपत्वेऽप्यौचित्त्यं दधाना ललितादयः । श्रीराधाप्रेष्ठभावस्य लोभात्सख्यरुचिं दधुरिति ॥
न चैवं वाच्यमानस्यापरकर्षो भवेदिह । मधुरादवरत्वेन युक्तिरत्रावधाय्यताम् ॥
सायुज्याख्या परा मुक्तिभक्तैर्यद्वदुपेक्षितां । सेवान्तरायादत्रापि तत्सुखस्य विघाततः ॥
मधुरोपेक्षितालीभिर्योगे सिद्धिस्तु नित्यदा । वियोगे प्रकटायान्तु लीलायामुच्यतेऽधुना ॥

सा च सिद्धिविधुरपरिभावितसाक्षात्काररूपा द्राक् तदावेशरूपा च नन्वन्यत्राप्रसिद्धमितिचेदलौकिकत्वाद् भूषणमेतन्नदूषणं लोकोत्तरचमत्कारिसुखं रस इत्यालङ्कारिकाः अलंप्रसक्तानुप्रसक्त्या मूलमनुकूलयामः तत्र यनुनोपकूला इति नित्यविहारभाण्डाराधिकारिणीयं नित्यसहचरीति स्कान्दणसिद्धेः यमुना उपकूला अनङ्गरङ्गाख्यप्रदेशद्रुमाः श्रीराधिकाकुञ्जवाटिकावृक्षा इत्यर्थः कृष्णपदवीं शंसन्तु अत्र कृष्णेत्याद्यपह्नवः विपक्षादिसमुदाये तथोक्तेरेवोचितत्वात् यद्वा आराध्या मम नाम्नापि तेन राधेति गीयत इति कृष्णयामलनिर्वचनानुसारेण तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकमिति सम्मोहनतन्त्रोक्तेर्भेदाभिप्रायेण वा तथोक्तं यदि वाऽतिरहस्यत्वान्न तस्याः साक्षान्नामोक्तिः तदुक्तं श्रीकृष्णयामले—

स्थानं नित्यविहारस्य ख्यातं वृंदावनं वनम् । यत्र नित्यं विहरति कृष्णो राधिकया सह ॥
आविर्भावं द्वापरान्ते विहारस्य करोति सः । अन्यदान्तर्हितो नित्यविहारं कुरुते प्रभुः ॥
कुञ्जे कुञ्जे चतुर्वेदपुराणभ्रमराकुले । वैकुण्ठादपि सङ्गोप्यसम्भोगस्थितमीश्वरम् ॥

सर्वं रहस्यं कृष्णस्य प्रोक्तवान्नारदः पुरा । वेदव्यासाय विविधान् राधिकाकृष्णयोर्गुणान् ॥
गोपयित्वा ततो व्यासः पुराणादिषु केवलम् । कृष्णलीलां निजगदे न राधासश्रितां कथाम् ॥
रुक्मिण्याद्याः स्त्रियो यास्तु ताः राधांशा न शंशयः ।

ननु स्वयमेव विचीयतामिति तेषां गाम्भीर्य्यमवधार्योचुः रहितात्मनां विगतानुसन्धानानां न इति सजातीयत्वेन सख्यसूचितम् ॥ ९ ॥

श्रीरामनारायणकृता भावभावविभाविका

ततोऽग्रे गच्छन्त्यो चूतप्रियालपनसासनकोविदारजम्व्वर्कविल्ववकुलाम्रकदम्बनीपान् दृष्ट्वा तेषा सफलत्वेन फलप्रदत्वेन च तद्विषयकप्रश्नस्यापि सफलत्वमालक्ष्य तथा च्यवति परदुःखकरुणया द्रवतीति चूतः उणादित्वान्निपातेन यकारस्थले उकारादेशः तकारागमश्च इति व्युत्पत्त्या कृपालुतया द्रवितचित्तः तथा चिति संज्ञाने इत्यस्माच्चेतति चेतयतीति वा चूतः उणादित्वादेवेकारस्य उकारादेशस्तत्संज्ञा ज्ञापकश्च तथा चः शोभायां समाख्यातः –

उकारः शङ्करः प्रोक्त ऊकारो विष्णुरेव च । तकारः कथ्यते चौरे क्रीडे पुच्छे प्रकीर्तितः ॥ इति

कोशोक्तेःशोभनो विष्णुशिवयोराक्रीडश्च प्रिया आलयः सख्यो यस्येति सखिषु स्निग्धः प्रियमालाति आददातीति प्रियप्रापको वा प्रियालः आलीः संत्यज्य गच्छतः पनङ्गमनं स्यति तनूकरोति ता मेलयितुं निरोधयति दुःखितान् पातीति पः न स्यति न नाशयतीति वा पनसः आसयति प्रियं सखीजनानां समीपे उपवेशयतीत्यासनः अकारं वासुदेवं सनति भजतीत्यसनः तद्भक्तत्वात् तत्प्रियो वा कोविदं रसाभिज्ञं रसिकशिरोमणिं कृष्णं आसमन्तात् सर्वसखीभ्यो रातीति कोविदारः जायते इति जम्बूः परोपकारित्वेन सुफलजन्मेति भावः । ये गत्यर्थास्ते प्राप्त्यर्था इत्यस्मात् ऋणाति प्रियङ्गमयतीत्यर्कः अर्कवत्स्वरूपावभासकतया तमो दुःखनाशको वा अर्कः विरुद्धं तत्प्राप्तिप्रतिबन्धं लुनातीति विल्वः उः शिवः अः कृष्णस्तयोर्भक्तत्वेन कुलं यस्य कुलत एव हरिहरपरः परमभागवतो वकुलः तौ कौ पृथिव्यां लाति प्रापयतीति वा वकुलः अमरोगे गतौ चेत्यस्मात् आमयति गमयत्यर्थात्प्रियमित्याम्रः कं सुखं ददातीति कदः कृष्णस्तङ्कदं वाति प्रापयतीति कदम्वः नयति प्रापयतीति नीप इति तन्नाम्ना च कृष्णप्रापकत्वं सम्भाव्य पप्रच्छुः । चूतप्रियालेति । पूर्ववद्विकलतया युगपदेव सोपकारसूचकत्वत्तन्नाम्ना सम्बोधनं ये चान्ये तथाविधास्ते नः कृष्णपदवीं शंसन्तु ननु किंनस्तत्कथनेन तत्राहुः परार्थभविका इति । परार्थो भवो जन्म येषां तथा परार्थे भवः शिवः को ब्रह्मा तयोः सदृशा आशु तोषफलप्रदाः परार्थभविका इति पाठे तु परार्थमेव भविकं मङ्गलमभ्युदयो येषां तथा यमुनोपकूलाः परोपकारायैव तीर्थवासिन इत्यर्थः एवं प्रार्थनायामप्युत्तरालाभे चूतस्य प्रच्युतमतित्वं प्रियालस्य प्रियं न लातीति प्रिया प्रापकत्वं पनं गतिं प्राप्तिं स्यतीति पनसस्य प्राप्तिप्रातवन्धकत्वम् असनस्य न कमपि सनति भजतीत्यसनः न कस्यापि सुखप्रदत्वम् आसनस्य आसमन्तात्स्यति अन्तं प्रापयतीति नाशकत्वम्वा कोविदारस्य कोविदानां रसज्ञानामारत्वं खण्डकत्वं जम्बोस्तु अम्बूजम्बूकफेलुप्रभृतीनामुणादिव्युत्पत्त्या व्युत्पन्नत्वात् जि अभिभवे इत्यस्माज्जायतेऽभिभवति सत इति सतामभिभावकत्वम् अर्कस्य स्वत एव विषात्मकतयामारकत्वं विल्वस्य विशेषेण लुनातीति विच्छेदकत्वं वकुलस्य कुलत एव हरिहरपरत्वेन तत्पक्षपातित्वम् आम्रस्य आमयति रोगं प्रापयतीति दुःखप्रदत्वं कदम्वस्य कुत्सिता अम्वा यस्येति काकविट्प्रभवत्वेन कुत्सितत्वं नीपस्य प्रियमन्यत्र नयतीति प्रियवियोजकत्वमन्येषामपि तत्सहवर्तिनां तादृशत्वं सर्वेषां तेषां परार्थानां भवो रुद्रस्तद्रूपेण संहारकत्वं परार्थेनैव भविकमभ्युदयो येषामिति परार्थहारकत्वं यमुनाया यमभगिन्याः सामीप्येन क्रूरताञ्चावगत्यान्यत्र गताः ॥ ९ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अहो एते आम्रादयः परोपकारशीलास्तपस्विनस्तीर्थसेवापराश्चेति मत्वा तान् पृच्छन्ति । चूतेति । चूताम्रयोः मधुराम्लफलत्वेन भेदः नीपो धुलिकदम्वा बृहत्पुष्पः कदम्वः क्षुद्रपुष्पोऽतिसुगन्धः प्रियालः शालभेदः पनसः कटहर इति ख्याता बृहत्फलः असनः पीतशालः कोविदारः कचनारभेदः अर्क्कः क्षुद्रवृक्षोऽपि गोपीश्वरप्रियत्वात्प्रश्नार्हः च्यवतेऽतिरसमिति चूतः च्युतिरक्षरणे प्रीणातीति प्रियालः प्रिञ्तर्पणे पनस्यते स्तूयत इति पनसः अस्यति परदुःखमिति असनः असु क्षेपणे कुं भूमिं विदारयतीति कोविदारः दृ विदारणे परोपकारार्थं झटिति भूमिंनाभिद्य निःसृतः जमति परदुःखमिति जम्बूः जमुअदने अर्क्कः भानुवज्जाड्यहरः विलति परदुःखमिति विल्वः विलभेदने वङ्कतेऽवगच्छति परदुःखमिति वकुलः बकि गत्यर्थः अम्यते स्वदुःखनिरासार्थं जनैरित्याम्रः अम गत्यादौ कन्दति हिनस्ति परदुःखमिति कदम्वः नयति सुखं प्रापयतीति नीपः णीञ् प्रापणे एवं भूता हे चूतादयः ! अन्ये च ये मधुकादयः परार्थभवका परार्थमेव भवा जन्म येषान्ते भविका इति पाठे भविकं मङ्गलं फलाद्युत्कर्षोऽपीत्यर्थः तत्रापि यमुनोपकूला यमुनायाः कूलसमीपे वर्त्तमानास्तीर्थनिकटवर्त्तित्वादिति नोऽस्मभ्यं कृष्णस्य सदानन्दरूपस्य भगवतः पदवीं मार्गं शंसन्तु स्वस्य करुणापात्रतामाविष्कुर्वन्ति रहितात्मनामिति काश्चिद्गृहादिरहिताः वयंत्वात्मना अतस्तच्छंसनेनात्मप्रदानं कुरुतेति भावः । अत्र दर्शनासिद्धावत्रन्य मार्गं पृच्छन्ति अहो एते समाधिनिष्ठाः न श्रृण्वन्त्यतो न किञ्चिदपि वदन्तीति निवृत्ताः अनभिज्ञापेक्ष कृष्ण-

स्वस्मषित्तरत्नमञ्जूषामाकृष्य गतस्तच्चोरचक्रवर्त्तिनः पदवीं शंसन्तु तत्रापि मृषाभाषणं न विधेयं यतो यमुनोपकूलाः यमुनासन्निधौ वर्त्तमाना इति शपथो व्यज्यते ननु स्वयमेवान्विष्य तस्य मार्गो निश्चेतव्य इत्याशङ्क्याहुः। रहितात्मानां विरहव्याकुलतयाऽन्वेषणसमर्थसमाहितमनोरहितानां नः कृपया भवन्त एव वदन्तु अहो एते तीर्थवासिनोऽतोऽत्यन्तकठोरहृदयाः अतो न कथयिष्यन्तीति ततो निवृत्ताः मानिनीपक्षेऽप्येवं निवृत्ताः निवृत्तिपक्षे चूतादिस्थानीयानि पञ्चकर्मेन्द्रियाणि जम्वादिस्थनीयान् पञ्चप्राणान् कदम्बनीपौ चित्ताहंकारौ पृच्छन्ति। चूतेति। ये वान्ये विषयाः परार्थभवकाः आत्मशेषभूताः यमुनास्थानीयात्मप्रदेशे स्थिताः नोऽस्माभिः श्रुतिभिः रहितात्मनामस्माकमविचारविधुरचित्तानां कृष्णस्य परमात्मनः पदवी मार्गं शंसन्तु स्वप्रकाशकस्य प्राप्त्युपायं सूचयन्तु तथाच तदनुमापका भवन्ति नतु तदवभासका इति भावः॥ ९॥

रास-रहस्यम्

र० टी०—चूताद्युपलक्षणीभूतान् रसनेन्द्रियग्राह्यपदार्थान् येऽन्ये एतेभ्य पृथक् तान् श्रोत्रघ्राणादिग्राह्यान् पदार्थानुद्दिश्य पृच्छति—यमुनोपकूलाः तत्स्थानीयमन्तःकरणं तस्मिन् स्थिता वृत्तयः, कथम्भूताः? पुरा परार्थभावकाः परं परमात्मानमर्थयते इति परार्थः, तस्मिन्नेव भवितुं शीलं यासां ताः परमात्मध्यानपरायणाः आसन्, अधुना नः अस्माकं रहितात्मनां आत्मनः रहितानामात्मपदच्युतानां कृष्णपदवीं आत्मप्राप्तिमार्गं, शंसन्तु उपदिशन्तु॥ ९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे चूतादयः! भवन्तः अन्ये च ये यमुनापकूला यमुनाकूलसमीपे वर्तमानाः परार्थभविकाः परार्था भविका जनिर्येषां ते रहितः वियुक्तः आश्रयः कृष्णः यासां तासां नोऽस्माकं कृष्णपदवीं शंसन्तु कथयन्तु चूताम्रयोः कदम्बनीपयोश्चावान्तरभेदः॥ ९॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रियालो राजादनोऽसनः पतिसारः कोविदारः काञ्चननारको ऋक्षः शोणकवृक्षः ऋक्षोऽद्रिभेदे भल्लूके शोणक इति विश्वः। बिल्व। वकुलो वञ्जुलोऽशोक इत्यमरः। भ्रमात्पुनर्वचः। आम्रकदम्बाम्राणां समूहः। नीपः कदम्बमाहुः सिद्धार्थे नीपेऽपि निकुरम्बै इति विश्वः। अतोऽनेकातिरेकः। येऽन्ये परार्थभविनः परार्थं भव उत्पत्तिः स एषामस्तीति ते तथा यमुनोपकूला यमुना उपकूलमुत्पत्तिस्थलं येषां ते रहितमात्मा शरीरमीशो वा यासां तास्तासां जीवन्मृतानामिति यावत् नः कृष्णपदवीं शंसन्तु। हे इ वनलक्ष्मीरमुना रहितात्मनां नोऽमुना कृष्णेन॥ ९॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु यद्यप्येताः स्त्रियः तथाप्यफला इति अल्पा इति स्वार्थपरा इति लक्ष्मीपक्षपातन्य इति न वदिष्यन्तीति ज्ञात्वा आम्रादीनत्युत्तमान् वृक्षान् पृच्छन्ति। चूतेति। चूताम्रौ मधुराम्लप्रकृतिकौ कालभिन्नफलौ वा प्रियालस्तु वीजेऽप्यधिकरसयुक्तः पनसो महाफलः अन्ये चाशनादयो वृक्षाः पुष्पफलप्रधाना किं बहुना अन्येऽपि ये मधूकादयः परार्थमेव जन्म येषां ते परार्थभवकाः किञ्च यद्यपि सर्व एव वृक्षाः परार्थजन्मानः तत्रापि ये यमुनोपकूलाः यमुनाया उपकूले तपस्विन इव तिष्ठन्ति ते ह्यवश्यं भगवन्तं पश्यन्ति बोधयन्ति च अतः सदानन्दस्य पदवीं शंसन्तु यथास्मद्धृदये समायाति दयार्थमाहुः। रहितात्मनामिति। केचिद्गृहरहिता धनरहिता देहरहिता वा वयन्त्वात्मरहिता एव अतः सर्वापेक्षया वयं दीनाः अतः कृष्णपदवीमस्मदर्थे शंसन्तु॥ ९॥

श्रीसुबोधिनी-सारः

हे आम्रादिवृक्षाः चूताम्रयोर्नीपकदम्बयोश्चावान्तरो भेदः यमुनाया उपकूलाः कूले समीपे वर्त्तमानाः परार्थमेव भवो जन्म येषां ते येऽन्ये वृक्षाः रहितात्मनां शून्यचेतसां नोऽस्माकं कृष्णस्य पदवीं मार्गं कथयन्तु॥ ९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततोऽप्युत्तरमलब्ध्वा 'फलादिभिः सर्वप्राणिसन्तर्पका एते वदेयुः' इत्याशयेन पृच्छन्ति—चूतेति। चूताम्रयोः कदम्बनीपयोश्चावान्तरभेदो द्रष्टव्यः। हे चूतादयः येऽन्ये च परार्थभविकाः परार्थमेव भवो जन्म येषां ते यमुनोपकूला यमुनाकूलसमीपे वर्तमाना वृक्षास्तीर्थवासिनो वा, ते भवन्तो रहितात्मनां कृष्णाकृष्टत्वेन शून्यचेतसां नोऽस्माकं कृष्णपदवीं कृष्णप्राप्तिमार्गं शंसन्तु कथयन्तु॥ ९॥

अन्वितार्थप्रकाशिका

चूतेति॥ हे चूतप्रियालादयः! चूताम्रयोर्मधुराम्लप्रकृतितो लतावृक्षजातितो वा भेदः। कदम्बः क्षुद्रपुष्पोऽतिसुगन्धः नीपो बृहत्पुष्पः अन्ये च परार्थभवकाः परार्थमेव भवो जन्म येषां ते। भविका इतीकारमध्यपाठे परार्थं भविकं मङ्गलमभ्युदयो

येषां ते उप समीपे कूलं येषां ते उपकूलाः यमुनायाः उपकूलास्तत्तटस्थिताः वृक्षास्तीर्थवासित्वेन सत्यवादिनः ते भवन्तो रहितात्मनां कृष्णाकृष्टत्वेन शून्यचेतसां नोऽस्माकं कृष्णपदवीं कृष्णप्राप्तिमार्गं शंसन्तु कथयन्तु ॥ ९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुनरन्यान् पृच्छन्ति चूतेति चूताम्रयोः शरद्ग्रीष्मफलपाकेनावान्तरभेदः नीपकदंबयोरवान्तरजातिभेदः हे चूतादयः परार्थभवका इति पाठे परार्थमेव भवो जनिर्येषां ते इति समासे समासान्तः कप् परार्थभविका इति पाठे तु परार्थं भविकं मंगलं फलाद्युत्कर्षो येषां ते इति समासः यमुनायाः संबंधि उपसमीपे कूलं तटं येषां ते यमुनातटनिकटे वर्त्तमाना इत्यर्थः । तथाभूता ये चूतादिभ्य इमे वृक्षाः रहितात्मनां विरहव्याप्तचित्तानां अस्माकं कृष्णस्य मार्गं शंसंतु ॥ ९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चूतेति ॥ चूतादिनीपान्तानां द्वन्द्वः तत्संबुद्धिः ! हे चूत, हे प्रियाल, हे पनस, हे असन, हे कोविदार, हे जम्बु, हे अर्क, हे बिल्व, हे बकुल, हे आम्र, हे कदम्ब, हे नीप, परार्थमेव भविक फलोत्कर्षादिमङ्गलं येषां ते, यमुनोपकूलाः यमुनाकूलसमीपे वर्त्तमानाः, ये अन्ये सर्वे ते भवन्तः, रहितात्मनां शून्यचेतसां नोऽस्माकं, कृष्णपदवीं श्रीकृष्णगमनमार्गं, शंसन्तु कथयन्तु। चूताम्रयोः कदम्बनीपयोश्चावान्तरभेदः। प्रियालो राजादनतरुः, पनसः कण्टकिफलः, असनः सर्जकतरुः, कोविदारो युगपत्त्रकतरुः, जम्बूः, प्रसिद्धः, अर्कः प्रसिद्धः, बिल्वो मालूरतरुः, बकुलः केसराख्यस्तरुः ॥ ९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

चूतप्रियालेति : १०.३०.९

तवाम्र सुरसाल इत्यभिहितं हि नामार्थवन्नवाऽस्ति यदि पूरयाभिमतमस्मदीयं लघु ।
न चेदमरभूरुहा समकथां वृथा तत्प्रथां वहस्यतिमहत्पदं किमु न लोकहास्यं लघोः ॥ २४ ॥
रसाल किल भूतले त्वमसि गोपिकानन्दकः प्रथेति च वृथैव यद्वितरसीह नास्मत्सुखम् ।
सती यदथवा सुतं व्रजपतेर्वतादर्शयन् युतः किसलयासिना स इव गोपिकानन्दकः ॥ २५ ॥
निखिलादपि वृक्षजातिवर्गात् सहकारोऽयमतीव दुःसहं यत् । तनुते तनुतापमत्र युक्तं यदसौ स्वीकृतसौरभानुवृत्तिः ॥ २६ ॥
निजगतिरञ्जितनन्दं कमलानन्दं सुरेशतरुकन्दम् । विहरन्तं स्वच्छन्दं दर्शय माकन्दराज गोविन्दम् ॥ २७ ॥
कौविदारणचणस्त्वमिहासि सन्दधाति समतां तव सोऽपि ।
कोविदार तव पादमुपेताः कोविदा रतरसेऽस्य कुरुष्व ॥ २८ ॥
भोः श्रीबिल्व भवान् सदा शिवरतेर्दातेति सङ्ख्यो मुहुः श्रुत्वोत्कण्ठितचेतसस्तव पदं प्राप्ता हि तल्लिप्सया ।
आजन्मार्जितमञ्जुलोज्ज्वलयशोरक्षात्तदीक्षोऽसि चेत् तह्यव्याहतभव्यसेव्यभगवद्रत्यर्पणं नः कुरु ॥ २९ ॥
श्रीफलोऽहं कथं नाम श्रीसपत्नीजनान् ब्रुवे । नैव चिन्तय वृक्षेश यत्त्वत्पदजुषो वयम् ॥ ३० ॥
वकुलकुलं तव सरलं यदि वा सुमनःसुगन्धमावहसि । तह्यस्मदीयसुमनःसुगन्धमादर्शयेह नन्दसुतम् ॥ ३१ ॥
वासोऽस्मदीयमपहृत्य यदाऽच्युतेन सस्थापितं त्वयि कदम्ब तदा त्वयैव ।
विज्ञातमुत्कपटधीः स च वा वयं वेत्यद्य स्वतन्त्रवचसा किमु सूचयामः ॥ ३२ ॥
सत्याश्रये तव भवेन्न भुजङ्गबाधा स्यात् प्रत्युत प्रतिपदं स्ववशी भुजङ्गः ।
कृष्णे त्वदाश्रयिणि दृष्टमिदं कदम्ब तत्तद्धियैव वयमद्य समागताः स्मः ॥ ३३ ॥
यदा निजफलैरलं रघुपतिस्त्वया तोषितस्तदा बदरि संस्तवस्तव बभूव लोकोत्तरः ।
ततः प्रभुरिहाधुना स्फुटमसौ समाहूयतां यतः परिचयस्तवैव च पुरातनो दृश्यते ॥ ३४ ॥
पुत्र्या दुःखाद् भर्तृदत्ताच्च सौख्यात् सैका लोके तद्द्वयात्का सवित्री ।
तत्ते वाच्यं किं पुनर्नूत्नमस्मद्दुःखं यत्त्वं मातृरूपासि धात्रि ॥ ३५ ॥
प्रियोऽस्माकं धात्रीं वदति भवतीं नन्दतनयः ततस्त्वं नः श्वश्रूरिति तव पदन्यस्तशिरसाम् ।
अखण्डाऽस्तु प्रीतिः समभिलषितार्थप्रजननी सदाभर्तुर्युष्मास्विति दिश सदाशीर्गिरमहो ॥ ३६ ॥
पर्वाश्रितोऽपि न ददातु विधुः सुपर्वाभिख्योऽपि चामरगणः कृपणस्वभावात् ।
दूर्वे त्वमीशपददर्शनपर्वदानं कुर्वद्य पूर्णशतपर्वयुता यतोऽसि ॥ ३७ ॥
येषामस्ति सदा ह्यमार्गवसतिः किं तैर्वृथैवोन्नतैर्भूजातैरथ तत्पदाश्रयितया किं वा भवेदीप्सितम् ।
भूमौ शैखरिक त्वमेव यदपामार्गोऽस्यवृद्धाऽपि तत् सन्मार्गं भगवत्प्रदर्शकमहो सन्दर्शयास्मानिह ॥ ३८ ॥

स्थाणुरेष पुरतः सखि भाति तद्भवेत् स खलु तत्र परेशः ।
मित्रभावमनयोरनपायं यद्वदन्ति निगमागमविज्ञाः ॥ ३९ ॥

कृष्णागम त्वं यदि वेत्सि कृष्णागमप्रकारं यदि वा ब्रवीषि ।
तत्सर्वभूजन्मसु मानयामस्त्वामेव विज्ञातनिजस्वरूपम् ॥ ४० ॥

कृष्णकान्तिरनुरक्तहृत्स्थितिर्मङ्गलादिविबुधार्चनशोभी ।
रक्तचन्दन भवानिव सोऽपि वर्तते वद भवेद्यदि दृष्टः ॥ ४१ ॥

तिलकोऽसि यथार्थस्त्वं सकलागमराशिषु । श्रीमानसि च तद् ब्रूहि ब्रह्म देहि लसत्सुखम् ॥ ४२ ॥

हे पाटीर भुजङ्गभूषिततनुस्त्वं सर्वदा वर्तसे तद्ब्रूह्यत्र समागतः किमधुनाऽस्माकं भुजङ्गाग्रणीः ।
नैवायं प्रतिवक्ति चेन्न वदतु स्पष्टानुरक्तान्तरां पृच्छामो रुचिरां भुजङ्गलतिकामेनां भुजङ्गस्थितिम् ॥ ४३ ॥

रे रे कपित्थ निजमन्मथसंज्ञयाऽस्मानुत्तजयस्यतनुकर्मणि किं वृथैव ।
यः सर्वदा दधिफलादनलब्धकीर्तिस्तं चेत्प्रदर्शयसि तत्किमपि स्तुमस्त्वाम् ॥ ४४ ॥

वक्रता तव फलेषु दलेषु सूक्ष्मता कठिनता च शरीरे ।
याऽम्लताऽस्ति च रसेष्वपि चिञ्चे यास्यतीह यदि दर्शयसीशम् ॥ ४५ ॥

यदागमज्ञाः कथयन्त्युदुम्बरस्त्वामुत्सवाङ्गं पशुरक्षणक्षमम् ।
तत्साधनीभूय निरङ्गयोजनं सम्पूरयास्मत्प्रियसङ्गमोत्सवम् ॥ ४६ ॥

अनेकजन्तुपोषणं फलेन येन जायते तथाविधानि यत्फलान्यनेकशोऽत्र सन्ततम् ।
दधास्युदुम्बर स्फुटं ततस्तवाधुनोचिता यदस्मदीयजीवनाच्युताप्तिसत्फलोद्धृतिः ॥ ४७ ॥

समंदारैरतिश्रेष्ठो देशोऽसावनुदृश्यते । तद्यात यामस्तत्रैव भवेत्प्रायः शठाग्रणीः ॥ ४८ ॥

त्यागोऽस्माकमकारि दैत्यरिपुणा तत्किं विहारेऽधिकं न्यूनं वाऽभवदेतदीक्षितमिदं जानीमहे नाण्वपि ।
स्याच्चेत्तेन निरूपितं तव शिवे तद् ब्रूहि पथ्यावहं पूर्वं तत्प्रियवादिनीह यदसीत्याश्रुत्य पृच्छा कृता ॥ ४९ ॥

यत्क्लेशान् शमयस्यहर्निशमपि श्रेयःप्रदात्री तथा लोकस्येति शमी शिवेति तव सन्नाम प्रसिद्धिं गतम् ।
सत्येवं शरणागताः शमि समालोक्यापि नः सम्प्रति तूष्णींभाव इहैष ते समुचितः किं कृष्णवर्त्मात्मनः ॥ ५० ॥

अशोकवकुलाम्रकक्षुरकचक्षुरकचम्पकादिद्रुमा जनुः सफलमस्ति वः प्रचुरदोहदेनैव नः ।
तदस्य किमु कल्पितं फलमनल्पतापोऽथवा प्रसिद्धकलिकालतोदयनिदानताऽत्र स्फुटा ॥ ५१ ॥

रे कुब्ज पुञ्जितमहीरुह रञ्जितोऽस्मि सिञ्जारवैर्बहुभिराभिररञ्जितोऽहम् ।
स्मृत्वोपकारमिममद्य दिशा कयापि सन्दर्शयास्मदतनुश्रमहारि वस्तु ॥ ५२ ॥

यत्र स्याद्भुवि नारिकेल्यनुसृतिस्तत्रैव मित्रागमः स्यात्पीडापि न शात्रवी प्रभवतीत्यालोच्य याता वयम् ।
पूर्वस्मादधिकामनङ्गरचितामार्तिं वहामोऽधुना तद्धूर्तश्वरि नारिकेलि विलसन्नाम्ना त्वया वञ्चिताः ॥ ५३ ॥

यदा यदाऽस्मद्द्विजवर्णनं प्रभुश्चकार शृङ्गारशिरोमणिस्तदा ।
स्मृतिस्तवैवास्य बभूव दाडिमि ततो भवेज्ज्ञात्यभिवीक्षितस्त्वया ॥ ५४ ॥

जम्भारिसूनोरमलस्य वार्तां प्रष्टुं हठाद्दन्तशठं न यात ।
तापप्रदातैव भवेद् गते तु यज्जम्भलोऽयं रिपुपक्षघाती ॥ ५५ ॥

वयमन्तेवासिन्यस्त्वमनुग्राहीति युक्तमिदमजनि । तदकैतवमिह वाच्यो यदुपात्तपदपद्मलाभकृन्मन्त्रः ॥ ५६ ॥

यत्पल्लवैरभिनयस्यतनुं प्रसादं धत्से महेश्वरमुदेऽम्बरशालि रूपम् ।
शैलूष इत्यभिहितं तव नाम सत्यं ब्रूमस्ततः प्रकटितं कुरु नायकं नः ॥ ५७ ॥

मध्वागमोऽत्र लसतीत्येवं गिरमाकलटय कस्याश्चित् । दुद्रावैका दैत्यभ्रान्त्याऽन्या वैष्णवाशयात्तस्थौ ॥ ५८ ॥

सरलसरलता तेऽन्वर्थिका भाति यस्मात् तदिह वद मुदा नः कुत्र स प्राणनाथः ।
त्वदुपकृतिमिमां संस्मृत्य दास्यामहेऽद्याभिनवसरलतां ते स्वां पुनर्दार्ढ्य हेतोः ॥ ५९ ॥

अहं जगति केवलोनुपमकृष्णरूपोऽस्म्यलं तमाल दलचालनप्रकटितेन गर्वेण ते ।
स च स्वपदसेविनां हरति तापमत्युज्ज्वलं भवानिह तु खेदयत्यतनुतापदानेन नः ॥ ६० ॥

सत्कुक्षौ प्रसवोऽस्ति यस्य भुवने नित्यं स एवाच्छलं सत्पात्रं सुखदुःखहृद्गतवसुक्षेपस्य साधूदितम् ।
तत्सख्यः किमिति प्रयाय सविधं तस्याश्रयात्किं फलं स्याद्वा ख्यातिमधिश्रितो हि भुवने स्पष्टं कदम्बेति यः ॥ ६१ ॥

लोके यद्यपि सर्वतो हरिकरिद्वेषोऽस्ति नैसर्गिको नैषोऽथापि सुरेभराजि यदसौ तद्वाहनं श्रूयते।
अभ्यर्णे हरिरस्ति ते किमिति मत्प्रश्नं सदिष्टार्थकं भो ऐरावत वृक्ष हेलयसि किं कूजद्विरावैर्मुधा॥ ६२॥

अहो शाल्मलि त्वं यदि श्रीधराखिलसद्वासनापूरणं चेत्करोषि।
तदा सत्यवाचो वयं नामधेयं स्थिरायुस्तवेत्याशिषा वर्धयामः॥ ६३॥
एह्येहि शीघ्रमिह कृष्णपदाब्जलाभो भूयादयत्नत इति प्रतिभाति यस्मात्।
देशोऽयमस्ति निखिलोऽपि नलाधिकश्रीस्तत्रेशदर्शनमृषिः सुलभं जगाद॥ ६४॥

अतिगतिवशतश्चरणौ श्रान्ताविति मनसि मा तमत। स्यन्दनमिममालम्ब्य क्षणाद्दूरं शोधयामस्तम्॥ ६५॥
द्रष्टव्य एष भगवानिह चेद्विरक्तैर्दृष्टो भवेन्मुनिगणेष्विति शास्त्रवादम्।
आलोच्य कृष्णपददर्शनभूरितृष्णा गोप्यस्तदा मुनिगणान्तिकमाययुस्ताः॥ ६६॥
उद्दिश्यान्तरनङ्गरङ्गसुखदं श्रीशार्ङ्गसङ्गं मुदा कात्यायन्यतितोषकारिणि पुराऽस्माभिर्व्रतेऽनुष्ठिते।

दुर्धर्षोऽयमुपस्थितोऽत्र विरहः कस्माद्दशा वेदृशी तत्सत्यंवदभूमिजोत्तमफलाध्यक्षोऽसि लोके यतः॥ ६७॥
पुण्यश्लोकस्य वार्तापि न यत्र श्रूयते सखि। किमर्थं तत्र गन्तव्यं देशोऽसावनलाश्रितः॥ ६८॥
शुकः स भववारिधौ मधुरया गिरा भावुकान् प्रतारयति तद्वदप्यहमिहाचरेयं ध्रुवम्।
पदाह्वय इति स्मयान्निखिलमूर्खचूडामणे प्रतारयसि किं मुधा भवसि किं शुकस्त्वन्तरो॥ ६९॥

रे शाखोटक माधवं सुपिहितात्मानं विलोक्यादरादस्मांश्चेदधुना वादिष्यसि ततः पुण्यं तथा ते भवेत्।
येनात्रैव विपल्लवस्थितिमिमां लुम्पन् लतोद्यत्सुमै राजत्पल्लवशेखरैरधिगतश्रीस्त्वं भविष्यस्यरे॥ ७०॥
काचिद् दूरतरं विलोक्य सहसा प्रत्याह पार्श्वस्थितां प्रेयांस्तत्र भवेत्फलाढ्यकुसुमारम्भा चिरं भासते।
यद्वा नायमलं विलासरसिकस्तत्रानुरक्तो भवेद् यत्प्रीती रसिकस्य योषिति परा या न प्रसूताऽजनि॥ ७१॥

इयं ब्राह्मणी प्रायशः श्रीशवार्ता वदेदित्यनल्पाशयान्नालि गच्छ।
यदङ्गारवल्लीति लोके प्रसिद्धा ततोऽस्याः किमु स्यादतापोदयस्ते॥ ७२॥
उन्मत्तधूर्तकितवान्यतमाभिधस्य पुंसोऽपि नाधिकृतिरीशपदावलोके।
पर्याप्तिभूमिरयमत्र तु तत्त्रिकस्य तत्प्रश्नतस्तदधुना भविता फलं किम्॥ ७३॥
आद्यवर्णरहितं भुवि नान्यद् वर्णयुग्ममुपयाति हि मानम्।
मा विलोकय ततः सखि कुन्दं मान्य एक इह नस्तु मुकुन्दः॥ ७४॥
त्वमसि भुवने विष्वक् सेनप्रियेति समुच्यते किमपि बदरे कृत्वा भूयः प्रणामपरम्पराम्।
अर्हितसहजं त्यक्त्वा सापत्नकं पदगामिनीः कुरु सुखवतीस्त्वं नः प्रेयः प्रदर्शनदानतः॥ ७५॥

कुत्रास्ते भगवान् कथं स्थितिरिति ज्ञातुं मुहुर्वीक्षिता अप्यस्मान्न हि दर्शयन्ति तमिह प्रयत्नागमः शाखिनः।
दुर्लक्ष्योऽपि विभुर्भवत्यतितरां लभ्यः पुराणागमैरित्याचार्यवचस्तु भाति भुवने जातं तदेतत्कथम्॥ ७६॥
देशोऽयमैशप्रपदप्रचारं विवेद भाग्यादधुना स्मृतिं ताम्। नोपैति चैवं जडभावभाजो विभात्यनूपस्थितिरस्य चित्रम्॥ ७७॥

नैवामुना सखि विना यमुना मनागप्यानन्दकृद्भवति शारदवारिपूर्णा।
गर्वं वहत्यलमहं सरसेत्यमुष्यां संदृश्यते किमपि सम्प्रति नीरसत्वम्॥ ७८॥
इन्द्रनीलमवरङ्गवर्तिनीमब्जिनीं मधुरषट्पदस्वराम्।
नर्तयत्यनुरागवृद्धये वायुरेष भरतागमार्थवित्॥ ७९॥
जङ्घा-लतान्त-कमनीयगतिः कृता चेज्जङ्घालतां तव तदा बहु वर्णयामः।
यत्साम्प्रतं तु रचयस्यतनुप्रसङ्गं तन्मान्द्यमेव तनुते नितरां नभस्वन्॥ ८०॥

नभस्वान् सूर्योऽपि त्वमपि सुमनः पूजितवपुः स चापि त्वं शाखाविरचितविहारः स च भवान्।
ततस्तद्वत्तापार्पणमुचितमप्याशुगजने सरूपः सोऽरूपस्त्वमिति किल भेदोऽल्पकलितः॥ ८१॥
तात वात वत तापतापितं मा प्रतापय पुनर्जनं त्विमम्।
नाथहीन-जनमानखण्डनं निन्द्यमुक्तमृषिभिः सदागतेः॥ ८२॥
कुरु मारुत मा रुतं मुधा वसुधाजन्म मुहुः प्रशंसया। यदि तत्र सदादरस्तदा भव सद्रूपविलोकनोन्मुखः॥ ८३॥
सद्रूपशोभी सततोपदेशाद्दतागमः शीलितसौमनस्यः।
लब्धं ततो वात मरुत्पदं तत् प्रसीद सौख्यं दिश हर्यभीष्टम्॥ ८४॥

नानागमोज्ज्वल-सुपर्ण-सुवर्ण-शाखामुख्यस्थितेर्गतिमतोऽखिलसत्पदेऽपि ।
वायो कथं न विदितस्तव सोमवंशशाखाविहाररसिको मरुदीड्यपादः ॥ ८५ ॥
प्रभञ्जन त्वमञ्जनप्रभञ्जनं प्रदर्शय यतोऽपि कृष्णवर्त्मभागनन्तवृत्तिरन्वहम् ।
सदागमप्रभञ्जनं विधातुमुद्यतस्य ते न दृश्यमेव वोल्लसत्सदागमस्थितं महः ॥ ८६ ॥
विष्णोः पदात्त्वमसि वात यदाप्तजन्मा भागीरथीव हर तापमशेषतो नः ।
यद्वा न सोदरतया स्थितिरत्र हेतुः स्पष्टं हि तादृशसुधाविषयोश्चरित्रम् ॥ ८७ ॥
स्पर्शवानिति जने निजप्रथां वर्धयस्यनिल सा वृथा न किम् ।
दातुमद्य यदिहेशदर्शनस्पर्शनं न पलमात्रमीहसे ॥ ८८ ॥
कुजातसंदोहशिरोऽग्रवृत्तेः खलस्य नित्यानलमैत्र्यभाजः ।
निरर्थकाऽन्यातनुतापदानं प्रसिद्धमेवेति न वात चित्रम् ॥ ८९ ॥
अन्यस्य कस्यापि च किंचिदस्तु त्वत्तः सुखं त्वं दिश वा न वाऽस्मिन् ।
न लोकवच्चिन्तय नस्तु वप्यो यत्त्वं वयं चापि भुजङ्गभोग्याः ॥ ९० ॥

कान्तासु व्याकुलीभावकरणं नोचितं मम । जगत्प्राणस्य मत्वेदं जडकातानुराग्यभूत् ॥ ९१ ॥
अहो कालगतिश्चित्रा यन्नः श्रीनाथचेतसः । जडस्थितं हसत्येतज्जडजातमपि स्वतः ॥ ९२ ॥
कथं त्वं पाथोज प्रथितमनिशं शम्बरजमित्यशङ्कं निर्लज्जं भवसि हितकृच्छम्बरिरिपोः ।
तवैतद्वा योग्यं जडमधुपसङ्गाहितहृदः पितृद्वेष्ट्रा स्नेहस्त्रिजगति लघुत्वाय महताम् ॥ ९३ ॥
रे नीरज द्विजगुणोल्लसितान्तरङ्ग श्रुत्यर्हतामुपगतं हि सुहृक्समाजे ।
नित्यामृतोज्ज्वलितवृत्त्यसि तन्न युक्तं सर्वात्मना तव परातनुतापदानम् ॥ ९४ ॥
नालीकरम्यरसिकोऽसि सदाम्बुज त्वं सत्कीर्तिशालिभुवने जनुराश्रितो हि ।
कृष्णानुरक्तहृदयः प्रमदैकभूमिस्तस्माद्वयं तव पदं ध्रुवमागताः स्मः ॥ ९५ ॥
मृष्ट्वा वियोगफलिकां लिपिमेतदीये भालेऽधुना लिख सुखोदयसङ्गमार्थाम् ।
पद्मैवमद्य वद पद्मभवं यतोऽसौ पुत्रस्तस्तव वचस्तदलङ्घनीयम् ॥ ९६ ॥
स्तोत्रं मृषाऽल्पधिषणे कुरुषे किमस्य पद्मस्य नेदमुपयोगकृदस्मदादेः ।
अस्त्रीप्रगल्भमभिधानमिहास्य घण्टाघोषेण गर्जति पुराणकवीन्द्रवाणी ॥ ९७ ॥

अत्यनभिज्ञे कुमुदिनि किं नः खिन्ना निरीक्ष्य हससि मुधा । मत्पतिवंशजरीतिस्त्वीदृगसाविति कथं न जिह्रेषि ॥ ९८ ॥
कामिन्यो विविधा विहाररसिकाः कान्ताः सकान्ता अपि दृष्टास्तत्र कुमुद्वतीव भुवने दृष्टा न धृष्टा परा ।
यज्जाग्रत्यपि सन्निधावलिजने सद्देशिकेऽस्मज्जने कामं याऽधिकबन्धजातललितोल्लासा सुखं मन्यते ॥ ९९ ॥
एका मित्रपदानुरक्तहृदयाऽन्या राजमान्या तथा कीर्तेरास्पदमाश्रिते समसुभे सत्यं तथाऽपीक्ष्यताम् ।
एका म्लानमुखी प्रसन्नवदना त्वन्येत्यतो निश्चितं नैकात्मा समयः कदापि घटते कस्माऽप्यनौपाधिकः ॥१००॥

सूर्यालङ्कृतमिन्दिराश्रितमिह प्रोद्यद्विधिश्रीकमप्यब्जं सम्प्रति दृश्यते गतरसं म्लायन्मुखं दीनवत् ।
यद्दोषाकरसङ्गरागि कुमुदं सानन्दमामोदते तत्कार्यं सुकृतं किम यदथवा श्रेयोऽर्थिभिः सज्जनैः ॥ १०१ ॥
सूर्यादरं कुमुद रे कुरु पद्म रे त्वं प्रोद्यद्द्विजेशभजनं भविता ततो वाम् ।
सौख्यं सदा किमथवा विधिरेव तादृग् यत्तादृशोऽपि हि वयं भृशमीदृशाः स्मः ॥ १०२ ॥
त्रिजगत्पतिदुर्धरो वियोगावसरः कान्तजनस्य मन्महे यत् ।

दिवसेशवियोगतोऽब्जिनीयं जडजाताऽप्यनुतापमेति कामम् ॥ १०३ ॥
पद्मिन्यपीयं प्रियविप्रयोगा दुःखं वताऽस्मत्सममेव भुङ्क्ते ।
म्लानाननाऽम्लानसमग्रपत्रा याऽऽस्ते यतो जीवनमात्रवृत्ति ॥ १०४ ॥
मित्रपादविरहेण पद्मिनि त्वं वयं च सममेव दुःखिताः ।
तत्कुतोऽस्मदवलोकनह्रियाऽधोमुखी बत जले निमज्जसि ॥ १०५ ॥
त्वं पद्मिन्यतिपुण्यवत्यसि यतो दुर्धर्षतापापहस्वापोद्रेकनिमग्नवर्तनतया कालस्त्वया नीयते ।
अस्माकं तु न मित्रपादविरहक्लेशाग्निभाजां पुनः प्रारब्धाद्भगवानिव क्षणमिह स्वापोऽपि दृग्गोचरः ॥ १०६ ॥
त्वं सर्वतोमुखगतिर्भवसीति कर्त्री केनाप्युपायविधिना तनुतापशान्तेः ।
नित्या द्वितीयमुखभाज इहैकचित्ताः कुर्मः किमब्जिनि वदात्र कमप्युपायम् ॥ १०७ ॥

मित्रद्विषमुरीकरोष्यरिगणान् दत्वाऽऽश्रयं पोषयस्यस्ताशङ्कमधःकरोषि भुवनं दोषाकरेऽभ्युद्गते ।
सद्यो हृष्टतरान्तरं भवसि यन्नीलाम्बुजास्मिञ्जने तत्ते युक्तमिदं न जातुचिदुदासीनस्य मन्यामहे ॥ १०८ ॥
तावत्स्मयं वह विनिन्द्य चारिवाग्भिर्हास्यं विधत्स्व वसुमद्विहिताश्रय त्वम् ।
पद्यानुरक्तहृदयोऽभ्युदितो न यावत् पश्चाद्धि कैरव ददामह उत्तरं ते ॥ १०९ ॥
सच्छ्यामद्युति भृङ्गवेणुविलसद्गीतं रसालं कृतं सत्पत्रं भुवनाप्तकीर्तिकलितं कामेषुरूपं दधत् ।
एवं नीरज रे त्वमीशसमतां सम्मन्यमानं हृदि माऽस्मान्मोहय यत्स पुरुषवरः क्लीबस्त्वमेतत्स्फुटम् ॥ ११० ॥
नैतद् गृहाण सखि मा स्पृश वारिजातं नैवास्य सङ्गतिरिहात्मसुखाय भूयात् ।
दोषाकराश्रितमिति स्फुटमाविभाव्य त्यक्तं यतः सततमेव जगज्जनन्या ॥ १११ ॥
रे रे द्विरेफ मुरलीधरकृष्णसाम्यं त्वं वर्णतोऽस्यधिगतः कृतितोऽप्यवाप्तुम् ।
यत्नस्तवैष बहुधा प्रतिभाति यस्मात् त्यक्त्वाऽनिशि भ्रमसि पङ्कजिनीः सुदीनाः ॥ ११२ ॥
लब्धो रसो यदि निशाचरसेवकेभ्यस्तद्भुंक्ष्व राजविदितं न यथाऽत्र भूयात् ।
यद्वा वृथा कथनतः किमु पानकर्तुर्मत्तस्य राजभयमेतदलीकमेव ॥ ११३ ॥
मा त्वं कुरु भ्रमत हे मधुपानमद्य माऽनल्पजल्पनमपि च्छलनं सतीनाम् ।
अर्वाक् क्वचिच्चरितमस्ति फलं तदस्य यत्पङ्कजातनिलये स्थितिमागतोऽसि ॥ ११४ ॥
अप्राशस्त्यव्याप्तौ सक्तचेता भूयादन्यस्त्वं न भूयाः कदापि ।
यस्माल्लोके षट्पदाशेषमान्या जागर्त्येषां षाट्पदी राजनीतिः ॥ ११५ ॥
पृष्ट्वाऽगाधवसुप्रभूतिविलसत्कोशं च पद्माश्रितं यत्त्वं भृङ्ग रसाशयेह मुकुदं स्तुत्युन्मुखः सम्प्रति ।
युक्तं तत्तु परं निशाचरपतावभ्यागते सम्मुखं यत्सूर्यागमने ह्यधोमुखमिति स्यात्ते किमस्मात्फलम् ॥ ११६ ॥
शिलीमुख तवाभिधा जडजनुःष्वनङ्गेन यन्न्ययोजि न ततोऽभवत्किमपमानसम्पादनम् ।
सतीत्थमपि यत्पुनर्भवसि तत्सहायः कथं कथं च जडजात्मनो मृदुगिरा करोषि स्तुतिम् ॥ ११७ ॥
विप्रराजवनितां भ्रमरैतां यद्भुनद्द्यगणितोभयभीतिः ।
साहसं त्विदमवर्ण्यमलं नः केवलं न भविता बत धातुः ॥ ११८ ॥
राजयोषित्समासक्तिस्त्वयि या भृङ्ग दृश्यते । नागस्ते किं त्विमा एव कलिकालक्षणस्थिताः ॥ ११९ ॥
मित्राङ्गनेयमिति चेतसि भृङ्ग मत्वा युक्तं न संस्पृशसि यन्निशि पद्मिनी त्वम् ।
जानंस्तथैव बत नः खलु मित्रसक्ताः शब्दच्छलाच्छलयसीति न युक्तमेतत् ॥ १२० ॥
आस्तामेतत्सखि किमनया वार्तया जारवृत्तेः सर्वस्यास्मिन्ननुभवविधेः पात्रपर्याप्तिभाजः ।
धात्रैवाराद्वयमिह कृताः सत्रपा निस्त्रपा वा प्राप्ताः सम्प्रत्यलिजलजनिप्रोदितं स्वोपहासम् ॥ १२१ ॥
विधे विदितमस्ति ते निखिलमेव यत्त्वं भवस्यशेषजनसृष्टिकृत् तदिदमेकमापृच्छ्यसे ।
अनन्यमनसः सतीर्निशि विहाय यः कौतुकं विभर्ति चतुरः क्वचित्तव पितेव संलक्षितः ॥ १२२ ॥
वेदान् वहन्नपि मुखेष्वखिलान् सदर्थप्रख्यापकाननुवसन्नपि सत्यलोके ।
अन्याङ्गनाच्छलनवृत्तिरिहासि कस्मादस्त्येव हेतुरथवा जडजातवासः ॥ १२३ ॥
सृष्टा एव विधे त्वयाऽत्र बहवो जाराः प्रजाराजिषु कश्चित्तेषु वदेद्दृगस्ति कुमतिर्यः स्वीयमातर्यपि ।
त्वत्तातप्रियभामिनीश्छलयसि त्वं रे विधातः कथं यावत्सृष्टिजनिस्मयात्समभवत् किं वा भ्रमान्धो भवान् ॥१२४॥
याति ख्यातिं स एवास्मिन् पितृधर्मानुगो हि यः । युक्तं धातस्त्वमधुना पितेवादयतां गतः ॥१२५॥
यो विद्धकण्टकपदो व्यपनीय दुःखं लोके स एव सुखयत्यपरान् भवांस्तु ।
आजन्म वृद्धपदभाक् त्वमिति क्षमं नस्तारुण्यदुःखहरणे न दयाऽभ्युदेति ॥ १२६ ॥
त्वं सर्वतोमुखगतिस्थितिरब्जयोने त्वं सर्वतश्च समदृक् चतुराननोऽसि ।
तत्ते मुरल्यपि वयं च समानरूपाः कस्मात्सुखासुखगतौ विहितो विभेदः ॥ १२७ ॥
अलं तत्परिहासेन विधेरन्यस्य कस्य वा । एकैव कारणं सख्यो मुरली सुखदुःखयोः ॥ १२८ ॥
न हि विधेरपराधलवोऽप्यहो भृशमिहोपकृतं बत तेन तु । सुलभमस्त्वधरामृतमैशमित्यचिरतो मुरली निरमायि यत् ॥ १२९ ॥
मुरलि सरलतां ते वीक्ष्य सद्वंशजत्वं निजहितमिति मत्वा त्वद्वचो दत्तचित्ताः ।
तदिह कथमिदानीं वंचयस्यस्तशङ्कं तदुचितमथवा ते धूर्तसंसर्गभाजः ॥ १३० ॥
य इह पिशुनचेताः साधुवंशोदितोऽपि मधुरकपटवाचा वञ्चयेत् कं न वाऽसौ ।
यदिह निशि वनेऽस्मिन् नः समानीय दीनांस्तिरयति यदुराजं छिद्रभागेष वेणुः ॥ १३१ ॥

समाहूय विश्रम्भतोऽस्मान् वनेऽस्मिन् नयस्यन्यथाभावमेनं मुकुन्दम् ।
सपत्न्यास्तवेदं भवत्येव योग्यं वयं चैव वाच्या मुरल्यत्र गर्ह्याः ॥ १३२ ॥
अस्मत्सुखोदयकृते प्रभुणा धृता त्वमस्मद्विरोधकृदभूरधुना वृथैव ।
तत्तेऽथवा न हि मनागपि मन्तुरत्र प्राप्तोत्तमाधिकृतिगर्वफलं तदेतत् ॥ १३३ ॥
मुरलि त्वं शृणुष्वेकं प्रभुस्तु प्रभुरेव सः । त्वमात्मानं परं पश्यन्त्याचराऽद्य यथारुचि ॥ १३४ ॥
प्राप्ते वियोगेऽपि विधेर्नियोगात् सन्त्यज्य कान्तां न हि दूरमेति ।
शृङ्गारशिक्षागुरुरेक एव मान्योऽवनौ पक्ष्यपि तद्रथाङ्गः ॥ १३५ ॥
रे रे रथाङ्ग विधिदिष्टमिमं स्वधर्ममध्यापयैनमकृतास्मदुपान्तवेगम् ।
नो चेत्तदीदृशकृतेरयशस्तव स्याद् यस्माद्रथाङ्गकर इत्यवनौ स सिद्धः ॥ १३६ ॥
सन्मित्रपादविरहात्सदृशं त्रयाणां प्रीत्यै न राजकरलालनमप्यवाप्तम् ।
एकं तु पद्ममपरो हि रथाङ्ग एष दैवाहतः समुदयः सखि नस्तृतीयः ॥ १३७ ॥
निर्हेतुकारिमतयो भुवने वने च व्याधादयो हि मृगमीनसतां प्रसिद्धाः ।
राज्ञः सदध्वविहृतेः सुगुणस्य सख्यश्चन्द्रस्य तादृगुचितं न हि चक्रजाते ॥ १३८ ॥
चक्रवाकमिमं दीनमुदासीनं निशापते । किमु तापयसि व्यर्थं पद्मिनीं नश्च तादृशीः ॥ १३९ ॥
नित्यं विष्णुपदस्थितिः शिवशिरोवन्द्यश्च तारोल्लसद्वृत्तिः सत्त्वगुणोज्ज्वलो द्विजपतिः सम्पूर्णसन्मण्डलः ।
यस्त्वं तस्य विधो तवेदमुचितं दातुं हि नोऽस्मिन् वने भ्रान्तिक्लेशहरोपदेशविलसच्छ्रीनाथसन्दर्शनम् ॥ १४० ॥
सद्रुचिस्तव सदास्ति सत्पथे मान्यता च भुवि सर्वमूर्धनि । तत्स्ववंशमिममब्ज बोधय स्पष्टमीदृगपथानुवर्तिनम् ॥ १४१ ॥
राकाप्रियः सत्पदपूर्णशोभः सर्वाभिवन्द्यः सकलागमश्रीः । सुधाधरः सोऽपि भवानपीन्दो तद्वां भिदा पीतसितांशुकत्वात् ॥ १४२ ॥
भवान् वामनेत्रं वयं वामनेत्राः प्रभो स्तद्विधो मित्रभावोऽत्र सिद्धः ।
ततोऽस्मद्विपत्तिप्रणाशे विधेये कथं रे करैस्तापमेवातनोपि ॥ १४३ ॥
बुधगुरुकविवर्याः प्रोल्लसत्सत्त्ववीर्यास्तुहिनकरविहारं कुर्वते सत्पथे च ।
हरिपदभजकानां तापदो नस्त्वमेवेत्युचितमिदमवैमो यत्कलङ्क्युच्यसेऽस्मिन्॥ १४४ ॥
त्वमसि विष्णुपदे स्थितिमागतो विधिवशेन विधो तदिहाधुना ।
कमपि तापय नोग्रकरैर्यतो बहुचलो भुवने कमलोच्छ्रयः ॥ १४५ ॥
सकलोऽस्यवनौ त्वमेव राकाधिपतेऽन्ये विकला इतीह सिद्धे ।
पुनरप्यतिदीनगोसमाना निजगोभिर्विकलाः कुतः करोषि ॥ १४६ ॥
उग्रतापहरणं प्रकुर्वतो नोग्रतापकरणं तवोचितम् । अत्र बीजमथवोग्रभानुना स्पष्टमेकदिनसङ्गतिस्तव ॥ १४७ ॥
यस्माज्जातश्चन्द्रमस्त्वं न युक्तं तस्मै दत्से चेतसे भूरितापम् ।
अस्त्वेतद्वा किं वृथैवोपदेशैर्वृत्तिः सिद्धा सर्वदैषा खलस्य ॥ १४८ ॥
जातो जातुचिदात्मजो यदि जने जायामुगस्मिन् गुरुस्तद्योगं कुरुते करेण तरसेत्येषा महत्पद्धतिः ।
त्यक्त्वा तां कुरुषेऽब्ज यन्निजकरैरस्मद्वियोगाम्बुधेर्वृद्धिं तत्र न ते त्रपेति सुवचं नित्याप्रतिष्ठाजुषः ॥ १४९ ॥
सौम्या गतिर्भुवि ममेति जनान् प्रतार्य यन्निर्भयं चरसि चन्द्र सदा निशासु ।
तद् गूढतत्त्वमवगच्छति ते स्वसापि यत्त्वद्भिया निजगृहं निशि सन्निधत्ते ॥ १५० ॥
कृत्वाऽऽभिर्वशमीशमत्र विरहं यन्मे स्वसा प्रापिता कुर्यां तत्प्रतिकारमद्य हि यथा कर्त्र्यो न भूयस्तथा ।
मत्वैवं यदि दातुमिच्छसि विधो तापं करैस्तत्कथं तत्सद्मोल्लसनाहिष्णुरसि रे तज्ज्ञातमेतन्न किम् ॥ १५१ ॥
राज्ञो मे पुरतः सदध्वविहृते रेता अकुर्वन् रतिं पुंसा नष्टभयं परेण तदिमाः शिक्ष्या बहूग्रैः करैः ।
चन्द्रैवं यदि मन्यसे न हि भवान् राजाऽस्ति राजापरो यः ख्यातोऽत्र नखेन्दुरीशपदगः श्रीराजराजस्तुतः ॥ १५२ ॥
वयं हरिसमाश्रिता लघुशशाश्रितस्त्वं शशिस्ततस्तव पराजये न खलु यत्नलेशोऽस्ति नः ।
परन्तु भगिनीरमासहज इत्युपेक्षास्पदं ततः किमिति जाल्मवद् वहसि रे प्रतापस्मयम् ॥ १५३ ॥
त्वं मातुलस्वसृजयोरनुरागभावं कंसेशयोश्चिरमपेत्य विधो प्रसिद्धम् ।
स्वस्रात्मजानुमतपक्षमुपेत्य यन्नस्तापप्रदो भवसि ते किमु जाल्मताऽन्या ॥ १५४ ॥
अपहाय रसाशया भ्रमन् भ्रमरोऽयं निशि मुग्धपद्मिनीः ।
जुषते नु बलात् कुमुद्वतीं हिमगो त्वत्सदृगीशवंशजः ॥ १५५ ॥

वृद्धोऽपि रे त्वमिह चन्द्र बृहन्निशायां निःशङ्कमेव सुरतोत्सवमातनोपि ।
यूनः सुतस्य रमणीभिरिमाभिरद्य सम्प्राप्तमर्हमपि तं सहसे न कस्मात् ॥ १५६ ॥
लोके कदाचिदपवादकरः कलङ्को जातस्तदा तदपमार्जनयत्नवृत्तिः ।
साधुर्भवत्युचितमेतदिदं विचित्रं यन्नः स्पृशन्निजकरैः कुरुषे दृढं तम् ॥ १५७ ॥
तापप्रदोऽपि मिहिरो न हि तापदाता स्वीया इमा इति विदन् भुवनेऽब्जिनीनाम् ।
त्वं शीतलोऽपि कुरुषेऽतनुतापदानमस्मासु ते सुत सतीषु विचित्रमेतत् ॥ १५८ ॥
यैरस्मास्वबलासु वर्षति करैरङ्गारमङ्गार्तिदैस्तैरेवामृतमिष्टमेष विकिरत्यब्जश्चकोर त्वयि ।
तद् बीजं किमु तादृगार्जवमुतानुष्ठानमीदृक् फलं किं वाऽस्यैव खलस्य दुर्विलसितं यत्सत्तदत्रोच्यताम् ॥ १५९ ॥
यथा वीक्षसे रे चकोर त्वमस्मांस्तथेशं दृशा पश्य योगीशवश्यम् ।
त्वया वीक्षितेऽस्मत्स्मृतिस्तस्य भूयात् ततः सिद्धमेवातुलं सद्यशस्ते ॥ १६० ॥
नीतो भेदधियं सपत्नगतया नैवं श्रिया यज्जनेष्वेषा मातृपदैकभूमिरिति साऽस्मद्धव्यकृत्सर्वदा ।
क्रीडत्यत्र सुतोऽप्ययमत्सरमसावस्मासु तस्मादसौ नीतोऽन्यत्र बलेन वै यदबलाः सर्वा वयं सम्प्रति ॥ १६१ ॥
दृष्ट्वाऽस्मद्रहितं प्रियं चिरतरोत्कण्ठाम्बुजावासिनी नीत्वा स्वीयगृहं सुखेन रमते मन्येऽधुना तेन सा ।
नो चेत् षट्चरणान् प्रियस्तुतिचणान्निष्कास्य कस्मादसौ चक्रे पत्रकवाटघट्टनमनुप्राप्तेऽपि बन्धौ गृहम् ॥ १६२ ॥
चाञ्चल्यमेवमिह तस्य निरीक्ष्य सख्यो मन्ये रमापि परमा परमाप तापम् ।
नो चेन्निशीन्दुकरकन्दलतुन्दिलायां तूष्णीं पिधाय निजसद्म कुतो नु शेते ॥ १६३ ॥
अस्मान् खेटकवासिनीरचतुरा लावण्यहीनाश्च यत् तत्त्याजासदृशीरनेकसुरतोत्कर्षं बुभुत्सुः प्रभुः ।
साध्वेतत्सरसास्तथा गुणवतीः कस्माद्रविः पद्मिनीस्तन्मन्ये पुरुषव्रतं यदबलात्यागो हि भोगोत्तरम् ॥ १६४ ॥
अरिदरकर इत्यखिले भुवने तव नाम कृष्ण जागर्ति । कथमस्मासु वियोगान्मैध्याहोस्वत्र भीतिमाचरसि ॥ १६५ ॥
स्वतन्त्रोऽहमिति श्रीशस्वगर्वोल्लासभूमयः । वयमेव कथं दीनाः सखि जाता जगत्त्रये ॥ १६६ ॥
स्वायोग्यत्वात्परित्यक्ताः प्रभुणेति विदन्नपि । किं रे व्याकुलयस्यस्मान् स्मयभृत्स्मर विस्मयाः ॥ १६७ ॥
जगन्मान्या माता भवति तव पद्माऽथ च पिता जगत्त्राता भ्राता विधिरपि जगत्सर्जनचणः ।
त्वमेवास्मिन् वंशे स्मर कथमभूः स्त्रीव्यसनदः कलङ्कोऽयं लोके जनयति ह्रियं ते न च कथम् ॥ १६८ ॥
रे रे मन्मथ पथ्यमाकलय नश्चित्ते विषादो वसत्यस्मान्नप्रकटो भवास्य हि दृशा व्यर्थं क्षणाद्दह्यसे ।
अस्मद्द्रोहकृते न ते हितमिदं वाच्यं तथाप्यापदि बोध्यः शत्रुरपीति योजयति नः सन्मार्गशैली श्रुतिः ॥ १६९ ॥
त्रिलोचनविलोचनेन च यदा प्रदग्धस्तदा विधाय करुणां पुनस्त्वमसि काभिरुज्जीवितः ।
बलं कतममाश्रितो जयसि वा जगत्तत्स्मर स्मर त्वमसि बुद्धिमान् किमिति जाल्मवच्चेष्टसे ॥ १७० ॥

कृष्णप्रिया

हे चूत (रस मय फल वाला आम्र ?) हे प्रियाल ! हे पवस ! हे अशन ! (फल एवं पुष्प वाले वृक्ष) हे जामुन ! हे कोविदार ! हे अर्क ? हे बिल्व वृक्ष ! (फलवाले वृक्ष) हे वकुल ? (वोरसली) हे आम्र (लंगड़ा राजापुरी हाफुस आदि फल वाले वृक्ष) हे कदम्ब ! हे नीप ? और जो निरंतर श्रीयमुनाजी के तट पर विराजने वाले परोपकार परायण जीवन वाले सारे तरुवर ? आप तो दयालु परोपकार परायण हो और हम प्यारे श्रीनन्द दुल्हारे के वियोग से आत्मरहित बन गई है उनको श्रीकृष्ण का पता लगा दो कि वे कहाँ है ॥ ५ ॥

किं ते कृतं क्षिति [1]तपो बत केशवाङ्घ्रिस्पर्शोत्सवोत्पुलकिताङ्गरुहैर्विभासि ।
अप्यङ्घ्रिसम्भव उरुक्रमविक्रमाद् वा आहो वराहवपुषः परिरम्भणेन ॥ १० ॥

कर्दमक्षमा

अन्वयः—हे क्षिति ! वत ? ते, किम्, तपः, कृतम् ? केशव, अङ्घ्रिस्पर्शउत्सवउत्पलितअङ्गरुहैः, विभासि ! (अयं ते उत्सवः) अपि ! उरुक्रमविक्रमात्, अङ्घ्रिसंभवः ! वा, वराहवपुषः, परिरम्भणेन, आहोस्वित् (वर्तते, किम् ?) ॥ १० ॥

---

१. शुभं–विज. । २. वपुषा–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे क्षिति क्षिते त्वया किं तपः सुकृतं कृतं या त्वं केशवांघ्रिस्पर्शोत्सवा केशवस्यांघ्रिस्पर्शेनोत्सवो यस्याः सा । कुतः । अङ्गरुहैरुत्पुलकिता रोमांचिता विभासि शोभसे ! तत्र विशेषं पृच्छन्ति । अपि किमयमुत्सवोंघ्रिसंभवोऽधुना तवैकदेशांघ्रिस्पर्शसंभवः यद्वा नैतावत्किं तु उरुक्रमविक्रमात्पूर्वमेव त्रिविक्रमस्य पदा सर्वाक्रमणात् । आहो अथवा नैतावदेवापि तु ततोऽपि पूर्वं वराहस्य वपुषः परिरम्भणेनेति अतस्त्वया नूनं दृष्टस्तं दर्शयेति ॥ १० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

निर्जोतिविज्ञापनाय विवशतया भूमौ निपत्योचुः—हे क्षितीति । गुणाभाव आर्षः । उत्सवः कथं ज्ञात इत्याशंकते—कुत इति । अंगरुहैः रोमभिः । तत्र उत्सवे । एकदेशे श्रीकृष्णांघ्रिस्पर्शेणोद्भूतः । अथ वार्थको यद्वेति द्वितीयो विकल्पः । आहोस्विदित्यर्थे तृतीयो विकल्पः । यद्वा—वरमाहवं सुरतसंग्रामं पृष्णातीति तस्मान्नंदकिशोरादेवेति । इह केशवेति प्रशस्तकेशं श्रीकृष्णमेव वक्ति गोपीनामर्थांतरस्यानभीष्टत्वादिति विजयध्वजः ॥ अहो किमेत विष्णुसमाधिमत्त्वादस्मत्प्रश्नं न शृण्वन्ति, किं वा तीर्थवासिनोऽप्यमी कठोरा एव, यतः किमपि न प्रतिवदन्ति, हंहो के जानन्ति के वा तं न जानन्तीत्यनिश्चितत्वात्तीर्थवासिनोऽमी कथं वृथा निन्द्यन्ते यो जनस्तमपश्यज्जानाम्यवेति निश्चिततत्त्वो भवति स पृच्छ्यतामिति कयाचिदुक्ते, प्रियसखि स एव जनः खलु कस्तं किं त्वं जानासीति सर्वाभिः पृष्टा सा तर्जन्या भूमिं दर्शयामास । ततश्च सत्यमेव त्वं ब्रूषे यत्र तत्र स वर्तते सा पृथिव्येवेति पृथिव्या अस्यास्तद्विच्छेदो नास्तीति कृष्णस्य पितृवर्गसखिवर्गप्रेयसीवर्गदासवर्गेभ्यो विरहदुःखाऽनमिज्ञत्वात्पृथिव्येव धन्येत्यतोऽस्याः पूर्वपूर्वेष्विव प्रश्नो न घटते, किं त्वस्याः प्राचीनं तप एव जिज्ञास्यं, यत्कृत्वा कृष्णविरहात्यंताभाववत्या वयमपि भवाम इति विमृश्य पृच्छंति—किमिति । हे क्षिति क्षिते त्वया किं तपः कृतम् , यतस्त्वं केशवस्यांघ्रिस्पर्शने उत्सवो यस्याः सा त्वं विभासि । यतोऽङ्गरुहैस्तृणांकुरैरुद्गच्छद्भिरुत्पुलकिता उत्कृष्टपुलकयुक्ता यत्र तत्र स वर्तते तत्रैव त्वामंघ्रिभ्यां स्पृष्ट्वै तिष्ठतीति कृष्णांगसंगसुखं तव रात्रिंदिवं व्याप्यैव यतोभूत्तत्तपो वक्तुमर्हसि । वयं विरहिण्यो दुर्भगास्तच्छ्रुत्वा कृतार्थी भवाम इति भावः । तदनुवाणां तामभिलक्ष्य पुरावृतस्मरणात्स्वयमेवाभ्यूहंति–अपीति । उरुक्रमस्य त्रिविक्रमदेवस्य विक्रमात् योंघ्रिसंभवोंघ्रिप्राप्तिः 'भूप्राप्तौ' संपूर्वः । तत्र तदीयमहाभारसहनलक्षण यत्तपस्तदेव किमित्यर्थः वै इति निश्चये, पादपूरणे वा । आहोस्वित् महावपुषः परिरंभणेन तदीयदृढपरिरम्भोत्थपीडाप्राप्तिलक्षणं यत्तपस्तदेव किमित्यर्थः । अन्याभिर्दुलंभं तवैतदुत्सव प्राप्तिसाधनं यत्तपस्तदपि स्त्रियास्तव पुरुषसंगलक्षणत्वात्सुखमयमेवेति नास्ति त्वत्तोन्या धन्येति भावः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं पदवीप्रार्थनेन पदवीस्मरणाद्भूमौ दृष्टिं निधाय तस्याः सर्वव्यापकत्वेनावस्य तद्दर्शनं सम्भाव्य तस्यां स्निग्धदूर्वांकुराद्युद्गमं पुलकजातं मत्वा तत्र श्रीकृष्णस्य पादाब्जस्य स्पर्शोत्सवेनैव सम्भाव्य तस्य सर्वोत्कृष्टतां सूचयन्त्यस्तस्याः सौभाग्यमधिक वर्णयन्ति । किन्ते इति । तपोऽत्र पुण्यजनकं कर्म । अपीति अङ्घ्रिसम्भवोऽयमुत्सवः । अपि किं त्रेधा विष्णुर्विचक्रम इति श्रुतिवर्णितस्य त्रिविक्रमस्य लोकत्रयाक्रमणार्थं प्रकटितैश्वर्य्यस्य श्रीविष्णोश्चरणविक्षेपेण सर्वाक्रमणाद्बभूव अपितु नैव तदानीमीदृशोत्सवशोभाविशेषासम्पत्तेः आहो न भवतु वा पादस्पर्शमात्रात् त्वदुद्धारार्थं प्रकटितमहावराहमूर्त्तेर्भगवतः साक्षात्सम्भोगेऽपि न सिद्ध इत्याहुः । आहो इति । यद्वा तप एव विकल्पयन्ति केशवांघ्रिस्पर्शसम्भव उत्सवस्त्रिविक्रमपादस्पर्शात् कारणात् किं वा वराहमूर्त्तिपरिरम्भेण कारणेन बभूव तत्कथयेति शेषः इति । श्रीकृष्णस्य तं तमतिक्रम्य माहात्म्यविशेषः सूचितः अतस्तद्विरहं कथं सहेमहीति किम्वा त्वं परमसुभगा वयं च तद्रहिता दुर्भगा एवेति कृपया तत्पदवीं सम्यग्दर्शयेति भावः ॥ १० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं निजार्त्तिविज्ञापनेनाधिक–दुःखोदयविवशतया भूमौ निपातात्; किम्वा पदवीप्रार्थनेन पदवीस्मरणाद्भूमौ दृष्टिं निधाय तस्यां स्निग्ध–दूर्वाङ्कुराद्युद्गमं दृष्ट्वा श्रीकृष्णपादाब्जस्पर्शजात–पुलकजातं सम्भाव्य (दृष्ट्वा) तस्याः परमसौभाग्यं मत्वा परमार्त्त्या आहुः—किमिति । केशवेति परमेश्वरत्वं पूर्व्ववत्; किम्वा प्रकृष्टाः केशाः सन्त्यस्येति व्युत्पत्त्या परमसौन्दर्य्यं सूचितम् । विशेषेण भासीति शोभाविशेषेणानन्यहेतुकोत्सवत्वमभिप्रेतम् , अङ्घ्रेब्जादिरूपकाप्रयोगः कोमलत्वादिगुण–नैरपेक्ष्येणापि केवलतत्तलस्पर्शमात्रेणैव तदुत्सव–विवक्षया, ईदृश उत्सवः केवलमङ्घ्रिसम्बन्धमात्रेण न स्यात्, किन्तु सम्भोगेनैवेति पक्षान्तरमाहुः—आहो इति । अन्यत्तैर्व्यञ्जितम् । यद्वा, तादृशशोभादृष्ट्या श्रीकृष्णपादाब्जस्पर्शेनैव तमुत्सवं सम्भाव्य तस्य सर्व्वोत्कृष्टतां सूचयन्त्यस्तस्याः सौभाग्यमधिकं वर्णयन्ति - अपिति । अङ्घ्रिसम्भवोऽयमुत्सवः, अपि किं त्रिविक्रमस्य लोकत्रयाक्रमणार्थं प्रकटितैश्वर्य्यस्य श्रीविष्णोः पादेन सर्व्वाक्रमणाद्बभूव ? अपि तु नैव, तदानीमीदृशोत्सवशोभाविशेषासम्पत्तेः । अहो न भवतु वा पादस्पर्शमात्रात्त्वदुद्धारार्थं प्रकटित–महावराहमूर्त्तेर्भगवतः साक्षात्सम्भोगेऽपि न सिद्ध इत्याहुः —आहो इति । यद्वा,

अङ्घ्रिसम्भव उत्सवस्त्रिविक्रमपादस्पर्शात् कारणात्, किंवा वराहमूर्त्तिपरिरम्भणेन कारणेन बभूव, तत् कथयेति शेषः। इति सर्व्वथा श्रीकृष्णस्य तत्तत्सकाशान्माहात्म्यविशेषः सूचितः; अतस्तद्विरहं कथं सहेमहीति; किंवा त्वं परमसुभगा, वयञ्च तद्रहिता दुर्भगा एवेति कृपया तत्पदवीं सम्यग्दर्शयेति भावः॥ १०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अङ्गरुहैः अङ्घ्रिसम्भवैः अंघ्रिसंस्पर्शसम्भवात्॥ १०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किमिति। हे क्षिति क्षिते! त्वया किं तपः कृतमन्यथेदं न घटते इत्याहुः या त्वं केशवस्यांघ्रिस्पर्शेन उत्ससवो यस्यास्तथाभूता कुतः अङ्गरुहैरुत्पुलकिता रोमाञ्चिता विभासि शोभसे उदञ्चितानि तृणान्यालक्ष्य तेन रोमाञ्चस्तत्र हेतुः केशवांघ्रिस्पर्शः तत्र च हेतुः प्राक्तनं तपश्चेति सम्भाव्याथोत्सवे हेत्वन्तराण्यपि सम्भावयन्ति। अपि किमयमुत्सवोंऽघ्रिसंभवोऽधुनैकदेशे भगवदंघ्रिस्पर्शसम्भवः किंवा पूर्वमेव उरुक्रमस्य त्रिविक्रमस्य विक्रमात् पदा सर्वाक्रमणाज्जातः अथवा ततोऽपि पूर्वं वराहवपूषो भगवतः परिरम्भणेनालिङ्गनेन जातः॥ १०॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हे क्षिति ते त्वया किं शुभं तपोलक्षणं कृतं पर्याप्तमङ्गोपाङ्गपूर्णं शुभं ते तव किं वशमन्त्रितं सत्कारपूर्वकं व्यावृत्तमस्तीत्यर्थः युगे क्षयान्ते पर्याप्ते कृतं क्लीबे हितेऽर्थवदिति यादवः खेदानुकम्पासन्तोषविस्मयामन्त्रणेवतेत्यमरः अस्तीति कथमवगम्यते इत्यत्राहुः केशवेति। केशवस्य सुकेशभारस्यांघ्रयोः स्पर्श एवोत्सवस्तेन उत्पुलकितैः ऊर्ध्वमुखोल्लसितैः अङ्गरुहैः रोमलक्षणैर्वृक्षैः विभासि यत्तस्तदिति शेषः यद्वा केशवाङ्घ्रिस्पर्शेतोत्सवा प्रकृष्टप्रसवा सती त्वमङ्गरुहैर्वृक्षैः उत्पुलकिता रोमाञ्चिता विभासि यद्वा अङ्घ्रिस्पर्शनलक्षणेनोत्सवेनोत्पुलकिताङ्गरुहैरंकुरितपुष्पितफलितैर्वृक्षैः हे अंघ्रिसम्भवे नारायणश्रीपादसम्भवे उत्पन्ने अपि पद्भ्यां भूमिरिति श्रुत्या लोकसम्भाविते उरुक्रमस्य त्रिविक्रमस्य विक्रमात्पादविक्रमणात् अङ्गरुहैः उत्पुलकितैर्विभासि वा आहोस्वित् वराहवपुषा नारायणेन कृतेन परिरम्भणेनालिङ्गनेनोद्धृतिलक्षणेन केशाद्वोऽन्यतरस्यामिति सूत्रेण शोभमानाः केशा अस्य सन्तीति मत्वर्थेव प्रत्ययो विधीयते अर्थान्तरविवक्षायां गोपीनामनभीष्टत्वम्॥ १०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

हे सख्यः अमी तावन्निःस्पन्दतया तदेकध्याननिष्ठा अस्माकं वचनमपि न शृण्वन्ति किं पुनः कथयिष्यन्ति तदेतान् हित्वा क्षितिमेव पृच्छामः इयं तावत्तद्विज्ञैव यत्र यत्र गच्छतु नास्याः अगोचरः स दृश्येत च तद्देशचरत्वगमकं पुलकमस्या इति तथा कुर्वन्ति। किन्ते कृतमित्यादि। हे क्षिति ते त्वया किं तपः कृतं ननु तपः कृतमिति कथमनुमितं तत्राहुः वत हर्षे केशवाङ्घ्रिस्पर्शेन उत्सवो यस्याः सा तथा त्वम् उत्सव एव कथमनुमितः तत्राहुः। अङ्गरुहप्रायैस्तरुभिः पुलकिता सती चेद्विभासि स्वसुकृतं स्वयमकथनीयमिति चेन्न कथयसि तदस्याभिरेव तत्कथ्यते शृण्यित्याहुः। अपीत्यादि। उरुक्रमो वामनस्तस्य विक्रमात्पादस्पर्शाद्वा आहो वराहवपुषः वराहावतारस्य भगवतः परिरम्भणेन उभयोः कारणयोरेकतरेण भावतव्यं मिलितमेव वा एकस्य चरणस्पर्शः अन्यस्य सर्वालिङ्गनमिति तस्माद्दृष्टः त्वया श्रीकृष्णः कथ्यतां क्वास्त इति शेषः॥ १०–१३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

किन्ते कृतं क्षिति तप इत्यादि। क्षिति हे क्षिते। निवासगत्योरिति क्षयन्त्यस्यामित्यौणादिकस्ति-प्रत्ययः। तस्मादी प्रत्ययः क्षिती सम्बोधने क्षिते! त्वया किं तपस्तप्तम्, यतः केशवाङ्घ्रिस्पर्शोत्सवा। उत्सवस्य लिङ्गमाह—अङ्गरुहैर्द्रुमैरुत्पुलकिता सती विभासि, अपि प्रश्ने, एकदेशवर्त्तिनः केशवस्याङ्घ्रिसम्भवोऽयमुत्सवः, किमुरुक्रमस्य विक्रमाद् वा वामनस्य विशेषक्रमणरूपाद्भाग्यात्; अथवा वराहवपुषः परिरम्भणेन भाग्येन? अन्यथा इतस्तपस्याफलमेतत्ते न भवतीति भावः॥ १०–१३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहो किमेते विष्णुसमाधिमत्त्वादस्मत्प्रश्नं न शृण्वन्ति किंवा तीर्थवासिनोऽमी कठोरा एव यतःकिमपि न वदन्ति हं हो के जानन्ति के वा तं न जानन्तीत्यनिश्चिततत्त्वास्तीर्थवासिनोऽमी कथं वृथा निन्द्यन्ते योजनस्तमपश्यत् जानात्येवेति निश्चिततत्त्वो भवति स पृच्छ्यतामिति कयाचिदुक्ते प्रियसखि स एव जनः खलु कस्तं किं त्वं जानासीति सर्वाभिः पृष्टा सा तर्जन्या पृथिवीं दर्शयामास ततश्च सत्यमेव त्व ब्रूषे यत्र तत्र स वर्त्तते सा पृथिव्येवेति पृथिव्या अस्यास्तद्विच्छेदो नास्तीति कृष्णस्य पितृवर्गसखिवर्गदासवर्गेभ्योऽपि विरहदुःखानभिज्ञत्वात्पृथ्व्येव धन्येत्यतोऽस्यां पूर्वपूर्वेष्विव प्रश्नो न घटते किं त्वस्याः प्राचीनं तप एव जिज्ञास्यं यत्कृत्वा कृष्णविरहात्यन्ताभाववत्यो वयमपि भवामेति विमृश्य पृच्छन्ति। किमिति। हे क्षिति क्षिते! त्वया किं तपः कृतं यतस्त्वं केशवस्याङ्घ्रिस्पर्शेन उत्सवो यस्याः सा त्वं विभासि यतोऽङ्गरुहैस्तृणांकुरैरुद्गच्छद्भिरुत्पुलकिता उत्कृष्ट-

पुलकयुक्ता यत्र तत्र स वर्तते तत्रैव त्वामङ्घ्रिभ्यां स्पृष्ट्वैवतिष्ठतीति कृष्णाङ्गसङ्गसुखं तव रात्रिंदिवं व्याप्यैव यतोऽभूत्तपो वक्तुमर्हसि वयं विरहिण्यो दुर्भगास्तच्छ्रुत्वापि कृतार्थी भवामेति भावः। तदब्रुवाणां तामभिलक्ष्य पुरावृत्तस्मरणात् स्वयमेवाभ्यूहन्ति। अपीति। उरुक्रमस्य त्रिविक्रमदेवस्य विक्रमात् योऽङ्घ्रिसम्भवः अङ्घ्रिप्राप्तिः भूप्राप्तौ सम्पूर्वः तत्र यदिमहाभारसहनलक्षणं यत्तपस्तदेव किमित्यर्थः। वै इति निश्चये पादपूर्णे वा आहोस्वित् महावराहवपुषः परिरम्भणेन तदीयदृढपरिरम्भणोत्थपीडाप्राप्तिलक्षणं त्तपस्तदेव किमित्यर्थः। अन्याभिर्दुर्लभं तवैतदुत्सवप्राप्तिसाधनं यत्तपस्तदपि स्त्रियास्तव पुरुषसङ्गलक्षणत्वात् सुखमयमेवेति नास्ति त्वत्तोऽन्या धन्येति भावः ॥ १० ॥

श्रीरसिकाह्लादिनी टीका

इतोऽप्युत्तरमलब्ध्वा पदवीकथनेन दृष्टिपथमवतीर्ण-क्षितिं दृष्ट्वा रोमाञ्चितत्वात्त्वयेवावश्यं दृष्ट एव श्रीकृष्ण इति संभाव्याहुः किं ते कृतमिति। हे क्षिति ते त्वया किं तपः कृतं, यतः परमसौभग्यवत्यसि। ननु भवतीभिः कथं ज्ञातं तत्राहुः केशवेति कश्च ईशश्च केशो तौ वसयति, अन्यस्य का कथा प्रशस्तकेशयुक्तस्य वा तस्यांघ्रिस्पर्शनोत्सवो यस्याः सा त्वं विभासि। तत्र लिङ्ग अङ्गरुहैस्तृणाद्यंकुरैरुत्पुलकिता रोमाञ्चिताऽतीव शोभसे। रोमाञ्चं दृष्ट्वा भावोत्पत्तिः सम्भाव्यते—भावमन्तरेण रोमाञ्चो न भवति। अंघ्रिस्पर्शमन्तरेण भावोत्पत्तिर्न भवति। अतो नूनमंघ्रिस्पर्शो नास्ति तत्रोत्प्रेक्षन्ते अपीति सम्भावनायाम् अयमुत्सव इदानीमेवांघ्रिस्पर्शसम्भवः। एतावदेव न तत्कुतः नवनीतादपि कोमलांघ्रिस्पर्शमात्रादयमुत्सवो न सम्भाव्यते। यतस्त्वं कोमलत्वादिगुणनिरपेक्षासि। अथवा नैतावत् इतः पूर्वं उरुक्रमविक्रमात् त्रैलोक्याक्रमणार्थमाविष्कृतत्रिविक्रममूर्त्तेः पादेन सर्वाङ्गाक्रमणाद्धेतोरयमुत्सव इत्यपि न तदानीमीदृशशोभाया असंयते। आहोस्वित् पादस्पर्शमात्रजनितो न भवति किं तु ततः तूर्व तवोद्धरणार्थमाविष्कृतवराहमूर्त्तेर्भगवतः सर्वाङ्गेषु परिरम्भणमालिङ्गनं वा अयमुत्सवश्चरणसम्भव इत्यत्र सन्देहं नास्ति, कारणविशेष पृच्छामस्त्वं परमसुभगासि दुर्भगानामस्माक कृपया पदवीं दर्शयति ॥ १० ॥

विशुद्धरसदीपिका

ततश्च पदवीप्रश्नेन पृथिवीमनुदत्तदृष्टयः प्रियनर्म्मसख्यः स्निग्धदुर्वांकुराद्युद्गमरूपं तच्चरणाब्जस्पर्शसञ्जातपुलकजातं मत्वा तामप्यात्मपदग्राहिणीमभिमन्यमाना आहुः। किन्त इति। हे क्षिति क्षिते इत्यर्थः छान्दसमिदं यद्वा इदं तोयं क्षितिः क्षिती इति शब्दप्रकाशात् तत्सम्बोधनमिदं सर्वेषां निवासस्थानत्वाद्यत्र कुत्रापि स्थितस्त्वया ज्ञायत एवेत्यनपह्नवाय वस्तुतस्तु यत्र प्रसूनशयनस्थलीयमिति गम्यते यथा च भावामृते—

प्रम्लिष्टपुष्पोच्चयसन्निवेशां ताम्बूलरागाञ्जनचित्रिताङ्गीं। व्यक्तीभवत्कान्तविलासचिह्नां शय्यामपश्यन्स्वसखीमिवाल्यः॥

इति ततश्च तत्क्रीडास्थानस्यास्य स्वपरिचितत्वसूचनेन तदन्तरङ्गत्वाभिमानेन ससोत्प्रासमाहुः। वत अहो ते त्वया किं तपः कृतमित्यभिलाषः या त्वं केशवांघ्रिस्पर्शोत्सवेति प्रशस्ताः केशाः सन्त्यस्या इति केशवा स्वाङ्गान् ङीप्विकल्पः तस्या अंघ्रिस्पर्शनोत्सवो यस्याः सा यद्वा केशाः प्रसाधनीयाः सन्त्यस्येति केशवः तस्य च तेषां प्रसाधनाय ततश्चान्निविष्टस्य प्रपदमात्रस्पर्शनानन्दोदयान्नवांकुरोद्गरूप उत्सवो यस्याः सा एवं च क्षितेरपि सहचरीत्वं व्यञ्जितं यत् उत्पुलकिन्ताङ्गरुहैर्विभासीति उदिति सात्त्विकानां सूद्दीप्तत्वं ततश्चानन्दाधिक्यं वेति सम्भावनायाम् अपिचेत्यर्थः। उरुक्रमविक्रमात् उरुबहुतरस्तत्रतत्रोपलभ्यमानत्वात् क्रमः विक्रमः सच केशवेषाय पुष्पावचयार्थमितस्ततो **भ्रमणं तच्च** द्वयोरपि गोपनायैकत्वेन पुंस्त्वेनचाभिधानम् अथवा उरुक्रमयोर्विक्रमादिति समासः अयमेव केलिना मालङ्कारः तदुक्तं विहारे सह कान्तेन क्रीडितं केलिरिष्यत इति यथालङ्कारः अपि सह विहरन्त्या कृष्णमुल्लङ्घयरम्ये सुरभिणि कुसुमेऽहं पूर्व्विका कौतुकेन अनियतपदभङ्ग्या पार्श्वसङ्घट्टनेन स्तनहतिपरिभूतो राधयाऽसौ व्यधायि ततश्च परस्परसङ्घट्टनेन तारुण्योदयान् मदनमदाविष्टया यदनुष्ठितं तत्सम्भाव्याहुः। आहो वराहवपुषः परिरम्भणेनेति। आहो ज्ञातमिति सोत्प्रासं पतिर्वरयितावर इत्यभिमानकोशात् वरेण निजवल्लभेन साकं य आहवः कृतस्यानुकरणरूपः सुरतसंग्रामः तं पुष्णातीति वपुट् ववयोरैक्यात् तस्य वराहवपुषः अर्थात्तया कृतेन परिरम्भणेन एवञ्च प्रागल्भ्य सूचितं तद्दर्शितमलङ्कारे शिलष्टा शिलष्यति गोकुलेन्द्रतनयेनाचुम्बिता चुम्बति स्वच्छन्द लिखितार्नखैर्नखपदैराभूषयत्यङ्कक शिक्षित्वा तत एव पुष्पधनुषः संग्रामविद्यामियं तस्य क्षोभकरी यदेव तादयं विद्यागुरुक्षोभिकेति यद्वा वेषपरिवर्त्तनेनावेशात्पुरुषायित संभाव्याहुःतदुक्तं तत्रैव सीमन्तमस्य दयितस्य बबन्ध वेणीं राधा शिखण्डवलयैः स च मालिमस्याः अन्योऽन्यवेषपरिवर्त्तनकौतुकेन द्वाभ्यामलभ्यत विशेषतः प्रमोदः अयं लीलाख्यानुभावः तदुक्तम् अङ्गैर्वेषैरलङ्कारैर्लीलाकान्तानुकारितेति तदेवमव्यवतश्लोके सुरतान्तवर्णानान्यथानुपपत्त्यातिरहस्यो विहारोऽत्रानुसन्धेयः प्रकटार्थे तु न कश्चिच्चमत्कार इत्युपेक्षितः ॥ १० ॥

श्रीरामनारायणकृता भावभावविभाविका

अग्रे गच्छन्त्यः पदवीमन्वेषयन्त्यः क्षितिं दृष्ट्वा ताञ्च सर्वसहां सर्वापराधसहनेऽपि क्षि निवासगत्योरित्यस्मात्सर्वनिवासगतिप्रदां सर्वोपकारिणीं सर्वाधारां व्यापकतया चावश्यं प्राप्ततत्संयोगाम् उत्फुल्ललतातृणादिना कृष्णाङ्घ्रिस्पर्शजातरोमहर्षो

सम्भाव्य पूर्वं बहुभ्योऽप्राप्तोत्तरत्वेन प्रार्थनायां लघुत्वेन स्वार्थासिद्धिं मत्वा तपः श्लाघनेनैव स्वकार्य्यसिद्ध्यै तां प्रोत्साहयन्ति **किन्ते कृतमिति**। हे क्षिति ते त्वया किन्तपः कृतं तन्नो ब्रूहि यतो वयं स्वाभाग्यात्कृष्णसङ्गममप्राप्य दुःखिता भ्रमामस्त्वन्तु **पूर्वमुरुक्रमविक्रमात्**—

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदामति।

श्रुतिसिद्धादपि ते तदङ्घ्रि सम्भव उत्सवो जात आहो इति अथ बराहवपुषस्त्वदुद्धारार्थमेवावतीर्णस्य परिरम्भणेन संभोगातिशयेन ते उत्सवः संभूतः अधुना तु सर्वतोऽतिशायिकेशवस्य कृष्णस्यांघ्रिस्पर्शेन य उत्सवस्तेऽत उत्पुलकिताङ्गरुहै रोषहर्षैर्विभासि विशेषेण शोभसे एवं तत्तपोमहिमवर्णनेऽप्यसंभाषमाणां दृष्ट्वा भगवत्संगमेन जातमदां सापत्न्येनाभिभवन्तीं वा पतित्रयसंगमश्रवणेन जातलज्जाम्बा संभाव्य तूष्णीं ययुः ॥ १० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवमतिविकलमानसाः प्राप्तात्यन्तदैन्या मार्गकथनप्रार्थनयोर्मार्गस्मरणाद्भूमौ निहितदृष्टयस्तस्याः सर्वत्र सत्त्वेनावश्यन्तदर्शनं सम्भाव्याहुः। किमिति। हे क्षिति ते त्वया किं कीदृशं किंनामधेयं तपः कृतं यद्यप्यस्माभिरपि तपः कृतमेव तथापि तादृशफलानुकूलं न कृतमतो महान् खेद इत्याशयेनाहुर्वर्तेति यतो या त्वं केशवस्यांघ्रिस्पर्शेनोत्सवो यस्याः सा कश्च कश्च ईशश्च केशाः ब्रह्मविष्णुशिवास्तेऽस्यावश्यतया सन्तीति केशवः केशान्नियामकतया वा गच्छतीति वा तथा च तादृशस्य परमात्मनोंऽघ्रिस्पर्शोत्सवो नाल्पस्य तपसः फलमिति भावः। एतज्ज्ञापकं चिह्नमाहुः। अङ्गरुहैरुत्पुलकिता विभासि विशेषेण शोभसे तत्र विशेषं पृच्छन्ति। अपि सम्भावनायां किमयमुत्सवः अंघ्रिसम्भवः संप्रति तवैकदेशे चरणस्पर्शसम्भूतः यद्वा नैतावत् किन्तु पूर्वमेवोरुक्रमस्य वामनस्य पदा सर्वाक्रमणात् अधुना भगवच्चरणस्पर्शनास्मृतत्वात् अथवा नैतावदेव अपितु ततोऽपि पूर्वं वराहस्य वपुषा परिरम्भणेनालिङ्गनेन तदानीमंघ्रिस्पर्शात्स्मृतेरेव तथाचास्मत्साजात्यं भवत्या अप्यतस्तं पश्यन्ती त्वं दर्शयेति भावः। अनभिज्ञापक्षे अहो किमर्थं तीर्थवासिनोऽमी निन्द्यन्ते यस्तमवश्यं जानाति स प्रष्टव्य इत्युक्तवतीनां मध्ये काचित्तर्जन्या क्षितिं सूचयामास ततः सर्वास्तामाहुः। किमिति। हे क्षिते त्वया किन्तपः कृतं यतः पुलकितैरङ्गरुहैरंकुरैः केशवस्याभिरूपैः केशवस्य तस्य परमसुन्दरस्य कृतस्यांघ्रिस्पर्शोत्सवा विभासि तादृशोत्सवजनके तपसि पृष्टेऽदत्तोत्तरान्तामुपलभ्य स्वयमेवोत् प्रेक्ष्यन्त्योऽपि अयमंघ्रिसम्भव उत्सव उरुक्रमविक्रमजनितपीडारूपतपसो त्वा अहोस्विन्महावराहवपुषः परिरम्भणजनितव्यथारूपेण तपसा यद्वा तच्चरणस्पशजनितपुण्याद्वा किम्वा तत्परिरम्भणजनितपुण्येन तथाच तत्पादस्पर्शादिरहितत्वाद्दुर्भगानामस्माकं तत्पादस्पर्शमनुभवन्ती सुभगा त्वं कारुण्यात्तन्मार्गं प्रदर्शयेति भावः। मानिनीपक्षे ऽप्येवं निवृत्ताः निवृत्तिपक्षे अपि क्षितिस्थानीयं मनः पृच्छन्ति। किमिति। केशवः परमात्मा तस्यांघ्रिरंश इवांशो जीवात्मा ममैवांशो जीवलोके जीवभूतः सनातनः इत्युक्तत्वात्तस्य स्पर्शेनोत्सवो यस्याः सा पुलकितैर्हर्षितैरङ्गरुहैः सङ्कल्पात्मवृत्तिभिर्विभासि स उत्सवः किं यथोक्तांघ्रिस्पर्शसम्भवः यद्वा उरुक्रमस्यान्तर्य्यामिणः विक्रमात्प्रेरणारूपपराक्रमात् आहोस्वित् वराहस्य वपुषः सेवनेन स्वरूपस्य परिरम्भणेनेति ॥ १० ॥

रास-रहस्यम्

१० टी—क्षिति, हे क्षिते ! इति पञ्चीकृतन्यायेन क्षितिप्रधानत्वात्, हे शरीर ! त्वया किं तपः कृतं आचरितयेन त्वं, परमात्मज्योतिः स्पर्शेन उत्सवः आनन्दः, तेन अङ्गरुहैः पुलकितं रोमाञ्चितं, विभासि विशेषेण शोभसे ? तत्र विशेषं पृच्छन्ति अपि किमयमुत्सवोऽङ्घ्रि, सम्भव ? अङ्घ्रः पादः किरणं आत्मज्योतिस्पर्शोद्भव ? उरुक्रम विक्रमाद्वा उरु महदतिशयेन क्रमणं देहबुद्धेः अतिक्रमणं तस्मात्, विक्रमात् विशेषेण प्रयासाद्वा ? आहो आहोस्वित् वराहवपुष इति वराहपुरुषः, श्रेष्ठपुरुषं लक्षयति, तस्य परिरम्भणेन "प्राप्य वरान् निबोधत।" इति श्रुत्या, श्रेष्ठपुरुषसम्मेलनेन इति ॥ १० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे क्षिति क्षिते ! त्वया किं तपः कृतम् या त्वं केशवांघ्र्युत्सवा केशवस्य ब्रह्मशिवयोरपि जनकस्य अङ्घ्रिस्पर्शेन उत्सवो यस्यास्तथा भूता यस्मादङ्गरुहैरुत्पुलकिता रोमाञ्चिता विभासि शोभसे अपि किमयमुत्सवः अङ्घ्रिसम्भवः अङ्घ्रिभ्यां त्वयि अधुना अर्पिताभ्यां सम्यक् भवो जन्म यस्यैवंभूतः किंवा उरुर्विततः क्रमः पादविन्यासो यस्य स तथा तस्य वामनस्य विक्रमात् चरणेनाक्रमणात् आहो किं वा वराहवपुषः क्रोडशरीरिणः परिरम्भणेन आलिङ्गनेन तस्मात्त्वया दृष्ट एवातस्तं दर्शयेति भावः ॥१०॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे क्षिति महि। क्तिजन्तत्वात्कृदिकारादक्तिन इति ङीप्। ईकारान्तः शब्दः। ते त्वया किं शुभं तप आदिकं कृतम्। केन कार्येणोह्यतेऽस्मच्छुभं युष्माभिरित्यत आहुः केशवेति। केशवस्याङ्घ्र्योः पादयोः स्पर्शः सम्बन्धस्तज्ज उत्सवस्तेनोत्पुलकिता सञ्जातरोमाञ्चा अङ्गरुहैर्दूर्वादिभिर्विभासीति। बत तव सन्तोषोऽस्माकं खेद इत्यर्थः। अङ्घ्रिसङ्ग उत्पुलकिततायां मम तयो

कोऽनुबन्ध इति न वदाम्बेति तामाहुः ॥ हे अङ्घ्रिसम्भव इति । अङ्घ्रिभ्यां सम्भवतीति सा तथा । पद्भ्यां भूमिरजायतेत्यादेः । तातपेक्षया भीतिः प्रबलेति हे अबले तवेयं पुलकिततावति पृच्छन्ति । उताप्युरुक्रमस्य त्रिविक्रमस्य विक्रमात्पादविक्षेपात्तद्वारस्य प्रागनुभूतत्वादिदानीमप्रदर्शने सन्तोषकार्यस्य पुनरपि तथा कृतवांश्चेत्सहनं न भवेन्ममेति भूयत एव वेति । सर्वमपि सर्वसहेऽकिञ्चित्करमिति स्वानुभूतं पक्षमुत्प्रेक्ष्य प्रेक्षावत्यः पृच्छन्ति । आहो वराहवपुषा वराहस्य वपुर्यस्य तेन हरिणा कृतेन परिरम्भणेनालिङ्गनेनेति वा वरेणासुरवरेण सह त्वदुद्धृतये आहवं युद्धं पुष्णाति तत्पोषस्तु तन्मारणरूप इत्यथवाऽऽहवेन तन्मरणकारणेन समरेण पुष्णाति त्वामिति तेनेत्यावर्त्याऽन्वय इति ॥ १० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमतिविलापे दीनतायामाविष्कृतायां भूमौ भगवच्चरणारविन्दानि दृष्टानि तदा भूमिं स्तुवन्ति । किंते कृतमिति । हे क्षिति ते त्वया किंवा तपःकृतमस्माभिरपि यतः कृतमेव परंनैवं फलमनुभूतं सर्वथा पुण्यव्यतिरेकेण नेष्टसिद्धिःसुतरां भगवल्लक्षणास्वस्य तदभावमाशङ्क्य बतेति खेदेन केवलं तव पादसंबन्धमात्रं किन्त्वन्येऽपि भावा दृश्यन्त इत्याहुः । केशवस्य ब्रह्मादेरपि मुक्तिदातुर्ब्रह्मप्रार्थितचरणारविन्दस्य अंघ्रिस्पर्शेन उत्सवो यस्याः खेदो दृश्यत एव अन्यथा पदानि स्पटानि न भवेयुः अन्योऽप्युत्सवो दृश्यते उत्पुलकिता च सर्वत्र दूर्वांकुरा उत्थिता इति अङ्गरुहैः रोमाञ्चैः कृत्वा विशेषेण भासि उत्पुलकिताङ्गरुहैर्वा अङ्घ्रिस्पर्शोत्सवा विभासि ननु सर्वत्रैव पुलको दृश्यते यदि केशवाङ्घ्रिस्पर्शेन स्यात् तत्रैकदेशे स्यात् स्वेदवदित्याशङ्क्य हेत्वन्तरमुत्प्रेक्षन्ते । अप्यङ्घ्रिसम्भव उरुक्रमविक्रमाद्वेति । अपीति सम्भावनायामनेन चरणस्पर्शेन पूर्वस्थितचरणस्पर्शः स्मृतः सतु सर्वत्र भूमौ व्याप्तः अतस्तेन अङ्घ्रिणा सम्भवो यस्य उत्सवस्य उरुक्रमः त्रिविक्रमः तस्य विक्रमात् पदन्यासाद्वेति तत्राप्यनिर्द्धारः नहि चरणसबन्धमात्रेण सम्भागरहितेन सात्त्विकभावरूप उत्सवो रोमाञ्चो भवितुमर्हति तदर्थं पक्षान्तरमाशङ्कन्ते । आहो वराहवपुषःपरिरम्भणेनेति । अनेन स्वसमानता च वर्णिता ॥ १० ॥

श्रीसुबोधिनी-सारः

हे क्षिति गुणाभाव आर्षः । ते त्वया किं तपः कृतं बत हर्षे केशवस्यांघ्र्योः पादयोः स्पर्शेनोत्सवो यस्याः सा अंगरुहैर्वृक्षादिभिरुत्पुलकितां रोमांचितां त्वं विभासि शोभसे अयमुत्सवोऽधुनांघ्रिभ्यां संभवो जातोऽपि किम् उरुक्रमस्य वामनस्य विक्रमणाद्वा आहो अथवा वराहमूर्त्तेः परिरम्भणादालिंगनात् ॥ १० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तेभ्योऽप्युत्तरमसम्प्राप्य 'यत्रकुत्राप्यस्तु' परन्तु पृथिव्या सह वियोगासम्भवात् सर्वोपकारिणी चेयमेव प्रष्टव्या' इत्याशयेन पृच्छन्ति—किं त इति । क्षिति हे क्षिते ! ते त्वया किं तपः कृतम् ? तत्तपस आश्चर्यं सूचयन्ति—बतेति । अत्युग्रतपश्चरणे ज्ञापकमाहुः । केशवस्य कृष्णस्याङ्घ्रिस्पर्शेन उत्सवो यस्यास्तथाभूता विभासि । तत्रापि ज्ञापकमाहुः—अङ्गरुहैर्हरिततृणादिभिरुत्पुलकिता रोमाञ्चिता विभासि शोभसे इति । तत्र विशेषं पृच्छन्ति—अपीति । किमयमुत्सवः अङ्घ्रिसम्भवः इदानीं तवैकदेशतदङ्घ्रिस्पर्शसम्भूतः ? यद्वा उरुक्रमविक्रमात् पूर्वमेव त्रिविक्रमस्य पदा सर्वाक्रमणात् ? आहो अथवा नैतावत्, अपि तु ततोऽपि पूर्वं वराहावतारस्य तस्य वपुषः परिरम्भणेनेति । अतस्त्वयि तत्कृपातिशयात्त्वया नूनं स दृष्टः स्यात्, तं प्रदर्शय इति भावः ॥१०॥

अन्वितार्थप्रकाशिका

किन्त इति ॥ हे क्षिति ! क्षितेः क्तिन्नन्तादपि ङीषार्षः । बताश्चर्ये । ते त्वया किं तपः कृतं यतः त्वं केशवस्याङ्घ्रिस्पर्शेन उत्सवो यस्यास्तथाभूता विभासि तथा अङ्गरुहैर्हरिततृणादिभिरुत्पुलकिता रोमाञ्चिता विभासि शोभसे । किमयमुत्सवः अङ्घ्रिसम्भवः इदानीं तवैकदेशतदङ्घ्रिस्पर्शसम्भूतः । यद्वा । उरुक्रमविक्रमात् पूर्वमेव त्रिविक्रमस्य पदा सर्वाक्रमणात् आहो अथवा नैतावत् अपि तु ततोऽपि पूर्वं वराहावतारस्य तस्य वपुषः परिरम्भणेन ॥ १० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

किमिति हे क्षिति हे क्षिते ते त्वया किं तपःकृतं केशवांघ्रिस्पर्शेनोत्सवो यस्याः सा त्वं अंगरुहैः धान्यादीनामंकुरैरुत्पुलकिता रोमांचिता विभासि शोभमानासि अपि प्रश्ने किं अद्यैव अंघ्रिसंभवः भवत्याः कृष्णचरणस्पर्शे संजातोऽयमुत्सवोस्ति यद्वा किमुनुरुक्रमस्य वामनस्य विक्रमात्पूर्वं पादन्यासात्त्वा यमुत्सवोस्ति अहो अथवादराहव पुषोवराहमूर्त्तेर्हरेः परिरम्भणेन पुरा आलिंगनेनायमुत्सवोऽस्ति यदि उत्सवश्चेत्तर्हि त्वया नूनं दृष्टः तस्मादस्माकं तन्मार्गं दर्शयेति भावः ॥ १० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किमिति ॥ हे क्षिति, गुणाभाव आर्षः । ते त्वया, किं तपः कृतम् । तपसोऽनाचरणे इदं न घटत इत्याहुः । या त्वमिति शेषः । केशवस्य श्रीकृष्णस्य योऽङ्घ्रिस्पर्शस्तेनोत्सवो यस्यास्तथाभूता, विभासि शोभसे । कुतः । अङ्गरुहैः उत्पुलकिता असि ।

उदञ्चितानि तृणान्यालक्ष्य तेन रोमाञ्चसंभावना। तत्र हेतुः केशवाङ्घ्रिस्पर्शः, तत्रापि हेतुः प्राक्तनं तपः इति उत्सवः संभवति। अथात्रोत्सवे हेत्वन्तराण्यपि संभावयन्ति। अयमुत्सवः अङ्घ्रिसंभवः अधुनैकदेशे भगवतोऽस्याङ्घ्रिस्पर्शसंभवः, अपि किं पूर्वमेव उरुक्रमस्य त्रिविक्रमस्य विक्रमः पदा सर्वाक्रमण तस्माज्जातः, किं वा आहो अथवा, ततोऽपि पूर्वं जातेनेति शेषः। वराहवपुषः वराहवपुष्ट्वेन जातस्यास्य वपुषः, परिरम्भणेनालिङ्गनेन जातः किम्। अतस्त्वया नूनं दृष्टस्तं दर्शयेति॥ १०॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

किं ते कृतं क्षितितप इति : १०.३०.१०.

सकृदपि पदलाभो दुर्लभोऽस्माकमद्याऽजनि जगति धरित्रि प्राप्त एवासकृत्ते।
तदिह वद यथार्थं किं तपोऽकारि पूर्वं सुफलमिदमयत्नाल्लब्धमासीद् यतस्ते॥ १७१॥
अपि धरित्रि पवित्रपदाङ्किता त्वमसि तत्त्वरया स दयानिधिः।
चरति कुत्र सखा मम तद्वद प्रियतमो यतमौनरतिर्यतः॥ १७२॥
त्वमसि विष्णुपदोल्लसिताधरे विधुरपीति युवां समशोभिनो।
तदधुनेन्दुरिवार्जय पूर्णतां रुचिरकृष्णपदाङ्कनिदर्शनात्॥ १७३॥

कृष्णप्रिया

अये क्षिति हे भगवति पृथ्वी! आपने कौन सा तपोव्रत किया है जिसके फलस्वरूप आपको श्रीकेशवजी के चरण सरोज स्पर्शजन्य रोमोद्गम हो रहा है एवं अत्यन्त सौन्दर्य पा रही है! अयि पृथ्वी? क्या वर्तमान कालीन श्री दामोदरजी के चरणकमलों के स्पर्श से यह आनन्द पाया है! या वामनावतार में भूमि को नापते समय प्रभुजी का जो चरणस्पर्श हुआ उसका स्मरणजन्य आनन्द है? या तो श्रीवराह अवतार में पाताल से ऊपर उठाने के समय तुम्हें जो भगवान का समालिङ्गन मिला उस अवसर का आनन्द है! अयि धरादेवि! यह स्पष्ट बतादो कि किस अवसर का यह आनन्द है॥ १०॥

अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन् दृशां सखि सुनिर्वृतिमच्युतो[1] वः।
कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः कुन्दस्रजः कुलपतेरिह वाति गन्धः॥ ११॥

कर्दमक्षमा

अन्वयः—हे सखि! एणपत्नि?, गात्रैः, वः, दृशाम्, सुनिर्वृतिम्, तन्वन्, अच्युतः, प्रियया, सह, अपि, उपगतः, कुलपतेः, कान्तअङ्गसङ्गकुचकुङ्कुमरञ्जितायाः, कुन्दस्रजः, गन्धः, इह, वाति॥ ११॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हरिण्या दृष्टिप्रत्यासत्त्या कृष्णदर्शनं संभाव्याहुः। अपीति। हे सखि एणपत्नि अपि किमुपगतः समीपं प्राप्तः। गात्रैः सुन्दरैर्मुखबाह्वादिभिः। प्रियया सहेति यदुक्तं तत्र द्योतकम्। कान्ताया अंगसंगस्तेन तत्कुचकुंकुमेन रंजितायाः कुंदकुसुमस्रजो गंधः कुलपतेः श्रीकृष्णस्य वात्यागच्छति॥ ११॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एणपत्नि मृगजाये कान्ताया अंग उरोवयवे संगो ययोस्तौ कुचौ तयोः कुंकुमेन रंजिताया अरुणीभूतायाः। यद्वा—कान्तस्य हरेरंगसंगो यस्यास्तस्याः कुचौ तयोः कुंकुमेति पूर्ववत्। कान्तायाः कमनीयाया वेति। कुलपतिर्गोपीसमूहनाथस्तस्य। गंधोऽस्यास्तीति गंधो गंधवान्वायुः। मत्वर्थीयोऽच्। गंध इह वाति स्वयं च न दृश्यते तत्सद्भावो विज्ञायत इति व्यंग्यालंकारोक्तिः॥ ततश्चाहो हंत तेन स्वकान्तेन ध्वजवज्रांकुशादिभिश्चिह्नैर्विचित्रितांगी विहरंती स्वाधीनभर्तृका महागर्वान्धा कथमस्मांस्तमेवाचक्षीतेत्यग्रतो गत्वा कामपि हरिणीमालक्ष्याहुः—अपीति। हे सखि एणपत्नि प्रियया त्वया किमुपगतः स्वसमीपे स प्राप्तः, संबोधनपदसाहचर्यादेवात्र त्वयेति लभ्यते। एणस्य पत्नी भवंत्यपि त्वमस्मत्तुल्या तस्यैव प्रिया तमेव प्रियं मन्यसे इति भावः। यतो गात्रैर्मुखबाह्वादिभिर्वो दृशां सुनिर्वृतिमत्यानंदं तन्वन् सन् इति। दृशमित्यादरे बहुत्वम्। अच्युत इति। स्वदृगानंदलाभात्त्वया तदनुगमनादेव हेतोस्त्वत्तः स न विच्युत इति भावः। ततश्चाग्रतः स्वभावादेव गच्छन्तीं तामालक्ष्य हंहो स दृष्ट इति किं ब्रवीमि तं वो दर्शयाम्येव मदनुपदमागच्छतेति ब्रुवाणेवाग्रत इयं गच्छन्ती ग्रीवां परावृत्य मुहुरस्मान्पश्यति, तदियमेवात्र निर्दये वृंदावने दयावतीति तदनु गच्छन्त्यो दैवात्क्वापि गतां तामदृष्ट्वा हंहो कृष्णं दर्शयिष्यन्तीं हरिणी किं न दृश्यते इति पृष्टाः काश्चिदाहुः। तर्हि

---

१. मीश्वरो–विज.।

कृष्णोऽत्रैव क्वापि वर्तते हरिणी तु कृष्णाद्बिभ्यती स्वीयसूचकत्वदोषापलापार्थं क्वापि निह्नुताऽभूदिति वितर्कयन्त्यो दैवादायातं सौरभ्यमनुभूयाहो सत्यंसत्यमेतदेव तत्त्वमिति सहर्षं मुहुराहुः—कान्ताया अंगसंसस्तत्कुचकुंकुमेन रंजितायाः कुंदस्रजो गंधो वाति आगच्छतेति । अत्र कतियागात्रद्वयस्य च कुचयोश्च कुंकुमस्य कुन्दस्य च गंधस्तासां नासाभ्यामेव निश्चीयते स्मेति भावः । कुलपतेर्गोपीकुलरमणस्येति कुलपतित्वनिष्ठां परित्यज्य संप्रत्येकया कयाचित्कान्तया रममाणस्य तस्यान्यायं पश्यतेति भावः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथात्रेति विचार्यते कामप्यादाय श्रीभगवानन्तर्हितः इति व्यक्तीभविष्यदपि पूर्वं यन्मुनीन्द्रः स्वयं न स्फुटमुक्तवान् तस्यायमभिप्रायः । सतस्वपि नानाभगवदाविर्भावेषु मम स्वयं भगवति श्रीकृष्णाख्य एव तस्मिन्नाग्रहविशेष इति तथा सत्स्वपि नाना तत्तत्परिकरेषु श्रीव्रजवासिष्वेव स इति तथा सत्स्वपि तेषु श्रीव्रजदेवीष्वेव ततोऽप्यधिकतरः स इति रहस्यं सर्वेऽऽपि ज्ञातवन्त एव किन्तु तास्वपि सतीषु श्रीराधिकायामेवाधिकतमः स इति न ज्ञातवन्तः तदेतन्मदाग्रहतारतम्यञ्च तत्तदुत्कर्षतारतम्यादेव । अस्याः परमरहस्यायास्तदेतत्तु साक्षाज्ज्ञापयितुं संकुचति मच्चित्तम् । ज्ञानखलताभिया विज्ञापयितुमपीच्छति तस्मादस्याः सखीनां वचनात्तत्राप्रतीतौ च प्रतिपक्षाणामपि वचनाद्व्यञ्जनयैव वृत्त्या यथावसरं मध्ये मध्ये प्रकटयिष्यामः । यदि च जातु स्वयमप्यावेशवशात् प्रकटयिष्यामः तदा नाम तु तस्याः साक्षान्न वक्ष्यामः । एतस्यास्तत्पुनरास्तामन्यासामपि न किञ्च । व्यञ्जनावृत्तिरेव सर्वत्र नानारसप्रकाशिनी नतु मुख्या सा च यदि प्रसङ्गे अवधारिते विशेषव्यञ्जनार्थमभ्युदयते तदातीव चमत्कारिणी स्यादिति तदेतदभिप्रेत्य प्रथमं सखीद्वारेदं ज्ञापयति यदा तामादाय श्रीभगवान् सहसान्तर्हितस्तदा तस्याः सख्यस्तु संशयाना एवासन् किन्तु केवलवलानुजान्वेषणपराभिस्ताभिः सहचारित्वेऽपि किञ्चिदुन्मादधारित्वेऽपि तन्मिथुनान्वेषणव्यग्रतया पृथगवस्थितस्वयूथतया तदवधानदूरस्फुरदीहाः सत्यः पर्यटितवत्यो वक्ष्यमाणं तत्पादचिह्नदर्शनं विनापि क्वचित् किञ्चिदुपलब्धवत्यश्च । तथाहि तासां वाक्यमप्येणपत्नीति । अत्राखण्डस्य वाक्यस्य निखिलपदानामप्यनुमोदनव्यञ्जक एवार्थः प्रतिपद्यते । ततः सख्यमेवासां तन्मिथुनमनुलक्ष्यते तद्दर्शनोत्कण्ठा च तत्र वाक्यार्थः । अपीति सम्भावनायाम् । तदिदं सम्भावयाम इत्यर्थः । अथवा अपीति प्रश्ने । तदेतत् पृच्छाम इत्यर्थः । किन्तत्तत्राहुः । हे सखि ! अच्युतो वो युष्माकमुपगतः समीपं प्राप्तः । ननु वनविहारिणस्तस्य वन्यानामस्माकं समीपप्राप्तौ किमाश्चर्यं तत्राहुः । प्रियया सहेति । ननु तत् खल्वाश्चर्यमेव किन्तु यत्र तस्य दर्शनं तत्र तस्याः सहयोगेन किमाश्चर्यमधिकं सुखं नाम तत्राहुः । तयैव सह गात्रैस्तादृशानन्दव्यञ्जकनानानुभावविचित्रैरङ्गैर्वो युष्माकं भवत्या भवत्सम्बन्धिनीनाञ्च दृशां सुनिर्वृतिं केवलस्य तस्य दर्शनादपि तत्साहित्यदर्शने परमानन्दं तन्वन् विस्तारयन्निति तदिदञ्च नास्मासु गोपयितुमर्हसि वयं हि तदन्तरङ्गधर्मविदः सहचर्यः तद्गन्धवाहमात्रेणापि तदीयं सर्वं ज्ञातुं शक्नुम इत्याहुः । कान्ताङ्गेति । प्रथमं तावत् कुलपतेस्तस्य तत्र कान्तायास्तस्यास्तत्र तदङ्गसङ्गस्य तत्र तत्कुचसङ्गिकुङ्कुमस्य तत्र च तल्लिप्तकुन्दस्रजः स एष गन्धः स्फुटमत्रायाति । स चाभ्यस्तत्वादस्माभिरुपलभ्यत इत्यर्थः । अथ द्रष्टुदृष्टिदृश्यप्रशंसया तदनुमोदनव्यञ्जकपदानामर्थः । अत एव प्रथममपीति सकाकु सम्भावनगिरा तत्रोत्कण्ठां व्यानञ्जुः । एणपत्नीति जात्यैव दृष्टिप्रशंसा । एणपत्नीत्यनेन "पत्युर्नो यज्ञसंयोग" इति पाणिनिस्मृतेरेणानां याज्ञिकत्वं तस्या यज्ञपत्नीत्वं व्यञ्जितमिति द्रष्टुं प्रशंसा । उपगतः समीपमपि प्राप्त इति तद्भाग्यप्रशंसा तत्रापि प्रिययेति द्रष्टृदृश्ययोर्द्वयोरपि प्रशंसातिशयः । गात्रैर्मिथः सङ्गमेनासाधारणतां प्राप्तैरिति पूर्ववदेव तन्वन् दृशां सखि ! सुनिवृतिमित्येभिर्दृष्टेश्च तदतिशयः अच्युत इति प्रियया सह विचाररहित्येन पुनर्दृश्यप्रशंसा व इति यत्र भवतीदृशी तत्र भवत्सङ्गिनीनामपि ईदृशत्वं युक्तमिति द्रष्टुं प्रशंसा । अथ कान्तेति दृश्यायास्तस्यास्तदङ्गसङ्गेति लब्धदुर्ल्लभस्य दृश्यस्य कान्तस्य कुचकुङ्कुमेति तत्संयोगलब्धभाग्यस्य दृश्यस्य कुंकुमस्य तद्रञ्जिताया इति तत् सम्बन्धेन लब्धशोभातिशयायाः दृश्यायाः कुन्दस्रजः शुभ्रतया तदुदयशोभायोग्यायाः स्वरूपेण च तस्या एव । कुलपतेरिति दृश्यस्य कान्तस्य । इहेति लब्धतद्गन्धसौभाग्यस्य दृश्यस्य तत्स्थानस्य वातीति वातमप्यात्मसात्कृत्य स्वयमेव सर्वतश्चलतीति गन्धविलसितस्य गन्ध इति तत्तद्विशेषयोगात्तस्य च प्रशंसावगतेति ॥ ११ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इयमपि श्रीतुलसीवत्तस्य नित्यप्रिया सापत्न्यात्तदिच्छानुसाराद्वा न कथयेदिति सख्येन विश्वस्य एणीं पृच्छन्ति—अपीति । हे एणस्य पत्नीति त्वयापि प्रियाविरहदुःखं ज्ञायत एव, अतः कथ्यतामिति भावः । एकत्वं विरहार्त्तिभरेण दूरे दृष्टयप्रसरणादेकस्या एव दृष्टेः, दृशामिति व इति च बहुत्वमच्युतोपगमेन गौरवात्; यद्वा, एकत्वं जात्यपेक्षया; किंवा बह्वीषु तासु मध्येऽन्तिकवर्त्तिनीमेकां प्रत्येव प्राधान्येन प्रश्नात् । प्रियया लक्ष्म्या कयाचिद्गोप्या वा सह प्रिययेति सहगमनात् तेनेष्यंयैव वा गात्रैर्दृशां सुनिर्वृतिं परमसुखं तत्वन्निति; अन्यथा विशाल–प्रसन्ननेत्राणामसाफल्यम् , किंवा, अन्यथेदृशदृष्टयसम्भव इति भावः । सु-शब्दो मोक्षसुखादपि वैशिष्ट्यविवक्षया, तेनात्यन्तान्तिक–सन्दर्शनमप्यभिप्रेतम् , अन्यथा सुनिर्वृत्यसम्पत्तिः । हे सखीति तस्या अपि श्रीकृष्णविषयक–सानुरागदृष्ट्या वने सहविहारादिना वा; अतोऽस्मासु वञ्चना नैव कार्येति भावः । अच्युत इति

सुनिर्वृतिविस्तारणे; किंवा, इहोपगमने विच्युतिर्नास्तीति भावः। तदेवाभिव्यञ्जयन्ति—कान्तेति। 'तद्धि जानन्ति तद्विदः' इति। न्यायेन तासां तद्गन्धपरिचयोऽस्तीति तथोक्तम् (भा० १०।२६।४४)—'मालां बिभ्रद्वैजयन्तीम्' इति पूर्वमुक्तम्, ततश्च (भा० १०।३०।७) 'सह त्वालिकुलैर्बिभ्रत्' इति तुलसीमाला, अधुना च कुन्दस्रज इत्येवं मालात्रयं गम्यते। यद्वा, वैजयन्त्यामन्यत्रापि तुलसीसम्भवात्तद्धारणं ज्योत्स्न्यां रात्रौ कुन्दमालायाः शोभाभराद्वैजयन्तीपरित्यागेनाधुना तस्या एव धारणं ज्ञेयम्। कुलपतेर्गोकुलेन्द्रस्य; किंवा, गोपीगणस्वामिनः, लज्जया वैदग्ध्या वा साक्षात्तथानुक्तिः, अतस्तदेकपतीनामस्माकं तदभावेन प्राणरक्षा न स्यादिति सर्वथा शीघ्रं कथयेति भावः। श्लेषेण कुत्सितं लाति आददति यो जनस्तस्यैव पतिरिति तया साहित्यं युक्तमेवेतीर्ष्योक्तिः। अन्यत्तैर्व्याख्यातम्। यद्वा, प्रियया उपगतः संगतः सन्निहास्ते। ननु तर्ह्यन्विष्य दृश्यताम्? तत्राहुः—गात्रैरिति, परमधन्ययुष्मचक्षुर्भिरेव दृश्यते, न त्वस्माभिर्द्रष्टुं शक्यत इत्यर्थः ननु तर्हि नात्र वर्त्ततैव नेत्याहुः-कान्तेति। अन्यत् समानम्।११।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

उपगतत्वमुपपादयति। कान्तङ्गेति। कुलपतिः कृष्णः॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हरिण्या दृष्टिलालित्यस्य श्रीकृष्णदर्शनजहर्षप्रयुक्ततां सम्भाव्य पृच्छन्ति। अपीति। हे एणपत्नि वो युष्माकं दृशां सुनिर्वृतिं निरतिशयानन्दगात्रैः सुन्दरैः पाणिपादादिभिरवयवैर्वितन्वन्विस्तरेण जनयन्नच्युतः प्रिया सहोपगतः अपि किमागतः किमित्यर्थः नोपगत इति मावोच इत्यभिप्रेत्य तत्र लिङ्गमाहुः। कापटयेन न ब्रूयुरिति सख्यमापादयन्त्यः संबोधयन्ति हे सखीति। कान्ताया अङ्गसङ्गमेनालिङ्गनेन यत्कुंकुमं तेन रञ्जितायाः कुलपतेर्गोकुलनाथस्य कृष्णस्य कुन्दस्रजो गन्ध इह वाति प्रसरत्यनेन कान्तया सह उपगतत्वे लिङ्गमुक्तं भवति॥ ११ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हे एणपत्नि! मृगजाये! ते ईश्वराः कयाचित्प्रियया प्रियतमया इहोपगतः सामीप्यमाप्तः किं कीदृशः हे सखि मृगभार्ये गात्रैराननादिशरीरावयवैः वो युष्माकं दृशां सुनिर्वृतिं तन्वन्नपि विस्तारयन् प्रश्ने निमित्तमाह। कान्तेति। कान्तायाः कमनीयायाः अङ्गसङ्गादालिङ्गनलक्षणात्सङ्क्रान्तकुचकुंकुमेन रञ्जिताया—अनुरागीकृतायाः अस्मत्कुलपतेः कृष्णस्यांसावलम्बिन्याः कुन्दस्रजः कुन्दपुष्परचितमालाया गन्धः वाति आगच्छतीति यद्यस्मादिति शेषः वा गतिगन्धनयोरिति धातुः यद्वा कान्तस्य भगवतोङ्गसङ्गस्याङ्गो यस्याः सा तथा अत्र स्त्रीशब्दोऽध्याहार्यः सा कान्ताङ्गसङ्गा स्त्री तस्याः कुचकुंकुमरञ्जितायाः कुलपतेः कुन्दः स्रजः गन्धोऽस्यास्तीति मत्वर्थे अच्प्रत्ययात् गन्धवान् वायुरिह वाति वीजयतीति गोपीनामेकवचनबहुवचनाभ्यां भक्त्यतिशयपिशाचीग्रहणं सूचयति यद्वा एणपत्नीतुल्यनेत्रत्वात्सखीत्युपचर्यते वः ईश्वरो भर्ता मृगः कयाचित्प्रियया उपगतः आश्लिष्टोऽपि किं न भवति गर्हितत्वात् अस्मत्कुलपतिरस्मान् विहाय कयाचिदालिङ्गित इत्याशयेनाहुः कान्तेति। कान्ताया अङ्गे उरोऽवयवे सङ्गो ययोस्तौ कान्ताङ्गसङ्गकुचौ तयोः कुंकुमेनरञ्जितायाः अरुणीभूतायाः कुलपतेः कुन्दस्रजो गन्ध इह वाति स्वयञ्च न दृश्यते तत्सद्भावो विज्ञायत इति व्यङ्ग्यालङ्कारोक्तिः॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अपीति द्वयम्॥ ११–१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्चाहो हन्त तेन स्वकान्तेन ध्वजवज्राङ्कुशादिभिश्चिह्नैर्विचित्रिताङ्गी निहरन्ती स्वाधीनभर्तृकामहागर्वान्धा कथममांस्तमेवाचक्षीतेत्यग्रतो गत्वा कामपि हरिणीमालक्ष्याहुः। अपीति। हे सखि! एणपत्नि! प्रियया त्वया किमुपगतः स्वसमीपे सम्प्राप्तः सम्बोधनपदसाहचर्य्यादेवात्र त्वयेति लभ्यते एणस्य पत्नी भवन्त्यपि त्वमस्मत्तुल्या तस्यैव प्रिया तमेव प्रियं मन्यसे इति भावः। यतः गात्रैर्मुखबाह्वादिभिर्वो दृशां सुनिर्वृतिमत्यानन्दं तन्वन् सन् व इति दृशामित्यादरे बहुत्वम् अच्युत इति स्वदृगानन्दलोभात्त्वया तदनुगमनादेव हेतोस्त्वत्तः स न विच्युत इति भावः ततश्चाग्रतः स्वभावादेव गच्छन्तीं तामालक्ष्य हं हो स दृष्ट इति किं ब्रवीमि तं वो दर्शयाम्येव मदनुपथमागच्छतेति ब्रुवाणेवाग्रत इयं गच्छन्ती ग्रीवां परावृत्य मुहुरस्मान् पश्यति तदियमेवात्र निर्दये वृन्दावने दयावतीति तदनुगच्छन्त्यो दैवात् क्वापि गतां तामदृष्ट्वा हं हो कृष्ण दर्शयिष्यन्ती हरिणी किं न दृश्यते इति पृष्टाः काश्चिदाहुः तर्हि कृष्णोऽत्रैव क्वापि वर्त्तते हरिणी तु कृष्णाद्बिभ्यतीति स्वीयसूचकत्वदोषापलापार्थं क्वापि निह्नुताभूदिति वितर्कयन्त्यो दैवादायातं सौरभ्यमनुभूयाहो सत्यं सत्यमेतदेव तत्त्वमिति सहर्षं मुहुराहुः कान्ताया अङ्गसङ्गतस्तत्कुचकुंकुमेन रञ्जितायाः कुन्दपुष्पस्रजो गन्धः वाति आगच्छति अत्र कान्तयोर्गात्रद्वयस्य च कुचयोश्च कुंकुमस्य च कुन्दस्य च गन्धस्तासां नासाभ्यामेव निश्चीयते स्मेति भावः। कुलपतेर्गोपीकुलरमणस्येति कुलपतित्वनिष्ठां परित्यज्य सम्प्रत्येकयैव कयाचित्कान्तया रममाणस्य तस्यान्यायं पश्यतेति भावः॥ ११ ॥

रसिकाह्लादिनी-टीका

एवं स्थावरेभ्य उत्तरं प्रलब्ध्वा जङ्गमान्प्रश्नकृतनिश्चया सत्यो हरिणीं दृष्ट्वा अरादेवस्थितां सख्येन विश्रम्य पृच्छन्ति । अप्येणपत्नीति, हे एणपत्नि कृष्णसारपत्नि त्वमपि पतिसङ्गजं सुखं विरहजं दुःखं जानासि अतः कथयेति । कदाचित् प्रियया सह उपगतस्त्वत्समीपे गतस्त्वया दृष्टः काश्चित् सेर्ष्यं कथयन्ति । किं कुर्वन् गात्रैः करचरणाद्यवयवैः दृशां सुनिर्वृतिं तन्वन् अन्यथानेत्राणां प्राणदस्यासिद्धेः । अन्यत्र आत्यन्तिकसंनिकर्षाभावेऽत्यन्तकष्टसुखस्याप्रसिद्धेः हे सखीति सम्बोधनेन श्रीकृष्णविषयकानुरागसम्भावनया विस्रब्धा पृच्छन्ति । सतां सप्तपदा मैत्री इति प्रसिद्धेः । अतो वञ्चनं तवानुचितं अच्युतो विलासच्युतिरहितः प्रिययेति व्यञ्जनावृत्या कथयन्ति । कुलपतेः गोकुलपतेः गोकुलनाथस्य, यद्वा गोपीकुलनाथस्य कुन्दस्रजः कुन्दकुसुममालाया इह गन्धो वाति आगच्छति । पूर्वं वैजयन्तीधारणमुक्तम् "मालां बिभ्रद्वैजयन्तीमिति" । इदानीं यया सहान्तर्हितस्तया विरचय्य समर्पितत्वात् प्रीत्या कुन्दस्रजधारणमुक्तं सौगन्ध्यातिशयेन लिङ्गमाहुः कान्तेति कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः क्रीडा सैव तस्या अङ्गसङ्गेन लग्नं यत् कुचकुङ्कुमं काश्मीरं तेन रञ्जितताया गन्ध एव कुङ्कुमायितां ज्ञापयति । सात्विकभावोदयात् । तत् क्षणमेव रचनाविशेषप्राकट्याद्वेति । यद्यपि कुन्दकुसुमगन्धाल्पत्वं तथापि कुचगतकास्मीरसम्बन्धेन सौरभ्याधिक्यं सूचितमिति । तदस्माकं सोढुमशक्यं त्वं तु सभाग्याय तया प्रियया सह विलासं कुर्वन् दृष्टः सौरभ्यमाघ्रातं च तव तु निर्मत्सरत्वात्सर्वं शुभमिति सेर्ष्योक्तिरिति ॥ ११ ॥

विशुद्धरसदीपिका

ततश्च नित्यं तत्सङ्गिनीं सुरङ्गिणीं नाम हरिणीं तत्रैवाकस्मादागतां दृष्ट्वा परमप्रेष्ठसख्य आहुः । अपीति । पूर्वस्मिन् वाक्ये श्लिष्टैः पदैः पिशुनयेच्च रहस्यवत्त्विति प्रेक्षावत्प्रमाणितन्यायमादाय प्रियनर्म्मसखीभिः सूचितेन निजप्राणसख्याः सौभाग्यातिशयेनात्मानं सिद्धार्थं मन्यमानाः सुरतान्तवर्णनभङ्ग्या किञ्चित्प्रकाश्योचुः । अपीति सम्भावनायाम् अत्राखण्डवाक्यस्य निखिलपदानामप्यनुमोदनव्यञ्जक एवार्थः प्रतिपाद्यते ततश्च सख्यमेवासां तन्मिथुनमनुलक्ष्यते तद्दर्शनोत्कण्ठातिशयेन भावोत्कर्षश्च तत्र वाक्यार्थोऽपीति यथा तदिदं सम्भावयामः अथवा प्रश्ने तदिदं पृच्छाम इत्यर्थः । किं तत् हे सखि ! अच्युतो वो युष्माकमुपगतः समीपं प्राप्तः ननु वनविहारिणस्तस्य वन्यानामस्माकं समीपप्राप्तौ किमाश्चर्य्यमिति तत्राहुः । प्रियया सहेति । ननु वनविहारिणः तत्खल्वाश्चर्यमेव किन्तु यत्र तस्य दर्शनं तत्र तस्याः सहयोगेन किमधिकं नाम सुखं तत्राहुः । तयैव सह गात्रैस्तादृशानन्दव्यञ्जनानुभावविचित्रैरङ्गैः वो युष्माकं भवत्या भवत्सम्बन्धिनीनाञ्च दृशां सुनिर्वृतिं केवलस्य तस्य दर्शनादपि तत्साहित्यदर्शनेन परमानन्दं तन्वन् विस्तारयन् तदिदञ्च नास्मासु गोपयितुमर्हसि वयं हि तदन्तरङ्गधर्मविदो नित्यसहचर्य्यः तद्गन्धवाहमात्रेणापि तदीयं सर्वं ज्ञातुं शक्नुम इत्याहुः कान्तेति । प्रथमं तावत्तत्पतेस्तस्य तत्र च कान्तायास्तस्याः तत्र च तदङ्गसङ्गस्य तत्र तत्कुचसङ्गिकुंकुमस्य तत्र च तल्लिप्तकुन्दस्रजः स एव गन्धः स्फुटमत्रायाति स चाभ्यस्तत्वादस्माभिरुपलभ्यत इत्यर्थः । एतेन तासां तथानुभवेन प्रागपि सम्प्रति चाग्रेऽपि स एव सख्यभावोऽखण्डित इति दर्शितं ततश्च रासावसर एव नवसङ्गम इति केचिदाहुस्तत्परास्तम्, एवञ्च पूर्णाः पुलिन्द्य इति पूर्वानुरागप्रकरणेऽप्यखिलप्रागुक्ततत्तद्भावविजयिनीनित्यसखीनामेवोक्तिरिति ज्ञेयमासाञ्च पूर्वानुरागोऽपि तन्मिथुननिष्ठः खर्वविलक्षण इत्यलौकिकत्वमपि तत्रोरुगाय पदाब्जरागश्रीकुंकुमेनेति वाक्ये तादृशव्यवहारस्य स्वाधीनपतिकायां विरोधः तत्समानन्तु पुरुषायितसुरतविशेष उभयोरपि स्वभावविनिमयेनेतिसर्वं चतुरस्रम् एतेन रमाया दत्तक्षणमित्यपि व्याख्यातं समानयोगक्षेमत्वादिति ज्ञेयम् अथ द्रष्टृदृश्यप्रशंसया तदनुमोदनव्यञ्जकः पदानामर्थः ता एव प्रथमम् अपीति सकाकु सम्भावनागिरा तत्रोत्कण्ठां व्यानञ्जुः एणपत्नीत्युपचारात् ततश्च जात्यैव दृष्टिप्रशंसा तत्र पत्नीत्यनेन यज्ञसंयोग एव तादृशप्रयोगस्य पाणिनिस्मरणात्साङ्केतिकं यज्ञपत्नीत्वमिति द्रष्टृप्रशंसा उपगतः समीपमपि प्राप्त इति तद्भाग्यप्रशंसा तत्रापि प्रिययेति द्रष्टृदृश्ययोर्द्वयोरपि प्रशंसातिशयः तस्याः प्रेमविषयत्वञ्च गात्रैर्मिथः सङ्गमनेनासाधारणतां प्राप्तैरिति पूर्ववदेव तन्वन् दृशां सुनिर्वृतिमित्येभिर्दृष्टेस्तदतिशयः अच्युत इति प्रियया विच्यवराहित्येन दृश्यप्रशंसा व इति यत्र भवतीदृशी तत्र भवत्सङ्गिनीनामपीदृशत्वं युक्तमिति द्रष्टृप्रशंसा अथ कान्तेति दृश्यायास्तस्याः तदसङ्गेतिलब्धदुर्ल्लभस्य दृश्यस्य कान्तस्य कुचकुंकुमेति तत्संयोगलब्धभाग्यस्य दृश्यकुंकुमस्य तद्रञ्जिताया इति तत्सम्बन्धेन लब्धशोभातिशया या दृश्यायाः कुन्दस्रजः शुभ्रतया उदयशोभायोग्यायाः स्वरूपेण च तस्या एव कुन्द इति देवभोग्यगन्धवत्त्वेन तदनुभविनां स्वेषां तासाञ्च नित्यपरिकरत्वस्य दिव्यगन्धतुलसीमधुमत्तैरिति वत्तथात्वं कुलपतेरिति दृश्यस्य कान्तस्य कूलशब्दः समूहवचनः ततश्च तस्याः कान्तायाः पतिरेव छत्रिन्यायेन गणलक्षणया तद्यूथगतानां सर्वासामस्माकं पतिरित्युपचरितस्येति तदेकसुखसुखित्वस्य इहेति लब्धतद्गन्धसौभाग्यस्य दृश्यस्य तत्स्थानस्य वातीति वनमप्यात्मसात्कृत्य सर्वतश्चलतीति गन्धविलसितस्य गन्ध इति तद्विशेषयोगात्तस्य च प्रशंसावगतेति सुरतान्तोऽयं जीवातुरिव परमप्रेष्ठसहचरीणां परमास्वादनीय इत्युत्कण्ठातिशयेन वर्णित इति संक्षेपः ॥ ११ ॥

श्रीरामनारायणकृता भावभावविभाविका

अग्र कृष्णमृगगृहिणीर्हरिणीर्दृष्ट्वा तासां कृष्णमृगगृहिणीत्वेन मृग्यतेऽस्माभिरिति मृगः कृष्ण एव मृगः कृष्णमृगः आत्मनश्च तद्गृहिणीत्वेन समानशीलव्यसनेषु मैत्रीतिन्यायान्मैत्रीयोग्यतां संभाव्य हरिणीत्वेन च दुःखहरिणीत्वमगत्य तन्नेत्रेषु च श्याममुग्धमाहनसुभगचपलतीक्ष्णत्वादीनि कृष्णासाधारणलक्षणान्यालक्ष्य तद्दर्शनातिशयेन तद्दृशोः कृष्णच्छविव्याप्तत्वं तत्रापि रसो वै सः रसं ह्येवायं लब्ध्वानन्दीभवतीति श्रुत्या कृष्णस्य सर्वरसात्मकत्वेऽपि यथाबहुगुणान्वितस्य रसायनस्य तत्तदनुपानयोगे एव तत्तद्गुणाविर्भावस्तथा सर्वरसायनस्य हरेः प्रियासङ्गम एव माधुर्य्यरसाविर्भाव इति मत्वा तद्दृशां रसनिमग्नतया प्रियया सह दर्शनं सम्भाव्य पप्रच्छुः। अपीति। अपीति सम्भावनायां प्रश्ने च वयं सम्भावयामः पृच्छामश्च तथा च नासम्भावितोऽस्मत्प्रश्नो नवा प्रश्नाभावेन कथनायोग्यत्वं हे एणपत्नि इत्यत्र सम्बोधने जातावेकवचनम् अग्रे वः दृशामिति बहुवचननिर्देशात् एणः कृष्णमृगस्तस्य पत्नि कृष्णो मृग्यतेऽनेनेति कृष्णमृगस्तम्मृगयितुं बहुतरयागानुष्ठातुःपत्नीत्वेन बहुपुण्यनिचयाद्वस्तद्दर्शनलाभ इति तत्पुण्यतद्भाग्ययोः प्रसंसा 'पत्युर्नोयज्ञसंयोग' इति पाणिनिना यज्ञसंयोगे एव पत्नीशब्दव्युत्पादनात् पत्नीशब्देन माथुरपत्नीनां स्नेहश्च ध्वनितस्तेन न केवलं यज्ञाद्यनुष्ठानफलं कृष्णदर्शनं किन्तु स्नेहातिशयस्य तदुक्तमभियुक्तैः—

गोपालाङ्गणकर्दमेषु विहरन् विप्राध्वरे लज्जसे। ब्रूषे गोवृषहुंकृतैः स्तुतिशतैर्मौनं विधत्से सताम्॥
दास्यं गोकुलपुंश्चलीषु कुरुषे स्वाम्यं न दान्तात्मसु। ज्ञातं कृष्ण! तवांघ्रिपङ्कजयुगं प्रेमैकलभ्यं मुहुरिति॥

कृष्णपत्नीनामासामस्मत्कृष्णपत्नीत्वेन सापत्न्यं मा भवत्विति पुनः सम्बोधन सखि इति अच्युतः प्रियया सह इह वः उपगत एव नो ब्रूत सखित्वेन मा उपेक्षां कुरुत नोपगत इति ब्रूयुश्चेत्तत्र सम्भावनावीजं सूचयन्त्यस्तद्विशेषणमाहुः। गात्रैः आनन्दमात्रकरपादमुखोदरादिरिति स्मृत्या तस्य प्रियमेव शिर मोदो दक्षिः॥ पक्षः प्रमोद उत्तरः पक्ष आनन्द आत्मेति श्रुत्यानन्दात्मकैः वः दृशां सुनिर्वृतिं तन्वन्निति एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या तद्विना कस्याप्यानन्दासम्भवात् किं चोक्तश्रुत्या सर्वेषां तत एवानन्दलाभेऽपि दृशां सुनिर्वृतिमित्युक्त्या दृशां तत्स्वरूपविदामेव सुनिर्वृतिः परमानन्दाविर्भात्र इति ध्वनिः ननु नो दृशां सुखलाभेन किमीर्ष्यया पृच्छथ नेत्याहुः। अच्युत इति। प्रच्युतसुखे एवान्यसुखदाने तदीयानन्दक्षयेनात्मसुखहानिबुद्ध्येर्ष्योद्गमः अच्युत तथा त्वाभावेन नेर्ष्यासम्भावनागन्धोऽपीति भावः। एवं सम्भाव्य पृच्छन्त्यःप्रिययेति शब्देन प्रियानुसन्धानेनोद्भूतेनेव तयोरनुग्रहेणाविर्भूतातिविलक्षणसुरभिमाघ्रायाहुः यद्वैवं सम्भावनासूचनेऽपि गोपयन्तीं प्रत्याहुः कान्ताङ्गसङ्गेति। अहो कान्तायाः कान्तिमत्याः कस्य सुखस्यान्तः पर्य्यवसानं वा यस्यां तस्याम् अङ्गसङ्गेति प्रेम निर्भरालिङ्गने तन्याः कुचकुंकुमेन हृदयहृदानुरागरसपूरितकुचकाञ्चनकलशद्वयोच्छलिततयाङ्गरागत्वेनावभासमानेन रञ्जितायाः कुलपतेः गोपीनां नः कुलस्य समूहस्य पत्युः कुन्दस्रजो गन्ध इह वाति एवं प्रश्नेऽप्युत्तरालाभे एता अपि वयमिव तदीयभ्रूधनुर्युगविस्फूर्ज्जनपूर्वकायाङ्गेषु वृष्टिविभिन्नहृदयाश्चकितदृष्टयो वा कृष्णगृहिणीत्वसाम्याज्जातमात्सर्या वा हरिणी तेन सुखापहरिण्यो वा न वदन्तीति मत्वोपेक्ष्य ययुः॥ ११॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवं व्याकुलमानसा अकस्माद्धरणीं दृष्ट्वा तामेव पृच्छन्ति। अपीति। हे कृष्णसारपत्नि अत एव हे सखि तुल्यपतित्वेन भीरुत्वादिधर्मसाम्येन भवत्या अस्मत्सखित्वमतो वो युष्माकम् अपि किमुपगतो मिलित इहास्मिन्वने प्रियया सह गच्छन्सुन्दरैर्मुखवाह्वादिभिः स्वगात्रैर्भवतीनां दृशां सुनिर्वृतिं परमसुखं तन्वन् विस्तारयन् यतोऽच्युतः परमात्मा तदुपगमो नेत्रादेः परमानन्दजनक एवेति भावः। ननु प्रियया साहित्यं कथमवगतमित्याशङ्क्याहुः। कान्तेति। कान्ताया अङ्गेन कुंकुमरञ्जितायाः कुलपतेः गोपीसमुदायस्वामिनः स्रजो मालायाः गन्ध इह वाति आगच्छति तथानुभूतगन्धप्रत्यभिज्ञया प्रियासाहित्यं निश्चीयत इति भावः। अत्रैणपत्नीत्यनेन "पत्युर्नो यज्ञसंयोग" इति स्मरणात् एणानां जन्मान्तरे याज्ञिकत्वसूचनेन तत्पत्नीनां यज्ञपत्नीत्वं सूचितमिति द्रष्टृप्रशंसा उपगत इति तद्भाग्यप्रशंसा दृशामित्यादिना तन्नेत्रप्रशंसा अच्युत इति परमानन्दप्राप्तियोग्यता कान्तेत्यादि दृश्यप्रशंसा कुन्दस्य शुभ्रतया कुंकुमशोभायोग्यता इहेति स्थानस्यानन्दवैशिष्ट्यं वातीति तत्संसर्गवतः प्रशंसेति व्यङ्ग्यमाला अनभिज्ञापक्षे अहो पुराकृततपःप्रभावात्प्रियचरणसरोजैरनिशं प्राप्तसङ्गातिगर्ववती क्षितिरियं न वदति यद्वा प्रत्युत्तरं दातुमसमर्थाः जडा न प्रष्टव्याः किन्तु चेतनः कश्चित्प्रष्टव्य इति चिन्तयन्त्योऽकस्मात् काञ्चिद्धरिणीं दृष्ट्वाहुः हे सखि! एणपत्नि! अच्युतः किन्त्वयोपगतः सम्प्राप्तः तव दृष्टिगोचर एव संप्रति क्वचिद्वर्त्तते ननु त्वत्तो वियुक्त इति सूचयितुमच्युत इत्युक्तं तत्र हेतुमाहुः। प्रिययेति। ततः स्वभावादेवाग्रे प्रचलितां तामवलोक्याहो इयं दृष्ट इति किं ब्रवीमि तं दर्शयाम्येव मत्पृष्ठत आगम्यतामिति सूचयन्त्यग्रतो गच्छति ग्रीवां परावृत्य मुहुरस्मान् पश्यति तत एषैवात्र निर्दये वृन्दावने दयावतीति तामनुगच्छन्त्यो दैवात्क्वापि गतां तामदृष्ट्वा परस्परं पृच्छन्तिस्माहो संप्रति हरिणी न दृश्यते क्व गतेति ततः काचिदब्रवीत् अत्रैव कृष्णो वर्तते सा तु तद्भयात्सूचकत्वदोषापलापार्थं क्वचित्तिराहितेति श्रुत्वा तत्रैव स्थिताः दैवादागतसौरभ्यमाघ्रायाहो सत्यं सत्यं त्वदुक्तमेव तत्त्वमिति सहर्षं पुनराहुः। कान्तेति। गोपीकुलरमणस्य तस्य गोपीसमुदायं विहायैकयैव कयाचित्कान्तया रममाणस्यऽन्यायं पश्यतेति कुलपतिपदाशयः मानिनीपक्षे

भगवान् राधया सहान्तर्हित इति पूर्वं स्पष्टमनुक्तमर्थं सपत्नीनां मुखेन मध्ये मध्ये व्यञ्जयति तस्याः सौभाग्यातिरेकं द्योतयितुं तत्र क्षितेरप्यलब्धोत्तराः अहो सर्वदास्मत्प्रार्थनापरायणस्याऽस्मान् विहायैकाकिनो गमनं कथं जातमिति विचारपराणां मध्ये काचिदब्रवीत् सत्यमेव कयाचिद्धूर्तया नीतः स्यादिति ततश्च सन्दिहाना एव पर्यटन्त्यः तादृशं गन्धमाघ्राय कयाचिन्नीत इत्यनुमीय दवादागतां मृगीमवलोक्याऽहो इयं श्रोत्रनेत्रादिमतीति ज्ञास्यतीति मत्वा तां पृच्छन्ति । हे सखि ! एणापत्नि अच्युतो वो युष्माकं समीपं गतः किं ननु प्रत्यहं गच्छति किमाश्चर्य्यमित्याशङ्क्याहुः । प्रियया यतो भवादृशामलौकिकानन्दं ददत् प्रतिदृश्यत इत्याहुः । गात्रैरिति । ननु प्रियया सहैव गत इति कथं ज्ञातमिति चेत्तत्राहुः । कान्तेति । सैव प्रिया न वयं तयैवाच्युतोऽस्मांस्तु विहाय गतः कुलपतेस्तस्य वैषम्यं नोचितमितीर्ष्या व्यज्यते यद्वा इहास्मिन् वने वो दृशां गात्रैः सुनिर्वृतिं तन्वन्प्रियया सह सङ्गतः किम्वर्तते नेति न वक्तव्यमित्याशयेनाहुः । कान्तेति । निवृत्तिपक्षे अथ मृगीस्थानीयां बुद्धिं पृच्छन्ति । अपीति । हे सखि ! बुद्धे वो दृशां वृत्तीनां गात्रैस्तत्र वृत्त्यवच्छिन्नचेतनरूपैर्गात्रैः सुनिर्वृतिं तन्वन् प्रियया ब्रह्मप्रतिपादिकया तत्त्वमस्यादिरूपया मुख्यया श्रुत्या स उपगतः सङ्गतः इहान्तःकरणे वर्तते किं यतः कान्तस्य परमात्मनः अङ्गसङ्गाय प्रतिपाद्य प्रतिपादकसम्बन्धाय कुचयोस्तत्स्थानीयोपासनादिकर्म्मणोः कुंकुमेन तज्जनितविविदिषया रञ्जितायाः कुलपतेः क्षेत्रस्वामिनश्चिदात्मनस्तत्सम्बन्धिन्याः कुन्दस्रजः तत्स्थानीयबुद्धिप्रत्ययमालायाः गन्ध इह वाति शान्त्यादिरूपसुगन्धयुक्ता प्राणचेष्टात्र दृश्यत इत्यर्थः ॥ ११ ॥

रास-रहस्यम्

र० टी०—आत्माभिमुखीवृत्तयः बुद्धिमेणपत्निवत्, इन भगवन्नामविशेषः, इन एव एण इति आत्मसहचरीत्वेन सम्भाव्य पृच्छन्ति, हे सखि बुद्धे ! वो युस्माकं दृशां निश्चयात्मकवृत्तीनां, स्वगात्रैः "तस्य प्रियमेव शिरः मोदः दक्षिणः पक्षः प्रमोद उत्तरपक्ष आनन्द आत्मा ।" इति श्रुत्या, आनन्दात्मकैः किरणैः "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ।" इति सुनिर्वृतिं, तन्वन् विस्तारयन्, अच्युतः अखण्डपरमानन्दस्वभाव, इह अन्तःकरणे, प्रियया आत्माकारवृत्त्या सह, त्वया उपगतः प्राप्तो न वा । अपि च इह कुलपतेः क्षत्रपतेः क्षेत्रज्ञस्य, कान्तायाः आत्माकारवृत्तेः, अगसंगेन आलिङ्गनेन तादात्म्यभावेन, तत् कुचकुंकुमरञ्जितायाः तत्स्थानीयहृदयानुरागरञ्जितायाः, कुन्दस्रजः कुन्दकुसुमस्रग्गन्ध इव सात्त्विकबुद्धिप्रत्ययधारा, वाति प्रवहति न वा ? ॥ ११ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे सखि ! एणपत्नि ! वो युष्माकं दृशां सुनिर्वृतिं निरतिशयं सुखं गात्रैः सुन्दरतरैर्मुखादिभिरङ्गैर्वितन्वन् प्रियया सह अपि किमुपगतः समीपं गतः प्रियासाहित्यद्योतकमाहुः । कान्ताङ्गसङ्गतस्तत्कुचकुंकुमेन रञ्जितायाः कुलपतेः व्रजनाथस्य श्रीकृष्णस्य कुन्दस्रजः कुन्दपुष्पमालायाः गन्धः वाति आगच्छति ॥ ११ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे एणपत्नि उपचारतो वा देवा एवावन्यामेतदाद्यात्मनाऽवतारिता इति वा पत्नीत्युक्तिः । तत्कृतयज्ञफलभोक्तृताप्रयोजकत्वात्तच्छब्दप्रयोगस्य योषित्सु । वो व इत्येकैवानेकतया कायस्मृतिगतेरभावादिति वा सम्मानिनीयेयं मानिनेति वाऽस्मद्वत्सपत्न्यक्लेशो न त इति व्यञ्जयितुं च बहुवचनैकवचने ज्ञेये । प्रियया सह नीतया गात्रैः स्वावयवैर्दृष्टैर्दृशां द्रष्टॄणां । सखीति दृक् सदृक् तया सरूपं ज्ञेयं । सुनिर्वृतिं बहुसुखं तन्वन्सन् उपगतः समीपमाप्तः । हे मोहनाङ्ग्य ऊह्यते केनेत्यत आहुः । कुलपतेः श्रीकृष्णस्य कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः कान्तायाः सह नीतवनितायाः अङ्गसङ्गस्तत्काले कुचकुङ्कुमेन रञ्जतास्तस्याः कुन्दस्रजः कुन्दमालाया इह त्वन्निकटे गन्ध आमोदो वाति आवात्यागच्छतीति । नो नाथ आयातश्चेदायताक्षि नैवविधः कुन्दस्रगामोदः स्यादिति भावः । अतिगन्ध उपगत इह वा इहैव । वाशब्द इवार्थे । वा स्याद्विकल्पोपमयोरिवार्थे च समुच्चय इति विश्वः । गन्धोगन्धक आमोदे इति विश्वः । हे सखि एणपत्नि गात्रैर्नेत्राद्यैर्दृशां सुनिर्वृतिं तन्वन्प्रिययेतरया सहेश्वरो भर्ता पुमृग उपगतोऽपि किमित्यर्थः । अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चय इति विश्वः । स च न दृश्यते गन्धश्चैतादृश आयातीति स गत एवेत्यूहयाम इति वदन्ति ॥ कान्तेति । कुलपतेर्हरिणस्य कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः कुन्दस्रजस्तन्मालायास्तासां गन्ध आवाति । स न दृश्यत इति तात्पर्यमिति केचित् । भ्रमपरिभ्रमणतः स्वसौभाग्यं तत्र मृग्यामारोप्य कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः कुन्दस्रजः कुलपतेरिति प्रतिपादितं सुदत्यो वदन्तीति च तात्पर्यं वर्णयन्ति । याः कान्तः पतिरङ्गसङ्गकाले कुचकुङ्कुमेन रञ्जितो याभिस्तास्तासामस्माकं कुन्दानां स्रग्यस्य तस्य कुलपतेः कृष्णस्य सकाशादिहैतत्समयेऽतिगन्धो बहुहिंसा उपगतो गतम् । व ईश्वरस्तु हे सखि एणपत्नि प्रियया त्वयैव सह गात्रैर्दृशां सुनिर्वृतिं तन्वन्नुपगतोऽपि किं । नास्मद्वत्तव दुर्दशाऽत एवं विभासीत्याक्रोशोक्तिरित्यपि योजयन्ति ॥ ११ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सर्वे स्थावरान् पृष्ट्वा जङ्गमान् पृच्छन्ति । अपीति । हे एणपत्नि कृष्णसारपत्नि ! प्रियया कयाचित् लक्ष्म्या वाऽन्यया वा उपगतः मिलितः स्त्रीसहितः अनेन मार्गेण गच्छन्स्वगात्रैः स्वावयवैः भवतीनां दृशां सुनिर्वृत्तिं तन्वन् दृष्टः कश्चित् अनेनैव मार्गेण

गत इति चरणारविन्ददर्शनात् निश्चीयते यदि दृष्टो भवेत् तदा अस्माभिरपि द्रष्टुं शक्य इति त्वं त्वन्यस्य पत्नी आस्माकञ्च सखी भवसि अत आहुः। हे सखीति सखित्वं कृष्णानुरक्त्या नेत्रतुल्यत्वेन भीरुत्वादिधर्मैः अन्यथा भवतीनां विकसितनयनानि न भवन्तीति। ननु कृतलीलः किमिति प्रार्थ्यते तत्राहुः अच्युत इति। ननु कथं ज्ञायते प्रियया उपगत इति तत्राहुः कान्तेति। कान्ताया अङ्गसङ्गे यत्कुचयोः कुंकुमं तेन रञ्जितायां कुन्दस्रजः कुन्दपुष्पमालायाः गोकुलपतेः सम्बन्धिन्या इह गन्धो वाति आर्द्रश्च गन्धः आर्द्रकुङ्कुमं ज्ञापयति सात्त्विकभावादेव वार्द्रता अतो ज्ञायते प्रियया सङ्गत इति ॥ ११ ॥

श्रीसुबोधिनी-सारः

हे एणपत्नि गात्रैः स्वांगैः वो युष्माकं दृशां नेत्राणां सुनिर्वृतिं हर्षं तन्वन् विस्तारयन् प्रियया राधिकया सहाच्युतः कृष्ण इहोपगतः प्राप्तोऽपि किम् हे सखि कुलपतेः श्रीकृष्णस्य कान्तायाः स्त्रिया अंगस्य संगेन कुचयोः कुंकुमं तेन रंजितायाः कुंदपुष्पमालाया गंध इह वाति आयाति ॥ ११ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततोऽप्युत्तरमसम्प्राप्य हरिण्या दृष्टिप्रसादस्य कृष्णदर्शनजन्यत्वं सम्भाव्य तां पृच्छन्ति—अपीति। 'त्वया वञ्चनं न कार्यम्' इत्याशयेन सम्बोधयन्ति—हे सखि हरिणपत्नि ! वो युष्माकं दृशां स्वगात्रैर्मनोहरमुखबाह्वादिभिः सुनिर्वृतिं सुखं वितन्वन् अच्युतः कृष्णः प्रियया राधिकया सह इहोपगतः प्राप्तोऽपि किम् ?। प्रियया सहेति यदुक्तं तत्र द्योतकमाहुः—कान्तेति। इह अत्र कुलपतेः गोकुलपतेः श्रीकृष्णस्य कान्ताया अङ्गसङ्गेन आलिङ्गनेन तत्कुचकुङ्कुमेन रञ्जितायाः कुन्दकुसुमस्रजो गन्धः वाति आगच्छति ॥ ११ ॥

अन्वितार्थप्रकाशिका

अपीति प्रश्ने ॥ हे सखि एणपत्नि हरिणि ! वो युष्माकं दृशां स्वगात्रैर्वाह्वादिभिः सुनिर्वृतिं सुखं वितन्वन् अच्युतः इह प्रियया सह त्वया उपगतः प्राप्तः। अपि यतः इह कुलपतेः गोकुलपतेः श्रीकृष्णस्य कान्ताया अङ्गसङ्गेन आलिङ्गनेन तत्कुचकुङ्कुमेन रञ्जितायाः कुन्दकुसुमस्रजो गन्धः वाति आगच्छति ॥ ११ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अधुना मृगपत्नी दृष्ट्यावलोकनेन हरिदर्शनमाशंक्याहुः आपीति हे मृगपत्नी हे सखि प्रियया सह अच्युतः वो दृशां गात्रैः सुन्दरैर्मुखाद्यंगैः सुनिर्वृतिं परमसुखं तन्वन् विस्तारयन् इह उपगतो भवतीनां समीपं प्राप्तो नूनं यतः कान्ताया अगसगस्तेन हेतुना तस्याः कुचकुकुमेन रंजितायाः कुलपतेर्वनिता यूथयतेः कृष्णस्य कुंदस्रजः कुंदपुष्पहारस्य इह गंधो वाति आगच्छति ॥११॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हरिण्या दृष्टिलालित्यं वीक्ष्य तत्र श्रीकृष्णदर्शनजहर्षप्रयुक्ततां संभाव्य पृच्छन्ति ॥ अपीति ॥ हे एणपत्नि, वो युष्माकं, दृशां सुनिर्वृतिं निरतिशयानन्दं, गात्रैः सुन्दरैः पाणिपादादिभिरवयवैः, तन्वन् वितन्वन्विस्तरेण जनयन्नित्यर्थः। अच्युतः श्रीकृष्णः प्रियया स्वप्रेयस्या सह, इह उपगतः अपि आगतः किमित्यर्थः। नोपगत इति मावोचः इत्यभिप्रेत्य तत्र लिङ्गमाहुः। तत्रापि कापट्येन न ब्रूयादिति सख्यमापादयन्त्यस्तां संबोधयन्ति हे सखि, कान्तायाः स्वप्रेयस्या अङ्गसङ्गेनालिङ्गनेन यत् कुचकुङ्कुमं तेन रञ्जितायाः आलिङ्गनसंक्रान्तस्तनकाश्मीरेण रागं प्राप्तायाः, कुलपतेर्गोकुलनाथस्य श्रीकृष्णस्य, कुन्दस्रजः कुन्दकुसुममालिकायाः गन्धः आमोदः, इह वाति प्रसरति। अनेन कान्तया सहोपगतत्वे लिङ्गमुक्तं भवति ॥ ११ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अप्येणपत्नीति १०.३०.११.

स्वैरालापोऽपि महतां नानृतं स्पृशति क्वचित्। या गोप्युक्तिः सदारेशप्रश्ना सा फलतः सती ॥ १७४ ॥

रे शम्बरा जगति निस्त्रपतापदानि युष्माद्दृशानि न हि कुत्रचिदीक्षितानि।
यत्प्रत्युतारिधिषणामपहाय कामं वृद्धिं दृशा नयत सम्प्रति शम्बरारिम् ॥ १७५ ॥
उदासीनं मार्गं सखि समभिवीक्ष्यैव किमिह व्रजस्यत्यावेशादतनुतरखेदाकुलगतिः।
स्पृहा ते यद्यस्ति प्रियतमपदालोकनविधौ ततो मार्गे दृष्टिं प्रदिश सुतमालाधिकरुचौ॥ १७६ ॥

कृष्णप्रिया

हे मृगाङ्गने ! हे प्रिय सखी ! अपनी किसी प्रियतमा के साथ विचरते हुए और अपने सुकोमल श्रीअङ्ग के दर्शनों से तुमको आनन्द देने वाले और इस पथ से पसरते हुए श्रीनन्दनन्दन जी को देखे ! अयि सखी ! प्रियतम के वक्षःस्थल में कुन्द-

कुसुमों की माला है, जिस माला में प्रिया के समालिङ्गन के समय उसके वक्षः स्थल का चन्दन लग रहा है, यहाँ उसकी सुगन्ध वाली वायु आ रही है ॥ ११ ॥

बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदान्धैः ।
अन्वीयमान इह वस्तरवः प्रणामं किं वाभिनन्दति चरन् प्रणयावलोकैः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—हे तरवः ? किम्, वा, गृहीतपद्मः, मदान्धैः, तुलसिकालिकुलैः, अन्वीयमानः, रामानुजः, प्रियांसे, बाहुम्, उपधाय, इह, चरन्, प्रणयावलोकैः, वः, प्रणामम्, अभिनन्दति, किम् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

फलभारेण नतांस्तरून्कृष्णं दृष्ट्वा प्रणता इति मत्वा प्रियया सह तस्य गतिविलासं संभावयन्त्यः पृच्छन्ति । बाहुमिति । तुलसिकाया अलिकुलैरतस्तदामोदं मन्दाधैरन्वीयमानोऽनुगम्यमान इह चरन्निति ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विटवृत्तिं श्रितवतो मालत्यादिसमीपे पुष्पजिघृक्षया जिगमिषासंभवे प्रश्नस्तान्प्रति कथंचिदुपयुज्यतेऽपि अश्वत्थादिप्रश्नः कथमुपयुज्यतेऽतस्तत्संभवं दर्शयितुमाहुः—बाहुमिति । प्रणामप्रदक्षिणादिना संसारात्तारयंतीति तरवोऽश्वत्थादयस्तान्प्रत्याहुः—हे तरवः रामानुजो मदान्धसंगी एकं बाहुं प्रियांसे निधाय परेणं प्रियामुखपद्मलोभिभ्रमरनिवारणाय गृहीतपद्मः । यद्वा हस्तेन गृहीतपद्मः वः प्रणामं प्रणयावलोकैरभिनंदति स्वीकरोति किं वेत्यनेन स्थावराणां भक्त्यतिशयो ध्वनितः ॥ तस्य तत्रैव वर्तमानत्वेऽन्यदपि लक्षणं मिथो ज्ञापयंत्यस्तरून्फलपुष्पावनम्रान्प्रणतान्मत्वा सवितर्कमाहुः—बाहुमिति । हे तरव इह चरन् कृष्णः फलपुष्पादिकरप्रदायिनां वः प्रजारूपाणां प्रणामं किं प्रणयपूर्वकावलोकैरभिनन्दति नवा ? हन्त हन्त युष्मद्विधेषु सात्त्विकसाधुलोकेषु कुतस्तस्य प्रीत्यवलोकनावकाश इति सासूसयमाहुः—रामानुजो मत्तस्तत्रापि प्रियाया असे बाहुं वामभुजमुपधायेति संप्रयोगप्रेमवशाच्छ्लथदुर्बलः प्रियास्कंधार्पितं स्वबाहुमेव कोमलमुपधानं कृत्वा तस्या मुखगंधेनोत्पतिष्णूनां भ्रमराणां विद्रावणार्थमेव दक्षिणपाणिगृहीतकमलोऽतः सेवैकतानमानसस्य तस्य नान्यत्र दृष्टिपातसंभव इति भावः । तुलसिकानां कोमलतुलसीकाननस्यालिकुलैरन्वीयमानः । तुलसिकाः परित्यज्य इहात्रैव सोन्विष्य इत्यतः स क्वचिदत्रैव निह्नुतो विहरतीति भावः । ननु तर्हि अलिकुलानामेवानुपदं गच्छामस्तत्राहुः—मदान्धैरिति । न हि मदान्धानामनुगतिर्भव्यजनैः कर्तुमुचितेति भावः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ तस्या मौनमयविलोकनाभिनिवेशेनाशङ्कितान्निजविरहार्त्तिदृष्ट्यार्त्तिभरोदयात् स्तब्धतां मत्वा तां विहाय फलपुष्पादिभरनम्रान् वृक्षान् वीक्ष्य विनयभरप्रणतान् मत्वा सर्वानेव तान् पृच्छन्ति । बाहुमिति । इहापि तत्तत्प्रशंसयानुमोदनं व्यज्यते तत्र वाक्यार्थेन यथा हे तरवो ! रामानुजो वो युष्माकं प्रणामं किम्वा प्रणयावलोकैरभिनन्दति इति स्वस्नेहस्य तत्कृपायाश्च योग्यास्पदतां सूचयित्वा तेषां द्रष्टृणां गुणप्रशंसा कथं नाभिनन्देदित्याशङ्क्य तत्र तस्य तया सह मधुरविलासावेशं कारणमाहुः । तज्ज्ञाने च कारणं गन्धमात्रेण पूर्ववन्निजतदन्तरङ्गधर्मविज्ञतामाहुः । बाहुमित्यादिना । तत्रानभिनन्दने सामान्यतः कारणं चरन्निति तत्तत्क्रीडास्थानगमनव्यग्र इत्यर्थः । ननु सदा सर्वत्र भ्रमति पश्यति चास्मान् अद्य वा को विशेषस्तत्राहुः । बाहुं प्रियांस उपधायेति । प्रियायाः स्वस्मिन् परमस्निग्धाया अंसे स्कन्धे उपधाय कोमलेयमिति यत्किञ्चिदाधायेति ननु तामेवास्मान् दर्शयितुमागतः कथमस्मत्प्रणामं नाभिनन्देत् इत्याशङ्क्याहुः । तुलसिकालिकुलैरन्वीयमानः सन् गृहीतपद्मः प्रियायास्तान्निवारयितुं दक्षिणेन भुजेन लीलापद्मधूननासक्त इत्यर्थः ! तर्हि कथमभिनन्देदिति भावः । अत्र तु तुलसिकालिकुलैरिति तत्क्रीडाननतुलसीनां सर्वसुगन्धित उत्कर्षो द्योतितः तथा च वक्ष्यते "दिव्यगन्धतुलसीमधुमत्तै"रिति अत एव मदान्धैस्तद्रसपानमदेनान्धैरपि तैरन्वीयमान इति प्रियाङ्गसङ्घर्षेण परिमलविशेषप्रकाशो दर्शितः इतीत्थमत्रापि पूर्ववत्तत्तत्प्रशंसा दर्शिता अथ च मालां बिभ्रद्वैजयन्तीमिति या वैजयन्ती प्रोक्ता मध्ये कश्चित्तुलसीत्यादौ त्वां बिभ्रदित्यनेन तत्प्राशस्त्यातिशयप्रस्तुतत्वाद्या च तुलसीमाला सूचिता पुनश्च कुन्दस्रज इत्यनेन या कुन्दस्रक् च दर्शिता संप्रति तस्यास्तस्याः स्खलनहेतवो विहाराश्च व्यञ्जिताः तदित्थं वाक्यार्थेन तत्तत्प्रशंसयानुमोदनमेव व्यञ्जितम् अथ पदानामर्थैरपि पूर्ववदनुसन्धेयं तदेवं वक्रीणां सख्यमेव लब्धं तस्या अमूनि नः क्षोभमित्यादौ विरोधमुखेन च तदेव हि निश्चेतव्यम् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हरिणीनां निरीक्षणाभिनिवेशेन निजविरहार्त्तिदृष्ट्या तासामप्यार्त्तिभरोदयात् स्तब्धतां मत्वा ता विहाय फलपुष्पादिभारेण नतान् वृक्षान् वीक्ष्य विनयभरनयान् परमसाधून् मत्वा सर्वानेव तान् पृच्छन्ति—बाहुमिति । बाहुं प्रियांस उपधाये-

त्यादिकं पूर्व्वोक्तगन्धप्राप्त्या प्रियया सहागमनं सम्भाव्य तत्र च स्त्री-स्कन्धसौरभ्यमिश्रित-श्रीमद्बाहुसौरभ्यं तथा श्रीहस्तामोदाक्तपद्मगन्धं तथा भ्रमरगन्धसम्वलितं तदङ्ग-तुलसीगन्धं च प्राप्योक्तम्। किंवा नागरीणामीदृशी परिपाटी भवेदिति युक्त्या तथोक्तम्, तुलसीकाया अलिकुलैरिति तस्या एव सर्व्वतो मधुरामोदविशेषात्, अतएव मदान्धैस्तैरन्वीयमान इत्यनेन बाहुमित्यादिना च रसविशेषप्रकटनम्, तथा तुलस्याः सौभाग्यं तत्सम्बन्धादलीनाञ्च सूचितम्। अन्वीयमानत्वेनैव मदान्धानां तेषां महाध्वनिना निज-निह्नुति-लीलाभंग-शंकया युष्मद्विधव्यवधानेन तान् परिहर्त्तुम्, किंवा युष्मत्पुष्पेषु सञ्चारयितुमिह चरन्' यद्वा, स्थावरजात्या तुलसीसाम्येन निजप्रयोजनापेक्षयापि समयविशेषेऽस्मिन् युष्मास्वपि तत्कृपा सम्भाव्यते इत्यतः विशेषतश्च प्रणतवत्सलत्वादत्रैव चरन् सन्निति भावः। प्रणयावलोकैः किमभिनन्दति, अनुमोदते स्वीकरोति वेति तेषां सुदुर्ल्लभत्वात्, किंवेति सकटाक्षप्रश्ने, अतस्तत् कथयतेति शेषः। अन्यत्तैर्व्यञ्जितम्। अथवा तच्छ्रीमत्पदानि तत्र च वामे संमिलित-स्त्रीपदानि वीक्ष्य दक्षिणे चाश्वासप्राप्त्येवाधिकनतान् वृक्षान् वीक्ष्य तेन श्रीदक्षिणहस्ते पद्मग्रहणं सम्भाव्य क्वचिच्च भयादिवाग्रतो द्रुतपतितान्यधिकमग्नान्याकुलानि च प्रिया-पदानि वीक्ष्य तेन च मदान्धभ्रमरानुगमनं सम्भाव्य, किंवा तत्तत्पदोपरि भ्रमरमुखनिर्गतमधुकणान् सर्व्वतो वीक्ष्य तथा तथोक्तमिति ज्ञेयम्। यद्वा, केवलमुन्मत्ततयैव तत्तदुक्तिः, न च किञ्चिद्दर्शनविचारादिनेति (भा० १०।३०।१४) 'इत्युन्मत्तवचः' इति वक्ष्यमाणत्वात् श्लेषेण मदान्धा एव तमनुसरन्तीति तथा तेषां सम्बन्धात् सोऽपि मदान्ध एवेति प्रणयकोपोक्तिः; यद्वा, मदान्धैरपि अतो गतमानाभिरस्माभिर्यदयमनुगम्यते, तद्युक्तमेवेति भावः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्रणामं फलभारनम्रत्वज्ञापकत्वमेव प्रणाम उच्यते ॥ १२-१४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

फलभारेण नतांस्तरून् कृष्णदर्शनात्प्रणतान्मत्वा प्रियया सहितगतिविलासं सम्भावयन्त्यः पृच्छन्ति। बाहुमिति। हे तरवः! रामानुजो गृहीतं दक्षिणपाणिना धृतं पद्मं येन तथाभूतः प्रियायाः स्कन्धे बाहुं वामं भुजं निधाय तुलसिकाया अलिकुलैस्तदामोदमदान्धैरन्वीयमानोऽनुगम्यमान इह चरन् प्रणयसहितैरवलोकैर्वो युष्माकं प्रणाममभिनन्दति किमित्यर्थः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विटवृत्तिमनुवर्तमानस्य पुंसो मालत्यादिपुष्पादानेच्छया तत्समीपजिगमिषासम्भवेन तत्प्रश्न उपयुज्यते अश्वत्थादिप्रश्नः क्वोपयुज्यते इत्यतः सम्भवं दर्शयितुमाहुः। बाहुमिति। हे तरवः! प्रणामप्रदक्षिणादिना प्रसन्नाः संसारात्तारयन्तीति तरवोऽश्वत्थादयः भगवच्चरणप्रियतुलसिकापुष्पमकरन्दलोलैरलिकुलैरन्वीयमानो रामानुज एकं बाहुं प्रियाया अंसे उपधायापरेण गृहीतपद्मः प्रणामं चरन् कुर्वन् प्रणयावलोकैः वः अभिनन्दति किं वेत्यन्वयः। प्रावण्यालङ्कारोक्तिः यद्वा इह चरन् रामानुजः प्रणयावलोकैः वः प्रणाममभिनन्दति किञ्चानेन स्थावराणां भक्त्युन्नतिः सूचितेति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्य तत्रैव वर्त्तमानत्वेऽन्यदपि लक्षणं मिथो ज्ञापयन्त्यस्तरून् फलपुष्पभारनम्रान् प्रणतान् मत्वा सवितर्कमाहुः। बाहुमिति। हे तरवः! इह चरन् कृष्णः फलपुष्पादिकरप्रदायिनां वः प्रजारूपाणां प्रणामं किं प्रणयपूर्वकावलोकैरभिनन्दति नवा हन्त हन्त युष्मद्विधेषु सात्त्विकसाधुषु लोकेषु कुतस्तस्य प्रीत्यावलोकनावकाश इति सासूयमाहुः। रामानुजो मत्तः तत्रापि प्रियाया अंसे बाहुं वामभुजमुपधायेति सम्प्रयोगश्रमवशात् श्लथदुर्वलः प्रियास्कन्धार्पितं बाहुमेव कोमलमुपधानं कृत्वा तस्या मुखगन्धेनोत्पतिष्णूनां भ्रमराणां विद्रावणार्थमेव दक्षिणपाणिगृहीतनीलकमलः अतस्तत्सेवैकतानमानसस्य तस्य नान्यत्र दृष्टिपातसम्भवः इति भावः। तुलसिकानां कोमलतुलसिकाननस्य अलिकुलैः अन्वीयमानः तुलसिकाः परित्यत्य इह अत्रैव सः अन्विष्यत इत्यत स क्वचिदत्रैव निह्नुतो विहरतीति भावः। ननु तर्हि अलिकुलानामेवानुपदं गच्छामस्तत्राहुः। मदान्धैरिति। नहि मदान्धानामनुगतिर्भव्यजनैः कर्तुमुचितेति भावः ॥ १२ ॥

रसिकाह्लादिनी-टीका

हरिणानां स्वभावतश्चाञ्चल्येन प्रदेशान्तरस्थितौ सत्यां परस्परं सम्मन्त्र्य एताः किमिति स्वानुभूतं कथयिष्यन्ति इति। फलपुष्पभारेण नतान् साधून् श्रीकृष्ण-सुतान् सर्वानेव परोपकारिणो मत्वा तरून् पृच्छति बाहुमिति, कुङ्कुमगन्धलिङ्गेन कयाचित् सह विलसतीति निश्चित्य कथयन्ति-प्रियांसे यया सह विहरति तस्या अंसे स्कन्धे स्खलनशङ्कया वामे बाहुमुपधाय संस्थाप्य विलासभरमन्थरत्वात् इति। दक्षिणेन बाहुना गृहीतपद्मः, अन्यच्च तुलसिकायाः सम्बन्धिभिरलिकुलैरन्वीयमान अनुगम्यमानः तस्यास्तुलस्याः मकरन्दपानेन यो मदस्तेनान्धैः अनेनैतत्सूचितं बाहुसौरभ्यं प्रियासौरभ्यं पद्मसौरभ्यं तुलसीसौरभ्यं च एतत्सौरभ्यं चतुष्टयं लब्ध्वा समप्रदेशस्थिताभिः परपंक्तिभिरुत्प्रेक्ष्य विलासभवझङ्कारश्रवणेन अलीनामनुमत्ततां सम्भाव्य प्रियाया सौभाग्यं तुलस्या सौभाग्यं अलीनामपि सौभाग्यं एतत् त्रितयं मनसि परिकल्प्य तरुणां नम्रत्वं दृष्ट्वा पृच्छन्तीति हे तरवः वो

युष्माकं प्रणामं प्रणयावलोकैः किमभिनन्दति अनुमोदते, पुष्पैः फलैश्चास्मदुपहनुकारिण अस्मद्विलासापतिकारिण इति मनसि विचार्य युष्मान्स करोति । किं वा नवेति सकटाक्षप्रश्ने किं कुर्वन् । भवत्संनिधावेवं विहरन् अनभिनन्दनमेव । पुनः पुनः पृच्छाभावहेतुः । एतेन तस्मिन् कृतघ्नत्वमप्यारोपितं भवति । गृहीतपद्म इत्यस्यायमभिप्रायः प्रियाश्वासवायुसौरभ्यलोभेनापततामलीनां निवारणाय तरुषु सञ्चारणाय पद्मभ्रामणमुक्तम् । अतस्तन्निवारणव्यग्रतया युष्मत्प्रणमानभिनन्दनमेव निश्चितमिति । ननु पूर्वं चूतप्रियालेति प्रश्ने कृतेऽपि उत्तरमलब्ध्वा पुनरपि वृक्षेषु कथं प्रश्नः विरहव्याधिव्याकुलितत्वात् पुनः प्रश्नः कृत इति तदुक्तं "कामार्त्ता हि प्रकृतिकृपणा चेतनाचेतनेषु" अतः कथयत । भवद्भिः कथयिते विस्रब्धाः सत्योऽग्रेऽन्विष्याम इति भावः । रामानुज इति निर्भयत्वं चोक्तं कस्यापि न संकोच इत्यपि सूचितं मदान्धैरिति मदान्धा एव तमनुगच्छन्ति वयं गतमदाः किमर्थाभिप्रयोजनं सेत्स्यतीति क्षणं निर्वेदालम्बिता विरहव्याकुलितत्वात् ॥ १२ ॥

विशुद्धरसदीपिका

अथ तस्या मौनमयावलोकनाभिनिवेशेनाशङ्कितान्निजविरहार्त्तिदृष्ट्यार्तिभरोदयात् स्तब्धतां मत्वा तां विहाय फलपुष्पादिनम्रान् द्रुमान् वीक्ष्य विनयभरप्रणतान्मत्वा सर्वानेव तान् पृच्छन्ति । बाहुमिति । इदमपि परमप्रेष्ठसखीनां वाक्यं तरवोऽप्येते तद्युगलपालिता लालिताश्च किल विलक्षणशक्तिभाजोऽन्तश्चेतना अपि तत्कुञ्जकेतनावेशेनाङ्गीकृतबहिर्जडीभावा भावज्ञतया परिकरप्राया इति गम्यते वल्लीनामपि तत्सुखावेशविवशानां सुरतान्तवर्णनोद्दीपिततदनन्तरलीलासंस्काराणां वैशिष्ट्यमिहापि तत्तत्प्रशंसयानुमोदनं व्यङ्ग्यं तत्र वाक्यार्थेन यथा हे तरवो ! रामानुजो वो युष्माकं प्रणामं किम्वा प्रणयावलोकैरभिनन्दति इति स्वस्नेहस्य तत्कृपायाश्च योग्यतां सूचयित्वा तेषां द्रष्टॄणां गुणप्रशंसा रामानुज इति साक्षात्तज्ज्येष्ठभ्रातुर्नामकथनान्निजस्य सख्यमेव सुव्यक्तं श्लेषेण धातोः प्रादुर्भावार्थतामवगत्य रामामनुपश्चाज्जायते प्रादुर्भवतीति सङ्केताभिधानात्तदनुगतत्वमपि व्यज्यते साङ्केतिकपदैश्चाश्लीलत्वं न दोषः ननु तदेकाश्रयाणां प्रणामं कथं ताभिनन्देदित्याशङ्क्य तत्र तस्य तया सह मधुरातिमधुरविलासंवेशं कारणमाहुः । तज्ज्ञाने च कारणं गन्धमात्रेण पूर्ववन्निजस्य तदन्तरङ्गधर्मज्ञतैव तत्रानभिनन्दने सामान्यतः कारण चरन्निति तत्तत्क्रीडास्थानगमनव्यग्र इत्यर्थः । ननु सदा सर्वत्र भ्रमति पश्यति वारमान् अद्य वा को विशेषात्तत्राहुः । बाहुं प्रियांस उपधायेति प्रेयायाः परमप्रेष्ठतमाया अंसे स्कन्धे सप्तमी सामीप्ये अतिसुकुमारिकेयं मम प्राणसञ्जीवनी वनीति ललितगत्यावेशेन स्खलेदपि कदाचिदिति तत्सम्भालनार्थमंससमीपे बाहुं ननु हस्तमात्रमित्यादरातिशयः उपधाय उपधानीकृत्येत्यर्थः । ततश्च पूर्वस्मिन् श्लोके सुरतान्तवर्णनश्रवणात्स्वतः सतां ह्रीः परतोऽतिगुर्वीतिन्यायेन सञ्जातापत्रपायाः प्राणप्रियायाः वनशोभावलोकनमिषेण ततो विहारस्थानादन्यत्र गमनमिति गम्यते प्राणनाथश्च तामनुसेवनपरः प्रयातीति सम्भाव्य तस्याः स्वाधीनपतिकात्वमनुसंहितं ननु तामेवास्मान् दर्शयितुमागतः कथमस्मत्प्रणामं नाभिनन्देदित्याशङ्क्याहुः तुळसिकालिकुलैरन्वीयमानः सन् गृहीतपद्मः निजस्य श्यामसुन्दरत्वेन वर्णसाम्यादात्मीयैरेवोदित्वरैरभिलाषविशेषैरेवाळिभिः पद्मिनीगणशिरोमणिमञ्जरीनीराजितचरणां प्राणप्रियां परितो भ्रमद्भिस्तदात्वोचितसेवौपयिकळीळापद्मे न निवारितैरप्यन्वीयमानः लोलुपतयानुगम्यमानः निवारणे निमित्तञ्चातिसुकुमारिकेयमेषां छाययापि ग्लानिमावहेदिति शङ्कैव एवञ्चाभिलाषैरपि तां स्प्रष्टुं न पारयतीति तत्सुखसुखित्वेन प्रीत्यतिशयः तस्याश्चाति सौकुमार्य्यं सूचितं यद्वा तुळसिकेति श्रीवृन्दादेव्या एव नामान्तरेणाभिधानं तस्या आलिकुलैः सहचरीगणैः अन्वीयमान इत्यर्थः स्वासाञ्च तद्विरहित्वाद्दैन्येन तदभिनन्दनम् एवञ्च लीलाकमलस्यापि हृदयाम्बुरुहत्वं व्यज्यते ततश्च प्राणप्रियायाः सुरतान्तां तां रूपमाधुरीं निपीय चक्षुष्मतेव हृदयाम्बुजेन निर्मञ्छनं यातीति गृहीतपद्मत्वेन सूच्यते ततश्चैतादृशस्तत्सेवाव्यग्रो युष्माकं प्रणामं कथमभिनन्देदिति प्रश्नाभिप्रायः । ततश्च तस्या अपि मदनमदालसाया ललितगतिः सूचिता यथाल० "स्थितिर्मदभरालसा न गरिमाणमालम्बते गतिः प्रकृतिमन्थरा त्वरत ईषदेव क्रमात् । सलीलमवलोकितं नमति वङ्कते शङ्कते स्वभाव इव लङ्घितः प्रियसमीपतो राधये"ति विलासालङ्कारोऽयं तदुक्तं तत्रैव—

यानस्थानासनादीनां मुखनेत्रादिकर्म्मणाम् । विशेषोदयिता लोके विलास इति कीर्त्यते ॥

ततश्च तस्या अपि रसासक्तिः प्रागल्भ्यञ्च सूच्यते एतदुक्तं भवति स्वाधीनपतिकायामस्यां श्रीराधिकायां मुग्धामध्याप्रगल्भेति भेदादवस्थात्रयं यथावसरमुत्सवाय प्राणनाथस्य नित्यदा विराजते तदेव किन्ते कृतमित्यादिश्लोकत्रये क्रमेण निष्टङ्कितमिति अत्र तुळसिकालिकुलैरिति तत्क्रीडावनतुलसीनां सर्वत उत्कर्षो द्योतितः दिव्यगन्धतुलसीमधुमत्तैरितिवक्ष्यमाणात् अत एव मदान्धैरित्युक्तं स्थानास्थानपतनविचारविधुरैरित्यर्थः । तद्द्वारा निजस्यापि प्रेममत्ततानुभूतेति । अन्वीयमान इति । प्राणप्रियाङ्गसङ्घर्षेण परिमलविशेषोदयादात्मनोऽपि तद्वृत्तानुभवेन तदनुगमनकर्म्मत्वाभिमानः सूचितः एवमत्रापि पूर्ववत्तत्तत्प्रशसा दर्शिता अथ च मालां बिभ्रद्वैजयन्तीमिति या वैजयन्ती पूर्वमुक्ता मध्ये कश्चित्तुलसीत्यादौ त्वां बिभ्रदित्यनेन तत्प्राशस्त्याशयस्य प्रस्तुतत्वाद्वा तुलसीमाला सूचिता पुनश्च कुन्दस्रज इत्यनेन या कुन्दस्रक् च दर्शिता सम्प्रति तस्यास्तस्यास्खलनहेतवो विहाराः सूचिताः ततश्च मदनालसावस्थेयं तस्याः सौभाग्यातिनन्दनेन सहचरीगणस्यातिरहस्यतापि दर्शिता तदुक्तं भावामृते "जाळादथोद्दक्शफरी-

स्तदाळयो लावण्यवत्याः समाचारयंस्तयोः क्रीणन्ति याः प्राणपरार्द्धकोटिभिस्तयोः प्रमोदोत्थरुचिच्छटाकण’’मिति तदित्थं वाक्यार्थेन तत्तत्प्रशंसयाऽनुमोदनमेव व्यञ्जितम् अथ पदानामर्थैरपि पूर्ववदनुसन्धेयं तदेवं वक्रीणां परमप्रेष्ठसखीत्वं लब्धं तच्च तस्या अमूनि नः क्षोभमित्यादिविरोधमुखेन निश्चेतव्यमित्यलमतिप्रपञ्चितेन—

अन्तर्वाणिरभाणि श्रीशुकदेवो निगूहयित्वा याम् । लीलान्ता मतिचपलप्रकटं कथयन्न जिह्रेमि ॥
राधाकृष्ण सुखानामास्वादो जीवनं येषाम् । तत्रार्च्च नैकप्राणा मत्प्राणाः साधवः शरणम् ॥ १२ ॥

श्रीरामनारायणकृता भावभावविभाविका

अग्रे पुष्पफलभारेण नतांस्तरून् दृष्ट्वा एते सफलजन्मानः सफलत्वेऽपि नतत्वेन निरभिमानाः कृष्णदर्शने फलानि मूर्ध्न्याधाय प्रणततया कृष्णैकपरा बहुसुमनसः कृष्णेनाग्रजं प्रति शंसितत्वात् तत्प्रियाश्च परोपकारशीलतया वदिष्यन्तीति मत्वा पप्रच्छुः । बाहुमिति । स हरिः इह युष्माकं समीपे चरन् वः प्रणामं प्रणयावलोकैरभिनन्दति किम्वा नेति विकल्पार्थः तत्र तस्य स्वभावत एव प्रणतवत्सलत्वादभिनन्दनसम्भावना अस्मद्दुःखे स्वमानदोष एव निमित्तं सम्भवानाविशेषनिमित्तं सूचयन्ति रामानुज इति । यूयमपि तत्प्रियाः रामं स्वाग्रजं प्रति भवतां प्रशंसनात् स एव कथं स्नेहदृष्ट्या वो नाभिनन्देत् किञ्च गृहीतपद्मः तुळसिकालिकुलैरन्वीयमान इति पदाभ्यामपि पुष्पपत्रधारणोक्त्या द्रुमलतादिप्रियत्वं सूचितं बाहुं प्रियांस उपधायेत्युक्त्यापि स्वर्णयूथिकालताक्रान्ततमालवेषत्वात् भवदनुकारित्वेन भवत्प्रियत्वं विद्युत्द्युतिप्रियालंकृततुलसिपुष्पवन्यस्रग्धनुरनुरञ्जितमेघवर्णतनुत्वेन रसवृष्ट्या नित्यं भवत्पोषकः कथं न प्रणयावलोकरसवृष्ट्याभिनन्देत् तथा वन्यस्रग्वसन्तालिङ्गिततदालिकुलमधुकरीनिकरकरम्बिततुंपतिरतिपतिमिलनमङ्गलरतिमतिशतरतिमोहनवामतमालंकृतवामपूर्णकामवामस्वभावकामाभिरामाङ्गः कामेषु कुसुमपूरकर्तुपातिसचिवानां वः प्रणामं कथं नाभिनन्देत् तथा गृहीतपद्म इत्यनेन स्वकरपदपद्माभ्यामालज्जितमपिपद्मं यदा संगृह्य स्वकरशिरश्छत्रकरेण नास्मन्मानदः कथं न भवतां सफलप्रणामं सफलं कुर्य्यात् असम्भावनायां तु बाहुं प्रियांस उपाधाय गृहीतपद्म इत्यनेन तामालिङ्ग्य करपद्ममिलिततन्मुखपद्मत्वात् तदेकपरत्वेन सर्वज्ञत्वेऽपि यथा प्रियया संपरिष्वक्तो न बाह्यङ्किञ्चित् वेद नान्तरमिति श्रुति सिद्धमदान्धतया कथमभिनन्देत् तथा नित्यवारुणीमदोन्मत्तरामस्यानुजः कुलस्वभावप्राप्तोन्मादः तुलसिकायाः सर्वपुष्पमानोपमर्दिन्याः नः सपत्न्या अलिकुलैस्तत्रापि मदान्धैरन्वीयमान इत्यनेन प्रतिपक्षमदान्धसंगी च कथं वः प्रणाममभिनन्देदिति एवं वदन्त्योऽप्यसम्प्राप्तोत्तरत्वेन ताननभिनन्दितप्रणामतया वैकल्येन विचेतसो मत्वाग्रे ययुः ॥ १२ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ततो दैवात् क्वापि गतायां हरिण्यां फलभारेण नम्राँस्तत्रत्यांस्तरूनवलोक्य भगवन्तं दृष्ट्वा प्रणता इति मत्वा प्रियासहितस्य गतिविलासं सम्भावयन्त्यस्तान् पृच्छन्ति । बाहुमिति । प्रियायाः स्कन्धे बाहुमुपधाय द्वितीयहस्तेन गृहीतं पद्मं येन स रामानुजः अग्राह्यनामाऽस्मत्पतिः मदान्धैस्तुलसिकासम्बन्धिभ्रमरसमुदायैरन्वीयमानः अनुगम्यमानः अनेन प्रियासाहित्यमनुमीयते तुलसिकां विहाय तदङ्गलिप्तोत्कृष्टसौरभद्रव्यसुगन्धलोभादनुगच्छन्तीति तथेह वने चरन् हे तरवः ! प्रणामं च प्रणयावलोकैः प्रमपूर्वकैरवलोकनैरभिनन्दति किं न वाभिनन्दतीति प्रश्नः यद्वा तथा चरन्नभिनन्दति आनन्दं प्राप्नोति वः प्रणामं चाभिनन्दत्यनुमोदति किम् अनभिज्ञापक्षे तादृशं गन्धमाघ्राय तत्रैवस्थास्तत्रत्यान् वृक्षान् पृच्छन्ति । हे तरवः ! किमर्थं प्रणाम कुरुत कृष्णप्रसादार्थमिति चेत्स किमिह चरन् वः प्रणाममभिनन्दति यद्यपि भवन्तः साधवः परोपकारशीला अनुकम्प्यास्तथापि भवदीयं प्रणामं नाभिनन्दतीति वयं जानीमः कुत इत्याशङ्क्याहुः । तस्यान्यत्रासक्तचित्तस्य कार्य्यान्तरव्यग्रत्वान्नास्त्यवलोकनावकाश इति सासूयमाहुः । बाहुं वामभुजं प्रियास्कन्धे उपधाय तत्कोमलत्वमालोच्य किञ्चिदाधाय तन्मुखगन्धेनोत्पतिष्णूनां भ्रमराणां निवारणार्थमेव दक्षिणकरगृहीतलीलापद्मः तथा चादौ चरन् तद्गतिविलासव्यग्रः पुनश्च तत्सेवैकतानमानसश्चातो न तस्यान्यत्र दृष्टिप्रसारणावकाश इति भावः । एतेन ननु तामेवास्मान्दर्शयितुमागतः कथमस्मत्प्रणामं नाभिनन्देदित्याशङ्कापि निरस्ता तेन निवारिता एव एते भ्रमरा अनुगच्छन्तीत्याहुः । तुलसिकेति । ननु भ्रमरकुलानामेवानुपदं गच्छतेत्याशङ्क्याहुः । मदान्धैरिति । मदोन्मत्ताः मदान्धैरनुगम्यन्ते भव्यजनैस्तु मदान्धा नानुगन्तुमुचिता इति भावः । रामानुज इति कठोरतामभिव्यञ्जयन्ति अभिनन्दतीति वर्त्तमानापदेशाच्छाखानामनुत्थानाच्च क्वचिददर्शनयाग्यस्थाने स्थित इति सूचयन्ति । अभिनन्दाक्षेपाच्च किमर्थं नम्रीभूताः शाखा उत्थाय समाहिताः सन्तोऽस्मच्चित्तचारे स्वाज्ञाकरं निश्शङ्कसूचयन्त्विति व्यञ्जयन्ति निवृत्तिपक्षे वृक्षस्थानीयान् सज्ञातान् पृच्छन्ति । बाहुमिति । प्रियायाः मायाया अंसे बाहुं निधाय तामधिष्ठाय गृहीतं पद्मं जगदुपादानभूतं पुष्कररूपं येन सः यतो रामा माया अनुजा आधीना यस्य सः तुळसि प्रकाशशीलं कं सुखं यस्य तन्मकरन्दास्वादनपरैः परमहंसलक्षणालिकुलैः ब्रह्मानन्दलक्षणमदेनान्धैर्विषयदर्शनरहितैरनुगम्यमान इह सज्ञातेषु चरन् हे तरवः ! सज्ञाताः वः प्रणामं नमस्कारादिलक्षणकर्म किमभिनन्दति तथाचाभिनन्दनकर्त्तारमात्मानं भवन्तः किं जानन्तीत्यर्थः ॥ १२ ॥

रास-रहस्यम्

र० टी०—हे तरवः ! अश्वत्थादयः ! तदुपलक्षिताः देवाः विष्ण्वाद्याः ! दक्षिणपाणिना गृहीतपद्मं गृहीतं मोदितान्तःकरणं यस्य स मुमुक्षुः, तुलसिका सात्त्विकप्रत्ययाः, ताभिः उपचीयमानः भावानन्दः, तेनोत्पन्नमद इव उन्मत्तता, तेन अन्धैः अन्ध इव सांसारिकव्यवहारशून्यैः, तथा तुलसिकायाः सात्त्विकवृत्तेः, अलिकुलैः अलिकुल इव चंचलरजोगुणवृत्तिभिः, अन्वीयमानः अनुगम्यमानः, रामानुजः रमन्ते योगिनोऽस्मिनिति रामः परमात्मा, तदनु जायते इवेति रामानुजः जीवात्मा मुमुक्षुः, प्रियायाः विरति वनितायाः, "भूः पर्याङ्कं भुजवाहुलता कन्दुकं खं वितानं, दीपश्चन्द्रः विरतिवनिता लब्धसंगः प्रमोद ।" इति अंसे स्कन्धे, वामबाहुं प्रमोदमुपधाय निधाय, इह अस्मिन् संसारे, विचरन् प्रणयावलोकैः प्रीतिपूर्णदृष्टिभिः, वो युष्माकं प्रणामं अनुग्रहपूर्वकं किमभिनन्दति आनन्दयति न वा ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे तरवः ! तुलसिकासम्बन्धिभिर्भ्रमरसमूहैरन्वीयमानः इह वने प्रियया सह चरन् वो युष्माकं प्रणामं प्रणयसहितैरवलोकैः किमभिनन्दति ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तरूनुरुफलभुग्नानग्रतो दृष्ट्वा नमन्तो नमता वा वासुदेवेनेति पृच्छन्ति ॥ बाहुमिति । प्रियायाः कस्याश्चिदंसे स्कन्धे बाहुमुपधाय निधाय गृहीतपद्मो गृहीतमितरहस्तन्वस्तं पद्मं येन सः । अन्तरङ्गतस्तु गृहीता पाणिगृहीती पद्मा रमा येन स इति । अनेनास्मत्कृतसुकृततो लोकानुकृत्यैवं नटनमस्येति ध्वन्यते । रामानुजो रामा अस्माननुहीनाजो जेतेति रामानुजो रामैका अनु अनुसृत्य जाजवनोपेता यस्येति वा सः । जो जेता जवनेऽपि स्यादिति विश्वः । आर्यं प्रति वोक्त्वा जीवन्त्यश्चेदुत्तरत्र शासितुं शक्यमिति रामस्य बलरामस्यानुज इत्यभ्यधुरिति वा । तुलसिकासङ्गता अलयो भ्रमरास्तेषां कुलानि तैर्मदान्धैरेतद्रसास्वादजनितमदान्धैरन्वीयमानोऽस्मन्नाथ इह चरन् हे तरवः प्रणयावलोकैः सस्नेहकटाक्षैः प्रणामं युष्मत्कृतमभिनन्दन्ति किंवेत्यपृच्छन् । कच्चित्कुरबकाशोकेत्यशोकस्य कच्चिन्मल्लिक इति मल्लिकायाश्चूतप्रियालेति चूतस्य प्रस्तुतप्रश्नादिनाऽऽननबन्धान्न मन्मथसाहितीमावहेयुरुत्पलं च तासामुत्पलाक्षीत्वात्स्वकान्तिपराजितत्वाच्च तद्बाणीभवनसम्भवं शिष्टं सपत्नीपद्मासद्मेति छद्मना पद्मं कायजसहायमाचरेदितस्तद्रक्षावश्यकीति पद्मं दधार करे हरिरिति ध्वनितमनेनेति ज्ञेयं । अरविन्दमशोकं च चूतं च नवमल्लिका । च पञ्चैते पञ्चवाणस्य सायका इत्यमरः ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं हरिणपत्नीं पृष्ट्वा इयं भर्तृसमीपे वक्तुं न शक्तेति पूर्वं भगवत्स्तुतान् वृक्षान् पृच्छन्ति । बाहुमिति । प्रियाया अंसे बाहुमुपधाय द्वितीयेन हस्तेन गृहीतपद्मः रामानुजो निर्भयः तुलसिकायाः सम्बन्धिनो ये अलयः तेषां कुलैः कृत्वा अन्वीयमानः पश्चाद्गम्यमानः हे तरवः ! पूर्वं भगवता भक्तत्वेन स्तुताः अतो भवद्भिः कृतं प्रणाममिहैव किमभिनन्दति न वेति प्रश्नः प्रियांसे बाहुमुपधायेति समतया गमनेन लक्ष्यते उभयोः पदानां पङ्क्त्याकारेण गमनात् कदाचित्पदानां चाञ्चल्येन भ्रमरोपरुद्धगत्या तन्निराकरणार्थं यत्नो लक्ष्यते तरवश्चलाः नम्राः नमस्कारार्थमेव फलोपहारं कृत्वा भूमिसंवद्धशिरसो जाताः अतो ज्ञायते प्रणामः कृत इति अनुत्थानात् सन्देहः अभिनन्दति न वेति अनभिनन्दने हेतुः चरन्निति यो हि गच्छति सः अनवहितोऽपि भवति ननु निकट एव स गच्छति यद्यभिनन्दनं कृतं स्यात् तदैव श्रूयेत कथं सन्देह इति चेत्तत्राहुः । प्रणयावलोकैरिति प्रणयपूर्वकमवलोकनैर्नतु वाचा अतो ये निकटस्थाः त एव जानन्ति नान्ये ॥ १२ ॥

श्रीसुबोधिनी-सारः

प्रियाया अंसे स्कंधोपरि बाहुं हस्तं निधाय गृहीतं पद्मं येन स रामानुजो मदान्धैः तुलसिकाया अलिकुलैर्भ्रमरवृन्दैरन्वीयमानो गम्यमान इह चरन्सन् हे तरवः प्रणयावलोकैर्वो युष्माकं प्रणाममभिनन्दति प्रशंसति किं वा ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

बाहुं प्रियांस इत्यत्र, **समतया गमनेने**त्यादि । यद्यपि चरणचिह्नादर्शनेऽपि भगवद्भावस्वभावादेव तल्लीलास्फूर्तिः सम्भवति, अत एवालिषु तुलसिकासम्बन्धित्वोक्तिः, तदनुसारेणाग्रे गमनाभावश्च, तथाप्यधुना प्रियदर्शनवता ज्ञापितः प्रियः शीघ्रं प्राप्स्यत इति ज्ञात्वा प्रश्नपरा इति, तत्राप्युन्मत्तदृष्टान्तस्योक्तत्वादत्यनवहिता इति चिह्नदर्शनेऽपि तन्मार्गेण न गताः । किञ्च । यथा

सहभूताया अपि स्वामिन्याश्चरणचिह्नदर्शनं पूर्वं पश्चाच्च दर्शनं तथेहाप्येकत्रैकदा पददर्शनं, नाग्रे । तीक्ष्णभावशान्त्यर्थमेव पदचिह्नानां दर्शितत्वात्तस्य च तावतैव शान्तेः । अग्रे तु भगवदावेशकार्यत्वेन वक्ष्यत इत्याशयेनाचार्यैरेवमुक्तम् । पदचाञ्चल्यज्ञापितालिनिवारणयत्नेनैव गृहीतपद्मत्वं ज्ञायते, तेनाञ्जसा तदपीडनेन च तत्सम्भवात् । मदस्य संगाभावहेतुत्वमनुभूयते । तेषां च समदानामपि संगे मर्यादामार्गीयभक्तिरसजनित एव मदो भवितुमर्हतीति तुलसीसंबन्धकथनम् । अनवसरेऽपि गमनान्मदान्धतोक्ता। एवं रसासक्तस्येतरानुसन्धानासम्भवात् स्वमिलनं दुर्लभं जानन्तो तरुप्रणामं चेदनुसन्धास्यत्यस्मिन्नपि समये तदास्मानपि कदाचिदनुसन्धास्यतीत्याशयेन प्रश्नं चक्रे । अन्यथाऽलीनामन्धत्वनिरूपिकायास्तरुप्रणत्यभिनन्दनं प्रश्नोऽनुपपन्नः स्यादिति भावः॥१२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

फलभारेण नतांस्तरून् दृष्ट्वा 'कृष्णं दृष्ट्वा प्रणता' इति मत्वा पृच्छन्ति—बाहुमिति । हे तरवः ! दक्षिणपाणिना गृहीतं लीलापद्मं येन सः, तुलस्या मोदमदेन अन्धैस्तुलसिकायाः अलिकुलैरन्वीयमानः अनुगम्यमानः रामानुजः श्रीकृष्णः प्रियाया अंसे स्कन्धे वामं बाहुमुपधाय इह विचरन् प्रणयसहितैरवलोकैः वो युष्माकं प्रणामं किमभिनन्दतीत्यन्वयः ॥ प्रियायामासक्तावभिनन्दनाभावस्यापि सम्भवादेव प्रश्नः ॥ १२ ॥

अन्वितार्थप्रकाशिका

बाहुमिति ॥ हे तरवः ! दक्षिणपाणिना गृहीतं पद्मं लीलापद्मं येन सः तुलस्यामोदमदेनान्धैस्तुलसिकायाः अलिकुलैरन्वीयमानः अनुगम्यमानः रामानुजः श्रीकृष्णः प्रियाया असे स्कन्धे वामं बाहुमुपधाय इह विचरन् प्रणयसहितैरवलोकैः वो युष्माकं प्रणामं किमभिनन्दति ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

फलभारेण नम्रान् वृक्षान् विलोकः तेषां कृष्णे संनतिं मत्वा पृच्छन्ति बाहुमिति गृहीतपद्मो रामानुजः श्रीकृष्णः प्रियांसे वनितास्कंधे बाहुम् उपधाय धृत्वा मदान्धैः तुलसिकागन्धलुब्धौ रलिकुलैः षट्पदव्रातैः अनुगम्यमान इह चरन् सन् हे तरवः प्रणयावलोकैः स प्रेमेक्षणैः वो युष्माकं प्रणामं किं अभिनन्दति प्रशंसति किं वा न प्रशसति ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

फलभारतो नम्रांस्तरून् दृष्ट्वा तांश्च श्रीकृष्णदर्शनतः प्रणतान्मत्वा प्रियया सहितस्य गतिविलासं सम्भावयन्त्यः पृच्छन्ति ॥ बाहुमिति ॥ हे तरवः, गृहीतं दक्षिणपाणिना धृतं पद्मं येन तथाभूतः, रामानुजः श्रीकृष्णः, प्रियांसे स्वप्रेयस्याः स्कन्धे, बाहुं वामं भुजं, उपधाय निधाय, मदान्धैस्तुलसिकाघ्राणजमदेनैवान्धतोपेतैः, तुलसिकालिकुलैः तुलसिकासंबन्धिभ्रमरकुलैः, अन्वीयमानोऽनुगम्यमानः सन्, इह, चरन् संश्च, प्रणयावलोकैः प्रणयसहितैरवलोकनैः, वो युष्माकं, प्रणामं अभिनन्दति किं वा युष्मत्कृतप्रणामान् स्वीकरोति किं वेत्यर्थः ॥ १२ ॥

कृष्णप्रिया

सुनो तरुवर ! प्यारे प्रियतम श्रीकृष्ण ने अपना एक श्रीहस्त प्रिया के स्कन्ध पर रख कर, और दूसरे कर कमल में कमल कुसुम को धारण किए हुए विचरते हुए, और जिनके पीछे श्री तुलसी जी की गन्ध से मत्त मिलिन्द जा रहे हैं वैसे श्री दाऊजी के छोटे भैया जू ने प्रणयपूर्ण अवलोकनों से तुम्हारे प्रणामों का अङ्गीकार किया है न ! ॥ १२ ॥

[1]पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः । नूनं तत्करजस्पृष्टा[2] बिभ्रत्युत्पुलकान्यहो ॥ १३ ॥

कर्दमक्षमा

अन्वयः—(अथ हे सख्यः ?) इमाः, लताः, पृच्छत, अहो, वनस्पतेः, बाहून्, आश्लिष्टाः, अपि, नूनम्, तत्, करजस्पृष्टाः, उत्पुलकानि, बिभ्रति ॥ १३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

काश्चिदाहुः । हे सख्य इमा लताः कृष्णेन संगता नूनमत इमाः पृच्छत । ननु स्वपतिसंगतौ तत्संगतिर्दुर्घटा न । वनस्पतेः पत्युर्बाहुनाऽऽश्लिष्टा अपि नूनं तत्करजस्पृष्टाः कृष्णकरनखस्पर्शं प्राप्ता अहो भाग्यं यत उत्पुलकानि बिभ्रति । न हि स्वपतिसंगतावीदृक्पुलकसंभव इति भावः ॥ १३ ॥

---

१. पश्यतेमा–वीर. ; पश्यते ह–विज. । २. करस्पर्शाद्–वीर. विज. विश्व. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतः कृष्णेन संगता अतो हेतोः । अत्राशङ्कते—नन्विति । तत्संगतिः कृष्णसंगतिः । दुर्घटा अशक्या नेत्याह—तन्नखैः कृष्णनखैः स्पर्शः कथं ज्ञातस्तत्राहुः—यत इति । उत्फुल्लकान्यूर्ध्वरोमाणि । अन्यथा तदसंभवमाहुः न हीति । इति भाव इति—यादृक्परपुरुषस्पर्शे स्त्रीणामानन्दस्तादृक्स्वपतिसंगमेनेति तात्पर्यम् ।। अन्यदपि लक्षणमन्या दर्शयन्त्य आहुः—पृच्छतेति । हे सख्य इमा लता एव कृष्णसंगमलक्ष्मधारिणीः पृच्छत । न च स्वपतिसंगतौ तत्संगतिर्दुर्घटेति वाच्यम् , यतो वनस्पतेः पत्युर्बाहून्सम्यगाश्लिष्टा अपि अहो कामोद्रेकः नूनं तन्नखैः स्पृष्टा एवोत्पुलकानि बिभ्रति, न हि स्वपतिसंगतावीदृक्पुलकं स्यात् । अत एव तल्लक्षणस्यास्मद्दृश्यमानत्वात्पूर्वपूर्वा इव न वयं तदद्राक्ष्मेति मिथ्या वक्तुं प्रभविष्यन्तीति भावः ।। १३ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेतत्सर्वं कस्याः पदानि चैतानीति या वक्ष्यन्ति तासामवधानास्पदमेव न बभूवेति लभ्यते संशयासम्भवात् काश्चित्तु किञ्चित्कृतावधाना अपि रागद्वेषाभावात्तदश्रुत्येव स्वाभीष्टमेव दर्शयन्ति मुनीन्द्रश्चात्र पूर्वाभ्यस्तासां वासनाभेददर्शनाय तदुदासीनतां व्यञ्जयति । पृच्छतेमा लता इति । वनस्पतिरूपस्य पत्युर्बाहूनप्याश्लिष्टा इमा एव लताः पृच्छत नन्वेवं चेत्तर्हि कथमासां तत्सङ्गतिस्तर्क्यते तत्राहुः नूनं वितर्के तस्य श्रीकृष्णस्य करजैः स्पृष्टा इति ननु तदिदमपि कथं वितर्कितं तत्राहुः । उत् उच्चैः पुलकान्यंकुररूपाणि बिभ्रति बिभ्रत्य एवासते अहो इत्यपूर्वतायां, नत्वेवं पुरेत्यर्थः ।। १३ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एते हि तद्भक्तास्तन्मतमनुसरन्तो नूनं न कथयेयुर्नाम तर्हि स्त्रीत्वेनात्मीया लता एवैताः पृच्छाम इत्यन्योऽन्यमाहुः—पृच्छतेति । बाहुनाश्लिष्टा इत्यादिकं सर्व्वं निजभावानुसारेण ।। १३ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्र काश्चित्काश्चिद्गोपीराहुः । पश्यतेति । हे सख्यः ! इमा लताः कृष्णेन नूनं सङ्गताः पश्यत पृच्छतेति पाठान्तरं तदा इमा पृच्छतेत्यर्थः । ननु स्वपतिसङ्गतौ तत्सङ्गतिर्दुर्घटा तत्राहुः वनस्पतेः प्रत्युर्बाहून्स्कन्धानाश्लिष्टा अपि कर्तरि क्तः आश्लिष्येति पाठान्तरे आश्लिष्यापि नूनं तस्य कृष्णस्य करजैर्नखैः स्पृष्टाः कुतः यत उत्पुलकानि बिभ्रति नहि स्वपतिसङ्गतानामपीदृक् पुलकसम्भव इति भावः । उदञ्चितकोरकाणि पुलकत्वेन सम्भावयन्तीनामियमुक्तिः ।। १३ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नूनं निश्चयेन यास्तस्य कृष्णस्य करनखस्पर्शादुत्पुलकितानि पुष्पफललक्षणानि बिभ्रति ताः लताः वनस्पतेः बाहून् शाखा आश्लिष्टा अपि सम्भाव्याः पश्यत अहो उन्मुख्यो भवतेत्यन्वयः अयं रूपकालङ्कारः सुरतसुखस्मारकः ।। १३ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अन्यदपि लक्षणमन्या दर्शयन्त्य आहुः । पृच्छतेति । हे सख्यः ! इमा लता एव कृष्णसङ्गमलक्ष्मधारिणीः पृच्छत नच स्वपतिसङ्गतौ तत्सङ्गतिर्दुर्घटेति वाच्यं यतो वनस्पतेः पत्युर्बाहून् सम्यगाश्लिष्टा अपि अहो कामोद्रेकः नून तन्नखैः स्पृष्टा एव उत्पुलकानि बिभ्रति नहि स्वपतिसङ्गतावीदृक् पुलकः स्यात् अत एतल्लक्षणस्यास्मद्दृश्यमानत्वात् पूर्वपूर्वा इव न वयं तमद्राक्ष्मेति मिथ्या वक्तुं प्रभविष्यन्तीति भावः ।। १३ ।।

रसिकाह्लादिनी–टीका

पुनरपि धैर्यमवलम्ब्य व्याकुलतया तरूनवगणय्य एते वेणुजातीकठिनास्तदनुकूलाः किमर्थं कथयिष्यन्तीति विचार्यस्त्रीत्वेनास्मात् दुःखाभिज्ञा एताः लताः कथयिष्यन्तीति सम्भाव्यान्योऽन्यसम्मन्त्रयन्त्यः कथयन्ति पृच्छतेति इमा लता पृच्छत किमिति वनस्पतेः पत्युर्बाहुनाश्लिष्टा अपि उत्पुलकानि बिभ्रति अङ्कुराद्युत्पन्नलिङ्गान् तत्करजैर्नखैः स्पृष्टा इति । नूनं निश्चितं प्रियायाश्चूडाबन्धार्थमविचिन्वती तेन सङ्गतिर्जाता । अतः एता धन्या वयं तु दुर्भगा इति श्रीकृष्णस्पर्शमन्तरेण नैतादृक् पुलकसम्भव इति स्वानुभवं तास्वारोप्योक्त इतः परमुत्तराप्राप्या विरता इत्यर्थः ।। १३ ।।

विशुद्धरसदीपिका

अथान्योऽन्यं सुरतालसा रूपमाधुरीमनुभूय भूयोद्दीपितविहारयोः कुञ्जान्तरं प्रवेशं सम्भावयन्ति । तदुद्दीपितत्वं दर्शितं श्रीगोविन्दलीलामृते "स्फुरन्मकरकुण्डलं मधुरमन्दहासोदयं मदालसविलोचनं कमलसन्धिलोलालकं मुखं स्वदशनक्षताञ्जनमलीमसोष्ठं हरेः समीक्ष्य कमलेक्षणा पुनरभूद्विलासोन्मुखी । परस्परालोकनजातलज्जानिवृत्तचञ्चद्दरकुञ्चिताक्षम् ईष स्मित वीक्ष्य मुखं प्रियाया उद्दीप्ततृष्णः पुनरास कृष्ण" इति ततश्च चङ्क्रमणक्रमेण कुञ्जान्तरः प्रविष्टयोर्विहाररसाविष्टयोस्तत्तल्लीलानुकरणपरा द्रुमालिङ्गिता लता अवलोक्य सम्भाविततत्क्रीडाविशेषाः परस्परमाहुः । पृच्छतेति । प्रियनर्म्मसखीनामिदं वाक्य हे सख्यः ! इमाः

साक्षादनुभूयमानाः तल्लीलावलोकहर्षवैवश्येन तदनुकरणपराः लताः पृच्छत एता अस्माकं सजातीया अपि नितरान्तयोरानुकूल्यमनुशीलयन्त्योऽस्मासु साक्षाद्वक्तुमशक्ताश्चेष्टया सूचयन्तीति भावः। तामेव दर्शयन्ति। वनस्पतेः तरुणतमालस्य बाहूनिव विटपानित्यर्थः आश्लिष्टा आलिङ्गिताः ननु कुतो ज्ञातं तदनुकृतिपरा इति चेत्तत्राहुः। बिभ्रतीति। उत्पुलकानि उच्चैरोमाञ्चिता इति भावोद्रेकः तत्कुतः यतस्तत्करजस्पृष्टाः यद्वा अपि समुच्चये तयोरन्योऽन्यनेपथ्यरचनायै करजैर्नखैः स्पृष्टा अपीत्यर्थः। एवं चोभयोर्नखस्पर्शोत्पुलकितत्वेन तन्मिथुनमनुसख्यमेवासां सुव्यक्तम् अनुकरणञ्च भावोद्रेकादस्मासु तत्सूचनाय वेत्यविरुद्धं तदेवं पञ्चश्लोकीयं सख्यरसोत्कर्षदर्शिका व्याख्याता कारिका "क्षिते मृगीणां वृक्षाणां लतानां च सुखोदयः। द्वयोः सुखानुभूत्येति सख्यमेव दृढीकृतम्। किमन्यच्छ्रीमुनीन्द्रोऽपि सख्यं प्रकटयिष्यति। निजस्य रेम इत्यादिवाक्ये तत्क्रीडितं वदन्॥ १३॥

श्रीरामनारायणकृता भावभावविभाविका

अग्रे गच्छन्त्यो वनस्पति भुजवलिता नृत्यन्तीरिव वायुवेगचलिता लता अंकुराद्युत्पुलकोत्कलिता विलोक्य पुरुषान् परुषानवधार्य ताः प्रष्टुं तत्सौभाग्यं प्रशंसन्त्यो मिथोऽभिमन्त्रयन्ति पृच्छतेमा इति। हे सख्यः! इमा लताः पृच्छत ननु क आसामुत्कर्षस्तत्राहुः। अहो इत्याश्चर्ये परमाद्भुतभाग्यमासां यतो वनस्पतेः पत्युर्बाहूनाश्लिष्टा अपि नूनं तस्य नन्दनन्दनस्य करजैः स्पृष्टाः ननु कथमेवमुत्प्रेक्षते तत्राहुः। उत्पुलकानि हर्षेणोदितानि पुलकानि हृष्टरोमाणि अंकुररूपाणि उपलक्षणमेतत्सुमनोविकासमधुधारानन्दादीन् बिभ्रति यतोऽतः एवमवधारयामः नैवंविधो हर्षः पतिसङ्गमे सम्भवत्यनुभूतमेतदस्माभिः प्रतिरोमव्याप्त्योच्चलितोऽयमानन्दः पूर्णानन्दस्य नन्दनन्दनस्यैव ततोऽतिचित्रमासां भाग्यमासां पतयोऽपि धन्याः स्वालिङ्गितानामपि तत्करस्पर्शामोदमामोदमवलोकयन्तोऽपि न वारयन्ति किन्तु स्वयमप्युत्पुलकानन्दाश्रुभी राजन्तेऽस्मदभाग्यान्नास्मद्बन्धवो ऽप्येतादृशा इति॥ १३॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अहो किमर्थं तरवः पृच्छ्यन्ते स्वस्त्रीसन्निधौ परस्त्रीभिः सह भाषणं न करिष्यन्त्यत इमा लताः प्रष्टव्या इति काश्चिदाहुः। पृच्छतेति। हे सख्य! इमा दृश्यमाना लताः पृच्छत ननु यथा स्वसन्निधौ अन्यपतिना अस्माभिः सह भाषणं दुर्घटं तथा स्वपतिसङ्गतानामासां हृदि मनसां गतिर्दुर्घटेत्याशङ्क्याहुः। बाहूनिति। यद्यपि वनस्पतेः शाखालक्षणान्भुजानाश्लिष्टास्तथापि नूनं निश्चयेन तस्य श्रीकृष्णस्य करजैर्नखैः स्पृष्टाः यतः पुलकानि बिभ्रति अहो सर्वरसोपमर्दी अस्मात्प्रेष्ठरसः स्वपतिरसाविष्टानामपि तत्स्पृहादर्शनात् नहि स्वपतिसङ्गतावीदृक्पुलकोद्गमः सम्भवतीति भावः। सममेतदितरपक्षयोरपि निवृत्तिपक्षे हे सख्यः! वनस्पतेः सङ्घातलक्षणस्य वृक्षस्य विषयचपळान्बाहुनप्याश्लिष्टा इमा लतास्तत्स्थानीया रागद्वेषादयः इन्द्रियस्येन्द्रियार्थे रागद्वेषौ व्यवस्थितावित्युक्तत्वात् नूनं तस्य चिदात्मनः कराः प्रत्ययास्तत्र जातेन प्रादुर्भूतेन चेतनेन स्पृष्टा अहो उत्पुलकानि बिभ्रति स चेतनतयावभासन्त इत्यर्थः॥ १३॥

रास-रहस्यम्

र० टी०—हे सख्यः! इमा लताः वासना लताः, पृच्छतः यतः एताः वासनाः वनस्पतेः हृदयारण्ये अहंवृक्ष एवं वनस्पतिः, तस्य रागद्वेषादि विषया एव बाहवः, तैः आश्लिष्टा अपि संयुक्ता अपि, एताः वासनाः अहो नूनं निश्चितं तत् तस्य आत्मनः, करजस्पृष्टा करः किरणं तस्मात् जायते यः प्रकाशस्तेन स्पृष्टा सत्यः, उत्पुलकानि उद्गतपुलकानि रोमाञ्चितानि, बिभ्रति धारयन्ति अर्थात् शुद्धरूपेण प्रतीयन्ते वासना इति भावः॥ १३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काश्चिदाहुः इमाः वनस्पतेः स्वभर्तुर्बाहून् आश्लिष्टा अपि अहो अत्याश्चर्यमिदं भर्तृसमीपेऽपि तत्तेन श्रीकृष्णेन नूनं करजैर्नखैः स्पृष्टाः उत्पुलकानि बिभ्रति आनन्दातिशयेन रोमाञ्चिता भवन्ति अतः इमाः लताः हे सख्यः! पृच्छत॥ १३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे सख्य इह तत्करजस्पर्शात्तस्य कृष्णस्य कराभ्यां यत इति स चासौ स्पर्शश्च तस्मात्करजा नखा वोत्पुलकान्यूर्ध्वं पुलका येषु तानि लोमस्थलानि भवत्यो बिभ्रति तथेह वनस्तेर्वृक्षराजस्य बाहून्स्कधानाश्लिष्टा आलिङ्गितवत्यः। कर्तरि क्तो वा भावे वा क्तस्ततो बहुव्रीहिर्वा। लता अप्युत्पुलकानि गतं। बिभ्रति। अहो अतद्योग्यस्यापि वनस्पतेः सहवास इयदुन्नावह इत्याश्चर्यं पश्यतः। एकः कृष्णः स्वयमनेका इत्यत्रापि वनम्पतेर्लता इति न्यरूरुपन्सारूप्यमिति ज्ञेयं। नूनं निश्चयः। वनस्पतेर्बाहूनाश्लिष्टा लता अपीह नूनं निश्चयेन तत्करजाः कृष्णनखास्तत्स्पर्शादुत्पुलकानि बिभ्रत्यहो सख्यः पश्यत। स्वपत्यालिङ्गनतोऽपि तासामत्मान्नाश्च करजमात्रस्पर्शः पुलककुलकलकोऽतोऽस्माभिः स्वस्वपतिपरित्यागत आगतिरच्युतं प्रत्युचितेति सूचयामासुरिति ज्ञेयमिति वा। एवमेव देवोऽपि हे सख्यः सह वर्तत चेद्वयमपि समाश्लिष्य तमुत्पुलकितकलेवराः स्यामेति तासां हृदयम्॥ १३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ते ज्ञानिनो वृक्षाः स्त्रीभिः सह सम्भाषणं न करिष्यन्तीति तत्तत्पत्न्य एव प्रष्टव्या इत्याहुः । पृच्छतेमा लता इति । वनस्पतेर्बाहूनाश्लिष्टा अप्येताः पृच्छत यद्यपि तासामप्यनवसरः ताश्च पुनर्भर्तृभुजालिङ्गिताः अपि भगवत्करजैरेव नखैः स्पृष्टाः सत्यः उत्पुलकानि बिभ्रति नहि नहि रसान्तराविष्टानां रसान्तरार्थं स्पृहा भवति अत एव ज्ञायते सर्वोपमर्दी भगवत्सबन्धी रस इति एवं सर्वेषामेवावचने मूर्छिता इव जाता इति एतदन्ता प्रश्नकथा नवविधा एता गोप्यो निरूपिताः दशमी तु भगवता नीयते एवमन्वेषणेन रसस्थैर्यं निरूपितम् ॥ १३ ॥

श्रीसुबोधिनी-सारः

अन्या ऊचुः । वनस्पतेर्बाहूनप्याश्लिष्टाः संपृक्ता इमा लता यूयं पृच्छत । नूनं निश्चितं तस्य कृष्णस्य करजैर्नखैः स्पृष्टा उत्पुलकानि रोमांचानि बिभ्रति अहो ॥ १३ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

क्वाप्युत्तरमसम्प्राप्य काश्चिदाहुः-हे सख्यः ! इमा लताः पृच्छत । 'एताः कथं जानन्ति ?' इत्यपेक्षायामाहुः—वनस्पतेः स्वपतेर्बाहून् स्कन्धानाश्लिष्टा अप्येताः नूनं निश्चितं तस्य कृष्णस्य करजैः पुष्पावचयं कुर्वतो नखैः स्पृष्टाः, यतः उत्पुलकानि बिभ्रति । स्वपतिस्पर्शमात्रेण पुलकासम्भवादित्याशयः ।. तासां भाग्यस्याश्चर्यं सूचयन्ति—अहो इति ॥ १३ ॥

अन्वितार्थप्रकाशिका

पृच्छतेति ॥ अहो हे सख्यः ! इमा लताः पृच्छत यत एताः वनस्पतेः स्वपतेर्बाहून् स्कन्धानाश्लिष्टा अप्येता अहो नूनं निश्चितं तस्य करजैः पुष्पावचयं कुर्वतो नखैः स्पृष्टाः । यतः उत्पुलकानि अङ्कुरमिषेण उद्गतपुलकान्यङ्गानि बिभ्रति धारयति । स्पर्शमात्रेण ईदृक् पुलकासम्भवात् ॥ १३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अन्या ऊचुः हे सख्यः वनस्पते स्वपत्युः बाहून् शाखाः प्रति आश्लिष्टाः संगताः संलग्ना इति यावत् इत्यामालताः यूयं पृच्छत यतो नूनं तस्य श्रीकृष्णस्य करजैर्नखैः स्पृष्टाः सत्यः अहो आश्चर्यं उत्पुलकानि रोमांचितानि बिभ्रति स्वस्वामिसंगमेनैवं रोमोद्गमसंभवो न स्यादिति भावः ॥ १३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वपतिसंगतानामन्यसंस्पर्शत उत्पुलकितत्वासंभवेऽपि वनस्पत्यात्मकपतिसङ्गतासु लतात्मकाङ्गनासु तथाभावलक्ष्यान्या ऊचुः ॥ पश्यतेति ॥ हे सख्यः, इमाः लताः, पश्यत । वनस्पतेः पत्युः, बाहून् स्कन्धान् आश्लिष्टाः अपि, कर्त्तरि क्तः आश्लिष्येति पाठान्तरे, आश्लिष्य अपि, नूनं तस्य श्रीकृष्णस्य करजाः नखास्तैः स्पृष्टाः, ननु तत् कुतो ज्ञातं तत्राह । यतः यत्तुलकानि, बिभ्रति अहो आसां भाग्यम् । न हि स्वपतिसंगतानामीदृक्पुलकसंभव इति भावः ॥ १३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पृच्छेतमा लता इति : १०.३०.१३.

अयं क्ष्माभूः सुरतोपशोभितस्तत्पृच्छतैनं परमेशवर्तनम् ।
यद्वा तद्वीक्षोत्पुलका वदिष्यति प्रकाममेषा सुरतैव सम्प्रति ॥ १७७ ॥
परोपकाराय नियोजितस्वसर्वस्वभावा तरुजातिरेव ।
इत्थं मुहुः श्रीशमुखेन युष्मद्यशः श्रुतं तत्किमिहेदृगेव ॥ १७८ ॥
वृक्षा वा धरणीवेयमेणी वा सुलतादयः । न केऽपि कथयन्त्यस्मानीशवार्तामिहाद्भुतम् ॥ १७९ ॥

कृष्णप्रिया

हे सखियाँ ! इन लताओं को पूछने से क्वचित् समाचार मिल जाय, देखा ! ये लताएँ वृक्षों के शाखा रूप भुजाओं को आलिङ्गन कर रही है तो भी श्रीश्याममनोहर जी के नख स्पर्श से इनमें रोमोद्गम–पुलकावली जाग्रत हो गई है जिससे अनुमान हो रहा है कि ये लताएँ भगवान का पता बता सकेगी ॥ १३ ॥

इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः ।[1] लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः ॥ १४ ॥

---

[1] १४ श्लोकादारभ्य २३ पर्यन्तं दश श्लोका न सन्ति–विज ।

कर्दमक्षमा

अन्वयः—इति कृष्ण अन्वेषणकातराः तदात्मिकाः उन्मत्तवचः गोप्यः भगवतः ताः ताः लीलाः हि अनुचकुः ॥ १४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उन्मत्तवत्पप्रच्छुरित्येतत्प्रपंचितमिदानीं 'रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः' इति यदुक्तं तत्प्रपंचयति । इतीति । उन्मत्तवचोगोप्यः उन्मत्तवचसश्च ता गोप्यश्च कृष्णस्यान्वेषणेन कातरा अतिविह्वलाः । अनुचक्रुरनुकृतवत्यः ॥ १४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एकं प्रतिश्रुतं प्रपञ्च्य द्वितीयं प्रक्रमते—इति उक्तरीत्या । अनुकरणघृताभिवृद्धवह्निज्वालानां कथमात्माऽतिष्ठत्तत्राह—तदात्मिका इति ॥ इमा आनन्दजाड्यान्न किमपि ब्रुवते इत्येवमचेतनेष्वपि प्रश्नकामादिदर्शनाभ्यामुन्मत्तानां वचांसीव वचांसि यासां ताः । ततश्च तस्यान्वेषणेऽपि कातरास्तन्मध्ये काश्चिदेवं प्रत्येकं परामम‍ृशुः—संप्रत्यहमेव स्वरूपचेष्टाद्यनुकरणेनात्मानं कृष्णाकारं दर्शयित्वापि कातराणामासां स्वस्य च मौहूर्तिकीमपि निर्वृतिं निष्पादयमीति मनसि कृत्वा तस्य सर्वा एव लीलाः क्रमेण स्मृत्वा रूढीकृत्य पूतनावधादिलीलामनुचक्रुः । तस्मिन्नेवात्मनो यासां ताः । तत्र च प्रति कूलानामनुकरणं योगमाययैव, तन्मध्य एव गोपीस्वरूपा भूत्वा तत्तल्लीलासिद्धयर्थं चकार । अनुकूलानुकरणं तु गोप्यश्चक्रुरिति ज्ञेयम् । "नो नः कथा वद सदास्विति तन्निषिद्धोऽप्यानन्दनिघ्न इह ता यदवोचमेव । नामानि तु प्रथयितास्मि तदत्र नासामित्थं मुनिर्मनसि सम्प्रति निश्चिकाय ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति पूर्वोक्तप्रकारकमुन्मत्तस्य वच इव वचो यासां तादृश्यो गोप्यः कृष्णान्वेषणे कातरा विरहदुःखेन तदपि कर्त्तुमसमर्था इत्यर्थः । तथा सत्यो गायन्त्य उच्चैरित्याद्यनुसारेण गानानुवृत्तिप्राप्ता या याः पूतनावधादिलीलास्तास्ता अपि मध्ये मध्येऽनुचक्रुरित्यर्थः । तत्र हेतुः तदात्मिकाः तस्मिन् श्रीकृष्णे आत्मा चित्तं यासां ता गाढं तदासक्ता इत्यर्थः । तत्र कृष्णानुकरणं स्फुटमेव तदात्मकतया तत्र च स्वभावापरित्यागेन नातितदभेदस्फूर्त्तिः यतन्त्युन्निदधेऽम्बरमित्यत्र यत्नकथनात् कृष्णोऽहं पश्यत गतिमिति स्वस्मिन् कृष्णत्वसाधनार्थं तच्छब्दप्रयोगाच्च पूतनाद्यनुकरणं च कृष्णविषयकतद्धेतुकभयेनेति तदात्मकतयैव यथा स्वविषयकभयेनोन्मत्तस्य व्याघ्राद्यनुकरणम् अतो न तदीयप्रेमविरुद्धभावयोगः कस्याश्चिच्छ्रीयशोदानुकरणं च न स्वेन रत्याख्येन भावेन तस्य वाल्यभावनया वृतत्वात् किन्तु प्रीतिसामान्यातिशयाल्लब्धकृष्णभावत्वेन ततो भयादेव ततस्तस्याभावेन न मातृभावस्पर्शः किन्तु कृष्णभावेनैवेति न मिथः स्पर्शानुचितयोर्भावयोर्युतिः सर्वमेतत्तासु तदानीमुन्मादस्यानुगतत्वात्सहसैव समपद्यत नान्यदेवेति च ज्ञेयम् ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

'इति' उक्तप्रकारेण; यद्वा, 'इति' ईदृशमुन्मत्तवद्वचो यासां गोपीनां ता उन्मत्तवच इत्युक्तानुवादः, तत्तद्वाक्यानि केवलमुन्मत्ततयैवेति पूर्वोक्तोन्मत्तकवदित्यस्य दाढर्यार्थम् । तत्र चोन्मत्तवचस्त्वमयोग्येष्वपि प्रश्नात्तत्र च तथा तथा तत्तत्प्रश्नादिति अनुचक्रुरित्यत्र हेतुः—कृष्णस्य परमाकर्षकस्यान्वेषणाय विरहेण कातरा इति; अतः कातर्य्येणैव तत्तदनुकरणम्, न च स्वाच्छन्धेन सुखादिबुद्धयेत्यर्थः । तत्रैव हेतुः—तदात्मिकास्तेन हृतचित्ता इत्यर्थः; यद्वा, तच्छब्देन लीलाः परामृश्यन्ते, ततश्चानुकरणेऽभिनिवेशेन तत्सम्यक्त्वमभिप्रेतम्; यद्वा, ननु तल्लीलास्मरणेनापि विरहार्त्तानां प्राणा दुर्द्धराः, अनुकरण—घृतेन च विवृद्धविरहवह्नि–ज्वालानां तासां हृदि कथमात्मा अतिष्ठदित्याशंक्याह—तस्मिन्नेवात्मा यासां ताः, अतः सुशीतलामृतार्णवसम्बन्धेन न निःसृक्तः; अन्यथा स्वस्थानस्थः सन् दग्धोऽभविष्यदेवेत्यर्थः; यद्वा, श्रीकृष्णाविष्टचित्ता इति तत्तनुकरणं पारवश्येनैव, न तु स्वच्छन्देनेत्यर्थः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उन्मत्तकवत्पप्रच्छुरित्येतत् प्रपञ्चितम् अथ रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपञ्चयति । इतीति । इत्युन्मत्तस्येव वचांसि यासां ताः गोप्यः कृष्णान्वेषणेनातिकातरा अतिविह्वलास्तदात्मिकाश्च भगवतस्तास्ता लीला अनुचक्रुरनुकृतवत्यः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतो क्रमसन्दर्भः

इति पूर्वोक्तप्रकारेण उन्मत्तस्य वच इव वचो यासां तादृश्यः गोप्यः कृष्णान्वेषणेन कातरा भीता इव भीताः विरहदुःखेन तदपि कर्त्तुमसमर्था इत्यर्थः । तथा सत्यो गायन्त्य उच्चैरित्याद्यनुसारेण गानानुवृत्त्या या याः प्राप्ताः पूतनावधादिलीलास्तास्ता अपि मध्ये मध्येऽनुचक्रुरित्यर्थः ॥ १४–२३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

इति प्रत्येकं दृष्ट्वा कस्यापि प्रत्युत्तरमनासाद्य चोन्मादे जाते सति 'कृष्णो नान्यत्र भगवान्, मय्येव प्रविष्टस्तदहमेवं कृष्णः' इति प्रत्येकं तादात्म्यममूदिति दर्शयति इत्युन्मत्तवच इत्यादि। इत्येवं प्रकारेणोन्मत्तवचो यथा भवति तथा, कृष्णान्वेषणकातराः सत्यस्तास्ता भगवतः कृष्णस्य लीला अनुचक्रुः। तास्ता इति पूर्वपूर्वानुभूताः। अनुकरणे हेतुः तदात्मिकास्तादात्म्यं गताः॥ १४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

इत्युन्मत्त-वचो गोप्य इत्यादि। उन्मत्त वचो यथा भवति, तथा तदात्मिकाः सत्यः श्रीकृष्णस्य भगवतस्तास्ता इत्यनुकूलाः, प्रतिकूलास्तु पूतनादि, तादात्म्यरूपाः सर्वनाम्नो बुद्धिस्थवृत्तित्वादनुकूला एव बोद्धव्याः॥ १४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इमा आनन्दजाड्यान्न किमपि ब्रुवते इत्येवमचेतनेष्वपि प्रश्नकामादिदर्शनाभ्यामुन्मत्तानां वचांसीव वचांसि यासां ताः। ततश्च तस्यान्वेषणेऽपि कातरास्तन्मध्ये काश्चिदेवं प्रत्येकं परामम्रृशुः सम्प्रत्यहमेव स्वरूपचेष्टाद्यनुकरणेनात्मानं कृष्णाकारं दर्शयित्वा अतिकातराणामासां स्वस्याश्च मौहूर्तिकीमपि निर्वृतिं निष्पादयामीति मनसि कृत्वा तस्य सर्वा एव लीलाः क्रमेण स्मृत्यारूढीकृत्य पूतनावधलीलामनुचक्रुः तस्मिन्नेवात्मा मनो यासां ताः तत्र च प्रतिकूलानामनुकरणं योगमायैव तन्मध्य एव गोपीस्वरूपा भूत्वा तत्तल्लीलासिद्ध्यर्थं चकार अनुकूलानुकरणं तु गोप्यश्चक्रुरिति ज्ञेयं "नो नः कथा वद सदास्विति तन्निषिद्धोऽप्यानन्दनिघ्न इह ता यदवोचमेवनामानि तु प्रथयितास्मि तदत्र तासामित्थं मुनिर्मनसि सम्प्रति निश्चिकाय॥ १४॥

रसिकाह्लादिनी-टीका

पूर्वमुक्तं उन्मत्तकवत्पप्रच्छुरयोग्येष्वपि प्रश्नान् अचेतनेषु प्रश्नस्यानौचितिं मन्यमाना लीलानुकरणं श्रीकृष्णप्राप्त्युपायं निश्चित्यानुचक्रुरित्याहुः इत्युन्मत्तेति इति, पूर्वोक्तप्रकारेणोन्मत्तस्येव वचो यासां ताः उन्मत्तवचसस्ताश्च ता गोप्यः। भगवतो रसैश्वर्येण विराजमानस्यात एवावधीरिति। षड्गुणस्य तास्ताः प्रसिद्धाः पूतनाप्राणशोषणादिका लीलाऽनुचक्रुः यतः कृष्णावेषणकातरा इति मुख्यो हेतुरनुकरणे नतु स्वातन्त्र्येणेति। लीलास्मरणमपि विरहतापनिर्वापकं कृतम्। लीलाऽनुकरणेनेति चेत्तत्राह तदात्मिका स एवात्मनि मनसि यासां ताः, यद्वा तस्मिन्नेवात्मा क्षेत्रज्ञो जीवो यासां ताः, स एव प्राणरक्षक इति अयमर्थः तासामात्मा यदि स्वदेहे तिष्ठेत् तदा विरहाग्निना दह्येतैव तस्य शीतलतया मृताश्च तुल्ये श्रीकृष्णे स्थितत्वान्न दग्ध इत्यर्थः। एतासां देहा एव तदावेशात्। लीलाऽनुकुर्वति नवात्मा तस्य तु श्रीकृष्णात्मनि क्रोडीकृतत्वात्। अतो न किंचिदनुपपन्नमिति॥ १४॥

विशुद्धरसदीपिका

तदेवं रासपञ्चाध्याय्याः प्राणैरिव पञ्चभिः श्लोकैस्तयोरतिरहस्यां रतिलीलां सहचरीणां च तद्युगलमन्वनर्गलां प्रमपरिपाटीं च दर्शयित्वा यथोचितमत्यासामप्युन्मादचेष्टितानि संगृह्णाति। इतीति। अहो विपक्षतटस्थादिसमुदाये तत्प्राणसख्यस्तयोरतिगोपितां क्रीडां कथं प्रकाशयामासुरित्यत आह। उन्मत्तवच इति। उन्मदस्यान्याननुसन्धानस्वभावात् यद्वा वचांस्येव तासामुन्मत्तानि स्वयं कथयामासुर्नतु ता इत्यर्थः। तथापि तत्सुखसुखितानामनुचितमेव हितरहस्यप्रकाशनमिति चेत्तत्राह। गोप्य इति। वैदग्ध्येन गोपयितुं न शक्ता इत्यर्थः। अत एव श्लिष्टपदोपादानमिति। ननु ताभिः किंचिदनुभूतं न वेत्यत आह। कृष्णान्वेषणकातराः तदेकव्यग्रा नानुसन्दध्युरिति भावः। तर्हि किमनुतस्थुरिति तत्राह। लीला इति। पृच्छतेत्यादि श्लोकस्य यत्किञ्चिदनुसन्धानेन तदावेशविवशास्तल्लीलामेवानुचक्रुः तास्ताः प्रागनुभूता इत्यर्थः। ननु प्रेम्ण उभयानुगतत्वात्सोऽपि कथं नानुचकारेत्याशङ्क्य भगवत इत्युक्तं स तु भगेन निजानदन्मूर्त्या प्राणेश्वर्या नित्ययुक्त इत्यर्थः। यद्यपि निजनिजभावावेशेन सर्वमिदं प्रागुक्त कस्याः पदानीत्यादि वक्रीणां नानुसन्धानगोचरः संशयाभावात् तथापि काश्चित्किञ्चित्कृतावधानाः कान्तभावावेशेन लीलामात्रमनुचक्रुरिति ज्ञेयम्॥ १४॥

श्रीरामनारायणकृता भावभावविभाविका

एवं विमृश्यापि प्रेमोन्मादविह्वलतया ताः पृष्टमपि विस्मितमतयो यदोचुस्तदाह। इत्युन्मत्तेति इति पूर्वोक्तप्रकारेणोन्मत्तानामिव वृक्षलतादिप्रश्नरूपाणि वचांसि यासां ता उन्मत्तवचसः यद्वा उत्कृष्टः सर्वज्ञस्यापि स्वैश्वर्यादिविस्मारको मदः प्रेमसुधासवस्तद्युक्तानि वचांसि यासां ता यद्वा उत्कृष्टानामपि ब्रह्मादीनां ब्रह्मविदां मत्तता येभ्यस्तादृशानि वचांसि यासां ता ताः वाचः कृष्णगुणगानेन सर्वदोषेभ्यः पान्तीति गोप्यः—

मृषागिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः। यस्यां न मे पावनमङ्ग कर्म स्थित्युद्भवत्राणनिरोधमस्य॥

लीलावतारेप्सितजन्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्नधीरः। इत्यादिभिस्तद्गुणगानहीनवचसां हेयत्वनष्टप्रायत्वश्रवणात् प्रेमवैक्लव्येन कृष्णान्वेषणेऽपि कातराः यद्वा बहुधा बहिरन्विष्यालब्धतत्समागमा बहिः कृष्णान्वेषणेऽपि कातराः अन्तर्भवेऽनन्त भवन्तमेव ह्यतत्त्यजन्तो मृगयन्ति सन्त इत्यादिभिरन्तरन्वेष्यतामवगत्यान्तर्दृष्टयस्तदात्मकाः सत्यास्तदात्मिकतयैव भगवतस्तास्ताः लीला अनुचक्रुः यद्वा लीलाहीने केवलं तदन्वेषणे सर्वथा विरहानुसधानदुःखेन कातरास्तदात्मिकास्तदालिङ्गितमतयः प्रेममार्गाचार्य्यभूता गोप्यो नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृता इत्यादौ स्मृतानुशीलनाव्यवहितपरप्राप्तिमाकलय्य इह भगवति यानि कर्माणि तानि कुर्वन्ननुकुर्वन्नेव शतं समा यावदायुर्जिजीविषेदित्यर्थक "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा" इत्यादि श्रुतिसिद्धलीलानुकारं स्वाचरितेनैवोपदिशन्त्यस्ता गुणमान स्मारितास्तास्तत्पदलक्ष्यस्वरूपात्मिका भगवतो लीला ह्यनुचक्रुः ॥ १४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

उन्मत्तकवत्पप्रच्छुरित्येतत्प्रपञ्चितं तदुपसंहरन् रमापतेस्तदात्मिका इति तदुक्तं तत्प्रपञ्चयिमुपक्रमते। इतीति। इत्येवं प्रकारेणोन्मत्तवचो गोप्यः ह्रस्वः छान्दसः यद्वा उन्मत्तस्य वच इव वचो यासां ताश्च ता गोप्यश्च यद्वा उन्मत्तवच एतावत्ततो गोप्यः कृष्णान्वेषणार्थं कातरा अतिविह्वला भगवतस्तास्ता लीला अनुचक्रुः अनुकृतवत्यः यतस्तदात्मिकाः तत्स्फूर्त्या कृष्णानुकरण तदासक्तिप्रवृत्त्या वा पूतनाद्यनुकरणन्तु कृष्णबिषयिकतद्धेतुकभयादिजनितपूनाद्यात्मकत्वस्फूर्त्या व्याघ्रादिमनोन्मत्तस्य व्याघ्राद्यनुकरणवत् अतो न प्रेमविरुद्धभावसङ्करः यद्वा प्रतिकूलानामनुकरणं योगमायैव तन्मध्ये गोपीस्वरूपा भूत्वा तत्र लीलासिद्ध्यर्थं चकार यद्वा तत्तल्लीलाविशिष्टे भगवति अन्तराविर्भूते बहिस्तल्लीलादर्शनस्य साक्षादसम्भवात् तथानुकरण कृतवत्यः तत्रोत्कृष्टाः कृष्णरूपं मध्यमाः बलरामादिरूपं निकृष्टाः पूतनादिरूपं नासक्तवचस्त्वात् कृष्णस्य सदानन्दरूपस्य परमात्मनोऽन्वेषणे कातराः व्यग्राः कातर्य्यं प्राप्ता इति वा ततः षड्गुणैश्वर्यसम्पन्नस्य परमात्मनः सम्बन्धिन्यस्तास्ता लीला हि प्रसिद्धौ अनुचक्रुः भगवत्कृततत्तल्लीलानुकरणं वर्णयामासुः वाच्यवाचकयोरभेदादनुचक्रुरित्युक्तमिति सूचयितुमाह। तदात्मिकाः द्वावेव ब्रह्मणो रूपे परं चापरं चेत्यादिश्रुतेः ॥ १४ ॥

रास–रहस्यम्

र० टी०—इति पूर्वोक्तप्रकारेण, उन्मत्तवचो गोप्यः "बालोन्मत्त पिशाचवत्।" इति वचनानुसारेण अनवस्थितचित्तस्य वच इव वचो यासां ताः गोप्यः वृत्तयः कृष्णान्वेषणकातराः आत्मान्वेषणखेदखिन्नाः, तदात्मिकाः तादात्म्येन आत्मध्यानपरायणाः सत्यः, तदभिमानवत्यः भगवतः मुमुक्षोस्तास्ताः लीलाः व्यापारान् यथा यथा पूर्वानुभूताः तथा तथा एताः अनुचक्रुः अनुकृतवत्यः ॥ १४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपञ्चयति। इतीति दशभिः। तत्रैकेनोपक्रम्यानुकरणं चतुर्भिस्तन्मयत्वं चतुर्भिः पुनरेकेनानुकरण च प्रपञ्चयति। इत्येवमुन्मत्तस्येव वचांसि यासां ताः उन्मत्तवचसः ताश्च ताः गोप्यश्च तथाभूताः कृष्णान्वेषणेन कातरा अतिव्याकुलाः तास्ताः प्राक् प्रदर्शिताः भगवतो लीलाः अनुचक्रुः अनुकृतवत्यः ॥ १४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शुकं आह एवमिति। पृच्छमानाः पृच्छन्त्यो वृन्दावनलताः समस्तमपि लतापदेन वृन्दावनपदं विश्लिष्ट सत्संश्लिष्टं योग्यतया भवति तरुपदेनापि। ततश्च वृन्दावनलता वृन्दावनतरूंश्चेति सिध्यत्यन्वयः। वृन्दावनलताभिरस्तो रुशब्दो येषां ते वृन्दावनलतास्तरवस्तांस्तरूंनित्यावृत्त्याऽन्वयः। एकयैकान्तकाले तच्छब्दश्चेद्रसाभासः स्यादिति भाव इति वा। क्वचिद्वनोद्देशे परमात्मनः पदानि व्यचक्षतापश्यन् ॥ १४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं तिरोधानेन जाततापनिवारणार्थं यत्नो निरूपितः एतदुपमर्दिका भगवल्लीला प्रादुर्भूता तस्या विलासं वक्तुं पूर्वोपसंहारपूर्वकमुपक्रमते। इतीति। इतिशब्दः प्रकारवाची एवंप्रकारेण प्रश्नायोग्येऽपि प्रश्नकरणादुन्मत्तवाचो गोप्यो जाताः कृष्णस्यान्वेषणे कातरा अपि दीना अपि जाताः तनुर्वाक् च श्रान्ता मनसि तु त्रयो वर्त्तन्त इति प्रथमस्यापगमे द्वितीय आविर्भूत इत्याह। लीला इति। भगवतस्तास्ताः पूर्वमुक्ताः कृताश्च तदात्मिकाः सत्यः अनुचक्रुः उन्मत्तवच इति छान्दसो ह्रस्वः अथवा इति पूर्वोक्तमुन्मत्तवचः एतावदिति ततो गोप्यः कृष्णान्वेषणार्थं कतारा जाता इति भगवतो लीलाः षड्विधाः स्वाभाविक्यः तासामपि भेदास्तास्ताः युक्तश्चायमर्थः भगवति हृदि समाविष्टलीलाभिः सहिते यदा यदा भगवानवतरति तदा तदा पूतनासु पयःपानादिकं कराति

तथैव सम्वत्सरलीलायां पुरुषोत्तमादिषु प्रसिद्धिः एतासामपि मनसि आविर्भूतेन कर्त्तव्यं तत्साक्षात्कर्तुमशक्यमिति भावनयैवाविर्भूत इति अनुकरणमात्रं कृतवत्यः—

भक्त्यातिमत्तास्तद्भावमीषन्मत्तास्तु रोषतः। द्वेषभावं समाश्रित्य क्रीडन्त्यो ऽजातमत्सराः॥
सत्त्वादिगुणभावेन नवलीलाः प्रपेदिरे। अतो न न्यूनभावोऽत्र ह्याविष्टाः शकटादिभिः॥
सर्वत्र हरिबुद्ध्या वा पादस्पर्शेच्छया पुनः। उलूखलादिभावोऽपि तत्सम्बन्धप्रसिद्धये॥ १४॥

श्रीसुबोधिनी-सारः

इत्येवमुन्मत्तवद्वचो यासां ताश्च गोप्यश्चेति कृष्णस्यान्वेषणे मार्गणे कातरा व्याकुलाः तदात्मिका भगवतस्तास्ता लीला अनुचक्रुर्हि॥ १४॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

लीला भगवतस्तास्ता इत्यस्याग्रे, **भक्त्यातिमत्ता** इत्यादि। एतासां प्रिये स्नेहसाम्येऽपि क्वचिद् भगवद्भावे क्वचित्पूतनादिभावे हेतुमाहुः **भक्त्येत्यादि**। नायिकाभेदेन हि भावभेदः। एकस्या अपि समयादिहेतुभेदेनापि तथा। एवं सति भगवत्तल्लीलातत्सम्बन्धिनां मध्ये यस्या यदा तादृग्रूपस्य यस्य स्मृतिस्तस्यास्तदा तदात्मकत्वं विशुद्धभावत्वाज्जलादिसम्बन्धिस्फटिकस्येवेति प्रघट्टकार्थः। तथा च भगवन्मात्रज्ञानमतिमत्तत्वम्। तत्सम्बन्धिनामपि ज्ञानमीषन्मत्तत्वम्। लीलासम्बन्धिनां येषां ये भावास्तदात्मकतायां ते भावा अपि स्वत एव भवन्तीति ज्ञापनाय **रोषत** इत्यादिना तदुद्देशः कृतः। भावेषु दृष्टान्तेन वैजात्यज्ञापनाय **सत्त्वाद्युक्तिः**। ननु तथापि भगवज्ज्ञानं विहाय पूतनादिज्ञानं यत्र, तत्र ततो न्यूनभावता गम्यते, तत्र हेतुरपि वक्तुं न शक्य इत्यरुच्या पक्षान्तरमाहुः **अतो न न्यूनभाव** इति। हि यस्माद्धेतोः शकटादिभिराविष्टा अतो न न्यूनतेत्यर्थः। अत्रैवं ज्ञेयम्। अत्र तापलीलाभगवतामन्योन्योपमर्दकभावेनाविर्भाव इति पूर्वमुक्तम्। सपदि तु लीलाया आविर्भाव एतासूच्यते। सा च भगवत्कृतितत्सम्बन्ध्यात्मिका विशिष्टा, न त्वन्यतरमात्ररूपा। तथा च यदंशो यत्राविर्भूतस्तत्र स एवांश उच्यते, अन्यथा पूतनासुपयःपानसामयिकदशापन्नभगवत्स्वरूपभावापन्नैव पूतनायन्त्याः स्तनं कथं पिबेत्। पूतनायन्ती च तस्यामेव पूतनावत् कथमाचरेत्। अतो न क्वापि कुतश्चिन्न्यूनतेति सारम्। अस्मिन्पक्ष एका लीला यत्राविर्भूता तत्र न द्वितीयेति सिध्यति। तथा सति चिरं विलासोऽयं न स्यादिति पक्षान्तरमाहुर्भगवद्भावापन्नायाः सकाशात् पूतनोलूखलादिभावापन्ना उत्कृष्टा इति ज्ञापनाय **सर्वत्रेति**। अत्युत्कटविरहभावेनातिदीनतया कथञ्चिच्चरणसम्बन्धं वाञ्छन्त्यो यत्र तत्सम्बन्धः **पूर्वमनुभूतोऽस्ति** तद्वदाचरन्ति। मयि चेन्न चरण स्थापयति, तदा पूतनोलूखलादिबुद्ध्यापि वा स्थापयत्विति भावेन आत्यात्यैव सर्वत्र भगवद्बुद्धिः। अतस्तस्य प्रकर्षेण सिद्ध्यर्थं तथेत्यर्थः। पुनरिति पदादेकस्यां लीलायामनुकृतायामप्युक्तरीत्यात्यातौ पुनरुलूखलादिभावोऽपि भवतीति ज्ञाप्यते। एवं सति भावप्राचुर्यादत्रोत्कर्षः सिद्ध इति भावः॥ १४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उन्मत्तकवत् पप्रच्छुरित्येतत् प्रपञ्चितमनुवदन् 'तास्ता विचेष्टा जगृहुः' इति यदुक्तं तत् प्रपञ्चयति—इत्येवमुन्मत्तस्येव वचांसि यासां ताश्च ता गोप्यश्च ताः कृष्णान्वेषणेन कातरा अतिविह्वलास्तदात्मिकास्तदभेदाभिमानवत्यश्च सत्यश्च तास्ता भगवतो लीला अनुचक्रुः अनुकृतवत्यः॥ १४॥

अन्वितार्थप्रकाशिका

इतीति॥ इत्येवमुन्मत्तस्येव वचांसि यासां ताश्च गोप्यश्च ताः। कर्मधारयः। कृष्णान्वेषणेन कातराः अतिविह्वलास्तदात्मिकास्तदभेदाभिमानवत्यः सत्यश्च तास्ता भगवतो लीला अनुचक्रुः अनुकृतवत्यः॥ १४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उन्मत्तकवत्यः प्रच्छुरित्येतदुक्त्वाऽधुना रमापतेस्तास्ता विचेष्टा जगृहुरिति यत्कथितं तद्विवृणो इतीति इत्यमुनाप्रकारेण उन्मत्तस्य वचांसि वाक्यानिववाक्या नियासाताः उन्मतवचांसः ताश्चता गोप्यश्च पुनः कथं भूता कृष्णस्याऽन्वेषणंमार्गण तेन कातरा व्याकुलाः तस्मिन् श्रीकृष्णे एव आत्मा मनो यासांताः गाठंदा सक्ता इत्यर्थः केऽनुचक्रुः भगवत्कृतलीलाऽसारेण चेष्टाः कुर्वन्तिस्म। तत्र श्रीकृष्णानुकरणं तीव्रध्यानेन तदात्मकत्वादिति स्फुटमेव पूतनाद्यनुकारणं तु श्रीकृष्णतल्लीलाऽनुस्मरणयन तु प्रेम विरोधाय ज्ञातव्यमित्याशयः॥ १४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उन्मत्तवत् पप्रच्छुरित्येतत् प्रपञ्चितमिदानीं 'रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः' इति यदुक्तं तत् प्रपञ्चयति ॥ इतीति ॥ इतीत्थं, उन्मत्तस्येव वचांसि यासां ताश्च ता गोप्यः, कृष्णान्वेषणेन कातरा अतिनिह्वलाः, तस्मिन् कृष्णे एवात्मा मनो यासां तथाभूताश्च सत्यः, भगवतः श्रीकृष्णस्य, ताः ताः लीलाः, अनुचक्रुरनुकृतवत्यः हि ॥ १४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

इत्युन्मत्तेति : १०. ३०. १४.

इत्थं भेदोपासनान्ता विधाय तत्तादात्म्योपस्तिविन्यस्तचित्ताः ।
चक्रुः क्रीडां तादृशीमोशरूपां यत्तद्युक्तं द्वे अपीशाप्तिहेतू ॥ १८० ॥

कृष्णप्रिया

श्रीशुकाचार्य जीने कहा कि राजन् ! इस प्रकार उन्मत्त की नांई वचन कहती हुई, एवं श्रीकृष्ण जी को खोजने से दीन हुई गोपियाँ कृष्णमय हो गयी, जिससे भगवान कृष्ण ने की हुई लीलाएँ स्वयं करने लगी ॥ १४ ॥

कस्याश्चित् पूतनायन्त्याः कृष्णायन्त्यपिबत् स्तनम् । तोकायित्वा रुदत्यन्या पदाहञ्छकटायतीम् ॥ १५ ॥
दैत्यायित्वा जहारान्यामेका कृष्णार्भभावनाम् । रिङ्गयामास काप्यङ्घ्री कर्षन्ती घोषनिःस्वनैः[1] ॥ १६ ॥

कर्दमक्षमा

अन्वयः—कृष्णायन्ती, (काचित् गोपी) पूतनायन्त्याः, कस्याश्चित्, स्तनम्, अपिवत्, (तदा) तोकायित्वा, रुदती, अन्या, गोपी शकटायतीम् (अन्या गोपीम्) यदा अहनत् ॥ १५ ॥ (तदा) एका, (गोपी) दैत्यायित्वा, कृष्ण अर्भभावनाम्, अन्याम्, (गोपीम्) जहार, (तदा) वा घोषनिःस्वनैः अङ्घ्री, कर्षन्ती, (अन्या) अपि, रिङ्गयामास ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कस्याश्चिदित्यादिभिश्चतुर्भिरनुकरणं प्रपञ्च्यते ततश्चतुर्भिस्तन्मयत्वं पुनरेकेनानुकरणमिति विवेकः । पूतनायन्त्याः पूतनावदाचरन्त्याः कृष्णवदाचरन्ती गोपी स्तनमपिबत् । तोकायित्वा तोकवदात्मानं कृत्वा ॥ १५ ॥ दैत्यायित्वा दैत्यवत्तृणावर्तवदात्मानं कृत्वा एका कृष्णार्भभावनां कृष्णस्यार्भं बाल्यं भावयति या तामन्यां जहार ॥ १६-१७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पूतनेवाचरतीति पूतनायते, पूतनायत इति पूतनायन्ती "कर्तुः क्यङ् सलोपश्च" इति क्यङि पुनः तङन्ताच्छानचि प्राप्ते शतृप्रत्ययस्त्वार्षः, "श्यप्श्यनोर्नित्यम्" इति नुम् । तोक इवाचरतीति तोकायते तोकाय्यत, इति तोकायित्वा 'अव्ययकृतो भावे' इति भावे क्त्वा । शकटायतीमिह नुमभावस्त्वार्षः ॥ एवमनुकरणं चतुर्भिराह—पूतनायन्त्याः पूतनावदाचरन्त्याः । कृष्णवदाचरन्ती स्तनमपिबत् पानमनुचक्रे । तोकायित्वा तोकवदात्मानं कृत्वा ॥ १५ ॥ रिंगयामास हस्तजानुभ्यां चचाल । घोरनिस्वनैः मंजीरादिध्वनिभिः सह ॥ दैत्यायित्वा तृणावर्तदैत्यवदाचरन्ती एका कृष्णस्य आर्भं बाल्यं भावयति या ताम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदात्मकत्वनानुकरणस्य प्रपञ्चमाह नवभिः । पूतनायन्त्या इति । तथापि स्वभावस्थितत्वेन पूतनावदाचरन्त्या एव ननु तत्तद्विरुद्धभावाया इत्यर्थः । कृष्णायन्तीत्यत्र तु कृष्णार्भभावनामिति वक्ष्यमाणानुसारेण भावतोऽपि तदाचरन्तीति लभ्यते एवमुत्तरत्रापि स्तनमपिबदिति चानुकरणमात्रं तन्मात्रस्यापेक्षितत्वात् शकटायतीं शकटायमानां तादृशत्वञ्च हस्तपादाभ्यां भुवमवष्टभ्याधोमुखतयैवोच्चैरवस्थानम् ॥ १५ ॥ कृष्णस्य आर्भभावना बाल्यवासना सैव सा यस्यास्तां जहार तद्भयावेशेन तद्धरणमनुकृत्य दर्शितवतीत्यर्थः । घोषाः किङ्किण्यस्तेषां निस्वनैः कृत्वा सहिता सेविता वा तत्र साक्षादेव तासामपि पादेषु नूपुरसद्भावात् एतच्च घोषप्रघोषरुचिरमित्याद्युक्तरिङ्गणललिलानुकरणम् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अनुकरणमेव प्रपञ्चयति—कस्याश्चिदिति नवभिः । तद्विवेकस्तैर्व्यञ्जित एव । तत्र चानुचक्रुरित्युक्तेऽनुकरणस्यैव प्रपञ्चने कार्य्येऽपि तन्मयत्वस्य प्रपञ्चनमनुकरणस्यैव सम्यक्त्वबोधनार्थमिति । अथवा केवलमनुकरणस्यैव प्रपञ्चो ज्ञेयः, तत्र चादौ दैहिकचेष्टायाः प्रायो देहचेष्टयैवानुकरणं वाक्चेष्टासम्बलितायाः प्रायस्तथैव मानसचेष्टासम्वलितायाश्च तथैवेत्येवं त्रिधानुकरणम्, तत्र

---

१. निः स्वनौ—वीर. ।

यद्यपि प्रायो भावनयैव सर्व्वत्रानुकरणम्, तथापि तत्र तत्र तत्तत्प्राधान्यापेक्षया त्रैविध्यम्। तत्रादौ देहचेष्टाप्रधानानुकरणमाह त्रिभिः। पूतनायन्त्याः पूतनायमानायाः पूतनाद्यनुकरणं केवलं भावनयैव किञ्चित् तत्तन्मुद्राद्याचरणेन, न तु वेशादिना, सर्व्वथा तदसम्भावात्। अतएव वक्ष्यते (१६ श० श्लो०)—'कृष्णार्भभावनाम्' इति। तदपि विरह-वैवश्येन, यद्यपि न सुसिध्येत्तथापि विरहार्त्तिभरस्वभावेन तत्तल्लीलाभिनिवेशात् स्वयमेव सम्पद्यतेति ज्ञेयम्। तत्र यद्यपि परमवैष्णवीनां तासां दैत्यानुकरणं न युज्यते, तथापि केनापि सुदुरूहेण भाववैचित्रीविशेषेणाविष्टास्ताः कृष्णस्यैव लीला अनुचक्रुः, तासां प्रियसख्यस्तु तत्तद्भावाविष्टास्ता वितर्क्य तत्रैव तच्चित्तासञ्जनेन महादुःखापनोदनार्थं बुद्धिपूर्व्वकमेव पूतनाद्यनुकरणं कृतवत्य इति। अथवा, 'इति' एवं ताः कृष्णान्वेषणकातरा बभूवुः; अनु अनन्तरं तासां प्राणरक्षार्थं तास्ता लीलाः कर्त्र्यो विरहविह्वलाः सर्व्वा एव गोपीस्तदात्मिका लीलामयीश्चक्रुः, अतस्तत्तल्लीलापरिकरत्वाद्दैत्याद्यनुकरणं युक्तमेवेति तासां सर्व्वमनवद्यम्। स्तनमपिबदिति चानुकरणमात्रम्, न तु तत्त्वतः, अनुकरणस्यैवापेक्ष्यत्वात्, एवमग्रेऽन्यदप्यूह्यम्। शकटायतीं शकटायमानाम्; एवमग्रेऽपि; शकटानुकरणं तोकायमानाया उपरि शकटवत् कथञ्चिदवस्थानं ज्ञेयम्॥ १५॥ घोषाः किंकिण्यस्तेषां निःस्वनैः कृत्वा सहिता इति वा, तच्च साक्षादेव तासामपि पादेषु नूपुर-सद्भावात्; एतच्च (भा० १०।८।२२) 'घोषप्रघोषरुचिरम्' इत्याद्युक्तरिंगणलीलानुकरणम्॥ १६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पूतनायन्त्याः पूतनायमानायाः॥ १५॥ कृष्णार्भभावनाम् अर्भकावस्थकृष्णानुकारिणीं रिङ्गयामास चंक्रमणमकरोत्॥ १५-१७॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कस्याश्चिदित्यादि चतुर्भिरनुकरणं प्रपञ्च्यते ततश्चतुर्भिस्तन्मयत्वं पुनरेकेणानुकरणमिति विवेकः। कस्याश्चिद्गोपिकायाः पूतनावदाचरन्त्याः काचित् कृष्णवदाचरन्ती स्तनमचुम्बदन्या तु तोकायित्वा शिशुवदात्मानं कृत्वा रुदन्ती शकटासुरवदाचरन्तीं काञ्चित्पदा चरणेनाहन् ताडयामास॥ १५॥ काचित्तु दैत्यायित्वा तृणावर्तवदात्मानं कृत्वान्यां काञ्चित्कृष्णस्यार्भकं बाल्यं भावयन्ती जहार हृतवती काचिद् घोषाणां ध्वनतां भूषणानां निःस्वनो ययोस्तौ भूषणनिःस्वनाविति पाठान्तरं तावङ्घ्रीचरणौ कर्षन्ती रिङ्गयामास जानुचंक्रमणं चकार॥ १६॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तत्र तास्त इत्युक्तेः सर्वा एव लीला इत्यायाते मूलतः प्रभृति पूतनामोक्षादिलीलानुकरणस्योपस्थितौ तदेवाह। कस्याश्चिदित्यादि बहुभिः। ननु तादात्मिका इति तादात्म्यभाजः, तादात्म्यन्तु प्रम्णो मर्यादया चेतसो वृत्त्यन्तरराहित्येन तन्मयीभावः। न च तदात्मिका इति लीलात्मिका इति वक्तुं शक्यते;—(१४ श-श्लो०) "लीला भगवतस्तास्ता ह्यनुचक्रुः" इत्युक्तेः। नहि लीला भूत्वा लीला अनुचक्रुरिति सम्भवति, तेन कृष्णावेशात् कृष्णा—तादात्म्यमेव। तदा कथं प्रतिकूलेषु पूतनादिष्वभिनिवेशाभावात् पूतनायन्त्या इति॥ (१५-२७)

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तर्हि पूतनादि—तादात्म्यं कस्या इत्याह—कस्याश्चिदित्यादि। ननु तादात्म्यं तावत् प्रेम्णः परया मर्यादया चेतसो वृत्तान्तराभावेन तन्मयीभावः। तत्र कथं विजातीयेषु पूतनादिषु प्रेम्णोऽभावादनभिनिवेशेन तत्तत्तादात्म्यम्? लीलायाः प्रतिपक्ष-सापेक्षत्वमस्त्येवेति चेत् तदात्मिका इति न सङ्गच्छते, अनुभवे च विरोधः। तर्ह्येवं विचारणीयम्—कस्याश्चिदित्यत्र पूर्ववत् सर्वनाम्नो वुद्धिस्थ-वृत्तित्वात् 'किम्' शब्देनात्र योगमाया बोद्धव्या, योगमायामुपाश्रिति इत्यस्यैवासौ मर्यादा। तदवधि भगवदिच्छावशादासां सर्वसाहाय्य कारिण्येव संयोगे वियोगे च योगमाया बभूव। अतस्तासां तदात्मकत्वे तल्लीलानुकारे लीलासामग्री—समवधान्ययैव विजातीयभावं प्रकटयति॥ (१६-२२),

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवमनुकरणं चतुर्भिराह। पूतनायन्त्याः पूतनावदाचरन्त्याः कृष्णवदाचरन्ती स्तनमपिबत् पानमनुचक्रे तोकायित्वा तोकवदात्मानं कृत्वा॥ १५॥ दैत्यायित्वा तृणावर्त्तदैत्यवदाचरन्ती एका कृष्णस्य आर्भंबाल्यं भावयति या ताम्॥ १६-१७॥

रसिकाह्लादिनी-टीका

लीलाऽनुकरणमेव प्रपञ्चयति कस्याश्चिदिति लीलायास्त्रैविध्यं मानसी वाचकी दैहिकी लीला द्वये प्रतियोगत्वेन पूतनादीनां स्फुरणमित्यभि कथयति। पूतनायन्त्या पूतनावदाचरन्त्या कस्याश्चित् कृष्णायन्ती कृष्णायमाना अपि इति। वाचिक्यां लीलायां कथामहं कृष्णः कयाचिदुक्तमहं पूतनास्या स्तनपानादीनामनुकरणं तथापि श्रीकृष्णमङ्के स्थाप्य सा यथा कृतार्था अभूत्। तथैव पूतनायन्ती कृष्णायन्तीमङ्के स्थाप्य सुखमन्वभवत्। कृष्णस्पर्शमात्रापेक्षयेव पूतनानुकरणमिति भावः। पूर्वपद्येनोक्तं

अनुचक्रुस्तदात्मिका इति स एव तासामात्मा जातोऽतः स्वातन्त्र्याभावात्, तासां प्राणरक्षार्थं तत्तथैव कृतं कृष्णेनेति लीला तया सादृगुण्यार्थं प्रियसखीभिः पूतनावदाचरितम्। यथा ग्रहग्रहीतस्य स्वातन्त्र्यं नास्ति। ग्रह एव तस्या देहे प्रविश्य स्वकीया एव चेष्टाः करोति तद्वदियं लीलेति एवमन्यत्राप्युह्यम्। सकटभङ्गलीलामाह अन्या काचिद्व्रजदेवी आत्मानं तोकायित्वा सकटायन्ती सकटवदाचरन्ती। यदा पादेन अहन् तु ताडितवती पादस्पर्शाशया शकटवदन्वकरोदिति भावः॥ १५॥ तृणावर्त्तलीलामाह दैत्येति, एका काचिद्दैत्यायित्वा तृणावर्त्तवदात्मनं विधाय, कृष्णार्भभावनामन्या जहार। कृष्णस्यार्भं बाल्यं भावयति। काचित् हृतवती तृणावर्तस्य वक्षसि कृष्णस्पर्शाशया तथा कृतवतीति तात्पर्यम्। "तावङ्घ्रियुग्ममनुकृत्सरीसृपन्ताविति स्मृतिपथमवतीर्णा लीलामनुकुर्वन्ति। कापि कृष्णायन्ती घोषाः किंकिण्यादयस्तेषां निस्वनैः कृत्वा अंघ्री कर्षति रिङ्गयामास। जानुपाणिभ्यां चलतिस्म॥ १६॥

विशुद्धरसदीपिका

लीला एव प्रपञ्चयति। कस्याश्चिदिति दशभिः। अत्र पूतनादिविजातीयतादात्म्यं न गोपीनामपि तु सर्वनाम्नां बुद्धिस्थवृत्तित्वात्किंशब्देनात्र योगमायैव वक्तव्या कार्य्यार्थे सम्भविष्यतीति प्रागुक्तेः सैव तासामदृष्टरूपा सती योगेऽयोगे च साहाय्यं करोति तथा श्रीकृष्णतादात्म्येन तद्बाललीलानुकरणमप्यनुचितमुन्मादमूलकमेव तस्यानियतवृत्तित्वान्न विरुद्धं यथा श्रीकृष्णानुकरणं स्फुटमेव तदात्मकतया तत्र च स्वभावापरित्यागेन नातिभेदस्फूर्त्तिः यतन्तीत्यादौ यत्नकथनात् कृष्णोऽहमिति कृष्णत्वसाधनार्थं तच्छब्दप्रयोगाच्च पूतनाद्यनुकरणञ्च कृष्णविषयकतद्धेतुकभयेन तदात्मकतयैव यथा स्वविषयकभयेन व्याघ्राद्यनुकरणम् अतो न तदीयप्रेमविरोधः श्रीयशोदानुकरणञ्च न स्वेन रत्याख्येन भावेन तस्य बाल्यभावनयाऽऽवृतत्वात् किन्तु प्रीतिसामान्यातिशयलब्धकृष्णभावेन ततो भयादेव ततस्तस्याभावेन न मातृभावस्पर्शः किन्तु कृष्णभावेनैवेति न मिथः स्पर्शानुचितयोर्भावयोर्युतिः सर्वमेतत्तासु तदानीमुन्मादस्यागतत्वात्सहसैव समपद्यत न पूर्वाभ्यासेनेत्यपि ज्ञेयं वस्तुतस्तु कस्याश्चिदित्यनाकलितस्वरूपाया भावनालब्धायाः नतु साक्षाद्गोपिकाया इत्यर्थः। अत एव पूतनायन्त्या इति पूतना इवाचरन्त्या इत्युक्तम् एवञ्च प्रतिस्वमेव निजभावनावेशस्वभावेनैवानुकृतिः तत्तल्लीलया कृता नत्वन्यानुसंहितेति तदुन्माद एव सर्वसाधकः अन्यानुसन्धाने तु तद्विरोधः स्फुट एव तदात्मिका इत्युक्तः बाललीलानुकरणञ्च तदीयभावविरुद्धमपि नन्दसूनुरिति प्रागुक्ताभिप्रायेण बाल्योऽयमस्मत्प्रीतिं नावकलयतीति स्फूर्त्त्या सङ्गमनीयमिति संक्षेपः कस्याश्चिदिति। पूतनायन्त्याः सेवाचरन्त्या नतु तद्वद्विरुद्धभावाया इत्यर्थः। कृष्णायन्ती भावतोऽपि स इवाचरन्तीत्यर्थः। स्तनमपिबदित्यपि भावेनैव तोकायित्वा बाल इवाचरित्वा रुदन्ती सती शकटायती काञ्चिद्भावनालब्धामहन् भावेनैवेति सर्वत्र योज्यम्॥ १५॥ दैत्येति। एकां कृष्णार्भभावनां कृष्णार्भोऽहमिति भावना यस्यास्तामेका अन्या काचिद्भावनालब्धा एके मुख्यान्यकेवला इत्यमरः दैत्ययित्वा तृणावर्त्त इवाचरित्वा भावेनैव जहार शेषं स्पष्टम्॥ १६॥

श्रीरामनारायणकृता भावभावविभाविका

तदनुकारमेवाह। कस्याश्चिदित्यादि नवभिः। कस्याश्चित्तु प्राणस्य प्राणमिति श्रुतिसिद्धप्राणप्राणकृष्णवियोगे तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति श्रुतिविरुद्धप्राणावस्थित्यनौचित्यं मन्यमानायाः कृष्णगुणगाने पूतनामोक्षचरितमनुस्मृत्य तदुरसि कृष्णविहारं तत्प्राणानां कृष्णप्रवेशञ्चाकलय्य तस्या एवं भाग्यातिशयं मत्वा स्वोरसि तद्विहारस्य तत्सङ्गत्यां तदवियोगस्य च कामनया पूतनायन्त्याः पूतनावदाचरन्त्या न तस्या विरुद्धभावमपि दधत्याः काचित्कृष्णायन्ती तदात्मकतया कृष्ण इवाचरन्ती स्तनमपिबत् उपलक्षणमेतत् तदुरसि विहारञ्च कृतवती तदा चोभे अपि स्वस्मिन्स्वोरसि च कृष्णाकारेक्षणे न क्षणं क्षणमापतुः स्वामिन् दुष्टाया यातुधान्या विरोधमप्यनवेक्ष्य तदुरसि विहरन् स्निग्धा नः सप्रेममानमात्रेणापेक्षसेऽतः प्रसीदेति प्रार्थनाञ्च चक्रतुः। अन्या तु गुणगानानुगततच्चरितमनुस्मृत्य तदात्मकतयैव तोकायित्वा रुदन्ती पयःपानार्थं कृष्णरोदनवत् तदधरामृतपानाय रोदनेन तदनुकुर्वती रोदनदशायां विरहपवनोत्क्षिप्तरूपसरः पद्मपदा कामपि हरिपदपद्मस्पर्शेच्छया शकटायती स्वहस्तपादाभ्यां भुवमवष्टभ्योच्चतया स्थितां तल्लीनचित्तत्वेन जडीभूततया च शकटमिवाचरन्तीमहन् परतः क्षिप्तवतीत्यर्थः तत्रापि पूर्ववत्स्वस्मिन् कृष्णाकारदर्शनं तत्पादस्पर्शसौख्यं प्रार्थनं चोहनीयम्॥ १५॥ अन्यां तदात्मकतयैव कृष्णार्भभावनामेका कृष्णगुणगाने हरेस्तृणावर्तवक्षोऽधिलम्बनमनुस्मृत्य तद्भाग्याधिक्यं मत्वा कृष्णवियुक्तसुरमुनिमनुजेभ्यस्तदालिङ्गितासुरश्रेष्ठ्यमवगत्य तदालिङ्गनाभिलाषेण दैत्यायित्वा जहार सा च कृष्णार्भभावनतया व्याप्तत्वेन दैत्यायन्त्या भावपूरकस्वात्मगतकृष्णप्रेणया च तां विगाढमालिङ्गितवती तदा सा स्वस्मिन् कृष्णाकारदर्शनेन सौख्यमवाप सातु कृष्णाकारसखीवक्षोऽधिमागमोद्बुद्धसंस्कारस्मृतकृष्णालिङ्गनसौख्योत्तरतद्विरहपीडयाधीरा प्रवहद्दक्कञ्जमधुनीराततक्लिन्नतनुचीरा खिन्नमुखभिन्नहृत्स्विन्नशरीरा भुव्यपतत्पूर्ववत्प्रार्थयामास च कापि कृष्णगुणगाने—

तावङ्घ्रियुग्ममनुकृष्य सरीसृपन्तौ घोषप्रघोषरुचिरं व्रजकर्दमेष्वित्यत्रोक्तकृष्णशिशुचरितमनुस्मृत्य तदात्मकतया तदनुकुर्वती स्वकरेण भुवमवलम्ब्याङ्घ्री कर्षन्ती वन्द्यालिबोधितकुसुमराजाब्जवद्घोषाणां निःस्वनैः विकसितमुखपद्मा रिङ्गयामास स्वामिन्नेवं बाल्ये एव सुखं दत्वाधुना कैशोरे वनमाहूयोपेक्षसीति चित्रमतः प्रसीदेति प्रार्थयामास च॥ १६॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथैतद्विवृणोति । कस्याश्चिद्गोप्याः पूतनावदाचरन्त्याः काचित्कृष्णवदाचरन्ती अहं कृष्ण इत्युक्तवती तां कृष्णं बुद्धाङ्के कृतवत्याः तस्याः स्तनमपिबत् यावच्छक्यते तावदनुक्रियतेऽतोऽसुपानसामर्थ्याभावात् स्तनपानमात्रमुक्तं तस्यापि द्वेषभावनाभावान्मरणाभावः अनुकरणात् तोकायित्वा तोकवदाचरित्वा तोकमात्मानं मत्वेति वा तोकवदात्मानं कृत्वेति वा शकटायतीं शकटवस्थितां पदा चरणेन अहन् निवृत्तिपक्षे कस्याश्चिदिति पूतनावदाचरन्तं परमात्मानं वर्णयामास काचित्कृष्णरूपेण स्तनपानमनुकुर्वन्तं काचित्तोकरूपमनुकृत्य रोदनमनुकुर्वन्तं शटरूपापन्नमात्मानं चरणेनाहन् तमनुकुर्वन्तं निरूपयामासेत्यर्थः एवमग्रेऽपि ॥१५॥ अन्या तृणावर्तदैत्यवदात्मानं कृत्वा कृष्णार्भं तस्य बाल्यं भावयन्तीमपरां जहार कापि अङ्घ्री कर्षन्ती घोषनिःस्वनैः रिङ्गयामास चलितवती ॥ १६ ॥

रास-रहस्यम्

र० टी० पूतनायन्त्याः पूतनावदाचरन्त्याः, पूतना माया, माया तत् कार्यं संसारस्य स्वरूपं आपातदृष्ट्या परमरमणीयं निर्दोषं च प्रतीयते परन्तु यदा कृष्णायन्त्य अर्थात् बालकृष्णवत् अर्भकसरलतया भगवद्भावनया तस्याः स्तनं पिबति अर्थात् तस्याः मायायाः हृदयपानं करोति अर्थात् तस्याः स्वरूपं विजानाति तदातु सा स्वस्वरूपेण प्रकटीभवति, अन्ततः ज्ञानाग्निना भस्मीभूता अर्थात् तस्याः आत्यन्तिको विनाशो भवति । संसारात्मकशकटं रागद्वेषादिद्वन्द्वचक्रोपरि परिनिष्ठितो भवति । तस्मिंश्च वासनानां सम्भाराणि वर्तन्ते । तत् प्राप्त्यर्थं जीवाः अज्ञानबालवत् रुदन्ति । यदा तानप्राप्य भगवन्मुखी भवन्ति, तथा संसारः भगवत् पदा स्पृष्टो भवति अर्थात् सर्वत्र भगवत्सत्तानुभवं कुर्वन्ति तदायं विपरिवर्तते । अस्मिन् स्थितानि वासनासम्भाराणि स्वतः एव विनाशं प्राप्नुवन्ति ॥ १५ ॥ मुमुक्षुः कृष्णार्भभावनां अर्थात् साधनस्य प्रथमावस्थायां दैत्यायित्वा अर्थात् दैत्यवत् मोहवशात् प्रबलवासनावायुना ताड़ितस्सन् आवर्तवत् संसारगह्वरे नीतो भवति; परन्तु यदि धृतियुक्तस्सन् भगवद्भावनां दृढीकर्तुं शक्नोति तदा सः स्वयमेव विनश्यति । यदा मुमुक्षुः साधनमार्गे स्वयं न सम्यक् चलितुं शक्नोति परन्तु बालवत् रिङ्गनेन कथं कथमपि चलितुं चेष्टते, साधनस्यादृढावस्थायां मधुरशब्दश्रवणेनाकृष्टहरिणवत् "स्वर्गकामः अग्नोष्टोमेन यजेत ।" "अपामसोममसृताः बभूमः ।" "अक्षय्यं ह वै चातुर्मास्ययाजिनो सुकृतं भवति ।" इत्यादि घोषनिस्वनैः अर्थात् स्तुतिवाक्यश्रवणेन कर्षन्ती अर्थात् आकृष्टो भवति ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काश्चित्कृष्णायन्ती कृष्णवदाचरन्ती कस्याश्चित्पूतनायन्त्याःपूतनावदाचरन्त्याः स्तनमपिबत् अन्या काचित् स्तोकायित्वा स्तोकवत् बालवदात्मानं कृत्वा रुदन्ती शकटायतीं शकटवदाचरन्तीं पदा अहन् चरणेन तताड ॥ १५ ॥ एका दैत्यायित्वा तृणावर्तारूपदैत्यवदात्मानं कृत्वा अन्यां कृष्णार्भमावनां कृष्णस्यार्भं बाल्यं भावयन्तीं जहार कापि काचिदपि घोषाणां किङ्किणीनां निःस्वनैरुपलक्षितैः अंघ्री कर्षन्ती रिङ्गयामास ॥ १६-१७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कथं निर्दध्रुः पदानिः यदुपतेरित्यत आह ॥ पदानीति । लता कल्पलता । आदिपदेन यवचक्रादिग्रहः ॥ १५ ॥ इत्युन्मत्तवचो गोप्य इत्यारभ्य बद्धान्वयास्त्रजाकापि तन्वीत्यादि विडम्बनमित्यन्ता दशश्लोकी प्रक्षिप्तेति पेक्षावत्सम्प्रदाय इति न व्याख्याता प्राचीनैरिति न व्याख्याताऽस्माभिरपीति ज्ञेयं । तैस्तैः पदैस्तत्पदवीं कृष्णमार्गमन्विच्छन्त्यः काङ्क्षन्त्योऽअतः पुरो वध्वाः कस्याश्चित्पदैः पदाङ्कैः सुपृक्तानि सम्पृक्तानि मिश्रितानीति यावत् विलोक्य दृष्ट्वाऽऽर्ताः सपत्न्याः कस्याश्चिदङ्गसङ्गोऽस्माकं पत्युरित्युन्नता किं सेतीर्ष्यादुःखिताः समभ्रुवन्परस्परसंल्लापं चक्रुः ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

प्रथमतो भगवच्चरित्रं पूतनासुपयःपानमिति काचित्पूतनाभूता जाता अन्याहं कृष्ण इत्युक्तवती तदा तामङ्क भगवद्बुद्ध्या अगृह्णान् ततस्तस्याः पूतनायन्त्याः कृष्णायन्ती स्तनमपिबत् तस्यास्तु मरणभावना न स्थितेति सा न मृता नाप्यनुकरणं कृतवती कृष्णायन्ती च स्तनमात्रमेव पिबति अलौकिकसमार्थ्याभावादिति स्तनपानमात्रमुक्तम् अमङ्गलतानिवृत्तये च शकटभङ्गलीलामाह । तोकायित्वेति । तोकवदाचरति आत्मानं तोकं मन्यते वा तोकवदात्मानं कृत्वा वा शकटायतीं शकटवत् स्थितामहन् ताडितवती ॥ १५ ॥ तृणावर्तलीलामाह । दैत्यायित्वेति । दैत्यवदात्मानं कृत्वा कृष्णस्यार्भं बाल्यं भावयन्तीं कृष्णार्भभावनां तामेका आत्मानं दैत्यायित्वा जहार कापि अङ्घ्री कर्षन्ती घोषनिःस्वनैः रिङ्गयामास चलितवती यथा बाल्ये मुग्धप्रभीतवत् घोषप्रघोषरुचिरं भगवान् गच्छति पूर्वश्लोके चतस्रः उक्ताः लीलाद्वयेन तास्तामसता मस्यः अत्र तिस्र एव राजसतामस्य इति चरित्रलीलायामुक्ता विशेषा अत्राप्यनुसन्धेयाः अथ युगलास्तिस्रो निरूपिताः गुणातीता त्वेका पुनः प्रकारान्तरेण बह्व्यः एकभावमापन्नाः भगवदिच्छया प्रधानगुणभावं प्राप्य रजसा अनेकधा विक्षिप्ताः बहुरूपा जाताः ॥ १६ ॥

श्रीसुबोधिनी-सारः

पूतनावदाचरन्त्याः कस्याश्चित् गोप्याः कृष्णायन्ती गोपी स्तनमपिबत्। तोकायित्वा बालवदात्मानं कृत्वाऽन्या रुदती सती शकटमिवाचरन्ती पदाऽहन् ॥ १५ ॥ एका दैत्यवदात्मानं कृत्वा कृष्णस्यार्भं बाल्यं भावयति या तामन्यां जहार। कापि घोषनिस्वनैः सहांघ्री पादौ कर्षंती रिंगयामास ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कस्याश्चित्पूतनायन्त्या इत्यत्र, **अन्या अहं कृष्ण इत्युक्तवतीति**। यद्यप्यत्रोक्तिप्रयोजनं नास्ति, पूतनासुपयः पानदशायामुक्तिप्राकट्याभावाच्च नैवं सम्भवति, तथापि यदा तदा पूतना मां **गृह्णा**त्वन्यथा तु कार्यं न भविष्यतीति भगवदिच्छा स्थिता, तथा कृष्णत्वेनेयं मां जानात्विति कृष्णायन्त्या अपि तदेच्छासीदिति ज्ञापनपरा तदुक्तिरिति ज्ञेयम्। **तस्यास्त्वि**त्यादि। अत्र मुख्योपपत्तिर्भावनयैवाविर्भूतेत्यादिना **पूर्वमेवाचार्यैरुक्तेति सर्वमवदातम्** ॥ १५ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

इत्युन्मत्तवचो गोप्य इत्यत्र **भक्त्येति** का० २७४३/४-२७६३/४। **भक्त्यातिमत्ता** इत्यादि याः भक्त्यातिमत्तास्तास्तद्भावं "कृष्णोऽहं पश्यत गति"मितिप्रकारेण **भगवद्भावं प्राप्ताः**, ईषन्मत्तास्तु "कस्याश्चित् पूतनायन्त्या" इत्यादिप्रकारेण **पूतनादिभावं प्राप्ताः**, तदुक्तं टिप्पण्यां "भगवन्मात्रज्ञानमतिमत्तत्वं तत्सम्बन्धिनामपि ज्ञान**मीषन्मत्तत्व**"मिति, लीलासम्बन्धिनां येषां ये भावास्तदात्मकतायां ते द्वेषादिभावा अपि स्वत एव भवन्तीतिज्ञापनायाहुः **रोषत** इति, भावेषु वैजात्यज्ञापनायोक्तं सत्त्वादिगुणभावेनेति, यद्यप्यत्र लीला बहुविधास्तथापि नवसु श्लोकेषु एकैकस्मिन् श्लोके उक्ता एकैकविधा विवक्षिता इति नव लीला इत्युक्तं, अथवा सर्वासां तुल्यत्वमेवेत्याशयेन पक्षान्तरमाहुः **अतो न न्यूनभावोऽत्रे**ति, हि यस्माद्धेतोः **शकटादिभिराविष्टा** अतो न न्यूनतेत्यर्थः, तथा च भगवद्भाववत्याः पूतनादिभाववतीनां च तुल्यत्वमेवेत्यर्थः, पक्षान्तरमाहुर्भगवद्भावापन्नायाः सकाशात् पूतनोलूखलादिभावापन्ना उत्कृष्टा इति ज्ञापनाय **सर्वत्र हरिबुद्ध्या वे**ति, कथञ्चिदपि चरणारविन्द**स्पर्शेच्छया पूतनोलूखलादिभाव** इत्यर्थः, मयि चेच्चरणं न स्थापयति तदा पूतनोलूखलादिबुद्ध्यापि स्थापयत्वितिभावेन तद्वदाचरन्ति, अत्यात्यैव सर्वत्र भगवद्बुद्धिरतो भगवच्चरणारविन्दसम्बन्धस्य प्रकर्षेण सिद्ध्यर्थं पूतनादि भाव इत्यर्थः ॥ १५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हीति निश्चये। पूतनायन्त्याः पूतनावदाचरन्त्याः कृष्णवदाचरन्ती स्तनमपिबत्। तोकायित्वा शिशुवदात्मानं कृत्वा रुदन्ती सती अन्या गोपी शकटवदाचरन्तीं गोपीं पदाऽहन् तताड। आचरणं चात्र किञ्चिच्छरीरचेष्टया, किञ्चिद्वचनमात्रेण, किञ्चिद्भावनामात्रेण च बोध्यम् ॥ १५ ॥ दैत्यायित्वा तृणावर्तदैत्यवदात्मानं कृत्वा एकां कृष्णार्भभावनां कृष्णस्यार्भं बाल्यं भावयति या तामन्यां जहार। घोषाः किङ्कण्यस्तासां निःस्वनैः सहितौ अङ्घ्री कर्षन्ती काचित् रिङ्गयामास जानुपाणिना चचाल ॥ १६ ॥

अन्वितार्थप्रकाशिका

कस्या इति ॥ कृष्णायन्ती कृष्णवदाचरन्ती काचित् गोपी पूतनायन्त्याः पूतनावदचरन्त्याः कस्याश्चित्स्तनमपिबत्। तोकायित्वा शिशुवत् आत्मानं कृत्वा रुदती सती अन्या गोपी शकटवदाचरन्तीं गोपीं पदाऽहन् अताडयत्। आचरण चात्र किञ्चिच्छरीरचेष्टया किञ्चित् वचनमात्रेण किञ्चिद्भावनामात्रेण च बोध्यम्। अत्र पूतनायन्त्यादिष्वाचारे क्यङ्। आत्मनेपदाभावस्तु आर्षः ॥ १५ ॥ दैत्यायित्वेति ॥ दैत्यायित्वा तृणावर्तदैत्यवदात्मानं कृत्वा एका कृष्णार्भभावनां कृष्णस्यार्भं बाल्यं भावयति या तामन्यां जहार। घोषाः किङ्किण्यस्तासां निःस्वनैः सहितौ अङ्घ्री कर्षन्ती काचित् रिङ्गयामास जानुपाणिना चचाल ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदात्मकत्वेनानुकरणरूपं लीलाख्यमनुभावं नवभिः प्रपञ्चयति कस्याश्चिदिति पूतनायन्त्याः बाह्यानुकरणैरेव पूतनावदाचरन्त्याः कस्याश्चिद्गोप्यः कृष्णायन्ती कृष्ण इव आचरन्ती काचिद्गोपी स्तनं अपिबत् स्तनपानमन्वकरोदित्यर्थः अन्या तोकायित्वा बालतुल्यं स्वकीयमात्मानं कृत्वा अन्यारुदन्ती सती शकटायतीं स हस्तपादाभ्यां भुवमवष्टभ्याधोमुखावस्थितया शकटायमानां पदाऽहन् तताड अत्र सर्वत्र शानचिप्रयोक्तव्ये सति शन्त्रत प्रयोगस्त्वार्षः ॥ १५ ॥ एकादैत्यायित्वा तृणावर्त्तदैत्यतुल्यं स्वमात्मानं भावयित्वा कृष्णार्भभावनां कृष्णस्य अर्भे शिशुत्वं तस्य भावना अनुकरणं यस्यास्तां अन्यां जहार तद्धरणमनुचकारेत्यर्थः कापि काचिद्गोपी घोषाः किंकिण्यस्तासां निःस्वनैः सहितौ पादौ कर्षती सती रिंगयामास बालकृष्णरिंगणमनुचकार ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कस्याश्चिदित्यादिचतुर्भिरनुकरणं प्रपञ्च्यते, ततश्चतुर्भिस्तन्मयत्वं पुनरेकेनानुकरणमिति विवेकः। तत्र तीव्रध्यानेन तदात्मकत्वाच्छ्रीकृष्णानुकरणं पूतनाद्यनुकरणं तु श्रीकृष्णकृतलीलानुस्मरणाय न तु प्रेमविरोधायेत्याशयः ॥ कस्याश्चिदिति ॥ पूतनायन्त्याः पूतनावदाचरन्त्याः, कस्याश्चिद्गोपिकायाः, स्तनं कृष्णायन्ती कृष्णवदाचरन्ती काचिद्गोपिका, अपिबत् अचुम्बत्। अन्या गोपिका, तोकायित्वा शिशुवदात्मानं कृत्वा, रुदन्ती सती, शकटायतीं शकटासुरवदाचरन्तीं काञ्चिद्गोपिकां, पदा चरणेन, अहन् ताडितवतीत्यर्थः ॥ १५ ॥ दैत्यायित्वेति ॥ एकान्या काचित्तु, दैत्यायित्वा तृणावर्त्तासुरवदात्मानं कृत्वा, कृष्णार्भभावनां कृष्णस्यार्भं बाल्यं तद्भावयन्तीमित्यर्थः। अन्यां काञ्चिद्गोपिकां, जहार हृतवती। कापि अन्यापि काचिद्गोपिका, घोषाणां मुञ्जीराणां निःस्वनाः शब्दास्तैः सह, घोषनिःस्वनाविति पाठान्तरे घोषाणां ध्वनतां भूषणानां निःस्वनो ययोस्तौ, अङ्घ्री चरणौ, कर्षन्तीरिङ्गयामास जानुचङ्क्रमणं चकार ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कस्याश्चिदिति : १०.३०.१५.

सर्वा यद्यपि तुल्यकृष्णहृदयास्तुल्याधिकृत्यन्वितास्तुल्येशाप्तिनिदानपुण्यनिचयास्तुल्योज्झितान्यक्रियाः।
एशं रूपमवाप काप्यतितरां तत्रासुरं चापरा तन्मन्ये विधिरेष मुञ्चति जनं नो नर्मकर्मण्यपि ॥ १८१ ॥
तत्तादात्म्यविभावनां निजमनस्याधाय नर्मण्यपि यः स्वैरं विहरत्यसौ प्रभुकृपापात्रं न चित्रन्त्विदम्।
आश्चर्यं भृशमेतदेव यदसौ यं संस्पृशेत् पापिनं सोऽपिश्रीशकृपापदं भवति तन्मानं चदैत्याः स्त्रियः ॥ १८२ ॥
येन केन प्रकारेण यो वः को वेशरञ्जनम्। करोत्यस्मिन् हरिप्रीतिर्न तद्धेतुः सुरोऽसुरः ॥ १८३ ॥
व्यवहारकृदन्तरङ्गवृत्तेभु विभाव्याऽनवधानता यदन्तः। तदुपासनमङ्गपूर्णमेतत् स्फुटमज्ञातसखीस्थिता स्थितास्ताः ॥१८४॥
तादात्म्यमेव भगवन्नवलम्ब्य कार्योपास्यिस्तवैष नियमो न यतोऽबलास्ताः।
यं कामपि प्रतिकृतिं प्रसभं प्रगृह्य चक्रुस्त्वदीक्षकृते विविधं विहारम् ॥ १८५ ॥

कृष्णप्रिया

जो गोपी कृष्ण भावाविष्ट होकर कृष्ण बनी उस गोपी पूतनारूप बनी गोपी का स्तन पान किया। पुनः जो गोपी स्तनन्धय बालकरूप बनी, उस गोपीने रुदन करते हुए शकट रूप प्राप्त हुई गोपी को पाद प्रहार किया, जिससे वह उलट गई ॥ १५ ॥ इधर एक गोपीं बाल मुकुन्द बन बैठी तब दूसरी गोपी अपने को तृणावर्त दैत्य बनाकर उस बाल कृष्ण रूप वाली गोपी को उठाकर ले चली, तब कोई कटि मेखला के किंकिणियों की ध्वनि करती दोनों पैरों को घसिटती हुई घुटनों से रगने लगी ॥ १६ ॥

कृष्णरामायिते द्वे तु गोपायन्त्यश्च काश्चन। [2]वत्सायतीं हन्ति चान्या तत्रैका तु बकायतीम् ॥ १७ ॥
आहूय[3] दूरगा यद्वत् कृष्णस्तमनुवर्ततीम्[4]। वेणुं क्वणन्तीं क्रीडन्तीमन्याः शंसन्ति साध्विति ॥ १८ ॥
कस्यांचित् स्वभुजं न्यस्य चलन्त्याहापरा ननु। कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः ॥ १९ ॥
मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया। इत्युक्त्वैकेन हस्तेन [5]यतन्त्युन्निदधेऽम्बरम् ॥ २० ॥

कर्दमक्षमा

अन्वयः—(तदा) द्वे (गोप्यौ) कृष्णरामायिते (आस्ताम्) (तदा) तु काश्चनगोपायन्त्यः, (आसन्) तत्र, च, एका, (गोपी) वत्सायतीम्, (अन्याम्, गोपीम्) हन्ति ॥ १७ ॥ यद्वत्, कृष्णः, तद्वत्, दूरगाः, (गाः) आहूय, तम्, अनुकुर्वतीम्, वेणुम्, क्वणन्तीम्, क्रीडन्तीम्, गोपीम्, अन्याः, साधु, साधु, इति, शंसन्ति ॥ १८ ॥ तन्मनाः, (काचित् गोपी) कस्याञ्चित्, स्वभुजम्, न्यस्य चलन्ती, अपराः, इति, आह, ननु, अहम्, कृष्णः, (मम) ललिताम्, गतिम्, पश्यत ॥ १९ ॥ वातवर्षाभ्याम्, मा, भैष्ट, मया, तत्, त्राणम्, विहितम्, (अस्ति) इति, उक्त्वा, यतन्ती, एकेन, हस्तेन, अम्बरम्, उन्निदधे ॥२०॥

---

१. गोपवत्सायिताः पराः–वीर.।

२. **वत्सायितां गृहीत्वाऽन्या भ्रामयित्वा न्यपातयत्। कृष्णायित्वा घ्नतीवान्या तत्रैका तु बकायतीम् ॥** वीर.।
वत्सायितां गृहीत्वाऽन्या तत्रैका तु बकायिताम्। इति कस्यचित्।

३. आह्वयत्–वीर.। ४. कुर्वतीं। ५. वितत्योन्नि–वीर.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

दूरगा दूरे वर्तमाना गाः यद्वद्यथा कृष्णस्तथाऽऽहूय तं कृष्णमनुवर्ततीमनुवर्तमानाम् । अनुकुर्वतीमिति वा पाठः ॥१९॥ यतन्ती प्रयत्नं कुर्वती अम्बरमुत्तरीयं वस्त्रमुन्निदधे ऊर्ध्वं धृतवती ॥ २०–२१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृष्णरामाविवाचरत इति कृष्णरामायेते, ततो भावे क्ते इटि च कृष्णरामायिते । तत्र तासु । अनु पश्चात् । एका कृष्णायन्ती ॥ १७ ॥ अनुवर्तनं त्वनुकरणं विनापि स्यादत आह—अनुकुर्वतीमिति वेति ॥ दूरगा दूरवर्तिनीर्गाः यद्वत्कृष्णं आह्वयति तद्वदेवाहूय तं कृष्णमनुवर्त्तन्तीम् । 'अनुकुर्वतीम्' इति च पाठः ॥ १८ ॥ ललिताम् अतीवरम्याम् । तन्मनाः कृष्णचेता आहेति ॥ ततश्चान्या अपि लीला अनुचिकीर्षतीनामपि तासां तद्ध्यानाधिक्याऽऽवेशेनोन्मादसंचारिप्राबल्येन चाऽऽमानुसंधानापगमात्कृष्णतादात्म्यमाह—चतुर्भिः । कस्याश्चिदिति—अहं सुबलस्कन्धार्पितभुजः कृष्णस्तस्मान्मम ललिताम् अतिरमणीयाम् । गतिम् नृत्यलीलाम् ॥ १९ ॥ ततो वातवर्षातस्त्राणं तत्त्राणमिति ॥ यतन्ती प्रयत्नं कुर्वती । अम्बरम् उत्तरीयवस्त्रम् । उन्निदधे ऊर्ध्वं धृतवती ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

द्वे चिक्रीडतुः तत्र काश्चन गोपायन्त्यः गोपबालायन्त्यश्चिक्रीडुः तदानीं बालकैरेव वत्सचारणात् तस्यामेव सभायां लीलान्तरमाह । वत्सेति । अन्या कृष्णायमाना तत्र तस्मिन् सति एका च कृष्णायमाना हन्ति हननानुकरणमनुकरोति अहन्नित्यर्थः ॥ १७ ॥ तदेवमनुकरणमात्रमुक्तम् अधुना प्रलम्बवधप्राक्तनग्रीष्मकृतविचित्रलीलानुकरणे शृङ्गारालम्बनरूपतदीयकैशोराविर्भावात्पुनरपि प्रियानुकरणरूपं लीलाख्यमनुभावमाह । आहूयेति द्वाभ्याम् । दूरगा इति । समासान्तविधेरनित्यत्वात् दूरगवीरित्यर्थः । अन्या गोपम्मन्याः ॥ १८ ॥ गतिं नृत्यलीलाम् ॥ १९ ॥ वातवर्षाभ्यामिति । तत्तल्लीलावेशेन साक्षाद्वातादिस्फूर्त्तेः एवमग्रे दावाग्निं पश्यतेत्यपि अत्र त्रासातिरेकेण शृङ्गाररससङ्कोचान्न तल्लीलोदाहरणम् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गोपायन्त्य इति गोपबालायन्त्य इति ज्ञेयम् । तदानीं बालकैरेव सह वत्सचारणात्, 'च'कारात् अघायतीश्च हन्ति अहन्, सामीप्ये वर्तमाना ॥ १७ ॥ अधुना वाक्प्रधानानुकरणं पञ्चभिर्वक्ष्यन्नादौ प्रलम्बवधात् प्राक्तन-ग्रीष्माकृत विचित्रलीलानुकरणमाह—आहूयेति द्वाभ्याम् । अत्र वाक्प्रधानानुकरणत्वात् किं वानुकरणे क्रमशोऽत्यन्तावेशेन तदात्मकत्वात् कृष्णायन्तीत्यादिकं पूर्व्वं नोक्तम्, 'दूरगाः' इति तैर्व्याख्यातमेव । यद्वा, दूरवर्त्तिनीर्व्रजादिस्थिता गोपीर्वेणुनाद–संकेतेन यथा कृष्ण आह्वयति, तथाहूयेति; एवमनुवर्त्ततीं काञ्चित् क्रीडन्तीं च गानादिक्रीडां कुर्व्वतीम्, अन्या गोपभावनापन्ना इति ज्ञेयम् ॥ १८ ॥ ननु निश्चितमेवाह, अतः कृष्णोऽहमित्युक्तौ न सन्देहः कार्य्य इति भावः । यद्वा, ननु हे गोपा गोप्यो वा पश्यत गतिं मम चेष्टां गमनं वा ललितां मनोहराम्, तन्मनाः श्रीकृष्णाभीष्टचितेत्यर्थः अनेन कृष्णोऽहमिति दोषो निरस्तः, कृष्णः सर्व्वगुणरूपादिसम्पूर्णोऽहम्, अतो ममाश्रयभूतां ललिताख्यां गोपीं पश्यत, इति एतत्तदुक्तमहो किं स्मरतेति शेषः । तच्च तेन कदाचित् केनापि भावेन पूर्व्वमुक्तमस्तीति पूर्व्ववत् बोद्धव्यम् । ननु कुतो वाक्यं न समापितम् ? तत्राह—तन्मनाः कृष्णहृतचित्तति, यद्वा, अनेनानुकारसमक्तैव पूर्व्ववदेवाभिप्रेता ॥ १९ ॥ वातवर्षाभ्यामिति—अनुकरणवशाद्वाङ्मात्रैणैव, किं वा तत्तल्लीलावेशेन साक्षादिव वातादिस्फूर्त्तेरिति ज्ञेयम्, एवमग्रे (भा० १०।३०।२२) 'दावाग्निं पश्यत' इत्यपि यतन्तीति विरहार्त्त्या बलहानिः सूचिता । उन्निदधे उद्यच्छन्तीति वा श्रीगोवर्द्धनवदूर्ध्वं नितरां धृतवती ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वेणुं क्वणन्तीं क्वणयन्तीम् ॥ १८—३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

द्वे गोप्यौ कृष्णरामाविवाचेरतुः काश्चन तु गोपावत्साश्च तद्वदाचेरुः तत्र काञ्चिद्वत्सासुरवदाचरन्तीं काचित् गृहीत्वा भ्रामयित्वा न्यपात् काचिद्बकासुरवदाचरन्तीं घ्नतीव बभूव ॥ १७ ॥ तथा दूरगाः दूरे वर्तमानाः गाः गोवदाचरन्तीः काश्चित् यद्वत्कृष्णस्तद्वदाह्वयदाजुहाव आहूयेति पाठे यद्वत्कृष्णस्तद्वत् दूरगाः आहूय पुनस्तमनुकुर्वती कृष्णत्वमिति पाठे कृष्णभावमनुकुर्वती तदेव दर्शयति वेणुं क्वणयन्तीं केवलं मुखेन गायन्तीं क्रीडन्तीमिति पाठान्तरं काश्चित्साधु साध्विति शंसन्ति प्रशशंसुः ॥१८॥ काचित्तु तन्मनाः कृष्णाभेदाभिमानयुक्तमनाः कस्याश्चित्स्वभुजं न्यस्य कस्याश्चिदंसे स्वभुजं निधायेत्यर्थः । चलन्ती पादन्यासान् कुर्वत्यपराः प्रत्याह किमिति ननु हे सख्यः ! अहं कृष्णः मम ललितां सुन्दरतरां गतिं पश्यतेति ॥ १९ ॥ तथा काचित्कृष्णोऽहमिति यतन्ती वर्षवाताभ्यां माभैष्ट भयं माकार्ष्ट ताभ्यां वर्षवाताभ्यां त्राणं मया विहितमित्युक्त्वाम्वरमुत्तरीयमेकेन हस्तेन वितत्य विस्तृत्योन्निदधे ऊर्ध्वं धृतवती ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दूरगाः दूरवर्तिनोर्गाः यद्वत् कृष्ण आह्वयति तद्वदेवाहूय तं कृष्णमनुवर्ततीम् अनुकुर्वतीमिति च पाठः ॥ १८ ॥ ततश्चान्या अपि लीला अनुचिकीर्षन्तीनामपि तासां तद्ध्यानाधिक्यवशेनोन्मादसञ्चारिप्राबल्येन चात्मानुसंधानापगमात् कृष्णतादात्म्यमाह चतुर्भिः। कस्यांचिदिति। अहं सुबलस्कन्धार्पितभुजः कृष्णः प्रसिद्धस्तस्मान्मम ललितामतिरमणीयाम् ॥ १९ ॥ यतन्ती प्रयत्नं कुर्वती अम्बरमुत्तरीयवस्त्रमुन्निदधे ऊर्ध्वं धृतवती ॥ २० ॥

श्रीरसिकाह्लादिनी टीका

अन्यदप्याह वृन्दावनप्रदेशे काश्चन गोपायन्त्यः वत्सपरूपमनुकुर्वन्त्यः, द्वे गोप्यौ कृष्णरामवदाचरिते। एवं सर्वाः ते परिवृढौ कृत्वा यथा क्रीडितवन्तः स्मस्तद्वदेव ताश्चिक्रीडुः। अन्या काचित् कृष्णवदाचरन्ती वत्सवदाचरन्ती हन्ति स्म हननमन्वकरोत्। तत्र तासु मध्ये एका कृष्णवदाचरन्ती वकवदाचरन्तीं अहन् हननानुकरणमकरोत् ॥ १७ ॥ सख्यरसे कृतां लीलामनुकुर्वन्तीति आहूयेति। दूरे स्थिता गां यथा कृष्ण आह्वयति तद्वत्। यद्वा दूरे व्रजे स्थिता गा व्रजदेवीर्यथा वेणुनादेनाह्वयति तमनुकुर्वन्ती कृष्णवदाचरन्ती वेणुं वादयन्ती सखीवदाचरन्तीभिः सह क्रीडन्ती। अन्याः मित्रायमाणाः साध्विति शंसन्तिस्मः।१८। दैहिकलीलामाह कस्याञ्चिदिति अपरा कृष्णवदाचरन्ती गोपवदाचरन्त्या-कस्याञ्चित् स्वभुजं न्यस्य चलन्ती आह कृष्णोऽहं हे गोपाः मम ललितां गतिं पश्यतेति आहुः। यतस्तन्मनास्तदेकचित्ताः ॥ १९ ॥ गोवर्द्धनोद्धरणलीलामाह—मा भैष्टेति, काचित् कृष्णायन्ती गोपवदाचरन्तीं प्रत्याह। व्यभिचारिभिर्भावैर्वातवर्षाभ्यां पीड्यमाने च दुःखं स्वयं सहमाना वदति। वातवर्षाभ्यां भयं मा कुरुत मया तत्त्राणं रक्षणं विहितं मा कृतमेवेत्युक्तायन्तीयं तं कुर्वति। एकेन हस्तेन गोवर्द्धनवत् अम्बरं स्वोत्तरीयं उन्निदधे ऊद्र्ध्वं धृतवती ॥ २० ॥

विशुद्धरसदीपिका

एका कृष्णायिता अन्या भावनालब्धा रामायिता तथैव काश्चन गोपायन्त्यः वत्सायन्तीं भावनालब्धाम् अन्या ततो भिन्ना निजरूपेण वर्त्तमाना घ्नती हननमनुकुर्वतीत्यर्थः। तत्रैवान्या वकायतीं घ्नतीत्यन्वयः ॥ १७ ॥ दूरगा दूरगवीरित्यर्थः। अन्या गोपम्मन्याः ॥ १८ ॥ कस्यामिति गतिं नृत्यादिलीलां शेषं स्पष्टम् ॥ १९ ॥ मेति। वातवर्षाभ्यामिति तल्लीलावेशेनैव साक्षाद्वातादिस्फूर्त्तेः मयेति अत्र त्रासातिरेकेण शृङ्गाररससंकोचनालीलोदाहरणं यतन्ती यत्नं कुर्वती अम्बरमुत्तरीयम् उन्निदधे ऊर्ध्वं धृतवतीति ॥ २० ॥

श्रीरामनारायणकृता भावभावविभाविका

द्वे गोप्यौ कृष्णरामायिते तत्रैका तदात्मकतयैव कृष्णायिता द्वितीया तु तत्सादरालिङ्गनविलासाद्यभिलाषेण रामायिता अन्यास्तु गोपदारास्तदुदारविहारविस्ताराय गोपायन्त्यः गोपकुमाराकारानुकारास्तत्सहप्रचारा बभूवुः उपलक्षणमेतत्काश्चित्तच्छविमोहिता विरहखेदपशुवृत्तयो वत्सायन्त्यो दशनगृहीततृणैः स्वमानापराधं क्षमापयामासुः अन्या तदात्मकतयैव कृष्णायन्ती अन्यां वत्सायतीं तत्करस्पर्शे तनुत्यागेन तदविच्छेदसङ्गतिमभिलषन्तीं वत्साकारां हन्ति स्म भूमौ पोथनाय पादावग्रहीत् साच कृष्णाकारसखी स्वपादग्रहणसमये कृष्णेन स्वमानमोचनं सम्भाव्य स्वत एव गतमाना तमालिङ्गितवतीति शेषः। तथैव तत्रैका वकायती हन्ति स्म तत्रायं क्रमः काचित्सखी सत्वमये मनस्यनुरागकलेव शुक्लवस्त्ररचितपक्षव्याप्तवपुष्यरुणवसनेन तुण्डं रचयित्वा कृष्णप्राप्तिकामा वकवत्तद्ध्यानपरा बभूव कृष्णरूपासखी तु सत्त्वमयमनसि प्रेमवृतावभिव्यक्तकृष्णच्छविवत्तच्छोणवस्त्रतुण्डगता व्यशोभत ततश्च तन्निःसृता प्रेमिणां बहिःप्रादुभूर्तकृष्णवद्व्यरोचत ततश्च हरिः यथानुरागिणमनुरागं गृहीत्वा तदीयसात्त्विकधर्माध्यासमपि निवारयति तथा दारुणतुण्डं गृहीत्वा शुक्लवेषं दारयतीव बभौ सा च तदा मुखतः पाटनाय गृहीततुण्डाधरायाः करौ रसावेशाच्चुचुम्बेति भावः। रसानुकारे रसोद्भवस्यावश्यकत्वात् ॥ १७ ॥ तत्रैवं कुमारलीलानुकारमभिधाय कैशोरलीलानुकारमभि वदन् शृङ्गारालम्बनरूपाविर्भूतकैशोरविहाराभिनयमाह। आहूयेति द्वाभ्याम्। यद्वत्कृष्णो दूरे वर्तमाना गाः आह्वयति तद्वत्तमनुकुर्वतीं मनसि च भवान् दूरे निपतितान् स्वीयान् पशूनपि नोपेक्षते कथमधुना रसिकशिरोमणी रसिकाः स्निग्धा न उपेक्षते इति भावयन्तीं तथा वेणुं क्वणन्तीं तत्रायं भावः यथा वेणुरवमोहिता वयं कृष्णगृहिण्यो मृग्य इवागतास्तथा कृष्ण इव कृष्णोऽपि वेणुरवमोहित आगमिष्यतीति वेणुं वादयन्तीं यद्वा न गोपानां वेणुधारणं क्वचित्प्रसिद्धं किन्तु पूर्वं विहारावसरे कृष्णवेणुरेव तयापहृतो बहुनृत्यगानादिना प्रार्थनेऽपि न प्रकटीकृतोऽधुना विरहवैकल्ये स्ववेणुं ग्रहीतुमागमिष्यत्येवेति सम्भाव्य तं वादयन्तीं कृष्णाभिनयेन बहुधा क्रीडन्तीमन्या तद्विहारलोलुपतया तद्रूपसखाकारा गोपी साधुसाध्विति शंसति स्तौति ॥ १८ ॥ काचित्तदात्मकतया कृष्णायति कस्याञ्चित्कृष्णाभिमर्षाभिलाषिण्यां स्वभुजं न्यस्य तदंसे बाहुं निधाय चलन्ती प्रेमपवनचालितपदपद्मौ हंसगतिमाहनगत्या न्यस्यन्ती ब्रह्मस्वरूपाविर्भूतमनयो जिज्ञासून् प्रतीवापरा गोपकुमाराकारा गोपीराह। अहं कृष्णो मे

ललितां गतिं पश्यत बहिरन्तस्तद्भावैक्यमाह । तन्मनाः यथा आह तथैव कृष्णाविष्टचित्ता इति भावः ॥ १९ ॥ काचित्तु सर्वासां गोपीनां विरहदुःखोच्छ्वासानश्रुधाराश्च प्रलयकारिवातवर्षत्वेन परिकल्प्य स्वस्मिंस्तद्भावनयाविर्भूततदात्मकत्वेन कृष्णस्वरूपत्वमवगत्यापरा आह । माभैष्टेति । भो गोपा यूयं वातवर्षाभ्यां माभैष्ट भयं माकुरुत यतो वो युष्माकं तत्त्राण ताभ्यां रक्षण मया विहितमित्युक्त्वा यतन्ती अनुभूतविरहदुःखकार्श्येन शक्तिह्रासात्प्रयत्नं कुर्वती एकेन हस्तेनाम्बरमुन्निदधे ऊर्ध्वं गोवर्धनाकारेण दधार । ततश्च सर्वा अपि सुरराजकोपात्प्राणान् संरक्ष्याधुना स्वयं प्राणग्रहणमनुचितं प्राणग्रहणस्यैवेष्टत्वे त्वस्मन्निवेदिततनुमनआदिभिः सहैव गृहाणेति प्रार्थयामासुः ॥ २० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तत्कृतं वृन्दावनविहारलीलानुकरणमाह । द्वे गोप्यौ कृष्णरामायिते कृष्णरामवज्जाते काश्चन गोपायन्त्यः गोपबालानुकरणं कृतवत्यः काचिद्वत्सरूपा च जाता इत्यादिद्रष्टव्यं तत्र वत्सासुरवदाचरन्ती काचिदन्या बलरामरूपा प्रलम्बो निहतोऽनेन वत्सको धेनुकादय इत्यनुसारेण हन्ति हननमनुकरोति स्म काचिद्बकवदाचरन्तीमन्या कृष्णरूपा हन्ति स्म ॥ १७ ॥ अथ तत्कृतं गवाह्वानादिलीलानुकरणमाह । आहूयेति । तत्र काश्चन गोपरूपा जाताः काश्चन गोपालरूपास्ते यद्वत्कृष्णः दूरगा आहूय वेणुक्वाणं करोति तद्वत्कृष्णमनुकुर्वतीं दूरगाः गोरूपा गोपीराहूय वेणुं क्वणन्तीं क्रीडन्तीं काचिदन्या गोपरूपाः साध्विति शंसन्ति स्म ॥ १८ ॥ गोपरूपायां कस्याञ्चिदपरा कृष्णरूपा भुजं निधाय चलन्ती आह ननु कृष्णोऽहं ललितां मदीयां गतिं हे गोप्यः ! पश्यतेति यतस्तस्मिन्मनो यस्याः सा यतस्तदावेशात्तद्रूपा जातेति भावः यद्यपीयं लीला पूर्वमनुक्ता तथाप्यत्र तदनुकरणस्योक्तत्वाज्जातेति द्रष्टव्यम् ॥ १९ ॥ अपरा कृष्ण इवावस्थिता गोपादिरूपा आह हे गोपादयः ! वातवर्षाभ्यां भयहेतुभूताभ्यां माभैष्ट ताभ्यां वातवर्षाभ्यां मया त्राणं विहितमित्युक्त्वा यत्नवती एकेन हस्तेनाऽम्बरमुत्तरीयं वस्त्रमुन्निदधे ऊर्ध्वं धृतवती ॥ २० ॥

रास–रहस्यम्

मुमुक्षुः यदेन्द्रियसंयमनपूर्वकं कृष्णरामायिते अर्थात् आत्मनिष्ठो भवितुं चेष्टते तदा वत्सायतीं, वत्सो रजोगुणस्य प्रतीकरूपः अर्थात् रजोवृत्त्या आत्मसकाशात् दूरे नीतो भवति यदि तु आत्मभावना सुदृढा स्यात्, तदा रजोगुणवृत्तिस्तया विनष्टा भवति । काचिदपरा बकायतीं अर्थात् बकधर्मसम्पन्नां कपटां वृत्तिं अर्थात् यदा कपटधर्मावृत्तिः मुमुक्षुं ग्रसितु चेष्टते तदा यदि आत्मबलं प्रबलं स्यात्, सा तेन निहता भवति ॥ १७ ॥ मुमुक्षोः आत्मभावनायां प्रबलायां सत्यां कृष्ण अर्थात् आत्मा दूरे स्थिताः अर्थात् विषयाभिमुखीः वृत्तीराहूय अर्थात् स्वसमीपं कर्तुं वेणुं अर्थात् अनाहतध्वनिं श्रावयति, अन्यावृत्तयः तं साधु साध्विति प्रशसन्ति ॥ १८ ॥ मुमुक्षोः काचिदन्या वृत्तिः अपरां तन्मनाललितां अर्थात् सुन्दरीमात्माकारवृत्तिमाश्रित्य तस्योपरि स्वभुजं न्यस्य अर्थात् तस्याः सहायतां प्राप्य आत्माकारतां प्राप्तुमनुकरोति ॥ १९ ॥ एवं यदा मुमुक्षुः गवां इन्द्रियाणां वर्धनेन अर्थात् इन्द्रियशक्तिवर्धनरूपेण साधनबलेन बलीयान् भवति "मद्भावमागताः ।" गीता, इति भगवद्भावं प्राप्नोति "ब्रह्मवद् ब्रह्मैव भवति ।" तदा अपरानपि "मा भैष्ट……इत्यादिना" अभयान् करोति ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यद्वत् यथा कृष्णस्तथा दूरगाः दूरे वर्तमाना गाः आहूय तं कृष्णमनुवर्ततीमनुवर्तमानां कृष्णायन्तीमित्यर्थः । अत एव वेणुं क्वणन्तीम् ॥ १८–१९ ॥ यतन्ती गोवर्द्धनोद्धरणे इव प्रयत्नं कुर्वती अम्बरमुत्तरीयं वस्त्रमुन्निदधे धृतवती ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नन्दसूनुना सह याताया अस्मन्मध्य एव कस्या एतानि पदानि योषिच्चरणा इति निश्चयोऽप्येतस्या इत्यनिश्चय इति कस्या इत्युक्तिः । अंसयोः पत्युः स्कन्धयोर्न्यस्तः प्रकोष्ठो विस्तृतकरे भूपवक्ष्यान्तरेऽपि च कूर्परादधरे चापीति विश्वः । अब्रुवन्नित्यनेनान्वयः । कूर्परादधस्तभागो यया सा तस्याः करिण्याः पदसम्पृक्तानि करिणः पदानीवेति केचित् । करिणा सह करिण्या यथा यानं तथा याताया इत्यन्वयः ॥ १७ ॥ यद्यतो नोऽस्मान्विहाय त्यक्त्वा गोविन्दः प्रीतो यां रह एकान्तस्थानमनयन्नीतवांस्तस्मादनया हरिरीश्वरो भगवान्नूनं निश्चयेनाराधितः पूजितो भवेत् । अनयाऽऽराधित इत्यतोऽनुवृत्तमानमाराधनंमूनं निश्चय इत्यब्रवन्नित्यन्वयः । अनया आर आधित इति छेदः । अनया सहारेत्याधितो मनोव्यथातोऽब्रुवन्नित्यनेनान्वयः । आर्ता इति पूर्वोक्तिस्वारस्यात् ॥ १८ ॥ हे आल्यः सख्यः । आलिः सखी सत्रपङ्क्त्योरिति यादवः । गोविन्दाङ्घ्र्यब्जरेणवोऽमी धन्याः कृतकृत्या अहो । यात्रेणून्ब्रह्मा चेशश्च तौ विधिभवौ रमादेवी च तदूतये स्वस्वाभिप्रेतोती रक्षा वाऽभिप्रेतार्थसिद्धिर्वा तस्यै । भरतिष्ठान ऊतये रक्षानिमित्तमभिप्रेतार्थसिद्ध्यर्थमित्यृग्माप्यादूतिजूतीति निपातितः । मूर्ध्ना दधुरिति । इयदामननादित्युक्तेर्विधिरधिकृतो भवद्भवादौ रमा च नाधिकारिमध्यस्येति विशेषं सूचयितुं पृथङ्निर्देशः । कथाविच्छेदश्चेदपि भवतु यत्राङ्कः पदानां ते धन्या इत्यौत्सुक्यातिशयेनास्तुक्त्रेणून्करेणुगतय इति तात्पर्यम् । आन्तरङ्गिको भावस्त्वेतयाऽऽराधित इत्यनुक्तेरुक्तेरनयानुपूर्व्याऽनयेनारमाभिर्विना-

नयैवेत्यान्यायेनाराधित इति व्यज्यमान एतासां ज्ञेयः ॥ १९ ॥ शोकस्तु प्राक् सन्नुज्वलत्युज्वलाङ्गीचरणाङ्करेणुदृष्ट्योत्कृष्टमित्याहुः यदिति। यत एकाऽपहृत्यास्मत्तो गोपीनां नो मत्येऽच्युताधारं भुङ्क्ते। अनेन न व्यासे धामो दामोदराधरसुधापानमस्माभिः सह तव्या इति स्वतदनसूयतां ध्वनयन्ति। तव्यास्तस्मादमूनि पदानि चरणान्युच्चैः प्रोक्तोऽतिशयेन क्षोमं चित्तचलनं कुर्वन्ति ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

वृन्दावनक्रीडायां वत्सपालकरूपा जाताः तत्र प्रकारमाह। कृष्णेति द्वे कृष्णरामायिते कृष्णरामवत् जाते काश्चन गोपायन्त्यः गोपा अत्र बालकाः जातिशब्दोऽयं वत्सरूपाश्च काश्चन जाताः चकारेण समुच्चिताः अन्या पुनर्वत्सायिता वत्सासुरवदाचरति तां घ्नतीव जाता कृष्णायिता अर्थात् चकारात् फलानि पातयन्ती च अन्या पुनः बकायतीं घ्नती जाता वत्सवधो लोके बलभद्रकृत इत्यपि प्रसिद्धः प्रलम्बो निहतोऽनेन वत्सको धेनुकादयः अत उभयोर्मध्ये एका बकायतीम् अन्या वत्सायन्तीम् ॥ १७ ॥ ततः परं गोपरूपेण वृन्दावनलीलामाह। आहूयेति। गोरूपाः काश्चन जाताः गोपालरूपाः काश्चन तत्र यद्वत् कृष्णः दूरगाः गाः आहूय वेणुक्वणनं करोति एवं दूरगा गोपीराहूय तं कृष्णमनुकुर्वती काचिज्जाता तां वेणुं क्वणन्तीं ततो नानाविधक्रीडां कुर्वतीम् अन्याः गोपायिताः साधु साध्विति शंसन्ति ॥ १८ ॥ एका पुनः क्रीडायां कृतापि लीला भागवते अनुक्ता तां भावयित्वा तादृशीं लीलां कृतवती तदाह। कस्याश्चिदिति। अत्रापि पूर्ववत् युगलास्तिस्रः चतुर्थ्येषा कृष्णरामायिते द्वे युगले साध्वाशंसनसहिता वेणुवादनपरा च तृतीया एषा तु निर्गुणा कस्याश्चिद्गोपरूपायां स्वभुजं स्थापयित्वा चलन्ती अपरा गोपरूपा याताऽन्या ननु हे गोप्यः! अहं कृष्णः मे ललितां गतिं पश्यतेति दोषाभावार्थमाह। तन्मना इति। पूर्वं कायिकीं चेष्टां केवलां कृतवती इदानीं वाचा सहिताम् ॥१९॥ पुनः प्रकारान्तरेण चातुर्विध्यमाह। मा भैष्टेति। एषैव निर्गुणा काश्चन गोपगोपीरूपा जाता वृष्टिभीता इव वातवर्षाभ्यां हेतुभूताभ्यां मा भैष्ट मया तत्त्राणं विहितम् इत्युक्त्वा एकेन हस्तेन अम्बरं नयन्ती पर्वतवत् स्थापयन्ती ऊर्ध्वं निदधे गोवर्द्धनवत् धारितवती यतन्ती प्रयत्नं कुर्वती वा ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

द्वे तु गोप्यौ कृष्णरामायिते कृष्णरामवत् जाते, काश्चन गोप्यो गोपायन्त्यो गोपबालवज्जाताः। तत्र तासु गोपीषु मध्ये वत्सायतीं वत्सासुरवदाचरन्ती मन्या कृष्णवद्वर्तमाना घ्नन्ती जाता। चकारात् कपित्थानि च पातयामास। तथा एका तु कृष्णरूपा बकायतीं बकासुरवदाचरन्तीं घ्नन्ती जाता ॥ १७ ॥ यद्वत् यथा कृष्णो गाः आह्वयति तथा दूरगाः दूरे वर्तमाना गाः आहूय तं कृष्णमनुवर्ततीं अनुवर्तमानाम् 'अनुकुर्वतीम्' इति पाठान्तरम्, अन्याः गोपबालभावनायुक्ताः साधुसाध्विति शंसन्ति प्रशशंसुः। तदनुकरमेव दर्शयति वेणुं क्वणन्तीमिति ॥ १८ ॥ काचित्तु तन्मनाः कृष्णाभेदाभिमानयुक्ता कस्याचित् स्वभुजमन्यस्या भुजे निधाय प्रचलन्ती पादन्यासं कुर्वती, ननु सम्बोधने, 'हे सख्यः! अहं कृष्णः मम ललितां सुंदरां गतिं पश्यत' इत्याहेत्यन्वयः॥१९॥ काचित्तन्मनाः "वातवर्षाभ्यां मा भैष्ट भयं मा कार्ष्ट, यतः तत् ताभ्यां वातवर्षाभ्यां त्राणं रक्षण मया विहितम्" इत्युक्त्वा यतन्ती प्रयत्नं कुर्वती एकेन हस्तेन अम्बरमुत्तरीयं वस्त्रमुन्निदधे वितत्य ऊर्ध्वं धृतवतीत्यर्थः ॥ २० ॥

अन्वितार्थप्रकाशिका

कृष्णेति ॥ द्वे तु गोप्यौ कृष्णरामायिते कृष्णरामवत् जाते। काश्चन गोप्यो गोपायन्त्यो गोपबालवज्जाताः। तत्र तासु गोपीसु मध्ये वत्सायतीं वत्सासुरवच्चरन्तीमन्यां कृष्णवद्वर्तमाना घ्नन्ती जाता। चकारात्कपित्थानि च पातयामास। तथा एका तु कृष्णरूपा बकायतीं बकासुरवदाचरन्तीं घ्नन्ती जाता। हन्तीति वा पाठः ॥ १७ ॥ आहूयेति ॥ यद्वत् यथा कृष्णोः गाः आह्वयति तथा दूरगाः दूरे वर्तमानाः गाः। टजभाव आर्षः। आहूय तं कृष्णमनुवर्ततीम् अनुवर्तमानाम्। अनुकुर्वतीमिति पाठान्तरम्। वेणुं क्वणन्तीं क्रीडन्तीं ताम् अन्याः गोपबालभावनायुक्ताः साधु साध्विति शंसन्ति प्रशशंसुः ॥ १८ ॥ कस्याश्चित् इति ॥ काचित्तु तन्मनाः कृष्णाभेदाभिमानयुक्ता कस्याश्चित्स्वभुजमन्यस्या भुजे न्यस्य निधाय प्रचलन्ती पादन्यासं कुर्वती। ननु सम्बोधने। हे सख्यः! अहं कृष्णः मम ललितां सुन्दरां गतिं पश्यतेत्याह स्म ॥ १९ ॥ मा भैष्टेति ॥ काचित्तन्मनाः वातवर्षाभ्यां मा भैष्ट भयं मा कार्ष्ट। यतः तत् ताभ्यां वातवर्षाभ्यां त्राणं रक्षणं मया विहितमित्युक्त्वा यतन्ती प्रयत्नं कुर्वती। शता आर्षः एकेन हस्तेन अम्बरमुत्तरीयं वस्त्रमुन्निदधे वितत्य ऊर्ध्वं धृतवती ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र तासु गोपायमानासु मध्ये अन्या एका कृष्णमनुकुर्वती वत्सायितां बकायितां च हन्ति हननमनुकुर्वतीति सर्वत्राऽनुकरणं ज्ञातव्यं न तु हननादिकं ॥ १७ ॥ दूरगाः दूरेस्थिताः गाः यद्वत् यथा कृष्णः आह्वयति तथा गा अनुकुर्वतीः गोपीः आहूयतं कृष्णं अनुवर्त्ततीं अनुवर्त्तमानां वेणुं क्वणतीं क्रीडन्तीं गोपीं अन्याः गोपवेषाः ॥ १९ ॥ तन्मना अपरागो गोपी आह ॥ १९ ॥ यतन्ती पर्वतोत्पाटनवद्यत्नमनुकुर्वती सती अम्बरमुत्तरीयवस्त्रं उन्निदधे ऊर्ध्वं दधार ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्णेति ।। द्वे गोप्यौ तु, कृष्णरामायिते कृष्णरामाविवाचेरतुः । काश्च गोपिकास्तु, गोपायन्त्यः गोपवदाचेरुः । काश्चन वत्सायन्त्य इति शेषः । तत्र एका प्रधाना, अन्या कृष्णायिता गोपी च, वत्सायन्तीं वत्सासुरवदाचरन्तीं, तु पुनः, बकासुरवदाचरन्तीं च, हन्ति ।। १७ ।। आहूयेति ।। दूरगाः दूरे वर्त्तमानाः गाः, यद्वद्यथा कृष्णः, आह्वयति तथा गाः अनुकुर्वतीः गोपीरिति शेषः । आहूय, तं श्रीकृष्णं, अनुकुर्वतीं वेणुं क्वणन्ती, क्रीडन्तीं, कांचिद्गोपिकां, अन्याः गोपवेषा इतरगोपिकाः, साधु साध्विति शंसन्ति प्रशशंसुरित्यर्थः ।। १८ ।। कस्यांचिदिति ।। अपरा काचित्तु, तन्मनाः कृष्णाभेदाभिमानयुक्तमनाः सती, कस्यांचित् स्वभुजं न्यस्य, कस्याश्चिदंसे स्वभुजं निधायेत्यर्थः । चलन्ती सती च, ननु हे सख्यः, अहं कृष्णः अस्मि, अतः, ललितां सुन्दरतरां, गतिं मम गमनं, पश्यतावलोकयत इति आह ।। १९ ।। मा भैष्टेति ।। तथा कृष्णोऽहमिति वदन्ती काचित्, वातवर्षाभ्यां, मा भैष्ट भयं मा कार्ष्ट । तत्त्राणं ताभ्यां वातवर्षाभ्यां त्राणं वो रक्षणं, मया विहितं, इति उक्त्वा, अम्बरमुत्तरीयं वासः, एकेन हस्तेन, वितत्य विस्तृत्य, उन्निदधे ऊर्ध्वं धृतवती । पाठे, यतन्ती प्रयत्नं कुर्वती सती, अम्बरमुत्तरीयं; उन्निदधे ।। २० ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

उन्निदधेऽम्बरमिति : १०.३०.२०.

निश्चलोऽयमिति वेदवादिनामस्तु तद्धृदयगोचरो रवः ।
अञ्चलं त्वहमवैमि निश्चितमित्यदर्शि परया तदञ्चलम् ।। १८६ ।।
दध्रे गिरिं स सबलोऽप्यम्बरपतिताम्बुजातपातभिया । अबलाप्यहं कलयाभ्यम्बरमिह सखि शयाम्बुजातेन ।। १८७ ।।
अरिदरधरा च सगदा दृष्टोदयपङ्कजातकलितशया । अहमस्मि च तद्रूपा तन्मां सुरतोत्सवप्रदां भजत ।। १८८ ।।

कृष्णप्रिया

इधर दो गोपियों ने तो बलभद्र जी कृष्णजी का स्वरूप धारण किया, तब उधर कितनी गोपियाँ गोपरूप बनी । एक गोपी ने वत्सासुर बनी हुई गोपी को मारा जो दूसरी गोपी ने बक रूप बनी हुई को मरा ।। १७ ।। तृण चरने के लिए दूर गई हुई गौओं को भगवान श्रीकृष्ण गंगे ? गंगे ! यमुने यमुने ऐसे नाम पुकार के बुलाते थे वैसे कृष्ण भावाविष्ट एक गोपी भी श्रीकृष्ण का अनुकरण करती हुई एवं वेणु बजाती हुई गौओं को बुलाती थी तब गोप बालकों की तरह उस गोपी की अन्य सखियाँ साधु साधु धन्य धन्य कह कर उसकी प्रशंसा करती थी ।। १८ ।। राजन् एक निर्गुणा गोपी थी, वह गोपरूप बनी और उसके कन्धे पर कृष्ण स्वरूपा अन्य गोपी ने अपनी भुजा को स्थापित किया और कृष्ण की तरह चलते चलते अन्य गोपियाँ से कहने लगी कि मैं कृष्ण हूँ तुम लोग मेरी लालित्यमयी चाल को देखो । राजन् ऐसा कहने वाली कृष्णमय बन गई थी ।। १९ ।। एक निर्गुणा गोपी थी वह श्री गोवर्द्धन धरण लीला कर रही थी, तब अन्य गोपियाँ में से कितनी गोपियाँ गौ रूप बनी कितनी गोप रूप बनी, और कुछ गोपीजन गोपीरूप में रही अब निर्गुणा गोपी ने कहा, कि वायु एवं वर्षा से मत डरो, आप सबकी मैं ने उनसे रक्षा की है ऐसा कह कर एक हस्त को प्रयत्न पूर्वक उठाकर गोवर्धन गिरिवर की तरह वस्त्र को ऊँचा उठाया ।। २० ।।

आरुह्यैका[1] पदाऽऽक्रम्य शिरस्याहापरां नृप । दुष्टाहे गच्छ जातोऽहं खलानां ननु दण्डधृक् ।। २१ ।।
तत्रैकोवाच हे गोपा दावाग्निं पश्यतोल्बणम् । चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममञ्जसा ।। २२ ।।
बद्धान्यया स्रजा काचित्तन्वी तत्र [3]ह्युलूखले । [4]भीता सुदृक् पिधायास्यं भेजे भीतिविडम्बनम् ।। २३ ।।
एवं कृष्णं पृच्छमाना वृन्दावनलतास्तरून् । व्यचक्षत[5] वनोद्देशे पदानि परमात्मनः ।। २४ ।।

कर्दमक्षमा

अन्वयः—हे नृप !, एका, (गोपी) अपराम्, पदा, आक्रम्य, शिरसि, आरुह्य, आह, हे, दुष्टाहे !, गच्छ, खलानाम्, दण्डधृक्, अहम्, जातः ।। २१ ।। तत्र, एका, (गोपी) उवाच, हे, गोपाः, (एनम्) उल्बणम्, दावाग्निम्, पश्यत, आशु, चक्षूंषि, अपिदध्वम्, वः, अञ्जसा, क्षेमम्, विधास्ये ।। २२ ।। तत्र, अन्यया, स्रजा, हि, उलूखले, बद्धा, भीता, काचित्, तन्वी, सुदृक्, आस्यम्, पिधाय, भीतिविडम्बनम्, भेजे ।। २३ ।। एवम्, वृन्दावनलताः, (च) तरून्, कृष्णम्, पृच्छमानाः, वनोद्देशे, परमात्मनः, पदानि, व्यचक्षत ।। २४ ।।

---

१. का–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. ध. रा. सु. । २. बध्नन्त्येका स्रजा काचित् त्वामद्यो लूखले हरे–इति वीर. पाठः । ३. उलूखले–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. ध. रा. सु. । ४. बध्नामि भाण्डभेत्तारं हैयङ्गवमुषंन्विति–वीर. विश्वेऽधिकम् । ५. क्षन्त–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपिदध्वं निमीलयतः ॥ २२ ॥ सुदृक् सुनयनमास्यं पिधाय सुदृक् वराक्षीति वा भीतिविडम्बनं भयानुकरणम् ॥ २३ ॥
एवं पुनरपि वृन्दावने लतास्तरूंश्च कृष्णं पृच्छन्त्यो वनोद्देशे वनप्रदेशे व्यचक्षतापश्यन् ॥ २४-२५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

खलानाम् उच्छृ खलानाम् ॥ दुष्टाहे कालिय ॥ २१ ॥ तत्र तासु । वः युष्माकम् ॥ २२ ॥ तत्र तासां मध्ये संभवत्वा-
त्रिया अपि विशेषणमित्याह—वराक्षीति ॥ अतश्चाकस्मादुन्मादस्य प्राबल्ये शान्ते सति कृष्णतादात्म्यस्यापि शैथिल्यमभूत्,
ततश्चाहं गोपीत्यात्मानमनुसंदधानां काचिद्भांडस्फोटनहैयङ्गवमोषणलीलानुकरणोद्यतामालक्ष्य योगमायैव श्रीयशोदायमाना तदुचितं
चकार—बद्ध्वेति । हैयङ्गवमुष्णन्तं बध्नामीत्युक्त्वाऽन्यया काचिस्स्रजा बद्ध्वा सुदृक् आस्यमाच्छाद्य भीतिविडम्बनं भयानुकरणं भेजे
इत्यन्वयः ॥ २३ ॥ वनोद्देशे वनप्रदेशे ॥ एवम् अनेन प्रकारेण । कृष्णं पृच्छमाना इति । अयमत्रप्रकारः—वैप्रलम्भकस्योन्मादस्य
प्रौढिमनि आत्मविस्मृतौ सत्यां स्वप्रेष्ठतादात्म्यमेव स्यात् । यदुक्तम्—'प्रियाः प्रियस्य प्रतिरूढमूर्तयः' इति, 'असावहं
तु' इति, 'कृष्णोऽहं तु' इति, 'कृष्णोऽहं पश्यत गतिम्' इत्यादि तस्यैव मध्यत्वे यत्किञ्चिदात्मानु संधानवत्त्वे सत्यनु-
करणम् । यदुक्तं प्रह्लादचरिते —"क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह" इति । अत्राप्युक्तम्–'कृष्णायन्त्यपिबत्स्तनम्' इत्यादि
तस्यैव मांद्ये आत्मानुसंधानस्य प्रायिकत्वेऽचेतनेष्वपि तरुगुल्मादिषु प्रश्नः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतावैष्णवतोषिणी

पदाक्रमणपूर्वकमारुह्येत्यर्थः ननु निश्चये सम्बोधने वा नृपेति पाठे आश्चर्येण सम्बोधनं दुष्टाहे ! इति कालियस्य
न्यकारेण सम्बोधनं गच्छ इतो निःसर अन्यथा दण्डं करिष्य इत्याह । जात इति । ननु निश्चतं तल्लीलायामेतद्वाक्यं भावेऽत्यनु-
करणं तत्रस्थस्य वाक्यस्य शेषेण तात्पर्य्येण वा ॥ २१ ॥ तत्र चेति चकारेणान्वयः कालियदमनलीलानुकरणेत्वित्यर्थः तत्रैकोवाच
हे गोपा इति पाठस्तु बहुत्रैव रेशब्दस्त्वहृद्यत्वान्नाद्रियते एवं श्रीकृष्णेनापि तत्र च चक्षुःपिधानमादिष्टमिति गम्यते दावाग्नि
पश्यतोल्वणमिति तु तत्र हेतुवाक्यम् उल्वणं चक्षुस्तेजोहरमित्यर्थः । तच्च निमीलनार्थव्याजादेव एवं मुञ्जाटवीसम्बन्ध्यपि सम्बन्ध-
नीयमिति पृथग् न वर्णितमिति ज्ञेयं अपिदध्वामिति दधस्तथोश्चेति स्मरणादभ्यासस्य भष्भावप्राप्तेरपिधद्ध्वदमिति वक्तव्येऽपिद-
ध्वमिति पाठ आर्षो लेखकप्रमादजो वा भष्भावो वर्गचतुर्थत्वमञ्जसा अनायासेनैव ॥ २२ ॥ अन्यया पूर्वमुक्तव्रजेश्वरीचेष्टामात्रं
कुर्वत्या तन्वी विरहार्त्त्या सद्य एव कार्श्यं प्राप्ता तत्र अनुकरणे उलूखल इति उलूखलानुकारिण्यां कस्याश्चिदित्यर्थः । सुदृगिति
दृग्भ्यामपि चकितविलोकनादिना भयमनुचकारेत्यर्थः । मुखं पिधाय हस्ताभ्यामेष बालकभयस्वभावः भीतिः कृष्णस्य भयकार्य्यं
कम्पादिकिञ्चिद्रोदनवाक्यादि च तदनुकरणं भेजे एवमन्यासामपि लीलानामनुकरणं यथार्हमूह्यम् ॥ २३ ॥ एवं तत्तल्लीलानां पुनः
पुनः पुनर्गानानुकरणयोः प्रकारेण तत्प्रकारविशिष्टं प्रश्नं कुर्वाणा इत्यर्थः । परमात्मनः सर्वेषामपि मूलस्वरूपस्य पदानि वनोद्देशे
व्यचक्षतेत्याश्चर्य्ये यस्य मुनयो वेदेऽपि यथाकथञ्चिदेव सूचकतया शब्दरूपाण्येव पदानि तर्कयन्ति मात्रं तस्यैव ताः स्वविहार-
वनोद्देशे साक्षाच्चरणचिह्नरूपाण्येव पदानि व्यचक्षतेति अहो एतन्मात्रांशेऽपि वयं सर्वेऽपि मुनयो न तासां साम्यं प्राप्नुमः
किम्पुनस्तादृशप्रेमविशेषासादितनित्यतदीयप्रेयसीत्वाद्यंश इति भावः । अन्तर्हित इत्यादिप्रकरणे तेषां व्याख्यायां प्रथमं तापमात्रं
द्वितीयं गानसहितान्वेषणं तृतीयं पूतनावधाद्यनुकरणं चतुर्थं पुनरप्यन्वेषणं पञ्चमं पददर्शनमिति क्रमः स्वव्याख्यायां प्रथमं तापमात्रं
द्वितीयं बाहुप्रसारेत्याद्यनुकरणं तृतीयं गानसहितान्वेषणं तत्रैव मध्ये मध्ये पूतनाद्यनुकरणे चतुर्थं पददर्शनमिति विवेचनीयम् ।२४।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु निश्चये सम्बोधने वा, नृपेति पाठे आश्चर्येण सम्बोधनम्, दुष्टाहे रे कालिय ! गच्छ, इतो निःसर, अन्यथा दण्डं
करिष्ये इत्याह—जात इति । ननु निश्चितम् ॥ २१ ॥ तत्र चेति चकारान्वयः, कालियदमनलीलानुकरणे त्वित्यर्थः, एवं तत्र कृतम्,
चक्षूंषीत्याद्युक्तेश्च, मुञ्जाटव्यामपि कृतं दावतो रक्षणं द्विविधमेवानुकृतमिति ज्ञेयम् । यद्वा, तत्र तासु मध्ये च ततश्च मौञ्जाटविक-
तदनुकरणमेव । पाठान्तरं स्पष्टमेव । अञ्जसा त्वनायासेनैव ॥ २२ ॥ अधुना मानसचेष्टाप्रधानानुकरणमाह —बद्ध्वेति । अन्यया
ताभ्यो भिन्नया पश्चादागतया दूतीरूपया कयाचिद्वृद्धया तन्मतानुसारिण्या; यद्वा, अन्यया जगद्विलक्षणया परममृदुलयेत्यर्थः ।
पूर्वं मात्रापि परमकोमलगोबालादिरज्जुभिरेव बद्धत्वात्; यद्वा, पूर्वं स्रजैकया पश्चादन्यया च तयैव बद्धा पूर्ववद्बहुधा
बन्धनार्थं तासां स्रजोऽपि बन्धनसामर्थ्यं तन्मतानुसारित्वं च सम्भवेदेव, तन्वी विरहार्त्त्या सद्य एव कार्श्यं प्राप्ता, अतएव प्रेम-
विशेषात्तया श्रीभगवद्भक्तवश्यतागुणविशेषमयलीलानुकरणम् । तत्रानुकरणे तास्विति वा उलूखल इति उलूखलानुकारिण्यां कस्या-
श्चिदित्यर्थः । सुदृगिति दृग्भ्यामपि चकितनिरीक्षणादिना भयमनुचक्रुरित्यर्थः । मुखं पिधाय स्वहस्ताभ्यामेतच्च बालकस्वाभाविक-
भयलक्षणं भीतिविडम्बनं कम्पपुलकादि किञ्चिद्रोदनकाकुवाक्यादि च; एवं प्रायो भयादिना मानसचेष्टानुकरणमेव द्योतितम्,
भयस्य मनोविषयकत्वात्; एवमत्यन्तभक्तवश्यतामयी श्रीदामोदरलीला सर्व्वासां लीलानां मध्ये श्रेष्ठतमेति तदनुकरणं 'मधुरेण

समापयेत्' इति न्यायेन सर्व्वान्ते प्रोक्तम्। धेनुकप्रलम्बयोर्वधः श्रीबलदेवकृतत्वान्नानुकृतः, कुमारीवस्त्रहरणं यज्ञपत्नीगणाकर्षणञ्च लज्जया किंवा तत्तल्लीलारसस्यात्मन्येव पर्य्यवसानात्तत्तदनपेक्षया, यमलार्जुनभञ्जनं च श्रीदामोदरलीलान्तर्गतत्वात् पृथङ्नानुकृतमिति पूर्व्वोक्तलीलाक्रमातिक्रमश्च तासां विरहविह्वलतावर्णनेन श्रीबादरायणेरपि तादृशभावापत्त्या तदनुसन्धानापगमात्, किंवा लिखितन्यायेन चेष्टादीनां त्रयाणामुत्तरोत्तरस्मिन्नेकैकस्य समवेततया केवलत्वसम्वलितत्वयोस्तत्रापि न्यूनाधिकत्वयोः क्रमापेक्षयोक्तेः, यद्वा, तास्वेव केवलत्वसम्वलितत्वादिक्रमेणैव तत्तल्लीलानां परिस्फूर्त्तेः; यद्वा, विरहकातरतया तन्मनस्तया वा पौर्व्वापर्य्यानुसन्धानाभावादितोषा दिक् ॥ २३ ॥ एवमिति पूर्व्वोक्तप्रश्नप्रकारेण; यद्वा, तत्तल्लीलानां पूर्व्वोक्तप्रकारकपुनः—पुनरनुकरणेन; तत्र हेतुः—कृष्णं चित्ताकर्षकमिति पदानि व्यचक्षत, पुनर्भूमौ दृष्टिनिपाताद्विशेषेणाचक्षतेति (भा० १०।३०।१०) 'केशवाङ्घ्रिस्पर्शोत्सव–' इत्याद्युक्तौ पूर्व्वं केवलं सम्भावनयैव, अधुना तु साक्षादेवापश्यन्नित्यर्थः। साक्षाद् दृष्टपक्षे च पूर्व्वं साक्षाद् दृष्टान्यपि विरहविह्वलतयानुसन्धानाभावाददृष्टानीव स्युः, अतएव नानुसृतानि, अधुना च तन्मयत्वेनानुकरणात् किञ्चित्तदुपशान्त्या बुद्ध्युपायेनानुसन्धानपूर्व्वकमपश्यन्नित्यर्थः। अतएव विशब्दः परमात्मनः परमप्रियतमस्येति रात्रावपि तल्लक्षणैस्तद्दर्शने हेतुः। अन्यत्तैर्व्याख्यातम्, यद्वा, प्रदोषे गते शारदपूर्णचन्द्रस्य चन्द्रिकासु विस्तृतासु दूरादपि स्पष्टतया तद्दर्शनम्, यद्वा, एवमित्यादिकमनुवादमात्रं प्रश्नमध्य एव पददर्शनविवक्षया ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे नृप ! काञ्चित्कालियायतीं शिरसि पदा आक्रम्यापरा काचिदुवाच किमिति हे दुष्टसर्प ! गच्छ इतो ह्रदादपसर ननु हे अहे ! अहं खलानां दण्डधृग् दण्डयिता जातोऽवतीर्ण इति ॥ २१ ॥ तथा तत्र गोपीनां मध्ये काचिदुवाच किमिति हे गोपा ! उल्वणं दुःसहं प्रभूतं वा दावाग्निं पश्यत चक्षूंषि पिदध्वं निमीलयत वो युष्माकमाशु क्षेममञ्जसा सुखेन विधास्ये करिष्यामीति ॥ २२ ॥ एका तु स्रजा काञ्चिद्बध्नन्ती प्रोवाच किमिति हे हरेऽधुना त्वां हैयङ्गवमुषं नवनीतचोरं तद्भाण्डस्य भेत्तारं चात उलूखले वध्नामीति तथैवं वद्धोक्ता च सा भीतेव शोभने दृशौ यस्मिंस्तदास्यं पिधाय हस्ताभ्यामाच्छाद्य सुदृग् वराक्षी वा सती मुखं पिधाय भीतिविडम्वनं भयानुकरणं भेजे चकारेति ॥ २३ ॥ इत्थं पुनरपि वृन्दावने लतास्तरूंश्च कृष्णं पृच्छमानाः वनप्रदेशे परमात्मनः कृष्णस्य पदानि व्यचक्षतापश्यन् ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उपसंहरति। एवमिति। वनोद्देशे वनप्रदेशे ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

परमात्मनः सर्वेषामपि मूलस्वरूपस्य पदानि वनोद्देशे व्यचक्षतेत्याश्चर्यमित्यर्थः। अन्तर्हित इत्यादिप्रकरणे तेषां व्याख्यायां प्रथमं तापमात्रं द्वितीयं गानसहितान्वेषणं तृतीयं पूतनावधाद्यनुकरणं चतुर्थं पुनरप्यन्वेषणं पञ्चमं पददर्शनमिति क्रमः। स्वव्याख्यायां प्रथमस्तापः द्वितीयं बाहुप्रसारेत्याद्यनुकरणं तृतीयं गानसहिताद्यनुकरणं तत्रैव मध्ये मध्ये पूतनाद्यनुकरणं चतुर्थं पददर्शनमिति विवेचनीयम् ॥ २४–२६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवं वद्धान्यया स्रजा काचिदित्यन्तं विजातीयमाह। भावेऽप्यधिगन्तव्यम्—एवमित्यादि, एवं तादात्म्यास्ते प्रकृताः सत्यः ॥ २३–२७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दुष्टाहे हे कालिय ! ॥ २१–२२ ॥ ततश्चाकस्मादुन्मादस्य प्रावल्ये शान्ते सति कृष्णतादात्म्यस्यापि शैथिल्यमभूत् ततश्च अहं गोपीत्यात्मानमनुसन्दधानां काञ्चिद्भाण्डस्फोटनहैयङ्गवमोषणलीलानुकरणोद्यतामालक्ष्य योगमायैव श्रीयशोदायमाना तदुचितं चकारेत्याह। बद्धेति। हैयङ्गवमुषं तु त्वां वध्नामीत्युक्त्वा अन्यथा काचित् स्रजा बद्धा सुदृक् आस्यमाच्छाद्य भीतिविडम्बनं भयानुकरणं भेजे इत्यन्वयः ॥ २३ ॥ एवमनेन प्रकारेण कृष्णं पृच्छमाना इत्यमात्र प्रकारवैप्रलम्भिकस्योन्मादस्य प्रौढिमनि आत्मविस्मृतौ सत्यां स्वप्रेष्ठतादात्म्यमेव स्यात् यदुक्तं प्रियाः प्रियस्य प्रतिरूढमूर्तयः असावहं त्विति कृष्णोऽहं पश्यत गति मत्यादि तस्यैव मध्यत्वे यत्किञ्चिदात्मानुसन्धानवत्त्वे सत्यनुकरणं यदुक्तं श्रीप्रह्लादचरिते क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकारेति अत्राप्युक्तं कृष्णायन्त्यपिवत्स्तनमित्यादि तस्यैव मान्द्ये आत्मानुसन्धानस्य प्रायिकत्वे अचेतनेष्वपि तरुगुल्मादिषु प्रश्नः ॥२४॥

श्रीरसिकाह्लादिनी टीका

कालीयदमनलीलामाह आरुह्येति, एका कृष्णवदाचरन्ती श्रीकृष्णचरणस्पर्शाशया कालिवदाचरन्तीं प्रत्याह। तिरस्कृत्य सम्बोधयति। हे दुष्ट गच्छाऽतो निःसर ननु निश्चितं खलानां त्वद्विधानां दण्डधृक् अहं जातः। किं कृत्वोक्तवती आरुह्य पदेन

शिरस्याक्रम्येति। हे नृपेति अद्भुतश्रवणे अवधानं कारयति। अयमभिप्रायः संचारिणो भावाः कुत्रचित्पूतनादिवत्प्रतीयमानाः कुत्रचिद्दावग्निवत् कदाचिद् कालियवत् प्रतीयमाना दुःख-हेतु-कृतत्वात् अत्र तदुपशमनार्थमेवैतासां यत्नः अतो न किंचिद्विरुद्धमिति ॥ २१ ॥ दावाग्निपानलीलामाह—तत्रेति कलियदमनदिने ह्रदतीरे रात्रौ गोकुलवासिजनस्य नाशहेतुमुत्थिते दावाग्निं स्मृत्वा काचिदाह वस्तुतस्तु संचारिणो भावा एवादाहकास्तेस्वेव दावाग्निबुद्धिं विधाय एका कृष्णवदाचरन्ती गोपवदाचरन्तीं प्रत्याह। हे गोपा उल्वणमतीव भयङ्करं दावाग्निं पश्यत चक्षुंषि आशु अपिदध्वं निमीलयत अञ्जसा दावाग्निपानेन वो युष्माकं क्षेमं विधास्ये ॥ २२ ॥ तत्र लीलानां क्रमो न उन्मत्ततुल्यत्वात् कुत्रचित्कस्याश्चित् लीलाया विस्मृतिः यथासुरस्य वधानुक्तिस्तथा वत्सापहरणस्य प्रलम्बवधस्यानुक्तिः। विरहाग्निज्वालावलीढत्वात् अनुकृतिर्न जाता। यद्यपि उलूखलबन्धनलीला प्रथममेव जाता तथापि इदानीमेव स्मृतिपथमवतीर्णा पूर्वलीला इयं सुखरूपा यथा व्रजेश्वर्या बद्ध उलूखनेन तद्वशवर्ती जातः तथानया लीलयाऽस्मद्वशवर्ती भविष्यतीत्यभिप्रायेणान्तेऽनुचक्रुः बद्ध्वेति अन्यया यशोदाभावनावत्या काचित्तन्वी श्रीकृष्णवदाचरन्ती उलूखलवदाचरन्त्यां कस्यांचित् स्रजा मालया बद्धा विरहकृतदाहात् कृशतन्वी जाता ताडिष्यतीति भीता भयानुकरणं संचारिभावकृतमेव, सुदृक् आस्यं पिधाय भीतिविडम्बनं भीत्यनुकरणं भेजे। सुदृक् सुन्दराक्षी वा यमलार्जुनभङ्गादिं क्रमते लीलान्तर्गतत्वात् पृथक् नोद्दिष्टं विरहविह्वलितत्वाद्वा विस्मृतं तन्मते तुल्यत्वोक्तम्। एवमन्यासां लीलाऽनुकरणमुन्नेया ॥ २३ ॥ एवमिति एवं पूर्वोक्तप्रकारेण लीलानामभ्यासेन कदाचित्वृक्षान् प्रति प्रश्नः कदाचिल्लताः प्रति कदाचित्पूर्वकृतलीलामनुकरणं कदाचित् विस्मृतानां पुनरपि वृन्दावनलतास्तरून् पृच्छमाना विरहकातर्येणानुसन्धानाभावात् पुनः पुनः पृच्छन्त्यो वनोद्देशे विहारयोग्ये प्रदेशे परमात्मनः परमप्रेष्ठस्य पदानि चरणचिह्नानि व्यचक्षत अपश्यन् लीलानुकरणस्य फलमेतदेवेति। व्यचक्षत परीक्षणपूर्वकं सम्यक्त्वेन दृष्ट्वा तर्कितवत्यः।२४।

विशुद्धरसदीपिका

आरुह्येति। एका गोपी परां भावनालब्धामाह। दुष्टाहे गच्छेति जातोऽहमिति तल्लीलावेशेन तद्वाक्याभावेऽप्यनुकरणं तात्पर्येणैव ज्ञेयम् ॥ २१ ॥ तत्रेति। गोपा इति भावनालब्धाः प्रत्याह। स्पष्टमन्यत् ॥ २२ ॥ बद्ध्वेति। अन्यया भावनालब्धया श्रीव्रजेश्वरीमनुकुर्वत्या अन्या काचिद्गोपी उलूखले भावनालब्धे बद्धा भावनयैव भीता सती भीतिविडम्बनं भयकार्य्यं कम्परोदनादिकं भेजे इत्यर्थः। तन्वी विरहार्त्या सद्य एव कार्श्यं प्राप्तेत्यर्थः ॥ २३ ॥ उपसंहरति। एवमिति। अत्र प्रथमं तापमात्रं द्वितीयं बाहुप्रसारेत्याद्यनुकरणं तृतीयं गानसहितान्वेषणं तत्रैव मध्ये मध्ये पूतनाद्यनुकरणं चतुर्थं पददर्शनमिति संग्रहः। एवमिति। यथैता अनुचक्रुः एवं याः कृष्णं वृन्दावनलतास्तरून् पृच्छमानास्ताः परमात्मनः परमरमायाः श्रीराधिकाया आत्मनः परमप्रेष्ठस्य पदानि पदचिह्नानि श्लेषेण पदानि तत्तल्लीलास्थानानीत्यपि उद्देशे उत्कृष्टे देशे प्रागुक्ते इति शेषः व्यचक्षत ददृशुः ॥ २४ ॥

श्रीरामनारायणकृता भावभावविभाविका

लीलानुकारान्तरमाह। आरुह्येति। नृपेति मुनीन्द्रेण परीक्षित्सम्बोधनम् एका तदात्मकतया कृष्णायमाना अपरां कामपि विरहविषाग्निज्वालेन दंदह्यमानतया स्वशिरसि कृष्णचरणस्पर्शकामनया नीलाम्बरवेष्टनशिरोमणिधारणादिभिः कृतकालीयानुकरणां शिरस्यारुह्य ललितनृत्यगतिवलितप्रेमपवनचलितनलिनायमानपदाक्रम्याह हे दुष्टाहे! गच्छ यतोऽहं ननु नूनं खलानां दण्डधृक् जातः तल्लीलायां यद्यपि नेयं भगवदुक्तिर्दृश्यते तथापि तद्वाक्यशेषेण योग्यतया वायमभिनयः चित्रं चैतत्स्नेहचरित्रं गोप्याः स्वशिरःपदाक्रमणेऽपि तदीयकृष्णानुकारदर्शनेन नेर्ष्यामात्सर्याद्युद्भवः प्रत्युताल्हादवृद्धिरिति ॥ २१ ॥ काश्चित्तु गोप्यः करालां स्वविरहज्वालां स्वरोमद्रूमवनसंलग्नां सर्वदिग्व्यापिनीञ्च पश्यन्त्यः प्रेमवैक्लव्यविगतमतितया तामेव दावाग्निं मत्वा तद्भीता गोपा इव गोपाल रक्षेति ब्रूयुः तत्र तस्मिन् सति एका तु तथैव पश्यन्त्यपि तदात्मकतया कृष्णावेशेनोवाच हे गोपाः! उल्वणं चक्षुर्भ्यां द्रष्टुमशक्यं दावाग्निं पश्यत अतस्तदुल्वणत्वादेवाशु चक्षूंषि अपि दध्वम् अत्र दधस्तथोश्चेति स्मरणादभ्यासस्य भष्भावेनापिधद्ध्वमिति प्रयोगसम्भवेऽप्यपि दध्वमित्यार्षम् अहमञ्जसा क्षेमं विधास्ये तथा च सर्वा नेत्रमीलने ध्यानळयेन रसवर्षघनश्यामं हृन्नभोव्याप्तमालोक्य शमितविरहज्वालाः कृष्णेन दावाग्ने रक्षिता वयमिति मत्वोन्मीळने पुनः पूर्ववद्बभूवुः अत्र कालीयदमनोत्तरनिशि गताया मुञ्जाटवीगतायाश्च दावाग्निमोचनलीलाया अनुकरणं ज्ञेयम् ॥ २२ ॥ पूर्वं बाललीलां निरूप्य कैशोरलीलानिरूपणेऽपि न प्रेमविह्वलितानां क्रमानुसन्धाननियम इति द्योतयन्मुनीन्द्रः पुनर्बाललीलानुकारमाह। बद्ध्वेति। काचित्तु सुदृक् शोभनाक्षी तन्वी सुतनुमती कृष्णानुकारेण सफलशरीरा वा अन्यथा कृष्णस्य स्नेहगुणबन्धनाधीनत्वमनुसन्दधत्या स्रजा कृष्णगुणग्रथितसुमनस्त्वेन स्रग्रूपया स्रजा पुष्पमालयेति करणनिर्देशो वा तत्र उलूखलाभावेन अत एव प्रेमविरहजडीकृतदेहत्वेन तत्र उलूखलाकारोपविष्टायां कास्याञ्चिद्गोप्यामेव कृष्णसंश्लेषकामिन्यां बद्धा स्वयं विरहदुःखेन भीता आस्यं हस्ताभ्यामधःकरणेन वा पिधाय भीतस्य यशोदाबद्धभीतकृष्णस्य विडम्बनमनुकारं भेजे भीता असवो दृशौ च यस्या इत्येकम्वा पदम् ॥ २३ ॥ श्रीशुको मुनीन्द्रः प्रेमपथाचार्य्यरूपगोपीनां चरितेनैव तत्पथमुपदिशंस्तेनैव प्रथमं भगवत्पददर्शनमाह। एवमिति। एवं विरहोपतापपूर्वकं मिथः सङ्गत्य तदात्मकतया गुणगानानुकारपरा वृन्दावनलतास्तरून् कृष्णं पृच्छमाना वनोद्देशे परमात्मनः पदानि व्यचक्षतेत्यन्वयः

तत्रैवं पृच्छमाना व्यचक्षतेत्युक्त्या परमात्मकृष्णान्वेषणे तत्पददर्शनं प्रति परिप्रश्नस्य प्राधान्यमन्येषामेवभित्युक्त्या प्रकारान्तःपातित्वेन तदङ्गत्वं तत्र लतास्तरूनित्युक्त्या यत्र यत्र तदुपदेशसम्भावना तत्र तत्र प्रश्नकथने नैकत्र स्वगुरावेव प्रश्ननियमो वारितः तत्राङ्गेष्वपि अतथ्यंस्तमचक्षाणाः करिण्य इव यूथपम इत्यादिना प्रदीप्तशिरा जळराशिमिवेत्यधिकारपठिततदप्राप्त्युपतापः प्रथमं गृहगमनाशात्यागेन वृन्दावने एव तत्प्राप्त्याशयावस्थानं तत्र गायन्त्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनमित्यत्र संहता इति सत्सङ्गस्तृतीयः तत्रामुमेव गायन्त्य इति भगवद्गुणगानं चतुर्थं तत्र गाने एवकारेणेतरव्यावृत्तिरुच्चैरित्यनेन लज्जाव्यावृत्तिश्च गुणः विचिक्युरित्यनेन गानान्वितान्वेषणं पञ्चमं तत्रान्वेषणे उन्मत्तकवदिति प्रेमपथकुशलत्वेऽपि प्रेमपथोन्मत्तैहिकामुष्मिककुशलदृष्ट्योन्मत्ततया तत्तुल्यत्वकथनं तच्चान्वेषणे गुणाः वनाद्वनमित्युक्त्यान्वेषणे आश्रमविशेषाग्रहत्यागोऽपि गुणो दर्शितः तथा लीळा भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिका इत्यत्र भगवल्लीलानुकरणं प्रधानं षष्ठं निर्दिष्टं तत्र तदात्मकत्वम् इष्टकैशोरशृङ्गारलीलानुकरणप्राधान्येऽपि प्रियतमलीलात्वाल्ललिन्तरानुपेक्षणञ्च गुणः एवं साङ्गं प्रश्नं कुर्वत्यो वनोद्देशे व्यचक्षतेत्यनेन वृन्दावनस्याराधनसिद्धभूमित्वोक्तिः भगवता स्वपदाङ्कानां प्रथमाविष्कारस्तु तत्रानुरागेण मदमानभङ्गतया सानुरागगानेन स्वाविष्काराय यत्तु कैश्चित् वनोद्देशे परमात्मनः पदानि व्यचक्षतेत्यनेन गोपीनामुत्कर्षकथनं तद्बहुसमीचीनं यत्तु तत्पदादर्शनेन सर्वमुनीनामपकर्षोक्तिः सा त्वनुचिता तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय इत्यादि श्रुतिविरुद्धत्वात् कस्यचिदपि तद्भक्तस्यापकर्षासम्भवात् शुकादीनामभक्तत्वस्य वक्तुमशक्यत्वाच्च ॥ २४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एका कृष्णरूपा कालियरूपां काञ्चिच्चरणेनाक्रम्य तस्याः शिरसि आरुह्याह हे दुष्टाहे! इतो गच्छ ननु निश्चयेन खलानामहं दण्डधृक् जात उपरि शिरसि काचिद्वृक्षशाखामवळम्ब्यान्तःकरणे भगवतः आवेशान्निरलिम्बतयैव वा यथा तदीयपाळनशक्त्यावेशान्तरस्य नृपेति सन्बोधनाशयः ॥ २१ ॥ तत्र तासु मध्ये एका कृष्णरूपा उवाच हे गोपाः! उल्वणं दावाग्निं पश्यत शीघ्रं चक्षूंषि पिदध्वं निश्चयेनाञ्जसा क्षेमं विधास्ये अत्र विरहेण दावाग्निदर्शनं भावनया वा अन्यासां तु तस्या वस्तुतः भगवद्भावभावनात्तत्त्राणप्रार्थना एवमेव जातं वर्षस्थलेऽपि अत्यन्तमत्तानामेव तदावेशेन भगवद्भावोदयात् ॥ २२ ॥ तत्र तासु मध्ये सुनयनमास्यं वामहस्तेनाच्छाद्य भीत्यनुकरनं कृतवती ॥ २३ ॥ एवमनुकरणं कृत्वा पुनरपि तथैव पृच्छमानाः भगवतः पदानि ददृशुरित्याः एवमिति । तथा च गाढोन्मादे भगवल्लीलानुकरणमप्रमादे प्रश्न इत्येव भ्रमणात्तासां भगवत्प्रसादेन समाहितता प्राप्ता तच्चरणदर्शनं जातमित्याशयेनाह । व्यचक्षतेति । परमात्मनः परमेश्वरस्य श्रीकृष्णात्मनावतीर्णस्य परमप्रियस्येति वा कस्मिंश्चिद्वनप्रदेशे भूमौ संळग्नानि पदानि दृष्टवत्यः निवृत्तिपक्षे चित्तैकाग्रतासिद्धयर्थं भगवत्कृतलीलानुकरणं वर्णयन्त्यः पुनस्तदन्वेषणप्रकारं बोधयन्त्यः वनोद्देशे अन्तः करणलक्षणस्य वनस्य सात्त्विकप्रदेशे पदानि चिदाभासळक्षणानि चिल्लक्षणपदज्ञापकानि तत्यातिकृतिभूतानि व्यचक्षत तदवलोकनं निरूपयामासुरित्यर्थः ॥ २४ ॥

रास-रहस्यम्

र० टी० यदा मुमुक्षुः आत्मबलेन बलोयान् भुत्वा दुष्टाहिकालियवदहंकारस्य शिरसि पादेनाक्रमणं कर्तुं शक्नोति अर्थात् अहङ्कारं नियन्तुं समर्था भवति तदैव खलाहङ्कारस्य दण्डधृग्रूपेण जातो भवति ॥ २१ ॥ दावाग्नीः यथा समस्तान्यरण्यानि भस्मीकरोति तथा कामाग्निः आशरीरादहङ्कारपर्यन्तं सकलं भस्मी करोति । परन्तु यदि काम्यविषयात् चक्षुनिर्मीलनं कर्तुं शक्यते अर्थात् कामनारहितं मनः कर्तुं शक्यते तदा तत्कालं स्वयमेवोपशाम्यति स कामः ॥ २२ ॥ यदि मुमुक्षुः मालावत् निरन्तरभावनया भगवन्तं संसारवृक्षलक्षणउलूखले योजयितुं शक्नोति अर्थात् "सर्वं खल्विदं ब्रह्म । रूपेण धारयितु शक्नोति तदा भगवानपि भक्तजनस्य प्रेमरज्जुकृतबन्धनं भीत इव स्वीकरोति ॥ २३ ॥ एवं पूर्वोक्तप्रकारेण आत्माभिमुखीवृत्तयः वृन्दावनलतास्तरुणिति हृदयारण्यस्य विषयसंस्कारान् तज्जन्यव्यापारांश्च विश्लोषपूर्वकमननेन कृष्णमात्मानं पृच्छमानाः, "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ।" इति श्रुत्या जिज्ञासमानाः, वनोद्देशे वनप्रदेशे हृदयारण्ये परमात्मनः पदानि अर्थात् पदचिह्नानि लक्षणानीत्यर्थः, व्याचक्षत अपश्यन् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अहे! सर्प! ॥ २१ ॥ आशु शीघ्रमपि दध्वं निमीलयत ॥ २२ ॥ सुदृक् शोभने दृशौ यस्मिन् तदास्यम् पिधात पाणिभ्यामाच्छाद्य भीतिविडम्वनं भयानुकरणं भेजे ॥ २३ ॥ एवं वृन्दावने लताः तरूंश्च कृष्णं पृच्छमानाः वनोद्देशे वनप्रदेशे परमात्मन पदानि व्यचक्षत अपश्यन् ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तस्या अत्र पदानि न दृश्यन्ते न लक्ष्यन्ते तृणाङ्कुरैः स्विद्यत्सुजातं कोमलमङ्घ्रितलं यस्याः सा तां प्रेयसीप्रतिप्रियं प्रियः कृष्ण उन्निन्ये स्कन्धेनोवाह नूनं निश्चयः । अन्यथा पथि पदानि दृगास्पदानि भवेयुरिति भावः । काचित्काश्चित्प्रति । अये

आल्यो धूल्यास्पदानि चेत्पदानि दृश्येरन्न च तथेति शङ्कते ।। अधिकमग्नानीति । पदमेकमधिकं के मग्नानीत्यतो न दृश्यन्ते । तद्वहनोहनं न सम्भवतीत्यतोऽप्याहुः । अधिकं मग्नानीति । अधिकमत्यन्तं न विद्यते ग्ना नदी यमुना एषां तानीत्यतत्प्रविष्टानीति यावत् दर्शनयोग्यान्यपि न दृश्यन्तेऽत ऊहनं युक्तमिति भावः । ग्नावोनेष्ट इत्यृग्भाष्ये ग्ना नद्यश्च समीरिता इति शीलस्वतो ग्नास्ता इत्युक्तः । तट्टीकायां च गमेस्ताच्छील्ये न इति न प्रत्ययो डिच्चेत्युक्तः । माधवेन ग्नाशब्दः स्त्रीवाची तथा चास्क आह । मेनाग्ना इति स्त्रीणां मेनामानयन्त्येग्नागच्छन्त्येनाज्ञतीति यद्व्याख्यातं तन्न विरुणद्धि ।।२१।। पुनस्तथा तदुद्वहने हेतुमूहयन्ति ।। इमानीति । हे गोप्यः कामिनो वधूं वहत इमानि पदानि भाराक्रान्तानीत्यधिकं मग्नानि धूल्यां पश्यत । स्वेर्ष्यावशाद्विश्रम्भरस्य कियानयमेकस्याः कृशाङ्ग्या भारस्तेनातिभग्नतायादोऽपि तासामिति भ्रमतो बोध्यः । अथवैतासां मदनमदविधूतये मधुसूदन एवैवं दर्शयामासेत्यवसेयं ।। २२ ।। पुष्पहेतोस्तदादानार्थं महात्मना कृष्णेनात्र त्रायत इति त्रोऽकिञ्चिदुपपादकादपि त्रायतेरादे च इत्यात्वे आतश्चेति योगविभागात्पान्तीति पाश्वत्रवर्तिन इतिवत्कप्रत्यये त्रोऽन्यो न विद्यते यस्या इति वाऽत्रायको यस्या इति वाऽत्रा कान्ताऽवरोपिता स्कन्धादवतारिता । अत्र प्रेयसा प्रियार्थे प्रसूनापचयः कुसुमलवनं कृतः ।। २३ ।। कुसुमचयापचयः कृष्णेन कृत इति कथं ज्ञायत इत्यत आहुः ।। प्रपदेति । प्रपदाभ्यां पादाग्राभ्यामाक्रमणं ययोस्ते । अत एवासकले भूम्यलग्नपादपृष्ठे इत्यसकले असमग्रे एते पदे पश्यत । तत्र कामिना कामिन्याः केशप्रसाधनं तत्संस्कारः कृत उन्नतलता आनमय्य पुष्पग्रहणसमये प्रपदमात्रगोत्रास्पर्शः सञ्जात इति भावः । पादाग्रं **प्रपदमित्यमरः** ।। २४ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सात्विकयाश्चेष्टामाह । आरुह्येति । एकामारुह्य पदा च आक्रम्य शिरसि पादाघातं कृत्वा नृपेति संबोधनं विश्वासाय एषा लीळा कठिना उपरि वृक्षशाखामवलम्ब्य वा तथा कृतवती वस्तुतस्तु या लीला यथा प्रभुणा कृता सा तथैवात्राविर्भवतीति निराळम्बनत्वेऽपि नानुपपत्तिः हे दुष्टाहे कालिय ! इतो गच्छ यतोऽहं खलानां दण्डधृक् जातः नन्विति सम्बोधनम् अमारणार्थम् ।। २१ ।। राजसी पुनस्तत्रैका जाता उवाच वक्ष्यमाणं गोरूपाः काश्चन गोपरूपास्तथापराः एका तु कृष्णरूपा आह । हे गोपा ! उल्वणं दावाग्निं पश्यतेति विरहेण दावाग्निं दृष्टवती भावनया वा तथा भातं सर्वोऽपि क्रीडा भगवद्रूपा तत्र तत्राविशतीति दावाग्नेरपि दर्शनम् अन्यासां विशेषाकारेण तस्यां भगवद्भावात् न तत्प्रार्थना एवमेव वातवर्षस्थलेऽपि अतिमत्तानामेव भगवद्भावेन तल्लीलावेशात्तस्या एव दर्शनमिति निष्कर्षः ।। २२ ।। तामसीमाह । बद्धेति । उलूखळे कयाचिद्बद्धा स्रजा माळया उलूखलस्थानीयापि काचित् अन्या तु यशोदारूपा तदा भीता सती सुदृक् उत्तमदृष्टियुक्ता आस्यं पिधाय हस्तेन सम्पूर्णमुखमाच्छाद्य भीत्यनुकरणं भेजे अत्र क्रमे गुणा एव प्रयोजकाः तत्तदधिकारानुसारेण तत्तल्लीलाः प्रादुर्भवन्ति भगवद्वशीकरणान्ता च लीला अन्यथा अन्ते उलूखळीळा न कृता स्यात् नातः परं कर्त्तव्यमस्तीति ळीळायां विरतिः । एवं लीलाभावमुपपाद्य भगवद्भावे वक्तव्ये भगवतो भीतिविडम्बनलीलास्तिरोहिताः ततः पूर्ववत् पुनः प्रश्न एव स्थितः तस्य सम्वेदनपूर्वकत्वात् एतत्त्वावेशेन जातमिति सम्वेदनरहितम् अतस्त्वस्य नोपसंहारः ।। २३ ।। पूर्वन्तु इत्युन्मत्तवच इति वचनमेवोपसंहृतं नतु प्रश्न उपसंहृतः अत इदानीं मध्ये लीलामुक्त्वा तस्यास्तिरोधाने पुनरेव वृन्दावनलतास्तरून् कृष्णं पृच्छमाना जाता इत्याह । एवमिति । तदा पुनरनुत्तरे प्राप्ते भगवानाविशत् मोहं दूरीकृत्य सर्वं ज्ञापितवानित्याह । व्यचक्षतेति । तापापनोदनार्थमेव त्रयम् अन्वेषणं लीला वेशो भगवदावेशश्चेति तत्र प्रश्नोऽन्तरङ्ग इति स एव सर्वत्र अनूद्यते वृन्दावनळताः तरून् कृष्णं पृच्छमाना जाता इति ततो वनोद्देशे वनभूमौ भगवतः पदानि दृष्टवत्यः परमात्मन इति पदानां परमपुरुषार्थता सूचिता भगवदावेशे हि सर्वज्ञता भवति तेषां च कार्यं भगवत्पददर्शनं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय इति श्रुते ।। २४ ।।

श्रीसुबोधिनी-सारः

एकाऽऽरुह्य शिरसि पदा पादेनाक्रम्यापरामाह । हे दुष्टाहे कालिय त्वं गच्छ खलानां दुष्टानां दंडदोऽहं ननु जातोऽस्मि । हे नृप ।। २१ ।। तत्र तासु वने वा हे गोपा उल्बणं दावाग्निं यूयं पश्यत इत्येका उवाच आशु शीघ्रं चक्षूंषि नेत्राणि अपिदध्वम् आवृणुत, क्षेमं मंगलमंजसा सुखे नाहं करिष्यामि ।। २२ ।। काचित्तन्वी सूक्ष्माङ्गी अन्यया मातृस्थानापन्नया गोप्या स्रजा मालयोलूखले बद्धा तत्र वने भीता सुदृक् आस्यं सुनयनं मुखं पिधायाच्छाद्य भीतेर्भयस्य विडम्बनमनुकरणं भेजे ।। २३ ।। एवं वृन्दावनलताः तरूंश्च कृष्णं पृच्छमाना वनस्योद्देशे परमात्मनः पदानि अपश्यन् ।। २४ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

तत्रैकोवाचेत्यत्र, विरहेण दावाग्निं दृष्टवतीत्यादि । अत्रेदमाकूतम् । भगवता यदेयं लीला कृता, तदा पूर्वं गोपैर्दावाग्निर्दृष्टः, ततः प्रार्थितः प्रभुः, अत्र कथं तद्वैपरीत्यमुच्यत इति शङ्कानेन निरस्यते । अतिविगाढभाववत्या एव भगवद्भावो भवति । तादृश्या एव च हृदये विरहाग्निः प्रकटो भवतीति सैव स्वामिनी तं दृष्टवती । तदेतदुक्तं **विरहेणेत्यादिना** । तदा पूर्वं

ततः पालनमेव कृतमित्यधुनापि स्वामिन्या रक्षैव सम्पन्नेति भावः। अथवैतस्या एवैतल्लीलाभावनाभूदिति सैवोक्तवतीत्याहु-**र्भावनया** वेति ॥ २२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे नृप ! एका कृष्णवद्वर्तमाना पदा शिरस्याक्रम्य आरुह्य अपरां तां कालियवद्वर्तमानां प्रति 'हे दुष्ट अहे ! गच्छ इतो ह्रदात् अपसर' इत्याहेत्यन्वयः। ननु 'त्वद्भयात् कुतो गच्छेयम् ?' तत्राह—जात इति। ननु निश्चयेन खलानां परोद्वेजकानां दण्डधृक् दण्डार्थमेवाहं जातोऽस्मि। तथा च मदाज्ञोल्लङ्घनेनात्र स्थितौ खलत्वात्त्वं मया दण्डितो भविष्यसीत्याशयः ॥ २१ ॥ तत्र गोपीषु मध्ये एका कृष्णवद्वर्तमाना गोपवद्वर्तमानाः प्रति 'हे गोपाः ! उल्बणं भयङ्करं दावाग्निं पश्यत' आशु चक्षूंषि अपिदध्वं निमीलयत, वो युष्माकं क्षेमं निर्भयत्वमहमञ्जसा अनायासेनैव विधास्ये करिष्यामि' इत्युवाचेत्यन्वयः ॥ २२ ॥ तत्र गोपीषु काचित् तन्वी कोमलाङ्गी कृष्णवद्वर्तमाना अन्यया यशोदावद्वर्तमानया स्रजा मालया नवनीतचौर्यनिमित्तेन बद्धा, अत एव भीता, सुदृक् शोभने दृशौ नेत्रे यस्मिंस्तन् आस्यं मुखं पिधाय हस्ताभ्यामाच्छाद्य भीतिविडम्बनं भयानुकरणं भेजे चकार ॥ २३ ॥ एवं श्रीकृष्णलीलाः कुर्वत्यः पुनश्च वृन्दावनलतास्तरूंश्च कृष्णं पृच्छन्त्यो वनोद्देशे वनप्रदेशे परमात्मनः कृष्णस्य पदानि भूमौ रजसि चिह्नतयोद्बुद्धानि व्यचक्षत अपश्यन् ॥ २४ ॥

अन्वितार्थप्रकाशिका

आरुह्येति ! हे नृप ! एका कृष्णवद्वर्तमाना पदा शिरस्याक्रम्य आरुह्य अपरां तां कालियवद्वर्तमानां प्रति हे दुष्ट अहे सर्प ! गच्छ इतो ह्रदात् अपसर। ननु निश्चयेन खलानां परोद्वेजकानां दण्डधृक् दण्डार्थमेवाहं जातोऽस्मि। धृजेः क्विप् ॥ २१ ॥ तत्रेति ॥ तत्र गोपीषु मध्ये एका कृष्णवद्वर्तमाना गोपवर्तमानाः प्रति हे गोपाः ! उल्बणं भयंकरं दावाग्निं पश्यत। आशु चक्षूंषि अपिदद्ध्वं निमीलयत-धद्ध्वमिति भष्भाववान्साधुः पाठः। दकारवांस्त्वार्षः। वो युष्माकं क्षेमं निर्भयत्वमहमञ्जसा अनायासेनैव विधास्ये करिष्यामीत्युवाच ॥ २२ ॥ बद्धेति ॥ तत्र गोपीषु काचित्तन्वी कोमलाङ्गी कृष्णवर्तमाना अन्यया यशोदावद्वर्तमानया स्रजा मालया नवनीतचौर्यनिमित्तेन बद्धा अत एव भीता सुदृक् शोभने दृशौ नेत्रे यस्मिंस्तत् आस्यं मुखं पिधाय हस्ताभ्यामाच्छाद्य सुदृक् वराक्षीति वा। भीतिविडम्बनं भयानुकरणं भेजे चकार ॥ २३ ॥ एवमिति ॥ एवं श्रीकृष्णलीलाः कुर्वत्यः पुनश्च वृन्दावनलतास्तरूंश्च कृष्णं पृच्छमानाः। शता आर्षः। वनोद्देशे वनप्रदेशे परमात्मनः कृष्णस्य पदानि भूमौ रजसि चिह्नतयोद्बुद्धानि व्यचक्षत अपश्यन् ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दुष्टाहे भोदुष्टस्यर्पयमुनातो गच्छ ॥ २१ ॥ आशुचक्षूंषि अपि दध्वं निमिलयत विधास्ये करोमि ॥ २२ ॥ बद्धेति तत्र तासु मध्ये अन्यया यशोदायमानया कृष्णायमाना काचित्तन्वी गोपी उलूखले उलूखलायमानायां गोप्यांस्रजा पुष्पमालयाबद्धासुदृक् सुनेत्रं आस्यं पिधायबालवद्भीता सतीभीतिविडंबनं कंपरोदनादि भयानुकरणं भेजे यद्वा सुदृक् सुंदर नेत्रा एव मन्यलीलानुकरणमपिवितर्क्यं ॥ २३ ॥ उक्तरित्यात्तत्तल्लीलागानानु करणानि कुर्वत्योमध्येमध्ये लतास्तरूपश्नं पृछत्योवन प्रदेशे पदान्यश्यन् ॥२४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आरुह्येति ॥ हे नृप, एका कृष्णायन्ती काचित् , अपरां कालियायन्तीं काञ्चित् आरुह्य, शिरसि पदा आक्रम्य, आह। हे दुष्टाहे दुष्टसर्प, कृष्णाहे इत्यपि पाठः। गच्छेता ह्रदादपसर। हे अहे, अहं खलानां दण्डधृक् दण्डयिता, जातः अवतीर्णः ननु ॥ २१ ॥ तत्रेति ॥ तथा तत्र तासां गोपीना मध्ये, एका काचिद्गोपी, हे गोपाः, उल्बणं दुःसहं, प्रभूतं वा, दावाग्निं दावानलं, पश्यत चक्षूंषि अपिदध्वं निमीलयत। वो युष्याक, आशु क्षेमं, अञ्जसा सुखेन, विधास्ये करिष्यामि इति, उवाच ॥ २२ ॥ बद्धेति ॥ तत्र तासु मध्ये, अन्यया यशोदायन्त्या कयाचिद्गोप्या, काचित् कृष्णायन्ती तन्वी, उलूखले स्रजा पुष्पमालया, बद्धा भीता सती, सुदृक् शोभने दृशौ यस्मिंस्तथाविध आस्यं पिधाय हस्ताभ्यामाच्छाद्य, भीतिविडम्बनं भायनुकरणं, भेजे, चकार। कस्याश्चित्पूतनायन्त्या इत्यारभ्य बद्धान्यया स्रजेत्यन्ता नव श्लोका विजयध्वजेन परित्यक्तास्तत्कारणाप्रदर्शनात्तस्य तत् साहसमेव प्रतिभाति ॥ २३ ॥ एवमिति ॥ एवमित्थं, कृष्णानुकरणं विधाय पुनरपीति शेषः। वृन्दावनलताः तरून् वृन्दावनसंबन्धिनीर्लतास्तरूंश्चेत्यर्थः। कृष्णं पृच्छमानाः गोप्यः, वनोद्देशे वनप्रदेशे, परमात्मनः श्रीकृष्णस्य, पदानि पादाङ्कनानि, 'पदं शब्दे च वाक्ये च व्यवसायप्रदेशयोः। पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनाः' इति मेदिनी। व्यचक्षतापश्यन ॥ २४ ॥

श्रीहरिसूरिविरचित श्रीभक्तिरसायनम्

एवं कृष्णमिति : १०.३०.२४.

प्राग्वासना बलवती न च याऽस्तमाप नमृलमन्यांवावधाल्लासतात्मवादैः
स्पष्टं रमेशपदशोधनजाततृष्णा आसन पुनयद्बलात्तत्कृष्णरूपाः ॥ १८९ ॥

अयि विचित्रतरप्रसरः शरन्नवनवाभ्युदयो मदनोदये। यदिह भान्ति रजोरसराजिताः सुमनसो विमदोत्सवदा अपि ॥ १९० ॥
सामोदमागमपुषं स्वपुरो वसन्तं कान्तं नितान्तसुमनोभवपल्लवाग्र्यम्।
द्रक्ष्याम्यहं सखि लताधिकशोभमानं त्वं माधवं लषसि किं न हि माधवं तम् ॥ १९१ ॥
नेपल्लतापि किल यान् भजतेऽधुना तैः किं पल्लवैरसि विमोहयितुं प्रवृत्तः।
अस्मद्विमोहकुशलः स हि पल्लवाग्र्यो योऽस्मिन् भवेद् बहुलतोत्सववृद्धिकारी ॥ १९२ ॥
अपर्णो विप्रवासो यः स सुखी प्रभुभक्तिभृत्। विभाति तादृगेवासौ तद् गच्छ सखि तत्पुरः ॥ १९३ ॥
आगच्छताशु सख्योऽयं सुपर्णो भात्यदूरगः। प्रायस्तत्र भवेच्छ्रीशो नो चेत्पृच्छामः तत्स्थितिम् ॥ १९४ ॥
योऽपारिभद्रस्तत एव भूयाद् रिपोरनिष्टं सुहृदः समिष्टम्।
अयं तथा नेति किमस्य पार्श्वं गतेन सख्योऽग्रत एव यात ॥ १९५ ॥
लतैकरसिकः सखा सखि भवेल्लतोपान्तिके तदेहि न हि वा भवेदिह स पुष्पणी सास्ति यत्।
अलं वितथशङ्कया सखि ततो भवेदेव स सदागमनमञ्जुला भवति पाल्लवी यत्स्थितिः ॥ १९६ ॥
लावण्यमेव सखि तादृशमैन्दिरेशं यद्वीक्षणं मनसिजादयकारि भूरि।
नास्मासु चित्रमिह बाललतास्वमृषु पुष्पोदयोऽजनि यतः कलिताज्ज्वलश्रीः ॥ १९७ ॥
यस्मान्निखिललतासु त्वमेव सर्वानुभूतिरसि लतिके। तन्नो विरहजदुःखं सत्यं वेत्सीति कथय विभुपदवीम् ॥ १९८ ॥
अयि श्यामे त्वमप्यत्र गोपीशब्दावलम्बिनी। कुतो जातासि यद्योगात् प्रियस्याप्रियतां गता ॥ १९९ ॥
एकसुतप्रसवा स्त्री सुन्दर्यपि गलितयौवना भवति। सखि बहुसुता यदेषा म्लानमुखी भाति तत्तिरस्कारात् ॥ २०० ॥
यद्गर्भसंस्कारवशाद् विलग्नं काठिन्यमद्याप्युपलभ्यतेऽस्मिन्।
तन्नामभाजस्तव रेणुकायाः सिद्धं कठोरत्वमिति व्रजामः ॥ २०१ ॥
रे वक्रतां त्यज ऋजुभव मागे गर्वं नाखर्वमावह यदस्मि स कृष्णसारः।
दीनानुकम्पिनि हरावुदिते सुलक्ष्यो भूयो भविष्यसि ततो भविता हितं ते ॥ २०२ ॥
पश्याद्भुतां स्थितिममुष्य हि वर्त्मनस्त्वमापातदृक्कवलितं यदि सेन्दुकान्तम्।
तद्भिन्नदृष्टिकलितं तु स कृष्णवर्त्मेत्येतद्विभाति सखि संश्रितकृष्णपादम् ॥ २०३ ॥
सदागमदृशां यावद्वस्तुध्याताच्युतात्मनाम्। न दुर्लभं सतामस्मिन् श्रीशपादाब्जदर्शनम् ॥ २०४ ॥
सन्मार्गोऽसावमार्गोऽसावित्यलं प्राग्व्यवस्थया। यस्य श्रीशपदप्राप्तिस्तमेव बहु मन्महे ॥ २०५ ॥
क्षमं सखि स पावकोऽयमपि कृष्णवर्त्माभिधः प्रकाशयति यत्सुदृग्जनदृशां निरीक्ष्यं पदम्।
तमोऽपहतिमातनोत्यपि परं स तापप्रदः सदा भवति सङ्गमे पुनरयं त्वलं शीतलः ॥ २०६ ॥

कृष्णप्रिया

अब सात्विका गोपिका की गाथा गाते श्रीशुकाचार्य जी कहने लगे कि राजन् ? एक गोपी कालीय लीला का नाटन करती हुई किसी दूसरी गोपी के शिरपर आरूढ होकर और पैर से मस्तक को दबाकर कहने लगी कि हे दुष्ट कालीय यहाँ से निकल जा, और तू जान ले कि दुष्टों को दमन करने वाला मैं प्रकट हो गया हूँ ॥ २१ ॥ अब दावाग्नि मान लीला अभिनाटन करने वाली कृष्णस्वरूपा गोपी ने कहा कि हे गोपवृन्द ! अत्यन्त उग्र इस दावानल को देखा, और शीघ्रता से अपने नयनों को मुन लो, चिंता मत करो, मैं शीघ्रता से तुम्हारा रक्षण करूँगा ॥ २२ ॥ अब तामसी गोपी ने की हुई दामोदर लीला का निरूपण करते हुए श्रीशुकाचार्य कहने लगे कि राजन् ! यह लीला गोपीजनों की अन्तिम लीला है। लीलाक्रम में यद्यपि यह प्रारम्भ की लीला है लेकिन भगवान की भक्तवश्यता इस लीला में निरूपित की गई है। इस लीला का अनुकरण करने के पश्चात् सर्व गोपिकाओं जो लीलावेश हुआ था वह यहाँ बन्द हो गया, इस दामोदर लीला में एक गोपी यशोदा रूप बनी, दूसरी ने उखल का रूप धारण किया और तीसरी कृष्णरूप बन गई जो कृष्णरूप बनी थी वह तो तन्वी-पतली कटिवाली गोपी थी उसको दूसरी गोपी ने पुष्पमाला से उखल से बांध दिया, तब सुन्दरवदना वह गोपी भयभीत बनकर अपने मुख को ढकने लगी, जिससे पता लगा कि यह सम्पूर्ण भयभीत बन गई है ॥ २३ ॥ इस प्रकार श्री वृन्दावन की लताओं को और तरुवरों का भगवान श्रीकृष्ण के सम्बन्ध में प्रश्न पूछती पूछती आगे निकल पड़ी, तब गोपीवृन्द ने व्रज में प्यारे श्रीकृष्णजी के चरणों का दर्शन किया ॥ २४ ॥

पदानि व्यक्तमेतानि नन्दसूनोर्महात्मनः। लक्ष्यन्ते हि[1] ध्वजाम्भोज चक्राङ्कुशयवादिभिः[2] ॥ २५ ॥
तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः। वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् ॥ २६ ॥

---

१. यदाभोजध्वजवज्रांकुशादिभिः—इति कस्यांचित। २. वज्रा—श्रीधर. वशो. जीव. वीर. विज. विश्व. रा. ध. शु. सु.।
१. लतादिभिः—वीर. विज।

कर्दमक्षमा

अन्वयः—व्यक्तम्, एतानि, पदानि, ध्वज, अम्भोज, वज्र, अङ्कुश, गदादिभिः, महात्मनः नन्दसूनोः हि लक्ष्यन्ते॥२५॥ तैः, तैः, पदैः, तत्, पदवीम्, अन्विच्छन्त्यः, (ताः) अबलाः, अग्रतः, वध्वाः, पदैः, सुपृक्तानि, विलोक्य, आर्ताः, समब्रुवन्॥२६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सुपृक्तानि संमिश्राणि ॥ २५–२६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

व्यक्तम् स्फुटम्। परमात्मनः श्रीकृष्णस्य वैतानीति कथं ज्ञातं, तत्राह—ध्वजे तावत्पर्यन्तं श्रीकृष्णेनैवांके निधाय तस्या नयनात्॥ तदेवं त्रिविधमुन्मादं निर्वर्ण्य तदन्तरैवाकस्मात्कृष्य पदचिह्नान्यालक्ष्य सानन्दवितर्कमाहुः—पदानीति। ध्वजादीनां धारणस्थानं प्रयोजनं चोक्तं स्कान्दे—"दक्षिणस्य पदांगुष्ठमूले चक्रं बिभर्त्यजः॥ तत्र भक्तजनस्यारिषड्वर्गच्छेदनाय सः (१)॥ मध्यांगुलिमूले च धत्ते कमलमच्युतः॥ ध्यातृचित्तद्विरेफाणां लोभनायातिशोभनम्॥ (२)॥ पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम्॥ कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् (३)॥ पार्ष्णिमध्येकुशं भक्तचित्तेभवशकारिणम्॥ भोगसंपन्मयं धत्ते यवमंगुष्ठपर्वणि (४) वज्रं वै दक्षिणे पार्श्वे अंकुशो वै तदग्रतः॥' इति तत्रैव स्कान्दे कृष्णमधिकृत्योक्तत्वात्कनिष्ठामूलेंकुशस्तत्तले वज्रमित्याहुः संप्रदायविदः। पार्ष्णावंकुशस्तु नारायणादेर्ज्ञेयः। तदेवं चक्रध्वजकमलवज्रांकुशयवा इति षट् ६ चिह्नानि कृष्णस्य दक्षिणे चरणे। अन्यान्यपि चिह्नानि वैष्णवतोषिणीदृष्ट्या लिख्यन्ते–अंगुष्ठतर्जनीसंधिमारभ्य यावदर्द्धचरणमूर्द्ध्वरेखा ७, चक्रस्य तले छत्रम् ८, अर्धचरणतले चतुर्दिगवस्थितं स्वस्तिकचतुष्टयम् ९, स्वस्तिकचतुःसंधिषु जम्बूफलचतुष्टयम् १०, स्वस्तिकमध्येऽष्टकोणमित्येकादश ११ चिह्नानि। "तथा वामपदांगुष्ठमूलतस्तन्मुखं दरम्। सर्वविद्याप्रकाशाय दधाति भगवानसौ॥" इति १, मध्यमामूलेम्बरम् अन्तर्बाह्यमण्डलद्वयात्मकम् २, तदधः कामुकं विगतज्यम् ३, तदधो गोष्पदम् ४, तत्तले त्रिकोण तदभितः कलशानां चतुष्टयम्; क्वचित्त्रितयं च दृष्टम् ५, त्रिकोणतलेर्द्धचन्द्रः ६, अग्रद्वयस्पृष्टत्रिकोणद्वयम् ७, तदधो मत्स्यः ८, इत्यष्टौ मिलित्वोनविंशतिः॥ २५॥ सर्वासां वाक्यम्—तैस्तैरिति। ध्वजाद्युपेतैरित्यर्थः। तस्य कृष्णस्य। पदवीं मार्गम्। अन्विच्छन्त्याऽन्वेषयन्त्यः। वध्वा नार्याः। पदैः चरणनिक्षेपैः। ईर्ष्ययार्ताः॥ सुपृक्तानि मिश्रितानि॥ २६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्चान्योऽन्यमाहुः पदानि इति। पदचिह्नानि व्यक्तं स्फुटमेवतानि नन्दसूनोः पदानि लक्ष्यन्ते। कैर्ध्वजादिभिः हि प्रसिद्धो ध्वजादीनि तत्र प्रसिद्धान्येवेत्यर्थः। ध्वजादियोगे हेतुः महात्मनः परमपुरुषोत्तमस्येत्यर्थः। आदिशब्दादन्यान्यपि तत्र पाद्मे ब्रह्मनारदसम्वादे श्रीकृष्णमधिकृत्य "षोडशैव तु चिह्नानि मया दृष्टानि तत् पदे। दक्षिणे चाष्ट चिह्नानि इतरे सप्त एव च। स्वस्तिकं चोर्ध्वरेखा च अष्टकोणं तथैव च। सप्तान्यानि प्रवक्ष्यामि साम्प्रतं वैष्णवोत्तम!। इन्द्रचापं त्रिकोणञ्च कलशं चार्द्धचन्द्रकम्। अम्बरं मत्स्यचिह्नञ्च गोष्पदं सप्तमं स्मृतम् षोडशञ्च तथा चिह्नं शृणु देवर्षिसत्तम!। जम्बूफलसमाकारं दृश्यते यत्र कुत्रचिदिति। क्रमदीपिकायाम्। मत्स्यांकुशारिदरकेतुयवाब्जबद्धैरिति। श्रीगोपालतापिन्याम्। शङ्खध्वजातपत्रैस्तु चिह्नितं चरणद्वयमिति आदिवाराहे मथुरामण्डलमाहात्म्ये। यत्र कृष्णेन सञ्चीर्णं क्रीडितं च यथासुखम्। चक्राङ्कितपदा तेन स्थाने ब्रह्ममयेऽगुणे इति। एवं चक्रशङ्खातपत्रैरधिकैरूनविंशतिश्चिह्नानि। स्कान्दे तु यच्चक्रादिषट्कमात्रमुक्तं तत्तु श्रीविष्णादावेव। यत उक्ते षोडशचिह्नप्रसङ्ग एव पाद्मे। अङ्कान्येतानि भो विद्वन्! दृश्यन्ते तु यदा कदा। कृष्णाख्यन्ते परं ब्रह्म भुवि जातं न संशयः। द्वयं वाथ त्रयं वाथ चत्वारि पञ्च चैव च। दृश्यन्ते वैष्णवश्रेष्ठ! अवतारे कथञ्चनेति। तेषां स्थाननियमो यथा तत्रवामध्ये ध्वजातु विज्ञेया पद्मं त्र्यङ्गुलमानतः। वज्रं वै दक्षिणेपार्श्वे अङ्कुशो वं तदग्रतः। यवो ऽप्यङ्गुष्ठसूले स्यात् स्वस्तिकं यत्र कुत्रचित्। आदि चरणमारभ्य यावद्वै मध्यमा स्थिता। तावद्वै चोर्ध्वरेखा च कथिता पाद्मसंज्ञके। अष्टकोणन्तु भो वत्स मानञ्चाष्टाङ्गुलैश्च तत्। निर्दिष्टं दक्षिणे पादे इत्याहुर्मुनयः किल। दक्षिणेतरस्थानानि सम्वदामीह साम्प्रतम्। चतुरङ्गुलमानेन त्वङ्गुलीनां समीपतः। इन्द्रचापं ततो विद्यादन्यत्र न भवेत् क्वचित्। त्रिकोणं मध्यनिर्दिष्टं कलशो यत्र कुत्रचित्। अष्टाङ्गुलप्रमाणेन तद्भवेदर्द्धचन्द्रकम्। विन्दुर्वै मत्स्यचिह्नञ्च आद्यन्ते वै निरूपितम्। गोष्पदं द्विखुरं ज्ञेयमाद्याद्यङ्गुलिमानतः। इत्येतल्लक्षणं तत्रैव पद्माकारा ध्वजा प्रोक्ता प्रान्ते त्रैकोणिकानघेत्यादि। व्याख्यायते च त्र्यङ्गुलमानतः। मध्यमाङ्गुल्यग्रात् तावन्मानं परित्यज्येत्यर्थः। वक्ष्यमाणयुक्तेः। पद्मस्याधो ध्वजं धत्ते इति स्कान्दसम्वादाच्च। यत्र कुत्रचिदिति यथाशोभं बहुत्रेत्यर्थः। आदिं चरणम् अङ्गुष्ठतर्ज्जन्योरन्तरालं यावन्मध्यं मध्यदेशं तावद्व्याप्य स्थिता तत्तस्याष्टकोणस्य मानमष्टाङ्गुलैर्ज्ञेयम् अग्रतोऽष्टाङ्गुलीः परित्यज्येत्यर्थः। स्वरूपमाने स्थानासमावेशः सच चरणस्य दैर्घ्यं चतुर्दशाङ्गुलप्रमाणत्वं विस्तरो षडङ्गुलिप्रमाणत्वमिति हयशीर्षमत्स्यादिप्रसिद्धत्वात् एतदनुसारेण त्र्यङ्गुलमानत इत्यपि व्याख्यातं व्याख्यास्यते चान्यत्र इन्द्रचापत्वं निर्गुणत्वात्तादृशवर्णमयत्वाच्च चतुरङ्गुलमानेनेति तावन्मानपरित्यागत उक्तं मध्यमाङ्गुल्यधः स्थितत्वात तथा दैर्घ्येतोऽपि ज्ञेये शोभापयोगात मध्य-

निर्दिष्टं चरणमध्ये स्थितम् अष्टाङ्गुलप्रमाणेन त्रिकोणस्याध इत्यर्थः। तत्कोटिद्वयस्य किञ्चित्त्रिकोणग्रासित्वान् विन्दुरम्बर-पर्य्यायः अयं च बाह्याभ्यन्तरमण्डलद्वयात्मकः द्विरेखासु समन्वितमिति तत्रैव तल्लक्षणोक्तेः सर्वचिह्नानामुपरि विन्दुः मत्स्यः सर्वचिह्नानामधः द्विखुरं द्विशफम् आद्याद्विन्दोद्वय गुलमानत इति इन्द्रचापादध इत्यर्थः पद्माकारावर्त्मतुलया प्रान्ते त्रैकोणिकं पताकास्थानीयं यस्यां सा सप्तम्या अलुक् एतच्च त्रैकोणिकं दक्षिणत एव ज्ञेयं वामत ऊर्ध्वरेखोपहतेः षोडशं चिह्नं पादद्वय एव ज्ञेयम् अनियमेनोक्तत्वात् जम्बूफलसमतया निर्देशेन तद्वर्णतदाकारमयमेव तच्चिह्नं नतु रेखाकारं चक्रशङ्खौ तु—

दक्षिणस्य पदोऽङ्गुष्ठमूले चक्रं विभर्त्यजः। तथा वामपदाङ्गुष्ठमूलतस्तन्मुखं दरमिति ॥

स्कान्दानुसारेणैव ज्ञेयौ छत्रं तु प्राधान्याद्दक्षिणचरण एव तत्रापि चिह्नान्तरशून्यप्रदेशत्वाच्चक्राध एव ज्ञेयं तासां तद्दर्शन-प्रकारश्चायं श्रीविष्णुपुराणे—

विलोक्यैका भुवं प्राह गोपीगोंपवराङ्गना। पुळकाञ्चितसर्वाङ्गी विकासिनयनोत्पला ॥
ध्वजवज्रांकुशाब्जाङ्करेखावन्त्यालि पश्यत। पदान्येतानि कृष्णस्य लीलालंकृतगामिनः ॥ इति ॥ २५ ॥

तैस्तैर्ध्वजादिशाभितैः वीप्सा मध्ये मध्ये दूर्वामय्यादि भूमौ विच्छिन्नत्वात् स्थानबाहुल्यस्य विवक्षया। अग्रत इति तावत् पर्य्यन्तं कृष्णेनैवाङ्के निधाय तस्यानयनात्। अवला विरहान्वेषणाभ्यां वळहीना अपि तस्य कृष्णस्य पदवीं वर्त्म अन्विच्छन्त्यः मृगयमाणाः। वध्वा श्रीराधायास्तस्या एव परमसौभाग्यवतीत्वेन स्थापयिष्यमाणत्वात् ॥ २६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्चान्योऽन्यमाहुः पदानीति। पदचिह्नानि व्यक्तं निश्चितम् एतानि नन्दसूनोरेव भवन्ति नान्यस्य हि यत ध्वजादिभि-र्विलक्ष्यन्ते तत्रैव हेतुमाहुः। महात्मनः महापुरुषत्वादित्यर्थः आदिशब्दाच्चक्रशङ्खादयः अत्र विशेषः श्रीविष्णुपुराणे—

विलोक्यैका भुवं प्राह गोपीगोपवराङ्गना पुलकाञ्चितसर्वाङ्गी विकासिनयनोत्पला ॥
ध्वजवज्राङ्कुशाब्जाङ्करेखावन्त्यालि! पश्यत। पदान्येतानि कृष्णस्य लीलालंकृतगामिन इति ॥

ध्वजादीनां धारणप्रयोजनमुक्त स्कान्दे—

'दक्षिणस्य पदोऽङ्गुष्ठमूले चक्रं विभर्त्त्यजः। तत्र नम्रजनस्योग्रसंसारच्छेदनाय सः ॥
मध्यमाङ्गुलीमूले तु धत्ते कमलमच्युतः। ध्यातृचित्तद्विरेफाणां लोभनायातिशोभनम् ॥
पद्मस्याधो ध्वजं धत्ते सर्व्वानर्थजयध्वजम्। कनिष्ठामूलतो वज्रं भक्तपापाद्रि-भेदनम् ॥
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तभवशकारिणम् भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्व्वणि ॥
तथा वामपदाङ्गुष्ठमूलतस्तन्मुखं दरम्।
सर्व्वविद्याप्रकाशाय दधाति भगवानसौ। पद्मादीन्यपि चिह्नानि तत्र दक्षिणपादवत् ॥' इति ॥ २५ ॥

तैस्तैर्ध्वजादिलक्षितैः, वीप्सा बाहुल्यस्य कैवल्यस्य वा विवक्षया; अबलाः—विरहान्वेषणाभ्यां बलहीना अपि तस्य कृष्णस्य पदवीं वर्त्म अग्रतोऽन्विच्छन्त्यो मृगयमाणाः, अग्रतो विलोकयेति वा, बध्वाः कस्याश्चिद् गोप्याः, यद्वा, स्वभावत एव लज्जाशीलत्वात् स्नुषावत् सर्व्वतः संकोचितत्वेन, किंवा श्रीयशोदाया मनोरथविशेषेण वधुरिति कदाचित् तन्मुखोद्गत्या गोकुले वधुत्वेन प्रसिद्धायाः श्रीराधाया एव तन्नामाग्रहणकारणं लिखितमेव, वधुपदलक्षणमुक्तं श्रीविष्णुपुराणे (५।१३।३२)-कापि तेन समं याता कृतपुण्या मदालसा। पदानि तस्याश्चैतानि धनान्यल्पतनूनि च ॥' इति। सुष्ठु पृक्तानि मिलितानि पदानि, अंसन्यस्त-प्रकोष्ठत्वात्, एवमात्मारामत्वादिना तासां यानतोऽसूयया वान्तर्हित इति निरस्तम्, तासामेकस्या नयनात्। तच्च तत्रैव ताभिः सह स्थितया तया केनापि संकेतेन ततो निःसारितया तदर्थं दूरे प्रादुर्भूतस्याग्रे कियत्पदप्रयाणानन्तरं मिलनादित्यूह्यम्। आर्त्ताः स्व-परित्यागेन तदेकपरिग्रहात्, यद्वा, विरहेणार्त्ता अपि सम्यग्विचारादि पूर्व्वकमब्रुवन्, अन्योऽन्यमुचुः ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा दृष्टभगपत्पदानां तासामुक्तिमाह। पदानीति। इमानि महात्मनो नन्दसूनोः पदानि व्यक्तं नूनं कुतः हि यस्मात् ध्वजादिभिः रेखात्मकैर्लक्ष्यन्ते इति ॥ २५ ॥ ततस्तैस्तैर्ध्वजादिचिह्नितैः पदैस्तस्य कृष्णस्य पदवीं पुरःपुरोऽन्विच्छन्त्यः अन्वेषयन्त्यः अवला गोप्यस्तदा कस्याश्चिद्वध्वाः पदैः सुपृक्तानि अन्तरान्तरा युक्तानि भगवतः पदानि विलोक्यार्ता दुःखिता ऊचुः ॥ २६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

परमात्मचरणाकृतित्वं कथमवगम्यत इति तल्लक्षणमुच्यते पदानीति। लता कल्पलता आदिशब्देन चक्रादिकं गृह्यते यवादीत्यपि पाठः ॥ २५ ॥ अन्विच्छन्त्यः अन्वेषणं कुर्वन्त्यः वध्वाः कस्याश्चिद्गोपस्त्रियः पदैश्चरणैर्निक्षिप्तैः सुपृक्तानि अन्तराले मिश्रितानि ईर्षयार्ताः समब्रवन सलापमकुर्वन ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदेवं त्रिविधमुन्मादं निवर्ण्य तदन्तरेवाकस्मात्कृष्णस्य पदचिह्नान्यालक्ष्य सानन्दवितर्कमाहुः। पदानीति ध्वजादीनां धारणस्थानं प्रयोजनं चोक्तं स्कान्दे—

दक्षिणस्य पदाङ्गुष्ठमूले चक्रं बिभर्त्यजः। तत्र भक्तजनस्यारिषड्वर्गच्छेदनाय सः॥
मध्यमाङ्गुळिमूले च धत्ते कमलमच्युतः। ध्यातृचित्तद्विरेफाणां ळोभनायातिशोभनम्॥
पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम्। कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम्॥
पार्ष्णिमध्येऽकुशं भक्तचित्तेभवशकारिणम्। भोगसंपन्मयं धत्ते यवमङ्गुष्ठपर्वणीति॥
वज्रं वै दक्षिणे पार्श्वे अंकुशो वै तदग्रत इति॥

तत्रैव स्कान्दे कृष्णमधिकृत्योक्तत्वात् कनिष्ठामूलेऽङ्कुशस्तळे वज्रमित्याहुः साम्प्रदायिकाः पार्ष्णावङ्कुशस्तु नारायणादेर्ज्ञेयः तदेवं चक्रध्वजकमलवज्रांकुशयवा इति षट्चिह्नानि कृष्णस्य दक्षिणे चरणेऽन्यान्यपि चिह्नानि वैष्णवतोषणीदृष्ट्या लिख्यन्ते अंगुष्ठतर्जनीसन्धिमारभ्य यावदर्द्धचरणमूर्ध्वरेखा ७ चक्रस्य तले छत्रम् ८ अर्द्धचरणतले चतुर्दिगवस्थितं स्वस्तिकचतुष्टयं स्वस्तिकचतुःसन्धिषु जम्बूफलचतुष्टयं १० स्वस्तिकमध्ये अष्टकोणमित्येवमेकादशचिह्नानि ११ तथा वामपदांगुष्ठमूलतस्तन्मुखं दरं सर्वविद्याप्रकाशाय दधाति भगवानसाविति १ मध्यमामूलेऽम्बरमन्तर्बाह्यमण्डलद्वयात्मकं तदधः कार्मुकं विगतज्यं ६ तदधो गोष्पदं ४ तत्तले त्रिकोणं ५ तदभितः कलशानां चतुष्टयं क्वचित्त्रितयं च दृष्टं ६ त्रिकोणतलेऽर्द्धचन्द्रोऽग्रद्वयस्पृष्टत्रिकोणकोणद्वयं ७ तदधो मत्स्य इत्यष्टौ मिलित्वा ऊनविंशतिः॥ २५॥ सुपृक्तानि मिश्रितानि॥ २६॥

रसिकाह्लादिनी–टीका

पूर्वमन्योन्यं निर्णतुं कथयति-पदानीति, नन्दसूनोरेतानि पदानि नान्यस्येति, व्यक्तं निश्चितं तत्र लिङ्गमाहुः। ध्वजाम्भोजवज्रांकुशयवादिभिरुपलक्षितानि आदि शब्दादन्यान्यपि षोडश चिह्नानि सन्ति। तदुक्तं नारदं प्रति ब्रह्मणो वाक्यं—"यैरेव ज्ञायते देवो, भगवान् भक्तवत्सलः। तान्यहं वेद नान्योक्ति सत्यमेतन्मयोदितम्। षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे। दक्षिणे चाष्ट चिह्नानि इतरे सप्त चैवहि। ध्वजा पद्मं तथा वज्रमंकुशो यव एव च। स्वस्तिकं चोर्द्ध्वरेखा च अष्टकोणं तथैव च। सप्तान्यानि प्रवक्ष्यामि साम्प्रतं वैष्णवोत्तमः। इन्द्रचापं त्रिकोणं च कलशं चार्द्ध चन्द्रकम्। अम्बरं मत्स्यचिह्नं च गोष्पदं सप्तमं स्मृतम्। अङ्कान्येतानि भो विद्वन् दृश्यन्तेतु यदा कदा। षोडशं च तथा चिह्नं शृणु देवर्षि सत्तमः। जम्बूफलसमाकारं दृश्यते यत्र कुत्रचित्। कृष्णाख्यं तु परंब्रह्म भुवि जातं न संशयः। तच्चिह्नं षोडशं प्रोक्तमित्याहुर्मुनयोऽनघा" इति। "द्वयं चाथ त्रयं चाथ चत्वारि पञ्च चैव हि। दृश्यन्ते वैष्णवश्रेष्ठ अवतारे कथञ्चनेति"। तथोक्तं धारणहेतुत्वं स्कान्दे—"दक्षिणस्य पदाङ्गुष्ठमूले चक्रं बिभर्त्यजः। तत्र नम्रजनस्यारि-षड्वर्गच्छेदनाय सः। मध्यमांगुलिमूलेतु धत्ते कमलमच्युतः। ध्यातुर्चित्तद्विरेफाणां लोभनायातिशोभनम्। पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम्। कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम्। पार्ष्णिमध्येऽङ्गुशं भक्तचित्तेभवशकारिणम्। भोगसम्पन्मयं धत्ते यवमंङ्गुष्टपर्वणी। तथा वामपदांगुष्ठमूलतस्तन्मुखं परम्। सर्वविद्याप्रकाशाय दधाति भगवानऽसौ" "पदादीन्यपि चिह्नानि तत्र दक्षिणपादवत्" अन्यान्याप्येवमूह्यानि॥ २५॥ एवमसाधारणैश्चिह्नैः श्रीकृष्णस्यैतानि पदानीति निश्चित्य तन्मार्गेणाऽन्यतो गता इत्याह। तैस्तैरिति ध्वजादीनां क्षितौ पुनर्पुनःयद्दर्शने पदैश्चरणचिह्नै रन्विछन्त्यो मृग्यमाणा कृष्णेनोपेक्षिताः अबला अन्तर्ध्यानेन गर्वस्यापहृतत्वात्। अग्रतः कस्मिंश्चित् प्रदेशे कस्याश्चिद्वध्वा व्रजदेव्याः पदैः समदेशस्थितैः सुपृक्तानि विलोक्यार्ताः परस्परं समब्रुवन् कथितवत्यः। 'यद्यपि मुनीन्द्रेण तन्नाम ज्ञायते तथापि सभायां श्रीकृष्णप्रियाणां नामोक्तिरसाम्प्रतमिति नोक्तम्। पूर्वं विरहविह्विलितत्वात्। आर्तिसम्वलिता एव मृग्यमाणास्ततोप्यार्तिभरोदयहेतुर्वधूपदसंयुक्तपददर्शनमभूदिति। अत एव तासामग्रतोऽन्वेषणं प्रतिबन्धोऽपीर्ष्यावशादेव जातः इत्यर्थः। स्वपरित्यागपूर्वकतत्परिग्रहादेवेर्ष्योदयः इति॥२६॥

विशुद्धरसदीपिका

दृष्ट्वा च परस्परमूचुः। पदानीति। व्याख्यातं व्यक्तं निश्चितं नन्दसूनोरिति गुरुनामोक्त्या सख्यं सूचितं महात्मनः सर्वसल्लक्षणयुक्तस्य परमधीरस्य वा हि यतः ध्वजादिभिर्लक्ष्यन्ते आदिपदादन्यैरपि तान्युक्तानि पाद्मे "षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे। दक्षिणेचाष्टचिह्नानि इतरे सप्त एव च। ध्वजा पद्मं तथा वज्रमङ्कुशो यव एव च। स्वास्तिक चोर्ध्वरेखा च अष्टकोणं तथैव च। इन्द्रचापं त्रिकोणञ्च कलशं चार्द्धचन्द्रकम्। अम्बरं मत्स्यचिह्नञ्च गोष्पदं सप्तमं स्मृतम्। षोडशन्तु तथा चिह्नं शृणु देवर्षिसत्तम! जम्बूफलसमाकारं दृश्यते यत्र कुत्रचित् इति। "क्रमदीपिकायाञ्च मत्स्यांकुशारिदरकेतुयवाब्जवज्रैरिति शङ्खः तापनीश्रुतौ शङ्खध्वजातपत्रैरिति छत्रं वराहतन्त्रे चक्राङ्कितपदा तेनेति चक्रमिति त्रीण्यधिकानि ततश्चैकोनविंशतिचिह्नानीति सिद्धम एषां स्वरूपं स्थानानि च वैष्णवताषिण्यां यथा पाद्मे "मध्ये ध्वजा तु विज्ञेया पद्मं त्र्यङ्गुलमानतः। वज्रं वैदक्षिणे

पार्श्वे अंकुशो वै तदग्रतः। यवोऽप्यङ्गुष्ठमूले स्यात्स्वास्तिकं यत्र कुत्रचित्! आदिं चरणमारभ्य यावद्ध मध्यमा स्थिता। तावती चोर्ध्वरेखा स्यात् कथिता पाद्मसंज्ञके अष्टकोणं तु भो वत्स! मानं चाष्टाङ्गुलैश्च तत्। निर्दिष्टं दक्षिणे पादे इत्याहुर्मुनयः किल। दक्षिणेतरस्थानानि सम्वदामीह साम्प्रतं चतुरङ्गुलमानेन स्वङ्गुलीनां समीपतः। इन्द्रचापं ततो विद्यादन्यत्र न भवेत्कचित्। त्रिकोणं मध्ये निर्द्दिष्टं कलशो यत्र कुत्रचित् अष्टाङ्गुलप्रमाणेन तद्भवेदर्द्धचन्द्रकम् विन्दुर्वै मत्स्यचिह्नञ्च आद्यन्ते वै निरूपितम्। गोष्पदं द्विखुरं ज्ञेयमाद्याद्यङ्गुळमानतः। एतल्लक्षणं तत्रैव पद्माकारा ध्वजा प्रोक्ता प्रान्ते त्रैकोणकादनु इति व्याख्यायते च द्व्यङ्गुलमानतः मध्यमाङ्गुल्यग्रात्तावन्मानं परित्यज्येत्यर्थः। वक्ष्यमाणयुक्तेः पद्मस्याधो ध्वजं धत्त इति स्कान्दसम्वादाच्च यत्र कुत्रचिदिति यथाशोभं बहुत्रेत्यर्थः आदिं चरणमङ्गुष्ठतर्जन्योरन्तरालं यावन्मध्यं मध्यदेशं तावद्व्याप्य स्थिता तत्तस्याष्टकोणस्य मानमष्टाङ्गुलैर्ज्ञेयमग्रतोऽष्टाङ्गुलीः परित्यज्येत्यर्थः। स्वरूपमाने स्थानसमावेशः स च चरणस्य दैर्ध्ये चतुर्दशाङ्गुलपरिमाणत्वं विस्तारे षडङ्गुलपरिमाणत्वमिति हयशीर्षमात्स्यादिप्रसिद्धत्वात्। एतदनुसारेण अङ्गुलमानत इत्यपि व्याख्यातं व्याख्यास्यते चान्यत्र इन्द्रचापं निर्गुणत्वात्तादृशवर्णमयत्वाच्च चतुरङ्गुळमानेनेति तावन्मानपरित्यागत इत्युक्तं माध्यमाङ्गुल्यधः स्थितविन्दोरधः स्थितत्वात् तथा दैर्ध्यतोऽपि ज्ञेयं शोभोपयोगात् मध्यनिर्द्दिष्टं चरणमध्ये स्थितम् अष्टाङ्गुलप्रमाणेन त्रिकोणस्यार्ध इत्यर्थः। तत्कोटिद्वयस्यकिंचित् कोणग्रासित्वात् विन्दुरम्बरपर्य्यायः अयञ्च बाह्याभ्यन्तरमण्डलद्वयात्मकः द्विरेखासु समन्वितमिति तत्रैव तल्लक्षणोक्तेः सर्वचिह्नानामुपरि विन्दुः मत्स्यः सर्वचिह्नानामधः द्विखुरं द्विशफमाद्याद्विन्दोद्व्यङ्गुलमानतः। इन्द्रचापादध इत्यर्थः पद्माकारावर्त्त्यतुल्या प्रान्ते त्रैकोणिकं पताकास्थानीयं यस्याः सा सप्तम्या अलुक् एवञ्च त्रैकोणिकं दक्षिणत एव ज्ञेयं वामत ऊर्ध्वरेखोपहतेः षोडश चिह्नं पादद्वय एव ज्ञेयम् अनियमेनोक्तत्वात्तु जम्बूफलसमतया निर्देशेन तद्वर्णन्तदाकारमेव चिह्नं तत् नतु रेखाकारं चक्रशङ्खौ तु दक्षिणपादाङ्गुष्ठमूले चक्रं विभर्त्यजः तथा वामपदाङ्गुष्ठम् लतस्तन्मुखं दरमिति स्कान्दानुसारेणैव ज्ञेयौ छत्रन्तु प्राधान्यात् दक्षिणचरण एव ज्ञेयम् तत्रापि चिह्नान्तरशून्यप्रदेशत्वाच्चक्राध एव ज्ञेयं तासां दर्शनप्रकारश्च श्रीविष्णुपुराणे–

विलोक्यैका भुवं प्राह गोपोर्गोपवराङ्गना। पुलकाञ्चितसर्वाङ्गी विकाशिनयनोत्पला॥
ध्वजवज्रांकुशाब्जाङ्करेखावन्त्यालि पश्यत। पदान्येतानि कृष्णस्य लीलालंकृतगामिन इति॥

एवञ्चोनविंशतिषु कतिचिदेव यत्र तत्र संगृहीतानि इति तेषामसाधारणं प्रयोजनं प्रकृतोपयोगि यथा ध्वजस्य रूपगुणादिभिरनन्ताद्यनेकसंन्नायकवृन्दविजेतृत्वं वज्रस्य वैरिविदारणम् अंकुशस्य सर्ववशीकारित्वम् अम्भोजस्य रमास्पदत्वं यवस्याखिलवृत्तिप्रदत्वमिति यथा योगमन्येषामप्यूह्यम्॥ २५॥ ततश्च तैस्तैर्ध्वजादिशोभितैः वीप्सा मध्ये मध्ये दूर्वादिमय्यां भूमौ विच्छिन्नत्वात् एता विपक्षाः आर्त्ता इत्युक्तेः अत एवाबलाः शुद्धप्रेमाख्येन मदीयताभिमानेन बलेन हीनाः यद्वा अवलीयन्ते इत्यबलाः अधीरत्वादप्रसरत्वादवाङ्मुखीभूता इत्यर्थः। यद्वा अग्रत इति वध्वा इत्ययेन योष्यम् अग्रतो वर्त्तमानाया वध्वा इत्यर्थः। ततश्च तावत्पर्यन्तं श्रीकृष्णेनैवाङ्कं निधाय नयनात् स्त्रीत्वज्ञानञ्च तत्पादानां श्रीकृष्णचरणापेक्षया द्व्यङ्गुलोनेत्वन लघुत्वात्तदुचिताङ्कवत्त्वाच्च वध्वा इति मुनीन्द्रस्यानुरागोक्तिः तस्या एव परमसौभाग्यवतीत्वेन स्थापयिष्यमाणत्वान्नववध्वा इत्यर्थः। सुपृक्तानि सानन्दं सोत्कण्ठं सन्निकृष्टतया गमगात् यद्वा अबलाः तस्याः पदचिह्नानि विलोक्यैव सौभाग्यबलहीना जाता इत्यर्थः तानि चोक्तानि सुधर्माध्वबोधे कुमारः–

श्रीकृष्णप्राणनाथायाः राधाया परमश्रियः। यवं वामपदाङ्गुष्ठमूले सन्ध्यङ्करूपिणम्॥
अनुदृत्तञ्च तन्मूलतळे चक्रं सुलाञ्छनम्। निम्ने छत्रं ततः पश्चात्सन्ध्यायेदग्रशृङ्गकम्॥
आरभ्याङ्गुष्ठतर्ज्जन्योरन्तरा यावदर्द्धयत्। ऊर्ध्वरेखा नामिकाया मूलदेशे तथाम्बुजम्॥
ध्वजमग्रोच्छ्रयं पश्चात्तथा दक्षिणचैलकम्। सपताकं ततः पश्चात्कल्पवल्लीं किळोर्ध्वगाम्॥
तस्या दक्षिणपार्श्वे वै पङ्कजं वसुपत्रकम्। कनिष्ठामूलतलतो दक्षिणे वक्रमंकुशम्॥
अग्रशृङ्गं समाध्यायेद्राधापदप्रविष्टधीः। पार्ष्णौ तिर्य्यञ्चमर्द्धेन्दुमर्द्धभागाग्रखण्डितम्॥
तस्य दक्षिणपार्श्वे वै बलयं मम चिन्तयेत्। श्रीराधादक्षिणे पादे चिह्नान्यथ विचिन्तयेत्॥
अङ्गुष्ठमूलतलतः शङ्खमग्नालपरन्ध्रकम्। चतुष्टयाङ्गुलीमूलतलतोद्रिं क्रमादृजुम्॥
ततः पश्चाद्रथं त्वग्रमुखं सर्वाङ्गसंयुतम् वामपार्श्वेऽग्रकोटिं तु शक्तिं दक्षे गदां स्मरेत्॥
तत्पश्चिमे पार्ष्णिस्थे प्रायो ह्यग्रमुखं झषम् इति। विशेषजिज्ञासायां भक्तिमञ्जूषा दृश्या॥ २६॥

श्रीरामनारायणकृता भावभावविभाविका

काश्चिद् दृष्ट्वा अन्याः प्रति दर्शयन्त्यः प्रेमपथिमात्सर्य्याद्यभावं परस्परोपकारशीलत्वञ्चोपादिशन्त्य आहुः। पदानीति। एतानि नन्दसूनोर्महात्मनः पदानि ध्वजाम्भोजादिभिर्व्यक्तं लक्ष्यन्ते इत्यन्वयः। तत्र यद्यपि महात्मनोऽसंख्यातब्रह्माण्डतदधिष्ठातृब्रह्माद्यधिष्ठानस्य नन्दसूनुत्वमिति चित्रं यानि च पदानि लक्ष्यन्ते श्रुत्यापि लक्षणावृत्त्या कथञ्चिद्बोध्यन्ते नतु साक्षात्तानि व्यक्तं

भान्तीत्यपि चित्रं तथाप्यतिचित्रं प्रेममाहात्म्यं भगवतस्तद्वश्यत्वञ्च येन महात्मनोऽपि नन्दसूनुत्वं दुर्लक्षतत्पदानाञ्च व्यक्तत्वामिति ध्वनिः ध्वजाम्भोजवज्रांकुशयवादिभिरित्यत्रादिशब्देन पाद्मादिसंगृहीतानि ग्राह्याणि तथा चोक्तं पाद्मे ब्रह्मनारदसम्वादे कृष्णपदमुद्दिश्य ।

षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे । दक्षिणे चाष्टचिह्नानि इतरे सप्त एव च ॥
ध्वजा पद्मं तथा वज्रमंकुशो यव एव च । स्वस्तिकं चोर्ध्वरेखा च अष्टकोणं तथैव च ॥
सप्तान्यानि प्रवक्ष्यामि साम्प्रतं वैष्णवोत्तम । इन्द्रचापं त्रिकोणञ्च कलशं चार्द्धचन्द्रकम् ॥
अम्बरं मत्स्यचिह्नञ्च गोष्पदं सप्तमं स्मृतम् । षोडशञ्च तथा चिह्नं शृणु देवर्षिसत्तम ॥
जम्बूफलसमाकारं दृश्यते यत्र कुत्रचित् इति ॥

श्रुतौ च शङ्खध्वजातपत्रैस्तु चिह्नितं चरणद्वयम् आदिवाराहे तु व्रजमाहात्म्ये यत्र कृष्णेन सञ्जीर्णं क्रीडितञ्च यथासुखं चक्राङ्कितपदा तेन स्थाने ब्रह्ममये शुभ इति शङ्खचक्रातपत्रैरूनविंशतिः भवन्ति तत्र ध्वजो भक्तानामभयायाम्भोजं मनोऽलिमोहनाय वज्रः पापागध्वंसायांकुशो मनोमत्तगजवशीकाराय यवो जगज्जीवनत्वसूचनाय स्वस्तिकं शरणापन्नस्वस्तये ऊर्ध्वरेखा तूपगतानामूर्ध्वप्राप्तिसूचिका अष्टकोणञ्च स्वजनानामष्टदिक्षु सर्वतः स्वप्राप्तेरष्टसिद्धीनाञ्च तदनुसृतत्वस्य सूचनाय चापशङ्खचक्राणि भक्तरक्षार्थं त्रिकोणन्तु त्रिगुणत्रिभुवनाद्याश्रयत्वदेव तिर्यङ्नरत्रिविधसर्वाराध्यत्वमुक्तमुमुक्षुविषयित्रिविधसर्वेष्टत्वमनोवाक्कर्मत्रिविधसेव्यत्वादिसूचकम् अमृतकलशस्तूपगतामृतत्वप्राप्तिमाङ्गल्यादिव्यञ्जकश्चन्द्रस्तुशिवशिवादिशिरोभूषणस्य पादानुगतत्वसखिजनाह्लादकत्वादिबोधकः अम्बरन्तु व्यापकत्वेऽप्यसङ्गत्वद्योतकं मत्स्यस्तु कामध्वजत्वेन स्वानुमतकामिनीनां कामपूरकत्वज्ञापकः गोष्पदं चरणापन्नानां चरणसेवनप्राधान्यप्रख्यापकम् आतपत्रं तापत्रयापहमिति बोध्यम् ॥ २५ ॥ भगवत्पदपदव्यैव तत्प्राप्तिमुपदिशन्तीनां तत्पदव्या तदन्वेषणमाह । तैस्तैरिति । तादृगसाधाधारणलक्षणान्वितैर्ध्वयतया स्वबुद्धिस्थैर्भगवता कृपया बहिः प्रकटितैः पदैः पद्यते कृष्ण एभिरिति तथाभूतैस्तत्पदवीं कृष्णप्राप्तिमार्गमन्विच्छन्त्योऽनुकूलभावेनेच्छन्त्यः अबलाश्रियो यद्वा विरहदुःखकातर्येण बलहीनाः यद्वा रूपगुणयौवनादिबलजातमानेन प्राप्तभगवद्वियोगखेदविकलतया अवलास्त्यक्तमानादिबला यतोऽत एव तत्पदैस्तत्पदवीमन्विच्छन्त्यः अनेन तपोयोगादिस्वसाधनबलमनवेद्य तत्पदाश्रयणेनैवतत्पदवीलाभो भवतीति ध्वनितम् एवमन्विच्छन्त्योऽग्रतोवध्वा नित्यवृन्दावनलीलायां ग लोकादौ च नित्यवधूत्वेन प्रसिद्धाया लोकोद्धाराय परभक्त्यात्मना प्रकटितपृथक्त्वाया वस्तुतस्तु नित्यचिदानन्दघनकृष्णचन्द्राह्लादिन्याः प्रभायाः पदैस्तत्प्रापकैः सुष्ठु यथा स्यात्तथा पृक्तानि मिलितानि विलोक्य समाधौ सिद्धतत्पददर्शिनां मायोपहितपददर्शने विक्षेपातिवद्वधूपददर्शने सापत्न्यभावेन जातमात्सर्य्यतया आर्ता दुःखिताः समब्रुवन्निति केचित् स्वमते तु न क्रोधो नच मात्सर्यमित्यादिना भगवत्पदवीमनुगतानां मात्सर्याद्यनुपपत्तेः निवारणतयाभिव्यक्तत्वेन प्रेमवृत्तिप्रतिफलितत्वेन च द्विगुणीभूतस्वरूपानन्दवत्परभक्तिरूपप्रियापदसुपृक्तनन्दकृष्णपदानि विलोक्य मात्सर्य्यादिकापट्यराहित्येनासमन्तात् ऋतं सत्यमेव यासां बहिरन्तर्निष्कपटस्नेहवत्यः समब्रुवन्नित्येवार्थः ॥ २६ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तानि दृष्ट्वा परस्परमाहुः । एतानि स्पष्टं नन्दसूनोर्महात्मनः सन्ति परमात्मनो नन्दसूनुत्वेनावतीर्णत्वात्तत्पदानां सर्वविलक्षणत्वादिति भावः यद्वा नारायणसमो गुणैरित्युक्तत्वान्महात्मनः सर्वोत्कृष्टस्य हि यतः ध्वजादिभिर्लक्ष्यन्ते ध्वजादीनां धारणस्थानाद्युक्तं स्कान्दे—

दक्षिणस्य पदाङ्गुष्ठमूले चक्रं बिभर्त्यजः । तत्र भक्तजनस्यास्ति षडूर्मिच्छेदनाय सः ॥
मध्यमाङ्गुलिमूले च धत्ते कमलमच्युतः । ध्यानचित्तद्विरेफाणां लोभनायातिशोभनम् ॥
पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम् । कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ॥
पार्ष्णिमध्येऽकुशं भक्तचित्तेभवशकारिणम् । भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्वणि ॥
आदिपदात्स्वस्तिकादिसंग्रहः । तथाच श्रीकृष्णमेवाधिकृत्य पाद्मे ॥
षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे । दक्षिणे चाष्टचिह्नानि इतरे सप्त एव च ॥
ध्वजः पद्मं तथा वज्रमङ्कुशो यव एव च । स्वस्तिकं चोर्ध्वरेखा च अष्टकोणं तथाष्टमम् ॥
इन्द्रचापं त्रिकोणञ्च कलशश्चार्द्धचन्द्रकम् । अपरे मत्स्यचिह्नं च गोष्पदं सप्तमं स्मृतत् ॥
षोडशञ्च तथाचिह्नं शृणु देवर्षि सत्तम ! । जम्बूफलसमाकारं दृश्यते यत्र कुत्रचिदिति ॥
शङ्खध्वजातपत्रैश्च चिह्नितं चरणद्वयमिति ।

तापिन्युक्तञ्च चक्राङ्कितपदा तेनेति वाराहाच्च चक्रशङ्खातपत्रैः सहैकोनविंशतिः तत्र सर्वाणि चिह्नानि श्रीकृष्णपादयोरेव तदुक्तं पाद्मे —

अङ्कान्येतानि भो विद्वन्! पश्यन्ते तु यदा तदा। कृष्णाख्यन्तु परं ब्रह्म सुविज्ञातं न संशयः ॥
द्वयं वाथ त्रयं वाथ चत्वारः पञ्च चैव च। दृश्यन्ते वै द्विजश्रेष्ठा! अवतारे कथञ्चनेति ॥

निवृत्तिपक्षे नन्दसूनोः आनन्दरूपसूर्यस्य परमात्मन एतानि चिदाभासलक्षणानि पदानि व्यक्तं किञ्च भगवच्चरणारविन्दस्थध्वजादिभिः ध्यातैरर्थचरणासक्तिसर्वानर्थविजयपापवासनाध्वंसमदनिवृत्तिवैराग्यादिजनकैर्युक्तानि लक्ष्यन्ते तथा च सत्त्वगुणउद्रिक्ते भगवच्चरणारविन्दध्यानासक्ते ऽन्तःकरणे कामक्रोधादिनिवृत्त्या पुनः पुनर्भगवद्ध्यानात्मप्रत्ययनिष्ठचिदाभासैर्भगवत्स्वरूपपर्यन्तं गम्यमानैस्तत्स्वरूपप्राप्तेरिति भावः ॥ २५ ॥ भगवतः पदानीति निश्चित्य तैस्तैस्तथाभूतैरेव भुवि संळग्नैः पदैस्तस्य पदवीं मार्गमन्वेषणं कुर्वन्त्यः स्वभावत एवाऽबलाः विरहान्वेषणाभ्यां विशेषतो बलहीनाः कृताः वध्वाः श्रीमत्या राधायाः पदैः भुवि सलग्नैः संपृक्तानि मिश्रितानि विलोक्य तन्मध्ये ततस्तयेर्ष्यावत्यो मानिन्यः काश्चिदार्ताः पीडिताः सत्यः समब्रुवन् प्रथममतिविह्वलत्वात्तत्पदोपरि तासां दृष्टिर्न पतिता भगवत्पददर्शनेनेषत्समाहितानां किञ्चिद्दूरं गतानां तदुपरि दृष्टिः पतितेति ज्ञेयं निवृत्तिपक्षे तैस्तैर्यथोक्तैरेकाग्रतां प्राप्तैः साभासप्रत्ययैरग्रे भगवत्स्वरूपान्वेषणम्प्रतिपादयन्त्योऽबळाः प्रत्यक्षादिभिः उक्तानुवादपरत्वान्निर्बलाः द्वा सुपर्णेत्याद्यभेदानुवादिन्यः श्रुतयः मुख्यवधूस्थानीयायास्तत्त्वमसि श्रुतेः स्त्रीभिः पदैः सुपृक्तानि तदर्थविचारपरत्वेन तत्संमिश्राणि विलोक्यार्त्ताः सत्यः समब्रुवन् ॥ २६ ॥

रास-रहस्यम्

र० टी—महात्मनः महतः आत्मनः परमोदारस्वरूपस्य सर्वमनोरथपूरकस्य नन्दसूनोः नन्दः परमानन्दः तस्याधुना आत्मरूपेरणाविर्भूतस्य, एतानि पदानि लक्षणानि, व्यक्तमेव स्पष्टमेव निश्चितमेव, "यद्वाचानभ्युदितं येन वागभ्युद्यते, यन्मनसा न मनुते येनाहुर्मनोमतम्।" "अशब्दमस्पर्शमरूपमव्ययम् ...... इत्यादि" श्रुतिर्हि यद्यपि आत्मनः अवाङ्मनसगोचरत्वं दर्शयति, तथापि "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः।" इति शुद्धान्तःकरणे अभिव्यक्तमिति लक्ष्यन्ते, लक्षणावृत्त्या कथञ्चित्, बोध्यन्ते, न तु साक्षात्। आत्मस्वरूपमिव ध्वजादिभिरुपलक्ष्यते। यथा ध्वजादिभिः, ध्वजःसर्वानर्थविजयध्वजदर्शनेन, अम्भोजः कमलं, मनोऽलिमोहनरूपेण, वज्रः सञ्चितकर्मलक्षणपापाद्रिभेदनेन, अङ्कुशः उन्मत्ताहंकारगजस्य वशीकरणेन, यवादिः मुमुक्षूणां योगक्षेमवहनं तैः इति ॥ २५ ॥ ध्यातैः सर्वानर्थविजयपापवासनाध्वंसस्वमदनिवृत्तिवैराग्यादिजनकैः तैस्तैः पदैः, तत्पदवीमन्विच्छन्त्यः ब्रह्मात्मभावमिच्छन्त्यः, अबलाः आत्मनः शुद्धस्वरूपप्रकटीकरणे असमर्थाः, अग्रतः सम्मुखे बध्वाः पदैः सुपृक्तानि मायोपाधियुक्तशवलब्रह्मरूपं विलोक्य अर्थात् वृत्तिसहितमात्मनः स्वरूपं दृष्ट्वा, आर्ताः दुखिताः सत्यः, समब्रुवन् परस्परमुचुः ॥ २६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

व्यक्तं निश्चितम् ॥ २५ ॥ सुपृक्तानि सुष्ठु मिश्राणि ॥ २६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कान्तां तानि स्वापचितानि कुसुमानि चूडयता शेखरीकुर्वतेह ध्रुवमुपविष्टं तया रेमे च। कामी रेम इत्याद्युक्तिर्लोकानुकारेणेति स्वयं ग्रन्थकृदप्रशस्तकामितादिकं प्रतिषेधति ॥ आत्मरत आत्मारामेति। आत्मरत आत्मक्रीड इति श्रुत्यनुवादरूपमिति न पुनरुक्तिशङ्केति केचित्। आत्मरतः स्वरतो न विद्यते रामा वयं यस्य सोऽराम आत्मनैवाराम आत्मारामः। स्वेच्छयैव त्यक्तास्मत्कोऽखण्डितः। न विद्यते खण्डिता नायक्यो यस्य सोऽखण्डितोऽन्योपभोगचिह्नतो हि पतिरागच्छति यस्याः साऽखण्डिता। तत्प्रभेदस्तु रजमञ्जर्यामुक्तो बहुधा मुग्धाऽखण्डिता यथा वक्षः किमु कलशाङ्कितमिति किमपि प्रष्टुमिच्छन्त्यानयनं नवोढसदृशः प्राणेशः पाणिना पिदध इत्यादिनोक्तोऽनुसन्धेयः। अधुना स्वदर्शनाभावादेता न खण्डिताः प्राणेशः पाणिनेत्याद्युक्तेः समागम आवश्यकः। शुकोक्ती रेम इत्यादिकेति ज्ञेयम् ॥२५॥ विचेतना ज्ञानहीना इति प्रलपन्त्यश्च ता गोप्य एवं चेरुः। आत्मरतः किमिति रेमे रामाभिरित्यत आह। कामिनां निन्दितकामवतां दैन्यं दर्शयन्ननुकुर्वन् स्त्रीणां दुरात्मतां च दर्शयन् रेम इत्यन्वयः ॥ २६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एता अपि पूर्ववत् दशविधाः तथैव तासां वचनानि पदानि प्रत्यक्षयोग्यानि सर्वैरेव दृश्यन्त इति तेषां याथात्म्यज्ञानं साध्यम् अतः प्रथममाहुः। पदानि व्यक्तमेतानीति। एतानि पदानि नन्दसूनोरेव व्यक्तं सत्यं नात्र सन्देहः चिह्नैः पदानां विशेषज्ञानं चिह्नान्येव कथं भवन्तीत्याशङ्क्य तत्रोपपत्तिमाहुः महात्मन इति। महतामप्यात्मा महान्वा ब्रह्मरूपः तस्य तत्तत्कार्यार्थं पदे चिह्नानि भवन्ति प्रकृतेऽपि तेषामुतयोग इति तदभिव्यक्तिः क्रियते तानि चिह्नान्याहुः। लक्ष्यन्त इति। अनुमीयन्ते पदानि

असाधारणधर्मैः लोकेऽप्येतादृशोऽर्थः प्रसिद्ध इति सम्मतिः ध्वजस्य स्थापनं भक्तानां निर्भयावासार्थम् अम्भोजस्थापनं सुखसेव्यत्वाय चक्रस्थापनं रक्षायै मनोनिग्रहार्थमङ्कुशस्थापनं कीर्तिसिध्यर्थं यवः व्रजादयोऽप्यादिशब्देनोच्यन्ते पापपर्वतादिनिराकरणार्थाः ॥ २५ ॥ एवमसाधारणधर्मैः पदानि निश्चित्य तन्मार्गेण गता इत्याह। तैस्तैरिति। ज्ञानं क्रियापर्यवसायीति क्रिया निरूप्यते तत्वदवीमन्विच्छन्त्योऽग्रतोऽबलाः जाताः पदान्यन्विष्य तत्पदवीं गता इत्यर्थः। मध्ये तासां प्रतिबन्धमाह। वध्वा इति। यदि तासां मत्सरदोषो न स्यात् गच्छेयुरेवान्तिकं दोषवशाच्च परं कुण्ठिता भवन्ति तदाह। वध्वाः कस्याश्चिद्गोपिकायाः पदैः सुपृक्तानि पङ्क्त्याकारेण गतानि भगवत्पदानि दृष्ट्वा तानि विलोक्य च आर्त्ता जाताः तदा अन्योऽन्यमेवाब्रुवन् ज्ञानक्रिययोरुपसर्जनत्वं कृत्वा वाचि प्रतिष्ठिताः जाताः अन्यथा शीघ्रगमने भगवान् प्राप्तः स्यात् ॥ २६ ॥

श्रीसुबोधिनी-सारः

ध्वजपद्मवज्रांकुशयवादिभिर्लक्षणैर्महात्मनो नन्दपुत्रस्येतानि पदानि व्यक्तं स्फुटं लक्ष्यन्ते। हि निश्चये ॥ २५ ॥ तैः तैः पदैः हेतुभूतैः तस्य पदवीं मार्गम् अन्वीच्छन्त्योऽबलाः स्त्रियोऽग्रतो वध्वा राधिकायाः पदैः सुपृक्तानि मिश्राणि पदानि विलोक्य दृष्ट्वा आर्त्ताः "सापत्न्यदुःखादपरं न दुःखं स्त्रीणां सुखं पत्युरिहास्ति किंचित्" इत्युक्तेः समूचुः ॥ २६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तानि दृष्ट्वा च परस्परमूचुस्तदाह—पदानीति। महात्मन उदारचित्तस्यात्ममनोरथपूरकस्य नन्दसूनोरेतानि पदानि इति व्यक्तं निश्चितम्। एवं निश्चये हेतुमाहुः—लक्ष्यन्ते इति। हि यस्मात् ध्वजादिभिर्लक्ष्यन्ते चिह्नितानि दृश्यन्ते इति। आदिशब्दादन्येषां चक्रादीनां ग्रहणम्। ध्वजादीनां धारणस्थानं तत्प्रयोजनं चोक्तं स्कान्दे—दक्षिणस्य पदाङ्गुष्ठमूले चक्रं बिभर्त्यजः। तत्र नम्रजनस्यारिषड्वर्गच्छेदनाय सः १। मध्यमाङ्गुलिमूले च धत्ते कमलमच्युतः। ध्यातृचित्तद्विरेफाणां लोभनायाति शोभनम् २। पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम् ३। कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ४। पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारिणम् ५। भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्वणि ६। तथाऽन्यान्यपि चिह्नानि वैष्णवतोषण्यामुक्तानि। तथाहि–अङ्गुष्ठतर्जनीसन्धिमारभ्य यावदर्धचरणमूर्ध्वरेखा ७। चक्रस्य तले छत्रम् ८। अर्धचरणतले चतुर्दिगवस्थितं स्वस्तिचतुष्टयम् ९। स्वस्तिकचतुःसन्धिषु जम्बूफलचतुष्टयम् १०। स्वस्तिकमध्ये अष्टकोणम् ११। इत्येवं दक्षिणचरणे एकादश चिह्नानि ॥ तथा वामपादाङ्गुष्ठमूले भक्तोन्मुखं दरम्। सर्वविद्याप्रकाशाय दधाति भगवानसाविति १। मध्यमामूले वरमन्तर्बाह्यमण्डलद्वयात्मकम् २। तदधः कार्मुकं विगतज्यम् ३। तदधो गोष्पदम् ४। तत्तले त्रिकोणम् ५। तदभितः कलशानां चतुष्टयं क्वचित्त्रितयमित्युक्तम्। त्रिकोणतलेऽर्धचन्द्रोग्रद्वयस्याष्टत्रिकोणद्वयम् ७। तदधो मत्स्यः ८। एवं वामपादेऽष्टौ मिलित्वा ऊनविंशतिः ॥ २५ ॥ एवं तैस्तैर्ध्वजादिचिह्नितैः पदैस्तस्य कृष्णस्य पदवीं स्थितिमन्विच्छन्त्योऽन्वेषयन्त्योऽबला गोप्यः अग्रतः कस्याश्चिद्वध्वाः पदैः सुपृक्तानि अन्तरान्तरा सम्मिलितानि तत्पदानि विलोक्य आर्ताः अतिदुःखिताः सत्यःसमब्रुवन् परस्परमूचुः। तस्याश्च वामचरणे अङ्गुष्ठतले यवः १। तत्तले चक्रम् २। तत्तले छत्रम् ३। तत्तले वलयम् ४। अङ्गुष्ठतर्जनीसन्धिमारभ्य यावदर्धचरणमूर्ध्वरेखा ५। मध्यमातले कमलम् ६। तत्तले सपताको ध्वजः ७। तत्तले पुष्पं वल्ली च ८,९। कनिष्ठातलेऽङ्कुशः १०। पार्ष्णावर्द्धचन्द्रः ११। एवं इत्येकादश दक्षिणचरणे ॥ अङ्गुष्ठमूले शङ्खः १। तत्तले गदा २। कनिष्ठातले वेदिः ३। तत्तले कुण्डलम् ४। तत्तले शक्तिः ५। तर्जन्याद्यङ्गुलितले पर्वतः ६। तत्तले रथः ७। पार्ष्णौ मत्स्यः ८। इत्यष्टौ मिलित्वैकोनविंशतिः ॥ २६ ॥

अन्वितार्थप्रकाशिका

पदानीति ॥ महात्मनः उदारचित्तस्यात्ममनोरथपूरकस्य नन्दसूनोरेतानि पदानि इति व्यक्तं निश्चितम्। हि यस्मात् ध्वजाम्भोजादिभिर्लक्ष्यन्ते। आदिना चक्रादिग्रहणम्। तथा हि स्कान्दे। "दक्षिणस्य पदोऽङ्गुष्ठमूले चक्रं बिभर्त्यजः ॥ तत्र नम्रजनस्यारिषड्वर्गच्छेदनाय सः ॥ मध्यमाङ्गुलिमूले च धत्ते कमलमच्युतः ॥ ध्यातृचित्तद्विरेफाणां लोभनायातिशोभनम् २॥ पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम् ३ ॥ कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ४ ॥ पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारिणम् ५ ॥ भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्वणि ६ ॥" तथाऽन्यान्यपि चिह्नानि वैष्णवतोषिण्यामुक्तानि। तथा हि अङ्गुष्ठतर्जनीसन्धिमारभ्य यावदर्धचरणमूर्ध्वरेखा ७। चक्रस्य तले छत्रम् ८। अर्धचरणतले चतुर्दिगवस्थितं स्वस्तिकचतुष्टयम् ९। स्वस्तिकस्य चतुर्षु सन्धिषु जम्बूफलचतुष्टयम् १०। स्वस्तिकमध्ये अष्टकोणमित्येवं दक्षिणचरणे एकादश चिह्नानि ११। तथा वामपादाङ्गुष्ठमूले भक्तोन्मुखं दरं सर्वविद्याप्रकाशाय दधाति भगवानसाविति १। मध्यमामूले वरमन्तर्बाह्यमण्डलद्वयात्मकम् २। तदधः कार्मुकं विगतज्यम् ३। तदधो गोष्पदम् ४। तत्तले त्रिकोणम् ५। तदभितः कलशानां चतुष्टयं क्वचित्त्रितयमित्युक्तम् ६। त्रिकोणतलेऽर्धचन्द्राग्रद्वयस्पृष्टं त्रिकोणद्वयम् ७। तदधो मत्स्यः ८। एवं वामपादेऽष्टौ मिलित्वा ऊनविंशतिः ॥ २५ ॥ तैस्तैरिति ॥ एवं तैस्तैरूर्ध्वजादिचिह्नितैः पदैस्तस्य कृष्णस्य पदवीं स्थितिमन्विच्छन्त्यः अन्वेषयन्त्योऽबला गोप्यः अग्रतः कस्याश्चिद्वध्वाः पदैः सुयुक्तानि अन्तरान्तरासम्मिलितानि तत्पदानि विलोक्यार्ताः अतिदुःखिता सत्यः समब्रुवन् परस्परमूचुः। इयं च श्रीराधेत्याहुः।

तस्याश्च वामचरणे अङ्गुष्ठमूले यवः १। तत्तले चक्रम् २ ! तत्तले छत्रम् ३। तत्तले वलयम् ४। अङ्गुष्ठतर्जनीसन्धिमारभ्य यावदर्धचरणमूर्ध्वरेखा ५। मध्यमातले कमलम् ६। तत्तले सपताको ध्वजः ७। तत्तले पुष्पं वल्ली च ८।९। कनिष्ठातलेऽङ्कुशः १०। पार्ष्णावर्द्धचन्द्रः ११। एवं इत्येकादश दक्षिणचरणे। अङ्गुष्ठमूले शङ्खः १। तत्तले गदा २। कनिष्ठातले वेदिः ३। तत्तले कुण्डलम् ४ तत्तले शक्तिः ५। तर्जन्याद्यङ्गुलितले पर्वतः ६। तत्तले रथः ७। पार्ष्णौ मत्स्यः ८। इत्यष्टौ मिलित्वैकोनविंशतिः ॥ २६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

व्यक्तं स्फुटं एतानि भूमिलग्नानि नन्दसूनोः पदानि ध्वजादिभिर्लक्ष्यन्ते ॥ २५ ॥ तत्पदवीं कृष्णप्राप्तिमार्गं अन्विछन्त्यो मृगयमाणाः अबलाः अन्यस्याः वध्वाः युवत्याः पदैः सुपृक्तानि संमीलितानि कृष्णपदानि विलोक्य अर्त्ताः सपत्नीर्ष्येया तप्ताः ॥२६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तानि दृष्ट्वा यदूचुस्तदाह ॥ पदानीति ॥ एतानि इमानि, महात्मनो महामहिम्नः, नन्दसूनोः पदानि, व्यक्तं नूनं, कुतः। हि यस्मात्, ध्वजश्च अम्भोजं च वज्रं च अङ्कुशं च यवश्च आदयो येषां तैर्लक्ष्मभिः, लक्ष्यन्ते लक्षितानि भवन्ति। ध्वजादीनि लक्ष्माण्युक्तानि पाद्मे 'षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे। दक्षिणे चाष्ट चिह्नानि इतरे सप्त एव च। ध्वजः पद्मं तथा वज्रमङ्कुशो यव एव च। स्वस्तिकं चोर्ध्वरेखा च अष्टकोणं तथैव च। इन्द्रचापं त्रिकोणं च कलशश्चार्द्धचन्द्रकः। अम्बरं मत्स्यचिह्नं च गोष्पदं सप्तमं स्मृतम्। षोडशं तु तथा चिह्नं शृणु देवर्षिसत्तम। जम्बूफलसमाकारं दृश्यते यत्र कुत्रचित्' इति। क्रमदीपिकायां च मत्स्याङ्कुशारिदरकेतुयवाब्जवज्रै रिति शङ्खलक्ष्म, तापनीयश्रुतौ शङ्खध्वजातपत्रैरित्यनेन छत्रलक्ष्म, वराहतन्त्रे चक्राङ्कितपदा तेनेति चक्रलक्ष्मेत्येवं त्रीण्यधिकान्युक्तानि एवं सति एकोनविंशति चिह्नानि भगवत्पादयोः सिद्धानि। एतेषां स्वरूपं स्थानानि च वैष्णवतोषण्याः। यथोक्तं पाद्मे इत्यादिनोक्तानि द्रष्टव्यानि ॥ २५ ॥ तैस्तैरिति ॥ ततः तैर्ध्वजादिचिह्नितैः, तैः पदैः, तत्पदवीं तस्य श्रीकृष्णस्य मार्गं, अग्रतः पुरतः, अन्विच्छन्त्योऽन्वेषयन्त्यः, अबला अखिला गोप्यः, तदा वध्वाः कस्याश्चिद्गोप्याः, पदैः पादाङ्कैः, सुपृक्तानि अन्तरान्तरा युक्तानि भगवतः पदानि विलोक्य, आर्त्ता दुःखिताः सत्यः, समब्रुवन् ऊचुः ॥ २६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पदानीति : १०.३०.२५.

सख्यः पश्यत पश्यताद्भुतमिदं यत्कृष्णवर्त्मन्यपि सच्छोभान्वितलक्ष्मणान्वयि पदाम्भोजं स्फुटं राजते।
किं चाकाशसरोजमित्यपि वचोऽलीकं कथं वर्णितं प्राज्ञैर्यत्स्फुटमत्र साब्जममलं विष्णाः पदं दृश्यते ॥ २०७ ॥
यत्सर्वतोमुखलसत्स्थिति शोभमानं दान्तं नितान्तममलप्रतिमं सदीड्यम्।
लेखाभिरञ्जितमनन्तसुखाभिधेयं विष्णोः पदं तदिह सादरमर्थयामः ॥ २०८ ॥

तैस्तैः पदैरिति : १०.३०.२६.

योऽन्तर्बहिर्विधृतपूर्णपरेशभावो विष्वग्भवे विचिनुतेऽत्र चरन् परेशम्।
मायाविलासविशदीकृतनैजवृत्तेर्मायेशितुः स पददृग् भवतात्यबोधि ॥ २०९ ॥
स्त्रीपुंभिदाव्यतिकरः सखि यत्र भाति ह्यर्थाङ्गनाङ्गललिताचरणप्रचारः।
तादृक् पदस्य मदनादरताऽस्ति चित्रम् वामाश्रिते किमथवा पुरुषे विचित्रम् ॥ २१० ॥
न स्नेहो न मनाक् त्रपा न च कृपा नाकृत्रिमं वर्तनं भीतिर्वा न जनापवादवचसः किन्तु स्वमात्रार्थधीः।
ईदृग् लोकगतिः कलौ किल भवेदित्याश्रुतं द्वापरेऽत्रैवदर्श्यनयां कथं भृशमसौ सख्यो मम द्वापरः ॥ २११ ॥

कृष्णप्रिया

भगवान् श्रीकृष्णजी के चरण चिह्नों का दर्शन होने से व्रजवनिताओं ने निश्चय किया कि ये चरण चिह्न तो महोदार श्रीनन्दकुमार जी के ही है यह सुनिश्चित है क्योंकि इन पदों में ध्वज, कमल, वज्र अङ्कुश यव आदि सर्व चिह्नों का भीतर दर्शन हो रहा है ॥ २५ ॥ प्यारे श्रीनन्द नन्दनू के उन उन चरण चिह्नों के पीछे पीछे फिरती और प्रियतम के पथ को खोजती गोपियाँ ने एक वधू-व्रजसुन्दरी के चरणों के साथ भगवान के चरणचिह्न देखे तब चित्त से उद्विग्न होकर कहने लगी ॥ २६ ॥

कस्याः पदानि चैतानि यातायाः नन्दसूनुना। अंसन्यस्तप्रकोष्ठायाः [1]करेणोः करिणा यथा ॥ २७ ॥
अनयाऽऽराधितो नूनं भगवान् हरिरीश्वरः। यन्नो विहाय गोविन्दः प्रीतो यामनयद् रहः ॥ २८ ॥

---

[1] करिण्याः–विज.।

कर्दमक्षमा

अन्वयः—करिणा, करेणोः, यथा, नन्दसूनुना, सह, यातायाः, च, अंसन्यस्तप्रकोष्ठायाः, कस्याः, एतानि, पदानि, (भविष्यन्ति) ॥ २७ ॥ नूनम्, हरिः, ईश्वरः, भगवान्, अनया, आराधितः, यत्, पीतः, गोविन्दः, नः, विहाय, याम्, रहः, अनयत् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तेनांसे न्यस्तः प्रकोष्ठो यस्याः । करेणोर्हस्तिन्याः ॥ २७ ॥ रह एकान्तस्थानम् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कस्याः सुभाग्यायाः । प्रकोष्ठः करतलमूलभागः ॥ अंसन्यस्तेति । यस्याः स्कन्धे नन्दसूनुना वामप्रकोष्ठो न्यस्त इत्यर्थः।२७। पदचिह्नैस्तां श्रीवृषभानुनन्दिनीं ज्ञात्वा तस्याः सुहृदां वाक्यम् । यद्वा—अं वासुदेवं नयति चोरयतीत्यत्र । औणादिको डः । तया अस्माकं सर्वस्वं हरन्त्या यत् यतः हरिरपि सर्वहरणोपीश्वरोऽपि राधितो वशीकृतः । गोविन्द इति भक्तिवात्सल्यमाह । भक्त्यृणापकरणाय गोचारणमप्यङ्गीकृतवान्यस्तस्यान्यदपि नाऽकार्यं किञ्चिदिति भावः ॥ पदचिह्नैरेव तां वृषभानुनन्दिनीं परिचित्यान्तराश्वस्ता बहुविधगोपीजनसंघट्टे तत्र बहिरपरिचयमिवाभिनयन्त्यस्तस्याः सुहृदस्तन्नामनिरुक्तिद्वारा तस्याः सौभाग्यं सहर्षमाहुः—अनयैव नूनं निश्चयेन हरिर्भक्तजनदुःखहर्ता भगवान्नारायण ईश्वरो भक्ताभीष्टदानसमर्थ आराधितः, न त्वस्माभिर्यतो नो विहायेत्यादि। ततश्च राधयत्याराधयतीति राधा इति नामव्यक्तिर्बभूव । "मुनिः प्रयत्नेन तदीयनामाप्यधात्परं किन्तु तदास्यचन्द्रात् । स्वयं निरेति स्म कृपानु तस्याः सौभाग्यभेर्य्या इव वादनार्थम् ॥" यद्वा—हे अनयाः अतिमहीयस्या तया सह वृथैव साम्याहङ्कारादनीतिमत्यः, नूनं हरिरयं राधितः राधामितः प्राप्तः शकन्ध्वादित्वात्पररूपम् । भगवासुन्दरः कामातुरः स्वकीर्तिप्रख्यापको वा "भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु" इत्यमरः । ईश्वरः युष्मान्वञ्चयितुं समर्थः । यदि नोऽस्मान् सुन्दरीर्विहाय गोविंदो गास्तस्या इन्द्रियाणि रमणार्थं विन्दति वेदयति वा सः । तस्याश्च पदचिह्नान्युज्ज्वलनीलमणिटीकां दृष्ट्वा लिख्यंते—वामचरणेऽङ्गुष्ठमूले यवः १, तत्तले चक्रम् २, तत्तले छत्रम् ३, तत्तले वलयम् ४, अंगुष्ठतर्जनीसंधिमारभ्य यावदर्द्धचरणमूर्द्ध्वरेखा ५, मध्यमातले कमलम् ६, तत्तले ध्वजं सपताकम् ७, तत्तले वल्ली ८, पुष्पञ्च ९, कनिष्ठातलेऽङ्कुशः १०, पार्ष्णावर्द्धचन्द्रः ११, इत्येकादश । दक्षिणचरणेंगुष्ठमूले शंखः १, तत्तले गदा २, कनिष्ठातले वेदिः ३, तत्तले कुंडलम् ४, तत्तले शक्तिः ५, तर्जन्याद्यंगुलितले पर्वतः ६, तत्तले रथः ७, पार्ष्णौ मत्स्यः ८, इत्यष्टौ मिलित्वैकोनविंशतिः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र सर्वा एवाहुः । कस्या इति । अत्र स्त्रीत्वज्ञानं तत्पादानां लघुत्वात् निम्नत्वतदुचिताङ्कलक्षितत्वादिना च इति ज्ञेयं नन्दसूनुना इति पूर्ववत् एतानि कस्याः पदानि परिचीयन्तामिति शेषः । श्रीभगवता स्वांसे तत्प्रकोष्ठन्यसनं च यद्यपि रसविशेषेणैव तथापि रात्रौ स्खलन्त्यास्तस्याः सुखगमनार्थं बलाद्दूरे नयनार्थञ्च भवति । अनेन तस्यामधिकप्रीतिः सूचिता । तामेव दृष्टान्तेनाहुः । करेणोरिति । तयोरपि काममदेन प्रीत्या तथैव गमनात् ॥ २७ ॥ तत्र सखीनामन्तरङ्गत्वेन गाम्भीर्यात् प्रतिपक्षाणामापाततो दुःखव्याप्तत्वात् तटस्थानाञ्च तदनभिनिवेशात् प्रथमं तस्याः सुहृद एवाहुः । अनयेति । नूंन वितर्कं निश्चये वा । हरिः सर्वदुःखहर्ता भगवान् श्रीनारायणः । ईश्वरः भक्तेष्टप्रदानसमर्थः स्वतन्त्रोऽपि वा । अनयैव आराधितः आराध्य वशीकृतः नत्वस्माभिः । राधयति आराधयतीति राधेति नामकारणञ्च दर्शितम् । तत्र हेतुर्गोविन्दः नोऽस्मान् विशेषेण हित्वा दूरतो निशि वनान्तस्त्यक्त्वा । तत्रापि रहः अस्मदगम्ये एकान्तस्थाने यामनयत् यद्वा सर्वा अप्यस्मान् विहाय यन् गच्छन्नपि यामेव रहोऽनयदित्यर्थः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

किं तदाह —कस्या इत्यादिना ध्रुवमित्यन्तेन । नन्दसूनुना सह यातायाः एतानि कस्याः पदानि परिचीयन्तामिति शेषः। श्रीभगवता स्वांसे तत्प्रकोष्ठस्य न्यसनञ्च रसविशेषेण किंवा रात्रौ स्खलन्त्यास्तस्याः सुखगमनार्थं बलाद्दूरे नयनार्थं वा । अनेन तस्यामधिकप्रीतिः सूचिता । तामेव दृष्टान्तेनाहुः—करेणोरिति । तयोरपि काममदेन प्रीत्या तथैव गमनात् ॥ २७ ॥ पश्चाच्च श्रीराधादेव्यास्तानि पदानि परिचित्याश्वस्तास्तन्नामनिरुक्ति-द्वारा तस्या भाग्यं सहर्षमाहुः—अनयेति । नूनं वितर्के निश्चये वा; हरिः सर्व्वदुःखहर्त्ता, भगवान् श्रीनारायणः, ईश्वरो भक्तेष्टप्रदानसमर्थः स्वतन्त्रोऽपि वा, अनयैवाराधित आराध्य वशीकृतः, न त्वस्माभिः, अन्यथास्माकमेतद्विरहार्त्त्याद्यसम्भवः । राधयति आराधयतीति श्रीराधेति नामकरणं च दर्शितम्, यद् यस्माद् गोविन्दो गोकुलेन्द्रत्वेन तस्या अस्माकञ्च तुल्योऽप्यसौ नोऽस्मान् विशेषेण हित्वा दूरतो निशि वनान्तस्त्यक्त्वा तत्रापि रहोऽस्मदगम्ये एकान्तस्थाने यामनयात्, यद्वा, गोविन्द एवासावनया आराधितः ! तस्याः परमभाग्यबोधनार्थं गोविन्दमेव विशिंषन्ति-

भगवान् निजाशेषैश्वर्य्यप्रकटनपरः, अतो हरिः सर्व्वार्त्तिहर्त्ता किंवा रूपगुणादिना सर्व्वमनोहर ईश्वरो व्रजजनप्राणनाथः, अतस्तदनुभवस्तयैव कृत इति भावः। अन्यत् समानम्। यच्छब्दद्वयं हेतोस्तस्यैव दाढर्यार्थम्, किंवा यत् प्रीतः, तस्माद्यामनयदिति वाक्यद्वयकल्पनया योज्यम्, एवमग्रेऽप्यूह्यम्; यद्वा, यन् रहो गच्छन् ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह। कस्या इत्यादिभिः सार्द्धैरष्टभिः। करिणा सहकरिण्या इव नन्दसूनुना सह गच्छन्त्याः कस्याश्चिद्वध्वाःपदानि हे गोप्यः! पश्यत कथं भूतायाः अंसे स्कन्धे न्यस्तः प्रकोष्ठो यस्यास्तस्याः अन्यथैवंविधः पदानां सम्पर्को न स्यादिति भावः ॥२७॥ अनया कृष्णेन सह यातया भगवान् हरिरीश्वरो नूनमाराधितः पूर्वजन्मनीनि शेषः। कुतः यद्यस्मान्नोऽस्मान् सर्वा विहाय गोविन्दः प्रीतियुक्तो रह एकान्तं यामनयत् नह्यनाराधितेश्वराणां रहसि गोविन्दसङ्गः सुलभ इति भावः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रकोष्ठः करतलमूलभागः करिणा सहितायाः करिण्याः पदानि यथा स्वांसन्यस्तहस्तायाः करिण्याः पदैः सम्पृक्तानि करिणा कृतानि पदानि वा २७–२८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कस्याः पदानीत्यादि ॥ २७—३३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

यद् यस्मात् प्रीतस्तस्यामिति शेषः ॥ २८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कस्याः पदानि चैतानीति सन्देहानन्तरं निश्चिन्वन्ति अनयेति। अनया सह नीतया भगवान् श्रीकृष्णो राधितः, राधामाख्यातवान् राधामाचष्टे राधयतीति राधि–धातोः क्ते सिद्धम्। सर्वाभ्यो ह्यस्यामेव गरीयसी प्रीतिरिति राधैवेय तत्सङ्गे ।२८।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अंसन्यस्तेति यस्याः स्कन्धे नन्दसूनुना वामप्रकोष्ठो न्यस्त इत्यर्थः ॥ २७ ॥ पदचिह्नैरेव तां श्रीवृषभानुनन्दिनीं परिचित्यान्तराश्वस्ता बहुविधगोपीजनसंघट्टे तत्र बहिरपरिचयमिवाभिनयन्त्यस्तस्याः सुहृदस्तन्नामनिरुक्तिद्वारा तस्याः सौभाग्यं सहर्षमाहुः। अनयैव नूनमिति निश्चये हरिभक्तजनदुःखहर्त्ता भगवान्नारायण ईश्वरो भक्ताभीष्टदानसमर्थ आराधित नत्वस्माभिः यतो नो विहायेत्यादि ततश्च राधयतीति राधेति नामव्यक्तीबभूवेति मुनिः प्रयत्नेन तदीयनामाप्यधात् परं किन्तु तदास्यचन्द्रात् स्वयं निरेति स्म कृश तु तस्याः सौभाग्यं भेर्य्या इव वादनार्थं यद्वा हे अनयाः अतिमहीयस्या तया सह वृथैव साम्याहङ्कारादनीतिमत्यः नूनं हरिरयं राधितः राधामितः प्राप्तः शकन्ध्वादित्वात्पररूपं भगवान् सुन्दरः कामातुरः स्वकीर्तिप्रख्यापको वा भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वित्यमरः ईश्वरः युष्मान् वञ्चयितुं समर्थः यत् यस्मान्नो सुन्दरीर्विहाय गोविन्दः गास्तस्या इन्द्रियाणि रमणार्थं विन्दयतीति वा सः तस्याश्च पदचिह्नान्युज्ज्वळनीलमणितट्टीकादृष्ट्या लिख्यन्ते वामचरणे अङ्गुष्ठमूले यवः १ तत्तले चक्रं २ तत्तले छत्रं ३ तत्तले वलयं ४ अङ्गुष्ठतर्जनीसन्धिमारभ्य यावदर्द्धचरणमूर्ध्वरेखा ५ मध्यमातले कमल ६ तत्तळे ध्वजः सपताकः ७ तत्तले वल्ली ८ पुष्पं च ९ कनिष्ठातलेऽकुशः १० पार्ष्णावर्द्धचन्द्रः इत्येकादश ११ दक्षिणचरणे अङ्गुष्ठमूले शङ्खः १ तत्तले गदा २ कनिष्ठातले वेदी ३ तत्तले कुण्डलं ४ तत्तले शक्तिः ५ तर्जन्याद्यङ्गुलितले पर्वतः ६ पर्वततले रथः ७ पार्ष्णौ मत्स्य इत्यष्टौ ८ मिलित्वा एकोनविंशतिः ॥ २८ ॥

रसिकाह्लादिनी–टीका

एतावत्पर्यन्तं स्वस्वमत्यनुसारेणान्योन्यसम्मतिमन्तरेणाचेतनेषु प्रश्नं लीलानुकरणं च कुर्वाणा मृग्यमाणा आसन्। इदानीं वधूपददर्शनेन बहूनां संचारिभावानामुदयात् आर्त्तिभराक्रान्ता निर्णेतुमिच्छन्त्योऽन्योन्यं पृच्छन्ति। कस्या इति एतानि पदानि कस्याः पत्न्याः श्रीकृष्णस्य स्नेहातिशये। ननु भवतीभिः कथं लक्षितस्तत्राहुः। नन्दसूनुनेति, परदुःखानभिज्ञत्वं सूचितम्। अस्मत्संगपरित्यजनेन सहायतया प्रभुसम्माननेनास्मत्संकोचोऽपि तया न कृत इति भावः। अंसन्यस्तप्रकोष्ठायाः तेनैव स्वांसे न्यस्तः प्रकोष्ठो चलस्थानं यस्याः। तत्रोत्प्रेक्षन्ते दूरदेशपरिभ्रमणेन श्रीकृष्णाङ्गसंस्पर्शजनितसात्त्विकभावोदयेन चाङ्गशैथिल्ये जाते श्रीकृष्णेनैव स्वांसे प्रकोष्ठं न्यसनं कृतं तत्पदानामसमग्रत्वादसम्यग्धारणाच्चेति भावः, यद्वा तस्या एवैतानि पदानि तस्या एवांऽसे न्यस्तः श्रीकृष्णेन स्थापितः प्रकोष्ठो मणिबन्धस्थानं यस्यां तस्या स्पर्शेन सात्त्विकभावोदयात्संवलत्पदपंक्त्यालिंगेन तस्यां प्रेमातिशयो जात इति भावः। यदि भावैकतानता नाभविष्यत् तदा सात्त्विकभावेन स्तम्भनप्रतिबद्धो नाभविष्यत् इति। क्रियानिष्पत्या ज्ञायते

सबलन्तत्पादगतितयैव नीत इति । न चास्मद्यूथाद्विच्युता काचिदिदानीमेव संगतेति वाच्यं यतोऽसौ विलासमन्तरेणापि अन्तर्ध्यानसामर्थ्यं जातमिति चित्रं तत्रानुरूपं दृष्टान्तमाहुः स्पर्शसुखं गज एव जानाति अतस्तं दृष्टान्तीकुर्वन्ति करेणोःहस्तिन्याः स्कंधे करिणा हस्तिना हस्तो यथा न्यस्यते तद्वत् । करेणोरङ्गसंगेन करिणा यथा सुखं प्राप्यते तद्वदिति वा, अतोऽस्मद्यूथमध्यस्थैव तेन सहैव काचिद्गता तस्या एव पदानि बहुशो दृष्टचराणि परिचीयतामित्यर्थः ।। २७ ।। इदानीं स्वमिन् दोषसद्भावं चाकलय्य परित्यागलिङ्गेन तस्यां दोषाभावं गुणसद्भावं चाकलय्य परिग्रहलिङ्गेन तस्याः सौभाग्यं बहुधा वर्णयन्त्योऽन्योन्यमाहुः । अनयेति यया सहान्तर्हितस्तयानयेति अङ्गुल्या पदपंक्ति दर्शयित्वाहुः यस्या एतानि पदानि इति नूनं निश्चयेन ईश्वर आराधितः ईश्वराराधनाच्च सौभाग्या जाता । कीदृशी हरिसम्बन्धेन सर्वसौख्यविशिष्टा यद्यस्माभिराराधितस्तथापि तया प्राप्तमाराधनफलं यत् तदस्माभिः प्राप्तमिति प्रकारविशेषाज्ञानात् अनाराधित एवाभावात् यतोऽस्माभिर्विरहदुःखमनुभूयते । यद्यस्माभिराराधितो भविष्यत् तदास्माकं विरहजनितदुःखं नाभविष्यदिति । क्रियातिवत्यानुमीयते । यतो नोऽस्मान् विहाय गोविन्दः गोकुलेन्द्रः सर्वत्र समोऽपि प्रीतः स्वां प्रीतिं प्रकटयन् यां रहः अस्मत् दृगगोचरे देशेऽनयत् प्रापितवान् । यथा अनया अयमेव गोविन्दः नूनं निश्चयेन पूर्वमाराधित इदानीमपि । कीदृशः भगवान् रसैश्वर्यवान् , यद्वा भगो भाग्यं तद्वान् नन्दपुत्रत्वात् सर्वसुखपूर्णः, हरिः दावाग्निपानादिना सर्वव्रजस्य दुःखहरणशीलः ईश्वरः 'कर्त्तुमकर्त्तुमन्यथा कर्त्तुं समर्थः । तथाहि यूथशो मिलितासु मधुररसं सञ्चारयितुं समर्थत्वात् मूल्यमन्तरेण दासी भवितुमागतानामस्माकं दास्यमङ्गीकर्त्तुं समर्थत्वात् इति । अस्माकमेतद्वैपरीत्यं जातं तुल्यत्वेऽपि गोविन्दस्य गुणाः यथा त्वेन तस्मादनुकूलाः जाताः । अस्माकं दौर्भाग्येन प्रतिकूलाः जाता इति । तया कृते गोविन्दाराधने ज्ञाते सति अस्माभिरपि तथानुष्ठेयमिति तात्पर्यार्थः ।। २८ ।।

विशुद्धरसदीपिका

किमब्रुवन्नित्यपेक्षायामाह । कस्या इति । सामर्षोक्तिः चकारः समुच्चयार्थः नन्दसूनुनेति बालत्वसूचकेन पदेन प्रेमानभिज्ञत्वं द्योतितं तत एव नन्देति सावज्ञोक्तिरपि । याताया इति । कर्त्तरि क्तः ततश्च स्वयमेव याताया न तु तेन नीताया इत्यर्थः । एवं चासूया व्यञ्जिता तथा अंसेन्यस्त न्यासीकृतः नतु दत्तः प्रकोष्ठो विस्तृतकरो नतु बाहुरित्यर्थः । ततश्चौदासीन्यमेव विशदीकृतं वस्तुतस्तु अंसे न्यस्तोऽर्पितः प्रकोष्ठोऽर्थात्तेन यस्यास्तस्याः इदं यद्यपि रसविशेषेणैव तथापि मदनालसत्वने स्खलितगतेस्तस्या अबलम्बनदानेन सुखगमनाय दूरनयनाय चेति गजगामित्वं दृष्टान्तयन्ति करेणोरित्यादिना ।। २७ ।। इत्थन्तासां सासूयोक्तिमसहमानास्तदेकप्राणां प्राणसख्यस्तासां क्षोभाय किञ्चित्प्रकाश्याहुः । अनयेति । अहो कस्या इति किन्तत्परिज्ञानेन या कापि परमसौभाग्ययती सर्वाभिरप्यस्माभिः परिचरणीयेत्याशयेन गोप्यः किमाचरदित्यादिवत्तद्भाग्यमभिनन्दन्ति अनयेति सर्वं वाक्यं सावधारणमिति न्यायादनयैवेत्यर्थः । नत्वस्मदादिभिरिति निर्वेदः राधितः पूजितः नूनं वितर्के निश्चये वा कोऽसौ हरिः सर्वदुःखहर्त्ता भगवान् श्रोनारायणः ईश्वरः भक्तेष्टप्रदानसमर्थः तत्र हेतुः यदित्यादि गोविन्दो गोकुलयुवराजः नः अस्मान् प्रेमातुरास्तदेकपरा अपि विशेषेण बुद्धिपूर्वकं हित्वा यामनिच्छतीमपि स्वयमेव रहः अस्माभिरप्यलक्ष्ये देशे ऽनयत् तत्कुतः यतः प्रीतः प्रेमपरवानित्यर्थः । यद्वा यो हरिरीश्वरो भगवानित्यादिनामभिः श्रीभागवतादिषु प्रसिद्धः सर्वस्य वशी सर्वस्येशान इति स एष वामनीत्यादिना श्रुतिशिरोभिरपि गीतः नारायणसमो गुणैरित्याभियुक्तोक्त्यास्माभिरपि निर्णीतः स चानया सह यातया राधितः वशीकृतः सन् गोविन्दः श्रीवृन्दावनेश्वरीत्वादस्यास्तस्य च वृन्दावनेश्वरत्यादिति भावः । वृन्दावने तु गोविन्दमिति वराहतन्त्रोक्तः इयमेव दैवीवागित्युच्यते यल्लीलायामपि प्रयुक्ता सिद्धान्तमेव प्रकाशयति अथवा अनया सह आराधितो गीविन्दः हरिः सर्वदुःखहर्त्ता अन्यथा सर्वकर्त्तेत्यर्थः तदुक्तं सम्मोहनतन्त्रे—

> गौरतेजो विना यस्तु श्यामतेजः समर्चयेत् । जपेद्वा ध्यायते वापि स भवेत्पातकी शिवे ! ।।
> स ब्रह्महा सुरापी च स्वर्णस्तेयी च पञ्चमः । एतैर्दोषैर्विलिप्येत तेजोभेदान्महेश्वरि ! ।।
> तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकमिति ।

अत्र ज्योतिरित्येकत्वनिर्देशाच्छक्तिशक्तिमत्त्वमपि निराकृतम्बोद्धव्यं तथा ईश्वरः सर्वविधानसमर्थः नान्यथा एतत्प्रसादोपनतमेवैतस्यैश्वर्यादिकमिति एकत्वेऽपि प्राधान्यं दर्शितं तथा भगवान् सकलैश्वर्य्यमाधुर्य्यप्रकाशकः यद्वा ईश्वरो हरिश्चेत्यैश्वर्य्यमाधुर्य्यप्रतिपादके विशेषणे वस्तुतस्तु अनया सह तया गोविन्दो भगवान् एतत्कृतैवास्य भगवत्तेति भावः । तथाराधितः राधामितः प्राप्त इत्यर्थः । द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरित्यनेन समासः यद्यपि श्रितादिषु इतशब्दो नास्ति तथापि द्वितीयेति योगविभागास्समासः ततः शकन्ध्वादिषु पररूपं वाच्यमित्यनेन पररूपमिति साधुः यद्वा राधामाख्यातवान् राधामाचष्टे राधयतीति वा राधितः राधीति धातोः क्ते इडागमे सिद्धः शेषं पूर्ववत् अथवा यत् यतोऽनयाराधितो वशीकृतस्तत एव भगवान् भाग्यवानित्यर्थः । अस्या वशवर्तितैव भाग्यं ननु निजस्य सर्ववशीकारित्वमिति भावः । तत एव हरिः मनोहरः अर्थादस्माकं ननु तस्याः प्रियसखीनां कथमसौ मनोहरः तथा सति कान्तभावस्फूर्त्या सख्यविरोधस्तत्राहुः ईश्वरः परमाराध्यः ननु प्रियः कान्त इति यावत् रसं मे राधाया

भजति किल भावो व्रजमणाविति श्रीसुधानिधेः रतिर्देवादिविषया भाव इति कविसमयानुसारेणेदं रसं सख्यमित्यर्थः स च भावस्तत्रैव यथा रसघनमोहनमूर्तिं विचित्रकेलीमहोत्सवोल्लासितं राधाचरणविलोडितरुचिरशिखण्डं हरिं वन्दे इति तदेवं पर्य्यायोक्त्या श्रीराधेयमिति व्यञ्जितं साक्षान्नामानुक्तिश्च विपक्षादिसमुदायगोपनीयत्वाद्रसिकानां मते व्यञ्जनाया एवमुख्यत्वं नतु मुख्याया इति सहचरीणामभिप्रायः श्रीहरेरात्मत्वेन वक्ष्यमाणायाः परब्रह्मभूताया मनोवचोऽगोचराया अनिर्देश्यत्वाद्गौरवाच्चा नामानुक्तिरिति श्रीमुनीन्द्राभिप्रायः आत्मना रमयेत्यन्यत्रापि आत्मनश्चानिर्वचनीयत्वेनैव कथनम् अवचनेनैव प्रोवाचेत्यादिश्रुतेरिति संक्षेपः ॥२८॥

श्रीरामनारायणकृता भावभावविभाविका

तद्वाक्यान्येवाह । कस्या इत्यादिना । तत्र प्रथमं परीक्षार्थं तासां परस्परवचनं कस्याः पदानीति भो सख्य ! एतानि सम्पदा मिश्रविपदा सदृशानि कस्याः पदानि ननु किन्तत्परिज्ञानेन तत्राहुः । नन्दसूनुना यातायाः । स्वसुखाय सर्वाः सखीः त्याजयित्वा स्वयन्तेन सह गतायाः नहि केवलं स्वनयनविलासविभ्रमैस्तन्मतिविभ्रमेण तन्नयनमपितु अंसन्यस्तप्रकोष्ठायाः हरिचन्दनभुजसदृशसचन्दनहरिभुजमूले न्यस्तो मणिधरनागिनी समासभूषणसमानप्रकोष्ठो यया तस्याः अनेन सर्वासां प्राणवल्लभं बलाद्वाहनात् कृष्णप्रणयनेन प्रणयपथविपरीताया इति ध्वनिः तत्र दृष्टान्तमाहुः । करिणा सह यातायाः करेणोर्यथा अत्र दृष्टान्तेन स्वीयमदमोहितत्वं स्पर्शसुखाधिक्येन विस्मृतसन्मर्य्यादतया पशुवृत्तित्वञ्च सूचितमिति केचित् स्वमते मात्सर्य्याभावेन प्रशंसैव तथाहि कस्याः पदानीति जिज्ञासायां निमित्तमाहुः । नन्दसुनुना याताया इति । अस्मासु मानकापट्येन प्रेमपथप्रच्युततया स्वदोषेणैव तद्वियुक्तास्वपि तस्यास्तत्कापट्यभावेन शुद्धप्रेमवत्यास्तत्प्रेमवश्येन रसिकशिरोमणिना नन्दसूनुना सह नीतायाः नन्वेवं सा निर्दोषप्रेमवती चेत्किमिति स्वसखीर्वर्जयित्वा गता तत्राहुः । अंसन्यस्तप्रकोष्ठायाः तेन प्रेष्ठतमेनांसे न्यस्तः स्वप्रकोष्ठो यस्या इति तथा च तत्पारवश्येनास्मत्त्यागेऽपि तया मानाभावेन रक्षिते प्रेमपथे सम्पादिते च तत्प्रसादेऽस्मद्भद्रमपि भविष्यति सह नयने दृष्टान्तः करिणा सह मिलितायाः करेणोर्यथा तदेतत् स्नेहाधिक्ये स्पर्शसौख्यभरेण गतिसौष्ठवे च दृष्टान्तः यद्वा कथम्भूतेन नन्दसूनुना तदाहुः यथा यथावत् करिणाह्लादामृतमयमतिहरस्मितसुधासीधुकरयुयुक्तचन्द्रमसा किम्भूतायास्तस्या करेणोः कं सुखं तद्रूपा रेणवः पादरजांसि यस्यास्तद्रेणुस्पर्श एवास्मत्सौभाग्यवर्धक इति भावः ॥ २७ ॥ तदनुष्ठानसौभाग्यातिशयाभ्यां तन्नामापि निर्द्धारयन्त्य आहुः । अनयेति । अनया नूनं भगवान् ब्रह्मा हरिर्विष्णुरीश्वरः शिवश्चाराधितो यद्यस्माद्देवत्रयवरेण गोविन्दो गवामिन्द्रो गोपालो नोऽस्मान् विहाय यां प्रीतो रहः अनयत् यद्वा अनयः कृष्णोऽनया राधितः ननयतीत्यस्तथाभूतोऽप्याराधितः यतोऽनयत्वेन नो विहायाराधितत्वेन यां रहः अनयत् यद्वा नो अनयः यथा स्यात्तथा आराधितः यद्वा अनयेनान्यायेन सख्यधर्मत्यागेनाराधितो यतो नयेन समानप्रेम्णा प्राप्तत्वेन नयनयोग्या नो विहाय अनयेन वैषम्यभावेन यां रहः अनयत् किञ्च गोविन्दोऽपि करुणया सर्वगोगोपगोपिकारक्षकत्वेन सर्वेश्वरोऽपि गवामिन्द्रत्वं गतोऽपि भगवानपि ज्ञानविरागधर्मयशः श्रीप्रभृतिपरोऽपि त्यक्तकारुण्यज्ञानविरागयशोधर्म्मादिमर्यादतया तस्या हरिः सह हरणशीलः पालकश्च न ईश्वरोऽन्यथाकर्तुं समर्थः संहारकश्च जात इति केचित् स्वमतेऽपि मात्सर्यास्वीकारात् अनयैव प्रेमातिशयवत्या भगवान् स्त्रीपारतन्त्र्यविरुद्धज्ञानाविरागयशोधर्मादिमानपि स्वयं सर्वमनोहरोऽपि ईश्वरः सर्वथा स्वतन्त्रोऽपि गोविन्दो गवामिन्द्रो गवामिन्द्रियाणामिन्द्रो हृषीकेशोऽपि नूनं निश्चितमाराधितो वशीकृतः यद्यस्मात् यत्प्रेमप्रभावाभिभूतरसप्रतिबन्धकहेयतापादकविरागधर्मादिमर्यादो नो विहाय यां रहः अनयत् इति तत्प्रेम्णैव रसपरस्तद्भृत्या नोऽपि भजिष्यति अत्र राधितः अनया इति राधेति नामापि दर्शितम् ॥ २८ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

यदब्रुवन् तदाह । कस्या इति । अहो लघुत्वनिम्नत्वादिचिह्नैश्चिह्नितानि स्त्रिया एतानि पदानि वर्त्तन्ते तथापि कस्याः अस्माकं मध्ये कस्याः न च ग्रामान्तरस्त्रियः यतः नन्दसूनुना सह यातायाः अन्यस्याः प्रेष्ठसाहित्यं न सम्भवति तथा च का वा निष्ठुरा प्रेष्ठमेकान्ते नीतवतो सा निश्चेतव्येति भावः । तत्रापि तेन स्कन्धे न्यस्तः प्रकोष्ठभागो यस्याः सा पदानि मनुपृक्तत्वादिदं ज्ञातवत्यः तच्च तस्यां रात्रौ सुखेन नयनार्थं दूरे बलान्नयनाय वा रसाभिव्यक्त्यर्थं वा तदनुरूपं दृष्टान्तमाहुः । करेणोः हस्तिन्याः करिणा हस्तिना यथा एतेन तस्यां तस्य प्रीत्यतिशयः काममदाक्रान्तत्वात्तदधीनता च ध्वनिता निवृत्तिपक्षे एतानि यथोक्तप्रत्ययेषु प्रविष्टानि पदानि कस्याः नन्दसूनुना परमात्मना सहितायाः प्रतिपादकभावेन सह प्रविष्टायाः तत्राप्यनेन परमात्मना अंसे शुद्धचैतन्यलक्षणे भागे न्यस्तः प्रकोष्ठस्थानीयस्तत्पादभागो यस्याः साहित्ये दृष्टान्तः तथा च का वा अहेतुप्रतिपादने समर्थेत्याद्याः ततस्ताः श्रुतयः युक्तवत्य इति भावः ॥ २७ ॥ तस्याः सौभाग्यमाहुः । अनयेति । तत्राभिज्ञापक्षे अनया तेन सार्धं यातया सख्या नूनं भगवानाराधितः यद्यप्यस्माभिरप्याराधितस्तथाप्यनया यथाराधितस्तथा नाराधितः फलवैलक्षण्यदर्शनात् नचास्माभिरपि तथैवाराधित इति भ्रमितव्यम् आराधनतारतम्यस्य तेन सम्यक् ज्ञात्वैव फलप्रदानाय प्रवृत्तत्वात् यतो भगवान् अत एव हरिः विलक्षणप्रेमवत्याः प्रेमसमानं सुखं दत्तवानिति तदीयदुःखस्य हर्ता ननु तदाराधनपराणामस्माकमन्तर्द्धानेन किमिति दुःखं दत्तवानिति चेत्तत्राहुः । ईश्वरः कर्तुमकर्तुमन्यथा कर्तुं समर्थः तत्कालिकं विलक्षणम् फलमावेदयन्ति । यस्मान्नोऽस्मान्सर्वा विहाय प्रीतः

सन् यां रह एकान्तमनयत् गोविन्दः साधारणोऽपि सर्वेन्द्रियग्राहकस्तस्या असाधारणो जात इत्यहो तस्या उत्कर्षातिशय इति भावः। अनभिज्ञापक्षे अनया जन्मान्तरे नूनं निश्चयेन हरिर्दुःखहर्ता महाविष्णुराराधितो नत्वस्माभिस्तत्रापि भगवत्त्वेनेश्वरत्वेन च यतोऽत्र भाग्यातिशयः परमस्वातन्त्र्यं च तथालब्धमित्याशयेनाहुः। भगवानीश्वर इति। यतः सर्वासां रक्षणेन लब्धगोविन्दानामपि नो विहाय प्रीतः यां रहोऽनयत् अनेन राधयत्याराधयत्याऽऽराध्यते वा राधेत्यर्थात्तन्नाम सूचितं तथाच तादृशी राधैवाऽतस्तस्या एव पदानीति किमर्थमसूयया कस्या इत्युक्तं भवतीभिरिति भावः। स्पष्टं नामाक्षरं प्रतिपक्षाणां गोपीनां राधाया वा सङ्कोचान्मुनिना तु ब्रह्मवैवर्तादौ तन्नाम्नः स्पष्टमुक्तत्वात्तत एव गोपीनामानि ज्ञातव्यानीति कस्या अपि नामानुक्त्या सूचितं परोक्षप्रिया हि देवा इति न्यायश्चानुसृतः एतद्ग्रन्थस्य गम्भीरार्थकत्वञ्च ध्वनितं मानिनीपक्षे हे अनयाः! परमोत्कर्षवत्याः स्पर्द्धाद्याचरणरूपान्यायवत्यः हरिः सर्वासां सामान्यतो मनोहर्ता श्रीकृष्णो राधितः पृथक्तया राधामेवेतः प्राप्तः शकन्ध्वादित्वात्पररूपं यद्वा राधा सर्वापेक्षयाधिक्येन प्रिया सा जाता अस्येति तारकादित्वादितच् यतो भगवान् कामातुरः श्रीमानिति वा कीर्तिमानिति वा—

भगः श्रीकाममाहात्म्यवीर्य्ययत्नार्ककीर्तिष्वित्यमरः।

तत्रापीश्वरः ग्रहणपलायनवञ्चनादौ समर्थः यद्यस्माद्गाः इन्द्रियाणि विन्दति विन्दयति वा गोविन्दः तया परस्परं रमणाभिलाषुः श्रीराधायाः पदचिह्नान्येकोनविंशतिसंख्याकान्युक्तानि तत्र वामचरणे यवं चक्रं छत्रं वलयोर्ध्वरेखाकमलध्वजवल्लीपुष्पाङ्कुशार्द्धचन्द्रा इत्येकादश दक्षिणचरणे शङ्खगदावेदीकुण्डलशक्तिपर्वतरथचमसा इत्यष्टौ निवृत्तिपक्षे तत्पक्षपातिन्यः "एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा नेह नानास्ति किञ्चने"त्याद्या आहुः अनया नूनं भगवान् जगत्पालकः हरिः संहर्ता ईश्वर उत्पादकः आराधितः प्रतिपादितः अखण्डैकरसस्य प्रतिपादनेन तत्त्वभगवत्त्वादेः प्रतिपादितत्वात् यद्यस्मात्सकलश्रुतिगम्यत्वाद्गोविन्दोऽपि प्रीतः सन् नो विहाय यां रहः अनयत् तज्जन्यचरमवृत्तिविषयत्वमगच्छदिति भावः॥ २८॥

रास–रहस्यम्

र टी०—करिणा सह गच्छन्त्याः करेणोरिव नन्दसूनुना जीवात्मना सह यातायाः प्रतिपाद्यप्रतिपादकभावेन सहप्रत्ययप्रविष्टायाः वृत्तेः, अंस इव अंशस्तस्मिन् न्यस्तः रक्षितः, प्रकोष्ठो कराग्रभागः किरणप्रकाशो यस्याः तस्याः कस्या एतानि पदानि उक्तप्रकारलाक्षक्षिकप्रत्ययानि इति, अस्माकं मध्ये कस्याश्चित् भविष्यति, इति प्रश्नस्यभावः॥ २७॥ "एतदात्म्यमिदं सर्वं।" "तत्सत्यं स आत्मातत्वमसि।" इत्यादिश्रुतिसिद्धया अनया आत्मना सहगतया आत्माकारप्राप्तया वृत्त्या नूनं अवश्यं भगवान् ब्रह्मा, हरिः, विष्णुः, ईश्वरः शिवश्च आराधितः पूर्वमुपासितः, पश्चात्तानेवात्मत्वेन प्रतिपादितः, यत् यस्मात् कारणात्, नो अस्मान् विहाय परित्यज्य, गोविन्दः गाः इन्द्रियाणि आत्मस्वरूपप्रदानेन पालयतीति, प्रीतः सन् प्रसन्नो भूत्वा, यां पूर्वोक्तवृक्तिं रह एकान्तमनयत् तज्जन्यचरमवृत्तिविषयत्वमगच्छदिति भावः॥ २८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अंसे स्कन्धे न्यस्तः प्रकोष्ठो यस्याः करिणा हस्तिना सह गच्छन्त्याः करेणोर्हस्तिन्याः यथा तथा नन्दसूनुना सह यातायाः॥ २७॥ यां रहः एकान्तं स्थानमनयत्तया नूनं निश्चितं हरिः खलु राधितः राधा सञ्जातास्य तथा तारकादिभ्य इतच् राधाकृष्णविहारे हेतुभूतेयमित्यर्थः। हेतौ तृतीया श्रीराधादासीप्राधान्यकथनं कैमुतिकन्यायेनास्या अतिप्राधान्यं द्योतयति विशेषतस्तया सह विहारोऽतिगोप्यत्वान्नोक्तः तस्याः स्वरूपादिनिर्णयः प्राचां ग्रन्थेषु द्रष्टव्यः॥ २८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अन्याः स्त्रियो विहाय यां कृष्णोऽनयन्निनाय वने सा च साऽपि सर्वगोपितां मध्ये आत्मानं वरिष्ठं मेने। आत्मशब्दो लिङ्गविवक्षया वरिष्ठमित्युक्तिः॥ २७॥ कामयानाः स्वं गोपीर्हित्वाऽसौ वासुदेवो मामतिभजते। कथान्तरारम्भं सूचयति हेत्यनेन प्रत्यारम्भे प्रसिद्धौ हेति यादवः। वनोद्देशं गत्वा दृप्ता ततः केशवमब्रवीत्॥ २८॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तासामसूयावाक्यान्याह। कस्याः पदानीति। पुरुषोऽत्र न संभाव्यते नापि ग्रामान्तरस्त्रियः अतोऽस्मन्मध्य एव कस्याश्चिद्भविष्यन्ति अयं प्रश्न इतरपरिच्छेदेन विशेषज्ञानार्थः नन्वत्र पदे लक्षणानि सन्ति चकाराद्भगवतः तस्याश्च चेष्टाज्ञापकानि चिह्नान्यप्युच्यन्ते सा हि नन्दसूनुना सहैव याता अन्यथा भगवान्न गच्छेत् तयैव प्रायेण नीतः स्वापेक्षया तस्याः महद्भाग्यमाहुः अंसे न्यस्तः प्रकोष्ठभागो यस्याः प्रकोष्ठभागो भगवदीयः करतलादर्वाचीनभागः तावता करेण कश्चित्सम्बन्धः सूचितः तावदेव नैकट्यं पदयोरिति किञ्च मध्ये तयोरसाविर्भावोऽपि जायत इति दृष्टान्तेनाहुः। करेणोः करिणा यथेति करेणोर्हस्ते करिणा यथा हस्तः प्रसायत इति करेणुः स्त्री तस्या अंसे यथा करी हस्तं प्रसारयति तथा पदानि मिलन्ति सम्मुखश्च भवति उद्घृष्टकण्ठो भवति

स्पर्शसुखमेव प्रधानमिति गजो दृष्टान्तीकृतः एवं त्रिविधा गोपिका उक्ताः ॥ २७ ॥ गुणातीताया वाक्यद्वयमाह दोषाभावप्रतिपादकं गुणप्रतिपादकञ्च तामसतामसा भगवदाविष्टा न भवतीति । अनयाराधित इति द्वाभ्याम् । तत्र प्रथमं तया सह विशेषरमणे तस्या भाग्यं हेतुत्वेनाहुः । अनया हरिर्नूनमाराधितः यद्यप्यस्माभिरप्याराधितः तथापि नूनं नाराधितः भगवदनाराधकैरपि फलत्वात् भगवतः सम्बन्धसम्भवात् आराधिते तु फले स्ववशे भवति तत्रापि तारतम्यं ननु तुल्यकर्मणां मध्ये कथमवान्तरभेदः तत्राहुः भगवानिति सामग्रीभेदात् कर्माणि सर्वत्र विलक्षणानि भवन्ति तदवान्तरवैलक्षण्यं स एव जानाति अतस्तथा फलनिरूपको जातः ननु तथापि वयन्तथा न ज्ञापनीयाः दुःखसाधकत्वादिति चेत्तत्राहुः । हरिरिति । स हि सर्वदुःखहर्त्ता वैलक्षण्यज्ञापनार्थं तथा बोधितवान् ननु भक्तिस्तुल्येति कथं भक्तानुसारेण तुल्यं फलं न कृतवान् तुल्यफलत्वेन कर्म कुतः स्वीकृतवान् तत्राहुः । ईश्वर इति । कदाचिद्भक्तिमुररीकरोति कदाचित्कर्म कदाचित्स्वेच्छां नहीश्वरो नियन्तुं शक्यः अस्मान् भक्तिमार्गे योजयति न कर्ममार्ग इति अत एव नः अस्मान्विहाय गोविन्दः साधारणेन्द्रोऽपि रह एकान्ते प्रीतः सन् तामेवानयत् कामरसः स्त्रीसमूहापेक्षयाप्येकस्यामेव मुख्यतयोत्पद्यते तथा करणे प्रीतिर्हेतुः प्रीतौ भक्तिः कर्म वा ॥ २८ ॥

श्रीसुबोधिनी-सारः

कस्या एतानि पदानि नन्दसूनुना कृष्णेनांसे स्कन्धोपरि न्यस्तः प्रकोष्ठो यस्यास्तस्या यातायाः प्राप्तायाः सह गच्छन्त्या वा इत्युत्तरमन्योक्तं करिणा हस्तिन्या इव ॥ २७ ॥ भगवनीश्वरो हरिर्नूनमनयाराधितः समर्चितः । यद्यतो नोऽस्मान् विहाय त्यक्त्वा प्रीतो गोविन्दो रह एकान्ते यामनयत् ॥ २८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

यातaया नन्दसूनुनेत्यत्र, प्रभोः सहभावोक्त्या गौणत्वेन सूचितमर्थमाहुः **तयैवं प्रायेणेति** ॥ २७ ॥ **भगवान्हरिरीश्वर इत्यत्र, वैलक्षण्यज्ञापनार्थमिति** । तादृशं कर्म स्वकृतमिति, स्वदोषज्ञाने मात्सर्यजं दुःखं भवतीति तथेत्यर्थः । **तुल्यफलत्वेनेति** । यादृक्कर्म तादृगेव फलमिति तुल्यफलकं कर्म भवति । तथा च यथास्मास्वपि कर्मवैलक्षण्येत्यस्मान् भक्तिमार्गेऽङ्गीकृतवानिति सा च तुल्यं फलं कृतवान्, तथा चेत्तामप्यङ्गीकुर्यात्तदास्मत्तुल्यैव भवेत् । तस्यामाराधनबललक्षणं कर्माधिकमस्तीति तां तन्मार्गे कुतोऽङ्गीकृतवानित्यर्थः । गोविन्दपदतात्पर्यनिरूपणे **साधारणेन्द्रोपीति** । यद्यपि 'इति गोगोकुलपतिं गोविन्दमभिषिच्य चे'ति वाक्यात् साधारण्येन सर्वस्यैव गोकुलस्येन्द्रः, न तु विशेषेणैकस्य कस्यचित् । अतस्तादृशस्यास्मदपेक्षया विशेषेणैकस्या भोगोऽनुचितः, तथापीश्वरत्वात्तथोपपद्यत इति भावः ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तद्वाक्यान्येवाह—कस्या इत्यादिभिः सार्द्धैरष्टभिः करिणा सह गच्छन्त्याः करेणोरिव नन्दसूनुना सह यातायाः तेनांसे स्कन्धे न्यस्तः स्थापितः प्रकोष्ठो यस्यास्तस्याः कस्या एतानि पदानि ? ॥ २७ ॥ तस्याः राधयति आराधयति इति राधेति नामनिरुक्तिमाहुः–अनयेति । अनया कृष्णेन सहागतया नूनं निश्चयेन हरिः भक्तदुःखहर्ता आराधितः । दुःखहरणे सामर्थ्यमाहुः–ईश्वर इति । तत्र हेतुमाहुः—भगवानिति । 'कुत एतज्ज्ञातम् ?' इत्यपेक्षायामाहुः—यदिति । यत् यस्मात् नोऽस्मान् विहाय प्रीतः सन् गोविन्दो यां रह एकान्तमनयत् । न त्वन्यनारीणामेवं तेन सह विहारः सुलभः सुकर इत्याशयः ॥ २८ ॥

अन्वितार्थप्रकाशिका

कस्या इति ॥ करिणा सह गच्छन्त्याः करेणोरिव नन्दसूनुना सह यातायाः तेनांसे स्कन्धे न्यस्तः स्थापितः प्रकोष्ठो यस्यास्तस्याः कस्या एतानि पदानि ॥ २७ ॥ अनयेति ॥ अनया कृष्णेन सहागतया नूनं निश्चयेन भगवान् ईश्वरः हरिः भक्तदुःखहर्ता आराधितः । यत् यस्मात् नोऽस्मान् विहाय प्रीतः सन् गोविन्दो यां रह एकान्तमनयत् । केचित्तु राधित इत्यापि छित्त्वा इतच्प्रत्ययेन व्याचक्षते । अनया गोप्या हरिः राधितः सञ्जातराधो राधाविशिष्टो जातः । पुष्पेण पुष्पित इतिवत् । राधा इति भगवन्नीतगोप्या नाम । अत्र ब्रह्मवैवर्तादौ प्रसिद्धमाहात्म्यायाः श्रीराधाया नाम्नोऽप्यकथनं तत्प्रतिपक्षाणां गोपीनां संकोचात् मुनिनाऽपि तन्नाम्ना स्पष्टमनुक्तिर्देवस्य परोक्षप्रियत्वादिति तोषिण्यामुक्तम् । वस्तुतो यथा गोपालतापिन्यां तदनुसारिणि गौतमीयतन्त्रे विष्णुपुराणे हरिवंशे च राधानामाकथनं तथा तापिन्यनुसारिणि श्रीभागवतेऽपि तदकथनं शैलीविशेष एव । न त्वकथने तात्पर्यविशेषकल्पना युक्ता ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नन्दसूनुना सह यातायाः गतायाः । तेन अंसे स्कन्धेन्यस्तः प्रकोष्ठो यस्यास्तस्याः करेणोर्गज्याः ॥ २७ ॥ प्रीतो गोविंदः यां रह एकान्तस्थानं प्रति अनयत् प्रापयत् नया अनया भगवान् हरिः नूनं निश्चितमेव अराधितः पूजितः यद्वा अनयाः हे अघटित-

मानवतः ॥ १ ॥ हरिः राधितः अत्र शकन्ध्वादित्वात्पररूपमार्जबराधया इतो युक्तो राधित इति निरुक्त्या राधायुक्तोऽस्तीति केचिद्वैष्णवावदन्ति ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह कस्या इत्यादिभिः सार्द्धैरष्टभिः ॥ कस्या इति ॥ करिणा हस्तिना सह, करेणोः हस्तिन्याः यथा, तथा नन्दसूनुना सह, यातायाः गच्छन्त्याः, अंसे स्कन्धे न्यस्तः प्रकोष्ठो यस्यास्तस्याः, कस्याश्चिद्वध्वाः, एतानि पदानि, हे गोप्यः, प्रश्यतेति शेषः। अन्यथैवंविधः पदानां संपर्को न स्यादिति भावः। च पादपूरणे ॥ २७ ॥ अनयेति ॥ अनया कृष्णेन सह यातया, भगवान् पूर्णषाड्गुण्यः, हरिः स्वाश्रितार्त्तिहरः ईश्वरो ब्रह्मादिशास्ता भगवान्, नूनं आराधितः पूर्वजन्मनीति शेषः। कुतः। यद्यस्मात्, नोऽस्मान् सर्वान् विहाय, गोविन्दः प्रीतः प्रीतियुक्तः सन्, यां प्रेयसीं, रहः अनयत् एकान्तमनयदित्यर्थः। न ह्यनाराधितेश्वराणां रहसि गोविन्दसङ्गः सुलभ इति भावः। यद्वा। हे अनयाः भगवतः पुरोऽपि मानाचरणेन नीतिवर्जिता मानिन्यः, भगवान् ईश्वरः, हरिर्मानिनां मानहरः कृष्णः, नूनं राधामितो राधितः स्वीकृतनिर्मानतां राधां प्राप्त इत्यर्थः। द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' इत्यनेन समासः। यद्यपि श्रितादिषु इतशब्दो नास्ति तथापि 'द्वितीया' इति योगविभागात् समासः। ततः 'शकन्ध्वादिषु पररूपं वाच्यम्' इत्यनेन पररूपत्वे साधुः। यद्यस्मादस्मत्कृतमानस्वीकाराद्धेतोः, नः मानवतीरस्मान्, विहाय परित्यज्य, गोविन्दः प्रीतो राधाया निर्मानतां विलोक्य प्रसन्नतां प्राप्तः सन्, यां निर्मानां राधां, रहः अनयत् ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अनयाराधित इति १०.३०.२८.

यन्नो विहाय भगवत्पदसक्तचित्ता नीतो वशं प्रभुरनेकविधार्जवेन ।
तत्प्रीतिकृत्स समभूदिति साधु किन्तु नाराधनं सखि विभाति न यानुगं तत् ॥ २१२ ॥
आराधनं सखि सदायफलं तदेव संजायतेऽच्युतपदस्य यदेव लोके ।
अन्याविरोधि सखि यः प्रकृते प्रकारस्तन्निर्मितः स न शुभावह एव वाच्यः ॥ २१३ ॥
कृताऽस्मद्वञ्चनो योऽयं प्रकारो दृश्यतेऽत्र हि । न तत्र हेतुः सा किन्तु स्पष्ट एवानयः सखि ॥ २१४ ॥
समानासु सतीष्वस्मास्वेषा वैषम्यधीः कुतः । जाता तस्य यतो ह्येषा रहस्थविरहस्थता ॥ २१५ ॥

कृष्णप्रिया

गोपियाँ ने कहा, श्रीनन्द कुमारजी के साथ पधारने वाली यह कौन सौभाग्य शालिनी सन्नारी होगी ! जिसके पद चिह्नों का दर्शन हो रहा है। इन पदों के दर्शन से यह माल्रूम हो रहा है कि जैसे कोई मत्तमातङ्ग मातङ्गिनी के कन्धे पर अपना हस्त रख कर चलता हो वैसे श्री नन्दकुमारजी ने इस वडभगिनी व्रजसुंदरी के कन्धे पर अपना प्रकोष्ठ (कोहिनी के नीचे का भाग) रखा है ॥ २७ ॥ अब दो श्लोकों से बड़भागिनी श्री स्वामिनी जी का सौभाग्य की प्रशंसा करने लगी कि, इस स्नेहमयी सौभाग्य शालिनी व्रज सुन्दरी ने निश्चय रूप से ईश्वर श्रीहरि भगवान श्रीकृष्णचन्द्र जी आराधन (सेवा) किया है, जिस सेवा के फलस्वरूप में भगवान गोविन्दजी हम सबको छोड़कर उसको एकान्त में ले गए हैं ॥ २८ ॥

धन्या अहो अमी आल्यो गोविन्दाङ्घ्र्यब्जरेणवः । [1]यान् ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तये ॥ २९ ॥
तस्या अमूनि न क्षोभं कुर्वन्त्युच्चैः पदानि यत् । [2]यैकापहृत्य गोपीनां रहो [3]भुङ्क्तेऽच्युताधरम् ॥ ३० ॥

कर्दमक्षमा

अन्वयः—अहो आल्यः ! अमी, गोविन्दाङ्घ्रि, अब्ज, रेणवः, धन्याः, अघनुत्तये, ब्रह्मा, ईशः, देवी, रमा, यान्, मूर्ध्नि, दधुः ॥ २९ ॥ तस्याः, अमूनि, पदानि, नः, उच्चैः, क्षोभम्, कुर्वन्ति, यत्, गोपीनाम्, (सर्वासां समानं श्रीकृष्णम्) अपहृत्य, या, एका, अच्युताधरम्, रहः, भुङ्क्ते ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे आल्यः सख्यः अहो धन्या अतिपुण्या गोविंदांघ्र्यब्जरेणवः। तत्र हेतुः। यानिति। अस्माभिरप्येतद्रेण्ववभिषेकेण तथैव कृष्णः प्राप्तुं शक्य इति भावः ॥ २९ ॥ अन्या आहुः। तस्या इति। गोपीनां सर्वस्वम्। अयं भावः। भवेदेवं यदि तस्याः पदानि संदृक्तानि न भवेयुस्तानि तु नो दुःखं कर्वंतीति ॥ ३० ॥

---

[1] यान् ब्रह्मेशादयो देवाः—वीर. ; यान् ब्रह्मणी दध्रमूर्ध्ना तद्‌तये—विज. ; यान्न ब्रह्मादयो देवाः प्राप्नुवन्ति चमूर्धतः—प्रा. पा.।
[2] एका—विज. । [3] धनं—वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'आलिः सत्रे सखीपंक्त्योः' इति यादवः। धन्या निरपेक्षाः स्वसङ्गि पुरुषाणां साधनान्तरं विनैव पावनसमर्थाः "निरपेक्षो गुणैः पूर्णो धन्य इत्युच्यते बुधैः" इति यादवः। तत्र धन्यत्वे। इति भाव इति-मूर्द्धिन धृतकृष्णपादरेणुना हतसर्वपापानां शुद्धान्तःकरणानां कृष्णप्राप्तिर्न दुर्घटेति तात्पर्यम्। इदं तटस्थानां वाक्यम्॥ तटस्थपक्षास्तु तत्रानवदधानाः कृष्णपदान्येवालक्ष्याहुः-धन्या इति। ब्रह्माद्या अघनुत्तये विच्छेददुःखापनयनाय यान्मूर्ध्ना दधुरित्यपराह्णे गोष्ठागमनसमये कृष्णसहचरबालकैः प्रत्यहं ते स्वर्गादवरुह्य कृष्णपादधूलिग्राहिणो दृश्यन्त एव, यद्वक्ष्यते-'वंद्यमानचरणः पथि वृद्धैः' इति, 'वन्दिनस्तमुपदेवगणा ये' इति च। वयं तु लज्जयैव यद्धत्तुं न शक्नुमस्तेनैवैतावदघं प्राप्नुम इति भावः॥ २९॥ अन्याः प्रतिपक्षाः। ननु कृष्णरेणुं धृतवतीनां कुतः शोकस्तत्राहुः-तस्या इति। अयं भाव इति-भवेदेवम् शोकाभावो नापि स्यात्, सपत्न्याः सुखं दुस्सहमित्यर्थः। अच्युतं सततस्यन्दमानामृतमधरमिति तस्याः सन्दश्याधरपातं संस्मृत्य नः क्षोभ इति॥ प्रतिपक्षसख्य आहुः-तस्या इति। उच्चैः कुर्वन्ति जनयन्ति। गोपीनां सर्वासामेवास्माकं भोग्याच्युताधरमेकैव रहश्चारयित्वा भुंक्ते, तयैव कामिन्या केनापि कर्मणैनं वशीकृत्यास्मान्प्रेमवतीत्या जयित्वा कृष्ण एतावद्दूरमानीत इति भावः॥ ३०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तटस्था आहुः। धन्या इति। अमी इमे आल्यः इति सम्बोधनं समदुःखत्वेन प्रायः सर्वासामेकभावात् सर्वासामेव युगपत् सम्बोधनं चमत्कारातिशयात्। दधुरिति अतीतनिर्देशो निश्चयज्ञापनार्थः। ब्रह्मादीनां यथोत्तरं श्रेष्ठ्यमूह्यम्। रमायास्तु विशेषणं तथापि श्रेष्ठ्यबोधनार्थं मूर्ध्नीति भक्तिभरं बोधयति। अघमपराधो विरहादिदुःखं वा। धन्यत्वे हेतुर्गोविन्दांघ्रीति सुपां सुलुगिति षष्ठीलुक् च्छान्दसः तत् सम्बन्धेन धन्या इत्यर्थः। अत एव यानिति अतो रेणवोऽपि तत्सम्बन्धलाभेन धन्याः वयन्तु तदभावात्ततोऽपि तुच्छा इति भावः। इयञ्च तत् पादरेणूनां माहात्म्यभावना प्रेमकृतैव। प्रमा ह्यसदपि माहात्म्यं स्फारयति किमुत सत्। ततस्तदतिशयस्तु तदतिशयमेव। यथादिभस्तच्चरिते। किम्बा अरे आचरितं तपस्तपस्विन्या यदियमवनिरित्यादि गद्ये तेन स्वमृगपदस्पर्शेन पृथिव्या भाग्यं वर्णितम्॥ २९॥ प्रतिपक्षा आहुः। तस्या इति। उच्चैरधिकम्। क्षोभं अतिदुःखम्। अपहृत्येति एकाकित्वेन रहसि भोगात्। यद्वा। चौर्येण तया मायाविन्या नीतत्वादेव सोऽस्मान् विहायात्रागतः। अन्यथा कथमागच्छेदिति भावः। गोपीनां सामान्यतः सर्वासाम्। अस्माकमेव धनमिति पाठः क्वचित्। सच प्रायः सर्वस्वमिति तेषां व्याख्यामवीक्ष्य। रह इति पाठस्तु सर्वत्र। अच्युतस्य तां त्यक्त्वाऽन्यत्र क्वाप्यगच्छतोऽधरमिति॥ ३०॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अमी इमे आल्य इति सम्बोधनम्। तत्र सर्व्वासामैकमत्यर्थं भक्तिविशेष-जननार्थं वा धारणे सर्व्वेषां प्राधान्यविवक्षया च-शब्दाप्रयोगेऽपि तेषां यथोत्तरं श्रेष्ठ्यमूह्यम्। कृष्णस्य पश्चात् पादाब्जरेणून् गृह्णन्तो ब्रह्मेशादयः सदैव ताभिर्दृश्यन्ते, अतो दृष्टमेव वर्ण्यते, न त्वैश्वर्य्याभिप्रायेण। देवीति श्रीवृषभानुगोपनन्दिनीव्यावृत्त्यर्थम्; यद्वा, तद्रेणुधारणेन लक्ष्म्यां भक्त्युदयेनोक्तम् -देवी पूज्येति; यद्वा, श्रीराधाया लक्ष्म्याश्च प्रायः पदानि तुल्यत्वात् सन्देहो व्यवच्छिद्यते—देवीति, देवीत्वेन लक्ष्म्या भूम्यस्पर्शत्वात्; यद्वा, देवी व्रजदेवी श्रीराधैव, मूर्ध्नीति भक्तिभरं द्योतयन्ति। अघमपराधो विरहादिदुःखं वा, अतस्तेऽनघा एव, अस्माकञ्च भक्त्या तद्धारणादघं मुक्तमेवेति भावः। अन्यत्तैर्व्याख्यातम्; यद्वा, रेणव एव धन्या उत्तमाः श्रीकृष्णरूप-परमधनदानयोग्या वा। यद्वा, अमी वैकुण्ठादौ वर्त्तमाना गोष्ठाङ्गनपतिता वा पूर्व्वदृष्टा वा। अस्याः पदैरसंपृक्तास्त एव धन्याः, एषा मात्सर्य्योक्तिः; यद्वा, इमे रेणव आल्यश्चेमा धन्याः, गोविन्द-नीतत्वाद्गौरवेण बहुत्वम्। एवं दृष्टान्तत्वेन रेणूनामिव तस्या अपि धन्यत्वमभिप्रेतम्॥ २९॥ श्रीचन्द्रावल्याः सखीनामुक्तिः—तस्या इति। उच्चैरधिकं क्षोभं वैकल्यं पूर्व्वोक्तधैर्य्यहानिं वा; यद्वा, उच्चैर्गर्व्वादुच्चतराण्यस्मान् मूर्ध्नोपर्य्यर्पितानि वेत्यर्थः। अपहृत्येति एकाकित्वेन रहसि भोगात्; यद्वा, चौर्येण तया नीतत्वादेव सोऽस्मान् विहायात्रागतः, अन्यथा कथमागच्छेदिति भावः। गोपीनां सामान्यतः सर्व्वासामेव; 'धनम्' इति पाठस्तेषां सम्मतः, सर्व्वस्वमिति व्याख्यानात्; अन्यथा गोपीनां भोग्यमित्येव व्याख्यातं स्यात्। अच्युतस्य तां त्यक्त्वान्यत्र क्वाप्यगच्छतोऽधरमिति; यद्वा, तस्मादच्युता अविच्छिन्ना सतीति चिरं भोगोऽभिप्रेतः, श्लेषेण च्युतोऽस्मन्मुखाद्गलितो योऽधरस्तमिति निजोच्छिष्टभोगस्तस्याः सूचितः। इमे रेणव आल्यश्चेमा धन्या इत्येतत्पक्षे उच्चैरस्मदतिक्रमणादुच्चान्यपि क्षोभं कुर्वन्ति किम्? काक्वा; अपि तु नैवेत्यर्थः। एवमेषा सर्व्वासामेवोक्तिर्ज्ञेया॥ ३०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

काश्चिदाहुर्धन्या इति। हे आल्यः! सख्यः! अमी गोविन्दस्य पादाब्जरेणवः धन्याः अहो तत्र हेतुः यानिति यान् गोविन्दांध्र्यब्जरेणून् ब्रह्मादयो देवाः अघनुत्तये गोविन्दप्राप्तिप्रतिबन्धकपापापनुत्तये मूर्ध्नि धृतवन्तः अस्माभिरप्येतदभिषेकेण

तथैव कृष्णः प्राप्तुं शक्य इति भावः ॥ २९ ॥ अन्यास्त्वाहुः । तस्या इति गोविन्देन सह याताया अमूनि पदानि नोऽस्माकम् उच्चैर्भृशं क्षोभं चित्तक्षोभं कुर्वन्ति तत्र हेतुः या स्वयमेकैव सर्वासां गोपीनां सम्बन्धि सर्वस्वभूतमच्युतस्याधरमधरामृतमपहृत्य रहसि भुङ्क्ते ॥ ३० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हे आल्यः ! सख्यः धन्या निरपेक्षाः आली सत्रे सखीपंक्त्योरिति यादवः । निरपेक्षो गुणैः पूर्णो धन्य इत्युच्यते बुधैरिति च ब्रह्माद्या मूर्ध्ना यान्दधुरिति यत्तस्माद्धन्या इत्यर्थः तस्माद्विष्णोरूतये अभिप्रायसिद्धये रक्षासिद्धये वा ॥ २९ ॥ ननु धन्यानां कृष्णपादतलयुक्तानां रेणूनां सन्दर्शनं युष्माकमभूदितः परं शोकस्य किङ्कारणमित्याशङ्क्य सत्यमथापि तदीयपदसम्पृक्तमन्यस्त्रीपदं संदृश्य संस्मृत्य महाशोको जायत इत्याशयेनाहुः । तस्या इति । गोपीनां मध्ये एका गोपी कृष्णमपहृत्य वशीकृत्य अच्युताधरम् अच्युतस्य हरेरच्युतं सन्ततस्यन्दमानामृतमधरोष्ठं रहो रहस्येकान्तदेशे भुक्ते यत्ततस्तस्या गोप्या अमूनि पदानि सदृश्याधरपानं संस्मृत्य उच्चैः क्षोभं चित्तविक्षेपं कुर्वन्ति तस्माच्छोक इत्यर्थः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

चरणरजोऽभिनन्दन्त्य ऊचुः—धन्या इत्यादि । अघं दुःखम्, तन्नुत्तये तन्नाशाय, धन्या सुखदा इत्यर्थः यान् ब्रह्माद्या मूर्ध्ना दधुः तस्माद्वयमपि तथा कुर्म इत्यर्थः ॥ २९ ॥ अन्याः काश्चिदूचुः—तस्या इत्यादि । एते रेणवो मूर्ध्नि धर्तुं युज्यन्ते एव; किन्तु तस्या अमूनि पदानि नोऽस्माकं क्षोभं कुर्वन्ति । तया किमपराद्धमित्याहुः—यैकेत्यादि । गोपीनां सर्वासामेव धनमच्युताधरमपहृत्य या एका सती भुङ्क्ते;—प्रधानाया नैतदुचितमिति 'नैकाकीमिष्टमश्नीयात्' इत्युक्तेः ॥ ३० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अघनुत्तये इति अघं दुःखम् तद्वयमपि गृह्णीमः, विशदज्योत्स्नायां स्पष्टमेव पद-लक्ष्म लक्ष्यते ॥ २९ ॥ तस्या अमूनीत्यादि । इयमन्यासामुक्तिः । एते रेणवो गृहीतुं युज्यते एव । किन्तु तस्या अमूनि पद-चिह्नानि नः क्षोभं यत उच्चैः कुर्वन्ति तस्मान्न ग्रहीतव्याः । तया किमपराद्धमित्याह—यैकेत्यादि । सा सर्वाधिका तयैव न गणितम्, कथमात्मसखीरिमाः स्वयमेकाहमस्य सङ्गे गच्छामीति एवं न गणयित्वा अच्युताधरं सर्वासामेव गोपीनां धनं 'धिविप्रीणने' इत्यौणादिक-प्रत्यये सिद्धम् । रहो रहसि एका सती भुङ्क्ते ॥ ३०-३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तटस्थपक्षास्तु तत्रानवदधानाः कृष्णपदान्यैवालक्ष्याहुः । धना इति । ब्रह्माद्या अघनुत्तये विच्छेददुःखापनोदनाय यान् मूर्ध्ना दधुरित्यपराह्णे गोष्ठागमनसमये कृष्णसहचरबालकैः प्रत्यहन्ते स्वर्गादवरुह्य कृष्णपादधूलिग्राहिणो दृश्यन्ते एव यद्वक्ष्यते वन्द्यमानचरणः पथिवृद्धैरिति वन्दिनस्तमुपदेवगणा ये इति च वयं तु लज्जयैव यद्धर्तुं न शक्नुमस्तेनैव तावदघं प्राप्नुम इति भावः ॥ २९ ॥ प्रतिप्रक्षसख्य आहुः । तस्या इति । उच्चैःकर्तुं जनयन्ति गोपीनां सर्वासामेवास्माक भोग्यमच्युताधरमेकैव रहश्चोरयित्वा भुङ्क्ते तयैव काभिन्या केनापि कर्मणैनं वशीकृत्य अस्मान् प्रेमवतीस्त्याजयित्वा कृष्ण एतावद्दूरमानीत इति भावः ॥ ३० ॥

रसिकाह्लादिनी-टीका

विरहार्त्तिभरेण विप्लुष्टचेतनास्तस्या भाग्यमभिनन्द्य गूढमात्सर्या तटस्थतावलम्ब्य परस्परं कथयन्ति धन्येति, हे आल्यः हे सख्यः इति सम्बोधने, रेणुधारणे सर्वसम्मत्यवधारणार्थं अहो इति दुर्लभलाभे । अमी वरिदृश्यमानाः गोविन्दस्य चरणाब्जसंबन्धिनो रेणवो धन्या उत्तमाः पुण्या इत्यर्थः । यद्वा धन्या धनवहा रेणुधारिणो धनलाभो भवति । अत्र धनं किं रतिसुखं तदस्माकं हस्ताद्गलितं एतद्रेणुधारणे तल्लाभो भविष्यतीति तात्पर्यार्थः । यान् रेणून् ब्रह्मा ब्रह्माण्डाधिकारी ईशः संहाराधिकृतः रमा लक्ष्मीः सर्वसम्पत्तिदानाऽधिकृता देवी द्योतमाना भार्यात्वात् । यान् रेणून् मूर्ध्नि दधुः धारयामासुः प्रयोजनमाहुः अघनुत्तये पापनशार्थं यद्यपि तेषां पापं विशेषतो नोपलभ्यते तथापि विचारयन्ति । तथाहि ब्रह्मणः पाप किं भगवत् प्रतिकुलेभ्योऽसुरेभ्यो वरदानं तल्लक्षणम्, रुद्रस्य पाखण्डप्रवर्त्तनलक्षणं पापं रमाया असुरराक्षसेभ्यो विभूतिवितरणलक्षणं पापं तस्या अपनुत्तये । यद्वा व्यभिचारिभावसृष्टत्वात् ब्रह्मणः पापं एतेषां भावानां तामसहराद्रुद्रस्य पापं अस्मत्सहाय्याकरणात् रमाया पापं एतेषाम् पापानां नुत्तये नाशाय । एते ब्रह्मादयो रेणून् दधुः । अस्माकं पापासम्भवात् किमर्थं धारयिष्याम इति भावः, यद्वा पुनरप्यात्मन्यार्थं सम्भाव्याहुः यथैते रेणुधारणेन निःपापाः जातास्तथा वयमपि अस्माभिरपि मानलक्षणमधमार्चारितस्य फल विरहदुःखमनुभूयते एतद्रसाभिषेकेन निः पापानामस्माकं स्वत एव विरहदुःखानिवृत्तिर्भविष्यतीति व्यञ्जितमिति ॥ २९ ॥ केवलस्य गोविन्दस्य पदाब्जरेणुनामेतादृशमाहात्म्यं तया सम्बलितस्य नैतादृशं परिणामविरसत्वात् मधुविषसम्पृक्तान्नवत् इति परीक्षन्त्य आहुः तस्या अमूनि पदानि नोऽस्माकं क्षोभं कुर्वन्ति विरहदुःखादप्यधिकं दुःखं ददातीत्यर्थः । यद्वा तस्याः पदानि उच्चैरिति श्रीकृष्णपदापरि

विलासविशेषेण निक्षिप्तानि नोऽस्माकं उच्चैरधिकं क्षोभं कुर्वन्ति । विरहदुःखादप्यधिकं दुःखं ददातीत्यर्थः । नोऽस्माकं क्षोभं धैर्यच्युतिं अन्वेषणप्रतिबन्धं कुर्वंति तत्र हेतुमाहुः यत् यस्मात् या एका गोपीनां सदा सुरक्षितमपि सर्वस्वं, चौर्येणापहृत्य रहः अस्मत्प्रवेशायोग्ये ऽच्युताऽधरं क्षणमपि विलासच्युतिरहितस्तस्याधरं अस्मानपृष्ट्वैव भुंक्ते इति साभिलाषेर्ष्यं वचनं अतो रेणुधारणमस्माकं नोचितमिति भावः ॥ ३० ॥

विशुद्धरसदीपिका

अथ तदुक्तौ किञ्चित्कृतावधानाः श्रीकृष्णैकतानाः श्रीराधिकामनुताटस्थ्यमवलम्बमानाः प्रेयसीआवाभिमाना आहुः । धन्या इति अहो आल्य इति तारल्यं तेनैता गोपकन्या इति गम्यते गोविन्दस्य गोकुलयुवराजस्येति सम्बन्धयोग्यता निगमगीत इति च माहात्म्याभिप्रायेण अङ्घ्रीति पातिव्रत्याभिमानेन अब्जेति सौन्दर्य्योक्तेः कान्तभावः सूचितः तत्सम्बन्धाद्रेणवः परागस्थानीया इति रूपकनिर्वाहः धन्याः अस्माभिरभिलषणीयाः यद्वा रेणवोऽपि तत्सम्बन्धलाभेन धन्याः तद्विरहिता वयं ततोऽप्यतितुच्छा इति दैन्यव्यक्तिः कीदृशाः यान् अनिर्वचनीय सौभाग्यान् ब्रह्मेशौ विख्यातौ यद्वा वदन्तीत्यादिश्लोकोक्तौ ब्रह्मपरमात्मानौ रमा देवी अन्तरङ्गा चिदानन्दात्मिकाचिन्त्यशक्तिः मूर्ध्नीति परमादरः अघनुत्तये अंहोदुःखव्यसनेष्वघमित्यनेकार्थात् यथायोगं तत्तदपनोदनाय इयञ्च तत्पादरेणूनां माहात्म्यभावना प्रेमकृतैव प्रेमा ह्यसदपि महात्म्यं स्फोरयति किमुत सत् यथा भरतचरिते किम्वाअरे आचरितं तपस्तपस्विन्येत्यादि सत्त्वञ्च लीलायां तत्र तत्रानुभूतत्वात् यद्वाञ्छया श्रीरित्यादिना पत्नीभ्यः श्रुतत्वादित्यनुसन्धेयम् ॥ २९ ॥ तस्याः प्रतिपक्षा आहुः । तस्या इति । पूर्वार्द्धं स्पष्ट तत्र यत् यतः येति सासूयन् एकेति मात्सर्य्यम् अपहृत्येति असम्मृतिः गोपीनामिति बहुवचननिर्देशेन भेदः सूचितः अच्युतेति विच्युयवराहित्येनान्यास्पृष्टत्वं रह इति स्वातन्त्र्य भुङ्क्ते नतु पिबति ततश्च पानातिशयः अधरमिति सम्भोगातिशयः धर्नामिति पाठः स्पष्ट एव यद्वा अच्युतेति गाढपरिरम्भेण यद्वा अच्युतस्य त्वया नित्ययुक्तस्येति वाग्देवी सूचितोऽर्थः ॥ ३० ॥

श्रीरामनारायणकृता भावभावविभाविका

कृष्णस्वरूपात्मिकाया लोके प्रमपथप्रवर्तनायैव परभक्तिरूपतया पार्थक्येनाविर्भूतायाः पादरजोदर्शनेन प्रवृद्धप्रेमोत्कर्षा रजो वर्णयन्ति । धन्या इति । हे आल्य इति सम्बोधनन्तु मात्सर्य्याद्यभावेनैकमत्या च परस्परमात्मवत्स्नेहाधिक्याल्लब्धतद्रजोदर्शनसौख्यस्यान्योऽन्यख्यापनाय सम्बन्धोक्त्या प्रीतिख्यापनेनोक्तार्थविश्वासाय च अहो इत्याश्चर्ये अमी इमे गोविन्दांघ्र्यब्जरेणवो धन्याः तद्धन्यत्वापादनायाहुः । यानिति । तत्र देवानामिन्द्रादीनां जीवत्वेन तैर्धारणेऽप्युत्कर्षाधिक्याभावादीश्वराणां ब्रह्मादीनां ग्रहणं तत्र रजोगुणाधिष्ठातेशो ब्रह्मा तमोऽधिष्ठातेशः शिवः सत्त्वाधिष्ठात्री रमा तत्रोपाधिगुणप्रयुक्ततदुत्कर्ष ज्ञापनाय देवी रजस्तमोवत्सत्त्वस्य विक्षेपावरणाभावात् द्योतनात्मिका नच ब्रह्मेशसहकारे विष्णोर्वक्तव्यतया रमोक्त्यनौचित्यमितिवाच्यं विष्णोरेव गोविन्दत्वेन तदङ्घ्रिरेणूनां तेनैव धारणोक्त्यसम्भवात् हरिर्हि निर्गुणः साक्षादित्यादिवाक्यैस्तत्र गुणविशिष्टत्वासम्भवेन निर्गुणे विष्णौ श्रूयमाणसत्त्वाधिष्ठातृत्वस्य तत्रासम्भवे सविशेषणेहीतिन्यायेनाङ्गावतरणन्यायेन च विशिष्टप्रधानयोः श्रूयमाणस्य तत्रासम्भवे विशेषणेऽङ्गे चावतरणवत्तच्छक्तौ रमायामेव कथनौचित्याच्च ते ब्रह्मादयो मूर्ध्नि दधुरिति रेणूनां धन्यत्वोत्कर्षस्तद्भक्त्युत्कर्षश्च दर्शितः अघनुत्तये इति प्रयोजनकथने तु नवै देवा पापान् स्पृशन्तीति श्रुत्या देवेषु तद्देहोत्पन्नापापास्पर्शेऽपि यथाकथंचिज्जन्मान्तरीयपापानां जीवत्वेन सम्भावनाभवेदीश्वरेषु तु सर्वथा तदनुपपत्तेस्तत्तदधिकारप्रयुक्तकर्मविक्षेपे सम्भावितकृष्णस्वरूपानतुसन्धानमेव पापत्वेन सम्भाव्य तदभावायेति मन्तव्यं यद्वा स्वभक्तानामघापनोदाय ब्रह्मेशयो रजस्तमोभ्यां तदसम्भवाद्रमायाः सत्त्वेन तत्सम्भवेऽपि बोधे भारतेरेव प्रमात्ववत्तदनन्वितसत्त्वस्याप्यकिंचित्करत्वात्तद्रजोधारणं रेणूनां तथोत्कर्ष हेतुगर्भितं तद्विशेषणं गोविन्दांघ्र्यब्जेति गोभिः श्रुतिशिरोभिर्विद्यते अविद्यानिरसनेनाविर्भाव्यते इति गोविन्दः "सर्वे वेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्यो वासुदेवपरा वेदा" इत्यादि श्रुतिस्मृतिभ्यः तस्याङ्घ्रि रेवाब्जं तद्रेणव इत्यङ्घ्रेरब्जतोक्त्या मृदुमञ्जुसुरभित्वं तत्सम्बन्धिरेणूनां च तदब्जपरागरूपतया तापहारित्वमिति ध्वनिः । रेणूनां लघूनां तदंघ्रिसम्बन्धेनैवेदृग्धन्यत्वं वयं तद्धीना मन्दभाग्या एव परन्तु ब्रह्मादीनां तत्सम्बन्धेनैवाघापनोदवद्वयमपि तद्धृत्यैव तद्वियोगदुःखहेतुमानाख्यपापमपनेष्याम इति भावः ॥ २९ ॥ ननु प्रथमं पदचिह्नदर्शनेऽपि नेदृग्धन्यत्ववर्णनं कृतं कथमधुनेदृक्तन्माहात्म्यस्फूर्तिस्तत्राहुः । तस्या इति । तस्या अतिविलक्षणरूपगुणप्रेमसमृद्धायाः सम्बन्धीनि अमूनि अस्मद्भाग्यात् प्रादुर्भूतानि पदानि पद्यते एभिरिति व्युत्पत्त्यैवेष्टप्रापकाणि नो मानादिदोषग्रस्तमनसामपि उच्चैः क्षोभमेवं माहात्म्यज्ञानपूर्वकतद्दर्शनात्युत्साहं कुर्वन्ति ननु किमेवं तस्या उत्कर्षो येन भगवतददर्शनादप्युत्साहवर्द्धनं तत्पदानां तत्र प्रेमोद्धर्षात् ध्यानेनैवाविर्भूतयुगलविहारमनुभवन्त्य आहुः । यैकेति । या सर्वासां गोपीनां मध्ये एका मुख्या यतः सर्वथा अच्युतस्य बहूनां नो हावभावकटाक्षैरपि च्युतिरहिततया विसृज्य गतस्याधरम्विचित्रप्रेमगुणमाहात्म्यादपहृत्य प्रेमगुणभुजदृढबन्धनेन बलादाकृष्य रह इति विक्षेपशून्यतयाभुंक्ते अन्यथा तदाविर्भावविना भुक्ते इति निश्चितवर्तमानोक्तिर्न भवेत् अतस्तत्पदान्याश्रित्य तत्कृपयोद्भूततादृक् प्रेमप्रभावादवे तत्प्राप्तिरिति भावः । विपक्षतयावस्थानन्तु परभक्त्या

चार्य्यभूतानां भगवदात्मिकानामस्पृष्टप्राकृतगुणानां मात्सर्याद्यसम्भवान्नो नो रोचते लोकविडम्बनेन भवतु वा तथाऽतो नो निरसिष्यामः ॥ ३० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तटस्थास्तु अहो किमर्थं विवादो भवतीभिरारब्धः सखीचरणोपरि दृष्टिमदत्त्वा भगवच्चरणरेणून् पश्यतेत्याहुः। धन्या इति। तत्रापि हे आल्यः! सख्यः गोविन्दस्य परमात्मनश्चरणकमले रणवोऽमी उपलभ्यमाना अहो आश्चर्यं धन्या अतिपुण्या यस्माद्यान् रेणून् ब्रह्मा ईशो महादेवः रमादेवी पालनशक्तिः अघस्य स्वस्वाधिकारे सम्भावितस्य दोषस्य विरहदुःखस्य वा निवृत्तये मूर्ध्नि दधुः तथा च तद्वियोगजनकदोषनिवृत्तये तद्धारणं कर्तव्यमिति भावः। स्ववचसि विश्वासार्थं सम्बोधयन्ति हे आल्य! इति अनभिज्ञापक्षे अहो तत्स्पर्शाभावे रेणुतोऽपि वयं तुच्छा इति भावः। प्रेम्णोऽसतोऽपि माहात्म्यस्य स्फोरकत्वस्वाभाव्यात्प्रेमकृतैवेयं रेणुमाहात्म्यभावना यथा भरतेन किं वा अरे आचरितमित्यादिना मृगपदस्पर्शेन भुवो भाग्यं वर्णितं मानिनीपक्षे यथा रेणवस्तथात्माप्यतो नास्ति मात्सर्य्यकृत्यमिति भावः। निवृत्तिपक्षे सत्यं ज्ञानमनन्तं ब्रह्म सर्वं खल्विदं ब्रह्म तज्जलान् इति शान्त उपासीतेत्याद्यास्तटस्था आहुः। हे सख्यः! अहो अमी गोविन्दस्यौपनिषदस्य परमात्मनो विसम्बन्धिनः तद्ध्यानास्पदस्य रेणवस्तत्रस्थाः शुभ्राश्चित्तप्रत्यया धन्याः यतस्तथाभूतान्प्रत्ययान्ब्रह्मादयो देव्याः वेदशरीरायाः सरस्वत्याः मूर्ध्नि मस्तके दधुः वेदान्तार्थाखण्डचिदेकरसपरमात्मस्वरूपानुसन्धानपराः समाधिस्था बभुवुः अघस्य विक्षेपस्य निवृत्तये ॥२९॥ पुनस्तत्प्रतिपक्षा अहो किमुच्यते भवतीभिः समाहितमनसामियं कथा ननु क्षुब्धचित्तानामित्याशयेनाहुः। तस्या अमूनि अशक्यदर्शनानि पदानि नोऽस्माकं वियुक्ताना मुच्चैः क्षोभं–दुःखव्याकुलतां जनयन्ति यतो या सर्वासां गोपीनां समानमच्युताधरमेकापहृत्य तत्रापि रहसि स्थित्वा भुंक्ते ननु वः स्त्रीसम्बन्धवशादुपरतिं प्राप्तस्य भगवतः कुतोऽधरामृतदानाय प्रवृत्तिः सम्भाव्यत इत्याशङ्कानिरासायाच्युत इत्युक्तं तथा चाऽप्रच्युतस्य नास्ति विरतितासम्भावनेति भावः। यद्वा तद्विरहदुःखादप्यस्माकं तस्यास्तत्संयोगजन्यं दुःखं महद्दुर्लभमित्यच्युतपदेन ध्वनितं न मानप्रच्युत इत्यर्थागमात् निवृत्तिपक्षे पुनस्तद्विरुद्धार्थका आहुः। तस्या उक्तश्रुतेरुच्चैः सर्वोत्कृष्टत्वेनानुसधीयमानानि पदानि नः क्षोभं स्वार्थप्रच्युतिलक्षणं जनयन्ति यतो यैका सर्वासां श्रुतीनां प्रतिपाद्यमर्थमच्युताधरमेकरसानन्दस्वरूपं रहो भुक्ते तत्तत्प्रतिपाद्यतद्वैशिष्ट्यादर्थाद्विशेष्यमात्रमपहृत्य सर्वविशेषविनिर्मुक्तं प्रतिपादयतीत्यर्थः ॥ ३० ॥

रास-रहस्यम्

र० टी०—हे आल्यः! हे सख्यः! अमो गोविन्दांध्यब्जरेणवः गोभिः श्रुतिशिरोभिः "सत्यं ज्ञानमनन्तं ब्रह्म।" "सर्वं खल्विदं ब्रह्मतज्जलानिति शान्त उपासीत।" इत्यादिभिः विन्दते अविद्यानिरसनेनाविर्भाव्यते इति गोविन्दः परमात्मा तस्य अङ्घ्रिः पादः किरणं, कथम्भूतं अब्जरेणव इव "यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ति स्वरूपाः।" अहो आश्चर्यं, धन्याः अतिपुण्या यान् यानि किरणानि, अघनुत्तये विक्षेपनिवृत्तये, ब्रह्मा सृष्टिकर्ता, ईश संहर्ता, रमादेवी चेति एतेऽपि मूर्ध्नि शिरसि दधुः वेदान्तार्थाखण्डचिदेकरसा बभूवुः इति यावत् ॥ २९ ॥ सर्वासां वृत्तीनां सर्वस्वं एकमात्रप्राप्तव्यमच्युताधरं "रसो वै सः।" इति एकरसानन्दं, एका एवापहृत्य तत्तत्प्रतिपाद्य तत्तद्विशिष्टात् विविच्य अर्थात्निर्विशेष्यमात्रमर्थं गृहीत्वा, रहो एकान्ते, विक्षेपशून्यतया सर्वविशेषविनिर्मुक्ता सती या भुङ्क्ते स्वस्वरूपानन्दमनुभवति तस्याः सत्त्वगुणसमृद्धायाः आत्माकारवृत्ते यत् यानि, अमूनि पदानि पद्यते एभिरिति व्युत्पत्या श्रुत्युक्तानि "सर्वे वेदा यत्पदमामनन्ति।" इति पदानि, तानि नो अस्माकं सगुणपराणामुच्चैः भृशं क्षोभं स्वार्थप्रच्युतिलक्षणं दुःखं, कुर्वन्ति जनयन्तीत्यर्थः ॥ ३० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

धन्या इति। सर्वतीर्थतीर्थभूतानां ब्रह्मेशरमाणां तीर्थभूताः सर्वतीर्थेभ्यः उत्कृष्टा इत्यर्थः ॥ २९ ॥ यत् यस्मात् ॥ ३० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अहं चलितुं न पारये न समर्था यत्र ते मनस्तत्र मां नय। एवमुक्तः स्कन्धे आरुह्यतामिति प्रियामाह ॥ २९ ॥ सा वधूरहन्ता सहिताऽन्वतप्यत सन्तप्ताऽभवत्। अनुतापप्रकारमीरयति ॥ हा नाथेति। सखे ते तव दास्याः कृपणाया मे सन्निधिं विद्यमानस्थानं दर्शय ॥ ३० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं तस्या भाग्यमभिनन्द्य मात्सर्येऽपि गूढे तथा वचनं भवतोति स्वभाग्यभिनन्दनमप्याहुः। धन्या इति। अहो आश्चर्य हे आल्यः! सख्यः अमी अंघ्रिरेणवो धन्याः मात्सर्याभावार्थं चैतदुच्यते यथा रेणवः तथा सेति विश्वासार्थमप्रतारणार्थञ्च सम्बोधनम् अनेन रेणूत्कर्षेण रेणव एव धार्याः स्वदोषनिवृत्त्यर्थमित्युक्तं भवति पूर्वमत्रैवैते रेणवः स्थिताः न तदा तेषामुत्कर्षः यदा पुनश्चरणसम्बद्धास्तदा धनमर्हन्तीति धनं कृष्णः यथेन्द्रो देवानां यथा धनेन सर्वविषयप्राप्तिः एवं प्रभुणापि तेषां धन्यत्वमुपपादयन्ति यानिति ब्रह्मा ईशः रमा च देवता रूपा पालिका शक्तिः तेषां स्वस्वाधिकारे दोषसम्भवात् तन्निवृत्त्यर्थं मूर्ध्नि दधुः ब्रह्मा-

नन्दरूपाया निवृत्त्यर्थं देवतापदम् अतः कारणादेतद्धारणेन वयमपि निर्दुष्टाः नीयमानगोपिका तुल्या भविष्याम इति ॥ २९ ॥ अन्या रजःप्रकृतय आहुः। तस्या इति। भगवच्चरणारविन्दरजस्तथैव परमस्याः गोपिकाया अमूनि पदानि सङ्गं गच्छन्त्याः नोऽस्माकं क्षोभं कुर्वन्ति तत्राप्युच्चैरत्यर्थं नन्वेकाकी भगवान् गच्छेत् तदपेक्षया ससहायः भक्तिमार्गे युक्त इति चेत्तत्राहुः। यद्यस्मात् गोपिकानां सर्वासामेव भोगरूपमच्युताधरं ता विहाय एकैवोपभुङ्क्ते तत्रापि रहः एकान्ते तासामनुज्ञाव्यतिरेकेण ननु विरतो भगवान् बहुस्त्रीसम्बन्धाद्भविष्यति कुतः सा भोक्ष्यते तत्राहुः। अच्युतेति। स हि पूर्णकाम एव न तस्य च्युतिरस्ति ॥ ३० ॥

श्रीसुबोधिनी-सारः

हे आल्यः सख्यः अमी गोविन्दस्यांघ्र्यब्जयोः पादपद्मयो रेणवो धन्याः। अहो यान् रेणून् ब्रह्मा ईशः शिवः रमा देवी मूर्ध्नि शिरसि दधुः। अघस्य पापस्य नुत्तयेऽपनोदार्थम् ॥ २९ ॥ अन्याः समत्सर। ऊचुः। तस्या अमूनि पदानि उच्चैर्नोऽस्माकं क्षोभं कुर्वन्ति यत् यस्मात् गोपीनां सर्वस्वं श्रीकृष्णमपहृत्य या एका रह एकान्तेऽच्युताधरं भुङ्क्ते ॥ ३० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

धन्या अहो इत्यस्याभासे, स्वभाग्याभिनन्दनमपीति। चरणसम्बन्धाद्रेणूनां धन्यत्वोक्त्या स्वस्यापि तथात्वात्तथात्वमायातीति तथा ॥ २९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र काश्चिदाहुः—धन्या इति। विश्वासार्थं सम्बोधयन्ति—आल्यः हे सख्यः! अमी गोविन्दस्य अङ्घ्रिरेवाब्जं तद्रेणवः अहो धन्याः सर्वपुरुषार्थप्रदाः। तत्र ज्ञापकमाहुः—यानिति। यान् रेणून् अघनुत्तये पुरुषार्थप्रतिबन्धकदोषनिवृत्तये ब्रह्मादयोऽपि मूर्ध्नि दधुः। अतोऽस्माभिरप्येतद्रजोभिषेकेण कृष्णः प्राप्तुं शक्य इत्याशयः ॥ २९ ॥ अन्या आहुः—भवत्वेवम्, तथापि सर्वासां गोपीनां सर्वस्वमच्युताधरं कृष्णाधरामृतमेकैव अपहृत्य रहः एकान्ते या भुङ्क्ते तस्याः यत् यानि अमूनि पदानि तानि नोऽस्माकमुच्चैः भृशं क्षोभं दुःखं कुर्वन्तीत्यन्वयः ॥ ३० ॥

अन्वितार्थप्रकाशिका

धन्या इति ॥ हे आल्यः सख्यः! अमी गोविन्दस्य अङ्घ्रिरेवाब्जं तद्रेणवः अहो धन्याः अतिपुण्याः यान् रेणून् अघनुत्तये ब्रह्मा ईशश्च देवीं रमा चेत्येतेऽपि मूर्ध्नि दधुः ॥ २९ ॥ तस्या इति ॥ सर्वासां गोपीनां सर्वस्वमच्युताधरं कृष्णाधरामृतमेकैवापहृत्य रहः एकान्ते या भुङ्क्ते तस्याः यत् यानि अमूनि पदानि तानि नोऽस्माकमुच्चैः भृशं क्षोभं दुःखं कुर्वन्ति ॥ ३० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे आल्पो हे सख्यः अमी गोविन्दस्यांघ्र्यब्जयोः पादपद्मयोः रेणवो धन्याः यान् रेणून् अघनुत्तये पापनाशाय ब्रह्मादयो मस्तके दधुः अतोऽस्माभिस्त्ववश्यं शिरसि धारणीया इति भावः ॥ २९ ॥ अपरा ऊचुः तस्या इति तस्याः हरिणा सह गतायाः उच्चैः अधिकं क्षोभं दुःखं यत् यतः या गोपी एका अच्युतस्य महारसमयं अधरामृतम् अपहृत्य रहो गत्वा भुंक्ते तत्कथंभूतं सर्वासां गोपीनां भाग्यरूपम् ॥ ३० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

काश्चिदन्या आहुः ॥ धन्या इति ॥ हे आल्यः सख्यः, अमी गोविन्दाङ्घ्र्यब्जरेणवः श्रीकृष्णस्य पादकमलरेणवः, धन्याः। अहो, यान् गोविन्दाङ्घ्र्यब्जरेणून्, ब्रह्मा स्वयं पितामहः, ईशो योगेश्वरः स्वयं शिवः, देवी महापुरुषलक्षणैर्विद्योतमाना, रमा स्वयं लक्ष्मीश्च, अघनुत्तये कथञ्चिज्जाताघनिवर्त्तनाय, गोविन्दप्राप्तिप्रतिबन्धकपापापनुत्तये इत्यर्थः। मूर्ध्नि, दधुः धृतवन्तः। अस्माभिरप्येतद्रेण्वभिषेकेण तथैव कृष्णः प्राप्तुं शक्य इति भावः ॥ २९ ॥ अन्या आहुः ॥ तस्या इति ॥ तस्य गोविन्देन सह यातायाः, अमूनि पदानि, नोऽस्माकं उच्चैर्भृशं क्षोभं चित्तक्षोभं, कुर्वन्ति। यद्यस्मात्, या तेन सह गता प्रेयसी, एका स्वयमेकाकिन्येव, गोपीनां सर्वासां गोपीनां सम्बन्धि सर्वस्वभूतं, अच्युताधरं कृष्णस्याधरामृतं, अपहृत्य, रहो रहसि, भुङ्क्ते ॥ ३० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

धन्या अमी इति : १०.३०.२९.

गोविन्दादपि सख्यो गोविन्दाङ्घ्र्यब्ज रेणवो धन्याः। येऽस्मत्तापनिवृत्त्यै स्थिता न तद्वत्पलायनं चक्रुः ॥ २१६ ॥

तस्या इति : १०.३०.३०.

सत्सङ्गोऽपि विशुद्धश्चेदेव तोषाय जायते। सस्त्रीपदेशपादेक्षा-क्षोभकृत्तास्वभूद्यतः ॥ २१७ ॥

स्वत्यागतोऽपि बहुदुःखकरः सपत्न्यां प्रेमा प्रियस्य भवतीति निसर्गसिद्धा ।
स्त्रीणां स्थितिर्जगति ता अपि तत्कृतोपचाराङ्किताविनिदृशोऽतनुतापमापुः ॥ २१८ ॥
त्यक्त्वाऽप्तजातमनुगच्छति यो रमेशं स्वाध्वग्रगः स इति भुव्यविवादसिद्धे ।
तां तादृशीमपि तु ता विनिनिन्दुरेतद् बीजं सपत्नदृगशेषगुणापिधाना ॥ २१९ ॥
केकां वदन्ति जलदाधिकदीप्तिभाजस्ते तां रहस्थितिवशेन मुकुन्दपादाः ।
सा केति याऽऽत्महितमात्ररतिः किलास्मांस्तक्त्या ययावदयवत् सहयं प्रलोभ्य ॥ २२० ॥
धन्येयमद्य सुलता भुवने यदस्यां भूयोऽनुरक्तहृदयोऽजनि माधवोऽपि ।
यद्वा समानगुणवत्यपि वस्तुजाते कस्मिंश्चिदेव रुचिरित्यनुभूतिसिद्धम् ॥ २२१ ॥

कृष्णप्रिया

अयि सखियाँ ! श्रीगोविन्द प्रभु के पदसरोज परागरेणु परम भाग्यशाली हैं जिन रेणुओं को श्रीब्रह्मा जी, श्रीमहेशजी एवं रमादेवी अधिकार संचालन जन्य सहन अपराधों के निवारण के लिए निज मस्तक पर निरन्तर धारण करते हैं ॥ २९ ॥ श्रीशुकाचार्य जी कहते हैं कि राजन् ! जो रजोगुणाविष्ट गोपियाँ थी उन्होंने कहा कि भगवान् श्रीकृष्णचन्द्रजी को अपने साथ ले जाने वाली गोपी के ये पैर पदचिह्न हमें अत्यन्त मनःक्षोभ कर रहे हैं—क्योंकि जो श्रीनन्दकुमारजी समस्त गोपीजन के हैं उनको उठा ले गई और अच्युत भगवान का दुर्लभ अधरामृत जो सर्व गोपीजन का है उसका वह व्रजनारी अकेली पान कर रही है ॥ ३० ॥

न लक्ष्यन्ते पदान्यत्र तस्या नूनं तृणाङ्कुरैः । खिद्यत्सुजाताङ्घ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ ३१ ॥
[1]इमान्यधिकमग्नानि[2] पदानि वहतो वधूम् । गोप्यः पश्यत कृष्णस्य भाराक्रान्तस्य[3] कामिनः ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—अहो ! अत्र, तस्याः, पदानि, न, लक्ष्यन्ते, नूनम्, तृणाङ्कुरैः खिद्यत् सुजायअङ्घ्रितलाम्, प्रेयसीम्, प्रियः, उन्निन्ये ॥ ३१ ॥ हे गोप्यः ! वधूम्, वहतः, भाराक्रान्तस्य, कामिनः, कृष्णस्य, अधिकमग्नानि, इमानि, पदानि, पश्यत ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदसम्पृक्तान्केवलं कृष्णपादरेणूनेव विचिन्वत्यस्तान्दृष्ट्वा पुनरत्यन्तं समतप्यंस्तदाह श्लोकत्रयेण । न लक्ष्यन्त इति । खिद्यती सुजाते सुकुमारे अंघ्रितले यस्यास्तामुन्निन्ये स्कन्धमारोपितवान् ॥ ३१ ॥ प्रपदाभ्यामाक्रमणं क्षोणीमर्दनं ययोः अत एवासकले पदे पश्यतेति ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदसम्पृक्तान् तस्याः पादैरमिश्रितान् । तत् तापमाह । उदूह्य नयनेन भूसम्बन्धाभावात्पदादर्शनमपि । शोकस्त्वेतादृशप्रेमा नास्मास्विति हेतोः ॥ भो मत्सरमहारोगग्रस्ताः मा खिद्यत नात्र तस्याः पदानि सन्तीति तस्याः प्रियसख्य आहुः–नेति । ताः प्रत्येव सहर्षापाङ्गमन्याः सख्यो नीचैः सवितर्कमाहुः–नूनमिति । उन्निन्ये भुजाभ्यामुद्गृह्य स्ववक्ष आरोहयामासेत्यर्थः । यतः प्रेयसीम् अतिप्रीतिविषयत्वात्तच्चरणखेदस्यासह्यत्वात् । इह खलु तत्सखीनामुभयविधं सुखं तस्यास्तादृक्सौभाग्यदर्मनोत्थम्, विपक्षाणां तादृशदुःखदर्शनोत्थं चेति ज्ञेयम् ॥ ३१ ॥ भो असमीक्ष्य भाषिण्यः मा खिद्यतेति किं ब्रूध्वे तत्पदानां दर्शनादप्यदर्शनमस्मत्प्राणानामदर्शनं संभावयतीति द्योतयन्त्यः प्रतिपक्षा आहुः–इमानीति । वधूमित्यनुपनीतेनापि कृष्णेन वनेऽत्र सा वधूरेव कृतेति भावः । तत्संकल्पेन तदैवागत्य ब्रह्मा तमुद्वाहं कारयित्वा तत्क्षणमेवान्तर्दधाविति ग्रन्थान्तरतोऽवसेयम् । ईश्वरत्वादेव सर्वसंस्कारपूर्णत्वेनोपनयनातिक्रमोऽपि । "वधूर्भ्रातृदत्तलाजा जुहुयात्" इति कृतपाणिपीडनायामेव वधूशब्दस्य गृह्यसूत्रे प्रयुक्तत्वात्, अन्यथा स्त्रियमेवेति योगीन्द्रः प्रवदेदिति ध्येयं सुज्ञैः । ये वदन्ति श्रीराधा श्रीकृष्णेन नोढा तेप्यनेन परास्ता इति । अत्र एव भाराक्रान्तस्य । गृहस्थाः खलु कलत्रभाराक्रान्ता इतस्ततो भ्रमन्त्येवेति भावः । कामिनः न तु प्रेमिणः । प्रेमवतीनामप्यस्माकं त्यागादित्यत एव काम एव तं तां वाहयेदन्यथा व्रजेन्द्रकुमारो ह्यतिसुकुमारो गोपालिकायाः कथं वाहको भवेदिति भावः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतावैष्णवतोषिणी

न लक्ष्यन्ते इति मत्सरोक्तित्वात् स्कन्धमारोपितवान् इति तैर्व्याख्यातम् । अत्र तान् दृष्ट्वेति तदसंपृक्तान् दृष्ट्वेत्यर्थः । यद्वा सख्योऽप्याहुर्नेति । सखीवाक्यत्वादेव खिद्यदित्यादि प्रेयसीम् अतिशयेन तत्प्रीतिविषयामित्यर्थः । उन्निन्ये हस्ताभ्यामङ्

---

[1] अयं सार्धोऽधिक इति केचन । [2] रमग्नानि–वीर. । [3] क्रान्तानि–वीर. विज. ।

विधाय निन्य इत्यर्थः । अथ प्रतिपक्षाः सासूयमाहुः । इमानीति । हे गोप्य ! इति विदग्धाभिर्युष्माभिरेतल्लक्ष्यत इति भावः । कामिनः केवलकामपरतन्त्रस्य न तु प्रेमरसविदग्धस्येत्यर्थः । पुनः सख्य आहुः अत्रेत्यर्द्धम् । महात्मना विदग्धशिरोमणिनेत्यर्थः । तदेतत् सार्द्धपद्यं कचिन्न दृश्यते च अतो नाङ्कः कृतः ॥ ३१ ॥ अथान्याः सख्य आहुरत्र प्रसूनेति । प्रेयसा अतिशयेन प्रीतिकर्त्रा । पूर्वत्र लिङ्गमाहुः । प्रपदे इत्यर्द्धेन । पदे इति प्रति पुष्पवृक्षमितिशेषः । अत एव बहुत्वं श्रीविष्णुपुराणे—

पुष्पावचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवम् । येनाग्राक्रान्तिमात्राणि पदान्यत्र महात्मन इति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उन्निन्ये स्कन्धमारोपितवानिति, (भा० १०।३०।३९) 'स्कन्ध आरुह्यताम्' इति वक्ष्यमाणानुसारेण तैर्व्याख्यातम् । प्रेयसीं प्रियतमां प्रिय इति पैशुन्योक्तिः । अन्त्यपक्षे चान्योऽन्यं प्रियत्वेन, तत्रापि प्रेयसीत्वेन सर्व्वाभ्यस्तस्यां प्रीतिरधिका सूचिता, अत उन्नयनं युक्तमेवेति भावः; यद्वा, उन्निन्य इति हस्ताभ्यामुत्थाप्याङ्के कृत्वा वा निन्य इति ज्ञेयम् । तथा सत्येव तादृशालिङ्गनादिरससम्पत्त्या प्रेयसीत्वं सुसिध्येदिति ॥ ३१ ॥ तल्लक्षणमाहुः—इमानीति । हे गोप्य इति विदग्धाभिर्युष्माभिरेतल्लक्ष्यत एवेति भावः । कामिन इति, अन्यथा तदसम्भवः, ईर्षोक्तिरेषा, वस्तुतस्तु कामयुक्तत्वेनैवाधिकात्मतदपेक्षा सूचिता, अन्त्यपलक्षे च तस्यामासक्तिरभिप्रेता । एतत् पद्यं बहुपुस्तकेषु न दृश्यते ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अन्या तु केवलमसम्पृक्तानि कृष्णस्यैव पदानि दृष्ट्वा सामर्षमाहुः । नेति । तस्या वध्वाः पदान्यत्र न लक्ष्यन्ते कुतः यतो नूनं तृणाङ्कुरैः खिद्यती सुजाते सुकुमारेऽङ्घ्रितले यस्याः तां प्रेयसीं प्रियः कृष्णः उन्निन्ये स्कन्धमारोपितवानित्यर्थः ॥ ३१ ॥ अपरास्तु सत्यमत एवाधिकमग्नानि पदानि पश्यतेत्याहुः । इमानीति । हे गोप्यः वधूं वहतो गामिनः गच्छतः कामिन इति पाठे कामिनोऽत एव वहतः कृष्णस्यात एवाधिकमग्नानीनि पदान्यत्र पश्यत ॥ ० ॥ काश्चिद्भूमिसम्मर्दमाळक्ष्याहुः । अत्रेति ! महात्मना कामिनात्र पुष्पहेतोः पुष्पावचयार्थं कान्ताऽवरोपिता अत्र तु प्रियार्थे प्रियामलङ्कर्तुं प्रेयसा कृष्णेन प्रसूनावचयः पुष्पलवनं कृतः अत एव प्रवदाभ्यां पादाग्राभ्यामुच्चप्रसूनावचयार्थमाक्रमणं ययोस्ते अत एवासकलेऽर्द्धमग्ने एते पदे पादाङ्कौ पश्यत ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

इदमधिकं शोककारणमित्याशयेनाहुः । नेति । नूनं तर्के एवं कथं तस्याः गोप्याः पदानि न लक्ष्यन्ते न दृश्यन्ते अदर्शने कारणमूहयन्ति । तृणाङ्कुरसम्बन्धेन खिद्यत्परिधातमाप्नुवत् सुजातं ळलितमङ्घ्रितलं यस्याः सा तथा तां प्रेयसीमुन्निन्ये उद्धृत्यानीतवान् उदूह्य नयनेन भूमिसम्बन्धाभावात्पदादर्शनमपि अत एव तादृशप्रेम नास्माकं प्राप्तमिति शोको ऽस्माकम् ॥ ३१ ॥ युष्मत्परित्यागवत्प्रेयसीपरित्यागेन गमनात्तत्पदादर्शनं किं न स्यादित्यतः कुत उद्धृत्य गमनमनुमीयत इत्यत एतल्लिङ्गमप्रतिहतमित्याहुः । इमानीति । धूमाग्न्योरविनाभाववत् भारवहपुरुषपदमज्जनं भारवहनाविनाभूतं प्रत्यक्षसिद्धत्वादूह्यागमनमनुमीयत इत्यर्थः । मानयितुं शीळमस्यास्तीति मानी तस्य अधिकश्रृङ्गारोक्तिरियम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

कियद्दूरं गत्वा न चलितवती, यतः तृणाङ्कुरैः खिद्यत्सुजाताङ्घ्रितलाम् । कथमनुमितम् तत्राहुः-न लक्ष्यन्त इत्यादि । प्रियत्वात् प्रेयसीत्वाच्च योग्यमेवैतत् ॥ ३१ ॥ हे सख्यः ! असिद्धोऽयं हेतुः,—सव्यभिचारात् । तत् कुतोऽत्यत्र गतेति तत्पदानि न लक्ष्यन्ते । तामुन्नयनान्नैवम्, पश्य पश्य व्यभिचार्य्येवायं हेतुः । तथाहीत्याहुः—इमानीत्यादि । अधिकमग्नानि बधुं वहतश्चेत्, यतो भाराक्रान्तस्य । वहने हेतुः—कामिनः । कियद्दूरमन्यतो गत्वा पदलक्ष्म प्रकाशन्तरमालोक्य सनिर्णयमाहुः—अत्रेत्यादि । प्रियार्थे प्रियानिमित्तमत्र स्थले तेन प्रसूनावचयः कृतः । तल्लिङ्गमाहुः—असकले खण्डे पदे पश्यत । कीदृशे ? प्रपदाक्रमणो प्रपदं तादाग्रं तेनाक्रमणमवष्टम्भनं ययोः ॥ ३२-३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भो मत्सरमहारोगग्रस्ताः मा खिद्यत नात्र तस्याः पदानि सन्तीति तस्याः प्रियसख्य आहुः । नेति । ताः प्रत्येव सहर्षापाङ्गमन्याः सख्यो नीचैः सवितर्कमाहुः । नूनमिति । उन्निन्ये भुजाभ्यामुद्गृह्य स्ववक्ष आरोहयामासेत्यर्थः । यतः प्रेयसीमतिप्रीतिविषयत्वात्तच्चरणतलखेदस्यासह्यत्वात् इह खलु तत्सखीनामुभयविधं सुखं तस्यास्तादृशसौभाग्यदर्शनोत्थं विपक्षाणां तादृशदुःखदर्शनोत्थं चेति ज्ञेयम् ॥ ३१ ॥ भो असमीक्ष्य भाषिण्यः मा खिद्यतेति किं ब्रूध्वे तत्पादानां दर्शनादप्यदर्शनमतिदुःखाकरमस्मत्प्राणानामदर्शनं सम्भावयतीति द्योतयन्त्यः प्रतिपक्षा आहुः । इमानीति । वधूमित्यनुपनीतेनापि कृष्णेन वनेऽत्र सा स्ववधूरेव

कृतेति भावः अत एव भाराक्रान्तस्य गृहस्थाः खलु कलत्रभाराक्रान्ताः इतस्ततो भ्रमन्त्येवेति भावः। कामिनः ननु प्रेमिणः प्रेमवतीनामप्यस्माकं त्यागादित्यत एव काम एव तं तां वाहयेदन्यथा व्रजेन्द्रकुमारो ह्यतिसुकुमारः किं गोपालिकाया वाहनो भवेदेति भाः॥ ३२॥

श्रीरसिकाह्लादिनी टीका

प्रदेशान्तरे गत्वा तान्यनालक्ष्य तर्कयन्ति। एतावत्पर्यन्तं तस्याः पदानि श्रीकृष्णपदैः सह समागतानि इतोऽग्रे न तल्लक्ष्यन्ते तत्र हेतुं कल्पयन्ति न लक्ष्यन्ते केवलस्य पदानि लक्ष्यन्तेऽतो रेणून् धारयिष्याम इति। लक्ष्यन्ते न तस्याः तत्र मात्सर्येण हेतुं कल्पयन्ति। बहुतृणवत्प्रदेशपरिभ्रमणेन तृणाङ्कुरैः खिद्यन्तौ सुजाते अङ्घ्रितले यस्यास्तामुन्निन्ये हस्ताभ्यामुत्क्षिप्यदुदूर्ध्वमुन्नीतवान्। तथा सत्कृत्यालिङ्गनचुम्बनादिसुखविशेषं दत्तवान्। स्वयमपि प्रियेति। ननु प्रभुश्चेत्कथमुन्निन्ये तत्राहुः प्रेयसीं मादृशीभ्यस्तस्यां प्रीत्यतिशयः सूचितः। स्वयमपि तस्याः प्रियः तस्याः अभीष्टसंपादनात् एवं सुदूरगमनेनान्योऽन्यं प्रीतिराविष्कृतेति भावः॥ ३१॥

विशुद्धरसदीपिका

तदुक्तिमसहमानास्तत्प्रतारणाय सुहृद आहुः। नेति। निषेधस्य प्राक्प्रयोगस्तदुक्तिप्रतिषेधाय नैवं वाच्यमित्यर्थः। अस्य देहलीदीपत्वेनाग्रेऽपि सम्बन्धः न लक्ष्यन्ते लक्षणैरपि न ज्ञायन्त इत्यर्थः। नूनं सम्भावयामः खिद्यती सुजाते सुकुमारे अंघ्रितले यस्यास्तां प्रेयसीं कोटिप्राणाधिकप्रियां प्रियस्तत्प्रेमाश्रयः उन्निन्ये अङ्के कृत्वा नीतवान् तत्र हेतुः। तृणेति। इदं प्रतीत्यभिप्रायेण वा प्रेमविवर्त्तेन वा श्रीवृन्दावनतरुलतातृणाङ्कुरादीनां तयोरिच्छया तत्प्रेमावेशेन च स्वीकृतजडीभावानां खेदप्रदत्वाभावात् सुजातेति सौहृदं सूचितम्॥ ३१॥ कान्तभावासाधकसहचर्य्यः सेर्ष्यमाहुः। इमानीति। हे गोप्य इति साधुविज्ञातं विदग्धाभिर्भवतीभिरित्यधीरत्वम् इमानि कृष्णस्य तत्प्रेमाकृष्टस्य पदानि अधिकमग्नानि पश्यत भाराक्रान्तस्येति सानुशयं यधूं वहतः देशान्तरं नयतः तत्र वधूमिति साभिलाषोक्तिः कामिन इति सासूयं ननु प्रेमविदग्धस्येत्यर्थः। वाग्देवी तु ततत्सेवैककामयितुः परमानुरक्तस्येत्यर्थः॥ ३२॥

श्रीरामनारायणकृता भावभावविभाविका

अग्रे तत्पदान्यदृष्ट्वा किन्तामपि कुत्रचित् त्यक्तवांस्तथाचेत्तादृश्यास्त्यागे नो नैराश्यमेवेति मुग्धभावेन खिद्यतीः प्रति काश्चित्सुज्ञा आहुः। न लक्षन्ते इति। अत्र यत्तस्याः पदानि न लक्षन्ते तेन न तत्त्यागः सम्भावनीयः परमदयालोर्भक्तवत्सलस्यानुरक्तत्यागानुपपत्तेरस्मदुपेक्षापि मानदोषपरिहारायैव किमिति तर्हि न लक्ष्यन्ते तत्राहुः। नूनमिति। निश्चितमेतत्तामुन्निन्ये आलिङ्गनसौख्यस्य मार्गेऽप्यनुभवायाङ्के उत्थाय नीतवान् करुणातिशयेन स्वोद्वहनेनापि भक्तातिसुखदातृत्वमूहित्वा भक्तदुःखासहिष्णुतां सूचयन्त्य आहुः। खिद्यत्सुजाताङ्घ्रितलामिति। खिद्यती सुजाते सुकुमारे आङ्घ्रितले यस्यास्तां ननु किमत्यानन्दघनस्यापि तत् दुःखदुःखित्वं तत्राहुः। प्रेयसीमतिशयेन प्रियतमां ननु समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रिय इति वदतस्तस्य कथं सा प्रेयसी तत्राहुः। प्रिय इति तथा च तस्य सर्वसमत्वेन रूपलावण्यादीनां तत्राकिञ्चित्करत्वेऽपि प्रेम्णा एवायं स्वभावो यदात्मारामस्य प्रेयसीत्वमापादयति—

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्। ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति॥

तेनैव प्रतिज्ञातत्वात्॥ ३१॥ इमान्यधिकमग्नानीति सार्द्धपद्यन्तु बहुपुस्तकेष्वदृश्यमानं श्रीश्रीधरस्वामिभिः श्रीवल्लभाचार्यैश्चाप्रामाणिकत्वेनाव्याख्यातं तोषणीकारैस्तु तद्बहिर्भूतत्वप्रकटनायव स्वग्रन्थे लिखित्वा तदेतत्सार्द्धपद्यं क्वचिन्न दृश्यते अतो नाङ्कः कृत इति लिखितमतोऽस्माभिरव्युपेक्ष्यतेतत्पदलापनिकात्वेवम्भाव्या "इमान्यधिकमग्नानिपदानि वहतो वधूम्। गोप्यः पश्यत कृष्णस्य भाराक्रान्तस्य कामिनः अत्रावरोपिताकान्ता पुष्पेहेतोर्महात्मना" कृष्णस्य नित्यानन्दस्वरूपस्यापि तदीयप्रेमभाराक्रान्तस्यात एवाकामत्वेऽपि सति प्रेमभाराक्रान्तत्वेनैव कामिनस्तमिवाचरतोऽत एव वधूं स्वां वहत इमानि पदान्यधिकमग्नानीति पश्यत अत्र च पुष्पहेतोस्तेन महात्मना सा कान्ता अवरोपिता उत्तारिता अग्रे पुष्पावचयचिह्नमवलोक्याहुः। अत्रेति। अस्मिन्प्रदेशे प्रेयसातिप्रेष्ठतमेन कृष्णेन नित्यनन्दस्वरूपेणापि प्रेमवशीकृतचित्तेन प्रियार्थ एव प्रसूनावचयः कृतः आप्तकामस्य भगवतः स्वार्थप्रवृत्त्यनुपपत्तेः प्रियार्थप्रवृत्तेस्तु तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमिति तेनैव प्रतिज्ञातत्वाच्च तत्र लिङ्गमाहुः। प्रपदेति प्रपदाभ्यामेवाक्रमणं ययोरत एवासकले भूम्यलग्नपार्ष्णिभागे पदे पश्यत तथा चैवं प्रेमाधीनभक्तवत्सलरसिकशिरोमणेरस्मदुपेक्षाऽसम्भवेऽपि स्वमानदोषकृतमेवावमानमनुभवाम इति भावः॥ ३२॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अहो मास्तु कलहस्तत्पदानि संप्रति न दृश्यन्त इति तटस्थाभिरुक्ते सति अहो सत्यं तत्पदान्यत्रास्मिन्प्रदेशे न लक्ष्यन्ते इति तद्वाक्ये सर्वाभिरङ्गीकृते तदन्तरङ्गाः काश्चित्सुहृद आहुः। नेति। अहो सा प्रेयसा विश्लिष्टेति न भ्रमितव्यं किन्तु तामुन्निन्ये

बाहुभ्यामुत्थाप्य स्वकटिभागे गृहीतवानतस्तस्याः पदान्यत्र न लक्ष्यन्ते एत्येवं निश्चयेन ज्ञातव्यम् उन्नयननिमित्तमाहुः । तृणाङ्कुरः खिद्यती यतः सुजाते अङ्घ्रितले यस्याः तां ननु एवं तर्हि स्कन्धमारोपितमिति कुतो न कल्प्यत इति चेत्तत्राहुः । प्रेयसीं रसाविर्भावकरीं खेदाद्य जनकं कटिभागारोपणमेव तादृश्या प्रेयस्याः समुचितमिति भावः ननु विश्रम्भं दत्त्वा तत्रैव कुतो न स्थितेत्याशंक्याहुः । प्रियः यतस्तस्या अपि सत्यविश्लेषे तथा परिरम्भणायाभीष्ट इति भावः । निवृत्तिपक्षे अहं ब्रह्मास्मीत्याद्यास्तदैकार्थप्रतिपादिका आहुः । तस्याः पदानि अत्राखण्डैकरसे परमात्मनि न लक्ष्यन्ते शक्तिवृत्त्या प्रवृत्तानि नोपलभ्यन्तेऽतो नूनं तृणाङ्कुरस्थानीयैर्वाच्यांशैः खिद्यती सुजाते एकार्थनिष्ठत्वात्समानाधिकरणभूते अङ्घ्रितले कोमलपदे यस्यास्तामुन्निन्ये ऊर्ध्वं शक्तिवृत्त प्राच्याः भागत्यागलक्षणया सर्वोत्तमं स्वरूपमानन्दैकरसमाशोचितवान् यतः प्रेयसीं प्रियः संसर्गासंगिसम्यक् ज्ञानदातृत्वात्प्रेयसीं स्वयं च तदैकपरस्तस्याः प्रिय इति भावः ।। ३१ ।। एतच्छ्रुत्वा अधिकमग्नानि प्रेष्ठपदानि च दृष्ट्वातिक्षुब्धस्वान्तास्तटस्थाभिमुख्यः प्रतिपक्षा आहुः । इमानीति । अहो सत्यमुक्तमेताभिर्यतो वधूं कामिनो ननु प्रेमिणः प्रेमवतीनामस्माकं त्यागात् कृष्णस्येमानि उपलक्ष्यमाणानि पदानि भाराक्रान्तानि यतोऽधिकमग्नानि पश्यत स्थित्वा विचारयत यतो भवत्यो विचारचतुरा इति गोप्य' इति सम्बोधनाशयः कामिन इत्यादिपदैरसूया व्यज्यते तथा च स्थूलदेहाया वध्वाः सकुमारशरीरिणोद्वहनं भारेण पीडाकरमत्यन्तकामिचेष्टितं पददर्शनादप्यधिकखेदकरमिति भावः । निवृत्तिपक्षे सर्वकाम इत्यादि श्रुतय आहुः । हे गोप्यः ! पालनशक्तिमत्परमात्मस्वरूपप्रतिपादनपराः यथोक्तश्रुतिलक्षणां वधूं वहतो यथोक्तरीत्या प्रतिपादकत्वेन धारयत इमानि कृष्णस्य सदानन्दविग्रहस्य सिसृक्षादिकामनाविशिष्टस्य पदानि ध्यानायोग्यधिकार्यन्तःकरणप्रत्ययलक्षणानि अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यत भाराक्रान्तानि यथोक्त श्रुत्यर्थवहनसमर्थानि पश्यत ।। ३२ ।।

रास-रहस्यम्

र० टी०—अत्र अस्यां स्थितौ तस्याः आत्माकारवृत्तेः श्रुत्युक्तानि पदानि अखण्डैकरसपरमात्मनि न लक्ष्यन्ते शक्तिवृत्त्या प्रवृत्तानि नोपलभ्यन्ते, अतः अस्मात् कारणात् नूनमवश्यं तृणाङ्कुरैः तत्स्थानीयवाच्यांशैः खिद्यति "लक्षणां विना अनुपपत्तिः खेदः ।" खेदं प्राप्नुवती, तथा सुजाते भागत्यागलक्षणया सुष्ठुः जाते, अघ्रितले समानधिकरणं पदे यस्यास्तां आत्माकारवृत्तिं आत्मवत् प्रियत्वात् प्रेयसीं प्रियः आत्मा स्वयं च तस्याः एकनिष्ठत्वात् उन्निन्ये ऊर्ध्वं नीतवान् , आत्मपदप्राप्तिरूपां सर्वोच्चपदवीं दत्तवान् ।। ३१ ।। हे गोप्यः ! हे वृत्तयः ! वधूमात्माकारवृत्तिं वहतः निरन्तरतैलधारावत् प्रवहतः भाराक्रान्तस्य ध्यानाभ्यासपरिपक्वावस्थां प्राप्तस्य, कामिनः आप्तकामस्य कृष्णस्यात्मनः घनीभूतानि इमानि पदानि ज्योतिषि पश्यत । अत्र अस्यां स्थितौ, महात्मना महांश्चासावात्मा चेति तेन, पुष्पहेतोः चित्तपुष्पस्य एकाग्रीकरणहेतोः, कान्ता आत्माकारवृत्तिः, अवरोपिता स्वात्मत्वेन प्रकटीकृता ।। ३२–३३ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

खिद्यती सुजाते सुकुमारे अंघ्रितले यस्यास्ताम् उन्निन्ये स्कन्धमारोपितवानित्यर्थः ।। ३१ ।। पुष्पहेतोः पुष्पावचयार्थमवरोपिता स्कन्धादवतार्य स्थापिता पुष्पाणामपचयः लवनं कृतम् अत एव प्रपदाभ्यां चरणाग्राभ्यामुच्चपुष्पावचयार्थमाक्रमण क्षोणीमर्दनं ययोस्ते अत एवासकले द्वे मग्ने एते पदे पादचिह्ने पश्यत कामः भक्तमनोरथपूरकः सङ्कल्पोऽस्यास्तीति तथा ।। ३२ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भगवतो मार्गमन्विच्छन्त्यो गोप्य इतरा अविदूरतः समीपे यद्विषय उन्निन्य इत्याद्यूहनं तां ददृशुः । रमणिरुचिररूपः किन्तु दूरे तवासीदित्यादिप्रश्नप्रतिवचनादिकं चोह्यम् । साऽप्यपूर्णमनोरथेत्याह । प्रियस्य विश्लेषेण मोहितां दुःखितां सखीमिति ।। ३१ ।। माधवा लक्ष्मीपतेः सकाशान्मानप्राप्तिं सत्कारस्वीकारं च तथा कथितं सर्वं तदनुभूतमाकर्ण्य श्रुत्वा दौरात्म्याद्धन्ताहेतुदुश्चित्तताया अवमानं हेलनं चाकर्ण्य परमं विस्मयं ययुः ।। ३२ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अन्याः पुनस्ततोऽपि खेदं कृतवत्य इत्याह । न लक्ष्यन्त इति । अहो किमिति विचार्यते अधरामृतम् पिबतीति एतावद्दूरे समागतानि तस्याः पदानि अग्रे न लक्ष्यन्ते न च वक्तव्यं समीचीनं जातमिति तत्राहुः तस्याः तृणाङ्कुरैः खिद्यत्पादतलं जातं तदा तादृशीमुन्निन्ये ऊर्ध्वं नीतवान् कटिभागे स्कन्धभागे वा वस्तुतस्तु हस्ताभ्यामेवोद्धृतवानिति सुतरां खेदे हेतुः ननु कथमेवं करिष्यतीत्याशङ्क्याहुः ! प्रेयसीमिति । साप्यत्यन्तं प्रिया स्वरूपमपि तस्याः प्रियः अतो ज्ञायते न सा स्कन्धमारूढा किंवा केवलमुन्निन्ये ।। ३१ ।। किञ्च तेन प्रकारेण न बहुदूरे गमनं सम्भवति, अतः क्वचिद्विश्रम्य पुष्पावचयमपि तदर्थे करोतीत्याहुः । अत्रेति । प्रसूनानामवचयः वृक्षादुत्तारणे न च स्वार्थं भविष्यतीति शङ्कनीयं सा हि श्रान्ता अतः प्रियार्थ एव सा तु कर्त्तुमशक्तैव तदाहुः प्रेयसा कृत इति सा हि–भगवदपेक्षया सर्वा प्रपदाभ्यामुत्थातुमप्यशक्ता अतः प्रेयसैव कृतः यतः प्रपदाक्रमणे पादाग्राभ्यामेवाक्रमणं ययोः अत एवासकले पार्ष्णिभागो नाभिव्यक्त इति पश्यतेति सन्देहाभावार्थं वचनम् ।। ३२ ।।

श्रीसुबोधिनी-सारः

अत्र स्थाने तस्याः पदानि न लक्ष्यन्ते। तृणाङ्कुरैः खिद्यती सुजाते सुकुमारेङ्घ्रितले यस्यास्तां प्रेयसीं प्रियः कृष्णः स्कन्धमारोपितवान् ॥ ३१ ॥ प्रियार्थमत्र प्रसूनानां पुष्पाणामवचयो राशिः प्रेयसा कृष्णेन कृतः प्रपदाभ्यामाक्रमणं क्षोणीमर्दनं ययोस्तेऽसकले खंडे पदं यूयं पश्यत ॥ ३२ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

एवं विचिन्वन्त्यस्ततोऽग्रे केवलं कृष्णपादरेणूनवलोक्यात्यन्तं तप्यन्त्य आहुः—नेति अत्र तस्या वध्वाः पदानि न लक्ष्यन्ते न दृश्यन्ते, अतो नूनं निश्चितं तां प्रेयसीं तस्याः प्रियः कृष्ण उन्निन्ये स्कन्धमारोपितवानित्यन्वयः। तत्र हेतुमाहुः-तृणाङ्कुरैः खिद्यती सुजाते सुकुमारे अङ्घ्रितले यस्यास्तामिति ॥ ३१ ॥ स्कन्धारोपणे लिङ्गमाहुः—इमानीति। हे गोप्यः! वधूं वहतः कृष्णस्याधिकमग्नानि भूमावधिकं प्रविष्टानि पदानि पश्यतेत्यन्वयः अधिकप्रवेशे हेतुमाहुः भाराक्रान्तेति। 'तथापि स्कन्धेन स्त्रीवहनं कथं शम्भवति?' इत्याकाङ्क्षयामाहुः—कामिन इति ॥ ३२ ॥

अन्वितार्थप्रकाशिका

नेति ॥ अत्र तस्या वध्वाः पदानि न लक्ष्यन्ते न दृश्यन्ते अतो नूनं निश्चितं तृणाङ्कुरैः खिद्यन्ती। शतार्षः। सुजाते सुकुमारे अङ्घ्रितले यस्यास्तां प्रेयसीं तस्याः प्रियः कृष्णः उन्निन्ये स्कन्धमारोपितवान् ॥ ३१ ॥ इमानीति ॥ असार्वत्रिकं पद्यम्। हे गोप्यो! वधूं वहतः भाराक्रान्तस्य कामिनः कृष्णस्याधिकमग्नानि भूमावधिकं प्रविष्टानि इमानि पदानि पश्यत ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्या गोपिकाया भूमौ पतितानि पदान्यदृष्ट्वा तपन्त्य ऊचुः नेति तस्याः अत्र पदानि अस्माभिर्न लक्ष्यते खिद्यंती सुजातेसु कोमले अंघ्रितले यस्यास्तां प्रेयसीं स्वाति प्रेष्ठा उन्निन्ये स्कन्धं स्थापितवान् ॥ ३१ ॥ अत्र स्थाने प्रसूनावचयः तरुभ्यः अंगुलिभिः पुष्पग्रहणं प्रपदाभ्यां पादाग्राभ्यां आक्रमणं भूसंमर्दनं ययोस्ते अतएवासकले अर्द्धे एते पदे यूयं पश्यत ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्याः केवलमसम्पृक्तानि श्रीकृष्णस्यैव पदानि दृष्ट्वा समार्षमाहुः ॥ नेति ॥ तस्याः प्रेयस्या वध्वाः, पदानि अत्र न लक्ष्यन्ते। कुतः। यतः नूनं तृणाङ्कुरैः खिद्यती सुजाते सुकुमारे अङ्घ्रितले यस्यास्तां, प्रेयसीं, प्रियः श्रीकृष्णः, उन्निन्ये स्कन्धमारोपितवानित्यर्थः ॥ ३१ ॥ अपरास्तु सत्यमेवात एवाधिकमग्नानि पदानि पश्यतेत्याहुः॥ इमानीति ॥ हे गोप्यः, वधूं स्वप्रेयसीं, वहतः गामिनः, वधूमुन्नीय गच्छत इत्यर्थः। कामिन इति पाठे, कामिनः कामाक्रान्तस्य, अत एव, वधूं वहतः भाराक्रान्तस्य कृष्णस्य श्रीकृष्णस्य, अधिकमग्नानि भाराक्रान्तानि, वधून्नयनसंभूतभारातिशयतया रेणुष्वधिकतया मग्नतां प्राप्तानीत्यर्थः। इमानि पदानि, अत्र पश्यत ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

न लक्ष्यन्ते इति : १०.३०.३१.

प्रभुसदयतेयमियती यदसह्यमभूत्तदङ्घ्रितृणदुःखम्। पश्यादयतामपि सखि सहेत याऽस्मद्वियोगतापमपि ॥ २२२ ॥

अत्रेति : १०.३०.३२.

यस्मिन्ननन्यमतयः खलु योगशक्त्या संयोजयन्ति सुमनांस्यवनौ मुनीन्द्राः।
स श्रीश एव सुमनःप्रचयं यदस्यां न्याधादतः स्फुटतया खलु धन्यताऽस्या ॥ २२३ ॥

कृष्णप्रिया

गोपियाँ परस्पर वार्तालाप करने लगीं देखो री? यहाँ तो भगवान को साथ ले जाने वाली गोपी पद चिह्न दिख नहीं पड़ते इससे यह निश्चय होता है कि उस गोपी के कोमल चरण तीक्ष्ण तृणाङ्कुरो से व्यथित हुए हैं इसलिए प्यारे श्यामसुन्दरने अपनी प्यारी को उठा लिया है ॥ ३१ ॥ प्रेयसी को उठाने का भार से आक्रान्त कामुक श्रीकृष्ण भगवान के भूमि में अधिक निमग्न पदों के दर्शन हो रहे हैं ॥ ३२ ॥

अत्रावरोपिता कान्ता पुष्पहेतोर्महात्मना।
अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः। प्रपदाक्रमणे एते पश्यतासकले पदे ॥ ३३ ॥
केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतम्। तानि चूडयता कान्तामुपविष्टमिह ध्रुवम् ॥ ३४ ॥

कर्दमक्षमा

अन्वयः—महात्मना, पुष्पहेतोः, अत्र, कान्ता, अवरोपिता, प्रेयसा, प्रियार्थे, अत्र, प्रसूनावचयः, कृतः, प्रपदाक्रमणे, एते, असकले, पदे, पश्यत ॥ ३३ ॥ अत्र, तु, कामिना, कामिन्या, केशप्रसाधनम्, कृतम्, तानि, (कुसुमानि) कान्ताम्, चूडयता, ध्रुवम्, इह, उपविष्टम् ॥ ३४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्याः कृष्णजान्वन्तरुपविष्टायाश्चिह्नं दृष्ट्वाऽऽहुः । केशप्रसाधनमिति । कान्तामधिकृत्य । तानि प्रसूनानि चूडयता चडानुकारेण बध्नता तेनेह ध्रुवमुपविष्टम् ॥ ३३ ॥ रेमे इत्यादिः शुकोक्तिः । आत्मारामः स्वक्रीडः । अखण्डितः स्त्रीविभ्रमैरनाकृष्टोऽपि तया रेमे । तथा चेत्किमिति रेमेऽत आह । कामिनामिति ॥ ३४–३५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

केशमार्जन्या केशसंस्कारः केशप्रसाधनम् । अत्र स्थले । कामिन्याः अतीवकमनीयायाः । कामिना पूर्णानन्दवतापि । ध्रुवम् निश्चितम् । तत्स्थलमधुना 'शृंगारवट' इति प्रसिद्धम् । सखीवाक्यमिदम् ॥ कृष्णजान्वन्तरुपविष्टायास्तस्याश्चिह्नं दृष्ट्वा पुनर्विपक्षा आहुः—केशानां प्रसाधनम् । अत्रत्यवनदेवतादत्तकङ्कतिकयेति बुध्यते । कामिन्याः न तु प्रेमवत्याः, स्वसखीरपि वञ्चयित्वा कामुकं नीत्वा रहोगतत्वात् । कामिना न तु प्रेमवता, प्रेमवतीनामप्यस्माकं विरहपीडानुसंधानात् । ततश्च तानि—तैः, प्रसूनैः केशैर्वा कान्तां कामिनी चूडयता नर्मणा पौरुषं व्यंजयितुं चूडावतीं कुर्वता इह ध्रुवमुपविष्टमिति । रहःकेलिवार्ताप्यभूदिति भावः । "विन्मतोर्लुक्" इति मतुपो लुक् ॥ ३३ ॥ तथा चेत् अनाकृष्टश्चेत् । तत्राशंकायाम् आह उत्तरं कामिनामिति । रेमे सुरतलीलामनुबभूव । आत्मनि स्वरूपानन्दे रतः । आत्मन्यारामः क्रीडा यस्य सः । "आत्मरत आत्मक्रीडः" इति श्रुतेः । अनेन विशेषणद्वयेन विटवृत्तिनिषेधोऽसूचि मुनिना । भगवत्प्रीतिसाधनभक्तिज्ञानादितारतम्यात्प्रीतितारतम्यं सूच्यतेऽत्र । तथा चान्या गोप्य इन्द्रियवृत्तयः, कृष्णनीता तु भक्तिर्बुद्धिर्वा ज्ञेया । बुद्धिमता तत्पदानि तत्तदर्थबोधकत्वेन योज्यानीति संतोष्टव्यम् । शोकादिकं च गुणनिमित्तमत एवाखंडित इत्युक्तम् ॥ तदेवं गोपीनामुक्तिभिरेष तस्याः सौभाग्यातिशयं दर्शयित्वा स्वयमपि तमुपपादयति रेम इति । आत्मारामोऽपि तया सह रेमे, तत्र हेतुः—कामिनामिति । 'स्वात्मरतः' इति पाठे आत्मारामशब्देन पौनरुक्त्यापातादेवं व्याख्येयम्—च एवार्थे । तयैव सहात्मना यत्नेन रतं रमणं यस्य सः 'आत्मा यत्नो धृतिर्बुद्धिः' इत्यमरः । आत्मारामतायां तादृशसुखलाभाभावादेव तावान्यत्न इति भावः । ननु तर्हि तस्याऽपूर्णत्वं प्रसक्तमतः अखण्डितः, तदपि पूर्ण एव न तु खंडितः तस्याह्लादिनीशक्तित्वेन स्वरूपभूतत्वादिति भावः । ह्लादिनीशक्तित्वमपि सर्वाह्लादसारो यः प्रेमा तस्यापि परमावधिर्यो महाभावस्तद्रूपत्वादेव हेतोर्भगवत आत्मारामत्वेन ह्लादमात्ररमणादपि ह्लादमहासारभूतया तया सह रमणस्याधिक्यमस्त्येव । तदुक्तं तत्र—"ह्लादिनी या महाशक्तिः सर्वशक्तिवरीयसी । तत्सारभूता राधेयम्" इति, "महाभावस्वरूपेयं गुणैरतिवरीयसी" इति चाततश्चात्मारामोऽपि तया सह स्वात्मरतः स्वात्मरतोऽप्यखण्डितः पूर्ण एव रेमे इत्यन्वयः । तेन च भगवत्तत्त्वानभिज्ञानां प्राकृतविवेकिनां हितं च तेभ्यः स्वविलासतत्त्वस्य गोपनं च चकारेत्याह—कामिनामिति । कामवशैः स्त्रीवशैश्च न भाव्यमिति लोकाञ्शिक्षयामासेत्यर्थः । कामवशत्वे सति पुमांसो दीनाः स्युर्दैन्ये च सति स्त्रियो दुरात्मानः स्युरित्यर्थं भगवान्भगवत्प्रेयसी च प्रमाणयति । यतस्ते इतस्ततो जल्पन्त उज्ज्वलप्रेमरसतत्त्वगोपनस्य हेतवो बभूवुरिति भावः । तथा दर्शयन्नेव प्रेमरसतत्त्वं च गोपयन्निति चैवशब्दाभ्यामेव व्याख्येयम् । यद्वा—कामिनां संबन्धे दैन्यं दर्शयन् 'आत्मवन्मन्यते सर्वम्' इति न्यायेन ये कामिनस्ते दीनमेवापश्यन् याश्च स्त्रियः कामिन्यस्ता दुरात्मानमेवापश्यंस्तत्प्रयोजकीभवन्नित्यर्थः । यद्वा—कामिनां दैन्यं दर्शयन्निति—कामिभिः सुरतप्रार्थनादिना दीनैर्भवितव्यं स्त्रीभिस्तत्रासंमत्या दुरात्मभिर्भवितव्यमिति दर्शयन् रसिकजनाञ्ज्ञापयन् । एवमेव रसपोषो नान्यथेति भावः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गर्भकाख्यमाल्यखण्डपतनं दृष्ट्वा पुनर्विपक्षा आहुः । केशेत्यर्द्धेन । तुशब्दो भिन्नोपक्रमे हीति पाठे निश्चयम् । प्रसाधनं प्रयोजनं सूचयन्ति । कामिन्याः कामिनेति । कामक्रीडासुखार्थमित्यर्थः । तादृशोपवेशं दृष्ट्वा सख्यस्त्वाहुः तानीत्यर्द्धेन । चूडयतेति ज्ञानन्तु स्वदेशे तादृशवेशस्य प्रायशो दृष्टत्वेति ज्ञेयम् ॥ ३३ । तदेवं श्रीगोपीजनमुखेनैव तथा सह तल्लीलां प्रशंस्य स्वयमपि प्रशंसति रेम इति । स्वैः स्वांशरूपैर्वैभवैः वैकुण्ठीयलक्ष्म्यादिभिर्गोष्ठसम्बन्धिप्रेयस्यादिभिश्च हेतुभिरपरापेक्षारहिततया तत्तदंशिनि आत्मनि स्वस्मिन्नेव रतः स्वेनैव पूर्णकाम इत्यर्थः । तादृशोऽपि तथा आत्मारामः स्वरूपानन्दावेशतत्पर इत्यर्थः । तादृशोऽपि तथा हेतुना रेमे तत्तदनादृत्य नन्दति स्म । तत्र हेतुस्तयेत्यर्थः । तच्छब्दस्य वक्तृबुद्धिस्थविलक्षण्यव्यञ्जकत्वात् सर्वाधिकतत्प्रेमाश्रयविषयरूपयेत्यर्थः । रेमे तया चात्मरत इति पाठे आत्मारामशब्देन पौनरुक्त्यापातात् तत्पूर्णकामात्मकत्वादेवात्मरत इति लभ्यते ।

चशब्दश्च यथा तया तस्य रमणं ताभिर्वितर्कितम्। तथा रेमे च इति बोधयति। तदेवमपि पूर्ववदेव विवक्षितम्। ननु ताभिर्लक्ष्म्यादिभिः प्र यस्यादिभिरपि तस्य रमणं दृश्यते तत्राह। अखण्डितः अनया हेतुना यथा ततस्ततः खण्डितः स्यात् स्वपतेः सकाशात् खण्डितानायिकावन्मनसा विच्युतः स्यान्न तथास्याः सकाशादयं लक्ष्म्यादिभिर्हेतुभि र्न कदाचिदपीत्यर्थः। अतः प्रेमनिर्जितत्वादनेन तस्यां स्वं सर्वं समर्पितमिति सूचितम्। तच्च प्रियजनप्रेमवशत्वं तस्य महानेव गुण इति पूर्वं बहुशो लिखितम्। श्रीभागवतामृते च विवृतम्। तदेवं तस्या एतादृश प्रेमा येन तादृशोऽप्यसौ वशीचक्रे तस्य चैतादृशः येन तादृशात्मारामतापि तिरश्चक्रे। तदेवं तादृशालम्बनस्वप्रेमवशत्वविहीनाः कामिनः कामिन्यश्च स्वमहिम्ना परास्ततया दर्शिता इत्याह। कामिनां दर्शयन्निति। अत्र कामिनामिति मलमूत्रादितया परिणामिभिरन्नजलादिभिस्तर्प्यमाणो यो देहस्तत्तर्पणेच्छारूपकामस्वभावानां नतु सच्चिदानन्दविग्रहतया स्वतस्तृप्तानां नतु वा प्रियजनतर्पणमात्रस्वसुखलक्षणप्रेमस्वभावानामित्यर्थः। तेषां दैन्यं दुर्गतत्वम्। तथा स्त्रीणामपि मलमूत्रेत्यादिलक्षणानां नतु तस्यापि रमणे हेतुतावगतसच्चिदानन्देत्यादिलक्षणानामित्यर्थः। तथा च तासां तद्विरोचनयोग्यता वक्ष्यते ताभिर्विधूतशोकाभिरित्यादिना। तदन्यस्त्रीणां दुरात्मतां तादृशदुर्गतनायकं वशीकृत्य हर्षगर्वादिदुष्टस्वभावतामित्यर्थः। तदुक्तं श्रीरुक्मिणीदेव्या त्वक्श्मश्रुरोमनखकेशेत्यादिना। अत्र श्रीकृष्णस्य तावद्वैलक्षण्यमुक्तमेव। याते पदाब्जमित्यादौ तद्वैलक्षण्यानुभवयोग्याश्च काश्चिदेव तद्वद्विलक्षणा एव भवन्ती च ज्ञापितम्। तदेवं तेषाञ्च दैन्यं तासां दुरात्मतां दर्शयन्निति दर्शयद्विधुपराजयं रमाबक्त्रानुल्लसति धृतलाञ्छनमितिवत्। सत्सुरसिजोदरश्रीमुषेति बच्च। वाग्भङ्ग्या स्वतस्तत्तन्निष्कर्षातिशय एव प्रतिपादितः। नतु बुद्धिपूर्विका तेन तद्दर्शना सति स्वात्मरतत्वादिके कामिदैन्यादि दर्शनार्थमुपहासकजनवत्तदनुकरणमपि न घटते इत्यन्यथा तु न व्याख्यातम्। भक्तप्रेमवशता तु नाहमात्मानमाशास इत्यादिषु बहुषु सम्मतैव ॥ ३४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पश्चादग्रे तस्याः पदानि वीक्ष्याहुः—अत्रेति। महात्मना विदग्धशिरोमणिनेत्यर्थः। श्लेषेण महान् पर्व्वतवत् स्थूल आत्मा बुद्धिर्यस्येतीर्ष्योक्तिः। इदं पद्यादूर्ध्वं क्वचिदेव दृश्यते। प्रियार्थे प्रेयसेत्यनेन पूर्व्वोक्तस्य प्रेयसीं प्रिय इत्यस्य वैपरीत्योक्त्या अन्योऽन्यं तुल्या एव प्रीतिः सूचिता; यद्वा, उन्नयनापेक्षया पूर्व्वं प्रेयसीमित्युक्तमिदानीञ्च प्रेयसेति प्रियतमत्वेन तया कृतेनादेशेन पुष्पावचयः कृत इत्याद्यभिप्रेतम्; तत्र 'पदे' इति द्वित्वं श्रीवृन्दावनवर्त्ति पुष्पवृक्षाणामेकतमस्यैकदेशे स्थित्यापि बहुलपुष्पावचयसिद्धेः, किंवा स्थाने स्थाने बहूनामप्युदितानां पदानामेकत्र द्विद्वि-दृष्टेः, अतएव श्रीविष्णुपुराणे—'पुष्पावचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवम्। येनाग्राक्रान्तिमात्राणि पदान्यत्र महात्मनः ॥' इति ॥ ३३ ॥ केशानां प्रसाधनं संस्करणं तच्च स्वांगुलिभिस्तदर्थात्मशिरोन्यस्त-कङ्कतिकया वा; तु-शब्दो भिन्नोपक्रमे, हीतिपाठे निश्चितं प्रसाधनप्रयोजनं सूचयन्ति–कामिन्याः कामिनेति कामक्रीडासुखार्थमित्यर्थः। किंवा पूर्वोक्तकामिन इतिवत् तु, ध्रुवं निश्चितमिति साक्षात्तल्लक्षणाभिव्यक्तेः ॥ ३४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तानि चूडयता शिरोभूषणं कुर्वता ॥ ३३–४२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

काश्चित्तस्याः कृष्णजान्वन्तरुपविष्टायाश्चिह्नं क्षोणीसम्मर्दनादिकमालक्ष्याहुः। केशप्रसाधनमिति। अत्र कामिना कृष्णेन कामिन्याः केशानामितस्ततो विश्लथतां प्रसाधनं पुनः सीमन्तसमीकरणाभ्यां बन्धनं कृतं कान्तामधिकृत्य तानि प्रसूनानि चूडयता शिरोभूषणं कुर्वता कृष्णेन नूनमुपविष्टम् ॥ ३३ ॥ १ इत्युक्तप्रकारेणैव प्रकारान्तरेणापि प्रळपनं कुर्वत्यः दर्शयन्त्य इति पाठे मिथः तल्लीला दर्शयन्त्यस्तच्चिह्नानि दर्शयन्त्यस्ता गोप्यस्तत्र तत्र विचेतस उन्मत्तचित्ता विचेरुः ॥ ० ॥ किं विचेतोभिर्गोपीभिः केवळमित्थं सम्भावनामात्रं कृतमुततत्सत्यमेवेति राज्ञः संशयं निराह मुनिः। रेम इति। तया गोपीभिरुद्भावितया कयाचिद्गोप्या च सह भगवान् रेमे कथम्भूतोप्यात्मारामोऽप्यखण्डितोऽप्यवाप्तसमस्तकामत्वेन स्त्रीविभ्रमैरखण्डितचित्तोऽपि तथा चेत्किमिति रेमे तत्राह। कामिनां विषयासक्तचित्तानां दैन्यं तत्पारवश्यात्मकं स्त्रीणां दौर्जन्यञ्च दर्शयन् दर्शयितुमित्यर्थः ॥ ३४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अवरोहणं स्नेहाधिक्यादित्याशयेनाहुः। महात्मनेति। कथमिदमवगतं पुष्पनिमित्तादित्यत्राहुः। अत्रेति। अपचयः नखादिसंयोगेन यथा म्लानं न भवति तथा प्रलूनमिदमपि प्रेयसां प्रेमातिशयप्रकटनम् ॥ ० ॥ इदमपि चित्रमित्याहुः। प्रपदेति। हे गोप्यः! प्रपदयोः पादाग्रयोराक्रमणं ययोरस्ति ते प्रपदाक्रमणे एते पदे पादलाञ्छने असकळे असम्पूर्णे उन्नतशाखापुष्पावचये प्रियकृष्णकरावनमितशाखाग्रहणे दुःस्थपदत्वाद्यावत्पादप्रमाणरहिते पश्यतेत्यन्वयः केशमार्जन्या केशप्रसाधनं केशसंस्कारः कमु गतावति धातोः काम आनन्दः कामो गतिर्ज्ञानं चास्य स्त इति कामी पूर्णानन्द ज्ञानवानित्यर्थः। तेन कामिना प्रशस्तेच्छावता वा ॥ ३३ ॥ कान्तां स्त्रियं तानि पुष्पाणि चूडयता संस्कृतकेशपाशे सुदर्शनीयं निदधता कृष्णेनेह स्थले उपविष्टं पश्यतेति शेषः

इदं ध्रुवं निश्चितं सन्देहं न कुरुतेत्यर्थः। अयं सर्वस्मादधिकशोकतम इत्याहुः। रेम इति। तया कामिन्या रेमे च सुरतशीलामप्यनुबभूव न स्वार्थमिति सूचयन्ति। आत्मरत इति। आत्मनि स्वरूपानन्दे रतः आत्मन्येवारामः कीडा यस्य स तथा आत्मरत आत्मक्रीड इति श्रुतिः अनेन विशेषणद्वयेन हरेर्विटवृत्तिं निषिध्यन्ति भगवत्प्रीतिसाधनभक्तिज्ञानादितारतम्यात्प्रीतितारतम्यमसूचि इति ज्ञायते तथा चान्या गोप्य इन्द्रियवृत्तयः कृष्णनीता कामिनीभक्तिबुद्धिर्वा ग्राह्येति बुद्धिमता तत्तत्पदानि तत्तदर्थबोधकत्वेन योजनीयानीति संग्राह्यमिति सन्तोष्टव्यं शोकादिकं च गुणनिमित्तमिति अत एवाखण्डितः कामेनेति शेषः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवं स्वयमपि तया सह तल्लीलां प्रशंसति। रेमे इति ॥ ३४-३५ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ततः क्वापि गत्वा परेशचिह्नमालोक्य काश्चिदाहुः—केशप्रसाधनमित्यादि। तु निश्चितम्। अत्र कामिन्याः कामिना तेन केश प्रसाधनं कृतम्। तत्र हेतुमाहुः तानीत्यादि। तान्यवचितानि प्रसूनानि चूडयतेहोपविष्टम्, ध्रुवं साक्षादेव दृश्यतामित्यर्थः।३४।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुन; सख्य आहुः। अत्रेति। महात्मना विदग्धाशिरोमणिनेत्यर्थः। यद्वा महे तत्प्रसाधनोत्सवे आत्मा मनो यस्य तेन पुष्पहेतः, पुष्पार्थमवरोपितेत्यशोकवृक्षोऽयमस्या; पादस्पर्शं प्राप्य सद्यः पुष्प्यति यथाहमेतत्पुष्पैरिमां प्रसाधयेयमिति बुद्धयेत्यर्थः। अत एव महात्मना महाबुद्धिमता अत्राशोकशाखायां प्रसूनानामवचयः कृत इत्यत एवात्र प्रसूनानि न सन्तीति भावः। किंचिद्दूरशाखाया हस्ताप्राप्यायाः पुष्पावचयनार्थं प्रपदाभ्यामाक्रमणं क्षोणिसम्मर्दनं यतस्ते पदे अत एव असकले सम्पूर्णयोस्तयोर्भुवि चिह्नादर्शनात् कृष्णजान्वन्तरुपविष्टायास्तस्याश्चिह्नं दृष्ट्वा पुनर्विपक्षा आहुः। केशानां प्रसाधनम् अत्रत्यवनदेवतादत्तकङ्कतिकयेति बुध्यते कामिन्याः ननु प्रेमवत्याः स्वसखीरपि वञ्चयित्वा कामुकं नीत्वा रहो गतत्वात् कामिना ननु प्रेमवता प्रेमवतीनामप्यस्माकं विरहपीडाननुसन्धानात् ततश्च तानि तैः प्रसूनैः केशैर्वा कान्तां कामिनीं चूडयता नर्मणा पौरुषं व्यञ्जयितुं चूडावतीं कुर्वता इह ध्रुवमुपविष्टमिति रहः केलिवार्ताप्यभूतिति भावः। वित्मतोर्लुगिति मतुपो लुक् ॥ ३३ ॥ तदेवं गोपीनामुक्तिभिरेव तस्याः सौभाग्यातिशयं दर्शयित्वा स्वयमपि तमुपपादयति। रेम इति। आत्मारामोऽपि तया सह रेमे। तत्र हेतुः स्वात्मरतः तया सह शोभमानमात्मनो रमणं यस्य सः। आत्मारामतायां तथा सुखं न तस्य भवत् यथा तया सह रमण इत्यर्थः। चात्मरत इति पाठे आत्मारामशब्देन पौनरुक्त्यापातादेवं व्याख्येयम्। च एवार्थे। तयैव सह आत्मना यत्नेन रतं रमणं यस्य सः। आत्मा यत्नो धृतिबुद्धिरित्यमरः। आत्मारामतायां तादृशसुखलाभभावादेव याबान् यत्न इति भावः। ननु तर्हि तस्याः पूर्णत्वं प्रसक्तमत आह। अखण्डितः। तदपि पूर्ण एव नतु खण्डितः। ह्लादिनीशक्तित्वेन स्वरूपभूतत्यादिति भावः। ह्लदिनीशक्तित्वेऽपि सर्वाह्लादसारो यः प्रेमा तस्यापि परमावधिर्यो महाभावस्तद्रूपत्वादेव हेतोर्भगवत आत्मारामत्वेन ह्लादमात्ररमादपिह्लादे महासारभूतया सह रमणस्याधिक्यमस्त्येव यदुक्तं तन्त्रे ह्लादिनी या महाशक्तिः सर्वशक्तिवरीयसी तत्सारभूता राधेयमिति महाभावस्वरूपेयं गुणैरतिवरीयसीति ततश्च आत्मारामोऽपि तया सह स्वात्मरतः स्वात्मरतोऽप्यखण्डितः पूर्ण एव रेमे इत्यन्वयः तेन च भगवत्तत्त्वानभिज्ञानां प्राकृतविवेकिनां हितं च तेभ्यः स्वविलासतत्त्वस्य गोपनं चकारेत्याह। कामिनामिति। कामवशैः स्त्रीवशैश्च न भाव्यमिति लोकान् शिक्षयामासेत्यर्थः। कामवशत्वे स ति पुमांसो दीनाः स्युर्दैन्ये चसति स्त्रियो दुरात्मानः स्युरित्यत्रार्थे भगवत्प्रेयसी च प्रमाणमिति यतस्ते इतस्ततो जल्पन्त उज्ज्वलप्रेम रसत्वगोपनस्य हेतवो बभूवुरिति भावः। तथा दर्शयन्नेव प्रेमरसतत्वं च गोपयन्निति चेवशब्दाभ्यामेव वा व्याख्येयं यद्वाकामिनां सम्बन्धे दैन्य दर्शयन् आत्मवन्मन्यते जगदिति न्यायेन ये कामिनस्तं दीनमेवापश्य याश्च स्त्रियः कामिन्यस्तां दुरान्मानमेवापश्यंस्तत्प्रयोजकी भवन्नित्यर्थः। यद्वा कामिनां दैन्यं दर्शयन्निति कामिभिः सुरतप्रार्थनादिना दीनैर्भवितव्यं स्त्रीभिस्तत्रासम्मत्या दुरात्मभिर्भावितव्यमिति दर्शयन् रसिकजनान् ज्ञापयन् एवमेव रसपोषो नान्यथेति भावः ॥ ३४ ॥

श्रीरसिकाह्लादिनी टीका

किं चाग्रे गत्वा पदाग्रदर्शनेन पुष्पावचयं सम्भाव्याहुः अत्रेति अत्र क्षावःप्रदेशे प्रयस्या स्वालंकारार्थमादिष्टेन प्रियतमेन प्रियाथ तत्संतोषाय तदादिष्टं बहु मानयता प्रसूनावचयः कृतः। एवमन्योन्यं सामरस्यं सूचितम्। स्थाने उच्चप्रदेशे स्थितानां पुष्पाणामवचयं कुर्वतः। प्रपदाभ्यां भूभागस्याक्रमणेऽसकले समग्रे पदे पश्य तयास्मि भागानभिव्यक्तेश्चेति बहूनां पदानां मध्ये एकत्र द्वयोर्द्वयोरसमग्रदर्शनादिदं संभाव्योक्तमिति। तदुक्तं पराशरेण—"पुष्पावचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवम्। येनाग्राक्रांतिमात्राणि पदान्यत्र महात्मन इति ॥ ३३ ॥ ततोऽन्यमाल्यग्रथने सर्वतो विशीर्णानां खण्डितानां दलानां सञ्चारं दृष्ट्वा प्रकारान्तरेणोत्प्रेक्षमाणा आहुः। केशेति अत्रेति श्रोणी-भरण-चिह्नं दृष्ट्वा तर्कयन्ति कृष्णमाचन्त उपविष्टाया कामिन्याः प्रियकृतप्रसाधने श्रीकृष्ण-

करस्पर्शे साभिलाषायाः केशप्रसाधनं वेण्यां करेण आपीड्य करेण कृतम्, कामिनेति–चुम्बनादिकटाक्षदर्शनादिषु साभिलाषेन कामक्रीडाप्रदर्शनार्थं तथा कृतमित्यर्थः, तु शब्दोक्तविशेषमाहुः। अन्या स्थलान्तरं दर्शयन्ति इहेति रहस्थले तानि पुष्पाणि कान्तां चूडयता चूड़ां करंग्रथनेनालंकुर्वतोपविष्ट ध्रुवं निश्चितं नात्र सन्देहः साक्षात् तल्लक्षणाभिव्यक्तेः। एवं रसाभिवृद्ध्यर्थं तस्यारहः प्रापणं पुष्पसम्पादनमलंकरणं चोक्तमिति ॥ ३४ ॥

विशुद्धरसदीपिका

सख्य आहुः। अत्रेति। पूर्वार्धेन तासां सख्य आहुः उत्तरार्द्धेनेति विवेकः। तथाहि अत्र गोप्य इत्याद्यनुक्तिरात्मनस्तत् सौभाग्यमदेन महात्मना विदग्धशिरोमणिना कान्ता कामानामखिलसुखानामन्तः पर्य्याप्तिर्यस्यां सा परमानन्दरूपिणीत्यर्थः अत्रावरोपिता अङ्कादवतारिता कुतः पुष्पहेतोः तदभिलषितपुष्पावचयकृते इत्यर्थः। प्रियार्थे प्रेयसा कृत इति वक्ष्यमाणात् यता महात्मना तस्या हृदयज्ञेनेत्यर्थः। तदनुमोदमानास्तत्सख्य आहुः हंहो साधु ज्ञातं प्रेयसा प्रीत्यतिशयवता प्रियायै इति प्रियार्थः चतुर्थीतदर्थार्थ इति समासः तस्याः वेशवेशायेति भावः। अत एव केशवपदस्य तादृशं व्याख्याने प्राणसख्यस्तत्रलिङ्गमाहुः। पदाग्रं प्रपदमिति कोशात् तदा क्रमणे तरुशिखरस्थपुष्पाद्यवचयाय विचरणे ययोस्ते असकले असमग्रे पदे पश्यत तदसहमाना गर्भकाख्यमाल्यथण्डनं दृष्ट्वा विपक्षा आहुः। केशेति। कामिन्या इत्यादि सामर्षम् तासां क्षोभाय तस्याः सुहृदः सोत्प्रासमाहुः। तानीति कुसुमानि चूडयता चूडायां योजयता कान्तानुपविष्टम उपोधिके चेति कर्म्मप्रवचनीयः धम्मिल्ळरचनाय किञ्चिदुच्चतयोपविष्टमित्यर्थः ॥ ३३ ॥ ततश्च तादृशवर्णनेनोद्दीपितभावा अर्द्धमेव वाक्यमसमाप्य सवासनानामानन्दजननाय तस्याः सौभाग्यमभिनन्दन्ति तदावेशेन श्रीमुनीन्द्रचरणा अप्याहुः। रेम इति। आत्मनेपदसन्निहितपदाभ्यामात्मत्वेन निर्दिष्टायाः प्राणप्रियायाः सुखमेवात्मसुखमित्यनुमननाय तस्याश्च प्रकरणादेव लाभे तयेत्युक्तिस्तत्पदलक्ष्यार्थभूतयेति मुनीन्द्राभिप्रायः तया अनिर्वचनीयसौभाग्ययास्मदनुभूतयेति वा रेमचेति चकारः समुच्चयार्थः आत्मरतः आत्मनि तस्यामेव रतः तत्त्वमस्या आत्मना रमया रेम इति ब्रह्मसंहितोक्तः ततश्च शक्तिवादो निराकृतो बोद्धव्यः तत एव च परिकरत्वमपि अन्यासां शक्तित्वे परिकरत्वे च न कोऽपि विरोधः तदुक्त श्रीकृष्णयामले—

या शक्रयः समाख्याता गोपीरूपेण ताः पुनः। सख्यो भूत्वा राधिकायाः कृष्णचन्द्रमुपासते ॥

तस्याः सख्यास्त्रयोऽपरा इत्यादिपुराणे च या च तस्या अपि यत्र कुत्रापि शक्तित्वश्रुतिः सा त्वाकृतिसाम्यादभेदाभिप्राया चेत्येतत्परगतापन्यासेन प्रदर्शितं मूर्द्धाम्नायतन्त्रे तस्या एव स्तवराजे—

केचिच्छ्रियं त्वां कतिचिच्च गौरीं परे परेशीं ब्रुवते कवीन्द्राः। परात्परं ब्रह्म सनातनत्वं गुणत्रयेणैव बिभर्षि लोकमिति ॥

अत्रोत्तरार्द्धं स्वमतमित्युत्तरत उपन्यस्तं गुणत्रयमुक्तं बृहद्गौतमीये —

सत्त्वं तत्त्वं परत्वं च तत्त्वत्रयमहं किल। त्रितत्त्वरूपिणी सापि राधिका परदेवतेति ॥

सत्त्वं कार्य्यं तत्त्वं कारणत्वं परत्वं ततोऽपि भिन्नत्वमित्यर्थः। यद्वा श्रीत्वेन तदेकाश्रयत्वं गौरीत्वेनार्द्धाङ्गीत्वं परेशीत्वेन तादात्म्यमिति शक्तिवादाभिमतं गुणत्रयं तेन लोकम् अवान्तरोपासकं विभर्षि तत्तदात्मत्वेन पोषसि स्वरूपतस्तु तुरीयं त्रिषु सन्ततमित्यादिन्यायेन परादपि परं यद्ब्रह्म तदेव त्वं परस्याप्यात्मेति ब्रह्मात्मनोः पर्य्यायत्वमयमात्मा ब्रह्मेति श्रुतिसिद्धमिति संक्षेपः तथाथर्वणि पुरुषबोधन्यां द्वादशवनवर्णनप्रस्तावे तस्याद्या प्रकृती राधिका नित्या निर्गुणा सर्वालङ्कारशोभिता प्रसन्नाऽशेषलावण्यसुन्दरी अस्मदादीनां जन्मदात्री अस्या अंशांशा बहवो विष्णुरुद्रादयो भवन्तीति श्रुतिरपि अस्या अर्थः तस्य परपरब्रह्मणः आद्या प्रकृतिः आद्यं स्वरूपमित्यर्थः। संसिद्धिप्रकृतीत्विमे स्वरूपञ्च स्वभावश्च निसर्गश्चेत्यमरः। स्वरूपस्यादिमत्त्वमविकृतत्वमेव प्रकृतिशब्दस्य शक्तिवाचित्वे तस्येति आद्या इति च विरुध्येतेति ध्येयं कासावित्यत आह। राधिका आराध्या मम नाम्नापि विज्ञेया तेन राधिकेति श्रीकृष्णयामलनिर्वचनानुसारेणाभेदाध्यवसायाच्छक्तिशक्तिमत्त्वं परास्तं नित्या कालत्रयेऽप्येकरूपा निर्गुणा अप्रसिद्धस्तद्गुणानां रहस्यत्वाच्च निर्गुणा यद्वा मायागुणातीता तथात्वे च सर्वालङ्कारशोभिता सर्वशब्दस्यासंकुचितता वृत्त्या सात्त्विकैराङ्गिकैश्चालङ्कारैः स्वरूपभूतैरेव शोभिता तथा दर्शिता मुक्ताचरिते श्रीरघुनाथेन यथा महाभावस्वरूपेयं नित्यदा वार्षभानवी। सखी प्रणय सद्गन्धवरोद्वर्त्तनसुप्रभा कारुण्यामृतवीचीस्तारुरणामृतधारया लावण्यामृतवन्याभिः स्नापिता ग्लापितेन्दिरा ह्रीपट्टवस्त्रगुप्ताङ्गी सौन्दर्य्यघुसृणाञ्चिता श्यामलोज्ज्वळकस्तूरीविचित्रितकलेवरा कम्पाश्रुपुलकस्तम्भस्वेदगद्गदरक्तता उन्मादोजाड्यमित्येतैरत्नैर्नवभिरुत्तमैः क्लप्तालंकृतिसंश्लिष्टा गुणालीपुष्पमालिनी धीरा धीरात्वसद्वासः परवासैः परिष्कृता प्रच्छन्नमानधम्मिल्ला सौभाग्यतिलकोज्ज्वला कृष्णनामयशः श्राविवनं साल्लासिकर्णिका रागताम्बूलरक्तोष्ठी प्रेयकौटिल्यकज्जला प्रणयक्रोधसच्चाली बन्धगुप्तीकृतस्तनी नम्मभाविनर्निष्यन्दस्मितकच्चूरवासिता सरभान्तरगृहे गर्वपर्य्यङ्कोपरिलीलया निविष्टाप्रेमवैचित्र्यविचलत्तरलाञ्चिता मध्यतात्ससखीस्कन्धलालादत्तकराम्बुजा श्यामा श्यामस्मरामोदमधूलीपरिपोषिकेति अथवा सर्वानलङ्करेति ऐश्वर्य्यादिना भूषयति सर्वालङ्कारः स्वयं भगवान् तेन नित्यपार्श्वस्थेन शोभिता वर्त्तमाने क्तः एवं नित्ययोगोऽपि दर्शितः तथा बह्वृचश्रुतिः राधया माधवो देवो माधवेनैव राधिकेत्यादिपरिशिष्टे दर्शिता तत एव प्रसन्ना आनन्दितेत्यर्थः। शेषं स्पष्टं तत्र अंशांशा अंशो मायाख्या शक्तिः अंशः

शक्तिसमावेश इत्यादि पुराणात् तस्या अंशा इवांशाः गुणत्रयाधिष्ठातारः अधिष्ठानाधिष्ठेययोरभेदाभिप्रायेणेदमितिसंक्षेपः। ननु श्रीमुनीन्द्रैरपि यत्र तत्राचिन्त्यशक्तिरियमित्यभिधातीतिचेत्सत्यं तद्विसर्वथाराध्यत्वाभिप्रापणेत्यवेहि यथा श्रीसुधानिधौ प्रेम्णः सन्मधुरोज्ज्वलस्य हृदयं शृङ्गारलीला कळा वैदग्धा परमावधिर्भगवतः पूज्यैव कापीशता ईशानां च शचीमहासुखतनुः शक्तिः स्वतन्त्रा परा श्रीवृन्दावननाथपादपद्ममहिषी राधैव सेव्या ममेति स्वात्मरत इति पाठे स्वैःस्वांशरूपैर्वैभवैर्वैकुण्ठलक्ष्म्यादिभिर्गोष्ठसम्बान्धप्रेयस्यादिभिश्चापरापेक्षारहिततया न तदंशिनि आत्मनि स्वस्मिन्नेव रतः स्वेनैव पूर्णकाम इत्यर्थः। तथा आत्मारामः स्वरूपानन्दावेशतत्परः तादृशोऽपि तया हेतुना रेमे तत्तदनादृत्य नन्दति स्म तत्र हेतुस्तयेत्येव तच्छब्दस्य वक्तृचित्तस्थवैलक्षण्यव्यञ्जकत्वात् सर्वाधिकप्रेमाश्रयविषयरूपयेत्यर्थः। ननु लक्ष्म्यादिभिः प्रेयस्यादिभिरपि तस्य रमणं दृश्यत इति चेत्तत्राहुः। अखण्डितः अनया हेतुना यथा सक्त इति ततस्ततः खण्डितः स्वपतेः सकाशात् खण्डिता नायिकावन्मनसा विच्युतः स्यात्तथा अस्याः सकाशात्ताभिर्हेतुभिन कदाचिदपीत्यर्थः। अथवा अखण्डितः अविशिष्टमपर्य्यायानेकशब्दप्रकाशितम् एकं वेदान्तनिष्णाता अखण्डम्प्रतिपेदिर इत्यादिना लक्षितः श्रीराधाश्रीकृष्णेत्याद्यनेकशब्दप्रकाशितत्वेऽप्येक एव इत्यर्थः। श्रीपञ्चरात्रेऽपि—

हरेरर्द्धतनू राधा राधिकार्द्धतनूर्हरिः। अनयोरन्तरादर्शी मूर्त्यवच्छेदकोऽधम इति॥

अत्र तनुशब्दः स्वरूपवचनः उत्तरपादे मूर्त्यवच्छेदक इत्युक्तेः अत एव लीलायामपि प्रथमेऽर्थे प्रेमनिर्णीतत्वात्तदनेन तस्यां स्वं सर्वमप्यर्थितमिति दर्शितं तदेव तादृशालम्बनप्रेमविहीनाः कामिनः कामिन्यश्च स्वमहिम्ना परास्ततया दर्शिता इत्याह। कामिनामित्यादि एवं च नायं कामविहारः किन्तु प्रेमविहार इति फलितम् अत्र कामिनां तत्तत्तर्पणेच्छारूपकामस्वभावानां नतु सच्चिदानन्दरूपतया स्वतस्तृप्तानां नवा प्रियजनतर्पणमात्रस्वसुखलक्षणप्रेमस्वभावानामित्यर्थः। तेषां दैन्यं दुर्गतत्वं तथा स्त्रीणां तदन्यासां तादृशदुर्गतनायकं वशीकृत्य गर्वादिदुष्टस्वभावानां दुरात्मतां दर्शयन् लोकेष्विति शेषः अत एवानन्दवृंदावनचम्पमनु० एवं राधाप्रेमधामा यया सा वात्मारामोऽप्याप्तकामोऽप्यदभ्रं रेमे यन्मात्कामिनां कामिनीनां न्यक्कारोऽभूदात्मनैवेति मन्ये अथवायमर्थः नन्वित्थं तत्तद्वाक्यानुसारेण परमानुकूलस्य नित्यदा तस्यामेवासक्तस्य रासक्रीडायां वह्वीभिर्विरुद्धवासनाभिश्च वाहुप्रसारेत्यादिना रमणमयुक्तमित्याशङ्क्याह। रेम इति। तया सह यात्तया लोकोत्तरसौभाग्यसम्पत्त्यैव आत्मरतः तयैव चात्मारामः तस्या एव तदात्मत्वनिर्देशादिति भावः। अत एवाखण्डितः प्रेमाखण्डरसो मत इत्युक्तेः अखण्डपरमप्रेमाणं प्राप्त सततासक्त इति यावत् आत्मनः अखण्डैकरसत्वेन प्रसिद्धेः यद्वा अखण्डितत्वमविच्छिन्नत्वं तेन नित्यविहारः सूचितः एवम्भूतश्च सन् आस्वपि रेमे अपीत्यनेनौदासीन्यव्यक्तिः ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमित्यादिन्यायेन कासां चित्कान्तभाववतीनां व्रजादौ सिद्धानां साधकचरीणां च मयेमा रंस्यथ क्षपा इति दत्तवराणाञ्च संकल्पसिद्धये नतु निजाभिलाषेणेति भावः। न चेदमसम्भावितम् इत्थम्भूतगुणो हरिरितिवत्सङ्कीर्णस्यापि प्रेम्णस्तादृशसामर्थ्यात् अत एव कामिनामिव दैन्यं दर्शयन् अर्थात्तासु स्त्रीणाञ्च तादृशीनामपि दुरात्मतां कामात्मताञ्च लोकेषु दर्शयन् वच स्वयं तथाभूत इत्यर्थः। एवञ्च साधकानुग्रहः साधितः ततश्च सत्यपि प्रेमविलासेऽन्तरान्तरा सौभगमदोदयेन कामित्वव्यक्त्या सम्भावितमेवौदासीन्यं तच्च तासान्तत्सौभगमदामित्यादिना दर्शितं निजस्य केवलपरमवत्त्वादिति भावः। यद्वा तथैव कस्मिंश्चिल्लीलाविशेषे नियुक्तः संस्तथाश्चक्रे ननु तया कथमेवाम्वधे कर्म्मणि निर्वन्धेन नियुज्येतेत्याशङ्क्य फलवलकल्प्यं कारणमाह। कामिनामित्युत्तरार्द्धेन। तथा हि अहो कामिनः स्वप्रियासु कथं दैन्यमनुशीलयन्ति ताश्च तादृशेषु तदेकतानेषु कथं दुर्ग्राह्यहृदया भवन्तीति कौतुकावलोकनेच्छया कासाञ्चित्साधकचरीणां नित्यसहचरीसङ्गप्रभावेणोपनततादृशभावानां शुद्धप्रेमपरीक्षणाय स्वप्रियतमस्य तस्यैव वाऽऽनुकूल्यास्वादाय प्रयोजित इति अर्थश्चायं मदमानाद्यात्मके कामिनीनां प्रेमणि कामिनां यद्दैन्यं लोकप्रसिद्धं तदेव स्वद्वारा दर्शयन् प्रकटयन् स्त्रीणाञ्च तत्र तत्र या मदमानात्मिका दुरात्मता दुर्द्धराचित्तता स्वतन्त्रता स्वाधीनपतिकात्वमिति यावत् दुर्ग्राह्य आत्मा दुरात्मा तस्य भावो दुरात्मतेति व्युत्पत्तेः तां च स्वप्रेयसीद्वारा स्वप्रणयलालित्येन च स्वयमेव प्रकटयन्निति सा च तासामतिविहारेणेत्यादिना दर्शयिष्यते तासां तु रसावेशात्तत्तदनुसन्धानाभावो युक्त एवेति सर्वमनवद्यम् एवं च स्वाधीनपतिकात्वं सुसिद्धं तदुक्तं निरन्तरप्रेमवशात्पार्श्ववर्तीव यत्प्रियः। वाग्वशप्राय आभाति सा स्यात्स्वाधीनभर्तृका यथालङ्कार एवं मम सखीप्रिया रचय वेशमस्याः स्वयं प्रसादय सखीमिमां मयि वृथैव जातक्रुधम् इति प्रणयकौतुकादिव नियोजितो राधया चकार रसिकाग्रणीरथ तथा स्वयम्माधवः अत एव दर्शयन्नित्युक्तं नत्वाचरन्निति अर्थात्तस्या एवेत्यर्थः। तच्च यथा कामिनो दीना भवन्ति तथा तासु दैन्यमभिनीय स्त्रीणां च तासामेव तत्सखीनां दुर्ग्राह्यात्मतां तादृशपरमलम्पटमणिना तथा तथाचरणेऽपि शुद्धसख्यावेशेन भावान्तरास्फूर्तिं च स्वद्वारैव स्वयमेव दर्शयन्निति तासां तदेकनिष्ठतया तत्स्फूर्त्याभासो निराकृः तथा दर्शितं श्रीसुधानिधौ तादृङ्मूर्तिर्व्रजपतिसुतः पादयोर्मे पतित्वा दन्ताग्रेणाथ धृततृणककाकुवादान् ब्रवीति नित्यचानुव्रजति कुरुते साहसायोद्यमञ्चेत्युद्वेगं मे प्रणयिनि किमावेदयेयं नुरो इति अथवा तया खण्डितो रेमे कथमित्याकाङ्क्षायामाह। आत्मरतः आत्मारामोऽपि आत्मनि तस्यामेव रतं निधुवनं यस्य सः आत्मा सैव आरामो यस्य सः आत्मा सः आरामः स्यादुपवनमिति कोशाद्वनेऽपि पुष्पाद्यवचयायेतस्ततो भ्रमणं तस्या एव तत्तदङ्गभ्रान्त्येति भावः। प्रसिद्धेऽर्थे

पौनरुक्त्यं दुर्वारमेव एवं च विशेषणद्वयेन कुञ्जवनक्रोडे सूचिते किं कुर्वन् कामिनामित्यादि कामिनो हि यथा प्रतिक्षणं संभोगसुखमनुभवन्तोऽप्यतृप्ततया दीना भवन्ति यथा च स्वाधीनपतिकाः स्त्रियः सौभाग्यमदगर्विता निजरमणं नवनवायमानं सुखमनुभावयन्त्योऽपि दुर्ग्राह्यात्मतया वाम्यमनुशीलयन्ति तत्तच्च स्वात्मद्वारा दर्शयन्नित्यर्थः। तत्कर्तृत्वानिर्देशश्चाभिप्रायेण यदाहुः वामता दुर्लभत्वं च स्त्रीणां या च निवारणा तदेतत्पञ्चवाणस्य मन्ये परमामायुधमिति तथाप्यखण्डितः यत्कस्याञ्चिदप्यवस्थाया तत्सुखान्मनसोऽविरतिस्तदेवाखण्डितत्वमित्यर्थः। यद्वा तया कर्त्र्या आत्मनि स्वस्मिन् रतं पुरुषायितं निधुवनं यस्य स आत्मरतः आत्मैव आसर्वतो वेषेण भावेन च रामा यस्य स आत्मारामः तदेवं स्वभावविनिमयो दर्शितः यथाऽयं हरीयते सा सच राधिकायते निरन्तरं भावनयोभयोरुभौ विपर्य्ययेणापि विपर्य्ययोत्थितां सम्भोगसीमां सदृशीमुपेयतुरिति तत्र हेतुः अखण्डितनित्यविहारीत्यर्थः। एवं च परमावेशवैवश्येनातिरहस्यळीलाप्रकाशनेऽपि श्लिष्टपदप्रयोगेण संगोप्यैव कथनान्मुनीन्द्रस्य तासां तत्सखीनां च तामनु ममत्वातिशय एव स्पष्टं प्रकाशित इति ज्ञेयं वस्तुतस्तु तया तत्पदलक्ष्यत्वेनात्मभूतयाऽखण्डितो रेमे तत एवात्मरतः तत एवात्मारोमोऽपि रतिरत्र शुद्धा प्रीतिः रामो रमणं तत एव च कामिनां दैन्यं स्त्रीणां च दुरात्मतां दर्शयन् नहि स्वयं कामी आत्मरतत्वान्नासौ स्त्री आत्मत्वादिति संक्षेपः एवं च साधूक्तं कंदर्प्पदर्प्पहेति स्वामिपादैरितिदिक्॥ ३४॥

श्रीरामनारायणकृता भावभावविभाविका

अग्रे केशप्रसाधनचिह्नमनुभूयाहुः। केशेति। अत्र तु यथा आह्लादिन्या अपि चन्द्रप्रभायाश्चन्द्राश्रयं विना स्थित्यसम्भवात्स्वाश्रयतया चन्द्रकामस्तथा तदाह्लादिशक्तिरूपायास्तस्याः सर्वोद्धाराय परभक्तिरूपतया आविर्भूतायाः स्वाश्रयविषयतया तत्कामस्यावश्यकत्वात्तत्कामिन्याः परां भक्तिं विना नित्यसिद्धस्यापि निरतिशयपरमानन्दस्याविर्भावासंभवात्स्वरूपानन्दस्य लीलासौख्यात्मनानन्तगुणतयाविर्भावाय तत्कामिना केशयोः प्रसाधयतापि तेन तस्याः केशप्रसाधनं विशालभालसीमन्तमुक्तादामशिरोमण्यादिभूषणपरिधानपदिकनिर्माणपूर्वकं वेण्याकारेण संग्रथनं कृतं तथा तानि स्वयं तदर्थं प्रपदाक्रमणादिना संचितानि प्रेमातिशयेन स्वतः प्रफुल्लितद्रुमलतासुमनांसि नीलनिशानभसि भगणानीव श्यामस्निग्धस्ववक्षसि मुक्ताफलानविकृष्णाकारस्निग्धस्वभक्तमनसिसितसात्त्विकगुणगणानिव स्वकान्तौ भक्तजनसितमृदुमञ्जुसुमनांसीव कान्तां प्रति चूडयता तत्केशबन्धे संग्रथयता इह महत्सौभाग्यवत्यां भूमौ तामुपविष्टम् उप समीपे तां जान्वोर्विवेशयित्वा स्थितं ध्रुवमिति निश्चितं नात्र संदेहलेशोऽपीति भावः। उपलक्षणमेतत्सर्वाङ्गशृङ्गाररचनायाः॥ ३३॥ एवं कृततच्छृङ्गारस्य तस्या तया रमणमाहुः। रेमे तयेति। आनन्दस्यैव प्रेमास्पदतया स्वात्मना एव नित्याविर्भूतपरमानन्दतया स्वात्मन्येव रतः आनन्दानास्पदे रमणासंभवात् एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या यत्र यत्र रमणं तत्र तत्रात्मलेशाविनाभावात् आत्मन्येवारामो यस्य तथाभूतः सर्वत्र तन्मात्राया एव प्रतिबिम्बात्मना रमणास्पदत्वेऽपि अत्र तु बिम्बात्मना अखण्डित एवानन्दघनोऽपि तया अतिविळक्षणरूपगुणशीलप्रेमनिधिरूपया स्वयं रेमे नात्र चित्रम् आत्मा तु राधिका तस्येत्यादिभिस्तस्यास्तदात्मकत्वात्तया रमणेऽपि नात्मारामत्वादीनां क्षतिः नन्वात्मारामे स्वानन्दपूर्णे तस्मिन् रमणफलस्यात्मगामित्वानुपपत्तेः कथमात्मनेपदप्रयोगस्तत्राहुः। दर्शयन्निति। अखिलकलादिगुरुर्भगवान् संसाराननुबन्धिनीं प्रत्युत कामिनामपि सजातीयविहार प्रकटनेन मनोहरणेन ध्यानादिद्वारा संसारमोचिकामतिविलक्षणां कामकलामाविष्कुर्वन् कामशास्त्रानुसारेण कामिनां दैन्यमेव रसोद्बोधकतयोचितस्त्रीणां तु दुरात्मतां न्यक्कारादिना वाम्यभाव एव रसोद्बोधक इति दर्शयन् रेमे तथा च रयणफलस्यात्मगामित्वदर्शनं विना दैन्यानुपपत्तेरात्मनेपदप्रयोग इति भावः॥ ३४॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अहो एतावतैव क्षुब्धस्वान्ताः संपन्नाः प्रेयसा प्रेयस्यर्थेऽन्यदपि यत्कृतं तत्पश्यतेति तत्सुहृद आहुः। अत्रेति सार्धेन। अत्र पुष्पहेतोर्महात्मना चतुरशिरोमणिना कान्ता अवरोपितामहे केशप्रसाधनोत्सवे आत्मामनो यस्येति वा अत्र तु प्रसूनानां पुष्पाणामवचयः प्रियाया अर्थे प्रेयसा कृतः पुष्पहेतोः प्रियार्थे इत्यनेन तत्प्रियार्थमेवावरोपणं न तु भारजनितश्रमनिवृत्त्यर्थमिति सूचितं ननु इदं कुतो ज्ञातमित्याशङ्क्याहुः। प्रपदाभ्यां पादाग्राभ्यामाक्रमणं भुवो यत्र ते असकले पदे पश्यत सम्पूर्णयोस्तयोर्भुवि चिह्नानवलोकनात् प्रतिवृक्षाभिप्रायं पद इति द्वितीया तेन पदान्यत्र महात्मन इति विष्णुपुराणोक्तबहुत्वेन पूर्वोक्तबहुत्वेन च न विरोधः निवृत्तिपक्षे नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोतेत्याद्यास्तत्पक्षपातिन्य आहुः सार्द्धेन मात्रेषु ध्येयाकारकयोग्यप्रत्ययेषु महात्मना यथोक्तकान्ता अवरोपिता स्वार्थबोधकत्वात्तद्रहिता कुत इत्यत आहुः पुष्पस्य तदर्थाकारवृत्तिळक्षणफलहेतुभूतचित्तैकाग्र्यलक्षणस्य हेतोः एषु प्रत्ययेषु प्रियाया अर्थस्याविर्भावार्थमैकाग्र्यलक्षणपुष्पसंचयः प्रेयसा सम्पादितः यतः पदाभ्यां पदयोर्वाच्यार्थाभ्यामाक्रमणं ययोस्ते असकले जीवनोपासकत्वेश्वरत्वोपास्याक्रान्ते पदे चैतन्ये पश्यत इदं श्रुत्वा सम्यक्तद्भूमिभागमवलोक्य कृष्णजान्वन्तरुपविष्टायास्तस्याः चिह्नमालक्ष्य विपक्षा आहुः। केशेत्यर्द्धेन अहो सत्यमुक्तं यतोऽत्र कामिन्याः नतु प्रेमवत्याः स्वसखीः वञ्चयित्वा कामुकं गृहीत्वा गतत्वात् कामिना नतु प्रेमवता प्रेमवतीनामस्माकं विरहपीडाननुसन्धानात् केशानां प्रसाधनं वेण्याकारेणाऽऽपीडाकारेण वा देवदत्तकङ्कतिकया नखैर्वा कृतं तुशब्दो विपक्षनिरासार्थः नह्यत्र ज्ञानार्थमुपवेशनं

सम्भवति द्वयोरपि कामाक्रान्तत्वादिति सूचयितुं कामिन्या इत्यादि अहो सत्यमिति तत्सुहृद आहुः तानीत्यर्द्धेन कान्तामधिकृत्य तानि पुष्पाणि चूडयता चूडाकारेण बन्धनाय ध्रुवमुपाविष्टं यद्वा चूडायां पुष्पप्रवेशनं ग्रथितेनापि भवति अतस्तानि क्रमेण चूडायां निवेशयता कान्ता समीपोपविष्टं ग्रन्थितमपि ध्रवमतस्तत्संदृश्यं दुर्ल्लभमतः किमर्थं स्पर्धया खिन्ना भवतेति भावः । निर्वृत्तिपक्षे अतः परं पराजितास्तत्पक्षमनुमोदयन्ति । केशेति कामिन्यास्तत्प्रतिपादनकामनावत्यास्तत्पदप्रतियाद्यस्य केशवस्य ब्रह्माद्यधीशस्य प्रसाधनमत्र ध्येयाकारप्रत्ययेषु कामिना स्वानुगृहीतमोक्षाभिलाषुणा प्रभुणा कृतं तत्त्वमसि श्रुतिलक्षणं कान्तामधिकृत्य तानि तत्त्वमसीति पदानि चूडयता चूडास्थानीयैकव्यक्तिपरत्वं नयाधिकारिणा सहोपविष्टमभिन्नतया स्थितमित्यर्थः ॥ ३३ ॥ एवं गोपीमुखेनैव राधया सह भगवल्लीळामुपवर्ण्य स्वयमाह शुकः । रेम इति । आत्मनि स्वस्वरूप एव रतः नतु स्त्र्यादौ आत्मन्येवारामः क्रीडा यस्य नतु स्त्र्यादौ अत एवाखण्डितः स्वस्वरूपादप्रच्युतस्तथाभूतोऽपि भगवांस्तत्प्रेमवशीकृतस्तया राधया यथा ताभिस्तपः कृतं तथा रेमे चेत्यर्थः । यद्वा अखण्डितः अस्याः सकाशादविच्युतः सन् यद्वा अप्यर्थे चः आत्मारामोऽपि अखण्डितोऽपि स्त्रीविभ्रमैरनाकृष्टोऽपि तया रेमे ननु तथा भूतः किमर्थं रेम इत्याशङ्क्य लोकोपदेशार्थमेव विडम्बनं चकारेत्याह । कामिनामिति । कामिनस्त्वेवमेवातिदीना भवन्ति दैन्येन चैवमेव निरादरं प्राप्नुवन्ततीत्युपदिशन् तेषामनुकरणं कृतवानिति तथा स्त्रीणां दुरात्मतां दौष्ट्यं दर्शयन् वशीकृतपुरुषे दौष्ट्यमेव कुर्वन्तीत्युपदिशन् एवं कृतवानित्यर्थः । तथा च कामवशे स्त्रीवशे च न भाव्यमिति लोकान् शिक्षयामासेति भावः । यद्वा ईदृशप्रेमविहीनाः कामिनः कामिन्यश्च स्वक्रीडया सदा तर्षिता इत्याह । कामिनां देहेन्द्रियादितर्पणेच्छारूपकामस्वभावानां दैन्यं दुर्गतत्वं स्त्रीणामपि तादृशीनां तदन्यासां दुरात्मनां दुर्गतनायकवशीकारेण गर्वादिदुष्टस्वभावतां दर्शयन्नित्यर्थः । यद्वा कामिभिः सुरतप्रार्थनादिपरैर्दीनैर्न भवितव्यं स्त्रीभिस्तत्रासम्भवन्ति पराभिर्भवितव्यमिति रसिकान्बोधयन्नित्यर्थः । निवृत्तिपक्षे सर्वश्रुतिविरोधनिवृत्त्या तया रेमे तत्प्रतिपाद्याऽखण्डितः अखण्डकरसः आत्मरतः सर्वं कामविनिर्मुक्तः अतः एवात्मारामश्च चकाराभ्यां सत्यज्ञानानन्तानन्दस्वरूपः अधिकार्यन्तःकरणवृत्त्याऽऽरूढो जात इत्यर्थः । नचास्ति द्वा सुपर्णा सयुजासखाया समानं वृक्षे परिषस्वजाते तयोरन्यः स्वाद्वत्त्यनश्नन्नन्योभिचाकतीति श्रुतिविरोधः तत्प्रकरणपर्य्यालोचनयास्य मन्त्रस्याऽभेद परत्वावगमात् तथाहि ब्रह्मैवेदममृतं पुरस्तादिति वाक्ये ब्रह्मणः सर्वात्मत्वेन निर्दिष्टे ननु ब्रह्मणो भोक्तृत्वमपि स्यादतो न युक्तं सर्वात्मत्वमित्याशङ्कानिरासायायं मन्त्रः पठ्यते यौ द्वौ बिम्बप्रतिबिम्बभूतौ जीवेश्वरावस्मिन्शरीरे वर्तेते तयोर्मध्ये यो बुद्धिप्रतिबिम्बभूतस्तदभेदाध्यासात्तद्धर्माभिमानी कर्मफलं भुङ्क्ते स एवान्यः बुद्धितादात्म्यरहितः सन्स्वरूपभूतचैतन्यात्मना भोगरहितः प्रकाशते औदासीन्यबोधाभ्यां चैतन्यमात्रमुच्यते तथा च भोगानुवादो भोगनिषेधशेष इति नच समाने वृक्षे पुरुषो निमग्नः अनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इत्युत्तरश्रुतिविरोधः अस्याः पूर्वोक्तानशनस्य स्वाभाविकत्वबोधनार्थकत्वात् तथाहि जीवेश्वरपुरुषाश्रये शरीरे पुरुषो बुद्ध्युपहितो निमग्नः कर्तृत्वाभिमानी अत एव तत्करणमोहावृतोऽनीशया स्वस्या नन्दरूपेश्वरभावाप्रतीत्या शोचति विषयागमापायिनामेतद्दुःखमनुभवति जुष्टं कार्यकारणसङ्घातैः सेवितम् अविवेकिभिस्तत्तदात्मतयागृहीतं यदाधिकारात् अन्यविवेचात् शरीरत्रयात् पृथग् भूतं तत्साक्षितयावगतं शोधितत्वं पदार्थमाशं सन्तं पश्यति दास्यात्मत्वेनावगतस्य महिमानमपरिच्छिन्नानन्दात्मतामिति एतेनान्तरीयकतया वीतशोकः सर्वानर्थविनिर्मुक्तः यद्वा जुष्टं विवेकवैराग्यादिभिः प्रक्षालिताशयमलैः सनकादिभिर्नैरन्तर्येणात्मत्वेन सेव्यमानमन्यकार्य्यकारणसङ्घाद्विलक्षणमीशं यदा पश्यतीति नापि पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीति श्रुतिविरोधः नह्यात्मानं प्रेरितारञ्च पृथक्मत्वामृतत्वमेतीति श्रुत्यर्थः । पामराणामपि तादृशमननसत्वेनामृतत्वप्राप्तिप्रसङ्गात् किन्तु शरीराद्यभेदेन गृहीतमात्मानं पृथक्कृतमात्मानं प्रेरितारञ्च मत्वा ईश्वरत्वेन च निश्चित्यामृतत्वमेतीति तस्मान्नास्तिकयाचिदपि श्रुत्या तस्याः श्रुतेर्विरोधः तत्र को मोहः कः शोक एकत्वमनुपश्यतः यन्मदन्यन्नास्ति कस्मान्नु बिभेषि तदिदमप्ये तर्हि परावबेदाह ब्रह्मास्मीति स इदं सर्वं भवति उदरमन्तरं कुरुते अथ तस्य भयंभवति मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति नात्र काचनभिदास्त्यत्र भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्युमाप्नोतीत्याद्याः श्रुतयो भेदमपाकुर्वन्त्येवेति स्थापितश्रुत्यैव मुख्यं रमणमावेदयतीति संक्षेपः । विपक्षे दोषं दर्शयन् रेम इत्याह । कामिनां पुरुषाणां श्रुत्यर्थविचारमधितवतां दैन्यमनीशत्वाभिमानेनानर्थजालप्राप्तिं दर्शयन् तथाविधानां स्त्रीणाञ्चैव दुरात्मतां दुष्टात्मरूपतां संसारानर्थास्पदजीवात्मतां दर्शयन् यथोक्तश्रुत्यर्थविचारविधुरस्य पुरुषादेरनर्थानिवृत्त्यभावं बोधयन्तीत्यर्थः । तथा च श्रुतिः यदा चर्मवदावत्तशं वेष्टयिष्यन्ति मानवाः तदा देवमविज्ञाय दुःखस्यान्तो भविष्यतीति ॥ ३४ ॥

रास-रहस्यम्

र० टी०—अत्र पूर्वोक्तावस्थायाः प्राप्तौ सत्यां, प्रेयसा आत्मना, प्रियार्थे आत्माकारवृत्तिनिमित्तं, प्रसूनावचयः कृतः चित्तपुष्पस्य ऐकाग्र्यं कृतं, अतएव प्रपदाक्रमणे एते, जातौ द्वित्वं, प्रपद्भ्यः पादाग्रेभ्यः आत्मकिरणेभ्यः आक्रमणं अवष्टम्भनं विज्ञानघनलक्षणं, असकले पदे असम्पूर्णब्रह्मपदे यूयं पश्यत ॥ ३४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

केशानामितस्ततो विश्लथतां प्रसाधनं समीकरणं कृतम् कान्तामधिकृत्य तानि प्रसूनानि चूडयता चूडानुकारेण वन्धता शिरोभूषणं कुर्वता इह ध्रुवमुपविष्टम् ॥ ३३ ॥ तया सह आत्मरतः स्वतस्तुष्टः आत्मारामः स्वक्रीडः अखण्डितः नित्यावाप्तसकल-

कामत्वेन स्त्रीविभ्रमैरखण्डितचित्तोऽपि रेमे तथा चेत्किमिति रेमे अत आह। कामिनां स्त्रैणानां दैन्यं स्त्रीपारवश्यं स्त्रीणां च दुरात्मतां दुष्टचित्ततां दर्शयितुम् ॥ ३४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अत्र ज्योत्स्नाशब्दः कान्तिमात्रवाची। यावच्चन्द्रप्रकाशो विभाव्यते तावद्वनमविशंश्चन्द्रवत्कर्पूरवद्धवलज्योत्स्ना चन्द्रिकेति वा। चन्द्रः सुधांशुकर्पूरकम्पिल्लस्वर्णवारिष्विति विश्वः। प्रविष्टं तम् आलक्ष्य ततो हरेर्मार्गणान्निववृतुर्निववृतिरे ॥३३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततोऽप्यन्या अधिकमेव सूचयन्त्य आहुः। केशप्रसाधनमिति। नखैरेव केशानां प्रसाधनं वेण्याकारेण आपीडाकारेण वा तुशब्दो ऽन्यथापक्षं व्यावर्त्तयति। नह्यत्र ज्ञानोपदेशः सम्भवति तदाहुः। कामिन्याः कामिना कृतमिति। एतदुत्थायापि भवति चूडायां पुष्पप्रवेशनन्तु उत्थितेन न भवति क्रोडे पुष्पाणि स्थापयित्वा क्रमेण तानि निवेशनीयानि अतः तानि चूडयता इहोपविष्टं ध्रुवमिति सत्यं कान्तामुपकान्तासमीपे कान्तामुद्दिश्य वा तथैवाकृतिर्दृश्यत इति ॥ ३३ ॥ एवं रसार्थं तस्या नयनं सामग्रीसम्पादनमलङ्करणं चोक्तं यदर्थमेतावत्तदाहुः। रेमे इति। पुष्टत्वात् कामस्य आत्मरतः तया च सह रेमे चकारात् लक्ष्म्या च अन्तःप्रविष्टाभिर्वा सापि रेमे इति वा आत्मन्येव रतिर्यस्य तेन निष्काम एव तस्या यथेच्छं कामं पूरितवान् अस्यामपि दशामासात्मरत एव रसाधारत्वाय तस्यामात्मानं स्थापितवान् आत्मन्येव मुख्या रतिः आत्मन्येव रमणं क्रीडा च यस्य यतः अखण्डितः इन्द्रियैरन्तःकरणैर्विषयैर्वा यदि स्वानन्दोऽन्यत्र गच्छेत् तदान्यत्र रतो भवेत् ननु कथमेवमसमीचस्थाने एतावता प्रयासेन एवं रमणं कृतवानिति तत्र प्रयोजनमाहुः। कामिनां दर्शयन् दैन्यमिति कामिनस्त्वेवमेव दीना भवन्ति कामार्त्ता हि प्रकृतिकृपणा इति तेषामनुकरणं करोति अन्यथा तेषां निरोधो न स्यात् प्रयोजनान्तरमप्यस्तीत्याहुः। स्त्रीणामिति। स्त्रीणां च दुरात्मता प्रदर्शिता न तासां कदाचिदशक्तिरस्ति नापि सौकुमार्यं किन्तु वशीकृते पुरुषे दौष्ट्यमेव कुर्वन्ति शालावृकाणां हृदयान्येता इति अत उभयबोधनार्थमेव रेमे ॥ ३४ ॥

श्रीसुबोधिनी–सारः

अत्र कामिन्याः केशप्रसाधनं कामिना कृतम्। कान्तां स्त्रीमधिकृत्य तानि प्रसूनानि चूडयता चूडानुकरणेन बध्नतेह स्थाने ध्रुवं निश्चयेनोपविष्टम् ॥ ३३ ॥ आत्मनिरतः तुष्टः "स्वे महिम्नि" इति श्रुतेः आत्मारामः स्वकोडोऽखंडितः स्त्रीविभ्रमैरनाकृष्टोपि कृष्णो रेमे। तत्र हेतुद्वयं कामिनां पुंसां दैन्यं स्त्रीवश्यतां स्त्रीणां च दुरात्मतां दुष्टस्वभावतां दर्शयितुम् ॥ ३४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

रेमे तया चात्मरत इत्यत्र, **पुष्टत्वात्कामस्येत्यादि**। यथा प्राकृतः कामी महानपि केवलं स्वार्थपरः सन्स्वयं यदि सुखी भवति तदा स्वकृतेपि दुःखिनं नानुसन्धत्ते तथा। यथात्मारामत्वलक्षणं स्वधर्ममप्यतिक्रान्तवांस्तथाऽस्मदुःखमप्यविचार्य स्वार्थमेवैतावत्सम्पाद्योद्भटभावः स्वयं तादृश्यैव तया च रेम इत्यर्थ इत्याशयेनोक्तं **पुष्टत्वादित्यादि**। तथा च स्वधर्माविचारकस्य परधर्माविचारे किमाश्चर्यमिति भावः। एवं सत्यात्मरत इत्यस्य स्वार्थपरत्वमर्थः पर्यवस्यत्यतो न पौनरुक्त्यमिति ज्ञेयम्। एवं सकामत्वेपि न निष्कामता क्षतिरिति ज्ञापनायात्मारामत्वोक्तिरित्याशयेनाहुर्**निष्काम एवेत्यादि**। प्रकारान्तरेणाप्यपौनरुक्त्यमित्याशयेनात्मरतत्वं प्रकारान्तरेणाहुः **रसाधारत्वायेति**। अत्रेदमाकूतम्। रसात्मकत्वाद्भगवतस्य च स्थायिभावात्मकत्वात्तमेतस्यां प्रकटीकृत्य रेमे। अन्यथैतद्रसानुभवासम्भवात्। न तु प्राकृतभावे सतीति। यद्वा **आत्मरत** इत्यत्रात्मपदं स्वामिनीवाचकम्। तथा **चात्मारामोऽपि** तयात्मरतः कृता रेमे। चकाराद्विशेषरमणं विविधबन्धादिविशिष्टमुच्यते। तथा सति नखदशनादिकार्यसम्भवेनाब्रह्मत्वशङ्का स्यात्, तन्निरासायाहुर**खण्डित** इति। यथा तस्यां रतोऽप्यात्माराम एव तथा दशनादिभिः खण्डितोऽप्यखण्डित एवेत्यर्थः। **कामिनां दर्शयन्दैन्यमित्यत्र**, कामिनस्त्विवत्यारभ्य **एवं रेम** इत्यन्तम्। अत्रायमर्थः। पूर्वमात्मारामत्वोक्त्या तादृशापि सन्यन्नायिकाधीनत्वमेवं भजने तेन रसात्मको रसवांश्च भगवानेव, अन्ये तु कामिनो रसाभासिनो मलपूर्णे वस्तुन्यासक्त्या बीभत्सरसपूर्णा भ्रान्ताः सन्तस्तादृशीष्वेव दैन्यमात्रं फलं लभन्त इति ज्ञाप्यते। किञ्च। आत्मारामोऽपि यद्रसपरवशस्तत्रैव रसभरवशेन मानादिकं भवति, अन्यासु तु रसाभावान्न स मानः, किन्तु दौष्ट्यप्रकटनमेवेति। एतेनात्मारामत्त्वापि प्रभो यत्र रतिस्तत्रैव रसो नान्यास्विति फलितम् ॥ ३४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पुनश्चाग्र वध्वाः पदचिह्नं दृष्ट्वाऽऽहुः—अत्रेति। महात्मना भक्तजनमनोरथपूरकात्युदारस्वभावेन कृष्णेन पुष्पहेतोः पुष्पावचयार्थमत्र कान्ताऽवरोपिता स्कन्धदवतारिता। तयोः परस्परमासक्तमाहुः—अत्रेति। प्रेयसा कृष्णेन प्रियामलङ्कर्तुमत्र प्रसूनानामवचयः अवतारणं कृतम्। तत्र चिह्नमाहुः—प्रपदेति। प्रपदाभ्यां पादाग्राभ्यामुच्चप्रसूनावतारणार्थमाक्रमण क्षोणीतल-

सम्कर्दनं ययोः, अत एव असकले अर्धलग्ने एते पदे पादौ पश्यत ।। ३३ ।। काश्चित्तस्याः कृष्णजान्वन्तरमुपविष्टायाः चिह्नं क्षोणीसम्मर्दनादिकमालक्ष्याहुः—केशप्रशाधनमिति । अत्र तु कामिना कृष्णेन कामिन्यास्तस्याः केशानामितस्ततो विश्लथतां प्रसाधनं पुनः सीमन्तसमीकरणाभ्यां बन्धनं कृतम् । अन्या आहुः—कान्तामधिकृत्य तानि प्रसूनानि चूडानुकरणेन बध्नता कृष्णेनेह ध्रुवं निश्चितमुपविष्टम् ।। ३४ ।।

अन्वितार्थप्रकाशिका

अत्रेत्यर्द्धम् ।। असार्वत्रिकम् । अत्र महात्मना कृष्णेन पुष्पावचयहेतोः कान्ता अवरोपिता अवतारिता ।।३३।। अत्रेति वा । अत्र प्रेयसा कृष्णेन प्रियार्थे प्रसूनानां पुष्पाणामवचयः कृतः । अत एव उच्चपुष्पावचयार्थं प्रपदाभ्यां पादाग्राभ्यामाक्रमणं क्षोणीमर्दनं ययोः ते असकले पादाग्रमात्रत्वादसम्पूर्णे पदे कर्मणी यूयं पश्यत । जातौ द्वित्वम् । पदानीत्यर्थः ।। ३४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

केशप्रसाधनं केशपाशग्रन्थनं अत्रस्थाने कृतं कान्तामधिकृत्य तानि पुष्पाणि चूडयता ग्रथ्नता कृष्णेन इह स्थाने ध्रुवं निश्चितं उपवेशनं कृतम् ।।३३।। अत्र श्रीकृष्णस्य निर्विषयित्वं दृढयन्नाह रेम इति । आत्मरतः आत्मनि अनवधिकान्तिशयानन्दमयस्वरूपे एव रतः अत्यासक्तः अन्यत्रासक्तिलेशाभावात् तथाभूते आत्मनि आरामः क्रीडा यस्य सः अत एवाखण्डितः अतिकमनीयैर्विषयैरनाकृष्टोपि तया गोपिकया रेमे किं कुर्वन् कामिनां कामासक्तानां नृणां दैन्यं स्त्रीवशत्वेन कार्पण्यं स्त्रीणां दुष्टत्वं च ।। ३४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

काश्चिद्भूमिसंमर्दमालक्ष्याहुः ।। अत्रेति ।। महात्मना कामिना, अत्र पुष्पहेतोः पुष्पावचयार्थमित्यर्थः । कान्ता स्वप्रेयसी, अवरोपिता स्कन्धादुत्तार्य भूतलं गमिता । अत्र तु प्रेयसा कृष्णेन, प्रियार्थे स्वप्रेयसीमलंकर्त्तुं प्रसूनावचयः पुष्पलवनं कृतः । अत एव प्रपदाभ्यां पादाग्राभ्यामाक्रमण ययोस्ते, प्रियामलंकर्त्तुं यः प्रसून वचयस्तदर्थमाक्रमणयुक्ते इत्यर्थः । अत एव, असकले अर्द्धलग्ने, एते पदे पादाङ्कौ, पश्यत ।। ३३ ।। काश्चित् कृष्णजान्वन्तरुपविष्टाया तस्याः क्षोणीसंमर्दनादिकं चिह्नमालक्ष्याहुः ।। केशप्रसाधनमिति ।। अत्र तु कामिना कामवता कृष्णेन, कामिन्याः स्वप्रेयस्याः, केसप्रसाधनमितस्ततो विश्लेष्यतां प्राप्तानां केशानां पुनः सीमन्तसमीकरणाभ्यां प्रसाधनं बन्धनं यत्तादित्यर्थः कृतं, कान्तां स्वप्रेयसीमधिकृत्य, तानि प्रसूनानि, चूडयता शिरोभूषण कुर्वता कृष्णेन, इह ध्रुव नूनं, उपविष्टम् । इत्युक्तप्रकारेण, एवंप्रकारेणापि, प्रलपन्त्यः प्रलपनं कुर्वन्त्यः, दर्शयन्त्य इति पाठे मिथश्चिह्नानि दर्शयन्त्यः, ताः गोप्यः, विचेतस उन्मत्तचित्ताः सत्यः, चेरुः तत्र तत्र बभ्रमुः ।। ३४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

केशप्रसाधनमिति : १०.३०.३३.

यस्य प्रसाधनकृते वसरप्रतीक्षा केशा भवन्ति नितरामवशो मुरारिः ।
केशप्रसाधनकृतेऽभ्युदिताभिलाषः पश्यन्ति न स्वमहिमानमल सकामाः ।। २२४ ।।
यत्किञ्चिदत्र सुकृतं कृतमस्ति सख्यस्तस्मादभूत् प्रभुपदप्रतिमेक्षणं नः ।
एतत्त्वगण्यमिह पुण्यमभूत्तस्तत्र स्यात् कथ प्रियसुखावहसङ्गलाभः ।। २२५ ।।

कृष्णप्रिया

यहाँ पर महात्मा श्रीकृष्णचन्द्र जी ने प्रियकान्ता को पुष्प चयन के भूतल पर उतार दिया हो ऐसा लगता है । यहाँ प्रियतम श्रीकृष्ण ने प्यारीजी के लिए कुसुमों का चयन किया होगा क्योंकि दोनो चरणों को एड़ी को ऊँचे करने से भगवान के पैर पृथ्वी पर आधे ही दिख पड़ते हैं ।। ३३ ।। स्नेह सम्पन्न श्रीकृष्ण ने प्रिय कामिनी जी की चोटी बेनी गूंथी है और उस बेनी में पुष्प गूंथने के लिए भगवान को यहाँ अवश्य कान्ता के समीप बैठना पड़ा है ।। ३४ ।।

रेमे तया चात्मरत[1] आत्मारामोऽप्यखण्डितः । कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मताम् ।। ३५ ।।
इत्येवं दर्शयन्त्यस्ताश्चेरुर्गोप्यो विचेतसः । यां गोपीमनयत् कृष्णो विहायान्याः स्त्रियो वने ।। ३६ ।।

कर्दमक्षमा

अन्वयः—कामिनां, दैन्यम्, दर्शयन्, च, स्त्रीणाम्, दुरात्मताम्, एव, दर्शयन्, आत्मारामः, अपि, अखण्डितः, च, आत्मारामः, तया, रेमे ।। ३५ ।। इति, एवम्, (भावम्) दर्शयन्त्यः, ताः, विचेतसः, गोप्यः, चेरुः, अन्याः, स्त्रियः, विहाय, याम्, गोपीम्, कृष्णः, अनयत् ।। ३६ ।।

---

१. स्वा–इति कस्यचित । २. प्रलप–वीर. विज ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्त्रीणां दुरात्मतामाह सा चेति द्वाभ्याम् । कामो यानमागमनसाधनं यासां ता गोपीर्हित्वा मामेव भजन इति हेतोः सर्वयोषितां मध्ये आत्मानं वरिष्ठं मेने इति ।। ३६ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

राक्षस्या बुद्धेः स्वभावमाह—इत्येवम् पूर्वोक्तविधया ।। वृषभानुनन्दिन्याः सर्वाधिकमुज्ज्वलरसस्य संभोगमंशं निर्वर्ण्य विप्रलम्भमपि वर्णयितुं तद्बीजमुत्थापयति—यामिति ।।३५।। वरिष्ठम् सर्वोत्कृष्टम् ।। सा चेति । पूर्वं सर्वाः सौभाग्यमदयुक्ता आसन्नधुना सा च, तत्र हेतुः—हित्वेति । कामयानाः कामयमानाः । यद्वा—कामेन यानमागमनं यासां ताः । अत एवान्यगोपी सौभाग्यहेतुको यः पूर्वं मान उद्भूतः सोऽपि निश्शेषेणैव शान्तः ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत्रेत्येवमिति पद्यार्द्धद्वयं तेषामसम्मतं पूर्वार्द्धे सति रेमे तयेत्यस्य शुकोक्तित्वासङ्गतेः । उत्तरार्द्धे सति सा चेति मात्रोत्थापनासङ्गतेः तदेवं तयोस्तं प्रेमाणं प्रशंस्य प्रकृतं तादृशं तद्विलासमयं मानं तत्प्रसादनादिकमपि तत्पोषणार्थं वर्णयति । सा चेति सपादत्रयद्वाभ्याम् सा च तदा मेने इत्यनेन पूर्वं तासु मध्ये वर्तमानाया अपि तस्यास्तादृशो मदो नासीदिदानीमेव जात इति लभ्यते ।। तच्चैवं तादृशभावे हि तासां द्विधा मानावस्था सम्भवति । कान्तैकस्फुरणे हर्षादिप्रचुरं स्थायिमयी कथञ्चिदन्यस्फुरणे गर्वादिप्रचुरस्थायिमयीति । अतस्तस्या गाढानुरागप्राधान्येन तदेकस्फूर्त्तिमयी बहुकालं व्याप्य हर्षादिमय्येव जाता । सम्प्रति कथञ्चिद्वाह्ये जाते तु परेति । आत्मवरिष्ठत्वे हेतुः गोपीः सर्वा एव तत्रापि कामयाना अपि हित्वा असौ अनिर्वचनीयविचित्रमाहात्म्यः परमस्वतन्त्रोऽतिदुर्लभ इत्यर्थः । तत्रापि प्रियः मदेकप्रेमकर्त्ता सन् भजतेऽनुवर्त्तते । अत्रान्यस्फुरणेऽपि गोपीनामेव स्फूर्त्तिर्नतु पूर्वास्विव सामान्यस्त्रीणामित्येतदंशेऽपि वैशिष्ट्यं दर्शितम् ।। ३५–३६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वस्मिन् आत्मनि आत्मना स्वयमेव, यद्वा, स्वस्य आत्मना स्वभावेनैवरतस्तुष्टः, चेति पाठे रेमे चेत्युक्तसमुच्चये चकारः ततश्च आत्मनैव रतस्तुष्टस्तादृशोऽपि रेम इति तादृशत्वमधुना न स्थितमिति पूर्ववदर्थः । पुनः पुनस्तथोक्तिस्तद्दार्ढ्याय, अतस्तयैव तुष्टः, तयैवारमत तद्विभ्रमैर्वशीकृतश्चेति तात्पर्य्यम् । अतः प्रेमनिर्ज्जितत्वेन तस्यां स्व० सर्व्वस्वमर्पितमिति सूचितम्, तच्च भक्तवत्सलवरस्य प्रियजनप्रेमपरवशस्य तस्य न दोषः कश्चित्, प्रत्युत निजभगवत्तासारप्रकटनरूपमहागुण एवेति पूर्वं बहुशो लिखितम् श्रीभागवतामृते च विवृतमेव । यद्वा, स्वात्मनः सख्येनात्मतुल्याः, किंवा स्वस्यात्मनः प्रिया गोप्यस्तासुरतोऽपि, अखण्डितः सम्पूर्णः सन् कायमनोवचनासक्त्या साकल्येन रेमे इत्यर्थः । अन्यत् समानम् । न चैवं केवलं निजप्रिया एव आनन्दिताः, अन्येषामपि हितं कृतमित्याह—कामिनामिति । कामवशैः स्त्रीवशैश्च न भाव्यमिति लोकान् शिक्षयामासेत्यर्थः । तत्र यथा श्रीभगवन्निजाचरितेन पुंसः शिक्षयति, तथा तत्प्रियापि स्त्रियः शिक्षयन्ती दुरात्मतां दर्शयामासेत्याह —सा चेति । यद्यपि तादृशो व्यवहारो मानश्च न दुरात्मतया किन्तु केवलमुभयोर्महानागरयोरन्योऽन्यं प्रेमविवर्द्धनो विशेषतश्च स्वाधीनभर्त्तृकात्वे नोचित एव, तथापि दर्पस्तत्कृतोक्तिविशेषश्चेश्वरेऽनुचित एवेति वैधोपासनाशास्त्रपरैस्तथा व्याख्यायते । तद्दोषोऽपि परिहृत एव, तयोर्लोकशिक्षापरत्वात् यद्वा, काथिनामिन्द्रादीनां दैन्यमीदृगसूयाभावादर्शयन् प्रेयसीकृत तादृग्विकासादिसुखाभावात्, स्त्रीणां च दुरात्मतां दुर्बुद्धित्व श्रीकृष्णेतरकुत्सितपति-भजनात्, अथवा कामिनः प्रति दैन्यं स्त्रियश्च प्रति दुरात्मतामेव दर्शयन् शिक्षयन्नित्यर्थः । अत्र भावः—यदि कामक्रीडायां रसिकतास्ति, तदा रिरंसभिः पुम्भिरीदृश्यं स्त्रीवश्यतम् दीनैरेव भाव्यम्, स्त्रीभिश्च सुरतादिपु लज्जादिकं परिहृत्य पुरुषं च वशीकृत्य स्वातन्त्र्यरूपदुश्चेष्टापराभिर्भाव्यमिति, एतच्च तयोर्व्वक्ष्यमाणवचनव्यवहारादेः, किंवोक्तव्यवहारस्याभिप्रायेण। यद्वा, अत्रोक्तरमणप्रकार एवायं दर्शितः, ततश्च वैदग्धीविशेषेण कामशास्त्रोक्त विविधबन्धादौ स्कन्धद्वयोपरि स्त्रीपादद्वयनिर्धारणादिना दैन्यं दौरात्म्यं चाधरदंशननखक्षति केशग्रहष्ठ पुरुषायितादिनोह्यम्, दैन्यदुरात्मता शब्दप्रयोगश्च ज्ञानादिनिष्ठ मुनिविशेषापेक्षया वस्तुतस्तु निजरसविशेषेण उक्तिभंग्यैवेति, यद्वा, आत्मरत इतिसप्तम्यन्तम्, तेन सहानयोरन्वयः, ततश्च भावे क्तः, आत्मरतौ दैन्यं दुःखमेवेति कामिनः प्रति दर्शयन् तया कामभोगाद्यसिद्धेः, आत्मरतौ दौरात्म्यमेवेति स्त्रियश्च प्रति दर्शयन् तया स्वामिसेवाद्यसिद्धेः, अत एवात्मारामतानादरेण तया सह स्वयं रेम इत्येषा दिक्, अलमति विस्तरेण । एवं तद्वचनं तासामपि (श्रीव्रजदेवीनामपि) संगच्छेत, श्रीभगवत्तत्त्वज्ञानेऽपि निजभावाव्यभिचारेण रसविशेषमयत्वाच्च ।। ३५ ।। एवमुक्तप्रकारेणेति ईदृशानि तयोरन्योन्यं क्रीडालक्षणानि दर्शयन्त्यो यथाक्रमं वा तत्तदर्थो ज्ञेयः, यद्वा, 'इति' ईदृशं वदन्त्य एवं दर्शयन्त्यश्च ता विरहार्त्ताः, अत एव विचेतसो हतविवेकाः सत्यः, यतो गोप्यस्तदेकप्रेमवशाश्चेरुरितस्ततो बभ्रमुरग्रतो गता इति वा, यद्वा, विरहवशाः ।।३६।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स्त्रीणां दुरात्मतामाह । यामिति । अन्याः स्त्रियो विहाय कृष्णो यां गोपीमनयत् सा च तदा सर्वयोषिताम्मध्ये स्वात्मानं वरिष्ठं श्रेष्ठ मेनेऽमन्यत ॥ ३५ ॥ मननप्रकारमेवाहाहित्वेति । कामो यानं गमनसाधन यासां ताः सर्वा गोपी विहायासौ प्रियो मामेव भजतेऽतोऽहं सर्वयोषितां श्रेष्ठेति मेन इत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इति शब्द आदिवचनः प्रकृष्टं कृष्णविषयं प्रलापं कुर्वत्यः विटविषयमनर्थवचनं कुर्वत्यश्चाविशिष्टचेतना अविपरीतचेतनाश्च कामिनां दुरात्मतां स्त्रीणामेव दैन्यं दर्शयन् दर्शयन्त्यश्च ॥ ३५ ॥ अयं भावः सर्वथा त्याज्य इति दर्शयितुमाह । यामिति । अनेन राक्षस्याः बुद्धेः स्वभावो दर्शितः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतो क्रमसन्दर्भः

तदेवं स्तनयोस्तं प्रशंस्य प्रकृतं तादृशं तद्विलक्षणं वर्णयति । सा चेति । तदा मेन इत्यनेन पूर्वं तासु मध्ये वर्त्तमाना या अपि तस्या तादृशो मानो नासीदिदानीमेव जात इति लभ्यते तच्चैवं तादृशभावं हि तासां द्विधा मनोभवावस्था सम्भवति कान्तैकस्फुरणे केवलं स्थायिमयी कथञ्चिदन्यस्फुरेण गर्वादिसञ्चारि प्रचुरस्थायिमयीति अतस्तस्या गाढानुरागं प्राधान्ये बहुकाले व्याप्य केवलं स्थायिमय्येव जाता सम्प्रति कथञ्चिद्वाह्ये जातेति परेति ॥ ३५ ॥ तदेवं तस्याः स्वाधीनभर्त्तृकात्वोचितं कृत्रिममाल स्यादिमयं नर्म वचनं श्रुत्वा स्वयमपि स नर्मैवान्तर्हित इत्यहा । एवमिति पादत्रयेण तदेवं सम्भोगाचितं स्वाधीनभर्त्तृकामयीं प्रेमपराकाष्ठां दर्शयित्वा नर्मणाणि विप्रलम्भे परमदैन्यमोहात्मिका तत्पराकाष्ठां दर्शयंस्तत् प्राशस्त्यमेव सूचयति । सेति सपादश्लोकेन ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ तस्या एव वृत्तान्तं श्रीशुकदेवः प्रस्तौति रेमे तयेत्यादि । तया सर्वा विहाय या नीतेत्यर्थः । न तु तस्य वैषम्यमेतदित्याहुः—आसु विरहितासु गोपीष्वात्मरत आत्मना मनसा रतं रमणं यस्य भावे क्तः, तया सह नीतया सह रेमे । ननु कथमेतज्ज्ञातमित्याहुः—आत्मारामोऽचिन्त्य परमैश्वर्यः, अतएवाखण्डितोऽखण्डप्रेमातुल्यप्रेमेत्यर्थः, दक्षिणनायकत्वात्; (भा० १०।३२।२१) "मया परोक्षं भजता तिरोहितम्" इति तस्य स्वोक्तेश्च । तेन तासु मानसं रमणं, अस्यां कायिकमिति । किं कुर्वन् ? कामिन्यां दैन्यं दर्शयन्, स्त्रीणाञ्च दुरात्मतां दर्शयन् अनुमानप्रयोगेन बोधयन् । तथाहि—यो यः कामी, स स दीनः, अनीश्वरत्वात्, यत्र यत्रानीश्वरत्वम्, तत्र तत्र दीनत्वम्, पुरूरव-ययातिप्रभृतिवत् । यो यो नैवम्, स स नैवम्, यथाहमित्यन्वयव्यतिरेकिणानुमानेन कामिनां दैन्यम् । एवं गोप्यादयो न दुरात्मानः, यदङ्गसङ्गवत्वात् यत्र यत्र यदङ्गसङ्गवत्त्वम्, तत्र तत्र न दुरात्मत्वम्, यथा लक्ष्म्यादिः । या मदङ्गसङ्गवत्यो न भवन्ति, ता दुरात्मानो भवन्ति यथा गोप्यादिभिन्नाः स्त्रियः । इत्यन्वयव्यतिरेकाभ्यां सामान्यस्त्रीणां दुरात्मताञ्च दर्शयन्निति यावत् । एतेन नाहं कामी, नैताश्च स्त्रीत्वेन दुरात्मानः, अपि तु मल्लीलौपयिकत्वादासां स्त्रीत्वभावाद्वाम्यादि । मम त्वासामनुवर्तनं लीलैवेति वाक्यार्थः । आत्मस्वात्मप्रायासु गोपीषु रमत इत्यात्मारामः ॥ ३५-३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

रेमे तया स्वात्मरत इत्यादि श्रीशुकोक्तिः । अस्यायमर्थः—स्वात्मरतः स्वात्मारामोऽप्यखण्डितोऽपि तया सह रेमे । आत्मारामत्वादिभिर्युक्तः कथं सर्वाः परित्यज्य केवलं तया सह रमते इत्याह—कामिनामित्यादि । ये कामिनो भवन्ति, ते दीना भवन्ति, यास्तु स्त्रियो भवन्ति, ता दुरात्मानो भवन्ति, नायं कामी, नैता अपि स्त्रियः स्त्रीप्रभृतयः, एताः किल चिदानन्दशक्तिरूपाः, आसां पार्थक्यं नास्ति, एकया सह रमणमेव सर्वासां रमणमिति बोधयन् । यद्वा, आसु परित्यक्तासु आत्मना आत्म-तादात्म्येन रमणं यस्य, अतोऽखण्डितः—न विद्यन्ते खण्डितेत्यवस्थाभेदसंज्ञा भेदाम्नायिका यस्य । अतस्ता अपि रमयति, तया सह च रमते, अतः परमाचिन्त्यमहिमत्वम्, तेन कामिनां दैन्यं दर्शयन् । कामिनः खलु एवं कर्त्तुं न शक्नुवन्ति, प्राकृतत्वात् । स्त्रीणाञ्च दुरात्मताम्, स्त्रियश्च दुरात्मानः, यत एवम्विधं मां न भजन्ति जीवच्छवमेव भजन्ति । यद्वा, आत्मारामोऽप्यखण्डितोऽपि न विद्यते खण्डितं यस्मात्, एकरसोऽपि कामिनां दैन्यं पादपतनादि-वैयग्रयं दर्शयन् । तथापि तस्याः प्रसादो न जातः, इत्यालक्ष्य स्त्रीणाञ्च दुरात्मतां दुःसाध्यतामेव यथा यथा दैन्यं करोति तथा तथा सापि वैमुख्यं करोति, कथं मत्सख्यस्त्यक्ता इति रोषं प्रकटयति—इति द्वयं दर्शयन् सम्पादयन् तथैव भक्तवशतालीलां प्रकटयति । यद्वा कामिनो यथा दैन्यं कुर्वन्ति, तथा दर्शयन् अत्यासक्तो भूत्वा रेमे । एवं स्त्रीणां परित्यक्तानां गोपीनां दुरात्मतां दुःखात्मकतां दर्शयन् । अयमर्थः—अहमेवं तवातिवशोभूतः, त्वं यद्यत्र गर्वमुद्वहसि, तदा ता इव भविष्यसीतिभाव्यर्थसूचनम् । यद्वा, यो यः कामी, स स दीनः, यथा कामी, यो नैवं स नैवं यथाहम्, एवं या याः स्त्रियः, तास्ता दुरात्मानः यथा स्त्रियः, या नैवं ता नैवं यथा गोप्यः—इति व्यतिरेकानुमानेन कामिनां दैन्यं स्त्रीणाञ्च

दुरात्मतां दर्शयन् रेमे, अप्राकृतं यथा स्यात्तथा रेमे इत्यर्थः। स्त्रीणामिति न हि केशस्तनवत्त्वमेव स्त्रीत्वम्, अपि तु आच्छादकत्वेन बद्धहेतुत्वं 'स्तृणातेर्आढसिद्धः', अवयवार्थ एव—अन्यथा उत्पन्नतत्त्वज्ञानासु देवहूत्यादिषु व्यभिचारात्। यद्वा, कामिनां दैन्यं यथा भवति, तथा रेमे, स्त्रीणां त्यक्तानां बाह्यतां स च मेन इति ॥ ३५-३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वृषभानुनन्दिन्याः सर्वाधिकमुज्ज्वळरसस्य सम्भोगमंशं निर्वर्ण्य विप्रलम्भमंशमपि वर्णयितुं तद्वीजमुत्थापयति। यामिति साचेति पूर्वे सर्वाः सौभगमदयुक्ता आसन्नाधुना साच तत्र हेतुर्हित्वेति कामयानाः कामयमानाः यद्वा कामो यानमागमनसाधनं यासां ताः अत एवान्यगोपी सौभाग्यहेतुको यः पूर्वमान उद्भूतः सोऽपि निःशेषेणैव शान्तः ॥ ३५-३६ ॥

रसिकाह्लादिनी-टीका

यदर्थमेतावत्कृतं तदाहुः रेम इति, एवं व्रजदेवीनां तर्कानुकर्णन स्वानुभवेन च निर्णीतं विलासं प्रतिपाद्य श्रीशुकः परीक्षितं प्रति श्रीकृष्णस्य प्रेमैकवश्यतां रसवर्त्मना बोधयति रेम इति, अपि शब्दः सर्वत्रानुषज्यते। आत्मारत आत्मरतोऽपि आत्मनि स्वस्वरूपे रतोऽपि, यद्वा आत्मना स्वभावेन रतः, प्रियवर्गेषु रतो प्रीतियुक्तोऽपि, यद्वा आत्मनि मनसि रतः सन्तुष्टोऽपि विषयापेक्षाहितोऽपि आत्मारामोऽपि आत्मन्येवाराम आरमणं क्रीडा यस्य, यद्वा आत्मना सहारामो यस्य बाह्यं किमपि नापेक्षते, तथापि तया सह रेमे आत्मरतत्वमात्मारामत्वमवगणय्य रेमे अयमभिप्रायः आत्मरतौ आत्मारामतायां च कियत् सुखमिति तारतम्यं जानन् तया सह रेमे, देहेन्द्रियैः सह स्वकीयेषु रमणे यत् सुखं तद्रमणं तत्सुखं निरीन्द्रिये आत्मनि कुतः अतएव सर्वज्ञः सर्वरसविवेकः ज्ञानवान् तथा चक्रे इति। यतोऽखण्डितः, परिपूर्णोऽपि रेमे। अयमर्थः गोपीजनरमणात् प्राक् आत्मरतत्वमात्मारामत्वं च नास्ति। उभयेषामनर्हितत्वात् तथापि आत्मरतत्वात्मारामत्वयोश्चैतन्यधर्मत्वं स्वकीयेषु रमणं देहेन्द्रियविशिष्टस्य विग्रहि धर्म, उभये सामानाधिकरण्येऽपि न विरोधः। ईश्वरे यथा ज्ञानाज्ञानयोर्धर्माधर्मयोः न विरोधः तद्वत् अत्रापि। अत एव यथा ज्ञानाज्ञानयोः धर्माधर्मयोस्तारतम्ये तथा गोपीरमणात्मारामत्वयोस्तारतम्यं ज्ञात्वा सजातीयैर्गोपीजनैः समं रमणं स्वीयमानन्दं स्वकीयकलाकौशलं चावधिभूतं रसवर्त्मनाविश्चकार। स्वीयामखण्डिततामप्याविश्चकार। अन्यथा योगमायाविर्भावितं परिपूर्णत्वमन्तरेण बह्वीनां यूथपतीनां कथमेकेन सम्भाव्येतेति। यथान्यो नायकः सङ्केते प्रियागमनं प्रतीक्षन् अगमने खण्डितो भवति तथा नायं बहुरमणत्वात् खण्डतो न भवति। यतोऽसावच्युत इति। श्रीकृष्णस्य दक्षिणनायकत्वात् तदुक्तं रसार्णवे "नायिकास्वप्यनेकासु तुल्यो दक्षिण उच्चयत" इति। किं च अहो अस्या लावण्यं प्रेम च वशीकृतः श्रीकृष्ण आत्मरतमात्मारामतावगणय्य तया सह रेमे इति। स्वप्रयोजनमुक्त्वा प्रयोजनमाह। कामिनामिति, अन्येषां प्राकृतानां मलमूत्रभाजनानामपि कामिनां मनोद्रेकात् प्रियामुखरूक्षताकलनात् संचारीभावोदयेन दैन्यं पारवश्यं प्रसादनं च। तादृशीनामेव स्त्राणां दुरात्मतां दुःखभावतां स्वाधीनपतिकतया हर्षमानगर्वारूढतां दर्शयन् रेम इति। अयमभिप्रायः सच्चिदानन्दविग्रहः श्रीकृष्णः, सच्चिदानन्दरूपा व्रजदेव्योऽतस्तदेकनिष्ठत्वमनुकरण न किन्तु तात्विकमेव इदं तु कैमुत्यन्यायेनोच्यते। प्राकृतेऽपि मानारूढत्वलक्षणा दुरात्मनानां मदमानारूढता भवेदिति। किं पुनः कृष्णे मूर्त्तिमति मधुररसे दैन्यं तत्परत्वं न भवेदिति। श्रीशुकस्यायमाशयः आचार्यैस्तद् व्याकृतं तादृशकृत्यनभिज्ञान् श्रीकृष्णमाहात्म्यानभिज्ञानपि। तस्य स्वातन्त्र्यं निर्लेपता च गोपीनामन्यस्त्रीदृष्टान्तेन चानभिज्ञतां स्थापयितुमिदमुक्तं कामिनामिति अतो न किंचिदसमञ्जसमिति श्रीकृष्णस्यायमाशयः यथा "स्वागतं वो महाभागा" इति यथाश्रुतेः तासां प्रतीतिर्जाता तथाऽत्रापि कामिनामिति। कामिभिः स्त्रीवशैर्न भाव्यं स्वीयाचरितेन लोकान् शिक्षयामास। तस्याः आचरितेन स्त्रीणां दुरात्मतां स्थापयामासेति। यद्यपि तादृशमानो न दुरात्मनतया किंतु केवलमुभयोरन्योन्यं प्रेम विवर्द्धनाय स्वाधीनपतिकाया उचित एव तथापि मर्यादामार्गोपासनायामीश्वरावज्ञानहेतुगर्वोक्तिरनुचितेति धर्म मर्यादामार्गे त्यागं शिक्षयन् रसमार्गेऽपि एवं शिक्षयति। यदि मधुररसे रिरंसास्ति तदा रसिकैर्दीनैः स्त्रीवश्यतया भाव्यं, यदि कामकलाकौशलभक्तिः तदा लज्जापरिहारपूर्वकं स्वपतिं वशीकृत्य स्वातन्त्र्येण मानदर्पपराभिः स्त्रीभिः दुरात्मतया भाव्यमित्युभयत्र शिक्षणम्। इदं रहस्यं ज्ञानकर्मादिनिष्ठमुनिमुखनिरीक्षणेन नोद्घाटितमिति। अत एव कामशास्त्रानुसारेणात्मा रामत्वमनादृत्य तया सह रेमे। आत्मारामतया सुखविशेषानुदयात् अलमिति ॥ ३५ ॥ पुनरपि सर्वासां मार्गेण प्रकारं कथयन् तस्या मानदर्पहेतुकं विप्रलम्भं कथयिष्यन् रहो वृत्तमाह इत्येवमिति, इत्येवं श्रीकृष्णलीलानुकरणेनान्योन्यं प्रदर्शयन्त्यस्तत्र विलासचिह्नानि निर्णीतवत्यो विचेतसो जाताः सत्यश्चेरुः बभ्रमुः। एवं तासां विह्वलत्वं प्रतिपाद्य तस्याः समानं निर्मितां मानारूढतां निरूपयति। वने विलासयोग्ये प्रदेशे अन्यास्त्रियः असम्पन्नमनोरथाः विहाय पत्या जातमानदोषा गोपी रहो नयत् ॥ ३६ ॥

विशुद्धरसदीपिका

उपसंहरति। इतीति द्वाभ्याम् ।इत्येवमिति। अन्यदप्येवं विधं विहारादिकमनिदिष्ट ता गोप्य इति कविवक्तृनिवद्धत्वादात्मानि रहस्यप्रकाशनदोषः परिहृतः ननु तादृशविरक्षादिसमुदाये ताभिः किमिति तद्रहस्यं प्रकाशितं तासां चानुभवगोचरः कथं

न जात इति चेत्तत्राह । विचेतसः प्रकाशने ऽनवधाने च तन्त्रेणैक एव हेतुः ननु रासक्रीडार्थं मुरलीकलेन सकला एवाहूय वाचः पेशैश्च परिभूय तत्प्रतिवचनचातुर्यमनुभूय कारुण्येन ताभिः सम्भूय लीलावेशेन रमयित्वा तादृशीश्च ता हित्वा किमित्यन्तर्हित इत्याशङ्क्य सर्वाऽयम्प्रयासः प्राणप्रियामन्वात्मन आनुकूल्यप्रदर्शनायेति समादधन्नाह । यामिति । तादृशी स्ताः सर्वा अपि वञ्चयन् मां रहोऽनयत् सा चात्मानं सर्वयोषितां मध्ये वरिष्ठ वरस्य प्राणाप्रियस्येष्ठ मेने अनुभूतवती एतदर्थोऽयमखिलः समुद्यम इति भावः । एवञ्च उपर्युपरि बुद्धानां चरन्तीश्वरबुद्ध्य इति न्यायाद्रासक्रीडेयं श्रीराधिकायाः स्वाधीनपतिकात्वप्रदर्शनायेति गम्यते ।३५। ननु तस्यास्तासां च को विशेषस्तत्राह । गोपीरिति गोपो भूपेत्यमरः । ततश्च तासां सर्वासां पट्टराज्ञी स्वामिनीत्यर्थः । अन्याः स्त्रियः भोगिनीकल्पा इति भावः । एवञ्चान्या शक्तिभ्रमेण तस्या मानमाशङ्क्यैव तासां त्याग इति हृदयं तत एव तयाप्येवमभिमतमित्याह गोपीरपि कामयाना अपि हित्वा यतोऽसौ मां भजते प्रियः परमेष्ठ इत्यर्थः ।। ३६ ।।

श्रीरामनारायणकृता भावभावविभाविका

मुनीन्द्रोऽग्र गोपीचरितमाह । इत्येवमिति । प्रेमप्रभावादाविर्भूतस्वरूपा यतो गोप्यो गा इन्द्रियाणि सर्वतोऽसद्विषयेभ्य आकृष्य भगवदेकपरत्वेन पान्तीति तथा पराञ्चिखानि व्यतृणत्स्वयं भूस्तस्मात्पराङ्पश्यति नान्तरात्मन्निति श्रुत्यान्य परत्वमेवेन्द्रियाणां हिंसनमिति निर्णायान अत्मानमन्तरो यमयतीत्यादि श्रुतिसिद्धान्तरात्म भगवत्परत्व एव तदहिंसनसूचनात् तथा सा वाग्यया तस्य गुणान् गृणीते इत्यादिस्मृतिवाक्यैश्च तदाराधने एवेन्द्रियसाफल्यप्रतीतेश्च अत एव लोकव्यवहारेभ्यो विचेतसो विगतमत्तयो-भगवद्विषये अविचेतसो वाकाराभिधेये वासुदेव विशिष्ट सर्वलोकविलक्षणं चेतो यासां तथा भूता वा एवं पूर्वोक्तादृशाप्रियाप्रियतमयोर्लीला एव दर्शयन्त्योऽपि प्रेमवैचित्र्यात्केवलमन्वेषयन्त्यो भगवदावेशनैव विचेरुरेवं देहाद्यभिमानस्यात्मस्वरूपविच्छेदकत्ववत् प्रेमपथाचार्यभूतानां गोपीनां स्वाचरितैस्तन्मार्गे मानस्य भगवद्विच्छेदकत्वमुपदिशन्तीनां चरितमुक्त्वासाक्षात् तदात्मभूतायाः प्राणवल्लभाया अपि स्वाचरितेन कैमुत्यन्यायेन मानस्य प्रेमपथपरिपन्थित्वं प्रख्यापयन्त्याश्चरितमाह । यामिति अन्याः स्त्रियः स्त्रीर्वने विहाय यां गोपीं कृष्णो नित्यानन्दस्वरूपोऽपि तदानीं मानाभावादनयत् नीतवान ।। सा च तदा तद्रमणोत्तरम् आत्मानं मेने इत्यनेन पूर्वमेतावद्विहारादौ कृष्णैकपरत्वेनात्मप्रतीतिरेव तस्यानाभूदिति दर्शितं नैतच्चित्रं तस्यापराभक्तितयाविर्भूतायाः कृपाकटाक्षावलोकनमात्रेणान्येषामपि जीवन्मुक्तानां यक्षत् क्रीडन रममाणः स्त्रीभिर्वा यानैर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरमिति देहाद्यननुसन्धानं श्रूयये तदा किमुवाच्यं तस्याः ततश्चात्मभानोत्तरं तद्धर्मस्फूर्त्तिमाह । वरिष्ठ मेने इति । तद्धत्वनुसन्धाने बहिः प्रवृत्तौ प्रियसेवनस्फूर्तिमाह यतोऽसौ निरुपमगुणमाहात्म्यः प्रियः सर्वप्रेमास्पदत्वेन परमानन्दरूपोऽपि मां भजते परमानन्दघनभजनीयत्वप्रयुक्तवरिष्ठत्वानुसन्धानोत्तरं हेयविलक्षणतया वरिष्ठत्वानुसन्धाने बहिर्दृष्ट्या तत्प्रतियोगिप्रतीतिमाह । सर्वयोषितामिति । अत्र परमानन्दकृष्णसेव्यत्वेन सर्ववरिष्ठत्वे वक्तव्ये सर्वयोषितामित्युक्तिस्तु कृष्णादन्येषां पुरुषत्वाभावात्तदसम्मत्या सर्वयोषितामात्मनोऽन्यूनत्वे हेतुमाह । हित्वेत्यादिना । ततः सर्वयोषिभ्यः रत्युर्वशीशच्यादिभ्यो वरिष्ठा गोप्यः ताश्च पुनः कामयमाना अपि हित्वा मां भजते इति ।। ३५–३७ ।।

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथेतरगोपीकृतं तल्लीलावर्णनमुपसंहरति । इत्येवं भगवल्लीलां परस्परं प्रदर्शयन्त्यश्चेरुः यतो गोप्यः गोपरूपेणावतीर्णस्य भगवतः सम्यग्धिन्यः यद्वा स्वभावादेव गोपात्मजे तस्मिन्प्रेमवत्यः नतु शास्त्रेण भगवदीया जाताः विचरन्त्यश्च विचेतसो जाताः प्रकारत्रयापि समाप्तित्वादतिव्याकुलमानसाः बभूवुरित्यर्थः । अथ वृषभानुनन्दन्याः विप्रलम्भांशं वर्णयितुं पीठिकां रचयति । यामिति । कृष्णः सदानन्दरूपः तस्यामानन्दमाविर्भावयितुं यां गोपीमनयत् अन्याः स्त्रियो वने विहाय अन्यासु स्त्रीत्वप्रागल्भ्यतामालोच्य तासां त्यागस्तयोः गोपीत्वमुग्धात्वमालम्ब्य नयनमिति द्योतयति स्त्रियो गोपीमित्युक्तं निवृत्तिपक्षे इत्थम् अविचेतसः समाहितचित्तस्य पुरुषस्य ब्रह्मस्वरूपं दर्शयन्त्यस्तस्यान्तःकरणवृत्तिषु विचेरुः अन्याः श्रुतिलक्षणाः स्त्रियो वने अन्तःकरणे विहाय यां यां गोपीं कृष्णः सदानन्दस्वरूपः परमात्मा अनयत् मम स्वरूपाववोधिकेयमित्यवभासयत् ।। तस्यास्त्यागे निमित्तमाह । सा चेति । चकारात् पूर्वं सर्वासां विस्मयो जात इदानीमस्यामिति गम्यते सर्वाभ्य उत्कृष्टमात्मानं मन्यमानायाः साधारणं रमणमस्माकं नासीदधुनात्वसाधारणं तस्मात्सापि गर्वं प्राप्ता अनेन समुदायदोषेण भगवान्नत्यजति किन्तु प्रत्येकदोषेणेत्यपि ध्वनितम् सापि सर्वासां योषितां मध्ये आत्मानं परमोत्कृष्ट मेने तन्निमित्तं तच्चेतसि स्फुरितमाह । कामयानाः । कामो यानमागमनसाधनं यासामिति वा गोपीः स्वभाग्यमविदित्वा सर्वासामपि साधारण्येन प्रियः असौ सर्वोत्तमो मामेकां भजते मन्मनोऽनूकूलमाचरतीति विचार्येत्यर्थः । निवृत्तिपक्षे निकृष्टापि श्रुतिरात्मानं सर्वश्रुतीनां मध्ये श्रेष्ठं मेने यतः सर्वा अपि गोपीः स्वसम्बन्धिनी स्वप्रतिपादनकामनावतीर्हित्वा असौ प्रत्यगभिन्नः परमात्मा स्वप्रतिपादनकामनावतीर्हित्वा असौ प्रत्यगभिन्नः परमात्मा प्रिय आनन्दघनो मां भजते मत्प्रतिपाद्यतां प्राप्तः महावाक्यश्रुतिबोध्यः परमात्मेत्यधिकारिचेतसि स्फुरितमिति भावः ।। ३५–३७ ।।

रास-रहस्यम्

र० टी०—अत्र अस्यामवस्थायां, कामिना आप्तकामस्वरूपेण मुमुक्षुणा, आत्मत्वेन प्रतिपादनकामिन्याः अतीवकमनीयायाः आत्माकारवृत्तेः, तु अवधारणे, केशप्रसाधनं कश्च ईशश्च केशौ तयोः प्रकर्षेण साधनं ध्येयाकारप्रत्ययरूपेण प्रतिपादनं कृतं, अत एव "तत्त्वमसि।" श्रुतिलक्षणां कान्तां कान्तियुक्तां परमकमनीयामधिकृत्य, तानि "तत्त्वमसी"ति पदानि. चूडयता चूडास्थानीयकृता शिरस्यवधार्य, ध्रुवमवश्यं, उपविष्ट उपेण आधिक्येन विष्टं प्रविष्टं अभिन्नतया स्थितमित्यर्थः ॥ कामिनां कामात्मपराणां, दैन्यं दरिद्रतां परिच्छिन्नत्वं, स्त्रीणां चैव स्त्रीस्थानीयानां विषयाकारवृत्तीनां चैव, दुरात्मतां दुष्टात्मतां स्वरूपेण दोषयुक्ततां, दर्शयन् अवलोकनं कारयन्, तथा आत्माकारवृत्त्या, आत्मरतः आत्मन्येव संयुक्तचित्तः, अखण्डतैलधारावत् निरवच्छिन्नः एकरसस्वरूपो भूत्वा आत्मारामः आत्मन्येव आरामः यस्य, सुखस्वरूपेण रेमे ब्रह्मात्मभावेन परिनिष्ठितो बभूव ॥३४–३५॥ इत्येवं पूर्वोक्तप्रकारेण विभिन्नावस्थायां विचरन्त्यः आत्माभिमुखीवृत्तयः मिथः आत्माकारवृत्तेः स्थिति दर्शयन्त्यः विचेतसः विगता चेतो यासां ताः व्याकुलमानसाः विचेरुः ॥ कृष्णः आत्मा, अन्याः स्त्रियः आत्माभिमुखीवृत्तीः, वने संसारारण्ये, विहाय परित्यज्य, यां गोपी आत्माकारवृत्तिमनयत् नीतवान् ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्त्रीणां दुरात्मतामाह इत्येवमिति त्रिभिः। पूर्वं याः प्राप्तगर्वाः इत्येवं विहाय यां निर्गर्वा मत्वा अनयत्सापि आत्मानं वरिष्ठं मेने इत्यग्रिमेणान्वयः कामो यानमागमनसाधनं यासां ताः कामातुरा अपि गोपीहि त्वा मां भजते इति हेतोः सा आत्मानं वरिष्ठं मेने ॥ ३५–३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तदालापास्तच्चरितसंल्लापासस्यैव विशिष्टा चेष्टा यासां तास्तदात्मिकास्तत्स्वामिकास्तद्गुणान्गायत्य एवात्मागाराणि शरीराणि गृहाणि च न सस्मरुः ॥३५॥ पुनः पुलिनं यत्रावात्सुरतस्थलमाविश्य कृष्णस्य भावनं ध्यानं यासां ताः समवेता मिलिता ललनास्तदागमनं काङ्क्षितं यासां तास्तथा। तदागमनकाङ्क्षिणीरिति पाठे द्वितीया प्रथमार्थे। समवेता जगुः ॥ ३६ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे अष्टाविंशोऽध्यायः ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं सर्ववस्तुयाथात्म्यस्फुरणं भगवदावेशात्तासां निरूपितमुपसंहरति। इत्येवमिति एवम्प्रकारेण भगवल्लीलाः प्रदर्शयन्त्यः चेरुः गतिं कृतवत्यः तासामनेकविधत्वे हेतुमाह। गोप्य इति। नहि ताः शास्त्रेण भगवदीया जाताः किन्तु स्वभावेन स्वभावस्त्वनेकविध इति सर्वमुपपद्यते किञ्च न हि ताः किञ्चिज्ज्ञात्वा वदन्ति किन्तु विचेतस एव अथवा एवं दर्शयन्त्यो विचेतसो जाताः प्रकारत्रयस्यापि समाप्तत्वात् अतस्तासां नाग्रे गतिर्निवचनानि एवमेतासां स्वरूपं निरूप्य निरूपयति। यां गोपीमिति। सार्द्धैस्त्रिभिः—

दोषोऽभिमानवचनो वचनोत्तरमेव च। पूर्ववत्तिरोभावो विज्ञेयं दोषदर्शने ॥

यां गोपीं पूर्वमजातदोषामनयत् यतः कृष्णः सदानन्दः तस्यामानन्दं स्थापयितुमन्यास्तु स्त्रिया जाताः सा तु मुग्धेव गोपीं अतस्ता वने विहाय तामनयत् वनस्थानां विवेको भवतीति॥ स्वयन्त्वयुक्तकरणात् प्रकृत्याद्यधिकारिणः बुद्धि स्म नाशयामासुः साप्यन्धेवाभवत्तनः तदाह। साच तदा सर्वयोषितां मध्ये वरिष्ठं मेन इति चकारः पूर्वसमुच्चयार्थोऽप्यार्थं तदेति पूर्वं तस्यास्तथा त्वं न जातमिति। अनेन समुदायदोषेण न भगवांस्त्यजति किन्तु प्रत्येकदोषेणेति ज्ञापित तस्यास्तथा दोषे हेतुः हित्वेति कामयाना अपि सर्वाः गोपीर्हित्वा असौ मां भजत इति तत्रापि प्रियः यथैव मम प्रीतिभवति तथैव करोति नतु कचिदप्रियविषयः अतोऽहं वरिष्ठा अन्यथानुपपत्त्या तथा त्वं कल्प्यते ॥ ३५–३७ ॥

श्रीसुबोधिनी-सारः

सा च राधा तदा सर्वस्त्रीणां वरिष्ठं श्रेष्ठमात्मानं मेने कामयाना इच्छन्तीर्गोपीर्हित्वाऽसौ प्रियो मां भजते ॥ ३५ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

यां गोपीमित्यत्र, बहिःप्रियसम्बन्धेन्तरायहेतुत्वेन माने दोषत्वोक्तिर्विवृताविति ज्ञेयम्। समानरसत्वेप्येतासां तदा मानोभून्नैकत्र। तत्राप्यधुना सोभूत्, तत्र हेतुमाहुः स्वगत्ययुक्तकरणादिति। नायिकानां हि प्रकृतिः सदा मानिनीत्वम्। प्रकृते चेयदवधि नायकाधीनत्वमेवाङ्गीकृतमिति स्वस्यापि नायिकाप्रकृतेर्या गती रीतिस्तस्यामयुक्तकरणान्नायकाधीनत्वेन स्थितेर्नायिकाप्रवृत्तिनिवृत्तिहेतुत्वेनाधिकारिण इवाधिकारिणो ये, आदिपदात्प्रौढा भावास्ते पूर्वभावान्कोमलान्नाशयामासुरित्यर्थः। स्वयं

स्वयुक्तेति पाठे स्वयंपदं स्वामिनीपरम्। शेषं पूर्ववत्। ननु पूर्वमेवास्या अपि स्वामिन्या **मानः कुतो नाभूत्, रसप्राप्तेस्तुल्य**त्वादिति चेत्, उच्यते। भगवान् हि भक्तेभ्यो भजनानन्दं दातुं लीलां करोति, स्वस्य तद्रसानुभवार्थं च। तथा च **बह्वीष्वपि** प्रियासु सतीष्वेकस्यां पृथङ् नयनेन विशेषरमणे यो रसः स न सम्भूय रमणे। स च स्वरूपात्मक एवेति तत्स्वरूपं प्रकटीकृतवानिति न काप्यनुपपत्तिः। पूर्वं मानाभावे स्वामिनीभिरेव हेतुरुक्तोऽ**नयाराधित** इत्यादिना ॥ ३५ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

यां गोपीमनयत् कृष्ण इत्यादिसार्धत्रयश्लोकवाक्यार्थानाहुः **दोष** इति का० २७७$\frac{३}{४}$। **दोषदर्शन** इति निमित्तसप्तमी, तथा च तस्यास्त्यागादिकं तासां स्वदोषस्फूर्तिनिमित्तं विज्ञेयमित्यर्थः, तस्यास्तादृगवस्थादर्शनेन तासां स्वदोषस्फूर्तिरभूदस्मद्दोषेणैव वयं त्यक्ता इति, अत्रैव श्लोके **स्वयमिति** का० २७८$\frac{३}{४}$। ननु समानरसवत्त्वेऽप्येतासां तदा मानोभून् नैकस्यां भगव। नीतायां तत्राप्यधुना मानोभूत् तत्र को हेतुरित्याशङ्क्याहुः **स्वगत्ययुक्तकरणादिति**, अत्र टिप्पण्यां नायिकानां हि प्रकृतिः सदा मानिनीत्वं, प्रकृते च इयदवधि नायकाधीनत्वमेवाङ्गीकृतमिति स्वस्या नायिकाप्रकृतेर्यागती रीतिस्तस्या**मयुक्तकरणान्** नायकाधीनत्वेन स्थितेर्नायिकाप्रवृत्तिनिवृत्तिहेतुत्वेनाधिकारिण इवाधि**कारिणो ये प्रकृत्यादय आदि**पदात् प्रौढा भावास्ते पूर्वभावान् कोमलान् **नाशयामासुरि**त्यर्थः, तथा च पूर्वं भावानां कोमलत्वान् मानाभावेपि पश्चान् नायिकास्वभाववशात् कोमलभावरूपबुद्धिनाशे **सापि नायिका अन्येवाभवत्** मानवती जातेत्यर्थः, एवं चायं मानो नायिकायाः प्रकृतिसिद्ध एव न तु दोषात्मक इति भावः, **स्वयं स्वयुक्तकरणादिति**पाठे स्वपदं स्वामिनीपरं, शेषं पूर्ववत्॥ अध्यायसमाप्तौ **श्रीकृष्ण** इति का० २७९$\frac{३}{४}$, ८०$\frac{३}{४}$। **श्रीकृष्णगोपिकास्तत्र द्विविधा नवधा गुणै**रिति अन्यपूर्वानन्यपूर्वाभेदेन **द्विविधाः** पुनः प्रत्येकं राजस्यादिभेदेन **नवधे**त्येवमष्टादशविधाः, उपलक्षणविधया एकानविंशतितमा अपि ज्ञेयाः, पक्षान्तरमाहुः **समुदायेन भिन्ना वेति**, समुदायभेदेन भिन्नप्रकारा इत्यर्थः, पक्षद्वयमप्यग्रिमाध्यायकारिकासु स्वयमेव वदिष्यन्ति, **स्वसन्देहात् तु मिलिता** इति कस्या वा भाग्यात् स्नेहेन कृपया वा आगच्छेदितिसन्देहान् मिलिता जाता इत्यर्थः, तदुक्तं "पुनः पुलिनमागत्ये"ति श्लोकविवरणे सुबोधिन्याम् ॥ ३५–३६ ॥

इत्यष्टाविंशोऽध्यायः ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

"किमेवं गोपीभिः केवलं सम्भावनामात्रं कृतम्? किंवास्ति तथात्वम्" इति सन्दिहानं राजानं प्रति शुक आह—तया सह रेमे इति। 'तर्हि गोपीभिरुक्तं कामित्वमपि सत्यमेव' इत्याशङ्क्याह—आत्माराम इति। तस्यामप्यवस्थायां निजानन्द एव रममाण इत्यर्थः। तत्र हेतुमाह—अखण्डित इति। **स्त्रीविभ्रमादिभिरनाकृष्टचित्त** इत्यर्थः। तत्रापि हेतुमाह—आत्मरत इति। स्वरूपानन्दलाभेनैव सन्तुष्ट इत्यर्थः॥ आप्तसमस्तकामश्चेत् किमिति तया सह रेमे तत्राह—कामिनामिति। विषयासक्तचित्तानां दैन्यं पारवश्यं स्त्रीणां दुरात्मतां दौर्जन्यं च दर्शयन् दर्शयितुमेव तया रेमे चकारादन्याभिश्च ॥ ३५ ॥ प्रकृतमुपसंहरति—इत्येवमिति। उक्तप्रकारेण प्रलपन्त्यः प्रलापमनर्थकं वचः कुर्वत्यः, 'दर्शयन्त्य' इति पाठे मिथस्तच्चिह्नानि दर्शयन्त्यो विचेतस उन्मत्तसदृशा गोप्यः विचेरुः। स्त्रीणां दुरात्मतां दर्शयति—यामिति सार्धाभ्याम्। अन्याः स्त्रियो वने विहायानादृत्य यां स्त्रियं कृष्णोऽनयत् सा च तदा सर्वयोपितां मध्ये आत्मानं वरिष्ठं मेने ॥ ३६

अन्वितार्थप्रकाशिका

कृष्णपदान्त उपविष्टायाश्चिह्नं पर्युषितपुष्पपतनं च दृष्ट्वाऽऽहुः—केशेति॥ अत्र तु कामिना कृष्णेन कामिन्यास्तस्याः केशानामितस्ततो विश्लथतां प्रसाधनं पुनः सीमन्तसमीकरणाभ्यां बन्धनं कृतम्। अन्या आहुः। कान्तामधिकृत्य तानि प्रसूनानि चूडयता चूडानुकरणेन बध्नता चूडाशब्दात्तत्करोतीति ण्यन्ताच्छता कृष्णेनेह ध्रुवं निश्चितमुपविष्टम्। भावे क्तः॥ रेम इति॥ शुकोक्तिः आत्मन्येव रतः अतः आत्मारामः स्वक्रीडः अखण्डितः स्त्रीभिरनाकृष्टो भगवान् कामिनां विषयिणां दैन्यं पारवश्यं स्त्रीणां दुरात्मतां दौर्जन्यं च दौर्शन्यं च दर्शयन् दर्शयितुमेव तया सह रेमे॥ इत्येवमिति अर्द्धम्॥ इदं पद्यं च स्वामिनो न सम्मतमिति तोषिणी। एवं प्रलपन्त्यः अनर्थकं वदन्त्यः। दर्शयन्त्य इति पाठे मिथस्तच्चिह्नानि दर्शयन्त्या विचेतस उन्मत्तसदृश्यो गोप्यो विचेरुः॥ स्त्रीणां दुरात्मतामाह—यामिति सार्द्धम्॥ अन्याः स्त्रियो वने विहायानादृत्य यां स्त्रियं कृष्णोऽनयत्॥ ३४–३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विचेतसागत लौकिकविवेकाः चेरुः अन्याः स्त्रीवने विहाय त्यक्त्वा कृष्णो यां अनयत्॥ सा च तदा सर्वयोषितां मध्ये आत्मानं स्वदेहं वरिष्टं नायकमाहनतया श्रेष्ठं मेने कुत इति चेत्तत्राह कामयानाः कामायमानाः अन्याः गोपीः हित्वा असौ प्रियः महाचतुरः मां भजते इति मत्वा वरिष्ठ मेने अनेन प्रकारेण स्त्रीणां दुरात्माता ज्ञातव्या॥ ३५–३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किंविचेतोभिर्गोपीभिः केवलमित्थं संभावनामात्रं कृतमुत तत्सत्यमेवेति राज्ञः संशयं निराकुर्वन्नाह मुनिः ॥ रेम इति तया गोपीभिरुद्भावितया कयाचिद्गोप्या च सह, आत्मरतः स्वतस्तुष्टः, आत्मारामः स्वक्रीडः, अखण्डितः अवाप्तसमस्तकामत्वेन स्त्रीविभ्रमैरनाकृष्टचित्तोऽपि श्रीकृष्णः, रेमे चिक्रीड एव । तथा चेन् किमिति रेमेऽत आह । कामिनां विषयासक्तचित्तानां, दैन्यं तत्पारवश्यात्मकदीनतां, स्त्रीणां च दुरात्मतां दौर्जन्य, दर्शयन् दर्शयितुमित्यर्थः । रेमे ॥ ३५ ॥ स्त्रीणां दुरात्मतामाह ॥ यामिति ॥ अन्याः स्त्रिया गोपीः, वनेऽरण्ये, विहाय परित्यज्य, कृष्णः यां गोपीं, सह अनयत् । सा च सा गोप्यपि, तदा सर्वयोषितां सर्वासां गोपीनां मध्ये, आत्मानं स्वां वरिष्ठं श्रेष्ठं, मेनेऽमन्यत ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यां गोपीमिति : १०.३०.३६.

दीनो यथा परायत्ताचारः स्त्रीवशगः पुमान् । तथा प्रदर्शयन् सर्वास्त्यक्त्वैकामभजत् प्रभुः ॥ २२६ ॥

कृष्णप्रिया

सुनो सखियाँ ! श्रीकृष्णचन्द्रजी तो आत्माराम होने से अपनी आत्मा में अनुरक्त है, और वनिताओं के विलास प्रभुको खण्डित नहीं कर सकते हैं, फिर भी कामीजनों की दीनता और वासनावश स्त्रियाँ की दुर्मति को दिखाने के लिए यहाँ रमण किया होगा ॥ ३५ ॥ श्रीशुकाचार्य जी ने कहा कि—राजन् इस प्रकार भगवान की लीलाओं को गाती और दिखलाती सब गोपियाँ बेचैन बन कर सर्वत्र घूम रही थी ॥ भगवान् श्रीकृष्ण अन्य गोपियाँ वन में छोड़कर जिस गोपीजी को साथ ले चले थे वह गोपी सब गोपियाँ में निज को सब गोपियों से अधिक श्रेष्ठ एवं बड़भागिनी मानने लगी । उन्होंने मन में ऐसा विचारा कि श्रीकृष्ण जी चाहना करने वाली व्रजवनिताओं को छोड़कर प्रियतम मुझमें प्यार कर रहे हैं ॥ ३६ ॥

सा च मेने तदाऽऽत्मानं वरिष्ठं सर्वयोषिताम् । हित्वा गोपीः कामयाना मामसौ भजते प्रियः[1] ॥ ३७ ॥
ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् । न पारयेऽहं चलितुं नय मां यत्र ते मनः ॥ ३८ ॥
एवमुक्तः प्रियामाह स्कन्धमारुह्यतामिति । ततश्चान्तर्दधे कृष्णः सा वधूरन्वतप्यत ॥ ३९ ॥

कर्दमक्षमा

अन्वयः—सा, च, गोपी, (तदा) कामयानाः, गोपीः हित्वा, असौ, प्रियः, माम्, भजते (इति) आत्मानम्, सर्वयोषिताम्, वरिष्ठम् मेने ॥ ३७ ॥ तदा, दृप्ता, (सा) वनोद्देशम्, गत्वा, केशवम्, अब्रवीत् अहम्, चलितुम्, न, पारये, (तत्) यत्र, ते, मनः, (तत्र) माम् नय ॥ ३८ ॥ एवम्, (तया) उक्तः, कृष्णः, स्कन्धम्, आरुह्यताम्, इति, प्रियाम्, आह, च ततः, अन्तर्दधे, तदा, सा, वधूः, अन्वतप्यत ॥ ३९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कामिनां दैन्यं दर्शयति । एवमुक्त इति । अखंडितत्वमाह । ततश्चेति । तस्यां स्कंधारोहोद्यतायामन्तर्हित इत्यर्थः ॥ ३९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भक्त्या लभ्यो नान्यथेति भावं दर्शयति—तत इति । ततो वरिष्ठत्वमननात् दृप्ता । केशवम् सर्वेश्वरम् । न पारये न शक्नोमि । सर्वथाहं तवाधीनेत्याह—नयेति ॥ वनस्योत्कृष्टप्रदेशं गत्वा केशवं केशान्वयमानं प्राक्कृतनर्मद्योतकचूडामुन्मोचयत्यास्तस्या विचित्रवेणीत्वेन ग्रथ्नन्तम् । अत एव दृप्ता, स्वाधीनकांताया दर्प एव रसमावहतीति भावः । चलितुं न पारये इति । बहुवचनभ्रमणोत्थो मे श्रमोऽभूदिति भावः । ननु मुग्धे ताभ्यो दूरमग्रे ह्यद्य स्थानान्तरं गन्तव्यमिति चेत्तत्राह—नयेति । पूर्ववन्मां वहन्नित्यर्थः । ननु किमग्रिमप्रदेशं अन्यजनदुष्प्रवेशं कुंजतिर्यक्तं पुष्पतल्पं त्वां नयामि, किं वा पुष्पाभरणार्थं पुष्पोद्यानम्, तत्राह-यत्र ते मन इति ॥३८॥ शुद्धबुद्धेः स्वभावं दर्शयितुमाह—सा वधूरिति । ततः स्कंधारोहानुज्ञानन्तरम् । इत्यर्थ इति—निजस्वातन्त्र्यं बोधितवांस्तस्या इति भावः ॥ ततश्च कृष्णेन मनस्येवं विचारितम्—अहो अनया स्वाभाविकः स्वधर्मं परित्यक्त एव, न हि सन्नायिका पुष्पतल्पं प्रति स्वनयने वचसा नायकाय सम्मतिंदत्ते । यदि चानया वाम्यरूपस्स्वधर्मस्त्यक्तस्तदा मयापि नायकेन संभुक्तकांतानुवर्तित्वलक्षणो दाक्षिण्यमयः स्वधर्मस्तक्तव्य एव, हि द्वयोरेव दाक्षिण्ये वाम्ये वा रसः सुरसः स्यात् । न चात्र रसिकलाकैरहं दूषयणीयः, रसो हि नायिकाप्रकान्तपरिपाटीक एव साधुर्भवेत् । किञ्च, महाप्रेमवत्या अस्या मद्विप्रलंभ जनितदशा-

---

[1] इह-विज । २. स्कन्धमा-वीर. ; स्कन्ध आ-श्रीधर. वंशी. जीव. विज. विश्व. रा. पृ. [illegible] ध. ।

विशेषदिदृक्षा साक्षादेव वा चिरं मे वर्तते, साप्येतदवसरे पूर्णा भविष्यति। मत्संश्लेषजनितमस्याः सौभाग्याधिक्यं ताभिरनुभूतमेव मद्विश्लेषजनितामपि प्रेमोद्रेकपरमावधिव्यंजिकां दशामसाधारिणीं दृष्ट्वा ताः परमचमत्कारसिंधुनिमग्ना भवन्तु। अस्या मद्विरहो दीपदहनायितो भवतु, ततश्चास्याः पूर्णतमाभ्यां संभोगविप्रलंभाभ्यां शृंगाररसोप्यद्य पूर्णतमत्वमापद्यताम्। अस्या अपि विरहे मत्संपादिते सर्वविरहोपशांत्यनन्तरं सर्वासामैकमत्ये सति विधित्सितोऽद्य रासोऽपि सेत्स्यति। अन्यथात्वे तत्संगरंगिणा मया तासां मानोऽद्य सर्वथैव दुरुपशम इत्यादीनि बहूनि प्रयोजनानि पर्यालोचयन्सहसैवांतर्द्धित्सु राह—स्कन्ध इति। अन्तर्दधे तत्रैव स्थित्वा ताः पश्यन्नपि तन्नयनगोचरतां जहावित्यर्थः। तत्र 'नय मां यत्र ते मनः' इति वदन्त्या वृषभानुनन्दिन्या मनस्येवं विचारितम् विलासश्रमवनविहारश्रमखिन्नाया मम क्षणं सुषुप्सा वर्तते अस्यापि स्वापाभावेनैव सर्वरजनीयापनमकल्याणसुखादेकमेव, अतः पुष्पतल्पं नयति चेन्नयतु आवां तत्र स्वप्स्याव इत्यतस्तत्रासंमतिर्न कृता। तत्र स्वप्स्याव इत्यतस्तत्रासंमतिर्न कृता। तत्र भगवतस्तदन्तःकरणविज्ञता प्रेमरसमयलीलाशक्त्यैव तिरोधापिता तत्तल्लीलासिद्ध्यर्थमिति ज्ञेयम्। अन्वतप्यत मुहुर्विललाप ॥ ३९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततो वरिष्ठं मानानन्तरं वनप्रदेशविशेषं तेनैव सह गमनं क्रमेणाग्रतो गत्वा दृप्ता गर्विता सती केशवं केशान् तदीयान् वयते ग्रथ्नाति अत एवाब्रवीत् किं तदाहुः। न पारये इति। बहुपरिभ्रमणेन परिश्रान्तत्वादिति व्याजमयी हेतुव्यञ्जना। ननु मुग्धे ताभ्यो दूरमग्रे स्थानान्तरं हृद्यं गन्तव्यमिति चेत्तत्राह। नयेति। पूर्ववदङ्के निधाय त्वमेव नयेत्यर्थः ॥ ३८ ॥ तदेवं तस्याः स्वाधीनभर्तृकात्वोचितं कृत्रिमालस्यादिमयं तत्प्रवचनं श्रुत्वा स्वयमपि सनर्मैवान्तर्हित इत्याह। एवमिति पादत्रयेण। स्कन्धे मदंस आरुह्यतामित्याह। इदञ्च नर्मणैव प्रियामित्युक्तेः। तथाहि। योऽन्यमुखे दुर्वादः प्रियतमवदने स एव परिहासः। इतरेन्धनजो धूमः सोऽयमगुरुसम्भवो धूप इति। यद्वा स्कन्धः प्रकाण्डे काये च बाहुमूलसमूहयोरिति विश्वप्रकाशात्। कायः स च युक्तत्वाद्वक्षोभाग इतीदमपि नर्मैव। ततस्तदनन्तरम्। त्वर्थे चकारः भिन्नोपक्रमे अन्तर्दधे च इति समुच्चये वा। तस्याः सकाशादप्यन्तर्द्धानेऽस्मिन्नीर्षापगमात्। सपत्नीनामैकमत्यमपि प्रयोजनं ज्ञेयम्। पूर्वान्तर्द्धानेऽपि तदपि चिकीर्षितमिति एवमेकयैव क्रिययानेकदुर्घटसम्पादनेन परमचातुरी दर्शिता। अहो उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति भावः। तदेवं सम्भोगोचितां स्वाधीनभर्तृकात्वमयीं प्रेमपराकाष्ठां दर्शयित्वा सनर्मण्यपि विप्रलम्भे परमदैन्यमोहात्मिकां तत्पराकाष्ठां दर्शयस्तत्प्राशस्त्यमेव सूचयति। सेति सपादेन। सा तद्दर्शनैकजीवना अन्वतप्यत मुहुर्विललाप ॥ ३९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तदा मेन इति पूर्वं तासु मध्ये वर्त्तमानाया अपि तस्यास्तादृशो मानो नासीदिदानीमेव जात इति केचिद्व्याचक्षते, वस्तुतस्तु तदा तादृशरतौ सत्यामित्यर्थः। यद्वा, तं तेन तथा रमितमात्मानम्; सर्व्वासां योषितां व्रजस्त्रीणां माने हेतुः—गोपीः सर्व्वा एव तत्रापि कामयानाः कामयमाना हित्वा, असावनिर्व्वचनीयविचित्रमाहात्म्यः, परमस्वतन्त्रोऽतिदुर्लभ इत्यर्थः। तत्रापि प्रियो मदेकप्रेमकर्त्ता सन्; यद्वा, सर्व्वासामेव प्रियोऽपि मामेव भजते प्रोल्लासानुवर्त्तते, अयञ्च स्वाधीनभर्त्तृकाया विदग्धवर्य्याया मानस्तद्रसपरिपोषको युक्त एवेति तदनुरूप तत्प्रसादश्चाग्रे भविष्यन्त्येव ॥ ३७ ॥ ततो मानानन्तरं तस्माद्वा मानात् रतिस्थानाद्वा दृप्ता गर्व्विता सती वनोद्देशं वनमयस्थानं तेनैव सह गमनक्रमेणाग्रतो गत्वा; यद्वा, मदनुगोऽयमवश्य भवितेति दृप्तत्वात् स्वयमेव गत्वा केशवं परमेश्वरमपि, किंवा केशि-मथनाद् व्रजहिताचरणपरमिति; यद्वा, केशवमित्युक्तन्यायेन तदीयसौन्दर्य्यमोहितेति भावः। अतएवाब्रवीत्। किम्? तदाह—न पारये, रत्या परिश्रान्तत्वादिति भावः। लज्जया साक्षात्तथानुक्तिः, किंवा दृप्तत्वादेव तथोक्तिः। ननु मुग्धे! ताभ्यो दूरमग्रे स्थानान्तरं हृद्यं गन्तव्यमिति चेत्तत्राह—नयेति। पूर्ववदङ्कादौ निधाय त्वमेव नयेत्यर्थः ॥३८॥ स्कन्धे मदंसे (स्कन्धः मदंसः) आरुह्यतामित्याह, इदञ्च नर्म्मणैव, प्रियामित्युक्तेः, यद्वा कायो मदीयं वक्षः, कटीरं वा, किंवा समूहः—गोपीवृन्द इत्यर्थः, तथा च विश्वः—'स्कन्धः प्रकाण्डे काये च बाहुमूल-समूहयोः' इति। ततश्चारुह्यतामिति उच्चप्रदेशे श्रीयमुनोत्सातोदेशे वा तासां तदानीं स्थितेः, किंवा मानेन तासामुच्चताविवक्षयैवेति दिक्। ततः पश्चात्, किंवा तस्मात् स्थानात् तस्याः सकाशाद्वा, त्वर्थे चकारः, भिन्नोपक्रमे, अन्तर्दधे चेति समुच्चये वा अन्तर्द्धानं प्रयोजनं पूर्व्वमेवोक्तम्, तदेव सूचयति—कृष्णः परमानन्दघनमूर्त्तिरित्यानन्दविशेषार्थमेवेत्यर्थः। अत एवोक्तं प्रियामिति। अत्र च कश्चिद्विशेषः श्रीविष्णुपुराणे (५।१३।३५-३९)—

'पुष्पबन्धन-सम्मानकृतमानामपास्य ताम्। नन्दगोपसुतो यातो मार्गेणानेन पश्यत ॥
अनुयातेऽसमर्थान्या नितम्बभरमन्थरा। या गन्तव्ये द्रुतं याति निम्नपादाग्रसंस्थितिः ॥
हस्तन्यस्ताग्रहस्तेयं तेन याति तथा सखि। अनायत्तपदन्यासा लक्ष्यते पदपद्धतिः ॥
हस्तसंस्पर्शमात्रेण धूर्त्तेनैषा विमानिता। नैराश्यान्मन्दगामिन्या निवृत्तं लक्ष्यते पदम् ॥
नूनमुक्ता त्वरामीति पुनरेष्यामि तेऽन्तिकम्। तेन कृष्णेन येनैषा त्वरिता पदपद्धतिः ॥' इति।

सा दृप्ता तद्दर्शनैकजीवना वान्वतप्यत मुहुर्विललाप ॥ ३९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत एवमभिमत्यनन्तरं किञ्चिद्दूरे गत्वा गर्विता सती केशवं सर्वेश्वरं णमब्रवीत् किमिति अहं गन्तुं चलितुं न शक्नोम्यतो यत्र ते मनः यत्र जिगमिषसि तत्र मां नयैति ॥ ३८ ॥ कामिनां दैन्यं दर्शयति । एवमिति । इत्थमुक्तो भगवान् प्रियामाह । किमिति स्कन्धमारुह्यतामिति त्वयेति शेषः अखण्डित्वमेवाह ततश्चेति । तस्यां स्कन्धारोहोद्यतायां सत्यामन्तर्हितवांस्ततः तदैव सा वधूरनुतप्तवती ॥ ३९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अत्यधिकं भजते इति इत्यनेन विषयलोलुपानां प्रवृत्तिरीदृशी इति दर्शयति कथान्तरारम्भं वा तमाह । तत इति । अत्यारम्भे प्रसिद्धे हेति यादवः । वनोद्देशं विषयप्रदेशं केशवं प्रशस्तकेशपाशं वने कामिनम् ॥ ३८ ॥ पारये समर्थये पारं गन्तुं न शक्नोमीति वा यत्र गन्तुं विटगत स्वभावं दर्शयितुमाह । एवमिति ॥ ३९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तया कथितमाकर्ण्य तत्रैव सङ्गनयनादिलक्षणां मानप्राप्तिञ्चाकर्ण्य परित्यागलक्षणमवमानञ्चाकर्ण्येत्यन्वयः । अत्र तु दौरात्म्यशब्दप्रयोगस्तदैन्यवचनानुवादात् वस्तुतस्तु दूरः श्रीकृष्णस्यानिकट आत्मा देहो यस्यास्तस्या भावो दौरात्म्यं तस्माद्धेतोरिति ॥ ३७–४१ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ सा राधापि सर्वा विहाय मय्येवासौ रत इत्यात्मनोऽनौचित्यं मनसि कुर्वती यदचेष्टत, त कथयति–सा चेत्यादि। सा राधा तदात्मानं वरिष्ठं मेने वरिष्ठैव सा, तथापि मेन इति यदुक्तं तस्यायमभिप्रायः ।–अहं सर्वप्रधाना ममैतन्नोचितम् । किं तत् ? इत्याह—हित्वेत्यादि । सर्वा विहाय मामसौ भजते प्रधानजनस्य नैतदुचितम् । तर्ह्येवमत्रैव विलम्बयामि यावत् सर्वा मिलन्तीति ॥ ३७ ॥ अथ तथैव मनसि कृतत्वात् स्फुटाक्षरमेवाह तत इत्यादि । वनोद्देशवनमध्यं गत्वा केशवमब्रवीत् । कीदृशी ? दृप्ता निः साध्वसा । किं तदित्याह-नयेत्यादि । अहं चलितुं न पारये, अस्या अयं भावः । यद्यहं न चलामि, तदायमपि न चलिष्यति, तावत्ता अपि सर्वा मिलिष्यन्तीति । तत साधूक्तम्—न पारय इति । न पारयसि चेत्तदा किं कर्त्तव्यमित्याशङ्क्याह–नयमामित्यादि । मां नय, क्व नेष्ये ? यत्र ते मनः, ते तव मनो यत्र यात्वित्यर्थः । मनस्तु तव विरहितास्वेव तासु, मयि तु तव श्रीविग्रह एवेति वक्रोक्तिः । अतस्तत्रैव नय, किमतेन निर्ममव्यापारेण व्यवहारेणेति बहिर्वाम्यप्रकाशः ॥ ३८ ॥ भगवानपि तमभिप्रायं विदित्वापि विपरीतबोधमभिनीय यदकरोत्तदाह—एवमुक्त इत्यादि । प्रियां राधां स्कन्ध आरुह्यतामित्याह, तया तु कपटरोषोक्तिः तेन तदसम्पाद्यान्तर्द्धाने स्वीकृतेवैयर्थ्यापत्तेः । कपटत्वेनाकलितत्वमेव सत्यम् । न केवलमेतदाह, अन्तर्दधे वेत्याह— तत इत्यादि । ततस्तत्रैवेत्यर्थः सप्तम्यां तसिल् । अन्यथा निर्दयत्वापत्तेः । स्वयं पश्यति, सा न पश्यति, एवं यथा भवति, तथान्तर्दध इत्यर्थः । तदनन्तरं सा वधूरन्वतप्यत ॥ ३९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

सा च राधा सर्वाः सखीरनुस्मृत्य मनसि चकार । किं तत् ? सर्वयोषितां वरिष्ठमात्मानं मेने । कोऽर्थः अहं सर्वप्रधानभूता, ममैतन्न युज्यते, तत् किम् ? तदाह—हित्वेति । सर्वा हित्वा मामसौ यद्भजते, प्रधानस्येदमनुचितम्, तर्हि एवं करोमि—न पारयेऽहं चलितुमित्युक्तेऽत्रैवायं स्थास्यति, तावत्ता अप्यागत्य मिलिष्यन्तीत्याशयेनाह–अतो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् । न तु सान्निध्यम । न पारयेऽहं चलितुमित्यादि । न पारयसि चेत्तदा किं भवतु ? तत्राह नय मामित्यादि । कुत्र नेष्ये ? यत्र ते तव मनो मनोमात्रम्, अर्थात् परित्यक्तानां मत्सहचरीणां पार्श्वमिति तास्त्यक्त्वा दूरं गन्तुं न पारयामीति पूर्वोक्तानुगुण्यम् । तव मनस्तत्रैव, मयैतत् ज्ञायते केवलं सन्निधि मात्रं यत्र, तथापि ममातीवोत्कण्ठा झटिति तत्र गन्तुमिति रहस्यम ॥ ३७–३८ ॥ ईश्वरस्तज् ज्ञात्वापि तस्या अपि सर्वप्रधानत्वमदं खण्डयितुं विपरीतबोधमभिनीयाह—यदि चलितुं न पारयसि; तदा स्कन्धमारुह्यताम् । एतावन्मात्रमवशिष्यते, सर्वमन्यद्वृत्तमस्ति, एतदपि क्रियतामित्युक्तवान्, न केवलमिदमुक्तवान्, अन्तर्हितश्चेत्याह—ततश्चान्तर्दधे इत्यादि ॥ ३९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वनस्योत्कृष्टप्रदेशं गत्वा केशवं केशान् वयमानं प्राकृतनर्मद्योतकपूज्यमुन्मोचयन्त्यास्तस्या विचित्रवेणीत्वेन ग्रथ्नन्तमत एव दृप्ता स्वाधीनकान्ताया दर्प एव रसमावहतीति भावः चलितुं न पारये इति बहुवनभ्रमणोत्थो मे श्रमोऽभूदिति भावः । ननु मुग्धे ताभ्यो दुरमग्रे हृद्यस्थानान्तरं गन्तव्यमिति चेत्तत्राह । नयेति पूर्ववन्मां वहन्नित्यर्थः ननु किमग्रिमप्रदेशे अन्यजनदुष्प्रवेशे कुञ्जान्तर्गन्त पुष्पतल्पं त्वां नयामि किं वा पौष्पाभरणार्थं पुष्पोद्यानं तत्राह । यत्र ते मन इति ॥ ३८ ॥ ततश्च कृष्णेन मनस्येवं

विचारितमहो अनया स्वाभाविकः स्वधर्मः परित्यक्त एव नहि सन्नायिका पुष्पतल्पं प्रति स्वनयने वचसा नायकाय सम्मतिं दत्ते यदि चानया वाम्यरूपः स्वधर्मस्त्यक्तस्तदा मयापि सन्नायकेन सम्भुक्तकान्तानुवर्त्तित्वलक्षणो दाक्षिण्यमयः स्वधर्मस्त्यक्तव्य एव नहि द्वयोरेव दाक्षिण्ये वामे वा रसः सुरसः स्यात् न चात्र रसिकलौकैरहं दूषणीयः रसोहि नायिका प्रक्रान्तपरिपाटीक एव साधु भवेत् किञ्च महाप्रेमवत्या अस्या मद्विप्रलम्भजनितदशाविशेषदिदृक्षासाक्षादेव या चिरं मे वर्त्तते साप्येतदवसरे पूर्णा भविष्यति मत्संश्लेषजनितमस्याः सौभाग्याधिक्यं ताभिरनुभूतमेव मद्विश्लेषजनितामपि प्रेमोद्रेकपरमविधि व्यञ्जिकां दशामसाधारणीं दृष्ट्वा ताः परमचमत्कारसिन्धुनिमग्ना भवन्तु अस्याः यद्विरहवाडवानलज्वालाया अग्रे तासां मद्विरहो दीपदहनायितो भवतु ततश्चास्याः पूर्णतमाभ्यां सम्भोगविप्रलम्भाभ्यां शृङ्गाररसोऽप्यद्य पूर्णतमत्वमापद्यताम् अस्या अपि विरहे मत्सम्पादिते सर्वविरहोपशान्त्यनन्तरं सर्वासामैकमत्ये सति विधित् सितोरासोऽपि सेत्स्यत्यन्यथात्वे तत्सङ्गरङ्गिणा मया तासां मानोऽद्य सर्वथैव दुरुपशम इत्यादीनि बहूनि प्रयोजनानि पर्यालोचयन् सहसैवान्तर्धित्सुराह । स्कन्ध इति । अन्तर्दधे तत्रैव स्थित्वा तां पश्यन्नपि तन्नयनगोचरतां जहावित्यर्थः । अत्र नय मां यत्र मे मन इति वदन्त्या वृषभानुनन्दिन्या मनस्येवं विचारितं विलासश्रमवनविहारश्रमखिन्नाया मम क्षणं सुषुप्सा वर्त्तते अस्यापि स्वापाभावेनैव सर्वरजनीयापनमकल्याणमसुखोदर्कमेव अतः पुष्पं तल्पं नयेति चेन्नयत्वावां तत्र स्वप्स्याव इत्यतस्तत्राशम्मतिर्न कृता तत्र भगवतस्तदन्तः करणविज्ञताप्रेमरसमयलीलाशक्त्यैव तिरोधापिता तत्तल्लीला सिध्यर्थमिति ज्ञेयम् अन्वतप्यत मुहुर्विललाप ॥ ३९ ॥

रसिकाह्लादिनी–टीका

सा तदा आत्मनं सर्वयोषितां वरिष्ठं मेने यावत्पर्यन्तं यूथमध्ये स्थिता आसीत् तावत्तस्य मानो नाविर्भूत इदानीं कृष्णसम्माननहेतुको जातः कामायमाना इत्यर्थः । यद्वा कामस्य यानं प्रापणं यासु कामवसतीरित्यर्थः । ता हित्वासौ प्रियो मामेव भजते सर्वासु समोऽपि मद्गुणाकृष्टचित्तः मदधीनतयानुवर्त्ततेऽतो अहं सर्वाधिकारस्वाधीनपतिका जाता ॥३७॥ मानपरिपाकमाह ततो इति, ततो रतिस्थानात् तत्र मृग्यमानानामन्यासामागमनं सम्भाव्य वहोदेदृशं वनप्रदेशान्तरं गत्वा दृप्ता गर्विता केशवं ब्रह्मेशवशयितारं किं पुनरेतस्या, यद्वा केशान् वाति सुगन्धीकरोति धूपदानेनेति परमशृङ्गारिणमित्यर्थः । तं अब्रतीत् किमब्रवीत् तदाह । अहं चलितुं न पारयेवनो दूदेशपरिभ्रमणेन रतिखेदव्याकुलितत्वेन नखपदाभ्यां गन्तुं न शक्नोमि । नन्वत्र सर्वा एवायास्यन्ति इत्यग्रे विलासयोग्ये स्थाने गन्तव्यमिति चेत् तत्राह । यत्र ते मनः तत्र त्वया गन्तव्यं तत्र मां नय लज्जया साक्षादकथयन्ती व्यञ्जनय मामुत्क्षिप्य स्वयमेव नेष्यतीति मनसि निधाय मां नय प्रापयेति कथितवती ॥ ३८ ॥ तदर्पोक्त्यनन्तरं किं जातं तदाह एवमिति, एवमुक्तः प्रियामाह । स्कन्ध आरुह्यतामिति । एवं सौभाग्यगर्वितया जातमानदोषया उत्थाप्य नयनमुक्तः, प्रियां स नर्मविनयं वचनमाह । स्कन्धे मदंसे आरुह्यतामिति । नर्मोक्तिमविज्ञाय मोहात्तथा चिकीर्षमानां दृष्ट्वा ततोऽनन्तरमेव संभोगस्थानाद्वा कृष्णोऽन्तर्दधे । विप्रलम्भमुत्पाद्य रसवृद्धये तद् दृष्ट्यगोचरेऽभूत् सा का यस्याः केशप्रसाधनादिना सम्माननं कृतं वधूरिति कृष्णपरिग्रहेणोक्ता कृष्णैकजीवना अन्वतप्यत तत स्वातन्त्र्यमजानन्त्या मयैतदुक्तमिति पश्चात्तापमकरोदिति ॥ ३९ ॥

विशुद्धरसदीपिका

किन्तु मम सुहृदोऽपि तासां सङ्गेन विरहखेदमनुभवन्तीत्यनुचितमिति विचारितवती तथा दर्शितमानन्दवृन्दावनचम्पूमनु अथ सा परमकोमलहृदयादयालुतमानामग्रणीः सुभगानां सुभगानां सुचिरदुरापताकापताका केवलमात्मनिष्ठया रतनिष्ठया रतमानसा विचारयामास यथा मय्येकस्यामतिशयरतिः प्राणनाथो मदालस्ता विच्छेदादह दधते हा कथं देहयोगं तस्माद्वाम्यङ्किमपि करवै येन नेतो विदूरं यायादेष क्रमत इह तास्ताश्च सर्वामिलन्तीति अयं हि शुद्धप्रेमानुभावो विभ्रमविशेष इत्युक्तमुज्ज्वले अधीनस्यापि सेवायां तस्यानभिनन्दनं विभ्रमो वामतोद्रेकात्स्यादित्स्याख्यांति कश्चन यद्वा सख्येर्मवदमिति तत्रैव विश्रम्भः साध्वसान्मुक्तः सख्यं खयशतामयः भावज्ञतानुभावोऽस्य दोषानुल्लेख एव चेति द्वयमेव दर्शयतीति । तत् इति । तदादीनां बुद्धिस्थशक्तेस्तादृशावचारानन्तरमित्यर्थः । दृप्ता सौभाग्यदर्पयुक्ता सोऽयमस्य रसनीयः नतु पूर्ववदुपेक्षणीय इत्याह । केशवमिति । सुरतविलुलितान् केशान् वाति यमयति गन्धयति व्युत्पत्त्या निजपरिचरणपरमिति दोषानुल्लेखः अयमेव तस्या तासाञ्च विशेषः भावज्ञतापि सर्वथामदीयं मनोगतं जानात्येवेति विश्रम्भात् वनोद्देशं यत्र स्थितयाता विधुरता निजसहचर्योऽवलौकितास्तादृशमुत्कृष्टं देशमित्यर्थः । किमब्रवीदित्यत आह । नेति । पारये नातःपरमन्यत्र चलितुमपि समर्था सखीप्रेमपरवसत्वादिति भावः । किन्तु यत्र ते मनस्तत्र नयेति अनुमननभङ्गया यत्र मदीये मनस्तत्रैवापि निश्चितं मयेति सूचितं शब्दशक्तिवलेनान्यत्राशक्तिसूचनान्नर्म्मापि व्यञ्जितम् ।३७। अथ श्रीभगवतो हृदयज्ञतामभिनयति । एवमिति । तया स्वाधीनपतित्वोचितकृत्रिमालस्यव्यञ्जकनर्म्मवचसा एवमुक्तः सन् सोऽपि प्रियां कोटिप्राणाधिकप्रियत्वेनाभिमतामिति नर्म्मवचसैवाह इतीति किं स्कन्ध इति अत्र प्रियामित्युक्तेः स्कन्धादिपदानां प्रकटार्थमनुसृत्यान्यथा भ्रमो न कार्य्यः वाम्यन्तु दम्पत्योरन्योऽन्यविषयकं रसाधायकमेव तदुक्तं योऽन्ये मुखे दुर्वादः प्रियतमवदने स एव परिहासः । इतरेन्धन जन्मा यो धूमः स एवागुरुसम्भवो धूप इति अयमेव दोषानुल्लेख इत्युच्यते अत्रैव च भावज्ञतापि स्कन्धा

पदस्यानेकार्थतामाश्रित्य सङ्गमनीया तथाहि स्कन्धः प्रकाण्डे काये च बाहुमूलसमूहयोरिति विश्वप्रकाशात्स्कः शब्दः समूहवचनः ततश्च समुचितत्वात्सहः चरीसमूहः सेनास्कन्धः इति महाकविप्रयोगश्च तथाश्लिष्टपदोपादानात् स्कन्धशब्दस्य कायपरतामपि योग्यतया परिकल्प्य पुनरेवं विचारितवान् मम प्राणकोटिनिर्मञ्छनीयललितचरितायाः श्रीमत्याः प्राणप्रियायाः समुत्कर्ष एव यथास्यात्तथा मयानुष्ठेयमिति वाञ्छितञ्च प्रियायाः सखीनां सङ्गतमिदानीं मिलिताभ्यामेव यद्यपि प्रकटीभूय सख्यः सुखनीयास्तथापि विरुद्धस्वभावास्वीर्ष्योदयादसूयादयःस्याद्यदिच सोऽपि मद्विषयकस्यात्तदा न तादृशो दोषः प्राणप्रियाविषयोऽसहनीय इत्यन्तर्हितवानिति तत इति अन्तर्दधे श्लेषेण तामेवान्तर्हृदये धारितवानित्यर्थः। कृष्णः तया वशीकृतः अथवायमप्यन्तर्हितत्वे हेतुः एवं स्थितोऽपि प्रेमास्याः प्रकाशयति मुग्धतामित्याह। सेति वधूः तत्प्रेमवद्धा अन्वयतप्यत कोमलहृदयत्वात् किमुक्तं मयेत्यनुतापं कृतवतीति ॥ ३८–३९ ॥

श्रीरामनारायणकृता भावभावविभाविका

मानदोषमुद्घाटयितुं वरिष्ठत्वभानप्रयुक्तदर्पमनुकुर्वत्याश्चरिमाह। तत इति। ततो वरिष्ठमानानन्तरं यथा पूर्वमानमानभाराभावेन कृष्णात्मतया सर्वसमर्थाऽभूदधुना तथाभावादनुकारमात्रमानभारश्रान्ता यथा कथञ्चिद्वनोद्देशं वनस्योत्कृष्टदेशं गत्वा दृप्ता मानदजयाक्रान्तत्वेनातिश्रान्ता केशवं ब्रह्मेशयोरपि कारणं तदुक्तं शिवेन कः प्रजापतिरुद्दिष्ट ईशोऽहं सर्वदेहिनाम् आवां तवाङ्गसम्भूतौ तस्मात्केशवनामवानिति तादृशमपि प्रेमाधीनतया केशवं केशांस्तदीयान् वयते पुष्पादिना ग्रथ्नातीति तथा तादृशं दृष्ट्वा स्वाधीनदृष्ट्या विस्मृततदुत्कत्कर्षा ब्रवीत् तद्वचनमेवाह। न पारयेऽहमिति। यद्वा मानमनुकुर्वती नर्म्मणैवाह। न पारयेऽहमिति। अहं चलितुं न पारये न समर्था ननु महत्सुखप्रदं रम्यतमं केळिप्रदेशमग्रे वर्तते तत्रावश्यं गन्तव्यं तत्र पूर्वानुभूततदङ्कनयनसौख्याह। नय मामिति यत्र ते मनस्तत्र मां नयेति यद्वा दृप्तापि ळोकदर्पदोषोपदेशाय कृतदर्पानुकारापि केशवं केशप्रसाधनादिना निश्चितस्वाधीनभावं पातिव्रत्यप्रेममर्यादामनुल्लङ्घ्य स्वासामर्थ्यतदिच्छाधीनत्वबोधकमेवाह। न पारय इति ॥ ३८ ॥ मानानुकारमिश्रस्वासामर्थ्यस्वामी स्वाधीनत्वद्योतकतत्त्वनर्म्मवचनश्रवणानन्तरं भगवानपि नर्म्मतयैवावददित्याह। एवमि त। एवमतिविलक्षणचातुर्यघटितमानप्रेमाशक्त्याधीन्यगमकनर्मवचसोक्तौ नर्म्मणैवाह। स्कन्ध आरुह्यतामिति। ननु रोषेण प्रियामाहेति श्रीशुकोक्तः नच स्वामिनः स्कन्धारोहोः पवादायैव भवति तदुक्तिः कथन्नर्म्मणेति वाच्यं यस्त्वन्यमुखेनापवादस्तस्यैव प्रियतममुखेन नर्म्मत्वसम्भवात् प्रियामिति पदस्यैव तत्सूचकत्वात् तदुक्तमभियुक्तैः योऽन्यमुखे दुर्वादः प्रियतमवदने स एव परिहासः इतरेन्धनजो धूमः सोऽगुरुजन्मा भवेद् धूपः यद्वा रसिकशिरोमणिर्भगवान् रतिकाळिकतदीयपादस्कन्धारोहसौख्यमनुस्मृत्य यद्यन्यत्र गन्तुमशक्तासि तर्ह्यत्रैव पुनः स्कन्ध आरुह्यतामित्याहसा तु मानानुकारेण तथारोढुमनिच्छती देशान्तरगमनायैवारोढुं प्रसारितचरणाऽभवत्ततश्च भगवान् कृष्णो नर्म्मणोत्थापितपादामेव त्यक्त्वा मानदोषप्राकट्याय तदभिप्रायं विद्वांस्तदनुसारेणैवान्तर्दधे ततस्तत्प्रेमोत्कर्षद्योतकं तच्चरितमाह। सा वधूरिति। सापि सर्वजगदाह्लादिकापि वधूस्तस्य नित्यप्रियभार्यापि कृष्णस्य क्षणान्तर्द्धानमात्रणानु पुनः पुनरतप्यत योग्यं चैतत् नित्यानन्दकृष्णविरहे तपनं जीवनदुःसहत्वञ्च एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुत्या यदानन्दमात्रावियोगे सर्वभूतानां जीवनासम्भावना तदा तस्य साक्षात्सर्वानन्दबिम्बभूतनित्यपरमानन्दकृष्णस्य वियोगे जीवनासहनं कैमुत्यसिद्धम् ॥ ३   ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तत इत्येवं मनसि स्फूर्त्यनन्तरं तेनैव सार्द्धं कस्मिंश्चिद्वनप्रदेशे प्रियेण सहैव गत्वा अखर्वगर्वाक्रान्तस्वान्ता सा केशवं स्वस्याः केशान्वयते ग्रथतीति तथा च स्वाधीनकान्तायास्तस्या रसावहो दर्पो जात इति भावः। रमणबहुवनभ्रमणादिना जातश्रमाहमितः परं चलितुं न पारये न भवामि ननु भो मुग्धे ताभ्यो दूरमग्रेऽति मनोज्ञस्थानं वर्तते तत्पर्यन्त यथा कथञ्चिच्चलनीयमिति चेत्तत्राह। नयेति। एवं तर्हि पूर्ववस्मामङ्के निधाय त्वमेव नय प्रापयाहन्तु पदमात्रमपि गन्तु न शक्तेत्यर्थः। ननु किम्पौष्पाभरणपुष्पतल्पशयनाद्यर्थं पुष्पोद्यानं नयामि किम्वा यमुना पुलिनं तत्र विहाराद्यर्थमित्यपेक्षायामाह। यत्र ते मनः अनेनालक्ष्यो मनुमोदनं च सूचितं यद्वा स्वप्रेमरज्जौ प्राप्तबन्धनं कान्तं निश्चित्य प्राप्तगर्वा केशवं ब्रह्मादिसमस्तस्वामिनं देहादिसम्बन्धातीतमब्रवीत् निवृत्तिपक्षे ततोऽन्तःकरणलक्षणस्य वनस्योद्देशे श्रेष्ठप्रदेशे शोभनप्रत्यये गत्वा अहमेव प्रत्यगभिन्नब्रह्मावभासिकेति गर्ववती ब्रह्माद्यधिष्ठानभूतं परमात्मानमब्रवीत् अहं चलितुं स्वार्थादपितु केनापि प्रमाणेन वादिनां वारणेऽशक्या अतस्त्वत्सम्बन्धाधिकरिमनः यत्राखण्डैकरसे त्वयि वर्तते तत्रैव मां नय तत्प्रतिपादकत्वेनैव मां स्थापय तथा च यथोक्तश्रुतिवेद्यत्वं ब्रह्मणोऽस्तीति विवेकिचेतसि स्फुरितमिति भावः ॥३७–३८॥ एतच्छ्रुत्वा भगवतैवं विचारितमनया मां स्वाधीनमवगत्य कृत्रिमालस्यादिमयं नर्मवाक्यमुक्तमतो नर्मवाक्यमुक्त्वाऽन्तर्द्धानं कार्यं तच्चावश्यकं यत एतेनैतच्छृङ्गाररसपोषणं महाप्रेमवत्या अस्या मद्वियोगजनितदशाया अवलोकनं मत्संश्लेषजनित सौभाग्यमवलोक्यातिविस्मितस्वान्तानां तासां परमचमत्कारसिन्धुनिमज्जनकर्या असाधरिण्या अस्यां मद्विरहावस्थायां दर्शनपूर्वकं सर्वाभिरभिरमणानुकूलस्यैकमत्यस्य सम्पादनञ्च सेत्स्यातीति तदेतदभिप्रेत्याह। एवमिति। एवमुक्तः श्रीकृष्णः मम स्कन्ध आरुह्यतामिति प्रियामाह। यद्वा स्कन्धः प्रकाण्डे काये चेति कोशात् स्कन्धः कायः सच योग्यत्वा-

दङ्करूपः सापि तत्कृतं नर्ममबुद्ध्वा तत्स्कन्धमारोढुं प्रवृत्ता ततस्तत्प्रवृत्त्यनन्तरमेवान्तर्दधे यतः कृष्णः सदानन्दस्वरूपोऽन्तरधात्ततः सा तद्दर्शनैकजीवना बधूः परमप्रिया विश्लेषासहा अन्वतप्यत परमपश्चात्तापमगच्छत् तेन च बहुधा विललाप निवृत्तिपक्षे एवमुक्तः परमात्मास्कन्धस्थानीयं देशविशेषं चैतन्यमात्रमारुह्य तां प्रतिपाद्यतामित्येवं वधूमाह भगवत्त्यागलक्षणया चैतन्यमात्रावेकत्वं यथोक्तश्रुतेरधिकारिणावगतमित्यर्थः। ततो यथोक्तश्रुत्या ब्रह्मणः सुवेद्यत्वावगत्यनन्तरं कृष्णः अपरिच्छिन्नसदानन्दस्वरूपः परमात्मा अन्तर्दधे परिच्छिन्नतां प्राप्त्या विज्ञाततां गतः यदि मन्यसे सुवेदेति दहरमेव नूनं त्वं वेत्थ अविज्ञातं विजानतामित्यादिश्रुतेः सा वधूः तल्लक्षणा श्रुतिरन्वतप्यत पुनरनधिकारिणा विचारिता अहो अवेद्यस्य ब्रह्मणः श्रुति वेद्यता कथमिति ॥ ३९ ॥

रास–रहस्यम्

र० टी०—तदा सा वृत्तिः आत्मानं स्वकीयं रूपं सर्वयोषितां अन्येभ्यः वृत्तिभ्यः, वरिष्ठं परमोत्कृष्टं, मेने अनुभूतवती, यतोऽसौ प्रियः सर्वप्रेमास्पदत्वेन परमानन्दरूपः प्रत्यगभिन्नपरमात्मा कामयानागोपीः हित्वा कामयमानान् वृत्तीः विहाय, मां भजते मम प्रतिपाद्यतां प्राप्त इत्यर्थः ॥ ३७ ॥ ततोऽभिमानोदयादनन्तरं, वनोद्देशं अन्तःकरणलक्षणस्य वनस्य उद्देशं "दहरपुण्डरीकं नाम।" इति श्रेष्ठ प्रदेशं शोभनं प्रत्ययं गत्वा, अहमेव प्रत्यगभिन्नब्रह्मावभासिका, इति मत्वा, दृप्ता गर्ववती सती, केशवमधिष्ठानभूतं परमात्मानमब्रवीत् आह, अहं चलितुं न पारये, कोऽपि वादी स्वस्वसिद्धान्तानुसारेण युक्तितर्कप्रमाणेन अस्मदभेदरूपसिद्धान्तात् न प्रत्याययितुं समर्थः, अतः यत्र सच्चिदानन्दघनाखण्डैकरसे ते मनः तव स्वरूपावस्थितिः वर्तते तत्रैव मां नय, त्वत् प्रतिपादकत्वेन मां स्थापय अथवा यत्र यस्मिन् कस्मिन्नपि विषये नय स्थापय कोऽपि वादी मां चलितुं चालयितुं न समर्थो भविष्यतीत्यर्थः ॥ ३८ ॥ एवमुक्तः पूर्वोक्तप्रकारेण कथितः सन्, प्रियामाह आत्माकारवृत्तिमाह, स्कन्ध आरुह्यतां "तत्त्वमसी"ति श्रुतिप्रमाणेन भागत्यागलक्षणया सर्वोपाधिनिरसनेन चैतन्यमात्रमारुह्यतां प्रतिपाद्यताम्। अतः यदा सा वृत्तिः श्रुत्यादिप्रमाणेन मया ब्रह्मप्रतिपादितमिति मेने तदापरिच्छिन्नः कृष्णः परमात्मा परिच्छिन्नतां प्राप्य विज्ञाततां गतः। तदनन्तरं "विज्ञातमविजानताम्।" "यदि मन्यसे सुवेदेति दभ्रमेवापि।" इत्यादि श्रुतिस्मरणात् अन्वतप्यत अनुतापं कृतवतीत्यर्थः ॥ ३९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

चलितुं न पारये गन्तुं न शक्नोमि ॥ ३८ ॥ कामिनां दैन्यं दर्शयति। एवमुक्तः प्रियामाह स्कन्ध आरुह्यतामिति। अखण्डितत्वमाह। ततश्चान्तर्दधे कृष्ण इति। ततस्तस्यां स्कन्धारोहोद्यतायां सत्यां कृष्णः सदानन्दः स्वाभाविकपरमानन्दोऽन्तर्हित इत्यर्थः सा चान्वतप्यत ॥ ३९ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

दोषाभावेनैवोत्तमता नतु धर्मान्तेरण अतस्तस्या भ्रमः भ्रान्ताया वाक्यमाह। ततो गत्वेति। ततो भोगस्थानादग्रे गत्वावनोद्देशमतिरमणीयं स्वार्थमयं गच्छति नतु मदर्थं ततश्चान्यार्थं यथा कथङ्खेदः प्राप्तव्य इति दृप्ता तादृशभगवत्कृपायामनधिकारिणी प्राप्तप्रसादेन जाता जीर्णा ब्रह्मादिभ्योऽपि मोक्षदातारं देहेन्द्रियादिसर्वरहितं परमानन्दरूपं केशवमब्रवीत् तस्या वाक्यमाह। न पारय इति। अहं चलितुं न पारये तथा पीष्ठदेशे गन्तव्यमितिचेत्तत्राह। यत्र ते मनः तत्र मां त्वमेव नय ॥ ३८ ॥ तदा भगवान् अतिचतुरः तद्वाक्यस्योत्तरमाह। एवमुक्त इति। प्रियेति कृत्वा उत्तरमुक्तवान् उत्तरमाह। स्कन्धमारुह्यतामिति। एषा हि नृत्यं कर्तुं वाञ्छति स्वान्तर्गतं रसमभिनेतुं तद्भूमौ पदस्थापने ऊर्ध्वभावाभावाद्रसः च्युतो भवेत् अतः स्वस्कन्धमेवारुह्यतामिति स एवात्यन्तं नटवटुयः स्वं स्कन्धमारुह्य नरीनर्ति अशक्यं ह्युपदिशति प्रार्थितं तथेति भगवतो हि मनः अलौकिकरसाभिनयने तद्भूमौ पदस्थापने न भवति अशक्ताचेत्कथं वदेत् अंतो मम तत्रैव मनः यदि तथा करिष्यति तदा नेष्यामीति नह्यनधिकारी नेतुं योग्यः भगवांस्तु नान्यथा वदतीति न स्वस्कन्धसम्भावना तया तु मोहवशात् तथैव बुद्धं ततो मोहवशात्तथा चिकीर्षमाणां तां दृष्ट्वा ततोऽप्यन्तर्दधे यतोऽयं कृष्णः सदानन्दः ततः पूर्ववदेव सापि जातेत्याह। सा वधूरन्वतप्यतेति सा अनन्यपूर्वा व्रतमध्यस्था तत्रापि गुणातीता अतः अन्वतप्यत अनुतापं कृतवती एवं सति भङ्ग्यन्तरेणाप्येतद्व्याकृतिः सम्भवति तथा हि भगवता ह्यस्यै प्रियायै पूर्णः स्वरसो दत्त इति भगवन्निष्ठा भावाः सर्वे स्वहृति स्फुरद्रूपा जाताः तथा च सर्वतः आधिक्यमपि स्वस्मिन् स्फुरितं तदेतदुक्त हित्वा गोपीरित्यादिना एवं सति द्वितीयरसलीळाचिकीर्षा यदाभूत्सापि तदा हृदि स्फुरिता तामविषह्यां मन्यमानापि न कातरा जाता किंतु पूर्वरसगरिम्णा दृप्ता सती प्रियमब्रवीत् एतदेव दृप्तापदेनोक्तं दुष्टगुणव्याप्तयोरप्यमृतं ददात्यहं त्वेतद्गुणैरेव पूर्णेत्यवश्यं सुखमेव दास्यति नतु दुःखमित्यभिप्रायज्ञापनाय केशवपदं ततो भोगस्थानादग्रे वनसम्बन्धिनमुत्कष्टं देशं स्वयं स्वेच्छया गत्वा नतु प्रियेण नीता गत्वा अब्रवीदित्युक्त्या प्रियनैकट्यं ज्ञायते तेन तदधीन एव प्रियस्तात्सङ्गे गत इति ज्ञापितं भवति अथवा वनमित्यद्देशो नाममात्रं वस्तुतस्तु महारसनिधानं तेन रसोद्दीपकमित्युक्तं भवति एतादृशे वने मद्वियोगेन मां विचिन्वन् यदि प्रियो भवति तदा कीदृशो रसः स्यादित्याशयेनाब्रवीदत एव दृप्तात्वमुक्तं पूर्वरसातिमदात् तथाचेत्करिष्यति तदाहं चलितुं स्यन्दितुमपि न पारये जीवनमेव न

सम्पत्स्यत इति भावः। एवं चेत्किञ्चित्कर्त्तव्याकाङ्क्षायामाह। नयेत्यादि यत्र स्वान्तर्द्धाने ते मनस्तत्रान्तर्द्धाने मां नय तिरोहितां मां कुरु त्वं मा तथा भवेत्यर्थः। प्रियस्त्विदमत्यशक्यमित्याशयेनोत्तरयति स्कन्धेत्यादिना यथा स्वस्कन्धारोहणमशक्यं तथा मत्तोऽन्तर्द्धानं भवत्याः नहि पूर्णज्ञानशक्तेरविषयः कोऽपि भवितुं शक्नोति यद्यपि विरुद्धसर्वधर्माश्रयत्वेन तं धर्मं प्रकटयितुं न पारय इति भगवदाशयज्ञापनाय प्रियापदमुक्तम् उत्तरदानमप्यत एवान्यथात्वेपमुक्तस्तूष्णीं तिष्ठेत्तिरोधीयेतैव वा प्रियात्वान्ममाशक्यं भवत्यास्तिरोधापनं तत्सामर्थ्याभावाद्भवत्याः स्वतस्तिरोधानं तथेति भावः। एवं सति प्रियया प्रार्थितं देयं यद्यपि तथापि प्रियात्वेन स्वाशक्यमिति लक्षणो यो हेतुस्ततो हेतोः स्वयमेव तथाकरोदित्याह ततश्चेति एवं कृते प्रभुनिष्ठं हेतुमाह। कृष्ण इति अस्यां दशायां हृदिप्रकटः सन्नेवानन्दात्मकतद्रसपोषको यत इत्यर्थः॥ ३९॥

श्रीसुबोधिनी-सारः

ततोऽनन्तरं वनोद्देशं गत्वा दृप्ता गर्विता केशवमब्रवीत् चलितुमहं न पारये न शक्नोमि॥ ३७–३८॥ एवमुक्तः स्कन्धमारुह्यतामिति प्रियामाह। ततः कृष्णोऽन्तर्दधे सा वधूरन्वतप्यत॥ ३९॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

ततो गत्वेत्यस्याभासे, दोषाभावेनैवेत्यादिना दृप्तात्ववक्तुस्तात्पर्यमुच्यते। शक्तौ सत्यामपि प्राकृतकामिवत्कामाधीनत्वेन स्ववशत्वज्ञानेनाशक्तिख्यापने स्वस्कन्धेनापि नेष्यतीति ज्ञानं भ्रमः। यथा भगवद्रमणे दोषभावासम्भवाद्भगवद्भावात्मकावेव सौभाग्यमदमानाविति 'तासां तत्सौभगमद'मित्यत्र निरूपितम्, तथा प्रकृतेपि प्रियाधीनत्वभावेनात्र रसो दत्त इति स एव भावोत्राजनि, न तु दोषरूपः। स एव हित्वा गोपीरित्यनेनोक्तः। एवं सत्यत्र विप्रयोगात्मकरसाननुभवे पूर्णरसदानं न भविष्यतीति ज्ञात्वा प्रभुः संयोगरसदित्सासंकोचमकरोत्। अयमेव भावः क्रियाशक्तिसंकोचप्रकाशको **न पारयेहं चलितुमित्यनेनोक्तः।** अन्यथाऽनृतवादित्वं स्यात्। न हि भगवन्तं प्रति तदीयानामेवं सम्भवति। स त्वतिपूर्णरसाविर्भावेन स्तम्भरूपः सात्त्विकभावो भवितुमर्हति। दृप्तत्वं ह्यमर्यादत्वम्। तथा चोक्तरीत्या निरवधिरसदातुस्तत्संकोचेच्छा रसमार्यादिकी न भवतीति तद्भावोदयोऽत्र **दृप्तापदेनोक्तः।** रजस्तमोऽधिष्ठात्रोरपि तज्जं भावं दूरीकृत्य अमृतदातेत्यत्रापि पूर्णरसदानार्थमेव तद्भावजननं स्वतिरोधानं चेति ज्ञापनाय **केशवपदोक्तिः।** एवं सति पर्यवसानतो रसमार्यादिकात्वमप्युक्तेच्छाया ज्ञायते। प्रियात्विमं वृत्तान्तमजानन्ती पूर्ववदेव प्रियः करिष्यतीति ज्ञात्वा 'नय मा'मिति क्रियाशक्तिं प्रार्थितवती। परन्तु यत्र ते मन इत्यज्ञात्वाप्युक्तेर्भगवन्मन उक्तकार्यस्तीति पूर्ववत्क्रियोद्गमस्याशक्यत्वादुभयोः प्रभुरशक्यमेवोपदिष्टवान्प्रियायाः स्वस्कन्धारोहणम्, न तु स्वस्य। अग्रिमरसदित्सया प्रभुः स्वहार्दं न ज्ञापयतीति प्रिया प्रियस्कन्धमेव बुद्ध्वा तथैव कर्तुमुद्यताभूत्। तदा प्रभुस्तथाकरोत्॥ ३८॥ एतत्सर्वं हृदि **कृत्वाचार्यैरुक्तमेषा हि नृत्यमित्यादि।** नटो हि नृत्यचेष्टया स्वान्तःस्थं रसं द्रष्टारमनुभावयति। एतद्धर्मसाम्येनात्रापि नृत्यपदप्रयोगः कृतः। एतदेव विवृतं स्वान्तरित्यादिना। पूर्वं प्रभुणा सर्वथा तदधीनत्वेन रसो दत्तः। सोऽन्तःप्रियाया अस्तीत्यधुना स्वयं तं रसं प्रियमनुभावयितुं वाक्कृती प्रकटयति। तच्चाशक्यम्, भक्तस्नेहेनैव तद्वशीभूतस्तथा रमते, न त्वन्यथापि। प्रकृते हि 'न पारयेह'मित्यादिस्नेहरीतिविरुद्धम्। यद्रसमार्गविरुद्धमिति तथा कर्तुमुचितं भवतीत्युच्यते, तन्न साधीयः। तथा सति रसस्वाभाव्येन प्रियान्तःस्थरसच्युतेः किं प्रियमनुभावयेत्, अग्रिमरसदानप्रतिबन्धश्च भवेत्। इदमेवोक्तं **तद्भूमावित्यादिना।** एतदर्थस्तु। **तत्** उक्ताभिनयनम्। **भूमौ** स्वान्तर्लक्षणस्थानं त्याजयित्वा बहिःस्वप्रौढ्या तत्प्रकटने न सम्भवतीति शेषः। तत्र हेतुरूर्ध्वभावेत्यादि। स्वान्तर्गुप्तो हि रसामृताब्धिरुत्तरोत्तरं भावतरङ्गाननुभावयति। इदमेवोर्ध्वभावत्वम्। स एव बहिः प्रकटितो रसत्वादेव बहिर्भवति। अतोऽयमेवोर्ध्वभावाभावः। च्युतः स्वरूपत एव नष्टो भवेदिति यावत्। अलौकिकरसाभिनयनम। विरहेणार्त्यादिप्रकटनं तत्, लौकिकरीत्या स्वाधिक्यज्ञापन **भूमौ पदस्थापनम्।** तस्मिन्सति तन्न सम्भवतीत्यर्थः। **अशक्ता चेदिति।** 'यत्र ते मन' इति प्रौढ्या, न तु प्रार्थनरीत्या, सख्येन कथं वदेदित्यर्थः॥ (एवं सति भङ्ग्यन्तरेणाप्येतद्व्याकृतिः सम्भवति तथा हि। भगवता ह्यस्यै प्रियायै पूर्णः स्वरसो दत्त इति भगवन्निष्ठा भावाः सर्वे हृदि स्फुरद्रूपा जाताः। तथा च सर्वत आधिक्यमपि स्वस्मिन् स्फुरितम्। तदुक्तं हित्वा गोपीरित्यादिना। एवं सति द्वितीयरसलीलाचिकीर्षा यदाभूत्सापि हृदि स्फुरिता। तामविषह्यां मन्यमानापि न कातरा जाता, किन्तु पूर्वरसगरिम्णा दृढा सती प्रियमब्रवीत्। एतदेव दृप्तापदेनोक्तम्। दुष्टगुणव्याप्तयोरप्यमृतं तदाति। अहं त्वेतद्गुणैरेव तूर्णेति अवश्यं सुखमेव दास्यति, न दुःखमित्यभिप्रायज्ञापनाय **केशवपदम्।** ततो भोगस्थानादग्रे वनसम्बन्धिनमुत्कृष्टं देशं स्वयं स्वेच्छया गत्वा, न तु प्रियेण नीता। गत्वाऽब्रवीदित्युक्त्या प्रियनकट्यं ज्ञाप्यते। तेन तदधीन एव प्रियस्तत्सङ्गे गत इति ज्ञापितं भवति। एतादृशे वने मद्वियोगेन मां विचिन्वन् यदि प्रियो भवति, तदा कीदृशो रसः स्यादित्याशयेनाब्रवीत्। अत एव दृप्तात्वमुक्तम्। पूर्वरसातिमदात्तथा चेत्करिष्यतीति तदाहं चलितुं स्पन्दितुमपि न पारये। जीवनमेव न संपत्स्यत इति भावः। एवं चेत् किं कर्तव्यमित्याकाङ्क्षायामाह नयेति। अत्र स्वान्तर्धाने ते मनस्तत्रान्तर्धाने मां नय, तिरोहितां मां कुरु, त्वं मा तथा भवेत्यर्थः। प्रियस्त्विदमत्यशक्यमित्याशयेनोत्तरयति **स्कन्धेत्यादिना** यथा स्वस्कन्धारोहणमशक्यम्, तथा मत्तोऽन्तर्धानं

भवत्याः । न हि पूर्णज्ञानशक्तेरविषयः कोपि भवितुं शक्नोति । यद्यपि विरुद्धसर्वधर्माश्रयत्वेन रसात्मकत्वेन च जानन्नेवाजानन्नपि भवितुं शक्नोतीत्येवमुत्तरं न सम्भवति, तथाप्यत्रातिप्रीतिविषयत्वेन तं धर्मं प्रकटयितुं न पारय इति भगवदाशयज्ञापना प्रियापदमुक्तम् । उत्तरदानमप्यत एव । अन्यथा त्वेनमुक्तस्तूष्णीं तिष्ठेत्तिरोधीयेतैव वा प्रियात्वान्समाशक्यं भवत्यास्तिरोधानम्, तासामर्थ्याभावाद्भवत्याः स्वतस्तिरोधानं तथेति भावः । एवं सति प्रियया प्रार्थितं देयं यद्यपि, तथापि प्रियात्वेन स्वाशक्यमिति लक्षणो यो हेतुस्ततो हेतोः स्वयमेव तथाऽकरोदित्याह ततश्चेति । एवं करणे प्रभुनिष्ठ हेतुमाह कृष्ण इति । अस्यां दशायां हृदि प्रकटः सन्नेवानन्दात्मकतद्रसपोषको यत इत्यर्थः ।। ३९ ।।

इति सप्तविंशोऽध्यायः ।। २७ ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तन्मननप्रकारमेवाह—हित्वेति । कामो यानमागमनसाधनं यासां ताः सर्वा गोपीर्विहायसौ प्रियो मामेव भजते अनुवर्तते, अतोऽहं सर्वयोषितां श्रेष्ठेति मेने ।। ३७ ।। तत एवमभिमानानन्तरं वनोद्देशं किञ्चिद्दूरं वनप्रदेशं गत्वा केशवं ब्रह्मादिनियन्तारमपि कृष्णं प्रति इतोऽग्रेऽहं चलितुं न पारये न शक्नोमि, 'अतो मां त्वं स्कन्धादिना नय' इत्यब्रवीत् । 'क नयामि' इत्यपेक्षायामाह—यत्रेति । यत्र जिगमिषसि तत्र नयेत्यर्थः । 'कथमेवं सर्वेश्वरमब्रवीत्' इत्याशङ्क्य तत्र हेतुमाह दृप्ता स्वश्रेष्ठत्वाभिमानेन गर्वितेत्यर्थः । सर्वेश्वरमपि पतिं प्राप्य सर्वाराध्याया उत्तमाया अपि यद्येवं दुर्बुद्धित्वं तदाऽन्यासां दुर्बुद्धित्वे कः सन्देह इत्याशयः ।। ३८ ।। कामिनां दैन्यं दर्शयति—एवमिति । एवमुक्तः स भगवान् 'एवं चेत्तर्हि त्वया स्कन्धमारुह्यताम्' इति तां प्रियां प्रत्याहेत्यन्वयः । सर्वेश्वरेणापि यदि कामलीलाङ्गीकृता तर्ह्येवं दैन्यं प्राप्तम्, काऽन्यस्य वार्ता ? परंत्वखण्डितत्वात् ततस्तस्यां स्कन्धारोहणोद्यतायां सत्यां कृष्णोऽन्तर्दधे । ततश्च सा वधूरन्वतप्यत ।। ३९ ।।

अन्वितार्थप्रकाशिका

सा च तदा सर्वयोषितां मध्ये आत्मानं वरिष्ठं मेने । सा चैवं मेने यत् कामयानाः कामयमानाः "आगमशास्त्रमनित्यम्" इति मुगभावः । कामयानशब्दः सिद्धोऽनादिश्चेति वामनसूत्रम् । "कामयानसमवस्थया तुलाम्" इति कालिदासोऽपि प्रयुङ्क्तः । कामो यानमागमसाधनं यासामिति वा गोपीर्हित्वा त्यक्त्वा असौ प्रियो मामेव भजते अनुवर्त्ततेऽतोऽहं सर्वाभ्यः श्रेष्ठेति ।। ३७ ।। तत इति ।। ततो दृप्ता सा वनस्य उद्देशं कञ्चित्प्रदेशं गत्वा केशवं प्रति इतोऽग्रेऽहं चलितुं न पारये न शक्नोमि । अतः यत्र ते मनः अस्ति तत्र मां स्कन्धादिना नय इत्यब्रवीत् ।। ३८ ।। कामिनां दैन्यं दर्शयति—एवमिति ।। एवमुक्तः स भगवान् एवं चेत्तर्हि त्वया स्कन्धेऽधिकरणे स्कन्धः कर्म वा आरुह्यतामिति तां प्रियां प्रत्याह स्म । ततस्तस्यां स्कन्धारोहणोद्यतायां सत्यां कृष्णोऽन्तर्दधे । ततश्च सा वधूरन्वतप्यत ।। ३९ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

न पारये न समर्था अहमस्मि यत्र तेषां तुं मनस्तत्रस्कंधेनिधायमांनय ।। ३८ ।। कामिनां दैन्यं दर्शयन् हरेरखंडितत्वमाहतस्याः श्रीकृष्ण स्कंधारोहसमये कृष्णों तर्दधे ।। ३९ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मननप्रकारमेवाह ।। हित्वेति ।। कामो यानमागमनसाधनं यासां ताः, गोपीः सर्वानपि गोपीजनानित्यर्थः । हित्वा परित्यज्य, असौ प्रियः मामेव, भजतेऽनुवर्त्तते, अतोऽहं सर्वयोषितां श्रेष्ठेत्यमन्यतेत्यर्थः । तत एवमभिमतिविधानानन्तरं वनोद्देशं किंचिद्दूरं वनप्रदेशं गत्वा, दृप्ता स्वसौन्दर्यगर्विता सती, केशवं ब्रह्मेशानादिशास्तृत्वेन सर्वेश्वरं श्रीकृष्ण, अब्रवीत् कथयामास । हे कृष्ण, अहं चलितुं गन्तुं न पारये न शक्नोमि । अतः, यत्र ते तव, मनः यत्र जिगमिषति, तत्र मां, नय । मामुदूह्य तं देशं नयेत्यर्थः ।।३७-३८।। कामिनां दैन्यं दर्शयति ।। एवमिति ।। एवमित्थं, उक्तः भगवान्, प्रियां आह । किमाहेत्यत्राह । स्कन्धं, आरुह्यतां इति, त्वयेति शेषः । अखण्डितत्वमेवाह । ततः तस्यां स्कन्धमारोढुमुद्यतायां सत्यां, कृष्णः अन्तर्दधेऽन्तर्हितवान् । ततश्च तदैव सा भगवतः पुरोऽपि स्वीकृतमाना वधूः, अन्वतप्यतानुतप्तवती ।। ३९ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततोगत्वेति : १०.३०.३८.

न सौकुमार्यं मृदुभाषणं वा स्वभावसिद्धं भुवि कामिनीनाम् ।
वशीकृते पुंस्यपि तु प्रलोभविधिर्दुरात्मत्त्वमगूढमेतत् ।। २२७ ।।
जगत्प्रियोप्यप्रियोऽभूच्छ्रीशस्तस्या यतः स्फुटम् । तत्संनिकर्षमाहात्म्यं वक्तुमीशान शेषधीः ।। २२८ ।।

प्रिये त्वद्गिरा मन्मनस्तत्र यातं सखी स्कन्ध एषोऽनुयातीह यत्नात्।
त्वया स्थेयमत्रासि चेत्तादृशीत्यब्रवीत् सत्यमीशोऽन्यथाधीः परं सा॥ २२९॥
एव कलापगमवेक्ष्य स मन्तुमस्मिन् राजा कलापजनशासनमातनोति।
नेशस्तथापि तु पृथक् समवेक्ष्य मन्तु यत्तां जहौ न च पुरा हृदि मानहीनाम्॥ २३०॥
देहान्तर्लसिता अनन्तविततानेकांसका नाडिकास्तास्वेकैव तु गच्छति प्रभुपदं योगात्सुधाधारिणी।
तस्यां चेदपि संगत स्मयलवस्तत्कालमन्तर्हितः स्यादेवेश इति स्फुटं सममवत्तदगापिकाचारतः॥ २३१॥
यदर्थमुज्झताः सख्यो यत्प्रात्या सस्मयाऽभवत्। तस्मिन्नन्तर्हिते युक्ता तनुतापानुतापिता॥ २३२॥

कृष्णप्रिया

श्रीठाकुरजी के अनुग्रह वह न समझ पाई, उसने माना भगवान मेरे वश है इसलिए मैं कुछ हूँ ऐसा गर्व आया और वन में चलते चलते आगे वन प्रदेश मैं जाकर केशवजी को कहने लगी कि अब मैं चलने में असमर्थ हूँ, अब आप जहाँ पधारना चाहें वहाँ मुझे सवारी पर चढाकर ले चलें!॥ ३८॥ राजन् जब प्रियाजी ने इस प्रकार केशव प्रभु को निवेदन किया तब रसि कवर श्रीकृष्णजी बोले यहाँ स्वारी तो कहाँ से मिले! प्रियाजू? आप मेरे कन्धो पर चढ जाइए, ऐसा कहते कन्धो पे चढाते श्रीकृष्णजी अन्तर्हित हो गए वह वधू-प्रियजी अत्यन्त सन्ताप करने लगी॥ ३९॥

हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज। दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम्॥ ४०॥

कर्दमक्षमा

अन्वयः—हा नाथ! हा रमण! हा प्रेष्ठ! हे महाभुज! क्व असि, दास्याः, ते, कृपणाया, मे, हे, सखे, सन्निधिम्, दर्शय॥ ४०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनुतापमाह। हा नाथेति॥ ४०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हा विषण्णास्मि वने 'हा विषादशुगार्तिषु' इत्यमरः। नाथ आशाप्रद। **रमण** रतिप्रद। **प्रष्ठ** अतीव प्रिय। **महाभुज** त्रस्तभयवारक। ते दास्याः शिक्षार्हायाः। कृपणायाः कृपार्हायाः। सख इति। नायं सखिधर्मो यो भयस्थाने सखीत्याग इत्याह॥ विलापमेवाह—हा नाथेति। त्वद्वियोगमहाग्निना दह्यमानादस्मद्देहान्मे प्राणाः सम्प्रति निःसृतप्राया यत्नेनापि मया रक्षितुं न शक्यन्ते, एषां तु त्वमेव नाथेति इतो दर्शनं दत्त्वा शीघ्रमेतान्रक्षेति भावः। न चैषां रक्षामहं स्वार्थमेव प्रार्थये किन्तु त्वदर्थमेवेत्याह—हे रमणेति। सर्वा अप्यन्या गोपीस्त्यक्त्वा रमणसुखविशेषार्थं यामेतावद्दूरं रहः समानैषीस्तस्यां मयि मृतायामेवं रतिसुखमन्यत्रालभमानो मां स्मरंस्त्वमपि दुःखेन विलपिष्यसीति भावः। नन्वस्तु मद्दुःखं तेन तव किम्, तत्राह—हे प्रेष्ठेति। तव मत्प्रेष्ठत्वात्त्वदीयं तद्दुःखं कोटिगुणीभूय मय्येव फलिष्यति, मत्प्राणकोटिनिर्मञ्छनीयपादाब्जनखैकदेशस्य तव तद्दुःखमहं मृत्वापि सोढुं न पारयिष्यामि। अतः कृपया सन्निधाय तदेव दुःखं दूरी कुर्वेति भावः। ननु यदि निःसृतप्राया एव प्राणास्तदा तानहमपि कथं निवर्तयितुं प्रभविष्यामि, तत्राह—हे महाभुजेति। त्वद्भुजस्य संजीवनौषधस्य स्पर्शनमात्रेणैव सुस्थसुशीतलीभूते देहेऽस्मिन्प्राणाः स्वयमेवागत्य स्थास्यन्तीति भावः। ननु मां विना स्वस्य गतिमेवं जानासि चेन्महाराजकुमारमतिसुकुमारमादरणीयं माम् 'नय मां यत्र ते मनः' इत्यादिष्टवती किमकापयस्तत्र सकाकुवैयग्र्यमाह—दास्यास्ते कृपणाया मे इति। तदानीं विलासश्रमनिद्रालस्याभिभूतयैव दीनया मया तथोक्तं क्षमस्व मा कुप्येति भावः। किञ्चायोग्ययापि मया सह त्वमेव दृढं यत्सख्यमकरोस्तेनैव तथाहमवोचमित्याह—हे सख इति। हे प्रिये तर्हि प्रसन्नोऽभूवं मत्समीपमेहीति चेत्सम्प्रत्यनुतापदुःखेनान्धास्मि त्वं क्व वर्तस इति न पश्यामीत्याह—दर्शय सन्निधिमिति। एतावदेव विलप्य विरहाद् घूर्णनवशात्संमुह्य भुव्यपतदिति ज्ञेयम्, अग्रे मोहितामित्युक्तेः॥४०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विलापमेवाह। हा नाथेति। हा खेदे आर्त्तिसम्बोधने वा। ततश्च सर्वत्रैव योज्यं नाथ स्वामितया पालक रमण कान्तोचितसुखप्रद प्रेष्ठ मद्विषयकतच्चितप्रेमविस्तारक क्वासि एवमेवं मयि स्निग्धोऽपि सम्प्रत्येकाकी क्व वर्त्तसे। हा हा तदज्ञानेन मम चित्तं क्षुभ्यतीति भावः। वीप्सापि वैयग्र्येण पुनरालिङ्गनादिनिजसौभाग्यस्मारकेण निजरसोद्दीपकतदङ्गविशेषसौन्दर्यस्मरणेन मुह्यन्तीवाह। महाभुजेति। पुनरतिदैन्येनाह। दास्या इत्यादि। तत्रैव किं पुनरपि ममालिङ्गनादिलाभाय मम वासं मृगवसीत्या-

शङ्कय नहि नहीत्याह । सखे दत्तनिजसाहचर्यसौभाग्य सन्निधिं निजसन्निधानमपि दर्शय ज्ञापय मात्रम् । साहभाग्य सन्निधिं निजसन्निधानमपि दर्शय ज्ञापय मात्रम् । साहचर्यदानेन भवतैव जनितव्यसनानि सम्प्रति तत्र मा गृह्णामि किन्तु त्वमत्र विद्यस इति मनसापि निश्चयतः स्वस्था भवेयमिति भावः । तत्र हेतुः । दास्याः सख्यादावयोग्यायाः किन्तु तादृशत्वत् कृपयैव बलादुत्पादितत्वदेकसुखानुकूल्यतात् पर्याया इत्यर्थः । तत्रापि कृपणायाः तदिदं दुःखं सोढुमशक्तायाः परिहर्तुं चाजानत्या इत्यर्थः । अतो न मयि वञ्चना कार्या नापि निजानुतापबीजं वप्तव्यमिति भावः । औदार्यनामा चानुभावोऽयं यथोक्तम् । औदार्यं विनयं प्राहुः सर्वावस्थागतं बुधा इति । ततश्च सा विमुह्य हन्त भूमावपतत् इति ज्ञेयम् । अग्रे मोहितामित्युक्तेः ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विलापमेवाह—हेति । हा खेदे आर्त्तिसम्बोधने वा । ततश्च सर्व्वत्रैव योज्यम् । नाथ ! प्राणेश्वर ! रमण ! भर्त्तः ! रतिदायक ! प्रेष्ठ ! प्रियतम ! महाभुज ! गाढालिंगनदातारित्यर्थः । एषां यथोत्तरं हेतुहेतुमत्तोह्या; यद्वा, नाथ ! प्रभो ! न केवलं तथा, किन्तु रमणसुखप्रद ! विविधक्रीडाकारकेति वा, अतः स्वभावत एव वा प्रेष्ठ ! आत्मनोऽपि सकाशात् परमप्रियेत्यर्थः । यतो महाभुज परममनोहरसच्चिदानन्दघनमूर्त्ते इत्यर्थः । यद्वा, परमभोगकर्त्तः । इति सततं रत्यादिसुखसम्पत्तिर्बोधिता, यद्वा, व्रजेश्वरत्वेन नाथेति; तत्रापि भर्त्तृप्रयोजनसिद्ध्या रमणेति, तत्रापि जारत्वेन प्रेष्ठेति, तत्रापि परमसुन्दरत्वादिना महाभुजेति । यद्वा, क्वासि क्वासीति परमार्त्या विलपन्ती सुविह्वला भूमौ निपतन्ती तदालिंगनमिच्छन्ती स्मरन्तीचाह—महाभुजेति । न च दूरे स्थित्वा अत्राहमस्मीति वक्तव्यमित्याह—मे मां प्रति तव सन्निधिं दर्शय सन्निहितो भवेत्यर्थः । कुतः ? दास्याः, तत्रापि कृपणायाः, अन्यथा मदन्त्यदशायां सत्यां त्वयानुतप्स्यत एवेत्याशयेनाह—हे सखे परमप्रियेति । यद्वा, सन्निधिदर्शने च क्वापि वञ्चना पूर्व्ववन्न कार्य्येत्याह—सखे हे परमविश्वासास्पदेति । अथवा ननु प्रियतमे ! त्वां हित्वा नाहं कुत्रापि गतोऽस्मि, त्वदन्तिकं एव वर्ते इति चेत्तर्हि त्वामहं मुग्धा नैव पश्यामि, सख्येन त्वमेवात्मानमभिव्यञ्जयेत्याह—दास्या इति । अन्यत् समानम् । यद्यपि विरहवैकल्येनानुसन्धानापगमाद्विलापेऽर्थसंगतिर्नापेक्षेत, असंगतिश्च गुण एव, तथापि तादृशीनां यत्किञ्चिद्वाक्यमेव सर्व्वार्थं सेवत इति, यथाभक्ति किञ्चिल्लिख्यते; एवमग्रेऽपि ज्ञेयम् । ततश्च सा विमुह्यन्ती हन्त भूमावपतदिति ज्ञेयम , अग्रे (४१ श० श्लो०) 'मोहिताम्' इत्युक्तेः, अथवा (३९ श० श्लो०) 'स्कन्ध आरुह्यताम्' इत्युक्तेः । प्रेमौत्कण्ठ्यकृतेन वैचित्त्येन पुरो वर्तमानस्यापि कृष्णस्य तयानवलोकनात् 'अन्तर्दधे कृष्णः' इत्युक्तम् , वस्तुतस्तु कौतुकत्वादेव स तत्र तूष्णीं स्थितः, ततः प्रेमवैचित्त्यभाजस्तस्या अनुतापः, तथान्या गोपीः सन्निहिता दृष्ट्वा कृष्णेनान्तर्हितमेवेति ज्ञेयम् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अनुतापमकारमेवाह । हा नाथेति । हेति खेदे हे नाथ प्रियतम हे महाभुज क्वासि तव किङ्कर्याः कृपणाया दीनायाश्च मम हे सखे तव सन्निधिं दर्शय ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भक्त्या लभ्यो नान्यथेति भावं दर्शयति । तत इति शुद्धबुद्धेः स्वभावोऽयमिति दर्शयितुमाह । सा वधूरिति । हा विषण्णास्मि वने हा विषादशुगर्तिष्विति च हे नाथ आशाप्रद हे रमण रति प्रद हे प्रेष्ठ ! प्रियतम ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अनुतापप्रकारमाह—हा नाथेति । हे महाभुज ! सन्निधिं दर्शय, यद्यपि सन्निधिस्तवानुभीयते, अत्रैवासि न क्वापि गतोऽसि, तथापि तं दर्शयेत्यर्थः । महाभुजेति भुजस्पर्शसुखानुभवसूचकमन्तर्द्धाय भुजाभ्यां परिरभ्य स्थित इति बोद्धव्यम् । तच्च स्वप्नलब्धं सुहृदालिङ्गनवत् । तत् क्वासि क्वासि, भुजस्पर्श एवानुभूयते, न तु त्वं पश्चात् पुरतः पार्श्वतो वासीति नोपलभ्यसे, तस्मात् सन्तमपि सन्निधिं दर्शयेत्यर्थः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विलापमेवाह । हा नाथेति । त्वद्वियोगमहाग्निना दह्यमाना तस्माद्देहान्मे प्राणाः सम्प्रति निःसृतप्रायाः यत्नेनापि मया रक्षितुं न शक्यन्ते एषां तु त्वमेव नाथोऽतो दर्शनं दत्त्वा शीघ्रं मे तान् रक्षेति भावः नचैषां रक्षामहं स्वार्थमेव प्रार्थये किन्तु त्वदर्थमेवेत्याह हे रमणेति सर्वा अप्यन्या गोपीस्त्यक्त्वा रमणसुखविशेषार्थं यामेतावद्दूरं रहः समानैषीस्तस्यां मपि मृतायामेव रतिसुखमन्यत्रालभमानो मां स्मरंस्त्वमपि दुःखेन विलपिष्यसीति भावः । नन्वस्तु मद्दुःखं तेन तव किं तत्राह । हे प्रेष्ठेति तव मत्प्रेष्ठत्वात्त्वदीयं तद्दुःखं कोटिगुणीभूय मय्येव फलिष्यति मत्प्राणकोटिनिर्मञ्छनीयपादाब्ज नखरैकदेशस्य तव तद्दुःखमहं मृत्वापि सोढुं न पारयिष्याम्यतः कृपया सन्निधाय तदेव दुःखं दूरीकुर्विति भावः । ननु यदि निःसृतप्राया एव प्राणास्तदा तानहमपि कथं निवर्त्तयितुं प्रभविष्यामि तत्राह । हे महाभुजेति त्वद्भुजस्य मत् सञ्जीवनौषधस्पर्शमात्रेणैव सुस्थसुशीतलीभूते देहेऽ-

स्मिन् प्राणाः स्वयमेवागत्य स्थास्यन्तीति भावः ननु मां विना स्वस्या गतिमेवं जानासि चेन्महाराजकुमारं परमसुकुमारमादरणीयं मां नय मां यत्र ते मन इत्यादिष्टवती किमकोपयस्तत्र स काकुवैयर्थ्यमाह । दास्यास्ते कृपणाया मे इति । तदानीं विळासश्रमनिद्रालस्याभिभूतयैव दीनया मया तथोक्तं क्षमस्व माकुप्येति भावः किञ्चायोग्ययापि मया सह त्वमेव दृढं यत्सख्यमकरोस्तेनैव तथाहमवोचमित्याह हे सखे इति । हे प्रिये तर्हि प्रसन्नोऽभूवं मत् समीपमहीति चेत्सम्प्रत्यनुतापदुःखेनान्धास्मि त्वं क्व वर्त्तसे इति न पश्यामीत्याह । दर्शय सन्निधिमिति । एतावदेव विळप्यहोद्घूर्णावशात् सम्मुह्य भूमावपतदिति ज्ञेयम् अग्रे मोहितामित्युक्तेः ॥४०॥

श्रीरसिकाह्लादिनी टीका

विप्रलम्भे यथा तासामवस्था जाता तथैवैतस्या अप्यभवदिति तस्याः विलापमाह हा नाथेति, हा इत्यार्त्तिज्ञापनार्थं, हे नाथ हे स्वामिन प्राणनाथ मयायुक्तं दृतं त्वया क्षन्तव्यं यतस्त्वमस्मत्स्वामी ह्यसि अहं दासी त्वया न त्याज्येति । हे रमण रतिप्रद त्वं भोक्ता वयं भोग्याः । अतो यथा रमणं भवेत्तथा त्वया समीप एव स्थातव्यमिति हेतोः हे प्रियतम एवं कृतवत्यपि त्वय्येव प्रीतिविषय इति न चान्यप्रीतिविषयोऽस्ति । अतितापव्याकुलया विक्लववचनमाह क्वासि दुखमहार्णवनिमग्नां मामुद्धर्तुमर्हसीत्याशयेनाह महाभुज दीर्घभुजाभ्यां दृढमालिंग्योद्धर्तुं त्वमेव योग्यो नान्य इति । नन्वहमत्रैव वर्त्ते किमिति बिलपयसीति चेत्तत्राह–ते दास्याः ते दास्याः संनिधिं दर्शय स्वनैकट्याद्दर्शने दास्यसम्भवात् । हे सखे सता सप्त पदं मैत्रमिति वचनात् । अहं तव सखी चिरसहचर्या अतो न वञ्चनीयेति । कृपणाय त्वां त्यक्तुमशक्नुवत्या दशम्यवस्थासंनिहिताया मे ममः संनिधिं समीचीनं निधिं तव मुखारविन्दं दर्शय दशम्यवस्थातः प्रागेव अन्यथा वास्याः लोपे सति पश्चात्तप्स्यसेऽतः शीघ्रं दर्शयेति ॥ ४० ॥

विशुद्धरसदीपिका

अथ प्रेमवैचित्यकृतं मौग्ध्यमनुनयति । हेति अतिखेदे तत एव नाथेति पुरुषोक्तिरपि तस्यास्तथात्वमुक्तमभियुक्तैः नाथेति पुरुषमुचितं प्रियेति दासेत्यनुग्रहो यत्र तद्दाम्पत्यमतोऽन्यन्नाररिज्जुः पशु पुरुष इति मधुरविलासाभिप्रायेणैव व्याख्यातम् अथवा प्रेमवैचित्योक्तावपि वैदग्ध्याद्यनन्तगुणसेवितचरणकमलत्वाद्विविधस्वभावानां गोपीनामनुग्रहाय तदभिमतभावसंग्रहाय च वाग्देवी विलसितमिदं तथाहि नाथेति दाम्पत्येन सुखप्रदेत्यर्थः । इदञ्च दाम्पत्याभिमानिनी नामैकमत्यायोक्तं तथा रमणकान्तोचितसुखप्रदेत्यर्थः । इदञ्च प्रेयसीन नचेदमसम्भावितं सैव चाष्टविधा राधा तत्तत्तद्भावविभावनीति आदि पुराणोक्तेः अथ प्रेष्ठ मद्विषयकतदुचितप्रेमविस्तारकेत्यर्थः । इति सहचरीणाम् एवं तद्विषकं तत्तद्भावजातमभिव्यज्य स्वाश्रितमावेदयति । सख इति अथवा दास्य इत्याद्यानां कृपणाया इति प्रेयसीनां सख इति स्वपक्षाणामभिप्रायेणेति तथाक्रमं योजना यद्वा ते दास्याः नाथ ते कृपणाया रमण मे सख इति प्रेष्ठेति च तासां तासां संग्राहकत्वान्महाभुजेति संग्रहसूचनमपि कृतम् औदार्य्याख्यानुभावोऽयम् औदार्य्यं विनयं प्राहुः सर्वावस्थागतं बुधा इति प्रेमवैचित्त्येऽपि तथात्वात्परमत्वमपि प्रेमवैचित्यमुक्तमुज्ज्वले प्रियस्थ संनिकर्षेऽपि प्रेमोत्कर्षस्वभावतः । या विश्लेषधियार्त्तिस्तत्प्रेमवैचित्यमुच्यत इति अत्र कारिकाः !

किंवा स्वीयापरोढालिभावावेशितचेतसाम् । गोपीनां संग्रहायाह नाथेत्यादिपदत्रयम् ॥
क्रमेण दासी कृपणा सखीत्याद्यभिमानिनी । स्वमतं सख्यमेवात्र प्रदर्शितवती स्फुटम् ॥
सिद्धान्त उत्तरः पक्ष इति शास्त्रविदां मतात् । तत्तथा दैन्यवचनं तासामतिसुखावहम् ॥
स्वसाम्यानुभवादद्धा सखीमिति मुनीन्द्रगीः ॥ ४० ॥

श्रीरामनारायणकृता भावभावविभाविका

तदनुतापवाक्यमेवाह । हा नाथेति ! हा इत्यनुतापे सखेदसम्बोधने च नाथेति नाथृनाधृयाञ्चोपतापैश्वर्याशीःपु इत्यस्मात् हेनाथास्मद्याच्यमानैश्वर्येण स्वामितयापालकोऽसितत: तद्रूपेति वा तथाच प्रार्थनापूरणेन स्वामितया पालय स्वयमेव वररूपतया कामं पूरय नोचेद्विरहेणोपतापकतया त्वयि नाथे सति अहं नाथ अथानन्तरमेव न स्यामिति भावः । कथं पालनं कामपूरणं वा तत्राह रमणेति तथाच रमणत्वात् रमय नोचेद्रमणस्य किंचिदपि वैपरीत्ये मम मरणमेव ननु रमुक्रीडायामित्यस्मात्क्रीडेच्छायां स्वसखीभिरमस्व तत्राह । प्रेष्ठेति अतिशयेन प्रियेत्यर्थः । तथाच त्वदतिरिक्तातिप्रियाभावात्त्वाद्वियोगे जीवनस्यैवासंभावनायां क रमणमिति भावः । इत्थं सम्बोधनैरत्र स्वखेदं निवेदयन्ती प्रार्थनां च सूचयन्ती प्रेमान्धतया क्वासि क्वासीति बाहुप्रसारेणान्वेषयन्ती वैक्लव्यतयानिपतन्ती स्वोत्थापनार्थं सम्बोधयति महाभुजेति ततश्चाविज्ञातसस्वेव तेन प्रियेणान्तर्हितेनैव भुजाभ्यामालिङ्ग्योत्थापिता प्रियस्पर्शलब्धप्राणा आप्तदर्शना सख्येन सम्बोधति दैन्याविष्कारेण सम्बोधयति दर्शनं च प्रार्थयति दास्या इति दास्याः स्वानुरागेणैवामूल्यक्रीतायाः नखरदादिविविधरत्नान्वितसुवर्णरूपधनेन वा क्रीतायास्तदात्मीयजीवनधनापगमे कृपणाया दीनाया मे हे सखे! स्पर्शेन वर्तमानतया सम्भावितं ते सन्निधिं दर्शय यद्वा कृपणायाः सन्निधि सम्यङ्निधिमिव दास्या मे सम्यङ्निधिं ते सन्निधिं दर्शय ॥ ४० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तत्कृतावलापमाह । हेति आर्तिसम्बोधनमिदं सर्वत्र योज्यं हा नाथ स्वामिन् ! पालक हा रमण प्रियोचितसुखप्रद हा प्रष्ठ प्रेमविस्तारक तथाचैवं विधस्य तव मद्वियुक्ततयावस्थानं नोचितमित्याशयेनाह । कासीति । आलिङ्गनं स्मृत्वा हा महाभुज दैन्येनाह ते दास्याः सख्यादावयोग्यायास्तत्रापि कृपणाया एवंविधं दुःखं सोढुमशक्तां मामपरिहतुं वा नास्यतो मम सन्निधिंदर्शय सन्निहितोऽस्मीति ज्ञापय यतस्त्वं सखा मुख्यसख्या अपराधाः क्षन्तव्या एवेति भावः । यद्वा हेति पश्चात्तापे अयुक्तं जातमित्यर्थः । यद्यपि मया अयुक्तं कृतं तथापि त्वया नाहं त्याज्या किन्तु दोष एवोपेक्षणीयो यतस्त्वमेव मम स्वामीत्याशयेनाह । हा नाथ ननु शङ्कटप्राप्तौ साहाय्यं करिष्यामीति चेत्तत्राह । हे रमण ! ते दास्याश्च रमणस्य भोक्तुस्तव भोग्याया मत्तो दूरेऽवस्थानं परमसङ्कटरूपं तस्मात्त्राणं कर्तुं योग्योऽसीति भावः । ननु भोग्येच्छया भोक्ता न प्रवर्तते किन्तु स्वेच्छया तथाच ममेच्छाभावात्कथं रमणे प्रवृत्तिरित्याशङ्क्याह । हे प्रेष्ठ मम प्रीतिविषयस्यान्यस्या भावात्त्वद्विरहे मरणमेव सम्भाव्यते तेनानुग्रहबुद्ध्या तथा कुर्वित्यभिप्रायः अतस्तथा भूतस्त्वं क्वापि गन्तुमयोग्यः अत्रैव स्थातव्यमहं व्याकुळत्वान्न जानामि ततः पृच्छामि कासीति झटिति कथय नोचेदुच्छेयुर्मम प्राणा इत्याशयेन पुनराह । कासीति इत्युक्त्वा भूमौ निपतिता मूर्च्छाभिमुखा उत्थानार्थं सम्बोधयति हे महाभुजेति यतस्तवैवाहं दासी तत्रापि संप्रति कृपणा तस्मान् मम सन्निधिं दर्शय हे सखे सख्युस्तवेदमुचितमिति भावः । यद्वा हे नाथ ! त्वदेकप्राणायास्त्वदधीनाया इत्येते प्राणाः संप्रति गन्तुकामाः मया रक्षितुमशक्या अतस्तानागत्याशु संरक्षेत्याशयः तद्गमने तवात्यन्तदुःखं भविष्यति सर्वापेक्षयोत्कृष्टत्वेन सम्मतायां मयि मृतायामन्यत्र रतिमलभमानस्य पश्चात्तापेन रोदनावश्यंभावादित्याशयेनाह हे रमणेति । ननु अस्तु मम दुःखं तव तेन किमिति चेत्तत्राह । प्रेष्ठेति प्रेष्ठस्य तव दुःखं कोटिगुणितं सन् मय्येव फलिष्यतीति भावः ननु सर्वथा निर्गन्तुं प्रवृत्ताः प्राणा मयापि कथं संरक्ष्या इति चेत्तत्राह । हे महाभुज कासि का स झटित्यागत्य स्वभुजामृतसंजीवनौषधेन सुकरं तद्रक्षणं सम्पादयेति भावः । नन्वेवन्तर्हि न पारयेऽहं चलितुमित्येवं किमर्थमुक्तवत्यसि ततः सापराधां त्वां न स्पृशामीति चेत्तत्राह । दास्यास्ते यद्यपि तदानीं प्राप्तगर्वयाऽऽलस्यादिवशात्तथोक्तं सप्रति तत्तन्निवृत्त्या दासीभावं प्राप्तास्मीति तत्रापि कृपणा परमदीना जातास्मि ततः क्षमैवोचिता इतः परं मरणस्यैवावशेषादपराधनिमित्तस्य दोषस्य निवृत्तत्वान्न कोप इतिभावः । किंच वस्तुतो नास्ति ममापराधस्त्वयैव दास्ययोग्याया मम सख्यं कृतं तदनुरूपं च मयानुष्ठितमित्याशयेनाह । हे सख इति । ननु नास्ति मम कोप इति चेत्तर्हि सन्निधिं दर्शय प्रसन्नः सन्मत्समीपमागतोऽसि चेत्तर्हि विरहव्याकुलस्वान्तायाः पश्चात्तापदुःखेनान्धीकृतनेत्राया मम सन्निधिं स्पर्शादिना दर्शय पश्चात्तमहतीं मूर्तिंद्रक्ष्यामीतिभावः । एवं विळपती भगवत्स्पर्शादिकमळब्धवती ततः परं विलापेऽप्यक्षमा मूर्च्छिता सती भूमावपतदित्यपि ज्ञेयं मोहितां ददृशुरिति वक्ष्यमाणानुसारात् निवृत्तिपक्षे अथ ब्रह्मणः साक्षात्स्ववेद्यत्वाभिमानं विहाय स्वजन्यवृत्त्यावरणनिवृत्त्या सन्निधिं प्रार्थयते हा नाथेति हेति स्वजन्यवृत्तिरहिता नाक्रोशति हेनाथ सर्वेश्वर हे रमण जगत्सृष्टिस्थिति भङ्गलक्षणक्रीडापरायण तत्पदार्थ हे प्रेष्ठ वरप्रेमास्पद महाभुजासंख्यातभुजादिमद्वीश्वरत्वपदार्थ असि असीत्येवं नवकृत्वस्तवोपदेशपराया दास्या अधिकारिभिर्मदर्थाग्रहे कृपणायाः दीनतां प्राप्तायाः मम क्वचित्सखे निरुद्धै रिन्द्रियैः सह वर्त्तमाने शुद्धेऽन्तः करणे सन्निधिम् आवरणनाशकवृत्त्युत्थानेन मत्प्रतिपाद्यतां प्रकटयेत्यर्थः ॥ ४० ॥

रास-रहस्यम्

र० टी०—हा नाथ ! हा खेदे, नाथ प्राणीमात्रान् चेतनता दानेन सनाथयतीति नाथस्तस्य सम्बुद्धौ हे नाथ, हे रमणप्रेष्ठ सर्वस्य हृदयं रमयति आनन्दयतीति रमणः अपरिच्छिन्नाह्लादजनकत्वात् प्रेष्ठ प्रियतमः, "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति ।" "तस्य भासा सर्वमिदं विभाति ।" कासि कासि महाभुज ! कुत्र त्वमसि कुत्र त्वमसीति परितापे वीप्सा । महाभुज ! भुक् अग्निः महाप्रलये प्रलयाग्निरूपेण सर्वं भक्ष्यते ग्रसते इति महाभुजः "यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥" कठ १।२।२४ ॥ "अत्ता चराचरग्रहणात् ।" ब्र० सू० १।२।९ ॥ इति सूत्राच्च । अत्र निर्विकल्पसमाधौ सर्वं प्रलीयते इति भावं गृहीत्वा सम्बोधनं, मम विज्ञात्र्यभिमानस्यापि त्वं स्वस्मिन् लयं कुरु । ते तव दास्याः दातुं योग्याया इति स्वस्मिन्नधिकारित्वं सूचितं, कृपणायाः दीनायाः सर्वश्रेष्ठसम्पदात्मज्ञानस्य भ्रष्टत्वात्, मम हे सखे इति समानलक्षणयुक्तत्वात् सम्बोधनं, सन्निधिं दर्शय सन्निकर्षं देहि, स्वस्मिन् प्रलयं कुरु इतिभावः ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अनुतापं वर्णयति । हा नाथेति । हा इत्यव्ययमनुतापाविष्करणे हे रमण ! हे प्रेष्ठ हा त्वां विनानुतप्तास्मि हे महाभुज ! अनुतापजलधौ निमग्नामुद्धर हे नाथ ! याच्यदास्याः याचकयाः सन्निधिं दर्शय हे सखे सखित्वात्कृतापराधायाः अपराध क्षन्तुमर्हसीति संबोधनपदानामाशयः ॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

न केवलमन्तरनुतापः किन्तु तज्जनितो बहिरपि विलापो जात इत्याह । हा नाथेति हा इति पश्चात्तापे अयुक्तं कृतमिति तथापि हे नाथ त्वमेव स्वामी अतो दोष एव दूरीकर्तव्यः नतु न्यक्तव्या ननु दूरे स्थित्वा पालनं करिष्यामीति चेत्तत्राह । रमणेति

त्वमेव रतिवर्द्धको भोक्ता भोग्यरूपाश्च वयमतो निकट एव स्थातव्यमिति भावः। नन्वनुरोधेन केवलं पालनं करिष्यामि भोक्तुरिच्छाभावात् नहि भोग्येच्छया भोक्ता भुंक्ते तत्राह। प्रेष्ठेति नह्यन्यः प्रीतिविषयोऽस्ति येन जीविष्यामि अत्यन्तं व्याकुलाया वचनमाह। कासि कासीति। मोहवशात् अन्धा पतिता च जाताः तत उत्थापनार्थं संबोधयति महाभुजेति महान् भुजो यस्य महती क्रिया शक्तिः अतो दोष एव दूरीकर्त्तव्यो नत्वहं यतोऽहदासीतत्रापितेतवैवाहं दासी स्वभावत एवाहं कृपणा अनालोचितथाचिका अतो मद्वचनान्नान्यथाभावः कर्त्तव्यः एवम्प्रार्थनायां परमकृपालुस्तामुत्थाप्य स्वस्थां कृतवान् अदृश्यरूपेणैव तदा पुनराह हे सखे स्पर्शेन स्वधर्मारोपात् स्वसन्निधिं दर्शय वर्त्तसे निकटे तथापि यथा सान्निध्यं दृष्टं भवति तथाकुरु एवमेव वदन्ती स्थिता भगवानपि तत्रैव स्थितः ॥ ४० ॥

श्रीसुबोधिनी–सारः

हा इति पश्चात्तापे। हे नाथ इति त्यागायोग्यता। हे रमण इति भोग्या वयं निकटे एव स्थाप्या इति भोगसाधनता। हे प्रेष्ठ इति क्रोधायोग्यता। कासि कासीति मोहवशता। हे महाभुज इति स्वकीयाया उत्थापनयोग्यता। ते तव दास्याः कृपणाया दीनाया मे संनिधिं समीपतां दर्शय दास्या दंडनमेव न त्यागः हे सखे ॥ ४० ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

अनुतापमेव दर्शयति–हा नाथेति। 'मयाऽनेचितं कृतम्' इत्यनुतापं सूचयति-हेति। 'स्वामित्वाद्दास्या मम पालनमेवोचितम्, न त्यागः' इति सूचयन्ती सम्बोधयति –नाथेति। दासीत्वान्न मम रक्षकोऽन्योऽस्ति। 'तव तु रक्षायां सामर्थ्यमस्त्येव' इत्याशयेन सम्बोधयति—महाभुजेति। 'न चान्तर्हितः सन्नेत्र पालयिष्यासीति मन्तव्यम् रमणत्वात्' इत्याशयेनाह-हे रमणेति। 'त्वद्वियोगेन मन्मरणमेव स्यात्' इत्याशयेनाह-हे प्रेष्ठेति। 'मन्मरणेन तत्रापि दुःखमेव भविष्यति' इति ॥ ४० ॥

अन्वितार्थप्रकाशिका

अनुतापमाह–हा नाथेति ॥ हा खेदे। हे नाथ! हे रमण! हे प्रेष्ठ! हे सखे! त्वं कासि कासि। कृपणायाः त्वद्वियोगेन दीनाया दास्याः मे स्वसन्निधिं दर्शय! इति विलप्य मुमूर्च्छ। अग्रे मोहितामित्युक्तेः ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनुतापमाह हा नाथेति ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अनुतापप्रकारमेवाह ॥ हा नाथेति ॥ हेति विषादे। वने विषण्णास्मीत्यर्थः। 'हा विषादाशुभार्त्तिषु' इति कोशान्तरम्। हे नाथ स्वामिन्, हे प्रेष्ठ प्रियतम्, हे रमण रतिप्रद, हे महाभुज महाबाहो, कासि कासि। संभ्रमे वीप्सा। दास्यास्तव किंकर्याः, कृपणायाः दीनायाश्च, मे मम, हे सखे, ते तव, संनिधिं पूर्ववदेव सांनिध्यं, दर्शय ॥ ४० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

हा नाथेति : १०.३०.४०.

श्रीकृष्णाच्युत माधवाचल धरानन्तत्रिलोकी प्रभो गोविन्देश मुकुन्द सुन्दरतनो वन्दारुरक्षागुरो।
ध्यान्तध्वंसक दैत्यमर्दक सदासत्सङ्गसंरक्षक त्राहि त्राह्यतिदीनगामिव सखे मां त्वत्पदैकाश्रयाम् ॥ २३३ ॥
कस्यापि कोऽपि भवति व्रजलोकवासी संरक्षको बत महत्स्वपि संकटेषु।
त्यक्तस्वजातिजनमित्रसखीजनायास्त्राताऽधुना मम विभो त्वमिहैक एव ॥ २३४ ॥
शुद्धत्वं चरणसरोरुहे सदैव मालिन्यं तव च शिरोरुहे दयाब्धे।
सम्प्रेक्ष्याप्यहरहराश मुग्धचित्ता सम्मोहात्कथमहमैच्छमंसवासम् ॥ २३५ ॥
त्वं ममासि सकला सकलास्ये त्वां विना न रमणी चतुरापि। मन्मुदेस्त्यसकृदेवमुदीर्यानार्यवत्कथमिहार्य करोसि ॥ २३६ ॥
एकाकिनी समपहाय सहायहीनामेनां वने त्रिभुवनेडितन तिनेता।
अन्यत्र याभि कथयामि न वैभवेश सत्यं कथं मनसि यातमिदं ससत्यम् ॥ २३७ ॥
मानो मया यदि कृतो बहुधाऽपमाने वैमानिकादिमगुरो विहितस्त्वयापि।
जातं समानमधुना मधुना शनास्मिंस्तत् किं नवं विरहवैभवमातनोपि ॥ २३८ ॥
सर्वे जना भुवि भवन्त्यपराधिनस्त्वं तेषां क्षमाकर इति प्रथितं पृथिव्याम्।
तत्प्रार्थयामि भगवन्नपराधिकत्वं मत्त्यागतो न नवमर्जय लोकगर्ह्यम् ॥ २३९ ॥

गुर्वङ्गनेयमिति मामवगत्य मोहात् किं रे करैः स्पृशसि चन्द्रं निरस्तलज्जम् ।
तारा न काममहमच्युतपादसक्ता सा राधिकेत्यलमलं किल साहसेन ॥ २४० ॥
वृत्त्यैव लक्ष्यं कुरुते पिता ते यं श्रीशमस्मिन् स्मर तद्भवस्य ।
वीरस्य तेऽसौ न हि बाणतोऽपि लक्ष्योभवत्यत्र न कि त्रपा ते ॥ २४१ ॥
शचोशवद्रतीशोऽपि करोति शरवर्षणम् । तद्गोत्राणार्थमचलौ कराभ्यां धारय प्रभो ॥ २४२ ॥
सद्वर्त्मदर्शनचणागममोदमानस्तल्लङ्घनं न सहसा प्रभुरेष कुर्यात् ।
एवं विचिन्त्य सुरतोत्सवदानदक्षं सालं द्रुमं द्रुतमगादनुनोतकृष्णा ॥ २४३ ॥
सन्मार्ग एव भवति प्रभुपादपद्मलाभो भुवीत्यखिलविद्वदुदीरितां गाम् ।
स्मृत्वा विमुग्धतरबुद्धिरगाढगात्राप्येणौघसन्निधिमवाप जवादशङ्कम् ॥ २४४ ॥
मार्गं दृष्ट्वा कृष्णसारप्रधानं तत्रासक्ता सर्वमेवापहाय । त्यक्त्वा शङ्कामेहि तत्त्वं मदीयोपान्ते क्षेत्रज्ञोऽसि मुग्धैवमूचे ॥ २४५ ॥
सुखं वा दुःखं वा सततमनुभोक्तव्यमखिलैः सहैव प्राप्तं चेत् पृथगपि कदाचिद्विधिवशात् ।
न गर्वाशः कार्यः क्वचिदपि तदा चेत्स विहितो जने हास्याय स्यादुभयमिह मानं तदबला ॥ २४६ ॥

कृष्णप्रिया

प्रियतम के अन्तर्हित होने से अन्तःकरण में और बाहर संतप्त होकर श्रीप्रियाजू हा नाथ ? हा रमण ! हा प्यारे ! हा प्रियतम ! हा महाभुज ! आप कहाँ हो ? कहाँ हो ? मैं तो आप की दीन दासी हूँ नाथ आप दर्शन दें ! आप का सान्निध्य दें ? ॥ ४० ॥

अन्विच्छन्त्यो भगवतो मार्गं गोप्योऽविदूरतः । ददृशुः [1]प्रियविश्लेषमोहितां दुःखितां सखीम् ॥ ४१ ॥
[2]तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् । अवमानं च दौरात्म्याद् विस्मयं परमं ययुः ॥ ४२ ॥

कर्दमक्षमा

अन्वयः—भगवतः; मार्गम्, अन्विच्छन्त्यः, गोप्यः, अविदूरतः, प्रियविश्लेषमोहिताम्, दुःखिताम्, सखीम्, ददृशुः ॥ ४१ ॥ माधवात्, मानप्राप्तिम्, च, आत्मनः, दौरात्म्यात्, अवमानम्, च, तया, कथितम्, आकर्ण्य, परमम्, विस्मयम् ययुः ॥ ४२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अन्विच्छन्त्यो मृगयमाणाः । अविदूरतः समीपे ॥ ४१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गां दृष्टिं पान्ति रक्षन्ति दुर्विषयगमनराहित्येनेति गोप्य इन्द्रियवृत्तयः शास्त्रविषयाः । भुक्तेः पूर्वमपरोक्षबुद्धेराविर्भावतिरोभावौ क्वचित्स्यातामिति दर्शनाय—प्रियविश्लेषेति । दुःखितामिति—भूतललुठनलग्नधूलिकंटकक्षतरक्तस्वेदबहलाश्रुधाराभिर्दुःखिनीत्येवं ज्ञापितम् ॥ अन्विच्छन्त्यः अन्वेषयन्त्यः । दूरतोऽपि ददृशुरिति तस्या विद्युत्तुल्यकांतिमत्त्वात् । सखीमिति तस्यास्तादृशदशादर्शनेन विपक्षाणामपि तत्र स्नेहोदयात् । किञ्च, उज्ज्वलरसस्य स्वभाव एवायं यत्कान्तस्य कान्तामात्रवियुक्तत्वे ज्ञाते सति कान्तानामीर्ष्याद्वेषाद्यभावः परस्परस्नेहवत्त्वं च । तदुक्तम्—"अत एव हि विश्लेषे स्नेहस्तासां प्रकाशते" इति ॥ ४१ ॥ तया सख्या । मानप्राप्तिम् स्कन्धारोहलक्षणाम् । पक्षे, अपरोक्षलक्षणाम् । दौरात्म्यात् अभिमानात् । अवमानम् त्यागलक्षणम् ॥ ततश्च सखीभिरत्युच्चरोदनेन व्यजनादिपरिचर्यया यत्नतस्तत्प्रबोधे संपादिते सति अयि प्रियसखि स्ववृतान्तं कथ्यतामिति ताभिः पृष्टया तया कथितम् —अयि प्रियसख्यः कथं भवतीभ्यो विच्छिन्नाहमभूवमिति मुग्धाहं परतन्त्रा नाज्ञासिषं, किन्तु मानप्राप्तिरवमानश्च दौरात्म्यादेवेति निश्चिनोमि । युष्मान्परःसहस्राः प्रेमवतीरवमत्य स्वविरहानलेन ज्वालयित्वा मह्यमेकस्यै यत्सौभाग्यं दत्तम् इदं तस्य दौरात्म्यम् । तं दुर्लीलमहाराजपुत्रं प्रति वराक्यपि मुग्धा 'न पारयेऽहं चलितुं नय माम्' इति यदवोचमेतत्तु ममैव दौरात्म्यम्, यत एतावानवमानः प्राप्त इत्युभयथापि मे महन्मनोदुःखमेवेति स्वकान्ते तासु स्वस्मिंश्च क्रमेणासूयाविनयदैन्यानि व्यञ्जितानि । अत्र श्रीमुनींद्रेण दौरात्म्यशब्दप्रयोगस्तु तस्या वचनानुसारादेव । वस्तुतस्तु—श्रीकृष्णाद्दूर आत्मा यस्याः, दूर आत्मा श्रीकृष्णो वा यस्याः सा दूरात्मा तस्या भावो दौरात्म्यं तस्मात् । विश्लेषादित्यर्थः । विस्मयं परमं ययुरिति—

---

[1] विश्लिष्टां–विज. । [2] तथा–प्रा पा. ।

प्रियसखि भवत्याः सौभाग्यमुचितमेव नात्र तस्य दौरात्म्यं रतिश्रान्तायाः स्वाधीनभर्तृकायास्तव कान्तं प्रत्याज्ञापनमपि न दौरात्म्यं प्रत्युत रसावहमेव, किन्त्वनुकूलनायकेन संभुक्तकान्ताया यदाज्ञोल्लंघनमेतादृशदुरवस्थाप्रापणं च एतदेव रसप्रतिकूलं दौरात्म्यव्यञ्जकम्। हन्तहन्त महारसिकशेखरस्य महाप्रेमवतो दयानिधेस्तस्य कथमेवं चिकीर्षितमभूदिति परमं विस्मयं प्रापुः ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अविदूरतो नातिदूरत इत्यर्थः। अतिदूरे व्यवधानसद्भावात्। राकेशशोभाविजयिशोभाविशेषेण दूरेऽपि दर्शनसम्भवात्। दुःखितामत एव मोहितां मूर्च्छितां समदुःखभावनया विशेषतस्तस्या एकाकिन्या अपि परित्यागदर्शनेन सुतरामीर्ष्यापगमादैकमत्याच्च सखीमित्युक्तं किन्तु निजसखीनामत्र प्रेमावेशविशेषो ज्ञेयः ॥ ४१ ॥ अत एव च तया कथितमाकर्ण्येति रोदनसंज्ञाप्रापणप्रश्नान्तरमिति ज्ञेयं कथितम् कथं भवतीभ्यो विच्छिन्ना बभूवाहमिति नाज्ञासिषं किन्तु दूरत एवात्मानुसन्धानमकार्षमित्यादिप्रकारकं सर्वं वृत्तमाकर्ण्य तत्रापि माधवात् नूनं लक्ष्म्यापि रमणतया स्पृहणीयात् सर्वगुणादिसम्पत्तेः पत्युर्वा तस्मात् स्वतएव परमसौभाग्यलाभलक्षणां सम्मानप्राप्तिं चाकर्ण्य तत्रैव गर्वलक्षणान्निजदौरात्म्यात् परित्यागलक्षणमवमानं चाकर्ण्य विस्मयमित्यादिकोऽन्वयः। अत्र तु दौरात्मशब्दप्रयोगस्तद्दैन्यवचनानुवादात्। वस्तुतस्तु श्रीकृष्णाद्दूरे आत्मा देहो यस्याः दूरे आत्मा श्रीकृष्णो वा यस्याः सा दूरात्मा तस्या भावो दौरात्म्यं तस्माद्दूरविश्लेषादित्यर्थः। परमं विस्मयमित्यादिकस्य तया कथितमित्यादिना त्रयेणाप्यन्वयश्च। तत्सहितान्तर्धानादिसर्वतच्चरितस्य स्वसहिततच्चरितादपि दुर्वितर्क्यत्वात्। तत्रापि तादृशमानप्राप्तेः स्वेषु परःकोटिष्वप्यदृष्टचरत्वात्। तत्र च सति तस्यामप्यवमानस्य परमासम्भवादिति ॥ ४२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विदूरतोऽत्यन्तदूरेऽपि पूर्व्वं ददृशुः, तस्याः कान्तिविशेषतः, यद्वा, विदूरतोऽन्विच्छन्त्यः, अग्रतो दूरं गत्वान्वेषयन्त्य इत्यर्थः। यद्वा, अकारप्रश्लेषेण अविदूरतो निकट एव ददृशुः, ततश्च निजवैकल्यभरेण निकटेऽपि पूर्व्वं तस्यास्तमार्त्तनादं न शुश्रुवुरिति ज्ञेयम्। प्रियस्य श्रीकृष्णस्य विश्लेषाद्विच्छेदाद्दुःखितां पश्चान्मोहिताञ्च भूतलविलुठन–लग्नधूलिकण्टकक्षतरक्ताक्तसर्वांगतादीनां बहुलाश्रुधारालापं किलमुखस्तनत्वादीनां लक्षणानां तादृशमोहस्य च तद्विश्लेषं विनान्यथानुपपत्तेः, मोहितामित्यनेन सर्व्वाभ्योऽन्याभ्योऽस्याः प्रीतिविशेषोऽपि दर्शितः, तासां हि विरहार्त्त्या लीलानुकरणमस्याश्चान्त्यदशातुल्यो मोह इति, सखीमिलितां तादृगवस्थापन्नां दृष्ट्वा सख्येन तुल्यव्यथा एव विशेषतश्च तद्द्विगुणितनिजवेदनाः सर्व्वा अपि परिवृत्य रुरुदुरित्यर्थः। ततश्च पूर्वोक्तमात्सर्य्यादिकं सर्वासामेव दूरे स्वयमेवापगतमिति तथा पश्चाद्बहुप्रयत्नैस्तां स्व-संज्ञां विचित्रचातुर्य्यैश्च स्वस्थतां शनैरीषत् प्रापयामासुः, ततश्चाश्वास्य तद्वृत्तं पप्रच्छुरिति ज्ञेयम् ॥ ४१ ॥ ततश्च तया कथितं सर्व्वमिति शेषः; यद्वा, पुनर्दुःखोदयभयेन ताभिरपृष्टमपि सखीनां समागमात् स्वयमेव विलापरूपेण वर्णितं तद्वृत्तमिति शेषः। इति पृथग्वाक्यमेकमेव वा, ततश्च मानप्राप्तिमाकर्ण्य; एवमग्रेऽपि; यद्वा, कथितमेवाभिव्यञ्जयति—मानेत्यादिना। अवमानं परित्यागलक्षणञ्च निजदौरात्म्यान्मानादिलक्षणादाकर्ण्य, चकाराभ्यामुभयोरेव प्राधान्यं द्योत्यते, तत्तत्प्रकारेण रमणात्, तथाकस्मादेव रसावसरे अन्तर्द्धानाच्च, माधवात् लक्ष्मीकान्तादपीति। यद्वा, मधुना मधुररसेन क्रीडति सदेति तस्मान्मानप्राप्तियोग्या मत्तोऽप्यधिका काचिदन्यैव, न त्वहम्, तथापि केवलं तत्कारुण्यमहिम्नैव, न च निजगुणैस्तादृशमानं प्राप्तेति भावः। एवं भद्रं श्रीभगवत्कारुण्यादिगुणत एव, अभद्रञ्च सर्व्वं निजदोषादेव वक्तव्यं मन्तव्यं चेति। साधूनपि शिक्षयामासेति ज्ञेयम्। यद्वा, श्रीकृष्णाद्दूरे आत्मा स्वयं श्रीकृष्णो वा यस्याः सा दुरात्मा तद्भावो दौरात्म्यं तस्मात्, तद्दूरगमनादित्यर्थः। परमं विस्मयं सद्य एव तादृशानुग्रहनिग्रहाभ्याम् ॥ ४२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीत्थम्प्रियस्य विश्लेषेण मोहितां विचित्तां दुःखिताञ्च तां सतीमविदूरतस्ता गोप्यः ददृशुः कथंभूताः भगवतो मार्गमन्वेषयन्त्यः ॥ ४१ ॥ ततस्तया स्वस्याः माधवान्मानप्राप्तिं सम्मानप्राप्तिं तथात्मनो दौरात्म्याद्धेतोरवमानं च कथितमाकर्ण्यसर्वा गोप्यः परमं विस्मयं प्रापुः ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दास्याः शिक्षायोग्यायाः दासुहिंसायामिति धातुः कृपणायाः कृपाविषयायाः गां दृष्टिं पान्ति रक्षन्ति दुर्विषयगमनराहित्येनेति गोप्य इन्द्रियवृत्तयः शास्त्रविषयाः अविदूरतः ज्ञात्वा समीपे स्थिताः ॥ ४१ ॥ मुक्तेः पूर्वमपरोक्षबुद्धेः आविर्भावतिरोभावौ क्वचित्स्यातामिति भावदर्शनायोच्यते प्रियेत्यादिना मानप्राप्तिम् अपरोक्षलक्षणमानप्राप्तिम् ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तस्याः पूर्वचिन्तितमेवाह—अन्विच्छन्त्य इत्यादि। प्रियविश्लेषाद्विचेतसो विरहिण्यो गोप्यः सखीं तां राधां ददृशुः। कीदृशीम्? ऊहितां वितर्कितां, सा चेद्भवति कथमेकाकिनी, सा चेन्न भवति तदा केयमन्येति प्रथममूहितां पश्चाद्ददृशुर्ज्ञातवत्यः।

किन्तु मा दुःखितामात्मवद्विच्छेददुःखभाजं न ददृशुरित्यर्थः, प्रच्छन्नभगवदङ्गसङ्गवत्वात् ॥ ४१ ॥ अथ मिलने सति ताभिः पृष्टया तया सर्वमेव कथितमित्येतदाह—तयेत्यादि । तया कथितमित्येकं वाक्यम्, तयानुपूर्वां सर्वमेव कथितमित्यर्थः । तत्र कथने माधवान्मानप्राप्तिमाकर्ण्य विस्मयं ययुरित्यर्थः ॥ ४२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

दौरात्म्यात्—आत्मनः प्राधान्य-मननात् ॥ ४२-४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अन्विच्छन्त्यः अन्वेषयन्त्यः विदूरतोऽपि ददृशुरिति तस्या विद्युत्तुल्यकान्तिमत्त्वात् सखीमिति तस्यास्तादृशदशादर्शनेन विपक्षाणामपि तत्र स्नेहोदयात् किञ्च उज्ज्वलरसस्य स्वभाव एवायं यत्कान्तस्य कान्तामात्रवियुक्तत्वे ज्ञाते सति कान्तानामीर्ष्यादोषाद्यभावः परस्परस्नेहवत्त्वं च यदुक्तमत एव हि विश्लेषे स्नेहस्तासां प्रकाशत इति ॥ ४१ ॥ ततश्च सखीभिरत्युच्चरोदनेन व्यजनादिपरिचर्यया यत्नतस्तत्बोधे सम्पादिते सति अयि प्रियसखि ! स्ववृत्तान्तः कथ्यतामिति ताभिः पृष्टया तया कथितमपि प्रियसख्यः कथं भवतीभ्यो विच्छिन्नाहमभूवमिति मुग्धाहं परतन्त्रा नाज्ञासिषं किन्तु मानप्राप्तिरवमानश्च दौरात्म्यादेव निश्चिनोमि युष्मान् परः सहस्राः प्रेमवतीरवमत्य स्वविरहानलेन ज्वालयित्वा मह्यमेकस्यै यत्सौभाग्यं दत्तमिदं तस्य दौरात्म्यं तं दुर्ल्ललमहाराजपुत्रं प्रति वराक्यपि मुग्धा न पारयेऽहं चलितुं नय मामिति यदवोचम् एतत्तु ममैव दौरात्म्यं यत एतावान् अवमानः इत्युभयथापि मे महामनोदुःखमेवेति स्वकान्ते तासु स्वस्मिंश्च क्रमेणासूयाविनयदैन्यानि व्यञ्जितानि अत्र श्रीमन्मुनीन्द्रेण दौरात्म्यशब्दप्रयोगस्तु तस्य वचनानुवादादेव वस्तुतस्तु श्रीकृष्णात् दूरे आत्मा यस्याः दूरे आत्मा श्रीकृष्णो वा यस्याः सा दूरात्मा तस्या भावो दौरात्म्यं तस्माद्विश्लेषादित्यर्थः विस्मयं परमं ययुरिति प्रियसखि ! भवत्याः सौभाग्यमुचितमेव नात्र तस्य दौरात्म्यं रतिश्रान्तायाः स्वाधीनभर्तृकायास्तव कान्तं प्रत्याज्ञापनमपि न दौरात्म्यं प्रत्युत रसावहमेव किन्त्वनुकूलनायकेन सम्भुक्तकान्ताया यदा ज्ञोल्लङ्घनमेतादृशदुरवस्थाप्रापणं च एतदेव रसप्रतिकूलं दौरात्म्यव्यञ्जकं हन्त हन्त महारसिकशेखरस्य महाप्रेमवतो दयानिधेस्तस्य कथमेवं चिकीर्षितमभूदिति परमं विस्मयं ययुः ॥ ४२ ॥

श्रीरसिकाह्लादिनी टीका

ततश्च विरहव्याकुलिता भूमावपतत् ततः किं वृत्तमित्यपेक्षायां प्रेमविवर्त्तस्वभावं कथयन् अन्यासां गोपीनां मार्गणैः तस्याः प्राप्तिमाह । अयमेव प्रेमविवर्त्तः । यत्समीपस्थमपि प्रेष्ठं न पश्यन्ति यथा कुररीविलापे अतः केनापि कौतुकेन तन्मंडले तत्समीप एव वर्त्तमानस्तूष्णीभावे पश्यति । तत्प्रेमालापान् शृण्वन्नतिष्टत् । अत उक्तं ततश्चांतर्दधे कृष्ण इति । अग्रे श्रीकृष्णोऽपि वदिष्यते । यथा परोक्षभजतातिरोहितमिति । इदानीं तासां तस्याः मिलनप्रकारमाहअन्विच्छन्त्य इति, एवं पूर्वोक्तप्रकारेण भगवतो मार्गमन्विच्छन्त्यो मृग्यमानाः सर्वा एव गोप्यः विदूरतो निकटप्रदेश एव भुवि पतितां सखीं श्रीकृष्णत्यागजनितदुःखसाम्यात् सखीत्वेन प्रतीतां दुःखसाम्यादेवेर्ष्यापगमोऽपि स्वत एव जातः । प्रियविश्लेषमोहितां प्रियस्य कृष्णविश्लेषाद्विरहान्मोहितां स्वसादृश्यं प्राप्तां । यतो दुःखितां मानविपाकं प्राप्तां ददृशुः ॥ ४१ ॥ तां दृष्ट्वा किं कृतमित्यपेक्षायामाह तयेति, सख्यभावेन वह्वीभिरवबोधितयाऽत एव किंचिन्मोहादुन्मग्नयेति । प्रथम तद्वृतान्तं पृष्टया पश्चात्कृष्णस्येति । ततस्तया कथितं रमणं पुष्पावचयकेशप्रसाधनादिमानप्राप्तिमाकर्ण्य माधवात् लक्ष्मीभर्त्तुः अनेन वैदग्धीविशेषः सूचितः, यद्वा मूर्त्ताद्वसन्तात् किं दौरात्म्यादाऽऽत्मनः दर्पादिलक्षणादवमानं उपेक्षालक्षणं प्राप्तमाकर्ण्य परमं विस्मयं रसावेशावसरेऽकस्मादन्तर्धानं तस्य स्वातन्त्र्यं चाकलय्य विस्मयं प्रापुरिति । तत्सहितान्तर्धानादि-केशप्रसाधनादिचरितपरिकलनेऽवमानसम्भवाद्विस्मय इत्यर्थः ॥ ४२ ॥

विशुद्धरसदीपिका

अन्विच्छन्त्यः गवेषयन्त्यः यद्वा मार्गमनुगन्तुमिच्छन्त्य इत्यन्वयः भगवत इत्यनेकार्थत्वाद्यथायोगमन्वयः गोप्यः सर्वा एव ऐकमत्याभिप्रायेण सामान्यनिर्देशः अविदूरतः ईषद्दूर इत्यर्थः नञोषदर्थे अनुदरा कन्येतिवत् ततः मोहाधिक्यं सूचितं सखीं ददृशुः तामिति वक्तव्ये सखीमित्युक्तिस्तासामेव तथानुभवात् यथा तदनन्तरमानन्दवृन्दावनचम्पूमनु ता अपि सैवेयमिति सहर्षविषादविस्मयसम्भ्रमौत्कण्ठ्यमुपकण्ठमुपसर्पन्त्यः कनककमलिनीमूलं कलहंसवध्व इव सुरसरितं सरिदन्तराणीव स्थापितां प्राप्तवतीरतिं सर्वभावानां श्रेणय इव स्वरसप्तकसम्पदं सर्वाः श्रुतय इव सुकवितां रसभावालङ्कारसंपदिव उपमालङ्कृतं रूपकाद्यलङ्कृतय इव अमृतकिरणकन्दलीं चकोरललना इव नवोद्यानलक्ष्मीं नानाविहङ्गवध्व इव अमृतकिरणकन्दलीं च कमलाकरसम्पदं कमलिनीविततय इव सकलाः परितः परिवव्रुः । अथ तासां सख्यं तत्रैव यथा "काचिद्विजयति स्म पल्लवकुलैः काचित्कचानान्ततिंबध्नाति स्म च कारकाचन करेणास्याम्बुजोन्मार्जनम् उचे काचन माद्धव भवती हा हतं कष्टां दशामेतामाप्तवती कथं हि स तव प्राणाधिनाथः शठः । अस्मान् विहाय भवतीं यदसावहार्षीत्तेनैव हि प्रसमितो विरहज्वरो नः सोऽयम्पुनर्द्विगुण एव बभूव धिङ्नोयद्वीक्ष्यते तदवशेयमभूतपूर्वा न कश्चित्ते दोषः सुमुखि ! मनसोऽवापि वचसो जगत्येव ख्याता त्वमभिगुणरत्नावळिखनिः त्वयि

प्रमा तस्य प्रथित इति सर्वस्य विषयः कुतो जाता तस्य व्यवसितिरियं हन्त कठिना, इति अत एव प्रियविश्लेषमोहितामित्युक्तं प्रियस्य विश्लेषो विशिष्टः श्लेषो मा ऊहितो यस्यास्तां किन्तु निजसाजात्येन विरहमात्रमेव तर्कितमित्यर्थः । अत्र कारिकाः—

सर्वाभिरपि विज्ञातं दुर्ग्राह्यहृदयः शठः । सखीयं सरलास्माकं तत्प्रतारणमन्वभूत् ॥
इयं प्रेम्णः परा काष्ठा यत्प्रष्ठक्षेमवाञ्छया । निजकापट्यविख्यातिर्दोषानुद्भावनं प्रिये ! ॥

एवञ्च विलोक्यरतिचिह्नानि ज्ञातमेताभिरेतया भ्रमन्त्या विपिने प्राप्ता दशेयमतिदुस्तरा रसावेशस्वभावेन तत्कृतं तासु नास्फुरत् यथोक्तं श्रीव्रजेश्वर्य्या बृहद्भागवतामृते—

पश्यन्त्या रतिचिह्नानि न पश्यन्त्यास्य चेष्टितम् । तथाहि] हन्त वालो ममावित्वा गा वनेष्वखिलं दिनम् ॥
श्रान्तो निद्रासुखं प्राप्तो न जागर्त्यधुनाप्ययम् । अरण्यकण्टकैर्दुष्टैः क्षतानीमानि सर्वतः ॥
अक्रियन्तास्य गात्रेषु परितो धावतो मुहुः । अहो कष्टं न जानाति किञ्चिन्निद्रावशङ्गतः ॥
म्रक्षयामास गात्रेषु स्वस्येदे नेत्रकज्जलम् । तथात्माधरताम्बूलरागं चेतस्ततो विदन् ॥
चिच्छेद हारमाल्यादिपरिवृत्तिं मुहुर्भजन् । नूनं काश्मीरवर्णेयं यमुनातीरमृत्तिका ॥
न परित्याजिता हन्त स्नानेनापि वपुः सखी । बालाभिश्चपलाभिर्यः सन्ध्यायामवधानतः ॥
स्नानं न कारितं सम्यङ्नाभ्यङ्गोन्मर्द ने तथेति ।

एवञ्च तामनु सर्वासां सख्यमेवं साधितं किञ्च प्रियविश्लेषमोहितामिति श्लेषानाश्रयणे प्रेमवैचित्यं स्पष्टीकृतं भवति तत्र च मोहितामित्युक्त्या दुःखितामित्युक्तिर्मोहस्यास्य तद्दुःखचिकित्सितत्वाभिप्रायेण तथा दर्शितमानन्दवृन्दावनचम्पूमनु यथा स्वेच्छायैव सरोजिनीदलमयी शय्येव तस्या अभूज् ज्योत्स्नैवाजनि गन्धसारसलिलासेकः शरीरोपरि बाहू एव मृणालवल्लिवलयस्तस्या वियोगज्वरे मूर्च्छैवाभवदुत्तमा प्रियसखी दुःखानुभूतिच्छिदे इति तदेवं प्रकरणस्यास्य श्रीराधिकोत्कर्षपरत्वं दर्शितम् अपि च विपक्षसपक्षतटस्थादिविभेदोऽप्येतामुद्दिश्यैव वर्णित इति सुसिद्धमाधिक्यं प्राधान्यञ्च वरमनुजन्यसमूह इतिन्यायात् वस्तुतस्तु निखिलस्यापि ग्रन्थस्य तात्पर्यमत्रैवेति गम्यते रुद्रयामले तस्याः सहस्रनामस्तोत्रे—

श्रीभागवतहार्द ज्ञा श्रीभागवतमानसा । श्रीभागवतसम्विद्या श्रीभागवतभासिता ॥
श्रीभागवतनिष्ठा च श्रीभागवतभावितेति ॥

तन्नाम्नां तथाश्रुतत्वात् साक्षान्नामानुक्तिश्च रहस्यत्वाद्भूषणमेव न दूषणमित्यलमतिप्रपञ्चितेन विस्तृतं भक्तिमञ्जूषायाम् अपिच वरीवर्त्ति रसिकजनसञ्जीविनी व्यञ्जनावृत्तिस्तदेकजीवनाच्च पर्य्यायोक्त्याद्यलंकृतिसंहाहतिरिति निःशङ्कमवे मुनीन्द्रपादैस्तथोक्तम् ॥ ४१ ॥ ततश्च तयेति माधवात् लक्ष्म्या अपि रमणतया स्पृहणीयात् सर्वगुणसम्पन्नात् स्वत एव परमसौभाग्यलाभलक्षणां मानप्राप्तिमाकर्ण्य तत्रैव दौरात्म्यात् तद्वियोगात् दूरे आत्मा देहो यस्याः सा दूरात्मा तस्या भावो दौरात्म्यं तस्मादित्यर्थः । तद्विश्लेषाद्वमानमाकर्ण्य विस्मयश्चोभयोरलौकिकप्रेमश्रवणात् यद्वा माधवादिति मुनीन्द्रोक्तिः मायास्तस्या एव धवात्तस्या एव पूर्वोक्तप्रकारां मानप्राप्तिं पारिशेष्यादात्मनश्च दौरात्म्यात् कामजभावाक्रान्तचेतस्त्वादवमानं चाकर्ण्य विस्मयं ययुः तत्सुखबुद्ध्याप्यनुकृतः कामजो भावः प्रेमविरोधीति विस्मये हेतुः अन्यथा व्याख्याने प्रकरणविरोधः ॥ ४२ ॥

श्रीरामनारायणकृता भावभावविभाविका

अग्रे यद्वृत्तं तदाह । अन्विच्छन्त्य इति । गोप्यः पूर्वं विच्छिन्ना भगवतो मार्गं मृग्यतेऽन्विष्यते ऽनेति तथा प्राप्तिपन्थास्तमेवानु पुनरव्युच्छिन्नवृत्त्या इच्छन्त्यः कामयन्त्यो नतु अन्वेषणविलम्बेन ततो निर्विद्य गृहं स्मृतवत्यः अनेन "दीर्घकालनैरन्तर्य्यसत्कारसेवितो दृढभूमि"रिति पतञ्जलिसूत्रितप्रेमपथदृढभूमित्वं दर्शितं ता अविदूरतः सखीं भगवत्सहगामितया तत्सहायभूतां ददृशुः ततस्तद्दर्शनेनात्रैतत्संनिधाने हरिर्भविष्यत्येवेत्युत्साहेन तत्सामीप्यं प्राप्य दूरात्तां स्वसखीं ददृशुस्तत्र हेतुः दुःखितां समानशीलव्यसनेषु मैत्रीतिवचनात्पूर्वं सर्वत्यागेन कृष्णैकपरत्वलक्षणसमानशीलत्वेऽपि समानव्यसनत्वाभावेन तत्सखीत्वमेव सम्भाव्य तद्विरहदुःखलक्षणसमानव्यसनत्वमप्याकलय्य स्वसखीत्वं व्यवसितवत्यः स्वाभ्यस्तस्यामाधिक्यमपि ददृशुरित्याह प्रियेति। प्रियस्य यो विश्लेषो विच्छेदस्तेन मोहितां मूर्च्छितां निश्चेष्टां ततश्च तन्मूर्च्छाभङ्गाय सुरभितोयसेचनव्यजनसमीरप्रियनामकीर्तनादियत्नं चक्रुरिति शेषः अन्यथा मोहिताया वक्ष्यमाणभाषणाद्यनुपपत्तिः ॥ ४१ ॥ ततः किंवृत्तमित्यत आह । तया कथितमिति। संज्ञाप्राप्तिविलापानन्तरं तत्प्रश्नोत्तरतया तया यत्कथितं माधवच्छविमध्वीमध्वास्वादनोन्मत्ततयात्मानुसन्धानराहित्येन सखीसमाजवियोगात्तनुसन्धानं तथा माधवात् लक्ष्म्यासर्वसौन्दर्य्यशोभाशृङ्गारसम्पत्सौभाग्याद्यधिष्ठातृदेवताया अपि समस्तचाञ्चल्यादिस्वभावपरित्यागेन तदीयनित्यनिरतिशयगुणगणलुब्धतया स्पृहणीयोपपत्तेः स्वानुग्रहादेवास्मद्दोषाननवेक्ष्यगुणाननपेक्षमानप्राप्ति यद्वा मान प्रमा तद्विषयिण्यव्यभिचारिणी यथार्थमतिस्तस्या एव धवात् मानप्राप्तिं ततश्च तस्य स्वपतित्वे स्वस्यास्तद्वधूत्वे च न पाणिग्रहणादिविधिः रूपलावण्यगाननृत्यरसकौशल्यैश्वर्यधर्मादिगुणा वा हेतवः किंत्वव्यभिचारित प्रेमर्मातिरेवेति तत्त्वं तथावमानं वने

परित्यागलक्षणञ्च न तद्रसानभिज्ञत्वात् क्रौर्याद्वा किन्तु स्वस्यैव दौरात्म्यात् प्रेमशैथिल्यदर्पादिरूपात् यद्वा दूरे आत्मा कृष्णो यस्या दूरे आत्मा देहः कृष्णाद्वा यस्याः सा दूरात्मा तस्या भावो दौरात्म्यं कृष्णवियोगित्वं तस्मादवमानं दुःखं तद्विरहिते स्वस्मिन् धिक् प्रियविरहितं मम जीवनमित्याद्यनादरं चाकर्ण्य विचित्रभगवन्माहात्म्यस्फूर्त्या परमं विस्मयम् आश्चर्यं स्मयो रूपगुणादिवर्गस्तद्राहित्यं वा ययुः यद्वा तस्या एव प्रेमवैलक्षण्यं तद्रसास्वादे स्वदेहसखीसमाजवनानुसंधानं स्वसौभाग्यातिशनये सर्वत्यागपूर्वकात्यादरप्राप्तावपि स्वगुणान् विगणय्य तदनुग्रहमात्रावधारणं तेन वने परित्यागेऽपि तदीयदोषमननुसन्धाय स्वस्मिन्नेव दौरात्म्यदर्शनमवगत्य परमं विस्मयं स्वीयप्रेमोत्कर्षस्मयराहित्यं वा ययुः ॥ ४२ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथ ता अपि तत्राशु समागता इत्याह । भगवतो मार्गं मृगयमाणा गोप्यः अविदूरतः सामीप्यतः दुःखिता प्रियविश्लेषजन्येन तापेन मूर्च्छितां समानदुःखाक्रान्तत्वेन सतीं तथाभूतां दृष्ट्वा विगतेर्ष्यास्तां वस्त्रवाय्वादिना सचेतनां कृतवत्य इत्यपि द्रष्टव्य निवृत्तिपक्षे भगवतो मार्गं विदूरतोऽन्विच्छन्त्यो गोप्यः परमात्मसम्वन्धिन्यः श्रुतयः दुःखिता आसन् अहो अस्माकं साक्षात्परमात्मप्रतिपादिका नास्तीति यदा मुख्यामपि सखीसमानविषयत्वात् प्रियेण चिदात्मना योऽयं विशेयेण श्लेषो वाच्यवाचकत्वलक्षणः सम्बन्धस्तत्र मोहितामत एव दुःखितां ददृशुस्तदा यत्किञ्चित्स्वास्थ्यं प्राप्ता इत्यर्थः ॥ ४१ ॥ अयि सखि ! किं त्तमिति ताभिः पृष्टया तया हे सख्यो ! मुग्धाहं तेन नेतीत्यादिनिश्चये सपर्यन्तं कथितं वृत्तमाकर्ण्य तत्र माधवाल्लक्ष्मीपतेः कान्तिपतेः सुन्दराद्वा मानप्राप्तिं चाकर्ण्य दौरात्म्याद्दौर्जन्यादवमानत्यागलक्षणं चाकर्ण्य परमविस्मयं ययुः अहो महान्तमियं मानं लब्धवती सच्चैवं विध मानं दत्त्वा कथमवमानं कृतवान् नानाश्चर्यमिदमित्येवं परमं विस्मयं प्राप्तवत्यः निवृत्तिपक्षे तया श्रुत्या तत्त्व पदार्थयोरभिन्नत्व कथितमाकर्ण्य माधवात्स्वजन्यब्रह्मविद्यापतेः मानस्य प्रामाण्यस्य प्राप्तिं चाकर्ण्य दूरे आत्मा शुद्धचिदानन्दघनो निर्विशेषोपास्यः दूरात्मा तस्माद्वान्विषयप्रतिपादकत्वादेव मानं तत्तद्विषयप्रेमानुत्पादकत्वं चाकर्ण्याहो लब्धप्रामाण्याया अस्याः कथमप्रामाण्यमिति परम विस्मयं ययुरित्यर्थः ॥ ४२ ॥

रास-रहस्यम्

र० टी०—गोप्यः आत्माभिमुखीवृत्तयः पूर्वं विच्छिन्नाः भगवतः परमात्मनः, मार्गं मृग्यते अन्विष्यते इति मार्गः तं, तथा प्राप्तिपन्थानमेन पुनः अन्विच्छन्त्यः अविच्छिन्नवृत्त्या इच्छन्त्यः कामयमानाः, प्रियविश्लेषः प्रियेण चिदात्मना योऽय विशेषः श्लेषः प्रतिपाद्यप्रतिपाकभावलक्षणासम्बन्ध, स्तत्र मोहतां मोहग्रस्तां, अत एव दुखितां शोकमग्नां सखीं, "समानशीलव्यसनेसु सख्यमि"ति वचनात्, पूर्वं सर्वविषयभोगत्यागेनात्मैकपरत्वलक्षणसमानशीलत्वात, मध्ये व्यसनाभावेऽपि, पुनरधुना तद्विरहलक्षणसमानव्यसनत्वमाकलय्य सखीत्वं व्यवसितव्यम् । एवम्भूतं आत्माकारवृत्तिं विदूरतः विशेषेण दूरतः "दीर्घनैरन्तर्यसत्कारसेवितादृढभूमि ।" रिति पातञ्जलसूत्रानुसारेण दीर्घकालेन ददृशुः दृष्टवत्यः ॥ ४१ ॥ माधवात् मा माया तस्याः धवः स्वामी माधवः तस्मात्, मानप्राप्तिं आत्मविषयणीं अव्यभिचारिणीं यथार्थमतित्वलक्षणां प्रामाण्यप्राप्तिं, तथा आत्मनः दौरात्म्यात् दूरे प्रत्यगभिन्ने आत्मा यस्याः सा दूरात्मा तस्य भावः दौरात्म्यं तस्मात्, अवमानं अधःकृत्यमानं, आत्मनः ज्ञातत्वेन प्रतिपादनं च, तया आत्माकारवृत्त्या कथितं 'तत्त्वं' पदयोरभिन्नत्वं लाक्षणिकतयाभिहितं, आकर्ण्य श्रुत्वा, परमं विस्मय ययुः अतिशयेन विस्मयं विगतस्मयं परमात्मनि स्वसम्बन्धित्वलक्षणं दोषदर्शनं ययुः अगमन् ॥ ४२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवतो मार्गमन्विच्छन्त्यः मृगयमाणाः अतिदूरतः समीपे प्रियस्य श्रीकृष्णस्य विश्लेषेण मोहितां तामपि ददृशुः ॥ ४१ ॥ भक्तमनोरथपूरणार्थं भक्तवश्यो भवति वस्तुतस्तु सर्वनिरपेक्षो भगवान् परमानन्दघनत्वादित्यवधार्य परम विस्मयं ययुः ॥ ४२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो यज्जातं तदाह । अन्विच्छन्त्य इति । पूर्वोक्ता गोप्यः भगवन्मार्गमन्विच्छन्त्यः अविदूरत एव तां ददृशुः तासां क्रोधाभावायाह दुःखितामिति नहि दुःखितायां क्रोधो भवति दुःखे हेत्वन्तरनिराकारणायाह । प्रियविश्लेषमोहितामिति । भगवत एव विशलेषणं परममोहं मूर्च्छां प्राप्तां सापि तासां सखी अतः सख्यभावेन बह्वयः तां प्रबोधितवत्यः न दुःखं पञ्चभिः सहेति पूर्वमेता भगवानेवमेव कौतुकार्थं गतः नत्वस्मद्दोषेणेति ज्ञातवत्यः अन्यथा दोषनिराकाणार्थमेव यत्नः कृतः स्यात् स्वदोषपरिज्ञानं च भगवत्कृपयैव भवति न स्वत इति ज्ञापयितुं सा नीता पश्चात्त्यक्ता कथनार्थमेव ॥ ४१ ॥ अतो भगवदिच्छया सर्वं कथितवती तत्र वक्तव्ये यत्प्रयोजकं तदाह मानप्राप्तिं च माधवात् अवमानं च दौरात्म्यादिति तया कथितं यद्यपि बह्वेव श्रुतं तत्रैतावान् अर्थो निर्द्धारितः सन्माननं यत्प्राप्त तन्नस्वगुणैः किंतु लक्ष्मीपतेरेव गुणैः लक्ष्म्यंशा एता इति दौरात्म्ययात् स्वधर्मादेवावमानं चकारात् खेदभ्रमादय एवं भगवतः अलौकिकं सामर्थ्यं दृष्ट्वा परमं विस्मयं प्राप्ताः एवं तद्वाक्यैः पदार्थनिर्द्धारो जातः अन्वेषणादिना भगवान्न प्राप्तव्य इति ॥ ४२ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । भगवतो मार्गम् अन्वीक्षमाणा गोप्योऽदूरतः समीप एव प्रियस्य श्रीकृष्णाद्विश्लेषो वियोगस्तेन मोहितां दुःखितां सखीं ददृशुः ॥ ४१ ॥ मानप्राप्तिं दौरात्म्याद्दुष्टस्वभावात् अवमानं च तया राधया कथितमाकर्ण्य श्रुत्वा परम विस्मयं प्रापुः ॥ ४२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं प्रियस्य विश्लेषेण मोहितां व्याकुलितां दुःखितां सखीं अविदूरतः समीपे भगवतो मार्गमन्विच्छन्त्यो मृगयमाणा गोप्यो ददृशुरित्यन्वयः । अनेन यः पूर्वं सापत्न्यात् तत्सुखसम्भावनया स्वखेद उक्तः 'तस्या अमूनि नः क्षोभं कुर्वन्ति' इति, स इदानीं सखित्वाद्दुःखदर्शनेन निवृत्त इति ज्ञेयम् ॥ ४१ ॥ ततश्च माधवान्मानप्राप्तिं स्वसन्मानप्राप्तिं' लक्ष्मीपतित्वात्तत्कृतसन्मानस्य महत्त्वसूचनार्थं माधवपदमुपात्तम् , तथा आत्मनः स्वस्य दौरात्म्याद्दौर्जन्यात् हेतोरन्तर्धानेन परित्यागात्मकमवमानं च ततः प्राप्तम्, चकारात् स्वविलापदुःखादिकं च तया कथितमाकर्ण्य तस्याद्भुतचरितेन परमं विस्मयमाश्चर्यं ययुः ॥ ४२ ॥

अन्वितार्थप्रकाशिका

अन्विच्छन्त्य इति ॥ भगवतो मार्गमन्विच्छन्त्यो मृगयमाणा गोप्यः एवं प्रियस्य विश्लेषेण मोहितां मूर्छितां दुःखितां सखीम् अविदूरतः समीप एव ददृशुः ॥ ४१ ॥ तयेति ॥ ततश्च मूर्छानिवृत्तौ माधवान्मानप्राप्तिं स्वसम्मानप्राप्तिं तथा आत्मनः दौरात्म्यात् दौर्जन्यात् हेतोरन्तर्धानेन परित्यागात्मकमवमानं च ततः प्राप्तं चकारात् स्वविलापदुःखादिकं च तया कथितमाकर्ण्य तस्याद्भुतचरितेन परमं विस्मयमाश्चर्यं ययुः ॥ ४२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अन्वीच्छंत्यो विचिन्वत्यः अविदूरतः समीपे ॥ ४१ ॥ दौरात्म्यात् दुष्टस्वभावत्वात् ॥ ४२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्विच्छन्त्य इति । भगवतः मार्गं, अन्विच्छन्त्यो वाञ्छन्त्यः । अन्विष्यन्त्य इति पाठान्तरे मृगयन्त्यः, मृगयमाणा इत्यर्थः । गोप्यः, अविदूरतः समीपे, प्रियस्य प्रेयसः विश्लेषो वियोगस्तेन मोहिता विचित्ता तां, दुःखितां च, सखीं ददृशुः ॥ ४१ ॥ तयेति ॥ ततः तया कथितं, माधवात् श्रीकृष्णात् , मानप्राप्तिं संमानलब्धिं, तथा आत्मनः दौरात्म्यात् हेतोः, प्राप्तं अवमानं च आकर्ण्य, सर्वा गोप्यः परमं विस्मयं, ययुः प्रापुः । चाऽवधारणे ॥ ४२ ॥

श्रीहरिसूरिविरचित श्रीभक्तिरसायनम्

अन्विच्छन्त्य इति : १०.३०.४१.

अनन्यभावेन परात्मचिन्तनं करोति यस्तस्य निसर्गवैरिणः ।
प्रयान्ति मित्रत्वमलं हि गोपिकास्तदोज्झितेर्ष्याः किल तां समाभजन् ॥ २४७ ॥
कचित्केनचित्स्नेहिनापि स्वमन्तुं कृतं चित्त आधाय तस्य प्रतीपे ।
विधौ मन्तुना तेन चासौ न दण्ड्यो वदेत्तत्प्रियं किंत्विति स्पष्टमस्मिन् ॥ २४८ ॥

तया कथितमिति : १०.३०.४२.

स्वांसं प्रदर्श्य सखि मां बत पूननारिर्नारीविमोहचतुरश्चतुराननेशः ।
चित्रं चरित्रमतनोदतनुप्रमुग्धं चेतोऽप्यसङ्गमकरोन्मम किं ब्रवीमि ॥ २४९ ॥
साधनानि किल सन्ति लसन्ति भूरिशो जगति रोषहराणि ।
तत्र मुख्यमृजु सद्वचनं यत् ताः स्त्रियस्तदरुषो हि तदाऽऽसन् ॥ २५० ॥
प्रायोऽस्मदीयमिह मानमवेक्ष्य कान्तो यातो भवेदिति पुरैव हि विस्मयास्ताः ।
तस्यास्तदुक्तिमवकर्ण्य तु निश्चितार्था जाताः क्षमं परमविस्मयमापुरन्तः ॥ २५१ ॥
तस्या वचस्तदखिलं तदुपेक्षितायाः श्रुत्वा विगर्वमपगत्य तदीशकृत्यम् ।
उत्कण्ठिताः पुनरधोक्षजचक्षुषस्ताः प्राग्वत्तरून् बहुविधान्युगपत्समूचुः ॥ २५२ ॥
हे चाम्पेय कपित्थ हे कदलि हे बन्धूक हे कुन्द हे हे स्त्रीवृक्ष शिरीष हे तिलक हे तापिच्छकास्मत्प्रियः ।
अस्मत्सौष्ठववर्णने प्रभुरसौ सस्मार वः सर्वतो युष्मासु स्मृतिमस्य नैव कुरुते हा कोपि धिग्धिक्कतः ॥ २५३ ॥
अति विक्लवया गिराऽर्थितेऽपि न ददत्युत्तरमत्र केऽपि नोऽर्हम् ।
बहुधा वनजन्मकर्मभिर्वा ह्यवनाध्वा विदितो न काममेभिः ॥ २५४ ॥

व्रजत झटिति सख्यो देशतोऽस्मादखर्वो यदिह किल पलाशो दृश्यते रक्तवक्त्रः ।
प्रियजनपरिहीनं दीनमेनं निरीक्ष्य जनमयमनुपेक्षः स्यात् स्वकृत्ये कदाचित् ॥ २५५ ॥

प्रीतिरस्ति यदि तेऽर्जुननाम्नि भूरुहैकमिदमाकलयाद्य ।
नास्मदर्थितपदोचितदानेऽपार्थतां परिचिनुष्व निजाङ्के ॥ २५६ ॥

ऐश्वर्यं लभते पुमानिह निजप्रारब्धतः सर्वतः सम्बन्धो न हि तत्र कारणमहो यः पुत्रपित्रात्मकः ।
वाल्मीकिर्यदगाधरामचरितं प्रोवाच भाव्यर्थकं पृष्टं वृत्तमपि प्रवक्ति न विभोर्वल्मीक एष स्फुटम् ॥ २५७ ॥

भूदार दारयसि किं भुवमस्मदिष्टप्राणप्रियामकृतमन्तुलवां बलेन ।
यद्वा किमस्त्यनुचितं प्रियविप्रयुक्ते कान्ताजनेऽल्पविहितो यदसत्प्रकारः ॥ २५८ ॥

रे रे खञ्जन मञ्जलैरलमल कुब्जे प्रियारञ्जनैस्तद्बोध्येन धरागतेन निधिनाऽप्यास्ते न कार्यं हि नः ।
चातुर्यं तव वच्मि दर्शयसि सच्छञ्ख सुखर्वाकृतिं पद्मेशं निधिमच्छकुन्दरदनं नीलं मुकुन्दं यदि ॥ २५९ ॥

त्वं मेघहृष्टः स च मेघरूपस्त्वं नीलकण्ठः स च तत्प्रियोऽस्ति ।
भुजङ्गभुक् त्वं स भुजङ्गवृत्तिः सम्बन्धतोऽस्माद् वद चेत् प्रवेत्सि ॥ २६० ॥

नेत्रं तदेव कृति येन हरिर्व्यलोकि मायूरबर्हगतनेत्रशतैः फलं किम् ।
प्राचीनवाक्परिचयादिति निश्चिनोमि दृष्टो मयूर भवता न सखा ममेति ॥ २६१ ॥

न यद्यपि बहिर्दृशा भवति गोचरो गोपतिर्दृशा त्विममबाह्यया सखि विलोकयामोऽधुना ।
कया ननु दिशेति चेन्निजसमीप एवास्थितः शुकः प्रकटयत्ययं स हरितत्त्वमात्मस्थितम् ॥ २६२ ॥

आगाभिप्रियसङ्गमसूचक एको हि नाम काकोऽसौ । नास्ति निशायामधुना काको वात्रोपकारकृद् भविता ॥ २६३ ॥

रात्रे त्वमत्र वृद्धा स्वप्रियसङ्गमवियोगसुखदुःखे । जानासि भूरि तन्नो वियोगदुःखं कथं न खण्डयसि ॥ २६४ ॥

त्वमसि पलितदेहो रात्रिरप्यत्र वृद्धा तदपि निजकरैस्तां रञ्जयस्यस्तशङ्कम् ।
ननु वयमति मुग्धाः सुन्दरोऽसौ मुकुन्दस्तदिह हससि किं रे चन्द्रिकाव्याजतोऽस्मान् ॥ २६५ ॥

स्वाङ्के निवेश्य कुलभूषणमिन्द्रकान्तं कृष्णं नु तस्य सविधे सखि भामपि द्राक् ।
आकर्षति स्वककरैरधिवासनार्थं संसारसौख्यमुपभोक्तुमना मृगाङ्कः ॥ २६६ ॥

रे चन्द्र पुत्रमिममात्मकरैः सुगाढमालिङ्ग्य धारयसि किं सततं निजाङ्के ।
अस्मासु योजय ततो ह्यचिरादनेकनप्तृप्रणप्तृपरिरम्भणसौख्यभाक् स्याः ॥ २६७ ॥

नीलाम्बरं निजकरैर्विशदं करोषि निर्णक्तृकर्मणि भवानतिलब्धवर्णः ।
पीताम्बरं यदि ददासि समुज्ज्वलं तद् भूयः स्तवाय तव सोम भवामि दक्षा ॥ २६८ ॥

त्वं सर्वज्ञशिरोमणिस्त्वमपि सच्छ्रुत्युल्लसद्वर्तनं नाम्नाप्यैक्यमतैतवा च युवयोरेकान्तमैत्री सदा ।
एवं सत्युभयोर्न कोऽपि कथयत्यानन्दहेतुं ततः किं सम्पादितमब्जलौकिकपदप्रौढ्या किमास्ते सुखम् ॥ २६९ ॥

अतिशिथिलगतानां निर्झरास्मत्पदानां प्रभुपदमनुगन्तुं नेषदप्यस्ति शक्तिः ।
तदिह भव सहायोऽन्वेषणे तार्क्ष्यकेतोर्यदसि किल वनेऽस्मिंस्त्वं सदैव प्रवाहः ॥ २७० ॥

उर्वीधरोऽयमखिलोन्नतिभागनेक भ्राजत्फलागमलसद्धृदयो यदास्ते ।
गत्वा तदस्य पुरतः परिपृच्छतैनं कृष्णागमं त्वमिह वेत्सि न वेति सख्यः ॥ २७१ ॥

जानामि सत्यमचल त्वयि शक्तिरस्ति ज्ञातुं रमेशमनिशं हि गुहाश्रितोऽसि ।
तत्र स्थितश्च हरिरित्यपि वेदवादस्तत्किं प्रतारयसि दर्शय शर्महेतुम् ॥ २७२ ॥

मदुन्नतितिरस्कृतिर्निजकुचैः कृताऽऽभिमुहुरिदं मनसि संस्मरन्न कुरु मौनसन्धारणम् ।
कृतो यदधुना क्षमाधर तवेह पादाश्रयस्त्वलं हि शरणप्रदः स इति सर्वसत्पद्धतिः ॥ २७३ ॥

नानापत्रलसत्स्थितिः प्रविलसद्बाणासनस्यन्दनः सद्वंशप्रभवोऽनवद्यविभवो भूभृद्वरः सन्नपि ।
अस्मच्चित्तधनं गिरे यदधुना हृत्वा गतं मोषकं त्वं सङ्गोप्य निजाश्रितं प्रकुरुषे तत्ते न दोषाय किम् ॥ २७४ ॥

धर्माश्रितः स भुवि यश्च सुपर्वतत्त्वज्ञातेति धर्मधिषणाः प्रवदन्ति सन्तः ।
तत्पर्वत त्वमसि नित्यसुपर्वतत्त्वपर्याप्तिभूरिति वद प्रभुलाभधर्मम् ॥ २७५ ॥

अस्मद्वितीर्णमधुगन्धचतुर्विधान्नराश्यादनातिशय पुष्टशरारकोऽपि ।
इष्टार्पणादुपकराति न भूभृदेष युक्तं जडेऽतिकठिने विफलं हि दानम् ॥ २७६ ॥

गोवर्धनोऽसि गिरिराज यथार्थनामा त्वं सर्वदेति विदितं तव पूर्ववृत्तात् ।
ग्लानिं गवामतनुजामवलोक्य सम्प्रत्याप्ताः पदं तव वियोगभयादवैताः ॥ २७७ ॥
स एवायं कुञ्जो ललितपुलिना सैव यमुना तदेवेदं वृन्दावनमपि स एवायमचलः ।
परोक्षे लक्ष्मीशेऽजनि तदखिलं विप्रियमतो मनःप्रीतौ हेतुर्भवति भुवि नो वस्तुमहिमा ॥ २७८ ॥
श्रीमानेष जयोऽर्जुनश्च सुरभिः शक्रस्तथा मन्मथो जीवोऽर्को वरुणः शिवाग्निवृषभा धर्मः कुबेरोऽप्यसौ ।
इन्द्राणी च तपस्विनी च परमाऽपर्णा सुपद्माऽप्यहो नंतेष्वन्यतमोऽपि वेत्ति भगवत्पादाब्जमित्यद्भुतम ॥ २७९ ॥
अनया तु भवेद् दृष्टो गायत्र्या सत्यमेव सः । परन्तु सख्यः किं कार्यं दर्शनार्हा न योषिताम् ॥ २८० ॥
प्रागाशाऽऽसीद्भूयसी दक्षिणस्त्वं प्रायः स्या इत्यद्य यत्पश्चिमोऽसि ।
तत्ते वाच्यं किं प्रभो ब्रूहि किञ्चिद् गोपीचित्तं तूत्तराशावलम्बि ॥ २८१ ॥

कृष्णप्रिया

यहाँ श्री प्रियाजी तडप रही थी भगवान को पुकारती थी उधर भगवान के मार्ग को ढूँढती हुई सर्वथा बेचैन चित्तवाली गोपियाँ आ रही थी, उन्होंने भगवद् वियोग संतप्त मूर्च्छित तथा दुःखी हुई श्री प्रियाजी को देखा ॥ ४१ ॥ मार्ग में मिले हुए गोपियाँ को श्री प्रियाजी ने सारा अपना वृत्तान्त सुनाया तब इन गोपियाँ ने निश्चय पूर्वक जाना कि भगवान के सद्गुणों से सन्मान मिलता है और यदि अहंकार से अपनी दुर्मति हुई या दुर्बुद्धि प्रकट हो गई तब भगवान् शीघ्राति शीघ्र त्याग कर देते हैं ऐसा ज्ञान होने से अपने अनुचित व्यवहार के लिए अतिशय आश्चर्य हुआ ॥ ४२ ॥

[1]ततोऽविशन् वनं चन्द्रज्योत्स्ना यावद् विभाव्यते । तमः प्रविष्टमालक्ष्य ततो निववृतुः हरेः ॥४३॥
तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः । तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ॥४४॥

कर्दमक्षमा

अन्वयः—ततः, यावत्, ज्योत्स्ना, विभाव्यते, तावत्, स्त्रियः, वनम्, अविशन्, (ततः) तमः, प्रविष्टम्, आलक्ष्य, ततः, (ताः) निववृतुः ॥ ४३ ॥ तन्मनस्काः, तदालापाः, तद्विचेष्टिताः, तदात्मिकाः, तदगुणान्, एव, गायन्त्यः, आत्मागाराणि, न, सस्मरुः ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततस्तयाऽपि सहिताः कृष्णान्वेषणाय वनमविशन् । ततो हरेरन्वेषणान्निवृत्ताः ॥ ४३ ॥ एवं तमप्राप्ता अपि स्वगृहानैव स्मृतवत्यः तदात्मिकाः स एवात्मा यासां ताः । तन्मय्य इत्यर्थः ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तम इति । पुनर्विरहवेदनया नेत्रेषु तमः प्रविष्टमाज्ञाय । यद्वा—तमसि सान्धकारगह्वरवने प्रविष्टं श्रीकृष्णं ज्ञात्वेत्यर्थः । पौर्णमास्यां शशिनः सार्वरात्रिकत्वात्प्रसिद्धतमसोऽसंभवादिति भावः । शास्त्रविषयास्ता दुःशास्त्रान्निवृत्य सच्छास्त्राभ्यासाय यत्नं चक्रुरिति ध्वन्यते । वस्तुतस्तु, तमःशब्दोपलक्षितहृदयगुहाप्रविष्टम् “यो वेद निहितं गुहायाम्” इति श्रुतेः । आलक्ष्य ज्ञात्वा । हरेस्तदुपासनान्निववृतुः तद्रूप्यमापुः “भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥” इति स्मृतेः, ‘यस्य देवे परा भक्तिः’ इत्यादश्रुतेः, “भक्तिरेवैनं गमयति” इति श्रुतेश्च ! स्त्रिय इ । स्त्रीणामन्धकारावृतवनप्रवेशासामर्थ्यादिति भावः । हरेरिति पाठः स्वामिसम्मतः । तत इत्यस्य पुनरुक्तिसमाधानाय तत इत्यस्यैव हरेरन्वेषणादिति व्याख्यानात् । अन्यथा तत इत्यस्य प्राग्विशेषणायोग्यता स्यात्, हरेस्तत इत्यन्वयाद्यसौष्ठवं च ॥ ततश्च वैयग्र्येण सखीदत्तस्तावलम्बनया तया सहैव तास्तमन्वेषयामासुरित्याह – त इति । चन्द्रज्योत्स्ना यावद्विभाव्यते लक्ष्यते इति । पूर्णिमारजन्यामपि निबिडवृक्षच्छायावशादेव तम इति । तदुक्तं विष्णुपुराणे—“प्रविष्टो गहनं कृष्णः पदमत्र न दृश्यते । निवर्तध्वं शशांकस्य नैतद्दीधतिगोचरः ॥” इति । वस्तुतस्तु, हंहो खेदसिंधुनिमग्नाः सख्यः घनश्यामतमेऽस्मिंस्तमसि घनश्यामवपुषं तमस्मदवलोकनशंकयैव प्र (नि) लीनाभूय स्थितं मा संकाचयत, यत्रयत्र यूयं यास्यथ ततस्ततोऽन्यत्रैव स पलायिष्यत इत्यलमतिसुकुमार शरीरस्य तस्य श्रमोत्पादने व्यवसायेनेति विमृश्यै निववृतुरिति ॥ ४३ ॥ इत्यर्थ इति । ध्यानेन तदात्मतां प्राप्ता इति तात्पर्यम् । सत्त्वबुद्धीनां स्वभावमाह–तन्मनस्का इति । तस्य आलापः कथनं यासां ताः । तद्गुणान्न तु ोषान् । गायन्त्य इति—“मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद” इत्युक्तेभगवतो गीतप्रियत्वादिति । आत्मागाराणि देहगेहानि ॥ तन्मनस्कत्वेनैव पूर्ववदुन्मादस्य मांद्ये तदालापाः ‘दृष्टो वः कश्चिदश्वत्थ’ इति तमालपन्त्यः । उन्मादस्य मध्यत्वे तद्विचेष्टाः ‘कृष्णायन्त्यपिबत्स्तनम्’ इति वत्तच्चेष्टामनुकृतवत्यः । उन्मादस्य प्रौढत्वे तदात्मिकाः ‘कृष्णो हं पश्यत गतिम्’ इतिवदात्मविस्मृतौ तन्मयीभूताः । पूर्वसंस्कारवशादेव ‘गायन्त्य उच्चैरमुमेव’ इतिवत्तद्गुणानेवेति ॥ ४४ ॥

---

१. गत्वा वनाद्–विज । २. स्त्रियः–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. रा. ध. सु. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततः परमवैयग्र्येण सखीभिर्दत्तावलम्बनया तयैव सहिताः पुनरप्यन्वेषयामासुरित्याह्। तत इति। यावद्वनं व्याप्य ज्योत्स्नाविभाव्यते लक्ष्यते तावद्वनमविशन् प्रविश्य तमन्वेषयामासुरित्यर्थः। तमसि महागहनगते प्रविष्टं श्रीकृष्णं पदचिह्नादिना वितर्क्य ततस्तस्माद्वनान्निवृत्ताः तथा च विष्णुपुराणे। "प्रविष्टो गहनं कृष्णः पदं यत्र न लक्ष्यते। निवर्त्तध्वं शशाङ्कस्य नैतद्दीधितिगोचर इति"। स्त्रिय इति स्त्रीणामन्धकारवनप्रवेशनासामर्थ्यादित्यर्थः। शङ्कादिग्धस्निग्धस्वभावतया निजदयितस्य स्वेभ्य एवापन्नतया तत्र प्रविष्टोऽयमिति वितर्कितः तस्य तस्मात् दुःसञ्चर स्थलान्निष्क्रमणाय व्यग्राः सत्य इत्यर्थः। हरेरिति पाठोऽत्र केषाञ्चिन्मतम्। सच टीकाकृतामसम्मतो लक्ष्यते। तत इति पुनरुक्तेः समाधानार्थं तत इत्यस्यैव हरेरन्वेषणादिति व्याख्यानात्। अन्यथा तत इत्यस्य प्राग्विशेषणायोग्यता स्यात्। हरेस्तत इत्यन्वयाद्यसौष्ठवं च ॥ ४३ ॥ ततश्च ततो निवृत्तास्तत्र प्रविष्टस्य तस्य व्यथते न किंस्वित् कूर्पादिभिरिति वक्ष्यमाणरीत्या दुःखशङ्कया परमदुःखमग्ना बभूवुरित्याह्। तन्मनस्का इति। तादृगवरोधस्थलं प्रविष्टे तस्मिन्नेव मना यासाम्। ततस्तादृशे तस्मिन्नेव विषये आलापस्तद्दुःखस्मरणमयः संलापो यासां ततस्तस्मिन्नेव निमित्ते विचेष्टा यत्नान्तरेण तन्निष्क्रमणसम्भावनया परितः परिक्रमणरूपा यासाम्। ततस्तस्मिन्नेव आत्मा यत्नो यासां तथा भावाः सत्यस्तस्य निलीनता कारणापन्नाः तादृसवशीभावमयकृपादिलक्षणान् गुणानेव केवलं तया स्फुरितान् नतु स्वपरित्यागादिदोषान् गायन्त्यः गानेन तं श्रावयन्त्यः आत्मानमपि न सस्मरुः किमुतागाराणीत्यर्थः ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तथापि परमप्रेमवैयग्र्येण तया सहिताः पुनरप्यन्वेषयामासुरित्याह– तत इति। यावद्वनं व्याप्य ज्योत्स्ना विभाव्यते लक्ष्यते, तावद्वनमविशन्, प्रविश्य तमन्वेषयामासुरित्यर्थः। तमसा प्रविष्टमत्यन्तघनवनत्वादन्धकारमयमालक्ष्य ततस्तस्माद्वनान्निवृत्ताः, तत्र तदन्वेषणासिद्धेः; तथा च श्रीविष्णुपुराणे—प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते। निवर्तध्वं शशांकस्य नैतद्दीधितिगोचरः ॥' इति; स्त्रिय इति स्त्रीणामन्धकारवनप्रवेशे सामर्थ्याभावादित्यर्थः। 'हरेः' इति पाठोऽत्र केषाञ्चिन्मतम्, स च श्रीस्वामिपादानामसम्मतो लक्ष्यते, तत इति पुनरुक्तेः समाधानार्थं तत इत्यस्यैव हरेरन्वेषणादिति व्याख्यानात्, अन्यथा तत इत्यस्य अन्वेषणादिति व्याख्याने तस्य प्राग्लिखनायोगात्, तथा हरेस्तत इत्यन्वयाद्यसौष्ठवञ्च ॥ ४३ ॥ तथापि स्वगृहान् गच्छेयुरिति किं वक्तव्यम, न च स्मृतवत्योऽपीत्याह्—तन्मनस्का इति। आत्मनः स्वीयानि विचित्रसुखसम्पत्तिमयानि किंवा गृहकृत्यार्थमभ्यासवशेन गम्यान्यपि। यद्वा, आत्मनं देहं क्षेत्रज्ञं वा; आगाराणि गृहाणि देहगेहानि वेति भोक्तृभोगसाधनभोग्यान्युक्तानि; तदस्मरणे हेतुः—तन्मनस्का इत्यादिपदत्रयेण तस्मिन् मनोवाक्कायाभिनिवेश उक्तः। तत्र मनसोऽभिनिवेशस्तद्गुणादिस्मरणेन तद्विषयकविविधसंकल्पादिना वा, वाचः—अन्योन्यं तद्वार्त्तया कदाचित्तदाह्वानादिना च, कायस्य च पूर्ववत्तच्चेष्टानुकरणेन प्रणामार्थदण्डवन्निपातेन तदर्थपुष्पमालाग्रथेन-शय्यास्तरणादिना चेति; अतएव तदात्मिकास्तन्मय्यः, किंवा उक्तप्रकारेण तदार्पितात्मानः, अतस्तस्य गुणानेव, न तु परित्यागेऽपि नैष्ठुर्य्यादिदोषान् गायन्त्यः, गानञ्च श्रीभगवतो गीतप्रियत्वात्; तथा चोक्तं तेनैव—'नाहं वसामि वैकुण्ठे योगिनां हृदये न वा। मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥' इति; एवं श्रीभगवद्वशीकरणहेतुत्वाद्गानस्य सर्व्वतः श्रैष्ठ्यमभिप्रेतम्। यद्वा, तदानीं तासां तदनुसन्धानाभावेन केवलं विरहार्तिभरस्वभावादेव, तथापि सर्व्वान्ते निर्देशात् तथा शतृङ्प्रत्ययान्तत्वेनानुस्मरणे प्राधान्यात्तस्य श्रैष्ठ्यं सिद्धमेव, तत्र चालापगानयोर्युगपदसम्भवात् कदाचिदालापः कदाचिद्गानमित्यूह्यम्। (कासाञ्चिदालापः कासाञ्चिद्गानमिति बोध्यम्) यद्वा, तन्मनस्का इत्यादिपदचतुष्केण तासां सदातनः स्वभाव उक्तः, अत एवाधुना विरहार्त्त्या गायन्त्य इति तदात्मिका इति पूर्ववदन्त्यदशापरिहारार्थं वा; यद्वा, तत्परिहारार्थमेव ता विशिनष्टि, विरहार्त्तिविवृद्धिर भावेन तदावेशेन वा; तस्य मन इव भयादिरहितं मनो यासाम्, तस्यालाप इव गम्भीरमधुराक्षरार्थभंगीपूर्वकनर्म्मादिमय आलापो यासाम्, तस्य चेष्टेव विचित्रालिंगनादिरूपा चेष्टा यासाम्, तस्य आत्मा देह इव त्रिभंगानुकरणादिना मनोहर आत्मा यासां ताः, तथापि तद्गुणानेव गायन्त्य इति तासां स्वभाव उक्तः; किञ्च, तेन तेन तत्प्राप्त्युत्कण्ठा विवृद्धेव, न तु निवृत्तेति च सूचितम्। अन्यत् समानम् ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तदात्मिकाः कृष्णानुसारदशायां तद्ध्यानयुक्ताः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततस्तया सहिताः कृष्णान्वेषणाय यावच्चन्द्रिका प्रकाशते तावद्वनं चेरुः ततस्तमसा सान्द्रतरुच्छायाकृतेन प्रविष्टं व्याप्तं वनमालक्ष्य ततोऽन्वेऽणान्निवृत्ताः ॥ ४३ ॥ एवमेव प्रातः अपि स्वगृहाप्रान्नैव स्मृतवत्यः तत्र हेतुं वदन्विशिनष्टि तस्मिन्कृष्ण एव मनो यासामत एव तदात्मिकाः तज्ज्ञानप्रचुराः अत एतस्यैवालापो यासां तास्तस्यैव विविधा चेष्टा यासां तस्यैव गुणान् गायन्त्यः इति ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यावच्चन्द्रज्योत्स्ना विभाव्यते तावद्वनाद्वनं गत्वा ततश्चन्द्रचन्द्रिकास्तमयानन्तरं प्रविष्टं प्राप्तं तम आलक्ष्य दृष्ट्वा निववृतुः निवृत्ता इत्यनेन दुःशास्त्रान्निवृत्त्य सच्छास्त्राभ्यसनाय यत्नं चक्रुरिति सूच्यते स्त्यै ष्ट्यै शब्दसङ्घातयोरिति धातोः शास्त्रविषया बुद्धयः ॥ ४३ ॥ सत्त्वबुद्धीनां स्वभावं दर्शयति । तन्मनस्का इति ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तद्गुणानेव गायन्त्यः न तु स्वदुखादिकमपि ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तत्रैकीभूय तत्रैव विचारणक्रम-सञ्चारक्रमेण यत्र चन्द्रज्योत्स्ना-प्रवेशो नास्ति तद्वनमुपस्थितमिति कृत्वा ततो निवृत्तः प्राग् दृष्टं पुलिनमेवाययुरित्याह—ततोऽविशन्नित्यादि त्रिभिः ॥ ४३ ॥ तस्मिन् मनो यासां समुद्दिश्यालापो यासाम् तदर्थमेव विचेष्टा यासाम्, स एवाश्रयो यासां तद्गुणानेव गायन्त्यः सत्य आत्मागाराणि शरीराणि न सस्मरुः ॥ ४४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तन्मनस्का इत्यादि । तस्मिन्मनो यासामित्यादिना सर्वासामेव मन–आदीनामेकाधिकरणत्वात्, तासां वासनापार्थक्यमेवास्तमिति भावः । अतस्तदधिकरणत्वात् नात्मागारदि सस्मरुः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च वैयग्र्येण सखीदत्तहस्तावलम्बया तया सहैव तास्तमन्वेषयामासुरित्याह । तत इति । चन्द्रज्योत्स्ना यावता द्विभाव्यते इति पूर्णिमारजन्यामपि निविडवृक्षच्छायावशादेव तमः यदुक्तं विष्णुपुराणे प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते निवर्त्तध्वं शशाङ्कस्य न तद्दीतिगोचर इति वस्तुतस्तु हंहो खेदसिन्धुनिमग्नाः सख्यो घनश्यामतमेऽस्मिंस्तमसि घन श्यामवपुषं तमस्तदवलोकनशङ्कयैव प्रलीनीभूय स्थितं मा सङ्कोचयत यत्र यत्र यूयं यास्यथ ततस्ततोऽन्यत्रैव स पलायिष्यते इत्यलमतिसुकुमारशरीरस्य तस्य श्रमोत्पादनव्यवसायेनेति विमृश्यैव निववृतुरिति ॥ ४३ ॥ तन्मनस्कत्वेनैव पूर्ववदुन्मादस्य मान्द्ये तदालापाः दृष्टो वः कश्चिदश्वत्थेतिवत्तमालपन्त्यः उन्मादस्य मध्यत्वे तद्विचेष्टाः कृष्णायन्त्यपिबत्स्तनमितिवत्तच्चेष्टामनुकृतवत्यः उन्मादस्य प्रौढत्वे तदात्मिकाः कृष्णोऽहं पश्यत गतिमितिवदात्मविस्मृतौ तन्मयीभूताः पूर्वसंस्कारवशादेव गायन्त्य उच्चैरमुमेवेतिवत्तद्गुणानेवेति ॥ ४४ ॥

रसिकाह्लादिनी–टीका

तत ताः कृततापापनोदनया तया सह पुनरन्वेषणं चक्रुरित्याह तत इति । ततस्तत्कथनानन्तरे तदन्वेषणार्थं तथा सह तदुपदिष्टमार्गेण विरलच्छायं वनमविशन् प्रविष्टाः । यावद् व्याप्य चन्द्रज्योत्स्ना विभाव्यते प्रकाशते तस्य वनप्रवेशं संभाव्य मृगयामासुः । अग्रे तमः प्रविष्टं वनस्पतिनिविडत्वात् वर्णसाम्यादविलक्ष्यं श्रीकृष्णं मत्वा ततो हरेरन्वेषणात् निववृतुः निवृताः तथोक्तं विष्णुपुराणे "प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते । निवर्तध्वं शशाङ्कस्य नैतद्दीधितिगोचरः" इति । स्त्रीणां भीरुस्वभावत्वादन्धकारप्रवेशासमर्थ्याच्चेति । तत इति सार्वविभक्तिकस्तसि । तस्य हरेरिति न पौनरुक्तम् । अनेन संचारिविशेषो निर्वेदो जातः गृहान्न गताः न च स्मृतवत्यः रत्याख्यस्थायिभावस्य दृढमूलत्वादिति ॥४३॥ ननु कृष्णमप्राप्तौ निर्वेदेन कथं गृहान्न गतास्तत्र हेतुमाह—तन्मनस्काः इति । ताः आत्मागाराणि आत्मानं क्षेत्रज्ञ देहं वा आगाराणि गृहान् न सस्मरुः न स्मृतवत्यः । आत्मकं यासां ताः स्वार्थ कः । यद्वा तदेव मनसि कं रमणसुखं यासां ताः, यद्वा तस्येव मनो विलासविषयं यासां ता तदाऽऽलापः तस्यैवालापोऽन्योन्यमुक्तिप्रत्युक्तिरूपो यासां ताः, यद्वा तस्यैवालापो भाषणं यासां ताः । तदुक्तमत्रैव-"मेघगम्भीरया वाचानामभिदुरगान्पशूनिति" । यद्वा तस्यैवालापो गानो यो ध्यातरूपो यासां ताः, तद्विचेष्टा तस्यैव तदर्थमेव कायस्य विविधा चेष्टा पुष्पाद्यवचयेन माला—यष्टिकन्दुकादिरचना—रूपा यासां ताः, यद्वा तस्यैव पूर्ववन्निलायनादिरूपा विविधा चेष्टा यासां ताः । तन्मय्य इत्यर्थः, यद्वा तस्मिन्नेवाऽऽत्मा स्वभावो यासां ताः तदात्मिकाः, स एवात्मा क्षेत्रज्ञरूपो यासां ताः तन्मय्यः, यद्वा तस्मिन्नेवात्मा स्वभावो यासां न तु गृहे ताः, यद्वा तस्येवात्मा विलासस्वभावो यासां ताः अन्योन्यालिंगननर्मस्मितादिस्व—भावो यासां ताः, अत एव तद्गुणानेव रूपान् कृष्णस्य गान प्रयत्वात् गानमेव चक्रुः न तु गृहस्मृतिमिति ॥ ४४ ॥

विशुद्धरसदीपिका

तत्सङ्गभावं प्रदर्शयति । तत इति । तदाकर्णनानन्तरं यावदवधि यावच्चन्द्रज्योत्स्ना विभाव्यते तावदेव वनमविशन् ततश्च हरेः परममनोहरस्य तमः प्रविष्टं गह्वरप्रवेशमालक्ष्य निववृतुः निवृत्ता बभूवुः अयं तत्सुखस्योदयस्तस्याः संसर्गादेवेति यथा श्रीमत्सुधानिधौ "राधादास्यमपास्य यः प्रयतते गोविन्दसङ्गाशया सोऽयं पूर्णसुधारुचेः परिचयं राकां विना काङ्क्षति किञ्च श्यामरति-

प्रवाहलहरीबीजं न ये तद्विदुस्तेप्राप्यापि महामृताम्बुधिमहो विन्दुं परं प्राप्नुयुरिति ॥ ४३ ॥ किं गृहान्प्रति निवृत्ता नेत्याह । तदिति । तन्मनस्काः तादृगवरोधस्थलं प्रविष्टे तस्मिन्नेव मनो यासां ताः ततस्तस्मिन्नेव विषये तादृशं आलापः तद्दुःखस्मरणमयः संलापो यासां ताः तस्मिन्नेव निमित्ते विचेष्टा वर्त्मान्तरेण निष्क्रमणसम्भावनया परितः परिक्रमणरूपा यासां ताः ततस्तस्मिन्नेवात्मा यत्नो यासां तथाभावाः सत्यः तन्निलीनतादिकरतादृशा यत्र यदि कारणस्ववशाभावमयकृपादिलक्षणान् गुणानेव केवलतया स्फुरितान् नतु स्वपरित्यागदोषान् गायन्त्यः नात्मानमपि सस्मरुः किमुतागाराणीत्यर्थः । यद्वा तन्मनस्का इति पञ्चहेतवोऽस्फुरणे स्मृतेर्मनोधर्म्मत्वात्तन्मनस्काः अन्यवार्त्तया प्रसङ्गादन्यस्मरणं स्यादिति तदालापाः दैहिकक्रियायान्तु क्षुत्पिपासादिनापि स्मरणान्तरं वारयति । तद्विचेष्टाःघटमहञ्ज्ञानामित्यादिज्ञानेच्छादिनात्मानि स्यादिति तदात्मिका सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधका इति न्यायाददृष्टवशादन्यस्फूर्त्तिः स्यादिति तद्गुणनित्यादिना ॥ ४४ ॥

श्रीरामनारायणकृता भावभावविभाविका

ततस्तां गन्तुमशक्तां हस्तावळम्बेन पुरतःकृत्वान्वेषयन्तीनां चरितमाह ततोऽविशन्निति ततस्तस्त्रियस्तां पुरस्कृत्य भगवन्तमन्वेषयन्त्यो यावच्चन्द्रज्योत्स्नाविभाव्यते तावद्वनमविशन् अग्रे तमः प्रविष्टम् यस्मिंस्तादृग्वनमालक्ष्य तत्र हरेरन्वेषणान्निववृतुः युक्तञ्चैतद्गङ्गासहकारेण नदीनां सिन्धुम्प्रति गमनवत् पराभक्तिपुरस्कारेण साधनभक्तीनां भगवदभिगमनवत् श्रुतिशिर एकवाक्यतयावान्तरश्रुतीनां तदुपकरणोपयोगितया च समस्तश्रुतीनां ब्रह्मणि पर्य्यवसानवच्च तत्पुरस्कारेणान्वेषणे यत्र यत्राश्रमवनादौ सत्त्वविभावना तत्र भगवदन्वेषणवच्चन्द्रभान्वितवने एवान्वेषणं तमः प्रविष्टाश्रमेभ्यः पाषण्डादिभ्यो भगवत्प्राप्तिसम्भवनाशून्येभ्यो जिज्ञासूनां निवृत्तिवत्तमः प्रविष्टवनेभ्यो निवर्तनञ्च यद्वा मनसश्चन्द्ररूपत्वात् यावच्चन्द्रज्योत्स्नामनोवृत्तिप्रकाशो जागर्ति स्वप्ने वा विभाव्यते तावदेव विविधसाधनैर्भगवत्स्वरूपान्वेषणसम्भववत् तमः प्रवेशसुषुप्तौ साधननिवृत्तिवत् यावच्चन्द्रज्योत्स्नान्वेषणमन्तः प्रवेशे ततो निवर्तनञ्च युक्तमेव यद्वा कृष्णं तमसि प्रविष्टमालक्ष्य ततो हरेरेव हेतोःस्वान्वेषणे तस्य पलायमानस्य प्राणनाथस्य तमसि प्रवेशे शर्कराकण्टकादिना खेदसम्भवादेव निववृतुः यद्वा भगवल्लीलावने तमःप्रवेशासम्भवेन भगवतो वासुदेवस्य च तमसि प्रवेशासम्भवेन यावच्चन्द्रज्योस्ना विभाव्यते शशिप्रभाया भानं जातं तावदन्वेषयितुं वनमविशन् ततो विरहार्ति वैकल्येन नेत्रयोस्तमः प्रविष्टमालक्ष्य प्रकाशमानमपि चन्द्रं तद्रश्मि व्याप्तमपि वनं नेत्रयोस्तमश्छादनेनापश्यन्त्यो निववृतुः सापि निवृत्तिर्न स्वतः किन्तु यत्र तत्र पतन्त्य एवोन्वेषयन्त्योऽपि हरेरेव भक्तदुःखासहिष्णोर्मनसि तथा प्रेरिता निववृतुः ॥ ४३ ॥ ननु ततो निवृत्ताश्चेत्तदा गृहान् गता भवेयुस्तत्राह । तन्मनस्का इति । ता आत्मानं शरीरमागाराणि च न सस्मरुः यदात्मानमपि न सस्मरुस्तदागारस्मरणस्यैव कैमुत्यन्यायेनासम्भवे तद्गमनस्य का कथा तदेवापादयति पञ्चभिः स्मरणस्य मनोधीनत्वात्तत्स्वास्थ्ये एव तत्स्यात् तास्तु तन्मनस्काः तस्मिन्नेव मनांसि यासां स एव वा मनःसु यासान्तथाभूताः इति कथं स्मरेयुः ननु तन्मनस्त्वेऽपि अन्योद्बुद्धसंस्काराः स्मृत्वा गच्छेयुस्तत्राह तदालापा इति तद्विषय एवालापोभाषणं यासां ततश्च तासु सर्वासु अन्यवार्त्ताप्रवेशस्यैवाभावात्कथमन्यसंस्कारोद्बोधस्तत्स्मरणं वा दहिकक्षुदादिचेष्टया संस्कारोद्बोधे देहगेहादिस्मरणमाशङ्क्याह तद्विचेष्टा इति पूर्वनिरूपितरीत्या तल्लीलानुकारविषया एव विचेष्टा यासां ननु तमेव भान्तमनुभाति सर्वमिति श्रुत्या घटमहंजानामीत्याद्यनुभवैश्चात्मनः सर्वप्रत्ययवेद्यत्वात्कथं तासां नात्मस्मरणं तत्राह । तदात्मिका इति स एवात्मा वस्तुत इतरास्फूर्त्या च यासां पूर्वन्तासां परस्परभाषणस्य तद्विषयत्वमुक्तमधुना तद्गानस्यापि तद्विषयत्वमाह । तद्गुणानेव गायन्त्य इति । यद्वा तेन वनेत्यक्तास्तत्क्रौर्य्यादिदोषालापपरा भवेयुस्तथा च दोषदृष्ट्या ततो विरज्य गृहगमनादिसम्भावनापत्तिस्तत्राह । तद्गुणानेव गायन्त्य इति नहि प्रेमिणां गुणैर्विनाप्रियतमे दोषस्फूर्तिसंभावनापीति भावस्तदुक्तं गीतगोविन्दे श्रीमत्या श्रीमुखेनैव गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहति च परितोषं दोषं विमुञ्चति दूरतः युवतिषु वलतृष्णे कृष्णे विहारिणि मां विना पुनरपि मनोवामं कामं करोति करोमि किमिति तथा चैतैः पदैस्तासां मनोवाक्कर्मभिस्तदेकपरत्वं स्वरूपतस्तदनतिरिक्तत्वञ्चोक्तं भवति यद्वा तन्मनस्कत्वे लीनमनसां मनोधीनतद्वाह्यव्यवहारलोपमाशङ्क्याह तदाळापा इत्यादि तेनैव तत्प्रेरणयैवालापो विचेष्टा विविधा तदनुकारादिचेष्टा यासां तत्र हेतुस्तदात्मिका इति स एवात्मा प्रेरको यासां ताः अत एव ज्ञानिनां देहाद्यध्यासाभावेऽपि भगवतैव जिज्ञासुजनोपकाराय यद्वागार्दिप्रेरणयोपदेशादिसम्भववत्सर्वोपकारकभक्तिनिर्वर्तनाय भगवत्प्रेरितवाचा तद्गुणानेव गायन्त्य इति भावः यद्वा तन्मनस्कत्वेन मनस्याविर्भूतेन तेनैव जीवनाधारं कं सुखं यासां तथामनस्याविर्भावेन स्फुरता तेनैव सहालापोयासां तास्तथा तेनैव तथाविर्भूतेन विविधा नाना विहारदिचेष्टा यासां तास्तथा तेनैव सह गुणानेव गायन्त्य एवं सर्वथा तदात्मिका न सस्मरुः यद्वा काश्चिदेवमुक्तरीत्या तदात्मिकाः काश्चित्तु व्युत्थानदशापन्नास्तस्यैव गुणानेव गायन्त्य एव न सस्मरुः ॥ ४४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ततस्तां हस्ते धृत्वोत्थाप्य तया सहिता अन्वेषणे प्रवृत्ता इत्याह । तत इति । ततो विस्मयप्राप्त्यनन्तरं पदचिह्नानां वने प्रवेशमालक्ष्य वनमविशन् तत्र यावत्पर्य्यन्तं वृक्षाणां विरलत्वाच्चन्द्रज्योत्स्ना विभाव्यते तावत् ततो निविडवृक्षेषु घनीभूतं तमः

प्रविष्टं प्रेष्ठपदचिह्नैरालक्ष्य हरेरन्वेषणान्निवृत्ताः स्त्रीत्वाद्भयेन तमो नाविशन्निति भावः। यद्वा हरेः सम्बन्धिन्यः तथा च तत्रापि धूर्तान्तरस्थितिशङ्कया न प्रविष्टा इति भावः। यद्वा अस्मासु तमः प्रविष्टासु सतीषु स बहिर्निःसत्य गमिष्यति चेत् सर्वथा न मिलिस्यतीति तत्राप्रवेशाशयः यद्वास्मास्वन्तः प्रविष्टासु संभ्रमादन्धकारपळायनपरायणस्य परमसुकुमारपादाद्यवयवस्य प्रेष्ठस्य खेदो भविष्यतीति विचार्य्य विवृत्ता इत्यभिप्रायः। अथवा प्रकाशकराङ्गस्य भगवतोऽत्र प्रवेशे तमः प्रवेशो न सम्भवतीति तत्र प्रविष्टं तम आळक्ष्य तर्कयित्वा निववृतुरित्याशयः निवृत्तिपक्षे ततो विस्मयप्राप्त्यनन्तरं यावद्विवेकलक्षणं चन्द्रस्य ज्योत्स्ना तत्तत्पदार्थतत्त्वप्रकाशो विभाव्यते तावदत्तन्निरसनार्थमविशन् अग्रे चैतन्यघने परमात्मनि तमः प्रविष्टप्रकाशसामर्थ्यमाळक्ष्य हरेः सम्बन्धिन्य श्रुतयो निववृतुः ॥ ४३ ॥ ननु सर्वथा कृष्णमलब्धवत्यः प्राप्तपरिश्रमाः स्वगृहान् प्रति कुतो न गता इति चेत्तत्राह। नात्मागाराणि सस्मरुः आत्मानं परिश्रमादित्यक्तं देहं गृहागाराणि गृहांस्तत्रत्यानि वस्तूनिच न स्मृतवत्यः स्मरण विना कथं गमनादिकं तासां भवेदिति भावः ननु कुतो न सस्मरुरित्याशङ्क्याह। तन्मनस्का इति। तस्मिं भगवति मनो यासां ताः तथाच स्मरणकारणस्य मनसे भगवति प्रविष्टत्वात्कथमन्यत्स्मरणे भवेदिति भावः। आलापद्वारापि स्मरणं वारयति तदाळापाः तत्सम्बन्ध्यालापो यासां ताः तथाच गृहान् प्रतिगन्तव्यमिति भाषणे कस्या अप्यवकाशो न जात इति भावः। नापि हस्तादिसंज्ञया सूचनावकाश कस्या अप्यासीदित्याशयेनाह। तस्यैव विचेष्टा पूर्वकं कथा यासां ताः ननु कदाचिन् मनसा गेहाद्यनुसन्धानं कुतो न जातमितिचेत्तत्राह। तदात्मिकाः स आत्मा तासां ताः तथा चार्तियुतात्मना तासां तदन्याऽनुसन्धानादिकं दुर्ल्लभमिति भावः किञ्च गेहादिस्मृतिसम्पादकं दुरदृष्टमपि नोत्थितं तन्नाशक तद्गुणकीर्तनपरत्वादित्याह। तदिति गुणान् गोवर्द्धनाद्धरणादिना गोकुलरक्षणादीन् यद्वा यतः काश्चित्तन्मनस्काः अहो प्रेष्ठं प्रति कुत्र वर्तते कथं मिलिष्यतीत्यादि तद्विषयकमनोरथपराः काश्चित्तदालापाः अहोऽस्मान्विहाय कथं गत इतःपरं कुत्रान्वेषणीय इत्यादि तद्विषयकवार्तालापपराः काश्चित्तद्विचेष्टाः पूतनास्तनपानादि तद्विचेष्टाकारपराः काश्चित्तदात्मिका तस्मिल्लीनमनस्कत्वात्समाधिस्था इव तदेकस्फूर्तयः काश्चित्तद्गुणानेव गायन्त्यस्तस्मान्नात्मागाराणि न सस्मरुः यद्वा कदाचित्तन्मनस्काः काचित्तदालापा इस्येव योज्यं निवृत्तिपक्षे काश्चित्तन्मनस्काः प्रत्यगभिन्नब्रह्मविषयकभिप्रायाः काश्चित् साक्षादेव तदालापाः सत्यत्वादिरूपेण तस्य प्रतिपादिकाः काश्चित्तद्विचेष्टाः सर्जनादिरूपाः काश्चित्तदात्मिकाः तस्मिन्नात्मा प्रयत्नस्तत्प्राप्तिसाधनाः शान्त्यादिरूपाः स आत्मवस्त्वेन वा प्रतिपाद्यो यासां ताः कारागृहस्थानापन्नानि काश्चिद्गुणान् सर्वज्ञत्वसर्वेश्वरत्वादिरूपानेव गायन्त्य आत्मनो आगराणि अज्ञानाहंकारादीनि न सस्मरुः परमार्थत्वेन न प्रतिपादयामासुरित्यर्थः ॥ ४४ ॥

रास–रहस्यम्

र० टी०—तत आत्माकारवृत्त्यभिहितं परमात्मनः यत्सर्वोपाधिविनिर्मुक्तत्वं तच्छ्रवणानन्तरं यावत् यत्र यत्र चन्द्रज्यत्स्ना मनसो चन्द्रजत्वात् जाग्रति स्वप्ने वा मनः गच्छति प्रकाशते तदेव विभाव्यते विशेषेणयुक्तां भाव्यते, तत्र तत्र स्वप्रजाग्रदवस्थासु सांसारिकविषयेषु स्त्रियः आत्माभिमुखीवृत्तयः, तावत् तथा हिताः सत्यः परमात्मान्वेषणार्थं वनं ससारारण्यमविशन् सांसारिकविषयेषु प्रविष्टाः तत्र तमः प्रविष्टमालक्ष्य अन्धकारप्रवेशवत्सुविषयेषु अज्ञानतत्कार्येषु मिथ्यात्वं दृष्ट्वा ततो विषयेभ्यः निववृतुः प्रातनिवृत्ता बभूवुः ॥४३॥ स्मरणस्य मनोऽधीनत्वात् तत्स्वस्थतायामेव तत्स्यात्। तन्मनस्काः तस्मिन् परब्रह्मण्येव मनांसि यासां ताः, तदालापाः तत् तस्य ब्रह्मः विषयकाः आलापाः विचारा यासां ताः, तद्विचेष्टाः तत्प्राप्तिनिमित्तमेव विशेषेण चेष्टा प्रयासो यासां ताः, तदात्मिकाः स एव तादात्म्येनात्मा वस्तुतः इतरस्फुर्त्यभावः च यासां ताः तद्गुणानेव गायन्त्यः तस्य लक्षणान्येव चिन्तयन्त्यः, आत्मागाराणि आत्मनः शरीरमेव आगार गृहं तदुपलक्षितान् सांसारिकविषयान् न संस्मरुः न् अनुसंदधन्ते स्म ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ततस्तदनन्तरं तया सह कृष्णा प्रियया सह यावत् चन्द्रज्योत्स्ना चन्द्रिका प्रकाशते तावद्वनमविशन् ततस्तमः प्रविष्टमतिनिनिडं वनं तमसा व्याप्तमालक्ष्व ततः कृष्णान्वेषणात् अतिनिवडवनाद्वा निववृतुः निवृत्ताः बभूवुः ॥ ४३ ॥ एवं भगवन्तमप्राप्यापि आत्मागाराणि न सस्मरुः न स्मृतवत्यः किन्तु तत्प्राप्त्याकाङ्क्षया तत्रैव तस्थुः तत्र कारणमाहु। तन्मनस्का इत्यादि ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतः परं भगवत्प्रसादे को हेतुरिति विचार्य सर्वपरित्यागेन देहत्यागपर्यन्तं साधनमिति निश्चित्य तथा कृतवत्य इत्याह। तत इति। ततो वनमविशन् मोहनिवृत्त्यर्थं वनप्रवेशः वनङ्गतानामपि चेन्मोहः तदा किं वनप्रवेशेनेति चन्द्रज्योत्स्ना यावद्विभाव्यते तावद्दूरमेव गताः अतिनिविडं वनन्तु न प्रविष्टाः यदा पुनर्गाढवने अन्तश्चन्द्रकिरणा न प्रविशन्ति तदा तत्र तमः प्रविष्टमालक्ष्य ततो निववृतुः निवृत्ता जाताः ननु प्रथमं यदुद्योगेन वनं गताः तदकृत्वा कुतो वा निवृत्ता इत्याशङ्क्याह। हरेरिति हरेः सकाशात् हरेः सम्बन्धिन्यो वा ततः अन्धकारान्निवृत्ता नहि भगवदीया अन्धकारं प्रविशन्ति भगवतैव निवर्तिताः ॥ ४३ ॥ निवृत्ताश्चेत् गृहङ्गता भविष्यन्तीत्याशङ्कायामाह। तन्मनस्का इति। ता नात्मागाराणि सस्मरुः आत्मानं देहमागारं गृहं तत्संबन्धीनि वस्तूनि स्मृतवत्य एव न कुतो गमिष्यन्ति अस्मरणे हेतवः तन्मनस्का इत्यादिभिः पञ्चभि पदैः पञ्च निरूप्यन्ते स्मृतिर्मनसि जायते तन्मनस्तु

केवळं भगवत्येव अतः तन्मनस्का भगवन्मनस्का न सस्मरुः अन्यद्वाराप्यस्मरणार्थमाह । तदालापा इति । अन्या अपिचेदन्यवार्तां कुर्युस्तदा तत्प्रसङ्गाद् गृहादिस्मरण भवति सर्वा एव तस्मिन्भगवत्येवालापो यासामतो ऽन्यतोऽपि न स्मरणं ननु दैहिकी क्रिया क्षुत्पिपासाकृता आवश्यकी तया देहादिस्मरणं भविष्यतीतिचेत्तत्राह । तद्विचेष्टा इति । तस्यैव भगवतः पूर्ववच्चेष्टा विशिष्टाः ननु तथापि सर्वज्ञानेष्वात्मांशः स्फुरति घटमहं जानामि पटमहं जानामीति अतः कथमात्मास्फूर्तिस्तत्राह । तदात्मिका इति । स एवात्मा यासां सर्वदा कृष्णात्मभावनैव चित्ते सहजा तासामत आत्मत्वेन भगवानेव स्फुरतीति न देहादिस्फुरणं ननु—

सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः ।

अदृष्टवशात् कथं न स्मृतिस्तत्राह । तद्गुणानेव गायन्त्य इति । यदि तुष्णीं तिष्ठेयुः भवेदपि स्मृतिः अन्यासक्तास्तु ताः कार्यान्तरपराः यतस्तस्य भगवतो गुणानेव गायन्ति गुणैः कृत्वा दुरदृष्टञ्च नश्यति अतो नादृष्टद्वारापि स्मृतिबोधः ॥ ४४ ॥

श्रीसुबोधिनी-सारः

चन्द्रस्य ज्योत्स्ना चन्द्रिका यावद्विभाव्यते प्रकाश्यते तावद्वनमविशन् । ततोऽनन्तरं प्रविष्टं व्याप्तं तमोऽन्धकारमालक्ष्य ततः स्थानात्स्त्रियो विवृत्ता बभूवुः ॥ ४३ ॥ तस्मिन् कृष्णे मनो यासा ता ते एवालापा वाग्विलासा यासां ताः तस्य हरेर्गुणानेव गायन्त्य आत्मनो देहान् अगाराणि गृहाणि न सस्मरुः ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च यावच्चन्द्रज्योत्स्नया वनं विभाव्यते प्रकाश्यते तावत्तया सह गोप्यः कृष्णान्वेषणार्थमविशन् । ततोऽग्रे घनतरुच्छायाकृतेन तमसा प्रविष्टं व्यासं वनमालक्ष्य हरेरन्वेषणात् निववृतुः निवृत्ता जाताः ॥ ४३ ॥ एवं तमःप्राप्तानां निराशया गृहगमनमाशङ्क्य गृहादिस्मरणमेव नासीत् , कुतस्तद्गमनम् ? इति सहेतुकमाह—तन्मनस्का इति । तस्मिन् कृष्णे एव मनो यासां ताः, तस्यैव आलापो भाषणं यासां तास्तदालापाः, यत एवंभूतास्मात्तस्य कृष्णस्येव विविधाश्चष्टा यासां तास्तद्विचेष्टाः, स एवात्मा यासां तास्तदात्मिकास्तदैक्यमानवत्यः तस्य गुणान् भक्तवात्सल्यादीन् गायन्त्य आत्मानं देहमगारं गृहम् , बहुवचनात् पतिपुत्रोपकरणादीनि च न सस्मरुः ॥ ४४ ॥

अन्वितार्थप्रकाशिका

तत इति ॥ ततश्च यावच्चन्द्रस्य ज्योत्स्ना विभाव्यते लक्ष्यते तावद्गोप्यः तया सहिताः कृष्णान्वेषणार्थं वनमविशन् । ततोऽग्रे तमः प्रविष्टमालक्ष्य हरेरन्वेषणान्निववृतुः निवृत्ताः । तङभाव आर्षः । हरेरित्यत्र स्त्रिय इत्यपि पाठः ॥ ४३ ॥ तन्मनस्का इति ॥ तस्मिन् कृष्ण एव मनो यासां ताः तस्यैव आलापो भाषण यासां तास्तदालापाः यत एवंभूतास्तस्मात्तस्य कृष्णस्येव विविधाश्चेष्टाः स एवात्मा यसां तास्तदात्मिकास्तदैक्याभिमानवत्यः तस्य गुणान् एव गायन्त्यः नतु स्वत्यागादिदोषान् । ततस्तमप्राप्ता अपि आत्मानं देहमगारं गृहं बहुवचनात् पतिपुत्रोपकरणादीनि च न सस्मरुः ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यावच्चन्द्रस्य ज्योत्स्ना प्रकाशोवने दृश्यते तावद्गोप्योवनमविशन् प्रविश्यामार्गयन्तेत्यर्थः । ततो निविडवनगते तमसि प्रविष्टं श्रीकृष्णमालक्ष्य ज्ञात्वा ततो वनात् निववृतुः ॥४३॥ आत्मागाराणि देहगेहानि न सस्मरुः । तस्मिन् आत्माबुद्धिर्यासां ताः ॥४४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः, तयापि सहितास्ता इति शेषः । वनं, अविशन् श्रीकृष्णान्वेषणायेति शेषः । कियत्तदविशंस्तत्राह । यावत् चन्द्रज्योत्स्ना चन्द्रचन्द्रिका, विभाव्यते प्रकाशते, तावद्वनं चेरुः । ततः, तमसा प्रविष्टं तमःप्रविष्टं, सान्द्रतरुच्छायाकृतेन तमसा व्याप्तं वनमित्यर्थः । आलक्ष्य, हरेः ततोऽन्वेषणात् , निववृतुः निवृत्ता अभवन् । केचित्त्वत्र 'गत्वा वनाद्वनं चन्द्रज्योत्स्ना' इति पाठं कृत्वा यावच्चन्द्रज्योत्स्ना विभाव्यते, तावद्वनाद्वनं गत्वा चन्द्रचन्द्रिकाऽदर्शनानन्तरं प्राप्तं तम आलक्ष्य निववृतुरित्याहुः । श्रीगोपालानन्दस्वामिचरणास्तु तमःप्रविष्टं निविडवनगते तमसि प्रविष्टं श्रीकृष्णमालक्ष्य ततो निववृतुरित्याहुः ॥ ४३ ॥ एवं तमःप्राप्ता अपि स्वगृहान्नैव स्मृतवन्त्यस्तत्र हेतुं वदंस्ता विशिनष्टि ॥ तन्मनस्का इति ॥ तस्मिन् श्रीकृष्णे एव मनो यासां ताः, अत एव तस्यैवालापो यासां ताः, तस्य श्रीकृष्णस्येव विविधाश्चेष्टा यासां ताः, तदात्मिकास्तन्मयाः, अत एव, तद्गुणान् एव, गायन्त्यः सत्यः, आत्मनां स्वस्वासामगाराणि गृहान् , न सम्मरुः ॥ ४४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततोऽविशन् इति : १०.३०.४३.

योग्यागमा अपि हि यं न विदुः परेशं गायन्त्यपीति किमु तत्र वृथा प्रयासः ।
इत्यन्तरे चिरमवेक्ष्य तदा रमण्यः सद्योगिवृत्तय इवाशु निवृत्तिमापुः ॥ २८२ ॥

यावद् द्वैतप्रकारः प्रसरति परितो वृत्तयस्तावदेव श्रान्ता धावन्ति यत्नात् कथमपि पुनरावृत्तिमेवाप्नुवन्ति ।
अप्राप्यं ज्योतिषां यद्विलसति तमसां यच्च तेजः परस्ताद् गत्वा ताश्चन्द्रिकान्तं क्षममिदमभजन् यत्पुनस्तन्निवृत्तिम् ॥ २८३ ॥
राससौख्यं तु राकायां तासामासीदितीरिते । आप्रभातविधूल्लासदन्यथोक्तिर्न युज्यते ॥ २८४ ॥ [युग्मम्]
जगद्व्याप्तापि यं द्रष्टुं नालमीशेह चन्द्रिका । तत्र का वयमल्पज्ञा अल्पगा इत्यनग्रगाः ॥ २८५ ॥
अप्राप्येशं निवृत्ताभिस्ताभिर्विश्रान्तवृत्तिभिः । स्फुटीकृता व्रजस्त्रीभिर्यतो वाच इति श्रुतिः ॥ २८६ ॥
यो योगिवृत्तेरपि नापराक्षो यो वा श्रुतेरश्रुततात्त्विकश्रीः । तस्यापरोक्षोद्यमिनां जनानां सिद्धः श्रमो गोकुलभावभाजाम् ॥२८७॥
न हि यावदसौ समीक्षितो निजहृत्संस्थित इत्यहं जनैः भ्रमणाच्छ्रम एव केवलो भवितैषा भुवि तावदन्वहम् ॥ २८८ ॥

तन्मनस्का इति : १०.३०.४४.

जगत्यस्मिन् यस्यास्त्यभिरुचिरहो साहसविधौ प्रसिद्धं तत्कर्माखिलमपि विभो साहसमयम् ।
वनेऽस्माकं त्यागं निशि विदधतस्ते यदुपते प्रसादोऽप्यस्मासु स्फुट इह जगद्विस्मयकरः ॥ २८९ ॥
असीमं स्वप्रेम प्रसृतमयि नाथ त्वयि कृतं तथाऽऽभिः सर्वस्वार्पणमपि मनोभावसहितम् ।
निरीक्ष्येषन्मानोन्नतिमतनुजामप्युदयवन् तदैवान्तर्भूतः किमिदनुचितं ते कृतविदः ॥ २९० ॥
प्रभो यत्त्वत्कृत्यं तदिह मधुरं तावकदृशा न जाने कि ब्रूयात् कथमिति च पृष्टो यदि परः ।
क्वचागोऽणुर्गोपीजनविरचितो मानसहितः क्व तत्त्यागः सह्याचल इव दृढस्तत्प्रतिकृतिः ॥ ९१ ॥
न यागैर्वा योगैर्व्रतजपतपः-साधनचयैस्तथाऽहं सन्तुष्टोऽप्यवनि लघु दानैरिह यथा ।
प्रतिज्ञावागेषा कथमवितथा स्याद् यदुपते त्यजस्येवं रुष्टस्त्वलमतनुदात्रीर्यदबलाः ॥ २९२ ॥
त्यक्त्वाऽन्यसाधनानीश गायामस्त्वद्यशो भृशम् । यथा शं दर्शय श्रीश काननं वा स्वकाननम् ॥ २९३ ॥
मानस्थितिर्भृशमितोऽप्यवधार्य ते चेन्मस्थितिर्व्रजजने भवितेत्यवेहि ।
गा नः स्थिता अवसि माधव सर्वदेति गानस्थितास्तदधुनाऽप्यव तावकीनाः ॥ २९४ ॥

कृष्णप्रिया

राजन् ! अब सब मिलकर श्याम सुन्दरजी को खोजने के लिए जब तक चन्द्र का प्रकाश-चांदनी रही तब तक एक वन से दूसरे वन में जाती रही इतने में अंधेरा छा गया तब श्रीहरि की सर्व प्रियाएँ श्री यमुना जी के तट पर लौट आई ॥४३॥ वे सब कृष्णमय मन वाली थी, कृष्णजी के सम्बन्ध का ही वार्तालाप करती थी, कायिक कियाएँ भी कृष्ण विषयक थी, वाणी से भी भगवान् के गुणों का गान कर रही श्री भगवान श्रीकृष्णजी को ही अपनी आत्मा जानती थी, इस दिव्यावस्था के कारण वे अपनी आत्मा एवं अपने निवासों को विरार गई थी ॥ ४४ ॥

पुनः पुलिनमागत्य कालिन्द्याः कृष्णभावनाः । समवेता जगुः कृष्णं तदागमनकाङ्क्षिताः[1] ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे[2] दशमस्कन्धे[3] [4]त्रिंशोऽध्यायः ॥ ३० ॥

कर्दमक्षमा

अन्वयः—तदागमनकांक्षिणः, कृष्णभावनाः, कालिंद्याः, पुलिनम्, पुनः, आगत्य, समवेताः, कृष्णम्, जगुः ॥ ४५ ॥

त्रिंशोध्यायः समाप्तः ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किन्तु पूर्वं यत्र श्रीकृष्णेन संगतिरासीत्तदेव कालिंद्याः पुलिनमागत्य कृष्णं भावयन्ति ध्यायन्तीति तथा ताः कृष्णस्यागमनं कांक्षितं यासां ता मिलिताः सत्यः कृष्णमेव जगुरिति ॥ ४५ ॥

इति श्रीमद्भागवते म० दशमपूर्वार्धे टीकायां त्रिंशत्तमोऽध्यायः ॥ ३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

किमितस्यतो भ्रमन्त्यो गानं चक्रुस्तत्राह–किं त्विति । यत्र पुलिने । यत्र त्यक्तास्तत्रैवास्मान् कृपया सांत्वयितुं नूनमागतः स्यादिति हेतोः पुनस्तत्रागत्येत्यर्थः । समवेताः 'दुःखं पञ्चभिः सह' इत्युक्तेरेकीभावं प्राप्ताः ॥ हन्तहन्त यत्रयत्र तदन्वेषणार्थं यामस्ततस्ततः स पलायिष्यते तस्माद्वनपर्यटनकष्टं किं तस्योत्पादयिष्यामस्तदिच्छां विनां स न लभ्यः, "यमेवैष वृणुते तेन लभ्यः" इति

---

१. कांक्षिणीः–विज. । २. पारमहंस्यां संहितायां–प्रा. पा. । ३ पूर्वार्द्धे रासक्रीडायां कृष्णान्वेषणं नाम–प्रा. पा. । ४. अष्टाविंशः–विज. ।

श्रुतिं प्रमाणीकुर्वत्य इव तद्दर्शने तत्कारुण्यमेव हेतुस्तत्कारुण्यस्य च तत्संकीर्तनमेव हेतुरिति सिद्धान्तं प्रकाशयन्त्य इव पूर्वं यत्र तेन संगतिरासीत्तदेव स्थानमाजग्मुस्तमेव जगुरित्याह–पुनरिति ।। ४५ ।।

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे त्रिशोऽध्यायः ।। ० ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तत्रापि स्वैस्तस्यावरोधशङ्कया सर्वमपि तदन्वेषणमार्गं परित्यज्य सर्वासां समेतानामस्माकं निकटमिदं निर्व्यवधानतया दूरप्रसरच्छब्दं तदेव लीलापुलिनं गतानां दैन्योपालम्भादिमयमुच्चैर्गानमाकलय्य स्वयमेव करुणया श्रीकृष्णस्त्वरितमागमिष्यतीति तं भावयमानास्तथा चक्रुरित्याह् । पुनरिति ।। ४५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् त्रिशोऽध्यायः ।। ३० ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पुनः पुलिनागमनम् , तत्र परित्यक्ता अस्मान् श्रीकृष्णो नूनं कृपया सान्त्वयितुं तत्रैवागतः स्यादिति मत्या, किंवा तद्दर्शनाभावेन स्वसहित-तत्क्रीडास्थानस्यैव दिदृक्षया, अत एवोक्तं 'कृष्णभावनाः' कृष्णः चित्ताकर्षकं परमानन्दप्रदं वा भावयन्त्यः, तत्र गतं मन्यमानाः किंवा कृतक्रीडं चिन्तयन्त्यः समवेता इति उच्चैः श्रीकृष्णस्य श्रवणार्थं 'न दुःखं पञ्चभिः सह' इति न्यायात् विरहस्वभावादेव वा, कृष्णं परमानन्दघनमूर्त्तिमिति तद्गानेनैव न किल प्राणा निर्गता इति भावः । तदागमन एव काङ्क्षितं यासामिति कथञ्चिदप्यन्येच्छा न जाता, तदागमनाकाङ्क्षा च न निवृत्ता, तत्र चागमनशब्देनात्यन्तविरहार्त्त्या सन्दर्शनमात्रमेवाकाङ्क्ष्यते, न त्वन्यदिति भावः ।। ४५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां त्रिशोऽध्यायः ।। ३० ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

काङ्क्षिताः काङ्क्षिरायः ।। ४५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये त्रिशोऽध्यायः ।। ३० ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किन्तु पूर्वं कृष्णेन यत्र सङ्गताः तदेव कालिन्द्याः पुलिनमागत्य समवेताः समुदिताः कृष्णभावनायुक्ताः कृष्णस्यागमने काङ्क्षा यासां ताः कृष्णमेव जगुः ।। ४५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां त्रिशोऽध्यायः ।। ३० ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

समवेता एकविषयीकृताः तस्य कृष्णस्यागमनकाङ्क्षिण्यः ।। ४५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां सप्तविंशोऽध्यायः ।। २७ ।।

श्रीमज्जीवगोस्वामिकृतो क्रमसन्दर्भः

कीर्त्तयन्त्यः पुनः पुलिनमागमने हेतुः । कृष्णभावनाः ते तत्र गतं मन्यमानाः । पुनर्दूराच्छून्यतादृष्ट्यैव तदागमनं काङ्क्षितं यासां तादृश्यः ।। ४५ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे त्रिशोऽध्यायः ।। ३० ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

पुनरिति पूर्वं श्रीकृष्णेन सह यत्राजग्मुः, तदागमनं तदाविर्भावः तत्र कांक्षितं कांक्षा यासाम् , भावे क्तः । समवेता हृदयेन सम्वादभाजः, एकवासनत्वात् , कृष्णे भावना यासाम् तास्तथा कृष्णं जगुः । श्रीकृष्णोऽप्यन्तर्हित एवादृष्टः सन् सहैव तिष्ठतीति मन्तव्यम् ।। ४५ ।।

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे त्रिशोऽध्यायः ।। ३० ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तदा किं चक्रुरित्याह—पुनरित्यादि । आत्मारामाणां देहा यथा यदृच्छया इतस्ततः सञ्चरन्ति, तथा पुलिनमाययुः, न तु बुद्धिपूर्वम् , तदा पूर्वविरोधः ।। ४५ ।।

इति त्रिशत्तमोऽध्यायः ।। ३० ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हन्त हन्त यत्र तदन्वेषणार्थं यामस्ततस्ततः स पलायिष्यते तस्माद्वनपर्यटनकष्टं किं तस्योत्पादयिष्यामस्तदिच्छां विना स न लभ्यो यमेवैष वृणुते तेन लभ्य इति श्रुतिं प्रमाणीकुर्वत्य इव तद्दर्शने तत्कारुण्यमेव हेतुस्तत्कारुण्ये च तत्सङ्कीर्तनमेव हेतुरिति सिद्धान्तं प्रकाशयन्त्यं इव पूर्वं यत्र तेन सङ्गतिरासोत्तदेव स्थानमाजग्मुस्तमेव जगुरित्याह । पुनरिति ॥ ४५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । त्रिंशोऽध्यायोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ ३० ॥

रसिकाह्लादिनी–टीका

तास्तदा किं कृतवत्य इत्यपेक्षायामाह-पुनरिति यत्र श्रीकृष्णेन विहृतं तत्कालिन्द्याः पुलिनं पुनरागत्य ननु कृष्णेन यत्र परित्यक्तास्तत्र कथं पुनर्गता इति चेत्तत्राह–कृष्णभावनाः श्रीकृष्णोऽत्र पुलिने रतिं करिष्यति इत्याशया पुलिनमस्माकं संगतिप्रदमिति तत्रैवाऽऽगताः 'कस्य'-कस्या भाग्यवशात्कृष्णः स्नेहादागच्छेदित्यालोच्य आगताः समवेताः मिलिताः सत्यस्तदा साधनान्तरमपश्यतः अस्मत् दैन्योपतापसम्बलितमुच्चैर्गानमाकलय्य स्वयमेवागच्छेदित्यावद्धहृदयाः कृष्णं मूर्त्तश्रृङ्गारमित्युच्चैर्जगुः । तदागमनकांक्षिताः दोषसद्भावे त्यक्ताः कृष्णगुणगानेन दोषनिवृत्तौ सत्यां कृष्णः स्वयमेव प्रादुर्भविष्यतीति, तदा कालिन्दीपुलिने कृष्णः सफलं भवतीति निश्चित्य तदागमनं कांक्षितं यासां ताः तत्प्रतीक्ष्यमाणाः कृष्णस्य गानप्रियत्वात् जगुरिति ॥ ४५ ॥

इति श्रीमन्नारदावतारसम्भूत–श्रीव्रजाचार्यनारायणभट्टविरचितायां रसिकाह्लादिनीटीकायां कृष्णान्वेषणं नाम त्रिंशोऽध्यायः ॥ ३० ॥

विशुद्धरसदीपिका

किमचेष्टन्तेत्यत आह । पुनरिति । पुलिनं प्रेष्ठसंयोगपीठमागत्य कालिन्द्याः निजसख्याः पर्वतसम्बन्धोक्तिः स्थैर्यलाभाय यद्वा कानि सुखानि मिलिन्दे यस्याः यद्वा केषां सुखानामालिपरम्परां ददातीति तस्याः सर्वथा सुखोपलब्धिसिद्धपीठमिति भावः । ननु कीदृशं समुद्दिश्यागतास्तत्राह । कृष्णभावनाः तदेव तासां सुखं नान्यदितिभावः यद्वा आत्मविस्मरणं दृढीकरोति कृष्णोऽहमिति भावना यासां ताः कृष्णं जगुरित्याश्चर्यं अयं च स्वयमेव तथाविध इतिन्यायेन झटिति सिद्धौ हेतुः समवेताः एकमत्येन मिलिता ननु तद्वदेकाकिन्यः कृष्णं स्वचित्ताकर्षकं मूर्त्तिमद्गानं जगुः यद्वा स्पष्टं तन्नामैव जगुः ननु तद्वत्कलमित्यर्थः । कुतःतादात तस्यैकस्यैवा काङ्क्षितं यासामिति तदेकालम्बना इत्यर्थः । ततश्च तदाकृष्टा वयमत्रागतास्तथैवास्माभिराकृष्टः सोऽप्यायास्यतीति भावः ॥ ४५ ॥

इति श्रीभागवतरासपञ्चाध्यायीव्याख्याने विशुद्धरसदीपिकायां द्वितीयोऽध्यायः ॥ २ ॥

मूलस्य त्रिंशोध्यायः ॥ ३० ॥

श्रीरामनारायणकृता भावभावविभाविका

ततो ध्यानगानसमाधेरुत्थितास्तं प्रेष्ठमपश्यन्त्यस्तद्विरहविक्लवितचित्ता वह्वन्वेषणैऽप्यलब्धप्रियवृतान्ताः पूर्वङ्कालिन्द्याः पुलिने प्रियकृतवेणुगानाह्वानतत्समागमविहाराद्यनुस्मृत्य तदेव तीर्थपादसंगमप्रदं तीर्थराजं श्रुतिगणगिरागिरेशगिरिजागिरिशगीतगुणं मङ्गलमङ्गलं भूभूषणमवधार्य यत्र यदुज्झितं तत्रैव तल्लभ्यते इतिन्यायं चानुसन्धाय पुनः पुळिनमेवागत्य योगिमनसामपि दुराधगमस्य भगवतोऽन्वेषणादिवैयर्थ्यं व्यवस्य गानप्रियस्य तस्य—

नाहम्वसामि वैकुण्ठे योगिनां हृदये न च । मद्भक्ताः यत्र गायन्ति तत्र तिष्ठामि नारद ॥

इत्यादिप्रतिज्ञां विश्वस्य तद्गुणानेव जगुरित्याह । पुनः पुलिनमिति ! पुनः कालिन्द्याः पुलिनमागत्येत्यत्र पुनःशब्देन प्रथमं तत्र कृष्णसमागमस्मारकेण तत्पुलिनस्य तत्सङ्गतियोग्यताध्वनिता न रोधयति मां योगो न साङ्ख्यं धर्म उद्धव इत्यादिना साधनान्तराणां तथा ऽनवरोधकत्वमभिधाय यथावरुन्धे सत्सङ्गां सर्वसङ्गापहो हि मामित्यादिना सत्समागमस्यैव तदवरोधकत्वबोधनात्समवेतास्तथावहिश्चित्तगानस्यापि तदनवरोधकत्वात्कृष्णभावनाः कृष्णमेव भावयन्तीति तथा तस्य कृष्णस्यैवागमनं काङ्क्षितं यासां ताः कृष्णमेव नित्यानन्दस्वरूपं स्वमनः कर्षकञ्च जगुः यद्वा यतः कृष्णभावना अतो भावनया कृष्णं समवेता एव बहिःप्राकट्याभावात्तदागमनकाङ्क्षिताः कृष्णमेव जगुः यद्वा यतस्तदागमनकाङ्क्षिताः अतः कृष्णस्यापि सर्वमनःकर्षकस्य भावना मनोरोचिका यथा भवेयुस्तथा समवेता मधुरमिलितस्वरा जगुः यद्वा यतः कृष्णभावनास्तद्ध्यानान्वितास्तन्मनोरोचिकाश्चातः क्वचिद्भावनाप्रादुर्भूतेन क्वचिदन्तर्हितेनैव तद्गानहृतचित्तेन तद्गानतानवितानतालापानुसृ- ललितनृत्यगतिमताः कृष्णेन समवेता एव गायन्त्योऽपि तद्विरहविभ्रमेण ध्यानलयेनैव तं पश्यामो न साक्षादिति भ्रमितचित्तास्तद गमनकाङ्क्षिता जगुः ॥ ४५ ॥

श्रीश्रीशौ राधिकाकृष्णौ सखीः स्वीयान् गुरून् द्विजान् । गिरां ढुण्ढि विदो भक्तान् वन्दे विश्वं हरेर्वपुः ॥

इतिश्री चन्द्रभागाख्य विष्णुसख्यापन्न श्रीरामनारायणविरचितायां श्रीमद्भागवतमहापुराणदशमस्कन्धान्तर्गत-
श्रीरासपञ्चाध्यायीव्याख्यायां भावभावविभाविकायां द्वितीयाध्यायव्याख्या समाप्ता ॥ २ ॥

मूले त्रिंशः ॥ ३० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

पुनर्विरहव्याकुलचित्ताः परस्परं विचारयामासुः अहो कुत्र गत्वा तदन्वेषणं विधेयमिति कयाचिदुक्ते अहो अन्वेषणं प्रियस्य क्लेशमात्रावहं समीपमागता अस्मानालक्ष्य पलायनपरस्य मिलना भावादित्यन्याभिहितम् अहो अहो सत्यं तस्य करुणां विना तत्प्राप्तिर्दुर्घटातस्तदुत्पत्त्युपायो विधेय इत्यपराभिः कथनं सर्वा विचार्य्य तत्कीर्तनमेव सदुपायं निश्चित्य तदर्थं पुनः कालिन्द्याः पुलिनमागता इत्याह । पुनरिति यत्र प्रेष्ठेन पूर्वं सङ्गतिरासीत्तदेव कालिन्द्याः पुलिनं स्वसुखहेतुभूतं प्रसरच्छब्दं यत्र वस्तु लभ्यते तत्रैवान्विष्यत इत्याशयेनागत्य कृष्णभावनाः प्रेष्ठमेव भावयन्ति ध्यायन्तीति तथा तस्य श्रीकृष्णस्यागमनं काङ्क्षितं यासां ताः समवेताः मिलिताः सत्यः कृष्णमेव जगुरूर्ध्वं गानं चक्रुः । विरहजनकदोषनिवृत्त्यर्थं तस्य करुणोत्पत्त्यर्थञ्चोच्चै र्गानं तदर्थञ्च समवेतत्वं कस्याः भाग्यात्स्नेहेन कृपया वागच्छेदित्याशयेन वा समवेताः अन्यां काञ्चिदादाय पुनः पलायनं न कुर्य्यादित्याशयेन वा निवृत्तिपक्षे पुनः पुन मायालक्षणायाः कालिन्द्याः पुलिने शुद्धान्तःकरणे आगत्य सदानन्दस्वरूपे परमात्मन्यभिप्रायवत्यः गतिसामान्यादिति न्यायेनैकार्थबोधकत्वेन मिलिताः तस्यागमने साक्षादेव गतिमाकाङ्क्षितं यासां ताः कृष्णमेव जगुः ॥ ४५ ॥

इति श्रीपरमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिमिश्र-
सूरिकृतायां भागवतगूढार्थदीपिकायां दशमस्कन्धे त्रिंशोऽध्यायः ॥ ३० ॥

रास-रहस्यम्

र० टी०—सर्वा एव वृत्तयः माया लक्षणायाः कालिन्द्याः पुलिने तटस्थानीये तत्कार्यं शुद्धान्तःकरणे पुनः आगत्य पुनः तत्प्राप्य कृष्णभावनाः परमात्मानमेव भावयितुं शीलं यासां ताः, तदागमनकाङ्क्षिताः ततः परमात्मनः एव आगमनाकाङ्क्षा प्रापणाभिलाषा यासां, ताः, "गतिसामान्यादि"ति न्यायेन एकार्थबोधकत्वेन मिलिताः सत्यः कृष्णं परमात्मानं ब्रह्मावेदकश्रुतीर्जुगुः परस्परसम्बादरूपेण विचारं कृतवत्यः ॥ ४५ ॥

इति रहस्ये द्वितीयोऽध्यायः ॥ ३० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कुत्र तस्थुरित्याकाङ्क्षायामाह । पुनः पुलिनमिति । यत्र पूर्वं श्रीकृष्णेन सङ्गतिरासीत्तदेव कालिन्द्याः पुलिनमागत्य कृष्णं भावयन्ति प्रार्थयन्तीति कृष्णभावनाः कृष्णागनं काङ्क्षितं वाञ्छितं यासां ताः समेताः कृष्णं जगुः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्रिंशाध्यायार्थप्रकाशः ॥ ३० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तर्हि किं जातमित्याकाङ्क्षायामाह । पुनः पुलिनमागत्येति पूर्वं पुलिने स्थिता यत्र तत्रैव पुनरागताः ननु विवेकरहिताः कथं तत्रानतास्तत्राह । कृष्णभावना इति कृष्ण एव भावना यासां तेन भगवदिच्छया भगवत्प्रेरणया तत्रैव स्थाने भगवान् रतिं करिष्यतीति निश्चित्य तत्स्थानमस्माकं हितकरमिति तत्रैवागताः ततः कस्या वा भाग्यात् स्नेहेन कृपया वा आगच्छेदिति सन्देहात् समवेता जाताः तदा साधनान्तरमलभमानाः कृष्ण सदानन्दं जगुः दोषनिवारणे हरिगुणगानमेव साधनमिति निवृत्ते पुनर्दोषे स्वयमेवायास्यतीति तदागमनकांक्षया जगुः श्रीकृष्णगोपिकास्तत्र द्विविधा नवधा गुणौ समुदायेन भिन्नात्रा गतगर्वाः असाधनाः । हरेर्गानं प्रियं मत्वा जीवनाथमपि क्रिया स्वसन्देहात्तु मिलिता जगुर्नानाविधैर्गुणैः ॥ ४५ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे सप्तविंशाध्यायः विवरणम् ॥ २७ ॥
(अन्य मते त्रिंशोऽध्यायः ॥ ३० ॥)

श्रीसुबोधिनी-सारः

पुनः कालिंद्याः पुलिनमागत्य कृष्णे भावना यासां ताः समवेताः संमिलिताः कृष्णागमनवांछिताः कृष्णं जगुः ॥ ४५ ॥

इति श्रीमद्भागवते दशमस्कन्धे सुबोधिन्यां टीकायां त्रिंशोऽध्यायः ॥ ३० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'ततः किं जातम् ? ' इत्यपेक्षायामाह—पुनरिति । समवेताः सम्मिलिताः सर्वा एव गोप्यः यत्र पूर्वं कृष्णेन सङ्गतास्तदेव कालिन्द्याः पुलिनं पुनरागत्य कृष्णभावनाः कृष्णध्यानपराः सत्यः कृष्णमेव जगुरित्यन्वयः । तत्र हेतुमाह–तदागमनं काङ्क्षितं यासां ता इति ॥ ४५ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने । त्रिंशत्तमो गतो वृत्तिकृष्णान्वेषणनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

पुनरिति ॥ समवेताः संमिलिताः सर्वा एव गोप्यः यत्र पूर्वं कृष्णेन सङ्गतास्तदेव कालिन्द्याः पुलिनं पुनरागत्य कृष्णभावनाः कृष्णध्यानपराः तदागमनं काङ्क्षितं यासां तादृश्यः सत्यः कृष्णमेव जगुः ॥ ४५ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमत्रिंशेऽध्याये व्यधादिमाम् ॥

इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायां त्रिंशोऽध्यायः ॥ ३० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृष्णे भावना प्रीतिर्यासां ताः । समवेताः । संमिलिताः । तदागमनस्य श्रीकृष्णागमनस्य कांक्षा इच्छा संजाता यासामिति तदागमनकांक्षिताः ॥ ४५ ॥

इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानदस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धव्याख्याने रासक्रीडायां कृष्णान्वेषणं नाम त्रिंशोऽध्यायः ॥ ३० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पुनरिति ॥ किं तु पूर्वं कृष्णेन यत्र संगतास्तदेवेति शेषः । कालिन्द्याः पुलिनं, पुनः आगत्य समवेताः समुदिताः, कृष्णभावनाः श्रीकृष्णध्यानासक्ताः, तस्य श्रीकृष्णस्यागमनमेव काङ्क्षितमीप्सितं यासां ताः एवंभूताः सत्यः कृष्णमेव, जगुः ॥४५॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे त्रिंशोऽध्यायः ॥ ३० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पुनः पुलिनमिति १०.३०.४५.

कृत्वागमेक्षणमुखाखिलसत्प्रयत्नां स्तास्तद्विशुद्धपुलिने निखिला युवत्यः ।
ऐशं यशो विशदमेव तदाऽन्वगायन् श्रीशाप्तये तदधिकं सकलात्स्फुटं तत् ॥ २९५ ॥
एवं प्रतीकसमुपासन–वासितात्मा योगी निजान्तरवधारित–चित्स्वरूपः ।
योग्यागमाद्यनभिलक्षितमात्मरूपं गायेदनन्यगतिराश्रयदं जनस्य ॥ २९६ ॥
मद्वश्यगीताभिनिविष्टधीर्यो मत्प्राप्तिरस्याश्विति माधवाशयम् ।
ता बोधयन्त्य, पुलिने चरन्त्यः श्रीशाप्तये गातुमुपाक्रमंस्तदा ॥ २९७ ॥
गीतेन मोहितधियो वयमस्य लब्धा इत्यन्तराहितदृशो व्रजयोषितस्ताः ।
तं प्राप्तुमप्यपरयत्न–विकुण्ठभावाः साध्वारभन्त नुतितोऽद्भुतगीतमेव ॥ २९८ ॥
प्रत्येकस्मिन्नशक्तेऽपि सङ्घे शक्तिः फलप्रदा । युक्तं जगुस्तुल्यचित्ताः सर्वाः श्रीशेक्षणोत्सुकाः ॥ २९९ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसुरिविरचिते भक्तिरसायने त्रिंशोऽध्यायः ॥ ३० ॥

कृष्णप्रिया

राजन् ! रासरमण श्री यमुना जो के पुलिन में किया था, गोपियाँ वहीं कालिन्दी जी के पुलिन आई, वे सब कृष्णभावना से समरथी, श्रीकृष्ण भगवान के दशम की उन की उत्कट लालसा थी, वह सब मिलकर भगवन प्राति की भावना से भगवान के गुणों को गाने लगी ॥४५॥

श्री मद्भागवत दशम स्कन्ध निरोध लीला के सामस प्रकरण के चतुर्थ फल प्रकरण मैं वीर्य धर्म निरूपक ३० वाँ अध्याय सम्पूर्ण ॥ ३० ॥

* * *

अथैकत्रिंशोऽध्यायः

श्लोकाः	ललित.	वसंत.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
१९	१८	१	१	८८४	४	३६	८८८	२७॥	

गोप्य[1] ऊचुः

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ।
दयित दृश्यतां [3]दिक्षु तावकास्त्वयि [4]धृतासवस्त्वां विचिन्वते ॥ १ ॥

कर्दमक्षमा

अन्वयः—हे दयित ! ते, जन्मना, अत्र, इन्दिरा, शश्वत्, श्रयते, हि, व्रजः, अधिकम्, जयति, हे, दयित, त्वयि, धृतासवः, तावकाः, दिक्षु, त्वाम, विचिन्वते, तत्, दृश्यताम् ॥ १ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एकत्रिंशे निराशास्ताः पुनः पुलिनमागताः ॥ कृष्णमेवानुगायन्त्यः प्रार्थयंते तदागमम् ॥ १ ॥

जयतीति । हे दयित ते जन्मना व्रजोऽधिकं यथा भवति तथा जयत्युत्कर्षेण वर्तते । यस्मात्त्वमत्र जातस्तस्मादिन्दिरा लक्ष्मीरत्र हि श्रयते व्रजमलंकृत्य वर्तते । एवं व्रजे सर्वस्मिन्मोदमानेऽत्र तु तावकास्त्वदीया गोपीजनास्त्वयि त्वदर्थमेव कथञ्चिद् धृता असवो यैस्ते त्वां विचिन्वतेऽतस्त्वया दृश्यतां प्रत्यक्षीभूयतामिति । यद्वा अस्माभिर्भवान् दृश्यताम् यद्वा एवं त्वया दृश्यतामेते विचिन्वत इति ॥ १ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

निराशाः कृष्णोपलब्धौ । ताः गोप्यः । तदागमम् कृष्णागमनम् (१) वेदान्तानधिकारिणां साधनचतुष्टयसंपत्तिरहितानां हरिकीर्तनमेव तदुपासनं स्यात्तत्प्रसादजनकत्वेनेत्यतः स्त्रीभूतानां गोपीनामुपासनमाह । चित्ते सन्निहितत्वात्त इति । व्रजंति गागोपावासार्थमत्रेति व्रजो गोपावासस्थानम् । श्रयत आश्रयते । त्वयाऽविनाभूतत्वाच्छ्रिय इति भावः । अत्र व्रजे । यतस्त्वदर्थं धृतप्राणा अतो हेतोः । अन्यथा प्राणहानिः स्यादिति भावः । दयितविरहे दयिता न जीवेयुर्नाम, तत्राह–त्वयि धृतेति । युष्मान्विहायाहमन्येषां प्रत्यक्ष एवेति चेदत्राहुः–यद्वेति । कालान्तरे दर्शनविषयी भवामि नाधुना, तत्राहुः–यद्वेति । एवमधुनैवैते गोपीजना मां विचिन्वते मृगयन्त इति हेतोस्त्वया दृश्यतामिति सम्बन्धः । कनकमंजरी नभ्र रौ लगौ" इति सूत्रात् ॥ पूर्वं जगुरित्युक्तं तदेव किमित्यत आह–गोप्य ऊचुरिति । हे दयित ते जन्मना व्रजो जयति । सम्बन्धिविशेषानुक्त्या सर्वेभ्य एव लोकेभ्य उत्कर्षेण वर्तत इत्यर्थः । वैकुण्ठलोकोऽपीदृश इति तद्व्यावृत्त्यर्थमाह–अधिकं यथा स्यात्तथेति । वैकुंठः सर्वोत्कृष्ट एव व्रजस्तु सर्वोत्कृष्टतम इत्यर्थः । तल्लिगान्तरमाहुः–इन्दिरा महालक्ष्मीः शश्वत् श्रयते सेवते 'श्रिञ्—सेवायाम्' । वैकुंठे तु सैव सेव्यते इत्यतो वैकुंठादपि व्रजः सर्वसमृद्धिपूर्ण इति भावः । एवं तद्धेतुक महासुखपरिपूर्णे व्रजे त्वत्प्रेयस्यो वयमेव सर्वलोकादृष्टश्रुतचरपरमारुह्यदुःखं यदनुभवामस्तस्मात्त्राणं त्वां न प्रार्थयामहे, किं त्वेकवारं दृष्ट्वा स्वनयने सफलयेत्याहुः– अत्र वृंदावने हि निश्चितमेव दृश्यताम् । किं द्रष्टव्यम्–तावका जनास्त्वां विचिन्वत इति । कथमेतावत्संतापवत्योऽपि एता न विपद्यंत इति मा संशयिष्ठा इत्याहुः–त्वयि धृता अर्पिता असवो यैस्ते, त्वयैवोन्मादितैस्ते यद्यस्माकमसवोऽस्मास्वेवास्थास्यंस्यदा तेषु विरहानलदग्धेषु सत्सु वयमेतावत्क्षणे मृत्वा सुखिन्य एवाभविष्यामेति । त्वयि तु स्वनाथे महासुखिनि ते दुःखेनैव वर्तते इति कथमसूनां सुखे सति देहा विपद्यन्तामित्यतस्तवास्मदुःखदर्शनात्मकं दुःखं शाश्वतिकमेवेति भावः । अत्र श्लोके प्रदिपादं द्वितीयाक्षरस्यैक्यं तथा प्रथमाक्षरसप्तमाक्षरयोश्च कुत्रचित् ॥ १ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्णैकगम्यो वागर्थो यासां लेखितुमिष्यते । ता एव करुणामय्यः स्वीकुर्वन्तु मदाग्रहम् । पीतश्रीगोपिकागतिसुधासाररसश्रियात् । श्रीधरस्वामिनां किञ्चिदवशिष्टं विचार्यते । अधिकं सर्वतः । व्रजे न तत्र तत्र ह्यालक्ष्यते । हि यतः । अत्र व्रजे । शश्वत्

---

१. गोपिका ऊचुः । २. साधु तत्र–विज. । ३. त्वा दिदृक्षतां–विज । ४. गता–विज. ।

निरन्तरम् । यद्वा । अधिकमित्यस्यात्राप्यन्वयः । प्रतिमुहुराधिक्येनेत्यर्थः । इन्दिरेति सम्पत्तदधिष्ठात्र्योरभेदेन निर्देशः । तदधिष्ठानेनैव तद्वृद्धेः एवं तत्प्रभावेणात्रत्यानां सर्वेषामेव सर्वमङ्गल जातम् । केवलं दैवहतानामस्माकमेव सदा दुःखं तत्राप्यधिकमिदम् । सर्वज्ञेन परमदयालुनास्मत्प्राणवल्लभेनापि त्वया न ज्ञायत इति । तदधुनान्यत्तावदस्तु तन्मात्रमपि ज्ञायतामिति व्यञ्जयितुं प्रार्थयन्ते दयितेति । दृश्यतां ज्ञायतां दुःखदर्शने सति परदुःखकातरोऽवश्यं साक्षाद्भवेदिति तु निगूढोऽभिप्रायः । किं तद्दुःखं तदाहुर्दिक्षिवति अनेन बहुलपरिश्रमादिकं परिभ्रमणञ्च सूचितम् । तावकास्त्वया स्वीकृतास्तदीयताभिमानवत्यो वा अत एव विचिन्वते अन्वेषणेन बहुदुःखमनुभवन्तीत्यर्थः । अतस्तावकत्वेनैवैतद्दुःखम् । अन्यथा तदनुत्पत्तिरिति भावः । तत्र दयितेत्यनुकम्पां जनयन्ति दयतेऽनुकम्पते इति निरुक्त्या दैन्यात् दयते चित्तमादत्ते दयित इति क्षीरस्वामिनिरुक्त्यनुसारेण तु किञ्चिदुपालम्भतोऽपि तामेव । ननु । (कै अव रहिअं पेम्मं णहु चिठ माणवे लोइ । जइ होइ कस्स विरहो विरहे होन्तम्मि को जिअइ)। कैतवरहितं प्रेम न तिष्ठति मानुषे लोके । यदि भवति कस्य विरहो विरहे भवति को जीवति । इति न्यायेन दयितस्य विरहे दयिता न जीवेयुर्नाम । सत्यं त्वत्त एव न म्रियन्ते इत्याहुस्त्वयि निमित्ते धृतासवः त्वत्प्राप्त्याशया जीवन्तीत्यर्थः । यद्वा । त्वयि विषये असवः प्राणा इन्द्रियाणीति यावत् । त्वन्न्यस्तत्वेन पश्यन्तीत्यर्थः । एषु श्लोकेषु पदवर्णादिसाम्यायः प्रायः प्रतिपादं द्वितीयाक्षरस्यैक्यम् । तथा दलद्वये कुत्रचिदन्यत्रापि क्वचित् प्रथमाक्षरसप्तमाक्षरयोश्चेति कुत्रापि कथञ्चिद्विचार्यम् । तच्च मुक्ताफलटीकायां विवृतमस्तिः तत्र दृश्यतामित्यत्र तेषां प्रथमार्थः पचेर्विक्लित्तिविक्लेदनावद्दृशेरपि प्रकाशप्रकाशनार्थत्वात् समर्थनीयः ॥ १ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णैकगम्यो वागर्थो यासां लेखितुमिष्यते । क्षान्त्वा गो-व्रजदेव्यस्ता भक्तिं तन्वन्तु मे निजाम् ॥
पीत-श्रीगोपिकागीत-सुधासाररसश्रियाम् । श्रीधरस्वामिनां किञ्चिदुच्छिष्टमुपचीयते ॥

अधिकं पूर्व्वतः सर्व्वतो वा श्रीवैकुण्ठादपि वा, व्रजेन तत्रत्या लक्ष्यन्ते, हि यतः, अत्र व्रजे शश्वन्निरन्तरम्, यद्वा, अधिकमित्यस्याप्यत्राप्यन्वयः, मुहुराधिक्येनेत्यर्थः । मूर्त्तिमती लक्ष्मीरिव उत्तरोत्तरं वर्द्धमाना परमोत्तमा सम्पूर्णा सर्व्वसम्पत् श्रयते, अनपेक्ष्यमाणापि स्वयमेव सेवते; यद्वा, वैकुण्ठेश्वर्य्यपि स शरणागतभावेन किंवा संकोचतो निरन्तरावस्थित्यशक्त्या मुहुरायातयातैर्वसति सदाभिनववैकुण्ठादधिकसम्पत्तेः, किंवा प्रतिगृहं भ्रमन्त्याः परमविनयनम्राया लक्ष्म्या एव साक्षाद्दर्शनात् । हीति निश्चये वा । तथा चोक्तम् (भा० १०।५।१८) 'तत आरभ्य नन्दस्य' इत्यादि मधुपुर्य्यामपि जन्मना व्रजस्यैवोत्कर्षसिद्धेः । किंवा तासां प्रायो व्रज एव तज्जन्मनिश्चयाज्जन्मना व्रज इत्युक्तम्, एवन्तत्प्रभावेणात्रत्यानां सर्व्वेषामेव सर्व्वमङ्गलं जातम्, केवलं दैवहतानामस्माकमेव सदा दुःखम्, तत्राप्यधिकमिदम्, सर्व्वज्ञेन परमदयालुनाऽस्मत्प्राणवल्लभेनापि त्वया तन्न ज्ञायते इति; तदधुनान्यत्तावदस्तु तन्मात्रमपि ज्ञायतामिति प्रार्थयन्ते—दयितेति । दृश्यतां ज्ञायताम्, किंवा साक्षात्क्रियताम, तस्य प्रत्यक्षत्वात् दुःखदर्शने सति परदुःखकातरोऽवश्यमागच्छेदिति भावः । किन्तदाहुः—दिक्षिवति । अनेन बहुलपरिभ्रमणदुःखं सूचितम्, तावकास्त्वया स्वीकृताः, त्वदीयाभिमानवन्तो वा, अतएव विचिन्वते, अन्वेषणेन बहुदुःखमनुभवन्तीत्यर्थः । अतस्तावकत्वेनैवैतद्दुःखमन्यथा तदनुत्पत्तिरिति भावः । वयमिति, गोपीजना वेति साक्षादनुक्तिः, परित्यागेन हताभिमानतया परमदैन्येन तथोक्तावप्यशक्तेः, किंवा निजार्त्तिभरेण सर्व्वेषामपि तदीयानां दुःखनिवेदनेच्छया सामान्येनैवोक्तेः; किंवा सामान्योक्त्यैवार्थगाम्भीर्य्यापत्तेरिति दिक् । एवमग्र अपश्यतामित्याद्यपि । ननु निबुद्धयस्तर्हि कस्यचिदन्यस्य भवत, तत्राहुः—दयितेति, त्वदेकप्रियेभ्यो जनेभ्यः कथञ्चिदन्यसम्बन्धमात्रमपि न वोचते इत्यर्थः । ननु—'कइअव-रहिअ पेम्मं णहि होइ माणुषे लोए । जइ होइ कस्स विरहो विरहे होन्तम्मि को जिअइ ॥' इत्यादिन्यायेन दयितस्य विरहे दयिता न जीवेयुर्नाम, सत्यं त्वत्त एव न म्रियन्त इत्याहुः । त्वयि निमित्ते धृतासवः, त्वत्प्राप्त्याशया जीवन्तीत्यर्थः । यद्वा, त्वयि विषये त्वन्न्यस्तत्वेन प्राणा न नश्यन्तीत्यर्थः । एषु श्लोकेषु पदवर्णादि साम्यापेक्षया प्रायः प्रतिपादं द्वितीयाक्षरस्यैक्यम्, तथा दलद्वये कुत्रचिदन्यत्रापि क्वचित् प्रथमाक्षरषष्ठाक्षरयोश्च कुत्रापि कथञ्चिद्विचार्य्यम्, तच्च श्रीमुक्ताफलटीकायां विवृतमेवास्ति ॥ १ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

जयति प्रकृष्टा भवति इन्दिरा गतिः समृद्धिः अत्र व्रजे ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तद्गुणानेव गायन्त्यः कृष्णं जगुरिति चोक्तं तदेव गानं प्रपञ्चयत्येकत्रिंशेन जयतीति । व्रजस्ते तव जन्मना हेतुना नितरां जयति उत्कर्षं प्राप्नोति किञ्च तव जन्मना इन्दिरा लक्ष्मीरपि नित्यमत्र वसते व्रजमलंकुर्वती अस्माभिरलक्ष्यमाणा चाश्रयत इत्यर्थः । यद्वा ते अत्र व्रजे श्रयते त्वामिति शेषः । नित्यानपायित्वादिति भावः । इन्दिरा महती समृद्धिर्वा एवं सर्वस्मिन् व्रजे मोदमाने तत्र त्वदीया वयन्तु त्वयि निमित्ते त्वदर्थमेवेत्यर्थः कथञ्चिद्धृता असवः प्राणा याभिस्तथा भूतास्त्वामेव मृगयन्ते अतस्त्वया दृश्यताम् । अत्र वक्तृबाहुल्यात्प्रतिश्लोकमवतारणद्राष्टव्या तत्र यथा सम्भवं पूर्वोत्तरं वचसां सगतिरुह्यते दृश्यतां प्रत्यक्षीभूयतामस्माकमितिशेषः ॥ १

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वेदान्तानधिकारिणां मुमुक्षुविविदिषूणां समर्थानां हरेः सङ्कीर्तनमेव तदुपासनं स्यात्तत्प्रसादजनकत्वेनेत्यतः स्त्रीभूतानां गोपीनामुपासनाप्रकारं निरूपयत्यस्मिन्नध्याये । तत्र गोप्यः चित्ते संनिहितत्वात्सम्बोध्यागायन् । जयतीति । कृष्णेत्यध्याहार्य हे कृष्ण ! व्रजन्ति यस्मिन्निवासङ्गोपा इति गोपनिवासस्थानं व्रजः अयन्ते तव जन्मना अधिकं जयति सर्वोत्कर्षेण वर्तते तत्र हेत्वन्तरं चाहुः । श्रयत इति । तत्र व्रजे "इदि परमैश्वर्ये,, इति धातुः इन्दिमैश्वर्यं राति ददातीति नित्यैश्वर्यरूपत्वादिन्दिरा श्रीः साऽधुना श्रयते आश्रयते हि यस्मात्तस्माच्चेत्यर्थः तव जन्मनिमित्तं श्रियः श्रयणं च त्वयाऽविनाभूतत्वाच्छ्रिय इति भावः । स्वाभिप्रायं दर्शयन्ति । दयितेति हे प्रेष्ठ ! भवान् स्वात्मनैव त्वां दिदृक्षतां द्रष्टुकामानां त्वयि गतासवः समर्पितप्राणाः त्वा त्वां विचिन्वते साकाङ्क्षत्वाद्दर्शनदानं युक्तमित्यर्थः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वृषेति वृषमयात्मजात् वत्सासुरात् मयात्मजाद्व्योमासुराच्चेत्यर्थः ॥ १-२-३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ भगवद्गानं सर्वोत्कर्षयुक्तं भवतीति सर्वोत्कर्षवाचिना 'जयति' शब्देन तदारम्भः कर्तुं योग्य इति तथैवाहुः—जयतीत्यादि । तव जन्मना प्रादुर्भावेन व्रजोऽधिकं जयति, भूवैकुण्ठत्वाज्जयत्येव, सम्प्रति त्वं प्रादुर्भावेनाधिकं जयति, भौमवैकुण्ठत्वात । तत्र हेतुः—इन्दिरा लक्ष्मीः शश्वदेवात्र हयत्रैव श्रयते अत्रैव तिष्ठतीत्यर्थः । अतो व्रजस्य सर्वोत्कर्षे सति व्रजस्थानामस्माकमेतादृशं दौस्थ्यमनुचितम् , तदस्य खण्डनार्थं त्वद्दर्शनं प्रार्थयाम इत्याहुः—दयितेत्यादि । हे दयित ! तावका जना अस्मद्विधरूपास्त्वां दृश्यतां विचिन्वते, तव दर्शनं प्रार्थयन्त इत्यर्थः । वृक्षमवचिनोति फलमितिवत् चिञो द्विकर्मकत्वात्त्वं दृश्यो भवेत्याशयः । त्वद्दर्शनमेव काङ्क्षितमन्यथा व्रजोऽधिकं जयतिशब्देन नेयौ । इन्दिरा श्रयत इति च यत् तत् किं तेनास्माकं कृतार्थता नेति वाक्यार्थः ॥ १ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

जयतीत्यादि । मङ्गलार्थं प्रथमतो जयति-शब्दोपादानम् , यद्यपि भूरेव जयति, तथापि व्रजस्याधिको जय इत्यधिकशब्दोपादानम् । जन्मना प्रादुर्भावेण, 'जनि प्रादुर्भावे मनि सिद्धम्' तव प्रादुर्भावसमकालमेव श्रीरपि प्रादुर्भूता, सा क्षणमपि त्वां विना स्थातुं न शक्नोतीत्याहुः—श्रयत इत्यादि । श्रिया सह विहरतो मम भवतीभिः किमिति सत्यमेव, किन्तु त्वया सह विहरणं नाभिलषामः, अपि तु केवलं दर्शनमेवेत्याहुः—दयितेत्यादि हि दयित ! त्वमतिदूरवर्ती न भवसि, निकटस्थ एव यतस्त्वां दृश्यतां विचिन्वते 'चिञ् धातुरयं द्विकर्मकः' दृश्यो भवेत्यर्थः । दिक्षु प्रतिदिशम् , अथवा 'दिश अतिसर्जने' इत्यस्य क्विबन्तस्य रूपे दिश आदेशास्तेषु आदेशेषु तावकाः, न केवलं तावकाः त्वयि धृतासवश्च तावका जना इति पुंलिङ्गता अन्यथा तावक्य एव ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एकत्रिंशे प्रेममधुस्वरताळादिसौरभा । गोपीगीताम्बुजश्रेणी ष्णाल्याकर्षिणी बभौ ॥
सनातनेभ्यः स्वामिभ्यः श्रीगुरुभ्यो नमो नमः । यदुच्छिष्टैकजीवातुश्चेष्टे सम्प्रति श प्रति ॥

पूर्वं जगुरित्युक्तं तदेव किमित्यत आह । गोप्य ऊचुरिति । हे दयित ! ते जन्मना व्रजो जयति सम्बन्धिविशेषानुक्त्या सर्वेभ्य एव लोकेभ्य उत्कर्षेण वर्त्तत इत्यर्थः । वैकुण्ठलोकेऽपीदृश इति तद्व्यावृत्त्यर्थमाहुः । अधिकं यथा स्यात्तथेति वैकुण्ठः सर्वोत्कृष्ट एव । व्रजस्तु सर्वोत्कृष्टतम इत्यर्थः । तल्लिङ्गान्तरमप्याहुः इन्दिरा महालक्ष्मीः शश्वत् श्रयते सेवते "श्रिञ् सेवायाम्" वैकुण्ठे तु सा एव सेव्यत इत्यतो वैकुण्ठादपि व्रजः सर्वसमृद्धिपूर्ण इति भावः । एवं तद्धेतुकमहासुखपरिपूर्णे व्रजे त्वत्प्रेयस्या वयमेव सर्वलोकादृष्टश्रुतचरपरमासह्यदुःखं यदनुभवामस्ततस्तत्त्राणं त्वां न प्रार्थयामहे किंत्वेकवारं दृष्ट्वा स्वनयने सफलयेत्याहुः । अत्र वृन्दावने । हि निश्चितमेव । दृश्यतां किं द्रष्टव्यं तावका जनास्त्वां विचिन्वते इति कथमेतावत् संन्तापवत्योऽप्येतावन्निपद्यन्तु इति मा संशयिष्ठा इत्याहुः । त्वयि धृता अर्पिताः असवो यैस्त्वयैवोन्मादितैस्ते यद्यस्माकमसव अस्मास्वेवास्थास्यंस्तदा तेषु विरहानलदग्धेषु सत्सु वरमेतावत् क्षणे मृत्वा सुखिन्य एवाभविष्यामेति । त्वयि स्वनाथे महासुखिनि ते सुखमेवानु वर्त्तन्ते इति कथमसूनां सुखे सति देहा विपद्यन्तामित्यतस्तु वास्मद्दुःखदर्शनात्मकं सुखं शाश्वतिकमेवेति भावः । अत्र श्लोके प्रतिपादं द्वितीयाक्षरस्यैक्यं तथा प्रथमाक्षरसप्तमाक्षरयोश्च । एवमन्येष्वपि श्लोकेषु प्रायः क्वचित् क्वचिदस्ति तच्च मुक्ताफलटीकाकारैर्विवृतम् ॥ १ ॥

रसिकाह्लादिनी-टीका

एवं तावत् व्रजस्य मङ्गलं कथयन्त्य स्वकीयं दैन्यमावेदयन्ति जयतीति, ते तव जन्मना व्रजः वैकुण्ठादप्यधिकं यथा स्यात् तथा जयति उत्कर्षेण वर्तते, नेयं लीला वैकुण्ठे वर्तते । ननु मथुरायामेव जन्म इति चेत्तत्राहुः । अत्रैव तज्जन्म प्रसिद्धेः यदि

मथुरायामेव जन्माभविष्यत्तदा तत्रैव मङ्गलमभविष्यत् अमङ्गलरूपस्य कंसस्य विद्यमानत्वात्। देवकीवसुदेवयोर्बन्धनरूपस्याऽमङ्गलस्य दृष्टत्वाच्चेत्यन्यथा उपपत्याऽत्रैव। तव जन्मनान्यत्रेति किं च "बहूनि सन्ति नामानि रूपाणि च सुतस्य ते" इति गर्गोक्त्या नन्दसुतत्वेन प्रसिद्धेरतस्तव जन्मात्रैव अन्यच्च लिङ्गातरमाहुः। अत्र व्रजे यस्मात्त्वं जातस्तस्मादिन्दिरा लक्ष्माः शश्वत् सर्वदा श्रूयते। व्रजवासिनामनुग्रहमाकांक्षतीव सेवते। वैकुण्ठे सेवैका भार्या तत्रैव तस्या उत्कर्षः। अत्र तु तादृश्या बद्धाः सन्ति। कदा सावसरो भविष्यति इत्येवमाकांक्षती निरन्तरं सेवते। अन्यत्र लक्ष्मीस्थित्या लोकस्योत्कर्षः। अत्र तु व्रजे स्थित्या लक्ष्म्या उत्कर्षः। सा हि पतिव्रता पत्यधीना पतिस्तु व्रजाधीनः तदुक्तमत्रैव "नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरूचां कुतोऽन्या। रासोत्सवेऽयं भुजदण्डगृहीतकण्ठलब्धाशिषां य उद्गाद् व्रजवल्लवीनाम्" इति। अतस्तव जन्मना व्रजोत्कर्षस्य सार्वजनीनं प्रसिद्धेः। ततोऽपि तव न कापि हीनतास्ति। एवं सर्वत्र व्रजे मङ्गलजातेऽस्माकमेवाऽमङ्गले हेतुं न लक्ष्ययामः निरपराधत्वात् ज्ञाते प्रतीकारं विधास्यामेति। हे दयित प्राणवल्लभ त्वया दृश्यतां एताः मदीयाः मत्कृते दुखं प्राप्नुवन्तीति। किं तद्दुःखं तदाहुः। तावकास्त्वदीया गोपीजनाः दिक्षु त्वां विचिन्वन्ति इति। अन्वेषणेन बहुदुःखमनुभवन्ति तावकत्वाभावे दुखं न स्यादेवेत्यर्थः यद्वा त्वया पश्यतां प्रत्यक्षीभूयतां। ननु प्रियविरहे जीवनमप्यसम्भावितमिति चेत्तत्राहुः तावकास्तदीयास्त्वयि घृतासव इति। त्वयि निमित्ते धृतासवस्त्वत् प्राप्त्याशया जीवन्ति नैराश्ये सद्य एव मरणं भवेदिति। यद्वा त्वयि विषये धृता न्यस्ता असवो याभिस्ता त्वया रक्षितानां प्राणानां नाशदर्शनात्कथं जीवन्तीत्यर्थः। एवं भूताज्जीवनान्मृतिः श्रेयसी त्वया दृश्यतां न जीवनं न चास्माकं मृतिरिति। एकामवस्थां देहीतिप्रार्थनम्॥ १॥

विशुद्धरसदीपिका

गीतमेवाह—गोप्य ऊचुरित्यारभ्य यावदध्यायम्। अत्र यद्यपि सर्वासामेव गानं सम्भवति तथापि समवेता इत्युक्तेः समानभावापन्नानामेव तज्ज्ञेयं नित्यसम्बन्धत्वात्समवायस्य तच्च यथास्थानं दर्शयिष्यामः। जयतीति। हे दयित! परमदयालो! अस्मत्प्राणनाथेति वा एवं चेदं प्रेयसीभावानां कन्यानां च गानमिति रुचितं ते जन्मना व्रजः अधिकं सर्वतो जयति "वृन्दावनं सखिभुवो वितनोति कीर्ति"मिति व्रजे तदाश्रितो जनसमूहो लक्ष्यते तत्र वयं किमिति दुःखिताः इति भावः। तथा इन्दिरा सर्वसम्पदधिष्ठात्री शश्वन्निरन्तरमत्र श्रयते आश्रयते हि निश्चितं तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमानिति जनश्रुतेरेवमुक्तं ततः किमस्मास्वेव विपादिति भावः। हहो ज्ञातं नास्मास्वन्यः कश्चिद्दोषः परं तावका इति निर्वेदोक्तिः कुत एतत् यतः त्वयि निमित्ते धृतासव इति तदपि कुतः त्वां विचिन्वत इति दृश्यतां त्वयेति शेषः प्रत्यक्षीभूयतामित्यर्थः। यद्वा अधिकतरमिदमेव दुःख सर्वज्ञेन परमदयालुना अस्मत्प्राणनाथेनापि त्वया न ज्ञायत इति तदिदानीं तावन्मात्रन्तु ज्ञायतामिति व्यञ्जयितुं प्रार्थयन्ते। दयितेति। दृश्यतां ज्ञायतामित्यर्थः। दृग्ज्ञाने ज्ञातरि त्रिषु" इत्यमरः। ततश्च परदुःखदर्शनकातरोऽस्मासु दययेदिति गूढोऽभिप्रायः यद्वा अस्माभिभवान् दृश्यतां किंवा त्वयि धृता असवो याभिस्ताः विगतासवोऽपि त्वां विचिन्वत इत्याश्चर्यं त्वया दृश्यतां कौतुकीत्वादायास्यतीत्यपदेशोक्तिः। यद्वा ननु यदि मामकास्तर्हि मां विना कथं जीवथ तत्राहुः। त्वयीति। त्वयि विषये धृताः प्राणा इन्द्रियाणि यासां ताः एवं च यद्यसवोऽस्मासु भवेयुस्तर्हि न जीवेम त्वयि न्यस्तत्वात्तन न नश्यन्तीति भावः। यद्वा त्वयि निमित्ते धृतासवः अस्मद्विरहे तवापि वैमनस्यं स्यादेव दयितत्वात्तन्माभूदित्येतदर्थं जीवाम इति भावः। एवं हि चकोरीणां चन्द्रत्वमेववास्मदिन्द्रियाणां जीवातुर्भव अन्यथा निषेव्यसरितां पत्युस्तटीः पक्षिगणाश्चिरं यत्पिबन्ति सरस्तोयं सैव लज्जामहोदधेरित्यभियुक्तोक्त्या तवैवापत्रपा स्यादिति तथा विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतमिति न्यायात्त्वत्पालिताशालताच्छेदेनानुचितत्वमपि स्यादित भावः। वयं तु त्वेदकजीवना अनन्यगतिका एवेति यद्वा—

विरहार्त्त्यग्निभीतोऽयं मृत्युश्येनो विमुञ्चति। प्राणपक्षिणमेतद्धि निश्चेतव्यं दयानिधे!॥

इति संक्षेपः! एतेषु च गीतेषु पदवर्णादिसाम्यापेक्षया प्रायः प्रतिपादं द्वितीयाक्षरस्यैक्य तथा दलद्वये कुत्रचिदन्यत्रापि क्वचिच्च प्रथमसप्तमाक्षरयोरिति चित्रत्वमपि ततश्च सकलचातुर्य्यचर्चितर संज्ञासमज्ञायां स्वगुणैनपुण्यमारोपयन्ती वाग्वदेवी नित्यदा ज्ञाताऽज्ञातापि परिचरतीत्येव गम्यते॥ १॥

श्रीरामनारायणकृता भावभावविभाविका

श्रियं हरिं गुरून् विप्रान्विदो भक्तान् गिरामजम्। ढुण्ढि शिवां शिवं दन्दे विश्वमेतत्तदात्मकम्।
वन्दे राधां सखीरिच्छंस्तदुच्छिष्टां हरेरितम्। कृष्णैकगम्यतद्गीतभावार्थस्य च सन्मितम्॥

"पञ्चाध्याय्यां तृतीयेऽस्मिन् प्रेमभावसमन्वितम् वर्णितं गोपिकागीतं कृष्णाविर्भावकं शुभ" तद्गीतमेवाह। श्रीगोप्य इति। पूर्वं पुनः पुलिनमागत्येत्युक्त्या धाममाहात्म्येन प्रियप्राप्तिमिच्छन्त्यो गीतारम्भे भगवद्गुणान् वर्णयन्त्यस्तत्संबन्धेनैव धाम स्तुवन्ति जयतीति। जयति शब्दोऽत्र मङ्गलाय विनियुक्तोऽपि वाक्यार्थान्वयी मङ्गलार्थत्वाभावे क्रियापदस्यादौ निवेशो न स्वारस्यं

लभेत यथाधुनिकव्रजवासिनो भगवत्प्राप्त्यै प्रदक्षिणादि कुर्वन्ति तथा साक्षाद्भगवद्रूपा गोप्योऽपि तदाविर्भावाय व्रजं स्तुवन्तीत्यद्भुतो व्रजमहिमेति भावः। अन्यत्राचार्य्यत्वकामैस्तत्तद्ग्रन्थकारैस्तत्तद्ग्रन्थारम्भे तत्तत्समाप्तिविख्यातिमुद्दिश्य मङ्गलप्रयोगदर्शनात्तदेव फलमत्र गोपीनां तथोद्देशाभावाद्गीतप्रार्थ्यभगवदभिव्यक्तिमुद्दिश्यैव पदप्रयोगात्तदेवफलं तथावैतद्गीतम्प्रेमभावनयानित्यमनुसन्दधतां गोपीनामिव भगवदभिव्यक्तिरावश्यकीति रहस्यं यद्यपि सदैव व्रजो जयति तव नित्यविहारास्पदत्वात्सर्वोत्कर्षेण वर्त्तते तत्र वैकुण्ठादीनां नित्यविहारास्पदत्वात्सर्वोत्कर्षप्यैश्वर्य्यमिश्रामाधुर्य्यास्पदत्वादसंकुचितस्नेहचेष्टासम्प्रतिपत्तेरत्र तु माधुर्यैकप्राधान्येन तदसङ्कोचमभिप्रेत्य सर्वोत्कर्षमतिः तथापि नित्यविहाराभिज्ञानामेव तज्ज्ञानं नान्येषां तव जन्मना तु अधिकं बहुतमं जयति तत्र व्रजस्य स्वत एवानन्दघनत्वात्तदुत्कर्षस्यात्मार्थत्वासंभवेन सर्वलोकहितार्थत्वासम्भवेन सर्वलोकहितार्थतया परस्मैपदधातुप्रयोगः पूर्वस्मादुत्कर्षाधिक्यान्तरद्योतनाय आहुः। श्रयत इति पूर्वन्तु नित्यविहारास्पदत्वेऽपि अत्रत्यक्लृप्तशक्तीनामत्र त्वया विहारो वैकुण्ठादिशक्तीनान्तु तत्र तत्रैव तव जन्मना तु वैकुण्ठेश्वरी सर्वसंपदैश्वर्य्याद्यधिष्ठात्री इन्दिराप्यत्रैव श्रयते ननु कदाचित्कीदृशी व्रजश्रीरिति परीक्षितुमाश्रिता भविष्यति तत्राहुः शश्वदिति। वैकुण्ठात्प्राणेश्वरस्य तवेहावतारे तत्र मनोऽवलम्बाभावादत्रैव निरन्तरं श्रयते ननु ममात्रागमने मत्प्रसादाय व्रजं शोभयितुं श्रिता भविष्यतीति चेन्न श्रयते इत्यात्मनेपदप्रयोगाच्छ्रयणफलस्यात्मगामित्वप्रतीतेर्व्रजसम्बन्धेनात्मसौभाग्यातिशयायैव श्रयणं नतु तच्छोभार्थं युक्तचैतद्यदा भवांस्तत्स्वामी सच्चिदानन्दघन ईश्वरोऽपि व्रजं विचित्रवात्सल्यशृङ्गारादिरसप्रादुर्भावेन जनोपकाराय श्रयते तदापतिव्रतायास्तस्यास्तदाश्रयणमिन्दिरेत्युपलक्षणं तथा चेन्दिराया ईश्वर्य्या आश्रयणे कैमुत्यन्यायेन सर्वा अपि सर्वगुणाधिष्ठात्र्यो देवतास्तत्तद्गुणैः सह व्रजमेव श्रयन्ते नैतच्चित्रत्—

यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणस्तत्र समासते सुरा इति।

वाक्येनाकिञ्चनाया अल्पाया भक्तेः सद्भावे सर्वगुणैः सह तदधिष्ठातृसुरावासबोधनेन व्रजे भक्तसमूहास्पदे नित्यविहारस्थले तत्रापि तव सर्वजनगोचरत्वेन प्रादुर्भावे किमुवाच्यं तदयस्थानस्य अत एवाधिकम् अधि सर्वतः क सुख यथा स्यात्तथा जयति यद्वा कं शिरोऽधिकृत्य सर्वधामशिरोऽवतंसतया जयति एवं सर्वस्मिन् स्वत एव त्वज्जन्मना चानन्दसंप्लवनिमग्ने व्रजवासिनीनां त्वदीनां नो दुःखं नोचितमित्याशयेनाहुःदयितेति हे प्रियनहिप्रियस्य प्रियाणां दुःखं प्रदातुमुचितं तथा दयतेऽनुकम्पते इति तस्य सम्बोधनं तथाचनह्यनुकम्पयापरदुःखकातराणां दीननैष्ठुर्य्यं युक्तमिति सम्बोधनाभिप्रायः स्वस्वभावमनुसृत्य तावका दिक्षु त्वां विचिन्वत इति दृश्यतां त्वया ज्ञायतां ज्ञात्वा कृपापारवश्ये स्वयमेव प्रादुर्भविष्यति करुणानिधिरिति भावः यद्वा दृश्यतां त्वया प्रत्यक्षीभूयत ननु सर्वे मदीया इति को भवतीनां विशष इति चेन्न सर्वषां तावकत्वेऽपि द्वा सुपर्णा सयुजा सखाया इत्यादिश्रुतिसिद्धसखित्वेऽपि स्वभ्रान्त्या न तथाभिमतिरस्माकन्तु वस्तुतः स्वाभिमत्या च तथात्वं तथा च—

सकृदेव प्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददाम्येतमव्रतं मम॥

इत्यादि वचनैः सर्वभूतभीतिरक्षणप्रतिज्ञानां प्रथमं स्वविरहदुःखं दिक्षु भ्रमणदुःखं मार्गणदुःखमित्येवं दुःखजातमनुचितं किं चात्र चित्रमिदं स्तावका ब्रह्मादयोऽपि त्वां द्रष्टुं व्रजं समायान्ति अत्रत्यास्तत्रापि स्वात्मनिवेदनेन त्वत्स्वीकारेण च तावका दिक्षु त्वां विचिन्वते इति दीपसमीपे तमोन्यायापत्तिः यदि तावकत्वमेव त्वत्तुष्टिकरं तर्हि वयं तावका अपि स्तावका जाता इत्यधुनापि प्रसीद। ननु मदीयाश्चेन्मद्वियोगे कथं जीवथ तत्राहुः। त्वयि धृतासव इति। त्वयि विषये धृता असवो बाह्याभ्यान्तरकरणानि प्राणाश्च याभिरतस्तव गुणगानकथारसपानादिनादिनास्मज्जीवनं त्वत्प्रविष्टप्राणानां मृत्युप्रवेशद्वारा त्वयि निमित्तभूते धृता असवो यासां तास्तथा त्वय्यैवान्तर्य्यामिणो दुःखदानायास्मदसवो धृताः यद्वा त्वयि त्वद्दर्शनार्थं धृता असवो याभिस्तास्तथा च यावत्त्वद्दर्शनाशा तावेदवास्मदसत्रस्तदाशाभङ्गे सद्य एवास्मन्मरणमिति भावः यद्वा त्वयि त्वन्निमित्ते अस्माकं प्रियाणां मरणे तत्र खेदो माभूदिति धृता असवो याभिस्ताः॥ १॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एकत्रिंशे शुभाध्याये गोपिकागीतसंज्ञके। प्रार्थयन्त्यो जगुः कृष्णं प्रेम्णा गोप्य इतीर्य्यते॥

अहो तस्य कलगीतेनाकृष्टा वयं यथा तदन्तिकं प्राप्तास्तथा सोऽप्यस्मद्गीतेनाकृष्टोऽस्मदन्तिकं प्राप्स्यतीत्याशयेन गानप्रवृत्तानां भगवत्प्रियाणां गानमुदाहरति। जयतीति। मङ्गलार्थमादौ जयतीति प्रयोगः तथाच मङ्गलार्थकत्वादादौ क्रियापदप्रयोगो न दोषावहः अधिकमहोव्रज कृतार्थतार्थं कृतावतारेण त्वया सर्वोऽपि व्रजः कृतार्थीकृतस्तत्रत्या वयं किमर्थमुपेक्ष्येमहि इत्याशयेनाहुः। तवाजस्य जन्मादिकारणविधुरस्य जन्मना स्वेच्छयात्र विलसितेन दिव्येन जन्मना प्रादुर्भावेन व्रजस्य स्थानत्त्वाज्जयति समस्तभूमिः भूर्भुवः स्वर्लोकप्रदेशेभ्यः सर्वभ्यो ब्रह्मलोकान्तेभ्यः उत्कर्षेण वर्तते तत्राप्यधिकं वैकुण्ठादपि जयति यद्यपि तत्रापि भगवान् वर्त्तते तथाप्येवं विधं जन्मादायेवंविधा लीला नाचरति यद्यपि जन्मस्थानं मथुरा तथापि तत्रत्यानां तदुपलभ्याद्देवकीवसुदेवाभ्यामपि नन्दयशोदानन्तजन्मोपलब्धमपितु विष्णुस्वरूपदर्शनमात्रमत्रत्यलीलादर्शनन्तु सर्वस्यापि सुकरमतो व्रज एवोत्कृष्टतम इति भावः। ननु मज्जन्मना व्रजस्य परमोत्कर्षो भवतीभिः कथमवगत इति तत्राहुः। श्रयत इति। हि यस्मादिन्दिरा श्रीः अत्र व्रजे श्रयते वैकुण्ठे

तु सैव प्राधान्यात्सर्वैराश्रयत इत्यर्थः। शश्वत्सर्वदा तत्र तु सैव निर्भयाभातस्तस्याः नैश्चिन्त्यान्न सर्वदाश्रयणमावश्यकमत्र तु वह्वीनां सपत्नीनामस्माकं सत्वादवसरलाभाय सर्वदा सेवनं युक्तं च तत् पतिव्रताशिरोमणिभूतायास्तस्याः भक्तेष्वनुग्रहातिशयं ख्यापयितुमन्याधीनतया वर्तमानस्य पत्युरनुवर्तनमिति भावः। यस्मादस्मदर्थमत्र भवतो जन्म यस्माच्च नास्ति लक्ष्म्याः भयं तयाङ्गीकृतत्वादतः हे दयित! दृश्यतां त्वया प्रत्यक्षीभूयतां प्राणप्रियस्य प्रत्यक्षं तव प्राणस्थितिसाधनमिति सम्बोधनाशयः किञ्च तावकाः व्रजस्त्रियस्त्वां दिक्षु विचिन्वते तथा चाऽत्रानुग्रहार्थमवतीर्णस्य तव ब्रह्मादिभिरन्वेषणमुचितं नतु व्रजवासिभिरिति भावः। ननु युष्माकं तादृशीभक्तिर्नास्ति इति कृत्वाहं तिरोहित इति चेत्तत्राहुः। त्वयि धृता असवः प्राणाः सर्वेन्द्रियाणि याभिस्ताः तथाचैवं विधास्त्वदीया अनाथवद्दिक्षु भ्रमन्तीतीदं महदसङ्गतमिति महद्दैन्यं व्यज्यते अनभिज्ञापक्षे हे दयित! ते जन्मना व्रजस्य सर्वोऽपि जनोऽधिकं जयति यद्दिनमारभ्यात्र तव जन्म जातं तद्दिनमारभ्य ब्रह्माण्डस्थेषु मध्ये कस्माच्चिदपि व्रजवासिनां मध्ये कस्यापि पराजयो न जात इत्यैश्वर्य्यस्य पराकाष्ठा ध्वनिता इन्दिरा सम्पदादिरूपा श्रीरपि अत्र व्रजे शश्वन्निरन्तरं श्रयते श्रीरिति स्वनाम्नः सार्थक्याय व्रजमलंकृत्य वर्त्तते हि प्रसिद्धमिदमिदानीं लोकत्रये तथा च नारायणसमो गुणैरिति ज्योतिर्विदग्रगण्येन गर्गाचार्य्येण भवज्जन्मपत्रे लिखिऽतत्वान्नारायणसमत्त्वं त्वय्यनुभूयते व्रजे वैकुण्ठतुल्यत्वमतोऽस्माकं विरहरहितवैकुण्ठवासिसमानत्वं कुतो नास्ति तस्मादस्मास्वपि तथात्वं सम्पादयितुमवश्यमस्माभिर्भवान् दृश्यतां ननु वैकुण्ठवासिनां नारायण इव युष्माकं नाहं प्रेष्ठ इति चेत्तत्राहुः दिक्षु तावका इति सर्वासु दिक्षु यावच्छक्त्याऽद्याप्यऽऽस्माभिरन्विष्यते तथापि भवान्न लभ्यते तत्र वयं किंकुर्म इति भावः तत्रापि तावकाः शश्वदनन्या अत एव त्वामेवानेनासमाहितता निरस्ता ननु परीक्षार्थं तिरोहितेन मयावगतं नाद्यापि युष्मत्प्रेमपरिचयावस्थात्सम्पन्ना मद्विरहोऽपि जीवनादर्शनादितीति चेत्तत्राहुः। त्वयि त्वत्प्राप्त्याशया धृतासवः जीवन्तीत्यर्थः तन्निवृत्त्यातु तावकानां जीवनं दुर्ल्लभमतो झटिति दृश्यतां मरणपर्य्यन्तं परीक्षाया अनुचितत्वादिति भावः। मानिनापक्षे तव व्रजो यासामस्माकं जन्मना अधिकं जयति श्रीश्च शश्वदत्रैव श्रयते तथाभूतास्तावकास्त्वां विचिन्वत इति दृश्यतां ज्ञायतां परमोत्कर्षैश्वर्य्यादिहेतुभूतस्वजनदुःखाऽपरिज्ञानरूपमन्ध्यं नोचितमिति भावः। नच साधारणसम्बन्धः किन्तु प्रेष्ठो भवानिति सम्बोधनाशयः किञ्च त्वयि धृतासवः त्वत्प्राप्त्याशया धृतजीवनाः तथाच तन्निवृत्त्या मृतास्वस्मासु तवापि परमोत्कर्षादिकं नश्यतीति भावः। यद्वा ननु दीयेत मयि वियुक्ते भवतीनामेतावत्पर्यन्तं कथं प्राणा देहे स्थिता इति चेत्तत्राहुः। त्वयीति। कठोरशिरोमणिभूते असंख्यातस्वसखीजनपरमतापहेतुक्रीडापरे स्त्रीदुःखजनितसुखाम्बुधिमग्ने धृताः स्थापिताः प्राणा याभिस्ताः तथाच यथा स्वगृहे दह्यमानेऽप्यन्यदीयगृहस्थं वस्तु न दह्यते तथा त्वयि स्थितत्वादस्मत्प्राणानामेतावत्पर्यन्तं रक्षा जातेति भावः। यद्वा यद्यपि तव जन्मना व्रजोऽधिकं जयति श्रीः शश्वदत्रैव श्रयते तथापि वृथैवेदं सर्वं यतः त्वयि धृतासवस्त्वदर्पितप्राणा दयस्तावकास्त्वां विचिन्वते अद्यापि दुःखिता एव सन्ति तस्मात्सुहृदननुग्राहिकायाः समृद्धेर्वैय्यर्थ्यं दृश्यतां ज्ञायतां तद्वैयर्थ्यपरिहाराय प्रत्यक्षीभूयतामिति वा दयितत्वात्तवेदं हितं वदाम इति सम्बोधनाशयः निवृत्तिपक्षे अधिष्ठानभूतचिदात्मनैवेदं देहादिसमस्तं शोभत इति श्रुतय आहुः। जयतीति। हे दयित! परमप्रेमास्पदः तव जन्मना प्रादुर्भावेन व्रजो देहेन्द्रियसङ्घातो ऽधिकं जयति सत्तास्फूर्तिवत्तयाऽवभासते तथेन्दिराशोभाप्यत्रैव निरन्तरं श्रयते सौन्दर्य्यादिगुणाक्रान्ततया प्रतीयते तस्माद्यस्यात्मनस्तव सत्तादिना मिथ्याभूतस्यात्यन्तमनित्यस्याप्येव प्रतीतिस्तेन त्वया दृश्यतां विद्वदनुभवविषयत्वं प्राप्यतां के ते विद्वांसः इत्यपेक्षायामाहुः ये त्वयि धृतासवस्तावकान्तानि सर्वाणि सटाम्ययुक्त आसतिमत्परःमच्चित्ता मद्गतप्राणा इत्यादिनोक्तलक्षणाः भवदीयास्त्वां सर्वाधिष्ठानभूतं परमात्मानं विचिन्वते अन्वेषणपराः सन्ति तथाच पञ्चकोशविवेकेन च आत्मकान्वेषणप्रकारउक्तस्तैत्तिरीयश्रुतौ तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तरआत्मा प्राणमयः तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तरात्मा मनोमयः तस्माद्वा एतस्मान्मनोमयादन्योन्तरात्माऽविज्ञानमयः तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तरात्मानन्दमयस्तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरपक्षः आनन्द आत्मा ब्रह्मपृच्छं प्रतिष्ठा सन्नेव भवत्यससद्ब्रह्मेतिवेद चेत् अस्तिब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति यद्वा व्रजः श्रुतिकदम्बस्तव जन्मना प्रादुर्भावेन प्रकटवेदार्थभूतेन त्वयाधिकं जयति शोभाञ्च महतीं प्राप्नोति हि यस्मादता ये त्वयि धृतासवस्त्वां विचिन्वते तेषां श्रुतिकदम्बे भवान्दृश्यतामित्यर्थः। यद्वा तवाविर्भावेन व्रजः सङ्घातो ऽधिकं जयति श्रीश्च विद्वद्हादौ शश्वच्छ्रयते अतो ये विचिन्वते तेषां दृश्यताम् एषु पद्येषु पादद्वितीयाक्षरं हलैक्यं केषुचित्पादेषु प्रथमसप्तमाक्षरं हलैक्यं आलङ्कारिकसमयसिद्धसावर्ण्यात्कचिदैक्यमितिद्रष्टव्यम् एकादशाक्षरं त्रिष्टुप्संज्ञके छन्दसि चतुः षष्ठ्युत्तरषडशीति तमोभेदः॥ १॥

रास–रहस्यम्

र० टी०—हे दयित! हे परमप्रेमास्पद! ते जन्मना "तत्सृष्ट्वा तदेवानुप्राविशत्।" इति तव प्रादुर्भावेन व्रजः देहेन्द्रियादिसंघातः अधिकं जयति सत्तास्फुर्तिवत्तयावभासते तथा इन्दिराऽपि शोभापि अत्रैव चेतनायुक्तसंघाते एव शश्वत् निरन्तरं श्रयते सौन्दर्यादिगुणाक्रान्ततया प्रतीयते। यतः आत्मनस्तव सत्त्वादिना नित्यस्यात्यन्तमिथ्याभूतस्य जडस्यापि एवं प्रतीतिः तस्मात् दिक्षु साक्षिसु आत्मसमर्पणकारेषु दृश्यतां विद्वदनुभवविषयत्वं प्राप्यताम्। के ते विद्वांसः इति अपेक्षायामाहुः, ये त्वयि धृतासवःत्वन्निमित्तं धृता असवः प्राणाः यैः ते तावकाः तव सम्बन्धिन्यः "युक्त आसीत् मत्परः।" "मच्चित्ता मद्गत प्राणाः।"

इत्यादि भगवदुक्तलक्षणयुक्ताः त्वां सर्वाधिष्ठानभूतं परमात्मानं विचिन्वते विशेषेण चिन्वते अन्वेषणपराः सन्ति । कथम् ? पञ्चकोश विवेकेन—"तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः तस्माद्वा एतस्मात् प्राणमयादन्योऽन्तर आत्मा मनोमयः एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमयः तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमयस्तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरपक्ष आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठासन्नेव स भवत्यसद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरि''ति ॥ १ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णगमनाकाङ्क्षिताः कृष्णं जगुरिति यदुक्तं तदेकत्रिंशे प्रपञ्चते । जयतीति । हे दयित ! हे प्रिय ! ते जन्मना व्रजः अधिकं यथा भवति तथा जयति उत्कर्षेण वर्तते । तथाऽत्रेन्दिरा लक्ष्मीः शश्वन्निरन्तरं श्रयते व्रतमलङ्कृत्य वर्तते एवं सर्वस्मिन् व्रजे कृतार्थतां प्राप्ते अत्र तु तावकास्त्वदीयाः गोपीजनाः त्वयि त्वदर्थमेव कथंचिद्धृता असवः प्राणा यैस्ते त्वां दिक्षु विचिन्वते मृगयन्ते हि अतो हेतोस्त्वया दृश्यतां प्रत्यक्षीभूयताम् ॥ १ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरि ॐ ॥ बिम्बाधराश्चित्ते प्रतिबिम्बितं सम्बोध्यैवमगायन्गोविन्दमित्याह ॥ गोप्य ऊचूरिति । हे दयित प्रेष्ठ कृष्ण ते जन्मना प्रादुर्भावेन व्रजो गोकुलं गतम् । अधिकमत्यन्तं जयति उत्कर्षेण वर्तते । जन्मापि न कर्मायत्तमित्याहुः । जन्म लोकवज्जन्म न आव्रजः स्वेच्छयाऽऽगतवानसीति । तत्र तन्त्रमाहुः । अधिकं चतुर्मुखे । विभक्त्यर्थेऽव्ययीभावः । अम्भावो गौणं चाधिकरणत्वम् । प्रार्थनार्थं प्राप्तवति सति स्वमाव्रज इति जन्मना व्रजो जयतीत्यप्यन्वयो वेति । निः प्राप्त्यर्थकस्तु घनजिते स्वजित इत्याद्यावेदिताः । यतस्ततस्तत्र साधु इन्दिरा रमा श्रयते त्वा दिदृक्षतां द्रष्टुमिच्छतां जनानां भवान्दृश्यतां प्रत्यक्षीभवतु । ते च कीदृश इत्यत ईदृशा-इति मृगदृशो दर्शयन्ति ॥ त्वयीति । त्वयि धृता असवः प्राणा येषां ते त्वां विचिन्वते मार्गयन्ति । अतस्तत्प्रत्यक्षीभवनं भवतो युक्तं तत्कुविति भावः । दिदृक्षतामिति पुंस्त्वेन त्वां विचिन्वत इति पराक्षनिर्देशेन ताः स्वदेवताभावं ध्वनयामासुरिति ज्ञेयम् । परोक्षप्रिया इव हि देवाः प्रत्यक्षादिष इत्यादिः । अनङ्गवशतोऽङ्गस्मरणाभावात्का त्वं चिकीर्षसि वने मुनिवर्य शैल इत्यादिवदुक्तिर्वा । दिदृक्षन्त्यश्च दिदृक्षन्तश्चेत्येकशेषेण स्वस्वादिकं सङ्गृह्य प्रोचुरिति वा । पुमांस्त्रियेत्येकशेषः । कार्यतोऽकामनिप्राया वयमित्येवमवदन्निति वा । हे तत्र तां त्रायत इति तत्रेति सम्बोधनं वा । एकतकारद्वितकारयोः श्रवणे विशेषाभावादिति ज्ञेयम् । विस्तृतं चैतद्भाष्यदीपिका-युक्तिवाख्यायामस्मत्कृतायां भाष्यकैय्यटशेखराद्युदाहृस्यानुसन्धेयम् । हे ज अस्मज्जयशलिन् । ज यतिता इधिकं जन्म न व्रजः आ इन्द्रिरा साधु तत्रेति पदानि । जो जेतरीति विश्वः । जगज्जतकेति वा । जनकस्यात्ययो जातिरित्यादेः । ननु विरक्तस्य मम किमासक्त्येत्यत आहुः । ते यतिता सन्यासित्वं नेति । इविकां इर्विधिर्वा कामो वा धीयतेऽस्मिन्निति गर्भे तद्वच्छ्रीतत्त्वं रमाऽस्यामिति वा । अधिकरणे किः । गर्भधिमित्यादिवत् । तेन तया वा कं सुखं तस्य तस्या वा कं सुखं यस्मात्तं त्वा दिदृक्षतामित्यन्वयः । ते जन्म मुख्यं न किन्तु त्वमेवेच्छयाऽऽव्रज इन्दिरया प्रविष्टयाऽन्तरधुतेनातिरस्कृत्या सहित इति इन्दिरासाधुतोऽयं स्त्रीजनस्तं त्रायत इति तत्सम्बोधनम् । सत्सु लसत्सु मल्लुलोकयिषा योषाणां कुत इत्यतोऽप्याहुः ! भवान्दृश्यतां सुन्दरतां श्रयते हि यतस्तत इति । इन्दिरा च धृतासवः प्राणायामादिपरा धृता आसवा यज्ञा येन सोऽपि आव्रजो निवासत्वेनास्तीति स तज्जनश्च त्वां विचिन्वत इत्यप्यन्वयः । प्रायः प्रतिपादमनुप्रासोत्तरा प्रथमाक्षरप्रासश्च ज्ञेयम् । तदववादीनां सावर्ण्यान्न प्रासभङ्ग इति च मन्तव्यम् । त्रिष्टुप्छन्दस्येकादशाक्षरवृत्तेषु नगणरगणद्वयलघुगुरुकवृत्तमेतन्नामेति नोक्तं तदाकर इदं निबन्धनेन हरिवृत्तदुर्ज्ञेयतां ध्वनतीति मन्तव्यम् । मध्ये लघू र इत्युक्ते रगणसाजात्यं मत्यलाधवा स्त्रीगणस्यापि । किञ्च रोऽग्निरित्युक्तेरयमपि विरहानलव्यापिकलेवर इतीदानीं दानवारिः सर्वप्रकारेण लाघवं स्वादर्शनाभिमर्शनतो ददौ तप्येति च प्रसादे सति लघुभूतस्यापि तस्य दास्यति गोविन्दो गौरवमिति ध्वनयितुं ग्रन्थकृत्रगणरगणद्वयलघुगुरुयुक्तवृत्तविशेषतो गीतविशेषं न्यभांत्सीदिति भावः ॥ १ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अष्टाविंशे हरेर्गानं स्वभावादपराधतः । कृतावज्ञा गोपिका हि स्तोत्रं चक्रुरितीर्यते ॥
एकोनविंशतिविधा गोप्यः स्वस्याधिकारतः । एकोनविंशतिविधां स्तुतिं चक्रुर्हरेः प्रियाम् ॥
राजसी तामसी चैव सात्त्विकी निर्गुणा तथा । एवं चतुर्विधा गोप्यः पतिमत्यो निरूपिताः ॥
तथैवानन्यपूर्वाश्च प्रार्थनामाहुरुत्तमाम् । गुणातीताः सात्त्विकीश्च तामसी राजसी तथा ॥
कृष्णभावनाया सिद्धा विशेषेणाह ताः शुकः । अनन्यपूर्विका एव पुनस्तत्र मुदा जगुः ॥
सात्त्विकी तामसी चैव राजसी चेति विश्रुताः । सर्वाश्च ततस्तिस्रः तामसी परा ॥
पुनस्ता एव त्रिविधा अटतीत्यादिभिस्त्रिभिः । राजसी तामसी चैव सात्त्विकीति विभेदतः ॥

अनन्यपूर्वा द्विविधा राजसी सात्त्विकी तथा । तमसा तामसी तत्र नास्तीत्येकोनविंशतिः ॥
अथवा प्रार्थनाद्यौ या सप्ततिं द्विविधाः पुनः । चतुर्थ्यस्तु समास्तत्र तत एकोनविंशतिः ॥
तत्तद्वाक्यानुसारेण तासां भावो निरूप्यते । अन्यथानेकता स्तोत्रे प्रकारैर्नोपयुज्यते ॥

तत्र प्रथमं राजस्यः काश्चन गोप्य आहुः । जयतीति । मङ्गलार्थोऽत्र जयशब्दः यथा फलं साधयेत् स्तोत्रं तथा निर्विघ्नार्थः अन्यथा क्रियामादौ न प्रयुञ्ज्यात् त्वदवतारेण व्रजः सर्वोऽपि कृतार्थः वयमेव परमकृतार्थाः एवेति यथा वयमपि कृतार्था भवामः तथा यत्नः कर्तव्य इति वक्तुं व्रजस्य तवावतारेण सर्वोत्कर्षो जात इत्याहुः । ते जन्मना व्रज अधिकं जयतीति सर्वोत्कर्षेण स्थितिर्जयः अधिकजयो वैकुण्ठादप्युत्कर्षः नहि वैकुण्ठे भगवानेवं लीलां करोति यद्यपि मधुरायां जन्म जातं तथापि तेन जन्मना नमथुरा सर्वोत्कर्षेण स्थिता किन्तु व्रज एव ननु भगवज्जन्मनः सर्वोत्कर्षहेतुत्वं न लोके प्रसिद्धमनन्यत्वेनैकत्वात् अतस्तादृश उत्कर्षहेतुर्वक्तव्यः यो लोके प्रसिद्ध इति चेत्तत्राह । श्रयत इन्दिरा शश्वदवहीति । अत्र व्रजे इन्दिरा सर्वदा श्रयते हीनभावेनाश्रयं कुरुते वैकुण्ठे तु सैव नियता भार्येति न तस्याः सर्वदाश्रयणं कर्तव्यं भवति इह तु तादृश्यो वयमनेका इति तस्याः स्वास्थ्यभावात् कदा वा ममावसरो भविष्यतीति निरन्तरं सेवते अतो लक्ष्मीस्थित्या लोका उत्कर्षं मन्यन्ते सा पुनर्लक्ष्मीः गोकुलाश्रया जाता हि युक्तश्चायमर्थः पतिव्रता हि सा यत्र पतिः स्वयमन्याधीनतया तिष्ठति भक्तेषु कृपां ख्यापियतुं तदुक्तमुळूखलप्रकरणे तत्र तद्भार्यासुतरामेवाश्रयत इति किमाश्चर्यं तव जन्मना व्रजस्य सर्वोत्कर्षः सर्वजनीनः अतस्तव रमणे न कापि न्यूनता न वा लक्ष्म्या मनसि विषादः अङ्गीकृतत्वात् अतः कारणादस्मदर्थमेवागतेन त्वया दृश्यतामिदं गोकुलमेकदा द्रष्टव्यं वाक्यार्थो वा कमं अग्रे वक्ष्यमाणः तावत्कालं त्वयि धृतासवः दिक्षु त्वां विचिन्वत इति दृश्यताम् । एतादृशोऽर्थोऽनुचित इति अनुचितप्रदर्शनेन बोधयन्ति ळोके हि ब्रह्मादयः स्वयमवतीर्णो वर्तसे इति निश्चित्य समायान्ति व्रजस्थाः पुनरस्मदादयः दिक्षु विचिन्वन्ति इतीयं गहत्यनौचिती ननु व्रजस्थानां भक्तिर्नास्ति अन्यथा विरहे भ्रियेरन् अतः अभक्ता न पश्यन्तीति युक्तमितिचेत्तत्राहुः । त्वयि धृतासव इति त्वदर्थनेव धृता असवः प्राणायैः यदैव त्वदनुपयोगं ज्ञास्यन्ति तदैव त्यक्ष्यन्तीति भावः अत एव त्वां विचिन्वते प्राणा नाश्वासयितुदल्पविलम्बेऽपि प्राणा गमिष्यन्तीति अन्यथा व्रजे गच्छेयुः प्रातरत्वमेवायास्यतीति अन्वेषणं व्यर्थमेव स्यात् दिक्षु त्वदीयाः त्वयि सतीति महद्दैन्यम् अतः एकवारं त्वदीयाः पश्येति प्रार्थना एवमेकया दर्शनं प्रार्थितं दयितेति सम्बोधनाद्भर्त्रदर्शने स्त्रीणां जीवनं न युक्तमिति निरूपितं यद्यपि भगवांश्चेत्पश्येत्तदा न कोऽपि पुरुषार्थः सिद्ध्येत तथापि दैन्यं दृष्ट्वा आत्मानमपि प्रदर्शयेदिति तथा प्रार्थना एवं स्वदैन्यानौचित्यादिनिरूपणेन तस्या राजसत्वं निरूपितम् ॥ १ ॥

श्रीसुबोधिनी-सारः

गोप्युक्तिः । ते तव जन्मनाऽधिकं यथा भवति तथा व्रजो जयति सर्वोत्कर्षेण वर्त्तते । इंदिरा लक्ष्मीः शश्वन्निरन्तरमत्र व्रजे श्रयते निवसते हे दयित त्वयि धृता असवः प्राणा यैः याभिर्वा तावकास्त्वदीयास्त्वां विचिन्वते मार्गयन्ति अतस्त्वया दृश्यतां नेत्रविषयो भूयताम् । हि युक्तम् ॥ १ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अष्टाविंशाध्यायार्थोक्तौ, स्वभावादपराधत इति । तदवस्थाया एव स्वभावो यद्गुणगानमेव भवत्येव । अतस्तत्स्वभावादेव गानं चक्रुरिति सम्बन्धः । पक्षान्तरमाहु**रपराधत** इति । भक्तेभ्योपि स्वस्मिन्नाधिक्यज्ञानलक्षणमपराध प्राप्यास्मान्यदि प्रार्थयिष्यति, तदा रसं दास्याम इति मानलक्षणा कृताऽवज्ञा याभिस्तादृश्यो यतोऽतः स्तोत्रं चक्रुरित्यर्थः । अवज्ञयाऽप्रसादे स्तोत्रेण प्रसादो भविष्यतीति तथेति भावः । यद्वा । स्वभावाद्रसस्वभावाद्योपराध इत्यग्रे **पूर्ववत्** । स्तोत्रमिति गानविशेषणम् । तथा च स्तोत्ररूपं गानं चक्रुरित्यर्थः । अग्रे गुणकथनं भाववैजात्यज्ञापनार्थमिति ज्ञेयम् । गूढाभिसन्धिना पक्षान्तरमाहुः **अथवेति** । प्रार्थनाश्च ता आद्याश्च प्रार्थनाद्याः याः प्रथमद्वितीयतृतीयपञ्चमषष्ठसप्तमाष्टमश्लोकैः कृताः, अन्ते त्रयोदशचतुर्दशाभ्यां च सान्निध्यात् कुमारिकाभिः कृताः, अन्ये तु प्रौढाभिरुक्ताः श्लोकाः । **चतुर्थ्यो** गुणातीतभावापन्नाः कोमलभावा इति यावत् । अतस्तथा श्लोकसंख्येत्यर्थः । ननु ‘तदागमनकाङ्क्षया जगु’रिति वचनाद्यथा मानेनापराधाद्गतः, तथा स्तोत्रेण सन्तुष्ट आगमिष्यतीति भावो लक्ष्यते, एवं सति दोषारोपादिरनुपपन्न इत्याशङ्क्य गूढाभिसन्धिमुद्घाटयन्तः स्तुतिस्वरूपमाहुः तत्तदिति । स्तुतिर्हि यथाधिकारं भवति । एतासामेतादृश एवाधिकारो येन कुहककितवादिवचनानामपि स्तुतित्वम् । अन्यथाग्रे तथानुदिष्यंस्तदागमनकाङ्क्षया जगुरिति न वदेत् । न ह्येवं ब्रह्मादिभिरपि वक्तुं शक्यम् । तथा च स्वस्वभावोद्गिरणे तच्छ्रवणेन प्रभोः परमसन्तोष इति तासां भाव एव निरूप्यत इत्यर्थः । विपक्षे बाधकमाहुः अन्यथेति । यद्यन्यस्तुतिवदत्रापि स्तुतित्वमेव स्यात्, न भावमात्रनिरूपणम्, तदोपालम्भादिप्रकारैरनेकरूपता स्तुतौ न सम्भवतीति सा नोच्येतेत्यर्थः ।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

अष्टाविंशाध्याये अष्टाविंशे हरेर्गानमिति का० २८१$\frac{३}{४}$–२९०$\frac{३}{४}$ । अथ संक्षेपतो विभज्यन्ते द्विविधा गोप्यः, तत्रान्यपूर्वा दशविधाः, अनन्यपूर्वा नवविधाः, तथा हि “जयति त” इति सात्त्विकराजसी १, “शरदुदाशय” सात्त्विकतामसी२, “विष-

जलाप्ययात्'' सात्त्विकसात्त्किी ३, ''न खलु गोपिकानन्दनो'' निर्गुणा ४, ''दिनपरिक्षये'' इतिद्वादशे श्लोके राजसतामसी १२, ''प्रणतकामदं'' राजसराजसी १३, ''सुरतवर्धनं'' राजससात्त्विकी १४, ''अटति यत्'' सत्त्वमिश्रतामसी १५, पतिसुतान्वये''त्यत्र तामसतामसी १६, ''रहसि संविदं'' रजोमिश्रतामसी १७, अथ कुमारिकाः, ''विरचिताभयं'' सात्त्विकसात्त्विकी ५, ''व्रजजनार्तिहन्'' सात्त्विकतामसी ६, ''प्रणतदेहिनां'' सात्त्विकराजसी ७, ''मधुरया गिरे'' त्यत्र निर्गुणा ८, ''तव कथामृतं'' राजससात्त्विकी ९, ''प्रहसितं'' **राजतामसी** १०, ''चलसि यद् व्रजात्'' **राजसराजसी** ११, ''व्रजवनौकसां **सत्त्वमिश्रतामसी** १८, ''यत्ते सुजात'' रजोमिश्रतामसी१ , **स्वभावादपराधत** इति विप्रयोगावस्थायाः **स्वभावादेन गानं** चक्रुः, पक्षान्तरमाहुः **अपराधत** इति, स्वस्मिन्नाधिक्यज्ञानलक्षणोपराधः, **कृता मानलक्षणावज्ञा** याभिस्तादृश्यः स्तोत्रं **चक्रुरित्यर्थः**, **राजसी तामसीत्यादि** ''जयति तेधिकं जन्मना व्रज'' इति श्लोके सात्त्विकराजसी, ''**शरदुदाशय**'' इत्यत्र सात्त्विकतामसी, ''विषजलाप्यया'' दित्यत्र सात्त्विकसात्त्विकी, ''न खलु गोपिकानन्दन'' इत्यत्र **निर्गुणा एव चतुर्विधा** गोप्यः **पतिमत्योऽन्यपूर्वा निरूपिताः**, तदनन्तरं सप्तविधा गोप्यः कुमारिकाः, ततः षड्विधाः पुनः सपूर्वाः, तत्र ''दिनपरिक्षये'' इति द्वादशे श्लोके राजसतामसी, ''प्रणतकामद'' मित्यत्र राजसराजसी, **सुरतवर्धन**'' मित्यत्र राजससात्त्विकी, ''अटति यद् भवानह्नी''त्यत्र देवनिन्दकाः सात्त्विकतामस्यः, ''पतिसुतान्वये''त्यत्र भगवन्निन्दकास्तामसतामस्यः, ''रहसि संविद''**मित्यत्र स्वनिन्दका** राजसतामस्य इत्याभासोक्तः क्रमः, कारिकोक्तक्रमानुसारेण तु देवनिन्दका राजसतामस्यः, आत्मनिन्दकाः सात्त्विकतामस्य इत्यायाति, तथा चोक्तं कारिकायां **तामसी तमसी चैव सात्त्विकीति विभेदत** इति, तथा चात्र कारिकोक्तक्रमस्याविवक्षितत्वेन तात्पर्यान्तरेण वा कारिकोक्ताभासोक्तपक्षयोर्व्यवस्था ज्ञेया, एवं द्वादशादिसप्तदशान्तश्लोकोक्ताः षड्विधा आद्याश्चतस्रश्चेति दशविधा अन्यपूर्वाः, अथ कुमारिकाः, ''विरचिताभय'' मित्यत्र ''सात्त्विकसात्त्विकी' त्युक्तमाभासे, कारिकायां तु ''गुणातीता'' इत्युक्तं; ''गुणातीता'' इत्यादिपदचतुष्टयं ''द्वितीयाबहुवचनान्तमाहे''त्यनेन सम्बद्ध्यते, ''व्रजजनार्तिह''न्नित्यत्र सात्त्विकतामसी, ''प्रणतदेहिना''मित्यत्र सात्त्विकराजसी, ''मधुरया गिरे''तश्लोके निर्गुणेतिप्रतिभाति, पूर्वोक्तैस्त्रिभिः श्लोकैः सगुणानामुक्तत्वात्, ''तव कथामृत''मित्यत्र राजससात्त्विकी, ''प्रहसित'' मित्यत्र राजसतामसी, ''चलसि यद् व्रजा''दित्यत्र राजसराजसी, अथ ''**व्रजवनौकसा**''मित्यष्टादशे श्लोके सत्त्वमिश्रतामसी, ''यत्ते सुजाते''तिश्लोके रजोमिश्रतामसी, एवं पञ्चमादिसप्तश्लोकोक्ताः अन्तिमश्लोकद्वयोक्ताश्चेति नवविधाः कुमारिकाः **तमसा तामसी तत्रेति** तत्र कुमारिकासु तामसतामस्य नास्तीत्यर्थः, तथा चान्यपूर्वा दशविधाः नवविधाः कुमारिकाश्चेति एकोनविंशतिभेदाः, अयं कारिकोक्तः प्रथमपक्षः, गूढाभिसन्धिना पक्षान्तरमाहुः अथ वेति, अत्र टिप्पण्यां प्रार्थनाश्च ता आद्याश्चेतिविग्रहः, तथा च प्रथमद्वितीयतृतीयपञ्चमषष्ठसप्तमाष्टमश्लोकैः कृताः, अन्ते त्रयोदशचतुर्दशाभ्यां च कृता याः प्रार्थनास्ताः कुमारिकाभिः कृताः, अन्ये प्रौढाभिरुक्ताः श्लोकाः, नवमादयश्चत्वारः पञ्चदशादयः पञ्च चेत्यर्थः, **चतुर्थस्तु गुणातीतभावापन्नाः** कोमलभावा इति यावत्, ''अतस्तथा श्लोकसङ्ख्यच्य''तिविवृतं टिप्पण्यां, ''न खलु गोपिकानन्दन'' इति चतुर्थश्लोकोक्तास्तु कुमारिकासु प्रौढासु च समाः एतच्छ्लोकवक्त्र्यः कुमारिकान्यपूर्वोभयविधा अपीत्यर्थः, **अस्मिन् द्वितीयपक्षे** सात्त्विक्यादिविभागो दुरूहः, अत एवोक्तं टिप्पन्यां 'गूणाभिसन्धिना पक्षान्तरमाहु'रिति ॥ १ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एकत्रिंशे तु गोपीभिः कृष्णागमनकाङ्‌क्षया । तमेव प्रार्थयन्तीभिर्यद्गीतं तन्निरूप्यते ॥ १ ॥

गानमेव दर्शयति—जयतीति । 'अतिप्रियस्य तव कपटाचरणमयुक्तम्' इत्याशयेन सम्बोधयन्ति—दयितेति । ते तव जन्मना निमित्तेन व्रजो वैकुण्ठादिलोकादप्यधिकं यथा भवति तथा जयति उत्कर्षेण वर्तते । हि यस्मात्तव जन्मना त्वदनुयायिनी इन्दिरा लक्ष्मीः शश्वत् नित्यमत्र व्रजे श्रयते व्रजमलङ्कृत्य वर्तते ॥ 'एवं सर्वस्मिन् व्रजे मोदमाने तव दासभूतानामस्माकं त्वयैवान्तर्धानेन दुःखोत्पादनं न युक्तम्' इत्याशयेनाहुः तावकास्त्वदीया गोपीजनास्त्वां दिक्षु विचिन्वते इति । नच त्वदीयत्वे सन्देहः, यतस्त्वयि त्वदर्थमेव कथञ्चिद् धृताः असवः प्राणा यैस्ताः । अतस्त्वया दृश्यतामस्माकं प्रत्यक्षीभूयतामिति ॥ १ ॥

अन्वितार्थप्रकाशिका

एकत्रिंशे तु गायन्त्यः कृष्णं गोप्यो दिदृक्षवः । तदागमं प्रार्थयन्त श्लोकास्तत्रोनविंशतिः (१९) ॥
उवाचेत्येकमर्द्धाढ्या षड्विंशतिरनुष्टुभः (२६॥) ॥ ३१ ॥

जयतीति ॥ एषु श्लोकेषु प्रायश्चतुर्णा पादानां द्वितीयाक्षरहलैक्यम् । केषुचित्पादेषु प्रथमसप्तमहलैक्यम् । तत्र क्वचिद्बवशसादीनामालङ्कारिकसमयसिद्धसावर्ण्यादैक्यम् । हे दयित ! ते तव जन्मना निमित्तेन व्रजो वैकुण्ठादिलोकादप्यधिकं यथा भवति तथा जयति उत्कर्षेण वर्तते । हि यस्मात्तव जन्मना त्वदनुयायिनी इन्दिरा लक्ष्मीः सम्पद्रूपेण श्रीनामसाफल्याय शश्वत् नित्यमत्र व्रजे श्रयते व्रजमलङ्कृत्य वर्तते । एवं सर्वव्रजप्रमोदे सति त्वयि त्वदर्थमेव कथञ्चित् त्वत्प्राप्त्याशयैव धृता असवो यैस्ते

तावका गोपीजनास्त्वां दिक्षु विचिन्वते । अतः त्वया दृश्यतां प्रत्यक्षीभूयताम् । प्रेरणांशत्यागेऽकर्मकत्वाद्भावे लोट् । यद्वा । अस्माभिर्भवान् दृश्यताम् । यद्वा । एतास्त्वां विचिन्वत इति त्वया दृश्यताम् । अष्टादशसु श्लोकेषु राजहंसीछन्दः ललितमिति केचित् ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीमेकत्रिंशेऽध्याये गोपीगीतं कथ्यन्ते श्रीकृष्णदर्शनाभिलाषिण्यो गोप्य ऊचुः जयतीति हे दयित प्रियते तव जन्मना-व्रजः व्रजस्थः सर्वोऽपिजनः अधिकं यथा भवति तथा जयति सर्वेभ्यः श्रेष्ठत्वेन वर्त्तते । हि यस्मादिन्दिरालक्ष्मीः सम्पद्रूपेण अत्र व्रजे शश्वत्सदाश्रयते वर्त्तते एवं सर्वव्रजस्य समग्रे मंगले सत्यपि तत्र तावका भवदीया युवतिजनाः त्वयि निमित्ते धृतासवः त्वद्दर्शनार्थं धृताप्रणाः त्वद्विरहजतापतप्ताः सन्त्यः दिक्षु दिशासु त्वां विचन्वते मार्गयन्ति । अतो भवता दृश्यतां अस्मन्नयनविषयीभूयतां दर्शनं देयमित्यर्थः । कर्मत्वाविवक्षायां दृशेरत्रभावे लोकट अपरा आहुरिति प्रतिश्लोकं ज्ञातव्येषु श्लोकेषु प्रायश्चतुर्णां पादानां द्वितीयाक्षरहलैक्यम् ॥ १ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निराशास्ताः पुनः प्राप्यैकत्रिंशे यमुनातटम् । गायन्त्यः कृष्णमेवैकमर्थयन्ते तदागमम् ॥ १ ॥

'तद्गुणानेव गायन्त्यः' 'कृष्णं जगुः' इति च यदुक्तं तदेव गानं प्रपञ्चयति ॥ जयतीति ॥ हे दयित परमदयालो अस्मत्प्राणनाथेति वा । ते तव, जन्मना व्रजः व्रजस्थो जनः, 'वृन्दावनं सखि भुवो वितनोति कीर्तिम्' इति वृन्दावनशब्देन यथा वृन्दावनस्थो जनः लक्ष्यते, तथात्र व्रजशब्देन लक्षणया व्रजाश्रितो जनसमूहो बोध्यः । अधिकं यथा भवति तथा, जयति सर्वोत्कर्षेण वर्त्तते ! तत्र वयं किमिति दुःखिता इति भावः । तथा, अत्र व्रजे, यस्मात्त्वं जातस्तस्मादिति शेषः । इन्दिरा सर्वसंपदधिष्ठात्री लक्ष्मीः, हि निश्चितमेव शश्वत् सर्वकाल, श्रयते व्रजमलङ्कृत्य वर्त्तते । 'तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमान्' इति पूर्वमेवाभिहितत्वात् । यद्वा अत्र व्रजे, श्रयते । त्वामिति शेषः । नित्यानपायित्वादिति भावः । एवं सर्वस्मिन् व्रजे मोदमाने तत्र, तावकास्त्वदाया वयं गोपीजनाः, त्वयि, निमित्ते सप्तमी । त्वदर्थमेवेत्यर्थः । धृताः कथंचिद्धिधृता असवः प्राणा याभिस्ताः, जनविशेष्यत्वे यैस्ते तथाभूताः, दिक्षु त्वामेव विचिन्वते मृगयन्ति । अतः, त्वया दृश्यतां प्रत्यक्षीभूयताम् । अस्माकमिति शेषः । यद्वा । अस्माभिर्भवान् दृश्यताम् । यद्वा । एते मां विचिन्वते इति त्वया दृश्यतां ज्ञायताम् । 'दृक् ज्ञाने ज्ञातरि त्रिषु' इत्यमरः । परमदुःखदर्शनकातरः कृष्णोऽस्मासु दययेदित्यर्थकेयं तासां गूढोक्तिः । एतेषु गोपीगीतश्लोकेषु प्रतिपादं सस्वरस्य केवलस्य हलो वा द्वितीयवर्णस्यैक्यं तत्र सकारशकारयोः साम्यमस्ति कुत्रचित् दलद्वये क्वचिदन्यत्र चापि प्रथमसप्तमाक्षरयोः प्राय ऐक्यमित्येवं रूपं व्यासवाक्चातुर्यं दृश्यते । तेन तं सदा वाग्देवी परिचरतीत्यपि बुध्यते ॥ १ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सन्मनोऽलिव्रजोद्गीतमिन्दिरानन्दमन्दिरम् । गङ्गोत्तुङ्गरसं वन्दे श्रीगोविन्दपदाम्बुजम् ॥ १ ॥
आलक्ष्याखिलसृष्टिसर्जकतया सच्चिद्विलासं परं गायन्ति श्रुतयोऽखिलाश्रयतया वाङ्मानसागोचरम् ।
सच्छब्दा गुणवृत्तयोऽप्यनिशमित्युक्तं हि वेदस्तुतौ प्राज्ञैस्तद्वदिहापि सूक्ष्ममतिभिर्ज्ञेयं सुगीतेङ्गितम् ॥ २ ॥
निखिलागममूलदृष्टपादं सकलांशान्वयभूषितं ह्यदृश्यम् ।
सगुणं भगवत्स्वरूपमेवं मनसाऽलोचि तदेति भाति ताभिः ॥ ३ ॥
देहादिसङ्गो भगवद्विराजितश्चिदिन्दिरोल्लासविलासभूरलम् ।
अतोऽत्र योगादचिरेण दृश्यतां प्रभुर्व्रजत्येवममूभिरीरितम् ॥ ४ ॥
आद्यन्तयोश्चरणयोरभिरूढमर्थं कृत्वा मनस्यतितरां विगताभ्यसूयैः ।
आलोच्यमेतदविगीतमनर्घ्यगीतं प्रादर्शि किञ्चिदुपयोग्यवधानबुद्धैः ॥ ५ ॥

जयति ते इति : १०.३१.१.

व्रजो जयति जन्मना जगदधीशितुः श्रीरपि वसत्यनिशमत्र तज्जगति धन्यभाग्या इमाः ।
प्रतिक्षणमिदं मुदा सदय यैः स्तुतं तान् बुधान् प्रवर्तयितुमीहसे कथमिहान्यथा वर्णने ॥ ६ ॥
यत्र त्वं व्रजसि स्त्रिया कृतधिया गन्तव्यमस्मिन् स्थले गन्तव्यं पुनरन्यतश्च भवतेत्येषः स्वभावो हि ते ।
ज्ञातो यत्किल गोकुले तव रमा ज्ञात्वाऽऽगताऽवस्थितिमत्र त्वं च निगूहसे तदवलास्वस्मासु को विस्मयः ॥ ७ ॥
योगो येनाकारि भूमौ न तस्य पारोक्ष्यं ते वागियं किञ्चिदर्था ।
यत्संयोगासक्तचित्ता अपीश त्वां पश्यामोऽद्यापि नाद्यानवद्यम् ॥ ८ ॥
यत्त्वद्व्यक्तिरिहेश सर्वसुखदा तस्मादितो न व्रज स्यान्मा मानवतीति यामि यदि तत्साऽस्मासु शश्वत्स्थिता ।
सिद्धास्तद्भुवि तावका वयमपि प्राणप्रियस्त्वं च नस्तद् दृश्यत्वविलम्बनेऽणुमपि सद्धेतुं न जानीमहे ॥ ९ ॥

मानापराधमवगत्य मनः कृतं नो यत्त्यागदण्डनमनल्पमकल्पि युक्तम् ।
निर्मन्तुकाक्षिसुखविच्युतिकृत् कुतोऽसीत्येकापराधफलमन्यगमित्यधर्मः ॥ १० ॥
अनन्यगतिका वयं तव पदारविन्दादृते वने गतजने मनोजनिपुलिन्दसन्दानिताः ।
कृतं क्वचिदपीश तन्मनसि माऽऽनयाऽऽगोऽधुना विधाय करुणां सखे लघु भवेह दृग्गोचरः ॥ ११ ॥
व्रजोत्कर्षार्थमीश त्वमस्मिन् क्रीडसि सर्वदा । तदलं पृथगुक्त्याऽस्मद्गोकुलानन्ददो भव ॥ १२ ॥

कृष्णप्रिया

इस अध्याय में १९ श्लोक है । भगवान का परमप्रेममय यशोगान इस अध्याय में है । दशम स्कन्ध के पांच गीतों में अति प्रसिद्ध जो गोपिका गीत है वह इस अध्याय में है । भगवान का तीसरा यशो धर्म का इसमें वर्णन है । अन्यपूर्वा और अनन्य पूर्वा दो प्रकार के गोपी जन ने नव नव श्लोको में भगवान के गुणों का गान किया है । अन्तिम श्लोक में दोनों प्रकार के गोपिकाओं के समूह गान किया है । १-२-३-४-५-६-७-८ ये क्रमशः सात श्लोक और १३-१४ ये दो श्लोक मिलाकर कुल नव श्लोकों में कुमारिकाओं ने प्रभु का गुणगान किया है । ९-१९ श्लोकों से नव अन्यपूर्वा गोपियाँ भगवत् गुण गाये हैं और चतुर्थ श्लोक का गान दोनों ने मिलकर किया है ।

अब प्रथम श्लोक में सात्विक राजसी गोपियों का यूथ नाथ को निवेदन करता है कि—अये दयानिधे ? आपके प्रादुर्भाव से व्रजभूमि का अधिक उत्कर्ष हुआ । रमा देवी निरन्तर वहाँ व्रज में आपके श्रीचरणों की सेवा के लिए व्रज का आश्रय लेकर विराजती है । केवल हमारे प्राण आपकी सेवा के लिए ही धारण किए हैं । हम सब सर्व दिशाओं में आपको ढू ढ रही है । नाथ ? हमारी दयनीय दशा की ओर निगाह कीजिए ॥ १ ॥

शरदुदाशये साधुजातसत् सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ॥ २ ॥

कर्दमक्षमा

अन्वयः—हे सुरतनाथ ! शरद उदाशये, साधुजातसत्सरसिज-उदरश्रीमुषा, दृशा, ते, अशुल्कदासिकाः, निघ्नतः, हे वरद, इह, वधः, किम्, न, भवति ॥ २ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत्र स्वतन्त्राणां बहूनां वक्तृत्वादपरा आहुरिति सर्वश्लोकेष्ववतारणास्ति । अथापि संगतिरुच्यते । तत्र विचिन्वन्तु मम किमिति चेत्तत्राहुः शरदिति । शरदुदाशये शरत्कालीने सरसि साधु जातं सम्यग्जातं यत्सरसिजं सुविकसितं पद्मं तस्योदरे गर्भे या श्रीस्तां मुष्णाति हरतीति तथा तया दृशा नेत्रेण हे सुरतनाथ संभोगपते वरदाभीष्टप्रद अशुल्कदासिका अमूल्यदासीर्नो निघ्नतो मारयतस्ते तव त्वया क्रियमाण इह लोकेऽयं वधो न भवति किम् । शस्त्रेणैव वधो वधः किं दृशा वधो वधो न भवति किन्तु भवत्येव । अतस्तव दृशाऽपहृतप्राणप्रत्यर्पणाय त्वया दृश्यतामिति भावः । त्वया दृश्यतामिति यथासंभवं सर्वत्र वाक्यशेषः ॥ २ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अवतारणा अवतरणिका । सङ्गतिः प्रसङ्गावसरादिरूपा । तत्र ताः । तत्र आक्षेपे । शरदुदाशय इत्यलुकसमासः । किं शस्त्रेण शतघ्न्यादिना । यतो दृशा भवत्येव वधोऽतः कारणात् त्वन्नेत्रहृतास्मत्प्राणप्रत्यर्पणार्थम् । इति भाव इति—दर्शनाभावेऽस्माकं प्राणा अस्माकं देहेषु नायास्यन्ति किन्तु गमिष्यन्त्येवेत्याशयः । यथासंभवम् यथायोग्यम् । सर्ववाक्यस्य सर्वश्लोकस्य शेषः, अन्ते योज्यमित्यर्थः । दृशः परमतस्करत्वम् उत्तमकाले जलदुग साधूनामुत्तमद्रव्यान्तर्यस्तलक्ष्मीतुल्यमहाधनस्य प्राणस्य हरणात् । ननु किमहं युष्मभ्यं दुःखं दित्सामि यदेवं सूचयथेति तत्र त्वमस्मान् हरस्येवेत्याहुः—शरदिति । दृशैव सुरतं नाथसि याचसेऽथ च दृशैव वरद अभीष्टसुखं ददासि अथ च तयैव दृशा प्रेमानलपुंजप्रक्षेपिणो निघ्नतोऽशुल्कदासिका अस्मान्मारयतस्तव इह किं न वधः, किं शस्त्रेणैव वधो वधः दृशा वधो वधो न भवति, अपि तु भवत्येव, तस्मात् हे वरद अभीष्ट ददेव अभीष्टमैहिकं पारत्रिकं सुखं ग्रसि खंडयसीत्यर्थः । किं चास्मासु ते स्वत्वं चेद्भवति तर्हि स्वधनं पालय ज्वालय वा न दोषः । वयं तु त्वया न शुल्केन क्रीता नापि परिणयेन गृहीताः किं त्वशुल्कदासिका वयं स्वयमेव मौग्ध्यादभूमेत्यर्थः । तत्र तस्य मोहनोन्मादनचौरचक्रवर्तित्वमेव हेतुं वदन्त्यो दृशं विशिषन्ति—शरत्कालसम्बन्धी य उदाशयः गम्भीरस्वच्छजलपूर्णस्तडाग इत्यर्थः । साधु जातं साधुसमयप्रदेशप्रकारतो जातं सत् जात्याप्युत्तमं यत्सरसिजं विकसितपद्मं तस्योदरस्थां श्रियं शोभां संपत्तिं मुष्णाति चोरयतीति तयेति दृशः सौंदर्यसौरभ्यशैत्यसौकुमार्याण्यसाधारणान्युक्तानि । या खलु तादृशं जनदुर्गमप्युल्लंघ्य तादृशाभिजातस्य जनस्यान्तःपुरं प्रविश्य संपत्तिं

चोरयति, सा तव दृक् चोरिका केनापि मोहनोन्मादनधूलिप्रक्षेपणोन्मादिताभिरस्माभिः स्वयमेव दत्तं सुरतधनं प्राणांश्च नीत्वा तुभ्यं ददावतः पूर्वमुक्तं त्वयि धृतासव इत्यतो वयं त्वया निर्धनीकृता हता एवेति परःसहस्रस्त्रीवधपातकं त्वया गृहीतमेवेति ध्वनिः। अतः पापाद्भीत्यापि दर्शनं देहीत्यनुध्वनिः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

शरदुदाशये इति। जन्मकाळस्थानयोः साद्गुण्यं दर्शितम्। साधुजातेति जन्मनः। सदिति जातेर्व्यक्तेश्च। उदरेति तत्रापि तदन्तःकोषस्य इति कमलस्य शोभा परमकाष्ठा दर्शिता तादृशतच्छ्रीमुषा स्वश्रिया तच्छ्रियं हरत्येवेत्यर्थः। यत्र यत्र सा स्फुरति तत्र तत्र तच्छ्रीर्न दृश्यते इति नवनवश्रीयुजाऽनया नूनं चोर्यत एव सेति भावः। दृशेत्येकवचनमेकयैव भावसूचनात्। एकयापि किमुत द्वाभ्यामिति श्लेषात्। दृशेति सुरथनाथेत्यत्राप्यन्वयः। हि दृशैव सुरतयाचकेति त्वयैवास्मासु तदिच्छा कारिता तत्र च वरदेति वरदानेन दृढीकृता चेति तत्रास्माकं न दोषः। अशुल्कदासिका इति प्रत्युत गुणा एव भवतस्तु सोऽपि दोषा सम्प्रति तु महानेवेत्याहुः निघ्नत इति। श्लेषेणापि तस्मिन्नेव दोषार्पणाय चौर्यक्रियाभिनिवेशो दर्शितः। स हि चौरेषु क्रिया सम्भवति साधूनामपि सम्पत्त्यादानादत्युत्कटदोषस्यागणनेन। अतिनिगूढपरवस्तुज्ञानेनातिदुर्लङ्घ्य लङ्घनेन च। तत्र प्रथमं सत् सरसिजेति पर्यन्तेनोक्तम्। शरदुदाशय इति स्वच्छतादिगुणयुक्तस्य जनयितुः साधुजातेति जन्मनः, सदिति स्वरूपगुणस्य च प्रशंसनात्। द्वितीयं महाजलान्तः सरसिजोदरे विलीयस्थितत्वेन। तृतीयञ्च वर्षानन्तरकालीनत्वात् अतिपूर्णस्योदाशयस्य दुरवगाहमध्यदेशत्वेन सहस्रपत्राख्यसरसिजोदरस्य दृग्भिर्दुर्भेदत्वेन चेति किञ्च त्वद्भयादिव तथा निगूढापि श्रीनायिका मुष्टा। ततः सरलानां ब्रजवृन्दावनयोर्निर्भयं भ्रमन्तीनामस्माकं वा का वार्त्ता भवत्वस्माकमपि तद्द्वारा मोषणं किन्तु सा कृततादृक्कौटिल्यापि स्वचक्षुषोरन्तरे रक्षिता वयन्तु तादृशसरला अपि बळान्मोषणे प्रत्युताशुल्कदासिकाः तत्रेर्ष्यां त्यक्त्वा निरुपाधितया सेवमाना अपि तद्द्वारा पुनर्निहन्तुमारब्धाः इति परमान्याय्यमित्याहुः। निघ्नतः इति। नेह किं वध इति चौर्याल्लोकेन न ज्ञायतां नाम इत्यपि किं न स्यादित्यर्थः। सम्बोधनद्वयेन चेदं ज्ञाप्यते अहो ज्ञाते तत्तत्सर्वं त्वयैतदर्थमेव मृषा प्रपञ्चितमिति। अन्यत्तैः। यद्वा तादृशदृशैव शुल्कदासिकाः। तद्रूपेणैव शुल्केन दासिका इत्यर्थः। ता दृशीरपि निघ्नतः त्यागेन मारयतः। हे सुष्ठुरतानां जनानामुपतापक ! नाथतेरुपतापार्थत्वात्। तथा हे निजवरच्छेदक ! अतो निजदोषपरिहारार्थमप्यागम्यतामिति भावः ॥ २ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीमुषेति दृशः परमतस्करत्वं ध्वनितम्, उत्तमकाले जलदुर्गे साधूनामुत्तमद्रव्यान्तर्व्यस्तलक्ष्मीतुल्यमहाधनस्य हरणात् अत ईदृशचौरेण वधोऽपि सुघट एवेति भावः। वस्तुतश्चैवं दृशः परमसौन्दर्य्यमुक्तम्, दृशेत्येकत्वेनैव भावविशेषसूचनात् क्षोभणत्वम ; यद्वा, एकयापि दृशेत्यर्थः। अशुल्कदासिका इति मूल्यं विना क्रीता अधमदासीरपीत्यर्थः। सम्बोधनाभ्यां वधस्यानौचित्यं सूचितम्, वधेन सुरतस्य भक्ताभीष्टप्रदत्वस्य च पूर्व्वदत्तवरस्य वा हानेः, श्लेषेण सुरतेश्वरेति त्वयैवास्मासु तदिच्छाकारिता, तत्र च वरदानेन दृढीकृतेति न तत्रास्माकं धाष्टर्यादिदोष इति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, ननु प्राज्ञप्रवर ! अस्मन्मरणात्त्वयि दोष प्रसङ्गः स्यादेवेत्याहुः—शरदिति। दृशा सुरतनाथ ! दृष्ट्यैव सम्भोगसुखप्रदोऽसीत्यर्थः। निघ्नतस्तादृग्दानानाचरणात् वधः, तज्जन्यं पापमित्यर्थः, 'आयुर्घृतम्' इतिवत्, अन्यत् समानम्। यद्वा, तादृशदृशैव तद्रूपेण शुल्केन दासिकाः, किंवा शुल्कं विनैव दासीर्निघ्नतो विरहार्त्त्या त्यागेन वेति स्वत एवायाति, तदुपसत्तेः, सम्बोधनद्वयं प्रणयकोपाद्विरहार्त्तिविशेषाद्वा, तथाहि सुष्ठुरतानां जनानामुपतापकेति नाथतेरुपतापार्थकत्वात्, निजवरच्छेदकेति परमघातकेति वा, 'दो' अवखण्डने, अतो निजदोषपरिहारार्थमप्यागम्यतामिति भावः ॥ २ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

शरदुदाशये शारदे जलाशये अशुल्कदासिकाः त्वद्गुणक्रीता दासिकाः ते वधः वधदोषः किं नास्ति शस्त्रादिभिर्विनावधेऽपि वधदोषोऽस्तीत्यर्थः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अत्र वक्तृबाहुल्यात् प्रतिश्लोकमपरा आहुरित्यवतारणाद्रष्टव्या तत्र यथासम्भवं पूर्वोत्तरवचसां गतिरुच्यते। तत्र विचिन्वन्तु मम किं तत्राहुः। शरदिति। शरत्कालिके सरसि सम्यग् जातस्य अनेन गम्भीराम्भस्समुद्भूतत्वमभिप्रेतं सत्सरसिजस्य सत्त्वमत्र सुमृष्टनालत्वरविकरविलसितत्वादिकं विवक्षितम उदरे गर्भे या श्रीस्तां मुष्णाति हरतिम् तिरस्करोतीति यावत्तथा तया दृशा नेत्रेण हे सुरतनाथ ! सम्भोगवर्द्धक ! तदर्थं याचनीयेति वा हे आत्मपर्यन्ताभीष्टप्रद ! तवाशुल्कदासिकाः मूल्यरहिताः दासीः मूल्यं विनापि दास्यम्प्राप्ताः शुल्कदासिका इतिच्छेदे तव सम्बन्धिना शुल्केन सौन्दर्यात्मकेन मूल्येन दासीरस्मान्निघ्नतां मारयतस्ते तव त्वया क्रियमाण इहैवळोकेऽयं वधो न भवति किं शस्त्रेणव वधो वधः किन्न भवतीति भावः। दृशा निघ्नत इत्यनेन दृशा नः प्राणानपहृतवत् इत्यभिप्रेतम् अतस्त्वदृशोपहृतप्राणप्रत्यर्पणाय त्वया दृश्यतामिति यथासम्भवं वाक्यशेषः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

व्रजजनस्य आर्तिं हन्ति हिनस्ति नाशयतीति व्रजजनार्तिहातस्य सम्बोधनं व्रजजनार्तिहन् ! वीरशूर निजजनस्य स्मयो गर्वः तं ध्वंसिस्मितवत् स्मितं यन्य स तथा तत्संबुद्धिः । निजजनस्मयध्वंसनस्मितयुषपूषकामसमृद्धाविति धातोः योषितां समृद्धिकामानां नः कामसमृद्धिं पारयेति शेषः कथङ्कारं पालनमत्राहुः । भजेति । हे सखे ! चारु सुन्दरं तव जलरुहस्य पद्मस्य सममाननं प्रवृत्तिशून्यस्य यद्दर्शनेच्छा स्यात्तादृक् शक्तिवन्मुखं दर्शयन् त्वत्किङ्किरीः दासीः नो भज पालय स्म स्मृत्वा पत्यादीन्विहायार्धरात्रे वनं प्राप्ता इति भवे भव इति द्विरावृत्तिः कर्तव्या जन्मनि जन्मनि किङ्करीरित्यर्थः । यद्वा भवे तादर्थ्ये सप्तमी अस्मद्भद्रार्थमित्यर्थः । यद्वाऽस्मज्जीवनसत्तायां विवक्षितायाम् अन्यथामरणमेवास्माकमापद्यत इत्यर्थः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अन्यच्च व्रजस्यैवमुत्कर्षके इन्दिराया अप्यत्रैव शश्वद्भावे स्त्रीनिकरवधोऽत्यन्तायोग्यः । यदि वा वदसि 'नाहं वो हन्मि, इति तदपि न, अशस्त्रवधः किं वधो न भवति ? इत्याहुः—शरदुदाशय इत्यादि । हे सुरतनाथ ! अथवा, हे सष्ठुरत ! हे नाथ ! दृशा अपणा अशुल्कदासिका अपणक्रीता दासीः, उपेत्य दासीभूता इति यावत् । इह वृन्दावनभूमौ किं वधो न ? सामान्यपुण्यस्थले एव जनो हत्यां न करोति, त्वं तु इहापीति इह-शब्दमहिमा । दयित ! दृश्यतामिति पूर्वोक्त्या साक्षादाविर्भूतमिव मत्वा तद्दृशोर्भाग्यादन्तः क्षोभमनुभवन्त्यः काश्चिदेवमुक्तवत्यः । दृशा कीदृश्या ? शरदुदाशये शरत्कालीने सरसि साधुजातं सम्यगुत्पन्नं यत् सत् उत्कृष्टं सरसिजं तस्योदरे या श्रीस्तां मुष्णातीति तथा तया, चौरस्य तदङ्गान्यपि चौराणीत्यर्थः । अथवा एवम्भूताया दृशोऽनुपलब्धा इत्यर्थः तृतीयान्ते दृक्-शब्दे लक्षणा । यथाऽन्नेन म्रियन्ते अन्नानुपलब्ध्येत्यर्थः । यद्वा, दृशा वरद अभिलाषप्रद ! अतो दृश्यताम्; तदकृत्वेह किं वधो न वधः—इति न केवलं सुरतनाथोऽसि वरदोऽप्यसि । हे वरद ! वरदकर्तृक-वधोऽत्यन्तमनुचित एव ॥ २ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नो चेद् दृश्यतां यासि, तदा स्त्रीवधोऽपि भविष्यतीत्याहुः—शरदुदाशय इत्यादि । शरत्सम्बन्धिनि जलाशये साधुजात यत् सत् उत्कृष्टं सरसिजं तदुदरे या या श्रीस्तां मुष्णाति या तया दृशा वधो न दुष्करः । जलमध्यस्थ-जलजस्योदरस्थां श्रियं या हरति सा स्थलस्थानामस्माकं जीवितं हरिष्यतीति किं चित्रम् ? यद्यपि त्वं दृशा वधं करोषि, तथापि सैव 'दयित दृश्यताम्' इति यत् पुनः प्रार्थयते, तत् खलु 'विषस्य विषमौषधम्' इति न्यायात् ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु किमहं युष्मभ्यं दुःखं दित्सामि यदेवं सुचयथेति तत्र त्वमस्मान् खलु हंस्येवेत्याहुः । शरदिति । दृशैव सुरतं नाथसि याचसे । अथ च दृशैव वरदः अभीष्टसुखं ददासि अथ च तथैव दृशा प्रेमानलपुञ्जप्रक्षेपिण्या निघ्नतोऽशुल्कदासिका अस्मान् मारयतस्तव इह किं न वधः कि शस्त्रेणैव वधो वधः दृशा वधो वधो न भवति अपि तु भवत्येव तस्मात् हे वरद ! अभीष्टं ददेव अभीष्टमैहिकं पारत्रिकञ्च सुखं द्यसि खण्डयसीत्यर्थः । किञ्चास्मासु ते स्वत्त्वञ्चेद्भवति तर्हि स्वधनं पालय जालय वा न दोषः । वयन्तु त्वया न शुल्केन क्रीता नापि परिणयेन गृहीताः किन्त्वशुल्कदासिका वयं स्वयमेव मौग्ध्येनाभूमेत्यर्थः । तत्र तस्य मोहनोन्मादनमहाचौरचक्रवर्त्तित्वमेव हेतुं वदन्त्यो दृशं विशिषन्ति शरत्कालसम्बन्धी य उदाशयः गम्भीरस्वच्छजलपूर्णस्तडाग इत्यर्थः । तत्र साधु जातं साधु समयप्रदेशप्रकारतो जातं सत् जात्याप्युत्तमं यत् सरसिजं विकसितपद्मं तस्योदरस्यां श्रियं शोभां सम्पत्तिं मुष्णाति चोरयतीति तथेति दृशः सौन्दर्यसारभ्य शैत्यसौकुमार्याण्यसाधारणान्युक्तानि या खलु तादृशं जनदुर्गमप्युल्लङ्घ्य तादृशाभिजातस्य सज्जनस्यान्तःपुरं प्रविश्य सम्पत्तिं चोरयति सा तव दृक् चोरिका केनापि मोहनोन्मादनधूलिप्रक्षेपणोन्मादिताभिरस्माभिः स्वयमेव दत्तं सुरतधनं प्राणांश्च नीत्वा तुभ्यं ददावत एव पूर्वमुक्तं त्वयि धृतासव इत्यतो वयं त्वया निर्धनीकृत्य हता एवेति परःसहस्रस्त्रीवधपातकं त्वया गृहीतमेवेति ध्वनिः । अतः पापाद्भीत्यापि दर्शनं देहीत्यनुध्वनिः ॥ २ ॥

श्रीरसिकाह्लादिनी टीका

ननु भवतीनां मया किमपि कृतं किमर्थमाक्रोशन्तीति चेत्तत्राहुः—शरदिति । एवं हि लोके प्रसिद्धिः चौरन्तु सर्वस्वमपहृत्य शस्त्रेण हन्ति । इदं त्वलौकिकं चौर्य्यं तत् दासीनां सर्वस्वमपहृत्वा शस्त्रेण वध इति तदेव विविच्य कथयन्ति शरदुदाशये शरत्कालीने उदाशये सरसि जलदुर्गं साधुजातं यत्सरसिजं कमलं तस्योदरे या श्रीस्तां मुष्णाति चोरयति तया दृशा वधः नेति । यथा कश्चित् चौरः तानन्तः स्वायतांश्चौरान् इतस्ततः प्रेषयति ते चौर्य्येणार्जितं तस्मै प्रयच्छन्ति । तथा तव दृशि कमलसम्पदं तदुदरे स्थितामपि आच्छिद्यत्वयि समर्पयतीति । अत एवंभूतया दृशा चौरभूतया द्वारेण अशुल्क-दासिका मूल्यं विना क्रीता दासीर्निघ्नतो मारयतस्तव त्वया क्रियमाणो वध इहास्मिन् विरहावसरे किं वधो न भवति । काका किं शस्त्रेणैव वध इति न किन्तु वध भवत्येव ।

यथा कमलोदरे स्थिता श्रीः दृशा मुष्टा एवं गोपीमामन्तःस्थितानपि प्राणानपहृत्य तुभ्यं समर्पयिष्यतीति । दृश एव चौरत्वं मारकत्वं चोक्तं, दृशा क्रियमाणो वध त्वय्येव फलिष्यतीति । भृत्यकृतं राजनीव अतस्तव महता दुष्कीर्तिर्भविष्यतीति भावः । सुरतनाथ ! संभोगसुखप्रद ! यद्वा हे सुरतनाथ सुरतापनाशात्तथा याच्यते । यद्वा सुरतं नाथ्यते उपतप्यते येन "नाथु नाधृ याञ्चोपतापैश्वर्य्याशीःषु" । इति धातो रूपं" विरहार्त्तिप्रदत्वेन सुरतस्य दाहकत्वं सूचितम् । यद्वा सुरतानां त्वयि रक्तानां नाथ तापकर्तः । इदं त्वय्यतिचित्रमित्यर्थः । हे वरद पूर्वमुक्तं "मयेमा रंस्यथक्षपा" इति वरप्रत्यर्थ (प्र) मागतानां किं वध उचितो भवति अपि तु नेत्यर्थः। सम्बोधनद्वयेनेदं सूच्यते । सुरतसुखं अस्मत्तत्वतः सर्वत्र प्रसृतं भवत्वेतदर्थमागताः तत्कार्यं दूरत एव स्थितं प्रत्युतास्मान् मारयितुमुद्यतोऽसि । अतः कामशास्त्रवैफल्यं जातमिति भावः । यद्वा दृशा शुल्कदासिका तव दर्शनमात्रेण मूल्यक्रीता नो निघ्नतः इह वने विजने मारयतः मूल्येन क्रात्वा मारयतः सतः त्वया क्रीयमाणो वधः किं वधः कुत्सितो वधः इत्यर्थः । अत्रत्याः वृक्षाः पक्षिणश्च एत एव साक्षिणो अस्मद्वधप्रसिद्धिं कथयिष्यन्तीतिभावः । यद्वा हे वरद अव खण्डने इति धातोरिदं रूपं पूर्वं वर दत्वा इदानीं खण्डयसीति । अस्मन्मारणेन स्त्रीवधदोषः प्रतिज्ञाभंगरूपो दोषश्च भविष्यतीति । अतो दोषद्वयनिराकरणार्थं त्वया दृश्यतामिति वाक्यार्थः ॥ २ ॥

विशुद्धरसदीपिका

ननु विचिन्वन्तु नाम स्वकपोलकल्पितप्रेमाणस्तत्र मम को दोष इत्याशङ्क्या सर्वस्य सर्वापहारिण्या तव दृशैव सर्वस्वं हृतमस्माकमिति तस्मिन्नेव दोषं पर्य्यवसाययन्त्य आहुः । शरदिति । जन्मकालस्थानयोः साद्गुण्यं साधुजातेति जन्मनः सदिति जातेर्व्यक्तेश्च उदरेति तदन्तः कोशस्येति प्रतिपदं शोभा सूचिता ता शस्य ते श्रीमुखस्वाश्रया तामपि न्यक् कुर्वन्त्येत्यर्थः । अयं भावः यत्र यत्रैष स्फुरति तत्र तत्र तच्छ्रीस्तिरस्कृतेव लभ्यत इति नवनवश्रीयुजानया सैव नूनं चोरितेति चौर्यक्रियाभिनिवेशो दर्शितः सच चौरेषु त्रिधा संभवति साधूनामपि संपत्यादानादत्युत्कटदोषस्यागणनेन अतिनिगूढपरवस्तुज्ञानेन अतिदुर्लङ्घ्य लङ्घनेन चेति तत्राद्यः सत् सरसिजेत्यनेनोक्तः शरदुदाशयेति स्वच्छतादिगुणयुक्तस्य जनयितुः साधुजातेन जन्मना सदिति स्वरूपस्य गुणस्य प्रशंसनात् द्वितीयो महाजलान्तःसरसिजोदरे निलीनायास्तस्याः परिज्ञानेन तृतीयश्च वर्षानन्तरकालीनत्वादतिपूर्णस्योदाशयस्य दुरवगाहमध्यदेशस्थत्वेन सहस्रपत्राख्यसत्सरसिजोदरस्य दृग्भिर्दुर्भेद्यत्वेन चेति एञ्च त्वद्भयादेव तेन निगूह्यावस्थापितापि श्रीर्नायिका दृशा मुष्टेति तवैव महान्दोषो दारापहारित्वेनाततायितापीति भावः । तस्य द्विजत्वं च ब्रह्मणोऽपि जनकत्वेनान्तः सूक्ष्मसूत्रोपवीतधारित्वेन "कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यत" इति स्मृतिसंवादान् मित्रामित्रत्वेन तद्दर्शनैकजीवनत्वादिना स्पष्टमेव । ततश्च ब्रह्मस्वापहारित्वं सिद्धं तत्र स्त्रीधनापहारित्वं सुतरामेवेति तत्रापि दृशेन्येकत्वेनैकयापि किमुत द्वाभ्यां यद्वा सुरतनाथ दृशा त्वयैवास्माकं तदिवाकरितेति भावगोपनम् तत्र च वरदेति वरदानेन दृढीकृतेति ततश्च शुल्कदासिका निघ्नतः नितरां मारयतः । नेह किं वधः श्लषेणे दृशा वशीकुर्वत इत्यर्थः । अधीनो निघ्न आयत्त इत्यमरः । लोकैश्चौर्य्यं माज्ञायतां नाम हत्यापि किं न स्यादिति भावः । यद्वा दृशा निश्चताः नहि शस्त्रेणैव वधो वधः अपि तु दृशापीति यद्वा दृशा वरद ततश्च निघ्न इति विश्वासघातकत्वमिति एवं चेदृशोः सरीसजरूपकेणानुरागित्वं सूचितमिति संक्षेपः ॥ २ ॥

श्रीरामनारायणकृता भावभावविभाविका

ननु मया तु नैव कस्या अपि वधः क्रियते भवतीभिः स्वयं म्रियते चेत्किं मम दूषणमित्यत आहुः । शरदुदाशय इति। शरदिति जन्मकालश्रैष्ठ्यं उदाशय इति तद्देशस्योत्तमत्वं साधुतया जातेति जन्मकारणानुगुण्यं सदिति स्वरूपोत्कर्ष एतादृशो यः सरसिजः पद्मः पाद्मालयालयस्तस्योदरे तद्दलेषु वर्तमाना या श्रीस्तां मुष्णातीति तथा तया शरत्सरोजान्तर्गर्भदलश्रीपराभवकारिण्या सानुरागारुणायततापो पशमना ह्लादकदृशा अशुल्कदासिका नो निघ्नतः किमिह लोके प्रेमपथि च वधो न भवति शस्त्रादिना निघ्नत एव वधोऽपि तु शस्त्रादीनां प्रतिनियतवधसाधनत्वात्तैर्वधो न तथा तापापहरणाह्लादकसानुरागदृशास्वभावपरित्यागेन तद्विरुद्धवधाचरणमतिनैष्ठुर्यमिति भावः । एवं करणे स्वभाववैपरीत्येन वैचित्र्यद्योतनं तथा करणस्य कर्त्रधीनतया स्वभावत्यागसम्भवेऽपि स्वतन्त्रे कर्तरि स्वभावपरित्यागानौचित्यमाहुः । हे सुरत ! सुष्ठु शोभना सर्वसौख्यप्रदाभ्युदयापवर्गकामधेनू रतिः प्रीतिर्यस्य यद्वा सुष्ठु कामसुखप्रदत्वेऽपि भवबन्धनाननुबन्धिनी रतिर्मिथुनविहारो यस्य तथा हे नाथ ! नाथृ नाधृ याञ्चोपतापैश्वर्य्याशीःष्विति विधानादस्मत्स्वामिनी श्वरसमर्थ अस्माभिर्याच्यमानस्वभावत एवाशीःप्रदः यद्वा सुष्ठु रतिरनुरागो येषां तेषां नाथ स्वामिन्नभिलषिताशीःप्रदः यद्वा सुरतविहारे नाथ ईश्वर समर्थ या चिताशीःप्रद तत्रापि विशेषतो वरदास्माकं वरप्रदातः न त्वया स्वत्रन्त्रेणेश्वरेण स्वस्वभाव वरदानयोर्विरुद्धं विधेयमिति भावः । यद्वा हे सुरतनां सुष्ठ्वनुरागवतामाप नाथ उपतापक तथा वरद स्वदत्तानपि वरान् द्यति अवखण्डयतीति तथा स्वभावत एवातिक्रूर तदुक्तं सोपपत्तिकमभियुक्तः अटति भवानवला कषलायवनेषु न तत्र विचित्र प्रथमति पूतनिकैव वधू वधनिर्दयवालचरित्रमिति अतः स्वस्वभावानुसारेणैवाशुल्कदासिका अपि नो निघ्नत किमिह वधो न स्यात्स्यादेवेति भावः । ननु न मया वधः क्रियते किमिति वृथैवोपालम्भो दीयते तत्राहुः । दृशा नेत्रद्वारानिघ्नत इति स्वयमनिघ्नतश्चौरद्वारा हन्तुरपि राज्ञो वधः स्यादेव । ननु कथं मम दृशश्चौरत्वं तत्राहुः । शरदित्यादि । बहिः शरदृतुरक्षिते उदाशयेजलपूरिते निखाते वर्तमानं बहिः सहायान्वितं जलदुर्गरक्षितं साधुजातं साधु तया बहुकुसुमशरशररूपपत्रप्रकारैः प्रादुर्भूतं सत्

सुदृढदुर्गात्मकं यत्सरसिजं पद्मं पद्मालयालयस्तदुरे वर्तमानां सुदृढजलशस्त्रदुर्गगतामपि श्रियं मुष्णाति तथा तया तादृक् श्रीमुषश्चौरस्य नास्मद्वधो दुष्कर इति भावः । दृशेत्येकवचनं जातौ एकयैव दृशापाङ्गनिरीक्षणेन वधसम्भवाद्वा एकयैव वधसम्भावनायां द्वाभ्यां तु कैमुत्यन्यायेन प्रलय एव स्यादिति सूचनाय वा अत्रोदरश्रीमुषेत्यनेनातिनिगूढदृगप्रवेशवस्तु ज्ञानं तथा शरदित्यादिभिर्दुर्गमर्दुगप्रवेशेन हरणं पूर्वव्याख्यातरीत्या साधुजातसत्सरसिजानां साधुशीळानां सतामाजन्मतीर्थसेविनां श्रीहरणेनातिनैष्ठुर्यं त्रिधा चौरक्रिया दर्शिता यद्वा इत्थं शरदि तीर्थजळमध्ये कृतालयाया बहुपत्रपुटोदरे वर्त्तमानतया एकान्तरतायाः पद्मासनस्थतय च सम्यग्योगिन्याः श्रियोऽप्येकान्तरतायाः संयोगिन्याः कान्ताया इव शफरीविहारदर्शनेन सौभरेरिव सफरीचपलदृग्विहारहारतया जारशिरोमणितािवष्कारपरयादृशैव सुरतनाथ सुरतसुखयाचकं तयैव याञ्चयास्मदभिळाषवृद्धौ तया दृशैव सुरताशीःप्रद वरदतया दृशैव पद्मरागधलनीलमणिप्रभतया शुल्करूपया क्रीताः शुल्कदासिका नः तया दृशैव स्मरशररूपया निघ्नतो विश्वासघातिनः किमिह वधो न स्यात् यद्वा अशुल्कदासिका नः स्वविरहेण निघ्नतस्तव सम्मतो योऽस्मद्वधः स किमुक्तरीत्या चौरावतंसया सुमशरशरप्रधानपद्मश्राहारया मनारमरामामारया मारशराकारया दृशा इह न स्यात् अस्मद्वध एव चेत्सम्मतस्तदा दृशैव कुरु नतु विरहेणेति भावः । यद्वा अशुल्कदासिका नो विरहेण निघ्नतस्तव यः किम्वधः किमप्यनिर्वचनीयो वधः सम्भावितस्तेन बिभेषि चेत्स इह तादृशा दृशैव न स्यात् अन्यथा त्वद्दृङ्मेलनं विना तु स्यादेव यद्वा जारैरपि भामिनीनामपहार एव क्रियते नतु संहारः कैश्चिदतिक्रूरैर्वधोऽपि चिन्त्यते चेत्सोऽप्यप्राप्तानां नतु अशुल्कदासिकानां तव तादृशा दृशापि निगूढाया अपि श्रियो मोषणमेव कृतं नतु वधस्तथा च तादृङ्निगूढ श्रीमुषा दृषा न स्वत आगतानां वने रहः विहरन्तीनामशुल्कदासिकानां मोशणं दुष्करमिति तदेवोचितं यत्तु विरहेणेह निघ्नतो वध इति तत्किं न किमपि अनुचितमेवेति भावः ॥ २ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अहो यो गुडदानेन म्रियते तस्मै विषं किमर्थं देयमिति लोकन्यायादीषदारक्तकटाक्षसाध्यास्मद्वधार्थं तिरोधानं नोचितमित्याशयेनाहुः । शरदिति । शरदिति । शरत्कालीनो यः स्वच्छजलाशयस्तत्र साधु सम्यक्प्रकारेण जातं सत्समीचीनं यत्सरसिजं कमलं तदन्तर्वर्तिनी या श्रीरारुण्यशोभा तां मुष्णातीति तथा तादृशरूपया रोषेणेषद्रक्तया दृशा नेत्रेणामूल्यदासिकाः नो निघ्नतो मारयतस्तव त्वया क्रियमाणोऽयमिहलोके किं वधो न भवति किं विरहानलज्वालया वधो भवति यतो हे सुरतनाथ ! सुरतस्य सम्भोगस्य नाथ तत्प्रद तथा च सुरतनाथस्य तव रोषदृष्ट्यैवास्माकम्मरणं सुकरमितिभावः । ननु रोषतिरोधानयोरुभयोरपि मरणमहेतुत्वाविशेषात्किमर्थेमवमुच्यत इतिचेत्सत्यं तथापि क्षाम्यादिना रोषदृष्ट्यामस्यापि सम्भवादस्तिनरोष इत्याशयेनाहुः । हे वरदेति समक्षे प्रेष्ठेऽपि प्रार्थिनां वरं दत्तं संपादयितुं शक्यमसमक्षे त्वशक्याप्रतीकारतेति भावः । तथाचाऽस्मद्दर्पनाश एव भवतः कर्तुं समीहितो नतु प्राणवियोगः करुणानिधेरिष्टदेवस्य तत्साधने प्रवृत्त्यसम्भवादतस्तन्निवृत्तिस्त्वीषद्रोषदृष्ट्यैव सुकराऽतो वृथैव तिरोहितोऽसीति भावः । यद्वा । ननु नाहं युष्मन्मारणे व्यापृतः स्वत एव भवतीनां प्राणा अपगच्छन्ति चेत्तत्र मम कोपराध इति चेत्तत्राहुः । शरदिति । तव दृशा दर्शनेन निघ्नतः किं वधो न तत्रापि हे सुरतनाथ सुरतार्थमागतनां तत्प्राप्तिस्तु दूरे गता प्रत्युत मरणमेव मध्ये उपस्थितमस्तीत्यतोऽस्मन्मन्दभाग्यस्य सुरतप्रदन्मरणप्राप्तिकरस्य माहात्म्यमिति भावः । किञ्चास्मद्वधे किञ्चित्र त्वदर्शनं तथाभूतां श्रियमपि मुष्णाति नाशयतीति तथा किञ्च सर्वेषां वरप्रदस्त्वमस्मान्मारयसीति महच्चित्रमित्याशयेन सम्बोधयन्ति हे वरदेति तथा च सर्वेषां वरप्रदानाय प्रत्यक्षभवनशीळस्य तवास्मन्मन्दभाग्यवशादस्मन्मरणसाधनं तव तिरोधानं सम्पन्नमित्याक्रोशोऽपि ध्वनितः अनभिज्ञापक्षे ननु विचिन्वन्तु भवत्यो मया तु नागम्यत इति चेत्तर्हि दृशा स्मत्सर्वस्वमपहृत्य गतेन त्वयास्मद्वध एव सम्पादित इत्याशयेनाहुः । शरदिति । यथोक्तया दृशा निघ्नतस्तव त्वया क्रियामाण इह लोके बधो न किमभिचरणादिकर्मणा कृतो लोकैरज्ञातोऽपि वधोऽनिष्टसाधनं कि न भवतीति भावः । दृशव शुल्केन मूल्येन दासिका अपि मारयतः कन्प्रत्ययेन सूचनेनात्यन्तकरुणापात्रतां व्यञ्जयन्ति यद्वा वयन्तु न त्वया मूल्येन कीता नापि विवाहिता अपि त्वशुल्कदासिकाः स्वयमेव मोहिताभूमेत्यर्थः तस्मात्सुरतरूपचरप्रदानेनास्मत्प्राणप्रत्यर्प्पणाय दृश्यतामित्याशयेनाहुः । हे सुरतनाथ ! हेवरद मानिनीपक्षे अहो अस्मद्वधायोद्यमं कर्तुम्प्रवृत्तस्य तव वधकात्वत्तदानीमस्माभिर्वधोत्पत्त्यासंख्यातस्त्रीवधादपिभपञ्चान्यस्तथा प्रवृत्तस्य इत्याशयेनाहुः । शरदिति । दृशा सुतरया च न केवळं याचनमात्रं सर्वथा तव दृक् किन्तु चौर्यकर्मापीति द्योतनाय विशिंषन्ति । शरदिति । यथा चौरः सतामपि निगूढां कठिनदुर्गस्थामपि श्रियं हरति तथा साधु जातस्य सतः पद्मस्य जलदुर्गासहस्रप्राकारगर्भस्थायिनीं त्वद्भयादेव तत्र निगृह्य स्थापितामपि श्रियमपि नायिकां मुष्णातीति तथा यदेवं भूता श्रारपहृता तदा सरलानां सर्वत्र भ्रमन्तीनां विहृतश्रोत्रादिकपाटानां मनआदिहरणे किंचित्रमिति भावः । यद्वा हे सुष्ठुरतानां नाथ ! उपतापक हे निजवरच्छेदक अशुल्कदासिकाः परमप्रेमवतीः सखीर्नः अतो मित्रद्रोहादिदोषपरिहारायागम्यतामिति भावः ! निवृत्तिपक्षे तव दर्शनेनैव संसारनिवृत्तिर्नान्यथेत्याहुः । शरदिति । शरत्कालीनजलवत्स्वच्छे आशये अन्तःकरणे ते तव दृशा दर्शनेन किं किमप्यनिर्वचनीयमज्ञानं शुल्कस्य तत्तद्विषयस्य दासिकास्तत्तदाकारा अन्तःकरणवृतीश्च निघ्नता नाशयतो विदुष इह वधो नाशः जन्ममरणलक्षसंसृति-

प्रवेशलक्षणेन भवति तथा च श्रुतयः "आत्मन्येवात्मानं पश्येत् तरति शोकमात्मवित् ब्रह्मविदाप्नोतिपरं न स पुनरावर्त्तत" इत्याद्याः अज्ञानतत्कार्ययो र्ज्ञाननिवृत्त्यर्थत्वमुक्तमित्याशयेनाहुः । असाधुजातमनिर्वचनीयोत्पत्तिमद्यत्सरसिजं सद्रूपब्रह्मलक्षणे सरसि अधिष्ठाने प्रतीतकमलस्थ नीयमज्ञानं तदुदरश्रीश्च तदुभयं मुष्णाति नाशतीति तथा तयेत्यर्थः ॥ २ ॥

रास-रहस्यम्

र० टी०—हे सुरतनाथ ! सुष्ठुरतानामनुरक्तानां स्वस्वरूपदानेन सनाथयतीति, हे वरद ! वरं श्रेयः अपवर्गः तं ददातीति वरदः तत्, सम्बोधने हे वरद इति, शरदुदाशये शरत्कालीनस्वच्छजलाशयवदाशये शुद्धान्तःकरणे असाधुजात अनिर्वचनीयरूपेण जात उत्पन्नः सत्सरसिजोदरश्रीमुषा सद्रूपब्रह्मसरसि अधिष्ठाने उत्पन्ना इव प्रतीताऽविद्या तदुदरश्रीमुषा तत्कार्यस्यापातरमणीयतां मुष्णाति नाशयति एवं भूतया ते तव दृशां दर्शनेन ज्ञानेन वा शुल्कदासिकाः शुल्कस्य तत्तद्विषयस्य दासिकाः तत्तदाकारान्तःकरणवृत्तीः निघ्नतः नाशयतः किमिह किमनिर्वचनीयाज्ञानस्य वधो न जननमरणलक्षणसंसृतेः "ब्रह्मविदाप्नोति परम् ।" "न च पुनरावर्तते ।" इत्याद्या नाशो न किम् ? अवश्ययेव इति भावः ॥ २ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अत्रान्योऽन्यनैरपेक्ष्येण हरिः प्रार्थ्यतेऽतः प्रतिश्लोकमन्याआहुरित्यवतारणा एकैकः श्लोकः एकैकयूथस्य अतः सङ्गतिर्नात्यपेक्षिता । शरदुदाशये शरदि यो जलाशयस्तस्मिन्साधुजातं सम्यगुत्पन्नं यत्सत् सरसिजं समीचीनं पद्मं तदुदरे गर्भे या श्रीः शोभा तां मुष्णाति हरति तिरस्करोतीति तथा तया दृशा नेत्रेण हे सुरतनाथ ! सम्भोगार्थं याचनीय हे वरद ! हे मनोरथपूरक अशुल्कदासिकाः शुल्कं मूल्यं विनैव सर्वपरित्यागपूर्वकं त्वदेकशरणाः अस्मान् निघ्नतो मारयतस्ते तव त्वया क्रियमाण इह लोके अयं वधः न किमपि त्वस्त्येव अयमर्थः प्रथमतस्तु पद्मश्रीमुट् नयनप्रहारैरस्माकं वधोऽस्मिन् लोके त्वया कृतः लोकव्यवहारतोऽरोपितत्वात् अयमेव लोके मुख्यो वधः तथापि पिष्टपेषणवत् पुनः परोक्षी भूत्वा घातयसीति ॥ २ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे वीर गरुडारूढ समर्थ विगत ईरः प्रेरको यस्येति स तत्सम्बुद्धिः । वीराश्च योषितोऽप्स्वैरिण्यो वयं च तासामित्येकं पदं वा व्रजजन आर्तिहन्निति छेदः । हे व्रजजन गोकुलज व्रजे जनो जननं यस्य तत्सम्बुद्धिः । वीर वीरयोषितां आर्तिहन् हे जगतम् । योषितो वीरयोपितामार्तिहंश्च न व्रज एवमुपेक्ष्य क्षपायां न गच्छेति वा । अलमेतल्लीलयेति लर्षान्त । निजजनानामस्माकं स्मयो गर्वस्तस्य ध्वंसनं येन तत्स्मितं यस्य ध्वंसयतीति तद्वा तत्सम्बुद्धिः । भवे भाविमङ्गलार्थं हे सखे जलरुहवद्विद्यमानमाननं जलरुहस्याननं चेष्टा य मात्तद्रूपं चारु दर्शयन्सन् किङ्करीरिति नः स्मृत्वा भज सेवस्व पालयेति यावत् । इतरेण धुनानमब्जमित्युक्तेः । विपरीतं चेष्वारुरुचा चारु भविष्यति ॥ २ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तामसी तु वधासंभवं प्रार्थयितुमदर्शनस्य वधसाधकत्वमाह शरदुदाशय इति । शरत्कालीनो योऽयमुदाशयः पुष्करणी तत्र साधुसम्यक्प्रकारेण जातं यत्सरसिजं कमलं तदन्तर्वर्तिनी या श्रीः तामपि मुष्णातीति तादृग्रूपया दृशा दृष्ट्या हे वरद यो निहन्ति तस्य किं वधो न अपि तु वधदोषो भवत्येव येनैव साधनेन परस्य प्राणा गच्छन्ति तत्संपादनसाधको घातकः दोषभाग्भवति अनेन भगवद्दृष्टिः सर्वघातुकी निरूपितः आयुर्मनांसि च दृशा सह ओज आच्छिदिति वाक्यात् तथास्मानपि प्रायेण क्रूरदृष्ट्या पश्यसि अन्यथा कथं प्राणबाधा स्यात् रूपं त्वानन्दमयमिति दृष्टं तदैव जीवयेत् अतस्तदभावात्केवलं घातयस्येव किञ्च न वयं वधार्हाः यतो दासिकाः कुत्सितादास्यः नहि स्त्रियः अप्रयोजिकाश्च हन्यन्ते किञ्च वयं शुल्कदासिकाः त्वञ्च सुरतनाथः सर्वपुरुषार्थसाधकत्वेन सम्बोधनानि यथाधिकारं नियतानि यथाधर्ममार्गे हे धर्मपालक ब्रह्मण्य हेयज्ञेश्वरेत्यादीनि अर्थे हे लक्ष्मीपते हे सर्वसिद्धिदेत्यादीनि तथामोक्ष हे मुकन्द हे योगेश्वर ! हे ज्ञाननिधे इत्यादीनि धर्मार्थमोक्षार्थिभिरुच्यन्ते एवमस्माभिरपि सुरतनाथेत्युच्यते सुरतं सम्भोगः जगति यावानस्ति तस्य भवान्नाथः त्वदाज्ञाव्यतिरेकेण सुरतं जगति न प्रवर्तते अतो ब्रह्मणा कामेन वा लोके सुरतप्र त्त्यर्थं वयं शुल्करूपादासिका दत्ताः शुल्कः मार्गनिर्वाहकं द्रव्यं प्रतिबन्धनिवर्तकं सुरतं चेद्भवत्येव निरुद्धं तिष्ठेत्तदा लोके रसो न भविष्यतीत्यस्मद्द्वारा त्वत्तः तल्लोके प्रसृतं भवत्विति वयमागताः तत्कार्यं दूरत एव स्थितं प्रत्युतास्मान्मारयसि एवं सति सर्वमेव कामशास्त्रं व्यर्थं स्यात् । तृतीयः पुरुषार्थश्च न भवेत् अतः सर्वदा यदर्थं वयं प्रेषितास्तत्कर्तव्यम् अथवा यदा कदाचित् कर्त्तव्यम् इदानीं जीवयितव्या रूपप्राकट्य न दृशो मारकत्वमुपपादयन्ति । श्रीमुषेति । यस्तु चौरो भवति स घातको भवति यथा यथा चौरे नैपुण्यं तथा तथा घातकत्वं तदर्थमाहुः । उदरश्रीमुषेति । तत्रापि ये दुर्जाताः ते अतिनिपुणाः तत्रापि जलदुर्गजाः तत्सरसिजं तत्रापि ते दुर्ग एव तिष्ठन्ति ते साधुजाताः प्रभवः तत्रापि प्रकाशवति काले शीताद्युपद्रवरहिते एवं देशकालस्वरूपादिभिः अशक्यचौर्य्यादपि पुरुषात् तदुदरवर्तिसर्वस्वनेता अन्तःस्थितप्राणान् साधारणगोपिकादीनां नेष्यतीति किमाश्चर्यं चौर्यं हि क्रियते

बलिष्ठेन अपकीर्त्यभावाय तदत्र तु न भविष्यतीत्युक्तं किं वधेनेति अथवा अदृशा अदर्शनेन दर्शनमदत्त्वा निघ्नतः किं वधो न सुरतार्थमागतास्तद्गतं दूरे अन्तरा मरणमुपस्थितं तथा सति सुरतस्याप्रकटितत्वात् नाथत्वमपि न स्यात् नहि योगी अश्वनिर्माणसमर्थोऽप्यश्वपतिरुच्यते प्रकटयति चेत्तथा तथा किञ्च अस्मद्वधे किमाश्चर्यं त्वदादर्शने लक्ष्मीरपि न तिष्ठेत्तदाहुः। श्रीमुषेति। उदरस्थिता श्रीश्चेद्बहिरानीता तदैव म्रियते अपुष्टत्वात् आमगर्भवत् यद्यपि तस्याः जीवने कालद्रव्यदेशवस्तूनि बहून्येव सन्ति तथापि त्वददर्शने न जीवति तथा वयमपि किञ्च त्वं सर्वेषां वरान् प्रयच्छसि अस्मांस्तु मारयिष्यसीति महदाश्चर्यं वरदाता हि प्रत्यक्षो भवति अथवा ते वयममूल्यदासिका धर्मदासिकाः अतो न हन्तव्याः एवमनेकविधचौर्यभावनया काश्चिद्भगवन्तमुपालभन्ते अन्तःस्थितो रसः पुष्टो बहिश्चेन्न विनिर्गतः तदा पूर्णो नैव भवेदिति वाङ्निर्गमस्तथा ॥ २ ॥

श्रीसुबोधिनी–सारः

शरदुदाशये शरत्कालीने जलस्थाने साधु यथा भवति तथा जातं सत् श्रेष्ठं सरसिजं पद्मं तस्योदरे गर्भे या श्रीः शोभा तां मुष्णात्यपहरति इति तथा तया दृशा नेत्रेणाशुल्कदासिका अमूल्यदासा निघ्नतो मारयतस्ते वधो हिंसा पापमिह न किम् अपि तु अस्त्येव। हे सुरतनाथ हे वरद ॥ २ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सुरतनाथेत्यत्र, (**सुरतं संभोग** इत्यादेरयमर्थः। रतं लौकिकं भोगशब्दवाच्यम्। तत्तु सृष्टिमारभ्य प्रवर्तते। तत्र न भगवदाज्ञापेक्षा। सृष्टिसमानयोगक्षेमत्वात्तस्य। एवं सति सुष्ठु अलौकिकं शोभनरूपं यत् रतं तत् सम्यग्भोगशब्दवाच्यम्। तदस्मास्वेव त्वदाज्ञयेच्छयेति यावत्, तयैव प्रवर्तते। यतो जगत् लौकिकं गच्छति, नश्यत्येव, न तु स्थिरम्। अतोऽत्यलौकिकं स्वरूपानन्दरूपं तत्र प्रकटीभवितुं नार्हति। एतादृशस्य तस्य भवानेव नाथः। प्रवर्तको रक्षकश्च। एवं सति स रसश्चेत् त्वय्येव निरुद्धस्तिष्ठेत्, तदा त्वलौकिका अपि भक्ताः शून्यहृदया भवेयुरिति त्वदिच्छां ज्ञात्वा त्वां प्रार्थयित्वा तादृशीर्वयं प्रकटीकृताः, यतः प्रतिबन्धनिवृत्तिः। अत एवाग्रे 'विस्वनसार्थित' इति वक्ष्यते। कामो भगवदीयः। मनसः पूर्वरूपत्वात् वाच उत्तररूपत्वात् 'मनश्चक्र' इत्युक्त्वा 'जगौ कलं वामदृशां मनोहरम्' 'ता दृष्ट्वान्तिक'मित्यादिकं च वाग्रूपमलौकिकभावप्रवर्तकं स्वप्रियास्वित्याशयेनाज्ञापदमुक्तम्। 'मैवं विभोर्हती'त्यादिवाचां भगवद्भावात्मकत्वात्तासामप्याज्ञारूपत्वमित्याशयः। तैरेव वचनैः प्रतिबन्धनिवृत्तिरपि।) अतो ब्रह्मणेति। अत्रायं भावः। 'ब्रह्मादयो बहुतिथं यदपाङ्गमोक्षकामा' इत्यत्र भगवद्भावकामाः सन्तः साक्षात्तमलभमानाः श्रियोपाङ्गा भावोद्गारिणो निरन्तर प्रियसंगतत्वेन तद्भावात्मकत्वं प्राप्ता इति तत्सम्बन्धे तदनुभावेन कदाचित्स भावोऽपि भवेदित्याशया तत्कामास्तपश्चरन्तीति निरूपितम्। प्रकृते च स्वयं प्रभुः प्रकट इति तन्मार्गप्रकटनार्थं द्वारभूता वय तेन प्रकटिता इति। अत्र सुरतशब्देन सुष्ठु भगवता समं रतं येनेति भगवद्भाव एवोच्यते, न तु सम्भोगः, तस्यापामरमनुवर्तमानत्वेन त्वदाज्ञेत्यादिना नाथत्वविवरणं यत्तदनुपपत्तेः। एतन्मार्गप्राकट्ये न ब्रह्मणो न कोऽपि भावः सिद्ध इत्यरुच्या पक्षान्तरमाहुः कामेन वेति। भगवदीयभावरूपेणेति ज्ञेयम्। स्वामिनीदर्शने हि भगवतो भाव उद्रिक्तः सन् कामकार्यं करोत्यतस्तेनैव स्वार्थं वयं प्रकटीकृता इत्यर्थः ॥ ३ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

शरदुदाशय इत्यत्र अन्तः स्थित इति का० २९१$\frac{३}{४}$। **पूर्णो नैव भवेदिति** गानरूपेण वाग्निर्गमाभावे बाह्यांशे पूर्णो रसो न भवेदितिहेतोर्गानरूपेण वाग्निर्गम इत्यर्थः ॥ २ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'त्वयि धृतासव' इत्यनेन 'तव दर्शनं विनाऽस्माकं मरणं भविष्यति' इति सूचितम्। 'तत्र मरणं भवतु, मम को दोष' इत्याशङ्क्याहुः—शरदिति। शरत्कालीनो योऽयमुदाशयः पुष्करिणी तत्र साधु सम्यक् प्रकारेण जातं यत् सत् सुविकसितं सुन्दरं सरसिज कमलं तस्योदरे या श्रीः शोभा तां मुष्णातीति हरतीति तिरस्करोति या दृक् तया दृशा नेत्रेण अशुल्कदासिका अमूल्यदासीर्नो निघ्नतः प्राणापहारेण मारयतस्ते तव त्वया क्रियमाण इह लोकेऽयं किं वधो न भवति? किं शस्त्रेणैव वधो भवति? दृशा वधो न भवति? किन्तु भवत्येव, अतोऽस्मज्जीवनार्थं दृश्यतामित्याशयः। ननु 'किमर्थं मूल्यंविनापि दास्यमङ्गीक्रियते?' 'सुरतार्थम्' इत्याशयेन सम्बोधयन्ति—सुरतनाथेति। 'मयेमा रंस्यथ क्षपाः' इति दत्तवरस्य 'वेदानीं तत्प्रतिषेधेन मारणमत्यन्तमनुचितम्' इत्याशयेन पुनः सम्बोधयन्ति—वरदेति ॥ २ ॥

अन्वितार्थप्रकाशिका

शरदिति ॥ हे सुरतनाथ सम्भोगपते ! हे वरद ! शरत्कालिको योऽयमुदाशयः पुष्करिणी तत्र साधु सम्यक् प्रकारेण जातं यत्सत् सुविकसितं सुन्दरं सरसिजं कमलं तस्योदरे या श्रीः शोभा तां मुष्णाति हरति। यादृक्तया चोररूपया दृशा नेत्रेण अशुल्क-

दासिकाः अमूल्यदासीनों निघ्नतः प्राणापहारेण मारयतस्ते तव त्वया क्रियमाण इह लोकोऽयं किं वधो न भवति किं शस्त्रेणैव वधो भवति। दृशा वधो न भवति किंतु भवत्येव। चोरेणेव गुप्तवधो लोकैर्मा ज्ञायतां नाम। हत्यादोषस्तु स्यादेव। अतोऽस्मज्जीवनार्थं दृश्यतामित्याशयः ॥ २ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दर्शनादानेन त्वयाऽस्माकं वधः क्रियते इत्याहुः शरदिति। हे सुरतनाथ संभोगेश शरदुदाशये शरदृतुसंभूते सरोवरे साधुजातं सम्यगुत्पन्नं यत्सत् सरसिजं कमनीयकमलं तस्याप्युदरं अन्तरोभागस्तत्र या श्रीरतिशयिता शोभा तां मुष्णाति चोरयति तथाभूता तया दृशा दृष्ट्या अशुल्कदासिका अमूल्यदासीः अस्मान् निघ्नतो निघ्नता हिंसता ते त्वया इह लोके वधः किं न कृतो वध एव कृतोऽस्ति चोरेणेव वने गुप्तः कृतो वधो लोकैर्माज्ञाय तां परन्तु हत्यापि किं न स्यादिति भावः। हे वरद अतस्त्वयापहृतप्राणप्रत्यर्पणाय दृश्यतामिति सम्बन्धः चोरवद्भवता तडागदुर्गस्था श्रीर्हृता अस्मान् हत्वा किं चोरयितुमिच्छसि वयं तु तव दास्य एव किं च हे जारवरत्वद्भयात्तत्र निगूढा श्रीरपि नायिका त्वया दृष्ट्यैव कृष्टा इतस्ततो भूपतीनां सरलानां नो हरणे का वार्त्ता अतो वयं नवधार्हा इति प्रेमसंरम्भ गर्भिताभिप्रायो ध्वन्यते ॥ २ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अत्र स्वतन्त्राणां बहूनां वक्तृत्वादपरा आहुरिति प्रतिश्लोकमवतारणा द्रष्टव्या। तत्र यथासंभवं पूर्वोक्तवचसां संगतिरुच्यते। ननु मानिन्यो यूयं मानदोषात् मद्विरहं प्राप्य विचिन्वन्तु नाम मम, तत्र को दोष इति चेत् सर्वासां द्विविधकरणशक्तिसमपहारिण्या तव दृशैवास्माकं सर्वस्वमपहृतं स एव तवापि दोष इत्येवं कृष्णेऽपि दोषं पर्यवसाययन्त्य आहुः ॥ शरदिति॥ शरदुदाशये शरत्कालीने सरसि, साधु भूम्याद्युपद्रवमन्तरेण जातं समुत्पन्नमत एव सत्प्रशस्ततया विकसितं यत् सरसिजं पद्मं तस्योदरमरुणायमानमन्तर्दलं तस्य श्रियं शोभां मुष्णातीति मुट् तया, दृशा नेत्रेण, हे सुरतनाथ संभोगवर्द्धक, हे वरद आत्मपर्यन्ताभीष्टप्रद, ते तव, अशुल्कदासिकाः मूल्यरहिता दासीर्मूल्यं विनैव दास्यं प्राप्ता इत्यर्थः। शुल्कदासिका इति च्छेदे तव सम्बन्धिना सौन्दर्यात्मकेन मूल्येन दासीरित्यर्थः। इत्थंभूता अस्मान् , निघ्नतो मारयतः, तव त्वया क्रियमाण इत्यर्थः। इह लोके, अयं वधः, न भवति किम्। शस्त्रेण वध एव वधः, दृशा बधो वधः किं न भवति भवत्येव। दृशा निघ्नत इत्यनेन दृशा नः प्राणापहरणं तवापि महान् दोष इति भावः। किं च दुर्गमतडागस्थसरोजस्थिता स्वयं श्रीस्त्वया दृशा चोरिता तद्वत् दृशाऽस्मान् मृतकप्रतीकाः कृत्वा किमिति चोरयितुमिच्छसि, सासव एव वयं तु त्वद्दास्य एवेति दृशो विशेषणाभिप्रायः। ननु वने गुप्त चोरवन्मया कृतो वधः कैर्ज्ञायते इति चेज्जना मा ज्ञायतां, स्त्रीहत्या न किं स्यादिति विचारय। किं चातिचतुरायाः श्रिय एवं हरणं तवोचितमस्तु वने त्वदर्थं भ्रमतीनामस्माकं सरलानां हरणायैवंविधः समारम्भस्तव नोचितः, अतस्त्वद् दृशापहृतप्राणप्रत्यर्पणाय त्वया दृश्यतामिति यथासंभवं वाक्यशेषः ॥ २ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

शरदुदाशय इति : १०.३१.२.

सखे स्मितमुखेन ते व्यरचि पूतनानाशनं दृशाऽब्जसदृशाऽधुना यदिह नः समारभ्यते।
स्पशाचरितगोऽनयो भवति तत्प्रभोः संशयः कृतं ह्यवयवैरिहावयविनो भवेदत्र कः ॥ १३ ॥
यन्नस्त्वत्पदवारिजातवसतीर्मीनैकतुल्यस्थितीराकृष्याकुलयस्यनङ्गसरसस्तीरे स्वदृग्जालकैः।
तन्नाथोडुपवंशविश्रुतयशाराशेर्न युक्तं वदेत् को नामात्र सुधीवरस्य भवतो मीनैकवृत्तेरहो ॥ १४ ॥
सन्त्यक्ष्यामि न वः कदापि बहुशो दत्वेति विश्रम्भकं चास्मन्मानसवृत्तयो बत निजायत्त्ताकृता श्रीमता।
कुर्याः सम्प्रति वञ्चनां निजतिरोधानेन येत्तन्न किं ज्ञातं गर्ह्यत एव यत्त्रिभुवने विश्रम्भघाती नरः ॥ १५ ॥
जितेन्द्रिय इति प्रथां जगति कर्तुमेवात्मनो यतस्व कथमप्यहो परमपास्य नः सङ्गमम्।
परन्त्विदमवेहि ते न हि कदापि कदापि लुप्ता भवेत् प्रथेति गणिकाविहार्यथ भुजङ्गवृत्तिः प्रभो ॥ १६ ॥
स्वार्युत्पादकभूमिकामपि कुधीर्जाल्मोऽप्यसौ देवकीं स्त्रीत्वान्नैव जघान यात्वनुसृतः कंसः स्वसारं सखे।
हन्तुं नः कथमुद्यतोऽसि युगवत् त्वत्सारभूताः स्त्रियस्तत् सत्य वद विश्वनाथ स भवान् देवः दैत्यः कुतः ॥ १७ ॥
दैत्या मया युगपदेव हताः सहस्रसङ्ख्याधिका अपि हता न तथा स्त्रियोऽस्मिन्।
एकां वकीं हतवतस्तव ताटकां च प्रायो दुराशय इहाच्युत भाति कृत्ये ॥ १८ ॥
भवन्ति तव पार्षदा वरदयादयः सुव्रतास्तथैव भुवि मामका अपि सुभक्तिभावादयः।
अकैतवतया सदा स्फुरति मित्रतैषामहो कुतो हि पुनरीदृशी परिणताऽऽवयोस्तद्वद ॥ १९ ॥

गवामतनुहुंकृतैर्मृदुरवैः पिकानामपि सुतो भवति गोपतेस्तदुपकण्ठगामी सदा ।
इति व्रजजनार्भकैस्तव गतिर्व्यवर्णि प्रभो न धावसि कुतोऽधुना वरद गोपिकारावतः ॥ २० ॥
मुधा किमु पलायसे किमिति वा पिधत्से निजं न संभवति विच्युतिः कथमपीह नौ सङ्गतेः ।
वयं प्रकृतयो भवानधिपनन्दसूनुयतस्ततो हि विधिचोदितः सततमावयोः सङ्गमः ॥ २१ ॥
भवत्यविकलस्थितेस्त्रिभुवनेश लज्जाकरस्तवस्तवनगर्हितो यदि च बल्लवीसङ्गमः ।
किमर्थमभवस्तदा सरसपल्लवोत्तंसकः कुतो वनपरिभ्रमे बहुलतानुरागो धृतः ॥ २२ ॥
मौनं समाश्रयत वः करवाण्यभीष्टमित्थं प्रतार्य शठ दुग्धमपाहरस्त्वम् ।
नैतावता बत जितं भवता यतोऽस्ति श्वोऽपि प्रसङ्ग इति तत्र हि दर्शयामः ॥ २३ ॥
एतादृक् तव संविधेयमिह चेदासीत् पुरस्तत्कुतो नोक्तं किं वितथं प्रतार्य वचसा मोहं सखे प्रापिताः ।
आस्तां तत्कृतमस्ति साधु निखिलं स्पष्टं त्विदं प्रोच्यताम् यः स्यादाशय ईश ते सुशरणास्तत्रानुमन्यामहे ॥ २४ ॥
सद्वाचोऽकितवा दयार्द्रहृदया यूयं न चेत्थं मिथः स्त्रीपुंसैर्विहितासु वादततिषु त्वद्वञ्चनावेक्षिकाः ।
कामं नाम भवाम भाविनि जने दृष्टान्तभूताः परं तच्छ्रीशाफलवञ्चनाविधिरयं स्वैरं समारभ्यताम् ॥ २५ ॥
व्यापादं यदि वाञ्छसीह भगवंस्तत्तस्य पात्राण्यलं कंसो मल्लशलादयोऽसुरवरा दैत्यास्तथा दानवाः ।
दीनासु क्रियते किमर्थमबलास्वस्मासु तद्योजनं दीनद्रोहविचिन्तनं न हि बुधैः सद्धर्म उट्टङ्कितः ॥ २६ ॥
विश्वातिशायि चरितं तव विश्वनाथ विश्वेऽपि शश्वदिति यत्प्रवदन्ति सन्तः ।
तत्स्याद् ध्रुवं चरितमीदृशमेव यन्नो दीना विहाय गहने विहितं स्फुटार्थम् ॥ २७ ॥
यो मुष्णाति परश्रियं स हि परान् पुष्णाति तृष्णाकुलान् कृष्णैतच्छशभृङ्गशोभिवचनं प्रायं प्रसिद्धं भुवि ।
अस्मादेव विशुल्कमीश भवतः शुश्रूषण स्वीकृतं तन्मूल्यार्पणसाध्वसान्न सहसा घाते प्रवृत्तो भव ॥ २५ ॥
यद्वद्वा मयि वर्तते तदखिलं लोकोत्तरं वस्त्विति प्रख्यातिस्पृहयालुना यदि निजोरुन्यस्तसर्वात्मना ।
हिंसायां निजहिंस्रतातिविशदीभावाय बुद्धिर्धृता तन्नास्ति त्वयि हिंस्रतैव भगवन् षाड्गुण्यभाजि प्रभो ॥ २९ ॥
प्रभाषन्ते सन्तः पुरुषहृदयं लोहमयमित्यलं योषादृष्टिर्भजति पदवीं चुम्बकमणेः ।
स्वरं श्रुत्वाप्यार्तं सदय न समायासि तदिदं भवेच्छास्त्रं प्रायो नरि जगति दुष्प्राप्यवतौ ॥ ३० ॥
प्रारब्धादघराशिदुःखविवशा सर्वे नरास्त्वं यतस्तद्दुःखप्रदकर्मणा न कलितः श्रीमानतश्चित्सुखः ।
सत्येवं हि मुधाऽस्मदार्तिकरणात्तत्किं चिनोषि प्रभो पङ्कालेपनमार्जनादिह वरं यत्कर्दमास्पर्शनम् ॥ ३१ ॥
पञ्चबाणभिदयोर्मनोभवप्राणयोरयमुपस्थितो रणः । शौरिणाऽन्यतरपक्षगेन तद्भावमीश भवितासुरक्षणत् ॥ ३२ ॥
इन्द्रियाणि समनांसि हृतानि जालकेन तव दृष्टिगुणानान् । वीक्ष्य धीरपि सुसंभ्रमदीना भ्राम्यतीह विहिताश्रयहीना ॥ ३३ ॥
शरदुदाशयजातसरोजको दरगतामपि मां हरतस्तव । न हि हरे वनजातविहारिणी हरणमद्भुतमित्यवगम्यते ॥ ३४ ॥

कृष्णप्रिया

अब सात्विक तामस गोपियों का यूथ नाथ को निवेदन कर रहा है कि—हे रमण निपुण श्याम सुन्दर ? शरत्कालीन सरोवर में अच्छी तरह से समुत्पन्न एवं विकसित कमल के हृदयगत सौन्दर्य को भी चुराने वाली रसमयी आपकी नजरों से हमें घायल करते हो नाथ ! यह तो एक प्रकार से हमारा वध ही है । हे नाथ ! आप तो वरद है और हम तो आपकी बिना मोलकी धर्म परायण सेविकाएँ है इसलिए आप दर्शन देकर रक्षण करें ॥ २ ॥

विषजलाप्ययाद्[1] व्यालराक्षसाद् वर्षमारुताद् वैद्यतानलात् ।
वृषमयात्मजाद् विश्वतोभया[2]दृषभ ते वयं रक्षिता मुहुः ॥ ३ ॥

कर्दमक्षमा

अन्वयः—हे ऋषभ ! विषजलअप्ययात्, व्यालराक्षसात्, वर्षमारुताद्, वैद्युतानलात्, वृषमयात्मजात्, विश्वतः, भयात्, ते, वयम, मुहुः, रक्षिताः ॥ ३ ॥

---

१ जलाशयाद्–विज. । २. मयाद भयाद्–विज. । ३ मुखाद्–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च बहुश्यो मृत्युभ्यः कृपया रक्षित्वा किमितीदानीं दृशा मन्मथं प्रेष्य घातयसीत्याहुः। विषेति। हे ऋषभ श्रेष्ठ विषमयाज्जलाद्योऽप्ययो नाशस्तस्मात्तथा व्यालराक्षसा दघासुराद्वर्षान्मारुताच्च वैद्युतानलादशनिपाताद्वृषोरिष्टस्तस्मान्मयात्मजाद्व्योमाद्विश्वतोऽन्यस्मादपि सर्वतो मयाच्च कालियदमनादिना रक्षिताः। किमिदानीमुपेक्षस इति भावः॥ ३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतोऽप्यधिकमुपालम्भमाहुः–किञ्चेति। प्रेष्य प्रेर्य। यद्वा—ऋषभेत्यवतारान्तरनाम्ना सम्बोधयन्ति, ऋषभदेववत्समाधिनिष्ठत्वत्किन्नास्मान्पश्यसि। यद्वा–यथर्षभावतारेणार्त्ता वृष्टिभयात्प्रजा रक्षिताः पूर्वं स एव त्वं दीनदयालुरित्यभिप्रायः। यथर्षभो गवेन्द्रः परपीडां न वेत्ति यद्वत्किमधुना जातोऽसीति वा। यद्वा-किमिति रक्षिताः कुतोऽविता मारिताः स्याम चेत्तदैव भद्रमभविष्यदनुना स्वहस्तमारणायावशेषिताः स्त्रीवधोऽतिनिंद्यो भविष्येवेत्यन्ये। इति भाव इति–"अन्ते रण्डाविवाहश्चेदादावेव कुतो न सः" इति न्यायेन रक्षितोपेक्षा नोचितेत्यभिप्रायः॥ किञ्च जिघांसैव चेत्तव वर्तते तदा पूर्वपूर्वविपद्भ्यः किमिति रक्षिताः; रक्षित्वा वधः खल्वनुचित एवेत्याहुः–विषमयाज्जलाद्योऽप्ययस्तस्मात्। व्यालराक्षसात् अघासुरात्। वर्षात् इन्द्रकृतवृष्टेः, मारुतात् तृणावर्तात्। वैद्युतानलात् इन्द्रकृतवज्रक्षेपात्। वृषात् अरिष्टात्, मयात्मजात् व्योमासुरात्। विश्वतोऽन्यस्मादपि सर्वतोभयात्कालियदमनादिना। हे ऋषभ **पुरुषश्रेष्ठ** स्वरक्षणादेव त्वदेकप्राणा वयं रक्षिताः वर्षादिभ्यस्तु सर्वव्रजरक्षणादेव तदन्तःपातिन्यो वयमपि रक्षिताः। अत एव रक्षके त्वयि विश्वस्य पञ्चशरज्वालोपशमार्थं वयमागताः, त्वया तु ततोऽपि कोटिगुणितया स्वविरहानलज्वालया दंदह्यामह इति विश्वस्तघातादपि त्वं न बिभेषीति भावः। अरिष्टव्योमवधस्य भावित्वेपि गर्गभा गुर्यादिमुखतः कृष्णजन्मपत्र्यां श्रवणस्य भूतत्वेनैव भूतनिर्देशः॥ ३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं परम्परया सर्वसाधारणतया च त्वया वयं सदा रक्षिता स्म एव। तर्हि विषवृक्षोऽपि सम्बर्ध्य स्वयं छेत्तुमसाम्प्रतमिति नीतिः कथं न स्मर्यतामित्यभिप्रेत्याहः। विषजलाप्ययादिति। विषजलं कालियह्रदजल तेन पीतेनाप्ययात् गवां गोपानाञ्च मरणात् व्यालराक्षसादघात् "रक्षो विदित्वाखिलभूतहृत् स्थित" इत्यनेन तस्यैव व्यालरूपस्य राक्षसत्वेन निर्देशः कृत इति तस्माद्बालवत्सान् गिळितवतो वयं रक्षिता इति सर्वगोकुलजीवनरूपाणां तेषां रक्षणेन गोकुलस्य रक्षणात् वयमपि रक्षिता इत्यर्थः। इति परम्परा दर्शिता। वर्षमारुतात् वर्षमिश्रान्मारुतात्तत्रैव वज्राश्मपरुषानिलैरित्युक्त्या वैद्युतानलाच्च श्रीगोवर्द्धनधरणेन त्वया रक्षिता इति सर्वसाधारणता दर्शिता वृषमयात्मजादिति समाहारं वृषात् वत् साकारत्वेन गतादपि परिणामे वृहत्त्वदर्शनात् वृषात्वत् सासुरात् मयात्मजात् तल्लीलाया अतिवाल्यचरितत्वेनैव निर्णेष्यमाणत्वात् पूर्वमेव व्योमासुराच्चेति पुनः परम्परा दर्शिता वराहतोको निरगादितिवत्। वृषात्मजाद्वत्सात् मयात्मजाद्व्योमाच्चेति वा। अथ सर्वमेव संगृह्य आहुः। विश्वतो भयादिति। तत्र तत्र योग्यतामाहुः! हे ऋषभ। सर्वश्रेष्ठ इति॥ ३॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विषजलादिभ्यो गोपोपादीनां वर्षादिभ्यश्च सर्व्वव्रजस्यैव रक्षणेनात्मीयात्मपालनात्, किंवा तत्र तत्र श्रीकृष्णविषयकमांगल्येनैव सर्व्वरक्षामननाद् वयं रक्षिता इति प्रेमोद्रेकेणोक्तं तत्र वृषमयात्मजादिति भाविसूचनम्, सहज-सार्व्वज्ञ्याद् विशेषतश्च विरहार्त्त्या प्रेमविशेषोच्छलनात् स्वत एव तत्तत्परिस्फूर्त्तेः, तस्य भावित्वेऽपि भूतनिर्द्देशः, सुनिश्चितत्वात्, अहो कति गण्यानि, बहुभ्योऽपि दुःखेभ्यो रक्षिता इत्याहुः—विश्वतः पूतना-शकट-तृणावर्त्त-यमलार्जुनेभ्यो वक-वत्सदवानल-केश्यादिभ्योऽपि भयादित्येवं पुनः पुनस्ते त्वया त्वदीया वा वयं रक्षिताः; तच्च तव युक्तमेवेति सम्बोधयन्ति—ऋषभ! कारुण्यादिना सर्व्वतः श्रेष्ठेति। यद्वा, व्रजेश्वरेति वयमित्यत्र स्पष्टनिर्द्देशः, स्वविषयकोपकारविज्ञापनाय, तच्चाधुनापि तदर्थं मुहुरिति तत्रौदासीन्य-राहित्येन परमकृपालुत्वं सूचितम्। किंवा प्रेमविवशानां तासां स्वप्नमनोरथादौ पुनः पुनस्तेषामेव साक्षादिव स्फूर्त्त्यभिप्रायेण, पूर्व्वोक्तक्रमातिक्रमा[?]रहवैवश्यात्, किंवा श्रीकृष्णविषयक-तत्तद्भये तेषां यथोत्तरं न्यूनताभिप्रायात्, अतएवैते स्पष्टं निर्द्दिष्टाः, ततश्च विषजलाप्ययादपि रक्षिताः, किं वक्तव्यं व्यालराक्षसादित्येवं व्याख्येयम्। अन्यत्तैर्व्यञ्जितम्। यद्वा, व्यालाः कालियाजगरादयः, राक्षसाः पूतनावकाशाद्याः, शङ्खचूडश्च यक्षराक्षसयोरभेदात्, स च श्रीध्रुवोपाख्यानान्ते व्यक्त एव, तेषां जातावेकत्वं पुनर्द्वन्द्वैक्यम्। एवमग्रेऽपि; वर्षं दुर्म्मदेन्द्र-प्रेरित-संवर्त्तककृतम्, मारुतस्तदानीन्तनस्तृणावर्त्तश्च, वैद्युतं विद्युत्समूहः, तद्वर्षकालीनमेघ, अनलश्च स्थानद्वयदाव, विश्वतस्तदितरेभ्यः, शकटादिभ्यः, ते गोपा वयञ्च रक्षिताः, त्वयेति प्रकरणबलात् गोपा इति साक्षादनुक्तिस्तदानीं तत्प्रसंगस्यायोग्यत्वात्। तत्र विषजलाप्ययाद्गोपाः सुधादृष्ट्या जीवनादिना वयं च शोकभरेण तत्र प्रविश्य मरणोद्यताः कालियमर्द्दनादिना अजगरात् श्रीनन्दः, पूतनातस्तन्निपातभयात्, प्रायः सर्व्वोऽपि व्रजः शकटार्ज्जुनतो वत्स-वकाद्यासुरेभ्यश्च बालकाः, शंखचूड़-

द्वयम, वर्षात् सर्वोऽपि व्रज इत्येवं विवेचनीयम्, तत्र ते इति दृष्टान्ततयोह्यम्। एवं सामान्येनैव वयं रक्षिताः स्मः, अधुना तु त्वदेकगतयो वयं विशेषेण रक्ष्या इति भावः। अन्यत् समानम्। यद्वा, किंशब्दः पूर्वस्मादनुवर्त्तेत। ततश्चायमर्थः—तस्मात्तस्मात् किमिति रक्षिता मारिताः स्याम चेत्तदैव भद्रमभविष्यदित्यर्थः, ततश्च तेषां दुर्म्मारकतापेक्षया यथोत्तरं श्रैष्ठ्यमूह्यम्॥ ३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विषजलाप्ययात् विषजलेन विनाशात्॥ ३॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च कृपया बहुभ्यो मृत्युभ्यो रक्षितवतोऽधुना दृशैव घातोऽनुचित इत्यभिप्रेत्याहुः। विषेति। हे ऋषभ श्रेष्ठ! विषमयात्कालियह्रदजलाद्योऽप्ययो नाशस्तस्मात्तथा व्यालराक्षसाद्घासुराद्वर्षमारुताद्वैद्युतानलादशनिपातजादग्नेः वृषाऽरिष्टः तस्मान्मयात्मजाद्व्योमासुराद्विश्वतः अन्यस्मादपि सर्वतो भयाच्च कालियमददमनादिभिः पुनः पुना रक्षिताः किमिदानीं केवलं मारयसीति भावः॥ ३॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अलुक् समासन्यायेन शरदुदाशय इत्येकं पदं शरदुदाशये शरत्कालसम्बन्धिसरोवरे साधु भूम्याद्युपद्रवमन्तरेण जातमुत्पन्नम् अत एव सत्प्रशस्तं विकासिजं यत्सरजितं पद्मं तस्य उदरमरुणाय मानमन्तर्दलं तस्य श्रियं शोभां मुष्णातीति शरदुदाशये साधु जातसत्सरसिजोदरश्रीमुट् तया दृशा शुल्कदासिकाः क्रीतदासीः नो निघ्नतः मारयतः तेऽस्मदाशादिहनने किं वधो न भवति खड्गादेरप्यधिको वधोऽर्धरात्रेऽस्मत्त्याग इत्यर्थः। सुरतनाथ निधुवनवीर!॥ ३॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

यद्येवमस्माकं वध एव तवोद्देश्यः तदा कथमुपसन्नेभ्यः पूर्वं पूर्वं हेतुभ्यो रक्षिताः स्म इति दर्शयन्ति—विषजलाप्ययादित्यादि। विषजलाप्ययः कालियकलिल-यमुना ह्रदः, व्यालोऽघासुरः; स एव राक्षसः, शरीरिग्रासित्वात्। वर्षादिः प्रसिद्ध एव, कुपितशक्रकृतत्वात्। वृषोऽरिष्टः मयात्मजो व्योमासुरः किं बहुना? विश्वतो भयादेव तत्रापि मुहुर्वारं वारम्। नन्वेषां भवद्विधवधहेतुत्वं बा कुतः? कुतो वा यूयं रक्षिता इति न वक्तव्यम्। व्रजस्थानां रक्षणमेवास्माकं रक्षणम्। तेन व्रजोत्कर्षेऽस्माकमप्युत्कर्षो भवितुमर्हति; तन्नचेदतत्रवास्माकं क्षोभ इत्याशयः॥ ३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अथ यदि नो वध एव तवोद्देश्यस्तदा पूर्वं पूर्वमुपसन्नेभ्यो वध-हेतुभ्यः कथं रक्षिता इत्याहुः—विषजलाप्यायादित्यादि।३।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च जिघांसैव चेत् तव वर्त्तते तदा पूर्वपूर्वविपद्भ्यः किमिति रक्षिताः रक्षित्वा वधः खल्वनुचित एवेत्याहुः। विषमयाज्जलात् योऽप्ययस्तस्मात्। व्यालराक्षसादघासुरात् वर्षादिन्द्रकृतवृष्टेः। मारुतात् तृणावर्त्तात्। वैद्युतानलादिन्द्रकर्तृकवज्रक्षेपात्। वृषादरिष्टात्। मयात्मजाद्व्योमात्। विश्वतः अन्यस्मादपि सर्वतो भयात् कालियदमनादिना हे ऋषभ पुरुषश्रेष्ठ! स्वरक्षणादेव त्वदेकप्राणा वयं रक्षिताः। अत एव रक्षके त्वयि विश्वस्य पञ्चशरजालोपशमार्थं वयमागताः त्वया तु ततोऽपि कोटिगुणितया स्वविरहानलज्वालया दन्दह्यामहे इति विश्वस्तघातादपि त्वं न बिभेषीति भावः। अतः अरिष्टव्योमवधस्य भावित्वेऽपि गर्भभाण्डर्यादिमुखतः कृष्णजन्मपत्र्यां श्रवणस्य भूतत्वेनैव भूतनिर्द्देशः॥ ३॥

श्रीरसिकाह्लादिनी टीका

अन्याः पुनर्दैन्यमावेदयन्त्यः प्रार्थ्यमाना बहुधा बहुभ्यो मृत्युभ्यो रक्षित्वा किमितीदानीमुपेक्ष्यस इत्याहुः। विषेति विषमयं कालियह्रदजलं तस्माद्योऽप्ययो नाशस्तस्मात् गोपीनां मरणदर्शनात् आजीव्य नाशात्स्वस्यैव नाशः सूचितः। व्यालराक्षसादघासुरात् तदुक्तमत्रैव "रक्षो विदित्वाखिलभूतहृत्स्थित" इति। वत्सवत्सपरक्षणेन वयमेव रक्षिता इत्यर्थः। वर्षमारुतात् द्वन्द्वैकवद्भावः वैद्युतानलात् अशनिपातरूपाग्नेः गोवर्द्धनोद्धरणेन त्वया रक्षिताः। वृष-मयात्मजात् वृषोऽरिष्टस्तस्मात् मयात्मजो व्योमस्तस्मात् आप्राप्तिद्वन्द्वैक्यं तस्य भावित्वेऽपि भूतवन्निर्देशो गर्गवाक्य-प्रामाण्यात्, पूर्वसंस्कारवशाद्वा। किं वास्माकं त्वदुपकार-विस्मृतिर्न जातेति कथयन्ति हे ऋषभ पुरुषोत्तम विश्वतो भयात्, पूतनादिभ्यो यद्भयं तस्मात् मुहुर्वारम्वारं रक्षितास्तत्र तत्रौदासीन्यराहित्येनेति किं यतोऽभयहेतवो गुणाः स्युः। यद्यपि शङ्खचूडबध एवासां रक्षा कृता, अजगरात् सुदर्शनात् नन्दस्य रक्षणं, व्योमात् गोपानां रक्षा, दावाग्निपानेन सर्व-व्रजस्य रक्षा कृता, तथापि व्रजैकदेशरक्षणेन स्वस्यैव रक्षणममन्यतः व्रजैकदेशनाशात्स्वस्यैव नाशाभिमाना देवमुक्तम्। किं च बहिः प्रकटेभ्यो मृत्युभ्यो रक्षिता इति युक्तं कृतं इदानीमन्तरात् दुःसहाद् मृत्योः

पालनीया इत्यर्थः। तदा वयं तैरेव मृत्युहेतुभिर्मारिता अभविष्यामः तदेव मन्दमभविष्यति। त्वया रक्षितं स्वाङ्गं व्याकुलीभवतीति न्यायमाहुः। विषवृक्षोऽपि सम्वर्द्ध्य स्वय छेतुमसाम्प्रतमिति दैन्यं निवेदनमिति ॥ ३ ॥

विशुद्धरसदीपिका

किञ्च मुहुर्मुहू रक्षया संवर्द्धितायास्तदाशायाश्छेदोऽनुचित इत्याहुः विषेति। विषयुक्तजलं कालियह्रदजलमिति शाकपार्थिवादि तेनाप्ययात् तत्र या गवादिरक्षा सा स्मदाजीव्यान्नादि संबन्धेनास्मास्वेव पर्य्यवस्यतीति किंवा स्मत् संबन्धेनैतत्तदनुष्ठानमिति भावः। एवमग्रेऽपि व्यालराक्षसादघासुरात् रक्षोविदित्वाखिलभूतहृत्स्थित इति तत्रैवोक्तेः वर्षमारुताद्वैद्युतानलादित्येकमपि द्विधोक्तमुपकारबाहुल्याभिप्रायेण सीदत् पालपशुस्त्रीत्याद्युक्तेः वृषमयात्मजात् तत्र वृषात्मजाद्वत्सासुरात् मयात्मजाद्व्योमासुरात् समासेनैक्याध्यवसायाच्छैलयोरव्यवहितत्वमप्युक्त सर्वमेव संगृह्याहुः। विश्वतो भयादिति। यद्वा साकूताभिधानं पूर्वश्लोकोक्तसुरतनाथ वरदेत्यादिना परममनोहरे त्वय्येव सक्तानामैहिकामुष्मिकविषयान्तरानासक्तिरपि त्वयैव कारितेति भावः। हे ऋषभ! प्राणवल्लभ सम्बन्धोऽपि सूचितः ॥ ३ ॥

श्रीरामनारायणकृता भावभावविभाविका

किञ्च स्वरक्षितहनने सौनकत्वापत्त्या गोपालत्वक्षतिरित्याशयेन तत्कृतां बहुधा रक्षां स्मारयन्ति। विषजलाप्ययादिति। वयं त्वया कालियविषव्याप्तयमुनाजलाप्ययात् त्वां यमुनाहृतं विलोक्य दुःखैः कल्पसाहस्रात्तत्प्रवेशोद्यतानां नः सम्भाव्यमानात्कृपया ततस्त्वरितं सुतृप्तसुखं हित्वैव बहिरागमनेन रक्षिताः अधुनातु त्वद्विरहेण सुधाकरकरव्याप्तं विश्वमेव विषजलसिन्धुरिवास्मान् स्नावयति भवानेव तदप्ययादव्यात् तथा कालियकुलव्यालानां रमणकद्वीपप्रेषणेन त्वया वयं रक्षिता अधुना तु त्वद्रमणकद्वीपे विहारपुलिने सर्वा गोप्यो विरहविषविषमपञ्चफणनखमणिधरव्यालम्बिभुजव्यालयुगलगुञ्जास्ततस्ता विरहविषयोपरामेण विशालभुजव्यालानी वनमालत्वसम्पादनेन ततो भवतैव रक्षणीयाः तथा राक्षसेभ्यः वकीवकादिभ्यो मुहुरक्षितास्तत्र राक्षसानां व्रजप्रवेशे सर्वेषां भयसम्भावनाभिप्रायेण वा ततः स्वरक्षणोक्तिः स्वीयानां जीवनरूपस्वात्मन एव रक्षोरक्षणेन स्वावनाभिप्रायेण वा अधुना तु 'द्वा सुपर्णासयुजा सखाय' इति श्रुतिसिद्धविश्वमित्रेण त्वयैव स्वविरहद्वारा दुःखप्रदतया विश्वामित्रतां यातेन विश्वामित्रेण प्रहितः प्रहितोऽपि स्वमनोजो मनोजो रक्ष इव नो भक्षगे प्रवृत्तस्त्वदक्षिणतयैव जक्षणादिना ततो रक्षणसम्भावना त्वद्वामत्वे तु वामानां तव वामतां कामेन निकामतयोपरामेण नामापि नावशेषणीयं व्यालराक्षसादित्यत्र जातावेकवचनं निर्दिश्य पुनर्द्वन्द्वैक्यमेवमेवाग्रेऽप्यूहनीयं तथा स्वभागतर्षगतस्वोत्कर्षसामर्षसहस्रदृक्कृतवर्षोद्धर्षोद्गिरिमाकृष्यैव कृष्णेन स्वकरकञ्जैकञ्जवद्धारणेन दुःखनिवारणं कृतमधुना तु सहस्रदृशः सदृश एव वारिधारासारैश्चतुर्दशभुवनात्मकस्वपिण्डब्रह्माण्डान् प्लावयन्ति बहुमेरुयुगस्वसखीकुचगिरिकरधारणेन त्वयैव स्वपक्षावनदक्षतया रक्षाविधेया तथा तत्कृतात्कृतान्तकृताद्दुरतिक्रममारुतात् वृष्टि वातात्त्वयावितावताधुनातु तद्विरहतापं विभ्राणो घ्राणान्निःसृतः स्वप्राणो जगत्प्राणश्च प्राणहरो जातस्तत्त्राणन्तु तव मुखसौरभावघ्राणेनैव तथा तत्प्रयुक्ताद्वैद्युतादपि त्वयैवाविता अधुना तु त्वदुत्कटविरहात्स्वकटिनिकटपटतटकाञ्चनाञ्चलाश्चञ्चलाश्चञ्चलवतापप्रपञ्चनेन तनुतञ्चनाजाताः त्वयैवैतद्दुःखवञ्चरञ्जनीयं तथा अनलात् द्विविधवनोद्भूतादग्नेस्त्वया रक्षिता अधुना तु कामविरहानलाभ्यामनलाभ्यां सकला अवला अलम्विकलाः कृताः बहः प्रतिद्रुमारुणसुमनांसि वनदाववदरुणप्रावरणान्याभरणमणिगणाश्चकरालाग्निज्वालतदङ्गारवद्दाहका जातास्त्वमेवावेति भावः वृषमयात्मजादित्यत्र वृषोऽरिष्टो मयात्मजो व्योमस्तयोर्द्वन्द्वैक्यं तस्मात् तथा चारिष्टाद्रक्षणस्य भावित्वेऽपि भगवत्प्रेमाविर्भूतसार्वश्येन तदुक्तिः यद्वा वृषमययोरात्मजौ वत्सव्योमौ तयोः समाहाराभिप्रायेणैकवचनं तस्मात् वयं त्वया रक्षिता अधुनातु त्वाम्विना पशुवृत्तीनां नः सर्वे पशवो वृषवत्सवद्भयावहा व्योमगतसोमः सोमयुतव्योमश्च व्योमोद्भवस्तोमेन रोमाञ्चको जातः तथा च विश्वतो भवान्मुहुस्त्वद्रक्षिता अधुना विश्वतोभयव्याप्ता इति स्वरक्षितानां स्वविरहेण वधोऽनुचित इति त्वया दृश्यतामिति यथासम्भवं सर्वत्र वाक्यशेष उपादेयः नच भवतीनां मद्दोषेण मयोपेक्षा कृतेति वाच्यम् आश्रितेषु गुणदोषदृष्ट्यनौचित्यात् तदुक्तं नीतिविद्भिर्दोषाकरोऽपि कुटिलोऽपि कलङ्कितोऽपि मित्रावसानसमये विहितोदयोऽपि चन्द्रस्तथापि गिरिशः शिरसा बिभर्ति नैवाश्रितेषु गुणदोषविचारणा स्यादिति ॥ ३ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

किञ्च बहुभ्यो मृत्युभ्यो रक्षितवान् विरहाग्निना मारणाय प्रवृत्तौ निमित्तं न विद्म इत्याशयेनाहुः। विषेति। विषजलं कालियह्रदजलं तेनापि गोपानां नाशस्तस्मात् व्याळराक्षसात् सवत्सपाल गिलिनोऽघासुरात् वत्सपालादिरक्षणेन परम्परया वयमपि रक्षिताः वर्षयुक्तात् मारुतात् वैद्युतानलादशनिपातोच्चन्द्रकृताद्गोवर्द्धनधारणेन साक्षात् वृषा वृषभासुरोऽरिष्टः मयात्मजात् व्योमासुरात् तच्चरितमग्रे वक्ष्यमाणमपि रासोत्सवात्पूर्वं जातमिति द्रष्टव्यं तल्लीळाया अतिवाल्य एवाऽयोग्यत्वात् किम्बहुना अन्यस्मादपि सर्वतो भयात् हे ऋषभ! सर्वोत्तम वयं रक्षितास्तथा च यथा प्रेष्ठत्वात्पूर्वं रक्षितास्तथेदानीमपि दर्शनप्रदानेनास्मद्रक्षणमेवोचितं नतु स्वस्वभावत्याग इतिभावः। अनभिज्ञापक्षे तत्र तत्र स्वरक्षणेन यथा वयं रक्षितास्तथेदानीमपि स्वप्रकटनेन रक्षणीया इति

भावः। मानिनीपक्षे ननु यदि भवतीनां वधो ममाभीप्सितः स्यात्तर्हि भवत्यो न रक्षिताः स्युरित्याशङ्क्याहुः। विषेति। तथा च स्वहस्तेन वधार्थमेव रक्षिता इति वर्तमानकालीनया प्रवृत्त्या ज्ञायत इति भावः। तत्र तत्र रक्षणपरायणश्रेष्ठत्वेन ख्याते त्वयि विश्वस्तानामस्माकं घातो नोचितो विश्वासघाताख्यकर्मकर्तृत्वायोग्यत्वाच्छ्रेष्ठस्य तवेति सम्बोधनाशयः निवृत्तिपक्षे किञ्चास्माकमपि तव तत्त्वज्ञानादेव रक्षणं भवति नान्यथेत्याहुः। विषेति। ते तव ज्ञानादिति शेषः। हे ऋषभ क्षराऽक्षरातीतपुरुषोत्तम! तव ज्ञानाद्धेतुभूतादधिकारिभिस्त्वदनुग्रहेण सम्पादिताः पुनः पुनर्वयं रक्षिता जाताः परमात्मज्ञानस्य विशेषणानि विषरूपस्य "विभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यतो"ति भयहेतुत्वेनाभिमतस्य जलस्य डलयोरभेदादब्जस्य उत्पत्त्याश्रुतस्याप्ययात् पलायनकरात् पुनश्च व्यालानां बहुश्रुतत्वेऽपि विपरीतार्थकल्पकत्वात्खलानां राक्षसात् राक्षसवद्भयं "व्यालो दुःखे गजे सर्पे खले श्वापदसिंहयो"रिति मेदिनी वर्षस्य दुःखवर्षो मारुतात् अथवा तन्नाशकरात् "तत्र को मोहः कः शोक एकत्वमनुपश्यत" इत्यादिश्रुतेः तथा वैद्युताद्विद्युताग्निप्रभं तृणपर्णादिस्थानीयमज्ञानं "विद्युत् तडिति सन्ध्यायां स्त्रियां त्रिषु तु निष्प्रभे" इति मेदिनी तदेवं वैद्युतं तत्सम्बन्ध्यहङ्कारादिकं वा तस्यानलादनलवद्दाहकात् तथा वृषमयात्मजात् भगवदाराधनलक्षणं निष्कामं कर्म नित्यादिसन्ध्यान्तं वृषशब्दप्रतिपाद्यं तन्मयादात्मनोऽन्तःकरणाज्जातात् अत एव विश्वतः सर्वतः अभयात् सर्वप्रकारेणानुच्छेद्याद्वैतवादेन सर्वभयोच्छेदकरादिति वा द्वितीयाद्वै भयं भवतीति श्रुतेः ॥ ३ ॥

रास-रहस्यम्

र० टी०—हे ऋषभ! क्षराऽक्षरातीतपुरुषोत्तम! ते तव स्वरूपज्ञानेन वयं वृत्तयः मुमुक्षवो वा मुहुः पुनः पुनः विषजलाप्ययात् "न विषं विषमुच्यते विषयाः विषमेव हि। विषं निहन्ति अत्तारं विषयाः तद्दर्शनेन वै।" इति वचनात् विषया एव बिषं, जलस्थानीयाः भोग्यपदार्थाः तेषामप्ययात् त्यागात् अर्थात् विषयभोगत्यागात्, पुनः व्यालराक्षसात् व्यालः खलः, राक्षसः असुतृपः, लोभलक्षणाघासरात् किम्वा विपरीतार्थ कारीशरीरात्मवाद्येव व्यालः खलः, स एव असुतृप् असुरः तस्मात्, पुनः वर्षमारुतात् भोगातृप्तिजन्यशोकजाश्रुपात एव वर्षा पुनश्च तद्भोगवासना एव मारुतः तस्मात्, पुनः, वैद्यतानलात् विद्युदिव विद्युत तस्यभावं वैद्युतं विषयभोगजन्यविद्युतवत् क्षणिकसुखस्य पुनः प्राप्ति कामनालक्षण अनलः तदव वैद्युतानलः तस्मात्, पुनः वृषमयात्मजात कर्मकाण्डोक्ताश्वमेवादिश्रेष्ठयज्ञाः वृषशब्दवाच्याः तन्मयाः यज्ञसमूहाः तदात्मजः तज्जन्यस्वर्गादिरूपफलं तस्मात्, पुनः विश्वतोभयात् विश्वतः सर्वतः भयात् द्वैतदर्शनात् "द्वितीयाद्वै भयं भवति।" "य एवमात्मानमुदर कुरुते अथ तस्य भयं भवति।" इत्यदि श्रुतिभ्यः रक्षिताः अनासक्तकारिताः ॥ ३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे ऋषभ! श्रेष्ठ विषजलात् योऽप्ययो नाशस्तस्मात् व्यालराशसादघासुरात् वर्षात् मारुताच्च वैद्युतानलात् अशनिजादग्नेः वृषात् वृषभासुरात् मयात्मजात् व्योमासुरात् विश्वतोऽन्यस्मादपि सर्वतो भयाच्च ते त्वया वयं रक्षिताः इदानीमपि विरहजादग्ने रक्षां कुर्विति भावः ॥ ३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शरदुदाशये साधु जातसत्सरसिजोदरश्रीमुषेति पदम्। शरदो ऋतोस्तत्सम्बन्ध्युदाशयः सरस्तस्मिन्साधु यथा तथा जातं सत्सरसिजं कमलं तस्य श्रियं शोभां मुष्णाति चोरयतीति सा तया दृशा कटाक्षेण। सप्तम्या अलगसंज्ञात्वेऽपि ज्ञेयः। हे सुरतनाथ रमणसमर्थवरद अशुल्कदासिका अविक्रीतदासीः। अनेन स्वाभाविकता दास्यस्य सूच्यते। निघ्नतो दूरीभूततया हतवतस्तवेह वधो न किं न शरादिः कथं कथयत। कामिन्योऽयं युष्मद्वध आयुष्मत्य इति न वद वधदृगेव तादृगिति तात्पर्यम्। असाधुजातसत्सरसिजोदरश्रीमुषा असाधूनां जातं समुदायस्तस्य तथा सन्ति रक्तिम्ना समीचीनानि सरसिजस्य कमलस्योद्गतान्यराणि दलानि च तेषां च याः श्रीस्तां मुष्णातीति सा तया दृशा। हलन्तत्वाट्टाबन्तः शब्दः। दृगेव भवति। शरदुदाशये शरवदाचरतीति स शरन् उद्गतोऽस्मय आशयो यस्य तस्मिन्सति सुरतशाश्वतरतिमन्। किञ्च हे शुल्कद असिश्च कश्च पावकश्चासिकौ आ सम्यगासिकौ यस्यां सा सेति वा यम एव यस्यां त्वद्वियुक्तानां सेव खड्गाग्निरूपिणीति यावत्। को ब्रह्माऽनिलार्कषु शमने सर्वनाम्नि च। पावके च मपूरे चेति विश्वः। हे वरद विघ्नतो निघ्ना अधीना नाथते एता मद्विषया भवन्त्वित्याशास्त इति ते सकाशादिह वधो न किं यथान्यासमन्वयो वा। हे सुरतनाथ ते आनन्दन्तीति वै वदेदित्यादेरानन्दमूर्ते या अशुल्कदासिका वरदनिघ्नतो वरदाधीनानामस्माकं ते दृशेत्यादिकमादिवत्। वधो नेह किमिति वा योजना। एतत्पक्षे सति शरदुदाशयपदेन लसति सरसि पदं सरसि साधुजातपदं सत्पदमित्येकतरमतिरिक्तं चेति परास्तमिति मन्तव्यम्। आशिषिनाथ इत्यात्मनेपदता। अधीनो निघ्न आयत्त इत्यमरः। वरं दातीति प्रागिदानीं वर द्यतीति वरदेति ज्ञेयम्। दोऽवखण्डन इति स्मरणात्। शरन्मण्डवदाचरदुदं समुद्रोदकं

तत्राशेते यः स तस्मिन्निति वा। विना द्रढिमानं वारोधारणायोगात्। तद्यदपां शर आसतित्समहन्यत। शरो मण्ड इति प्रोक्त इत्यादेः।। अधिकरणे शेतेरित्यच्। हे नाथ न धिद्यत ईहेच्छा यस्याक्लिष्टकर्तः कृष्ण हे सुरत अर्थैवं वने वनितात्यजनानन्दरं न किं वध इत्यन्वयो वा। हे साधुजात साध्वयं यद्रक्षार्थमिति यावत् जात प्रादुर्भूत साधोर्नन्दगोपाज्जात तव पिता नैतादृश इति भावः। सत् यत्सरसिजं तस्योदरमावासस्थानं यस्याः सा च स, श्री रमा तां मुष्णाति स्वविषयीकरणमेव तन्मोषणं तयेति वा का कथाऽस्माकमिति भावः। तर्हि तदा कृतदन्तनखक्षतापेक्षाऽयमधिकृत्किं किङ्कर्य इति न वदेति च वदन्ति। रदनिघ्नतो रदैर्निघ्नंस्तस्य ते सकाशाद्वधो व वध इव किं नेति वा। इवार्थे वशब्दो वाशब्दो वा बोध्य इत्युक्तेः ॥ ३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अन्याः पुनः कोमलाः बहुधा त्वया रक्षिता इदानीमपि पालयेत्याहुः। विषजलाप्ययादिति। विषजलं कालीयह्रदजलं तत्पीत्वा सर्वं एव बालका गावश्च मृताः ते पुनर्ज्जीविताः व्यालाः सर्पाः कालीयसुदर्शनादयः राक्षसाः तृणावर्तादयः तेषामेकवद्भावः तस्मादपि रक्षिताः वर्षमारुतादिन्द्रकृतात्तत्रैव वैद्युतानि अनलो दवाग्निश्च तयोरप्येकवद्भावः वृषो योऽयं मयात्मजः व्योमासुरः तस्मादपि रक्षिताः न तासां भूतभविष्यद्विषयकपदार्थज्ञाननिर्बन्धोऽस्ति सर्वज्ञत्वात् किं बहुना विश्वत एव भयात् पालने हेतुः ऋषभेति भर्ताहि पालयत्येव अतः सर्वदा पालक इति इदानीमपि पालयेत्यर्थः। ते च मारका बाह्याः इदानीतनस्त्वान्तर इति सर्वथा पालनीयाः अन्याः पुनर्भगवतो महानुभावत्वं ज्ञात्वा तस्य स्वरूपं कीर्त्तयन्ति ॥ ३ ॥

श्रीसुबोधिनी–सारः

विषमयाज्जलात् योऽप्ययो नाशस्तस्मात् व्यालराक्षसादघासुरात् वर्षात् मारुतात् वायोः वैद्युतानलादशनिपातात् वृषादरिष्टात् मयात्मजाद्व्या मासुरात् विश्वतः सर्वतो भयादभ्यादेः ते त्वया मुहुर्वारं वारं रक्षिता वयं स्मो हे ऋषभ ॥ ३ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

"यदि वयं मारणीयास्तर्हि पूर्वं किमिति वहुभ्यः आपद्भ्यो रक्षितवानसि? पूर्वरक्षितानामिदानीं दृशा मन्मथप्रेरणेन मारणमनुचितमेव" इत्याशयेनाहुः—विषेति। 'तत्रापि सत्यप्रतिज्ञस्य श्रेष्ठस्यैतदत्यन्तमनुचितम्' इत्याशयेन सम्बोधयन्ति—ऋषभेति। विषजलं यत् कालियह्रदजलं तस्मात् योऽप्ययो नाशस्तस्मात्, व्यालराक्षसात् अघासुरात्, इन्द्रकृताद्वर्षात्, मारुतात्, वैद्युतानलात् विद्युत्पातजादग्नेः, वृषः अरिष्टस्तस्मात्, मयात्मजात् व्योमासुरात्, विश्वतोऽन्यस्मादपि सर्वतो भयात् कालियदमनादिभिर्मुहुः पुनःपुनस्त्वया वयं रक्षिताः स्मः। अत्रारिष्टव्योमवधस्य भावित्वेऽपि तज्ज्ञानं श्रुत्यवतारत्वात् ॥ ३ ॥

अन्वितार्थप्रकाशिका

विषजलेति ॥ ऋषभ! विषजलं कालियह्रदजलं तस्मात् योऽप्ययो नाशस्तस्मात् व्यालराक्षसात् अघासुरात् इन्द्रकृताद्वर्षात् मारुतात् वैद्युतानलात् विद्युत्पातजादग्नेः वृषः अरिष्टस्तस्मात् मयात्मजात् व्योमासुरात् विश्वतोऽन्यस्मादपि सर्वतोभयात् कालियदमनादिभिर्मुहुर्मुहुः पुनस्त्वया वयं रक्षिता स्मः। इदानीं मन्मथेन हन्यमानान् किमुपेक्षसे। तथा रक्षितानां वधः सर्वथा अयोग्यः। अत्रारिष्टव्योमवधस्य भावित्वेऽपि तज्ज्ञानं श्रुत्यवतारत्वात् भगवदाविष्टत्वाच्च अन्यत्राप्येवं ज्ञेयम्। तोषिण्यां तु वृषात्मजो वत्सासुरः वराहतोको निरगादितिवत् व्योमवधोऽग्रे वर्ण्यमानोऽपि रासात्पूर्वभावीत्युक्तम्। परे तु गर्गादिमुखाच्छ्रुतस्य भूतत्वेन निर्देश इत्याहुः ॥ ३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

रक्षणे हेतून् दर्शयन्त्यः प्राचुः विषेति विषजलेन कालियह्रदजलेनाप्यया गो गोपानां नाशस्तस्मात् व्यालराक्षसात् मुखप्रविष्टान् बालान्वात्सांश्च भक्षतः अघासुरात् बालवत्सरक्षणात् वयमपि रक्षिता इत्यर्थः वर्षात् वृष्टेर्गोवर्द्धनधारणेन मारुतात् तृणावर्त्तात् वैद्युतात् वर्षासमये विद्युत्याच्च अनलात् दावाग्नेः वृषमयात्मजात् वृषात्मजो वत्सासुरस्तस्मात् मयात्मजो बकस्तस्मात् यद्वा वृषात् अतिष्टात् मयात्मजात व्योमासुरादिति केचित् विश्वतः समग्रात् भयात् हे ऋषभश्रेष्ठ वय ते त्वया मुहुः रक्षिताः एतावत्कालं रक्षित्वा इदानीमुपेक्षा न कर्त्तव्येति भावः ॥ ३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च कृपया बहुभ्यो मृत्युभ्यो रक्षणं विदधतस्तवाधुना दृशैर्वधातविधानमनुचितमित्यभिप्रेत्याहुः ॥ विषेति ॥ हे ऋषभश्रेष्ठ, विषजलाप्ययात् विषमयकालियह्रदजलात् योऽप्ययो गोगोपानां नाशस्तस्मात्, तथा व्यालराक्षसात् मुखप्रविष्टान् बालान् वत्सांश्च जक्षतोऽघासुरात्, वर्षमारुतात् वृष्टेर्मारुताच्चेत्यर्थः। तथा वैद्युतानलोऽशनिपातजोऽग्निस्तस्मात्, वृषमयात्मजात् वृषात्मजो वत्सासुरस्तस्मात् मयात्मजो बकासुरस्तस्माच्चेत्यर्थ यद्वा। वृषोऽरिष्टासुरस्तस्मात् मयात्मजो व्योमासुरस्तस्माच्चेत्यर्थः। किं बहुना। विश्वतः समग्रात्, भयाच्च अन्येभ्यो मृत्युहेतुभ्यो या भीतिस्तस्या इत्यर्थः। ते त्वया, वयं मुहुः रक्षिताः। किमितीदानीं

केवलं दृशा मारयसीति भावः। तत्र विषमयजलपायिनां कालियदमनेन, अघासुरगिलितानां त्वघासुरप्राणहरणपूर्वममृतमय्या स्वदृशा वीक्षणेन, वर्षाद्गोवर्द्धनोद्धारणेन, रक्षणं कृतमिति यथासंभवमूह्यम् ॥ ३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विषजलाप्ययादिति : १०.३१.३.

कल्पानलानिलजलप्रदवृष्टिजालात् काकोलकाविलजलाल्लघु पालितः प्राक्।
घोरामरारिनिकरादपि तच्छरण्योपेक्षापदं तव कथं वयमद्य जाताः ॥ ३५ ॥
क्रुद्धेन्द्रारब्धवृष्टिप्रगलदधिकसत्कायँ धैर्यान्तराणां वीक्ष्यास्माकं मुखानि द्रुततरमभवद्यन्मनस्ते दयार्द्रम्।
जातं तद्वज्रसारं कथय कथमहो साम्प्रतं साश्रुनेत्रा क्रन्दन्तीरट्टहासं सदयं न सहसाऽऽयासि शृण्वन्नपि त्वम् ॥ ३६ ॥
युष्मत्पापात्सन्निधिं नैव यामीत्येवं वाचो भान्ति ते भ्रान्तिमूलाः।
यत्प्रागुक्तं गोपबालैरशेषैः कृष्णेनाद्यैवाघकालो व्यनाशि ॥ ३७ ॥
श्रुत्वाऽस्मत्स्वरमार्तमेषि न दयामालम्ब्य नाथेदृशं क्रौर्यं त्वय्यधुना नवीनमिह तत्कस्मात्समासादितम्।
ज्ञातं वा तव पादकुट्टनगलद्गर्वस्तदा कालियस्तत्सर्वस्वमिवोपदां प्रविशदां त्वत्प्रीतयेऽकल्पयत् ॥ ३८ ॥
अधःस्थितेनाल्पतराद्रिधारणं कृतं करेणेति न किञ्चिदद्भुतम्।
कुरूर्ध्वगाभ्यामचलद्वयोद्धृतिं प्रभो कराभ्यां सबलो मतस्तदा ॥ ३९ ॥
न नाशिताः स्युर्यदि पूतनादयो न वारितं स्याद्यदि वेन्द्रवर्षणम्।
कुतोऽर्थनायाः प्रसरस्तदा त्वयं त्रातं तदानीं किमुपेक्षसेऽधुना ॥ ४० ॥
निस्तन्द्रं शरणागताऽवनपरः कारुण्यवारांनिधिर्भक्तानामभयप्रदो नरदराडित्थं जनैर्गीयसे।
तत्प्रायः प्रतियातमर्थत इतस्तोषप्रदस्तावकं सत्यं सम्प्रति चेत्तदस्ति विशदं सत्यावलम्बं कुरु ॥ ४१ ॥
भोक्तव्या विरहव्यथेति भवती भाले लिपिर्विधसी तत्राहं करवाणि किं यदुवरेत्येवं त्वदुक्तेस्त्वितः।
भूयस्त्वद्वरदाऽभयप्रदकरैः संलालितेऽस्मल्लसद्धम्मिल्ले सुमनः समाश्रितपदे का नाम संभावना ॥ ४२ ॥
पृथ्वीतो जलतोऽग्नितश्च मरुतश्चाकाशतश्चापि ते तत्तत्क्लेशद–तत्प्रसङ्गपतिताः शश्वद्वयं रक्षिताः।
एवं भौतिकसंभवादपि भयात् त्रातुस्तवाहं प्रभो प्राप्तं त्राणमिहाप्यनङ्गशिखितो भूतात्मकादद्भुतात् ॥ ४३ ॥
परप्रहित-दुर्दैत्यदूरीकरण-कौतुकी । दूरीकर्तुं निजारब्धं विरहं किं विलम्बसे ॥ ४४ ॥

कृष्णप्रिया

अब सात्विक सात्विक गोपीवृन्द गोविन्द प्रभुजी का गुणगान करने लगी, वे कहती है कि हे गुणनिधान ! आपने अनेकविध रक्षण किया है, प्रथम तो आपने कालीय विषयक विषैला जलपान से हुई मृत्यु से, कालीय सुदर्शन अघासुरादि भयानक सर्प एवं अजगरों से, तृणावर्त प्रभृति भयंकर दैत्यों से, गोवर्धन उत्सव कालीन इन्द्रकृत धारासंपात वर्षा-वायु-विद्युत्–दावानलादि उपद्रवों से, व्योमासुर वृषभासुर केशि प्रभृति असुरों से और अन्यान्य अनेक क्लेशों से-विविध भयों से आपने ही पुनः पुनः रक्षण किया है ॥ ३ ॥

न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक्।
विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले ॥ ४ ॥

कर्दमक्षमा

अन्वयः—हे सखे ! भवान्, खलु, गोपिकानन्दनः, न, (किन्तु) अखिलदेहिनाम्, अन्तरात्मदृक्, (अस्ति) विश्वगुप्तये, विखनसा, अर्थितः, सात्वताम्, कुले, उदेयिवान्, (अस्ति) ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च विश्वपालनायावतीर्णस्य तव भक्तोपेक्षाऽत्यन्तमनुचितेत्याशयेनाहुः। न खल्विति। हे सखे भवान्खलु निश्चितं यशोदासुतो न भवति किं तु सर्वप्राणिनां बुद्धिसाक्षी। ननु स किं दृश्यो भवति तत्राहुः। विखनसा ब्रह्मणा विश्वपालनाय प्रार्थितः सन्सात्वतां कुले उदेयिवानुदित इति ॥ ४ ॥

---

१. स खलु–विज. २. सार्थितो–विज.

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्तत्त्वमाहुः—अपि चेति। किन्तु अपि तु। बुद्धिसाक्षी चेत्कथं दृश्य इत्यभिप्रेत्याशङ्कते—नन्विति। तत्र दृश्यत्वे। विखन्यते मैथुनमृते उत्पद्यत इति विखनाः ब्रह्मा कमलजत्वात्। "यो जातः सर्वतः पूर्वं विना मैथुनमात्मनः। विखनाः स हि विज्ञेयः कुद्दालो विखनास्तथा ॥" इति निरुक्तात्। तेन तथा। यद्वा–श्रीयशोदानन्दनो न भवान् तस्याः परमदयार्द्रायाः सम्बन्धेनास्मासु दयोत्पत्तेः। अखिलदेहिनामंतरात्मदृगपि न तत्रास्मद्दुःखज्ञानसंभवात्। न च विश्वगुप्तये ब्रह्मणाऽर्थितः तत्रास्माकमपि रक्षायोग्यत्वाद्गोपीजनरक्षणे किं तेन शपथो दत्तः। भक्तानां कुले च नोदेयिवान् तत्र तत्सम्बन्धेन निरुपाधिकृपालुतासंभवात्। किन्तु स भगवान् खे आकाश एवोदेयिवान् इत्याकाशगुणत्वेनासंगौदासीनत्वोद्भवात्। यद्वा—नखान् लुनानीति नखलुः शस्त्रविशेषस्तद्वत्तीक्ष्णस्वभावो हि संसारस्तस्माद्गोपायति रक्षतीति नखलुः गोपिकाभक्तिस्तया नन्दत्यानन्दयति वेति। संसृतिक्लेशरक्षकस्य तवांनंगार्तिहरणं न दुर्घटमिति भावः। यद्वा—न खलु मोपिका वंशी तया नन्दयतीति तथा। यद्वा—गोपिकानदनो भवान्नेति न किं त्वस्त्येवेति काकुः। खलु प्रसिद्धम्। यद्वा—न खलु गोपिकानंदनोऽस्ति भवानिति दुःखितावाक्यम्। अयि शश्वदसमीक्ष्यभाषिण्यो गोप्यतिष्ठत सर्वानन्दकन्दो नंदनंदनोऽहं स्त्रीवधपातकी विश्वस्तघाती च निर्द्धारितस्तदितो निःसृत्य रहसि क्वचिदेवं स्थास्यामि यथा जन्ममध्ये सकृदपि मद्दर्शनं न प्राप्स्यन्तीति तदीयभीषणोक्तिमाशंक्यानुतप्तास्तं प्रसादयितुं स्तुवन्ति—नेति। भवान् गोपिकानन्दनः खलु न भवति किन्त्वखिलदेहिनामन्तरात्मा अतःकरणप्रेरकः, दृक् द्रष्टा चेत्यन्तर्यामी भवतीति भागुरिगार्गिपौर्णमास्यादिमुखादश्रौष्म इत्यतो यथास्मान्प्रेरयसि तथा ब्रूमहे इत्यतो मा कुप्य प्रसीद त्वदाविर्भावकारणं च श्रुतमित्याहुः—विखनसा ब्रह्मणा प्रार्थितः सन् सात्वतां यदूनां कुले उदेयिवान् श्रीयशोदागर्भोदय शैलादाविर्भूतः। नन्वेवं चेज्जानीथ तर्हि किमर्थं रूक्षं ब्रूध्वे, तत्राहुः—हे सख इति। त्वयैव रससिन्धौ वयं निमज्जिता इति परामृश्य विश्वं पालयन् विश्वांतर्वर्तिनीस्मानपि पालय कृपयैवेति भावः। यद्वा—स्वप्रयसीनामेवं दुःखं द्रष्टुं नृदेवतिर्यगादिमध्ये कोऽपि न समर्थः। यथा त्वं दुःखं पश्यन्नपि सुखमास्से तस्मादेवं वितर्कयाम इत्याहुः नेति। श्रीयशोदायाः परदुःखलवेऽपि द्रुतचित्तायाः कुक्षौ त्वं न जातोऽसि तत्कुक्षेरेकस्यापि लक्षणस्य त्वय्यनुलम्भादिति भावः। तर्हि कोऽहम्! त्वं सर्वप्राणिनामंतर्यामीति वितर्क्यसे, स एव जीवानां दुःखं पश्यन्नपि तदन्तः सुखं वसति। उदासीनशिरोमणेस्तवात्राविर्भावेऽपि किं कारणं न जानीम इत्याहुः—निखनसा ब्रह्मणा स्वसृष्टिवृद्धिमभीप्सुना विश्वगुप्तये विश्वस्मिन् जगत्यत्र गुप्तये त्वं प्रार्थितः त्वद्भक्तथा जीवा मुच्यन्त इत्यतस्त्वमवतीर्य गुप्तस्तिष्ठ यथा केऽपि त्वामीश्वरं न मन्यते तदा च तवेश्वरत्वममन्यमानानामीश्वरानुवर्तिनामपि जरासन्धादिवदसुरत्वमेव भविष्यति, तत एव मे सृष्टिवृद्धिर्भवित्रीति ब्रह्मवाञ्छितसिद्ध्यर्थं परदारपरद्रव्यचौर्यहिंसादंभादिकं स्वप्रतिकूलं धर्मं स्वगापनार्थमंगीकरिष्यन् दुस्त्यजं स्वधर्ममौदासीन्यञ्चाजहदेव सात्वता कुले उदेयिवान्। सख इति—परदारग्रहणादस्माकं सखाप्यभूदिति भावः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं प्रभावत्वादिदमनुमिमीमह इति स्तुत्यर्थमाहुः। न खल्विति। श्रीगोपेश्वर्य्या अपि स्वकुळश्रेष्ठत्वेन स्वान्तः पातं विधाय स्वदैन्येनैव न्यूनतयोक्तिर्न दोषाय अतोऽस्माकमिदं हृत्तापवृत्तं भवान् जानात्येव किन्तस्य बहुवर्णनेनेति भावः अवतारकारणमनुमीयते। विखनसेति। अतः स्वभक्तवरप्रार्थनया भक्तकुलेऽस्मिन्नुदितमात्रत्वेनापि भवता भक्ता अनवसरेऽपि परिपाल्या एवेति त्वत्प्रियाणामस्माकमप्यवसरापेक्षा न युक्ता। सोऽयन्तु परम एवावसर इति भावः। ननु यूयं न मद्भक्ता इति चेत्तथापि परिपाल्याः श्रीब्रह्मणा किल सवषामेव पाळनस्य प्रार्थनादित्याहुः। विश्वगुप्तये इति। वस्तुतस्तु भक्तेष्वपि भावविशेषभाजो वयं विशेषतः परिपाल्या इत्याशयेनाहुः। सखे इति। यद्वा ऐश्वर्यज्ञानमिदं मुन्यादेमुखतः तन्माहात्म्यश्रवणेन ततो निजभावानुरूप्येण श्रीगोपिकानन्दनतामयकेवलमाधुर्यानुभवेऽपि तदेतदैश्वर्यं याचकरीत्या निजाभीष्टसाधनमात्राय प्रयोजितमिति ज्ञेयम् एवमुत्तरत्रापि। अन्यत्तैः। यद्वा खल्विति प्रतिषेधे खळूक्त्वेतिवत्। अन्तरात्मदृगपि भवान् गोपिकानन्दनो न भवति खल्वपि तु भवत्येव इत्यर्थः। कथं तदाहुः। विखनसेति। अतो वयं पाल्या एवेति भावः। सेर्ष्यमाहुर्गोपिकायाः परमदयालुतया श्रीव्रजेश्वर्या नन्दनो भवान्न भवति किन्तु परमात्मैवं स्वतः सर्वत्रौदासीन्यात् एवं नूनमपि ब्रह्मभक्तिवशीकृतत्वादेव भवान् एतन्नन्दनन्दनताव्याजेन विश्वगुप्तये प्रकटोऽस्ति तत्र च बाल्यक्रीडामयाद्यनुवृत्त्यास्माकं सखिताञ्च प्राप्तोऽस्तीति भवता प्रति पाल्या एव वयमित्याहुः। विखनसेति। अथवा नञः प्राङ्निर्द्देशात् सर्वपदैरेवान्वयः। तेन हे असखे प्रतिकूल! खलु वितर्के। भवान् श्रीयशोदानन्दनो न भवति तत्र तत्सम्बन्धेनास्माकमुपेक्षानुपपत्तेः तथाखिळदेहिनामन्तरात्मदृगपि न भवति तत्रास्मद्दुःखज्ञानसम्भवात् न च ब्रह्मणा विश्वगुप्तयेऽर्थितस्तत्रास्माकमपि रक्षाया योग्यत्वात्। सात्वतां भक्तानां कुले च नोदेयिवान्। तत्र तत्सम्बन्धेन निरुपाधिकृपालुतासम्भावदिति ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विचित्रक्रीड़ाकारिसाक्षादेतद्वर्त्तमानरूपो बहिरेव केवलं भवान् न भवति, किन्तु अन्तरप्येवं वर्त्तत इत्याहुः–अखिलेति। अतोऽस्माकमेतद्हृत्तापवृत्तं भवान् जानात्येव, किं तस्य बहुवर्णनेनेति भावः। ननु सत्य जानाम्येव, किन्तु कृत्यं सर्व्वमवसर एव

सम्पाद्यते, तत्राहुः—विखनसेति; स्वभक्तवरप्रार्थनया भक्तकुलेऽवतीर्णेन भवताऽवश्यं भक्ता अनवसरेऽपि परिपाल्या एवेति त्वद्भक्तानामस्माकमप्यवसरापेक्षा न युक्तेति भावः। अस्मिन्नवतारे स्वभक्तापेक्षया स्वकृतनिबन्धस्याप्यतिक्रमणात्, तच्चाग्रे गुरुपुत्रानयनादौ व्यक्तमेव। ननु यूयं न मद्भक्ता इति चेत्तथापि परिपाल्याः श्रीब्रह्मणावतारेऽस्मिन् सर्व्वेषामपि पालनस्य प्रार्थनादित्याहुः—विश्वेति। अतो निजभक्तवरप्रार्थनस्यावश्यपाल्यत्वाद्वयं नोपेक्ष्या एवेति भावः। किञ्च, तत्रापि विशेषता वयं परिपाल्यास्तत्र च भावविशेषेणेत्याशयेनाहुः—सखे इति। अन्यत्तैर्व्याख्यातम्। यद्वा, अन्तरात्मदृगपि भवान् गोपिकानन्दनो न भवति खलु किम्? अपि तु भवत्येव; कथम्? तत्राहुः – विखनसेति। अतो वयमानन्दनीया एवेति भावः। यद्वा, गोपिकानन्दनः कारुण्यादि–गुणरूप–लीलैश्वर्य्यादि–निजभगवत्ताप्रकरणपरः श्रीकृष्णो भवान् न भवति, किन्तु परमात्मैवेति परमदुःखेन वेदान्तपक्षमङ्गीकृत्याहुः–नेति। खलु निश्चितम्; इत्यधुना ज्ञातमिति सर्व्वत्राग्रेऽपि शेषः। किञ्च, अकारप्रश्लेषेण न विश्वस्य गुप्तिः—अविश्वगुप्तिस्तस्यै जगत् संहारायैवेत्यर्थः। सात्वतां सात्वतानां यादवानामेव कुले, न तु गोपकुले जात इति च। अन्यत् समानम्। अथवा हे सखे! इति सोल्लुण्ठम्। नञः प्राङ्निर्देशात् सर्व्ववाक्यैरेवान्वयः, तेन हेऽसखे प्रतिकूलेति। खलु वितर्के। श्रीयशोदानन्दनो न भवति, तथा सति तत्सम्बन्धेन दामोदरत्वादि–भक्तवश्यतादिभरप्रदर्शनेन चास्माकमुपेक्षानुपपत्तेः। यद्वा, गोपिका व्रजस्त्रियः सर्व्वा आनन्दयतीति तथा सति तद्वैपरीत्यासम्भवात्। किञ्च, अखिलदेहिनामन्तरात्मदृगपि न भवति, तथा अस्मद्दुदुःखज्ञानसम्भवात्, न च ब्रह्मणा विश्वगुप्तयेऽर्थितः, तथा सत्यस्माकमपि रक्षाया योग्यत्वात्, सात्वतां कुले च नोदेयिवान्, तथा सति तत्सम्बन्धेन निरुपाधिकृपालुतासम्भवात्। यद्वा, स प्रसिद्धो भवानखिलदेहिनामन्तरात्मदृगपि विश्वगुप्तये ब्रह्मणा सात्वतां भक्तानां कुले अवतरितुमर्थितः, भवान् खलु खे आकाश एव उदेयिवानित्याकाशगुणत्वेनासंगौदासीनत्वाद्भवान् गोपिकानन्दनो न भवतीत्यर्थः। यद्वा, उ इति पदं सम्बोधने, उ भो गोपिकानन्दन! विखनाः पितामहः, तेन च कृष्णस्य पितामहो गृह्यते 'प्लवगसैन्यमुलूकजिताजितम्' इतिवत्। अत्रोलूक – शब्देन कौशिक उच्यते, तेन च शक्रः, नात्र नेयार्थतादोषः, तस्य काव्यैकविषयत्वात्। अतोऽयमर्थः – तव पितुः पित्रा विश्वगुप्तये विश्वेषां सकलानां व्रजवासिनां गुप्तये रक्षायै भवानर्थितः सन् सात्वतां भक्तानामेषां गोपानां कुले उदेयिवान्, साम्प्रतं रक्षा द्वारेऽस्तु, हृदयदुःखमपि न जानातीत्याहुः—अखिलदेहिनामन्तरात्मदृक्, अन्तर्हृदयज्ञोऽपि न भवति, वाढमन्तर्दह्यमानानामस्माकं यदेतां महार्त्तिं विनाशयतीत्यर्थः। व्रजेन्द्रपित्रा सर्व्वोत्तमसन्तानार्थं विष्णुराराधित इति प्रसिद्धिः॥ ४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

न खल्विति। न केवलं गोपीतनयत्वं किन्तु अखिलदेहवतामन्तरात्मातो दृक् दृष्टिश्च सत्ताहेतुः ज्ञानप्रदश्चेत्यर्थः। अन्तः प्रविष्टः शुभाशुभसाक्षीत्यर्थः। विखनसा विरञ्चेन॥ ४—५॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च निखिळजगत्पाळनार्थमवतीर्णस्य तत्रापि स्वाश्रितपक्षपातिनस्तवाश्रितोपेक्षानुचितेत्यभिप्रेत्याहुः न खल्विति। हे सखे! भवान् खलु नूनं यशोदासुतो न भवति प्राकृतः केवलङ्किन्त्वखिळदेहिनामन्तरात्माता दृक् कर्तरि क्विप् अन्तप्रविष्टः शुभाशुभसाक्षी परमात्मेत्यर्थः। स किं कर्मायत्तदेहभाग्भवति नेत्याहुः। विखनसा विरञ्चिना विश्वपालनाय प्रार्थितः सात्वतां भक्तानां कुले उदेयिवान् स्वेच्छयावतीर्णः नतु प्राकृतवत्कर्मणा जात इत्यर्थः॥ ४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इदानीमपि अस्मद्रक्षा भवता कार्या तथा यथा पुरा कृता इत्याशयेनाहुः। विषेति। विषजलाशयात् विषयुतयमुनाह्रदात् यद्वा विषजलपानेन आशयो दीर्घनिद्रामरणं तस्मात् व्याळात्सर्पात् राक्षसात् तृणावर्तनाम्नः वर्षयुक्ताद्वायोः वैद्युतानलात् निर्घातलक्षणाग्नेः वृषमयाद्वत्सासुरनिमित्ताद्भयात् किम्बहुना हे वृषभ! श्रेष्ठ विश्वतो मुखाद्भयात् ते त्वया वयं मुहुः रक्षिता इत्यन्वयः॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

न खल्विति। अथवा पूर्वानुसारेणैवाश्चर्यमनुमीय स्तुत्यर्थमाहुः न खल्विति द्वाभ्याम्। संमृतेर्भयात् तत्सम्बन्धिनः सर्वस्मादेव स्वगोकुले सर्वसम्पत्तिवशीकरणात् श्रियः करमिव साक्षाद्गृह्णाति यस्तं तव॥ ४—१३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अपि च केचित्त्वां गोपिकासुतमेव वदन्ति, केचित् सर्वप्राणिनामन्तर्यामीति, केचिद्विश्वरक्षणार्थमवतीर्णोऽसीति मतत्रयं प्रसिद्धम्। तत्रास्मान् प्रति मतत्रयाभिन्नवद् व्यवहरसि, तत् केयं ते लीलेति दर्शयन्ति – न खल्वित्यादि। खलु भो कृष्ण! भवान् न गोपिकानन्दनः, तथा चेदस्मासु सजातीयासु कृपाऽभविष्यत्। नाप्यखिलदेहिनामन्तरात्मदृक्, तथा सति अस्माकमप्यन्तरात्म-

दुःखज्ञताऽभविष्यत् । नापि विखनसा ब्रह्मणार्थितः । न विश्वगुप्तये सात्वतां कुले उदेयिवान् । तथा सति विश्वान्तरवर्त्तिनीनामस्माकमपि गुप्तिरभविष्यत् । तस्माददूभुतैरेवेयं तव लीलेति भावः ॥ ४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

स्वयमेव हनिष्यामीति तेभ्यो रक्षिता इति चेत्तदपि न, त्वं विश्वस्य रक्षार्थमेव सात्वतां कुलेऽवतीर्णोऽसीत्याहुः—न खल्वित्यादि । खलु भो भगवन् ! गोपिकानन्दन एव भवान्, गोपिकानन्दनत्वे गोपत्वम्, गोपत्वेऽस्माकं दुःखानभिज्ञोऽसि, अखिलदेहिनामन्तरात्मदृगिति 'विखनसार्थितो विश्वगुप्तये, सख उदेयिवान् सात्वतां कुले' इति च यच्छास्त्रज्ञैः प्रतिपाद्यते, तथा तथा चेत् परदुःखाभिज्ञोऽभविष्यः, अस्मद्विध-गोपनपरोऽप्यभविष्यः विश्वान्तर्गतत्वादस्माकमपि ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अयि शश्वदसमीक्ष्यभाषिण्यो गोपाल्यस्तिष्ठत सर्वानन्दकन्दो नन्दनन्दनोऽहं स्त्रीवधपातकी विश्वस्तघाती च युष्माभिर्निर्द्धारितः तदितो निःसृत्य रहसि क्वचिदेवं स्थास्यामि यथा जन्ममध्ये सकृदपि सकृदपि मद्दर्शनं न प्राप्स्यथेति तदीयभीषणोक्तिमाशङ्कयानुतप्तास्तं प्रसादयितुं स्तुवन्ति । नेति । भवान् गोपिकानन्दनः खलु न भवति किन्त्वखिलदेहिनामन्तरात्मा अन्तः करणप्रेरकः दृग् द्रष्टा चेत्यन्तर्यामी भवतीति भाण्डरिगार्गि पौर्णमास्यादि मुखादश्रौष्म इत्यतो यथास्मान् प्रेरयति तथा ब्रूमहे इत्यतो मा कुप्य प्रसीद। त्वदाविर्भावकारणं च श्रुतमित्याहुः विखनसा । ब्रह्मणा विश्वपालनाय प्रार्थितः सन् सात्वतां यदूनां कुले उदेयिवान् श्रीयशोदागर्भोदयशैलादाविर्भूतः नन्वेवञ्च जानीध्वे तत् किमिति रूक्षं ब्रूध्वे तत्राहुः । हे सखे ! इति त्वयैव सख्यरससिन्धौ वयं निमज्जितः इति परामृश्य विश्वं पालयन् विश्वमध्यवर्त्तिनीरस्मानपि पालय कृपयैवेति भावः । यद्वा स्वप्रेयसीनामेवं दुःखं द्रष्टुं नृदेवतिर्यगादिषु मध्ये कोऽपि न समर्थः । यथा त्वं दुःखं पश्यन्नपि सुखमास्से तस्मादेवं वितर्कयाम इत्याहुः । नेति । गोपिकायाः श्रीयशोदायाः परदुःखलवेऽपि श्रुतचित्तायास्तस्याः कुक्षौ त्वं न जातोऽसि तत् कुक्षेरेकस्यापि लक्षणस्य त्वय्यनुपलम्भादिति भावः । तर्हि कोऽहं त्वं सर्वप्राणिनामन्तर्यामीति वितर्कन्ते । स एव जीवानां दुःखं पश्यन्नपि तदन्तः सुखं वसति । उदासीनशिरोमणेस्तवात्राविर्भावेऽपि कारणं न जानीम इत्याहुः । विखनसा ब्रह्मणा स्वसृष्टिवृद्धिमभीप्सता विश्वगुप्तये विश्वस्मिन् जगत्यत्र गुप्तये त्वं प्रार्थितः त्वद्भक्त्या जीवा मुच्यन्त इत्यतस्तथा त्वमवतीर्य गुप्तस्तिष्ठ यथा केऽपि त्वामीश्वरं न मन्यन्ते । तदा च तवेश्वरत्वममन्यमानानामीश्वरानुवर्त्तिनामपि जरासन्धादिवदसुरत्वमेव भविष्यन्ति तत एव मे सृष्टिवृद्धिर्भवित्रीति ब्रह्मवाञ्छितसिद्ध्यर्थं परदार-परद्रव्यचौर्य-मात्सर्य-हिंसा-दम्भादिकं स्वप्रतिकूलं धर्मं स्वगोपनार्थमङ्गीकरिष्यन् दुस्त्यजं स्वधर्ममौदासीन्यञ्चाजहदेव सात्वतां कुळे उदेयिवान् । सखे ! इति परदारग्रहणादेवास्माकं सखाप्यभूरिति भावः ॥ ४ ॥

रसिकाह्लादिनी–टीका

अन्या आहुः । पूर्वसंस्कारविशिष्टा गर्गोक्तिप्रामाण्यावलम्बना च उपालम्भन्ते न खल्विति–ननु भवतो यशोदासूनुत्वे निश्चिते सति सर्वमुपलम्भा युक्ता भवेयुस्तदेव निश्चितं नास्त्येवेति विचार्याहुः, न खल्विति भवान् केवलं गोपिकानन्दनो यशोदासूनूर्न भवति । खल्विति निश्चये तथा सति यशोदया उलूखले यथा वध्वा स्वाधीनकृतः स्यात् तदास्माभिरपि प्रेमरज्जुबन्धनेन बद्धो भवेत्तत्तु यथावन्न बद्धः बुद्धिसाक्षित्वात् तदेवाहुः । कित्वखिलदेहिनां सर्वप्राणिनां अन्तरात्मदृक् बुद्धिसाक्षी । अत एव बन्धनायोग्यः । ननु साक्षी चेत्तर्हि किं दृश्यो भवतीति तदाहुः—विखनसेति विखनसा ब्रह्मणा विश्वगुप्तयेऽर्थितः सन् हे सखे सात्वतां यदूनां कुले उदेयिवान् उदितः यदा विश्वपालनायावतीर्णस्य वैषम्यमयुक्तमितिभावः । यद्वा भवान् गोपिकानन्दनो भवेति खल्विति सर्वत्रानुषज्यते । यदि भवेत्तदा तत्प्रजारूपा अस्मान् पालयेत् । यद्वा गोपिका आनन्दयति स्वल्पलावण्यादिगुणैरित्यपि न अस्मासु तदप्रतीतेः । किं च भवान् अन्तरात्मदृगपि न भवति । अस्मदार्त्तिपरिज्ञानाभावात् । यस्तु बुद्धिसाक्षी भवति स तु सर्वेषां सुखदुःख जानात्येवैतत् निश्चितमेव किं च विखनसेति विशेषेण खनति वेदार्थं विचारयतीति विखना ब्रह्मा तेन प्रार्थितः सन् । सात्वतां भक्तानां यदूनां कुल उदित इत्यपि न ब्रह्मा जानात्येव । भक्तरक्षणं भगवतोऽतरङ्ग, किं तत्प्रार्थनेनातो विश्वपालनं बहिरङ्गो धर्मस्तदर्थमेव प्रार्थितस्तथापि बहिरङ्गधर्माणोऽपि वयं न रक्षिता इति, यद्वा भवान् गोपिकानन्दनो न भवति । खलु काका भवत्येवातो वयं तत्सम्बन्धेन परिपाल्या इति । भवान् अन्तरात्मदृक्–बुद्धिसाक्षी न भवति खलु किं तु भवत्येव । नारायणसमो गुणैरिति गर्गोक्तेः, अतोऽस्मदार्त्तिमवकलय्य निर्वापयेति । विखनसा ब्रह्मणा प्रार्थितः सन् विश्वगुप्तये विश्वपालनाय यदूनां कुले उदितो न खलु काका किंतु उदित एवातो ब्रह्मप्रार्थना विरोधपरिहारायास्मान्पालयेति । यद्वा भवान् गोपिकानन्दन एव बाल्यात्प्रभृति सुखसम्वृद्धः । अस्मदार्त्तिपरिज्ञानाभावात् आत्म्यौपम्येन सर्वत्र सुखित्वप्रतीतेश्च अन्तरात्मदृक् बुद्धि–साक्षी ईश्वरः विखनसा विश्वपालनाय प्रार्थिता यदूनां कुले उदित इत्यपि न अस्मद्रक्षणानाकलनात् । अत एव पालनायोग्यत्वमितिभावः । यद्वा भवान् गोपिकानन्दनो नित्यसिद्ध एव विखनसा ब्रह्मणा विश्वस्मात् गुप्तये अप्राकट्यायांतर्द्धानार्थमित्यर्थः । सात्वतां भक्तानां कुले उदित इति । न खलु

निश्चितं यदि सर्वस्माद्प्यदृश्यस्तिष्ठत्तदा नास्माकं मनसि दुःखं भवेत्। किं च भवानखिलदेहिनामन्तरात्मदृक् बुद्धिसाक्षी इत्यपि नयस्तु बुद्धिसाक्षी स किं दृश्यो भवति इति मनसि विचार्य तूष्णीं भवेत्। तत्तु सर्वेषां दृश्यत्वे सत्यपि अस्माकमेव दौर्भाग्येनादृश्यो भवतीत्यनुतप्ता भवामेति। यद्वा भवान् ब्रह्मणा विश्वगुप्तये विश्वस्य गुप्तिरदर्शनं संहार इति यावत् संहारार्थं प्राथितः, सात्वतां यदूनां कुले उदित अखिलदेहिनामन्तरात्मनि दृक् दृष्टिर्यस्येति सर्वदेहिजीवं जिघृक्षन्नित्यर्थः। हे सखे इति खलु निश्चितं न काका शिरश्चालनम्। किंतु निश्चितमेव तत्र लिङ्गमाहुः। गोपिकानन्दनः तव संहार-कर्तृत्व-रूपं धर्मं गोपायतीति गोपिका अस्मान्नानन्दयतीति। तथा एवंभूतो भवान् अस्मान् दुःखीकरोतीति हेतुं न जानीम इति भावः। सर्वस्य विश्वस्य परिदृश्यमानत्वात् वयमेव किं संहर्त्तव्याः अतो दुष्कीर्तिः तन्मूलदुरितपरिहारायास्मान् पालयेति तात्पर्यार्थः ॥ ४ ॥

विशुद्धरसदीपिका

तदेवं प्रभावत्वादिदमनुमिमीमह इति स्तुत्यर्थमाहुः। न खल्विति। श्रीगोपेश्वर्या अपि स्वकुलश्रेत्वष्ठत्वेन स्वान्तःपातं विधाय स्वदैन्येनैव तन्न्यूनोक्तिर्न दोषाय अतोऽस्माकं हृत्तापस्य प्रवृत्तिं भगवान् जानात्येव किं तस्य बहुवर्णनेनेति भावः। अवतारकारणमनुमिमते। विखनसेति। अतः स्वभक्तप्रार्थनया भक्तकुलेऽस्मिन्नुदितभावत्वेन भवता भक्ता अनवसरेऽपि परिपाल्या एवेति त्वत्प्रियाणामस्माकमप्यवसरापेक्षा न युक्ता सोऽयन्तु परम एवावसर इति भावः। ननु यूयं न मद्भक्ता इति चेत्तथापि परिपाल्या इत्याहुः। विश्वगुप्तय इति। तत्रापि भावविशेषभाजो वयं विशेषतः पाल्या इत्याहुः। सखे इति। ऐश्वर्यज्ञानमिदं मुन्यादिमुखतस्तन्माहात्म्यश्रवणेन ततो निजभावानुरूप्येण श्रीगोपिकानन्दनतामयकेवलमाधुर्यानुभवेऽपि तदेतदैश्वर्यं याचकरीत्या निजाभीष्टसाधनमात्राय प्रयोजितमिति ज्ञेयं यद्वा सेर्ष्यमाहुः। गोपिकायाः परमदयालुतयास्मत्पालिकायाः श्रीव्रजेश्वर्या नन्दनो भवान्न भवति किंतु परमात्मैव स्वतः सर्वत्रौदासीन्यान् एवमपि विश्वगुप्तये प्राकटनादपि तदन्तः पातिन्यो वयं पाल्या इत्यर्थः। यद्वा सखे सच्छिद्रे प्रेमशून्ये सात्वतां कुले कंसादिक्रूरजनबहुले उदेयिवान् जात इत्यर्थः। प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज इति गर्गोक्तेः। अत्र नन्दनन्दन इत्यनुक्तिः सम्बन्धस्फूर्त्या लज्जोपत्तेः ततश्चैता स्वीयाभिमानिन्यो नन्दव्रजकुमारिका एव वरदेत्यादि ज्ञापकात् गाऽनेप्यधीरतया प्राथम्यं तत एवेति ॥ ४ ॥

श्रीरामनारायणकृता भावभावविभाविका

स्वस्वैर्येण दुःखाभिज्ञत्वरक्षणसमर्थत्वाद्याविष्कुर्वन्त्यः प्रार्थयन्ति। न खल्विति। खलु भवान् गोपिकाया नन्दन एव न येन नास्मद्धृतं जानाति यद्वा भवान् गोपिका "नाहं प्रकाशः सर्वस्य योगमायासमावृत" इत्यादिवचनात् स्वरूपानन्दावरका माया तस्याः कार्यं न भवति अपि तु अखिलदेहिनामन्तरात्मा च दृक् चेति तथा तत्रान्तःकरणगताभासत्य साक्षिभास्यत्वे सति प्रमातृत्वाहिरात्मत्वं साक्षिणस्तु अन्तरात्मत्वं तस्यान्तरात्मत्वे हेतुर्दृगिति तदुक्तं भगवत्पूज्यपादैः रूपं दृश्य लोचनं दृक्तु दृश्यं दृष्टं मानसं दृश्या धीवृत्तयः साक्षी दृगेव नतु दृश्यते इति साक्षात् भगवतापि—

> इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः। मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥
> श्रुत्यापि इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
> महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिरिति ॥

तथाचान्तरात्मत्वाद्विच्छेदानौचित्यं दृग्रूपतया स्वप्रकाशत्वेनाभानानौचित्यमिति भावः। यद्वा अन्तरात्मनामन्तःकरणानां प्रकाशक इति अस्माद्दुःखं ज्ञात्वाप्युपेक्षानुचितैव नन्वहमेतादृशश्चेत्कथङ्गोपिकानन्दनताङ्गतस्तत्राहुः। विखनसार्थित इति। विश्वगुप्तये ब्रह्मणार्थितः सात्वतां कुळे यादवानां वंशे उदेयिवान् नतूत्पन्न इति श्रुति रूपतया प्रेमोद्भूतसार्वज्ञ्येन वोक्तिः यद्वा सात्वतां सहजभजक्तानां व्रजवासिनां कुले समूहे उदेयिवान् अतो ब्रह्मणा विश्वगुप्तये प्रार्थितत्वान्नोऽपि विश्वबाह्यत्वाभावादसुरेभ्य इव विश्वस्य स्वविरहदुःखादस्मद्रक्षा विधेया विशेषतो व्रजवासिनीनामुपेक्षानर्हा तथा सखे! इति सम्बोधनेन सखीनामुपेक्षासुतरामयोग्येति भावः। यद्वा अन्तरात्मदृगपि भवान् खलु गोपिकानन्दनो न भवतीति नेति अपि तु भवत्येव ब्रह्मणार्थितत्वात्तथा च तत्सम्बन्धेन नोपेक्षा वयं यद्वा नकारस्य प्रागुक्त्या सर्वपदैरन्वयस्तथा च भवान् खलु गोपिकाया यशोदाया नन्दनोऽपि न भवति तथात्वे तस्याः सरलकृपालुस्वभावत्वात्तथ कौटिल्यनिष्ठुरेत न स्यात्तां जातिसम्बन्धेनापि अस्मासु करुणैव जायेत तथाखिलदेहिनामन्तरात्मा च न भवति तथा च विरहसम्भावनैव न स्यात् तथान्तरात्मदृगपि न भवति तथात्वेऽस्मद्दुःखं ज्ञात्वा मनोद्रवदेव विश्वगुप्तये विखनसार्थितोऽपि न भवति तथात्वे विश्वान्तर्गतानां नो विरहेण मारणं न घटेत सात्वतां कुले भक्तसमुदायेऽपि नोदेयिवान् तथात्वे भक्तेषु वात्सल्यं स्यात् तथा असखे इति सम्बोधनेन श्रुतिसिद्धः समानतः सर्वसखा विशेषतो नित्यविहार्यस्मत्सखा च न भवति तथात्वे सखीदुःखप्रदानं न युज्येतातः पूर्वानुभूतश्रुतिमुनिगीतकृपालुस्वभावातिभ्रमदर्शनेन किञ्चिदन्य एव भवान् गोपिकानां नो नन्दनो न भवति तथात्वे गोपिकानां नो नन्दनमभीष्टसुखप्रदानमेव स्यात् अपि तु अन्तरात्मैव अन्तरात्मतयास्मत्सर्वविरहवत्त्वेन बहिर्लीलां सङ्कोचितुमेव प्रवृत्तः तथा ब्रह्मणा विश्वरक्षणाय नार्थितः अपितु विखनसा खनधातोः असप्रत्ययव्यु-

त्पन्नेन विशेषतः खननशीलेन स्वयं खनितुमशक्तेन विश्वगुप्तये गोपनाय प्रलयकरणायार्थितः यादवकुले उदेयिवान् तथा च विश्वस्य प्रलयप्रकारसम्भवेऽपि स्वानुरागिणा "त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैती"त्यादिवचनैर्मृत्युभयासन्भवात्स्वविरहेणैव हन्ति हे असखे इति पूर्ववत् यद्वा खलु भवान् किं गोपिकानां सर्वासां नः श्वश्रूणां नन्दनो न भवति अपि तु भवत्येवेति सर्वत्र काकु तथा च ब्रह्मवत्संहरणदशायां त्वयि तासां नन्दनत्वे जाते त्वयैव पाणिगृहीता वयं तथा च साक्षात्पाणिग्राहकत्वादधुनाप्यस्मत्पतिंमन्यमानामपि देहित्वेन तव चाखिलदेहिनामन्तरात्मत्वेनाप्यस्मन्मुख्यपतित्वात् उपेक्षा नोचिता तथा विखनसा विश्वगुप्तयेऽर्थितः सात्वतां कुले उदेयिवानित्यनेन तेनापि तदा यदुक्तं "तत्प्रियार्थमेव त्वदाज्ञप्तब्रह्माशया नो जन्मेति तद्विफलीकरणमनुचितमेव तवाप्यस्मत्प्रियमेव सम्मतं वृथा वामलीलया वामाखेदनमिति भावः ॥ ४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

युक्तं चास्मदादिरक्षणं तदर्थमेव नन्दनन्दनविग्रहात्मनाविर्भूतत्वादित्याशयेनाहुः । नेति । गोपिकाया यशोदाया नन्दनः सुतो भवान्न भवतीति प्रसिद्धं किन्तु सर्वप्राणिनां योऽन्तरात्मा तस्य दृक् साक्षी अन्तर्यामी भवानेवम्भूतोऽपि विखनसा ब्रह्मणार्थितः विश्वस्य रक्षणाय प्रार्थितः सन् सात्वतां यादवानां कुले उदेयिवान्प्रादुर्भूतः ननु एवं जानतीभिः किमित्युक्तं विघ्नता नेह किम्बध इति तस्मात्तिरोहित एव स्थास्यामि यथा युष्माकं कदापि दर्शनं न भवेदित्याशङ्क्याहुः । सखे इति । तथा च भवद्दत्तसख्यानुरूपेयमुक्तिः करुणोद्दीपिका नतु कोपावहातो विश्वगोपनाय प्रादुर्भूतस्य तव तन्मध्यगतानां स्वयं सखीभावेप्सितानां कारुण्यात्पालनमेवानुरूपमिति भावः । यद्वा सर्वान्तरवृत्त्यभिज्ञस्य तवास्मदन्तः करणनिष्ठप्रेमातिरेकोपरि दृष्टिः कर्तुं युक्ता नतु दर्पाभासोपालम्भोत्पादिगुणेनेत्याशयेनाहुः अनभिज्ञापक्षे तथा च कालियमर्दनादिना स्वीयरक्षणादिना लोकोत्तरसामर्थ्यप्रकटनाद्वा वयमेवं तर्कयाम इत्याशयेनाहुः । नेति । खलु शब्दो वितर्के सर्वापेक्षयाल्पबलाया गोप्याः सुतो भवान्न किन्तु सर्वदेहिनामन्तरात्मदृगिति तर्क्यतेऽस्माभिः ननु सर्वान्तर्यामिणो मम देहिभावेन कथमुत्पत्तिरित्याशङ्क्याहुः । विखनसेति । सत्वतां सात्त्विकानां समानानां कुले विश्वगुप्तये उदियवान् तस्मात्तवाविर्भावो नतु जन्माऽतः सर्वपालनायावतीर्णस्य तव सखीनामस्माकमुपेक्षा नोचिता दर्पोऽप्यस्माकं त्वदुत्कर्षहेतुरतः कोपं विहायागन्तव्यमिति भावः । मानिनीपक्षे अहो निर्दयशिरोमणिरयङ्क इति बहुविचार्य यथास्माभिर्भवान्निश्चितस्तथेत्याशयेनाहुः । नेति । भवान्करुणार्ह नः प्रेयसीदुःखसन्ततिमवलोक्याप्यद्रवीभूतस्वान्तः गोपीकायाः अस्मदादिगोपनपरायाः करुणानिधिभूतायाः परकीयसुखदुःखाभ्यां तदाविष्टस्वान्तायाः श्रीयशोदायाः नन्दनस्तदीयानां दुःखप्रदत्वादानन्दजनकः सुतो न भवति तर्हि कोऽहं निश्चित इति चेत्तत्राहुः । सर्वप्राणिनामन्तर्यामी स एव परमदुःखवतां दुःखं पश्यन्नपि तदन्तः सुखं वसति सर्वान्तःस्थस्य तस्य बहिराविर्भावे निमित्तमपि वयं विद्म इत्याहुः । विखनसेति । स्वसृष्टिवृद्धिमभीप्सुना ब्रह्मणा विश्वगुप्तये प्रार्थितस्त्वद्भक्त्या जीवानां मोक्षो भवेत्ततस्त्वमवतीर्य गुप्तास्तिष्ठ तदेश्वरवादिनामपीत्वीश्वरं मन्यमानानामपि मोक्षो दुर्लभो भविष्यति अत एतेन मे सृष्टिवृद्धिर्भविष्यतीति विधिवाञ्छितसिद्ध्यर्थं परदारपरद्रव्यचौर्यादिस्वस्वभावप्रतिकूलं स्वगोपनार्थमङ्गीकर्तुं सात्वत्यां कुले उदेयिवान् अत एव परदाराणामस्माकं सख्यमाश्रितवानिति सम्बोधनाशयः । यद्यपि स्वगोपनार्थमेव त्वं प्रवृत्तस्तथाप्यस्मद्दुःखकरमौदासीन्यं किमिति स्वज्ञापकं चिह्नं पुनर्गृहीतवानतः स्वप्रकटतासम्पातात्सर्वथानाश्रयणीयमिति भावः । यद्वा विश्वस्य प्रपञ्चस्य मोक्षमार्गे प्रवृत्तिसम्पादनेन स्वरक्षणार्थं सात्वतां दयादिसात्त्विकधर्मवतां कुले तेषामपि त्वत्तो वैमुख्यसम्पादनार्थमुदेयिवान् अस्माकमपि स्वधर्माद्विच्युतिसिद्ध्यर्थं सख्यं गृहीतवानिति सम्बोधनाशयः । यद्वा प्रथमनिर्दिष्टस्य नञः सर्वपदैः सम्बन्धः भवान् गोपिकानन्दनो न खलु प्रसिद्धः तद्रक्षणाव्यापृतत्वात् नाप्यखिलदेहिनां हृद्गतभावज्ञः अस्मन्मनोगतप्रेमातिरेकाज्ञानात् तथा विखनसा न हिंस्यात् सर्वाभूतानीत्यादिवेदवाक्यैर्विश्वगुप्त्यर्थं न प्रार्थितो यथोक्तप्रार्थनावाक्यमपि न प्रार्थितो यथोक्तप्रार्थनावाक्यमपि न श्रुतवान् अस्मद्धिंसापरायणत्वात् नापि सात्वतां कुले उदेयिवान् तत्कुलोचितकृपालुत्वाद्यदर्शनात्तथा तद्धर्माऽसम्पादनाद्वृथैव गोपिकानन्दनेत्यादिनाख्यातोऽसीति भावः अत एव सखित्वेन ख्यातः सखा न भवसि शत्रुधर्म्माक्रान्तत्वादित्याशयेन सम्बोधयन्ति हे असखे इति निवृत्तिपक्षे खलुशब्दो निषेधे भवान् गोपिकानां श्रुतीनामस्माकमानन्दकरो न भवतीति न यतोऽखिलदेहिनामन्तरात्मदृक् "योविज्ञाने तिष्ठन्विज्ञानमन्तरो यमयति यो विज्ञानं वेदैष त आत्मान्तर्याम्यमृत" इति श्रुतेः विशेषेण खनति वेदार्थं विचारयतीति विखना विद्वान् तेनार्थितः प्रार्थनाविषयीभूतमोक्षस्वरूपो विश्वस्य सर्वस्य कार्यकारणसङ्घातस्य गुप्तये सह खैरिन्द्रियैः सह वर्तमानः सखः सन् सत्त्ववतां मन आदीनां समुदाये उदेयिवान् "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतां महाबाहो ! यथेदं धार्यते जग"दिति श्रुतिस्मृतिभ्याम् ॥ ४ ॥

रास-रहस्यम्

र० टी०—न खलु गोपिकानन्दनः, खलु निश्चये, गोपिकानां वृत्तीनामस्माकं आनन्दकरो न भवतीति किम् ? अर्थात् अवश्यमेव, भवानखिलदेहिनामन्तरात्मदृक्, प्राणिमात्रस्य अन्तरात्मदृक् साक्षीरूपेण वर्तसे, तदुक्तं भगवत्पूज्यपादैः "साक्षी दृगेव न तु दृश्यते" इति विखनसार्थितः "यो जातः सर्वतः पूर्वं विना मैथुनमात्मनः । विखना स हि विज्ञेयः कुद्दाल विखनास्तथा ।" इति

निरुक्तः, विशेषेण खनति वेदार्थं विचारयतीति विखना विद्वान् तेनार्थितः प्रार्थनाविषयीभूतः मोक्षस्वरूपः, विश्वगुप्तये जाग्रति विश्वनामात्मनः गुप्तये रक्षार्थं, विश्वात्मनः शुद्धात्मनि प्रलीनमेव रक्षा, जन्मादि तु नाश एव "न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते ।" "न च पुनरावर्तते ।" छा० ८।१५।१॥ इति सख खमिन्द्रियं जात्या एकवचनं तैः सह वर्तमानः सन्, सात्त्वतां कुले सात्त्वन्तो भक्ताः तेषां शुद्धमनोबुद्ध्यादिनां कुले समूहे शुद्धान्तःकरणे उदेयिवान् "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि ।" इति आविर्भूत आसीत् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भवान् सर्वात्मा सर्वेश्वरो यथान्येषां जनानां तत्तदधिकारानुसारेण मनोरथान् पूरयति तथास्माकं मनोरथमपि पूरयेत्याशयेनाहुः काश्चित् । हे सखे ! भवान् गोपिकानन्दनः यशोदासुतो न किमपि त्वस्त्येव तथा विखनसा ब्रह्मणा विश्वगुप्तये नार्थितः किं न प्रवर्तितः किमपि तु प्रवर्तित एव तथा सात्वतां यादवानां कुले न उदेयिवान् नः उदितः किमपि तूदित एव किं बहुना अखिलानां देहिनामन्तरात्मदृक् न किमपि त्वस्त्येव एवमस्मन्मनोरथसम्पादने तव को भार इति भावः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे वनिता नावनं कदाऽपि मया कृतमिदानी कुत एवमर्थनेति न स्वामिन्वद वदामः सर्वजनीनं त्वद्रक्षणं क्षणं दिशेति शंसति ॥ विषेति ॥ विपात्मकाज्जलाशयो यमुनाह्रदस्तस्माद्व्यालः क्रूरो राक्षसस्तृणावर्तस्तमात् । व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनीति विश्वः । विषं जलाशयं यमुनाह्रदमातयरि गमयति प्रापयती स तथा स चासौ व्यालः कालियस्तेन सहितो राक्षसस्तृणावर्तो वा वको वा तस्मादिति वा । वर्षं वृषकृतं तेन सहितस्तत्प्रहिति एव मारुतस्तमात्तदा त्वयैव तत्प्रेरिताद्विद्युदग्रेर्वृषेण वत्सासुरेण मय्यते गम्यते प्राप्यत इति तस्माद्भयात् । अयव्रयपयमयचयतयणयगताविति स्मरणात् । तद्रूपादेव भयात् । यद्वा वृषभश्च वत्सश्च तेन सहितो मयो जन्यजनकशब्दसाङ्कर्यान्मयपुत्रो व्योमस्तस्मादिति केचित् । वृषभयाद्भयादिति पदमेकम् । वृषश्च मयाश्च मयपुत्रो वृषमया तौ याभ्यां भयं तस्मादिति वा । मुखं निःसारणे वक्त्र इति विश्वात्सर्वतोमुखं निःसरणं यस्य तस्माद्दवादिति शेषः । हे वृषभ ते त्वया । एवं मुहुर्वयं रक्षिता अत एतद्यपि रक्षेति भावः । न च वाच्यं स्युरुत्तरपदे व्याघपुङ्गवसुरर्षभकुञ्जराः सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचका इति किञ्चित्पदोत्तरं सतां व्याघ्रादिपदानां श्रेष्ठार्थवाचकत्ववचनात्पुव्याघ्र इत्याद्युदाहरणात्कथं केवलवृषशब्दः श्रेष्ठवाचीति । वृषभः पुङ्गवे वृष इति नानार्थरत्नमालोक्ते रूढ्या श्रेष्ठोऽप्यर्थः । यथोक्तं तिग्मेन पुरोभिदित्पूरताप्यटीकाटिप्पणेपु । अभिनद्वृषेण प्राणेन वृपभेण वृषेण जीवश्रेष्ठेन प्राणेन वृषभः पुङ्गवे वृष इति नानार्थरत्नमालोक्तेः श्रेष्ठोऽपि वाच्य इति भाव इति । यद्वा वर्षयिताभिलषितमिति वृषभः । यद्वा वृष सेचनेऽस्मादभजित्यनुवृत्तौ ऋषिवृषिभ्यां किदित्ययेे नस्य कित्त्वाद्गुणाभावे च निष्पन्नो वृषशब्दो योगेन वर्षयितारमाह । इदमप्युक्तं त्वमग्रे वृषभः पुष्टिवर्धनः । वृषभो वर्षणस्य कर्तेति वृषं धर्मं बिभर्तीति वा तत्सम्बुद्धिः । वृषो धर्मं वृषः श्रेष्ठे वृषो गौमूषको वृषः । वृषो बलं वृषः कामो वृषलो वृष उच्यत इति नानार्थध्वनिपदमञ्जर्युक्तेर्योग्यभर्तृत्वाद्वृषभ इति वा । वृषभत इति पदमेकं वा वृषभस्य मान्धातुवार्हनत्वे वृषभरूपेन्द्रस्य तिर्येन वायुर्वृषभरूपेणेत्युक्तेर्वायोर्वा तिर्यनेति तत्सम्बुद्धिर्वा ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततश्च ज्ञानिभ्यो यथा मोक्षं प्रयच्छति तथास्मभ्यमपि अस्मदुचितं मोक्षं दास्यतीति तं स्तुवन्ति न खल्विति । भगवतो नन्दसूनुत्वे सर्वं उपालम्भा युक्ता भवन्ति तदेव नास्तीति सर्वमयुक्तमुपालम्भनं खल्विति निश्चये नात्रतिरोहितमिव गोपिकाया यशोदाया नन्दनः पुत्र इति तथा सति यथा तया स्वाधीनः कृतः ज्ञातो वा तथा गोपिकानामपि भवेत् गोकुलस्वामिपुत्रत्वात् तुल्यतायामेव हि विद्यायोनिसम्बन्धः किंच न केवलं भवान् वैकुण्ठाधिपतिः पुरुषोत्तमः किंतु अखिलदेहिनां सर्वेषामेवास्मदादीनामन्तरात्मानमन्तःकरणं पश्यतीति यद्यस्मद्धृदये तादृशं तापं पश्येत्तदा प्रसन्न एव भवेत् अतो नास्मिन् वक्तव्यं किञ्चित् किञ्च आगतश्चास्मदादीनां परिपालनार्थमेव यदि जानीयात् एता नङ्क्ष्यन्तीति तदा परिलालयेत् रक्षणार्थं च प्रार्थित एव नतु स्वेच्छया समागतः तदाहुः विखनसार्थित इति । विखना ब्रह्मा विशेषेण खनतीति सर्वथा वेदार्थविचारकः अत एव वैखानसं मतं ब्रह्मणा कृतं भगवद्भजनप्रतिपादकं तेनैव मार्गेण पूजां भगवान् गृह्णातीति वेङ्कटादौ तथैव पूजा अतः सर्वेषां पूजामपि ग्रहीतुं ब्रह्मणार्थितोऽपि विश्वगुप्तये इति । मुख्यं प्रयोजनम् एवमन्तरात्मत्वात् सर्वेषामेव जीवानां भवान् सखा तादृशः लोके सख्यं प्रकटयितुं सात्वतां यादवानां वा कुले उदेयिवान् प्रादुर्भूतः अत एतदर्थमेवागतः पूर्वमपि सखा यथेच्छमेव प्रेरयसि आगतस्य पुनर्विशेषो वक्तव्यः सचात्मनिवेदनरूपो भवति अतो वयं किं विज्ञापयामः यथोचितमेव कर्त्तव्यमिति भावः ॥ ४ ॥

श्रीसुबोधिनी-सारः

गोपिकाया यशोदाया नन्दनो पुत्रो भवान्न खलु एव किंतु सर्वदेहिनाम् अन्तरात्मदृक् बुद्धिसाक्षी विश्वस्य गुप्तये रक्षार्थं विखनसा ब्रह्मणाऽर्थितः संयाचितः सात्त्वतां यदूनां कुले उदेयिवान् आविर्भूतः । हे सखे ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सख उदेयिवानित्यत्र, पूर्वमपि सखा यथेच्छमित्यादि । 'सुपर्णावेतौ सयुजौ सखाया'विति श्रुतेरन्तरात्मा जीवस्य सखा भवति । प्रकृते च स्वरमणेच्छामनतिक्रम्य तदनुरूपमेवास्मात्प्रेरयसीत्यर्थः । अत एवास्माकं नायिकाभाव एव सार्वदिक इति भावः । एतादृशस्यागमनं नायिकायै स्वसमर्पणार्थमेव भवतीति तदेवं कर्तुमुचितमिति भाव इत्याशयेनाहुः **आगतस्येत्यादि** ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ऋष्याद्यवताररूपा गोप्य एव 'सर्वसाक्षिणस्तवाग्रे किं बहु वक्तव्यम् ?' इत्याशयेनाहुः—नेति । खलुशब्दोऽवधारणे । 'सकलजगत्पालनार्थमवतीर्णस्य तव स्वाश्रितास्मदुपेक्षा न युक्ता' इत्याशयेन सम्बोधयन्ति—हे सखे इति । भवान् गोपिकानन्दनो यशोदासुतो नैव भवति । किंत्वखिलदेहिनां सर्वप्राणिनां योऽन्तरात्मा अन्तःकरणं तं पश्यतीति तथा साक्ष्येव । 'तस्य कथं जन्म' इत्यपेक्षायामाहुः—विखनसा ब्रह्मणा प्रार्थितः सन् विश्वपालनाय सात्वतां यादवानां कुले उदेयिवान् स्वेच्छया त्वमवतीर्णोऽसि, नतु प्राकृतवत् कर्मवशाज्जात इत्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

ननु तर्हि विश्वस्तघाती असंव्यवहार्योऽहं किमर्थं प्राथ्र्ये तत्राहुः—न खल्विति ॥ हे सखे ! भवान् गोपिकानन्दनो यशोदासुतो नैवं भवति । किन्त्वखिलदेहिनां सर्वप्राणिनां योऽन्तरात्मा अन्तःकरणं तं पश्यतीति तथा साक्ष्येव अतोऽस्मद्दुःखमपि जानासि इति भावः । विखनसा ब्रह्मणा प्रार्थितः सन् विश्वस्य गुप्तये पालनाय सात्वतां यादवानां कुले उदेयिवान् स्वेच्छया त्वमवतीर्णोऽसि । आङ्पूर्वादिणः क्वसुः । अतो विश्वगोप्त्रा त्वया वयमपि गोप्याः । यद्वा, सेर्ष्यमाहुः । नञः प्राङ् निर्दिष्टस्याग्रेऽप्यनुषङ्गः तथा च निर्दयः त्वं यशोदासुतो नासि नाप्यन्तः साक्षी ब्रह्मणा प्रार्थितो विश्वगुप्तयेऽपि नावतीर्णः । कथमन्यथाऽस्मान्मारयसि इति ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गोपेन मया एताभ्य आपद्भ्यः कथं यूयं रक्षिता इत्याशंक्याहुः न खल्विति भवान् गोपीकानन्दनो न भवति तर्हि कोऽहं तत्राहुः । अखिलदेहिनां अन्तरात्मदृक् सर्वजीवान्तर्यामीपरमेश्वरोऽसि तर्हि कुतोऽत्रागतोऽहं तत्राहुः हे सखे विश्वसंरक्षणायविखनसा-विधिना अर्थितः प्रार्थितः सन् सात्वतां यादवानां कुले कृपालुत्वात् उदेयिवान् पूर्वदिशायां सूर्य इव प्रादुर्भूतोऽसि अतोविश्वान्तर्वर्त्तिनीनामस्माकमप्यवश्यं त्वयारक्षा विधेयेति भावः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च निखिलजगत्पालनार्थमवतीर्णस्य तत्रापि स्वाश्रितपक्षपातिनस्तव स्वाश्रितानामस्माकमुपेक्षाऽनुचितेत्यभिप्रेत्याहुः । यद्वा । गोपात्मजेन मया यूयं कथं रक्षिताः स्थ भवतीभिर्विषजलाप्ययादित्यादि यदुक्तं तत्तु घुणाक्षरवदेवाभवदित्यत्राहुः ॥ न खल्विति ॥ हे सखे, भवान् गोपिकानन्दनो यशोदासुतः, न भवति । खलु नूनम् । तर्हि कोऽहमस्मीत्यत्राहुः । अखिलदेहिनां सर्वप्राणिनां, अन्तरात्मदृक् सर्वजीवान्तर्यामिपरमेश्वरो भवान् भवति । अन्तः प्रविष्टः शुभाशुभसाक्षी परमात्मेत्यर्थः । स किं कर्मायत्तदेहभाग्वत् दृश्यो भवति नेत्याहुः । विखनसा ब्रह्मणा, विश्वगुप्तये विश्वपालनाय, अर्थितः प्रार्थितः सन्, सत्त्वतां भक्तानां, कुलेऽन्वये, उदेयिवान् स्वेच्छयाऽवतीर्णः, न तु प्राकृतवत् कर्मणा देहं धृत्वा दृश्यो जात इत्यर्थः । अतो विश्वान्तर्वर्त्तिनीनास्मास्माकमप्यवश्यं रक्षा कर्त्तव्येति भावः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

न खलु गोपिकेति : १०.३१.४

यत्कार्यमस्ति किल यस्य तदेव तेन कार्यं न कदापि हि तद्विरोधि ।
अस्मज्जनावनकृते भवतोऽवतारस्तत्तद्विरोधि वनमाश्रयसे कथं वा ॥ ४५ ॥
यदा भवति दुर्जनोन्मददशा पिशाच्युद्भवो यदा च सदवस्थितिर्भवति कुञ्चिता तद्भयात् ।
तदाऽवतरणं महामनुमयाभिधानस्य ते श्रुतं तदिह पाहि नः स्मरदुरन्तरक्षोभयात् ॥ ४६ ॥
अनाथजनरक्षणं जगति भाव्यमेतद्धिया चतुर्मुखमुखैर्मखाशनवरै-स्त्वमभ्यर्थितः ।
करिष्यसि पुरः कथं सदय तद्वचः सार्थकं यदद्य परिदृश्यते प्रथमपीठिकैर्यदृशी ॥ ४७ ॥

अलं मौनेनालं वनतरुतिरोधानविधिना मृषा क्रोधेनालं कपटचरनाचार- चरितैः ।
अलं त्वौदासीन्यैरल-मलघुमानै रलमलं विलम्बैर्यत् स्वीयावन विहितसन्धस्त्वमवनौ ॥ ४८ ॥
नित्याम्भोधि–निषेवणोदित–महाशैत्यौपशान्त्यै यदि प्रेप्सुर्दावपदस्थितिं तदिह किं तार्णेन तेनाग्निना ।
एह्यस्मत्सविधे दिशामविरहाद्दीप्ताग्निभाजौ कुचावेतौ पर्णतृणाग्निसेवनविधि-ग्रीष्मस्य यच्छ्रयते ॥ ४९ ॥
धातृप्राथित-विश्वरक्षणकृते प्रातोदयस्त्वं कुले वृष्णीनामसि नासि गोपशिशुको विश्वेशसाधारणः ।
तत्कुर्वन्निह धातुरर्थितमहो सत्यं पुराऽङ्गीकृतं चित्तं त्वद्विरहद्विषत्कलुषितं त्राह्यस्मदीयं द्रुतम् ॥ ५० ॥
स्मरारिस्मृतिः स्यात् स्मरार्तिव्यपाये समर्थेति वागर्थतोऽभ्यर्थिताऽपि ।
स्वकान्तैकपूज्याङ्घ्रिपद्मस्य वासं तवालोक्य चित्ते पदं नैव धत्ते ॥ ५१ ॥
अस्मद्व्रतस्त्वमिति माधव वास्तवाज्ञः स्वैरं जनो जगति जल्पतु जारबुद्धिः ।
देवद्विजाप्त-गुरुसन्निधि-शालिनीह जातोऽस्ति ते सुभग साप्तपदीनयोगः ॥ ५२ ॥
क्वचित्पत्रं पुष्पं क्वचिदपि फलं क्वापि सलिलं यदा लब्धं तस्माद् बहुतरमगास्तोषमनघ ।
यदस्माभिः सम्प्रत्यतुलरुचि सर्वस्वमपि ते प्रदत्तं तत्कस्मान्न बत सविधं धावसि सखे ॥ ५३ ॥
किं वाऽऽगो गणयन् दयानिधिरयं तत्याज वः सुन्दरी रात्रावेवमदम्भशालिहृदयैः पृष्टेऽथ तत्रोत्तरम् ।
किं वा देयमिदं मनागपि विभो विज्ञो न तस्मात्कृपां कृत्वाऽऽगत्य सकृद्धृदान्तरगतं पश्चात् स्वतन्त्रो ह्यसि ॥ ५४ ॥
जडाधिपतिरप्यसौ निजपदाम्बुजाताश्रया इमा इति जडात्मनाममितयोषितानामपि ।
करोति न तिरस्कृतिं त्वमिह सुज्ञवर्योऽपि सन् करोपि तदिदं नुतेः पदमुतोपहासस्य भोः ॥ ५५ ॥
विलोकय दयानिधे यदयमिन्दुरानन्दयत्यमन्दमिह तारकाः पदजुषः स ते पूर्वजः ।
तदस्मदवनं प्रभो कुरु न वा न तत्राभ्यर्थसे व्रतं नु वह वंशजं सदय तारकानन्दकम् ॥ ५६ ॥
वयं कीदृशोऽयं च कीदृक्स्वरूप इति ज्ञानशून्याः कथं साहसोत्काः ।
इति श्रीश वाच्यं न यत्त्वं परात्मा वयं मुख्यभूतास्तवेत्येव विद्मः ॥ ५७ ॥
तदावतारस्य विभो प्रधानं हेतुं च कार्यं परितो यथार्थम् । वयं विभाव्यैव मुहुर्मुहुस्त्वां सम्प्रार्थयामस्त्वमवेति दीनाः ॥ ५८ ॥
इदमस्मद्वचः सत्यमकैतवमिति प्रभो । बहिष्ठस्य पुराप्राच्यमसि त्वं त्वन्तरात्मदृक् ॥ ५९ ॥

कृष्णप्रिया

अब जो निर्गुण गोपियाँ का वृन्द है जो प्रभुकी महिमा करुणा आदि के जानकर है वह स्नेह सभर भाव से प्रभु को विनय कर रहा है कि हे सखे ! हे कृपालो ? आप श्री यशोदोत्संग लालित नन्दनन्दन होते हुए भी अखिल ब्रह्माण्ड के स्वामी एवं सब प्राणियों के अन्तर्यामी है । जीव की नासिका में से श्री वराह भगवान का अवतरण हुआ है उस ब्रह्माजी ने अखिल ब्रह्माण्ड के रक्षण के लिए आप को निवेदन किया, आपका सावन किया । भक्तवत्सल आप यदुकुल में प्रकट हुए श्रीपूर्ण पुरुषोत्तम ही है ॥ ४ ॥

विरचिताभयं वृष्णिधुर्य ते शरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ५ ॥

कर्दमक्षमा

अन्वयः—हे वृष्णिधुर्य ! संसृतेः, भयात्, ते, शरणम्, ईयुषाम्, विरचिताभयम्, कामदम्, करसरोरुहम्, हे कान्त ! नः, शिरसि, धेहि ॥ ५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्मात्त्वद्भक्तानामस्माकमेतत्प्रार्थनाचतुष्टयं सम्पादयेत्याहुः विरचिताभयमित्यादिचतुर्भिः । हे वृष्णिधुर्य संसृतेर्भयात्ते चरणमीयुषां शरणं प्राप्तानां प्राणिनां विरचितं दत्तमभयं येन तत्तथा हे कान्त कामदं वरदं तथा श्रियः करं गृह्णातीति तथा तद्भवत्करसरोरुहं नः शिरसि धेहि ॥ ५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतत् वक्ष्यमाणम् । वृष्णीनां चन्द्रवंश्यानां धुर्योऽग्रणीः 'वृष्णिः पाण्डवचन्द्रयोः' इति मेदिनी । यद्वा—वृष्णिषु रेतःसेक्तृषु मुख्य रतिनिपुण । उभयथाऽस्माकमभीप्सितापादनमुचितमिति संबुद्ध्यभिप्रायः । काम्यत इति कान्तश्चतुर्वर्गः, स एव

---

१. वयं–विज. । २. शरण–श्रीधर. वंश. जीव. वीर. विश्व. शु. ध. सु. रा ।

कामोऽभिलषितस्तं ददातीति तथा करचरणयोरुभयोर्विशेषणम् । हे कान्तेति वा । श्रीकरग्रहमिति—अतस्तव हस्तसम्बन्धाद्वयमपि श्रीतुल्या भवेमेत्यभिप्रायः । त्यागार्हत्वमेव श्रीसमानतेत्यर्थः ॥ ननु भो प्रियभाषिण्यः युष्माकं प्रणयकोपोक्तिपीयूषपानार्थमेवांतर्हितं तदधुना लब्धाभीष्टोऽस्मि यथेष्टं वरं वृणुतेति तत्प्रसादोक्तिं संभाव्य साश्वासं पृथक्पृथक् स्वाभीष्टं प्रार्थयन्ते—विरचितेत्यादिचतुर्भिः । हे वृष्णिधुर्य निजकुलकमलप्रभाकर नः शिरसि करसरोरुहं धेहि अर्पय । किमर्थम्, तत्राहुः कामदम्—यस्य शरप्रहारभयात्त्वां प्रपन्नास्तं काम द्यति खंडयतीति, तच्छेषभंग्या कामं दददपि । न चात्र तस्याशक्तिरिति वाच्यम्, यतः संसृतेभयाच्चरणमीयुषां प्रपन्नानां जनानां विरचितमभयं येन तत् । येन संसारभयादपि रक्षितुं शक्यते तस्य कामभयाद्रक्षणे कः खल्वायास इति भावः । ननु तर्हि वो वक्षस्सु दधामि तत्रैव ममापिधित्सा वर्तते, तत्र नेत्याहुः—श्रीकरग्रहमिति । श्रिया लक्ष्म्या कराभ्यां ग्रहो ग्रहणं यद्धारणार्थं यस्य तद्वक्षसि करधित्सायां यथा लक्ष्म्या वार्यते तथैवास्माभिरपि तद्धारणीयमिति भावः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पूर्वानुसारेणैवैश्वर्य्यं संभाव्याहुः । विरचितेति । विरचिताभयमिति मोक्षप्रदत्वमुक्तं कामदमिति धर्माद्यर्थिनां सर्वाभीष्टप्रदमिति त्रिवर्गप्रदत्वं भक्तिप्रदत्वं च श्रीकरग्रहमिति प्रेम्णा प्रियजनवश्यत्वं रसिकत्वं च । एषां यथोत्तरं श्रैष्ठ्यमूह्यं सरोरुहरूपकेण सहजशीतलमधुरत्वादिना स्वतः फलरूपत्वं सूचितम् । ततो मोक्षो नाम निर्विघ्नप्रेमसम्पद्वृद्धये विविधदुःखपरम्परा निवृत्तिरेव ज्ञेयः त्रिवर्गोऽयं प्रेमसाधनोपयोग्येव अन्यच्च भक्तानामुपेक्ष्यमेव एतच्च सर्वं तद्गुणवर्णनं प्रेमोल्लासेनैव ज्ञेयम् । ननु तद्योग्या न यूयमिति चेत् सत्यं निजमाहात्म्यापेक्षया धेहीत्याहुर्वृष्णिधुर्य्य ! हे निजाशेषमाधुरीप्रकटनाय यदुविशेषकुलेऽवतीर्णेति तच्च भावविशेषेण त्वया धेयमित्याशयेनाहुः । कान्त ! हे प्रियेति अन्यत्तैः यद्वा विरचितेत्यादिना संसारसम्बन्धिपापहारित्वेन शौर्य्यमुक्तं कान्तं च तत्कामदं चेति स्वतः सुखदत्वेन सर्वाभीष्टप्रदत्वेन च दातृत्वं श्रीकरग्रहम् श्रियः सम्पदधिष्ठात्र्याः स्वगोकुले वशीकरात् करमिव गृह्णाति यत्तदित्यनेन सर्वसंपदाश्रयत्वमतोऽस्माकं विरहभयनाशः तद्रूपाभीष्टप्राप्तिः तत्प्राप्त्यानुषङ्गिकसर्वसम्पत्प्राप्तिश्च तेनैव सिध्येदिति भावः । वृष्णिधुर्य्य वृष्णिविशेषव्रजराजकुलतिलकेति वयं स्वाभाविकत्वत्पाल्या नैवोपेक्ष्या इति भावः । उभयथापि शिरसि धेहीति तेनास्मान् वाढमङ्गीकुरुष्वेति तात्पर्यम् ॥ ५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विरचिताभयमिति मोक्षदत्वमुक्तम् । कामदमर्थिनां सर्व्वाभीष्टप्रदमिति त्रिवर्गदत्वं भक्तिदत्वञ्च; श्रीकरग्रहमिति प्रेम्णा भक्तवश्यत्वं रसिकत्वञ्च, एषां यथोत्तरं श्रैष्ठ्यमूह्यम्; सरोरुहरूपकेण सहजशीतलमधुरत्वादिना स्वतः फलरूपत्वं सूचितमेव, अतो नः शिरसि धेहि, अस्माकं तत्तत्सिद्धये इति भावः । तत्र मोक्षो नाम निर्विघ्नभक्तिसिद्ध्यै विविधसंसारदुःख-निवृत्तिरूपो ज्ञेयः, त्रिवर्गो भक्तिसाधनोपयोग्येव, अन्यच्च भक्तानामुपेक्ष्यमेव; एतच्च भक्तिसिद्धान्तमते ज्ञेयम्, तासाञ्च मते शिरसि श्रीहस्तधारणमेव परमफलमन्यच्च तत्स्वभावमात्रस्तोत्रम् । ननु तद्योग्या न यूयमिति चेत्, सत्यम्, निजमाहात्म्यापेक्षया धेहीत्याहुः—वृष्णिधुर्य्य ! वृष्णीन्द्रे धुर्य्यो दमनसमर्थ इति स्वपक्षकृपाकरणं दर्शितम्, यद्वा, वृष्णिधुर्य्य हे निजाशेषगुण-कृपादि-प्रकटनार्थं यदुकुलावतीर्णेत्यर्थः । गोपानामपि यादवत्वात्, तच्च भावविशेषेण त्वयाधेयमित्याशयेनाहुः— कान्त ! हे प्रियेति । अन्यत्तैर्व्याख्यातम् । यद्वा, सरोरुहरूपकेण ध्वनितम्, तापहारित्वादिना दुःखध्वंसन-सुखापादनाद्यात्मकं सर्व्वार्थप्रदत्वम्, तथा सहजशीतलत्वादिना च ध्वनितम्, स्वतः परमफलत्वमेव दर्शयन्ति—विरचितेत्यादिना । संसारभयादपि प्रपद्यमानानां विरचितमभयं सर्व्वतो भयाभावो येन, अतोऽस्माकं पुनर्विरहभयं नाशयेति भावः । कान्तञ्च तत्कामदञ्चेति स्वतः सर्व्वार्थरूपत्वं सर्व्वार्थप्रदत्वञ्चोक्तम्, कामदत्वात् । कान्तत्वस्य श्रैष्ठ्येन पश्चान्निर्द्देश्यस्याप्यादौ निर्द्देशः, श्रीभागवतामृतोक्त-भक्तिसिद्धान्तापेक्षया, तात्कालिक-स्वाभिप्रेतानुसारेण वा; अतस्तत्प्राप्तिर्निजकामपूर्त्तिश्चाभिप्रेता, तच्च सम्भवेदेवेत्याहुः—श्रीति, तद्दृष्टान्तेनास्मास्वप्यपेक्षासम्भवादिति भावः । यद्वा, श्रीकरग्रहमपि धेहि, तत्र हेतुः—वृष्णिधुर्य्येत्येव, एतदनुसारेणाग्रे मनोरथं कुर्व्वता अक्रूरेण विस्तार्य्य वक्ष्यते (भा० १०।३८।१६)—'अप्यङ्घ्रिमूले पतितस्य' इत्यादि । तत्र कान्तेत्यस्य, यद्वेति कामदमित्यस्य च समर्हणमिति विस्तरः, परं स्पष्टमेवेति । एवमग्रेऽप्यूह्यम् । यद्वा, भयतः शत्रुभयेन संसृतेरितस्ततः संसरणात् पलायनात् चरणमीयुषां प्रपद्यमानानां जनानां वैरिविनाशेन विरचिताभयं श्रीकरग्रहं श्रीकराः सम्यक्कररेखामयाः शङ्खचक्रादयस्तान् गृह्णातीति तथा, तदैश्वर्य्यं विनायमर्थः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्मात्तावकानामस्माकमभिमतमेतच्चतुष्टयं सम्पादयेत्याहुश्चतुर्भिः । विरचितेति । हे वृष्णिधुर्य ! संसृतेः भयदात् संसाराद्भयात्तव चरणमीयुषां शरणङ्गतानां विरचितं दत्तमभयं येन तत्कामदमभीष्टदं तथा श्रियो लक्ष्म्याः करं गृह्णातीति तथा तत्करसरोरुहं कान्तं कमनीयं नोऽस्माकं शिरसि निधेहि ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गोप्यः स्वतत्त्वज्ञानं विज्ञापयन्ति । स इति । गोपिका नन्दयतीति गोपिकानन्दनः सः भवान् हे सखे ! विश्वगुप्तये जगद्रक्षार्थं सात्वतां यदूनां कुले उदेयिवान् उदयं गतः जन्मभजनाय योग्यो नेत्याशयेनाहुः । अखिलेति । अखिलदेहिनामन्तर्या-

मित्वेन द्रक्ष्यति पश्यतीति यद्वान्तरात्मानं स्वरूपं पश्यतीति अनश्नन्नन्यो अभिचाकशीतीति श्रुतिः किञ्च विखनसार्चितः ब्रह्मणा पूजितः विरिञ्चिगुरुरित्यर्थः। यद्वा यः सात्वतां कुले उदेयिवान् स भवान् गोपिकानन्दनः खलु न भवतीत्यर्थः। निषेधे वागलङ्कारे वीप्सनेनुनये खल्विति अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वेति त्वायोग आक्षेपापोक्षिकः तर्हि क इति तत्राहुः। अखिलेति। न खल्विति पाठे वाक्यालङ्कारार्थः॥ ५॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ननूक्तप्रकारेण मतत्रयेण ये यथा मां वदन्ति, तथैवाहं नान्यथाशङ्कनीयमिति चेत्, तदैवं क्रियतामित्याहुः—विरचिताभयमित्यादि। हे वृष्णिधुर्य! विश्वगुप्तिपर! विश्वगुप्तये सात्वतां कुले उदेयिवानिति, विश्वगुप्तिनिष्ठत्वपक्षणाश्रित्य सम्बोधनम्। सर्वासां नो रक्षणं क्रियतामिति भावः। तदेव किं प्रकारम्? तमाहुः—हे कान्त! करसरोरुहं नः शिरसि धेहि, तदा सर्वा एव वयं जीवाम इत्यर्थः। कीदृशम्? विरचिताभयम्। केषाम्? ते तव चरणमीयुषाम्। कस्मात्? संसृतेर्भयात्, अभयमिति यावत्। कीदृशम्? श्रियो लक्ष्म्याः करग्रहो येन तत्तथा; श्रियः करग्रहणमात्रप्रयोजनमिति। अस्माकं तु कामदं सर्वाभीष्टप्रदम्। शिरसीति याचकरीत्या प्रथयतोऽल्पमेव याचनम्, तेन दैन्यञ्च व्यज्यते॥ ५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ननु भो गोप्यः! विपरीतमेव भवतीभिरुच्यते, अहमाखिलात्मदृक् विश्वगुप्तिकृच्च इति चेत्तदेवं कुर्वित्याहुः—विरचिताभयमित्यादि बहुभिः॥ ५–८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु भोः प्रियभाषिण्यः! युष्माकं प्रणयकोपोक्तिपीयूषपानार्थमेवान्तर्हितं तदधुना लब्धाभीष्टऽस्मि यथेष्टं वरं वृणुतेति तत् प्रसादोक्तिं सम्भाव्य साश्वासं पृथगभीष्टं प्रार्थयन्ते विरचितेत्यादि चतुर्भिः। हे वृष्णिधुर्य! निजकुलकमलप्रभाकर नः शिरसि करसरोरुहं धेहि अर्पय। किमर्थं तत्राहुः। कामद यस्य शरप्रहारभयात् त्वां प्रपन्नास्तं कामं द्यति खण्डयतीति तच्छेषभङ्ग्या काम ददत्पि। न चात्र तस्याः शक्तिरिति वाच्यम्। यतः संसृतेर्भयात् चरणमीयुषां प्रपन्नानां जनानां विरचिमभयं येन तत्। येन संसारभयादपि रक्षितुं शक्यते तस्य कामभयाद्रक्षणे कः खल्वायास इति भावः। ननु तर्हि वो वक्षःसु दधामि तत्रैव ममापि धित्सा वर्त्तते। तत्र नेत्याहुः। श्रीकरग्रहमिति श्रिया लक्ष्म्या कराभ्यां ग्रहणं तद्धारणार्थं यस्य तद्वक्षसि करधित्सायां यथा लक्ष्म्या वार्यते तथैवास्माभिरपि तद्धारणीयमेवेति भावः॥ ५॥

श्रीरसिकाह्लादिनी–टीका

ननु केन प्रकारेण युष्मत्परिपालनं भवेत्तत्राहुः। विरचितेति, पूर्वसंस्कारेण ऐश्वर्यं पुरस्कृत्य स-काकुदैन्यमावेदयन्त्यः प्रार्थयन्ते विरचितेति। एवं तावत् प्रार्थनाचतुष्टयं सम्पादयेति तन्मध्ये एकां प्रार्थनां निवेदयन्ति। हे वृष्णिधुर्य निजगुणाविष्कारेणालङ्कृतयदुकुलं नोऽस्माकं इति करसरोरुहं शैत्यहेतुं करकमलं धेहि स्थापय। विरहतापतप्ते शिरसि स्थापनेन सर्वाङ्गतापनिवृत्तिर्भविष्यतीति भावः। हे कान्तेति सम्बोधनेनैतत् ज्ञायते तावत् करकमलधारणेन नः स्वाधीना कुर्विति। कीदृशं करसरोरुहं न केवलमेतावदेव। किं तु कामदं भक्तेभ्यो भीष्टप्रदम्। ननु आकौमारं चरितब्रह्मचर्योऽहं कथं स्त्रीणां शिरसि हस्तमाधास्ये इति चेत्तत्राहुः। श्रीकरग्रहं तव ब्रह्मचर्यं विदितम्। अनेन परमरसज्ञत्वं च सूचितम्। चरणमीयुषां शरणं प्राप्तानां अविशेषेण सर्वेषां विरचितं दत्तमभयं येन। किं पुनः प्रियाणां शरणागतानां या शरणागता सैव स्वकीया तत्त्यागोऽनुचितं ईश्वरस्यापि वयमपि संसृतेः सम्यक् सृतिः शरणमभिशरणं यस्मात् संसृतिः कामस्तस्य भयात्। ते चरणमीयुषां शरणं प्राप्तानां अभयं देहि हस्तधारणेनेति। यथा संसारभयात् शरणगतानां दुःखनिवृत्तिः फलं तथाऽस्माकं कामतापशान्तिः फलमित्यर्थः। यद्वा कीदृशं कान्तान् कामानभिलषितानर्थान् ददातीति कान्त कामदं। वृष्णिधुर्येति गर्गवाक्यप्रामाण्यादिति सर्वं समञ्जसमिति। यद्वा श्रीकरः सर्वसम्पत्सम्पादको ग्रहो ग्रहणं आग्रहो वा यस्य करसरोरुहे ग्रहणमात्रे सर्व-सम्पत्प्रादुर्भवति। किं पुनर्भावविशेषेणेति तात्पर्यम्। अतः प्रतिश्रुतमनुस्मृत्य पालयेति प्रार्थना॥ ५॥

विशुद्धरसदीपिका

अथ परकीयाभिमानिन्य किञ्चिदैश्वर्य्यमवलम्ब्य श्लोकचतुयेन मनोरथचतुष्टयं प्रार्थयन्ति अयमाशयः प्राणनाथ! यदि भवान्नियमन इति मन्यसे तर्हि त्वदेकजीवनानां प्रार्थितमिदं त्वरितमेव सम्पादय यदि चेश्वरस्तदा त्वद्भक्तानामस्माकं प्रार्थितं साधयेति यदि चास्माकमनवलोकनं प्रतिज्ञातं तर्हि वाञ्छाकल्पतरुस्वभावेनैवं विधेयमिति धर्मराजसावित्रीसम्वादमवतारयन्ति तव हि तत्पतेर्जीवनं विनान्यत्सर्वमपि सम्पादयिष्यामीति धर्मराजप्रतिज्ञायां सत्यवत एव सकाशात्पुत्रपीतमुत्पादयिष्यामीति

सावित्र्याः प्रार्थितसिद्धिरितिमहाभारते स्थितं तत्रविरचिताभयमिति मोक्षप्रदत्वमुक्तम् "अभयं वै जनकप्राप्तोऽसी"ति श्रुते कामदमिति त्रिवर्गप्रदत्वं तत्र मोक्षो नामनिर्विघ्नप्रेमसमृद्धये विविधदुःखपरम्परानिवृत्तिरेव ज्ञेया त्रिवर्गोऽपि भक्तिसाधनोपयोग्येव अन्यस्य तदेकभक्तेरुपेक्षितत्वात् श्रीकरग्रहमिति प्रेम्णा प्रियजनवश्यत्वं रसिकत्वं च यद्वा सेर्ष्यमाहुः—

लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम् । शेषे धराभराक्रान्ते शेते नारायणः सुखम् ॥

इत्यभिज्ञातोक्त्यास्मद् दुःखानवकलनं हि तत्संसर्गदोषादेवेति भावः । यद्वा साकूताभिधानं तथाहि—

धनवन्तो हि जानन्ति करुणाः परवेदनाम् । श्रीदामानं वासुदेवश्चकार धनदोपममिति ॥

सरोरुहरूपकेण च शीतलमधुरत्वादिना स्वतः फलरूपत्वं सूचितम् एतच्च तद्गुणवर्णनं प्रेमोल्लासेनैव वस्तुतस्तु श्रुतिमुनिरूपत्वादेतासां प्राग्जन्माहितसंस्कारेणोन्मत्तत्वाच्च रसेनाप्यविरुद्धमिति ज्ञेयं वृष्णिधुर्य्येति कान्तेति च व्रजराजकुलतिलकपरमप्रेष्ठेत्यभिप्रायेणोक्तम् ॥ ५ ॥

श्रीरामनारायणकृता भावभावविभाविका

तस्मादेवं विधेहीत्याहुः । विरचिताभयमिति । वर्णितसम्बन्धेन स्वभावनानुरोधेन च सम्बोधयन्ति । कान्त ! हे स्वामिन्निति बहुस्त्रीकान्तत्वे सङ्कोचं सम्भाव्याहुः । वृष्णिधुर्य्येति वृष्णिर्यदुवंशभवो बहुस्त्रीकस्तद्वंशधर तद्वंश्यश्रेष्ठ बहुकान्तत्वस्य वृष्णिशशविन्दुप्रभृतिकुलपरम्पराप्राप्तस्य न हि त्वय्यसम्भव इति भावः । कामवर्षिणां सुरतिलतां सेचकानां श्रेष्ठ इति वा ते करसरोरुहं सरोरुहवन्मञ्जुसुरभिशीतलत्तापोपशमकाह्लादजनकं नः शिरसि धेहि तथा च तव नः कामज्वालोपतापपरीक्षात्वत्करसरोरुहसम्बन्धेनास्मत्तापोपशमश्च भवेत् न इति बहुवचननिर्देशेन शिरसीत्यत्र जातावेकवचनं बोध्यं तथा चक्राभिकरधारणे सम्भावितकालविळम्बस्य विरहविकलानामसह्यतया युगपत्सर्वशिरस्सुकरसरोरुहं धेहीति प्रार्थने करे बहुवचननिर्देशो भाव्यस्तत्र तददर्शनेनैकवचनप्रयोगेण भगवत्करस्य सर्वतः पाणिपादं तदित्यादिशास्त्रं प्रसिद्ध विभुत्वमेव सूचितं तथा च विभोर्विभुसर्वाङ्गस्य युगपद्बह्वाविर्भावसंभवेन नास्मत्तापोपशमोदुःशक इति ननु बहुकामिनीनां निकामकामतापोपशमेकाममशक्तिस्तत्राहुः । विरचिताभयमिति । संसृतेः आधिदैविकाध्यात्मिकत्रिधानादितापलक्षणसंसारस्य भयात् चरणशरणमीयुषामसंख्यातानां विशेषेण पुनः कदापि तत्सम्भवसम्भानाशून्यतया तन्मूलाज्ञानबाधेन रचितमभयं येन तथाभूतेन तस्यैतत्तापोपशमनमशक्यं विशेषतः कामतापोपशमकत्वमेवाहुः । कामदमिति । कामान्ददातीति तथा न केवलमपवर्गप्रदमेव किन्तु सर्वकामप्रदमपि किञ्चत्वत्कामविहार एव संसृत्युभयतापापहारकोऽतस्त्वद्विहार एव परमहंसैर्ध्येयस्तदुक्तम्—

चौरो यो नवनीतस्य जारो वल्लवयोषिताम् । ध्येयः सदैव साधूनां चौरजारशिरोमणिः ॥
भगवतापि न मय्यावेशितधियां कामः कामाय कल्पते । भर्ज्जिताः क्वथिता धानाः प्रायो बीजाय नेष्यते ॥
जन्म कर्म्म च भेदिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्ज्जुन इति ॥

कामदत्वे सर्वकामदशक्त्याश्रयत्वं प्रमाणयन्ति । श्रीकरग्रहमिति श्रियोऽपि कामदत्वे किमुवाच्यमन्यकामदत्वमित्यपि ध्वनिः यद्वा हे कान्त ! मधुरकोमलकान्तिमत् करसरोरुहं नः सर्वासां शिरसि धेहि तथा च संसृतेर्भयाद्विरचिताभयं यत्करं तदपि यथा सरोरुहवत्कोमलं तथा तव कोमलपद्भ्यां यद्वने संसरणं तद्भयादेव चरणमीयुषां नोविरचिताभयं नो दुःसहं तन्निवर्त्तय ततः सर्वकामदं यत्तन्नः कामदं कुरु तथा श्रियः करं गृह्णातीति तथाभूतं करं नः श्रीकरग्रहं नः श्रीशोभाकरग्रहे एव यस्य तादृशं विधेहि त्वद्विरहे निःश्रीका नः स्वकरग्रहेण श्रीमतीः कुर्विति भावः । यद्वा हे कान्त ! कानां सर्वकामादि सुखानामन्तं पर्य्यवसानं यस्मिन् त्वन्निवासास्पदे नो हृदि यत्कामस्य संसृतिः सम्यग्बलोद्रेकेण सोपद्रवतया सरणं तद्भयादेव चोऽवधारणे तद्विजयोद्यतस्य तव रतिरणमीयुषां नो विरचिताभयं यथा स्यात्तथा करसरोरुहं नः शिरसि धेहि पञ्चकुसुमशरस्मरसमरकरणाय पञ्चाङ्गुलिदलं करसरोरुहमेवालं यद्वा रिपुरणे तद्रिपोरेवाग्रणीकरणं नीतिः तथा च सर्वकामदोऽपि पञ्चशिरःशशिधरो हरः कामदःकामावखण्डक इति पञ्चागुलिशीर्षणि नखचन्द्रधरः कर एव नः सर्वथा कामसुखदोऽपि कामज्वरावखण्डकोऽग्रणीतया तं नः शिरसि धेहि ततश्च तादृक्करसरोरुहस्य शिरस्यारोहे स्वत एव कामोपद्रवोपशमस्तथा श्रीकरग्रहं स्वश्रियैव सर्वान् करे गृह्णाति वंशीकरोतीति तथा भूतमस्मद्दास्यापादकं नः श्रीकरग्रहं श्रिय इव करग्राहकं विधेहीति भावः ॥ ५ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तस्मात्त्वद्भक्तानामस्माकमेतत्प्रार्थनाचतुष्टयं सम्पादयेत्याहुः । विरचितेति चतुर्भिः । करसरोरुहं नोऽस्माकं शिरसि धेहि तत्र स्थापनेनान्तः करणस्थस्य तापस्योपशमो भविष्यति सरोरुहात्मकस्य हस्तस्यात्यन्तशीतत्वादिति सरोरुहं हृदयेन सूचितं न केवलं तापोपशामक किन्तु कामदं सकलमनोरथपूर्तिकरं ननु स्वकान्तस्येदं कृत्यमिति चेत्तत्राहुः । कान्तेति । ननु योगिध्येयःकस्यापि कान्तो न भवति कुतो भवतीनामित्याशङ्क्याहुः । भियः करस्य ग्रहो ग्रहणं येन तत् तथाच गृहस्थो भगवान् यथा श्रियं हस्ते

गृहीतवांस्तथास्मच्छिरसि हस्तं धारयितुं नास्ति किञ्चिद्बाधकमिति भावः। ननु श्रियो विधिपूर्वकं हस्तग्रहणे भवतीनां शिरोग्रहणे को हेतुरिति चेत्तत्राहुः। शरणमीयुषां तव शरणागतत्वाभिलाषूणां विरचितमभयं येन तत् एवञ्च विवाहितापेक्षयापि शरणागतानामस्माकं कामशत्रोः शकासात्पालनमत्यावश्यकं शरणागतपालनस्येश्वरस्य तवनिजधर्मः ननु तथापि निषिद्धोऽयं प्रकारः सर्वथापि वर्जनीय इति चेत्तत्राहुः। वृष्णिधुर्य्य ! यदुकुलोद्भवस्य बहुस्त्रीकस्य वृष्णेर्वंशे धुर्य्यः श्रेष्ठो भवान् पतित्वेन वृतोऽत्रस्माभिरतो नास्ति दोषस्तस्मात्दृष्टादृष्टदुःखमपाकर्तुं योग्योऽसीति भावः। यद्वायमाद्विश्वस्य गुप्तये भगवत उदयस्तस्माद्रक्षणस्यावश्यकत्वाद्यथास्मद्रक्षणं तथा त्वयावश्यं विधेयमित्याहुः। विरचितेति। मदीया भवत्य इत्याश्वासनार्थं करसरोरुहं नः शिरसि निधेहि तत्स्थापनेन त्रिवर्गसिद्धिरस्माकम्भविष्यतीत्याशयेनाहुः। कामदं यतोऽस्मात्कान्तत्वेनावतीर्णस्य भगवतोऽस्मन्मनोरथपूर्त्तिरावश्यकीत्याशयेन सम्बोधयन्ति। कान्तेति ननु भवतीनां सन्ति पतयोऽतः कथमहङ्कान्तः कथञ्च मद्धस्तसरोरुहं कामदमितिचेत्तत्राहुः। श्रीकरग्रहं यथा श्रीपतित्वेन प्रसिद्धः। अपि न वस्तुतः श्रियः पतयः किन्तु सुवर्णादिमायिकरूपान्तायास्तस्या अत एव भगवद्धस्तकमळं तत्करग्रहं तथास्माकमपि मायिकरूपान्तरपतयस्ते मुख्यस्तु कान्तो भवानेवात एवास्मान् स्वीयत्वेन स्वीकृतवानित्याशयः किंच संसृतेर्भयाच्छरणमीयुषां विरचताभयं मोक्षप्रदं पाठान्तरे चरणप्रपन्नानामित्यर्थः। सर्वस्य मनोरथपुरुषगलप्रदानाय वृष्णिषु श्रेष्ठत्वेन भवानवतीर्ण इत्याशयेनाहुः। वृष्णिधुर्य्य ! अनभिज्ञापक्षे युष्मत्प्रार्थनामाकर्ण्य स्वस्मिंस्तत्करणसामर्थ्यमवधार्याहं प्रकटितो भविष्यामीति तदभिप्रायमाळक्ष्य सुकरं प्रार्थयन्ति हे कान्त ! करसरोरुहं नः शिरसि धेहि किमर्थमिति चेत्तत्राहुः। कामादिशरप्रहारपरस्य कामस्य खण्डनकरं तदुद्दीपकं चानेन रतिप्रार्थनमपि व्यञ्जयन्ति अन्यथा सर्वाप्यस्माकमलंक्रिया कान्ताननुमोदनाद्वृथा भविष्यतीतिचेत्तत्राहुः। सम्यक्सृतेर्मार्गाद्यद्भयं तदुल्लङ्घनजन्यं तस्मादपि तवशरणागतानां विरचिताभयं इन्द्रदेरपि पराजयं कर्तुं समर्थस्य तव त्वदीयानाञ्च नास्ति सन्मार्गादपि भयं प्रवलेन त्वया प्रवर्तितस्य सन्मार्गत्वात् तदुक्तं "सर्वं वलवतां शुचिः। सर्वं वळवतां धर्मः सर्वं वलवतां स्वकमिति प्रागयं वसुदेवस्येत्यनुरोधेन वृष्णिधुर्य्येतिसम्बोधनं तथाच पालनशक्तिमतस्तवाऽस्मत्पालनमेयोचितमिति तदाशयः मानिनी पक्षे नोऽस्माकं मध्ये तव सूतेः सम्यक् पलायनादितोऽपि दूरतरतिरोधानाद्यद्भयतदस्माकं प्राप्तानां शिरसि करसरीरुहं निधेहि यतः सर्वं विरचितममयं येन जन्मान्तरे क्षत्रवंशोद्भवत्वादभयप्रदत्वमुचितमेव तव हस्तस्येति द्योतयन्त्यः सम्बोधयन्ति हे वृष्णिधुर्य्योति पुनश्च हे तत्कान्त ! तासां कामदं तथाच कान्तभावमङ्गीकृत्य येन हस्तकमलेन कामन्दत्तवांस्तस्याधुना शिरसि स्थापने को विलम्ब इतिभावः पुनश्च श्रीकरग्रहं शोभाकरग्रहणयोग्यं तथाच तदभावे तासां शिर एव पतिष्यतीति भावः। निवृत्तिपक्षे अतः स्वस्वरूपप्रकाशनार्थमेवं कुर्विति प्रार्थयन्ति। विरचितेति। हे वृष्णिधुर्य्य ! नृणां निःश्रेयसार्थं गृहीतकृष्णाद्यवतार तव शरणमीयुषां भगवच्चित्तत्वादिप्रपन्नलक्षणवतां श्रीकरग्रहं मोक्षं श्रीसम्पादकमाग्रहं नोऽस्माकं श्रुतीनां शिरसि मस्तके उपनिषद्भागे कं सुखं तद्रूपो रसोब्रह्मानन्दात्मकं रस राति ददातीति करसरस्तं निधेहि श्रीकरेति सम्बोधनं वा तथात्वे सति मत्प्राप्तिस्तेषां सुकरेत्यत्राहुः हे कान्ताऽस्मत्प्रतिपाद्यं कामं द्यति खण्डयतीति त सर्ववासनोच्छदकरं पुनश्चारुहम् अरूणि वेदरूपशब्दे प्रमाणाद्बाह्यानि मतानि हन्तीति तथा तम् अत एव संमृतेर्भयाद्विरचिताभयम् एवंभूतग्रहस्य त्वत्कृपां विनोदायासम्भवात्तदर्थं त्वां प्रार्थयाम इति भावः ॥ ५ ॥

रास-रहस्यम्

र० टी०—हे वृष्णिधुर्य ! वृषि व्यापकार्थे, विष्णूपलक्षितसंसारप्रपञ्चस्याधिष्ठानत्वेन धारक ! ते तव विरचिताभयं विशेषेण रचितं प्रकटितमभयमद्वैतस्वरूपं येन, "द्वितीयाद्वै भयं भवति।" इति श्रुतेः, चरणमीयुषां शरणमीयुषां प्रपन्नानां नः, संसृतेर्भयात् जन्ममृत्युरेव संसृतिभयं तस्मात्, नः अस्माकं, शिरसि मस्तके, श्रीकरग्रहं मुक्तिलक्षणा श्रीसम्पद्, तत्कराणां साधनानां ग्रहं सम्पादकं, करसरोरुहं कं सुखं तद्रूपं रसं ब्रह्मानन्दात्मकं राति ददातीति करसरः ब्रह्मज्ञानं, तस्मिन् रुह जातं मोक्षाख्यं, पुनः कथम्भूतम् ? कान्तकामदं कानां सुखानामन्तः पर्यवसानरूपः तं कामदं च, सर्वेषां कामानां दातारं च धेहि स्थापयेत्यर्थः ॥ ५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे वृष्णिधुर्य्य ! संसृतेर्भयात् पुनःपुनर्जन्ममरणादिरूपात् संसारभयात् ते तव चरणमीयुषां पादपद्मशरणं प्राप्तानां जनानां विरचितं संपादितमभयं येन तत् तथा बहूनां कामदमभीष्टदं तथा श्रियः करं गृह्णातीति श्रीकरग्रहम् एवं भूतं ते करसरोरुहं हे कान्त ! नः शिरसि धेहि ॥ ५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

न वयमज्ञा इति विज्ञापयन्ति ॥ स इति। स भवान्गोपिकाया यशोदाया नन्दनः सुतः खलु। ना निषेधे वागलङ्कारे वीप्सनेऽनुनये खल्विति च। विश्वोऽपि प्रागुदाहृतः। गोपिका अस्मानानन्दयतीति स तथा स खलु इदानीं नेति वा। कुतो न यशोदासुत इत्यत आहुः। अखिलदेहिनामन्तरात्मा सम्पश्यतीति स तथा। हेत्वन्तरमाहुः ॥ विखनसार्चित इति। विखना ब्रह्मा

तेनार्चितः सम्प्रार्थितस्तेनेति यावत्। प्रयोजनमाहुः ॥ विश्वगुप्तय इति। जगद्रक्षार्थं हे सखे सात्वतां यादवानां कुल भवानुदेयिवानुदयं प्राप्तः स भवान्गोपिकानन्दनः खलु निश्चय इति वा। न खल्वित्यपि पाठस्तत्र खलु वाक्यालङ्कारे। योऽखिलदेहिनां खिलो नेत्यखिलो देहः स्वरूपदेहो येषामस्ति तेषामन्तरात्मदृक् विखनसाऽर्चितश्च। खन् अवदारणेऽस्मादसुनि विगतं खनोऽवदारणं यस्य विखना अखनाश्मसम इति यावत् तेन ब्रह्मणा सखः सुखपूर्ण इति वा। समं खं ब्रह्मणा येन स सख इति। कं ब्रह्म खं ब्रह्मेति श्रुतेः। खं प्रकाशस्वरूपत्वात्पुनः खं सुखरूपतः। ख्याततत्वाच्चैव तत्खं स्याद्रौहिणेयस्तथाऽत्रददिति बृहदारण्यभाष्योक्तम्। सशब्दस्य समार्थकता प्रागुक्त्वोपपादिताऽनुसन्धेया। हे आत्मदृक् मदपरोक्षज्ञानिन् त्वं भवांस्तरेति। विश्वगुप्तये सात्वतां कुले उदेयिवान्। मे चाखिलदेहिनामं अखिलदेहिनो विध्यादयस्तेषां नामः प्रणामो यस्य सकलनमस्कृतम्। नो गोपिकाऽस्मद्यशोदा आनन्द बबन्ध स त्वं खलु नामान्तरेत्यत्र न यतिभङ्गः शङ्क्यः तस्य क्षुद्रकाव्याभव्यताहेतुत्वात्। अर्थान्तरवर्णने सुतरामदोषत्वात्। स्पष्टं चैतत्प्रमेयदीपिकादिषु। स भवान्गावश्च पिकाश्चोपलक्षणया सन्तोषणीयसर्वग्रहास्तानानन्दयति। आकरणानुकरणादिभिः। अखिलदेहिनां मध्ये भवानन्तरा विना। आद्यर्थे बहुवचनम्। संसारादिदुरिष्टं सखः शुभेन्द्रियसहितः सन्नुदेयिवानिति वा। हे अखिल पूर्ण हे गोपिकानन्दन नामग्रहणं भावे घञ्। नस्तरेति तर वितर पुनर्मदो न पथोदं चेत्तथा कुर्विति भावः। आत्मदृक् स्वप्रकाशः ॥ ५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अन्याः पुनः सात्त्विकसात्त्विक्यः राजसप्रधानाभ्यो विशिष्टाः अप्रार्थितञ्च भगवान्न दास्यतीति भगवत्करस्य स्वशिरः सम्बन्धं प्रार्थयन्ति। विरचिताभयमिति। हे स्वामिन्! हृदयं स्फुटति अतः यथा सर्वाङ्गे आप्यायनं भवति तथा शिरसि करसरोरुहं धेहि शीतळं हि कमलं भवति सरोजातं तत्रापि कर एव सरः स्थानं सरसिजस्थानञ्च अत उद्धरणादिना न रसालतापगमः कान्तेति संबोधनं प्रथमतः शिरसि हस्तस्थापनेन स्वाधीनीकरणं द्योतितं किञ्च न केवलं हस्तम्तापमेव दुरीकरोति किन्तु कामदञ्च अभिलषितं कामं प्रयच्छति। ननु भगवान् पुरुषोत्तमः योगिध्येयः कथं स्त्रीणां स्पर्शं करिष्यतीति चेत्तत्राहुः। श्रीकरग्रहमिति। श्रियाः करस्य ग्रहो ग्रहणं येन नतो भगवान् गृहस्थ इति यत्र ळक्ष्म्या हस्तं गृह्णातीति तत्रास्मच्छिरोग्रहणे किम्भविष्यीति भावः। ननु लक्ष्मीर्विवाहितेति विधिवशात् तस्या हस्तग्रहणं भवतीनां ग्रहणे को हेतुरितिचेत्तत्राहुः। संसृतेर्भयात् शरणमीयुषां विरचिताभयामिति। यथा विधिर्विवाहे तथैव शरणागतपालनेऽपि विवाहापेक्षया शरणागतरक्षा महती स साधारणर्मः अयमश्विरधर्मं इति नन्वयं निषिद्धः प्रकार इति कथम्पालनमिति चेत्तत्राहुः। हे वृष्णिधुर्येति वृष्णिर्हि यदुवंशोद्भवः बहुस्त्रीकः यदुवंशकर्ता तद्वंशेऽपि भगवान् धुर्यः श्रेष्ठः तत्रापि स्त्रियः संसारभयात् समागताः नहि संसारः स्वभावन एव दुष्टः किन्त्वसह्यदुःखहेतुरिति तथा वयमपि महद्दुःखं प्राप्नुमइति दृष्टादृष्टद्वारा भवांस्तन्निवर्तक इति अनेनैव निर्भयतापि सूचिता अतः कान्तबोधनात् भवानेव भर्ता अतः स्त्रीणां व्रतमनुस्मरन् वाञ्छितं कुर्वित्यर्थः ॥ ५ ॥

श्रीसुबोधिनी–सारः

हे वृष्णिधुर्य संमृतेर्भयात् चरणमीयुषां सेवमानानां विरचितं दत्तमभयं येन तत् हे कामदं श्रियो लक्ष्म्याः करं हस्तं गृह्णातीति तत् ते करसरोरुहं पाणिपद्मं नोऽस्माकं शिरसि त्वं धेहि स्थापय ॥ ५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तस्मात्त्वद्भक्तानामस्माकमभिमतमेतच्चतुष्टयं सम्पादय' इत्याहुः—विरचितेति चतुर्भिः। 'महत्कुलोत्पन्नत्वेनापि तवास्मदार्तिहरणं युक्तम्' इत्याशयेन सम्बोधयन्ति —हे वृष्णिधुर्येति। तव करसरोरुहं नोऽस्माकं शिरसि धेहि स्थापय। 'तेन किं फलम्?' इत्यपेक्षायां 'त्वद्दर्शनादिजनितकामतापनिवृत्तिरेव' इत्याशयेन पुनः सम्बोधयन्ति—कान्तेति। 'तापनिवर्तकत्वं तस्य स्वाभाविको धर्म' इति सरोरुहपदेन सूचितम्। 'केषां तापनिवृत्तिर्दृष्टा' इत्याशयेनाहुः—संसृतेर्भयात् चरणमीयुषां शरणागतानां भक्तानां विरचितं दत्तमभयं येन तदिति। 'न केवलं तापनिवर्तकम्, किंतु मनोरथपूरकं च। तेनास्मन्मनोरथं पूरय' इत्याशयेनाहुः—कामदमिति। 'किं तत्र ज्ञापकम्' इत्यपेक्षायां 'सर्वमनोरथपूरिकाया लक्ष्म्या अपि प्रभावस्त्वत्स्वीकारादेव' इत्याशयेनाहुः—श्रीकरग्रहमिति ॥ ५ ॥

अन्वितार्थप्रकाशिका

विरचितेति ॥ हे वृष्णिधुर्य! हे कान्त! संसृतेर्भयात् चरणमीयुषां शरणागतानां भक्तानां विरचितं दत्तमभयं येन तत् कामदं श्रियः करं गृह्णाति तादृशं तव करसरोरुहं नोऽस्माकं शिरसि धेहि स्थापय ॥ ५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

याचयन्त्य आहुः चतुःश्लोकैर्विरचितेति हे वृष्णिधुर्ययादवाग्रसर संसृतेर्भयात् ते चरणं तव चरणकमलं ईयुषां प्राप्तानां जनानां विरचितं संपादितं भयं येन तत् श्रीकरग्रहं श्रियो लक्ष्म्याः करग्रहं विवाहकाले रतिसमये च पाणिग्रहकं हे कान्त वाकान्त

कामदमित्येकपदं कान्तं मनोहरं च तत् कामदं भक्तमनोरथपूरकं च यद्वा कान्तानामस्मदादीनां इच्छाप्रदं करसरोरुहं पाणिपद्मं नोस्माकं शिरसि निधेहि ॥ ५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्मात्त्वद्भक्तत्वात्तावकानामस्माकं सर्वथाभिमतमेतच्चतुष्टयं संपादयेत्याहुश्चतुर्भिः ॥ विरचितेति ॥ हे वृष्णिधुर्य चन्द्रधूर्वाहक, तापतप्तजनशान्तिकारिन्नित्यर्थः । 'वृष्णिः पाण्डवचन्द्रयोः' इति मेदिनी । यद्वा । वृष्णिधुर्य यादवश्रेष्ठ, हे कान्त कमनीय, ससृते भयात् ते तव, चरणं ईयुषां प्राप्तानां, शरणं गतानामित्यर्थः । विरचितं दत्तमभयं येन तत्, कामदमभीष्टप्रदं, कान्तं च तत्कामदं चेत्येकं पदं वा । तथा श्रियो लक्ष्म्याः करं दक्षिणपाणिं गृह्णातीति तथाभूतम्, करसरोरुहं पाणिपद्मं, नोऽस्माकं शिरसि धेहि निधेहि ॥ ५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वरचिताभयमिति : १०.३१.५.

वरचिताभयापहा भुवि भवन्ति ये जातुचिन्न ते सदय साधवो विषयभोगसौख्यप्रदाः ।
इदं तव कराब्जमस्त्युभयदानदक्षं ततः सुपूज्यमिह धेहि नः शिरसि सर्वशोभास्पदम् ॥ ६० ॥
संसारोरगभीजुषा-मभयदो हस्तो मुखाब्जस्तथा तापघ्नः पदमिष्टदं सदमृताधारोऽधरो जीवनम् ।
अस्माभिर्यदिदं श्रुतं तदधुना वृष्णीश वीरार्तिहन् व्यक्तीकृत्य पुषाण नस्त्वमसि यज्जीवातुरूपः सताम् ॥ ६१ ॥
यदाचरणमीर्ष्यया तदबलासु सापत्नकं तनोति च ततो वयं नहि हरे रमेर्ष्याजुषः ।
यदत्र समपेक्ष्यते हृदि विनिश्चयाधायकं कराब्जमिह धेहि नः शिरसि साऽस्ति तद्वासिनी ॥ ६२ ॥
यदि स्यात् पद्मायाः इव निरुपमं रूपमिह वस्तदा मद्भोगस्यायनमुचितं यूयमिति चेत् ।
तदस्माकं विष्णो शिरसि निजहस्ताब्जमधुना निधेहि त्वं यत्तत् सुरतरुवदस्तीष्टफलदम ॥ ६३ ॥
मीनस्येवाम्बुजस्यापि नाजले स्थितिरुज्ज्वला । अतः कराब्जमेतत्ते शुद्धास्मत्के निधेहि भोः ॥ ६४ ॥

कृष्णप्रिया

पुनः सत्वगुण विशिष्ट सात्विक सात्विक गोपियाँ निवेदन करती है कि हे वृष्णिकुल नायक ! हम तो संसार भय से भयभीत होकर आप के श्रीचरणों में शरण आए हुए आपके शरणागत सेवक है । हे कान्त ! आपका कर सरोज तो विषय-कामनाओं का विनाशक एवं सर्वविध शुभ कामनाओं का वरदायक है और कृपया श्री लक्ष्मी जी का पाणिग्रहण करने वाला मङ्गल दायक है वह कर सरोज के हमारे शिर पर पधराईए एवं हमें अङ्गीकृत करें ॥ ५

[1]व्रजजनार्तिहन् वीर योषितां निजजनस्मयध्वंसनस्मित ।
भज सखे [2]भवत्किङ्करीः स्म नो जलरुहाननं चारु [3]दर्शय ॥ ६ ॥

कर्वमक्षमा

अन्वयः—हे व्रजजन, आर्तिहर ! हे योषिताम्-वीर, हे, निजजन, स्मय ध्वंसन स्मित ! हे सखे ! भवत् किंकरीः, स्म नः भज, (न) चारु, जलरुहाननम, दर्शय ॥ ६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे व्रजजनार्तिहन् हे वीर निजजनानां यः स्मयो गर्वस्तस्य ध्वंसनं नाशकं स्मितं यस्य तथाभूत हे सखे भवत्किंकरीर्नोऽस्मान् भज आश्रय । स्मेति निश्चितम् । प्रथमं तावज्जलरुहाननं चारु सुंदरं योषितां नोऽस्माकं दर्शय ॥ ६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे व्रजजनार्त्रिहन् वयं किं व्रजजना न भवामेति सम्बुद्ध्याशयः । तथाभूत तादृशा अन्तर्द्धानेनालं तव स्मितमेव स्त्रीमानदलनसमर्थमिति तात्पर्यम् । अभजनेऽस्माकं दुर्दशावत्पश्चात्त्वयापि दुःखमेव लब्धव्यं सख्येन तुल्यव्यथत्वात् । यद्वा-विश्वासघातदोषप्रसक्तेरित्याशयेनाहुः-हे सखे भजेति । कमलदर्शनेन भृङ्गवदस्मन्नेत्रभृंगाणां त्वन्मुखमेव कमलवत्प्रियमित्यभिप्रेत्याहुः-जलरुहेत्यादि । यद्वा-हे योषितां वीर स्त्रीवधे समर्थेति । स्त्रीवधेन शौर्यप्रकटनं सर्वथानुचितम् 'व्याधस्याप्यनुकम्प्यानां स्त्रीणाम्' इत्युक्तेः ।

---

[1] "व्रजजनार्ति" श्लोकः क्रमे द्वितीय-विज ; अयं नास्ति-प्रा. पा. । [2] भावे-विज. । [3] दर्शयन्-विज. ।

विशेषेणेरयति प्रेरयति प्रतिपक्षान्निजानामिति वीरः शूरः 'रसे शूरे सुते वीरः' इति धरणिः ॥ अपरा आहुः—योषितां मध्ये ये व्रजजनास्तेषामार्त्तिं कन्दर्पशरप्रहारजनितां हन्तीति तथा । तेन देव्यादीनामप्यन्ययोषितां तां न हरसि, यद्वक्ष्यते–'व्योमयानवनिताः, कश्मलं युयरपस्मृतनीव्यः' इति । हे वीर दुर्वारमारसंप्रहारमहाजिष्णो । किञ्चास्माकं सौभाग्योत्थं गर्वं तदुत्थं वाम्यलक्षणं मानमपि न सहस इत्याहुः—निजजनानां स्मयध्वंसनं माननाशकं स्मितमपि यस्य । ननु वरं शीघ्रं वृणुत तत्राहुः–भवत्किंकरीरस्मान्भज परिचर । ननु यदि मम किंकर्य एव यूयं तदा मां स्वपरिचरणे किमित्याज्ञापयध्वे, तत्राहुः–हे सखे इति । तर्हि ब्रूत किं वः परिचरणं, तत्राहुः—जलरुहेत्यादि । तोषिण्यान्तु—भज अस्मःद्दुःखं प्रतिकुर्वन्निकटे तिष्ठ । अहो आस्तां तादृशोऽपि मनोरथः प्रथमं तावन्मनोहरं जलरुहतुल्यमाननमपि दर्शय । तत्र व्रजजनार्तिहन्निति भजनयोग्यत्वमुक्तं व्रजान्तः पातित्वादस्माकमन्यथाऽस्मदन्त्यदशापत्याऽऽर्तिहननासिद्धिः स्यात् । वीरेत्युक्तेरदेयस्यापि दानसामर्थ्यमुक्तम् । निजजनो निजप्रियाजनः । स्मयो मानः । तव स्मितमात्रेणापि मानो निरस्यते ददर्थमन्तर्द्धानेनालमिति भावः । अनेनैव मनोहरत्वमप्यभिप्रेतमतस्तदवश्यं द्रष्टुमपेक्ष्यत इति भावः । सख इति भजने प्रकारविशेषः सूचितः यद्वा–अभजने चास्माकं दुर्दशया पश्चात्त्वयापि किल दुःखं लब्धव्यं सख्येन तुल्यव्यथत्वात्, किं वा विश्विसघातदोषप्रसक्तेरिति भावः । अथ सख्ययोग्यस्यात्मनो विरहदैन्येनौद्धत्यमाशंक्याहुः—भवतः किंकरीरिति । योषितामिति–तत्र चास्माकं सामर्थ्याभावात्स्वयमेव दर्शयेति भावः । यद्वा–परमार्ताः प्रणयकोपेनाहुः व्रजजनार्तिहन् । तथाभूतोऽपि योषितां वीर, योषिद्वधे समर्थेत्यर्थः । अतो वयं मृतप्राया एव वृत्तास्तथा निजजनसुखग्लापनकपटस्मित तदधुनाऽभवत्किंकरीरन्या अदासीरेव भज, चारु जलरुहाननं च नो दर्शय मरणस्यैव निश्चितत्वात् । यद्वा व्रधजनार्तिहन । इह हन् गत्यर्थो ध्येयः, अन्यथा कथमस्माकमियं दशा स्यादिति ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं वैयग्र्येणादावङ्गीकारमात्रं प्राथ्याभीष्टविशेषान् प्रार्थयन्ते त्रिभिः तत्र प्रथमेन सामान्यतः सङ्गं प्रार्थयन्ते व्रजेति भज अस्माकं दुःखं प्रतिकुर्वन्निकटे तिष्ठ अहो आस्तां तादृशोऽपि मनोरथः प्रथमं तावच्चारु मनोहरं जलरुहतुल्यमाननमपि दर्शय । तत्र व्रजजनार्त्तिहन्निति भजनस्य योग्यत्वमुक्तम अन्यथास्मदन्त्यदशापत्त्या आर्त्तिहननासिद्धिः स्यात् वीरेत्यदेयस्यापि दानसामर्थ्यमुक्तं निजजनो निजप्रियाजनः तव स्मितमात्रेणापि मानो निरस्यते तदर्थमन्तर्द्धानेनालमिति भावः । अनेनैव परममनोहरत्वमप्यभिप्रेतम् अतस्तदवश्यं द्रष्टुमपेक्ष्यत इति भावः । सखे ! इति भजने प्रकारविशेषः सूचितः यद्वा अभजनेऽस्माकं दुर्दशया पश्चात्त्वयापि किल दुःखं लब्धव्यं सख्येन तुल्यव्यथत्वात् किंवा विश्वासघातदोषप्रसक्तेरिति भावः । अथ सख्ययोग्यस्याप्यात्मनो विरहदैन्येन औद्धत्यमाशङ्क्याहुः । भवतः किंकरीरिति योषितामिति तत्रास्माकं सामर्थ्याभावात्स्वयमेव कृपया दर्शयेति भावः । अन्यत्तैः । यद्वा योषितां मध्ये ये निजजनास्त्वपरिग्रहाः तेषां स्मयध्वंसनस्मित । अत एव निजदासीरस्मान् भज, तत्प्रकारमेवाहुः । जलेत्यादिना आप्याययस्व न इत्यन्तेन यद्वा परमार्त्त्या प्रणयकोपेनाहुः व्रजजनार्त्तिहन् हे तथाभूतोऽपि योषितां वीर योषिद्वधे समर्थेत्यर्थः । अतो वयं मृतप्राया एव वृत्तास्तथा निजजनमुखलापनकपटस्मित अधुना अभवत्किङ्करीरन्या अदासीरेव भज चारु जलरुहाननं च नो दर्शय मरणस्यैव निश्चितत्वात् अन्यत् समानम् ॥ ६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न च केवलं शिरसि श्रीहस्तनिधानमात्रं कार्य्यम्, किन्त्वस्माक कामश्च पूरयितव्य इति प्राक् सूचितमेवार्थ्यौत् क्येनाभिव्यञ्जयन्ति—व्रजेति । एतेन भजनस्य योग्यत्वमुक्तम्, अन्यथास्मदन्त्यदशापत्त्या आर्त्तिहननासिद्धिः, वीरेत्यदेयस्यापि दाने सामर्थ्यमुक्तम्, स्मयो मानः, तव स्मितमात्रेणापि मानो निरस्यते, तदर्थमन्तर्द्धानेनालमिति भावः । यद्वा, अनेन परममनोहरत्वमभिप्रेतम्, अतस्तदवश्यं द्रष्टुमपेक्ष्यत इति भावः । सखे ! इति भजने प्रकारविशेषः सूचितः । यद्वा, अभजनेऽस्माकं दुर्दशया पश्चात्त्वयापि किल दुःखं लब्धव्यम्, सख्येन तुल्यव्यथत्वात्, किंवा विश्वासघातिदोषप्रसक्तत्वादिति भावः । ननु तत्र तत्रादरो मे नास्तीति चेत्तत्र सदैन्यमाहुः—भवतः किंकरीरिति । दीनाना शरणागतानामुपेक्षा परमयुक्तेति भावः । यद्वा, तर्हि श्रीबलराममनुगच्छतेति चेत्तत्राहुः –भवत एव, न त्वन्यस्य किंकरीरिति जलरुहवदाननं चारु यथा स्यात्तथेति प्रेम्णा सस्मित-भ्रूविलासकटाक्षवलितम्, किंवा निकटागमनेन सम्यक्तया दर्शयेत्यर्थः, जलरुहेत्युपमया दर्शनमात्रेण विरहसन्तापहारित्वमभिप्रेतम्, योषितामिति तत्रास्माकं सामर्थ्याभावात् स्वयमेव कृपया दर्शयेति भावः । यद्वा, जनन्यजीवनानामस्माकमन्यथा मरणमेवेति, किंवा त्वद्दर्शनसुखस्य योषितां हृदयैकानुभवनीयत्वात्ताः प्रत्येव तद्दानं योग्यमिति सूचितम् । अन्यत्तैर्व्याख्यातम् यद्वा, योषितां मध्ये ये निजजनास्त्वत्परिग्रहाः स्वीयत्वेन स्वीकृता वा, तेषां स्मयध्वंसनस्मित, अतएव निजदासीर्भजः तत्प्रकारमेवाहुः – जलेत्यादिना 'आप्याययस्व नः' इत्यन्तेन । यद्वा, योषितां वीर हे योषिद्वधे समर्थेत्यर्थः । अतो वयं मृतप्राया एव वृत्तास्तदधुना अभवत्किंकरीः अन्या अदासीरेव भज, चारुजलरुहाननञ्च नो दर्शय, मरणस्यैव निश्चितत्वात्, इदञ्च प्रणयकोपेन परमार्त्त्या चोक्तम् । अन्यत् समानम् ॥ ६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

निजजनस्मयध्वंसन स्मित ! माननीजनमानभञ्जनस्मित ! ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे व्रजजनार्तिहन् ! हे वीर ! निजजन्मनां यः स्मयोगर्वस्तं ध्वंसयतीति तथा नन्द्यादेराकृतिगणत्वात्कर्तरि ल्युः तथाभूतं स्मित यस्य हे तथाभूत ! हे सखे भवतस्तव किङ्करीर्नोऽस्मान् भजानुवर्तस्व स्म निश्चितमद्भुतं वा सुन्दरं जलरुहाननं तावत् योषितामस्माकं दर्शयस्वेति ॥ ६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विरिञ्च गुरुश्चेदपेक्षिताशेषपुरुषार्थप्रदः स्यात्तत्र कथं निर्णय इत्याहुः । विरचितेति श्रियःकरं गृह्णातीति श्रीकरग्रहं शरणमीयुषां पुंसां निधेहि हे कान्त ! कमनीय ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ननु शिरसि करार्पणेनैव चेद् यूयं जीवथ, तदा सर्वा एव नयने निमीलयत, शिरसि वः करमर्पयामि । मैवमित्याहुः—व्रजेत्यादि । हे व्रजजनार्तिहन् ! इति हेतुमत् सम्बोधनम् । हे वीर ! सर्वसमर्थ ! तथा सति यथा उपेक्षायां समर्थस्तथाऽपेक्षायामपि । तर्हि किमहमुपेक्षकः ? न निजजनस्मयध्वंसनस्मित ! किङ्करीरस्मान् भज । ननु भजनं किं श्रयणं सेवनं वा ? इत्यत्राहुः—जलरुहाननं दर्शय, स्ववदनदर्शनं हि भजनमित्यर्थः । योषितामिति निर्द्धारणे षष्ठी योषितां मध्ये किङ्करीर्न इत्यर्थः । अथवा हे व्रजजन ! व्रजा व्रजस्था एव जनाः परिजना यस्य हे योषितामार्तिहन् ! वीरेति देशीय स्निग्ध सम्बोधनं वा ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अपरा आहुः । योषितां मध्ये ये व्रजजनास्तेषामार्त्ति कन्दर्पशरप्रहारजनितां हन्तीति तथा तेन देव्यादीनामप्यन्ययोषितां तां न हरसि । यद्वक्ष्यते व्योमयानवनिताः कश्मलं ययुरपस्मृतनीव्य इति । हे वीर ! दुर्वारमारसंप्रहारमहाजिष्णो किञ्चास्माकं सौभाग्यार्थं गर्वं तद्दुःखं वामलक्षणं मानमपि न सहसे इत्याहुः । निजजनानां स्मयध्वंसनं माननाशकं स्मितमपि यस्य । ननु वरं शीघ्रं वृणुत तत्राहुः । भवन किङ्करीरस्मान् भज परिचर । ननु यदि मत् किङ्कर्य एव यूयं तदा मां स्वपरिचरणे किमित्याज्ञापयध्वे तत्राहुः । हे सखे ! इति तर्हि ब्रूत किं वः परिचरणं तत्राहुः । जलरुहेत्यादि ॥ ६ ॥

रसिकाह्लादिनी–टीका

एवमभीष्टानन्यान् मनसि निधायाहुः व्रजेति, हे व्रजजनार्त्तिहन् व्रजजनानामार्त्तिहन्तृन् । अनेन सर्वभजनीयत्वमुक्तं इति ज्ञात्वा तव भजने वयं प्रवृत्ता इति भावः । हे सखे सख्युः सखा अवञ्चनीयो भवतीति धर्मोपदेशः भवत्किंकरीः दासीनो भजनं तत्र तव लज्जा न दोषः । यथा वयं त्वां भजामस्तथा त्वमपि भज–"ये यथा मां प्रपद्यन्ते तां तथैव भजाम्यहमिति" त्वयैव प्रतिश्रुतत्वात् इति हितोपदेशः । हे वीर मधुररसदाने वदान्य, यद्वा योषितां वीर अन्ये हि शूराः प्रतिकूलेषु प्रति–भटेष्वेव वीररसमाविष्कुर्वन्ति भवांस्तु अस्मास्वेव वीररस प्रकटयति । वयं मृतप्राया एवं मृतं मारणं कुर्वन् न लज्जत इति भावः । यद्वा योषितां मध्ये ये निजजनास्तेषां स्मयो गर्वस्तस्य ध्वंसनं नाशकं स्मितं यस्य तस्य सम्बोधनम् । स्मितमात्रेण माननिवृत्तौ जातायामिदानीमन्तर्द्धानेनालमिति । स्वभजने सुकरत्वं द्योतयन्ति । स्मित-विलसत्-भ्रूविक्षेपनिमर्दानां दीनानां योषितां तव प्रतिभटीभवितुमशक्तानां तावन तापहरणशीलं जलरुहाननं चारु यथा भवति तथा दर्शयेति । अन्यजलरुहं स्पर्शेन तापहरं भवति । इदं तु दर्शनमात्रेणेति महान् विशेषो दर्शितः । इदानीं वाञ्छितान्तरं प्रार्थ्यमानं विरहतापशान्तये अङ्गसङ्गं हृदि विधाय तच्चरणस्पर्शमात्रमेव "भिक्षुपादप्रसारिका" न्यायेन प्रार्थयन्ते प्रणतेति ॥ ६ ॥

विशुद्धरसदीपिका

अपि च व्रजेति । भजनयोग्यत्वम् अन्यथा स्मदन्त्यदशापत्त्यार्तिहननासिद्ध्यार्थत्वासिद्धेः वीरेत्यदेवस्यापि दानयोग्यत्वं योषितामिति तत्रास्माकं सामर्थ्याभावत्स्वयमेव कृपया दर्शयेति भावः यद्वा योषितां मध्ये ये निजजनाः त्वत्परिग्रहाः तेषां स्मयो मानस्तस्य ध्वंसनं स्मितं यस्येति परममनोहरत्वं यद्वा ननु भवत्या यौवनमत्ता इति त्यक्तारतत्राहुः । निजेति । तव स्मितमात्रेणैव तत्प्रतीकारो भवेत्किमन्तर्धानेनेति भावः । सख इति भजने प्रकार उक्तः कथमित्यत आहुः जलरुहाननं दर्शयेति । परमार्त्त्या प्रणयकोपेनाहुः । भवत्किंकरीरिति ॥ ६ ॥

श्रीरामनारायणकृता भावभावविभाविका

मनोरथान्तरं प्रार्थयन्ति । व्रजजनार्तिहन्निति । व्रजजनानाम् आर्तिं हन्तीति तत्सम्बोधनं तथा च व्रजजनानां नो वृजिनं वर्जयेति भावः अन्यथा तथात्वं न स्यात् नच हन्हिंसागत्योरिति । स्मृतेर्व्रजजनान् आर्तिं गमयतीति व्युत्पत्त्या वा व्रजजनानार्त्या

हन्तीति व्युत्पत्तिभेदेन वा भवतीनामात्यवगतावपि न तथात्वहानिरिति वाच्यं सर्वव्रजजनार्तिनिवर्तकस्यास्मदर्थेऽर्थान्तरप्रयोगोऽनुचित एव तथा हे वीर! विशब्दः पक्षित्वेन गरुडवाचकस्तमीरयतीति तथा नारायण एवार्ति हरणायावतीर्णे कथमार्ति दास्यसीति भावः। ननु नाहमार्तिं ददामीति चेत्तत्राहुः। योषितां वीर प्राणस्य प्राणमिति श्रुतेः सर्वेषामीरः प्राणोऽपि योषितां त्वन्मूर्तिहृदयमनः प्राणानां नो विशेषेण ईर प्राणभूत तथा च प्राणवियोगे जीवनाशम्भवप्रसिद्धौ किमुवाच्यं प्राणप्राण वियोगे वा। ननु किमिति परकीये मयि प्रीत्यतिशयस्तदतिशये चैवं गर्वो गर्वे पुनरेवं दैन्यं तत्राहुः। हे वीर विशेषेण प्ररक सामान्यतः सर्वान्तर्यामिन् विशेषतो योषितां नो वीर विविधतया प्रेरक तत्रान्तर्यामितया सर्वव्यवहारे मनोहरतया प्रीत्यतिशये वरदानेन तदार्यवंशीनादेन गृहादागमने वक्रोक्तिसुस्मितनिरीक्षणादिभिः स्थूणानिखननन्यायेन रागस्मरयोः सुदृढीकारे अत्यादरविहाराभ्यां स्मयः पुनश्च विरहेण दैन्ये प्रवर्तक तथा च स्वयमेव तथा प्ररणेऽप्यधुना योषितां वीरत्वे स्वविरहेण घातप्रवृत्तौ विश्वासघात तादृशवीरस्य योषितां वीरत्वे यशोहानिश्च किञ्च स्मयनिवृत्त्यर्थमेव त्वयान्तर्हितेनाप्यन्तर्हित तत्तु गुडदानेन रिपुशान्तौ विषदानमनुचितमिति न्यायेन मधुरसुस्मितेनैव सम्भवति स्मयोपशमे विरहविषोपयोगो न विधेय इत्याहुः। निजजनस्मयध्वंसनास्मितेति। स्मयध्वंसस्य स्मितमात्रसाध्यत्वेऽप्यन्तर्द्धानं त्वस्मद्धितार्थमेव प्रतिभाति तच्च निजजनेषु अनुचितमेवेति भावः। किञ्च हे निजजन! वस्तुतः सार्वात्म्याद्गोपरूपेण परिणयात् बरदाने स्वीकरणादस्मदाद्यन्तर्भावादाह्वानाद्रति सुखप्रदानाच्च सर्वथा स्वीयतया निजजनस्मयत्वदीयनिजजनानाम्—

न क्रोधो नच मात्सर्य्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥

इत्यादि वचनेभ्योऽसम्भावितोऽपि स्मयो यस्मात् तथा यथाकथञ्चिज्जातेऽपि स्मये यस्य नाशायैव धनुरादिविफूर्ज्जनबलशौर्य्यापेक्षानिजजनानां नः स्मयध्वंसनं तु भ्रूधनुर्विस्फूर्ज्जनपूर्वकसुस्मितेनैवेति वृथान्तर्द्धानादिकमिति भावः। किञ्च स्मयो मनोधर्मः स्मितेन मनोहरणे कुरुस्तद्धर्मस्मयावस्थितिरिति तस्मात् हे सखे! सामान्यतः सयुजा सखाया इति श्रुतिसिद्धसखे विशेषतो वरदानस्वीकारादिनाविष्कृतसख्य नोऽस्मान् भज सख्योः परस्परभजनौचित्येऽपि नोऽसमर्थत्वेन तव तु समर्थतया त्वयैव भजनीय किञ्च श्रुत्वाभावेन च सख्योऽपि वयं स्वीयभावेन भवत्किङ्कर्य्य एवेति भवतो भृत्यानुग्रहकातरस्वाभाव्याद्भवत्किङ्करीर्नो भज यद्वा यद्यपि वयमपि किमप्यतिविलक्षणत्वदेक गम्यसुखकर्योऽपि त्वद्भजनाधीनमेव तत्सम्पादनसामर्थ्यं न स्वातन्त्र्येण मैथुनसुखस्य मिथुनसाध्यत्वादिति ननु परोक्ष भजाम्येवाहं मम भजनाभावे भवतीनामनुरागविह्वलत्वाज्जीवनादिकमेव न स्यात्। कथमधुना भजनं प्रार्थ्यते तत्राहुः। जलरुहाननं दर्शय जलरुहाननं दर्शय जलरुहवन्मञ्जुमधुरसुरभितापघ्नाह्लादकमाननमपरोक्षं कुरु। ननु भवदङ्गे बहुजलरुहमाला यूयञ्च जलरुहकरचरणविशाला कथङ्कराला कामज्वरज्वाला नोपशाम्यति कथञ्चैकेन मज्जलरुहाननेन तदुपशमस्तत्राहुः। चार्विति। तवाननमेव चारु त्वदाननाभाने तु जलरुहाणि तादृक्त्वाङ्गानि चाचारुतया स्मरशरवद्वृच्छेदकान्येवेति भावः॥ ६॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अपराः प्रार्थयन्ति हे व्रजजनार्तिहन्! व्रजजनपीडानाशाय कृतावतार! तथा च स्वावतारसामान्यप्रयोजनमवलोक्योऽस्मदार्तिनाशनं तत्रोचितं नचातोऽधिका काचिदार्तिरस्त्यस्माकमिति भावः। किञ्च हे योषिताम्वीर! दीनशूर ब्रह्मादिभिरप्यशक्यपूर्णायाः अस्मदिच्छायाः पूरक! ननु सत्यमेव तथापि भवतीनाम् मानरूपं दोषमवलोक्य तन्निरासाय तिरोहितोऽस्मीतिचेत्तत्राहुः-निजेति। निजजनानामस्मदादिस्वसेवकानां स्मयस्य गर्वस्य ध्वंसनं स्मितं यस्य तथाच स्मितमात्रस्यैवोत्कटप्रार्थनोत्पादनेन तन्नाशस्य संभावात्मकमर्थं तिरोधानाय प्रवृत्तोऽसीति भावः। स्मितेन हाससंकोचेनैव गर्वध्वंसो भवतीति वा अतोऽस्मान्भज सेवय। ननु पालनप्रार्थनाधिकारवतीनां भजेति प्रार्थनादद्यापि स्मयो न निवृत्त इति गम्यत इति चेत्तत्राहुः। भवत्किंकरीरिति। अस्मत्कृतसेवनसदृशभवत्कर्तृकसेवनेनैवाऽस्मत्पालनं नान्यथा तच्चावश्यकं "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्य"मिति भवत्प्रतिज्ञा सत्या तदनुसारेणैव गृहीतसखिभावस्य यथोक्तप्रार्थनायामनौचित्यशङ्का नोऽकार्य्येति द्योतनाय सम्बोधयन्ति हे सख! इति अस्मात्कैङ्कर्य्यं प्रसिद्धं यद्वा यथेच्छसितथा कुरु संप्रति कुड्मलात्मकं स्वमुखं चारु मनोहरमस्माकं दर्शयेति सदैन्यप्रार्थनाम् अनभिज्ञापक्षे हे वीर अदेयस्य दाने समर्थ नोऽस्मन्निकटे सर्वदा तिष्ठ प्रथमन्तु चारु जलरुहाननं योषितामबलानां नो दर्शय यतो हे व्रजजनार्तिहन्! अन्यथास्मन्मरणावश्यंभावादार्तिनाशनव्रतभङ्गः स्यादिति भावः। गर्वध्वंसनायान्तर्धानन्तु नोचितं तस्य सुकरोपायसाध्यत्वादित्याशयेनाहुः। निजेति। ननु पूर्वं कुतो गर्वं कृतवत्यः इत्याशङ्क्य किङ्करीणामप्यस्माकन्त्वयैव सख्यपदे स्थापितत्वेन इत्याशयेनाहुः सखे भवत्किङ्करीरिति। यद्वा अस्मत्त्याग एव यदि तवाग्रहस्तर्हि सम्प्रत्यस्मन्मरणकाले चौरस्वमुखपद्मं सन्दर्शय दृष्ट्वा प्राणत्यागं करिष्याम इत्यर्थः। मानिनीपक्षे व्रजजनार्त्तिहर्त्तापि योषितां वीरस्तद्वधे समर्थः, अत एव निजजने यः स्मयस्तेन निजजनस्मयस्य ध्वंसनं स्मितं यस्य अतो भवतो यथोक्तप्रवृत्तिं दृष्ट्वा वयमपि सम्प्रति मरणायोद्युक्तास्तस्मात्तवास्मज्जीवनमपेक्षितमस्ति चेत्तर्हि शीघ्रमागत्य भवत्किङ्करीरस्मान्भज सेवनायाश्रय शठम्प्रतिशठंकुर्यादित्युक्तत्वाद्यथासखापि भवानस्मद्दुःखाय

तिरोहितस्तथा सख्योऽपि वयं तव दुःखाय धूर्तशिरोमणेस्तवाग्रे तिरोधानसामर्थ्याभावान्मरिष्याम इति सूचयन्त्यः सम्बोधयन्ति हे सख इति। किञ्च झटिति जलरुहाननं चारु दर्शयान्यथा पश्चात्तापङ्करिष्यसीति भावः। यद्वा जिघांसन्तं जिघांसीयादित्युक्तत्वात्सर्वा दण्डयितुङ्किमर्थं प्रवृत्तोऽसि एता भवत्किङ्करीर्भजप्रेष्ठसेवय नोऽस्माकन्तु चारु जलरुहाननमात्रं दर्शय अपकर्तुरपि सख्युर्मुखदर्शनेच्छानं निवर्तते। इदं प्रार्थयामः किङ्कुर्म इति सख इति सम्बोधनाशयः। निवृत्तिपक्षे स्वानुग्रहादुपनिषत्सु लब्धाग्रहस्य व्रजो वेदस्तत्सम्बन्धिना आस्तिकशिरोमणिभूतस्य जनस्यार्त्तिं जन्ममरणलक्षणसंसृतिदुःखं हरतीति तथा यता योषितां श्रुतिलक्षणस्त्रीणामस्माकं वीक्ष्यते अस्माकमस्मदीयानां च रक्षणे परमसमर्थ! रक्षणप्रकारमाहुः निजजननानां स्वभक्तानां स्मस्याहङ्कारादिदोषस्य ध्वंसनाय स्मितं मन्दहासो यस्य हासो जनोन्मादकरी च मायेति हासशब्दाभिधेयायाः सर्वनर्थजीवभूतायाः मायाया मन्दत्वं स्वभक्तेष्वप्रवर्तनं तस्मात् सखे सर्वादास्मत्संप्रुक्त भवत्किङ्करीः प्रभवत्प्रतित्पादनरूपसेवापरायणा अस्मान्भजास्मत्प्रतिपाद्यतामाश्रय तथाच विवेक्त्यन्तः करणेऽस्मत्प्रतिपाद्यताम्प्राप्य तस्य जलरुहस्य चतुर्दशभुवनात्मकपुष्करस्य कमलस्य चाननं सत्तास्फूर्तिप्रदं स्वस्वरूपं दर्शय को वान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यादित्यादिश्रुत्या सर्वसत्तास्फूर्त्तिदः परमात्मा प्रतिपादित इति प्रकाशयेत्यर्थः ॥ ६ ॥

रास-रहस्यम्

र० टी०—हे व्रजजनार्तिहन्! व्रजति गच्छतीति व्रजः शरीरं, व्रजजनानां स्थूलसूक्ष्मकारणशरीरसमूहानां या आर्तिः जन्मजरादिलक्षणं दुःखं तं हन्तीति तथा, हे वीर! विः पक्षी, इदं प्राणोपलक्षणं, तथा च प्राणान् ईरयति प्रेरयति चालयतीति वीरः प्राणः, तस्य सम्बोधनं "प्राणस्य प्राणः" इति श्रुतेः, नः योषितां अस्माकं वृत्तीनां, निजजनस्मयध्वंसनस्मित स्वसम्बन्धिनीनामस्माकं वृत्तीनां स्मयः अहंकारादिदोषः तत् ध्वंसनं नाशकारकं स्मितं मन्दहास्यं हृदयद्रवकारीप्रकाशः यस्य तत् सम्बोधनं, भवत्किंकरीः तव सेवापरायणा अस्मान् हे सखे! भज अस्मदन्तःकरणे विराजितो भव "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।" इति भगवदुक्तितः चारुः परमसुन्दरं जलरुहाननं जलरुहस्य चतुर्दशभुवनात्मकपुष्करस्य आननं सत्तास्फूर्तिप्रदस्वस्वरूपं दर्शय तस्य आपरोक्ष्यं कुरु "को वान्यात् कः प्राण्यात् यदेष आकाशो आनन्दो न स्यादि"ति श्रुतेः ॥ ६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे व्रजजनार्तिहन्! व्रजस्य अन्येषां जनानां शरणागतानां च क्लेशनिर्नाशक! हे वीर हे निजजनस्मयध्वंसनस्मित निजजनानां स्मयस्य गर्वस्य ध्वंसनं नाशकं स्मितं यस्य सः तस्य संबोधने तथा हे सखे! भवत्किङ्करीर्नोऽस्मान्भज अनुवर्तस्व स्मेति निश्चितम् योषितामस्माकं चारु सुन्दरं जलरुहाननं तावद्दर्शय ॥ ६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वाभीष्टमिष्टं प्रति बोधयन्ति ॥ विरचितेति। हे कान्त कमनीयपते वा वृष्णिवर्य। धुर्येत्यपि पठन्ति। स च वृषभपर्याय इति श्रेष्ठार्थकः। ते तव संसृतेः सत्सङ्गरूपसंसारात्तामुद्दिश्य तथा भयादितरस्माच्छरणमीयुषां प्राप्तानां विरचिताभयं विरचितमभयं येन तत्कामदमपेक्षितदं कामो मारस्तं द्यति खण्डयतीति तत्तथेति वा श्रीकरग्रहं गृह्णातीति ग्रहं श्रियः करस्य पाणेर्ग्रहं करस्य ग्रहो यस्य तदिति वा करसरोरुहं करकमलं नः शिरसि धेहि। संसृतेर्भयादित्यन्वयस्तु प्रस्तुतार्थानस्तुङ्कार इति ज्ञेयम्। पारमार्थिकोक्तिरयं संसार एव नेति वा हे श्राकर सम्पत्कर श्रीर्विषमिदानीं करे यस्य स तत्सम्बुद्धिः। श्रीर्विषे वेषसम्पदोरिति रत्नकोशः। नो मध्ये का कामिनी मदं ग्रहं तदात्मकं पिशाचं यायादिति शेष इति वा। श्रीर्वाणोलक्ष्मीलवङ्गेषु विषे बिल्वेऽप्यथो त्रिष्विति नानार्थरत्नमाला ॥ ६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततस्तामसी किञ्चिद्वैलक्षण्येन धार्ष्ट्येन तमेवार्थं प्रार्थयति। व्रजजनार्त्तिहन्निति। हे भगवन् एता वक्तुं न जानन्ति मया तु निर्धारितमुच्यते हे सखे! इति अप्रतारणार्थं सम्बोधनं नः अस्मान् भजेति हितोपदेशः। ननु कथमेवं धार्ष्ट्यं निषिद्धञ्च बोध्यते तत्राहुः। भवत्किङ्करीरिति। ये यथा मां प्रपद्यन्त इति हि तव प्रतिज्ञा। अतो यथा किङ्कर्यो वयं भवन्तं भजामः तथा भवानपि भजतु किंकरीः त्वं तव प्रतिज्ञा च प्रसिद्धेत्याहुः। स्मेति न केवलमस्मद्भजने तव सैवैका प्रतिज्ञा हेतुः किन्तु अन्येऽपि हेतवः सन्ति प्रथममवतारप्रयोजनं व्रजजनार्त्तिहन्निति व्रजजनानामार्त्तिं हन्तीति तथा नातः परमन्या आर्त्तिरस्ति सामान्यप्रयोजनमेतत् विशेषप्रयोजनमाहुः। योषितां वीरेति कृष्णो भगवान् वीरैर्हि शूरा निराकरणीयाः अन्यगतकामादयः तत्र मुख्यः कामः सच बहुविधः अन्तर्बहिः पदार्थेन पूरणेन पूरयित्वा आश्रयाभावात् निवारणीयः, अत एव लोके दातारः कीर्त्तिमन्तो भवन्ति वीरेभ्यः अतो भवान् महावीरः अन्तः स्थितेनानन्देन अतिदरिद्राणां ब्रह्मणापि पूरयितुमशक्यानामिच्छापूरकः अयञ्चार्थस्तव सर्वजनीनः अतः योषितां वीरेतिसम्बाधेनं नहि कृष्णाज्जगति कश्चिदेवं सम्बोधनमर्हति अपूर्णकामत्वात्। अतोऽवतारसामान्यविशेषप्रयोजनाभ्याञ्च नो भज ननु सत्यं तथापि भवतीनामभिमानदोषनिवृत्त्यर्थं भजनं न क्रियत इति चेत्तत्राहुः। निजजनस्मयध्वंसनस्मितेति।

निजजनाः सेवकाः तेषां स्मयो गर्वः तस्य ध्वंसनार्थं स्मितं यस्य निजजनानां स्मयदूरीकरणार्थं परित्यागो नोपायः किन्तु तदर्थं स्मितमेव कर्त्तव्यं स्मितं हि मन्दहासः हासोजनोन्मादकरी च माया तस्या मन्दत्वं भक्तध्ये प्रवर्त्तनं नहि मायामोहव्यतिरेकेण कस्यचित् स्मयो भवति अत एव हास्यसङ्कोच एव साधनं निजजनानामपि धर्म एव दुष्टः नतु धर्मी अन्यथा निजजनत्वमेव न स्यात् इत्यलौकिकोपायः लौकिकेऽपि तव हास्येन ता अपि आत्मानं तुल्यं मन्यन्ते यदा पुनर्हास्ये सङ्कोचः तदैव तासां गर्वो निवर्त्तते किञ्च अभिमानो हि दोषः स तावदेव तिष्ठति यावत्तव स्मितयुक्तमाननं न पश्यन्ति नहि काचित्तादृशमप्याननं दृष्ट्वा स्वाभिमानं पालयितु शक्ता नन्वेतल्लोके अप्रसिद्धं साधनत्वेनेति कथं ज्ञातुं शक्यत इत्याशङ्क्याहुः। जलरुहाननं चारुदर्शयेति। जलरुहं कमळं तत्सदृशमाननममृतस्त्रावि नह्यमृते पीते कस्यचिद्दोषस्तिष्ठतीति युक्तिः साधनत्वे चेत्सन्देह एकवारं प्रदर्श्य पश्येत्यर्थः किञ्च अभिमानो हि मनोधर्मः तव आननन्तु चारु मनोहरं नहि धर्मिणि हृते धर्मस्तिष्ठति सख्युः सखिभजनं युक्तमेव ॥ ६ ॥

श्रीसुबोधिनी-सारः

हे व्रजजनार्त्तिहन् हे वीर निजजनानां भक्तानां स्मयस्य गर्वस्य ध्वंसनं नाशकं स्मितं यस्य सः तत्सम्बोधनं हे सखे योषितां नोऽस्माकं चारु सुन्दरं जलरुहाननं पद्ममुखं त्वं दर्शय। भवतः तव किंकरीर्दासीः त्वं भज। स्मेति प्रसिद्धम् ॥ ६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'विशेषतः सकलव्रजजनानामार्तिनिरासायावतीर्णस्य तवास्मदार्तिहरणमावश्यकम्' इति सूचयन्त्यः सम्बोधयन्ति-व्रजजनार्तिहन्निति। आर्तिहरणसामर्थ्यं सूचयन्त्यः पुनः सम्बोधयन्ति—वीरेति। 'युष्माकं गर्व एव महान् दोषः, अत एव तन्निरासायान्तर्हितोऽस्मि' इति चेत् 'निजजनानां स्मयो गर्वस्तं ध्वंसयतीति तथाभूतं स्मितं यस्य तेन त्वया स्मितमात्रेणैव गर्वो निरसनीयः न त्वन्तर्धानस्य प्रयोजनमस्ति' इत्याशयेन सम्बोधयन्ति—निजजनस्मयध्वंसनस्मितेति। 'अस्मन्मरणेन तवापि दुःखं भविष्यति' इति सूचयन्त्यः सम्बोधयन्ति –हे सखे इति। 'उक्तेऽर्थ न कश्चित् सन्देह' इत्याशयेनाहुः—स्मेति। अतोऽन्तर्धानेन सुतरां गर्वस्य निवृत्तत्वाद्भवतः किङ्करीः दासीर्नोऽस्मान् भज अनुवर्तस्व। 'का वा अनुवृत्तिः कर्तव्या ?' इत्यपेक्षायामाहुः—चारु मनोहरं जलरुहाननं मुखकमल योषितामस्माकं दर्शयेति ॥ ६ ॥

अन्वितार्थप्रकाशिका

व्रजेति ॥ हे व्रजजनानामार्तिहन् ! हे वीर ! निजजनानां स्मया गर्वस्तं ध्वंसयतीति तथाभूतं स्मितमपि यस्य तत्सम्बुद्धिः अतोऽस्माकं गर्वनाशो जात एव किमन्तर्धानेन। हे सखे ! भवतः किङ्करीः दासीः नोऽस्मान् भज। चारु मनोहरं जलरुहाननं मुखकमलं योषितामस्माकं दर्शय ॥ ६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

व्रजेति व्रजजनानां अर्त्तिहापीडानाशकस्तत्सम्बुद्धिः वीर समर्थ निजजनानां यः स्मयोऽभिमानस्तस्य ध्वंसनं निवारकं स्मितं यस्य तत्सम्बुद्धौ हे एवं भूत हे सखे भवतस्तव किंकरीः दासीः नोऽस्मान् भज पश्येत्यर्थः। योषितां नोऽस्माकं चारु सुन्दरं तेजलरुहाननं पद्मसदृशं मुखे दर्शय ॥ ६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

व्रजेति ॥ हे व्रजनार्त्तिहन्, हे वीर. निजजनानां यः स्मयो गर्वस्त ध्वंसयतीति तथाभूतं, नन्द्यादेवाकृतिगणत्वात्कर्त्तरि ल्युः। स्मितं यस्य हे तथाभूत, हे सखे, भवतस्तव किंकरीः, नोऽस्मान्। भजानुवर्त्तस्व। स्मात्र निश्चिते। प्रथमं तावत् चारु सुन्दरं, जलरुहाननं, योषितामस्माकं, दर्शय दर्शयस्व ॥ ६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

व्रजजनार्तिहन्निति : १०.३१.६

स्मितं रुचिरमीश ते निजमदापनोदक्षम भवत्यतितरामिति प्रभुवरापहाय स्मयम्।
अधारि लघु किंकरीपदमनल्पसेवास्पदं कुतः पुनरितोऽपि तत्प्रकटने विलम्बः सखे ॥ ६५ ॥
अनेन किमु तेऽन्वय-प्रथमपूजितेनेन्दुना प्रभो भवति यः सदा स्मरतमो-निमज्जद्वपुः।
अतो जगति दुर्धरं तिमिरमेतदन्तः स्थितं विनाशय सदाशयस्व मुखचन्द्रसन्दर्शनात् ॥ ६६ ॥
अस्माभिर्विरहव्रतं व्यरचि व्यक्तस्याधुनोद्यापनं कार्यं चारु तदर्थमागमयुतो द्राग्ब्राह्मणोऽपेक्ष्यते।
तत्त्वं सच्छुतकं मुखं तव सखे सद्ब्राह्मणं दर्शय तस्मै स्वामृतमुत्प्रवालनिहितं प्रीत्यार्पयामोऽधुना ॥ ६७ ॥
नभोगरूपं नयनं त्वदीयं त्वद्वाहनं चापि नभोगशालिः।
नभोगजाते रतिरस्ति चातो नभोगभास्या अपि नो गृहाण ॥ ६८ ॥

रदनप्रकाशि वदनं स्मितपूर्वं सदने प्रदर्श्य मदने कृतबुद्धिः ।
अधुना कुतो हि मधुनाशनकान्ते विरहोदयोऽजनि रहोधिविहारे ॥ ६९ ॥
लोके यथाऽऽर्जवविधिः स्वहितार्थकारी तादृक् परो न कतमोऽप्युचितोऽस्त्युपायः ।
जानन्त्य एव वयमित्थमहो वहामस्त्वत्किङ्करीपदमिहेति न शिष्टमस्मात् ॥ ७० ॥
दास्यो वयं सदा दास्यमनालस्येन कुर्महे । वेतनं नान्यदिच्छामस्त्वन्मुखाब्जनिरीक्षणात् ॥ ७१ ॥
वृन्दावनमिदं नाम स्वकमित्यावयोर्मतम् । तत्त्वं दर्शय पश्यामो वयं चापि स्वकाननम् ॥ ७२ ॥

कृष्णप्रिया

अब तामसी गोपियाँ गोविन्द को निवदेन कर रही है कि हे श्यामसुन्दरवर आप तो महान् वीर है । वीरों का कर्तव्य है कि शत्रुओं का उन्मूलन करे हमारे हृदय में रहने वाला गुप्त निवासी काम शत्रु का आप निमूलन करें क्योंकि आप सन्नारियों के लिए कामोन्मूलक वीरवर हो । आप तो निज भक्तजनों के हृदय में रहने वाला गर्व का मन्द स्मित से चूर्ण करने वाले हो, आप तो हमारे सखा हो, हम आप की अकिंचन किंकरी है हमारा आप पालन करें और कृपया आप के मङ्गल अमृत स्वादिमुखकमल का दर्शन कराईए ॥ ६ ॥

प्रणतदेहिनां [1]पापकर्षणं तृणचरानुगं श्रीनिकेतनम् ।
फणिफणार्पितं ते पदाम्बुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७ ॥

कर्दमक्षमा

अन्वयः—प्रणतदेहिनाम्, पापकर्शनम्, तृणचरानुगम्, श्रीनिकेतनम्, फणिफणार्पितम्, ते पदाम्बुजम्, नः, कुचेषु, कृणु (कृणुष्व) नः, हृच्छयम्, कृन्धि ॥ ७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अविशेषेण प्रणतानां देहिनां पापकर्शनं पापहन्तृ तृणचरान्पशूनप्यनुगच्छति कृपयेति तथा सौभाग्येन श्रियो निकेतनं वीर्यातिरेकेण फणिनः फणास्वर्पितं ते पदाम्बुजं नः कुचेषु कृणु कुरु । किमर्थम् । हृच्छयं कामं कृन्धिछिन्धि ॥ ७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न केवलं करनिधानेनैव कृतार्थाः किन्तु स्तनप्रदेशे चरणस्पर्शमपि इच्छाम इत्याहुः-प्रणतेति । वीर्यस्य अतिरेकेणाधिक्येन ॥ अपरो आहुः-कुचेषु पदाम्बुजं कृणु अर्पय । किमर्थम्-हृच्छयं कामं कृन्धि छिंधि । अत्राभिस्समर्थरतिमत्त्वेन महाप्रेमवतीभिः स्वीयदुःखापायसुखप्राप्तिज्ञानरहिताभिः श्रीकृष्णसुखैकप्रयोजनककावायिककमानसव्यापाराभिस्तस्यैव सौरतसुखोद्दीपनार्थमेव स्वीयरूपयौवनकामपीडां विवृण्वतीभिः परमविदग्धाभिः प्रायः प्रेम्णो वाङ्निष्ठतालाघवं न क्रियते किन्तु कामस्यैव, यथा भोजनलम्पटं कंचित्स्वमित्रं बुभुक्षुमभिलक्ष्य स्नेहेन तं मोचयितुकामश्चतुर्विधमिष्टान्नसाधने प्रयतमानो जनस्तेन पृष्टोऽपि स्वार्थमेवाहं प्रयस्यामि न त्वदर्थमिति ब्रूते तदैव प्रेमा गुरुर्भवति यति त्वेतावान्ममायासस्त्वत्सुखार्थमेव न तु स्वार्थं निष्कामत्वादिति ब्रूते तदा प्रेमा लघुर्भवति । तदुक्तं प्रेमसंपुटे-"प्रेमा द्वयो रसिकयोरयि दीप एव हृद्वेश्म भासयति निश्चलमेव भाति । द्वारादयं वदनतस्तु बहिष्कृतश्चेन्निर्याति शीघ्रमथवा लघुतामुपैति ॥" इति । तत्रासां स्वसुखनात्पर्याभावः 'न पारयेऽहम्' इति भगवद्वाक्यादेव स्व शीकारव्यंजकादवसीयते । तस्य प्रमैकवश्यत्वमेव सर्वशास्त्रेपु दृष्टं न तु कामैकवश्यत्वमिति ज्ञेयम् । ननु पापाद्बिभेमि, तत्राहुः-प्रणतानां देहिनां पापनाशकम् । तव कुतः पापशङ्केति भावः । ननु कठोरेषु सुकुमारं मत्पदाम्बुजं व्यथिष्यते, तत्राहुः-तृणचरानुगम्, तृणचरा गावस्तासामप्यनुगच्छति । गावो हि कठोरस्थलेऽपि घासं चरन्ति यदि तत्रापि तव चरणस्य सहिष्णुता तर्हि किमुतास्मत्कुचेषु, कुचकाठिन्यं प्रत्युत तस्य सुखदमिति भावः । ननु नानालङ्कारमंडितानां युष्मत्कुचानामुपरि पादार्पणमनुचितं, तत्राहुः-श्रियः शोभाया निकेतनमिति । कुचानामलंकारवर्यमेवैतद्भविष्यतीति भावः । ननु युष्मत्पतिभ्यो बिभेमि, तत्राहुः-फणिनः फणेषु अर्पितम् । त्वं कालियनागादपि न बिभेषि किमुत तेभ्य इति भावः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ द्वितीयेन हृदयान्तरङ्गतद्विरहतापशान्तये प्रलेपौषधमिव प्रथमं हृदयबहिरेव तदङ्गसङ्गं प्रार्थयमाना दैन्येन तच्छ्रवणमात्रस्यैव सङ्गं तद्गुणानुवादपूर्वकं प्रार्थयन्ते । प्रणतेति । चरणपङ्कजं ते तावकमसाधारणं किम्वा त्वदीयानामस्माकं कुचेषु कृणु निधेहि ननु निर्भयाः ! पापादहं बिभेमि, तत्राहुः । प्रणतेति सकृत् प्रणामकारिणामपि यथा कथञ्चिच्छरणागतानामपि नलकूवर-

---

[1] कर्शनं—श्रीधर. वंशी. जीव. वीर. विज. विश्व. शु. सु. ध. रा. ।

कालियादीनां प्राणिनां पापहन्तुः कुतस्तव पापशङ्केति। किम्वा मदादिना सागःसु युष्मासु तदाचरणमयुक्तमिति, चेत्तत्राहुः- प्रणतेति। कालियादिवत् त्वत् प्रणतानामस्माकमागो नश्येदेव। ननु तथापि परमक्रूरेषु मृदुलतरं तत् कर्त्तुं न शक्यते तत्राहुस्तृणेति पशुसङ्गतो वने वने भ्रमणादिदं नाधिकं दुःखमिति। यद्वा अनभिज्ञाभिर्युष्माभिः सङ्गोऽनर्ह एव तत्राहुः। तृणेति। तृणान्येव नत्वग्रतो न्यस्तानि शर्करादीनि अपि चरन्तीति परमाज्ञता सूचिता। पशव इव वयमनुकम्प्या इति भावः। ननु सुष्ठु शोभनेषु युष्माकं स्तनेषु कथं पादार्पणं कर्त्तुं युज्यते इत्यत आहुः। श्रीति। सर्वातिशायिशोभास्पदत्वादलङ्करणवर्यमेव भावीत्यर्थः। ननु भीरुस्वभावत्वात् युष्मत्पतिभ्यो बिभेमि तत्राहुः फणीति। एतेन विषाद्यनर्थध्वंसनत्वात् विषोपमहृच्छयध्वंसनयोग्यताप्युक्ता। एवं चतुर्भिर्विशेषणैः पापहन्तृत्वादिकमुक्तम्। ननु तत्तदर्थमेवेष्यते नेत्याहुः। हृच्छयं कृन्धीति। अस्माकमेतदेव प्रयोजनमिति भावः। यत्तु सुजातेति रीत्या हृच्छयोऽप्ययं स्नेहमयत्वेनैव स्थापयिष्यते। शिरसीति पूर्वमेकवचनं दैन्येनैकस्मिन्नपि करधारणात् सर्वा एव वयमङ्गीकृताः स्यामेति। अधुना तु कुचेष्विति बहुत्वं प्रत्येकं लोभेन कियत् किञ्चित् सम्बन्धेन पर्य्याप्तत्वादन्यस्य तेनापर्याप्तत्वात् प्रत्येकं लोभस्येति॥ ७॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्च ते तावकमसाधारणम्, किंवा त्वदीयानामस्माकं कुचेषु कृणु निधेहीत्यर्थः, पापं संसारदुःखं परमोत्कटव्यसनं वा, तृणचरानुगमिति सर्व्वव्रजपशुवर्गपालकत्वेन कृपालुत्वम्, एवं चतुर्भिर्विशेषणैः पापहन्तृत्वादिकमुक्तम्। ननु किन्तत्तदर्थमेवेष्यते? नेत्याहुः—हृच्छयं कृन्धीति, अस्माकमेतदेव प्रयोजनं तत्तदशेषमेतदनुगमेवेति भावः। तत्तच्च स्वभक्तार्थं किञ्चिदात्मार्थे च किञ्चिदिति यथायोग्यं विवेचनीयम्। अम्बुजरूपकेण पूर्व्वोक्तसरोरुहरूपकवत् सर्व्वसाधनत्वं परमसाध्यत्वञ्च ध्वनितम्। अन्यत्तैर्व्याख्यातम्। यद्वा, ननु निर्भयाः। पापादहं बिभेमि; तत्राहुः—प्रणतेति। सकृत्प्रणामकारिणामपि यथाकथञ्चिच्छरणागतानामपि वा, सर्व्वप्राणिनां पापहन्तृ, कुतस्तव पापशङ्केति भावः। किंवा मदादिना सागःसु युष्मासु तदाचरणमयुक्तमिति तत्राहुः—प्रणतेति। त्वत्प्रणतानामस्माकमागो नश्येदेवेति भावः—'सकृदेव प्रपन्नो यस्तवास्मीति च याचते। अभयं सर्व्वदा तस्मै ददाम्येतद्व्रतं मम॥' इत्यादिवचनात्। ननु तथापि परमक्रूरेषु मृदुलतरं तद्दुःखशङ्कया कर्त्तुं न शक्यते। तत्राहुः—तृणेति, पशुसंगत्या वने वने भ्रमणादिदं नाधिकं दुःखमिति भावः; यद्वा, अनभिज्ञाभियुष्माभिः संगो मेऽनर्ह एव। तत्राहुः—तृणेति। तृणान्येव, न त्वग्रतो न्यस्तानि शर्करादीन्यपि चरन्तीति परमाज्ञता सूचिता, पशव इव वयमप्यनुकम्प्या इति भावः। ननु सुष्ठु शोभनेषु युष्माकं स्तनेषु कथं पादार्पणं कर्त्तुं युज्यत इत्यत आहुः—श्रीति। सर्व्वातिशायिशोभास्पदत्वादलङ्कारणवर्य्यमेव भावीत्यर्थः। ननु तथापि भीरुस्वभावत्वात् युष्मत्पतिभ्यो बिभेमि; तत्राहुः—फणीति; यद्वा, फणिफणार्पितत्वेन विषाद्यनर्थध्वंसनत्वमुक्तम्, ततो विषोपमहृच्छयमपि हृदि पदार्पणेन कृन्धीति भावः। शिरसीति पूर्व्वं सर्व्वासामैक्याभिप्रायेणोक्तम्, मूर्ध्नि करार्पणमात्रेण सापत्न्यविशेषानुदयात्, अधुना च स्तनेष्विति बहुत्वेन प्रत्येकं तेषु करधारणमभिप्रेतम्, अत्र रसविशेषेण सापत्न्यसम्भवात्; अतोऽन्योऽन्यं भेदानुत्पत्तये सर्व्वासामेव प्रत्येकं युगपदविशेषेण तत् कार्य्यमिति भावः। हृच्छयमिति अदृश्यस्य तद्रोगस्य तथैव प्रतिकार्य्यत्वात्। अन्यत् समानम्॥ ७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तृणचराः गावः तदनु॥ ७॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अविशेषेण प्रणतानां देहिनां पापहन्तृ तृणचरा गावः ताः अनुसृत्य गच्छतीति तथा सौभाग्येन श्रियो निकेतनमाश्रयभूतं वीर्यातिरेकेण फणिनः कालियस्य फणेष्वर्पितं ते तव पदाम्बुजं नोऽस्माकं कुचेषु कृणु निधेहि हृच्छयं कामं कृन्धि छिन्धि॥ ७॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

न केवलं करनिधानेन पूर्यते अपितु कुचेषु चरणनिधानं चापेक्षितमित्याहुः। प्रणतेति। तृणचरान् पशून् अनुगच्छतीति तृणचरानुगं फणिफणेष्वर्पितं कृणु कुरु हृच्छयं कामं कृन्धि छिन्धि॥ ७॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ननु मद्वदन-दर्शनेनैव चेत् कृतार्थास्थ, तदा प्रागेव दृष्टम्, तत् किं पुनरुत्कण्ठध्वे? इति चेत् न केवलं ते वदन-दर्शनमेव नोऽभिलषितम्, अपि तु तव पदाम्बुजं स्तनयोः कर्तुमित्याहुः—प्रणतेत्यादि। ते तव पदाम्बुजं नोऽस्माकं कुचेषु कृणु कुरु। तदा किं भविष्यतीत्याशङ्क्याहुः—हृच्छयं हृत्तापं कृन्धि। ननु मत्पदाम्बुजस्य हृच्छयच्छेत्तृता क्व प्रसिद्धा? तत्राहुः-प्रणतदेहिनां पापकर्षणम्। पापकर्षणतो नाधिको हृच्छयच्छेदः, तस्यागन्तुकत्त्वात्। ननु ते प्रणता इति तथा क्रियते? नैतदपि; यतस्तृणचरानुगं तृणचराणां पशूनामप्यनुगम् एवमेव तस्य साहजिकमेव कारुणिकत्वम्। ननु कुङ्कुमादि-पङ्किलेषु परममनोज्ञेषु वः स्तनेषु पदार्पणमनुचितमेव, नेत्याहुः—श्रीनिकेतनं शोभास्पदम्। तत्सम्पर्कादस्माकं स्तनयोः कमलाच्छादित-कनक-पूर्णकुम्भवच्छोभातिशयो

भावी। ननु सत्यं ब्रवीमि, कडिनेषु वस्तनेषु कमलकोमले पदे कथमर्पयितव्ये ? इत्यत आहुः—फणिकणार्तिम्, फणिनः कालियस्य मणिभिः कठोरासु फणास्वर्पितम, तत् कथं शङ्केत्युपसंहारः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अपरा आहुः कुचेषु पदाम्बुजं कृणु अर्पय किमर्थम्। हृच्छयं कामं कृन्धि छिन्धि। अत्राभिः समर्थरतिमत्त्वेन महाप्रेमवतीभिः स्वीयदुःखापायसुखप्राप्तिज्ञानरहिताभिः श्रीकृष्णसुखैकप्रयोजनककायिकवाचिकमानसव्यापाराभिस्तस्यैव सौरतसुखेदीपनार्थमेव स्वीयरूपयौवनकामपीडां विवृण्वतीभिः परमविदग्धाभिः प्रायः प्रेम्णो वाङ्निष्ठतालाघवं न क्रियते। किन्तु कामस्यैव यथा भोजनलम्पटं कञ्चित् स्वमित्रं बुभुक्षुमभिलक्ष्य स्नेहेन तं भोजयितुकामः चतुर्विधमिष्टान्नसाधने प्रयतमानो जनस्तेन पृष्टोऽपि स्वार्थमेवाहं प्रयास्यामि न त्वदर्थमिति ब्रूते तदेव प्रेमा गुरुर्भवति यदित्वेतावान् ममायासस्त्वत् सुखार्थमेव मम तु स्वार्थं निष्कामत्वादिति ब्रूते तदा प्रेमलघू भवति। यदुक्तं प्रेमसम्पुटे। प्रेमा द्वयोरसिकयोरपि दोप एव हृद्वेश्म भासयति निश्चलमेव भाति। द्वारादयं वदनतस्तु वहिकृतश्चेन्निर्वाति शीघ्रमथ वा लघुतामुपैतीति। तत्रासां स्वसुखात् पर्याभावो न पारयेऽहमिति भगवद्वाक्यादेव स्ववशीकारव्यञ्जकादवसीयते। तस्य प्रेमैकवश्यत्वमेव सर्वशास्त्रदृष्टं ननु कामवश्यत्वमिति ज्ञेयम्। ननु पापाद्बिभेमि तत्राहुः। प्रणतानां देहिनां पापनाशकं तव कुतः पापशङ्केति भावः। ननु च कठोरेषु युष्मत् कुचेषु सुकुमारं मत् पादाम्बुजं व्ययिष्यते तत्राहुः तृणचरानुगं तृणचरः गावस्तासामप्यनुगच्छति गावो हि कठोरस्थलेऽपि घासं चरन्ति ! यदि तत्रापि त्वच्चरणस्य सहिष्णुता तर्हि किमुतास्मत् कुचेषु कुचकाठिन्यं प्रत्युत तस्य सुखदमिति भावः। ननु नानारत्नालङ्कारमण्डितानां युष्मत् कुचानामुपरि पादार्पणमनुचितं तत्राहुः। श्रियः शोभाया निकेतनमिति कुचानामलङ्कारवर्यमेवैतद्भविष्यतीति भावः। ननु युष्मत् पतिभ्यो बिभेमि तत्राहुः। फणिनः फणेषु अर्पितं त्वं कालियनागादपि न बिभेषि किमुत तेभ्य इति भावः ॥ ७ ॥

श्रीरसिकाह्लादिनी टीका

ते तव पदाम्बुजं नोऽस्माकं कुचेषु कृणु स्थापय ननु उच्चरितब्रह्मचर्योऽहं पापभिया भवतीनां कुचस्पर्शं पादेनापि नाकरेयमिति चेत्तत्राहुः—प्रणतदेहिनां मागस्कानामपि शरणागतानां देहिनां प्राणिनां पापकर्शनम्। पापनिरसनसमर्थं कुतस्त्वयि पापशंकेति भावः। सागस्कानां तदेव फलं यद्यस्मासु पापशङ्कास्तर्हि तदपगमाय निहिततात्पर्यम्। तृणचरानुगं परकृपालुतया तृणचरान् पशूनप्यनुगच्छति, तद् यथा गवां तृणभक्षणमेव मुख्यं प्रयोजनं तथास्माकं अपि तापशान्तिफलमिति। नैतावता तव काचिद् क्षतिर्भवेदिति अयमभिप्रायःयथा ज्ञानशून्यानां पशूनामनुगमनं कृतं तथाऽनभिज्ञानामप्यस्माकमनुवृत्तिः कृपया कर्तव्येति। ननु भवतीनां वक्षसि पादार्पणेन को वा लाभो युष्माकं भविष्यतीति चेदत आहुः। श्रीनिकेतनं शोभा–सम्पदो निकेतनं स्थानमित्यर्थः। त्वच्चरणार्पणेनास्माकं सौभाग्यलाभो भविष्यति। तव च अस्मत् कुचस्थापनेन रसिकेन्द्रता भविष्यतीति। ननु मानगरलदिग्धेषु भृशं तप्तेषु कोमलस्य मच्चरणस्य स्थापनमयुक्तमिति चेत्तत्राहुः। फणिफणार्पितमिति। न हि कालियफणाभ्योऽप्यतितप्ताः क्रूरा अस्मत्कुचा इति। यथातीवगरलाग्निना संदग्धाः कालियफणाः रमित्वा स्वकीयाः कृतास्तथा मानोन्नता अस्मत्कुचा अपि सम्मर्द्दनेन दमित्वा तापोपनोदनद्वारा स्वकीया कर्तव्या इति पादस्पर्शस्य मुख्यं प्रयोजनमाहुः कृन्धि हृच्छयमिति। दृश्यते रोगो वहुभिरौषधैः प्रतीकार्यो भवति अय रोगः हृच्छयः केनाप्यौषधेग प्रताकार्यो न भवति। चरणस्पर्शमात्रेण निवृतो भविष्यतीत्यर्थः ॥ ७ ॥

विशुद्धरसदीपिका

अपि च। प्रणतेति। चरणपङ्कजं ते तावकम् साधारणं त्वदीयानामस्माकं कुचेषु कृणु निधेहि ननु निर्भायाः ! पापाद्बिभेमि तत्राहुः। प्राणतेति। सकृत्प्रणतानामपि कथञ्चिच्छरणागतानामपि नलकूबरादीनां च प्राणिनां पापहन्तृ ततश्च कुतस्तव पापशङ्केत भावः। किं मदादिना सागःसु। यस्मासु तदाचरणमयुक्तमितिचेत्तत्राहुः प्रणतेति। कालियादिवत्प्रणतानामस्माकमप्यागो नश्येदेवेति भावः। ननु तथापि मृदुलतरमतिकठोरेषु धर्तुं न शक्यते चेत्तत्राहुः तृणेति। पशुसङ्गत्या वने वने भ्रमणादिदं नाधिकमाधिदमिति भावः। यद्वा अनभिज्ञाभिर्युष्माभिः संगोऽनर्हं एव तत्राहुः तृणान्येव नत्वम्रतो न्यस्तानि शर्करादीन्यपि चरन्तीति परमाज्ञता तद्वदेवानुकम्प्या वयमिति दैन्यमपि नन्वतिमनोज्ञेषु पादार्पणमनुचितमित्यत आहुः। श्रीति सर्वातिशायि शोभास्पदत्वादवमलङ्करणेमव भावोत्यर्थः। स्यादेतद्दीनजनकृपापरवशत्वेन कामिनीनां युष्माकं तुं स्पर्शेन ममाप्यनिष्टं भावीति तत्राहुः। फणीति। नहि तत्स्पर्शेऽप्यनिष्टं जातं प्रत्युततनन्महात्रितार्तिहरणामित्रास्माकं हृच्छयं कृन्धीति एतदेव प्रयोजनमिति भावः ॥ ७ ॥

श्रीरामनारायणकृता भावभावविभाविका

दर्शनोत्तरम्मनोरथं प्रार्थयन्ति। प्रणतदेहिनामिति। यतोऽन्यजलरूहानामपि न नस्तापोपशमकत्वं प्रत्युत विरहकामाग्न्योरुद्दीपनेनोपतापकत्वमेवातस्ते त्वत्सम्बन्धि यत्पदाम्वुजं तदेव ते त्वदीयानां नः कुचेषु कृणु निधेहि किमर्थं तद्धारणं तत्राहुः।

कृन्धीति । त्वदेकभोग्यमस्मद्रूपानुरागादिधनं कुचेष्वेव काञ्चनकलशेषु निधिवदवस्थापितं तदपहर्त्तुं चोरवद्धृदि त्वन्निवासास्पदे शेते निर्भयतया निवसतीति तथा कृन्धि निःसारं ततो निःसारय यथा त्वदाक्रीडे कालिन्दी ह्रदे बहुयुगावासमपि कालियं निःसार्य्य तद्विषोपशमनं कृतं तथास्मद्धृदि ह्रदे तदपनयनेन तत्तापविषोपशमो विधेय इत्यभिप्रेत्य दृष्टान्तीकुर्वन्त्य आहुः । फणिफणार्पितमिति । यद्वा कामविरहाग्नितप्तेषु कुचेषु कथम्पदाम्बुजधारणं भयास्पदत्वात्तत्राहुः । फणिफणार्पितमिति तथाच विषानलव्याप्ततत्फणार्पितस्यात्र न भयशङ्कासम्भावनापीति भावः । नः कुचेषु तु नखमणिप्रदीपानि तत्पदाम्बुजधारणे मङ्गलकलशत्वोपपत्तिरेव । स्यात् ननु परमसौभाग्यवत्सुयोषितां कुचेषु कथमनुत्तमाङ्गधारणं तत्राहुः । श्रीनिकेनमिति । पद्मापद्मालयेत्यादिवाक्येषु अम्बुजानां तदालयत्वप्रसिद्धावप्यम्भोजवनं विहाय ते पदाम्बुजाश्रयश्रवणात्तदेव मुख्यं श्रियो निकेतनमिति तद्धारणे एवास्मत्स्तनशोभान्यथा निःश्रीकत्वमेव यद्वा श्रियि नितरां केतनं यस्य तथा च सर्वसम्पत्सौभाग्याद्यधिष्ठातृदेव्याः श्रियोऽपि हृदलङ्करणं कथं ग्राम्याणां नोहृदलङ्कारायालं न स्यात् ननु तथापि श्रियो हृदि श्रितं कथं ग्राम्यत्वेनारसज्ञानां हृदि धारणीयं तथातिमृदुलं नलिनीदलश्रीललनाकरतललनेऽप्यनलं पदाम्बुजं कथं रोमाञ्चितकणाक्रान्तातिकठोरेषु कुचगिरिषु ध्रियेत तत्राहुः । तृणचरानुगमिति । तथाच वयं श्रीरिव रूपिण्योऽपि त्वद्विरहेणैव नतु ग्राम्यत्वेन पशुवृत्तयस्त्वदुपभोग्या अनुकम्प्यश्च तथातृणचरानुगमनसीळस्य न रोमाञ्चतृणान्वितकुचगिरिस्पर्शभयशङ्कापि । ननु पतिमत्सृज्य परपुरुषानुरतानां पापिनीनां परदाराणां विहारे पापमेवाश्रयेत तत्राहुः प्रणतदेहिनामिति । तथा च यत्प्रणतानां देहिनां देहाध्यासाक्रान्तमती नामपि पापासम्भवः किमुवाच्यं तत्पणतानां प्रेम्णापगतदेहानुसन्धानानां नो देहदेहिभावशून्यस्य सच्चिदानन्दविग्रहस्य वा तव सर्वपापापहारकस्य पापशङ्कातः सर्वपापापहारिणस्तव नो मानमात्रापराधहेत्वर्च्चनं विरहे वैक्लव्यपशुवृत्तीनां नोऽनुकम्पयानुगमनं त्वद्वियागमतश्रीकाणां श्रीसौभाग्यवर्द्धनं कामतापविषोपशमनश्च सर्वथापि न्याय्यमिति भावः ॥ ७ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अन्याः प्रार्थयन्ति । प्रणनेति । ते पदाम्बुजं नः कुचेषु कृणु कुरु बहुवचनं समुदायाभिप्रायेण ते त्वदीयानां न इति वा ननु विरहानलज्वालाव्याप्तेषु स्तनेष्वतिसुकुमारचरणस्थापनप्रार्थनं नोचितमिति चेत्तत्राहुः । फणिनः कालियस्य शेषस्य फणासु अर्पितं तथा च परमकोमलमपि विलक्षणशक्तिमत्त्वात्केनापि पीडयितुमशक्यमिति भावः । ननु तथापि स्तने चरणस्पर्शो नोचित इतिचेत्तत्राहुः । श्रीनिकेतनं लक्ष्म्यावासस्थानं तथा च श्रीर्यत्र सर्वदा तिष्ठति तस्य स्तनेषु स्पर्शेऽन्यासङ्कः सन्देह इति भावः । ननु कामाक्रान्तस्वान्ततया निकृष्टानां युष्माकमनुरोधो नोचित इति चेत्तत्राहुः । तृणचरानुगं यथा भगवता पाल्यमाना अपि गावस्तृणं परित्यज्यामृतं नाश्नन्ति किन्तु तृणमेव तासाममृतं तथापि कृपालुना त्वया नोपेक्ष्यन्ते अपितु तदनुरोध एव क्रियते तद्वद्भगवदीया अपि वयं यद्यपि कामासक्तास्तथापि नोपेक्ष्या इति भावः । ननु तथापि युष्माकमजितेन्द्रियतादिसम्पादकं पापं वर्त्ततेऽतस्तत्सत्त्वे कथं मत्पादस्पर्शाधिकारस्तस्मात्तन्निवर्तककर्मानुष्ठानानन्तरं तथा करिष्यामीति चेत्तत्राहुः । प्रणतदेहिनां पापकर्षणं प्रकर्षेण स्वधर्मत्यागपूर्वकं ये नरा देहाभिमाननिवर्तकतत्त्वज्ञानरहिताश्च तेषां पापनिवर्तकयोः स्वधर्मतत्त्वज्ञानयोरभावात्त्वत्पदाम्बुजमेव स्मृतं दृष्टं स्पृष्टम्वा तन्निवर्तकमत्यानन्दं तथाभूतानामस्माकं तेनैव पापनिवृत्तिसम्भवान्नानुष्ठानान्तरमपेक्षितमिति भावः । तत्र तदर्पयित्वा हृच्छयं कामं कृन्धि नाशय तथाच न पापनिवृत्तिरस्माकमभिलषिता किन्तु कामस्य निवृत्तिरितिभावः । यद्वा ननु भवत्यः कामोपाधिकप्रीतिमत्योऽतो मम दर्शनमात्रस्यापि नाधिकारिण्य इति चेत्तत्राहुः । एवं चेत्तर्हि तत्प्रतिबन्धकं काममेव कृन्धि कथमित्यपेक्षायामाहुः । नः कुचेषु स्वपदाम्बुजं कुरु ननु—

न जा तु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥

इत्युक्तत्वात्तत्स्थापनेन न तन्निवृत्तिर्भविष्यति किन्तु प्रत्युताभिवृद्धिरिति शङ्काऽपि पदस्थापनप्रार्थनया निराकृता हस्तस्थापनस्य तदभिवृद्धिहेतुत्वात् । ननु तत्स्थापनस्याभिवृद्धिहेतुत्वाभावस्यापि कथं तन्निवृत्तिहेतुत्वमित्याशङ्क्याहुः । फणीति तथा च कालियफणार्पणेन यमुनाह्रदस्य निर्विषत्वं त्वया सम्पादितं तद्दृष्ट्वा देहलक्षणफणिनः कुचलक्षणफणार्पणेन यमुनाह्रदस्थानीयहृदयस्य कामरूपविषस्य निःसरणेन निर्विषत्वसम्पादनसमर्थत्वमित्यनुमिमीमह इति भावः । न केवलं दोषनिवर्त्तकमात्रं किन्तु गुणाधायकमपीति द्योतनायोक्तं श्रीनिकेतनं तथा च तत्त्वाद्धर्मज्ञानैश्वर्य्यादिलक्षणश्रियःस्पर्शमात्रेणाधायकमिति भावः । ननु परमोत्कृष्टस्य मत्पदाम्बुजस्य स्पर्शोऽपि दुर्लभ इत्याशङ्कानिरासायोक्तं तृणचरानुगं तथाचास्मदधिकाराभावेऽपि तव करुणया तस्य सौलभ्यमिति भावः । ननु तथापि पापनिवृत्तिं विना कथं तत्सम्भव इत्याशङ्कानिवृत्त्यर्थमुक्तं प्रणतेति । अनभिज्ञापक्षे अथवा हृत्तापशान्तिकरोपलेपौषधिमिव हृदि अङ्गसङ्गमभीप्सन्त्यो दैन्येन चरणसङ्गमेव प्रार्थयन्ते प्रणतेति । ते पदाम्बुजमस्माकं तप्तेषु कुचेषु निधेहि । ननु पापभयाश्चैवं कर्तुं शक्नोमीति चेत्तत्राहुः । प्रणतानां नलकूवरादीनां स्थावरत्वादिप्रदपापस्य कर्षणमतस्तेन तव का पापप्राप्तिसम्भावनेति भावः । यद्वा ननु किमिति करपद्मस्थापनं न प्रार्थ्यत इत्याशङ्क्य स्वापराधनिवृत्त्यर्थमादौ पदाम्बुजस्थापनमेव प्रार्थ्यत इत्याशयेनाहुः प्रणतेति । प्रणतानामस्मदादीनामपराधनाशकमित्यर्थः । ननु नैवं प्रार्थनीयं कठिनेषु तेषु स्थापनेन मृदुलस्य चरणस्य पीडोदयादित्याशङ्क्याहुः तृणचरानुरागम् । तृणशर्क्कराद्यत्यन्तकठोरवस्तुषु स्थापनादेवं कृतेनाधिकं दुःखमिति-

भावः । अनेन यथातृणचराग्रहवशात्तदनुगमनजन्यपीडा त्वया न गण्यते तथास्मदनुग्रहवशादपि सा न गणनीयेत्यपि ध्वनितं ननु नानारत्नालङ्कृते पादार्पणं न शोभत इति चेत्तत्राहुः । श्रीनिकेतनं नखचन्द्रादिशोभास्पदत्वात्ततोऽप्यधिकालङ्कृतिकरमिति भावः । ननु युष्मद्धृदयस्थतापजन्यदाहः कथं सोढुं शक्य इति चेत्तत्राहुः । फणीति । भवतु किन्तत इति चेत्तत्राहुः हृच्छयं कामं कृन्धि पश्चाद्यथाकामोपशमः स्यात्तथा कुरुष्वेति भावः । मानिनीपक्षे ननु युष्मद्दर्शनमात्रस्य कामोद्दीपकत्वान्मानवतीनां युष्माकमालिङ्गनादेर्दुर्घटत्वात्कामवाधाभयान्नाहमाविर्भवामीति चेत्तत्राहुः । प्रणतेति । अहो सत्यमिदं तथाप्यागन्तव्यमागत्य च नः कुचेषु यथाकथञ्चित्पदाम्बुजं कृणु एतावन्मात्रमस्मभिरनुज्ञायत इति भावः । नन्वेतं विना मम प्रयोजनं कथं भवतीति चेत्तत्राहुः । कृन्धीति । अस्माकं लोकोत्तरसौन्दर्य्यत्वादेतावतैव तवोन्नतिर्भविष्यतीतिव्यङ्ग्यम् । ननु सर्वोत्तमानां युष्माकं पदेन स्पर्शे कृते पापं भविष्यतीति नाहं तथा कर्तुं शक्नोमीति चेत्तत्राहुः । प्रणतेति । ननु परमकोमलस्य पदाम्बुजस्यातिकठोरयुष्मत्कुचस्पर्शन पीडा भविष्यति तथा च तथा व्याप्तहृदयस्य मम रसाविर्भावोदुर्ल्लभस्ततः कराम्बुजार्पणमनुज्ञायतामिति चेत्तत्राहुः । तृणेति । अहो प्रत्यक्षापलापपरायणधूर्तशिरोमणे तृणशर्कराद्यपेक्षयाप्यस्मत्कुचः किङ्कठोर इति भावः । ननु भवतु यथाकथञ्चित्स्थापयिष्यामि तथापि तेन कुचानां शोभा न भवतीति चेत्तत्राहुः । श्रीति । शोभानिवृत्तिभयकार्ये तव चरणस्पर्शः शोभास्पदत्वं ह्यस्माभिज्ञायत इति भावः । ननु मदीयतिरोधानरूपापराधेन भवतीनामन्तः करणे महान्क्रोधो वर्तते तथा च क्रोधानलज्वालया तद्दाहावश्यंभावात्कथं रसानुभव इति चेत्तत्राहुः । फणीति । अहो किमित्येवमनुभूतसामर्थ्यानामस्माकमग्रतो बहुविधं चातुर्य्यं प्रकाश्यते त्वया नहिकालियविषदग्धस्यान्येन केनचिद्दाहः सम्भवतीति भावः । तस्माद्भयं विहायागन्तव्यमिति भावः । निवृत्तिपक्षे नन्वन्तःकरणशुद्धिं विनेदङ्कथं भविष्यतीति चेत्सापि त्वदधीनेत्याशयेनाहुः । प्रणतेति । तव पदाम्बुजोपासनेन हि चितस्य शुद्धिर्भवत्यतस्तन्नः कुचेषु कर्मोपासनप्रतिपादनभोगेषु कुरु भवत्पदाम्बुजाराधनमेव कर्मोपासनाकाण्डयोरर्थ इत्यधिकारिचेतसि प्रकाशयेत्यर्थः । यतस्तव पदाम्बुजं फणिनः शेषस्य फणास्वर्पितं तथा च—

नारायणपरा वेदा नारायणपरा मखाः । नारायणपरा योगा नारायणपराः क्रियाः ॥

इत्युक्तत्वाच्छेषशायिनारायणस्य भगवतस्तव पदाम्बुजसेवनमेव काण्डद्वयार्थ इति भावः । यतश्च श्रीनिकेतनं भोगमोक्षश्रीप्रदं यतश्च साधकानुग्रहार्थं रामकृष्णाद्यात्मनावतीर्णस्य तव तृणचरानुगं गोमृगाद्यनुगमनपरं तृणचरैत्यक्तसर्वभोगैस्तपस्विभिरानुगम्य प्राराध्यत इति तदिति वा यतश्च प्रकर्षेण नातिमात्रमपि कृतवतां देहिनां समस्तपापोच्छेदकं तदुक्तम्—

एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवायेति ॥

एवम्भूतेन काण्डद्वयप्रतिपादितेन सम्यगुपासितेन निजजनस्य हृच्छयं कामं कृन्धि नाशयेत्यर्थः ॥ ७ ॥

रास-रहस्यम्

र० टी०—ते तव पदाम्बुजं कमलवदानन्ददायिकिरणसमूहं, कथम्भूतं ? प्रणतदेहिनां पापकर्शनं प्रकर्षेण नतानां नाराणां शरणागतानां पापविवर्तकं, तृणचरानुगं 'तृणादपि सुनीचेन तरोरपि सहिष्णुना । अमानिना मानदेन कीर्तनीयः सदा हरिः ।' इति वचनात्, तृणवदभिमानशून्यतया चरन्तीति तृणचराः परमहंसाः तेषामनुगं अनुगमनशीलं, श्रीनिकेतनं सर्वसम्पदामधिष्ठानरूपं, फणिफणार्पितं फणीसर्पः, तल्लक्षाहंकारः तस्य फणः शिरः तस्मिन्नर्पितं "ब्रह्मानन्दनिधिर्महाबलवताऽहंकारघोराहिना, संवेष्ट्यात्मनि रक्ष्यते गुणमयैश्चण्डैस्त्रिभिर्मस्तकैः । विज्ञानाख्यमहासिना श्रुतिमता विच्छिद्य शीर्षत्रयं, निर्मूल्याहिमिम निधिं सुखकरं धीरोनुभोक्तुं क्षमः ।" इति वचनात्, नः अस्माकं कुचेषु यत्र यत्र कुत्सितविषयेष चरणं गमनमिति कुचः तेषु कृणु कुरु अर्थात् विषयलक्षणान्धकारान्निष्कास्य तव प्रकाशेन प्रकाशमयं कुरु, तथा हृच्छयं कामं विषयकामनां कृन्धि छिन्धि ॥ ७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रणतानां शरणागतानां देहिमात्रोपलक्षितानां पापकर्षणं दुरितापहं सर्वशरण्यत्वात् तृणचरान् पशूननुगच्छतीति भक्तेच्छानुसारित्वात् सौभाग्येन श्रियोनिकेतनमाश्रयभूतम् फणिनः कालियस्य फणास्वर्पितं दुष्टदमनकर्तृ एवंभूतं ते पदाम्बुजं नः कुचेषु कृणु निधेहि किमर्थमित्यत आहुः कुरु हृच्छयं कामं कृन्धि छिन्धि ॥ ७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

किम्वा प्रणतदेहिनां पापं कर्षयत्यपकर्षतीति तत्तथा पापस्य कर्शनं यस्मादिति वा तृणचरास्तृणभक्षकास्तत्सञ्चारिणो वा पशवस्ताननुगच्छतीति तत्तथा श्रीनिकेतनं शोभावद्वा लक्ष्मीनिवासभूतं वा । अनेनाटनं नटनमिति ध्वन्यते । फणिफणार्पितं प्राक् शेषशीर्षार्पितमेतर्हि कालियफणिफणार्पितं नः कुचेषु कृणु । अनेन फणिफणार्पणमर्पणमस्मत्कुचेषु चासङ्गस्य तव सममिति ध्वनयन्ति । किञ्च स च कञ्चुकमोचकस्तत्सङ्गेन त्वमपि तथा भवेत्यपि तेन च हृच्छया हृदि शेत इति हृच्छयो हृच्छयत इति हृच्छयस्तं कृन्धि हिंसय । यो नः कुचेषु नः कुचेपूतरविन्दादीन्नोऽयति प्रापयतीति स तथा तं हृच्छयमित्यावृत्त्याऽन्वयनेनानागस्कृदनङ्गभङ्गप्रार्थनेत्यर्थविशेषः सूचितो भवतीति मन्तव्य ॥ ७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

राजसी तु तत उत्तमा तमेवार्थं प्रकारान्तरेण । प्रार्थयते प्रणतदेहिनामिति । ते पदाम्बुजं नः कुचेषु कृणु कृणुष्व छान्दसो लोपः स्थापय तस्य प्रयोजनम् । कृन्धि हृच्चयमिति । हृदये चोरवत् स्थितं कामं कृन्धि कुचेष्विति समुदायाभिप्रायेण बहुवचनं विरहेण भिन्ना मन्यन्ते शिरसि हस्तदानेन निकटे समानयनमुक्तं ततो भजनेन सबन्ध उक्तः । अनेन विपरीतरस उच्यते बन्धविशेषो वा तिर्यग्भेदः एकवचनात् तावता हि हृदयस्थितः कामो गच्छति स्त्रीणां समूहे लीलाशयने परितः स्थितानां तथा संबन्धो भवतीति वा ननु कर्कशेषु स्तनेषु कथं कोमलचरणस्थापनमितिचेत्तत्राहुः । फणिफणार्पितमिति । नहि कालीयफणात् क्रूराः अस्मत्स्तनाः अत्र यथा चरणस्थापनं कृत्वा तदन्तर्गतो दुरीकृतः एवमत्रापि कर्तव्यः अम्बुजपदेन प्रत्यक्षतस्तापहारकत्वम् । ननु तथापि स्त्रीणां वक्षसि चरणस्थापनमयुक्तमिति चेत्तत्राहुः । श्रीनिकेतनमिति । लक्ष्म्याः स्थानं तल्लक्ष्मीः किल तत्र स्पर्शमर्हति अन्यासु कः सन्देह इति । ननु भवत्यो मूढाः कथम्भवतीनां हितं कर्तव्यमिति चेत्तत्राहुः । तृणचरानुगमिति । तृणचरा गावः तेषामनुगं पश्चाद्गच्छति तद्धितार्थं ते किम्भगवता प्रेर्यमाणा इति तृणं परित्यज्यामृतं भक्षयन्ति तेषां तृणमेवामृतं तथास्माकमपि काम एवामृतं नैतावता परमकृपालोः कश्चनार्थः क्षीयते असामर्थ्यं तव नास्तीत्याहुः । हे वीरेति । ननु भवतीनां जितेन्द्रियत्वाद्यभावात्पापमस्ति तदपगमे पश्चात्पदं स्थापयिष्यामीति चेत्तत्राहुः । प्रणतदेहिनाम्पापकर्षणमिति । वयं प्रकर्षेण नताः नास्माभिः प्रकारान्तरेण निवर्तयितुं शक्यते किन्तु तव चरणप्रसादादेव नम्राणां पापं गच्छति । तत्रापि देहिनः प्रकर्षण न तत्त्वेन धर्ममार्गादिपरित्याग उक्तः देहाभिमानस्य विद्यमानत्वात् न ज्ञानमपि प्रणतानां हि नाप्यधोगतिः । अतस्तव पदमेव तेषां पापनाशकं चिन्तितं दृष्टं स्पृष्टमालिङ्गितं वा ॥ ७ ॥

श्रीसुबोधिनी–सारः

प्रणतानां देहिनां पापकर्शनं पापहन्तृ तृणचरानुगं गवादिपृष्ठचारि श्रियो निकेतनं स्थानभूतं फणिनः कालियस्य फणास्वर्पितं ते पदाम्बुजं चरणकमल नोऽस्माकं कुचेषु त्वं कृणु कुरु । हृच्छयं कामं त्वं छिन्धि ॥ ७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्च ते पदाम्बुजं नोऽस्माकं कुचेषु कृणु स्थापय । तेन हृच्छयं कामं कृन्धि छिन्धि । 'पादस्थापनमात्रेण कथं कामनिरास ?' इत्यपेक्षायां पदाम्बुज विशिनष्टि । 'तत्र सुखप्रतिबन्धकपापनिरासकत्वात्' इत्याशयेनाहुः—प्रणतेति । अविशेषेण प्रणतानां शरणागतानां देहिनां पापकर्शनं पापहन्तृ । कामनिरासे सामर्थ्यं सूचयन्त्य आहुः–फणिनः कालियस्य फणास्वर्पितमिति । एवं सति क्रौर्यमाशङ्क्य सौकुमार्यं सौन्दर्यसौभाग्यादिकं च सूचयन्त्य आहुः—श्रीनिकेतनमिति । लक्ष्म्या आश्रयभूतमित्यर्थः । तर्हि दुर्लभत्वमाशङ्क्य तत्कृपया सुलभत्वं सूचयन्त्य आहुः—तृणचरान् गवादीन् पशूनप्यनुगच्छतीति तथा तत् ॥ ७ ॥

अन्वितार्थप्रकाशिका

प्रणतेति ॥ अविशेषेण प्रणतानां शरणागतानां देहिनां पापकर्शनं पापहन्तृ तथा कृपया तृणचरान् गवादीन् पशूनप्यनुगच्छतीति तथा तत्सौभाग्येन श्रिया निकेतनमाश्रयं वीर्यातिरेकेण फणिनः कालियस्य फणास्वर्पितं ते पदाम्बुजं नोऽस्माकं कुचेषु कृणु-स्थापय । "कृञ्, हिंसायाम्" सुनोत्यादिः । अनेकार्थत्वात्करणे वृत्तिः । यद्वा । "कृ विहिंसाकरणयोः" "धिन्विकृण्व्योरच" इति तेन हृच्छयं कामं कृन्धि छिन्धि "कृती वेष्टने" रुधादिः । अनेकार्थत्वात् छेदेऽपि ॥ ७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रणतेति प्रणतानां नतानां देहिनां पापकर्शनं पापकर्षणमिति पाठद्वयं, तस्य पापनाशकं पर्यायः । तृणचरानुगं तृणचरान् तृणभक्षकान् अनुगच्छतीति तथाभूतं । तथापि श्रियाः शोभायाः निकेतनं निवासस्थानं । तथाविधमपि फणिफणार्पितं फणिनः कालियसर्पस्य फणेषु अर्पित तदमनाग्रधृतं ते पदाम्बुजं । नः कुचेषु स्तनेषु कृणु निधेहि तत्र धृत्वा किं करोमि तत्राहुः हृच्छयं मनोजं कृन्धिनाशय एतानि कर्त्तुं समर्थस्य पादपद्मस्य अस्माकं हृच्छपहरणेः कः प्रयास इत्याशयः ॥ ७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रणतेति ॥ प्रणता अविशेषेणि प्रणाममात्रं कुर्वाणा ये देहिनस्तेषां, पापकर्शनं पापहरं यथाकथञ्चिन् प्रणतिविधानपूर्वं शरणागतानां नलकूबरादीनां कालियादीनां च प्राणिनां पापनिवर्त्तकमित्यर्थः । ते तव, पदाम्बुजं, नोऽस्माकं, कुकेषु कृणु निधेहि । ननु मृदुलतरं मत्पदाम्बुजमतिकठोरेषु भवत्कुचेषु धर्त्तुं कथं शक्यते तत्राहुः । तृणचरानुगं गच्छत्, पशुसंगत्या वने वने शिलतृणादिषु भ्रमनं कुर्वतस्तव यदा तृणकर्करादिकं तद्व्यथाकृन्न जातं तदाऽतथाविधं नः कुचमण्डलं तथाकृत्कथं स्यादिति भावः । श्रियोऽपि निकेतनं सौभाग्यातिशयेन श्रियोऽप्याश्रयभूतं, सर्वातिशायिशोभावत्समये मृदुलताभाक् समये काठिन्यताभाक् चेति भावः । ननु मार्दवस्य प्रत्यक्षवीक्ष्यत्वात्कठिनताभागिति कथं ज्ञातं तत्राहुः । फणिफणार्पितं वीर्यातिरेकेण फणिनोऽपि रत्नयुक्तफणेष्वर्पितम् ।

तन्मूर्द्धरत्ननिकरस्पर्शातिताम्रं चेत्युक्त्योभयविधत्वस्मरणात् । नन्वस्त्वेवं परं तृत्तमाङ्गे तद्धारणं विहाय तत् तत् कुचेषु किमिति याच्यते इति चेत् त्वत्कृतकुचस्पर्शसंभूतहृच्छयस्यान्यथाऽनिवृत्तेरतिशीतोदगङ्गोदयस्थानत्वेन तत्स्पर्शाच्छान्त्यर्थमित्याहुः, कृन्धीति । हृच्छयं कामजपरितापमित्यर्थः । कृन्धि छिन्धि । त्वत्पत्स्पर्शेन तीव्रतापकारिकालियमहाविषनिर्हरणदर्शनात्तेनास्माकं हृच्छयं कृन्धीति याच्यते इति भावः ॥ ७ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

प्रणतदेहिनामिति : १०.३१.७.

आभिः साकमनेकदैत्यविगमव्यापारदीक्षागुरुः स्त्रीभिः सङ्गरमाचरेयमधुना भूमौ कथं ह्रीपदम् ।
शङ्केथा न कदाचिदेवमनिशं सज्जो यदस्मत्पुरस्त्रैलोक्योद्भटधूर्जटिप्रतिभटो जागर्ति वीरः स्मरः ॥ ७३ ॥
करैस्त्वमनिशं निजैर्दितिजनिर्दयोन्मर्दने जनार्दनसुदर्शनादिकमुरीकरोष्यायुधम् ।
परन्तु न ततो मनोजनिजयोऽजनीह प्रभो मनागपि यशोनिधे वद तदत्र किं योजितम् ॥ ७४ ॥
यदाश्रित्य दुर्गं भवत्युन्नतोऽरिः पदं तत्र शूरैर्विधेयं पुरेति ।
अनुस्मृत्य नीतिं स्तनाद्रौ पदं स्वं कुरु प्राक्ततोऽर्थात्स्मरोनिर्जितः स्यात् ॥ ७५ ॥
रोमाञ्चोत्कटकण्टकेऽतिकठिने कार्ष्ण्याश्रितास्ये कुचे निःसारे कथमर्पयामि पदमित्येव न सन्दिह्यताम् ।
तीक्ष्णोर्ध्वाग्रतृणाहितं फणिफणोन्मर्दक्षमं पङ्कहृत् सश्रीकं सुरसं पुरैव तदभूदस्मत्सुभाग्याद्धरे ॥ ७६ ॥
शिवपदार्पणतः स्तनभूभृतो भुवि भजेयुरल शिवरूपताम् । नखरचन्द्रकलाङ्कितमौलयः स्मरजयोऽर्थत एव ततो भवेत् ॥ ७७ ॥
शिवदृग्ज्वलिताग्निभूतिभूतः प्रसृतोऽसौ निखिलान्तरे रजोभिः । प्रसृतं तदिदं स्तनेऽपि माष्टुं कृपया योजय तत्पदाम्बुजातम् ॥७८॥
उन्मत्तचित्तजमहाकरिराडखर्वभूभृन्निभैर्दृढकुचाभिधगण्डभागैः ।
अस्मान् मुधाऽर्दयति तत्पदगाङ्कुशेन दुर्दान्तमेनमधुनाऽऽकलयानुपेक्षम् ॥ ७९ ॥
त्वमेकस्मिन् शेषे भुवि पुनरयं कञ्चुकियुगे त्वमन्तर्युक्तानां वससि निखिलानां पुनरयम् ।
त्वदाधिक्यादेवं स्मयमयमपूर्वं वहति तत् स्वपादप्रक्षेपैः कुरु गतमदं कालियमिव ॥ ८० ॥
अस्मन्मनःसु वसतीति पदाम्बुजं ते जानन्नपि स्मयभरान्नमनाद्यकुर्वन् ।
उन्मत्तवृत्तिरभयं पुनरत्र शेते तच्छिक्षयैनमधुना स्मरमङ्घ्रिपातैः ॥ ८१ ॥
निरीक्ष्य दुर्गाणि तदन्तरस्थो धनुर्गुणन्यस्तसमस्तबाणः ।
प्रहर्तुमिच्छत्यबलास्तदेनं बहिर्विनिःसारय कामभिल्लम् ॥ ८२ ॥
स्मरः स्मृतिसमुद्भवो भवति भुव्यनङ्गो भवाञ्छ्रुतिस्थितपदोऽखिलाङ्गकलितश्च तन्निश्चिनु ।
न तेन सह सङ्गरे तव पराभवः सर्वथा स्मृतेरधिबला श्रुतिः स्फुटमिहास्तिमानं यतः ॥ ८३ ॥
अयि भोस्तव विक्रमस्य शैली त्रिजगद्वीरविलक्षणा विभाति । शिवदुर्धरवैरिजातहन्ता शिवजय्यस्मरसङ्गराद् बिभेषि ॥ ८४ ॥
स्मरो दुर्धरो धीरवीरो जगत्यामिति स्वान्तरे श्रीहरे चेद् बिभेषि ।
तदस्मत्स्तनौ तत्पदे भूरि मृद्गन् स्वहस्तेन सौहार्दभावं चिनुष्व ॥ ८५ ॥
वीरं स्मरं जगति सर्वजना वदन्ति तत्त्वं तु सूक्ष्ममिदमत्र विभो वदामः ।
अस्मद्बलात् सकलमेव बलं किलास्य तास्तेऽनुगास्तदधुना न जयेऽस्य यत्नः ॥ ८६ ॥
त्वं सर्वदा शरधिशाल्यसि शार्ङ्गधन्वा कामस्तु कौसुमधनुर्लघुपञ्चबाणः ।
तत्किं बिभेषि किमु वा द्रवसीह दूरं त्वां वीक्ष्य हन्त शरणार्थमुपैष्यतीश ॥ ८७ ॥
यो ह्यस्मद्बलमाकलय्य विपुलं लोकानजैषोत् स्फुटं कष्टं सोऽप्यधुना स्मरः स्मयमयोऽस्मत्पीडनायोद्यतः ।
हा कालस्य गतिर्विचित्रचरिताऽऽस्तामेतदार्तावलं स्मर्तव्यो हरिरित्यहो यदुपते ब्रूमस्तदाख्यावलिम् ॥ ८८ ॥
रक्षोराजहृतां श्रियं पुनरहो मोक्तुं स सीतापतेरायासो हि महानभूत् कपिगणे साह्यप्रदे सत्यपि ।
नीतासु स्मररक्षसाऽऽत्मवशतामस्मास्वकस्मात् प्रभो यत्नस्ते नितरां विधेय इति भोः प्रागेव नः पालय ॥ ८९ ॥
चन्द्रः सूर्यवदाचरत्यविनयाद् वातोऽप्ययं वह्निवन्नीरं नीरजयुक्तमप्यतितरां काकोलवद् वर्तते ।
एवं त्वत्सुतसम्मतौ कृतधियः सर्वेऽपि निःशृङ्खलास्तत्प्रौढोऽस्ति भवागतो निजसुतं शंसेतरान् साधुवत् ॥ ९० ॥
विभो वृक्षपश्यादयो लक्षशोऽपि वसन्तीह ते सन्ति सर्व सपत्राः ।
विपत्त्रो भवानेक एवात्र लोके विपद्भ्यस्ततः पाहि कामोद्भवाभ्यः ॥ ९१ ॥

इयं राका रात्रिर्वनततिरियं भानुतनुभूरियं ज्योत्स्ना चेयं पवनसरणिश्चापि सुभगा ।
स्त्रियः सत्योऽप्येताः स्वजनमतिमुन्मुच्य तु तुदन्त्यदो वाच्यं कस्याग्रत इति भवानेव शरणम् ॥ ९२ ॥
पुत्रश्चेदपथानुवर्तनमतिस्तच्छिक्षणीयो जवात् पित्राऽनुक्तिमता स्वयं हितदृशा तन्मातृसद्द्वारतः ।
तत्त्वं श्रीश निजाङ्घ्रिमर्पय कुचेष्वस्माकमस्मिन् सदा श्रीरास्ते विपथस्थितं च तमसौ कुर्यात्सदध्वाश्रितम् ॥ ९३ ॥
पापात् पुरातनकृतात्फलमीदृशं चेत् पापापहं तव पदं हृदये वहामः ।
यत्त्वत्पदप्रणतिरप्यखिलाघहन्त्री कुर्मः सहस्रमिह ता अपि तत्प्रसीद ॥ ९४ ॥
त्वत्पदध्यानमात्रेण बुधा हृद्ग्रन्थिमोचकाः । तदद्धा त्वत्पदं शक्तं हृच्छयच्छेदने न किम् ॥ ९५ ॥
अप्रार्थितेनापि पदं हि येन न्यस्तं त्वयेशाहिशिरस्यनर्घ्यम् ।
तत्प्रार्थनां नः किल कुर्वतीनां हृद्यर्पणं तस्य तवेड्यमेव ॥ ९६ ॥

कृष्णप्रिया

अब राजसी गोपियाँ या गोपिकावृन्द श्रीवृन्दविहाराजी को कह रहा है कि नाथ चतुर्विध पुरुषार्थ परिपूरक आपके श्रीचरणों की स्तुति किन शब्दों में करें ! आप का चरण कमल प्रणाम करने वाले देहधारी प्राणियों के पापों का विनाशक है, गौओं को चराने के लिए पीछे पीछे फिरने वाले है, श्री लक्ष्मी देवीजी का नित्य निवासस्थान है और कालीय नाग के फणों पर नृत्य करने वाले है, ऐसे समर्थ और कोमल एवं दयालु आपके चरण कमल हमारे हृदय प्रदेश पर स्थापित करके हृदगत काम की शान्ति करें ॥ ७ ॥

मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ।
विधिकरीरिमा वीर मुह्यतीरधरसीधुनाऽऽप्याययस्व नः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—हे पुष्करेक्षण ! हे वीर ! वल्गुवाक्यया, मधुरया, गिरा, मुह्यतीः, विधिकरीः, इमाः, नः, अधरसीधुना, अत्यायय्स्व ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुष्करेक्षण तवैव मधुरया गिरा वल्गूनि वाक्यानि यस्यां तया बुधानां मनोज्ञया हृद्यया गम्भीरयेत्यर्थः । मुह्यतीरिमा नो विधिकरीः किंकरीरधरसीधुना आप्याययस्व सञ्जीवयेति ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति मधुरा तु बालानामपि वागस्ति सा बुधमनोज्ञा न भवति, इयं तु बुधप्रिया गंभीरार्थेति भावः । विधिं विधानं कुर्वंतीति विधिकर्यस्ताः "विधिर्ना नियतौ काले विधाने परमेष्ठिनि" इति मेदिनी । शेतेऽनेनेति शीधु मद्यममृतं वा 'शीधुपीयूषमद्ययोः' इति धरणिः, । अधरनिष्ठामृतेनेत्यर्थः । पुष्करेक्षणेत्याकाशवद्व्यापकदृष्टेस्तवास्माकं दर्शनं कथं नेत्यभिप्रायः 'पुष्करं सर्वतोमुखम्' इत्यमरादयः ॥ भोभो मत्प्राणैकवल्लभा रत्नवल्लव्यः जीवातुभूतासु भवतीषु नाहमुदासे, दासे मयि संततस्थे प्रेमहेमशृङ्खलानिबद्धे कथमविश्वस्ताः, विश्वस्ता भवत भावत्कं कङ्कणमिव हस्ताङ्कगतमेव मां जानीतेति स्फूर्तिप्राप्तं तद्वाक्यमाकर्ण्यापरा आहुः-मधुरया माधुर्य्यव्यञ्जकवर्णघटितत्वात्सुश्रवया । वल्गूनि मञ्जुलपदार्थवैचित्रीकाणि वाक्यानि यस्यां तया । बुधानां विदग्धानां मनोज्ञया मनो जानत्या गिरा विधिकरीः किङ्करीर्न इमा मुह्यतीस्तन्माधुर्यस्वादभरादानान्मोहं प्राप्नुवतीः पुनरधरशीधुना आप्याययस्व । यद्वा—मोहं प्राप्नुवतीर्नः अधरशीधुनाऽपि आयमस्व पुनर्मोहं प्रापयस्वेत्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ तन्मुखसौरभनिभतद्भाषितविशेषजनिततत्पानेच्छात्मकस्य मोहपर्यन्तदशागामिनस्तापस्य पुनरन्यदुश्चिकित्स्यतामाशङ्कमानास्तस्मिन्न वाङ्गसङ्गे पेयौषधमिवान्तरङ्ग सङ्गमनीयं तन्मुखसुधाकरसुधारसमपि प्रार्थयन्ते । मधुरयेति । अधरसीधुनास्मानाप्याययस्व अन्यथा सद्य एव म्रियेमहीति भावः । कुतस्तव गिरा स्मर्यमाणया स्वागतं वो महाभागा इत्यादिलक्षणया । कठोरा भव मृद्वी वा प्राणास्त्वमसि राधिके ! । अस्ति नान्या चकोरस्य चन्द्रलेखां विना गतिरित्यादि लक्षणया वा यया कयाचिद्वा । मुह्यतीः अन्त्यदशानुगं मोहं प्राप्तवतीः । कीदृश्या गिरा मधुरया स्वरविशेषेण वर्णविन्यासविशेषेण प्रेममृदुतया प्राणिमात्राणां रुचिरतया । तथा वल्गूनि आकाङ्क्षायोग्यतासत्तिसौष्ठववन्ति वाक्यानि सुप्तिङन्तवर्गो यत्र तादृश्या । तथा बुधानामर्थज्ञानां मनोज्ञयाभिधालक्षणाव्यञ्जनादिवृत्तिप्रतिपादितवस्तुरसभावालङ्कारार्थगाम्भीर्येणानन्दप्रदया । इमा इति प्रत्यक्षत्वादिना असन्दिग्धत्वं

तत्कालीनत्वं च मोहस्योक्तं कथमदेयं दातव्यमित्यत आहुः। हे वीर! दयावीर दानवीरेति वा। पुष्करेक्षणेति उक्तावसरे सस्मितविलाससुन्दरदृष्ट्यादिना गिरि एव विमोहनत्वमधिकमभिप्रेतम्। तथाच कर्णामृते। पर्याचितामृतरसानि वदार्थभङ्गीवल्गूनि वल्वितविशालविलोचनानीति। अन्यत्तैः। यद्वा। गिरा मुह्यतीः अत एव विधिकरीः दासीत्वं गताः मोहेन विवेकापगमात्। यद्वा। गिरैव विधिकरीः अधुना विरहार्त्त्या इमा मुह्यतीति ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्चाधरसीधुनाऽस्मानाप्याययस्व, अन्यथा सद्य एव म्रियेमहीति भावः। कुतः? तव गिरा पूर्वोक्तयाधुना स्मर्य्यमाणया नहि भवतीभ्यो ममान्यत् प्रियतमं कुत्रापि किञ्चिदस्तीत्यादिलक्षणया मुह्यतीः, मोहस्यान्त्यदशानुगत्वात्, विरहेण सीध्वप्राप्त्या जनितस्य मोहरोगस्य वैद्यशास्त्रोक्तनिदान-विपर्य्ययन्यायेन तत्प्राप्त्यैवोपशमः सिध्येन्न त्वन्यथेति भावः। तच्च युक्तमेवेत्याहुः विधिकरीस्त्वदाज्ञाकारिणीः। गिरो मोहहेतुत्वं दर्शयन्ति—मधुरया अमृतवन्मिष्टया, यद्वा, मधु मद्यमेव साक्षादिव राति ददातीति तया, इति परममादकत्वमुक्तम्। कथम्? तदाहुः—वल्गूनि अर्थस्य प्रियत्वादिना शब्दस्य च सद्वर्णबन्धादिना मनोहराणि वाक्यानि यस्यां तया, अतो बुधानां विदग्धानां चित्ताकर्षिण्या, इति श्रोत्रमनः प्रियत्वमुक्तम्। इमा इति मोहस्य प्रत्यक्षत्वादिनासन्दिग्धत्वं तत्कालीनत्वं चोक्तम्। ननु वाङ्मात्रेण कथं मोहः स्यात्? तत्राहुः—वीर हे महासामर्थ्ययुक्तेति। त्वद्गिरोऽपि तादृशत्वादित्यर्थः। यद्वा, कथमदेयं तद्दातव्यमित्यत आहुः—हे वीर! दयावीर दानवीरेति वा। पुष्करेक्षण! हे परमसुन्दरेत्यर्थः उक्त्यवसरे सुन्दरदृष्ट्यादिना गिर एव विमोहनमधिकमभिप्रेतम्। तथा च कर्णामृते—'पर्य्याचितामृतरसानि पदार्थभङ्गी, वल्गूनि वल्गितविशालविलोचनानि' इति। अन्यत्तैर्व्याख्यातम, यद्वा, गिरा मुह्यतीः, अतएव विधिकरीर्दासीत्वं गताः, मोहेन विवेकापगमात्; यद्वा, गिरैव विधिकरीः, अधुना विरहार्त्त्या इमा मुह्यतीः, अकारप्रश्लेषेण अबुधानामपि, किमुत विदग्धानाम्; यद्वा, बुधानां ज्ञानिनामपि, किं पुनर्भक्तानाम्? किंवा बुधानां पण्डितानामपि किमुताबुधानामस्माकं मनोज्ञया? अन्यत् समानम्। अथवा मधुरया श्रोत्रमात्रप्रिययेत्यर्थः। वस्तुतस्तु अवल्गुवाक्यया अबुधमनोज्ञया, तथापि विधिकरीः, कुतः? इमाः त्वत्प्रमहतविचारा गोपीः, अतएव त्वदधर-सीधुं प्रति त्वदर्थं मुह्यतीनाप्यायय न स्वस्थय किन्तु मारयेत्यर्थः। तदेवाविवेकिनीनामस्माकमुचितमिति भावः; एषा प्रेमार्त्तिभरोक्तिः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शकपक्षीयम्

मधुरया कोकिलादिशब्दवच्छ्लाघ्यया वल्गुवाक्ययावचनभङ्गीविशेषवत्या विधिकरीः नियोगकरीः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे पुष्करेक्षण! बुधानां हृद्यया वल्गूनि वाक्यानि यस्यां तयात एव मधुरया कोकिलादिशब्दवच्छ्लाघ्यया ते तव गिरा मुह्यतीः विधिकरीश्च इमा नोऽस्मानधरामृतेनाप्यायस्व सञ्जीवय ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

वल्गूनि मनोहराणि वाक्यानि निराकाङ्क्षाणि पदात्मकानि यस्यां सा तथा बुधानां विदुषां मनोज्ञया हृद्यया मधुरयेति इत्यनेन प्राप्तां बालभाषणशङ्कां निराकरोति विधिकरीः दासीः अधरसीधुना अधरामृतेन आप्याययस्व सेचय जीवय वा मुह्यतीः मोहं गच्छतीः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु भवत्यो नियतवचसः प्रागुक्तङ्करसरोरुहं शिरसि धेहि ततश्च जलरुहाननं दर्शयेति। ततश्च पदाम्बुजं कृणु कुचेष्विति निश्चित्य कथ्यतां तदेव करोमीतिचेत् ब्रूम इत्याहुः। मधुरयेत्यादि हेपुष्करेक्षण कमललोचन मुह्यतीर्मोहं प्राप्नुवतीरिमा विधिकरीः किङ्करीरस्मान् अधरसीधुना अधरमधुनाप्याययस्व जीवय अधरमधु पाययित्वा तदर्पयेतियावत् नच तत्र तूष्णीकेन त्वयाधरः पाययितव्यः किन्तु मधुरकथापूर्वकमित्याहुः मधुरया गिरा मा मोहं व्रजत पिबत पिबताधरमिति कोमलेन वचसा विशेषेण तृतीया कीदृश्या वल्गु सुन्दरया वाक्यमाकाङ्क्षादिमत्पदकदम्बं यत्र तथाभूतस्यैव शब्दस्य प्रामाण्यात् अत एव बुधानां पण्डितानां विदग्धानामिति यावत् मनोज्ञया रुचिरया इत्येवायमवधिर्नापरं याचितव्यमिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु भवत्योऽनियतवचसः प्रागुक्तं करसरोरुहं शिरसि धेहि ततश्च जलरुहाननं दर्शयेति, ततश्च पदाम्बुजं कृणु कुचेष्विति निश्चित्य कथ्यताम्, तदेव करोमीति चेद्ब्रूम इत्याहुः—मधुरयेत्यादि। हे पुष्करेक्षण! कमललोचन! मुह्यतोर्मोहं प्राप्नुवतीरिमा विधिकरीः किङ्करीरस्मानधरसीधुना अधरमधुनाप्याययस्व जीवय। अधरमधु पाययित्वा तदर्पयेति यावत्। न च तत्र तूष्णीकेन त्वयाधरः पाययितव्यः, किन्तु मधुरकथापूर्वकमित्याहुः—मधुरया गिरया 'मा मोहं व्रजत पिबत पिबताधरम्' इति कोमलेन वचसा,

विशेषणे तृतीया । कीदृश्या ? वल्गु सुन्दरं वाक्यम्, आकाङ्क्षादिमत्पदकदम्बं यत्र—तथाभूतस्यैव शब्दस्य प्रामाण्यात् । अतएव बुधानां पण्डितानां विदग्धानामिति यावत्, मनोज्ञया रुचिरया । इत्येवायमवधिर्नापरं याचितव्यम् इति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भो भो मत्प्राणैकवल्लभा ! रत्नवल्लभाः जीवातुभूतासु भवतीषु नाहमुदासे दासे मयि सन्ततहेमप्रेमहेमशृङ्खलानिबद्धे कथमविश्वस्ता विश्वरता भवत भावत्कं कङ्कणमिव शस्तां हस्ताङ्कगतमेव मां जानीतेति स्फूर्त्तिप्राप्त तद्वाक्यमाकर्ण्यापरा आहुः । मधुरया माधुर्यवञ्चकवर्णघटितत्वात् सुश्रवया वल्गूनि मञ्जुलपदार्थवैचित्रीकाणि वाक्यानि यस्यां तया बुधानां विदग्धानां मनोज्ञया नमो जानत्या गिरा विधिकरीः किङ्करीः नः इमा मुह्यतीस्तन्माधुर्यास्वादभरादानन्दमोहं प्राप्नुवतीः पुनरधरसीधुना आप्याययस्व । यद्वा । मोहं प्राप्नुवतीर्नः अधरसीधुनापि पाययस्व पुनर्मोहं प्रापयस्वेत्यर्थः ॥ ८ ॥

रसिकाह्लादिनी–टीका

इतोऽपि सर्वोत्तममवधिभूतमधरामृतपानं प्रार्थयन्ते । मधुरयेति, हे पुष्करेण कमलवत्सन्तापहरविलोचनं तवैव पूर्वानुभूतया मधुरया गिरा मुह्यतीरिमाः गोपीराप्याययस्व सञ्जीवय मोहस्य मरणपूर्वावस्थारूपत्वात् तदुक्तम्–"आपद्भीतिवियोगाद्यैर्मोहश्चित्रस्य मूढतेति" । उपेक्षया सद्यो म्रियेरन् इत्यर्थः । संजीवनं केन स्म धनेनेत्यपेक्षायामाहुः अधरसीधुनेति । कीदृश्या गिरा मधुरं रसं राति ददातीति मधुरा तथा, यद्वा अमृतवन्मिष्टया तत्र हेतुगर्भविशेषणं वल्गुनि मनोहराणि वाक्यानि यस्याः तया बुधानां शब्दार्थतात्पर्याभिज्ञानां मनोज्ञया सद्यश्चित्ताऽकर्षिण्या गिरा सम्मोहितानां मरणस्यावश्यं भावित्वात् । दुःकीर्त्तिपरिहारायाधरामृतदानेन संजीवयेति हे वीर रसस्तु द्वैध्यं दाने युद्धं चोत्साहे वर्द्धयति । दाने शूरत्वं तदा कार्पण्यमकुर्वन् अधरामृतदानेन देहीति । युद्धशूरश्चेत् त्वमसि तर्हि जीवमानं प्रतिभटमन्वेषय अन्यथा गिरा मोहितानां मृतप्रायाणामस्माकं मारणे स्त्रीवधजनित–पातकं ते संचारश्च भविष्यतीति तात्पर्यार्थः । कीदृशीः नः विधिकरीः तदा वस्त्रहरणे त्वदाज्ञा तु विधायित्वम् । त्वया दृष्टचरमेव, यद्वा आत्मा बारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदध्यासितव्य इति श्रुत्यर्थः सम्पादनं कर्त्तृरिति वेदाज्ञाविधायिनीषु आत्मोपासनपरास्वस्मासु वञ्चनपरेण न भाव्यमिति यद्वा पूर्वानुभूतेनेदानीं स्मर्य्यमाणेनाधरसिधुना मुह्यतीरिमाः त्वां मृग्यमाना गोपी अधुना मधुरया गिरा आप्याययस्व वाणिं श्रावयित्वा जीवयेति । कीदृशीस्तवैव पूर्वानुभूतया गिरा विधिकरीः दासीः तदेव स्मारयन्ति "बद्ध्वाञ्जलिं मूर्ध्न्यपनुत्तयेऽहस" इति "मयेमा रंस्यथ क्षपा" इति प्रतिश्रुताथरूपया आशाबन्धात्मिकया विधिकरी जाताः । न अधुना प्रतिश्रुतार्थसम्रादिकया गिरा संजीवयेति प्रार्थना अन्यद्विशेषेण जातं समानमेव किं चाचिकित्से रोगे महामन्त्ररूपया गिरा उप समीपे महादिव्यरसरूपेणाधरसीधुना पाययित्वा संजीवयेति । अचिन्त्यो हि प्रभावो मणिमन्त्रौषधीनामित्युक्तत्वात् । ननु विरहे दशम्यवस्थाया अवश्यं भावित्वेन दुर्निवार्य्यत्वात् प्रकारान्तरेणापि जीवनोपायश्चिन्तनीयः इति चेत् स्वयमेव विचार्य वदन्ति तव कथेति ॥ ८ ॥

विशुद्धरसदीपिका

अपि च । मधुरयेति । हे पुष्करेक्षण विशालोत्फुल्ललोचनेति स्मितावलोकितं सम्भाव्याहुः । वीरेति परमादेयमपि दातुं समर्थेति अधरसीधुनास्मानाप्याययस्वेति परमार्त्या प्रलपनमित्यदोषः अन्यथा चरमदशापत्तेः कुतः तव स्वागतं वो महाभाग इत्यादिकया गिरा मुह्यतीः मधुरयेति बहिस्तादृशत्वे ऽप्यन्तः कटुतरयेति भावः । रसविधातकत्वात् मोहोऽत्रान्त्यदशैव ननु मया त्वादराभिप्रायेणैव तथोक्तमिति तत्राहुः । बुधेति । न वयं बुधाः किन्तु परमाज्ञाः स्त्रिय इत्यपि वक्रोक्तिः । यद्वा श्लेणमधुमद्ये पुष्परस इत्यादिकोशाद्विरेपिमादकमधुसीधुस्पार्शादेव ततस्तन्मोहिताभिस्तदेव प्राथ्र्यत इति यद्वा अधर धर्तुमशक्यं यत्सीधु तेनेति प्राचुर्य्यमभिप्रेतं यद्वा अधरमम्बर सीधु यस्मादित्यतिमादकत्वमुक्तमित्यदोषः वल्गुवाक्येति अर्थविचारेऽत्यतितीक्ष्णयेत्यर्थः । ननु किमर्थमाप्यायनीयास्तत्राहुः विधिकारीः किङ्करीः मोहनविवेकापगमादेवमुक्तं किं वा प्रणयकोपेनेति यद्वा दासीत्वं गता इति सर्वात्मर्पणमभिहितम् एवं प्रार्थना चतुष्टयी दर्शिता ॥ ८ ॥

श्रीरामनारायणकृता भावभावविभाविका

तापोपशमं प्रार्थयित्वा रसाप्यायनं मनोरथान्तरं प्रार्थयन्ति । मधुरयेति । यथा मधु आस्वादनमात्रेण प्रलोभकं मादकञ्च यत्स्वर्गादिः तदेव रातीति मधुरा तया वल्गूनि वाक्यानि "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्भवती" त्यादीनि यस्यां तयात एव बुधनामैहिकामुष्मिकव्यवहारदक्षाणां परमार्थत्वरूपेण तु अबुधानां वा मनोज्ञया रोचकया गिरा सकामश्रुतिरूपया मुह्यतीरिमा विधिकरीर्विध्यधीनानुष्ठानवतीः प्रजाः हे पुष्करेक्षण हृदयकमलसाक्षिन् ! तथा वीर विशेषेण धीप्रेरक ताः अधरे वेदान्तिमभागे वर्तमानेन सीधुना ज्ञानामृतेनाप्याययसि तथा मधुरया स्वरतो वर्णतश्च स्निग्धसुस्मितापाङ्गनिरीक्षणमिश्रतया च मधुरया सर्वैहिकामुष्मिकसुखतत्साधनविस्मारकानुरागात्मकमधु रातीति तथाभूतया वा तथा वल्गूनि स्नेहरसोद्बोधकगम्भीरभावार्थवन्ति वाक्यानि

प्रियहितत्वेन वक्तुं योग्यानि वचनानि यस्यामतएव बुधानां रसविशेषभावनाचतुराणामबुधानाञ्च सर्वप्राणिनां मृगपक्षिद्रुमलतादीनां स्वरादिसौष्ठवेन मनोज्ञया तव गिरा तव मुखपङ्कजसौरभरूपया मुह्यतीः सर्वलोकवेदधर्मविस्मृत्या त्वदेकपरास्तथा गतदेहाद्यनुसंधाना अधुना तदनुस्मृतिजनिततन्मुखकञ्जदलाधरमधुसीधुकामलक्षणान्यदुर्विचिकित्स्यतापजान्तिमदशाशोकमोहव्याप्ता इमा इति प्रत्यक्षविह्वलतया मोहासन्दिग्धत्वसूचनं विधिकरीः अमूल्यदासिका आज्ञानुसारिणीः सेवारता वा इति सम्बन्धद्योतनं ता नोऽधरसीधुनामृतसञ्जीवनरसेनाप्यायस्व पुष्करेक्षण वीर इति सम्बोधनाभ्यां विह्वलतया सर्वप्रत्यक्षापि नो दशा न हृत्कमलसाक्षिणो विशेषेणान्तः प्रेरकस्य तवाज्ञातातः प्रसीदाधुनोपेक्षायां सद्यो मरणं मरणमिति भावः। यद्वा त्वद्विरहकामचिन्ताग्निसन्तापदन्दह्यमानतयान्तिमदशां प्राप्ता मुह्यतीर्नः प्रथमं तावत्पूर्वं निरूपितमधुरया गिरा हे पुष्करेक्षण ! कमलनयन तद्वद्वा तापापहारीक्षणं दर्शनं यस्य तथा वीर विशेषेणास्मत्प्राण आप्यायस्व सचेनाः कुरु परमामृतेनाधरशीधुनाप्यायस्व विगतज्वराः फुल्लिताङ्गीर्विधेहि यद्वा स्वात्मनोऽमृतसञ्जीवनसुरवैद्यत्वमाख्यापयितुं विरहादिना मारयित्वा पुनःसञ्जीवनं त्वयाभिमतं तदनुचितं सितादानेन मरणसम्भवे विषं न देयमिति लौकिकन्यायात्तस्मात्पूर्वनिरूपितया मधुरया गिरैव मुह्यतीः कृत्वा ऽधरसीधुनाऽप्यायस्व नो विधिकरीरित्युक्त्या स्वाधीनासु इदमेव मोहनं जीवनं च युक्तं नतु विरहेण मारणमिति भावः ॥ ८ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अपरा एतावता दुःखनिवृत्तिमपश्यन्त्यः प्रार्थनीयं किन्दारिद्र्यमिति विचिन्त्य परमोत्कृष्टं वस्तु प्रार्थयन्ते। मधुरयेति—

मां हि प्रार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥

कौन्तेय ! प्रतिजानीहि न मे भक्तः प्रणश्यति। सर्वधर्म्मान्परित्यज्य मामेकं शरणं व्रज। अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि माशुच इत्यादिरूपया मधुरया अर्थतोऽत्यन्तमिष्टया वल्गूनि मनोज्ञानि वाक्यानि यस्यां तया शब्दतोऽत्यर्थमधुरया अत एव बुधमनोज्ञया बुधानां विदुषां हृद्यया विधिकरीः किङ्करीरस्मान् तथा च नास्माकमविचारिता प्रवृत्तिरितिभावः। सम्प्रति तिरोधानलक्षणया लीलया मुह्यतीर्मूर्च्छां मरणपूर्वावस्थां लभमाना इमा झटित्यागत्य द्रष्टव्याः। हे पुष्करेक्षण ! पुष्करे हृदयकमले ईक्षणं यस्य सः तथा च अन्तर्यामिणा त्वया सर्वं ज्ञायत एव नास्ति विज्ञापनकृत्यमिति भावः। विशाळनेत्रेण त्वयेदमागत्य प्रत्यक्षेणोपलब्धव्यमिति वा दृष्ट्वा च स्वाधरामृतेन नोऽस्मानाप्यायस्व संजीवय यतो हे वीर ! निजजनार्तिनिराकरणमेव शौर्य्यं कृत्यमिति भावः। यद्वा स्वभावत एवाज्ञाकरीः सम्प्रति विरहदुःखेन मुह्यतीरस्मानागत्याप्यायस्व कथमितिचेत् आदौ गिरा ननु वाणीमात्रेण कथं मोहनिवृत्तिरितिचेत्तत्राहुः। मधुरयेति। मायामयस्य मोहस्य सच्चिदानन्दरूपस्य तव मुखान्निःसृतया माधुर्य्यव्याप्तया तया निवृत्तिरवश्यं भविष्यतीति भावः। तत्रापि सत्यप्रियहितार्थकत्वाद्वल्गूनि वाक्यानि यस्यां सा तत्रापि बुधजनमनोज्ञया ज्ञानरूपया यच्च तन्निवृत्ताप्रतिबन्धकं तदाप्यायनं कुर्वित्याशयेनाहुः। पुष्करेक्षण ! तथाच ळोकोत्तरसौन्दर्य्याद्यलंकृतविग्रहं दर्शयित्वा तद्दर्शनाभिलाषं निवर्तय तथाऽधरामृतपानेच्छामपि तत्प्रदानेन पूरयेत्याशयेनाहुः। अधरेति। सर्वमपि कर्तुं प्रदातुञ्च समर्थोऽसीति द्योतयन्त्यः सम्बोधयन्ति हे वीरेति ! अनभिक्षापक्षे न केवलं बहिर्हृदिलेपमात्रेणाऽस्मत्तापस्य शान्तिः कर्तुं वा शक्या किन्तु अत्रोपायवाहुल्यमपेक्षितमित्याहुः मधुरयेति। नोऽस्मानाप्यायस्वाह्लादय यतो मुह्यतीरुपान्त्यान्दशां प्राप्ताः कथमितिचेत्तत्राहुः। गिरा तत्रापि न प्रतियात व्रजमिति बजवत्कठोरया किन्तु मधुरया नापि स्वागतमितिवत्प्रतारणरूपयेत्याहुः। वल्गुवाक्यया यद्यपि मुग्धानामस्माकं नातिविवेकस्तथापि स्वया वुधजनमनोज्ञैव सा प्रयोक्तव्येत्याशयेनाहुः। वुधेति तथाचैवंविधया गिरा वयं वक्तव्या इत्यको मूर्च्छानिवृत्त्युपायः द्वितीयमाहुः हे पुष्करेक्षण ! तथाच कमलवद्विशालनेत्राभ्यां वयं सम्यक् द्रष्टव्या इति भावः। तृतीयमाहुः। अधरेति। तथाभूतममृतरूपमौषधं मृतानामप्युज्जीवनकरं पाययितव्यमिति भावः। तत्रापि विलम्वो नोचित इत्याहुः इमाः क्षणमात्रमपि विलम्वासहाः। ननु मम का ममता यदर्थमेवंविधपरिश्रमो मया कर्तव्य इत्याशङ्क्याहुः। विधिकरीरिति तथाप्यनल्पमिदमौषधं दातु न शक्नोमीति चेत्तत्राहुः। वीर परमोदार त्वादानशूर ! सर्वस्वमपि दातुं समर्थ यद्वा यथोक्तोपायेन गतमूर्च्छाः भवत्यो यथोक्तोपायकर्त्रे सद्वैद्याय मह्यं किम्प्रदास्यथेति तेत्तत्राहुः। विधिकरीरिति। जन्मजन्मान्तरेषु तव किङ्कर्य्यो भविष्यामो नचान्यत्किंचित्तुभ्यं दातुं वयं योग्यास्तस्मादेतत्प्रतिनिधिभूतस्येतरवस्तुनोऽभावाच्छरीरमेवार्पयिष्याम इति भावः। तावतापि नास्ति ऋणपरिहारो यद्यपि तथापि दानशूरेण त्वया न किमपि विचार्य प्रत्युपकारानपेक्ष्य दानस्यैव सात्त्विकत्वाभिधानात् मानिनीपक्षे ननु नैतावता मम हृच्छयस्य शान्तिर्भविष्यति तदुपशामकमस्त्येकं युष्मत्सन्निधौ वस्तु तथापि भयान्न तत्प्रार्थयामीति सदैन्यप्रार्थनामालक्ष्याहुः। मधुरयेति—

कठोरा भव मृद्वी वा प्राणास्त्वमसि राधिके !। अस्ति नान्या चकोरस्य चन्द्रलेखाम्विना गतिः ॥

इत्यादिरूपया मधुरया वल्गुवाक्यया प्रतारणरूपया अतएव वुधमनोज्ञया गिरा पूर्वं तव वचनकर्त्र्यो वयं जाताः अतएव सम्प्रति प्रतारणफलभोगसमये मुह्यन्त्यः मरणोपान्त्यदशां प्राप्ताः यद्यप्येवं तथापि सज्जनैरपकर्त्तप्युपकर्तव्य इति न्यायमनुसृत्या-

स्माभिरनुज्ञापितोऽस्माकमधरामृतेन स्वात्मानमाप्याययस्वागत्याह्लादय भयत्ति रोहितो मातिष्ठेति भावः। भ्रूलक्षणधनुर्द्वयेक्षणलक्षणवाणधारी वीर शिरोमणिस्त्वं किमर्थं विभेषीति सम्बोधनद्वयाशयः निवृत्तिपक्षे तस्मात्साधकानुग्रहार्थं लीलाविग्रहमादाय—

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते । उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ॥

क्षेत्रज्ञञ्चापि मां विद्धि सर्वक्षेत्रेषु भारत । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते । यदा भूतपृथग्भावमेकस्थमनुपश्यति तत एवच विस्तारं ब्रह्म सम्पद्यते तदेत्यादिकरूपया मधुरया पथ्याभूतार्थप्रतिपादकत्वाद्वल्गुवाक्यया अत एव वुधजनमनोज्ञया अतस्तवौष्ठपुटनिः सृतामृतरूपया नोऽस्मानाप्याययस्व यतस्तद्वाद्युद्भावितमिथ्याभूतातिकर्कशतर्कातिपुष्टवादान्धकारेण मुह्यतीर्नचोपेक्ष्याः यतो विधिकरोर्भवदाज्ञारूपा विधिप्रतिपादिकास्तव किङ्करीभूता अतस्तथाभूतया गिराऽऽवश्यमस्मानागत्यायनेन धर्मसंस्थापनरूपः स्वपालनहेतुरुक्तः साधुपरित्राणाख्यं द्योतन्त्यः सम्बोधयन्ति । पुष्करेक्षण सौन्दर्य्यादिगुणालंकृतविग्रहेण स्वस्मिन्नासक्तिसम्पादनेन सर्वं परिपालयेति भावः । अस्मत्पालनाय दुष्कृतिनोऽपिनाशयेत्याशयेनाहुः । हे वीरेति ॥ ८ ॥

रास–रहस्यम्

र० टी०—मधुरया गिरा यथा मधुकराणां मधु आस्वादनमात्रेण प्रलोभकं मादकं च भवति तथा "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति ।" इत्यादिस्वर्गादिपरवल्गुवाक्यानि यस्यां एवं श्रुतिमधुरया अतएव बुधमनोज्ञया बुधानां ऐहिकामुष्मिकव्यवहारदक्षाणां परमार्थदृष्ट्यातु अबुधानां वा रुचिरया गिरा सकामश्रुतिलक्षणया, इमा विधिकरीः विध्यधीनानुष्ठानशीलाः मानवीः, मुह्यतीः मुह्यमानाः, अतः हे **पुष्करेक्षण** ! हृदयकमलसाक्षिन् ! हे वीर ! हे धीप्रेरक ! अधरे वेदस्यान्तिमभागे उपनिषदि वर्तमानेन सीधुना ज्ञानामृतेन नः अस्मान् आप्याययस्व परिपालय ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे पुष्करेक्षण ! कमलनयन भवदीयेनैव निरीक्षणेन मुह्यतीः तथा भवदीययैव मधुरया चित्तापहरिण्या वल्गूनि मनोहराणि वाक्यानि यस्यां तया बुधमनोज्ञया स्वरूपतः स्वरतोऽर्थतश्च बुधानां हृद्यया गिरा च मुह्यतीः इमाः विधिकरीः किङ्करीः नोऽस्मान् अधरशीधुना अधरामृतेन आप्याययस्व सञ्जीवय ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वल्गूनि मनोहराणि वाक्यानि यस्यां सा तया मधुरया स्वयं मनोहर्त्र्या गिरा वाण्या जारनारीणामेव मनोहरता न गीरितीरयन्ति । बुधमनोज्ञया विद्यावद्धृद्यया **पुष्करेक्षण** पद्मनेत्र पुष्करं पुष्कलमीक्षणं ज्ञानं वा पुष्कलानीक्षणानि नयनानि यस्य तत्सम्बुद्धिर्वा हे वीर प्रेरकान्तररहित **शूर** वा विधिकरीर्विधि माऽऽज्ञां कुर्वन्ति तच्छीला इति विधिकर्यस्ताः । कृञो हेतुताच्छील्यानुलोम्येष्विति कृञष्टः । टिड्ढाणञिति ङीप् । दासीर्मुह्यतीरिमा अधरसीधुना तद्गतरसरूपमद्येन । मैरेयमासवं सीधुरित्यमरः । न आप्याययस्व वर्धय । स्फायी ओप्यायी वृद्धाविति स्मरणात् । प्रथमाष्टकषष्ठाध्यायद्वाविंशतिवर्गताप्यायस्व समेतुत इत्यृग्व्याख्यावसरे वर्धस्वेति विवृतत्वात् । सेचयेत्यादि व्याख्यानं धात्वनेकार्थत्वात्सम्भवति । मुरलि मुररिपुप्रिये त्वमप्यापयेत्यन्तरङ्गतः कटाक्षयन्ति विधिकरीरिमेति । विधिकरीरो हि विधिनिर्मितब्रह्माण्डघटः सोऽप्त्यास्तीति विधिकरीरिणी । घटः करीरः कलश इत्यमरः । सा मा सम्पद्यस्याः सा त्वं मुरलि तव यः स्वनस्तेन न आप्यायेति वा ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

इममेवार्थं ततोऽप्युत्तमा प्रकारान्तरेण प्रार्थयते । मधुरया गिरेति । "हस्तेन च स्वरूपेण पदा चोपकृतिर्मता । मुखेन चोपकारो हि कर्त्तव्य इति ता जगुः । पूर्वोक्तमपि सर्वं हि यावत् स्पष्टं न भाषते । तावत्सरसतां याति न कदाचिदिति स्थितिः" हे स्वामिन् मधुरया गिरा मुह्यतीरिमा गोपीराप्याययस्व मोहोहि मरणपूर्वावस्थारूपः तासामाप्यायने हेतुः विधिकरीरिति आज्ञाकारिणीः सेवाकारिणीर्वा असामर्थ्यन्तु तव नास्तीत्याहुः हे वीरेति । शौर्यं हि आर्त्तानामार्तिनिराकरणार्थम् इमा इति प्रदर्शनेन क्षणमात्रविलम्बेन मरिष्यन्तीति सूचितम् । ननु वाङ्मात्रेण कथं मोहनिवृत्तिरिति चेत्तत्राहुः । मधुरयेति । मोहो हि मायारूपः स भवत्स्वरूपेणैव निवर्त्तते सच्चिदानन्दरूपेण तत्र तव वाणी आनन्दरूपेत्याहुः । मधुरयेति । मध्वसाधारणो रसः तद्युक्ता मधुरा वल्गु मनोहरं वाक्यं यत्र वाक्यस्य मनोहरत्वं सत्यप्रियप्रतिपादकत्वेन अतः सद्रूपता निरूपिता बुधानां मनोज्ञा आह्लादकारिणी अनेन ज्ञानरूपा निरूपिता ते हि ज्ञानेनैव रता भवन्ति मुखे नयने वर्तते इति तयोरपि व्यापारं कृत्वैव वक्तव्यमित्याहुः पुष्करेक्षणेति। कमलवत्परतापापहारके ईक्षणे यस्य किञ्च अधरसीधुना अधरामृतेन च आप्याययस्व वक्तव्याः द्रष्टव्याः पाययितव्या इति मूर्च्छितानां हि मुर्च्छानिवारणार्थं महामन्त्राः पठ्यन्ते कमलादीनि च शीतलद्रव्याणि स्थाप्यन्ते सर्वथा असाध्ये अमृतमपि पाय्यते

अतिगोप्यान् पाययन्ति इयन्तु मूर्च्छा नाल्पेन निवारयितुं शक्येति वीरेति सम्बोधनम् अनेन अन्तिमावस्था प्रदर्शिता पूर्वप्रार्थिताश्चार्थाः स्मारकत्वेनाधिकमूर्च्छाहेतवो जाताः ॥ ८ ॥

श्रीसुबोधिनी–सारः

हे पुष्करेक्षण वल्गूनि सुन्दराणि वाक्यानि यस्यां तया बुधानां विवेकिनां मनोज्ञया हृद्यया गम्भीरत्वात् मधुरया गिरा वाचा मुह्यतीर्मोहं प्राप्नुवतीरिमा विधिकरीर्दासीर्नोस्मानधरसीधुनाऽधरामृतेनाप्याययस्व सञ्जीवय ॥ ८ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

मधुरया गिरेत्यत्र **हस्तेनेति** का० २९२$\frac{३}{४}$, २९३$\frac{३}{४}$। "विरचिताभय" मित्यादिश्लोकत्रयोक्तभगवत्कृतोपकारानुवादपूर्वकमेतच्छ्लोकोक्तमुपकारमाहुः **हस्तेन चेत्यादि**, "विरचिताभय" मितिश्लोके "शिरसि धेहि नः श्रीकरग्रह"मिति **हस्तेनोपकारः**, "व्रजजनार्तिह"न्नितिश्लोके "भज सखे भवत्किङ्करी"रितिस्वरूपेणोपकारः, "प्रणतदेहिना"मितिश्लोके "पदाम्बुजं कृणु कुचे"ष्विति पदा उपकारः, अस्मिन् "मधुरया गिरे"तिश्लोके **मुखेन चोपकारः कर्तव्य इति** ता गोप्यो जगुरित्यर्थः, मधुरवाणीप्रार्थनप्रयोजनमाहुः **पूर्वोक्तमित्यादि**, यावद्भगवान् मधुरवाण्या भाषणं न करोति तावत्पर्यन्तं **पूर्वोक्तं सर्वमपि सरसतां न यान्ति**, तूष्णीं रमणे रसो न भवतीतिरसमर्यादासूचनाय स्थितिरित्युक्तम् ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तव कृपादृष्ट्यैव तापनिवृत्तिः, नान्यथा' इति सूचयन्त्यः सम्बोधयन्ति — हे पुष्करेक्षणेति । 'अस्मासु स्त्रीषु वीरत्वं न युक्तम्' इत्याशयेन पुनः सम्बोधयन्ति — वीरेति । तव गिरा वाण्या विमुह्यतीर्विधिकरीः किङ्करीरिमा नः अस्मान् अधरसीधुना अधरामृतेन आप्याययस्व सञ्जीवयस्वेत्यर्थः । गिरो मोहकत्वे हेतूनाह—कोकिलादिशब्दवत् मधुरयेति । वल्गूनि मनोहराणि वाक्यानि यस्यां तथेति । अस्मन्मोहकत्वे किं वक्तव्यम् ? यतो बुधानां ज्ञानिनामपि मनोज्ञया हृदयज्ञयेति ॥ ८ ॥

अन्वितार्थप्रकाशिका

मधुरयेति ॥ हे पुष्करेक्षण ! हे वीर ! कोकिलवत् मधुरया वल्गूनि मनोहराणि वाक्यानि यस्यां तया बुधानामपि मनोज्ञया हृद्यया गम्भीरयेत्यर्थः । तव गिरा वाण्या विमुह्यतीः । नुमभाव आर्षः । विधिकरीः किङ्करीरिमा नः अस्मान् अधरसीधुना अधरामृतेन आप्याययस्व सञ्जीवयस्वेत्यर्थः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मधुरयेति वल्गुवाक्यमावल्गूनि मनोहराणि वाक्यानि यस्यां तया । बुधानां अर्थज्ञानां मनोज्ञया आनन्दप्रदया मधुरया गिरा तव वाण्या । मुह्यतीः मृततुल्याः इमाः अस्मान् । विधिकरीः दासीः हे पुष्करेक्षण कमलनेत्र अधरसीधुना अधरामृतेन आप्यायस्व संजीवय ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मधुरयेति ॥ हे पुष्करेक्षण, हे वीर, वल्गूनि मनोहराणि वाक्यानि यस्यां तया, बुधानां तदभिप्रायज्ञपण्डितानां मनोज्ञानन्दप्रदा तया, मधुरया कोकिलादिशब्दवत् श्राव्यया, गिरा तव वाण्या, मुह्यतीः विधिकरीः किंकरीः, इमाः नोऽस्मान् अधरसीधुना अधरामृतेन, आप्याययस्व संजीवय । एवं प्रार्थनाचतुष्टयी दर्शिता ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मधुरया गिरेति : १०.३१.८.

या वाणी श्रुतिरूपिणी तव विभो विद्वन्मनोहारिणी सत्प्रामाण्य निरूपिणी शिव-सुर-ब्रह्मादिकोद्धारिणी ।
तामस्मद् दुरदृष्टमेतदनृतां कर्तुं कथं चेष्टते त्वं वा श्रीश निजे वचस्यपि कथं मालिन्यमाकाङ्क्षसि ॥ ९७ ॥
अनेकजनसन्निधौ यदुदितं वचः सन्मतं तदीयसमनुष्ठितौ भवति योऽसमर्थः सखे ।
करोति निजगोपनं सकुचधीः खसूचीक्षणो भवत्युचितमेव तत् त्वयि परं न वीरोऽसि यत्॥ ९८ ॥
सहसे न कदापि दास्यभाजां विषयेष्वार्तिमनाथदीनबन्धो ।
श्रुतिविश्रुत एष डिण्डिमस्ते कथमीशार्हति मान्द्यमद्य यातुम् ॥ ९९ ॥
यास्ते भवन्ति गुणवर्णनलब्धवर्णा आकर्णनेऽपि किल याः सततं सुवर्णाः ।
कृत्वा निजोदितविधिं प्रकृते यथार्थं क्षिप्रं नयाच्युत विधावृततां श्रुतीस्ताः ॥ १०० ॥

सर्वोऽपि स्मृतिनिचयस्त्वदीयवाक्यप्रामाण्यं यदुवर वर्तते गृहीत्वा।
न त्यक्ष्याम्यलमिति वाग् यदप्रमाणं प्रामाण्यं श्रुतिनिचये न दुर्घटं किम्॥ १०१॥
वाण्यामेकोऽनुष्ठितावन्य एव वैधो मार्गो यस्य तद्वाचि का वा।
श्रद्धेत्यद्धोद्धोषितेऽनादरः स्याद् वेदेऽप्येवं मा कृथास्तत्तदीदृक्॥ १०२॥
यद्मावादीः पूर्वमस्मत्समीपेतत्ते सर्वं सत्यमेवापलब्धम्।
अस्यामेवानुष्ठितौ दिष्टयोगात् स्पष्ट दृष्टं चेष्टितं त्वय्यपूर्वम्॥ १०३॥
या महामोहविध्वंसकारिणी गीस्तवावनौ। तया मोहोऽयमस्माकमिति चित्रीयते मनः॥ १०४॥
त्वद्वाच्यनन्यमतिविश्वसनास्त्वदुक्तं कुर्वन्ति ये विधिमहर्दिवमच्युतेष्टम्।
तेषां न मोहतिमिरावृतिरित्यवेक्ष्य तादृक् स्थिता वयमितस्तु भवान् प्रमाणम्॥ १०५॥
भवेन्मदधरामृतं सुलभमस्य योऽत्राजरः सुवर्णगिरिसंस्थितो भवति सत्सुधर्माश्रितः।
यदेवमिह तादृशस्थितिजुषो न किं वा वयं पदे तव धृतासुभिः कुत इदं पुनर्नोष्यते॥ १०६॥
आप्यायनसमं नान्यत्तनुपुष्टिकरं जने। निजाधरामृतरसेनाप्यायय तदीश नः॥ १०७॥

कृष्णप्रिया

अब भक्तिभाव सभरगुणातीता गोपी जन निवेदन कर रहे हैं कि–हे कमलनयन केशव ? हे पुष्कर लोचन पुरुषोत्तम! विद्वानों के हृदय को आह्लाद एवं आदर देने वाली, मनोहर वचन रचनामयी आपकी मधुर अमृत स्राविणी वचन सुधा से हम सब मुग्ध बन गई है। नाथ ? हे वीर ? अब तो हम आपकी बन चुकी है, इसलिए कृपया आपका अधरामृत का पान कराकर जीवन दान प्रदान करें॥ ८॥

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः॥ ९॥

कर्वमक्षमा

अन्वयः – तप्तजीवनम्, कविभिः ईडितम्, कल्मषापहम्, श्रवणमङ्गलम्, श्रीमत्, आततम्, तव, कथामृतम्, ये, भुवि, गृणन्ति (गायन्ति) त, एव, भूरिदाः, जनाः॥ ९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च अस्माकं त्वद्विरहे प्राप्तमेव मरणं किं तु त्वत्कथामृतं पाययद्भिः सुकृतिभिर्वंचितमित्याहुः। तवेति। कथैवामृतम्। अत्र हेतुः तप्तजीवनम्। प्रसिद्धामृतादुत्कर्षमाहुः। कविभिर्ब्रह्मविद्भिरपीडितं स्तुतम् देवभोग्यं त्वमृतं तैस्तुच्छीकृतम्। किं च कल्मषापहं कामकर्मनिरसनं तत्त्वमृतं नैवंभूतम्। किं च श्रवणमंगलं श्रवणमात्रेण मंगलप्रदम्। तत्त्वनुष्ठानापेक्षम्। किं च श्रीमत्सुशान्त तत्तु मादकम्। एवंभूतं त्वत्कथामृतमाततं यथा भवति तथा ये भुवि गृणन्ति निरूपयन्ति ते जना भूरिदा बहुदातारः। जीवितं ददतीत्यर्थः। यद्वा एवंभूतं त्वत्कथामृतं ये भुवि गृणन्ति ते भूरिदाः पूर्वजन्मसु बहुदत्तवंतः। सुकृतिन इत्यर्थः। एतदुक्तं भवति। ये केवलं कथामृतं गृणन्ति तेऽपि तावदतिधन्याः किं पुनर्ये त्वां पश्यन्त्यतः प्रार्थयामहे त्वया दृश्यतामिति॥ ९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदाहुः–किञ्चेति वंचितम्–विश्वमिति शेषः, वैपरीत्यादित्यर्थः। अत्र अमृतत्वे। तप्तानां संसारतापसन्तप्तानां जीवनम् जलवत्संतापहरम्। उत्कर्षम् आधिक्यम्। न केवलं स्तुतमेवापि तु क्लेशहरमित्याह–किञ्चेति। तत्तु प्रसिद्धं तु। नैव भूतम् कामकर्मनिरासकम्। विशेषान्तरमाह–किं चेति। अनुष्ठानापेक्षम् सेवनापेक्षम्। अन्यद्विशेषमाह–किं चेति। इत्यर्थ इति–न हि जीवदानात्परं दानमस्ति। हरिकथाश्रवणे मोक्षो भवतीत्यर्थः। ‘जीवेस्स वै यस्य पुनर्न मृत्युः’ इत्याद्युक्तेः। पूर्वपुण्य विना निरूपणमपि कर्तुं न शक्यत इत्यभिप्रेत्याह–यद्वेति। इत्यर्थ इति–“तेपुस्तपो जुहुवुः सस्नुरार्या यज्जिह्वाग्रे वर्तते नाम विष्णोः” इत्याद्युक्तेः। यतस्ते दर्शनमति न्यतमत्वापादकमतो हेतोः। केचित्तु अरे परमव्यग्राः यावदाप्याययेयं तावत्क्षणं मद्वार्तया कालो नयितामिति चेत्, सत्रासमाहुः–श्रीकृष्णविरहिणीनां कथैव मृतं मरणं तप्ते मंडकपाकभाजने जीवनमिव ‘जीवनं भुवनं वनम्’ इति कोशात्। कविभिरीडितम् ‘कवयः किं न जल्पन्ति’ इति वर्णनस्वभावेन तस्यापि वर्णनात्। कल्मषापहम् येषां पापमस्ति ते शृण्वतु नास्माकं प्रयोजनम्। श्रवणेनैव मंगलं न तु प्रयोजनेन। श्रिया मदो येषां तेषु राजसु कविभिर्विस्तारितम्। ये भुवि गृणन्ति ते भूरिदा महाप्राणिघातकाः ‘दो–अवखण्डने’ अतोऽधुना त्वदाशया क्षणं जिजीविषूणां तेनालमिति वदन्ति तद्विगीत मिवाभात्यस्माकम्। यद्वा –भूरिदा हेमदाः–हेमदानस्याखिलाभीष्टप्रदत्वात्तव कथामृतवर्णनस्यापि तेनैव जातत्वात्। यथामृतं क्षुद्रोगादिहरं

बलपुष्ट्यादिकरं मधुरमन्यविषयविस्मारकं तथा हरिकथापि संसाररोगहरा मधुरा सर्वविषयविस्मारिका, रोगादिनाशकत्वेन बलपुष्टिकर्यपीति ॥ त्वत्कर्तृककथाया माधुर्यमहिमा कैर्वाच्यः, त्वत्संबंधिकथाऽन्यवक्तृकाप्यमृतद्वयास्वाद्वी श्रेष्ठा चेत्याहुः—तव कथैवामृतं केन साधर्म्यण तप्तान्महारोगादितप्तान्संसारतप्तांश्च जीवयतीति स्वर्गीयान्मोक्षरूपाच्चामृतादाधिक्यं च । कविभिः ध्रुवप्रह्लादादिभिर्वा 'या निर्वृतिस्तनुभृताम्' इत्याद्यैरीडितम् । अन्यदमृतद्वयम् "सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्किं त्वंतका सिलुलितात्पततां विमानात्" इत्याद्युक्तिभिर्न रोचितम् । कल्मषाणि प्रारब्धपर्यन्तानि पापानि अपहन्ति, स्वर्गीयामृत तानि न हन्ति कामादिवर्द्धकत्वात्प्रत्युत तान्युत्पादयत्वेव, मोक्षामृतमपि प्रारब्धपापं हन्ति । श्रवणे नैव स्वाद्यमानत्वादभीष्टसाधकत्वाच्च मंगलम्, तद्वयं तु नैवंभूतम् । श्रीमत् प्रेमर्यन्तसंपत्तिप्रदम् । आततम् प्रतिक्षणमेव वक्तृभिर्विस्तृतं, तदुभयं तु न तथा । ये गृणन्ति त एव भूरि बहुतरं ददति तेभ्यः सर्वस्वं ददाना अपि तत्परिशोधयितुं न क्षमन्त इति भावः । यद्वा—तव शीस्तु तदैव मधुरा यदि त्वद्दर्शनसहिता स्यादन्यथा तु महानर्थकरीत्याहुः —तव कथैव मृतं मरणकारणम् । कुतः—तप्तं जीवनं यतः । तप्ततैलादौ जलमिवेति श्लेषः । ननु तर्हि कथं पुराणादिषु श्लाध्यते तत्राहुः-कविभिर्व्यासादिभिरीडितम् । कवीनां वर्णनमात्रस्वभावेन तस्यापि वर्णनादिति भावः । कल्मषापहमिति— दुःखभोगेन प्राचीनं कल्मषं नश्यत्येवेति भावः । लोककर्तृकश्रवणेनैव मंगलं स्वस्त्ययनमविनाशो यस्य तत् । यदि जनाः सुधियस्तत्परिणामं दुःखं विचार्य न तत् श्रोष्यन्ति तदा तदपि नंक्ष्यत्येवेति भावः । श्रीमदर्धनमदान्धैर्दुजनैरेव लोका म्रियन्तामित्यभिलब्धधनव्ययेनापि आततम् । देशेदेशे ग्रामेग्रामे पुराणवाचकान्संस्थाप्य विस्तारितम् । अत एव भूरि ये गृणन्ति ते भूरिदाः । भूरीन् श्रोतृलोकान् द्यन्ति खण्डयन्ति मारयन्ति तस्मात्ते कथाजालं वितत्य सौम्या इवोपविष्टा मनुष्यमारकाद्व्याधादपि अधिका दूरत एव रुधीभिरुपेक्ष्या एवेति भावः । वक्ष्यति च 'यदनुचरितलीलाः' इत्यादि । वस्तुतः कथायाः कथकस्य च सर्वोत्कर्षव्यंजिकेयं व्याजस्तुतिः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ कथं तर्हि जीवथेत्याशङ्क्य प्रेममयस्वानुभवप्रमाणनिर्णीततत्कथामहिमवर्णनेन तत्र कारणमाहुः । तवेति । कथैवामृतम् अमृतवत् स्वतः फलं फलान्तरसाधनञ्च । तत्तद्रूपत्वं दर्शयन्ति तप्तान् त्वद्विरहतापखिन्नान् किमुत संसारतापखिन्नान् जीवयति मृत्युपर्यन्तदुर्दशातो रक्षतीति तत् । पूर्वेषां जीवनरूपञ्चेति तथा वन्द्यमानचरणः पथि वृद्धैरित्यादेः । शक्रशर्वपरमेष्ठिपुरोगा कश्मलं ययुरित्यादेश्च दर्शनात् । कविभिर्ब्रह्माशिवचतुःसनादिभिरात्मारामैः किमुतान्यैरीडितम् । वर्त्तमाने क्तः । अस्मद्व्रजवासिभिर्यद्वण्यते तदेवानूद्य श्लाघ्यते नतु स्वयं वर्णयितुं शक्यत इत्यर्थः । रहस्याज्ञानात् । तथा कल्मषं सर्वरोचकत्वादि प्रभावमयत्वात् स्वान्तरायमपि किमुत संसारहेतुपुण्यपापरूपं हन्तीति तत् । एवमेवं भूतमपि श्रवणमात्रेणैव मङ्गलं तत्तत्सर्वार्थसाधकं किमुतार्थविचारेण । अत एव श्रीमत् सर्वत उत्कर्षयुक्तम् । आततं सर्वव्यापकञ्चेति प्रसिद्धामृताद्वैलक्षण्यमत्युक्तम् । तदीदृशं कथामृतं भुवि यत्र कुत्रापि ये गृणन्ति कथनरूपेण ददति ते भूरिदाः सर्वेभ्योऽपि सर्वार्थप्रदातारः । किमुत गोकुले तत्राप्यस्मासु तु त्वद्विरहतप्तासुजीवनमेव ददतीति भावः । ते चान्यत्र पूर्वोक्ता ब्रह्मादयः व्रजे सर्व एवास्मासु तु विशेषतः सख्य इति ज्ञेयम् । यद्वा । अहो परमव्यग्रा यावदाप्यायेयं तावत् क्षणं मिथो मद्वार्त्तया कालो नीयतामिति चेत्तत्र सत्रासमाहुः । कथैव मृतं मृतिः कथैव मारयतीत्यर्थः । कुतः । तप्तं जीवनं यस्मात् । तप्ते तैलादौ जळमिवेति श्लेषः । कविभिस्तावकैरेव कल्मषापहं यथा स्यात्तथेडितं तन्नाशकतया श्लाघितमित्यर्थः । किञ्च श्रवणेनैव मङ्गलं मङ्गलमिति श्रूयते नत्वनुभूयते इत्यर्थः । श्रीमदाततं श्रिया सौन्दर्यादिना तत्कृतेन मदेन निजजनानादरादिलक्षणेन चाततं चर्वतः प्रसृतम् । अतो ये तद्गृणन्ति ते भूरिदा महाप्राणाघातका इत्यर्थः । एषा परमार्त्त्युक्तिरेव । दो अवखण्डने । अतोऽधुना त्वदाशया क्षणं जिजीविषूणां तेनालमिति भावः ॥ ९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विरहादितप्तान् जनान् जीवयतीति तथा तत्. न च तस्य श्रवणार्थं प्रयासोऽपेक्ष्येतेत्याहुः—कविभिः । पूर्वैराधुनिकैश्च ईडितं स्वत एव संश्लाघ्य वर्णितमित्यर्थः । न च काम क्रोधादिना पापेन वा तदर्थानुभवान्न फलंसिध्येदिति वक्तव्यम्, तस्यैव तन्निरसनस्वभावत्वादित्याहुः—कल्मयेति । अतोऽर्थानुभवः स्वत एव भवतीति भावः । न च तदपेक्षापीत्याहुः—श्रवणेति । यद्वा, न केवलं तप्तजीवनत्वेन सद्योदुःखहरमात्रं किन्तु कविभिः सर्व्वार्थप्रापकत्वेन स्तुतम् । कथम् ? तदेव प्रपञ्चयन्ति—कल्मषापहं संसारध्वंसकमित्यर्थः । संसारस्य कल्मषैकमूलत्वात् सर्व्वदुःखध्वंसकं वा; किञ्च, श्रवणेति, एवमुभयथा दुःखदोषहरत्वेन मंगलत्वेन च सर्व्वार्थसाधनत्वमुक्तम्, स्वतः परमफलत्वञ्चाहुः—श्रीमदिति । एवमेषां यथोत्तरं श्रेष्ठयम् । अतः कथैवामृतं यथा तस्य क्षुत्वङ्रोगादिहरत्वाद् बलपुष्ट्यादिकरत्वाच्च साधनत्वम्, मधुररसमयत्वात् साध्यत्वं च तथा कथाया अपीत्यर्थः । आततं यथा स्यात् विस्तारेणेत्यर्थः; यद्वा, व्यापकमित्यर्थः । इति देवभोग्याद्विशेष उक्तः, तस्य व्यापकत्वाभावात् । अन्यत्तैर्व्याख्यातम् । यद्वा, अत्राधुना तादृशजनाभावादस्माकञ्च विरहार्त्तिवैवश्येन तत्राशक्तेर्वयं मृता एवेति भावः । अथवा, अरे परमव्यग्राः ! यावदाप्याययेयं तावत् क्षण मिथो मद्वार्त्तया कालो नीयतामिति चेत्तत्र सत्रामाहुः—कथैव मृतं मृतिर्मरणं कार्य्यकारणयोरत्यन्ताभेदविवक्ष-

योपचारः । कुतः ? तप्तं जीवनं यस्मात्, अतो ये तद्गृणन्ति उच्चारयन्ति ते भूरिदाः; 'दो अवखण्डने' महाप्राणघातका इत्यर्थः। एषा परमप्रेमार्त्त्युक्तिरेव । ननु तर्हि कथं पुराणादिषु प्रतिपाद्यते ? तत्राहुः—कविभिर्व्यासादिभिरीडितं कवीनां वर्णनमात्रस्वभावेन तस्यापि वर्णनादिति भावः । पापनाशनमात्रम् । किञ्च, श्रवणेनैव मंगलं सुखकरं न तु प्रयोजनेन; यद्वा, कविभिरीडितमित्यत्र हेतुः—कल्मषेत्यादिपदद्वयम् । पापहरत्वेन श्रवणयोः सुखदत्वेन च तैरीभ्यत इत्यर्थः । अतएव श्रिया मदो येषां राजादीनां तेष्वाततं कविभिरेव विस्तृतम्; किंवा श्रीमदैर्जनैर्नाट्यगीतादिभिर्द्वारा आततम्, अतोऽधुना त्वदाशया क्षणं जिजीविषूणां तेनालमिति भावः ॥ ९ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तव कथामृतं सदसि ये गृणन्ति ते भूरिदाःमहाधनप्रदाः ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्चास्माकं त्वद्विरहेण प्राप्तप्रायमेव मरणं किं तु त्वत्कथामृतं मिथः ये पिबन्ति तैर्वञ्चितमित्यभिप्रत्याहुः । तवे त तवकथैवामृतं तत्र हेतुः तस्तानां तापत्रयतप्तानां जीवनं प्रसिद्धामृतादुत्कृष्टत्वमाहुः । कविभिर्ब्रह्मादिभिरीडितं स्तुतं देवभोग्यममृतन्तु तैस्तुच्छीकृतमिति भावः । किञ्च कल्मषापहं श्रोतृणां वदतां स्मरतां च पापहरं प्रसिद्धन्तु नैवमिति भावः किञ्च श्रवणमात्रेणैव मङ्गलं निःश्रेयसरूपं यस्मात् प्र तथाभूतं प्रसिद्धन्तु पुनः संसारनिमित्तमितिभावः । श्रीमच्छान्त्यादिगुणावहं प्रसिद्धन्तु मादकमिति भावः। एवभूतं त्वत्कथामृतमाततं विस्तृतं यथास्यात् भुवि ये गृणन्ति निरूपयन्ति ते जना भूरिदाः बहुवदान्या जीवित ददतीत्यर्थः । पूर्वजन्मसु बहुदत्तवन्तः सुकृतिन इति यावदिति वा ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तप्तान् जीवयतीति तप्तजीवनं श्रवणमात्रेण मङ्गलं श्रीमत्समृद्धिमत् आततं विस्तृतं भुवि ये जनाः तव कथामृतं गृणन्ति पानादिना ते भूरि बहुलं दुःखं द्यन्ति खण्डयन्तीति भूरीणि हिरण्यादीनि ददतीति वा भूरि स्वर्णं जातरूपं हिरण्यं राः कल्याणं हेमरुक्मं सुवर्णमिति भवन्तीति शेषः ॥ ९

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

नन्वेवं चेत्तथैव करिष्यामि, क्षणं विलम्बः क्रियतामिति चेत्तव कथायां प्रतीतिर्नास्तीत्याहुः—तव कथामृतमित्यादि। तव कथैवामृतं कथामृतम्, न तु कार्यम्, कथया यथा तर्पयसि, न तथा कार्येणेत्यर्थः । अत एव तप्तजीवनं तप्तं जीवनं यस्मात्, कार्यासम्भवात्तथा कथया जीवनं तप्तमेव भवति, अतः कविभिः शास्त्रकृद्भिरेवेडितम्, न तु प्रेमज्ञैः । अतः कल्मषापहम्, न तु हृत्तापहनम् । अतः श्रवणमङ्गलम्, न तु चेतः सुखदम्, यतः श्रीमदेनैश्वर्यमदेन स्वाच्छन्द्येनाततम् अतस्तां कथां ये भुवि गृणन्ति, ते भूरिदा भूरिच्छेदकाः दोऽव खण्डते इत्याक्षेपः । अन्तस्तु तव कथा तप्तजीवनं कविभिः स्तुतं कल्मषापहम्, इत्यादि स्तुत्याऽप्रस्तुतप्रशंसा ॥ ९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तव कथामृतमित्यादि । तव कथैवामृतम्, अमृतशब्दोऽत्र विपरीतलक्षणया विष-परः, यथा (साहित्यदर्पणः २।११) ''उपकृतं बहु तत्र'' इत्यादि, यतस्तप्तं जीवनं यस्मात्, कविभिः शीघ्रकृद्भिरेवेडितं स्तुतम्, न तु प्रेमज्ञैः । अतः कल्मषापहम्, न तु विरहाग्निहरम् । श्रवण-मङ्गलं श्रवण एव मङ्गलं, न तु सुखदम् न त्वनुभवे । श्रीमदेन ऐश्वर्यजनितस्वाच्छन्द्येनाततम्, अमृतपक्षेऽप्येवमेव अन्यामृत-विलक्षणम्, अतस्तां कथां मे गृणन्ति, ते भूरिदा 'दोऽवखण्डने' इत्यस्माद् भूरिच्छेदका इत्याक्षेपो वा, अन्योऽर्थो हि स्फुट एव ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत् कर्तृकथायाः माधुर्यमहिमा कैर्वाच्यः । त्वत् सम्बन्धि कथा अन्यवक्तृकाप्यमृतद्वयात् स्वाद्वी श्रेष्ठा चेत्याहुः । तव कथैव अमृतं केन साधर्म्येण तप्तान् महारोगादिसन्तप्तान् संसारतप्तांश्च जीवयतीति तत्त्वद्विरहतप्तांश्च जीवयतीति स्वर्गीयान्मोक्षरूपाच्चामृतादाधिक्यञ्च कविभिर्ध्रुवप्रह्लादादिभिः या निर्वृतिस्तनुभृतामित्यादिपद्यैरीडितम् अन्यदमृतद्वयं, सा ब्रह्मणि स्वमहिमन्यपि नाथ ! माभूत् किन्त्वन्तकासि—लुलितात् पततां विमानादित्याद्युक्तिभिर्न रोचितम् । कल्मषाणि प्रारब्धपर्यन्तानि पापानि अपहन्ति। स्वर्गीयामृतन्तु तानि न हन्ति कामादिवर्द्धकत्वात् प्रत्युत तान्युत्पादयत्येव । मोक्षामृतमपि प्रारब्धपापं न हन्ति श्रवणेनैव स्वाद्यमानत्वादभीष्टसाधकत्वाच्च मङ्गलं तद्द्वयन्तु नैवम्भूतम् । श्रीमत् प्रेमपर्यन्तसम्पत्तिप्रदम् आततं प्रतिक्षणमेव वक्तृभिर्विस्तृतं तदुभयन्तु न तथा ये गृणन्ति कीर्त्तयन्ति ते एव भूरि बहुतरं ददति तेभ्यः सर्वस्वं ददाना अपि तत् परिशोधयितुं न क्षमन्त इति भावः। यद्वा । तव गीस्तदैव मधुरा यदि त्वद्दर्शनसहिता स्यात् अन्यथा तु महानर्थकरीत्याहुः । तव कथैव मृतं मरणकारणमित्यर्थः । कुतः

तप्तं जीवनं यतः। तप्ततैलादौ जलमिवेति श्लेषः। ननु तर्हि कथं पुराणादिषु श्लाघ्यते तत्राहुः। कविभिर्व्यासादिभिरीडितं कवीनां वर्णनमात्रस्वभावेन तस्यापि वर्णनादिति भावः। कल्मषापहमिति दुःखभोगेन प्राचीनं कल्मषं नश्यत्येवेति भावः। लोककर्तृकश्रवणेनैव मङ्गळं स्वस्त्ययनमविनाशो यस्य तत् यदि जनाः सुधियस्तच्छ्रवणपरिणामं दुःखं विचार्य न तत् श्रोष्यन्ति तदा तदपि नङ्क्ष्यत्येवेति भावः। श्रीमदैर्धनमदान्धैर्दुर्जनैरेव लोका म्रियन्तामित्यभिलष्य धनव्ययेनापि आततं देशे देशे ग्रामे ग्रामे पुराणवाचकान् संस्थाप्य विस्तारितम्। अत एव भुवि ये गृणन्ति ते भूरिदाः भूरीन् श्रोतृलोकान् द्यन्ति खण्डयन्ति मारयन्ति तस्मात्त कथाजालं वितत्य सौम्या इवोपविष्टा मनुष्यमारकात् व्याधादप्यधिका दूरत एव सुधीभिरुपेक्ष्या एवेति भावः। यद्वक्ष्यते यदनुचरितलीलेत्यादि वस्तुतः कथायाः कथकस्य च सर्वोत्कर्षव्यञ्जिकेयं व्याजस्तुतिः॥ ९॥

श्रीरसिकाह्लादिनी–टीका

एवं प्रार्थनाचतुष्टयं दुर्लभं मत्वा तव कथामृतमेवाश्रियत इत्याहुः। विरहेऽस्माकं जीवनं नास्मद्यत्न साध्यं किन्तु त्वत् कथामृतसाध्यमिति निश्चतं तव यथाशक्तिस्तथा कथाया अपि शक्तिरिति कथोत्कर्षमाहुः। कीदृशं कथामृतं तप्तजीवनं कामादिजनकतापतप्तान् जीवयतीति। विषयिनः कामादिविषयवासनाशून्यान् कृत्वा स्वनिष्ठान् करोति। कथामृतस्यायमेव स्वभावः। कविभिरीडितं कविभिः ज्ञाततत्वभिमुक्तैरित्यर्थः। तैः स्वसेव्यत्वेनेडितं स्तुक्तं भाष्यकृद्भिः "मुमुक्षुसेव्यत्वमाहुः"। कल्मषापहं अविद्यारूपं संसारभूतं कल्मषं पापं अपहन्ति तथा तत एव मुक्त-मुमुक्षु विषयिसेव्यत्वमुक्त्वा एतत् त्रिपक्षव्यतिरिक्तानां शुद्धभक्तानां सेव्यत्वमाहुः श्रवणमङ्गलं नान्यत्तेषां किंचित्साध्यमस्तीति भावः। स्वतः परमपुरुषार्थत्वमाहुः। श्रीमत् भक्तिलक्ष्मीसम्पादकमित्यर्थः। आततं वैकुण्ठपर्यन्तं व्याप्तमित्यर्थः। वैकुण्ठेऽपि कथामृतस्यैव सेव्यत्वश्रवणात् भुवीति अलभ्यलाभोक्तिः ये ये गृणन्ति कथयन्ति ते जनाः भूरिदातारः सर्वस्वं ददातीति। यद्वा प्रसद्धदेवभोग्यादमृतादुत्कर्षमाहुः। कथामृतं तप्तजीवनमित्यादि। आचार्यैः व्याकृतत्वात्। यद्वा विरहिणीनामस्माकं कथामृतं वैपरीत्येन स्फुरति तथाहुः। चन्द्रचन्दनादीनां सर्वजनानप्रतीत्या (प्रत्या) शैत्यहेतुभूतानां अस्मदनु भवेत्। तापहेतुत्वस्फूर्तेः। तथा कथामृतस्यान्येषां तापनिवर्तकत्वप्रतीतावपि नास्माकं तथात्वं प्रतीतेः। कथामृतमन्येषां मरणनिवर्कत्तकमपि अस्माकं कथैव मृतं मरणं तच्छ्रवणे मरणस्य सन्निहतत्वात्। तप्तजीवनं अन्येषां संसारतापतप्तानां जीवनं आप्यायनकरं अस्माकं तद्वैपरीत्येन तप्तेष्वस्मच्चित्तेषु जीवन जलमिव निविप्तं यथा तप्ततैले निक्षिप्त जलं ज्वालाधिक्यं करोति तथाऽस्मच्चित्तेषु ज्वालाऽऽधिक्ये हेतुः कथामृतमेव पुनः कीदृक् कविभिरीडितं स्तुतं असद्गुणारोपः स्तुतिः। कवीनां नारदादीनां तथात्वेन प्रतीतेः। मधुररसानधिकारात् तेषां न भोगो न च विप्रलम्भो अतस्तैरीडितं न त्वस्मिन्मादृशैरिति। अस्मत्सज्जानतीनां तथात्वं प्रतीतेः, कल्मषापहं प्रायश्चित्ताधिकारिणां पापहरत्वेन प्रतीतानां पापस्य फलं दुःखं कथामृतसेवनेऽपि नास्माकं दुःखनिवृत्तिर्दृश्यतेऽतो वयं नाधिकारिण्य इत्यर्थः। यद्वा "त्यागेनेके अमृतत्वमानशुरि" ति श्रुतिबलात् पतिपुत्रादिसङ्गपरित्यागेनागतानां नास्मकं पापसम्बन्धगन्धोऽपि। अतः प्रायश्चित्तानधिकृता। प्रायश्चित्तत्वेन न श्रोस्याम इति भावः। श्रवणमङ्गलं श्रवणमात्रेण मङ्गलं, अर्थबादरूपत्वेन सुखजनकम्। परिणामतोऽमङ्गलमेव दुःखजनकत्वात्। कथामृतस्य स्वरूपतश्चेत् सुखात्मकं स्यात् पुत्रजन्मश्रवणवत् तर्हि अस्मानेव प्रतीतमभविष्यदिति। अस्माकं तद्वैपरीत्येन सौभाग्यहानिदर्शनादिः। यद्वा श्रीमद्भिः लक्ष्मीसम्पन्नैराततं विसृतम् वयं तु निष्किंचना अतो दशम्यवस्थासम्भवात्प्रागेव शुश्रूषयाऽलमिति। एवंभूतं कथामृतं भुवि वृन्दाबनभूमौ आततं गीतलापादिभिः विसृतं यथा भवति तथा ये गृणन्ति कथयन्ति ते जना भूरिदा बहुदातारः नतु पात्रापात्रविचारवन्तः यत्किंचिद्ददातीत्यर्थः। यद्वा अभूरिदा जना अभूरिदाश्च ते अजनाश्च अभूरिदा अल्पदा उत्पत्तिरहिता भवन्त्विति साङ्गलिभञ्जशाप इति भावः॥ ९॥

विशुद्धरसदीपिका

नन्वेवं गिरैव यदि मोहितास्तर्हि कथमेतावन्तं कालं जीवयेत्याशङ्क्य प्रेममयस्वानुभवप्रमाणनिर्णीतं तत् कथामहिमानं कारणमाहुः तवेति। पूर्वाभ्यस्ताटस्थ्येनैताः सख्यार्भिमान्यस्तच्चरितामृतैकजीवनास्तत्सुखसुखिन्य इति स्वाभिप्रायमावेदयन्ति कथा तव रूपगुणलीलावर्णनात्मको वाक्यसंदर्भः सैवामृतमिव स्वतः फलं फलान्तरसाधनं परमास्वादनीयं मृत्युहरं चेति अथवा ननु तदेकजीवनानां मीनादीनममृताद्वियुक्तानां जीवितमसम्भावितमिति चेत्सत्यं तव कथामृतं पिबद्भिर्यथा कथंचिज्जीवितमिति तत्प्रशंसन्ति। अत्रामृतं जलमेवेति तत्तदेव दर्शयन्ति तप्तान् त्वद्विरहतापखिन्नान् जीवयतीति तप्तजीवनं कविभिर्ब्रह्मादिभिः पीतामृतैरपीडितं स्तुतं वत्सहरणादौ ज्ञाने प्रयासमुदपास्येत्यादिना मृडविरञ्चिसभासु गीता इति श्रीरुक्मिणीवाक्येन चेदं कल्मषं स्वान्तरायमपि किमुतान्यदप्यपहन्तीति तथा तत् एवं भूतमपि श्रवणमात्रेणैव मङ्गळं सर्वार्थसाधकं किमुतार्थविचारेणेति श्रीमत् सर्वत तत्कृष्ट श्लेषेण श्रीरानन्दात्मिका श्रीराधिका तया तल्लीळया च नित्ययुक्तमित्यर्थः। तत एव च तद्गुणशालीति भावः। ततश्चाततं सर्वतो विस्तृततरं यद्वा प्रसिद्धामृताद्वैलक्षण्यमाहुः। तवेति। चतुरशिरोमणेः परमानन्दरूपस्य तत्तु सामुद्रं कथामृतमिति विशिष्टं तत्त्वामृतमेव तप्तजीवनं तत्तु देहान्तरलभ्यत्वान्न तथेति। कविभिरीडितं तत्तु सत्कविरसनासूर्यनिस्तुषतरशब्दशालिपाकेन तृप्तो दयिताधरमपि

नाद्रियते का सुधा दासीति तदनावृतं कल्मषापहं तत्तु हिंसाप्रायकर्म्मसाध्यत्वात्तद्विपरीतं श्रवणमङ्गलं तत्तु तद्विरुद्धं तन्माहात्म्यश्रवणेन तदाकाङ्क्षाया मरणस्याभिलषितत्वात् श्रीमत् सुखकरं सुखमत्र रसः रसं ह्येवायं लब्ध्वानन्दी भवतीति श्रुतेः ततश्च द्वादशरसात्मकं किंवा शुद्धप्रेमैकरसं तत्तु षड्रसात्मकं तत्रापि रसनेन्द्रियास्वाद्यं तत्त्वात्मसुखरूपमिति आततं सर्वत्र लभ्यं तत्तु देशादिनिरुद्धम् ईदृशं कथामृतं भुवि यत्र कुत्रापि ये गृणन्ति ते भूरिदाः ॥ ९ ॥

श्रीरामनारायणकृता भावभावविभाविका

एवमन्तिमदशापन्नाश्चेत्कथमद्यावधिजीवनं भाषणञ्च तत्र प्रेमोद्धर्षोत्स्वानुभवप्रमाणसिद्धं तथा साङ्ख्यश्रुतिरूपतया सर्वश्रुतिसिद्धान्तरहस्य निमित्तमाहुः। तव कथामृतमिति। यद्वा सर्वमेव तत्प्रार्थितमनुरतेभ्यो देयं नत्वननुरतेभ्यो भवत्यश्चानुरतिं निरूपयन्त्योऽपि नानुरता यतो लब्धमदङ्गसङ्गसौख्या अपि मद्वियोगेऽपि जीवथेति शङ्कापनोदायाद्यावधि स्वजीवननिमित्तमाहुः तव कथामृतमिति। तव विरहे असम्भावितमप्यस्मज्जीवनं परन्तु तत् कथैव यतोऽमृतम् अमृतरसात्मकतया फळरूपा मरणप्रतिरूपत्वेन सर्वथा पुरुषार्थरूपाणि नास्मत्सु खायापि तु यथा मृतमयोऽपि चन्द्रमण्डलः प्रलयार्कायते तथादुःखितानां मरणप्रतिबन्धेनैव वैरिणी तदेवाहुः। तप्तजीवनमिति आध्यात्मिकादितापत्रयवतां तत्तापापनोदपूर्वकजीवनं विस्मरणनष्टप्रायस्वरूपानन्दस्यावणरागवाधेन, पुनराविर्भावकमपि नामास्माकं तथा किन्तु त्वद्विरहकामचिन्ताग्नितापापयनशक्तत्वेऽपि त्वद्भक्तपक्षपातकरुणरसिकत्वादिस्मारकतयाश्वासेन तप्तानामपि जीवनहेतुतया मरणेन सम्भावितापनिवृत्तेः प्रतिरोधकतया दुःखहेतुरेव तथास्मद्गीतं तव कथामृतं कविभिस्तव गुणगणार्णवगानरसिकैः स्वकल्मषहानिर्दृष्टा—

यासां हरिकथोद्गीतं पुनाति भुवनत्रयम्।

इत्यादिना कल्मषापहमितीडितमपि नस्तु त्वद्वियोगेऽपि रूपमाधुर्य्यादिस्मारकतया कामग्लानिरूपकल्मषमपहन्ति नाशयतीति तथा तादृग्रूपतामेति यद्वा हन हिंसागत्योरित्यस्मात् कल्मषं गमयति प्रापयतीति तथा भवति किञ्चान्यानि कल्मषापहानि तपः प्रायश्चित्तादिरूपाणि कर्माणि यदिन्द्रियानुष्ठेयानि तच्छोषकत्वात्स्वरूपत क्लेशात्मकत्वान्मरणे स्वफलविधायकत्वाद्मङ्गलरूपाणि भवन्ति तव कथामृतन्तु मङ्गलश्रवणयोः कर्णयोः मङ्गलं सुखप्रदं तदुक्तं श्रोत्रमनोभिरामादिति तथा श्रवणमेव मङ्गलं सुखप्रदं तदुक्तं श्रोत्रमनोभिरामादिति तथा श्रवणमेव मङ्गलं यस्येति तथा तदप्युक्तम्—

तदेव रम्यं रुचिरं नवं नवं तदेवं शश्वन्मनसो महोदयम्। तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकगुणोऽनुगीयते ॥

तथा—

त्वत्कथामृतपथोधौ विहरन्तो महामुदः। कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपममिति ॥

तथा श्रवणमात्रेणैव नतु श्रवणोत्तरानुष्ठानदेहत्यागादिफलाविर्भावादिप्रतिबन्धनिरासापेक्षं लोके मङ्गलत्वेन प्रसिद्धानां विषयसुखात्मकमनोवृत्तिगतस्वरूपसुखप्रतिबिम्बानां विम्वभूतम् एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति रसो वै स रसं ह्येवायं लब्ध्वानन्दी भवतीत्यादिश्रुति सिद्धं मङ्गलं परमानन्दो यस्मात्तथभूतमपि नस्तु श्रवणमात्रे वर्णस्वरमाधुर्य्येण मङ्गलं भवति हृद्गतन्तु क्षोभकमेव तथा श्रीमत नित्यसंयोगे मतुप् विधानादन्येषा नित्य श्रीयुक्तमपि श्रियो नो नित्यसपत्नीत्वेन तन्नित्यसम्बन्धत्वात्सपत्नमेव एवञ्च द्रवतीभिर्हेयमिति चेत्तत्राहुः। आततं सुरनरादिसर्वत्रलोकेषु सर्वसुखप्रदातृतया व्याप्तमपि नस्तु कायमनोवचःस्वासमन्तात्तत्त्वेनत्यक्तुमशक्यं तथा चेदृक्कथामृतं सुरैर्लब्धामृतपानैरपि प्राप्यं तदीयामृतस्य मर्त्यापेक्षयामरत्वापादकत्वादमृतत्वेऽपि कल्पान्ते देवनाशश्रवणान्नामृतत्वं कथामृतस्य तु—

मर्त्यो मृत्युव्यालभीतः पलायन् लोकान्सर्वान्निर्भं नाध्यगच्छत्।
त्वत्पादाब्ज प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैतीत्यादिना ॥

सर्वथामृतत्वं तदीयाभृतस्य संसारानलदन्दह्यमानानां सुराणां तापमनपहृत्य तप्तानामेव जीवनत्वमस्य तु भवतापमपहृत्यातिमृत्युस्वरूपाविर्भावकत्वं तदीयामृतस्य कविभिर्विरागबोधवद्भिर्गर्हितत्वमस्य तु तैरीडितत्वं तस्य भोगेन पूर्वपुण्यापहर्तृत्वमस्य तु कल्मषापहत्वं तस्य तु पाने एव क्षुद्रसुखप्रदत्वेऽपि श्रवणेऽभिलाषजनकत्वेन तापोद्भवकत्वमस्यतु श्रवणमात्रेण मङ्गलत्वं तस्य भगवता स्वयं श्रियं गृहीत्वाऽमृतमात्रदानेन श्रीवियोगान्निः श्रीकत्वमस्य तु नित्यश्रीतत्पतिसम्बन्धवत्त्वान्नित्यश्रीमत्त्वं तस्य तु स्वर्गैककोणे निपतितत्वमस्य तु आततत्वमिति तदीयामृतातिविलक्षणत्वात् तादृक्कथामृतं ये जना भूरिदा पूर्वबहुपुण्यवन्तस्ते एव भुवि गृणन्ति ते जनाः सफलजनिमन्तो भूरिदा बहुपुण्यवन्तो ज्ञेया ये इति वा यद्वा ये जना गृणन्ति ते एव भूरिदा बहुदातारो अक्षयघनदातृत्वात् न घनदास्तद्दत्तधनस्य क्षणभङ्गुरत्वान्नानानर्थरूपत्वात्—

जीवाभयप्रदानस्य कलां नार्हन्ति षोडशीम्।

इत्यादि वचनाच्च यद्वा ते भूरिदाश्च तथा अजना भाविजन्मप्राप्त्या नतु तद्द्रानफळभोगाय पुनर्जन्मवन्तोऽजनभगवत्स्वरूपा वा—

हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः। पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युत ॥

इत्यादि वचनात् लब्धत्वदीयाङ्गसङ्गादि सौख्यानां पुनस्तदभिलाषविकलानामस्माकं तु तत्कथामृतं भुवि अस्मत्सन्निधाने ये गोपदारा जना गृणन्ति ते तप्तानां जीवनमात्रहेतुश्रवणसुखमात्रप्रदत्वेन बह्वभिलाषिणामभूरिदा एव यद्वा तव कथामृतं पापिनां कल्मषापहमतिधर्मप्रदञ्च आविर्भूतपापफलतापतप्तानामार्तानां तप्तानां जीवनं जलं यथा तथा तापापहं तथा श्रवणमात्रेण मङ्गलतया सर्वकामसुखकं श्रीमत्तयार्थानामर्थदं जिज्ञासूनामपि मालिन्यहेतुकल्मषापहं भवतापोपशमेन स्वरूपसुखदम् औत्सुक्यबोधकं श्रवणे मङ्गलं सर्वविघ्नापहं बोध्यं श्रीमत् आततं पूर्णसुखममृतरूपमेवेति सर्वसुखत्वेन कविभिरीडितं यद्वा कविभिर्विद्वद्भिस्तु सर्वाभिलाषशून्यैर्विद्वन्मनोहरतत्स्वाभाव्यात्प्रयोजनाभावेऽपि निरन्तरमीडितं निवृत्ततर्षैरुपगीयमानात् कुर्वन्त्यहैतुकीं भक्तिमित्थं भूतगुणो हरिरित्यादि वचनात् तथासर्वसुखदमपि प्रेमिणां त्वद्वियुक्तानामस्माकमेव क्षोभकमित्यति चित्रं यद्वा तव कथामृतमपि त्वमिव षड्गुणाश्रयम् आततमित्यैश्वर्य्यस्य कथनं कल्मषापहमित्यनेनादृष्टकल्मषनिवर्तकतया धर्मस्य दृष्टकल्मषात्मकरागादिनिवर्तकतया वैराग्यस्य कविभिरीडितमित्यनेन यशसः श्रवणमङ्गलश्रीमच्छब्दाभ्यां प्रियः तप्तजीवनामृतशब्दाभ्यां सर्वानर्थोपशमकस्वरूपानन्दाविर्भावलक्षणामृताभिधेयमोक्षाभिव्यञ्जकज्ञानस्य निर्देशस्तथा च त्वमिव भगवन्नति प्रिय त्वं विरहेण खेदयसे तथैव नो मरणप्रतिबन्धेन खेदयतीति भावः। यद्वा यावन्मद्वियोगं कथामृतेनैव जीवध्वमित्यत आहुः। कथापि नामृतं किन्तु मृतमेव कथं तत्राहुः। तप्तजीवनं तप्ते सस्नेहपात्रे जीवनं जलं यथा बह्वग्न्युद्बोधकं तथा त्वद्विरहादितप्ते स्नेहपूर्णेऽस्मद्धृत्पात्रेकामचिन्ताग्न्युद्बोधकं तथा कविभिः कं सुखं वियन्तीति कवयः प्रेमसुखापहाः यद्वा वन्दिन इव श्रीमतस्तव काव्यादिस्तवेन स्वार्थसाधकास्तैरेवेडितं न तु प्रेमरसाभिज्ञैस्तद्दशापन्नैः तथा कल्मषापहं कल्मषफलदुःखोपभोगेन तन्निवर्तकं त्वद्वियोगे कामकल्मषोद्बोधेनापहन्तीति वा तथा श्रवणमात्रेण मङ्गलं भौमग्रहवदतिपोषकं तथा श्रियोऽसाधारणरूपगुणादेर्मद आततो यस्मिंस्तत् ये जना भुवि गृणन्ति ते भूरिदा "दोऽवखण्डने" इत्यस्मात् भूरिद्यन्ति अवखण्डयन्तीति तथा हृद्यन्तश्छेदका इति भावः ॥ ९ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु युष्माकं प्रेमातिरेकपरीक्षार्थमन्तर्हितोऽहं ततश्च सम्प्रति ज्ञातवानहं नाद्यापि भवत्यो मत्प्रेमातिरेकभूमिमारूढाः मद्विरहेऽपि जीवनधारणादित्याशङ्क्य नास्माकमपराधस्तव कथा त्वत्सदृशगुणास्मान्जीवयति वयं किं कुर्म इत्याशयेनाहुः। तवेति। तव कथामृतम्, अत एव तप्तानामस्माकं जीवनं तत्र प्रमाणमाहुः। कविभिस्तत्त्वदर्शिभिः सर्वज्ञैर्नारदादिभिरीडितम् स्तुतं एतेन प्रसिद्धामृतादुत्कृष्टत्वं सूचितं तद्धि विषयार्थिभिः स्तूयते नतु कविभिः किञ्च कल्मषापहं नहि प्रसिद्ध तत्कल्मषं निवर्त्तयति किन्तु निवृत्तकल्मषप्राप्यमिदन्तु तन्नाशार्थं साधनान्तरं नापेक्षत इतिभावः। किञ्च श्रवणमङ्गलं नित्यं तच्छ्रवणमात्रेण मङ्गलप्रदमिदं श्रवणमात्रेण मङ्गलरूपं किञ्च श्रीमत् प्रसिद्धन्तु तत् न श्रीप्रदं इदं मोक्षश्रीपर्य्यन्तसमस्तश्रीप्रदं यद्वा श्रीमत्सु शान्तं तत्तु मादकं तत्राप्याततं चतुर्दशभुवनेषु व्याप्तं प्रसिद्धन्तु तन्नैवं अतो ये भुवि गृणन्ति तेऽस्माकं भूरिदाः बहुप्रदाः परमोपकारकास्तस्मादेवंविधषड्गुणयुक्तेन भवत्तुल्येन जीवनहेतुत्वादतिरोहितत्वाच्च किञ्चिदधिकेन च तव कथाऽमृतेन त्वत्प्रीत्यर्थं जीवामोऽतो न वयं परीक्षायोग्याः किन्त्वनुकम्प्या इति भावः। अनभिज्ञापक्षे अहो महति सङ्कटे निमग्नाः मरणमप्यस्माकं न भवति किं कुर्म इत्याशयेनाहुः। तव कथालक्षणममृतं तप्तानां मरणयोग्यानामप्यस्माकं जीवनसाधनं जातं ननु कुतस्तल्लभ्यत इति चेत्तत्राहुः। कविभिः पूतनाघतादिकानां भवच्चरितानां गीतविशेषरचनायां कुशलैरीडितं स्तुतम् उत्तमश्लोकतादिचरितवत्कल्मषनिवर्तकं श्रवणमात्रेण मङ्गलकरञ्च यतः श्रीमत् शोभायुक्तं नचैवंविधं किञ्चित्स्थानमस्ति यत्र न सास्तीत्याहुः। आततम्व्याप्तं यतो ये भूरिदाः महान्तो दातारस्त उत्तमश्लोकाश्चापि भुवि सर्वस्यामपि भूमौ तत्र तत्र स्थिता गृणन्ति तस्मात्किमर्थं स्वविरहसन्तापं भाजयितुं स्वकथामृतेन जीवयसि यदि सर्वथा तवानागमननिश्चयः स्यात्तर्हि किञ्चिदस्मन्मरणोपायं रचयित्वा निश्चिन्ततया पलायस्वेति भावः। यद्वा ननु मत्कथया क्षणमात्रं जीवनं धार्य्यतामितिचेत्तत्राहुः। तव कथैव मृतिरुद्दीपनविधया मरणसाधनं यतस्तप्ते तैलादौ जलमिव अतः कविभिरननुभूतार्थकल्पनाकुशलैरेव कल्मषापहत्वेनेडितं स्तुतं दुःखभोगेन कल्मषनिवर्तकमिति वा तथा श्रवणमङ्गलमापातरम्यमतो व्यर्थमेव श्रीमदेन सौन्दर्य्याखर्वगर्वेण सर्वत्र प्रसृतं तस्मादस्मदग्रे ये गृणान्त ते भूरिदा महाघातुकाः "दोऽवखण्डन" इति स्मारणात् तस्मादलं तव कथयेति भावः। मानिनीपक्षे ननु अनेकगुणवत्त्वेन यत्कथामृतं कविभिरीडितं तस्मिन्नपि मयि भवत्यो नानुरज्जन्ते इत्याशङ्क्याहुः तव कथेति। कविभिरतिशयोक्तिपरैस्तप्तजीवनत्वादिरूपेणेडितमपि तव कथामृतं भूरिदा उदारा अस्मत्तुल्या जनाः श्रीमदेन ततं व्याप्तं गृणन्ति अतो नास्माभिस्त्वय्यनुरज्यत इति भावः। निवृत्तिपक्षे किञ्चित्तव चरित्रकथामृतपानेन केषामुद्धारो भविष्यतीत्याहुः। तव कथामृतं यतस्तप्तानां त्रिविधतापतप्तानां जीवनं तापनिवर्तकं पीता गाव इतिवत् तप्तानां ज्ञानिनां जीवनरूपं तप आलोचन इति स्मरणात् यतः कविभिर्ब्रह्मविद्भिः सनकादिभिरीडितं किञ्च तव कथामृतसेविनां न कृच्छ्रचान्द्रायणादिकर्म्मा-

पेक्षेत्याहुः। कल्मषाय अनिरयप्रदकथान्तरायभूतपापकर्मनिवर्त्तकं तत्रापि श्रवणमङ्गलं कृच्छ्रादिघोररूपत्वाच्छ्रवणेऽप्यमङ्गलं तत्रोदारचरितामृतन्तु श्रवणमात्रेणाप्यानन्दप्रदं नचापातरम्यमपि तु श्रीमत् वास्तवसमस्तोद्धारशोभालङ्कृतम् अत एवातते सर्वत्र व्याप्तं न त्वेकदेशि तस्माद्ये भुवि अधिकारभूमौ गृणन्ति ते भूरिदा महान्तो दातारः सर्वयज्ञानुष्ठानसर्वस्वदक्षिणादिफलवन्तः यद्वा ये जन्मान्तरेषु भूरिदास्त एवास्मिन् जन्मनि गृणन्ति यद्वा मुमुक्षूणामनुग्रहार्थं ये गृणन्ति ते भूरिदा जनाः अभयदानसमं दानं नास्तीत्युक्तत्वात् अभयदातृत्वेनातल्पदाः यद्वा ये गृणन्ति ते भूरिदाश्च ते अजनाः विष्णुस्वरूपाश्च हे भूरिदेति वा तस्माल्लीलाविग्रहमादायास्मदुद्धारो ळोकोद्धारश्चावश्यं सम्पाद्य इति भावः ॥ ९ ॥

रास-रहस्यम्

र० टी० तव कथामृतं त्वत्सम्बन्धिविचार एवामृतं सर्वपुरुषार्थरूपत्वात्, तप्तजीवनं तप्तानां जीवनं "तपो ब्रह्मेति व्यजानाद् ।" इति श्रुतेः आध्यात्मिकादितापानामप्रतिकारपूर्वकसहनमेव जीवनं जीव्यरूपेण ग्रहणं, यतः कविभिरीडितं कविभिः ब्रह्मविद्भिर्सनकादित्रिकालदर्शिभिरीड़ितं कथितं, कथम्भूतम्? कल्मषापहं कृच्छ्रचान्द्रायणाद्यनपेक्ष्य निरयप्रदपापनिवर्तकं, श्रवणमंगलं ब्रह्मविचारश्रवणमेव मंगलं कल्याणप्रदं, श्रीमदाततं ब्रह्मज्ञानमेव परमसम्पद् तेनाततं व्याप्त अर्थात् पूर्णज्ञानस्वरूपं भुवि संसारप्रपञ्चे ये मुमुक्षवः गृणन्ति ब्रह्मज्ञानसाधनरूपेण गृह्णन्ति, ते जनाः नराः, भूरिदाः जन्मान्तरेषु बहुदत्तवन्तः सुकृतिन इत्यर्थः ॥९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काश्चित् त्वद्विरहाग्निनास्माकं मरणं प्राप्तं यद्यपि तथापि त्वद्गुणश्रावयितृभिर्वञ्चितमित्याहुः। तवेति। तव कथारूपममृतं तप्तानां त्वद्विरहज्वालादग्धानां जीवनम् नतु प्रसिद्धममृतम् अत एव कविभिर्मुनिभिर्व्यासादिभिः क्रान्तदर्शिभिर्वेदैर्वा ईडितं स्तुतं देवभोग्यममृतं तु तैस्तुच्छीकृतमिति भावः। न केवलं तप्तजीवनमात्रमपि तु कल्मषापहं तव प्राप्तप्रतिबन्धकपापघ्नम् किञ्च श्रवणमात्रेण मङ्गलावहम् किञ्च श्रीमत् त्वद्विषयकज्ञानभक्त्युत्पादनरूपा श्रीर्विद्यते यस्मिन् तत् एवं भूतं त्वत्कथामृतमाततं यथा भवति तथा भुवि ये गृणन्ति निरूपयन्ति ते भूरिदाः बहुदातारः जीवननिष्कल्मषत्वद्विषयकज्ञानभक्त्यादीनां दातार इत्यर्थः ॥ ९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ये तव तप्तान्संसारतो जीवयतीति तप्तानां जीवनं येनेति वा। किञ्च कविभिरीडितं। कवयो गृणन्तीत्यादेः। कल्मषापहं श्रवणेन मङ्गलं यस्माच्छ्रवणयोर्मङ्गलं येनेति तच्छ्रीमत्समृद्धियुतमाततं विश्वविततं हे भूरिदं सकलपुरुषार्थप्रदं गृणन्ति ते। जनः पामर इति विश्वः। अजना अपामरा महान्त इति भावः। भूरि जातरूपं हिरण्यं राःकल्याण हेम रुक्मं सुवर्णमित्यभिधानं। भूरिर्ब्रह्माच्युतेशेषु। भूरिप्राज्यसुवर्णयोरिति विश्वः। तवाजना जीवन्मुक्ता इति वा ॥ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं पदार्थचतुष्टयं सम्प्रार्थ्य तद्दाने स्वयमेवहेतुमाशङ्क्यपरिहन्ति तव कथेति। ननु सर्वमिदं प्रार्थितं भक्तेभ्यो देयं नत्वभक्तेभ्यः अभक्तत्वञ्च विरहेऽपि जीवनादवसीयते भगवांस्तु सर्वनिरपेक्षः न तस्य भवज्जीवनेन कार्य्यं लक्ष्मीसदृश्यो यस्य कोटिशो दास्यः अतस्त्वयि धृतासव इत्यप्यसंगतं तस्माद्व्यर्थमेव प्रार्थनमित्यशंक्य परिहरन्ति नेदं जीवनमस्मत्कृतिसाध्यं किंतु तव कथाविरहेण प्राणानां गमने प्रतिबन्धं करोति कथायाः पुनः यथा तव सामर्थ्यं तथा सापि षड्गुणात्मिका मोक्षकायिनी परमानन्दरूपा च तदाहुः। तव कथा अमृतमिव अमृतं भगवद्रसात्मकं सर्वषां मरणादिनिवर्त्तकं यद्रूपं तदमृतशब्देनोच्यते अतो मोक्षदातृत्वं परमानन्दरूपता च सिद्धा। इदानीं षड्गुणान् निरूपयन्ति। तप्तजीवनमित्यादिषड्भिः पदैः तप्ता ये संसारे तेषां जीवनं यस्मात् अमृतं हि तापनिवर्त्तकं प्रसिद्धमेव वैराग्यं च भगवतो ज्ञानं वा सर्वतापनिवर्त्तकं यत्संस्कारयोग्यं तज्ज्ञानेन नश्यति यदयोग्यं तत्परित्यागेन अत एव स्मार्तैः संस्काराशक्तैः परित्याग एव बोध्यते अतो ज्ञानं वैराग्यं च तापनाशके भवतः आपाततन्तापनाशकत्वं जलादावपि वर्त्तत इति तदर्थमाहुः। कविभिरीडितमिति। कविभिः सर्वैरेव शब्दार्थरसिकैः ज्ञानिभिरीडितं ज्ञानं वैराग्यं वा आपाततः स्त्रीषु तथात्वमस्तीति तद्व्यावृत्त्यार्थमाहुः कल्मषापहमिति। कल्मषं पापमपहन्तीति ऐश्वर्य्यस्य समग्रस्य धर्मस्येत्यपि क्वचित्पाठः अलौकिकसाधकं च वीर्यं महत्तद्धर्मरूपमेव भवति धर्म्यं च पुनः कल्मषनिवर्त्तकं भवति पूर्वोक्तधर्मविशिष्टं च कथायाश्च तथात्वं सर्वत्र प्रसिद्धं प्रायश्चित्तादीनामप्यापाततस्तथात्वमस्तीति तद्व्यावृत्त्यर्थमाहुः। श्रवणमङ्गलमिति। तद्गोमयादिलेपनात्मकमुपवासात्मकं च स्वरूपतोऽप्यमङ्गल घोरात्मकत्वात् श्रवणेऽप्यमङ्गलम् इदन्तु उदारचरितं श्रुतमेवानन्दं जनयतीत्यनुभवसिद्धत्वात् श्रवणमङ्गलं कीर्तितुल्यता निरूपिता पुत्रजन्मादिश्रवणस्यापि किंचिद्धर्म्मसाम्यात् श्रवणमङ्गलत्वमाशङ्क्य तद्व्यावृत्त्यर्थमाहुः। श्रीमदिति तद्धनं व्ययसाधकं नतु धनसाधकं कथामृतं तु लक्ष्म्या अत्यपेक्षितत्वात् तद्युक्तं भवति तेन श्रोतुर्वक्तुश्च तत्सिद्धिः राज्यप्राप्तिश्रवणं तथा भवतीति तद्व्यावृत्त्यर्थमाहुः आततमिति। आ सर्वतः ततं व्याप्तं राज्यादिकं तु परिच्छिन्नं भगवत ऐश्वर्यं तु न तथा अन्तर्बहिः सर्वेषां सर्वथा व्याप्तमिति कथामृतं च पुनः सर्वलोकान् व्याप्य तिष्ठति स्वसामर्थ्यं सर्वत्रैव संपादयति तस्मात्

स्वरूपतो धर्मश्च भवत्कथेति तया कृत्वा जीवनं नतु स्वतः अनेनोत्कर्षोऽप्युक्तः त्वं कदाचिन्मारस्यपि कथामृतं तन्मिन्नपि काले जीवयतीति भगवान् स्वतन्त्रः कथामृतं परतन्त्रमित्येतावान् विशेषः त्वं च अवतारे ब्रह्मादिभिः प्रार्थित आगच्छसि आगतोऽपि तिरोभवसि कथा तु समागता न तिरोभवति अत एव तादृशं कथामृतं ये भुवि गृणन्ति त एव भूरिदाः बह्वर्थदातारः य इति प्रसिद्धाः व्यासादयः भूरिदाश्च ते अजनाश्च ते केवलं भगवद्रूपाः जननादिदोषरहिता वा परं विरलममृतं केवलं मरणोपस्थितौ तन्निवर्तकमेवेति नतु संभूयैकत्र रसजनकं रसपिण्डयोरिव तव कथयोश्च विशेषः अन्यथा कथार्थमेव यत्नः कृतः स्यात् परं विरहे मरणनिवर्त्तकत्वेन तदुपयोग इति भगवत्त्वेन स्तूयते अतस्तैर्भगवत्कथाकथकैः बहुदत्तामिति तद्वशात् जीवनम् एतत्सत्त्विक्याः । ९ ।

श्रीसुबोधिनी–सारः

तप्तानां जीवनहेतुः कविभिर्ब्रह्मादिभिरीडितं स्तुतं कल्मषापहं पापहन्तृ श्रवणेनैव मंगलप्रदं श्रीमत् सुसौम्यम् आततं विस्तृतं तव कथामृतं भुवि पृथिव्यां ये जना गृणन्ति वदन्ति ते भूरिदाः सर्वतीर्थदानकृतः बहुपुण्यभाजो वा ॥ ९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'युष्माकं पूर्णः स्नेहो नास्ति, यतो मद्विरहे सत्यपि जीवथ' इत्याशङ्कायामाहुः—तवेति । तव कथामृतं त्वद्विरहेण सन्तप्तानामस्माकं जीवनं जीवनकारणम् ।' इत्याहुः । 'तत् कुतः प्राप्तम् ?' इत्यपेक्षायामाहुः—ये भूरिदाः पूर्वजन्मसु बहुदत्तवन्त–सुकृतिनो जनास्ते भुवि आततं विस्तृतं यथा भवति तथा गृणन्ति निरूपयन्तीति । प्रसिद्धाद् देवभोग्यात् अमृतादुत्कर्षमाहुः—कविभिर्विवेकिभिरीडितं स्तुतम, देपभोग्यममृतं तु तैस्तुच्छीकृत्य निन्दितम् । किञ्च कल्मषापहं सर्वपापनिरासकम्, तत्त्वमृतं नैवंविधम् । किञ्च श्रवणमङ्गलं श्रवणमात्रेण मङ्गलप्रदम्, तत्त्वनुष्ठानापेक्षम् । किंच श्रीमत् सुशान्तम्, तत्तु मादकमिति ॥ ९ ॥

अन्वितार्थप्रकाशिका

तवेति ॥ ये जनाः तप्तानां त्रिविधतापवतां जीवनं कविभिर्विद्वद्भिरपीडितं स्तुतं कल्मषापहं श्रवणमात्रेण मङ्गलकरं श्रीमत् सुशान्तं तव कथारूपममृतं भुवि आततं विस्तृतं यथा स्यात्तथा गृणन्ति ते भूरिदाः पूर्वजन्मसु बहुदानादिपुण्यवन्तः अमृतं तु देहखेदमात्रनिवर्तकं ब्रह्मविद्भिस्तुच्छीकृतं पापानामनाशकं पानापेक्षं मादकमिति देवभोग्यादमृतात्कथाया उत्कर्षार्थं विशेषणानि । ते इत्यत्र ये इत्यपि पाठः ॥ ९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

युष्मत्प्रार्थनामगणयतो मम स्मरणेन युष्माकं किंप्रयोजनमित्याशंकायां प्रोचुः तवेति । तप्तानां विरहजतापतप्तानां संसारतापतप्तानां च जीवनं जलवच्छान्तिकरं कविभिर्व्यासादिभिः ईडितं स्तुतं इतरजनानां कल्मषापहं नानाविधं विषयवासनारूपं पापनाशकं श्रवणमंगलं श्रवणमात्रे मंगलं श्रेयस्करं श्रीमत् लक्ष्मीप्रदं महज्जनेषु आततं विस्तृतं उत्कैर्गुणैरमृतादप्यधिकं तव कथामृतं भुवि ये जनाः गृणन्ति निरूपयन्ति ते भूरिदाः पूर्वजन्मनि विप्रादिभ्यो बहुभोजनदक्षणादिदायकाः सन्ति ॥ ९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं चास्माकं त्वद्विरहणे मरणं तु प्राप्तप्रायमेव किं तु त्वत्कथामृतं ये पिबन्ति पाययन्ति च तेषु मध्ये तत्पाययद्भिः सुकृतिभिस्तद्वञ्चितमस्तीत्यभिप्रेत्याहुः ॥ तवेति ॥ हे कृष्ण, तव कथा एवाऽमृत, कथामृतस्यैव परमामृतत्वे हेतुः ! तप्तजीवनं तापत्रयतप्तानां जीवनं, प्रसिद्धामृतादुत्कर्षमाहुः । कविभिरादिकविभिर्ब्रह्मादिभिः, ब्रह्मविद्भिरन्यैर्वा, ईडितं स्तुतं, देवभोग्यं त्वमृतं तैस्तुच्छीकृतम । किं च कल्मषापहं कामकर्मनिरसनं, तत्तु तदथ गरुडेन्द्रयोरिव युद्धादिसाध्यत्वेन हिंसाप्रायत्वात् तद्विपरीतम् । किं च श्रवणमङ्गलं श्रवणमात्रेण मङ्गलप्रदं, तत्त्वनुष्ठानापेक्षम् । किं च श्रीमत् शान्त्यादिगुणावहं, प्रसिद्धं तत्तु मादकं, एवभूतं तव कथामृतं आततं विस्तृतं यथा तथा, भुवि ये जनाः, गृणन्ति निरूपयन्ति, ते जनाः, भूरिदाः बहुवदान्यः, जीवितं ददतीत्यर्थः । पूर्वजन्मसु बहुदत्तवन्तः सुकृतिन इति यावदिति वा ॥ ९ ॥

श्रीहरिसूरिविरचित श्रीभक्तिरसायन

तव कथामृतमिति : १०.३१.९.

कथामृतमिदं तव श्रुतिसुखावहं दुर्वहाधितापहृदलं भवेदितिति विचिन्त्य पीतं बहु ।
अनङ्ग इह चित्तजो मनसि साङ्ग एवाभवत् ततस्त्वतनुतां पुनर्नय समागमानन्दतः ॥ १०८ ॥
शब्दो रसत्वमनपेतसुखं समेत्य श्रोतॄन् करोति सरसांस्तव कीर्तिरूपः ।
अद्धा त्वमीश सरसोऽपि रसप्रदाने जातोऽलसस्तदुचितं कृपणत्वमाढ्ये ॥ १०९ ॥
यशस्त्वदीयं विगतोपमं सदा विभाति देवाप्रमितप्रभावतः ।
तदद्य सम्पाद्य जगत्यवद्यतां न वै कलङ्किप्रतिभं कुरु प्रभो ॥ ११० ॥

तव कथा प्रथा नाथ कीदृशी चरितमीदृशं त्वद्य ते कथम् ।
तदिदमाचर त्वं न सर्वथा श्रुतिदृशा सदैवासि सत्कथः ॥ १११ ॥
अमृताधिकशक्तिमत् त्वदीयं भुवि सत्यं हितकृत् कथामृतं हि ।
प्रथित सुखशालिजीवनं तद् भवतीदं तु सुतप्तजीवनं यत् ॥ ११२ ॥
चन्द्रादप्यधिकं सुशीतलमघप्राग्भारसंहारकं श्रीव्यासप्रमुखा यशस्त कवयः सम्वर्णयन्त्यादरात् ।
आचारस्तु तवेदृशोऽयमबलास्वप्येवमाभाति तत् तेषामिष्टमकल्प्यनल्पमिह ते तस्मात्तथाऽवर्णयन् ॥ ११३ ॥
त्रितापपापापहं—मींप्सितार्थदं यशःत्वदीयं भुवि भूरिमङ्गलम् ।
मुहुः कवीन्द्रैरितमित्यमूरपि रमेश गायन्ति विचिन्त्य दृश्यताम् ॥ ११४ ॥
ये त्वत्कथामृतरसं मनुजा भजन्ति तेऽन्येष्टदाननिपुणाः प्रभवत्त्यवन्याम् ।
एवं प्रथा तु विशदा बत तं पिबन्तीरस्मान् प्रभो त्यजसि किं न च वञ्चनेयम् ॥ ११५ ॥

कृष्णप्रिया

राजन् ! अब परमभक्ता राजस सात्विकी अनन्यपूर्वा कुमारिकाओं ने श्रीनन्दकुमारजी को निवेदन किया कि ! आपका कथामृत महत्व किन वचनों में गाया जाय ! यह अमृत तो भगवान के समान षड् ऐश्वर्य सम्पन्न है, संतप्त विविधताप संतप्तजीवों के लिए संजीवन है; व्यास, बाल्मीकि आदि शब्द के अर्थ और रसके ज्ञाताओं ने निरन्तर उसका यशोगान किया है, समस्त पापों के निवारण करने वाला है; श्रवण मात्र से सर्वविध मङ्गल कारक है; श्री से सम्पन्न होने के कारण श्रोता एवं वक्ताओं को श्री का पराभक्ति का दान करने वाला है, और सर्वत्र व्यापक होने से सुलभ है। हे नाथ ? इस वसुधातल में जो श्री व्यास शुकाचार्य नारदादि दयालु देवर्षि ब्रह्मर्षि लोग कथामृत का पान कराते हैं वे परमोदार पुरुष हैं ॥ ९ ॥

प्रहसितं प्रिय प्रेमवीक्षितं[1] [2]विहरणं च ते ध्यानमङ्गलम् ।
रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥ १० ॥

कर्दमक्षमा

अन्वयः—हे कुहक ? हे प्रिय ? ते प्रहसितम्, प्रेमवीक्षणम्, ध्यानमङ्गलम्, विहरणम्, वा, हृदिस्पृशः, रहसि, संविदः, हि नः, मनः, क्षोभयन्ति ॥ १० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु तर्हि मत्कथा श्रवणेनैव निर्वृता भवतः किं मद्दर्शनेन । न । त्वद्विलासक्षुभितचित्ता वयं तत्रापि शान्ति न विदाम इत्याहुः । प्रहसितमिति । हे प्रिय हे कुहक कपट । सविदः संकेतनर्माणि ॥ १० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कथाश्राविणां किं दर्शनेनेत्याशङ्कते—नन्विति । निर्वृताः जातानन्दाः । तत्रापि कथाश्रुतावपि । "संविद्युद्धे प्रतिज्ञायां संकेताचारनामसु । संभाषणे क्रियाकारे विज्ञाने तोषणेऽपि च ॥" इति कोशात् । रहसि सम्विदः सर्वोपेक्षया भवतीनामिष्टमवश्यं साधयिष्यामीत्येवंरूपाः । कुहकेति स्वोक्तस्यान्यथाकरणादस्मदुपेक्षया सर्वत्र कापट्यपर्यवसानाच्च ॥ अस्माकं तु त्वद्दर्शन विना त्वत्सम्बन्धिवस्तुमात्रमनिदुःखदमित्याहुः—प्रहसितमिति । विहरणं संप्रयोगः । याश्च संविदः संलापनर्माणि । हृदिस्पृश इति–त्वं दुःखदत्वाद्विस्मर्तुमिष्टोऽपि विस्मर्तुं न शक्यस इति भावः । ध्यानेनापि मंगलं परमसुखदमिति चतुर्णामपि विशेषणम् । मनः क्षोभयन्ति व्याकुलयन्ति, एतानि मनसि प्रविश्य सद्यः सुखं दत्त्वा तद्द्वितीयक्षण एव महादुःखं ददत्यत एव हे कुहक ! कुहकदत्तवटकान्यपि सद्यः स्वादून्यप्यायत्यां परमदाहकानि । प्राणघातकानीत्यर्थः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र प्रथमेऽर्थे । ननु विचारलुब्धाः दुर्लभे मयि कथमेतावन्तमनुरागं कुरुथ यदि कुरुत तदा मत्कथाश्रवणेनैव निर्वृता भवत इत्यादिकमाशङ्क्य तेनानिर्वृतौ तस्यैव पूर्वानुरागमयं चरितं दूषयन्ति त्रिभिः । द्वितीयेऽर्थे । आशयापि चिरं जीवितुं न शक्नुम इत्याहुः । प्रहसितमिति भावे क्तः । वीक्षितमित्यत्र वीक्षणमिति तु क्वचित्पाठः । प्रथमतः प्रहसितं तासां दर्शनमात्रेण भावोल्लासात् प्रकृष्टं सहजस्मितात् किञ्चिदुद्भटं हासितम् । कीदृशं ततः प्रेम्णा वीक्षितं यत्र तादृशं ततो विहरणं सखिभिः सहक्रीडाविशेषः । तच्च कीदृशं ध्याने मङ्गलं तदनुचिन्तने आशाबन्धकारकं निजभावाभिव्यञ्जनामयत्वात् । ततश्च रहसिसंविदः दूरतः

---

[1] वीक्षणं–श्रीधर वंशी. जीव. वीर. विज. विश्व. शुक. सु. ध. रा. । [2] विरहिणां च–प्रा. पा. ।

स्वयं निर्जने गत्वा वेण्वादिना नर्मोक्तयः ताश्च कीदृश्यः या हृदि स्पृशो हृदयङ्गमा इति सर्वतोऽन्तरङ्गत्वं दर्शितम्। यच्छब्दोऽत्र चमत्कारविशेषार्थः। ततो लिङ्गविभक्तिविपरिणामेण पूर्वपूर्वत्राप्यनुषञ्जनीयः। तेषु यथोत्तरं श्रैष्ठ्यम्। कुहकेति उदर्के दुःखमयत्वात् तद्‌बतरकुहकानामयमेवेति भावः। न इति तत्र बहुनामनुभवं प्रमाणयन्ति क्षोभयन्ति आकुलयन्ति हि निश्चितं क्षोभणे हेतुः प्रिय! हे लोभनेत्यर्थः। एवं त्वदेकप्रियत्वेन वयं सदा मनः क्षोभदुःखं लभामहे त्वं पुनरस्मान् वत वञ्चयस इत्याशयेन च सम्बोधयन्ति हे कुहकेति॥ १०॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु, निर्बुद्धयस्तथाप्यौषधवद्वलान्मत्कथां मिथः सेवध्वमित्याहुः; यद्वा, आशयापि चिरञ्जीवितुं न शक्नुम इत्याहुः—प्रहसितमिति। भावे क्तः। प्रकृष्टहसितं शुद्धभावेन स्मितमित्यर्थः। प्रेम्णा वीक्षितं, विहरणं क्रीडा, ते इत्यस्य प्रहसितादिभिः सर्वैरप्यन्वयः। ध्यानमात्रेणापि मंगलं सुखकरम्। यद्वा, ध्यानमंगलं शुभावहं सुखेन प्रेमध्यानसम्पादकमित्यर्थः। एतच्च त्रयाणामपि विशेषणम्। अतएवोक्तं श्रीकपिलदेवेन (भा. ३।२८।३३) 'ध्यानायनं प्रहसितम्' इत्यादि। हृदिस्पृशो हृदयङ्गमाः। यद्वा, स्मरणपथमात्रं गच्छन्त्योऽपि सत्यः, याः सम्विदस्ताः सर्व्वा एवेति तासां सर्व्वासां हृत्स्पृक्त्वं क्षोभणत्वं चाभिप्रेतम्। क्षोभयन्ति कामेनाकुलयन्ति, सम्विद इत्यस्यान्तिके अयुक्तत्वेन तस्यैव विशेषणत्वेऽपि हृदिस्पृश इति सर्व्वान्त्यत्वाद्वचनविपरिणामेन सर्वैरपि योज्यम्। तत्राद्यद्वयप्रायो भावत्वान्मानसम्, प्रहसितस्य शुद्धभावजन्यत्वात्। प्रेम्णश्च मनोवृत्तिविशेषे स्फूर्त्तेः, विहरणं प्रायो दैहिकम् ताम्विदश्च वाचिक्य इत्येवं त्रिविधा चेष्टोक्ता। तेषां च क्षोभणे यथोत्तरं श्रैष्ठ्यमूह्यम्। हि निश्चितम्; क्षोभेण हेतुः—हे प्रियेति। अन्यथा क्षोभणाशक्तिः। एवं त्वदेकप्रियत्वेन वयं सदा मनः क्षोभदुःखं लभामहे, त्वं चास्मान वत वञ्चयस एवेत्याशयेन सम्बोधयन्ति—कुहकेति। अन्यत्तैर्व्याख्यातम्। यद्वा, प्रियजने प्रेम तद्दर्शनादिमात्रेण पुलकादिलक्षणम्, वीक्षितं विशेषेण प्रेमस्मितादिनेक्षितम्, ध्यानं प्रियजनस्य चिन्ता तदेव मंगलम्, अस्माकमाशालम्बनादिहेतुत्वात्; सम्विदः प्रतिश्रुतानि सर्व्वापेक्षया भवतीनामिष्टमवश्यमेव सम्पाद्यमित्यादिलक्षणानि स्वोक्तस्यान्यथाकरणात्तथाधुनास्मदुपेक्षया तत्र तत्र सर्व्वत्रैव कापट्यपर्य्यवसानाच्च कुहकेति। अथवा ननु स्त्रीणां तत्रापि साध्वीनां धैर्य्यमुपपद्येतेति चेत्तत्र सप्रमविकारं सदैन्यं चाहुः–प्रहसितमिति। क्षोभयन्ति धैर्य्यं हरन्ति तत्तत्स्मरणादधुनापि यज्जीवेम, एतदेव नः परमधैर्य्यं विद्धीति भावः। अन्यत् समानम्॥ १०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्रियेति सम्बुद्धिः॥ १०—११॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तर्हि मत्कथामृतं श्रवणेनैव तृप्ता भवथेत्यत्र तथापि त्वद्विलासक्षुभितचित्ता वयं न शान्तिमाप्नुम इत्यभिप्रेयाहुः। प्रहसितमिति। हे प्रिय! हे कुहक! वञ्चक तव प्रहसितं च प्रेम्णा वीक्षणञ्च ध्यानमङ्गलं ध्यानेनापि मङ्गलं सुखं यस्मात् विहरणञ्च याश्च रहसि संविदः सङ्केतचेष्टाः कथम्भूता हृदि स्पृशो हृदयारूढाः ताश्च नोऽस्माकं मनः क्षोणयन्ति हि॥ १०॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तव कथामृतं तप्तजीवनादिफलदं चेत् अधरसीधुनाप्यायनं किमर्थमित्याशङ्क्य तव हसितादिना मुग्धा वयं तवाधरसीधु प्रार्थयामह इत्याशयेनाहुः। प्रहसितमिति। हे प्रिय! प्रेम्णा वीक्षणं ध्यानमङ्गलं विहरण विहारः विक्रमणलक्षणः हृदि स्पृशः हृदयंगमाः संविदः सम्भाषणादयः संविद्युद्धे प्रतिज्ञायां सङ्केताचारनामसु। सम्भाषणे क्रियाकारे विज्ञाने तोषणेऽपि चेति वचनात् एते सर्वेऽपि सुरते संभवन्तिः कुहक! धूर्तेतिप्रणयकोपे हि यस्मात्तस्मात् अधरामृतपानप्रार्थनम्॥ १०॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

न केवलं तव कथैव तादृशी प्रहसितादिकञ्च तव यदन्यत्तदपि नो मनः क्षोभकमित्याहुः—प्रहसितमित्यादि। हे प्रिय! ते तव प्रहसितं प्रहासः विहरणं विहारः रहसि संविदः विजनसंवादा हि निश्चितं मनः क्षोभयन्ति। पूर्वं मनः सुखदत्वेन ज्ञातान्यासन्, सम्प्रति तदन्यथाभावान्मनः क्षोभकान्येव सर्वाणि जातानीति वाक्यार्थः। त्रयाणां त्रीणि विशेषणानि। प्रहसितं कीदृशम्? प्रेमयुक्तं वीक्षणं यत्र। विहरणं कीदृशम्? ध्यान मङ्गलं ध्यानस्यैव मङ्गलं न तु ध्यातुः—मनः क्षोभकत्वात्। संविदः कीदृश्यः? हृदिस्पृशो मर्मस्पृशः। यतस्त्वं कुहकत्वेन कापट्यवत्वेन प्रसिद्धोऽसीति योग्यं सम्बोधनम्। हे कुहक? कापट्यपटो! अतो युक्तमेवोक्तं "तव कथामृतं तप्तजीवनम्" इत्यादि॥ १०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

न केवलं कथैव तादृशी, अन्यच्चेत्यन्या आहुः—प्रहसितमित्यादि। यत एतान्यपि क्षोभयन्त्येव, हि रेवार्थः॥ १०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अस्माकन्तु त्वद्दर्शनं विना त्वत् सम्बन्धि वस्तुमात्रमतिदुःखदमित्याहुः। प्रहसितमिति। विहरणं सम्प्रयोगः। याश्च सम्विदः संलापनर्माणि हृदि स्पृश इति दुःखदत्वाद्विस्मर्तुमिष्टा अपि न विस्मर्तुं शक्यन्त इति भावः। ध्यानेनापि मङ्गल परमसुखदमिति चतुर्णामपि विशेषण मनः क्षोभयन्ति व्याकुलयन्ति। एतानि मनसि प्रविश्य सद्यः सुखं दत्त्वा तद्द्वितीयक्षण एव महादुःखं ददत्यत एव हे कुहक! कुहकदत्तवटकान्यपि सद्यः परमस्वादून्यप्यायत्यां परमदाहकानि प्राणघातकानीत्यर्थः॥ १०॥

रसिकाह्लादिनी–टीका

एवं कथामृतसेवने दुःखानुसन्धाने त्यागार्हत्वं विनिश्चित्य तदुपरमेऽपि सद्य एव मरण सम्भाव्य उभयतो व्याकुलचित्ताः स्वान्तस्य पीडां दैन्येन निवेदयन्ति प्रहसितमिति हे प्रिय तवैतानि नोऽस्माकं मनः क्षोभयन्ति पूर्वं मङ्गलास्पदत्वेनानुभूतानि तत एव ध्यानानि इदानीं तिरोधान्येतान्येव मनः क्षोभकराणि भवन्ति। अत एव आशयाणि चिरं जीवतय साम्प्रतमिति। हे प्रियेति सम्बोधनेनैतत् ज्ञाप्यते। स्मृतमात्रस्य तव सम्बन्धस्य क्षोभजनकत्वेऽपि तद्विस्मृता स्वकृत्तिसाध्यत्वानिश्चिय इति प्रहसितं प्रथमदर्शने जाते भावोच्छलनात् साहजिकस्मितादुद्रिक्तं हसितं ततः प्रेमवीक्षण प्रेमलक्षणं रसार्णवे "स प्रेमा भेदरहितं यूनोर्यद्भावबन्धनमिति"। भावगर्भं वीक्षणमवलोकनं विहरणं विहारः क्रीडेति यावत्। क्रीडा तु स्वकीयसापेक्षा तत्र वयमेव स्वकीया इति। कीदृशं ध्यानमङ्गलं ध्यानमात्रेण मङ्गलं सुखप्रदं किं पुनरनुभवे मङ्गलमिति त्रयाणां विशेषणम्। रहसि विजनेस्थले सम्विदो नर्मोक्तयः क्रौंचबन्धाद्यभिज्ञानरूपाः। हृदिस्पृशो हृदयङ्गमा अस्मदनुगुणास्तदा जाता। अधुना तवादर्शने मनः क्षोभयन्ति धैर्यच्युतिं कारयन्ति। उत्तरोत्तरं चतुर्णा क्षोभहेतुत्वं सूचितम्, हे कुहक हे कपटेति सम्बोधनेनैनत्सूचिते। पूर्वं प्रहसितादिना विश्वासं जनयित्वा इदानोमुपेक्षया नैराश्यं जनयन् कामांकुरेऽस्मान् व्याकुलयन् पद्यमभिव्यञ्जयसीति। तव दर्शने ये सुखहेतवो जातास्त एवादर्शने दुःखहेतवो जातास्त एवादर्शने दुःखहेतवो भवन्ति। तव सम्बन्धमात्रमायत्यां दुःखहेतुरतो ये तव सम्बन्धरहिताः स्वमनसुखिनो नान्ये यथा वयमिति भावः॥ १०॥

विशुद्धरसदीपिका

हंहो शान्तं पापं मम कथैकजीवना यूयं तदाचरमाणाः सुखं विचरथ किं मम दर्शनाद्याग्रहेणेत्यत आहुः। प्रहसितमिति। दक्षिणानां वाक्यं हे कुहक! बहुप्रियत्वात्कपटविलासिन् तदुक्तं –

धातस्तात विरुद्धोऽसि द्वितयं माकृथा नृणाम्। भृत्यत्वमविवेकज्ञे स्नेहमन्यपरे जने इति॥

ततश्च हे रतिहिण्डकेत्यर्थः। ते तव प्रहसितं प्रकृष्टं सव्रजस्मितात्किञ्चिदुत्कृष्टं हसितं तच्चातिवञ्चकत्वादेव सरला एताः कथं मया प्रतार्य्यन्त इत्यभिप्रायात् तदुपरि प्रेम्णा वीक्षितं ततः सखिभिः सह विरहणं क्रीडाविशेषः सा सा शृङ्गारेचेष्टति यावत् ततश्च कीदृशं ध्यानेति तदनुचिन्तने आशाबन्धकारकं निजभावाभिव्यञ्जनभयत्वात् ततश्च रहसि सम्विदः दूरतः स्वयं निर्जने गत्वा वेस्वादिना नर्मोक्तयः ताश्च कीदृश्यः या हृदिस्पृशः हृदयङ्गमाः इति सर्वतोऽन्तरङ्गत्वं दर्शितं यच्छब्दाऽत्र चमत्कारविशेषार्थः ततो लिङ्गविभक्तिविपरिणामेन पूर्वपूर्वत्राप्यनुषञ्जनीयः तेषु यथोत्तरं श्रेष्ठ्यात् न इति बहूनामनुभवं प्रमाणयन्ति क्षोभयन्ति आकुलयन्ति हि निश्चितं क्षोभणे हेतुःप्रियलोभना तथा तथापि परमप्रेष्ठेति परमासक्तिः सूचिता॥ १०॥

श्रीरामनारायणकृता भावभावविभाविका

किञ्च यथाकथञ्चित्क्षणमप्यस्मज्जीतिसम्भावनया विलम्बो न विधेयः यतो भगवतस्ते यथा षड्गुणाः प्रसिद्धास्तथा अपि बहवो गुणाः सन्ति ते च नः क्षोभयन्ति क्षणमपि विश्रामप्राप्त्याऽस्मज्जीवनं न सहन्ते इत्याहुः। प्रहसितमिति। यद्वा तद्वैकल्यविनयाभ्यां जातानुकम्पतया लीलयैवाविर्भूतवपुषं भगवन्तं पश्यन्त्यस्तेन सहैव विहरन्त्योऽपि साक्षात्सम्बोधयन्त्योऽप्यन्तर्द्धानभ्रमेणान्तर्धानमेवाकलय्याहुः। प्रहसितमिति। हे प्रिय हे कुहक इति सम्बोधनाभ्यां प्रियत्वेन मनः संलोभ्य स्ववशीकृत्य कुहकत्वेन तत क्षोभयन्ति यथा कश्चिन्मधुरध्वनिमृगयुर्गीतमाधुर्य्येण मृगीराहूय प्रियनादेन विश्वासमुत्पाद्य कुहकतया पुनर्घातयति तद्वदिति द्योतितं प्रहसितं प्रकृष्टं सितातोऽपि मधुतयावासितं मुखचन्द्रसितामृतमयप्रभेवोल्लसित यत् हसितं प्रकृष्टा अपि संभेदादयः स्वभान्यूनतया वा हसिता येन प्रकृष्टा अन्या गोपीः प्रति वा हसितं प्रकृष्टञ्च ह स्फुटं च सितञ्चेति वा मुखकञ्जविकासात्मना हृदाकाशोदितरसेन्दुसितमृदुसुधासुधभासात्मना वा नित्यसिद्धमन्दस्मितापेक्षयापि विचित्रभावविशेषप्रकाशतया प्रकृष्टं यत् हासतमुखेन्दावरुणदसनवसनप्रावरणरदभगणावलिसमागमप्रदर्शनेनात्मनोबहुसखिविलासभावावभासकतयाभिलाषोल्लासकं वा यत् प्रहसितम् अत्र भावे क्तः प्रेमवीक्षितमित्यत्र च क्वचिद्वीक्षणमित्येव पाठः तथा यत्ते प्रेम्णावीक्षणं प्रेमान्वितविशेषेणानिमेषदत्तदृष्टितयेक्षणम्वा विविभावविभावकायाङ्गीकरणापाङ्गाक्षयेषु क्षयेक्षणं वा तथा भूतमीक्षणं नयनम्वा तथा च जातावेकवचनं तथा ते विहरणं विहारः नृत्यगीताविलासविविधपादन्यासानिलचलितनलिनीदलमृदुलकरोल्लासादिरतिसुखविस्तरणरतिरणरमणादिवा-

श्लेषेण किम्भूतं तत् विशेषेण हरणं मनोहरं स्वात्मनोऽपि मनोहरत्वात् विविधप्रकारेण मनोहरणम्वा पुनः किं भूतं तत् ध्यानअनुचिन्तनेऽपि मङ्गलं निजभावाभिव्यञ्जकत्वादाशोद्भावकं ध्यतृणां ध्यानेऽपि मङ्गलं परमसुखरूपं किमु वाच्यंसानन्दोत्साहं विहरतां पूर्वोक्तसर्वविशेषणम्वा यद्वा ध्यानेन मा सकामानां शोभा यस्मात्तत् ध्यानं नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनमित्यादिवचनात्तद्भावनयैव ज्ञानशोभाश्रवणात् तथा ते मधुरमुखरस्फीतगीतरवान्वितं नृत्यदोलनादिन विचित्रमनोज्ञभावदर्शकं गलं कण्ठं तथा गायतीतिगः तेनैव गानेन लाति अनुगृह्णतीति लः सच सच तथा तं तथा रहसि संविदः एकान्तिकनर्मोक्तयः रहसि गत्वा वेण्वादिनाह्वानाद्युक्तयो वा मनोगतमनोजसंज्ञापकाः संज्ञाविशेषा वा कथंभूतास्ताः हृदि प्रविश्य स्पृशन्ति संलग्नास्ततो न चलन्ति न वियुज्यन्ते इति भावः। यद्वा हृदिस्पृशः प्रेमनिमित्तालिङ्गनानि नः सर्वासां मनः क्षोभयन्ति हीति सर्वासां नस्तव चानुभवसिद्धत्वात् प्रसिद्धं प्रियत्वात् नहि प्रियाणां क्षोभं प्रियस्याज्ञातो भवति अस्मत्प्रहसितादिना स्वमनः क्षोमानुभवेनानुमानाद्वा तवापि प्रसिद्ध ननु भवतीनां मनः क्षोमानुभवेनानुमानाद्वा तवापि प्रसिद्ध ननु भवतीनां मनः क्षोभमाने स्वमनः क्षोभसम्भवे वा अन्तर्हिततत्वे कथमन्तर्हितत्वं तत्राहुः। कुहकेति। अस्माभिः सरलस्वभावेन स्वदैन्याविष्कारेणाप्यन्तर्भावोऽपि स्फुटं निगद्यते त्वया तु स्वतनुवत्कृष्णकुटिलमनस्त्वेन सङ्गोप्यते इत्येव विशेष इति भाव ॥ १० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु यावद्रमणं जातं तावतैव सन्तोषो विधेय इतः परञ्च मत्कथामृतपानेन जीवतीभिर्मद्ध्यानमेव सम्पाद्यमिति सम्पाद्यमितिचेत्तत्राहुः। प्रहसितमिति। हे प्रिय ! हे कुहक यद्यपि परमात्मा त्वं कपटलीळयास्मत्प्रियविग्रहं प्रकटितवांस्तथापि त्वद्विषयकरणेच्छास्माकं न निवर्तते तादृशदोषवशादेव मनः स्थिरं न भवति तत्र भगवतन्तव प्रहसित प्रेमपूर्वकं वीक्षणं विहरणं क्रीडनञ्च एतत्त्रितयं ध्यानेऽपि मङ्गलं तथा रहसि याः सम्विदः क्रीडासङ्केताः हृदिस्पृशः अन्तःकरणे प्रविष्टाश्च नोऽस्माकं मनः क्षोभयन्ति क्षणमात्रं तदनुसन्धानपरायणमपि मनः हासं प्रतिभगवत्प्रहसितादिकं नोपलभ्यत इति वृत्त्युदये क्षुब्धं भवति प्रहसितादयो यद्यपि गुणास्तथाप्यस्यां विरहदशायां दोषा जाता अहो वयं किं कुर्म इति भावः। न इति बहुवचनेन बह्वानामनुभवं प्रमाणयन्ति। हिशब्देन प्रसिद्धिं द्योतयन्ति अनभिज्ञापेक्षं तव कथायां क्रियमाणायां तत्र नान्तरीयकतया स्मृतानि प्रहसितादीनि मारकाणि भवन्ति स्मृतिपथमारुहन्तींत्याहुः। प्रहसितं प्रकर्षेणोच्चैर्हसितमस्मान्दृष्ट्वैवात्यन्तप्रसन्नताविष्करणरूपं तव प्रहसितं सम्प्रति स्मृतं सदस्मन्मनः क्षोभकरं भवति यतो हे प्रिय ! प्रियेण समक्षे कृतं यदानन्दावहं प्रहसितं तत्तस्य विरहदशायां मरणावहमेव भवतीति भावः। तथा प्रहासानन्तरं यत्प्रेमपूर्वकं बीक्षणं विशिष्टं शोभनमीक्षणं कटाक्षधारा च केवलं वा तत् तथा विहरणं सखिभिः सखीभिर्विदारः विशेषेण वेणुनादादीनां हरणमाकरणमिति वा एतत्त्रितयं ध्यानमङ्गळं ध्याने स्मरणे मङ्गलं स्वस्वरूपं न भवति किन्तु दर्शन एव तथा रहस्येकान्ते याः सम्विदस्ता अपि गतौ हृदिस्पृशः फलपर्यवसायिन्यः सत्यो हृदयविलौकसः तदेतत्परमसुखकरमपि सर्वं तवानया कपटप्रवृत्त्या परमदुःखावहं सम्पन्नमित्याशयेन सम्बोधयन्ति। हे कुहकेति। हि निश्चितं क्षोभयन्ति अत्र संशयं विहाय स्वकुहकतानिरासायाऽऽगत्यास्मन्मनः क्षोमं निवर्तयेति भावः। मानिनीपक्षे अहोऽस्माभिरदीर्घदर्शित्वादबुद्धैव यदनुष्ठितं तस्य फलमिदानीमुपास्थितमित्याशयेनाहुः। प्रहसितामति। त्वया यदस्माकं प्रहसितं यच्चप्रियस्य तव प्रेमपूर्वकं वीक्षणं हे प्रिये त वा प्रियं मत्वेति भावः। विहरणम् एतत्त्रयं ते ध्याने अहो एतासां कदा प्रहसितादिकं द्रक्ष्यामीति चिन्तिते मङ्गलं यावत्तादृशं तव चिन्तितं स्थितं तावदेव तत्कर्तृकप्रार्थनादि परमस्माकं मङ्गलं स्थितं संप्रति तवचिन्तनसिद्धावसरेऽस्माकं परमस्माकं जातमिति भावः। तथा रहसि यास्तव हृदिस्पृशः संविदः ताश्च नो मनः क्षोभयन्ति अहो नायं प्रहसितादिपात्रभूतः स्थितोऽतो वृथैवा ऽनभिज्ञाऽपकृतज्ञशिरोमणिभूतस्याग्रे प्रहसितादिकमनुष्ठितं कुटिलभ्रूविग्रहश्चरणोपान्तपातनयोरवस्थितरस्तरमान्मान्मौर्ख्येण विपरीतमनुष्ठितमतः किं कुर्म इत्येव स्मृतानि प्रहासितादीनि नो मनः पुनः पुनर्व्याकुलयन्ति हि निश्चितं यथा कश्चिद्वञ्चकः सेवको भूत्वा दैन्यसेवनादिना मनो रञ्जयित्वा स्वस्मिन्विश्वासमुत्पाद्य मादकं वस्तु प्रदाय सर्वस्वमादाय पळायते तथा त्वमपि कृतवानस्य हो कष्टं किं कुर्म इति कन्यावेशेन संबोधयन्ति हे कुहकेति। निवृत्तिपक्षे एवंरूपोऽपि त्वं जीवरूपेण स्वस्यैव च वञ्चको जातस्तस्य तव स्ववञ्चनहेतुभूतानि चेष्टितानि नो दुःखकराणीत्याशयेनाहुः। प्रहसितेति ! दुःखे सुखताभ्रमात्तथा हे प्रिय ! अनित्यासत्येषु नित्यत्वसत्यत्वभ्रमाद्विषयाणां प्रेमपूर्वकमीक्षणं तथाऽशुचा शुचित्वभ्रमाद्विहरणं तदेतत्त्रयं ध्यानेऽपि न मङ्गलं तथा रहसि विषयसम्भोगसंकेतास्तत्रापि हृदयप्रविष्टाः सम्यगुत्पादिताभिनिवेशा एतानि कुहकत्वं प्राप्तस्य तव चेष्टितानि नो मनः क्षोभयन्ति अहो किमिति नित्यमुक्तपरमात्मना स्वबन्धुचेष्टितान्याश्रितानीति क्षोभम् जनयन्ति हि निश्चतम् ॥ १० ॥

रास–रहस्यम्

र० टी—हे प्रिय ! हे परमप्रेमास्पद ! प्रेमवीक्षणं पूर्वोक्तानुरागपूर्वकमीक्षणं विचाररूपमेव, ते तव, प्रहसितं माययाविभूत, विहरणं च विविधरूपेणप्रकटीकरणं च, तथा ध्यानमंगलं ध्यातृणामनुचिन्तनेऽपि परमकल्याणप्रदं, रहसि एकान्ते सम्विदः सम्यग् ज्ञानसाधनमननात्मिकाः, हृदिस्पृशः हृदि अन्तःकरणे अनुभावकाः, परन्तु हे कुहक ! ? संसारप्रपंचलक्षणेन्द्रजालकारिन् ! हिं यस्मात् ते तवेन्द्जालं नः अस्माकं मनः चेतांसि क्षोभयन्ति व्याकुलयन्ति ॥ १० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

त्वत्प्रहसितादिभिः क्षुभितचित्तानां त्वद्दर्शनादेव शान्तिर्भविष्यतीत्यन्या आहुः हे प्रिय ! हे कुहक हे आगाधाशय ध्यानमात्रेणापि मङ्गलं यस्मात्तद्विहरणम् संविदः सङ्केतनर्माणि ।। १० ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अधरसीधुनाप्यायय स्वेत्यनन्तरमेव प्रहसितमित्यादि कथनीयम् । मध्ये मद्विरहदहन उज्वलति कथमुज्वलाङ्ग्य इयल्लवं जीवनं युष्माकमित्यतः पारोक्ष्येण तव कथामृतमित्याद्युक्त्वा तेनैवास्मदवस्थानमित्यर्थात्सूचयित्वा पुरा रचितमच्युताधरसुधाया अवितरणे क्षोभकमिदमिति वदन्ति । हे कुहक प्रणयकोपेन कुहकेत्युक्तिरित्यन्तः प्रतिबिम्बितसम्बोधनं । अन्तरर्थस्तु नो कुहकेति । प्रहसितं ते हासः प्रेमवीक्षितं स्नेहपूर्वकमीक्षणं ध्यानमङ्गलमित्यविपरिणतं विपरिणतं सद्यथायथमन्वेति । विहरणं क्रीडा हृदिस्पृशो हृदयङ्गमाः । हृद्युभ्यामित्यलुक् । रहसि याः संविदः सम्भाषणानीत्येतदादयो हि यतो नोऽस्माकं मनः क्षोभयन्ति । संविद्युद्धे प्रतिज्ञायां सङ्केताचारयामासुः । सम्भाषणे क्रियाकारे विज्ञाने तोषणेऽपि चेत्युक्तेस्सम्भवदर्थो ग्राह्यः । क्षुभ सञ्चलने । चालयन्त्यन्यथाकुर्वन्तीति यावत् । ततोऽधरसीधुनाप्याययस्वेत्यन्वयः ।। १० ।।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तामस्या वचनमाह । प्रहसितमिति । यद्यपि कथया स्थातुं शक्यते यदि त्वदीयैर्धर्मैः क्षोभो नोत्पादितः स्यात् यथा भगवति षड्गुणाः सन्ति तथा षड्व्यामोहका अपि गुणाः सन्ति अन्यथा कथयैव चरितार्थता स्यात् तदर्थं भगवान्मायया कुहकलीलामपि करोतीति स्वस्वभावदोषात् भगवति तथा स्फूर्तिरिति यथा ज्वरितस्यान्ने विरसताप्रतीतिः अत आहुः । तव प्रहसितादिकं नो मनः क्षोभयतीति प्रकर्षेण हसितं स्वभावत एव खिन्नाता त्यक्त्वा अन्यया सह स्थित इति ततश्चेत्समागत्य प्रकर्षेण हसति सुतरां क्षोभं प्राप्नोति प्रियेति संबोधनात् तव सम्बन्धोऽपि स्मृतः क्षोभजनको जायते अत एव यासां न सम्बन्धस्तासां न क्षोभः किंच तव यत्प्रेमवीक्षितं प्रेम्णा वीक्षितं तदपि क्षोभयति स्मृतं सत् अन्यविषयकं वा विश्वासजनकत्वाद्वा अन्तः कपटरूपमिति क्षोभजनकम् अन्यथा काय विसंवादो न स्यात् मनस उत्तोलकं वा आशाजनकं आशायां च श्रमः तव विहरणमपि क्षोभजनकं विहरण यच्चलनं वेणुवादनादिना रसो भगवदीयः आकाराद्बहिःस्थाप्यत इति विशेषेण हरणं यस्मादिति त्रिभङ्गुर्ललितादिकं भवति तत्पूर्वमस्माभिर्ध्यातमिति ध्यान एव मङ्गलं त्वल्लक्षणं शुभफलं प्रयच्छतीति तदपीदानीं क्षोभजनकं तिरोहितत्वात् त इति सर्वत्र सम्बन्धः अन्यन्माययापि करोतीति मुख्यतया अत्रोक्तिः एवं रूपसम्बन्धे चतुष्टयं क्षोभकमुक्तं नामसम्बन्धिद्वयमाह । रहसि संविद इति । या हृदि स्पृश इति रहसि एकान्ते संविदो ज्ञानरूपाः भगवद्वाच; ज्ञानान्येव वा शास्त्रजनितानि बन्धाद्यभिज्ञारूपाणि तत्रापि या वाचो हृदि स्पृशः हृदयगामिन्यो भवन्ति अस्मदनुगुणा एवं विधसंविदो वा नतु केवलं नायकानुगुणाः अत एवमेते सुखहेतवो भगवान् वक्ष्यति चेत्तदा क्षोभं जनयन्ति अयमर्थः सर्वानुभवसिद्ध इत्याह । हीति ।। १० ।।

श्रीसुबोधिनी–सारः

हे प्रिय ते प्रहसितं प्रेम्णा वीक्षणा वीक्षणं विहरणं क्रीडनं ध्यानमंगलं हृदिस्पृशो रहसि एकांते या संविदो रतिसंकेतानि नोऽस्माकं मनः क्षाभयन्ति हि । हे कुहक दम्भिन् ।। १० ।।

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

'तर्हि मत्कथाश्रवणेनैव तृप्तानां युष्माकं मद्दर्शनेनैव किम् ?' इत्याशङ्क्य 'त्वद्विलासक्षुभितचित्तानामस्माकं तावन्मात्रेण शान्तिर्नास्ति' इत्याशयेनाहुः–प्रहसितमिति । 'प्रेमविषयस्य तव कापट्यं न युक्तम' इति सूचयन्ति–सम्बाधनद्वयेन । हे प्रिय ! हे कुहक ! ध्यानमात्रेणापि मङ्गलं परमानन्दप्रदं ते प्रहसितादिकं याश्च हृदिस्पृशो हृदयङ्गमाः रहसि संविदः सङ्केतनर्माणि ताश्च नोऽस्माकं मनो हि यस्मात् क्षोभयन्ति । तथा कथाश्रवणमात्रेण शान्तिर्नास्तीति शेषेणान्वयः ।। १० ।।

अन्वितार्थप्रकाशिका

तर्हि यूयं मत्कथां शृन्वन्तु किं दर्शनेन तत्राहुः–प्रहसितमिति ।। हे प्रिय ! हे कुहक ! ध्यानमात्रेण मङ्गलप्रदं ते प्रहसितं प्रेम्णा वीक्षणं विहरणं विहारः याश्च हृदिस्पृशो हृदयङ्गमाः रहसि संविदः संकेतनर्माणि ताश्च नोऽस्माकं मनो हि यस्मात् क्षोभयन्ति। अतः कथामात्रेण नास्माकं शान्तिः ।। १० ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु युष्माकं मत्कथाश्रवणेनैव शान्तिस्तर्हि मद्दर्शनादिना किं प्रयोजनमिति चेत्तत्राह प्रहसितमिति । हे प्रियध्याने मंगलं चतुर्वर्गप्रदं यत्ते तव हसितादित्रयं हृदिस्पृशो हृदयङ्गमाः रहसि एकान्ते याः संविदः संकेतनर्मवचनानि इत्येकं च हे कुहक कितव एतानि चत्वारिकर्तृणिनोऽस्माकं मनः क्षोभयन्ति आकुलयन्ति हि ।। १० ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु भवत्यः मत्कथाश्रवणेनैव निर्वृतास्तृप्ता वा भवथ तर्हि किं मद्दर्शनेनेति चेत्त्वद्विलासक्षुभितचित्ता वयं तत्रापि न शान्तिं प्राप्तुम इत्यभिप्रेत्याहुः ।। प्रहसितमिति ।। हे प्रिय हे प्राणतोऽपि समास्पदीभूत, हे कुहक कपटविलासिन् , ते तव, प्रहसितं सहजस्मितात्किंचिदुत्कृष्टतया हसनं, प्रेमवीक्षणं प्रेम्णा वीक्षणं च, ध्यानेनापि मङ्गलं मुखं यस्मात् , विहरणं क्रीडाविशेषविधानं च, याः हृदि स्पृशः हृदयारूढाः हृदयङ्गमा इत्यर्थः । रहसि एकान्ते, संविदः संकेतचेष्टाः, ताश्च, नोऽस्माकं, मनः क्षोभयन्ति आकुलयन्ति हि निश्चितम् ।। १० ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

प्रहसितमिति : १०.३१.१०.

अदृष्टत्वद्रूपानपि सुकृतिनस्तान् मनुमहे विभो त्वं यद्ध्याने भवसि हृदयानन्दजनकः ।
अलं त्वां पश्यन्त्योऽप्यकृतसुकृता एव वयमित्यहो यद्ध्यानेऽपि प्रभवसि न यासां सुखकरः ।। ११६ ।।
तत्ते प्रेमनिरीक्षणं प्रहसितं वक्त्राब्जमत्यादराद् दृष्ट्वा सायमनन्त तस्य मननान्नेयो वियोगः सुखम् ।
आसीदेवमखेदकारि मननं तत्सम्प्रति श्रीपते सङ्केतेप्सितवासनस्य मनसः क्षोभाय सञ्जायते ।। ११७ ।।
सङ्केतं वितथं विधाय भवता यद्ध्यानसौख्यादपि निम्यानीय वनं सुघोरमजनं प्रच्याविताः सम्प्रति ।
कस्ते मन्तुरकारि वैरमथवा सम्पाद्यमापादितं यस्मादेवमिदं ब्रवीहि शपथस्त्वत्पूर्वजस्यास्ति ते ।। ११८ ।।
स्वप्रेय-सुन-बान्धवाऽऽप्तजनसंव्याप्तयेभ्यो जवादानीता विजने वने निशि सखे यद् भ्रंशयित्वा त्वया ।
तस्यैतन् परिकल्पितं किमु फलं स्वापह्नुतिः श्रीपते मन्त्वंशोऽपि तवात्र नास्ति कुतुकिन्मूर्खावतंसा वयम् ।। ११९ ।।
अस्मद्दुःखनिदानमत्र हि भवानेवं भ्रमित्वा मुधा मुग्धाभिर्बहुनिन्दितोऽसि वचनैरुच्चावचैरच्युत ।
तत् क्षन्तव्यमहो न चाणुरपि ते मन्तू रहः संविदो याः पूर्वा हृदयस्पृशः समभवंस्ताः क्षोभयन्त्येव नः ।। १२० ।।
यत्तत्प्रेमनिरीक्षणं विहरणं यच्च स्मितं तान्यलं वृत्तिभ्यः प्रवितीर्य चोरवदरं चित्ते प्रविश्य स्वयम् ।
मोहं मन्त्रबलात् प्रसार्य तरसा याभिर्विवेको हृतस्तत्किं वाच्यमितः परं त्वमसि रे तासां गुरुः संविदाम्।। १२१ ।।
वंशाद्यं पुरुषं विमोचयति यो दुःखान स एवावना धन्यो मान्यतमाग्रणीरिति जनास्तत्रायतन्ते खिलाः ।
त्वं सर्वेश्वरतां भजन्नपि दयावानप्यलं ज्ञानवान् वंशादेर्मनसस्तु खेदमहरन् दत्से कथं प्रत्युत ।। १२२ ।।
यत्सविद्भिरनर्थवाग्भिरफलं क्षोभं मनः प्रापितं नास्माभिस्तु नरोत्तमोऽपि हि भवान्नेतुं क्षणं शक्यते ।
तद्वर्ण्यं कथमत्र किं वयममूर्खाः सुचार्य्यश्च ताः किं वालिङ्गमवाच्यमीश यदिदं चित्तं भवान् पुंवरः ।। १२३ ।।

साजात्यमाश्रित्य मनोऽस्मदीयं श्रयत्यहो त्वत्स्मितवीक्षणादि ।
जीर्णास्तवेमाः शठ-वाक्प्रगल्भारहःकथास्ताः किमु भेदयन्ति ।। १२४ ।।
विरहदो भवान्नो तथा यथा रहसि संविदः क्षोभयन्ति नः ।
स्फुटमिदं वियोग्यात्मनां विधोरधिकतापदा चन्द्रिकासृतिः ।। १२५ ।।

याः स्पृष्ट्वा सममावयोः सुहृदयं ते सौरते सङ्गमे जाताः पूर्वमबाधयोगघटकाः प्रायो रहः संविदः ।
हित्वा त्वामनृतोक्तयो यदधुना नः क्षोभयन्तीह ताः युक्तं दीनजने भवत्यतिवलोऽशक्तोऽपि लोके न कः ।। १२६ ।।
स्मितं प्रियनिरीक्षणं विहरणं तथाऽन्यान्यपि विचित्रचरितानि ते शुभकराणि योगात्तव ।
इमा जगति तावका अपि रहःकृताः संविदः कुतो हृदयभेदिकाः समभवन् कृतघ्ना इव ।। १२७ ।।
एकाऽपीश सुखाय या निगदिता वेदैर्विभो भूरिशस्ताः सम्प्रत्यखिला अपि प्रमिलिता भाग्येन योग्येन नः ।
क्षुद्रेऽप्यत्र सुखे विकुण्ठगतयः खेदप्रदाः प्रत्युत तद्ब्रूमो वयमीश किं नु सुचिरं पश्यत्वमेवान्ततः ।। १२८ ।।
सदा सन्निहितः श्रीशः स्वीयानामिति संविदः । अस्मन्मनः क्षोभयन्ति त्वदागमन-वाञ्छया ।। १२९ ।।

कृष्णप्रिया

राजन् परीक्षित् ! अब अन्यपूर्वा राजस तामस गोपियाँ अथवा उनका यूथ प्रभु की प्रार्थना कर रहा है—हे प्यारे ! आप का उपहासों के प्रसङ्ग के अट्टहास्य, प्रेममय अवलोकन, चिन्तन करने से चित्त का मङ्गल करने वाला आपका वेणुवादन करते हुए आप की लालित्यमयी गति और हृदय को स्पर्श करने वाला रहस्यमय वार्तालाप याने आपकी प्रणयपूर्ण गाष्ठियाँ हे कपट कुशल कृष्ण हमारे चित्त में क्षोभ पैदा करते हैं ।। १० ।।

चलसि यद् व्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ते पदम् ।
शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति ॥ ११ ॥

कर्दमक्षमा

अन्वयः—हे नाथ ! हे कान्त ! पशून्, चारयन्, यत्, व्रजात्, चलसि, (तदा) नलिनसुन्दरम्, ते, पदम्, शिलतृण अङ्कुरैः, सीदति, इति, नः, मनः, कलिलताम्, गच्छति ॥ ११ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च त्वयि वयमतिप्रेमार्द्रचित्तास्त्वं पुनरस्मासु केन हेतुना कपटमाचरसीत्याहुः श्लोकद्वयेन । चलसीति । हे नाथ हे कान्त यद्यदा व्रजाच्चलसि पशूंश्चारयंस्तदा तन्नलिनसुन्दरं कोमलं ते पदं शिलैः कणिशैस्तृणैरङ्कुरैश्च सीदति क्लिश्येदिति नोऽस्माकं मनः कलिलतामस्वास्थ्यं गच्छति प्राप्नोति एवंभूतास्त्वद्दुःखशङ्कितचित्ताः वयम ॥ ११ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उपालम्भमाहुः-किं चेति । कः ककारोन्ते यस्य स कान्तः शुकः, स यथा फलादि गृहीत्वा क्षणेन नेत्रे परिवर्तयति त्वमपि तथाऽस्मान्वेणुध्वनिनाऽत्राहूय दर्शनरसमापीय गतः । यद्वा-कान्तो बकः, स यथा स्वकार्यकरणे साधुरिवास्ते तथा त्वमपि । यद्वा-कान्तोन्तकः, स यथा साधूनसाधूंश्च सर्वानविशेषेण मारयति तथा त्वमस्मानिति । यद्वा-कान्तः काकः, स यथा योऽस्मायन्नाद्यर्पयति तस्यैवोपरि मलमुत्सृजति तथा वयं त्वया सहातिप्रीतिकरास्त्वमस्मानेवं रोदयसीति भावः । यद्वा-कान्तः कंकः, स यथा मृतान्मारयति तथा त्वमस्माननंगमारिता मारयसीति । यद्वा—कान्तश्चातकः, स यथा स्वात्यम्बु पीत्वा पुनर्मेघं न सेवते तथा त्वं स्वकार्यं कृत्वास्मांस्त्यजसीति किं बहुना ॥ किं च, त्वं केवलमधुनैव दुःखयस्यस्यपि तु अन्यदापि स्वमपि दुःखयित्वाऽस्मभ्यं दुःखं दातुं यतस इत्याहुः-चलसीति । यद् यदा तदा नलिनादपि सुंदरं सुकुमारम् । शिलैः कणिशैस्तृणैरङ्कुरैश्च सीदति क्लिश्येदिति संभाव्य मनः कलिलतामस्वास्थ्यं प्राप्नोति । यद्वा—कलिं कलहं लाति गृह्णतीति कलिलं तद्भावः कलिलता ताम्, कलेः कलहस्य लतां प्रतानमिति वा । अस्माभिरेव सहास्मन्मनः कलहं करोतीत्यर्थः । स च कलिर्यथा—अरे मजः स यदि बने भ्रमणात्खिद्यति तदा व्रजान्निस्सृत्य नित्वमेव तत्रैव किं यात्यतस्त्वं किमति वृथा खिद्यसि । अयि निर्बुद्धयो गोपालिकास्तस्य चरणद्वयं स्थलकमलादपि सुकुमारं भवत्येव वने च शिलतृणांकुरशर्कराः सन्त्येव कथं पीडा न स्यात् । अरे मुग्ध स सुकोमलवालुके पथिपथ्येव भ्रमति । अयि निर्विवेकाः गावः किं पथिपथ्येव घासं चरन्ति । अरे प्रेमान्ध स चक्षुष्मान् शिलतृणाद्युपरि कथं पादावर्पयेत् । अयि प्रेमगन्धेनापि रहिता यद्यावेगवशाद्भ्रमाद्वा तदुपरि पादः पतेत्तदा किं स्यात् । भो भ्रातश्चेतः सत्यं ब्रूषे, एतावद्दुःखमनुभवितुमेव जीवन्त्यो विधात्रा वयं सृष्टाः । भो दुःखिन्यः खलु जीवत यूयमहं तु युष्मत्प्राणैः सार्द्धं युष्मद् हेभ्यो निःसृत्याधुनैव यामीति ॥११॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तच्च भवता क्षोभदानं संयोगवियोगयोरविशेषमेव नतु कादाचित्कमित्याहुः चलसीति द्वाभ्याम् । व्रजादिति । ततश्चलनमारभ्यागमनपर्यन्तनेव कलिलता सूचिता । पशूंश्चारयन्निति विविधानामनन्तानां तेषां चारणार्थं वर्त्मपरित्यागेनेतस्ततो भ्रमणाच्छिलादिभिरवसादः सम्भावितः । तथा पशुतया निर्बुद्धित्वेन ते त्वत्पादाब्जदुर्गमपथेऽपि बत भ्रमन्तीति श्लेषेण सूचितम् । शिल पतितसश्रृङ्गवन्यधान्यादिकम् । अझिल्लिकण्टकवनमित्यादिहरिवंशोक्तेः । सर्वत्र कण्टकाभावात् न तदुल्लेखः । नाथ ! हे व्रजेश्वरेति तत्तवायुक्तमिवेति । कान्तेति अस्मत्कोमलकरस्पृश्यमेव तदिति प्रेमसम्बोधनद्वयम् । कलिलताया हेतुविशेषः । यद्वा । नाथत्वेन सर्वेषां व्रजजनानां कान्तत्वेन च विशेषतोऽस्माकमिति भावः । यद्वा । नाथ एव प्रियजनोपतापक ! ननु विवेकिन्यस्तर्हि अवसादहेतुमद्विषयकचिन्ता त्यज्यतां तत्राहुः । कान्तेति । प्रियजनचिन्ताया विवेकेऽप्यपरिहार्यत्वात् । यद्वा कलिलतागमने हेतुः नाथ हे प्राणेश्वर इति । ननु "यावत कुरुते जन्तुः सम्बन्धान्मनसः प्रियान् । तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कव" इत्यादिवचनेन प्रीतेर्दोषत्वप्रतिपादनात् । प्रीतिरेव निरस्यतां तत्राहुः मनो गच्छतीति । सङ्कल्पमात्रात्मकं तन्नास्माकं बुद्धिवृत्तिं विवेकमपेक्षत इति भावः । ननु मनोऽपि युष्माकमेवेत्याशङ्क्य तस्यापि न दोष इत्याहुः । कान्त हे मनोहर इति । अहो वनभ्रमणं विहायात्र द्रुतमेहीति भावः ॥ ११ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

व्रजादिति; ततश्चलनमारभ्यागमनपर्य्यन्तमेव कलिलता सूचिता, व्रजे तदवसादानुत्पत्तिश्चोक्ता, स्वयं ताभिस्तच्छोधनात्, पशून् चारयन्निति विविधानामनन्तानां तेषां चारणार्थं वर्त्म-परित्यागेनेतस्ततो भ्रमणाच्छिलादिभिरवसादः सम्भावितः । तथा पशुतया निर्ब्बुद्धित्वेन ते त्वत्पादाब्जदुर्गमपदेऽपि वत भ्रमन्तीति श्लेषेण सूचितम्, पदमित्येकत्वेऽपि द्वित्वमायात्येवेति पूर्वं

लिखितमेव, तथाप्यत्रार्थोऽयं ज्ञेयः। एकमपि, किमुत द्वयमिति गोचारणप्रदेशस्य प्रायो घनमृदुतृणमयत्वेन भूतलवर्त्ति-शर्करा–कर्करादेः सम्पर्काभावात्तन्नोक्तम्, 'अझिल्लिकण्टकवनम्' इत्यादि–हरिवंशाक्तेः, सर्व्वत्र कण्टकाभाव एव हरिदासवर्य्येण गिरिराजेन श्रीगोवर्द्धनेन तत्पार्श्ववर्त्ति-तदनुगगिरिवर्गेण च स्वशिलानां श्रीपादाब्जन्यासपदे नवनीतायमानत्वसम्पादनात्ता अप्यत्र नोक्ताः। नाथ ! हे व्रजेश्वरेति तत्तवायुक्तमिति; कान्तेति अस्मत्कोमलकरस्पृश्यमेव। तदिति प्रेमसम्बोधनद्वयम्, कलिलतायां हेतुविशेषः, तेनाधिक-कलिलतापि सूचिता। यद्वा, नाथत्वेन सर्व्वेषां व्रजजनानां कान्तत्वेन च विशेषतोऽस्माकमिति भावः। यद्वा, नाथ ! एवं प्रियजनोपतापक ! ननु विवेकिन्यस्तर्हि अवसादहेतुमद्विषयकचिन्ता त्यज्यताम् ? तत्राहुः—कान्तेति। प्रियजनचिन्ताया विवेकेऽप्यपरिहार्य्यत्वादिति भावः। यद्वा, कलिलतागमने हेतुः—नाथ ! हे प्राणेश्वरेति। ननु 'यावतः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान्। तावन्तोऽस्य निखन्यन्ते हृदये शोकशंकरः ॥' इत्यादिवचनेन प्रीतेर्दोषत्वप्रतिपादनात् प्रीतिरेव निरस्यताम्। तत्राहुः—कान्त हे मनोहरेति। अलमतिविस्तरेण अन्यत्तैर्व्याख्यातम्। यद्वा, सीदति व्यथत इति एतच्चिन्तया कलिलतां केव यमिति, अतो वनभ्रमणं विहायात्र द्रुतमेहीति भावः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च त्वयि वयमतीव प्रेमार्द्रचित्तास्त्वन्तु कुतोऽस्मान् वञ्चयसीत्यभिप्रेत्याहुः द्वाभ्यां हे नाथ हे कान्त यद्वा पशूंश्चारयन् व्रजाच्चलसि तदा नलिनवत्सुन्दरं कोमलं ते तव पदं शिलैः कठिनैस्तृणैरङ्कुरैश्च सीदतीति क्लिश्येदिति नोऽस्माकं मनः कलिलतामस्वास्थ्यं गच्छति याति ॥ ११ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

त्वच्चरितं ज्ञानिनामपि दुर्बोधकं किमुतास्माकमिति भावेनाहुः। चलसीति। पशूंश्चारयन् यद्यदा व्रजाच्चलसि गच्छसि तदा शिलतृणाङ्कुरैः छिन्नशिखरत्वेन परुषैरिषीकादितृणाग्रैः शिलाः शर्करास्ताभिस्तृणाङ्कुरैश्च वा सीदति व्यथतीति कलिलतां नारायणोऽन्यो वेति संशयपङ्किलताम् ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

न केवलमिदानीमेव वने समानीय नः कदर्थयसि, तव विहारोऽस्माकं क्षोभक एवासीदित्याहुः—चलसीत्यादि। हे नाथ ! यद् व्रजात् पशून् चारयन् चारयितुं चलसि, तत्र ते तव नलिनादपि सुन्दरं पदं शिलतृणाङ्कुरैः सीदतीति कृत्वा नोऽस्माकं मनः कलिलतां दुःखगहनभावं हे कान्त ! गच्छति। अतः साधूक्तम्—विहरणञ्च ध्यानस्यैव मङ्गलं यस्य तत्तथा, न तु ध्यातुमङ्गलमिति ॥ ११ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

त्वमेवास्मासु निर्दयः, कदाचिदस्माकं दोषमपि पश्यसि, अन्यथा कथमत्याक्षीः, वयन्तु न तथा, त्वद्गतप्रेम्णैवाहर्निशं दुनुम इत्यपरा आहुः—चलसीत्यादि। तस्मात्त्वं पशुप एव, यदस्माकं मनः कलिलतां नावगच्छसि। कथं नावगम्यते ? तत्राह– नलिनसुन्दरं ते पदं शिलतृणाङ्कुरैः सीदतीत्यहो कष्टमिति भावः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च त्वं न केवलमधुनैव दुःखयस्यपि तु अन्यदपि स्वमपि दुःखयित्वा अस्मभ्यं दुःखं दातुं यतसे इत्याहुः। चलसीति यत् यदा। तदा नलिनादपि सुन्दरं सुकुमारं शिलैः कणिशैः तृणैरङ्कुरैश्च सीदति क्लिश्येदिति सम्भाव्य मनः कलिलताम् अस्वास्थ्यं प्राप्नोति। यद्वा ! कलिं कलहं लाति गृह्णातीति कलिलं तद्भावः कलिलता ताम् अस्माभिरेव सहास्मन्मनः कलहं करोतीत्यर्थः। सच कलिर्यथा। अरे मनः स यदि वने भ्रमणात् खिद्यति तदा व्रजान्निःसृत्य नित्यमेव तत्रैव किं यात्यतस्त्वं किमिति वृथा खिद्यसि। अयि निर्बुद्धयो गोपालिकास्तस्य चरणतलद्वयं स्थलकमलादपि सुकुमारं भवत्येवं वने च शिलतृणाङ्कुरशर्कराः सन्त्येव कथं पीडा न स्यात्। अरे मुग्ध स सुकोमलवालुके पथि पथ्येव भ्रमति। अयि निर्विवेकाः गावः किं पथि पथ्येव घासं चरन्ति। अरे प्रेमान्ध स चक्षुष्मान् शिलतृणाद्युपरि कथं पादावर्पयेत्। अयि प्रेमगन्धेनापि रहिता यद्यावेगवशाद् भ्रमाद्वा तदुपरि पादः पतेत् तदा किं स्यात्। भो भ्रातश्चेतः सत्यं ब्रूषे। एतावद्दुःखमनुभवितुमेव जीवन्त्यो विधात्रा वयं सृष्टाः भो दुःखिन्यः खलु जीवत यूयं अहन्तु युष्मत् प्राणैः सार्द्धं युष्मद्देहेभ्यो निस्सृत्याधुनैव यामीति ॥ ११ ॥

रसिकाह्लादिनी–टीका

एवं स्वभावतस्तव क्षोभदातृत्वे निर्णीतेऽपि स्नेहवशात्त्वदनिष्टाशङ्का–व्याकुलचित्ता वयं त्वं त्वस्मदनिष्टाबन्धनिरसनेन तटस्थतामवलम्बसे। न्यायतो विरोधप्राकट्यात् इति। चलसीति, व्रजात् यत् यदा पशून् गाश्चारयन् वृन्दावनप्रदेशेषु संचारयितुं चलसि तदा नलिनसुन्दरं नलिनादपि सुन्दरं सुभगं कोमलं च ते तव पदं हे नाथ व्रजराजपुत्रत्वात्, यद्वा नाथते योच्यतेऽस्मा-

भिरिति हे नाथ ! यद्वा नाथसे प्रियजनाननुसन्तापयसि । शिलतृणांकुरैः शिला सूक्ष्मपाषाणकणशः तृणानि दर्भादिनामङ्कुरा एतैरतिपुरुषैस्तीक्ष्णैः सीदति खिद्यतीति मत्वा नो मनः कलिलतां व्याकुलतां गच्छति प्राप्नोति । वस्तुतस्तु तथा वृन्दावनप्रदेशस्य कोमलत्वेन सुखप्रदत्वं प्रसिद्धः । अन्यथोपानत्परित्यागेन संचरणं कथं भवेदिति । तथापि स्नेहस्यायमेव स्वभावः । किमपि कल्पनया मनो व्याकुलयति । तव तु अस्माकं वास्तवे दुःखे विद्यमानेऽपि औदासीन्यमिति चित्रम, व्रजादिति प्रातरारभ्य सायंकालपर्यन्तं खेदसम्भावनेति । पशूंश्चारयन्निति । अस्मत्प्रवेशयोग्ये गवां चारणमिति सेर्ष्यं वचनम् । पशूनिति बुद्धिशून्यं तेन मार्गत्यागपूर्वकं घनतृणमयप्रदेशसंचारणेन खेदास्फुरणं तेषामिति हे कान्तेति । यद्यपि त्वमस्मदार्त्तिनिरसनेन समर्थोऽसि तथाप्यौदासीन्यमवलम्बितुं न शक्नुमः । यतस्त्वस्मच्चित्तेषु कोमलकरसम्बाह्यत्वेनावमाससे इति तात्पर्यम् । नाथेति कान्तेति सम्बोधनद्वयेन निजमनः पीडा पराकाष्ठा सूचितेति । अतश्चिरं दृगगोचरे प्रदेशे परिभ्रमणेनालमिति ॥ ११ ॥

विशुद्धरसदीपिका

तच्च क्षोभणं संयोगवियोगयोरविशेषमेव तत्कृतमेव भवतो निशि तमसि च परिभ्रमणं व्यर्थमेवेत्याशयेनाहुः । चलसीतिद्वाभ्याम् । व्रजादिति । ततश्चलनमारभ्यागमनपर्य्यन्तमेव कलिलतासूचिता पशूंश्चारयन्निति अनन्तानान्तेषां चारणार्थं वर्त्मपरित्यागेनेतस्ततो भ्रमणाच्छिलादिभिरवसादः सम्भावितः तथा पशुतयानिर्बुद्धित्वेन ते त्वत्पादाब्जे दुर्गमदेशेवनेऽपि भ्रमन्तीति खेदः सूचितः शिलं पतितकणशश्रृङ्गवन्यधान्यादिकं, इदं च अझिल्लिकण्टकवनमित्यादिहरिवंशोक्तेः सर्वत्र कण्टकाद्यभावेऽपि प्रेमविशेषादुक्तं नाथेति कान्तेति परमप्रेमास्पदत्वं ननु "यावतः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान् । तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः" इति भारतोक्तेः । प्रीतिरेव त्यज्यतामिति तत्राहुः, मनोगच्छति सङ्कल्पमात्रात्मकं तन्नास्माकं बुद्धिवृत्तिमपेक्षत इति भावः ॥ ११ ॥

श्रीरामनारायणकृता भावभावविभाविका

किञ्च नस्तु तव प्रियत्वात्त्वदीयस्वाभिलषितविहारप्रवृत्तावपि त्वदीयवृथाखेदसम्भाववेनापि खेदो भवति तव तु कुहकत्वादस्मत्खेदे स्वहृदि तद्भानेऽपि न तत्प्रतीकारः अत्यन्तस्वविरहेण तद्वर्धनमित्याहुः । चलसीति । यद्वा तव स्वेच्छया स्वविहारकौतुकेन दिनचलनेऽपि यदा नो दुर्दशा भवति तदा रात्रौ वनभ्रमणं किमु वाच्यमित्याहुः । चलसीति । तत्र हे नाथ ! हे कान्तेति सम्बोधनाभ्यां त्वं सामान्यतः सर्वस्य नाथः स्वामी विशेषतो व्रजस्य तत्रापि नोऽस्माकं तु कान्त एवातः सर्वविश्वस्थितिपालनयोः प्रवृत्तस्यात्मीयत्वेन विशेषतो व्रजपक्षपातः नः स्वकान्तानां स्वकान्तः स्वकान्तश्च स्वकान्तेनानुचित एव यत् यदा व्रजात्पशूंश्चारयन् चलसि तदा नलिनादपि सुन्दरं मञ्जु मृदु च ते पदं शिलतृणाङ्कुरैः सीदति वृन्दावने भगवद्विहारभूमौ कण्टकासम्भावनया तदनुक्तिः यद्वा भगवत्प्रियमृदपदे कण्टकस्पर्शसम्भावनेऽपि वैकल्येन भीतमनसा तदनुक्तिः यदा रोमाञ्चितस्वस्तनेषु तृणांकुरैर्व्याप्तशिळासाम्यसम्भावनया स्वपरमसुखार्थमपि त्वन्मृदुपदे तस्य स्पर्शे खेदो माभूदिति धारयितुं न पारयामः तदा किमु वाच्यं मृदुतृणांकुरस्पर्शे तृणस्पर्शे वा शिलास्पर्शे वा तदवसादसम्भावना तथा च सीदतीति सम्भावनयैव नो मनःकलिळतां द्रवीभावं तत्तत्सादृश्यं गच्छति यद्यपि यथात्वत्पदावसादसम्भावनया नो मनसां द्रवीभावस्तथा व्रजशिळतृणांकुराणामपि व्रजवासित्वाविशेषात्त्वत्प्रेमैकव्याप्तानां साक्षात्तव पदसम्बन्धिनां त्वत्पदावसादशङ्कया सम्भवति द्रवीभावः, तथा दिनचलने सुपथेन गमनसम्भवे तदस्पर्शसम्भवोऽपि तथापि जडमतीनां नो वृन्दावनशिलादिष्वपि शिलादित्वाविशेषभ्रमेण जाड्य न जाड्यकल्पनया तथा सम्भाव्यखेदः तथा सर्वज्ञस्यापि सर्वसुपथदर्शकस्यापि तव दिनेऽपि पशुचारणे तदनुगतया कुपथगमनं सम्भाव्य सच्चिदानन्दाच्छेद्याभेद्यत्वत्पदेऽपि प्रेमवैक्लैव्येन तद्विस्मृत्यमाधुर्यरसाक्रान्तचित्तानां मृदुत्वमेवानुसन्धाय तथावसादसम्भावनया खेद इति न तच्चित्र यद्वा नलिनसुन्दरं ते पदमपि नः प्रेमरसनाभिर्वद्धं तथा तव चलनारम्भे उक्तसम्भावनया कलिलताङ्गतेषु नो मनः एकेषु निरुद्धमत एव चलितुमशक्तमपि त्वं वलाच्चारयश्चलसि तत्रापि रसाभिज्ञं द्रष्टुमनुनिःसृता अनुगतचित्ता अनुचरीर्नो हित्वा नाथोऽप्यनुचर इव पशूननुचरसीति चित्रं तव रसवैदग्ध्यं यदि पशूनामनुरतत्वं तदा नोऽननुरतत्वं यदि तेषां तथा तदानोऽपि तथात्वं यदा पशुषु देवानां प्रियत्वप्रसिध्या सर्वदेवात्मकस्य तव पशुप्रियत्वं तदा विदग्धा अपि वयं कामविरहचिन्तानलेभ्यो विदग्धवैदग्ध्या पशुवृत्तयो जाता इति नाधुनोदासीन्यावसरः । यदि गोपजातिजातत्वेन गोचारणं स्वभावानुमतं तदा गोपत्वेन नाथत्वेन कान्तत्वेन गोप्यः कान्ताः स्वभावानुगा अपि नापेक्ष्याः यदि नाथ जनैरिवगोपबाळैर्विहाराय वनजनैः स्वसौख्याय याच्यमानतया तदाप्रदानाय वनगमनं तदा वयं वनविहाभिकांक्षिण्यः स्वसौख्याय याचनपरा इत्यस्मदानं प्रदातुमप्याविर्भव न हि नाथ ! सर्वार्थपरित्यागेनास्मदर्थे उपतापकार्यत्व कान्तस्य च तव वैपरीत्येनान्तकत्वं न्याय्यम् अपि तु रतासु विपरीतत्वेऽपि विपरीतरतिरेवोचिता बन्धनविधानेऽपि भुजनागपासबन्धनं कोपरसावेशेऽपि नखरदच्छेदो यथाकाममधोनिपात्याङ्गावपेषणं वेति भावः ॥ ११ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अहो रात्रौ परमकोमलपादपद्मकृतपलायनस्यास्मत्स्वामिनः का वा पीडा जाता स्यादित्यनुसंदधत्यः मूर्च्छावस्थामेवानुसंदधत्यः अस्मन्मनो दिनेऽपि यदा त्वं व्रजाच्चलसि तदाऽस्वास्थ्यमेव गच्छतीत्याशयेनाहुः । चलसीति । यद्यदा व्रजात्पशू

चारयन् चळसि तदा हे नाथ ! नलिनात्स्थलकमलादपि सुन्दरं कोमलं ते पदं शिलैः स शूकवन्यधान्यकणिशैः तृणैः कुशकाशादितीक्ष्णाग्रतृणैरंकुरैश्च सद्यो भूमिं निर्भिद्य निःसृतैः सीदति क्लिश्येदिति नो मनः कलिलतामस्वास्थ्यं गच्छति प्राप्नोति तत्र व्रजादिति प्रातरारभ्य खेदः चलसीति चलनात्खेदत्वं चलसीत्युक्त्या तव पदं त्वमस्मान्विहाय न गच्छसि वयमेव चलाः तच्चालयसीति सूचितं तत्रापि पशून् चारयन् पशवश्च पर्वतारण्यकच्छरूपायां भूमौ चरन्ति तदनुगमनं च नग्नपद्भ्यां भूम्याद्यनुग्रहार्थं पाल्यानां चर्मणोऽपरिधेयताबुद्ध्या पादुकाग्रहणात् नलिनरूपत्वाच्च कोमळ स्थाने अस्माकं अङ्के स्थातुं योग्यं नाथेति सबोधनाद्वयमेवात्रार्थे नियोज्याः सति तथापि स्वयं चलसीत्यत्यन्ताश्चर्यमिति ध्वनितं कान्तेति सम्बोधनात्तदेतदस्मद्दुःखावहमिति सूचितम् अनभिज्ञापक्षे किञ्च स्वस्मिन्नत्यन्तार्द्रस्वान्तास्वस्मासु कपटाचरणं न न्याय्यमित्याहुः । चलसीति । यद्वा न केवलमधुनैवास्मद्दुखाय स्वात्मानं दुःखयस्यपितु सर्वदैव तवेयं रीतिरित्याहुः । चलसोति कलिलतां व्याकुलतां कलिं कलहं लाति गृह्णातीति कलिलं तस्य भावः कलिलता कलहकर्तृता तां गच्छति प्रप्नोति कलहं करोतीति यावत् तथाहि अहो वने भ्रमतः कृष्णस्य परमकोमलं पदं सीदति अरे मनः नैवं तथाचेत्प्रत्यहं तत्र न गच्छेत्तस्मात् किमर्थं वृथा खिद्यसि अयि निर्बुद्धिगोपालिकास्तदीयं पादयुगलं स्थलपद्मादपि कोमलतरं किन्न पश्यत अरे मुग्धमनः वालुकामये कोमले पथि पदं स्थापयत्यतो न सीदति तत् अयि विचारविधुराः पशवः किं तथा भूते स्थले चरन्त्यतस्तान् चारयंस्तनुगच्छति तदा तदीयं पदं शिलादिभिः कथं न सीदति अरे प्रेमान्ध विशालनेत्रोऽसौ तदुपरि पदं किमर्थं स्थापयति अयि प्रेमलेशेनापि विधुरास्त्वरया तदनुभ्रमणकाले तदुपर्य्यवश्यं पदं पतत्येव तेन च पीडा भवत्येव अहो भो भ्रातश्चेतः सत्यमुक्तं त्वया नास्त्यसावस्मदधीनो येन वयं तं वारयामोऽत एवं विधं दुःखं सहन्त्यो जीवामोऽस्मदर्थमेनं विधात्रा सृष्टत्वान भो दुःखिन्यो जीवन्तु भवत्योऽहन्तु युष्मत्कान्तपददुःखं द्रष्टुं नालमतो युष्मद्देहेभ्यः प्राणैः सार्धमधुनैव यामीति मानिनीपक्षे अहो वृथैव वयं त्वामुपालब्धुं प्रवृत्ताः स्वाङ्गेषु दयालेशरहितस्यान्यत्र तत्प्रसक्त्यभावादित्याशयेनाहुः । चलसीति ! हे नाथ शोभनवस्तुमात्रोपतापनस्वभाव यदा पशून् चारयन् व्रजाच्चलसि तदा शिलादिभिः परमकोमलं पदं सीदतीति नो मनः कलिलतां दयया आर्द्री भावं गच्छति परमकठोरान्तःकरणस्य तव तु तत्र करुणालेशोऽपि नोत्पद्यते अतोऽकान्त ! कस्य स्वकीयस्य परकीयस्य च सुखस्यान्तनाशकः तथा च एवं विधकठिनचित्तस्तुविधातृसृष्टौ कोऽपि नासीन्नास्ति न भविष्यति चेति भावः निवृत्तिपक्षे पुनः क्षोभकरीं तच्चेष्टामो वदयन्ति यद् यदा व्रजाद्देहमध्यात्पशूनिन्द्रियलक्षणान् चारयन्विषयलक्षणेषु मार्गेषु भ्रामयन् स्वयमपि चलसि अहं श्रोता स्प्रष्टेत्याद्यभिमानयान्भवसि तदा पद्यते गम्यते इति पदं सान्द्रानन्दघनस्वरूपं नलिनं चतुर्द्दशभुवनात्मकम् पदं सुन्दर येन यदधिष्ठितं येन यदधिष्ठितं सत्सुन्दरतया प्रतीयते तत् तथा भूतपदं यथोक्तयाप्रवृत्त्या शिलतृणाङ्कुरस्थानीयैराध्यात्मिकाधिदैविकाधिभौतिकसंज्ञकैर्दुःखैः सीदतीति कृत्वा नो मनः कलिलतां व्याकुलतां गच्छति यतो हे नाथ ! स्वतन्त्रस्य तत्रैवम्बिधं पारतन्त्र्यमासाद्यदुःखोपभोगो नोचित इति भावः । किञ्च हे कान्त कस्य कस्यापि सुखस्यान्तः परिसमाप्तिरन्तर्भावो यस्मिन्सः तथा च यथा श्वा शुष्कास्थिचर्वण कुर्वन्स्वदन्तनिःसृतरुधिरमस्थिसम्बन्धि मन्यते तथा स्वस्वरूपभूतं सुखं विषयसम्बन्धि मत्वा तदर्थं वृथाखेदं प्राप्नुवन्तं त्वामाऽऽलोच्यास्माकं खेदो भवतीति भावः ॥ ११ ॥

रास-रहस्यम्

र० टी०—हे नाथ ! सर्वान् चेतनादानेन सनाथयतीति नाथः तस्य सम्बोधनं, यत् यदा गाः इन्द्रियादीन् व्रजाच्चारयन् देहमध्याच्चारयन् विषयमार्गेषु भ्रामयन् स्वयमपि कर्ताभोक्तादिरूपेण चलसि अभिमानवान् भवसि, तदा नलिनसुन्दरं नलिनमिव सुन्दरं पवित्रशोभायुक्तं, ते तव, पदं पद्यते गम्यते इति पदं सच्चिदानन्दलक्षणं, यथोक्तया प्रवृत्त्या शिलतृणाङ्कुरैः तत्स्थानीयाध्यात्मिकादिदुःखैः, सीदति व्यथयतीति दृष्ट्वा, हे कान्त ! कानां सुखानामन्तः पर्यवसानरूपः परमानन्दस्वरूपः, नः अस्माकं, मनः चेतांसि, कलिलतां व्याकुलतां, गच्छति प्राप्नुवन्ति, यथा श्वा शुष्कास्थिचर्वणंकुर्वन् स्वदन्तनिःसृतं रुधिरमस्थिसम्बन्धिनं मनुते तथा जीवरूपेण स्वस्वरूपभूतं सुखं विषयसम्बन्धिनं मत्वा तदर्थं वृथैव खेदं प्राप्नुवन्तं त्वामालोक्य मुमुक्षुणां खेदो भवतीति भावः ॥११॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

दिवसे पादपद्माभ्यां वने गमनं त्वदीयं तावदस्माकं न रोचते रात्र्यां ताभ्यां तव चङ्क्रमणमतिसन्तापदमतोऽस्माकं समीपे आगच्छेत्यभिप्रायेणान्या आहुः हे नाथ ! हे कान्त यत् यदा पशून् चारयन् व्रजाच्चलसि तदा नलिनवदारुण्येन मार्दवेन सुगन्धितश्च सुन्दरं ते पदं शिलैः कणिशैस्तृणैरङ्कुरैश्च सीदति क्लिश्येदिति नोऽस्माकं मनः कलिलतां क्षुभिततां गच्छति याति रात्र्यां त्विदानीं सुतरां कलिलतां गच्छत्यत एहि ॥ ११ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ज्ञातस्वतस्वतन्त्रत्वानामस्माकमपि प्रेमविशेषप्रसरान्मन एवं भवति त्वं तत्त्वतो कुहकोऽपि नटयसि तत्वमिति सुदत्यो वदन्ति ॥ चलसीति । यद्यदा व्रजात्पशूंश्चारयंश्चलसि हे नाथ ते नलिनसुन्दरं कमलकोमलं तदपेक्षयाऽपि सुन्दरं वा पदं तृणशिलाङ्कुरैस्तत्स्पर्शेन सीदति विशीर्णं भवतीति नो मनः कलिलतां व्यग्रतां गच्छति । मम युष्माकं च कोऽनुबन्ध इति न वदेति

वदन्ति ॥ कान्तरमणेति । इदानीं कृतं किं मयेत्यामयो युष्माकमित्यतोऽप्याहुः । पशूनिवास्मांश्चारयन्वनं वनं व्रजादस्मात्सङ्गाच्चलस्यन्यत्रेति कान्तकस्य सुरतसुखस्यान्तो येन तत्सम्बुद्धिः । कान्तः स एव यः स्थैर्यधैर्यसौन्दर्यसागरः सुखस्यान्तकरं कान्तमपरं तर्कयामह इत्युक्तेः । अन्ततो गत्वा मम स्वभावोऽयमिति न गद गदाग्रजेत्याहुः । कस्य स्वरूपसुखस्याप्यन्तो निर्णयो येन तत्सम्बुद्धिः कान्तेति । अतः कौहक्यं दर्शयसीति कुहकेत्युक्तमिति भावः । हे मनःकान्तं मनःकान्तोऽश्मरूपं यस्य सो भवांश्चलसीति कलिलतां गच्छत्यस्मद्व्रज इति वा । कान्तोऽश्मनि प्रिय इति विश्वः । निवृत्ताः किल ललना इति न लप यदुपेत्यप्याहुः । नो मनः कलिना तन्नामकद्रुमेण सहिता लता माधवी तदादिकमेव मार्गणार्थं पुनर्गच्छतीति वा । लता कस्तूरिकायां तु माधवीद्रुमयोरपीति विश्वः । भूतावासः कलिद्रुम इत्यमरः । मनःकान्त मनोहर यत्, व्रजात्पशूंश्चारयंश्चलसि तदा तथाऽपि ते पदं नलिनसुन्दरमेव नः पदन्तु तृणशिलाङ्कुरैः सीदतीति भवान्कलिलतां न गच्छतीति वा ॥ कुहकेति । कलिं स्वभावतो लान्त्याददत इति कलिलास्तेषां भावस्तां नाथ भगवान्गच्छतीति कुहकेति वा । यद्यनुप्रासनैर्भर्यं तर्हि शिलतृणेति पाठस्तत्र शिलाः सन्त्यमीष्वित्यर्श आद्यचि शिलानि तृणानि चाङ्कुराश्च तैरित्यर्थः । हे कान्त नो मनः कलिलानां स्वीकृतकलहानां भावस्तां गच्छतीति वा । कलिः स्यात्कलहे शूर इति विश्वः । ते पदं मम मनो नाथते आशास्ते । आशिषि नाथ इति वाच्यमिति वार्तिकादात्मनेपदता ॥ ११ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

राजस्यावचनमाह । चलसीति । अस्माकन्तु स्नेहवशात् त्वद्विषयिका समीचीनेऽपि खेदबुद्धिर्जायते तव तु नास्मद्विषयिणी सत्यपि खेदे जायत इति न्यायविरोधमाहुः । यत् व्रजात्पशून् चारयन् चलसि तत्र चलने नलिनापेक्षापि सुन्दरं कोमलं हे नाथ! ते पदं मार्गस्थितैः शिळतृणांकुरैः शिलाः पाषाणाः तृणानि अङ्कुराः दर्भादीनां तामसानि सात्विकानि राजसानि अथवा शिलारूपं यत्तृणं शिलतृणं कठिनं तृणं तस्याङ्कुरैः अतिपुरुषतीक्ष्णैः सीदतीति क्लेशं प्राप्नोतीति वस्तुतो न प्राप्नोत्येव तथापि हे कान्त भर्त्तः! मनः कीळळतां गच्छति । व्रजादिति । प्रातरारभ्य खेदः सूचितः चलनादेव च खेदः । अतः प्रथमतस्तदेवोक्तं वस्तुतस्तु तव पदे अस्मत्स्थानं विहाय न गच्छतः तथापि भवानेव तथा चालयति किंच व्रजस्थिता गावः अरण्ये नीयन्ते तासां चारणं न मार्गगमनेन भवति अतः अमार्गेऽपि गन्तव्यं भूम्यादीनाम् अनुग्रहार्थं न पादुकाग्रहणं पाल्यानां चर्मच न परिधेयम् अतो नलिनसुन्दरं पदमेव शिलतृणांकुरैः सीदित जले एव स्थातुं योग्यं जलपूर्णं वा नलिनादपि सुन्दरं चेल्लक्ष्म्यामस्मासु वा स्थातुं योग्यं नाथेति सबोधनात् बहव एवात्रार्थे नियोज्याः सन्ति तथापि स्वयमेव गच्छसीति वने हि त्रिविधा भूमिः पर्वतरूपा अरण्यरूपा कच्छरूपा च तत्र क्रमेणैकमेकत्र भवति सर्वं वा सर्वत्र अवसादः अशक्त्या एकत्र स्थितः तदा चिन्ता भवति स्वयं गत्वा स्वहृदये स्थापनीय इति मनः कान्तेति च तेन मनः स्थापितमपि न तिष्ठतीति ॥ ११ ॥

श्रीसुबोधिनी-सारः

हे नाथ हे कान्त यत् यदा पशून् चारयन् व्रजात् त्वं चलसि तदा नलिनं कमलं तद्वत् सुन्दरं ते पदं शिलतृणाङ्कुरैः सीदति दुःखयति व्यथते इति हेतोर्नोऽस्माकं मनः कलिलतां व्याकुलतां प्राप्नोति ॥ ११ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किंच 'त्वयि वयमतिप्रेमार्द्रचित्ताः, त्वं पुनरस्मासु केन हेतुना कपटमाचरसि ?' इत्याशयेनाहुः–चलसीति द्वयेन। स्नेहं सूचयन्त्यः सम्बोधयन्ति हे नाथ हे स्वामिन् ! हे कान्त ! यत् यदा पशूंश्चारयन् व्रजाच्चलसि तदा नलिनवत् सुन्दरं कोमलं ते पदं शिलैः कणिशैस्तृणैरङ्कुरैश्च सीदति क्लिश्येदिति नो मनः कलिलतामस्वास्थ्यं गच्छति प्राप्नोति । एवं त्वद्दुःखशङ्कितचित्ता वयम् ॥ ११ ॥

अन्वितार्थप्रकाशिका

चलसीति ॥ हे नाथ ! हे कान्त ! यत् यदा पशूंश्चारयन् व्रजाच्चलसि तदा नलिनमिव सुन्दरं कोमलं ते पदं शिलैः शूकजान्यकणिशैस्तृणैरङ्कुरैश्च सीदति क्लिश्येदिति नो मनः कलिलतामस्वास्थ्यं गच्छति प्राप्नोति ॥ ११ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

त्वयि अस्माकं प्रेमातिशयोऽस्ति अतोऽस्मासु त्वया कपटं नाचरणीयमित्याशयेनाहुश्चलसीति द्वाभ्यां हे नाथ यदा व्रजात् पशून् चारयन् सन् चलसि त्वं गच्छति तदा नलिनवत्सुन्दरं पद्मवन्मृदु ते पदं शिलैः संतूष्य वन्यध्यान्यकणिशैः अत्यल्पशर्करानिर्वातृणैश्चांकुरैश्च सीदति खिद्यतीति हेतोः हे कान्त नो मनः कलिलतां व्याकुलतां प्राप्नोति । अतोऽतितापदं रात्रिभ्रमणं विहाय शीघ्रीमां गन्तव्यमित्यभिप्रायः ॥ ११ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च त्वयि वयमतीव प्रेमार्द्रचित्ताः त्वं त्वस्मासु कपटमाचरन् केन हेतुनाऽस्मान्वञ्चयसीत्याहुर्द्वाभ्याम् ॥ चलसीति ॥ हे नाथ, हे कान्त, यद्यदा, पशून् गाः चारयन्, व्रजात् चलसि, तदा, नलिनसुन्दरं कमलवत् मोमलं, ते तव, पदं शिलैः कठिनैस्तृणैरङ्कुरैश्च, यदा । शिलैः सशूकवन्यधान्यकणिशैः तृणैः अङ्कुरैश्च, सीदति क्लिश्येत्, इति नोऽस्माकं, मनः कलिलतामस्वास्थ्यं, गच्छति ॥ ११ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

चलसीति : १०.३१.११.

या गावः परितस्तवातिकुतुकाद्धावन्त्युपान्ते भृशं लीलालोलतमे नताः करयुगेनाऽऽह्लादयस्यन्वहम् ।
आभिर्गोभिरकार्यघं किमु विभो ब्रूह्यस्मदीयाभिरित्येतद्यत्समुपागता बत तिरोधत्सेऽभिवीक्ष्यैव ताः ॥ १३० ॥
नलिनाधिकमञ्जु ते पदं भगवन् प्रत्यहमेव वीक्षितम् । सकुशं वनमद्य सञ्चरत्यनुचिन्त्यैत मनोऽतिकश्मलम् ॥ १३१ ॥
अनेकनतिसंस्तवे विरचितेऽप्यलं ते पदे सतां सुखपदे दया न समुदेति यत् सम्प्रति ।
तदद्य विदितं प्रभो निखिलमस्य बीजं जने चिरं खलसमागमो भवति निर्दयत्वप्रसूः ॥ १३२ ॥
दीर्घभावमधिगम्य शिलादौ जाग्रति प्रभुपदे वनसीम्नि । दीनरक्षण-सुलक्षणशीलं तद्गतं गतमिदं न वदामः ॥ १३३ ॥
आवयोर्विरहयोग ईदृशे जातमेतदनुसङ्गतं द्वयम । त्वपदाब्जमिह कण्टकावृतं मानसं कलिलतान्वितं च नः ॥ १३४ ॥
जातं पदं मम तृणाङ्कुरराजिरक्तं जाता वने सुखजुषो नितरां भवत्यः ।
नैवं वदेश परिपश्य मनोऽपि यन्नो जातं सखे तदतनूग्र-शरानुरक्तम् ॥ १३५ ॥
विदर्भभूभृद्रमणीभुवा पुरः समागमस्ते भवितैव सर्वदा ।
सदर्भभूभृद्रमणीभुवाऽधुना प्राप्तं प्रसङ्गं समलङ्करोषि हि ॥ १३६ ॥
दृष्ट्वाऽरिं सतृणास्यमाक्षिपति न क्रुद्धोऽपि वीराग्रणीः, शौरे शूरजनप्रचारसरणिस्त्वेवंविधा दृश्यते ।
पादाब्जं तव गोत्रमूलपुरुषद्वेषीति तत्सम्प्रति प्राप्तं त्वां शरणं तृणाहितमुखं तन्मा पुनः खेदय ॥ १३७ ॥
गावस्ताः समदन्ति कोमलतृणं याः स्युर्महत्यो वने याः स्वल्पामदुपाङ्घ्रिमात्रगतयः संग्राह्यमेतत्कृते ।
इत्यालोच्य विभो त्वया यदि तृणं स्वीये पदे सञ्चितं ताभ्यो दर्शय तर्हि मंक्षु मुखतो निःसारयिष्यन्ति तत् ॥ १३८ ॥
त्वत्प्राणप्रियवल्लभाऽपि भगवन् पद्मा न यत्र स्थितिमक्षुण्णां लभते क्व तत्र गणनाऽस्माकं परासामपि ।
तच्छ्रीमत्पलमद्य ते तृणशलाकाभिः समासादितं दिष्ट्या स्वेष्टतमे समिष्टमकृतोद्योगं हि सिद्धत्यलम् ॥ १३९ ॥
सखे पदमखेदकं सुखकरं परेषामपि प्रसङ्गवशतोऽभवत्तृणमुखं मुहुर्दीनवत् ।
किमन्यसुखदुःखयोः कथनतो वयं तादृशो न हेतुरपरो मनाक् कुटिलकालचेष्टाबलात् ॥ १४० ॥
प्रसङ्गवशतोऽभवत्तृणमुखं पदं ते वयं श्रिताद्रिगहना मिथो बत पराभवाशङ्कया ।
तदद्य निजकौशलाद्धटकभावमाश्रित्य नः पदस्य च कृपानिधे कुरु समञ्जसं सङ्गमम ॥ १४१ ॥
कलाधिपतिना श्रितं पदमिदं यदूनां पते समोदमिह दुर्मुखैःकठिनकण्टकैरावृतम् ।
विभाव्य भजति प्रभो कलिलभावमस्मन्मनः क्षमं हि पितृखेदकृत् सुतपदावमानोदयः ॥ १४२ ॥
सुरेन्द्रमुकुटोल्लसद्-विविधहीरमृद्वङ्कुरप्रभाकिरणसङ्गमादपि यदा स रक्तान्तरम् ।
तदद्य पदमीश ते भवति नैव रक्तं तृणैरपीत्यजनि निर्णयो मृदुदृढत्वयोरार्थिकः ॥ १४३ ॥
पदं नलिनसुन्दरं सरसमानसे यन्मृदुस्थिति भ्रमति तद्वने सतृणजालमालाकुले ।
गतं यदपि नो मनाक् किमपि नाच्युतास्मन्मनस्तथापि खलु खिद्यतेऽनुचितमेतदित्याकुलम् ॥ १४४ ॥
आमोदगर्भमतिमञ्जुरसान्वितं ते पादाब्जमस्ति जगदीश जगत्प्रसिद्धम् ।
तस्मादयं यदुवरालिगणोऽपि यातस्तं वर्जयस्यतनुरागमितीश चित्रम् ॥ १४५ ॥
तृणार्दितं ते पदमीश जातं मनो मुधा खेदमुपैति यद्वा ।
परार्ति-दूरीकरणा-ऽसमर्थो दयार्द्रधीः खेदभुगित्यगूढम् ॥ १४६ ॥
तृणावर्तोद्गतभ्रान्तिरनुभूता त्वया पुरा । भूयोऽपि सा तवाप्तेति खिद्यतेऽस्मन्मनः प्रभो ॥ १४७ ॥
क्षीराम्भोधिनिवास्यपि प्रतिदिनं त्वं यद्रसे सस्पृहो यच्छ्रीमत्पदपद्मशोभमतुलो यस्मिन् रसोऽप्युज्ज्वलः ।
तन्नः कामद मानसं स्मृतिजनुर्हंसं पदं ते नलाक्रान्तं वीक्ष्य सखे मुहुः कलिलतां सम्प्राप्तमित्यद्भुतम् ॥ १४८ ॥
काठिन्यं स्वकरे रमाऽपि परमा साशङ्कमाना सती प्रादायामलकोमलोत्पलदलं संसेवते यच्छनैः ।
तच्छ्रीमत्पदमद्य ते भुवि कथं निम्नोन्नतायां भवेन्निक्षेपार्हमितीश नः प्रतिपदं चित्तं सचिन्तं भृशम् ॥ १४९ ॥

क्षुद्रैरेभिरनाथवन्मम पदं क्षुण्णं तृणाग्रैरिति मा खिद्या न जहीहि धैर्यमवशान्मा सत्रपो वा भव ।
यत्तद्दण्डनशक्तिशालि भगवन्नास्ते प्रदात्रात्मकं चेतोऽस्माकमतस्तु तत्कलिलतां गच्छत्परं स्वीकुरु ॥ १५० ॥
क्षुद्रैर्महानपि पराभवितामनेकैरेकोऽत्र नीयत इति श्रुतमद्य दृष्टम् ।
यच्छ्रीपदं लघुतृणैरपि वीरवर्य ग्रस्तं मनः कथमिदं त्विति चिन्तनैर्नः ॥ १५१ ॥
अस्मत्पदं यदि सखेदमभूत् तृणाग्रैः कस्मात्तु तत्र भवती मनसा विमोहः ।
मैवं कदापि वद माधव यत्पदं तेनैतत्तवास्त्यपि तु नो मनसः पदं तत् ॥ १५२ ॥
सद्राजपूजितमिदं पदनीरजं ते यत्कण्टकाग्र्यचयसङ्ग्रह-मातनोति ।
आश्चर्यमेतदतुलं प्रसमीक्ष्य कस्य न स्यादहो कलिलता हृदि किं पुनर्नः ॥ १५३ ॥
सूर्योदितं तव पदाम्बुजमेतदीश यत्सर्वतोमुखगतीति तृणाग्रशालि ।
विध्वाश्रितं सदपि सद्रवभावमेति चित्रं मनोऽपि तमुपैत्यधुनाऽतिचित्रम् ॥ १५४ ॥
अतीन्द्रियमसङ्ख्यनामयमचञ्चलं त्वत्पदं वदन्ति विबुधास्तथैव शृणुमश्च विष्णो वयम् ।
पदे जगति तादृशेऽप्युदितमद्य तर्कासहं शिलोपमतृणाङ्कुरार्दनमिति स्म नो विस्मयः ॥ १५५ ॥
बुध-गुरु-कवि-सूर्याद्याश्रितं मङ्गलाढ्यं वरनखरसुधांशुप्रोल्लसत्-प्रान्तभागम् ।
वरदपदमिदं ते यद्ग्रहाढ्यं विचित्रमभवदशनिभं तत् तार्णपूर्णप्रचारे ॥ १५६ ॥
लेखाश्रितं पदमिदं तव यत्तृणाग्रप्रक्षेपदुःखभरवाहि भवेत् स्वतो हि ।
तर्ह्यच्युताखिल-सुपर्वसुखावहस्ते जातोऽवतार इति वागनृता न किं स्यात् ॥ १५७ ॥
निष्किञ्चना अपि वयं भुवि ते पदाब्जे तार्णाग्रदुःखमपि जातमलं न सोढुम् ।
सर्वेश्वरः स्वजनरक्षणदाक्षितोऽस्मत्-पीडां कथं विषहसेवतकिं वदामः ॥ १५८ ॥
कण्ठकग्रस्तमपि ते यत्पदं नहि खिद्यते । तद्धेतुस्तव सान्निध्यमिति नस्तादिश प्रभो ॥ १५९ ॥

कृष्णप्रिया

अब अन्य पूर्वा राजस राजसी गोपियाँ अथवा उनका यूथ प्रियतम को दैन्य भाव से निवेदन कर रहा है कि हे नाथ! पशुधन चराने के लिए प्रातःकाल से सायंकाल पर्यन्त व्रजभूमि में एक वन से दूसरे वन में विचरते हैं, तब आपके अनावृत सुकोमल चरण कमल अतिशय तीक्ष्ण तृणों के अंकुरों से दर्भों से, एवं कंकरों से कष्ट को प्राप्त करते हैं इस क्लेश-पीडा को देखकर हे कान्त ! हमारे चित उद्वेग पाते हैं ॥ ११ ॥

दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतम् ।
[1]वनरजस्वलं दर्शयन् मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥

कर्दमक्षमा

अन्वयः —हे वीर ! दिनपरिक्षये, नीलकुन्तलैः, आवृतम्, वनरजःस्वलम्, बिभ्रत्, वनरुहाननम्, दर्शयन्, नः मनसि, मुहुः, स्मरम्, यच्छसि ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्वं तु दिनपरिक्षये सायंकाले नीलकुन्तलैरावृतं घनरजस्वलं गोरजश्छुरितं वनरुहाननमलिमालाकुलपरागच्छुरितपद्मतुल्यमाननं बिभ्रत्सन् तच्च तादृशं मुहुर्मुहुर्दर्शयन्नो मनसि केवलं स्मरं यच्छस्यर्पयसि । न तु सङ्गं ददासीति कपटस्त्वमसीति भावः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तच्च आननम् । इति भाव इति—कुहकानामौपरिकप्रेमा भवति न त्वान्तर इत्यभिप्रायः । अत्रैव वीरत्वं नान्यत्रेत्यभिप्रायः ॥ किं च त्वं संयोगेऽपि नैव सुखं दित्ससीत्याहुः – दिनपरिक्षये सायंकाले । नीलकुन्तलैः कुटिलालकैर्मन्दमारुतलोलितैरावृतं, घनरजस्वलम् 'धनं गोधनवित्तयोः' इति विश्वप्रकाशाद्गोरजश्छुरितं वनरुहाननं लोलालिमालाललितपरागभवच्छुरितसरोरुहसदृशमाननं बिभ्रत् । तच्च मुहुः संदर्शयन् गोसम्भालनप्रियसखान्वेषणमिषेणेतस्ततः परिवृत्यास्मन्नयनगोचरीभवन् स्वदर्शनस्य सर्वजनानन्दकं स्वभावं ज्ञात्वा एताः कष्टसिंधावेव निमज्जयामीति विमृश्य नोऽस्मभ्यं स्मरं यच्छसि । य एव कुलधर्मपदवीं विषज्वालामिवानुभाव्यास्मानुन्माद्य वनेष्वानीयैवं रोदयतीति भावः । हे वीर व्रजस्त्रीणां धर्मध्वंसनार्थमेव प्रवर्तितस्मरशरप्रहार ॥ १२ ॥

---

[1] वन–वीर. विज ; घन–श्रीधर. वंशी. जीव. विश्व. शुक. सु. रा. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

दिनस्य परितः क्षये अत्यन्तप्रान्ते सतीति दुःखाधिक्य सूचितं नीलाः कुन्तला अलकास्तेषां ललाटोपरि श्रीमुखस्यावरणेन शोभाभरापादनात् तैरावृतमिति सहजपरमसौन्दर्यमभिप्रेतम्। अत एव घनरजस्वलम्। धनं गोधनवित्तयोरिति विश्वप्रकाशाद्गोरजश्छुरितमिति। रजसापि तदुल्लासोऽभिप्रेतः। पङ्काङ्गरागरुचिरावितिवत्। विशेषतस्तु गोपोचितवेशस्य तस्य गोपीजातिषु स्वेषूद्दीपनत्वादनुवादः। ततश्च सामान्यतः स्मरार्पणे हेतुः। विशेषतस्तु दिनपरिक्षये नीलकुन्तलैरिति दर्शयन्निति च पूर्वस्य कामोदयवेलात्वात् उत्तरस्य च भावातिशयसूचकत्वात्। यदि चादर्शयन् स्वगृहान्तः प्रविशति तथापि तादृशं कामार्पणं न स्यादिति भावः। तत्रापि मुहुरिति। गोसम्भालनादिच्छलेन पुनः पुनः परितो बहुधा निरीक्षणेन स्मरार्पणस्यापि पौनःपुन्यं दर्शितम्। तच्च कथञ्चित् विचारभरेणसम्बरीतुमिष्यमाणस्यापि तस्य मुहुरुद्भटीकरणं मनसीति स्मरस्यात्यन्तमनोव्यापकत्वमप्रतिकार्यत्वञ्च श्लेषेण स्मरमिति यः कान्तजनस्मरणमात्रेण क्षोभकः तं साक्षाद्यच्छसीति तस्य महत्त्वं सूचितम्। तत्र सामर्थ्यं दर्शयन्ति हे वीरेति। तत्रैव तव वीरत्वं नत्वन्यत्रेति सप्रणयरोषनर्म ध्वनितम्। वस्तुतस्तु तादृशस्वीयभावोद्दीपनमिति भावस्य भावनैव मुहुरनूद्यते। अहो व्रजान्तस्तादृशदर्शनेनापि स्मरोऽभूत्। अधुना च वनान्तर्निशि रत्यर्थनागरवेशेन तत्रापि विरहे स्मरणविशेषेणासौ वर्द्धेतैवेति विलम्बं माकुरु इति भावः। एवं श्लोकद्वयेऽस्मिन्निदमपि व्यज्यते नित्यमेवास्मदभीष्टमपूरयित्वापि गच्छसि त्वय्यस्माकं मनः स्नेहमेव वहति नतु तदभावेनौदासीन्य यं स्मरं वहति तन्तु स्वत्प्रेरिततयैव नतु स्वतः। तथा त्वत्स्नेहमयतयैव नतु रूक्षतया स्नेहस्य स्वभावजत्वात् त्वं पुनरस्मासु सङ्गेच्छया सङ्गच्छमानासु स्मरमेव ददासि नतु मिथः स्नेहोचितं सङ्गं तस्मादस्माकं सर्वं स्नेहमयमेव भवतस्तु कपटमयमेवेति ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं सम्पूर्णदिनं दुःखेनैव वयं गमयामः, सायं व्रजे त्वदागमनेऽपि दुर्भगा न सुखं लभामह इत्याहुः—दिनेति। दिनस्य परितः क्षये अत्यन्ते सतीति दुःखाधिक्यं सूचितम्। नीलाः कुन्तला अलकस्तेषामेवोपरि श्रीमुखक्ष्यावरणेन शोभाभरापादनात्, अतएवाग्रे वक्ष्यते अक्रूरेण (भा०१०।३८।९)—मुखं मुकुन्दस्य गुडालकावृतम्' इति। तैरावृततमित्यादिना परमसौन्दर्य्यमभिप्रतम्। तच्च मुहुः स्मरार्पणे हेतुः, तथा दिनपरिक्षय इति च तस्य कामोदयवेलात्वात्, कुन्तलावृतत्वादिकं सहजसौन्दर्य्यपरिकरत्वेन बिभ्रत् प्रकटयन तच्च नोऽस्मान् दर्शयन् यदि चादर्शयन् स्वगृहान्तः प्रविशसि, तथापि मुहुः कामार्पणं न स्यादिति भावः। मुहुरिति गोसम्भालनादिच्छलेन पुनः पुनः परितो बहुधा निरीक्षणेन स्मरार्पणस्यापि पौनः पुन्यम्। यद्वा, कथञ्चिद्विचारेऽपि सति स्मरस्य मुहुरुदयो मनसीति स्भरस्यात्यन्तननोव्यापकत्वमप्रतिकार्य्यत्वञ्च। स्मरमिति, स्मरणमात्रेण यः क्षोभक्कः स साक्षाद् दर्शनेन परमक्षोभं कुर्य्यादेवेति सूचितम्। तत्र सामर्थ्यं दर्शयन्ति—हे वीरेति। किंवात्रैव तव वीरत्वम्, न त्वन्यत्रेति क्रोध—नर्म्मोक्तिः। अन्यत्तैर्व्याख्यातम्। यद्वा, धनरजो विभ्रत्, अतएव स्वलं सुष्ठ्वलंकृतमित्यर्थः। यद्वा, सुष्ठु अलमतिसयेन त्रिभ्रदित्यनेन दर्शयन्नित्यनेन वास्यान्वयः। यद्वा, विभ्रद् वेणुमिति शेषः। मोहमयेन प्रेमवैवश्येन वा साक्षात्तदुच्चारणाशक्तेः। यद्वा, धनं वेणुलक्षणं रजश्च गव्यमेव विभ्रत्। अन्यत् समानम्। अहो ब्रजान्तस्तादृशवेशदर्शनेनापि स्मरोऽभूत्, अधुना च वनान्तनिशि रत्यर्थं नागरवेशेन, तत्रापि विरहे स्मरणविशेषेणासौ वर्द्धतैवेति विलम्बं मा कुर्व्विति भावः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वनरुहाननं जलजसममुखं घनरजस्वलं घनरजोघूसरितम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं भूतास्त्वत्क्लेशशङ्कितचित्ता वयं तु दिनक्षये सायंकाले नीलकुन्तलैःकेशैरावृतं गोरजश्छुरितं वनरुहाननमलिमालाकुलपद्मरजश्छुरितपद्मतुल्यमाननं मुहुर्मुहुर्दर्शयन्नोऽस्माकं मनसि केवलं हे वीर स्मरं यच्छसि काममुद्दीपयसि नतु सङ्गं ददासि ततः कपटस्त्वमिति भावः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ननु व्याकुलचित्तानां कामोद्बोधायोगात् कृन्धि हृच्छयमिति कथमुक्तम् अत्र वदन्ति। दिनेति। दिनपरिक्षये संध्याकाले वनादागच्छन्निति शेषः। वनरजस्वलं वनूभमौ सता गोरजसा युक्तं दर्शयन् नीलकुन्तलैरावृतं वनरुहं जलजं कमलं तद्वच्छोभमानमाननं विभ्रत् त्वं नो मनसि स्मरं कामं मुहुरनिशं नूतनम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

गमन-समये तावद्दुःखदत्त्वमुचितमेव, आगमने वा सुखदोऽपि न च तथेत्याहुः—दिनपरिक्षय इत्यादि। हे वीर! दिनपरिक्षये सायं व्रजागमनसमये नीलकुन्तलैरावृतं वनरुहाननं दर्शयन् नोऽस्माकं मनसि स्मरं विभ्रद् यच्छसि, असन्तमप्यास्माकं

हृदये स्मरं धृत्वा अर्पयसि; सोऽपि नागच्छति, बलादेवाकृष्यार्पयसीति विभ्रच्छब्द-तात्पर्यम्। हे नीलश्याम! यद्वा, नितरामिलयतीति नीलः, ईल प्रेरणे। कुन्तलैरावृतमिति गोचारणप्रेमव्यञ्जकम्। चारु यथा स्यात्तथा दर्शयन् कुन्तलावृतत्वे कुन्तलान् सम्वार्य दर्शयन्निति चारु-शब्दार्थः। तत् साधूक्तम्—कुहक नो मनः क्षोभयन्तीति ॥ १२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवं व्रजाद् वनगमनावधि सर्वमेव दिनं दुनुमः, तत्र च यदाराद् व्रजमायासि, तदा वा तं सन्तापं हरसि, नापि तथा प्रत्युत प्रकारान्तरेण सन्तपस्येव इत्यन्या आहुः—दिन परिक्षये इत्यादि। हे वीर! सर्वसमर्थ! दिनपरिक्षये व्रजागमनसमये नोऽस्माकं मनसि स्मरं यच्छसि, वस्तुतस्त्वस्माकं मनसि प्रेम विना स्मरो नास्ति; त्वमेव तत्बलादारोप्य विकलयसि, तत्रापि मुहुरेव, न सकृत्, नीलकुन्तलैरतिश्यामचूर्णकुन्तलैरलकैरावृतमेकदेशेनापि संज्ञा गम्यते, कुन्तलाश्चूर्णकुन्तलाः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च त्वं संयोगेऽपि नैव सुखं दित्ससीत्याहुः। दिनपरिक्षये। सायङ्काले नीलकुन्तलः कुटिलालकैर्मन्दमारुतलोलैरावृतम्। धनरजस्वलं धनं गोधनवित्तयोरिति विश्वप्रकाशाद्गोरजश्छुरितम्। वनरुहाननं लोलानि मालाललित-परागभरच्छुरित सरसिजसदृशमाननं बिभ्रत् तच्च मुहुर्दर्शयन् गोसम्भालनप्रियसखान्वेषणच्छलेनेतस्ततः परिवृत्यास्मन्नयनगोचरीभवन् स्वदर्शनस्य सर्वजनानन्दकं स्वभावं ज्ञात्वा एताः कष्टसिन्धावेव निमज्जयामीति विमृश्य नोऽस्मभ्यं स्मरं यच्छसि। य एव कुलधर्मपदवीं विषज्वालामिवानुभाव्यास्मानुन्माद्य वनेष्वानीयैवं रोदयतीति भावः। हे वीर! व्रजस्त्रीणां धर्मध्वंसनार्थमेव प्रवर्त्तितस्मारशरप्रहार! ॥ १२ ॥

श्रीरसिकाह्लादिनी-टीका

एवं दिवा वृन्दावनप्रदेशे क्रीडया दिवसमतिवाह्यास्मदुपेक्षया रसान्तरालम्बनैः सह सुखमनुभूय सायंकाले काम इव वेलायां सम्यक् शोभा-दर्शनासामर्थ्यात् दुःखाधिक्यं सूचितम्। नीलाश्च ते कुन्तलाश्च निलकुन्तलास्तैरावृतम्। अनेन शोभाधिक्यं सूचितम्। वनरुहाननं जलरुहतुल्यमाननं विभ्रत्। यथाऽलिभिरुत्पलस्थितमकरन्दः पीयते तथात्रालकालिभिर्मुखकमलस्थितलावण्यमकरन्दः पीयत इत्यर्थः। घनरजस्वलमितिपरागच्छुरितत्वं कमलस्योपमानत्वात्। तच्च मुहुर्वारं वारं दर्शयन्। कदाचिद्गृहमध्ये प्रविसन् कदाचित् सर्वतो गोपीः कटाक्षवीक्षणेन सम्मानयन् नोऽस्माकं मनसि पौनः पुण्येन स्मरं स्मरणमात्रेण मनःक्षोभकं किं पुनर्दर्शनेनेति। मनोभवत्वात् पुनर्मनस्येवावस्थामर्पयसि पीडाहेतुमेवार्पयसि न निवर्तयसि। गो दोहनकर्मनियुक्तानां तदाकरणनियोग-छद्मना मुखकमलस्य बारं बारं प्रदर्शने कामाग्नेः सन्धुक्षणमिति भावः। हे वीरेति सम्बोधनेनैतत् सूच्यते। अन्यो वीरस्तु प्रतिभटेषु वीररसमाविस्कुर्वन् तद्धृदयेषु शल्यमर्पयन् शोभते त्वं किंकिरीषु वीररसं प्रकटयन् स्मररूपं कर्णतालीकमर्पयन् कथं न लज्जस इति भावः। किं च मुहुर्मुहुः दर्शयन् स्मरं यच्छसि अयमभिप्रायः। रसास्वादनसमयोऽयं न स्मरार्पणसमय इति अनवसरे स्मरार्पणलिङ्गेनाविवेकित्वं सिद्धतीत्यर्थमिति ॥ १२ ॥

विशुद्धरसदीपिका

दिनेति। दिनस्य परितः क्षये अत्यन्तं प्रान्ते सति इति दुःखाधिक्यं सूचितं तत्रापि यथाकथञ्चित् दृश्येत तदर्थं नीलकुन्तलैरावृतं तत्र नीलेत्यावरकत्वं कुन्तलैरिति कुन्तः शस्त्रविशेषस्तत्सादृश्यं गृह्णद्भिरिति मारकत्वं तत्रापि धनरजस्वलं धनं गोधनवित्तयोरिति विश्वः। गोधनरजसाच्छादितं मुहुरिति पुनः पुनर्गोसंभालनादिमिषेण दर्शयन्निति विच्छिद्यादर्शने नातृप्तिः सूचिता स्मरमिति पूर्ववत् क्षोभकमेवेति वीरेति निर्दयत्वमिति संक्षेपः ॥ १२ ॥

श्रीरामनारायणकृता भावभावविभाविका

किञ्च त्वयैव प्रेरितः कामस्त्वां विना न यापितः स्यादित्याहुः। दिनपरिक्षये इति। दिने पूर्वदिनचिन्ताविरहाभ्यां द्वेषसम्भावनया तत्परिक्षयोक्तिः सर्वास्मिन् दिने या नस्त्वत्कमलकोमलपदोः शिलाद्यवसादचिन्ता समस्तदिने संचिता सा चिन्तातो विन्दुनाधिकत्वात्तद्दशगुणा भवति यथाकथञ्चिद्दिनक्षये तु त्वत्सुखागमावगमेन तच्चिन्ताक्षयप्रवेशेऽपि नः क्षयोपायमेव करोषि नतु दुःखापायमिति तदेवाहुः। नो मनसि स्मरं यच्छसि आदौ स समय एव स्मरस्मारकः स च स्मरः स्मरणमात्रेणास्मन्मारकः तच्च त्वं विभ्रन्नानाभावैः पोषयन् बलान्मनसि यच्छसि तच्च स्ववेश्मनि नो मनसि तत्प्रेरणमेवानुचितं तदपि प्रेरणं न सामान्यत इति सम्बोधनेनैवाहुः। वीरेति। विशेषत ईरयतीति तथा किञ्च यद्विजयाय समुद्यतस्तस्य स्ववेश्मनि निवेशे तद्युद्धमेवोचितं नतु पलायनमित्यपि श्लेषेणाहुः। वीरेति। वीरेत्यत्र तव कामसंग्राम एव भिरामो विरामेतु वीरत्वक्षतिः यतस्तव मारणे एव नतु मारमणमारेण अतो वीरवरस्त्वं वरवर्णिनीर्नोवरतया वरय नहि मारमणेन मारेण मारयेति भावः। नन्वहं त्वेरयामीति शङ्कायामपि श्लेषेणैवोत्तरमाहुः। वारेति। विविधतयेरयसि नैकधेति भावस्तदेव विविधत्वं दर्शयन्ति मुहुराननं दर्शयन्निति आ ईषदपि नेति याचितमङ्गकारा न यस्मिंस्तद्रतिस्नेहमात्रविशेषैर्नो याश्चास्त्रोकारगोश्वास्य काम पूरयित्वा मुहुरिति पुना रूक्षभावैरासमन्तात् ननेति

विनयास्वीकारो यस्मिंस्तं दर्शयंस्तेन हृदयमति क्षोभयसि तथा वनरुहेति तद्विशेषणेन वनरुहं कमलं तत्सादृश्यद्योतकेन तस्य मुख्यमदनवाणत्वं ध्वनितं तस्य दर्शनञ्च दृग्द्वारेण तस्य हृदयप्रवेशनमिति तदिषुप्रवेशे तत्प्रावल्यसम्भवात्सुतरां तन्निवेशः एवङ्कामोद्दीपनं मुख्यं विषयं दर्शयंस्तद्विशेषयन्ति नीलकुन्तलैरावृतमिति । नीलैः कृष्णस्निग्धैर्मुखाब्जमधुपमधुपवलितयावलिकुन्तलैरलकैरावृतं वेष्टितमित्यनेन कामोद्दीपकविषयसन्निधाने कदाचित्कामोदयाभावोऽपि विषयतद्भोक्तुभयसन्निधावावश्यकत्वमेव कामोवद्भवस्येति भावः । मुखपद्मस्य तत्तन्मधुपरागाद्भावकमधुपरागान्वितत्वं दर्शयन्त्य आहुः । धनरजस्वलङ्गोधनरजोव्याप्तं घनरजस्वलमिति पाठेतु बहुतररजोयुक्तमित्यर्थः । तथा च स्वसाजात्यस्य गोपोचितवेषविशेषद्योतनेनातितरां स्वमनोमनोद्भाकत्वं ध्वनितं यद्वा वनरुहाननमिति पद्मनिधिरूपमाननं मुहुः गोगणनादिषु क्रीडादिसुहृत् क्रीडाव्याजेन पुनः पुनर्दर्शयन् किं भूतं तत् धनं रूपधनं तेन रजस्वलं तेन तद्रजसा मदेन च व्याप्तं नीलकुन्तलैस्तद्रक्षककृष्णनागाकारैरावृतम्मुहुर्हसितापाङ्गनिरीक्षणादौ तत्समृद्धिभूतदर्शनमुक्ताधरविद्रुमपद्मरागतोरन्द्रनीलानाद्याविष्कारेण दर्शयन् तत्काम नो मनसि यच्छसीति भावः । यद्वा नीलकुन्तलैरावृतं तथा धनरजस्वलमेवाननं बिभ्रद्दर्शयन् नतु कुन्तलसमूहसमूहनरजः क्षालनाभ्यां स्पष्टं दर्शयन् अतिशोभमसमानभानेन अविद्याक्षोभवदस्पष्टतया मुख्यस्य मुहुर्दर्शनेन मनः क्षोभयन् स्मरं यच्छसि यद्वा काम एष क्रोध एष रजोगुणसमुद्भव इत्यादि स्मृतिभी राजसस्य कामस्योपशमकनिरतिशयरत्यात्मकसितामृतमयराजसोपलक्षितसच्चित्सुखदर्शनेन तदुपशमसम्भवेऽपि तव कुन्तलादेः स्वरूपात्मकत्वेऽपि नीलवर्णप्रयुक्तमः प्राणरणभ्रमेण धनरजोरजोयुक्तत्वमत्या रजः प्रभवः कामप्रभवः प्रभवतीति भावः । किंच व्रजे वनरुहाननं दर्शयित्वा स्मरदानेन वने नो रोहयित्वा वनरुहाननादर्शनमनुचितम् अतो वनरुहाननस्य नो नयनपथनयनेनावनतवनितावनं विधेहि ॥१२॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

भगवतस्त्वस्मद्भाग्यवशात्करुणा नोत्पद्यत इत्याशयेनाहुः दिनेति । दिनस्य परिक्षये सन्ध्याकाले परिक्षयपदेन न दिने प्रदोषो ध्वनितः दिनपरिक्षये अगत्या आयासीति भावः । प्रविष्टान्धकारकालेऽप्यागतौ कमलरूपमाननं नीलवर्णैः कुन्तलैरावृतं सम्यगदृश्यमानं तत्रापि धनं गोधनवित्तयोरिति कोशाद्गोरजोव्याप्तमितस्ततः प्रेक्षणेन नयनं दर्शयन्नपि नो भनसि स्मरं काममेव यच्छसि नत्वङ्गसङ्गं तत्रापि कामवाणैर्वेधयन्वीरत्वमेव प्रकटयसीति संबोधनाशयः । अनभिज्ञापक्षे त्वन्तु संयोगसमयेऽप्यस्मद्दुःखायैव भवसि इत्यासयेनाहुः । दिनस्य विरहनिमित्तत्वात्परमशत्रोः परिक्षये सम्यक्नाशे सायङ्काले अनेनोद्दीपनकाल उक्तः भ्रमरकुलमालावृतजलवन्नीलकुन्तलावृतं मुखमित्यालम्बनस्य सौन्दर्य्यातिशयो व्यज्यते तत्रापि धनरजस्वलमिति गोपोचितवेषेणोद्दीपनं तादृशं मुखं सर्वतो व्यावर्त्तनेन पुनः पुनर्दर्शयन् तेन स्वापेक्षां सूचयन्नो मनसि स्मरं स्मरणमात्रेणापि क्षोभकरं वलाद्यच्छसि अर्पयसि हे वीर अत्रैव त्वं वीरो नतु कामयुद्धेऽत एव सर्वदा स्मरमेव यच्छसि न त्वङ्गसङ्गमिति तव सर्वं सकपटमेव चेष्टितमस्माकं तु तत्सकलं प्रेममयमिति भावः । मानिनीपेक्ष यथा दयां विहाय स्वाङ्गेषु त्वया चेष्टितं तथास्माकमपीत्याहुः । दिनेति तथाभूतं मुखं मुहुर्दर्शयन्नो मनसि स्मरं यच्छसि तथाचास्मान्कामयुद्धाय वलात्कारणोद्यताः सम्प्रति तद्युद्धावसरे पलाय्य गतोसीति दृष्टं तव वीरत्वमित्याशयेन संबोधयन्ति । हे वीरेति । निवृत्तिपक्षे तथा दिनस्य तत्स्थानीयस्य विवेकस्य परिक्षये वनरुहस्य यथोक्तपद्मस्याननं सत्तास्फूर्तिप्रदं चैतन्यं नीलकुन्तलस्थानीयैः घटपटादिप्रत्ययैरावृतं विधृतं तथा धनरजखलं वित्ताद्यर्थं विक्षेपोत्पादकेन रजोगुणेनावृतं पुनः पुनस्तत्तज्जन्म सुदर्शयन्नोऽस्माकं मनसि स्मर वित्तं यच्छसि स्मेत्याश्चर्य्ये यतस्त्वं वीरः अविवेकादिसमस्तशत्रुपराजयसमर्थ इत्याशयेन संबोधयन्ति हे वीरेति ॥ १२ ॥

रास–रहस्यम्

हे वीर ! अधिष्ठानरूपेण सर्वान् विजयते इति वीरः, तस्य सम्बोधनं, दिनपरिक्षये वैराग्यस्य न्यूनतापन्ने प्रारब्धपुण्यकर्मणां परि परितः क्षये समाप्ते सति, वनरुहाननं वने हृदयारण्ये रोहति ध्यानबलादाविर्भवति इति रुहं, एवं तव आननं स्वरूपं, नीलकुन्तलैरावृतं तत्स्थानीयविषयाकारवृत्तीनां मलिनत्वात् नीलत्वं तैरावृतं अर्थात् तदन्तरालात् स्वल्पदर्शनं, पुनः कथम्भूतम् ? घनरजस्वलं बहुतररजोगुणसंयुतं, वायुताड़ितचञ्चलजले सूर्यप्रतिबिम्बवत् वारं वारं दर्शयन्, न अस्माकं, मनसि चेतसि, विभ्रत् धारयन्, ते स्मरं कामं प्राप्तिकामनामेव, त्वं यच्छसि ददासि ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विहारानर्हे सायं कालेऽपि त्वां दृष्ट्वा विहारेच्छास्माकं जायते विहारयोग्येऽस्मिन् समये तु वयमत्यातुरा अतश्चरणपङ्कजं नस्तनेषु अर्पयेत्याहुरन्याः । दिनपरिक्षये सायं काले नीलकुन्तलः भ्रमरमालावत्परितः स्थितैरावृतं घनरजोभिः सघनैर्गोरजोभिश्छुरितम् वनरुहाननं पद्मतुल्यमाननम् बिभ्रत् तत्राननं मुहुर्दर्शयन् नो मनसि स्मरं कामं यच्छसि अर्पयसि इदानीं तु निर्जने वने रात्र्यां त्वदर्थमत्यौत्सुक्यमस्माकमस्ति ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कलिलमन्यत्रागच्छन्नो मनस्त्वत्कृतस्मृतिमति त्वमित्यं तनोषि स्मृत इति वदन्ति ॥ दिनपरिक्षप इति । सायंसमये नीलकुन्तलैर्नीलालकैरेत एव त्वद्विरहे रहः कुन्तहस्तवद्विद्यमाना इति ध्वनयितुं श्यामलालकैरित्यनभिदधाना अभ्यधुः कुन्तलैरिति

मन्तव्यं। कुन्तल केशपर्यायः कुन्तहस्तवच्च कुन्तलं इत्यनेकार्थध्वनिपदमञ्जरी। नैल्यं लोहमयत्वात्तत्रापि सम्भवि। आवृतं वयरुहाननं बिभ्रद्वनानां यतद्भूमौ गोरजस्तद्युतं हे वीर दर्शयन्मुहुर्नो मनसि स्मरं यच्छसि। मुहुरित्यत्रापि योज्यं ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं सप्तविधा अनन्यपूर्वा निरूपिताः चतस्रश्च सपूर्वाः अतः परं क्रमेण षट् ता एव निरूप्यन्ते तत्र प्रथमं राजसतामस्या षचनं ता हि बहिर्गत्वा द्रष्टुमशक्ता अतो यदा संध्यायां भगवानायाति तदा भगवन्तं दृष्ट्वा मनसि कामो भवति ततो बन्धप्रार्थना अधरामृतप्रार्थना च रजसा सत्त्वेन च भविष्यतः अनन्यपूर्वाणां तु नित्य एव कामः दिनपरिक्षये संध्याकाले क्षयोक्त्या दिने द्वेष्यत्वं ज्ञाप्यते रजोगुणस्यायं समयः कामस्य च कालः नीलकुन्तला भ्रमरा इव रसबोधकाः ये हि मुखकमललावण्यामृतं पिबन्ति ते उद्बोधका भवन्ति अतस्तैरावृतं वनरुहवत्कमलवत् आननं बिभ्रत् हे वीर ! नः मनसि स्मरं यच्छसि संध्यायां नीलवर्णैरावृतत्वे तत्प्रभवयाप्तत्वं भवतीति तदुक्त्या वनरुहत्वोक्त्या च कुवलयाभत्वं ज्ञाप्यते तथाच प्रियामुखेन्दुदर्शनेनोत्तरोत्तरमधिकविकासवत्त्वमितः पूर्वमतादृशत्वं च ज्ञाप्यते तेन प्रियस्य सर्वास्वासक्तिः सूचिता भवति। अत एव जलपदं विहाय वनपदमुक्तं तेन वने यावस्था तां ज्ञापयितुं तान् धर्मान्बिभ्रदेवाननं दर्शयतीति ध्वन्यते धनेन गोभिः रजस्वलं मुहुश्च प्रदर्शयन् मध्ये मार्गं गच्छन् उभयतःस्थिता गोपीः पर्यायेण पश्यति अतो मुहुः प्रदर्शनम् अग्रे गच्छत्पुनः पुनर्व्यावृत्य पश्यतीति वा तथा तादृग्दर्शनं स्वापेक्षाज्ञापकमिति स्मरजनकं निरन्तरदर्शनेन तत्रैव रसास्वादनमिति न स्मरोत्पत्त्यवसरःस्यात् अतो वारंवारं प्रदर्शनं स्मराग्नेः संधुक्षणामिव भवति तादृशं कृत्वा तत्पूरणार्थं तन्निराकरणार्थं वा युद्धमवश्यं भवति श्रमनिवृत्तिश्चास्माभिरेव वनरुहमिति वन एव तत्सर्वथा भोग्यम् अतोऽत्रैव समागमनम् अनेन गृहे रतिं दास्यामीति एक्षो व्यावर्त्तितः विभ्रदिति। बलात्कारेण तामेवावस्थां स्थापयति। यदि मुखसम्मार्ज्जनं कृत्वा समागच्छेत्तदा प्रसन्नमुखदर्शनात् ज्ञानं वा भवेत् धनसंवन्धिरज इति काम एव नतु क्रोधः यथापात्रं धृत्वा तत्स्थितमन्नं भोगार्थं दीयते तथा मुखं धृत्वा तत्रत्यो रसः कामात्मा मनसि स्थाप्यत इति मुखधारणस्य हेतुत्वम् , अतो भोगार्थं दत्त इति भोगः करणीयः अयं कामआगन्तुक इति नास्यान्येन पूरणं भवति ॥ १२ ॥

श्रीसुबोधिनी–सारः

दिनस्य परिक्षये नाशे संध्यायां नीलैः केशैरावृतं घनं सान्द्र रजोऽस्यास्तीति तद् वनरुहाननं मुखपद्मं बिभ्रत् मुहुर्दर्शयन् नोऽस्माकं मनसि स्मरं कामं त्वं यच्छसि उद्भावयसि। हे वीर ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

दिनपरिक्षय इत्यत्र, **विभ्रत्पद**तात्पर्योक्तौ, **ज्ञानं वा भवेदिति।** भक्त्यात्मकत्वात् मुखस्य स्नेहरसानुभव एव स्यादित्यर्थः ॥ १२

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्वं तु दिनपरिक्षये सायंकाले नीलकुन्तलरावृतं घनरजस्वलं गोरजश्छुरितं वनरुहाननं अलिमालाकुलपरागच्छुरितपद्मतुल्यमाननं बिभ्रत् मुहुर्मुहुर्दर्शयन् नो मनसि केवलं स्मरं यच्छसि अर्पयसि, नतु सङ्गं ददासि। 'इति कपटत्व वारस्य तव नोचितम्' इति सूचयन्त्यः सम्बोधयन्ति—वीरेति ॥ १२ ॥

अन्वितार्थप्रकाशिका

दिनेति ॥ हे वीर ! त्वं दिनस्य परिक्षये सायंकाले नीलकुन्तलैरावृतं घनरजस्वलं गोरजश्छुरितं वनरुहाननम् अलिमालाकुलपरागच्छुरितपद्मतुल्यमाननं बिभ्रत् मुहुर्दर्शयन् नो मनसि केवलं स्मरं यच्छसि अर्पयसि न तु सङ्गं ददासीति कपटपटुता ।१२।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दिनेति इत्थं वय तु त्वयि अत्यासक्तमनसः स्मः त्वं तु दिनपरिक्षये दिनस्य क्षये सूर्यास्तकाले नीलैः कुन्तलैः केशैः आवृतं धनरजस्वलं गोधनरजोयुक्तं वनरुहाननं भ्रमरालिव्याप्तपरागच्छुरितकमलसदृशं मुखं बिभ्रत् तच्च मुहुर्मुहुर्दर्शयन् हे वीर। स्मरबाणेन घातयितुसमर्थ नो मनसि सर्वथा स्मरं काममेव यच्छसि ददासि नतु अङ्गसङ्ग एवं संयोगकालेऽपि तवाऽऽचरितं कपटमयमेवास्ति अस्माकं तु निखिलं शुद्धप्रेममयमेवेत्याशयः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दिनेति ॥ वयं तु एवं त्वद्दुःखशङ्कितचित्ताः भवाम इति शेषः। त्वं तु दिनपरिक्षये सायंकाले, नीलकुन्तलैर्नीलकेशैः आवृत, धनरजस्वलं गोरजश्छुरितं, वनरुहाननमलिमालाकुलपद्मरजश्छुरितपद्मतुल्यमाननं, बिभ्रत् तच्च, मुहुः पुनः पुनः दर्शयन्, नोऽस्माक मनसि, हे वीर, स्मरं यच्छसि केवलं काममेवोद्दीपयसि न तु सङ्गं ददासि ततः कपटनिभृतान्तः करणस्त्वमसीति भावः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दिनपरिक्षय इति : १०.३१.१२

महानरिरयं मनोजनिरिहेति तत्सङ्ग्रहः कृतः कुत इति प्रभो वदसि चेत् स्मर स्वां कृतिम् ।
यतो दिनपरिक्षये स्वयमलङ्कृतो गोगणैरुपेत्य मुखतोऽददाः सपदि कामदानं बलात् ॥ १६० ॥
त्वन्नीलकुन्तलरजः कलिताऽऽस्यवीक्षाप्रादुर्भवत् स्मरविलासि मनोऽस्मदीयम् ।
तद्युक्तमेव भगवन् यदिहाबलानां चेतः सुतोदयकृते हि रजश्चिनोति ॥ १६१ ॥
यन्नो मनो हि मदनोदयशाल्यभूत्तत् त्वास्तां विविच्य नहि पश्यसि किं निजास्यम् ।
यत् सद्द्विजात्मकलितं रजसेति युक्तं सर्वो जनोऽपि निजदोषनिरीक्षणेऽज्ञः ॥ १६२ ॥

शैवालजालकलितं जलजं कलेशंलीलाविलासि विपुलामल-धूलिमालम् ।
तत् सर्वदाल्यतनुलोलुपतर्द्धिकृत्स्यादेवेति नाद्भुतमिदं वदनाम्बुजे ते ॥ १६३ ॥
अत्यल्पनील-चल-कुन्तल-मौलिदेशं क्षोणीपरिभ्रमण-लग्नपरागजालम् ।
दृष्ट्वा मुखेन्दुमिह ते मनसोऽनुरागो युक्तो हि यत्पितृमुदे स्वसुतास्यवीक्षा ॥ १६४ ॥
दृष्ट्वा त्वदीयमुखचन्द्रमतन्द्रशोभमस्मन्मनः स्मृतनिजात्मज चन्द्ररूपम् ।
उत्कण्ठितं भवति युक्तमिदं हि लोके सादृश्यधीर्जयति स्वगतार्थबुद्धिम् ॥ १६५ ॥

मुखेन्दुरयमीश ते भवति सिद्धचन्द्राधिको यतः स तमसांशतो वृततनुस्तदा निष्प्रभः ।
अयं पुनरनेकशोऽप्यधिवतोऽपि नीलालकैस्तमोभिरविलुप्तभस्तदिह नो मनो मोदते ॥ १६६ ॥
कृष्णालकावलि-समावृतमाननं स्वं कृत्वा व्यदर्शि भवता यदहःसमाप्तौ ।
जातेऽन्धकारसमये भविताऽखिलेष्टमेतादृगर्थविदुपैति मनः प्रमोदम् ॥ १६७ ॥
दिनावसाने मुखपङ्कजं तव विलोक्य नीलालक-षट्पदाश्रितम् ।
यदस्मदक्षि भ्रमरद्वयं पपौ तदीययोगन-समोदमन्तरम् ॥ १६८ ॥
नीलालकालिमय मञ्जुलकम्बलस्य कृत्वाऽन्तरे निजमुखं गुरुलोकभीत्या ।
स्पृष्ट्वा च नः स्तनयुगं नयनेन हस्तेनादर्शयदेव मदनो न तदाऽर्पितः किम् ॥ १६९ ॥

कृत्वा खेटकमण्डलं घनकचप्राचुर्यरूपं पुरस्तीक्ष्णाग्रेण निजाक्षिलक्षित-कटाक्षाख्यासिनेश त्वया ।
वीर्यं स्वं बहु सन्दिदर्शयिषुणा दीनेऽपि सस्त्रीजने रक्षेमाः स्मर किं मृषा स्वपिषि किं नोक्त्वा स उत्थापितः ॥ १७० ॥
सायं नीलविशालकेशमयसद्रोलम्बमौर्वीयुते वक्रभ्रूधनुषि स्वनेत्रकमलं सयोज्य बाणं त्वया ।
तद्रूपेण तदायुधानि दधता संलक्षितोऽसौ मुहुः त्यक्त्वा शान्तिमनन्तकापकलितो जातस्तदैव स्मरः ॥ १७१ ॥

अपि भूरितरं रजोऽवलीढं मुखमेतत्तव चित्रकार्यकारि । परमेश यदत्र तद्दृशां नो हृदये सात्त्विकभावमातनोति ॥ १७२ ॥
ये तु त्वन्मुखपद्मसौष्ठवतिरीधानोद्यतास्तान् कचान् मूर्ध्नि त्वं मलिनान् बिभर्षि सुरतामोदप्रदा याश्च ते ।
तासां नोऽसुलभं पदेक्षणमपि प्रायः प्रयासैरपि तद्दृष्टं त्वयि राजनीतिरचना—चातुर्यमन्यादृशम् ॥ १७३ ॥
अद्यैवेश निशोदये स्वमुखतो यत्कामदानं कृतं तच्चेद्रक्ष्यधुना मया न विहितं तन्मोनमेवाश्रयः ।
यस्मादत्र न साक्षिणः सुमतयो ये सन्ति तैः किं फलं त्वत्तुल्याः कुटिला रजोनुगुणिताः केशास्त्वदीया हि ते ॥ १७४ ॥

दाता मुखं प्रतिग्रहीतृमनोऽस्मदीयं दानं च काम इति साधु परन्तु तस्य ।
निष्कामलिङ्गवशतो न तयोः प्रसक्तिस्तन्नो दिशासु तत एव च ते कृतार्थे ॥ १७५ ॥
यत्कामदानमिह तन्निशि तन्निशान्ते निष्कामदानमिति शास्त्रविचक्षणेन ।
द्व्यर्थं विभाव्य तदिदं निशि वा निशान्ते दत्तं तु निर्वहणमस्य विचिन्तनीयम् ॥ १७६ ॥
पुत्रार्पणं निशि विधाय यथा त्वयेश दूरीकृतो हि मनसो लघु तद्वियोगः ।
स्वीयाङ्घ्रि-दर्शन-समर्पणतस्तथैव दूरीकुरुष्व विरहं स्वमहो दयाब्धे ॥ १७७ ॥

कृष्णप्रिया

अब अन्य पूर्वा राजस तामस गोपियाँ गोविन्द को निवेदन कर रही है कि, हे वीर संध्या काल में श्याम चिक्कण केशों से घिरे हुए और गोरज से भरा हुआ मुख सरोज का पुनः पुनः दर्शन कराते हुए आप हमारे उरपुर में अनुराग को उत्पन्न करते है ॥ १२ ॥

प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शन्तमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥ १३ ॥

कर्दमक्षमा

अन्वयः—हे रमण ? प्रणव कामदम्, पद्मजार्चितम्, धरणिमण्डनम्, आपदि, ध्येयम्, शन्तमम्, ते, चरणपङ्कजम्, हे, आधिहन् ? नः, स्तनेषु, अर्पय ॥ १३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतोऽधुना कपटं विहायैवं कुर्विति प्रार्थयन्ति श्लोकद्वयेन । प्रणतकामदमिति । हे आधिहन्हे रमण पद्मजेन ब्रह्मणाऽर्चितमापदि ध्येयं ध्यानमात्रेणापन्निवर्तकं शन्तमं च सेवासमयेऽपि सुखतमं ते चरणपंकजं कामतापशान्तये नः स्तनेष्वर्पयेति ॥ १३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तमनुपलभ्यैव बोधयन्त्य आहुः—अत इति । यतो नः स्मरं यच्छसीत्यतो हेतोः 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । आधिः कामपीडा तां हन्तीति तथा । अन्यथा नामवैयर्थ्यं स्यादिति भावः । एतत्समर्थकसम्बोधनान्तरमाहुः—रमणेति । रमते निःशंकमिति रमणः । इह रात्रौ न कोऽप्यायास्यतीति भावः । प्रणतानां नागाङ्गनादीनां वाञ्छितदम् । वत्साहरणरूपापराधित्वेन वृन्दावने नित्यमागत्य पद्मजेनार्चितम् । धरण्या भूमेर्मंडनं भूषणम् । चरणपङ्कजमित्युक्त्या तापहारित्वं ध्वनितम् ॥ ननु यद्यहं सदा दुःखयाभ्येवेति निश्चिनुध्वे तर्ह्यलं मया युष्माकमिति तत्कोपमाशंक्य हन्तहन्त स्वकर्मदुःखान्धाभिस्त्वय्यपि दोष आरोपित इत्यनुतप्य तं प्रसादयितुं सर्वसुखदत्वेन स्तुवत्यस्त्वयैवास्माकं प्रयोजनमिति द्योतयन्त्यः स्वदुःखोपशमनं प्रार्थयन्ते—प्रणतेति द्वाभ्याम् । प्रणतानामपराधीभूयापि नम्राणां कालियतत्पत्न्यादीनां कामदम् । पद्मजेन ब्रह्मणा स्वापराधोपशमनार्थमर्चितमतोऽस्माकमपराधः क्षम्यतामिति भावः । धरणिमण्डनमिति—अस्मत्कुचानपि तेषु चरणार्पणेन मण्डयेति भावः । ध्येयमापदीति—"अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ" इति गर्गोक्तेः । आपदोऽस्मांस्त्रायस्वेति भावः । सर्वत्र हेतुः–शन्तमम् सर्वकल्याणरूपं सर्वसुखरूपञ्च । आधिहन् आधिं हन्तुमित्यर्थः । न च स्तनेषु चरणार्पणे तत्र कोऽपि श्रमः प्रत्युत सुखमेवेत्याहुः—हे रमण ! रिरंसोस्तव तेनैवाभीष्टसिद्धिर्भाविनीति भावः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं प्रहसितमित्यादिभिस्तासामेव प्रेमोक्तिद्वारा पूर्वमवर्णितः श्रीकृष्णस्य तासु पूर्वरागः श्रीमुनीन्द्रेण स्पष्टीकृतः तासु तदीयरागस्य ताभिरनुभूयमानतया वर्णनेनैव महारसावहत्वादिति ज्ञेयम् एवं तदङ्गसङ्गानुरागे तस्यैव दोषं विन्यस्य तथैव तत्प्रार्थनाद्वयमुपसंहरन्त्यः स्वयं गीतेन जातस्मरक्षोभाः पुनः प्रार्थयन्ते । प्रणतेति द्वाभ्याम् । प्रणतानां नलकूबरनागतत्पत्न्यादीनामभीष्टदमिति सर्वार्थप्रदत्वमुक्तम् । अत एव बालवत्सान् हृत्वा ज्ञाततत्त्वेन वन्द्यमानचरणः पथि वृद्धैरित्यनुसारान्नित्यमेवागच्छता वा विखनसार्थित इत्यस्य व्याख्यानुसारेण वा पद्मजेनार्चितमिति पारमैश्वर्यं धरणिं भूतलं सुन्दरासाधारणलक्षणैर्ध्वजादिभिर्मण्डयतीति तथा तत् इति सौन्दर्य्यं कृपालुत्वं च ध्येयमापदीति इन्द्रकृतवृष्ट्यादावनुभवात्सर्वापन्निवर्त्तकत्वम् । एवं सर्वार्थसाधकत्वमुक्त्वा स्वतः परमफलत्वमाहुः । शन्तमं चेति एवं दुःखहानिसुखावाप्तिहेतुत्वं यदुक्तं तदनुसार्य्येव सम्बोधनद्वयं विवेचनीयम् अतोऽस्माकं विरहादिव्यथां नाशय विचित्रक्रीडादिना सुखं च सम्पादयेति भावः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं गीतेन जातस्मरक्षोभात् पूर्वतो विशेषेण वर्णयन्त्यः प्रार्थितमपि वैयग्र्यात् पुनः प्रार्थयन्ते—प्रणतेति द्वाभ्याम् । प्रणतानां कामदमभीष्टदमिति सर्वार्थप्रदत्वमुक्तम् । अत एव पद्मजेनार्चितमिति परमैश्वर्य्यम्, धरणिं भूतलं सुन्दरासाधारणलक्षणैर्ध्वजादिभिः प्रेमभक्तिप्रवर्त्तनेन च मण्डयतीति तथा तदिति सौन्दर्य्यं कृपालुत्वञ्च, ध्येयमापदीनि भक्तिविघ्नादि-सर्वापन्निवर्त्तकत्वम्, अनेन भक्तिप्रवर्तनमेव दृढीकृतम् । एवं पूर्ववत् पङ्कजरूपकेण सूचितं सर्वार्थसाधनत्वं दर्शितम् । दुःखादिध्वंसनेन कामदत्वेन च स्वतः परमफलत्वं चाहुः –शन्तमञ्चेति । य एतदाम्मोद्देशेन तद्द्वयानुसारेण सम्बोधनद्वयं विवेचनीयम्, अतोऽस्माकं विरहादिव्यथां नाशय विचित्रक्रीडादिना सुखञ्च सम्पादय, तथा आत्मानं चार्पयेति भावः । अन्यत्तैर्व्याख्यायम् । यद्वा, प्रगतानां भक्तानां ब्रह्मादीनां कामदं पद्मजया लक्ष्म्या अर्चितमिति परमसौभाग्यनिधित्वं धरणिं लक्ष्मीद्वितीयां निजप्रियां विचित्रक्रीडया स्तनोपर्य्यवस्थित्या च मण्डयतीति यद्वा, धरण्या मण्डनं कुचकुंकुमादिना चित्रादिनिर्म्माणेन चालंकारो यस्येति प्रियजनपरवशत्वं रसिकत्वञ्च, एवं लक्ष्मीतोऽपि धरण्यां प्रीतिरधिका ध्वनिता, सा श्रीवराहपुराणादौ प्रसिद्धैव । ध्येयमापदीति विरहदुःखमोचकत्वं परम्, शन्तमंमसुखप्रदं तदात्मकञ्च ? एवं पक्षद्वयेऽप्येयां यथोत्तरं श्रेष्ठ्यम् । ते त्वदीयानां नः, अतोऽर्पणं युक्तमेवेति

भावः। किञ्च, हे रमणेति तत्रापि तव रति शीलत्वादित्यर्थः। आधिहन्निति, अन्यथा अस्माकमन्त्यदशापत्त्या तवाधिहन्तृत्व-कीर्त्तेर्लोपः स्यादिति भावः। अस्यैवं विस्तारोऽग्रे श्रीमदक्रूरमनोरथे यदर्च्चितमिति, तत्र प्रणतेत्यस्य विस्तारः। ब्रह्मेत्यादि ध्येयमित्यस्य, मुनिभिरिति धरणीत्यस्य, सात्वतैरिति गोचारणायेति च शन्तमामित्यस्य, यद्गोपिकानामिति। एवं पूर्व्वमुक्तात् पापहन्तृत्वादिमाहात्म्यादत्र कामदत्वादिना विशेष ऊह्यः, तत्र च पूर्व्वं द्वितीयपक्षे निजदैन्यनिवेदनपूर्व्वकमेव प्रार्थनम्, अधुना च गीत क्रमेण श्रीपदाब्जे मनः प्रवेशात्तस्यैव सुखाद्यपेक्षया केवलं तदेकवर्णनेनैवेति भेदः। किञ्च, पूर्व्वं तत्प्रयोजनं साक्षादेवोक्तम् हृच्छयं कृन्धीति। अत्र च आधिहन्निति सम्बोधन द्वारा परोक्षवादेनैव तस्य चोत्कर्षः, (भा० ११।२१।३५) 'परोक्षवादा ऋषयः परोक्षञ्च मम प्रियम् इति श्रीभगवदुक्तेः। तेन च पूर्व्वं कामरोगस्यैव, अधुना चाशेषमानसपीड़ाया एव नाश इत्येषा दिक् ॥१३॥

श्रीसुदर्शनसूरिकृतं शकपक्षीयम्

शन्तमं सुखतमम् ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अतोऽधुना कपटं विहाय संगतो भवेति प्रार्थयन्ते द्वाभ्याम्। हे रमण! तव चरणपङ्कजमस्माकं स्तनेष्वर्पय निधाय कामाग्निं शमयेति भावः। तदनुगुणं सम्बोधयन्ति हे आधिहन्निति आधिर्मनःपीडा कथम्भूतं शन्तमं सेवासमये सुखतममापदि ध्येयं च धरण्या मण्डनमलङ्कारभूतं ह्रस्वत्वमार्षं पद्मजेन ब्रह्मणार्चितं प्रणतानामभीष्टदञ्च ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

धरणिमण्डनं भूमिभूषणं सर्वापदि ध्येयं पद्मजार्चितं ब्रह्मणा राधितं शन्तमं सुखतमम् आधिहन्! मनोदुःखनाशन! ते चरणपङ्कजं नः स्तनेष्वर्पय निधेहीत्यन्वयः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अतो व्रजाद्गमनसमये पशुचारणजनितशिलतृणाङ्कुरलब्धावसादचरण-स्मरणदुःखस्य शान्तिर्न विन्यस्तस्तनाधिकरणक-तदीयस्पर्शेन सम्भवतीति तथैव कर्तुमुचितम्। एवमागमनसमयेऽपि वदनाम्बुजदर्शनकरणकमनोऽधिकरणकस्मरार्पणजनितदुखञ्च न विनाधरामृतदानेनापसरतीति च तथैव कर्तुमुचितमिति च दुःखद्वयस्य निर्वापनार्थमुपायद्वयं क्रमात् श्लोकद्वयेनाहुः—प्रणत-कामदमिति द्वाभ्याम्। हे रमण! हे आधिहन् चरणपङ्कजं स्तनेष्वर्पय। कीदृशम्? शन्तमं कल्याणतमम्, शं शब्दोऽव्ययः, शंयुरित्यादिदृष्टेः। प्रणतानां कामदमभीष्टदमिति इष्टम्; पद्मजेन ब्रह्मणार्चितमिति दुर्लभम्, धरणीमण्डनमिति करुणामकरन्द-निष्यन्दि, आपदि ध्येयमिति सर्वापद् विनाशकम् ॥ १३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ननु भोः! यद्गतं तद्गतमेव, सम्प्रति किं कर्त्तव्यं तद्वदत इत्याशङ्क्यान्या आहुः—हे रमण! चरणपङ्कजं नोऽस्माकं स्तनेष्वर्पय। आपदि विरहे ध्येयम्, प्रणतकामदम्, वयं किमप्रणताः? पद्मजार्चितमस्माभिः किं नार्च्यते? धरणी-मण्डनमिति धरण्यामेव निरन्तरं भ्रमणीयम्, अस्माकमपि वक्षोमण्डनं भवत्वित्याक्षेपः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु यद्यहं सदा दुःखयाम्येवेति निश्चिनुध्वे तर्ह्यलं मया युष्माकमिति तत्कोपमाशङ्क्य हन्त हन्त स्वकर्मफलदुःखान्धाभिस्त्वय्यपि दोष आरोपित इत्यनुतप्य तं प्रसादयितुं सर्वसुखदत्वेन स्तुवन्त्यस्त्वयैवास्माकं प्रयोजनमिति द्योतयन्त्यः स्वदुःखोपशमनं प्रार्थयन्ते। प्रणतेति द्वाभ्याम्। प्रणतानामपराधोभूयापि नम्राणां कालियतत्पत्न्यादीनां कामदं पद्मजेन ब्रह्मणा स्वापराधोपशमनार्थमर्चितमतोऽस्माकमपराधः क्षम्यतामिति भावः। धरमणिमण्डनमित्यस्मात् कुचानपि तेषु चरणार्पणेन मण्डयेति भावः। ध्येयमापदीति अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथेति गर्गोक्तेरिति आपदोऽस्मांस्त्रायस्वेति भावः। सर्वत्र हेतुः। शन्तमं सर्व-कल्याणरूपं सर्वसुखरूपञ्च। आधिहन्! आधिं हन्तुमित्यर्थः। नच स्तनेषु चरणार्पणे तव कोऽपि श्रमः प्रत्युत सुखमेवेत्याहुः। हे रमण! रिरंसोस्तव तेनैवाभीष्टसिद्धिर्भाविनीति भावः ॥ १३ ॥

रसिकाह्लादिनी-टीका

स्मर्यमाणेन तव पूर्वाचरणेनेदानीं मनसि क्षोभो जायते। अतः कपटं विहाय सङ्गं देहीति प्रार्थयन्ते। यद्यप्ययमर्थः पूर्वं प्रार्थित एव प्रणतदेहिनामित्यनेन पादाम्बुजार्पणं कुचेषु प्राथितमेव तथापि बिस्मितत्वात् पुनरपि प्रार्थयते। अथवा बहु-वक्तृत्वान्न पुनरुक्तिः। एवं वर्णनेन विरहार्त्तिविह्वलत्वादिव। चरणपंकजस्थापनं छद्मना पुनरपि सम्भोगमेव प्रार्थयन्ते सुरतवर्द्धनमित्यस्मिन् श्लोके स्पष्टीभविष्यत इति। प्रणतेति, हे रमण रतिप्रद ते चरणपङ्कजं नः स्तनेष्वर्पय कीदृशं प्रणतानां कामदं सर्वाभीष्टप्रदं,

नलकूवरादिषु तथा दर्शनात् पद्मजेन ब्रह्मणाऽर्चितं पूजितं "दृष्ट्वा त्वरेण निजधोरणतोऽवतीर्य पृथ्व्यां वपुः कनकदण्डमिवाभिपात्येति" परमावश्यकत्वात्। धरणिमण्डनं ध्वधादिभिः षोड़शश्चिह्नैः धरणिं मण्डयतीति कृपालुत्वमुक्तम्। किं चान्ये देवाः पादैर्भुवनं स्पृशन्ति। अयं तु देवोत्तमः सुतरो परन्तु वृन्दावनभूमेर्लौकिकं माधुर्यं येनाकृष्टः पादत्राणमन्तरेण पादसंचारिणा भूम्याः जनितं सुखमनुभवति। भूदृष्टान्तेन तमलङ्करणं संभाव्याशासते। ध्येयमापदि ध्यानमात्रेण सर्वापन्निवारकं गजेन्द्रादिषु तथा श्रूयमाणत्वात्। तथा वयमपि स्मरापद्ग्रस्तास्ततोऽस्मान्मोचयेति ध्यानमात्रमघनिवर्त्तकं किमुत स्पर्श इति भावः। कैमुत्यन्यायेन स्पर्शमेवाशासते एव सकामानां अभीष्टप्रदत्वेन आर्त्तिनामार्त्तिनिवर्त्तकत्वेन सेव्यत्वमुक्त्वालंकर्माणामलंकृतिप्रदत्वेन सेव्यत्वमुक्वा भूस्तु वराहभोग्या नित्यप्रिया वृन्दावनभुवस्ततोऽपि वैशिष्ट्यतस्तस्या नित्यसम्बन्धं चोक्त्वा निष्कामानां परमपुरुषार्थमाहुः। सन्तमं सेवासमये सुखप्रदं सुखरूपं च एतादृशं चरणपङ्कजं शैत्यहेतुत्वात्। ततस्तनेष्वर्पय विशेषणफलं स्वस्मिन्नेव पर्यवस्यति। त्वच्चरणपङ्कजं स्वभावत एव प्रणतकामदम्। वयं प्रणतास्तासाभभीष्टप्राप्तिर्यादि नाभविष्यत्तदा कोऽपि प्रणतो नाभविष्यत्। पद्मजार्चितं ब्रह्माण्डाधिकृतेन ब्रह्मणा पूजिता वयमपि भूसादृशेनालंकारार्थं स्वीकुर्म इति। आपदि ध्येयं यथा गजेन्द्रादय आपदो मोचितास्तथा वयमपि स्मरापदो मोचनीया इति। यदि वास्माकमापन्निर्वर्तनं नाभविष्यत्तदा कोप्यार्त्तस्तव पादोपसृतिं नाकारिष्यत्। वयमार्त्ता आर्तिनाशाय तव पादस्पर्शं कामयामहे इति। शन्तमं सेवासमये निष्कामानां सुखरूपं वयमपि निष्कामाः केशनिर्वोढुमतिलंघ्य समस्तबन्धुनां स्तनेषु चरणपङ्कजं निधेहीति दैन्यमावेदितम्। हे रमण हे आर्त्तहरण इति विशेषणद्वयेनेदं सूच्यते इति पदत्वेनाऽधिहन्तृत्वेन तव प्रसिद्धिरस्ति। भक्ताभीष्टप्रदत्वेन चरणकीर्तिरप्यस्ति। अस्मान्मनोरथ्या पूरणे महती तव प्रसिद्धिर्भविष्यतीति भाव ॥ १३ ॥

विशुद्धरसदीपिका

तदेवं प्रहसितमित्यादिभिस्तासामेव प्रेमोक्तिद्वारा पूर्वमवर्णितः श्रीकृष्णस्य तासु पूर्वानुरागः सूचितः तासु तदीयरस्यताभिरनुभूयमानतया वर्णनेनैव रसावहत्वादितिज्ञेयं तदेवं स्मरक्षोभवर्णनेनोद्दीपिततद्भावाः प्रार्थयन्ते प्रणतेति द्वाभ्याम् प्रणानां नागपत्न्यादीनामभीष्टदम् इति सर्वार्थप्रदत्वं पद्मजेनार्चितमिति पारमैश्वर्य्यं तच्च वत्सहरणप्रसङ्गे अथवा वन्द्यमानचरणं पथि वृद्धैरित्याद्यनुसारात् धरणिमण्डनमिति सौन्दर्य्यं कृपालुत्वं च ध्येयमापदीति आर्तिहरत्वं च एवं सर्वार्थसाधनमुक्त्वा स्वतः परमफलत्वमाहुः शन्तमञ्चेति। एवं दुःखहानिसुखावाप्तिहेतुत्वं यदुक्तं तदनुसार्य्यैव सम्बोधनद्वयम्। आधिहन्! रमणेति च अतोऽस्माकं विरहादिव्यथां न शय विचित्रक्रोडासुखं संपादयेति भावः ॥ १३ ॥

श्रीरामनारायणकृता भावभावविभाविका

एवं तदुद्भाषितामेव स्वव्यथां निवेद्य तदुपशमाय प्रार्थयन्ति। प्रणतकामदमिति। हे रमणेति सम्वोधनेन स्वभावत एव रमणस्य तव रमणं भविष्यत्येवेति वृथैवायं तवाग्रहः। यद्वा रमणशीलस्यापि तव किमस्मदभाग्यादेव "राजन्कनकधाराभिस्त्वयि वर्षति निन्यदा। अभाग्यच्छत्रच्छन्नत्वान्मयि नायान्ति विन्दव" इत्यत्रोक्तन्यायेन रमणवैमुख्यमेवमपि तव नान्याय्यं भगवतः ससखीनामभाग्या नौचित्यात् अतो रमस्व तथा हे आधिहन्! आधिर्हि मानसी व्यथा तथाच हृच्छयपीडानिवर्त्तकस्य तव तत्क्रीडाभावे व्रीडास्पदमेव। यद्वा रमणेतिपदेनैश्वर्यधर्मयशः श्रीतिभगचतुष्टयेनाभ्युदयप्रदत्वमुक्तं आधिहन्नितिज्ञानविरागाभ्यामपवर्गप्रदत्वं तथाचार्थप्रदस्यानर्थात्मकचिन्तापहत्वं धर्मप्रदस्य कामाग्निना दाहकत्वं कामप्रदस्याविरहस्वरूपाभेदस्यापि मोक्षाविर्भावकस्य स्वरूपतिरोभावे नाधिवर्धनं विरुद्धं तस्माद्रमणत्वेन रमणप्रवृत्त्या सुष्ठुरमणेनाधिहनना यादौ चरणपङ्कजं नस्तनेष्वर्पय तेन हृच्छयाधिशमनं भवेत् यथा तव भगाख्यषड्ङ्गवत्त्वात्संष्टदत्वं सर्वानिष्टनिवर्त्तकत्वञ्च तथा त्वत्सदृशमेव तव चरणमिति भावः। तदेवाहुः। प्रणतकामदमिति। धर्मो दर्शितः। तत्र धर्मो द्विविधः सकामो निष्कामश्च तयोः सकामस्य सर्वकामप्रदत्वं प्रसिद्धं भगवच्चरणमपि प्रणतानां सर्वकामदं उक्तञ्च किमलभ्यं भगवति प्रसन्ने श्रीनिकेतन इति तथा आशामहे यदित आशिष ईश नान्य इति च। निष्कामस्तु हृदयशोधकतया कामनिवर्तकः भगवच्चरणं च प्रणतानां कामं द्यति खण्डयतीति तथा उक्तं च तथापि तत्परा राजन्नहि वाञ्छन्ति किञ्चनेति तथा—

सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः। स्वयं विधत्त भजतामनिच्छतामिच्छापिधानं निजपादपल्लवमिति ॥

किञ्च भवच्चरणस्य कामप्रदानेऽपि तन्निवर्तकत्वं तदुक्तं भगवतैव—

न मय्यावेशितधियां कामःकामाय कल्पते। भर्जिताः क्वथिता धानाः प्रयो वीजाय नेष्यतः ॥ इति।

अनेनैव वैराग्यमपि ध्वनितं तथाच कामपूरकत्वेन कामपूरणं षूरणद्वारैव तदुपशमनमप्युचितम् ऐश्वर्य्यं दर्शयन्ति। पद्मजार्चितमिति। पद्मजेन सर्वपरमेष्ठिना ब्रह्मणापि पूजितं तदा च ब्रह्मणा स्वतः पूर्णनापि सर्वजनसुखार्थमेव सुखस्य सत्त्वाधीनतया रजसा तदनिर्वाहमभिप्रेत्य पूजितमित्यस्माकमपि सुखदानमेव योग्यमितिभावः। यशोऽपि जनवृजिनवर्जनेन भवति अन्येषां मण्डनेन वा तत्रादिमाहुः। ध्येयमापदीति। आपदि ध्येयं ध्यानमात्रेणापन्निवारणं तथाच तद्ध्यायतीनां नोविरहाद्यापदयोग्यैवेति

भावः । द्वितीयमाहुः । धरणिमण्डनमिति । कतिचिज्जनमण्डनेन यशोविस्तारसम्भवे किमु वाच्यं धरणिमण्डनस्य । अत्र धरणिगतसर्वजनमण्डनमेव धरणिमण्डनत्वं सरोविकासवत् । यद्वा असाधारणवज्राङ्कुशादिभिरङ्कैर्धरणिगतयावत्तन्मण्डनं त्वमनेन पृथिव्या श्रीकारितया निरतिशया श्रीरपि दर्शिता अन्यशोभकत्वेन श्रियोऽतिशयं बोधयित्वा स्वरूपतः शोभनत्वेन श्रियमाहुः । पङ्कजमिति । तत एव शोभनं तथा च सर्वश्रीकरस्य स्वतः श्रीमयस्य नः श्रीकरणमेवाचितं ज्ञानं फलेन द्योतयन्त्य आहुः । शन्तममिति । तथा च स्वयं शन्तमेन सर्वशङ्करेण चरणेन नस्तनशङ्करयोः शङ्करणीयमिति व्यञ्जना ॥ १३ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु यद्यहं करुणारहितस्तर्ह्यलं मया युष्माकमिति तत्कोपमाशङ्क्याहुः । भगवन्न वयं त्वयि दोषमारोपयामः किन्तु स्वमन्दभाग्यं वर्णयामोऽतस्तव सङ्गमप्रतिबन्धकदोषनिरासाय त्वां प्रार्थयाम इत्याशयेनाहुः । प्रणतेति । ते तव चरणकमलं नः स्तनेष्वर्पय । यद्यपि त्वदीयं चरणसरोजमन्तर्हृदयेऽस्माभिः स्थापयिषितं तथापि न तत्र स्थापयितु शक्यमतस्तत्र त्वमेव स्थापय चरणस्यापि षड्विधैश्वर्यसम्पन्नत्वात्तत्स्थापनेनास्माकं सर्वं प्रयोजनं संस्थास्यतीत्याशयेन तद्वत्त्वप्रतिपाकानि विशेषणानि तत्र प्रकर्षेण नतानामनन्यशरणानां कामप्रदमभिलषितसमस्तैश्वर्य्यप्रदं पदं पद्मस्थानं स्तब्धैर्ग्रहीतुमशक्यमतः प्रणतेत्युक्तं पद्मजेन ब्रह्मणा पद्मजया लक्ष्म्या वार्चितमिति धर्माधारतोक्ता तथा धरण्या मण्डनमलङ्करणरूपमनेन यशोऽधिकरणता निरूपिता तथा आपदि ध्येयं श्रीप्रदानेनापन्निवर्तकमिति श्रियोऽधिकरणता कथिता शन्तमं कल्याणतममिति वैराग्यज्ञानाश्रयता दर्शिता ततश्च हृदयस्थं कामाधिं नाशयेति ध्वनयन्त्यः सम्बोधयन्ति हे आधिहन्निति तन्निवृत्तिरपि नैतावता किन्तु रमणे कृते इत्याशयेनाहुः । हे रमणेति । एवञ्चान्येषां तत्तत्फलप्रदमप्यस्माकं यथोक्तफलमात्रप्रदमस्त्विभावः । यद्वा चरणपङ्कजमस्माकं स्तनेषु अर्पय एतावतैवास्माकं मनोरथपूर्त्तिर्भविष्यति तस्य सर्वफलप्रदत्वादित्याशयेनाहुः । पद्मजेति एवं ब्रह्मलक्ष्म्यादिभिरपि तदेवार्चितं किञ्च धरणिमण्डनमतोऽस्मत्स्तनमण्डनं कथं न भविष्यतीति भावः किञ्च ध्यानमात्रेणापन्निवर्तकं स्पर्शन त्वापन्नाशोऽपि भविष्यतीतिभावः । किञ्च शन्तमं मोक्षपर्य्यन्तशान्तिसम्पादकं ततश्च तत्स्पर्शनास्माकं मोक्षोऽपि नालभ्य इति भावः । नचास्ति भगवतोऽस्माकम्वाऽनेन कश्चिद्दोष इत्याशयेनाहुः हे रमणेति । किञ्च समस्ताधिनाशाय कृतावतारस्य तवावश्यं स्वीयानामस्माकमाधिनाशः कर्तव्य इत्याशयेनाहुः । हे अधिहन्निति अनभिज्ञापक्षे अतः सम्प्रति कपटं विहायैवङ्कुर्विति प्रार्थ्यमावेदयन्ति । प्रणतेति । प्रणतानां नागपत्न्यादीनां कामप्रदं सर्वार्थप्रदम् अतएव वत्साहरणान्ते पद्मजेनार्चितं धरणिं ध्वजादिचिह्नैर्मण्डयतीति तथा अनेन कृपालुत्वं सौन्दर्य्यातिशयत्वञ्च दर्शितं तथापदि ध्येय महेन्द्रकृतवातवर्षाद्यापन्निवर्तकत्वेनानुभूतम् एवंसुखसाधनत्वमभिधाय सुखरूपत्वमाहुः । शन्तमामिति । एतावताप्यस्मदाधिवाशे तव किञ्चिद्यत इत्याशयेनाहुः हे आधिहन् ! तत्र तदर्प्यणयोग्यश्च त्वमित्याशयेनाहुः । हे रमणेति यद्वा तेन तवापि सुखमेव भविष्यत्वतो न वयमायासकरे कर्मणि त्वां प्रेरयामः त्वन्तु स्वार्थाऽविरुद्धमप्यस्मत्प्रयोजनं न सम्पादयस्यत्यन्तमाश्चर्य्यमिति ध्वनयन्त्यः सम्बोधयन्ति । हे रमणेति । मानिनीपक्षे ननु युष्मद्दर्शनान्मम मनसि कामोद्दीपने तच्छान्त्युपायः को वा भवतीभिर्विचार्य्योऽङ्गीकृत इति चेत्तत्राहुः । चरणपङ्कजं स्वीयं नः स्तनेष्वर्पय तेन च स्वकामाधिं नाशयेत्याशयेनाहुः । हे आधिहन् यत एव तावतैव रतिसुखमवाप्स्यसीत्याशयेनाहुः । हे रमणेति । नचैतावतास्माकं मानहानिस्तव पादपद्मस्य सर्वकामप्रदत्वात्सर्वैरादृतत्वाच्चेत्याशयेनाहुः । प्रणतेत्यादि । निवृत्तिपक्षे तस्मात्स्वात्ममतस्य जीवात्मनो यथोक्तसंसृतिप्रवाहोपशामार्थं स्वचरणसरोजं नः स्तनेषु कर्मोपासनापरभागेषु अर्पय ते तादृशवदेभागाः भगवच्चरणारविन्दार्च्चनध्यानपरा इत्यधिकारिचेतस्याविर्भावय ततश्च तदर्चनध्यानपरन्त तस्य सर्वं सेत्स्यातीत्याशयेनाहुः । प्रणतेति । अत एव ब्रह्मादिभिरर्चितं भक्तपारवश्यमाहुः । धरणीति । स्वीकृतरामकृष्णाद्यवदयद्वारामोक्षसुखप्रदं जीवरूपेण संसरणमीश्वररूपेण मित्यमुक्ततयावस्थानमाराध्याराधकाभावश्चेत्येतत्सर्वं तव लीलामात्र नतुवस्तुत इत्याशयेनाहुः । हे रमणेति ॥ १३ ॥

रास-रहस्यम्

र० टी०—हे रमण ! सर्वस्मिन् रन्तुं शीलमन्येति रमणः, तस्य सम्बोधनं, आधिहन् ! कामनानामपूरणजन्यः मनस्तापः आधिः, तं हन्ति नाशयतीति आधिहा सम्बुद्धौ आधिहन्, शन्तमं सर्वेषां विक्षेपाणामुपशमकारणीभूतं सर्वोत्कृष्टकल्याणस्वरूपं, प्रणतकामदं प्रणतानां प्रपन्नानां काममभिलषितं ददातीति तत् कामदं, पद्मजार्चितं ब्रह्मादिभिः सेव्यमानं, धरणीमण्डनं धरण्योपलक्षितसंसारप्रपञ्च स्वस्वरूपप्रकाशेन मण्डयति अलङ्करोतीति तत्, ध्येयमापदि ध्यानमात्रेणापन्निवर्तकं अतः ध्यानयोग्यं ते तव चरणपञ्जं पङ्कजवत् चरणं किरणं आत्मज्योतिः, नः अस्माकं, स्तनेषु स्तनं हृदयस्थानं तेषु अर्पय स्थापय ॥ १३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अतोऽधुना चरणपङ्कजं नोऽस्माकं स्तनेषु आधिहन् ! हे रमण अर्पय कथम्भूतं शान्तमं प्राप्तकाले निरतिशयानन्दजनकम् आपदि ध्येयं स्मरणमात्रेणैवापन्नाशकम् धराणमण्डनं धरण्याः भूषणम् । ह्रस्वत्वमार्षं प्रणतानां सर्वकामपूरकम् पद्मजो ब्रह्मातदर्चितम् ब्रह्मादिपूज्यमित्यर्थः ॥ १३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे रमण आधिहन्मनोव्यथामथनं पद्मजार्चितं धरणिमण्डनं। धरणी धरणिर्महि महीति द्विरूपकोशः। तदलङ्काररूपमापदि आ सम्यग्व्यक्तं पदि धूल्यङ्किते पादे दृष्टे सति ध्येयमिति वा। यथोक्तं परस्तात्। पदानि व्यक्तमेतानि नन्दसूनोर्महात्मनः। लक्ष्यन्त इत्यादि। अनेनापद्यवेति निरस्तं भवति। ध्येयं शन्तममतिसुखम्। स्वित्यानन्दः समुद्दिष्टो वरिति ज्ञानमुच्यते। मुक्तिदानेन तद्दानात्सुवरस्य पदद्वयमिति बृहद्भाष्योक्तेः। चरणपङ्कजं नः स्तनेष्वर्पय। यद्यपि ते पदाम्बुजं कृणु कुजेषु नः कृन्धि हृच्छयमिति प्रागस्यार्थस्य प्रार्थितत्वात्पुनरर्थनमादराद्वाऽनेकासां कामिनीनां मेलनात्तत्र कासाञ्चिदत्र कासाञ्चिदिति वा ज्ञानदातृत्वोपाधिना तत्रैकमानन्ददातृत्वोपाधिनाऽत्रैकमत एव शन्तमित्युक्तमिति वा युक्तम्। एवमुत्तरत्रापि ज्ञेयम। नः स्तनेष्वस्मच्छन्देषु चरणपङ्कजमर्पय तस्तुतिरतमस्मच्छन्दं कुर्विति तात्पर्यमिति ॥ १३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत उत्तमा अनन्यपूर्वावत् स्तनयोश्चरणधारणं प्रार्थयन्ति। प्रणतेति। अत एव न पौनरुक्त्यं परं पूर्वापेक्षया अत्र चरणमाहात्म्यमधिकं गुणाधायकमेतत् पूर्वं तु दोषनिवर्त्तकं हे रमण रतिकर्त्तः नः स्तनेषु चरणपङ्कजमर्पय प्रयोजनमाहुः। आधिहन्निति आर्तिहन् इति वा हृदयतापः चिन्ता च निवारणीये दृष्टोषकारेणैव तापो गमिष्यति अस्माभिर्हृदयेस्थापितं न बहिः समायाति अतस्त्वया बहिःस्थापनीयं चरणपङ्कजस्यापि भगवत इव षड्गुणानाहुः। तत्र प्रथममैश्वर्यं प्रणतकामदमिति प्रकर्षेण येन ता अनन्यशरणाः तेषां कामदमभिलषितार्थदातृ ईश्वर एव तथाविधो भवति। तत्रत्यः कामः स्तब्धैर्ग्रहीतुं न शक्यत इति प्रणतत्वमुक्तं पद्मजार्चितमिति धर्मरूपता निरूपिता ब्रह्मप्रार्थनयैवात्रागतमिति कीर्त्तिरूपतामाहुः। धरणिमण्डनमिति। धरण्या मण्डनमलङ्करणरूपं श्रीरूपं वा आपदि ध्येयं श्रीरूपं वा पङ्कजसाम्यात् रूपोत्कर्ष उक्तः शन्तमं कल्याणतमं ज्ञानरूपम् आर्त्तिहन्निति संबोधनात् ते चरणपङ्कजमिति सम्बन्धनिरूपणात् वैराग्ययुक्तं च रमणेऽभीष्टप्रापकः आर्त्तिहन्नित्यनिष्टनिवारकः अथवा यल्लोके पञ्चविधमुपकारं करोति तदस्मास्वेकमेवं करोत्विति प्रार्थ्यते प्रणतासु कामं ददाति तत्पूर्वमुक्तं मनासि नः स्मरं वीर! यच्छसीति प्रकर्षेण नम्रेषु वा कामं द्यति खण्डयति पद्मजेन पद्मजया वा अर्चितम् ऐश्वर्यार्थं कामार्थं वा पद्मजेन अर्चितं तत्तुल्यार्थम् अन्यथा तानि चरणपङ्कजजन्म कथं प्राप्नुयुः धरण्यपि स्त्री अनलङ्कृता न भुज्यत इति तस्यां पदस्थापनं भगवदपेक्षयापि चरणो महान् आपदि ध्यानमात्रेणैवापदं दूरीकरोतीति यथैतेषां सर्वोपकारकातृ तथास्माकमपि करोत्विति प्रार्थना अनेन सर्वे एव सुरतबन्धा आक्षिप्ताः ॥ १३ ॥

श्रीसुबोधिनी–सारः

हे रमण हे आधिहन प्रणतानां कामदं पद्मजेन ब्रह्मणाऽर्चितं धरण्या भूमेर्मण्डनम् अलङ्करम् आपदि ध्येयं दुःखे चिंत्यं शन्तमं परममंगलं ते चरणपङ्कजं नोस्माकं स्तनेष्वर्पय निधेहि ॥ १३ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

प्रणतकामदमित्यत्र, अथवा यल्लोक इत्यादि। लौकिककामखण्डनैश्वर्यस्वकामदानालंकरणापद्दूरीकरणात्मकं पञ्चविधमुपकारं करोति तच्चरणपङ्कजं तापनिवारणात्मकमेकमेव पकारमस्मासु करोत्वित्यर्थः। **पद्मजैरर्चितमिति** चरणपद्मजैर्नखैस्तथेत्यर्थः। लोके तेषां संयोगिद्रव्यत्वेपि भगवन्नखानां सच्चिदानन्दरूपत्वेन स्वरूपात्मकत्वेन तथा वक्तुमशक्यं यद्यपि, तथापि स्वस्याधुना चरणसम्बन्धेत्यार्त्या यदेव तत्सम्बन्धि तदेव पूर्णसाधनमित्याशयेन तथोक्तम्। अस्मिन्पक्ष उपपत्तिमाहुरन्यथेति। उक्तारुच्यैव पक्षान्तरमाहुस्तत्तुल्यं वेति। तैरतिशोभा। अतस्तैश्चरणपद्मं पूजितमिव भवतीत्यर्थः। ध्वजादिचिह्नानि चोक्तरूपाणि ज्ञेयानि ॥ १३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'अतोऽधुना कापट्यं विहाय आविर्भूयास्मत्प्रार्थितं कुरु' इत्याहुः—प्रणतेति। 'अस्मन्मनोग्लानिस्त्वया निरसनीया' इत्याशयेन सम्बोधयन्ति—आधिहन्निति। तत्र हेतुं सूचयन्त्यः पुनः सम्बोधयन्ति–रमणेति। कामसन्तापनिरासाय ते तव चरणपङ्कजं नोऽस्माकं स्तनेष्वर्पयेत्यन्वयः। 'कथं चरणसम्बन्धेन तापनिवृत्तिः' इति शङ्का पङ्कजपदेन निरस्तापि पुनस्तन्निरासकत्वे हेत्वन्तराणि सूचयन्त्यो विशिंषन्ति—पद्मजेन ब्रह्मणार्चितमिति। तत्रापि हेतुमाहुः—प्रणतानां कामं मनोरथं ददातीति तथा तत्। धरण्या मण्डनमलङ्कारभूतम्। धरणि इति ह्रस्वमार्षम्। आपदि ध्येयमिति ध्यानमात्रेणाप्यापन्निवर्तक मति। शन्तमं सेवासमये एव परमानन्दजनकमित्यर्थः ॥ १३ ॥

अन्वितार्थप्रकाशिका

प्रणतेति ॥ हे रमण! हे आधिहन् मनोदुःखप्रशमक! प्रणतानां कामदं पद्मजेन ब्रह्मणाऽर्चितं धरणेर्मण्डनमलङ्कारभूतम् आपदि ध्येयं ध्यानमात्रेणापन्निवर्तकं शन्तमं सेवनेऽप्यानन्दजनकं ते चरणपङ्कजं नोऽस्माकं कामशान्तये स्तनेष्वर्पय ॥ १३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अत इदानीं कपटं त्यक्त्वा दयामवलम्ब्यास्मन्मनोऽभिलषितं कर्त्तव्यमेवेत्याहुः प्रणतेति । द्वाभ्यां हे आधिहन् अस्माभिः सह रमणेन मदनमार्गणव्यथाशमन पद्मजेन विधिना पूजितं धरणिमण्डनं धरण्या भूमेर्मण्डनं शोभा जनकं आपदि आपत्काले तन्नाशाय सर्वैर्ध्येयं ध्यातुं योग्यं प्रणतानां शरणागतानां कामदं न त्वन्येषां भक्तवत्सलत्वात् शन्तमं अभिलाषुकानामतिसुखकारि पादाब्जं अस्माकं स्तनेषु अर्पय ॥ १३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अतोऽधुना कपटं विहाय संगतो भवेति प्रार्थयन्ते द्वाभ्याम् ॥ प्रणतेति ॥ आधिर्मनः पीडा तां हन्ति इति तत्संबोधनम् । हे रमण आधिं निराकृत्य क्रीडनसुखप्रदं शतमं, सेवनकालेऽपि महासुखप्रदं आपदि ध्येयं, ध्यानमात्रेणाप्यापन्निवर्त्तकं, धरणिमण्डनं धरण्या अलंकारभूतं, किं बहुना । पद्मजेन ब्रह्मणा अर्चितमाराधितं, प्रणतकामदं प्रणतजनाभीष्टप्रदं च, ते तव, चरणपङ्कजं, नोऽस्माकं, स्तनेषु अर्पय । अस्मत्स्तनेषु निधाय कामाग्निं शमयेति भावः ॥ १३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

प्रणतकामदमिति : १०.३१.१३.

प्रणम्रजनकामदं जगति ते पदाम्भोजमित्यलं वदतु सज्जनस्तदितरोऽथवा तादृशम् ।
वयं न कथयामहे यदनुभूयतेऽद्यान्यथा विहाय विनताः सतीस्तृणमुरीकरोत्युन्नतम् ॥ १७८ ॥
सत्यं सन्नतमानसाः कृतधियः सत्यश्च मत्कामुकाः सत्सर्वं तु परं विधिर्हि बलवानेतादृशे कर्मणे ।
एवं धूर्तवचः प्रपञ्चरचना–जालैरलं यत्स्फुटं त्वद्वागुक्तविधेयताऽनलसधीस्त्वामेष शुश्रूषते ॥ १७९ ॥
गोत्रालङ्करणमिदं पदं सदैव शास्त्रेऽपि स्फुटमनुभूतमन्वहं च ।
तत्कार्यान्तरमपहाय नः स्तनाख्यगोत्रालङ्करणमिदं न किं करोषि ॥ १८० ॥
आपद्ध्येयमितीरितं तव पदं ध्यानं च तत्कीदृशं चित्ते वा पदचिन्तनं यदथवा चित्तस्य तत्रार्पणम् ।
गोविन्दोभयथाप्यनुष्ठितमहो नाद्यापि तट दृश्यते साऽऽपद्वा कतमाऽऽशुचिन्तनफलेत्येतत्तु तत्त्वं वद ॥ १८१ ॥
ये शन्तमं तव पदं निगदन्ति सन्तो जानन्तु चेतसि त एव तथाभिधार्थम् ।
सम्प्रत्युपस्थित-वियोग-भयापनुत्त्यै ह्याद्याक्षरार्थमपि यत्र वयं न विद्मः ॥ १८२ ॥
दत्त्वा स्वीयपदाब्जभूतिममलां गङ्गां त्वया शम्भवे श्रीगोविन्द तदीयतापशमनं निःशेषतामापितम् ।
श्रुत्वैतत्स्तनशम्भवोऽपि विरहक्ष्वेडार्तिशान्त्यै परं याचन्ते चरणामृतं यदि न तत्तन्मूलमेवार्पय ॥ १८३ ॥
लोकह्रियाऽतिकृपणोऽपि नरोऽर्थितं द्रागंशेन यच्छति न तद्विफलीकरोति ।
प्राप्तार्थिकार्थित-समर्पणलब्धकीर्तेस्तत्पाददानमपि किं तव भारभूतम् ॥ १८४ ॥
आगत्य पादं यदि नः स्तनेषु संस्थापयस्यच्युत तेन भूयात् ।
प्रथा पृथिव्यां प्रसृता यथार्था पयोधरा विष्णुपदाश्रिता इति ॥ १८५ ॥
विरागिणि पदस्थितिर्भवति नान्तरे रागिणीत्यदो वद वयं परं मनुमहे सुतथ्यं ततः ।
सुरागिणि हृदन्तरे सुरमुनेर्मनाङ् नास्ति मे पदस्थितिरिति द्रुतं कुरु रमेश दिव्यं पुरा ॥ १८६ ॥
सन्तो निरन्तरमनन्त-निजान्तरङ्गे शान्ता वहन्ति सदुदन्तसुखं पदं ते ।
ज्ञात्वैवमेव भगवन्नधिकारशून्या बाह्याङ्ग एव हि वयं तदलं वहामः ॥ १८७ ॥
यद्यर्पयस्यद्य पदं स्तनेषु स्यादेकमत्राच्युत भूरि चित्रम् ।
यत्राश्रिता विष्णुपदालम्बा-स्तनाद्र्यस्तिष्ठति देवराजे ॥ १८८ ॥
सचक्रविस्फारित-मण्डलेषु स्तनेषु नश्चेत् स्वपदं विधातुम् ।
विचारवान् सन्नपि नाथ यत्वं चिरायसे किं न विचित्रमेतत् ॥ १८९ ॥
कुरु स्वकीयं पदमस्मदीये स्तनेऽधुना कञ्चुकनीति याच्ञा ।
प्रभो नवीना न यदस्ति सिद्धपदं शयालास्तव कञ्चुकिस्थम् ॥ १९० ॥
त्वत्प्रीतिदायिन इति स्तनकन्दुका भोः संरक्षिताः स्वहृदयान्तरगूहनेन ।
ज्ञात्वा प्रसङ्गमधुनाऽर्पयितुं प्रवृत्तास्त्वं स्वं पदं च कुरु तत्र मनोज्ञरत्यै ॥ १९१ ॥
करः करेणाकलितोऽच्युतेन नावां पदेनेति विचिन्त्य तूर्णम् ।
गजेन्द्रकुम्भौ स्तनजन्मभाजौ पदार्पणात् तत्कुरु तौ कृतार्थौ ॥ १९२ ॥

अखेदक-नखेन्दुभि-र्युतमनेक-सूर्याश्रितं बुधैः कविभिरीडितं गुरुवरैः सदैवार्चितम् ।
प्रभो श्रितशनैश्चर-व्रज-मनन्त-सन्मङ्गलं जगत्सु महदद्भुतं पदमिदं सकृद् दर्शय ॥ १९३ ॥
त्रिलोकजनपावनी भवति जाह्नवी यद्रसः शिरोद्धृतिलसत्प्रभो जगति यत्परागः प्रभो ।
यदीयलवसङ्गमो जडगते सुराज्यप्रदः पदं तदखिलेष्टदं स्तनपदे सकृत् स्थापय ॥ १९४ ॥
इदं तव पदं यदम्बुजमलं ततो नान्तरोदकं विकसितं भवेदिति समाचरैवं लघु ।
पयोधरभुवि प्रभो सुरसभावभाजि प्रतिष्ठितं कुरु ततो द्वयोरपि भवेत्प्रसादोदयः ॥ १९५ ॥
दोषोल्लासिगतेर्निशा चरपतेर्यत्स्वं पदं दुर्लभं योगीन्द्रैः सुलभीकृतं यदुपते त्वत्पादभक्तिस्पृशाम् ।
सम्प्रत्यच्युत यत्करोष्यसुलभं गोपाङ्गनानामिदं दृष्ट्वा वक्ष्यति किं भवत्पदरतो लोकोऽपि विद्मो न तत् ॥ १९६ ॥
पदाब्जमत्यन्तमृदु त्वदीयमत्यन्तकाठिन्यजुषौ स्तनौ नः ।
तद्योजया-ऽन्योन्य-मनन्यदृष्ट्या येनाशु भूयाद् द्वयमेकरूपम ॥ १९७ ॥
अस्माकमस्तु कथमप्यसुखं निशायां नैतद् विचिन्त्य भगवन् भवदर्थनेयम् ।
किन्तूपकारसरणीमवलोक्य वच्मो दीनार्तिरन्निति वचः कुरु सत्यमार्षम् ॥ १९८ ॥
यदि प्रणतकामदं यदि च पद्मजाद्यर्चिदं पदं धरणिमण्डनं विपदि चिन्तनीयं यदि ।
जगत्सुभगशङ्करं यदि च सर्वमेतद्ध्रुवं हृदामयहृतिर्न ते तदिह दुःशका नः प्रभो ॥ १९९ ॥

कृष्णप्रिया

अब अनन्य पूर्वा राजस राजसी गोपियाँ भगवान की स्तुति करने लगी, कि हे रसिकवर ? चरणों में शरण आये हुए समर्पित जीवों के कामादि दोषों को निर्मूल करने वाले, कमल से उत्पन्न श्री ब्रह्माजी और पद्मजा श्री लक्ष्मीजी से सादर सेवित, धरणी देवीजी को निज चरण कमलों के स्पर्श से समलंकृत करने वाले, प्रत्येक प्रकार के आपत्काल में स्मरणीय नित्य मङ्गल कल्याणप्रद हे चिन्तानिवारक चिन्तामणि ? आपके पदपङ्कज हमारे हृदय प्रदेश में पधराईए ॥ १३ ॥

सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥ १४ ॥

कर्दमक्षमा

अन्वयः—हे वीर ! सुरतवर्धनम् , शोकनाशनम् , स्वरितवेणुना, सुष्ठु, चुम्बितम् , नृणाम् , इतररागविस्मारणम्, ते, अधरामृतम् , नः, वितर ॥ १४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च हे वीर तेऽधरामृतं नोऽस्मभ्यं वितर देहि । स्वरितेन नादितेन वेणुना सुष्ठुचुम्बितं यथेष्टमास्वादितमिति नादामृतवासितमिति भावः । इतररागविस्मारणं नृणामितरेषु सार्वभौमादिसुखेषु रागामिच्छां विस्मारयति विलापयतीति तथा तत् ॥ १४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदाहुः–अपि चेति । हे वीर कामजयवीर । इति भाव इति–शंखक्षीरन्याये नातीवानन्दजनकमित्यभिप्रायः । स्तनतटचरणार्पणोद्बुद्धकामाग्निज्वालाशमकमधरामृतं देयमेव । अन्यथा कामोऽस्मान्धक्ष्यतीत्यर्थः । सुरतवर्द्धनम्–निधुवनेऽधरामृतपानेऽतीवानन्दो भवतीति भावः । आनन्दजनकत्वाच्छोकं मन्मथतापं नाशयतीति तथा । “विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्” इत्यमरः ॥ किं च, भो धन्वन्तरिप्रतिमभिषक्छिरोमणे कामरागमूर्च्छिताभ्योऽस्मभ्यं किमप्यौषधं देहीत्याहुः । सुरतवर्द्धनमिति पुष्टिकरत्वम् । शोकनाशनमिति पीडाहरत्वं तस्योक्तम् । न च तदपि महार्घ्यं मूल्यं विनैव कथं देयमिति वाच्यम् , दानवीरेण त्वया तदतिनिकृष्टाय निष्प्राणाय सप्राणीकर्तुं विनैव मूल्यं दीयते एवेत्याहुः–स्वरितेन नादितेन वेणुना कीचकेनापि सुष्ठु सम्यक्तया चुम्बितं स्वादितम् । ननु धनजनकुटुम्बाद्यासक्तिरेवात्र कुपथ्यं तद्वते जनायैतन्न दीयते, तत्राहुः–इतररागविस्मारणम् । इतरवस्तुष्वेतदेव रागमासक्तिं विस्मारयतीत्यद्भुतमौषधमिदम् । यत्कुपथ्यान्निवर्तयतीत्यस्माभिरनुभूयैव दृष्टमिति भावः । नृणां मनुष्यजातिस्त्रीणां वितर देहि । हे वीर दानवीर दयावीर वा ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अधरामृतम् अधर एवामृतं तत् सुरतं प्रेमविशेषमसंभोगेच्छां वर्धयतीति तथा तत् इति मध्वादिवन्मादकत्वमुक्त्वा मुहुर्लब्धेऽपि तस्मिन्न तृप्तिः सूचिता निजधाष्टर्यादिकं च परिहृतं शोकं त्वदप्राप्तिदुःखस्यानुभवमपि नाशयति विस्मारयतीति तथा

तदिति चोक्तम् इतररागविस्मारणं तु नृणामपि किमुत नारीणां तास्वप्यस्माकं तु तद्विस्मारणमिति किं वाच्यं शाश्वतस्वस्पृहया तदत्यन्ताभावस्यापि सम्पादकमित्यर्थः । तदेव प्रमाणयन्ति । स्वरितेतिवेणोः पुम्भावेन ख्यातत्वात् तेषां तत्प्राप्तिस्ताम्बूलचर्वितादि-सम्बन्धेन तदीयरसे तदुपचारात् क्रमतद्वयेण स्वेच्छावर्धनदुःखान्तरस्फूर्तिनाशनविषयान्तरविस्मारणान्युक्त्वा तस्य परमपुरुषार्थत्वं दर्शितम् एवमर्थत्रयमेव पूर्वपद्येऽपि दर्शितमित्यैकार्थ्यं च ज्ञेयं नच तवादेयं किञ्चिदस्तीत्याशयेनाहुः वीर हे दानशूरेति । अन्यत्तः अत्र नादामृतवासितमिति वेणुद्वारा सुष्ठु पायकमित्यर्थः । इदं च लोभविशेषोत्पादकतागमकं सुगायनस्य श्रोतृषु सुखादिना स्पर्शादीच्छाजनकत्वात् तत्र चामृतस्याप्यमृतवासितत्वं गन्धयुक्ति न्यायेन परस्परं किञ्चिद्वैलक्षण्यमिति ज्ञेयम् यद्वा स्वरितेन सञ्जात-षड्जादिस्वरेण वेणुना चुम्बितमिति तस्य मादकत्वमेव दर्शितं वेणोस्तच्चुम्बनं गानपौनः पुन्येन वैयात्याभिक्तेस्तत्सम्पर्कज-स्वरेणापि जगतोऽप्युन्मादकत्वाभिव्यक्तेश्च ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुरतं सुशोभनं रतं रतिः प्रेम, किंवा सम्भोगसुखं वर्द्धयतीति तथा तदिति मुहुर्लब्धेऽपि तस्मिन्नतृप्तिः सूचिता, निज-धाष्ट्र्यादिकञ्च परिहृतम् , शोकोऽकृतार्थत्वादिना विरहेण वा तं नाशयतीति तथा तदिति, अन्यथा शोकनाशो न भवतीति सूचितम् । तथा स्वरितेति गुणविशेषेण परममादकत्वमुक्तम् , तन्नादस्य जगदुन्मादकताहेतुसम्पर्कमात्रकत्वादिति तेनैव सर्व्वदुःखविस्मृतिर्नत्वन्यथेति ध्वनितम् । यद्वा, पूर्वोक्तवेणुभाग्यभराभिप्रायेण तद् सुष्टुचुम्बिततया परममधुरत्वं सौभाग्यभरप्रदत्वं च, चुम्बितमिति भोगानाचरणेन तत्क्षीणतापि परिहृता, नृणां यानि इतराणि अधरामृतव्यतिरिक्तानि सार्व्वभौमादिमोक्षान्तसुखानि, तेषु रागवि-स्मारणमिति परममोहनत्वम् । एव देवभोग्यादमृतात् मोक्षाख्यादपि वैशिष्ट्य दर्शितम् , तथा श्रवणादपि भक्तिप्रकारेभ्योऽप्युह्यम् । एवं तद्दर्शनसुखादपि वैशिष्ट्यमूह्यम् , तादृशप्रियतमजनैकप्राप्यत्वात् , एवं विशेषणानामेषां यथोत्तरं क्रमेण हेतुहेतुमत्ताह्या, न च तवादेयं किञ्चिदस्तीत्याशयेनाहुः—वीर ! हे दानशूरेति । यद्वा, श्लेषेण हे कामयुद्धवीरेति तद्युक्तमेवेति भावः । वीरेति किशोरं प्रति सम्बोधनमेतद्दशरीत्यैतेन च रसिकत्वमेव बाध्यते, अतएव तस्य पौनःपुन्यम् , तथापि सङ्गत्यनुसारेणार्थभेदो लिख्यत इति दिक् । अन्यत्तैर्व्यञ्जितम् । यद्वा, स्वरिते षड्जादिस्वरं प्रापितेन वेणुना नृणामपि, किमुत नारीणामित्यर्थः । तेषां तत्प्राप्तिस्ताम्बूल-चर्वितादिसम्बन्धेन कथञ्चिदूह्या । यद्वा, नृणां मध्ये वीरेत्यन्वयः, अर्थः स एव, इतरेति तस्मिन् प्राप्ते पुनरन्यत् किञ्चिन्नेष्टव्यमिति प्रार्थना–चातुर्यम् । यद्वा, इतरत् ततोऽन्यत् , सर्व्वं रागेण स्वविषयकरसोत्पादनेन विस्मारयतीति सदा तदेकप्राप्त्यर्थं निजौद्धृत्यादिपरिहारार्थं च तत्स्वभाव एवोक्तः । एवं पूर्व्वतोऽत्र विशेषः स्पष्ट एव, अतएव पूर्व्वं सीधुनेति, अत्र चामृत-मित्येषा दिक् ॥ १४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

स्वरितवेणुना षड्जादिस्वरसंयुक्तवेणुना ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तथा हे वीर ! तवाधरामृतं वितर देहि कथं भूतं नृणामितरेषु सार्वभौमादिषु सुखेषु रागम् इच्छां विस्मारयति-लोपयतीति तथा स्वरितेन नादितेन वेणुना स्वरयुक्तवेणुना सुष्ठु यथा तथा चुम्बितं नादामृतवासितमित्यर्थः । शोकनाशनं तापत्रयदुःखशामकम् उत्तरोत्तरं रतिवर्द्धकं च ॥ १४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

स्तनतटेषु चरणार्पणादुद्भुद्धज्वलितकामाग्निज्वालाशमनाय तवाधरामृतं पिपासुभ्योऽस्मभ्यं देहीत्याहुः । सुरतेति । सुरतं ग्राम्यधर्मः स्वरितवेणुना स्वरयुक्तवेणुना ध्वनिरस इतरेषां रसानामास्वादनसुखं विस्मारयतीति इतररागविस्मारणम् इतरेषु मधुरेषु वस्तुषु रागं स्नेह विस्मारयतीति इतररागविस्मारणं वा वितर देहि "विश्राणनं वितरणं स्पर्शनं प्रतिपादन"मिति हलायुधः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अधर एवामृतं नृणामपि ताम्बूलचर्वितादौ किमुत नारीणां तत्र अधरतदीयरसयोरभेदोपचारः ॥ १४–१७ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

दुःखान्तरनाशायोपायान्तरमाहुः—सुरतेत्यादि । हे वीर ! ते तवाधरामृतं वितर । कीदृशम् ? सुरतं प्रेम, तद्वर्द्धनम् , यतः शोकनाशनम् । ननु तद् वेणुनैव पीतमिति चेत् न तेन सुष्ठु चुम्बितमेव, नतु सम्यक् नतु सम्यक् पीतम् । ननुच्छिष्टं पातु न युज्यत इति चेत्तत्राहुः—इतररागविस्मारण परमरसायनौषधम् । औषधे हि तथा विचारो न क्रियते, मध्वादिवत् इति—(११ श-श्लो०) "चलसि यद् व्रजात्" इत्यादि, (१२ श–श्लो०) "दिनपरिक्षये" इत्यादि द्वाभ्यां श्लोकाभ्यां प्रतिपादित–दुःखद्वय-

शान्त्युपायत्वेन कथितयोः स्तनादिकरणकचरणाधरामृतवितरणयोः (७ म–श्लो०) "कृणु कुचेषु नः कृन्धि हृच्छयम्" इति, (८ म–श्लो०) "अधर सीधुनाप्याययस्व नः" इत्याभ्यां वा सह न पौनरुक्त्यम् ॥ १४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

धरणीमण्डनत्वेन यदि चरण-पङ्कजं स्तनेषु नार्पयसि, तदा तवाधर-सुधया धरण्याः सम्बन्धो नास्ति, तामेवाधरसुधां नो वितरेत्यन्याः सोत्प्रासमाहुः—सुरतवर्द्धनमित्यादि । वीर ! विशेषेण ईरयसीति तथा, ते अधरामृतं वितर, तत्तु वेणुना पीतमिति चेत् , सम्यक् तेन न पीतमित्याहुः—स्वरितवेणुना सुष्ठु चुम्बितमेव, नतु पीतम् वेणूच्छिष्टं पातुमिच्छत, अहो वो निर्लज्जता इत्याशङ्क्याहुः—शोकनाशनं शोकनाशनत्वेन तथाभूतमपि पातुमिष्यते उषधो तथा विचारो न क्रियते, न केवलं शोकनाशनं सुरतं प्रेमानन्दस्तस्य वर्धनम् । रसायनं हि द्वेधा भवति—स्वस्थस्यौजस्करं किञ्चित् , किञ्चिदार्तस्य रोगनुत् , इदन्तूभयमेव अत इतर-रोग-विस्मारणमन्यस्पृहा निरासकम् ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च । भो धन्वन्तरिप्रतिम ! भिषक्शिरोमणे कामरोगमूर्च्छिताभ्योऽस्मभ्यं किमौषधं देहीत्याहुः । सुरतवर्द्धनमिति । पुष्टिकरत्वं शोकनाशनमिति पीडाहरत्वं तस्योक्तम् । नच तदपि महार्घं मूल्यं विनैव कथं देयमिति वाच्यं दानवीरेण त्वया तदपि निकृष्टाय निष्प्राणायापि सप्राणीकर्तुं विनैव मूल्यं दीयत एवेत्याहुः । स्वरितेन नादितेन वेणुना कीचकेनापि सुष्ठु सम्यक्तया चुम्बितं स्वादितम् । ननु धनजनकुटुम्बाद्यासक्तिरेवात्र कुपथ्यं तद्वते जनायैतन्न दीयते तत्राहुः । इतररागविस्मारणम् इतरवस्तुष्वे-तदेव रागमासक्तिं विस्मारयतीत्यद्भुतमौषधमिदं यत् कुपथ्यान्निवर्त्तयतीत्यस्माभिरनुभूयैव दृष्टमिति भावः । नृणां मनुष्यजाति-स्त्रीणां वितर देहि हे वीर ! दानवीर दयावीरेति वा ॥ १४ ॥

रसिकाह्लादिनी–टीका

सुरतवादेनोक्तः । कस्यापि झटिति साक्षादर्थप्रत्यायको न भवतीति मनसि निधाय साक्षात्सम्भोगरसं प्रार्थयन्ते सुरतेति पूर्वमुक्तमधरसीधुनाप्याययस्व न इति । तस्यैवेदानीं सविशेषप्रार्थनमाहुः । हे वीरेति दानशूरत्वमुच्यते ते तवाधरामृतं वोऽस्मभ्यं वितर देहि । कीदृशं सुरतं संम्भोगेच्छां वर्द्धयतीति लब्धेऽपि तस्मिन् तस्य भावः सूचितः । केवलं सम्भोगेच्छामेव न पुष्णाति किन्तु मानसशोषमप्यपहरति । शोकनाशनं विरहजनितमकृतार्थत्वमानरूपं शोकं नाशयति । तथा तत् अधरामृतपानानन्तरेण शोका न नश्येदिति भावः । पुनः कीदृशं स्वरितवेणुना सुष्ठु चुम्बितं नीरसस्यापि रसोद्बोधनद्वारा जगदुन्मादकत्वं सूचितं चुम्बितमित्यनेनानुच्छिष्टत्वाभावः सूचितः । तादृशेन तेनान्यस्याप्यधिकारसम्भावनं सूचितमिति । यद्वा स्वरितवेणुना षड्जादिस्वरालापयुक्तेन वेणुनेति नादब्रह्मादिभिः व्यञ्जकत्वं ध्वनितं चुम्बितमिति सारांशस्तेनास्वादितं किङ्करीणामुच्छिष्टाधिकारो नान्यस्येति सूचितम् । नृणामिति सामान्यतः पुरुषमात्राणां नादामृतश्रवणेन इतरेषु सार्वभौमादि ब्रह्मानन्दान्तेषु सुखेषु रागमिच्छां विस्मारयतीति तथा, यन्मोहिताः पुरुषा अपि चलिताः किमुत नार्यः । यद्वा इतरेषु ब्रह्मरुद्रादीनां ये रागाः मालवाद्यास्तान् विस्मारयति । अधरामृतं यदा वहिः प्रसरति तदा नादसम्वलितमेव हि निर्गच्छति । तदमृतं येषां नृणां हृदि प्रविष्टं, चुम्बितं सारांशग्रहणेनेति सेर्ष्यवचनम् । इदानीमपि उच्छिष्टमपि याचितं देहीति । नेनोच्छिष्टेन सुरतेच्छा वर्द्धिष्यते । अप्राप्तिजनितशोकोऽपि निर्वर्त्तिष्यते उच्छिष्ट-कार्पण्यमकुर्वन् देहि तव न काचित् क्षतिः भविष्यतीति तात्पर्यार्थः ॥ १४ ॥

विशुद्धरसदीपिका

सुरतेति । अधर एवामृतम् अधरमर्वाचीनममृतं यस्मादिति वा सुरतं प्रेमविशेषसंभोगेच्छां वर्धयतीति । तथा तत् इति मुहुर्लब्धेऽप्यतृप्तिः सूचिता शोकं त्वदप्राप्तिदुःखानुभवं नाशयतीति तथा तत् इतररागविस्मारणं नृणामिति किमुत नारीणामित्यर्थः । तदेव प्रमाणयन्ति । स्वरितेति । वेणुनेति पुंजातित्वाभिप्रायेण यद्वा वमित्यमृतात्मकं बीजम् अमृतं च परमानन्दः इरिति कामसुखं वश्च इश्च ये आत्मकामसुखे अणू यस्मादसौ वेणुः सर्वतः परमसुखदेनेत्यर्थः । "वेति ब्रह्मसुखं विद्यादिकामसुखमुच्यते । तावेवाणूतमौ यस्मात् स वेणुरिति कथ्यते,, सुष्ठु चुम्बितमिति परमास्वादनीयत्वम् ॥ १४ ॥

श्रीरामनारायणकृता भावभावविभाविका

चरणस्तनार्पणेनाधिनिवृत्तिं संप्रार्थ्य परमसुखकरमनोरथान्तरमाहुः सुरतवर्धनमिति । हे वीर ! तेऽधरामृतं नोऽस्मान् प्रति वितर ते तवाधरबिम्बे यदमृतमित्यत्र ते शब्देन वैलक्षण्यद्योतनं नहि सर्वत्र बिम्बरसः नवा सर्वाधरेष्वमृतं तथात्वे स्वाधरामृततृप्तानां प्रार्थनैव न स्यात् न इत्यधिकारिकथनं कामाग्निदग्धानामेव तदमृतदानपात्रत्वं नान्येषां वीरेति सम्बोधनेन तु हे रतिदानशूर इति युद्धकुशलेति नहि वीरस्य तव कामस्यैव विशेषत ईरणं युक्तमपितु तद्भेषजामृतस्यापि तदमृतमपि नोऽधिकारमित्यत्र हेतुगर्भं विशेषणं सुरतवर्द्धनमिति । सुरतानामेव वर्द्धनं विलक्षणसुखदानेन महत्त्वद्योतकं सुरतसम्भोगस्य वर्द्धनं वा यथा रसायनादिपानेन सम्भोज्यरसास्वादरुच्यभिवृद्धिः मधुपानेन च प्रकृतजनलौकिकसम्भोगरसाभिवृद्धिस्तथा परमरसायनरूपा-

लौकिकाधरमधूकमाध्वीमधुपानस्य त्वदीयप्रेममयसुरतसम्भोगवर्द्धकत्वं यथा यथाधरामृतपानं जायते तथा तथा मदनमदोन्मत्ततया सुरतसम्भोगरसो वर्द्धते इति भावः। तथा शोकनाशनम् अन्याविचिकित्स्यस्यापि त्वद्विरहशोकस्य नाशनम् उभयत्रमानः स्वरितवेणुना सुष्ठु चुम्बितमिति तथाच उच्चमानन्तः शून्यकठोरहृद्ग्रन्थिवंशवंशोत्पन्नस्वपरिच्छिन्नशुष्कदग्धविद्धनीरसवेणोः सुमधुरस्वरेणामृताभिवर्षकत्वं त्वदधरामृतसुष्ठुचुम्बननिमित्तमेव किमु वाच्यं वेणोस्तद्वहुमुखमापूर्य्य बहिः प्रसारितनादात्मकत्वदधरामृतकणपुटास्वादनमात्रेण नः पूर्वसिद्धत्वसुरतत्वस्याप्यागमनोत्साहात्मनाभिवृद्धिस्तद्वैमुख्यशोकनाशश्च जातः किंभूतं तत् इतररागविस्मारणं नृणामिति नृणामप्राप्तमपि संभावनामात्रेणेतरेषां सार्वभौमादिशतगुणत्वनाम्नातानां ब्रह्मसुखपर्य्यन्तानां यो रागोऽभिलाषस्तद्विस्मारणं किं वाच्यं नारीणामनुगतरसानां तदुक्तमभियुक्तैः—

अद्वैतवीथपथिकैरुपास्याः स्वाराज्यसिंहासनलब्धदीक्षाः। शठेन केनापि वयं हठेन दासीकृता गोपवधूविटेनेति ॥

किं चात्र श्रुतिरूपा गोप्यः सच्चिदानन्दभगवदधरामृतस्यापि तदात्मकत्वं भगवत्त्वंच वर्णयन्त्यस्तदात्मकत्वात्तत्प्रार्थयन्तीतिफलांशेऽपि नानन्त्यत्वक्षतिः। तत्राधरामृतमित्यमृतशब्दस्य तत्स्वरूपवाचिनः कालादपरिच्छेदरहितसच्चिन्सुखघनस्वरूपद्योतकत्वम्। सुरतवर्द्धनमिति। सुरतानां वर्द्धनं धर्मद्वारेश्वरेण भवतीति धर्मैश्वर्ययोः कथनं शोकनाशनं "तरति शोकमा" त्मविदिति श्रुत्या ज्ञानेनेति ज्ञाननिर्देशः स्वरितेत्यादिना वेणुस्वरद्वारा विख्यात्युत्पत्त्या यशोनिरूपणं स्वश्रिया इतररागविस्मारकत्वोत्पत्त्या श्रीविरागस्य निरूपणं यद्वा ज्ञानस्यैव परमपुरुषार्थरूपतया भगवत्स्वरूपजिज्ञासुजनसेव्यत्वेन वैराग्यस्य च तदन्तरङ्गत्वेन तयोरेवोक्तिः। तत्र ज्ञानस्याप्यधरनिःसृतत्वममृत्वं चाधररसस्यापि उत्कर्षज्ञानेनैव रत्युपदर्शनादज्ञाने तदभावात् ज्ञानस्याप्यधरनिष्ठसुरतवर्द्धनत्वं तस्यैव उक्तश्रुत्या शोकनाशकत्वं तस्यैव स्वरितेत्यादिना शब्दब्रह्मात्मकवेणुसम्बन्धेनानुश्रावकत्वसाम्यामतरेत्यादिना अतन्निरसनरूपज्ञानतदङ्गवैराग्ययोः साम्यसूचनम् ॥ १४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

इदन्तु स्वदोषनिवृत्त्यर्थमस्माभिः प्रार्थितं त्वं प्रसन्नश्चेत्तर्हि मुख्यमस्मदीयं प्रार्थनीयं शृण्वित्याशयेनाहुः। सुरतेति। हे वीर! स्वस्याधरामृतं वितर देहि। ननु अनेन किम्भविष्यतीतिचेत्तत्राहुः सुरतेति। यथा वह्वन्नभोजनानुकूलाक्षुत्तन्कारणरसेनोद्बोध्यते तथापरिच्छिन्नकामेन त्वया सम्भोगयोग्यतासिद्ध्यर्थं परिच्छिन्नस्यास्मत्कामस्य वर्धनं तत्रापि न लौकिकसाम्यमित्याशयेनाहुः। शोकस्य नाशनं मोक्षप्रदमपि लौकिकं नैव तस्य प्रत्युत शोकोत्पादकत्वात् किञ्च स्वरितेन नादितेन वेणुना सुष्ठु चुम्बितं परमभक्तेन वेणुना लोकोत्तरमाहात्म्यवत्त्वेन गीतं ब्रह्मलोकपर्य्यन्तं ख्यातकीर्त्तीति यावत। अत एव नृणामपि इतरेषु सार्वभौमादिसुखेषु रागमिच्छाम्विस्मारयति विलोपयति तथा तत् किमुत वक्तव्यमस्माकमतस्तत्तदेवास्माकमपेक्षितत्वादवश्यं देहीत्यर्थः। यद्यपीदमल्पं वस्तु तथापि दानशूराणां किमप्यदेयं न भवतीत्याशयेन सम्बोधयन्ति। हे वीरेति। यद्वा नृणां स्वरितवेणुना चुम्बितं सततच्छिद्रद्वारा नादरूपेण निःसृतं स्वस्य कर्णद्वारा हृदये प्रविष्टं सत् इतररागविस्मारणं स्वरितवेणुरूपेण परिणतेनान्तःकरणेन चुम्बितं सदिति वा ऽस्माकन्तु साक्षाद्ग्रहणेऽधिकारात् साक्षादेव हि यतः साक्षादेव पीतं सदस्माकं सुरतवर्द्धनं शोकनाशनञ्च भविष्यतीत्यर्थः। अनभिज्ञापक्षे हे वीर! यदि त्वं स्मरयुद्ध कातरस्तर्हि स्तनेषु चरणाम्बुजमर्पय। यदि च सुरतसमरप्रतिभटप्रियजनविजयसमर्थस्तर्ह्यधरामृतं देहीति भावः। ननु दत्तमेव पूर्वं किमिति पुनस्तदेव प्रार्थ्यत इत्याशङ्क्योक्तं सुरतस्य प्रेमकृतस्य सम्भोगेच्छां वर्द्धयतीति तत् अनेन तस्य मध्वादिवन्मादकतोक्ता तत्र तस्य भावश्च दर्शितः। अत एतत्त्वद्विरहादिजनितशोकस्य नाशनं तत्रापि स्वरितवेणुना सुष्ठु चुम्बितं नादामृतवासितमिति भावः। ननु लोकद्वयनाशनिबन्धनशोकोत्पादकत्वात्कथं सर्वथाशोकनाशनमित्युक्तमित्याशङ्क्योक्तम्। इतरेषु लोकद्वयभोग्येषु रागं विस्मारयतीति। एवञ्च निमित्तापायेऽपि नैमित्तिकस्यापाय इति भावः। तत्रापि नृणामनधिकारिणामपि तथा राहोः सुरादिरागविस्मारकममृतं जातं तद्वत् किमुत नारीणां तत्राप्यस्माकमिति भावः। यद्वा नृणां मध्ये तव यदेवम्विधमधरामृतं तन्नो देहीत्यर्थः। मानिनीपक्षे ननु नैतावताममान्तःकरणनिष्ठदाहस्य निवृत्तिर्भविष्यतीत्यतोऽन्यदपि किञ्चित्तदुपशामकमाज्ञायतामिति प्रार्थयन्तमिवालक्ष्य विरहव्याकुलत्वादीषत्तिरोहितस्य भावः सर्वमप्यनुजानन्ति। सुरतेति। नोऽस्माकमधरामृतं ते तुभ्यं स्वस्मै वितर देहि तेन तव मनोरथपूर्तिर्भविष्यति यतः सुरतवर्द्धनं शोकस्यास्मदप्राप्तिहेतुकस्य नाशनम् अनुभूतपूर्वत्वादत्र संशयो न कर्तव्य इत्याशयेनाहुः। स्वरितो वेणुर्य य तेन त्वया पूर्वं सुष्ठु चुम्बितं किञ्चेदममृतम्वागगोचरमात्रानुभूतमाहात्म्यमित्याहुः। इतरेति। सर्वेषामपि नृणां योषिदधरामृतमितररागविस्मारकत्वेन प्रसिद्धम् असुराणां मोहिन्यधरामृतपानाशया क्षीराब्धिमन्थने त्वमृतविषयकरागस्य त्यक्तत्वादिति भावः। तथापि यथोक्तामृतास्वादनसमये प्रायो नायकस्य पराजयो भवत्यतस्त्वया तदानीं वीरता विधेया नोचेदुपहास्यो भविष्यसीति हितैषित्वात्प्रथममेव त्वां सूचयाम इत्याशयेन सम्बोधयन्ति। हे वीरेति। निवृत्तिपक्षे ततश्च भवदर्चनध्यानाभ्यां येषामन्तःकरणशुद्धिरैकाग्र्यञ्च प्राप्तं तेषां विवेकवैराग्यादिसम्पन्नानामधिकारिणां नृणां धारयत्यज्ञानादिकं सर्वमिति धरः सर्वाधिष्ठानभूतः परमात्मा तस्य सम्बोधने हे धर! तेन यथोक्तस्य तव प्रतिपादिकानामस्माकमुपनिषदाममृतम् अस्मच्छ्रवणजन्यज्ञानामृतं वितर करुणया देहि यतस्त्वमेव वीरः "नहि ज्ञानेन सदृशं पवित्रमिह विद्यते" इत्युक्तत्वात्सर्वोत्तमज्ञानामृतदातृत्वाद्दानशूरस्तदन्तःकरणवृत्त्यारूढः सन् तदज्ञानादिसमस्तशत्रुध्वंसकरत्वाद्युद्धशूरश्चेति "ददामि

बुद्धियोगं तं येन मामुपयान्ति ते । तेषामेवानुकम्पार्थमहमज्ञानजं तमः'' इत्यादिध्वनयन्त्यः । हे वीरेति नच स्वस्य त्वदभिन्नज्ञानवतस्त्वत्प्रवृत्तिनिवृत्तिः शक्या प्रियो हि ज्ञानिनोऽत्यर्थमित्याशयेनाहुः । सुरतस्य परस्परप्रीतेर्वर्द्धनं नचैतदमृतं विना जीवस्य शोकनिवृत्तिः सम्भवतीत्याशयेनाहुः । शाकस्य तदुपलक्षितबन्धस्य नाशनं ''तरति शोकमात्मवित् ब्रह्मविदाप्नोति परं तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते ऽयनायेति'' श्रुतेः नचेदमस्मद्विचारमन्तरा लभ्यमित्याशयेनाहुः । स्वरितो ध्वनिव्यञ्जितो वेणुस्थानीयोपनिषत्कदम्बो येन तेन वेदान्ताभ्यासव्रता पुरुषेण सुष्ठु चुम्बितं सम्यगास्वादितं ''वेदान्तविज्ञानसुनिश्चितार्था'' इत्यादिश्रुतेः अनात्मपदार्थेषु राग एवानर्थकरः स च मिथ्याज्ञानविजृम्भितस्तत्त्वज्ञानामृतेन मिथ्याज्ञाननिवृत्त्या निवर्तते इत्याहुस्तत्रानात्मपदार्थेषु रागस्तस्य नाशकं यं लब्ध्वाचपरं लाभमित्युक्तत्वात् ॥ १४ ॥

रास-रहस्यम्

र० टी०—हे वीर ! जीवानामज्ञानतत्कार्यकामक्रोधादिसर्वशत्रुविनाशकत्वात् वीरः, तस्य सम्बोधनं, सुरतवर्धनं सुष्ठुरतानां त्वय्येवानुरक्तानां मुमुक्षूणां विलक्षणसुखदानेन वर्धनम् उन्नयनं, शोकनाशनं स्वस्वरूपप्रकाशनेन संसृतिबन्धनजन्यं शोकं नाशयतीति शोकनाशनं ''तरति शोकमात्मवित् ।'' इति श्रुतेः, स्वरितवेणुना ''वेति ब्रह्मसुख विद्यादिकामसुखमुच्यते । तावेवाणुतमौ यस्मात् स वेणुरिति कथ्यते ।'' इति वचनात्, नादात्मकशब्दब्रह्मलक्षणं वेणुसम्बन्धेनानुश्रवणेन सुष्ठुचुम्बितं नादामृतं सम्यग्रूपेणास्वादितं नृणां मनुष्यजातीनामस्माकं इतररागविस्मारणं इतरेषु सार्वभौमादिशतशतगुणवर्णितसुखेषु रागस्यासक्तेः विस्मारकं, ते तव, अधरामृतं वेदोपनिषदात्मकं ज्ञानामृतं नो अस्मान् वितर देहि ॥ १४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्यास्तु अधरामृतपानेनैव कृतार्था भविष्यामस्तदागत्य सम्पादयेत्याशयेनाहुः । सुरतवर्द्धनम् शोकनाशनं तापत्रयनाशनम् स्वरितेन नादितेन वेणुना सुष्ठु चुम्बितं नादामृतवासितमिति भावः । इतरेषु ऐहिकामुष्मिकेषु सुखेषु रागमनरागं विस्मारयति त्वदेकप्रवणं जनं करोतीति तथा तत् एवंभूतं तेऽधरामृतम् हे वीर ! वितर देहि ॥ १४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सुरतवर्धनं व्यवायः सुरतं स्वरितवेणुना स्वरोऽस्य सञ्जात इति स्वरितः स चासौ वेणुश्च तेन चुम्बितं । सुष्ठ्वित्यनेन यदाकदाचिन्नस्तस्य तु सदेत्यसूचयन् । इतररागविस्मारणमितरविषयासक्तिविस्मारकम् । नृणामिति द्रष्टृमात्रग्रहणम् । अनुभवित्रीणां तु का कथेति ध्वन्यतेऽनेन । वीर नस्ते धरामृतं वितर । अनेन पूर्वोक्तसीधुशब्दं मूलकृद्व्याचिख्याविति ध्येयम् । विश्राणनं वितरणं स्पर्शनं प्रतिपादनमिति हलः ॥ १४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदनन्तरं तत उत्तमाः प्रार्थयन्ते । सुरतेति । अधरामृतं वितरेति अत्राप्यधरामृतं गुणाधायकम् एतस्य चतुर्गुणत्वमेव विवक्षितं ज्ञानवैराग्ययोरत्रानुपयोगात् तस्यैश्वर्यमाह । सुरतवर्धनमिति । गोपिकासु परिच्छिन्नः कामः अपरिच्छिन्नेन सह संयोगे क्लिष्टा भवति यथा रसाः क्षुदुद्बोधका भवन्ति तथायं रसः कामोद्बोधकः किंच न केवलमयं काममेव पोषयति किन्तु सर्वानेवान्तःकरणदोषान् निवारयति । अतः शोकनाशकत्वं ज्ञानवैराग्यरूपता च निरूपिता, ऐश्वर्यधर्मरूपता च यशो रूपतामाह स्वरितो नादयुक्तो यो वेणुः तेन सुष्ठु चुम्बितं यशो हि नादज्ञैः कीर्त्यते वेणुश्च परमभक्त इति तेनापि चुम्बितमेव नतु पीतमितररागविस्मारणमिति श्रियो रूपं सा हि सर्वं विस्मारयतीति स्वतः पुरुषार्थत्वेन नृणामस्माकमधिकारिणां दुर्लभपुरुषार्थानां वा यद्यपीदं देयं न भवति तथापि वितरगुणेन दातुं शक्यत इति वितरेत्युक्तं वीरेति सम्बोधनात् शौर्येऽन्यथा सम्भवतीति निरूपितम् ॥ १४ ॥

श्रीसुबोधिनी-सारः

सुरतस्य वर्द्धनं वृद्धिहेतुः शोकस्य नाशनं स्वरितेन वेणुना सुष्ठु चुंबितं नृणामितररागाणां विस्मारणं विस्मृतिजनकम् इतरेषु भोगजातेषु रागमिच्छां विस्मारयतीति वा ते तवाधरामृतं नोऽस्मान् प्रति त्वं वितर देहि ॥ १४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'अस्मासु स्त्रीष्वेतद्दानरूपमेत्र वीरत्वं युक्तम्' इत्याशयेन सम्बोधयन्ति—वीरेति । ते तवाधरामृतं नोऽस्माकं वितर देहि । 'अस्माकमेतदेव परमफलरूपम्' इत्याशयेनाहुः—सुरतवर्धनमिति । सुरतसम्भोगसुखं वर्धयतीति तथा तत् । शोकनाशनमिति तत्र हेतुमाह-इतरेति । नृणां नृजातीनामस्माकं यः इतरेषु धनपुत्रगृहलोकादिषु पुरुषार्थेषु रागस्तस्य विस्मारकम् । 'तर्हि दुर्लभं कथं देयम्' इत्याशङ्क्य 'त्वत्कृपया जडस्यापि वेणोः सुलभम्, किमस्माकम् ?' इत्याहुः—स्वरितेन नादितेन वेणुना सुष्ठु सम्यक् चुम्बितमिति ॥ १४ ॥

अन्वितार्थप्रकाशिका

सुरतेति ॥ हे वीर ! सुरतस्य सम्भोगसुखस्य वर्द्धनं शोकस्य नाशनं स्वरितेन नादितेन । स्वरितेत्यपि पाठः । वेणुना सुष्ठु चुम्बितं नादामृतवासितं नृणां नृजातीनामस्माकम् इतरेषु पुत्रधनादिषु रागस्य विस्मारकं ते तवाधरामृतं नोऽस्मभ्यं वितर देहि ॥ १४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

किंच सुरतेति हे वीरविरहतप्त प्रेमिजनानामधरामृतदानेन तापनिवर्त्तनसमर्थसुरतवर्द्धनं प्रेमरूपसंभोगेच्छावृद्धिकरं तवादर्शनजातशोकनाशनं नृणां त्वत्त इतरेषु सार्वभौमाद्यात्मानं दातान्यसुखेषु रागविस्मारणं प्रीतिनिवर्त्तकं नृणामिति पदं नारीणामप्युपलक्षकं ते अधरामृतं वितर अस्मन्मुखेषु देहि नाचेन्मरणं भविष्यतीति भावः ॥ १४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चरणार्पणं स्तनयोः कृत्वा नान्यत् संपादयेति चेन्न किं तु त्वदधरामृतं पिपासुभ्योऽस्मभ्यं तदपि देहीत्याहुः ॥ सुरतेति ॥ हे वीर, नृणां इतरेषु सार्वभौमादिषु सुखेषु राग इच्छा तं विस्मारयतीति तथाभूतं, तथा स्वरितो नादितश्चासौ वेणुश्च तेन स्वरयुक्तवेणुना, सुष्ठु यथा तथा चुम्बितं, नादमृतवासितमित्यर्थः । पुंजातेर्वर्णायदा चुम्बनपूर्वमास्वादनीयं तदा नारीणामस्माकमास्वादनीयमित्यत्र तु किमु वक्तव्यमिति भावः । यद्वा । वमित्यमृतात्मकं बीजममृतं चात्मानन्दः, इरिति कामसुखं वकारेकारयोर्द्वन्द्वे आत्मसंबन्धि कामसंबन्धि च सुखमिति सिद्धम् । स्वः स्वर्गः संजातोऽस्त्येषामिति स्वरिताः स्वः स्वर्गमिताः प्राप्ता वा स्वरिता नाकिनस्तेषां वे आत्मकामसुखे ते अणू अणुप्राये यस्मादसौ स्वरितवेणुरक्षस्तेन, सुष्ठु चुम्बितं सर्वसुखदस्याक्षरस्यापि परमास्वादनीयमित्यर्थः । शोकनाशनं तापत्रयदुःखशामकं, सुरतवर्द्धनमुत्तरोत्तरं रतिसुखवर्द्धकं, च ते तव, अधर एवामृतं अधरमवाचीनममृतं यस्मादिति वा तत्पक्षे द्वितीवमधरामृतमिति शेषः । वितर देहि ॥ १४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सुरतवर्धनमिति : १०.३१.१४.

नानाकुन्दकदम्बवृन्द-विलसत्कन्दे च वृन्दावने नित्यानन्दजुषा त्वयेश सुलताद्युत्पादिका चातुरी ।
अभ्यस्ता विविधा भवेद्यदिह नस्तां दर्शयात्युज्ज्वलां तत्पात्राणि वयं यतः सुगणिकास्तद्वल्लतैकप्रियाः ॥ २०० ॥
श्रीकान्तालोकि-वृन्दावनमखिलमहो मञ्जुमाकन्दवृन्दं ज्ञाता नाम्नाऽर्थतश्चाप्यखिलतरुवरास्तत्र तत्र स्थिता ये ।
यः सीतानन्तकर्ता सुरतरुचिर भो मार्दवज्ञः पदानामस्माकं दर्शयैकं त्वमिह मृदुलतं तं त्वशोकप्रकारम् ॥ २०१ ॥
हृद्भूमावुदितः स्तनाद्रिनिकटे कामाग्निरुत्कीलकस्तच्छान्तिर्न धरामृतैः प्रभवति प्राणेश सिक्तैरपि ।
तत्तच्छान्तिकृतेऽधरामृतमहो याचामहे तन्न चेन्माऽऽस्तां स्वधरामृतेन तु विभो तूर्णं कुरुष्वाप्लुतम् ॥ २०२ ॥
किं तेन तापदेन यदिदं कृष्णाधरामृतं वहति । तद्दिश तदेव मधुरं यत्त्वं कृष्णाधरामृतं वहसि ॥ २०३ ॥
स्वस्थितं यदधरामृतं त्वया वंशजाय मगवन्समर्पितम् । योग्यमेव तदिदं तु चित्रकृद् दुर्लभं भृशमरन्ध्रचेतसाम् ॥ २०४ ॥
मृद्वीकाम्रसकृत्फलोत्तम फलेष्वद्धाऽनुभूतेष्वपि सन्ध्याते त्वधरामृते रतिकरे नो जायते तत्स्मृतिः ।
सिद्धे त्वेवमशङ्कमेव भगवस्तत्किं मुधा वञ्चयस्यास्तां मय्यधरामृतं किमु ततस्त्वन्यो रसो भुज्यताम् ॥ २०५ ॥
त्यक्त्वोत्तमं मदधरं किमु याचतेदं निःसारणं मदधरं त्विति वञ्चयान्यान् ।
अस्माकमाशयमिमं शृणु पूर्णकर्णं यत्रामृतं तदधराभिधमस्मदर्थ्यम् ॥ २०६ ॥
पातव्योऽपि रसो यदन्यपुरुषोच्छिष्टोऽभिजातास्तदा वीराः सच्चरितोदयव्यसनिनस्तं नाद्रियन्ते मनाक् ।
तत्त्वं वेणुमुखाश्रिताधररसं देहीश नस्तावकं लोके स्वानुपयोगि वस्तु वितरन्त्यात्मीय दासीजने ॥ २०७ ॥
श्रुत्वाऽनेकविविक्तरागमधुरं वेणोः स्वरं तत्क्षणे तन्निक्षिप्तमना जनो भवति यत्तत्साधु नैवं तु नः ।
लिप्सूनामधरामृतं तव विभो स्पष्टं हि भूपाङ्गने सङ्गीतादि न याचकं वशयति स्वीयार्थकृष्टान्तरम् ॥ २०८ ॥
स्त्रीपुंसाधरसंस्थितं यदमृतं निक्षेपरूपं तयोरन्योन्यं तत एव निर्भयतया प्राह्यं ह्युभाभ्यामपि ।
एवं सत्यधरामतं त्वयि तदस्माकं प्रसह्य प्रभो कस्माद्वणुरसौ धयत्यनुपदं नेयः क वाऽयं नयः ॥ २०९ ॥
कृपाघन घनद्युते त्रिभुवने तवानुग्रहः सतोऽस्ति सुलभोऽसतोऽसुलभ इत्ययं डिण्डिमः ।
विभाति वितथार्थको यदिह नः सतीनां सुदुर्लभः ससुलभः सरन्ध्रवपुषो मुरल्या अभूत् ॥ २१० ॥
आजन्म या मधुप मुख्यरसानुभाविन्याजन्म या च विरस कविवर्जिता च ।
तस्यां स्वमुख्यरसदानविधिर्मुरल्या-मस्मासु चैवमिति चित्रतरा रुचिस्ते ॥ २११ ॥

सदीड्यगोपवंशजस्त्वमीश गोपसत्तमात्मजावयं तदावयोरनिन्द्य एव सङ्गमः।
विहाय चैवमीदृशं कुजन्मवंशजातया तया स्त्रिया कियान् प्रियार्जितस्त्वया सुखोच्चयः॥ २१२॥
परनराधरसौधरसं धयन्त्यपि न जात्वसि पल्लवसंश्रिता। तदिदमद्भुतमेतदलौकिकं मुरलि जारसुखं ससतीव्रतम्॥ २१३॥
वेणो पुमांस्त्वमसि तत्किमु वीरगर्ह्यो पुंवक्त्रचुम्बनविधो विहिता प्रवृत्तिः।
तच्चेत् सुखं मनसि कामयसे तदेनं हित्वैहि नस्तदतुलं वयमर्पयामः॥ २१४॥
अङ्गीकृत्यास्य दृत्यं त्वमिह मुरलिके नष्टभीर्भ्रष्टलज्जाऽनैषीर्नस्तत्समीपं सपदि गुरुजनैरप्यलं रक्ष्यमाणाः।
तद्वच्मः सत्यमेकं स्वहितमिति शृणु त्यज्येतामेष पन्था यद्येतज्ज्ञातमाप्तैर्बहु किमु धमनीरूपतामेष्यसि त्वम्॥ २१५॥
कृष्णेनाङ्गीकृताऽहं तदितरजनतः कैव मे भातिरेवं निश्चित्यान्तः कदापि त्वमिह मुरलिके नैव गर्वं वहस्व।
पश्य त्वं स्पष्टमेतद् द्वयमपि च पुरा मन्यमानास्तथैव धूर्तेनात्मैकसौख्ये बत निहितदृशा प्रापिताः कामवस्थाम्॥ २१६॥
न भोगसुखसाधने न खलु पादसंवाहने न चार्जवविधावपि क्वचिदिहोपयोगोऽजनि।
तया तु रमसे सदा व्यरचि भोग्यमस्मास्विदं तथाचरितभाक्ष्वपीत्युचितमेतदैशे पदे॥ २१७॥
भगवन्नधरामृतैकदानेऽप्यतिवेलं कृपणायते मनस्ते। मुनयः परमामृतं लभन्ते कथमीश प्रददासि वा न विद्मः॥ २१८॥
अधुना परिगृह्य वोऽधरामृतमग्रे परमामृतं ददे। यदि तद्वचनेन च क्षमस्तदलं नः परिगृह्यतामिदम्॥ २१९॥
कण्ठ-कम्बु-कुच-चक्रसमूहा केशपाशवलयान्यपि सन्ति
वीरशब्द इह चेत्त्वयि सत्यस्तेषु मा भज पराङ्मुखभावम्॥ २२०॥
कामं विद्रुमपल्लवस्त्वदधरः स्वर्द्रोः परं पल्लवः पादो दृक् च निजाश्रितार्पित-सुखस्वानन्दसंपल्लवाः।
एवं त्वं सुलताणयपल्लवमयो यस्मान्न तस्मान्मनागस्मास्वीश विपल्लवत्वमधुना युक्तं लतात्मस्विदम्॥ २२१॥
सुरतोत्सवदायि सर्वशोकापहमीड्यं स्वररागपूर्णहृद्भिः। भृशमन्यरसस्मयापहारि स्फुटमित्यर्थयतेऽधरामृतं नः॥ २२२॥
भवान् दानशूरो वयं चार्थिशूरा वरं दानमेतल्लसत्स्वामृतं च।
सदर्हः प्रसङ्गोऽपि सम्प्रत्यवाप्तस्ततस्तद्दिश स्यात् त्रयाणां प्रतिष्ठा॥ २२३॥
सुरताऽभ्यर्थना नैव वैफल्यं यात्वितीर्ष्यया। जडराशिरपि प्रादादमृतं त्वं तु चित्सुखः॥ २२४॥

कृष्णप्रिया

अब अनन्य पूर्वा राजस सात्विकी गोपियाँ भगवान को निवेदन करती है कि हे वीर? हे दान वीर! प्रणय रस अनुराग-दिव्यानन्द को सम्बर्धित करने वाला, शोक का सर्वथा नाशक; नादमय वेणु जी ने भी उसका सुचारु रूप से चुम्बन किया है लेकिन पान तो नहीं है और भगवद् रस से भिन्न समस्त लौकिक रसों की विस्मृति कराने वाला "ऐश्वर्य-वीर्य-यशः एवं श्री" नाम के चतुर्विध ऐश्वर्यों से परिपूर्ण जो आपका अधरामृत है, आप कृपया उस अमृत का प्रदान करें॥ १४॥

अटति यद् भवानह्नि काननं [1]त्रुटिर्युगायते त्वामपश्यताम्।
कुटिलकुन्तलं श्रीमुखं च ते जड[2] उदीक्षतां पक्ष्मकृद्[3] दृशाम्॥ १५॥

कर्दमक्षमा

अन्वयः—भवान्, अह्नि, काननम्, यत्, अटति, (तदा) त्वाम्, अपश्यताम्, त्रुटिः, युगायते, च कुटिलकुन्तलम्, ते, श्रीमुखम्, उदीक्षताम्, दृशाम्, यक्ष्मकृत्, जडः, (इति मन्यामहे)॥ १५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च क्षणमपि त्वददर्शने दुःखं दर्शने च सुखं दृष्ट्वा सर्वसङ्गपरित्यागेन यतय इव वयं त्वामुपागतास्त्वं तु कथमस्मांस्त्यक्तुमुत्सहसे इति सकरुणमूचुः—अटतीति द्वयेन। यद्यदा भवान् काननं वृंदावनं प्रत्यटति गच्छति तदा त्वामपश्यतां प्राणिनां त्रुटिः क्षणार्धमपि युगवद्भवति एवमदर्शने दुःखमुक्तम्। पुनश्च कथञ्चिद्दिनान्ते सायंकाले ते तव श्रीमन्मुखं कुटिलाः कुन्तलाः केशा यस्मिंस्तादृशमृदुच्चैरीक्षमाणानां तेषां दृशां पक्ष्मकृद्ब्रह्मा जडो मन्द एव निमेषमात्रमप्यन्तरमसह्यमिति दर्शने सुखमुक्तम्॥ १५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यच्छृणु इत्याहुः—किं चेति। "त्रसरेणुत्रिकं भुंक्ते यः कालः स त्रुटिः स्मृतः" इत्युक्तेः। इह विभक्तिलोपस्त्वार्षः। दुःखसमयस्य दुरतिक्रमत्वेन विवृद्धमिवाततत्वात्। युगायते युगवदाचरति, युगशब्दश्चतुर्युगपरत्वेन प्रयुक्तः। तेन दैवद्वादशसहस्र-

---

१. त्रुटि यु०। २. जडवदो–विज.। ३. पक्ष्मनुद्–विज.; पक्ष्मनुः–इति कस्यचित्।

वर्षतुल्यो भवति "दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम्" इत्युक्तेः। जडोऽनिमिषाकरणादिति शप्यते। यद्वा—चतुर्मुखेष्वष्टनेत्राणि स्वस्यानिमिषाणि कृत्वा स्थितोऽतः स एवाजडः परमविद्वान् उदीक्षतामुच्चैः पश्यत्विति॥ किं चास्माकं दुरदृष्टमेव दुःखप्रदं त्वं किं कुर्या इत्याहुः। यद् यदा वृन्दावनमटति गच्छति तदा त्वामपश्यतामस्माकं गोपीजनानां त्रुटिः क्षणस्य सप्तविंशतिशततमो भागः सोऽपि युगतुल्यो भवति। दिवसे त्रयामिकमेव त्वद्विरहदुःखं सर्वेषां व्रजजनानाम् अस्माकं तु त एव त्रयो यामाः शतकोटियुगप्रमाणा भवन्ति। अत्र दुरदृष्टं विना किमन्यकारणं भवेदिति भावः। पुनश्च कथञ्चिद्दिनान्ते तव श्रीयुतं मुखमुत्कंठयेक्षमाणानां तेषामेव गोपीजनानां दृशां पक्ष्मस्रष्टा विधाता जडो निर्विवेकः। दुःखं करोतीति शेषः। एवं च त्वददर्शनेऽपार एव दुःखसिन्धुः, दर्शने तु पक्ष्मोद्भवो निमेष एव यो दर्शनविरोधी सोऽपि नवशतत्रुटिप्रमाणो भवन्नवशतयुगायत इत्युभयथापि दुःखं दुरदृष्टवशादेवेति भावः। "त्रसरेणुत्रिकं भुंक्ते यः कालस्य त्रुटिः स्मृतः। शतभागस्तु वेधस्स्यात्तैस्त्रिभिस्तु लवः स्मृतः॥ निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः।" इति मैत्रेयः। यद्वा–'कृती–छेदने' दृशां स्वचक्षुषां पक्ष्मकृत् पक्ष्मछेत्ता। अजडश्चतुरो जनस्ते श्रीमुखमुदीक्षतामुत्कर्षेण पश्यतु न तु वयमचतुरा इति भावः॥ १५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

युगायते दुःखसमयस्य दुरतिक्रमत्वेन इति परमदुःखम् अतश्चिरमरदशनदुःखमसह्यमिति सत्वरं दर्शनं देहीति भावः। अपश्यतां सर्वेषामपि व्रजजनानां किमुतास्माकं कुटिलाः कुन्तलाश्चूर्णकुन्तला उपरि भागे यस्मिन् तत् स्वत एव श्रीयुक्तं मुखम् उदीक्षतां चेति चकारान्वयः भवत्वन्येषां पक्ष्मकृत् उदक्षमाणानामपीत्याक्षेपार्थः। अन्यत्तैः यद्वा दुर्वितर्क्यप्रकृते कदापि त्वत्तोऽस्माकं न किंचित्सुखं जातं प्रत्युतादर्शनकाले दर्शनकालेऽपि दुःखमेवेत्याहुः। अटतीति पूर्वार्द्धेनादर्शनकाले दुःखमुक्तं, दर्शनकालेऽपि दुःखमाहुः। कुटिलेति। जडः अनभिज्ञः अनिमिषत्वाकारणात् सर्पनीय इति शेषः। यद्वा उदीक्षमाणानां सतां पक्ष्मकृत् 'कृती छेदने' यः पक्ष्माणि कृन्तति स एव अजडः रसज्ञो विद्वान्। वा यद्वा स्वदृशां पक्ष्मीच्छेदेवाजडः स एव च उदीक्षताम् उच्चैः पश्यतु, वयं तु पक्ष्मच्छन्नदृशो जडाः साक्षादपि किं पश्याम इति भावः॥ १५॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

काननमटतीति श्लेषेणारसज्ञत्वमप्रेतम्। अह्नीति तदानीं तत्र निजगमनाशक्तिरुक्ता, युगापते दुःखसमयस्य दुरतिक्रमत्वेन विवृद्धिमिव गतत्वादिति परमदुःखम्। अपश्यतामस्मादृशजनानां किंवा सर्व्वेषामपि व्रजजनानां किमुतास्माकमिति। यद्वा, तावका इति वत् त्वज्जनानामपि दुःखमित्यर्थः। कुटिलाः कुन्तलाश्चूर्णकुन्तला उपरिभागे यस्मिन् तत्, अत एव किंवा वेणुधारणादिना श्रीयुक्तं मुखमुदीक्षतां चेति चकारान्वयः। अन्यत्तैर्व्याख्यातम्। यद्वा, दुर्व्वितर्क्यप्रकृते! कदापि त्वत्तोऽस्माकं न किञ्चित् सुखं जातम् किंत्वदर्शने दर्शनेऽपि दुःखमेवेत्याहुः। अटतीति पूर्वार्द्धेन। व्यक्तमेवादर्शने परमदुःखम् अतश्चिरमदर्शनदुःखं सोढुं न शक्नुमः सत्वरं तद्दर्शनं देहीति भावः। दर्शनेऽपि दुःखमाहुः। कुटिलेति। जडः अनभिज्ञः अनिमिषत्वाकरणात् पश्यत इति शेषः। तादृशश्रीमुखस्य संदर्शनासंपत्त्या दुःखमेवेत्यर्थः। अहो बतास्माकं परमदौर्भाग्यमिति भावः। तथापि तद्दर्शनोत्कण्ठा नितरां बोधितैव दर्शने निमिषमात्रव्यवधानासहिष्णुत्वात् यद्वा उदीक्षमाणानां सतां पक्ष्मकृत् कृती छेदने यः पक्ष्माणि कृन्तति अकारप्रश्लेषेण स एव अजडो रसज्ञो विद्वान् वा। यद्वा, दृशां पक्ष्मच्छिदजड एव उदीक्षताम्, उच्चैः पश्यतु, वयन्तु पक्ष्मच्छन्नदृशो जडाः साक्षादपि किं पश्याम इति भावः। एवमधिकदिदृक्षापि सिद्धैव॥ १५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

त्रुटीति अविभक्तिनिर्देशः आर्षः चक्षूरूपविघाताज्जडः॥ १५॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किंच क्षणमपि त्वद्विश्लेषमसहमानाः सर्वसङ्गपरित्यागेन वयं यतय इव त्वामुपागतास्त्वं तु कथमस्मांस्त्यक्तुमुत्सहस इत्यभिप्रेत्याहुः द्वाभ्याम्। भवान् यत् यदा अह्नि वृन्दावनं प्रत्यटति गच्छति तदा त्वामपश्यतां प्राणिनां त्रुटिः क्षणार्धमपि युगवद्भवत्येवमदर्शने दुःखमुक्तं पुनश्च कथञ्चिद्दिनान्ते तव कुटिळाः कुन्तळायस्मिंस्तच्छ्रीमन्मुखम् उत् उच्चैरीक्षमाणानां तेषां दृशां पक्ष्मकृद्ब्रह्मा जडो मन्द एव निमेषमात्रमप्यसह्यमिति दर्शने सुखमुक्तम्॥ १५॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

किं अहोरात्रमस्माकं त्वत्संचिन्तनमेवान्यो व्यापारो नेष्यते इत्याशयेनाहुः। अटतीति। यद्यदा यस्मिन्नह्नि काननमटति गच्छति तदा तस्मिन्नह्नि त्रुटिः त्रुटीति प्रातिपादकिग्रहणं तेन विभक्त्यम्तं पदं लक्षयति अणुद्वयलक्षणः परमाणुः त्रयः परमाणवस्त्रसरेणुः त्रयस्त्रसरेणवस्त्रुटिः सः कालावयवः नः त्वामपश्यतामस्माकं युगायते युगवदाचरति दिव्यद्वादशसहस्रपारिमितसमानो

वर्त्तते पक्ष्म नुदन्ति व्यथयन्तीति पक्ष्मनुदः तादृश्यो दृशो यासां तास्तथा तासामनिमिषनेत्राणां तव मुखमीक्षतामीक्षमाणानामस्माकं प्रवृत्तिर्जडवदचेतनवन्निश्चेष्टनमित्यर्थः । अनेन बहुकालोऽपि त्रुटितुल्य इति सूच्यते नुद्दृशामिति पाठेनुर्मानवस्य तव मुख —मीक्षतां दृशां पक्ष्म जडवदुत्क्षेपावक्षेपलक्षणप्रवृत्तिशून्यमित्यर्थः । अनेन मानवस्याप्यनिमिषत्वं सूच्यते ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

प्रातर्व्रजतो गमनात् सायं व्रजागमने च प्रकारभेदेन दुःखभेदकारित्वम्, तदन्तरालकालेऽपि सुतरां दुःखद एव त्वमिति निरूपयन्त्य आहुः—अटतीत्यादि । हे रमणेति बोध्यम् । यद् यदा अह्नि दिने भवान् काननमटति, तदा त्वामपश्यतां मद्विधानां त्रुटिकालो युगमिवाचरति, दुःखदत्वात् । तदनन्तरं वा समये कदाचिद्दर्शनं भवति, तत्रापि निमेषो युगायत इत्याशयेन विधिं प्रत्यसूययाहुः—कुटिलेत्यादि । ते तव श्रीमुखमुदीक्षताम्, उदीक्षमाणानाञ्च दृशां पक्ष्मकृद्विधाता जड एव तं प्रति किं ब्रूमः ? अतोऽस्माकं कस्यामपि दशायां न स्वास्थ्यमिति भावः ॥ १५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवञ्चेत् कियान् विलम्बः क्रियताम् ? तत्राहुः—अटसीत्यादि । त्रुटि युगायते त्वामपश्यताम् । अपश्यतामिति सामान्यनिर्देशात् प्राणिमात्रस्यैव किं पुनस्त्वयानुरागिणीनामस्माकमित्यर्थः । एवं कुटिलकुन्तलमित्यादौ च ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्चास्माकं दुरदृष्टमेव दुःखदं तत्र त्वं किं कुर्या इत्याहुः । यत् यदा भवान् काननं वृन्दावनमटति गच्छति तदा त्वामपश्यतामस्माकं गोपीजनानां त्रुटिः क्षणस्य सप्तविंशतिशततमो भागः सोऽपि युगतुल्यो भवति । क्लीवत्वमार्षम् । दिवसे त्रैमासिकमेव त्वद्विरहदुःखं सर्वेषां व्रजजनानामस्माकन्तु त एव त्रयो यामाः शतकोटियुगप्रमाणा यद्भवन्त्यत्र दुरदृष्टं विना किमन्यत् कारणं भवेदिति भावः । पुनश्च कथञ्चिद्दिनान्ते श्रीमन्मुखं तव उदीक्षतामुत् कण्ठया ईक्षमाणानां तेषामेव गोपीजनानां दृशां पक्ष्मकृत् पक्ष्मस्रष्टा विधाता जडो निर्विवेको दुःखं करोतीति शेषः । एवञ्च त्वददर्शने दुष्पार एव दुःखासिन्धुः दर्शने तु पक्ष्मोद्भवो निमेष एव यो दर्शनविरोधी सोऽपि नवशतत्रुटिप्रमाणो भवन्नवशतयुगायते इत्युभयथापि दुःखं दुरदृष्टवशादेवेति भावः । त्रसरेणुत्रिकं भुङ्क्ते यः कालः सः त्रुटिः स्मृतः । शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः । निमेषस्त्रिलवो ज्ञेय आम्नातास्ते त्रयः क्षण इति मैत्रेयः । यद्वा । कृती छेदने । दृशां स्वचक्षुषां पक्ष्मकृत् पक्ष्मच्छेत्ता अजडश्चतुरो जनस्ते श्रीमुखमुदीक्षतामुत्कर्षेण पश्यतु नतु वयमचतुरा इति भावः ॥ १५ ॥

श्रीरसिकाह्लादिनी टीका

एवमदर्शने दुःखं दर्शनावसरेऽपि पक्ष्मव्यवधानेन दुःखं तदवश्यमेवेत्युभयतो व्याकुला सत्यो दैन्यं निवेदयन्ति—अटतीति, यद् यद् यदा भवान् काननं वृन्दावनं प्रत्यटति अह्नीति रात्रौ यत्र विलसितं तत्परिशीलनेन दिवाऽपि सुखविशेषोदयात् स्वस्याशक्त्या तत्र गमनाभावः सूचितः । तदा त्वामपश्यतां गोपीजनानां अस्मदृष्टान्तेन सर्वेषामपि व्रजजनानां त्रुटि उपलक्षणमेतत् । अल्पः कालो युगायते दुरतिक्रमणीयत्वात् । अदर्शने परमदुःखावधिरुक्तो दिवसस्यानतिबाह्यत्वादिति । सायंकाले वनादिगमनसमये कुटिलाः वक्राः कुन्तला अलकाः यस्मिन् । तव हृदयस्य कौटिल्यं कुन्तलैश्चैव प्रकाशितमित्यर्थः । यतः शीघ्रं दर्शनं ददासीति । श्रीमुखं श्रिया शोभया युक्तं उदीक्षतां उत् उच्चैः सतृष्णतया ईक्षतां अस्मदृशानां सर्वषां गोपीजनानां दृशां पक्ष्मकृत् विधाता जडोऽनभिज्ञ एवाभासत इत्यर्थः । निमेषमात्रव्यवधानासह्यतयासह्यत इत्यर्थः । एवं दर्शनस्य मुखे परां काष्ठामापन्नेऽपि निमेषव्यवधानात् दुःखसम्बलितत्वं आपाततो रमणीयत्वेपि उदर्के दुःखं सम्बलितत्वाददुःखमेव अयमर्थः देवानां श्रीमुखदर्शनविमुखानां अनिमिषकरणेन श्रीमुखदर्शनासक्तमनसां सनिमिषत्वकरणेन च अनुचितकर्मकरणात् विधातरि जड़त्वम् । अधुना प्रणयसंरम्भेण दोषोद्गारं प्रकाशयन्त्य स्वस्मिन् निर्दोषत्वं व्यञ्जयन्त्य आहुः ॥ १५ ॥

विशुद्धरसदीपिका

तथा वेणुनेति । कर्तृत्वोक्त्याऽचेतने चेतनाधायकत्वं ततश्च दर्शने दुःखमसहमानाः परमार्त्या स्वपूर्ववृत्तमावेदयन्ति । अहो भवान् यदा अह्नि काननमटति तदा त्वामपश्यतां किमुत रात्रावित्यर्थः । तथा कुटिलकुन्तलं श्रीयुतं मुखमुदीक्षतां किमुत गह्वरवनान्तरमिति भावः । पक्ष्मकृत् निमेषकर्ता जडः परदुःखानभिज्ञः किमुत वनकुञ्जादिनिर्माता यद्वा उदीक्षतां पक्ष्मकृत् यः पक्ष्माणि कृन्तति स एव अजड इति रसज्ञः विद्वानित्यर्थः । यश्च द्रुमलताद्यन्तरितं त्वां समानीय दर्शयेत्सतु परमोपकारी परमविद्वांश्च तादृशश्च भवानेवेति भावः ॥ १५ ॥

श्रीरामनारायणकृता भावभावविभाविका

वितरिष्यामि किन्त्वरया तत्र दर्शनविलम्बस्यासह्यत्वं दर्शयन्त्य आहुः। अटतीति। यदिति यदा भवान् अन "प्राणने" इत्यस्मात् भवस्य दग्धकामस्यापि प्राणो जीवनभूतः किमुत कामिनोनां नः कप्रत्ययान्तत्वाद्धलन्तत्वं यद्वा सामान्यतः सर्वस्य भवस्य जीवनभूतोऽधिष्ठानतया सत्तास्फूर्तिप्रदः यद्वा भवत्यस्मादिति भवस्य अनत्यस्मादित्यन् स चासौ सच भवान् सत्तालाभजीवनहेतुः सर्वं खल्विदं ब्रह्म तज्जालानिति श्रुतेः तर्हि किमुवाच्यमस्मज्जीवनहेतुरिति यद्वा भवस्य जन्मनो जीवनः साफल्यहेतुर्यद्दर्शने एव जन्मसाफल्यं यद्वा काननं भाति प्रकाशयति वाति सुगन्धयति अनिति जीवयतीति तथा स भवान् काननं केवलमटति न किञ्चिदपि तत्र कार्य्यं साधयति तत्र काननमित्यनेन वननामनिर्देशेन का कुत्सितमस्मद्विरहदुःखदत्वादाननं यस्मिन्निति प्रियमुखे तथोक्त्यनौचित्याद्वा कानि कुत्सितान्येवासुन्दरतया दर्शनीयानि पक्षिमृगाद्याननानि यस्मिन्निति नास्मन्मुखानीव तव दर्शनयोग्यं तत्र किमप्यस्तीति वृथैव तत्राटनं यद्वा गोपकुमाराणां सुन्दरमुखानां तत्र वर्त्तमानत्वात् भगवद्विहारवनपक्षिमृगादीनामपि कुत्सिताननत्वासम्भवात् कुत्सितानि स्वविरहदुःखकालत्वेन स्वग्लान्यन्वितानि आननानि यस्मात्त्वदीयपद्गमनात् यद्वा कं सुखरूपं त्वदीयमाननं यस्य तत्काननं वृन्दावनस्थावरजङ्गमानां सर्वेषां चेतनत्वात् प्रेमरसान्वितत्वेन त्वदेकजीवनत्वात् त्वद्ध्यानपरतया जठीभूतत्वेऽपि त्वद्दर्शने मुकुलपुलकसुमनोविकासप्रहासमध्वानन्दाश्रुस्रावदर्शनात् भवांश्च स्वमुखदर्शनेन नः सुखदानवत्सुखदानायैवाटतीति न वृथाटनं तथापि नस्त्वत्तस्त्रुटिततनूनां त्रुटियुगायते दुःखकालत्वेन कालात्मकतया युगकाल इव दुस्तरतामेति किमु वाच्यं त्वददर्शने त्रुटेर्युग इवाचरणं त्वद्दर्शने पक्ष्मप्रतिबन्धोऽपि दुःसह इत्याहुः। कुटिलकुन्तलमिति। तव श्रीमुखं नित्यश्रियान्वितं मुखमुदीक्षतामुत्कृष्टतया निविष्टचित्ततया ईक्षतां किम्भूतं तत् कुटिला वक्राः कुन्तलाः कुं पृथ्वीं स्वशोभया तलमधः कुर्वन्तीति तथाभूता अलका यस्मिन् निशाळिङ्गितनिशापतिवदस्मद्दृक्कुमुदविकासहेतुः। यद्वा कुटिला मुखावरणेन दर्शनप्रतिबन्धकतया कपटयुताः कुन्तला यस्मिन् कृष्णवर्णानां स्निग्धत्वेऽप्यहो कौटिल्यमिति भावः तत्पश्यतां नः पक्ष्मकृद्ब्रह्मासर्वज्ञतयाबुद्ध्याधिष्ठातृदेवत्वेन प्रसिद्धोऽपि जड एव यत आत्मनो निमेषरहितनेत्राष्टकमिन्द्रस्य मिथ्याविषयजातदर्शनायानिमेषदृक् सहस्रमस्माकं सच्चित्सुखात्मकं कृष्णवपुः पश्यतां गोपीजनाना दृग्द्वयेऽपि पक्ष्मकृत् कथं जडतामतीयात् यद्यधुनापि त्वन्मुखमुदीक्षतां पक्ष्मकृत्पक्ष्मच्छेदकः स्यात् तदा अजडो यथावत्सर्वज्ञ एव भवेत् यद्वा यः पक्ष्मकृत्तच्छेदकस्तथैवाजडश्च स ते कुटिलकुन्तलं श्रीमुखम् उदीक्षतां पश्यतु वयन्तु निमेषकृतप्रतिबन्धाः प्रेमजडीकृतचित्ताश्च कथम्पश्याम इति भावः॥ १५॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अहो अधरामृतायोग्यकालेऽपि त्वद्विरहोऽस्माकमसह्यः किमुवक्तव्यमस्यां रात्रावित्याशयेनाहुः। अटतीति। भवान् स्वतन्त्रः वारयितुमशक्यः यदा दिने दिने काननं वृन्दावनं प्रति अटति गच्छति तदा त्रुटिः क्षणस्य कश्चिद्देशोऽपि त्वामपश्यतां व्रजस्थानां सर्वप्राणिनां युगवत्प्रतीयते किमु वक्तव्यमस्माकं पुनश्च कथञ्चिद्दिनस्य परिक्षये व्रजं प्रत्यागतस्य तव कुटिलकुन्तळाननं श्रीमुखमुच्चैरीक्षमाणानां प्राणिनां दृशां पक्ष्मकृद्ब्रह्मा जडो मन्दः भवच्छ्रीमुखापेक्षयाऽतिक्षुद्रसुखविषयदर्शनार्थं देवानां पक्ष्म न कृतवान् अलौकिकविषयदर्शनपराणामस्मदादीनां तु तत्कृतवान् काळं च तेषां महान्तं कृतवान् अतस्तस्य जडत्व स्पष्टमेवेति भावः। तथा च निमेषप्रतिबन्धोऽपि यत्रासह्यः दुःखप्रदस्तत्रैवंविधसमये बहुकालं त्वद्विरहं कथं सहामस्तस्मात्कृपां कुर्वित्याशयः। अनभिज्ञासक्षे किञ्च प्रत्यहं क्षणमपि त्वददर्शने दुःखदर्शने च सुखमनभूय सर्वसङ्गपरित्यागेन यतय इव त्वामुपागतास्त्वन्स्वेवंविधा अप्यस्मान् परित्यज्य गत इत्यहो कष्टमिति सकरुणमाहुः। अटतीति। त्वामपश्यतां त्रुटिरपि युगायते त्वन्तु सूर्य्योदयादारभ्य तदस्तपर्य्यन्तं वनमटसि तत्रापि तव गमनं यदा सार्थकं भवेत्तर्हि स्याद्यथाकथञ्चित्सन्तोषः परन्तु दिनमात्रं वृथा काननमेवाटसि अस्माकन्तु तदत्यन्तमसह्यमिति भावः। दर्शनसमयेऽनिमेषमात्रमप्यन्तरमसह्यमिति दर्शनसुखमुक्तम उदीक्षता मध्ये पक्ष्मच्छेदकः स एवाऽजडः प्रतिबन्धकनिवृर्तकत्वात् कुशल इति वा, तथा च तत्प्रतिबन्धकस्याङ्गस्यापि छेदनीयत्वात्तत्सुखस्योत्कर्ष इति भावः। यद्वा अस्माकमय सुखजनक इतिभ्रमाद्वयं दुःखसमुद्रपतिताः विचारे कृते तु तव दुःखजनकत्वमेव सिद्ध्यति सर्वदा तथैव तव प्रवृत्तिदर्शनादित्याशयेनाहुः। अटतीति। तथाच प्रयोजनं विना चिरकालं वने भ्रमणं दर्शनकाले कुटिलकुन्तलैर्मुखस्याच्छादनञ्चेत्येतत्सर्वं केवळमस्मद्दुःखायेत्यर्थः। किञ्च तवैव कोऽपराधो दैवमप्यस्मद्दुःखाय बद्धपरिकर इत्याहुः। पक्ष्मकृत् इति तस्माद्बहुजातमितः परं करुणा विधेयेति भावः। मानिनीपक्षे ननु सम्प्रतियुष्मद्गर्वशैथिल्यं जातं वर्त्तते प्रकटिते तु मयि पुनर्गर्वगिरिशृङ्गारूढाः भविष्यथ इति चेदस्मदर्थं नागम्यतां यासान्तु त्वद्दर्शनादर्शनयोः सुखदुःखसागरे प्रवेशस्तदर्थमेवागम्यतामित्याशयेनाहुः। अटतीति। निवृत्तिपक्षे यथोक्तज्ञानामृतरहितानां क्षणमात्रमपि कालो दुःखकालत्वान्महानित्याहुः। अटतीति। त्वामपश्यतामह्नि अनिर्घातलक्षणे दिने संसृतिलक्षणं यत्काननं तद्भवान् यदटति तत्र त्रुटिरपि तत्र त्रुटिरपि कालो युगवद्भवति "मुखं निःसरणे वक्त्रे" इति कोशात् श्रियःधर्मादिसम्पत्तेः निःसरणं यस्मात्तथाभूत चेतनं कुटिलः कुन्तलो जवोविषयाभिमुखो वेगो यस्य तादृशमुदीक्षतां मध्ये यस्तुभ्यं त्वत्प्राप्त्यर्थं दृशां चक्षुरादीन्द्रियाणां पक्ष्मकृन्निरोधकः स एवाजडश्चेतनस्त्वत्स्वरूप इत्यर्थः॥ १५॥

रास-रहस्यम्

र० टी०—यद् यदा भवान् काननमटति विषयारण्यं गच्छति तदा अह्नि विचारोदये सति तव श्रीमुखं ज्ञानालोकोद्भासितं स्वरूपं, अपश्यतां अननुभवतां नः अस्माकं कालः त्रुटिः क्षणमात्रमपि युगायते युग इव कल्प्यते तस्मात् त्वामुदीक्षतां उत्सुकतापूर्वकं अर्थात् निविष्टचित्ततया ईक्षतामस्माकं जड़दृशां चक्षुरादीन्द्रियाणां कौटिल्यादयः दोषाः कुन्तलवत् आवरकाः यस्य एवं तव श्रीमुखस्य पक्ष्मकृत् निरोधकृत् जडः ॥ १५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वात्मनि त्वय्यत्यन्ततो ऽनुरक्ताः अन्यत्र विरक्ता अतोऽनुग्रहं कुर्विति काश्चिदाहुः। अटतीति द्वाभ्याम्। यत् यदा त्वामपश्यतामस्माकं गोपीजनानां त्रुटिरपि क्षणार्धमपि युगायते युगवद्भवति दिनान्ते तव श्रीमन्मुखमुदीक्षतामुच्चैरीक्षमाणानामस्माकं तु दृशां पक्ष्मकृत् प्रजापतिर्जड इति मतिर्भवति ॥ १५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

न गोपीनामस्माकमन्यो व्यापारोऽपारमहिमंस्त्वच्चिन्तनादिति विज्ञापयन्ति ॥ अटतीति। यद्यदा भवानह्नि दिवा काननं वनमटति तदा त्वामपश्यताम्। पुंप्राया इत्यपश्यतामित्युक्तिः। अस्माकं गोपीजनानां त्रुटिः। न लोपः प्रातिपदिकान्तस्येत्यादिवत्प्रातिपादकनिर्देशः। त्रुटछेदने इगुपधात्कितीन्। स्त्रियां मात्रा त्रुटिःपुंसि लवलेशकणाणव इत्यमरः। लेशोऽपि कालो युगानीवाचरति युगायते। युगं तु दिव्यद्वादशसहस्रवत्सरात्मकः कालः। कुटिलं कुन्तलं श्रीमुखं च जडवन्निमीलनोन्मीलनाभावमात्रेण तद्वदित्युक्तिः। अन्यथेक्षतामिति विक्षतं स्यादिति ज्ञेयम्। ईक्षमाणानां दृशां तत्सम्बन्धिनयनानां पक्ष्मनुत्पक्ष्माणि तल्लोमानि नुदति व्यथयतीति तत्तथा। पक्ष्मकृदिति पाठे पक्ष्माणि करोतीति स चतुराननो जडवन्मूर्खवद्देवेत्यर्थ इति केऽपि। यद्यदाऽह्नि भवानटति यत्र कुत्रापि तदा नं नियन्तारं त्वाऽस्मदितरा नारी न आमगान्वगच्छत्। सा काऽपि त्रुटियुगा त्रुटिर्युगं यस्याः सा सती पश्यताम्। पश्यो जीवोऽस्यास्तीति स जीवस्तत्त्वमयते गच्छति न काऽपि। याऽयते पश्यतां सा केति तां पश्य तादृङ्मृगदृङ्नास्तीत्यर्थः। पश्यत इति व्याख्यावेलायां पश्यतीति पश्यो जीव इति तत्त्वप्रकाशिकाद्युक्तेः। ईक्षतां दृशामजडवत्पण्डितवद्युगं त्रुटियुग्मवदाचरतीत्यपि त्रुटियुगायत इत्यावर्त्यार्थो ज्ञेयः। एवं चेन्न वृत्तविच्छित्तिस्त्रुटिर्युगायत इति पठतामिव नापि प्रातिपदिकताश्रयणक्लिष्टता च भवतः। स्यात्त्रुटिः संशये लेशे सूक्ष्मैलाकालमानयोरिति विश्वः। यद्वाऽर्धर्चादित्वान्नपुंसकलिङ्गता। न च काशिकायामर्धर्चगोमयेत्यारभ्य शकलान्तशब्देषु त्रुटेरग्रहीतेः कथं तत्त्वेन नपुंसकतेति वाच्यम्। ओष्ठे इत्यृग्भाष्यटीकायामर्धर्चादित्वादोष्ठशब्दो नपुंसकलिङ्ग इत्युक्तस्य तत्रोपसङ्ख्यायत्वादित्युक्तेराकृतिगणतामजिज्ञपन् युगेत्येकदेशा ग्रन्थकृत इति काऽत्र कथन्ता। लिङ्गमशिष्यमिति भाष्याद्वा नपुंसकता ॥ १५ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं त्रिविधा निरूप्य पुनस्तामस्यस्त्रिविधा निरूप्यन्ते देवनिन्दिकाः सात्त्विकतामस्याः भगवन्निन्दिकास्तामसतामस्याः स्वनिन्दिका राजसतामस्य इति। अटतीति। भवान् अह्नि काननं यदाटति तत्र दिवसे त्रुटिः युगायते तत्र निमित्तं त्वामपश्यतामिति यदा पुनः पश्यामः तदा कुटिलकुन्तलं श्रीमुखं ते उदीक्षतां नोऽस्माकं यः पक्ष्मकृत् ब्रह्मा स जडः यथा देवानां पक्ष्म न करोति अलौकिकद्रष्टत्वात्तदपेक्षयात्यालौकिकद्रष्टृत्वात् अस्माकमपि पक्ष्मकरणमनुचितम् अतोऽनुचितकरणात् जडः देवा हि बहुकालं जीवन्ति तथा वयमपि न कृताः। त्रुटिर्युगायत इति त्रुटिशब्दोऽस्त्रियां यदि सार्थकं गमनं भवेत् तथापि न काचिच्चिन्ता परमह्नि काननमेवाटति ननु कानने कश्चन पुरुषार्थः अस्माकञ्च न बहिर्गमनं सम्भवति ॥ १५ ॥

श्रीसुबोधिनी–सारः

अह्नि दिने यद् यदा काननं वनं भवानटति गच्छति तदा त्वामपश्यतां त्रुटिः क्षणार्द्धमपि युगवद्भवति। कुटिलानि कुन्तलानि यस्मिन् तत्ते श्रीमुखम् उदीक्षतां पुंसां स्त्रीणां वा दृशां नेत्राणां पक्ष्मकृत् ब्रह्मा जडो मूर्ख इति त्वत्सम्बन्धो दुर्लभः ॥१५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किंच 'क्षणमपि त्वदर्शने दुःखं दर्शने च सुखं दृष्ट्वा सर्वसङ्गपरित्यागेन वयं त्वामुपागताः, त्वं तु कथमस्मांस्त्यक्तुमुत्सहसे' इति सकरुणमाहुः—अटतीति द्वयेन। यत् यदा अह्नि दिवसे भवान् काननं वृन्दावनं प्रति अटति गच्छति तत्त्वामपश्यतां प्राणिनां त्रुटिर्युगायते तृतीयस्कन्धे उक्तः त्रुट्याख्यः स्वल्पोऽपि कालो युगवद्भवति। एवमदर्शनदुःखमुक्तम्। यस्मादेवं तस्मात् हे अच्युत! पुनश्च कथञ्चिद्दिनान्ते कुटिलः कुन्तलाः केशा यस्मिंस्तत् श्रीमत् शोभातिशययुक्तं ते तव मुखं उदीक्षतां उच्चैरीक्षमाणानां तेषां दृशां पक्ष्मकृत् ब्रह्मा जडो मन्द एवेति सम्मतो भवति। एवं निमेषमात्रमप्यन्तरमसह्यमिति दर्शनसुखमुक्तम् ॥ १५ ॥

अन्वितार्थप्रकाशिका

सर्वं त्यक्त्वा यतय इव वयं त्वामागतास्त्वं कथमस्मांस्त्यक्तुमुत्सहसे इत्याहुः—अटति इति ॥ यत् यदा अह्नि दिने भवान् काननं वृन्दवनं प्रति अटति गच्छति । तदा त्वामपश्यतां प्राणिनां त्रुटिः युगायते । त्रुटिरत्यल्पः कालः । सारार्थसंदर्शिनी-सम्मते त्रुटीति सुलुक् पाठे क्लैव्यमार्षम् । सुवत्पाठे छन्दोभङ्ग आर्षः । युगाय ते तस्मात् हे अच्युत ! पुनश्च कथंचिद्दिनान्ते कुटिलाः कुन्तलाः केशा यस्मिंस्तत् श्रीमत् शोभितिशययुक्तं ते तव मुखम् उदीक्षताम् उच्चैरीक्षमाणानाम् । आर्षः शता । तेषां जनानां दृशां पक्ष्मकृत् ब्रह्मा जड एवेति निमेषमात्रमप्यन्तरमसह्यम् । यद्वा । दृशां पक्ष्मकृत् पक्ष्मच्छेत्ता । "कृती छेदने" क्विप् । निर्निमेषप्रेक्षी अजडश्चतुरो जनः तव रूप उदीक्षतां पश्यतु नतु वयं मूर्खा हतभाग्याश्च ॥ १५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

त्वद्दर्शनं विना क्षणमपि स्थितौ सत्यामस्माकं महद्दुःखं भवत्यस्त्वदङ्गाश्लेषमन्तरा तु मरणं भविष्यतीत्याशयेनाऽऽहुः श्लोकयुगलेन । अटतीति । यत् यर्हि अह्नि दिने भवान् काननं वृंदावनं अटति भ्रमति तदा त्वामपश्यतां प्रेमिजनानां त्रुटिः अत्यल्पकालोऽपि युगायते चतुर्युगमिवाऽऽचरति । अथ दिनान्ते त्वय्याऽऽगते सति कुटिलकुन्तलं ते श्रीमुखं श्रीमदाननं उदीक्षतां आधिक्येन पश्यतां अस्मदादिजनानां दृशां नेत्राणां पक्ष्मकृत् विधिः जडः कार्याकार्यविवेकशून्य एव एतादृशो न चेत्तर्हि प्रेमिजननयनपक्ष्मकृन्नाभूदिति भावः ॥ १५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च क्षणमात्रमपि त्वदनर्शने महद्दुःखं दर्शने च परमं सुखं जायते ततः सर्वसङ्गपरित्यागेन यतय इव वयं त्वामुपगताः, त्वं तु कथमस्मांस्त्यक्तुमुत्सहसे इति सकरुणं स्वपूर्ववृत्तं प्रदर्शयन्त्य ऊचुर्द्वाभ्याम् ॥ अटतीति ॥ भवान् यद्यदा, अह्नि दिवसे, काननं वृन्दावनं प्रति, अटति गच्छति, तदा त्वां, अपश्यतामनवेक्षमाणानामस्माकं, त्रुटि क्षणार्द्धमात्रकालोऽपि, युगायते युगवद्भवति । एवमदर्शने दुःखमावेदितम् । पुनश्च कथञ्चिद्दिनान्तसमये, ते तव, कुटिला कुन्तला यस्मिंस्तत् , श्रीमुखं परमश्रीमदास्यं, उदीक्षतां उदुच्चैरीक्षमाणानां, अस्माकं, दृशां पक्ष्यकृद्ब्रह्मा, जडः मन्द एव । इत्युपालम्भं कुर्महे । निमेषमात्रमप्यन्तरमसह्यमिति दर्शने सुखमुक्तम् । यद्वा । तव श्रीमुखमुदीक्षतां नः दृशां यः पक्ष्माणि कृन्ततीति पक्ष्मकृत् सः अजडः निर्निमेषतया यस्त्वन्मुखदर्शकः स तु परमोपकारी विद्वांश्चेति जानीमहे इति भावः ॥ १५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अटतीति : १०.३१.१५.

दिवा भजस्व काननं निशि स्वकाननं सखे प्रदर्शयेति दर्शिते मुहुर्मुहुर्मनोऽर्थिते ।
तथास्त्वितीरितं वचो विधाय चान्यथा स्वगोपनाद्वियोगतोऽधुना प्रदर्शितं विकाननम् ॥ २२५ ॥
यदा त्वमह्नि कानने भ्रमस्यदभ्रसम्भ्रमादतर्क्य-कर्कशाऽर्कतप्त-शर्करापरिश्रिते ।
अखर्वघर्मघर्मता तदाऽऽस सर्वतोमुखे सखेऽधुना तु तद्वृथा चरस्यनाथवत् कुतः ॥ २२६ ॥
नित्याह्निकं यदटवीभ्रमणं ममातः का तत्र भीः श्रमविधाविति चिन्तनेन ।
मा साहसं कुरु निशि भ्रमणेऽधुनैकः क्लेशोऽपि न श्रमकरः सह मित्रवर्गैः ॥ २२७ ॥
अविद्यानिशायां भवारण्यभागे जना मां विहाय भ्रमन्तीति गर्ह्याः ।
वदन्नेवमङ्गीकरोषि प्रकारं तमेवेति चित्रं न किं के चरित्रम् ॥ २२८ ॥
कान्तारतान्तविहृतिर्मम चाह्नि सिद्धा भव्या भविष्यति निशास्वपि युष्म ीड्या ।
एवं प्रतारकवचांसि वितीर्य कर्णाभ्यर्णे कथं चरसि पूर्ववदित्यपूर्वम् ॥ २२९ ॥
कान्तारत-श्रमज-खेदमिहाऽपनेतुं शास्त्रे ततो वनविहारविधिर्निरुक्तः ।
त्वं पूर्वमेव चरसीति विचित्रमर्वाग्भुक्तेरगस्त्यमुनि-चिन्तनमप्रसिद्धम् ॥ २३० ॥
कान्तारतोत्सव-मिहेश विहाय मोहात् कान्तारतोऽधिकसुखाभिरुचिः कथं ते ।
शस्ताम्बरं मिलितमप्यपहाय शुष्कां कस्तारवीं त्वचमनुस्पृहयेन् मनीषी ॥ २३१ ॥
अयं त्रटिमितो भवत्यलमयं युगात्मेति या व्यवस्थितिविकल्पना जगति भाति मिथ्यार्थिका ।
न चेत् कथमिहानिरीक्षित-भवन्मुखानामहो लवोऽपि युगरूपतां भजति नाम नश्चेतसि ॥ २३२ ॥
घस्रेऽजस्रनिषिध्यमानसुरतेऽप्यासीद् वियोगेन मे कालः स्वल्पतमोऽपि कल्पसदृशस्तासां मदेकात्मनाम् ।
निश्यस्यां रतिरङ्गभाजि तु भवेन्मामन्तरा तत्स्थितिः कीदृग्वा समयातिलङ्घनमिदं नैषत्कथं चिन्त्यते ॥ २३३ ॥

सूक्ष्मं च पक्ष्म कमलेक्षण ते मुखाब्जवीक्षाविरोधकृदतोऽजनि दुःसहं नः ।
भूयस्त्वया-ऽनुभवतेदृशमर्थजातमद्रिद्रुमान्तरमहो क्रियते कथं वा ॥ २३४ ॥
स्रष्टा स यद्यपि तथापि विभाति भूयः सम्भ्रान्तधीर्भुवि समञ्जसयोजनायाम् ।
पक्ष्माक्ष्णि ते मुखनिरीक्षणलालसेऽस्मिन् निष्पक्ष्म नेत्रमकरोद्दिवि देवतानाम् ॥ २३५ ॥
चतुराननोऽपि चतुरागमवेत्ताप्यखिलादिमोऽध्यवनि सत्यसमेतः ।
वितथाक्षिपक्ष्मकरणादुपयातां जडतां निजां न यदपश्यदिहाहो ॥ २३६ ॥
निर्माय पक्ष्मविहितं व्यवधानमक्ष्णि धात्रा त्वदास्यकमलस्य निरीक्षणेऽद्य ।
गिर्यादिकल्पितमिदं व्यवधानकृत्ते युक्तं सुतादधिकता पितरीति सिद्धम् ॥ २३७ ॥
सूक्ष्मं हि पक्ष्म गिरिवृक्षसदृक्षमक्ष्णि संलक्ष्यते क्षणविरोधिमुखेक्षणे ते ।
यत्साम्प्रतं तु गिरयस्तरवश्च मूर्तास्तद्वाच्यमच्युत किमुच्चतरत्वमेषाम् ॥ २३८ ॥
अपश्यन्त्यो घस्रे मुखमपि कलां कल्पकलनां प्रपश्यन्त्यः सायं सुखमनुभवामो निरुपमम् ।
विभो भूयोऽप्यस्मद्विचरितमिदं सत्परिचितं मनागस्मिन्काले नहि समुचिता गुप्तवसतिः ॥ २३९ ॥
पशुपालनानलसधीर्वनं प्रभाते प्रयासि पुनरेषि । हर्तुं व्रजजनविरहं सायमयं ते क्रमोऽद्य कुत्र गतः ॥ २४० ॥
सर्वदा सदयचेतसो निजेष्वच्युतादयवदद्यः वर्तने । कोऽत्र हेतुरथवास्ति मस्तकाभ्यर्हितः कुटिलकुन्तलाश्रयः ॥ २४१ ॥
कौटिल्यं ते कचेष्वीश मुखे श्रीरनपायिनी । तत्र त्वन्मनसः केन साकं स्नेहोऽस्ति तद्वद ॥ २४२ ॥
नानागमोल्लसितमेतदतीवरम्यमस्माभिरीश सह पश्य च काननं त्वम् ।
स्यात्ते सुखं यदधिकं निगदन्ति सुज्ञाः पुत्रास्यदर्शनसुखं रमणीयुतस्य ॥ २४३ ॥

कृष्णप्रिया

अब अन्यपूर्वा तामस सात्विक गोपियाँ भगवान् की स्तुति करती हैं कि हे नाथ ? हे प्यारे ? आप प्रातः काल से सायंकाल पर्यन्त सम्पूर्ण दिवस गोचारण धर्म पालन के लिए वन में विचरते हैं, तब हम परवश गृहनिवासिनी गोपियाँ को आपके दर्शन से वञ्चित एक भी क्षण प्रसरित होता है, वह क्षण तो हमारे लिये युगों के समान हो जाता है, पुनः गोचरण कराके आप व्रज की ओर लौटते हैं तब आपके कुटिल श्यामल कोमल घूंघर वाले केशो से आवृत श्रीमुख का हमे दर्शन मिलता है, उस दर्शन के दुर्लभ अवसर पर बीच में पलक चलन का अन्तराय हमारे लिए असह्य बन जाता है और वेदना वश मुँह से वाक्य निकल जाता है यह पलकविधाता विधाता सचमुच जड़ तो नहीं है ॥ १५ ॥

पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य तेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः कितव योषितःकस्त्यजेन्निशि ॥ १६ ॥

कर्दमक्षमा

अन्वयः—हे कितव ! हे अच्युत ? गतिविदः (गीत गानगति जानतः अथवा भक्तमनोगतिं जनतः) तव, उद्गीत-मोहिताः, (वयम्) पतिसुत अन्वय भ्रातृबान्धवान्, अतिविलङ्घ्य, ते, अन्ति, आगताः, (तादृशीः) योषितः, निशि, कः, त्यजेत् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्मात् हे अच्युत पतीन्सुतानन्वयांस्तत्सम्बन्धिनो भ्रातृन्बांधवांश्चातिविलंघ्य ते अन्ति तव समीपमागता वयम् । कथंभूतस्य । गतिविदोऽस्मदागमनं जानतः सर्वस्वं विहाय यदर्थमागमनं यत्तात्पर्यं जानत इति भावः । गतिगतीर्वा जानतः । याभिर्वयं मोहितास्तादृशीः गतिविदो वयं वा तवोद्गीतेनोच्चैर्गीतेन मोहिताः हे कितव शठ एवंभूता योषितो निशि स्वयमागतास्त्वामृते कस्त्यजेन्न कोऽपीत्यर्थः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतस्तव वियोगोऽस्माकमसह्यस्तस्माद्धेतोः । अच्युतेति—त्वं वीर्यच्युतिरहितत्वेन क्लीबोऽसि किमिति सम्बुद्ध्याशयः। अस्मदागमनं सुरतार्थमेवेति जानतो विज्ञस्य । गीतगतीः आकर्षणसम्मोहनादिरूपाः' । अस्मादागमनं यदि दर्शनार्थं तदापि तव गानं तून्मादकरमेवातो न वयं त्याज्याः, वयमपि गतिविदो गतानस्मान्न त्यक्ष्यतीति जानन्त्य एवागताः । हे कितवेति—निजस्वभावान्यथाकरणात्तव धूर्तत्वं वयं विद्मः । तेनालमस्मासु धूर्ततयेति भावः । निशीत्युक्ते रात्रौ भीरूणां स्त्रीणां त्यागोऽनुचित इति। इत्यर्थ इति—स्वतः प्राप्तवस्तुनस्त्यागो मुक्तसंगस्याप्यन्याय्य एव "उद्यतस्य हि कामस्य प्रतिवादो न शस्यते । अपि निर्मुक्तसंगस्य

कामरक्तस्य किं पुनः ॥" इत्युक्तेः ॥ याश्च वेणुवादनसमये पतिभिरन्तर्गृहे निरुद्धा आसंस्ताः सेर्ष्यमाहुः–पतिसुतेति । गतिमन्तिमां स्वस्य दशमीं दशां विदन्तीति ताः वयम्, अंति त्वदंतिकमायाताः । हे अच्युत ? अत्रापि अच्युतोऽभूस्तत्किं विपरीतलक्षणयैव त्वमच्युतो नामेति भावः । तर्हि किमागता इति चेत्–उद्गीतेन मोहिता हतविवेकीकृताः । एवं चेत्तर्हि रे मूढाः ? सहध्वं वेदनामिति, तत्राहुः–हे कितव शठ एवंभूता योषितो निशि स्वयमागता भीरु (रूः) त्वां निर्दयमृते कस्त्यजेन्न कोपीत्यर्थः । यद्वा–हे कितव हे मत्त निश्यायाताः युवतीः कः खलु युवा त्यजेत् । अतस्त्वं वञ्चकोऽपि वंचित एवाभूरिति भावः । "कितवस्तु पुमान्मत्ते वञ्चके कनकाह्वये" इति मेदिनी ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवञ्च सति तदेतदद्य कृतमत्यन्तमयुक्तमित्याहुः । पतीति । बान्धवा मातापित्रादयः । अति तेषां-वाक्यातिक्रमात् स्नेहादिपरित्यागाच्चातिशयेन विशेषेण च धर्माद्यनपेक्षया समूलत्वेन लङ्घयित्वाऽतिक्रम्य आगमने हेतुस्तवोद्गीतमोहिता इति हरिण्य इवेति भावः । न च यादृच्छिकमुद्गीतमपि तु ज्ञानपूर्वकमेवेत्याहुर्गतिविद इति । अस्मदागमनं जानत इति भावः । यद्वा । ननु भवत्यः परमधीराः गीतमात्रेण कथं मोहितास्तत्राहुः । गीतगतिविशेषान् जानन्त्य इति । यैः शक्रशर्वपरमेष्ठिपुरोगा इति भावः । यद्वा । भवत्यो विदग्धा ममैतादृशं स्वभावमपि जानन्तीति कथं न सावधाना जातास्तत्राहुस्त्वत्स्वभावविदोऽपि वयमिति । मोहनमन्त्रप्रायत्त्वात्त्वद्गानस्येति भावः । अहो तदप्यास्तां स्वयमेव तथानीता योषितः पुनर्निशि कस्त्यजेत् सम्भावनायां लिङ् न कोऽपीत्यर्थः । अत एव हे कितव ! वञ्चनशील । अनेनाऽन्योऽपि कितवः कस्त्यजेत् सर्वस्यापि तस्य कैतवे लब्धेनैवार्थेन स्वव्यवहारसाधकत्वं भवतु तस्यापि तिरस्कारित्वमिति तत्रापि विशेषः । अतः एव हे अच्युत ! स्वगुणादव्यभिचारिन्निति सान्वयैव तवैषा संज्ञेति भावः ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बान्धवाः पितृमात्रादयः, एषां पूर्वोक्तन्यायेन पूर्वपूर्वपरित्यागे परपरापेक्षया यथोत्तरं श्रेष्ठ्यमूह्यम् । अति तेषां वाक्यातिक्रमात् स्नेहादिपरित्यागाच्चातिशयेन विशेषेण च धर्म्माद्यनपेक्षया समूलत्वेन लङ्घयित्वा अतिक्रम्यागमने हेतुः—हे अच्युतेति । प्रपन्नजनरञ्जनादि–माहात्म्यतः कदाचिदपि विच्युतेरसम्भवादित्यर्थः । किञ्च, गतिं स्वभावमात्मनोऽस्माकञ्च वेत्सीति गतिविदः, यद्वा, तव ज्ञानमभिज्ञत्वं विदन्तीति विदः सुव्रतत्वादिस्वमाहात्म्यमस्माकञ्च त्वदेकगतित्वं जानासीति विदत्यः किंवा कारुण्यादिमयं त्वत्स्वरूपं जानत्य इत्यर्थः । किञ्च, उद्गीतमोहिताः, कितव ! हे कपटिन् ! निजस्वभावान्यथाकरणात्, निशीति रात्रौ भीरूणां स्त्रीणां त्यागोऽनुचित एवेति भावः । त्यजेदिति सम्भावनायां सप्तमी कितवेति सम्बोधनेन, कः कितवोऽपि, त्यजेत्, अपि तु कितवेनापि निशि योषितां त्यागो नैव सम्भवेदित्यर्थः, अतस्त्वयि न केवलं धूर्त्तत्वं परमाकृतज्ञत्वमपि पर्य्यवस्येदिति भावः । अथवा रात्रौ निर्ज्जने निजान्तिके उद्गीतेन रिरंसया प्रागाकृष्यानीतानां गोपसुन्दरीणां पश्चात्त्यागाद् धूर्त्त एवासीत्यर्थः । अतो व्यक्तीभूतं धूर्त्तत्वमधुना दर्शनं देहीति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, कितवा धूर्त्ताः ! किंवा धूर्त्तस्य तव योषितः, त्वद्वद्वयमपि धूर्त्तास्तव धूर्त्तत्वं सर्व्वं विद्म एवेत्यलमस्मासु धूर्त्तत्वेनेति । एतच्च दर्शनप्रार्थनचातुर्य्यं ज्ञेयम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अन्ति अन्तिकं ते हीति पाठे त्वामित्यर्थः । कितव ! धूर्त्त ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्माद्धे अच्युत ! पतीन् सुतानन्वयास्तत्सम्बन्धिनः भ्रातॄन् बान्धवांश्चात्यन्तं विलङ्घ्य ते तवान्ति समीपमागता वयं कथंभूतस्य गतिविदः अस्मदागमनं जानतः गतिविदः वयं तवोद्गीतेन मोहिताः हे कितव ! एवंभूता योषितो निशि स्वयमागतास्त्वां विना कस्त्यजेन्न कोऽपीत्यर्थः ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भगवदुन्मुखस्मरणमुग्धा गोप्यो रतिविहारसमयोऽयमिति निरूप्य सुरतसंविदाधिं क्षिपन्ति । पतीति । ते तव सकाशमागता हि यस्मात् हे कितव ! कः पुरुषः निशि योषितस्त्यजेदित्यन्वयः आगमने हेतुं वदन्ति गतिविद इति आकर्षणलक्षणगानज्ञस्य तवोद्गीतेन स्थितोत्थानकरगानेन मोहिताः मूर्च्छां प्रापिताः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

दिवसविहारस्त्वेवमेव, रजनीविहारो वा निराविलो भवितुं, न च तथा; यतो वेणुनादेन वनमानीय त्यक्वान्तर्धत्से इति तत्कालत्यक्तदेहाः सत्यो याः सद्यः सङ्गतास्ता एवोचुः—पतिसुतेत्यादि । हे कितव ! तवास्ति ? सर्वमेवानय' इति परसर्वस्वापहारी कितवः, तस्यसम्बोधने । तथा पत्यादीनतिशयेन विशेषेण लङ्घयित्वा तत्तत् सम्बन्धिनो देहान् विहायेत्यर्थः । अतिविशदाभ्यास-

समर्थास्ते तवान्ति अन्तिकमागताः । हे अच्युत ! इति सम्बोधनेनाच्युतसमीपागमने अच्युतत्वमेव भवितुमुचितम् । तत्र कस्त्वदन्यो निशि योषितस्त्यजेत् । कीदृशीः ? तव गतिविदस्तवोद्गीतमोहिताः, यद्वा, तव कीदृशस्य ? गतिविदः शरण्यस्य ॥ १६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवञ्चेद्विलम्बो न सोढव्यस्तदा गृहमेव गच्छत इत्याशङ्क्य त्यक्तगुणमयदेहा अप्राकृतदेहाः काश्चिदाहुः—पतिसुतेत्यादि । हे कितव धूर्त ! पत्यादीनतिविलङ्घ्य प्रतिशयेन विशेषतो लङ्घित्वा च तद्देहत्यागेन तत्तत्सम्बन्धमात्रमपि त्यक्त्वा तवास्ति तव निकटे आगता आयाता गता इति वा । अच्युतेति अप्राकृतेन देहेन पुनरितच्युतो न भविष्याम इति कृत्वा तवास्ति गताः प्राप्ताः । गतिविदो तवानेन गरिरिति विदः, तव तत्त्वज्ञा इत्यर्थः, तवोद्गीतमोहिताः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

याश्च वेणुवादनसमये पतिभिरन्तर्गृहनिरुद्धा आसंस्ताः सेर्ष्यमाहुः । पतीति । गतिमन्तिमां स्वासां दशमीं दशां विद्म इति ता वयमन्ति त्वदन्तिकमायाताः । हे अच्युत ! अत्रापि च्युतोऽभूस्तत् किं विपरीतलक्षणयैव त्वमच्युत नामेति भावः । तर्हि किमागता इति चेदुद्गीतेन मोहिताः हतविवेकीकृताः । एवञ्चेत्तर्हि रे मूढाः ! सहध्वं वेदनामिति तत्राहुः । हे कितव ! शठ एवंभूता योषितो भीरूस्ताः निर्दयमृते कस्त्यजेत् न कोऽपीत्यर्थः । यद्वा । हे कितव ! हे मत्त ! निशि आयाता युवतीः कः खलु युवा त्यजेत् अतस्त्वं वञ्चकोऽपि वञ्चित एवाभूरिति भावः । "कितवस्तु पूमान् मत्ते वञ्चके कनकाह्वये" इति मेदिनी ॥ १६ ॥

रसिकाह्लादिनी–टीका

पतिसुतेति—पत्यादीन् अतिशयेन विलङ्घ्य अतिशयोऽत्र तेषां वाच्यानाकलनात् अवगणय्य । प्रत्यपत्तितयान्ते तवान्तिके समीपे आगताः गतिविदः गतिमन्मत्स्वभावरमणात्मकं जानतस्तव, यद्वा अस्मदागमनं जानतः, यद्वा गतिविदो वयं तव रमणात्मकगतिं स्वभावं जानन्त्यः, यद्वा गतिं गमनमस्थितिं जानन्त्यः तदुक्तमत्रैव । "धन्याः स्म मूढमतयोऽपि हरिण्य एता" इत्यनेनोक्ता । गतिं जातन्त्येव, यद्वागतिं बहिर्ब्रह्मचर्यमन्तस्तु विलासस्वभावं जानन्त्यः, यद्वा तव गतिं धूर्त्तत्वं जानत्य स्तवसमीपे आगताः । ननु मत्स्वभावं जानीथ चेत्तर्हि किमागताः तत्राहुः तवोद्गीतमोहिताः तदुक्तं "देव्यो विमानगतयः स्मरनुन्नसारा भ्रश्यत् प्रसूनकवरा मुहुर्मुहुर्विनीव्यः" इत्यनेनोक्तो देवीनां मोहो मादृशीनामविदग्धानां का कथेति । अहो माहात्म्यं मोहन–मन्त्रात्मकस्य तव गीतस्येतिभावः । अयमभिप्रायः स्वयमागताश्चेन् तदा त्याग उचितो भवेत् तद् उद्गीतेन तत्तन्नाम्नाऽऽनीतानां अस्माकमिदानीं त्यागेन विडम्बनं कुर्वन् धूर्तत्वं प्रकटयतीति न्यायमाहुः । हे कितव धूर्त्त अन्योऽपि कितवः नायिकादर्शनात् प्रागेव वञ्चनां करोति दृष्टायां रमणमेव प्रकाशयति तदेवाहुः । स्वयमेवागता योषितः रात्रावपि निशि, रात्रौ त्वदन्यः कस्त्यजेत् सम्भावनायां न कोऽपित्यर्थः । अन्यस्यापि कितवस्य व्यवहारसिद्ध्यर्थमेव कैतवं स एव स्वार्थं तस्येति । तव कैतवस्य स्वार्थपर्यवसायित्वाभावं व्यर्थमेव कैतवमिति । अतः पत्यादीन् विहायागता अस्मान् परित्यज्य कथं न लज्जसे अतो धूर्त्तत्वं विहाय दर्शनं देहीति प्रार्थयामहे ॥ १६ ॥

विशुद्धरसदीपिका

एवं दक्षिणानां दाक्षिण्यगीतवधाय साधकचरीषु या भगवता वेणुनाकृष्टा अलब्धविनिर्गमास्त्यक्तदेहाः समुपलब्धपरिकरकलेवरास्ताः ससंरम्भमिवाहुः । पतीति । अत्र योगमायाकल्पिता अपि पतयः आसामेव नतु सर्वासामिति नहि व्रज एकविध एव प्रेमा रसकदम्बचूडामणेः परमप्रेम्णो विलासाः सर्वेऽपि सावकाशाः समुल्लसन्तः सुखयन्ति रसिकजनानिति योगमाययापि यावतानौचित्यं नापतेत्तावदेव कल्पयितुमुचितमिति ज्ञेयं यद्यपि परमप्राकृतलीलायां न किमप्यनुचितं तथापि नित्यदोषोपरक्ते श्रोतृचेतसि न तत्परतां समुदेति तथा सति याः श्रुत्वा तत्परोभवेदित्यादावुपवर्णितो भगवत्प्रयासो वृथैव स्यादित्यवधेयं विशेषजिज्ञासायां भक्तिमञ्जूषा दृश्या सुताश्च प्रजापत्यादीनामेवेति प्रागेव निर्णीतं यान्धवाश्च मातृपित्रादयः । अतीति । तेषां वाक्यातिक्रमात् स्नेहादिपरित्यागाच्च विलङ्घ्य धर्माद्यनपेक्षया समूलमुल्लंघ्य अतिक्रम्येत्यर्थः । तथा आगमने हेतुः तवोद्गातमोहिताः हरिण्य इवेति भावः । ननु परमधीराः कथमुद्गीतमात्रेण मोहितास्तत्राहुः । गतीति । गीतगतिविशेषज्ञाः यद्वा तव कापट्यपटुतादिगतिविदोऽपि मोहनमन्त्रेणेवोद्गीतेन मोहिताः यद्वा ननु पित्रादिभिः । कथं न निवारितास्त्राहुः । तवोद्गीतेनैव हेतुना तैर्मा ऊहिताः न तर्किताः न ज्ञाता इत्यर्थः । ननु गीतमोहिता एवागता नतुस्नेहेनेत्याशङ्क्याहुः योषित इति । प्रीतिपराधीना इत्यर्थः । ईदृशीः तत्रापि निशि कस्त्यजेत् सम्भावनायां लिङ् न कोऽपीत्यर्थः । अत एव हे कितव वञ्चनशील ! हे अच्युत ! तादृशस्वगुणादप्रच्युत इति दोषोद्धारः ॥ १६ ॥

श्रीरामनारायणकृता भावभावविभाविका

किञ्च नहि तव कुन्तला एव कुटिला अपि तु भवतापि कृष्णकुटिलस्वभावतयैव ते साजात्येन शिरोधृताः ननु किं मम कौटिल्यं तत्राहुः । पतिसुतान्वयेति । वयं पतीन् पतिं मन्यान् ततः सुतान् स्वीकृतपुत्रान् भातृपुत्रादीन् वा तेषामन्वयं वंशं वा

तेषामन्वयः सम्बन्धो यस्मिंस्तद्गृहं प्रवृत्तिपथमेव वा तथा भ्रातॄन् बान्धवांश्च भ्रातृबान्धवानिति पितृकुलोपलक्षणं वा तत् सर्वमति विलङ्घ्य अतिशयेनादित एव तत्सम्बन्धासम्पत्त्या विशेषतस्तत्कुलमर्य्यादागतधर्माद्यनवेक्ष्य लङ्घयित्वा तेऽन्ति समीपे अच्युता एवागताः प्राप्ताः ननु तत्सम्बन्धेन मनसापि कदाचित्कचिदपि च्युताः कथमेवं सर्वत्यागेनागमनं तत्राहुः। तवोद्गीतमोहिता इति। त्वदीयेनासाधारणेनोत्कृष्टेन यत्र शक्रशर्वपरमेष्ठिपुरोगाः कश्मलं ययुरनिश्चिततत्त्वास्तादृशेन गीतेन मोहिता मृगयुगीतेन मृग्य इव गतमतयः तत एव निमित्तभूताद्वा मा ऊहितं विचारो यासां तथाभूताः यद्वा तवोद्गीते परममाधुर्य्यरसस्नेहस्वरसौष्ठवेन श्रोत्रमनोहरतया परमाह्लादप्रदे गीते मा यथार्थत्वमतिरेवोहिता याभिः एतद्गीतं यथा श्रवणमधुरं तथैव सर्वथा परमसुखपर्य्यवसायीति यद्वा तवोद्गीतेनैव मा सकलसुखसम्पत्तिर्मा स्वीया शोभा वा ऊहिता याभिः वयमेवमागता अपि नागता इव याता यतो भवान्ऽच्युतेति हेतुगर्भसम्बोधनम् अच्युतोऽद्रवितचित्त एव तिष्ठति न पुनर्वस्तुतस्तथा अपि तु कितव कापट्येनैवास्मत् दुःखदानविडम्बनाद्यर्थतयाचरणशील इति सम्बोधनान्तरं कितवेति। ननु मया बाल्येन लीलयैव वेणुर्वादितो नाहं वेद्मि भवत्य आगमिष्यन्तीति। तत्राहुः। गतिविद इति नत्वया मुग्धभवेन वेणुर्वादितः किन्तु मुग्धमोहनभावेनैव अन्यथा बाल्यभावेन क्रीडायां प्रतिदिनं वंशवादनेऽपि नास्माकं तथा मोहो मोहेन धावनं वा किन्तु तद्विरहितानां स्मरस्मरणाभ्यां दहनं प्राणोद्वहनञ्च अधुना तु मोहनेनैव शृङ्गाररसोत्कलितभावेन गतिविदस्तव वादनेनैव नो गृहाद्गतिः वने गतिः पुनरीदृशी गतिः तत्र गतिविद इति नो हृदयगतिं प्रेमविरहविह्वलितदशां तथा नो गतिं स्ववेणुध्वनिमात्रेण विलम्बासहिष्णुतया लोककुलवेदमर्य्यादाबन्धूंश्च हित्वा गमिष्यन्तीति तथा स्वगतिं रमणार्थमेव वनागमनं वरदानमनुस्मृत्यावाहनं स्वहृदयङ्गतं कापट्यं रमणेऽपि वञ्चनादिकं तथा कापट्येत्वदवश्यं भाविनि भामिनीनां विवशतागतिविद एव एवेदृशमुद्गीतं तेन मोहनमागतिरिव गतिश्च ननु ममेच्छास्वभावं बहुकालपरिचिता अपि यूयं किन्तु मे वेणुशब्देनैवमागताः तत्रापि श्लेषेणोत्तरमाहुः गतिविद इति। सर्वप्रकारां तव मोहनरमणकापट्यादिगतिं स्वीयाञ्च पूर्वोदितां भूतां भाविनीं च गतिं जानन्त्योऽपि यतो मोहिता अतः स्वात्मानमवजानन्त्य एवागता इति भावः। ननु मयि कैतवानुपलम्भेऽप्युपालम्भो नोचित इत्यत आहुः। योषित इत्यादि। तवाकितवत्वे योषितः कस्त्यजेत् न को ब्रह्मापि योषित्त्यागासमर्थः पुत्रीं प्रतिधावनश्रवणात् प्रार्थयमानाप्सरस्त्यागे त्वपूज्यत्वशापावगतिश्रवणाच्च तत्रापि वने विशेषता निशि तथा स्वोद्गीतमोहिताः स्वयमागताः दक्षिण्यभावस्थिता वामा वामा को दक्षो वामेन स्वीकुर्य्यात् त्वदन्न्यः कितवोऽपि कस्त्यजेदिति त्वमेव कितवशिरोमणिरिति भावः। नच भगवत्येवं कितवोक्तिरसम्भायेति सम्भवति संभावना ब्रह्ममे कितवा इति श्रुत्यनूदितत्वात् कितवत्वादेर्ब्रह्मणि यद्वा तत्र सर्वस्वभावेन तथोक्तिसम्भवेऽप्यत्र तथोक्त्यसम्भावनायामेव योजना यदा कितव योषितोऽप्येवमहेयाः पूर्वनिरूपितदिशा सर्वमतिविलंघ्यगता इति विरज्य परिव्रजनमुक्त्वा तत्र हेतुत्वेन नित्यानित्यवस्तुविवेकमाहुः गतिविद इति। तेषां गृहबान्धवादीनां गतीः दुर्ल्लभत्वनित्यदुःखहेतुत्वनश्वरत्वादिरूपाः—

नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना। गृहापत्याप्तपशुभि का प्रीतिः साधितैश्चलैः।
यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचारामेनखैः पिनद्धम्। स्रवन्नवद्वारमगारमेतद्विण्मूत्रपूर्णमदुपैति कान्या॥

इत्यादिवाक्यैस्तव गतिञ्च निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च ह नः। आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मेत्यादि —

वाक्यैर्विदन्तीति तथा तदुक्तमपि ताभिः।

कुर्वन्तिहि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः ‘किमिति यद्वा गृहकुलश्रुतिधर्मादीनां गतिंधूमादिमार्गेण पुनरावृत्तिलक्षणां ततो विरज्य निवृत्तिपथत्वदुपासनगतिमर्चिरादिमार्गेणापुनरावृत्तिलक्षणां विन्दतीति विदः यद्यपि—

नैते सृतो पार्थ! जानन् योगी मुह्यति॥

इत्यादिना तद्गतिविदां मोहाभावोक्तिस्तथापि सातु योगिनां मायामोहनिधाभिप्राया नतु त्वद्वियोगिनीनां योषितां तवोद्गीतमोहितत्वनिषेधाभिप्राया इति गतिविदोऽपि तवोद्गीतमोहिता इति युक्तमेव यद्वा कथमेवं भवतीनां मद्गतिज्ञानं तत्राहुः तव निगमात्मकमपि यत् उत्कृष्टमुत्तरकाण्डात्मकं स्वरूपसूचकं त्वद्वशमुखगीतमित्यच्युतवंशगुरुलब्धं तेन जाता मा शाब्दी प्रमा ऊहिता तच्छब्दानुगुणत्वद्गुणप्रेमगुणगणेभ्यो विचारिता याभिस्तथाभूता वने विविक्तनिशि व्यापारादिविक्षेपशून्यावसरे “प्रविश्य रजनीं यावद्ब्रह्मध्यानं समाचारेदित्यादि श्रुतिसिद्धयोषितः स्वात्मनि जुषमाणाः कः सुखरूपोऽपि कस्त्यजेदपि तु नेति काकूक्तिः॥ १६॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

किञ्च सर्वथाऽत्याज्या अस्मान् किमर्थं त्यक्तवानसीति न विद्म इत्याशयेनाहुः। पतीति। हे अच्युत! भगवतोऽप्रच्युतस्वरूपत्वात्कदापि तेन वियोगो न भविष्यतीति विचार्य पतयः सुताः अन्वयो वंशः भ्रातरः बान्धवाः सम्बन्धिन एते सर्वथाप्यलङ्घ्यास्तानप्यतिविलङ्घ्य तवान्ति समीपे आगता यतस्त्वद्गतिविदः कर्मोपासनज्ञानफलजाताः तत्प्रदानाय साक्षात् दृष्टाः सर्वा अपि गतयो भगवत एव भवन्तीति वयं वा गतिविदः पत्यादिभजने भगवद्भजने च गतितारतम्यविद इति वा किञ्च त्वयाप्याकृष्टा

इत्याहुस्तवोद्गीतेनोच्चैर्गीतेन मोहिताः पत्यादिवैमुख्यापादकेन गीतामृतेन त्वयैव स्वस्मिन्नासक्तचित्ताः सम्पादिताः कस्त्यजेत् यस्त्वं स्वस्मिन्नासक्तचित्ताः सम्पादिताः कस्त्यजेत् यस्त्वं स्वस्मिन्नासक्ताः स्वयमाहूय फलमदत्त्वा त्यक्तवान् स भवान् क इति न विद्म इत्यर्थः। ननु स्वपत्यादिसन्निधावेवातः परङ्गन्तव्यमिति चेत्तत्राहुः। कितवानां त्वत्स्वरूपानभिज्ञत्वात्स्वपरवञ्चकानां सम्बन्धिन्यः स्त्रियः अतस्तदाभिमुख्यं कदापि मास्तु त्वदेकशरणा वयं त्वयैव रक्षणीया इति भावः। अनभिज्ञापक्षे आस्तां तत् अद्य तु अन्यदप्यनुचितं कृत्तमित्याहुः। पत्यादीनतिक्रम्य तव समीपमागताः यतस्तवोत्कृष्टेनोच्चैर्गीतेन मोहिताः यतस्तव गतिविदः अस्मन्मोहकान् गीतगतिविशेषान् जानतः उद्गीतेन मोहिता अवश्यमागमिष्यन्तीत्यस्माकं गीतविद इति वा यद्वा तव स्वभावं जानन्त्यो विदग्धा अपि वयं मोहनमन्त्रात्मकेनोद्गानेन मोहिता एवं स्वयमेवाहूता योषितो निशि अरण्ये त्वामृते कस्त्यजेत् कापि स्त्रियो न त्याज्यास्तत्रापि निर्जनवने तत्रापि निशि तत्रापि यदर्थमाहूतास्तददत्त्वैवेति तवैव शठस्यैवं विधं चेष्टितं सम्भवति नान्यस्येति कितवेति सम्बोधनाशयः। यद्वा हे कितव! एवम्बिधः कितवोऽपि कश्चिन्नास्ति सहि कैतवाल्लब्धं तु स्वीकरोति नतु तिरस्करोतीति भावः। तथा च नास्त्यस्मत्त्यागे किमपि कारणं प्रच्युति लक्षणन्तु त्वयि नास्त्येवेत्यच्युतेति सम्बोधनाशयः मानिनीपक्षे तिष्ठत्वस्मदर्थं गमनागमनविचार एतास्तु पत्यादीनतिलंघ्य तव समीपमुपागताः किमर्थंत्यक्तवानसीत्याहुः। पतीति च्युतिर्राहितं मत्वा समागतास्त्वं तु स्वयमेव पलायित इत्याश्चर्य्यमिति अच्युतेति सम्बोधनाशयः शठंप्रति शठं कुर्यादिति न्यायमजानन् तथैव कितवः सम्पन्नोऽसि सरलाः प्रति कैतवाचरणादित्याशयेनाहुः कितवेति। निवृत्तिपक्षे एव विधाधिकारिणमपेक्ष्यैव पत्यादिस्थानीया अर्थान् वादिनो वातिलङ्घ्य हे अच्युत स्वरूपावबोधकं यस्तवोद्गीतेन समन्वयात् स विजिज्ञासितव्यः सोऽन्वेष्टव्य इत्यादिरूपेण या या विवेकज्ञानाः त्वत्प्रभुत्वेनोहिताः कितवेन कैतव्येन व्याजेन योषितः स्वाभीष्टपतिपरायणाः योषित इव परब्रह्मणि तात्पर्य्येण संगता अस्मान् को वाविद्वान्निशि कर्मादिरूपेण परिणतायामविद्यायां निशि त्यजेत् क्षिपेत् ब्रह्मातिरिक्तपरतत्त्वप्रतिपादनेनान्धगर्त्तक्षयवत्पीडयन् यस्त्यजेन्न स विद्वानित्यर्थः ॥ १६ ॥

रास–रहस्यम्

र० टी०—साधनचतुष्टयसम्पन्नाधिकारिणः मुमुक्षवः, हे अच्युत! पत्याद्युपलक्षितान् सर्वान् सांसारिकविषयान् अतिविलंघ्य परित्यज्य "यदहरेव विरजेत् तदहरेव प्रव्रजेत्।" इति श्रुतिमनुसरतः, ते स्वगतादिभेदशून्यस्य तव, अन्ति प्रत्यक्त्वेन ज्ञातुमागताः, कथम्? गतिविदः गतिं आब्रह्मभुवनाल्लोकाः पुनरावर्तिनः, अनित्यं, नश्वरं, दुःखदं च तथा आत्मानं परमानन्दरूपेण वेत्तीति विद, स्तस्य तव, उद्गीतमोहिताः "ब्रह्मविदाप्नोति परम्।" "ब्रह्मविद् ब्रह्मैव भवती"ति श्रुत्या उच्चैर्घोषेण मोहिताः मुग्धतया आगताः, अतः निशि व्यापारादिविक्षेपशून्यावसरलक्षणगम्भीररात्रौ "प्रविश्य रजनीं यावत् ब्रह्मध्यानं समाचरेत्।" इति श्रुतिप्रसिद्धनिशि, योषितः स्वात्मानं जुषमानाः, त्वां विना, हे कितव! आत्मवञ्चक! कस्त्यजेत् न कोऽपीत्यर्थः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं भूता वयं हे अच्युत! अखण्डैश्वर्य्य! हे कितव! वञ्चक! मुग्धया कृतमिदं सम्बोधनम्। यद्वा "ब्रह्मदाशा ब्रह्म कितवा" इत्यादिवेदान्तैकवेद्य! सर्वात्मन्! तव गतिविदः तव पुरुषोत्तमस्य सर्वविलक्षणवेणुगीतगतिविदः, अत एवोद्गीतेन उत्तमेन वेणुगीतेन मोहिताः पतिसुतान् तत्सम्बन्धिनः भ्रातॄन् बान्धवांश्च अतिविलङ्घ्य ते तवान्ति समीपे आगताः त्वया तु त्यक्ताः एवमनन्याः योषितस्तत्रापि निशि कस्त्यजेत्त्मादागच्छेति फलितोऽर्थः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वस्थितिमिव तत्स्थितिमपि नर्ममर्मवध्वो बोधयन्ति ॥ पतीति। पतिर्भर्ता च सुताः पुत्राश्चान्वयास्तदनुबन्धिनो भ्रातरो बान्धवा इतरे चताननतिविलङ्घ्यातिक्रम्य ते त्वां प्रत्यागता हि यतोऽच्युत। गतिविद इति प्रथमा षष्ठी च। गतिविदोऽस्मद्गतिज्ञस्य तवोद्गीतेव प्रोहितगतिविदश्चागता योषितो निशि कस्त्वदन्यस्त्यजेन्न त्यजेदतः कितवेति सम्बोध्य इति भावः ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं देवत्वं भगवता संपादितं मूर्खो ब्रह्मा तादृशीनां पक्ष्मकृत् तदपेक्षया हीना आहुः। पतीति। हे अच्युत! स्वतः कामनिवृत्तभयरहिताः पतिः सुताः अन्वयो वंशः भ्रातरः बान्धवाः सबन्धिनः एते सर्वथा अविळङ्घ्याः तानप्यतिविलङ्घ्य ते अन्ति समागताः त्वं सर्वेषां गतिं जानासीति गतिवित् सर्वैर्यावती गतिः संपाद्यते तां भवानेव दास्यतीति वयं वा गतिविदः तेषां भजने भगवद्भजने च तारताम्यविदः किंच तव उद्गीतेन च मोहिताः अतो मोहयित्वा समानीय उभयभ्रंशार्थम् अरण्ये निशि योषितः कस्त्यजेत् सर्वदैव स्त्रियो न त्याज्याः सुतरामरण्ये सुतरां निशि यदर्थं वा समाहूताः तदप्यदत्त्वेत्यभिप्रायेण सम्बोधनं कितवानां वा वयं सम्बन्धिन्यः अतोऽस्माकं तेषु न प्रवेशः ॥ १६ ॥

श्रीसुबोधिनी-सारः

हे अच्युत पतिपुत्रादीनतिविलंघ्य ते तवान्ति समीपमागताः गतिविदस्तव उद्गीतेन मोहिताः हे कितव शठ निशि रात्रौ योषितः स्त्रीः कः त्यजेत् न कोपि ।। १६ ।।

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

यस्मादेवं तस्मात् हे अच्युत अखण्डानन्दस्वरूप ! वयमपि पतीन् सुतान् अन्वयान् तत्सम्बन्धिनो भ्रातॄन् बान्धवांश्चातिविलङ्घ्य अनादृत्य त्यक्त्वा तेऽन्तिकं त्वत्समीपमागताः । आगमने हेत्वन्तरमाहुः-गतिविदो गीतगतिं जानतस्तवोद्गीतेन उच्चैर्गीतेन मोहिताः कितवयोषितः पत्यादिवञ्चनेन आगता योषितो रात्रौ निशि त्वामात्मारामं विना को वाऽन्यस्त्यजेत् ? न कोऽपि इत्यर्तः ।। १६ ।।

अन्वितार्थप्रकाशिका

पतीति ।। हे अच्युत ! हे कितव ! गतिविदः गीतगतिम् अस्मदागमनं वा जानतः गतिविदो वयं वा तवोद्गीतेन उच्चैर्गीतेन मोहिताः त्वयैव गीतेन बलादाकृष्टाः वयं पतीन् सुतान् अन्वयान् तत्सम्बन्धिनो भ्रातॄन् बान्धवांश्चातिविलङ्घ्य अनादृत्य तेऽन्ति त्वत्समीपमागताः अतोऽस्मान गृहाणेति । त्वामृते को नाम जनः निशि स्वयमागता योषितस्त्यजेत् । कितवोऽपि कैतवेन लब्ध न त्यजतीति ।। १६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पतीति हे अच्युत । पत्यादीनतिविलंघ्य अतिक्रम्य ते अन्तिसमीपे आगताः । किमर्थं यतो गतिविदः अस्मदागमनं ज्ञातुः तवोद्गीतेन उद्दाममधुरवेणुगीतेन मोहिताः योषितः । अस्मान् हे कितव कठोरहृदयं त्वां विना निशि कस्त्यजेत् कठोरहृदयस्त्वमेवास्मान् त्यजेः नान्यः ।। १६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पतीति ।। तस्मात् हे अच्युत, पतिः स्वामी च सुताः पुत्राश्च अन्वयो वंशश्च भ्रातरश्च बान्धवाश्च तान्, अत्यत्यन्तं, विलङ्घ्य, गतिविदः अस्मदागमनं जानतः, गीतगतीर्वा जानतः, एव उद्गीतमोहिताः उद्गीतश्रवणेन मोहं प्राप्ताः, वय ते तव, अन्ति समीपं, आगताः । अतः हे कितव धूर्त्त, एवं स्वयमागताः योषितः, निशि रात्रिसमये, त्वां विनाऽन्य इति शेषः । कः त्यजेत् । न कोऽपीत्यर्थः ।। १६ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पतिसुतान्वयेति : १०.३१.१६.

इमे पतिसुतादयश्च्युतपदास्त्वमेवाच्युतपदोऽसि भुवि सर्वदेत्यनुविभाव्य याता वयम् ।
तदद्य कुरु रक्षणं निजपदस्य तन्नस्ततो भवेदुभयमेकतो यदि तदाशु कुर्यात् कृती ।। २४४ ।।
नाश्रावि श्वशुरानुशासनवचो नालोचि शालीनता नैवाऽलक्षि ननान्दुरस्फुटमहो नासेवि भर्तुः पदम् ।
एकं त्वत्पदपद्मसङ्गमसुखं ध्यात्वाऽऽगतानां वने कर्तुं नोचितमच्युतस्य तव नः श्रीशो भयप्रच्युतिम् ।। २४५ ।।
तीर्त्वा तूर्णमपत्रपामपि नदीं शालाद्रिमुल्लङ्घ्य चातिक्रम्यात्मगृहादटवीं सुविकटां गुर्वादितर्वाश्रिताम् ।
प्राप्ता वीतभयं पदं तव वयं श्रान्ता निशान्तावधि तत्किं पश्यसि रक्षमंक्षु सदयां संलक्ष्य दीक्षां निजाम् ।। २४६ ।।
सूर्याद्यर्चितमार्यसेवितमिदं कार्यं समर्यादमित्यायाताःप्रभुवर्य धैर्यमतुलं धृत्वा निशायामपि ।
तत्पर्याप्तमहो न कार्यमिति चेत्कार्यं किमस्मात्परं धार्यं वा स्वमतानुसार्यभिनवं चेद् ब्रूहि कुर्मस्तराम् ।। २४७ ।।
ये प्राप्ता विधितो विहाय भुवि तान् प्राप्तास्त्वदीयान्तिकं जातोऽसावविधिः परन्तु न ततो दोषोऽस्ति योषात्वतः ।
प्राप्तानां शरणं स्मरार्दितहृदां स्त्रीणां निशि त्यागतस्त्वं सुज्ञोऽप्यविधिं श्रितोऽसि भृशमित्यालोकयात्यद्भुतम् ।। २४८ ।।
आजन्मार्जितकीर्तिरत्नममलं स्याद्येन दूष्यं जनैतत्कर्माशु बुधेन हेयमिति सद्वर्त्मेदमित्यालपन् ।
ब्रह्मेन्द्राद्यमराहितस्वविमलस्तोत्रप्रशंसापहं कर्मैतत्तु कथं विशङ्कमधुना त्वं स्वीकरोषि स्वतः ।। २४९ ।।
न यावत्सान्निध्यं भजति वनिता तावदतुलं मृषा वीर्यं ब्रूते रतिमतिमतीव स्फुटयति ।
प्रपन्ने तद्योगे त्वमिव निजगुप्तौ कृतमतिस्तदग्रे कर्तव्यं किमु चतुरयाऽपि प्रमदया ।। २५० ।।
स्मृत्यालापविलोकनाभिनयसद्भावानुकूल्यादिषु स्त्रीणां कामिमनोहृतावलमिहैकं किं पुनस्तेऽखिलाः ।
तत्सर्वानुभवेऽपि यस्य हृदि नोत्कण्ठोदयस्तस्य ते वर्ण्यं श्रीश किमन्यदस्ति निगमो ब्रह्मेति वक्ति स्फुटम् ।। २५१ ।।

मन्मानसे बहु यदस्ति हि तद्भवत्यः श्रोष्यन्ति चेत् सुभगमेव विधिं वदामि ।
वामाशयं हृदि निधाय निशान्त एवं नाभाषि किं शठ वचस्यपि न प्रमा ते ॥ २५२ ॥
सदयमनुगृहाण श्रीश मा वा निशेयं कथमाप हि गमिष्यत्येव किं त्वेकमस्मिन ।
निजशरणगतानां वल्लवीनामुपेक्षा व्यरचि भगवतैवं दुर्यशो नार्जयैतत् ॥ २५३ ॥
अनाथजनपीडनं भुवि न पण्डितैः सर्वथा विधेयमवमुद्भवत्यपरिहार्यमस्माद्यतः ।
सहेतुकमिदं वचस्तव पुरस्तु दोषाकरादिमान्वयजुषो मृषा किल स वंश्यधर्मोऽस्ति यत् ॥ २५४ ॥
अग्राह्यर्चनसौख्यमब्जसदनात् सेवासुखं श्रीकराद् गोगोपालसमगमाद् भ्रमिसुखं येनेश तत्ते पदम् ।
प्रायो भात्यतिनूत्नमस्मदुदितं निन्दासुखं वाञ्छतीत्याजन्माननुभूतवस्तुनि जनेच्छा कीदृशेऽपि स्फुटा ॥ २५५ ॥
कात्यायनीव्रतविधिर्यदकारि साङ्गस्तत्स्यात् पुरोऽस्य फलमीड्यमिति त्वयोक्तम् ।
दृष्टं फलं तदिदमद्य वयं हि धन्या धन्यो भवानपि विभोऽस्ति भविष्यवेत्ता ॥ २५६ ॥
यद्व्यासैरित्यभाषि त्वमसि सुगतिवित्तत्र वेणोर्निजस्याऽस्माकं वाऽद्यद्वये सा वत निजविहिता ज्ञायते चेन्न चित्रम् ।
बुद्धिश्चित्तं च यस्यामनवगतपदे दीव्यतस्तां गतिं चेदस्माकं वेत्सि तन्नः कथय निरुपमां त्वद्धियं वर्णयामः ॥ २५७ ॥
जाग्रच्छक्तिभिरुत्कटश्रुतिगतैः स्वोद्गीतमन्त्रैरलं संमोह्यालयतो निजान्निशि वनं दुर्गाह्यमानीय नः ।
यत्त्यागोऽथ च मन्त्रसंवरणमप्येतत्त्वयाऽकार्यहो तत्का विप्रतिपत्तिरस्ति भवतः सच्छद्मतानिर्णये ॥ २५८ ॥
चेतोवृत्तिजुषः स्त्रियो भुवि न चेत् स्युर्यस्य तेनाऽनिशं शिक्ष्याः स्वेप्सितवर्त्मना नहि मनाक् त्याज्याः प्रभो कर्हिचित् ।
शिक्षायां क्रमतो भजन्ति सुपथं त्यागे तु पूर्वस्थितिं तस्माच्छिक्षय सत्पथानुसरणे न त्यागमेवं कुरु ॥ २५९ ॥
यत्सम्प्रत्युपपादितं पतिसुताद्याः सन्ति तस्माद् गलत्तारुण्याः खलु यूयमत्र भवतीसङ्गे न किं स्यात्सुखम् ।
मैवं कल्पय चिन्तयास्मदुदितं दृष्टाखिलार्थोऽज्ञवद्धित्वा तत्पुरुषं निजात्मनिहितं मा द्वन्द्वबुद्धिर्भव ॥ २६० ॥
विरहवितरणेन भीतिदायी भवसि परन्तु वयं न वै विभीमः । असकृदभिहिता पुरैव शुष्कदरकरता बहुधा विलोकिता च ॥ २६१ ॥
इमाः स्त्रियः किं मम कुर्युरन्तरित्यश्रद्धया भो कुरु नावहेलनम् । पश्य त्वमस्मत्कुलमुख्यया कृतः कथं भुवीत्यच्युतमाययैकया ॥२६२॥
तापो वियोगजनितोऽलमलम्भि विप्रैर्न स्त्रीभिरेवमकथि व्रजगोपबालैः ।
सोऽस्मासु सम्प्रति कथं बत दीयते ते विप्रा वयं मखजुषो नहि किन्तु योषाः ॥ २६३ ॥
नागस्ते यत्पुरैवोक्तं मम यूयमसुप्रियाः । प्राणप्रिया इति वयं मुधा गर्वेण वञ्चिताः ॥ २६४ ॥
नैतत्पूर्वमश्रृण्म वीरचरितं क्वापीदृशं वञ्चनाचारं येन मृदुक्तिभाविकधियो योषा वयं वञ्चिताः ।
अग्रे चेदपि निग्रहस्तव मतः कार्यो न चानुग्रहस्तर्ह्यास्तां भुवने भवाम ननु ते दृष्टान्तभूताः कृतौ ॥ २६५ ॥
वक्रं ते हृदयं सदैव कठिनं युष्माकमेवेति यो वादोऽवर्तत चावयोरलमसौ जातोऽद्य तन्निर्णयः ।
याचामः सरलान्तरा वयममूस्तत्कर्कशोन्मर्दने श्रीवत्सं भवता तु भूषणपदे वक्रं सदा धार्यते ॥ २६६ ॥
यथाऽस्माभिर्हृत्स्थं निजकठिनभावं स्तनमिषाद् बहिर्निःसार्येदं व्यरचि नवनीतादपि मृदु ।
मिषाच्छ्रीवत्सस्य व्यरचि सरलं हृत्कुटिलतां बहिः कृत्वा तद्वद्यदि तदधुना किं त्यजसि नः ॥ २६७ ॥
क्रूरेभ्य एकलघुरप्यनिशं रिपुभ्यः स्वैणीगणं जगति रक्षति कृष्णसारः ।
त्वं तादृशोऽपि च महान् हरिणीक्षणानां त्राणं विहाय विपिने भ्रमसीति चित्रम् ॥ २६८ ॥

कृष्णप्रिया

अब तामस तामस अन्यपूर्वा व्रजनारियाँ व्रजराज को कहती है कि—हे अच्युत ! अधिक क्या कहा जाय, पति, पुत्र वंश, भाई, बन्धु आदि सर्व कुटुम्बीजन का त्याग एवं उनकी आज्ञा का उल्लङ्घन कर आपके श्रीचरणों की सेवा में उपस्थित हुए हैं । आप सर्वज्ञ है अन्तर्यामी है हमारे मन की गति को सर्वथा जानते हैं । आपके हृदयङ्गन वेणुगान का श्रवणकर आपके चरणों में आसक्त बन चुके हैं । हे कलाकुशळ ? वचन चतुर ? रात्री के भयभीत काल में हमारा त्याग आपके लिए उचित न माना जाय अतः आप दर्शन दें ॥ १६ ॥

रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरः श्रियो वीक्ष्य [1]धाम ते मुहुरतिस्पृहा[2] मुह्यते मनः ॥ १७ ॥

---

१. वीर–वीर. विज. ; धाम वीक्ष्य ते–इति क्वस्यचित् । २. स्पृहं–प्रा. पा. ।

कर्दमक्षमा

अन्वयः—हृच्छयोदयम्, रहसि, संविदम्, प्रहसिताननम्, प्रेमवीक्षणम्, श्रियः धाम ते बृहत् उरः, वीक्ष्य, अतिस्पृहं नः, मनः, मुह्यति ॥ १७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतस्त्वया त्यक्तानामस्माकं प्राक्तनत्वद्दर्शननिदानस्य हृद्रोगस्य त्वत्संगत्यैव चिकित्सां कुर्वित्याशयेनाहुर्द्वयेन। रहसीति। श्रियो धाम ते बृहद्विशालमुरश्च वीक्ष्यातिस्पृहा भवति तथा च मुहुर्मुहुर्मनो मुह्यति ॥ १७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतो रात्रौ भीरुत्यागोऽनुचितोऽतो हेतोः। प्राक्तनं यत्त्वद्दर्शनं तदेव निदानमादिकारणं यस्य तस्य। हृद्रोगः कामव्यथा तस्य। चिकित्साम् अपाकरणम्। अतिस्पृहा अत्यभिलाषः। तया अतिस्पृहया। मुह्यति वैवश्यमेतीत्यर्थः॥ किं कर्तव्यं तव मोहनपञ्चकं कामशरपञ्चकमिवास्मन्नेत्ररन्ध्रेषु प्रविश्य हृदयं ज्वलयतीत्याहुः–रहसि संविदं रतिप्रार्थनव्यंजकसंभाषणं प्रथमम्, हृच्छयोदयमस्मदवलोकनहेतुकं कन्दर्पभावोदयं द्वितीयम्, प्रकृष्टं हसितं यत्र तथाभूतमाननं तृतीयम्, प्रेमयुक्तमीक्षणं चतुर्थम्, श्रियो धाम शोभास्पदं बृहद्विस्तीर्णमुत्तुंगमुरो वक्षः पंचम वीक्ष्य पुनःपुनर्विशेषतो दृष्ट्वा अतिस्पृहणमतिस्पृहा, भावक्तिवन्तः। स्पृहितया मनो मुह्यते मुह्यति। औत्कण्ठ्यज्वालया मूर्च्छतीत्यर्थः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ते तव हृदयस्य कास्य उदयं वीक्ष्य कीदृशं रहसि सम्वित् यत्र तम्। अलुक्समासः। तथा प्रकृष्टं हसितं यस्मिन्नानने तदाननं यत्र बृहदिति गाढालिङ्गनेच्छाकारकः सौन्दर्यविशेष उक्तः। श्रियः सर्वसम्पन्निधेः स्वाभाविकपीतरेखारूपाया धामेति च वीक्ष्यास्माकमतिस्पृहेत्यस्मच्छब्दवाच्यकर्तृकवीक्षणस्पृहायाः क्रियाया वीक्षणस्य पूर्वकालत्वात् क्त्वा प्रत्ययः। स्वातन्त्र्यविवक्षया स्पृहाया एव वीक्षणकर्तृत्वोपचारः।अत्रोद्भवतीति शेषः। अतिस्पृहया मनो मुह्यतीत्यर्थः। अतिस्पृहमिति चित्सुखः। अतिस्पृहा च तत्तदनुभवाय तत्सङ्गममात्राय वा। तथा च मनो मुह्यतीति स्पृहायाः परमौत्कण्ठ्यं द्योत्यते। यद्वा। वीक्ष्येति पूर्ववृत्तमिदं तथा तथैव भवत् अधुना तत्तदतिशयेन मरणमेवासन्नमिति भावः। एवं स्पृहाया दुर्निवारत्वादप्रतिकार्यत्वम्। तेन निजपरमदैन्यञ्च सूचितम् ॥ १७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतो निजकृतज्ञत्वापेक्षया दर्शनेक्षणमपि न विलम्बस्वेत्याशयेन पूर्वतो विशेषमाहुः–रहसीति। पूर्वं सम्विद इत्युक्तम, अत्र च सम्विदमिति एकामपि सम्विदम्, किमुत बह्वीरित्यर्थः। एवं पूर्वोक्तविशेषोऽत्रोह्यः हृच्छयस्य हृदि सुप्तवन्निश्चेष्टतया लीनस्यापि कामस्योदयः प्राकट्यं यस्मात् तत्, इदं प्रहसितादीनां सर्वेषामपि विशेषणं ज्ञयम् यद्वा, तव हृच्छयोदयं कामविकारं भावविशेषविलसितस्मितगण्डाधरविस्फूर्त्यादिलक्षणं प्रकृष्टं हसितं यस्मिन्नानेन तत्, प्रकृष्टहासयुक्तमाननमिति वा, प्रेम्णा वीक्षणं पूर्ववत् पदद्वयं वा, बृहदिति गाढालिङ्गनाभिप्रायेण परमसौन्दर्य्यमुक्तम्। श्रियो धामेति अतिस्पृहायां हेतुविशेषः, सापत्न्यात् शोभाविशेषाच्च, वीक्ष्य आलोच्य चिन्तयित्वेत्यर्थः। स्थितानामित्यध्याहार्य्यम्, किंवा भिन्नकर्तृकत्वे क्त्वाप्रत्यय आर्षः। अतएवातिस्पृहमिति चित्सुखः, अतिस्पृहा च तत्तदनुभवे त्वत्संगममात्रे वा; तया च मनो मुह्यतीति स्पृहायाः परमौत्कट्यं द्योत्यते, किंवा पूर्ववन्निजधैर्य्यहानिरेवोक्ता; यद्वा, रहसि सम्विदं प्रति यत् प्रहसिताननादिक हृच्छयोदयादिकं वा, एवं सति दृष्ट्वेत्येवार्थः। ततश्च पूर्वं दृष्टानां तेषामधुना स्मरणादतिस्पृहादिकमिति पूर्ववज्ज्ञेयम्, यद्वा, पूर्वमपि तथा तथैव भवेत्, अधुना तु तत्तदतिमरणमेवासन्नमिति भावः। अन्यत्तैर्व्याख्यातम्; यद्वा, श्रियो धामापीति सापत्न्याक्रान्तत्वेन दोषः। किंवा परम-दुर्लभत्वेनात्मनस्तदयोग्यत्वं दैन्येन सूचितम्; यद्वा, ते श्रियो विविधाः शोभारूपवेशलीलादिविषयकाः, इत्यनुक्तमप्यन्यत् सौन्दर्य्यादिकं संगृहीतम्, धाम च लतागृहादि, न केवलमतिस्पृहा मनश्च मुह्यते, परममोहनात्तत्तन्माधुर्य्यात्, अनेन मनसो दुर्निवारत्वादप्रतिकार्य्यत्वम्, तेन निजपरमदैन्यञ्च सूचितम्। अन्यत् समानम्। अथवा ननु कृतज्ञोऽस्मि, कथमेवमत्यन्तार्त्ता भवथेति चेत्त्वयैव बहुधा मोहितत्वादित्यार्त्तत्वे त्वदेककारणत्वेन पूर्ववत् सम्विदादीनां परममोहनत्वमेव परमार्त्त्या विशिष्याहुः—रहसीति। 'ते' इत्यस्य पूर्वतः परतश्चान्वयः। ते सम्विदादिक प्रहसिताननादिकं वा वीक्ष्य तेऽपि अतिस्पृह। तेऽपि मन इत्यादर्शादौ निरीक्षणादिना भावविशेषोदयादिति तेषां परममोहनत्वमुक्तम्, अतोऽस्माकमतिस्पृहा मनोमोहश्च युक्त एवेति, अतो यावदन्त्यदशा न भवेत्तावदेव सन्दर्शनं देहि। तत एव कृतज्ञत्वं सिध्येदिति भावः ॥ १७ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

हृच्छयोदयं कामजनकम् ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अतस्त्वया त्यक्तानामस्माकं प्राक्तनत्वद्दर्शननिदानहृद्रोगस्य त्वत्सङ्गत्यैव चिकित्सां कुर्वित्याहुः द्वयेन । तव रहसि संविदं साङ्केत्यं कर्म हृच्छयोदयं कामजनकं प्रेम्णा वीक्षणं च प्रहसितमाननं च श्रियो लक्ष्म्याः स्थानभूतं बृहद्विशालमुरो वक्षश्च वीक्ष्यास्माकमतीव स्पृहा भवति तया च मुहुर्मनः मुह्यते मोहं प्राप्नोति ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किं बहुनोक्तेनास्मरवस्थेयं हीति विज्ञापयन्ति । रहसीति । हृच्छयस्योदयो यस्मात्तत्तथा वीक्ष्य विरूप्य अतिस्पृहा अतिशयितस्पृहया मुह्यते विभक्तिव्यत्ययश्छान्दसः बृहति दधातीति बृहत् श्रियः निवासस्थानमितिशेषः । यद्वा बृहदुरः श्रिय इत्येकं पदं बहुवचनं द्रष्टॄणामनुक्षणं कान्तिविशेषबाहुल्यद्योतकम् ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ कुमारिका ऊचुः-रहसीत्यादि । रहसि निर्जने या संवित् संवेदनम् । (भा० १०।२२।२७) "मयेमा रंस्यथ क्षपाः" इति यदादिष्टं तद्वीक्ष्य ज्ञात्वा प्रेमवीक्षणञ्च वीक्ष्य दृष्ट्वा बृहदुरश्च वीक्ष्य मुहुर्वारं वारमतिस्पृहा जातेत्यर्थः । अतो मनश्च मुह्यति, तत् कथमेवं करोषीति भावः । प्रेमवीक्षणं कीदृशम् हृच्छयस्य मनोरथस्योदयो यस्मात् । प्रहसितं प्रहास एवाननं प्रीणनं यस्य, अथवा प्रहसिताननं वीक्ष्य । कीदृशम् ? प्रेमवीक्षणं यस्य; बृहदुरः किम्भूतम् ? श्रियो धाम ॥ १७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अतस्त्वदालोकेऽपि स्पृहाभाजां दुःखमेव फलमित्याहुः—रहसीत्यादि । ते तव धाम वीक्ष्य मुहुरतिस्पृहा जनेन अमनः मनः शून्यं यथा स्यात्तथा मुह्यते, अतिस्पृह्यतीति अतिस्पृट् तेन तथा; तव कीदृश्ये ? बृहदुरःश्रियः, तत्रापि रहसि वीक्ष्येत्यर्थः। बृहदुरो वीक्ष्येति वा, कीदृशम् श्रियो धाम, उभयमेव कीदृशम् ? संविदं सम्यक् विशिष्टा दा शुद्धिर्यस्य, 'दैप् शोधने'इति क्विपि सिद्धम् ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किं कर्त्तव्यं तव मोहनपञ्चकं कामशरपञ्चकमिवास्मन्नेत्ररन्ध्रेषु प्रविश्य हृदयं ज्वलयतीत्याहुः । रहसि सम्विदं रतिप्रार्थनव्यञ्जकसम्भाषणं प्रथमम् । हृच्छयोदयम् अस्मदवलोकनहेतुकं कन्दर्पभावोदयं द्वितीयम् । प्रकृष्ट हसितं यत्र तथाभूतमाननं तृतीयम् । प्रेमयुक्तमीक्षणञ्च चतुर्थम् । श्रियो धाम शोभास्पदं बृहद्विस्तीर्णमुत्तुङ्गमुरो वक्षः पञ्चमम् । वीक्ष्य मुहुः पुनः पुनर्विशेषतो दृष्ट्वा अतिस्पृहणम् अतिस्पृहा । भावकिवन्तः । स्पृहितया मनो मुह्यते । उत्कण्ठाज्वालया मूर्च्छतीत्यर्तः ॥ १७ ॥

श्रीरसिकाह्लादिनी-टीका

पुनरपि विरहव्यथिताः स्ववैचित्यमभिव्यञ्जयन्त्य आहुः । रहसीति-रहसि एकान्ते सम्विदं सुरतगोष्ठ्यां, प्रहसिताननं प्रकृष्टं हसितं यस्मिन् एतादृशमाननं प्रेम्णा वीक्षणं हृच्छयोदयमिति । प्रेमाणां विशेषणं हृच्छयस्य हृदि लीनस्यैव कामस्योदय उद्बोधो यस्मात् , यद्वा प्रेम वीक्षणं कीदृशं प्रहसितं हास्ययुक्तमाननं यस्मिन् , यद्वा प्रहसिताननमिति विशेष्यं प्रेमवीक्षणमिति विशेषणं, ते बृहत् अस्मत् कुचविलुण्ठन् प्राङ्गणभूतं श्रियो धाम ते उरो वक्षस्थलं वीक्ष्य मुहुर्वारम्वारं अतिस्पृहा। इदानीं स्मर्यमाणानि एतानि अनवरतं तप्नोदनफलां अतिस्पृहां मृत्यौत्कण्ठ्यं जनयन्तीतिभावः । तेन च मनो मुह्यते धैर्यच्युतिर्भवतीत्यर्थः। यद्वा रहसि सम्विदं प्रति ते प्रहसिताननं प्रेम-वीक्षणमित्याहुः । आननस्य विशेषणं श्रियो धाम बृहत् सम्भोगार्हं उरो वीक्ष्य चिन्तयित्वा अधुनातिस्पृहा भवति पुनरपि तथैव भवत्विति । तया च मनो मुह्यते धैर्यं त्यजतीत्यर्थः । यद्वा प्रहसिताननं वीक्ष्य आदर्श प्रतिबिंवितं दृष्ट्वा ते अतिस्पृहा पुनः पुनः दर्शनोत्कण्ठ्यं भवति । तेन च मनो मुह्यते विस्मितं भवति । अहमेतादृक् सौन्दर्यवान् स्मेति तात्पर्यम् । वक्षति च "विस्मापनं स्वस्य च सोभगर्द्धः परं पदं भूषणभूषणाङ्गमिति" । अतो मादृशीनां अतिस्पृहा मनो मोयोरनौचिती—परिहारः सूचितः अतो मादृशीनां मुहुर्मूर्च्छोदयात् जीवितमरणान्तरालवति प्राणावस्थानधिगतिः ॥ १७॥

विशुद्धरसदीपिका

अथ किञ्चिदवधाय पुनरपि दुर्गाव्रतपरा ऊचुः । रहसीति द्वाभ्याम् । ते तव रहसि संविदं रहसि निर्जने कालिन्दीतीरे "यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपा" इत्यादिका प्रतिज्ञा संवित् यत्र तद् अलुक्समासः । बृहदुरो वीक्ष्य तत एवाशाबन्धेन हृच्छयस्य कामस्य उदयो यत्र तत् तथा प्रकृष्टं हसितं भावविशेषगमकं स्मितं यस्मिंस्तदाननं यत्र तथा प्रेम्णा वीक्षणं यत्र तत्रापि श्रियोऽस्मत्सजातीयायाः पीतरेखारूपाया धाम मुहुरित्यभ्यासेन परमासक्तिः सूचिता अतिस्पृहेति सम्पदादित्वाद्भावे क्विप् अतिस्पृहया मनो मुह्यतीत्यर्थः । एवं स्पृहाया दुर्निवारत्वादप्रतिकार्य्यत्वं तेन निजानां परमदैन्यं सूचितं सम्बोधधनानुक्तया पतिभाव एव दृढीकृत इति ज्ञेयम् ॥ १७ ॥

श्रीरामनारायणकृता भावभावविभाविका

ननु यथान्यत्र सर्वत्र दोषदृष्ट्यातत्त्यागेनागमनं तथा मय्यपि कैतवाच्युतत्वादिदोषदृष्ट्या विरज्य विश्रम्यतामित्याशङ्क्यास्माभि रतिविरहदुःखेत तप्ताभिस्त्वद्विरहदुःखगतं दोषं मनोवैक्लव्येन त्वय्यारोप्य क्वचित्तथोक्तावपि नत्वयि निर्दोषपूर्णगुणविग्रहे दोषगन्धे नचानुरागिणीनां नो गुणे दोषारोषो गुणानां चानन्त्येन तद्दर्शिनी न ततो विच्छेदावकाश इति तव गुणदृष्ट्यैव त्वयि नो मनो मुह्यतीत्याहुः। रहसि संविदमिति। तव रहसि संविदं रहसि विजने कालिन्दीवनतटकुञ्जादिषु यत्सम्विदं सम्यग्वेदनं मनोऽनुरागोत्साहादिभावानां यस्मात्तदवञ्चनवचनरचनं वीक्ष्य विशेषेण तात्पर्य्यागतिपर्य्यन्तं ज्ञात्वा नो मनोऽतिस्पृहं सत्त्वयि मुह्यति स्नेहवैक्लव्येन मुग्धतामेति। यद्वाऽत्युत्कण्ठामुद्भावयति यद्वाऽधुना वियोगदशायान्तु तदलाभेन मूर्छा मरणसंनिधानरूपामेति मुहुरतिस्पृहेति पाठेतु तद्वीक्ष्यवर्त्तमानानां नस्त्वद्विषयिण्यतिनिष्ठितस्पृहाभिलाषा जायते। ततश्च मनो मुह्यतीत्यादिपूर्ववत्। यद्वा स्पृहेत्यत्र सम्पदादित्वाद्भावे क्विप् ततश्च तृतीया तद्वीक्ष्य जातया स्पृहाभिलाषया मनो मुह्यति यद्वा रहसि त्वद्धृदये गोपिताऽपि यास्मद्विषया संवित्समीचीनं ज्ञानं ताम्वीक्ष्य विविधप्रकारेण हृद्भावपिशुनैर्विभावैरीदृय बुद्ध्वा शेषं पूर्ववत् तत्किंभूतं हृच्छयोदयं हृच्छयस्य कामस्योदय उत्पत्तिर्यस्मात्। यद्वा त्वद्विषयो हृच्छयः कामो नित्यमस्मद्धृदि शेते एव नतु तेनैवोत्पद्यते किन्तु हृच्छयस्यैवोदयो वृद्धिर्यस्मात् एवं हृच्छयोदयस्य प्रहसिताननमित्यादि सर्वविशेषणत्वम्। यद्वा त्वन्मनसि तत्तद्भावैर्मुखे च हृच्छयस्योदयं जन्म वीक्ष्य परीक्ष्य प्रथमतो बालाभावदशायामपि नो मनसि त्वत्स्पृहा तया मनोमोहश्च तर्हि किमु वाच्यं तव हृच्छयोदयदर्शने यद्वा नः कामवीरत्वात्त्वयि तद्विजयाकाङ्क्षिण्यपि हृच्छयोदयं कामोत्कर्षं दृष्ट्वा ततोऽप्यधिकं तदुदयस्पृहा भवति तथा च मनो मुह्यति तदेतत्सर्वथा तद्विजयिनि त्वयि तदुदयस्पृहणं मनोमोहमात्रमेव। यद्वा तव हृच्छयाय कामरणाय य उदय उद्यम आरम्भो वा तं तत्तद्भावैर्वीक्ष्येत्यादि पूर्ववत् यद्वा अन्तर्द्धानात्पूर्वरतिविहारेऽनुभूतत्वात्तवरतिरणेऽपि मुहुः हृच्छयोदयं कामोद्धर्षचेष्टाविशेषं वीक्ष्य विशेषेण स्मृत्वा पुनस्तत्स्पृहा मनोमोहश्च भवति। यद्वा कातरः सद्भीत्या मापलायस्व कामवीराणामपि नो हृच्छयरणे ततस्तवैवोदयः उत्कर्षो भाति तं वीक्ष्य तत्स्पृहादि जायते तथा ते प्रहसिताननं वीक्ष्य नो मनस्यति स्पृहा जायते मनश्च मुह्यति मोहितं भवति विरहे तु तत्स्मृत्वातिस्पृहा मनसो मूर्च्छा च भवति तत्र प्रहसिताननमित्यत्र प्रकृष्टं मृदुसितसितादिमध्वाह्लाद्यमृतमयं सितं यस्मिंस्तादृगाननं मुखं विकसितकञ्जप्रसूनप्रभसुधाकरप्रायं वीक्ष्य यद्वा प्रहसितानि स्वन्यूनतयाक्षिप्तानि सर्वाण्यप्याननानि येन तदेवाननं वीक्ष्य यद्वा तादृक् प्रकृष्टहासितेन आ ईषदपि नकारो याञ्चानङ्गीकारो न यस्मिन् यद्वा प्रहसितेन न आननानां न्यूनताद्योतनेन आ समन्तात् ननेति याञ्चास्वीकार एव यस्मिंस्तद्वीक्ष्य तथापि किम्भूतं तत् प्रेमवीक्षणं प्रेम्णा उत्कलितानुरागेणान्वितं वीक्षणं यस्मिंस्तत् यद्वा प्रेम्णा विविधं नानाभावकटाक्षान्वितमीक्षणं यस्मिन् यद्वा प्रेमविशिष्टे ईक्षणे नयने यस्मिन् यद्वा प्रेम्णैव वीक्षणं दर्शनं विशेषेणेक्षणं परीक्षणं वा यस्मिन् यद्वा प्रेम्णैव वीक्षणं दर्शनं यस्य प्रेमशून्यानां तद्दर्शनासम्भवात् यद्वा प्रेम्णैव विशेषेणेक्षणं किं स्वरूपमेतत् कीदृग्विचित्रचिदानन्दात्मकगुणवद्वायमिति ज्ञानं यस्य यद्वा प्रेमोदय एव वीक्षणे दर्शने विशेषतो गुणज्ञाने वा यस्य न कदापि निर्वेदसम्भावनं यद्वा मुखविशेषणाभावेऽपि तव प्रेमवीक्षणं प्रेमपूर्वकं वीक्षणं विविधमीक्षणञ्च वीक्ष्येत्यादि पूर्ववत् यद्वा तव प्रेम च वीक्षणं विविधमीक्षणञ्च शेषं पूर्ववत् हे बृहत् ब्रह्मन् सर्वगुणैर्वाबृहत् श्रेष्ठ! तव उरो वीक्ष्य दृष्ट्वा विशेषेण वा गुणैर्गाढालिङ्गनसुखदानादिभिर्यथावत् परीक्ष्यादर्शने तु विशेषेण तत्परतया संचिन्त्य वा शेषं समानं बृहदिति उरोविशेषणं वा तथा च स्वभावतत एवोच्चतया तच्छोभोक्तिः उदारतया सुखदानेन वा बृहत्त्वम् अस्मदालिङ्गनोत्साहेन विशेषत उच्चतया वा बृहत् धर्मरूपतया वा बृहत् किंम्भूतं तत् श्रियो धामेति शोभाया धाम निवासास्पदं श्रियः सर्वशृङ्गारैश्वर्य्यसम्पदाद्यधिष्ठातृदेवताया वा धाम गृहं सर्वत्र चला अपि सा यत्रैव सर्वमपहाय नियतं वसति तद्वक्ष इत्यादि पूर्ववत् यद्वा श्रियः सम्बन्धि तव उरो वीक्ष्य यद्वा श्रियोऽपि बृहद्बहुमान्यं तदभिलषणीयमुरः वीक्ष्येति पृथगन्वयेन तव धाम तनुकान्तितेजो वा वीक्ष्य तव धाम मुख्यं नित्यविहारास्पदं श्रीमद्वृन्दावनम् एतत्पुलिनं च वीक्ष्येत्यादि पूर्ववत् तथा च सर्वेषां पृथक् पृथक् स्पृहामोहयोर्जनकत्वात्तद्वीक्षणेन तदुदयान्मुहुरित्युक्तं यद्वा त्वामेव वीक्ष्य विशेषेण निविष्टमनस्त्वेन विविधच्छविविशिष्ट वा ईक्ष्य रहसि विजने दृष्ट्वा रहसि त्वदेकपरतयान्यभानशून्ये हृदि अधुया स्मृत्वा वा वर्तमानानां नो ते त्वद्विषया मुहुरतिस्पृहाः भवन्ति ताभिश्च मनो मुह्यति मनोमोहः सर्वविस्मृत्या तत्रैव मुग्धत्वं वियोगे मूर्च्छा वा भवति कीदृशं त्वां संविदं समीचीनं विदिति वेदनं ज्ञानं स्वीयानां स्वस्मिन् भावप्रदं तद्भावफलदानाय सानुग्रहं नानारसभावविवाभादियुतस्य रहसि तासां हृदि स्वभावे संवित् यथावदपरोक्षं ज्ञानं वा यस्य यद्वा रहसि विजने मनस्यन्तर्भावावेदनं यस्मात्तादृक् सविनयवचनं यस्य पुनः कीदृशं त्वां हृच्छयोदयं हृच्छयस्य कामस्योदयो यस्मिन् किशोरवयसं हृच्छयस्यास्मद्धृत्सु उदयो जन्म यतः यद्दर्शनाद्विश्वोद्धारहारविहाराय यत्प्रेरणाद्वास्मन्मनसि मनोजजन्मान्यत्र कामाभावादिति भावः। यद्वा स्वदर्शनजनितस्य नो हृच्छयस्य वंशध्वनिनादौ समागमे पुनः सापाङ्ग दृष्टिस्थूणनिखननवत्तत्स्थिरत्वापादकवचनैः पुनः पुलिनविहारादौ वाभिवृद्धिर्यस्मात् यद्वा हृच्छये रतिरणे उदयः समुद्यमस्तत्समये उदयस्तदुद्भावकविविधानिर्वचनीयचेष्टासमुदायो वा यस्य यद्वा स्वाङ्गशोभायां हृच्छयादपि उदय उत्कर्षो यद्वा सद्भिर्हेयस्यापि हृच्छयस्य सतां गेयत्वध्येय-

त्वाद्यापादक उदयो यस्मात् पुनः कीदृशं त्वां प्रहसिताननं प्रकृष्टेन हसितेनापि हृच्छयस्य युक्तमाननं यस्य प्रहसितानि सर्वेषां कामदेवादानामस्मदादीनां चाननानि येनेत्यादि प्रहसितेनैव वाचा स्वीकारास्वीकारौ च मुखविशेषणतयोक्तौ भगवद्विशेषणतया योज्यौ पुनः कीदृशं प्रेमवीक्षणं प्रेमान्वितं विविधभावभावितमीक्षणं दृष्टिः ईक्षणे लोचने वा तादृशे यस्य यद्वा प्रेम्णैव वीक्षणं यस्य प्रेमैव वीक्षणे यस्येत्यादि पूर्वं मुखविशेषणतया व्याख्यातं भगवद्विशेतणतया योज्यं पुनः किं भूतं त्वां वृहद्धर्म एव उरो यस्य यद्वा बृहदुदारं सुखदं स्वभावात् एवोष्ममालिङ्गनोत्साहेनैवोष्मं वा उरो यस्य पुनः कीदृशं त्वां श्रियो धाम लक्ष्म्यास्पदम् यद्वा चतुर्वर्गप्रेमनिधिं त्वां वीक्ष्य मुहुरतिस्पृहा मनो मुह्यति तदेकपरं भवति। तत्र रहसि संविदमिति सम्यग्वेदनं स्वरूपसाक्षात्कारो यस्मादिति मोक्षप्रदत्वं हृच्छयोदयमिति कामसुखप्रदत्वं हृच्छयोदयमिति कामसुखप्रदत्वं बृहद्धर्म एवोरो यस्येति धर्मनिधित्वं श्रियो धामेत्वर्थनिधित्वं प्रेमवीक्षणमित्यनेन प्रेमनिधित्वं वीक्षणेनैव प्रेमजनकत्वे वीक्षणस्य प्रेमान्वितत्वे हेतुः प्रहसिताननमिति ॥ १७ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु किमर्थं परमेश्वरबुद्धिमाच्छाद्य रमणबुद्धिं कृतवत्यो ययेदानीं दुःखसागरे निमग्ना अतस्त्यज्यतां सा बुद्धिरित्याशङ्क्य तव स्वपरूमेव तादृशबुद्धिमुत्पादितवत् सा चेदानीमस्माभिर्निवर्तयितुमशक्येत्याशयेनाहुः। रहसि सम्विदः सङ्केता यस्मात् अलुगार्षः हृच्छयस्य कामस्योदयो येन प्रहसितमाननं यस्य प्रेमपूर्वकं, वीक्षणं यस्य तथाभूतत्वाच्छ्रियः स्थानं तव बृहद्वक्षःस्थलञ्च पुनःपुनर्वीक्ष्य स्थितानामस्माकम् अतिस्पृहा जाता तयाचास्मन्मनस्त्वत्प्राप्त्यभावान्मुह्यते पुनःपुनर्वा मूर्च्छां प्राप्नोतीत्यर्थः। यद्वा भावक्विवन्तः स्पृहा तथाचास्मन्मनो वीक्ष्य तया मुह्यतीत्यर्थः। अतिस्पृहमिति क्वचित्पाठः। यद्वाः स्पृहोत्पत्तौ कारणत्रयं रहसि सम्विद्रूपमेकं कामोदयकरं प्रेमपूर्वकं वीक्षणविशिष्टं प्रहसिताननमिति द्वितीयं श्रियो धाम विशालमुरश्च तृतीयं तथाच त्वदीयं मोहिनीविग्रहमालोक्य दग्धकामो महारुद्रोऽपि यत्र मोहितस्तत्र ततः कोटिगुणितसौन्दर्य्यादिविशिष्टे त्वयि सति वराकीणामस्माकं व्यामोहे किञ्चित्रमिति भावः। अनभिज्ञापक्षे त्वद्दर्शनजन्यत्वदङ्गसङ्गस्पृहा त्वद्वियुक्तानामस्माकं रोगरूपा सम्पन्नातःस्वाङ्गसङ्गेन तच्चिकित्सा त्वयावश्यं विधेयेत्याहुर्द्वाभ्यां पूर्वमस्माकं कामो न स्थितः तव प्रहसितयुक्तस्य मुखस्य दर्शनेनोदयं प्राप्तः प्रेमपूर्वकवीक्षणेन स्थिरताङ्गतः ततो रहसि सम्विदः सम्भोगचातुर्य्यसूचनेनातिसौन्दर्य्यावीशिष्टस्य विशालस्योरसो दर्शनाज्जातेन स्वयोग्यताज्ञानेन चोत्कटोत्कण्ठातच्छान्तिस्पृहोत्पन्ना तद्विषयालाभात्तद्युक्तं मनः केवलं मुहुर्मुहुर्मुह्यते मृत्युरपि नायात्यत उभयत्र भ्रष्टानां जीवन्मरणाभ्यां रहितानामस्माकं धिग्जीवनमित्यर्थः। मानिनीपक्षे यद्यपि भवान् सम्प्रतिपरोक्षस्तिष्ठति तथापि त्वदीयमनसोऽवस्थां वयं सम्यगवगच्छाम इत्याशयेनाहुः। अस्मत्कृतं स्वत्तोषार्थं सङ्केतं तथा कामोदयहेतुभूतं प्रेमवीक्षणं प्रहसितयुक्तयमस्मदीयं मुखं श्रियःस्थानमुरःस्थलं च वीक्ष्य तत्प्राप्तिस्पृहया तव मनो मुह्यति तथाप्यस्मद्दुःखार्थं तादृशं दुःखमपि सहसे न त्वागच्छस्यतः किं वक्तव्यमाश्चर्य्यं तव हठस्य माहात्म्यमिति भावः। निवृत्तिपक्षे यद्यप्येवं तथापि कामिनोऽस्मदभिप्रायं नाशयन्तीत्याहुः। प्रमदाकृता रहसि सम्विदं तथा तदीयं यथोक्तमाननयथोक्तमुरश्च वीक्ष्य कामरूपेण स्थितस्य तव जातया स्पृहयास्माकं मनो मुह्यते तात्पर्य्यव्यत्यासं भजत इत्यर्थः ॥ १७ ॥

रास–रहस्यम्

र० टी०—रहसि विजने एकाग्रचेतसि सम्विदं सम्यग्रूपेण वेदनं ज्ञानं सच्चिदानन्दस्वरूपेण विनिश्चयः, प्रेमवीक्षणं अनुरागतया विशेषेण ईक्षतीति वीक्षणं तात्पर्यतयावधारणं, हृच्छयोदयं त्वमस्मत् हृदये नित्यमेव शेषे, अतः तस्योदयं प्रकटीभावं, प्रहसिताननं प्रकर्षेण हसितेन प्रकाशस्वरूपेण दर्शनं तत्र स्वरूपं, बृहदुरः व्यापकत्वात् बृहद् उरः उदारतया राति सुखं ददातीति उरः, ते तव, श्रियः धाम शोभाया आश्रयरूपः, "तस्य भासा सर्वमिदं विभाति।" इति श्रुतेः, वीक्ष्य विशेषेण ईक्षित्वा अपरोक्षं कृत्वा, मुहुः पुनः पुनः, अतिस्पृहा अतिशयाभिलाषा भवति, मनः चेतश्च, मुह्यते मोहं प्राप्नोति ॥ १७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वयं पुरुषोत्तमस्य भक्तहितायावतीर्णस्य मधुरवचनप्रहसितश्रीमुखावलोकनादिभिरुत्पन्नं त्वद्रमणमनोरथमस्माकं सफलं कुर्वित्याहुरन्याः। रहसीति द्वाभ्याम्। ते तव रहसि एकान्ते संविदं प्रहसितमाननं च हृच्छयोदयं च प्रेमवीक्षणं च श्रियो धाम बृहद्विशालम् उरश्च वीक्ष्य नोऽस्माकमतिस्पृहा तया भवति मुहुर्वारंवारं मनो मुह्यति ॥ १७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

या वयं रहसि संविदं गतम्। हृच्छयोदयमिति सम्भवद्विशेषणं। प्रहसिताननं प्रेमवीक्षणं च बृहद्विशालं श्रियो रमाया धाम गृहरूपमुरश्च ते वीक्ष्य चाच्छ्रुत्वा संविदं चातिस्पृहा इति नो मनो मुह्यते मोहयुतं भवति। हे अतिस्पृह अतिक्रान्तः स्पृहा इति तत्सम्बुद्धिः। नो मनो मुहुरामुह्यत इति वा। बृहदुरश्रियो वीर वीक्ष्येति पाठे बृहदुरसि स्थिताश्चताः श्रियश्च ता वीक्ष्यैकाऽपि सापत्न्येर्ष्यातोऽनेकीभूय भासत इति श्रिय इत्युक्तिर्युक्तेति वा ॥ १७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत उत्तमा आत्मानमेव निन्दन्ति। रहसीति। नोमनः अतिस्पृहं सत् मुह्यत इति तत्र कारणत्रयं गुणत्रयसहितं वाक्यं हास्यमुरश्चैव कामानन्दाधिकारिणः रहसि एकान्ते या संविज्ज्ञानं वा पूर्वतत् हृच्छयस्य कामस्य उदयेन तादृश प्रहसितयुक्तमाननं प्रेमपूर्वकं वीक्षणं च यस्मिन् श्रियो धाम बृहदुरः भगवद्रूपस्य वा षड्गुणत्वमुच्यते रहसि संविदो यस्मादिति एतादृशं त्वां हृच्छयस्य उदयो यस्मात् प्रहसितमाननं यस्य प्रेमपूर्वकं वीक्षणं यस्य बृहदुरः श्रीधामच वीक्ष्य प्रमाणादिवलरूपता भगवद्रूपेति निरूनपिता वक्षसि च स्वस्थित्यर्थं यशःश्रीश्च निरूपिता मुखदर्शनेनैव प्रहसितयुक्तत्वात् पूर्वं स्थित्यभावः। ततः कामः प्रेमवीक्षणेन च तस्य स्थिरीकरणं ततः स्वयोग्यता ततो भोगचातुर्यं प्रथमविशेषणेन एवं सर्वं भविष्यतीति अतिस्पृहायुक्तं मनः मुह्यते केवलं मोहं प्राप्नोति पदार्थालाभात् मुहुर्मूर्च्छा समायातीति जीवनमरणान्यतराभावात् धिग्जीवनमित्यर्थः॥ १७॥

श्रीसुबोधिनी-सारः

ननु मत्स्वभावं जानन्त्यः कथमीहध्वे पुनस्तत्राह हृच्छयस्य कामस्योदयो यस्मात् तत् रहसि एकान्ते संविदं सङ्केतं प्रेम्मा वीक्षणं यस्मिंस्तत् प्रहसिताननं विकसितमुखं श्रियो लक्ष्म्या धाम गृहं बृहद् विशालमुरो वक्षःस्थलं वीक्ष्यातिस्पृहा भवति मनो मुहुर्मुह्यति॥ १७॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

रहसि संविदमित्यत्र, **गुणत्रयसहितमिति**। मधुरत्ववल्गुवाक्यत्वबुधमनोज्ञत्वलक्षण गुणत्रयं ज्ञेयम्। रहसि संविदो ज्ञानानि येन वाक्येन तत्तथा। वाक्यनिरूपणे सति यादृशं तदस्ति तादृशमेव प्राप्यत इति गुणत्रयसहितमित्युक्तम्। अथवा। कारणत्रयस्यैव विशेषणमिदम्। कारणोद्देशो वाक्यमित्यादिना कृतः। कामेत्यादिना गुणानां बन्धादिबोधकत्वेन वाक्यं कामोद्बोधकम्। हास्यमानन्दस्य। श्रीधामत्वेन रसाधिकारिणो बोध्यन्ते॥ १७॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

रहसि संविदमित्यत्र **वाक्यं हास्यमुरश्चैव कामानन्दाधिकारिण** इति का० २९४६। "संवित्" **वाक्यं** तत् कामोद्बोधकं, हास्यमानन्दोद्बोधकं "श्रीधामे"तिविशेषणेन उरसा लोलाधिकारिण उच्यन्ते, अत्र कामपदमानन्दपदं च तत्तदुद्बोधकपरं ज्ञेयम्॥ १७॥

इत्यष्टाविंशोऽध्यायः॥ २८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'अतस्त्वया त्यक्तानामस्माकं प्राक्तनत्वद्दर्शननिदानस्य हृद्रोगस्य त्वत्सङ्गत्या त्वमेव चिकित्सां कुरु' इत्यादुगुः—रहसीति द्वयेन। तव रहसि एकान्ते संविदं साङ्केत्यचेष्टितं, तद्विशिंषन्ति—हृच्छयस्य कामस्य उदयो यस्मात् तत्। प्रहसितमाननं च प्रेम्णा वीक्षणं च श्रियो लक्ष्याः धाम स्थानभूतं बृहद्विशालमुरो वक्षश्च वीक्ष्य त्वत्सन्बन्धे अतिस्पृहा भवति। तथा मुहुः पुनः पुनश्च मनो मुह्यते मोहं प्राप्नोति॥ १७॥

अन्वितार्थप्रकाशिका

रहसीति॥ तव रहसि संविदं साङ्केत्येन चेष्टितं हृच्छयस्य कामस्य उदयो यस्मात् तत् प्रहसितमाननं च प्रेम्णा वीक्षणं च श्रियो लक्ष्म्याः धाम स्थानभूतं बृहद्विशालमुरो वक्षश्च वीक्ष्य त्वत्सम्बन्धे अतिस्पृहा भवति। यद्वा। अतिस्पृहा अत्यन्तया स्पृहया। स्पृहेः क्विप् भावे। मुहुः पुनः पुनश्च मनो मुह्यते मोहं प्राप्नोति। तद्भावः। अतस्त्वत्सङ्गनिदानकस्य हृद्रोगस्य त्वत्सङ्ग एव चिकित्सा। विषस्य विषमोषधम् इति न्यायात्॥ १७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निःस्पृहत्वात्त्वं यावयन्त्युक्तास्तथापि दयालुना त्वयाविरहीणीनामस्माकं रक्षणं विधातुं योग्यमित्याशयेनाहुः। रहसीति। हृदिमनसि शेते सततं तिष्ठतीति हृच्छयः कामस्तस्योदयस्तं हृच्छयोदयं रहसि संविदं संकेतनर्मवाक्यं स्मृत्वाश्रियोरमायाः धाम स्थानं बृहद्विशालं उरोहृदयं वीक्ष्य मुहुरति स्पृहा अस्माकं तव संयोगेऽतीच्छा जायते मनः मुह्यते॥ १७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अतस्त्वया त्यक्तानामस्माकं प्राक्तनत्वाद्दर्शननिदानहृद्रोगस्य त्वत्संगत्यैव चिकित्सां कुर्वित्याहुर्द्वयेन॥ रहसीति॥ हे कृष्ण, ते तव, रहस्येकान्ते, संविदं नर्म साङ्केत्यकर्मेति यावत्। हृच्छयस्य कामस्योदयो यस्मात् कामजनकमित्यर्थः। प्रेमवीक्षणं प्रेम्णा निरीक्षण च, प्रहसिताननं प्रकृष्टहाससहितं मुखं च, श्रियो लक्ष्म्याः, धाम स्थानभूतं, बृहद्विशालं, उरो वक्षश्च वीक्ष्य,

अस्माकं, अयतीव, स्पृहा भवति। तया च, मुहुः मनः मुह्यते मोहं प्राप्नोति। यद्वा। अतिस्पृहेति संपदादित्वाद्भावे क्विपि तृतीयान्तम्। अतिस्पृहया मनो मुह्यतीत्यर्थः ॥ १७ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

रहसि संविदमिति : १०.३१.१७.

ऐकान्तिकार्थकवचः श्रतिसाक्षिजातप्रेमश्रिया गवि हितचरितानुकूलम्।
अस्मन्मनः स्वसदृशं तव धाम वाञ्छत्येतत्तु साधु तदनुभ्रमतीति चित्रम् ॥ २६९ ॥
कान्तं नितान्तमकुतोभयकान्ति शान्तं यद्धाम सन्ततमनन्त वदन्ति सन्तः।
प्रेयस्तदेतदधुना त्वबलाजनेभ्यो बिभ्यत् कथं द्रवति भीरुवदद्रिकुञ्जे ॥ २७० ॥
पुंभ्यो बिभेति युवतियुवतोजनेभ्यो न क्वापि पुंवर इतीह जनप्रसिद्धम्।
त्वय्यद्भुतं त्विदमलोकि बलावलिप्तेष्यस्मद्भिया भ्रमसि सम्भ्रमतो ह्यरण्ये ॥ २७१ ॥
देवापगा यदुदिता गरलोपतापशन्तिं विधाय शिवमूर्ध्नि वसत्यजस्रम्।
तत्ते पदं विरहतापभयेन लीनं शक्तौ न हेतुरिह कारणकार्यभावः ॥ २७२ ॥
यः श्रीमत्पदमागतः सुशरणं सोऽनन्यजन्मा स्वयं शान्तः सङ्गमिनो जनानपि करोत्यारादतापानिति।
वागेषा तु मृषैव भाति भगवन् यत्त्वत्पदासक्तिरप्युत्तापं मदनस्तनोति सहितास्वस्मास्वनन्योद्भवः ॥ २७३ ॥
सकृदपि पदपङ्कजं चिन्तयन्त्यन्तरे ये तनुरपि नहि तापः शिष्यते तेषु यत्ते।
प्रतिदिनमखिलाङ्गं वीक्षमाणास्वकस्मात् तदयमतनुतापो वर्धतेऽस्मासु कस्मात् ॥ २७४ ॥
यद्धाम मोहतिमिरापहमीरितं सद्वेदैस्तदद्य तु तदुद्भवकारि भूरि।
आस्तां प्रदर्शय मुखेन्दुमपारकान्तिं स्यात्तेन चित्तमपमोहमितात्मजेक्षम् ॥ २७५ ॥
सुमनोऽभिलषितपूरणकृतेऽवतारस्तवैष भुवि सिद्धः। तत्कुरु सदयं कृतार्थं मनोऽपि नस्त्वन्मुखेन्दुललिताशम् ॥ २७६ ॥
श्रीश्चेत् प्रियतमायुक्तं सा न्यस्ता वक्षसि त्वया। दास्यो वयं तु हृष्यामस्त्वत्पादाब्जेक्षणादपि ॥ २७७ ॥
सुधा महितमालोक्य धाम त्वन्मुखचन्द्रगम्। मनः स्पृहयते युक्तं सुमनःस्पृह्यमेव तत् ॥ २७८ ॥

कृष्णप्रिया

अब तामस राजसी अन्य पूर्वा गोपियाँ गोविन्द को निवेदन करती है कि हे प्रियतम ! रहस्य में कही हुई और अन्तःकरण के अन्तर रहा हुआ अव्यक्त विशुद्ध काम का उदय करने वाली रहस्यमयी प्रणय गोष्ठी, अनुराग मधुर हास्यमय मुख कमल, लक्ष्मी देवी जी निवास मन्दिर आपका विशाल वक्षःस्थल, आदि दिव्य तत्वों का दर्शन मात्र से हमारा मन आपकी उत्कट स्पृहामय बन चुका है और आपके श्रीचरणों में मुग्ध बन गया है ॥ १७ ॥

व्रजवनौकसां व्यक्तिरङ्ग ते वृजिनहन्त्र्यलं विश्वमङ्गलम्।
[1]त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८ ॥

कवमक्षम।

अन्वयः—हे अङ्ग ! ते, व्यक्तिः (मधुर स्वरूपम्) विश्वमङ्गलम्, अलम्, व्रजवनौकसाम्, वृजिनहन्त्रीस्वजनहृद्रुजाम्, यत्, निषूदनम्, (अस्ति) तत् (स्वरूपम्) त्वत् स्पृहात्मनाम्, नः, मनाक्, त्यज (मनसि स्थापय) ॥ १८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तव च व्यक्तिरभिव्यक्तिर्व्रजवनौकसां सर्वषामविशेषेण वृजिनहन्त्री दुःखनिरसनीति। विश्वमंगलं सर्वमंगलरूपा चातस्त्वत्स्पृहात्मनां त्वत्स्पृहारूढमनसां नो मनागीषत्किमपि त्यज मुञ्च। कार्पण्यमकुर्वन्देहीत्यर्थः। किं तत्। स्वजनहृद्रोगाणां यदतिगोप्यं निषूदनं निवर्णकमौषधं तत्त्वमेव वेत्सीति गूढाभिप्रायम् ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

व्रजवनौकसामित्युक्तेर्वयं किं तदन्तर्गता नेत्युक्तम्। विश्वमंगलमित्युक्त्या वयं किं विश्वस्मिन्नेत्युक्तम्, यतो वयमपि तदन्तस्था एवेति हेतोः, कार्पन्यं बद्धमुष्टित्वम्। इत्यर्थ इति–न ह्यशेषपालकस्य कार्पण्यं शोभत इति भावः। अज्ञात इव भगवान्

---

[1] भज–विज.।

पृच्छति—किं तदिति। अतिगोप्यम् प्रत्यक्षं वक्तुमशक्यम्। निजदर्शनोत्तरमंगसंगरूपमित्याशयः। स्वजनेति सम्बोधनं वा॥ किञ्च, कुलवधूनामस्माकं निरपराधानां त्वयैव संमोह्य रात्रौ वनमानीतानामौत्कण्ठ्याग्निना केवलं प्राणदाहनमेव न तवाभिप्रेत किं तु स्वांगसंगदानेन प्राणपालनमपीत्यत्र हेतुमाहुः—तव व्यक्तिरभिव्यक्तिर्व्रजजनौकसां सर्वेषामेवाविशेषेण विश्वमंगलम्—विश्वानि सर्वाणि मंगलानि यत्र तत्तथा स्यात्तथा। वृजिहन्त्री दुःखनिरसिनी। अतस्त्वत्स्पृहात्मनां त्वत्कर्तृका या स्पृहा अस्मद्दर्शनोत्था तस्यामेवात्मा तत्सपूरयितुकामं मनो यासां तासां नः। मनाक् ईषत् किमपि। त्यज मुञ्च। कार्पण्यमकुर्वन् देहीत्यर्थः। तदेव किम्, तत्राहुः—स्वजनहृद्रुजाम् युष्मज्जनकुचरोगाणाम् यन्निपूदनम् उपशमकमौषधम् चरणकमलमित्यर्थः। तदेव यद्यस्माभिः कुचेष्वर्पयितुं प्राप्यते तदा तेनैव त्वत्स्पृहां पूरयित्वा स्वप्राणाः पाल्यन्त इति भावः॥ १८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं भवतैव निजहृच्छयोदयस्य व्यञ्जनयास्मासु ते ते नाना भावा जन्यन्ते हन्तास्य हृच्छयताप एवमेवं शान्तः स्यादिति भावनया त्वद्भावभावितत्वेन तत्तद्वासनोदयात्। यतोऽस्माकं त्वयि स्नेहः स्वभावजत्वाद्बलवत्तर इति द्योतयन्त्यस्तादृश-स्नेहमयाभिलाषविस्फुटहृदयाः सदैन्यं निवेदयन्ति। व्रजेति द्वाभ्याम्। व्रजौकसां वनौकसां चेत्यर्थः। व्यक्ति प्राकट्यम्, अतोऽन्तर्द्धानमयुक्तमिति भावः। अङ्गेति प्रमसम्बोधने न केवलं तेषां वृजिनहन्त्री अशेषस्यापि मङ्गलरूपा वृजिनहन्त्री। यद्वा तेषामेव सर्वसुखदा च अलमतिशयेनेत्यस्योभयतोऽप्यन्वयः अतो नः सम्बन्धे दुःखशमकं किमपि देहि। ननु व्रजौकस्त्वेन भवतीनामपि तत्तदुत्पातजदुःखशान्त्यादिकं भविष्यत्येव किमन्यत् प्रार्थयध्वे तत्राहुस्त्वयि त्वत्प्राप्त्यर्थमेव या स्पृहा तस्यामेवात्मा मनो यासां तासां नः ननु व्रजवनौकसोमपि मत्स्पृहास्ततः कोविशेषस्तत्राहुः। स्वजनेति। तेष्वपि स्वजनविशेषो ऽस्मद्विधस्तस्य हृद्रुजां यन्निपूदनमिति मनागिति परमदौर्लभ्येन याचकरीत्या वा वस्तुतस्तु हृद्रुजामिति बहुत्वेन निशब्देन च तथा तद्विषयककामानाम-निवर्त्यत्वेन प्रत्युत सदा नवनवतया वर्द्धिष्णुत्वेनैव निरन्तरं तद्वैविध्यमभिप्रेतम्॥ १८॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतोऽधुनेदं विधेहीति सर्वान्ते फलितं निश्चित्याहुः। व्रजेति। व्रजौकसां वनौकसां चेत्यर्थः। ते व्यक्तिः अवतारं प्राकट्यं वा अतोऽन्तर्धानमयुक्तमिति भावः। अङ्गेति प्रेमसम्बोधने। न केवलं वृजिनहन्त्री, विश्वमंगलम् अशेषमंगलरूपा चेत्यर्थः। अलमतिशयेनेत्यस्योभयतोऽप्यन्वयः। ततो वृजिनस्यापुनरुद्भवत्वादिकं मंगलस्य च भक्तिप्रेमादिसम्पत्तिपूर्वकप्रतिक्षणमभिनवसुख परम्परादिरूपत्वमूह्यम्। स्वजनानां या हृद्रुजः कामास्तासां नितरां सूदनं स्वजनत्वात्तव विदितमेवेति भावः। रुक्शब्दप्रयोगः प्रेमार्त्तिभरेण। ननु यद्भक्ता मयि प्रेमभक्तिं सदा सन्दर्शनं तदर्थं श्रीवैकुण्ठादिकमपि वाञ्छन्तीति जानाम्येव, तत्राहुः—त्वयि त्वत्प्राप्त्यर्थमेव स्पृहा किंवा तव या स्पृहारिरंसा तस्यामेवात्मा मनो यासां तासां नः, ईदृशीरस्मान् प्रति यद्देयं स्यात् तदेवेति भावः। मनागिति परमदौर्लभ्येन याचकरीत्या वा, वस्तुतस्तु हृद्रुजामिति बहुत्वेन 'नि' शब्देन च तथा तद्विषयक-कामानामनिवर्त्त्यत्वेन सदा नवीनवत्तया बर्द्धिष्णुत्वेनैव निरन्तरविविध-प्रेमरतिरभिप्रेता। अन्यत्तैर्व्याख्यातम्। यद्वा, हे स्वजन! त्वत्स्पृहात्मनां नो या हृद्रुजस्तासामिति। अन्यत समानमिति॥ १८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

व्रजवनौकसां गोपानां मुनीनां च व्यक्तिरवतारः त्यज देहि ममाक् ईषत् रुजां हृदयंक्लेशानाम्॥ १८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अङ्ग! हे कृष्ण! तवाभिव्यक्तिरवतारो गोपानां मुनीनाञ्च वृजिनहन्त्री पापनिरसनी दुःखनिरसनी वा विश्वस्य मङ्गलं मङ्गलावहा वा त्वत्स्पृहात्मनां त्वत्स्पृहारुग्णमनसां नोऽस्माकं मनागीषत् त्यज मुञ्च किंचिद्देहीत्यर्थः। किं तत् यत्स्वजनस्य हृद्रोगाणां निषूदनं निवर्त्तकमौषधं तत्तु त्वमेव वेत्सीति गूढोऽभिप्रायः॥ १८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यदि भवानस्मदापदं न परिहरिष्यति तर्ह्ययमवतारो व्यर्थो भविष्यति न चैतद्युक्तम्, अतोऽस्मद्दुःखं भवता अवश्यं परिहरणीयमिति भावेनाहुः। ब्रजेति। भो अङ्ग ते तवेयं व्यक्तिरवतारलक्षणा ब्रजौकसां गोपानां मार्गौकसां तीर्थसार्थानां वा निवहौकसांग्रामवासिनां वा वनौकसां वनवासिनां वा सन्यासिनां वानप्रस्थानां वा जलाश्रयाणां वा अलमत्यर्थं वृजिनहन्त्री दुःखनाशिनी यद्यस्मात्त्वयि स्पृहा यस्य स त्वत्स्पृहः आत्मा यासां ततस्तथा तासां नश्चक्षुर्विषयं मनाक् ईषदपि भेजे सामान्योक्त्या पुनरुक्तं कुर्वन्ति। स्वजजेति। विश्वमङ्गलं यद्व्यक्तं रूपं स्वजनस्य हृद्रुजाम् अन्तर्गतगोगाणां निपूदनं निर्मूलकरं तस्मादस्माकं स्वजनैकत्वादभीष्टं भवता कर्तव्यमिति भावः॥ १८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां एकोनत्रिंशोऽध्यायः॥ २९॥ ३१॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तस्मादिदं ते नोचितमित्याहुः—व्रजवनौकसामित्यादि । हे अङ्ग ! ते तव व्यक्तिः प्रकाशो व्रजवनौकसां वृजिनहन्त्री दुःखनाशिका, अलमत्यर्थः विश्वमङ्गलम् । अतो व्रजौकस्त्वेन विश्वान्तर्गतत्वेन चास्माकं तव प्रकाशो वृजिनहन्त्रैव । तस्मात्त्वत्स्पृहात्मनां यन्निसूदनं मारकमदर्शनम्, तत् मनाक् च त्यज मुञ्च, तन्न कुर्वित्यर्थः । हे स्वजनबन्धो ! नोऽस्माकम् । कीदृशीनाम् ? हृद्रुजां हृदि रुक् यासाम् । यद्वा, नोऽस्माकं हृद्रुजां यन्निसूदनं नाशकम्, दर्शनम्, तत् मनाक् च त्यज वितर देहीति यावत् । त्यजिरत्र दानार्थः । स्वजनानां हृद्रुजामिति समासे एकं वा पदम् ॥ १८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अस्मासु निरपेक्षता ते मोचिता इत्यन्या आहुः—व्रजवनौकसामिति । इदानीमस्माकं व्रजौकस्त्वं वनौकस्त्वञ्च । अतोऽस्माकं वृजिनहन्तृता समुचितैव ते, अतः स्वजन हृद्रुजां यत्तत् त्यजेत्यन्वयः । त्वत् स्पृहात्मनां नो यन्निसूदनं हिंसकं मनागपि त्यजेत्यर्थः ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च । कुलवधूनां निरपराधानामस्माकं त्वयैव सम्मोह्य रात्रौ वनमानीतानामौत्कण्ठ्याग्निना केवलं प्राणदाहनमेव न तवाभिप्रेतं किन्तु स्वाङ्गसङ्गदानेन प्राणपालनमपीत्यत्र हेतुमाहुः । तव व्यक्तिरभिव्यक्तिः व्रजवनौकसां सर्वेषामेवाविशेषेण विश्वमङ्गलं सर्वाणि मङ्गलानि यत्र तद्यथा स्यात्तथा वृजिनहन्त्री दुःखनिरसनी अतस्त्वत्स्पृहात्मनां त्वत्कर्तृका या स्पृहा अस्मद्दर्शनोत्था तस्यामेवात्मा तत् सम्पूरयितुं कामं मनो यासां तासां नः मनाक् ईषत् किमपि त्यज मुञ्च कार्पण्यमकुर्वन् देहीत्यर्थः । तदेव किं तत्राहुः । स्वजनहृद्रुजां युष्मज्जनकुचरोगाणां यन्निषूदनमुपशमकमौषधं करकमलमित्यर्थः । तदेव यदि अस्माभिः कुचेष्वर्पयितुं प्राप्यते तदा तेनैव त्वत्स्पृहां पूरयित्वा स्वप्राणाः पाल्यन्त इति भावः ॥ १८ ॥

रसिकाह्लादिनी–टीका

एवं स्मर्यमाणैरेतैः पुनः पुनः हृद्रोग एव वर्द्धतेऽतः कापट्यं विहायेवं कुर्विति स दैन्यं हृद्रोगोपशमनं प्रार्थयन्ते व्रजेति–ते तव व्यक्तिः प्राकट्यं व्रजवनौकसां अविशेषेण वृजिनं हन्ति दुःखनिरसनसमर्था । अङ्गेति प्रबोधनाय सम्बोधनं तन्मध्ये अस्माकमेव दुःखं नान्येषामिति । हेतुं पृच्छामेति । अलमतिशयेन विश्वमङ्गलरूपा च उदर्के सुखपरम्परासम्पादिका मङ्गलमिति । स्वजनानां हृद्रोगाना हृदयपीडानां यन्निषूदनं समूलनिरसनं गूढं अस्मद्धृदयश्रितस्य तत्रैव विदितं नान्यस्य । तच्च मनाक् ईषत् नोऽस्माकं त्यज वितर त्वत्स्पृहात्मनां त्वत्प्राप्त्यर्थं स्पृहा, यद्वा त्वत्स्पृहा त्वद् भावेच्छा आत्मनि चित्ते यासां । यद्वा त्वयि या स्पृहा सुखं चिरं तिष्ठत्विति । वांच्छा कामनेति यावत् सा आत्मनि मनसि यासां तासां, अयमभिप्रायः । हृदयतापे सति तत्रस्थे त्वय्यपि तापः सम्भवेत् । अतस्तव तापनिर्वाणार्थमौषध – प्रार्थना । न तु स्वतापं निवारणार्थमिति । त्वया त्यक्तानां न मरणमिति तात्पर्य्यम् । मनागतियाच्वकरीत्या स्तोकमेव प्राथ्यर्ते । ननु तदल्पमिति तदुक्तं गीतगोविन्दे “स्वहृदयमर्म्मणि वर्म्म करोति सजलनलिनीदलजालमिति” वत् । एतावत्पर्यन्तं स्वतापनिवारणार्थं सर्वं प्रार्थितं इदानीं स्वतापानुसन्धानं विहाय श्रीकृष्णस्य गोचारणार्थं वृन्दाटवीप्रवेशेन चरणारविन्दे व्यथां परिकल्प्य तरुच्छायान्तर्गतं यत्तमपश्यन्त्यः । तद्यथा जनिता स्वस्मिन् व्यथां निवेदयन्त्यो विरहार्तिविह्वलाः ॥ १८ ॥

विशुद्धरसदीपिका

किञ्च । व्रजेति । अङ्गेति प्रेमसम्बोधनम्, अत्रापि नामानुक्तिः पतिभावनयैव ते व्यक्तिः प्राकट्यं स्वरूपम्वा यद्वा व्यक्तिः प्रादुर्भाव एव न तिरोभाव इत्यर्थः । व्रजेति व्रजौकसां वनौकसां चेत्यर्थः । एवञ्चकक्कस्य तत्र तूभयम् अतोऽन्तर्द्धानमयुक्तमिति भावः वृजिनहन्त्री न केवलं तेषामेव किन्तु विश्वस्यापि मङ्गलं मङ्गलरूपा । यद्वा तेषामेव सर्वसुखरूपा यथा स्यात्तथा वृजिनहन्त्री अलमित्युभयान्वितं ननु किन्तद्वृजिनं यदर्थमेवं प्राथ्यर्ते तत्राहुः । अहो नास्माभिस्त्रपया वक्तुं शक्यते त्वत्स्पृहात्मनामस्माकं तव स्वजनानां हृद्रोगनिषूदनं यत्किमपि तत्त्यज झटिति देहीत्यधीरत्वं स्वजने इत्यन्तर्वर्तिनीं विभक्तिमाश्रित्य देवदत्तस्य गुरुकुलमित्यादिवदन्वयः । अत्र स्वजनशब्देन स्वकीयाभावो दृढीकृतः, यद्वा स्वजनेति सम्बोधनं ततश्चावश्यं हृद्रोगप्रतीकारः कर्त्तव्यः ॥१८॥

श्रीरामनारायणकृता भावभावविभाविका

एवमस्माकमन्यसर्वत्यागेऽपि त्वयि निर्वेदाभावादलाभेनागत्या निर्वेदमाशंसन्तीनामपि त्वच्चेष्टागुणस्मरणादिभिः कदापि तत्संभावनाया अप्यनुदयान्न त्वां विना कथञ्चिद्विश्रान्तिस्तयाप्यस्मद्दैन्येनात्मप्रकृतानुग्रह एवविधेय इत्याहुः । व्रजवनौकसामिति । अङ्गेति प्रियसम्बोधनं हे प्रियेति तथा च न प्रियस्य तवाप्रियाचरण प्रियाचरणे विलम्बो वा युज्यते । यद्वा अङ्गेति सम्बोधनेन अङ्गसङ्गे नैवानङ्गोपशमो नान्यथेति भावः । यद्वा अङ्गवियोगेऽस्माकमङ्गवियोग एव भाव्य इति व्यङ्गः व्रजवनौकसां व्रजे व्रजमण्डले

यानि वनानि तेषु ओकांसि गृहा एषामिति व्रजगतसर्ववनवासिनां ते व्यक्तिर्नित्यदाविर्भावः सैव च तेषां वृजिनहन्त्री वृजिनानां दुःखानां चाभावप्रयोजिका विश्वमङ्गलं सर्वमङ्गलरूपा च नियतलिङ्गतया व्यक्तिविशेषणत्वेऽपि षण्डत्वं तथाचोक्तं ब्रह्मणा—

तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम्।
यज्जीवितन्तु निखिलं भगवान्मुकुन्दस्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेवेति ॥

सर्वव्रजवनौकसां त्वदेकजीवनत्वे किमु वाच्यं वृन्दावनवासिनां सुतरामस्माकं, यद्वा व्रजौकसाङ्गोपालादीनां वनौकसां मृगपक्षिद्रुमगुल्मलतादीनाञ्च। यद्वा व्रजन्तीति व्रजा जङ्गमास्तेषां वने एवौको निवासो येषामिति तत्रैवाचलतया निवसतां स्थावराणाञ्च ते व्यक्तिरेव वृजिनहन्त्री सर्वमङ्गलरूपा च यदा स्थावराणामपि त्वद्व्यक्त्यैव शोषादिदोषवृजिनव्रजनं विकासादिरूपप्रहासादिविविधसर्वमङ्गलञ्च तदा किमु वाच्यं चेतनानां पक्षिमृगादीनां सुतरां धीमतां मनुष्याणामतितरामस्माकं यद्वा विश्वमङ्गलमिति त्वदीया व्यक्तिः, सर्वक्षेमाय ब्रह्मप्रार्थनया विश्वस्य मङ्गलं यदा स्मरतां स्मरणमात्रेण मङ्गलं वृजिनहन्त्री च तदा किमु वाच्यं व्रजवनौकसमिति तथा च यतो व्रजे त्वद्व्यक्तिरेव नित्यं संनिहितो हरिरित्यादिशास्त्रसिद्धान्तेऽन्तर्द्धानस्यैवान्तर्द्धानं योग्यं तथा विश्वमङ्गलत्वे वृजिनहन्त्रीत्वे तु सुतरां व्रजवनौकसां तथात्वे ऽस्माकमेव वृजिनाहननममङ्गलाचरणं चान्याय्यं ननु सर्वव्रजसामान्येन युष्माकमपि गोवर्द्धनोद्धारणादिभिर्वृजिननाशः कृत एव को भवतीनां विशेषो येन तथोच्यते किंवा वृजिनमिन्द्रकृतवातवर्षासुरोत्कर्षाद्यदर्शनात्तत्राहुः। त्वत्स्पृहात्मनामिति त्वय्येव स्पृहा आत्मनि मनसि यासां यद्वा त्वय्येव स्पृहा आत्मानः प्राणाश्च यासां त्वत्स्पृहामय्यो वा तासां तथा च त्वां विना क्षणविश्रामाभाव एव विशेषः तथा बाह्यवृजिनाभावेऽपि मनोव्याप्तस्पृहारूपं वृजिनं त्वत्प्राप्त्यैकनिवर्त्यमिति हे स्वजन स्वीया एव वयं गोपीजना न परकीया यस्य यद्वा स्वीय एव जनो नान्यदीयस्त्वम्। यद्वा स्वीयेषु जनिः प्रादुर्भावो यस्य तथाच स्वीयास्वस्मासु तिरोभावो नोचितः यद्वा स्वः स्वात्मैव प्रादुर्भूतस्तथा च यदा स्वात्मन्यध्यस्तप्राणवियोगे जीवनासंभवस्तदा किमु तिरोभावो व्यंसकतास्फूर्तिप्रदस्वात्मविरहेक्षणं स त्वं च न च कथं स्वात्मना मया वियोगसम्भव इति वाच्यम्। अघटनघटनापटीयस्या त्वदिच्छया सर्वसम्भवात् तस्मात्त्वमेव कृपया हृद्रुजां निषूदनं यत्तत् मनाक् त्यज नोऽस्माकं देहि स्वजनानां नो हृद्रुजामिति वान्वयः। ननु किं प्रार्थ्यते तद्ब्रूत तत्राहुः। यदिति। अत्रायमभिप्रायः मुख दर्शय चरणं स्तनेष्वर्पयेत्याद्येकैकोक्तौ तदेवं भवेदिति तत्स्पृहाशान्तावप्यन्यविधया स्पृहया दुःखाशमोऽतो हृद्रुजामिति। बहुवचननिर्देशेन नास्माकमेक एव रोगः किन्तु विविधत्वद्विषयकस्पृहाव्याप्तानां तद्विषयप्राप्त्यभावे सर्वास्ताः स्पृहारुज एवातस्तासां नितरां सूदनम् अभिलषणीयनित्यप्राप्त्या स्पृहारुजां निवर्तनं देहि तत्र यदिति सर्वनामपदप्रयोगात्सर्वरोगनिवर्तकसंग्रहो विवक्षितः तद्वीक्षया वा सर्वसंग्रहः तत्सर्वस्य लज्जया वक्तुमनर्हत्वाद्वा सर्वनामनिर्देशः तव सर्वमर्मज्ञत्वेन कथनप्रयोजनाभावाद्वा सर्वनामोक्तिः प्रार्थनीयानां बहुत्वेन कथनाशक्तौ बहुकथने कालविलम्बे जीवनाशक्त्या वा प्रार्थनीय सुखस्य वाचामगोचरत्वाद्वा तथोक्तिः मनागिति। एकदैव युगपदित्यर्थः। ननु मनाकिंचिदर्थकमिति वाच्यं भगवत्स्वरूपपूर्णसुखस्य किंचित्त्वानुपपत्तेः दैन्येन तथोक्तिसम्भवेऽपि स्वसाधनबलेन फलप्राप्तिसम्भावनायां न्यूनसाधने सर्वफलानुपपत्तेर्भवेदपि प्रार्थनासङ्कोचो नतु तदनुग्रहाधीनफलप्राप्तौ तदनुग्रहेण सर्वसम्भवे स्वसुखे सङ्कोचप्रयोजनासम्भवात् ॥ १८ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

स्वदुःखनिवृत्तेरनायाससाध्यतामावेदयन्ति। व्रजेति। हे करुणानिधे! तवाभिव्यक्तिः सर्वेषां व्रजौकसां वनौकसां च विशेषेणात्यर्थं वृजिनहन्त्री दुःखनिरसनी अतो, दुःखप्रदानायान्तर्धानमनुचितमितिभावः। किञ्च विश्वस्य सर्वस्यात्यर्थं मङ्ळरूपा तथा च विशेषसम्बन्धवतीनामस्माकं सम्प्रति विपरीतासम्पन्नेत्यहोऽस्मदभाग्यमहिमेतिभावः। अतः स्वाभिव्यक्त्यनुरूपैव चेष्टान्याय्येत्याशयेनाहुः। नोऽस्माकं मनागीषदायासरहितत्यागं किंचित्त्यजास्मभ्यं हि अनादरेणापि त्वया दत्तेऽस्मत्कार्य्यं भविष्यतीति ज्ञापयितुं त्यजेत्युक्तं यतस्त्वय्येव स्पृहायुक्त आत्मा अन्तःकरणं यासां तथाच उत्कटस्पृहायुक्तान्तःकरणानामादरानादरविचारः कुतस्त्य इति भावः। किन्त्याज्यमित्याकाङ्क्षायामाहुः। स्वजनानां गोपीनां हृदयरोगाणां यदेव नितरां सूदनं नाशनं भवति तदेव तदभिज्ञस्त्वं देहि, तन्नाम न वक्तव्यमिति भावः। मनागिति याचकरीत्या वस्तुतस्तु हृद्रुजामिति बहुवचनेन निषूदनमित्यत्र निशब्देन च चिरकालं निरन्तरं मङ्गलोत्तराङ्गसङ्गसुखप्रार्थनीयत्वेनाभिप्रेतं ध्वनितम् अनभिज्ञापक्षे स्वरोगोपशामकौषधप्रदानोत्साहमुत्पादयितुं याचकरीतिमनुसरन्त्यः स्तुवन्ति तव व्यक्तिर्जन्म वृजिनस्य दुःखस्य पापस्यच हन्त्री, अनेन सर्वदुर्गाणि यूयं मञ्जस्तरिष्यथेति गर्गाचार्य्येणोक्तत्वात्। पूतनादिसंहारेण नलकूबराद्युद्धारेणच तत्त्वस्यानुभूतत्वाच्च किञ्च नैतावदपितु सर्वस्यापि मङ्गलरूपा तव जन्मप्रभृति काप्यमङ्गलस्यादर्शनात् एवं स्तुत्वा स्वाभिमुखं प्रियमालक्ष्याहुः मनागीषत् नतु बहु तत्रापि त्यजावश्यं त्यक्तव्यमेव देहीत्यत्र प्रवृत्या किन्तदित्यपेक्षावन्तमिवालक्ष्य भिक्षुपादप्रसारणन्यायमाश्रित्त्याहुः। स्वजनेति। तथा च केषांचिद्दुःखस्य नाशकः केषांचित्पापस्य निवर्तकः केषाञ्चिन्मङ्गलरूपफलविशेषस्य प्रदाता। अस्माकन्तु रोगस्य निवर्तको भव नात्र कार्पण्य तवोचितमिति भावः। मानिनीपक्षे जन्मप्रभृति यादृशस्तव स्वभावः स्थितः संप्रत्यपि तथाभूत एवास्माकमपेक्षितः इत्याशयेनाहुः। व्रजेति

तथा च यथास्माकमपि दुःखं न भवेन्मङ्गलञ्च स्यात्तथा त्वयानुष्ठेयमिति भावः। तर्हि कथमेवं भवेदिति चेत्तत्राहुः। त्यजेति। हे स्वजनं नोऽस्माकं यत् हृदयकान्तीनां निषूदमीषदौदासीन्यं तत्त्यज यतस्त्वत्कर्तृका या स्पृहा तस्यामात्मा मनो यासां त्वत्कृतमानाशक्तचेतसां तथा च अप्रति स्वीकृतमीषदौदासीन्यं विहायागत्य पूर्ववत्प्रार्थनादिकं कुर्वित्याशयः। निवृत्तिपक्षे तस्माद्यथास्मत्संरक्षणं जीवानां समुद्धारश्च भवेत्तथात्वया कृपा विधेयेति प्रार्थयन्ते। व्रजेति। व्रजस्य वेदस्य संसाराऽरण्यपतितानां जीवानां चातिवृजिनहन्त्री सर्वानर्थनिवृत्तिकरी तथाविश्वस्यालमङ्गलरूपा परमानन्दाविर्भावकरी हे परमात्मन्! तव व्यक्तिः साक्षात्कारः तस्मात्स्वजनानां स्वभक्तानामज्ञानाहङ्कारादिलक्षणरोगाणां यन्निषूदनं तदस्मत्सम्बन्धविज्ञानलक्षणं किञ्चित्स्वजनेभ्यो देहि यतस्त्वद्विषयाः या स्पृहा जिज्ञासा तत्कर्तव्यतायामात्माभिप्राया यासां तथा चोपनिषदेन विज्ञानेन स्वजनानुद्धरेति भावः॥ १८॥

रास-रहस्यम्

र० टी०—हे अङ्गः! हे परमप्रेमास्पद! ते तव, व्यक्तिः स्वरूपेणाविर्भावः, व्रजवनौकसां संसारारण्ये परिव्राजकानां परमहंसानां, वृजिनहन्त्री पापनिरसनी, सर्वदुःखानामात्यन्तिकनिवृत्तिकर्त्री, तथा अलमतिशयेन, विश्वमङ्गलं विश्वस्य विश्वात्मनः देहाद्यध्यासनिरसनपूर्वकं मंगलवहा, अतः त्वत्स्पृहात्मनां त्वामेव स्वात्मत्वेन स्पृहयन्ती याः तासां, नोऽस्माकं स्वजनानां स्वात्मत्वेनानुसन्धीयमानानां जनानां, हृद्रुजामभिमानादिलक्षणहृदयव्याधिना, यन्निषूदनं निश्चयेन सूदनं विनाशकं विज्ञानलक्षणमौषधं, मनाक् किंचिदपि त्यजाकार्पण्येन देहीति भावः॥ १८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ते तव श्रीसर्वेश्वरस्थ सर्वात्मनः व्यक्तिरभिव्यक्तिः प्रादुर्भावः विश्वमङ्गलं सर्वमङ्गलरूपा व्रजवनौकसां सर्वेषामविशेषेण वृजिनहन्त्री दुःखनिरसनी। अतः अङ्ग हे श्रीकृष्ण! त्वत्स्पृहात्मनां त्वत्स्पृहायुक्तमनसां मनाक् ईषात्कमपि त्यज मुञ्च देहीत्यर्थः। किं तत् यत् स्वजनहृद्रोगाणां निषूदनं निवर्तकमौषधमिति गूढोऽभिप्रायः॥ १८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वयं सर्वथा नाथ त्वया दयनीया इति विज्ञापयन्त्य उपसंहरन्ति॥ व्रजेति। व्रजौकसो बनौकसश्च तेषामङ्ग स्वजन अत्यन्तमुत्पत्तिरहितं विश्वव्याप्तं ते व्यक्तिरवतारोऽलं वृजिनहन्त्री पापनाशिनी यत्त्वत्स्पृहात्मनां तुभ्यं स्पृहा यस्य स आत्मा मनो येषामस्मदादीनां हृदुजां मनआमयानां निपूदनं परिहारकं तन्मङ्गलं रूपं मनागीषद्व्रज सेवस्व दर्शयेति यावत्। विश्वमङ्गलं सर्वश्रेयो नो विषये भज। अथवा मनागीषद्व्रज दर्शनं वो देहीति वा॥ १८॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे एकोनत्रिंशोऽध्यायः॥ १०–२९।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

पुनरनन्यपूर्वा एतावत्कालं मनोरथाभिनिविष्टा किंचित्प्रार्थयते। व्रजवनौकसामिति। इयं ते व्यक्तिः व्रजवनौकसां वृजिनहन्त्री पापनाशिका विश्वस्याप्यत्यर्थं मङ्गलरूपं दोषनिवर्त्तकं विशेषाकारेणास्माकमेव गुणाधायकं सर्वेषाम्। अत एतादृशं मनाक् त्यज त्यागावश्यकत्वे हेतुः। त्वत्स्पृहात्मनामिति। त्वय्येव स्पृहायुक्तः आत्मा अन्तःकरणं यासां किं त्यक्तव्यमित्याशङ्कायामाहुः स्वजनेस्वजनानां गोपिकानां हृद्रुजां हृदयरोगाणां कामरूपाणां यदेव निषूदनं भवति नितरां सूदनं नाशनं यस्मात् केषांचित्फलदाता तादृशोऽस्माकं रोगनिवर्त्तको भवत्विति॥ १८॥

श्रीसुबोधिनी–सारः

हे अङ्ग ते तव व्यक्तिर्जन्म व्रजवासिनां वनवासिनां च वृजिनहन्त्री दुःखविनाशिनी विश्वमंगलं सर्वमङ्गलरूपा तव स्पृहायामिच्छायामात्मा चित्तं यासां तासां नोऽस्माकं मनाक् ईषदपि किंचित्त्वं त्यज मुञ्चाधारहेतुं देहि। तथा हि स्वजनानां यत् हृद्रुजो मनोव्यथास्तासां निषूदनं नाशनम् औषधमिति यत्॥ १८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वाभेदं सूचयन्त्यः सम्बोधयन्ति—अङ्गेति। तव व्यक्तिः अभिव्यक्तिरवतारो व्रजस्य व्रजवासिजनस्य यनौकसां मुनीनां च वृजिनहन्त्री पापनिरसनी, दुःखनिरसनी वा। तथा अलमतिशयेन विश्वस्य मंङ्गलं मङ्गलावहा च॥ अतस्त्वत्स्पृहात्मनां त्वत्सम्बन्धस्पृहारूढमनसां नोऽस्माकं स्वजनानां हृद्रुजां हृदयरोगाणां कामादिरूपाणां यन्निपूदनं विनाशकं त्वत्सम्बन्धरूपमौषधं तन्मनाक् ईषदपि त्यज देहीत्यन्वयः॥ १८॥

अन्वितार्थप्रकाशिका

व्रजेति॥ अङ्ग हे प्रभो! तव व्यक्तिः अभिव्यक्तिरवतारो व्रजस्य व्रजवासिजनस्य वनौकसां मुनीनां च वृजिनहन्त्री पापनिरसनी दुःखनिरसनी वा। तथा अलमतिशयेन विश्वस्य मङ्गलावहा च अतस्त्वत्स्पृहात्मनां त्वत्सम्बन्धस्पृहारूढमनसां नोऽस्माकं

स्वजनानां हृद्रुजां हृदयरोगाणां कामादिरूपाणां यन्निषूदनं विनाशकं त्वत्संबन्धरूपं गूढं त्वदेकवेद्यमौषधं तन्मनाक् ईषदपि त्यज कार्पण्यमकुर्वन् देहीति ।। १८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

व्रजते तव व्यक्तिर्मनुष्यभावेन प्रत्यक्षता व्रजवनौकसामन्येषां चालमतिशयेन व्रजिनं हन्त्री जन्ममरणादिदुःखनिवर्त्तका पुनः कथम्भूता विश्वमंगलं सर्वमंगलरूपा अङ्गहे हरे अतस्त्वत्स्पृहात्मनां तव स्पृहायां व्याप्तामनसामस्माकं मनाक् ईषत् त्यज कृपणतांत्यक्त्वात्वं किंचिद् देहीत्यर्थः । तत्किमिति चेत्तत्राहुः स्वजनहृद्रुजां स्वजनानामस्माकं या हृद्रुजोहृदय रोगास्तासां यन्निषूदनं नाशकं गूढमौषधं तद्भवानेव जानातीति गुप्ताशयः ।। १८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

व्रजेति ।। अङ्ग हे कृष्ण, ते तव, व्यक्तिरभिव्यक्तिरवतार इति यावत् । व्रजश्च वनं चौको निवासस्थानं येषां तेषां, व्रजौकसो गोपाः वनौकसो मुनयश्च तेषामित्यर्थः । अलमतिशयेन, वृजिनहन्त्री पापनिरसनी, दुःखनिरसनो वा, विश्वमङ्गलमखिलजगतां मङ्गलावहा, भवति । अतः, त्वत्स्पृहात्मनां त्वत्स्पृहारूढमनसां, नोऽस्माकं, स्वजनहृद्रुजां स्वजनस्य हृद्रोगाणां, यत् निषूदनं निवर्त्तकमौषधं, तत् मनाक् च किंचिदेव त्यज मुञ्च देहीत्यर्थः । तत्तु त्वमेव वेत्सीति गूढोऽभिप्रायः । अलमित्युभयत्रान्वेतव्यम् । स्वजनेति सम्बोधनं वा ।। १८ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

व्रजवनौकसामिति : १०.३१.१८.

निशाधिपत्यन्वयभूषितो भवान् निशोज्ज्वलालङ्कृतयस्तथा वयम् ।
प्रिय प्रियाश्चेदवलम्बसे मिथो महत्सुखं पूर्वजयोर्भविष्यति ।। २७९ ।।
यदि पुण्ययनेषु नोऽस्ति संख्या न कुतस्तर्हि ददासि दर्शनं नः । यदि नैव तदा तु सिद्धमेव सदयास्मास्वनधत्वमुत्प्रियत्वम ।।२८०।।
न योषाणामासामनधिकृतिभाजामधिकृतिर्मदीयस्वानन्दानुभववति सार्वा शिकसुखे ।
अयं चेदीशास्ते तव हृदयभावोऽस्तु तदिदं कृतार्थास्तत्पादादपि सदय तं दर्शय सखे ।। २८१ ।।
तृणाघ-बक-पूतना-विषजलादिवृष्ट्यादिकानशेषभयदायिनो लघु निवार्य विघ्नोत्करान् ।
निजात्मज इवाञ्जसा सकलमावितं गोकुलमिहैव समये कुतः पुनरपाठि काठिन्यकम् ।। २८२ ।।
दयाघन बृहद्वने निजजनोऽयमस्मिन् कथं दवानलशिखाविलो मयि सतीह भूयादिति ।
य एव निगदन् भवानपिवदग्निमत्युल्वणं न तस्य तव दुःशकं विरहवह्नितो रक्षणम् ।। २८३ ।।
अस्मच्चित्तं सुष्ठु वा दुष्टवृत्ति प्रेष्ठैतस्मिन् संशयश्चेत् तवास्ति ।
तत्किं तूष्णीं संपिधाने न भूयः पृच्छस्वाऽऽप्तं तद्गतं कामदेवम् ।। २८४ ।।
सकल-मङ्गल-मङ्गलमङ्ग ते तृणचराऽनुचरानुचरं प्रभो । पदसरोजमुरोजनिरोगतावहमहो यदहो तदिहास्तु नः ।। २८५ ।।
तवावतारोऽयमसाधु दुर्धरः सदुत्तरः सज्जनरञ्जितान्तरः । निगद्यमानो निरवद्यभाषिभिस्तदद्य हृद्यं सुरवन्द्य पाहि नः ।। २८६ ।।
वंशोऽयं जगदीश तेऽत्र शृणुमः सर्वाश्र्यराजाञ्चितः शूरेणोल्लसितो बुधेन कलितो मान्यो वदान्यैरिति ।
आस्तां तच्च यशोदयो विलसितः सम्प्रत्यपीति प्रभो तद्वश्यस्य तवायशो न लवशोऽप्यास्तामिति ब्रूमहे ।। २८७ ।।
करालोऽयं कालो निरवधिविशालोऽसमशरानलो दीव्यज्ज्वालो हिमकिरणमालोऽपि सकलः ।
कृपालो त्वं बालोचितरुचिरहेलोऽसि यदि तत् कथं जीवामोऽरं तदेव तवपन्न्यरतमनसः ।। २८८ ।।
प्रभो प्रभुत्वं तव चेदनस्तं गतं कथं तर्हि सुसह्यमेतत् निशाचरोऽयं प्रसभं करैः स्वैराकर्षति श्रीधर यत्प्रियास्ते ।। २८९ ।।
इमा सकामाः परमाभिरामाः प्रिया न सा मापि ममास्ति वामा । क्षमानिधे माधव मानधामा त्वमात्मसामानि कुरु प्रमाणम् ।।२९०।।
पुरुषेण मया परेण कार्योऽत्र परस्त्रीनिचये कथं प्रवेशः । यदि चैवमनाथदीनबन्धो करुणां प्रेषय तोषपोषकर्त्रीम् ।। २९१ ।।
अस्मद्विषादपरिपोषविशेषकर्त्री योषां रुषं स्वहृदये निहितां जहीहि ।
स्त्रीमात्र एव विरतिर्मम सम्प्रतीति पश्चाद्वदिष्यसि यदि श्रुतिमीश कुर्मः ।। २९२ ।।
ह्रीसुत्क्षमाक्षान्तिदयारुषश्च समानरूपा अपि सम्प्रतीश । अन्त्यैव ते प्रीतिपदं विभाति ययैवमीशोऽपि वशीकृतोऽसि ।। २९३ ।।
दितिजदनुजवर्गः कृत्स्न एकत्र कोटौ तव तदपरकोटौ क्रोध एको दयालो ।
स च यदि कृततापो नो पराजीयते तत् किमु कृतमिति चोक्तौ किं भवेद् दूषणं वा ।। २९४ ।।
परोपकारनिरता या रुषं हन्ति लीलया । कथं जाताऽवीर्यवती दया साराधिकाप्यहो ।। २९५ ।।

यावद्वर्णव्यवस्थाऽत्र श्रुतिर्गवेति तत्कथम् । वाच्यमस्मद्वर्णगतिर्न तेऽभूच्छ्रुतिगा विभो ॥ २९६ ॥
धृत्वा ह्रस्वाकारं वने विहारस्त्वया प्रतिज्ञातः । तत्कथमधुना विधृताकाराभिव्यक्तयेऽप्युदासीनः ॥ २९७ ॥
व्रजजनवृजिनापगमस्त्वदभिव्यक्त्यैव सदय भूशमजनि । मङ्गलवितरणशालिन् कुरु सम्प्रति हृद्रुजामिहापगमम् ॥ २९८ ॥

कृष्णप्रिया

अब तामस सात्विक अनन्य पूर्वा व्रज कुमारिकाओं का यूथ नाथ को विनम्र निवदेन कर रहा है कि हे प्रियतम ? हे अङ्ग ? आप का यह आनन्द मात्र करपादमुखोदरादि जो दिव्य स्वरूप है वह विश्व का मङ्गल करनेवाला है और व्रज एवं विविध वन में निवास करने वाले जनों के अन्तराय रूप पापों का सर्वथा विनाशक है, निज भक्तजनों के कामादि हृदय रोगों को सर्वथा निर्मूल करने वाली दिव्य औषधि है। हे अङ्ग । यह आप की दिव्य स्वरूप रूप जो औषधि हैं वह निरन्तर आप की प्राप्ति करने की इच्छा वाले हम निजजनों को प्रदान करने की कृपा करें ॥ १८ ॥

[1]यत्ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद् व्यथते न किंस्वित् कूर्पादिभिर्भ्रमति धीर्भवदायुषां न ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे[2] दशमस्कन्धे[3] गोपीगीतं नामैकत्रिंशोऽध्यायः[4] ॥ ३१ ॥

कर्दमक्षमा

अन्वयः—प्रिय ! ते, सुजातचरणभाम्बुरुहम् , नः, कर्कशेषु, स्तनेषु, भीताः, शनैः, दधीमहि, तेन, अटवीम् , अटसि, तत् , कूर्पादिभिः, किंस्वित् , न, व्यथते ? भवदायुषाम् नः, धीः, भ्रमति ॥ १९ ॥

एकत्रिंशोध्यायः समाप्तः ॥ ३१ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतिप्रेमधर्षिता रुदत्य आहुः । यदिति । हे प्रिय यत्ते तव सुकुमारं पदाब्जं कठिनेषु कुचेषु संमर्दनशङ्किताः शनैःशनैर्दधीमहि वयम् । त्वं तु तेनाटवीमटसि संचरसि । नयसीति पाठे पशून्वा कांचिदन्यां वा आत्मानमेव वा नयसि प्रापयसि । तत्ततः तत्पदाम्बुजं वा कूर्पादिभिः सूक्ष्मपाषाणादिभिः किंस्विन्न व्यथते कथं नु नाम न व्यथेतेति भवानेवायुर्जीवनं यासां तासां नो धीर्भ्रमति मुह्यतीति ॥ १९ ॥

इति श्रीमद्भागवते म० दशमपूर्वार्धे टोकायांमेकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

धर्षिताः आकुलाः । संमर्दः संघर्षः । तेन पदाब्जेन । पशवस्तु पालमनुगच्छन्त्येवात आहुः-अन्याम् श्रीराधिकातोप्यलक्षिताम् । काञ्चिदिति गोपीभ्योऽप्यन्यां वा, राधिकातोऽपि प्रियाम् । कदाचिद्भवाद्यन्वेषणार्थमात्मानमपीति वा । ततः वनप्राप्तिहेतोः । यद्वा—हेतुवाचकयत्पदस्य पूर्वमनुक्तेराह—तत्पदाम्बुजमिति । 'कूर्पं स्यात्सूक्ष्मपाषाणे' इति धरणिः । भवदायुष्ट्वाद्वयं जीवेमेत्यर्थः ॥ ननु भो रसिका यत्प्रार्थयध्वे तन्मे चरणकमलं संप्रति वनभ्रमणसुखे निमज्जत्यतो युष्मत्कुचेषु स्थातुं नावकाशं लभते, तत्र सरोदनमाहुः—यत्ते इति । तव सुजातमतिसुकुमारं यच्चरणाम्बुरुहं स्तनेषु दधीमहि तेनापि भीता एव वयं तेन चरणाम्बुरुहेणाटवीमटसीति काकूक्त्या हन्तहन्त कीदृशमनर्थमयसाहसं करोषीति भावः । ननु कथं भीताः स्थ, तत्र विशिंषन्ति-कर्कशेष्विति । स्तनानां कठोरत्वमेव भयहेतुरित्यर्थः । किमिति तर्हि धध्वे, तत्राहुः—हे प्रियेति । त्वं तेष्वेव चरणार्पणे प्रीणासीति त्वत्सुखमालक्ष्यैवेति भावः । किञ्च, तदानीं चरणेन स्तनवीडने त्वत्सुखे साक्षाद्दृष्टेऽपि चरणसौकुमार्यदृष्ट्यैत्र व्यथावश्यं संभवेदेवेति शंकयाऽस्माकं खेदो जायत एवेत्याहुः—शनैर्दधीमहीति । त्वत्सुखेऽप्यार्तिशंकया खिन्नत्वमिति महाभावलक्षणमिदम् । तेन त्वत्संयोगेऽप्यस्माकं दुःखं विधात्रा ललाटे लिखितमेवेति ध्वनिः । किं कर्तव्यम् , तपोभिर्विधिं प्रति स्तनानां कोमलत्वे प्राध्र्यमाने तव सुखं न स्यात् , कर्कशत्वे च त्वच्चरणानां व्यथेत्युभयथैव संकटमस्माकमित्यनुध्वनिः । भवत्वस्माकमेवं संयोगवियोगयाः कष्टं, त्वं तु स्वैरित्वेपि किं कष्टं सहसे यत्ते नाटवीमटसि । किं चरणाम्बुरुहमेतदटव्यटनयोग्यमित्युपालम्भो व्यजितः । ननु यदा यन्मे मनस्यायाति तदा तदहं करोम्येवात्र भवतोनां किमित्याहुः—त्वच्चरणं न व्यथते किंस्वित् , अपि तु व्यथत एवं । किन्तु त्वमस्मास्विव त्वांगेष्वपि निर्दय एव, किं वा—एता मद्दुखेनातिदुःखिन्यो भवन्ति तस्मादेता दुःखयितुं प्रवृत्तेन मया स्वदुःखमपि कर्तव्यं सोढव्यं चेत्याशयेन तां व्यथामपि सहसे, किं वा—अस्मद्दुःखदर्शन एव तव महासुखमतस्तां व्यथामपि त्वं सुखमेव मन्यसे,

---

[1] "यत्ते" श्लोको विजये नास्ति । [2] पारमसंस्यां संहितायां । [3] पूर्वार्द्धे रासक्रीडायां गोपीगीतं नाम—प्रा. पा. ; क्रीडायामेक—इति कस्यचित् । [4] एकोनत्रिंशोऽध्यायः—विज. ।

किं वा—'संसर्गजा दोषगुणा भवन्ति' इति न्यायेन यत्पूर्वं ते हृदयं कुसुमसुकुमारमासीत्तदेवास्मत्कठोरस्तनसंगेन संप्रति कठोरमभूद्यथा तथैव तव चरणमपि स्तनसंगेनैव कठोरमभूदतः कूर्पादिभिरपि न व्यथते. किं वा—त्वच्चरणस्पर्शमाहात्म्यात्कूर्पादयोऽपि कोमला एव भवन्ति, किं वा—धरण्यैवाति कारुण्यात्त्वन्माधुर्यास्वादलोभाद्वा त्वच्चरणविन्यासस्थले स्वजिह्वोपस्थाप्यते, किं वा—त्वमस्मत्तोऽपि प्रेमसिन्धुर्दैववशादस्मद्विरहसंतप्तो भ्रमन्नुन्माददशां प्राप्तः स्वचरणव्यथामपि नानुसंधत्से, इत्येवं नानाकारणानि परामृशन्तीनामस्माकं धीर्भ्रमति। न तु क्वापि निश्चयं लभत इति भावः। नन्वेतत्कियत्त्वद्दुःखं व्यञ्जयथ, अहं तु तद्दुःखं दुःखं न मन्ये येन प्राणास्तिष्ठन्तीति चेदत आहुः—भवदायुषामिति। भवति त्वय्येवायूंषि, भवानेव वाऽऽयूंषि यासां तासाम्। कल्याणवति त्वयि स्थिते त्वेतावद्भिरपि कष्टैरस्मदायुषां न नाश इत्यर्थः। अयं भावः—भवानिवास्मान्दुःखयितुं प्रवृत्तो विधिरेतद्विचारयति स्म—यद्यासामायूंषि संप्रत्यास्वेव स्थापयिष्यामि तदा मद्दत्तैरति संतापैर्दग्धायुष इमाः सद्यो मरिष्यन्ति, ततोऽहं पुनः काभ्यो दुःखं दास्यामि, तस्मादेतासामायूंषि मत्सधर्मिणि मद्बन्धौ कृष्णे निधाय यथेष्टमिमा अम्रियमाणा अपारमेव दुःखं भोजयिष्यामीति, अत एव न म्रियामहे। यद्वा—एवं धीरेव तदनिश्चयाद्भ्रमति, प्राणास्त्वस्माकं निश्चये देहान्निर्गच्छन्त्येवेति त्वं संप्रति पश्येति भावः। नन्वायुषि स्थिते कथं नाशस्तत्राहुः—भवदायुषां त्वत्समर्पितायुषां, स्वायूंषि तुभ्यमस्माभिः संप्रतिदत्तानि तैश्चिरं त्वं व्रजे खेलेति भावः॥ १९॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे एकत्रिंशत्तमोऽध्यायः॥ १॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु कास्ता हृद्रुजः किं वा तन्निषूदनमित्यपेक्षायां रुदत्य इवोद्दिशन्ति। यदिति। अम्बुरुहरूपकेण सिद्धेऽपि सुकोमलत्वे सुजातेति विशेषणं ततोऽपि परमकोमळत्वविवक्षया शनैरित्यत्र हेतुः भीता इति तत्र च हेतुः। कर्कशेष्विति। स्तनेषु दधीमहीत्यत्र हे प्रियेति प्रियत्वेन हृद्येत्र, तत्रापि स्तनेष्वेव धारणस्य योग्यत्वात् तेनाटवीमटसि अधुना निशि वने भ्रमसीत्यर्थः। स एव चरणस्यैव धारणे पुनः पुनस्तदुल्लेखे च हेतुरुक्तः अनिष्टाशङ्कया तत्रैव बर्धितस्नेहातिशयत्वात् पूर्वं गोचारणाय तृणमयप्रदेश एव परिभ्रमणात् प्रायिकत्वेन शिलेत्याद्युक्तं सम्प्रति तु कर्कशप्रायत्वेन दृश्यमाने पुलिनोपरितनयमुनातटे भ्रमणात् कूर्पादिभिरिति। यद्यपि तदानीं श्रीवृन्दावनस्य स्वभावेन च तेषामपि तत्र तत्राशङ्का नास्ति तथापि अनिष्टाशङ्कीनि बन्धुहृदयानि भवन्तीत्यादिन्यायेन शङ्का तासां सा सञ्जायेतैव भ्रमति मुह्यति अत्र हेतुः भवदायुषामिति इत्थमेवोपक्रान्तं त्वयि धृतासव इति मध्य चाभ्यस्तं चलसि यद्व्रजादिति अतस्तैर्या व्यथा सास्मज्जीवन एवोत्पद्यते तदधुना प्राणान् धारयितुं कथञ्चिदपि न शक्नुम इति भावः! तदेव तादृशाशङ्का एव हृद्रुजः तन्निषूदनं च स्वयमेव परमप्रियतमाङ्गे सळाळनसुखनिवासनमेवेति द्रुतमेव समागच्छेति भावः। नयसीति पाठे गच्छसीत्येवार्थः। नय पय गताविति धातोः तदेव तासां सर्वस्यापि भावस्य प्रेमैकमयत्वे स्थिते श्रीभगवतोऽप्यवमेव ज्ञेयं हन्तेमा मयि प्रेमैकमय्य इत्यादिभ्यः परमसुखमयात्मदानमेव समञ्जसं तच्च योग्यत्वादेवमेवमित्यालोच्य तादृशप्रेमविळासमयतत्तदिच्छा जायते इति एवमन्यदप्यूह्यं सहृदयैस्तदेकरसिकैरिति॥ १७॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकत्रिंशोऽध्यायः॥ ३१॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एतावत्पर्य्यन्तं निजेष्टमेव बहुधा प्रार्थितमुपसंहारे च श्रीभगवतो वनाटनमनुसन्धाय तेन च श्रीपादाब्जयोर्व्यथां सम्भाव्य निजप्रार्थितमप्यनादृत्य प्रेमभरप्रवर्षिताः केवलं तत्सुखमेव प्रार्थयमाना रुदत्य आहुः—यदिति। अम्बुरुहरूपकेण ततोऽपि परमकोमलत्वविवक्षया, भीता इत्यत्र शनैरित्यत्र च हेतुः—कर्कशेष्विति। श्लेषेणैवं निजनित्य नवयौवन तेन दुःखाधिक्यञ्च निवेदितम्। दधीमहीत्यत्र हेतुः—हे प्रियेति, प्रियत्वेन तेष्वेव तस्य धारणयोग्यत्वात्। एवं पूर्वोक्तनलिनसुन्दरत्वमपि स्वानुभवेन दृढीकृतम्, तेनाटवीमटसि अधुना निशि वने भ्रमसीत्यर्थः। यद्यपि प्रेमोद्रेकवैवश्यात् पूर्वोक्तानुसन्धानेन पौनरुक्त्येऽपि नैव दोषप्रसङ्गः किन्तु गुण एव तथापि चळसीति पूर्वं दिवाभ्रमणमुक्तम् अधुना चाटवीमटसीत्यनेन रात्राविति भेदः कल्प्यः दिने गोचारणाय तृणमयप्रदेश एवं परिभ्रमणात् कूर्पादिभिः सम्बन्धो न स्यादित्युक्तमेव रात्रौ चाधुना सम्भवेदित्युक्तं कूर्पादिभिरिति आदिशब्दात् कर्करादयः। यद्यपि श्रीवृन्दादेव्यादिप्रयत्नेन श्रीवृन्दावनस्वभावेन च तेषामपि तत्र सत्ताशङ्का नास्ति तथापि अनिष्टाशङ्कीनि बन्धुहृदयानि भवन्तीत्यादिन्यायेन तासां सा सञ्जायेतैव अतः स्वयमेवोक्तकिंस्विदिति भ्रमति मुह्यतीत्यत्र हेतुः भवदायुषामिति। अतस्तैर्व्यथा सास्मज्जीवन एवोत्पद्यते तदधुना प्राणान् धारयितुं कथञ्चिदपि न शक्नुम इति भावः। एवमधुना मूर्च्छया पूर्वतोऽप्यधिकव्यथा सूचिता नयसीति पाठे गच्छसीत्येवार्थः 'नय पय गतौ' इति धातोः। सर्वान्ते वचनमिदं श्रीराधादेव्याः स्वजनेत्यादिना स्मारिताया इव ज्ञेयम्, तत्र च हृद्रुजां निसूदनमिति तेन पादाब्जेनाटव्यटनमेव हृद्रुजः, ततो निवृत्तिरेव तन्निसूदनमित्यर्थः। तथापि सन्दर्शने पर्य्यवस्यत्येव, 'नः' इति बहुत्वम्, निजसखीवर्गाभिप्रायेण, किंवा निजभावानुसारेण सर्वासामपि संग्रहात्। एवं श्रीचरणारविन्दस्य परमकोमलत्वेन वनपरिभ्रमणे व्यथाशंक्य तदुद्दिश्य वारद्वयमुक्तम्, अतः

स्तनेषु तस्य धारणमपि वारद्वयं प्रार्थितम्, 'सारंगाणां पदाम्बुजम्' इत्यादिन्यायेनैव तात्कालिकदैन्येन भक्त्या तस्मिन्नेवासक्तेः, तथा श्रीमुखस्य च मुहुर्वर्णन तेनैव विशेषतो मोहितत्वात्, एवमन्यच्चोह्यम्, सहृदयैस्तदेकरसिकैरित्येषा दिक् ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यमेकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तत् पदं कूर्पादिभिः तीक्ष्णशिलादिभिः किं व्यथते व्यथत एवेति धीर्भ्रमति भवदायुषां त्वदधीनजीवितानाम् ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अतिप्रेमधर्षिता रुदत्य आहुः। यदिति। हे प्रिय! तव सुकुमारं पदाब्जं तन्नः कठिनेषु कुचेषु स्तनेषु संमर्द न शङ्किताः शनैः धारयामः तेन पदाब्जेनाधुना ऽटवीमटसि चरसि नयसीति पाठे वनं प्रति पशूनात्मानं वा नयसि प्रापयसि तत्पदाब्जं कूर्पादिभिस्तीक्ष्णसूक्ष्मशिलादिभिः किंस्विन्न व्यथते कथं नु नाम न व्यथते व्यथत एवेति नोऽस्माकं धीर्भ्रमति अस्वस्था भवति कथम्भूतानां नः भवानेवायुर्जीवनं यासां तथाभूतानां त्वदधीनजीवितानामित्यर्थः ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कास्ता हृद्रुजः किंवा निषूदनमित्यपेक्षायामाहुः। यत्त इति। विभ्रमा एव रुजः। तच्च स्तनेषु शनैस्तन्निधानमेव तन्निषूदनं अत एवैतदेव मुहुः प्रार्थितमिति भावः ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ प्रथमवक्त्र्य एवोपसंहरन्ति—यत्तु इत्यादि। हे प्रिय! ते तव यत् सुजात-चरणाम्बुरुहं कर्कशेषु कठिनेषु स्तनेषु भीताः सत्यः शनैर्दधीमहि बिभृम, तेन चरणाम्बुरुहेनाटवीमटसि, तत् किं न व्यथते? अपितु व्यथते। कैः कूर्पादिभिः। अतो भवानेवायुर्यासाम्, तासां नो धीश्चित्तं भ्रमति, अनवस्थिता भवति। अतः परमटव्यटनाद्विरम, प्रादुर्भूयतामिति वाक्यार्थेनोपसंहारः। (भा० १०।३०।४१) "समवेता जगुः कृष्णम्" इति पूर्वाध्यायास्ते जगुरिति क्रियया जयतीति पद्यैर्गानमेव तासाम्, न तु तत्तदुदितं कविना पद्यैर्निबद्धम्। तेन रागतालस्वरसहितमेव गानमिदम्, तत्र च कौशलमवान्तरं बोद्धव्यम्। प्रतिपद्यं प्रथमपादस्य द्वितीयो वर्णः, स एव पादान्तरस्य च द्वितीयः। (षष्ठ–श्लो०) "जलरुहाननं चारु दर्शय" इत्यत्र द्वितीय एव भवितुमर्हति जकारः। स प्रथमोऽभूत्। (१५ श०–श्लो०) "जड उदीक्षताम्" इत्यत्र चकार–स्थाने डकारस्तद्वर्गत्वादिति स्खलितदोषो नाङ्गीकार्यः। इदं तु वैचित्र्यं गानस्य ॥ १९ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अस्त्वस्माकं दुःखकथा, तया एव प्रयोजनं नास्ति, किमरण्य-रुदितैः? न, किन्तु भवद्दुःखमनुस्मृत्य यन्मुह्यामस्तदेव खण्डयेत्युपसंहरन्त्य एवोचुः—यत्ते इत्यादि। तव हृदयमेव कठिनम्, न तु श्रीरचनादिकमङ्गम्। अतस्तेन सुकोमलेन चरणेनाटवीमटसि, तत् किं न व्यथते, एवेति नोऽस्माकं धीर्भ्रमति। भवानायुर्यासां नित्यायुषामतस्तावतापि दुःखेनापि देहो न पततीति भावः ॥ १९ ॥

इत्येकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु भो रसिकाः! यत् प्रार्थयध्वे तन्मे चरणकमलं सम्प्रति वनभ्रमणसुखे निमज्जत्यतो युष्मत्कुचेषु स्थातुं नावकाशं लभते तत्र सरोदनमाहुर्यत्ते इति। तव सुजातमतिसुकुमारं यच्चरणाम्बुरुहं स्तनेषु दधामहि तेनापि भीता एव वयं तेन चरणाम्बुरुहेण अटवीम् अटसीति काकूक्त्या। हन्त हन्त कीदृशमनर्थमसमसारसं करोषीति भावः। ननु कथं भीतास्थ तत्र विशिषन्ति। कर्कशेष्विति। स्तनानां कठोरत्वमेव भयहेतुरित्यर्थः। किमिति तर्हि धद्ध्वे तत्राहुः। हे प्रियेति। त्वं तेष्वेव स्वचरणार्पणे प्राणसीति त्वत्सुखमालक्ष्यैवेति भावः। किञ्च। तदानीं चरणेन स्तनपीडने त्वत्सुखे साक्षाद्दृष्टेऽपि चरणसौकुमार्यदृष्ट्यैव व्यथावयं

सम्भवेदवेति शङ्कया अस्माकं खेदो जायत एवेत्यत आहुः। शनैर्दधीमहीति। त्वत्सख्येऽप्यार्त्तिशङ्कया खिन्नत्वमिति महाभावलक्षमिदं तेन त्वत्संयोगेऽस्यस्मन्कं दुःखं विधात्रा ललाटे लिखितमेवेति ध्वनिः। किं कर्त्तव्यं तपोभिर्विधिं प्रति स्तनानां कोमलत्वे प्रार्थ्यमाने तव सुखं न स्यात् कर्कशत्वे च त्वच्चरणानां व्यथेत्युभयथैव सङ्कटमस्माकमित्यनुध्वनिः। भवत्वस्माकमेवं संयोगविवियोगयोः कष्टम्। त्वन्तु स्वैरित्वेऽपि किं कष्टं सहसे यत्तेनाटवीमटसि किं चरणाम्बुरुहमेतदध्यटनयोग्यमित्युपालम्भो व्यञ्जितः। ननु यदा यन्मे मनस्यायाति तदा तदहं करोम्यत्र भवतीनां किमित्यत आहुः। तच्चरणं न व्यथते किं स्विदपि तु व्यथते एव किन्तु त्वमेवास्मास्विव स्वाङ्गेष्वपि निर्दय एव। किम्वा एता मद्दुःखेनातिदुःखिन्यो भवन्ति तन्मादेता दुःखयितुं प्रवृत्तेन मया स्वदुःखमपि कर्त्तव्यं सोढव्यञ्चेत्याशयेन तां व्यथामपि सहसे किम्वा अस्मद्दुःखदर्शन एव तव महासुखमतस्तां व्यथामपि सहसे किम्वा अस्मद्दुःखदर्शन एव तव महासुखमतस्तां व्यथामपि त्वं सुखमेव मन्यसे। किम्वा संसर्गजा दोषगुणा भवन्तीति न्यायेन यत् पूर्वं ते हृदयं कुसुमसुकुमारमासीत्तदेवास्मत्कठोरस्तनसङ्गेन सम्प्रति कठोरमभूत् यथा तथैव त्वच्चरणमपि स्तनसङ्गेनैव कठोरमभूदतः कूर्पादिभिरपि न व्यथते। किम्वा त्वच्चरणस्पर्शमाहात्म्यात् कूर्पादयोऽपि कोमला एव भवन्ति। किम्वा धरण्यैवातिकारुण्यात् त्वन्माधुर्यास्वादलोभाद्वः त्वच्चरणविन्यासस्थले स्वजिह्वा उत्थाप्यते। किम्वा त्वमस्मत्तोऽपि प्रेमसिन्धुदैववशादस्माद्विरहसन्तप्तो भ्रमन्नुन्माददशां प्राप्तः स्वचरणव्यथामपि नानुसन्धत्से इत्येव नाना कारणानि परामृशन्तीनामस्माकं धीर्भ्रमति। ननु क्वापि निश्चयं लभते इति भावः। नन्वेतत् कियत् स्वदुःखं व्यञ्जयथ। अहन्तु तद्दुःखं दुःखं न मन्ये येन प्राणास्तिष्ठन्तीति चेदत आहुर्भवदायुषामिति भवति त्वय्येवायूंषि भवानेव वा आयूंषि यासां तासां कल्याणवति त्वयि स्थिते त्वेतावद्भिरपि कष्टैरस्मदायुषां न नाश इत्यर्थः। अयं भावः। भवानिवास्मान् दुःखयितुं प्रवृत्तो विधिरेतद्विचारयति स्म यद्यासामायूंषि सम्प्रत्यास्वेव स्थापयिष्यामि तदा मद्दत्तै रतिसन्तापैर्दग्धायुष इमाः सद्यो मरिष्यन्ति। ततोऽहं पुनः काभ्यो दुःखं दास्यामि तस्मादासामायूंषि मत् सधर्म्मणि मद्बन्धौ कृष्णे निधाय यथेष्टमिमा अम्रियमाणा अपारमेव दुःखं भोजयामाति अत एव वयम् न म्रियामहे। यद्वा। एवं धीरेव तदनिश्चयाद्भ्रमति। प्राणास्त्वस्माकं निश्चयेन देहान्निर्गच्छन्त्येवेति त्वं सम्प्रति पश्येति भावः। नन्वायुषि स्थिते कथं नाशस्तत्राहुः। भवदायुषां त्वत्समर्पिता युषां स्वायूंषि तुभ्यमाभिः सम्पात दत्तानि। तैश्चिरं त्वं व्रजे खेलेति भावः॥ १९॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। एकत्रिंशोऽत्र दशमे सङ्गतः सङ्गतः सताम्॥ ३१॥

श्रीरसिकाह्लादिनी टीका

ततः तदनन्तरं स्वमेव प्रार्थ्यमाना रुदन्त्यः आहुः यत्ते इति" हे प्रिय प्रीतिविषय ते तव यत्सुजात सुकोमलं चरणाम्बुरुहं स्तनानां कर्कशानुसन्धानेन भीताः शनैरिति हस्तलाघवेन कर्कशेषु नवयौवनोन्नतेषु स्तनेषु दधीमहि धारयेम, तेन पादाब्जेनाटवीं वृन्दावनभूप्रदेशं अटसि। तत्पदाब्जं कूर्पादिभिः सूक्ष्म—पाषाण—कणिकादिभिः तृणाङ्कुरैश्च किं स्विदिति। कथं वा न व्यथतेऽपि तु व्यथत एवेति निश्चित्य सम्भाव्येति वा नोऽस्माकं धीर्भ्रमति मुह्यति। पाठान्तरे नयसीति। पशून्नयां काञ्चिदिति वा सेष्यं वचनं भवदायुषां भवानेवायुः जीवितं यासां तासां नः जीवनपीडायां सर्वा पीडा भवतीति तात्पर्यम्। यद्यपि वृन्दावनप्रदेशस्य सुखरूपत्वं येनाकृष्टः कृष्णः पादत्राणमन्तरेण साक्षात्स्पृशति तथापि बुद्धिविक्लवत्वादेवमुक्तम्। "अनिष्टाशङ्कानि बन्धुहृदयानि भवन्तीति" न्यायात्। यद्यपि क्वापि क्वापि पद्यानि पुनरुक्तानि अनुसन्धानाभावेन तथाधुनेदं पद्यं तथैवोक्तमिति। यथा हि चलसि यद्व्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ते पदम्। शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छतीति पद्ये अयमर्थः पूर्वमुक्त एव तथापि श्रीकृष्णदर्शनेन उत्तरस्याप्राप्तौ पुनरपि वैशिष्ट्येन दैन्यप्रलपनरोदनप्रकारस्त्वयमेव पौनः पुन्यमिति अयमभिप्रायः। त्वच्चरणाब्जमस्मज्जीवितं प्राणा इत्यर्थः। त्वच्चरणाब्जपीडा अस्मत्प्राणपीडैवेत्यर्थः। त्वच्चरणाब्जसुखेनैवास्मत्सुखमिति तात्पर्यम्॥ १९॥

इति श्रीमन्नारदावतारसम्भूत–श्रीव्रजाचार्यनारायणभट्टविरचितायां रसिकाह्लादिनीटीकायां गोपिकागीतं नामैकत्रिंशोऽध्यायः॥ ३१॥

विशुद्धरसदीपिका

अथ तासामेतासां च परमदैन्येनाधीरप्रलपितमवकर्ण्य जातकारुण्या नित्यसहचर्य्यस्तदाकर्षणमन्त्रमिव तत्सुखप्रतिपादकमेकं वाक्यमतिगाम्भीर्य्येणाहुः। यदिति। हे प्रिय! प्रेमविषय यत्ते असाधारणं सुजात परमकोमलं चरणाम्बुरुहं कर्कशेष्विति सर्वदा पुमात्रास्पृष्टेष्वित्यर्थः। ततश्च कामासक्तिः परिहृता सख्यरुचे रुत्कटत्वादित्युक्तमुज्ज्वले यूथाधिपत्वे इत्यादिना स्तनेषुशनैर्दधीमहि नित्य संधारयामः सम्वाहनायेति शेषः वर्तमान प्रयोगेण नित्यता सूचिता तच्च सम्वाहनं सुरतश्रमापनोदनायेति गोप्यत्वात्प्रकाशत्वेनोक्तं भीता इति शनैर्द्धारणे हेतुः। ततः च सौकुमार्य्यं सूचितं वयं स्तनेषु धारयन्त्यो व्यथामस्त्वं तु कूर्पादिष्वपि धारयन्न व्यथस इत्यतिवैषम्यमिति भावः ततश्च तदेकसुखत्वं सौहृदविशेषश्चोद्दीपकचेष्टया व्याञ्जितः चरणाम्बुरुहमित्येकत्वं जात्यभिप्रायेण। किम्वा द्वितीयस्य सङ्गोप्यत्वात्तथोक्तिः तेन चरणाम्बुरुहेण। यद्वा तेन कर्कशत्वेनेत्यव्यवहितत्वादाक्षेपलभ्यम्। एवञ्च स्वकृतमेव भुज्यते

अस्माभिरिति विषादः। अहो तिष्ठत्वस्माकं विरहदुःखमतिकर्कशस्तनस्पर्शदोषेण संक्रमितकाठिन्यं त्वच्चारणाम्बुरुहं कूर्पादिभिः अतिसूक्ष्मैस्तीक्ष्णैः शिलाखण्डादिभिः तृणाङ्कुरैश्च न व्यथते किंचित् व्यथत एवेत्यर्थः। यद्यपि श्रीवृन्दावनतृणादीनि न तादृशानि तथाप्यनिष्टाशङ्कीनि बन्धुहृदयानीति न्यायेन जायेतैव शङ्केति तत्र हेतुः भवदायुषामिति भवत्सुखसुखीनां न इति पूर्वाभ्यो वैलक्षण्यमुक्तं धीर्भ्रमति निश्चयात्मिकापि दोलायते किं पुनर्मानसमिति भावः॥ १९॥

इति श्रीभागवतरासपञ्चाध्यायीव्याख्याने विशुद्धरसदीपिकायां तृतीयोऽध्यायः॥ ३॥

मूलस्य एकत्रिंशोऽध्यायः॥ ३१॥

श्रीरामनारायणकृता भावभावविभाविका

तत्र बहुषु हृद्रोगेष्वन्यरोगाणां स्वदुःखैकहेतुत्वमेव एकस्य तु प्रियतमदुःखसम्भावनारूपतयासर्वतो वलीयस्त्वात्प्राधान्येन तमेव रोगमाहुः। यत्ते सुजातेति। चरणाम्बुरुहमित्यत्रोपमावाचकेवादिशब्दाप्रयोगे तदात्मकत्वनिर्देशेन मृदुमञ्जुसुरभ्याह्लादकतापोपशमाद्यतिसादृश्यं विवक्षितं सुजातेति विशेषणेन तु सर्वोक्तोपमाधर्मेभ्यः उपमेयेऽतिशयसूचना ननु निश्चितसाध्यवान् दृष्टान्तः सन्दिग्धसाध्यवान्पक्ष इति न्यायविदां स्थितिरिति कथमुपमात उपमेय साध्यगुणातिशय इति तत्राहुः। यदिति यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुत्या मनोवाचामविषयत्वेन वर्णयितुमशक्यं "सर्वे वेदा यत्पदमामनन्तीतिश्रुत्वा सर्ववेदतात्पर्यगोचरत्वेन चातिचित्रं तथाच पर्वते पक्षे प्रत्यक्षाभावेन प्रतिपादने सन्दिग्धेऽपि वह्नौ न महानसचुल्ह्यन्तर्गतनिश्चितस्वल्पाग्नेर्नातिशयः किन्तु दूरेऽपि भ्रमादिरिपुपराभावकधूमध्वजतेसस्ततोऽतिशय एवेत्याशयः। तदतिशयगुणत्वेऽपि हेतुस्त इति सच्चिदानन्दघनस्य तव पदस्य तद्गुणानाञ्च "निश्चेतनात्मकशरीरगुणैश्च हीनः आनन्दमात्रकरपादमुखो दरादि"रित्यादिवचनैरानन्दमात्रत्वं तथा निर्दोषपूर्णविग्रह आत्मतन्त्रः किन्तु निर्दोषचैतन्यसुखनित्यां स्विकां तनुमित्यादिवचनैर्म्लानिविकृतिनाशादिदोषशून्यत्वं चरणाम्बुरुहस्य तद्युक्तत्वमिति महानुत्कर्षः तच्चरणाम्बुरुहं वयं हृच्छयादितापोपशमस्वाह्लादाद्यर्थं स्तनेषु दधीमहि। अत्र चरणाम्बुरुहमित्याधेयस्यैकवचनेन स्तनेषु दधीमहीत्याधाराणां बहुत्वनिर्देशेन भगवच्चरणस्य विभुत्वमपि द्योतितमन्यथा परिच्छेदे त्वपरिमितस्तनेषु युगपद्धारणासम्भवः स्यात्। तत्र प्रियइति संबोधनेन हेतुगर्भितेन प्रियत्वाच्चरणधारणमस्माकं युक्तमेवेति ध्वनिः, तथापि चरणस्यातिमृदुत्वेन भीता अतः शनैरेव दधीमहि भीतौ हेतुः। कर्कशेष्विविति। अत्र स्तनानां कर्कशत्वेन सर्वासां नवकिशोरवयस्त्वं तत्र बोध्यं त्वच्चरणस्य मञ्जुसुरभितापोपशमनाह्लादकत्वादिगुणाः स्तने धारणावश्यकत्वप्रयोजकाः मृदुत्वं तद्धारणे भीतिप्रयोजकमतस्तव चरणगुणैरेवेतस्तत आकृष्टमतयो वयं शनैर्दधीमहि तेन मृदुतमचरणेनाटवीमटसि इति वर्तमानार्थकप्रयोगेण वर्तमाननिशाकालद्योतनं तथाच मम गोचारकस्यस्वभावप्राप्तत्वात्किंतच्चिन्तयेति शङ्कायां यदा तवाह्नि परिदृश्यमानभूमिगुणदोषवासरे काननाटने शिलसदृशतृणांकुरावसादभयान्नो मनः कलिलतां याति तदा किमु वाच्यमधुना निशि तथा प्रकाशाभावे कूर्पादिव्याप्तयमुनोवनेऽटसि तथा तदा बहुगोपबालसहकारेण तेऽपि त्वदेकप्राणाः तव कुतथगमननिषेधेन रक्षका भवेयुरधुना त्वाहूतमपि निजकिङ्करीपरिकरं विहाय एक एवाटसि किञ्च तत्र तु गोचारणप्रयोजनमत्र तु न तथा किन्तु गवामिन्द्रियाणां चारणस्यास्मासु सम्भवेऽपि तत्कुलधर्मात्मकगोचारणत्यागेनापि केवलमस्मद्दुःखदानायाटवीमटसि तत्रापि त्वत्सुखभावनायां स्वदुःखमपि स्वीकुर्मस्तव सुखमपि नैव सम्भाव्यते प्रत्युत त्वच्चरणाम्बुरुहं किं कूर्पादिभिर्न व्यथते अपितु व्यथते एवेति, तथाच गवां पशूनांश्चारणतालक्षणपरोपकाराय स्वचरणैर्वनगमनाचरणे स्वदुःखसहिष्णुना परमकृपालुसत्पुरुषेण भवतीति रसरीतिविदाऽपि कुपुरुषैरप्यकार्यस्य सुखाभावेऽपि प्रत्युतस्वदुःखसम्भवेऽपि पराणां स्वचरणैकरतानां निजैकज्जीवनानां स्वयमाहूतानां विनयप्रार्थनावतीनां दुःखदानस्याचरणं कथमङ्गीकृतमिति नो धीर्भ्रमति तदुक्तं नीतिज्ञैः—

ते वै मानुषराक्षसाः परसुखं स्वार्थाय निघ्नन्ति ये। ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥

यद्वा तेन कर्कशकुचेषु शनैर्धारणभयेनाटवीमटसि तत्किं शनैः स्तनस्पर्शेन व्यथतेऽधुना वनाटने कूर्पादिभिर्न व्यथते इति नो धीर्भ्रमति यद्वा नस्तव रमणसुखाय त्वद्रमणेन सुखाय च प्रवृत्तानां दुःखाय स्वदुःखस्वीकारेण भ्रमतस्तव सुखघनस्यापि दुःखभ्रमेणनो धीर्भ्रमति अस्माकमात्मनोऽसह्यमपि वर्णितं दुःखजातं न तद्वदसह्यं यथास्मन्निमित्तभ्रमणे त्वत्पादकूर्पादिव्यथासम्भावितदुःखमसह्यमिति नो धीर्भ्रमति। ननु मम दुःखेन किमर्थं भवतीनां खेदस्तत्राहुः भवदायुषां त्वदेकजीवनानां त्वत्खेदसम्भावनायां सद्यो मरणमिति भावः। तस्मात्त्वन्मिलनेनैव जीवनम् सर्वखेदोपशमश्चेति प्रसीदेति भावः॥ १९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धान्तर्गत रासपञ्चाध्यायीव्याख्यायां श्रीचन्द्रभागाख्यविष्णु सख्यापन्न-
श्रीरामनारायणरचितायां भावभावविभाविकायां तृतीयाध्यायव्याख्या समाप्ता॥ ३॥

मूले एकत्रिंशः॥ ३०॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवं बहूक्तः परं विरहव्याकुलस्वान्ता गतधैर्याः रुदत्य आहुः। यदिति। यत्तव सुजातं चरणकमलं स्तनेषु भीताः सत्यः शनैर्दधीमहि भयेन शनैर्धारणे हेतुः कर्कशेषु। ननु एवं तर्हि किमर्थं धारयथेति चेत्तत्राहुः। हे प्रिय! स्वसुखार्थं धाष्टर्येन

धारयामः तत्रापि सुजाताम्बुरुहरूपत्वात्सुगन्धिशीतळं हृदयस्थतापोपशामकं प्रियपदमतस्तद्धारणि सूचनार्थमुक्तं सुजातेतित्वन्तु तादृशकोमलेनास्मानपरित्यज्यात्मदोषेण सम्प्रति रात्रौ अटवीं शर्करादिव्याप्तमरण्यमटसि भ्रमसि किंस्वित्त्वत्पदपद्मं तत्रत्यशर्करादिभिर्न व्यथते। यद्यपि तेन तादृशवनभ्रमणेन तद्व्यथते नवेति सन्देहो भवति तथापि नोऽस्माकं सन्देहोऽस्मद्दोषवशात्पलाय्यते तेन त्वया तद्व्यथामगणयित्वा भ्रमणाश्रितत्वाद्व्यथत एवेति निश्चयात्, तथा च स्वसुखहेतुना तत्पीडापि यद्यस्माकं सह्या तदा परमदुःखकारणभूता वनभ्रमणजन्या तद्व्यथा त्वसह्यतमा नोऽस्माकं बुद्धि स्तामनुसन्धाय भ्रमति मूर्च्छां गन्तुं घूर्णत इत्यर्थः। यतो भवदायुषां त्वदेकप्राणानामस्माकं तादृशभवत्पादपीडानुसन्धानेन मरणमेवोपस्थितमहो कष्टमिति भावः। अनभिज्ञापक्षे अहो यत्प्रार्थ्यते तन्मयावगतं तथापि मदीयं पादसरोजं युष्मत्स्तनेषु स्थापितं व्यथामवाप्नोति तेषां कठोरत्वादतो भवतीनां परोक्षं वन एव भ्रमामीत्याशङ्क्य सरोदनमति चित्रमाहुः। यदिति। तथाचातिसुकुमारत्वात्पीडाशङ्कयास्माभिः कठोरेषु स्तनेषु शनैः स्थाप्यते तेन त्वमटवीमटसीत्यतिचित्ररूपोऽन्यायस्तवैक शोभत इति भावः। स्तनस्पर्शजनितदुःखासहनं कूर्पादिस्पर्शोत्थव्यथासहनञ्च किंनिबन्धनमिति तु वयं न विद्म इत्यप्यनेन ध्वनितं तव मनसोऽवस्थां को वेद कीदृशी वर्त्ततेऽस्माकम्बुद्धयस्तु संशयचक्रारूढास्थैर्यं न लभन्ते किङ्कुर्म इत्याहुस्ते व्यथते परमसुकुमारत्वादादौ स्विन्न व्यथते भ्रमणे प्रवृत्तत्त्वादिति द्वयोः पक्षयोरन्यतरस्या निर्धारणादस्मद्धीः भ्रमति तथाहि अहो तस्य पदन्तु व्यथते तथाप्यसाव स्मास्विव स्वाङ्गेष्वपि निर्दयः किंवास्मद्दुःखार्थं स्वाङ्गे दुःखमुत्पाद्य सहते किम्वास्मद्दुःखजन्यसुखेन दुःखमपि सुखमेव मन्यते किंवा दैववशाद्विरहं प्राप्तः प्रेमभराक्रान्तस्वान्तत्वादुन्माददशां प्रविष्टस्तत्पीडां नानुसन्धत्त इत्यादिप्रथमपक्षानुकूलतर्कान्प्रति धावति किं संसर्गजा दोषगुणा भवन्तीति न्यायाद्यथास्मद्धृदयमतिकोमलमप्यस्मत्कठोरकुचसंगेनातिकठोरमभूत्तथा त्वत्पदाम्बुजमप्यतो न व्यथते किंवा सुकुमारसङ्गे न कूर्पादयः कोमलतां गताः। किंवा भूमिरेव कारुण्यान्माधुर्य्यरसास्वादनाय पादाधः स्वजिह्वां स्थापयति किंवा कयाचिदिन्द्रजालविद्यया भूमिं न स्पर्शयतीत्यादि द्वितीयपक्षतर्कान्प्रति धावति ननु मिथ्येदं प्राणधारणादितिचेत्तत्राहुः भवत्येव समर्पितमायुर्यासामतः सुखिनि त्वयि स्थितत्वान्न नश्यन्तीति भावः। मानिनीपक्षे अतिकोमलचित्तस्य परमसुकुमारावयवस्य स्वभावविपर्य्ययमालक्ष्य वयमति व्याकुलाः सम्पन्नाः। किंकुर्म इत्याशयेनाहुः। यदिति। कुचानां कठोरत्वाच्चरणस्यातिसुकुमारत्वाद्धारणे भयं तत्र तत्तद्धारणे प्रीयसे इति कृत्वा प्रियसे इति कृत्वा तद्धारणं यतो हे प्रिय! तथाच्च तव संयोगोऽप्यस्माकं दुःखहेतुरेव यतः कुचानां कठोरत्वे तव पादपीडाप्रयुक्तं दुःखं व्रतादिना तत्कोमळत्वप्रार्थनायां तव दुःखानुसन्धानेन दुःखमिति भावः। तादृशेनापि त्वमटवीमटसि तत्तु निश्चयेन व्यथत एव तत्तस्मिन्नपि दया नोत्पद्यतेऽतस्तव स्वभावविपर्य्ययमालक्ष्यास्मद्धीर्भ्रमति मरणावस्थां गन्तुं प्रवृत्ता त्वन्त्वस्मद्विरहितो विशिष्टास्मदायुभिरपि चिरं सुखेन विहरेत्याशयेनाहुः। भवत्यर्पितायुषामिति। निवृत्तिपक्षे। जीवरूपेण संसरणं तन्नास्मभ्यं रोचते पुनरपि वदाम इत्याशयेनाहुः। यदिति। तव पदं ब्रह्मणा साधकानुग्रार्थं प्रकटितं सगुणस्वरूपे सुजातचरणाम्बुरुहे यस्य तदपि कठिनानुष्ठाने प्रतिपादकेषु स्तनस्थानी येषु कर्मोपासनाप्रतिपादकयोग्येषु अहो निर्गुणस्य निरवयवस्य कथमर्चनादिक प्रतिपादयाम इति भीताः सत्यः शनैः सांधकानां चित्तशुद्ध्यादिक्रमेण तत्त्वज्ञानोदयार्थं दधीमहि तेनैव जीवत्वं प्राप्तेन रूपेण संसाराटवीमटसि तत् किंस्विन्न व्यथते किन्तु व्यथत एव तत्रत्यैः कूर्पादिस्थानीयैराध्यात्मिकादिदुःखैः यद्वा किं व्यथते नवेति अस्माकं धीर्भ्रमति अनेन संसारस्यानिर्वचनीयत्वं बोधितं यतो भवद्बोधार्थमेवास्माकं प्रादुर्भावोऽत एवं वदाम इत्याहुर्भवदिति॥ १९॥

इति श्रीपरमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिमिश्र-
सूरिकृतायां भागवतगूढार्थदीपिकायां दशमस्कन्धे एकत्रिंशोऽध्यायः॥ ३१॥

रास-रहस्यम्

र० टी०—हे प्रिय! हे परमप्रेमास्पद! ते तव सुजातचरणाम्बुरुहं अम्बुरुहवत् सुष्ठुरुहवत् सुष्ठुजातानि चरणानि किरणानि आत्मज्योतिंषि तानि, कर्कशेषु विविधतर्कशास्त्रचिन्तनेन विक्षिप्तेषु, स्तनेषु तत्स्थानीय हृदयेषु, अत्र चरणाम्बुरुहमिति आधेयस्य एकवचनेन स्तनेष्विति आधाराणां बहुत्वनिर्दिशेन चरणाम्बुरुहस्य विभुत्वं द्योतितं, भीताः विक्षिप्तचित्तेषु त्वं स्थास्यसि न वा इति शङ्कया भीताः, शनैः दधीमहि शनैः विधारयामः, तेन एवम्भूतेन प्रकाशेन युक्तोऽपि यदा अटवीमटसि संसारारण्यं भ्रमसि "एकोऽहं बहुस्यामि"ति बहुरूपेण वर्तसे तत् तदा कुर्पादिभिः तत्स्थानीयविविधशरीरधारणादिभिः, किंस्विन्न व्यथते? जीवत्वदशायां आध्यात्मिकादिदुःखैर्क्लिश्यते न वा? इति भवदायुषां भवानेव आयुर्जीवनं यासां तासां त्वदेकनिष्ठानां, न अस्माकं धीः बुद्धिः, भ्रमति किं कर्तव्यविमूढा भवति॥ १९॥

इति रहस्ये तृतीयोऽध्यायः॥ ३०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या आहुः। यदिति। हे प्रिय! ते तव सुजातं सुष्ठु जातं निरतिशयसुन्दरं चरणरूपमम्बुरुहं कमलमित्यर्थः। कर्कशेषु कठिनेषु सम्भ्रमभयाच्छनैर्दधीमहि धारयेम वयम् तेन सुजातचरणाम्बुरुहेणाटवीमटसि गच्छसि तत्सुजातं चरणाम्बुजं

कूर्पादिभिः सूक्ष्मपाषाणादिभिः किं स्विन्न व्यथते अपि तु व्यथते एव, अतो भवदायुषां भवानेवायुर्जीवनं यासां तासां नो धीर्भ्रमति अस्वस्था भवति ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकत्रिंशाध्यायार्थप्रकाशः ॥ ३१ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

काचिद्राजसतामसी सखेदमाह । यत्तइति । सुजांत यच्चरणाम्बुरुहं चरणकमलं भीताः सत्यः स्तनेषु शनैर्दधीमहि शनैर्द्धारणे हेतुः कर्कशेष्विति । प्रियेतिसम्बोधनात् स्नेहाद्धारणं सुजातमिति यथा महत्सम्यक् प्रकारोत्पन्नं शीतलं सुगन्धितापनाशकं भवति अतःस्तनेषु स्थापनं प्रियत्वात् धाष्टर्येन स्थापनं तेन वातिकोमलेन अस्मान् त्यक्त्वा अस्मद्दोषेण इदानीमटवीमटसि स्वयमस्मद्दुःखेन स्थित्वा यद्यन्यस्मै दुःखं दातुं शक्नुयात् तर्हि प्रयच्छेत् नतु स्वयमपि दुःखं प्राप्य तत्रास्माकं संदेहः कि व्यथते नवेति स्विदित्युत्प्रेक्षायां किं न व्यथते अपि तु व्यथत एव कूर्पादिभिः शर्करादिभिः कूर्पशब्देन विषमाः शर्करा उच्यन्ते तर्हि व्यथत एव कथमुत्प्रेक्ष्यते तत्राहुः । भ्रमति धीरिति । बुद्धिः केवलं परिभ्रमति यदि व्यथत इति निश्चयः स्यात् तदा बुद्धिः शान्तैव भवेत् पुनर्यदा याति तेन संदेहः तत्र हेतुः भवदायुषामिति । भगवल्लीलार्थमेवायुर्यासां पूर्वन्तु खेदेन मनःपीडा निरूपिता इदानीन्तु मूर्छा निरूप्यत इत्यन्तस्थितिः एवं सर्वासां मूर्च्छापर्यन्तं स्थितिर्ज्ञातव्या पुनर्लीलाप्रवेशे प्रलापः पुनः स्वरूपस्थितौ गानमिति एवं साधनपरीक्षयोर्यावत्तावत् तासां तापो निरूपितः ॥ १९ ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे अष्टाविंशाध्यायविवरणम् ॥ २८ ॥ ३१ ॥

श्रीसुबोधिनी–सारः

हे प्रिय यत्ते तव सुजातं सुकुमारं चरणाम्बुरुहं पादाब्जं कर्कशेषु कठिनेषु स्तनेषु शनैर्दधीमहि भीता वयं धारयामः तेन पदाब्जेन त्वम् अटवीं वनमटसि भ्रमसि तत् कूर्पादिभिः पाषाणशर्करादिभिर्न व्यथते किं स्वित् कथं न व्यथते नामेति भवानेवायुर्जीवनं यासां तासां नोऽस्माकं धीर्बुद्धिर्भ्रमति ॥ १९ ॥

इति श्रीमद्भागवते दशमस्कन्धे सुबोधिन्यां टीकायामेकत्रिंशोऽध्यायः ॥ ३१ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

एतावन्निरूपणेन भगवत्प्राप्तौ भक्तकृतसाधनस्य यावती पराकाष्ठास्ति तावत्युक्ता जाता, भगवता च भक्तानां स्नेहपरीक्षायां क्रियमाणायां यावती तस्याः पराकाष्ठा, साप्युक्ता आतेत्युपसंहरन्ति एवं साधनेति । अत्र यावत्तावदित्यव्ययपदे । तथा चोक्तरीत्या साधनपरीक्षयोर्यावत्स्वरूपं तावद्रूपस्तापो निरूपित इत्यर्थः ॥ १९ ॥

इत्यष्ट विशोऽध्यायः ॥ ३० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अतिप्रेमधर्षिता रुदन्त्य आहुः—यदिति । हे प्रिय ! ते तव यत् सुजातं सुकुमारं चरणाम्बुजं कर्कशेषु कठिनेषु स्तनेषु भीताः सम्मर्दनशङ्किताः सत्यो वयं शनैःशनैर्दधीमहि धारयेम, तेन चरणेनाटवीमटसि विचरसि, 'विचरसि, 'नयसि' इति पाठे तु अटवीं प्रति काचिदन्यां वा आत्मानमेव वा नयसि तदा तत् पदाब्जं कूर्पादिभिस्तीक्ष्णसूक्ष्मपाषाणादिभिः किं स्विन्न व्यथते कथं तु नाम न व्यथते इति नोऽस्माकं धीर्भ्रमति चाञ्चल्यं गच्छति । तत्र हेतुमाह—भवदायुषामिति । भवानेवायुर्जीवनं यासां तासामित्यर्थः ॥ १९ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोषवर्णने । एकत्रिंशो गतो वृत्ति गोपीगीतनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

यदिति ॥ हे प्रिय ! ते तव यत्सुजातं सुकुमारं चरणाम्बुजं कर्कशेषु कठिनेषु स्तनेषु भीताः सम्मर्दनशङ्किताः सत्यो वयं शनैः शनैर्दधीमहि । धर्तुं योग्यमित्यर्थः । "अर्हे कृत्यतृचश्च' इति चाल्लिङ् । तेन चरणेनाटवीमटसि विचरसि । नयसीति पाठे तु अटवीं प्रति काञ्चिदन्यां वा आत्मानमेव वा नयसि तदा तत् पदाब्जं कूर्पादिभिस्तीक्ष्णाग्रसूक्ष्मपाषाणादिभिः किंस्विन्न व्यथते कथं तु नाम न व्यथते इति भवानेवायुर्जीवनं यासां तासां नोऽस्माकं धीर्भ्रमति चाञ्चल्यं गच्छति ॥ १९ ॥

इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायामेकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथातिप्रेमविस्फुटितहृदयारुदत्यः प्रोचुः यदिति हे प्रिय यत्ते तवसुजातं सुकोमलं पादपद्मं कर्कशेषु कठिनेषु स्तनेषु भीताः संजातपादव्यथा शंकाः वयं शनैः शनैः दधीमहि अस्माभिः धारणीयमित्यर्थः अर्हे कृत्यतृचश्चेत्यर्हार्थो लिङ् तेन कोमलपादेनाटवीं मार्गं प्रत्यटसि गच्छसि नयसीति पाठेऽयमेवार्थः नयगताविति स्मरणात्। अतस्त्वत्पादपद्मं कूर्पादिभिः सूक्ष्मपाषाणशकलादिभिः किंस्विन्न व्यथतेऽपि तु व्यथत एव अतो भवदायुषां भवानेव आयुर्जीवितं यासां तासां नोऽस्माकं धीबुद्धिः भ्रमति वैचित्यं प्राप्नोति अतोऽत्र मृदुस्थाने आगत्य मृतप्रायाणामस्माकं जीवनरूपं दर्शनं युष्माभिर्देयमित्यभिप्रायः ॥ १९ ॥

इति श्रीशुद्धकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानदस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने रासक्रीडायां गोपिकागीतं नाम एकत्रिंशोऽध्यायः ॥ ३१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अतिप्रेमधर्षिता रुदन्त्य आहुः ॥ यदिति ॥ हे प्रिय, यत् ते तव, सुजातचरणाम्बुरुहं सुकुमारं पादाब्जं, तत् नोऽस्माकं, कर्कशेषु कठिनेषु, स्तनेषु कुचेषु, भीताः सम्मर्दशङ्किताः सत्यः, शनैः दधीमहि धारयेम। तेन पदाब्जेन, अधुना अटवीमरण्यं, अटसि चरसि। नयसीति पाठे, अटवीं प्रति, पशूनामात्मानं च नयसि प्रापयसि। तत्पदाब्जं, कूर्पादिभिस्तीक्ष्णसूक्ष्मशिलाश्मादिभिः. न व्यथते किंस्वित्। कथं नु नाम न व्यथतेऽपि तु व्यथते एवेत्यर्थः। इत्येवं, भवानेवायुर्जीवनकालो यासां तथाभूतानां, त्वदधीनजीवितानामित्यर्थः। नोऽस्माकं, धीः भ्रमति स्वस्था न भवति ॥ १९ ॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे एकत्रिंशोऽध्यायः ॥ ३१ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यत्ते सुजातेति : १०.३१.१९.

सद्यस्तनातिकठिनत्वसहं न भूयादेतत्ततो विरचितो न तथा विहारः।
सद्यस्तनोज्ज्वलतराब्जदलोपमेन पादेन तेन कथमाक्रमसि ह्यरण्यम् ॥ २९९ ॥
यन्मार्दवातिशयितामवलोक्य पद्मं त्वत्कामिनितनुजयोः शरणं बभूव।
तत्ते पदाम्बुजमनर्हवनभ्रमेषु शक्तं भवेत् कथमलं भ्रमतीति चित्तम् ॥ ३०० ॥
भुजङ्गेशोऽप्यङ्कं निजमकृतभङ्गं रचयति विहङ्गोऽपि स्वाङ्गं मृदुमृदु समुत्तुङ्गसुभगम्।
यदुद्धृत्यैतत्ते पदमिदमरण्ये स्थपुटिते कथं सञ्चारि स्यादिति सदय खेदो मनसि नः ॥ ३०१ ॥
निःशेषयातरजसि प्रसृतप्रकाशे चित्तेऽपि संविशति योगविदां शनैर्यत्।
तत्ते पदं शितशिलाशकलप्रकीर्णे देशे भृशं सरजसि भ्रमतीति चित्रम् ॥ ३०२ ॥
यः शेषे कमलाकुचे च चरणश्चित्तेऽपि वा योगिनां मन्दं मन्दमुपैति मार्दववशात् तद्दाढ्यमालोचयन्।
तस्यास्तं यदिहाधुना गिरिदरीक्षोणीषु विद्रावणं तद्धेतुर्ननु गोपिका इति वचःशल्यं मनः कृन्तति ॥ ३०३ ॥
लोके कथञ्चिदपि नाम चरन्तु लोकाः प्रारब्धकर्मकलिता हि भवन्ति सर्वे।
प्रारब्धकर्मरहितोऽपि विभो त्वमत्र स्वारब्धकर्मवशतो भ्रमसीति चित्रम् ॥ ३०४ ॥
मत्स्या-ऽच्छ-कच्छप-वराह-नृसिंहवेषेष्वप्यस्ति मे वनरतिर्नहि नूतनाऽद्य।
सत्यं प्रभो वद तथैव निजं व्यलोकं तत्र स्थितं तमवनानवनप्रकारम् ॥ ३०५ ॥
काम भ्रमाम्यहमिहाद्रिगुहागमेषु किं वा मयाऽपकृतमत्र च वोऽपनीतम्।
नैवं वदांशिकमपीशजगत्यगूढं सर्वांशतो वयमहो भवदायुषः स्मः ॥ ३०६ ॥
अस्मन्मोहाद्भवन्मोहस्त्वद्भ्रमात् संभ्रमा वयम्। इत्यन्योन्यं पश्य पूर्णं यत्त्वमेकायुषो वयम् ॥ ३०७ ॥
न भ्रमोऽस्तु तवापीश न च माहोऽपि नः क्वचित्। नात्रान्यत् साधनं किञ्चिदावयोः सङ्गम विना ॥ ३०८ ॥
प्रमादादप्रमादाद्वा न न्यस्तं त्वत्पदं स्तने। विधाय करुणामीश तत्सुखं दिश सम्प्रति ॥ ३०९ ॥
यत्त्वां कान्तमनङ्गभोगचतुरं भोगोपलब्धाच्छया वाञ्छामो वयमित्यनच्छचरितादस्माकमाकस्मिकात्।
जातोऽधर्म इति प्रभो स्वमनसा संचिन्त्य नास्माञ्जहि यत्तादृश्यपि नः पदान्यभिलषन्त्यन्तः सुधर्माश्रिताः ॥ ३१० ॥
विना तव पदाश्रयं भुवि न जातु शब्दस्थितिः प्रभो त्वयमकुण्ठितः श्रुतिषु डिण्डिमः श्रूयते।
स्फुटास्मदतनूदितं लसति शब्दजातं परं पदं तु नहि दृश्यते कथय नाथ चैतत्कथम् ॥ ३११ ॥

मत्पादोऽशनिरूप एवमवदस्त्वन्तन्मृषा यत्स्फुटीभावं याति न गर्जितार्दनरवे मेघो दयेऽस्मिन् प्रभो।
किं चास्मत्सविधागतावपि विलम्बान्मन्दभावोऽस्य हि स्पष्टः स्याद्यदि सत्य एव स तथा दुःखाद्रिभङ्गं कुरु ॥ ३१२ ॥
स्वकीयजनहेलनं न सहतेऽल्पकोऽपि क्वचित् प्रभुस्त्वमखिलस्य सन् कथमिदं सखे पश्यसि।
निशाऽसमशरापगा हिमकरादिभिर्हास्यतां रसस्त्वदधिदैवतो ध्रुवमनायि नश्चित्तगः ॥ ३१३ ॥
दयानिधे स्वाश्रयगा कथं वा सद्भक्तृता व्यक्ततमा विधेया। यदच्युतास्माभिरगायि गीतं शृणोषि तन्नो सदसद्ब्रवीषि ॥ ३१४ ॥
त्रपां तिरस्कृत्य वचोविरोधिनीं हठात् पुरस्कृत्य गिरं नटीमिव।
त्वत्प्रीतये गीतमिदं मनोहरं सुज्ञोऽसि तन्मानय मानयाश्रुतिम् ॥ ३१५ ॥
आकोटिद्रव्यविश्राणनरचितपणानां पुरस्तान्न कार्यं मूर्खाणां स्वीयरत्नाधिकसुषमगुणोद्घाटनं बुद्धिमद्भिः।
दत्वा स्वार्थं रसज्ञान्निजसरसगुणान् श्रावयेदीश तत्ते प्रीत्यै गीतं त्वमेको यदसि भुवि विभो मुख्यगीतार्थवेत्ता॥ ३१६ ॥
न हावो न भावो न यत्रानुभावः कथं तद्धि गीतं प्रभो मा वदैवम्।
यतो वैदिकैर्मन्त्रतः सर्वपूजां चरद्भिर्जने दर्शितो राजमार्गः ॥ ३१७ ॥
गीतं सम्प्रति गोपिकाभिरुचितं गीतं प्रभो चेतसि मैवं मानय गोपिकाभिरुचितच्छ्रुत्याऽस्य किं मे फलम्।
यच्चेतो भुवि रागितां जनयति श्रुत्या च यस्यानिशं श्रोतॄणां भवति प्रसन्नरतामोदः सुरागास्पदः ॥ ३१८ ॥
श्रीकान्त शान्तमनसः सततं स्वभावो भात्येष यत्परिजनार्तिहृतौ प्रवृत्तिः।
शान्तैकसेवितपदस्य निशान्तभाजः सायं निशान्तसमये भवतो न कस्मात् ॥ ३१९ ॥
दिवापद्मोल्लासो निशि तु कुमुदाभासनमिति प्रसिद्ध्याऽहोरात्रे भुवि तव तु सिद्धः सुखरसः।
रमा भूमिप्रीतिप्रद तदिह याचामह इदं त्वमस्मद्गीतार्थं झटिति पदरागं वितर नः ॥ ३२० ॥
त्वं ध्यातो भुजगाधिपेन मुनिना वाल्मीकिना कीर्तितो व्यासेन प्रणुतोऽसि यस्त्वमनिशं गीतो विरञ्च्यात्मजैः।
किं ध्यानं किमु वर्णनं च किमु वा स्तोत्रं च गीतं च किं तस्यास्माभिरहो विधेयमधुना श्रीनाथ मुग्धात्मभिः ॥ ३२१ ॥
यच्चिन्तनं साङ्गमबोधि साधुभिः यत्कीर्तनं वा शरणार्थनादिकम्।
न ज्ञायते तस्य लवोऽप्यधोक्षजस्तव्या प्रभुश्रीरिति कीर्तितोऽस्यलम् ॥ ३२२ ॥
ज्ञान-कर्मेन्द्रिय-प्राण-चित्त-बुद्ध्यहमादिभिः। गतीस्त्वमीश येनेमं जीवं रक्षायुरर्पणात् ॥ ३२३ ॥
इत्येवं बोधयन्त्यस्ता गोपिका गोपतिप्रियाः। ऊनविंशतिसुश्लोकैरगायन् गीतमुत्तमम् ॥ ३२४ ॥
योगोऽथोपासना धीस्तदनु च भवति ज्ञानवैराग्यलाभो ज्ञानं त्रैकालिकं चाप्यनुभवति सदेत्यादितस्तच्चरित्रात्।
युक्तोऽर्थोऽयं निरुक्तो विशदत्रिमुपदप्राप्तिकार्यार्षवाचा भात्येवं तत्सुधीभिर्विशदमनुपदं दृश्यतामुज्झितेर्ष्यम् ॥ ३२५ ॥
विषजलाप्ययेत्यादिभूतगं बृषमयात्मजेत्याद्यनागतम् जयति ते वचोवर्त्तमानगं न खलु गोपिकेत्यादि सर्वगम् ॥ ३२६ ॥
पृच्छामि त्वामहं श्रीश सत्यमत्रोत्तरं वद। मदादृताभिर्गोपीभिर्गीतस्त्वं समया न किम् ॥ ३२७ ॥
गोपीगीतं समाकर्ण्य यथा प्रत्यक्षतामगाः। तद्गीतमेव मद्गीतं तन्मेऽध्यक्षसुखं दिश ॥ ३२८ ॥

श्रीशकल्पतरु क्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने एकत्रिंशोऽध्यायः ॥ ३१ ॥

कृष्णप्रिया

अब तामस राजस गोपियों का वृथ नाथ को निवेदन करता है—हे प्यारे ? आप के सर्वोत्तम चरण कमल को हमारे कठोर वक्षःस्थल में अत्यन्त संकोच एवं सुकोमल चरणकमल को कष्टकर न बन जाय, इस प्रकार के डर के साथ धीरे धीरे पधराती है, आप उन सुकुमार चरण कमलों से जब वन प्रदेश में विचर रहे हैं, तब वनके कंकर कांटे दूर्वाङ्कुरादि से आप को कितनी वेदना होती होगी ? ऐसा विचार मात्र से हमारा चित्त हमारी अत्यन्त खिन्न हो जाती है भ्रमित बन जाती क्योंकि आप ही हमारे जीवन हो और हमारा जीवन भो आप के लिए ही है ॥ १९ ॥

श्रीमद्भागवतदशमस्कन्धनिरोधलीलान्तर्गत-तामस प्रकरण के फल प्रकरण का गोपीगीत नाम का
भगवद् यशोधर्म निरूपक ३१ वाँ अध्याय सम्पूर्ण ॥ ३१ ॥

* * *

द्वात्रिंशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
२२	१६	६	३	७९६	१७	४२	८५५	२६॥	७

श्रीशुक[1] उवाच

इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा । रुरुदुः सुस्वरं[2] राजन् कृष्णदर्शनलालसाः ॥ १ ॥

कर्वमक्षमा

अन्वयः—श्रीशुक उवाच—हे राजन ? कृष्णदर्शनलालसाः, गोप्यः, इति, प्रगायन्त्यः, च, चित्रधा, प्रलपन्त्यः, सुस्वरम्, रुरुदुः ॥ १ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

द्वात्रिंशे विरहालापविक्लिन्नहृदयो हरिः । तत्राविर्भूय गोपीस्ताः सांत्वयामास मानयन् ॥ १ ॥
स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः । सदयं नन्दयन्गोपीरुद्गतो नन्दनन्दनः ॥ २ ॥

इति गोप्य इति । इत्येवं प्रभृति चित्रधा अनेकधा । सुस्वरमुच्चैः कृष्णदर्शने लालसाऽतिस्पृहा यासां ताः ॥ १ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यथा गोपीनामुपासनयात्मानं प्रकाशितवांस्तथा साधनसामग्र्या ज्ञानिनामपीत्यर्थं दर्शयितुमग्रिमाध्यायरम्भ इति । विक्लिन्नहृदयः द्रवद्धृदयः । तत्र गोपीसमाजे । ताः विरताः । सान्त्वयामास प्रेमवाक्यैः प्रीणयामास (१) स्वप्रेमामृतकल्लोलैर्निजानुरागाम्बुमहदूर्मिभिर्विह्वलीकृतं विवशं चेतो यासां तास्तथा ताः । 'अथोर्मिषु महत्सूल्लोलो' इत्यमरः । उद्गत आहिर्बभूव(२) । पूर्वं त्वनवकाशतया दूरे स्थिताः पश्चादसावधानानां मूर्छितानां कण्ठेषु मूर्तिमन्तः स्वराः सप्त प्रविष्टा इत्याह—सुस्वरमिति ॥ चित्रधा आश्चर्यतालतानादिप्रकारेण गायन्त्यः अतिवैवश्योद्रकात्प्रलपन्त्यश्च सुस्वरं रुरुदुः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति शब्दः प्रकारवचनस्तस्मादेवं प्रभृतीत्येवार्थः । प्रकर्षेण प्रेमोद्रेकादुच्चैर्गायन्त्यः कदाचित् प्रकर्षेण लपन्त्यश्च । किम्वा विरहव्याकुलतया किञ्चिदनर्थकं जलपन्त्युः चित्रधेत्यस्य पूर्वेण परेणाप्यन्वयः । सुस्वरं करुणदीर्घस्वरेणेत्यर्थः । हे राजन्निति तद्दर्शने लालसया तद्युक्तमेवेत्यार्त्तिसम्बोधनम् ॥ १ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

'इति'—उक्तप्रकारेण पूर्व्वोक्तमन्यच्चेत्यर्थः, अतएव तैर्व्याख्यातम्—इति एवं प्रभृतीति, एतदादिकमित्यर्थः; यद्वा, चित्रधेत्यस्य विशेषणम्, उक्तबहुप्रकारेणेत्यर्थः । प्रकर्षेण प्रेमोद्रेकादुच्चैर्गायन्त्यः, कदाचित् प्रकर्षेण लपन्त्यश्च; यद्वा विलपन्त्यः किम्वा विरहव्याकुलतया किञ्चिदनर्थकं वचो वदन्त्यः चित्रधेत्यस्य पूर्व्वेण परेणापान्वयः । सुस्वरं करुणदीर्घस्वरेणेत्यर्थः । कृष्णस्य चित्ताकर्षकस्य दर्शने लालसा यासामिति रोदने प्रयाणादौ वा सर्व्वत्र हेतुः । हे राजन्निति तद्दर्शने लालसया तद्युक्तमेवेत्यस्यार्त्तिसम्बोधनम् । अन्यत्तैर्व्याख्यातम् । 'तत्र' इति गोप्य इतीत्यधिकं लेखकभ्रमादिति । अथवा कृष्णदर्शनलालसा अपि अधुना तदनादरेणेति । एतत् पूर्व्वोक्तं श्रीराधादेवीगीतमेव, सर्व्वाः प्रकर्षेण तद्विद्धचित्ततया परमासक्त्या गायन्त्यः प्रकर्षेण लपन्त्यश्च; अन्यत् समानम् ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं गोपीनां गानमुपवर्णितम् अथैवं गायन्तीर्गोपीरनुजिघृक्षोराविर्भूतस्य भगवतो दर्शनहर्षजां तासां विक्रियां सरससाक्षेपसंलापां तां क्रीडाञ्चानुवर्णयति द्वात्रिंशेन । इतीति । इत्थं भगवतो गुणान् गायन्त्योऽनेकधा प्रलपन्त्यश्च हे राजन् ! कृष्णदर्शने लालसा ऽतिस्पृहा यासां ताः सुस्वरं यथा तथोच्चैः रुरुदुः ॥ १ ॥

---

१. बादरायणि—प्रा. पा. । २ सुस्वरा—त. पु मूले ।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यथा गोपीनामात्मानं प्रकाशयन् भगवांस्तथा साधनसामग्र्या ज्ञानिनामपीतीममर्थं दर्शयितुमस्याध्यायस्य प्रारम्भः तत्र शुकः रोदनादिकमपि भक्त्युद्रेकलक्षणमिति दर्शयितुं गोपीनां रोदनप्रकारं कथयति। इतीति। चित्रधा नानाविध्येन सुस्वरं यथा श्रोतृसुखकरं भवति तथा स्वरं कुर्वत्यः। अनेन परिदेवनादिकं व्यावर्त्तयति ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतो क्रमसन्दर्भः

शौरिः शूरवंशाविर्भूतत्वेन प्रसिद्धोऽपि तासामेवाविरभूत् सर्वतोऽप्यपूर्वादाविर्भावादित्यर्थः ! साक्षान्मन्मथाः नानाचतुर्व्यूहस्थाः प्रद्युम्नास्तेषां मन्मथः चक्षुषश्चक्षुरितिवन्मन्मथत्वप्रकाशक इत्यर्थः ॥ १–३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ गानानन्तरं प्रलापो जातः पश्चाद्रोदनमपि जातमित्याह—इतीत्यादि। प्रकर्षण रागादिसम्बलिततया गायन्त्यश्चित्रधा प्रलपन्त्य उन्मत्ता इव शून्यं लपन्त्यः सुस्वरं यथास्यात्तथा रुरुदुः। सौस्वर्यं स्वाभाविकम् न तु बुद्धिपूर्वकम् ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

द्वात्रिंशे हरिरायातः स्वाङ्गभावां शुकोक्तिभिः। पूजितः प्रतिपूज्यैताः प्रेमोक्त्या झणितामधात् ॥

चित्रधा आश्चर्यतानतालादिप्रकारेण प्रगायन्त्यः अतिवैवश्योद्रेकात् प्रलपन्त्यश्च सुस्वरं रुरुदुः ॥ १ ॥

रसिकाह्लादिनो–टीका

एवं दशम्यवस्थान्तरवर्तिनीनां अनर्थकं किंचित्प्रलपन्तीनां रोदनप्रकारं श्रीशुकः कथयति इति, एवं तदादिप्रकारेण पूर्वोक्तेन प्रगायन्त्य उच्चैर्गायन्त्यः कदाचिन्मध्ये प्रलपन्त्यः अनर्थकमनन्वितं वचः कथयन्त्य एवं प्रकारो मया कथितः ततोऽपि चित्रधेति उभयत्र सम्बध्यते। एवमपि यदा न प्रादुर्भावितस्तदा सुस्वरं करुणोत्पादकस्वरसहितं यथा भवति तथा रुरुदुः हे राजन्निति सम्बोधनं तासां विरहार्त्तिभराधिक्येऽवधानं कुर्विति। सर्वधाधने वैफल्यं जाते रोदनमेवावशिष्टं कृष्णाकर्षणकर्मिति विचार्य तदेव चक्रुरिति। तत्र हेतुः कृष्णदर्शनलालसाः कृष्णदर्शने लालसाऽत्यौत्सुक्यं यासां ताः नतु पत्यादिशुश्रूषणे देहरक्षणादौ चेति ॥ १ ॥

विशुद्धरसदीपिका

इतीति। प्रकारवचनोऽयम् एवं प्रकारकं प्रकर्षेण गायन्त्यः तथा वितर वीर नस्ते धारमृतमित्यादिकं विरहव्याकुलतया प्रजल्पन्त्यश्च चित्रधेत्युभयान्वयि सुखरं करुणदीर्घस्वरेणेत्यर्थः। हे राजन्नित्यार्त्तिसम्बोधनं तद्दर्शनैकलालसानामीदृशमधीरत्वं युक्तमेवेति भावः यद्वा तासामत्यन्तार्तिं श्रुत्वातिदुःखमूर्च्छितं राजानं सम्बोधयति सोऽयमाविर्भूत इत्यर्थः ॥ १ ॥

श्रीरामनारायणकृता भावभावविभाविका

वन्दे स्वेष्टौ रमावेशावुमामहेशौ गुरून् गिराम्। गणेशं वैष्णवान् विप्रान् विन्दो विश्वं वपुर्हरेः ॥

आसामहो चरणरेणुजुषामहं स्यां वृन्दावने—
किमपि गुल्मलतौषधीनाम्।
या दुस्त्यजं स्वजनमार्य्यपथञ्च हित्वा—
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥

पञ्चाध्याय्याश्चतुर्थेऽस्मिन् गोपीकरुणया हरिः। सान्त्वयामास ता गोपीस्तत्प्रश्नोत्तरकीर्तनैः ॥

प्रेमपथाचार्य्यरूपा गोप्यः सप्रार्थनगुणगानरूपं भगवत्करुणोद्बोधकतया तत्प्रापकं मुख्यं प्रेमाङ्गभूतं धर्मं स्वचरितेनैवोपदिश्याधुना नित्यं कृपालुतया सर्वप्राणिषु नित्यं वर्त्तमानायाः प्रार्थनागुणगानादि पूर्वोपदिष्टसर्वधर्म्मैरुद्भूता यास्तत्कृपायाः पात्रत्वापादकं दैन्यमेव यथा सर्वत्र साम्येन वर्षतोऽपि मेघस्य तुल्यनिप्रतितमपि जलं निम्ने एव संगृहीतं भवति नोच्चस्थले तथा सर्वसमानोद्भूतापि तत् कृपा दीने एव स्थिरा भवतीत्युपदिशन्त्यस्तथा यद्यद्गृहे नास्ति तद् दृष्ट्वा तस्य चमत्कृतिर्भवति भगवतस्तु सर्वथापूर्णत्वान्न किमपि तच्चमत् कृतिजनकं किन्तु तस्येश्वरत्वादेव सत्यं दैन्यं नास्तीति सत्यदैन्यदर्शने चमत्कृतिसम्भवादावश्यकस्तदाविर्भाव इत्यपि द्योतयन्त्यो रुरुदुरित्याह मुनीन्द्रः इति गोप्य इति अत्रेति प्रकारनिर्देशे इत्युक्तप्रकारेण प्रगायन्त्यस्तत्र गानस्य प्रकृष्टत्वं प्रेमविह्वलचित्तेन गद्गदकण्ठेन जातरोमाञ्चादिभावतया गानेन स्वरतालाद्यभिज्ञतामात्रेण स्वरसौष्ठवन्तु यासां रोदनेऽपि किमु वाच्यं गाने इति भगवत्प्रापकगानस्य "मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद" ! इत्यादौ भक्तिसहकारित्वनिर्देशात् तदेव भाक्तविकलत्वमाह प्रलपन्त्यश्चेति। स्वीयविरहदुःखं निवेदन्त्यः चित्रधेत्यनेन विविधप्रगानप्रलापबोधकेन यथैकः प्रकारो मया दर्शितस्तादृगनेकविचित्रप्रकारैः प्रगानप्रलापौ कुर्वत्य इत्युक्तं गोप्य इत्यनेन स्वभावतो गोप्योऽपि स्वाभिप्रायशोकादिगोपनशीला अपि

प्रेमवैक्लव्येन स्वभावपरित्यागेन चित्रधा प्रलापपूर्वकं प्रगायन्त्य इति यद्वा कृष्णविहारसुखायैव यतः कृष्णदर्शनलालसा अतो गा इन्द्रियाणि यातुं शीलं यासां यथोक्तं केनापि कृष्णदर्शनविहाराशयैव स्वपादयोरुपरिबन्धनपूर्वकं कूपे प्रलम्बितेन भगवता तत्प्रेममाहात्म्यद्योतनाय काकरूपेण तन्मांसकृन्तनारम्भे काकं प्रति "काक सर्वं ! त्वया भोज्यं देहमांसं न मे यथा नेत्रद्वयेन भोक्तव्यमिच्छामि प्रियदर्शनमिति । ततः सकृष्णकाक एव कृष्णतयात्मानं तस्मै दर्शयामास तथाकामविरहचिन्ताग्निभिर्गवामिन्द्रियाणां दाहे कथं कृष्णदर्शनं तदुपलक्षितविहारादि भविष्यतीति तद्गुणगानामृतेन तद्रक्षां कुर्वत्यः यद्वा गोप्योऽपि गोपालप्रियसख्याऽप्येवमन्वेषणलीलानुकारगुणप्रगानादिनोत्पादितभगवन्महदनुग्रहा अपि तदनुग्रहस्य स्वात्मनि संग्रहाय सुस्वरं निर्ल्लज्जतया दीर्घस्वरेण कपाटभावादनर्गलाद्विगलितेन रुरुदुरतो दैन्यमेव तत्कृपाभाजनत्वापादकं राजन्निति प्रेमश्रिया राजमान ! यथा तव सार्वभौमश्रिया राजमानस्यापि न मद्दर्शनं दैन्यश्रिया राजमानस्यैव ममाविर्भावस्तथा श्रीपतिरपि दैन्यश्रियाप्रलोभितः ॥ १ ॥

श्रीवनपतिसूरिकृता भागवतगूढार्थदीपिका

द्वात्रिंशे गोपिकालापविक्लिन्नहृदयोऽच्युतः । तासामाविर्हितस्ताश्च पूजिताः प्रत्यपूजयत् ॥

इत्थं विरहव्याकुलचेतसां चेष्टावर्णनमुपसंहरति । इतीति । इत्येवं पूर्वोक्तप्रकारेण सर्वा एव गोप्यः प्रकर्षेणोच्चैः परमप्रेम्णा गायन्त्यः तथा चित्रधा अनेकप्रकारेण प्रलपन्त्यः विरहव्याकुलत्वादनर्थकान्यपि वचांसि प्रलपन्त्यः एवं कृतेऽपि यदा प्रेष्ठदर्शनं न जातं तदा सुस्वरं करुणोत्पादकदीर्घस्वरेण रोदनं कृतवत्यः एतत्सर्वं न स्वदेहरक्षाद्यर्थं किन्तु कृष्णदर्शने लालसा उत्कटोत्कण्ठा यासां ताः यथा दुःखितानां दुःनिवृत्त्यर्थं राजाग्र रोदनेन तां निवेदयति तद्वदिति सम्बोधनाशयः निवृपक्षे गोप्यः श्रुतयः मुख्याधिकारिणं प्रति प्रकर्षेणा मुख्यतात्पर्य्येण परमात्मानमेव गायन्त्यः कर्म प्रति प्रलपन्त्यः अनर्थकवचनत्वेन प्रतीयमानाः परमजडं प्रतिरुरुदुरहोमहामूर्खोऽयं सर्वकवचनत्वेन प्रतीयमानाः परमजडं प्रतिरुरुदुरहोमहामूर्खोऽयं सर्वथस्मद्विमुख इति रोदनमेव कुर्वत्यः अधिकार्य्यभाव उपदेशवाक्यानां रोदनरूपत्वाभिधानात् यतः कृष्णस्य सदानन्दरूपस्य परमात्मनो दर्शय जीवानां मोक्षार्थं भवत्विति लालसा यासां ताः आत्मा वा अरे द्रष्टव्य इत्यादि श्रुतेरित्यर्थः ॥ १ ॥

रास–रहस्यम्

र० टी०—इति पूर्वोक्तप्रकारेण "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।" इत्यादि श्रुत्यनुसारेण कृष्णदर्शनलालसा कृष्णस्य परमात्मनः दर्शने अस्माकं मोक्षो भवतु इति लालसा अभिलाषो यासां ताः सर्वा एव, गोप्यः वृत्तयः, राजन् भ्रमरकीटन्यायेन ज्योतिर्ध्यानपरायणत्वात् स्वात्मानमपि ज्योतिरूपेण प्रकाशयन्, उत्तमाधिकारिणं प्रति प्रगायन्त्यः प्रकर्षेण मुख्यतात्पर्यतया परमात्मानमेव गायन्त्यः "तत्त्वमसि ।" "अयमात्मा ब्रह्म ।" "प्रज्ञानं ब्रह्म ।" इत्यादि महावाक्यानि श्रावयन्त्यः, मध्याधिकारिणं प्रति चित्रधा विविधयुक्तिसहकारेण प्रकर्षेण लपन्त्यः शब्दजालं विस्तारयन्त्यः, विषयलम्पटनास्तिकानां प्रति तु सुस्वरं रुरुदुः सुष्ठु स्वरं सुस्वरं उच्चैः रुरुदुः "अहो महामूढोऽयं सर्वथा परमात्मविमुखा" इति ॥ १ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं गोपीभिः प्रार्थितः श्रीकृष्णः आविर्भूय ताः सान्त्वयामासेति द्वात्रिंशेनाध्यायेन वर्णयति । इत्येवं कृष्णदर्शने लालसा अतिस्पृहा यासां तास्तद्गुणान् गायन्त्यः चित्रधा अनेकधा प्रलपन्त्यः सुस्वरं यथा तथा उच्चैरुरुदुः ॥ १ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ यथा नक्तं व्यक्तो भक्त्या तुष्टः सन्गोपीगोपनं ततान तथाऽन्यानप्यवतीश्वर इति प्रतिपादयत्यस्मिन्नध्याये । तत्रादौ रौति नृत्यतीत्याद्युक्तभक्त्युद्रिक्ततां तासु दर्शयन् रोदनादिकं कथयति ॥ इतीति । कृष्णदर्शनतृष्णा गोप्य इति सुस्वरं यथा तथा गायन्त्यः स्वरतेस्तु स्वरो विष्णुरिति छान्दोग्यभाष्योक्तेस्तं विष्णुमुद्दिश्यैव सुगायन्त्य इत्यन्वयः । चित्रधा प्रकारप्रकारेण सुस्वरं श्रोतृकरुणाकरं वा प्रलपन्त्यश्च सुस्वरं सु अत्यन्तं स्वरावयवः श्वासा इति यावत् । अस्मिन्कर्मणि यथा तथा स्वे विष्णौ रमते यस्मात्स्वरो वायुरुदीरित इति तद्भाष्योक्तेः । रुरुदू रोदनं चक्रुः ॥ १ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एकोनत्रिंशके ऽध्याये प्रसादं भगवत्कृतम् । रोदनात्प्राप्य तुष्टास्ता निर्णयज्ञा इतीर्यते ॥
नहि साधनसंपत्त्या हरिस्तुष्यति कस्यचित् । भक्तानां दैन्यमेवैकं हरितोषणसाधनम् ॥
सन्तुष्टः सर्वदुःखानि नाशयत्येव सर्वतः । अतो निर्णयवाक्यानि भजनार्थं न्यरूपयत् ॥

एवं पूर्वाध्यायान्ते तासां स्तुतिमुक्त्वा ततः पूर्वाध्याये तासां प्रलापमुक्त्वोभयमप्युपसंहरन् तयोरसाधनतायां जातायां रोदनं कृतवत्य इत्याह । इतीति । पूर्वोक्तप्रकारेण सर्वा एव गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च जाताः अस्माभिरेकः प्रकार उक्तः तास्तु

चित्रधा विलापयुक्ता जाताः यदा तयोरसाधनत्वं जातं तदा सर्वाः सम्भूय महद्रोदनं कृतवत्यः रोदने निमित्तमाह । कृष्णदर्शनलालसा इति । नतु स्वदेहरक्षार्थम् ॥ १ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । इति एवं प्रगायन्त्यः चित्रधा बहुप्रकारेण प्रलपन्त्यः प्रवदन्त्यः कृष्णस्य दर्शने लालसा वाञ्छा यासां ता गोप्यः सुस्वरं यथा भवति तथा रुरुदुः हे राजन् ॥ १ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एकोनत्रिंशाध्याये एकोनत्रिंशक इति का २९५६–२९७६ । "मिथो भजन्ती"त्यादिना निर्णयकथने हेतुमाहुः **सन्तुष्ट** इति ।

इत्येकोनत्रिंशोऽध्यायः ॥ २९ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

द्वात्रिंशे गतशोकाभिर्गोपीभिर्यमुनातटे ॥ प्रादुर्भूतस्य कृष्णस्य संवादो विनिरूप्यते ॥ १ ॥

"नहि साधनसम्पत्त्या हरिस्तुष्यति कस्यचित् ॥ भक्तानां दैन्यमेवैकं हरितोषणकारणम्" इति सिद्धान्ताद् अन्वेषणादिसाधनसम्पत्त्या तदप्राप्तिं निरूप्य इदानीं तत्सन्तोषहेतुं गोपीनां दैन्यं निरूपयति –इतीति । हे राजन् ! कृष्णदर्शने लालसा अतिस्पृहा यासां ता गोप्य इत्येवमुक्तप्रकारेण चित्रधा अनेकप्रकारेण प्रगायन्त्यः प्रलपन्त्यः वदन्त्यश्च सुस्वरं यथा भवति तथा उच्चैरुरुदुरित्यन्वयः ॥ १ ॥

अन्वितार्थप्रकाशिका

द्वात्रिंशे कृपया कृष्ण आविर्भूय च गोपिकाः । असान्त्वयच्चाद्रियत श्लोका द्वाविंशतिर्मताः (२२) ॥
उवाचत्रयमङ्घ्रय्नास्तत्त्वसंख्या (२॰॥।) अनुष्टुभः ॥ ३२ ॥

इतीति ॥ हे राजन् ! कृष्णदर्शने लालसा अतिस्पृहा यासां ता गोप्य इत्येवमुक्तप्रकारेण चित्रधा अनेकप्रकारेण । धा आर्षः । प्रगायन्त्यः प्रलपन्त्यः वदन्त्यश्च सुस्वरं यथा भवति तथा उच्चैः रुरुदुः ॥ १ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अधुना द्वात्रिंशेऽध्याये रुदतीनां तासां मध्ये हरेराविर्भावं तत्सान्त्वनं च परस्परप्रश्नोत्तराणि च वर्णयन्नाह तत्रादौ गोपीनां हरेरतिशयदर्शनाभिलाषां दर्शयन्नाह इतीति । एवं प्रभृति चित्रधा अनेकधा प्रलपन्त्यो विरहव्याकुलतया अयोग्यमपि जल्पन्त्य सुस्वरं दीर्घस्वरं कृष्णदर्शने लालसाः अतिस्पृहा यासां ताः ॥ १ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विरहातापविक्लिन्नहृत् द्वात्रिंशे स्वयं हरिः । भूत्वाऽऽविस्तत्र ता गोपीर्मानयन् समसान्त्वयत् ॥ १ ॥
आत्मीयप्रेमपीयूषोल्लोलविह्वलितान्तराः । नन्दयन् सदयं गोपीर्नन्दसूनुः समुद्गतः ॥ २ ॥

एवं गोपीजनकृतगीतमुपवर्णितमथैवं गायन्तीर्गोपीरनुजिघ्रक्षोराविर्भूतस्य भगवतो दर्शनहर्षजां तासां क्रियां सरससाक्षेपसंलापां तां क्रीडां चानुवर्णयति ॥ इतीति ॥ इतीत्थं, प्रगायन्त्यः भगवतो **गुणान्** प्रकर्षेण गायन्त्यः, चित्रधा नैकधा, प्रलपन्त्यः प्रलापान् कुर्वाणाश्च गोप्यः, हे राजन्, कृष्णदर्शने लालसाऽतिस्पृहा यासां ताः एवंभूताः सत्यः, सुस्वरं यथा तथा; रुरुदुः । उच्चस्वरेण रोदनमाचरन्नित्यर्थः ॥ १ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

योगिदृश्यो भक्तवश्यो गोपीगीतः श्रुतिस्तुतः । यस्तद्वत्तस्वापरोक्षसुखस्तं श्रीशमाश्रये ॥ १ ॥
प्राप्तत्रिकालस्थितवस्तुबुद्धो सिद्धे समाधौ सति सत्सुखात्मा । प्रादुर्भवत्याशु ततो विकल्पाज्ञानप्रणाशो भवतीत्यबोधि ॥ २ ॥
स्थूलाल्पात्यल्पभेदैरिह हि निगदितोपासनाया भिदा तत् सञ्जातानन्दभोगाननुभवति जनः स्वाधिकारानुरूपान् ।
योगीवानन्दरूपेत्यनुपदलिखनाद् व्यञ्जितो योगिवर्यैर्गूढस्त्वर्थोऽयमत्रात्त्युतमतिगतिभिः प्रोह्य एव पुरोऽपि ॥ ३ ॥
शिष्टाऽहङ्कृतिरंशतो भवति सम्पूर्णे समाधावपि तत्कार्यं त्वखिलं प्रयाति विलयं साक्षात्कृते ब्रह्मणि ।
एवं पूर्णसमाधिबोधनपरो ह्यध्याय एष प्रभात्यध्यायान्तिमपद्यतः स्फुटतरं तज्ज्ञैः स्वदृष्टय क्ष्यताम् ॥ ४ ॥

इति गोप्य इति : १०.३२.१.

गोप्यस्थितिं यदुपतिं प्रसमीक्ष्य हार्दाद् गोप्यस्थितिं विदधिरेऽपि च ताः स्वकीयाम् ।
गीतोपदेशरसिकत्वमवेक्ष्य किं च गीतोपदेशमपि यद्विदधुः क्षमं तत् ॥ ५ ॥
आर्तः स्वरः प्रभुदयोदयकृद्यथास्मिंस्तुत्यर्चनादिविविधार्जविता न तादृक् ।
स्पष्टं यदत्र नुतिगीतिकृतोऽपि गोपीः प्रीतो बभूव सदयो रुदतीरवेक्ष्य ॥ ६ ॥

कृष्णप्रिया

पूर्व के दो अध्यायों में श्रीगोपीजनों ने अन्तर्हित भगवान् की पुनः प्राप्ति के लिए प्रभु की लीलाओं का अनुकरण इतः उतः सर्वत्र पर्यटन वृक्ष लता आदि को परिपृच्छन वगैरै अनेक साधन किए, दर्शन दिए तदनन्तर प्रियतम के गुणों का स्तवन किया फिर भी भगवान नहीं, तब रुदन नाम का दैन्य साधन किया, करुणानिधान रुदन से प्रकट हुए। प्रभु की प्राप्ति के अनन्तर गोपीजन प्रभु से वार्तालाप करने लगे इस प्रसङ्ग का श्रीशुकाचार्यजी वर्णन कर रहे हैं।

राजन् परीक्षिन्! प्रभु की लीलाओं का अनुकरनो प्रभु के गुणों का गान करती और भाँति भाँति विप्रलाप करती हुई गोपियाँ कृष्णदर्शन की लालसा से उच्च स्वर से रोने लगी ॥ १ ॥

तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः। पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥

कर्दमक्षमा

अन्वयः—(तदा) पीताम्बर धरः, स्रग्वी, सक्षात् मन्मथमन्थः; स्मयमानमुखाम्बुजः शौरिः तासाम् , आविरभूत् ॥२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

साक्षान्मन्मथमन्मथो जगन्मोहनस्य कामस्यापि मनस्युद्भूतः कामः साक्षात्तस्यापि मोहक इत्यर्थः ॥ २ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तासां गोपीनां मध्ये। शूरवंशे जातः कर्कशस्तासां बहुदुःखदर्शनादप्येतावन्तं कालमनाविर्भूत इत्याह—शौरिरिति। कामजयित्वाद्वा शौरिराविरासीदिति, तदेवाह - साक्षान्मन्मथेति। मनो मथ्नाति क्षोभयतीति मन्मथः। पृषोदरादित्वात्साधुः। शरीरं विना केवलमनस एव मन्थकत्वेन मन्मथत्वम्। तदुक्तम्—"अपूर्वेयं धनुर्विद्या मन्मथस्य महात्मनः। शरीरमक्षतं कृत्वा भिनत्त्यन्तर्गतं मनः ॥" इति। इत्यर्थ इति —'मनोजये जितं सर्वम्' इत्युक्तेः कामस्य मनोवशीकरणशीलत्वेन तज्जेतृत्वमुपचयते, मनोजेता च सर्वजयी कामस्तस्यापि मनसो मोहकत्वेन भगवतो मन्मथमन्मथत्वम्। कोटिमन्मथलावण्यवद्भगवतो रूपदर्शनेन कामोऽपि मोहितोऽभूदित्याशयः। किं च, तासां गलदश्रुधारामार्जनार्थम् , यद्वा—अपराधक्षमापणार्थं हस्तबन्धनाय पीताम्बरधर इति। यद्वा—अपराधक्षमापणार्थं तृणवदन्ते हस्तेन वस्त्राञ्चलं गृहीत्वा वस्त्रमिव गले मालां च बद्ध्वेत्यर्थः ॥ शौरिरिति—श्रीगोपीजनपक्ष्यस्य श्रीशुकदेवस्य कृष्णम्प्रत्यसूयोक्तिः। कुटिलान्तःकरणक्षत्रजातिप्रादुर्भूतत्वादेव कृष्णः प्रेमवतीभ्य आभ्य एतावद्दुःखं दत्त्वा स्वशौर्यं प्रकटीचकार, यदि सरलान्तःकरणगोपीजातिजातोऽभविष्यत्तदा नैवमभविष्यदित्यर्थव्यञ्जिका। अत एव तासां दुःखेपि प्रफुल्लमुखः। वस्तुतस्तु, तासामानन्दनार्थमेव प्रफुल्लीकृतं सुखांबुजमेव, हृदंबुजं तु संतप्तमेव यस्य सः। पीताम्बरः स्कन्धाभ्यां पुरो लम्बीकृत्य हस्ताभ्यां धरतीति सः। अपराधं क्षमापयितुमिति भावः। स्रग्वीति–प्रयस्यैव परिधापितां स्रजं तां दर्शयितुमिति भावः। साक्षान्मन्मथो यः समष्टिकामस्तस्यापि मनो मथ्नातीति सः। जगन्मोहमपि कंदर्पं मोहयितुमायान्तं स्त्रीभावं प्रापय्य तथा मोहयामास, यथा सोऽपि कृष्णसौन्ददर्यं दृष्ट्वा कन्दर्पशरपीडितो मुमोहेत्यर्थः। तेन कृष्णस्तत्प्रेयस्यश्च स्वरूपभूतकंदर्पस्यैव शरपीडिता रमन्ते न तु प्राकृतजगन्मोहककन्दर्पस्य, तस्य तत्रानधिकारादेवेति ज्ञेयम्। न हि तुच्छभृत्यस्य प्रबलतरस्वामिनि प्राबल्यमिति भावः। तदानीं साक्षान्मन्मथमन्मथत्वेन महामोहनस्वीयमाधुर्याविष्करणं तासां तादृशस्यापि विरहदुःखस्य निवारणार्थमिति ज्ञेयम् ॥ २ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तासां तथा रुदतीनामधुना मद्दुःखसम्भावनया दैन्यविशेषेणासां रोदनात् प्राणा गतप्राया इति। तेन वितर्क्यमानानामित्यर्थः। एवमात्मानपेक्षया तदेकापेक्षयैव दैन्यविशेषेण तत्प्राप्तिरिति दर्शितम्। शौरिः शूरवंशाविर्भूतत्वेन प्रसिद्धोऽपि तासामेवाविरभूत् सर्वतोऽप्यपूर्वादाविर्भावादित्यर्थः। तथाच वक्ष्यते "त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधदिति। तत्रातिशुशुभे ताभिर्भगवान् देवकीसुत" इति गोप्यस्तपः किमचरन् यदमुष्य रूपलावण्यसारमसमोर्ध्वमनन्यसिद्धम्। दृग्भिः पिबन्त्यनुसवाभिनव दुराप"मित्यादौ च तथैव श्रीगोपीषु विशेषोक्तिः। एताः परमित्यादौ वाञ्छन्ति यद्भवभियो मुनयो वयञ्चेति श्रीमदुद्धवसिद्धान्तानुसारेण सर्वाधिक प्रेमवतीषु तासु युक्तमेव च तादृशत्वम्। प्रपद्यमानस्य यथाश्नतः स्युरित्यादि न्यायेन तथैव दर्शयति। साक्षान्मन्मथमन्मथ इति। नाना वासुदेवादिचतुर्व्यूहेषु ये साक्षान्मन्मथाः स्वयं कामदेवाः नतु तदीयशक्त्यंशावेशिप्राकृतमन्मथवदसाक्षाद्रूपाः तेषामपि

मन्मथः मन्मथत्वप्रकाशकः चक्षुषश्चक्षुरित्यादिवत्। येषां रूपगुणविशेषानामंशेन तत्प्रकाशकोऽसौ तानखिलान् एव प्रकाशयन्नित्यर्थः। अत एवास्य महामन्मथत्वेनैकाक्षरादि मन्त्रा ध्यानानि च सन्ति। किन्तु तस्मिन् ध्यानेऽन्याकारत्वं मन्मथत्वव्यञ्जनार्थमेव ज्ञेयं मन्मथपदस्य यौगिकवृत्त्या तेषामपि क्षोभकादिरूपः सन्निति ध्वनितम्। एवं तादृशरूपस्यादिरसे परमालम्बनता भक्त्यन्तरागम्यता च दर्शिता। तदेवं स्वरूपाविर्भावस्यापूर्वतामुक्त्वा विलासवेशयोरप्याह। स्मयेत्यादि विशेषणत्रयेण। तत्र स्मयमानेति वर्त्तमानप्रयोगेण तात्कालिकत्वविवक्षया सहजस्मिताद्वैलक्षण्यप्रतीतेः तथा पीताम्बर इत्यनेनैव विवक्षिते सिद्धे धारणप्रयोगोऽतिरिक्त एवेति तेन तदानीमन्यविशिष्टधारणबोधनात्। तथा स्रग्वीत्यत्रापि प्रशंसायां मत्वर्थीयविधानात्। किञ्च। स्मितेनात्मनः सुप्रसन्नत्वं त्यागस्य च परिहासमयत्वम्। पीताम्बरधारणेन मूर्द्धपर्य्यन्तावृततया स्वस्य तासां परित्यागतः संकुचितचित्तत्वम्। स्रग्वित्वेन केवलतत्सङ्गितया तां विना स्वस्य सङ्गान्तरारोचकत्वञ्च ज्ञापितं तथा च श्रोतृहृदये तत्प्रवेशाय तात्कालिकशोभावर्णनमिदमिति ॥ २ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तासां तादृशीमार्तिं गतानामाविरभूत् दृश्यो बभूव, इति परमार्त्त्यैव तत्प्राप्तिरिति दर्शितम्। यद्वा, तथा रुदतीनामधुना मद्दुःखसम्भावनया दैन्यविशेषेण रोदनात् प्राणा गतप्राया इत्यतो हेतोरित्यर्थः। एवमात्मानपेक्षया तदेकापेक्षयैव दैन्यविशेषेण तत्प्राप्तिरिति। शौरिः—शूरवंशे निजगुणरूपाद्यशेषभगवताप्रकटनार्थमतीर्णो भगवानित्यर्थः। अयमाविर्भावे हेतुः। श्लेषेण सर्व्वासामेव युगपत् सन्तोषणसामर्थ्यं दर्शितमिति दिक्। स्मयमानं मुखाम्बुजमेव, न तु हृदम्बुजम्, तासां तादृशार्त्तिरोदनादूयस्य स्मयमानता स्वभावत एव। किंवा तासां शोकनाशनाद्यर्थं पीताम्बरधरो धावनेनेव त्वरयाविर्भूयागमनात् सुलत्पीताम्बरम् किंवा तासां गलदश्रुधारासम्मार्जनार्थं श्रीहस्तेनैकेन धरतीति तथा सः, स्रग्वीति कमलादिपुष्पैस्ताः शीतलयितुम्, यद्वा, प्रियजनार्त्तिकातर्य्यभरेण निजापराधक्षमापणार्थमिव तृणवत् श्रीदन्तान्तिके श्रीहस्तेन निजवदत्राञ्चालं गृहीत्वा वस्त्रमिव श्रीगले मालाञ्च बद्धेत्यर्थः। एवं वैदग्धीविशेषप्रकटनेन तासां परममोहनत्वात् साक्षान्मन्मथमन्मथ इति। अथवा सौन्दिर्य्यादिकमेव तैर्विशेषणैरुपलक्षितम्, तत्र सौन्दर्य्यस्योपलक्षणं स्मयमानेति भूषणानाञ्च, पीतेति विनोदस्य,सुग्वीति स्रक् च सौन्द्येव ज्ञेया, (भा० १०।३०।११) 'कुन्दस्रजः कुलपतेः' इति पूर्वोक्तेः, रात्रौ च तस्या एव शोभाविशेष सम्पत्तेः। अनुक्तं वैदग्ध्यमाधुर्य्यादिकमन्यदप्युपलक्षयति —साक्षादिति। तथा विरहातिखिन्नानामपि तासां कामोद्बोधं तस्यापि कामोद्रेकं सूचयतीति दिक्। अन्यत्तैर्व्याख्यातम्। यद्वा, मन्मथादपि मन्मथः महामन्मथ इत्यर्थः। तस्यैव महामोहनताशक्तिसागरकणांशप्राप्त्या कामदेवस्य मोहनताशक्तेः अतोऽयमेव कन्दर्पः अत एव कन्दर्पबीजस्य महामन्त्रे बीजमिति श्रीमदनगोपाल इत्यादि संज्ञयाप्युच्यते ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तासामेवं रुदतीनामग्रे शौरिराविर्बभूव कथम्भूतः स्मयमानं मुखाम्बुजं यस्य स जगन्मोहकस्य कामस्यापि मोहकः ॥२॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भक्त्युद्रेकोद्भूतरोदनफलमाह। तासामिति। मनोमथ्नातीति मन्मथः कामः साक्षात्स्पष्टीकृतसर्वाङ्गसुन्दर इन्द्रतुल्यस्तस्यापि मन्मथः मदमथनः मदनो मन्मथो मारः काम इति रुद्रः। अनेनैवं विधभगवदुपासनासामर्थ्यात्समुद्भूतः सौन्दर्यसागरः काम इति रुचितं भवति ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तासां तथाविधरोदनश्रवणानन्तरं सोढुमशक्तस्तदैव प्रादुरभूदित्याह–तासामित्यादि। शौरिरित्यत्र शूरशब्दो न रूढः, अपि तु यौगिक एव। शूरपुत्रोऽपि नातः परमन्तर्धानलीलायां समर्थोऽभूत्, अपि तु तासां साक्षादाविर्भूतः, अतएव स्मयमानमुखाम्बुजः। अतः परं मम धैर्यं न वर्तत इति स्मयमानत्वम्। पीताम्बरधर इति भावविशेषात् श्लथत् पीताम्बरं वामकरेण बिभ्रदित्यर्थः। अथवा पीतोत्तरीयैकदेशं धृत्वा स्मितं संवृण्वन्, अथवा, श्लथदुत्तरीयतया पीताम्बरं पीताम्बरैक देशो धरायां यस्य, अन्यथा पीपीन्बरमित्यनेनैव सिद्धिः। स्रग्वी अम्लानवनमालः, मन्मथस्य मन्मथो मनो मथ्नातीति तथा, तस्यापि तथा अथवा, मदयतीति मथ्नातीति वा मन्दमथ् वा मदनः नं मथ्नीतीति मन्मथो रुद्रस्तस्यापि मदं गर्वं मथ्नातीति मोहिनी रूपेण गर्व हृतवान् इति तथा। भूतोऽपि स्वयं तासां सौन्दर्याकृष्ट इत्यर्थः। अथवा साक्षान्मन्मथो मूर्त्तमन्मथस्तस्यापि मन्मथः ॥ २ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पीताम्बरधर इत्यादि। दूरागमनात् प्रेम्णा भावविशेषेण वा श्लथत्पीताम्बरं वामकरेण दधदित्यर्थः। अथवा, तत्र स्थित एव दूरादागत इव त्वरानाटयेन पीताम्बरं पीतोत्तरीयक देशो धरायां यस्य स्त्रं समान–पीतोत्तरीय इत्यर्थः। स्रग्वी लोलवनमालः। मदयतीति मथ्नातीति मथ् मदनस्तं मथ्नातीति मन्मथो रुद्रस्तस्यापि मदो मदास्तं मथ्नातीति तथा, मन्मथस्यापि मन्मथ इति।२-४।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शौरिरिति। श्रीगोपीजनपक्षस्य श्रीशुकदेवस्य कृष्णं प्रत्यसूयोक्तिः। कुटिलान्तःकरणक्षत्रियजात्युद्भवत्वादेव कृष्णः प्रेमवतीभ्य आभ्य एतावद्दुःखं दत्त्वा स्वशौर्यं प्रकटीचकार। यदि सरलान्तःकरणगोपजातिजातोऽभविष्यत्तदा नैवमभविष्यदित्यर्थव्यञ्जिका, अत एव तासां दुःखेऽपि प्रफुल्लमुखः। वस्तुतस्तु स्मयमानं तासामानन्दनार्थमेव प्रफुल्लीकृतं मुखाम्बुजमेव हृदम्बुजन्तु सन्तप्तमेव यस्य सः। पीताम्बरं स्कन्धाभ्यां पुरो लम्बितीकृत्य हस्ताभ्यां धरतीति सः। अपराधं क्षमयितुमिति भावः। स्रग्वीति प्रेयस्यैव परिधापितां स्रजं तां दर्शयितुमिति भावः। साक्षान्मन्मथो यः समष्टिः कामस्तस्यापि मनो मथ्नातीति सः। जगन्मोहनमपि कन्दर्पं मोहयितुमायान्तं स्त्रीभावं प्रापय्य तथा मोहयामास यथा सोऽपि कृष्णसौन्दर्यं दृष्ट्वा कन्दर्पशरपीडितो मुमोहेत्यर्थः। तेन कृष्णस्तत्प्रेयस्यश्च स्वरूपभूतकन्दर्पस्यैव शरपीडिता रमन्ते न तु प्राकृतस्य जगन्मोहनकन्दर्पस्य तस्य तत्रानधिकारादेवेति ज्ञेयम्। तदानीं साक्षान्मन्मथमन्मथत्वेन महामोहनस्वीयं माधुर्याविष्करणं तासां तादृशस्यापि विरहदुःखस्य विस्मारणार्थमिति ज्ञेयम् २॥

श्रीरसिकाह्लादिनी-टीका

अधुना रोदनमेव कृष्णप्राप्तिसाधनं जातमित्याहुः तासामिति, यस्तु विरहज्वालावलीढमनस्तेन रुरुदुस्तासां परमार्त्तानां दशम्यवस्थानिकटवर्त्तिनीनां मध्ये शौरिः सर्वेषां दुःखनिरसननिजगुणप्रकाशनार्थं शूरवंशेऽवतीर्ण इत्यर्थः। आविरभूद् दृश्योऽभवदिति। तासां शोकनिवृत्यर्थं स्मयमानं मुखाम्बुजं यस्य, स्वदोषाच्छादनार्थमेव स्मितं स्वस्यैव सापराधत्वादिति। रोमाञ्चादिगूहनार्थं पीताम्बरधरः। पीताम्बरेण सर्वमङ्गमाच्छाद्याविर्भूतः। स्रग्वी तद्विरहे स्वस्यापि तापनिर्वापकं शैत्यहेतुं मालाधारणमुक्तम्। यद्वा इदानीं मनसि आविर्भावे न रसो न च कीर्त्तिरिति विचार्याविर्भूतः, पीताम्बर इति वर्णसादृश्येन तद्वर्णसदृश्येन तद्वर्णसदृक्त्वेन पीताम्बरधारणमुक्तः, स्रग्वी अनेन मालाधारणेन कीर्तिरक्षणं सूचितम् तासामलंकरणार्थं, यद्वा स्रजो वृन्दावनभवमाल्यगुम्फिताः सन्ति यस्येति ईर्ष्ययोपालब्धुमुद्यतानां वाक्स्तम्भं कारयितुं जगन्मोहनरूपमाविश्चकारेति। एवं-गति-बिलासमाधुर्यप्रकाशनेन साक्षान्मन्मथमन्मथः। स तु मन्मथः प्राकृतः प्राकृतानेव क्षाभयति। नत्वप्राकृतान् कृष्णप्रियान्, अयं तु साक्षान्मूर्त्तः, जगन्मोहकस्य मन्मथस्यापि मोहक इत्यर्थः। कामस्य चेन्मोहो जातस्तर्हि तासां मोहने को विस्मय इति। एतासां मोहने प्राकृतकामस्यासामर्थ्यात् अयमेव मोहक इत्यर्थः। अयमाशयः यावत्पर्यन्तं कृष्णो रासविलासं कृतवान् तावत्पर्य्यन्तं कामस्यापि निरोधो जातः। स्वरूपे निमग्नत्वान्निष्क्रियो जात इति। तदवच्छिन्ने काले सर्वे जनाः मत्प्रवणचित्तत्वं न स्वार्थ साधयन्त्विति विचार्य कामं मोहितवानिति। कृष्णस्वरूपे स्थितः अयं कामस्तु चिन्मयात्मकः गोपीजनसेव्यः। "एताः परं तनुभृत" इत्यादिना तु तासु उद्धवादिनमस्कार्यो सुदृष्टम्॥ २॥

विशुद्धरसदीपिका

तासामिति। तथा रुदतीनां यद्वा भवायुषामित्युक्तिमवधार्य्य किं मद्विषयकदुःखसंभावनया गतप्राणा जाता इति वितर्क्यमाणानामित्यर्थः। एवं च तासामेव प्रेमानुराधादाविर्भूत इति दर्शितं शौरिः शूरपुत्रत्वेन निर्दयोऽपि नातः परमन्तर्द्धानलीलायां समर्थेऽभूदित्यर्थः। यद्वा अविर्भावबोधकेन शौरिपदेन प्रकटळीलागतावेवाविर्भावतिरोभाववािति सूचितं ततश्च तादृशगोपीविशेषनिष्ठैवेयं लीळेति प्रागेव दर्शितं तथाचोज्ज्वले—

हरेर्लीलाविशेषस्य प्रकटस्यानुसारतः। वर्णिता विरहावस्था गोष्ठवामभ्रुवामसावित्युक्तम्॥

एवञ्च खण्डितात्वमप्येतदपेक्षय्यैवेत्यपि सूचितं तदेव विशदयति। स्मयेत्यादिना। तात्कालिंकसहजस्मितेन प्रसादमाविष्कुर्वन्नित्यर्थः। यद्वा स्मयो गर्वः मानश्चित्तसमुन्नतिः। तदुभययुक्तं मुखाम्बुजं—यस्य सः अम्बुजरूपकेण रक्तत्वमपि सूचितं ततश्चासां दर्पोपशमनव्यक्तिः। यद्वा अपत्रपया स्मयमानं किञ्चिद्विकसितं मुखाम्बुजं यस्येति भावगोपनं तथा पीताम्बरधरः पीतमम्बरं धरापर्य्यन्तं यस्य इदं चापत्रपया निजाङ्गानामाच्छादनाय अन्यथा पीताम्बर इत्येव साधुः वस्तु तस्तु सुरताङ्कगोपनायेदं तथा स्रग्वीति प्रशंसायां मत्वर्थीयविधानात् स्रगियं तदा त्वयोग्या श्रीवृन्दादेव्यैव निवेदितेति ज्ञेयम्। किंवा कुन्दस्रजः कुलपतेरिह वाति गन्ध इत्यादिना प्रागेवदर्शिता सुरतविमर्दितेयमिति गम्यते अथवा कामविजयाभिषेकमाळ्यं तदेव व्यञ्जयति। साक्षादिति। तथाहि नाना वासुदेवादि चतुर्व्यूहेषु ये साक्षान्मन्मथाः स्वयङ्कामदेवाः नतु तदीयशक्त्यंशावेशिप्राकृतमम्मथवदसाक्षाद्रूपाः तेषामपि मन्मथः मन्मथत्वप्रकाशकः चक्षुषश्चक्षुरित्यादिवत् एषां रूपगुणविशेषाणामशेन तत्प्रकाशकोऽसौ तानखिळानेव प्रकाशयन्नित्यर्थः। अत एवास्य महामन्मथत्वेनैकाक्षरमन्त्रध्यानानि यं मां स्मृतकामः सकामो भवतीत्याद्याः श्रुतयश्च सन्ति एवं तादृशरूपस्यादिरसे परमालम्बनता भक्त्यन्तरागम्यता च दर्शिता, एवञ्च साक्षादित्यादि स्मयेत्यादिस्रगित्यादिभिः त्रिभिः पदैः स्वरूपविलासवेषाणामपूर्वतोक्ता सा च यथायोगं पूर्वोक्तप्रकारेण सर्वासां सुखदा विशेषतश्च मुरतान्तळक्ष्म ळक्षितस्वरूपेण प्रियसखीनामिति संक्षेपः॥२॥

श्रीरामनारायणकृता भावभावविभाविका

तत्साधनैर्जातानुग्रहो भगवान् दैन्येन तासामनुग्रहपात्रत्वे जाते तद्दैन्यश्रिया लुब्धः प्रादुरभूदित्याह । तासामिति । ततश्च तासां स्वप्रेमव्याप्तचित्तानां प्रिया संश्लिष्टनां मारकेण विश्लिष्टानां मारकेण मारितानां स्वमारतानां मध्ये एव तद्दैन्यमारतः शौरिः शूरवंशप्रवरः साक्षान्मन्मथमन्मथः लोके आधिभौतिकः कामोमन्मथस्तदधिष्ठातृकामदेवः साक्षान्मन्मथः तस्यापि मनोमथनशीलस्तन्मनसि प्रादुर्भूतः कामः साक्षान्मन्मथन्मन्मथः आविरभूत् न तु कुत्रापि गतस्तत आगतः व्यापकवपुषो गमनासंभवात् । यद्वा तासासान्वितप्रेममनसामेवाविर्भाव इति ध्वनिः शूरप्रवरत्वादेव कामरणविजायाय स्मयोगर्वो मानोऽभिमानश्च ताभ्यां युक्तं मुखाम्वुजं यस्य । यद्वा ता गोपीराश्वासयितुं स्मयमान मञ्जुमृदु मधु सितस्मितयुतं मुखाम्बुजं यस्य यद्वा स्मयेन तादृक्स्मितेनैव मा इति न्यक्कारोयाञ्चानङ्गीकरणलक्षणः न इति तदभावस्तथा च मानः यस्मिंस्तादृङ्मुखाम्बुजं यस्य । यद्वा स्मयो गर्वसमानः नहि नहि कार्य्ये इति जाते स्मये तिरोहितत्वेन तदभावे आविर्भूतत्वेन द्योतकं यस्य यद्वा मयि कदापि स्मयो नहि नहि इति द्योतकं मुखाम्बुजं यस्य तथा स्मयमानविशेषणेन मुखरूपाम्बुजस्य स्मितरूपविकासान्वितत्वज्ञापनेन तासां तापोपशमाह्लादाविर्भूतमुखस्य विकसिताम्बुजत्वनिर्देशः विकसितस्यैव तस्य तापहारित्वप्रसिद्धेः । यद्वा स्मयमानतयास्मितसितसितामृतप्रभान्वितमुखमेवाम्बुजोऽम्बुधिप्रभवश्चन्द्रस्तासां विरहतमस्तापव्याप्तहृङ्मनसां तदपवादेन स्वाह्लादेन प्रसादको यस्य तथा च क्षीराम्बुधिप्रभूतेन्दोर्लौकिकतमस्तापापलापकत्वेऽपि कृष्णविरहिणीनां प्रतापकत्वमेव अयं तु प्रेमरसामृताम्बुधिप्रादुर्भूतमुखेन्दुरेवामितचन्द्रप्रजाह्लादस्मितसुधामिवर्षितया तत्तमस्तापापवादक इति भावः । तथा तासामाश्वसनाय ताभिः पीते पूर्वं विलासावसरे आस्वादिते एवाम्बरे दशनवशने धारयतीति पीताम्बरधरः भवतीभिः पीते एवैते निःशङ्कं पातव्ये यद्वा यूयं मद्वियोगेन यथा खिन्नास्तथाहमपि विकल एवेति ज्ञापनाय पीते एवाम्बरे दशनवसने धारयतीति । यद्वा भगवतो नित्यं पीताम्बरधरत्वात् विशेषकथनं तु भवदीयकाञ्चनवर्णत्वेनैव पीताम्बरं गले धारयामि भवतीनां वर्णेणैव मम शोभा तथा मम बहिरङ्गपीताम्बरेणेवान्तरमपि वोऽनुरागेण व्याप्तमिति द्योतनाय । यद्वा वोऽनुराग एवान्तर्व्याप्य बहिरपि मामाच्छाद्य पीतवसनमिवल सतीति । यद्वा विनयेनाश्वासनाय पीताम्बरं गले कृत्वा हस्तयोर्धारयतीति तथा । यद्वा यथा मम मनो वोऽनुरागेनाच्छादितं वपुश्च तद्वर्णपीताम्बरेण तथा मम कृष्णकुटिलस्वभावो भवतीभिरेव निजप्रेमगुणैराच्छाद्यते इति भावः, तथा स्रग्वीति वन्यस्रग्धर इत्यनेनापि मयापि वो विरहतापतप्तहृदये तदुपशमाय युष्मत्तनुसुमनसां तापोपशमवत्ववत्तदुपशमकत्वभ्रमेण सुमनः स्रगिव धृता तथापि तापानुपशम एव संनिधि प्राप्तोऽधुना तदुपशमो युष्मदधीन इति । यद्वा गुणग्रथितसुमनः स्रगिव ममातिमृदुसुमनोवृतयोऽपि युष्मद्गुणग्रथिता इति द्योतयितुं यद्वा भवतीनां सुमनांसि एव मद्गुणग्रथिततया ममोरोहारतया मयि सलग्नानि तानि धृत्वैव विहरामि यद्वा कुसुमानां कामवाणत्वेन निर्वाणोऽप्यहं युष्मत्कामवाणव्याप्त एव । यद्वा प्रेमवतीनां समीपे कपटानिर्वाहात्तत्रान्तर्द्धानापराधोपशमाय स्रग्वीति स्रजा वद्धकर एवाविरभूत् यद्वा साक्षान्मन्मथमन्मथ इत्युक्त्या स्रग्वीति तस्मित्रवसन्तालिङ्गितवपुरिति भावः । यद्वा मुनिमधुकरनिकरोपवर्णितयशोरूपस्रग्धर असां प्रेमवतीनां विरहाग्निदाहेन न यशः स्थास्यतीति तत्स्रग्धर आविरभूत् । यद्वा मन्मथमनोमथितुं सुमनोजमुखचन्द्रेण ज्येष्ठेन तत्पराभवसम्भवेऽपि तडिद्वर्णपीताम्बरेण तद्भीति संपत्तावपि कुसुमवाणरणाय कुसुमधारणमेव न्याय्यमिति स्रग्वी आविरभूदित्युक्तं यद्वा यदामितानि सुमनांस्येव मद्गुणबद्धानि तदा किमु वाच्यं मनोजस्य । यद्वा तासां त्रिविधतापेषु कामतापोपशमाय साक्षान्मन्मथमन्मथ इत्युक्तं विरहतापोपशमायाविरभूदिति पुनः संभावितविरहचिन्तातापोपशमाय वर्णितार्थानि स्मयमानमुखाम्बुजः पीताम्बधरः स्रग्वीतिविशेषणानि । यद्वा तापशुष्कतनुसुमनःसुमनोलतानां सुरतरसवृष्टिसेचनाय पीताम्बरधरः स्रग्वीति पदाभ्यां सतडिदिन्द्रधनुर्घनघनस्यामत्वद्योतनं मुखचन्द्राधरामृतरसपोषणाय स्मयमामुखाम्बुज इति ॥ २ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ततः परं भगवानप्यन्तर्द्धानतया स्थातुं नाशकत् किञ्च अतिप्रवलेन तत्प्रेम्णा समाकृष्टचेता आविरभूदित्याह । तासामिति । "मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिने" त्युक्तस्वरूपेण तावत्कालं स्थितः पुनस्तदभीष्टवासुदेवात्मकः आविरभूत् एतद्दुःखनिवृत्त्यनुकूलं शौर्यं प्रकटनीयं सर्वदुःखनिरासाय यदुवंशेऽवतीर्णत्वात्स्वापराधशङ्कया ग्लायमानस्तास्तोषयितुं स्मयमानः स्मितयुक्तं मुखपद्मं यस्य सः तथा च भवतीनां विरहवैक्लव्यदर्शनार्थमहं तिरोहितो नतु किञ्चिद्दोषं मनसिनिधायातो यथोक्तवैक्लव्यमवलोक्यातिप्रसन्नोऽहमिति सूचयन्निवेत्यर्थः । तत्तोषोत्पादकं तत्स्वरूपंचाह पीताम्वरधरः लक्ष्म्या सह रमणयोग्येन वैकुण्ठस्वरूपेणात एव स्रग्वी ब्रह्मणा लक्ष्म्या वा समर्पितया मालया अलंकृतः, तत्रापि केवलकरुणयैवाविर्भूतो नतु कामकृताकर्षणेनेति बोधनाय इत्याहुः साक्षादिति । मन्मथः कामाधिष्ठानदेवस्तस्यापि मन्मथः स्वास्मिन्नासक्ति करः तथा च एवंभूतस्य परमेश्वरस्य नास्ति कामवश्यतासंभावनेति भावः । अनभिज्ञापक्षे गोपिकादुःखदुःखितः श्रीशुकः क्षत्रियजातित्वात्तासु प्रेमभराक्रान्तासु शौर्यं प्रकटितवानिति द्योतयितुं शौरिरित्युक्तवान् । अत एव दुःखितास्वपि तासु स्मयमानमुखाम्बुजः तत्रापि तादृशासु हासानौचित्यमभिप्रेत्यार्धहाससंकोचार्थं मुखाग्रे हस्तेन पीताम्बरधर स्रग्वी वनमालया शोभमानः साक्षान्मन्मथमन्मथ इति तासां तादृशस्यापि विरहदुःखस्य विस्मारणार्थं तादृश इति भावः । मानिनोपक्षे शौरिरपि तत्प्रेमपराधीनत्वादाविरभूत् स्मयमानमुखाम्बुजः अहो हासार्थं मयेदमतुष्टि

तमतः कोपो न विधेय इति सूचनार्थं तथाभूतः अन्तस्तु युष्मद्विरहात्सन्तप्त एवेति भवः। अतएवापराधक्षमापणार्थं स्कन्धाभ्यां पुरोलम्बिनीकृत्य बद्धहस्ताभ्यां पीताम्बरधरः युष्मत्परिधापितामेव मालां धारयन् युष्मान्स्मरन्नेव क्वचिदेकान्ते विकलचित्त एवाहं स्थितो ननु कयाचिद्रममाण इत्याम्लानपुष्पां मालामवलोक्य प्रतीयतामिति सूचयन्निवेति भावः। ननु तथापि तासां कोपनिवृत्तिः कथं जातेत्याशङ्क्याह। साक्षादिति ॥ २ ॥

रास–रहस्यम्

र० टी०—तासां वृत्तीनां मध्ये एव शौरिः माया तत्कार्यकामक्रोधादिसर्वानर्थविजये समर्थत्वात् शूरः तवायायं शौरिः, आविरभूत् आविः ज्योतिर्ध्यानपरत्वात् भ्रमरकीटन्यायेन स्मयमपि स्वप्रकाशरूपेण प्रकटीबभूव, कथम्भूतः ? स्मयमानमुखाम्बुजः पूर्वमहंकारादिदोषजन्यापत्रपया स्मयमानं किञ्चित् विकसितं पश्चात् स्वयंज्योतिरूपेण साक्षात्कृतत्वात् पूर्णविकसिताम्बुजवदाह्लादकरः, पीताम्बरधरः पीतवर्ण, शान्त्यांप्रतीकरूपत्वात्, शान्त्या स्वात्मानमम्बरवत् आकाशवत् व्यापकत्वेन धारयतीति पीताम्बरधरः, स्रग्वी स्रक माला, माला इव वृत्तीनां नैरन्तर्यत्वात् गुणसादृशं, श्रुतिशतलक्षणपुष्पाणां प्रामाण्येन ग्रथितत्वात् स्रक् तदस्यास्तीति स्रग्वी, साक्षात्मन्मथमन्मथः यस्यः साक्षात्कारेण मुनिमानसमपि मथ्नातीति मन्मथः कामः, तमपि आत्मसाक्षात्कारेणापरोक्षतया मथ्नातीति साक्षान्मन्मथमन्मथः अर्थात् आत्म साक्षात्कारेणैव कामविजय अर्थात् कामनानां विजयः सम्भवति नान्यथा ॥ २ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तासां रुदतीनां समीपे स्मयमानं मुखाम्बुजं यस्य सः शौरिः श्रीकृष्णः आविरभूत्। कथंभूतः साक्षात् मन्मथस्य विश्वमोहकस्यापि मन्भथः मोहकः ॥ २ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्फलमालपति ॥ तासामिति। स्मयमानमुखाम्बुजः स्रग्वी। अस्मायेति विनिः। साक्षादिति सर्वप्रत्यक्षसिद्धतां मन्मथमन्मथत्वस्य दर्शयति। मन्मथं मथ्नातीति मन्मथमत्प्रमथनाथस्तस्य नारायणीरूपेण मथः स तथा। यरोऽनुनासिक इत्यनुनासिकः। एतन्मुरारिः। अनेन तादृङ्नगदृग्भवनसमर्थस्य नैतदाभीरनारीवाञ्छया प्रादुर्भाव इति दुर्भावः कार्यः किन्तु तद्दयात एवोदय इति सूच्यते। साक्षान्मुख्यतो मन्मथो मन्मथो येन स इति वा कामकामत्वप्रदः। एतेन न तद्बाधा माधवस्येति द्योत्यते। मथ विलोडने मथतीति मथो मनसो मथो मन्मथः। पचाद्यच्। स्वजनकस्यापि स्ववैर्यगारत्वाद्विलोडनं युक्तमिति ज्ञेयम्। मनो रुद्र उदाहृत इत्यादेः। मित्रचन्द्रानुबन्धस्तु दूरोत्सारित इति सन्तोष्टव्यं। चन्द्रमा मनसो जात इत्यादेः। मननं मच्चेतनं। सम्पदादिक्विप्। गमादीनां क्वाविति नलोपः। ह्रस्वस्य पिति कृतीति तुक्। मन्ममथो मनोमथक इतरत्पूर्ववदिति वा ॥ २ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो भगवान् ब्रह्मा विष्णुः रुद्रश्च भूत्वा पुनः कृष्ण एव जात इत्याह। तासामाविरभूदिति। तासां मध्य एव भगवानाविर्भूतः मायाजवनिकां दूरीकृत्य भगवान् प्रकटो जातः यतः शौरिः शूरस्य पौत्रः शौर्यमत्र प्रकटनीयमिति सर्वेषां दुःखनिवारणार्थमेव यदुवंशे अवतीर्ण इति तदा तासां दोषनिवृत्त्यर्थं स्मयमानं मुखाम्बुजयस्य ईषद्धसम्मुखः तासां वैक्लव्येन सतुष्टः स्मितयुक्तं स्मयमानं स्मयमानाभ्यां वा सहितं मुखाम्वुज यस्य भक्तानां दोषः भक्तेभ्यो निर्गतः भक्तौ समायातीति ज्ञापनार्थ तदानीन्तनरूपं वर्णयति पीताम्बरधर इति। पीताम्बरं हास्यसंकोचार्थं हस्ते धृत्वा तिष्ठति अथवा व्यापिवैकुण्ठरूपेण एतावत् कालं लक्ष्म्या सह रमणं कृत्वा तेनैव रूपेण प्रादुर्भूतः स्रग्वी वनमालायुक्तश्च मध्ये ब्रह्मादिपूजां च गृहीतवान् लक्ष्म्या वा अतो विलम्ब इत्यपि सूचितम्। अत एव प्रथमश्लोके प्रथमाध्याये श्रयत इन्दिरेति उक्तम्। इदानीन्तु उपेक्षां कर्त्तुं मयुक्तेति प्रादुर्भूतः, अत आगमनमुक्तमग्रे। यद्वा तत्र हेतुमाह विशेषणद्वयेन इदानीमनाविर्भावे तु न रसो न वा कीर्त्तिः स्वयं त्वाच्छादने रसत्वसाधकपीताम्बरधरः कीर्त्तिमयस्रग्वांश्चातः प्रकट इत्यर्थः। अन्यथा तु भक्तानां स्वरूपतिरोधान उक्तोभयाभावः स्फुट इति भावः। ननु कन्दर्पेण कथं न वशीकृतः स्वपूतना खिन्नेति तत्राह। साक्षान्मन्मथस्यापि मन्मथः आधिभौतिको मन्मथः देवतारूपः तत आध्यात्मिकः सर्वहृदयेषु साक्षान्मन्मथः तस्याप्ययं मन्मथः आधिदैविकः सर्वस्यापि सर्वत्वात् अतः कन्दर्पोऽपि मुग्धः कन्दर्पस्याप्यशक्यमोहः कन्दर्परूपश्च अतस्तासां दैन्ये प्रादुर्भूते तन्निवारणार्थं कामरूपमेव प्रकटीकृतवान् अतस्तेन पूर्ववत् कामसंपन्नाः ताः कृताः ॥ २ ॥

श्रीसुबोधिनी–सारः

स्मयमानमीषद्धसन्मुखाम्बुजं यस्य स पीताम्बरधरः स्रग्वी माली साक्षान्मन्मथस्य कामस्यापि मन्मथो मोहकः शौरिः कृष्णस्तासां प्रकटोभूत् ॥ २ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

एकोनत्रिंशाध्याये तासामाविरभूदित्यस्याभासे, ब्रह्मा विष्णुरित्यादि । अत्रेदमाकूतम् । आद्यब्रह्मकल्पे भगवानेव चतुर्मुखो ब्रह्माभूत्, तपश्च पूर्वं कृतवान् । स वाच्यवाचकतया 'भगवान् ब्रह्मरूपधृक् नामरूपक्रिया धत्त' इति वाक्या'च्छब्दब्रह्मेति यं विदु'रिति वाक्याच्छब्दसृष्टिमर्थसृष्टिं च कृत्वा तदेवानुप्रविश्य सर्वं कार्यं कृतवान्, स्वयं रजोरूपश्च । प्रकृते च पूर्वं रजोरूपमानरूपेणाविर्भूतः, ततस्तापरूपेण, ततो विविधगानप्रलापरूपेण, ततो विविधलीलारूपेण । विष्णुश्च विक्षेपरहितः शुद्धसत्त्वात्मको यथा यस्य पालनं भवति तथा पाति । प्रकृते च सखीवचनश्रवणानन्तरं स्वापराधहेतुकं गमनं प्रियस्य ज्ञात्वा चित्तविक्षेपं त्यक्त्वा पुनः स्वस्थानस्थिताः स्वजीवनार्थं स्वं स्वं भावं प्रकटीकृतवत्य इति तादृग्भावरूपेण प्रकटः । 'यदरोदीत्तद्रुद्रस्य रुद्रत्व'मिति श्रुतेः स्पष्टं रुद्रत्वम् । 'देवाः स्वधनमग्नौ निधाय संग्रामाय यदा गताः, तदाग्निस्तद् गृहीत्वा पलायितः, तदा देवा बलात्स्वकीयं धनमगृह्णन्, स तदा दुःखेनारोदी'दिति श्रुतावुपाख्यानम् । प्रकृते चादेयं रसं एवं प्रभुः स्वामिनीभ्यो दत्तवान् स्वभोगार्थम् । स्वामिन्यस्तु मानेन स्वस्मिन्नेव तं रसं निरुद्धवत्यः, तदा मानेऽपहृतेऽतिदैन्यमाविष्कृतवत्य इति **रुरुदुरित्युच्यते**। यथा स सर्वनिरासकस्तथायं भावोऽखिलशास्त्रोक्तसाधनबलनिरासकः । यतः साधनबलस्फूर्तावेतदनुदयो भगवदनाविर्भावश्च, एतदुदये तत्स्फूर्तिनाशः प्रभोराविर्भावश्च । 'कृषिर्भूवाचक' इति वाक्यात्कृष्णशब्दवाच्यता यद्यपि सदैवास्ति, तथाप्येतद्भावोदयाव्यवहितोत्तरक्षणे यदि नाविर्भूयाद् भक्तानां तदा देहादिसत्तैव न स्यात्, दैन्येनैवात्युपमर्दकभावेन प्राचीनसत्त्वनाशात् । अतः स्वयमाविर्भूय स्वस्वरूपात्मकं सत्त्वमानन्दं च तत्र स्थापयतीत्याविर्भूतस्य कृष्णतेति । **स्मयमानमुखाम्बुज** इत्यत्र, **स्मयमानाभ्यां वेत्यादि** । न ह्येतादृशोऽन्योऽस्ति यस्य एतादृशा भक्ता इति स्मयः । अत एवैताश्चेत् मां प्रार्थयिष्यन्ति तदाऽन्यस्माद् अपि मद्भक्तायेमं रसं दास्ये, अन्यथा तु मुक्तिमेवेति मानः । अत एवाम्बुजत्वमुक्तम् । तद्धि रविकिरणसम्बन्धादेव विकसितं सद्रसं प्रकटयति । अत्रैतत्प्रार्थनैव तत्स्थानीयेति भावः । **भक्तानां दोष** इति । विचारे क्रियमाणे भगवद्रसपानानन्तरमेव तादृग्भावोत्पत्तेस्तस्यैव स धर्म इति निश्चीयत इत्यर्थः । **अथवा व्यापिवैकुण्ठे**त्यादि । 'मयाऽपरोक्षं भजत'इति वाक्यात् श्रीकृष्णस्त्वेतासामेव निकटे स्थितः । एवं सति 'तं विलोक्यागत'मिति यदागमनकथनम्, तेन येन रूपेण तत्र स्थितिः पूर्वम्, तेन रूपेणागमनमित्यवश्यं वाच्यम्, तत्र स्थितस्यैव आगमनासम्भवात् । अतो येन रूपेणागमनं **व्यापिवैकुण्ठे**त्यादिना । व्यापिवैकुण्ठे हि पुरुषोत्तम एव, नांशः, व्रजे तु 'श्रयत इन्दिरे'ति वाक्याल्लक्ष्म्यः कदाचिदपि नावसरः । इदानीमेतन्मानापनोदनं तदार्तिनाशनं चैकदैव करिष्यन् लक्ष्म्या रमणं येन रूपेण करोति तेन रूपेण कृत्वा तत्स्वरूपस्य एतदभिन्नत्वात् तान् धर्मान् प्रकटीकृत्य प्रकट इत्याशयेनागमनमुक्तम् । एवं सत्येतेषां धर्माणां पूर्वमसत्त्वात् तद्विशिष्टस्यापि तथात्वात्तादृशस्यागमनमुक्तं भवतीति भावः । **ननु कन्दर्पेणे**ति। **पूतनोक्ते**रिदमाकूतं ज्ञायते । पूतनया हि परपक्षनिरासः क्रियये । दुःखिता तु सा न तं कर्तुं समर्था, किन्तु सुखिता । स्वामिनीभिरपि सर्वात्मभावविरुद्धाः सर्वे भावा निरस्ताः । तथा च सर्वात्मभाववत्सु भक्तेषु दुःखसम्भवे मर्यादामार्गीया भक्ता अप्यस्मिन्मार्गे दुःखसम्भावनारहितान्मोक्षादप्याधिक्यं न ज्ञास्यन्तीत्येतन्मार्गप्रवृत्तिर्न भविष्यतीति ज्ञात्वा कुतोऽतिरोधानं न कृतवानिति । तथा च कन्दर्पशब्दः सर्वात्मभावपरः । एतासां कामभावोऽपि सर्वात्मभावात्मक एवेति ज्ञापनाय कन्दर्पपदप्रयोगः । **स्वपूतनाखिन्नेति** । भविष्यतीति शेषः । यद्वा । दैन्येनाविर्भूतो न तु हेत्वन्तरेणेतीममर्थं स्फुटं कर्तुमत्रापि लौकिकरीतिं जानतो भ्रान्तस्याशङ्कामनुवदन्ति **ननु कन्दर्पणे**त्यादिना । **साक्षादित्यनेनाद्यपक्षे** समाधानमेवं ज्ञेयम् । अस्मिन्मार्गे मोक्षादाधिक्यज्ञानाभावः किं रसवार्ताभिज्ञस्यापाद्यते, उत तदनभिज्ञस्य । तत्रान्त्ये ओमिति ब्रूमः । आद्ये तु विवरणोक्ताध्यात्मिकमन्मथरसस्यैव यत्र विप्रयोगे महारसत्वमुच्यते तत्र तस्यापि तद्रूपस्य विप्रयोगे महारसत्वेन ज्ञाने का शङ्का नामेति द्वितीयपक्षसमाधानं विवरणे स्फुटम् ॥ २ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं दैन्येन सन्तुष्टो भगवान् प्रादुरभूदित्याहुः—तासामिति । तासां रुदन्तीनां मध्य एव शौरिः कृष्णः आविरभूत् । तं वर्णयति—स्मयमानं प्रहसन् मुखाम्बुजं यस्य सः, पीताम्बरधरः, स्रग्वी मालाधारी, साक्षान्मन्मथमथः जगन्मोहकस्य कामस्यापि मोहकस्वरूपधरः ॥ २ ॥

अन्वितार्थप्रकाशिका

तासामिति ॥ तासां रुदतीनां मध्ये एव स्मयमानं प्रहसन् मुखाम्बुजं यस्य सः पीताम्बरधरः स्रग्वी मालाधारी साक्षान्मन्मथमन्मथः जगन्मोहकस्य कामस्यापि मोहकस्वरूपधरः शौरिः कृष्णः आविरभूत् ॥ २ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

साक्षान्मन्मथमन्मथः मन्मथस्य विश्वमोहस्य कामस्यापि यन्मथः साक्षान्मोहकः ॥ २ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तासामिति ॥ तासामेवं रुदन्तीनां गोपीनामग्रे स्मयमानं मुखाम्बुजं यस्य सः, पीताम्बरधरः परिहितपीताम्बरः स्रग्वी कण्ठविधृतातिमनोहरपुष्पमालः, साक्षान्मन्मथमन्मथः, साक्षाद्भावेन वर्त्तमानस्य जगन्मोहकस्य कामस्यापि मनस्युद्भूतकाम इत्यर्थः। शौरिः, आविरभूत् ॥ २ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तासामिति : १०.३२.२

ज्ञेयमाभिरपृष्ट्वापि मदन्तर्धानकारणम्। इति प्रादुर्बभूवेशः स्मयमानमुखाम्बुजः ॥ ७ ॥
गतं वागतं वा न मे व्यापकस्याम्मयाच्च स्मयाद् व्यक्तताऽव्यक्तता च।
अभिव्यक्तितः श्रीधरेणेत्यबोधि स्वदृष्ट्या तु युक्तं तथा ता अपश्यन् ॥ ८ ॥
विश्वाकारः स्वयं सन्नपि मदनुजनप्रीतयेऽहं तदुक्तैर्मत्प्राप्तिप्रेमभावोल्लसितनतिशतस्तोत्रगीतैः प्रसन्नः।
स्वीकुर्वन् कामरूपं स्वजनवरदयादानदक्षं तदग्रे व्यक्तः स्यामित्यबोधि श्रितधनकपटः स्रग्धरस्तागीशः ॥ ९ ॥
तेषामीशालीकनं जायतेऽलं त्यक्त्वा कार्याण्यत्र ये योगयुक्ताः।
सं योगैकासक्तसर्वेन्द्रियाणां किं तच्चित्रं योषितामीशलाभः ॥ १० ॥

कृष्णप्रिया

उच्च स्वर से दैन्य से, अनन्य भाव से रोने लगी तब व्रजवनिताओं के रुदन से आर्द्रचित होकर, मन्दस्मित मधुर मुखारविन्द वाले, जीवमात्र के मनका मन्थन करने वाला कामदेव के मन को मंथन करने वाले, कर सरोज में पीताम्बर को धारण किए हुए, वनमाला विभूषित, शूरसेभ के पौत्र भगवान् श्रीकृष्ण व्रजवनिताओं के मध्य में प्रकट हुए ॥ २ ॥

तं विलोक्यागतं [1]प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः। उत्तस्थुर्युगपत् सर्वास्तन्वः प्राणमिवागतम् ॥ ३ ॥
काचित् कराम्बुजं शौरेर्जगृहेऽञ्जलिना मुदा। काचिद् [3]दधार तद्बाहुमंसे चन्दनरूषितम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—प्रेष्ठम् , तम् , आगतम् , विलोक्य, प्रीति उत्फुल्ल दृशः, सर्वः, अबलाः, आगतम् , प्राणम् , (प्राप्य) तन्वः इव (वाः सर्वाः) युगपत् , उत्तस्थुः ॥ ३ ॥ काचित् , शोरः, कराम्बुजम् , मुदा, अञ्जलिना, जगृहे, काचित् , चन्दनभूषितम् , तद्बाहुम् , मुदा अंसे दधार ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तन्वः करचरणादयः काचित्कराम्बुजं शौरेर्जगृहेऽञ्जलिना मुदा ॥ काचिद्दधार तद्बाहुमंसे चन्दनरूषितम ॥ ३–४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं कृष्णम। अवयवावयविनोरभेदोपचारात्तनूशब्दोत्रावयवपरः, शरीराणि वा। प्राणशब्द एकत्वं सामान्याभिप्रायम् ॥ तन्वः करचरणादयः। आगतमिति पुनरुक्तिस्तासां मूर्च्छितानामुत्थानं तदागमनैकहेतुकमिति स्पष्टीकर्तुम् काचित् अनिर्दिष्टामिधा। करादिभिः करादिग्रहणं हरेर्भक्त्यैकलभ्यतामाह। चन्दनेन रूषितम् भूषितम 'रुष–भूषायाम्' धातुः सर्वगोपीषु मुख्यानां कासांचित्स्वस्वभावोचितप्रेमचेष्टितान्याह–काचिदिति पंचभिः। कराम्बुजं दक्षिणमेवेत्युत्तरार्द्धव्याख्यया व्यक्तीभावित्वात्। विनयमयमैत्र्यात् स्पर्शौत्सुक्याच्चेति भावः। इयमादरमयसंस्पर्शात्तदीयतामयघृतस्नेहवती कान्तपराधीना दक्षिणा च प्राथम्यात्सर्वज्येष्ठा। चन्दनेन रूषितं भक्तिच्छेदेन लिप्तं बाहुं वाममेव, स्वकान्तवामभाग एव स्थित्यौचित्यात्। इयमादरगंधिना स्वकर्तृकालिंगनेन किञ्चिद्घृतस्नेहमिश्रमधुस्नेहवती व्यक्तसख्या किञ्चित्स्वाधीनकान्ता दक्षिणा च। अञ्जलिनागृह्णादितीयं दास्यप्रायमैत्र्या कान्ताधीना दक्षिणा च ॥ ३–४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आगतम् आदौ समुत्कण्ठया सद्य एव दूरे प्रादुर्भूयागमनक्रमेण निजान्तिकं प्राप्तं सन्तम्। तथा च विष्णुपुराणे। "ततो ददृशु रायान्तं विकाशिमुखपङ्कजमिति" अत एव विशेषेण लोकयित्वा दृष्टवेति रोदनवैवश्येन ईषद्दर्शनेऽप्यनिश्चयात्। किम्वा

---

[1] कृष्णं– इति कस्यचित।

[2] **कृष्णस्य मुखलावण्यसुधां नयनभाजनैः। आपीयापीयनातृप्यन् सन्तस्तच्चरणं यथा ॥** च. पु. मूलेऽधिकः।

[3] दृबभा–वीर.।

दृष्टेऽति परमत्त्यर्या विश्वासाभावान् सम्यक् निरीक्ष्यैवेत्यर्थः। अबला विरहक्षामतयोत्थातुमसमर्था अपि सर्वा युगपदुत्थिताः। तत्र हेतुः प्रेष्ठमिति। तदेकप्रेष्ठत्वेन मरणे जीवने च तदेकहेतुत्वात्। एतदेव दृष्टान्तेन साधयति। तन्व इति आगतमिति पुनरुक्तिः उत्थाने आगमनैकहेतुतास्पष्टार्थं कृता। विलासाख्योऽनुभावोऽयम्। "गतिस्थानासनादीनां मुखनेत्रादिकर्मणाम्। तात्कालिकं तु वैशिष्ट्यं विलासः प्रियसङ्गत" इति ॥ ३ ॥ पूर्व विरहदैन्येन तुल्यवचनैः सर्वासामेव तुल्यता प्राप्तिर्दर्शिता। अधुना प्राप्तनिजालम्बनत्वेन स्वस्वभावमनुसरन्तीनां मुख्यानाञ्चेष्टितभेदैर्भावभेदानाह। काचिदिति पञ्चभिः। कराम्बुजं दक्षिणं जगृहे वनभ्रमणश्रान्ततया मत्तस्य तस्य करावलम्बनाय तथा व्यवहारस्यौचित्यात् स्पर्शौत्सुक्याच्च। करस्य दक्षिणत्वञ्च निजस्कन्धे तद्बाहुधारिण्या द्वितीयायाः कान्तसमानस्थितत्वेन वामभागावस्थानौचित्यात् दक्षिणस्यैव तथा ग्रहणौचित्याच्च। एवमुत्तरोत्तरं ज्ञेयम्। अञ्जलिनेति निर्देशादियं मृदुः सख्यप्रायदास्या कान्तपराधीना दक्षिणा च। चन्दनेन रुषितं भक्तिच्छेदलिप्तमिति इयमाकृष्य धारणात् प्रखरा व्यक्तसख्या किञ्चित् पराधीनकान्ता दक्षिणा च। ताम्बूलमत्र प्रतिकुञ्जं मालादिसाहित्येन श्रीवृन्दादेव्या स्थापितम्। योगमाययैव वा सिद्धम्। शौरेरिति प्रकरणलब्धम्। अञ्जलिनाऽगृह्णादिति पूर्ववत्। अत्रौत्सुक्यं त्वधरामृतार्थम्। इयं मृदुर्दास्यप्रायसख्या कान्तपराधीना दक्षिणा च अङ्घ्रिकमलं दक्षिणमेव स्तनयोर्न्यधात्। वामभुजेन प्रियावलम्बनेन वामचरणन्यस्ताङ्गभावताप्राप्तेः। सम्प्रति स्थित एव चायमुपवेशस्याग्रतो वक्ष्यमाणत्वात्। अत उपविष्टयैव तया चरणधारणम्। तस्य तयो र्निधाने हेतुः सन्तप्तेति विरहमयरत्याख्येन भावेनेति शेषः। हृदय इति पाठे स एवार्थः। इयं प्रखरा दास्यप्रायसख्या कान्ताधीना दक्षिणा च ॥ ३-४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आगतमिति। तासामभिप्रायानुसारेण यद्वा तासां मध्ये प्रादुर्भूत किंवा आदौ दूरे प्रादुर्भूयागमनक्रमेण निजान्तिकं प्राप्तं सन्तमित्यर्थः। तथा श्रीविष्णुपुराणेऽपि "(५।१३।४२। ततो ददृशुरायान्तं विकासिमुखपङ्कजम्" इति। अत एव विशेषेण लोकयित्वा दृष्ट्वेति रोदनवैवश्येन ईषद्दर्शने प्यदर्शनात् किंवा दृष्टेऽपि परमार्त्त्या विश्वासाभावात् सम्यङ् निरीक्ष्यैवेत्यर्थः। अतः प्रीत्या प्रहर्षणोच्चैः फुल्ला विकसिता दृशो नेत्राणि यासां तथाभूताः सत्यः, अबला विरहक्षामतयोत्थातुमसमर्था अपि सर्व्वा युगपदुत्थिताः। तत्र हेतुः—प्रेष्ठमिति। ननु तथाप्यन्त्यदशाप्राप्तानामिव तासां सद्य एकदा तथोत्थानं कथ सम्भवेदित्याशंक्य एएतदेव दृष्टान्तेन साधयति—तन्व इति, तदेकप्रेष्ठत्वेन मरणे जीवने च तदेकहेतुत्वादिति भावः। यद्वा, आदौ प्रीत्युत्फुल्लदृशो बभूवुः, पश्चादुत्तस्थुः, यथा तनूनामप्यादौ स्पन्दनादि पश्चात् स्वस्वकृत्ये प्रवृत्तिरिति। आगतमिति पुनरुक्त्या उत्थाने आगमनैकहेतुता बोधिता ॥ अधुना तदागमनात् सर्व्वासामेव विरहतापापगमं परमोत्सवादिकञ्च षड्भिर्वदन्नादौ पृथक्त्वेन तासु मुख्यानां प्रसिद्धानामष्टानां प्रेमचेष्टितान्याह—काचिदिति पञ्चभिः। कराम्बुजमेकमन्येनाम्बरधारणात्तथा व्यवहारस्य शोभनत्वात्; अम्बुजरूपकेण सहजारुण्यादिसौन्दर्य्यं तापहारित्वञ्च ध्वनितम्। अञ्जलिनेति भक्तिविशेषात्, मुदेति विरहदुःखनिवृत्तेः, इदञ्चाग्रेऽपि सर्व्वत्रानुवर्त्त्यम्, तस्य तं वा सौन्दर्य्यादिना निर्व्वचनीयं बाहुम्, शौरेरित्यनुवर्त्तत एव। एवमग्रेऽपि। चन्दनेन रूषितं भक्तिच्छेदलिप्तमिति सौन्दर्य्यं तापापहारित्वं चोक्तम् ॥ ३-४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तमागतं प्रेष्ठं कृष्णमवलोक्याबला गोप्यः प्रीत्योत्फुल्ला विकसिता दृशो यासां तथा भूता युगपत्सर्वा उत्तस्थुः यथा आगतं प्राणान् तन्वः शरीराणि तद्वद्वियुक्ते प्राणे पुनरागत्य सुस्थे सति यथा तनुरुत्तिष्ठते तद्वदित्यर्थः। अथ ताः कृष्णस्य मुखे यल्लावण्यं तदेव सुधा तां नयनरूपै र्भाजनैः पानपात्रैः पुनःपुनरापीयापीय पीत्वाऽपि नातृप्यन्न तृप्ता बभूवुः। यथा सन्तः भक्तास्तच्चरणं भगवत्पादाब्जलावण्यमनुभूयापि न तृप्यन्ति तद्वत् ॥ तत्र काचिद्गोपी हरेः कराम्बुजं हर्षेणाञ्जलिना जग्राहकाचित्तु चन्दनेन भूषितं लिप्तं तस्य बाहुमात्मनः स्कन्धे दधार ॥ ३-४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तन्वः भोगायतनशरीराणि ॥ गोपीनां करादिग्रहणादिषु हरेः करादानादिना भक्त्यै कलभ्यः श्रीनारायण इति निदर्शयंस्तत्प्रवृत्तिं कथयति। काचिदित्यादिना चन्दनरूषितं लिप्तम् ३-४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

काचिदित्यादि षट्कम् ॥ ४—८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तत्र प्रादुर्भूते सति यदभूत्तदाह—तमित्यादि। आगतमाविर्भूतम्, न तु कुतश्चिदायातम्,—तत्रैवान्तर्द्धाय स्थितत्वात्। अवला अपि उत्थानासमर्था अत्युत्तस्थुः, युगपदिति दर्शनस्य पौर्वापर्याभावादेकस्यैव प्रत्येकं पुरतो भासमानत्वात्। एतेन पूर्वमुपविष्टा एव जगुरिति मन्तव्यम्। तत्र दृष्टान्तः—तन्वः प्राणमिवागतम्। प्राणयतीति प्राण आत्मा तं प्राप्य तन्वः शरीराणि;

आत्मनः एकत्वादेकवचनम् , तनूनां बहुत्वे तथा ॥ अथ तस्मिन्नाविर्भूते तमालोक्य, या यथा चक्रुस्तदाह—काचिदित्यादि बहुभिः । काचित् कराम्बुजमिति सादरप्रणयिनी केचिदेनां चन्द्रावलीमाहुः । काचिद्दधार तद्बाहुमिति सख्यप्रधान प्रणयवती ॥ ३-४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तन्वः करचरणादयः । आगतमिति पुनरुक्तिस्तासां मूर्च्छितानामुत्थानं तदागमनैकहेतुकमिति स्पष्टीकर्तुम् ॥ ३ ॥ सर्वगोपीषु मुख्यानां कासाञ्चित् स्वस्वभावोचितप्रेमचेष्टितान्याह काचिदिति पञ्चभिः । कराम्बुजं दक्षिणमेवेत्युत्तरार्द्धव्याख्यायां व्यक्तीभावित्वात् । जगृहेविनयमयमैत्र्यात् स्पर्शौत्सुक्यात्स्तुति भावः । इयमादरमसंस्पर्शात्तदीयतामयघृतस्नेहवती कान्तपराधीना दक्षिणा च प्राथम्यात् सर्वज्येष्ठा चन्दनेन रूषितं भक्तिच्छेदेन लिप्तं बाहुं वाममेव स्वकान्तवामभाग एव स्थित्यौचित्यात् । इयमादरगन्धिना स्वकर्तृकालिङ्गनेन किञ्चिद्घृतस्नेहमिश्रमधुस्नेहवती व्यक्तसख्या किञ्चित् स्वाधीनकान्ता दक्षिणा च ॥ ४ ॥

रसिकाह्लादिनी-टीका

प्रथमं तासां तत्र गोचरे किंचिद्दूरे दिशि आविर्भूयायान्तं ससम्भ्रमाः जाता इत्याह तं विलोक्येति, तथोक्तं पाराशरेण-"ततो ददृशुरायातं विकाशिमुखपङ्कजमिति" । तदर्थं सर्वमन्वेषितं गानं रोदनमपि प्राप्तिसाधनं ज्ञात्वा तमागतं दूरादेव विलोक्य सम्यक्त्वेन दृष्ट्वा परिचित्य विरहाग्नितापप्रदमपि श्रेष्ठं जीवनं हेतुत्वात् । अबलाः विरहार्त्तिजनितदेहसामर्थ्या अपि तद्विश्वासाभावात् सकृदात्मानं दर्शयित्वा पुनरप्यदृश्यो भविष्यतीति शङ्कया सर्वा पुण्यत एकदैव उत्तस्थुः ससंभ्र—समुत्थिता इति । कर्शनानन्तरमेव प्राप्ता उत्फुल्ला विकसिता दृशो यासां ता तत्र दृष्टान्तमाह-तन्वा करचरणादयः आगतं प्राणं दृष्ट्वा यथोत्तिष्ठन्ति सचेतना भवन्ति तद्वदिति ॥ एवं तावत्सर्वासामेव विरहतापनिवृत्तौ सत्यां तासां यूथमुख्यानां तत्तद्भावोदयेन पूर्वचिंतितानि विरहालापैः मुखनिर्गतानि शृङ्गग्राहिकान्यायेन पृथक्कृतानि चेष्टितानि अभिनयेन दर्शयति काचिदिति पञ्चभिः । काचिदिति श्रीकृष्णप्रियात्वान्नामानुक्तिः ॥ ययान्तर्द्धिसमये कराम्बुजस्पर्शनमेव चिन्तितं सा कापि शौरेरिति शुकोक्तिः । काचित् कराम्बुजमिति शैत्यहेतुत्वं व्यञ्जितम अञ्जलिना संहतहस्तद्वयेन गौरवपूर्वकं स्वविनयज्ञापनं च मुदा हृदयोल्लासे निजगृहे पुनरप्यन्तर्द्धानशङ्कयेति गूढाभिप्राया, बहु-प्रदेशचंक्रमणेन संबलनशङ्कया वा स्पर्शजनितानन्दप्राप्तीच्छया वा कराम्बुजग्रहणमिति । काचित् गौरवं परित्यज्य तद्बाहुं स्वांसे दधार यतोऽप्यन्तरगा भविष्यामीत्याशया सदालिङ्गिता स्यामीत्याशया वा एकं बाहुं स्वस्कन्धे धृतवती । अनेन पीताम्बरधारणात् , मुदेति पूर्वक्लेशनिवृत्तिः सूचिता । कीदृशं बाहुं चन्दनभूषितं चन्दनेन भक्तिच्छेदरचनया कयाचिल्लिप्तं विरहतापतप्तांसे स्थापनं तत्तापनिवृत्त्यर्थमेव, तत्र हेतुत्वेन विशेषणं चन्दनभूषितमिति । रुषितमिति पाठे स एवार्थः ॥ ३-४ ॥

विशुद्धरसदीपिका

तमिति । आदौ समुत्कण्ठया सद्य एव दूरे प्रादुर्भूयागमनक्रमेण निजान्तिकं प्राप्तं सन्तं, ततो ददृशुरायान्तं विकासिमुखपङ्कजमिति विष्णुपुराणोक्तेः, अत एव विशेषेणाळोक्य वैवश्येनेषद्दर्शनेऽप्यनिश्चयात् । किंवा दृष्टेऽपि परमार्त्या विश्वासाभावात् सम्यक् निरीक्ष्येत्यर्थः । तत्र हेतुः अबला विरहक्षामाः यद्वा अवलीयन्ते इत्यवलाः सुरतरञ्जिततत्तदङ्गावलोकनाभिनिवेशेन नीचीनाङ्गयष्टय इत्यर्थः । इत्थमबला इति तन्त्रेणाभिधानं आसां च द्वैविध्यद्योतनायैवागमनमिति द्विः पाठः ततश्च प्रेयस्यो वयस्याश्च प्रीत्युत्फुल्लमुखाः युगपदुत्तस्थुः विलासाख्योऽनुभावोऽयं यथोक्तम्—

गतिस्थानासनादीनां मुखनेत्रादिकर्म्मणाम् । तात्कालिकं तु वैशिष्ट्यं विलासप्रियसङ्गजम् ॥

उभयत्र हेतुः प्रेष्ठमिति प्रियतमं प्रकृष्टं सखायमिति च यथायोग्यं तथैव दृष्टान्तोऽपि यद्वा तन्वः प्राणमिवेति तदेकजीवत्वेनोभयान्वयी यद्वा तन्व्यः विरहेण कृशाङ्गयष्टयः पक्षे सुकुमार्यश्च तदेवमत्र प्रीत्युत्फुल्लदृश इत्यनेन मुखाम्बुजानामर्घपात्रत्वं दृशां च सद्यो विकसितकुसुमप्रायत्वं प्रीतेश्च सलिलत्वमध्यवस्यार्घनिवेदनमपि सूचितम् एवं च रतेर्भावाङ्गमिति दर्शितम्॥३॥ तदेवं विरहदैन्येन सर्वासां तुल्यभावस्तन्त्रेणैवोक्तः इदानीं प्राप्तनिजालम्बनत्वेन तदेकप्राणानां निदाघतप्तानां लतानामिवोपलब्धरसानां स्वस्वभावमनुसरन्तीनां मध्ये कासांञ्चित् मुख्यानां चेष्टितभेदैर्भावभेदानाह । काचिदित्यापञ्चभिः । अत्रायमभिसंधिः आसां परः प्रेमा तावद्द्विविधः कासांचित्सख्यप्रधानश्च आद्यश्च सम्भोगविप्रलम्भात्मत्वेनात्मनि तदीयताभावनामयदाक्षिण्यप्रचुरः स चासौ दक्षिणानां कान्तपराधीनानां परस्तु कान्ते मदीयताभावनामयः स्वाधीनप्रेष्ठत्वाद्वामतादिप्रचुरः स चासौ वामायाः स्वाधीनपतिकायास्तदेकजीवनानां तस्याः सखीनां च सोऽयं परम आद्यरसाभिधः तदुक्तमलंकारकौस्तुभे चित्तद्रवस्थायी भावः प्रेमाख्यः प्रथमो रस इति चित्तद्रवस्थायीभावो रतिस्थायी इत्यर्थः -

तत्रालम्बनमन्योऽन्यं गुणाश्चोद्दीपनं मतम् । विशिष्य कथनाभावोऽनुभावः परिकीर्तितः ॥
मत्यौत्सुक्यादयोऽप्यत्र योग्याः संचारिणो मताः । सचायं श्रीराधामाधवयोरेव यथा तत्रैव ॥
राधामाधवयोर्यत्तत्प्रेमक्षेमंकरं महदिति । तत्र श्रीकृष्णप्रेमा यथा तत्रैव ॥

प्रेयास्तेऽहं त्वमपि च मम प्रेयसीति प्रवाद । स्त्वं मे प्राणा अहमपि तवास्मीति हन्तप्रलापः ॥
त्वं मे ते स्यामहमिति च यत्तच्च नो साधुराधे ! । व्याहारे नौ नहि समुचितो युष्मदस्मत्प्रयोगः॥
उभयोर्यथा श्रीमत्सुधा निधौ । सा लावण्यचमत्कृतिर्नववयोरूपं च तन्मोहनम् ॥
तत्तत्केलिकलाविलासलहरीचातुर्य्यमाश्चर्य्यभूः । नो किंचित्करमेव यत्र न नुतिर्नागोप्थवा संभ्रमो ।
राधामाधवयोः स कोऽपि सहजः प्रेमोत्सवः पातु नः ॥

अयं च दाम्पत्येऽपि शुद्ध एव तत् सुखपर्य्यवसायित्वात् तदुक्तमलंकारे—

प्रेमा दाम्पत्यभावोऽपि द्वयोः शुद्धतरो मत इति ॥

तत्रैवान्यत्र—

राधामाधवयोरेव शृङ्गारः श्रुतिरोचकः । वैदग्ध्यं यत्र पर्याप्तं कृतार्थश्च मनोभव इति ॥

तदेवमुभयोराद्यस्तु रिरंसासङ्कीर्णः तत एव च पराधीनतामयः संयोगविप्रयोगरूपश्च अयं तु केवलसंयोगमयः स्वाधीनकान्ताख्यः यथा स्वीयाः सन्ति गृहे गृहेऽम्बुजदृशो यासां विलासक्कणात्—

काञ्चीकुण्डलहेमकङ्कणझणत्कारो न विश्राम्यति क हेतुः सखि ! कानने पुरपथे सौधे सखीनां पुरो ।
भ्राम्यन्ती मम वल्लभस्य पुरुतो दृष्टिर्न विश्राम्यति ॥

तदेवं भावद्वयमिश्रतारतम्येनोत्तममध्यमकनिष्ठभाववतीनां प्रत्येकं त्रैविध्यं त्रिविधासु च सजातीयभावानां परस्परं सख्यरोचकत्वात् विजातीयभावानां प्रतिपक्षत्वम् अरोचकत्वादरसजातीयभावानां सौहृदं यस्मिंश्चिद्रोचकत्वेन हिताशंसनमात्रपरत्वात् अतिमिश्रत्वेनातिसूक्ष्मत्वेन वा नातिस्फुटसजातीयभावानां ताटस्थ्यं अवधानहेत्वभावात् तत्र च श्रीकृष्णविषयकनिजभावमात्राभिरुचितमतीनां सख्यस्य तदेकमूलत्वं श्रीराधाविषयकनिजनिजभावमात्राभिरुचिमतानां सख्यस्य तदेकमूलत्वं तत्र तदीयतामदीयतामययोर्मुख्ययोर्भावयोरुत्तर एव श्रेयान् तत्र हि ममताधिक्येन गम्भीरः प्रेमप्रवाहो वर्द्धते ततश्च तद्विवक्तकौटिल्यापरपर्य्यायाभावरूपं वाम्यमुदेति अहरिव गतिःप्रेम्णः स्वभावकुटिला भवेदिति भरतोक्तेः तत एव च कान्तोऽपि तद्वशः स्यादिति परमोत्तमत्वं तस्याः सखीनां च तत्सुखसुखितानां तद्वशीकारितया ततोऽपि परमत्वमिति स्थिते भावद्वयविभागे श्रीकृष्णस्य वयमित्यभिमानवतीनां दक्षिणात्वं श्रीराधाया वयमित्यभिमानवतीनां वामात्वं तत्राद्यासु श्रुतिमुनिरूपाणां समावेशः परासु च तासामेव कासांचिल्लब्धशुद्धभावानां साधकचरीणां समावेश इति अत्रासां प्रखरा मृद्वीमध्यादिभूयासो भेदा उज्ज्वलाद्यनीलमणेर्ज्ञेयाः विस्तरभिया नोच्यन्ते न चायं विभागः प्रतिकूलतयासंभावनायः तत्तन्नायिकारूपेण क्रीडन्त्याः श्रीराधाया अनुगतेन प्रियतमेन तत्तन्नायकभावाभिव्यञ्जकतया तत्तत्पोषकत्वाभिप्रायाद्रसस्यास्य तत्तत्प्रकारवर्णनेनैव सर्वोत्कत्कर्षप्रदर्शनतात्पर्य्यपर्य्यवसायित्वादित्यलमतियप्रञ्चितेन । काचिदिति औदासीन्यव्यक्तिः शौरेरिति पूर्ववत् करमम्बुजं जगृहे तच्च दक्षिणमेव पुरुषव्यक्तौ तस्यैव प्राधान्यात् तथा वनभ्रमणश्रान्ततयामत्तस्य तस्य करावलम्बनदानाय तादृशव्यवहारस्यौचित्यात् स्पर्शौत्सुक्याच्च अञ्जलिनेत्यादरः मुदेति प्रीत्युत्कर्षः ततश्चेयं मृदुः सख्यप्रायदास्या कान्तपराधीना दक्षिणा च नामानुक्तिश्च तत्समानभावानामन्यासामपि तदन्तःपातविवक्षया एवं सर्वत्र श्लोकार्द्धेनैव कथनात्कवेरौदासीन्यमिति संक्षेपः । काचिदिति । चन्दनेनरूषितं भक्तिच्छेदलिप्तम् इयमाकृष्य धारणात्प्रखरा व्यक्तसख्या किञ्चित्पराधीनकान्ता दक्षिणा च ॥ ४ ॥

श्रीरामनारायणकृता भावभावविभाविका

तदाविर्भावे जाता तासां या दशा तामाह । तम्विलोक्येति । तमागतमासमन्ताद्गतं प्राप्तं विश्वतश्चक्षुर्विश्वतः पात् सर्वतः पाणिपादं तत् मया ततमिदं सर्वजगदव्यक्तमूर्त्तिनेत्यादिश्रुतिस्मृतिभ्योविभुसर्वाङ्गत्वात् आगतमिव विलोक्य तदेजति तन्नेजति तद्दूरे तद्वन्तिके इति श्रुत्या विभुत्वादनेजनस्य तत्तत्प्रदेशाभिव्यञ्जकत्वेच्छानुसारेणैजनगमनस्य दूरान्तिकयोर्वर्तमानत्वस्य च सम्भवात् श्रुतौ एजृकम्पने इत्यस्मात् कम्पनञ्चलनमित्यर्थः । तत् उ अन्तिके इति पदच्छेदश्च विलोक्येत्यत्र तु अन्तरपि वर्त्तमानत्वेमान्तः पश्यन्त्यः सह विहरन्त्योऽपि पूर्वगीतेषु प्रहसितं प्रियप्रेमवीक्षणमित्यादिषु ते प्रहसितादि वीक्ष्य मुहुरतिस्पृहेत्यादि तेन सहभाषमाणास्वपि ध्यानमङ्गलमित्युक्त्या वयं ध्यानलयेनैव पश्यामो नैव पश्याम इति भ्रमेण विकला अधुनातु विशेषेण गततत्संशयतया लोकयित्वा ता अबला अपि उत्तस्थुः तदुक्तं प्रेमनित्यव्यक्ततया अस्य गोपीजनस्यान्तर्बहिः प्राकट्यं भगवतः श्रुत्यातदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत इति व्यापकतयान्येषामपि तथात्वेऽप्यव्यक्तत्वेन न तथात्वं तत्राबला इति प्रथमस्वरूपेणैव बबला नार्य्योविशेषतो विरहदुःखकर्षिता गतप्राणास्तन्व इवाबलाः प्राणमागतं तन्व इव प्राप्तबलाः सर्वा युगपदुत्तस्थुः अयमत्राभिप्रायः प्रयत्ने जाते कस्मिंश्चिदङ्गे चेष्टामात्रं भवति मरणोत्तरप्राणागमने तु सर्वोत्थानं तथा युगपत्सर्वा उत्तस्थुः, यद्वा एकैकेन्द्रियप्रवेशेनोदितिष्ठत्तदाविराडित्यनुत्थानेऽपि "अत एव प्राण" इति व्याससूत्रनिर्णीतप्राणात्मनः क्षेत्रज्ञस्य प्रवेशे उदतिष्ठत्तदा विराडिति

विराडुत्थानवत्तं प्राणमागतमिव विलोक्य ताः सर्वा उत्तस्थुः यद्वा तासु तस्याः तन्वः वस्तुतस्तत्स्वरुपत्वात् लीलायामपि तत्पत्नीत्वात्तस्य तासामतिप्रियत्वात्प्राण इति तमागतमिव विलोक्य युगपत्सर्वा उत्तस्थुः। यद्वा सर्वास्तन्व इत्युक्त्या विरहकर्षिततया सूक्ष्मताङ्गताः प्राणात्मकस्य तस्य वियोगे तनुमात्रावशिष्टा वा तमागतं विलोक्योत्तस्थुः तस्यातिप्रियत्वमेव हि प्रेष्ठमिति प्रेष्ठत्वादेव तद्विरहे तनुमात्रावशेषत्वं दर्शने संजीव्यलब्धबलत्वेनोत्थानं चोपपन्नमेव किंच भगवदाविर्भावे सर्वोत्थानमभिप्रेत्य विलोकयेत्यनेन विलोकयित्रात्मन उत्थानमुक्तं प्रेष्ठमिति प्रियत्वावगमे मनस उत्थानसूचनं प्रीत्युत्फुल्लदृश इतीन्द्रियोत्थानोपलक्षणं बला इति बलप्राप्त्या प्राणोद्गमद्योतनम् उत्तस्थुरिति शरीरोत्थानं युगपदिति सर्वसङ्घातस्य समानकालोद्गमोक्तिः उत्थितानां तासां प्रियसमागमे चेष्टामाह। काचिदित्यादिना तत्र पूर्व विरहदैन्येनैकदशापन्नानां सर्वासां सहनिरूपणमधुना प्रियदर्शनलब्धश्वासानां जाताश्वासानामुद्भूतविवि भावोल्लासानां विचित्रचेष्टानिदर्शनमिति विशेषः काचित् शौरेः कराम्बुजमञ्जलिना मुदा जगृहे इत्यन्वयः तत्र मुदेति प्रियदर्शनजातमोदेन लब्धसामर्थ्या अञ्जलिना मुदा करग्रहणन्तु आगतस्य प्रथमं सप्रेमादररीत्या यद्वान्तर्द्धानेन वाम्यभावङ्गतस्य पुनरुद्वेगशङ्कयाक्रमेण स्पर्शाकाङ्क्षया यद्वा अञ्जलिना हस्तद्वयेन ग्रहणं पुनः पलायनभयात् यद्वा करग्रहणेन पाणिग्रहणसूचकेन स्वीकृतत्यागे लज्जोत्पादनाय यद्वा वामभागस्य वामभागत्वात् शौरिरित्युक्त्यादक्षिणं करं जगृहे इतिसूचनात् दक्षस्य तव दक्षिणत्वेन दाक्षिण्यभावयो गस्य वामासु वामभावस्य न वामत्वमिति भावद्योतनाय यद्वा अमलं निरुपाधिकं सुखस्वरूपं तं करस्थामलकवदपरोक्षतापादनाय यद्वा स्वहस्तगतत्वेन स्ववशीकरणाय यद्वा करस्याम्बुजमिति विशेषणेन स्वान्तस्तापोपशमाय कराम्बुजस्य योग्यतामाकलय्य यद्वा अयं पद्मां सदैव वक्षसि धृत्वैव विनिरति मय्यपि न रमापेक्षया रूपलावण्यमाधुर्य्यादिगुणेषु वैकल्यमपितु तस्याः करे पद्म इति सुरभिमृदुत्वाह्लादकत्वाद्यखिलगुणैस्तस्याः करस्थपद्मस्य भगवत्करपद्मस्याप्यनवगतत्वात्तत्करपद्मग्रहणेन पद्मातोऽप्यधिकमात्मनस्तत्प्रियात्वसम्पादनेन तस्य हृद्धामतया तस्या अपि हृद्धामतया हृद्धामतापादनाय यद्वा शौरेरित्युक्त्या शूरवंशप्रभवशूरवरस्य रतिरणे मल्लक्रीडाप्रथमभावद्योतनाय काचित्तु चन्दनरूषितं तेन लिप्तं यस्य प्रियतमस्य बाहुम् अंसे स्वस्कन्धे दधारेत्यन्वयः। अत्रापि मुदेति पूर्ववदनुषज्य योजनीयं तद्वा होरंसे समपणन्तु ततोऽप्यन्तरङ्गसख्यभावद्योतनाय आत्मनस्तदन्तरङ्गत्वसम्पादनायैव वा सख्यभावप्रियसन्मानरीत्या वा प्रथमसख्याकरग्रहेणन परीक्षिते तस्य वामभावोपरमे स्वदाक्षिन्यसहितधाष्ट्योविष्काराय वा यद्वा। चन्दनरूषितमिक्त्युक्त्या तद्विरहे दाहकस्यापि चन्दनस्य तद्बाहुसम्बन्ध एव तापापनोदकत्वमाकलय्य यद्वा चन्दनलिप्ततयागौरं तद्बाहुं करकमलनालमिवाकलय्य तापोपशमायांसे धृतवती यद्वा चन्दनलिप्तं श्यामभुजं गङ्गायमुनासङ्गमं स्वेष्टफलदतीर्थराजमाज्ञाय तदवगाहनेन स्वेष्टसिद्धौ तदन्तः प्रवेशायांसे दधार यद्वा गौरचन्दनस्य तद्बाहु संगमदर्शनजातोत्साहा स्वयमपि गौरीश्यामबाहुसङ्गतिं चकार यद्वा तद्बाहुं चन्दनलिप्तं दृष्ट्वा चन्दनानुलेपानुपुष्पसमर्पणस्यौचित्यात् अंसे धारणेन स्वमुखाम्बुजस्य समर्पणाय यद्वा मलयादागततल्लिप्तभोगिवच्चन्दनलिप्ततद्बाहुनोचितस्वभुजभुजङ्ग्याः समागमेनैव स्वात्मनोऽपि स्वपष्टेसमागम इत्येकप्रयत्नेन कार्य्यद्वयसम्पत्तिमवगत्य तथ चरणं यद्वा चन्दनालिप्तं तद्भुजंमलयद्रुमशाखां मत्वा भुजभुजङ्ग्याविरहविषतापोपशमार्थं तन्मेलनाय स्वांसे दधार तथाच तन्मिलनमात्रेण सा पञ्चफणा भुजभुजगी गतविरहतापावषी प्रबृद्धानुरागसुखाभ्यामभिभूतस्वपरानुसंधानचेतनतया लब्धजाड्या प्रेमोद्भूतरोमपुलकमुकुलाप्रस्फुरत्फुल्लकरकुसुमा शाखालीङ्गितलतेव बभौ ततश्च मलयसङ्गमे लताया अपि चन्द्रनत्ववत् हरिभुजसौरभ्यस्य तद्भुजे संपत्तौ भक्तेषु निजसत्त्वात्मकप्रेमरसं स्वयं दत्त्वा नदीयानुरागमत्या भक्तवश्यत्ववत् तल्लब्धतया मधुपतेरपि मधुपत्वापत्तिरात्मारामत्वं च ॥ ४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ततः किंवृत्तमित्यपेक्षायामाह। तमिति। तं तथाभूतमागतं विळोक्य तासां विह्वलतादशायामाविर्भूतत्वात्तच्छरीरसुगन्धाघ्रामादिना ससंज्ञाः सत्यः अहो आगतोऽयं प्रेष्ठ इत्यमन्यन्तेति सूचयितुमागतमित्युक्तं प्रीत्या विकसितनेत्रपद्माः प्रीतिपारवश्यात्कोपनिवृत्त्या तादृशा जाता इति भावः। तत्राप्यबळास्तत्प्रतीकारबळरहिता यद्वा विरहेण कृशतां गतत्वाद्दुर्बला बलरहिता अपि यतः प्रेष्ठं तद्दर्शनमात्रेणैव सबला इति भावः। सर्वा अपि युगपदेवोत्तस्थुः आगतं प्राप्य तन्वः करचरणादयः शरीरावयथा यथा द्राक्त्यकान्यनेकानि योगशरीराणि प्राणं प्राप्य यथा युगपदुत्तिष्ठन्ति तद्वत् एक एव कृष्णस्तासां प्राण इतिबोधनाय प्राणमित्येकवचनम् ॥३॥ तत्र युगपदुत्थितानां सर्वासां मध्ये मुख्यानां पृथक्चेष्टितान्याह। काचिदिति। चन्द्रावली श्यामा शैव्या पद्मा राधा ललिता विशाखा भद्रेत्यष्टौ मुख्या सख्यः तत्राद्याश्चतस्रः सरलस्वभावत्वाद्दक्षिणाः उत्तराश्चतस्रः वामस्वभावत्वान्मानिन्यः अत एव मुनिनापि सरलानां मध्ये एकैकस्याश्चेष्टितमर्धेनार्धेनोक्तं वामानां मध्ये त्वेकैकस्या वृत्तेनोक्तं तत्रादौ कान्तपराधीनाया दक्षिणाया वृत्तमाह। काचिच्छौरेः दक्षिणं करकमलमञ्जलिना संहतहस्तद्वयेन जगृहे तत्रापि मुदा परमहर्षेण भ्रमणप्राप्तश्रमम्मत्वा स्पर्शौत्किण्ठयात्करावलम्बनव्याजेन प्रेम्णा तद्गृहीतवतीत्यर्थः। इयं तु राधां प्रति स्पर्धिनी चन्द्रावली संज्ञा तथाचोक्तं विल्वमङ्गले—

राधामोहनमन्दिरादुपगतश्चद्रावलीमूचिवान् । राधे क्षेममिहेति तस्य वचनं श्रुत्वाह चन्द्रावली ॥
कंसं क्षेममये विमुग्धहृदये कंसः क्व दृष्टस्त्वया। राधा क्वेति विलज्जितो नतमुखः स्मेरो हरिः पातु व इति ॥

अथ द्वितीयायाः कान्ताधीनायाः दक्षिणायाश्चेष्टितमाह । काचिच्चन्दनलिप्तं विरहतापोपशामकं तस्य बाहुं स्कन्धे मुदा दधार इयं राधा सुहृद्भूता श्यामलाख्या सखी ॥ ४ ॥

रास-रहस्यम्

र० टी०—प्रेष्ठं परमप्रेमास्पदं तं परमात्मानं आगतमिवागतं विलोक्य ध्यानेन साक्षात्कृत्य, प्रीत्युत्फुल्लदृशो प्रीत्या उत्फुल्लानि विकसितानि नेत्रोपलक्षितः सर्वाणि करणानि यासां ताः, अबलाः न बलाः चक्षुरादिनां यत्र बलं नास्ति, वृत्तयः तन्वः प्राणमिवागतं मृतशरीरे प्राणस्य पुनरागतिवत् "तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते एवमस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रतिष्ठन्ते एवं वाङ्मन श्चक्षुः श्रोत्रं च ते प्रीता प्राणं स्तुवन्ति ।" "अत एव प्राणः ।" इति श्रुतिसूत्रनिर्णीतः प्राणात्मन इव सर्वा युगपत् एकदैव उत्तस्थुः उदतिष्ठन् ॥ ३ ॥ "विश्वतश्चक्षुरुतः, विश्वतोमुखो विश्वतः बाहुरुतः विश्वतस्पात् ।" "सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।" "मया ततमिदं सर्वम् ।" इत्यादि श्रुतिस्मृतिभ्यः काचित् शौरेः परमात्मनः, कराम्बुजं अम्बुजवदाह्लादकरं करं ज्योतिः, अञ्जलिना स्वकरेण स्वकिरणेन, मुदा परमहर्षेण, जगृहे गृहीतवती, काचित् चन्दनरूषितं चन्दनवत् स्निग्ध तत् तस्य परमात्मनः बाहुं कराग्रं प्रकाशं अंसे स्वात्मनि, दधार धारितवती ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तं श्रीकृष्णमागतमाविर्भूतम् युगपद्विलोक्य सर्वा युगपदेवोत्तस्थुरित्यर्थः । अनेन तत्तदाभिमुख्येनाविर्बभूवेति सूच्यते तत्र दृष्टान्तस्तन्वः कष्टान्तस्तन्वः करचरणादयः प्राणमागतमिवेति ॥ ३—४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रेष्ठं तमालोक्य प्रीत्युत्फुल्लदृशो यासां ता अबलास्तन्वः शरीराण्यागतं प्राणा यथोत्तिष्ठन्ति तथेति सर्वा युगपदेकदेवोत्तस्थुः । अंसे चन्दनरूषितं बाहुं काचिद्दधार ॥ ३-४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो यज्जातं तदाह । तं विलोक्येति तमागतं विलोक्य युगपत्सर्वा उत्थिताः पूर्वमाविर्भावमुक्त्वाधुना यदा गमनमुक्तं तद्विलोकनसमये स्वामिनीः भावानुवादरूपं पूर्वमन्तः स्थितोऽधुना बहिरागत इति वा तथोक्तिः । ननु किमाश्चर्य्यं भगवत्यागते उत्थिता इति तत्र नह्येताः सजीवाः स्थिता किंतु निर्जीवा इति वक्तुं दृष्टान्तमाह । तन्वः करचरणाद्यवयवाः प्राणमागतमिवेति प्रयत्ने हि एकमेवाङ्गं व्यापृतं भगवति प्राणे तु सर्वाणि संभूय अतो बहुवचनं युगपदुत्थानार्थम् उत्थापनं पञ्चानां भाव्यं देहेन्द्रियप्राणान्तःकरणजीवानां तत्र जीवस्य अन्याधीतमुत्थानं परं तस्मिन्नागते सर्वाण्युत्तिष्ठन्ति सतु भगवति प्रविष्टः भगवत्सङ्गे समागतः भगवत्युत्थित एवोत्थितः अन्तःकरणं तु उत्थितमित्यत्र हेतुमाह । प्रेष्ठमिति अत्यन्तप्रियो भगवान् तं दृष्ट्वा उत्थितं भगवति या प्रीतिस्तया कृत्वा उत्फुल्ला दृक् यासाम् अनेन प्रीत्या इन्द्रियाणामुत्थानाच्चेतसां विलोकनार्थमेवागमनमित्यागमनमात्रेण विलोकनमादौ संपन्नम् उत्फुल्लता तु ततो भिन्ना तस्याः पुष्पधर्मत्वेन तदुक्त्या दृशां कमलत्वं व्यज्यते तत्र पीतेर्हेतुत्वोक्त्या यदवधितत्कार्याभावेनाधुनैव तत्प्राकट्यं ज्ञाप्यते रवेरिव विरहे सर्वातिरोधानादेतत्तिरोधानमप्यासीदत एवाबलात्वमुक्तं कार्यमात्रे स्वसामर्थ्याभावज्ञापनार्थं दृष्टान्तेनैव प्राणानामुत्थानं प्राणानां भगवान् प्राण इति शरीरं तु पूर्वोक्ताभिलषितपदार्थत्वेन निरूपणात् उत्थितमित्यत्र तमिति हेतुः । एवमुत्थितानां भगवता सह स्थितानां कार्यमाह । काचिदिति पञ्चभिः । पूर्वमनेकविधाअपि भगवत्याविभूतेसप्तविधा एव जाताः एकोभगवान् सर्वार्थे प्रकटीभूतः तत्र या अग्रे स्थिताः ताअपि निकटः स्थिाता एव पूर्वं मुच्यन्ते शुद्धरजोयुक्ता रजःसात्त्विक्यश्च निर्गुणाश्च शिष्टाः सप्तविधा गण्यन्ते काचिदत्र शौरे काराम्बुजमुदा अञ्जलिना अगृह्णात् एक एव हस्तो भगवता प्रसारितः पीताम्बरधर इति द्वितीयेन हास्यनिवारणार्थं पीताम्बरग्रहणात् बहुमानेन ग्रहणमञ्जलिना भवति शौरेरिति वीरत्वज्ञापनाय मुदेति पूर्वोक्तक्लेशव्यावृत्त्यर्थम् अन्याः पुनः ततोऽप्यन्तरङ्गा भविष्यामीति तद्बाहुमंसे दधार यथा आलिङ्गितैव भवति अग्रे एतस्या विनियोगो वक्तव्यः भुजमगरुसुगन्ध मूर्ध्न्यधास्यत् कदा नु इति अत एव तदीयो धर्मोऽन्तःतस्याः निरोधं साधयिष्यतीति चन्दनरूषिततमित्युक्तं चन्दनेन रूषितं लिप्तं चन्देन हेतुना पूज्या लक्ष्मीर्वापूर्वोक्ता तथा ताम्बूलेऽपि एवं सामग्नीप्रकटनेन तासां देवोत्तमानां च कृत्यं प्रदर्शितम् एता आरोढुकामाः देवोत्तमास्तु पूजका इति ॥ ३-४ ॥

श्रीसुबोधिनी-सारः

आगतं प्रेष्ठमतिप्रियं तं श्रीकृष्णं विलोक्य दृष्ट्वा प्रीत्योत्फुल्ला उज्जृम्भिता दृशो नेत्राणि यासां ता । अबला गोप्यो युगपत्समकालं सर्वा उत्तस्थुरुत्थानं चक्रुः, आगतं प्राणं तन्व इन्द्रियाणि इव ॥ ३ ॥ काचित् शौरेः श्रीकृष्णस्य कराम्बुजं हस्तपद्मं मुदा हर्षणाञ्जलिना जगृहे दधार चन्दनेन भूषितं तस्य बाहुं काचिदंसे स्कन्धोपरि दधार ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

काचित्कराम्बुजमित्यत्र, पूर्वमनेकविधा अपीति । अनाविर्भावे चित्तविक्षेपादनेकविधत्वं पूर्वाध्याय उपपादितं वचनरीत्या । अधुना तु प्रभुर्भगशब्दार्थं प्रकटीकृत्य स्वयमाविर्भूत इति ता अप्याविर्भूतस्वरूपैकनिष्ठा इति तदात्मिका जाता इत्यर्थः । एवं सति स्वरूपस्य रसात्मकत्वेन तद्धर्माणामपि तथात्वात् भ्रुकुटिबन्धनादिभावा अप्युपपद्यन्त इति भावः । **निर्गुणाश्च शिष्टा** इति । चकारात्तमस्सजातीयभाव उच्यत्ते ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तमागतं कृष्णं विलोक्य प्रीत्या उत्फुल्लदृशो विकसितनेत्राणि यासां ताः अबलाः गोप्यः सर्वा युगपदेव उत्तस्थुः । तत्र दृष्टान्तमाह—तन्व इति । यथा प्राणंविना तन्वः तनवः करचरणादयो मूर्च्छिताः निश्चेष्टाश्च भवन्ति पुनस्तत्प्राप्तौ सचेष्टाः सन्त्यः स्वव्यापारे प्रवर्तन्ते तथा गोप्योऽपि कृष्णंविना मूर्च्छिता आसन्, पुनस्तं दृष्ट्वा सव्यापारा जाता इत्यर्थः । तस्य प्राणतुल्यत्वमाह—प्रेष्ठमिति ॥ ३ ॥ उत्थितानां तासां पृथग्व्यापारानाह—काचिदिति । काचिद्गोपी मुदा हर्षेण अञ्जलिना संहतहस्तद्वयेन शौरेः कृष्णस्य कराम्बुजं जग्राह । काचित्तु चन्दनेन भूषितं 'रूषितम्' इति पाठान्तरम्, लिप्तं तस्य बाहुमात्मनोंऽसे स्कन्धे दधार ॥ ४ ॥

अन्वितार्थप्रकाशिका

तमिति ॥ प्रेष्ठं प्रियतमं तं कृष्णम् आगतं विलोक्य प्रीत्या उत्फुल्ला विकसिताः दृशो नेत्राणि यासां ता अबला गोप्यः यथा प्राणमागतं प्राप्य तन्वः करचरणादयः उत्तिष्ठन्ति तथा सर्वा युगपदेव उत्तस्थुः ॥ ३ ॥ अथ आसु गोपीषु मुख्यानां चेष्टाविशेषमाह । अत्र तोषिण्यनुसारेण तासां नामानि लिख्यन्ते–काचिदिति ॥ काचिद्गोपी मुदा हर्षेण अञ्जलिना संहतहस्तद्वयेन शौरेः कृष्णस्य कराम्बुजं जग्राह । इयं चन्द्रावली राधाप्रतिस्पर्द्धिनी मृदुश्चेति । काचित्तु चन्दनेन भूषितम् । रूषितमिति पाठान्तरम् । लिप्तं तस्य बाहुमात्मनोंसे स्कन्धे दधार । इयं राधासुहृत् श्यामला ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रीत्या उत्फुल्लादृशो यासां ताः आगतं प्राणं प्रतिज्ञातनवः करचरणाद्यङ्गानीव ॥३॥ अञ्जलिना संगतकरद्वयेन चन्दनेन रूषितं च चर्चितं भूषितमित्यपि पाठः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ प्रेष्ठमतिप्रियं आगतं तद्विलापासहिष्णुताजातापारकरुणया समायातं, श्रीकृष्णं विलोक्य, अबला रोदनव्यतिरिक्तबलरहिता गोप्यः, प्रीत्योत्फुल्ला विकसिता दृशो यासां तथाभूताः सत्यः, आगतं पुनरायातं, प्राणं मुख्यासु, तन्वः शरीराणि इव, सर्वाः युगपदेककालमेव, उत्तस्थुः । वियुक्ते प्राणे पुनरागत्य सुस्थे सति यथा तनुरुत्तिष्ठते तद्वदुत्तस्थुरित्यर्थः ॥ ३ ॥ ता इति ॥ अथ ताः गोप्यः, कृष्णस्य मुखे यल्लावण्यं तदेव सुधा तां, नयनभाजनैर्नयनरूपैः पानपात्रैः, आपीय पुनः पुनः पीत्वापि, यथा सन्तो भक्तजनाः, तच्चरणं भगवत्पदाब्जलावण्यं, पुनः पुनरनुभूयापि न तृप्यन्ति तद्वत्, न अतृप्यन् तृप्ता न बभूवुः हि ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तं विलोक्येति : १०.३२.३.

वस्तु समान्यमपि चेत्पुनर्लब्धं तदा मुदे । भवत्यत्र नु संलब्धस्ताभिरद्धेन्दिराधिपः ॥ ११ ॥
प्रादुर्बभूव भगवान विपिने तदान्तस्तासां सुख कियदभूत् कियती दया वा ।
तस्यापि चेतसि कियानथ हार्दभावस्तच्चाखिलं यत पुराणगिरोऽप्यतर्क्यम ॥ १२ ॥

काचित् कराम्बुजमिति : १०.३२.४.

यस्त्वं दीनजनानुपालनविधौ नित्योल्लसत्कङ्कणस्तस्यास्मिंस्तव हस्त मादृशि जने कस्मादुपेक्षाऽजनि ।
इत्थं प्रष्टुमनाः शशाङ्कवदनैका कापि गोपाङ्गना मन्ये पूर्णदयावतो भगवतो हस्ताम्बुजं सन्दधे ॥ १३ ॥
अकुतोभयोऽपि भगवानिह कस्माद्दरभागभूदिति विचिन्तनलोला ।
न हि तादृशः स खलु किं त्वयमेवेत्यविलम्बमस्य करमाजगृहेऽन्या ॥ १४८ ॥
अजातशत्रुः श्रीनाथः कस्मादस्मासु वैरधीः हेतुर्वाऽस्त्यरिभाक्सङ्ग इत्यन्याऽरिकरं दधौ ॥ १५ ॥
अतिप्रियतमा त्वस्य रमैवेत्यपरा जवात् । कर्तुं तत्तुल्यमात्मानं तत्कराब्जकराऽभवत् ॥ १६ ॥
प्रसादाभययोर्दक्षः सर्वेष्वप्येष एव यत् । तदन्यसाधनेनालमिति तत्करमादधौ ॥ १७ ॥
न त्वं कुरु पुनः प्राग्वन्नाहं कुर्यामितः प्रभो । तत्करं स्वकरे न्याधादिति सच्छपथाय किम् ॥ १८ ॥
विना पाणिग्रहं न स्यामहमस्य कुटुम्बिनी । इति किं तरसा शीघ्रं जगृहे पाणिना करम् ॥ १९ ॥

अतनु शासनवर्तनलङ्घनं यदि कृतं महता क्वचिदस्य तत् ।
अतनुशासनमेव विधेयमित्यनुविचिन्त्य हि सा करमग्रहीत् ॥ २० ॥

तद्वाहुमिति :

अतिनिर्दयलोकजन्मभूमिरयमेवावयवो बुधैर्निरुक्तः । भगवद्भुजमात्मबाहुसात्किं विदधे सा समतां द्वयोर्विचिन्त्य ॥ २१ ॥
रजस्तमः पूर्णभुवो बाहो त्वज्जा इति श्रुतम् । कथं त्वमसि सत्त्वश्रीरिति तं प्रष्टुमस्पृशत् ॥ २२ ॥

त्वमंस विश्रान्तिनिमित्तमस्या मदाश्रितायाः प्रथमं पुरस्कृतः ।
ततः कुतोऽभूदिदमीदृशं त्विति प्रष्टुं तदंसोऽसमुपागमत् प्रभोः ॥ २३ ॥
अंसंगतं वरमहारि विहारिणा मे कृष्णेन पूर्वमिति कापि विलोलबाहुः ।
अंसंगतं वरमवेक्ष्य तदाऽतिहर्षादंसंगतं भगवतो ह्यकरोन्निजांसे ॥ २४ ॥

कृष्णप्रिया

प्रियतम श्याम सुन्दरजी का दर्शन होते ही सर्व गोपियाँ, प्रीति से प्रफुल्लित नयन बनी, काया के भीतर प्राणों के प्रवेश से समस्त अङ्ग प्रत्यङ्ग एवं इन्द्रियां जैसे सचेत हो जाय वैसे व्रजनारियाँ सब साथ नाथ के सामने हाथ जोड़कर खड़ी हो गई ॥ ३ ॥ जो शुद्ध सात्विक गोपी जी थी उसने भगवान ने पसारा हुआ प्रियतम का कर सरोज अपने दोनों कर सरोजों की अञ्जली के मध्यम में अत्यन्त आदर से धारण किया। तब दूसरी शुद्ध राजस गोपी ने चन्दन चर्चित नन्दलालजू की बाहुको अपने कन्धे पर धारण किया ॥ ४ ॥

काचिदञ्जलिनागृह्णात्तन्वी ताम्बूलचर्वितम् । एका तदङ्घ्रिकमलं[1] सन्तप्ता स्तनयोरधात् ॥ ५ ॥
एका भ्रुकुटिमाबध्य प्रेमसंरम्भविह्वला । [2]घ्नन्तीवैक्षत् [3]कटाक्षेपैः [4]संदष्टदशनच्छदा ॥ ६ ॥

कर्दमक्षमा

अन्वयः—काचित् तन्वी ताम्बूलचर्वितम्, अञ्जलिना, अगृह्णात्, संतप्ता, एका, तदङ्घ्रिकमलम्, स्तनयोः अधात्॥५॥ प्रेमसरम्भविह्वला, सन्दष्ट दशनच्छदा, एका, भ्रुकुटिम्, आबध्य, कटाक्षेपैः, घ्नन्ती, इव, ऐक्षत् ॥ ६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अञ्जलिना संहतहस्तद्वयेन ॥ ५ ॥ भ्रुकटिं भ्रुवमाबध्य कुटिलीकृत्य प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला विवशा-दष्टाधरोष्ठा कटाः कटाक्षास्तैर्ये आक्षेपाः परिभवास्तैस्ताडयन्तीवैक्षत ॥ ६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ताम्बूलस्य चर्वितं भक्षितोच्छिष्टं थूत्कृत्य त्यक्तं तज्जलं वा । संतप्तस्तनयास्तापापनोदार्थमधाद्धार ॥ अंघ्रिकमलं दक्षिणमेव स्वहस्ताभ्यां गृहीत्वा भूमावुपविष्टा स्तनयोर्न्यधात् । ततश्च वामभुजेन कान्तायाः स्कंधमालंब्य वामचरणेन भुवमवष्टभ्य कृष्णस्तस्थाविति ज्ञेयम् । इयं मैत्र्यप्रायदास्या कान्ताधीना दाक्षिणा चेत्यत इमे तदीयतामयघृत स्नेहवत्यौ प्रथमायाः सख्यौ ॥ ५॥ नामैकदेशग्रहणेन भीमपदेन भीमसेनवत्कटपदेन कटाक्षग्रहो ज्ञेयः । घ्नन्तीवेत–अरे शठ मामपि त्यक्तवानित्याशयः । राधिकेयमिति प्रतीयत इति ॥ भ्रुकुटिमाबध्य भ्रुवं कुटिलीकृत्य । सज्यं धनुः शरसंसक्तं प्रतान्येवेत्यर्थः । प्रेमसंरभेण प्रणयकोपावेशेन विह्वला विवशा । कटाः कटाक्षाः शरास्तेषां क्षेपणैः । कृष्णं लक्ष्यभूतं घ्नंतीव–भो कुहकशिरोमणे स्वप्रेमहालाहलं त्वया मयि प्रसृज्य सम्यक्तया सफलीकृतम्, देहान्निसृतप्रायान्प्राणान्दग्धुं किं पुनरपि प्रत्यासीदसि, त्वं साध्वेव परिचितोऽभूरिति व्यंजयन्ती प्रैक्षत । निदंष्टदशनच्छदेत्यंगुलिनाऽऽवृतस्य स्वाधरस्य दंशः कोपानुभावः । इयं मदीयतामयमधुस्नेहोत्थमानकौटिल्यवती ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रेमसंरम्भविह्वला सती भ्रुकुटिमावध्य निर्दष्टदशनच्छदा भूत्वा कटाक्षेपैर्घ्नंतीवैक्षतेत्यन्वयः । कटाक्षेपैः कटाक्षविक्षेपैः। सन्दष्टेति क्वचित् पाठः । शौरिमिति प्रकरणात् । घ्नतीवेति तस्यापि क्षोभं व्यज्य ताभिगृहीतत्वेनैव दाक्षिण्यमात्रेणैव च स तत्र स्थित इति व्यज्यते । तथा वाम्येन दूरस्थिताया अपि तस्याः प्रेमसंरम्भेत्यनेन तदीक्षणे परमसुखं दर्शितम् । यथा श्रीविष्णुपुराणे। काचिद्भ्रूभङ्गुरं कृत्वा ललाटफलकं हरिम् । विलोक्य नेत्रभृङ्गाभ्यां पपौ तन्मुखपङ्कजमिति अत्र विव्वोकाख्यानुभावो दर्शितः। यथोक्तम् इष्टेऽपि गर्वमानाभ्यां विव्वोकः स्यादनादर इति । तथा ललिताख्योऽपि यथोक्तं विन्यासभङ्गिरङ्गाणां भ्रूविलासमनोहरा। सुकुमारा भवेद्यत्र ललितं तदुदीरितम् इयं प्रखरा सुसख्यात्यन्तस्वाधीना वामा कान्ता च ॥ ६ ॥

---

१. युगलं–विज. । २. प्रत्य–त्रिज । ३. क्षेण–वीर. विज. । ४. निर्दिष्ट–प्रा. पा. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अञ्जलिनेति पूर्व्ववत्, किंवा बहुल-लाभाशया सदा चर्व्व्यमाणं ताम्बूलं प्रवर्त्तते, परमरसमयत्वात् पतनशङ्कया वा। यतस्तन्वी विरहणातिकृशा, अतएव ताम्बूलचर्व्वितं परमरसमयत्वात् ताम्बूलं पुरा श्रीभगवतैव नागरशेखरेण स्वयमानीतम्, किंवा श्रीवृन्दादेव्याद्यर्पितं ज्ञेयम्। अङ्घ्रिकमलमेकं स्तनयोर्न्यधादित्येतस्यास्तदर्थमुपवेशो ज्ञेयः। श्रीभगवदुपवेशश्चाग्रे (भा० १०।३२।१४) 'तत्रोपविष्टः' इति वक्ष्यते, तस्य तयोर्निधाने हेतुः—सन्तप्तेति। अन्यथा विरहतापकामज्वरयोरनुपगमः। 'हृदये' इति पाठेऽपि स एवार्थः॥ ५॥ प्रेमसंरम्भेणैव भ्रुकुटिम् आ सम्यग् बद्ध्वा पश्चात् प्रेमसंरम्भविह्वला बभूवेति शेषः। ऐक्षतेति परेणावान्वयः। तथा च श्रीविष्णुपुराणे (५।१३।४४)—'काचिद् भ्रूभगुरं कृत्वा ललाटफलकं हरिम्। विलोक्य नेत्रभृङ्गाभ्यां पपौ तन्मुखपंकजमिति॥' अन्या च कटाक्षवाणाक्षेपैर्घ्नन्तीवैक्षत। अत्रापि प्रेमसंरम्भ एव कारणं ज्ञेयम्; निर्दष्टदशनच्छदेत्युक्तेः, प्रेमेत्यनुवृत्तेर्वा॥ ५-६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

जुषाणा जुषमाणा सेवमाना॥ ६-८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

काचित्तन्वी योषिदञ्जलिना संहतहस्तद्वयेन तस्य ताम्बूलचर्वितं चर्विततांम्बूलं जग्राह एका तु विरहतापेन तप्तयोः स्तनयोस्तस्य भगवतोऽङ्घ्रिकमलं कमलवच्छीतलमङ्घ्रिमधाद्दधार॥ ५॥ एका तु भ्रुकुटिंभ्रुवमाबध्य कुटिलीकृत्य प्रेमसंरम्भेण प्रेमगर्भक्रोधेन विह्वला निर्दष्टो दशनच्छदोऽधरोष्ठो यया तथाभूता कटाक्षेण घ्नतीव ताडयन्तीवैक्षत कटाक्षेपैरिति पाठे कटाक्षपातैरित्यर्थः॥ ६॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

चर्वितं भक्षितोच्छिष्टम् अधात् दधार॥ ५॥ प्रेमसंरम्भविह्वला प्रणयकोपाकुलिता भ्रुकुटिं ललाटशिराम् आबध्य प्रकाश्य निर्दष्टदशनच्छदा नितरां दष्टोष्ठपुटा॥ ६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

काचिदञ्जलिनेति कुमारिकाणां मुख्या। एका तदङ्घ्रिकमलमिति सदैन्यप्रणयवती। सा तु काचिद्दधार तद्बाहुमिति बाहुं स्वांसे दधत्याः कस्याश्चित् स्कन्धे कृतावर्जनतया शिथिलैकपादस्य तस्य स्थितिः। अतएव शिथिलं चरणं स्वयमुपविश्य स्तनयोः कृतवती, न तु तदा भगवानुपविष्टः॥ ५॥ एका भ्रुकुटिमावध्येति प्रणयक्रोधवती केचिदेनां श्रीराधामाहुः॥ ६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तदङ्घ्रिकमलमिति। उपविश्य स्थितवत एव प्रणयवशाच्चरणयोरेकमुत्तोल्य स्तनयोरधात्। पश्चादेवोपवेशो वक्ष्यते।५-९।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अञ्जलिनागृह्णादितीयं दास्यप्रायमैत्र्या कान्ताधीना दक्षिणा च। अङ्घ्रिकमलं दक्षिणमेव स्वहस्ताभ्यां गृहीत्वा भूमावुपविष्टास्तनयोर्न्यधात्। ततश्च वामभुजेन कान्तायाः स्कन्धमालम्ब्य वामचरणेन भुवमवष्टभ्य कृष्णस्तस्थाविति ज्ञेयम्। इयं मैत्र्यप्रायदास्या कान्ताधीना दक्षिणा चेत्यत इमे तदीयतामयघृतस्नेहवत्या प्रथमायाः सख्यौ॥ ५॥ भ्रुकुटिमावध्य एवं कुटिलीकृत्य सज्यं धनुः शरसंसक्तं प्रतान्येवेत्यर्थः। प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला विवशा कटाः कटाक्षाः शरास्तेषां क्षेपैर्निक्षेपैः कृष्णं लक्ष्यभूतं घ्नतीव भोः कुहकशिरोमणे! स्वप्रेमहालाहलं त्वया मयि प्रयुज्य सम्यक्तया सफलीकृतं देहान्निःसृतप्रायान् प्राणान् दग्धुं किं पुनरपि प्रत्यासीदसि त्वं साध्वेव परिचितोऽभूरिति व्यञ्जयन्ती ऐक्षत। निर्दष्टदशनच्छदेत्यञ्जलिना धृतस्य स्वाधरस्य दशः कोपानुभावः। इयं मदीयतामयमधुस्नेहोत्थमानकौटि यवता॥ ६॥

रसिकाह्लादिनी-टीका

अजरसीधुनाप्यापयस्व न इति यया प्रार्थितं सा अञ्जलिना संहतहस्तद्वयेन ताम्बूलचर्वितं अधरामृतं इव सहितमेवागृह्णात्। कीदृशी विप्रलम्भेऽधरामृतपानानन्तरेण कृशाङ्गी जाता, एका काचित् यया प्रार्थित "चरणपंकजं सन्तमञ्च ते रमण नः स्तनेष्वर्पयाधिहनिति"। सा स्वमनोरथं सफलीकर्त्तुं संतप्तस्तनयोः विरहतापतप्तयोस्तदङ्घ्रिकमलमधात् न्यस्तवती तासां सम्मर्दे तत्रोपविश्येति आर्थिकोऽयमर्थः, अन्यथा तदङ्घ्रिकमलस्थापनमशक्यं स्यादिति॥ ५॥ ययोक्तं 'पतिसुतान्वयेति" प्रणयकोपविशेषवती सा एका यूथमुख्या दूरे स्थिता कौटिल्येन भ्रूकुटिं भ्रूलतां आबध्य वक्रीकृत्य भ्रुकुटिबन्धनेन चित्तकौटिल्यं लक्षितम्। प्रेमसंरम्भैः प्रकोपः सर्वेन्द्रियस्तम्भहेतुना तेन विह्वलाऽत एव संदष्टदशनच्छदा सम्यक् दृष्टो दशनच्छदो अधरोष्ठो यया सा लोभनियमनार्थं पूर्वं प्रतिश्रुतविलासावितरणदशः। स्वभाव-नियमनार्थं प्रेम संरम्भः कटाक्षे नेत्रे प्रान्तास्तैर्ये आक्षेपाः परिभवाः, यद्वा

आसमन्तात् क्षिप्यन्ते इति आक्षेपा बाणास्तैः घ्नन्तीव ऐक्षत् स्वातन्त्र्यनिराकरणपूर्वकस्वान्ततासम्पादनार्थं कटाक्षैर्हननं सूचितमिति। तदुक्तं विष्णुपुराणे “काचिद्भूभङ्गुरं कृत्वा लालाटफलकं हरिम्। विलोक्य नेत्रभृङ्गाभ्यां पपौ तन्मुखपङ्कजमिति”। यया चिन्तितं “कुटिलकुन्तलं श्रीमुखं च ते जड़ उदीक्षतां पक्ष्मकृद्दृशामिति” मुखदर्शनमेव प्रार्थितम् ॥ ६ ॥

विशुद्धरसदीपिका

काचिदिति। ताम्बूलमत्र प्रतिकुब्जं मालादिसाहित्येन वृन्दादेव्या स्थापितं शौरेरिति प्रकरणलब्धम् अञ्जलिनेति पूर्ववत् औत्सुक्यमधरामृतसाहित्यात्। एवञ्च वितर वीर नस्ते धरामृतमित्यस्या एवाभिलाषः इयञ्च मृदुर्दास्यप्रायसख्या कान्तपराधीना दक्षिणा च ततश्च श्रुतिमुनिरूपासु कान्तभाववतीयमिति ज्ञेयं एकेति। तदङ्घ्रिकमलमपि दक्षिणमेव स्तनयोरधात् वामभुजेन प्रियालम्बनेन समचरणन्यस्ताङ्गभारताप्राप्तेः सम्प्रति स्थित एव चायं उपवेशस्याग्रे वक्ष्यमाणत्वात्, अत उपविष्टयैत तया चरणधारण तस्य तयोर्निधाने हेतुः। सन्तप्तेति विरहमयरत्याख्येन भावेनेतिशेषः। इयं च प्रखरा दास्यप्रायसख्या कान्ताधीना दक्षिणा च अस्याश्चरणपङ्कजं शंतमं चेत्यभिलाषः। इयमपि पूर्ववत् तिस्र एताः कान्तभाववत्यः ॥५॥ अथ वामानां कामानधीनां शुद्धामेव प्रीतिमुपदर्शयितुं तासां स्वामिन्यासर्वाभिरन्याभिश्चेष्टितमेकेन श्लोकेनाह। एकेति। सर्वासु मुख्यतमा ‘एके मुख्यान्यकेवला” इत्यमरः यद्वा सर्वास्वप्यवस्थासु प्रियतमेनैकताङ्गतेत्यर्थः। प्रेमसंरम्भविह्वलेति स्वभावोक्तिः, तत एव पूर्वोक्ताभ्यः कार्माबह्लाभ्यो वैशिष्ट्यं भ्रुकुटिमाबध्येति वाम्यव्यक्तिः, यद्वा सुरतचिह्नगोपनाय रोषानुकरणं निर्दष्टदशनच्छदेति कथनान् कटाक्षेपैः कटाक्षविक्षेपैरित्यर्थः। इयञ्च तस्याः क्षोभचेष्टां वर्णयतः श्रीमुनीन्द्रस्याप्यर्द्धहसितवर्णोक्तिगौरवेण भीत्यनुक्तेरिति। इयं चाखिलमप्यनाविलप्रेमगोपनाय यदेतभिर्दक्षिणभागे निगृहीतोऽप्ययमित एवानुसरति रतिलम्पट इति वाम्येन तस्य स्थगनम् अयमेव बिब्बोकाख्योऽनुभावः “इष्टेऽपि मानगर्वाभ्यां बिब्बोकस्यादनादर” इत्युक्तेः ललिताख्योऽपि यथा “विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा सुकुमाराभवेद्यत्र ललितन्तदुदीरित”मिति तथा माधुर्यं सर्वभावानां सर्वावस्थासु चारुतेत्युक्तलक्षणो माधुर्यातिशयश्च सूचितः, इयञ्च प्रखरा सुसख्यात्यन्तस्वाधीनकान्ता वामा सर्वाभिरामा चेति मुख्यतमैवेत्यलमतिप्रपञ्चितेन, तासां तासां चेष्टितादिसंग्रहश्चैतस्या एव सौभाग्योत्कर्षवर्णनाग्रहेणेति यदेताः सर्वा अपि बञ्चयित्वैनामेवारमयदिति दिक् ॥ ६ ॥

श्रीरामनारायणकृता भावभावविभाविका

अन्याया अधरामृतरसलुब्धायाश्चरितमाह। काचिदञ्जलिनेति। काचित्तन्वी तु तस्य ताम्बूलचर्वितमञ्जलिना अगृह्णादिति तस्येत्यध्याहृतेनान्वयः। तत्र तन्वीति सुन्दराङ्गी प्रियाधरसपानार्हा चर्वणे तदधररसान्वितामिदमिति ज्ञात्वा मिष्टमिष्टं हि मत्वा तल्लोभेनोच्छिष्टभक्षणमितितन्यायमाश्रित्याञ्जलिनेतियोजितपाणिद्वयपुटेनात्यादरेण गृहीतवतीत्यर्थः। यद्वा काचित्तन्वीति विरहतापशोषणेनातितनुसूक्ष्माङ्गी स्वपोषणस्य तदधरामृतजोषणाधीनतामवगत्य बह्वीषु बलात्तदास्वादनेतिधाष्ट्र्य तत्तर्षोद्धर्षण विलम्बासहिष्णुताञ्च व्यवस्याञ्जलिनेति पाणिद्वयं संयोज्य शिरोधारणेन प्रार्थयित्वागृह्णात्, यद्वा यतस्तच्चर्वितमञ्जलिना गृह्णादत एव तत्पुष्ट्यातनुविस्तार इत्यस्मात् प्रफुल्लिशरीरा सफलदेहा वा जाता, यद्वा सहजसरागोऽपि प्रियतमाधरोऽनेनातिरागान्वितः कृत इत्येतद्धृदयनिवेशेऽनुरागवृद्धौ सौभाग्यातिशयान्विताशयान्विताऽगृह्णात् तदेतदतिदैन्यदास्यभावरसाभिज्ञतान्वितायाः आचरितमिति बोध्यं काचिदन्यापि दाक्षिण्यभावमेवानुगता तु प्रियदर्शनेन तदानुकूलभावेन च किञ्चित् विरहचिन्ताग्निद्वयोपशान्तावपि लब्धालम्बनतया तदतिस्निग्धापाङ्गनिरीक्षणस्नेहवृष्ट्योद्दीपिततयाचातिवृद्धहृच्छयाग्निसन्तप्तास्तनयोस्तदङ्घ्रिकमलं स्वतापपरीक्षार्थं न्यधात्, यद्वा स्वोरोजयोर्बहुधा बहुसरोजस्रग्योजनेऽपि विरहचिन्ताकामोद्भूतत्रिदोषज्वरानुपशमे आधिदैविकाध्यात्मिकादित्रिदोषविषमज्वरोपशमाय मुनिभिर्हृदि धृतं तदुपशमकं तदङ्घ्रिमृदुकमलं तत्सदृशं कं ब्राह्मणं मं शिवञ्च लाति अनुगृह्णातीति वा स्वर्गमपि मलमिव हेयं यस्मादिति वा कमलं तदुपशमायैव स्तनयोर्न्यधात् ॥ ५ ॥ अथ वामाया आचरितमाह। एकेति। एका तु प्रेमसंरम्भविह्वला तथा सन्दष्टदशनच्छदा भ्रुकुटिमाबध्य कटाक्षेपैर्घ्नन्तीवैक्षत। अत्र सवर्णवर्णलोप इति कटाक्षक्षेपैरित्यर्थः। एकेत्यनेन सर्वसुख्यायूथेश्वरीश्वरी, यद्वा एका इति सा एकैव न तादृशी काप्यन्या स्वाधीनपतिका प्रेमागाधा लब्धविरहबाध श्रीमती राधा कृतापराधं माधवमालक्ष्य प्रेमसंरम्भविह्वलेति प्रेम्णा यः संरम्भः क्रोध एवमस्मत्प्रेमभावेऽप्ययं कुटिलकृष्णबहिरन्तरतया सर्वतो वियोज्य नस्त्यजतीति तत्र प्रेमिणां गृहादिभ्यो वियोजनयोग्यमेवेति न दोषाय किन्तु प्रेमभावान्वितानां तद्भावान्वितानां त्यागे सङ्गाभावः परमदुःखायेति तेन विह्वला, यद्वा प्रेमैव संरम्भः क्रोधो रतिरणे तद्रूपक्रोधस्यैवोचितत्वात् यथा यथा क्रोधाधिक्यं तथा तथाङ्गैरङ्गानि परस्परं सम्पीड्या प्रपातनरदनखादिच्छेदनरूपरणाधिक्यतया रतिरणे तु यथायथा प्रेमाधिक्यं तथा तथा गाढालिङ्गनादिपूर्वकरतिरणसौष्ठवापत्तिः तेन विह्वला प्रेम्णैव विकलचित्ता तथा सन्दष्टदशनच्छदेतिदशनच्छदसंदंशस्तु स्वभावत एव स्मितरूपविकाशाह्लादसुधात्मकविकाशान्वितः प्रियामुखाम्बुजचन्द्रः प्रियदर्शने त्वतिशयेन जातप्रहासोल्लासः तथाचैवं विरहदुःखदानेऽपि मुखप्रसादमालक्ष्य कदाचिन्निर्भयः पुनरप्येवं कुर्याच्चेत्तदासर्वासां मरणमेवेत्याशयानुरोधेन स्मितानुरोधाय, यद्वा रदकुन्दकलिकासखीभिः कुसुमयति मुखपद्मदलाधरवशीभाववत् दशनभगणरूपसखाभिमुखचन्द्रवशीभाववत् सखीभिः पातः वश्यतैव

रसरीतिरिति बोधाय यद्वायमधरोऽतिमधुर इति त्वयाप्यास्वादनीयः इति द्योतनाय, यद्वा रतिरणारम्भाय जातप्रेमात्मसंरम्भेण त्वदधरालाभे स्वाधर एवच्छिद्यत इति त्वयाप्यतिसंरम्भेण सावधानतया रतिरणसमुद्यमः कर्तव्यः तथा भ्रुकुटिमावध्येति भ्रुकुटिबन्धस्तु कुटिलकृष्णोऽपि भवानस्माभिः शिरसि धृतस्त्वं तु तथापि कौटिल्यं न जहासीति व्यञ्जनाय यद्वा कुटिलकृष्णेऽपि भ्रुवो मया प्रेमसंरम्भेण बद्धो भवान्किमिति प्रेमसंरम्भेणापि न वध्यते, यद्वा बद्धे अपि भ्रुवौ मया शिरस्येव धृते इ त प्रेमसंरम्भवद्धत्वे त्वया तस्यानादरः शङ्कनीयः यद्वा रतिरणारम्भाय मया प्रेमसंरम्भेण युगधनुषो युगपदाकृष्टे इति त्वयापि न रतिरणासन्धाने विलम्बोऽनुसन्धेयः ननु मया प्रेमसंरम्भभयेन भवत्या सन्धिरेवाकाङ्क्ष्यते इति चेद्भवतु तर्हि मया नितरां तव सन्धिततिरणप्रतिबन्धकोऽपि तु तत्ससाधक एव किञ्च सुरतिशूराणां न रतिरणोपशमः स्पृहणीय किन्तु तदुद्गम एवेति कटाक्षाणां तिर्यङ्निरोक्षणरूपापाङ्गानामनङ्गवृद्ध्या कृतस्वविद्धजनापाङ्गानां कामबाणानां इन्द्रनीलनीरजमणिजटितचित्राक्षाक्षयनिषङ्गसंगिनां भ्रूधनुर्द्वयमाकृष्य नेत्रे प्रेम्णा रतिरणोद्युतीकरणाय घ्नन्तीवैक्षत यद्वा नन्दघने परप्रेमास्पदे तस्मिन् रसभावदक्षाणां तासां वामभावामभीप्सतीनामतिवामानामतिवामानामतिन्ममानां दाक्षिण्यस्यैव वामत्वं वामभावस्य तु वामत्वमेवेत्यत्रापि दाक्षिण्यख्यापनमेव दाक्षिण्यमित्येवं योजना एकाशब्दस्तु पूर्ववदेव देव्या उत्कर्षे प्रेमसंरम्भविह्वलेति प्रेम्णः संरम्भेण रभ राभस्ये इत्यस्माद्वेगेन विह्वलातिक्लान्ततयालिङ्गनमिच्छत्यपि कर्तुमशक्ता प्रेमवेगाधिक्ये हेतुः सन्दष्टदशनच्छदेति प्रियेण सम्यग्दष्टौ पूर्वविहारावसरे आस्वादितौ दशनच्छदौ यस्याः प्रेष्ठस्यैव वा तस्य सम्यगास्वादितौ दशन च्छदौ यया तन्मधुपानलुब्धा मत्ता चेति भावः। अनिमिषेक्षणा यैव भ्रुकुटिमावध्य कटाक्षेपैः स्निग्धापाङ्गैःघ्नन्तीवहनहिंसागत्योरित्यस्मादात्मानं तत्र गमयन्तीव प्रेष्ठं व नेत्रद्वारा तद्भावदर्शनोत्साहजननेन वा स्वस्मिन् प्रापयन्तीवैक्षत स्वान्तः प्रेमभावानेव वा तस्मै गमयन्ती ज्ञापयन्तीवैक्षत ॥ ६ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथ तृतीयायाः कान्ताधीनायाः दक्षिणायाः वृत्तमाह। काचिच्छौरेः ताम्बूलचर्वितं परमादरादञ्जलिना गृहीतवती नत्वेकेन हस्तेन यतस्तन्वङ्गी कोमलाङ्गी तथा तद्ग्रहणयोग्या इय चन्द्रावली सुहृद्भूता सैव्यामिधा सखी अथैवम्विधाया एव चतुर्थ्या वृत्तमाह। एका तस्य वामभुजेन श्यामलाख्यां सखीमवलम्ब्य तिष्ठतः प्रेष्ठस्य दक्षिणमङ्घ्रिसरोरुहं स्वयमुपविष्टा सती स्तनयोरधात् यतः सन्तप्ता इयमपि चन्द्रावली सुहृद्भूता पद्माख्या सखी ॥ ५ ॥ अथ वामासु प्रथमायाः अतिवामायाः प्रखरायाः स्वाधीनकान्ताया वृत्तमाह। एका भ्रूकुटिमाबध्य भ्रुवौ कुटिलीकृत्य प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला सती सन्दष्टाधरोष्ठा भूत्वा कटाः कटाक्षास्तैर्ये आक्षेपाः परिभवास्तैः ताडयन्तीव ऐक्षत "इष्टेऽपि गर्वमानाभ्यां बिब्बोकः स्यादनादरः" इत्युक्तलक्षणो बिब्बोकाख्योऽयमनुभावः सर्वा परित्यज्य या नीता पश्चात्त्यक्ता च सेयं श्रीराधाख्यामुख्या सखी गोपालतापिन्यां गान्धर्वेति नाम्ना ख्याता ॥ ६ ॥

रास–रहस्यम्

र० टी०–काचित् तन्वी "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः।" इति श्रुत्या क्षीणा वृत्तिः, परमात्मज्योतिषः स्वज्योतिषा एकीभावकर्तुमशक्यत्वात् अञ्जलिना स्वकरेण, तस्य ताम्बुलचर्वितं चर्वितताम्बुलवत् प्रसादं प्रसन्नतां अगृह्णात् गृहीतवती, एका संतप्ता तपश्चरणजन्यसम्यग्रूपेण तप्ता, तदंघ्रिकमलं तत् तस्य परमात्मनः, अंघ्रिः ज्योतिः, कथम्भूतम्? कमल कं स्वर्गादिसुखं तदपि मलमिव हेयं यस्मात् तत् स्तनयोर्मध्ये हृदि, अधात् न्याधात् ॥ ५ ॥ एकातुभ्रूकुटिमाबध्य "भ्रुवोर्मध्ये दृष्टिमावेश्य सम्यग्।" उप०। इति वचनानुसारतः प्रेमसरम्भविह्वला प्रेम्माऽनुरागेण यः सरम्भः क्रोधः कथंभूतः? कथमद्यापि मे साक्षात्कारो न भवतीति स्वस्मिन्नेव क्रोधः, तेन विह्वला विकलचित्ता अतएव सन्दष्टदशनच्छदा इति क्रोधस्य बहिः प्रकाशस्वरूपं दर्शयति सन्दष्टाधरोष्ठा अर्थात् बलादिन्द्रियग्रामं निरुध्य, कटाक्षेपैः कटाः कटाक्षास्तैर्ये आक्षेपाः परिभवास्तैः, घ्नन्तीव रजोगुणजन्यचञ्चलतां नाशयतीव, ऐक्षत् दृष्टिं निवेशयामास ॥ ६ ॥

गूढार्थदीपिनीसहितम्
अथैकोनत्रिंशोऽध्यायः

एकोनत्रिंशकेऽन्योन्यं भाषणं प्रेमपूर्वकम्। रासारम्भे प्रियोन्मादात् कृष्णान्तर्धानमुच्यते ॥ १ ॥
कामदर्पविनाशाय रासलीलां प्रवर्तयन्। मल्लयुद्धे जिताशेषं तं हरिर्लीलयाऽजयत् ॥ २ ॥
कामावेशाच्च्युताः सर्वे न कश्चिद्वस्तुतोऽच्युतः। त तु संमर्द्य रासेऽस्मिन्नच्युतोऽच्युततां गतः ॥ ३ ॥

दण्डकारण्यवासिमुनिजनमनोरथपूरणार्थं कामगर्वमोचनार्थञ्च रासपञ्चाध्यायीप्रारम्भः। तेषां सङ्कल्पपूरणार्थं निर्गुणोऽपि भगवान् सगुणः सन् शरदा हेतुभूतेन उत्फुल्ला मल्लिका वेला पुष्पाणि यासु ताः रात्रीः प्राक् प्रतिज्ञाताः रात्रीः वीक्ष्य रन्तुं मनश्चक्रे इत्यन्वयः ॥ १ ॥ यदा रन्तुं मनः चक्रे तदा तत्प्रीतये स प्रसिद्धः चन्द्रः उदगात् उदितोऽभूत्। किं कुर्वन्। अत्र दृष्टान्तः। यथा प्रवासादागतः प्रियः प्रियायाः मुखं कुङ्कुमेन विलिम्पति तद्वत्। पुनश्च शन्तमैः सुखमयैः करैः किरणैः चर्षणीनां प्रजानां च शुचः ता तापग्लानीः मृजन् दूरीकुर्वन् ॥ २ ॥ 'कुमुदेऽपि कुमुत् प्रोक्तम्' इति विश्वकोशात् तत् विकाशनीयत्वेन वर्तते यस्य तं

कुमद्वन्तं चन्द्रं दृष्ट्वा तद्गोभिः किरणैः अञ्जितं प्रकाशितं वनं च दृष्ट्वा वामदृशां गोपीनां मनोहरं वशीकरणं कलम् ईकारघटितं क्लीमिति कामबीजं जगौ इत्यन्वयः। रमा लक्ष्मीः तद्भ्रातृत्वादियमुक्तिः। वामदृक्पदेन ईकारो गृह्यते ॥ ३ ॥ व्रजाङ्गनाः तत् गीतं निशम्य यत्र कान्तः तत्र ययौ इत्यन्वयः। न लक्षितो गमनोद्योगो यासां ताः। जवेन वेगेन चञ्चलानि कुण्डलानि यासां ताः ॥ ४ ॥ कान्तः कानां भोगसुखानाम् अन्तः पराकाष्ठा यत्र। दोहं दोहनपात्रम्। पयः अधिश्रित्य चुल्यामारोप्य। संयावं यवागूभेदम् अनुद्वास्य अनुत्तार्य ॥५॥ तत् परिवेषणम् अपास्य त्यक्त्वा ॥६॥ लिम्पन्त्यः चन्दनादिलेपं कुर्वत्यः। प्रमृजन्त्यः उद्वर्तनादि कुर्वत्यः व्यत्यस्तानि ऊर्ध्वाधोधारणेन विपरीतानि वस्त्रादीनि यासां ताः ॥७-९॥ प्रेष्ठविरहेण धुतानि नष्टानि अशुभानि पापानि यासाम्। मङ्गलं पुण्यम् निर्वृतिः आनस्दः ॥ १०-११ ॥ गुणैः प्रोह्यते सञ्चाल्यते इति गुणप्रवाहः संसारः ॥ १२ ॥ पुरस्तात् पूर्वं सप्तमस्कन्धे ॥१३-१४॥ ऐक्यं सम्बन्धं पाण्डवादिवत् ये विदधतः कुर्वाणा भवन्ति ते सायुज्यं यान्ति ॥१५॥ यतः श्रीकृष्णात् एतत् स्थावरादि प्राणिमात्रमपि मुच्यते ॥ १६ ॥ वाचःपेशैः वाक्चातुर्यैः ॥ १७-१८ ॥ अघोररूपा उदितचन्द्रत्वात्। अघोरैः कोकिलादिभिः। व्रजं प्रति न यात स्त्रीभिः इहैव स्थेयम्। यथाश्रुतार्थः स्पष्ट एव। हे सुमध्यमाः सुष्ठु मध्यमः कटिभागः यासां ताः ॥१९॥ अपश्यन्तोऽपि मा विचिन्वन्ति न मृगयन्ते अतः बन्धून् साधु सम्यक् असम् उपेक्षणमेव कुरुत। 'असु क्षेपणं धातुः ॥२०॥ राकेशकरैः चन्द्रकिरणैः प्रकाशितम्। यमुनास्पर्शिवायोर्लीलया मन्दगत्या एजद्भिः कम्पमानैः तरुपल्लवैः शोभितम् ॥ २१ ॥ हे सतीः हे सत्यः। गोष्ठं व्रजम् अचिरं मा यात किन्तु रासानन्तरमेव। मेति पदं सर्वत्र योज्यम्। मा क्रन्दन्ति मा दुह्यतेति ॥ २२ ॥ यन्त्रिताशया वशीकृताचित्ताः। उपपन्नम् उचितमेव। प्रीयन्ते प्रेम कुर्वन्ति ॥ २३ ॥ हे कल्याण्यः ॥ २४ ॥ ते तु उपपतयः मुख्यपतिस्तु अहमेव ममैव शुश्रूषणं कर्तव्यम्। दुःशीलत्वादियुक्तोऽपि पतिः नः त्याज्यः किं पुनः सर्वगुणसम्पन्नोऽहमिति अतोऽऽत्रैव मया सह रमध्वमिति गूढाऽभिप्रायः ॥ २५ ॥ फल्गु तुच्छम्। जुगुप्सितं निन्दितम् उपपतिर्जारः तत्सम्बन्धि सुखमौपपत्यम्। पत्युत्तरपदाण्यः ॥ २६ ॥ श्रवणादिभिः तथा भावो न यथा सन्निकर्षेण ततो न यातेति व्यङ्ग्योऽर्थः स च ताभिर्न बुद्धः किन्तु यथाश्रुतार्थ एव अतस्तदभिप्रायेणैवाग्रिमग्रन्थयोजना ॥ २७ ॥ विशेषेण प्रियमपि भावाज्ञानात् प्रतिकूलम्। विषण्णाः विषादं प्राप्ताः ॥ २८ ॥ मुखानि अव अधःकृत्वा चरणेन भुवं लिखन्त्यः तूष्णीं तस्थुरित्यन्वयः। शुचःश्वनेन शोकोच्छ्वासेन शुष्यन्तो विम्बफलसदृशा अधरोष्ठा येषु तानि। उपात्तमषिभिः मिलितकज्जलैः अस्त्रैः अश्रुभिः कुचकुमानि मृजन्त्यः क्षाजयन्त्य स्म एवार्थे तस्थुरेव चित्रिता इवेत्यर्थः। उरुः दुःखभरो यासां ताः ॥ २९ ॥ किञ्चित्संरंभेण प्रणयकोपेन गद्गदगिरः सत्यः प्रेष्ठं कृष्णम् अब्रुवत्। रुदितेन रोदनेन उपहते अन्धीभूते इव नेत्रे प्रोञ्छ्य। विनिवर्तिताः त्यक्ताः तत्प्राप्त्यर्थमेव सर्वे कामाः याभिस्ताः ॥ ३० ॥ नृशंसं क्रूरम्। दुरवग्रहो हठी। स्वच्छन्दचारिन् वा। तव पादमूलं भक्ताः सेवितवतीः अस्मान् भजस्व स्वीकुरु मा त्यज। आदिकर्मणि विवक्षिते कर्तरि क्तः॥३१॥ यत् त्वया उक्तं तत् उपदेशपदे उपदेष्टरि त्वयि एव सर्वमस्तु यतो भवानेव सर्वेषां तनुभृतां बन्धुः आत्मा च ॥ ३२ ॥ हे आत्मन् प्रियतम। स्वे असाधारणे त्वय्येव रतिं कुर्वन्ति। अतः त्वयि चिरात् भृतां निबद्धाम् आशां मा स्म नैव छिन्द्याः। मा विफलीकुरु ॥३३॥ यत् चित्तं गृहेषु निविशति तत् भवता अपहृतम्। उत अपि यौ करौ तावपि अपहृतौ। किं बहुना नेत्रे श्रोत्रे सर्वाण्यपि इन्द्रियाणि अपहृतानीत्यर्थः पदमेकपदमपि पादौ न चलतः अतः कथं यामः गत्वा च किं करवाम ॥ ३४ ॥ पूरकेण प्रवाहेण। हासावलोकः कलगीतं वेणुनादः ताभ्यां जातं कामाग्निं सिञ्च प्रशमय। उपयुक्तदेहाः दग्धशरीराः सत्यः ते पदवीं सन्निधानम् प्राप्नुयाम ॥ ३५ ॥ अङ्ग हे सखे। यर्हि पादतलम् अस्प्राक्ष्म स्पृष्टवत्यो वयं तत्प्रभृति अन्यस्य समक्षं स्थातुमपि न पारयामः न समर्था भवामः। अभिरमिताः सन्तोषिताः ॥ ३६ ॥ दत्तक्षणं दत्तावसरम्। यत खेदे ॥ ३६ ॥ वक्षसि पदं लब्ध्वापि श्रीः तुलस्या सह यत्पादरजः चक्रमे इयेष तद्वत् वयमपि तव पादरजः प्राप्तुमागता इत्यन्वयः ॥ ३७ ॥ हे वृजिनार्दन तापनिवर्तक। नोऽस्माकं दास्यं दासीभावं देहीत्यन्वयः। वसतीः गृहान्। स्मितपूर्वकनिरीक्षणेन यः दुःसहः तापः तेन तप्तान्तःकरणानाम्। इदं तव मुखं वीक्ष्य तथा भुजदण्डयुगं वक्षश्च विलोक्य दास्यो भवामेत्यन्वयः। कथभूतं मुखम्। कुण्डलयोः श्रीः पयोस्ते एवंभूते गण्डस्थले यस्मिन् अधरे मुधा यस्मिन् तच्च तच्च। श्रियो लक्ष्म्या एकं मुख्यं रमयतीति रमणं रतिजनकम् ॥ ३९ ॥ अङ्ग हे सखे। ते मधुरपदयुक्तेन दीर्घस्वरालापेन मोहिता सती का स्त्री आर्यचरितात् पातिव्रत्यलक्षणात् न विचलेत् सर्वापीत्यर्थः। यत् यतः गवादयोऽपि तव रूपं निरीक्ष्य रोमाञ्चयुक्ता अभवन् ॥ ४० ॥ व्यक्तं निश्चितम्। यथा देवः उपेन्द्रः सन्। तत् तस्मात् कामदमनार्थं करकमल शिरःसु निधेहि स्थापयेत्यर्थः ॥ ४१ ॥ विक्लवितं कामविकलताम् ॥ ४२ ॥ समेताभिः राधासहिताभिश्च ताभिः वृतः अच्युतः व्यरोचतेत्यन्वयः। उडुभिः नक्षत्रैः वृतः मृगाङ्कः चन्द्र इव। उदारहासेसु दन्तेषु कुन्दकुसुमवत् दीधितिः प्रकाशो यस्य ॥ ४३ ॥ ताभिः उपगीयमानः ॥ ४४ ॥ तस्याः तरलैः तरङ्गैः आनन्दी कुमुदानाम् आमोदः सुगन्धः यस्मिन् तेन वायुना हिमेति योज्यम् ॥ ४५ ॥ बाहुप्रसारेण परिरम्भः गाढालिङ्गनम् करादीनामालभनं स्पर्शः। नर्म परिहासः क्ष्वेलिः रतिक्रीडा तदादिभिश्च कामम् उत्तम्भयन् उद्दीपयन् सन्तोषयामास ॥ ४६ ॥ आत्मानं प्रत्येकमपि ॥ ४७ ॥ सौभगमदं सौन्दर्योन्मादम्। मानं गर्वम्। प्रशमाय गर्वमोचनाय प्रसादाय पुनरनुग्रहाय च अन्तरधीयत नत्वन्यत्र गतः। 'धीङ् धारणे दिवादिः।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यामेकोनत्रिंशोऽध्यायः ॥ २९ ॥

अथ त्रिंशोऽध्यायः

त्रिंशे लता द्रुमान् कृष्णं प्रच्छन्त्यः प्रेमविह्वलाः । लीलाविडम्बनं चक्रुर्मार्गयन्त्यो वने वने ।। १ ।।

यूथपं गजेन्द्रम् अचक्षाणाः अपश्यन्त्यः करिण्यः हस्तिन्य इव ।। १ ।। रमापते श्रीकृष्णस्य गत्यादिभिः आकृष्टचित्ताः प्रमदाः ताः ताः विचेष्टाः लीलाः जगृहुः अनुचक्रुरित्यन्वयः । विभ्रमो भ्रूविलासः । उत्तरो विभ्रमः श्रृङ्गारभावः । रमा राधा ।। २ ।। प्रियस्य गत्यादिषु आविष्टचित्ताः गोप्यः असौ कृष्णः अहमेव इति परस्परं न्यवेदिषुः । विभ्रमोऽत्र भ्रान्तिः ।। ३ ।। संहताः मिलिताः सत्यः विचिक्युः अन्वेषितवत्यः । भूतेषु अन्तरं बहिश्च आकाशवत् सर्वत्र सन्तं कृष्णं वनस्पतीन् पप्रच्छुः ।। ४ ।। वः युष्माभिः दृष्टः कच्चित् । मनो हृत्वा गतः ।। ५ ।। इतः एतन्मार्गेण दृष्टः कच्चित् । कुरबकः रक्तवर्णा कटसरैया कटसरैया । नागकेशरः तद्धेदश्च । मानिनीनां दर्पति योऽयम् ।। ६ ।। अलिकुलैः भ्रमरसमूहैः सह त्वां बिभ्रत् ते त्वया दृष्टः कच्चित् ।। ७ ।। हे यूथिके (जुही) वः युष्माकं प्रीतिं जनयन् यातः गतः युष्माभिः अदर्शि कच्चित् ।। ८ ।। हे चूतादिवृक्षाः ! रहितः त्यक्त आत्मा कृष्णो येषां कृष्णत्यक्तानां । परार्थ भवो जन्म येषां तेषां नोऽस्माकम् कृष्णपदवी मार्गं कथयन्तु । आम्र चिरौंजी कटहल पीतशाल कचनार इति क्रमेणार्थाः यमुनेति ।। ९ ।। हे क्षिति ! ते त्वया । अत एव उत्पुलकिता रोमाञ्चिता सती विभासि । अपि किम् अयम् उत्सवः उरुक्रमस्य वामनस्य विक्रमात् पदा सर्वाक्रमणात् । परिरम्भणेन आलिङ्गनेन वा ।। १० ।। हे सखि एणपत्नि मृगि ! अच्युतः प्रियया सह इह उपगतः किम् । स्वैः गात्रैः वः युष्माकं दृशां निर्वृति सुखं वितन्वन् कुर्वन् । यतो हि कुलपतेः श्रीकृष्णस्य कुन्दस्रजः इह गन्धः वाति आयाति । कान्ताया अङ्गसङ्गेन यत् कुचगतं कुंकुमं तेन रञ्जितायाः वासितायाः ।।११।। हे तरवः । रामस्य अनुजः श्रीकृष्णः प्रियासे बाहुँ निधाय इह विचरन् इतो गच्छन् वः युष्माकं प्रणामं किं वा प्रेमावलोकैः अभिनन्दति । तुलसिकायाः अलिकुलैः अनुगम्यमानः । अंसे स्कन्धे ।। १२ ।। करजैः कृष्णनखैः स्पृष्टा । वनस्पतेः वृक्षस्य बाहून् शाखा आलिङ्गिता लता पृच्छत । उत् उच्चैः पुलकानि अंकुररूपाणि बिभ्रति ।। १३ ।। गोप्यन्तमकपदम् ।। १४ ।। कृष्णवत् आचरन्ती कृष्णायन्ती काचित् गोपी । तोकवत् बालवत् आत्मानं कृत्वा ।। १५ ।। दैत्यवत् तृणावर्तवत् आत्मानं कृत्वा एकागोपी कृष्णस्य आर्भं बाल्यं भावयतीति तं । जहार । घोषाणां किङ्किणीनाम् मंजीरादीनाम् ।। १६ ।। द्वे गोप्यौ कृष्णरामाविव आचरतः कृष्णरामायेते ततो भावे क्त इति च । कृष्णरामवत् जाते । गोपायन्त्यः गोपबालवत् आचरन्त्याः । तत्र तासु । एका कृष्णायन्ती । अन्या कृष्णायमाना ।। १७ ।। यद्वद्वत् कृष्णः तथा दूरे वर्तमानाः गाः दुरगवीः ।। १८ ।। ननु संबोधने ।। १९ ।। यतन्ती यत्नं कुर्वती अम्बरम् उत्तरीयवस्त्रं वितत्य उर्ध्वं धृतवती ।। २० ।। एका कृष्णरूपा अपरां कालियरूपाम् ।। २१ ।। यूयं पश्यत । आशु अपिधध्वं निमीलयत । 'दधस्तथोश्च' इति नियमात् अभ्यासस्य भष्भावे प्राप्तेरपिधध्वमिति वक्तव्ये दकारघटितः पाठः प्रामादिकः । अञ्जसा अनायासेन ।। २२ ।। तत्र तासां मध्ये अन्यया यशोदारूपया आस्यं पिधाय मुखमाच्छाद्य । सुदृक् गोपी वा ।। २३ ।। व्यचक्षत अपश्यन् ।। २४ ।। व्यक्तं निश्चितम् ।। २५ ।। अन्विच्छन्त्यः अन्वेषयन्त्यः । वध्वा राधाया सुपृक्तानि मिलितानि ।। २६ ।। अंसे स्कन्धे न्यस्तः प्रकोष्ठः करतलमूलभागो यस्याः । करिणा सह गच्छन्त्या इव ।। २७ ।। राधामितः प्राप्तः राधितः हरिः 'शकन्ध्वादित्वात् पररूपम् । याम् अनयत् सा अनया योऽनयत् सोऽपि अनयः इति श्लेषेण राधानाम्नीऽभिव्यक्तिः ।। २८ ।। हे आल्यः सख्यः अघं वियोगदुःखं तन्निवृत्तये ।। २९-३० ।। खिद्यन्ती सुजाते कोमले अङ्घ्रितले यस्याः । उन्निन्ये अङ्के निधाय ।। ३१-३२ ।। अत्रेत्यर्द्धम् । अवरोपिता अवतारिता ।। ३३ ।। प्रपदाभ्यां पादाग्राभ्याम् आक्रमणं पृथ्वीमर्दनं याभ्यां ते । असकले अर्द्धे पदे कर्मणी पश्यत । जातौ द्वित्वं पदानीत्यर्थः ।। ३४ ।। कान्तामधिकृत्य तानि प्रसूनानि चूडारूपेण बध्नता तेन उपविष्टम् । भावे क्तः । चूडाशब्दात् तत्करोतीति ण्यन्तात् शतृप्रत्ययः ।। ३५ ।। दैन्यपारवश्यम् । दुरात्मताम् अहंभावम् । आत्मरतः स्वतस्तुष्टः । कुतः । आत्मनि आरामः क्रीडा यस्य सः अखण्डितः स्त्रीविभ्रमैरनाकृष्टः ।। ३६ ।। इत्येवमित्यर्द्धम् ।। ३७ ।। यामिति सार्द्धम् । कामयमानाः आगमशास्त्रस्यानित्यत्वात् मुगभावः कामेन यानमागमनं यासां ताः इति वा ।। ३८ ।। न पारये न शक्नोमि । दृप्ता गर्विता ।। ३९-४०-४१ ।। अन्विच्छन्त्यः अन्वेषयन्त्यः । अवमानं त्यागलक्षणं ।। ४२ ।। मानप्राप्तिं स्कन्धारोहणम् । दौरात्म्यात् अभिमानात् ।। ४३ ।। ततो वनात् । अन्वेषणाद्वा ।। ४४ ।।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां त्रिंशोऽध्यायः ।। ३० ।।

अथैकत्रिंशोऽध्यायः

एकत्रिंशे निराशास्ता कृष्णस्यान्वेषणे यदा । तदा पुलिनमागत्य गोपीभिर्गीतमीर्यते ।। १ ।।

हे दयित प्रिय ! इन्दिरा लक्ष्मीः अत्र हि अत्रैव श्रयते निवसति । तावका त्वदीया गोपीजनाः दिक्षु त्वां विचिन्वते अन्विष्यन्ति अतस्त्वया दृश्यतां प्रत्यक्षीभूयताम् । अस्माभिर्वा भवान् ।। १ ।। शरत्कालिके सरसि सञ्जातकमलश्रियमपहरता दृशा नेत्रेण अमूल्यदासीः निघ्नतः मारयतः ते त्वया क्रियमाण इह लोके किं वधो न भवति किं शस्त्रेणैव वधो भवति दृशा वधो न भवति किन्तु भवत्येव ।। २ ।। हे ऋषभ देवश्रेष्ठ । अप्ययात् नाशात् । व्यालोऽघासुरः तस्मात् । वैद्युतानलात वज्रपातात् ।

वृषोऽरिष्टः । मयात्मजो व्योमासुरः तस्माच्च किं बहुना विश्वतः सर्वतोभयात् । अरिष्टव्योमवधस्य भावित्वेऽपि गर्गाचार्यमुखतः श्रवणाद् भुतत्वेन निर्देशः ॥ ३ ॥ नेति व्यङ्ग्योक्तिः । नेति प्रत्येकं सम्बध्यते । न नन्दनः । न अन्तरात्मदृक् न प्रार्थितः न च यदूनां कुले उदेयिवान् किन्तु स भवान् खे आकाशे उदेयिवान् अत एव आकाशस्य असङ्गौदासोन्ये इति अवगुणद्वयं त्वयि आयातम् । यथाश्रुतार्थस्तु स्पष्ट एव । विखन्यते मैथुनं विना उत्पद्यते इति विखना ब्रह्मा पद्मजत्वात् । यो जातः सर्वतः पूर्वं विना मैथुनमात्मनः । विखनाः स हि विज्ञेयः कुद्दालो विखनास्तथा इति निरुक्तात् ॥ ४ ॥ ते चरणमीयुषां प्राप्तानां दत्ताभयं स्वकीयं करकमलं नोऽस्माकं शिरसि धेहि स्थापयेन्वयः । वृष्णयो यदुवंशीया तेषां धुर्य । हे कान्त ॥५॥ योषितां नः जलरुहाननं मुखकमलं दर्शयेत्यन्वयः । स्मेति भूतकालवत् । निजजनानां स्मयध्वंसनं गर्वनाशनं स्मितं यस्य तत्सम्बुद्धौ । भज स्वीकुरु ॥ ६ ॥ तृणचरा गावःताननुगच्छतीति । कुचेषु कृणु अर्पय कृन्व् हिंसायां करणे वृतिः हृच्छयं कामं च कृन्धि छिन्धि । कृती वेष्टने छेदेऽपि ॥ ७ ॥ गिरा मुह्यतीः इमा विधिकरीः किङ्करीः नः सीधुना अधरामृतेन आप्यायस्व सञ्जीवय ॥ ८ ॥ मृतं मरणकारणम् । तप्ततैलादौ जलमिवेति श्लेषः । ईडिते वर्णनस्वभावत्वात् । कल्मषेति येषां पापं स्यात् ते शृण्वन्तु नास्माकम् । श्रवणेनैव मङ्गलमिति श्रूयतं न तु अनुभूयते । श्रीमदैः धनमदान्धैः आततं विस्तारितम् । ते भूरिदाः भूरीन् श्रोतॄन् घ्नन्ति खण्डयन्ति मारयन्तीति व्यङ्ग्योक्तिः । पक्षे तु स्पष्टम् भूरिदातारः । गृणन्ति निरूपयन्ति ॥ ९ ॥ संविदः रतिसङ्केतवाचः । हे कुहक कपटिन् इति प्रेमावेशात् ॥ १० ॥ यत् यदा व्रजात् चलसि तदा ते पदं शिलादिभिः सीदति क्लिश्यतीति नः मनः कलिलतां व्यग्रतां प्राप्नोति । शिलं धान्यकणिशम् ॥ ११ ॥ कुन्तलैः केशैः आवृतं वनरुहाननं मुखकमलं बिभ्रत् तत् दर्शयंश्च मनसि कामं यच्छसि प्रेरयसि सङ्गं च न ददासीति कपटित्वम् । घनेति गोरजोव्याप्तम् ॥ १२ ॥ हे आधिहन् कामनाशक । पद्मजेन ब्रह्मणा । शन्तमं सुखमयम् ॥ १३ ॥ स्वरितेत स्वरयुक्तेन । इतररागः संसाररागः तस्य विस्मारकम् नोऽस्मभ्यम् ॥१४॥ त्रुटि क्षणार्द्धमपि कालः । सुलुक् । निर्विसर्गपाठ एव साधुः इति चक्रवर्ती । युगायते युगमिवाचरति । ते मुखम् उत् उच्चैः आसक्त्या ईक्षतां दृशां पक्ष्मकृत् ब्रह्मा जडः मूर्खः । दर्शने विक्षेपकरत्वात् पक्ष्मणोऽनावश्यकत्वम् ॥ १५ ॥ हे अच्युत ते अन्ति समीपम् आगताः । गतिम् अस्मदागमनं सुरतार्थमेवेति जानतस्तव ॥ १६ ॥ संविदं रतिचेष्टाम् । श्रियो धाम उरः वक्षःस्थलं वीक्ष्य अतिस्पृहा भवति । यद्वा सम्पदादित्वात् स्पृहेः भावे क्विप् तृतीयान्तम् । मनश्च मुह्यति आसक्तं भवति ॥ १७ ॥ अङ्ग हे प्रियतम ! ते व्यक्तिः वृजिनहन्त्री दुःखनिरसनी मङ्गलरूपा च स्वजनानाम् अस्माकं हृद्रोगाणां निवर्तकं यत् औषधं त्वत्सङ्गरूपं तत् मनाक् ईषत् यथातृप्ति वा त्यज देहीत्यर्थः ॥ १८ ॥ यत् सुजातम् अतिकोमलं ते चरणकमलं स्तनेषु वयं शनैः दधीमहि धारयेम तेन त्वं वनमटसि तत् कूर्पादिभिः सूक्ष्मपाषाणादिभिः किं न व्यथते व्यथते एव इति नः अस्माकं धीः भ्रमति व्यग्रीभवति । भवानेव आयुर्जीवनं यासां तासामस्माकं धीः । स्वित् वितर्के ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यामेकत्रिंशोऽध्यायः ॥ ३१ ॥

अथ द्वात्रिंशोऽध्यायः

द्वात्रिंशे भगवान् व्यक्तो गोपीमध्येऽतिशोभनः । तमाश्लिष्य मुदं प्रापुरुत्तरं च यथोचितम् ॥ १ ॥

चित्रधा बहुधा । सुस्वरम् उच्चैः ॥१॥ शौरिः शूरत्वात् । शूरवंशोद्भवत्वाद्वा । यन्मथस्यापि मनो मथ्नाति क्षोभयतीति । पृषोदरादित्वात्साधुः ॥ २ ॥ तन्वः करचरणादय इव ॥ ३ ॥ अंसे स्कन्धे ॥ ४–५ ॥ प्रेमसंरम्भः प्रणयकोपः कटाक्षेपैः कटाक्षपातैः सन्दष्टं दशनच्छदः ओष्ठो यया सा ॥ ६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एका तु भ्रुकुटीभ्रुवमाबध्य कुटिलीकृत्य प्रेमनिमित्तोयः संरम्भः क्रोधावेशस्तेन विह्वला व्याकुला संदष्टः दशनच्छदेऽधरोष्ठो यया सा कटाक्षेपैः कटाक्षपातैर्घ्नन्तीव ऐक्षत ॥ ६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ताम्बूलचर्वितं काचित्तन्वी कोमलाङ्ग्यञ्जलिना सम्पुटितपाणिद्वयेनैका काचित्तदङ्घ्रियुगलमेकैककरेणोन्नमय्य स्वयं च प्रवणा सन्तप्तस्तनयोरधाद्दधार । अधुनाऽनुपवेशादुद्धृत्येति पूरणीयं । यद्वक्ष्यति स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितैरचीक्लपन्नासनमात्मबन्धवे तत्रोपविष्ट इति ॥ ५ ॥ एका तु प्रेमसंरम्भविह्वला भ्रुकुटीमाबद्ध्य निर्दष्टो दशनच्छदोऽधरोष्ठो यया सा कटाक्षेण प्रत्यवैक्षत्प्रैक्षत् ॥ ६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतः काचित्ताम्बूलचर्वितमञ्जलिना अगृह्णात् तस्याः ताम्बूलयोग्यतामाह । तन्वीति । कोमलाङ्गी एका पुनः बहिःस्थिता साक्षात्सम्बन्धमलभमाना उत्थातुं वा अशक्ता उपविश्यैव तदाङ्घ्रिकमलं स्तनयोरधात् अनुत्थाने धारणे च हेतुः सन्तप्तेति सा

ह्यत्यन्तं विरहातुरा ॥ ५ ॥ एकेति । अन्या पुनर्दूरस्था तामसी तमसा भ्रुकुटिमाबध्य कटाक्षेपैः घ्नन्तीव ऐक्षत अत्र सवर्णे वर्णलोपः कटाक्षक्षेपैरित्यर्थः । प्रेम्णा सहितो यः क्रोधसंरम्भः तेन विह्वला सम्यक् दष्टः नशनच्छदो यया तादृशी च जाता भ्रुकुटिबन्धनेन चित्तकौटिल्यं प्रेमसहितसंरम्भेण इन्द्रियवैक्लव्यं सन्दंशेन देहक्षोभः घ्नन्तीवेति प्राणैर्बलस्फूर्तिः ज्ञानसाधनमपि तस्या विकृतं प्रान्तदृष्टिः कटाक्षः तत्रापि आक्षेपभावः यथा वाचावगुरणां तथा कटाक्षा एव आक्षेपरूपाः निरन्तरं प्रवृत्ताः तादृशभावस्य पूर्णत्वाय कालनियमनार्थं वा भ्रुकुटीभङ्गः स्वभावनियमनार्थं च संरम्भः लोभनाशार्थं दंशः मोक्षाभावार्थं ज्ञानवक्रता प्रमाणनिराकराणार्थं हननमिति यतो लौकिकिकी भक्तिः पुष्टा भवति एतदर्थमेषा निरूपिता ॥ ६ ॥

श्रीसुबोधिनी–सारः

काचित्तन्वी ताम्बूलचर्वितमंजलिनाऽगृह्णात् तस्यांघ्रिकमलं पादपद्ममेका संतप्ता स्तनयोरधात् ॥ ५ ॥ भ्रुकुटिमाबध्य कुटिलीकृत्य प्रेमसंरंभेण प्रणयकोपावेशेन विह्वला संदष्टौ दशनानां दंतानां छदौ छादकौ ओष्ठौ यथा सैका कटाक्षैराक्षेपा वर्णलोप आर्षः । तैर्घ्नन्ति ताडयन्तीवैक्षत ॥ ६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

चन्दनरूषितमित्यत्र, एवं सामग्रीत्यादि । एतास्वनुग्रहविशेषो ज्ञापित इति भावः । **एका भ्रुकुटिमाबध्येत्यत्र, तादृशभावस्येत्यादि** पूर्वं मानमात्रं निरूपितम्, अधुना तु शतधापि मानापनोदनार्थं यत्ने कृते मानमहं न त्यक्ष्यामीति गाढमानो निरूप्यते । तथा हि । कालविलम्बेन हि मानः शिथिलो भवति, व्यभिचारित्वेनाचिरस्थायित्वात् । तथा चायं मानस्तथा यथा न भवति । गाढता तादृश्यैवास्य सार्वदिकी भवति । तथा कृतिरेव कालनियमनम् । प्रियवचनादिभिर्मानोनवश्यं त्यजतोति नायिकास्वभावः, स मा भवतु, मानस्वभाव एव मम तिष्ठत्विति प्रयत्नस्तन्नियमनं स्वभावनियमनं नाल्पेन भवतीति संरम्भ उक्तः । मानस्य प्रियसंगमविलम्बहेतुत्वेन दुःखदत्वात् किमित्येवं करणमित्याशङ्क्यैतद्विचारानुदयं तत्र हेतुत्वेन वक्तुमेतद्धेतुमाह **विह्वलेति** मूले । पूर्वानुभूतसंगमसुखस्मरणे तल्लोभात् कदाचिन्मानत्यागः स्यादिति तदभावाय दंशः । एवमत्याग्रहेपि हृदि प्रियस्थितेरावश्यकत्वान्मानस्यापि तत्रैव सत्त्वात् कदाचिदस्य तस्मिन् लयः स्याच्चेत्तदापि मानराहित्यं भवेदिति तदभावाय ज्ञाने कौटिल्यम् । निर्दोषभावे हि धर्मिणो मुक्तिः, तस्यातथात्वे तत्सम्बन्धाद्यत्र धर्मिणोपि न मुक्तिस्तत्र तस्य कथं सा भवेदिति भावः । **प्रमाणनिराकरणार्थमिति ।** 'सर्वस्येशानः' 'य आत्मानमन्तरो यमयती'त्यादिश्रुतिभ्य ईशितृत्वनियामकत्वादिधर्मवत आज्ञोल्लङ्घनं तदग्रे स्तब्धत्वादिकं प्रभुश्चान्तःकरणं मानान्निवर्तयितुं यतते, अन्तःकरणं च न निवर्तत इति प्रमाणविरुद्धत्वान्न सम्भवति, तच्च प्रमाणबलनिराकरणे सम्भवतीति तद्धननमेव कृतं भवतीत्यर्थः । **यतो लौकिकी भक्तिरिति ।** लोकरीत्यनुसारी स्नेह इत्यर्थः ॥ ६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

काचित्तन्वी योषिद् अञ्जलिना तस्य ताम्बूलचर्वितमगगृह्णात् । एका तु तद्विरहेण सन्तप्ता सती तस्याङ्घ्रिकमलं कमलवत्सुकुमारं तापनाशकं चाङ्घ्रिस्वस्तनयोरधात् ॥ ५ ॥ एका तु भ्रूकुटिं भ्रुवमाबध्य कुटिलीकृत्य प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला, अतएव सन्दष्टो दशनच्छदः अधरोष्ठो यया सा, कटाः कटाक्षास्तेषामाक्षेपैः सम्पातैः घ्नन्तीव ताडयन्तीव ऐक्षत ॥ ६ ॥

अन्वितार्थप्रकाशिका

काचिदिति ॥ काचित्तन्वी योषिद् अञ्जलिना तस्य ताम्बूलचर्वितमगृह्णात् । एका तु तद्विरहेण सन्तप्ता सती तस्याङ्घ्रिकमलं कमलमिव सुकुमारं तापनाशकं चाङ्घ्रि स्वस्तनयोरधात् । इमे चन्द्रावलीसख्यौ शैव्यापद्मानाम्न्यौ ॥ ५ ॥ एकेति ॥ एका तु भ्रुकुटिं भ्रुवः कुटिलतामाबध्य कृत्वा प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला अत एव सन्दष्टो दशनच्छदः अधरोष्ठो यया सा कटाः कटाक्षास्तेषामाक्षेपैः सम्पातैः घ्नन्तीव ताडयन्तीव । नुमार्षः । ऐक्षत् ददर्श । तङभाव आर्षः । इयं राधिका इयमेव गोपालतापिन्यां गान्धर्वेति प्रसिद्धेत्वाहुः ॥ ६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भृकुटिं आबध्य वक्रीकृत्य सप्रेममन्युवेगेन विह्वलासती संदष्टो दशनच्छदोऽधरोष्ठो यया सा कटाक्षेपैः कटाः कटाक्षास्तेषामाक्षेपैर्निक्षेपैःघ्नन्तीव कृष्णमैक्षत ॥ ६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

काचिदिति ॥ तत्र काचित्, तन्वी गोपी, शौरेः श्रीकृष्णस्य, कराम्बुजं हस्तकमलं, मुदा हर्षेण, अञ्जलिना संहतपाणिद्वयेन, जग्राह । काचित्तु, चन्दनेन रूषितो लिप्तस्तं तद्बाहुं श्रीकृष्णभुजं, अंसे स्वकीयस्कन्धे, दधार ॥ ५ ॥ काचिदिति ॥ काचित् तन्वी गोपी, अञ्जलिना संहतहस्तद्वयेन, ताम्बूलचर्वितं चर्वितं ताम्बूलं, अगृह्णात् जग्राह । एकाऽन्या काचित्तन्वी तु, संतप्तस्तनयोः विरहतापसंतप्तस्ववक्षोजयोः, तदङ्घ्रिकमलं कमलवच्छीतलं श्रीकृष्णपादपङ्कजं, अधाद्दधार ॥ ६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तामूबूलचर्वितमिति : १०.३२.५.

आदौ विभाति न मनागपि यत्र रागः संसेवनोत्तर-मपारतरा-ऽनुरागः ।
ताम्बूलमीशमिव वीक्ष्य ततस्तदा तत् सेवात्तधीः किमिति साञ्जलिना दधार ॥ २५ ॥
श्रीनाथाङ्घ्रिसरोजजातरसभाक् स्थाणुः स्वयं चापि यो जातः स्वद्रु समानकान्तिरखिलप्रेष्टप्रदः शङ्करः ।
ताम्बूलं त्विदमत्र भाति भगवन्मुख्यामृतस्वादभाक् तत्स्यादेव तथाविधाधिकगुणं बुद्ध्यैवमन्याऽग्रहीत् ॥ २६ ॥

द्विजोच्छिष्टं सदा सेव्यमिति शास्त्रार्थकोविदा । काप्यसेवत ताम्बूलं भगवन्मुखचर्वितम् ॥ २७ ॥
उद्वेजिताऽहमिह येन पुरा समन्तादुद्वेग एष हरिणा विहितः सचूर्णम् ।
सर्वांशतोऽजनि न वेति विलोकनार्थं ताम्बूलमाशु जगृहे किमु तादृशं सा ॥ २८ ॥
एकाऽहमेव सरसाऽस्य रसस्य भोक्त्रीत्येष स्मयो मुरलिकाहृदि यः पुराऽऽसीत् ।
सोऽद्य त्वया ह्यपहृतो मुखवीटिके तत् पूज्या ममेति च करेण दधार काचित् ॥ २९ ॥
सोद्वेगा त्वमिवाहं भुजङ्गरतिका दलान्विता च तथा । कस्मादेतद्रसभाक् त्वमहं नेत्याददेऽनुयोक्तुं ताम् ॥ ३० ॥

तदङ्घ्रिकमलमिति :

सन्मानसोत्पलदलादपि कोमलोऽसावासीत्पुरेति कठिने न कुचे कृतो मे ।
योग्योऽधुना तु स शिलोपलभूविहारात् पादः प्रभोरिति कुचे निदधे निजेऽन्या ॥ ३१ ॥
त्रिपापहर्त्र्यम्बु बभूव यस्मात् पदाम्बुजातस्य न तस्य विष्णोः ।
सुदुर्घटा मे तनुतापशान्तिरिति न्यधात् कापि कुचेऽतितप्ते ॥ ३२ ॥
स्वीये पयोधरघटे ललिताब्जनाभपादाम्बुजातभरणं च चकार काचित् ।
नैतद्विचित्रमिह यत्किल धर्म एव स्त्रीणामयं जलभृते करणं घटेषु ॥ ३३ ।
सार्वांशिकं यदि मयैव सुखं गृहीतमैशाङ्गसङ्गजनितं तदिमाः सपत्न्यः ।
ईर्ष्याजुषः स्युरिति तत्र गतेर्ष्यमन्या न्यायेन पादसुखमेवमुरीचकार ॥ ३४ ॥
अम्लानभावमिह नैति विनाम्बुजातसङ्गं सरोजमिति कापि विचिन्त्य चित्ते ।
सद्यस्तने घनरसे कठिनावनिस्थं पादाब्जमैशमनुद्युतये न्यधात् किम् ॥ ३५ ॥
रणरणकरणेऽहमस्मि शक्ता ध्रुवमबलाऽप्यतनप्रसङ्गरागे । सदयहरिविबोधनाय काचिदिति चरणे स्तनभूभृतं न्ययुङ्क्त ॥ ३६ ॥
अस्मिन्नेव सुखं सर्वं यच्छ्रीरेनं न मुञ्चति । अतोऽखिलसुखेहान्या पादमस्यादधे हृदि ॥ ३७ ॥
क्षीराब्धिनित्यवसतेः कमलाधिपस्य नान्यत्र सद्रतिकरो भविता निवासः ।
इत्यङ्गना-चतुरधी-रसवृद्धिभाजाः श्रैशं पदं निजपयोधरयोरकार्षीत् ॥ ३८ ॥

एका भ्रुकुटिमिति : १०.३२.६.

विरहदुःखमभूद् भगवन यदा स्मरशरैरहमेवमिहार्दिता । इति शरप्रहृतिं स्वकटाक्षतो यदुवरानुभवार्थमदर्शयत् ॥ ३९ ॥
सजातीयचेतोवशीकारयुक्तिर्न यस्यास्ति धिग्जन्म तस्येति काचित् ।
तदा स्वाधरं स्वावशश्रीधराग्र्याधरं वीक्ष्य धिक्त्वेन भूयोऽदशत् किम् ॥ ४० ॥

कृष्णप्रिया

किसी राजस सात्विक गोपीने श्याम सुन्दर के चर्वित ताम्बूल को अपनी अञ्जली में ले लिया, तब वियोग एवं काम ज्वर संतप्त सात्विक राजस गोपीने प्रभु के पदपङ्कज को अपने वक्षःस्थल में धारण किया, इससे ऐसा निश्चय होता है कि यह व्रज सुन्दरी शोक संतप्त हृदया भूतल पर लेटी होगी और दौर्बल्य से उठ नहीं सकी तब कृष्ण जी के चरण सरोज को हृदय पर धारण किया ॥ ५ ॥ जो तामस गोपी थी वह भ्रुकुटी चढ़ाकर, प्रणयप्रकोप के आवेश से अत्यन्त विह्वल बनकर दोनों से होठ को काटती और कटाक्षों से कृष्ण को वेधती देखने लगी ॥ ६ ॥

अपरानिमिषद्दृग्भ्यां[1] जुषाणा तन्मुखाम्बुजम् । आपीतमपि नातृप्यत् सन्तस्तच्चरणं यथा ॥ ७ ॥
तं काचिन्नेत्ररन्ध्रेण हृदिकृत्य निमील्य च । पुलकाङ्ग्युपगूह्यास्ते योगीवानन्दसम्प्लुता[3] ॥ ८ ॥

---

१ निमिषं-विज. । २. गु-श्रीधर. वंशी. जीव. वीर. विज. विश्व. रा. ध. शु. सु. । ३. निर्भरा-विज. ।

कर्दमक्षमा

अन्वयः—अनिमिषद्दृक्भ्याम्, आपीतम्, अपि, तत् मुखाम्बुजम्, जुषाणा, अपरा, सन्तः, यथा, तच्चरणम्, (संसेव्य न तृप्यन्ति) तथा, न, अतृप्यत् ॥ ७ ॥ नेत्ररन्ध्रेण, तम्, हृदि, कृत्य, निमील्य, च, उपगुह्य, पुलकाङ्गी, काचित्, योगी, इव आनन्द समुप्लुता, आस्ते ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनिमिषन्तीश्यामनिमीलन्तीश्यां दृग्श्यामापीतमपि सम्यक्सादरं दृष्टमपि पुनः पुनर्जुषाणा नातृप्यत् ॥ ७ ॥ हृदिकृत्य हृदयं नीत्वेत्यर्थः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अपरा गोपी । सन्तः सर्वदा तत्पराः ॥ अनिमिषन्तीभ्यामानन्दजाड्यवशादनिमीलन्तीभ्यां दृग्भ्यां भ्रमरीभ्यामिव तस्य मुखाम्बुजम् । यद्वा–तत्प्रसिद्धं पूर्वस्याः कटाक्षशरजर्जरितत्वात्समयचकितव्याकुलमनुतप्तम् । आपीतं सम्यगास्वादितमाधुर्यमपि पुनःपुनर्जुषमाणा आस्वादयन्तीति । मुखाम्बुजस्य स्वभावेनैव माधुर्यमपरं तत्रापि स्वाभीष्टेन स्वयूथेश्वरीकटाक्षशरप्रहारेण संकोचत्रपाविषाददैन्यादिसंचारिविमिश्रणाबहुविधमतिवर्द्धमानं तदानीमभूदतस्तत्र तृष्णाधिक्यान्नातृप्यत् । सम्पूर्णांशेन दृष्टान्तादर्शनादेकांशेन दृष्टान्तमाह–सन्त इति । अत्र कटाक्षशरप्रहारिण्यामेव कृष्णस्य तदानीं संपूर्णा दृष्टिः संपूर्णं मनश्च न त्वन्यस्यां कस्यामप्येकांशेनापि, यत एव स्वस्मिंस्तस्यानवधानमालक्ष्य लज्जानुद्गमात् । दृग्भ्यामिति संपूर्णाभ्यामेव नेत्राभ्यां स्वच्छन्देनैव मुखमपश्यदतः सर्वतः सौभाग्यवती कठाक्षरवर्षिण्येव ज्ञेया ॥ ७ ॥ तम् श्रीकृष्णम् । हृदिकृत्य कारागारेऽपराधिनमिव । इत्यर्थ इति–हृदयदेशे प्रापणमेव हृदिकरणपदार्थः । सर्वदा सतः करणासंवादिति तात्पर्यम् । आनन्दसंप्लुता परमानन्दपूर्णा । पुंस्त्वपाठे तु योगिविशेषणम् । अत्र केचिदष्टसखीचेष्टितं कल्पयन्ति–'काचित्कराम्बुजं शौरेः' इत्यारभ्य 'योगीवानन्दसंप्लुताः' इत्यन्तम् । तत्र संख्यापूर्त्यर्थम् "काचिदायांतमालोक्य गोविंदमतिहर्षिता । कृष्णकृष्णेति कृष्णेति प्राह नान्यदुवाच ह ॥" इत्यधिकं श्लोकं च पठंति । सख्यश्च—चंद्रावली १, श्यामला २, श्यामा ३, विशाखा ४, राधिका ५, ललिता ६, पद्मा ७, भद्रा ८ इत्याख्याः । ललिताविशाखाचम्पकलताचित्रातुंगविद्येन्दुलेखारंगदेवीसुदेव्य इत्थं केचित्सख्यष्टकं राधाभिन्नं वदन्ति ॥ हृदिकृत्य हृदयं नीत्वेति । भाग्यान्मिलितोऽयं चंचलः कान्तः पुनर्माऽपसरत्विति च बुद्ध्वेति भावः । निमील्य चेति–पुनर्नेत्ररंध्रेणैव न निःसरेदिति शकयेवेति भावः । पुलकांगीति निर्विघ्नसंभोगप्राप्तिबुद्ध्या उपगूह्यास्त इति स्वकर्तृकोपगूहनं महाविरहोत्तरकालप्राप्त्या तृष्णाधिक्येन धैर्यापगमात्, तत्र द्रष्टृलोकाभावाल्लज्जानुत्पत्तश्च । तिस्र एवैताः कान्तपार्श्वं प्रत्यागमनाद्वामा अस्मानेवायमागम्य मिलतु न तु वयमिमं गत्वा कदाचिदपि मिलाम इति मदीयतामयमधुरस्नेहवत्त्वात्सुसख्याः स्ववशीकृतकान्ता ज्ञेयाः । तत्र तिसृषु मध्ये प्रथमा सर्वगोपीजनाधिका यूथेश्वरी, द्वितीयातृतीये तस्याः सख्यौ । एवं सप्त नामासां श्रीवैष्णवतोषिणीदृष्ट्यैव चन्द्रावलीश्यामलाशैव्यापद्माश्रीराधाललिताविशाखा इति क्रमेण नामान्यवगतानि । अष्टमी तु "काचिदायांतमालोक्य गोविंदमतिहर्षिता । कृष्णकृष्णेति कृष्णेति प्राह नान्यत्तदैव यत् ॥" इति विष्णुपुराणदृष्ट्या भद्रानाम्नी ज्ञेया । श्रीवैष्णवतोषिणीधृतस्कांदप्रह्लादसंहिताद्वारकामहात्म्यविख्याताभिख्या एता अष्टावेव त्रिशतकोटिगोपीषु मुख्या ज्ञेयाः । आसु तारतम्यजिज्ञासा चेदुज्ज्वलनीलमणिर्द्रष्टव्यः । सर्वमुख्या तु राधैव "यथा राधा प्रिया विष्णोस्तस्याः कृष्णः प्रियस्तथा । सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा ॥" इति पाद्मोक्तेः । "देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्वलक्ष्ममयी सर्वकांतिः संमोहिनी परा ॥" इति बृहद्गौतमयोक्तेः । "राधया माधवो देवो माधवेनैव राधिका । विभ्राजते जनेष्वा–" इति ऋक्परिशिष्टोक्तेश्च ज्ञेया ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जुषाणा आस्वादयन्ती आपीतं सम्यगास्वादितं माधुर्यमपि इति दृशो रसनात्वं मुखस्याम्बुजतारूपकेण तत् सौन्दर्यस्य मधुत्वञ्च रूपितम् । दृशो रसनात्वरूपकेण तु तन्माधुर्यासक्तिर्दर्शिता । शान्ता दास्यभक्तिनिष्ठा इति साक्षाद्दर्शनेऽपि तृप्त्यभावमात्रे दृष्टान्तः । वैशिष्ट्यं तु तत्तद्भावमाधुरीव्यञ्जकश्रीमुखालम्बनतया विद्यत एव । इयं सन्मुखदत्तदृष्टित्वात् प्रखरा स्वयमेवासौ मां मिलिष्यतीति स्वस्थान एव स्थितत्वात् सुसख्या स्वाधीनकान्ता वामा च ॥ ७ ॥ तं नेत्ररन्ध्रेण हृदि कृत्येति तस्या हृदये तस्य स्वच्छोपाधौ बिम्बस्यैव परमासक्तिः सूचिता ततः साक्षाद्भावाल्लज्जया नेत्रे निमील्य भावपारवश्येन पुलकाङ्गी सती उपगुह्य आलिङ्गनमनुकृत्य आस्ते चिरं तथैवासीदित्यर्थः । योगीवेति अन्तः स्फूर्त्तौ दृष्टान्तः यद्वा योगीति क्रिया विशेषणं योगे यथा स्यात्तदिवेत्यर्थः । इयं लज्जया मृद्वी पूर्वस्माद्धेतोः सुसख्या स्वाधीनकान्ता वामा च एवं सप्तोक्ता अष्टमी तु श्रीविष्णुपुराणे—

काचिदायान्तमालोक्य गोविन्दमतिहर्षिता । कृष्णकृष्णेति कृष्णेति प्राह नान्यदुदैरयदिति ॥

प्रखरा सरला चेयम् अत्रेदं विवेचनीयं रत्याख्यो भावस्तावदुभयविधः एक आत्मनि तदीयताभावनामयत्वेन कान्तपराधीन्यदाक्षिण्यादिमयः अन्यः कान्ते मदीयताभावनामयत्वेन पराधीनकान्तत्ववामत्वादिमयः तदेवं भावद्वयमिश्रिततारतम्येनान्येऽपि विविधा भावा विभाव्यन्ते तदेतन्नानाभाववतीनां मध्ये सजातीयभावानां सख्यं स्यात् रोचकत्वात् विजातीयभावानां प्रतिपक्षता स्यात् अरोचकत्वादेव सजातीयभावानां सौहृद्यं स्यात् यत्किञ्चिद्रोचकत्वेन हिताशंसनमात्रात् अतिमिश्रत्वेनातिसूक्ष्मत्वेन वा नातिस्फुटसजातीयादिभेदभावानां तटस्थ्यं स्यात् अवधानहेत्वभावात् श्रीकृष्णविषयकनिजनिजभावमात्राभिरुचिमतीनां तासां सख्याद्युदयस्य तदेकमूलत्वमेवोचितमिति, तत्र तदीयतामदीयतामययोर्मुख्ययोर्भावयोरुत्तरः श्रेयान् ममताधिक्येन हि गम्भीरप्रेमप्रवाहाधिक्यं भवति तत एव तद्विवर्त्तरूपवाम्यापरपर्य्यायकौटिल्याभासो जायते "अहेरिवगतिः प्रेम्णः स्वभावकुटिला भवे"दिति भरतन्यायात् । अत एव कान्ताऽपि तद्वशः स्यात् तथा च रुद्रः—

वामता दुर्लभत्वं च स्त्रीणां या च निवारणा । तदेव पञ्चवाणस्य मन्ये परममायुधमिति ॥

यथा श्रीहरिवंशे श्रीसत्यभामायां दृश्यते—

रूपयौवनसम्पन्ना सौभाग्येन च गर्विता । अभिमानवती देवी श्रुत्वैवेर्ष्यावशं गतेति ॥

कुटुम्बस्यैश्वरी सासीद्रुक्मिणी भीष्मकात्मजा । सत्यभामोत्तमा स्त्रीणां सौभाग्येचाधिकाभवदिति च ॥

अत एवार्द्धेनार्द्धेन प्रथमचतसृणां वर्णनमुत्तरातसृणां त्वेकेनैकेनेति कवेरादरोऽपि दृश्यते । आसु तिसृतु च एकाभ्रूकुटिमावध्य इत्यनेन या वर्णिता सैव श्रेष्ठा भाववैशिष्ट्येन प्रथमत्वेन चोपन्यासात् तादृशसर्वविलक्षणभावश्च तस्या एव स्वपरित्यागे स्यात् यस्याः सर्वपरित्यागेन स्वसङ्गे नीतायाः सौभाग्यदानेन सर्ववैलक्षण्यं श्रीभगवान् स्वयमाविष्कृतवान् तस्मात्सैव सा भवेत् । अथ प्रथमचतसृणां प्रथमैव ज्येष्ठा श्रेष्ठा च अग्रे स्थितत्वात् सर्वा अतिक्रम्य प्रथमत एव कान्तस्पर्शात् दक्षिणासु सुमधुरचेष्टत्वात् एषा चोत्तरवर्गप्रवराया विजातीयभावेति प्रातिपक्षिकी ज्ञेया अथानयोर्वर्गविचारः तत्रोत्तरप्रथमायाः सख्यौ तदनन्तरे द्वे प्रथमप्रथमायास्त्वेकव्यवहिततृतीयादिके द्वे भावसाम्यात् न तत्तदनुगततया वामदक्षिणयोः स्थितेश्च यातु प्रथमद्वितीया सा खलु प्रथमगणान्तः प्रविश्य स्थितापि किञ्चिद्व्यवहितत्वात्तदतिक्रमिचरितत्वाच्च न प्रथमायाः सखी पराधीनकान्तं मन्यतया किञ्चित्सादृश्येनोत्तरायास्तु सुहृदिति ज्ञेयम् अथ या विष्णुपुराणोक्ता सातु नातिविस्पष्टभावत्वद्वर्गद्वयाप्रवेशाच्छ्रीशुकेनावर्णनाच्च तटस्थैव ज्ञेया । अथ तासां नामविचारः तत्र भावस्योत्तरे मल्लद्वादशीप्रसङ्गे श्रीकृष्णयुधिष्ठिरसम्वादे तन्नामानि यथा "गोपीनामानि राजेन्द्र ! प्राधान्येन विबोध मे । गोपाली पालिका धान्या विशाखा ध्याननिष्ठिका । राधानुराधा सोमाभा तारका दशमी तथेति विशाखान्या धनिष्ठिकेति पाठः क्वचित् दशमीत्यपि नामैकं तच्चान्वर्थमिति सर्वान्ते पठितं, यद्वा तथेति दशम्यपि तारकानाम्न्यैवेत्यर्थः । गोपाली चेयं नूनं पाद्मोक्तगायत्रीचरी भवेत् तथा स्कान्दप्रह्लादसंहितायां द्वारकामाहात्म्ये मायासरःप्रस्तावे पुनरुद्धवागमने प्रियप्राप्तिवत्प्रियदूतप्राप्तावपि स्वस्वभावाभिव्यक्तेस्तद्भावोक्तिसहितान्येवाष्टौ नामानि निर्दिष्टानि किन्त्वत्यन्तदुःखमयोक्तित्वान्नैतादृशरसावसरे दृश्यानि कदाचिद्विचारावसरे त्वपेक्ष्याणीत्यनन्यगतिकत्वेनैव लिख्यन्ते यथा "तच्छ्रुत्वा वचनं तस्य ललिता क्रोधमूर्च्छिता । उद्धवं साश्रुनयना सोवाच रुदती तदा । श्रीललितोवाच असत्यो भिन्नमर्य्यादः शठः क्रूरजनप्रियः । माकृथाः पुरतोऽस्माकं कथास्तस्याकृतात्मनः । धिक् धिक् पापसमाचारो धिगसौ निष्ठुराशयः हित्वा यः स्त्रीजनान्मूढो गतो द्वारवन्तीं प्रति । श्रीश्यामलोवाच किं तस्य मन्दभाग्यस्य स्वल्पपुण्यस्य दुःखदाः । मा कुरुध्वं कथाः सख्यः कथाः कथयतापराः श्रीधन्योवाच केनायं हि समानीतो दूतो दुष्टजनस्य च । यातु तेन पथा पापो येन नायाति वै पुनः श्रीविशाखोवाच न शीलं न कुलं यस्य ज्ञायते जन्म कर्म च । हीनस्य पुरुषार्थेषु तेन सङ्गो निरर्थकः । श्रीराधोवाच पूतनाघातने यस्य नास्ति पापकृतं भयम् । तस्य स्त्री हनने साध्वः ! शङ्का कापि न विद्यते । श्रीशैव्योवाच सत्यं ब्रूहि महाभाग ! किं करोति यदूत्तमः । संवृतो नागरस्त्रीभिः कथास्माकं करोति किम् । श्रीपद्मोवाच कदोद्धव ! महाबाहुः नागरीजनवल्लभः । समेष्यतीह दाशार्हः पद्मपत्रायतेक्षणः । श्रीभगद्रोवाच । हा कृष्ण ! गोपप्रवर ! हा गोपीजनवल्लभ ! । समुद्धर महावाहो ! गोपीः संसारसागरादिति । एके तु चन्द्रावलीमेवाष्टानां मध्ये मन्यन्ते न तु धन्यां तस्या लोकेऽति प्रसिद्धेः तत्र दशसंख्याकं मतं नात्रैकार्थ्यं समर्थयति संख्यावैषम्याद् अष्टसंख्याकयो रपि मतयोर्धन्यापक्षो न सङ्घटयितु शक्यते तत्र तत्सहितत्वेन श्रीळलितादीनां पञ्चानां वामप्रखरप्रायत्वात् अत्र त्वेका भ्रुकुटिमाबध्येति तिसृणामेवेति चन्द्रावलीपक्षस्तु सङ्गम्येत तस्या दक्षिणावर्गाग्रिमात्वेन स्थापयिष्यमाणत्वाद्वामदक्षिणयोर्द्वयोरपि वर्गयोस्त्रिसंख्यकत्वेन षट्त्वे द्वाभ्यां श्यामलाभद्राभ्यां चान्याभ्यामष्टतापर्य्याप्तौ सुघटता स्यादिति । तदेवं स्थिते या पुनरुत्तरवर्गप्रथमा एका भ्रुकुटीत्यादि वर्णिता परमभावसौभाग्योपरिकाष्ठापन्नत्वाच्छ्रीराधैव । "यथा राधाप्रिया विष्णोस्तस्या कुण्डं प्रियं तथा । सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभेति पाद्मोक्तेः । राधा वृन्दावने वन इति मात्स्यस्कान्दादिभ्यः देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्वलक्ष्मी मयी सर्वकान्तिः सम्मोहिनी परेति बृहद्गोतगीये च । राधया माधवो देवो माधवेनैव राधिका । विभ्राजन्ते जनेष्वा" इति ऋक्परिशिष्टे । वर्णिता च सा तथैव श्रीजयदेवसहचरणे महाराजलक्ष्मणसेनमन्त्रिवरेणोमापतिधरेण । "भ्रूवलनैः कयापि नयनोन्मेषैः कयापि स्मित-

ज्योत्स्नाविच्छुरितैः कयापि निभृतं सम्भावितस्याध्वनि। गर्वोद्भेदकृतावहेललितश्रीभाजि राधानेन सातङ्कानुनयं जयन्ति पतिताः कंसद्विषो दृष्टयः"। इति विवृतं चतन्मदनुजवरैः श्रीरूपमहाभागवतैरुज्ज्वलमणेः स्थायिभावविवरणे। अतो गान्धर्वेति या श्रीगोपालतापन्यां प्रसिद्धा सापि मुख्यत्वलिङ्गेनेयमेवेति मन्यन्ते। अस्याः प्रह्लादसंहितायां पूर्वपूर्वापेक्षया वचनकौशल्यान्मध्यात्वम्। अत्र च कोपावसरेऽपि लीलाविशेषमात्रव्यञ्जितप्रागल्भ्यतया बाहुधारिण्याद्यपेक्षया मध्यात्वमिति च समानम्। अथ यापरा निमिषदित्यादिना तत् सखी वर्णिता सा श्रीललितेत्यवगम्यते। वाम्यप्राखर्याभ्यां साम्यात्। सम्प्रति नातिवाम्यादिकं तु निजवरसखीनिशातदृक्पातघातजाततत् क्षोभदर्शनेनातिसन्तोषात्। एषा च राधानुराधा इति या भविष्योत्तरपठिता तदपरस्पर्यायैव वा। तत्र च पाठस्य नाम्नोश्च युग्मतामयत्वावगतेरत्रापि समवर्गता प्राप्तसखीवृन्दप्रथमोक्तेमुख्यता प्राप्तिसाम्यात्। अथ तं काचिन्नेत्ररन्ध्रणेत्यादिवर्णिता तत् सखी तु प्रायः श्रीविशाखैव। वाम्यमार्दवाभ्यां साम्यात्। प्रह्लादसंहितायामपि न शीलमित्यादिकं तद्वाक्यं तादृशमेव। अथ या प्रमवर्गस्य प्रथमा सा श्रीचन्द्रावल्येव। यतः श्रीराधया सह प्रतियोगितयैतिह्यमस्या एव विराजते। तथा च श्रीविल्वमङ्गलचरणाः। "राधामोहनमन्दिरादुपगतश्चन्द्रावलीमूचिवान् राधे! क्षेममिहेति तस्य वचनं श्रुत्वाह चन्द्रावली। कंसक्षेममये विमुग्धहृदये कंसः क दृष्टस्त्वया राधा केति विलज्जितो नतमुखः स्मेरो हरिः पातु वः" इति। अर्थसाम्यप्रायादियं भविष्योत्तरख्याता सोमाभैव वा स्यात् अथ या तस्या द्वितीया काचिद्दधार इत्यादिना श्रीराधा सुहृद्वर्णिता सा श्यामला भवेत्। प्रह्लादसंहितायां ललितादिगणे प्रविश्य हितोपदेशदानेन तस्याः सौहृद्यलक्षणावगतेः। सखीनां समदुःखप्रलापिता भवति किञ्चिद्व्यन्तरितव्येव तु हितोपदेशदातृता दृश्यत इति। इयमेव श्रीमध्वाचार्यैर्भावगततात् पर्ये दर्शिता लीलाख्या भवेत्। अथ काचिदञ्जलिनेति एका तदङ्घ्रीति वर्णिते ये चन्द्रावलीसख्यौ तथा विष्णुपुराणे यास्तटस्था वर्णिताः ताः क्रमेण शैव्यापद्माभद्राः स्युः सेवकवद्दैन्येन साङ्गमिषया नातिस्फुटभावविशेषत्वेन च साम्यादिति। महानुभावसम्मत्या युक्तिप्रायं व्यलेखि यत्। तत्र कृष्णस्तदीयाश्च ममानन्यगतेर्गतिः। ता मद्वर्ण्यरहोलीलानाम्ना सङ्कोचमाप्नुयुः। मुनिनैवं स्तुताह्वानाः क्षमन्तां मम चापलम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

जुषाणा सेवमाना प्रीत्या वीक्षमाणेत्यर्थः। आपीतमपि दृशोश्चषकत्वं ध्वनितं परमप्रीत्या सम्यग्दृष्टमपीत्यर्थः। सन्तः प्रीति भक्त्येकनिष्ठाः इति मधुरप्रेम्णः प्रीतिभक्तेर्वा तृप्त्यभावांशमात्रे 'साम्यमभिप्रेतं किन्तु सारङ्गाणां पदाम्वुजम्' इत्यादितेषां श्रीपदाम्वुजे भक्तिः, आसाञ्च प्रेयसीनामधरामृतादिलोभेन प्रायः श्रीमुख एव प्रीतिरिरिति प्रेमविशेषः सूचित एव। अतएव तेषां श्रीपादाब्जयोः कोमलत्वादेः साक्षादननुभवादब्जादिरूपकाप्रयोगः ॥ ७ ॥ काचित् परमलज्जादिगुणनम्रा साक्षाच्चिरं मुहुर्द्रष्टुमप्यक्षमा, अतएव नेत्रयो रन्ध्रेण द्वारेण हृदिकृत्येति मनसि सर्व्वाङ्गस्फूर्त्त्या तत्तदशेषसौन्दर्य्यानुभवार्थमिवेति निमील्य नेत्रे एकस्मिन्नेवांगे नेत्रयोर्लग्नयोरन्येषां मनस्यापि दर्शनासम्भवात्। किंवा नेत्रद्वारेण तस्य निःसरणभयादिव, वस्तुतस्तु तत्तत्प्रेमसंप्लुतत्वस्वभावेनैव, अतएवोपगुह्य हृदि तमालिंग्य, चकारात् कृष्ण कृष्णेति कीर्त्तयन्ती; तथा च वैष्णवे (५।१३।४३) 'काचिदालोक्य गोविन्दमायान्तमतिहर्षिता। कृष्ण कृष्णेति कृष्णेति प्राह नात्यदुदैरयत् ॥' इति। काचित् भ्रुकुटिमित्यत्र यद्येकैव गोपी व्याख्याता, तदात्र पराशरोक्तेयमष्टमी ज्ञेया, आनन्दरसेऽत्यन्तनिमग्ना सती आस्ते-क्षणमासीदित्यर्थः। योगी ध्यानयोगेन भगवति चित्तैकाग्र्यं गतः; तथा च वैष्णवे (५।१३।४५)—'काचिदालोक्य गोविन्दं निमीलितविलोचना। तस्यैव रूपं ध्यायन्ती योगारूढेव चावभौ ॥' इति बहिर्वृत्त्यभावामात्रे दृष्टान्तः। तत्र च नेत्ररन्ध्रेणेति तस्मादप्यस्या विशेषः सूचितः, ध्याने दर्शनादपि साक्षात् सन्दर्शनेऽत्यन्तानन्दात्, तच्च श्रीभागतामृतोत्तरखण्डे विवृतमेव, तत्रापि काचिदिति स्त्रीत्वेन भावविशेषात्, अतएवालिंगनाच्च साक्षात् सन्दर्शनवद्भ्यः पार्षदाभिभ्यः श्रीगोपवर्गादिभ्यश्चानन्दविशेषः सूचित एवेति दिक्।

नौमि चन्द्रावलीं भद्रां पद्मां शैव्यामनुक्रमात्। श्यामां विशाखां ललितां राधामित्यष्टौ तत्प्रियाः ॥

तत्तन्नामाग्रहणकारणं पूर्व्वं लिखितमेव। यद्यप्यासां प्रेम्णि तारतम्यबाहुल्यं न घटते, प्रत्येकं सर्व्वासां तस्मिन् परमकाष्ठापत्तेः, अतएव कराम्बुजग्रहणादिषु तासां स्वस्वभावानुसारेण तदानींतनेच्छानुसारेणैव वा प्रवृत्तिः तथापि मुक्तगणपूज्यानां श्रीवैकुण्ठपार्षदवराणाम् इव तासामपि कथञ्चित्तारतम्यकल्पनया तत्रापि मुख्यत्वेन प्रसिद्धानामष्टाना तास्वपि श्रीराधादेव्याः सुप्रसिद्धत्वेन सर्वतो वैशिष्ट्येन श्रैष्ठ्यं ततश्च तद्भावानां तत्तच्चेष्टितानामत्यूह्यम्। अत एवाष्टौ तथा तथा पृथगुक्ता इति दिक् ॥८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अपरा निमेषमकुर्वतीभ्यां दृग्भ्यां तस्य मुखाम्बुजमापीतमपि पुनःपुनर्जुषाणा सेवमाना नातृप्यत् न तृप्ता बभूव यथा सन्तो भक्ताः तस्य चरणं पुनःपुनरनुभूयापि न तृप्यन्ति तद्वत् ॥ ७ ॥ काचित्तु नेत्ररन्ध्रद्वारेण तं कृष्णं हृदि विधायोपगुह्यालिङ्ग्य च निमील्य नेत्रे इति शेषः पुलकानि पुलकितान्यङ्गानि यस्याः सन्तीति तथा भूता आनन्देन संप्लुता व्याप्ता आनन्दमग्ना योगीवास्ते आस्त ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अनिमिषं निमेषलक्षणव्यापारशून्यमितिक्रियाविशेषणं जुषाणा सेवमाना ॥ ७ ॥ हृदि स्थितं कृत्वा पुलकाङ्गी रोमाञ्चितगात्रा उपगुह्य आलिङ्ग्य आनन्दनिर्भरा परमानन्दपूर्णा ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अपरा निमिषद्दृग्भ्यामिति दर्शनानन्दनिस्पन्दा स्वभावसरला ॥ ७ ॥ तं काचिन्नेत्ररन्ध्रेणेत्यादि मुग्धापि गम्भीरप्रमवती ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अनिमिषन्तीभ्यामानन्दजाड्यवशादनिमीळन्तीभ्यां दृग्भ्यां भ्रमरीभ्यामिव तस्य मुखाम्बुजम्। यद्वा। तत् प्रसिद्धं पूर्वस्याः कटाक्षशरजर्जरितत्वात् सभयचकितव्याकुळमनुतप्तम्। आपीतं सम्यगास्वादितमाधुर्यमपि पुनः पुनर्जुषमाणा आस्वादयन्तीति मुखाम्बुजस्य स्वभावेनैव माधुर्यमपारं तत्रापि स्वाभीष्टेन स्वयूथेश्वरी कटाक्षशरप्रहारेण सङ्कोचत्रपाविषाददैन्यादिसञ्चारिमिश्रणाद्बहुविधमतिवर्द्धमानं तदानीमभूदतस्तत्र तृष्णाधिक्यान्नातृप्यत्। सम्पूर्णांशेन दृष्टान्तादर्शनादेकांशेन दृष्टान्तमाह। सन्त इति। अत्र कटाक्षशरप्रहारिण्यामेव कृष्णस्य तदानीं सम्पूर्णा दृष्टिः सम्पूर्णं मनश्च न त्वन्यस्यां कस्यामप्येकांशेनापि। यत एव स्वस्मिंस्तस्यानवधानमालक्ष्य लज्जानुद्गमात् दृग्भ्यामिति सम्पूर्णाभ्यामेव नेत्राभ्यां स्वच्छन्देनैव मुखमपश्यदतः सर्वतः सौभाग्यवती कटाक्षशरवर्षिण्येव ज्ञेया ॥ ७ ॥ हृदि कृत्य हृदयं नीत्वेति भाग्यान्मिलितोऽयं चञ्चलः कान्तः पुनर्माऽपसरत्विति च बुद्ध्येति भावः। निमील्य चेति पुनर्नेत्ररन्ध्रेणैव निःसरेदिति शङ्कयेति भावः। पुलकाङ्गीति निर्विघ्नसम्भोगप्राप्तिवुद्ध्या। उपगुह्यास्ते इति स्वकर्तृकोपगूहनं महाविरहोत्तरकालप्राप्त्या तृष्णाधिक्येन धैर्यापगमात् तत्र दृष्टलोकाभावाल्लज्जानुत्पत्तेश्च। तिस्र एवैताः कान्तपार्श्वं प्रत्यगमनाद्वा मा अस्मानेवायमागम्य मिलतु ननु वयमिमं गत्वा कदाचिदपि मिलाम इति मदीयतामयमधुरस्नेहवत्त्वात् सुसख्याः स्ववशीकृतकान्ताः ज्ञेयाः। तत्र तिसृषु मध्ये प्रथमा सर्वगोपीजनाधिका यूथेश्वरी द्वितीयातृये तस्याः सख्यौ। एवं सप्तानामासां श्रीवैष्णवतोषिणी दृष्ट्यैव चन्द्रावली श्यामला शैव्या पद्मा श्रीराधा ललिता विशाखा इति कमेण नामान्यवगतानि अष्टमी "तु काचिदायान्तमालोक्य गोविन्दमतिहर्षिता। कृष्णकृष्णेति कृष्णेति प्राह नान्यत्तदैरयति" विष्णुपुराणदृष्ट्या भद्रानाम्नी ज्ञेया। श्रीवैष्णवतोषणीधृतस्कान्दप्रह्लादसंहिता द्वारकामाहात्म्यविख्याताभिख्या एता अष्टावेव त्रिशतकोटिगोपीषु मुख्या ज्ञेयाः। आसु तारतम्यजिज्ञासा चेदुज्ज्वलनीलमणिर्द्रष्टव्यः सर्वमुख्या तु श्रीराधैव "यथा राधा प्रिया बिष्णोस्तस्याः कुण्डं प्रियं तथा। सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभेति पाद्मोक्तेः। देवी कृष्णमयी प्रोक्ता राधिका परदेवता। सर्वलक्ष्मीमयी सर्वकान्तिः संमोहिनी परेति" बृहद्गोतमीयोक्तेः राधया माधवो देवो माधवेनैव राधिका। विभ्राजन्ते जनेष्वा इति ऋक्परिशिष्टोक्ते ज्ञेया ॥८॥

रसिकाह्लादिनी–टीका

सा अपरा यूथमुख्या अनिमिषदृग्भ्यां तन्मुखाम्बुजं जुषाणा आस्वादयन्ती दृशोः पानकरणत्वमुक्तं लक्षणया मुखाम्बुजे लावण्य रूपमकरन्दस्य पेयत्वं सूचितं इव द्रव्यस्यान्तप्रवेशनं पानमिति पानलक्षणम्। अत्र च नेत्रद्वारेण मुखाम्बुजलावण्यस्य हृदये प्रवेशनमेव पानमिति। आपीतमपि सम्यक् दृष्टमपि परमप्रीत्या पुनः पुनः सेवलानान्नातृष्यत् अलमिति। नामन्यतेति अनेन विषयसौन्दर्यं प्रवृत्तिहेतुः न तु प्रयोजनाभावः प्रतिबन्धकोऽस्तीति। तत्र दृष्टान्तः सन्तस्तच्चरणं यथेति। सारङ्गानां पदाम्बुजमिति ते यथा पदाम्बुजमित्युक्तम्। ते यथा पदाम्वुजं सदा सेवमाना अपि अलमिति। अनन्यन्ते तृप्त्यभावे दृष्टांतः। ननु सर्वांशेन सन्तो हि प्राप्तव्यमस्ति। चरणांवुजे सर्वेषां साहित्यमस्ति। अधरामृते न कस्याप्यंशोऽस्ति अत एतस्य सर्वतो वैशिष्य्यं सूचितमिति ॥ ७ ॥ यथा "न खलु गोपिकानन्दनो भवानि" त्युपलिप्तं सा काचित् पूर्वस्यास्तु दर्शनमात्रमेवापेक्षितं अस्यास्तु तावत् विशेषोदयाद्वैशिष्य्यं तस्यास्तु अनिमिषदृग्भ्यामिति लिङ्गात् सारल्यं मुग्धत्वात् काचिद्दूरे स्थिता ध्यानविक्षेपकगोपीसङ्गत्यागेनेति। सर्वाङ्गलावण्यग्रहणासक्तिः निरूपिता यस्याः श्रीकृष्णस्यादर्शने सर्वविवेकशून्यत्वमासीत्, तं कृष्णं सर्वाङ्गलावण्यविभागेन हृदि कृत्य स्वमनसि स्थिरीकृत्य तत्र नयद्वारमाह नेत्ररन्ध्रेणेति। पुनर्नेत्रे निमील्य वहिर्निसारणशङ्कया निमीलनं वस्तुतस्तु प्रेम विवर्त्ते नाऽनुसन्धानं न चोद्देशस्तथापि तस्या अनुरागोत्कण्ठ्यं विदग्धत्वं सूचितम्। अनेन सर्वेन्द्रियवर्तानां स्वान्त एव निरोध उक्तः। कृष्णे हृदि प्रविष्टे सति स्वान्त एव स्थितानां सर्वेन्द्रियाणां विषयाणां अनुभवो जातः। अतस्तमुपगुह्य हृद्येवाङ्गिनं आस्ते स्म तूष्णीं आनन्दसमुद्रे निमग्ना जाता। यतः पुलकाङ्गी हृद्यालिङ्गने जाते न कस्या अपि गोचरेतेतिभावः। अन्याभिरनुपलक्षिता परमानन्दमनुभूतवती। ननु साक्षात्पर्शमन्तरेण कथमानन्दावाप्तिस्तत्र तस्या अनुभव एव प्रमाणं तत्र बहिर्दृष्ट्याभावेपि। अन्तः सुखपूर्णत्वे दृष्टांतः योगी च योगी यथा ध्यानयोगेनेवान्तरानन्दपूर्णो भवति, बहिः सम्वेदनाभावात् तथेयमप्यानन्दसम्प्लुता ता बहिः सम्वेदनरहिता चासीत् कार्यानुसंधानाभावात् नह्यन्त पूर्णे अनिन्दे कञ्चन कामो नामावशिष्यत् इति। अत एवोपसंहारे एतस्यावैशिष्य्यं चोक्तं न केवलमेतासां यूथमुख्यानामेव मनोरथपूर्त्तिर्जाता किन्तु सर्वासामपि–इत्याह सर्वा इति। एवं यूथमुख्यानां अभीष्टप्राप्तौ सत्या सर्वासामथानन्दा-

वाप्तिप्रकारं दर्शयति । यास्तु विरहजेनाग्निना मूर्च्छिता इवासन् ताः, केशवः प्रशान्तकेशवान्, यद्वा कस्य सुखस्य स्पर्शः कामस्तं वशयतीति, साक्षान्मन्मथमन्मथ इत्युक्तत्वात् उपक्रमे तूक्तमेव "तासां तत्सौभगमदं वीक्ष्य मानं च केशव" इत्युक्तमेव तासां मदमाननिवृत्तौ सत्यां स्वत एवाऽऽविर्भूत इति । तस्य केशवस्यालोकस्तत्कर्तृको वा तेन परमोत्सवः परमानन्दस्तेन निर्वृत्ताः सत्यो विरहजं तापं जहुः विस्मृतवत्यः इत्यर्थः । प्राज्ञं ईश्वरं ब्रह्मज्ञं वा सौषुप्तं वात आचार्यैरेवं व्याकृतत्वात् । यद्वा प्राज्ञं रसज्ञं प्राप्य रसजिज्ञासवो जनाः यथा तापं जहाति तद्वदिति ॥ ८–९ ॥

विशुद्धरसदीपिका

अथैतस्याः प्राणसहचरीणामरीणां चेष्टामाह । अपरेति । अनन्या पूर्वोक्ताया मुख्यतमाया अभिन्ना परसुहृदित्यर्थः । अनिमिषेति । पाने समुत्कण्ठातिशयः दृग्भ्यामिति द्वित्वं ततोऽप्युत्कर्षपरं यद्वा द्वयोरेव सुखास्वादायेति जुषाणा प्रीत्या सेवमाना एवं च दृशोर रसनात्वं सौन्दर्यस्य च मकरन्दत्वं निरूपितम् आपीतं सम्यगास्वादितम् अपीति । तन्माधुर्य्यासक्तिः तदेव तत्सर्वमपि सुरतचिह्नालोकनायेति सौहृदमेवोभयमनुस्पष्टीकृतं तत्र दृष्टान्तः सन्त इति । एते च दास्यभक्तिनिष्ठा एव तच्चरणमित्युक्तेः उपमेयवैशिष्ट्यन्तु श्रीमुखालम्बनतया एवं च साक्षाद्दर्शनेऽपि तृप्त्यावमात्रेऽपि दृष्टान्तसङ्गतिः तदेव रम्यं रुचिरं नवं नवमिति नवमोक्तेः । इयं च सम्मुखदत्तदृष्टित्वात्प्रखरा मुख्या श्रीललिताख्येति अत्रापि नामानुक्तिः पूर्ववदेव सङ्गमनीया ॥ ७ ॥ अथैतस्या एव सङ्गाल्लब्धसहचरीभावायाः कस्यश्चित्साधकचरीमुख्यायाश्चेष्टितमाह । तमिति । प्राक्तनध्यानावेशेन मत्कामा रमणं जारमस्वरूपविदोऽबला: ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः इत्यस्य प्रागुक्तव्याख्यानुसारेण परमप्रेष्ठतयाभिमतं संप्रतिनेत्ररन्ध्रेण हृदि कृत्य निमील्य चेति समुच्चयेनाग्रहः सूचितः साक्षद्दर्शनेऽप्ययं ध्यानावेशो भावपरिपाकेन प्राग्भवीयसंस्कारात् ततश्च भावपारवश्येनैव पुलकाङ्गी सती उपगुह्य तत्रैवालिङ्गनमनुक्तमास्ते चिरन्तथैव स्थगितासीत् इत्यर्थः । योगीवेत्यन्तः स्फूर्त्तौ कामानासक्तौ च दृष्टान्तः निमील्येत्यस्यायम्भावः प्रियस्य नेत्रद्वारेण मा बहिर्निर्गमो भवेत् इति भीत्या चकोराक्षीव कपाटपक्ष्म संदधे वस्तुतस्तु सुरतचिह्नितविग्रहमेनमाकाचिदनुभवतु भवतु च प्राणेश्वर्य्योः क्रीडितमीडितमेवेति त्वहृदयमानीय निलीयस्थापयामीतिमौग्ध्येनानुकरणमिदं इयं च नेत्रनिमीलनेन लज्जानुभावान्मृद्वी पूर्वं सुसख्या वामां च ॥ ८ ॥

श्रीरामनारायणकृता भावभावविभाविका

अभ्यर्हितत्वात्तस्या एव चरितं श्लोकान्तरेणाप्याह । अपरेति । सा अपरा न परः कश्चित्ससङ्गी विद्यते यस्याः परसबन्धशून्या यद्वा न काचित्परा उत्कृष्टा अन्यदीया वा विद्यते यस्याः सर्वोत्कृष्टा सर्वसखीष्वात्मीयमतिमती स्वयञ्चापरा वासुदेवैकपरायणा अनिमिषद्दृग्भ्यां पूर्वनिर्दिष्टभ्रुकुटिबन्धनेन कृष्णदर्शनप्रेम्णैव वा निमिषरहिताभ्यां दृग्भ्यां यद्वा तत्र नरलीलया सर्वदृगीश्वर्या अपि भ्रमापादिकया प्रेमसंरम्भविकलतयास्मानमितरनारीसादृश्यभ्रमेण प्रियदर्शने सम्भावितनिमिषप्रतिबन्धयतिबन्धाय भ्रुकुटिबन्धोक्तावपि न वस्तुतस्तस्यान्तिमिषपातः नैमिषे निमिषक्षेत्रे इत्यत्रानीमिषस्य विष्णोः क्षेत्र इतिस्वामिचरणैर्व्याख्यातत्वात्तत्स्वरूपात्मकाह्लादिकशक्त्यास्तस्या अपि वस्तुत एव अनिमिषदृक्त्वं ताभ्यामिन्द्रनीलवज्रमणिरचितयुगपात्राभ्यां तन्मुखाम्बुजं जुषाणेत्यत्र मुखेन मुखाम्बुजपानसम्भवेऽपि नेत्राभ्यां तत्पानासम्भवेन तद्गतरूपमाधुर्य्यं जुषाणा इतिवक्तव्येऽपि तद्रसाधिकपाने तत्पानमिति सरःपीतमित्यादिवन्मुखाम्बुजं जुषाणेत्युक्तं तन्मुखम् आसमन्ताद्बहुरसग्रहणेन पीतमपि परन्तु तत्पिपासाधिक्येन नातृप्यत् यद्वा पूर्वं विहारेऽधरामृतास्वादनेनासमन्तात्पीतमपि दृग्भ्यां तद्रूपामृतं जुषाणा नातृप्यत यद्वान्तर्द्धानावसरे प्रियासन्निधानाभावादासमन्तात्पीतं तत्सन्निधानेऽधुना जातेऽप्यारुण्ये तत्प्रेमसंरम्भविह्वलत्वदर्शनेनेषत्पीतमपि मुखाम्बुजं जुषाणा नातृप्यत् अनेन रम्याणां विकृतिरपि भियन्तनोतीति न्यायेनारुणपङ्कजरूपं तन्मुखाम्बुजमीषत्पीतमिति स्वर्णवर्णजरीजात्मना भासमानमतिरुचिवर्द्धकं जातमितिध्वनिः । यद्वा मुखाम्बुजमिति निर्देशादनिमिषदृग्भ्यामित्यत्रानिमिषविशेषणे तु तव्यावृत्त्या दृशोस्तारयोर्मधुपानुरूपत्वमवधार्य्य ताभ्यामेव तत्पानयोग्यतां व्यवस्य मुखाम्बुजमधुन एव कामादिनिर्दोषविषमज्वरमोचकत्वमकात्य ताभ्यां जुषाणा अपि नातृप्यत् यद्वामुखाम्बुजमित्यत्राम्बुजमित्यत्राम्बुनि समुद्रे जायते इति व्युत्पत्त्या मुखचन्द्रं सुधाभ्रातृत्वात्स्वयं सुधानिधित्वात्साक्षात्सुधात्मकं स्वाङ्गारिविरहाङ्गारभोगविकलतया पक्ष्मपक्षचालनरहिताभ्यां जुषाणा आपतिमपि नातृप्यत् अतृप्तौ हेतुः पिपासाधिक्यं विषयसौन्दर्यं च तत्र दृष्टान्तमाह । सन्तस्तच्चरणं यथेति । सन्तो जीवन्मुक्तपरमहंसाः स्वजीवजनरूपमुक्तिमपि अपहाय लीलयैव विग्रहाध्यासापन्ना इव तच्चरणाम्बुजमधुरसजीवनं जीवनं जीवनमत्त्या तज्जुषाणा अपि न तृप्यन्ति तदुक्तं भगवत्पदाम्बुजमधुपशिरोमणिपरमहं साचार्य्यभगवत्पूज्यपादैः मुक्ता अपि लीलया विग्रहं कृत्वा भजन्ते इति । यद्वा अपरेति श्रीमती राधापेक्षयापरा तन्मुख्यसखीललितेत्यर्थः, शेषं समानम् ॥ ७ ॥ अन्याचरितमाह । तं काच्चिदिति । काचित्तु तम् अतिविलक्षणमन्ये चौराः स्वामिदृष्टिं वञ्चयित्वा बहिर्वर्तमानं वित्तं हरन्ति । अयन्तु नेत्रे संयोज्य हृद्यन्तः स्थं चित्तं हरति तं महतायासेन लब्ध्वा चपलचौरत्वात्पुनः पलायनभयात्स्नेहपाशेनाकृष्य नेत्ररन्ध्रेण हृदि कृत्य कृत्वात्रासमासेऽपि ल्यप्प्रयोगश्छान्दसः अलुकसमासाविवक्षया वा हृत्कमले संस्थाप्य बहुसुमनो मधुपस्य तस्य कमले एव बन्धनसम्भवात्तदुक्तं स्नेहवलज्ञैः । "बन्धनानि खलु सन्ति बहूनि प्रेमरज्जुकृतबन्धन-

मन्यत् । दारुभेदनिपुणोऽपि षडङ्घ्रिर्निष्क्रियो भवति पङ्कजकोशनिबद्ध'' इति ततश्च प्रवेशद्वारेण पुनर्निःसरणभयेन निमील्येति पक्ष्मकपाटं दृढं दत्त्वा तिर्यक्कर्णद्वारा निर्गमभयात्तयोरलकपाशप्रसारणपि चकारात् ज्ञेयं यत्रापि उपगुह्य त्येनन स्वीयमनोमयरूपान्तरेण हृदि गतं तमालिङ्ग्य पञ्चफणजुष्टपुष्टभुजभुजगपाशाभ्यां सुदृढं बद्ध्वा पुलकाङ्गी जातरोमहर्षा अयमत्राशयः । हरेः श्रुतिषु अणोरणीयस्त्वाम्नानाद्रोमच्छिद्रद्वारेण पलायनशङ्कया कृष्णचौररक्षणाय कृष्णान्येव रोमाणि द्वारपत्वेन तत्तद्द्वारे स्थापयामास तान्यपि सहर्षाण्येव तिष्ठन्ति अभूवन् तथाप्चैवं कृष्णमपराजितं मन्यं स्ववशे कृत्वा आनन्दसंप्लुता हृदि प्रवृद्धानन्दसिन्धौ निमग्ना यद्वानन्दाश्रुप्रवाहनिमग्ना आस्ते इति आस्तेत्यर्थः । यद्वा तस्या नित्यानन्दसंफ्लुतत्वद्योतनाय वर्तमानप्रयोगः । तत्र साधनफलयोर्दृष्टान्तः योगीवेति तत्र निमीलनहृदि करणे साधनसाम्ये आनन्दसंप्लवस्तु फलसाम्यं नात्र योगिसाम्यं तस्याः संयोगिनीत्वेन वशीकृतयोगीश्वरेश्वरत्वेन चित्रास्पदम् ॥ ८ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथ द्वितीयायाः प्रखरायाः स्वाधीनकान्ताया वामाया वृत्तमाह । अपरा अनिमिषद्दृग्भ्याम् अनिमीलन्तीभ्याम् दृग्भ्याम् अञ्जलिस्थानापन्नाभ्याम् तत्रापि क्षरणशङ्कया अनिमिषतीभ्यां तस्य प्रेष्ठस्य मुखाम्बुजं तत्रत्यलावण्यामृतम् आसमन्तात्पीतमपि जुषाणा अत्रैवागत्यालिङ्गनं करिष्यतीति मानावेशात्स्वस्थान एव स्थित्वा सेवमाना नातृप्यत् उत्कण्ठातिशयादलम्बुद्धिं न कृतवती तत्रानुरूपं दृष्टान्तमाह । यथा सन्तस्तद्भक्ताः यथोक्तदृग्भ्यामापीतमपि तच्चरणाम्बुजं जुषाणा न तृप्यन्ति तद्वदित्यर्थः । इयं राधा पक्षपातिनी ललिताख्यसखी ॥ ७ ॥ अथ तृतीयायाः मध्यायाः स्वाधीनकान्तायाः वामायाश्चरितमाह । तं प्रेष्ठं नेत्ररन्ध्रेण हृदि कृत्य हृदयं लीलाप्रवेशनीयरूपस्यैकत्वाद्रन्ध्रेणेत्येकवचनं तन्निःसरणभयान्नेत्रे निमील्यच तमन्तरेवालिङ्ग्य तज्जन्यानन्दमग्ना पुलकाङ्गी रोमाञ्चिततनुरास्ते अत्रैवागत्यालिङ्गनं विधास्यतीति मानेनैवंभूता सती स्वस्थान एव स्थिता यथाविर्भूतानान्दे निमग्नो योगी समास्ते तद्वदित्यर्थः । इयमपि राधासुहृद्भूता विशाखाभिधा सखी एवं सप्तात्राभिहिता अष्टमी तु सरला भद्राख्या विष्णुपुराणेऽभिहिता—

काचिदायान्तमालोक्य गोविन्दमतिहर्षिता । कृष्णकृष्णेति सा प्राह नान्यत्किञ्चिदुदीरयदिति ॥

चन्द्रावल्यादिनामानि तु स्कन्दे प्रह्लादसंहिताद्वारकामाहात्म्यादावुक्तानि ॥ ८ ॥

रास-रहस्यम्

र० टी०—अपरा तु यस्याः न काचित् परा उत्कृष्टा युष्मदीया वा विद्यते सा सर्वोत्कृष्टा परमात्मपरायणा तु अनिमिषद्दृग्भ्यां पूर्वनिर्दिष्टभ्रूकुटिबन्धनेन निमेषरहिताभ्यां दृग्भ्यां अर्थात् त्राटकमुद्रां धृत्वा, आपीतं आ समन्तात् पीतं पीतमिव चक्षुद्वारेण हृदि धारयन्ती, तन्मुखाम्बुजं तस्य परमानन्ददायकं प्रकाशं, जुषाणाऽपि सेवमानाऽपि, यथा सन्तस्तच्चरणं सम्यग्रूपेण तत्स्वरूपापन्नाः जीवन्मुक्ताः परमहंसाः स्वप्रयोजनाऽभावेऽपि लोकसंग्रहार्थं विदेहकैवल्यपर्यन्तं अतृप्त इव परमात्मध्यानपरायणा एव भवन्ति तथा नातृप्यत् अमृतपाने इव अलं बुद्धिं न कृतवती ॥ ७ ॥ काचित् तं अनन्तकोटीब्रह्माण्डाधिष्ठानभूतं व्यापकं परमात्मानं नेत्ररन्ध्रेणेति बहिर्मुखवृत्तीनामन्तर्मुखत्वं सम्पाद्य हृदिकृत्य अन्तःकरणे एव धारयित्वा, उपगुह्य आलिङ्ग्य अर्थात् एकात्मभावं प्राप्य, निमील्य च बहिर्विक्षेपान्निरुध्य, पुलकांगी च रोमाञ्चिता सती, योगीवदानन्दसारे सम्प्लुता आस्ते निमग्ना बभूव ॥ ८ ॥

गूढार्थदीपिनी

अनिमिपन्तीभ्यां निमेषशून्याभ्याम् ॥ जुषाणा सेवमाना ॥ ७ ॥ उपगुह्य आलिङ्ग्य पुलकानि रोमाञ्चितानि अङ्गानि यस्याः सा ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अपरा अनिमिषन्तीभ्यामनिमीलन्तीभ्यां दृग्भ्यां तन्मुखाम्बुजमापीतमपि सुदृष्टमपि पुनः पुनर्जुषमाणा सेवमाना नातृत्यत् यथा सन्तः साधवः तच्चरणं पुनः पुनर्ध्याने सुदृष्टमपि ध्यायन्तः न तृप्यन्ति "आवृत्तिरसकृदुपदेशात् ४ १ । १ । इति सूत्रमप्यत्रानुसन्धेयम् ॥ ७ ॥ हृदिकृत्य हृदयकमले निधाय ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अपराऽनिमिषं यथा तथा दृग्भ्यां भ्रमराभ्यां तन्मुखम्बुजमापीतमपि जुषमानाः सन्तस्तच्चरणं दृग्भ्यां जुषाणाः पश्यन्तो यथा न तृप्ता भवन्ति तथा तेन पानेनातृप्यन्न तृप्ताऽभूत् ॥ ७ ॥ काचिन्नेत्ररन्ध्रण हृदि कृत्य साक्षात्प्रभृतीनि चेत्यस्याकृतिगणतया हृदीत्यस्य कृञा योगे सत्यां गतिसंज्ञायां कुगतीति समासे क्त्वो ल्यपि हृदिकृत्येति भवति । चक्षुर्निमील्योपगृह्यालिङ्ग्य च योगीवानन्दनिर्भरा पुलकाङ्गी रोमाञ्चितशरीराऽऽस्ते !! ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमतिपुष्टा निरूप्य अत्युत्तमां निरूपयति । अपरेति । एषाहि भगवद्दर्शनेन गतदोषा अतो ध्यानेन भगवन्तं हृदये स्थापयितुकामा नेत्राभ्यां नेत्रद्वारा भगवन्तं हृदि स्थापितवती अत्र लावरायामृतं पेयं मुखस्याम्बुजत्वोक्तेः अनिमिषद्दृग्भ्यामिति पानकरणं द्रवद्रव्यस्यान्तर्निवेशनं पानं मध्यो रसविच्छेदो भविष्यतीति आनिमिषद्दृग्भ्यां पानं नेत्रयोरञ्जलित्वं लावण्यामृतस्य विरलत्वात् प्रीतिसेवनमत्राभिप्रेतं, यद्यपि आसमन्ताद्धर्मसहितं सर्वमेवाभिनिविष्टं स्वाधीनं जातं यदैवेच्छति तदैव हृदये पश्यतीति तथापि नातृप्यत् अलंभावं न कृतवती तत्र हेतुर्विषयसौन्दर्यं नतु प्रयोजनाभावः प्रतिवन्धकः एतदर्थं दृष्टान्तमाह । सन्तस्तच्चरणं यथेति । सन्तो हि जातकार्याः तथापि चरणारविन्दे सहजो रसः नतु किञ्चित्प्राप्तव्यं निवर्तनीयं वा ॥ ७ ॥ एका पुनर्दूरस्था अनया तुल्यशीला योगानुसारेण भगवन्तं गृहीतवतीत्याह । तं काचिदिति । पूर्वं लौकिकी पश्चाद्भक्तिमार्गानुसारिणी निरूपिता, इयं योगानुसारिणी, अतोऽस्याः सर्वावयवे दृष्टिः उभयोरेकीकरणम् अन्यथा दृष्टिभेदः स्यात् पूर्वस्यास्तु दर्शनमेव प्रयोजनम् एषा विरलेति काचिदित्युक्तं तं पूर्वोक्तं न खलु गोपिकानन्दनो भवानिति यया निरूपितं नेत्ररन्ध्रेणेत्येकवचनं रूपप्रवेशार्थं हृदि कृत्येति हृदि कृत्वा असमासेऽपि ल्यप् हृदि कृत्येत्यलुक् समासो वा ततोऽन्तः प्रविष्टो बहिर्मा गच्छत्विति निमीलनं कृतवती नहि तस्या बुद्धौ भगवान् वहिरवशिष्टोऽस्ति स्वकीयो वा भागः तया गृहीत इति चकरात्सर्वेन्द्रियनिवर्त्तनं ततोऽन्तरानन्दे पूर्णे पुलकाङ्गी जाता केवलानन्देन पुलके गोपीत्वं न भविष्यतीति तदर्थं विशेषमाह । उपगुह्यास्त इति अयं रोमाञ्चः सात्विकभावे प्रविष्टः अत एवान्तरुपगुह्यालिङ्ग्य आस्ते तामेव स्थितिं धारितवती अवस्थान्तराभावाय । ननु तस्या उत्तरत्र कार्यं भगवता सहसंभोगः कर्त्तव्यः आलापाः गृहे च गन्तव्यमिति कथन्तामेवावस्थां स्थापितवती तत्राह । योगीवेति । योगे हि तयैवाग्रे सर्वं कार्यं साधायति तथेयमपि तयैवावस्थया सर्वं साधनीयमिति स्थिता किंच आनन्दसंप्लुता आनन्दे निमग्ना अतएव बहिः संवेदनरहिता संवेदनायामेव सत्यां कार्यानुसन्धानं नहि पूर्णे आनन्दे कश्चन कामोऽस्ति ॥ ८ ॥

श्रीसुबोधिनी–सारः

अनिमिषन्तीभ्याम् अनिमीलन्तीभ्यां दृम्भ्यां तस्य मुखाम्बुजमापीतमपि जुषाणा सेवमाना नातृप्यत् तस्य चरणं जुषाणाः सन्तो भक्ता यथा ॥ ७ ॥ काचित्तं कृष्णं नेत्रद्वारेण हृदि कृत्य निमील्य चोपगुह्यालिंग्य पुलकांगी रोमांचितास्ते आनन्देन संप्लुता व्याप्ता योगीव केशवस्यालोकाद्दर्शनात् परम उत्सवो महोत्साहस्तेन निर्वृताः सर्वास्ता गोप्यो विरहाज्जातं तापं जहुः तत्यजुः प्राज्ञं विवेकिनं प्राप्य जनाः संसारिण इव ॥ ८–९ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अपराऽनिमिषदित्यत्र, **एषा ही**त्यादि । गतदोषा विस्मृतपूर्वदुःखेत्यर्थः ॥७॥ तं **काचिन्नेत्ररन्ध्रे**णेत्यत्र **पूर्वं लौकिकी**त्यारभ्य **दृष्टिभेदः** स्यादित्यन्तम् । एका भ्रुकुटिमित्यनेन लौकिकसरूपभाववती निरूपिता । तद्यथा तथोपपादितम् । भक्तिमार्गे हि स्नेहवशाद् बहिर्मुखारविन्ददर्शने तेनैव विस्मृतसर्वा तदन्यन्नापेक्षते, सा त्वपरेत्यनेन निरूपिता । योगे हि ध्याने प्रत्येकमङ्गं पृथक् चिन्त्यते, धारणायां तैः समुदितमेकत्वेन स्वरूपं चिन्त्यते । परस्परसम्बन्धास्मरणपूर्वकमेकाङ्गस्मरणस्यानुचितत्वेनापराधरूपत्वात् । प्रकृते तु स्वरूपस्य रसात्मकत्वेन भावात्मकत्वादेकैकस्यैवाङ्गस्य स्वामिनीभावविषयत्वे तत्र परस्परं भेदापत्तिः स्यात्, सा च अनेन भावेनापास्यते । इदमेवोक्तमन्यथा **दृष्टिभेदः स्यादि**त्यनेन । दृष्टिकृतो भेदः स्वरूपे स्यादित्यर्थः । न च विषयत्वेन स्वरूपस्य भावाद् भेदो वाच्यः, एतन्नियमाभावात्, सर्वं ज्ञानं प्रमेयमित्यादौ व्यभिचारात् । ईश्वरज्ञानस्य सर्वविषयकत्वेन स्वविषयकत्वस्यापि सर्ववादिसम्मतत्वेन प्रकृते च स्वयंप्रकाशचिद्रूपत्वात् स्वरूपस्य न काप्यनुपपत्तिः । एतेषां भावानां व्यभिचारिभावत्वे तु न स्वरूपभेदकत्वं स्यात् । स्थायिभावत्वेन तद्भेदकत्वमावश्यकमिति तत्समाधानमावश्यकमिति भावः । **स्वकीयो वा भाग इ**ति । प्रभुरेताभ्यः प्रत्येकमाविर्भूय रसं ददातीति सर्वासां भागरूपो भवति । तथा च यदर्थमाविर्भूतं यद्रूपं तत् तस्याः भागरूपमिति तथा । एतेन पितृधने पुत्राणामिव प्रभुस्वरूपे स्वामिनीनामेव स्वत्वमिति ज्ञापितं भवति ॥ ८ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

अपरा तु अनिमिषन्तीभ्यां दृग्भ्यामापीतमपि सम्यग्दृष्टमपि पुनःपुनर्जुषाणा जुषमाणा सेवमानापि नातृप्यत् । तत्र दृष्टान्तमाह—सन्त इति । तस्य चरणाम्बुजं पुनःपुनः सेवामाना अपि सन्तस्तद्भक्ता यथा न तृप्यन्ति अलंप्रत्ययं न कुर्वन्ति तथेत्यर्थः ॥ ७ ॥ काचित्तु नेत्ररन्ध्रेण तं कृष्णं हृदि कृत्य निधायोपगुह्यालिङ्ग्य नेत्रे निमील्य च पुलकानि रोमाञ्चितानि अङ्गानि यस्याः सा आनन्दव्याप्ता आनन्देन सम्प्लुता व्याप्ता योगीवाऽऽस्ते स्मेत्यन्वयः ॥ ८ ॥

अन्वितार्थप्रकाशिका

अपरेति ॥ अपरा तु अनिमिषन्तीभ्यामनिमीलन्तीभ्यां दृग्भ्यामापीतमपि सम्यग्दृष्टमपि तन्मुखाम्बुजं पुनः पुनर्जुषाणा जुषमाणा । मुमभाव आर्षः । सेवमानापि तस्य **हरेः चरणं** सेवमानाः सन्तो यथा न तृप्यन्ति तथा नातृप्यत् । इयं राधासखी

ललितानाम्नी ।। ७ ।। तमिति ।। काचित्तु नेत्ररन्ध्रेण तं कृष्णं हृदि कृत्य हृदये निधाय । ल्यबार्षः । उपगुह्य आलिङ्ग्य नेत्रे निमील्य च पुलकानि रोमाञ्चितानि अङ्गानि यस्याः सा आनन्देन संप्लुता व्याप्ता योगीवास्ते स्म । इयं विशाखानाम्नी राधासखी अष्टमी भद्रानाम्नी अत्र नोक्ता । अत्र त्रिंशत्कोटयो गोप्यस्तासां षोडशसहस्राणि गोप्यो मुख्यास्तासां मध्येऽष्टौ मुख्यतमा तासामपि द्वे राधाचन्द्रावल्यौ अतिमुख्यतमे । तयोरपि श्रीराधा सर्वमुख्यतमेति सारार्थसन्दर्शिनी ।। ८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनिमिषन्तीभ्यां अनिमीलन्तीभ्यां दृग्भ्यां कृष्णमुखाम्बुजम् आपीतमपि दृष्टमपि मुहुर्मुहुःजुषमाणा सेवमाना नातृप्यत् ।।७।। तं श्रीकृष्णं हृदिकृत्य हृदयं प्रापयित्वा नेत्रे निमील्य रोमांचितासती उपगुह्य आलिंगनमनुकृत्य योगिवत् आनंद संप्लुता आस्ते ।।८।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एकेति ।। एका अपरा काचित्तन्वी तु, भृकुटिम् आबध्य भ्रुवं कुटिलीकृत्येत्यर्थः । प्रेमसंरम्भविह्वला प्रेमगर्भक्रोधेन विवशा, संदष्टो निर्दष्टः दशनच्छदोऽधरोष्ठो यया तथाभूता सती, कटाः कटाक्षास्तैर्य आक्षेपाः परिभावास्तैः, घ्नन्तीव ताडयन्तीव, ऐक्षत् । कटाक्षेणेत्यपि पाठः ।। ७ ।। अपरेति ।। अपरा अनिमषन्त्यौ च ते दृशौ च ताभ्यां, तन्मुखाम्बुजं श्रीकृष्णमुखपद्मं, आपीतं सम्यक् पीतमपि, जुषाणा पुनः पुनः सेवमाना सत्यपि, यथा सन्तो भक्ताः, तच्चरणं कृष्णस्य चरणं, पुनः पुनरनुभूयापि, नैव तृप्यन्ति तद्वत् न अतृप्यत् ।। ८ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अपरेति : १०.३२.७.

सामोदघर्मोदमरन्दपूर्णं प्रसन्नशोभं विलसत्परागम् । मुखाम्बुजं वीक्ष्य हरेर्मृगाक्ष्याः पपौ सुनेत्रालियुगं क्षमं तत् ।। ४१ ।।
विनाम्बुजातं नहि मीनवृत्तिरित्यनुस्मृतार्था किल कापि गोपिका ।
मुखाम्बुजाते कमलेडिते हरेर्निजाक्षि-मीनौ सहसाऽक्षिपन्मुदा ।। ४२ ।।
पदाम्बुजाते बहवोऽच्युतस्य लसन्ति यत्सत्पुरुषास्ततो मे । स्वीत्वादनर्हा विहृतिर्हि तत्रेत्यासीज्जुषाणाऽस्य मुखाम्बुजातम् ।। ४३ ।।

तं काचिदिति : १०.३२.८.

चेतस्तवायमविनीतचरित्रचर्यः पुत्रो यदेष युवतिष्वपि तीक्ष्णदण्डः ।
इत्थं मनः कथयितुं सुतचेष्टितं किं तद्वन्द्यमीशमनयल्लघु तत्समीपम् ।। ४४ ।।
यद्यत्यागमनेन ते वयममूः प्राप्तप्रमोदास्तथाप्यर्वाक् त्वत्कृतवञ्चनाविधिमलं दृष्ट्वा मनः शङ्कते ।
सत्यं निष्कपटोऽसि चेदरमितस्तत्तत्समाश्वासयेत्यक्षिद्वारिपरा मुदा यदुवरं हृन्मन्दिरे प्राहिणोत् ।। ४५ ।।
यस्याणुमात्रविरहेऽप्यतिदुःखभोक्त्री जाताऽस्यथाऽहमपि ते सहचारयोगात् ।
अस्त्येष कीदृगिह दर्शय मामितीव चक्रे तथा निजमनोऽत्यभिलाषपूर्त्यै ।। ४६ ।।
विरहदुःखमभोजि मया समागमसुखं त्वियमेव भुनक्त्यहो ।
इति न यातु कदापि मनोहृदीत्यरमधादमुनाऽस्य नु सङ्गतिम् ।। ४७ ।।
हंसनेत्रात्मनो ह्यस्य हंसमण्डलवर्तिनः । विहृतिर्मानसे युक्तेत्यन्या तत्र न्ययोजयत् ।। ४८ ।।
अस्या मदीयविरहोद्भवविक्लवत्वमासीत् सदेतदथवा बहिरेव दम्भः ।
इत्यैशसंशयमलं व्यपनेतुकामा काचिद्धृदन्तरगतं भगवन्तमाधात् ।। ४९ ।।
भूयो हित्वा मामयं नापगच्छेदेवं रोत्स्याम्येनमित्याशयेन । नेत्रद्वारान्तः प्रतिष्ठाप्य पक्ष्मद्वारं प्रापानन्नमेका प्रलाप्य ।। ५० ।।
सुमनोज्ञहृदारामे यदासीन्माधवोदयः । युक्तमेव हि तद्योगात्फुल्ला रोमलताङ्कुराः ।। ५१ ।।
हार्दासने निजानन्दप्रदमाधाय माधवम् । आनर्च सुमनो योगात् साऽऽसीद्योगिवदित्यलम् ।। ५२ ।।

कृष्णप्रिया

अब जो भक्ति मार्गीया निर्गुणा गोपीजी निर्निमेष नयनों से नाथ के मुख सरोज के मधुर रस का पान करने पर भी अघाती नहीं थी, मालुम हो रहा है कि कोइ सन्त पुरुष प्रभु के चरण कमलों का ध्यान करने से तृप्त नहीं हो रहे हैं ।। ७ ।। अब जो योग मार्गीया निर्गुण गोपीजी थी उसने नेत्र रन्धों से निजनाथ को निज हृदय में पधारकर आँखे मूंद कर पुलकित अङ्ग वाली हो प्रियतम कृष्ण का समालिङ्गन कर, योगी की तरह आनन्द रस निमग्न बन गई ।। ८ ।।

सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः । जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा [1]जनाः ॥ ९ ॥
ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः । व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥१०॥

कर्दमक्षमा

अन्वयः—यथा, जनाः, प्राज्ञम्, प्राप्य, संशयम्, जहति, तथा केशवालोकपरमोत्सवनिर्वृताः, ताः, सर्वाः, विरहजम्, तापम्, जहुः ॥ ९ ॥ तात ? विधूतशोकाभिः, ताभिः, वृतः, भगवान्, अच्युतः, यथा, शक्तिभिः, वृतः, पुरुषः, यथा, तथा, अधिकम्, व्यरोचते ॥ १० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्राज्ञमीश्वरं प्राप्य यथा मुमुक्षवो जनाः । यद्वा प्राज्ञं ब्रह्मज्ञं प्राप्य यथा संसारिणः । यद्वा प्राज्ञं सौषुप्तं प्राप्य यथा विश्वतैजसावस्था जीवाः ॥ ९ ॥ पुरुषः परमात्मा शक्तिभिः सत्त्वादिभिर्यथा । यद्वा उपासकः पुरुषो ज्ञानबलवीर्यादिभिः । यद्वा पुरुषोऽनुशायी प्रकृत्याद्युपाधिभिर्वृतो यथाऽधिकं विरोचते तद्वत् ॥ १० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ता यूथीभूताः । मुमुक्षूणामुपासनयेश्वरसाक्षात्कारेणैव संसारतापहानिः "मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ" इत्याद्युक्तेः । "ज्ञानादेव तु कैवल्यम्" इति श्रुतेर्ज्ञानस्यैव संसृतिनाशकत्वाद्वेदान्तिमतेन पूर्वोक्तार्थेऽस्वारस्यादर्थांतरमाह-यद्वेति । ब्रह्मज्ञम् ज्ञानिनम् । ज्ञान्यनवरतसंगेन तदुपदिष्टात्मतत्त्वसाक्षात्कारेणाज्ञाननिवृत्त्या परमानन्दस्वरूपावाप्तेः संसारतापहानिः स्फुटैवेति सर्वानुभूतार्थपरित्यागेनाननुभूतार्थकथनमन्याय्यमिव मत्वा पुनरर्थान्तरमाह—यद्वेति । सौसुप्तम् सुषुप्त्यवस्थासाक्षिणम् । विश्वतैजसावस्था जीवा जाग्रत्स्वप्नसाक्षिणः सुषुप्तौ जाग्रत्स्वप्नोभयकालिकदुःखानामननुभवात् "अन्धोऽनन्धो" दुःखयदुःखी' इत्यादिश्रुतेः । केवलसुखमेव तत्रानुभूयते सुखमहमस्वाप्समिति तदुत्थितस्मृतेः ॥ प्राज्ञम् परमभागवतम् । जनाः संसारतप्ताः । "गृहेषु तप्ता निर्विण्णा यथाच्युतजना—" इति प्रावृड्वर्णनोक्तेः । संदर्भस्तु-प्राज्ञं सुषुप्तिसाक्षिणमिव सुषुप्तावविद्यावत् पुनः परित्यागशंकाया निगूढस्थितेरित्याह ॥ ९ ॥ ताभिः पूर्वमुद्दिष्टाभिः भगवद्दर्शनात्त्यक्तक्लेशाभिः । अच्युतोऽस्पृष्टशोकः । 'पूर्वमेवाहमिहासम्" इति, "तत्पुरुषस्य पुरुषत्वम्" इति श्रुतेः । पुरुषः परमात्मा । सत्त्वादयो यद्यपि मायाकार्यत्वान्मायाशक्तयस्तथापि मायायाः 'मम माया दुरत्यया' इत्याद्युक्तेस्सापि तच्छक्तिरतस्तस्या याश्शक्तयस्ता अपि तस्यैव स्त्र्युपकरणानां स्त्रीस्वामिवत् । एतदर्थस्य विज्ञेयत्वेन दुर्बोधत्वादर्थान्तरमाह । "ज्ञेयो लोके स पुरुषो भजते यो हरिं सदा । तदन्यः खुरशृंगादिवर्जितो द्विपदः पशुः ॥" इत्युक्तेः । पुरुष उपासकः भगवद्भक्तः । भक्तेर्ज्ञानाद्युत्पादकत्वं प्रथितमेव । यद्वा-हरेर्भक्ताधीनत्वेन स्वातंत्र्याभावाद्भक्ताधिक्यमत्रोक्तम् । "प्रसिद्धमेतल्लोकेऽस्मिन्स्वामिनः सेवकोऽजिकः । सेतुं कृत्वाऽतरद्रामो वायुजोऽब्धिं तु कूर्दनात् ॥" इत्यभियुक्तोक्तेः । ननु पुरुषपदं जीवपरम् 'क्षेत्रज्ञ आत्मा पुरुषः' इत्युक्तेस्तत्कथमन्यपरतया व्याख्यातमितिचेत्, 'तुष्यतु दुर्जनः' इति न्यायेनाह-यद्वा पुरुषोऽनुशायीति । "अनुशायी जीवः भगवन्निद्रामनुशेते प्रलयावस्थायाम्" इति निरुक्तेः । "अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु" इत्युक्तेः । प्रकृत्यादीत्यत्रादिना महदहंकारादिग्रहः । "यथा प्रकृतिभिर्गुप्तः पुमान्राजा च सप्तभिः" इत्याद्युक्तेः ॥ शक्तिभिः सर्वेन्द्रियशक्तिभिः पुरुषो यथाधिकं विरोचते, तासां वैकल्ये सति तु नात्यन्तं रोचते, एवमेव कृष्णोऽप्यासां खिन्नत्वे खिन्नो नाधिकं रोचते, आसां विधूतशोकत्वेनाधिकरुचिसत्त्वे सोऽप्यधिकं रोचते । पुरुषस्य यथा स्वेन्द्रियसुख एव सुखं स्वेन्द्रियदुःखे दुःखमेवमेवं कृष्णस्यापि तासां सुखदुःखे इति गोपीविषयकप्रेमवत्त्वं तासां स्वस्वरूपभूतत्वं ज्ञापितम् । स्कांदे प्रभासकांडे यथा-"षोडशैव सहस्राणि गोप्यस्तत्र समागताः । हंस एव मतः कृष्णः परमात्मा जनार्दनः ॥ तस्यैताः शक्तयो देवि षोडशैव प्रकीर्तिताः । चन्द्ररूपी मतः कृष्णः कलारूपास्तु ताः स्मृताः ॥ संपूर्णमंडला तासां मालिनी षोडशी कला । षोडशैव कला यास्तु गोपीरूपा वराननाः ॥ एकैकशस्ताः संभिन्नाः सहस्रेण पृथक्पृथक् ।" इति । 'प्रमदाशतकोटिभिराकुलितः' इत्यागमोक्तेस्त्रिशतकोट्यो गोप्यस्तासां मध्ये द्वे राधाचन्द्रावल्यौ मुख्यतमे, तयोरपि मध्ये श्रीराधा सर्वमुख्यतमेति भक्तिशास्त्रनिर्णयः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वन्यासां का वार्त्ता तत्राह । सर्वा इति । तासां तत्सौभगमिदं वीक्ष्य मानञ्च केशव इत्यत्रेवात्र च केशवशब्दः परमतेजोनिधानतापरः । ततश्च तदानीं यथा तस्यान्तर्द्धाने तासां तेजोऽन्तर्द्धापनं तथा सम्प्रति आविर्भावेन तदाविर्भावः सञ्जात इति भावः । तस्यालोक एव परमानन्दप्रदत्वात् परमोत्सवस्तेन निर्वृताः प्राप्तदुःखनिवर्त्तकसुखाः । तत्रानुरूपो दृष्टान्तः । प्राज्ञमिति ।

---

[1] जनः-विज. ।

सुषुप्तावविद्यया इव पुनः परित्यागशङ्कया निगूढस्थितेः । यद्वा । प्राज्ञः परमभागवतस्तं प्राप्य जना यथेति एवमप्यारम्भ एव दृष्टान्तेन सम्यक्सिद्धौ पूर्वस्मादेव हेतोः ॥ ९ ॥ ततो मदमानौ परित्यज्य सर्वा मिलित्वैव तदनुगता बभूवुस्ताभिः श्रीभगवतोऽपि परमशोभाविर्भावो जात इत्याह । ताभिरिति त्रिकेण । विधूतेत्यत्र कारणविशेषश्चोक्तः श्रीपराशरेण । "तत काश्चित् प्रियालापैः काश्चिद्भ्रूभङ्गवीक्षितैः । निन्येऽनुनयमन्याश्च करस्पर्शेन माधव" इति । भगवान् सर्वसम्पूर्णोऽपि अच्युतः तत्र कथञ्चित्च्युतिरहितोऽपि अधिकं पूर्वपूर्वतः प्रकृष्टं यथा स्यात्तथा ताभिर्विशेषेणारोचत तादृशस्यापि ताभिस्तादृशत्वे तदाविर्भावविशेषे एव दृष्टान्त इत्याह । पुरुष ईश्वरः । स यथा भगवद्रूपेण शक्तिभिः ऐश्वर्यादिमयस्वरूपशक्तिभिर्वृत एवाधिकं विरोचते नतु ब्रह्मरूपेण ताभिरावृत इति तथा सोऽपि ताभिः प्रेमविशेषमयस्वरूपशक्तिभिर्वृत एवाधिकं व्यरोचतेत्यर्थः तातेति । सम्बोधनं परमानुकम्पायाम् । "तातोऽनुकम्प्ये पितरीति" नानार्थात् परमानुकम्प्यत्वादेव रहस्यमिदं त्वयि प्रकाशयामीति भावः ॥ १० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न च केवलं ता एव निस्तापा हृष्टाश्च बभूवुः किन्त्वन्या सर्वाः अपीत्याह । सर्वा इति । केशाः सुन्दरा वर्त्तन्तेऽस्येति केशवः अस्त्यर्थे वः तस्य तदीयैककेशस्यापीत्यर्थः । आलोकः ईषद्दर्शनं तदेव परम उत्सवः सर्वार्थसमुच्चयः चित्तोल्लासो वा तेन निवृताः सता इति विरहतापाधिक्यं निर्वृत्यनन्तरमेव तत्त्यागसिद्धेः । यद्वा, आलोकस्तेन सम्यक्निरीक्षणं परमोत्सवश्च प्रेमनर्म्मादिः ताभ्यां निर्वृताः तत्रानुरूपो दृष्टान्तः—प्रकर्षण आ—सम्यक् जानातीति प्राज्ञः श्रीकृष्णस्तद्भक्त्यादिमाहात्म्य–तत्त्वाभिज्ञो महाभागवतोत्तमः, तं कुत्रापि गतं पुनः प्राप्य प्रकर्षेण लब्ध्वा प्रीत्या बहुधा संगम्य तद्विरहजं तापम् । अकार-प्रश्लेषेण अजनाः, अस्य विष्णोर्जना वैष्णवा यथा जहति तद्वदिति, अस्य च सुप्रसिद्धत्वेन तथा—'रामरावणयोर्युद्धम्' इत्यादि न्यायेन तदेकयोग्यत्वेन च दृष्टान्तत्वम् ॥ ९ ॥ ततः श्रीभगवतोऽपि परमनिर्वृत्या भगवत्तासाराविर्भावेणाधिकशोभा जातेत्याह—ताभिरिति । विधूतो नाशितः शोको विरहजोऽन्तस्तापो याभिस्ताभिः, तद्विशेषश्चोक्तः श्रीपराशरेण–'ततः काश्चित् प्रियालापैः काश्चिद्भ्रूभंगीविक्षितैः । निन्येऽनुनयमन्याश्च करस्पर्शेन माधवः ॥' इति, अतस्ताभिर्वृतः सन् भगवान् सर्वैश्वर्य्यसम्पूर्णोऽपि, अच्युतः कथञ्चित् कदाचित् कस्माच्चिदपि शोभाभयाच्च्युतिरहितोऽपि अधिकं यथा स्यात्तथा विशेषेणारोचत अशोभत । भगवानिति अधिक हेतुर्वा, विरोचने तेनैवाशेषनिजभगवत्ता–सर्वस्वप्रकटनादित्यर्थः । अत एवाशेषशोभायाः परां काष्ठां प्राप्तस्यापि ताभिर्वृतत्वेनाधिकविरोचनं दृष्टान्तेन साधयति—पुरुष इति, जीवो ब्रह्मत्वेन स्वतः सर्वशक्तियुक्तोऽपीन्द्रियादिशभिः प्रकटिताभिः सतीभिरेव यथाधिकं विरोचते, अन्यथा मूर्च्छितादितुल्यताप्राप्तिः, एवं माधुर्य्यकारुण्यादिगुणप्रकटनेन निजवल्लभावलिवृतत्वेनैवाधिका तस्यापि शोभा स्यात्, अन्यथा भक्तवृन्दसेव्यमानत्वेनाप्यशेषशोभामयभगवत्तासारापूर्तिप्रसक्तिरिति दिक् । अत एवाश्चर्येण तद्बोधयोग्यत्वेन वा तातेति सम्बोधनं यद्वा तत्स्मरणात् प्रेमवैवश्येनैव पूर्ववत् ॥ १० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

प्राज्ञं परमात्मानं जना योगिजनाः प्राप्यसाक्षात्कृत्य ॥ ९ ॥ पुरुषः शक्तिभिः चतुर्विंशतितत्त्वात्मिकाभिः यद्वा पुरुषः परमपुरुषः शक्तिभिः विमलादिभिः ॥ १०—१२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ताः सर्वा गोप्यः केशवस्यावलोकनमेव परम उत्सवस्तेन सुखिताविरहजं तद्विश्लेषजं तापं जहुः तत्यजुः यथा योगिजनाः प्राज्ञं परमात्मानं प्राप्य साक्षात्कृत्य आध्यात्मिकादितापत्रयं जहति तद्वत् यद्वा "प्राज्ञेनात्मना सम्परिष्वक्तो न वाह्यं किञ्चन वेद-नान्तरं प्राज्ञेनात्मनान्वारूढ" इत्युक्तरीत्या यथा सुषुप्तिदशायां परमात्मना सम्परिष्वक्ता जाग्रत्कालिकवाह्याभ्यान्तरक्लेशान् जहीत तद्वदित्यर्थः ॥९॥ तत्र तदा ताभिर्विगतविरहजशोकाभिः परिवृतः नितरां व्यरोचत । हे तात ! यथा पुरुषो जीवः शक्तिभिश्चतुर्विंशतितत्त्वात्मिकाभिः वृतो रोचते यद्वा पुरुषः परमपुरुषः शक्तिभिर्विमलादिभिर्वृतस्तद्वत् ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

जनः शोकाकुलः संसारी वा प्राज्ञं पण्डितं दुःखशमनबोधकं परमात्मानं वा "प्राज्ञेनात्मनान्वारूढ" इतिश्रुति ॥ ९ ॥ पुरुषो विष्णुः शक्तिभिः लक्ष्मीविभूतिभिः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्राज्ञं सुषुप्तिसाक्षिणमिव सुषुप्तौ अविद्यावत् पुनः परित्यागशङ्कया निगूढस्थितेः ॥ ९ ॥ पुरुषो भगवत्तत्वं स यथा भगवद्रूपेण शक्तिभिः ऐश्वर्यादिमयस्वरूपशक्तिभिर्वृत एवाधिकं व्यरोचत इत्यर्थः ॥ १०–१२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

एवं स्वस्वप्रकृत्यनुसारेण विविधभावभावुकसुभगम्भावुकाः सर्वा एव तमालोक्य विरहसन्तापं जहुरित्याह-सर्वा इत्यादि । यथा जनाः प्राज्ञः भगवद्भक्तं प्राप्य भगवद्विरहतापं जहति, तथेत्यर्थः ॥ ९ ॥ अथ भगवानपि तथैतेन पूर्वं तथा न

व्यरोचतेत्याह ताभिर्विधूतेत्यादि । ताभिर्व्यरोचतेति वाक्यार्थः । अधिकं यथा भवति तथा, एतेन पूर्वं तथा व्यरोचत एकाकित्वात् । तत्र दृष्टान्तः । पुरुषः शक्तिभिर्यथा सुप्तशक्तिः रुष ईश्वरस्तथा न विरोचते, यथोद्रिक्ताभिः शक्तिभिः । एतेन शक्तीनां सुप्तत्वमुद्रिक्तत्वञ्चेति, न तु कदापि नाशः नित्यत्वात् । तातेति सविस्मय हर्षोत्कर्षे सम्बोधनम् ।। १० ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

व्यरोचताधिकमित्यादि । एकाकी सन् न व्यरोचत, तदानीन्तु अधिकं व्यरोचत इत्यर्थः । तातेति हर्षोत्कर्षेण श्रीशुकदेवस्य तत्तत्स्मरण-सूचकं सम्बोधन-करणम् । यथा यथा वत् स्वरूपेणैव । स कीदृशः ? पुरुषः परमपुरुषः पुरुषोत्तमः एकदेशेनापि संज्ञावगतेः शक्तिभिः स्वशक्तिभूताभिरताभिः ।। १०-१३ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पाज्ञं परमभागवतं जनाः संसारतप्ताः । गृहेषु तप्ता निर्विण्णा यथाच्युतजनागम इति प्रावृड्वर्णनोक्तेः ।। ९ ।। शक्तिभिः सर्वेन्द्रियशक्तिभिः । पुरुषो यथाऽधिकं विरोचते । तासां वैकल्ये सति तु नात्यन्तं रोचते एवमेव कृष्णोऽप्यासां खिन्नत्वे खिन्नो नाधिकं रोचते । आसां विधूतशोकत्वेनाधिकरुचिमत्त्वे सोऽप्यधिकं रोचते इति । पुरुषस्य यथा स्वेर्निन्द्रियसुख एव सुखं स्वेन्द्रियदुःखे दुःखम् एवमेव कृष्णस्यापि तासां सुखदुःखाभ्यामेव सुखदुःखे इति गोपीविषयकप्रेमवत्त्वं तासां स्वस्वरूपभूतत्वञ्च ज्ञापितम् स्कान्दे प्रभासखण्डे यथा । "षोडशैव सहस्राणि गोप्यस्तत्र समागताः । हंस एव मतः कृष्णः परमात्मा जनार्दनः । तस्यैताः शक्तयो देवि ! शोडशैव प्रकीर्त्तिताः । चन्द्ररूपी मतः कृष्णः कलरूपास्तु ताः स्मृताः । सम्पूर्णमण्डला तासां मालिनी षोडशी कला । षोडशैव कलायास्तु गोपीरूपा वराननाः । एकैकशस्ताः सम्भिन्नाः सहस्रेण पृथक् पृथगिति" । प्रमदा शतकोटीभिरकुलिते इत्यागमोक्तेस्त्रिंशत्कोट्यो गोप्यस्तासां मध्ये षोडशसहस्राणि गोप्यो मुख्यास्तासामपि मध्ये सहस्राणि मुख्यतरास्तासामेव मध्ये अष्टावेता मुख्यतमाः अष्टानामपि मध्ये द्वे राधाचन्द्रावल्यौ अतिमुख्यतमे तयोरपि मध्ये श्रीराधा सर्व मुख्यतमेति भक्तिशास्त्रनिर्णयः । ततश्च ताः सम्यक् हास्यहस्तग्रहादिना आदाय निर्विश्य पुलिनं प्रविश्य च व्यरोचतेति पूर्वेणैवान्वयः । पुलिनं विशिनष्टि सार्धेन । विकसद्भिः कुन्दैर्मन्दारैः सुरभिर्योऽनिलस्तस्मात् षट्पदा यस्मिंस्तत् । वायोः शैत्यं पुलिनसम्बन्धात् मान्द्यं षट्पदास्पदत्वात् शरच्चन्द्रांशूनां सन्दोहैर्ध्वस्तं दोषाया रात्रेस्तमो यत्र तत् । शिवमत एव सुखदं यमुनाया हस्तरूपैस्तरलैस्तरङ्गै राचिता आस्तृता कोमला वालुका यस्मिंस्तत् ।। १०-१२ ।।

रसिकाह्लादिनी-टीका

एवं निर्वृत्ततापानां तासां सम्बन्धेन श्रीकृष्णस्यापि कान्त्यतिशयो जात इत्याह ताभिरिति याभिर्मदमानौ त्यक्तौ ताभिरिति । इदानीं श्रीकृष्णाविर्भावेन विधूतशोकाभिः निरस्ताकृतार्थत्वप्रतीतिरिति । अकृतार्थत्वमन्यत्वमेव शोकस्तस्य निवृत्तत्वात् परमोज्वलत्वं जातमत एव रमणयोग्याभिस्ताभिर्वृतो वेष्टितः, यद्वा याभिः कात्यायन्यर्चनेन पतित्वपुरः सरं रमणं याचितं व्रतप्रार्थितः सन् वरं प्रादात् "मयेमा रंस्यथ क्षपा" इति प्रतिश्रुतं ताभिः कृत्वा अधिकं नित्य-सिद्धाभ्योप्यधिको व्यरोचत । भगवानपि ऐश्वर्यविशिष्टोऽपि तदनन्यतास्वेव उरीकृत्वात् । ताभिर्वृत ऐश्वर्यादधिकं व्यरोचत, यतोऽच्युतः तास्वनुरागच्युति रहितः, यद्वा विप्रलम्भात् पूर्वं यथा "बाहुप्रसारे"त्यादि "रेमे तत्तरलानन्द" इत्यादिनोक्तं रमणं ततोऽप्यधिकं व्यरोचत । विप्रलंभेन स्थायिभावस्य पुष्टत्वात् शोभाभरः सूचितः । तत्र दृष्टान्तमाह पुरुषः पमेश्वरः ईश्वरः द्योतिकाभिः मायाद्यादिभिः शक्तिभिस्तनुकूलाभिः सर्वोपकारकत्वं न प्रकाशते तद्वत्, यद्वा प्राकृतः पुरुषो जीवः क्रियाज्ञानादिशक्तिभिर्वृतः शोभते । स्वर्गादि मोक्षान्तपुरुषार्थप्राप्तियोग्यो भवति । तदभावे न किंचित् तद्वत् भगवान् सर्वकामपूर्णोऽपि व्रजसुन्दरीसङ्गमन्तरेण तिरोधाने मधुररसपराकाष्ठां न लब्धवान् । तद्रसदर्शनाधिकृतोपि जनो निर्वृत्ति नाम इदानीं ताभिर्वृतं दृष्ट्वा निर्वृतो भवत् । तातेति सम्बोधनं स्वानुभवो मया कथ्यते तत्रावधानं कुर्विति । यतः एकाकिनैव रसः न प्राप्यतेऽतो रसवृद्ध्यर्थं ताभिः सङ्गतः शुशुभे स्वदृष्ट्यभिप्रायेण श्रीशुकः स स्वानुभवं कथयति ।। १० ।।

विशुद्धरसदीपिका

याश्च तत्प्रियार्थं संभवन्तु सुरस्त्रिय इत्यनेन सूचितावतरणाः स्वीकृतनिजस्वामिनीपरिचरणाः स्वसदृशरूपवेषाभरणास्तासां सर्वासामेव चेष्टितमाह । सर्वा इति । ता इत्युक्तस्वरूपाः केशवस्य केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतमित्यादिना सूचितकेशप्रसाधनकर्त्तुः तथा केशवांङ्घ्रिस्पर्शोत्सवेत्यादिनानुभूततद्रहोविहारस्येत्यन्तरङ्गत्वम् आलोको दर्शनमेव परमोत्सवो यस्तेन निर्वृताः परमांशिन्यः निजेश्वर्य्यास्तस्याः सौभाग्यसुखास्वादादितिभावः । विरहजं तापं जहुः नैतासां कदाचिद्विरह इतिभावः । तत्रानुरूपो दृष्टान्तः । प्राज्ञमिति । सुषुप्त्यभिमानिनं तदवस्थमित्यर्थः । तत्राविद्याया इवात्र विरहस्फूर्त्तेरभाव इति सूचितं, यद्वाप्राज्ञः परमभागवतः समयज्ञ इतियावत् तं प्राप्य जनाः परमानन्या भागवतास्तत्सुखिनो भवन्ति यथेत्यर्थः । एतासां नामानि प्रह्लादसंहितानुसारेण प्राचीनैरुक्तानि श्रीमुनीन्द्रैश्चातिरहस्यत्वाद्भाववैवश्याच्च नोक्तानि तानिच मूलविरोधात् कल्पनागौरवादस्मा-

भिरुपेक्षितानि इति ज्ञेयं नह्यत्र संख्या विवक्षिता तत्तत्स्वभावप्रदर्शनाय तत्तच्चेष्टितवर्णनसंरम्भादिति सूक्ष्मदृशावधेयम् ॥ ९ ॥ ततश्च मद्भावप्रशमेन सर्वासामेकीभावात्संमिलितानां संनिध्यात् भगवतोऽपि सुखमधिकं जातमित्याह । ताभिरिति । पूर्वोक्ततत्तद्भावाभिः विशेषेण धूतः त्याजितः शोको यासां ताभिः तत्त्याजनप्रकारो विष्णुपुराणे ॥

ततः काश्चित्प्रियालापैः काश्चिद्भूभङ्गवीक्षितैः । निन्येऽनुनयमन्याश्च करस्पर्शेन माधव इति ॥

भगवानिति श्रीकिशोरीरमण इत्यर्थः । एवं च श्रीराधायुगलितो मुख्यप्रकाशस्तासां मध्यग इतिसूचितं तत एवाच्युतः तस्यामेवात्यासक्तत्वेनान्यत्रानासक्तः ताभिश्च तथैव वृतः स्वस्वामित्वेनाङ्गीकृतः इति सख्यमेव तद्युगलमनु स्पष्टीकृतम अधिकं व्यरोचत तत्र दृष्टान्तः पुरुषो जीवतत्त्वं शक्तिभिरिन्द्रियैः ततश्चैता अपि तयोरिन्द्रियस्थानीयास्तन्मिथुनं चासामात्मपरमात्मस्थानीयमित्यर्थः । यद्वा पुरुष ईश्वरतत्त्वं स यथैश्वर्य्यादिभिः स्वरूपशक्त्या चेति तातेति सानुकम्पं सम्बोधनम् अत्रैव मनोदेयमिति भावः ॥ १० ॥

श्रीरामनारायणकृता भावभावविभाविका

एवं कासाञ्चिच्चरितं पृथक् पृथगुक्त्वा सर्वासां तथा वक्तुमशक्त्या समुदायेनाह । सर्वास्ता इति । ताः सर्वा अपि केशवालोकेन यः परमोत्सवस्तेन निर्वृता विरहजं तापं जहुरित्यन्वयः । तत्रासंख्यातगोपिकानां युगपद्दर्शनासम्भावनानिरासायाह । केशवेति को ब्रह्मा ईशो रुद्रस्तयोरपि तदङ्गसम्भूतत्वेन विभु सर्वाङ्गत्वान्न तदसम्भाव इति भावः । यद्वा कीदृग्रूपेणाविर्भाव इति जिज्ञासायां केशवेति केशा अपि सुन्दराः सन्त्यस्येति तथा ततश्च यस्य केशमात्रं सर्वसौन्दर्य्यनिधिः किमु वाच्यं मुखादीनां यद्वा कथं तद्दर्शनेनानन्दस्तत्राह केशवेति । कं सुखं तस्येशः दातुं समर्थः स्वार्थे प्रत्ययः केशवस्यालोकः कृपादृष्टिस्तद्विषयकं दर्शनं वा तस्यैवासमन्तात्सर्वासां समीपे बहिरन्तश्चाविर्भावो वा तेन यः परमोत्सव उत्कृष्टो हर्षो नित्यनिरतिशयानन्दाविष्कारो वा तेन परा मा विरहवैक्लव्येनाङ्गश्रीमान्द्येऽपि तद्दर्शनमात्रोद्भवा योत्कृष्टाङ्गशोभा उत्सवश्च ताभ्यां वा निर्वृता मग्नचित्ता विरहजं तापं जहुः तथा च परमानन्दावाप्तिर्दुःखनिवृत्तिश्च दर्शिता तत्र दृष्टान्तः । प्राज्ञमिति । यथा जनाः जन्या अन्तः करणादयो जाग्रत्स्वप्नयोस्तद्व्यापृतिश्रमिताः प्राज्ञं सुपुप्तौ कारणावस्थं प्राप्य गतश्रमाः सुखिनश्च भवन्ति यद्वा जनाः संसारतापत्रयमुमुक्षवः प्राज्ञं प्रकृष्टा ज्ञा ब्रह्मापरोक्षमतिर्विद्यते यस्य सा भवति वा यस्मात्स प्रज्ञ एव प्राज्ञस्तं प्राप्य विगतभवतापाः आविर्भूतस्वरूपात्मकनित्यानन्दाश्च भवन्ति यथा वा जना जीवाः परमात्मस्वरूपाज्ञानजनानादुःखकर्षिता महावाक्यप्रज्ञैकगम्यं प्राज्ञं ब्रह्म प्राप्य साक्षात्कृत्य गतदुःखाः सुखिनश्च भवन्ति तथा, यद्वा ताः सर्वा अपि जनाः भगवतो जनिः प्रादुर्भावो यासां तास्तं प्राज्ञं रसाभिज्ञं रसिकशिरोमणिं प्राप्य कं सुखं तद्दातुमीशः समर्थो यस्तदालोकस्तेन परमोत्सवनिर्वृता यथेति यथावद्विरहजं तापं जहुरिति यथा तदालोकपरमोत्सवनिर्वृतास्तथा विरहजं तापमपि जहुरिति वान्वयः ॥ ९ ॥ सत्समागमे भगवच्छोभामाह । ताभिरिति । तत्र तातेति प्रियसम्बोधनेन रहस्योपदेशयोग्यतासूचनम् अच्युत इत्यनेन यथा दिनतापहरणे सर्वजनाह्लादनेऽपि सुधानिवेश्चन्द्रस्य न सुधाच्युतिः यथा वाज्ञजनेभ्यो बोधदानेन त्रिविधभवतापनिवृत्तिपूर्वकपरमसुखदानेऽपि भगवत्स्वरूपविदुषां न विद्यासुखच्युतिः यथा वा सर्वविश्वसत्तास्फूर्तिप्रदानेऽपि ब्रह्मणो न सच्चिद्रूपत्वच्युतिः तथा भगवान् कृष्णो दुःखकर्षणनित्यानन्दस्वरूपः तद्दुखकर्षणे परमानन्ददानेऽप्यच्युत एवेति ज्ञापितं स्वरूपादच्युतः परप्रेमास्पदोऽपि जीवः स्वप्रेमास्पदतां पुत्रवित्तादावध्यस्य तदन्वेषणपरो दुःखी भवति तथात्वशङ्कानिरासायाह । भगवानिति । तस्य स्वरूपाज्ञानेन लुप्तभगस्य तथात्वेऽप्ययं भगवान् अलुप्तभग इति भावः । ताभिः स्वस्वरूपात्मिकाभिः अतिविलक्षणप्रेमोत्साहवतीभिर्वा वृतः सन्नधिकं व्यरोचत नच पूर्णस्यान्यसम्पर्के आधिक्यासम्भवः स्वरूपतश्चिदानन्दस्यापि जीवस्य विरतिज्ञप्तिरत्यादिभिरधिकं भगवत्स्वरूपानन्दाविर्भावात्पूर्णपुण्याया अपि गङ्गाया नद्यन्तरसङ्गमे पुण्यददशगुण्यमिव अव्यक्तपूर्णानन्दब्रह्मणः श्रुतिसङ्गतौ व्यक्तानन्दत्ववत् व्यक्तस्वरूपानन्दस्यापि प्रेमवृत्तिप्रतिफलने बहुगुण्यवदाधिक्यस्फूर्तिसम्भवात् । यद्वा अधि सर्वतः कं सुखं सर्वासां गोपीनां तत्स्मरतां सर्वजनानां वा परमानन्दो यथा स्यात्तथा व्यरोचत विशेषेण स्वरूपरुचिमाविश्चकार । ननु विरहशोकभिन्नहृत् खेदखिन्नाभिः प्रियान्वेषणादिश्रमाखिन्नाभिः शोकाश्रुक्लिन्नाभिः छन्नत्वे का वा शोभा तत्राह । विधूतशोकाभिरिति । भगवद्दर्शनमात्रेण धूतस्तदानुकूल्यदर्शनेन विधूतः शोको यासां "तरतिशोकमात्मविदितिश्रुतेः सर्वात्मकृष्णसाक्षात्कारे एव शोकापनोदसम्भवात्, यद्वा भगवता "अनीशया शोचति मुह्यमान" इति श्रुतेः शोकग्रस्तानां" ममैवांशो जीवलोक जीवभूतः सनातन" इति स्मृत्या स्वांशभूतानां जीवानां शोकापनोदपरमानन्दप्रदानाय लीलानन्दप्राकट्येऽपि प्रेमाभावे तद्यथावदसम्पत्तौ ताभिः प्रेमपथाविष्कारेण धृतः सर्वलोकशोको याभिः यद्वा कृपालूनां परदुःखदुःखित्वस्वभावत्वेन भगवतः परमकृपालुतया सम्भावितो यो गोपीनां शोकेन प्रजानामनुद्धारेण वा शोकः सस्वविधूतशोकत्वेन प्रेमपथप्रवर्त्तनेन वा विधूतो याभिस्ताभिरधिकं व्यरोचत तत्रोपमान्वेषणे तु न तारावृतचन्द्रस्योपमानत्वम् । कोटिपूर्णचन्द्रताराणां कृष्णगोपीच्छविसाम्यासम्भवात् प्रियतमकृष्णादर्शने दुःखप्रदत्वदर्शनाच्च नवा रतिप्रभृतिवृतः कामो मूर्तिमच्छृङ्गाररसो वोपमानं क्षुद्रत्वात् भवानुबन्धित्वाद्योगिनामनाह्लादकत्वेन रुच्यविषयत्वाच्च न वा योगर्द्धिभिर्योगानन्दोऽप्युपमानं तन्न्यूनत्वाद्भोगिनामरोचकत्वाच्च नवानन्तशक्तियुतः परमेश्वरोऽप्युपमानं सर्वानुगतत्वेऽपि तच्छोकापनोदानन्दयोरकरणात्तस्माद्रामरावणयोर्युद्धं रामरावणयोरिवेति न्यायमाश्रित्याह । पुरुष इति । पुरुषः

कृष्णस्तदितरेषां पुरुषतासम्मतत्वात्सत्त्वाह्लादिनीशक्तिभिः गोपीभिरेव यथेति यद्वोपमाया असम्भवान्नात्रोपमानोपमेयभावः किन्तु पुरुषस्ताभिः स्वशक्तिभिर्यथेति यथावद्व्यरोचत तत्र तस्यैव पुरुषत्वाद्वा पूर्षु बहुगोपीयूथेषु राजमानतया वा पुरुषप्रयोगः ॥१०॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथान्यासां वृत्तमाह । सर्वास्ताः गोप्यः केशवस्य ब्रह्माद्यनुकम्पकस्य तेजोनिधेरवलोकनाद्यः परमोत्सवस्तेन निर्वृता आनन्दिताः विरहजन्यं तापं जहुः, यथा प्राज्ञं परमेश्वरं प्राप्य तदीया जनाः, यद्वा प्राज्ञं ब्रह्मज्ञं प्राप्य मोक्षविरहजं तापं मुमुक्षवस्त्यजन्ति । यद्वा प्राज्ञं सौषुप्तं पुरुषं प्राप्य विश्वतैजसावस्था जीवाः ॥ ९ ॥ एवम्भूताभिस्ताभिर्भगवानपि विशेषेण शुशुभ इत्याह । ताभिरिति । भगवान् षाड्गुण्यैश्वर्य्यसम्पन्नोऽपि अच्युतः स्वस्वरूपादानन्दघनादच्युतोऽपि विधूतशोकाभिस्ताभिरधिकं तत्रापि विशेषेण अरोचत पुरुषः स्वयमेव परमात्मा सत्त्वादिभिः शक्तिभिर्यथा । यद्वा उपासकः ज्ञानवलवीर्य्यादिभिर्यथा अथवा पुरुषः सङ्घाताभिमानी सर्वेन्द्रियशक्तिभिर्यथा तथा तस्य स्वरूपानतिरिक्ताभिः स्वशक्तिरूपाभिर्गोपाङ्गनाभिर्भगवतः क्रीडानुकरणं संवृत्तमिति भावः । पुत्रतदनुकम्प्यत्वात्तवाग्रे मयेदं रहस्यं प्रकाशितमिति तातेति सम्बोधनाशयः "प्रमदाशतकोटिभिराकुलित" इत्यागमोक्तसंख्याता गोप्यः तासां मध्ये—

षोडशैव सहस्राणि गोप्यस्तत्र समागताः । चन्द्ररूपी मतः कृष्णः कलारूपास्तु ता मताः ॥
एकैकशस्ताः सम्भिन्नाः सहस्रेण पृथक् पृथक् ।

इतिस्कान्दोक्ताः षोडशसहस्राणि मुख्यास्तासामपि मध्ये सहस्रसंख्याकाः मुख्यास्तत्राप्युक्ता अष्टौ मुख्यतरास्तत्रापि श्रीराधाचन्द्रावल्यौ मुख्ये तत्रापि श्रीराधापरममुख्यतमेति विवेकः । तासामित्यत आरभ्य निवृत्तिपक्षे तासां श्रुतीनां सम्बन्धा शौरिः संसारविजयं कर्तुं प्रवृत्तोऽधिकारिदेहस्तत्रस्थितं वसुदेवशब्दाभिधेयमन्तः करणं तत्रैवोपलब्धुं योग्यत्वाद्वासुदेव औपनिषदः परमात्मा तत्रैव सर्वसाधनसम्पन्नाधिकार्य्यन्तः करणलक्षणे वन एवाविरभूत् अहं ब्रह्मास्मीति साक्षात्प्रकटितः आत्मन्येवात्मानं पश्येदित्यादिश्रुतेः तत्रापि यः सगुणः स्मयमानमुखाम्बुजत्वादिरूपेणानिशं ध्यातः स एव साक्षान्मन्मथश्चासौ मन्मथश्च सर्ववृत्तिसाक्षिरूपः प्रतिबोधविदितं मतमितिश्रुतेः १ तं तथाभूतं भगवन्तमधिकारिचेतसि आविर्भूतमबलोक्यावलाः साक्षात्तत्प्रकाशनबलरहिताः श्रुतयः स्वानुकूलाधिकारिणि प्रीत्योत्फुल्लाः विकाशं प्राप्ताः दृक् ज्ञानं यासामधिकारिणा प्रकाशिततत्त्वार्थज्ञानाः सर्वाः काण्डत्रयात्मिकाः युगपदुत्तस्थुः यथाभूतस्वार्थाभिमुखा जाता इत्यर्थः । ३ काचिदित्यादौ जातावेकवचनं काश्चिद्भगवदवयवभूततत्तद्देवयजनप्रतिपादिका इति कर्मकाण्डश्रुतीनां तात्पर्यं सूचितवान् । ४ काश्चित्तदुपभुक्तं नैवेद्यादिग्रहणपरास्तदङ्घ्रिध्यान ॥ तिपादिकाश्चेत्युपासना काण्डश्रुतीनां तात्पय ध्वनितवान् । काश्चिन्मुख्याः नेहनानास्तिकिञ्चन मृत्योः स मृत्युमाप्नोति याइह नानेव पश्यतीत्याद्या अभेददर्शनपरिशुद्धाः । ५ काश्चित्तत्त्वमसि अहं ब्रह्मास्मीत्याद्याः निर्गुणोपासनपरा इतिज्ञानकाण्डश्रुतीनान्तात्पर्य्यं सूचितवान् सर्वा अपि ताः केशवस्य परमात्मनः योऽधिकारिण आलोकः साक्षात्कारस्तेन परमोत्सवस्तेन निवृता अहो अयं स्वात्मभूतपरमात्मानं न जानातीति तदीयविरहाज्जातो यस्तापस्तं जहुः ततश्च विधूतः शोको याभिः प्रसन्नाभिरिति वा ताभिः श्रुतिभिर्वृतः सगुणो निर्गुणश्चाधिकं व्यरोचत सच्चिदानन्दस्वरूपतया प्रतिपाद्यः सन् सम्यगशोभतेत्यर्थः ॥ १० ॥

रास-रहस्यम्

र० टी०-ताः सर्वा अपि केशवालोकपरमोत्सवनिर्वृताः को ब्रह्मा, ईश रुद्रस्तयोरपि वं सुखं ददस्तीति केशवः परमात्मा, तस्यैव आ समन्तात् लोकदर्शनमापरोक्ष्येण साक्षात्करः, तेन यः परमोत्सवः नित्यनिरतिशयानन्दानुभवः, तेन निर्वृताः आत्यन्तिकदुःखनिवृत्तिपूर्वकपरमानन्दं प्राप्तवत्यः, यथा जनाः मुमुक्षवः प्राज्ञं प्राप्य ब्रह्मज्ञं प्राप्य यद्वा भक्तजनाः ईश्वरं प्राप्य यद्वा जाग्रत्स्वप्नावस्थायां नानाव्यापारजन्यश्रमप्राप्ताः प्राज्ञं सुषुप्तौ कारणसाक्षिणं प्राप्य "प्राज्ञेनात्मना सम्परीष्वक्तो न बाह्यं किंचन वेन नान्तरमि"ति श्रुतेः, विरहजं आत्माक्षात्काराऽप्राप्तिजन्यं तापं, जहुः दुःखापेताः बभूवुः । यद्वा यथा जना जीवाः विरहजं तापं परमात्मस्वरूपाज्ञानजन्यजरामरणसंसारभ्रमणात् नानादुःखकर्षिता पश्चात् श्रवणमननिदिध्यासनेन प्राज्ञं कारणसाक्षिणं प्राप्य साक्षात्कृत्य गतदुःखकर्षिताः पश्चात् श्रवणमननिदिध्यासनेन प्राज्ञं कारणसाक्षिणं प्राप्य साक्षात्कृत्य गतदुःखाः सुखिनश्च भवन्ति तथेत्यर्थः ॥ ९ ॥ भगवान् परमात्मा अच्युतः विश्वसत्तास्फुर्तिप्रदानेन, जीवमात्रेभ्यः ज्ञानप्रदानेन, सर्वेभ्य आनन्ददानेन च सच्चिदानन्दरूपात् न च्युतो भवतीति अच्युतः, विशेषेण धूताः नष्टाः शोकाः आध्यात्मकादिदुःखानि यासां, ताभिः वृत्तिभिः वृतः परिवेष्टितः, अधिकं व्यरोचत, पूर्णपुण्याया अपि गंगायाः नद्यन्तरसंगमे पुण्याधिक्यश्रवणवत् पूर्वमव्यक्तपूर्णानन्दब्रह्मणः पश्चात् व्यक्तत्वरूपानन्दस्यापि वृत्तिप्रतिफलतत्वेनानन्दाधिक्यं द्योतितं, यथा परमपुरुषः ह्लादिनीशक्तिभिः विरोचते ॥ १० ॥

गूढार्थदीपिनी

प्राज्ञं ब्रह्मज्ञं प्राप्य यथा संसारिणः सुषुप्तिसाक्षिणं वा ॥ ९ ॥ पुरुष ईश्वरः शक्तिभिः सत्त्वादिभिः ॥ १० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्राप्यं मुक्तोपसृत्य प्राप्य जनाः मुमुक्षवः प्राज्ञं विद्वांसं वा जना ज्ञानभक्त्यधिकारिणः "प्राज्ञेनात्मना संपरिष्वक्तो न वाह्यं किंचन वेद नान्तरमि"त्यादिश्रुतिप्रोक्तं प्राज्ञं भगवन्तं सुषुप्तौ प्राप्य जनास्तापं जहतीति वा ॥ ९ ॥ हे तात ! विष्णुदत्त ! ताभिर्विधूतशोकाभिः शुद्धाभिरधिकं भगवान् व्यरोचत तासामनत्वे च दृष्टान्तः पुरुषः स एव यथा शक्तिभिः विमलोत्कर्षिण्यादिभि रति ॥ १० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

केशवालोकपरमोत्सवनिर्वृतास्ताः सर्वाः प्राज्ञं पण्डितं प्राप्य यथा जनः पामरस्तापं सांसारिकं जहाति तथा विरहजं तापं जहुः । जनो जाग्रत्तापं दिवा जातं प्राज्ञं भगवन्तं प्राप्यालिङ्ग्य जहाति तथेति वा । प्राज्ञेनात्मना सम्परिष्वक्त इत्यादेः ॥ ९ ॥ विधूतः शोको याभिस्ताभिः सहितो यथा शक्तिभिः स्वभार्याभिः श्रीभूदुर्गादिभिः पुरुषो हरो रोचते । शक्यत्वाच्छक्तयो भार्या इति गतं । तथा भगवानच्युतः कृष्णो व्यरोचत स्वरूष्टान्तो हरेर्भवेदित्यृग्भाष्योक्तेः पुरुषो यथेति युक्तम् ॥ १० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं विशेषाकारेण कृत्यमुक्त्वा सर्वासां सामान्याकारेण प्रयोजनमाह । सर्वास्ता इति । यो हि बलिष्ठरजस्तमोभ्यां व्याप्तयोरपि फलसंपादकः तस्य क्षुद्रगुणक्षोभयुक्तानामासामुद्धारे कः प्रयास इति वक्तुं केशवेत्युक्तं तस्य योऽयमालोकः अवलोकनं प्रकाशो वा अन्तर्बहिः अत एव परमोत्सवः यथा लौकिकानां महाराज्यप्राप्तिः पुत्रोत्सवो वा तेन निर्वृताः सर्वा एव जाताः एवं तासामिष्टसिद्धिरुक्ता अनिष्टनिवृत्तिमाह । जहुर्विरहजमिति । नन्वेवं सति मुक्ता एव ता भवेयुः नहि संसारे निवृत्ते भगवत्साक्षात्कारेण परमनिर्वृत्तौ सत्यां कश्चन पुरुषार्थोऽवशिष्यते तत्राह । प्राज्ञं प्राप्येति । प्राज्ञः सुषुप्तिसाक्षी स्वाप्यये भगवदाविर्भावो निरूपितः तत्र च जीवानां प्रवेशो वासनासहितानां तं प्राप्य यथा जनाः अधिकारिणो मनुष्याः पुनरायान्ति एवमत्राप्यागमिष्यन्तीति भावः । यतो जना जायमानाः नतु उत्तमाधिकारिणः स्वसंबन्धख्यापनार्थमेव परं भगवान् प्रकटः ॥ ९ ॥ एवं तासां कृत्यमुक्त्वा ताभिर्भगवत्कृत्यमाह । ताभिरिति तासां सम्बन्धे प्राकृतीनां भगवतोऽन्यथात्वं शङ्क्येत तन्निवर्त्यते अन्यथा स्वार्थमेव भगवत्तिरोधानं स्यात् स नैव व्यरमत् "तस्मादेकाकी न रमत" इति श्रुतेः लोकोऽपि केवलं भगवन्तं पश्यन् न निर्वृतो भवति किंतु सर्वशक्तियुक्तं परं पुंसः स्त्रियाश्च रनयोःसुखदुःखिनोर्नेति वाक्यात् दुःखिताश्चेत्तदोत्तमता न भवतीत्याह । विधूतशोकाभिरिति । ताः पूर्वोक्ताः गुणास्तासामुक्ता एव सर्वथा प्रपन्ना इति मध्ये शोकः समजनि तस्मिन्निवृत्ते यथापूर्वमेव ता भगवांश्च षड्गुणैश्वर्ययुक्तः तथापि प्राकृत इव यदि परिच्छिन्नकामः स्यात् तथापि वैलक्षण्यात् न रोचेत, भगवांस्तु पूर्णकाम इत्याह । अच्युत इति । अतः ताभिर्वृतः अधिकं व्यरोचत सहजापेक्षया उक्तार्थ विश्वासेन हि श्रोता वक्तारं पुष्णातीव पितेव पुत्रं स्वार्थम् अत एवाग्रेऽतिगुप्तार्थकथनेन वक्ता श्रोतारं सुखयति अन्यथानधिकारिणं मत्वा न वदेदलौकिकमर्थं प्रकृतेचास्मिन्नर्थे राज्ञो विश्वासं दृष्ट्वातिसंतोषेण स्नेहेन च पितृत्वेन सम्बोधयति । तातेति । नन्वेवं सति भगवत्कान्तेः तारतम्यात् सहजत्वं न स्यात् अत आह । पुरुषः शक्तिभिर्यथेति । यथायं प्राकृतोऽपि पुरुषः सर्वसामर्थ्येषु लीनेषु लोकप्रतीत्या न रोचत इव स चेत् क्रियाज्ञानादिशक्तीराविष्करोति तदाधिको रोचते तथा अयमपि भगवान् रोचमान एव प्रकटासु शक्तिषु गोपिकासु सर्वप्रतीत्या युक्तानामप्यन्तःकरणेन अधिकं व्यरोचत अतिसौन्दर्यं प्राप्तवान् ततो भगवान् परमानन्दयुक्तः स "एव एषह्येवानन्दयतीति" श्रुतेः ॥ १० ॥

श्रीसुबोधिनी–सारः

गतशोकाभिस्ताभिः स्त्रीभिर्वृतोऽच्युतो भगवान् अधिकं यथा भवति तथा व्यरोचताऽराजत् शक्तिभिः पुरुषो हरिरिव हे तात ॥ १० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सर्वास्ताः केशवालोकेत्यत्र क्षुद्रगुणक्षोभयुक्तानामिति । एतासां भगवतश्च गुणा सर्वे महान्तः परोक्षभजनस्याज्ञानं क्षुद्रो गुण एतासामिति हृदयम् । मुक्ता एव ता इत्यादि । तदात्यार्तितः प्राणेन्द्रियान्तः करणजीवा भगवत्येव प्रविष्टास्तत्सम्बन्धेन च परमानन्दं प्राप्तवन्त इति पुनर्बहिरनुसन्धानमेतादृशीनामसम्भावितमित्यर्थः । **एवमत्रापीति** । एतास्तु न लौकिक्यो, नापि प्रसिद्धमुक्तिमार्गीयाः, किन्तु बहिः प्रियसंगमाभिलाषवत्यः, भगवांश्च एतन्मनोरथं पूरयत्येवेति तथैव संपत्स्यत इत्यर्थः ॥ ९ ॥ **ताभिर्विधूतेत्यत्र, प्राकृतीनामिति** । प्राकृतीत्व इत्यर्थः ॥ १० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ताः सर्वा गोप्यः केशवस्यालोकनं दर्शनमेव परम उत्सवस्तेन निर्वृताः आनन्दिताः, अतस्तद्विरहजं तापं जहुः । तत्र दृष्टान्तमाह–प्राज्ञं परमात्मानं प्राप्य साक्षात्कृत्य यथा योगिजनाः । यद्वा प्राज्ञेनात्मना सम्परिष्वक्तो "न बाह्यं किञ्चन वेद-

नान्तरम्" इति श्रुतेः प्राज्ञं सौषुप्तं प्राप्य तदेकीभूय विश्वतैजसाद्यवस्थापन्ना जनाः यथा अध्यात्मिकादितापत्रयं जहति तद्वदित्यर्थः ॥ ९ ॥ विश्वासार्थं प्रेम सूचयन् सम्बोधयति—हे तातेति । विधूतशोकाभिस्तद्दर्शनस्पर्शादिना निवृत्ततद्विरहजन्यशोकाभिस्ताभिर्गोपीभिर्वृतः अच्युतः, तत्र हेतुः – भगवान् ज्ञानवैराग्यादिगुणपूर्णः कृष्णः व्यरोचत । तत्र दृष्टान्तमाह— परमपुरुषः शक्तिभिः भूर्तिमतीभिर्विमलादिभिः परिवृतो यथा विरोचने तथेति ॥ १० ॥

अन्वितार्थप्रकाशिका

सर्वा इति ॥ ताः सर्वा गोप्यः केशवस्यालोको दर्शनमेव परम उत्सवस्तेन निर्वृताः आनन्दिताः प्राज्ञमीश्वरं प्राप्य मुमुक्षवो यथा । यद्वा । ब्रह्मज्ञं प्राप्य संसारिणो जना यथा । यद्वा । प्राज्ञं सुषुप्तिसाक्षिणं प्राप्य विश्वतैजसा जीवा यथा । "प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्" इति श्रुतेः । तद्वद्विरहजं तापं जहुः ॥ ९ ॥ ताभिरिति ॥ पुरुषः परमात्मा शक्तिभिः सत्त्वादिभिर्विमलोत्कर्षिण्यादिभिर्वा । यद्वा । पुरुषोऽनुशायी प्रकृत्याद्युपाधिभिर्यद्वा पुरुषः सर्वेन्द्रियशक्तिभिर्वृतोऽधिकं यथा रोचते तथा विधूतशोकाभिर्निवृत्तशोकाभिः ताभिर्गोपीभिर्वृतः अच्युतो भगवान् अधिकं व्यरोचत ॥ १० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

केशवस्य आलोकनात् यः परमोत्सव उत्कृष्टोत्साहस्तेन निर्वृत्ताः सुखं प्राप्ताः प्राज्ञं प्रकर्षेण अज्ञं सुषुप्त्यभिमानिनं प्राप्य जनाः यथा सुषुप्तिं प्राप्य जनाः सुखिनो भवन्ति तद्वदित्यर्थः ॥ ९ ॥ ताभिरिति ताभिः गतविरहशोकाभिर्वृतोऽधिकं व्यरोचत क इव पुरुषः अक्षरधाम्निस्थितः परमेश्वरः शक्तिभिर्लक्ष्म्यादिभिर्यथा यद्वा पुरुषो मुक्तपुरुषः शक्तिभिर्ज्ञानवैराग्यादिसामर्थ्यैर्यथा व्यरोचत तद्वत् ॥ १० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ काचिद्गोपी तु, नेत्ररन्ध्रेण, नेत्ररन्ध्रद्वारेण, तं कृष्णं, हृदि कृत्य निधाय, हृदयं नीत्वेत्यर्थः । उपगुह्यालिङ्ग्य, निमील्य च, नेत्रे इति शेषः । पुलकानि पुलकितान्यङ्गान्यस्याः सन्ति तथाभूता सती, योगी इव, आनन्देन संप्लुता व्याप्ता, आस्ते आस्त ॥ ९ ॥ सर्वा इति ॥ ताः सर्वा गोप्यः, केशवस्य श्रीकृष्णस्यालोकोऽवलोकनं तेन स एव वा परम उत्सवस्तेन निर्वृताः सुखिताः सत्यः, यथा जना योगिजनाः, प्राज्ञं परमात्मानं, प्राप्य साक्षात्कृत्य, तापमाध्यात्मिकादितापत्रयं जहति, तद्वत् विरहजं भगवद्वियोगोत्थं तापं, जहुस्तत्यजुः । यद्वा प्राज्ञं ब्रह्मज्ञं प्राप्य, यथा संसारिणो जनाः, यद्वा प्राज्ञं सुषुप्तिसाक्षिणं प्राप्य यथा विश्वतैजसावस्थास्थजीवाः तापं त्यजन्ति तद्वत् तापं जहुः ॥ १० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सर्वास्ता इति : १०.३२.९.

सर्वाः स्त्रियोऽप्यच्युतदृष्टयोऽच्युते तत्कालजामार्तिमशेषतो जहुः ।
साध्वेव तद्यत् क्वचिदप्यवाप्य यं योगे त्रितापं सुजनो जहाति हि ॥ ५३ ॥

ताभिरिति : १०.३२.१०.

कृष्णेन ताः शुशुभिरे नहि केवलं तु कृष्णोऽपि ताभिरबलाभिरलं विरेजे ।
नैतद्विचित्रमिह यन्निशयेन्दुरीशः शक्त्याम्बुदश्चपलया च विदा नृजन्मा ॥ ५४ ॥

कृष्णप्रिया

राजन् वे सब गोपियाँ केशव भगवान के अवलोकन से समुत्पन्न उत्सव से आनन्द निमग्न वन गई मानों कि कोई जीव सुषुप्ति के साक्षी प्राज्ञ को प्राप्त कर समस्त दुःखों को भूल जाता है। वैसे ही, इन्होंने भी श्रीकृष्णचन्द्रजी के दर्शन कर विरहोत्पन्न सारे दुःखों को भूल गई ॥ ९ ॥ हे तात ! शोक क्लेश निर्मुक्त समस्त गोपियाँ से समावृत श्री अच्युत भगवान् अतिशय सुशोभित बने, विशिष्ट पुरुष क्रिया ज्ञान योग तप आदि शक्तियाँ से सुशोभित बनता है ॥ १० ॥

ताः समादाय कालिन्द्या निर्विश्य पुलिनं विभुः । विकसत्कुन्दमन्दार[1] सुरभ्यनिलषट्पदम् ॥ ११ ॥
शरच्चन्द्रांशुसन्दोहध्वस्तदोषातमः शिवम् । कृष्णाया[2] हस्तदरलो[3]चितकोमलवालुकम् ॥ १२ ॥

कवमक्षमा

अन्वयः—ताः, समादाय, विकसत्, कुन्द मन्दार, सुरभि, अनिल, षट्, पदम्, शरद्, चन्द्रांशु, सन्दोह, ध्वस्त, दोषातमः, कृष्णायाः, हस्ततरलाञ्चितकोमलबालुकम्, कालिन्द्याः, शिवम्, पुलिनम्, निविश्य, विभुः, (व्यरोचत) ॥११-१२॥

---

१. सुरता–विज. । २. कृष्णेहायस्त । ३. तरलाञ्चि ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

विकसत्कुन्दमन्दारैः सुरभिर्योऽनिलस्तस्मात्षट्पदा यस्मिंस्तत् पुलिनम् ॥ ११ ॥ शरच्चन्द्रांशूनां सन्दोहैः समूहैर्ध्वस्तं दोषातमो रात्रि गतं तमोयस्मिंस्तत् अतः शिवं सुखकरम् । हस्तरूपैस्तरलैस्तरंगैराचिता आस्तृताः कोमला वालुका यस्मिन् एवंभूतं पुलिनं ताः समादाय निर्विश्य तत्र ताभिर्वृतोऽधिकं व्यरोचतेति पूर्वेणान्वयः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

समादाय सम्यग्घस्तधारणादिनाऽऽदाय । षट्पदा भ्रमराः ॥ किरणसंदोहस्य संमार्जनीत्वं ध्वनितम् । अतः तमोरहितत्वात् । यद्वा–कामजयस्फोरणार्थं शिवपदम् । कृष्णायाः कालिंद्याः । "अणुतरंगो लोलः स्यात्तरलः कुरुलस्तथा" इति गोपालः । 'आचितं छन्नसिक्तयोः' इति च । अतस्तरलैरणुतरंगैः निर्विश्य उपविश्य । तत्र पुलिने । आभिः गोपांगनाभिः ॥ ततश्च ताः सम्यग्धास्यहस्तग्रहादिनाऽऽदाय निर्विश्य पुलिनं प्रविश्य च व्यरोचतेति पूर्वेणैवान्वयः । पुलिनं विशिनष्टि सार्धेन । विकसद्भिः कुंदैः मन्दारैश्च सुराभर्योऽनिलस्तस्मात्षट्पदा यस्मिंस्तत् । वायोः शैत्यं पुलिनसम्बन्धात्, मांद्यं षट्पदास्पदत्वात् । शरच्चंद्रांशूनां संदोहैर्ध्वस्तं दोषाया रात्रेस्तमो यत्र तत् । शिवमत एव सुखदम् । यमुनाया हस्तरूपैस्तरलंस्तरंगैराचिता आस्तृताः कोमला वालुका यस्मिंस्तत् ॥ ११–१२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विशब्दोक्तस्य रोचने वैशिष्ट्यस्योपकरणान्तरमपि दर्शयति ता इति द्वाभ्याम् । सम्यक् प्रत्येकं सर्वासामेव हस्तधारणादिना आदाय रासयोग्यं पुलिनान्तरं गन्तुं पूर्वपुलिनतो गृहीत्वा निर्विश्य प्रविश्य मध्यमधिष्ठायेत्यर्थः । विभुर्व्यापक इत्येकस्यापि सर्वासां युगपत् समादानादिसमावेशार्थम् । पुलिनस्य भावोद्दीपनसामग्र्या रासक्रीडायोग्यतां दर्शयंस्तद्विशिनष्टि । विकसदिति सार्द्धेन । वायोः शैत्यसौरभ्ये स्पष्टे । मान्द्यञ्च षट्पदास्पदत्वात् ॥ ११ ॥ शरदिति । चन्द्रांशूनां सुप्रसन्नता सन्दोहेति चन्द्रस्य पूर्णता ध्वस्ताक्षेषेति दिनवत् प्रकाशश्च सूचितः । कृष्णायाः श्रीकृष्णस्य सनामत्वेन सवर्णत्वेन च सख्यं प्राप्तायाः । अत एव हस्तेति । किम्वा विचित्रशोभादिना तस्यापि चित्ताकर्षकत्वेन तन्नाम्न्याः वृन्दावनं गोवर्द्धनमित्यादिः । हस्तेति हस्तैरिवावचयनेन स्थलीवैषम्यकठिनांशराहित्यादिकं ध्वनितम् । अन्यत्तैः । यद्वा । ताः समादायेति ताभिः सह तदेव पुलिनं निर्विश्य मध्यप्रदेशं प्रविश्येत्यर्थः । विशेषेण भवतीति विभुर्बभूव इति शेषः । निजवैभवं प्रकटयामासेत्यर्थः । तच्च तद्दर्शनेति द्वाभ्यां वक्ष्यते अन्यत् समानम् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विशब्दोक्तस्य रोचने वैशिष्ट्यस्योपकरणान्तरमपि दर्शयति । ता इति द्वाभ्याम् । सम्यक् प्रत्येकं सर्वासामेव हस्तधारणादिना आदाय रासयोग्यपुलिनान्तरं गन्तुं पूर्वपुलिनतो गृहीत्वा निर्विश्य प्रविश्य मध्यमाधिष्ठायेत्यर्थः । विभुर्व्यापक इति एकस्यापि सर्वासां युगपत् समादानादिसमावेशार्थं पुलिनस्य कामोद्दीपनसामग्र्या रासक्रीडायोग्यतां दर्शयन् तद्विशिनष्टि । विकसदिति सार्द्धेन । वायोः शैत्यं पुलिनसम्बन्धात् मान्द्यं च षट्पदास्पदत्वात् सौरभ्यञ्च व्यक्तमेव ॥ ११ ॥ शरदिति चन्द्रांशूनां सुप्रसन्नता, सन्दोहेति चन्द्रस्य पूर्णता, ध्वस्तदोषेति रात्रित्वापगमने दिनवत् प्रकाशश्च सूचितः । कृष्णायाः कृष्णस्य सनामत्वेन सवर्णत्वेन च सख्यं प्राप्तायाः, अत एव हस्तेति । किंवा विचित्रशोभादिना तस्यापि चित्ताकर्षिकायाः, तदेवाह–हस्तेति । हस्तैरिवावचयनेन स्थलीवैषम्य कठिनांशराहित्यादिकं ध्वनितम् । अन्यत्तैर्व्याख्यातम् । यद्वा, ताः समादायेति ताभिः सह तदेव पुलिनं निर्विश्य मध्यप्रदेशं प्रविश्येत्यर्थः । विशेषेण भवतीति विभुर्बभुवेति शेषः निजवैभवं प्रकटयामासेत्यर्थः । तच्च तद्दर्शनेति द्वाभ्यां वक्ष्यते । अन्यत् समानम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो विभुः कृष्णस्ताः समादाय कालिन्द्याः पुलिनं निर्विश्य तत्र ताभिः परिवृतो व्यरोचतेति पूर्वेणान्वयः । पुलिनं कथभूतं विकसद्भिः कुन्दैर्मन्दारैश्च सुरभिर्यो मन्दानिलः तस्मात्षट्पदा भृङ्गा यस्मिन् ॥ ११ ॥ शरच्चन्द्रांशूनां सन्दोहैःसमूहैर्ध्वस्तं नाशितं रात्रितमः अतः शिवकरं तथा यमुनाया हस्तैरिव तरलैस्तरङ्गैराचिता विस्तृता कोमला वालुका यस्मिंस्तथा भूतम् ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विभुः अविलश्च षट्पदाश्चानिलषट्पदाः विकसतोः कुन्दमन्दारयोः सुष्ठु रताः क्रीडावन्तः अनिलषट्पदाः यस्मिंस्तत्तथा ॥ ११ ॥ शरत्कालचन्द्रांशूनां संदोहेन निरन्तरराज्या ध्वस्तं निरस्तं दोषातमः रात्र्यन्धकारो यस्मिंस्तत्तथा कृष्णायाः यमुनायाः ईहया प्रवाहलक्षणचेष्टया आयस्ताः आयासं प्राप्ताः तरला अणुतरङ्गा एतैराचितानि आसिक्तानि च कोमलानि च वालुकानि सैकतानि यत्र तत्तथोक्तं यद्वा कृष्णेहया श्रीकृष्णमूर्तिक्रीडया आयस्तानि च तरलानि चञ्चलानि चात एवाचितानि इतस्ततो विकीर्णानि च शेषं समम् अणुस्तरङ्गो लोलः स्यात्तरला कुरलस्तथेति गोपालः आचितं छन्नसिक्तयोरिति च ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

किं कृत्वा व्यरोचतेत्याह—ताः समादायेत्यादि द्वाभ्याम्। ताः समादाय कालिन्द्याः पुलिनं निर्विश्य। आदिदीपकमिदम्, तद् विशिनष्टि–विकशद्भिः कुन्दैर्मन्दारैश्च सुरभयो येऽनिलास्तत् सङ्गिनः षट्पदा यत्र कृष्णोऽत्रागत्य क्रीडिष्यतीति कृत्वा कृष्णाया हस्तेन तरलं यथा स्यात्तथार्चिताः सम्यङ्मार्जिताः कोमला वालुका यत्र ॥ ११–१२ ॥

श्रीरसिकाह्लादिनी टीका

व्यरोचतेत्युक्तं वैशिष्ट्यं प्रस्तुतश्लोकेन निबध्नाति रासक्रीडार्थं यत्कृतवांस्तदाह ता इति। यासां मदमाननिवृत्यर्थमन्तर्द्धानने स्थितः ताः समादाय हास्यनखस्पर्शभावगर्भेण हस्तग्रहणादिना सम्यक्तया गृहीत्वा यत्र पुलिने गानं कृतं ततोऽपि विशालं रासयोग्यं पुलिनान्तरं निर्विश्य तासां यावन्मनोरथं विलासं चिकीर्षत व्यरोचतेति पूर्वेणैवान्वयः। कालिन्द्या इति पदेन शृङ्गाररसप्रवाहभरसूचितः। विभुरिति सर्वसंनिहितत्वेन सर्वासां सम्माननेच सामर्थ्यमुक्तम्। पुलिनस्य शृङ्गारोद्दीपकत्वेन रासविलासयोग्यतया विशिनष्टि विकसदिति विकसन्ति कुन्दमन्दारपुष्पाणि तैः सुरभिर्योनिलस्तेन षट्पदा यन्मिन् कालिन्दीसम्बन्धेन वायोः शैत्यमुक्तम्, कुन्दमन्दारसम्बन्धेन सौरभ्यं वननैकट्यान्माद्यम्। अनेन परमोद्दीपकसामग्रीसम्पत्सूचितेति। सर्वास्याः सामग्र्याः कामोद्दीपकत्वं निरूपयन् उज्वलतामाह ॥ ११ ॥ शरदिति, शरत्कालीनो यश्चन्द्रस्तस्यांशुनां किरणानां सन्दोहः समूहस्तेन ध्वस्तं दोषा तमः रात्रिसम्बान्धतमो यस्मिन् अनेन शरदर्द्धौ उज्वलत्वं प्रसन्नताहेतुत्वं च सूचितम्। चद्रस्याऽपि पूर्णत्वमुज्वलत्वं सूचितम्। ध्वस्तेति रात्रिसम्बन्धितमो निरसनेन दिवसवत् प्रकाशाधिक्य च सूचितम्। कृष्णाया इति नामतः वर्णतश्च साम्येन तद्विलाससाहाय्यं शाहचर्यं च सूचितम्। हस्तेति हस्ता इव तरलास्तरङ्गास्तैराचिता नीचोच्चराहित्येन विस्मिता कोमला बालुका यस्मिन्। अनेन कोमलतया स्पर्शमात्रतः पादयोः सुखप्रदत्वं सूचितम् ॥ १२ ॥

विशुद्धरसदीपिका

अथैतासां रासक्रीडायोग्यदेशविशेषप्रापणमाह द्वाभ्याम। ता इति। प्रागुक्ताः सर्वा एव सम्यक्हस्तधारणादिना आदायकालिन्द्याः इति प्रागेव व्याख्यातं पुलिनमिति तस्या एव प्रदेशविशेषं चक्रभ्रमणाभिधं मणिसंकुलमिति क्रमदीपिकोक्तेः गोविन्दलीलामृते च—

तत पुलिनमागत्य सचक्रभ्रमणाभिधम्। तत्र रन्तुमनाश्चक्रमारुरोह प्रियानुगः इति ॥
पूर्वं प्रियारूढाः पश्चात्स इत्यर्थः तथावितस्तिमात्रोच्चनिखातशंकुगत्रिनेमिचक्रोपरि राधया सह।
स्थितः स मध्ये ऽन्यसखीगणैः क्रमाद्बहिश्च काराथ सुमण्डलात्रयमिति ॥

तदेव विशिनष्टि। विकसन्ति कुन्दानि माध्यानि मन्दराणि च देवकुसुमानि तेन दिव्यादिव्यपुष्पसमृद्धिः सूचिता तेषां गन्धेन सुरभिर्योऽनिलः स एव षट्पद इवेतस्ततो भ्रमन् यत्र तत् अनिलस्यैव षट्पदत्वरूपकेण देशस्यालौकिकत्वम् ॥ ११ ॥ तथा शरत्सम्बन्धी यश्चन्द्रस्तदंशूनां सन्दोहेन ध्वस्तं क्षिप्तं दोषाया रात्रेःतमो यस्मिंस्तत् एवं किरणानां सन्दोहस्य मार्जनीत्वं तमसश्चावकरत्वमभिप्रेतं तेन च परमाळौकिकत्वं शिवं सुखतमं शीतलतमं वा श्लेषेण शिववदुज्वलवर्णम् एवञ्च कामविजयस्फोरणाय शिवपदोपादानमिति ज्ञेयं तथा कृष्णाया नाम्नापि साम्यम्प्रापिताया प्रियसख्यास्तरलैस्तरङ्गैराचितं वैषम्यकाठिन्याद्यपसारणेनास्तृतं कोमलं वालुकं यस्मिंस्तत् यद्वावालुका हिमवालुका कर्पूर इतियावत् आचिता हिमवालुका यत्र तत् विभुरिति सर्वासां यथायोग्यं मानदाने हेतुः ॥ १२ ॥

श्रीरामनारायणकृता भावभावविभाविका

तासां सन्माननाय यत्कृतवांस्तदाह। ताः समादायेति विभुः सर्वासां प्रमास्पदे भगवति तुल्यप्रेमर्द्धिमत्त्वात्ताः सर्वाः समादाय सम्यक् हास्यनर्मोक्तिहस्तग्रहणालिङ्गनादिभिः आदाय स्वीकृत्य सह गृहीत्वा वा कालिन्द्याः वक्ष्यमाणगुणगणयुतं पुलिन निर्विश्याधिकं व्यरोचत तत्र विभुरित्यनेन विभुत्वं विना परिच्छिन्नेन सर्वासामसंख्यातगोपीनां हृदन्तर्भाववेत्तृत्वस्य तासां सर्वासां तथा प्रत्येकहस्तग्रहादिना मनोरञ्जनसन्मानपूर्वकादानस्य चासम्भवात्तद्योग्यत्वसूचनं पूर्वमपि पुनः पुलिनमाविश्य समवेताः कृष्णं जगुरित्युक्तत्वात् पुलिने एवोपविष्टाः ताः समादाय पुलिनं निर्विश्येत्यनेन तु पूर्वं तासां कृष्णविरहेण स्मरोद्दीपनकुसुमविकासभ्रमरगानाद्यसहिष्णुतया क्वचित्तदुद्दीपनद्रुमलतादिरहितैकान्तपुलिनप्रदेशे समवेत्य गुणगानं कृतं तेनाविर्भूतो विभुरधुनोद्दीपनविभावान्वितविहारार्हप्रदेशन्ताः समादाय निर्विवेशेति द्योतितं कालिन्द्या इत्यनेन तु कलिं द्यति अवखण्डयतीति कलिन्दस्तत्पुत्र्यास्तत्कुलाचलकुलागताचलकलिनिरसनस्वभावत्वादपि तस्यास्तत्सङ्गतानामीर्ष्यामात्सर्याद्यभावतया सह विहारयोग्यताज्ञापनं लीळायोग्यत्वायैव पुलिनं विशेषयति। विकसदिति। विकसन्तो ये कुन्दमन्दारोपळक्षितविविधसुमनोविशेषास्तेषां सुरभियुक्तो योऽनिलो वायुस्तेनागताः षट्पदास्तद्रूपा मुनयो यत्रेति तथा च ये कृष्णळीळोत्साहेन विकसन्तः सुमनसस्तेषां सङ्गं ये मुनयः प्राप्नुवन्ति

तद्गुणान् गायन्ति चेति ध्वनिः तत्र विकसदिति शत्रन्तोक्त्या सद्योनिकाससूचनेन बहुकालविकाससम्भावितम्लानग्लानिनिरासः। यद्वा भगवद्विहारसमविकासोक्त्या तत्रत्यकुसुमादीनां जडत्वाभावचिदात्मकत्वं तल्लीलानुसारित्वञ्च सूचितं, यद्वा पुलिनस्यैव रासविलासोल्लासेन कुन्दविकासरूपस्वदशनप्रकाशात्मकप्रहासो मन्दारादिना नन्दनन्दनानन्दिपुलिनस्य नन्दनवनादेर्मन्दा अरयः संस्पर्द्धिनो यस्येति मन्दविकारद्योतनं, यद्वा विशेषेण कं सुखं येभ्यस्ते विकाराः कृष्णलीलोत्साहेन विशेषेण कं येषां वा परमानन्दघनलीलोपकरणानामपि परमानन्दरूपत्वात् विशेषं यत्कं सुखं परमानन्दस्तत्स्वरूपा वा तथा त एव सन्तः समीचीनाः परोपकारिणः सद्रूपा वा ये कुन्दमन्दारादयस्तेषां सुरभ्यनिलेन षट्पदा यत्रेति तथा अत्र वायोस्त्रयो गुणाः शैत्यादयस्तत्र यमुनासन्निहितदेशशरन्निशाकालसंनिकर्षेण शैत्यं कुसुमसुरभिषट्पदसम्बन्धनिर्देशेन सुरभित्वम् अनिलेति स्वनाम्नैव मन्दत्वं तीव्रो वायुः सशब्दो भवति अयन्तु अनिलो न इला वाणी तदुपलक्षितः शब्दो यस्मिन्निति, यद्वा कीदृशं पुलिनं विकसद्भिः कुन्दोपलक्षितकुसुमैर्मा श्रीर्यस्य विकसतां कुन्दादीनां मा श्रीर्वा यस्मिन्, यद्वा विकाशविशेषसुखरूपा सदात्मिका तथाकुं कुत्सितं द्यतीति सर्वदोषापहारिणी तद्रहिता च मा श्रीर्यस्य, यद्वा विकञ्च तत्सच्च कुं कुत्सितं दमयतीति कुन्दमं विकसच्च तत्कुन्दमञ्च विकसत्कुन्दमं तथा आगतानां कृष्णदाराणां सुरभ्यनिलेनागताः षट्पदा वेदा एव षट्पदा यस्मिन्, यद्वा दारेषु सुष्ठु रमते भाति चेति दारसुरभः कृष्णः स स्वामितया वर्तते अस्येति तत् दारसुरभि तथा भूता अनिला इळा वाणी तच्छून्याः साक्षाद्वर्णनासमर्थाः षड्भिर्लिङ्गैः पद्यन्ते ब्रह्माणि पर्यवस्यान्तीतिषट्पदाः षड्भिरङ्गैः पद्यन्ते गम्यन्ते इति बा वेदा अपि यस्मिंस्तत् यद्वा यथा योगिप्रेरितः सुसुमनाः षट्कमळभेदिवायुः कृष्णपादमनुसरति तथा विकसत्कुन्दमन्दारसुमनः परागान्वितकञ्जवनागतत्वात्सुरभिः कृष्णानुगोऽनिलः अनहतनादवन्नादवन्तः षट्पदाश्च यस्मिंस्तत यद्वा विकसन्तः कुन्दादयो येन तथा सुष्ठु रमते भाति चेति सुरभः कृष्णः तदङ्गसङ्गतया सुरभिनिळस्तदुद्बुद्धनादा षट्पदाश्च यस्मिंस्तत् अनेन जगज्जीवनाङ्गसङ्गेनैव वायोः स्थिरचरचेष्टाद्बोधैकतया जगत्प्राणत्वं सूचितम् ॥ ११ ॥

पुलिनमेव वर्णयति। शरदिति। यथा भक्तानां हृदयं हरिळीलोत्साहेनातिविकसिते सुमनसि प्रोद्भूताह्लादभूतमयभक्तिप्रभान्वितभजनानन्देन्द्वंशुसन्दोहात्मकशुद्धसत्त्वप्रकाशेन ध्वस्ताविद्याख्यदोषातमः ध्वस्तसमस्तदोषरूपरजोस्तमो वात एव शिवं कल्याणरूपञ्च भवति तथा पुलिनमपि विकसितेऽति सुमनसि जाताह्लादे ससखिगणभगवत्सुमनसि तत्सुमनोरूपशरच्चन्द्रांशुसन्दोहेन पूर्णचन्द्ररश्मिव्रातेन ध्वस्तं समस्तं दोषारात्रिस्तस्याः समस्ततमो यस्मिंस्तथाभूतं तथा शिवं मङ्गलात्मकञ्च एवंविकसदित्यादिना परितः कुसुमविकासेन तत्सुरभिवायुना षट्पदानादेन शोभा वर्णिता शरच्चन्द्रेत्यादिना उपरिचन्द्रकिरणसमूहेन तथापूर्वेणोद्दीपनं द्वितीयेन क्रीडाप्रतिबन्धतमोनिरासश्च वर्णितः अधुना क्रीडोपयोगिपुलिनाधो भागसौष्ठवमाह। कृष्णाया इति। कृष्णायाः कृष्णनामतद्रूपवत्यास्तस्यापि मनः कर्षकनित्यानन्दरूपायास्तत्प्रेम्णैव द्रवभूतायास्तत एव विकसितातिसुमनसस्तद्दर्शनोल्लासप्रफुलितानन्त कुमुददृशस्तत्समानसख्युर्विमानतया तन्मानाय प्रसारितं प्रशस्तं हस्तरूपस्वरूपतरलैस्तरङ्गैः सखारूपेण हस्तैः प्रवाहरूपेण तरलैर्वाचिताः तृणादीनिराससमतापादनाभ्यां मृद्वास्तरणादिवद्रचिता स्वभावतः कृष्णप्रेम्णाच कोमला वालुका यस्मिंस्तत्, यद्वा कीदृशं पुलिनं तदाह शिवं स्वहृत्कुञ्जे ससखिगणकृष्णविलासोत्साहेन पुलिनात्मनाविर्भूतभक्तराजशिवरूपं तत्र विकसन्तः कुन्दमन्दाराः कृष्णस्य हृद्याविर्भावेन तद्रोमहर्षः सुरभ्यनिल उक्तव्युत्पत्त्या सुरभिकृष्णश्रितस्तत्प्राणः षट्पदाश्च ज्ञानं च शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्दनादिति श्रीमद्भागवतोक्तेस्तस्यविद्यानिधित्वात्तदन्तर्गतकृष्णगुणानुवादात्मकवेदघोषचन्द्रश्च स्वस्य तमोऽधिष्ठातृतया कदापि तत्सङ्गे न भगवत्स्वरूपाभानं माभूदिति तदभिभवाय चन्द्रकलात्मनाशिरोधृतभगवत्सत्त्वांश एव तद्रासोल्लासतया पूर्णतामापन्नः तथा च तदंशुसन्दोहेन ध्वस्ता स्वशरणापन्नानां सर्वे दोषा येनासौ तत एवातमश्च गह्वरवनागता यमुनाच तज्जटान्तर्गता गङ्गा साच भगवच्चरणसम्बन्धेन शिवशिरोवासलाभेन तदनुध्यानपरतया कृष्णामृदुवालुकाश्च विष्णुपादोदक्या नीतविष्णुपादरजस्त्वेन पुलिनशिवाङ्गावधूतभस्मउपर्य्यंवरंच दिगम्बरपुलिनहरवराम्बरं सुरपथश्च शिवो रोगसितारोगहार इत्याद्यपि यथायथमूह्यं "स्वान्तर्व्यक्तप्रियासंघकृष्णलीलाशिवात्मकम् पुलिनं वैष्णवानां नोनित्यं हृद्यस्तु शंकरम् ॥ १२ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ततः काश्चित्प्रियालापैः काश्चिद्भ्रूभङ्गवीक्षितैः। निन्येऽनुनयमन्याश्च करस्पर्शेन माधवः॥ इति

विष्णुपुराणोक्तहेतुभिर्विधूतशोकास्ताः सम्यक् हस्तधारणप्रियालापादिसमीचीनप्रकारेणादाय सह गृहीत्वा रासक्रीडायोग्यकालिन्द्याः पुलिनं निर्विश्य ताभिर्व्यरोचतेत्युनुसम्बन्धनीयं कलिं कलहं द्यति खण्डयतीति कलिन्दस्तस्य कन्या कालिन्दी तथाच तत्पुलिने गापीनां परस्परं मया च कलहो न भविष्यतीति तत्र नयनस्याशयः विमुक्त्यापकत्वात्सर्वासामैकमत्यसम्पादकः तत्र नयने समर्थ इति वा पुलिनस्य रासयोग्यतामाविष्करोति विकसत्कुन्दमन्दारैः सुरभिर्यो वायुस्तस्मात्षट्पदा यत्र ॥ ११ ॥

पुनश्च शरत्कालीनकिरणानां समूहैर्ध्वस्तं दाषाया रात्र्यास्तमो यत्र तेन दिवसतुल्यकालवत्त्वादत्यन्तशोभन पुनश्च कृष्णसदृशवर्णनामधेयायाः भगवत्सख्याः भगवद्रमणार्थ पुलिनभूमिं संस्कृत्य स्थिताया हस्तरूपैस्तरङ्गै राचिता आस्तृता कोमलवालुका यत्र तरङ्गैः पुलिनभूमेः समतासम्पादनात्तेषां हस्तत्वनिरूपणं तथाच जलसुगन्धपुष्पवायुनादैः परितो वेष्टितं सुप्रकाशवत् शीतलं कोमलं समं चेति बोधितम् ॥ १२ ॥

रास-रहस्यम्

र० टी०—विभुः परमात्मा, ताः वृत्तीः समादाय सहकृत्य, कुन्दः कुं कुत्सितान् देहात्मवादिनः द्युति अवखण्डयतीति कुन्दः, मन्दारः मन्दान् मन्दबुद्धिसम्पन्नान् भेदवादिनः प्रति राति सत्कर्मोपासनाजन्यचित्तशुद्धिं चित्तैकाग्रतां च ददातीति मन्दारः, सुरभिः कामधेनुवत् सर्वकामान् पुरयतीति, अनिला इला वाणी तच्छून्या साक्षाद्वर्णनासमर्थाः अवाङ्मनसगोचरत्वात्, षट्पदं "उपक्रमोपसंहारावभ्यासाऽपूर्वताफलम्। अर्थोवादोपपत्ती च लिङ्ग तात्पर्यनिर्णये ॥" इति षड्भिर्लिङ्गैः पद्यन्ते ब्रह्माणि पर्यवस्यन्तीति षट्पदाः तान् विकसत् उत्तमाधिकारिणां हृदये विकासयत्, कथंभूतम्? शरच्चन्द्रांशुसन्दोहध्वस्तदोवातमः शरच्चन्द्रचन्द्रिकावत् शुद्धसत्त्वप्रकांशेन ध्वस्ता रजस्तमोलक्षणदोषा तदभिन्नतमः अज्ञानं यस्मात् अत एव शिवं कल्याणरूपं च, कीदृशं, हस्ततरलाचितं हस्तः करः प्रकाशः तेन तरलवदाचितं सरलाचितं द्रवीभूतं, कोमलवालुकं तद्वत् शीतल शान्तिप्रदं कालिन्द्याः पुलिनं कलिं सर्वानर्थस्वरूपं द्यति अवखण्डयतीति कलिन्दः, कलिन्द एव कालिन्दः "स्त्रियां ङीप्" कालिन्दी तस्याः कालिन्द्याः पुलिनं तत्स्थानीयं मायायाः तीरं शुद्धान्तःकरणं निर्विश्य निश्चयेनाविश्यान्तर्मुखीभूत्वा ताभिः वृत्तिभिः परिवृतो व्यरोचतेति पूर्वस्यानुषंगः ॥ ११-१२ ॥

गूढार्थदीपिनी

ता इति द्वयम्। ताः पुलिनं तटं समादाय नीत्वा ताभिर्वृतः भगवान् व्यरोचतेति पूर्वेणान्वयः। विकसद्भिः कुन्दादिभिः सुरभिः योऽनिलः तस्मात् भ्रमरा यस्मिन्। कथंभूतम्। शरत्कालिकचन्द्रस्य किरणसमूहैः ध्वस्तं निशातमो यस्मिन्। पुनश्च। यमुनायाः हस्तरूपतरङ्गे आचिता आस्तृता कोमला वालुकाश्च यस्मिन् तत् ॥ ११-१२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ताः समादाय पुलिनं निर्विश्य तत्र ताभिर्वृतोऽधिकं व्यरोचतेति पूर्वेणान्वयः पुलिनं वर्णयति। विकसदिति सार्द्धेन। कुन्दैर्मन्दारैश्च सुरभिर्योऽनिलस्तस्मात् षट्पदा यस्मिन् तत् ॥ ११ ॥ शरत्कालीनस्य चन्द्रस्यांशुसन्दोहैः किरणसमूहैर्ध्वस्तदाषातमो निरस्तनिशान्धकारम् शिवं सुखदम् तथा कृष्णायाः यमुनाया हस्तैरिव तरलैराचिता आस्तृता कोमला वालुका यस्मिन् तत् तस्य श्रीकृष्णस्य दर्शनेन य आह्लादस्तेन विधूता हृद्रुक् यासां ताः मनोरथान्तं ययुः प्रापुः श्रुतयो यथेति श्रुतयो यथा कर्मादिपरत्वेन प्रतीयमानाः अकृतार्था आसन् समन्वयाध्यायोक्तप्रकारेण परमात्मपरतया वेदाचार्य्येण स्थापिताः प्राप्तार्था भवन्ति तद्वत् एवं लब्धमनोरथानां भगवत्प्रावण्यमाह। स्वैरिति आत्मबन्धवे आत्मप्रियाय स्वैरुत्तरीयैरासनमचीक्लृपन् रचयामासुः ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ताः समादाय। अनेन सन्तोषभरेण तासां गमनसामर्थ्यं स्वतो नेति ध्वन्यते। पुलिनं निर्विश्य। तत्स्वरूपं निरूपयति ॥ विलसदिति। विलसन्तः कुन्दमन्दारा यस्मिन्स तद्वा सुरतस्य तत्सम्बधी तदुपयोगी मन्दोनिलोऽजं कुर्वन्तश्च षट्पदा यस्मिन्स तद्वा स चासौ स च तच्च तत्तच्चेति वा। नलिनपुलिनेति लिङ्गानुशासने द्विलिङ्गताऽभिधानात्। विलसत्कुन्दमन्दारेषु सुरतानिलषट्पदा यस्मिन्निति पक्षेऽनिलस्य निर्भरं तदुपर्यागतिरेव सुरततेति मन्तव्यम्। विकसत्कुन्दमन्दारसुलताभिः सहिता अनिलषट्पदा यस्मिन्निति वा। सुरभ्यनिलेति पाठस्तु मूलार्थः ॥ ११ ॥ शरदश्चन्द्रः शरत्कालिकश्चन्द्रस्तस्यांशयः किरणास्तेषां सन्दोहः समूहस्तेन ध्वस्तं दोषा रात्रिस्तत्तमोऽन्धकारो यस्मिन्स चासौ शिवश्चेति पुलिङ्गतपक्षे। द्वितीयपक्षेऽनेकतायामेकतायां पदस्य नायव्ययौ। ननु गत्वा वनाद्वनं चन्द्रज्योत्स्ना यावद्विभाव्यते। तमः प्रविष्टमालक्ष्य ततो निववृतुः स्त्रिय इति प्रागुक्तेर्न हि चन्द्रास्तमयानन्तरं पुनस्तद्दिने शरच्चन्द्रांश्वित्याद्युक्तिः कथमिति चेत्। अबलाश्रान्त्यसहिष्णुः कृष्णस्तमःसृष्टिं सति शीतांशौ ततानानन्तरं चेदं वचनमिति सम्भवात् प्रविष्टपदस्वारस्यात्। पुनश्चन्द्रसृष्टेरिति वा। कृष्णाया यमुनाया हस्तास्तद्रूपास्तरत्यास्तरङ्गास्तैराचिता इतस्ततः प्रसारिताः कोमलवालुकाः सिकता यस्मिस्तन्निर्विश्य व्यरोचतेत्यतीतेनान्वयः। विशेषकं। कृष्णेहायस्तरलाञ्चितेति पाठे कृष्णस्येहा चेष्टा तथाऽऽयस्ता आयासं प्राप्तास्तरला लघुतरङ्गास्तैः पूर्ववदुर्वरितं। कृष्णे या ईहा प्रवाहस्तयेति वा। अगुस्तरङ्गो लोलः स्यात्तरलः कुल्लस्तथेति गोपालः ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तासामानन्दजननार्थं यत्कृतवांस्तदाह। ताः सामादायेति। ताः सम्यगादाय समीचीने पुलिने निर्विश्योपविश्य विभुर्जातः कालिन्दी कलिन्दकन्या कलिं द्यतीति कलिन्दः अतस्तस्याः पुलिने तासामन्योऽन्यं भगवता कलहो न भविष्यतीति ज्ञापितं पुलिनं वर्णयति क्रीडायोग्यत्वार्थं सार्द्धेन। सर्वत उपरि अधश्चेति प्रथमतः सर्वतः सौभाग्यमाह। विकसन्ति कुन्दमन्दारपुष्पाणि तेषां सुरभ्यनिलः षट्पदा भ्रमराश्च यत्र वायोः त्रयो गुणाः स्पष्टाः मकरन्दोऽपि पुष्पेष्वधिकः तेन मत्ता भ्रमरा अपि नादसाधकत्वेन गानादावुपयुज्यन्ते विकासः वाय्वर्थ एव कुन्दगन्धः शान्तः मन्दारगन्धः पुष्टः तेन गुप्तागुप्तकामयोरुद्बोधको निरूपितः शत्रन्तोक्त्या

प्रभुनिवेशनसमय एव विकासारम्भो नतु पूर्वमपीति ज्ञाप्यते अन्यथा विकसितेति वदेत् एवं सति यस्मिन् क्षणे यस्यार्थस्योपयोगस्तस्मिन्नेव क्षणे तत्कार्यं भवति नान्यदेति लीलामात्रोपयोग्येवात्रत्यं सर्वमिति ज्ञापितं भवति अन्यथा सार्द्धाध्यायत्रयोक्तलीलायां क्रियमाणायां भूयस्येव रात्रिरतीतेत्यधुनैव विकासे हेत्वन्तराभावात्स न भवेदत एव न वदेदपि एवं सत्येतादृक्चन्द्रादिसम्बन्धित्वेनोक्तत्वादनिलादयोऽप्यधुनैव प्रवृत्ता न पूर्वमपीति ज्ञेयम , स्वतन्त्रतयापि सौरभ्यप्रतीत्यर्थं सुरभिरनिल उक्तः ॥ ११ ॥ एवम्परितः जलं परितः सुगन्धः परितः पुष्पाणि परितो वायुः परितो नाद इति निरूपितम् उपर्युक्तमतामाह । शरदिति शरत्कालीना ये चन्द्रांशवः तेषां सन्दोहः समूहाः तैर्ध्वस्तं दोषा रात्र्यास्तमो यत्र तेन अत्यन्तं शिवं कल्याणरूपम् अन्धकारे गतेऽपि यदि भूताद्यभिनिविष्टं भवेत् तथापि तदाप्यसमञ्जसमिति कल्याणरूपता निरूपिता निर्विघ्नमग्रिमेष्टकार्यसम्पादकत्वज्ञापनाय परितश्च निकृष्टाः पदार्थाः नोपर्यधश्च अधस्तस्य पुलिनस्य गुणानाह । कृष्णेति । सापि भगवत्सनाम्नी भूसंस्कारं कृतवती भगवद्रमणार्थं कृष्णाया हस्तरूपाः तरलाः तरङ्गास्तैः चिताः कोमलवालुकाः यत्र अन्यथा हस्तरूपताभावे समता न स्यात् तेन शैत्यं कोमलत्वं समता चोक्ता तादृशं पुलिनं निर्विश्य तत्र गत्वा वा स्थितः उपवेशनमग्रे वक्ष्यति भावेनैवोपवेशनम् ॥ १२ ॥

श्रीसुबोधिनी–सारः

ता गोपीः समादाय गृहीत्वा विकसद्भिः कुन्दमन्दारैः सुरभिर्योनिलो वायुस्तस्मात् षट्पदा भ्रमरा यस्मिंस्तत् शरत्कालीनचन्द्रस्यांशूनां किरणानां संदोहैः संघैर्ध्वस्तं दोषाया रात्र्यास्तमो यस्मिंस्तत् शिवं मंगलकरं कृष्णाया नद्या हस्तरूपैस्तरलैस्तरंगैराचिता व्याप्ता कोमला वालुका यस्मिन् एवं भूतं कालिंद्या यमुनायाः पुलिनं तटं निर्विश्य विभुः कृष्णो व्यरोचतेति पूर्वत्रान्वेति ॥११–१२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उक्तमेव स्पष्टयति—ता इति । विभुः सर्वमनोरथे समर्थः श्रीकृष्णस्ता गोपीः समादाय कालिन्द्याः पुलिनमाविश्य ताभिः परिवृतो व्यरोचतेति पूर्वणैवान्वयः । पुलिनं विशिनष्टि—विकसद्भिः सुरभिर्यो मन्दानिलस्तस्मात् षट्पदा भ्रमराः यस्मिन् तत् ॥११॥ शरत्कालीनो यो निर्मलश्चन्द्रस्तस्यांशूनां किरणानां सन्दोहैः समूहैर्ध्वस्तं दोषाया रात्रेस्तमो यस्मिन् तत् , अत एव शिवं सुखकरम् , कृष्णाया यमुनाया हस्ततुल्यैस्तरलैस्तरङ्गैराचिता आस्तृता कोमला वालुका यस्मिंस्तत् ॥ १२ ॥

अन्वितार्थप्रकाशिका

ता इति द्वयम् ॥ विभुः कृष्णस्ताः गोपी' समादाय विकसद्भिः कुन्दैर्मन्दारैश्च सुरभिर्यो मन्दानिलस्तस्मात् षट्पदा भ्रमराः यस्मिन् तत् शरत्कालिको यो निर्मलश्चन्द्रस्तस्यांशूनां किरणानां संदोहैः समूहैर्ध्वस्तं दोषातमो रात्रेर्ध्वान्तं यस्मिन् तत् अत एव शिवं सुखकरं कृष्णाया यमुनाया हस्ततुल्यैस्तरलैस्तरङ्गैराचिता आस्तृता कोमला वालुका यस्मिन् तत् कालिन्द्या पुलिनमाविश्य ताभिः परिवृतो व्यरोचतेति पूर्वस्यानुषङ्गः ॥ ११–१२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विकसद्भिः प्रफुल्लैः कुन्दंमंदारैः सुरभिः सुगन्धिर्योऽनिलो वायुस्तेन षट्पदाभ्रमरा यस्मिंस्तत् पुलिनं ॥ ११ ॥ शरदिति कथंभूतं पुलिनं शरच्चन्द्रस्य अंशूनां रश्मीनां संदोहैः कलापैर्ध्वस्तदोषातमः रजनीध्वान्तं यस्मिंस्तत् अतः शिवं सुखजनकं कृष्णायाः हस्तसदृशैस्तरलैस्तरङ्गैः आचिता प्रसृता कोमला वालुका यस्मिंस्तत् एवं भूतं पुलिनं ताः समादायनिर्विश्य अधिकं व्यरोचतेति पूर्वेण सम्बन्धः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ताभिरिति ॥ तत्र तदेति शेषः । विधूतशोकाभिः विगतविरहजशोकाभिः, ताभिः गोपीभिः वृतः परिवृतः, भगवान् नृत्वेऽपि षाड्गुण्यपूर्णः, अच्युतः स्त्रीप्रसङ्गेऽपि वीर्यच्युतिवर्जितः श्रीकृष्णः, हे तातानुकम्प्य राजन्निति यावत् । पुरुषो जीवः, शक्तिभिश्चतुर्विंशतितत्त्वात्मिकाभिः शक्तिभिः वृतः सन् यथा रोचते, यद्वा । पुरुषः परमपुरुषः, शक्तिभिर्विमलाद्याभिः शक्तिभिः, वृतः सन् , यथा रोचते शोभते तद्वत् । अधिकं, व्यरोचत ॥ ११ ॥ ता इति ॥ ततः विभुः श्रीकृष्णः, ताः गोपीः, समादाय, कालिन्द्या यमुनायाः, पुलिनं तोयोज्झितस्थानं, निर्विश्य, तत्र ताभिः परिवृतो व्यरोचतेति पूर्वेणान्वयः । पुलिनं विशिनष्टि सार्द्धेन । विकसन्तः प्रफुल्लपुष्पा ये कुन्दा मन्दाराश्च तैः सुरभिर्योऽनिलस्तस्मात् षट्पदा भृङ्गा यस्मिंस्तत् तथाभूतम् ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ताः समादायेति : १०।३२.११.

सरसाः कर्तुमन्विच्छंस्तास्तदा युवतीः प्रभुः । लसत्पुष्पलतामागात्कालिन्द्यास्तटीम् ॥ ५५ ॥

शरच्चन्द्रांशु इति : १०.३२.१२.

तापापहतिरुक्ताऽस्ति पूर्णचन्द्रनिषेवणात् । चित्रमत्र त्वतापास्तास्तत्करस्पर्शतोऽभवन् ॥ ५६ ॥

कृष्णप्रिया

उन गोपियाँ को साथ में लेकर श्रीकालिन्दी जी के पुलिन पर विराजमान भगवान् श्रीकृष्ण विशेष विभूषित बन गए। प्रभु के विराजमान होने पर श्री यमुनाजी का तीर विकसित कुन्द कलियाँ और मन्दार कुसुमों से सुरभित वायु वाला एवं षट्पदों से गुंजित बन गया ॥ ११ ॥ राजन् ? जब श्रीश्याम सुन्दर श्री यमुना जी के तट पर पधारे तब शरत् कालीन शशधर की शीतल किरणावली ने निशा के अन्धकार का निवारण किया जिससे रात्री रानी कल्याणमयी बन गई एवं श्यामसुन्दर श्री यमुना ने तरङ्गस्तरूप कर कमलों से तटपर कोमल वालुका को विठाकर विराजने समतल स्थल बना दिया ॥ १२ ॥

तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथान्तं श्रुतयो यथा ययुः ।
स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितैरचीक्लृपन्नासनमात्मबन्धवे ॥ १३ ॥
तत्रोपविष्टो भगवान् स ईश्वरो योगेश्वरान्तर्हृदि कल्पितासनः ।
चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् ॥ १४ ॥

कर्दमक्षमा

अन्वयः—तद्, दर्शनाह्लाद, विधूत, हृदरुजः, (ताः गोपिकाः) यथा, श्रुतयः, तथा, मनोरथान्तम्, ययुः, (ततः) स्वैः कुचकुङ्कुमाङ्कितैः, उत्तरीयैः, आत्मबन्धवे, आसनम्, अचीक्लृपत् ॥ १३ ॥ योगेश्वरान्तर्हृदि, कल्पितासनः, तत्र, उपविष्टः, स, भगवान्, ईश्वरः, गोपी परिषद्-गतः, अर्चितः, त्रैलोक्य, लक्ष्मी, एक, पदम्, वपुः, दधत्, सः, चकास्ति ॥ १४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ताश्च मनोरथानानामन्तं ययुः पूर्णकामा बभूवुरित्यर्थः श्रुतयो यथेति । अयमर्थः । यथा मर्मकाण्डे श्रुतयः परमेश्वरमपश्यन्त्यस्तत्तत्कामानुबंधैरपूर्णा इव भवन्ति ज्ञानकांडे तु परमेश्वरं दृष्ट्वा तदाह्लादपूर्णाः कामानुबंधं जहति तद्वदिति । आप्तकामा अपि प्रेम्णा तमभजन्नित्याह । स्वैरिति । अचीक्लृपन् रचयामासुः आत्मबंधवेंतर्यामिणे ॥ १३ ॥ गोपीसभागतस्ताभिः संमानितः संश्चकास शुशुभे । त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव पदं स्थानं तद्वपुर्दधद्दर्शयन् ॥ १४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ताः यूथीभूताः । पूर्णकामाः प्राप्ताभिलषितार्थाः । दृष्टान्तसिद्धमर्थं स्फुटयति–अयमर्थ इति । कर्मकाण्डे पूर्वमीमांसायाम् । श्रुतयः तदभिमानिन्यो देवताः । परमेश्वरम् परत्मानम् । "वर्ष्मोस्मि समानाम्" इत्यादिभिः, "आयन्तु नः पितरः" इत्यादिभिश्च केवलकामानुबन्धिकर्म प्रतिपादनेनापश्यन्त्यो वर्णयन्त्यः तत्तत्कामानुबन्धैः सर्वाच्छादकत्वपित्रादिप्रीणनादिभिरपूर्णा । इवेतीवशब्देन कर्मणोऽप्यन्तः करणशुद्धिद्वारा तद्दर्शनोपयोगित्वमुक्तम् । ज्ञानकाण्डे उत्तरमीमांसारूपे । परमेश्वरम् "सर्वं खल्विदं ब्रह्म" इति, "ब्रह्माहमस्मि" इत्येवं चराचरात्मसहितमात्मतत्त्वं दृष्ट्वानुभूय तदाह्लादपूर्णाः स्वात्मज्ञानानन्दपूर्णाः कामानुबन्धं तत्तत्कर्मजसुखेहां जहति, ब्रह्मानन्दे सर्वानन्दानामन्तर्भूतत्वात्, "तस्य मात्रामुपजीवंत्यन्ये" इत्यादिश्रुतेः । तद्वदिति प्राप्तात्मानन्दवत्कामानुबन्धं हित्वा तद्दर्शनाह्लादेन श्रीकृष्णदर्शनानन्देन विधूता नष्टा हृद्रुजोऽविषयीकरणलक्षणा यासां तास्तथा । आप्तकामाः श्रीकृष्णदर्शनेन पूर्णमनोरथा अपि । प्रेम्णा अनुरागेण । तम् श्रीकृष्णम् । उत्तरीयैः प्रावरणवस्त्रैः । कुचकुंकुमांकितैरनेनैकैकवस्त्रा अप्यानन्दविवशाः सत्यस्तैरेवासनं ददुरिति ध्वनितम् । आत्मबन्धव इति–देहबन्धुदर्शनेऽपीतिकर्तव्यताविस्मृतिर्भवति किमुतात्मबन्धुदर्शन इत्याह ॥ अत्र तासां सख्यसमुचितां प्रेमसेवामाह–तस्य श्रीकृष्णस्य दर्शनानन्देन खण्डितसर्वमनोदुःखा व्रजसुन्दर्यः स्वीयैरुत्तरीयैः कुचकञ्चुकोपरिस्थैरतिसूक्ष्मवस्त्रैरात्मबन्धवे तस्मै आसनं तथाऽचीक्लृपन्नुपजह्रुर्यथा श्रुतयो महोपनिषदोऽपि मनोरथानामन्तं परमकाष्ठां ययुः । यतोधिकोऽन्यो मनोरथो न संभवति तं प्रापुः । यद्दृष्ट्वा वयमपि व्रजे गोप्यो भूत्वा श्रीकृष्णेन सहैवं कुचकुंमस्तिमितवस्त्रार्पणादिना कदा विलसाम इत्युत्कण्ठिता बभूवुरित्यर्थः । अत एव श्रुतयो गोपीत्वप्राप्त्यर्थं तीव्रं तपश्चक्रुरिति बृहद्वामनीया कथा, "स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते समाः समदृशोंघ्रिसरोजसुधाः" इति तासामुक्तिश्च । तत्र पूर्वकल्पगतकृष्णावतारदर्शिन्यः श्रुतयो लब्धचरमनोरथा एतस्मिन्कल्पे गोप्यो बभूवुरेव, एतस्मिन्कल्पे तु लब्धमनोरथा एताः श्रुतयोऽग्रिमकल्पे गोप्यो भविष्यन्ति श्रुतीनामानन्त्यादिति ज्ञेयम् ॥ १३ ॥ तत्र गोप्युत्तरीयासने । यो योगेश्वराणां सनकादिप्रभृतीनामन्तर्हृदि हृदयपद्मकर्णिकायां विमलोत्कर्षिण्यादिशक्तिभिः कल्पितासनः स एवेश्वरो नन्दनन्दनरूपेण गोपीसभागत इति सम्बन्धः । चकाश काशृ–दीप्तौ' । अर्चितः आसनताम्बूलनर्मसस्मितापांगादिभिः संमानितः । धातूनामनेकार्थत्वाद्दर्शनेऽपि दधातिरस्ति ॥ तत्र प्रतिस्वयूथमेव पृथक्पृथगुपर्युपरिनिहितबहुवस्त्रासनेषु ताभिः क्लृप्तेषूपविष्टः । ननु तावत्संख्याऽऽसनेषु कथमेक उपविष्टस्तत्राह–

ईश्वरः तत्तदलक्षिततावत्प्रकाशवान्। तत्र हेतुः–भगवान् कामवान् 'भगं श्रीकामाहात्म्य–'इत्यमरः। तस्य तावत्सु सर्वेष्वेवासनेपूपवेष्टुं कामनामालक्ष्यैश्वर्य्यैव शक्त्या योगमाया द्वारा तावन्तः प्रकाशास्तथा प्रकाशिता इत्यर्थः। किञ्च, स हि योगेश्वरैः शेषशंकराद्यैरन्तर्हृदि हृदयाभ्यन्तरे एव कल्पितं मनसैवानीतत्वात्त्रिजगद्दुर्लभमनुपहृत्तमनर्घ्यमासनं यस्य सः। एताभिस्तु हृदयाद्बहिरेव स्वगात्रनिर्मात्यवस्त्रैः स्वौपभुक्तसुगंधैरासनं कल्पितं यत्तत्रैवोपविष्टश्चकाश दिदीपे। यः खलु स्वयं भगवान्ब्रह्मरुद्रादिपरिषदा क्षीरोदादितीरे स्तुत्यादिगम्य एव मनसि प्रादुर्भवन्परोक्ष एव क्षणमात्रमेव भवेत्, स एव गोपीपरिषदं स्वयं गतोऽच्युतश्चिरकालमभिव्याप्य च्युतिरहितः। 'अर्चितः' इति पाठे ताम्बूलनर्मस्मितापांगादिना संमानितः। किं कर्तुं गतः–प्राकृताऽप्राकृताधोमध्योर्द्ध्वलोके या लक्ष्मीस्तत्तदनन्तस्वांशपर्यंतवस्तूनां नानाशोभादिसंपत्तिस्तस्या एकमनन्यत्पदमाश्रयभूतं यद्वपुस्तदपि दधत्। तासां गोपीनामंगकांतिस्मितकटाक्षादिमाधुर्यैः पुष्णन्। यद्वा–तत्रोपविष्ट एव तत्र तादृशोपवेशादिविशिष्ट एव योगेश्वरान्तर्हृदि कल्पितासनः तत्क्षणमारम्य महारुद्रादिभिर्योगेश्वरैर्गोपीपरिषन्मध्यगततादृशोपवेशतादृशशोभातत्तन्नर्मसंलापादिविशिष्ट एव कृष्णो ध्यानेन स्वहृदयमानिन्य इत्यर्थः॥ १४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततोऽतिहृष्टानां प्रेमसेवामाह। तदिति। तस्य क्रीडाविशेषोत्सुकस्य विभोर्दर्शनेन य आह्लादस्तेन विशेषतो धूता नाशिता हृद्रुजः सर्वाः आधयो यासाम्। तथाविधेन तेन सह तत्रागमनेन रासक्रीडादिमयच्चिरस्थितिर्निर्द्धारिता पूर्वशङ्कापगमात्। न केवलं परमदुःखशान्तिरेव अपि तु परमसुखप्राप्तिरपि जातेत्याह। मनोरथस्य वाञ्छितस्यान्तं परां काष्ठां ययुरिति। तत्र दृष्टान्तः श्रुतयो यथेति। श्रुतयोऽपि तादृशलीलाविशिष्टं तं प्रकाश्य निजनिजनानातात्पर्यदौस्थ्यं परित्यजन्ति। परमतात्पर्यपर्यवसानञ्च प्राप्नुवन्तीति। तदुक्तमेकादशे स्वयं श्रीभगवतः यस्यां न मे पावनमङ्गकर्मेत्यादि। द्वादशे। श्रीसूतेन स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभाव इत्यादि च। तत्राप्येषा परमप्रेममयरासलीलेति। श्रुतयोऽप्यत्रैव कृतार्था जाता इत्यस्या लीलाया महिमापि दर्शितः। अतः सहोक्तिनामालङ्कारोऽयं व्यञ्जितः। ततश्च सुस्थिरचित्ताः सत्यः आसनमचीक्लृपन् विचित्रचारुप्रकारेण रचयामासुः। कैः स्वैः स्वयं परिहितैः उत्तरीयैः सर्वाङ्गीणवस्त्रस्यान्तर्गतैः कुचपट्टिकां वेति वक्ष्यमाणानुसारेण हृदयावरणरूपैः विरहरोदनधारापातात् कुचकुंकुमेनाङ्कितैरञ्जितैरित्यर्थः। ननु कथं लज्जाशैथिल्यमिव ताभिरङ्गीकृतं स्वोपयुक्तैः वस्त्रैरासनं दत्तञ्च तत्राह। आत्मेति। आत्मनो बन्धवे। आत्मीयत्वेन मित्रत्वेन च भावादित्यर्थः। अन्यत्तैः। आसनञ्चेदं सर्वासां सूक्ष्मवस्त्रमयविस्तीर्णमेकमेव वर्गशः पृथक् पृथगेव ज्ञेयम्॥१३॥ स प्रेमरसाम्बुधिवर्द्धनः श्रीकृष्णचन्द्रः स्वयं भगवान् ऐश्वर्यादि षड्गुणसम्पन्नोऽपि तथा ईश्वरः नित्यमपूर्वापूर्वतत्प्रकाशनसमर्थोऽपि तत्र तस्मिन्नासने उपविष्टः सन् चकाश तत्र तत्रासम्भवशोभाविर्भाववान् बभूव। अन्यत्र पुनरसौ परमदुर्लभ एवेत्याह। योगेश्वरैः सिद्धसमाधिभिः श्रीरुद्रादिभिरपि अन्तर्हृदि एकाग्रचित्ते कल्पितं भावनामात्रेण स्थापितमासनं यस्य तादृशोऽपि। अलुक् समासः। अर्थात्तैरेव कल्पितमिति वा। तस्मात्तासां सम्बन्धस्यैवैष गहिमेति भावः। तत्र च वैशिष्ट्यमाह। गोपीति। यद्वा। तादृशेन गोपीपरिषद्गतत्वेनैव योगेश्वरान्तर्हृदि कल्पितासन इति ज्ञेयम्। किञ्च। अर्चितः आसनताम्बूलनर्मस्मितापाङ्गादिना सम्मानितः। किं कुर्वंश्चकाश त्रैलोक्ये प्राकृताधोमध्योर्ध्वलोके परमव्योमाख्य महावैकुण्ठपर्यन्ते या लक्ष्मीस्तत्तदनन्तस्वाविर्भावपर्यन्तवस्तूनां नानाशोभादिसम्पत्तिः तस्या एकमनन्यत् पदमाश्रयभूतं वपुः प्रकाशं बिभ्रत् तासामग्रे धारयन् प्रकटयन्नित्यर्थः। तथाच वक्ष्यते। गोप्यस्तपः किमचरन् यदमुष्येत्यादि॥ १४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततोऽतिहृष्टानां प्रमसेवामाह—तदिति। तस्य क्रीडाविशेषोत्सुकस्य विभोर्दर्शनेनाह्लादस्तेन विशेषतोधूता नाशिता हृद्रुजः सर्व्वाधयो यासां तथाविधेन तेन सह तत्रागमनेन रासक्रीडानिर्द्धारात्। विधूतशोकाभिरिति पूर्व्वं विरहशोकमात्रस्य नाशनम्, अधुना त्वशेषहृद्रुजामिति भेदः। अत एव मनोरथान्तं ययुः, यद्वा, उपमागर्भितं ज्ञेयम्। मनोरथान्तमिव ययुः, रासक्रीडाप्रत्यासत्तेः, यथा श्रुतयोऽपि तद्गुणादिवर्णनात् तं प्राप्ता इव भवन्ति, न तु सम्यग् लभन्ते, साक्षादप्राप्तेः, सा चोक्तैव श्रीब्रह्मस्तुतौ (भा० १०।१४।३४) 'अद्यापि यत्पदरजः श्रुतिमृगामेव' इत्यादिना, यद्वा, तस्य विभोर्दर्शनाह्लादेन विधुता हृद्रुग् विरहार्त्तिलक्षणा यासां तथाभूताः सत्यो मनोरथस्य तद्दर्शनविषयकस्य अन्तं समाप्तिं ययुः, पुनः पुनस्तथा तदुक्तिरत्यन्तविवृद्धस्य विरहतापस्यापगमेऽपि तत्संस्कारस्य तु क्रमेणैवापगमात्, श्रुतयोऽपि क्रमेणेश्वरं दृष्ट्वा कामजालं त्यजन्ति, यद्वा, मनोरथानामन्तं निष्ठाम्, यस्मात् परो मनोरथो नास्ति, तं प्राप्ताः क्रीडाविशेषमैच्छन्नित्यर्थः। श्रुतयोऽपीश्वरं दृष्ट्वा तद्भक्तिविशेषमिच्छन्ति, अत एवासनमचीक्लृपन् विचित्रचारुप्रकारेण रचयामासुः कैः स्वैः स्वयं परिहितैः उत्तरीयैः कुचकञ्चुकोपरिविन्यस्तैः कञ्चुकस्य सूक्ष्मतरवस्त्रत्वात् विरहरोदनधारापाताच्च कुचकुंकुमेनाङ्कितैर्भूषितैरित्यर्थः। ननु अशेषगुणवतीभिः कथं लज्जा ताभिः परिहृता कथम्वा प्रभवे कुचकुंकुमाक्तैरुत्तरीयैरासनं दत्तं तत्राह। आत्मेति। आत्मभ्योऽपि बन्धुः प्रेयान् तस्मै आत्मकोटिप्रेष्ठायेत्यर्थः, अतोऽस्य भूम्युपवेशेन परम-स्वदुःखापत्तेः सख्यप्रेमविशेषाच्चेत्यर्थः। तेनैव बलादत्यन्ता ब्रह्मादिभिस्तथाप्रेरणेन स्वातन्त्र्याभावादित्यर्थः। आसनकल्पनं

पुनरन्तर्द्धानशंकया तत्रैवावृत्त्य रिरक्षिषया, किंवा स्वाभिप्रेतसुखपिपृच्छिषयेति दिक्। अन्यत्तैर्व्याख्यातम्, यद्वा आत्मनोऽपि सकाशात् बन्धुः प्रियः, तस्मै परमप्रियतमाय, प्रेमभरवैवश्यादित्यर्थः। एवं स्वस्वोत्तरीयेण तस्य च परमसूक्ष्मवस्त्रतया सर्व्वा अपि विस्तीर्णोच्चासनार्थमेकत्रैव, किंवा स्वस्ववर्गादिभेदेन पृथक् पृथगेव कल्पयामासुरिति ज्ञेयम् ॥ १३ ॥ ईश्वरः परमस्वतन्त्रोऽपि भगवान् सर्व्वैश्वर्य्यपरिपूर्णोऽपि रसिक-शिरोमणिः प्रेमामृतार्णव-वर्द्धनः श्रीकृष्णचन्द्रस्तस्मिन्नासन उपविष्टः सन् चकास, यद्वा, भगवानिति तेनैव तस्य भगवतासारप्रकटनमित्यभिप्रेतम्। ईश्वर इति सर्व्वशक्तिमत्त्वम्, पृथक्त्वेन कल्पितासनसमूहे तासां स्वस्य च सन्तोषविशेतार्थं तत्तदलक्षितत्वेनैकस्यापि पृथक्तयैवोपवेशात्, योगेश्वरैः सिद्धसमाधिभिः श्रीसनकादिभिरपि अन्तर्हृदि एकाग्रतां प्रापिते चित्ते कल्पितं मानसपूजायां तदुपवेशार्थं विचित्ररत्नादिना प्रयत्नेन रचितम्, किंवा आसनं कल्पयामीत्येवमर्पितमासनमेव यस्येति तस्य साक्षात्तत्स्वीकारोऽपि नास्तीति ध्वनितम्। तादृशोऽपि चकासेत्यत्र हेत्वन्तरं गोपीनां परिषदं सभां प्राप्तः, बहुलमण्डलाकारेणोपविष्टानां तासां मध्यवर्त्ती सन्नित्यर्थः। अनेनापि पूर्व्ववदैश्वर्य्यमूह्यम्। किञ्च, अर्चितस्ताभिः सम्मानित आसनकल्पनेनैव, किंवा ताम्बूलादि-समर्पणेन नर्मादिना कटाक्षादिना वा। अत एव त्रैलोक्येति श्रीभगवद्वपुषः सर्वदा त्रैलोक्यलक्ष्मीपदत्वेऽपि अधुना, अतः सर्व्वकालाद्वैशिष्ट्यं सूच्यते अनेन चकासनप्रकारोऽपि दर्शितः ॥ १३–१४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मनोरथानां तत्प्रतिपादकानाम् ॥ १३ ॥ त्रैलोक्यलक्ष्म्यैकपदं त्रैलोक्ये सौन्दर्यस्य एकाश्रयम् ॥ १४–१५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्य भगवतो दर्शनेन य आह्लादस्तेन विधूता निरस्ता हृद्रुजस्तद्विश्लेषजा मनःपीडा यासां ता गोप्यो मनोरथान्तं मनोरथप्रतिपादनाकाङ्क्षापर्यवसानं प्रापुः, यथा श्रुतयस्तद्वत् यथा भागद्वयात्मिकाः श्रुतयः तात्पर्यवृत्त्याभिधया च वृत्त्या प्रतिपिपादयिषितपरमात्मानं प्रतिपादनाकाङ्क्षापर्यवसानं प्राप्नुवन्ति तद्वदित्यर्थः। इत्थं पूर्णमनोरथा अपि प्रेम्णा तमभजन्नित्याह। कुचकुङ्कुमाङ्कितैः स्वैः स्वकीयैरुत्तरीयैरात्मबन्धवे आसनं स्वयं रचयामासुः ॥ १३ ॥ योगीश्वराणानन्तर्हृदयकमलध्ये कल्पितमासनं यस्य तथा भूतोऽपीश्वरो भगवांस्तत्र गोप्युत्तरीयरचितासने समासीनः गोपीसमुदायमध्यगतः त्रैलोक्यसौन्दर्यैकाश्रयं वपुर्दधद्बिभ्राणः चकाश दर्शयन् शुशुभे ॥ १४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मनोरथान्तं प्रार्थितार्थपूर्तिं मनोरथानामर्थानामन्तं निर्णयहेतुं परमात्मानं रथ गताविति धातुः श्रुतिविषये तस्य ब्रह्मणो दर्शनेन विषयीकरणलक्षणेन जाताह्लादेन पूर्णार्थलक्षणेनावधूता हृद्रुजो विषयीकरणलक्षणा यासां तास्तथा उत्तरीयैः प्रावरणीयवस्त्रैः आसनं विमलोत्कर्षणीज्ञानेत्यादि क्लृप्तमिव पीठम् अन्यत्रात्मनो वायोर्बन्धवे "सतो बन्धुमसति निरविन्दन्नि"तिश्रुतिः ॥ १३ ॥ गोपीपरिषद्गतः गोपस्त्रीसमूहमध्यवर्त्ती त्रैलोक्यलक्ष्मीणां त्रैलोक्यसौन्दर्याणामेकं पदं स्थानं त्रिलोकीजनसेव्या लक्ष्मीः श्रीस्तस्या एकं केवलं पदं भोगभोग्याश्रमं वा ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तद्दर्शनेति। तस्य क्रीडाविशेषौत्सुक्यस्य विभार्दर्शनेनेत्यादिको विग्रहः तथाविधेन तेन सह तत्रागमनेन रासक्रीडादिमयचिरस्थितिर्निर्द्धारिता पूर्वशङ्कापगमात् परमसुखप्राप्तिरपि जातेत्यर्थः। मनोरथान्तमिति। तत्र दृष्टान्तः श्रुतयो यथेति। तल्लीलानुभवेनोभयत्रापि परमकृतार्थत्वादिति सहोपमेयम् यथाशब्देन व्यज्यते ॥ १३–१५ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तत्र गत्वोपरिरिक्षुं श्रीकृष्णमालक्ष्य सर्वा आसनं कल्पयामासुरित्याह—तद्दर्शनेत्यादि। ता इत्यध्याहार्यम्। आत्मबन्धवे श्रीकृष्ण य आसनमचीक्लपन्। कैः स्वैरुत्तरीयैः, प्रत्येकमेवोत्तरीयमाकृष्य उपर्युपरि कृत्वा बहूच्चमासनं चक्रुरिति बहुवचन महिमा? कीदृशैः? कुचकुङ्कुमाङ्कितैः, तेनासनस्य पूजापि कथिता; अत्युच्चासनतया सर्वनिरीक्षणं सुकरमित्यर्थः। कीदृश्यः? तस्य दर्शनाह्लादेन विधूतहृद्रजः। विधूतहृद्रुक्ते दृष्टान्तः।—मनोरथान्तं यथा श्रुतयो ययुः, श्रुतयो भगवत्परा उपनिषदो यथा चिरकालकृतचरणारविन्दप्राप्तिरूपस्य मनोरथस्यान्तं परिणामं गोप्यन्तररूपेण प्रापुः। ततश्च विधूतहृद्रुजोऽपि यथा बभूवुस्तथेत्यर्थः। स्वैरुत्तरीयैरासनकल्पने सर्वा एव निरुत्तरीया बभूवुरिति न मन्तव्यम्, तदैव योगमायया प्राग्वदुत्तरीयसम्पादन कृतमिति ॥ १३ ॥ अथ तदासनस्थो भगवान् पुनरत्यन्तं व्यरोचतेत्याह—तत्रेत्यादि। तत्रासने उपविष्टो भगवान् चकास। कीदृशः? गोपीपरिषद्गत इति हेतुमद्विशेषणम्। अर्चितस्ताभिरेव सत्कृतः। योगेश्वरैरन्तर्हृदि कल्पितमासनं यस्य तस्य कल्पितत्वात्तत्र तथा न शोभत इत्यर्थः। किमिव? तत्राह—त्रैलोक्यलक्ष्म्यास्त्रैलोक्यश्रिय एकं मुख्यं पदं चिह्नं यद्वपुर्लक्ष्यरूपं वपुरिति यावत्। तद् दधत् दधानः, किं वा वपुर्दधद्वपुर्दधानं मूर्त्तमिति यावत्। तथाविधं त्रैलोक्यलक्ष्म्येकपदं त्रैलोक्यं शोभारूपमेकं वस्तुरूपकम्। पदं व्यवसिति–त्राण स्थान लक्ष्माङ्घ्रि वस्तुषु इति नानार्थवर्गात् ॥ १४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

योगेश्वरान्तर्हृदि कल्पितासन इत्यादि। तथाभूतोऽपि तत्र गोपकुचकुङ्कुमाक्तपट एवोपविष्टो रराजेत्यर्थः। योगेश्वरान्तर्हृदये उपविष्टस्तथा न राजत इति यावत्। तत्रोत्प्रेक्ष्यते वपुर्दधत् वपुर्दधानं मूर्त्तं त्रैलोक्यलक्ष्म्येकपदमिव त्रैलोक्यलक्ष्म्या यदेकं मुख्यं पदं व्यवसायः स इव मूर्त्तः, अथवा त्रैलोक्यलक्ष्म्येकपदं गोपीनां वपुर्दधत् आलिङ्गन्निति भावः। अर्चितः प्रणय–परिहास-विकस्वरवचः –प्रसूनैरिव ताभिः पूजित इत्यर्थः॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्र तासां सख्यसमुचितां प्रेमसेवामाह। तस्य कृष्णस्य दर्शनानन्देन खण्डितसर्वमनोदुःखा व्रजसुन्दर्यः स्वीयैरुत्तरीयैः कुचकञ्चुकोपरिस्थैरतिसूक्ष्मवस्त्रैरात्मबन्धवे तस्मै आसनं तथा अचीक्लपन्नुपजहुर्यथा श्रुतयो महोपनिषदोऽपि मनोरथानामन्तं परमकाष्ठां ययुः। यतोऽधिकोऽन्यो मनोरथो न सम्भवति तं प्रापुः। यद्दृष्ट्वा वयमपि व्रजे गोप्यो भूत्वा श्रीकृष्णेन सहैवं स्वकुच-कुङ्कमस्तिमितवस्त्रार्पणादिना कदा विलसाम इत्युत्कण्ठिता बभूवुरित्यर्थः। अत एव श्रुतयो गोपीत्वप्राप्त्यर्थं तदनुगतिव्यञ्जकं तीव्रं तपश्चक्रुरिति बृहद्वामनीया कथा। “स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते समाः समदृशाऽङ्घ्रि सरोजसुधा” इति तासामुक्तिश्च। तत्र पूर्वकालगतकृष्णावतारदर्शिन्यः श्रुतयो लब्धचरमनोरथा एतस्मिन् कल्पे गोप्यो बभूवुरेव। एतस्मिन् काले तु लब्धमनोरथा एताः श्रुतयोऽग्रिमकल्पे गोप्यो भविष्यन्ति श्रुतीनामानन्त्यादिति ज्ञेयम्॥ १३ ॥ तत्र प्रति स्वयूथमेव पृथक् पृथक् उपर्युपरि निहितबहुवस्त्रासनेषु ताभिः क्लप्तेषूपविष्टः। ननु तावत् संख्येष्वासनेषु कथमेक उपविष्टस्तत्राह। ईश्वरः तत्तदळक्षिततयात्मप्रकाशवान् तत्र हेतुः। भगवान् कामवान् भंग श्रीकाममाहात्म्येत्यमरः। तस्य तावत् सु सर्वेष्वेव आसनेषु उपवेष्टुं कामनामालक्ष्य ऐश्वर्यैव शक्त्या योगमायाद्वारा तावन्तः प्रकाशास्तथा प्रकाशिता इत्यर्थः। किञ्च। स हि योगेश्वरैः शेषशङ्करा-द्यैरन्तर्हृदि हृदयाभ्यन्तरे एव कल्पितं मनसैवानीतत्वात् त्रिजगद्दुर्ळभमनुपहतमनर्घ्यमासनं यस्य सः। एताभिस्तु हृदयाद्बहिरेव स्वगात्रनिर्माल्यवस्त्रैः स्वोपमुक्तसुगन्धैरासनं कल्पितं यत्तत्रैवोपविष्टश्चकाश दिदीपे यः खलु स्वयं भगवान् ब्रह्मरुद्रादिपरिषदा क्षीरोदादितीरे स्तुत्यादिभिर्गम्य एव मनसि प्रादुर्भवन् परोक्ष एव क्षणमात्रमेव भवेत् स एव गोपीपरिषदं स्वयं गतः अच्युतश्चिर-कालमपि व्याप्य च्युतिरहितः। अर्चित इति पाठे ताम्बूलनर्मस्मितापाङ्गादिना सम्मानितः। किं कर्तुं गतः त्रैलोक्ये प्राकृतप्राकृताधो मध्योर्ध्वलोके या लक्ष्मीस्तत्तदनन्तस्वांशपर्यन्तवस्तूनां नानाशोभादिसम्पात्तिस्तस्या एकमनन्यत् पदमाश्रयभूतं यद्वपुस्तदपि दधत् तासां गोपीनामङ्गकान्तिस्मितकटाक्षादिमाधुर्यैः पुष्णन्। यद्वा। तत्रोपविष्ट एव तत्र तादृशोपवेशादिविशिष्ट एव योगेश्वरान्तर्हृदि-कल्पितासनः। तत् क्षणमारभ्य महारुद्रादिभिर्योगेश्वरैर्गोपीपरिषन्मध्यगतः तादृशोपवेशतादृशशोभातत्तन्नर्मसंलापादि विशिष्ट एव कृष्णो ध्यानेन स्वहृदयमोनिन्यं इत्यर्थः॥ १४ ॥

रसिकाह्लादिनी–टीका

अधुना तासां प्रेम–विजृम्भितं चेष्टितमाह तद्दर्शनेति, ईषन्मदमानसत्वे येनान्तर्हितं तस्य दर्शनात् य आह्लाद आनन्दस्तेन विधूताः समूलं नाशिताः हृद्रजो विरहजार्तिपीडाः यासां ताः, यद्वा तस्य दर्शनं ज्ञानं विचार इति यावत् इदं रासोपयोगिस्थलं अत्र वने एवं विहारः कर्तव्यः, अत्र कालिन्द्यां एवं जलविहारः कर्तव्य इति तेन निर्धारणेन समूलं नाशिता हृदयपीडा यासां ताः। इतः परमेवाहितो नाभविष्यतीति निश्चिन्ता इत्यर्थः। मनोरथान्तं मनोरथानां वांछितात्मानामन्तं परां काष्ठां ययुः प्रापुः भाविनोऽर्थस्य निश्चयात्। यथा श्रुतयः कमकाण्डे ईश्वरमपश्यंत्यस्तप्ता भवन्ति, ज्ञानकाण्डे चेश्वरं दृष्ट्वा मनोरथान्तं प्राप्नुवन्ति पूर्णमनोरथा भवन्ति तद्वदति। यद्वा श्रुतयो नित्यविहारिणं तत्कदम्बकमध्यस्थं किशोराकृतिश्रीकृष्णं दृष्ट्वा कामितवत्य ततस्तासां वरो दत्तः। “पुरा सारस्वते कल्पे ब्रजे गोप्यो भविष्यर्थति” उपनिषद्रूपास्ताः एव कुमारिका जाताः। एता यथा मनोरथान्त मनोरथानामन्तमवसानं ययुः परिपूर्णकामा बभुवुस्तथा अन्या अपि सादि नित्याः सर्वा अपि मनोरथान्तं ययुः। अस्य रासविलासस्यैतत् प्रयुक्तत्वात्। अत एव स्वैरुत्तरोयैः कुचोपरि विन्यस्तै सूक्ष्मैः कोमलैः तैरेवासनमचीक्लपन् आसनरचनप्रयोजनमाह जिज्ञासा या किंचित्पृष्टकामा अन्वेषणजनितश्रमजलेन कुचकुकुमस्यांकितत्वम्। अत एव कुचकुंकुमांकितै रित्युक्तम्। यद्वा विरहार्त्तिजनित-रुदिताश्रुधारासिक्तत्वात् उत्तरीयानां कुचकुंकुमांकितत्वम्। अत एव स्वीयातिनिवेदनमपि सूचितम्। ननु गौरवोचितप्रीति-विषयत्वेन चेदयमाराध्यस्तर्हि स्वैरुत्तरीयैरासनकल्पनं कथमिति चेत्तत्राह आत्मबन्धवे। आत्मा च बन्धुत्वं प्रेष्ठावधिभूतप्रमबन्धन-हेतुश्च तस्मै, यद्वा आत्मनः चित्तं बध्नाति स्वस्मिन् संयोजयतीति तस्मै, यद्वा आत्मानः क्षेत्रज्ञस्य बन्धवे अन्तरङ्गाय, अत एव तस्यासनः कल्पनमुचित एव, यद्वा कुचकुङ्कमाङ्कितैरिति लिङ्गात् कुचकुंकुमछद्मना स्वानुराग एव तस्यासनत्वेन कल्पितवत्यर्थः।१३। अन्यथा पुनरप्यन्तर्हितो भवेदिति तत्रासने उपविष्टः स इति स्वरूपं भगवानपि भगवतामुपेक्ष्य ईश्वरोऽपि ईश्वरतां पृष्ठतः कृत्वेति गोपी-परिषद्गतश्चकास शुशुभे। परितो मण्डलाकारेणोपविष्टा गोत्यस्तन्मध्यवर्त्ती सभापति र्भगवानुपविष्ट इति। यद्वा भगवान्

भगो भान्यं तद्वान् अन्यथा गोपीनामुत्तरीयासनं रसविशेषकं न स्यादिति। कीदृश ईश्वर-आचिन्त्यशक्तिमान्। अन्यथा कोटियूथानां परिछिन्नं एकेन वपुषा सम्माननेन स्यादिति। गोपीनांसुलभत्वेपि अन्येषां दुर्लभता महायोगीश्वरेति योगीश्वरैः सनकादिभिः सिद्धैरेव हृदि इव ध्यानेन कल्पितमासनं यस्य तत्रापि वैभवावस्थस्य ननु साक्षात् स्वरूपस्येति। यद्वा भगवान् ईश्वर इति व्रजेन्द्रपुत्रत्वात् ताभिरर्चितः हस्तपादादिसम्मर्द्दनर्मस्मितादिना च सम्भावितः पूर्वं मदमानाभ्यामवज्ञातत्वेन परित्यज्य गतत्वात्, इदानीं तिरोधानशङ्कया बहुमानितः। अत एव त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत्। त्रैलोक्येऽउपरि वैकुण्ठपर्यन्तं या लक्ष्म्यः अधः पातालपर्यन्तं या लक्ष्म्यः भूमौ भूर्लोकपर्यन्तं या लक्ष्म्यो यावन्त्यश्च तासामेकमेव पदं स्थानं वपुर्दधत्। अन्येन त्रैलोक्ये सारभूतशोभा सम्पदो नान्यतगदमित्यर्थः। तदुक्तमत्रैव "अक्षण्वतां फलमिदमि" ति ॥ १४ ॥

विशुद्धरसदीपिका

तत्र तासां प्रेमसेवामाह। तदिति। तस्य पुळिनस्यैव दर्शनेन य आह्लादस्तेन विशेषतो धूता नाशिता हृद्रुजः कामपीडा यासां ताः मनोरथान्त तदितरलिप्सां तं ययुः कथमित्याकाङ्क्षायामाह। श्रुतय इति। ता अपि तादृशलीलाविशिष्टं तं रासविहारिणं प्राकाश्य निजनिजनानातात्पर्यदौस्थ्यं त्यजन्ति शब्दतत्पर्य्यावसानञ्च गच्छन्ति तद्वदित्यर्थः। त्वयि हि फलन्त्यतन्निरसनेन भवन्निधना इति तत् स्तुतेरेव जडत्वमासामपौरुषेयत्वादेव परास्तं, यद्वा आसु याः श्रुतयः श्रुतिरूपाः साधकचर्य्यस्तासु यथायथावन्मनोरथान्तं ययुः। मुनिरूपास्तु कुरुक्षेत्रयात्रायां यास्यन्तीत्यपि दर्शितं "सिद्धिं तु काचिदेवासां रसारम्भे प्रपेदिरे" इत्युज्ज्वलोक्तेः विधूतहृद्रुक्त्वे लिङ्गमाह। स्वैरिति। बहुत्वेन स्वैस्वैरित्यर्थः। उत्तरोयैः कुचपट्टिकासूक्ष्मवस्त्रैः कुचकुंकुमाङ्कितैः विरहरोदनगलदश्रुभिरार्द्रतया कुचकुङ्कमविन्दुभिरङ्कितैरिति स्ववेदनावेदनायेति भावः। अथवा उत्तरीयैरित्यनेनैत्र तथात्वव्यक्तेः स्वैरिति धनैरित्यर्थः। तेन सर्वस्वनिवेदनं व्यञ्जितम् अचीक्लपन्नतिशयेन कल्पयामासुः। ननु कथं लज्जाशैथिल्यमङ्गीकृतं तत्राह। आत्मबन्धवे निजसखित्वेनाभिमताय अन्यथा बन्धुपदेन रसाभासापत्तेरित्यर्थः ॥ १३ ॥ तदेवम्प्रमाणाय तस्य शोभाविशेषमावेदयति। स प्रेमाम्बुधिवर्द्धनः श्रीकृष्णचन्द्रः भगवान् श्रीराधया नित्ययुक्तः साक्षात्कारस्त्वधिकारापेक्षः एक सख्यापि नो लक्षितमित्यादेः। ननु सापत्न्यं कथं न स्फुरितं तत्राह। ईश्वरः योगमायेशः तदेत्र नित्यकाल परिचरन्त्यास्तस्याः प्रभावेण तदयोग्याभिरलक्षितलील इत्यर्थः। तथैव गोपीपरिषद्गतः ताभिरर्चितश्च आसनमित्युपचारान्तरोपलक्षणं तेनैव रूपेण योगीति योगिनोऽत्र भगवद्भक्तिसिद्धाः तादृशमुख्यरूपभगवदुपासकाः—

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मत इति ॥

श्रीगीतासु तेषामेव तथा निर्धारितत्वात् चकाश परमशोभामाविष्कृतवान् किं त्रैलोक्येति त्रयो लोका द्वारकामथुरागोकुलधामानीति त्रैलोक्यं तत्रत्या लक्ष्म्याः श्रीभूलीलाख्यास्तासामेकपदम् अनन्याश्रयं वपूरूपं दधत् प्रकटयन्नित्यर्थः ॥ १४ ॥

श्रीरामनारायणकृता भावभावविभाविका

तदा तासां गोपीनां तद्दर्शनाह्लादं तत्कृतां सेवां चाह। तद्दर्शनेति। तस्यामितपूर्णचन्द्रप्रभसुखकन्दनन्दनन्दनस्य दर्शनेनानन्दाह्लादेन सुरभिषकूशतमोहनसुरभकृष्णमुखाम्बुजसुरभिमधुमयेन विशेषेण धूना हृद्रुजो विषमशरविषमशरजा विषमज्वरा यासां ता गोप्यः मनोरथानां स्वीयसर्वाभिलाषाणां दर्शनालिङ्गनादिसंभोगान्तानामन्तः पर्य्याप्तिर्यस्मिंस्तं सर्वाभिलषितभावालम्बनरूपं, यद्व मनोरथानामन्यविषयकस्वीयसर्वकामानामन्तोऽवधिर्यस्मात् यद्दर्शनावधिरेव कामोद्भवस्तद्दर्शनोत्तरन्तु नान्यत्र कामः तदुक्तं पुरस्तात् यह्य म्बुजाक्ष तव पादतलमित्यत्र। यद्वा सर्वेषां सर्वमनोरथानां तत्प्रतिबिम्बात्मकतत्तत्सुखळेशगोचरात्वात् "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति" श्रुतेस्तथाचांशभूतसुखेषु तत्तद्विषयलाभोत्पन्नवृत्त्यभिव्यक्तेष्वेकलाभेऽन्यत्रेच्छासम्भवेऽपि तद्बिम्बपरमानन्दघनकृष्णप्राप्तावन्यत्र मनोरथासम्भवात् सर्वमनोरथानामन्तः परिसमाप्तिर्यस्मिस्तं। यद्वा मनोरूपरथानामतिधावनशीलानां कुत्राप्यनिवृत्तकामानामन्तो वेगक्षयो यस्मिंस्तं "यतोवाचो निवर्त्तन्ते अप्राप्य मनसा सहे"त्यादिश्रुतेः नैतन्मनो विशति वागुत चक्षुरात्मेत्यादि स्मृतेश्च। यद्वा "बुद्धिं स सारथिंकृत्वा मनः प्रग्रहवान् पुमान्। प्रयाति परमम्पारं विष्णवाख्यं पदमव्यय"मिति श्रुतेर्मनः प्रग्रहोपलक्षितरथस्यान्तं प्राप्यभूमिं भूमानन्दं कृष्णमेव साक्षाद्ययुः। तद्दर्शनेनैव मनोरथानामन्तं पूर्णतां ययुःप्रापुरिति वा। तत्र दृष्टान्तः श्रुतयो यथेति यथा श्रुतयः पूर्वकाण्डे कामतदप्राप्तिशोकचिन्ता सन्तप्ता विविधवर्णाश्रमवर्णितकर्मसु भ्रमन्ति तथा ता अपि साक्षाच्छ्रुतिरूपा कामशोकचिन्ताग्निसन्तप्ता नानावर्णपुष्पपर्णाद्याकीर्णवनाश्रमेषु तत्तद्वर्णितकर्मसु भ्रमित्वा पुनः श्रुतयो यथोत्तरकाण्डे तद्ध्यानगुणगानादिना तद्बोध सम्पाद्य तद्दर्शनेनाभेदसाक्षात्कारेण य आह्लादो भूमानन्दस्तेन विधूता हृद्रुजो याभिस्तथाभूताः भवन्ति "रसो वै सः रसं ह्येवायं लब्ध्वानन्दीभवति आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन तरति शोकमात्मविदित्यादि श्रुतिभ्यस्तथा तद्ध्यानगुणगानदैन्यैस्तदाविर्भावमवाप्य तद्दर्शनाह्लादविधूतहृद्रुजः यथा श्रुतयो मनोरथान्तं श्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधना इत्यादिस्वप्रवृत्तिपर्य्यवसानं ययुः। यद्वा श्रुतयो वाग्रूपा अपि मनोरथान्तं मनोवागगोचरमपि गुणगानेनैव हृदयशुद्धिद्वारा जगदध्यारोपापवादेनातन्निरसनेन ययुस्तथा गुणगानातन्निरसनाभ्यां ता अपि मनोरथान्तं ययुः। एवन्तत्प्रा-

प्रावपि मुक्ता अपि लीलया विग्रहं कृत्वा भजन्ते इति भगवत्पूज्यपादवाक्येन यो वेद निहिन्तं गुहायां परमेव्योमनसोऽश्नुतेसर्वान्कामान्सहब्रह्मणा विपश्चितेति श्रुत्या च न सेवारमणयोरभाव इति द्योतयंस्तत्सेवारम्भमाह । स्वैरुत्तरीयैरिति स्वीयैः स्वाङ्गपरिधानभूतैर्नत्वासनाय पृथगानीतैः उत्तरीयैः साटीकञ्चुकोपरिपरिधानवराम्बरैः आन्तरसानुरागद्रवीभूतान्तःकरणात्मकास्त्रैः पूर्वं विरहरोदनेनानन्दाश्रुप्रवाहणे वा निर्धूततया संलग्नकुचकुंकुमाङ्कितैः प्रथमविहारे आलिङ्गनादिसङ्घर्षेण कुचकुंकुमाङ्कितैर्वा तस्मै आत्मबन्धवे नतु कुटुम्बिजनवच्छरीरमात्रसम्बन्धिने । यद्वा स्वरूपेणात्मस्वरूपाय उपाधिनापि "सयुजा सखाया" इति श्रुत्या जीवाविज्ञातसखिरूपाय यद्वात्मस्वरूपत्वेऽपि लीलायां बन्धुरूपाय आत्मत्वेन प्रियाय बन्धुत्वेन सेव्याय चेति वा आसनं पौराणिकादीनामिवात्युच्चमचीक्लृपन् रचयामासुः, तत्रायमभिप्रायः यद्भवता पूर्वमुपदिष्टं तत्तु नापृष्टः कस्यचिद्ब्रूयादिति वचनादप्रश्ने उपदेशानौचित्यात्तथा तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवयेति वचनादासनप्रदानादिसेवाभावेऽपि तदनौचित्याच्चास्माभिरस्वीकृतम् अधुनात्वस्माभिर्व्यासासनादिदानपूर्वकं प्रश्नः क्रियते तत्पृष्टं तत्त्वतस्त्वया उपदेष्टव्यमिति तथाश्रुतिस्वारस्यादप्यस्य ज्ञानं नीरवन्नीरसंक्षीरवत्सु स्नेहम्वेति परीक्षितुमेवासनप्रदानमिति ॥ १३ ॥ तत्र भक्तानामासनरचनं न व्यर्थमपि तु भगवांस्तत्रोपविष्टः शुशुभे इत्याह । तत्रोपविष्ट इति । स भगवानीश्वरो योगेश्वरान्तर्हृदि कल्पितासनस्तत्रापविष्टो गोपीपरिसद्गतस्ताभिरर्चितस्त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधच्चकाशेत्यन्वयः । तत्र स इत्यनेन यस्मै आत्मबन्धवे ताः स्वैरुत्तरीयैरासनमचीक्लृपन् स एव भगवांस्तत्रोपविष्टः तत्र भगवत्त्वेनैव धर्मविरागज्ञानाश्रयतया योगेश्वरान्तर्हृदि कल्पितासनत्वं श्रिया शृङ्गाररसोपयोगिरूपमाधुर्यलालित्यचापल्यविविधभावदाक्षिण्यादिरूपया यशसा च भक्तप्रीयत्वजगदुद्धारकत्वादिरूपेण तत्रोपवेश ऐश्वर्यस्य तूभयोपयोगतया भङ्ग्यन्तर्गततयोक्तावपि पुनः स्पष्टं पृथक्निर्देशः तत्रयोगेश्वराणामन्तर्हृदि तु कल्पितत्वेन मनोमयमासनं यस्य स तत्र तु साक्षादुपविष्टश्चकाशेति विशेषः । अन्तर्हृदि कल्पितासन इत्यलुक्समासः । यद्वा योगेश्वरोगोवर्द्धननाथस्तासां रक्षणे नित्योद्यतस्तासां बहिरन्तर्योगाय संयोगायेश्वरः । यद्वा ताभिः स्वस्वान्तर्हृदि कल्पितं दत्तमासानं यस्मै सहृदितत्रचोपविष्टश्चकाश । यद्वा यतः स्वयमपि योगेश्वरोऽत एव स्वान्तर्हृदि तासां कल्पितमासनं येन तथाभूतः सन् ताभ्यः स्वहृदम्बरे दत्तासनस्तद्दत्ताम्बरासने उपविष्टश्चकाश सख्यभावे परस्परासनदानस्यौचित्यात् । यद्वा ताभीरचितासनानुपवेशे पूर्वमेव प्राप्तविरहखेदविकला अधुना स्वयाच्चाभङ्गे वैक्लव्येन कां दशां गताः स्युरिति तास्त्रातीति तस्त्रः सन्नुपविष्टः । यद्वा तत्रत्वादेवकासनगतोऽपि सर्वासामुप समीपे यथा भवति तथोपविष्टश्चकाश । यद्वा स योगेश्वरत्वादेव अन्तर्हृदि स्ववक्षसि ताभ्यो दत्तासनःकृतालिङ्गनः ताभिर्वा स्ववक्षःसु दत्तासनः आलिङ्गितस्ततस्तद्दत्तवहिरासनोपविष्टश्चकाश यतो बहूनां चन्द्रतारादीनामेकाम्बरस्थत्वं दृष्टं नैकस्य चन्द्रस्य बह्वम्बरस्थितिरतश्चित्रमेतदेकस्य बह्वम्बरस्थितिर्बह्वम्बरोपरिस्थितौचोप सामीप्येन वर्त्तनं तत्र कानिचिदम्बराण्यरुणानि काञ्चनाञ्चलसूर्य्योदयरागान्वितानि कानि चिदम्बराणि निशि सुघनस्यामघनावृतानीव नीलानि काञ्चनाञ्चलादिविद्युत्द्युतिव्याप्तानि कानिचित्स्वच्छनिशीव रजतबिन्दुतारागणव्याप्ता चलचन्द्रप्रकाशानि कानि चिदम्बराणि तु दिनपरिक्षये पीतरविकिरणव्याप्तानीव पीतानि स्वाञ्चलरविद्योतितानि कानिचित्तु स्वाञ्चलचन्द्रप्रभाव्याप्तशारदसितघनान्वितत्वेनेव सितानि कानिचिदम्बराणित्तु चन्द्रप्रभागणिततारागणप्रकाश–विकासेनेव सिता निद्युमन्ति च कानिचिदम्बराणि तु हरिहरिसखि बहुमुखचन्द्रसमागमोत्साहेनानन्तब्रह्माण्डगतबुधव्याप्तानीव हरि तद्युत्यन्वितानि एवं बह्वम्बरतल्पगतोऽपि त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधच्चकाश । यद्वा योगेश्वरान्तर्हृदि कल्पितासन इतिदृष्टान्तोक्तिः । यथा विषयसुखकलेशकुतपः क्लेशत्यागपूर्वकं कलेशगुणगणमजातानुरागतयातिसूक्ष्मोरूरोरागान्विते हृदयशोकाम्बरे परमहंसानां सुमानसं सुमानसं मत्वा तत्र कल्पितासनो भवति तथातासां मुरोरागान्वितेष्वतिसूक्ष्मकोशाम्बरेषु प्रविष्टश्चकाशेत यान्यम्बराणि स्वयं चौर्य्येण हृतानि तानि ताभिः स्वयमर्पितानि उरोरागयुतानि कथं तत्र नोपविशेत् अर्चित इत्यनेनासनसमर्पणानन्तरं ताभिरर्चितस्तदप्यर्च्चनं न लौकिकं किन्तु नेत्रयुगलार्घपात्रयोः पूरितप्रेमसुखांशुभिस्तत्पदसमर्पितैः पाद्यमर्घ्यं च दत्त्वा ताभिः समर्पितं स्वीयरूपमधुरसं प्रभुणा स्वयं दृक्पात्राभ्यामाचमनं कृते ततोऽधरमधुमधुसितसुस्मितदधिसुस्नेहघृतान्वितं स्वातिगौरमुखं रजतपात्रगतं दर्शयित्वा मधुमकं समर्प्य प्रमोदाब्धौ तं प्रियं स्नापयित्वा सुरागस्वाङ्गार्पणेन तदङ्गेषु रागलापनेन नचाङ्गरागं दत्त्वा पादसंवाहने पदयोः करकमलेऽर्पयित्वा कामाग्नौ मदमानदाहेन धूपं निरूप्य कुलस्नेहतल्लज्जारसनवर्त्तिकादाहकहृदयकापट्यादितमोनाशकभगवत्स्वरूपसुखप्रकारकप्रेमप्रकाशाख्यदीप संदश्यमदुध्वधरद्राक्षाफलनैवेद्यं चुम्बनेनैव स्वमुखसुवासं मुखवासं च दत्त्वा भ्रूयुगवर्त्तनेन नृत्यं दर्शयित्वा गुणगानेन सन्तोषितः गोपीपरिषद्गत इति प्रेमवृत्तिगणगताभिव्यक्तनिजपरमानन्दपरब्रह्मैवातिरत्युत्कर्षेण बहुरतिरूपासु तासु स्वाङ्गेऽङ्गीकृतवह्वनङ्गप्रभयानङ्गीकृतवह्वनङ्गस्त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधच्चकाश इतित्रैलोक्य लक्ष्म्याः शोभाया एकं पदमाश्रयं, यद्वा त्रैलोक्यस्याधिष्ठानतया लक्ष्म्याश्च स्ववक्षसि तन्निवासतया एकं, पदं यद्वा पादोऽस्यविश्वा भूतानि एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतिभ्या त्रैलोक्यं तल्लक्ष्मीस्तज्जीवनहेतुसुखदश्रीश्चैकं पदमंशो यस्य, यद्वा त्रैलोक्यलक्ष्म्या एकं मुख्यं पातीति पं पतिरूपं ददातीति दं दातृ च तत्तथा लक्ष्म्यैकपदमिति पाठेतु आङ् पूर्वकम् एकपदमिति सर्वत्र व्याख्येयं । यद्वा त्रैलोक्यलक्ष्म्यै शोभार्थकपदं वपुर्दधच्चकाश तत्र कपदमिमिति चतुर्मुखोऽपि पदमंशो यस्येति । यद्वा कानि ब्रह्माण्डानि तदारोपिततया पद्यन्ते यस्मिंस्तत् । यद्वा कानां बहुमदनानां पदं बहुकामसदृशरूपं यद्वा सर्वकानां सुखानां पदं समाश्रयं तद्विम्वात् । यद्वा कः स्वर्गेऽपि पदमंशो यस्य यद्वा कं जल

क्षीरनिधिः सर्गजलनिधिर्वा पदं यस्य। यद्वा कानि सर्वसुखानि पद्यन्ते प्राप्यन्ते अनेनैतदाराधनेनेति तत्। यद्वा कं सुखरूपञ्च तदेव पदं सर्वाधिष्ठानं तथा पद्यन्ते ऽस्मिन्निति पदं सर्व प्रपत्तिगोचरं च तथा पद्यते फलरूपतया प्राप्यते इति पदं चेति तथाभूतं तासां कपदं सर्वसुखास्पदं वपुर्दधच्चकाश ॥ १४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथ गोपीनां कृत्यमाह। तस्य क्रीडोत्सुकस्य विभोर्दर्शनेन योऽह्लादस्तेन नाशिताः तद्विरहरूपहृदयरोगाः यासां ता मनोरथस्यान्त पूर्णकामतां ययुः। यथा श्रुतयः परमात्मनि समन्वयं प्राप्य कृतकृत्याः भवन्ति, तद्वत् ततः सुस्थिरचित्ताः सत्यः कुचकुङ्कुमेन स्वेन्दार्द्रेनाङ्कितैः स्वीयैरुत्तरीयैरासनं कृतवत्यः यत आत्मबन्धवे अनभिज्ञापक्षे अन्तर्यामिणे तदुत्तरपक्षयोः स्वप्रेष्ठाय तथा च तादृशोत्तरीयैस्तदासननिर्माणं सूचितमेवेति भावः। एतेनाहोपूर्वमुपदेशं कर्तुं प्रवृत्तोऽस्माभिर्निवारित आसीत् कदाचित्तद्दुःखादेव तिरोहितः स्यादतोऽधुना प्रथमं व्यासासनोपर्य्युपवेश्यैतन्मुखारविन्दादुपदेशोग्राह्य इत्याशयेनैवङ्कर्तुं प्रवत्ता इति ध्वनितं निवृत्तिपक्षे ताः श्रुतीः स्वप्रतिपादकत्वे समादाय कालिन्द्याः मायायास्तीरं शुद्धान्तः करणं निर्विश्य विभुर्व्यरोचत विकाशं प्राप्य कुन्दमन्दरादिस्थानीयैः यमनियमादिभिः सुरभिर्योऽस्ति निरुद्धः प्राणवायुस्तेन निरुद्धषट्पदं षड्वर्गो यत्र पुनश्च शरत्कालस्थानीयेन निष्कामभगवदाराधनलक्षगेन कर्मणोदितो विवेकाख्यश्चन्द्रस्तस्य विचारलक्षणानामंशूनां सन्दोहेन समूहेन ध्वस्तारागद्वेषादिदोषलक्षणमासमन्तात्तमो यस्मिन् अत एव शिवं कल्याणरूपं पुनश्च कृष्णाया अविद्यायाः हस्तलक्षणैस्तरङ्गैरात्मानमात्मज्ञानभेदैराऽऽचिता असंस्पृष्टाकोमला वालुकास्थानीयाः वृत्तयो यस्मिन् तस्यप्रत्यगभिन्नस्य परमात्मनो दर्शनेन योऽह्लादस्तेन विधूतास्तद्वादिकल्पिताः विपरीताभिप्रायरूपाः हृदयरोगा यासां तात श्रुतयः मनोरथस्याखण्डैकरसपरमात्मप्रतिपादनाभिलाषस्यान्तं समाप्तिं ययुः। कुचकुंकुमेन कर्मोपासनाद्यनुष्ठानसहितपरमात्मानुरागेणाङ्कितैः स्वीयैरुत्तरीयैः स्वजन्यप्रत्ययैः आत्माबन्धवे औपनिषदाय परब्रह्मणे आसनमभिव्यक्तिस्थानं कृतवत्यः ॥ १३ ॥ स भगवानपि ईश्वरः स्वतन्त्रोऽपि तत्र ताभिरुत्तरीयैर्निर्मित आसने उपविष्टः किञ्च योगीश्वरैर्ब्रह्मादिभिरन्तर्हृदि एकाग्रे मनसि कल्पिमासनं यस्य तथाभूतोऽपि यद्यप्येवं तथापि गोपीपरिषद्गतः तत्समापतिः ताभितताम्बूलनर्मस्मितादिना अर्चितः सन् अधिकं शुशुभे, यतस्त्रैलोक्यस्य चतुर्दशभुवनस्य या सौन्दर्य्यलक्ष्मीः तस्याएव मुख्यं पदमाश्रयं वपुर्नरविग्रहं दधत् प्रकटयन् सन्। यद्वा गोपीपरिषद्गतत्वादिरूपेण योगीश्वरान्तर्हृदि कल्पितासनः अत्रोत्तरीयैरासनस्य निर्माणेऽपि तदन्तस्तादृशवस्त्रान्तरस्य सत्त्वात्तत्क्षण एव भगवत्कृपया दिव्योत्तरीयोद्भवसंभवाच्च न तासां रसाभासकरा नग्नाताशङ्का निवृत्तिपक्षे तत्र योगीश्वरान्तर्हृदि कल्पितासनो भगवानीश्वरः सः परमात्मा गोपीनां गोपस्य स्वसत्तास्फूर्तिप्रदानेन सर्वपालकस्य देवस्यावबोधनपराणां श्रुतीनां समाप्तिस्तत्प्रतिपाद्यतया अर्चितः निखिलप्रपञ्चशोभाया एवमाधिष्ठानभूतं वपुर्दधत्॥१४॥

रास–रहस्यम्

र० टी०—यथा श्रुतयः पूर्वमीमांसाकाण्डे तत्तद्वर्णाश्रमादिषु तत्तत्कामप्राप्त्यर्थं तत्तदनुष्ठाननिमित्तं विविधद्रव्यचिन्तया सन्तप्ता भूत्वा पुनरुत्तरकाण्डे-उपनिषदि श्रवणमनननिदिध्यासनेनाभेदरूपेण पूर्णानन्दकेवलब्रह्मणि पर्यवस्यन्ति, तथा वृत्तयः तत्परमात्मदर्शनं साक्षात्कारः तज्जन्याह्लादेन भूमानन्दावाप्तिना, विधूतहृद्रुजो विशेषेण धूतो निरस्तसमस्तवासनारोगः यासां ताः, मनोरथान्तं ययुः अनिवृत्तकामानां मनोरूपरथवेगस्यान्तं पर्यवसानं "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।" "यो वेद विहितं गुहायां परमेव्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते" त्यादि श्रुतिभिः, ययुः पूर्णकामाः जाताः। अथ आत्मबन्धवे "आत्मैव आत्मनो बन्धुरात्मैव रिपुरात्मनः।" इति वचनात् आत्मज्ञानस्य दृढीकरणार्थं कुचकुङ्कुमाङ्कितैरात्मानुरागेण रञ्जितैः, स्वैरुत्तरीयैः स्वमात्मा तत्सम्बन्ध्युत्तरीयः आवरणविशेषस्तै, कथम्भूतै? "अहं ब्रह्मास्मी"ति भावनामयैः ध्यानैः, अन्तःकरणलक्षणमासनं, अचीक्लृपन् रचयामासुः ॥ १३ ॥ भगवान् ईश्वरः जीवानामन्तर्हृदये स्थित्वा यमयति यः सः परमात्मा, योगेश्वरान्तर्हृदि योगेश्वराणां ब्रह्मात्मैक्यसंस्थितानां सिद्धयोगानामन्तर्हृदये हृदयकमलमध्ये, कल्पितासनः कल्पितं विरचितमासनं यस्य, एवं त्रैलोक्यलक्ष्म्येकपदं त्रिलोक्यां भवं त्रैलोक्यं तस्मिन् या लक्ष्मीः शोभा तस्या एकमेव पदं आश्रयभूतं अथात् सर्वाधिष्ठानतया पद्यते फलरूपतया प्राप्यते इति पदं, वपुर्दधत् वपुरिव वपुः विभ्राणो दर्शयन्, सः परमात्मा तत्र तस्मिन् आसने उपविष्टः उप आधिक्येन विष्टः प्रविष्टः अर्थात् समाध्यवस्थां प्राप्य, गोपीपरिषद्गतोऽर्चित तदाकारावृत्तिभिः परिवेष्टितः सन् सेव्यमानतया च चकास परमशोभां प्राप्तवान् ॥ १४ ॥

गूढार्थदीपिनी

तस्य हरेर्दर्शनाह्लादेन विधूता निवृत्ता हृद्रुजः वियोगजन्यपीडा यासां ताः। यथा श्रुतयः ज्ञानकाण्डे ब्रह्म प्रतिपाद्य पूर्णमनोरथा भवन्ति तथा। आत्मबन्धवे कृष्णाय आसनम् अचीक्लृपन् रचयामासुः ॥ १३ ॥ त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव पदम् आश्रयभूतं वपुः दधत् प्रकटयन् चकास शुशुभे ॥ १४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

योगेश्वराणामन्तर्हृदि हृदयमध्ये कल्पितमासनं यस्यैवं भूतः सः श्रीकृष्णः त्रैलोक्ये या लक्ष्मीः शोभाः तस्याः एकमेव पदमाश्रयं वपुर्दधद्बिभ्राणः तत्रासने उपविष्टः गोपीपरिषद्गतः गोपीसभागतः ताभिरर्चितः सन् चकाश शुशुभे ।। १३–१४ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तद्दर्शनाह्लादेन विधूता हृद्रुजस्तद्दर्शनाभिमर्शनजा आमया यासां ताः। अन्यत्र तद्दर्शनेन तद्विषयीकरणहेतुना व्यक्त आह्लादस्तदभिमानिद्वारा तासां तेन विधूता हृदजो स्वरहस्यार्थो ननु वर्णनकरणका रोगा यासां ता मनोरथान्तं प्रार्थितसुरताद्यर्थपूर्ति अन्यत्र मनोरथो मनोगतिस्तस्यान्तमित उत्तरं गम्यं नास्तीति निर्णयं श्रुतयो वेदा यथा यान्ति तथा ययुः। पक्षे द्वयेऽप्यतृप्तिरेव भूषणमिति। अमनोरथान्तमिति विभजनेनार्थस्तु। यतो वाचो निवर्तन्ते। नातृप्यन्नित्यादे रसविशेषद इति रसिकौर्महः। कुचकुङ्कुमाङ्कितैः स्वैरुत्तरीयैः प्रागरणयद्धै राधाबन्धवे आत्मनः स्वकीयस्य पितुर्बन्धुर्जामाता तस्मै स्वप्राणनाथाय याऽऽसनमचीक्लृपन्कल्पयामासुः। तदुपरि तमुपवेशयामासुः ।। १३ ।। तत्र तत्कल्पितासने उपविष्टः स भगवानीश्वरो योगेश्वराणां महायोगिनामन्तर्हृदि। विभक्त्यर्थेऽव्ययीभावः तृतीयासप्तम्योर्बहुलमिति नाम्भावः। हृदय इत्यर्थः। हृदयान्तः कल्पितं तैरासनं यस्य स सोऽपि तत्रोपविष्ट इति कारुण्यं तासु ध्वन्यते। इदं नटनमिति वा। गोपीपरिषिद्गतन्ताभिरर्चितश्च। त्रैलोक्यलक्ष्म्येकपदं। त्रिलोक्या इमास्त्रैलोक्यास्ता लक्ष्म्यः शोभान्तासामेकपदं मुख्याधिकरणं वपुःशरीरं दधच्चकास चकासे शुशुभे ।। १४ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो गोपिकानां कृत्यमाह। तद्दर्शनाह्लादेति। शोके गतेऽपि कामस्तापात्मका वर्त्तत एव सम्बन्धस्य जातत्वात् यदा पुनस्तादृशस्थाने तदर्थं गतः तदा तद्दर्शनेन तस्य तदवस्थामापन्नस्य दर्शनेन योऽयमाह्लादः भाव्यर्थनिश्चयात् तेन विधूताः हृद्रुजो यासामेवं निवृत्तदोषे तासां यज्जातं तदाह। मनोरथान्तं ययुरिति। ताभिर्यथाकथाञ्चेत्संबन्धोऽभिलषितः जातस्तु ततोऽनन्तगुणसामग्रीसहितः अतोमनोरथस्याप्यन्तो यत्र तादृशं ययुः। नन्वनभिलषितं कथं प्राप्नुयुः तत्राह। श्रुतयो यथेति। श्रुतयो हि निरन्तरं भगवद्गुणवर्णनपरा तेन धर्मेण वाचः पूर्वरूपं यन्मनः तस्यापि यदगम्यं भगवत्स्वरूपं तत्प्राप्तवत्यः "यतो वाचो निवर्त्तन्तेअप्राप्यमनसा सहेति भगवदानन्दः मनोरथान्तो भवति तत्प्रतिपादकाः श्रुतयो जाताः सर्वे च मन्यन्ते "तन्त्वौपनिषदं पुरुषं पृच्छामि अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति सर्वे वेदा यत्पदमामनन्ति" इत्यादिवाक्यैः ब्रह्मणि श्रुतयः प्रमाणमित्यध्यवसीयते। सर्ववेदान्तप्रत्ययमितिन्यायाच्च अलौकिको वेदार्थः अलौकिका वेदशब्दाः लोके च न सङ्केतः तथापि निरन्तरं भगवत्कार्य्यं कथयन्तीति लोकाः तच्छ्रवणेन शुद्धान्तः करणाः स्वयमेवालौकिकविषये सामर्थ्यं मन्यन्ते। श्रुतिश्च तत्प्रतिपादिका भगवदिच्छया नात्र लौकिकं साधनमपेक्षते युक्तिं वा तथा एतासामपि मनोरथान्तप्राप्तिः एवम्परमपुरुषार्थदातुर्भगवतोऽन्यत्राभिनिवेश आधारधर्मसम्बन्धात् स्वस्य कृतार्थता न भविष्यतीति पूजार्थमात्मनिवेदनार्थं च आसनं चक्रुरित्याह। स्वैरुत्तरीयैरिति तद्देशस्थानां स्त्रीवस्त्राणि त्रीणि भवन्ति परिधानीयं कुचपट्टिका उपरिवस्त्रञ्च सर्वाभिरेव स्वोपरिवस्त्राणि आसनार्थं दत्तानि उपरि वस्त्राण्यपि द्विविधानि भवन्ति सर्वदापरिधेयानि भोगसमये च तानि सूक्ष्माणि भवन्ति तान्येव भगवते दत्तानीति ज्ञापयितुमाह। कुचकुंकुमाङ्कितैरिति। शुष्काण्यपि कुंकुमानि क्रीडायामार्द्राणि भवन्ति, अतः तेनाङ्कितानि उत्तरीयाणि अचीक्लृपन् कल्पयामासुः। ननु स्वोपरिधेयं कथमधः कल्पयांचक्रुरित्याशङ्क्याह। आत्मबन्धव इति। आत्मनः स एव बन्धुः रक्षिता तदर्थमेव देहः स्वात्मा च अत उपर्याच्छादनमपि तदर्थमिति तस्यासनक्लृप्तिरुचिता ।। १३ ।। ततो भगवान् तासु सर्वत्र निविष्ट इति ख्यापयितुं तद्दत्तासन उपविष्ट इत्याह। तत्रोपविष्ट इति। भगवानिति तेषां कार्यसाधकत्वं ननूत्तरवस्त्रापगमे सभायां रसाभासो भवेत् अतः कथमुपविष्ट इति चेत्तत्राह। स ईश्वर इति। स पूर्वं प्रार्थित ईश्वरः सर्वकरणसमर्थः अतः तासां दिव्यानि वस्त्राणि संपन्नानीति बोधितं येषां जलक्रीडायां न वाससामार्द्रता अतः सर्वकरणसमर्थः तत्रोपविष्टः सः पूर्वप्रार्थितः। ननु भगवान् अपवित्रे भोगादिलेपयुक्ते कथमुपविष्ट इतिचेत्तत्राह। योगेश्वरान्तर्हृदिकल्पितासन इति। योगेश्वराणां हृदयं शुद्धं तत्राप्यन्तर्हृदयं तत्रापि कल्पितमेव भगवदासनं नतु क्लृप्तं मानसो मूर्तिस्तिष्ठति नतु कदाचिदपि स्वयमुपविष्टः मुख्यमासनमेत्तदेव अतश्चकाश परमशोभां प्राप्तवान्। पूर्ववद्गोपीनां परिषदं गतश्च जातः परितो गोपिका उपविष्टः इत्यर्थः। सभापतिर्भगवान् अतः ताभिरर्चितः ततो भगवान् तासामर्थ त्रैलोक्ये यावन्ति लक्ष्मीरूपाणि इन्द्रपदादीनि तासां यदेकं पदं यस्यांशविलासाः तत्तल्लक्ष्मीभोक्तारः तादृशं वपुर्धृतवान् अस्मिन्नर्थे देशकालादिभेदेन यावन्त उत्कृष्टा अर्था अपेक्ष्यन्ते तान् प्रकटितवान् तादृशवपुर्धारणेन ।। ४१ ।।

श्रीसुबोधिनी-सारः

तस्य हरेर्दर्शनादाह्लादेन हर्षेण विधूता नष्टा हृद्रुजो मानसीपीडा यासां ता गोप्यो मनोरथानामन्तं ययुः प्रापुः पूर्णकामा बभूवुः। श्रुतयो वेदान्तवाक्यानि यथा। कुचानां कुचेषु वा कुंकुमानि तैरंकितैश्चितैः स्वैरुत्तरीयैर्वस्त्रैरात्मनो बन्धवे श्रीकृष्णायासनं

रचयाञ्चक्रुः ॥ १३ ॥ योगेश्वरैरन्तर्हृदि हृदयमध्ये कल्पितमासनं यस्य योगेश्वराणामन्तर्हृदि कल्पितमासनं येनेति वा स भगवानीश्वरो गोपीनां परिषदि सभायां गतस्ताभिरर्चितः सम्मानितः त्रैलोक्ये या लक्ष्मीः शोभा तस्य एकमेव पदं स्थानं वपुः शरीरं दधत् सन् चकासे शुशुभे ॥ १४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

श्रुतयो यथेत्यत्र, श्रुतयो हीत्यारभ्य **युक्ति** वेत्यन्तम्। अत्रायं भावः। **श्रुतिष्वस्त्यंशद्वयम्।** भगवत्स्वरूपानुभूतिः, अन्येषां तत्सम्पत्तौ साधनत्वं च। तत्र स्वशक्त्यैव चेत्तदनुभवो भवेत्तदा 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'ति न वदेयुः। भगवदनुग्रहेणानुभवैकवेद्यत्वभावे श्रुतिनां वाग्रूपत्वादेवं कथने वदद्व्याघातश्च स्यात्। अतः श्रुतीनां पूर्वं तदप्राप्तिः, सततं तद्गुणवर्णनेन तदनुग्रहात्पश्चादनुभवो भगवदानन्दस्येति तथोक्तिरिति मन्तव्यम्। एतदेवोक्तं **श्रुतयो जाता** इत्यन्तेन ग्रन्थेन। **अपरञ्च।** 'तं त्वौपनिषदं पुरुषं पृच्छामी'त्यादि श्रुतिभ्योऽन्येषां भगवज्ज्ञानं श्रुत्यादिभिरेव भवतीति निश्चितम्। तच्च श्रुतीनां वाग्रूपत्वाद्यतो वाचो निवर्तन्त' इत्यादि श्रुतिभ्योऽसम्भावितम्। एवं सत्युभयविरोधपरिहाराय श्रुत्युक्तभगवद्धर्मश्रवणेन तत्कृत्या च भगयदनुग्रहे भक्तौ जातायां स्वयमेव तदानन्दानुभवयोग्यता भवतीति वाच्यम्। तदेतदुक्तं **सर्वं** चेत्यारभ्य **युक्ति** वेत्यन्तेन ग्रन्थेन। एवं सति प्रकृतेंऽशद्वयबोधनार्थमयं दृष्टान्तः। तेन सार्धाध्यायत्रयेण निरूपितस्नेहेन वशीकृतेन प्रभुणा कृत्वैतासां मनोरथान्तप्राप्तिः। अन्येषामपि कृतपुण्यपुञ्जानामेतदुक्तिश्रवणकीर्तनादिना एतद्भावानुसारेण भजनेन च भगवदानन्दानुभावो भविष्यतीत्युक्तं भवतीति। ननु सर्वथा वागविषयत्वे त्वेवं कथनमपि न सम्भवति, अनेनैव प्रकारेण तथा त्वस्य प्राप्तेः। किञ्च। भगवदानन्दानुभवहेतुत्वेन हि गुणवर्णनं श्रुतीनां पूर्वमुक्तं तदप्येवं बाधितं भवेत्। तथा सत्येवं निरूपणमपि बाधितम्, अतो निषेधमुखेनैव वागविषयत्वं, न विधिमुखेनेत्यस्याः श्रुतेस्तात्पर्यमिति चेत्। तत्राहुः **श्रुतिश्च तत्प्रतिपादिके**त्यादि। प्रतिपादनं हि तद्बोधकवाक्यकथनम्, बोधश्च न शक्तिग्रहं विना। लोके तद्वाचकशब्दाप्रसिद्ध्या सोऽपि न सम्भवदिच्छयैवेत्यर्थः। अत एव भगवतोक्त 'मतोऽस्मि लोके वेदे च प्रथित' इति। मुक्त्युच्छेदाभावाय तथेच्छा। यदप्युक्तं **सर्वथा वागविषयत्वे**त्यादि, तत्राप्युच्यते। जीवानां सर्वपुरुषार्थसिद्ध्यर्थं हि भगवान् वेदमाविश्चकार। तत्र येन रूपेण साधनात्मकेन यः पुरुषार्थो यादृशाधिकारिणः सिध्यति, तद्रूपं तं पुरुषार्थं तमधिकारिणं च श्रुतिर्निरूपितवती मोक्षपर्यन्तम्। एवं करणे सन्तुष्टो भगवान् यद्रूपं प्रकटीकृत्य यमानन्दं दत्तवान्, तद्रूपं स आनन्दश्च पूर्वं न ज्ञातौ, अधुनापि मनोवागविषय इत्येतादृशमपि फलात्मकं वस्त्वस्तीति ज्ञापनाय चाहुः। 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने'ति। अत्र पूर्वार्धमानन्दस्य विशेषणम्। तथा चैतस्मात्पूर्वं 'रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवती'त्यादिना यद् भगवत्स्वरूपं निरूपितं तत्सर्वात्मभावैकलभ्यम्, न त्वन्यथेति ज्ञापयितुं सर्वात्मभावस्य निर्वचनमशक्यमिति तद्व्यञ्जकं धर्मामाहोत्तरार्धेन। एतादृशमानन्दं यो विद्वान् ज्ञातवान् वा स कुतश्चन लोकाद्वेदात् किं बहुना परीक्षार्थं साक्षाद् भगवदुक्तोल्लङ्घनान्मानादिदशायां तदतिक्रमादपि न बिभेतीत्यर्थः। मोक्षसाधनस्य स्वकृतिसाध्यत्वेन तत्र श्रवणादीनि साधनान्युक्तानि, अत्र तु भगवदनुग्रहैकलभ्यत्वेन स्वकृत्यसाध्यत्वादनुवाद एव कृत इति। **स्वैरुत्तरीयै**रित्यस्याभासे, **आधारधर्मसम्बन्धा**दित्यादि। स्वामिन्यो हि सर्वांशे स्वसम्बन्धमेव प्रियस्यापेक्षन्ते, तद्भावस्वाभाव्यात् प्रभुश्च तदर्थमेवाधुना प्रकट इति न तदन्यस्य तत्सम्बन्धयोग्यतापि। अत एवाग्रे वक्ष्यति **कल्पितासन** इतीति भावः ॥ १३ ॥ **स ईश्वर** इत्यत्र, **येषां जलक्रीडाया**मित्यादि। जलक्रीडानन्तरं येषामार्द्रता न तिष्ठतीत्यर्थः। **योगेश्वरान्तर्हृदी**त्यस्याभासे, अपवित्रेत्यादि। लोके वेदे च पवित्रत्वेन यादृशं वस्तु नोपादेयं तादृशमप्येतत्सम्बन्धियोगेश्वरान्तर्हृदयादपि भगवत उपादेयं यत्र, तत्र लोकादिषूपादेयत्वेन प्रसिद्धं यादृशं तादृशस्य एतत्सम्बन्धिनो वस्तुनः का वार्तेति ज्ञापयितुमेवं कथनमिति ज्ञेयम् ॥१४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्य भगवतो दर्शनेन य आह्लादस्तेन विधूता निरस्ता हृद्रुजः तद्विश्लेषजा मनःपीडा यासां ता गोप्यो मनोरथस्यान्तं पर्यवसानं ययुः पूर्णमनोरथा जाता इत्यर्थः। तत्र दृष्टान्तमाह—श्रुतयो यथेति। श्रुतयो यथा कर्मकाण्डे तत्तत्काम्यकर्म प्रतिपादयन्त्यः पूर्णाः, ज्ञानकाण्डे त्वरीश्वरं प्रतिपाद्य पूर्णमनोरथा भवन्ति तथेति। 'तथाविधास्तमभजन्' इत्याहस्वैरिति। आत्मनां जीवानां बन्धवे परमोपकारिणे कृष्णाय रोदनाश्रुक्षालितैः कुचकुङ्कुमैरङ्कितैः स्वकीयैरुत्तरीयवस्त्रैरासनमचीक्लपन् रचयामासुः ॥ १३ ॥ भगवतो भक्तवात्सल्यमान–तत्रेति। योगेश्वराणां सिद्धयोगानामन्तर्हृदि हृदयकमलमध्ये कल्पितमासनं यस्य। तत्र हेतुः–ईश्वरो सर्वनियन्ता। तत्रापि हेतुः–भगवान् ऐश्वर्यादिपूर्णः। एवंभूतोऽपि त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव पदमाश्रयभूतं वपुर्दधत् बिभ्राणः सः श्रीकृष्णस्तत्र गोपीकुचकुङ्कुमाङ्कितोत्तरीयकल्पितासने उपविष्टः गोपीनां परिषद्गतः सभागतस्ताभिः सभाजितः सम्मानितश्च संश्चकास शुशुभे इत्यन्वयः ॥ १४ ॥

अन्वितार्थप्रकाशिका

तदिति ॥ तस्य हरेर्दर्शनेन य आह्लादस्तेन विधूता निरस्ता हृद्रुजः तद्विश्लेषजा मनःपीडा यासां ता गोप्यो यथा कर्मकाण्डेष्वपूर्वाः श्रुतयो ज्ञानकाण्डे ईश्वरं प्रतिपाद्याभिप्रायपर्यवसानात्पूर्णमनोरथा भवन्ति तथा मनोरथस्यान्तं ययुः पूर्णमनोरथा जाताः । आत्मबन्धवेऽन्तर्यामिणे हरये कुचकुङ्कुमैरङ्कितैः स्वैः स्वकीयैरुत्तरीयवस्त्रैरासनमचीक्लपन् रचयामासुः ॥ १३ ॥ तत्रेति ॥ भगवान् ईश्वरः योगेश्वराणां सिद्धयोगानामन्तर्हृदि हृदयकमलमध्ये कल्पितमासनं यस्य त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव पदमाश्रयभूतं वपुर्दधत् बिभ्राणो दर्शयन् सः श्रीकृष्णस्तत्र गोपीकुचकुङ्कुमाङ्कितोत्तरीयकल्पितासने उपविष्टः गोपीनां परिषद्गतः सभागतस्ताभिः सभाजितः संमानितश्च संश्चकास शुशुभे । गत्यर्थककसधातोर्लिट् धातूनामनेकार्थता ॥ १४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदिति तद्दर्शनाह्लादेन विधूताः हृद्रुजो हृदयरोगा यासां ताः गोप्यः मनोरथस्य स्वेप्सितार्थस्य अन्तं परिपूर्णतां ययुः श्रुतयो यथा हरि लीलाप्रतिपदिकागताऽन्याभिप्रायाश्च श्रुतयः प्रतिपाद्यं स्वरूपं प्राप्य कृतार्थतां ययुस्तद्वदित्यर्थः । स्वैः स्वकीयैः आत्मबन्धवे जीवात्ममित्राय द्वासुपर्णा सयुजासखायेति श्रुतेः अचीक्लपन् विरचयन्ति स्म ॥ १३ ॥ योगीश्वराणां अंतर्हृदिहृदये कृतासनः गोपीनां परिषदि सभायां गतो वर्त्तमानः ताभिरर्चितत्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव पदमाश्रयं वपुःस्वरूपं दधत् प्रकाशयन्सन् चकासशुशुभे ॥ १४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शरदिति ॥ शरच्चन्द्रांशूनां शरत्संबन्धिचन्द्रकिरणानां ये संदोहाः समूहास्तैर्ध्वस्तं नाशितं दोषातमो रात्रिध्वान्तं यस्मिंस्तत्, तथा कृष्णाया यमुनायाः, हस्ता इव ये तरलास्तरङ्गास्तैराचिता विस्तृताः कोमला वालुका यस्मिंस्तत्, शिवं सुखकारकम्।१३।
तदिति ॥ तस्य भगवतो दर्शनेन य आह्लादस्तेन विधूता निरस्ता हृद्रुजस्तद्विश्लेषजा मनः पीडा यासां ताः गोप्यः, यथा श्रुतयः भागद्वयात्मकाः श्रुतयः, तात्पर्यवृत्त्या अभिधया च प्रतिदिपादयिषितपरमात्मानं प्रतिपाद्य प्रतिपादनाकाङ्क्षापर्यवसानं प्राप्नुवन्ति तद्वदित्यर्थः । मनोरथान्तं मनोरथप्रतिपादनाकाङ्क्षापर्यवसानं, ययुः प्रापुः । इत्थं पूर्णमनोरथा अपि प्रेम्णा तमभजन्नित्याह । कुचकुङ्कुमाङ्कितैः, स्वैरात्मीयैः, उत्तरीयैः प्रावरणीयवस्त्रैः, आत्मबन्धवे निजान्तरङ्गहितकारिणे, तस्मै आसनं, अचीक्लपन् रचयामासुः ॥ १४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तद्दर्शनेतिः १०.३२.१३.

अयं स्वयमकामोऽस्ति नीरजस्थितिसंस्तुतः । युक्तं ताभिः कामुकीभिर्योजितः कुङ्कुमासने ॥ ५७ ॥
सौभाग्यमस्मदीयं त्वदेकशरणं त्वदाश्रितं जगति । तन्मा जहीहि तमिति प्रबोधयन्त्यस्तथासनं प्रददुः ॥ ५८ ॥
योगोपासनयोः किंचिच्छिष्यते रजसः स्थितिः । तां बोधयन्त्यश्चक्रुस्ताः सकुङ्कुममिहासनम् ॥ ५९ ॥
धन्यं श्रीशकरस्पर्शात् परिधानीयमम्बरम् । स्वोत्तरीयं तथेशाङ्घ्रिस्पर्शादस्त्विति तद्दधुः ॥ ६० ॥

तत्रोपविष्ट इतिः १०.३२.१४.

भक्तप्रकल्पितरजोगुणराजिभाजि तिष्ठन् सदा मृदुपदे हृदयाम्बरेऽहम् ।
तद्गोचरस्तदनुचिन्तितकामदाता स्यामित्यबोधि विभुनाऽऽसनशोभितेन ॥ ६१ ॥

कृष्णप्रिया

वियोगोत्तर प्रियतम श्रीकृष्ण चन्द्रजी के दर्शन जन्य आह्लाद-आनन्द से गोपियाँ के हृदय के रोग-क्लेश दोष धो गए जैसे श्रुतियाँ निरन्तर भगवद् यशोगान करने से मन से भी अगम्य गोविन्द जी का साक्षात्कार पाले वैसे व्रजवनिताओं ने अपने प्रियतम का दर्शन और प्राप्ति के मनोरथों को सिद्धकर लिए । प्रभु प्राप्ति के अनन्तर गोपियाँ ने अपनी आत्मा भगवान् श्रीश्याम सुन्दर जी को विराजने के लिए अपने वक्षःस्थल में लगाए कुङ्कुम केशर के लेपसे अङ्कित उत्तरीय वस्त्रों से दिव्यासन सजा दिया ॥ १३ ॥ राजन् ! योगानुष्ठान निष्ठ योगेश्वरों अपने विशुद्ध हृदय के भीतर के अतिविशुद्ध हृदय को भगवान् विराजने के लिए आसन को बना लेते हैं फिर भी वहाँ भगवान् की मानसी मूर्ति ही विराजमान होती है साक्षादानन्दमात्र करपादमुखोदरादि स्वरूपसे नाथ नहीं विराजते हैं वह पूर्णानन्दमय श्रीनन्द नन्दन भगवान् व्रजवनिताओं के उत्तरीयवस्त्र निर्मित आसन पर विराजमान हो गए । तब गोपियाँ की परिषद् में विराजमान एव गोपीजनों से समर्चित सर्वेश्वर श्रीकृष्ण भगवान् का श्री विग्रह तीनों लोकों की लक्ष्मी के सौन्दर्य का मात्र एक अधिष्ठान स्वरूप बन गया ॥ १४ ॥

सभाजयित्वा तमनङ्गदीपनं सहासलीलेक्षणविभ्रमद्भ्रुवा[1] ।
[2]संस्पर्शनेनाङ्ककृताङ्घ्रिहस्तयोः [3]संस्तुत्य ईषत्कुपिता बभाषिरे ॥ १५ ॥

गोप्य ऊचुः

भजतोऽनुभजन्त्येक[4]एक एतद्विपर्ययम् । नोभयांश्च भजन्त्येक एतन्नो ब्रूहि साधु भोः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—सहासलीलाईक्षणविभ्रमभुवा, अलङ्कृतअङ्घ्रिहस्तयोः, संस्पर्शनेन, अनङ्गदीपनम्, तम्, सभाजयित्वा, संस्तुत्य (पुनः) ईषत्, कुपिताः, बभाषिरे ॥ १५ ॥ गोप्यः, ऊचुः, एके, भजतः, अनुभजन्ति, एके, एतत् विपर्यम् (अपि, अनुभजन्ति) च, एके, उभयान्, (अपि) न, भजन्ति, भोः ? एतद् (विषये) नः, साधु, ब्रूहि ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवोपलक्षिताः । संस्पर्शनेन शनैः संमर्दनेन ॥ १५ ॥ तत्र भगवतोऽकृतज्ञतां तद्वचनेनैवापादयितुकामा गूढाभिप्राया लोकवृत्तान्तमिव पृच्छन्ति । भजत इति । भजतः प्राणिनः अनु अनन्तरम् । केचित्तद्भजनानुसारेण भजन्ति । केचिदेतद्विपर्ययं यथा भवति तथा । तद्भजनानपेक्षमभजतोऽपि भजन्ति । अन्ये तु नोभयानिति ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं कृष्णम् । सभाजयित्वा सत्कृत्य । अनङ्गदीपनम् कामोद्दीपकम् । अङ्के उत्संगे कृतयोरंघ्रिहस्तयोः संमर्दनेन । संस्तुत्य संश्लाघ्य । ईषत्कुपिताः प्रेमभरस्वभावत्वात्कोपाल्पत्वम् ॥ ततश्च रिरंसवे तस्मै रतमदित्सूनां तासां चेष्टितमाह—सभाजयित्वेति । सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा अनंगदीपनम् स्वीयं कामं द्योतयन्तं, तासां वा कामोद्दीपकं तं सभाजयित्वा तदुचितैरेव भावैः संमान्य पूर्वं नः संत्यज्य गतः संप्रत्येवं चेष्टत इति प्रणयकोपगोपनार्थमंककृतयोस्तेनैव तासामंके न्यस्तयोस्ताभिरेव वा स्वांके कृतयोः अंघ्रिहस्तयोः संस्पर्शनेन संस्तुत्य—अहो ते करचरणयोरद्भुतं शैत्यं यत्संस्पर्शनेनैवास्मत्संतापो निर्वाणस्तस्मात्त्वं सत्यं संतापदुःखानभिज्ञः सदा सुखी विधुरेवासीति व्याजस्तुत्या स्तुत्वा ईषत्कुपितास्तद्दर्शनानंदस्वभावत एव विनष्टीभूतकोपस्य शेषभागवत्य इत्यर्थः ॥ १५ ॥ तत्र तदा । अकृतज्ञताम् कृतघ्ननाम् । तद्वचनेन भगवद्वचनेन । गूढो गुप्तो भगवत्यकृतज्ञताद्योतनरूपोऽभिप्रायो यासां ताः । इवशब्देन भगवत्कर्षणामलौकिकत्वं सूचितम् । एके लौकिकाः । एके महात्मानः । अन्ये उभयविलक्षणाः । उभयान् भजतोऽभजतश्च । एतत्पक्षत्रयमस्ति यदत्र साधु निर्दोषपक्षस्तम् । भोः हे कृष्ण । नः अस्मभ्यम् ॥ अत्र ताभिः प्रतिस्वं मनस्येवं विचारितम्—अद्य यदयं प्रेमिमुकुटमणिरप्यस्मानेवं दुरवस्थामलंभयत्तत्रायमेव प्रष्टव्यः—भोः कृष्ण तवास्मासु प्रीतिरौदासीन्यं द्रोहो वेति त्रयः पक्षाः संभाव्यमाना अपि विचारतो न घटन्ते । तत्र प्रीतिः सोपाधिर्निरुपाधिर्वा । नाद्या, सोपाधिप्रीतिमान् किल स्वकामसंपादकजनाननुरंजयत्येव न तु त्रिरञ्जयति, त्व त्वस्मानेव स्वविरहाग्नावधाक्षीरेव वधार्थम् । नापि परा, निशि घोरवनमध्य एवास्मत्त्यागादस्मत्कष्टद्रष्टुरपि तव क्लमानुत्पत्तेः । नाप्यौदासीन्यम्, अस्मत्सुखदुःखसाधकत्वदर्शनात् । नापि द्रोहः, स किं शाश्वतिकः प्रातिकूल्यनिबन्धनो वा । नाद्यः, तथादर्शनाभावादेव । नापि द्वितीयः, अस्मासु तत्प्रातिकूल्याभावात् । किं त्वाश्वस्तपरिचारकजिघांसालक्षणविलक्षणो यः कश्चन द्रोहस्तस्यैवोदाहरणीभवता भवता भूयत इत्यादिकं स्वमुखेनास्माभिः स्फुटं न वाच्यं, किन्तु प्रहेलिका भंग्या तथा किंचन प्रष्टव्य यथायमेव यथार्थतया तत्प्रश्नोत्तरं ददान एतदादिकमर्थं व्याचक्षीतेति सद्धृदयत्वात्तुल्यमनोगतविमर्शास्ताः—भो महाप्राज्ञ कृष्ण एकामस्माकमर्थप्रहेलिकां व्याचक्ष्वेत्याहुः—भजतो जनाननुलक्ष्मी कृत्यैव भजंति । एके जनाः सापेक्ष भजंतीत्यर्थः । अत्र सापेक्षवस्त्वलाभे सति नापि भजन्तीति सोपाधिप्रीतिरायाता । एतद्विपर्ययं यथा स्यात्तथा भजन्ति । एकेऽभजतोऽपि भजन्ति निरपेक्ष भजन्तीत्यर्थः । अत्र स्वापेक्ष्यफलान्तरानुद्देशाद्भजनत्यागतो वा निरुपाधिप्रीतिरायाता । अन्ये तु नोभयान भजंतीति नापि सापेक्षं नापि निरपेक्षं भजन्तीत्यौदासीन्यमायातम । द्वेषो द्रोहश्चाप्यभजनं भवेदिति तावप्यायातावित्यत एतद्विवरणे एवमेव किञ्चित्किञ्चिदधिकमपि व्यक्तीकरिष्यते भगवता । एतन्नो ब्रूहीति एते खलु के एतद्भजनमभजनं वा किं तद् ब्रूहीत्यर्थः । एते च एतच्च एतदिति "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" इत्येकशेषैकत्वे । साधु यथार्थमेव ब्रूहि वैयधिकरण्यं मुंचन्नित्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र च प्रणयस्वभावेन तासां निगूढां कोपोत्पत्तिमाह । सभाजयित्वा पूर्वोक्तप्रकारेण सम्मान्य तं बभाषिरे पृष्टवत्यः । ता इति शेषः कीदृश्यः सत्यस्तत्राह । ईषत् कुपिताः । ननु तादृक् सभाजितवत्यश्चेत्तर्हि कथमीषत्कोपस्याप्यवसरमर्हन्ति तत्राह ।

---

१. विभ्रम–श्रीधर. वंशी. जीव. विश्व. रा. शु. सु. ध. ; मद्–वीरः विज. । २. नोत्काङ्ककृताङ्गहृच्छयं–विज. । ३. संस्तभ्य–वीर. विज. । ४. भजन्त्यन्ये–वीर. विज. ।

अनङ्गदीपनमिति । तद्दीपनकृते नानाविलासमभिव्यञ्जयन्तमित्यर्थः । पूर्वं परित्यज्य गतः सम्प्रत्यसावेवं चेष्टत इति प्रणयस्वभावविमर्शनेनेति भावः । ननु कुचकुङ्कुमाक्तवस्त्रोपवेशतया स्वेषामेव तदनङ्गदीपनत्वे प्रागेव जाते सति तस्य तद्दीपनत्वं पृष्ट्वा सन्तमपि कोप व्यक्तीकर्तुं कथमर्हन्ति तत्राह । अङ्ककृताङ्घ्रिहस्तयोः संस्पर्शनेन संस्तुत्य इति । तादृशतया तत्तत्स्पर्शपूर्वकं नानागुणप्रशंसया सन्तोष्येत्यर्थः । तेन कोपन्तु गोपितवत्य एवेति भावः । तर्हि कोप आसीदिति कथं ज्ञायेत तत्राह । सहासेति । उपलक्षणे तृतीया स्वगिरैवायं व्यक्तदोषः स्यादिति मतिकौटिल्यव्यञ्जकेन तादृशभ्रूविलासेन व्यक्ततत्कौटिल्य इत्यर्थः । व्यक्तीभविष्यति च तत् कौटिल्यं प्रश्नपरिपाट्या इति भावः । तदेवमवहित्या नाम सञ्चारी व्यक्तः । तदुक्तम् "अनुभावं पिधानार्थेऽवहित्थं भाव उच्यते" इति । अवहित्थेति स्त्रीळिङ्गता च । तथा "हेतुः कश्चिद्भवेत्कश्चिद्गोप्यः कश्चन गोपनः । इति भावत्रयस्यात्र विनियोगः समीक्ष्यते" इति च । यथा हेतुरत्र सति कौटिल्यमेव गोप्योऽसूयामयोऽमर्षः । गोपयन्त्यनेनेति गोपनः सचात्र तादृशतया तत्तत्स्पर्शसंस्तवाभ्यां प्रत्यायितं हर्षकौटिल्यं सहासादित्वञ्च मतिकौटिल्यम् अयमपि तदेव प्रत्याययति एवमत्रापि योगमायावैभवमेव दर्शितम् । सर्वाभिर्युगपत्तथा व्यवहारात् । अङ्घ्रिहस्तयोरिति द्वित्वं प्रत्येकं जात्यपेक्षया ॥ १५ ॥ अथ सेयं परिपाटी स्वत्यागपरिहारार्थमेव ताभिः कृतेति बोधयन्नाह । गोप्य ऊचुरिति । तत्र चैतदिति उभयान् भजतश्चाभजतश्च न भजन्तीत्यन्तं प्रश्नत्रयम् । साधु यथा स्यात्तथा ब्रूहीत्यर्थः । ते ते के किम्वा तेषां फलं तत् सर्वं विविच्य कथयेत्यर्थः । भो इति सम्बोधनेनावधापयन्ति । स्वस्मिन् दोषपर्यवसानशङ्कया तस्य मनोऽनभिनिवेशानुकरणात् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सभाजयित्वेत्यनुवादः प्रश्नार्थं सभाजनस्य सम्यक् विवक्षया किंवा पुनर्विशेषेण सम्मान्येत्यर्थः । यतः अनङ्गमङ्गरहितमपि कामं दीपयति साङ्गीकृत्य पूर्वतोऽपि प्रकाशयति तथा तमत्यन्तकन्दर्पविवर्धनमित्यर्थः । अत एव तासामङ्के कृतयोः ताभिस्तेनैव वा न्यस्तयोस्तस्याङ्घ्रिहस्तयोः अङ्घ्रे र्हस्तस्य च किंवा अङ्घ्रे र्हस्तयोश्चेत्यर्थः । सम्यक् स्पर्शनेन विविधपरिपाट्या शनैक शनैः सुखसंवाहनेन एवमपि पूर्व्ववदैश्वर्य्यं दर्शितम् । सर्व्वाभिरपि द्वयोरंगयोश्चतुर्णामेव वा युगपत् संस्पर्शनात् सम्यक् स्तुत्वा प्रश्नविशेषार्थं तदुत्तरप्राप्त्यर्थञ्च ईषत्कुपिता इति प्रेमभरस्वभावेन कोपस्याल्पत्वात्, किंवा आन्तरत्वेन बहिरव्यक्तत्वात् । यद्वा, ईषत् संक्षेपेण वभाषिरे, परमवाग्मित्वात्, ततश्च कुपिता इति पूर्व्वदुःखप्राप्तेः । किंवा तस्य वचनातिरेकविधायित्वात्, यद्वा, कोपं विनाभिप्रायाज्ञानेन हृद्यप्रत्युत्तरालभ्यत्वादिति दिक् । अन्यत्तैर्व्याख्यातम् । यद्वा, तादृशभ्रुवा कृत्वानंगदीपनम्, किंवा तयैव समाजयित्वा ताभिस्तस्य तथा समाजनमेव युक्तमित्याशयेनाह—अनङ्गेति । अयं कोपे भाषणेऽपि हेतुर्द्रष्टव्यः ॥ १५ ॥ उभयान् भजतोऽभजतश्चेति प्रश्नत्रयं तथाकृतज्ञत्वादिपरिहारेण पुनरपरित्यागदार्ढ्यार्थं साधु यथा स्यात्तथा एतद्ब्रूहि । ते ते के, किंवा तेषां फलं तत् सर्व्वं विविच्यास्मान् प्रति सुबोध कथयेत्यर्थः । भो इति सम्बोधनेनावधापयन्ति, तत्र निजदोषपर्य्यवसानतया तस्य मनोऽनभिनिवेशात् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

एतद्विपर्ययं कुर्वन्ति अभजतोऽपि भजन्तीत्यर्थः । उभयान् भजतश्चाभजतश्च । एतन्नो ब्रूहि एतेषां तारतम्यं ब्रूहीत्यभिप्रायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अनङ्गं कामं दीपयत्युद्दीपयतीति तथा तं भगवन्तं सहासलीलेक्षणेन विभ्रमो यस्यां तया भ्रुवा सभाजयित्वानुरञ्जयित्वा समो मलोप आर्षः यद्वा आत्मभिः सहक्रीडायित्वा उक्तविधया भ्रुवोपलक्षिताः । गोप्यः अङ्के ष्वात्मनामूरुषु यौ कृतौ निहितौ भगवतश्चरणौ तयोर्यावात्मनां हस्तौ तयोः संस्पर्शनेन करणस्य शेषत्वविवक्षया षष्ठी ताभ्यां मर्दनेन तत्पूर्वक संस्तभ्य दृढमङ्घ्री गृहीत्वेत्यर्थः ईषत्कुपिताः सत्यो बभाषिरे ॥ १५ ॥ भाषणमेवाह । भजत इति । केचिद्भजतोऽनुवर्त्तमान् भजन्त्यनुवर्त्तन्ते एकेत्वेतद्विपर्ययं कुर्वन्ति अभजतो भजन्तीत्यर्थः । अन्येतूभयान् भजतश्चाभजतश्च न भजन्तीत्यत्यर्थः । भोःकृष्ण ? एतन्नोऽस्मभ्यं ब्रूहि कथय उक्तविधान् प्राश्नान् तत्र प्रवर्तक साधु साधु साध्यं गुणदोषतारतम्यं च ब्रूहीत्यर्थः तृतीयकोट्यन्तभू तस्त्वमिति भावः ॥१६॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अनङ्गं कांम दीपयतीत्यनङ्गदीपनः तं लीलया लाळित्येन ईक्षणं हाससहितं सहासं सहासळोलेक्षणेन निभ्रमन्त्योऽनुदिशं सञ्चलन्त्यः भ्रुवो यासां तास्तथा संस्पर्शनेनोत्पन्ना उत्का उत्कष्ठा सैवाऽङ्कं लक्षणं तेन कृतः पूर्णः अङ्गे शरीरे हृच्छयः कामः संस्पर्शनोत्काङ्ककृताङ्गहृच्छयः । तं संस्तभ्य करचरणाद्यङ्गस्पर्शनेनाभिव्यक्तं कामं निरुध्येत्यर्थः ॥ १५ ॥ गोप्यः शास्त्रतत्त्वमजानन्त्यो हृतेरकृतज्ञताकरणाभिप्रायेण पृच्छन्ति । भजत इति । एके केचिद्भजतः सेवमनाननुभजन्ति सेवानुकूलफलसमर्पणेन सेवन्ते एके केचित् एतस्योक्तस्य विपर्ययं कुर्वन्ति फलोद्देशेनासेवमानाननिष्टफलदानेनानुवर्त्तन्ते अन्ये नोभयांश्चानुवर्तन्ते यदेतत्पक्षत्रयम् अत्र साधु निर्दोषपक्षमस्माकं ब्रूहि विविच्य कथयेत्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्र भगवतः काठिन्यमापादयितुकामाः पृच्छन्ति । भजत इति ।। १६ ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ तथा तस्मिन्नासने उपविष्टं श्रीकृष्णं करपदादिलालनपूर्वं ताः किञ्चित् पप्रच्छुरित्याह—सभाजयित्वेत्यादि । तं श्रीकृष्णमङ्के कृत् करणं यस्य तथाभूते नाङ्घ्रिहस्तयोः संस्पर्शनेन सभाजयित्वा तर्पयित्वा संस्तुत्य च, पुनस्त्यागभिया संस्तवनम्, वस्तुतस्तु अन्तःकुपिताः ईषद्वभाषिरे ईषदल्पाक्षरं वह्वर्थम् । कीदृशम् ? सहासलीलेक्षणविभ्रमभ्रुवा, अनङ्गदीपनम् । न अङ्गं अनङ्गं अङ्गीति यावत्, तत्प्रम तस्य दीपनम् ।। १५ ।। तत् किमित्याह—भजत इत्यादि । अल्पाक्षरेण त्रयः प्रश्नाः । हे भगवन् ! साधु भद्रं ते, एतन्नो ब्रूहि, व्यक्तं यथा भवति तथा वद । केचिद्भजतोऽनुभजन्ति, केचिद् विपर्ययं कुर्वन्तीति शेषः अभजतश्च भजन्तीति यावत् । अन्ये उभयान् भजतोऽभजतश्च न भजन्तीति । भजन्तीरस्मान् त्वं तु न भजसि । अभजन्तमपि त्वां वयं भजाम इति साशंसः प्रश्ने साध्ये अवहित्थया मिश्रीकृत्य प्रश्नः ।। १६ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

संस्तुत्येति । पुनस्त्यागभिया सत्यन्तर्महति इत्यर्थः कोपेऽपि सम्यक् स्तुतिपूर्वकमेव वभाषिरे । कुपिता अन्तःकुपिता ईषदल्पेनैवाक्षरेण ।। १६-१९ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च निरंसवे तस्मै रतमदित्सूनां तासां चेष्टितमाह सभाजयित्वेति । सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा अनङ्गदीपनं स्वीयं कामं द्योतयन्तं तासां वा कामोद्दीपकं तं सभाजयित्वा तदुचितैरेव भावैः सम्मान्य पूर्वं नः सन्त्यज्य गतः सम्प्रत्येवं चेष्टत इति प्रणयकोपगोपनार्थम अङ्कक्रुतयोस्तेनैव तासामङ्के न्यस्तयोस्ताभिरेव वा स्वाङ्के धृतयोः अङ्घ्रिहस्तयोः संस्पर्शनेन संस्तुत्य अहो ते करचरणानां शैत्यमपूर्वं यत्संस्पर्शनेनैवास्मत्सन्तापो निर्वापणस्तस्मात् त्वं सत्यं सन्तापदुःखानभिज्ञः सदा सुखी विधुरेवासीति व्याजस्तुत्या स्तुत्वा ईषत्कुपितास्तद्दर्शनानन्दस्वभावत एव विनष्टीभूरकोपस्य शेषभागवत्य इत्यर्थः ।।१५।। अत्र ताभिः प्रतिस्वं मनस्येवं विचारितम् । अद्य यदयं प्रेमिमुकुटमणिरप्यस्मानेवं दुरवस्थामलम्भयत्तत्रायमेवं प्रष्टव्यः भोः कृष्ण ! तवास्मासु प्रतिरौदादीन्यं द्रोहोवेति त्रयः पक्षाः संभाव्यमाना अपि विचारतो न घटन्ते । तत्र प्रीतिः सोपाधिर्निरुपाधिर्वा । नाद्या । सोपाधिप्रीतिमान् किल स्वकामसम्पादकजनापनुरञ्जयत्येव नतु विरञ्जयति । त्वं त्वस्मान् स्वविरहाग्नावधाक्षीरेव वधार्थम् । नापि परा । निशि घोरवनमध्य एवास्मत्त्यागादस्मत्कष्टद्रष्टुरपि तव क्लमानुत्पत्तेश्च । नाप्यौदासीन्यमरमत्सुखदुःखसाधकत्वदर्शनात् नापि द्रोहः । स किं शाश्वतिकः प्रातिकूल्यनिबन्धनो वा । नाद्यः तथा दर्शनाभावादेव । नापि द्वितीयः । अस्मासु तत्प्रातिकूल्याभावात् । किन्त्वाश्वस्तपरिचारकजिघांसालक्षणो विलक्षणो यः कश्चन द्रोहस्तस्यैवोदाहरणीभवता भवता भूयत इत्यादिकं स्वमुखेनास्माभिः स्फुटं न वाच्यं किन्तु प्रहेलिकाभङ्ग्या तथा किञ्चन प्रष्टव्यं यथायमेव यथार्थतया तत्प्रत्युत्तरं ददान एतदादिकमर्थं व्याचक्षीतेति सहृदयत्वात्तुल्यमनोगतविमर्शास्ता भो महाप्राज्ञ ! कृष्ण एकामस्माकमर्थप्रहेलिकां व्याचक्ष्वेत्याहुः । भजतो भजान् अनु लक्ष्यीकृत्यैव भजन्ति एके जनाः सापेक्ष भजन्तीत्यर्थः । अत्र सापेक्ष्यवस्त्वलाभे सति नापि भजन्तीति सोपाधिप्रीतिरायाता । एतद्विपर्ययं यथा स्यात्तथा भजन्ति एकेऽभजतोऽपि भजन्ति । निरपेक्ष भजन्तीत्यर्थः । अत्र स्वापेक्ष्यफलान्तरानुद्देशात् भजनत्यागतो वा इति निरुपाधिप्रीतिरायता अन्ये नोभयान् भज-तीति सापेक्षमपि निरपेक्षमपि नैव भजन्तीत्यौदासीन्यमायातम् । द्वेषो द्रोहश्चाप्यभजनं भवेदिति तावप्यायाताविव्यत एतद्विवरणे एवमेव किञ्चित्किञ्चिदधिकमपि व्यक्तीकरिष्यते भगवता । एतन्नो ब्रूहीत्येते खलु के एतद्भजनमभजनं वा किं तद्ब्रूहीत्यर्थः । एते च एतच्च एतदिति नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामित्येकशेषैकत्वे । साधु यथार्थमेव ब्रूहि वैयधिकरण्यं मुञ्चान्नित्यर्थः ।। १६ ।।

श्रीरसिकाह्लादिनी-टीका

तदेवं पूर्वं धर्मोपदेशेन दूषितचित्ताः "परोपदेशे पाण्डित्यमि"ति मनसि निधाय गूढप्रणयकोपाः धर्म जिज्ञासमान इव साक्षात्तस्य दोषं स्वमुखेन वक्तुमपारयन्त्य स्थिता इदानीं तासां प्रश्नपूर्वभूमिकामाह सभाजयित्वेति, येन पूर्वं भर्त्तुशुश्रूषणमिति धर्मोपदेशं कृतम् । स्वपूर्वोक्तप्रकारेण सभाजयित्वा स कृष्णेति मन्युगापनमुक्तम् । सहासलीलेक्षणविभ्रमभ्रवा सहासलालेक्षणं तेन विभ्रमन्ती इतस्ततश्चलन्ती या भ्रूस्तया, तत्र कामोद्दीपने कामेण पञ्च वाणा इव पञ्च साधनानि हासो-लीला ईक्षण विभ्रमो विलासो भ्रूश्चेति चतुर्णामुपलब्धिस्थानं भ्रूरिति कामोद्दीपनार्थं नानाविलासप्रकटनमित्यर्थः । एतैः साधनैरनङ्गं निरन्तरमङ्गभावं स्वशरीराऽनुसन्धानाभावं दीपयतीति, यद्वा अनङ्गमपि अङ्गरहितमपि दीपयति साङ्गीभावेन प्रकाशयतीति अत एवांककृताङ्घ्रि हस्तयोः अङ्के कृतयोस्ताभिरेव स्थापितयोरङ्घ्र्योर्हस्तयोश्च संस्पर्शनेन नानाविधवैदग्धप्राकट्येन श्रमनाशकहस्तमार्दवव्यंजकसम्मर्दनेन

संस्तुत्य गुणप्रशंसनं कृत्वेति। ननु किमर्थं सम्मानमपि स्तुतिश्च अत्यादरः शङ्कनीयः। प्रस्तुतस्य रासविलासस्येति कर्त्तव्यता सम्पाद्यतामिति चेत्तत्र स्वाभिप्रायसङ्गोपयन्त्य ईषत्कुषिताः। किमनेन विलासेन नु तर्के दुःखमेवेति स्वमनसि विचार्य स्वमुखे तस्य दोषप्रकाशनं करोति चेत्तदा विलासदार्ढ्यं भवतीति निश्चित्येषत्प्रणयकोपं व्यञ्जयन्त्यः इव बभाषिरे, यद्वा कुपितास्तद्दोषदर्शनेन परित्यज्य गतत्वात् ईषत् किंचित् स्वल्पेन पद्येनार्थं भङ्गया गाम्भीर्येण बभाषिरे पृष्टवन्त्यः, यद्वा सहासलीलेक्षणविभ्रमभ्रुवा सभ्राजयित्वा तस्मिन्नवसरे सैव सत्कृतिरिति। तदुक्तमत्रैव "तत्सत्कृतिं समधिगम्य विवेश गोष्ठं स व्रीडहासविनयं यदपांगमोक्षमिति"। हासलीलेक्षणादयस्तु कोपाच्छादका इति। यद्वा एवं सर्वभावेन प्रपन्नानपि भवान् त्यजतीति कृष्णे दोषदृष्ट्या ईषत्कुपिता विवादमिव कुर्वन्त्यो बभाविरे पप्रच्छुरिति ॥ १५ ॥ पक्षत्रयं मनसि विचार्य पृच्छन्ति भजत इति, भजतोऽनु तद्भजनानुसारेण भजन्ति, एके तद्विपर्ययं अभजतोऽपि भजन्ति, अन्ये भजतोऽभजतश्च न भजन्ति इति प्रश्नत्रयं ते के साधु यथा स्यात्तथा एतन्नोऽस्माकं ब्रूहि। अत्र केऽधिकारिणः किं तेषां फलं कियती कीर्त्तिरिति तत्सर्वं विविच्यास्माकं साधु सुबोधं यथा भवति तथा ब्रूहीति। भो इति सखित्वद्योतकं सम्बोधनं, अतिप्रियत्वान्नामानुक्तिरितिवा, तत्र भजनाऽनुसारेण ये भजन्ति ते किं धूर्त्ता आहोस्वित्समीचीना इति। यथा कश्चित्पादसम्वाहनं कस्यचित् करोति सोऽपि तस्य चेत्पादसम्वाहनं करोति तदा किं फलं स्यादिति। तदेवं कर्तव्यमिति पक्षे तदेव फलं नान्य इति। निरपेक्षकर्म्मे तु सन्देह इव अभजन्तो न भजिष्यतीति। निश्चितस्य भजने क्वचिद्दोषोऽपि भवति यथा निः कामस्य योगिनो भजते। कामिनीभजनमिवेति दृष्टान्तः। अत्र क्वचिदुपकारः क्वचिदपेक्षितोऽर्थः क्वचिद्धर्म इति एवं निर्द्धारितं फलं व्यक्तमिति। भजदभजतोरभजने किं फलं तदपि वक्तव्यम् ॥ १६ ॥

विशुद्धरसदीपिका

ततश्च प्रणयस्वभावेन निगूढां कोपोत्पत्तिमपि सामान्येनाह। सभाजयित्वेति। सम्मान्य कया सहासेति हासेन मन्दस्मितेन सहितं यल्लीलेक्षणं तेन विभ्रमन्ती या भ्रूस्तया अत्र हास्यस्य पुष्पत्वं लीलेक्षणत्याञ्जलिबन्धत्वं विभ्रमद्भुवः परिभ्रामणत्वञ्चाभिप्रेतं ततश्च पुष्पाञ्जलिदानं कृतमिति सूचितं तेन च भावेन रसाच्छादनाद्गूढकोपः। ननुकोऽयं विलक्षणः सभाजनविधिस्तत्राह अनङ्गदीपनं तद्दीपनकृते नानाविलासानभिव्यञ्जयन्तमित्यर्थः। अत्रायमेवोचित इति भावः। पक्षान्तरे प्रेमदीपनमिति पूर्ववत् सर्वमिदमन्तः कोपे बीजं पूर्वं संत्यज्य गतः संप्रत्येवं चेष्टत इति प्रणयस्वभावजविमर्शेनेति भावः। ननु सहासेत्यादिकं स्वेषामेवानङ्गदीपनत्वगमकं तथा सति कथंकोपव्यक्तिरितचेत्तत्राह। अङ्क ति सर्वथा कुपिता एव न जानात्विति तादृशतया तत्स्पर्शपूर्वकं नानागुणप्रशंसया संतोष्येति तेन कोपगोपनं तर्हि कोप इतिकथंज्ञातं तत्र सहासेति पूर्वोक्त एव हेतुः। यद्वा उपलक्षणे तृतीया स्वयैव गिरा व्यक्तदोषः स्यादिति कौटिल्यव्यञ्जकेन भ्रूविलासे व्यक्तं तत्कौटिल्या इत्यर्थः। बभाषिरे परिपुष्टवत्यः प्रश्नपरिपाट्य व व्यक्ती भविष्यतीति मानसो भाव इतिभावः। अवहित्थेयम् अनुभावपिधानार्थोऽवहित्थं भाव उच्यते इति भरतोक्तेः। तथा "हेतुः कश्चिद्भवेत्कश्चिद्गोप्यः कश्च न गोपनः। इति भावत्रयस्यात्र विनियोगः समीक्ष्यते" अत्र प्रणयकोपे हेतुः मतिकौटल्यमेव गोप्योऽसूयामयोऽमर्षः स्पर्शसंस्तवाभ्यां प्रत्यतितं हर्षकैवल्यं गोपनं, एवमत्राङ्घ्रिहस्तयोरिति द्वित्वं प्रत्येकस्पर्शापेक्षया ततश्च सर्वासां तथा व्यवहारे योगमायैव हेतुः एवञ्च यथा स्वमादरस्यापरिचयेऽपि सेवेत्यवसेयमिति दिक् ॥ १५ ॥ अथ सेयं परिपाटीतदभिप्रायपरिज्ञानार्थमेव कृता नत्वसूययेति बोधयन्नाह। गोप्य इति। एतत्प्रश्नस्यासाधुत्वं नहि शङ्कनीयमिति भावः। तथा तादृशसभाजनव्यापारेण विक्षिप्तचेतसं भो इति संबोधनेनावधापयन्ति स्वस्मिन्दोषशङ्कायामास्मा गतो भूयो इतिभावः। एवं च तासां प्रेमप्रभावेण कुण्ठितमस्यैश्वर्य्यमिति सूचितम् ॥ १६ ॥

श्रीरामनारायणकृता भावभावविभाविका

अर्चित इत्यत्र सूचित पूजनमेवानुवदप्रश्नमेवावतारयति सभाजयित्वेति। यद्वा प्रश्नार्थं तदङ्गत्वेन पुनः सभाजनं स्तवनं च सभाजने एव साधनान्याह। सहासेत्यादिहासैर्लीलाभिरीक्षणैर्विभ्रमैश्चतुर्भिः सहवर्त्तमानया भ्रुवा इत्यत्र पञ्चान्तरङ्गसाधनानि तत्र हासस्त्रिविधः सलज्जमन्दमृदुस्मितरूपः प्रेमोद्धर्षण प्रहासस्तत्पूर्वचेष्टानौचित्य सूचनेनोपासनरूपश्च लीला विविधोद्दीपकचेष्टा विशेषाः ईक्षणं द्विविधमपाङ्गदृष्ट्या निमिषरहितदत्तदृष्ट्या च विभ्रमा मनोहरक्ष्वेल्यादयश्च कितवतापादकास्तैर्भ्रुवाभङ्गे न च एतेषां प्रेष्ठसभाजने प्रेममार्गीयत्वेनान्तरङ्गतालौकिकसेवारीत्यनुगतत्वाद्बहिरङ्गमिश्रितान्याह। सस्पर्शनेनेति अङ्ककृताङ्घ्रिहस्तयोः संस्पर्शनेन तत्र हस्ताभ्यामंघ्रिसंवाहनं रीतिप्राप्त बहिरङ्गम् अंघ्र्योरङ्के कृत्वा संवाहनोक्त्या प्रेमभिश्रता संस्तुत्येति तत्रोचितनर्मरीत्यैव सम्यक्प्रशंस्य ईषत्क्षपिता इत्यनेनानुरगगसुखोत्कर्षाभ्याम् पराभूततया ईषदवावशिष्टं यत्पूर्वविरहजं कुपितं तदपि पुनर्विश्लेषो माभूदित्वभिप्रायेणैव तेनान्विता तं बभाषिरे पप्रच्छुः फलप्राप्ता तद्भोग एवोचितो न प्रश्नादिकमित्यपेक्षायां तं विशेषयति अनंगदीपनमिति। पुनः पुनः स्वांगेष्वनङ्गं दीपयतीति तथा तं तत्रानङ्गदीपने बाह्यसाधनानि सहासलीनेत्यादिव्याख्यानं पूर्ववत्त्तैरनङ्गदीपनम् अङ्ककृताङ्घ्रिहस्तयोः संस्पर्शनेन सभाजयित्वेत्यन्वयः। यद्वा तासामङ्के कृतयोरङ्घ्र्योः संस्पर्शनेन मुखस्तननीव्यादिषु हस्तयोः संस्पर्शनेन चानङ्गदीपनं स्वविरहे चानङ्गं न दीपयतीति दाहं करोतीति तथा तथा स्वदर्शने आनन्दसंप्लवतया प्रेमवैक्लव्यत-

याचानुसंधानराहित्येनानङ्गमङ्गाभावं दीपयति प्रकाशयति अन्तर्द्धानेन मूर्च्छादिनाङ्गाभावं प्रकाशयतीति तथा तम् एवं सति प्रश्नेनानिर्णये पुनरन्तर्द्धाने मरणमेव संभाव्यं पप्रच्छुरिति भावः ।।१५।। तासां प्रश्नमेवाह । श्रीगोप्य इति । भजतः सेवतो जनानेके भजन्ति तत्समानसेवां कुर्वन्ति ते के किंविधं वा तेषां तत्फलं एके तु एतद्विपर्ययमिति तद्विपरीतम् अभजतोऽपि भजन्ति न तत् सेवामिच्छन्ति ते के कीदृशं वा तत्फळम् अन्ये तु भजतोऽभजतश्चोभयानपि न भजन्ति ते के कीदृक्तत्फलयोग्याश्चैतन्नो ब्रूहि अत्र पक्षत्रयेऽपि स्वरूपफळभेदेन प्रश्नद्वयस्योत्तरं वाच्यं तथाचास्मान् भजतोऽपि तव भजनेऽस्माकं योग्यताभजतोऽप्यस्मानभजतस्तवच-योग्यतास्फुटा स्यादिति भावः । तत्र स्वस्मिन्दोषसम्भावनया अश्रृण्वानमिवालक्ष्य भोइति सम्बोधनेनावधानतामापादयन्ति । प्रश्नं विना पूर्वं भवताबहुप्रजल्पितम् अधुनासनदानसभाजनपूर्वकप्रश्नेऽप्यकथने प्रमादमेवनिश्चितं स्यात् तत्रापि तत्समाधानाय कैतवेन किंचिद्वक्तुं विचारयन्तं प्रत्याहुः । साध्विति । साधु यथास्यात्तथाब्रूहि नहि कापट्य न व्यासासननिविष्टेन वाच्यमिति भावः ।।१६।।

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवं यथोक्तासनोपर्य्युपविष्टं भगवन्तं किञ्चित्पप्रच्छुरित्याह । सभाजयित्वेति । तं सम्मान्य ईषत्कुपितास्ताः बभाषिरे यतः कामं नानाविलासैर्दीपयतीति अनङ्गदीपनं केन सम्मान्येत्यपेक्षायामाह सहासलीलापूर्वकं यद्वीक्षणं तेन विभ्रमो विलासो यस्यां तया भ्रुवा पुनश्चाङ्कीकृतयोः स्वस्वाङ्केगृहीतयोरङ्घ्रिहस्तयोः संस्पर्शनेन ततश्च संस्तुत्य भवानस्माकं मतिः परमानन्दप्रद इत्येवमादि-वचनैः स्तुत्वा स्वकोपं गोपयित्वा बभाषिरे मानिनीपक्षे सहासलीलेक्षणविभ्रमभ्रुवा अनङ्गस्य दीपनं यस्य तं तेनैव स्वाङ्के कृतयोः अङ्घ्रिहस्तयोः संस्पर्शनेन संस्तुत्य अहो तव करचरणकमलयोरपूर्वं शैत्यं यत्संस्पर्शादस्मत्तापोऽपि निवर्त्तते तस्मात्त्वमन्यदीयतापाऽ-नभिज्ञश्चन्द्रवत्सर्वदा सुख्येवासीति व्याजेन स्तुत्वा तद्दर्शनादिना कोपस्य कुण्ठितत्वादीषत्कुपितः बभाषिरे निवृत्तिपक्षे अनङ्गस्य सकारणस्य कामादेर्दीपनं तेषामेवानुकम्पार्थमहमज्ञानजन्तमः । सहासलीलापूर्वकेणेक्षणेनासंख्यातजगदुत्पादकेन तत्सहितेन विभ्रम-वत्याभ्रुवा तत्प्रलयहेतुभूतया उपलक्षितम् अङ्घ्रिहस्तयोरित्युपलक्षणं स्वस्मिन्प्रतिपाद्यानामसंख्यातावयवानां संस्पर्शनेन ईषत्सहस्र-शीर्षा इत्यादिना प्रतिपादनेन संस्तुत्य अहो अस्माकमप्यगम्य इत्येवमीषत्कुपिताः बभाषिरे तथाचैवम्बिधानां श्रुतीनामकथगम्यः परमात्मेत्यधिकारिचेतास शङ्कासमुत्थितेति भावः ।। १५ ।। अहोविज्ञातमस्माभिर्भवत उपदेशकरणे महत्युत्कण्ठा वर्त्ततेऽतः संप्रत्य-स्मत्प्रश्नानुसारेण यथेष्टमुपदिश्य तेन च प्रसन्नो भवति द्योतयन्त्यस्तस्याकृतज्ञतां तन्मुखेनैवोद्घाटयितुकामः गूढाभिप्रायाः लोकवृत्ता-न्तमिव पृच्छन्ति । भजत इति । भजतः प्राणिनः अनु पश्चात्केचिद्भजनानुसारेण भजन्ति एके स्वेतद्विपर्ययं यथा भवति तथा अभजतोऽपि तद्भजनानपेक्षाः भजन्ति एकेतु उभयान्भजतोऽभजतश्च न भजन्ति एतत्पक्षत्रयमपि सोदाहरणं साधु सम्यक् नो ब्रूहि सावधानतयैतदुत्तरं वक्तव्यमिति द्योतयितुं भो इति सम्बोधनम् ।। १६ ।।

रास-रहस्यम्

र० टी०—अनङ्गदीपनं अनङ्गस्य नित्यस्यापरिच्छिन्नस्य निर्गुणस्य परमात्मनः दीपनं स्वान्तःकरणे प्रकटीकरणं यस्य एवम्भूतं तं परमात्मानं, सहासलीलेक्षणविभ्रमभ्रुवा सहासं चतुर्दशभुवनरूपेणप्राप्तविकासं, तस्मिन्नानाजीवरूपेण शरीरधारणमेव लीला, तदेव "तदैक्षत एकोऽहं बहुस्यामि"ति ईक्षणं, तेन विभ्रमेण विलासेन, सह भ्रुवा यमराजेन, सर्वान् कालरूपेण यमयतीति यमः मृत्युस्तस्यावश्यम्भावित्वसंयोगादिदोषदर्शनेन सभाजयित्वा वैराग्यमूलत्वेन परिशोभितं कृत्वा, तथा अङ्कृतांघ्रिहस्तयोः परमात्मज्योतिषां क्रोडीकृत्य स्वात्मत्वेन तेषां संस्पर्शनेन सम्यग्रूपेण ऐकात्म्यभावकरणनिमित्तेन पुनः "पुरुषसूक्तेन ।" संस्तुत्याऽपि पूर्णकृतकृत्यतामलभ्य स्वासु किंचिन्न्युनतामालक्ष्य, कथमधुनाऽपि नः पूर्णकृतकृत्यतां नाभविष्यदिति ईषत् कुपिता किंचित् क्रोधं कृत्वा इव बभाषिरे स्वस्वात्मानमेव पप्रच्छुः ।। १५ ।। एके भजतोऽनुभजन्ति, भजतोजनाननुलक्ष्यीकृत्यैव भजन्त्येकेजनाः अर्थात् सापेक्षं भजन्ति, सापेक्षवस्त्वलाभे सति न भजन्तीति सोपाधिका प्रीतिः । एके एतद्विपर्ययं, एके भजतोऽपि न भजन्ति अर्थात् निरपेक्षं कर्तव्यबुद्धिमात्रात् भजन्तीति निरुपाधिका प्रीतिः । अन्ये नोभयांश्च भजन्ति, अन्ये मूढा आप्तकामाः वा न सापेक्षं न निरपेक्षमपि भजन्ति, एतन्नो साधु ब्रूहि एतत्पक्षत्रयमपि सोदाहरणं साधु यथार्थमेव ब्रूहि, भोः सावधानतयैतदुत्तरं वक्तव्यमिति द्योतयितुं भो इति सम्बोधनं अर्थात् एतत्प्रश्नत्रयस्य सावधानतया विचारणीयत्वमित्यर्थः ।। १६ ।।

गूढार्थदीपिनी

सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा तं कृष्णं सभाजयित्वा सत्कृत्य । संस्पर्शनेन सम्मर्दनेन संस्तुत्य अहो सौकुमार्यम् ।। १५ ।। विपर्ययं कुर्वन्ति अभजतोऽपि भजन्ति । उभयान् भजतोऽभजतश्च न । एते खलु के । एतत् भजनम-भजनं च किम् तत् ब्रूहि । एते च एतच्च एतत् एकशेषः ।। १६ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अनङ्गं दीपयतीत्यनङ्गदीपनं श्रीकृष्णं सभाजयित्वा संस्तुत्य च सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तथा भ्रुवा उपलक्षिता अङ्के कृतयोर्गोप्यङ्कनिहितयोः श्रीकृष्णाङ्घ्र्योः नियोजितौ यौ हस्तौ गोपीहस्तौ ताभ्यां श्रीकृष्णाङ्घ्रिसंमर्द्दनेन

स्वाङ्कगतश्रीकृष्णाङ्घ्री स्वहस्ताभ्यां दृढं संपीडयेत्यर्थः ईषत्कुपिता अतिस्नेहगर्भेण किंचित् कोपाभासेन युक्ताः याः काश्चिद्भगवन्तं केवलं कान्तमात्रं जानन्ति ता एव बभाषिरे ॥ १५ ॥ तदाह । भजन इति । केचित् प्राणिनः भजतः अनुवर्तमानाम् भजन्ति अनुवर्तन्ते केचित्तु एतद्विपर्ययं कुर्वन्ति तद्भजनानपेक्षमभजतोऽपि भजन्तीत्यार्थः । अन्येतूभयान्न भजन्ति भो प्रिय ! एतत्पक्षत्रयं नोऽस्मभ्यं साधु यथा भवति तथा ब्रूहि कथय ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सहासलीलेक्षणविभ्रमद्भ्रुवो हासश्च लीला च ताभ्यां सहितं सहासलीलामीक्षणं तेन विभ्रमन्त्यो भ्रुवो यासां ता विभ्रमन्त्यौ भ्रुवाविति गोप्योऽनङ्गं दीपयन्तीति स तं सभाजयित्वा सम्पूज्य संस्पर्शनेनोत्पन्नोत्कोत्कण्ठा सैवाङ्को लाञ्छनं तेन कृतोऽङ्को गतिर्यस्य स चासौ हृच्छयः कामश्च तमन्तरङ्कूरितं संस्तभ्य सन्निरुध्य । विवक्षाविरामात्सन्ध्यभावः । ईषदित्युमयान्वयि । कुपिता ममापिरे ऊचुः । हृच्छयं प्रति संस्तम्यस्तन्भनीय इतीषत्कुपिता बभाषिर इति वा । पोरदुपधादिति यत् ॥ १५ ॥ इयन्तमायासमनुभूयायताक्ष्यः स्वयं विकल्प्य श्रीमन् त्वं तत्त्वं जल्प किं कल्पमध्य इति निष्प्रकाशितस्वाशयाः परोक्षतः पृच्छन्ति । भजत इति । एके केचन भजतः सेवमानान्भजन्ति तदनुसवनसेवानुसारिफलोपलम्भकतया सेवन्ते । एके चैतद्विपर्ययं स्वानभजतोऽपि स्वयं फलं वितरन्तः सेवन्ते । भजतोऽभजत इत्युभयानप्येकेचन न भजन्ति उदासत इति यावत् । एतत्कल्पत्रये किं साधु सम्यग्भो आत्मन्ब्रूहि । अनेन विवेकः कृतश्चेत्कृतघ्नता तवाविर्भवतीति भामिन्यो ध्वनयन्ति स्मेति तात्पर्यम् । एक एतद्विपर्यय इत्यस्मद्व्याख्यासङ्ख्यं भजन्त्यभजतो ये वै करुणा इत्युत्तरत्रोत्तरे भजत इति युक्ता ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं प्रसन्नं भगवन्तं दृष्ट्वा स्वान्तःकरणदोषदूरीकरणार्थं स्वकृतघ्नतां पूर्वं भगवति कल्पिततस्य इति तन्निराकरणार्थं लोकदृष्ट्या भगवति कृतघ्नतालक्षणो दोषोऽस्ति नवेति निर्णयार्थं किञ्चित् प्रष्टुमुद्यता इत्याह । सभाजयित्वेति प्रश्नार्थं प्रथमतः सभाजनं स्तोत्रं कृत्वा ननु किमनेन विचारेण साम्प्रतं जातं फलं भुज्यतामिति चेत्तत्राह । अनङ्गदीपनमिति । अनङ्गं दीपयति निरन्तरमेव अङ्गीभावं सम्पादयतीति च ध्वनिः, अतो नैकेन भोगेन कार्यनिष्पत्तिः पुनस्तेनापि भोगेनाग्रे अधिक एव खेदः स्यात् सचेत् स्वदोषेण तदा दोषो दूरीकर्त्तव्यः भगवद्धर्मेण चेत् वाक्निर्बन्धं कारयित्वा प्रार्थयित्वा वा कालानुभवः कर्त्तव्य इति भावः । अनङ्गदीपने साधनमाह । सहासेति । साधनाभावार्थं वा प्रार्थनीय इति साधनकीर्त्तनं हासपूर्वकं यल्लीलेक्षणं तेन विभ्रमन्ती या भ्रूः तया अनङ्गं दीपयति पञ्चात्र साधनानि हासो लीला ईक्षणं विलासा भ्रूश्चेति पञ्च चेद्धेतवः कार्यमप्रतिहतं भवति मायाव्यामोहिका स्वरूपरिस्मारणार्थं लीलास्वासक्तिं साधयति ईक्षणं तत्र ज्ञानजनकम् अन्यथा ज्ञानान्तरेण तन्निराकरणं स्यात् विलासाः पोषकाः भ्रूर्यम नियन्ता काल इति यावत् प्रसाददाता वा तत्रैव ततः प्रश्नार्थम् उपढौकनं कुर्वन्ति संस्पर्शनेनेति अङ्के कृतः स्थापितो यो भगवदङ्घ्रिः तत्संबन्धिनौ यौ हस्तौ तयो सम्यक्स्यर्शनेन संळालपन्त्य इत्यर्थः, संस्पर्शनेन सहिताः तत आभिमुख्यार्थं संस्तुत्य ॥ १५ ॥ एवं सर्वभावेन प्रपन्नानपि त्यजतीति भगवति दोषदृष्ट्या ईषत्कुपिताः साधनैर्निवर्तितेऽपि दोषो न सम्यक् निवर्त्तते यावद्भगवान् न निवर्त्तयतीति अतो विवादमिव कुर्वत्यो बभाषिरे तासां प्रश्नमाह । भजत इति । त्रयः पक्षाः सन्दिग्धाः फलतः स्वरूपतश्च भजनाभजनाभ्यां तत्रैके ये यथा भजन्ति ते तथा तानपि भजन्ति एके पुनरभजतोऽपि भजन्ति अन्ये तु उभयानपि न भजति तेषां त्रयाणम् उभयोरपि प्रतियोगिनोः फलं वक्तव्यं ये भजनानुसारेण भजन्ति ते किं कृतघ्नाः आहोस्वित् धूर्त्ताः आहोस्वित् समीचीना इति केनचित् पादप्रक्षालनं कृतं सोऽपि चेत्करोति तदर्थं किं स्यात् फलार्थकरणे फलं देयं तेनापि तदेव कर्त्तव्यं निरपेक्षकरणे तु सन्देह एव अभजतो भजने क्वचिद्दोषः स्यात् यथा निष्कामे कामिनी क्वचिदुपकारः अपेक्षितश्चेदर्थः क्वचित्स्नेहः क्वचिद्धर्म इति एकं फलं निर्धारितं वक्तव्यं यो वा न भजति पूर्वः तस्य वा किं फलमिति ये वा नो भयविधान भजन्ति तेषामुभयविधानां वा किं फलमिति कृतस्य साधनस्य कुत्रवा उपयोगः एतत्सर्वं ब्रूहि साधु यथा भवति तथा भो इति संबोधनं सावधानार्थं भजतः पुरुषाननु तदनुसारेण भजन्ति एके पुनर्भजनव्यतिरेकेणैव भजन्ति इत्युभये न भजनकर्त्तारः अन्ते तु भजनरहिता एव ॥ १६ ॥

श्रीसुबोधिनी–सारः

अनङ्गदीपनं कामोत्पादकं तं श्रीकृष्णं सभाजयित्वा सहासेन लीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा अङ्के कृतयोरंध्र्योर्हस्तयोः संस्पर्शनेन संस्तुत्य किंचित्कुपिता ऊचुः ॥ १५ ॥ एके जना भजतः सेवकानेव भजंति एके केचन एतद्विपर्ययमभजतो भजंतीत्यर्थः । एके उभयान् न भजंति चाद्भजन्त्येके उभयान् भो कृष्ण एतत्साधु त्वं ब्रूहि नोऽस्मभ्यम् ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

सभाजयित्वेत्यस्याभासे, स्वान्तःकरणदोषेत्यादि । दोषस्यैव विवरणं स्वकृतघ्नतामित्यादिनोच्यते । परोक्षं भजता प्रभुणा तादृशो रसो दत्त इति तदज्ञानं स्वकृतघ्नता । प्रभौ दोषाभावात्तदारोप एव तत्र सम्भवति । स च गृह्यमाणस्य स्मर्यमाणस्य

वा वस्तुनः सम्भवति। स्वामिनीनां तु प्रियातिरिक्तधर्मास्फूर्तिनियमेन **स्वनिष्ठस्यैव** एतस्यायमारोप इति भावः। यद्यप्ययमपि रसमध्यपात्येवेति न दोषत्वं वक्तुमुचितम्, तथापि भगवति दोषाभावस्य शास्त्रसिद्धत्वादारोपस्य च भ्रमत्वनियमाच्छास्त्ररीतिमवलम्ब्य तथोक्तम्। अग्रेऽपि दोषपदं यत्र तत्रेदमेव तात्पर्यं ज्ञेयम्। **विभ्रमद्भ्रुवेत्यत्र, भ्रूर्यम** इत्यादि। यमयति नियमयतीति यमः, कालः। तथा च कालविलम्बेन स भावः कदाचिन्नश्येतेति तदभावाय तस्यैव भावस्य नियमनं सदा स्थितिं तादृशीं भ्रूः करोतीति तथा। अथवा। फलस्यैव नियमनमत्राभिप्रेतम्। एतदेवाहुः **यावत्प्रसादेति**। तत्रैवानङ्गभाव एवाशेषस्वरूपानन्ददाता, नान्यत्रेत्यर्थः। **ईषत्कुपिता** इत्यत्र, **साधनैर्निर्वर्तित** इत्यत्रापि दोषपदं पूर्ववज्ज्ञेयम्। काचित्कराम्बुजमित्यादिनोक्तस्वकृतकराम्बुजधारणादीनि साधनानि। ननु स्वरूपेणानिवर्तितो दोषो वचनेन कथं निवर्तिष्यते। तस्मात्तस्य दुर्बलत्वात्तदुपपादितमाद्येऽध्याय इति चेत्। अत्रायं भावः। 'रसो वै स' इत्यादिश्रुतिभिर्भावात्मको हि भगवान्। चाधुना दोषात्मको, रसस्वरूपस्यैव यथात्वात्। स्वामिनीभावाविर्भावमूलकारणं वेणुनादात्मकः शब्दः इति निर्दोषपूर्णगुणरूपभावाविर्भावोपि वाग्रूपशब्देन भविष्यतीति किमनुपपन्नम्। किञ्च। यथा वीक्षणेन यो रसः स न स्पर्शादिना। सम्भाषणेन च यः, स नेक्षणादिनेति तत्तद्रसस्वभावः। तथास्मांस्त्यक्त्वा गतः कथमिति भावस्तादृग्वचनैरेवेति शिशिरय निजहृदयम्। आद्येऽध्यायेप्येवमेव ज्ञेयम्। अतः सुष्ठूक्तं **साधनैर्निर्वर्तित** इत्यादि। ननु भजनाभजननिर्णयस्य प्रभुविषयकस्योद्देश्ये सति साधारण्येन पश्ने को हेतुरिति चेत्, उच्यते। भगवद्विषयकप्रश्नस्यैवाद्धा क्रियमाणे वयमेतादृश्यो भक्तास्त्वमेतादृशीरस्मान्कथं त्यजसीति हि प्रश्नः स्यात्। स च नायिकोत्तमानां स्त्रीरत्नानामग्रे भगवता स्तुत्यानां स्वामिनीनां मुखाम्बुजान्न निःसर्तुमर्हति, किन्तु ग्राम्याणां रसाभासयुक्तानामेव स्यात्। न हि विकचशारदसरोरुहात् तिन्तिणीरसस्पन्दः सम्भवति। अतो व्याजेन प्रश्ने भावगोपनेन महान्रस इति मुख्यरसस्वाभाव्यादेव तथोक्तिरिति बुध्यस्व। भगवांस्तु जीवेभ्यः स्वस्य वैलक्षण्यं वक्तु तत्स्वरूपज्ञानं विना ततो वैलक्षण्यं ज्ञातं न भविष्यतीति तत्स्वरूपमुक्त्वा स्वस्वरूपमुक्तवान्। अन्यथा स्वामिनीतात्पर्यविषयः स्वयमेवेति तान्न निरूपयेत्॥ १५॥ **भजतोऽनुभजन्त्येक** इत्यत्र, **तेषां त्रयाणामित्यादि**। भजनानुसारेण भजनकर्ता प्रथमः, अभजतो भजनकर्ता द्वितीयः, उभयाभजनकर्ता तृतीयः। द्वितीयो यमभजन्तं भजते स एकः प्रतियोगी। तृतीयो यं भजन्तं न भजते स द्वितीयः प्रतियोगीति ज्ञेयम्॥ १६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तत्र वने केन साधनेन सम्माननम्?' इत्यपेक्षायामाह—सभाजयित्वेति। सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा तं कृष्णं सभाजयित्वा अनुरञ्ज्य अङ्ककृतौ स्वोरौ स्थापितौ यौ भगवतोऽङ्घ्रिहस्तौ तयोः संस्पर्शनेन सम्मर्दनेन निमित्तेन संस्तुत्य 'अहो शैत्यमहो सौकुमार्यम्' इत्यादिस्तुतिं कृत्वा बभाषिरे। सम्मानने हेतुमाह—अनङ्गवर्धनमिति। सम्भोगप्रदत्वादित्यर्थः। भाषणे हेतुमाह—ईषत्कुपिता इति। तदन्तर्धानेन किञ्चित्कोपयुक्ता इत्यर्थः॥ १५॥ तत्र भगवतो कृतज्ञतां तद्वचनेनैवापादयितुकामा गूढाभिप्राया लोकवृत्तान्तमिव पृच्छन्ति—भजत इति। भो हे कृष्ण! एके जना भजतोऽनुवर्तमानान् भजन्ति अनुवर्तन्ते। एके त्वेतद्विपर्ययं कुर्वन्ति अभजतोऽपि भजन्तीत्यर्थः। अन्ये तूभयान् भजतः अभजतश्च न भजन्ति। एतत् भजतां गुणदोषफलादिकं सर्वं साधु सम्यक् यथा भवति तथा नोऽस्मान् प्रति ब्रूहीत्यन्वयः॥ १६॥

अन्वितार्थप्रकाशिका

सभाजयित्वेति॥ अनङ्गस्य दीपनं वर्द्धनं तं कृष्णं सहासलीलेक्षणेन विभ्रमो विलासो यस्या तया भ्रुवा सभाजयित्वा अनुरज्य अङ्ककृतौ स्वोरौ स्थापितौ भगवतोऽङ्घ्रिहस्तौ तयोः संस्पर्शनेन संमर्दनेन निमित्तेन संस्तुत्य अहो शैत्यमहो सौकुमार्यं यत्स्पर्शेनैवास्मत्सन्तापनिवृत्तिस्त्वं तु सन्तापदुःखानभिज्ञ एव अतोऽस्मान्विहाय गतवानित्यादिव्याजस्तुतिं कृत्वा अन्तर्द्धानेन ईषत्कुपिताः सत्यो बभाषिरे॥ १५॥ तत्र भगवतः अकृतज्ञतां तद्वचनेनैव प्रकटयितुं लोकवृत्तान्तमिव पृच्छन्ति—भजत इति॥ भोः कृष्ण! एके जनाः भजतः प्राणिनः अनु अनन्तरं तद्भजतानुसारेण भजन्ति। एके त्वेतद्विपर्ययं कुर्वन्ति अभजतोऽपि भजन्तीत्यर्थः। अन्ये तूभयान् भजतः अभजतश्च न भजन्ति। एतत् भजतां गुणदोषफलादिकं सर्वं साधु सम्यक् यथा भवति तथा नोऽस्मान् प्रति ब्रहि॥ १६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सभाजेति अनङ्गदीपनं कामोद्दीपकं तं श्रीकृष्णं सहासेन सलीलने इक्षणेन विभ्रम विलासो यस्यां तया भ्रुवा भृकुट्या अंके उत्संगे कृतयोः पादयोः हस्तयोश्च संस्पर्शेन समर्दनं नच सभाजयित्वा संमानयित्वा ततः संस्तुत्य तत ईषत्कुपिताः सत्यः गोप्यो बभाषिरे॥ १५॥ हरेः स्ववाक्येनैवाकृतज्ञत्वं प्रकाशयितुमिच्छन्त्यो गुप्ताशयाः अन्यजनवृत्तांतमिषेण पृच्छन्ति भजत इति एके जजाः भजतः स्वसेवमानान् जनान् भजंति तत्सेवनानुसारेणोपकुर्वन्ति एतेभ्यो भजमानेभ्यः विपर्ययं अभजमानं एके अन्ये भजन्ति अन्ये अपर उभायान् भजमाना न भजमानांश्चन भजन्ति एते के सन्ति अस्मान् एतत् प्रश्नत्रयं भो हरे साधु यथार्थं यथा स्यात्तथा ब्रूहि॥ १६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्रेति ॥ योगेश्वरान्तर्हृदि योगेश्वराणां हृदयकमलमध्ये, किल्पतमासनं येन तथाभूतः सन्नपि, ईश्वरः सः श्रीकृष्णो भगवान्, तत्र गोप्युरीयरचितासने, उपविष्टः समासीनः, गोपीपरिषद्गतः गोपीसमुदायमध्यगतः, अर्चितस्ताभिः पूजितः त्रैलोक्य-लक्ष्म्यैकपदं त्रैलोक्यसौन्दर्यैकाश्रयं, वपुः दधद्बिभ्राणः सन्, चकास उक्तविधं वपुर्दर्शयन् शुशुभे ॥ १५ ॥ सभाजयित्वेति ॥ अनङ्गं कामं दीपयत्युद्दीपयतीति तथाभूतं तं भगवन्तं, सभाजयित्वा अनुरञ्जयित्वा, वा पूजयित्वा, सहासं च तल्लीलयेक्षणं च तेन विभ्रमो विलासो यस्यां तया भ्रुवा उपलक्षिताः, अङ्के कृतौ अङ्घ्रिहस्तौ पादपाणी च तयोः, संस्पर्शनेन च, उपलक्षिताः। अत्र प्रभोरानन्दमयकरणादिसर्वावयस्य प्राण्यङ्गत्वाभावान्नैक्तवद्भावः। गोप्यः, संस्तुत्य प्रथमतः स्तवनं विधाय, ईषत्कुपिताः सत्यः बभाषिरे ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सभाजयित्वेति : १०.३२.१५.

लोके चलप्रकृतिरप्रतिमस्वरूपाप्यब्जासनाऽलमनिशं स्ववशीकृता श्रीः।
येनास्य तेन हि वशीकृतिरस्मदादेर्दासीजनस्य भुवि चित्रकृदत्र कृष्ण ॥ ६२ ॥
मानं विना न रसपुष्टिरयं तु मानात् कुप्यत्यतोऽत्र करणीयमहो कथं वा ।
आलोच्य तद्घटित-तन्नुतिमादधुस्ता लोकेऽनया स्फुटमबोधि विधेयमीदृक् ॥ ६३ ॥
योगीश्वराशेषहृदन्तरङ्गोऽप्यस्माकमार्तिं स्मरजामबाह्याम्। न ज्ञातवानत्र भवान् कथं वा ज्ञात्वाऽप्युपेक्षा विहितेति चित्रम् ॥६४॥
श्रीश त्वत्पदकञ्जयोरतितरां हस्ताब्जयोर्वक्षसो वक्त्रेन्दोश्च समागमो निरुपमानन्दं प्रदद्यात्प्रभो।
नैवास्मिन् किल संशयो यदनिशं श्रीशानुभूतं मुहुः किञ्च त्वत्प्रपदाग्रसतिसुखा धन्याऽभवच्छ्रीरपि ॥ ६५ ॥
विप्रयोगस्तव श्रीश सिद्ध एव श्रुतिष्विह। कृतः संप्रति यो योगः स सर्वाश्चर्यकार्यभूत् ॥ ६६ ॥
दौर्भाग्यादथवेच्छया तव विभो दुर्भोग्यमाप्तं त्वतिक्रान्तं कान्त कथञ्चिदाचर परं मैवं पुनर्जात्विति।
स्वच्छन्दं विशदं विधातुमनसस्तं प्रार्थयन्ति स्म ताः स्वं स्वं वृत्तमिहानुभूतमखिलाः प्रख्यापयन्त्यस्तदा ॥ ६७ ॥
गोपस्येयं कन्यां नास्याम्। एवं कार्यं नेत्यालोचि ॥ ६८ ॥
चतुरक्षरपादं कन्यावृत्तमिदमग्रेऽप्येवमेकैकाक्षराधिकपादं वृत्तमीक्ष्यम्।
काममनाथां स्त्रीजनपङ्क्तिं वीक्ष्य तवासीत् तद्वद चित्ते ॥ ६९ ॥
हरे तापशान्तिं विधातुं न शक्ता। तदा सोमराजी तदिन्दोः कथा का ॥ ७० ॥
आसीत् त्वद्रतियोगाच्चित्ते मे मदलेखा। जीर्णा सम्प्रति सर्वा तन्मैवं कुरु भूयः ॥ ७१ ॥
तत्काले यच्छोभासौख्यं किं वा कीदृक् स्वामिन् वच्मि। नो चेदब्दो विद्युन्माला शोभालोपो लोके स्पष्टः ॥ ७२ ॥
विभो भवत्समागमं विनाऽखिलं ममाप्रियम्। अभूदिति प्रमाणिकां गिरं ममावधारय ॥ ७३ ॥
दास्यजुषो मे गर्वलवं माधव यत्त्वं वीक्ष्य गतः। सद्गुणलोपे पूर्णगतिस्तन्मणिमध्यच्छिद्रसमः ॥ ७४ ॥
यदवापि कापि दुःस्थितिर्नहि तत्र चित्रमण्वपि। यदहं त्वयीश सम्भ्रमादभवं भुजङ्गसङ्गता ॥ ७५ ॥
यद्देवीभिः सदय न दृष्टं तत्ते लब्धं भुवि रतिसौख्यम्। सत्यप्येवं स्मयमगमं यत्तन्मत्ताहं नहि तव मन्तुः ॥ ७६ ॥
विश्रम्भेण प्रीतिमादर्श्य पूर्वं पश्चात्त्यागो यत्कृतो वन्यवन्याम्। एतत्साधु प्रायशः स्यात्तवैव नान्यत्रैवं शालिनी कृष्णनीतिः ॥ ७७ ॥
अस्तोकदम्भे तव विप्रलम्भे विश्रान्तिमत्यां मयि सम्भ्रमन्त्याम्। प्रोत्फुल्लमल्ल्या कलिकायुधाल्या क्रूरेन्द्रवज्राधिकमन्वचेष्टि ॥ ७८ ॥
प्रोज्झिताऽहमिह यद्यपि त्वया त्वत्स्मृतिस्तु नहि मां जहौ विभो। तत्तयैव विरहेऽपि तेऽभवं निर्गतार्तिकमनोरथोद्धता ॥ ७९ ॥
उपेन्द्रवज्राधिकसारशाली ध्रुवं वियोगस्तव तत्प्रसङ्गे। बभूव दीर्णः खलु धैर्यशैलः सहस्रशैलोन्नतवीर्यभारः ॥ ८० ॥
सजातिवर्गोऽहमिवातिदुःखी विजातिवर्गस्तु न च प्रवक्ति। वक्त्वेश भूयादुपजातिभेदस्तदाशयात् तत्र मयाऽवतस्थे ॥ ८१ ॥
अवरं वरमेव वा कृतं भवता तस्य निरुपणेन किम्। कुरु नैवमितः परं क्वचिदिति कापीशमुवाच सुन्दरी ॥ ८२ ॥
सरलधीरहं वक्रबुद्धिना निशि वने त्वया कृष्ण मोचिता। तदनु दुर्दशा मे तथाऽभवत् कनकमञ्जरीभक्षणे यथा ॥ ८३ ॥
को विहाय निशि निर्दयचेताः कामिनीं स्वयमुपाश्रितपादाम्। स्वागतेति च वदेद् गतलज्जस्त्वां विनेति वद तत्त्वमिह त्वम् ॥ ८४ ॥
पद्मिन्या यन्मधुररसभृतो भोगस्त्यागस्तदनु किल जने। सिद्धं त्वेतद् भ्रमरविलसितं तत्तं वाच्यं किमभिनवगिरा ॥ ८५ ॥
यावन्नासीद् भगवन्मञ्जुमूर्तेः प्रत्यक्षं ते विपिने तावदेषा। वातोर्मीभिस्तरणीवाब्धिमध्ये जाता भूयस्तरलाङ्गी भ्रमन्ती ॥ ८६ ॥
सत्यनुकूलाऽस्म्यहमपि नित्यं यत्तव कृत्यं मयि रिपुतुल्यम्। तद्वद सत्यं सकपटचेतस्तत्प्रतिकूलं व्यरचि कुतस्ते ॥ ८७ ॥
कुलादिमस्तेऽपि जहाति कामिनीमजस्रमेकां प्रतिनक्तमृक्षपः। अदोष एवास्मदुपेक्षणे तव त्वदीय-वंशस्थ-चरित्रमीदृशम् ॥ ८८ ॥

लघु तमालमवेक्ष्य भवानिति भ्रमितया द्रुतमापि तदन्तिकम् । त्वमसि नेति विभाव्य विलम्बितं द्रुतविलम्बितवृत्तमभून्मम ॥ ८९ ॥
विरहे यदापि तव नाथ मया किमु तत्स्मरामि च वदामि मुहुः । प्रमिता क्षरैर्यमिति ते विदिते छलिताक्षरैश्छलयसीह कुतः ॥ ९० ॥

इह निशि माधव पश्य षटपदस्त्यजति पतन्नपि नैव मालतीम् ।
स्थितचतुरोऽपि भवान्विहाय मां वदति गतत्रप-मेतदद्भुतम् ॥ ९१ ॥
भवति यथा रविसङ्गमशून्यं मृदुतर-तामरसं करुणाब्धे ।
तव विरहेण तथा मम चेतोऽभवदधिकं किमु ते कथयामि ॥ ९२ ॥
मृदुतमगात्रे रतिरसपात्रे सकपटमात्रे त्वयि कृतयात्रे ।
इयमपि गोत्रा कुसुमविचित्रा सदयममात्राऽऽसदवचरित्रा ॥ ९३ ॥

चन्द्राधिकशैत्यां वक्षोमणिमालां कामानलकीलाप्लुष्टां किल जाताम् ।
पश्यन्नपि यत्त्वं पृच्छस्यतिमात्रं शोभास्पदमेतद् गोविन्द तवैव ॥ ९४ ॥
आसीद्योऽर्वाक् तव विरहात्मादावो नास्योच्छित्त्यै जलधरमालापीशा ।
किं तद्रूपं यदुवर तज्जां पीडां ब्रूयामेतत् त्वमपि सखे मा पृच्छ ॥ ९५ ॥
त्वदीयां गतिं को वदेदत्र सत्यामितिच्छद्मबुद्धे विभाव्यां ततोऽहम् ।
भुजङ्गप्रयातं भुजङ्गा विदन्तीत्यपृच्छं तदा पल्लवानेव भूयः ॥ ९६ ॥
कृष्णवर्त्म तव नाधिगतमहो कुञ्जवर्त्मनि लताधिकललिते ।
कृष्णवर्त्म-सदृगास यदुपते चन्द्रवर्त्म किमु वच्मि तदपरम् ॥ ९७ ॥
पीयूषदानोज्ज्वल शीतदीधितेर्वंश्येन कार्यं नहि वज्रताडनम् ।
तादृङ्मनीषा यदि चेतसि स्थिता तच्चेन्द्रं वंशोद्भवता न किं धृता ॥ ९८ ॥
तवाऽऽस हृदयं यदा पावपदं ममापि तदलं तदाऽऽप विपदम् ।
ततस्तु मनसा मया व्यवसितं हरेऽस्तु शरणं जलोद्धतगतिः ॥ ९९ ॥

पद्मिन्यस्तव विरहेण दूनचित्तामालोक्य प्रियतम मामसौख्यमापुः ।
कस्माद्वा विधुरमणो स्वभावयोगादेकैव प्रकटमभूत् प्रहर्षिणीयम् ॥ १०० ॥
स्थितिस्तु मे कथमपि दैवयोगतः समागता किमु तव चिन्तयाऽनया ।
पराङ्गना नयनविडम्बनोत्सुका हरे तवैव च रुचिरा स्थितिस्त्वियम् ॥ १०१ ॥
यदकृत वनभुवि गोपनलीलां तदखिलमभिमतमाकलितं मे ।
अविरतमियमहमस्मि च चण्डी स्मयभरहृतिरिति कार्यमवैमि ॥ १०२ ॥

विकलमविकलं वस्तु वाऽऽस्तां कथं तव विरहजुषो मे न खेदाय तत् ।
निखिल सुखकरी चन्द्रिका तापदा समभवदिति मेऽभूत्तदा विस्मयः ॥ १०३ ॥
कलहं सदा कृतवती सह केलावियमेवमित्यतनुतापमवाप्य ।
मम मानसं सुकलहंस तदानीं कलहंसताऽनुगुणमेव चचार ॥ १०४ ॥
मदधीन एव भगवानिति स्मयात् कलिताऽस्मि पूर्वमिह मादनिद्रया ।
विरहो न चैव करुणैव केवला यदहं ततो झटिति सुप्रबोधिता ॥ १०५ ॥

अयि नाथ नाथ कथनेन कि वृथा विरहे तवापि हृदयेऽनया व्यथा ।
क्वचिदप्यरैरपि हरे न सास्त्विति तमुवाच कापि किल मञ्जुभाषिणी ॥ १०६ ॥
किमु सदयं वदामि तामवस्थां नियतिवशादिह या मयाऽऽपि देव ।
विपिनभुवि लता हि पुष्पिताग्रादवकलिता यदि तत्कथं वद स्यात् ॥ १०७ ॥
मेघश्यामे त्वय्यपिधानं किल याते संभ्रान्तायां चेतसि चेतोजनिना च ।
आसीदस्मिन्नाथ तवावस्थितिसूची भूयो भूयो मत्तमयूराभिध एषः ॥ १०८ ॥

कुञ्जः प्रचण्डतरुमण्डलमण्डितोऽपि दृष्टः पुरा तववियोग-दवाग्निदग्धः ।
पश्यामि संप्रति तु भव्यमतो ह्यसङ्गः सङ्गो वसन्ततिलकस्य तवात्र हेतुः ॥ १०९ ॥
कुत्राक्रामि श्रीश किमु कृतं चेतः सौख्यं कस्मादासीत् कैतवजलधे नाहं वच्मि ।
मद्वृत्ते चेत्ते किल हृदयं प्राप्ताशङ्कं साक्षीभूता कीर्तयतुतरां वासयन्तीयम् ॥ ११० ॥

सकल—सुरवराश्चर्यकृच्छोभमानं मधुरतर—वने नाटकं दर्शयिष्ये ।
इति यदभिहितं तद्विधातुं यथार्थं किमिह विरहतोऽकारि नान्दींमुखीयम् ॥ १११ ॥
विषमविरहदुःखक्लान्तचित्ता यदाऽहमभवमतनुपीडाभाजनं पूतनारे ।
तदनु च गतिरत्र स्यात्कथं तन्न जाने भुवि यदि न दया ते मालिनी लग्नकः स्यात् ॥ ११२ ॥
पद्मनेत्र यत्त्वयाऽत्र पत्रिपात्रतामिहानायि विप्रलम्भकस्य शम्बरासुरद्विषः ।
एकतस्तदेतदुत्तमं बभूव भो विभो मुक्तबाण ऐक्षतैष रिक्तमात्मतूणकम् ॥ ११३ ॥
कल्पवृक्ष—कामधेनु—कौस्तुभादिकामितार्थपूरकाद्य हृद्यकर्तिशालि पादपद्मयुग्म ।
त्वां श्रितोऽपि दुःखभागभूदयं जनो न किं हि चित्रमत्र विष्टपे पतत्रिराजकेतनाङ्क ॥ ११४ ॥
धम्मिलस्थः कुसुमनिचयो माला गलगता पत्रन्यासोऽप्यभिनव-सुमालङ्कार-रचना ।
विभ्रष्टाऽभूत्तव हि विरहे किं वच्मि तदिदं नाम्नैवाऽऽसं मदनललिता तत्कालमवशा ॥ ११५ ॥
यज्जङ्घालाप्यहमिह विभो महाविरहाचलभाराक्रान्तापदमपि न चाभवं चलितुंक्षमा ।
श्रीनाथाम्भोधरतनुरुचे कृपाजलधे मम तत्किं वृत्तं विरहविहितं मुधा परिपृच्छसि ॥ ११६ ॥

आनन्दानां त्वमसि महतां भाजनं घोषभाजां नन्दादीनामिति यदुपते भावि भव्यं विभाव्य ।
स्फूर्जद्दावाग्न्यधिक-विरहावस्थितिः स्वस्थ यामे मन्दाक्रान्ता कथमपि कृता धैर्यपीयूषवृष्ट्या ॥ ११७ ॥
हरेरियमतिप्रिया भवति मद्धृतिं कुर्वतः सुदीनजनशेखरायितपदेति मत्वाऽथवा ।
त्वदीक्षणकृते मुहुर्भ्रमितचेतसे शोभितान्यदर्शयदियं च मे तव पदानि पृथ्वी सखे ॥ ११८ ॥
ससितमसितं निम्नानिम्नं ह्यकण्टकिकण्टकि सजलमजलं साश्मानाश्मस्थलं न विलोकितम् ।
तव पदयुगावेक्षोत्कण्ठा-ससंभ्रमया मया मुहुरिह कृतं देवेशैकं तदा हरिणीप्लुतम् ॥ ११९ ॥
सदैव त्वद्वासोऽवनिभृति वरीवर्ति भगवन्निति प्राग्भ्योऽश्रावि प्रकटमनुभूतं गिरिमखे ।
हरेऽन्यत्संत्यज्य स्थलमखिलमस्मिन् शिखरिणीत्यलं भ्रान्तं क्लेशः स तु सदयवाचामविषयः ॥ १२० ॥

श्रीमन्नाथासीद्विरहविकलावस्थितौ दुर्धरायां मय्यर्वागर्था स्मृतिरविकला सोत्तराशाभिलाषा ।
केल्यर्हा भूमिः कुसुमितलतावेल्लितामण्डपाली तावद्दृष्टाऽथो त्वयि कृतमतिनवजानामिकिञ्चित् ॥ १२१ ॥
प्राप्तायां भगवंस्त्वदङ्घ्रिविरहक्लेशं भ्रमन्त्यां मयि किं किं वार्चारितं न चेष्टितमतिक्रूरं मनोजन्मना ।
वक्तुं तन्निखिलं तु नास्मि कुशला जानीहि तद्यन्मृगीबाले नायककृष्णसाररहिते शार्दूलविक्रीडितम् ॥ १२२ ॥
विधायाप्तोन्मुक्तां पतिसुतसदनेभ्योऽपि विभ्रंशिताशामटव्यां निश्यस्यां भयकृतिपशुभिः क्रूरशब्दप्रचारैः ।
यदानीयाकार्षीर्विरहदवशिखा स्पर्शसौख्यानुभूतां ततः शोभाकीर्तिः किमु तवमिलिता कृष्ण तन्नैवजाने ॥ १२३ ॥
श्रीकान्तानन्तकान्ते तवपदविरहक्लेशवाधावगाधे दुर्लङ्घ्येऽनेकचञ्चन्मनसि जलहरीराशिदुर्लक्ष्यमध्ये ।
मग्नाया मे न कश्चित्समभवदवनौ त्राणकर्ता तदानीमासीदेकं तु मूर्तस्तव कुशलकरं चिन्तनं स्रग्धरायाः ॥ १२४ ॥
दुःसहदुःखदनायककेलिवियोग-महामदिराविवशा माधव यद्यपि शून्यमना अहमासमिहेतरकृत्यपदे ।
केशव-माधव-वामन सज्जनवाञ्छितभव्यददेहधृते सुन्दरगात्रचरित्र तथापि तवास मुखे मम नाम सखे ॥ १२५ ॥
यस्याः प्रसादयोगात्त्वदङ्घ्रियोगो ममास सुलभतरोर्वाक् । त्वद्विरहदुःखहत्यै तामेवास्तुवमहं तदागीत्यार्याम् ॥ १२६ ॥
अलमीशभिन्नवृत्तोत्कीर्तनतस्तत्त्वतस्तदाऽस्माभिः । रुमलङ्कृतः ससमयस्त्वत्पदपद्मप्रसादगीत्यैव ॥ १२७ ॥
[एतदन्तवृत्तलक्षणनामानि च्छन्दोमञ्जर्यां द्रष्टव्यानि ।]

जगन्नायकस्त्वं वयं गोपिकाः स्मस्ततः कान्तता चावयोरेकरूपा ।
अमन्तुर्यदस्मत्परित्याग आरात् कृतस्तत्र वैरूप्यमालोकितं किम् ॥ १२८ ॥
वयं श्यामाः श्यामस्त्वमपि गजराजेडितगतिर्वयं भूयः पद्मोल्लसितचरणस्त्वं वयमपि ।
सुकेशस्तुल्यस्त्वं वयमपि किमालोकितमहो तदस्माक त्यागे सदय वद बीजं यदि भवेत् ॥ १२९ ॥
नवीनवाहाऽसि च वीनवाहः प्रवासिनी त्वं त्वसि विप्रवासा ।
रात्रिस्थिताऽरात्रिचरस्तुतोऽहं वैरूप्यमेतद्धृदि वाऽऽगतं ते ॥ १३० ॥
विवाहितस्त्वं च विवाहिताऽलं विशेषकेड्याऽसि तथाविधाऽहम् ।
त्वं मोनभूषश्च समीनकेतुरहं ततः साध्विदमस्ति साम्यम् ॥ १३१ ॥
हृत्वा पयोधरघटं सदने प्रयासि धृत्वा पयोधरघटं विपिनेऽपि यातः ।
मन्ये पयोधरघटाधिक-शोभमानसर्वाङ्गतत्त्वमधुना बहुधा कृतार्थः ॥ १३२ ॥

कुञ्जः पुञ्जस्तरूणामपि च मनसिजः कञ्जमब्जो द्विजाश्चाप्येतेषामन्त्यजानामुचितमकरुणं यद्भवां क्लेशदत्वम् ।
कान्तः शान्तश्च दान्तस्त्वमसि निखिलगोपालकः श्रीश शश्वच्छ्रीमद्गोविन्द तासां समुचितमवनं किं तवोपेक्षणं वा ॥ १३३ ॥
विलोक्य दुःखं दृषदः स्फुटान्त न कथं दयाब्धे न दया तवोदिता ।
न दुःखमेवाकलितं त्वयाऽथवा ध्रुवं हि सर्वं सहता विलासिना ॥ १३४ ॥
हंसस्त्वमित्यभिहितं मुनिभिर्महद्भिस्तन्मानसे विहरणं तव जन्मसिद्धम् ।
कृष्णस्वरूपभृदपत्रपयेति विद्मो नेहागतोऽसि बत नः शुभमानसेषु ॥ १३५ ॥
विप्रप्रियाऽरतिपरेण पुरा मुरारेऽकारि त्वया समुचितः सहि विप्रलम्भः ।
प्राप्ता सुविप्रसवभाक्ष्वपि चासुदेव इत्याशयो यदि तवेश तदर्हं एव ॥ १३६ ॥
यास्त्वामनन्यशरणाः शरणं प्रयाता याश्च त्वयापि भणिताः प्रकटं मदीयाः ।
त्यागस्ततो बत कृतः किमवेक्षि नाथ श्रेयः स्वकीयमथवा गविरत्र तासाम् ॥ १३७ ॥
अहं हरिरिति स्मयो मनसि चेदखर्वस्तव प्रभो स्फुटमलङ्कुरु द्विपदनेकपानां कुले ।
असह्यविरहानलोज्ज्वलशिखाकलपाकुले प्रदर्शयसि किं वृथा नरहरे मृगीणां गणे ॥ १३८ ॥
विनोदोऽपि श्रीमन्नहि निरवधिः क्वापि गदितो यतः क्लेशोऽन्यस्योद्भवति नितरां दुर्वहतरः ।
त्वयोपक्रान्तोऽयं स तु मृदुविसान्तर्विलसितैर्गुणैरद्रेर्मूलाकलन–मुपलेवाऽशनिहतिः ॥ १३९ ॥
विधाय निजगोपनं निजपदाब्जभाजो निजा अनायिषत दुर्धरां विपदमिन्दिराधीश यत् ।
न भाति सहि धर्म इत्यखिलशिष्टविद्वन्मतो भवेद्यदि विशारद सपदि तत्प्रमाणं भण ॥ १४० ॥
सुधाऽनल्पकणमेलनं यदि भवेन्निशांशेऽपि तत् प्रसिद्धमवनौ ततो भवति रक्तिमेति स्फुटम् ।
सुधाकरसमागमोऽजनि बृहन्निशायामिह भवत्यतनुरक्तिमा न कथमीश तद्दृश्यताम् ॥ १४१ ॥
नखमुखेन्दुमुखप्रसृतं सती द्वयमभूत्सरसं तव गोपते । स्फुटतमा प्रथमा तु जगत्त्रये तदपरामधुना श्रुतिगां कुरु ॥ १४२ ॥
अथो सुगीतं हरिणान्तरङ्गभू प्रोत्साहि चाकर्ण्य गुहागतेन हि ।
पञ्चाननाग्र्येण सतीव्रतापितः स्वकाननादप्युदपादि सद्रवः ॥ १४३ ॥
आकर्ण्यासां भिन्नभिन्नोक्तिवृत्तं विज्ञायापि स्वैकपादाब्जसक्तिम् ।
नित्यानन्दोऽप्यच्युतस्तत्सुखार्थं पूर्वं वाचाश्लेषमङ्गीचकार ॥ १४४ ॥
अधिकविततया गिरा वद त्वं तदधिकवीक्षितया दृशानुपश्य ।
समधिकविनयाथवा भवास्मिन्नधिकविभाववशोऽस्मि सर्वदैव ॥ १४५ ॥
शुभदयादृशा वरदया गिरा विमदया धिया बहुदयाभया ।
सुखदया श्रिया चापि संश्रितमदय इत्ययि वदसि मां कथम् ॥ १४६ ॥
मिष्टान्नमप्यविरतं यदनादरस्तत् सञ्जायते नियतमित्यबले मयैतत् ।
तक्रं ह्यकल्पि विरहात्मकमन्तरे तत् स्वादार्थमित्युपकृतिज्ञमवेहि मां त्वम् ॥१४७॥
सर्वस्वं यददायि वादकुशले मह्यं त्वया तन्मया चेन्नादायि मुदा तदा न भविता मत्तः कृतघ्नः परः ।
मत्सर्वस्वगतो मदीयविरहोऽपीत्यर्पितो गर्वतस्तत् किं गर्हयसे कृतघ्न इति मां मुग्धे कृतज्ञं सदा ॥ १४८ ॥
उन्माष्टुं मणिदर्पणादि मलिनं भस्मादिकं लाप्यते लोकैरेवमहो मयाऽत्र विरहात्मा भूतिरेषाऽर्पिता ।
युष्मन्मानससन्मणिस्थित-महामानैक-मालिन्यविध्वस्त्यै दीप्तिकरीत्यलं हितकर मां प्रत्युपात्तोक्तिभिः ॥ १४९ ॥
श्रीमत्सरस्थितिरियं त्वयि भासमाना युक्ता मदाश्रयतयेति सुतन्वि मन्ये ।
कामं समुज्ज्वल-गुणान्वयशोभमानमुक्तौघमूषणतयाऽपि च पद्मनेत्रे ॥ १५० ॥
खगाधिपतिकेतनोऽनिशमहं वियुक्तोऽस्म्यतस्त्वयापि समया मया जगति भाव्यमेतद्धियाः ।
क्षणं किल वियोजिता सुतनु तद्विमुक्ताऽमुनेत्यलं तवधियाऽनया वितथया रुषाऽपि प्रिये ॥ १५१ ॥
सङ्गो मदीयः सचराचरेऽत्रास्मिन्नस्त्येव नित्यं हि मनोज्ञरूपः ।
असङ्गभावोऽपि हि सौत्यनङ्गभावं ततोऽदर्श्युभयं मया ते ॥ १५२ ॥
योगो मदीयः सकलेषु भूतेष्वास्ते प्रिये तन्मयि सर्वयुक्ते ।
यत्त्वं वियोगं स्वमनोनिविष्ट-मारोपयस्यत्र तु किं वदामि ॥ १५३ ॥
विप्रलभ्य इति मां निगमोऽपि स्तौति नित्यमविवादपदज्ञः ।
विप्रलभ्य इति मां यदवादीस्तन्न दूषणमलं किल भूषा ॥ १५४ ॥

आलम्ब्येशदयामनामयभयां दीनावनेनाऽधुना शुद्धं तद्धि यशश्चिनुष्व भविता यद्गीयमानं जनैः ।
इत्युक्तोऽपि मुहुस्त्वया प्रियतमे नैवागमं यत्तदा तद्बीजं तु यशोदयाश्रिततया स्याद्विघ्न ईदृग्रसे ॥ १५५ ॥
गुर्वादिसर्वाप्तजनाश्रिते युक्ता प्रिये तद्भयतो रहःस्थितिः ।
तर्वादिचार्वायतपर्वतालयेऽनन्योदयेऽसौ विरहस्थितिः कृता॥ १५६ ॥

अपहृतमबलायास्तेऽम्बरं यत्तटिन्यां तदुपजनित-रोषध्वस्तये मुग्धबुद्धे ।
तदधिकपटदाने सादरस्तूर्णमासं तदधिकपटवाचा किं वृथा मां दुनोषि ॥ १५७ ॥
अमायां नैवास्मत्कुलगुरुरभिस्थास्यति विधुः कथङ्कारं स्थेयं कुलतिलकभूतेन हि तथा ।
ततो मायावासः श्रुतिगुणनुतो मे ह्यभिमतः कृतोऽतस्त्वं मायाश्रित इति वृथा भ्रान्तिरिह ते ॥ १५८ ॥
अलमविरतयो रथाङ्गनाम्नोः सखि वयसो रसविच्युतिः स्फुटाऽस्ति ।
प्रभवतु न तथाऽऽवयोर्धरण्यामिति विरतिर्ध्रुवमन्तरा कृता मे ॥ १५९ ॥
अयामिह स्थितिमानपि सर्वदा न ददृशे सुदृशाऽपि च यत्त्वया ।
तदयमङ्गपदस्य समन्वयस्त्वयि भवत्युत पश्य मयीत्यलम् ॥ १६० ॥
या पापवृत्तिर्भवभोगदात्री मद्भक्तिभाजामिह तां धुनोमि ।
ततः प्रसिद्धैव सुसाधुता मे या साधुता तन्वि निजा त्वयैव ॥ १६१ ॥

प्रतारकोऽहं भववारिधौ तत् सर्वे नमस्यन्ति जना मदङ्घ्रिम् । न चेद्गुणं पश्यसि दोषदृष्ट्या तत्किं ब्रवे धन्यमतिस्त्वमेव ॥१६२॥
काठिन्यं सुघनस्तनि स्तनजनिव्यक्तुं स्वचेतःस्थितं यत्संछाद्य मदीयचेतसि मृदुन्यारोप्यते तद्धठात् ।
स्त्रीजातेस्तव नेदमद्भुतमहो यत्राम विद्वानपि स्वं दोषं गिरितुल्यमप्यलमसौ ज्ञातुं न दक्षः क्षितौ ॥ १६३ ॥
नानालतोदित भुजे भवतीसमाजे यत्प्रेमतस्तिलकवद् विहराम्यजस्रम् ।
तद्धूर्तचक्रतिलको भवसीति वाक्यं धूर्ता भवत्य इति सौत्यबलाः स्वमर्थम् ॥ १६४ ॥
अरङ्कशभर्तेति रङ्कशहर्तेत्यजस्रं सहस्रं जना मां वदन्ति ।
सुगात्रि त्वमेकाऽत्र चित्तं प्रवक्तुं प्रगल्भाऽसि यन्मां हि रङ्कं ब्रवीषि ॥ १६५ ॥
मद्गौरवं स्फुटमपि ह्यनवेक्ष्य लोके यद्वक्रतां त्वमुपपादयसि प्रिये मे ।
नेदं तवाग इह किं त्वनवेक्षितेषत्सद्वृत्तपद्धतिमतेः फलमीदृगेव ॥ १६६ ॥

तन्वि ये चपलवृत्तयोऽरयस्तान्प्रहर्तुमहमस्मि दीक्षितः । तं च मां चपलवृत्तिरित्यदो वक्तुमुत्खलति ते कथं मनः ॥ १६७ ॥
या लोकैरखिलैरलीकवचनेष्वापाद्यते सर्वदा तां चेत्त्वं खलतां मयि प्रियतमे सम्प्रत्यलं पश्यसि ।
तत्ते दृष्टिरलीकदर्शनचणा कैर्वा न वर्ण्या भवेत् स्पष्टं ते मन एव वा सुखलताक्रान्तं दरीदृश्यते ॥ १६८ ॥

विश्वास्यता तु निखिलश्रुतिगोचरा मे कान्ते कथं श्रुतिपथं तव न प्रयाता ।
आस्तामितोऽपि मम मारतमेव पृच्छ पश्चाद्वदिष्यसि यथा तदहं शृणोमि ॥ १६९ ॥
ज्ञातं मयैव विदितोऽहमित्वयेति संदृश्यते त्वयि यतो हि विदेहभावः ।
ज्ञातो मया त्वमसि यादृगिति स्ववाचा कान्ते किमर्थमधुनाऽऽकुलयस्यलं माम् ॥ १७० ॥

न तापकर्ता न नतापकर्ता कदाप्यहं ऽयामिति मे प्रतिज्ञा ।
अनङ्गतापाकुलिताऽपि सुज्ञे कस्मात्त्वमेनां वितथां करोषि ॥ १७१ ॥
आदावविश्रान्त—मुदारतोरु चमत्कृतिं सुन्दरि मे प्रदर्शय ।
पश्चान्मदीयं किल शाठ्यवर्णनं कृतं त्वया योग्यमहो भविष्यति ॥ १७२ ॥
मयि सप्रमदत्वमीक्षसे त्वं तदिदं बाढमिदं तु चिन्तयाऽन्तः ।
अपि दीर्घदृशा विशालनेत्रे सहिते वा रहितेऽथवा त्वयैतत् ॥ १७३ ॥
श्यामा बहिस्त्वं वयसाऽपि काममन्तर्बहिर्लक्षितकृष्णरूपा । बहिर्दृशा केवलकृष्णरूपं कि मामुपालम्भपदं करोषि ॥ १७४ ॥
यद्यत्कृतं तस्य विभो प्रतिक्रियां श्वो दर्शयिष्यामि निकेतने तव ।
आस्तामियं ते ललने विभीषिका लोके प्रसिद्धो यदहं विकेतनः ॥ १७५ ॥
महामर्षयति नो स वञ्चकस्तेन संतरति ना भवञ्चकः । दृष्टवत्यसि जनं नवञ्चकं येन मां वदसि तन्वि वञ्चकम् ॥ १७६ ॥
अलमलमलघुप्रलम्भवाक्यैरिति वितथं सखि मां न गर्हय त्वम् ।
रणरणकरणे कथं न भाव्यमधिकवचस्थितिना मयेति पश्य ॥ १७७ ॥

किमर्थमागा इह माधव त्वमेवं प्रिये मा वद मुग्धभावात् ।
यतोऽवतारो मम सर्वदैव सिद्धो जगत्यां सुरतोदयाय ॥ १७८ ॥
किमत्र संपादितमीश यत्त्वया निशा विशाल गमिताऽनया दिशा ।
न चानयेदं हृदि सौख्यदं यतो निशान्तमेवाऽकरवं कृशोदरि ॥ १७९ ॥
मां सङ्गतां कुरु सदैव मया रमस्व मामेव सन्ततमनन्तसुखां कुरुष्व ।
त्वन्मात्रहार्दमतिरञ्जितमानसं मामेवं मुधा वत सुधांशुमुखि ब्रवीषि ॥ १८० ॥
त्वं चोरोऽस्यभिहितमत्र यत्तदास्तामुच्चोरस्थितिरिह कस्य पश्य पूर्णम् ।
अस्त्वन्यत्सखि मम पश्यतोऽपि चेतो लीलातो हृतमिति सम्प्रति प्रतीतम् ॥ १८१ ॥
वैलासिकी कुशलता मयि याऽस्ति सुभ्रूः सर्वापि सा तव समागमतो हि लब्धा ।
इत्थं मयैव मुखतः स्वयमुच्यमाने मत्तो विहाररसिकस्त्विति किं ब्रवीषि ॥ १८२ ॥
कान्ते यस्मादधिकमलिनीभावमङ्गीकरोषि त्वय्येवातः सखि समुचिता सौरभानुप्रवृत्ति ।
तस्मात् संप्रत्यधिकविलसद्भावमङ्गीकुरुष्व भूयादर्थाद् द्विजवरमहावंशभागीशयोगः ॥ १८३ ॥
अहीनवृत्तिः सखिहीनवृत्तिर्नित्योऽहमस्मीति जगत्प्रसिद्धम् ।
त्वमन्तरालोच्य पुनः स्ववृत्तं यथाऽसि तत्त्वेन भजस्व कामम् ॥ १८४ ॥
वाचालताश्रयणमेतदलं पुरस्ताद्यत्कामिनि त्वमवदोऽवगतस्तदर्थः ।
शारीरकं रतमिहेच्छसितद्दिशामि दासोऽस्मि ते तदलमुज्ज्वलकोपितेन॥ १८५ ॥
कुशलोऽस्यधिकवचःस्थितिमतिमतिरसिकः पराङ्गनाशरणे ।
तद्दर्शय कुशलत्वं शरणजनक्लेशहरणतः सद्यः ॥ १८६ ॥

भजत इति : १०.३२.१६.

निजाङ्घ्रिभजनोन्मुखं जनमवेक्ष्य कश्चिद्भजत्यहो तमिह कश्चनाभजकमप्यलं सेवते ।
सदैव भजतोऽपि यो भजति नेषदन्यान् कुतः तदस्य गणनां भवेद्भुवि कृतघ्नकोटौ न किम् ॥ १८७ ॥
शुद्धे परात्मन्यपि जल्पयन् रजोगुणं ततस्तं स्वगुरुं विधाय च ।
स्वकल्पनाऽपोहनमाचरेदिति तथाऽऽसनस्थेश्वरपृच्छयाऽध्वनि ॥ १८८ ॥

कृष्णप्रिया

मधुरमन्दस्मित, रसमयी लीला, स्नेहसभर अवलोकन, रसपोषक विलास और भ्रूभङ्ग इन पांच अङ्गो से अनन्य अनुराग नाम के अनङ्ग को उद्दीपित करने वाले प्यारे श्याम सुन्दरजी का श्री व्रजवनिताओं ने यशोगान किया, पुनः अपने उत्सङ्ग में अत्यन्त आदर से नाथ के श्रीचरणों को पधराकर कोमल करसरोजों से संवाहन करते हुए कुछ आविष्ट होकर प्रियतम को निवेदन किया ॥ १५ ॥ गोपियाँ श्री गोविन्दजी को कहने लगी, कि नाथ ! जगत में तीन प्रकार के लोग होते हैं । उनमें कितने एक तो भजन (सेवन-स्नेह उपकार) करने वालों को भजते हैं, कई एक जन भजन न करने वालों के स्वभाव को न देखते हुए और उनकी परवाह न करते हुए उनको भजते हैं, तब कितने ऐसे हैं कि भजन करने वाले और भजन न करने वाले दोनों को नहीं भजते हैं; हे प्रियतम इस विषय में आप कृपया समाधान करें आप का निवेश किस पक्ष में है ॥ १६ ॥

श्रीभगवानुवाच

मिथो भजन्ति ये सख्यः स्वार्थैकान्तोद्यमा हि ते । न तत्र सौहृदं धर्मः[१] स्वार्थार्थं तद्धि नान्यथा ॥ १७ ॥
भजन्त्यभजतो ये वै करुणाः पितरो यथा । धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ॥ १८ ॥

कदंमक्षमा

अन्वयः—श्री भगवान् उवाच—हे सख्यः ! ये, मिथः, भजन्ति, ते, हि, स्वार्थ, एकान्त उद्यमाः (सन्ति) तत्र, सौहृदम्, न, (वर्तते) च, धर्मः, न (वर्तते) तत् (भजनम्) हि, स्वार्थार्थम्, अन्यथा न (प्रयोजनम्) ॥ १७ ॥ हे, सुमध्यमाः !, ये, वै, करुणाः (ते किल) यथा, पितरः (पुत्रादीन्) (तथा) अभजतः, भजन्ति, अत्र, निरपवादः, धर्मः (वर्तते) च, सौहृदम्, वर्तते ।, १८ ॥

---

१. स्वार्थं तद्धित्त–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

विदिताभिप्रायो भगवानुत्तरमाह । मिथ इति । हे सख्यः उपकारप्रत्युपकारतया ये मिथो भजन्ति तेऽन्यं न भजन्ति किं त्वात्मानमेव । कुतः । हि यस्मात्स्वार्थ एवैकान्तत उद्यमो येषां ते । तत्र च न सौहृदमतो न सुखं न च धर्म किं त्वर्थ एव दृष्टोद्देशाद्गोमहिष्यादिभजनवदित्यर्थः ॥ १७ ॥ ये त्वभजतो भजन्ति ते द्विविधाः करुणाः स्निग्धाश्च । तत्र तु यथाक्रमं धर्मकामौ भवत इत्याह । भजन्त्यभजत इति ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विदितो ज्ञातोऽभिप्रायस्त्वस्मिन्दोषारोपलक्षणो येन स तथा । स्वार्थे स्वप्रयोजन एव । एकान्तः निश्चितः । उद्यमः उद्योगः । तत्र परस्परभजने, अतः सुहृत्ताभावान्न सुखं, धर्मस्तु दानार्चनादिरूपोऽदृष्टार्थः प्रायो भवति । दृष्टोद्देशाद्दुग्धादिनिमित्तं, यद्यपि गोभजनमदृष्टार्थमपि तथापि प्राकृतैस्तदचिन्त्य दृष्टार्थमेव तत्क्रियतेऽतो गोपदोपादानमत्रेति इत्यर्थ इति–अन्योन्यपशुकण्डूतिवटदृष्टार्थस्य न धर्मत्वमिति भावः ॥ विदिताभिप्राय उत्तरमाह–इति । उपकारप्रत्युपकारापेक्षया ये मिथो भजन्ति ते स्वार्थे दृष्टाऽदृष्टे स्वीयफलार्थ एव एकान्त उद्यमो येषां ते । हि निश्चितं स्वात्मानमेव भजन्ति नान्यं, तन्मिथो भजनं नान्यथा अन्यथा न स्यात् । अतस्ते स्वार्थपराः सोपाधिप्रीतिमन्तः । कामिन एवेत्यर्थः । तत्र तेषु सौहृदं प्रेम नास्ति । धर्म इति उत्तरश्लोकार्थदृष्ट्या निरपवादो धर्मश्च नास्ति । 'स्वात्मार्थम्' इति पाठे तदित्यस्य विशेषणमेतत् ॥ १७ ॥ तत्र तु तयोस्तु । करुणाः आर्तदर्शनश्रवणादिना द्रवद्धृदयाः । अत्र अभजद्भजने । निरपवादो निर्दोषः । सौहृदं साधुत्वं च । "उपकारिषु यः साधुत्वे तस्य को गुणः । अपकारिषु यः साधुः साधुत्वे तस्य को गुणः । अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥" इति जैमिनीयोक्तेः । हे सुमध्यमा इत्यनेन यूयं सुष्ठु मध्ये चेतसि भवं मध्यमं धर्मं यासां तास्तथा । अभजन्तमपि मां भजन्त्यो धर्मशीलाः स्थेति ध्वनितम् ॥ द्वितीयप्रश्नस्योत्तरमाह—अभजतो ये भजन्ति निरपेक्षं भजन्तीत्यर्थः । ते निःसंबंधसंबंधभेदाद्विविधाः । करुणा यथा—पितरो यथेति । तत्र करुणाः शुद्धभक्तास्तेष्वेव प्रह्लादादिषु निरुपाधिकरुणस्योदयदर्शनादिति दृष्टान्तद्वैविध्यादुभयेऽपि प्रत्युपकारानपेक्षिणस्तद्दुःखसुखाभ्यांदुःखसुखवन्तो भजनं प्राणात्ययेऽपि न त्यजन्ति । पूर्वे श्रेष्ठाः, उत्तरे अवराः । अत्रैषूभयेष्वेव धर्मो निरपवादः फलाकांक्षाराहित्यादनश्वरः । सौहृदं प्रेम च निरपवादम् । हे सुमध्यक्षा इति – श्लेषेण शोभनमध्यम एव प्रश्नो यासां ताः । विगीतोदाहरणत्वादाद्यन्तौ प्रश्नौ विगीताविरत्यर्थः । यद्वा—शोभनं मध्यममुत्तरं यास्वेवं मध्यमस्य प्रश्नोत्तरस्यास्य भवस्य एवोदाहरणानीत्यर्थः ॥१८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वार्थोऽत्र स्वीयं दृष्टमदृष्टञ्च भजन्ति ये यथा देवान् देवा अपि तथैव तानिति न्यायेन यज्ञादिसन्तोषिताभिर्देवताभिरपि गोमहिष्यादिभिर्दुग्धादिकमिव स्वर्गादिकं दीयत इति तस्मिन्नेकान्तस्तन्मात्रनिष्ठ उद्यमो येषां ते न तत्र सौहृदम् । धर्म इति प्रसिद्धमपि तद्द्वयं वक्ष्यमाणरीत्या सापवादमेव मन्यामह इत्यर्थः । धर्मस्वातन्त्र्येण पुरुषार्थत्वेऽप्यर्थकामाभ्यां परिवर्त्तनाय विनियोगापातात्सहृदस्य च कैतवमयत्वादिति भावः । हि निश्चये अन्यथा उक्तादन्यप्रकारेण तत् मिथो भजनं न स्यात् । यद्वा तत्र मिथ्यात्वं नास्तीत्यर्थः तत्र आत्मनोऽपि तासु तादृशभजनशङ्कां सहजसख्योल्लेखेन परिहरन् सम्बोधयति हे सख्य ! इति । अन्यत्तः अत्रातो न सुखमित्यर्थवलाद्व्याख्यातम् । यद्यपि तत्रापि दृष्टसुखं घटते तथापि सौहृदराहित्येनोत्तमानां सुखवृद्धिर्नजायत इति भावः । किंतु पाठोऽयं कल्पित इव लक्ष्यते । उत्तरत्रैतत्प्रतियोगिवाक्येऽपि नापेक्षितव्य इति स्वार्थार्थमिति पाठोऽपि चित्सुखादीनां बहूनां सम्मतः तत्र तद्भजनमन्यथा प्रतीयमानमपि स्वप्रयोजनार्थमेवेत्यर्थः । स्पष्टमन्यत् ॥ १७ ॥ वै प्रसिद्धौ यथेत्युभेयषामुदाहरणार्थं पितरौचेति चकारोऽध्याहार्य्यः निरपवादो विप्रतिपत्तिरहित इत्यर्थः । सौहृदञ्च निरपवादं हे सुमध्यमा इति सर्वसल्लक्षणोपलक्षणत्वेन तादृशगुणत्वं युष्मासु भात्येवेति भवत्य एव तत्र साक्षिण्य इतिभावः । इदञ्च तासामात्मभजनार्थं चातुर्य्यम् । अन्यत्तैः यद्वा । पूर्वं सोपाधिभजतामुद्दिष्टयोरपि सौहृदधर्मयोः सापवादत्वमुक्त्वा सम्प्रति निरुपाधिभजतामुद्दिष्टयोर्निरपवादत्वमाह । तत्राप्युदाहरणीकृतानां करुणानां पित्रोरप्यविशेषमाह । भजन्त्यभजत इति । करुणेषु सौहृदस्यापि स्पष्टत्वात् पित्रोः पुत्रादिपालनस्य गार्हस्थ्यधर्मसहायत्वाद्धर्मस्यापि समान्यतः प्राप्तेः ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वार्थो निजदृष्टमात्रफलार्थ एव, तस्मिन् वा एकान्तः, तस्मिन्नेवैकस्मिन् अन्तो निष्ठा यस्य तथाभूत उद्यमो येषां ते इति श्रीगुरुसेवा मिथो वैष्णवैः प्रेमादिकञ्च परिहृतम्, तत्र तत्र सद्धर्म्मादिसद्भावात्, आत्मानमेवेति लोकदृष्ट्या परोपकारसम्भावितं धर्म्मादिकं निरस्तम्, प्रत्युपकारापेक्षयैव भजनात् । एवं दोषपरिहारापेक्षया प्रत्युपकारेऽपि धर्म्माद्यभावः । तथाभजने तारतम्याभावोऽप्यूह्यः । अन्यथोपकारप्रत्युपकारयोस्तुल्यत्वाभावेनानुभजनासिद्धिः । एवमेवानुभजन्ति छायावत् भजनानुसारेण भजन्तीति प्रश्नस्योत्तरं सिध्येत्, अतो यत्र प्रत्युपकारापेक्षापि न, तत्र धर्म्म इति सूचितमिति दिक् । हि निश्चये । नान्यथा उक्तादन्यप्रकारेण

तत् मिथोभजनं न स्यात्। यद्वा, तत्तत्र मिथ्यात्वं नास्तीत्यर्थः, सख्येनैव कथनादिति। यद्वा, आत्मनोऽपि तासु तादृशभजनमिव कारुण्यभरेण मन्वानः सहजसख्येन तत् परिहरन् सम्बोधयति—हे सख्य इति। अन्यत्तैर्व्याख्यातम्। तत्र स्वात्मानमिति सु-शब्दस्यार्थः, सुखमिति तदित्यस्य च, अत इति ज्ञेयम्। तदिति पूर्ववदेव वा, अत इति चार्थबलादायात्येव। यद्यपि तत्राप्यन्योऽन्यमुपकारेण दृष्टसुखं घटेत, तथापि स्वोपकारजनितत्वात् प्रत्युपकारस्यावश्यापेक्ष्यत्वाच्च धर्म्माभावेन तात्त्विकत्वाभावादपि विचारेण सुखाभाव एव पर्य्यवस्येदिति, न च सुखमिति व्याख्यातम्। यद्वा, उन्मत्तवन्नियतात्मेत्यादिवत् लेखकभ्रमेणैव तद्वक्ष्यमाणानुसारेणात्र तदनपेक्ष्यत्वात्। 'स्वार्थोर्थम्' इति पाठोऽपि श्रीचित्सुखादीनां बहूनां सम्मतः। ततश्च तद्भजनमन्यार्थं प्रतीयमानमपि स्वप्रयोजनार्थमेवेत्यर्थः। अन्यत् स्पष्टम्। अथवा स्वार्थमेव एकान्त उद्यमो येषां जनानां ते हि ते मिथो भजनकरा यथा राजसेवका वितदवैतनिकादयः, हि प्रसिद्धौ, अतएव प्रायो लोकानां सर्व्वेषामेव दृष्टार्थपरत्वात्, ते विशिष्य स्पष्टं न निर्द्दिष्टाः। अन्यत् समानम्॥ १७॥ अभजतो दैन्यादिना बाल्यादिना च; वै प्रसिद्धौ, यथेति दृष्टान्तेन निरुपाधिसहजकारुण्यमभिप्रेतम्। ते हि श्रीभगवता एव, तच्च सुतरां मत्कृतात्मनामित्यत्र तैर्व्याख्यातमेव। तथापि करुणाः पितरौ चेति द्विविधा अवगम्यन्त एव। यद्वा, यथेति उभयेषामप्युदाहरणमात्रत्वेनोक्तम्। पितरौ चेति चकारोऽध्याहार्य्यः। निरपवादः सम्पूर्ण इत्यर्थः। तैः प्रत्युपकाराद्यनपेक्षया केवलमत्यन्तकृपालुत्वेनैवोपकारात्, सौहृदञ्च निरपवादं तयोः सहजस्निग्धत्वात् केवलसौहृदोक्तिः, पुत्रपालने पित्रोर्धर्म्मानुत्पत्तेः। यद्वा, कथञ्चित्तेनापि तयोर्धर्म्मो द्रष्टव्यः, ततश्च तेषां तयोश्च स तच्चेति हे सुमध्यमाः। हे सुन्दर्य्य इति तदेव सौन्दर्य्यमिति। किंवा तद्युष्मासु भात्येवेति भावः। इदञ्च तासामात्मभजनार्थं चातुर्य्यम्॥ १८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मिथो भजन्ति उपकारप्रत्युपकारौ कुर्वन्ति। करुणाः करुणायुक्ताः केचिद्रागद्वेषाभावादुपकर्तृष्वपि समदृष्टयः अकृतज्ञाः आत्मैकानुभवसुखत्वेन तदितरकृतज्ञानरहिताः गुरुद्रुहः। "अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः। एव वृत्ति समास्थाय विप्रो जीवेदनावदी"ति न्यायेन प्राणिषु अत्यन्तपीडाविमुखाः॥ १७–१९॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

विदिताभिप्राय उत्तरमाह। मिथ इति। हे सख्यः! ये मिथो भजन्ति परस्परमुपकुर्वन्तो वर्त्तन्ते ते स्वार्थे स्वप्रयोजने एव निमित्ते एकान्त नियत उद्यमो येषां तथाभूताः स्वप्रयोजनमात्रपरास्ते हीत्यर्थः। यस्मादेवमत एव तत्र मिथो भजनेन सौहृद मिथो भजनप्रवर्त्तकं न सौहृदमित्यर्थः। किन्तूपचिकीर्षा प्रत्युपचिकीर्षैव तत्र कारणमित्यर्थः। अत एव तत्र धर्मस्तु तत् साध्यो धर्म इत्यर्थः। किन्तु केवलं दृष्टमेव तत्साध्यं प्रयोजनमिति भावः। तदेवाह तन्मिथो भजनं स्वार्थार्थं स्वप्रयोजनमेवार्थः प्रयोजनं यस्य तथाभूतं हि नत्वन्यथा स्वार्थनिरेक्षपरोपकारद्वारा धर्मार्थं न भवतीत्यर्थः॥ १७॥ द्वितीयकोट्यन्तर्गतानाह। भजन्तीति। हे सुमध्यमा! अभजतो ये भजन्ति ते करुणाः करुणावन्तः अर्शआद्यच् स्वार्थनिरपक्षेपरोपचिकीर्षा करुणा साच पित्रादिष्वतीव प्रसिद्धेति तानि दर्शयति पितरौ यथेति। अत्राभजद्भजने सौहृदं सर्वभूतसुहृत्त्वं प्रवर्तकं तत्साध्यस्तु निरपवादो निर्बाधो धर्मः अक्षय्यो भवदनुग्रहरूपधर्म इत्यर्थः॥ १८॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तत्र परिहारं वक्तुमुपक्रमते। मिथ इति। हे सख्यः! ये मिथो भजन्ति उपकारप्रत्युपकारलक्षणां सेवां कुर्वन्ति ते स्वार्थैकान्तोद्यमा हि स्वप्रयोजननियतप्रयत्ना यस्मात्तस्मात्तत्र तेषु सौहृदम् अनिमित्ततः स्नेहलक्षणो धर्मो नास्ति। ननु तर्हि किमस्ति तत्राह। स्वार्थमिति। स्वप्रयोजनार्थं वित्तं जानीध्वं विपक्षं प्रतिषेधति। नेति॥ १७॥ ये अभजतः फलेष्विच्छाननुगतान् भजन्ति फलमपर्यन्ति तत्र कारणमाह। करुणा इति। करुणयन्ति प्राणिनो दृष्ट्वा द्रवीकृतहृदया भवन्तीति करुणाः तत्र दृष्टान्तः लोकानुग्रहकरणशीलाः पितरो यथा बालादीन् दृष्ट्वा गुणान्तरं चास्तीत्याह। हे सुमाध्यमाः! अत्र तेषु जनेषु सौहृदलक्षणो धर्मश्च निरपवादः निर्दोषः इदं संप्रज्ञातसमाधिस्थस्य लक्षणम्॥ १८॥

श्रीमज्जीवगोस्वामिकृतो क्रमसन्दर्भः

स्वार्थोऽत्र दृष्टफलं ये दृष्टफलमात्रोद्यमां मिथो भजन्ति स्वात्मानमेव भजन्ति। हि यस्मादुर्जनं नान्यथा भवति। अतस्तत्र न सौहृदं नच धर्म्मः। कारणविशेषमेव दृष्टान्तयति, तत्र तस्मिन् साकूतपर्यवसानमाशङ्क्य मिथोऽक्षि निकूचन्तीः प्रत्याह। नाहमिति॥ १७–२०॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

भगवानप्याशयं ज्ञात्वा समुचितं प्रत्युत्तरमाह—मिथ इत्यादि। हे सख्य इति सप्रेम सम्बोधनम्। मिथो भजने न सौहृदं न धर्मः। तद्भजनं हि आत्मानं प्रत्येव परस्परानुकूल्योपाधिकत्वात्। स्वात्मार्थमिति पाठे स्वात्मनिमित्तम्॥ १७॥

द्वितीय प्रश्नस्योत्तरम्—भजन्तीत्यादि । अभजतो ये भजन्ति, ते वै करुणाः कारुणिकाः, यथा पितरौ । तयोः केवलमभजतः शिशून् प्रति वात्सल्यमेव । अत्र निरपवादो धर्मः सौहृदञ्च ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विदिताभिप्राया उत्तरमाह । मिथ इति उपकारप्रत्युपकारापेक्षया ये मिथो भजन्ति ते स्वार्थे दृष्टादृष्ट स्वीयफलार्थं एव एकान्त उद्यमो येषां ते हि निश्चितं स्वात्मानमेव भजन्ति नान्यं तन्मिथो भजनं नान्यथा अन्यथा न स्यात् । अतस्ते स्वार्थपराः सोपाधिप्रीतिमन्तः । कामिन एवेत्यर्थः । तत्र तेषु सौहृदं प्रेम नास्ति । धर्म इत्युत्तरश्लोकार्थदृष्ट्या निरपवादो धर्मश्च न स्वात्मार्थमिति पाठे तदित्यस्य विशेषणमेतत् ॥ १७ ॥ द्वितीयप्रश्नस्योत्तरमाह । अभजतो ये भजन्ति निरपेक्षं भजन्तीत्यर्थः । ते निःसम्बन्धससम्बन्धभेदाद्द्विविधाः । करुणा यथा पितरौ यथेति । तत्र करुणाः शुद्धभक्तास्तेष्वेव प्रह्लादादिषु निरुपाधिकरुणस्योदयदर्शनादिति । दृष्टान्तद्वैविध्यात् उभयेऽपि प्रत्युपकारानपेक्षिणस्तद्दुःखसुखवन्तो भजनं प्राणान्तेऽपि न त्यजन्ति पूर्वे श्रेष्ठाः । उत्तरे अवराः । अत्र एवोभयेष्वेव धर्मो निरपवादः । फलाकांक्षाराहित्यादनश्वरः सौहृदं प्रेम च निरपवादम् । हे सुमध्यमा इति । श्लेषेण शोभनः मध्यम एव प्रश्नो यासां ताः विगीतोदाहरणत्वादाद्यन्तौ प्रश्नौ विगीतावित्यर्थः । यद्वा । शोभनं मध्यममुत्तरं यास्वेव । मध्यमस्य प्रत्युत्तरस्यास्य भवत्य एवोदाहरणानीत्यर्थः ॥ १८ ॥

रसिकाह्लादिनी–टीका

तत्र प्रथमप्रश्ननिर्धारितं फलमाह ये मिथो भजन्ति ते स्वार्थैकान्तोद्यमा स्वार्थः दृष्टमात्रफलमित्तिं स्वस्मिन्नैव चैकस्मिन्नतो निष्ठाफलं यस्य तथाभूत उद्यमो येषां ते तु हित्वा ज्ञात्वैवान्योन्यं भजन्ते तारतम्येन भजन्ति तेषां स्वाथमेवोद्यमः । अतोऽन्योन्यभजने सौहृदं स्नेहो धर्मो भवेत् तदुक्तं भजन्ति ये यथा देवान् देवा अपि तथैव तान् । गो-महिष्यादिभजनवत् प्रत्युपकारापेक्षो उपकारे धर्मस्नेहाभावस्तारतम्याभावश्च सूचितः । उपकाराकरणे कोऽपि उपेक्षारूपदोषदर्शनात् दुग्धाभावे गोमहिष्यादिनामुपेक्षवदिति । अतो यत्र प्रत्युपकारापेक्षाप्यस्ति तत्र सौहृदं न च धर्म्मे इति, हीति निश्चयेनाधर्म्मार्थमिव प्रतीयमानं भजनं स्वप्रयोजनार्थमेवेत्याह तद्भजनं स्वार्थार्थमेव अन्यथा उक्त प्रकारणादन्यप्रकारो नास्तीति । हे सख्य इति सम्बोधनमप्रतारणायेति । आवयोरन्योन्यभजनेनैष प्रकार इति भावः ॥ १७ ॥ द्वितीयप्रश्नस्योत्तरमाह—भजन्तीति, यथेति सर्वत्रान्वेति, ये अभजतोऽपि भजन्ति अतीव-शैशवेन सामर्थ्येन वैष्णवादीन् वा अभजतोऽपि जनान् ये भजन्ति तेषामपेक्षितदाने पुष्णन्ति प्रत्युपकारानपेक्षतया ते वैष्णवाः यतः करुणाः कृपालवः । यथाहं तथा तेऽपि तत्र दृष्टान्तः यथा पितरः स्नेहेन धर्मेणापि भजन्तो दृश्यन्ते । तत्र सौहृदस्यावश्यकत्वं धर्मस्यानुषङ्गिकत्वम्-तदुक्तं मनुस्मृतौ "वृद्धौ च मातापितरौ, भार्या साध्वी सुतः शिशुः । अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्" । अत्र निरपवादो विप्रतिपत्तिरहितः सम्पूर्णो धर्म इति । अतएव धर्मे सौहार्दे वा उपकारस्यावश्यकत्वात् । प्रतियोगिनो भजनशङ्कायाः अप्यभावात् धर्मस्य निरपवादत्वं निर्दोषत्वमित्यर्थः । गोः पङ्कधारणवत् प्रत्युपकारानपेक्षत्वं च केचित्क्रियमाणमपि भजनं नाङ्गीकुर्वन्ति, निरपेक्षत्वादेव सौहार्देऽपि अनुयोगिप्रतियोगिनोः साम्याभावः । अनुयोगिनस्तु धर्मोपपन्ने दृष्टत्वात् । प्रतियोगिनस्तु धर्मः धर्मो नाप्यधर्मः । सापेक्षस्वभावादेवेति, हे सुमध्यमा इति सम्बोधनमुक्तार्थस्य विश्वासाय स्वहृदयानुसारेण सर्वत्रैवमेवोन्नेयमिति ॥ १८ ॥

विशुद्धरसदीपिका

अत्र रसपरिपाट्यामपि प्रयुक्ता सरस्वती सिद्धान्तमपि स्फोरयतीति दर्शयन्नाह । श्रीभगवानुवाचेति । मिथ इति । स्वार्थोऽत्र दृष्टमदृष्टञ्च फलं "भजन्ति ये यथा देवान् देवा अपि तथैव तान्" इति न्यायेन यज्ञादिसन्तोषिताभिर्देवताभिर्गोमहिष्यादिभिर्दुग्धादि दीयते इति तस्मिन्नेकान्तस्तन् मात्रनिष्ठ उद्यमो येषां ते सकामा इत्यर्थः । न तत्र सौहृदं धर्म इति तत्र प्रसिद्धमपि तद्द्वयं वक्ष्यमाणरीत्या सापवादमेवमन्यामह इत्यर्थः । धर्मस्य स्वातन्त्र्येण पुरुषार्थत्वेऽप्यर्थकामाभ्यां परिवर्तमानाय विनियोगात् सौहृदस्य कैतवमयत्वादिति भावः । हि निश्चये अन्यथा उक्तादन्यप्रकारेण तन् मिथो भजनं न स्यात् यद्वा तत्र मिथ्यात्वं नास्तीत्यर्थः । तत्रात्मनोऽपि तासु तादृशभजनशङ्कां सहजसंख्योल्लेखेन व्यावर्त्तयन्संबोधयति । सख्य इति । अन्यत्तैः तत्र न सौहृदमतो न सुखमिति । यद्यपि दृष्ट सुखं घटेत तथापि सौहृदराहित्येन सुखबुद्धिर्न जायत इति भावः । तत्र तद्भजनमन्यार्थं प्रतीतमपि स्वप्रयोजनार्थमिति ॥ १७ ॥ भजन्तीति । ये वै प्रसिद्धैः तथेत्युभयेषामुदाहरणार्थं पितरौ चेति चकारोऽध्याहार्यः निरपवादो विप्रतिपत्तिरहितः सौहृदश्च निरपवादं सुमध्यमा ! इति यूयमेवात्र मुख्यमुदाहरणमिति भं तत्र करुणेषु धर्म्मः पित्रोश्च सौहृदमिति विवक्षितप्रतीत्यै द्वयमुदतं युष्मासु द्वयमपीति ततस्तत उत्कर्षः । यद्वा करुणेषु सौहृदस्य पित्रोश्च पुत्रादिपालनस्य—

वृद्धौ च मातापितरौ साध्वी भार्य्या शिशुः सुतः । अप्यनर्थशतं कृत्वा भर्त्तव्या मनुरब्रवीदिति ॥

धर्म्मस्यापि सामान्यतः प्राप्तेः स्पष्टत्वादुभयोरविशेषभेदोदाहरणमित्यर्थः ॥ १८ ॥

श्रीरामनारायणकृता भावभावविभाविका

भगवत उत्तरमवतारयति । मिथ इति । यन्मिथः परस्परं सद्य एव दृष्टफलमभिकाङ्क्षिणो भजन्ति ते वणिज इव स्वार्थैकान्तोद्यमाः स्वार्थं स्वदृष्टसुखार्थमेव केवलमुद्यमो येषामन्यार्थत्वेन प्रतीतावपि तदभजनदर्शनेन स्वार्थासिद्धौ रोषादिदर्शनेन तदर्थत्वासम्भवाद्यतस्तत्स्वार्थमेवातस्तत्र न सौहृदं परस्परप्रीतिरैहिकं फलं न वा पुण्यं दृष्टजनको धर्मः पारलौकिकः नान्यथेति, अन्यथा धर्म्मबुद्ध्या सौहृदेन वा भजने भजनमेव भवेन्नातेन स्वभजनापेक्षा यद्वा नान्यथेति नाहमन्यथा वच्मि मद्वचनं तिगमरूपत्वात् सत्यमेव सख्य इति संबोधनेनापि असुरान्प्रत्यन्यथा सम्भवेऽपि स्वाभाविकसख्येन न भवतीः प्रति मदुक्तिरन्यथा यद्वा ननु—

देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथेति स्मृतेः ॥

कथन्न धर्मस्तत्राह । सौहृदमिति । तत्रापि श्रेयोमात्रं परं केवलमवाप्स्यथ न निःश्रेयसमिति सूचनात् लौकिकमिथोभजनेतूभयं नास्त्येव देवाराधनेतु धर्म्ममात्रव्यवहारेऽपि यथावत्कर्मसम्पत्तौ तत्कामितफळप्राप्तावपि, यतो न सौहृदं मद्भक्त्युपयोगिहृदयसौष्ठवानुत्पादकमतो न परो धर्म्मः किन्तु श्रममात्रमेव धर्मो मद्भक्तिकृत्प्रोक्तः—

धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः । नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥

इत्यादि वचनात् ॥ १७ ॥ प्रथमपक्षीयप्रश्नस्योत्तरमुक्त्वा द्वितीयप्रश्नयोरुत्तरमाह । भजन्तीति । हे सुमध्यमाः ! ये अभजतः प्रत्युपकारमकुर्वतो भजन्ति ते एके करुणा दयालवः तथा पितरावित्युपलक्षणं स्निग्धा इत्यर्थः । यथेत्युक्त्या यथैते तथा निष्कामाराधकाश्चेति त्रिविधाः तेषु फलमाह । धर्म इत्यादि । तत्र करुणायाविधिप्राप्तत्वाद्धर्म्मो मुख्यः फलं सुष्ठु हृद्येव तदुद्भवदर्शनात्सौहार्दञ्च स्नेहस्यानुरागप्राप्तत्वात् सुष्ठु हृद्येव तदुत्पत्तेः सौहृदमेव मुख्यं धर्मोऽपि गृहस्थधर्म्मप्राप्तत्वात् निष्कामाराधनेतु धर्मो निरपवादः—

नेहाभिक्रमनाशोऽस्ति प्रत्यवायौ न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयादित्यादि ॥

वचनात् भक्त्युपयोगिहृदयशुद्धिहेतुत्वाच्च सौहृदमपि चकारेण विशेषणानुकर्षणात्तत्सौहृदमपि निरपवादं तद्धर्मसौहृदयोर्मत्स्वरूपप्राप्तिपर्य्यवसायित्वात् । यद्वा यथेति दृष्टान्तत्वेन निर्देशो यथा लोके केचित्करुणाः पितरौ च प्रत्युपकारानपेक्षया भजन्ति तथा अभजतोऽपि तेषां फलाभिलाषादर्शनेन तत्फलदातुरपि मे ये भजन्ति । अत्र सकर्मकधातोः कर्मापेक्षतया मामिति वक्तव्येऽपि कर्ममात्रोक्तौ फलान्तरसम्भावना स्यादिति षष्ठ्या सम्बन्धसामान्येन कर्मत्वफळत्वोभयार्थत्वाभिमत्या षष्ठीनिर्देशः तथा च भजतो मम भजने निरपवादो धर्मः सौहृदं चेति भावः ॥ १८ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तासामभिप्रायमवगत्य क्रमेणोत्तरमाह । मिथ इति । ये मिथोऽन्योऽन्यं परस्परोपकाराकाङ्क्षया भजन्ति स्वार्थ एवैकान्तत उद्यमा येषां तथाभूता न ते कञ्चिदन्यं भजन्ति किन्तु स्वात्मानमेव दृष्टफलार्थित्वात्प्रसिद्धञ्चेदं बहवश्चैतदुदाहरणभूता अतो नाधिकमत्र वक्तव्यमिति द्योतनाय हि शब्दः तत्र सत्कीर्त्तिकरं सौहृदं निर्व्याजेन हितैषित्वन्नास्ति नापि धर्मः दृष्टोद्देशात् । यद्वा नात्रैवं विधे भजने सौहृदं धर्मः किन्तु मित्रतालक्षणो धर्म्मः हि यतस्तद्भजनं स्वार्थं पशूनां परस्परं कण्डूयनसदृश नान्यथा स्वार्थाभावे निवर्त्तते । हे सख्य ! इति संबोधयन् युष्माकं ममत्वमेवंविधं मैत्र्यमपितु निरुपाधिकं सख्यमिति द्योतयति ॥ १७ ॥ द्वितीयप्रश्नस्योत्तरमाह । भजन्तीति । ये अभजतोऽपि भजन्ति ते द्विविधाः सम्बन्धरहितास्तद्वन्तश्च तत्राद्याः करुणाः दयाळवो यथा द्वितीयाः पितरौ, यथा अत्र प्रथमपक्षे निरपवादो धर्मो निरुपाधिकत्वादनीश्वरः । द्वितीयपक्षे निरपवादं सौहृदं । यद्वा पक्षद्वयेऽपि निरपवादो धर्म्मः सौहृञ्च । यद्वा अत्र सौहृदरूपा धर्म्मो निरपवादः हे सुमध्यमा इति सम्बोधयन् करुणायाः सम्बन्धस्य च विषयभूताः भवत्य इतिसूचयति श्लेषेण शोभनो मध्यमः प्रश्नो यासां ताः सुष्ठु मध्यमपक्षोदाहरणभूता भवत्य इति वा ज्ञापयति ॥ १८ ॥

रास–रहस्यम्

र० टी०—ये मिथोऽन्योन्यं परस्पराकाङ्क्षया भजन्ति ते वनिज इव स्वार्थैकान्तोद्यमा, स्वार्थं स्वदृष्टसुखार्थमेव केवलमुद्यमो येषां ते स्वार्थार्थाः न परार्थाः, ते परेषामर्थमदृष्टार्थं वा न भजन्ति, यत एवं तत् पशूनां परस्परकण्डुयनसदृशं स्वार्थार्थमेव, अतः नाधिकमत्र वक्तव्यमिति द्योतनाय हि शब्दः, न तत्र सत्कीर्तिकरं सौहृदं प्रेमधर्मो निर्व्याजेन हितैषित्वं, न वा पुण्यकर्मलक्षणाऽदृष्टजनको धर्मः । नान्यथा स्वार्थाभावे निवर्तते ॥ १७ ॥ ये अभजतः प्रत्युपकारमकुर्वतो भजन्ति, ते द्विविधाः भवन्ति । सम्बन्धसहिताः सम्बन्धरहिताश्च । आद्याः यथा पितरो तत्र निरपवादधर्मः करुणया विधिप्राप्तत्वात् मुख्यफलं सुष्ठुहृदि एवोद्भवदर्शनात्, सौहृदञ्च स्नेहस्यानुरागप्राप्तत्वात् नश्वर एव, सोपाधिकधर्मः । द्वितीयपक्षे करुणाः दयालवः अत्र । निरपवादो धर्मः निरुपाधिकत्वात् अनश्वरं "नेहाभिक्रमो नाशोऽस्ति प्रत्यवायो न विद्यते : स्वल्यमप्यस्य धर्मस्य त्रायते महतो भयात् ।" इति निष्कामाराधनमिव भवति, सुष्ठुहृदि एव तदुत्पत्तेः सौहृदं च मुख्यधर्मः ॥ १८ ॥

गूढार्थदीपिनी

स्वार्थे एव एकान्तो मुख्यः उद्यमः प्रयोजनं येषां ते । तत् भजनम् । अन्यथा परार्थं न ॥ १७ ॥ मातापितरौ च । सुष्ठु मध्यमः कटिभागो यासां ताः तत्सम्बुधौ । निरपवादः निर्दोषः ॥ १८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तृतीये पक्षे बहून् भेदान् जानत्यः कृतघ्नविषयं तृतीयं पक्षं मन्वानाः स्वस्य कृतघ्नत्वं स्वमुखेनैव कथयिष्यतीति तासामाशयं ज्ञात्वाह । मिथ इत्यादिना । हे सख्यः ! ये मिथो भजन्ति अन्योऽन्यमनुवर्तन्ते स्वार्थैकान्तोद्यमाः स्वार्थं निमित्तभूते एवैकान्तत उद्यमो येषां ते तथा अतः तत्र सौहृदं नास्ति नच धर्मः ॥ १७ ॥ ये तु अभजतोऽपि भजन्ति ते द्विविधाः एके करुणाः करुणावन्तः अर्शआद्यच् अन्ये पितरौ यथा तथा स्नेहयुक्ताश्चेति द्विविधाः द्वैविध्यमेवाह । धर्मो निरपवादः निरपवादं सौहृदं चेति ॥ १८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं सास्ताक्षीभिरधिक्षिप्तः स्वयमुत्तरं वक्तुमारभते ॥ मिथ इति । परस्परं भजतोऽनुभजन्ति ये हे सख्यस्ते स्वार्थैकान्तोद्यमाः स्वार्थं तदित्यन्यथा नेति च वित्त । यद्वा स्वार्थैकान्तोद्यमा हे सख्य इति सामानाधिकरण्यम् । ते यूयमित्यन्वयः । त इति निर्देशेनाग्निपुत्रत्वं तासां द्योत्यते । हिते हितद्विविषये वा । तत्र सौहृदं धर्मो न किन्तु स्वार्थमेव परस्परं भजन्तीति तद्वित्त । अन्यथा नेति वित्तेत्यन्वयः ! अतो न स्वार्थैकान्तोद्यमाः स्वार्थं वित्तेत्यनयोः पौनरुक्त्यमिति मन्तव्यम् ॥ १७ ॥ अभजतः स्वानसेवमानान्ये भजन्ति ते यथा पितरः पुत्रसेवामनपेक्ष्य तत्त्राणकर्तारस्तथा करुणाः करुणयन्तीति ते तथा । अत्रैतादृशेषु जनेषु हे सुमध्यमाः शोभनमध्यप्रदेशयुता वामाक्ष्यो धर्मश्च निरपवादो निर्दोषः सौहृदं च निरपवादमिति विपरिणतमन्वेति उत्तमाधिकारिलक्षणमिदम् ॥ १८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एतेषां भेदान् फलं चाह भगवान् । मिथोभजन्तीति त्रिभिः । तत्राद्यपद्यस्य निर्धारमाह । ये मिथोभजन्ति ते स्वार्थैकान्तोद्यमाः स्वार्थ एव एकान्त एकं फलमुद्यमस्य ते हि ज्ञात्वैवान्योऽन्यं भजन्ते तरतमभावेन च भजनमनुवर्त्तयन्ति । अतो न तेष्वन्योऽन्यवञ्चनापि संभवति । अतः स्वार्थमेव । लौकिकार्थमेव तेषामुद्यमः ननु । उभये ब्राह्मणाः अन्योऽन्यभजनेन धर्मः स्नेहो वा भवेत् कथं स्वार्थमेवेत्याशङ्क्याह । न तत्र सौहृदमिति । क्षणेनैव द्वितीयस्या भजनं ज्ञात्वा क्रोधकरणात् । अतो न सौहार्दं नापि धर्मः "संभोजनीयानामपि पिशाचभिक्षा नैषापितॄन् गच्छति नोतदेवान् इहैव सा चरति क्षीणपुण्या शालान्तरे गौरिव नष्टवत्सेति" गुरुसेवायामपि यदि दृष्टार्थतोभयोः तदापि न धर्मः शास्त्रानुसारीचेत् मिथोभजनाभावः । विद्या तु फलरूपा सख्य इति संबोधनादप्रतारणाय इति प्रसिद्धास्ते वणिज इव स्वार्थ एव तेषां प्रवृत्तिः यद्यपि धर्मादयाऽपि स्वार्था एव तथाप्यन्योऽन्यभजने न ते सिध्यन्ति तथा सौहार्दमपि यद्यन्यमपेक्षेत तस्य साधनस्य विनियोगमाह स्वार्थार्थमिति अन्यार्थमपि । प्रतीयनानं स्वार्थमेव एवं सेवादिदानेष्वपि दुःखनिवृत्तिस्तत्र फलम् अत्रार्थे सर्वोऽपि लोकः प्रमाणमिति हि शब्दः अन्यथा परोपकाराय न अन्यस्य हृदये तत्प्रतीकारार्थं चिन्ताजननात् ॥ १७ ॥ अतः फलं स्वार्थसिद्धिः लौकिकी नाममात्रेणैव तेषां धर्मत्वं नतु वस्तुतः ये पुनः अभजतोऽपि भजन्ति ते द्विविधा इत्याह । भजन्तीति । ये अभजतोऽपि तूष्णीं स्थितान् भजन्ति तत्र निमित्तद्वयं लौकिक वैदिकं वा स्नेहो विधिश्च तत्र सौहार्दं धर्मश्च फलं क्रमेणैव वः पूर्वः तस्य सौहार्दमवसरे कर्त्तव्यमेवापकारः अन्यथा कृतघ्नः स्यात् धर्मशेषश्चेत्प्रायश्चित्त विधेयम् । तदीय एव धर्मः तद्द्वारा तेषु गच्छतीति तत्र धर्मः यत्र कर्मप्रधानं यत्र वा देवता तदुभयं न विवक्षितं प्रतियोगिनि भजनशङ्काभावात् । यत्र वा असमानता गोः पङ्कोद्धारणवत् तत्रापि तथा यत्र पुनराधारे प्रत्युपकारः सभवति तत्र प्रवृत्तौ पूर्वस्याभजने उत्तरभजने निरपवादो धर्मः सौहृदं च फलम् अधिकारिविशेषण । तु एकत्र करुणा अपरत्र दैहिकः सम्बन्धः तदाह । करुणाः पितराविति अन्यत्रापि दृश्यत इति तद्धर्मातिदेशमाह यथेति । संसारिणः क्रूराः तेऽपि कदाचिद्दीनेषु भजनं कुर्वन्ति स्निग्धा इव च भवन्ति तेषां सग्रहार्थं यथेति सम्बन्धस्तु जन्मान्तरीयोऽपि भवतीति उपमानोपमेययोरभेदात् एकविध एव निरपवाद इति तदुपकारेण हि तस्यापवादः तदभावान्निरपवाद एव अत्र एतादृशे अर्थे अनेन यत्र प्रत्युपकारसम्भावनापि न तत्र धर्म इति चित्रम् अत एव केचित् क्रियमाणमपि नाङ्गीकुर्वन्ति सौहार्दं धर्मोऽस्तीति चकारः सुमध्यमा इति संबोधनमुक्तविश्वाय धर्मेणैव उत्तममध्यमता ये तु पुनः सर्वथैव न भजन्ति जनार्थं भजतः सौहृदेन वा भजतः धर्मार्थं तु न शङ्का तानुभयानपि केचिन्न भजन्ति अभजतो दीनान् धर्माधिकारिणश्च तानपि भजन्ति ॥ १८ ॥

श्रीसुबोधिनी–सारः

झटित्युत्तरमाह कृष्णः । हे सख्यः ये मिथः परस्परं भजन्ति उपकारप्रत्युपकारतया ते हि स्वार्थे एव एकान्तत उद्यमो येषां ते तत्र च सौहृदं न धर्मो न तद्धि भजनं स्वार्थार्थमेव गोमहिष्यादिभजनवत् नान्यथा न प्रकारान्तरेण ॥ १७ ॥ अभजतोनुपकारिणो वै पुत्रान् ये भजन्ति करुणाः दयालवस्ते पितर इव अत्र पक्षे निरपवादः शुद्धो धर्मः सौहृदं सुखं चास्ति हे सुमध्यमाः ।१८।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

भजन्त्यभजतो ये वा इत्यत्र, **धर्मशेषश्चे**त्यादि । धर्मार्थं यो भजते तस्य धर्म एव मुख्य इति भजनीयस्तच्छेषः । एवं सति भजनकर्तुः पातकादिसम्भवे तद्दोषो निवर्तनीय एव, कृतघ्नतापरिहारायेत्यर्थः । ननु पुण्येनैव पापनिवृत्तिरित्यस्य तत्र नोपयोग इत्यत आहुः **तदीय एवेति** । धर्मशेषीय एव धर्मो भजनद्वारा भक्तेषु गच्छतीत्यर्थः । ननु विहितत्वात्तद्भजनस्यापूर्व एव धर्मस्तेनोत्पद्यत इति चेत् । मैवम् । तादृक्फलसाधकत्वेन तद्भजनविधाने भजनीयनिष्ठतादृग्धर्मवत्त्वस्यैव प्रयोजकत्वात्, 'तेजस्कामोग्निमेव तेजस्वन्तं स्वेन भागधेयेनोपधावती'त्यादिश्रुतिभ्यस्तथा निर्णयात् । अन्यथा तेजस्वन्तमिति न वदेत् । न चामूर्तत्वं बाधकमिति वाच्यम्, अलौकिकस्यार्थस्य कोकरीत्या निर्णेतुमयुक्तत्वात् । 'अलौकिकास्तु ये भावा न तांस्तर्केण योजये'दिति श्रुतेश्चेति दिक् । निषेधस्य प्राप्तिपूर्वकत्वनियमेनात्र चापवादनिषेधोक्तेर्यत्र धर्मापवादसम्भावना स एवात्र धर्मः परिगृहीतः, यत्र न तत्सम्भावना न सोऽत्र विवक्षित इत्याशयेनाहुः । **तत्र धर्मे यत्रे**त्यादि । नित्यं कर्म कर्तव्यत्वेनैव यत्र क्रियते तत्र तदेव प्रधानम् । यत्र देवताराधनेनैव धर्मस्तत्र सा प्रधानम् । न चोक्तेषु धर्माभावादविवक्षतत्वमिति वाच्यम् । भगवता हि निर्णयः क्रियते । स च सन्दिग्धे कर्तुमुचितः, उक्तेषु सन्देहाभावादत्राविवक्षितत्वात् ॥ १८ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

एवं पृष्टो भगवानुत्तरमाह – मिथ इति । स्नेहेन सम्बोधयति—हे सख्य इति । ये मिथो भजन्ति परस्परमुपकुर्वन्तोऽनुवर्तन्ते ते हि यस्मात् स्वार्थे स्वप्रयोजन एव एकान्तो नियत उद्यमो येषां तथाभूताः, अतस्तेषां तत् भजनं स्वार्थार्थं स्वप्रयोजनार्थमेव । नान्यथा न परार्थम् ॥ अतस्तत्र भजने तत्फलं सौहृदं प्रेम, धर्मो वा नोत्पद्यते इत्यर्थः ॥ १७ ॥ ये वै अभजतो भजन्ति ते करुणाः कृपालवः । करुणा तेषां भजने परोपकारे प्रवर्तिकेत्यर्थः ॥ तत्र दृष्टान्तमाह– मातापितरौ यथा कृपया पुत्रान् भजतः तथेति । हे सुमध्यमाः ! अत्र निरपेक्षभजने निरपवादो निर्बाधो धर्मो भवति । धर्मोत्पत्तौ विवादो नास्तीत्यर्थः ॥ सौहृदं स्नेहश्चोत्पद्यते इत्यर्थः ॥ १८ ॥

अन्वितार्थप्रकाशिका

अभिप्रायं विद्वानुत्तरमाह—मिथ इति ॥ हे सख्यः ! ये मिथः परस्परमुपकारप्रत्युपकारापेक्षया भजन्ति ते स्वात्मानमेव भजन्ति नान्यम् । ते हि यस्मात् स्वार्थे स्वप्रयोजन एव एकान्तो नियत उद्यमो येषां तथाभूताः अतस्तेषां तत् भजनं स्वार्थार्थं स्वप्रयोजनार्थमेव नान्यथा न परार्थम् । अतस्तत्र भजने तत्फलं सौहृदं प्रेमधर्मो वा नोत्पद्यते ॥ १७ ॥ भजन्तीति ॥ हे सुमध्यमाः ! ये वै अभजतोऽपि भजन्ति किं पुनर्भजतः ते पितरौ यथा मातापितराविव करुणाः कृपालवः सुस्निग्धाश्च । अत्र निरपेक्षभजने निरपवादो निर्बाधो धर्मो भवति सौहृदं स्नेहश्चोत्पद्यते ॥ १८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदुत्तरं कुर्वन् श्रीकृष्ण उवाच मिथ इति । हे सख्यः हि यतः स्वार्थः स्वकीयप्रयोजनं तदर्थ एव एकान्त आवश्यक उद्यमो येषां एवंभूता ये सन्ति ते मिथः परस्परं भजंति तत्र सौहृदं न कपटमयत्वात् स्नेहभावो नास्ति न च धर्मः परलोकप्रापकं सत्कर्मापि न भवति तर्हि किमर्थं स्वार्थार्थं स्वप्रयोजनार्थमेव अन्यथा तन्न भवति ॥ १७ ॥ ये करुणाः दयालवस्ते अभजतः अभजमानानपि पितरौ यथा तथा भजन्ति हे सुमध्यमाः अत्र भजने करुणानां निरपवादः शुद्धो धर्मः परलोकप्रापकं सत्कर्मास्ति पित्रादीनां सौहृदं स्नेहभावश्च ॥ १८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भाषणमेवाह ॥ भजत इति ॥ एके केचित्, भजतः स्वं भजतः प्राणिनः, अन्वनन्तरमेव, भजन्ति अनुवर्त्तन्ते । तद्भजनानुसारेण भजन्तीत्यर्थः । एके केचन, एतद्विपर्ययं, कुर्वन्ति । अभजतो भजन्तीत्यर्थः । तद्भजनानपेक्षमभजतोऽपि भजन्तीति भावः । अन्ये तु, उभयान् भजतश्चाभजतश्चेत्यर्थः । न भजन्ति । भोः कृष्ण, एतत् पक्षत्रयस्वरूपं, तद्गुणदोषतारतम्यं च, साधु यथा तथा, नोऽस्मभ्यं, ब्रूहि ॥ १७ ॥ विदिताभिप्रायो भगवांस्तदुत्तरमाहुः ॥ मिथ इति ॥ हे सख्यः, ये मिथः, भजन्ति, परस्परमुपकुर्वन्तो वर्त्तन्ते इत्यर्थः । ते हि स्वार्थे स्वप्रयोजने निमित्ते एव एकान्तत उद्यमो येषां तथाभूताः, ते हि स्वप्रयोजनमात्रपरा इत्यर्थः । तत्र सौहृदं न, कपटमयत्वात् । धर्म' न, परलोकप्रापकं सत्कर्मापि न भवतीत्यर्थः । हि यस्मात्, तद्भजनं स्वार्थार्थं, न तु अन्यथा दृष्टोद्देशाद्गोमहिष्यादिभजनवदित्यर्थः ॥ १८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मिथो भजन्तीति : १०.३२.१७.

यः स्वस्मिन् पूर्णकामो भवति युवतयः सर्वदा तेन पुंसा कस्माद्वाऽस्मिन्विधेया प्रतिपदविविधक्लेशदाऽन्यस्य सेवा ।
ये नामैवं स्थितस्याप्यनिशमपचितिं कुर्वते तत्त एव प्रष्टव्याः पृच्छतैतत्कथमिति यदि मां वच्मि तद्वव्यक्तस्यात् ॥ १८९ ॥

ताद्दक्सत्पुरुषाङ्घ्रिसेवनविधिर्भव्यप्रदः सेवकस्यैवं चेत्तव सम्मतं यदुपते तत्सम्प्रतीदं कुतः ।
त्यक्त्वाऽन्याखिलकार्यमङ्घ्रिभजनं पूर्णस्य ते कुर्वतीरस्मान् यत्सहसा त्वदीयविरहक्लेशानलोऽतापयत् ॥ १९० ॥
नायं तापो विरहदवज्ञो न भ्रमो वाऽनुभुक्तः किन्तु स्नेहो मयि दृढकृतः सत्कृतोऽनन्तभक्त्या ।
नैवं कुर्यां यदि न भवती प्रीतिरीदृङ् मयि स्यात् सिद्धं नित्यादधिकरदितं काम्यमस्मिन् युवत्यः ॥ १९१ ॥

नित्यात्काम्यं समधिकमिद सत्यमस्मादकारित्वामुद्दिश्य व्रतमिह भवान्यर्चनं प्रेष्ठदायि ।
अर्थस्तस्माद्यदयमुदितः श्रीश तद् ब्रूहि कीदृक् श्रद्धा काम्ये रतिरपि च काऽऽधिक्यमप्यस्ति नित्यात् ॥ १९२ ॥
नैवं वाच्यं क्वचिदपि भवेन्नैव जातेऽपि काम्ये साङ्गे कर्मण्यभिमतफलाऽनाप्तिरस्मिन् युवत्यः ।
युष्मत्क्लृप्त व्रतमजनि चेत् क्लृप्तसर्वाङ्गयुक्तं सख्यः सिद्ध्येदविकलफलं तर्हि का तत्र शङ्का ॥ १९३ ॥

साङ्गं बभूव तदनङ्गयुतव्रतं वा साक्षी त्वमत्र हि विभोऽसि सदासवर्गः ।
जानीमहे न च किमप्यपि तु स्मरामः सर्वाङ्गवीक्षणकृता भवता यदुक्तम् ॥ १९४ ॥
सत्यं सख्यो ब्रूत यः कोऽपि नासीद् बाह्याङ्गेषु न्यूनभावोऽखिलेषु ।
स्याद्वा कीदृश्यन्तरङ्गव्यवस्थेत्येष प्रश्नोऽभिप्सितार्थानुरोधात् ॥ १९५ ॥

दृष्ट्वा सर्वान्तरङ्गेष्वपि तव वसतिं त्वत्प्रधानानि कृत्वोदासीनास्तत्र जाता बहिरखिलसदङ्गैकसंगोपनेहाः ।
तान्यप्यङ्गानि सर्वाण्यविकलमनुदासीन एवाऽवलोक्य साङ्गानङ्गान्तरङ्गानवगतमतिवत्त्वं कथं भो ब्रवीषि ॥ १९६ ॥

यूयं यद्यद् वदत सकलं सत्यमेवं तथापि दृष्टाऽनङ्गस्थितिरपि मया तत्र कर्मण्यतन्द्रम् ।
साक्षित्वं मे कथितमिह यत्तच्च सत्यं परन्तु कस्मिन्देयं क्व च खलु न वेत्यत्र नातोऽस्मि मुग्धः ॥ १९७ ॥
यच्चानङ्गस्थितिविलसनं यच्च नाज्ञानपूर्वं किं चारब्धव्रतविकलताहारि मुख्याङ्गमेव ।
इत्थं भूयः सशपथमहो श्रीमतैवोक्तमर्वाक् कार्यानन्त्यादजनि भवतो विस्मृतिर्नो पुनर्नः ॥ १९८ ॥

त्वत्साक्षि त्वन्निमित्तं त्वदुदितविधिनैवाखिलं कर्मजातं तद्देवाकारि नो वेत्यपर इह लसत्येव साक्षी विवस्वान् ।
सोऽस्मिन्काले विदेशं गत इति भवता नैव वाच्यं यदस्ति श्रौतो घोषो जगत्यां स हि भवति परं दक्षिणं चक्षुरैशम् ॥ १९९ ॥

अस्माकं सकलाङ्गसुन्दरमभूत् त्वत्प्रीतिसंपादकं गोविन्दाखिलमेव कर्म न मनाक् तत्रास्ति नः संशयः ।
यच्छ्रुत्वा तवपारिहासिकमृषाभाषाविशेषानसौ सत्साक्षी तव दक्षिणाक्षिग-जगच्चक्षुर्मुहुः कम्पते ॥ २०० ॥

यदुकुलतिलक त्वत्सङ्गमोऽसङ्गमोऽपि समगतिरिति भाति प्रायशः स्वानुभूत्या ।
तव हि विरहकाले प्रादुरासीद्विदेहस्थितिरिह च विदेहावस्थितिः सङ्गमेऽपि ॥ २०१ ॥
यश्चिन्तयत्यनिशमेव हितं स लोके मित्रेति नामकलितो भवति स्वभावात् ।
त्वं मित्रमित्रपदपूर्णपदोऽसि तस्मादस्मद्धितं भवति येन तथा विधेहि ॥ २०२ ॥
विचित्रतरचातुरीप्रचयचारुवाचाऽधुना हितोऽहमपराजितोऽपि तदितः प्रसादोन्मुखः ।
भवेदभिमतं मनःसुखदमत्र यद्यत्प्रिय प्रियाः प्रतिपदं करोम्यविरतं हि तत्पूरणम् ॥ २०३ ॥

मम त्वं हितकारीति वेदान्ता मा वदन्त्विदम् । मदिष्टकरणादीश तथाऽहं वच्मि साम्प्रतम् ॥ २०४ ॥

कृष्णप्रिया

भगवान् श्रीकृष्णने कहा कि हे प्रिय सखियां ? जो समाज परस्पर का भजन करते है या कार्य करते हैं वह पक्ष यद्यपि योग्य है फिर भी उस प्रकार में उस सम्बन्ध में न तो सौहार्द है या तो धर्म है । वह भजन, वह सम्बन्ध केवल स्वार्थ के लिए किया जाता है और कोई हेतु नही होता है ॥ १७ ॥ दूसरा समाज दूसरा वर्ग भजन करने वालों का भी भजन करता हैं वह दो प्रकार का है, एक सहज करुणाशील साधुजन है और दूसरे माता पिता आदि पुण्यजन है ! कोमल कटी व्रज वनिताऐं ? इस पक्ष में इन सुजनों में अपवाद रहित धर्म है और साहार्द भी है ॥ १८ ॥

भजतोऽपि न वै केचिद् भजन्त्यभजतः कुतः । आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः ॥ १९ ॥

नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तिवृत्तये[1] ।
यथाधनो लब्धधने विनष्टे तच्चिन्तयान्यन्निभृतो न वेद ॥ २० ॥

---

१. वृत्तयो यथा–विज. । २. तथैव मत्तः फलसम्पदः स्युरुच्चावचाः कल्पतरोरिवार्थिनाम् । विजयेऽधिकम् ।

कर्दमक्षमा

अन्वयः—(ये) केचित्, भजतः, अपि, न, वै, भजन्ति, (तर्हि) अभजतः, कुतः (भजिष्यन्ति) एते, हि, आत्मारामा, आप्तकामाः, अकृतज्ञः, गुरुद्रुहः (इति, चतुर्विधाः, सन्ति) ॥ १९ ॥ हे सख्यः ? अहम्, तु, भजतः, जन्तून्, अपि अमीषाम्, अनुवृत्ति वृत्तये. न भजामि यथा, अधनः, लब्धधने, विनष्टे, (सति) तत्, चिन्तया, निभृतः अन्यत्, न, वेद ॥२०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तृतीयप्रश्नोत्तरं भजतोऽपीति । अयमर्थः । ते तु चतुर्विधाः । एके आत्मारामा अपराग्दृशः । केचिदाप्तकामा विषयदर्शिनोऽपि पूर्णकामत्वेन भोगेच्छारहिताः । अन्येऽकृतज्ञाः संमूढाः । अन्ये तु गुरुद्रुहोऽतिकठिनाः । 'स पिता यस्तु पोषकः' इति न्यायादुपकर्ता गुरुतुल्यस्तस्मै द्रुह्यन्तीति तथा ते ॥ १९ ॥ अत्र चरमकोटिगतमात्मानं मत्वाऽक्षिसंकोचैः परस्परं गूढस्मितमुखीस्ता दृष्ट्वाऽऽह । नाहं त्विति हे सख्यः अहं तेषां मध्ये न कोऽपि किं तु परमकारुणिकः परमसुहृच्च । कथम् । अमीषां भजतामनुवृत्तिवृत्तये निन्तरध्यानप्रवृत्त्यर्थं तान्न भजामि । एतत्सदृष्टांतमाह । यथेति । तस्य धनस्यैव चितया निभृतः पूर्णो व्याप्त इति यावत् । अन्यत्क्षुत्पिपासाद्यपि न वेद ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तृतीयप्रश्नस्य 'नोभयांश्च भजन्त्यन्ये' इत्येवंरूपस्य उत्तरं प्रस्फोटयति-अयमर्थ इति । ते उभयभजनहीनाः । एके मुरुयाः । न पराक् बहिर्विषयान्पश्यन्ति किं त्वात्मानमेव केवलं ये पश्यन्ति तेऽपराग्दृशः ज्ञानिनः । केचित् तद्विशेषाः । आप्तः कामो येषां ते "आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् । तद्वत्कामा यं प्रविशन्ति सर्वे" इत्यादिस्मृतेर्ज्ञानिनां कामनोदयाभावात् । अन्ये प्राकृताः । संमूढाः अतिमूढाः । अन्ये तदितरे । अतिकाठिन्यं विना गुरूणां हिताशंसिनां द्रोहो न भवतीत्यभिप्रेत्याह–गुरुद्रुहः अतिकठिनाः ॥ तृतीयप्रश्नस्योत्तरमाह–भजतोऽपीति । ते यथोत्तरन्यूनाश्चतुर्विधाः । आत्मारामा अबहिर्दृशः एके । अन्ये आप्तकामाः, बहिर्दर्शित्वेऽपि स्वत एव पूर्णकामत्वेन न परतो भोगेच्छवः । अपरे अकृतज्ञाः, परतो भोगेच्छुत्वेऽपि परैः कृतमुपकारादिकं न जानन्ति । अन्ये गुरुद्रुहः, परैः कृतमुपकारादिकं न मन्यतां प्रत्युत तेभ्यो गुरु अधिकं द्रुह्यन्ति ते निर्हेतुकद्रोहिणः, सहेतुकद्रोहिणः, सहेतुकद्रोहिणस्त्वल्पद्रुहः कैमुत्यप्राप्तत्वेन तदन्तर्भूता एवं तथापालकत्वाद्गुरवश्च ते द्रुहश्चेति गुरुद्रुहो विश्वस्तघातिनश्चेति त्रिविधद्रोहोऽप्यभजनमेव । ततश्च प्रथमप्रश्नोत्तरस्योदाहरणमेकमेव, द्वितीयप्रश्नोत्तरस्य द्वे, तृतीयप्रश्नोत्तरस्य षडित्येवं नव ॥१९॥ अत्र चतुर्षु । चरमकोटिगतम् अन्त्यकक्षाप्रविष्टम् । आत्मानम् श्रीकृष्णम् । मत्वा ज्ञात्वा । अक्षिसंकोचैः ईषन्नेत्रचालनैः । परस्परगूढस्मितमुखीः अन्योन्यगुप्तेषद्धसास्याः । ताः गोपीः दृष्ट्वा श्रीकृष्णो वक्ति – नाहं त्विति । तेषाम् चतुर्णाम् । न कोपि अन्यतमोऽपि न । किन्तु अपि तु । परमाकारुणिकत्वादिकं शंकते—कथमिति । तान् भजतः । एतत् वृत्तम् । अधनो दरिद्रः । मम सकृत्संभूय पुनरन्तर्द्धानं स्वस्मिन्प्रीत्यतिशयार्थम् "सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघ । मत्कामः शनकैस्साधुः सर्वान्मुञ्चति हृच्छयान् ॥" इति नारदं प्रति मदुक्तेः । भक्तसंसृतिविनाशार्थमेव मम लीलेति भावः ॥ तत्र प्रथमद्वितीयप्रश्नोत्तरोदाहरक्षेषु त्वं वर्तसे तृतीयप्रश्नोत्तरोदारणेषु मध्ये कतम इति चेत्–श्रृणुत, भो मत्मुखेनैव मत्पराजयं शुश्रूषवो मिथः स्मितविलसितकटाक्षनटनचातुरीधुरीणाः सख्यः शृणुत—नारायणत्वेनात्मारामः पूर्णकामश्च भवन्नपि नंदपुत्रत्वेनानात्मारामोऽ पूर्णकामश्च, गोपबालत्वेनानधीतनीतिशास्त्रत्वादकृतज्ञो भवन्नपि नारायणत्वेन सार्वज्ञ्यात्कृतज्ञश्च, सविलासादिभिर्मुहुः प्रणीतानामपि युष्माकं सकृन्मात्रत्यागेन द्रोहाद्गुरुध्रुगपि भवन्पुनः स्वदर्शनानंददानान्न गुरुध्रुक् च । तर्हि निश्चयेन को भवति भवानिति चेत्, तत्राह—नाहमिति । तुर्भिन्नोपक्रमे । जन्तून् जीवमात्राणि भजतोऽप्यहं न भजामि । तर्हि पूर्वतः को भेदस्तत्राह—अमीषां भजतामनुवृत्तिर्मद्भजनं तस्या वृत्तये जीविकायै । हे अबला मदभिप्रायं ज्ञातुमसमर्थाः हन्तहन्त यमेवोपायं करोमि स एव विफलीभवति तस्मान्मय्यपराधिन्यनुग्रहलेशोऽपि कृष्णस्य नास्ति धिङ् मामिति प्रतिक्षणं निर्वददैन्यादिवृद्ध्या कामक्रोधाद्यनुपगमैर्भक्तिः प्रदीप्तीभवत्यजातप्रेम्णात्, जातप्रेम्णां तु अनुवृत्तिर्मदासक्तिस्तस्या जीविकार्थं न भजामि दर्शनं दत्त्वाप्यन्तर्भवाति तत एवानुवृत्तिरासक्तिः प्रवृद्धीभवति । तत्र जातप्रेमस्वेव दृष्टान्तः—यथेति । तस्य धनस्यैव चिन्तया निभृतः पूर्णः, व्याप्त इति यावत् । अन्यत् क्षुत्पिपासाद्यपि न वेद अतो मां भजतां मदनुवृत्तिरेव वाञ्छिन्त तस्या आधिक्येन संपादनादहंता न प्रकटमभजन्नप्यप्रकटमधिकमेव भजामीत्यहमपि वस्तुतः करुण एव, द्वितीयप्रश्नस्योदाहरणीभूतो यथा भवत्य इत्यतो मम स्वदर्शनदानादाने एव भजनाभजनेन व्याख्येये । "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति वस्तुप्रतिज्ञाया अन्यथा भावानर्ह्यादिति भावः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वै एव नैव भजन्ति हि प्रसिद्धौ एवमकृतज्ञानामज्ञत्वे माभजने मभिप्रेतं ज्ञात्वापि ये न भजन्ति ते त्वशेषदोषयुक्ता इत्याह । गुर्विति । गुरूपेक्षका इत्यर्थः प्राणदण्डोचितविप्रादेरिव तादृशस्योपेक्षैव द्रोह इति । अत्र तु पदार्थे तात्पर्य्यं नास्ति किंतु गौण्या वृत्त्या कृतोपकारोपेक्षका गम्यन्ते तेन च तेषामर्थधर्मसौहृददयापेक्षाराहित्यं व्यज्यत इति ज्ञेयम् ॥ १८ ॥ तदेवं तासां मते

तदादिभिः सह विचित्रक्रीडया रममाणस्य तस्यात्मारामत्वादिद्वयं न घटत एव । विरहार्त्तिप्रदत्वेन नच पूर्वोक्ते सापेक्षनिरपेक्षभजने तादृशोत्तरादिचातुर्य्येण विज्ञताभिव्यक्तेः न कृत्वा चाकृतज्ञत्वं ततो गुरुध्रुक्त्वं निर्विशेषं काठिन्यमेव पर्यवसितमित्यभिप्रेत्य तैर्व्याख्यातम् । तत्र चरमेति पूर्वं कृतज्ञतामात्रमाषादयितुमपृच्छन्नधुना तु ततोऽपि दोषवैशिष्ट्यपर्यवसानेन सन्तुष्टा जाता इत्यभिप्रेत्य व्याख्यातम् । अक्षिनिकोचैरिति । अथवा काठिन्यापादनार्थ एवायं प्रश्नोद्यम इति व्याख्येयम् । अथाभजनेऽपि मम सर्वेभ्यो भजनकृद्भ्यः उत्तमभजनत्वं किमुत भजन इत्याह । नेति । तुशब्दो भिन्नोपक्रमे । आत्मारामादि चातुर्विध्य रहिताऽप्यहं भजतोऽपि जनान् न भजामि "नाहं वसामि वैकुण्ठे योगिनां हृदयेन च । मद्भक्ता यत्र गायन्ति तत्र निष्ठामि नारदे" त्यादि मदुक्तिभिस्तन्निकटे स्थितमपि स्वं तेभ्यो न दर्शयामीत्यर्थः । नञः सर्वादौ प्रयोगः स्ववाक्येनैव स्वस्य यन्त्रणापत्त्या परमवैयग्र्यात् । हे सखया ! इति आत्मारामत्वादिराहित्यमेव साधितम् । जन्तूनित्यविशेषात् सर्वत्रैवेदृशो मम व्यवहारो नतु भवतीष्वेवेति नात्मनि ममौदासीन्यं । शङ्कनीयमिति भावः । कथं न भजसि तत्राह अमीषामिति । अनुवृत्तीनां निरन्तरध्यानानां वृत्तिर्यस्मात्तस्मै सन्ततप्रेमप्रकर्षायेत्यर्थः । नन्वस्माकं त्वय्यनुवृत्तिवृत्तिः सदा वर्त्तत एवेति चेत् सत्यं तथापि वैशिष्ट्यार्थमिति सदृष्टान्तमाह । यथेति विशेषतो नष्टे हारिते इति वैयग्र्यविशेषो दर्शितः । अत एव तच्चिन्तया नितरां भृतो व्याप्तः । तदेवं रूपगुणादिना सर्ववशित्वात् सर्वार्थपूर्णत्वेन प्रेममात्र सापेक्षत्वेन च प्रत्युपकारानपेक्षतया साम्येऽपि करुणपितृनप्यतिक्रम्य स्वस्य हितैषित्वं दर्शितं स्वादेयस्ववशीकारसर्वपुरुषार्थशिरोमणिस्वप्रेमदानात् । तथा प्रियप्रेमभरसास्वादाधिक्यं च बोधितम् । सन्ततततद्दर्शनलालसात् तदर्थं तद्विरहदुःखसहनाच्चेति ज्ञेयम् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वै एव नैव भजन्ति । हि हेतौ निश्चये वा । न कृतं तद्भजनं जानन्ति अनुसन्दधतीत्यकृतज्ञा लोकाद्यपेक्षावत्त्वेऽपि प्रत्युपकारसामर्थ्येऽप्यज्ञानेन तदकरणान्मूर्खा एवेत्यर्थः । एवं तेषामज्ञत्वेनाभजनमभिप्रेतम् । सामर्थ्यवन्तो ज्ञात्वापि ये न भजन्ति, ते त्वतिदुष्टा इत्याह—गुर्व्विति । एवं तासां पादत्रयकृतप्रश्नस्य पद्यत्रयेण प्रत्युत्तरम् , तासां संक्षेपादिवाक्यगुणविशेषेण स्वस्मादपि माहात्म्यविशेषणं विस्मरणार्थम् । एवं तासां मते श्रीभगवतो विचित्रक्रीडयात्मारामता आप्तकामता च न घटेतैव, 'गुरु' शब्दप्रयोगेण गुरुध्रुक्ता न च ज्ञेयैव, विरहार्त्तिदत्वेन भजनासिद्ध्या नाद्यपक्षद्वयमपि संगच्छत । अतोऽकृतज्ञतैव परिशिष्येतेति तथा चाग्रे वक्ष्यते—'अकृतचेताः' इत्यादि श्रीविष्णुपुराणे (५।२४।१६) श्रीबालरामायाने—'अकृतज्ञध्वजो हि सः' इति अत एव तैरपि व्याख्यातम् । अकृतज्ञत्वं तद्वचनेनेवेति चरमकोटिगतमिति च, तत्रापि चरमकोटित्वं घटेतैव । यद्वा, गुरुध्रुक्पदेन अतिकठिना इति तैर्व्याख्यातम् तदत्रैव चरमकोटिगतत्वं संगच्छत एव ॥ १९ ॥ 'तु' शब्दो भिन्नोपक्रमे, आत्मारामत्वादिचातुर्विध्यरहिताऽप्यहं न भजामि, नञः सर्व्वादौ प्रयोगः स्ववाक्येनैव स्वस्य यन्त्रणापत्त्या परमवैयग्र्यात् , हे सखय इति आत्मारामत्वादिराहित्यमेव साधितम् । अन्यथा सख्यासम्भवः । जन्तूनिति विचारविशेषराहित्यमभिप्रेतम् , अन्यथा स्वत एवानुवृत्तिसिद्धिः । नन्वस्माकं त्वय्यनुवृत्तिं सदानुवर्त्तत एवेति चेत् , सत्यम् , विशेषेण तत्सम्पत्त्यर्थमिति सदृष्टान्तमाह—यथेति । विशेषतो नष्टे इति पुनः प्राप्तिसम्भावना निरस्ता, अत एव नितरां भृतो व्याप्तः ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

न भजामि न शीघ्रदर्शनफलकरो भवामि अनुवृत्तयेऽनुवर्तनस्य मदनुध्यानरूपस्याविच्छेदाय तच्चिन्तया धनचिन्तया अदृश्यमानस्यात्यन्ताभिनिवेशित्वे दृष्टान्तः यथेति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ तृतीयं त्रेधाविभज्य दर्शयति । भजतोऽपीति । ये भजतोऽपि नैव भजन्ति कुतोऽभजतो भजेयुः ते त्वात्मारामादयः केवलं स्वदेहमात्रपोषणपरायणा नतु ज्ञानिनस्तेषां सर्वभूतसुहृत्त्वेन द्वितीयकोट्यन्तर्गतत्वात् आप्तकामाः शब्दादिविषयभोगतदुपकरणतत्स्थानसमृद्धिमन्तः अकृतज्ञाः कृतघ्नाः अकृज्ञानामेव परां काष्ठां दर्शयति । गुरुद्रुह इति । यद्वाऽकृतज्ञत्वकार्यं दर्शयति । गुरुद्रुह इति । गुरुभिः कृतमहोपकारमननुस्मृत्य तेभ्योऽपि द्रुह्यन्तीति तथाभूताः एतेषां त्रयाणामितरभजनाभावात्प्रवर्त्तकसाध्यगुणदोषा नोक्ता इति भावः ॥ १९ ॥ इत्थं भगवतोक्तास्ता गोपीस्तावदनुवर्तमाना अस्मानभजन्नयं तृतीयकोट्यन्तर्भूतस्तत्रापि नात्मारामो नाप्याप्तकामश्च तथा चेदस्माभिः सह वने विहारासम्भवादतोऽयं नूनमकृतज्ञ इत्यक्षिसङ्कोचैः परस्परं सूचयन्तीर्दृष्ट्वा तत्कारणज्ञो भगवान् पुनराह । नाहं त्विति हे सख्यः ! भजतोऽपि जन्तून्नाहं भजामि न तेषां दृष्टिगोचरो भवामीत्यर्थः । तथापि नाकृतज्ञ इतिभावः । तर्हि किमर्थं न भजसीत्यत्राह । अमीषां मां भजतां जन्तूनामनुवृत्तिवृत्तयेऽनुवर्त्तनस्य मदनुध्यानरूपस्याविच्छेदाय अनेनात्मनः कृतज्ञत्वं परमकारुणिकत्वं चोक्तं प्रियस्यादृश्यमानस्यात्यन्ताभिनिवेशविषयत्वे दृष्टान्तमाह । यथेति । अधनो निर्धनः पुमान् कदाचिद्दैवाल्लब्धेन विनष्टे सति तच्चिन्तया नष्टधनचिन्तया निभृतो व्याप्तः अन्यन्न वेद नान्यत्स्मरति किन्तु तदेव नष्टं धनमविच्छेदेनानुस्मरन्नवतिष्ठते अविनष्ट इति वाच्छेदः । तस्मिन्नविनष्टे सति तच्चिन्तया विषयचिन्तया निभृतः पूर्णः तद्धनमन्यच्च नवेद नानुस्मरति किन्तु प्रमत्तो भवतीतिति भावः । अस्मिन् व्यतिरेके दृष्टान्तः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

असंप्रज्ञातसमाधिस्थस्य लक्षणमाह । भजतोऽपीति । अत्र केचिज्जनाः भजतोऽपि फलार्थितया सेवमानानपि न भजन्ति स्वप्रयोजनाभावात् । कथं तदित्यत्राह । आत्मेति । आत्मनि परमात्मन्येवारामः क्रीडा येषां ते तथा बाह्यप्रवृत्तिशून्या इत्यर्थः । तदपि कथमित्याशङ्क्य सुखार्थं हि प्रवृत्तिः सुखन्तु स्वत एव पूर्णमित्याशयेनाह । आप्तकामा इति । काम्यत इति कामः आनन्दः हिशब्दो हेतौ आनन्दाप्तौ निमित्तमाह । अकृतेति । अकृतं परमात्मानं जानन्तीति तज्ज्ञानं च निष्पापत्वादित्याह । गुरुद्रुह इति । गुरूणि पापानि द्रोहितवन्तो नाशितवन्त इति नास्त्यकृतः कृतेनेति श्रुतिः नराणां क्षीणपापानामिति स्मृतिः कीदृशाः कृतघ्ना इत्यतो वाह भजतोऽपीति । ये केचिद्भजतः शरणार्थितया सेवमानानापि न भजन्ति ग्रहणलक्षणां सेवां न कुर्वन्ति अभजतः कुतो भजन्ति तत्र कारणमाह । आत्मारामा इति । परमात्मविषयमतिरहिता देहलक्षणात्मनि नितरां रताश्च तर्हि कुत्र रतिरित्यत्राह । आप्तेति । आप्ते विस्रब्धे स्त्रीजने कामो येषां ते तथा एतादृशाः कृतघ्नाहि कृतं न जानन्ति नाशयन्ति च अतएव गुरुद्रुहः देवादिगुरूणां द्रोग्धार इत्युच्यन्ते हविराद्यदानात् ॥ १९ ॥ अहमेष्वेक इति भवतीनामाशङ्का माभूदित्याह । नाहमिति । अपि समुच्चये तुशब्दो विशेषप्रकाशकः अहं भजतः फलार्थितया सेवमाना न भजतोऽपि फलार्थितया असेवमानान्न भजामि तदिच्छया फलं न दास्यामि "यमेवैष बृणुते तेन लभ्य"इति मम विजयशिखामणेः ततः प्रयोजनाभावात् तेभ्यः प्रयोजनं न ममेत्यर्थः । तर्ह्येषां सेवानिष्फला किं नेत्याह । अमीषामिति । अमीषामुभयेषां यथा सेवाः स्युः तथा तथा मत्तः उच्चावचाः सेवाफलसंपदः स्युरेव अर्थिनां योग्यानामधिकारिणां कल्पवृक्षाद्यथाफलानि तथेत्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तृतीयप्रश्नस्योत्तरम्—भजतोऽपीत्यादि । केचिद् भजतोऽपि न भजन्ति, किं पुनरभजतः ? के त इत्याह—आत्मारामा इत्यादि । आत्मारामाणामनन्यस्फूर्त्तेः आप्तकामानां पूर्णत्वात् अकृतज्ञानामज्ञत्वात्, गुरुद्रुहां पापाधीनमनोवृत्तित्वाच्चत्वार एव तथा ॥ १९ ॥ किन्तु उक्तेषु धर्मिषु अभजन्तं मां भवत्यो भजन्तीति स्वासां कारुणिकत्वम्, मम चाकृतज्ञता नाशङ्कनीयेत्याह—नाहन्त्वित्यादि । अहन्तु अहं पुनर्यद्यप्यात्माराम प्राप्तकामश्च, तथापि न तदुभयत्वेन नाप्यकृतज्ञादित्वेन हे सख्यः ! भजतोऽपि जन्तून् प्राणिमात्रमपि भजामि, किन्तु अमीषां जन्तूनामनुवृत्तिवृत्तयेऽनुगतिसातत्याय भजत एव यदि भजामि, तदा पूर्णत्वाभिमानेन पुनरनुवृत्तिं न करिष्यन्तीति । नन्वभजने यदि ते विरज्येरन्, तदा किं स्यात् ? नैवमित्याह—यथेत्यादि । अहं तु सर्वेषां धनं धनं प्रति कोऽपि न विरज्यति । इत्यत्र व्यतिरेके दृष्टान्तः—यथाऽधनः केनाप्युपायेन लब्धस्य धनस्य पुनर्विगमे तच्चिन्तयाऽन्यन्निभृतं निपुणं न वेद न जानाति । अतः साधूक्तम्–अनुवृत्तिवृत्तय इति । किन्तु एतत् सामान्यजन्तुपरम्, न तु भवद्विधपरम्; यतो भवत्यः सख्युर्मम सखीत्वे सद्धर्मिण्यः ॥ २० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नाहन्त्वित्यादि । अहन्तु आत्मारामादीनां मध्येनैकोऽपि भवतीभिः किमन्योन्यं सस्मितमीक्ष्यते ? तर्हि कथमस्मान्न भजसीत्याह—अनुवृत्तिवृत्तये यथाधन इत्यादि । तथापि तासां मुखप्रसादमनालोक्य पुनर्वदति—किमेतेन मयापराद्धमेव, तस्मादयमपराधः क्षम्यतामित्याह—मयेत्यादि । परोक्षं भजता मनसा भवतीभिरेव भजता तिरोहितं मा सूयितं मार्हत, मामसूयितुं मार्हत । कुतः ? प्रियश्चेत्, यूयञ्च प्रियाश्चेन् प्रियस्यापराधः प्रियाभिरेव क्षम्यते । ततोऽहमृणीत्याह—न पारयेऽहमित्यादि । विबुधायुषापि देवायुर्मानकालेनापि ॥ २०-२२ ॥

इति द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तृतीयप्रश्नस्योत्तरमाह । भजतोऽपीति । ते यथोत्तरन्यूनाश्चतुर्विधाः । आत्मारामाः अबहिर्दृश एके । अन्ये आप्तकामाः बहिर्दर्शित्वेऽपि स्वत एव पूर्णकामत्वेन न परतो भोगेच्छवः । अपरे अकृतज्ञाः परतो भोगेच्छुत्वेऽपि परैः कृतमुपकारादिकं न जानन्ति । अन्ये गुरुद्रुहः परैः कृतमुपकारादिकं न मन्यन्तां प्रत्युत तेभ्यो गुरु अधिकं द्रुह्यन्ति ते निर्हेतुकद्रोहिणः । सहेतुकद्रोहकमुत्यप्राप्तत्वेन तदन्तभूतः एव । तथा पालकत्वम् गुरवश्च ते द्रुहश्चेति गुरुद्रुहो विश्वस्तघातिनश्चेति त्रिविधद्रोहोऽप्यभजनमेव ततश्च प्रथमप्रश्नोत्तरस्योदाहरणमेकमेव । द्वितीयप्रश्नोत्तरस्य द्वे तृतीयप्रश्नोत्तरस्य षडित्येवं नव ॥ १९ ॥ तत्र प्रथमद्वितीयप्रश्नोत्तरोदाहरणेषु त्वं न वर्त्तसे । तृतीयप्रश्नोत्तरादाहरणेषु मध्ये कतम इति चेत् शृणुत भो मन्मुखेनैव मत्पराजयं शुश्रूषवो मिथः स्मितविलसितकटाक्षणचातुरीधुरीणाः सख्यः ! शृणुत नारायणत्वेनात्मारामाः पूर्णकामश्च भवन्नपि नन्दपुत्रत्वादनात्मारामोऽपूर्णकामश्च । गोपबालकत्वेनानधीतनीतिशास्त्रत्वादकृतज्ञो भवन्नपि नारायणत्वेनैव सार्वज्ञ्यात् कृतज्ञश्च सविलासादि-

भिमुहुः प्रणीतानामपि युष्माकं सकृन्मात्रत्यागेन द्रोहाद्गुरुध्रुगपि भवन् पुनः स्वदर्शनानन्ददानान्न गुरुध्रुक च। तर्हि निश्चयेन को भवति भवानिति चेत्तत्राह। नाहंत्विति। तु भिन्नोपक्रमे। जन्तून् जीवमात्राणि भजतोऽप्यहं न भजामि तर्हि पूर्वतः को भेदस्तत्राह। अमीषां भजतामवृत्तिर्मद्भजनं तस्या वृत्तये जीविकायै। हे अबळाः! मदभिप्रायं ज्ञातुमसमर्थाः। हन्त हन्त यमेवोद्यमं करोमि स एव विफलीभवति तस्मान्मय्यपराधिन्यनुग्रहळेशोऽपि कृष्णस्य नास्ति धिङ्मामिति प्रतिक्षणं निर्वेददैन्यादिवृद्ध्या कामक्रोधाद्यनुपगमैर्भक्तिः प्रदीप्तीभवत्यजातप्रेम्णां जातप्रेम्णान्तु अनुवृत्तिर्मदासक्तिस्तस्या जीविकार्थं न भजामि दर्शनं दत्त्वाप्यन्तर्दधामि तत एवानुवृत्तिरासक्तिः प्रवृद्धीभवति। तत्र जातप्रेमस्वेव दृष्टान्तः। यथेति। तस्य धनस्यैव चिन्तया निभृतः पूर्णो व्याप्त इति यावत्। अन्यत् क्षुत्पिपासाद्यपि न वेद। अतो मां भजतां मदनुवृत्तिरेव वाञ्छिता तस्या आधिक्येन सम्पादनादहन्तान् प्रकटमभजन्नप्यप्रकटमधिकमेव भजामीत्यहमपि वस्तुतः करुण एव द्वितीयप्रश्नस्योदाहरणीभूतो यथा भवत्य इत्यतो मम स्वदर्शनदानादाने एव भजनाभजने न व्याख्येये। ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति वस्तु प्रतिज्ञाया अन्यथा भावानर्हादिति भावः॥ २०॥

रसिकाह्लादिनी–टीका

तृतीयप्रश्नोत्तरमाह—भजतो इति, केचिन्महापुरुषा भजतोपि जनानभजन्ति, अभजतां का कथा ते च चतुर्विधा। आत्मरामा अनुसन्धानरहिता यत आत्मन्येव रमन्तेऽतो भजन्तो देहमपि नानुसन्दधते दैहिकानां भजनस्य का कथेति, अन्ये आत्मकामाः अतोऽधिकस्य कामस्यावकाशाभावादन्यभजनं नापेक्षन्ते सर्वकामपूर्णत्वात्। यथा भुक्तवति पुरुषे भुंक्ष्वेति वचनस्य वैयर्थ्यम्। अत उभयेषां भजने सार्थस्य धर्मस्यात्राऽप्यसिद्धे एतयोरुभयोः स्वरूपकथनमेव। अतोऽपि आत्मारामत्वमाप्तकामत्वं च न सञ्जघटीति। तयोरुपेक्षया विलासस्य स्वीकृतत्वात्। तृतीयपक्षमाह—अकृतज्ञा इति। अन्यकृतं भजनमुपकारं न जानन्ति, ये तु प्रत्युपकारसमर्था अपि तदीयोपकारसापेक्षा अपि प्रत्युपकारकर्त्तृत्वेन भजन्ति तेषामज्ञानमेव हेतुरभजत इति। ते अकृतज्ञा इति अहं कृतज्ञो न भवामि। अस्योत्तरं अग्रिमश्लोके वक्ष्यति। "मया परोक्षं भजते"ति। चतुर्थपक्षमाह ये तु सामर्थ्ये सत्यपि ज्ञात्वैव न भजन्ति तेऽतिनिर्दया इत्याह गुरुद्रुह इति। यः कश्चित्स्वस्याभीष्टसम्पादको यश्च पोषकः स तु गुरुः पूज्यस्तस्यैव द्रुह्यन्ति ये द्रोहस्य द्वैविध्यं जीवनहरणेन सर्वस्वहरणेन वा तत् द्वयं जातमेवासामभिप्रायेण। तथा हि विप्रलम्भे दशस्यवस्थायाः सन्निहितत्वात् जीवनहरणमपि सम्भावितमस्ति। सर्वस्वहरणं च जातमेव गृहसुखस्यापहृतत्वात्, यद्वा सर्वस्वं तेन सह विलासं तस्याऽप्यपहृतत्वात्। तेन गुरुद्रोहेन तु दुःखस्यानिवारणात् एतादृशः ते गुरुद्रुहस्त्वतिकठिना इत्यर्थः। धर्म-सौहार्दापेक्षाशून्यत्वादेवोऽपेक्षा इत्यर्थः। अस्यापि परिहारस्योत्तरश्लोके वक्ष्यति "नाहं तु सख्य" इति। इदानीं पक्षत्रयस्य विद्यमानत्वात् गुरुद्रोहः परिशिष्यतेऽत एव चरमकोटिगतिमात्मानं मत्वा गुरुद्रोहमिव धनसादृश्यदर्शनात् अक्षिसन्निकोचैः परस्परगूढस्मितमुखीस्त्वादृष्ट्वाह नाहमिति। आचार्याणां हृदयं अभिज्ञाः केचनैवं वदन्ति। आसु गुरुशब्दो नोपपन्नः। स्वमुखेन दास्यस्वीकारात् तदधीनत्वाच्च उपपन्ने वापि द्रोहस्यासम्भवः। मदमानसद्भावेन रसविकलत्वमाकलय्य रसवृद्ध्यर्थमेवान्तर्हितत्वात्। तद् द्रोहेणेति अतो कृतज्ञत्वं परिशिष्यते। तत्रापि चरमकोटिगतत्वमेव वक्ष्यति च भ्रमरगीतायाम् "व्यसृजदकृतचेताः किं नु सन्धेयमि"ति, किं च "परिचरति कथं तत्पादपद्मं तु पद्मा ह्यपि वत हृतचेता उत्तमश्लोकजल्पैरिति"। अहो वताविज्ञाय पादपद्मं कथं श्री सेवते इति आचार्यैर्व्याकृतम्। तथा चाग्रे वक्ष्यति कुरूक्षेत्रयात्रायां गोपीसंसदि "अप्यवध्यायथास्मान् स्विदकृतज्ञाविशङ्कयेति" श्री मुखेन स्वीकृतमिति। अत एवाकृतज्ञत्वं तस्मिन्नापद्यते। तस्यापि परिहारं करिष्यति अनुरूपमुत्तरं दातुमलभमान एव तत्समप्रत्युपकारासामर्थ्यात "न पारयेऽहमिति" पदेन स्वस्मिन् पृणीत्वं तासु पूरिपूर्णत्वमेव समर्थितम् मुखेन वदति एतेषां मध्ये कोऽपि न भवामि दोषचतुष्टयाभावः कथितः। हृदयेन तु स्वदोषमाकल्प्य प्रोक्तं तद्वः प्रतियातु साधुनेति। ननु पादक्रमेण चरमकोटित्वं गुरुद्रोह एव भवति। तत्र समाधत्ते पादक्रमादर्थक्रमो बलीयान्। अग्निहोत्रं जुहोति यवागूं पचतीतिवन ज्ञेयम्॥ १९॥ इदानीं स्वदोषान् स्वमुखेनोद्भाव्यान्यत्र संचारयतमालक्ष्य स्मितेनैवान्योन्यं व्यञ्जयन्ती दृष्ट्वा तत्परिहरन्नाह नाहमिति, तु शब्दनैतच्चतुर्विधेभ्यो व्यतिरेकः प्रदर्श्यते। अहं तु चतुर्विधेषु तेषु रमणप्रतिकूलेषु मध्ये न कश्चन किन्त्वतीति कृपालुं न च नापीश्वरत्वं शङ्कनीयमित्याह। हे सख्य इति। समानशीलव्यसनेषु सख्यमित्युक्तत्वात्। एकार्थाभिः विवेशाच्चेति आत्मारामोऽप्यरीरमत् इत्यादिनाऽऽत्मारामऽत उपेक्षिता साक्षात् मन्मथमन्मथ इत्यनेन कामस्यापि मोहजनकत्वं दाढ्यर्रमणाथमेव। अन्यथा कामपारतन्त्र्ये चरमधातुपातेन विवशत्वोपपत्तेरिति। अत एवाकृतज्ञत्वं नास्ति। "ये त्यक्तलोकधर्माश्च मदर्थे तान् विभर्म्यहमि"त्युक्तेश्च सर्वज्ञत्वमुक्तम्। गुरुद्रोहोऽपि मयि न शङ्कनीय इति। विरहे व्यभिचारिभावानां दुःखवत्प्रतीयमानत्वेपि न दुःखं परिणामे रसपोषकत्वात्। तदुक्तं "श्रृङ्गारो विप्रलम्भं हि न विना पुष्टिमश्नुते" इति मयि कश्चन दोषो न शङ्कनीय इति भावः। तर्हि कथमन्तर्द्धानेन स्थितमिति चेत्तत्राह यमाश्रित्यैव रीतिस्तामाह अहं तु भजतोऽपि जन्तून् विशेषाभावः सूचितः प्राणिनो न भजामि। परोक्षं भजन्नपि तेषु कदाचित् अपरोक्षं भजनं न प्रकाशयामि। अन्ये तूपकारप्रत्युपकाररूपेणाऽन्योन्यं भजन्तो दृश्यन्ते। अहं तु तादृशो न भवामि किं तु विलक्षण इति तु शब्दस्यार्थः। ननु तर्हि किमित्येवं क्रियत इति चेत्तत्र हेतुमाह। अमीषामिति अमीषां भजतामनुवृत्तये निरन्तरध्यानार्थमेव मम तु

सर्वसुहृदत्वात् अयं व्यवहारः। सर्वष्वेकरूप एव दृष्टफलश्च केवलं युष्माष्वेवेत्यपि न शङ्कनीयमित्यर्थः। दृष्टप्रत्ययमर्थं दृष्टान्तेन स्पष्टयति यथाऽधन इति यथा पूर्वमेवाधनो निर्धनः पश्चाल्लब्धे धने विनष्टे हारिते सति तच्चिन्तया निभृतः नितरां भृतः व्यापृतः निमग्नचित्तः सन् अन्यत् क्षुत्पिपासादिकमपि न वेद, इयं तु लोकप्रसिद्धिः। यथा नारदाय सकृद्दर्शयित्वा मया पुनरन्तर्हितं तदा तस्य निरन्तरमनुवृत्तिरेव जाता तथा भवतीनामपि ममान्तर्द्धाने तादृश्येवानुवृत्तीत्यर्थः ॥ २० ॥

विशुद्धरसदीपिका

भजत इति वै एव नैव भजन्तीत्यर्थः। हि प्रसिद्धौ एवमकृतज्ञानामज्ञत्वेनाभजनमभिप्रेतं ज्ञात्वा ये न भजन्ति ते त्वति दोषयुक्ता इत्याह। गुर्विति। गुरूपेक्षका इत्यर्थः। प्राणदण्डोचितविप्रादेरिव तादृशस्योपेक्षैव द्रोह इति भावः। अत्र हि पदार्थे तात्पर्य्यं नास्ति किन्तु गौण्या वृत्त्या कृतोपकारोपेक्षका गम्यन्ते तेन च तेषां धर्म्मार्थं सौहृददयापेक्षाराहित्यं व्यज्यत इति ज्ञेयं "यद्वा स पिता यस्तु पोषक" इति न्यायादुपकर्ता गुरुतुल्यस्तदुपेक्षका गुरुद्रुह इत्यर्थः। अयं विवेक आत्मारामा अपराग्दृशं ते चान्तरनिष्ठत्वेनोपकारापकाराननुसन्धानात् निर्दोषा एव केचिदाप्तकामाः भोगपूर्णत्वेन तदिच्छारहितास्तेयप्यदूष्या अन्येचाकृतज्ञा वालादिवन्मूढास्तेऽपि तथा तुरीयास्तु कृतघ्ना इति महादोषभाज इत्यर्थः ॥ १९ ॥ तदेवं ताभिर्विचित्रक्रीडया रममाणस्य नाद्यद्वयं तादृशोत्तरादिचातुर्य्येण च तृतीयमघटमानं मत्वा परिशेषादतिकाठिन्यमेवास्मिन् पर्य्यवसितमिति परस्पराक्षिनिकोचैः सङ्कोचयन्तामालक्ष्य परमचातुर्य्येणात्मनि तथा तथाभजनेऽपि सर्वेभ्यो भजनवृद्यः उत्तमत्वं किमुत भजन इति संमानमभिनयन्नाह। नाहमिति। तुभिन्नोपक्रमे आत्मारामत्वादिचातुर्विध्यरहितोऽप्यहं भजतोऽपि न भजामि मयापरोक्षं भजता तिरोहितमिति वक्ष्यमाणाद्विद्यमानमपि स्वभजनं मध्ये मध्ये तेभ्यो न प्रकटयामीत्यर्थः। नन्वः सर्वदौ प्रयोगश्च स्ववाक्येनैव स्वस्य यन्त्रणापत्त्या परमवैध्ययादेव हे सख्य इति आत्मारामत्वादिराहित्यमेव साधितं जन्तूनित्यविशेषात् सर्वत्रैव ममेदृशो व्यवहारो न भवतीष्वेवेति नात्मनि ममौदासीन्यं शङ्कनीयं कथं न भजसीति तत्राह। आमीषामिति। अनुवृत्तीनां सन्ततध्यानानां वृत्तिर्यस्मात्तस्मै प्रेमप्रकर्षायेत्यर्थः। नतु काठिन्येनेति भावः। नन्वस्माकं त्वय्यनुवृत्तिः सर्वदा वर्त्तत एव किन्तद्वृत्त्येति चेत् सत्यं तथापि तद्वैशिष्ट्यर्थमिति सदृष्टान्तमाह। यथेति। विशेषत नष्टे हारिते इति वैध्यविशेषो दर्शितः अत एव तच्चिन्तया नितरां भृतो व्याप्तः तदेवं रूपगुणादिना सर्ववशित्वात्सर्वपूर्णत्वेन च प्रत्युपकारापेक्षतया साम्येऽपि करुणपितॄनप्यतिक्रम्य स्वस्य हितैषित्वं प्रदर्शितं स्वादेयस्व वशीकारसर्वपुरुषार्थशिरोमणिस्वप्रेमदानात् एवञ्चात्मनः प्रियप्रेमरसास्वादाधिक्यं सन्ततद्वर्द्धनलोभेन तत्तद्विरहदुःखसहनोच्चति संक्षेपः ॥ २० ॥

श्रीरामनारायणकृता भावभावविभाविका

तृतीयपक्षीयांश्चतुर्धा विभजति। भजतोयपीति। केचित् भजतोऽपि जनान् वै निश्चयेन न भजन्ति तर्हि अभजतः कुतो भजेयुः न कुतोऽपि ते चतुर्विधास्तत्रैके आत्मारामास्तेषान्तु स्वात्मसुखमग्नतयान्यसेवापेक्षास्फूर्त्योरभावान्नान्यकृतसेवायामुत्कर्षमतिर्न वा तद्भजनावकाशो नच तद्भजने किमपि फलोद्भावनमतो न तत्र प्रवृत्तिः। नच तर्ह्यात्मारामसुनिसेवनवैफल्यमाशङ्कनीयं तैस्तत् प्रत्युपकारप्रवृत्त्यभावेऽपि तत्सुकृतस्य तस्मिन्नात्मानन्दपूर्णेऽतिशयाधायकत्वाभावेन "तस्य त्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्या"मिति श्रुतेः तत्सुहृदां तत्फलभावत्त्वाध्यवसायात् ज्ञानीत्वात्मैवमेतमिति स्मृतेस्तस्येश्वरात्मकतयेश्वरद्वारा तत्सेवाफलोत्कर्षस्यावश्यं भावित्वात् "यद्येको ब्रह्मविद्भुङ्क्तेजगत्तर्पयातेऽखिलं तस्माद्ब्रह्मविदे देयं यद्यस्ति वसु किञ्चने"त्यादिस्मृतेश्च अन्ये आप्तकामास्ते त्रिविधा तत्र ये सर्वकामसुखानाम् एतस्यैवानन्दस्येत्यादिश्रुत्यात्मसुखमात्रत्वात्तन्नित्यप्राप्त्यैव प्राप्तसर्वकामास्ते तु प्रथमपक्ष एव गतार्थाः ये च ग्राम्यसुखेषु नित्यार्तिदेन वित्तेनेत्याद्युक्तरीत्या तत्सुखकामे च दुःखं कामसुखापेक्षेत्यादिवाक्यैर्दोषदृष्ट्या तत्र कामाभावेनैवाप्तकामा विरक्तास्तेषामपि भगवत्प्रियत्वात्पूर्वेषामिव प्रत्युपकाराप्रवृत्तिरेव तत्सेवनफलस्यापीशद्वारैव सम्भवान्न सेवनवैफल्यं ये पुनः समृद्धकामत्वादाप्तकामा नृपादयस्तेषान्तत्सेवाकामाभावेन प्रत्युपकाराप्रवृत्तावपि बहुसमृद्धोऽयं कदाचिदपि यदि कृपां करिष्यति तदास्मद्बहुभद्रं भविष्यतीत्याशया जनानां तत्सेवाप्रवृत्तिः अन्ये ये अज्ञाः स्वबुद्धिमान्द्यप्रमादादिनान्यकृतसेवाज्ञानशून्यतयैवाप्रत्युपकारिणस्तेषामपि कदाचित्तत्परिज्ञाने प्रत्युपकारसम्भावनायै पुनर्गुरुद्रुहः कृतघ्ना उपकारिण उपकारं ज्ञात्वापि दुष्टचित्ततयैव तत्प्रत्युपकाराप्रवृत्ताः प्रत्युत विरोधिनस्ते तु दुर्जनत्वादेव सद्भिर्हेयाः परत्र दुःखभागिनश्चेति भावः ॥ १९ ॥ नन्वेतेषु पक्षेष्वस्माकं द्वितीयपक्षनिवेशेऽपि भवतः कस्मिन्पक्षे निवेश इत्यपेक्षायां मम तु तत्सर्वविळक्षणत्वमित्याह। नाहंत्विति। हे सख्य इति सम्बोधनेन नास्मदुक्तौ वञ्चनाशङ्कागन्धोऽपीति भावः। अहं भजतो भजामि अपि तु न तथा वणिज इव स्वार्थार्थं किन्तु मत्तः सेवाफलप्राप्तौ विश्वासेन पुनः तेन स्वस्मिन्ननुवृत्तयेऽनुवृत्तिद्वारा तेषां परमानन्दघनस्वस्वरूपळाभाय चाभजतोऽपि भजामि परन्तु न कथा करुणानामिव धर्म्माय पितराविव रागपरवशतया वा निष्कामाराधकानामिव वा किन्तु स्वयमभजनेऽपि पालनदर्शनेन परमकृपालुदृष्ट्यास्वस्मिन्ननुवृत्तये तेषां स्वरूपसुखलाभाय च तथा अभजतो न भवन्ति तदपि अभजने दुःखप्राप्त्या तद्भयात्तद्दुःखनिवृत्तिसुखलाभाय मय्यनुवृत्तये ततः परमनिर्वृत्तिलाभाय च तथा भजतोऽपि न भजामि तदपि तेषां

स्वस्मिन्ननुवृत्तये एव किञ्चिद्भजनानुभजने तु तत्सुखप्राप्तौ विश्रमितानामनुवृत्तिशैथिल्ये परमपुरुषार्थलाभसंभवात् भजने समनुग्रहात्सुखमनुभूय पुनर्मया भजने तद्विच्छेदे तत्प्राप्त्यै मय्यनुवृत्त्यापरमपुमर्थसिद्धिरिति भावः। तत्र दृष्टान्तमाह। यथाधनः इति। यथा कश्चिज्जन्मारभ्याधनः कदाचित्किन्महद्धनं लब्ध्वा पुनस्तद्धने विनष्टे तच्चिन्तया निभृतोऽन्यन्न वेद तथा सकृदनुभूतमत्सुखलाभाय मय्यनन्यानुवृत्तिस्तया मन्नित्यप्राप्तिश्च भवति ॥ २० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तृतीयप्रश्नस्योत्तरमाह। भजत इति। ते चतुर्विधाः केचिदात्मारामाः अन्तर्मुखाः केचिद्बहिर्मुखा अपि पूर्णत्वादाप्तकामा उपकारापेक्षाराहिताः केचिदकृतज्ञाः उपकारानुपकारज्ञानविधुरा अत्यन्तमूढाः केचित् उपकर्त्ता गुरुः स्मृत इत्युक्ता गुर्वादय उपकारिणस्तेभ्यो द्रुह्यन्तीति ते तथाच तदुपकारं न जानन्ति प्रत्युतापकारं प्रकुर्वन्ति ते अतिकठिना इत्यर्थः ॥ १९ ॥ समानार्थकम् एतेषु मध्ये भवान् क इत्यभिज्ञानापेक्षायामहो स्वमुखेनैव चरमकोटिप्रविष्ट इति सन्तुष्टा अक्षिसङ्कोचैः परस्परं गूढस्मितमुखीर्मोनिनीश्चालक्ष्याह। नेति हे सख्यः! अहन्तु भजतोऽपि न भजामि तुशब्देन पक्षान्तरव्यावृत्तिः तच्चाभजनं नाकृतज्ञत्वादिनिवन्धनं किन्तु तदनुवृत्तिद्वारेच्छानिवन्धनमित्याशयेनाह। अमीषां भजताम् जन्तूनाम् अनुवृत्तये निरन्तरध्यानप्रवृत्त्यर्थं तान्न भजामि जन्तुमात्रं प्रति यदेवं तदा सखीर्युष्मान् प्रति किं वक्तव्यमिति सम्बोधनाशयः। तथाच कारुणिकः परमसुहृदहं नत्वकृतज्ञ इति भावः। एतत्सदृष्टान्तमाह। यथेति। यथा अधनो दरिद्रो दैववशाल्लब्धधनो जातः पुनश्च तस्मिँल्लब्धधने विनष्टे सति तस्य धनस्यैव चिन्तया निभृतः पूर्णः अन्यत्क्षुत्पिपासादिकमपि न वेद ॥ २० ॥

रास-रहस्यम्

र० टी०—केचित् भजतोऽपि जनान् वै निश्चयेन न भजन्ति, तर्हि अभजतो कुतो भजेयुः न कुतो पीत्यर्थः। ते चतुर्विधाः, तत्र एके आत्मारामास्तेषां तु स्वात्मानन्दमग्नतयाबहिस्फुर्तेरभावात् न भजनावकाशः। न च तर्हि आत्माराममुनिसेवनवैफल्यमाशंकनीयं, तस्य सुकृतस्य तस्मिन् पूर्णानन्दस्वरूपे अतिशयाधायकत्वाभावेन "तस्य पुत्राः दायमुपयन्ति, सुहृदः सधुकृत्यं द्विषन्तः पापकृत्यामि"ति श्रुतेः। "ज्ञानीत्वात्मैव मे मतमि"ति तस्येश्वरात्मकतया ईश्वरद्वारातस्सेवाफलोत्कर्षस्यावश्यम्भावित्वात् "यद्येक ब्रह्मवित् भुंक्ते जगत्तर्पयतेऽखिलम्। तस्मात् ब्रह्मविदे देयं यद्यास्ते वस्तु किञ्चने"ति स्मृतेश्च। अन्ये द्वितीयाः आप्तकामाः, ते त्रिविधाः, तत्र ये आत्मानन्दप्राप्त्या प्राप्तसर्वकामास्ते तु प्रथमपक्षे एव गतार्थाः। ये च विषयजन्यसुखेषु विरक्ताः कामाभावेनाप्तकामास्तेषामपि भगवत् प्रियत्वात् पूर्वेषामिव न सेवनवैफल्यम्। पुनः ये नृपादयः समृद्धकामत्वादापेक्षिकाप्तकामास्तेषां सेवनेन तु यदि कदाचित् कृपां करिष्यन्ति तदास्मत् बहुभद्रं भविष्यतीति आशया सेवायां प्रवृत्तिः। अपरे तृतीयाः अकृतज्ञाः उपकारिणः उपकारं ज्ञात्वापि प्रत्युपकाराप्रवृत्ताः। चतुर्थाः गुरुद्रुहः "उपकर्ता गुरुस्मृतः।" इति वचनात् गुर्वादयः उपकारिणस्तेभ्यो द्रुह्यन्ति प्रतीपमाचरन्तीति गुरुद्रुहः ॥ १९ ॥ भगवदुक्तिः ॥ हे सख्य! अहं भजतोऽपि भजामि, अपितु न वनिज इव स्वार्थार्थं किन्तु मत्तः सेवाफलप्राप्तौ विश्वासदार्ढ्याय भजामि, पुनस्तेन स्वस्मिन्ननुवृत्तये निरन्तरध्यानप्रवृत्त्यर्थम्। अभजतोऽपि भजामि, आराधकानामिव मामभजतोऽपि कर्तव्यबुद्ध्या सदा सदाचरणशीलान् भजामि, यदा कदापि चित्तशुद्ध्यनन्तरं तेन स्वस्मिन्ननुवृत्तये। अभजतो न भजामि, कथम्? दुःखप्राप्त्या तन्निवृत्तये सुखप्राप्तये च तेन स्वस्मिन्ननुवृत्तये। भजतोऽपि न भजामि, कथम्? किंचित् भजनानुभजने तु शैथिल्यप्राप्त्या स्वस्मिन्ननुवृत्तेरभावात् परमपुरुषार्थप्राप्तिर्नस्यात्। परन्तु यदा कदाचित् प्रारब्धवशात् सुखमनुभूय पुनस्तद्विच्छेदे तत्प्राप्त्यै स्वस्मिन्ननुवृत्तिः भवत्येव, यथाऽधनो दरिद्रो दैववशात् लब्धधनः जातः, पुनस्तद्धने विनष्टे सति तस्य धनस्यैव चिन्तया निभृतः निमग्नः अन्यत् क्षुत्पिपासादिकमपि न जानाति, तथा मद्भक्तोऽपि मां कदाचित् साक्षात्कृत्य पुनर्मयि अन्तर्हिते सति मच्चिन्तया परितः अन्यद् देहादिकमपि नानुसन्धत्ते। यद्वा भजतोऽपि जन्तून् न भजामि बुद्धिविषयतां न यामि अर्थात् प्रतिपाद्यतां न गच्छामि, कथमिति चेत्, तत्राह–अनुवृत्तये प्रतिबोधविदितत्वसिद्धये, यावद्ब्रह्मसाक्षात्कारो न भवति तावच्छ्रवणादिरावृत्तिः कर्तव्याः। "आवृत्तिरसकृदुपदेशात्।" इति भावः ॥ २० ॥

गूढार्थदीपिनी

आत्मारामः अबहिर्दृष्टयः। पूर्णकामाश्च। कृतमुपकारं न जानन्ति विस्मरन्तीति। गुरुतुल्यमुपकारकर्तारं जानन्तोऽपि ये द्रुह्यन्ति ते कृतघ्ना इत्यर्थः ॥ १९ ॥ हे सख्यः! न भजामि कुतः अमीषाम् अनुवृत्तिवृत्तये निरन्तरध्यानप्रवृत्त्यर्थम्। यथा दरिद्रः धनचिन्तया निभृतो व्याप्तः अन्यत् क्षुत्पिपासाद्यपि न वेद ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

केचित्तु भजतोऽपि न भजन्ति यदा तदा अभजतः कुतो भजेयुः ते चतुर्विधाः एके आत्मारारामाः "आत्मा वा रे द्रष्टव्य" इत्यादिश्रुतिप्रोक्तजिज्ञास्यब्रह्मनिष्ठा ध्रुवास्मृतियुक्ताः ध्यानप्राप्तब्रह्मानन्दनिमग्नाः तेषां स्वभक्ताभक्तकर्मानुसारित्वाभावात् केचिदाप्तकामाः लब्धप्राकृतैश्वर्याः विषयानन्दनिमग्नाः तेषामुपकर्त्रनुपकर्तृविवकलोपात् अन्ये अकृतज्ञाः उपकारानभिज्ञा इत्यर्थः। अपरे

"जन्मदो वृत्तिदश्चैव प्राणदो ज्ञानदस्तथा । गुरुर्भवति धर्मेण श्रेष्ठा स्युरित्युत्तरोत्तरा" इत्यभियुक्तोक्तेभ्यो गुरुभ्यो द्रुह्यन्तीति तथा कृतघ्ना इत्यर्थः ।। १९ ।। नन्वत्रात्र को भवानित्यत आह । नाहमिति । हे सख्यः ! अहं तु तद्विलक्षण इति तुशब्देन तेभ्यो वैलक्षण्यं द्योतितं तर्हि भजतोऽप्यस्मान् वने विहाय किमर्थमन्तर्द्धिकौतुकं त्वया कृतमत आह । अमीषां भजतामनुवृत्तिये अनुवृत्तेर्मदनुरक्तेर्वृत्तये अविच्छेदाय निरन्तरध्यानप्रवृत्त्यर्थं भजतोऽपि न भजामि एतदेव दृष्टान्तेन स्पष्टयति । यथेति । तच्चिन्तया धनध्यानेन निभृतः पूर्णः अन्यद्धिताहितं न वेद ।। २० ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तृतीयकल्पे द्वयेऽधिकारिण इत्याह ।। भजत इति । भजते जनानपि न भजन्ति । अभजतो न भजन्तीति कुतो वाच्यम् । ते चात्मारात्मा आत्मनि भगवत्यारमन्त इत्यसम्प्रज्ञातसमाधिस्था आप्तकामा इत्यभजने पूर्णकामनाहेतुमाह । द्वितीयकोटिमाह । केचिद्भजतोऽपि न भजन्ति वै । अभजतो नेति कुतो वक्तव्यम् । ते च किंरूपा इत्यतो निरूपयति । कृतं परकृतमुपकारं न जानन्तीति ते तथा । गुरुद्रुहो गुरुभ्यो महात्मभ्यो द्रुह्यन्तीति ते तथा हि प्रायेणैवमेव जन इति प्रसिद्धौ । यतो न भजन्ति तत आत्मारामा आप्तकामाः पुनर्यतो भजतोऽपि न भजन्त्यतोऽकृतज्ञा गुरुद्रुह इति वा विपर्ययेण यत आत्मारामाद्या यतश्चाकृतज्ञाद्यास्ततश्च भजतोऽपि न भजन्तीति वा ।। १९ ।। नाहमेतेष्वेकतमः किन्त्वियं लौकिकी रीतिरिति ताः प्रति स्वस्थितिं कथयति ।। नाहमिति । हे सख्योऽहं भजतोऽपि जनान्न भजामि मदो भवेदिति तत्काले न भजामीति वचनम् । क्रमादभजनं तज्जनानुजिघृक्षयैव फलं तु निश्चितमिति वदति ।। अमीषामिति । अमीषां यथानुवृत्तयः सेवाः स्युस्तथा मत्त एव फलसम्पद उच्चावचाः स्युरेव । तत्र व्यतिरेकं निदर्शनमाह ।। नार्थिनां कल्पतरोरिवेति । स च योग्यतायोग्यताविचाररहितः स्वार्थिजनमनःसङ्कल्पितमेव यच्छति न त्वसङ्कलिपतमहं तु न तथेति । उच्चावचास्तत्तद्योग्यतानुसारेणानेकप्रकाराः । तथा च नीतिकारः । सौन्दर्यं भुवनत्रयेऽपि विदितं सम्भूतिरम्भोनिधेर्वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः । इत्थं दातृगुरोर्गुणास्सुरतरोः सर्वेऽपि लोकोत्तरा ⋯ दर्थिप्रकारार्थे तर्पणविधावेको विवेको यदीति न भजामि ततः प्रत्युपकृतिं न वाञ्छामि तत्रान्वयनिदर्शनं वा । कल्पतरुर्नार्थिभ्यः स्वयं किञ्चिदपेक्षत इति ।। २० ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तेषां स्वरूपमाह । भजतोऽपीति । केचिन्महापुरुषा भजतोऽपि न भजन्ति अभजतः कुतो भजिष्यन्ति ते पूर्वोक्तन्यायेन चतुर्विधाः तन्मध्ये उभये समीचीनाः ये दयाधर्माधिकारिणस्ते अधमाः । ये लौकिकनिमित्तास्ते उत्तमा इति तावद्गणयति साङ्कर्याभावाय । आत्मारामा इति । आत्मन्येव रमन्त इति अन्येन भजनीयो देहादिर्नापेक्षित इति भजनमेव न मन्यन्ते तेषां भजनार्थं च साधनत्वेन स्वदेहादिकमपि न मन्यन्ते तथाच अन्ये आप्तकामाः आप्तः । प्राप्तः कामो यैः यो भुक्तवन्तं ब्रूयात् त्वं भुङ्क्ष्व माभुङ्क्ष्वेति वा एकत्राप्रवृत्तिः अपरत्र सिद्धसाधनत्वेनानुवादः उभयथापि वैयर्थ्यं प्रवर्त्तमानस्य धर्मः सेत्स्यति अज्ञानं वा उभये तु अधमा इत्याह ये कृतं न जानन्ति तदुपकारं ते प्रत्युपकारसमर्था अपि उभयविधानपि न भजन्ति तेषामज्ञानमेव हेतुरभजने ज्ञात्वाचेदभजनं गुरुद्रोहः यः कश्चित् स्वस्य पुरुषार्थसाधकः स गुरुः स पूज्यः तस्यापदि स्वशक्तौ सत्यां तदुपेक्षायां तद्द्रोहः अनेनैव कृत इति गुरुद्रोहकर्त्ता भवति, एवं सर्वेषां गुणदोषा निरूपिताः गोपिकानां हृदये भगवानेव तन्मध्ये क इति जिज्ञासायाम् अभजनकर्तृत्वात् भजनसामर्थ्यस्यापि विद्यमानत्वान्मिथो भजनपक्षः अभजनभजनपक्षश्च व्यावर्त्तितः ।। १९ ।। ननु द्वितीयपक्षे गोपिकानां भजने स्नेहाद्भजनमस्तु ततो भगवान्निरूपकत्वेन नैषामन्तर्भूतः ईश्वरश्च नैषामन्तर्भवतीति कथमेवं विचार इति चैन्मैवं गोपिका भोग्या इत्यविवादं ताश्च भोग्यसमर्पकत्वेन वापेक्षणिः अतो भगवत एव विचारः कर्त्तव्यः ईश्वरोऽपि फलार्थं सेव्यश्चेत् न विचार्य्यः व्यवहारे दृष्टार्थश्चेद्दीयमानग्रहणाग्रहणाभ्यां विचार्य एव पूर्वं गृहीतत्वात् नात्मारामता नापि पूर्णकामता प्रथमप्रवृत्त्या तृप्तावपि परित्यागो नोचितः ततस्तृतीयपक्ष एवाभिनिवेश उचितः तदपि सर्वज्ञस्यानुचितम् । ईश्वराणा फलदातृणां कदाचिदेवं भवतीति शङ्कायाः परिहारमाह । नाहं तु सख्य इति । तुशब्दस्तं पक्षं व्यावर्त्तयति नापीश्वरभजनपक्षः शङ्कनीय इत्याह । सख्य इति । गोपिकास्तु सख्यः रसे तुल्याः एकार्थाभिनिवेशाश्च अहमिति भगवान् नतु जीवः तेन आत्मारामादिपक्षा व्यावर्त्तिताः । अहं राम एव नत्वात्मारामः ममात्मव्यतिरिक्तपदार्थाभावात् न व्यावर्त्यमस्ति कामाभावादेव नाप्तकामत्वम् अतो मम भिन्नैव व्यवस्था नतु जीवतुल्यता नाह तु सख्य इति तामेव व्यवस्थामाह । भजतोऽपि जन्तून् अहं न भजामि तत्रान्य एव हेतुः अमीषामनुवृत्तिवृत्तय इति अमीषां जीवानां जन्तुपदेन प्राणिमात्रं भगवतो न केनाप्युपयोगः भगवान् फलरूप इति सर्वेषामेवोपयोगः तथा सति तेषां भजनमेव इष्टमिष्टसाधनं वा तत्राहञ्चेत्साधनत्वेन प्रविशामि तदा जनमेव नाशयामि अग्रे भजनस्य प्रतिबन्धात् पूर्वभजनस्य च वैयर्थ्योपादनात् चतुर्धाहि भगवदुपयोगः भगवान् भोग्यो भोक्ता वा भोग्यपक्षे कामनापूरकत्वेन स्वातन्त्र्येण वा भोक्तापि भक्त्याभक्तदत्तपदार्थस्वीकारात् विषयत्वेन भोगाद्वा आद्ये भजनं नश्येत् अल्पफलदानात्स्वरूपतो महत्त्वेऽपि कालपरिच्छेदात् द्वितीये तु तथात्वमतिभजनेन भवति तद्गोपिकानां नास्तीति तत्सिद्ध्यर्थमभजनम् अपेक्षाभावात् नाहं विषयन्यायेन भोक्ता भक्त्यर्थं तु अभजनमेवेति सिद्धान्तसंग्रहः । यथा अभजने अनुवृत्तिः सिध्यति तथा प्रकारमाह । यथाधन इति । पूर्वमधनः पश्चाल्लब्धं

धनं तच्चेद्विनष्टं तदा तच्चिन्तया व्याप्तः निभृतः तदेकनिमग्नः सन् अन्यन्न वेद एतत्तु लोकप्रसिद्धं तथा गोपिकानामपि पूर्वमप्राप्तो भगवान् प्राप्तश्चेत्तिरो भवति तदा निभृताः तत्रैव मग्नचित्ताः न प्रपञ्चं स्मरिष्यन्ति निभृतानां प्रयोजनं पूर्वमुक्तमेव ॥ २० ॥

श्रीसुबोधिनी–सारः

केचित् भजतोपि न भजन्ति कुतोऽभजतो भजन्तीति के ते तत्राह । अकृतज्ञाः कृतघ्ना गुरुभ्यो द्रुह्यन्तीति तथा अभजतोऽपि भजन्ति ये भजतः कुतो न भजन्ति के ते तत्राह । आत्मारामाः पूर्णकामा योगिनः ॥ १९ ॥ भजतो न भजन्तीति कोट्यंतर्गतमात्मानं जानन्तीः प्रत्याह स्वस्मिन् ततो वैलक्षण्यदर्शनार्थं हे सख्यः भजतो जंतून् न भजाम्यपि किन्तु वैलक्षण्ये अभजने फलमाह अमीषां भजतामनुवृत्तिवृत्तये निरन्तरध्यानार्थं तत्र दृष्टान्तः यथाऽधनो दरिद्रः प्राप्तधने विनष्टे सति धनस्यैव चिंतया निभृतो व्याप्तोऽन्यत् क्षुत्पानादि न वेद ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

केचित्तु भजतोपि न भजन्ति, अभजतस्तु कुतो भजेयुः ? । ते हि चतुर्विधाः—एके आत्मारामाः बहिर्दर्शनरहिताः, केचिदाप्तकामाः विषयदर्शने सत्यपि पूर्णकामत्वेन परभजनप्रवृत्तिरहिताः, अन्ये चाकृतज्ञाः परकृतोपकारानुसन्धानरहिताः मूर्खाः, केचित्तु गुरुद्रुहः निपुणाः, परोपकारानुसन्धानवन्तोऽपि दुष्टचित्तत्वात् यः स्वोपकारं करोति स गुरुतुल्यः पूज्य एव, तदप्रत्युपकारेण तद्द्रोहमेव कुर्वन्तीत्यर्थः ॥ १९ ॥ एवं भगवद्वचनं श्रुत्वा "न चायमात्मारामः, बहिर्दर्शनसत्त्वात् । न चायमाप्तकामः, गानेनास्मदाह्वानस्य कृतत्वात् । न चायमकृतज्ञः, चतुरशिरोमणित्वात् । अतो भजन्तीनामस्माकमुपेक्षको गुरुद्रोह्येवायमित्येतद्वचनादेव सिद्धम्" इत्यभिप्रायेणाक्षिसङ्कोचैः परस्परं गूढस्मितमुखीस्ता दृष्ट्वाह—नाहमिति । हे सख्यः ! अहं तु भजतोऽपि जन्तून् न भजामि प्रत्यक्षतो निरन्तर नानुवर्त इत्यर्थः । 'तर्हि गुरुद्रोह्येव त्वम्' इति चेन्न, मच्चिन्तनस्य परमपुरुषार्थहेतुत्वात् तदर्थान्तर्धानेन 'परमकारुणिकः परमसुहृच्चाहम्' इत्याह—अमीषामिति । मां भजतां जन्तूनामनुवृत्तेरनुवर्तनस्य ध्यानरूपस्यानुवृत्तये अविच्छेदाय न तान् भजामीत्यन्वयः । एतदेव दृष्टान्तेन स्पष्टयति—यथेति । यथा अधनो निर्धनः पुमान् कदाचिल्लब्धधने विनष्ट सति तस्य धनस्य चिन्तया निभृतो व्याप्तः अन्यत् न वेद क्षुत्पिपासादिकमपि न जानाति, तथा मद्भक्तोऽपि कदाचिन्मां प्रत्यक्षतो दृष्ट्वा पुनर्मय्यन्तर्हिते सति मच्चिन्तया व्याप्तोऽन्यद्देहादिकमपि नानुसन्धत्ते इत्यर्थः ॥ २० ॥

अन्वितार्थप्रकाशिका

भजत इति ॥ केचित्तु भजतोऽपि न भजन्ति अभजतस्तु कुतो भजेयुः । ते हि उत्तरोत्तरन्यूनाः चतुर्विधाः । एके आत्मारामाः बहिर्दर्शनरहिताः केचिदाप्तकामाः पूर्णकामत्वेन परभजने प्रवृत्तिरहिताः । अन्ये च अकृतज्ञाः परकृतोपकारानुसन्धानरहिता मूर्खाः । केचित्तु गुरुद्रुहः परकृतोपकारं जानन्तोऽपि दुष्टचित्तत्वात् गुरुतुल्यमुपकारकं द्रुह्यन्ति तादृशा भवन्ति । कृतघ्ना इत्यर्थः ॥ १९ ॥ आत्मानं चरमकोटिगतं मत्वा सस्मितमुखीस्ता दृष्ट्वाऽऽह—नाहमिति ॥ हे सख्यः ! अहं तु चतुर्षु न कोऽपि किन्तु परमकारुणिकः परमसुहृच्च । यतः अमीषां मां भजतां जन्तूनामनुवृत्तेरनुवर्तनस्य ध्यानरूपस्यानुवृत्तये अविच्छेदाय भजतोऽपि जन्तून्न भजामि प्रत्यक्षतो निरन्तरं नानुवर्ते । यथेति । यथा अधनो निर्धनः पुमान् कदाचिल्लब्धधने विनष्टे सति तस्य धनस्य चिन्तया निभृतो व्याप्तः अन्यत् न वेद क्षुत्पिपासादिकमपि न जानाति तथा मद्भक्तोऽपि कदाचिन्मां प्रत्यक्षतो दृष्ट्वा पुनर्मय्यन्तर्हिते सति मच्चिन्तया व्याप्तोऽन्यद्देहादिकमपि नानुसन्धत्ते ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तृतीयप्रश्नोत्तरमाह केचित् जनाः भजतोपिजनान्न भजन्ति तर्हि अभजतस्तांस्तु कुतः ते चतुर्विधाः आद्या आत्मारामाः आत्मपरमात्मसुखापेक्षाः, द्वितीया आप्तकामः विषयभोगेच्छाहीनाः । तृतीयाः अकृतज्ञाः उपकारा ज्ञानशून्याः, चतुर्थाः गुरुद्रुहः गुरुः पित्रादिर्य उपकारकर्त्ता तस्मैद्रुह्यन्तीति तथोक्ताः सपिता यस्तुपोषक इति स्मरणात् १९॥ स्वकृतमुत्तरं श्रुत्वा ताः परस्परं दृष्ट्वा ईषद्धसन्तीः संपश्यन्नाहमिति हे सख्यः अमीषां मां भजमाना नामनुवृत्ति वृत्तये अनुवृत्तिः स्वस्वभावानुसारेणप्रवृत्तित्यक्त्वामद्रुच्यनुसारेणप्रवृत्तिरूपोगाढ स्नेहस्तस्थावृत्तये भजतापि जंतून् जनानह न भजामि अतो युष्माभिः परमदयालुः परमसुहृच्चाहं ज्ञातव्याः। अत्र दृष्टान्तः यथा अधनो धनहीनः पुरुषः आदौ धनेलब्धे सति परमानंदयुक्तः पुनस्तस्मिन् विनष्टे सति तच्चिंतयानिभृतो व्याप्तः सन् अन्यत्सुखं दुःखं च न वेद स्वस्वभावं त्यक्त्वायथाधनप्राप्तिः स्यात्तथैव करोति भावः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ द्वितीयकोटयन्तर्गतानाह ॥ भजन्तीति ॥ हे सुमध्यमाः, अभजतः ये भजन्ति, करुणाः करुणावन्तः 'अर्शआद्यच्' । ते तु, पितरः यथा तथा भजन्ति वै । अत्राभजद्भजने । सौहृदं सर्वभूतसुहृत्त्वं, निरपवादः धर्मः, यद्वा । हे सुमध्यमाः अभजतः स्वमभजमानान् ये भजन्ति ते द्विविधा इति शेषः । करुणाः करुणावन्तः 'अर्शआद्यच्' । स्वार्थनिरपेक्षपरोपचिकीर्षा करुणा

तद्वतः, पितरश्च। तत्र संसृतिदुःखभाजो जनान् दृष्ट्वा स्वार्थवर्जिता साधवः स्वानभतोऽपि भगवतो ज्ञानमुपदिश्य ततस्तारयन्ति। तथा पितरः स्वानभजतोऽपि सुतान् पोषयन्ति। अत्रैकत्र निरपवादो निर्दोषः धर्मः, अन्यत्र सौहृदं च। तत्र सतां जनेषु भगवज्ज्ञानावबोधनं प्रसिद्धो धर्म एव। पित्रोस्तु केवलः सौहार्दरूपः स्नेहभाव एव। 'वृद्धौ च मातापितरौ साध्वी भार्या शिशुः सुतः। अप्यनर्थशतं कृत्वा भर्त्तव्या मनुरब्रवीत्' इति धर्मस्यापि तत्र सामान्यतः प्राप्तिरस्त्येव ॥ १९ ॥ अथ तृतीयकोटिगान् त्रेधा विभज्य दर्शयति ॥ भजतोऽपीति ॥ ये केचित्, भजतोऽपि नैव भजन्ति, तर्हि अभजतस्तु, कुतः भजेयुः। ते तु आत्मारामाः केवलं स्वदेहमात्रपोषणपरायणाः, न तु ज्ञानिनः, तेषां सर्वभूतसुहृत्त्वेन द्वितीयकोट्यन्तर्गतत्वादिति भावः। आप्तकामाः शब्दादिविषयोपभोगतदुपकरणतत्स्थानसमृद्धिमन्तः, अकृतज्ञाः कृतघ्नाः, अत एव, गुरुद्रुहः यथातथाविधतयोपकर्त्तारो गुरवस्तैः कृतमुपकारमननुस्मृत्य तानपि द्रुह्यन्तीति तथाभूता इत्यर्थः। अनेनाकृतज्ञानामेव पराकाष्ठा दर्शिता एतेषां त्रयाणामपीतरभजनाभावो महान् दोष इति भावः। यद्वा केचित् भजतोऽपि न भजन्ति वै अभजतस्तु कुतः एव। ते च चतुर्विधाः, एके आत्मारामा अपराग्दृशः, केचित् आप्तकामाः विषयदर्शनेऽपि पूर्णकामत्वेन तद्भोगेच्छारहिताः, अन्ये अकृतज्ञा मूढाः, इतरे गुरुद्रुहः अतिकठिनाः, 'स पिता यस्तु पोषकः' इति न्यायादुपकर्त्तापि गुरुतुल्यस्तस्मै द्रुह्यन्तीति यथा। एते भजतोऽभजतश्च न भजन्तीति। अत्रायं विवेकः। आत्मारामा अन्तर्निष्ठत्वेनोपकाराननुसंधानान्निर्दोषा एव। आप्तकामा भोगपूर्णत्वेन तदिच्छारहितत्वाददुष्याः, अकृतज्ञा बालादिवन्मूढत्वेनादुष्याः, तुरीयाः कृतघ्नत्वान्महादोषभाज इति ॥ २० ॥

कृष्णप्रिया

राजन्! जो भजन-सेवा आदि करने वाले सुजन को भी भजते नहीं है, वे लोग भजन न करने वालों का भजन कैसे करेंगे? राजन् यह जो तीसरा पक्ष है इसमें आत्माराम आप्तकाम अकृतज्ञ एवं गुरुद्रोही इन चार प्रकार के जनों में कोई एक होते हैं ॥ १९ ॥ अब भगवान् अपने विषय में स्पष्टता करते हैं कि हे सखियाँ! भजन के विषय में तीन पक्षों का पूर्व में परामर्श किया वे सब जीवों के लिए है इसलिए इन पक्षों में मेरा समावेश नही हो पाता, मैं तो भगवान हूँ इसलिए नियम स्वतन्त्र होते हैं, अब सुनिये, मैं तो भजन करने वालों का भी भजन इसलिए नहीं करता हूँ कि भजन करने वाले भक्तजनों की वृत्ति सदा मुझमें बनी रहे जैसे किसी अधन को धन मिला और मिलने के बाद चला गया तब उसका मन धन की चिन्ता में ही रहेगा, और धन को छोड़ और पदार्थों को वह भूल जाता है और उसके मन में धन ही प्रवेश कर लेता है ॥ २० ॥

एवं [1]मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः।
मया परोक्षं भजता तिरोहितं [2]मासूयितुं [3]मार्हथ तत् प्रियं प्रियाः ॥ २१ ॥
न पारयेऽहं निरवद्यसंयुजां [4]स्वसाधुकृत्यं विबुधायुषापि वः।
[5]या माभजन् दुर्जरगेहशृङ्खलाः[6] [7]संवृश्च्य तद्[8] वः प्रतियातु[9] साधुना ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे[10] दशमस्कन्धे[11] गोपीसान्त्वनं नाम [12]द्वात्रिंशोऽध्यायः ॥ ३१ ॥

कदमक्षमा

अन्वयः—हे, अबलाः, मद् अर्थ ऊज्झित, लोक, वेद, स्वानाम्, वः, हि, एवम्, मयि, अनुवृत्ति, वृत्तये, परोक्षम्, भजता, मया, हि, तिरोहितम्, तत्, हे, प्रियाः, प्रियम्, माम्, असूयितम्, मा अर्हथ ॥ २१ ॥ हे सख्यः! अहम्, तु, विवधायुषा, अपि, निरवध संयुजाम्, वः, साधुकृत्यम्, प्रतियातुम्, न, पारये, याः (श्रीमत्यः) दुर्जर गेह शृंखलाः, मा, अभजन्, तत्, वः, (साधुकृत्यम्) वः साधुना (कृतेन) (एव) प्रतियातु ॥ २२ ॥

इति द्वात्रिंशोध्यायः समाप्तः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं मदर्थोज्झितलोकवेदस्वानां मदर्थे उज्झितो लोको युक्तायुक्ताप्रतीक्षणात् वेदश्च धर्माधर्माप्रतीक्षणात् स्वा ज्ञातयश्च स्नेहत्यागात् याभिस्तासां वो युष्माकं परोक्षमदर्शनं यथा भवति तथा भजता युष्मत्प्रेमालापान् शृण्वतैव तिरोहितमन्तर्धानेन स्थितम्। तत्तस्मात् हे अबला हे प्रिया मा मामसूयितुं दोषारोपेण द्रष्टुं यूयं माऽर्हथ न योग्याः स्थः ॥ २१ ॥ आस्तामिदं

---

[1] र्थार्पित—विज.। [2] सा—विज.। [3] नार्हथ मां—विज। [4] सु—वीर. बिज.। [5] यो मां भजे—विज.। [6] शृंखलां—इति कस्यचित्। [7] संच्छिद्य—वीर.। [8] वृद्धि—विज.। [9] याति सो—विज.। [10] पारमहंस्यां संहितायां—प्रा. पा.। [11] पूर्वार्द्धे रासक्रीडायां गोपीसान्त्वनं—प्रा. पा.; यां भगवद् दर्शनं—इति कस्यचित्। [12] त्रिशोऽध्यायः—विज.।

परमार्थं तु श्रृणुतेत्याह । नेति निरवद्या निर्दोषा निष्कपटा संयुक् संयोगो यासां तासां वो विबुधानामायुषाऽपि चिरकालेनापि स्वीयं साधुकृत्यं प्रत्युपकारं कर्तुं न पारये न शक्नोमि । कथंभूतानाम् । या भवत्यो दुर्जरा अजरा या गेहश्रृंखलास्ताः संवृश्च्य निःशेषं छित्त्वा मा मामभजन्मदेकनिष्ठचित्ता अभूवंस्तासाम् । मच्चित्तं तु बहुषु प्रेमयुक्ततया नैकनिष्ठम् । तस्माद्वो युष्माकमेव साधुना साधुकृत्येन तद्युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवतु । युष्मत्सौशील्येनैव ममानृण्यं न तु मत्कृतप्रत्युपकारेणेत्यर्थः॥२२॥

इति श्रीमद्भागवते म० दशम० पूर्वार्धे टीकायां द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

युक्ताऽयुक्ताऽप्रतीक्षणम् सदाचरणलोकापवादभीतित्यागरूपम् । धर्माऽधर्माऽप्रतीक्षणम् निजपतित्यागौपपत्यसेवनरूपम् । श्रृण्वतेत्युपलक्षणम्—प्रेमालापं श्रृण्वता, गुणगाथां गायता, भावविशेषं स्मरता केवलमन्तर्द्धानेनात्रैव स्थितं, विश्वासाभावश्चेत्प्रष्टव्यं यमुनादिभ्यः ॥ ननु जन्तून्स्वभक्तानजातप्रेम्णो जातप्रेम्णश्च यदेवं भजसि तत्सम्यक्करोषि, किन्त्वस्मास्वपि तथैव तद्व्यवहरणाद्वयमपि जन्तुमध्यगण्या अभूमेति तासां सानुशयं वाक्यमाशंक्य भो मत्प्राणपरार्द्धप्रियपदपयोजपांशुपरमाणवः सख्यो युष्मासु यदन्यसाधारण्ये नाद्य व्यवहृतं तदेतन्मे दौरात्म्यं क्षमध्वमित्याह—एवम् 'व वा यथा तथैवैवम्' इत्यमरोक्तेस्तद्वदित्यर्थः । ततश्च मदर्थे उज्झितो लोकः युक्ताऽयुक्ताऽप्रतीक्षणात्, वेदश्च धर्माऽधर्माऽप्रतीक्षणात्, स्वान्यात्मात्मीयधनज्ञातयश्च स्नेहत्यागात् याभिस्तासामपि वस्तद्वदनुवृत्तये उक्तलक्षणानामन्येषां भक्तानामिवानुवृद्ध्यै परोक्षमदर्शनं यथा स्यात्तथा भजतां युष्मत्प्रेमालापान् श्रृण्वता तिरोहित मति काकुः । तस्मादतीवानौचित्यं हृतमित्यर्थः । न हि प्राचीना अर्वाचीना भाविनो वा भक्ताः संभवेयुः, न ह्यतावत्या अप्यनुवृत्तेरपरवृद्धिरस्ति, न हि परमाणुपरममहतोर्ह्रासवृद्धी केनाप्याशास्येते तस्मादन्यप्रेमिभक्तान्प्रति युष्मत्प्रेमवैप्रलंभिकप्रतापमहोत्कर्षजिज्ञापयिषामयी ममेयमसमीक्ष्यकारिता क्षम्यतामिति भावः । यस्मादेवं तस्मान्मा मां प्रत्यसूयितुं दोषारोपेण द्रष्टुं नार्हत तत्र प्रियमिति प्रिया इति च हेतू । प्रियस्य दोषं प्रियाः खलु न मनस्यानयन्तीत्यर्थः ॥ २१ ॥ आस्ताम् स्थीयताम् । इदम् वृत्तम् । परमार्थम् सत्यभूतम् । नैकनिष्टम् एकस्य बहुषु स्थानासंभवादित्यर्थः । इत्यर्थ इति—इत्थमतीव दुष्कप्रेमरूपद्रविणदातृत्वेनोत्तमर्णानां भवतीनां तत्प्रतीकारासमर्थस्य ममाधमर्ण्यमेव स्थास्यतीति तात्पर्यम् । विगतो बुधो गणनभिज्ञो यस्मात्तेन स्वभावनित्येनाप्यायुषेति वा ॥ मन्मनसि संततं यदुद्भवति तच्छृणुतेत्याह–नेति । निरद्या कामकर्मलोकधर्मशास्त्रापेक्षाराहित्येन निरुपाधिसंयुक् संयोगो यासां तासां वः स्वेनैव यत्साधुकृत्यं न तु साधुत्वापादकेन केनचिद्वस्तुसंपर्केण साध्वित्यर्थः, तत् न पारये प्रति कर्तुं न शक्नोमि । विबुधायुषापि देवानामायुः प्राप्यापीत्यर्थः । कृत्यमित्येकवचनेन युष्माकं क्षणिकमपि कृत्यमित्यर्थः । या मा माम् अभजन् । संवृश्च्य दुर्जरा अपि पतिश्वश्रूपिताभ्रातादिस्नेहश्रृंखलां निःशेषं छित्त्वैव, श्लेषेण अपक्वयोगिन इव संवृश्च्यापि ताः श्रृंखलामापुनर्वाभजन्नित्यर्थः । अहं तु पित्रोर्भ्रातरि स्वेषु बन्धुष्वपि स्निह्यामि च युष्मान्भजामि चेति 'ये यथा मां प्रपद्यन्ते' इनि स्वप्रतिज्ञातोपि च्युत इति मम प्रतिक्रियाया असं भवः, व्यज्यमानोऽयमर्थः श्लेषेणापि लभ्यते स यथा—संवृश्च्य या युष्मान् अहं मा अभजम् । परसवर्णेननकारदुकारयोः संयोगः । तत्तस्माद्वः साधुत्वेनैव तद्युष्मत्साधुकृत्यं प्रतिकृतं भवतु, युष्मत्सौशील्येनैव ममानृण्यं, वस्तुतस्तु ऋण्येव भवामि युष्माकमिति भावः । ततश्च ताभिः प्रातस्वमनस्येव विचारितं परमेश्वरत्वादेव सर्वगुणपरिपूर्णत्वेऽपि दोषगन्धमात्रराहित्येऽप्यस्मत्प्रेमरसविज्ञत्वेप्यस्मान् प्रेमवत्वेनोत्कर्षयितुं स्वं चापकर्षयितुमस्मद्दणी भवितुमेवास्मत्कर्मकोऽयमस्य त्यागस्तदिमं पराबुभूषुं जिगीषवो वयमेवाधन्या एवं भवितुमपारयन्त्योऽनेन फलतः प्रेम्णा जिता एवाभूमेति ॥ इति भावार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमे ह्यधिकस्त्रिंशः संगतः संमतः सताम् ॥ २२ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अद्यैव च भवतीनां निकट एव स्थितवानस्मीत्याह । एवं दुह्यन्त्योऽभिययुः काश्चित् इत्यादि प्रकारेण मदर्थेत्यादि हे अबला इति तत्तत्परित्यागे दुष्करत्वं सूचयति । मा सूचार्यतुमित्यत्र हेतुविशेषमप्याह । प्रियं प्रिया इति । हि निर्द्धारणे यद्वा । एवं यथाधनः, इत्यादिप्रकारेण वो युष्माकं मय्यनुवृत्तिवृत्तये एव मया तिरोहितम् । पदानि व्यक्तमेतानि नन्दसूनोर्महात्मन इत्यादिभवद्वाक्यानुसारेणाग्रतः पार्श्वतः स्थित्वैव भवद्दृष्टिमात्रागोचरीबभूव इत्यर्थः । किं कुर्वता परोक्षं भजता प्रेमाळापादिकमनुमोदमानेन । तथानुग्रहे हेतुः मदर्थेति यद्वा अन्यत्तैः माद्वयं निषेधे तथापि प्रियं मल्लक्षणं मासूयितुं मार्हथ अपि तु मया दत्तदुःखा यूयमर्हथैवेत्यर्थः । कुतः प्रियं प्रियाः ! प्रियस्य तथाकर्तुमयुक्तत्वादित्यर्थः । एतच्चानुनयचातुर्यम् ॥२१॥ व इति सम्बन्धमात्रे षष्ठी । युष्मान् प्रतीत्यर्थः । स्वसाधुकृत्यं स्वीयप्रत्युपकारकृत्यं न पारये प्रति कर्तुं न शक्नोमि । यद्वा । वो युष्माकं यत् स्वीयमसाधारणं साधुकृत्यं तदहं न पारये तत्सदृशप्रत्युपकारे न समर्थोऽस्मीत्यर्थः । स्वसाधुकृत्यत्वमेव दर्शयति । निरवद्या काममयत्वेन प्रतीयमानत्वेऽपि वस्तुतो निर्मलप्रेमविशेषमयत्वेन निर्दोषा संयुक् संयोगः सम्यग्मद्विषयकचित्तैकाग्रता स्वस्वपत्यादि स्पर्शाभावेन च निर्दोषा

संयुक् सङ्गमो यासाम् । किञ्च या इति दुर्जराः कुलवधूत्वनेच्छेत्तमशक्या अपि गेहशृङ्खला गृहसम्बन्धिन्य ऐहिकपारलौकिकसुखकरलोकधर्ममर्यादाः संवृश्च्य या मामभजन् परमानुरागेण मय्यात्मनिवेदनं कृतवत्य इत्यर्थः । अतो ममान्यत्रापि प्रेमयुक्तत्वान्न पारये इत्यर्थः । अत्रोत्तर व इति पदमनपेक्ष्यैव या इति प्रयुज्यते पश्चादेव च तेन योज्यते । अतः प्रथमपुरषत्वम् । यद्वा । अन्यत्तैः विगतो वुधो गणनाभिज्ञो यस्मात्तेनानन्तेनायुषापीत्यर्थः । शृङ्खलामित क्वचिदेकवचनान्तः पाठः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमित्यस्यानुवृत्तय इत्यनेनान्वयः । हे अबला इति, तत्र स्वतः शक्त्यभावं सूचयति । प्रियं प्रिया इत्यन्योऽन्यप्रियत्वेन मम विरहाद्यपराधो न ग्राह्य इति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, एवमित्यस्य मयेत्यनेनान्वयः । तादृशचिन्तानिभृतेन मयेत्यर्थः । तत्र हेतुः—मदर्थेति । अतः अरोक्षमपि भजतैव प्रेमालापं शृण्वता, गुणगाथां गायता, भावविशेषं च युष्माकं स्मरता केवलमन्तर्द्धानमात्रेणात्रैव स्थितमित्यर्थः । अथवा 'अनुवृत्तिवृत्तये' इत्युक्तम् । सा च कीदृस्यनुवृत्तिस्तां दृष्टान्तेनाह—ययेति । अतोऽस्य पूर्व्वेणैव सम्बन्धः । हे सख्यः ! इत्यनेन इदञ्च युष्मानधिकृत्य नोच्यते, सहजसख्यादिति ध्वनितमेवाभिव्यञ्जयति—एवमिति । हि अपि, युष्माकमपि मय्यनुवृत्तये; एवं युष्मान् न भजामि किम् ?—काक्वा; अपि तु नैव । तत्र हेतुः—मदर्थेति । यद्वा, युष्माकमपि मय्यनुवृत्तये, किमपि तु नैव । कुतः ? एवं तादृशचिन्तानिभृततया मदर्थमेव नान्यत् किञ्चिदुद्दिश्य उज्झिता उपेक्षिता लोकाश्चतुर्दशभुवनानि श्रीवैकुण्ठादयश्च, अतो वेदाश्च तद्बोधितकर्म्मानादरात्, अतएव स्वश्च पतिपुत्रादयो याभिस्तासाम्, स्वत एवमपि निरन्तरविशुद्धपरमानुवृत्तिवृत्तेरित्यर्थः, एवं मुमुक्षुभ्यो मुक्तेभ्यश्च भक्तेभ्योऽप्यासां विशेषो दर्शितः अष्टंत्तदपेक्षासम्भवात्तादृशभावाभावाच्च । ननु तर्हि किमर्थमधुर्यन्तर्हितम् ? तत्राह—मयेति । परोक्षं अजतेति कुत्रापि न मया गतमासीत्, किन्तु युष्मदन्तिकेऽत्रैव वर्त्तमानेन परोक्षं मदगोचरधिया, युष्माभिः प्रियमाणं विचित्रप्रेमालापादिकं भजता; तुमर्थे शतृङ्, श्रोतुमित्यर्थः । एवं (भा० १० ।३१।१६) 'कितव ! योषितः कस्त्यजेत्' इत्यादिकं परिहृतम् । यद्वा, अकारप्रश्लेषेण अपरोक्षं साक्षादेव भजता तिरोहितं युष्मदद्दश्यमात्रेण स्थितमित्यर्थः, तथापि प्रियजनदुःखहेतुत्वेन दोषः स्यादेवेति चेत्तर्हिक्षन्तव्यमित्याशयेनाह—प्रियं प्रिया इति । यद्वा, ननु तदपि किमर्थम् ? तत्राह—प्रियं प्रिया इति । प्रियाभिः सह प्रियस्य तदुयुक्तमेवेति भावः । यद्वा, तत् परोक्षभजनं प्रियं यस्य तं मां सहजमत्कौतुकरसेनेत्यर्थः । अहो बतेदं साधु कौतुकं यत् प्रियजनप्राणैः सह क्रीड़नमिति चेत्तत्राह—प्रिया इति ! प्रेम्णा तदपि प्रीतिविशेषायैव स्यादित्यर्थः । यद्वा, तत्तथापि 'मा'-शब्दद्वयं निषेधे प्रकृत्यर्थं गमयति, अर्हतेत्यर्थः । कुतः ? प्रियं प्रियाः प्रियस्य प्रियासु तथा कर्त्तुमयुक्तत्वादित्यर्थः । एतच्चानुनयन-चातुर्य्यम् । अन्यत्तत्र तत्र समानम् ॥ २१ ॥ 'वः' इति सम्बन्धमात्रे षष्ठी, युष्मान् प्रतीत्यर्थः । स्वसाधुकृत्यं स्वीयं प्रत्युपकारकृत्यं न पारये कर्त्तुं न शक्नोमि । यद्वा, वो युष्माकं यत् स्वीयमसाधारणं साधुकृत्यम्, तदहं न पारये । तत्र हेतुः—निरवद्या सर्व्व-नैरपेक्ष्येण कापट्यादि-राहित्येन निर्म्मलप्रेमविशेषेण च निर्दोषा संयुक् संयोगः सम्यङ्मद्विषयकचित्तैकाग्रता संगमो वा यासां तासामिति मुमुक्षापरादिमतः कामादिदोषः परिहृतः, प्रत्युत स्वविषयक-तादृशकामस्य महानेव गुणोऽभिप्रेतः, निरवद्यसंयोगहेतुत्वात् । किञ्च, या इति दुर्जरा अच्छेद्या अपि गेहशृङ्खलाः, गेहानि गेहसम्बन्धिपतिपुत्रादयस्तत्तदर्थकृत्यानि चान्येव शृङ्खलाः, कृतिनामपि दुश्छेद्यसंसारबन्धहेतुत्वात् । ताः संवृश्च्य अभजन्, भवत्य इति प्रेमगौरवेण, अतो मम तादृशत्वाभावान्न पारय इत्यर्थः । अन्यत्तैर्व्याख्यातम्; यद्वा, सु सुष्ठु असाधुकृत्य मद्विषयक-नष्ठुर्य्यादिकमपि, किमुत साधुकृत्यमित्यर्थः । इदञ्च ताभिः सह स्वच्छन्देन सदा क्रीडालोभेनोक्तम् । अपारणे हेतुः—निरवद्यं निजांगमात्मानं वा संयुञ्जन्ति समर्पयन्तीति तथा तासाम् । किञ्च, दुर्ज्जरा गेहस्य शृङ्खला नित्यगोपालनादिदृढकृत्य-निबन्धान् सर्व्वबन्धुजनानुवृत्तिबन्धांश्च संवृश्च्य या भवतीरहं माभजन्नसेवितवानस्मि, 'शृङ्खलाम्' इति पाठेऽपि तथैवार्थः । दुर्ज्जरेति विशेषणेन शृङ्खलारूपकेण च निजशक्त्याप्यच्छेद्यत्वं 'सं-' शब्देन चासक्तित्यागेऽपि बहिस्त्यागासामर्थ्यम्, किंवा संच्छेदनेच्छायामपि सत्यामसामर्थ्यं ध्वनितमिति दिक्' युष्मद्वदात्मानर्पणेन सर्व्वनैरपेक्ष्याभजनेन च प्रत्युपकाराशक्तेः, अतएव (गी० ४।११) 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' इत्यादिनिजवचनव्यभिचारापत्तेश्चाहं युष्माकमृण्येवेत्यर्थः । अन्यत् समानम् । यद्वा, साधुर्यो ना पुरुषो मद्भक्तः कश्चित् वो युष्मान प्रतियातु प्रत्युपकारेणानुगच्छतु; आशिषि पञ्चमी; यद्वा, वो युष्माकं तत् स्वसाधुकृत्यं प्रतियातु अनुवर्त्ततामनुकरोत्वपि, अहन्तु न पारयाम्येवेति सर्व्वथा प्रत्युपकारासामर्थ्योक्तिः । अग्रे च प्रणयकलहाध्यायान्ते श्रीरुक्मिणीं प्रत्ययमेव वक्ष्यति (भा० १०।६०।५७)—वयं 'प्रतिनन्दयामः' इति; अत्र च प्रतिनन्दनेऽप्यशक्त्या केवलमृणित्वमेवापादयत् । अतस्तस्याः सकाशादप्यासां विशेषः सुसिद्ध एवेति दिक् ॥ २२ ॥

निजोच्छिष्टप्रदानेन स्वस्मादपि सदानुगम् । पुष्टं विधत्ते यस्तस्मै श्रीधरस्वामिने नमः ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीश्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मयेति । परोक्षं भजता परोक्षमुपकारं कुर्वता ॥ २१ ॥ निरवद्यसंयुजां निरवद्ये मयि संयुक्ताचित्तानां—वः साधुकृत्यमुपकारं कर्तुं न पारये या यूयं गोप्यः दुर्जयगेहश्रृङ्खलाः अच्छेद्यगृहस्नेहपाशान् संवृश्च्य छित्त्वा मा अभजन् तासां कर्तुं न पारये इत्यन्वयार्थः सा श्रृङ्खला अधुनापि प्रतियातु भूयोऽपि निवर्त्ततामित्यर्थः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

आत्मनः कृतज्ञतानाविष्कुर्वन् कारुणिकत्वमेवाह । एवमिति । हे अबला ! मदर्थमुज्झितास्त्यक्ता ळोका युक्तायुक्ता प्रतीक्षणात् वेदः धर्माधर्मानपेक्षणात् स्वा ज्ञातयश्च स्नेहत्यागात् याभिस्तासां वो युष्माकमनेन कृतज्ञत्वमाविष्कृतं मय्यनुवृत्तये परोक्षं भजता उपकुर्वता मया तिरोहितम् अनेन कारुणिकत्वमुक्तं तस्माद्धे प्रियाः । प्रियतमं मामसूयितु दोषदृष्ट्या द्रष्टुं मार्हथ॥२१॥ आत्मनः कृतज्ञता काष्ठामाह । नेति । निरवद्यं निष्कपटं यथा तथा संयुज्यन्ते भजन्त इति तथा तासां वो युष्माकं सुसाधु यथा तथा कर्तुं प्रत्युपकर्त्तुमहं विबुधायुषापि न पारये न शक्नोमि मनुष्यायुषा तु न शक्नोम्येव ब्रह्मायुषापि न शक्नोमीति भावः । या भवत्यः दुर्जरगेहश्रृङ्खलाः संछिद्य गृहरूपं पाशं सम्यक् छित्त्वा मामभजन् तत्तस्मात्तासां वः सा श्रृङ्खला अधुना प्रतियातु भूयोऽपि निवर्त्ततामित्यर्थः । मया कार्यः प्रत्युपकारोमुक्तिप्रदानमेव तत्तु सदृशं भवेदिति भावः । यद्वा तस्माद्युष्माकमेव साधुना साधुकृत्येन तद्युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवतु "मय्येव जीर्णतां यातु यत्त्वयोपकृतं हरे ! नरः प्रत्युपकृतं हरे ! नरः प्रत्युपकारार्थी विपत्तिमभभिकाङ्क्षतीत्युक्तरीत्या युष्मत्साधुकृत्यं तेनैव जीर्यत्विति भावः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भगवान् गोपीनां सेवास्तवनव्याजेन स्वोपासनाप्रकारं दर्शयति । यथेति । यथा अधनो धनहीनः दरिद्रः दैवाल्लब्धधने नष्टे तच्चिन्तया नष्टघननियतरतमनस्कत्वेन नितरां भृतं गृहीतम् अन्यन्न वेद । यद्वा निभृतं स्तिमितं निश्चळं स्थिरं पुरोवर्त्यन्यद्वस्तु हे अबलाः ! एवं मदर्थं मामुद्दिश्य अर्पिते लोकवेदस्वे लौकिककर्मवैदिककर्मलक्षणसर्वस्वे यासां तास्तथा तासां वो युष्माकम् अनुवृत्तयः सेवालक्षणा उपासना अविषया न स्युरित्यन्वयः । तर्हि किमर्थं भवतान्तरधायीत्याशङ्क्याऽस्माकं स्वभावोऽयमित्याशयेनाह । मयेति । अत्र भजतेति शतृप्रत्ययः इच्छावाची परोक्षं भजता व्यवधानमिच्छता मया तिरोहितं पारोक्ष्यं कृतं "परोक्षप्रिया इव हि देवा" इति श्रुतिः व्यवधानमस्मत्प्रियं यस्मात्तस्मात् हे प्रियाः ! यूयं प्रियं मां सासूयितुम् असूया सहितां मतिं कर्तुं नार्हथेत्यन्वयः "संनिकर्षो हि मर्त्यानामनादरणकारण"मिति स्मृतेश्च शिक्षणायाप्येवं ॥ २१ ॥ ननु युष्मदनुग्रहाभावात् तत्कथमित्याशङ्क्यानुग्रहविशेषं कथम् । नेति । विबुधायुषा दिव्यवत्सरकल्पितजीवनलक्षणेनापि अहं निरवद्यसंयुजां निर्दुष्टमनोयोगवृत्तीनां वः सुसाधुकृत्यं युष्माकं सर्वसम्मतं निर्दोषकर्म प्रतिकर्तुं न पारये न शक्नोमीत्यनेन गोपीष्वधिकोऽनुग्रहोऽस्तीति दर्शितम् । न केवलं युष्मास्वनुग्रहविशेषो मम निर्व्याजभक्त्या भजमाने कस्मिंश्चिदपि स्यादित्याशयेनाह । यो मामिति । यो मां भजेन्मामुद्दिश्य भक्तिं करोति स पुरुषः स्त्रीजनो वाधुनास्मिन् जन्मन्येव दुर्जरदेहश्रृङ्खलाः भक्तिज्ञाने विना जरयितुं शिथिलीकर्तुमशक्याः लिङ्गशरीरलक्षणश्रृङ्खलाः संवृश्च्य छित्त्वा वृद्धिं स्वरूपभूतानन्दलक्षणां प्रति याति तस्य तावदेवचिरमित्यादिश्रुतेः । यद्वा दह्यते सिच्यते इति देहः दुर्जरा दुरुच्छेदाः पुत्रमित्रादिनिबद्धस्नेहलक्षणाः श्रृङ्खलाः संवृश्च्य मां भजेत्सेवते सोऽधुनैव भक्तिज्ञानादिसाधनसामग्रीलक्षणां वृद्धिं प्रतियातीत्यन्वयः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

न पारयेऽहम् न शक्नोमि ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तथापि यदेवं माया कृतम् तत्र मासूयाकरणीयेत्याह—एवमित्यादि हि अबला रामाः । अव अवरं वाम्यं लान्तीति तथा, मा मामसूयितुं मार्हथ मा क्षमाः स्थः । ननु भजन्तीरस्मान् विहाय गतवान्, कथं मासूयितव्यः ? इत्याह—मयेति । परोक्षं भजतैव मया तिरोहितम्, तिरोभूयापि मया वो भजनं कृतमित्यर्थः । साक्षाद्भजनात् परोक्षभजनमेव प्रेमगमकम् । यतो भवत्यः प्रियाः ननु जन्तवः; अहं प्रियः न त्वात्मारामादिः; इत्याह—प्रियं प्रियाः । ननु तर्हि तिरोहितमेव कथम् ? तत्राह—वो युष्माकमनुवृत्ति-

वृत्तये अनुवृत्तेर्वृद्ध्यर्थम्, भवतीनां मदङ्गसङ्गोत्सवेन पूर्णम्मन्यानां पुनरुत्कण्ठां वर्द्धयितुम्। ननु तदा तिरोहितमेवेति सत्यम्, भजतेति यदुक्तं यत्र किं प्रमाणमिति चेत्, मत्स्वभाव एव प्रमाणम्। यतोऽहं कृतज्ञ एवेति स्वकृतज्ञत्वं तासां विशेषणद्वारैव प्रकटयति—मदर्थेत्यादि। एवं प्रकारेण मदर्थं यन्निमित्तमुज्झितानि लोकवेदस्वानि याभिस्तासां वोऽभजने ममाकृतज्ञता स्यादिति स्वदोषपरिहारार्थं परोक्षभजनमेव कृतम्। तच्च सन्दर्शनरूपं कदाचिद् वीजनादिषु भवतीभिर् न दृश्य इति परोक्षं भजतेति पदयोर्ध्वनिः। अतः सम्यगुक्तम्—मासूयितुमित्यादि ॥ २१ ॥ यद्यपि वो भजनं कृतमेव तथाप्यहं वः। ऋणीवेत्याह न पारयेऽहमित्यादि। निरवद्या निरुपाधिर्निर्व्यलीका वा, संयुक् यासां तासां वः स्वसाधुकृत्यं स्वकीयसाधुकर्म अहमीश्वरोऽपि न पारये शोधयितुं न शक्नोमीत्यर्थः। यद्वा, वः कृत्यं स्वसाधु स्वैरेव साधु यथा भवति तथा कर्तुं न पारये। 'विलम्बेन पारयिष्ये' इति अपि नेत्याह—विबुधायुषा देवायुः परिमाणकालेनापि। कुतः ? इत्याह—वो युष्मान् दुर्जरगेहशृङ्खलाः संवृश्च्य छित्वा मा अभजन्। यथा भवत्यो दुर्जरगेहशृङ्खलाः संवृश्च्य मामभजन्, तथाहं भवतीर्माभजमित्यर्थः ॥ २२ ॥

इति श्रीदशमे स्कन्धे श्रीबृहत्क्रमसन्दर्भे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु जन्तून् स्वभक्तान् अजातप्रेम्णो जातप्रेम्णश्च यदेवं भजसि तत् सम्यक् करोषि। किंत्वस्मास्वपि तथैव त्वद्व्यवहरणाद्वयमपि जग्तुमध्य एव गण्या अभूमेति तासां सानुशयं वाक्यमाशङ्क्य भो मत्प्राणपरार्द्धप्रियपयोजपांशुपरमाणवः सख्यो युष्मासु यदन्यसाधारण्येनाद्य व्यवहृतं तदेतन्मे दौरात्म्यं क्षमध्वमित्याह। एवं यद्वा यथा तथैवैवमित्यमरोक्तेस्तद्वदित्यर्थः। ततश्च मदर्थे उज्झितः लोकः युक्तायुक्ताप्रतीक्षणात् वेदश्च धर्माधर्माप्रतीक्षणात्। स्वान्यात्मात्मीयधनज्ञातयश्च स्नेहत्यागात् याभिस्तासामपि वस्तद्वदनुवृत्तये उक्तलक्षणानामन्येषां भक्तानामिवानुवृत्तिवृद्ध्यै परोक्षमदर्शनं यथा स्यात्तथा भजतां युष्मत् प्रेमालापान् शृण्वता तिरोहितमिति काकुस्तस्मादतीवानौचित्यं कृतमित्यर्थः। न हि प्राचीना अर्वाचीना भाविनो वा भक्ता एवं सम्भवेयुः न ह्य तावत्या अप्यनुवृत्तेरपरावद्धिरस्ति नहि परमाणुपरममहतोः ह्रासवृद्धी केनाप्याशास्येते तस्मादन्यप्रमिभक्तान् प्रति युष्मत् प्रेमवैप्रलम्भिकप्रतापमहोत्कर्षजिज्ञापयिषामयी ममेयमसमीक्ष्यकारिता क्षम्यतामिति भावः। यस्मादेवं तस्मान्मा मां प्रति असूयितुं दोषारोपेण द्रष्टुं नार्हथ। तत्र प्रियमिति प्रिया इति च हेतुः प्रियस्य दोषं प्रियाः खलु न मनस्थानयन्तीत्यर्थः ॥ २१ ॥ मन्मनसि सन्ततं यदुद्भवति तत् शृणुतेत्याह। नेति। निरवद्या कामकर्मलोकधर्मशास्त्रापेक्षाराहित्येन निरुपाधिसंयुक् संयोगो यासां तासां वः स्वेनैव साधु यत् कृत्यं नतु साधुत्वापादकेन केनचिद्वस्तुसम्पर्केण साध्वित्यर्थः। तत् न पारये प्रतिकर्तुं न शक्नोमि विबुधायुषापि देवानामायुः प्राप्यापीत्यर्थः। कृत्यमित्येकवचनेन युष्माकं क्षणिकमपि कृत्यमित्यर्थः। या मा मामभजन् संवृश्च्य दुर्ज्जरा अपि पतिश्वश्रूपितृभ्रात्रादिस्नेहबन्धुशृङ्खलाः निःशेषं छित्त्वैव। श्लेषेण अपक्वयोगिन इव संवृश्च्यापि ताः शृङ्खलामापुनर्वाभजन्नित्यर्थः। अहन्तु पित्रोर्भ्रांभरि स्वेषु बन्धुष्वपि स्निह्यामि च युष्मान् भजामि चेति। ये यथा मां प्रपद्यन्त इति। स्वप्रतिज्ञातोऽपि च्युत इति मम प्रतिक्रियाया असम्भवः। व्यज्यमानोऽयमर्थः श्लेषेणापि लभ्यते। स यथा। संवृश्च्य या युष्मान् अहं मा अभजं परसवर्णेन नकारदुकारयोः संयोगः। तत्तस्माद्वः साधुत्वेनैव तत् युष्मत् साधुकृत्यं प्रतियातु प्रतिकृतं भवतु। युष्मत् सौशील्येनैव ममातृण्यं वस्तुतस्तु ऋण्येव भवामि युष्माकमिति भावः। ततश्च ताभिः प्रति स्वमनस्येवं विचारितम्। परमेश्वरत्वादेव सर्वगुणपरिपूर्णत्वेऽपि दोषगन्धमात्रराहित्येऽप्यस्मत् प्रेमरसविज्ञत्वेऽप्यस्मान् प्रेमवत्त्वेनोत् कर्षयितुं स्वंचापकर्षायितुमस्मदृणी भवितुमस्मत् कर्मकोऽयमस्मत्त्यागस्तदिमं पराबुभुषु विजिगीषवोमेवाधन्या एवं भवितुमपारयन्त्योऽनेन फलतः प्रेमद्वन्समजिता एवाभूमेति ॥ २२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। द्वात्रिंशो दशमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ३२ ॥

रसिकाह्लादिनी-टीका

एवं सर्वत्र स्वस्याभजने हेतुमुक्त्वा प्रस्तुते भजनविशेषमाह एवमिति, एवमनेन प्रकारेण, शुश्रूषन्त्यः पतीन्काश्चिदित्यादिना मदर्थे मत्कामनयानया उज्झिताः लोका कर्मोपार्जिता स्वर्गादिब्रह्मलोकान्ता गृहीतचित्तधर्मानादरात् वेदश्च विधिनिषेधानादरात् स्वपतिपुत्रादयः स्नेहपरित्यागात् एते त्यक्ताः याभिस्तासां वो युष्माकमपि अनुवृत्तये निरन्तरध्यानार्थं परोक्षभजता। रात्रौ स्त्रियः कथं त्यक्तव्या इति मनसि निधाय निरन्तरध्यानार्थमपरोक्षं भजनं रात्रौ रक्षार्थं परोक्षं भजनं एतदुभयं कुर्वता तिरोहितं नेत्रागोचरेण स्थितम्। प्रत्यभिज्ञाबोधकमाह—कितव योषितः कस्त्यजेन्निशि इत्यादि प्रेमालापान् शृण्वन् "अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृत" इति प्रत्यभिज्ञा दर्शयता अग्रतः पार्श्वतः पृष्ठतश्चादृश्येन भजता भवतीनां प्राणरक्षां कुर्वता तिरोहितम्, यद्वा अपरोक्षं भजता सर्वतो रात्रौ रक्षता तिरोहितम्, यद्वा परोक्षं भजता कण्टकशर्करादीनपसारयता मार्गसंस्कारं कुर्वता अतिरोहितं न तीर्यक्स्थितं किं तु अग्रतः एव स्थितम्। भजतो भजन्त्येक इति यत्पृष्टं तस्योत्तरं दत्तमिति भवतीनामपरोक्षं भजनं मम तु परोक्षं भजनमित्येतावान् भेदः। हे अबला इति सम्बोधनेन तत् ज्ञाप्यते न ह्यन्येषामिव भवतीनां भजनं किंत्वलौकिकमेव सिध्यतीति।

अनेनाभजनपक्षौ वल्लवीमनसि निरधारितोपि निरस्तः। अन्यथा असूयापि सम्भवेत्। तत् तस्मादकृतज्ञत्वादिदोषारोपणे मा मां असूयितुं मर्हथ, कीदृशं मां प्रियं प्रीतिविषयं यूयं मत्प्रियाः दुष्टेऽपि प्रिये स्वस्यासूयाविषयत्वमनौपायिकं त्यक्तुमशक्यत्वात् इति प्रीतिविषयेऽकृतज्ञत्वादिदोषस्फुरणमसम्भावितम्। प्रत्युतं अकृतज्ञत्वगुणसम्भावनमुचितम्। अकृतमकृतिमं भावं जानातीति अकृतज्ञः तस्य भावो कृतज्ञत्वं स्वाभाविकमनोभावज्ञत्वमित्यर्थः। अन्यथा दोषस्फुर्त्तौ औदासीन्यसामानाधिकरण्य स्यादिति। ननु परोक्षं भजने स्वभजनसादृश्यं न भवति दुःखहेतुत्वात्स्फूर्तेरिति चेत्तर्हि प्रियं मा मामसूयितुं मार्हथ सागस्यापि मयि दोषमुद्भावयितु मार्हथ दोषमुद्भाव्य सदोषस्य मम भजने भवतीनामपि सदोषत्वं प्रसिद्धिर्भविष्यतीति। क्षन्तव्यमेवेति सानुनयोक्त्या वैषम्यमभिव्यञ्जितम्, प्रियं प्रिया इत्यनेन दोषमुद्भावयन्त्योऽपि भवन्त्यो मया त्यक्तुमशक्याः। तथा प्रिये त्यक्तुमशक्ये मयि तया कर्तुमशक्ये मयि तया कर्त्तुं प्रियाणामसाम्प्रतमिति भावः॥ २१॥ एवं तासाममर्षमार्जनं कृत्वा भजमाणस्य स्वस्यानृण्याय स्फुटयितुं ताः परिसान्त्वयति "न पारयेऽहमिति" निरवद्यसंयुजां निरवद्या संयुक् संयोगे यासां लोकप्रतीत्या काममयत्वेन प्रतीयमानोऽपि विषयमहिम्ना निःकामे पर्यवसाय्येवेत्यर्थः। तदुक्तं श्रीमुखेनैव "न मय्यावेषितधियां कामः कामाय कल्पते" इति तादृशकामसम्बन्धस्य संसारहेतुत्वं प्रत्युपकारं कर्त्तुमित्यध्याहारः। न पारयेऽहं न शक्नोमि विबुधायुषाऽपि ब्रह्मण आयुषापि, यद्वा वो युष्माकं कृत्यं भजनं प्रतिस्वं स्वकीयं साधु समीचीनं कर्त्तुं न पारयेऽहं, यद्वा वो युष्माकं स्वमसाधारणं साधु कृत्यं निष्कपटं भजनं वक्तुमित्यध्याहारः न पारयेन कोऽपि समर्थः। भवतीनां मम चोभयोर्वैसादृश्यादित्यर्थः। न हि वास्तवजलतृप्तं कदाचित् मरोचिजलतृप्तिः सदृशी भवितुमर्हतीति। तत्र हेतुमाह—या भवत्यः दुर्जरा अजया अच्छेद्या इत्यर्थः, गेहशब्देन समष्टिरूपा पतिपुत्रादिषु स्नेहरूपा सर्वगृहाचितव्यापाररूपा वा मुनीनामपिच्छेत्तुमशक्याः अग्रे एताः एव स्पष्टी करिष्यन्ति। "स्नेहानुबन्धो बन्धूनां मुनेरपि सुदुस्त्यज" इति। बहिः लोहमय्यः शृङ्खलाः च्छेत्तुमपि शक्याः, अन्तस्थिताः सुस्नेहमय्यः शृङ्खलाः केनापि न छिद्यन्ते। मम तु स्वकीये स्नेहानुबन्धस्य त्यक्तुमशक्यत्वात्। अत एव भवतीनां मम च तुल्यत्वाभावः। एतादृशी शृङ्खला बन्धनहेतून् संवृश्च्य सम्यक् छित्वा अप्रत्यापत्तिरूपेण त्यक्त्वेत्यर्थः। या माभभजन्निति। यथा भवतीनां मदेकनिष्ठत्वेन भजनं तथा युष्मदेकनिष्ठत्वेन मम भजनाभावान्न साम्यम्, बहुप्रेम्नो विभक्तत्वान्नैकनिष्ठत्वमितिभावः। तद्भजनं वो युष्माकं साधुना भावप्रधानो निर्देशः साधुत्वेन प्रतियातु प्रत्युपकृतं भवतु। सर्वनैरपेक्षेण युष्मद्भजनाशक्तेः "ये यथा मां प्रपद्यन्ते तां तथैव भजाम्यहमिति" स्वप्रतिज्ञाहानिप्रसक्तैरपि अतो ममानृण्या भावो निर्णीतः। इतः परं भवतीनां स्वाधीनपतिकात्वे जाते यथा रुचिमाज्ञापयन्त्विति भावः। "स्वमुखेन विशिष्टोक्त्या गोपीनां प्रेमयन्त्रितः। ऋणित्वमङ्गीकृतवान् स कृष्णः प्रेमदोऽस्तु मे"॥ २२॥

इति श्रीमन्ना‹दावतारश्रीनारायणभट्टविरचितायां रसिकाह्लादिन्यां रासपञ्चाध्यायीटीकायां गोपीसान्त्वनो नाम द्वात्रिंशोऽध्यायः॥ ३२॥

विशुद्धरसदीपिका

तदेव तासां मुख्यतमं वर्गद्वयम् एकः कान्तभावेन भजमानानां परश्च सख्येनेति तत्राद्यमुद्दिश्याह। एवमिति। दुहन्त्योऽभिययुः काश्चिदित्यादिप्रकारेणेत्यर्थः। मदर्थः मत्प्राप्त्यै उज्झितानि लोकवेदस्वानि याभिस्तासां वः युष्माकं मय्यनुवृत्तये यथाधन इत्युक्तप्रकारो वा युष्माकं मय्येव वृत्तिर्यथास्यात्तथा परोक्षं भजता भवतीनां दृष्टिमात्रागोचरीभूतेनेत्यर्थः। यद्वा किं कुर्वता परोक्षम्भजता प्रेमालापादिकमनुमोदमानेन तिरोहितं न त्वन्यत्र गतमित्यर्थः। अतो हे प्रियाः! मद्विषयकप्रेमकर्त्र्यः प्रियमेवं प्रेमपरमा मासूयितुं गुणेषु दोषमारोपयितुं मार्हथ। प्रियाभिः प्रियं प्रति तथा सम्भावयितुमयुक्तमिति भावः॥ २१॥ अपरमुद्दिश्याह। नेति। व इति सम्बन्धमात्रे षष्ठी युष्मान् प्रतीत्यर्थः। व इत्यवधानार्थं स्वसाधुकृत्यं स्वीयं प्रत्युकारकृत्यं न पारये कर्त्तुं न शक्नोमि। यद्वा हे सख्यः! वो युष्माकं यत्स्वीयमसाधारणं साधुकृत्यं तदहं विबुधायुषापि न पारये न प्रत्युपकर्तुं समर्थः। यद्वा विगतो बुधो गणनाभिज्ञो यस्मात्तेनानन्तेनेत्यर्थः। तत्र हेतुः। निरिति निर्मलप्रेममयत्वेन निर्दोषा संयुक् सम्बन्धः शुद्धसख्यमात्र यद्वा मत्सुखैकतात्पर्य्यवत्त्वेनान्तः स्वसुखस्पर्शाभावेन निर्दोषा युक् मया सह सख्यभावेन मेलनं विद्यते यासां तासां तत्र हेतुः दुर्जरेति। दुर्गता जरा यस्मात्तद्दुर्जरं यौवनं तद्गायर्तीति दुर्जरगः कामः तस्य या ईहा चेष्टा सैव प्रेमप्रतिबन्धाच्छृङ्खला तां संवृश्च्य सम्यक् छित्त्वा मामभजन् शुद्धप्रेम्णेवेति शेषः। अथवा यामाभजन्निति गेहशृङ्खला इति च पाठः तत्र दुर्जरा गेहस्य शृङ्खलाः नित्यङ्गोपालनादिगृहकृत्यनिबन्धनाः बन्धुजनानुवृत्तिनिबन्धनाः वस्तुतस्तु "गृहिणीगृहमुच्यत" इत्यादि स्मृते कान्तभाववतीभिर्दाम्पत्यनिबन्धनाः संवृश्च्य या भवतीः अहं माभजं न सेवितवानस्मि तत्प्रत्युपकारं यो युष्माकं साधुना सर्वनिरपेक्षभजनेन कृत्वा प्रतियातु प्रतिक्रियामनुकरोत्वित्यर्थः॥ २२॥

इति श्रीभागवते महापुराणे दशमस्कन्धेरासपञ्चाध्यायीव्याख्याने विशुद्धरसदीपिकायां चतुर्थोऽध्यायः॥ ४॥

मूलस्य द्वात्रिंशोध्यायः॥ ३२॥

श्रीरामनारायणकृता भावभावविभाविका

ततोऽस्माकं भजन्तीनामपि भवता तथैवाभजनं कृतं नेत्याह। एवपीति। अत्र प्रश्नोत्तरादिव्यवधानेन गोपीनां भगवदर्थसर्वत्यागस्यासंनिहतपूर्वप्रकृतत्वाभावाद्व्यावहितपरामर्शात्प्रत्यक्षपरामर्शस्यैव ज्यायस्त्वादेवं शब्दः प्रत्यक्षानुभूतवाची एवं स्पष्टं

परिदृश्यमानं यथा स्यात्तथा मदर्थ एव "एतमेव परिव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः येनाहं नामृतास्यां किमहं तेन कुर्य्या "मित्यादिश्रुतिमनुसृत्योज्झितास्त्यक्तालोकाः प्रवृत्तिपथवेदफलत्वेन श्रूयमाणाः स्वर्गोदयस्तत्प्राप्तिसाधनवेदा इति तन्निरूपिताः कुलजात्यादिपात्रधर्माः ऐहिकाश्च सर्वे स्वाःस्वसम्बन्धिनः पतिबन्धुग्रहवित्तादयो याभिस्तासां वो यद्वा वस्तुतः "सर्वे वेदा यत्पदमामनन्ति वासुदेवपरा वेदाः वेदैश्च सर्वैरहमेव वेद्य" इत्यदिनाहमेव सर्ववेदप्रतिपाद्यः "तत्त्वमसि अहमात्मा गुडाकेश स्व आत्मन्नित्यप्रिये सयुजा सखाया' इत्यादिना सर्वेषां स्वात्मबन्धुश्चातः सर्ववेदार्थस्वात्मभूतमदर्थमेवोज्झिता ळोकाः पामरजना वेदास्तन्निर्णीताः प्रवृत्तिपरा वेदार्थास्तदभिमता एव स्वाः स्वीया देहगेहादयो याभिस्तासां वः प्रथमत एवमपि सिद्धा वृत्तिः सा मया स्थूणा निखननत्ययेन विनयेन वा पूर्वं दृढीकृतापि फळानुभवे योगसिद्धानां प्राप्ताष्टसिद्धिभिरिव रसास्वादकसायादिभिरिव वा मदमानाभ्यां प्रतिवद्धा तस्या अनुवृत्तये यतो यूयमवळा मदमानप्रतिबन्धहरणबलरहिता । यद्वा अकारो वासुदेवोऽहमेव सर्वसम्पदात्मको बळं यासां तथाभूताः प्रियाश्चातो मयापरोक्षमदर्शनं यथा स्यात्तथा भजतैव तिरोहितं यद्वा प्रहसितं प्रियेत्यत्रोपवर्णितरीत्या भवतीनामप्यपरोक्षमेव यथाभवति तथाभजतैव ध्यानलयेनास्माकमिदं विहारदर्शनमिति बुद्धिमात्रप्रतिबन्धेन तिरोहितमन्यथा मदेकप्राणानां वो मद्वियोगे जीवनमेवासम्भाव्यमतो मया युष्मत्सेवनात्यागात् मा मां प्रियमसूयितुं मार्हथ गुणे दोषवुद्धिरसूया तां कर्तुं न योग्या प्रियदोषेष्वपि गुणवुद्धेरेव न्याय्यत्वात् ॥ २१ ॥ ननूक्तमेवास्माभिः निजजनस्मयध्वंसनस्मितेत्यत्रास्मन्मानस्य स्मितमात्रापनेयत्वेनान्तर्द्धानवैय्यर्थ्यं तत्राह । न पारयेऽहमिति या यूयं दुर्ज्जरां गेहश्रृङ्खलां संवृश्च्य सम्यक् छेदयित्वा मा मामभजं स्तासां निरवद्य संयुजां वः मानमात्रस्य स्मितमात्रापनेयत्वात् स्वस्मिन्मयि यत्साधुकृत्यमुपगमनं मया विप्रळम्भेऽप्यनुवर्तनादि तद्यतोऽहं विवुधानां देवानामायुषापि तावत्कालसेवनेनापि प्रतिकर्तुं न पारये किम्मर्त्यायुषा तदन्तर्गतकिञ्चित्कालेन वा । अतो मम ऋणापाकरणे असमर्थत्वाद्वः साधुनैव तत्प्रतियातु भवत्यः स्वसाधुतया ममानृण्यं जानन्तु । असमर्थस्य ऋणिनो महाजनैरिव । यद्वा अस्मिन्नर्थे देवायुषो भगवत्समीपे आधिक्याभावात्तथोक्त्यनुपपत्तिरेवातो वुधा ब्रह्मतत्त्वविदो विवुधास्तुपराभक्त्यात्मकप्रेमसहकृतबोधवन्तस्तेषामायुषा जीवनभूतेन स्वात्मनापि न पारये—

एषाङ्घोषनिवासिनामुत भवान्किंदेव रातेति नश्चेतो विश्वफलात्फलं त्वदपरं कुत्राप्ययन्मुह्यति ।
सद्वेषादिव पूतनापि सकुला त्वामेव देवार्पिता यद्धामार्थसुहृत्प्रियात्मतनयप्राणशयास्त्वत्कृते ॥

इत्यादिना ब्रह्मणा निर्णीतत्वात् अतो वः साधुनेत्यादि पूर्ववत् । यद्वा भगवतो ऋणापाकरणासामर्थ्यो भगवत्त्वक्षतो तत उत्कर्षेऽपि गोपीनामत्युत्कर्षासिद्धेर्नायमर्थः अपितु ब्रह्मणा तथा निर्णीतस्मान्निरवद्यसंयुजां तत्सेवनानुरूपफलान्तरासंभवेन मम स्वात्मसमेना नृण्यसम्भवेऽपि यथा नित्यमुक्तस्यापि मे प्रेमबन्धनमेवसर्वज्ञस्यापि प्रेमप्रमादस्वाकारश्च तथा प्रेमिणामृणित्वमेवेष्टमृणित्वे नित्यसङ्घर्षलाभादानृण्यस्य तदलाभेनानिष्टतया न पारये इत्येवोक्तं वस्तुतस्तु यथा केनचिदतिधनिना महाजनेन स्वसमर्पितधनव्यापारिणः सकाशात्किमपि कार्यार्थमृणग्रहणेऽपि तद्धनस्य तदीयत्वेनानृण्यमेवैवम्वः साधुत्वस्याप्यन्तर्य्यामिणो मेऽतिप्रेमाधीनतया वः साधुनैव तत्प्रतियातु ॥ २२ ॥

यन्त्रस्य गुणदोषो न यन्त्रिणो मधुसूदन ! । त्वत्प्रेम्णा त्वत्कृता व्याख्या तया तुष्यतु मे भवान् ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धान्तर्गत रासपञ्चाध्यायीव्याख्यायां श्रीचन्द्रभागाख्यविष्णुसख्यापन्न-
श्रीरामनारायणरचितायां भावभावविभाविकायां चतुर्थाध्यायव्याख्या समाप्ता ॥ ४ ॥

मूले द्वात्रिंशः ॥ ३२ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवं वो युष्माकं मय्यनुवृत्तये परोक्षमदर्शनं यथा लोकादित्यागे दुर्बला इति तदाशयः मया तिरोहितं तिरोधाय स्थितं यतो मदर्थोज्झितलोकवेदस्वानां मदर्थमुज्झितस्त्यक्तो लोको युक्तायुक्ताप्रतीक्षणात् वेदश्च धर्माधर्मानादरात् स्वा ज्ञातयश्च स्नेहत्यागात् याभिस्तासां ननु भवतीष्ववलासु वलं प्रकटयितुं मया तिरोहितमिति सूचनाय संबोधनं हे अवलाः ! भवति तथा भजन्तीति युष्माकं प्रेमाकुलानां ममतैव तस्मात्प्रियं मामसूयितुं दोषारोपेण द्रष्टुं यूयं मा अर्हथ न योग्याः स्थ यथाहं युष्माक प्रियस्तथैव यूयमपि प्रिया अत्रार्थे संशयो न कर्तव्य इत्याशयेन सांवेधयति । हे प्रिया ! इति मानिनीपक्षे यद्यप्येवं तथापि तादृशं प्रियं मां प्रियाः यूयमासूयितुम्मर्हयेति मां प्रियासु प्रियस्य तथाप्रवृत्तेरनुचितत्वादिति भावः ॥ २१ ॥ आस्तामिदं परमार्थं तु शृणुतेत्याह । नेति । काममयत्वेन प्रतीयमानापि वस्तुतो निर्मलप्रेममयत्वेन निरवद्या निर्दोषा संयुक् मद्विषयकचित्तैकाग्रता अङ्गसङ्गमो वा यासां तासां वः स्वीयं समीचीनप्रत्युपकारकृत्यं विवुधायुषा देवायुषा ब्रह्मायुषा वा विवुधानां ज्ञानिनां मतेनायुषापि न पारये प्रत्युयकारहेतुलोकवेदमर्यादाः विवृश्च्य निःशेषं छित्त्वा या मामभजन् शरीराद्यर्पणं कृतवत्यः तथाचाचिज्ञापक्षे भजनस्य जीवधर्मत्वात्तादृशभजनस्य मयि दुर्ल्लभत्वान्न पारये अनभिज्ञापक्षे मम चित्तस्य पितृभ्रातृवंध्वादिष्वपि स्निग्धत्वान्न पारये मानिनीपक्षे मम चित्तं बह्वीषु प्रेमयुक्तं तत्वनन्यताङ्गतमतो न पारये तत्तस्माद्युष्माकमेव साधुना साधुत्वेन प्रतियातु प्रत्युपकृतं भवतु तथा च युष्मत्सौ-

शील्येनैव ममानृण्यं नतु मत्कृतेन प्रत्युपकारेणेति भावः । निवृत्तिपक्षे भजतोऽपि जन्तूनहं न भजामि विषयतया तेषां प्रकटो न भवामि किमर्थमितिचेत्तत्राह । अकृतवृत्तये प्रतिबोधविदितत्वसिद्धये एतत्सदृष्टान्तमाह । यथेति । एवं वो युष्माकं मय्यनुवृत्तये मदर्थोज्झितलोकवेदस्वानां विवेकिनां परोक्षं भजता वर्तमानेन मया परोक्षतया लब्धेनापि मया तिरोहितम् अन्तर्द्धानेन स्थितं तथा च यावद्ब्रह्मसाक्षात्कारो न भवति तावच्छ्रवणाद्यावृत्तिः कर्तव्यापेक्षतया भातस्य तिरोहितत्वात् तथाच भगवतो बादरायण सूत्रम् "आवृत्तिसकृदुपदेशात्" इतीति भावः । तस्मात्प्रियाः प्रतिपादकत्वेनाभिप्रेताः यूयं प्रियप्रतिपादनत्वेन सम्मतं माम् अहो अस्मद्विच परस्य झटिति प्रत्यक्षतया कुतो न भातीति सूचितमित्यर्थः । अस्त्वपिदं जीवरूपेण बद्धस्य मम बन्धननिवारकाणां युष्माकमुपकारस्य प्रत्युपकारं त्वहं न पश्यामीत्याह । नेति । निर्बन्धकर्तृशयुषासंस्पृष्टे मयि संयुजां तात्पर्य्येण संगतानां वः स्वसाधु कृत्यं विबुधायुणां यतो भवत्यो दुर्जरा देह गेहादिश्रृङ्खला मदीयाः संवृश्च्य मामभजन् तस्मात्तद्युस्तत्माधुकृत्यं स्वसाधुत्वेन प्रतियातु श्रुतिकृतोपकारस्य प्रत्युपकारः केनापि कर्तुमशक्य इत्यर्थः ॥ २२ ॥

इति श्रीपरमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिमिश्र-
सूरिकृतायां भागवतगूढार्थदीपिकायां दशमस्कन्धे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

रास-रहस्यम्

र० टी०—एवं अपरोक्षसाक्षात्कारानन्तरं जीवन्मुक्तस्य परिदृश्यमानो व्यवहारो यथा स्यात् तथा मदर्थोज्झितलोकवेदस्वानां "एतमेव परिव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति किं प्रजया करिष्यामो येषां नायमात्मायं लोकः येनाहं नामृता स्यां किमहं तेन कुर्याम् ।" "पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति ।" इति श्रुतिमनुसृत्य उज्झिता त्यक्ता लोकाः प्रवृत्तिमार्गाः, वेदाः वेदफलत्वेन श्रूयमाणाः स्वर्गादयः तत्प्राप्तिसाधनानि च, स्वे स्वसम्बन्धिनः पतिपुत्रगृहवित्तादयो याभिस्तासां वः युस्माकं मय्यनुवृत्तये पूर्वं यथा साक्षात्कृतं पुनस्तस्य ध्यानसिद्धये स्थूणानिखननन्यायेन दृढीकर्तुं अन्यथा रसास्वादकषायादिभिः मदमानाभ्यां वा प्रतिबद्धा ममानुवृत्तये यतो यूयमबलाः असमर्थाः अतो मया परोक्षमदर्शनं भजतैव तिरोहितं अन्तर्धानेन स्थितं, तत् तस्मात् मा मां प्रियं असूयितुं, गुणेषु दोषबुद्धिरसूया तां दोषदृष्टिं कर्तुं मार्हथ न योग्या, प्रियः दोषेष्वपि गुणबुद्धिरेव न्याय्यत्वात् ॥ २१ ॥ बन्धनकर्तृत्वादि दोषासंस्पृष्टे मयि निरवद्यसंयुजां निरवद्याः निष्कपटाः संयुक् संयोगो तात्पर्येण संगतं भजनं यासां, भावे क्विबन्तं, तासां वो युस्माकं, स्वसाधुकृत्यं निष्कपटेन स्वप्रत्युपकारकरणाय प्रवृत्तोऽहं, विबुधायुषापि विशेषेण बोधयुक्तः विबुधः, तस्यायुषा स्वात्मस्वरूपप्रदानेनापि, न पारये न शक्नोमि । या भक्त्यो दुर्जरगेहश्रृंखलाः "जीर्यतोऽपि न जीर्यति ।" इति दुर्जराः देहगेहनिबन्धनासक्तिरूपबन्धनानि, संवृश्च्य सम्यग्रूपेण छित्वा, मां परमात्मानमभजन् तत्सेवानुरूपफलान्तरासम्भवात्, तत् तस्मात्, वो युस्माकमेव, साधुना साधुकृत्येन सर्वनिरपेक्षसाधनेन स्वात्मचिन्तनेन, प्रतियातु यतः नित्यमुक्तस्यापि मे ज्ञानिनः साहित्यमिष्टमेव अतः प्रत्युपकृतं भवतु अर्थात् साक्षात्कारो भवतु ॥ २२ ॥

इति रहस्ये चतुर्थोऽध्यायः ॥ ३० ॥

गूढार्थदीपिनी

हे अबलाः ! मदर्थे उज्झिताः त्यक्ता लोकवेदस्वीयमर्यादा याभिः तासाम् एवभूतानां वः युष्माकं भजता प्रेमालापान् शृण्वतैव मया तिरोहितम् । भावे क्तः । तत् तस्मात् हे प्रियाः । माम असूयितुं दोषारोपेण द्रष्टुं न योग्याः स्थ ॥ २१ ॥ निरवद्या निर्दोषा संयुक् संयोगो यासां तासां वः यत् स्वीयमसाधारणं साधु कृत्यं तत् न पारये प्रत्युपकर्तुं न शक्नोमि ब्रह्मायुषापि । या भक्त्यः दुर्जराः गेहश्रृङ्खलाः छित्त्वा माम् अभजन् तत् तस्मात् यः युष्माकं साधुना सोशील्येनैव प्रतियातु प्रतिकृतं ममानृण्यं भवतु । अन्यथा युष्माकम् अहम् ऋणी एवेत्यर्थः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दमशस्कन्धे पूर्वार्द्धे गुढार्थदीपिन्यां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे अबलाः ! एवमेव मदर्थे उज्झितो लोकस्तदनुरूपयुक्तायुक्ताप्रतीक्षणात् वेदश्च धर्माधर्माप्रतीक्षणात् स्वाः ज्ञातयश्च तत् स्नेहत्यागात् याभिस्तासां वो युष्माकं मयि ध्यानार्हे विश्वकारणे "कारणन्तु ध्येय"मिति श्रुतिविषये अनुवृत्तये परोक्षमदर्शनं यथा भवति तथा भजता उपकुर्वता स्नेहोद्रेकं कारयित्रा मया तिरोहितम् अन्तर्द्धानेन स्थितम् तत्तस्मान्मा मां भवतीनां प्रियं हे प्रियाः ! असूयितुं दोषदृष्ट्या द्रष्टुं यूयं मार्हथ ॥ २१ ॥ तासां निर्दोषदासीत्वं स्वस्य परमस्वामिनः परमकृतज्ञत्वं चाह । नेति । निरवद्या संयुक् संयोगो यासां तासां वो युष्माकं विबुधायुषापि बहुकालेनापि स्वसाधुकृत्यं स्वीयं प्रत्युपकारकृत्यं कर्तुमहं न पारये न शक्नोमि या भवत्यो दुर्जरां गेहश्रृङ्खलां संवृश्च्य सम्यक् छित्त्वा मा मामभजन् अतो वो युष्माकमेव साधुना साधुकृत्यं प्रतियातु प्रतिकृतं भवतु भवतीनां सौशील्येनैव ममानृण्यमिति भावः ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्वात्रिंशाध्यायार्थप्रकाशः ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वतिरोधानमेतदर्थमिति ताः प्रति प्रोच्य स्वोपास्तिरेवं कर्तव्येत्यर्थात्सूचयन्स्तावयितुं लौकिकीं काञ्चिद्धाटीकमाटीकमानः सत्सम्माननं कुर्वन्नेवेश्वर ईरयति। यथेति। अधनः प्राग्दरिद्रो दैवाल्लब्धधने प्राप्तद्रव्ये पुनर्विनष्टे चोरादिद्वारा तच्चिन्तया जनोऽन्यन्निभृतं धनभिन्नं क्षीरादिपूर्णकलशादिकं न वेद तदितरत्रादरादिति भावः। तथा हि तत्त्वनिर्णयटीकायाम्। यो हि यत्रादरवांस्तथैव तद्वस्तु विद्यमानमपि स्फुरति न त्वत्रानादरवतोऽन्यत्रादरवतश्चेत्यनुभवसिद्धमिति। निभृतं स्वगृहीतमेवं तथा मदर्थार्पितलोकवेदस्वानां मद्रूपेऽर्थे विषयेऽर्पिताः समर्पिता लोको लौकिको वेदो वैदिकः स्वं द्रव्यं ज्ञातयो वा याभिस्तासां वो युष्माकमनुवृत्तय उपासनाद्या मयि मय्येवाबला अन्यत्रापरिवर्तमाना नष्टधनस्य धनचिन्तया तस्य यथा नान्यज्ज्ञानं तथा भवदनुवृत्तयोऽपि मत्तोऽबलाः सत्येवं तिरोधानं माधव कुत इत्यतोऽभिधत्ते। मयेति। मया किञ्चिद्व्यवधानेन परोक्षमेवं भजता तिरोहितम्। परोक्षमपि मां भजतेति। अतिरोहितमीषत्तिरोहितमिति वा। सासूयितुमसूयासहितं कर्तुम्। सुप्सुपेति वा मयूरव्यंसकादित्वाद्वा समासः। हे प्रियाः प्रियं मां नार्हथ भार्यामीर्ष्यतीति मैनामन्यं ऽद्राक्षादित्यादिवद्यं प्रतीत्यविवक्षणाद्द्वितीया। सासूयितुं माऽर्हथ तत्प्रियं प्रिया इति पाठस्तु स्फुटार्थः। समसूयितुं सासूयितुं वेति केचित्। सर्वा अपि मिलित्वेति तदर्थः॥ २१॥ रतिसमयत्वात्ताः प्रोत्साहयति॥ नेति। निरवद्यसंयुजां निरवद्यं यथा संयुजन्त इति निरवद्यसंयुजस्तासामकुटिलसंयोगवतीनां वो विबुधायुषाऽपि सु साधुकृत्यं न पारये भवत्कृतं प्रतिकृत्वा न पारयितुं शक्तः। यो जनः सत्यो वा मर्त्यो वेति जनो मां भजेत्सो दुर्जरा जरयितुं रीत्यन्तरेणासुसाधदेहरूपशृङ्खला निगडान्संवृश्च्य। वो वृश्च छेदने। सञ्छिद्याधुना सद्य एव वृद्धिं स्वरूपानन्दाद्यां प्रतियाति। तस्य तावदेव चिरमिति श्रुतेः। दुर्जरदेहो दिह्यत उपनीयत इति देहः स्नेहस्तद्रूपशृङ्खलाः संवृश्च्य यो भजेत्सोऽधुनैव वृद्धिं मुक्तिं प्रयातीति वा। एष्यन्निश्चयादेवमुक्तिः। आन्तरङ्गिको भावस्तु भगवतो वो विबुधायुषाऽपि दैवात्प्राप्तेन तेनापि यत्कृत्यं कर्म तन्निरवद्यस्य मम संयुजाम्। सम्पदादित्वात्क्विप्। बहुवचनमाद्यर्थे। सञ्ज्ञादीनां सु साधु सम्यक् साध्विति पर्याप्तमिति वक्तुं न पारये न शक्नोमि। अल्पीयसी सत्कृतिः फलमनल्पमिति। मद्भजनस्यायमाजनीनः स्वभाव इत्याह॥ य इति॥ २२॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे त्रिंशोऽध्यायः॥ १०–३०॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं स्वस्याभजने हेतुमुक्त्वा प्रकृते तदभावमाह। एवमिति। यदुक्तं ताभिररण्ये स्त्रियो रात्रौ कथन्त्यक्तव्यक्ताः। तदर्थमेवमुच्यते द्वयमत्र कर्त्तव्यं भजनानुवृत्त्यर्थमभजनं रात्रौ रक्षार्थं भजनञ्च तत्परोक्षभजनेन सिध्यतीति मयापरोक्षं भजता तिरोहितं भजने हेतुमाह। एवमिति। मदर्थमेव उज्झिताः लोकवेदस्वा याभिः वृथा परित्यागव्यावृत्त्यर्थं मोक्षार्थपरित्यागव्यावृत्त्यर्थञ्च मदर्थमुज्झितेत्युक्तम्। आद्ये त्यागोऽनिष्टहेतुः द्वितीये न मम भारः त्रयः पदार्थास्त्यक्तव्याः लोको दुस्त्याज्यः आर्यमार्गो वैदिकः प्रकारः तादृश इति मयैव लोके तथैव प्रतीतिजननात् पतिपुत्रादयो दुस्त्याज्याः तत्रापि न मयि प्राप्ते किन्तु मदर्थे मत्कामनायामेव तदा मे विचिकीर्षितो भवतीति सर्वधर्मान् परित्यज्येति तादृश एव मम भाव इति त्रितयपरित्यागे मया भजनं कृतं वस्तुतस्तु स्वपदं स्वात्मपरम् अन्यथा पतिपुत्रादीनामपि लोकवेदमध्यपातात्तेनैव तत्प्राप्तेः स्वपदमनर्थकं स्यात् तथा च स्वात्मकत्वेन स्नेहविषयत्वाभाव एव तत्त्यागः एतासां भगवदर्थमेव प्रीतिविषयत्वादात्मादीनामिति सारं युक्तश्चायमर्थः अनन्याः पालनीया इति वः युष्मान् मय्यनुवृत्तय इत्येकम् फलम् अवला इति सम्बोधनात् न सतामिव प्रत्यक्षेण भवतीनां भजनं सिद्ध्यतीति ज्ञापितं परोक्षं भजता अतिरोहितं वा भजतां यत्तिरोहितां वा भजनं भोगो वा भोक्त्रैव मया भोगं कुर्वता तिरोहितं भवतीभिर्न दृष्ट इत्यर्थः। अनेना। भजनपक्षो व्यावर्त्तितः तस्मिन्सत्यसूया सम्भवति अकृतज्ञत्वादिदोषारोपणेन मा मसूयितुं नार्हथ यतः प्रियं प्रिये दुष्टं स्वस्यापि तथात्वस्यावश्यकत्वात् त्यक्तुमशक्यत्वात् किञ्च प्रिया यूयमकृतज्ञत्वादयो हि धर्मा न प्रतीतिविषये भवन्ति औदासीन्यसामानाधिकरण्यात्॥ २१॥ एवं तासां मनोमार्जनमुक्त्वा भक्तिमार्गविरोधं परिहर्त्तुं ताः स्तौति। न पारयेऽहमितिनिरवद्यसंयुजां निर्दुष्टभजनयुक्तानां स्वसाधुकृत्यं स्वप्रत्युपकारकरणं विबुधायुषा ब्रह्मायुषा मन्वन्तरपरिमितायुषा वा विशेषेण बुधानां ज्ञानिनामनन्तायुषा वा विशेषेण बुधानां ज्ञानिनामनन्तायुषा वा न पारये भजनप्रत्युपकारयोर्वैसादृश्यात् भवतीनां भजनं निष्कपटमस्मद्भजनं सकपटमिति नह्यल्पजलस्यापि तुल्यं बह्वपि मरुमरीचिकाजलं भवति सत्यभजनन्तु ब्रह्मणोऽशक्यमेव जीवधर्मत्वात् तत्रापि विशेषमाह। या मा भजन्निति। दुर्ज्जरा हि गेहशृङ्खला या जीर्यतोऽपि न जीर्यतीति तां सम्वृश्च्य छित्त्वा याः भवत्यः प्रसिद्धाः मा मभजन् यैः पूर्वं बद्धाः स्थिताः स्वार्थं तेषामर्थमात्मानञ्च मय्येव समर्पितवत्यः बहिः शृङ्खलाः त्यक्तुमपि शक्या नतु सर्वतः आवृते गृहे शृङ्खला एवमलौकिककर्त्रीणां यद्भजनं तद्भवतीनामेव साधुना भावप्रधानो निर्देशः साधुत्वेन प्रतियातु प्रत्युपकृतं भवतु साधवो हि महत्कर्म कृत्वा स्वयमेव तुष्यन्ति नतु प्रत्युपकारमपेक्षन्ते अतो मयि भजनं नास्ति भजनस्य धर्मत्वात् अतोऽग्रेऽपि यदि स्वयमेव सन्तुष्टाः तदा भजत नो यथासुखं विधेयमिति भावः नह्यशक्यं कश्चित्कर्तुं शक्नोतीति॥ २२॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे एकोनत्रिंशाध्यायविवरणम्॥ २९॥ ३२॥

श्रीसुबोधिनी-सारः

एवं मदथ उज्झितस्त्यक्तो लोको युक्तायुक्ताविचारतः वेदश्च धर्माधर्माविचारतः स्वा ज्ञातयश्च लज्जातो वचनाकरणाच्च याभिस्तासां वो युष्माकम् अनुवृत्तये परोक्षं भजता मया तिरोहितमन्तर्हितं तत्तस्मात् हे अबलाः हे प्रियाः प्रिय मा मां असूयितुं निंदितुं यूयं मार्हथ ॥ २१ ॥ निरवद्या दोषरहिता संयुक् संयोगो यासां तासां वो युष्माकं विबुधानां देवानामायुषापि स्वेन साधु कृत्यं प्रति प्रत्युपकारं कर्त्तु महं न शक्नोमि दुर्जरा अजरा गेहश्रृङ्खलाः संवृश्च्य छेदयित्वा या मामभजन् तासां तत्तस्मात् वो युष्मामेव साधुना प्रतियातु प्रतिकृतं भवतु भवत्सौशील्येनेव ममानृण्यमिति भावः ॥ २२ ॥

इति श्रीमद्भागवते दशमस्कन्धे सुबोधिन्यां टीकायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

भजतोऽपि न वै केचिदित्यत्र, ये दयाधर्माधिकारिण इत्यादि। धर्मार्थं भजत्सु धर्मं सम्पादयितुमधिकारिणः समर्थास्तान् ये न भजन्ति ते त्वधमा इत्यर्थः। अकृतज्ञत्वादिदोषवत्त्वेन त एवाग्रे वाच्याः। लौकिकमेव निमित्तं भजने येषां ते लौकिकनिमित्तास्तान् ये न भजन्ति ते उत्तमा इत्याहुः। **ये लौकिकनिमित्ता** इति। त एव आत्मारामत्वादिधर्मवत्त्वेनाग्रे वाच्याः ॥ १९ ॥ **न पारयेहमित्यस्याभासे, भक्तिमार्गविरोधमित्यादि**। ननु 'नाहं तु सख्य' इत्यादिना साधनमार्गीयभक्तविषयकमभजनमुक्तम्, प्रकृते च परोक्षभजनमुक्तम्, अनुवृत्तिवृत्त्यर्थं परोक्षभजने च हेतुत्वेनैवं मदर्थत्याद्युक्तम्। तथा चैतद्भजनानुरूपमेव स्वभजनमुचितम, न तु कामपि मर्यादां स्थापयित्वा। तथा सति भक्तिमार्गविरोधापत्तिः। एतादृशीनां दुःखदर्शनमपि स्वस्य तद्विरुद्धमिति प्राप्त उच्यते। अत्र स्वामिनीभजनानुरूपं न भजनमिति हि तवाशङ्का। तत्तु प्रावाहिकधर्मरूपम्। एतदेव भगवताप्युक्तं महत्तयत्फलार्थिनो यादृशं भजनं तत्फलं दत्वा ततो विमुच्य इत्याशयेन 'ये यथा मा'मित्यादि। अत्र यथातथेति पदाभ्यां भजनप्रकारयोरप्येकरूपत्वमुच्यते। प्रकृते च दास्यं प्रकारः। स च **भक्तधर्म** एव, नत्वीश्वरे सम्भवति। कदाचित्क्रियमाणमप्यनुकरणवद् भवति। न हि महाराजः कदाचित्संतोषेण स्वसेवकाङ्गमर्दनं कुर्वन् दासो भवति। तथा प्रकृतेऽपि रसवशात् मानिनीपदपद्मपरागानुरागं कुर्वन्नपि पतिरेव, न त्वन्यथा भवतीति क्व प्रत्युपकृतिसम्भवो भजनानुरूपं भजनं वा। एवं सति प्र युपकृत्यपेक्षया तदभावेन दोषारोपो न कार्यः, अशक्यत्वादित्युक्तं भवति। नन्वेवं सति सुतरां परोक्षभजनमनुपपन्नम्। न ह्यप्रत्युपकार्यभजनासु दुःखहेतुकृतिः सम्भवतीति चेत्। अत्र ब्रूमः। रसात्मकः प्रभुरित्यविवादम्। स च संयोगविप्रयोगभेदेन द्विविधः। तत्रान्यतराभावे त्वसम्पूर्ण एव सः स्यात्, सम्पूर्णं रसं दत्वा तदुत्तरकालीनदोषारोपात्मकव्यभिचारिभावोत्पत्तौ तच्छान्तिर्वचनैः कृता, तस्याग्रिमरसानुभवविरोधित्वादिति न किञ्चिदनुपपन्नम्। एतेनैतादृशीषु दुःखदर्शनं त्वस्य भक्तिमार्गविरुद्धमित्यपि निरस्तम्। एवं सतीश्वरत्वमेवाशक्तौ हेतुरित्याशयेन प्रभुराहेत्याहुः **भक्तिदार्गविरोधं परिहर्तु**मिति। नन्वेतेन स्वस्येश्वरत्वमेवोक्तं भवति, न त्वेतत्स्तुतिरिति चेत्। अत्रायं भावः। यद्यपीश्वरत्वेनोक्तरीत्या प्रत्युपकारकरणं न सम्भवत्तेव, तथापि तर्कितमुच्यते, यदि कथञ्चिन्मयि दास्यमापद्येत, तथापि निरन्तरं दास्यकरणेपि कदाप्यनृणो न भवामीति प्रभुणा निरवध्युत्कर्ष उक्त इति का वान्या स्तुतिरेतदग्रे। अन्यथा 'विबुधायुषापी'ति न वदेत्, 'स्वसाधुकृत्यं न पारये' इत्येतावतैव चारितार्थ्यात्। नन्विदमितरभक्तसाधारणमिव भाति। तथा हि। चतुर्वर्गार्थिषु तद्दानस्य प्रत्युपकृतिरूपत्वेऽपि प्राप्तात्यन्तिकभक्तियोगेषु सेवातिरिक्तानपेक्षणात्तस्याश्च स्वतन्त्रपुरुषार्थत्वात्किं वा प्रत्युपकृतित्वं भजेत। प्रकृतेति दास्यातिरिक्तानपेक्षणान्न प्रत्युपकृतिः सम्भवतीति कोऽत्र विशेष इति चेत्। अत्रेदं प्रतिभाति। न ह्यपेक्षितत्वेन प्रत्युपकृतित्वं सम्भवति, स्वल्पं कृत्वाऽधिकप्रेप्सोरधिकं कृत्वा स्वल्पप्रेप्सोश्चार्थं व्यभिचारात्। अतः स्वरूपतः पूर्वकृत्यनुरूपत्वं मृग्यम्। तत्रापेक्षानपेक्षे अप्रयोजिके। स्वामिनीभजनानुरूपं भजनमीश्वरेपि न सम्भवति, किं पुनर्जीवे। यच्चोक्तं प्राप्तात्यन्तिकेत्यादि, तत्राप्युच्यते। ते हि पूर्वं सकामत्वेन नित्यकर्तव्यत्वज्ञानेन वा प्रवृत्ता मध्ये भगवदनुग्रहेण सेवारसानुभवे जातेन्यापेक्षां त्यक्तवन्तः स्वार्थं, न तु तदर्थं तथा। एवं सत्युत्तरोत्तरं तादृक्सेवासम्पादनेन तदेकसाध्यसुखदानमेव प्रत्युपकृतिस्तेषु। अत्र तु 'त्वदुपासनाशाः' 'एवं मदर्थोज्झितलोकवेदे' त्यादिवाक्यैस्ततप्राप्तेः पूर्वमेव त्यागः। प्रभौ सहजस्नेहोऽतः तत्सुखे स्वोपयोगं मत्वा तत्प्रतिबन्धकं दूरीकृत्य स्वं विवेदितवत्यः। अत एव 'यत्ते सुजाते'त्याद्युपपद्यते। अत ए'वैवं मदर्थोज्झिते'त्यत्र स्वत्यागोत्युक्तः। स्वार्थमन्यत्यागो लौकिकानामलौदिकानां च पुंसां सम्भवति, न तु यथाकथञ्चिदपि स्वत्यागः। अत्र स्वपदेनात्मोच्यते। तथा च स्वात्वेन स्नेहविषयत्वाभाव एवैतत्त्यागः, भगवदुपयुक्तत्वेनैव तस्य देहादेश्च स्नेहविषयत्वात्। एवं सति भगवदर्थमात्मा प्रियो, न त्वात्मार्थं भगवानित्यागतम्। खण्डितादिष्वपि स्वसम्पाद्यसुखानङ्गीकृतिरेव दुखे माने च हेतुः। तथा च भगवत्सुखसम्पादनं केन प्रत्युपकृतं भवेत्। न चैतत्साधनसम्पादननेव प्रत्युपकृतिरास्त्वत्वति वाच्यम्, अत्र भावस्यैव साधनरूपत्वात् तस्य पूर्वकक्षापन्नत्वात्सदैकरूपत्वेन नित्यत्वेनासाध्यत्वाच्च। किञ्च। भावबलेनैव यद् भवति तत्र न भगवत्कृत्यपेक्षा, 'वशे कुर्वन्ति मां भक्त्ये'ति वाक्यात्। अन्यच्च। नैकात्मतां मे स्पृहयन्ती' त्युपक्रम्य सेवाकथारसासक्तियुक्तानां तेषां 'पश्यन्ति ते म' इत्यनेन स्वरूपरसानुभवमुक्त्वा एतादृशानामपि 'भक्तिरनिच्छतो मे गतिमण्वीं प्रयुङ्क्त' इति कपिलदेवेनोक्तम्। इह तु रसमार्गरीत्याङ्गीकार इति न कदाचिदपि तदिच्छाननुरूपा कृतिः सम्भवति, तस्य रसस्य तादृशत्वादेव अपरञ्च स धर्ममार्गोऽयं-

सम्भवति, तस्य रसस्य तादृशत्वादेव । अपरञ्च । स धर्ममार्गोऽयं धर्मिमार्ग इत्यन्येभ्य इयान् विशेष इति कथं वदामः, खद्योतेभ्य इव तरणेः । अतः सुष्ठूक्तं न पारय इति । यद्यपि गेहश्रृङ्खलाछेदस्य भावस्वभावकार्यत्वात्तस्य च भगवदनुग्रहैकलभ्यत्वाद् गेहश्रृखलाछेदोऽपि भगवतैव कारितो भवतीति नैतदुत्कर्ष आयाति, तथाप्येताभ्य एवायं भावो दत्तो, नान्येभ्य इत्येतदुत्कर्षः । अत एवैतस्यैव प्रत्युपकृतिरूपत्वं भगवतोक्तम् । तर्हि 'न पारय' इत्यनुपपन्नम् । प्रत्युत एतादृग्भावदातरि प्रत्युपकृत्यसम्भवाद्वैपरीत्यमापततीति चेत् । अत्रेदं प्रतिभाति । पूर्णाखिलशक्तिपूर्णस्यापि प्रभोरशक्तिर्यत्करणे तद्वस्त्वत्यन्ताभाव एवेति निश्चयः । न हि सर्वसामर्थ्यवत्त्वेन द्वितीयमीश्वरं कर्तुं समर्थः । अत एव प्रभुणोक्तं 'न शक्यन्तेऽनुसंख्यातुमनन्तत्वान्मयापि हीं' त, तथा प्रकृतेपि केवलभावस्य रसात्मकत्वेन भगवदात्मकत्वात्तदनुरूपवस्त्वभावादशक्तिरेव निष्प्रत्यूहेति मन्तव्यम्, अन्यथा ईश्वरत्वमेव । न स्यात्, श्रुत्युक्तरूपाभावादिति बुध्यस्व । वैपरीत्यापत्तिरिति दूषणं यदुक्तम्, तत्रोच्यते । कर्मज्ञाने साधनमार्गीयभक्तिं च जीवार्थं कृतवान्, फलमार्गीयभक्तिमार्गं तु स्वार्थमाविश्चकार । अन्यथा रसात्मकस्वस्वरूपानन्दानुभवो न स्यात्, 'तस्मादेकाकी न रमत' इति श्रुतेः । तथा च भावदानादेरपि स्वार्थत्वान्नोक्तदूषणम् । नन्वेवमपि 'न पारय' इति नोपपन्नमिति चेत् । न, अस्यानन्दस्य स्वरूपात्मकत्वेऽप्येताभ्य एव तदनुभवादनुभूतस्य च वस्तुन एवैतादृशत्वेनैवं कथनस्य तत्स्वरूपनिरूपकत्वात् । यथा 'विस्मापनं स्वस्य च सौभगर्द्धे'रित्यत्र वस्तुस्वरूपनिरूपणम्, तथात्रापीति सर्वमनवद्यम् । अत्र पूर्वार्धेनैवैतत्स्तुतिसम्पत्तावप्युत्तरार्धकथनस्य तात्पर्यमाहुः अतो मयीत्यादिना । अत्रोपकृतेरेव प्रत्युपकृतिरूपत्वोक्त्या तद्भिन्नतदपेक्षायां सोपाधिभजनं कार्यं भवति, तथा च भजनं एव तत्सम्भवात् । एतदेवोक्तं नो चेदित्यनेन । तच्च भवतीष्वसम्भावितमशक्यत्वादित्याहुः न ह्यशक्यमित्यनेन । प्रत्युपकृत्यशक्तावयं भगवन्निष्ठोपि हेतुरिति ज्ञेयम् ॥ २२ ॥

इत्येकोनत्रिंशोऽध्यायः ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आत्मनः कृतज्ञतामाविष्कुर्वन्नुक्तं कारुणिकत्वमेव स्पष्टयति एवमिति । 'अबलानां प्रियाणां द्रोहो न यक्त' इत्याशयेन सम्बोधयति हे अबलाः ! हे प्रियाः ! इति च । मदर्थं मत्प्राप्त्यर्थमुज्झिताः त्यक्ताः लोकाः यक्तायुक्तप्रतीक्षणात्, वेदाः धर्माधर्मानवेक्षणात्, स्वाः ज्ञातयः तत्स्नेहपरित्यागत्, याभिस्तासां वो युष्माकमप्यनुवृत्तये परोक्षं यथा भवति तथा भजतामुपकुर्वता मया तिरोहितं तत्तस्मात् मा मामसूयितुं दोषदृष्ट्या द्रष्टुं मार्हथ न योग्या स्थेत्यन्वयः । 'प्रियाणां प्रिये दोषदर्शनं न युक्तम्, इत्याशयेनाह—प्रियमिति । 'युष्माकं मम प्रियत्वे तु न सन्देह' इति सूचयति—हीति ॥ २१ ॥ एवमुक्तेऽपि तासां सन्तोषमदृष्ट्वाऽऽह—नेति । निरवद्यसंयुजां निरवद्या निष्कपटा संयुक् संयोगो भजनं यासां तासां वा युष्माकं स्वसाधुकृत्यं न पारये स्वीयसाधुकृत्येन प्रत्युपकारं कर्तुमहं विबुधायुषापि न शक्नोमि । 'कुत' इत्यपेक्षायां 'मच्चित्तस्य बहुषु प्रेमयुक्ततयाऽनेकनिष्ठत्वात् युष्मच्चित्तस्य मदेकनिष्ठत्वात्' इत्याशयेनाह—या भवत्यो दुर्जरा अजरा या गेहरूपाः श्रृङ्खलास्ताः संवृश्च्य निःशेष छित्वा मा माम् अभजन् तासामिति । तस्मद्वो युष्माकमेव साधुना साधुकृत्येन तत् युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवत्वित्यर्थः । युष्मत्सौशील्येनैव ममानृण्यम्, न तु मत्कृतप्रत्युपकारेणेत्याशयः ॥ २२ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने । द्वात्रिंशो गतो वृत्ति गोपीगीतनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ अबलाः ! हे प्रियाः ! मदर्थं मत्प्राप्त्यर्थमुज्झिताः त्यक्ताः लोकाः युक्तायुक्ताप्रतीक्षणात् वेदाः धर्माधर्मानवेक्षणात् स्वाः ज्ञातयः तत्स्नेहपरित्यागात् याभिस्तासां वो युष्माकमप्यनुवृत्तये परोक्षमदर्शनं यथा भवति तथा भजता युष्मत्प्रियालापान् श्रृण्वतैव मया तिरोहितं तत्रैवान्तर्द्धानेन स्थितम् । भावे क्तः । तत्तस्मात् प्रियं मा मामसूयितुं दोषदृष्ट्या द्रष्टुं नार्हथ न योग्याः स्थ ॥ २१ ॥ आस्तामिदं परमार्थं तु श्रृणुत नेति ॥ निरवद्यसंयुजां निरवद्या निष्कपटा संयुक् संयोगो भजनं यासाम् । भावे क्विन्तम् । तासां वो युष्माकं स्वसाधुकृत्यं स्वीयसाधुकृत्येन प्रत्युपकारं कर्तुमहं विबुधायुषाऽपि न पारये न शक्नोमि । या भवत्यो दुर्जरा अजरा या गेहरूपाः श्रृङ्खलास्ताः संवृश्च्य निःशेषं छित्त्वा मा माम् अभजन् मदेकचित्ता अभूवंस्तासामिति । मम चित्तं तु बहुषु प्रेमयुक्ततया नैकनिष्ठं तस्माद्वो युष्माकमेव साधुना साधुकृत्येन तत् युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवत्वित्यर्थः । युष्मत्सौशील्यैनैव ममानृण्यं नतु मत्कृतप्रत्युपकारेण ॥ २२ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्द्धेऽन्वितार्थप्रकाशिकायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवमिति । एवं तथा मदर्थे उज्झितास्त्यक्ताः लोकादयो याभिस्ताः लोको युक्तायुक्तेक्षणं वेदो धर्माधर्मक्षणं स्वाःज्ञातयास्ता सुस्नेहश्च तासां वो युष्माकं मयि अनुवृत्तये गाढस्नेहाय परोक्षमदर्शनं यथा स्यात्तथा भजता युष्मत्सप्रेमकर्माणि पश्यतैव यया तिरोहितं अदर्शनतया स्थितं तत्तस्माद्धेतोः हे अबलाः हे प्रियाः यूयं प्रियं मा माम् असूयितुं दोषारोपेण ईक्षितुं मार्हथ न योग्यो भवथ ॥२१॥ इदानीं भक्तवात्सल्यं दर्शयन् स्वाभिप्रायं द्योतयन्प्राह नेति निरवद्यः कपटरहिततया निर्दोषः संयुक्दृढस्नेहं स यो गोप्यः यासां तासां वो युष्माकं विबुधायुषापि विबुधानां ब्रह्मादीनां आयुषा आयुरुपलक्षककालेनापि स्वसाधुकृत्यं स्वीयं भवदीयं प्रत्युपकारकृत्यं न पारये कर्त्तुं न शक्नोमि यतः याः भवत्यः दुर्जराकुलीनवधूत्वेनाच्छेद्या अपि गेहशृङ्खलाः ताः शृङ्खलामित्यपि पाठः संवृश्च्य सम्यक् छित्त्वा मा माम् अभजन् सेवितवत्यः अतो वो युष्माकं साधुना साधुकृत्येनैव तत् युष्मत् साधुकृत्यं प्रति यातु युष्मान् प्रति उपकाररूपं भवत्वित्यर्थः ॥ २२ ॥

इति श्रीशुद्धैकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने रासक्रीडायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अयं नूनमकृतज्ञ इत्यक्षिसंकोचैः परस्परं सूचयन्तीर्दृष्ट्वा तत्कारणज्ञो भगवान् पुनराह ॥ नाहं त्विति ॥ हे **सख्यः, अहं तु भजतोऽपि जन्तून्, न भजामि** । तेषां दृष्टिगोचरो न भवामीत्यर्थः । तथापि नाकृतज्ञ इति भावः, तर्हि किमर्थं न भजसीत्यत्राह । **अमीषां मां भजतां जन्तूनां, अनुवृत्तिवृत्तये** निरन्तरध्यानप्रवृत्त्यर्थं, समनुध्यानरूपस्यानुवर्त्तनस्याविच्छेदायेत्यर्थः । अनेनात्मनः कृतज्ञत्वं परमकारुणिकत्वं चोक्तम् । अदृश्यमानस्य प्रियस्यात्यन्ताभिनिवेशविषयत्वे दृष्टान्तमाह । यथेति । **यथा अधनः** निर्धनः **पुमान्, लब्धधने विनष्टे**, महायासोपार्जितवित्ते दैवाद्विनाशं प्राप्ते सतीत्यर्थः । **तच्चिन्तयाऽनुक्षणं** तच्चिन्तनेन, **निभृतो** व्याप्तः सन्, **अन्यत् न वेद** । नान्यत्स्मरतीत्यर्थः । क्षुत्पिपासाद्यपि न वेदेति भावः ॥ २१ ॥ आत्मनः कृतज्ञतामाविष्कुर्वन् कारुणिकत्वमेवाह ॥ **एवमिति** ॥ **एवं हे अबलाः, मदर्थमुज्झितास्त्यक्ताः लोको** युक्तायुक्ताप्रतीक्षणात् **वेदो** धर्माधर्मानवेक्षणात् **स्वा** ज्ञातयश्च स्नेहत्यागाद्याभिस्तास्तासां, **वो** युष्माकं अनेन स्वस्य कृतज्ञत्वमाविष्कृतम् । **मयि अनुवृत्तये परोक्षमदर्शनं** यथा भवति तथा, **भजता** उपकुर्वता युष्मत्प्रेमालापान् शृण्वतैव मया, **तिरोहितम**न्तर्धानेन स्थितं हि । अनेन स्वस्य कारुणिकत्वमुक्तम् । **तत्**तस्मात्, **हे प्रियाः, प्रियं** प्रियतमं **मा मां, असूयितुं** दोषारोपेण द्रष्टुं, **मा अर्हथ** न योग्याः स्थ ॥ २२ ॥ आत्मनः कृतज्ञताकाष्ठां प्रदर्शयन्नास्तामिदं परमार्थं शृणुतेत्याह ॥ **नेति** ॥ **निरवद्यं** निष्कपटं यथा तथा **सयुञ्ज्यन्ते** भजन्ते इति तासां, निरवद्या संयुक् संयोगो यासां तासामिति वा । **वो** युष्माकं **सुसाधु** यथा तथा, कर्तुं **प्रत्युपकर्त्तुम्, अहं विबुधायुषापि न पारये** न शक्नोमि । कुतः । **या भवत्यः, दुर्जरा** अजरा या **गेहशृङ्खलाः, ताः संवृश्च्य** निःशेषं छित्त्वा, **मा मां, अभजन्** । गृहरूपं पाशं सम्यक् छित्त्वा केवलं मामेव समाश्रयन्नित्यर्थः । **तस्मात्, वो** युष्माकमेव, **साधुना** साधुकृत्तेन, **तद्युष्मत्साधुकृत्यं, प्रति**कृतं **भवतु** । युष्मत्सौशील्येनैव ममानृण्यं न तु मत्कृतप्रत्युपकारेणेत्यर्थः ॥ २३ ॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं मदर्थ इति : १०.३२.२१.

जाता यथा प्रियतमाः सकला मदर्थत्यक्ताखिलागमजन–स्वजनोक्तधर्माः ।
जाता न वा मदपरोक्षविधावभिज्ञा ज्ञातुं मया हृदि सताऽपि तिरोहितं वः ॥ २०५ ॥
तत्तादृशी जगति कस्य विराजमाना वागाशपूज्यतलिना रसनाऽस्ति लोके ।
सर्वागमादिम–मनोरमपूर्णकामाऽऽरामेण या विवदितुं भविता पुरस्तात् ॥ २०६ ॥

न पारयेऽहमिति : १०.३२.२२.

अलमुक्तेन बहुना सारमेकं ददामि वः । सर्वदा सर्वकार्येषु चित्तमां युष्मदावृतम् ॥ २०७ ॥
भवदायुषेति वचनं व्रजगानां विबुधायुषेति वचनं हरिणोक्तम् ।
फलितोऽर्थ एष तदनुप्रतिभाति भुवि योगवित्-स्थितिरनल्पसुकल्पा ॥ २०८ ॥

श्रीमद्रमारमण ते चरणाब्जमस्मत् सन्मानसोज्ज्वलरसेषु दृगर्कयोगात् ।
तूर्णं प्रसादपदवीं नय तेन भूयादामोदसंभृदयमीश सदाऽङ्गदेशः ॥ २०९ ॥
प्रसन्न एवासि सखे सदा नः श्रीनाथ तत्रापि विशेषतोऽद्य ।
तत्प्रार्थयामः किमु वा वदामो विज्ञो वयं नेश दिश त्वमेव ॥ २१० ॥
नहि चन्द्रिकयाऽर्थ्यते सुधांशुर्जलधिर्वा नहि जातुचिन्नदीभिः ।
तडिताऽपि न मेघ इत्यलं वोऽतनुवाग्भिर्दयिता कृतार्थनाभिः ॥ २११ ॥
भवति प्रसादर्रासको रसिको रसिको न भावुको भवति ।
किमु चित्रमत्र भवति प्रेष्ठानामत्र भवति नः प्रीतिः ॥ २१२ ॥
न केकी मेघालौ क्वचिदपि विरक्तः प्रियतमाश्चकोरो वा ज्योत्स्नाविगलितसुधायामपि तथा ।
न कामी कामिन्याः सदधरसुधायामपि तथा विरक्तोऽभूत् क्वापीत्यभिनवगिर श्रावयत किम् ॥ २१३ ॥
जह्यात् क्वचिज्जलधिरप्यलमात्मवेलामेषा धराऽपि समुपैष्यति वाऽधरत्वम् ।
स्वीयान्तरङ्गसुखशालितया तथापि नाहं क्वचिद् रसवतीर्भवतीस्त्यजामि ॥ २१४ ॥
एवं पृथक् पृथगुदीरित-वृत्तजातप्रेमानिलाकलित-कृष्णधनेन तासाम् ।
सद्यः सदुत्तरवचोऽमृतवर्षणेन नीतः शमं निजवियोगभवो दवाग्निः ॥ २१५ ॥
एवं सिद्धसमाधिसंविदुदितप्रत्यक्स्वरूपेऽखिलाधिष्ठाने त्रिविधाघतापशमने स्वीयादरे श्रीवरे ।
प्राप्तेऽध्यक्षपदं विचक्षणमतिः संक्षीणपापस्तदा कुर्यादात्मदृगादरेण निखिलासत्कल्पनापोहनम् ॥ २१६ ॥
विस्मृत्याखिलभावमन्यविषयं मन्मात्रबद्धस्पृहो मामेवाखिलभावनाभिरभितः पश्यन्ननालस्यधीः ।
यो गायेदवगाह्य हार्दपुलिनं तेनास्मि लभ्यो यथा न्यायैस्तादृगिहान्य-यत्नचतुरप्रश्नैरपीत्यध्वनि ॥ २१७ ॥
लभ्यस्त्वं न गुहाद्रिकुञ्जविपिनारामादिभूयोऽटनैर्न ध्यानैर्नच तीर्थसञ्चरणतो नैकान्तिकावासतः ।
श्रीमस्त्वद्गुणगानमेकमवनौ हेतुर्ह्य साधारणस्त्वत्प्राप्ताविति गोपिकाभिरभितः संदर्शितोऽध्वा वृतः ॥ २१८ ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने द्वात्रिंशोऽध्यायः ॥ ३२ ॥

कृष्णप्रिया

हे अबला ? हे गोपिकाओं ? आप सबने मेरे लिए लोक सुखों का, वेद सुखों का, एवं स्वजनों का त्याग किया है यह सर्वोत्तम समर्पण है, आपकी यह समर्पणवृत्ति सर्वथा बनी रहे । इसलिए परोक्ष में भजन करता हुआ मैं अन्तर्हित हो गया था इसीलिए आप सब प्रियतमाओं प्रियतम मुझमें कृपया असूया न करें ॥ २१ ॥ हे व्रजवनिताओं ? आपका अहैतुक निस्कारण निर्दोष भजन है आपका मुझपर श्रेष्ठ उपकार है ब्रह्माजी का भी आयुष्य लेकर आपके भजन का बदला नहीं दे सकता हूँ । आप लोगों ने गृहासक्ति की अकाट्य जंजीर को तोड़कर मेरा भजन किया है । प्रियतमाओं ? आपके समर्पण नाम के साधु कर्म से ही उसका प्रत्युपकार बदला हो सकता है ॥ २२ ॥

श्रीमद्भागवतदशमस्कन्धनिरोधलीलान्तर्गत-तामस प्रकरण के फल प्रकरण में भगवान के श्रीधर्म का
निरूपक करने वाला ३२ वाँ अध्याय समाप्त ॥ ३२ ॥

* * *

अथ त्रयस्त्रिंशोऽध्यायः

श्लोकाः	अनु.	मंदा.	वसंत	वंश	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४०	२९	१	६	१	३	३	१५५२	१६	४१	१६०९	५०।	१

श्रीशुक[1] उवाच

इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः। जहुर्विरहजं[2] तापं [3]तदङ्गोपचिताशिषः ॥ १ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—तद् अङ्ग उपचितआशिषः, गोप्यः, भगवतः, इत्थम्, सुपेशलाः, वाचः, श्रुत्वा, विरहजम्, तापम्, जहुः ॥ १ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्रयस्त्रिंशे ततो गोपीमंडलीमध्यगो हरिः। प्रियास्ता रमयामास ह्रदिनीवनकेलिभिः ॥ १ ॥

तत्तदा अंग हे राजन्। यद्वा तस्य भगवतोऽङ्गेन वपुषा करचरणाद्यवयवैर्वोपचिताः समृद्धा आशिषो यासां ताः ॥ १ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो गोपीश्लाघानन्तरम्। ताः कालिन्दीतीरस्थाः। ह्रदिनीकेलिर्जलक्रीडा, वनकेलिरित्युपलक्षणं स्थलक्रीडादीनामिति(१) तदा गोप्याश्वासनानन्तरम्। क्लिष्टकल्पनापेक्षयाऽक्लिष्टमार्ग एव साधुरिति मत्वाह—यद्वेति। "अङ्ग प्रतीकेऽवयवोपायदेशप्रियेषु च" इति धरणिः। यद्वा—भगवतो विशेषणम्। तत्र तासामङ्गेनेत्यादिसमासः। त्रयस्त्रिंशे रासलास्यविहारजलकेलयः। प्रश्नोत्तराण्यप्युक्तानि परीक्षिच्छुकदेवयोः। (१) सुपेशलाः अतिमनोहराः। तस्यांगस्पर्शादिना उपचिता आशिषः कामा यासां ताः। भगवत एव वा विशेषणम्। गोपीगात्रस्पर्शजनितसुखस्येत्यर्थः। तेन च प्रश्नोत्तरसमाप्तौ मानशान्त्या तदाऽऽलिंगनचुंबनादिविलासा आसन्निति द्योतितम् ॥ १ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

रासलीला जयत्येषा जगदेकमनोहरा। यस्यां श्रीव्रजदेवीनां श्रीतोऽपि महिमा स्फुटः ॥

इत्थमीदृशीः सुपेशलाः परममनोहराः। विरहो भूतो भावी च तज्जं तापं जहुः विरहेऽप्यपरित्यागश्रवणात्तथा विशेषतोऽपि निजऋणित्वादिप्रतिपादनेन च दवात् पुनर्विच्छेदेऽप्यत्यन्तपरित्यागशङ्कापगमाच्च। अतः पूर्वमुक्तस्याप्यत्र पुनरुक्तिरधुनैव सम्यक् तापपरित्यागस्य विवक्षया। किञ्च। तदङ्गेति आलिङ्गनकरग्रहणादिना सम्पन्नमनोरथाः सत्यः। यद्वा। भगवत एव विशेषणं सुपेशलवाग्घेतुत्वेन तासां गोपीनामङ्गै रुपचिताशिष इति ॥ १ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

जयति श्रीरासलीला जगदेकमनोहरा। यया श्रीगोपनारीणां लक्ष्मीतो महिमाधिकः ॥

इत्थमीदृशीर्भगवतस्तादृशवचनादिना निजाशेषभगवतां प्रकटयतः, अतः सुपेशलाः परममनोहराः, विरहो भूतो भावी च तज्जं तापं दाहं जहुः। पूर्वमुक्तस्याप्यस्यात्र पुनरुक्तिः, विरहेऽप्यपरित्यजनात्। तया विशेषतो निजऋणित्वादिप्रतिपादनेनापुनर्विच्छेदस्य मननाच्चाधुनैव सम्यक् तापत्यागविवक्षया, यतो गोप्यः सहजप्रेमरसपरिप्लुतचित्ता इत्यर्थः। किञ्च, तदङ्गेति आलिंगनकरग्रहणादिना सम्पन्नमनोरथाः सत्य इत्यर्थः, यद्वा, भगवत एव विशेषणं सुपेशलवाग्घेतुत्वेन तासां गोपीनामङ्गैरुपचिताशिष इति ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथैवं सूक्ताभिर्गोपीभिः सह भगवतो रासक्रीडामनुवर्णयति त्रयस्त्रिंशेन। इत्थं भगवतः सुतरां पेशला वाचः श्रुत्वा गोप्यस्तस्याङ्गेनाङ्गसङ्गेनोपचिताः समृद्धा आशिषो यासां ताः तथाभूताः विरहज तापं जहुः ॥ १ ॥

---

[1] बादरायणि–प्रा. पा.। [2] विरहस–प्रा. पा.। [3] तत्सङ्गो विज.।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भक्तिप्रसन्नभगवत्प्रीतिरेवानन्दानुभवे कारणं नान्यत्साधनमिति निदर्शयितुं रासक्रीडां वर्णयत्यस्मिन्नध्याये "स तत्र पर्येति जक्षत् क्रीडन् रममाण" इत्यादिश्रुतिः। तत्र गोपीनां कृष्णविरहसमुद्भूतसन्तापप्रणाशं वक्ति। इत्थमिति। तापत्यागे निमित्तमाह। तत्सङ्गेति। हरेरङ्गसङ्गलक्षणसेवनेन उपचिताः फलरूपेण परिणताः आशिषः प्रार्थना यासां तास्तथा। यद्वा उपचिताः संचिताः समृद्धिङ्गताः आशिषः शुभानि यासां तास्तथा ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विरहो भूतो भावी तज्जं विरहेऽप्यपरित्यजनात् निजऋणित्वाङ्गीकाराच्च ॥ १–२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ तावतैव भगवदनुनयेन तासां हृत्तापो व्यरमदित्याह—इत्थमित्यादि। सुपेशलाः, सुस्निग्धाः, तदङ्गैः श्रीकृष्णाङ्गैरुपचिता आशिषः सुखानि यासाम्। एवमुक्त्वा युगपदेव सर्वाः प्रत्येकमालिङ्गितवानिति ध्वनिः ॥ १ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तत्रेत्यादि। स्त्रीरत्नैरित्यस्य विशेषणानि—अनुव्रतैः, अनुव्रतं व्रतं कात्यायनीव्रतं येषां तैः प्रीतैः प्रीणनं प्रस्तिया इतैः प्राप्तैः अन्यैश्च वंशोनादाकृष्टैर्बहुविधैर्गोपीजनैरन्योन्यमावद्धाः सम्यक् वद्धा वाहवो यैरिति। एका गोपी एकः कृष्ण इति प्रथमं न सङ्गच्छते, रत्नैरिति सर्वासामेव तुल्यत्वात् ॥ १–२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्रयस्त्रिंशे रासलास्यविहारजलकेलयः। प्रश्नोत्तराण्यप्युक्तानि परीक्षिच्छुकदेवयोः ॥

सुपेशला अतिमनोहराः तस्याङ्गस्पर्शादिना उपचिता आशिषः कामा यासां ताः। भगवत एव वा विशेषणम्। गोपीगात्रस्पर्शजनितसुखस्येत्यर्थः। तेन च प्रश्नोत्तरसमाप्तौ मानशान्त्या तदा आलिङ्गनचुम्बनादिविलासा आसन्निति द्योतितम् ॥ १ ॥

रसिकाह्लादिनी–टीका

"रासोपदेशतः कृष्णः स्वमाधुर्यप्रकाशनैः। रसज्ञान्नन्दयन् जीयात् गोपीमण्डलमध्यगः"। इत्थं स्वस्य न्यूनतया ऋणित्वप्रकाशनेन च गोपीनामुत्कर्षवर्णनेन सुपेशलाः मनोरञ्जनकरी भगवतो रसैश्वर्यपूर्णस्य वाचः श्रुत्वा दत्तावधानत्वेनाकर्ण्य गोप्यः श्रीकृष्णोक्तिश्रवणजसुखं गोपायन्त्य विरहजं भूत-भव्यं विरहजं तापं जहुस्तद्वाक्यविश्वासादिति। कीदृश्यः तस्य भगवतोऽङ्गैःकरचरणाद्यवयवैः आलिङ्गनादिषु स्पृष्टैः उपचिताशिषः उत्तरोत्तरवर्द्धितमनोरथाः। यथा स्वप्नेऽनुभूतं दुःखं उत्थाने स्वत एव विनश्यति तद्वदिति ॥ १ ॥

विशुद्धरसदीपिका

रासलीलाजयत्येषा मनोहर मनोहरा। यस्यां श्रीराधिका देव्याः सर्वतो महिमा स्फुटः ॥

शुक इति इत्थमीदृशीः एताश्च सुपेशलाः परममनोहराः। यद्वा शोभनावयवाः भगवतः किशोरीरमणस्य वाचः परमप्रेमप्रकाशकसदुक्तीः श्रुत्वा विरहो भूतो भावी च तज्जन्यं तापं अविश्वासात्मिकां चित्तग्लानिं जहुः त्यागानुकारेऽप्यपरित्यागनिश्चयात् विशेषतः ऋणित्वादिप्रतिपादनेन सर्वशङ्कापगमाच्च। वस्तुतस्तु सखीरप्यस्मान्वञ्चयित्वास्मत्प्राणेश्वरीं रहोऽनयत्तत् किं वयमयोग्या इति योऽन्तस्ताप इति यथायोगं तत्र हेतुः। तदिति। तस्य भगवतोऽङ्गेन वपुषः करचरणाद्यवयवैर्वा उपचिताः समृद्धा आशिषो यासां ताः सच्च प्रागेव दर्शितं काचित्कराम्बुज शौरेरित्यादिना अवपुश्च शिरसि धेहि न इत्याद्याः। यद्वा तासां वाचामङ्गैः-शब्दाद्यवयवैरिति किम्पुनरभिप्रायेण। यद्वा अङ्गैः सुरतचिह्नाङ्कितै उपचिताः सम्पन्ना आशिष अभिलषितानि यासां तत्र प्रथमेऽर्थे तदङ्गैः श्रीकृष्णस्याङ्गैरेव तदालिङ्गनभुजक्षेपादिभिस्वोपचिताः परमर्द्धिं प्राप्ताः आशिषस्तत्सम्भोगेच्छारूपा यासामिति तत्सुखोदयेन तदाच्छदनं वैदग्ध्यञ्च सूचितं यदाहुः "विदग्धानां मिथो लीलाविलासेन यथा सुखम्। न तथा संप्रयोगेण इति शास्त्रविनिर्णयः" यथा अङ्गात्तीर्णविलेपनं सखिसमाकृष्टिक्रियायां मणिमन्त्रो हन्तमुहुर्वशीकृतविधो नामास्य गोपीपतेः। निर्माल्यस्रगियं महौषधिरिह स्वान्तस्य सम्मोहने नासाङ्कुरितसृणां गृणाति परमाचिन्त्यप्रभावावलिम्। ततश्चैकमत्यमपि लब्धमिति दर्शितम् ॥ १ ॥

श्रीरामनारायणकृता भावभावविभाविका

श्रियं श्रीशं गिरां ढुण्ढिं शिवां शिवमजं सुरान्। गुरून् द्विजान् विदो भक्तान् वन्दे विष्णोर्वपुर्जगत् ॥
ब्रह्मादिजयसंरूढदर्पकन्दर्पदर्पहा। जयति श्रीपतिर्गोपीरासमण्डलमण्डनः ॥

श्रीवृन्दावनकुञ्जे सुमनःकुञ्जे सतां सदा । सङ्क्रीडन् रमतां कृष्णो रासत्यादिकेलिभिः ॥
पञ्चमे नन्दजो गोपीरासमण्डलमण्डनः । रमयामास ताः सर्वा रासरत्यादिलीलया ॥

पद्मापयोधरतटीपरिरम्भलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य । व्यक्तानुरागमिव खेलदनङ्गखेदखेदाम्बुपूरमनुपूरयतु प्रियं नः ॥

स्वात्मभूतहरिणा यथा जीवानां कदापि वियोगो विभ्रमादेव तद्विच्छेदे सति दुःखं भगवन्निगमश्रवणजज्ञानेनैव विच्छेदविच्छेदेन तत्स्वरूपानन्दावाप्त्या कामपूर्त्या तदुपशमस्तथा गोपीनामपि कृष्णात्मनां न कदापि तद्विच्छेदः प्रेमपथमुपदेष्टुं विभ्रमाणामपि तासां लीलाविभ्रमादेव विच्छेदविभ्रमोऽवेषणविभ्रमश्चाभूत् भगवद्वचोभिरेव ता विभ्रमा अभूवन्नित्याह भगवान् शुकः । इत्थमिति । ता यतो गोप्यः प्रेमपथगोपनं रक्षणं शीलं यासां ता अतस्तद्रक्षणाय भगवता स्वात्मना नित्या वियोगं लीलाविभ्रमैरादौ गोपयन्त्यः पुनर्भगवत्प्रापकप्रेमपथसाधनबोधाय यतो गा इन्द्रियाणि वाचश्च पान्तीति गोप्योऽतः स्वेन्द्रियाणि ताश्च तल्लीलानुकारतदन्वेषणादिचेष्टाभिस्तद्गुणगानैश्च रक्षन्त्यः पुनस्तदभिव्यक्तप्रेष्ठमपि गुरूपदिष्टतच्छुश्रूषालब्धबोध एव शोकापनोदक इति श्रुतिगाः पात्यस्तं गुरुत्वेन प्रतिष्ठाप्य सेवाप्रश्नाभ्यां प्राप्ततद्वाचो गाश्चाप्रमादसविश्वासश्रवणेन पात्यो भगवतो वाचः श्रुत्वा विरहजं तापं जहुः भगवतो वाच इत्यनेनापि नित्यनिर्दुःखपूर्णपरमानन्दस्वरूपे स्वस्मिन्दुःखाभावसुखयोरनापादकतया भगानां यदपार्थकत्वं तत्परिहाराय स्वाश्रितेष्वेव स्वैश्वर्य्येण साधनशक्त्याधानं स्वधर्मयशोभ्यां तदन्तःकरणशोधने स्वश्रिया तत्सर्वगुणश्रीसम्पादनं विरागेणेतररागापनोदं ज्ञानेन विभ्रमाभावमापादयतो वाचां श्रवणस्य विभ्रमनिवृत्तिपूर्वकविरहजतापापनयनत्वसूचनं ननु "भ्रमयति भारतीत उरुवृत्तिभिरुक्थजडा"नित्यादिना भगवद्वाचां भ्रमापादकत्वमुक्तं कथं तदपनोदकत्वमुच्यते तत्राह । सुपेशला इति । तत्रोक्थजडानित्युक्त्या प्रवृत्तिगृहकुलादिधर्मबोधकवाचां तथात्वेन पूर्वं वाचः पेशैर्विमोहयन्नित्यत्रापि तथैवोक्तिः परन्तु तत्र वाचः पेशैरिति सुशब्दाप्रयोगान्मोहकत्वस्वीकारेऽप्यत्र सुशब्देन तद्व्यावृत्तेस्तथाभावेन भगवदनुवृत्तिजनकत्वमेव ततश्च वाचः श्रुत्वा विरहजं तापं जहुरित्यनेन जीवनप्रदघनश्यामस्य रसवृष्ट्यात्मकवाग्धारासारसारैरसारविरहनिदाघजतापोपशमे पूर्वं तत्तापशुष्काः स्वर्णयूथिकाललितलतारूपा गोप्यः तद्रसस्वारस्येन रोमपुलकमुकलव्याप्ताः प्रफुल्लितसर्वाङ्गकुसुमा दृक्कुसुममधुस्रावास्तन्मुखशशिस्मितचन्द्रिकामृतपुष्टा जातास्तदङ्गोपचिताशिष इत्यनेन तदङ्गतमालालिङ्गनेन लब्धसर्वफला बभूवुरित्येकरूपकुसुमलतानां सर्वफलप्राप्तिरिति चित्रं तदङ्गसङ्गमचरितम् आशिषशब्दवाच्यसर्वफलानि तु अर्थधर्मकाममोक्षप्रेमसुखाख्यानि प्रसिद्धानि तत्रार्थलाभस्तु हरिकरोरगोरगकरणेन स्तनश्रीफले समर्प्य श्रियोऽपि सर्वस्वभूतरदहीरकनखादिमणिगणयुतेन्द्रनीलतनुकरणतनुरूपाखिलभुवननिधिवशीकारेण स्पष्टः सर्वसुरावयवयज्ञपुरुषाय स्वसर्वस्वरूपरूपद्रव्यार्पणेन द्रव्यरूपस्वाङ्गस्य सर्वसुरात्मकतदङ्गसंयोगेन द्रव्यदेवतासम्बन्धरूपयागनिष्पाया तन्मुखसोमपानेन यज्ञपुरुषस्य स्वकरतलीकरणेन धर्म्मलाभश्च स्फुटतरः पूर्णकामानामपि सर्वकामदकोटिकामतनुहरेः सकामतयालिङ्गनेन कामज्वरशमनपूर्वकपूर्णकामत्वेन कामलाभोऽपि निकामः करस्थविल्वसमस्तनपाणिकृष्णब्रह्मभानेन रमणेऽपि शरीरभानाभावेन जीवन्मुक्तिप्रसिद्धिः सप्रेमकृष्णालिङ्गने च सामीत्यादिमुक्तेः प्रेमसुखस्य च प्राप्तिः स्पष्टतमैवेति भावः ॥ १ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

त्रयस्त्रिंशे ततोऽध्याये हरेर्लीला निरूप्यते । वने जले च बहुधा राजप्रश्नोत्तरं तथा ॥

अथ रासोत्सवं वर्णयिष्यन्नादौ भगवतोक्तानुनयवाक्येन ताः सम्यक् प्रसन्ना इत्याह । इत्थं पूर्वोक्तप्रकारेण भगवतः पूर्णस्याहं भवतीनामधमर्ण इत्येवं रूपा गोप्यः भगवता स्वीयत्वेन स्वीकृताः वयं नतु त्यक्ता इति निश्चयवत्यः तादृशाधिकारायोग्या अपि वयं भगवतैवमनुनीता इति मनसि विचारयन्त्य इति वा वाचः श्रुत्वा विरहजं तापं जहुः । यतो भगवद्वाचः सुपेशलाः अतिमनोहराः आपातरम्यतानिरासाय सुपदं प्रयुक्तं यतश्चोपचिताशिषः लब्धमनोरथाः । यद्वा तस्य भगवतोऽङ्गेन वपुषा करचरणाद्यङ्गैर्वा उपचिताः समृद्धा आशिषो यासां ताः यद्यपि पूर्वं तापत्याग उक्तस्तथापि तादृशवाक् श्रवणादिना पुनर्विरहशङ्कापगमाद्विरहजन्यतापत्यागः पुनरुक्तः तासां गोपीनामङ्गस्पर्शादिना लब्धसुखा इति वा एतेन प्रश्नोत्तरसमाप्तौ मानशान्त्या तदा आलिङ्गनचुम्बनादिविलासा रसन्निति सूचितं निवृत्तिपक्षे अथ विद्वच्चेतसि परमात्मनः श्रुतिभिः रम्यं वक्तुमुपक्रमते । इत्थमिति । भगवद्भावं प्राप्तस्य प्रत्यगात्मनोपयुसुपेशला वाचः श्रुत्वा लब्धमनोरथास्तदा हे राजन् ! तत्तद्वादि श्रुतिषु प्रत्यगभिन्नपरमात्मप्रतिपादनं नास्तीत्यादिना प्रतिपादिताद्विरहाज्जातं तापं जहुः ॥ १ ॥

रास-रहस्यम्

र० टी०—इत्थं पूर्वोक्तप्रकारेण भगवतो परमात्मनः, स्वसम्बन्धिनीः सुपेशलाः मनोहराः, वाचः श्रुतियुक्त्युपपादितं भाषणं, श्रुत्वा आकर्ण्य, गोप्यः वृत्तयः, तदङ्गोपचिताशिषः तत्तस्य परमात्मनः अंगोपचिता अंगैः अंगसदृशैः ज्योतिभिः उपचिताः समृद्धाः, आशिषः मनोरथाः यासां ताः, तद्विरहजं तापं नित्यनिरतिशयपरमानन्दस्वभावस्य द्वैतबुद्ध्या प्राप्तः जननमरणलक्षणं संसरणात्मकं तापं, जहुः तत्त्यजुः ॥ १ ॥

गूढार्थदीपिनी

त्रयस्त्रिंशे महारासो गोपिकाभिः समं हरेः । तत्र राज्ञश्च सन्देहः सोपपत्ति निवार्यते ॥

सुपेशला अतिमनोहराः । तत्र तदा । अङ्ग हे राजन् ! यद्वा । तस्य भगवतोऽङ्गेन उपचिताः समृद्धाः आशिषः मनोरथा यासां ताः । तासामङ्गेनेति प्राप्तसुखस्य भगवतोऽपि षष्ठ्यन्तं विशेषणम् ॥ १ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं भूताभिर्व्रजाङ्गनाभिः सह रासक्रीडां भगवतोऽनुवर्णयति त्रयस्त्रिंशे । इत्थमिति । तदङ्गोपचिताशिषः भगवदङ्गैःश्रवणादिभिरुपचिताः समृद्धाः आशिषः कामाः यासां ताः गोप्यः भगवतः इत्थं सुपेशलाः सुरमणीयाः वाचश्च श्रुत्वा विरहजं तापं जहुस्तत्यजुः ॥ १ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ भक्तिरेवानन्दभुक्तिहेतुर्नान्यत्साधनं तत्रेति निरूपयितुं वल्लवीभिर्वल्लभस्य तद्भक्तिप्रसन्नस्य रासक्रीडां वर्णयति । तत्रादौ हरिगिरो तद्विरहतापोपशमः कामिनीनां जात इत्याह ॥ इत्थमिति । सुपेशला अतिरुचिराः । पेशलो रुचिरे दक्ष इति विश्वः । वाचो बह्वर्थगर्भितत्वाद्गोप्यः श्रुत्वा किञ्च तत्सङ्गोपचिताशिषस्तस्य सङ्गः सम्बन्धस्तेनोपचिताः सफला आशिषोऽभिलाषा यासां ताः सत्यो विरहजं तापं जहुः ॥ १ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

त्रिंशत्तमे हरिः प्रीतो लीलां कामकृतामपि । इन्द्रादिदुर्लभां चक्रे स्वानन्दार्थमितीर्यते ॥
अस्याः सर्वोपकाराय फलश्रुतिरुदीर्यते । लौकिक्यपि यदा दृष्टिस्तदा सिद्धान्त ईर्यते ॥
रसात्मकस्तु यः कामः सोऽत्यन्तं गूढ एव हि । अतः शास्त्रं प्रवृत्तं हि तृतीयं भारतं तथा ॥
अतोऽत्र भगवांश्चक्रे नृत्यं कारितवांस्तथा । सर्वाङ्गेषु तु यो लीनः स यथा व्यक्ततां व्रजेत् ॥
जलं वायुश्च सामग्री श्रमात् शीतं च जायते । अत्रैव लोकप्रकटमाधिदैविकमुत्तमश्चापरः ॥

कामाख्यं सुखमुत्कृष्टं कृष्णो न भयेन दुःखं दूरीकृतवान् । एवं पूर्वाध्याये तदेव दूरीकृतं भवति अन्यथा भगवतैव दुःखं दत्तं स्यात् अतो भगवता त्यक्त्वा न गतमिति न भगवान् दुःखहेतुः किन्तु ज्ञानमेव । अतो भगवद्वाक्यात् अज्ञाने गते तन्मूलकं दुःखमपि गतमित्याह । इत्थमिति । भगवतो वाचः श्रुत्वा विरहजं तापं जहुः भ्रमादेवास्माकं विरहो जात इति ननु वचनमात्रेण कथमज्ञाननिवृत्तिः तत्राह । भगवत इति । गोप्य इति विपरीतभावनानिवृत्त्यर्थं ननु ता वाचः कथं न मनसि सन्देहमुत्पादितवत्यस्तत्राह । सुपेशला इति । अतिमनोहरा इति मनसि विचिकित्सायामेव सन्देहः शब्दस्वाभाव्यादेव मनसि सन्देहो न जातः, अतो विरहजं तापं जहुः । नास्माकं विरहो जात इति ज्ञातवत्यः यथा स्वप्नादुत्थितः स्वाप्निकं दुःखं न मन्यते तस्य भगवतः अङ्गैरुपचिता आशिषो यासां भगवत्कार्यव्यतिरेकेनैव भगवदवयवैरेव सर्वमनोरथाः पूरिताः ॥ १ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । एवं भगवतः सुपेशलाः सुमंजुलाः वाचो गोप्यः श्रुत्वा तत्तदा तस्य वा अङ्गेनोपचिताः समृद्धा आशिषो यासां ताः विरहजं तापं जहुः ॥ १ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

त्रिंशत्तमाध्यायार्थकथने त्रिंशत्तमे हरिरित्यादि । इतिशब्दो हेतुवाची । **लीलां चक्रे** इति । लोके प्रकटामिति शेषः । तथा सत्ययं वाक्यार्थः । यद्यप्यतिगोप्यत्वादियं लीला न वक्तुमुचिता, तथापि प्रभुर्लोके प्रकटां लीलां चक्र इति हेतोरीर्यत इति, अन्यथा रासलीलेर्यत इत्येव वदेयुः । सा च 'यथा मदच्युद् द्विरदः करेणुभि'रित्यन्तेन ग्रन्थेनोक्ता । एतदग्रेऽतिदेशेन कामशास्त्रोक्तरीत्यापि सोक्तेत्याहुः **कामकृतामपीति** । इन्द्रो विषयभोगेऽभियुक्त इति तन्नामग्रहणम् । वस्तुतस्तु ब्रह्मादीनामपि दुर्लभैव । कामकृता सा हि लोकानुसारिणी भवति । एवं सति यत्र सापीन्द्रादिदुर्लभा, तत्र पूर्वोक्तलीलायास्तथात्वे किं वाच्यमिति भावः । लीलोक्तिप्रस्तावे फलश्रुतिरसंगतेत्याशङ्क्य तत्तात्पर्यमाहुः अस्या इति । लोके कामकथा तदुद्बोधिका दृष्टेति तच्छङ्कया वैराग्यार्थी कदाचिन्न शृणुयात्, तथा भक्त्यर्थ्यपि, मातृणां रहस्यवार्ता न श्रोतुमुचिता, तथा सति चित्तवैषम्येतिमहान्दोषः स्यादिति शङ्कया, न शृणुयात् । एवं सति विषय्येवावशिष्यते । तथा सति तु हीनाधिकारिविषयत्वेनोत्तमत्वं न स्यादित्येतत्सर्वपरिहाराय फलश्रुतिरित्यर्थः । विषयिणः पूर्वं विषयत्वेन श्रवणेऽपि तत्स्वभावादेव दोषनिवृत्तिपूर्वकं परमपुरुषार्थप्राप्तिरिति भावः । अन्ते प्रश्नोत्तरयोस्तात्पर्यमाहुः **लौकिक्यपीति** । सर्वथा प्रपन्ना दृष्ट्वाऽदेयमपि स्वरूपानन्दं दत्तवानिति तु वस्तुस्थितिः । भगवतो

रसात्मकत्वेनऽत्स्वरूपमध्यपातित्वमेतासामिति च। पूर्वमन्यत्र विवाहाभावे रसस्वरूपमेव न सम्भवति, यतस्तद्रसस्वरूपमर्यादा तथा। एतादृशेर्थे विषयत्वेनोभयोः प्रवृत्तिः, अतोऽनुचितमिदमिति बुद्धिः कस्यचिच्चेत्स्यात्, वस्तुतस्तु उपेक्ष्य एव सः, तथापि **प्रभुः सर्वोद्धारक** इति तादृशस्याप्यलौकिकी बुद्धिर्यथा भवति, तथा वक्तव्यमिति प्रश्नतात्पर्यम्। **शुक** 'स्तुष्यतु दुर्जन' इति न्यायेन तन्मतमेवानुसृत्योत्तरितवान्। अन्यथाग्रे 'गोपीनां तत्पतीना'मित्यनेन परदारात्वस्यैव दूषितत्वेन तद्दोषाप्रसक्त्या 'तेजीयसां न दोषाये'ति निषेधोऽनुपपन्नः स्यात्, 'नैतत्समाचरे'दित्यादिरपि। एवं सति 'कुत एव बन्ध' इत्यन्तमुक्तरीत्योक्तम्, अग्रे तु वस्तुस्थितिमनुसृत्येति भावः। नृत्यबन्धादेरुपयोगमाहुः **रसात्मक** इति। नृत्यबन्धाभ्यामुद्बुद्धे रसे भोगः संपन्न एवेति स्वरूपेणैवानन्ददानाच्च जलानिलयोः कोपयोग इत्याशङ्क्याहुः। **जलं वायुश्चेति**। **रमणं** जलस्थलभेदेन द्विविधम्। तत्राद्ये जलं सामग्री, द्वितीयेऽनिलः, तयोस्तथात्वे हेतुः स्वामिनीभगवतोः श्रमः। शीतत्वं जलानिलनिष्ठो हेतुरत्र सामग्रीत्वभवने। तथा च जलं वायुश्च **रमण** उक्तहेतुभ्यां सामग्री जायत इति योजना। जायते इति पदादपूर्वा सा भगवल्लीलार्थमेव तदैव जायत इति ज्ञाप्यते। **शीता**दिति भावप्रधानो निर्देशः। ननु भरतवात्स्यायनप्रणयनं हि जीवार्थम्। तथा च तदुक्तरीत्या प्रवृत्तस्य जीवस्यापि तथानन्दसम्भवादत्रावैशिष्ट्यापत्तिः। न च प्रभुस्वरूपमेव विशेषः, तस्योद्बुद्धरसात्मकत्वेन तदुद्बोधकानामप्रयोजकत्वादिति चेत्। मैवम्। अत्र हि रसात्मकं स्वरूपमेवोच्यते। तच्चोद्बोधकविशिष्टमेवोद्बुद्धम्, न तु केवलम्। अन्यथा रसात्मकत्वं न स्यात्, तत्स्वरूपस्यैव तथात्वात्। तच्च विशेषतो न भावयितुं शक्यमज्ञानादिति तज्ज्ञानार्थं भरतवात्स्यायनाभ्यां तत्स्वरूपं निरूपितम्, एवं भगवता **नृत्यमकारि**, एवं च **रमणमिति**। जीवास्तु ब्रह्मपरां श्रुतिमिवैतदपि द्वयं जीवपरमिति ज्ञात्वा प्रवृत्ताः क्लिश्यन्ति परमिति बुध्यस्व। एतदेवाहुः **कृष्णो भुङ्क्ते न चापर** इत्यनेन। तत्र हेतु**रुत्तममिति**। क्षराक्षराभ्यामुत्तमं पुरुषोत्तमस्वरूपात्मकमित्यर्थः। न हि भगवत्स्वरूपमन्येन भोक्तुं शक्यमिति भावः। एतल्लीलाया भूमौ प्राकट्यकरणे प्रयोजनमाहुः **अत्रैवेति**। आधिदैविकत्वे संपन्ने हि पुरुषोत्तमभजनं साक्षात्सम्पद्यते। तच्च वैकुण्ठे भवति। प्रभुस्तु अस्मिन्नेव लोके आधिदैविकं रूपं जीवानां प्रकटं यथा भवति तथा **भुङ्क्त** इत्यर्थः। एतल्लीलाश्रवणेऽपि तथा भवतीति तथा। **उत्कृष्टमिति**। मोक्षसुखादपीति शेषः **प्रमाणेन** वचनैरित्यर्थः। **प्रमेयेण** स्वरूपेणेत्यर्थः। **इत्थं भगवतो गोप्य** इत्यत्र, विपरीतभावेनेत्यादि। नागरीवत्कुतर्कोपहतमतयो न भवन्तीति तथा। **ननु ता वाच** इत्यादि। अनुभवविरोधित्वाद्वचनानां भगवति चाप्तत्वनिश्चयादिति भावः। **मनसि विचिकित्सायामेवेति**। मिथो विरुद्धत्वज्ञान एवेत्यर्थः। प्रकृते भगवद्वचनानुभावात्पूर्वसान्निध्यानुभवोऽधुना सम्पन्न इति नानुभवविरोधोऽतो न सन्देह इति भावः॥ १॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

त्रिंशेऽध्याये त्रिंशत्तम इत्यादि का० २९८$\frac{१}{४}$–३०२$\frac{३}{४}$। एतच्च टिप्पण्यां विस्तरे व्याख्यातमपि संक्षेपतो लिख्यते, लीलां चक्र इति लोके प्रकटामितिशेषः, तथा सति **हरिः प्रीतः** सन् **कामकृतामपि** लीलां प्रकटां चक्रे इति हेतोर्गोप्यापि लीला त्रिंशत्तमेऽध्याये ईर्यत इति वाक्यार्थः, लीलोक्तिप्रस्तावे फलश्रुतिरसङ्गतेत्याशङ्क्य तत्तात्पर्यमाहुः। **अस्याः सर्वोपकारायेति**, वैराग्यार्थिनां भक्तानां च सर्वेषामुपकाराय अस्या लीलायाः 'विक्रीडितं व्रजवधूभि'रित्यादिना फलश्रुतिरुदीर्यते, लोके कामकथा तदुद्बोधिका दृष्टेति तच्छङ्कया वैराग्यार्थी कदाचिन्न शृणुयात् तथा भक्तयश्च्यपि मातृणां रहस्यवार्ता न शृणुयादिति सर्वेषां निःशङ्कश्रवणप्रवृत्तिसिद्धये फलश्रुतिरित्यर्थः, अन्ते प्रश्नोत्तरयोस्तात्पर्यमाहुः **लौकिक्यपीति**, यदा कस्यचिद् **दृष्टिर्लौकिकी** भगवति दोषारोपात्मिका भवति तदापि **सिद्धान्त ईर्यते** प्रश्नोत्तराभ्यां निर्णय उच्यते इत्यर्थः, भगवतो रसात्मकत्वेन स्वरूपात्मकामरसभोक्तरि भगवति दोषारोपवान् वस्तुतस्तूपेक्ष्य एव तथापि प्रभुः सर्वोद्धारक इति तादृशस्याप्यलौकिकी बुद्धिर्यथा भवति तथावक्तव्यमितिप्रश्नतात्पर्यं, स च प्रश्नः "संस्थापनाय धर्मस्ये"त्यादिना राज्ञा कृतः, शुकस्तु 'तुष्यतु दुर्जन' इतिन्यायेन तन्मतमेवानुसृत्य "तेजीयसां न दोषाये"त्यादिना उत्तरं कृतवान्, अग्रे"गोपीनां तत्पतीनां चे"त्यादिना यदुत्तरं तत्तु वस्तुस्थितिमनुसृत्येतिभावः, नृत्यबन्धादेरुपयोगमाहुः। **रसात्मक** इति, अतः **शास्त्रं प्रवृत्तं** हीति **अतो** रसात्मककामस्य गूढत्वात् तद्ज्ञापनार्थं **भरतोक्त**वात्स्यायनोक्तं च **शास्त्रं** प्रवृत्तं, धर्मार्थकाममोक्षशास्त्रेषु **तृतीयं** कामशास्त्रं, **अत्रो**ऽत्र **भगवांश्चक्रे** इति कामस्य गूढत्वात् तदुद्बोधार्थं स्वयं **नृत्यं चक्रे** स्वामिनीभिः कारितवांश्च, बन्धोपयोगमाहुः **सर्वाङ्गेष्विति**। जलानिलयोरुपयोगमाहुः **जलं वायुश्च सामग्रीति**, रमणं जलस्थलभेदेन द्विविधं, तत्राद्यं जलं सामग्री द्वितीयेऽनिलः, तयोः सामग्रीत्वे हेतुः स्वामिनीभगवतोः श्रमः, शीतत्वं जलानिलनिष्ठो हेतुरत्र सामग्रीत्वभवने, तथा च जलं वायुश्च **रमणे श्रमशीतत्वाभ्यां सामग्री जायते** इतियोजना, शीतादितिभावप्रधानो निर्देशः, "**सोम्भस्यल**"मिति श्लोकोक्ता जलक्रीडा, "ततश्च कृष्णोपवन" इति स्थलक्रीडा, एतल्लीलाया **भूमौ प्राकट्यकरणे** प्रयोजनमाहुः **अत्रैव लोके** इति, प्रकटमिति क्रियाविशेषणं, तथा चास्मिन् लोके आधिदैविकं रूपं जीवानां **प्रकटं** यथा भवति तथा **भुङ्क्ते** इत्यर्थः। एतल्लीलाश्रवणे जीवानामाधिदैविकं रूपं प्रकटीभवतीति तथा, उत्तममिति क्षराक्षराभ्यामुत्तमं पुरुषोत्तमस्वरूपात्मकमित्यर्थः॥ १॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्रयस्त्रिंशे प्रहृष्टाभिः सन्तुष्टाभिः स्ववाक्यतः । गोपीभिः सह कृष्णस्य रासलीला निरूप्यते ॥ १ ॥

इत्थं भगवतः सुपेशलाः मनोहरा वाचः श्रुत्वा तस्याङ्गैः करचरणाद्यवयवैः स्पृष्टैः उपचिताः समृद्धाः आशिषो मनोरथा यासां ता गोप्यस्तद्विरहजं ताप जहुरित्यन्वयः ॥ १ ॥

अन्वितार्थप्रकाशिका

रासक्रीडा त्रयस्त्रिंशे गोपीभी रमणं हरेः । ह्रदिनीवनकेलीभिः श्लोकास्तत्रेन्दुसिंधवः (४१) ॥
उवाचेति त्रयं (३) सार्द्धा गजवेदा (४८॥) अनुष्टुभः ॥ ३३ ॥

इत्थमिति ॥ इत्थं भगवतः सुपेशलाः मनोहरा वाचः श्रुत्वा तस्याङ्गैः करचरणाद्यवयवैः स्पृष्टैः उपचिताः समृद्धाः आशिषो मनोरथा यासां ता गोप्यस्तद्विरहजं तापं जहुः । एतेन प्रश्नोत्तरसमाप्तावालिङ्गनादिविलासा आसान्निति ज्ञापितम ॥ १ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं त्रयस्त्रिंशेऽध्याये हरेः रासरमणमुच्यते सुपेशलाः मनोहराः तत्तदा अङ्ग हे उत्तरे यद्वा तस्य हरेः अगेन शरीरेण अङ्गैर्हस्तपादाद्यवयवैर्वा उपचिताः संपन्ना आशिषो मनोरथा यासां ताः ॥ १ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गोपीमण्डलमध्यस्थस्त्रयस्त्रिंशे ततो हरिः । रमयामास ता गोपीः सरित्कारण्यकेलिभिः ॥ १ ॥

इत्थमिति ॥ इत्थमेवं, भगवतः श्रीकृष्णस्य, सुपेशलाः अतिमृदुलाः, वाचः श्रुत्वा, गोप्यः, तस्य श्रीकृष्णस्य अङ्गेनाङ्गसङ्गेन उपचिताः समृद्धा आशिषो यासां ता एवंभूताः सत्यः, विरहज तापं, जहुः । तत्तदा, अङ्ग हे राजन्निति वा ॥ १ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

साधुवृन्दावनोद्भूतरसास्वादैकतृष्णताम् । दर्शयन्नकरोद्रासं यस्तं वन्दे व्रजप्रियम् ॥ १ ॥
निःशङ्कं गलिते माने श्रीशाध्यक्षविरोधके । रसान्निरथ सिद्धैवेत्यर्वागध्यायसङ्गतिः ॥ २ ॥

इत्थं भगवत इति : १०.३३.१.

यद्वाचस्त्रिविधाऽतिदुर्धरमहातापापहारक्षमाः स्वर्शश्चापि यदङ्घ्रिकञ्जरजसः कामं त्रितापापहः ।
तस्य श्रीपुरुषोत्तमस्य वचनैः सर्वाङ्गसंस्पर्शनैरल्पागन्तुकतापपापमखिला गोप्यो जहुर्नाद्भुतम् ॥ ३ ॥

कृष्णप्रिया

श्री शुकाचार्यजी ने कहा कि राजन् ! भगवान् के प्राकट्य बाद प्रभु के श्रीअङ्ग के स्पर्श से व्रजाङ्गनायें पूर्ण मनोरथ हो गई और भगवान के सुमधुर और सुकोमल पदावली पूर्ण वार्तालाप का श्रवण करने से जो विरहजन्य सन्ताप था वह नष्ट हो गया ॥ १ ॥

तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः । स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥ २ ॥

कर्दमक्षमा

अन्वयः—अनुव्रतैः, प्रीतैः, च, अन्योन्याबद्धबाहुभिः, स्त्रीरत्नैः, अन्वितः, गोविन्दः, तत्र, रासक्रीडाम् , आरभते ॥२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रासक्रीडां रासो नाम बहुनर्तकीयुक्तो नृत्यविशेषस्तां क्रीडाम् । अन्योन्यमाबद्धाः संग्रथिता बाहवो यैस्तैः सह ॥ २ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र कालिंदीतटे । गोविन्द इति—गोपीनां श्रुत्यवतारत्वाद्वा वेदलक्षणा वाणीरूपा गोपीर्विंदति लभत इति गोविंदः, गोभिः श्रुतिरूपाभिर्गोपीभिर्लभ्यत्वाद्वा । रासक्रीडेति—भक्तिप्रसन्नभगवत्प्रीतिरेवानन्दानुभवे कारणं नान्यत्साधनमिति दर्शयितुं रासक्रीडामाह—"जक्षन् क्रीडन्नममाणः" इति श्रुतेः । साक्षाद्रासलीलामेवाह श्रुतिः—"पद्या वस्ते पुरुरूपा वपूंष्यूर्द्ध्वा तस्थौ त्र्यविं रेरिहाणा ऋतस्य सद्म विचरामि विद्वान्महद्देवानामसुरत्वमेकम्" इति । अस्या अर्थः—पद्या योग्या कृष्णमूर्तिर्बहुरूपा वपूंषि बहूनि वस्ते परिधत्ते । तस्याप्यन्योर्द्ध्वा गोपा संगरहिता तस्थौ । मध्य इति शेषः । किंभूता—त्र्यविं त्रेधाभूतां दृष्टिं रेरिहाणा

गिलन्ती । रासे हि एकैकस्या गोप्या उभयतः कृष्णद्वयं पुरस्तादेकः, सा मूर्तिर्ऋतस्य धर्मस्य सद्मभूता तामनुचिंत्य विचरामि त्वद्वियुक्ता सती विद्वान् जानती काव्यवदत् देवानां कृष्णेन वियोजयतामसुरत्वं निर्दयत्वमेकं मुख्यं महदिति कृष्णतिरोधाने ज्ञेयमिति भावः । रासलक्षण तु—"एकस्य पुंसो बह्वीभिः स्त्रीभिः क्रीडा तु मण्डलैः । हल्लीसकक्रीडनकं रासक्रीडां विदुर्बुधाः ।।" इति । नारदपुराणे तु—"पृथुं सुवृत्त मसृणं वितस्तिमात्रोन्नतं कौ विनिखन्य शंकुम् । आक्रम्य पद्भ्यामितरेतरं तु हस्तैर्भ्रमोऽयं खलु रासगोष्ठी ।।" इत्युक्तम् । आगमे त्वस्येयं प्रक्रिया—पृथ्वीकीलकोपरि मणिहाटकसम्बद्धं विशालं चक्रं, तदुपर्यष्टदलं तत्समानं कमलं चतुरंगुलोन्नतं, तदुपरि युगपदाक्रमणेन कर्णिकायां स्थितेन परितो बल्लवीमंडले च सता श्रीकृष्णेन तद्भ्रामणपूर्वकं समकालगानं विचित्र नृत्यमनुष्ठितमिति । विजयध्वजस्तु—नृत्यादिषु भरतरीतिसंज्ञेषु गातुमुपक्रान्तेषु योधिरसोल्लासो जायते स रसस्तत्सम्बन्धी रसो रासस्तदुद्रेकेण क्रीडा नृत्यविशेष इत्याह ।। नृत्यगीतचुंबनाऽऽलिंगनादीनां रसानां समूहस्तन्मयी या क्रीडा तामनुवृतैस्तदानीं परस्परैकमत्येन स्वानुकूलैः अन्योऽन्यमाबद्धाः संप्रथिता बाहवो यैस्तैः सह ।। २ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्रेति । तदेवं ताभिः सहात्मनः ऐकमत्ये सतीत्यर्थः । रासक्रीडामारभत परमाभिलषितानां तासां लाभेन पूर्वमेव कर्त्तुमीप्सितां महोत्सवरूपां तत् क्रीडां कर्त्तुं प्रवृत्तः । गोविन्द इति श्रीगोकुलेन्द्रतायां निजाशेषैश्वर्यमाधुर्यविशेषप्रकटनेन परमपुरुषोत्तमता स्त्रीरत्नैरिति तासाञ्च सर्वस्त्रीवर्गश्रेष्ठता प्रोक्ता । रत्नं स्वजातिश्रेष्ठेऽपीति नानार्थवर्गात् । इति रासक्रीडायां परमसामग्री दर्शिता । अत एव प्रीतैस्तत् प्रेमभरविशेषैः । अतोऽनुव्रतैस्तदेकाधीनैः । अत एवान्योऽन्यमाबद्धबाहुभिः बाहवोऽत्र करा ज्ञेयाः । अन्योऽन्यत्वञ्च तासामेव । नतु तेन सह तद्बाहुभ्यां तासां प्रत्येकमुभयतः कण्ठग्रहणात् । एतद्धि रासक्रीडालक्षणम् । "नटैर्गृहीत कण्ठीनामन्योऽन्यात्तकरश्रियाम् । नर्त्तकीनां भवेद्रासो मण्डलीभूय नर्त्तनमिति" । अयमस्ममण्डलीमध्येऽत्रैवास्तां न च निःसरत्विति आबद्धेत्याशब्दव्यञ्जितस्तासां गूढाभिप्रायः ।। २ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत एव रासक्रीडामारभत, आसनं विहाय कर्तुं प्रवृत्तः । गोविन्द इति श्रीगोकुलेन्द्रतया तत्र निजाशेषैश्वर्य्यविशेषप्रकटनेन परमपुरुषोत्तमता, स्त्रीरत्नैरिति तासाञ्च सर्व्वस्त्रीवर्गश्रेष्ठता प्रोक्ता, इति रासक्रीडायाः परमसामग्री दर्शिता । ननु तस्य साक्षात्तासां नृत्यादौ लज्जा युज्यते ? तत्राह—तामेव प्रथयति, अनुव्रतैस्तदिच्छैकानुसारिभिस्तदनुकूलस्तत्सदृशकलाभिज्ञैरित्यर्थः । कुतः ? प्रीतैस्तद्वाक्यादिना प्रहृष्टैः, यद्वा, तत्प्रेमभरविवशैरित्यर्थः । अतोऽनुव्रतै तदेकाधीनैः, अत एवान्योऽन्यमाबद्धबाहुभिः, बाह्वाऽत्र करा ज्ञेयाः, अन्यथा नृत्यादिसौन्दर्य्यासम्पत्तिः । अन्योऽन्यत्वं च तासामेव, न तु तेन सहेति तद्बाहुभ्यां तासां प्रत्येकमुभयतः कण्ठग्रहणात् । एतच्च रासक्रीडालक्षणम्, तथा चोक्तम्—'नटैर्गृहीतकण्ठीनामन्योन्यात्तकरश्रियाम् नर्त्तकीनां भवेद्रासा मण्डलीभूय नर्त्तनम् ।।' इति । ह्ययमस्मन्मण्डलीमध्येऽत्रवास्ताम्, न च निःसरत्विति आबद्धेत्याशब्दगूढाभिप्रायः ।। २ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ तत्र पुलिने भगवान् स्त्रिय एव रत्नानि तैः सहितः रासक्रीडामारब्धवान् । कथं भूतैरनुव्रतैरन्योऽन्यभाबद्धाः संग्रथिता बाहवो यैस्तथाभूतैः रासो नामानेकनर्त्तकीयुक्तो नृत्यविशेषः ।। २ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

समृद्धफलशुभानुभवप्रकारं वक्तुमुपक्रमते । तत्रेति । तत्र वने तस्यावस्थायाम् अन्योऽन्याबद्धबाहुभिः इति रासक्रीडाप्रकारं दर्शयति । समतलमतृणप्रदेशे वितस्तिमात्रोन्नतशङ्कुं संस्थाप्य तत्परितः सर्वैः स्वपादमवष्टभ्य वृत्ताकारेण स्थित्वैकस्या वामहस्तमन्यस्या निकटवर्तिन्या दक्षिणपाणिना संगृह्य स्वशक्त्यावष्टम्भेन वर्तुलाकारभ्रमण चक्रवत्क्रिया रासक्रीडा ।। २ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं तत्र प्रसन्नाभिरेव ताभि, समं पूर्वोक्तलक्षणं रासमारब्धवानित्याह—तत्रेत्यादि । स्त्रीरत्नैः स्त्रीषु मध्ये ईश्वररूपा लक्ष्मीस्वरूपा यास्तासामपि रत्नै रत्नभूतैः, अनुगतं व्रतं येषां तैः कुमारीगणैश्च, प्रीतैः प्रीणनं प्रीस्तया इतैः प्राप्तैर्वेणुनादाकृष्टैरन्यैश्च गोपाङ्गनाः गणैश्च । कीदृशैः ? अन्योन्याबद्धबाहुभिः कुमारीभिः, कुमार्यस्तदितराभिस्तदितरा अन्योन्याबद्धबाहवः । अथवा, एका कुमारी एका तदितरेति वैचित्र्यार्थं तथा बन्धः ; अथवा मङ्गलद्वयमन्वितो मध्यवर्त्ती सन्ननुगतः ।। २ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नृत्यगीतचुम्बनालिङ्गनादीनां रसानां समूहो रासस्तन्मयी या क्रीडा ताम् अनुव्रतैस्तदानीं परस्परैकमत्येन स्वानुकूलैः । अन्योन्यमाबद्धाः संग्रथिता बाहवो यैन्तैः सह ।। २ ।।

रसिकाह्लादिनी–टीका

इदानीं प्रस्तुतं रासक्रीडाविनोदं प्रकाशयन् स्वप्रतिश्रुतमर्थं साधयति तत्रेति, यत्रोपविष्टः सान्त्वनमकरोत्तत्र पुलिने गोविन्दो गोकुलेन्द्रत्वं प्रकटयन् रासक्रीडामारभत प्रारब्धवान्। रासो नाम बहुनर्तकीनृत्यविशेषः। रसस्याभिव्यक्तिर्यस्मादिति वा सः रसोत्पत्त्यर्थमेव नृत्यं रसस्तु मानसो धर्म, शरीरचेष्टा मनस्याविर्भवति। नृत्यस्य शरीरकृतिसाध्यत्वं नृत्यस्याविर्भवकत्वं नित्यसिद्धस्य मानसभावरूपरसस्याविर्भाव्यत्वम्। इक्षुकाण्डे पूर्वसिद्धो रसः पीडनादाविर्भवति। तथा नृत्यगीतादिना मधुररसस्याविर्भावः। अनेन रसस्यानादित्वं नित्यत्वं च सूचितम्। रससाधकत्वमाह स्त्रीरत्नैरन्वित उत्तमस्त्रीकदम्बैरिति स्वाभाविककामकलाकौशलं सूचितम्। अन्वित इति रसविशेषोत्पत्तिश्च सूचिता। हरिद्राचूर्णसंयोगवत् सहात्ये साम्यं सूचितम्। यदि तासु स्वाभाविककलाकौशलं न स्यात् तदा भगवत ऐश्वर्यान्निरोधो न स्यात् इति किं च भगवतोऽपि रसोत्पत्तावशक्यत्वं स्यात्। न हि सिकतासमूहे तैलमुत्पद्यतेऽपितु तिलेभ्य एवेति। अयमलौकिको रसोऽलौकिकेत्वेवोत्पद्यते। एतास्तु त्रिलोकीमध्यजातस्त्रीभ्यो विलक्षणा विधातृसृज्यत्वाभावात्। अता एवैतासां मधुररसाविर्भावत्वयोग्यता सूचिता। गोविन्द इति नायकशिरोमणित्वं सूचितम्। एकजातीयविलक्षणरसोत्पादकत्वेन सामर्थ्यद्योतनार्थमन्वितत्वं न हि विजातीयाद्रसोत्पत्तिरिति कुत्रापि दृष्ट श्रुतं चेति, अत एव तदालिङ्गनचुम्बनादिना प्रीतैरिति रसाधिकृतत्वं सूचितम्। प्रभुसमानितानामधिकृतनां कार्य्यसंसाधकत्वं भवतीति प्रसिद्धेः। तासां रासक्रीडायाभिनिवेशमाह तावद् आदौ अन्योन्याबद्धबाहुभिः। अन्योन्याआसमन्तात् बद्धा बाहवो याभिःश्रीकृष्णस्य मध्यनायकवन्मध्येऽवस्थितित्वादिति ॥ २ ॥

विशुद्धरसदीपिका

तदेवमैकमत्ये सति रासोल्लासो जात इत्याह। तत्रेति। तस्मिन्नेवावसरे तत्र देशे वा गोविन्दः श्रीगोकुळयुवराजः। पक्षे वृन्दावने तु गोविन्दमिति वराहोक्तस्तद्देशाधिपतिमुख्यतमः प्रकाशश्च रासक्रीडां रासरूपां क्रीडां तल्लक्षणम्—

नटैर्गृहीतकण्ठीनामन्योऽन्यात्तकरश्रियाम्। नर्तकीनां भवेद्रासो मण्डलीभूयः नर्तनमिति ॥

अनुव्रतैः अनुगतं व्रतं येषामिति दुर्गाव्रतपराणां वर्गः संगृहीतः स्त्रीरत्नैः स्त्यायन्ते सर्वपरित्यागेनानुगच्छन्तीति कान्तभावानां प्रीतैः तत्प्रेमपरवशैस्तदेकपरैरिति सखीनाम् अत्रोत्तरोत्तरं श्रेष्ठ्यमूह्यं परिगणनं तु वाह्यां मण्डलीमारभ्य कृतमिति ज्ञेयं कीदृशैः अन्योऽन्येति निजनिजसजातीयाभिराबद्धा बाहवो याभिस्ताभिः, एवञ्च मण्डलीत्रयमत्रोह्यं तदुक्त श्रीगोविन्दलीलामृते—

वितस्तिमात्रोर्द्ध्वनिखातशंकुगत्रिनेमिचक्रोपरिराधया सह। स्थितः समध्येऽन्यसखीगणैः क्रमाद्बहिश्चकाराथ सुमण्डली त्रयम् ॥
सुवर्णवल्यञ्चितमालशाखिनःस्वर्णालवालालिरिवावभावसाविति ॥

अत्रेयं क्रीडा नित्यसिद्धानां साधनसिद्धानां संभिन्नानामसंभिन्नानां च यथा योगं देव्यंगानान्तु परिकत्वमेव तदुक्तमलङ्कारकौस्तुभे—

काचिद्वीणां मुरजमपरा कापि वंशीं दधाना। काश्चित्तालं करकिसलये तालधारित्वमाप्ताः ॥
चक्रुः सङ्गीतकविरचनां रासमध्ये कयाचि। द्गानं नानास्वरपरिमलामोदमुच्चैर्वितेने ॥

आदिपुराणे च—

तिस्रः कोटयो वल्लवीनां समाजस्तत्तन्मध्येवल्लभस्त्वेकरूपः।
काश्चित्तासां नाटयविद्याप्रगल्भाः शश्वद्धान्यागानवेदप्रवीणाः ॥
काश्चित्तासां वीटिकादानदक्षाश्चान्याविज्ञावस्त्रयत्नप्रकर्यः।
काश्चित्तासां वाद्यविद्योरुविज्ञा नर्त्रक्योऽन्यास्तालतारप्रकर्यः ॥
तत्रत्याश्चाधित्यकृत्यप्रशंसां कुर्वत्योऽन्यास्तोषयन्त्यात्मनाथमिति।

एवं च मण्डलीत्रयमध्यगतो मुख्यतमः प्रकाशः श्रीराधया युगलितः सहचरीभिर्ज्ञातोऽन्याभिरज्ञातश्च क्रीडतीतिज्ञेयं नचेदमसम्भावितं श्रुतदेवबहुलाश्वयोर्युगपत्गृहगमने तथादृष्टत्वात् तत्रतल्लीलासम्पादने च यथावसर योगमायापरिचरत्येव यथास्थानमिति सव हृद्यम् एवमेव दर्शितं क्रमदीपिकायां सुदृशामुभयोः पृथगन्तरगं दयिता गलबद्धभुजद्वितयमिति तदेव निजसखीगणैरेत्र श्रीराधाकृष्णयोरासक्रीडामुख्या अन्यासां मनोरथपूरणाय शिक्षासौष्ठवेन योगमायावैभवेन वा कण्ठे गृहीतत्वप्रत्यायनादिकमेवेति ज्ञेयं यम्मन्येरन्नित्यादिवक्ष्यमाणात् तदेवं विविधभावानां युगपदनुशीलवं रासक्रीडामन्तरेण दुर्घटमिति तस्य प्राशस्त्यमपि सकलरसिकजनसम्मतं दर्शितम् ॥ २ ॥

श्रीरामनारायणकृता भावभावविभाविका

तत आसनाहुः आधाय रासंक्रीडारम्भः स हि तत्रारभतेति तत्र पुलिन एव गोविन्दा अपरं पराभूय प्राप्तगोविन्दाभिषेक इत्यनेन तदारब्धरासक्रीडायामतिमनोरथ पूरिता तथा देवेन्द्रविजये तद्विजयिकामसङ्गमारम्भयोग्यताध्वनिता तथा गमनरश्मी-

नामिन्द्रत्वकथनेन स्वाङ्गकान्त्या पुलिनस्थलातिप्रकाशत्वं स्वकान्तिकौमुद्याः सखीजनदृक्कुमुदसुमनः सुमनोविकासकत्वं स्वरश्मिप्रभामण्डलगतचन्द्रवत्तन्मण्डलान्तर्भासमानत्वं तासाञ्च चन्द्रप्रभावत्तदीयत्वं मण्डलाकारत्वं तन्मण्डलादप्रच्युतत्वं स्वरश्म्यन्वितचन्द्रस्य जगत्तमस्तापापनयनाह्लादकत्वाद्गोपीमण्डलस्थस्य सर्वस्वानुगतजनाविद्यातापत्रयोपशमकस्वानन्दाविर्भावकत्वं गवां सर्वेन्द्रियाणामिन्द्रत्वेन सर्वेन्द्रियसर्वरसप्रवर्तकत्वं तद्वर्षणशीलत्वं च तथा गोभिर्विद्यते इति व्युत्पत्त्या श्रुतिरूपाभिर्गोपीभिः प्राप्यत्वं तत्तात्पर्य्यगोचरत्वं तास्वभिव्यक्तत्व गोविन्दत्वेनैव गोपीसमाजराजमानत्वयोग्यत्वं च ध्वनितं गोविन्दो रासक्रीडामारभतेत्यन्वयः। बहुनर्तकीनृत्यविशेषो रासस्तद्रूपां क्रीडां स्वेच्छानुकूलचेष्टामिति स्वातन्त्र्यद्योतनं रसानां समूहो वा रासः रससमूहाविर्भाविकां वा क्रीडाम्। यद्वा रसशब्दाभिधेयसर्वलोकसुखानां बिम्बभूततया तत्समूहात्मकः स्वयं कृष्ण एव रासः रसो वै स इतिश्रुत्या चोर एव चौर इति वद्रस एव रासो वा स्वयं स्वस्वरूपात्मिकामेव क्रीडामारभताविर्भावयामास कैरित्यपेक्षायामाह। स्त्रीरत्नैः स्त्रीषु सर्वलोकक्रीडाधामवर्तमानास्वपि रत्नभूतैः सर्वश्रुतिशिरोरत्नब्रह्मैकपरवेदान्तश्रुतिभिरिव सर्वस्त्रीशिरोरत्नैरतदात्मकैर्वा भगवतानन्दघनेन लब्धविहारतया स्त्रीत्वस्य विद्वत्प्रार्थ्यत्वापादकतया रत्नरद्भूषकैस्तदुक्तम्—

एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौच वत साधुकुर्वते। यासां गृहात्पुष्करलोचनपतिः॥
न जात्वपैत्याहृतिभिर्हृदिस्पृशन्। अद्वैतवीथीपथिकैरुपास्याः॥
स्वाराज्यसिंहासनलब्धदीक्षाः। शठेन केनापि वयं हठेन दासीकृता गोपबधूविटेनेत्यादि॥

इति तासां स्वरूपत उत्कर्षोक्तिः साधनतोऽप्याहानुव्रतैरिति कृष्णानुकूल्यमेव व्रतं येषां तत्प्राप्तये ऽनुसृतं कात्यायनीव्रतं वा यैरनुवर्तमानाः सर्वे व्रतोपलक्षिता धर्मा वा येषां तैः तदानुकूल्येनैवैश्वर्याद्यभावेन सह सुखानुभवायान्योऽन्याबद्धबाहुभिरित्यनेनैव यथा पूर्वापराविरोधसमन्वयाभ्यां क्रमपठितश्रुतिषु ब्रह्माभिव्यक्तिस्तथान्योऽन्याबद्धबाहुश्रुतिरूपासु तासु तदभिव्यक्तिरित्यपि ध्वनितम् अनुव्रतत्वेनैव प्रीतैस्तत्प्रसादगोचरीभूततयाविर्भूतपरमसुखत्वेन मुदितैः प्रीत्यात्मकैरिति वा तथाच प्रेमवृत्तिगणे ब्रह्मयत् क्रियद्रूपासु तासु तदभिव्यक्तिरिति सूचितम् अत्रान्यो बिद्धबाहुभिरित्युक्त्या परस्परबद्धबाहुत्वं गृहीतकरणेन कृष्णेनेत्यत्र सर्वतो गृहीतकरा गोप्यस्तन्मध्ये स्वैश्वर्यं सर्वतो मुखः कृष्ण इत्येवं रूपो बभूव॥ २॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तत्र ताभिः सहैकमत्ये सति तस्मिन्प्रदेश इति वा गोविन्दः स्त्रीरत्नैः समन्वितो रासक्रीडामारभत—

नटैर्गृहीतकण्ठीनामन्योऽन्यात्तकरश्रियाम्। तन्नर्तकीनां भवेद्रासो मण्डलीभूय नर्तनम्॥

इत्युक्तं रासलक्षणं रसानां समूहो रासस्तस्य क्रीडेति तद्व्युत्पत्तिः एतदर्थमेव स्वीकृतगवेन्द्राभिषेक इति सूचयितुं गोविन्द इत्युक्तं भगवता सार्द्धं रासक्रीडायोग्यता तासामेवासीदिति सूचनाय रत्नैरित्युक्तं तत्राप्यनुव्रतैस्तत्रापि नान्यानुरोधेन किन्तु प्रीतैः प्रीतिपूर्वकमुत्तमोत्कण्ठावद्भिः कथमित्यपेक्षायामन्योऽन्येनैवाबद्धाः संग्रथिता बाहवो यैस्तैस्तथा चान्योऽन्याबद्धबाहूनां भगवता गृहीतकण्ठीनां नर्तनं सम्प्रवृत्तमित्यर्थः। निवृत्तिपक्षे तत्र श्रुतीनामैकमत्ये सति विद्वदन्तः करण इति वा गोविन्दः श्रुत्येकगम्यः परमात्मा श्रुतिलक्षणस्त्रीरत्नैः श्रुतिमस्तकैरन्वतः प्रतिपाद्य प्रतिपादकसंबन्धवान् रसो वै स इति श्रुत्या रस आनन्दरूपः परमात्मा तदीयां तदाविर्भावकरीं क्रीडां श्रुतिप्रतिपाद्यतालक्षणां लीलामारभत तत्र कापि श्रुतिरद्वितीयब्रह्मानुसृता न स्थिता इत्याशयेनाह। अनुव्रतैस्तत्रापि न किलष्टकल्पनया तत्र नीता इत्याशयेनाह। प्रीतैरिति। तत्रापि परस्परविरोधराहित्येनेत्याशयेनाह। अन्याऽन्येति परस्परमाबद्धा अविरोधम्प्राप्ता बाहुस्थानीया वाक्यार्था येषां तैः॥ २॥

रास-रहस्यम्

र० टी०—तत्र श्रुतीनामैकमत्ये सति स्वविशुद्धान्तःकरणे अनुव्रतैः परमात्मानुकुल्यमेव व्रतं यासां तैः, प्रीतैः परस्परविरोधरहितैः, अन्योन्याबद्धबाहुभिः परस्पराबद्धमविरोधेन प्राप्तैकमत्यं बाहुभिः वेदशाखाभिः यैः स्त्रीरत्नैः रत्नभूताभिरात्माभिमुखीवृत्तिभिः सर्वासां मध्ये रत्नमिवोज्ज्वलत्वात् ब्रह्मैकपरश्रुतिमस्तकैरन्वितः प्रतिपाद्यप्रतिपादकभावसम्बन्धेन "तत्तु समन्वयादि"ति सूत्रेण प्रतिपादितः, गोविन्दः गोभिः श्रुतिभिः आनुकूल्येन विन्दते स्वरूपानन्दं येन सः, रासक्रीडां श्रवणमनननिदिध्यासनादिनोत्पन्नरसानां समूहः रासः, प्रेमरसपरिपाकात्मविलासविशेषात्मकः क्रीडाविशेषः, "रसो वै सः।" इति श्रुत्या रसः परमानन्दस्वरूपः सन्नात्मक्रीडामारभत आरब्धवान्॥ २॥

गूढार्थदीपिनी

तत्र यमुनातटे। अन्योन्यम् आबद्धा गृहीता बाहवो यैस्तैः अनुव्रतैः वशवर्तिभिः॥ २॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र यमुनापुलिने गोविन्दः अनुव्रतैः अनुकूलैः अन्योऽन्यमाबद्धाः सङ्ग्रथिताः बाहवो यैस्तैः स्त्रिय एव रत्नानि तैरन्वितः रासक्रीडाम् रासो नाम बहुनर्तकीयुक्तो नृत्यविशेषः स एव हल्लीश इति युगान्तरे प्रसिद्धः तद्रूपां क्रीडाम् आरभतारब्धवान् ॥ २ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अनुव्रतैः स्त्रीरत्नैर्योषिच्छ्रेष्ठैरन्योन्यमाबद्धा बाहवो यैस्तैः सा च भरतशास्त्रोक्ता ज्ञेया। लीला शुकोऽप्यङ्गनामङ्गनामन्तरा माधवो माधवं माधवं चान्तरेणाङ्गना इत्याद्याह ॥ २ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एव दुःखाभावसुखयोः प्रतिबाधकं रूपेण वाचा च निवार्य स्वकर्त्तव्यमारभते। तत्रारभतेति। गोविन्द इति तदर्थमेवेन्द्रो जातः, अतोऽसाधारणो भोगश्च तस्यावश्यक इति च अनुव्रतैः स्त्रीरत्नैरन्वितः रासकीडामारभत बहुनर्त्तकीयुक्तो नृत्यविशेषो रासः रसस्याभिव्यक्तिर्यस्मादिति रसप्रादुर्भावार्थमेव हि नृत्यं रासे क्रीडालीला स्वस्य कीडायां मनसो रसस्योद्गमः नृत्ये देहस्य कामस्तु भोक्तृनिष्ठ इति स्वप्राधान्यं समाजेनापि रस उत्पद्यत इत्येकवचनं तदाहीक्षुरसवद्भक्तिरसवद्वा कामरसोऽप्युत्पद्यते गोपिकानां रसयोग्यतामाह। अनुव्रतैरिति। अनुव्रतैरिति अनु व्रतं यासां तासामपि रसोत्पादनमावश्यकमिति यादृशो भगवतोऽभिप्रतः तादृश एवेति च। नन्वयं रसः अळौकिकः न लौकिकेषु उत्पद्यते अतो व्यर्थ आरम्भः नहि सिकतासमूहात् तैलमुत्पद्यत इतिचेत्तत्राह। स्त्रीरत्नैरिति स्वभावतः स्त्रियस्त्रिविधाः लोकभेदेन तत्रापि मानुषीषु जातिभेदाश्चत्वारः पद्मिन्यादयः वासनाभेदाश्चतुर्दश अश्वप्रकृत्यादयः सर्वास्वेवेता रत्नभूताः स्वासाधारणधर्मैः तद्धर्मप्रकाशिकाः, अतः सर्वभावेन रसोत्पत्तियोग्यता तैरन्वित इति स्वयं नायकमणिः तद्योग्या एते मणय इति एकरसत्वाय च मेलनम् अनेन रसप्रकटनार्थं शुल्कदासिका भगवते दत्ता इति यदुक्तं तदपि समर्थितं, नन्वेते जीवाः भगवानानन्दमयः कथं वैषम्याद्रसोत्पत्तिरितित्तत्राह। प्रीतैरिति। ता अपि भगगत्सादृश्यो जाताः सर्वतः प्रीता इति तासामभिनिवेशनप्रकारमाह। अन्योऽन्यावद्धवाहुभिरिति। ताः परस्परमासमन्तादुभयतः बद्धौ बाहू यासां नतु भगवता सह ॥ २ ॥

श्रीसुबोधिनी-सारः

तत्र तदानुव्रतैराज्ञाकरैः प्रीतैः अन्योन्यमाबद्धा बाहवो यैस्तैः स्त्रीरत्नैः सह गोविंदो रासक्रीडामारभत ॥ २ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र यमुनापुलिने स्त्रीरत्नैः उत्तमस्त्रीभिर्गोपीभिरन्वितो गोविन्दो रासक्रीडां रसस्याऽऽनन्दस्याभिव्यक्तिर्यस्मात् स रासः बहुनर्तकीयुक्तो नृत्यविशेषस्तां क्रीडामारभतेत्यन्वयः। रसोत्पादनयोग्यतां सूचयन्नाह—स्त्रीरत्नैरिति। 'तथात्यननुकूलाश्चेत् कथं रसोत्पत्तिः ?' इत्याशङ्क्याह—अनुव्रतैरिति। स्ववशवर्तिभिरित्यर्थः। तत्र हेतुमाह—प्रीतैरिति। तासामपि तत्रोत्साहं द्योतयन्नाह—अन्योन्यमाबद्धाः सङ्गृहीता बाहवः यैस्तैरिति ॥ २ ॥

अन्वितार्थप्रकाशिका

तत्रेति ॥ तत्र यमुनापुलिने अनुव्रतैर्वशवर्त्तिभिः प्रीतैः अन्योन्यमाबद्धाः गृहीता बाहवो यैस्तैः स्त्रीरत्नैरन्वितो गोविन्दो रासक्रीडां रसानां नृत्यगीतालिङ्गनादीनां समूहो रासः बहुनर्त्तकीयुतो नृत्यविशेषो वा। "नटैर्गृहीतकण्ठानामन्योन्यात्तकरश्रियाम् ॥ नर्तकीनां भवेद्रासो मण्डलीभूय नर्तनम् ॥" इति नाटयशास्त्रम्। तत् क्रीडामारभत ॥ २ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र यमुनाकूले अनुव्रतैः स्वाधीनैः अन्योन्याबद्धबाहुत्वं तु तासामेव न तु कृष्णस्य ॥ २ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्रेति ॥ अथ तत्र यमुनापुलिने, गोविन्दः भगवान्, श्रीगोकुलयुवराज इत्यर्थः। अनुव्रतैः सर्वथैकमत्यविधानेनानुसृतैः, अन्योन्यमाबद्धाः संग्रथिताः बाहवो यैस्तथाभूतैः, प्रीतैः प्रसन्नतावद्भिः, स्त्रीरत्नैः अन्वितः सहितः सन्, रासक्रीडां, आरभतारब्धवान्। रासो नामानेकनर्त्तकनर्त्तकीयुक्तो नृत्यविशेषः ॥ २ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तत्राऽऽरभतेति : १०.३३.२.

सिद्धे समाधौ गतकल्पनौघे सानन्दसाक्षात्कृतिरात्मनोऽरम् ।
रसानुभूतिश्च ततोऽर्थसिद्धा रासेति शब्दादिदमत्र बोध्यम् ॥ ४ ॥
मदेकगुणशालिनो मदनुरूपचेष्टाजुषो भवन्ति भुवि ये जना मदनुरक्तसर्वेन्द्रियाः ।
अलभ्यममरैरपि स्वयमहं समेत्यातनुं रसं ननु दिशाम्यदो ध्वनितमत्र रासोद्यमात् ॥ ५ ॥
तासामेवमभूतपूर्वमनवच्छिन्नप्रवाहं तदा प्रेमाणं भुवि कृत्रिमेतरलसद्भावं विभाव्याञ्जसा ।
नार्वाग्भूतमितो न भाव्यनुपमं यत्तत्सुखं कामतो रासक्रीडनकैतवेन चकमे दातुं कृतज्ञाग्रणीः ॥ ६ ॥
प्रारब्धदेहपतनोत्तरमेव रासो ज्ञानेन लभ्यत इति स्थितिरन्यथैव ।
मद्भक्तिहार्दहृदयैस्तु जनैरिहैव लभ्यः स इत्यभिमतं विशदं व्यधात् स ॥ ७ ॥
अनङ्गसुखदातृत्वं व्यञ्जयन्तावुभावपि । परस्परार्पितभुजौ विश्रम्भाय बभूवतुः ॥ ८ ॥

कृष्णप्रिया

रास रस ग्रहण करने योग्य रसराज समकक्ष और स्त्रीरत्न गोपियाँ प्रसन्न मन हो गई, परस्पर का हाथ मिलाकर जोड़ी बनकर गोविन्द जी के सामने खड़ी हो गई, तब उनसे मिलकर श्रीगोविन्द भगवान ने रासक्रीडा रमण का प्रारम्भ किया ॥ २ ॥

रासोत्सवः सम्प्रवृत्तो गोपीमण्डलमण्डितः ।
योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः । प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं[1] स्त्रियः ॥ ३ ॥
यं [2]मन्येरन् नभस्तावद् विमानशतसङ्कुलम् । दिवौकसां सदाराणामौत्सुकया[3]पहृतात्मनाम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—द्वयोः, द्वयोः, मध्ये, प्रविष्टेन, योगेश्वरेण, कृष्णेन, कण्ठे, गृहीतानाम्, तासाम्, गोपी-मण्डल-मण्डितः, रासोत्सवः, सम्प्रवृत्तः, यम्, स्त्रियः, स्वनिकटम्, मन्येरन्, तावत्, नभः, औत्सुक्यापहृतात्मनाम्, सदाराणाम्, दिवौकसाम्, विमानशतसंकुलम् अभवत् ॥ ३–४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्साहित्यमभिनयेन दर्शयति रासोत्सव इत्यादिनाक्षरचतुष्टयाधिकेन सार्धेन । तासां मण्डलरूपेणावस्थितानां द्वयोर्द्वयोर्मध्ये प्रविष्टेन तेनैव कण्ठे गृहीतानामुभयत आलिंगितानाम् कथंभूतेन । यं सर्वाः स्त्रियः स्वस्वनिकटं मामेवाश्लिष्टवानिति मन्येरंस्तेन । एतदर्थं द्वयोर्द्वयोर्मध्ये प्रविष्टेनेत्यर्थः । नन्वेकस्य कथं तथा प्रवेशः । सर्वसन्निहितत्वे वा कुतः स्वैकनिकटत्वाभिमानस्तासामित्यत उक्तम् । योगेश्वरेणेति । अचिंत्यशक्तिनेत्यर्थः तावत्तत्क्षणमेवौत्सुक्यव्याप्तमनसां सस्त्रीकाणां देवानां विमानशतैः संकुलं संकीर्णं नभो बभूव ॥ ३–४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य तासां वा साहित्यम् । अभिनयेन रचनया । एतदर्थम् स्वस्वोपकण्ठमननार्थम् । इत्यर्थ इति–अन्तराप्रदेशं विना स्वस्वनिकटमननं न संभवतीत्याशयः । तदसम्भवं मत्वा शंकते–नन्विति । इत्यर्थ इति–"न तदिहास्ति लोकेषु यद्योगेन न जायते" इत्युक्तेः । सर्ववस्तुसंपादनं तु योगिनापि क्रियते किमुत योगेश्वरश्रीकृष्णवैभवमिति तात्पर्यम् । गोपीमण्डलेति–प्रियामङ्के निधाय वेणुं वादयन्सतडिन्मेघोपम एकः प्रकाशो मेढीभूतो मध्ये विराजते यमपेक्ष्य मण्डलं स्यादिति । तत्साहित्यप्रकारं दर्शयति–रासोत्सव इति षडक्षरन्यूनसार्द्धेन । रास एवोत्सवः भक्तदृङ्मनश्चातकेभ्य आनन्दाभृतप्रदायकः । सम्यगेव प्रवृत्तः । केन–तासां मंडलरूपेण व्यवस्थितानां गोपीनां द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णेन । अत्र संप्रवर्तित इत्यनुक्तेः स्वतंत्रकर्तृत्वं तस्मै रासाय ददता स्वयं च करणत्वं भजता श्रीकृष्णेन स्वस्मात्सर्वशक्तिभ्यः सर्वलीलाभ्यश्च रासस्यैव महोत्कर्षः स्वदत्तो व्यंजयामासे । अत एव लक्ष्मीप्रभृतयोऽपि तं लब्धुमुत्कण्ठत एव, न तु लम्भत इति ज्ञेयम् । कथंभूतानाम्–तेनैव कण्ठे गृहीतानाम् उभयत आलिंगितानाम् । अत्रा-

---

१. निकटश्रियः–विज. । २. यन्मन्येत–विज । ३. वयनिभृता–विज. ।

ग्रिमश्लोके "मध्ये मणीनां हैमानां महामारकतो यथा" इति मध्य इति पदेन मारकत इत्येकवचनेन चात्र च श्लोके सता मिथो इत्यनुक्त्वा प्रविष्टेनेति पदेन च प्रयुक्तेन गोपीमंडलमध्यकर्णिकाभूत एव कृष्णो मध्ये स्थितः सन्नेव तथा गतिलाघवं प्रकटयामास, यथा मंडलस्थानां गोपीनामपि द्वयोर्द्वयोर्मध्ये प्रविष्टो नृत्यति स्मेत्येकपरमाणुमात्रकाले नैव मध्यप्रदेशादागत्य मण्डलस्थास्त्रिशत-कोटिगोपीः सनृत्यं परिरभ्य पुनर्मध्यप्रदेशगत एव बभूवेत्यलातचक्रादपि तस्य गतिलाघवमधिकमभूदिति ज्ञेयम्। यतो मंडल-कर्णिकागतत्वं मंडलस्थप्रत्येकगोपीमध्यगतत्वं तस्य तदानीं सर्वैर्दृष्टम्। एवमेव "अङ्गनामंगनामन्तरा माधवो माधवं माधवं चान्तरेणां-गनाः। इत्थमाकल्पिते मंडले मध्यगः संजगौ वेणुना देवकीनन्दनः॥" इति श्रीबिल्वमङ्गलमहानुभावचरणैरुक्तम्। तत्र हेतुगर्भं विशिनष्टि—योगेश्वरेण निखिलकलानिधित्वात्तदुपायमहाविज्ञेन। "योगः सन्नहनोपायध्यानसंगतियुक्तिषु" इत्यमरः। यद्वा—योगो योगमाया दुर्घटघटनापटीयसी महाशक्तिस्तस्या ईश्वरेण युगपत्सर्वगोपीनामाश्लेषौत्सुक्यं तस्याभिज्ञाय सैव तावतः प्रकाशांस्तस्य प्रकटय्य समादधौ। अत्र द्वयोर्द्वयोर्मध्ये प्रविष्टेनेति वीप्सया एकैकगोपीमध्ये द्विद्विगोपीमध्ये प्रवेशः संगच्छते इति व्याचक्षते। तत्रैकैकगोपीमध्यप्रवेशे व्याख्याय माने योगमायापक्षे एकस्याः स्त्रियः स्कंधयोः कृष्णप्रकाशद्वयस्य भुजस्पर्शानौचित्यं नाशंकनीयम्, योगमाययैव तांतां प्रत्येकस्यैव प्रकाशस्य स्पर्शमानसमर्पणात्। द्विद्विगोपीव्याख्याने तु नैवासमं जसम्। यं श्रीकृष्णं स्त्रियः स्वनिकटं मन्येरन् असौ मयाश्लिष्यन्नेवात्रास्ति तदपि यत्सर्वत्रायं दृश्यते तदियं काचिदस्य नाट्यविद्येत्यमंसतेत्यर्थः। अत्र मध्यगो देवकीनंदनः श्रीव्रजेश्वर्या सहित एवेत्याहुः, तस्या एव सर्वश्रैष्ठ्यात्, 'रासक्रीडादिकारणम्' इति तदीयशतनामस्तोत्रदृष्टेः। तावत् तावत् तत्क्षण एव विमानशतैर्व्याप्तं नभो बभूव। केषाम्—दिवौकसाम् ब्रह्मादीनाम्। अत्रौत्सुक्यादिति कृष्णनृत्यांश एव न तु रसस्य विलासे दासत्वेनानौचित्यात्, तद्दाराणां तु अनौचित्याभावात्सर्वत्रैव। अत एव रासे दिवि पुंसां कृष्णदर्शनमेव, न गोपीदर्शनं, योगमाययावरणादिति ज्ञेयम। नन्वेतादृशरासक्रीडा केन दृष्टेति चेदाह—नभः अन्तरिक्षम्। द्यौः स्वर्ग ओका वासस्थानं येषां तेषाम्। औत्सुक्यम् उत्कण्ठा॥ ३–४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

रासः परमरसकदम्बमय इति यौगिकार्थः। स एवोत्सवः क्रीडाविशेषरूपः सुखमयः पूर्वं कृष्णेन परमानन्दघनमूर्त्तिना निमित्तेन सम्यक् प्रवृत्तः। सम्यक्त्वमेव दर्शयति। गोपीनां मण्डलेन मण्डितः इत्येवं तासां शोभाहेतुत्वमधिकं दर्शितम्। तत् प्रवर्त्तने तद्विशेषश्चोक्तः श्रीपराशरेण। "रासमण्डलिबन्धोऽपि कृष्णपार्श्वमनुज्झता। गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना। हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डलीम्। चकार तत् करस्पर्शनिमीलितदृशं हरिः। ततः प्रवर्त्तते रासश्चलद्वलयनिः स्वनः। अनुजातशरत् काव्यगेयगीतिरनुक्रमात्"। इति। किञ्च तासामिति द्वयोरित्युक्ते एकत्रैव मध्ये स्थितिर्बोध्यते। तन्निवारणार्थं वीप्सा अत एव मध्ये मणीनामित्यत्र मध्य इति सामान्यं वक्ष्यते कृष्णस्याप्युभयतः स्थितत्वेन दोर्भ्यां गृहीतकण्ठ्य इति च। तथा चोक्तं श्रीविल्वमङ्गलेन। "अङ्गनामङ्गनामन्तरे माधवो माधवं माधवं चान्तरेणाङ्गना। इत्थमाकल्पिते मण्डले मध्यगः सञ्जगौ वेणुना देवकीनन्दन" इति। व्यक्तीभविष्यति च क्रमदीपिकावचनेन सुदृशामुभयोः पृथगन्तरगमित्यनेन। अत एव तत्तद्युग्मपूजैव तत्र विहिता नतु तत्तत् त्रिकपूजेति। स्त्रिय इति। स्त्रीषु परमानुरागेण युगपदात्मसङ्गमभीप्सुषु सत् पुरुस्य तथैव कृत्यं व्यक्तमिति बोधयति। अन्यथा वैषम्येण दोषापात्तः सुखभङ्गश्चेत्यर्थः। यं स्वनिकटमेव मन्येरन्नमसतेत्यत्रेदं विवेचनीयम्। रासमहोत-सवोऽयं परस्परसुखार्थमेव श्रीकृष्णेन प्रारब्धः। तस्माद्रासस्य सर्वशोभादर्शनं श्रीगोपीनां सर्वासामेवावश्यापेक्ष्यमिति तासामिद-मेव भानं योग्यम्। कयाचिन्नाट्यविद्ययैवासौ बहुत्र भाति मयातु गृहीत एव अन्यथा स्वनिकटमेवापश्यन्नित्युच्येत। किञ्च ताभिः प्रियस्य स्वस्व निकट एव स्थितिं मन्यमानाभिस्तस्य स्वपार्श्वद्वयेऽपि वर्त्तमानतातुलानन्दग्रस्तबुद्धित्वेन विवेक्तुं शक्येति गम्यते। तस्मात् पूर्वत्र चात्र चानन्दमोह एव मूळं कारणं ज्ञेयम्। अत्र चैकस्यैव तथा प्रवेशादिकं समादधदाह। योगो योगमायाचिन्त्या-द्भुतशक्तिविशेषस्तस्येश्वरेणेति स्वाभाविकं तच्छक्तित्वेनैव प्रेरणां विनापीच्छामात्रेण तत्तदुदय इति व्यञ्जितं द्योराकाश ओको निवासो येषामिति स्वभावत एव व्योम्नि भ्रमतामकस्माद्रासक्रीडादर्शनात् संहतानामित्यर्थः। अत एव विमानशतसंकुळं नभो बभूव। चन्द्रदिशं परित्यज्य चन्द्रोपर्यव वा ज्ञेयम्। दिवौकसां ब्रह्मरुद्रादीनामिति। स्वर्गादावपि तादृशोत्सवासद्भावः सूचितः। तत्रैवात्यौत्सुक्येति औत्सुक्यमत्र नृत्यांश एव नतु रहस्य विलासांशेऽपि दासत्वेनायोग्यत्वात्। तत एवाधुनैवागतत्वात। अत एव योगमायया तेषां रहस्यं प्राप्तिदृष्ट्याच्छादनमपि ज्ञेयम्॥ ३–४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

रासः परमरसकदम्बमय इति श्लेषार्थः, स एवोत्सवः क्रीडाविशेषः सुखविशेषसाधनसारसमुच्चयो वा; कृष्णेन परमा-नन्दघनमूर्त्तिना हेतुना सम्यक् प्रवृत्त इति, संप्रवृत्तौ रासस्य कर्त्तृत्वनिर्देशेन प्राधान्योक्त्या सर्वलीलानां नित्यत्वादिकेऽप्यस्य सर्वतो वैशिष्ट्यमेवाभिप्रेतम्। सम्यक्त्वमेव दर्शयति—गोपीनां मण्डलेन मण्डित इति। तद्विशेषश्चोक्तः श्रीपराशरेण (वि० पु० ५।१३।४८–५०)—

'रासमण्डलबन्धोऽपि कृष्ण पार्श्वमनुज्झता । गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना ॥
हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डलीम् । चकार तत्करस्पर्शनिमीलितदृशं हरिः ॥
ततः प्रववृत रासश्चलद्वलयनिः स्वनः । अनुजातशरत्काव्यगेयगीतिरनुक्रमात् ॥' इति ।

किञ्च, तासामिति तथा चोक्तं श्रीविल्वमङ्गलेन—'अंगनामङ्गनामन्तरा माधवो, माधवं माधवं चान्तरेणांगना । इत्थमाकल्पिते मण्डले मध्यगः, संजगौ वेणुना देवकीनन्दनः ॥' इति । एतदनुसारेण सर्व्वमध्ये मेधीभूतः शंकुस्थानीय एको बोद्धव्यः, अन्यथा पार्श्वद्वयस्य गोपीद्वय कण्ठग्रहणेन वेणुधारणासिद्धया रासमहोत्सवे परममंगल मधुरमोहनतद्वाद्याभावापत्तिः, तदभिप्रायेणैव वक्ष्यते (भा० १०।३३।६)—'मध्ये मणीनाम्' इत्यादि । स्त्रिय इति स्त्रीसु सत्पुरुषस्य तथैव कृत्यं युक्तमिति बोधयति, अन्यथा वैषम्येण दोषापत्तिः सुखभंगश्चेत्यर्थः । एकस्यैव तथा प्रवेशः सर्व्वासाञ्च प्रत्येकं युगपत् कण्ठग्रहणम् , तथापि तासां स्वनिकटत्वमानः, तत्र च पार्श्वद्वये वर्त्तमानस्याप्येकत्वेनैव मानः, तत्सर्व्वञ्च तत्तद्लक्षितमित्याद्यशेषासमञ्जसं समादधदाह—योगोऽचिन्त्याद्भुतशक्तिविशेषस्तस्येश्वरेणेति । द्योराकाश ओको निवासो येषामिति स्वभावत एव वोम्नि भ्रमतामकस्माद्रासक्रीडादर्शनात् संहता अत्र स्थितानामित्यर्थः । अतएव विमानशतसंकुलं नभो बभूव । यद्वा, द्यौः स्वर्गस्ततश्च स्वर्गेऽपि तादृशोत्सवासद्भावः, तेषां स्वस्वसेवाया वरोऽवसरोऽपि सूचितः, अतएवात्यौत्सुक्येति इत्यसमयेऽप्यागमनदोषः परिहृतः, अथवा एते खलु श्रीभगवत्क्रीडाया आन्तरिक्षाः परिकरा देवविशेषा ज्ञेयाः, अतएवोक्तम्—दिवौकसां तत्क्रीडोपकरणत्वेन सदा सावधानं व्योम्न्येव वर्तमानानामित्यर्थः । एवमन्यत्राप्यूह्यम् ॥३॥ ततस्तेभ्यो दिवौकसोभ्यः, किंवा तदनन्तरं स्वयमेव नदुर्दिन्यत्वान्महामंगलोत्सवस्वभावाद्वा, एवमग्रेऽपि । आदौ दुन्दुभीनां नादो मंगलारम्भार्थं स्वस्ववर्ग्यसम्मेलनार्थञ्च, नितरां पेतुः, नि-शब्देन वृष्ट्य इति बहुत्वेन च रंगस्थल्यां पुष्पास्तरणं किल जातमिति बोध्यते । गन्धर्व्वाणां पतयः श्रेष्ठाः, अन्यथा तादृशनृत्ययोग्यगानासिद्धिः, तेषां श्रेष्ठ्यसाफल्यासम्पत्तिश्च स्त्रीभिरप्सरोभिः स्वपत्नीभिर्वा सहिता इति सर्व्वेषामेव तदेकनिष्ठतोक्ता, न तिष्ठति मलो यस्मादित्यमलामति तेषामपि कामादिदोषो निरस्तः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

द्वयोर्द्वयोर्मध्ये स्थित्वा कृष्णेन गृहीतानां रासोत्सवः सम्प्रवृत्त इत्यन्वयः ॥ ३ ॥ यं कृष्णं स्त्रियः सर्वाः स्वनिकटस्थमम्येरन् तेन कृष्णेनेत्यन्वयः यदा रासोत्सवः सम्प्रवृत्तः नभस्तावद्दिवौकसां विमानशतसंकुलमासीत् ॥ ४–७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाभिनयेन दर्शयति । रासोत्सव इत्यादिना नभस्तावदित्यतः प्राक्तनेन तासां मण्डलरूपेण स्थितानां द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णेन गोपीमण्डलमण्डितो रासोत्सवः संप्रवृत्त इत्यन्वयः । कथंभूतानां तेनैव कण्ठे गृहीतानामुभयत आलिङ्गितानां कथंभूतेन यं कृष्णं सर्वाः स्त्रियः स्वनिकटस्थं मन्येरन् मामेवाश्लिष्टवानिति मन्येरंस्तथाभूतेन तदर्थं द्वयोद्वयार्मध्ये प्रविष्टेनेत्यर्थः । नन्वेकस्य तथा कथं प्रवेशः सर्वसंनिहिते तस्मिन्वा कथं तासां स्वनिकटवृत्तित्वमात्राभिमान इत्यतो विशिनष्टि । योगीश्वरेणेति । अचिन्त्यविविधविचित्रशक्तिनेति भावः । बहुरूपतामापन्नेन तासां स्वस्वनिकटवर्त्तित्वमात्राभिमानं जनयता चेति गूढाभिसन्धिः तथा च वक्ष्यति "कृत्वा तावन्तमात्मानं याचतीर्व्रजयोषित" इति । अत एवाचील्क्रुपन्नासनमात्मवन्धवे इत्युक्तमुपपन्नं नम इति यदा रासोत्सवः सम्प्रवर्त्तित तावत्तत् क्षणमेवौत्सुक्यमनसां सस्त्रीकाणां देवादीनां विमानशतैः सङ्कुलं सङ्कीर्णं नभो बभूवेति शेषः ॥ ३–४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

इत्यादिषु भरतरीति संज्ञेषु गातुमुपक्रान्तेषु योऽधिरसोल्लासो जायते सरसः तत्सम्बन्धी रसो रसः तदुद्रेकेण क्रीडानृत्यशेषे एवं विधो रासक्रीडोत्सवः कृष्णेन सम्यक्प्रवृत्त इत्ययः कीदृशो गोपीनां तासां मण्डलेन वलयेन मण्डितोऽन्वितः कथं भूतेन तासां गोपोनां मध्यप्रविष्टेन मध्ये शङ्कुस्थापनाय मध्यप्रवेशः सङ्गत इति तत्राह द्वयोरिति । वलयस्थितानां तासां द्वयोर्मध्ये प्रविष्टेन एकस्येदङ्कथं घटत इत्यतो योगेश्वरेणेति श्वर्यादेकस्य बहुत्वं घटत इति भावः कीदृशानां कृष्णेन कण्ठे गृह्यं तत्रैव विशेषः । कृष्णदक्षिणांसग्रहणं वामस्थितायास्तस्य वामस्कन्धग्रहणं स्वनिकटस्थस्त्रियः कृष्णेन गृहीतानां रासोत्सवः सम्प्रवृत्त इति गतेनान्वय इत्यर्थः ॥ ३ ॥ नन्वेवं कृष्णे रासक्रीडाकारिणि के साक्षिण इति तत्राह । यं मन्येतेति । कृष्णो यदा रासक्रीडां कर्तुं मन्येत न्यरूरुपदिति व्यत्ययः तावत्तदा नभः औत्सुक्येन निभृतात्मनां निश्चलमनसां सदाराणां सभार्याणां दिवौकसां विमानसतसङ्कुलम् आसेति शेषः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

योगोऽचिन्त्यशक्तिः ॥ ३–६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तत्प्रकारमाह-रासोत्सव इत्यादि । रासनामा उत्सवो यत्र स तथा, रासलास्योचित-स्थलविशेषः सम्प्रवृत्तः प्रादुरासीत् । गोपीनां मण्डलेन मण्डलैर्वा मण्डितः, कृष्णेन-च मण्डित इत्यन्वेतव्यः । अथ कृष्णेन सम्प्रवृत्तः सम्प्रवर्त्तित इत्यर्थः । योगेश्वरेणाचिन्त्य-परमैश्वर्येण कण्ठे गृहीतानां तासां द्वयोर्द्वयोर्मध्ये प्रविष्टेन भ्रमणकौशलेनातिवेगवता । अनेन योगेश्वरत्वं प्रकटितम् । अथवा द्वयोर्मण्डलयोर्मध्ये द्वयोर्मण्डलयोर्मण्डलद्वयमध्यवर्त्तिनीनां कण्ठे गृहीतानां तासां मध्ये प्रविष्टेन स्त्रियस्तं सन्निकटं मन्येरन् । स्त्रिय इति मण्डलद्वयमध्यवर्तिन्यः, एतदेव योगेश्वरत्वम् । वस्तुतस्त्वेक एव सर्वनिकटस्थः, न तु नानात्वेन, अतएव स्वनिकटं मन्येरन् मेनिरे; न तु नानात्वं वास्तवम् , योगेश्वरमात्रस्यैव कायव्यूहकरणसामर्थ्यम् , तदकृत्वा एक एव यद्व्यापकत्वेन स्फुरति, तदेवाचिन्त्यपरमैश्वर्यम । तर्हि (भा० १०।३३।१९) "कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः" इति कथं सङ्गच्छताम् ? सत्यम् , तत्रैवं व्याख्या ।—यावतीर्यावत्प्रमाणा यावदवयवाशयवत्यस्तावन्तं कृत्वा तावत्प्रमाणत्वेन तावदाशयत्वेन स्फुरति । तदा नभस्तावत् सकलं नभ इत्यर्थः ।-'यावत्तावच्च साकल्ये' इत्युक्तेः सदाराणां दिवौकसां विमानशतशङ्कुलमासीदित्यर्थः । तद् दर्शनार्थमत्योत्सुक्यभृता आत्मानो येषाम् ॥ ३ ॥ तेषामौत्सुक्यमाह-ततो दुन्दुभय इत्यादि ॥ ४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

द्वयोर्द्वयोर्मध्ये प्रविष्टेन कण्ठे गृहीतानामित्यत्र भ्रमणकौशलम् । तत्र योगेश्वरः कृष्णः हेतुः, अतएव स्वनिकटं यं मन्येरन् मेनिरे, न तु तद्वास्तवम् , योगेश्वरमात्रस्यैव कायव्यूहकरण-सामर्थ्यम् , तदकृत्वा एकेनैव श्रीविग्रहेण यद्व्यापकत्वं तदेवाचिन्त्यमैश्वर्यम् , तर्हि (१९ श-श्लो०) "कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः" इति कथं संगच्छताम् ? सत्यम् तत्रैवं व्याख्या—यावतीर्यावत प्रमाणा यावदाशया वा तावत्प्रमाणं तावदाश्रयमिति वा कृत्वा अतः कौशलमेवाङ्गीकार्यम् ॥ ४-५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत् साहित्यप्रकारं दर्शयति । रासोत्सव इति । षडक्षरन्यूनसार्द्धेन । रास एव उत्सवः भक्तजनदृङ्मनश्चातकेभ्य आनन्दामृतप्रदायकः सम्यगेव प्रवृत्तः । केन । तासां मण्डलरूपेणावस्थितानां गोपीनां द्वयोर्द्वयोर्मध्येन प्रविष्टेन कृष्णेन अत्र सम्प्रवर्त्तित इत्यनुक्तेः स्वतन्त्रकर्त्तृत्वं तस्मै रासायैव ददता स्वयञ्च करणत्वं भजता श्रीकृष्णेन स्वस्मात् सर्वशक्तिभ्यश्च सर्वलीलाभ्यश्च रासस्यैव महोत्कर्षः स्वदत्तो व्यञ्जयामासे । अत एव लक्ष्मीप्रभृतयोऽपि तं लब्धुमुत्कण्ठन्त एव नतु लभन्ते इति ज्ञेयम् । कथंभूतानां तेनैव कण्ठे गृहीतानामुभयत आलिङ्गितानाम् । अत्राग्रिमश्लोके मध्ये मणीनां हैमानां महामारकतो यथेत्यत्र मध्ये इति पदेन मरकत इत्येकवचनेन चात्र च श्लोके सता मिथो इत्यनुक्त्वा प्रविष्टेनेति पदेन च प्रयुक्तेन गोपीमण्डलमध्यकर्णिकाभूत एव कृष्णो मध्ये स्थितः सन्नेव तथा गतिलाघवं प्रकटयामास । यथा मण्डलस्थानां गोपीनामपि द्वयोर्द्वयोर्मध्ये प्रविष्टो नृत्यति स्मेत्येकपरमाणुमात्र कालेनैव मध्यप्रदेशादागत्य मण्डलस्थास्त्रिशतकोटिगोपीः सनृत्यं परिरभ्य पुनर्मध्यप्रदेशं गत एव बभूवेत्यलातचक्रादपि तस्य गतिलाघवमधिकमभूदिति ज्ञेयम् । यतो मण्डलकर्णिकागतत्वं मण्डलस्थप्रत्येकगोपीमध्यगतत्वं तस्य तदानीं सर्वैर्दृष्टम् । एवमेव । "अङ्गनामङ्गनामन्तरा माधवो माधवं माधवञ्चान्तरेणाङ्गनाः । इत्थमाकल्पिते मध्यगः सञ्जगौ वेणुना देवकीनन्दन" इति श्रीविल्वमङ्गलमहानुभावचरणैरुक्तम् । तत्र हेतुगर्भं विशिनष्टि । योगेश्वरेण निखिलकलानिधित्वात् तदुपायमहाविज्ञेन । "योगः सन्नहनोपायध्यानसङ्गतियुक्तिष्वि" त्यमरः । यद्वा । योगा योगमाया दुर्घटघटनापटीयसी महाशक्तिस्तस्या ईश्वरेण । युगपत् सर्वगोपीनामाश्लेषौत्सुक्यं तस्याभिज्ञाय सैव तावतः प्रकाशांस्तस्य प्रकटय्य समादधौ । अत्र द्वयोर्द्वयोर्मध्ये प्रविष्टेनेति वीप्सया एकैकगोपीमध्ये द्विद्विगोपीमध्ये प्रवेशः सङ्गच्छते । इति व्याचक्षते तत्रैकैकगोपीमध्यप्रवेशे व्याख्यायमाने योगमायापक्षे एकस्याः स्त्रियः स्कन्धयोः कृष्णप्रकाशद्वयस्य भुजस्पर्शानौचित्यं नाशङ्कनीयं योगमाययैव तां तां प्रत्येकस्यैव प्रकाशस्पर्शभानसमर्पणात् द्विद्विगोपीव्याख्याने तु नैवासमञ्जसम् । यं श्रीकृष्णं स्त्रियः स्वनिकटं मन्येरन् असौ मयाश्लिष्यन्नेवात्रास्ति तदपि यत् सर्वत्रायं दृश्यते तदियं काचिदस्य नाट्यविद्येत्यमंसतेत्यर्थः । अत्र मध्यगो देवकीनन्दनः श्रीवृन्दावनेश्वर्या सहित एवेत्याहुः । तस्या एव सर्वश्रैष्ठ्यात् रासक्रीडादिकारणमिति तदीयशतनामस्तोत्रदृष्टेः । तावत् तत्क्षण एव निमानशतैर्व्याप्त नभो बभूव । केषां दिवौकसां ब्रह्मादीनाम् अत्रौत्सुक्यादिति कृष्णनृत्यांश एव नतु रसस्य विलासे । दासत्वेनायोग्यत्वात् तद्दाराणान्तु अनौचित्याभावात् सर्वत्रैव अत एव रासे दिवि पुसां कृष्णदर्शनमेव न गोपीदर्शनम् । योगमायया आवरणादिति ज्ञेयम् ॥ ३—५ ॥

श्रीरसिकाह्लादिनी टीका

एवं स्वयमाचितायां रासक्रीडायामभिनिवेशमाह अक्षरचतुष्टयाधिकेन सार्द्धश्लोकेनेति । रासः रसाविर्भावको नृत्य एवोत्सवविशेषः सम्यक् प्रवृत्तः । तत्र हेतुमाह । श्रीकृष्णेन मूर्त्तिमता श्रृङ्गारेणेत्यर्थः । सम्यक्त्वं विशदयति गोपीमण्डलमण्डितः गोपीमण्डलेन मण्डितोऽलङ्कृतः, यद्वा गोपीमण्डलं मण्डितं येनेति । तेन सदानन्दरूपेण तासां मण्डलाकारेण स्थितानां उभयतः

कण्ठे गृहीतानां द्वयोर्द्वयोरिति। कृष्णोभयतः पार्श्वद्वये स्थितत्वेन गृहीतकण्ठत्वमुच्यते-तदुक्तं क्रमदीपिकायां-"सुदृशामुभयोः पृथगन्तरगमिति"। तदुक्त पाराशरेणापि"रासमण्डलिबन्धो हि कृष्णपार्श्वमनुज्झता। गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना। हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डलीम्। चकार तत्करस्पर्शनिमीलितदृशं हरिः। ततः प्रवर्त्तिते रासश्चलद्वलयनिः स्वनः। अनुजातशरत्काव्यगोपिगीतिरनुक्रमात्"। ननु द्वयोर्द्वयोः मध्ये प्रविष्टेन उभयतः कण्ठालिङ्गितत्वेन च स्वरूपबहुत्वं प्रतीयते इति चेत्तत्राह। यं मन्येरन्निति लिङ्गेन गोपी-दृष्टयभिप्रायेण स्वरूपबहुत्वमिव प्रतीयत इति एतदभिप्रायेण गोपीमण्डलमध्ये शङ्कस्थानीयः एक एव बोद्धव्यः। अन्यथा स्वरूपबहुत्वे यं स्वनिकटं मन्येरन्निति स्वैकनिकटत्वभानकथनं न स्यादिति! स्वरूपाणां बहुत्वेन मायिकत्वे तासां निष्कपटभजने न वै सादृस्यादिति। सुखभङ्गपर्य्यवसायि-रसाभासश्च भवेदिति। अत एव आचार्य्यैः व्याकरिष्यते "मध्ये मणीनामिति। यथा मध्ये ऽनावृत्तिरेकवचनं च गोपीदृष्टयभिप्रायेणेति"। नन्वेकस्य कथं द्वयोर्द्वयोर्मध्ये प्रवेशो युगपत्कण्ठग्रहणं पार्श्वद्वयेऽपि एकत्वभावः। स्वसम्मुखस्थितानां पार्श्वद्वयस्थितेन कृष्णेन गृहीतकण्ठानां दर्शनेन कथं नेर्ष्योदयस्तत्राह योगेश्वरेणेति। अचिन्त्याद्भुतशक्तिविशेषो योगस्तस्येश्वरेण नियन्त्रा सर्वशन्निहितत्वं कर्त्तुं समर्थेनेति। अग्रे वक्ष्यति "चित्रं वतैतदेकेन वपुषा युगपत् पृथक्। गृहेषु द्वयष्टसाहस्रं स्त्रिय एक उदावहत्" यथा तत्रैकस्यैव वपुषोऽचिन्त्यशक्तित्वं सर्वत्र पूर्णत्वं नारदेन प्रत्यक्षतो दृष्टम् तथा तत्रापि स्वरूपैक्यं सर्वसन्निहितत्वं च न चित्रं न हि भगवच्छक्तियोगमायाया अयमतिभार इति। योगमायामुपाश्रित इत्युक्तमेव, अन्यथा तासामेकस्वरूपभजने निष्कपटे प्रेम्णि च सकपटबहुरूपप्रदर्शनं न न्याय्यमिति भावः। अत एवोक्तम्। यं मन्येरन्निति उक्तं च "जगद्धनमयं लुब्धाः कामुकाः कामिनीमयम्। नारायणमयं धीराः पश्यन्ति परमार्थिनः" इति वत्। स्वनिकटमाने चित्रं, किं च यथा "मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकस" इति। अत्र भगवतोऽचिन्त्यशक्तेरेव हेतुत्वं किमुत तासां स्वैकनिकटत्वमाने इति। वपुषोऽद्भुतापरिछिन्नत्वे योगेश्वरेणेति हेतुः। अन्येऽपि योगिनो भगवत्प्रसादोचितसामर्थ्याः सर्वसन्निहिताः भवन्ति किमुत भगवान्निति योगेश्वरे इति। रासोत्सवप्रवृत्ते दिवौकसां विमानशतसंकुलनभ आसीत् इति सम्बन्धः। दिवौकसां अधिकारिणामित्यर्थः। अन्येषां तत्राप्रवेशात् सदाराणां स्त्रीणामपि दिदृक्षासंभवात्। अत एवौत्सुक्येन कौतुकेनापहृतात्मनां आकृष्टचित्तानां च स्थितिरुद्दीपकत्वेनोक्तमिति। रासोत्सवं प्रतीक्ष्यमाणानां तेषां विमानशतैः शतशब्दस्त्वसख्यातवाची असंख्यातैरित्यर्थः, तैः सङ्कुलंनभ आसीदिति ॥ ३-४ ॥

विशुद्धरसदीपिका

तदेतद्विशदयति। रासेति। सार्द्धद्वयेन रासः प्राग्लक्षितः क्रीडाविशेषः। यद्वा रसकदम्बमयः कश्चिद्विलक्षणो व्रजलीलाविशेषः। यद्वा रसो मुख्यरसः शुद्धः प्रेमा स एव रासः तद्रूपो य उत्सवः तत्तत्प्रेमपोषणमयः पूर्वं कृष्णेन कर्त्रा तत्तत्प्रेमपरवशेनेति वा संप्रवृत्तः प्राक्सिद्ध एव संप्रति संप्रवर्तितः सम्यक्त्वमेव दर्शयति गोपीत्यादि। एवमेवाभिमतं स्वामिपादः—

जयति श्रीपतिर्गोपीरासमण्डलमण्डनः।

इत्यादिना वस्तुनिर्द्देशात्मकमङ्गलमाचरद्भिः कीदृशेन द्वयोर्द्वयोर्मध्ये प्रविष्टेन नचेदमसंभावितमित्याह। योगेति योगा अचिन्त्या निजशक्तिर्योगमायाख्या तस्या ईश्वरेण मायायां किंतु दुर्घटमितिन्यायान् मायायामिति किंपुनर्योगमायामित्यर्थः। अथवा कृष्णेन परमानन्दघनमूर्त्तिना निमित्तेन सम्यक् प्रवृत्तः तदुक्तं श्रीपराशरेण—

रासमण्डलिबन्धोऽयं कृष्णपार्श्वमनुज्झता। गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना ॥
हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डलीम्। चकार तत्करस्पर्शनिमीलितदृशं हरिः ॥
ततः प्रववृते रासश्चलद्वलयनिः स्वनः। अनुजातशरत्काव्यगेयगीतितरनुक्रमादिति ॥

तासां कण्ठेगृहीतानां मध्ये स्त्रियः स्त्रीत्वाभिमानिन्यः नतु सख्याभिमानिन्य इत्यर्थः। यं स्वनिकटं मन्येरन् अमंसत कयाचिन्नाट्यविद्ययैवासौ बहुत्र भाति मयातु गृहीतकण्ठ एवेतिभावः। अन्यथा स्वनिकटमेवापश्यन्नित्युच्येत किंच ताभिः प्रियस्य स्वस्वनिकटस्थितिंमन्यमानाभिस्तस्य पार्श्वद्वये वर्तमानता तु नानन्दग्रस्तबुद्धित्वेन विवेक्तुं शक्तेति गम्यते ततश्च सर्वमध्यगतं युगळं सखाभिरपि परिचीयते नान्याभिरिति सिद्धिरेवे सर्वत्र योगमायैव वा हेतुः। एवञ्च तस्य तासां च नृत्यगीतादिकमपि ताभिरनाकलितमेवेतिदिक्। तत्रोभयोर्नृत्य श्रीगोविन्दलीलामृते—

आदिश्य हल्लीशककेलिरङ्गे राधामुकुन्दौ ललितादिकालीः।
तत्रांसविन्यस्तभुजौ मिथस्तावनृत्यतां लास्यविदां वरिष्ठौ ॥

तयोर्लक्षणं संगीतरत्नाकरे—

नर्तकीभिरनेकाभिर्मण्डलीभूय नर्तनम्। यत्रैको नृत्यति नटस्तद्वै हल्लीशकं विदुः ॥

तदेवेदं तालबन्धगतिभेदेन भूयसा लास्यं स्यान्न स नाकेऽपि वर्त्तते किं पुनर्भुवि तदेवं रासोऽयं हल्लीशकलास्यभेदेन द्विविधोऽपि स्थिरा स्थिर भेदेन द्विविध इति दर्शितं तत्रैव—

नृत्यन्नितम्बिनीनां तद्वैदग्ध्यं पदचालनैः । कुलालचक्रवच्चक्रं भ्रमदासीद्द्वयोरपि ॥
लघुभ्रमच्चक्रगतेः समा तासां गतिः क्वचित् । कचिन्मन्दा कचिच्छीघ्रा सप्रियस्य तथा हरेरिति ॥
तदेवं स्थिरमस्थिरमप्येतद्द्विधं रासमण्डलम् । स्थिरं स्थलविशेषस्थमस्थिरं चक्रसंश्रयम् ॥
स्थिरभ्रमिः कर्तृगता भवेत्सव्यापसव्ययोः । स्थिरे तु चक्रजा साहि प्रातिलोम्यानुलोमभाक् ॥
यथास्थाने स्थितं तत्र नृत्यं तद्भ्रमितः पुनः । नाना स्थानस्थितं भाति नृत्यकर्तुश्च योषितः ॥

एवं च चक्रभ्रमिस्वभावानेनैवानेकत्र भानमेतदप्युक्तं तत्र प्रत्येकमुभयोर्यथा तत्रैव—

कृष्णः श्रीमान्मुहुरिह समागत्य तासां स मध्यान्नाना तालक्रमवशतया चालयन् श्रीपदाब्जे ॥
धुन्वन् पाणी नटति निगदन्नित्थमानयन्दयंस्ताः । तत्तत्तत्थै दृगिति दृगिथै दृक् तथेदृक्तथैथा ॥
थो दिक् दां दां किट किट कणझेन्थो क्कु थो दिक्कु आरे । झेन्द्रां झेन्द्रां किट किट किट धां झेङ्कुझो झेङ्कुझों झों ।
थो दिक् दां दां दृमि दृमि दृमि धां कांकुझें कांकुझें द्रा मागत्यैवं नटति स हरिश्चारुपाठप्रबन्धम् ॥
कूजत्काञ्चीकटकविरणन्नूपुरध्वानरम्यम् । पाणिद्वन्द्वं मुहुरिह नदत्कङ्कणं चालयन्ती ॥
राधा कृष्णद्युतिघनचये चञ्चलेव स्फुरन्ती । नृत्यन्तीत्थं गदति तथथै थै तथै थै तथै था ॥
धां धां दृक् दृक् चङ चङ निङां णं णिङां णं णिङां णाम् । तुत्तुक् तुन्तुं गुडगुडुगुड धां द्रां गुडुद्रां गुडुद्राम् ॥
धेक् धेक् धोधो किरिटि किरिटि द्रां दिमिद्रां दिमिद्रामागत्यैवं मुहुरिह सदः श्रीमदीशा ननर्त्त ॥

प्रधानसखीनां यथा—

झंझं कुर्वत्कनकवलये धुन्वती पाणिपद्मे । तासाम् मध्यात्सपदि ललिताप्यागमत् कृष्णकान्त्या ॥
श्यामे रङ्गे तडिव घने नृत्यतीत्थं वदन्ती । थै थै थो थो तिगड तिगड थो तथैथो तथैताः ॥
दृमि दृमि दृमि धों धों धों मृदङ्गादिवाद्यैः । कण कण कण वीणा क्वाणमिश्रैर्विशाखा ॥
नटति झणण झंझंकार्यलंकारजाला । दृगिति दृगिति दृक्थै थो तथोथो ब्रुवाणा ॥

एवमन्यासामपि विस्तरभिया न लिख्यन्ते अथ—

श्रालिक्यनृत्ये राधाया देयमन्यदपश्यता । तुष्टनात्मार्पितस्तस्यै कृष्णेनालिङ्गनच्छलात् ॥

अपिच—

कृष्णः कान्तां नटयति मुदा कापि वंशीप्रगानैः । नर्म्मोन्नीतं स्खलनमिह सा तस्य दृष्टा दिशन्ती ॥
तालं तस्य स्खलितमपि संभालयन्त्यात्मनो द्राक् । स चाप्येषा नटयति तथा क्वापि वीणाप्रगानैः ॥
कृष्णेन रामस्थतया समं हरिर्यथा ननर्त्तात्र जगाववादयत् । साहाय कोक्त्वापि सखीततिर्नालं तथासीन्नृतिगानबादने ॥

इत्यादिबहुशः । एवंचरङ्गमरयस्यगलं यद्यत्करोति तत्तदनुकरोतिगोपीगण इति ज्ञेयं नात्र चित्रं यतः पश्यतामिति विशेषो इत्याह । नभइति । विमानशतसंकुलत्वमपि मण्डलीवधरीत्यैवज्ञेयम् । औत्सुक्यापहृतात्मनामित्युक्तः दिवि ओको येषामिति तल्लीलानुमोदतपरिकराणां सर्वदा व्योम्न्येव वर्तमानानामित्यर्थः । नतु रहस्यलीलायामनधिकारिणां प्राकृतदेवानामिति भावः । यद्वा प्राकृताप्राकृतमिश्रत्वात् प्रकटलीलाया इति प्राकृता एव नृत्यमात्रावलोकनमात्रपरा नतु रहस्यवेदिन इत्यविरोधः ॥ ३–४ ॥

श्रीरामनारायणकृता भावभावविभाविका

गोपीमण्डलमध्यस्थभगवद्रासविशेषं निर्दिश्य रासप्रकारान्तरमाह । रासोत्सव इति । रासः परमरससमूहः स एवोत्सवः परमसुखरूप उदिति उत्कृष्टः स्वरूपात्मकत्वादेवातिविलक्षणः सवः कालो यस्येति वा स स्वयमेव सम्यक् प्रवृत्त इत्यत्र रासोत्सवे एव प्राधान्येन सम्यक् प्रवृत्तिकर्तृत्वनिर्देशः पूर्वं तु गोविन्दो रासक्रीडामारभतेत्युक्तं तथा च कृष्णारम्भमात्रेण आरम्भोऽप्यत्रेच्छामात्रं ज्ञेयः स्वयमेव गोपीकृष्णसंबन्धाय नित्योत्सुको रससमूहात्मको रासोत्सवः कृष्णेच्छामात्रं प्रतीक्षतामवेक्ष्य सम्यक् स्वसर्वगुणयुगपदाविष्कारेण प्रवृत्तः । यद्वा कृष्ण एवादावारभत । ततश्च तदारम्भसमुद्बुद्धेन सर्वज्ञानामपि ज्ञानप्रतिबन्धकेन नित्यमुक्तस्यापि बन्धकेनातिचित्रेण प्रेमरसेन भगवतः कृष्णस्य तत्सखीनाञ्च विगतानुसंधानतया रासोचितकलादिदाक्षिण्यासम्भावितत्वेन तत्सम्यक्त्वासम्भवात्स रासोत्सव एव सम्यक् तत्प्रथमेच्छानुसारेण प्राथमिकादेव प्रयत्नात्समाधिवृत्त्यनुवृत्तिवत् भगवत्तत्सखीगणसमागमोत्साहेन च प्रवृत्तः । अत एवाबुद्धिपूर्वकत्वेन वेदस्य स्मृतिभ्यः प्राधान्यवद्रासोत्सवस्यैव भगवल्लीलान्तरेभ्यः प्राधान्यं किञ्च प्रेमपथस्य प्रत्यक्त्वेन सर्वलोकवैपरीत्येन सर्वत्र सर्वेश्वरत्वात्कृष्णस्य प्राधान्यं गोपीनां तत्सखीत्वात्तदधीनत्वं रासादेस्तत्कर्मतया तदधीनत्वम् अत्र तु रासोत्सवस्य सम्प्रवृत्तिकर्तृत्वनिर्देशेन प्राधान्यं गोपीनां तदुपकरणत्वमत एव रासविशेषणतया किम्भूतो रासोत्सव इत्यपेक्षायामाह । गोपीमण्डलमण्डित इति । गोपीनां मण्डलेन मण्डितः तत्राप्ययं विशेषो गोपीनां प्रेमपारवश्येन प्रवृत्तौ

रासोत्सवप्राधान्यं तन्मण्डकत्वाच्छोभाप्राधान्येन गोपीनां प्राधान्यं कासां रासोत्सवस्तदाह । तासामिति । यासां गोपीनां मण्डलेन मण्डितस्तासामेव किम्भूतानामित्यपेक्षायामाह । द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णेन कण्ठेगृहीतानाम् अत्रापि गोपीविशेषणतया कृष्णस्य भगवतो निर्देशात्तासां प्राधान्यं तथा कृष्णगृहीतकण्ठतया शोभितत्वेनैव तासां रासमण्डकत्वेन तासामपि शोभाप्रदत्वात्कृष्णाप्राधान्यम् असंख्यतानां तासां द्वयोर्द्वयोर्मध्ये प्रवेशयोग्यत्वाय कृष्णविशेषणमाह । योगेश्वरेणेति । यतो वा काचित्स्वरूपात्मिकैव लीलोपयोगिन्यचिन्त्या शक्तिस्तदीश्वरेण अत्र शक्तेः स्वरूपात्मकत्वे तयोरीशितव्येश्वरत्वलक्षणभेदस्फूर्ति सच्चिदानन्दानां भेदाभावेऽपि भेदभानवत् । यद्वा विभक्तानां सर्वासां योगायेश्वरेण समर्थनेत्यर्थः । तत्र द्वयोर्द्वयोः ।। वशप्रयोजनमाह । स्त्रियो यं कृष्णं नित्यानन्द स्वमनःकर्षणं स्वस्वनिकटं स्वस्यैव समीपस्थं मन्येरंस्तेन तत्र योगीश्वरानाम् । अत्रायमाशयः सर्वमनसां नित्यानंदकृष्णाकृष्टत्वाद्यपि कृष्णस्य स्वसमीपे दर्शनं न स्यात्तदा स्वमन्दभाग्यत्वबुद्धयोत्सवभङ्गो यदा च मण्डले एकैकसनिधाने प्रवेशस्तदैश्वर्य्यभानप्रतिरोधेन तादृशरसास्फूर्तिरतः स्वात्मन एकस्यां दिशि कृष्ण एकस्यां गोपीति भावेन मन्निकटे एव प्रियतम इति स्वस्वोत्कर्षभानेन सर्वासां सुखातिशयार्थं तथा प्रवेशः । यद्वा नेश्वरीणामैश्वर्य्यभानं प्रतिबन्धकमीर्ष्या वापि तु प्रेमवतां कृष्णतद्भक्तोभयसमागमः सुखकरस्तथा च सर्वासां कृष्णतत्सखीनां समागमेन सुखातिशयाय तथा प्रवेश इति ध्वनिः । अस्मिन्पक्षे यत्र यत्र गोपीनाञ्चाग्रे कर्तृत्वं तत्र तत्र कृष्णप्रेरितविद्वद्देहानामिव रासोत्सवप्ररितत्वेनैव कर्तृत्वनिर्देशः । यद्वा रासोत्सवः प्रवृत्त इत्युक्त्वा किम्भूतः स तदाह । गोपी गोशब्दवाच्यानां गोश्रुतीन्द्रियरश्मिभूम्यादीनां पतिर्गोपः सर्वेश्वरः कृष्णः प्रवर्त्तकत्वेन गोप्तृत्वेन चास्यास्तीति तथा पुनः कीदृशः द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णेन कण्ठे गृहीतानां तासां मण्डलेन मण्डितः । यद्वा किम्भूतो गोपी तथा मण्डलो मण्डितोऽनेनेति तथा अस्मिन्पक्षे कृष्णप्रवर्तितस्तल्लब्धश्रीको रासोत्सव एव तासां मण्डलमण्डक इति गोपीनां रासोत्सवस्य च सर्वस्य कृष्णस्वरूपात्मकत्वाद्यथेष्टमण्डकमण्डितत्वोक्तिर्गुणप्रधानभावोक्तिर्वा न दोषाय । यद्वा एवं पृथगेव मण्डलरासं निरूप्य रासप्रकारान्तरमाह । मण्डलरासोत्तरं योगेश्वरेण द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णेन कण्ठे गृहीतानां रासोत्सवः सम्प्रवृत्तः तत्रापि रासद्वैविध्यसूचनं दक्षिणवामभागस्थगोपीद्वयमध्यप्रविष्टेन कण्ठे गृहीतानामेकः परस्परयोजितकरद्वयसंमुखगोपीद्वयमध्यप्रविष्टेन द्वितायोऽत्र भगवतोऽप्युभयसन्तोषायोभयसंमुखतया तत्तत्कण्ठे करद्वयधारणेन चतुर्भुजत्वमिति बोध्यम्, एवं यावद्रासोत्सवः सम्प्रवृत्तस्तावन्नभोरासदर्शनौत्सुक्येनापहृता आत्मानो मन इन्द्रियप्राणा येषां तेषां दिवौकसां विमानानां शतेनासङ्ख्यातेन संकुलमासोत् शतसङ्ख्यास्वीकारे नभः संकुलत्वासम्भवात्, अत्र सदाराणामित्युक्त्या स्त्रीणां रुषाणां च सर्वेषामौत्सक्यापहृतात्मत्वकथनं यद्वा सदाराणामपि दारपुरुषयोः सह वर्तमानत्वे परस्परं लग्नचित्ततयान्यत्रौत्सुक्यासम्भवेऽपि तद्रासोत्सवमाहात्म्यादेव तथौत्सुक्यमिति सूचनं नभस्तावद्विमानशतसंकुलमित्यस्यायमप्याशयः नभसा कृष्णतत्सखिवद्भ्रमितशशिप्रभमुखमृगाङ्काङ्कां भूमिमालोक्य विमानेन स्वमानायामिताण्डशशिनामानयर्नामिव विमानानयनेऽपि तेषां शशिप्रभतया विशेषमानानां विमानानामतिशोभमानकृष्णतत्सख्यमनिमानरीक्षणेन विमानानां तन्मुखचन्द्रग्रहणसहकारायेक्षितबहुतरताराकारत्वं जातं किञ्च यद्यपि तानि विमानानि चन्द्रतोऽप्यधिकप्रभतया विमानानि तथापि तानि कृष्णतत्सखिच्छविविमातानि चन्द्रस्तु स्ववंशजकृष्णदर्शनलब्धातिमानतया राजमान इति विमानचन्द्रविभागोपपत्तिः तत्रस्थाः सुराश्च शुक्लपक्षे शशिसुधापानं विस्मृत्यामितहरितत्सखिमुखचन्द्ररूपसुधाम्पेपीयमाना औत्सुक्यापहृतात्मत्वेन द्रुमदशापन्नतया सुरद्रुमाः सन्तः सुमनः सुमनोऽभिवर्षिणोऽभवन् ।। ३–४ ।।

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

चतुर्वर्णाधिकेन सार्द्धेन तत्साहित्यं दर्शयति । रासेति । तासां रासक्रीडालक्षण उत्सवो मनोविस्मापकाह्लादरूपः सम्यक् प्रवृत्तः यथोत्सवोऽनेकविधैर्ब्राह्मणादिभिर्मण्डितो भवति तथाऽयमुत्सवो गोपीनां बहुविधैर्मण्डलैर्मण्डितः कथंभूतानां तासां कृष्णेन कण्ठे गृहीतानां कथम्भूतेन कृष्णेन द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णपदेनानवच्छिन्नानन्दसमुद्रे तासां निमग्नता सूचिता । ननु एकस्य कथमेककलमेवंविधः प्रवेश इत्याशङ्कानिरासायोक्तं योगेश्वरेण योगः अघटितघटनापटीयसी महामायाशक्तिस्तस्या ईश्वरेण, तथा च तादृशशक्त्या तस्य तथा प्रतीतिरित्याशयेनाह । यं श्रीकृष्णं स्त्रियः स्वनिकटं मन्येरन् अत्र गोपीद्वयान्तरितः कृष्ण इत्युक्त्या गोप्यऽर्द्धसङ्ख्याककृष्णमूर्त्तिसंयुक्तो रासोत्सवस्तेन गोपीससख्याकवन्मूर्त्तियुक्त न वक्ष्यमाणेन तेन न पौनरुक्त्यं किञ्च अत्र न तावत्संख्याकमूर्त्तिस्वीकारः किन्तु एक एवातिलाघवेनतथा नृत्यकृतिः स्यात् । एवं यं मन्येरन्नित्युक्तं नतु तथा दृष्टवत्य इति इयञ्च भगवद्लीला परमात्कृष्टा लक्ष्म्यादीनामपि प्रार्थनीया परमदुर्लभा चेति बोध्यं रासोत्सव इत्यारभ्य कथालङ्कारार्थं पुरञ्जनोपाख्याने नगरीवर्णनवद्रासवर्णनमतो निवृत्तिपक्षविवरणप्रयासादुपरम्यते ।। ३–४ ।।

रास–रहस्यम्

र० टी०—परं परमात्मानं सर्वाः स्त्रियः वृत्तयः, स्वनिकटं स्वस्य निकटस्थं प्रत्यगभिन्नत्वेन मन्येरनमंसत, तासां वृत्तीनां, द्वयोर्द्वयोर्मध्ये प्रविष्टेन "प्रतिबोधविदितं मतमि"ति श्रुत्या प्रतिबोधद्वयोर्मध्ये प्रविष्टेन, योगेश्वरेण ब्रह्मात्मैक्यलक्षणं योगः तथान्तर्यमिरूपेण जीवानामीशनकर्तृत्वादीश्वरः, योगश्चासौ ईश्वरश्च योगेश्वरः तेन योगेश्वरेण कृष्णेन परमात्मना, कण्ठेगृहीतानां उभयतः

आलिङ्गितानामेकीभावकृतानां तासां, गोपीमण्डलमण्डितः गोपीनां वृत्तीनां, मण्डलैः समूहैः, मण्डितः शुशोभितः, रासोत्सवः परमरसानां समूहः रासः, स एवोत्सवः उत्कृष्टः स्वरूपबोधात्मकत्वात् अतिविलक्षणः सवः काल, एवंभूतः संप्रवृत्तः सम्यग्रूपेण प्राथमिकादेव ध्यानप्रयत्नादारभ्यः समाधिवृत्त्यनुवृत्तिस्तया उत्साहेन प्रवृत्तः, तावत् तत्क्षणमेव, रासकर्शनौत्सुक्येनापहृतात्मनां "रसा वै सः ।" इति श्रुत्या रस एव रास परमात्मा तद्दर्शनौत्सुक्येन मानसेन, अपहृता मुषिता इन्द्रियप्राणमनादयः येषां तेषां, तत्तदधिष्ठातृदिवौकसां देवतानां, स्वदाराणां तत्स्थानीयतत्तदिन्द्रियजन्यवृत्तिसहितानां, विमानानां मनोरथानां, शतमसंख्यातपरं तैः संकुलं संकीर्णं नभः हृदयाकाशः बभूव ॥ ३-४ ॥

गूढार्थदीपिनी

रासेति सार्द्धम् । कृष्णेन रासः सम्यक् प्रवर्तितः । कथंभूतेन । कण्ठे गृहीतानाम् उभयतः आलिङ्गितानां तासां द्वयोर्द्वयोर्मध्ये प्रविष्टेन अत एव स्त्रियः यं स्वनिकटं मन्येरन् इति योज्यम् ॥ ३ ॥ यावत् एव तावत् तत्क्षणमेव नभः विमानशतैः संकुलमासीत् ॥ ४-५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवतस्ताभिः समन्वितत्वमभिनयेन दर्शयति । रासोत्सव इत्यादिना यं मन्येरन्नित्यन्तेन । तासां गोपीनां मण्डलरूपेण वर्तमानानां द्वयोर्द्वयोर्मध्ये प्रविष्टेन कथम्भूतानां कृष्णेन कण्ठेन कण्ठे गृहीतानामुभयत आलिङ्गितानाम् कथम्भूतेन यं श्रीकृष्णं सर्वाः स्त्रियः पृथक् पृथक् स्वनिकटं मन्येरन् तेन नन्वेकस्तत्तन्निकटस्थः कथमभवदित्यत आह । योगेश्वरेणेति । अचिन्त्यशक्तिनेत्यर्थः । तथैव वक्ष्यति "कृत्वा तावन्तमात्मानं यावती व्रजयोषित" इति एवंभूतेन कृष्णेन गोपीनां मण्डलैर्मण्डितोऽलंकृतः रासोत्सवः सम्प्रवृत्त इत्यन्वयः । यर्हि रासोत्सवः सम्प्रत्तस्तावत् तत्क्षणमेवौत्सुक्यनिभृतात्मनामौत्सुक्यपूर्णमनसां सस्त्रीकाणां दिवौकसां देवादीनां विमानशतैःसङ्कीर्णं नभोऽभूदिति शेषः ॥ ३-४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गोपीनां मण्डलं वलयाकारेण स्थितसङ्घस्तेन मण्डितोऽलङ्कृतस्तासां द्वयोर्द्वयोर्मध्ये प्रविष्टेन कण्ठे च गृहीतानां रासोत्सवः प्रवृत्तः । सर्वाः स्त्रियश्च यं स्वनिकटं स्वसमीपवर्तिनं मन्येरंस्तासामिति पूर्वेणान्वयः । एकस्यैवानेकासां मध्यगततादिसम्भावकमाह ॥ योगेश्वरेणेति ॥ ३ ॥ यद्यदा वा तावत्सदाराणां सभार्याणां दिवौकसामौत्सुक्येन निभृतः पूर्ण आत्मा मनो येषां ते तथा तेषां विमानशतेन निर्मानविमाननभो गगनं सङ्कुलं व्याप्तं बभूवेति शेषः । यन्मन्येत नभस्तावदिति पाठे व्यत्ययादिक्लेश इति प्राचीनटीकात एवावसीयते ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवान्पुनः हस्तमण्डलाद्बहिः स्थितो यथा सम्बध्यते तथा सन्निवेशमाह । रासोत्सवः सम्प्रवृत्त इति । सर्वेषामेव गुणभावात् रसप्राधान्यात् रासोत्सव एव सम्यक प्रवृत्तः उत्सवो नाम मनसः सर्वविस्मारक आह्लादः उत्सवत्वसम्पादनाय सजातीयानेकरसोत्पादनार्थं विशेषमाह । गोपीमण्डलमण्डित इति । गोपीनां मण्डलैरनेकविधैर्मण्डितः उत्सवोऽप्यनेकविधैः ब्राह्मणादिमडलैर्मण्डितो भवति अत्रापि तुल्यस्वभावाः रसार्थमेकीकृताः पृथङ्मण्डलभाजः तैरपि मण्डितः पोषकाश्च रसास्तदुत्पादिता इति उत्तरोत्तरमण्डलैः पूर्वपूर्वरसः पोष्यत इति नायं रसोऽन्यत्र भवितुमर्हति सम्यक् प्रवृत्तिर्निरन्तरमाविर्भावः । ननु कालकर्मस्वभावानां प्रतिबन्धकत्वात् अनेकत्र जायमानो रसः कथमेकीभवति तत्राह । योगेश्वरेणेति । सहि सर्वोपाय इति सर्ववस्तुषु विद्यमानं भगवदैश्वर्यादिकं योगं स्वोद्धाटयतीति साधनेषु योगः प्रधानं तत्रैश्वर्य्ये सर्वत्रैव एवम्भूतो रस उत्पादयितुं शक्यत इति सिद्धमेव किं कृष्णोऽर्यामिति स्वयमेव सदानन्दः कामानलनवाग्निलीनं जनयितुं शक्नोति तस्य भगवतस्तासु सन्निवेशप्रकारमाह । तासां मध्ये द्वयोर्द्वयारिति मण्डलीकृतायावत्यो गोपयः तासां द्वयं द्वयं भिन्नतया भावनीयं द्वित्वद्वयस्य नैकाधिकरणताभाव्या अतो मण्डलमध्ये यत्र हस्तद्वयग्रन्थिः तत्र भगवदुदरं तथा भवति तथा भगवानुत्थितो जातः ॥ ३ ॥ तथोद्गतस्योभयत्र संबन्धमाह । द्वयोर्द्वयोर्मध्ये प्रविष्टेन भगवता कण्ठे गृहीतानामिति हस्तद्वयेन पार्श्व स्थितयोः कण्ठे ग्रहणम् एवं षोडशगोपिकानामष्टकृष्णा भवन्ति अन्यथा रसाभासः स्यात् कृष्णद्वैविध्यप्रतीतेः इममेवार्थमाह स्वनिकटं स्त्रियः यम्मन्येरान्निति स्वस्यैव निकटे नत्वन्यासां स्वसम्मुखस्थितगोपिकाकण्ठालिङ्गितभगवद्दर्शनमपि भगवदिच्छया तासां न जायत इति प्रयोजनार्थं हि रूपरदण तदर्धसंख्ययैव प्रयोजनं भवतीति न समसंख्यामृग्या यावतीर्गोपयोषित इत्यग्रे समसंख्यां भगवतो वक्ष्यति यत्पुनः कैश्चिदुक्तम् "अङ्गनामङ्गनामन्तरे माधव" इति तत्रापि सविसर्गः पाठो ज्ञेयः, द्विवचने बहुवचनप्रयोगश्च अन्यदेव वा तन्मण्डलं न भागवतोक्तं मध्ये वेणुनादस्योक्तत्वात् । अत्र तु रसार्थे नृत्यमिति गानार्थमपेक्षायामपि देवैरेव तत्सिद्धिः मध्ये मणीनां हैमानां हैमानामित्यत्र तु दर्शनार्थमुक्तत्वात् गोपिकानां देवानाञ्च दर्शनं तथैवेति नानुपपन्नं किञ्चित् एवं रसार्थं सर्वसामग्र्या मुक्तायां सरसः प्रादुर्भूतः सर्वेषां भविष्यतीति देवादयः सर्वे अलौकिकज्ञानयुक्ता दर्शनार्थमागता इत्याह । नभस्तावदिति । तावन्नोभी विमानशतसकुलमासीत् ।

मण्डपेहि नृत्यं रसजनकम् अन्यथोपरि वैचित्र्यं न स्यात् तदर्थमपि विमानशतेन संकुलं यथा रसोत्पादनार्थं स्त्रिय' पुरुषाश्च संवद्धाः नानाबन्धयुक्ताः चित्रे स्थाप्यन्ते तदर्थं भगवतो चित्रप्रायाः स्थापिताः अत्र एवाग्रे औत्सुक्यापहृतात्मनामिति वक्ष्यति स्वलीलार्थं सर्वं तथा प्रेरयतीति न औत्सुक्येनान्यथासिद्धिः तासां रसग्रहणार्थमागमनं भगवदिच्छा तु चित्रार्था विमानस्थितान् तत्संबन्धिनो वर्णयति । दिवौकसामिति । स्वर्ग एव स्थानं येषां सदाराणामिति । तेषां भावान्तरव्युदासार्थं स्त्रीणामुपसर्ज्जनत्वं तासां भावार्थं स्वर्गस्थिता रसाभिज्ञाः रसयोग्याश्च भवन्तीति । नन्वीश्वरलीला न द्रष्टव्येति कथं तेषां दर्शनार्थं प्रवृत्तिः तत्राह । औत्सुक्येन विचाररहितलीलाक्षिप्तमनसामपहृत आत्मास्वरूपं बुद्धिर्वा येषामतः स्वधर्मादेव प्रवृत्ताः नतु भगवद्धर्मं विचारितवन्तः ।। ४ ।।

श्रीसुबोधिनी-सारः

द्वयोर्द्वयोर्मध्ये प्रविष्टेन योगेश्वरेण कृष्णेन कंठे गृहीतानां तासां रासोत्सवः संप्रवृत्तः गोपीनां मंडलं मण्डयतीति तथा एकस्य पुंसो बह्वीभिः क्रीडनं रासमण्डनमिति "अंगनामंगनामन्तरे माधवो माधवं माधवं चांतरेणांगना ।। इत्थमाकल्पिते मंडले मध्यगस्संजगौ वेणुना देवकीनन्दनः" इति हरिवंशतिलके । "पृथु सुवृत्तं मसृण वितस्तिमात्रोन्नतं कावति खन्य शंकुम् ।। आक्रम्य पद्भ्यामितरेतरं तु हस्तैर्भ्रमोयं खलु रासगोष्ठी" इति ।। ३ ।। स्त्रियः स्वनिकटं यं मन्येरन् तावत् औत्सुक्योनाऽपहृत आकृष्ट आत्मा चित्तं येषां तेषां सदाराणां सस्त्रीकाणां दिवौकसां देवानां विमानानां शतैः संकुलं व्याप्तं नभोऽभूत् ।। ४ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गोपिमण्डलमण्डित इत्यत्र, **उत्तरोत्तरेति** । उत्तरोत्तरक्षणसम्बन्धिभिरित्यर्थः । **पूर्वपूर्वेति** । पूर्वपूर्वक्षणसम्बन्धीत्यर्थः ।। ३ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदेवाभिनयेन दर्शयति-रासोत्सव इत्याद्यक्षरचतुष्टयाधिकेन सार्द्धेन । तासां मण्डलरूपेणावस्थितानां द्वयोर्द्वयोर्मध्ये एकैकरूपेण प्रविष्टेन कृष्णेन कण्ठे गृहीतानामालिङ्गितानां गोपीनां मण्डलैर्मण्डितः शोभमानो रासोत्सवः सम्प्रवृत्त इत्यन्वयः । 'एवं तस्य बहुरूपदर्शने रसाभासः स्यात्' इत्याशङ्क्याह—यमिति । यं कृष्णं सर्वाः स्त्रियः स्वस्वनिकटस्थं मामेवासावाश्लिष्टवानिति मन्येरंस्तेन । ननु 'एकस्य कथं तथा प्रवेशः ? सर्वसन्निहितत्वे वा कुतः स्वैकनिकटत्वाभिमानस्तासाम् ?' इत्याशङ्क्याह—योगेश्वरेणेति । योगः अचिन्त्यशक्तिर्माया तस्या ईश्वरेण नियन्त्रा । तन्मायामोहेन तासां तथाभिमान इत्याशयः ।। ३ ।। यदा रासोत्सवः सम्प्रवृत्तस्तावत् तत्क्षणमेव तद्दर्शनौत्सुक्येन व्याकुलमनसां सस्त्रीकाणां देवानां विमानशतैर्नभः सङ्कुलं सङ्कीर्णं बभूवेत्यन्वयः ।।४।।

अन्वितार्थप्रकाशिका

रासोत्सव इत्यादि ।। यं मन्येरन्नित्यन्तं चतुरक्षराधिकं सार्द्धम् ।। यं कृष्णं सर्वाः स्त्रियः स्वस्वनिकटस्थं मामेवासावाश्लिष्टवानिति मन्येरंस्तेन तासां मण्डलरूपेणावस्थितानां द्वयोर्द्वयोर्मध्ये एकैकरूपेण प्रविष्टेन योगेश्वरेण अचिन्त्यशक्तिना बहुरूपेण कृष्णेन कण्ठे गृहीतानामुभयतः आलिङ्गितानां गोपीनां मण्डलैर्मण्डितः शोभमानो रासोत्सवः संप्रवृत्तः । गोपीतिवृत्तिगतस्यापि औचित्याद्विशेषणयोग आर्थिकः । अत्र एको मध्ये कर्णिकावत्स्थितो हरिः वेगनृत्यवशाद्द्विद्विगोपीमध्ये प्रतीतोऽभूत् इति केचित् । रूपबहुत्वेन तथेत्यन्ये गोप्यश्चैवममंसत । कयाचिन्नाट्यविद्यया गोप्यादिषु स्वतुल्यबहुवेशादिरूपतया बहुत्र भाति अस्ति तु ममैव निकट इति मध्यकेन्द्रे तु राधायुतः कृष्ण इति प्राहुः ।। ३ ।। यं मन्येरन्निति पूर्वान्वयि । नभ इति ।। यदा रासोत्सवः सम्प्रवृत्तस्तावत् तत्क्षणमेव तद्दर्शनौत्सुक्येन अपहृतात्मनां व्याकुलमनसां सस्त्रीकाणां देवानां विमानशतैर्नभः संकुलं संकीर्णं बभूवः । अत्र ब्रह्मादीनामौत्सुक्यादि कृष्णनृत्यांश एव नतु रहस्यविलासे दासत्वेनायोग्यत्वात् । तद्योषितां तु अयोग्यत्वाभावात् सर्वत्रैव । अत एव रासे पुंसां दिवि कृष्णदर्शनमेव न गोपीदर्शनं योगमायया आवरणात् इति ज्ञेयम् ।। ४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गोपीनां मंडलैर्वृन्दैर्मण्डितः शोभितः द्वयोर्द्वयोर्मध्ये प्रविष्टेन एकेन योगानां असंख्यैश्वर्याणां ईश्वरेणा कृष्णेन कंठे गृहीतानां तासां गोपीनां रासोत्सवः संप्रवृत्तः याः स्त्रियः य श्रीकृष्णं स्वनिकटं यथा मन्येरन् तथा अत्रायं सग्रहः यर्हि विंशतिः गोप्यस्तर्हि च चत्वारिंशद्गोप्यस्तर्हि विंशति प्रकारः कृष्ण एवमनेकप्रकारैरूह्यं तत्र सर्वत्र द्वेगोप्यौ एकः कृष्णः एवं रीतया ज्ञातव्यमिति कृष्णेन तु तासां कंठग्रहणमेव नतु बद्धबाहुत्वमिति बोध्यम् ।।३।। दिवौकसां विमानशतं संकुलं नभ आसीत् ।। ४-५ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाभिनयेन दर्शयति रासोत्सव इत्यादिना नभस्तावदित्यतः प्राक्तनेन ग्रन्थेन ।। रासोत्सव इति ।। यं श्रीकृष्णं, स्त्रियः सर्वा गोप्यः, स्वनिकटं स्वसमीपस्थं, मन्येरन् मामेवायं शिलष्टवानिति मन्येरन् , तथाभूतेन तेन श्रीकृष्णेनैव कण्ठे गृहीतानामुभयत आलिङ्गितानां, तासां मण्डलरूपेण स्थितानां गोपीनां, द्वयोः द्वयोः मध्ये प्रविष्टेन योगेश्वरेण कृष्णेन, गोपीनां मण्डलेन मण्डितः,

रासोत्सवः, संप्रवृत्तः। तत्रायं विवेकः। कृष्णदक्षिभागस्थितायाः कृष्णकृतं दक्षिणांसग्रहणं कृष्णवामभागस्थितायास्तेन कृतं वामस्कन्धग्रहणमिति। नन्वेकस्य कथं तथा प्रवेशः सर्वसंनिहिते तस्मिन् वा कथं स्वनिकटवर्त्तित्वमात्राभिमान इति शङ्कानिवृत्त्यै योगेश्वरेणेति विशेषणं दत्त, ततोऽचिन्त्यविविधविचित्रशक्तिना बहुरूपतामापन्नेन तासां स्वस्वनिकटवर्त्तित्वं जनयता चैवंविधमैश्वर्यं प्रदर्शितमिति गूढोऽभिसंधिः। तथा च वक्ष्यति। 'कृत्वा तावन्तमात्मानं यावतीर्व्रजयोषितः' इति ॥ ३ ॥ यमिति ॥ यं मन्यरन्निति पूर्वश्लोके संगृहीतं, ततो नभ इति। यदा रासोत्सवः संप्रवर्त्तित इति शेषः। तावत्तत्क्षणमेव, औत्सुक्यतिभृतात्मनामौत्सुक्यव्याप्तमनसां, सदाराणां सस्त्रीकाणां, दिवौकसां देवादीनां, विमानशतसंकुलं विमानशतैः संकीर्णं, नभ आकाशं, बभूवेति शेषः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

रासोत्सव इति : १०.३३.३.

कुण्डलोत्प्रभगण्डकोधिकमण्डनोऽल्पशिखण्डकैर्मण्डितोऽसमकाण्डजोपाधिहिण्डनादृत-भण्ढधीः।
दण्डितोरगचण्डिमा बहुखण्डितासुरमुण्डकः पण्तिोऽवनिमण्डलेऽवतु मण्डलीकृतताण्डवः ॥ ९ ॥
यज्जागरान्त्यशयनादि-मकालवृत्त्योरज्ञातलोकपदयो-र्निजरूपभाजोः।
उल्लासनं विषयनिर्विषयोभयेड्य श्रैशं श्रुतीरितमभूदिह सावकाशम् ॥ १० ॥
वाक्चित्ताविषयत्वतो न विषयः सद्वस्तुवृत्तेर्घटः सन्नित्याद्यखिलानुभूतिविषयत्वान्नाप्यवेद्यं प्रभुः।
अन्यत्तद्विदितादथो अविदिताच्छ्रुत्यर्थमेवं स्फुटीचक्रे रासरसेऽबलाद्वितययोर्मध्ये कृतात्मस्थितिः ॥ ११ ॥
दृश्यते त्वग्र्यथा बुद्धयाऽनग्र्यया तु न दृश्यते। श्रुत्यर्थोऽयमभूद्व्यक्तोऽत्र तथाऽनुभवाद् द्वयोः ॥ १२ ॥

यं मन्येरन्निति : १०.३३.४.

यदङ्घ्रिस्पर्शोऽपि त्रिदशशिरसामप्यसुलभः स सर्वस्वीयाङ्गैः कलयति हि गोपालवनिताः।
विचिन्त्यैवं देवास्तदखिलवधूवृन्दमपि तत् प्रकामं तद्युक्तं समर्जान विमानाश्रितमिति ॥ १३ ॥
के देवाः कस्तदीशोऽप्यथ च तदबलाः काश्च तद्योनिजाद्या द्रष्टुं स्तोतुं प्रवेष्टुं स्फुटसकलकलं रङ्गमन्योन्यसङ्गम्।
ब्रह्मा शंभुश्च शेषो बत किमु बहुना तत्प्रिया सा रमाऽपि यं दृष्ट्वा मौनभाजो मुकुलितनयनाः स्वान्तरङ्गे निदध्युः ॥ १४ ॥

कृष्णप्रिया

गोपी मण्डल से अनेक विध मण्डित रासमहोत्सव का समारम्भ हुआ, उस मण्डल में दो दो गोपीजनों के मध्य में विराजमान योगेश्वर भगवान् श्रीकृष्ण ने अपने दो करकमल एक गोपीजन के कण्ठ में पधराए जिससे प्रत्येक गोपी जी को यह लगा कि प्रियतम श्याम सुन्दर मेरे पास है। जब यह रास महोत्सव हो रहा था तब दर्शनादि आनन्द पाने के लिए समुत्कण्ठित देव वृन्द अपनी देवनाङ्गनाओं के साथ सैकड़ों विमानों से ब्रजमण्डल में आ पहुँचे जिससे आकाश मण्डल विमान मण्डल से मण्डित बना ॥ ३-४ ॥

ततो दुन्दुभयो [1]नेदुर्निपेतुः पुष्पवृष्टयः। जगुर्गन्धर्वपतयः सस्त्रीकास्तद्यशोऽमलम् ॥ ५ ॥
वलयानां नूपुराणां किङ्किणीनां च योषिताम्। सप्रियाणामभूच्छब्दस्तुमुलो रासमण्डले ॥ ६ ॥

कदमक्षमा

अन्वयः—ततः, दुन्दुभयः, नेदुः, पुष्पवृष्टयः, निपेतुः, सस्त्रीकाः, गन्धर्वपतयः, अमलम्, तद्यशः, जगुः ॥ ५ ॥ रासमण्डले; सप्रियाणाम्, योषिताम्, वलयानाम्, नूपुराणाम्, च-किङ्किणीनाम्, तुमुलः, शब्दः, अभूत् ॥ ६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्तस्य भगवतः श्रीकृष्णस्यामलं निर्मलं यशो जगुरिति ॥ ५ ॥ सप्रियाणा कृष्णसहितानाम। तुमुलः संकीर्णः ॥ ६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः रासोत्सवोपक्रमानन्तरम्। तद्यशः कृष्णस्य गोपीनां च यशः—अहो श्रीकृष्णवैभवमहो गोपीभाग्यमित्येवं रूपम्। पुष्पवृष्टिस्तु रंगस्थलीमार्दवार्थेति ॥ ५ ॥ "वलयः कण्ठरोगे ना कङ्कणे पुंनपुंसकम्" इति मेदिनी। "नूपुरः पादभूषणे, किंकिणी

---

[1] खात्पेतुः-विज.।

क्षुद्रघंटिका" इति कोशः । 'तुमुलो रणसंकीर्णे' इति मेदिनी ॥ सप्रियाणाम् स कृष्णानाम् । अत्र चकारेण तत्रानद्धसुषिरतुमुलान्यपि संगृहीतानि । एषां चकारेणोक्तत्वादप्राधान्याद्वलयादिवाद्यानाच्छादकत्वं ध्वनितम् ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तेभ्यो दिवौकोभ्यः । किम्वा तदनन्तरं स्वयमेव नेदुः दिव्यत्वात्महामङ्गलोत् सवस्वभावाच्च । एवमग्रेऽपि आदौ दुन्दुभीनां नादो मङ्गलार्थः स्वस्ववर्गसम्मेलनार्थश्च । नितरां पेतुः निशब्देन वृष्टयः इति बहुत्वेन च रङ्गस्थल्यां पुष्पास्तरणं किल जातमिति बोध्यते । स्त्रीभिरप्सरोभिः सपत्नीभिश्च सहिता इति सर्वेषामेव तदेकनिष्ठतोक्ता न तिष्ठति मलो यस्मादित्यमलमिति तेषामपि तदानीं सर्वदुर्वासना निरस्ता ॥ ५ ॥ एवं देवकृतोत्सवमुक्त्वा रासयोग्यं वाद्यगीतादि वक्तुमादौ वाद्यमाह । वलयानामिति । किङ्किणीनां काञ्च्यादिवर्त्तिनीनां योषितामिति । योषित्त्वेन स्वभावत एव वलयादिसद्भावः सूचितः । स प्रियाणामिति । तासां प्रीत्यर्थं तावत्तया प्रकाशमानस्य श्रीभगवतोऽपि तावद्वलयादिशब्दोऽभिप्रेतः । रासेन यन्मण्डल मण्डलीबन्धस्तस्मिन् ॥ ६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं देवकृतोत्सवमुक्त्वा रासयोग्यं वाद्यगीतादि वक्तुमादौ वाद्यमाह—वलयानामिति । किंकिणीनां काञ्च्यादिवर्त्तिनीनां योषितामिति । स्त्रीत्वेन सामान्यत एव वलयादिसद्भावो न तु रासार्थं भूषणत्वेन ग्रहणादिति बोध्यते, पूर्वं गृहेभ्यो निर्गमे तासां तदपेक्षणात्, सप्रियाणामिति तासां प्रीत्यर्थं तावत्त्वमिव गतस्य श्रीभगवतोऽपि तावद्वलयादिशब्दोऽभिप्रेतः रासेन यन्मण्डलः मण्डलीबन्धः, किंवा रसस्येदं रासं यन्मण्डलं तस्मिन्, यद्वा, रससमूह इत्यर्थः ॥ ५ ॥ भगवान् सर्वैश्वर्यशोभाभरसम्पन्नोऽपि तत्र रासमण्डलेऽत्यन्तं शुशुभे, स्वतोऽशेषशोभाचरमकाष्ठां गतस्यापि ताभिः शोभातिशयं पूर्ववद्दृष्टान्तेन साधयति—मध्य इति । हैमानां हेमनिर्मितानां हेमवर्णानां वा, यथा महामरकतमणेरपि हेममणिमध्यवर्त्तितयैव शोभाधिका स्यात्तथा तस्यापि प्रियजनाश्लेषेणैवाधिका शोभा स्यादित्यर्थः । तत्र हेतुः—देवकीसुत इति भक्तवात्सल्येन देवक्यां जातत्वात्, प्रियजनविषयकप्रेमभरविस्तारणेनैव शोभाभरसम्पत्तेरिति भावः । देवकी यशोदेति पूर्वं लिखितमेव । अन्यत्तैर्व्याख्यातम् । यद्वा, महामरकत इत्येकत्वं वस्तुतो भगवत एकत्वस्य, किंवा वेणुवादनार्थं मध्यवर्त्तिनोऽभिप्रायेण, अत्र केचिदाहुः—सहजेन्द्रनीलमणिवर्णोऽप्यसौ नृत्यगतिकौशलेन युगपदिव प्रत्येकं कण्ठग्रहणादिना ताः सर्वा व्याप्य भ्रमणात्, तासां सुहेमगौरीणां कान्तिच्छटासम्पर्कादनतिश्यामलमरकतमणिवर्णताप्राप्त्या महामरकत इत्युक्तमिति, ततश्च नृत्यशक्तिविशेष एव, न तु कोऽपि भगवताविशेष इति दिक् ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत इति । दुन्दुभयो दध्वनुः सस्त्रीकाः गन्धर्वश्रेष्ठा अमलं शृण्वतां वदतां च पापहरं तस्य भगवतः यशो जगुः ॥ ५ ॥ वलयानामिति । सप्रियाणां श्रीकृष्णसहितानां योषितां ये वलयादयस्तेषां शब्दस्तुमुलः सङ्कीर्णो बभूवेत्यर्थः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सप्रियाणां सकृष्णानाम् । अत्र चकारेण तत्रानद्धशुषिरतुमुलान्यपि संगृहीतानि । एषां चकारेणोक्तत्वादप्राधान्याद्वलया दिवाद्यानाच्छादकत्वं ध्वनितम् ॥ ६ ॥

रसिकाह्लादिनी-टीका

तन्मध्ये पुष्पवृष्टीगीतवाद्याधिकारिणां प्रमत्ततामाह । ततो रासप्रारम्भे जगन्मङ्गलसूचिकाः दुन्दुभयो नेदुः नृत्योत्साहोद्दीपकादिवैश्वर्यादिमहानादं चक्रुरिति । आधिकारिकैर्मोचिताः पुष्पवृष्टयो निपेतुः, तालगतिसमाप्तिसमकालमेव नितरां नैरन्तर्येण पेतुः, गन्धर्वपतयो गन्धर्वमुख्या अधिकारिणः तद्यशो जगुः, सस्त्रीसहायाः, अनेन श्रीकृष्णगाने गन्धर्वगानस्य साहित्यं सहायित्वमुद्दीपकत्वं च सूचितं गोपीगाने तत् स्त्रीणां गानस्य साहित्यं साहायित्वमुद्दीपकत्वं च सूचितम् । तद्यशो तासां तस्य च यशः कीदृशम् अमलं कामादिवासनानिरसनसमर्थम् अत एव रासोत्सवादिदर्शनेन विषयवासनानिरासोऽपि सूचितः । तत्तद्दर्शनं न दोषयेति भावः । किं च तत्कालोपयोगिसजातीयपदार्थपूर्वप्रवेशस्य रसोद्दीपकत्वं न विजातीयप्रवेशस्येति ध्वनितम् ॥ ५ ॥ एवं आकशस्थगन्धर्वादिकृतवाद्यादिकमुक्त्वा गोपीमण्डलमध्य एवान्तरङ्गानि रसोपयोगीविचित्रवादित्राण्याह वलयानामिति । योषितां गापीनां बलयानां शब्दोऽभूत् । अनेन हस्ताभिनयादिगतभेदस्य बलशब्दोत्पत्तिजनकत्वं सूचितम् । नूपुराणामिति पादन्यासगतिभेदस्य नूपुरध्वन्युत्पादकत्वं सूचितम् । किङ्किणीनामिति कटिचालनभेदस्य किङ्किणीध्वन्युत्पादकत्वं सूचितम् । अग्रे वक्षति च "पादन्यासैर्भुजविधुतिभि"रिति । एवमूर्द्ध्वाधो मध्यभागेषु अन्तरङ्गवादित्रशब्दस्य रसविशेषोद्दीपकत्वं सूचितं इति । स प्रियाणामिति प्रियस्योपसर्जनत्वं वलयादिवाद्येषु तासामेव प्राधान्यात् । रासमण्डल इति रसस्याभिव्यक्तिर्यस्मादिति रास एतादृशे मण्डले गोपीमण्डले, यद्वा रसस्योदयो यस्मान्नृत्यविशेषात् स रासस्तस्य मण्डले मण्डलाकारेण बन्धेन, यद्वा रसानां समूहो रासस्तस्य मण्डले प्रदेश इति । तुमुलरसङ्कीर्णे अत एव कुंचिताक्षशब्दानां नृत्योपयोगित्वं तथा वत्तादि शब्दानां तत्र लयात् पृथक्त्वेनानुपलक्षत्वं यथा दूरस्थानामन्येषां मतान्तरभेदग्रहणं न भवति तथा तुमुलो बभूवेति ॥ ६ ॥

विशुद्धरसदीपिका

अथ चेतनानां का वार्त्ता जडानामपि रसावेशो जात इत्याह । तत इति । तदनन्तरं विमानयानानां रसावेशवैवश्ये जाते सति दुन्दुभयः स्वयमेव नेदुः । तादृशतालबन्धादिसंबद्धतयैव जगर्जु रित्यर्थः । पुष्पवृष्टयश्च स्वयमेव निपेतुः, तथा गन्धर्वा दिव्यगायनास्तेषां पतयः पालका रागविशेषास्त एव मूर्त्तिधराः सस्त्रीका इति सपरिकरास्ते च गोविन्दलीलामृते दर्शिताः विस्तरभिया न लिखिताः तद्यशः रासलीलायशो जगुः न तिष्ठति मलं कामवासना यस्मादित्यमलं स्वभावविमलं वा शुद्धप्रेमविलासादिति भावः, अथवा क्रियाविशेषणमिदम् अमलं यथा भवति तथा जगुरित्यर्थः । कामकथोपदेशेन कामविजयख्यापनादिति भावः ॥ ५ ॥ एवं चातिवैवश्येन समाजे स्थगितप्रायेऽप्यभ्यासपाटवप्रभावेण यथावदेव रासस्थितिर्जातेत्याह । वलयानामिति । सप्रियाणामिति तासामेव योषितां प्राधान्यं सूचितं रासे यन्मण्डलं मण्डलीबन्धस्तस्मिन् तुमुलः समस्वरतालादिः, नत्वसंमिलित इत्यर्थः स्पष्टमन्यतः अयं स्थिरो दर्शितः ॥ ६ ॥

श्रीरामनारायणकृता भावभावविभाविका

तत्र नभसि जातमुत्साहं वर्णयति । ततो दुन्दुभय इति । "परमा वा एषा वाक् या दुन्दुभा" विति श्रुतेर्यतो दुन्दुभिनादस्य मङ्गलत्वं तत आदौ मङ्गलार्थं दुन्दुभयो नेदुः । मङ्गलानां च मङ्गलं जगन्मङ्गलमङ्गलात्मनेत्यादिना मङ्गलमङ्गलभगवतो मङ्गले मङ्गलार्थं मङ्गलान्तरापेक्षाभावेऽपि रवेः पूजने दीपवत्तदुपपत्तिः दुन्दुभय इति वचनं प्रभृत्यर्थे तदादीनि वाद्यानि देवानां छविदर्शने प्रहृतात्मतया देहानुसन्धानाभावाद्रासोत्सवोत्साहेन तन्महन्मङ्गलसम्बन्धेन गङ्गानिविष्टजलान्तरस्य गङ्गात्ववन्मलत्वनिष्पत्तये वा भगवतो योगिजनमनो विहारेऽनाहतध्वनिवत् स्वयमेव नेदुः, तथा निपेतुः पुष्पवृष्टय इत्यत्रापि देवानां विगतानुसन्धानतयैव तत्कर्तृकवर्षणमनुक्त्वा "नित्यो नित्यानाञ्चेतनश्चेतनानामिति" श्रुत्या चेतनचेतनाभगवत्सन्निधानेन लब्धचेतनानां पुष्पाणां भगवत्तत्सखीगणोत्फुल्लिताङ्गपुष्पमिलनजातोत्साहतया भगवतं गोपीनां चाङ्गसङ्गतवृन्दावनद्रुमलतापुष्पेर्ष्यया वोत्प्लुत्योत्प्लुत्य स्वत एव भगवत्सम्मुखप्रवृत्तिमतां वृष्टयोनितरां सविस्तरास्तरणरूपतया पेतुः । यद्वा सुरद्रुमनिपतितपुष्पवृष्टिवत्तेषां सुरद्रुमत्वापन्नानां सुराणां सुमनांस्येव सुमनांसि भगवन्मुखचन्द्रमद्भुतमनः सुरदर्शनात्तत्समागमोत्साहेन बहुरूपेणोत्फुल्लितानि अपरिमिततया तद्वन्नभसि संमातुमनर्हाणि सुमनोवृष्टिरूपतया निपेतुः तत्र वृष्ट्याधिक्यस्य निशब्देनैव बोधनाद्वृष्टय इति बहुवचनं तु तत्तद्वर्णसुमनसां वृष्टिभेदाभिप्रायेण तत्र कानिचित्सुरसुमनांसि सत्त्वात्मकतया शुक्लानि कानिचित्कृष्णध्यानेन तद्रूपतया कृष्णानि कानिचिदनुरागरञ्जितान्यरुणानि कानिचित्पीतवसनलसनानि पीतानि कानिचित्तु हरिहृतानि हरितानि कृष्णयशः सुरभिवासितान्यतिसुरभीणीति विभागः । कानिचित्तु तत्तदुत्साहेनोद्भ्रम्यच्छविचकिततया गतिभग्नानि सुखमग्नानि तदङ्गलग्नानि रोमपुलकतयोल्लसितानि तथा गन्धर्वपतयश्च सस्त्रीकास्तदमलं यशो जगुरित्यत्राप्ययमेवाशयः न मलं विद्यते यस्मात्तथाभूतामलयश उत्साहेनैव गतमलहृदयहृद्रागरूपतया तद्रागप्रवाह एवोद्गतः तत्र रागे तानावतानान्येव प्रमप्रवाहतरङ्गाः तानगतमूर्च्छना एव तन्निमग्नमनसां पुनर्निर्गमासां पुनर्निर्गमासम्भवादावर्ताः तद्रोमपुलकं तद्रागसुरसरित्प्रवाहलब्धरसतीरभूमितनुरोमद्रुमोत्थानमित्याद्यूह्यम् ॥ ५ ॥ एवं रासानुरूपसुरसमाजवाद्यगाने निरूप्यान्तरङ्गतयान्तरङ्गवाद्यमाह । वलयानामिति । अत्र रासे उपर्यधोमध्ये च समानवाद्यध्वनिरपेक्षितः तत्रोपरि नृत्ये करचालनेन स्वपतिगुणगानबहुमणिवलयतया प्रकाशिततन्वा स्वालयकरपद्मनिवासितया पद्मया तद्गुणगानवत् मधुरशब्दोद्भवेनोपरि शब्दोल्लासतया नृपसुरपतिपद्मादिपदन्यासिनां चरणाश्रितपरमहंसानां राजहंसशिशूनामिव पदकञ्जाश्रितानां शुभपदन्यासतद्गुणगणनवन्नृत्यपदन्यासे तद्वासिनां मणिनूपुराणां भुवि ध्वनिः पूरं एवं मेरुसुरनीलाद्रिशृङ्गनिवसितविविधविबुधतन्नाममनुमननवत्कनकेन्द्रनीलाभवृहदुच्चहारसखिहारिनितम्बोद्वासिनीनां किङ्किणीनां नृत्यकटिचालनवादनेन मध्ये नादप्रसादस्तथाच रासमण्डले पुनर्मण्डलीभूय नर्तने सप्रियाणां प्रियेण कृष्णेन निगुणेनापि गुणीभूतेन राजमानानां तद्योषितां गोपानां ये वलयादयस्तेषां शब्दस्तुमुलः स्वध्वनिमाधुर्यविगुणसौष्ठवसुरवाद्यादिगुणपराभवेन महानभूदभवदित्यर्थः । यद्वा वलयानां शब्द इति रासगतवाद्यध्वनिनिरूपणं सप्रियाणां योषितां शब्द इति तासामनशब्द वर्णनं ज्ञेयम् ॥ ६ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

तावत्तत् क्षणमेवौत्सुक्याकृष्टचेतसां सस्त्रीकाणां देवानां विमानशतैः संव्याप्तनभ आसीदिति शेषः । स्वर्गसम्बन्धिनृत्यगीतादिकं तेषां तदानीन्तुच्छमभूदिति सूचनाय दिवौकसामित्युक्तं रसान्तरव्यग्रतानिरासाय सदाराणामित्युक्तम् । ननु भगवल्लीलां द्रष्टुमधिकाराभावात्कथं तत्र प्रवृत्ता इत्याशङ्कानिवृत्त्यर्थमुक्तमौत्सुक्येति तत्रापि यावत्तेषां दर्शनाय स्थितं तावदेव तेषां दर्शयामास । भगवानिति द्रष्टव्यं देवा अपि न केवलं कौतुकद्रष्टार एव बभूवुरपितु रासक्रीडापरिकरतां ययुरित्याशयेनाह । ततस्तदनन्तरं देवैर्वादिता दुन्दुभयो नेदुस्तथा तैरेव क्रियमाणाः रङ्गाधिष्ठानदेवतापूजार्थं च पुष्पाणामास्तरणार्थं वृष्टयो निपेतुः । नानाविधानां पुष्पाणां भिन्ना वृष्टय इति द्योतनाय बहुवचनं ततो गन्धर्वपतयो गानाधिकारमुख्या विश्वावसुप्रमुखा जगुः । भगवान् श्रोष्यतीति

मत्वा तत्पतयो जगुरित्याशयः तत्रापि सस्त्रीकाः प्रेमाविष्टत्वादव्यग्रचित्ता इति भावः। अत्रोदितां भगवल्लीलामवलोक्य न तेषां भगवति विषयित्वबुद्धिरासीदित्याशयेनाह। तस्य तादृशक्रीडायां निविष्टस्य भगवतोनिर्मलं यश इति तथा च तद्दर्शनं शुद्धबुद्धीनां तेषां मलनिवर्त्तकमभूदिति भावः ॥५॥ एवं वाह्यवाद्यादिकमुक्त्वा नृत्यमध्ये रसोपयोगिवादित्राण्याह। वलयानामिति। तत्राप्युपरि योषितां वलयानाम् अधो नूपुराणां मध्ये किङ्किणीनां शब्दो रासमण्डले तुमुलः संकीर्णाऽभूत् तत्रापि प्रियेण श्रीकृष्णेन संवर्त्तमानानां तथा च तत्कृपया न कस्यापि कृष्णविश्लेष आसीदिति भावः। चकारेण सङ्ग्रहीतस्य करतालादिशब्दस्याप्राधान्यं व्यज्यते ॥ ६ ॥

रास-रहस्यम्

र० टी०—"परमा वा एषा वाक् या दुन्दुभावि"ति श्रुतेः, यतो प्रणवाख्य दुन्दुभिनादस्य मंगलत्वं श्रूयते अत आदौ दुन्दुभयो नेदुः श्रुतिशिरोत्थप्रणववृत्त्या "मंगलानां च मंगल"त्वेनानहतध्वनिरूपेण स्वान्तरमेव नादश्रवणमभूत्, पुष्पवृष्टयः निपेतुः इन्द्रियाधिष्ठितदेवतानां "नित्यो नित्यानां चेतनश्चेतनानामि"ति श्रुत्या परमात्मसन्निधानेन पुष्पाणां "ब्रह्मविदाप्नोतिपरम्।" "ब्रह्मवादे ब्रह्मैव भवति।" इति श्रुतिकुसुमानां विदुषां चेतसि नैरन्तर्येणाभिमुख्यतया वारं वारं पतनलक्षणं वषणमभूत, सस्त्रीकाः गन्धर्वपतयः इन्द्रियाधिष्ठातृदेवाः स्वस्ववृत्तिभिः सहिताः, तत्तस्य परमात्मनः अमलं न मलं कार्यकारणभावो विद्यते यस्मिन् तत्तथाभूतममलं यशः "सत्यं ज्ञानमानन्दं ब्रह्म।" इत्यादि श्रुतिबोधितं स्वरूपलक्षणं जगुः व्यक्तमवदन् ॥ ५ ॥ रासमण्डले "रसो वै सः।" इति श्रुत्या रस एव रासः, तस्य मण्डले आश्रयभूते विद्वच्चेतास सप्रियाणां प्रियः परमात्मा तत्सहितानां योषितां वृत्तीनां, कथम्भूतनाम्? वलयानां वलयाकारेण स्थितानां, नूपुराणां नू नूनं निश्चयेन, पुराणां हृदयपुरवसतीनामन्तर्मुखवृत्तीनां, किंकिणीनां किंकिणीवत् मधुरशब्दकारिणीनां, तुमुलः तुश्च तुलाविद्या, मुश्च मूलाविद्या च, तयोर्लयं करोतीति तुमुलः, शब्दः दीर्घप्रणवात्मकः नाद अभूत् अभवत् ॥ ६ ॥

गूढार्थदीपिनी

सप्रियाणां कृष्णसहितानाम योषितां किङ्किणीनां क्षुद्रघण्टानाम्। तुमुलो रणसंकीर्णे इति मेदिनी। मिश्रित इत्यर्थः ॥६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्य श्रीकृष्णस्य अमलं यशः श्रोतृणाञ्च पापहम् ॥ ५ ॥ प्रियेण श्रीकृष्णेन सहिताः सप्रियास्तासां वलयादीनां च तुमुलः संकीर्णः शब्दोऽभूत् ॥ ६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तद्यशः कृष्णयशोऽमलं निर्दोषम् ॥ ५ ॥ सप्रियाणां पतिसहितानां योषितां वलयानां नूपुराणां चरणभूषणानां किङ्किणीनां कटितटादिगतक्षुद्रघण्टानां रासमण्डले तुमुलः परस्परमेलनजः शब्दोऽभूत् ॥ ६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो नृत्यारम्भे यद्द्रव्यं तज्जातमित्याह। तत इति आदौ दुन्दुभिवादनं "परमा वा एषा वाक् या दुन्दुभौ" विश्रुतेः ततः प्रथमतः पुष्पवृष्टिर्मङ्गलार्था पुष्पाञ्जलिः प्रसिद्धः आगतो रसः तदधिष्ठाता वा पूज्यत इति नानाविधानां पुष्पाणां भिन्नावृष्टय इति बहुवचनं ततो गानं साधारण जातमित्याह। जगुर्गन्धर्वपतय इति। भगवान् श्रोष्यतीति उत्तमैरेव गानं गन्धर्वपतयो विश्वावसुप्रभृतयः तद्य धिकारिण इति नटानामिव तेषां दर्शनं न दोषाय अन्यथा भगवद्धस्तस्थितेन्द्रादीनामपि दोषत्वं स्यात् "अर्थद्रव्यविराधेऽर्थो बलीयानि"ति न्यायात् तथाषि तेषामन्यथा बुद्धिः सम्भाव्येतेति विशेषणमाह। सस्त्रीका इति। वैषयिकदोषव्यावृत्त्यर्थमाह। अमल तद्यश इति। तद्धि मलनिवर्तकम् अतो न तासां तेषां वा तत्कालोपयोगिपदार्थादतिरिक्तो भाव उत्पद्यते ॥ ५ ॥ एवं बाह्यगीतवाद्यादिकमुक्त्वा नृत्यमध्ये रसोपयोगिवादित्राण्याह। वलयानामिति। स्थानत्रये हि वादित्राण्यपेक्ष्यन्ते नीचस्थाने भूमाविव मध्ये उपरि च तथैव तालभेदाः। अतोऽत्रापि उपरि वलयानां शब्दः अधो नूपुराणां मध्ये किङ्किणीनामन्योन्याबद्धबाहव एव मध्ये मध्ये हस्तद्वयं योजयन्तीति बलयानां शब्दः अथवाग्रे शब्दोत्पत्त्यर्थं प्रकारं वक्ष्यति पादन्यासैरिति सप्रियाणां कृष्णसहितानामत एव सर्वलास्य सम्पत्तिः सर्वासां भगवत्संबन्धार्थं चकारात् अन्येऽपि कूजितशब्दाः मुखशब्दाश्चोक्ताः सर्व एकोभूय तुमुलो भूत्वा यथा दूरस्थानामवान्तरग्रहणं न भवति तथा सति किं स्यादत आह। रासमण्डल इति रसानां समूहमण्डले यथानधिकारित्वेन शूद्रस्य वेदश्रवणे तदध्येतुर्मन्त्रस्य च शक्तिहासः शूद्रे च पासंभवस्तथैतथैतद्भक्तातिरिक्तानामेतच्छ्रवणेऽप्यनधिकारादस्य रसस्यालौकिकत्वोदतच्छ्रवणे मण्डले सवषां रसो गच्छेत् श्रवणे सति तदन्वेषणपरत्वं स्यात्तत्तेषामेवानिष्टकरमिति तदेव पापरूपम् ॥ ६ ॥

श्रीसुबोधिनी–सारः

ततोऽनंतरं दुन्दुभयो नेदुः पुष्पवृष्टयः पेतुः सस्त्रीकाः साप्सरसो गंधर्वपतयोऽमलं शुद्धं तस्य हरेर्यशो जगुः ।।५।। सप्रियाणां श्रीकृष्णसहितानां योषितां स्त्रीणां किंकिणीनां क्षुद्रघंटिकानां वलयानां नूपुराणां रासमंडले तुमुलः संकीर्णः शब्दोऽभूत् ।।६।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततस्तदा रासारम्भे देवैर्वादिता दुन्दुभयो नेदुः, तैः कृताः पुष्पवृष्टयश्च पेतुः । 'नानाविधानां पुष्पाणां भिन्ना भिन्ना बहुशो वृष्टिर्जाता' इति ज्ञापयितुं बहुवचनम् । सस्त्रीकाः स्त्रीभिः सहिताः गन्धर्वपतयः भगवत्समाजे साधारणगन्धर्वगानस्य रसविशेषाजनकत्वात्तत्र योग्या विश्वावसुप्रभृतयो गन्धर्वश्रेष्ठास्तस्य भगवतः अमलं श्रोत्रादिजनानां सकलमलनिवर्तकं यशो जगुरित्यन्वयः ।। ५ ।। एवं बाह्यगीतवाद्यादिकमुक्त्वा नृत्यमध्ये एव रसोपयोगिवादित्राण्याह—वलयानामिति । सप्रियाणां कृष्णसहितानां योषितां गोपीनां ये वलयादयः तेषां तुमुलः सङ्कीर्णः शब्दो रासमण्डले अभूत् । वलयानि हस्तभूषणानि । नूपुराणि पादभूषणानि । किङ्किण्यः कटिभूषणानि ।। ६ ।।

अन्वितार्थप्रकाशिका

तत इति ।। ततस्तद्रासारम्भे देवैर्वादिता दुन्दुभयो नेदुः दुन्दुभिनादश्चायं मङ्गलार्थं च स्ववर्ग्यमेलार्थं च । तैः कृताः पुष्पवृष्टयश्च निपेतुः । सस्त्रीकाः स्त्रीभिः सहिताः गन्धर्वपतयो विश्वावसुप्रभृतयः अमलं तस्य हरेर्यशो जगुः ।। ५ ।। वलयानामिति ।। रासमण्डले सप्रियाणां कृष्णसहितानां योषितां गोपीनां वलयानां नूपुराणां किङ्किणीनां तुमुलः संकीर्णः शब्दोऽभूत् ।। ६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रियैः श्रीकृष्णरूपैः सहितानां योषितां तद्वलयादीनां च तुमुलो महान् शब्दोऽभूत् रासलक्षणमुक्तं तोषणीसारे नटैर्गृहीतं कण्ठानामन्योन्यात्तकरश्रियां नर्त्तकीनां भवेद्रासो मंडलीभूय नर्त्तनमिति ।। ६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ।। ततः, देवानामिति शेषः । दुन्दुभयः नेदुर्दध्वनुः देवमुक्ता इति शेषः । पुष्पवृष्टयः निपेतुः । सस्त्रीका अप्सरोभिः सहिताः, गन्धर्वपतयो गन्धर्वश्रेष्ठाः, अमलं शृण्वतां वदतां च पापहरं तद्यशो भगवतो यशः, जगुरगायन् ।। ५ ।। वलयानामिति ।। सप्रियाणां श्रीकृष्णसहितानां, योषितां गोपीनां, वलयानां कङ्कणानां, नूपुराणां मञ्जीराणां, किङ्किणीनां क्षुद्रघाण्टकानां च, शब्दः, रासमण्जले तुमुलः संकीर्णः अभूत् सम्बभूव ।। ६ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततो दुन्दुभय इति : १०.३३.५.

रासारम्भे यदा सन्मुरज-मुरलिका-झल्लरी-कम्बु भेरी-वादित्रा तोद्य-वीणा-पटह-घनघनोज्जृम्भिगम्भीरनादाः ।
मन्ये श्रीशेन साकं सुखदरसभुजामद्भुतं गोपिकानां भाग्यं दृष्ट्वा व्यधात्तज्जडमपि किमलं स्तात्रमेतन्मिषेण ।। १५ ।।

पुष्पवृष्टय इति :

आलोक्य भूरिसुरतोत्सवभावमेनं कश्चित् प्रजारहिततां न वदत्वमूषाम् ।
इत्यात्मभावितधियो विबुधास्तदा ताः सन्तानशोभिततनूः सुमतो व्यधुः किम् ।। १६ ।।
राका निशा निखिलगोपसुताश्च राका राके शरञ्जितकरा वनभूमयश्च ।
ताः पुष्पवृष्टिवशतः खलु पुष्पवत्योऽभूवन् क्षमं तदतिचित्रमिदं तु शुद्धाः ।। १७ ।।
सुमान्यमुञ्चंस्त्रिदशास्तदानीं विलोक्य रासोत्सवमद्भुतश्रियम् ।
न केवलं किन्त्ववधानशून्या निजानि भूयः सुमनांस्यपि प्रभौ ।। १८ ।।
सुरता सुलता च पुष्पवत्यभवत्तादृशि सौरतात्सवे । नहि चित्रमदोऽद्भुत त्विद सुरजा वृक्षचयश्च किन्नराः ।। १९ ।।
कल्पसन्तानवर्षाणि यत्राऽगुरणुरूपताम् । युक्तं तत्रात्सवे कल्पकोटिस्त्रुटिसमाऽभवत् ।। २० ।।

जगुर्गन्धवति :

सुरतोत्सवसभृतां प्रवृत्तिं भृशमैशीमवलोक्य सा सुखस्था । सुरताऽत्र जगौ क्षमं तदेतद्यदिह सौत्यखिलो निजेष्टदं हि ।। २१ ।।
केचित्कृपां निरुपमामवदन् कृपाब्धेः काश्चिज्जगुर्निरुपमं भुवि भाग्यमासाम् ।
अन्योन्यमेव मतिरागदमन्तरङ्गेऽगायंस्तदानघयशस्त्रिदशाः सकान्ताः ।। २२ ।।

वलयानामिति : १०.३३.६.

स्वाङ्के स्वात्मजवज्जडा अपि वयं ह्याभिः समुद्वाहिता वाचालान्यपि पादसेवनविधौ मुक्तानि चाभिर्वयम् ।
हस्तैः स्वैर्वयमाभिरुन्नततराण्यालम्बितानीत्यलं काञ्ची-नूपुर-कङ्कणान्यपि जगुः शब्दच्छलाद्धन्यताम् ।। २३ ।।
निःसीमेशदयोदयाज्ज्वलरसं संवीक्ष्य रासोत्सवं नृत्यन्त्यप्सरसः स्तुवन्ति बिबुधा गर्जन्ति वाद्यादयः ।
अस्माभिर्यदि मौनमाश्रितमिहैतन्नित्यसम्बन्धिभिस्तत्काऽन्या हि कृतघ्नतेति रवतस्तद् भूषणान्यस्तुवन् ।। २४ ।।
भगवत्सङ्गिसङ्गस्य माहात्म्यं मुनिनेरितम् । पश्यतास्मासु तत्स्पष्टमित्यूचुस्ते स्वशब्दितैः ।। २५ ।।
विविधभोगविशेषजुषोऽप्यहो वयमिहैव सुमुक्तपदाङ्किताः । सकलमान्यविदेहजयोऽर्थतः कृत इतीव जगर्जु रिमे रवैः ।। २६ ।।
व्यापाराऽल्पदशामधर्म इति संभातोऽपि योऽस्मिन् यदि श्रीनाथ प्रियकृद्भवेदतितरां तद्यातशङ्कं जनैः ।
कार्यस्तत्र निदर्शनं स्फुटमिमाः सत्साक्षिसल्लग्नकास्तत्र स्मो वयमित्यलङ्कृतिचयाश्चक्रुर्नु घण्टाध्वनिम् ।। २७ ।।
पादजात-कृशमध्य-संशयावासिनोऽपि वयमद्य मापतेः । सच्छ्रुतीडयवचसस्त्वनुग्रहादेवमूचुरिति कि नु ते रुतैः ।। २८ ।।
सज्जघनशोभिनोऽपि हि सुरतोत्सवदाः सहंसकविलासाः । वयमिह सुवर्णकलिताः श्रीश इव स्मो भुवीति जगुरखिलाः ।। २९ ।।
वय हि सुरतोल्लसद्युवति पञ्चशाखिश्रियो वयं चरणशोभिनो वयमनन्तसम्पच्छ्रिताः ।
पृथक् पृथगितीव ते विशदयन्त एवाशयं निजं निजरवैस्तदा किमु सुरोपहासं व्यधुः ।। ३० ।।
दृष्ट्वा प्रसङ्गं सुरतोत्सवस्य परेण पुंसा व्रजबालिकानाम् ।
तास्तत्पतिप्राप्तपदाश्च शब्दैराकारयंस्तानिह कि नु भूषाः ।। ३१ ।।
दृष्ट्वाऽतनुसुरतोत्सवसमुत्सुकं माधवं त्वलङ्कृतयः । युक्तं तद्वृद्धिकृतावासन् वाचलतोक्तिभाजस्ताः ।। ३२ ।।
वयं सदाशयस्थिता वयं पदैकसेविनो वयं च मध्यभूषणान्यनाङ्गसङ्गिनो वयम् ।
तदस्तु कीदृगप्यहो चरित्रमेतदीयमित्वरं स्वरैरजल्पि तैरनल्पकल्पितैर्मिथः ।। ३३ ।।
तनुपादकलावभासभाजो वयमेषा परिपूर्णशोभिनीति ।
इह साधु विहाय नोऽनयाऽसौ रमते वेत्यलमुज्जगुश्च भूषाः ।। ३४ ।।
अहं सकलहंसकोऽस्म्यहमियं च काञ्ची पदा ममास्ति विदितेह सद्वलयभूषणाद्येति किम् ।
अलङ्कृतिचयो निजामनघतां मिथो दर्शयंश्चकार सुरतोत्सवे प्रतिपदं श्रुतीड्यध्वनिम् ।। ३५ ।।

कृष्णप्रिया

रास महोत्सव के अवसर पर दुन्दुभि नाद होने लगा, देव लोकों से पुष्पों की वर्षा होने लगी, अपनी अङ्गनाओं के साथ गन्धर्वपति श्री गोविन्दजी का निर्मल यश गाने लगे ।। ५ ।। राजन् । रासमण्डल में प्रियतम और प्रियतमाओं के करकमलता के कंकण चरणों के नूपुर कांची कलाप के किंकिणियों का ब्रह्माण्ड व्यापी भारी शब्द हुआ ।। ६ ।।

[1]तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः । मध्ये मणीनां हैमानां महामारकतो यथा ।। ७ ।।

पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ।

स्विद्यन्मुख्यः कबररशनाऽग्रन्थयः[2] कृष्णवध्वो गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ।। ८ ।।

कर्दमक्षमा

अन्वयः—तत्र, ताभिः, देवकीसुतः, भगवान् , हैमानाम् , मणीनाम् , मध्ये, यथा, महामरकतः (तथा) अतिशुशुभे ।।७।। पादन्यासैः, भुजविधुतिभिः, सस्मितैः, भ्रूविलासैः, भज्यन्मध्यैः, चलकुचपटः, स्विद्यन् , मुख्यः, कबररशनाग्रन्थयः, तम् , गायन्त्यः, कृष्णवध्वः, मेघचक्रे, तडित, इव, ताः, विरजुः ।। ८ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

महामरकतो नीलमणिरिव हैमानां मणीनां मध्येमध्ये ताभिः स्वर्णवर्णाभिराश्लिष्टाभिः शुशुभे गोपीदृष्ट्यभिप्रायेण वा विनैव मध्यपदावृत्तिमेकवचनम् ।। ७ ।। स यथा ताभिः शुशुभे तथा ता अपि तेन विरेजुरित्याह । पादन्यासैरिति । भुजविधुतिभिः करचालनैर्भज्यमानैश्चलद्भिः कुचैश्च पटैश्च गंडलोलैर्गंडेषु चंचलैः । स्विद्यन्मुख्यः स्विद्यति स्वेदमुद्गिरन्ति मुखानि यासां ताः कबरेषु रशनासु च ग्रन्थयो दृढा यासां ताः कबरान्रशनाश्च शैथिल्यभिया दृढं बद्धा नृत्यन्त्य इत्यर्थः । यद्वा तेषु तासु चाग्रन्थयः

---

१. तत्रापि । २. रशनाग्र–श्रीधर. वंशी. जीव. वीर. विज. विश्व. रा. ध. शुक. सु. ।

नृत्यवशाच्छिथिलग्रन्थय इत्यर्थः। तत्र नानामूर्तिः कृष्णो मेघचक्रमिव तास्तु बहुविधास्तडित इव स्वेदस्तुषार इव गीतं गर्जितमिव चेति यथासंभवमूह्यम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र रासक्रीडायाम्। ताभिः गोपीभिः। देवकीसुतो यशोदानन्दनः। हैमानाम् हेम्न इमे हैमाः। इदमणि टिलोपेन साधु। हेमकारेण रचिताः। यद्वा—हैमा हिमगिरिसंभूताः पीतमणयः। गोपीनां दृष्ट्यभिप्रायेण मध्ये इति पदमावर्तनीयं, गोपीभिर्बहुरूपदर्शनात्। सर्वमध्यकर्णिकास्थस्यैकत्वान्मध्यपदावृत्तिर्न कार्येत्याह—वा विनैवेति ॥ देवकीसुतः क्षत्रियजातिरपि भगवान् षडैश्वर्यपूर्णोऽपि तत्र गोपजातिस्त्रीणां मध्येऽतिशुशुभे। इन्द्रनीलमणिवर्णोऽपि कृष्णस्तासां गौरकांतिमिश्रणान्मरकतवर्णस्तत्रापि शोभावैलक्षण्यमालक्ष्य महच्छब्दः प्रयुक्त इत्येके। मरकतशब्दोऽयमिन्द्रनीलमणिवाचीत्यपरे। 'महामारकतः' इत्यपि पाठः ॥ ७ ॥ अन्योन्यशोभातिशयमाह—स यथेति। स कृष्णः। ताभिः गोपीभिः। ताः गोप्यः। तेन कृष्णेन। पादानां न्यासैर्वक्रस्थानादिविक्षेप, विशेषैः। अतिपरिश्रमसाध्ये कर्मणि दृढग्रन्थीनामपि विमोको भवतीत्यत आह—वद्ध्वेति। इत्यथ इति—इह नञ्समासे यञ्प्राशस्त्ये बोध्यः। शिथिलग्रन्थोऽप्रशस्तग्रन्थयोऽल्पग्रन्थयो वा "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥" इति हरिभर्त्र्युक्तेः। 'कबरी केशविन्यासः' इत्यमरः। 'रशना कांचिजिह्वयोः' इति विश्वः। क्वचित् 'कबरं केशजूटायाम्' इत्यपि। तत्र दृष्टान्ते। मेघचक्रं मेघमंडलम्। ताः गोप्यः। यथासंभवं यथायथम्। कृष्णवध्व इत्यनेन कात्यायनीव्रतकर्त्र्यो गांधर्वविधिना विवाहिता एव। "परस्परानुरोधेन कन्यायाश्च वरस्य च। गांधर्व इति संप्रोक्तो विवाहः संगमे सति ॥" इति स्मृतेर्भगवति व्यभिचारदोषो नायाति, परकीयासगतेरेव व्यभिचारत्वात्। कुत्रचित्तासां परकीयात्वेन कथनं तु शृंगारातिशयार्थम्। किञ्च, कांतिविशेषद्योतना यैव तडित इति दृष्टान्तो न तु पादन्यासादिविशेषद्योतनाय, तडितामचेतनत्वात्। यद्वा—तडितामिव पादन्यसादो शैघ्रयावर्तनादिप्रकाशाय। 'तड—आघाते' चौरादिकात् 'ताडेर्णिलुक्च' इत्यौणादिक इतिः। धातूनामनेकार्थत्वात् तटन्ति क्षिप्रं तिरोधानं गच्छन्तीति तडितः ॥ यथा ताभिः स शुशुभे तथा तेन ता अपि शुशुभिर इत्याह—पादन्यासैरिति। पादानां न्यासा गीतरसतालानुसारिणः पुनःपुनर्व्यक्तीकृतविचित्रनृत्यगीतयस्तैः। भुजविधुतिभिः अन्योन्यबद्धानामपि भुजानां विचित्रैः कंपनैः। किञ्चान्योन्याबद्धभुजतां त्यक्त्वा कदाचिदतिलाघवतो हस्तकभेदेन करचालनैर्गीतपदार्थाभिनयैः। स्मितसहितैर्भ्रुवां विविधैर्भेदैर्भंगिभिः रसाभिनयार्थं स्वस्वकौशलावधापनार्थं च। तस्मान्मध्यैर्भज्यमानैः स्वभावतः कार्त्स्न्येन नृत्यविवर्त्तनादिना च भंगमिव गच्छद्भिर्मध्यभागैः। चलैः कुचपटैः कञ्चुकोपरितनवस्त्रैः, भगवदुत्थानानंतरं न पुनः संगृहीतैः। कृष्णस्य वध्वो भोग्याः स्त्रियः 'वधूर्जाया स्नुषा स्त्री च' इति नानार्थवर्गः। अत्र वधूशब्दस्य भार्यावाचकत्वे व्याख्यायमाने 'प्रकृतिमगन् किल यस्य गोपवध्वः' इति भीष्योक्त्या विरुध्येत तेन न तथा व्याख्येयम् ॥ कृष्णस्य श्यामसुंदरस्य तदेकाश्लिष्टा गौरांग्यस्तदेकाश्रयतया तदेकभोग्यतया च वध्व इव वध्व इति प्रकृतवैष्णवतोषिणी ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

देवकीसुतस्तत्तया भवत्सुविख्यातो भगवान् सर्वैश्वर्यसर्वशोभाभरसम्पन्नोऽपि तत्र तु रासमण्डले ताभिरत्यन्तं शुशुभे। यद्वा। तत्र यशोदासुतत्वे अत्यन्तं शुशुभे तत्रापि ताभिरत्यन्तं शुशुभे इत्यर्थः। तादृशस्यापि ताभिः शोभातिशयं दृष्टान्तेन साधयति। मध्ये इति। सामान्यविवक्षयैकत्वम्। सर्वेषु मध्येष्वित्यर्थः। अतो मण्डलमध्यस्थोऽप्येकः प्रकाशो ज्ञेयः। स एव हि श्रीराधिकां सङ्गे निधाय वेणुवादनपूर्वकं भ्रमन् सर्वरासमण्डलमत्यर्थं मण्डयति। तच्च क्रमदीपिकाद्युक्तरासान्तरानुसारेण ज्ञेयम्। "इतरेतरवद्धकरप्रमदा गणकल्पितरासविहारविधौ मणिशङ्कुगमप्यमुना वपुषा बहुधा विहितस्वकदिव्यतनुम्। "सुदृशामुभयोः पृथगन्तरगं दयितागलवद्धभुजद्वितय"मिति मणिशङ्कुगतत्वमप्युक्त्वा तदेव पुनर्विशेष्य वर्ण्यते। मणिनिर्मितमध्यगशङ्कुलसद्विपुळारुणपङ्कजमध्यगमित्याद्यनन्तरम्। तरुणीकुचयुक् परिरम्भमिलद्घुसृणारुणवक्षसमुख्यगतिमिति। तथैवोक्तम्। मण्डले मध्यगः सङ्गगौ वेणुनेति। हैमानां हेमविकाराणां मणानां गोलोकतया, मणिवन्निर्मितानां महामारकत इत्यति सामान्यतथैकवचनम्। मेघचक्र इति वक्ष्यमाणात् यथा महामरकतमणेरपि हेममणिमध्यवर्त्तितयैव शोभाधिका स्यात्। तथा तस्यापि प्रियाजनाश्लेषेणैवाधिका शोभा स्यादित्यर्थः। अन्यत्तैः। तत्र महच्छब्दपूर्वः मरकतशब्द इन्द्रनीलमणिवाची ज्ञेयः। यद्वा। तासां सुहेमगौरीणां कान्तिच्छटासम्पर्कादनतिश्यामलमरकतमाणवर्णता प्राप्त्या महामारकत इत्युक्तम् इति। ततश्च नृत्यशक्तिविशेष एव नतु कोऽपि भगवत्ताविशेष इति ॥ ७ ॥ न केवलं ताभिः सोऽधिकं शुशुभे किन्तु तेन ताश्च तथा शुशुभिरे इत्याह। पादेति। पादानां न्यासाः नृत्यगतिभिः भूम्याक्रमणभङ्ग्यस्तैः। भुजानां हस्तानां विशेषेण धुतिभिः हस्तकभेदेन चालनैः यद्यप्यन्योऽन्यवद्धवाहुत्वेन भुजविधुतयो न सम्भवेयुस्तथापि कदाचित्तदर्थमावद्धत्वपरित्यागेनैव। स्मितसहितैर्भ्रुवां विलासैस्तत्तद्रसाभिव्यञ्जकनर्त्तनचातुर्यैर्भज्यमानैः स्वभावतः कार्श्येन विशेषतश्च नृत्यार्थपरिवर्त्तनादिना भङ्गमिव गच्छद्भिर्मध्यभागैः। किम्वा भज्यमानता भङ्गं कौटिल्यमिति यावत्। कुटिलीभवन्मध्यभागैरित्यर्थः। सर्वत्र मुहुरिति मन्तव्यम्। कुचपटाः भगवदुत्थाने सति पुनः पुनः परिगृहीतानि निज-

निजनिजोत्तरीयाण्येव । अन्यत्तैः । अत्र ग्रत्थय इत्येव पदच्छेदो योग्यो नत्वग्रन्थय इति । कृष्णवध्व इत्यादिकं त्वेवं व्याख्येयम् । तं कृष्णं गायन्त्यः ता दृष्टान्तयितव्यवशात् कृष्णस्य तत्तत् प्रकाशचक्र विरेजुः । कुत्र का इव मेघचक्रे तडित इव । ननु मध्ये मणीनामित्यादिप्रोक्तदृष्टान्तो न घटते अदाम्पत्येन तत्तदागन्तुकसम्बन्धात् न त्वयं स्वाभायिकसम्बन्धाभावात्तदेतदाशङ्कयानन्दवचित्र्येण रहस्यमेव व्यनक्ति । कृष्णवध्व इति । तद्वदत्रापि स्वाभाविकादेव सम्बन्धाद्दाम्पत्यमेवेति भावः । अत एव तासामभ्यासविशेषं विनापि तेषु तेषु गुणेषु परम एवोत्कर्षो वर्त्तते ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न केवलं ताभिः सोऽधिकं शुशुभे, किन्तु तेन चात्र शुशुभिरे इत्याह—पादेति । पादानां न्यासा नृत्यगतया भूम्याक्रमेण भंग्यस्तैर्भुजानां हस्तानां विशेषेण धुतिभिर्हस्तकभेदेन चालनैः; यद्यप्यन्योऽन्याबद्धबाहुत्वेन भुजविधुतयो न सम्भवेयुः, तथापि अन्योऽन्याबद्धाभ्यां द्वाभ्यां संहत्यैव, किंवा कदाचित्तदर्थमाबद्धत्वपरित्यागेनैव । यद्वा, अन्योऽन्याबद्धानामपि भुजानां नृत्यगतिभंग्यैव ता बोद्धव्याः; एवमग्रेऽपि सर्व्वं तथैव ज्ञेयमिति दिक् । स्मितसहितैः भ्रुवां विलासैस्तत्तद्रसाभिव्यञ्जकनर्त्तनचातुर्य्यैर्भज्यमानैः स्वभावतः कार्श्येन विशेषतश्च नृत्यार्थपरिभ्रमणादिना भंगमिव गच्छद्भिर्मध्यभागैः पटाः कञ्चुकानि, किंवा श्रीभगवदुत्थाने सति पुनः परिगृहीतानि निजनिजोत्तरीयाण्येव कृष्णस्य श्यामसुन्दरस्य वध्वस्तदाश्लिष्टा गौरांग्यस्तदेकाश्रया इत्यर्थः । तच्च दृष्टान्तेनापि ध्वनितमेव । किंवा कृष्णस्य वध्वः प्रिया इति तत्सदृशतत्तद्वैदग्ध्यादिकं तत्प्रेममोहितत्वञ्च मुक्तमेवेति भावः । अतस्तमेव गायन्त्यः; तत्प्रकारश्चोक्तः श्रीपराशरेण—'कृष्णाः शरच्चन्द्रमसं कौमुदीं कुमुदाकरम् । जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनः ॥' इति विशेषेण रेजुरशोभन्त । तत्प्रेमभर-मौग्ध्य-नृत्यादि-वैदग्ध्ययोरन्योऽन्यं सम्मिलनेन तस्यैश्वर्य्यलौकिकत्वयोरैक्येनेव शोभाभरसम्पत्तेः, तड़ित इवेति दृष्टान्तेनान्योऽन्यशोभया तस्यापि शोभा ध्वनितैव । चक्र इति नृत्यगतिकौशलेन निजशक्तिविशेषेणैव वा नानात्वमिव प्राप्तत्वात् , किंवा मेघानां घटाविवक्षया, अन्यथा सुश्यामत्वाद्यभावेन शोभाद्यभावः, तस्यातिशोभानन्तरं तासामतिशोभावणनं सर्व्वथा परमशोभाचरमकाष्ठागतानामपि रासक्रीड़या शोभाविशेषसम्पत्त्या परमाद्भुतत्वात् ॥ ७ ॥ ततश्च प्रहर्षोद्रेकेण तासां नृत्यगीतविवृद्धिम् , किंवा नृत्यस्य प्राधान्यमुक्त्वा गानस्याप्याह—उच्चैरिति, नृत्यमाना इति । नर्त्तनेऽपि तादृशगानात्तु कौशलविशेषो दर्शितः । गानादिप्रयोजनमाह —रतिः सुरतं प्रेम श्रीकृष्णप्रेम वा, सैव प्रिया यास्तामिति, न चोच्चैर्गानादिना तासां श्रमः शंकनीय इत्याह—कृष्णस्य चित्ताकर्षकस्य परमानन्दघनमूर्त्तेर्वा अभिमर्शेन मुदिता इति गीतस्योच्चैस्त्वं दर्शयति—यासां येन वा गीतेनावृतं व्याप्तम् । यद्वा, यस्य गीतादेर्गीतेन लोक—निबद्धगाथादिनावृतं तदेकरसमयमभूदित्यर्थः । इति तन्माहात्म्यमुक्तम् । अन्यत्तैर्व्याख्यातम् । यद्वा, नृत्येन मानः कृष्णेन सम्मानः,; यद्वा, नृत्ये मानः कृष्णादप्याधिक्येन गर्व्वो यासां ता रक्तकण्ठ्यः प्रेमस्निग्धकण्ठ्य इति गानस्य प्रेमरसमयत्वेन परममधुरत्वमुक्तम् , उच्चैर्गाने हेतुः—रतीति कृष्णेति च । यद्वा, उच्चैः श्रीकृष्णादप्युच्चतया, तथा चोक्तं श्रीपराशरेण—'रासगेयं जगौ कृष्णो यावत्तारायतध्वनिः । साधु कृष्णेति कृष्णेति भावत्तां द्विगुणं जगुः ॥' इति । तत्र हेतुमाह—रक्तेत्यादिविशेषणैस्त्रिभिः । एषां यथाक्रमं हेतुहेतुमत्त्वमूह्यम् । यद्यपि तासामभिमर्शतस्तस्यापि प्रमोदात्तथैवोच्चैर्गानं सम्भवेत् , तथापि रासगेयापेक्षया प्रेमवैवश्येन तदुच्चगीतश्रवणलालसेन वा न तादृक् सिध्येदिति ज्ञेयम् । अन्यत् समानम् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कवररशना ग्रन्थयः कवरेषु रशनासु च ग्रन्थयो यासां ताः ॥ ८–९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्रेति । हैमानां मणीनां मध्ये महामरकत इन्द्रनीलमणिरिव ताभिः स्वर्णवर्णाभिराश्लिष्टस्तत्रातीव शुशुभे गोपीदृष्ट्यभिप्रायेणैकवचनम् एवमुत्तरत्राप्यवगन्तव्यम् ॥ ७ ॥ यथा ताभिर्भगवान् शुशुभे तथा तेन ताश्च विरेजुरित्याह पादन्यासैरिति न्यासैर्विक्षेपैः भुजविधुतिभिः करचालनैः स्मितेन सहितैर्भ्रुवाम्विलासैश्च भज्यमानैर्मध्यैश्चलद्भिः कुचैश्च पटैश्च गण्डेषु चञ्चलैः कुण्डलैश्च उपलक्षिताः स्विद्यन्ति स्वेदमुद्गिरन्ति मुखानि यासां ताः कवरेषु रसनासु च ग्रन्थयो यासाम् । यद्वा तेषु तासु च न विद्यन्ते ग्रन्थयो यासां ताः शिथिलकवरादिग्रन्थिमत्य इत्यर्थः । एवम्भूताः कृष्णस्य वध्वः तं कृष्णं गायन्त्यस्तेन विरेजुः । यथा मेघचक्रे तडितस्तद्वत् तत्र कृष्णो मेघचक्रमिव तास्तु बहुविधास्तडित इव गानं गर्जितमिवेति यथासम्भवमूह्यम् ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तत्रापि रासक्रीडायामपि । यद्वा तत्रापि नभस्यपि रासमण्डले एवं चेत् स प्रियाणामिति पदं पूर्णार्थं लभते । मन्यत्र कृष्णव्यतिरेण प्रियाभावात् अस्मिन्पक्षे प्रियेण बहुरूषं गतेन कृष्णेने सहितानां तत्रापि शब्दसामर्थ्यात्पारवश्यात् शिक्षार्थं नभस्यपि रासक्रीडा प्रवृत्तेति प्रतर्क्यं हैमानां हिमवत्संभूतानां मणीनां माणिक्यानां मध्ये मरकतः श्याममणिरिव अनन्तरत्नप्रभवस्येत्युक्तं

रत्नजातीनामुत्पत्तिर्हिमवद्गिरेरिति प्रसिद्धं यद्वा हैमानां हेमाकारसम्भूतानां तत्रत्यानां मणीनां निर्मलत्वेन कान्त्यतिशयात् ।। ७ ।। तत्र नृत्यप्रकारं कथयति । पादेति । पादन्यासैर्वक्रस्थापितपादविक्षेपविशेषैः भुजानां विधुतिभिः कम्पनविशेषैः भ्रूविलासैः भ्रूभङ्गैः चलकुचतटैरिति केचित् कबरेत्यादौ श्लथदिति पदमध्याहार्यं श्लथन्त्यः कबररशनाग्रन्थयः बन्धविश्लेषाः यासां तास्तथा यद्वा कबररशनानामग्रन्थयः अबन्धनानि यासान्ताः मुच्यमानकबरकाञ्च्य इत्यर्थः । स्तनितरसनाग्रन्थय इति केचित् । स्तनष्टन इति धातुः कृष्णवध्वः कृष्णपरिग्रहाः कृष्णयुक्ताः गोपस्त्रिय इति वा भावैः पुरुषान् बध्नन्तीति बध्वः "समस्तभावैः खलु बन्धनं स्त्रिय" इत्युक्तेः तं कृष्णं मायन्त्यो या एवं विधास्ताः मेघचक्रे मेघमण्डले तडित इवेति कान्तिविशेषद्योतनार्थं दृष्टान्तोपादानं ननु पादन्यासादिविशेषप्रकाशनार्थम् अचेतनत्त्वात्तडितां यद्वा यत्तडित इति तडितो यथा प्रकाशनाऽप्रकाशने तथा पादविन्यासाद्यावत्तनमिति दर्शनाय तड गताविति धातोः तडन्ति क्षिप्रतिरोधानं गच्छन्तीति क्षिप्रतिरोधानं गमनशीलार्थे इत्प्रत्ययः ।। ८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

देवकी पूर्ववद्यशोदैव ।। ।। ७–८ ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ नृत्य–गीत–वाद्य-बन्ध-तालादि–समेतं स्त्रीबहुमण्डलनृत्यं रास इति स्थिते मण्डलमुक्तम्, बन्धोऽप्युक्तः । वाद्यञ्च वलयानामित्यादिना चोक्तम् । सम्प्रति ताल-गान-नृत्यानि दर्शयति पादन्यासैरित्यादि । कृष्णवध्व इति गोपवधूत्वं प्रसिद्धं वारयति । तं कृष्णं गायन्त्यो विजहुर्ननृतुरित्यर्थः । कुत्र का इव ? मेघचक्रे तड़ित इव, तड़ितो यथा मेघचक्रे नृत्यन्ति । मध्ये वर्तमानस्य भगवतोऽभितः प्रसृमराणां श्याममहसां चक्रे मण्डलमध्ये मण्डलाकारेण मण्डलाद्बहिर्भवितुमशक्ततया घनीभूते श्यामलिमनिमेघचक्रत्वारोपः, स च वाक्यार्थेन गम्यः, प्रकरणगम्यश्च,—शब्देनानुपात्तत्वात् । पादानां न्यासैस्तालशब्दानुकारेण भुवि सशब्दपादाघातैर्भुज विधूतिभिर्गतिविशेषेण भुजदोलैर्मूर्च्छना काले तालत्यागानुकूलभुजकम्पैर्वा । अन्योन्यावद्धबाहुलेऽपि तालत्यागसमये भुजयोः कम्पनानन्तरं पुनर्बन्ध इति क्रमः ; एवं विधनृत्येनापि मण्डलस्य भङ्गस्तिर्यक्ता वा भवतीति नानुसन्धेयम्,—यथा स्थानस्थिति कौशलात् । भ्रुवां विलासैस्तालानुकृत्या भ्रुवां विक्षेपैः । कीदृशैः ? सस्मितैः स्मितसहितैर्भज्यद्भिरिव मध्यैर्भज्यन्मध्यैर्गति विशेषतालत्यागकालीन–तनुलतापूर्वार्द्धधुननेन भङ्गाशङ्कास्पदैर्मध्यैः, तावतायासेनापि चलैः कुचानामेव पटैः, न तु कुचैः, तथा तावतायासेनापि गण्डलोलैरेव कुण्डलैः विशेषणे तृतीया । स्विद्यन्ति मुखान्येव यासाम्, न तु सर्वाङ्गानि, अश्रान्तत्वाद्वराङ्गनात्वाच्च । कवरेषु रसनासु ग्रन्थयो यासाम्,—तथा विधायासेनाप्यशिथिलत्वात् । गायन्त्य इति गानानुकूलं वाद्यं वीणादिकमपि बोद्धव्यम्,—योगमाया सम्पाद्यमानत्वात् । यद्यप्येतच्छुद्धाङ्गिकमेव नृत्यम्, तथापि वाद्यस्यावश्यकम् । अत्र भगवान् द्रष्टैव । गोप्यः समं भगवता ननृतुरिति पश्चादेव सह–नृत्यम् । इदं तु मण्डलनृत्यम् । तच्च द्विविधम्—स्वकर्त्तृकभ्रमिकञ्चेति । आद्यञ्च द्विविधम्—सव्यमपसव्यञ्च; द्वितीयम्—चक्रोपधिकम्, तच्च प्रतिलोममनुलोमम् । चक्रं चेद्वामतो भ्रमति, तदा दक्षिणतो नर्तक्यो भ्रमन्ति, तथा दक्षिणतश्चेच्चक्रम् तदा वामतस्ता इति क्रमः । किन्तु तत्र भ्रमिश्चक्रभ्रमित एक नृत्य तु यथा स्थानम् । अत्र तु भ्रमिश्च स्वकर्तृकनृत्यञ्चानियतस्थानमिति । यदुक्तम्—'स्थिरमस्थिरमप्येतदद्विविधं रासमण्डलम् । स्थिरं स्थूलविशेषस्थमस्थिरंचक्रश्रयम् । स्थिरं भ्रमिः कर्तृगता भवेत् सव्यापसव्ययोः । अस्थिरे चक्रजा सा च प्रतिलोम्यानुलोम्यभाक् । यथास्थानस्थितं तत्र नृत्यं तद्भ्रमितः पुनः । नाना स्थानमिवाभाति नृत्यकर्त्र्यश्च योषितः ।।' इति ।। ७ ।। गायन्त्य इत्युक्तस्य गानस्य प्रकारमाह—उच्चैरित्यादि । नृत्ये मानः पूजा यासां ताः रक्तकण्ठाः सुकुमारत्वादरुणकण्ठाः रक्तं रागकदम्बम् जातित्वादेकवचनम् कण्ठे यासां तत्कालरागपरिवर्तनसामर्थ्यवत्यः । रतिर्नृत्यगीतविषया श्रद्धा तस्याः प्रियाः कृष्णस्याभिमर्शः स्पर्शः, आश्लेष इति यावत्; तेन मुदिता गानकौशलमालोक्य क्षणे क्षणे तदालिङ्गिता इत्यर्थः । एवम्भूताः सत्य उच्चैर्जगुर्नृत्यन्त्य एव । यद्यस्य तानस्य गीतेनेदं पूर्वं पूर्वं सङ्गीताचार्यैर्ब्रह्मादिभिः कृतं गीतमावृतमाच्छन्नं तुच्छीबभूव । किं वा यद् गीतेन विश्वमिदमावृतम्, अतः परं नान्यद्गीयेत कैश्चिदित्यर्थः ।। ८ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पादन्यासैरित्यादि । कृष्णवध्वो न तु गोपवध्वः, एतेनागूढ़ा एव तथा ननृतुः । तं कृष्णामेव गायन्त्यः मेघचक्रे तड़ित इव विरेजुः, मध्यवर्तिनः श्रीकृष्णस्य नृत्यविशेषभ्रमणकौशलेन चक्राकारस्य तेजः पटलस्य मेघचक्रत्वम्, तासाञ्च मध्ये मध्ये कृष्णतेजसा छन्नत्वात् मध्ये मध्ये कृष्णतेजोऽपि पराभूय स्वतेजसा द्योतमानत्वात् तड़ित्वम् । स्विद्यन्मुख्यं एतावत्यपि श्रमे स्विन्नानि मुखान्येव न तु सर्वाङ्गानि यासाम्, तथा कवर—रसनासु ग्रन्थयो यासाम्, नतु ग्रन्थिशैथिल्यम्, शिक्षान्यासप्रकटनेन परिश्रमकृत–दोषराहित्यं सरस्वतीरहस्यम् । पादन्यासैस्तालशृङ्गानुकारेण सशब्दैर्भुविपादघातैर्भुजाविधूतिभिर्गति विशेषनिष्पादितैर्भुजदोलैस्तालमूर्च्छनायाञ्च मूर्च्छना व्यञ्जकैर्भुज कम्पैर्वा । सस्मितैर्भ्रूविलासैः । भज्यन्मध्येरिति—क्षीणतया नृत्यायासेन भजद्भिरिव मध्यैः, लुप्तोत्प्रेक्षा । एतावत्यपि परिश्रमे निःश्वासबाहुल्याभावात् चलै कूटानांपटैरिव न तु चलैः कूटैः पटैश्च ।

गण्डलोलैः कुण्डलैर्गण्डेषु विश्वक्स्थितानामेव कुण्डलानां लोलता ग्रीवामुखदोलनानां लाघवम् रहस्यम् , विशेषणे तृतीया ॥ ७ ॥ यद्गीतेनेदमावृतमित्यादि । अयमर्थः—ताभिर्यद्गीतं तेन तेनैव सङ्गीतशास्त्रकारैर्नानाप्रवन्धाः कृताः, तैरेवेदं भुवनत्रयमावृतमिति । पुरं तादृशं नासीदिति भावः । नृत्यमाना इति नृत्ये श्री कृष्णाकृतं मानं पूजा यासां ताः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देवकीसुतः क्षत्रियजातिरपि भगवान् षडैश्वर्यपूर्णोऽपि तत्र गोपजातिस्त्रीणां मध्ये अतिशुशुभे इन्द्रनीलमणिवर्णोऽपि कृष्णस्तासां गौरकान्तिमिश्रणान्मरकतवर्णस्तत्रापि शोभावैलक्षण्यमालक्ष्य महच्छब्दः प्रयुक्त इत्येके । मरकतशब्दोऽयमिन्द्रनीलमगिवाचीत्यपरे । महामारकत इत्यपि पाठः ॥ ७ ॥ यथा ताभिः स शुशुभे तथा तेन ता अपि शुशुभिरे इत्याह । पादन्यासैरिति । पादानां न्यासाः गीतरसतालानुसारिण्यः पुनः पुनर्व्यक्तीकृतविचित्रनृत्यगीतयस्तैः । भुजविधुतिभिरन्योऽन्यबद्धानामपि भुजानां विचित्रैः कम्पनैः । किञ्च । अन्योन्यावद्धभुजतां त्यक्त्वा कदाचिदतिलाघवतो हस्तकभेदेन करचाळनैर्गीतपदार्थाभिनयैः स्मितहसितैर्भ्रुवां विविधैर्भेदैर्भङ्गिभिः । रसाभिनयार्थं स्वस्वकौशलावधापनार्थञ्च । भज्यन्मध्यैः भज्यमानैः स्वभावतः कार्श्येन नृत्यविवर्त्तनादिना च भङ्गिमिव गच्छद्भिर्मध्यभागैश्चलैः कुचपटैः कञ्चुकोपरितवस्त्रैर्भगवदुत्थानानन्तरं पुनः प्रतिसंगृहीतैः कृष्णस्य वध्वः भोग्याः स्त्रियः । वधुर्जाया स्नुषा स्त्रीचेति नानार्थवर्गः । अत्र वधूशब्दस्य भार्यावाचकत्वे व्याख्यायमाने प्रकृतिमगन् किल यस्य गोपवध्व इति भीष्मोक्त्या विरुद्धयेत तेन न तथा व्याख्येयम् । कृष्णस्य श्यामलसुन्दरस्य तदेकाश्लिष्टा गौराङ्ग्यस्तदेकाश्रयतमा तदेकभोग्यतया च वध्व इव वध्व इति प्रकृतवैष्णवतोषणी ॥ ८ ॥

रसिकाह्लादिनी-टीका

नन्वेवं नृत्यमानासु तासु मध्ये चेत् कृष्णस्योपसर्जनं तत्तर्हि शोभा न्यूनत्वं स्यादिति आशंक्य पूर्वशोभाधिक्यमाह तत्रेति, भगवानपि स्वैश्वर्य्यमवगणय्य तत्र रासमण्डले ताभिर्यासां ऋणोवास्ते सुवर्णवर्णाभिरित्यधिकं शुशुभे । तासां संसर्गेण शोभादर्शनजं सुखं स्वयमनुभूतवान् । आत्मने पदेन सूचितं ऐश्वर्यशोभात आधिक्यं न विवक्षितं किं तु प्रथमं बाहुप्रसारेत्यादिना वनविहारशोभाभराधिक्यं सूचितम् । सजातीयादेवाधिक्यं सम्भवति न विजातीयादिति नियमः । यद्वा भगवान् भगो भाग्यं तद्वान्, हेतुगर्भविशेषणमाह देवकीसुतः "द्वे नाम्नी नन्दभार्याया यशोदा देवकीत्यपि । अतः सख्यमभूत्तस्या वसुदेवस्य भार्ययेति" । यशोदासुत इत्यर्थः । अतो वात्सल्येन लाल्यमानस्य तस्यातीव पुष्टत्वात् बह्वीषु रससञ्चारणसामर्थ्यं द्योतितम् । यद्वा विशेषणद्वयेन धीरलालित्यधर्मभाक्गुणयुक्तत्वं सूच्यते तदुक्तं रसार्णवे "पितृभ्यां गमितोऽत्यन्तं नैश्चिन्त्यं प्रेयशीवशः । विदग्धो नवतारुण्यो धीरलालित्यधर्मभाक्" । नैश्चिन्त्येन हेतुना विलासभरः सूचितः । तत्रानुरूपं दृष्टान्तमाह—मध्ये मणोनामिति । हेमनिर्मितानामङ्गुल्याकाराणां मणोनां मध्ये महामारकतो मध्ये नायक इव तादृशोऽपि उभयतः कण्ठालिङ्गिताभिरिति । भूषणभूषितानां तासां सम्पन्नमन्तरेण शोभाभरासम्पादनादिति । केवलो मध्यनायक सुवर्णमणि व्यतिरेकेणशोभते तद्वत् । एकवचनेन स्वरूपैक्यं भगवतः अचिन्त्यशक्तेरिति सर्वसंन्निहितत्वं, मध्य इति पदेन मण्डलमध्यस्थोऽप्येक एकः । यथा महामारकतस्य च्छटाः सुवणमणिषु मध्ये प्रविशन्ति अद्भुतचमत्कारित्वेन शोभां विशेषयन्ति तद्वदुन्नेयम । आचार्य्यैरपि व्याकृतं गोपीदृष्ट्यभिप्रायेण स्वैकनिकटत्वमानं मध्यपदानावृत्तिरेकवचनं च तथा चोक्तं क्रमदीपिकायां—माणिनिर्मितमध्यगशङ्कुलसद्विपुलारुणपङ्कजमध्यगतमि"त्युपक्रम्य "तरुणीकुचयुक्परिरम्भमिलतघुसृणारुणवक्षसमुक्षगतिमिति" । विल्वमङ्गलोक्तिस्तु "अङ्गनामङ्गनामन्तरं माधवो माधवं माधवं चान्तरेणाङ्गना । इत्थमाकल्पिते मण्डले मध्यगः संजगौ वेणुना देवकीनन्दन" इति । गोपीदृष्ट्यभिप्रायेण स्वसंनिहतत्वम् । क्रमदीपिकोक्तपङ्कजमध्यगतामितिवत् । मण्डलमध्यस्थितिरेकेन स्वरूपेणेति । यथाकाशस्थितस्य चन्द्रस्य भुवि युगपत्सर्वलोचनगोचरत्वमिति तथा मनः समाधीयतामिति, न च भगवता प्रवेश इति किं तु योगमायया एव सम्भवात् अन्यथा रसाभासप्रसङ्गात् । ऐश्वर्यस्य तु पूर्वमेवोपेक्षितत्वात् किं च यथा प्राप्तिलक्षणया सिद्ध्या योगिनां सर्वत्र प्रचारः सर्वसन्निहतत्वम् । किंच न तथात्रापि मन्तव्यं योगेश्वरेणेत्युक्तत्वात् "तर्काप्रतिष्ठानादिति" व्याससूत्रम् किं च "अतर्क्याः खलु ये भावाः न तांस्तर्केण योजयेत्" इति धर्मण त्वतर्क्यपरिछिन्नत्वं धर्माणामपरिछिन्नत्वमिति न किंचिदसमञ्जसमिति ॥ ७ ॥ एवं रसाधिकरणत्वेन तासामुत्कर्षं निरूप्य तस्याप्युत्कर्षं निरूपयन्ति तथोक्तं—"शृङ्गारे नायिका श्रेष्ठा रसाधिकरणं यतः । माधवत्वेन सौन्दर्यवारिधि स परिछद" इति । इदानीं न केवलं ताभिः स शुशुभे किंतु ताऽपि तेन विरेजुरित्याह पादन्यासैरिति, पादानां चरणानां न्यासाः नृत्यगतिभेदास्तै भुजानां विधुतयः सर्वे हस्तकाभेदास्तैः । नन्वन्योन्या बद्धबाहुभिरित्युक्तेः हस्तकादिभेदः कथं सम्भवेत् । तत्र समाधानं तत् स्थानापरित्यागेनैव हस्तकभेदसम्पत्तेरिति भावः । यद्वा अन्योन्या बद्धबाह्वानामेव नृत्यविशेषगतिभेदादेव विधुतयः कम्पायमानाः बोधव्या इति, सस्मितैः स्मितसहितैः भ्रुवां विलासैः नृत्यगतिव्यञ्जकैरुद्ध्वाधोभागतिर्य्यक् प्रसरणरूपैः कृष्णमनोरञ्जकैर्भज्यद्भिः पादन्याससाहचर्यात् भङ्गमिव प्राप्नुवद्भिः नृत्यगतिवशात्कार्ष्याच्च भङ्गस्योत्प्रेक्षेति । चलैः कुचैः पटैश्च चलेषु वा पटास्तैः । अनेन सर्वावयवानां रसाभिव्यञ्जकं सकम्पत्वमुक्तम् । कुण्डलैर्गण्डेषु लोलैः अनेन सर्वा एव शिरोभेदा उक्ताः । स्विद्यन्मुख्यः स्विद्यन्ति

मुखानि यासां ताः, अनेन रत्याख्यभावस्य सर्वाङ्गपूर्त्या स्वेदरूपेण बहिर्गमनमुक्तमिति। कवरेषु रसनासु च पूर्वदृढग्रन्थयो इदानीमग्रन्थयः सर्वावयवव्याप्तेन रसेन शरीरशैथिल्यात् केशपासे रसनायां शैथिल्यं जातमितिभावः। कृष्णवध्व इत्यनेन तत्साहचर्यात् नृत्यगानांगिकभावोत्पत्तिभरः सूचितस्तमेव गायन्त्यः मानसभावोच्छलेन गाने रसोद्रेकः सूचितः। स्वकलाकौशलेन स्ववैदग्धाभिव्यञ्जकैः नृत्यगानादिभिः विशेषेण रेजुः। तत्र दृष्टान्तमाह मेघचक्रे तडित इव अलातचक्रवद्भ्राम्यन् कृष्णो मेघचक्रमिव लक्षितस्तास्तु बहुधा द्योतमाना तडित इव। तडितो हि बहुकालं दर्शनार्हा न भवन्ति, एता अपि नृत्यगतिविशेषवशादचिरप्रभा इव लक्षिताः। तडितो हि अचिरदर्शना अपि मेघचक्रं शोभयन्ति, मेघचक्रेणापि तासां शोभा भवत्येव। एवं लाघवशक्त्या सर्वसन्निहितत्वेन परित आच्छादिता अपि केनचित्कान्तिविशेषेण मध्ये मध्ये दर्शनगोचरा भवन्ति। एवमन्योन्यं शोभाभरः मध्ये सूचितः। चक्र इति नृत्यगतिभेदबन्धेन निजलाघवशक्त्या च नानत्वमिव प्रतीतमति रासक्रीडायां शोभावैशिष्ट्यं सूचितम् ॥ ८ ॥

विशुद्धरसदीपिका

तत्र स्थिरे रासमण्डले ताभिः श्रीभगवतः शोभाविशेषं दर्शयति। तत्रेति। स्थगिते समाजे भगवान् देवकीसुत इति विशेषणद्वयेन प्रकाशद्वयविशिष्टमेकवस्तु सूचितं तत्राद्यः श्रीराधासहितः सर्वमध्यगो मुख्यतमो भगवत्पदवाच्यः प्रकाशः तथा क्रमदीपिकायाम्—

इतरेतरबद्धकरप्रमदागणकल्पितरासविहारविधौ।

मणिशङ्कुगमप्यमुना वपुषा बहुधा विहितस्वकदिव्यतनुम्। सुदृशामुभयोः पृथगन्तरगं दयितागलबद्धबुजद्वितयम् ॥

इत्यादिना अपरश्च सर्वासां यथोचितमभिलाषपूरकदाक्षिण्यवान्मुख्यतरो देवकीसुताख्य इति विवेकः अन्यथैकेनैव गतार्थत्वे पदद्वयोपादानेऽधिकपदत्वं भवेत्। हैमानां हेमवर्णानां पुष्परागाख्यमणिविशेषसूक्ष्मखण्डानां परितः खचितानां मध्येऽभितः सुवर्णखचितो महामरकतो हरिन्मणिविशेषो यथेति। एवञ्च तासां तयोश्च शोभा दर्शिता द्वयोरैक्यमपि सूचितं यथालङ्कारकौस्तुभे —

राधाभासो मरकतमयीं कुर्वते कृष्णकान्तिम्। कृष्णस्याभा अपि च हरितं कुर्वते धाम तस्याः ॥
स्थाने स्थाने यदि निवसतस्तौ तदा गौरनीला। वेकस्थाने यदि वत तदा तुल्यभासौ विभातः ॥

एवञ्च ताभिरलक्षितत्वमपि साधितम् ॥ ७ ॥ एवं स्थिरास्थिरभेदेन द्विविधो रासो दर्शितः। इदानीं तासां नृत्यादावपि शिक्षाकौशलं दर्शयति। पादेति। मेघचक्रे इति। मेघसदृशे मण्डळ इत्यर्थः। तेन भगवतः स्थिरत्वं सूचितं मेघसादृश्यं च कृष्णवध्व इति तासामेव कर्तृत्वाभिधानं ततश्च तासां नृत्यसुखास्वादाय तेन निजरूवमेवास्तृतमिति सूचितं रङ्गस्य च स्वच्छत्वमपि साधितं तडित इवेत्यङ्गानां सौकुमार्य्यं चाञ्चल्यं सूचितम्। कथम्भूताः पादन्यासैरुपलक्षिताः गानविशेतमानपूरणं पादन्यासेनैव कृतमिति शिक्षाकौशलं तत्र पादन्यासाः नृत्यगतिलालित्येन भूम्याक्रमणभङ्ग्यस्तैः भुजानां विशेषेण धुतिः हस्तकभेदेन चालनं ताभिः स्मितसहितैर्भ्रूविलासैः तत्तद्रसाभिव्यञ्जकभ्रूनर्त्तनचातुर्य्यैः भज्यद्भिः स्वभावतः सूक्ष्मत्वेन नृत्यविशेषेण च मानादिप्रपूरणानुरोधेन परिवर्त्तनाद्भङ्गमिव गच्छाद्भिर्मध्यभागैः। यद्वा कुटिलीभवन्मध्यभागैरित्यर्थः। चलन्तः किञ्चित्कम्पयुक्ताः कुचोपरिवर्त्तमानाः सूक्ष्मपटास्तैः तावतैव मानप्रपूरणादतिवैदग्ध्यं कुण्डलैर्गण्डयोरुपरिलोलैरिति कपोलानां गण्डस्थलस्थानीयताञ्च प्रकल्प्य ळोलतया च तन्नृत्यानुकारः सूचित इति प्रतिव्यक्तिरासव्यूह ऊहितः तत्रोपयुक्तं सात्विकमाह। स्विद्यदित्यादिना स्विद्यन्ति मुखानि यासां ताः तथा देवदत्तस्य गुरुकुलमिति वदन्तर्वर्तिनीं विभक्तिमाश्रित्य स्विद्यन्ति शिथिला इत्यर्थान्तरसंक्रमितं कवराणां रसनानाञ्च ग्रन्थयो यासामित्यतिसौकुमार्यमिति संक्षेपः ॥ ८ ॥

श्रीरामनारायणकृता भावभावविभाविका

अत्र भगवतो गुणभावोक्त्या गुणभावे शोभामान्द्यलक्षणदोषभावं कश्चिन्मन्द आशङ्केतं तद्वारणाय प्रेमशृङ्गारभावपथिगणभाव एव गुणभाव इति दर्शयंस्तत्र भगवच्छोभामाह। तत्रातिशुशुभ इति। अत्रायं भावः। स देवकीसुतोऽपि तत्र व्रजे तच्छोभोपयोगियशोदासुतत्वेच भगवान्षडैश्वर्य्यादिगुणवानपि तत्र रासमण्डले प्रेमवतीनां मध्ये स्वयं शोभमानोऽपि ताभिर्निमित्तभूताभिरतिशुशुभे ऽतिशयितां स्वशोभामाविश्चकार गुणरसज्ञेष्वेव गुणचमत्कारसम्भवात्। यद्वाभिव्यक्तप्रेमवृत्तिप्रतिफलितब्रह्मानन्दवत्स्वयं शोभमानोऽपि ताभिर्मिलित्वातिशुशुभे। यद्वा स्वयं ब्रह्मानन्दात्मकतया कैश्चिन्निवृत्तिपरविविदिषुविद्वज्जनैर्ध्येयज्ञेयत्वेन शोभमानोऽपि ताभिस्तत्र रासमण्डले शृङ्गाररसान्वितपरमानन्दतन्वातिशयेन सर्वविषयिमुमुक्षुविद्वज्जनध्येयज्ञेयतयातिशुशुभे। यद्वा ताभिः शोभमानाभिरतितच्छोभामतिलङ्घ्य ताभ्योऽप्यतिशयेन शुशुभे तत्र दृष्टान्तमाह। मध्ये इति। हैमानां हेमरचितानां कृत्रिममणीनाम्। यद्वा हेमखचितानां मणीनां माणिक्यविशेषाणां तथा चोद्भूतानुरागनृत्यश्रमरोचनादिरागारुण्यव्याप्तगौराङ्गित्वोक्तिः। यद्वा हेमवर्णानां पुष्परागमणीनां मध्ये महान् मारकतो हरितमणिर्यथा तत्र भगवतः श्यामवर्णत्वेऽपि हेमवर्णगोपीतनुमणिप्रभाव्याप्ततया हरितमणि-

रूपत्वनिर्देशः। यद्वा महेतिविशेषणेन समानमारकतजातिव्यावृत्तेन्द्रनीळस्यैव निर्देशो ज्ञेयः, अत्र हैमानां मणीनां मध्ये महामारकतदृष्टान्तोक्त्या सर्वतो गोप्यो मध्य एव कृष्ण इत्येवं मण्डलरचना द्योतिता। यद्वा मण्डलस्य तथात्वेऽपि मध्ये मध्यनायकवदेकरूपाविष्कारः। यद्वा मणीनां मध्ये मध्ये इति वीप्सया मण्डलस्य तथात्वमेव सर्वथैतद्गोपीकृष्णमण्डलस्योरोवस्याकारतया भक्तानामुरोवासेन शोभातिशयो दर्शितः। यद्वा हैमानां स्वतो हेमवर्णानां तथा मध्ये मणीनां शरीरमध्ये दृङ्नखादिरूपा मणयः सर्वाङ्गेषु भूषणरूपमणयो वा यासामित्यलुक् समासः, तासां तद्रचितरासमण्डले ताभिः सह महामरकतः महामराणां ब्रह्मादीनामपि के शिरसि वर्तमानः तेषां सुखं वा यस्मात्तथाभूतो वा महामरकः सार्वविभक्तिकत्वात्प्रथमायां तसिल् स यथावदतिशुशुभे तासां मण्डलगतानां शोभां नभसि निरीक्षमाणानां महामराणां वा शोभामतिलङ्घ्य शुशुभे यद्वा अन्ये सापेक्षाभरा। अयन्तु निरपेक्षामरत्वेन महाभरश्चासावेव कः सुखरूपश्च महामरकतोऽत एवाविनाशिनित्यसुखरूपतया स्वकृपालब्धसुखस्वदारसहकृतदिदृक्षवमरानतिलङ्घ्य शुशुभे रराज महामारकत इति पाठे तु चोर एव चौर इतिवत् मरकत एव मारकतस्तथा च पूर्वोक्ता एवार्था अनुसन्धेयाः। यद्वा महामारो मन्मथमन्मथः सच कः सुखरूपश्चेति तथा॥ ७॥ तदन्वितानां तासां शोभामाह। पादन्यासैरिति। यथैकस्य कृष्णस्निग्धमेघस्य नभोव्यापकस्य मध्ये विद्युदुल्लासेन प्रविभक्ततया बहुमेघचक्रतया भासमानस्य वध्वस्ततस्तडितस्तस्मिन्मेघचक्रे तद्गर्जनानुकूलस्वशब्दं कुर्वन्त्यो राजन्ते तथा मेघचक्रे तडित इव ताः कृष्णवध्वः एकस्य कृष्णस्य श्यामस्निग्धसुन्दरस्य आकाशशरीरं ब्रह्मेति श्रुत्या नभोव्यापकविग्रहस्य मध्ये मध्ये गोपीतनुस्फूर्त्या प्रविभक्तबहुविग्रहतयानेकमेघचक्रवद्भासमानस्य वध्व पट्टमहिष्यो गोप्यस्तं गायन्त्यस्तद्गानमनुसृत्य यथोपयोगस्वरसप्तकाभिनिवेशेन तालगतिमनुल्लङ्घ्य नानारसवृष्ट्यानुकूलविविधमूर्च्छनाद्यन्वितविचित्रतानवितानगानं कुर्वत्यो विरेजुः, तत्र तथा भासमानकृष्ण एव मेघचक्रं हेमवर्णद्युतिमत्यो गोपिका एव तडितस्तद्गतिनृत्यविस्फुरणचाञ्चल्यमेव चपलाचापल्यं गानमेव गर्जनं रसवृष्टिरेव वृष्टिः किम्भूतास्तास्तत्राह। स्विद्यन्मुख्य इति अत्र हरिमुखचन्द्रसन्निधौ तच्चन्द्रमणिगोपीमुखानां सुधास्रावित्वं गम्यते। यद्वा हरिहरिसखिमुखानां केशपट्टिकादावामुक्तादामयुतानां स्वेदवृष्टिस्मितयुक्तत्वेनापूर्वोच्चलितरूपसुधास्वेदवृष्ट्यन्वितभूमिलोकस्थचन्द्राणां स्वतुल्यत्वाभावेन सुधानिधित्वेऽपि तद्वृष्टिशून्यत्वेन व्योमस्थसभगणचन्द्रप्रहासो द्योत्यते। यद्वा व्योमचन्द्रमसं निरीक्ष्य परस्परं मुखविलोकनपूर्वकस्मितस्वेदवृष्टिदर्शनेन तन्मुखचन्द्राणामेव स्वप्रभाविकाशातिशयितसुधावृष्टिः सूच्यते। यद्वा पर्वणि चन्द्रसुधया देवाप्यायनवत् गोपीमुखचन्द्रणां सर्वदेवात्मकदेवदेवकृष्णाप्यायनायामृतवृष्टिर्बोध्यते। यद्वा श्रुतिमुनिमधुपाभिलषणीयपदाब्जमधुमाधवमधुपमुपलभ्य तत्प्रलोभाय गोपीमुखपद्मानां स्वेदमधुस्नावित्वं ज्ञाप्यते। यद्वा हरिमुखसंनिधानसंनिधानजाताह्लादतयानुरागात्मकमध्वात्मना द्रवीभूतस्वहृत्कमलानुकारेण बहिर्निदर्शनं तन्मुखकमलैः क्रियते। यद्वा स्विद्यन्मुख्य इत्युपलक्षणं सर्वाङ्गस्वेदस्य तथा चामितहरिच्छविदर्शनाय दृग्भूताखिलसखीजनरोमच्छिद्रेभ्यः स्वेदभिषेण तद्दर्शनाह्लादानन्दाश्रुद्गम एव गम्यते प्रियसङ्गमे श्रमासम्भवात् पुनः किंभूतास्तास्तदाह। कवररसनाग्रन्थय इति। केषु सर्वे ां शिरःसु वरः श्रेष्ठस्तद्भूषणतया राजमानः सर्वशिरोमणिः कवरः। यद्वा कात्सर्वोत्कृष्टाद्ब्रह्मणोऽपि वरः कवरः। यद्वा कानां सर्वसुखानां वरः श्रेष्ठस्तद्बिम्बरूपब्रह्मानन्दात्मकः कवरः। यद्वा कः सुखरूपश्चासावेव स्वीयो वरः पतिश्च कवरः यद्वा स्वकेषु शिरःसु करधारणेन दत्तो वरो येन स कवरः। यद्वा स्वकेषु शिरःसु वर्तमानो वरः कवरः कृष्णस्तेन सह प्रेमरसनया ग्रन्थिर्दृढश्लेषो यासाम्। यद्वा तस्मिन्नेव तद्गुणगानेन तदधरामृतास्वादनेन चेन्द्रियद्वयाधिष्ठानरसनाया ग्रन्थिर्यासाम्। यद्वा तस्मिन्कपटरशनाया अग्रन्थिः तद्ग्रन्थिविच्छेदो यासाम्। यद्वा तेनैव निमित्तभूतेन कुललज्जादिरसनानामग्रन्थिर्ग्रन्थ्यभावो यासाम्। यद्वा तगुणरसनाग्रथितसर्वाङ्गसुमनः सुमनसः। यद्वा के शिरसि वराः श्रेष्ठाः कविवरवर्णितसर्वगुणनिधयः कवराः केशबन्धास्तेषु या रसनाः स्वर्णसूत्राणि तासु "भिद्यते हृदयग्रन्थि"रिति श्रुत्या कृष्णकुटिलस्निग्धहृदयग्रन्थिभेदनतः त्रिगुणान्विता गुणकेशवसन्निधानेन अग्रन्थयः स्खलितस्वर्णसूत्रबन्धा गतबन्धप्रमुदितसुमनोवृष्टिवन्मुखशशिनिजपतिशिरारुढतया जातप्रमदया तत्प्रमदया केशपट्टिकया निशया कृष्णकुटिलस्वभावतया सापत्न्यभावेन पतिपारोद्धये सितसुमनोभगणनिपातवद्वासितसुमनः सज्जनसदृशसितसुमनोभिः कृष्णकुटिलस्वभावजनसन्निभकृष्णकुटिलवरसङ्गत्यागवद्वा स्वजनशिरोराजमानसुस्निग्धकृष्णत्रिभङ्गस्य सितसात्त्विकसुगुणवृष्टिवद्वागतबन्धकुटिलकृष्णस्निग्धकवरेभ्यो विगलितग्रथितसितसुमनसः कै विरेजुस्तत्राह। पादन्यासैरित्यादिना। तत्र शशिकिरणामृताम्बुपूरितत्वेन मानसतयोल्लसितवृन्दावनभूमौ प्रेम ‹वनवेगेन चाल्यमानानां तन्नानागत्यनुसृतचापल्यभ्रमणमुखरितमणिनूपुरभ्रमरगीतगुणगणानां सर्वसद्गतिपूरकश्रुतिहरिपदन्यासवत् सर्वसद्गतिपूरकाणां कमलभव-भव कमलालया-कमलासरागकामितरजः परागपादकमलानां न्यासिनामपि मतिविमोहनगतिविलासैः प्रेमप्रभायुतभूमिवहहृत्कमलतया प्रकटितमणिकमलेषु तद्गतानां हृत्पद्मेषु च विन्यासैः तथा सर्वौषधिपतिसुधानिधिमुखदर्शनोत्साहितसमीरसमीरितसलतिकवनस्पतिनृत्यवद्गोपालमुखदर्शनोत्साहेन पञ्चाङ्गुलिभालोल्लसितनखशशिविशालकरहरनृत्यवद्वाप्रतिस्वाङ्गुलिदलनखश्रीदर्शनप्रमदमोदाभ्यामेकपद्मासनपद्मपद्मश्रियंक्षपयतां करपद्मानां नृत्यवद्वा स्मरसमरे नखवज्रभालाङ्गुलिपञ्चकुसुमशालान्वितभुज वशालधनुर्विस्फूर्ज्जनवद्वा भुजानां समस्तप्रशस्तहस्तचलनान्वितविधुतिभिः चालनैः तथा सानुरागगौरीसखीगणस्य कृष्णचन्द्रेण सहोल्लासवत् अरुणवसनालंकृतभगणान्वितशशिप्रभासद्वा साधररदमुखमृदुहाससहकृतैः गोपीभिः प्रेम्णा शिरोऽवधूततत्समागमोत्साहाविष्कृतयुगलरूपत्रिभङ्गकृष्णस्य तत्तदङ्गानां भालाङ्गणगतदृङ्मणिकमलयोर्भव्यन्मध्य-

रासवत्तारायुततारापत्यङ्गीकरणहर्षोद्धर्षविष्कृतद्विगुणविगुणधनुस्तनुविबुधविबुधबुधविविधबालोल्लासवद्वा नानाभावपिशुनभ्रूयुगविलासैः तथा सुमनोवत् सुमनोधृतकृ'णाकारतयाहृदयवटपूरितप्रेमरसासारतयास्तनघटद्वयपूरितरसशृङ्गारतया सर्वाङ्गविविधरूपनिध्याधारतया स्वर्णयूथिकालताललितमृदुतनुफलितस्तनश्रीफलयुगलभारतया सात्त्विकगौरिवृत्तिप्रतिबिम्बितकृष्णाकारवत्कृतत्रिभङ्गकृष्णानुकारतया चपलनृत्यगतिसौष्ठवान्वितभज्यन्निव मध्यभागैः तथा पवनवेगचलितसुघनपयोधरे विद्युत्पातिचपलचलनमिव प्रेमरूपबालसरसिचलयुगलस्तनाचलयोस्तद्ध्वजाञ्चलहलनमिवमुनिगणमतिप्रलयङ्कररदनखरतिभावादिरत्नाकरगति वेगरतिरङ्गतरङ्गप्रवृद्धरूपप्रेमरत्नाकरद्वये मनाक् नाकपभयमकृत्वोद्भुतकुचयुगमैनाकद्वयपक्षबलनमिव तत्तत्राथोधिद्वयनिविष्टरसिकवरिष्ठसुरतिनाथहरिकरसुरनाथकृततद्विरिदलनपक्षविद्वलनमिव चलकुचपटैस्तथा अलकाल्यावलिवृतसुस्मितविकासविमुखकमलरूपसलिलगण्डद्वयसरससरसि दिव्यमीनयुगलविहारवत् हृद्गृहनिविष्टमकरध्वजस्य कर्णविवरद्वाराङ्गणकपोलयोस्तद्ध्वजद्वयविस्फारवत् साविकासनिजावासमुखपद्माभ्यासे सोल्लासकृतरूपद्वय-कमला-चपलबिलासवत्-हरितत्स खिजनरासोल्लासदर्शनोत्साहेन निशालकभगणरदनशशिमुखरविकुण्डलारब्धरासवत्सालकनिशारदभगणमुखशशिसितस्निग्धशरद्घनसदृशगण्डे तडिदिव लोलैः कुण्डलैश्च मेघचक्रे तडित इव विरेजुः ॥ ८ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु महामायानटीनर्तकस्य भगवतस्तत्र नृत्यतः का शोभेत्याशङ्क्याह । तत्रेति । तत्र तस्मिन् रासमण्डले भगवानपि देवकीसुतोऽपि अत्यर्थं शुशुभे तत्र दृष्टान्तः सौवर्णानां मणीनां मध्ये मध्ये महामरकतो नीलमणिर्यथा शोभते तद्वत् गोपीदृष्ट्यभिप्रायेण वा विनैव मध्यपदावृत्तिमेकवचनम । यद्वा कदाचिन्मण्डलमध्यगतो वेणुं वादयन् शुशुभे तदुक्तं विल्वमङ्गले—

अङ्गनामङ्गनामन्तरे माधवो माधवं माधवं चान्तरेणाङ्गनाः । इत्थमाकल्पिते मण्डले मध्यगः सञ्जगौ वेणुना देवकीनन्दनः ॥ ७ ॥

स यथा ताभिः शुशुभे तथा ता अपि तेन विरेजुरित्याह । पादन्यासैः सङ्गीतशास्त्रोक्तनृत्यानुकूलपादगतिभेदैः भुजविधुतिभिरन्योन्याबद्धभुजानामपि यथोक्तक्रीडानुकूलैः कम्पनविशेषैः । यद्वा कदाचिदन्योऽन्याबद्धबाहुत्वमुत्सृज्याऽभिनयाथ कृतैश्चालनैः सम्विस्तृतैः भ्रूवाम्विलासैः कार्श्यात्कुण्डलीभवन्मध्यभागैः चलद्भिः कुचैस्तत्तत्पटैश्च गण्डेषु चञ्चलैः कुण्डलैः स्विद्यन्ति स्वेदविन्द्वलङ्कृतानि मुखानि यासां कवरेषु रसनासु च दृढा ग्रन्थयो यासां ताः अग्रन्थयः शिथिलग्रन्थय इति वा तं कृष्ण गायन्त्यो विरेजुस्तत्रानेकमूर्त्तिः श्रीकृष्णो मेघचक्रमिव गोप्यस्तडित इव स्वेदविन्दवस्तुषार इव गीतगर्जितमिवेत्यप्यासूचितं कृष्णवध्वः कृष्णभोग्याः स्त्रियः वधूपदेन तस्यैव वस्तुतः स्वाभाविकाः स्त्रिय इति सूचितं इति सूचितं स्ववधूवदेव चेष्टां कृतवत्य इति वा तडित इवेत्यनेन तथाभूता अपि ताः देवादिभिर्मेघचक्रे तडित इव कदाचित् शोभमाना दृष्टा इत्यपि ध्वनितम् ॥ ८ ॥

रास-रहस्यम्

र० टी०—तत्र विदुषामन्तःकरणे भगवान् परमात्मा, कथंभूतः ? देवकीसुतः दिव्यति प्रकाशयतीति देवः, तं कायति शब्दायते इति देवकः, स्त्रियां ङीप् देवकी शुद्धाबुद्धिः, तस्याः सुतः महावाक्यलक्षणशब्दश्रवणेनोत्पन्न आत्मज्ञानलक्षणः, ताभिः स्वयं परमशोभा स्वरूपोऽपि निमित्तभूताभिरात्माकारवृत्तिभिरतिशुशुभे, यद्वा स्वयं ब्रह्मानन्दस्वरूपोऽपि कैश्चिन्निवृत्तिपरविद्वज्जनैर्ध्येयत्वेनातितरां शुशुभे रराज, यथा हेमवर्णानां पुष्परागमणीनां मध्ये महान मरकतहरितमणिर्विराजते ॥ ७ ॥ कृष्णवध्वः कृष्णः परमात्मा, तस्य वध्वस्तत्स्थानीयाः तदभिमुखीवृत्तयः, खिद्यन्मुख्यः "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।" इति गीतोक्त्या बहुजन्मन्यपि परमात्माभिमुख्येन महत् प्रयासकर्तृत्वात् खेदप्राप्ताः सत्यः, भुजविधुतिभिः भुक् अग्निः—तैजसशरीरं, तदुपलक्षितस्थूलसूक्ष्मकारणशरीराणां पञ्चकोशविवेकेन जातः विविक्तः भुजः आत्मा, तस्य विधुतिः विश्लेषणं ताभिः, तथा परमात्मनः पादन्यासैः पादः किरणानि तेषां न्यासैः विन्यस्तैः, पुनः सस्मितैर्भ्रूविलासैः सस्मितैः स्निग्धप्रकाशैः, भ्रू आज्ञाचक्रं, तस्मिन्नुद्भासितैः, तथा कुण्डलैर्गण्डलोलैः चलकुचपटैः गण्डस्थले मुखे प्रामुख्येन, कुण्डल इव लोलैः चञ्चलैः क्षणिकैः, पुनः चलकुचपटैः चलतीति चलः नश्वरः, कुत्सितविषयेषु चरतीति कुचः तयोः, पटैः आवरकैरेभिरुपलक्षिताः कृष्णवध्वः अर्थात् कुत्सितविषयावरकाणां कवररशनाग्रन्थयः कानां सर्वसुखानां वरः श्रेष्ठः ब्रह्मानन्दात्मकः कवरः, तेन देहगेहादिषु मोहलक्षणरशनानां रज्जूनां ग्रन्थयः दृढबन्धनानि "भिद्यन्ते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्यकर्माणि तस्मिन् दृष्टे परावरे ।" इति श्रुत्या भज्यन्मध्यैः मध्यैः भज्यमानैः मध्ये भक्त्या सर्वतोरूपेण नाशयित्वा, तं परमात्मानं गायन्त्यः सर्वश्रुतीनां केवलाद्वैते एव तात्पर्यमिति कथयन्त्यः, तड़ित इव मेघचक्रे नभव्यापकस्य मेघस्य मध्ये विद्युत इव, विरेजुः विशेषेण शोभायुक्ता बभूवुः, अर्थात् हृदि बहुजन्मसञ्चितविषय संस्कारलक्षणमेघानां मध्ये विद्युत् प्रकाश इव ज्ञानसूर्योदयः बभूव ॥ ८ ॥

गूढार्थदीपिनी

हेम्न इमे हैमाः तेषां मध्ये यथा मारकता नीलमणिः । तत्र रासमण्डले ॥ ७ ॥ तं श्रीकृष्णं गायन्त्यः कृष्णवध्वः मेघमण्डले तडित इव विरेजुरित्यन्वयः । कथंभूताः । षड्भिः तृतीयान्तैः स्विद्यन्मुख्यः । भुजकैः । विधुतिभिः करचालनैः । भज्यन्मध्यैः

कुटिलीभवन्मध्यभागैः। गण्डेषु लोलैः चञ्चलैः कुण्डलैः। स्विद्यन्ति स्वेदयुक्तानि मुखानि यासां ताः। कवरादिषु नृत्यवशात् अग्रन्थय इति पदच्छेदः शिथिलग्रन्थयः अत्राल्पार्थ नञ्। मेघचक्रे मेघमण्डले ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

महामरकतो यथा इन्द्रनीलमणिरिव तत्र रासमण्डले तासां मध्ये भगवानतिशुशुभे आविष्कृतबहुमूर्तित्वेऽपि भगवति एकत्वादेकवचनम् एवमग्रेऽपि बोध्यम् ॥ ७ ॥ नानामूर्तिघनश्यामसमीपे अप्येकैकशो विद्युद्वद्विरेजुरित्याह। पादन्यासैरिति। पादन्यासैः चरणविक्षेपैः भुजविधुतिभिर्हस्तक्रियाभिः स्मितसहितैर्भ्रुवां विलासैश्च भज्यमानमध्यैः कटिभागैश्च कुचैश्चपटैश्च गण्डेषु कपोलेषु लोलैश्चञ्चलैः कुण्डलैश्चोपलक्षिताः स्विद्यन्ति स्वेदयुक्तानि मुखानि यासां ताः कवरेषु रसनासु च अग्रन्थयः शिथलग्रन्थयः कृष्णवध्वः कृष्णेन सहिताः वध्वः गोप्यः तं कृष्णं गायन्त्यः मेघचक्रे तडित इव विरेजुः तत्र बहुमूर्तिः कृष्णः श्याममेघचक्रवत्तास्तु बहुविधास्तडिद्वत्स्वेदस्तुषारवत् गीतं गर्जितवदिति यथासम्भवमूह्यम् ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्रापि तत्समयेऽपि ताभिराभीरमानिनीभिः सह देवकीसुतः शुशुभे। तत्र निदर्शनमाह। मध्य इति। हैमानां हेमसम्बन्धिनां तदगाराणामिति यावत् मणीनां मध्ये महामरकतो यथा तथेति। मृगमदातिलकादयः श्यामवर्णा मणयो यो षतः स्वर्णसमाः। अयं हरिस्तु मरकतसम इत्यर्थः। हैमानां गतम् ॥ ७ ॥ रासविलाससारस्यं विशदयति। पादानां न्यासा विक्षेपास्तैर्भुजानां विधुतयो विधूननानि करपल्लवयोग्यकम्पनानि तैः। सुस्मितैरिति पाठः सुस्मितत्तावहः। सस्मितैरिति पाठे भ्रूविलासविशेषणता ज्ञेया। भ्रूविलासैर्भ्रूभङ्गैर्भज्यन्ति तथा भान्ति मध्यानि कुचभारेण कटितटानि। मध्यं न्यायेऽब्जकोशे च कट्यामिति विश्वः। तैश्चलानि कुचतटानि तैर्गण्डेषु लोलानि तैः कुण्डलैः कर्णभूषणैः स्विद्यन्ति स्वेदसहितानि भवन्ति मुखानि यासां ताः। स्वाङ्गादिति ङीप्। कवररशनासु कवराणि केशपाशा रशनाः काञ्च्यश्च तास्वग्रन्थयो ग्रन्थ्यभावा यासां ताः श्लथद्ग्रन्थय इत्यर्थः। कृष्णबध्वस्तं गायन्त्यो मेघचक्रे मेघसमूहे। अनेन बहुनीरदसमवाये यादृशी कान्तिस्तादृश्यैकतमकृष्णाङ्गकान्तिरिति तदपि स्थूलदृश्वबुद्ध्यारोहार्थमुक्तमिति सूच्यते। तटित इव विद्युत इव विरेजुः। ध्वनिप्रकाशनमात्र एतन्निदर्शनम्। अल्पस्यापि प्रसिद्ध्यैव दृष्टान्तत्वं युज्यत इत्यृग्भाष्योक्तेः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं नृत्यमध्ये प्रविष्टो भगवान् गुणभावात् कदाचिन्न भासेतेत्याशङ्क्य सर्वजनानां भगवच्छोभा तदा जातेत्याह। तत्रेति। स्वभावशोभातोऽप्यतिशयेन शुशुभे तदुक्तं शक्तिभिः सहितोधिकां शोभां प्राप्नोतीति कदाचित्स्वत एव शोभां प्रकटयेदिति तद्व्यावृत्त्यर्थं ताभिरित्युक्त ननु सहजशोभायुक्तस्य कथं ताभिरतिशोभा तत्राह। भगवानिति। यथा गुणाः सर्वोत्तमाः न तथैता इतिचेत्तत्राह। देवकीसुत इति। भक्त्या यथा देवक्या अपि पुत्रो जातः स्त्रीणामेवोपकारायाविर्भूतः अतस्तास्वपि स्वसामर्थ्यमेव दत्त्वा शोभां प्राप्तवान् सहजस्य कृत्रिमैः शोभा न भविष्ययीति आशङ्क्य दृष्टान्तमाह। मध्ये मणीनामिति। महामारकतो गरुडोद्गारी समणिः सहजः सुवर्णमणयः कृत्रिमाः तथापि ते परितः क्लृप्ताः सहजमणिमप्यतिशोभयन्ति ॥ ७ ॥ एवं पूर्वपीठिकामुक्त्वा मुख्यं नृत्यमाह। पादन्यासैरेति। पादन्यासाः सर्व एव चारीकरणरूपाः भुजानां विधुतयश्च सर्वहस्तकभेदाः एकेनावयवेन शिष्टावयवाः तथा संविधानयुक्ता इति ज्ञेयं मन्दहाससहिताः सर्वे एव कटाक्षा उक्ता भ्रूभेदाश्च तत्तद्रसे हृदयाविष्ट तथैव भवन्तीति भज्यन्ति भङ्गयुक्तानि मध्यानि उपरिभागपरिवर्त्तनात्मकानि रसाभिनिविष्टानां तासां सर्वावयवातिभ्रमणेन रस एकीभवतीति परिवर्त्तनादिभिरेव वा चलेषु कुचेषु पटा इति सर्वाण्येव कम्पनान्युक्तान कुण्डलैर्गण्डलोलैरिति सर्वे एव शिरोभेदाः उक्ता शिरोभेदेष्वेव वक्त्रत्रयेषु कुण्डलानां यच्चलननिरूपणं तद्विद्युतामिव शोभार्थं गण्डलोलैरिति सर्वा कान्तिस्तत्रैवोपक्षीणेति ज्ञापनार्थं गण्डे हि केवलो रसः पेयो रसस्तत एव पीयत इति विद्योतनं तस्यैवाभिव्यक्त्यर्थं ततोऽन्तः स्थितो रसः पुष्टोऽभिव्यक्त इति ख्यापनार्थमाह। स्विद्यन्मुख्य इति। स्विद्यन्ति स्वेदयुक्तानि मुखानि यासामिति कवररशनासु च अग्रन्थयो जाताः रसेन सर्वावयवस्थेन एकीभूतेन देहः सूक्ष्मतामापन्नः अतः केशपाशे रसनायां च ग्रन्थिः शिथिलः। नन्वेवं कथं श्रमस्तत्राह। कृष्णवध्व इति। सदानन्दस्य हि फलस्य ता उपभोक्त्र्यः अतः क्रियायां श्रमो भवत्येव एतादृश्योऽप्यन्तः सन्तोषेण गायन्त्यो जाताः एवं कार्यादिश्रमैरपि ता विरेजुः अतिशोभायुक्ता जाताः। ननु लोकानां दर्शनसापेक्षा शोभा तास्तदा कथं सर्वैर्दृष्टा इति तत्राह। तडित इव ता इति। नहि तडित् बहुकालं दर्शनयोग्या भवति मेघचक्रे शोभामेव परं सम्पादयति तथा कृष्णसमूहे भगवता आच्छादिताः परितः कदाचिदेवोद्गताः केनचिदंशेन दृष्टा भवन्ति अतः तासां शोभा न दोषावहा जाता किन्तुविशिष्टैव जाता ॥ ८ ॥

श्रीसुबोधिनी-सारः

तत्र रासे देवकीसुतो भगवान् ताभिर्गोपीभिरतिशुशुभे हेमानां मणीनां मध्ये महामरकतो नीलमणिरिव ताभिस्तासामित्यन्ये ॥ ७ ॥ तेन ता अपि विरेजुरित्याह। पादानांन्यासैर्यथातालं प्रक्षेपैः भुजविधुतिभिर्हस्तचालनैः स्मितयुक्तैर्भ्रुवां विलासैः

भज्यमानैर्मध्यैः चलद्भिः कुचैः पटैः गण्डेषु कपोलेषु लोलैः चञ्चलैः कुंडलैः स्विद्यन्ति स्वेदयुक्तानि यासां ताः कवरेषु च रशनासु ग्रन्थयो यासां ताः कृष्णवध्वः तं गायन्त्यो विरेजुः मेघचक्रेऽब्दमंडले तडितो विद्युत इव ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र रासमण्डले हैमानां सुवर्णरचितानां मणीनां द्वयोर्द्वयोर्मध्ये महामरकतो नीलमणिरचितादिभिः स्वर्णवर्णाभिः श्यामस्वरूपो भगवान् देवकीसुतः अतीव शुशुभे । यद्वा गोपीदृष्ट्यभिप्रायेण मध्यपदावृत्ति विनैवैकवचनम् ॥ ७ ॥ 'यथा ताभिर्भगवानतिशुशुभे तथा तेन ता अपि विरेजुः' इत्याह—पादन्यासैरिति । पादन्यासैः पादविक्षेपैः, भुजविधुतिभिः करचालनैः, स्मितेन सहितैः भ्रुवां विलासैश्च, भज्यद्भिर्भज्यमानैर्मध्यैः कटिभागैः, चलैः कुचैः पटैश्च, गण्डेषु लोलैश्चञ्चलैः कुण्डलैश्चोपलक्षिताः स्विद्यन्मुख्यः स्विद्यन्ति स्वेदमुद्गिरन्ति मुखानि यासां ताः । कबरेषु ककेषु रशनाशु च दृढा ग्रन्थयो यासां ताः । यद्वा तेषु तासु च अग्रन्थयो निर्मुक्तग्रन्थयो गायन्त्यस्ताः कृष्णवध्वः कृष्णप्रिया गोप्यो मेघचक्रे मेघसमूहे तडित इव विरेजुः । तत्र बहुरूपधरः कृष्णो मेघचक्रमिव, तास्तु बहुविधास्तडित इव, स्वेदस्तुषार इव, गीतं गर्जितमिवेति यथासम्भवमूह्यम् ॥ ८ ॥

अन्वितार्थप्रकाशिका

तत्रेति ॥ तत्र रासमण्डले हैमानां सुवर्णरचितानां मणीनां मालावयवानां द्वयोर्द्वयोर्मध्ये महामरकत इव ताभिः स्वर्णवर्णाभिराश्लिष्टः श्यामस्वरूपो भगवान् देवकीसुतः अतीव शुशुभे । अत्र इन्द्रनीलमणिवर्णोऽपि कृष्णस्तासां गौरकान्तिमिश्रणान्मरकतवर्णोऽभूत् । मरकतशब्दोऽयमिन्द्रनीलवाचीत्यपरे ॥ ७ ॥ पादन्यासैरिति ॥ पादानां न्यासैर्विक्षेपैर्भुजविधुतिभिः अन्योन्याबद्धबाहुत्वमुत्सृज्यामिनयार्थं कृतैः करचालनैः स्मितेन सहितैर्भ्रुवो विलासैश्च भज्यद्भिर्भज्यमानैर्मध्यैः । शता आर्षः । कटिभागैश्चलैः कुचैः पटैश्च गण्डेषु लोलैश्चञ्चलैः कुण्डलैश्चोपलक्षिताः स्विद्यन्मुख्यः स्विद्यन्ति स्वेदमुद्गिरन्ति मुखानि यासां ताः कवरेषु कचेषु रशनासु च दृढा ग्रन्थयो यासां ताः । यद्वा । तेषु तासु च नृत्यवशात् अग्रन्थयो निर्मुक्तग्रन्थयः तं श्रीकृष्णं गायन्त्यस्ताः कृष्णवध्वः कृष्णप्रिया गोप्यो मेघचके मेघसमूहे तडित इव विरेजुः । तत्र नानामूर्तिः श्रीकृष्णो मेघचक्रमिव तास्तु बहुविधास्तडित इव स्वेदस्तुषार इव गीतं गर्जितमिवेति ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हैमानां सुवर्णरचितानां महामारकतो नीलमणिर्यथा तथा ॥ ७ ॥ भुजानां विधुतिभिश्चालनैः भज्यमानैः कटिकार्श्यात् चक्रीभवद्भिः मध्यैश्च चलैश्चलद्भिः कुचैः पटैर्वस्त्रैश्च गण्डेषु लोलैः कम्पमानैः कुण्डलैः स्विद्यंति स्वेदयुक्तानि मुखानि यासां ताः कबरेषु धम्मीलेषु रशनासु कांचिषु दृढाग्रन्थयो यासां ताः तं कृष्णं गायन्त्यस्ताः मेघचक्रे तडित इव विरेजुः तत्र नानामूर्त्तैः श्रीकृष्णो मेघ चक्रमिव गोप्यो विद्युत इव स्वेदो जलबिन्दव इव गीतं गर्जितमिवेत्युपमेयोपमानसादृश्यम् ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्रेति ॥ तत्र रासमण्डले, देवकीसुतः भगवान् श्रीकृष्णः, ताभिर्गोपीभिः सह, हैमानां स्वर्णनिर्मितानां मणीनां मध्ये, महामरकतो यथा इन्द्रनीलमणिरिवेत्यर्थः । अतिशुशुभे ॥ ७ ॥ यथा ताभिर्भगवान् शुशुभे तथा तेन ताश्च विरेजुरित्याह ॥ पादन्यासैरिति ॥ पादन्यासैः पादविक्षेपैः, भुजविधुतिभिः करचालनैः, सस्मितैः स्मितेन सहितैः, भ्रूविलासैर्भ्रुवां विलसनैश्च, भज्यन्मध्यैः भज्यमानैर्मध्यैश्च, चलकुचपटैश्चलद्भिः कुचैः पटैश्च, गण्डलोलैर्गण्डेषु चञ्चलैः, कुण्डलैश्च उपलक्षिताः, स्विद्यन्ति स्वेदमुद्गिरन्ति मुखानि यासां ताः कवरेषु रशनासु च ग्रन्थयो दृढा यासां ताः एवंभूताः, ता गोप्यात्मकाः कृष्णवध्वः, तं श्रीकृष्णं, गायन्त्यः सत्यः, मेघचक्रे तडितो विद्युत इव, तेन कृष्णेनेति शेषः । विरेजुः । तत्र नानामूर्त्तिः कृष्णो मेघचक्रमिव तास्तु बहुविधास्तडित इव, स्वेदस्तुषार इव, गानं गर्जितमिवेति यथासंभवमूह्यम् ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तत्रेति : १०.३३.७.

सकलं सकलार्कचक्षुषाऽस्मिञ्जगदेतत्समशोभि येन साऽपि । शुशुभे किल याभिरिन्दिरेशः कथमेता न सुवर्णरत्नरूपाः ॥ ३६ ॥
तासां सुवर्णगुणभावजुषामखण्डसौभाग्यकः सहि तदा रमणीमणीनाम् ।
आसीत् सुमङ्गलपदं गुणतोऽवलम्ब्य यन्नायकः क्षममदोऽखिलसन्मणीशः ॥ ३७ ॥
सुवर्णगुणगुम्फिता-ऽखिलजगच्छिरः सन्मणिव्रजस्थरमणीमणीव्रजसुहारमध्यस्थितिः ।
अखण्डगुणरम्यतां विदधदच्युताखण्डलक्षणोत्तमपदोऽपि यः कथमसौ न सन्नायकः ॥ ३८ ॥
लसन्निशाभिर्विधुरेष ताभिर्व्यरोचतानन्तगुणः क्षमं तत् । सिताम्बरास्ता विशदान्तराशाः स चापि सम्पूर्णकलोदयो यत् ॥ ३९ ॥

पादन्यासैरिति : १०.३३.८.

पादन्यासानुरञ्ज्यत्समसमयसमुद्भूतमञ्जीरकाञ्चीरत्नप्राञ्चत्सुहस्तोज्ज्वलवलयरवं लोलनासाग्रभूषम् ।
तत्तच्चित्रप्रकार-भ्रमणगतिगलत्पुष्पगन्धानुधावद्रोलम्बारब्धगुञ्जारवसरणिसमुद्बोधितोद्गीतिमार्गम् ॥ ४० ॥
सभ्रूक्षेपं कटाक्षध्वनितनिजमनोजातभावं समुद्यत्पादन्यासानुकूलाभिनयमवनमद्ग्रीवमध्योरुसन्धिम् ।
रासोत्साहं विचित्रोज्ज्वलरसभरितं वीक्ष्य योषिन्मणीनां तासां श्रीशेन साकं मुमुहुरिह महादेवता युक्तमेतत् ॥ ४१ ॥
(युग्मम्)

काश्चित्पादेन काश्चिद् द्विगुणगुणभुजाशाखया पुष्पिताभिर्वाग्भिः काश्चिल्ललाटोद्गतिकविलसनैर्मध्यगत्वेन काश्चित् ।
काश्चिद्धार्दस्थित-प्रावरणसितगुणै-र्लक्षितात्मस्वरूपा गायन्त्येवं व्रजेशं भगवनमुदितं वृत्तयः श्रौतगीतैः ॥ ४२ ॥
योषिल्लीलामिषादेवमवाच्यर्थो महर्षिणा । मन्ये यदब्रवीत् सोऽग्रे यद्गीतेनेदमावृतम् ॥ ४३ ॥
(युग्मम्)

भगवद्धार्दवेदिन्यः काश्चित् तदनुवादिकाः । काश्चित्तत्स्तावका ह्येवं ज्ञेया वा श्रुतिगा स्थिताः ॥ ४४ ॥
क्रीडायामचले कृष्णमेघे नानात्मभासिनि । आसंस्तद्गतिशाभिन्यो युक्तं तास्तत्र चञ्चलाः ॥ ४५ ॥

कृष्णप्रिया

सुवर्ण की मणियों के मध्य श्रेष्ठतम नीलमणी जैसे सुशोभित लगती है, वैसे ही भगवान श्रीदेवकी नन्दन गोपियाँ के मध्य शोभा–सुषमा पाने लगे ॥ ७ ॥ राजन् ? रासमहोत्सव की पूर्व पीठिका आपने सुनी अब आप मुख्य भूमिका का श्रवण करे नृत्य के अवसर पर एक चरण को चलाना "चारी" नाम का प्रकार और दो चरणों को फिराना "करण" नाम का प्रकार इत्यादि चरणचलाने के प्रकारों से सकल व्रजनारी के प्रत्येक चरण को एक ही समय एक ही समय एक ही साथ में भूमिपर स्थापित करने से पुनः युद्धविन्यासों से–हस्तों को हिलाने से, स्मित सहित भ्रुकुटीविलासों से, कटी भाग भर्जीसे, वक्षःस्थल के वस्त्रों की चञ्चलता से, गण्डस्थलपर चलाय मान कुण्डलों की, कान्ति से, प्रस्वेद बिन्दुओं से विभूषित मुख सरोज वाली, केशवेणी और वस्त्रोके शिथिल ग्रन्थियाँ वाली श्री कृष्णाङ्गना ओं प्रियतम के गुणोंका जब गान कर रही थी तब मेघ मण्डल में रही विजली के समान सौन्दर्य दान दे रही थी ॥ ८ ॥

उच्चैर्जगुर्नृत्यमाना रक्तकण्ठ्यो रतिप्रियाः । कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम् ॥ ९ ॥
काचित् समं मुकुन्देन स्वरजातीरमिश्रिताः ।
उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति । तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥१०॥

कर्दमक्षमा

अन्वयः—रक्तकण्ठ्यः, रतिप्रियाः, कृष्णाऽभिमर्शमुदिताः, नृत्यमानाः, उच्चैः, जगुः, यद्गीतेन, इदम् , आवृतम् ॥९॥ काचित् , मुकुन्देन, समम् , अमिश्रिताः, स्वरजातीः, उन्निन्ये, (तदा) प्रीयता, तेन, साधुसाधु, इति, पूजिता, (सा गोपी) तद्-एव, ध्रुवम् , उन्निन्ये, च, तस्यै, मानम् (च अभीष्टम्) बहु, अदात् ॥ १० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नृत्यमाना नृत्यन्त्यः । रक्तकण्ठ्यो नानारागैरनुरंजितकण्ठ्यः । कृष्णस्याभिमर्शेन संस्पर्शेन मुदिताः । इदं विश्वम् ॥९॥ मुकुन्देन सह स्वरजातीः षड्जादिस्वरालापगतीः । अमिश्रिताः कृष्णोन्नीताभिरसंकीर्णाः । प्रीयमाणेन संमानिता तज्जात्युन्नयनमेव पुनर्ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वा उन्निन्ये उन्नीतवती ॥ १० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कामकलोद्बोधककस्पर्शविशेषोऽभिमर्षः । यद्वा—नृत्ये मानं कृष्णकृतं सम्मानं यासां ताः । आवृतम् , देवसाक्षिकत्वात् । यद्गीतेन यासां गानेन । रतिप्रिया रमणानुरागाः ॥ नृत्यमाना नृत्यन्त्यः । यद्वा – नृत्येन मानः कृष्णकर्तृक आदरो यासां ताः । रक्तकण्ठ्यः नानारागैरनुरंजितकण्ठ्यः । रागाश्चोक्ताः संगीतसारे – "तावन्त एव रागाः स्युर्यावत्यो जीवजातयः । तेषु षोडशसाहस्त्री पुरा गोपीकृता वरा ॥" इति । रतिः कृष्णकर्तृका प्रीतिरेव प्रिया यासां ताः । कृष्णस्याभिमर्शेन स्पर्शादिना मुदिताः, इति नृत्यादिश्रमानुद्गमः । यद्गीतेन यत्कर्त्रीकेण गीतेन तदानीमिदं जगद्ब्रह्मांडमावृतम , व्याप्तमासीदित्यर्थः ।

---

१. कृतमदा–विज. । २. प्रीयमानेन–इति कस्यचित् ।

यद्वा—यद्गीतेन यत्कर्मकेन गीतेनेति । अद्यापि जगद्वर्तिभिर्लोकैर्षा रीयन्त एवेत्यर्थः ॥ ९ ॥ अत्र समगानं तत्प्रशंसार्थम् । मुकुन्देन तद्गानानुसारेण गीतमिति ज्ञेयम् । अन्यथा मुकुन्दगानसमगानज्ञस्त्रिलोक्यां कोऽपि नास्ति तद्विभूतिमन्तरेणेति भावः । ध्रुवम् व्यक्तवर्णगानेन प्लावनं वा । सार्धे नान्वयोत्र ॥ स्वरजातीरिति—स्वराः खलु—"षड्जर्षभो च गान्धरो मध्यमः पञ्चमस्तथा । धैवतश्च निषादश्च सर्वे स्युः श्रुतिसंभवाः मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः । मातङ्गश्च क्रमेणाह स्वरानेतान्सुदुर्गमान् ॥" तेषां जातीरष्टादश । यदुक्तम्—"रागश्च जायते यस्याः सा जातिरभिधीयते । शुद्धा च विकृता चेति सा द्विधा परिकीर्तिता ॥ शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः । ता एव विकृताः सत्यो जाता विकृतसंज्ञया ॥ षाड्ज्यार्षभी च गान्धारी मध्यमा पंचमी तथा । धैवती चाथ नैषादी शुद्धा एतास्तु जातयः ॥" इति । अमिश्रिताः कृष्णान्नीताभिरसंकीर्णाः । यद्वा-शुद्धा अपि जात्यन्तरास्पृष्टाः परमप्रावीण्येन केवलनस्तद्गानात् । तत्रापि उत्कृष्टं निन्ये, अतः परमदुर्गयाणामपि तासां तथा गानमालक्ष्य तेन कृष्णेन सा पूजिता स्वीयपीतोत्तरीयादिभिः सम्मानितेति । विशाखेयमिति प्राञ्चः । तज्जात्युन्नयनमेव ध्रुव ध्रुवाख्यं तालविशेषं कृत्वा उन्नीतवती । तस्यै कृष्णो मानमादरं बहुरत्नमालापदकोर्मिकाद्यलंकारमदात् । इयं पूर्वतोप्यधिकसाद्गुण्याविष्कारवती ललिता । ततश्च यथोत्तरात्कृष्टतादृशगाने गोपीनामप्रवृत्तिमालक्ष्यश्रीराधा स्वयमगायन्ती स्वसख्यास्तस्या एव सर्वसाद्गुण्योत्कर्षं ज्ञापयामासेति ज्ञेयम् ॥१०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च प्रहर्षोद्रेकेण तासां नृत्यस्य प्राधान्यं वर्णयित्वा गानस्याप्याह । उच्चैरिति । नृत्यमाना इति नर्त्तनेऽपि तादृशगानात्तत्कौशलविशेषो दर्शितः । गानादिप्रयोजनमाह । रतिः श्रीकृष्णकर्तृका प्रीतिः सैव प्रिया यासाम् । नचोच्चैर्गानादिना तासां श्रमः शङ्कनीय इत्याह । कृष्णस्याभिमर्शेन मुदिता इति अयमप्येको हेतुर्ज्ञेयः । गीतस्योच्चैस्त्वं दार्शयति । यासां गीतेनावृतं व्याप्तम् । यद्वा । यासां गीतेन स्वयमुत्प्रेक्षितरागसमूहेन इदं जगदावृतं तदनुसारिगानपरं जातमित्यर्थः । ताभिः कृताः षोडशसहस्रसङ्ख्यारागा एव जगति विभक्ता इति सङ्गीतशास्त्रप्रसिद्धः । यथोक्तं सङ्गीतसारे । "तावन्त एव रागाः स्यु र्यावत्यो जीवजातयः । तेषु षोडशसाहस्रो पुरा गोपीकृता वरे"ति । अन्यत्तैः । यद्वा । नृत्येन मानः श्रीकृष्णकृतसम्मानो यासां ताः । रक्तकण्ठ्यः प्रेमस्निग्धकण्ठ्य इति परममधुरस्वमुक्तम् । उच्चैर्गाने हेतुः रतीति कृष्णेति च । यद्वा । उच्चैः श्रीकृष्णगानादप्युच्चतया तथा चोक्तं श्रीपराशरेण । "रासगेयं जगौ कृष्णो यावत्ता व्यायतध्वनिः । साधु कृष्णेति कृष्णेति तावत्ता द्विगुणं जगु" रिति । तत्र हेतुमाह । रक्तत्यादिविशेषणैस्त्रिभिः । एषां यथेष्टहेतुहेतुमत्त्वं ज्ञेयम् एवं तत्रातिशुशुभे ताभिरित्यत्र तासां शोभावद्गानादिगुणस्यापि परमोत्कर्षः सूचितः । उत्तरत्र तु स्पष्टमेव ॥ ९ ॥ अधुना पूर्ववत्तासु मुख्यानां प्रेमचेष्टितानि पृथक्त्वेनाह । काचिदिति सार्द्धपञ्चभिः । मुकुन्देन सममिति । तस्यापि तदनुगत्वं विवक्षितम् । सह युक्तेऽप्रधान इति स्मरणात् । उन्निन्ये उत्कृष्टं कल्पयामास अमिश्रिताः संहत्य गानेऽपि विलक्षणत्वेन पृथगवगताः । ततश्च तेन मुकुन्देन पूजिता । कथं पूजिता तत्राह । साध्विति । वीप्सा हर्षेण साधुत्वदार्ढ्याय वा वदतेति शेषः ॥ १० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना पूर्ववत्तासु मुख्यानां प्रेमचेष्टितानि पृथक्त्वेनाह—काचिदिति सार्द्धपञ्चभिः । मुकुन्देन परमानन्दप्रदेन सममिति तादृशोन्नयने हेतुः । तथा तेन तस्य जगतोऽपि परमानन्दप्रदत्वं ध्वनितम् । उन्निन्ये मूर्च्छयामास । यद्वा, अपूर्वाः कल्पयामास । ततश्च तेन मुकुन्देन पूजिता तेन सममुन्नयनेऽप्यमिश्रितत्वेनोन्नयनात् । कथं पूजिता ? तदाह—साध्विति । वीप्सा हर्षेण, साधुत्वदार्ढ्याय वा, वदतेति शेषः । अन्यत्तैर्व्याख्यातम् । यद्वा, अमिश्रिता विशुद्धाः, तथा च संगीतसागरे 'जातयोऽष्टादश प्रोक्तास्तासां लक्षणमुच्यते । शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः । ता एव विकृताः सत्यो जाता विकृतसंज्ञिताः' इत्यादि । किञ्च, 'षाड्जर्षभी च गान्धारी मध्यमा पञ्चमी तथा । धैवती चाथ नैषादी शुद्धा एतास्तु जातयः ॥' इति । काचिदित्यनुवर्त्तत एव, बहु यथा स्यात्तथा इति पूर्वतोऽप्यस्याः सम्मानाधिक्यम्, तेन च गानेऽपि कौशलमधिकं सूचितम् ॥ ९ ॥ पार्श्वस्थस्येति शीघ्रसुखग्रहणं बोधितम्, अन्यथा रासावेशेन स्खलनं सम्भवेत्, किञ्च, पार्श्वस्थत्वेन तस्यापि तत्र सावधानत्वम्, तस्यां पूर्वतोऽपि भावाधिक्यञ्च ध्वनितम्, अतः परिश्रमादिकं तदर्थं केवलं छलमेव ज्ञेयम्, रासश्रमेण कदाचिद्दूर्याष्टिमेकां लीलया गदामिवावष्टभ्य विभर्त्तीति गदाभृतः, यद्वा, गदति व्यक्तमेव गीतादिक वदतीति गदा वंशी, तां धारयतः सखीकरं परित्यज्य तस्यैव स्कन्ध जग्राह । परिश्रान्तिलक्षणं श्लथदिति, तथा पराशरेणाप्युक्तम्—'परिवर्त्तश्रमेणैका चलद्वलयलापिनीम् । ददौ बाहुलतां स्कन्धे गोपी मधुनिघातिनः ॥' इति मल्लिकापुण्याणां श्लथनं कवराद्वोद्धव्यम् ॥ १० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

उन्निन्ये अमूर्च्छयत् ॥ १०-१५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उच्चैरिति । नृत्यन्त्यो नानारागै रञ्जितकण्ठ्यः श्रीकृष्णस्याभिमर्शेन मुदिता उच्चैर्जगुः यद्गीतेन यासां यस्य च गीतेनेदं विश्वमावृतं व्याप्तं कृत्स्नं जगद्गीतैकदेशवदिति भावः ॥ ९ ॥ कृष्णाभिमर्शमुदितानां तासां प्रत्येक गीतादिचेष्टितमाह । काचिदिति ।

तत्र काचिदङ्गना मुकुन्देन सह स्वरजातीः स्वरभेदान् षड्जऋषभगान्धारमध्यमपञ्चमधैवतनिपादाख्यान् अमिश्रिताः श्रीकृष्णोन्नीताभिरसङ्कीर्णा उन्निन्ये ऽमूर्च्छयत् कथम्भूता सती प्रीयता प्रीयमाणेन तेन श्रीकृष्णेन साधु साध्विति पूजिता तदेव स्वरजात्युन्नयनमेव ध्रुवाख्यतालविशेषं कृत्वोन्निन्ये उन्नीतवती तस्यै इत्थमुन्नीतवत्यै बहुमानं संमानमदाच्चकार कृष्ण इति शेषः ॥ १० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

रक्तकण्ठ्यः रागयुक्तकण्ठगुणाः अभिमर्शः कामकलोद्बोधककरस्पर्शविशेषः यासाङ्गीतेन इदं जगदावृतं व्याप्तं देवसाक्षिकत्वात् ॥ ९ ॥ अमिश्रिताः स्वरान्तरानन्तरिताः स्वरजातीः षड्जादिस्वरभेदेन उन्निन्ये उत्कृष्टत्वेन गीतवती मूर्च्छयामास च—

निषादर्षभगान्धारषड्जमध्यमधैवताः । पञ्चमश्चेत्यमीसप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ इत्यमरः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यासां गीतेन स्वयमुत्प्रोक्षितरागसमूहेन इदं जगदावृतं तदनुसारिगानपरं जातमित्यर्थः । ताभिः कृताः षोडशसहस्रसंख्या रागा एव जगति विभक्ता इति सङ्गीतशास्त्रात् ॥ ९–१० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ तासां गानमाकर्ण्य स्वयमपि गातुमुपचक्रमे । तत्र तत्सदृशं गातुं सर्वासु विस्मितासु काचित् सगर्वमुपेत्य गायति स्मेति दर्शयति—काचित् सममित्यादि । स्मरान् षड्जादीनमिश्रितान् स्व स्व श्रुतीतरश्रुतिसंभिन्नताभाववतः एवं जातीः आन्ध्रीप्रभृतिर्जातीः, अमिश्रिताः परसाङ्कर्याभाववतीरुन्निन्ये । प्रीयता प्रींयमाणेन भगवता साधु साध्विति पूजिता आत्मानं विनान्यैर्दुष्करमिति ज्ञानोत्तरम् , तस्याः स तथा शक्तिमालोक्य सविस्मयं पूजनं कृतवानिति भावः । अथ ता एव स्वरजाध्रुवगानोपयुक्ताः कृत्वा भगवानुन्निन्ये ततोऽप्युच्चतरं कृत्वापनीतवात् ; सापि ततोऽप्युच्चतरं कृत्वापनीतवतीति दर्शयती — तदेवेति । तच्छब्दोऽव्ययः । ता एव स्वरजातीः, ध्रुवं ध्रुव इति गानविशेषः कृत्वोन्निन्ये स इत्यध्याहार्यम् ! तस्यै मानञ्च बह्वदात् । इति सापि ततोऽप्युच्चतममुन्नीतवतीत्यनुसन्धेयम् , कथमन्यथा बहुमानदानम् ॥ ९ ॥ एवं संक्षेपेण प्रथमरासं निर्वर्ण्य तत्कृत परिश्रममाप–काचिद्रासेत्यादि । पार्श्वस्थस्येति सर्वस्या एवेति ज्ञेयम् । बाहुना जग्राहेति वामेन बाहुनेति मन्तव्यम् । गोदा वाक् ,—'निगादो निगदो गदः' इत्युक्तः गदमाविभर्तीति तथा तस्य तया समं किमपि व्यक्तं कथयतो गायतो वा जग्राहेति पुनर्मया वक्तव्य इति प्रकारग्रहणपरः—प्रम प्रश्रयेण सङ्कोचाभावात् । श्लथमानानि बलयानि मल्लिकाश्च कबरात् कवर्याश्च यस्याः सा तथा । वस्तुतस्तु रासोत्सवे शृङ्गारोऽङ्गी अद्भुतोऽङ्गम् । अथवा उत्साहो हि व्यभिचारिभावः स्वातन्त्र्येण विभावादिभिः परिपुष्टो रसतामापन्नो भावाख्यो रसोऽङ्गम् । तत्र श्रमादयो व्यभिचारिणः ॥ १० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

काश्चित् समं मुकुन्देनेत्यादि अमिश्रिताः शुद्धान् स्वरान् जातीश्च स्वराः षड्जादयः सरिगम–प्रभृतयः, उन्निन्येगायतः कृष्णस्य स्वरमाच्छाद्य उच्चैर्निन्ये, अतितारस्वरमुन्नीतवती, तेन श्रीकृष्णेनापि प्रीयता सता साधु साध्विति पूजिता । कृष्णोऽपि ततो ध्रुवनामानं गीतविशेषं ततोऽपि उन्निन्ये उच्चैर्नीतवान्, तस्यै सह गायन्त्यै गीयतां गीयतां त्वत्समा कापि गातुं न शक्नोतीति पूजयन् मानं बहु अदात् ॥ ९ ॥ काचिद् रास-परिश्रान्तेत्यादि । कृष्णस्य स्कन्धं बाहुना जग्राह, आलस्यं श्लथयितुं तदंसे कृतावसजनेति भावः पार्श्वस्थस्येति स च तत्पार्श्वं न जहाति गदाभृत इति तेन बाहुना स च स्कन्धासक्तगद इव बभौ तयैव गदया कामजयोऽपि जात इति सरस्वती–निर्यासः । करेण स च तदग्रं दधारेति च ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नृत्यमाना नृत्यन्त्यः । यद्वा । नृत्येन मानः कृष्णकर्तृक आदरो यासां ताः रक्तकण्ठ्यः नानारागैरनुरञ्जितकण्ठ्यः । रागाश्चोक्ताः सङ्गीतसारे । "तावन्त एव रागाः स्युर्यावत्यो जीवजातयः । तेषु षोडशसाहस्री पुरा गोपीकृता वरे"ति । रतिः कृष्णकर्तृका प्रीतिरेव प्रिया यासां ताः । कृष्णस्याभिमर्शेन स्पर्शादिना मुदिता इति नृत्यादिश्रमानुद्गमः । यद्गीतेन यत्कर्तृकेण गीतेन तदानीमिदं जगज्जातमावृतं व्याप्तमासीदित्यर्थः । यद्वा । यद्गीतेन यत्कर्मकेण गीतेनेति । अद्यापि जगद्वर्त्तिभिर्लोकैर्या गीयन्त एवेत्यर्थः ॥ ९ ॥ स्वरजतीरिति स्वराः खलुः "षड्र्षभौ च गान्धारो मध्यमः पञ्चमस्तथा । धैवतश्च निषादश्च सर्वे स्युः श्रुतिसम्भवाः । मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः । मातङ्गश्च क्रमेणाहुः स्वरानेताम् सुदुर्गमान् । तेषां जातीरष्टादश । यदुक्तम् । रागस्तु जायते यस्याः सा जातिरभिधीयते । शुद्धा च विकृता चेति सा द्विधा परिकीर्तिता । शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः । ता एव विकृताः सत्यो जाता विकृतसंज्ञया । षाड्जार्षभी च गान्धारी मध्यमा पञ्चमी तथा । धैवती चाथ नैषादी

शुद्धा एतास्तु जातय” इति । अमिश्रिताः कृष्णोन्नीताभिरसङ्कीर्णाः । यद्वा । शुद्धा अपि जात्यन्तरास्पृष्टाः । परमप्रावीण्येन केवलतत्तद्गानात् । तत्रापि उत्कृष्टं निन्ये । अतः परमदुर्गेयानामपि तासां तथा गानमालक्ष्य तेन कृष्णेन सा पूजिता स्वीयपीतोत्तरीयादिभिः सम्मानितेति विशाखेयमिति प्राञ्चः तत्तज्जात्युन्नयनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वा उन्निन्ये उन्नीतवती तस्यै कृष्णो मानमादरं बहुरत्नमालापदकोर्मिकाद्यलङ्कारमदादयं पूर्वतोऽप्यधिकसाद्गुण्याविष्कारवती ललिता । ततश्च यथोत्तरोत्कृष्टतादृशगाने गोपीनामप्रवृत्तिमालक्ष्य श्रीराधा स्वयमगायन्ती स्वसख्यास्तस्या एव सर्वसाद्गुण्योत्कर्षं ज्ञापयामामेति ज्ञेयम् ॥ १० ॥

रसिकाह्लादिनी–टीका

एवं केवलं नृत्यसम्भ्रममुक्त्वा नृत्यकर्तुरितिगानमाह उच्चैरिति नृत्यमाना नृत्यन्तः, यद्वा नृत्ये मानोऽभिमानो यासां ताः तासां नृत्यस्य सर्वोत्कृष्टत्वात् उच्चैः जगुः । ननु नृत्यसम्भ्रमे गानासम्भवमाशंक्योच्चैर्गाने हेतुमाह—कृष्णाभिमर्शमुदिता इति कृष्णस्य परमानन्दरूपस्याभिमर्शनं करेण प्रोंछनादिरूपोऽभिमर्शः स्पर्शस्तेन मुदिता इत्ययमेव मुख्यो हेतुः । अनेन श्रमापनयनमप्युक्तम् । उच्चैरिति उभयत्रापि सम्बध्यते । एवं नृत्यगानस्य हि वैदग्ध्यविशेषप्रकटनमुक्तम् , यद्वा नृत्यमाना श्रीकृष्णनृत्यादाधिक्येन गर्वो यासां ताः उच्चैरिति पदस्य सापेक्षत्वं पूर्वगानतोप्याधिक्यम् । अथवा श्रीकृष्णस्य गानादाधिक्यविवक्षयोच्चैस्त्वमिति । गानस्य वैशिष्ट्ये हेतुमाह रक्तकण्ठ्यः, नानारागैरनुरञ्जितकण्ठ्यः, अनेन श्रीकृष्णस्य मनोऽनुरञ्जकत्वं सूचितम् । तत्रापि हेतुमाह रतिप्रियाः रतिः श्रीकृष्णप्रीतिः सैव प्रिया परमादरेण सेव्या यासां ताः, अत एव तत् प्रीत्युद्देशेन गानमिति सूचितम् । यदा रतस्योच्चैस्त्वाऽधिकमाह श्रीकृष्णस्यापि स्तम्भेन तासामुच्चैर्गीते सामर्थ्यादिति यद्गीतेनेति यासां गीतेनेदं विश्वमावृतमासीत् अयमभिप्रायः । कृष्णाभिमर्शमुदिता इत्यत्र श्रीकृष्णेन कुचादिगात्रस्पर्शादिना तासु स्वानन्दस्थापिते सति, अतः पूर्णानन्दत्वं सूचितमिति । अत एव रमणावच्छिन्नकाले सर्वेषां जीवानां सुखपूर्णत्वं जातमिति भावः ॥ ९ ॥ इदानीं यूथमुख्यानां कासांचित् पृथक् पृथक् चेष्टितानि तत् मध्ये कासाञ्चित् कृष्णचेष्टितमिश्राण्याह काचिदिति । काचिद् यूथमुख्या मुकन्देन समं मुकन्दस्योपसर्जनत्वात् स्वानन्दपूर्णा समर्थेन स्वरजातीः षडजादि-स्वरालापभेदान् अमिश्रिता कृष्णोद्गीताभिरससङ्कीर्णा, यद्वा असङ्कीर्णा अश्रुतपूर्वा स्वरजातीनामुन्नयनन्तु समकालमेव नादारम्भे पृथक् पृथक् उपलब्धः । अत एव मुकुन्देन सममुन्निन्ये स्वरावसानमर्पितवती, यद्वा मुकुन्देनामिश्रतानैकत्वं नीत्वा तस्याप्यशक्यत्वात् । स्वरजाती रागस्वरभेदान् सममेकदैवोन्निन्ये । तत्स्वराणामवसानं युगपद् नीतवती । अत एव साधु साध्विति तेन पूजिता । तज्जात्युन्नयनं तदुपदेशेन स्वयमपि चिकीर्षमाणेन प्रीयता तदुन्नयने प्रीतिमाविष्कुर्वता । अनेन गाने वैदग्धीविशेषप्राकट्यं दर्शितम् । इदानीं श्रीकृष्णसम्माननेन ततोऽप्याधिक्येन गाने तत्कौशलमाह तदेवेति, तदेव तज्जात्युन्नयनमेव ध्रुवं निश्चलं यथा भवति तथा उन्निन्ये तं नादं ध्रुवनादेनैक्यं निनाय । यद्वा येन ध्रुवतालेन समतालेन ध्रुवाख्येन तालेन तदुन्नयनं ततोऽपि स्वोत्प्रेक्षितं नादान्तमनयत् । तन्नादे श्रीकृष्णमनसो निरुद्धत्वात् सात्विकभावोदयेन च बहुमानं सम्मानं पूजनमित्यर्थः । अदात् प्रशशंसेत्यर्थः । यद्वा कण्ठादुत्तार्य्य महाधनं हारं प्रसादत्वेन दत्तवानिति भावः ॥ १० ॥

विशुद्धरसदीपिका

इदानीं गानस्याप्याधिक्याह । उच्चैरिति । नृत्यमानाः नृत्यन्त्यः सत्यो जगुरिति कौशलम् । यद्वा नृत्ये लब्धो मानश्चित्तसमुन्नतिर्याभिरिति शाकपार्थिवादिः रक्तकण्ठ्य इति सौकुमार्य्यं रतिः श्रीकृष्णकर्तृका प्रीति तद्विषया वा सैव प्रिया अभिलषणीया यासामिति तत्सुखित्वम् अत एव कृष्णाभिमर्शमात्रेण मुदिता इति वैदग्ध्यं किमिति काङ्क्षायामाह । यदिति । यासां गीतेन स्वयमुत्प्रेक्षितरागसमूहेन इदं जगत् आवृतं व्याप्तं तदनुसारिगानपरं जातमित्यर्थः । ताभिः कृतरागाणां षोडशसाहस्री जगति विस्तृतेति भावः । यथा सङ्गीतसारे “तावन्त एव रागाः स्यु र्यावत्यो जीवजातयः । तेषु षोडशसाहस्री पुरा गोपीकृतावरे”ति । यद्वा इदमिदं मास्पदम् आवृतमाच्छादितम् एवञ्च तत्रास्पदमेवास्फुरत् पारिशेष्यादिति भावः । यद्वा यासां गीतेन येन वा गीतेन इदं मम हृदयमावृतम् इतिब्रह्मानन्दरसाच्छ्रीकृष्णरसाद्याधिकरसोव्यञ्जितः तदेवं श्लोकद्वयेन कान्तभावानां नृत्यादिकौशलं दशितं कृष्णवध्व इत्युपक्रमात् ॥ ९ ॥ अथ सहचरीवर्गमुख्यतमायाः श्रीललितायाः सर्वजित्वरं तदाह । काचिदिति । मुकुन्देन सममिति तदुनुगतत्वमैकमत्यञ्च सूचितं स्वरजातीरिति स्वरा उक्ताः सङ्गीतरत्नाकरे “रञ्जकाः श्रोतृचित्तानां स्वराः सप्तविधा मताः । षड्जार्षभौ च गान्धारो मध्यमः पञ्चमस्तथा । धैवतश्च निषादश्च सर्वे स्युः श्रुतिसम्भवाः । मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः । मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमा” निति । जातयः “रागस्तु जायते यस्याः सा जातिरभिधीयते । शुद्धा च विकृता चेति सा द्विधा परिकार्तिता । शुद्धा सप्तविधा ज्ञेयास्तज्ज्ञैः षड्जादिभेदतः । षड्जकैशिक्यादिभेदादेकादशविधापरे”ति आदिग्रहणादार्षाभ्युदीच्यवन्त्यादिग्रहः ताश्चातिदुर्गहाअपि अमिश्रिताः स्वरजात्यन्तरास्पृष्टाः उन्निन्ये उच्चैर्नीतवती सह गानेऽपि ततोऽधिकवैलक्षण्यं दर्शितवतीत्यर्थः । ततः प्रीयता प्रीतियुक्तेन तेन मुकुन्देन साधु साधु साध्विति प्रोत्साहनं वदता पूजिता अत्यादृतेत्यर्थः । इयञ्च मुकुन्देन सममित्युक्तेः शुद्धसख्यवती काचिदिति केन तत्सुखेनाचीयते पूर्यते इति व्युत्पत्तेश्च उद्भटत्वात्प्रखरा च नामानुक्तिश्च श्रीमुनीन्द्रस्य वैवश्योदयेनेति निर्णीतमेव श्रीवृहद्भागवतामृते प्रथम खण्डान्ते परीक्षिद्वाक्येन ॥ १० ॥

श्रीरामनारायणकृता भावभावविभाविका

एवं प्रधाननृत्यं निरूप्य नृत्यमानानां तासामतिचित्रं गानसौष्ठवमाह । उच्चैरिति । आदावुच्चैर्जगुस्ततः पुनर्नृत्यमाना अभूवन् । यद्वा नृत्यमाना नृत्यं कुर्वत्य एवोच्चैर्जगुरित्युभयोर्नृत्यगानयोर्युगपदाचरणेन महत्कौशलं तासां यद्वा नृत्यस्य मानो देवाङ्गनादिभ्योऽपि नृत्यकौशल्याधिक्यादभिमानो यासां यद्वा नृत्ये मानं यथार्थज्ञानं यासां यद्वा नृत्यगतौ मानं प्रमाणं यासां यद्वा कृष्णेन सह नृत्येन लब्धो मानः आदरो याभिः यद्वा नृत्येनैव कृतः कृष्णसम्मानो याभिः तथा च नृत्येन कृष्णसम्मानं कुर्वत्या गुणगानेनापि तत्सम्मानायोच्चैरुच्चस्वरेण जगुः । यद्वा चकारस्य शोभावाचकत्वादुत्कृष्टशोभा येषु तैः स्वरैर्जगुः यद्वोत्कृष्टस्य कृष्णस्यैव शोभा येषु तैर्गीतैर्जगुः तत्र प्रथमार्थे बहूच्चस्वरगाने शोभाभावमाशङ्क्याह । रक्तकण्ठ्य इति । रञ्जकस्वरयुक्तकण्ठवत्य इत्यर्थः । यद्वा द्वितीयार्थे कथमुत्कृष्टशोभावत्स्वरैर्जगुस्तत्राह । रक्तकण्ठ्य इति । यद्वा तृतीयार्थे कथं कृष्णशोभान्वितैरेव गीतैर्जगुस्तत्राह । रक्तकण्ठ्य इति । रागव्याप्तकण्ठ्य इत्यर्थः । अत्रायं ध्वनिः इन्द्रनीलमणिद्युतिनीलपद्मरागसुरभिमृद्वाह्लादककृष्णाङ्गदर्शनजातोत्साहतया तद्योगयोग्यतापत्त्यै तासां हृदयपद्मोऽपि रागव्याप्ततया पद्मरागो जातः ततश्च तद्व्याप्त्योच्छलितरागरूपतया कण्ठमभिव्याप्य मुखपद्ममपि रागान्वितत्वकरणेन तद्योग्यत्वायैव पद्मरागं चकार तथाच कण्ठस्य तद्रागात्मकरागव्याप्ततया तच्छोभान्वितगीतैरेव जगुः । अत्र चेन्द्रनीलबहुपद्मनिधीनां विभवदर्शनेन न स्वाभिभवमाशङ्क्य कण्ठशङ्खनिधिगर्जनेनापि गानस्योच्चत्वसम्भावना तत्र नृत्यमाना रक्तकण्ठ्य उच्चैर्जगुरित्यत्र घनश्यामकृष्णदर्शनेन तद्गम्भीरगर्जनात्मकगीतनादप्रमोदमदाः प्रमदा मयूरा इव नानावर्णाम्बरपक्षध्वननेन नृत्यमाना एव यतो रक्तकण्ठ्योऽत उच्चैर्जगुः । उच्चैर्गाननृत्ययोः प्रयोजनं सूचयंस्ता विशिनष्टि । रतिप्रिया इति । कृष्णस्य रतिविहारः प्रियो यासां रतिः प्रीतिः प्रीतिर्वा प्रिया यासाम् । यद्वा रतिरूपाः प्रीतिमय्यश्च ताः प्रियाश्चेति रतिप्रियाः । यद्वा कृष्णाय रतिर्मिथुनक्रीडा प्रीतिर्वा प्रिया यासां, यद्वा रतिः स्त्रीणां प्रिया भवति नतु क्वापि स्त्रीरतेः प्रिया भवति तास्तु मन्मथमन्मथस्य भगवतो रतेरपि प्रिया अतोऽत्यर्थं तत्सौभाग्यं यद्वा अकारसंज्ञहरे रतिरेव प्रिया यासामित्यरतिप्रिया इति वा छेदः । एतादृशरासगानसातत्येऽपि तासां श्रमाभावे हेतुमाह । कृष्णाभिमर्शमुदिता इति । कृष्णस्य नित्यानन्दस्य सर्वानन्दबिम्बभूतस्य सर्वात्मत्वेन सर्वेषामपि सामान्यत्वेऽपि प्रियत्वेऽप्यात्मनस्तु विशेषतः प्रकटलीलायामप्यतिप्रियतमस्याभिमर्शेन साक्षात्प्रत्यङ्गस्पर्शेन मुदिताः । ननु सर्वात्मतया सामान्यतः सर्वेषामभेदसम्बन्धादिन्द्रियाङ्गव्यवहितसम्बन्धस्य कथमुत्कर्षोक्तिरिति चेत्तत्रेदं चिन्त्यं किमज्ञानां स्वरूपाभेदोत्कर्ष उच्यते विदुषां वा नाद्यस्तेषां तदज्ञानाद्भेदभ्रमाच्च सिद्धोऽप्यभेदोऽसिद्ध एव विदुषामपि परोक्षापरोक्षसन्देहादत्र तु पारोक्ष्यसंशयाभावाच्छ्रैष्ठ्यं नचेन्द्रियाङ्गव्याङ्गव्यवधानशङ्का भगवद्धामलीलागतानां तु—

देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनामित्यादिवचनैः ।

कृष्णवदेव व्यवधानहेतुभूतानात्मदेहेन्द्रियाभावात् तत्र तेष्वपि देहेन्द्रियभेदवादिनामपि न व्यवधानशङ्कावसरो देहस्यैव नृत्यगानाद्यास्पदत्वेन देहे देहव्यवधानासम्भवात् तासां तद्गीतोत्कर्षमेवाह । यद्गीतेनेति । यासां गीतेनेदमन्तरिक्षमावृतं व्याप्तमासीत् अन्तरिक्षस्थविमानयानानां साङ्गनासुरप्रधानानां दिविस्थसभगणचन्द्रस्य च न तासां गीतं विनान्या स्फूर्तिरत एव वक्ष्यते—

कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः । कामार्दिताः शशाङ्कश्च सगणो विस्मितोऽभवत् ।। इति ।

यद्वा यद्गीतेन यासां स्वयं प्रकटीकृतरागसमूहेनेदं सर्वं जगत्सुरनरादिलोकमावृतं तदनुसारिगानपरं जातं तत्कृतरागषोडशसाहस्री त्रिलोके विभक्ता । तदुक्तं सङ्गीतसारे—

तावन्त एव रागाः स्युर्यावत्यो जीवजातयः । तेषु षोडशसाहस्री पुरा गोपीकृतावरा ।। इति ।

यद्वा किम्भूतास्तास्तदाह । यद्गीतेनेति । यासां यशसा कविभिर्वर्णितेन नाना सुरनरभाषागतगीतप्रबन्धादिनेदं जगदावृतं व्याप्तम् । यद्वा यद्गीतेन यासां तत्र गानविषयभूतेन श्रुतिरूपतया वा वर्णितमाहात्म्येन कृष्णेनेदं जगद्व्याप्तं यद्वा यस्य कृष्णस्य गीतेनेदमावृत तस्य कृष्णस्याभिमर्शेन मुदितास्तमेवोच्चैर्जगुः । यद्वा पुनः पुनरतिशयेन कृष्णाभिमर्शं यथा स्यात्तथा नर्तने उदिता उद्यताः यद्वा कृष्णाभिमर्शं यथा स्यात्तथा नृत्यमाना इति पृथक् सम्बन्धः उदिता इति उत्कृष्टं कृष्णमेवेताः प्राप्ता अतस्तासां तत्र लीनचित्तत्वाद्यस्य कृष्णस्यैव तत्प्रेरणया तन्मुखनिःसृतेनेदं गोपीमण्डलमावृतं व्याप्तम् ।।९।। तत्र कस्याश्चिदतिप्रियाया गीतोत्कर्षमाह । काचित्सममिति । काचिदिति सर्वाभ्यः पृथग्निरूपणात्पृथग्वर्णितानामपि प्रथमोद्देशादग्रे गानोन्नयनस्तुतिविषयत्वोक्त्या सर्वोत्कृष्टा । यद्वा कासु स्वरूपा चिदिति चिद्रूपा चिदानन्दमयी श्रीमती राधा मुकुन्देन सममभिश्रिताः स्वरजातीरुन्निन्ये इत्यन्वयः । तत्र मुकुन्देन सममित्यनेन तु अन्यासां गानं स्वतन्त्रं श्रीमत्याः कृष्णेन सहैव किञ्च यथा कृष्णस्य गानादिलीला स्वतः परमानन्दघनत्वेन स्वप्रयोजनाभावाज्जीवानां मुक्तिदानाय तथा श्रीमत्या इत्यपि द्योत्यते अमिश्रिता इत्यत्र अन्यासां गानेनामिश्रिता मुकुन्देन सममित्युक्त्या सर्वोपाधिविनिर्मुक्तप्रत्यगभिन्नब्रह्मवदेव स्वरब्रह्माप्यन्यामिश्रितं मुकुन्देन समं निन्ये तथा च राधाकृष्णगानयोर्मिथः समत्वं

तुल्यगुणत्वम् अन्यगानेभ्यः श्रेष्ठयञ्च द्योतितम्। यद्वा अमिश्रिता इत्यनेनान्यस्वररागादिगाने प्रमादादितरमिश्रणव्यावृत्तिस्तत्र प्रमादासम्भवात् स्वरजातीरिति स्वराः षड्जादयो ध्वनिविशेषास्तदुक्तम्—

रञ्जकाः श्रोतृचित्तानां स्वराः सप्त विधा मताः। षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ॥
धैवतं च निषादं च सर्वे स्युः श्रुतिसम्भवाः।
मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ।मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् ॥

जातयस्तु तत्र रागोत्पत्तिहेतवः उन्निन्ये इति सुरगन्धर्वादीनामपि व्यामोहकसर्वोत्कृष्टतया गानसूचनम् अतस्तेन भगवता साधु साध्विति पूजिता स्तुता। यद्वा साध्विति कृत्वा साधु पूजिता। यद्वा तेन हेतुना प्रियेण सर्वगोपीभिश्च पूजिता स्तुता सुरासुरादिभिश्च सुमनोवृष्ट्यादिभिः पूजिता ततश्च सैव तदेव गीतं ध्रुवं ताळविशेषं यथा भवति तथा उन्निन्ये। यद्वा प्रथमं ध्रुवस्य स्थायिपदस्य गानं कृत्वा मध्येऽन्तरा गानानन्तरं तदेव ध्रुवमुन्निन्ये नान्तरान्तरितपूर्वोत्तरध्रुवगानयाः क्वचिदपि स्वरेणास्खळितास्तस्यै स्तुत्यनन्तरमालिङ्गनचुम्बनादिना मानमादरं बह्वदात् ॥ १० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

केवलनृत्यमुक्त्वा सगीतं तदाह। उच्चैरिति। नृत्यमानाः नृत्यन्त्योऽप्युच्चैर्जगुः शानजार्षः नृत्ये मानो गर्व आदरोक्तिर्वा यासामिति वा रक्तकण्ठ्यः नानारागैरनुरञ्जितकण्ठ्यः स्निग्धकण्ठ्य इति वा तथापि रतिरेव प्रिया यासां यद्वा गानफलमाह। रतिः कृष्णकर्तृका प्रीतिः प्रिया यासां ननु तादृशचिरकालीननृत्ये श्रमापनोदस्तासां केन जात इत्यशङ्क्याह। कृष्णेन सदानन्दरूपेण प्रेष्ठेन कृतः अभितोऽमर्षः प्रोञ्छनादिरूपः तेन मुदिता मोदसागरे निमग्नाः किंचिद्गीतेन सर्वैरपि सर्वं विस्मृत तासां श्रमविस्मरणे किञ्चित्रमित्याह। यासामुच्चैर्गीतिनेदं विश्वमावृतमासीत्। यद्वा यासां स्वयं कल्पितेन षोडशसहस्रभेदभिन्नेन गीतेनेदमावृतं व्याप्तम्। यद्वा तद्विषयकेन लोकैः स्वोद्धाराथ क्रियमाणेन गीतेनेदमावृतम् ॥ ९ ॥ अथ पञ्चभिस्तासां प्रेमचेष्टितान्याह। काचिदिति—

षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा। धैवतश्च निषादश्च सर्वे स्युः श्रुतिसम्भवाः ॥
मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः। मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् ॥
रागस्तु जायते यस्मात्सा जातिरभिधीयते। शुद्धा च विकृता चेति सा द्विधा पारिकीर्त्तिता ॥
शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः। ता एवा विकृताः सत्यो जाता विकृतसंज्ञया ॥
षाड्जर्षभी च गान्धारी मध्यमा पञ्चमी तथा। धैवती चाथ नैषादी शुद्धा एतास्तु जातयः ॥

इत्युक्तजातीरमिश्रिताः जात्यन्तरासंस्पृष्टाः मुकुन्देन सह उन्निन्ये उत्कृष्टाः कल्पयामास। यद्वा कृष्णोन्नीताभिरसङ्कीर्णाः स्वरजातीः षड्जादिस्वरालापगतीरुन्निये सहशब्देन संख्याप्राधान्यमुच्यते ततश्च प्रियमाणेन तेन साधु साध्विति पूजिता संमानिता वीप्सा हर्षेण इयं ललितानाम्नी श्रीराधासखी ॥ १० ॥

रास-रहस्यम्

र० टी०–यद्गीतेनेदमावृतं यासां नादाभ्यासात्मकगानेन शब्दब्रह्मात्मकस्फुरणेनेदं संसारप्रपंचमावृतं व्याप्तं, एवम्भूताः नृत्यमानाः नृत्यवदस्थिराः न निर्वातदीपवत् स्थिराः, रक्तकण्ठ्यः परमात्मानुरागेणाकण्ठपूरिताः, रतिप्रियाः रतिः परमात्मप्रीतिरेव प्रिया यासां ताः, कृष्णाभिमर्षमुदिताः कृष्णस्य परमात्मनः अभितो मर्शः परामर्शः, पूर्वानुभूतनिश्चयात्मकं ज्ञानं, तेन मुदिताः अन्तः पूर्णानन्दयुक्ताः, गोप्यः वृत्तयः, उच्चैर्जगुः दीर्घप्रणवध्वनिवत् नादाभ्यासं कृतवत्यः ॥ ९ ॥ काचित् कासु स्वरूपाचिदिति चिदानन्दमयीर्वृत्तिः, मुकुन्देन समं मुकुं प्रेमवचनं, तत्पूर्वकं स्वस्वरूपं ददातीति मुकुन्दः परमात्मा तेन, समं समानाकारं, स्वरजातीरमिश्रिताः स्वराः स्वरवर्णाः, जातयः व्यञ्जनवर्णाः, ताभ्योऽमिश्रिताः अमेलयित्वा शुद्धा, अर्थात् स्वरव्यञ्जनादिभेदरहिता नादरूपा उन्निन्ये उन्नीतवती, तया प्रीतया प्रीतिं कुर्वता, तेन परमात्मना, साधुसाध्विति स्तुत्या पूजिता सम्मानिता, पुनस्तदेव, तच्छब्दो अव्ययः, तां चिदानन्दमयीमेव, ध्रुवं निश्चयेन, उन्निन्ये उत् उत्कृष्टत्वेन निन्ये गृहीतवान्, तस्यै मानं च आदर च, बह्वदात् ॥ १० ॥

गूढार्थदीपिनी

नृत्यमाना नृत्यशीलाः। ताच्छील्ये चानश्। नृत्येन मानः आदरो यासां ताः इति वा। रक्तो रागरञ्जितः कण्ठो यासां ताः। कृष्णस्य अभिमर्शः सुस्पर्शः तेन मुदिताः ॥ ९ ॥ स्वरजातीः स्वरालापगतीः उन्निन्ये उन्नीतवती। तदेव तज्जात्युन्नयनमेव ध्रुवाख्यं तालविशेषं कृत्वा उन्निन्ये ॥ १० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णस्याभिमर्शेन मुदिताः नृत्यमानाः नृत्यन्त्यः रक्तकण्ठ्यः विविधरागैरनुरञ्जितकण्ठ्यः उच्चैर्जगुः यद्यासां गीतेनेदं विश्वमावृतं व्याप्तमभूत् पावितं जातमित्यर्थः ॥ ९ ॥ तत्र काचिद्वधूः मुकुजर्षभगान्धारमध्यमपञ्चमधैवतनिषादाख्यस्वरालापगतीः अमिश्रिताः मुकुन्दोन्नीताभिरसङ्कीर्णा उन्निन्ये तदा तेन मुकुन्देन प्रियमाणेन साधु साध्विति पूजिता तदनन्तरं तदेव स्वरजात्युन्नयनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वोन्निन्ये उन्नीतवती तस्यै बहु मानमदात् ॥ १० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यद्गीतेन यच्च गीतं च तेनेदं विश्वमावृतं व्याप्तं कृतमदाः प्रमदा इत्यत एव नागस्तासां रक्तकण्ठ्यो मनोहरकण्ठयुता रतिप्रिया इष्टसुरताः कृष्णस्याभिमर्शः सङ्गस्तेन मुदितास्तुष्टा उच्चैस्तथा जगुरगायन् ॥ ९ ॥ काचिद्गोपिका मुकुन्देन समं साकममिश्रिताः परस्परममिलिताः स्वरजातीः षड्जादिजातीरुन्निन्ये तावदूर्ध्वं निनाय । प्रीयता प्रीतिं प्राप्नुवता तेन साध्विति सुसमीचीनं सुसमीचीनमिति पूजिता सत्कृता नर्नायकतोपविशेषं तद्दृष्ट्वा । तदित्यव्ययम् । तं स्वरमेव ध्रुवं यावत्तन्मूर्छनं भरतभारतीप्रमितं तावत्पर्यन्तमुन्निन्ये । या तस्यै मानं सत्क्रियां बहु यथा तथाऽदात्कृतवान् । मुकुन्दस्यैतत्समगानं तासामनुग्रहविशेषेणेति मन्तव्यम् । तदुन्नयनमेव ध्रुवं तन्नामकतालसहितं यथा तथैवोन्निन्य इति वा । स्वरजा विरजा तस्यास्तीरेण परेण मिश्रिताः सम्बद्धा अप्युन्नयेनारचय्योन्निन्ये ऊर्ध्वं वैकुण्ठं प्रति निन्य इत्यर्थः ॥ १० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

गाढनृत्यमुक्त्वा मध्यनृत्यमाह । उच्चैर्जगुरिति । नृत्यमाना नृत्यं कुर्वत्य एव उच्चैर्गानयुक्ता जाताः अथवा आदावुच्चैर्जगुः ततो नृत्यमाना नृत्यन्त्यो जाताः उभयत्र हेतुमाह । रक्तकण्ठ्योरति प्रिया इति । रक्तः रञ्जकस्वरेण युक्तः कण्ठो यासामस्तीति रतिरेव प्रिया यासामिति गानेन व्यामोहनं नृत्येन च तासां प्रसिद्धं, ननु पूर्वनृत्येन जातश्रमाः कथमेवं कृतवत्य इत्यत आह । कृष्णाभिमर्शमुदिता इति । भगवतः अभितो मर्शः प्रोञ्छनादिविशेषरूपः तेन मुदिताः अन्तः पूर्णानन्दाः इतरविस्मारणार्थं नादाधिक्यमाह । यद्गीतेनेदमावृतमिति । यासां गीतेनेदं जगद्व्याप्तम् अथवा यदर्थमेतन्नृत्यादिकं तत्सफलं जातमित्याह । यद्गीतेनेति । लोकैः क्रियमाणेन गीतेन एतत्प्रकाशकेन एतज्जगद्रसेन व्याप्तमित्यर्थः । लोके रसप्राकट्यार्थमेवैतत्कृतमिति उत्पन्नस्य नादस्यामृतमयत्वाय भगवता नादः कृतः स च मधुर एव कर्त्तव्यः तेन च जगत्पूरणीयम् ॥ ९ ॥ ततोऽघटमानमेतदिति तदर्थमाह । काचिदिति । मुकुन्देन समम् अमिश्रिताः स्वरजातीः काचिदुन्निन्ये काचित्सम्यक् भगवद्भावं प्राप्ता भगवतो नादकरणे हेतुः मुकुन्देनेति मोक्षदानार्थमेव उपनिषदि स्वनादं पूरितवान् उभयोरेकता नादे तुल्यता मोक्षे कार्यद्वयं पूर्वसंघातान्निवर्तननं ब्रह्मप्रापणञ्च तदर्थमितरनिवारणार्थमुपनिषदामुपयोगः स्वराः षड्जादयः तेषां जातिभेदाः यथा मयूरः षड्जं वदति तथा अन्येऽपि पक्षिणः मनुष्या अन्येऽपि जीवाः षड्जं वदन्ति तथापि तेषामवान्तरजातिरस्ति ते चेद्यथाक्रमेण यथारसाभिव्यक्ति यदभिप्रायेण सृष्टावुत्पादिताः तास्तथैव योजिताश्चेत्तदा स्वरजातयः अमिश्रिता भवन्ति तद्भगवता कर्त्तुं शक्यं नान्येन तासां चेदुन्नयनं तदा युक्त एव संतापस्तदाह । पूजिता तेन भगवतेति स्वस्य ब्रह्मत्वात्स्वविचारितानुपूर्वीति स्वस्य तथा गानं नाश्चर्यहेतुः । अन्ये तु तत्स्वरूपमेव न जानन्ति कुतः पुनः करिष्यन्तीति तेनैव पूजिता किंच कार्यमपि उन्नयनेन जातमिति । साधु साध्विति प्रीयता प्रीतिं कुर्वता भगवता स्वरूपतः फलतश्च साधुत्वाय द्विरुक्तिः प्रातिश्च तुल्यत्वात् सर्वथा कार्यानुगुणत्वात् ॥ १० ॥

श्रीसुबोधिनी-सारः

नानानुरागै रंजितकण्ठ्यो रतिप्रिया नृत्यमानाः कृष्णस्याभिमर्शेन मुदिता उच्चैर्जगुः यासां गीतेनेदं विश्वमामृतम् ॥९॥ काचिद्गोपी मुकुन्देन समं सहाऽमिश्रिता भिन्नाः स्वराणां षड्जादीनां जातीरुन्निन्ये ऊर्ध्वं नीतवती प्रीयता सुप्रसन्नेन तेन कृष्णेन पूजिता साधुसाध्वित संमानिता तदैवावसरे ध्रुवं तालविशेषमुन्निन्ये या तस्यै बहुमानमदात् ॥ १० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

जगुर्गन्धर्वपतय इत्यत्र, **अन्यथा भगवद्धस्तेत्यादि** । अत्रायं भावः । यथा भगवल्लीलामात्रोपयोगिनो नटा इव विश्वावसुप्रभृतयः, तथा भगवद्गृहस्सदनादिमात्रोपयोगिक्रियाशक्तिमन्त इन्द्रादयो दिक्पालेभ्यो भिन्नाः सन्ति, ते त्वेतद्भुजदण्डमात्रावलम्बाः, तयो रसरूपत्वेन रसात्मकक्रियाशक्तिप्रधानानामेव तत्र स्थितेरुचितत्वात् । अत सुष्ठूक्तं **भगवद्धस्तेत्यादि** ।।९।। **काचित्समं मुकुन्देनेत्यस्याभासः** । **उत्पन्नस्य नादस्येत्यादि** । अत्रायं भावः । अयं नादो न लौकिकः, पूर्वसिद्धा वा, किन्त्वलौकिकोऽपूर्वः । स च भगवतोऽन्यभावनिवृत्तिपूर्वकं स्वमात्रविषयकभावोत्पत्त्यर्थं प्रत्येकं कृतः । अयं च स्वामिनीनामप्युक्तभावानुरूपभगवद्विषयकभावविशेषोत्पत्तौ रसानुभावको भवति । **मूलकारणत्वात्स्वामिनीगानस्य तथात्वम्** । इदमेवामृतमयत्वम् । सा च भगवन्नादेनेति तथा

कृतः। अपरञ्च। स्वामिन्याः स्वरजात्युन्नयने प्राधान्योक्त्या प्रभोस्तत्सहभावोक्त्या ततः सकाशादस्य माधुर्यं लक्ष्यते। अन्यथा प्रभोस्तारनादेनास्याभिभवे रसाभास एतद्वैयर्थ्यं च स्यात्। साम्ये तूभयोः स्वातन्त्र्येण करणात्परस्पराननुगुणत्वेन च मिथो रसानुपयोगित्वप्रसङ्गः। स्वयं नादस्वरूपमज्ञात्वा भगवन्नादं श्रुत्वा तत्स्वरूपनादकरणेऽपि तथा। अतो भगवद्विचारितानुपूर्वीं स्वयं ज्ञात्वा तथैवोन्नीतवतीति ज्ञेयम्। पूर्णरसोदयो भगवति जात इत्यपि ज्ञापनाय तदधीनत्वमपि ज्ञापयितुमेवं कथनम्, नायिकाप्राधान्यस्य एतद्रसस्वभावरूपत्वात्। एवं सति तारनादसाध्यजगत्पूरणं मधुरेण न भवति। अन्यधर्मनिवृत्तौ ह्येतेन पूरणं भवति। तदर्थमेतत्स्वरूपे रसाभिज्ञा निरूपिकाश्चैता एवेति। यथा 'तं त्वौपनिषदं पुरुष'मिति श्रुतेस्तदुक्तमेव ब्रह्मस्वरूपम, तथैतन्निरूपितधर्मवदेव पुरुषोत्तमस्वरूपम्, नान्यधर्मविशिष्टमित्येतद्गानस्योपनिबद्धाक्यरूपत्वादेतच्छ्रवणेन भगवति प्राकृतधर्मराहित्यज्ञानं स्वस्मिंश्च तत्सम्बन्धित्वेनान्यधर्मराहित्यं तज्ज्ञानं च भवति। तदनन्तरं भगवदानन्दानुभवो भवति। एतत्प्रभुगानकार्यम्। एवं सत्येतेन जगत्पूरणं भवत्येवेति सर्वमवदातम् ॥ १० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नृत्यमानाः नृत्यन्त्यस्ता उच्चैर्जगुः। तद्गीतस्याद्भुतत्वं सूचयन्नाह—रक्तकण्ठ्य इति। नानारागैरनुरञ्जितकण्ठ्य इति। गाने हेतुमाह—कृष्णस्याभिमर्शेन संस्पर्शनं मुदिता इति। पुनश्च तस्य रतिः प्रीतिरेव प्रिया यासां ता इति। तत्प्रीत्यर्थं जगुरित्याशयः। तद्गानस्योत्कत्वमाह—येन गीतेनेदं विश्वमावृतं व्याप्तमासीदिति। यद्वा तद्गीतस्य प्रसिद्धत्वमाह—यद्गीतेन लोकनिबद्धगाथादिना इदानीमपि विश्वमावृतमस्ति इति ॥ ९ ॥ काचिद्गोपी मुकुन्देन कृष्णेन समं सह अमिश्रिताः कृष्णान्नीताभिरसङ्कीर्णाः स्वरजातीः उन्नीतवती तदा प्रीयता प्रीयमाणेन तेन कृष्णेन 'साधु साधु' इति वचनेन सा पूजिता सम्मानिता जाता। तदान्या काचिद्गोपी तदेव जात्युन्नयनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वोन्निन्ये, तस्यै गोप्यै पूर्वगोपीतोऽपि कृष्णो मानमादरं बह्वदात्। गानविद्यायां चेयं पूर्वतोप्यतिनिपुणा। स्वराश्च—"षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा। धैवतश्च निषादश्च सर्वे स्युः श्रुतिसम्भवाः॥ मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः। मातङ्गश्च क्रमेणाह स्वरानेतान् सुदुर्लभान्" इत्युक्ता ज्ञेयाः। तेषां जातिभेदाश्च बहवो गानशास्त्रतो ज्ञेयाः ॥ १० ॥

अन्वितार्थप्रकाशिका

उच्चैरिति ॥ यासां गीतेन इदं विश्वमावृतं ता नृत्यमाना नृत्यशीलाः। ताच्छील्ये चानश्। रक्तकण्ठ्यः नानारागैरञ्जितकण्ठ्यः रतिः कृष्णप्रीतिरेव प्रिया यासां ताः कृष्णस्याभिमर्शन स्पर्शेन मुदिता गोप्यः उच्चैर्जगुः ॥९॥ काचिदिति सार्द्धम् ॥ काचिद्गोपी मुकुन्देन कृष्णेन समं सह अमिश्रिताः कृष्णोन्नीताभिरसंकीर्णाः स्वरजातीः उन्निन्ये उन्नीतवतीः तदा प्रीयता प्रीयमाणेन। शता आर्षः। तेन कृष्णेन साधु साधु इति वचनेन पूजिता स्वीयोत्तरीयादिभिः सम्मानिता जाता। विशाखेयमिति प्राञ्चः तदाऽन्या काचिद्गोपी तदेव जात्युन्नयनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वोन्निन्ये। तस्यै गोप्यै पूर्वगोपीतोऽपि कृष्णो मानमादरं रत्नमालादिरूपम् अदात्। इयं ललिता गीतिनिपुणा। स्वराश्च "षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ॥ धैवतश्च निषादश्च सर्वे स्युः श्रुतिसंभवाः ॥ मयूरचातकच्छागक्रौञ्च कोकिलदर्दुराः ॥ मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् ॥" तेषां जातीरष्टादश यदुक्तम्। "रागस्तु जायते यस्याः सा जातिरभिधीयते ॥ शुद्धा च विकृता चेति सा द्विधा परिकीर्तिता ॥ शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः ॥ ता एव विकृताः सत्यो जाता विकृतसंज्ञया ॥" इत्यादि गानशास्त्रे ज्ञेयम् ॥ १० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

रक्तकण्ठरोमधुरस्वराः गानश्रमेण अरुणकण्ठरो वा कृष्णस्याभिमर्शेन संस्पर्शेन मुदिताः ॥ ९ ॥ पूर्ववत्तासां प्रेमचेष्टितादि वर्णयति सार्द्धपञ्चभिः काचिदिति मुकुंदेन सहस्वरजातीः षड्जादिस्वरालापगतिः अमिश्रिताः कृष्णोन्नीताभिरसंकीर्णाः काचित् उन्निन्ये उच्चैः प्रापयामसाप्रीयताप्रसन्नतां प्रापमाणेन तेन हरिणा साधुसाध्विति पूजितासती तदेव स्वरजात्युन्नयनमेव ध्रुवाख्यं ताल भेदं पुनः कृत्वा उन्निन्ये तस्यैगोप्यै हरिबहुमानं आदरात् ॥ १० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उच्चैरिति किं च नृत्यमाना नृत्यन्त्यः, रक्तकठ्यः नानारागैरनुरञ्जितकण्ठ्यः, विपरीतस्वरत्वरहिता इत्यर्थः। रतिः रमणं सुरतं वा प्रियं यासां ताः अतः एव, कृष्णस्याभिमर्शः संस्पर्शस्तेन मुदिताः सत्यः, उच्चैः जगुः। यद्गीतेन यासां यस्य च गीतेन, इदं विश्वं, आवृतं व्याप्तम् ॥ ९ ॥ श्रीकृष्णाभिमर्शमुदितानां तासां प्रत्येकं गीतादिचेष्टितमाह ॥ काचिदिति ॥ तत्र काचिदङ्गना, मुकुन्देन श्रीकृष्णेन, समं सह, स्वरजातिः स्वरान् तदालापगतीश्च, अमिश्रिताः श्रीकृष्णेनोन्नीताभिरसंकीर्णाः उन्निन्येऽमूर्च्छयत्। तदा प्रीयमाणेन, तेन कृष्णेन, साधु साध्विति पूजिता संमानिता सती, तदेव स्वरजात्युन्नयनमेव, ध्रुवं ध्रुवाख्यं तानविशेषं कृत्वा, उन्निन्ये समुन्नीतवती। तस्यै च इत्थ स्वरमुन्नीतवत्यै एव, श्रीकृष्ण इति शेषः। बहु यथा तथा, मानं सम्मानं, अदात् ॥ १० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

उच्चैर्जगुरिति : १०.३३.९.

मोहिते सति मृगे स्थितिभाजि स्थैर्यमेष्यति चिरेण मृगाङ्कः । चिन्तयन्निति गणः खलु तासां गातुमारभत रासरसेषु ॥ ४६ ॥
ब्रह्मादिदेव-मुनि-योगिवरेण्य-पुण्यालभ्योऽच्युताङ्गसुखसङ्ग इहास्ति योऽलम् ।
याभिः ससौरतविलासत एव लब्धस्तद्गीतसंवृतमिदं त्विति युक्तमेव ॥ ४७ ॥

काचित् सममिति : १०.३३.१०.

अयं श्रुतिमुखो द्विजेशकुलजो द्विजाभ्यर्चितोऽभवत्वतितरामहं त्वधरबुद्धिरूर्वंशजा ।
अवेलमधुना कथं परिचरेयमित्याशयाज्जगौ बत तदा तु सा तदविमिश्रमेवादरात् ॥ ४८ ॥
निशायामनिशं गीतोल्लास सच्छ्रुतिभास्वरम् । यो वेत्त्यनुभवत्येष साधुवादोऽच्युतोक्तिषु ॥ ४९ ॥
एकोद्गीत-परोन्नीत-स्वरवृर्ति विभाव्य सः । ऐकमत्यमसापत्न्य ज्ञात्वोचे साधु साधु तत् ॥ ५० ॥

कृष्णप्रिया

श्रोताओं को सुख देने वाले कषाय-सुरीले कण्ठ वाली, रमण क्रिया में रस वाली, प्रियतम के विशेष स्पर्श से प्रमोद पूर्ण बनी हुई गोपियाँ नृत्य के साथ पंचम कली से जब गान करने लगी तब नाद से सारा ब्रह्माण्ड छा गया ॥ ९ ॥ कोई एक गोपी उत्तम भाव से भगवद् भाव को प्राप्त कर सकी थी उसने जाना कि श्यामसुन्दर जी की इच्छा इस स्वर जाति को उपर ले जाने की है तब उस गोपीने भगवान श्रीकृष्णके नाद के साथ अपने स्वर और जाति का मिश्रण न हो इस प्रकार अपने स्वर को उपर ले गई, ऐसा भगवदभीष्ट कार्य को देख कर प्रसन्न मन भगवान् श्रीकृष्णने उनका आदर किया, और श्रीमुख से "साधु साधु" कहा, उस अवसर दूसरी गोपी ने उसी ध्रुव स्वर को ऊँचे लें नादसे मिलाया तब भगवान ने उसका भी अत्यन्त सम्मान किया ॥ १० ॥

काचिद् रासपरिश्रान्ता पार्श्वस्थस्य गदाभृतः । जग्राह बाहुना स्कन्धं [1]श्लथद्वलयमल्लिका ॥ ११ ॥
तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभम् । चन्दनालिप्तमाघ्राय हृष्टरोमा चुचुम्ब ह ॥ १२ ॥

कर्दमक्षमा

अन्वयः—रासपरिश्रान्ता, श्लथद्, वलयमल्लिका, काचित्, बाहुना, पार्श्वस्थस्य, गदाभृतः, स्कन्धम् जगाह ॥११॥ तत्र, एका, अंसगतम्, उत्पलसौरभम्, चन्दनालिप्तम्, कृष्णस्य, बाहुम्, आघ्राय, हृष्टरोमा, चुचुम्ब ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं नृत्यगीतादिना श्रीकृष्णसम्मानितानां तासामतिप्रीतिविलसितं वृत्तमाह । काचिदिति । श्लथन्ति वलयानि मल्लिकाश्च यस्याः सा ॥ ११ ॥ उत्पलस्य सौरभमिव सौरभं यस्य तं बाहुम् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गदाभृत इति । ननु वनिताभिर्विलासावसरे गदाधारणस्य शृंगारापहारकत्वाद्वीररसत्वापत्तिर्जातेतीत्थं भ्रान्तानां भ्रान्त्यनुपत्त्यर्थमाह गदार्थं पार्वतीशिवसंवादेन । तथा हि—रासलीलां विलोक्यागत्य शिवेन सा लीला पार्वत्यै वर्णिता । तत्र प्रसंगेनोक्तम्—'पार्श्वस्थ गदाभृतः' इति । तत्र पार्वत्योक्तम्—गदाभृत इति कथम् ? तत्र शिवेनोक्तं गदाभृतो वेणुभृतः । तदा पार्वत्युवाच—"रणे संप्रेषिता शूरैः शत्रूंश्चूर्णयती भुवि । शास्त्रेण सा गदा प्रोक्ता कथं वेणुर्गदा प्रभो ॥ शिव उवाच कीचकेषु समुत्पन्ना बहुरन्ध्रविभूषिता । येन केन प्रकारेण माधवेनाधरे धृता ॥ वेणुः सपत्निभावेन गदत्येवमहर्निशम् । अतो व्रजस्त्रियः सर्वाः संवदान्त च तां गदाम् ॥" इति शिवकृतपञ्चाध्यायीव्याख्याने, तदैव गोपीश्वरो जात इति प्रसिद्धेः । केचित्तु नट वृन्दाधिपोचिता गदाकृतिर्यष्टिस्ताम्, तदपि न शोभनं प्रतिभाति । मम तु गदति वर्णात्मकं शब्दं निगदतीति गदा वंशी तां बिभर्तीति तथा तस्य । 'गद-व्यक्तायां वाचि' इतीत्थं प्रतिभातीति । स्कन्धम् भुजशिरः ॥ साद्गुण्यप्राधान्येन सख्यौ वर्णयित्वा सौभाग्यप्राधान्येन सर्वमुख्यतमां वर्णयति—काचिदिति । गदाभृतः कृष्णस्य पक्षे, गदनं गदा गीतवत्योः सख्योर्गुणतारतम्यज्ञानकथा, तां बिभर्ति धत्ते पुष्यति वा तस्य स्कन्धं बाहुना दक्षिणेन जग्राह आललंबे । श्लथन्तो वलयाः मल्लिकाश्च कबरस्था यस्याः सा । स्वाधीनकान्तत्वादियं वृषभानु

---

१. स्रवत्कबर-विज. ।

कुमारी ॥ ११ ॥ तत्र रासे । उत्पलेन तन्मालया सुगंधितमिति वा । हृष्टरोमा जातसात्त्विकभावा । 'स्तम्भः स्वेदोऽथ रोमाञ्चः' इत्याद्युक्तेः । चुचुम्ब हेति कामाकुलितत्वं सूचितम् ॥ अंसगतम् स्वस्कन्धे स्थितम् । चंदनालिप्तमपि उत्पलस्येव सौरभं यस्येति स्वाभाविकेन गात्रस्योत्पलगन्धेनात्यधिकेन चंदनगंधस्यावरणात् । पूर्वाध्यायोक्तक्रियातुल्यत्वादियं नूनं श्यामला ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवेत्यर्द्धकम् । तदेव तालानिबद्धं केवलरागमयमेव वा प्राथमिकत्वेन प्राप्तत्वादादितालमयमेव वा गीतं तत्क्षणादेव ध्रुवं यति निःसारसञ्ज्ञतालद्वयैकतरात्मकं ध्रुवं भोगाख्यावयवद्वयमात्रयुतगीतविशेषं रचयित्वा जगावित्यर्थः । तस्यैव च मानमदात् श्रीमुकुन्द इति शेषः । किन्तु पूर्वतो बहु यथा स्यात्तथेति । अन्यत्तैः । यद्वा । स्वरा मत्तमयूरादिवद्ध्वनयः षड्जादयः सप्त । तदुक्तम् । "रञ्जकाः श्रोतृचित्तानां स्वराः सप्तविधा मताः । षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा । धैवतश्च निषादश्च सर्वं स्युः श्रुतिसम्भवाः । मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः । मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान्" इति । अथ जातयस्तत्र रागोत्पत्तिहेतवः । तदुक्तम् । रागस्तु जायते यस्याः सा जातिरभिधीयते । शुद्धा च विकृता चेति सा द्विधा परिकीर्त्तिता । शुद्धा सप्तविधा ज्ञेया तज्ज्ञैः षड्जादिभेदतः । षड्जकैशिक्यादिभेदादेकादशविधा परेति आदिग्रहणादार्षभीत्यादयः षट् । षड्जो दिव्यो वेत्यादयश्च दश ज्ञेयाः । ता अमिश्रिताः स्वरजात्यन्तरास्पृष्टाः । परमप्रावीण्येन केवलतत्तज्ज्ञानात् । तत्रापि उत् उत्कृष्टम् । निन्ये गृहीतवती जगावित्यर्थः । एवं कासाञ्चिद्गुणोत्कर्षप्राधान्येन तत्रापि तारतम्येन गानाद्यनुभावकं प्रेम वर्णयित्वा कासाञ्चित् सम्भोगप्राधान्येन वर्णयति । काचिद्रासेत्यादिना । तत्रापि कस्याश्चित् सौभाग्यप्राधान्येनाह काचिद्रासेति । पार्श्वस्थस्येति शीघ्रसुखग्रहणं दर्शितम् । अन्यथा रासावेशेन स्खलनं सम्भवेत् । गदां नटवृन्दाधिपत्युचितां गदाकृतिं यष्टिं बिभर्ति इति । यद्वा गदति वर्णात्मकं शब्दं निगदतीति गदा वंशी तां तदुचितत्वेनापि बिभर्त्तीति गदाभृतं तस्य । अत एव मध्यस्थस्यापि नटवृन्दाधिपतिस्थानीयोऽयं प्रकाशः परिश्रान्तिलक्षणं श्लथदिति श्रमेण नवमल्लिकावद्विलुलिताङ्गायां श्लथन्तः परस्परं विच्छिद्य सङ्घट्टं कुर्वन्तो वलयाः तथा श्लथन्त्यो गलन्त्यो मल्लिकाश्च कवरस्था यस्याः सा । तथा श्रीपराशरेणाप्युक्तम् । "परिवर्त्तनश्रमेणैका चलद्वलयलापिनीम् । ददौ बाहुलतां स्कन्धे गोपी मधुनिघातिनः" । इति । अत्र मल्लिकानां शिथिलता च ज्ञेया । शोभादिदशानां मध्ये सोऽयं माधुर्यनामानुभावो ज्ञेयः । यथोक्तम् । माधुर्यं नाम चेष्टानां सर्वावस्थासु चारुतेति । एवमस्याः स्वाधीनभर्तृकात्वं मध्यस्थितत्वं दर्शितम् । तस्मात् श्रीराधिकेयम् । अतो निकटपठिते गानविद्यया तद्द्वयसुखकारिण्यौ तत्सख्यौ श्रीललिताविशाखे भवेताम् । पूर्वस्यास्तादृशचेष्टत्वेन वर्णनं स्वतन्त्रनायिकात्वव्यञ्जकम् । उत्तरयोर्गीतादिगुणत्वेन वर्णनं साहायकव्यञ्जकमिति ॥ ११ ॥ अथ प्राक्तनक्रियासादृश्येन नूनं श्रीश्यामलाविलासमाह । तत्रेति । एका गोपी अंसगतं स्वस्कन्धस्थितं स्वभावत एव उत्पलपुष्पतोऽप्यधिकं तज्जातीयं सौरभं यस्य इत्यर्थः । विशेषतश्चन्दनेन आ सम्यक् भक्तिच्छेदादिसाधुप्रकारेण लिप्तं ह स्पष्टम् । चुम्बने हेतुः हृष्टरोमेति प्रेमवैवश्यादित्यर्थः । श्लेषेण रोमाण्यपि हृष्टानि तस्याश्च हर्षः किं वक्तव्य इत्यर्थः । अयं प्रागल्भ्यात्थाऽनुभावः । यथोक्तम् । "निःशङ्कत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भता" इति ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एका गोपी अंसगतं स्वस्कन्धस्थितं स्वभावत एवोत्पलपुष्पतोऽपि अधिकं सौरभं यस्य, विशेषतश्च चन्दनेन आ सम्यक् भक्तिच्छेदादिसाधुप्रकारेण लिप्तमिति कामोद्दीपनं सूचितम् । ह स्पष्टम् । चुम्बने हेतुः—हृष्टरोमेति प्रेमवैवश्यादित्यर्थः । श्लेषेण रोमाण्यपि हृष्टानि, तस्याश्च हर्षः किं वक्तव्य इत्यर्थः ॥ ११-१२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं नृत्यगीतवाद्यादिना श्रीकृष्णसम्मानितानां तासामति प्रेमविलसितं वृत्तमाह चतुर्भिः । काचिदिति । रासेन परिश्रान्ता श्लथन्ति वलयानि मल्लिकाश्च यस्यास्तथाभूता आत्मनो बाहुना समीपस्थस्य भगवतोंऽसं जग्राह ॥ ११ ॥ तत्र तासां मध्ये एका त्वात्मनोंऽसगतं स्कन्धे निहितमुत्पलस्य सौरभमिव सौरभं यस्य तं चन्दनेन समन्ताल्लिप्तं कृष्णस्य बाहुमाघ्राय हृष्टानि पुलकितानि रोमाणि यस्यास्तथाभूता बाहुम् अधरं वा चुचुम्ब ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कृष्णोऽपि तदेव गीतं ध्रुवमुन्निन्ये व्यक्तवर्णेन प्लावयामास तेन तस्यै एव समज्ञायन्त्यै अत्र समगानं नाम तत्प्रशंसार्थं मुकुन्देन तद्गानानुसारेण गीतमिति ज्ञातव्यम् अन्यथा त्रिजगति मुकुन्दगायनसमज्ञायनज्ञः कोऽस्ति स्वविभूतिमन्तरेण स्रवन्ती श्लथयन्तीकवरबद्धमल्लिका यस्याः सा तथा ॥ ११ ॥ उत्पलसौरभम् उत्पलमालया सुगन्धितम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

काचित् । गदां गोपालनोचिताम् । नटवृन्दाधिपत्युचितामेव वा गदाकृतिं यो बिभर्त्तीति गदाभृत् ॥ ११-१४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

एवं कृष्णोऽपि श्रान्तः सन् कस्याश्चिदंसे बाहुं नन्यासेत्याह—तत्रेत्यादि। तत्र रासोत्सवे एका सौभाग्यवी अंसगतं कृष्णस्य बाहुं चुचुम्ब, उत्पलसौरभं स्वभावेन चन्दनालिप्तम् आरोपेणात आघ्राय घ्राणेन परीक्ष्य कि मयं चन्दनेन सुरभिः किं स्वरूपेणेति संदिग्धा, उत्पलसौरभमिति स्वरूपं सौरभमनुभूय, हृष्टरोमा चचुम्बेत्यर्थः। अतश्चन्दनालिप्त इति लिपिप्रकृत्यर्थ महिमा। अत्र कृष्णस्यालस्यमस्या उत्कण्ठां व्यभिचारिणौ ॥ ११-१२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कृष्णोऽपि श्रमलीलया कस्याश्चिदंसे भुजं न्यस्तवानित्याह—तत्रेत्यादि। तत्र समये एका स्वांसगतं श्रीकृष्णस्य बाहुं चुचुम्ब। तस्याः श्रमस्तच्चुम्बनेनैव गतः। उत्पलसौरभमिति स्वभाव सौरभं चन्दनेनालिप्तमेव, नतु तेन सुरभि, स्वत एव सुरभित्वात्। स्वयं ममांसे बाहुर्न्यस्त इति सर्वापेक्षया स्वस्याः सौभाग्यातिशयं मत्वा हृष्टानि रोमाणि यस्याः ॥ ११ ॥ कस्याश्चिन्नाटच विक्षिप्तेत्यादि। श्रीकृष्णस्य गण्डे स्वगण्डं संदधत्यास्ताम्बूलचर्वितं प्रादात्, यद्वा ताम्बूलचर्वितं संदधत्याः सखीकरे अनुचरो मुखे वा निक्षिपत्याः कस्याश्चिद् गण्डे गण्डं प्रादात्, मह्यं देहीति प्रणवातिशयो व्यञ्जितः न तु सा ददौ नाप्येषोऽगृह्णात् ॥१२-१५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

साद्गुण्यप्राधान्येन सख्यौ वर्णयित्वा सौभाग्यप्राधान्येन सर्वमुख्यतमां वर्णयति। काचिदिति। गदाभृतः कृष्णस्य पक्षे गदनं गदा गदा गीतवत्योः सख्योर्गुणतारतम्यज्ञानकथा तां बिभर्त्ति धत्ते। पुष्यति वा तस्य स्कन्धं बाहुना दक्षिणेन जग्राह आललम्बे। श्लथन्तो वलयाः मल्लिकाश्च कवरस्था यस्याः सा। स्वाधीनकान्तत्वादियं श्रीवृषभानुकुमारी ॥ ११ ॥ अंसगतं स्वस्कन्धे स्थितं चन्दनालिप्तमपि उत्पलस्येव सौरभं यस्येति स्वाभाविकेन गात्रस्योत्पलगन्धेनात्यधिकेन चन्दनगन्धस्यावरणात् पूर्वाध्यायोक्तक्रियातुल्यत्वादियं नूनं श्यामला ॥ १२ ॥

श्रीरसिकाह्लादिनी टीका

एवं कासाञ्चिद्गुणोत्कर्षमुक्त्वा कासाञ्चित् पूर्वमेव चिन्तितं आलिङ्गनादिसुखं वर्णयति काचिदिति, यूथमुख्या सौभाग्यभरगर्विता स्वस्यैकस्मिन् पार्श्वे स्थितस्य विद्यमानस्यैव लाघवशक्तिमत्वात्। श्रीकृष्णस्य स्कन्धं स्वबाहुना जग्राह। श्रीकृष्णांसे स्वबाहुं स्थापितवतीत्यर्थः। कीदृशस्य गदाभृत इति सामर्थ्यद्योतिका श्रीशुकोक्तिः, यद्वा गदं कामतापरूपरोगं न विभर्त्ति न पुष्णाति इति गदाभृतः तस्य कामतापनिवर्त्तकस्येत्यर्थः। स्कन्धग्रहणे हेतुमाह रासपरिश्रान्ता नृत्यसम्भ्रमेण रसावेशात् श्रमः अतःश्रमापनयनद्वारा स्खलनशङ्कया स्कन्धग्रहणमिति, अनेन स्वाधीनपतिकात्वं सूचितम्। परिश्रमलिङ्गमाह—श्लथदिति शिथिलीभवन्तो वलयाः श्लथन्त्यो मल्लिकाश्च कवरात् यस्या सा, यद्वा श्लथन्ती पुष्पनिर्म्मितवलयेभ्यो मल्लिका यस्या सा, यद्वा श्लथन्ती वलयाकारा कवरान्मल्लिका यस्याः सा, अन्यथा मण्डलपरित्यागेन श्रमापनयने क्रियमाणो रासो भज्येत् रसवृद्धिरपि न भवेदिति। अत एव मण्डलमपरित्यजता कृष्णेनापि स्वस्कन्धार्पणं सम्भाव्यतेति। तदुक्तं पराशरेण "परिवर्तश्रमेणैका चलद्वलयलापिनाम्। ददौ बाहुलतां स्कन्धे गोपी मधुविघातिन' इति ॥ ११ ॥ कस्याश्चित् पूणमनोरथोपगतं चेष्टितं वक्तुं तस्या एव यूथमुख्याया विलासविशेषमाह तत्रेति—तत्र रासमण्डले एका काचिद् गोपी कृष्णस्य बाहुं स्वस्यांसगतं तेन करालिंगितत्वात्। उत्पलतो नीलोत्पलादपि सौरभं यस्मिन् स्वाभाविकं सौरभमित्यर्थः। विशेषतश्चन्दनालिप्तं चन्देनेनासमन्तात् भक्तिच्छेदेनालिप्तं अनेन कामतापनिर्वापकत्वमुक्तम्। आघ्राय भावविशेषेण घ्राणम्। अतः एकान्तप्रविष्टपरिमला आनन्दपूर्णा सती बाहुमेव चुचुम्ब ह। इति हर्षे प्रसिद्धौ वा पूर्णानन्दत्वे लक्षणमाह—हृष्टरामेति स्पर्शसुखं पूर्वश्लोक एव विघृतं अस्मिन्पद्ये गन्धसुखमनुभूतं चुचुम्ब इति फूत्कारेण कामाग्निसन्धुक्षणमिव बिडम्बयन्ती चुम्बनमकरोदिति तात्पर्यार्थः। उत्पलसौरभमिति विशेषेण स्वाभाविकं सौरभं चन्दनालिप्तमिति विशेषेण कर्बुरितम्। अनयोः विवेचनायाघ्राणतात्पर्य्यं, अलौकिकभावयुक्तानां परमविदग्धानां त्वेतद्विवेचनं नान्यासामिति सूचितम्। आघ्राण विवेकधैर्य्यनाशाय चुम्बनं वाप्यायनायालमिति ॥ १२ ॥

विशुद्धरसदीपिका

प्रीतियुतत्वमेवाभिव्यञ्जयति। तदित्यर्द्धेन। तदेव तयोद्गीतमेव ध्रुवं यतिनिःसारुसंज्ञतालद्वयैकतरात्मकध्रुवाभोगाख्यावयवद्वयमात्रयुतगीतविशेषं रचयित्वेति शेषः तेन ध्रुवोन्नयनेन तस्यै परमसुहृदे पूर्वापेक्षया बहु अधिकतरं यथा भवति तथा मानं चेतसः समुत्कर्षमदात् दत्तवान् मुकुन्द इति शेषः। अत्र मुकुन्दपदस्यामुख्यया वृत्त्या तस्यापि तामनु सख्यमेवाभिमतं तत्सुखपर्य्यवसायित्वादिति संक्षेपः। तदेवं तासां तस्याश्च प्रेमसौभाग्यं गुणोत्कर्षं च वर्णयित्वा तत्तत्सौभाग्यमणिमञ्जरीनीराजितचरचरणकमलायाः श्रीराधिकायाः सर्वाधिकं स्वाधीनपतिकात्वलक्षणं सौभाग्योत्कर्षमाह। काचिदिति। अनिर्वचनीयेत्यर्थः। यद्वा तादृशसौभाग्योत्कर्षवती श्लेषेण केन ब्रध्नेन भानुनेति यावत् आचिता अयोनिजात्वात्सनातनतया संगृह्णीतेति काचित् "अयोनिजेयं

कल्याणी कीर्तिनन्दिनीति" ब्रह्मवैवर्तभागवद्भगवत इव तस्या अपि प्रादुर्भावमात्रमेवेति भावः "मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोऽम्बुनो" रित्यमरः। तदेवं ककारस्यानेकार्थस्य मुख्यया वृत्त्या भानौ शक्तिः ततश्च नामैकदेशे नामग्रहणमिति न्यायाद्वृषभानुनन्दिनीति नामापि संसाधितम् "श्लिष्टैः पदैः पिशुनयेच्च रहस्यवस्त्विव" त्यलङ्कारानुसारेण सङ्गोपितमपि अथवा पद्मपुराणसंवादनकेन वेधसांशावतरणप्रसङ्गे वृषभानुनाम्ना गोपराजेनात्मजात्वेनोचितेति किवन्तोऽयमिति पूर्ववदेव रासपरिश्रान्तेति सौकुमार्य्यं पार्श्वस्थस्येति नित्यसान्निध्य गदेति नटराजकरास्थता गदाकृतिर्यष्टिरेव गदेत्युच्यत इति भरतः। यद्वा गदतीति कलध्वनि करोतीति गदा वंश्येव "निगदो गद" इति कोशाच्च परिश्रान्तिलक्षणमाह। श्लथदित्यादिना रासपरिश्रमेण रसालसतया वा नवमालिकावद्विलुलिताङ्गत्वेन *श्लथन्त्यो गलन्त्यो मल्लिकाः कबरगुम्फितमल्लिका स्रजो यस्या इति किञ्चित्कार्श्यं सूचितं तेन च सौकुमार्य्यं* माधुर्य्याख्यानुभावोऽयं "माधुर्य्यं नाम चेष्टानां सर्वावस्थासु चारुते"ति अन्यथा कार्श्यस्यावर्णनीयत्वादिति भावः। बाहुना स्कन्धं जग्राहेति विस्रम्भात्मकं सख्यं स्वाधीनपतिकात्वं च सुव्यक्तमिति सक्षेपः॥ ११ ॥ तदेव तस्याः सौभाग्योत्कर्षं साक्षादनुभूय तदभिलषन्त्याः दक्षिणायाश्चेष्टितमाह। तत्रेति। तस्याः सौभाग्योत्कर्षे ऽनुभूते सतीत्यर्थः। एका प्रागुक्ताभ्यां द्वाभ्यामन्या भिन्नप्रकृतित्वात् "एके मुख्यान्यकेवला" इति कोशात् अंसगतमिति दास्यप्रायसख्यव्यक्तिः स्वभावत एवोत्पलपुष्पतोऽप्यधिक तज्जातीयं सौरभं यस्य तं विशेषतश्चन्दनेन आसम्यक् भक्तिच्छेदादिसाधुप्रकारेण लिप्तं हृष्टरोमेति प्रेमवैवश्यं दैन्यञ्च सूचितं चुचुम्वेति प्रागल्भ्यञ्च "निःशङ्कत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भते"ति। वस्तुतस्त दास्यप्रायरतेरस्या नेदं रमणीयञ्चेष्टितमिति श्रीमुनीन्द्राभिप्रायः जग्राह बाहुनेत्यादिना पूर्वोक्तसुषमाविशेषस्योत्कर्षज्ञापनायैव प्रदर्शितमिति ज्ञेयम्॥ १२ ॥

श्रीरामनारायणकृता भावभावविभाविका

एवं गाननृत्यादिगुणप्रधानायाश्चेष्टास्ताः कासां चरितेन दर्शयित्वा संभोगप्रधानाश्चेष्टा निरूपयन्नादावालिङ्गनचेष्टामाह। काचिदिति। काचित्तु रासपरिश्रान्तेत्यत्र यद्यपि रासो रससमूहस्तत्रापि नित्यपरमानन्दघनसन्निधानेन पूर्वव्याख्यानरीत्या काचिदिति चित् सुखरूपत्वेन च श्रमासम्भवस्तथापि कृष्णालिङ्गनसुखसम्भोगातिशयाय मिषेण श्रान्तैवेति बोध्यम्। यद्वा राससुखभरपूर्णतयैव चेष्टान्तरप्रवृत्तिशैथिल्यात्परिश्रान्तेवेति ज्ञेयं, यद्वा परिशब्दोऽत्र वर्जने तथाच रासश्रमरहिता अपि सह रासेन निवृत्तविरहादिश्रमा अपि केवलसुखसंभोगातिशयायैव पार्श्वस्थस्येति विभुसर्वाङ्गतया सर्वत्र स्थितस्यापि वर्णितरीत्या मण्डले स्वसमीपाविभूतस्य गदाभृत इति साक्षाद्रमापतेर्यद्वा गदाकारा काचिन्नटनागरस्य नृत्ये गदाचालनवदावर्तमाना यष्टिः तां धरतः। यद्वा गद्यते व्यक्ताक्षरमधुरस्वरेण निगद्यते गीतमनतेति गदा वंशी तद्भृतः स्कन्धं जडीभूतयाचलया पुष्पितया स्वर्णयूथिकालतया तमालद्रुमस्कन्धाश्रयणमिव विबुधविबुधसुमनोहरत्रिविधभगवद्गुणसुमनोऽन्वितया चतुर्वर्गभगवत्स्वरूपानन्दफलयुतया प्रेममाधुर्य्यरसमधुच्युतया भक्तिलतया श्रीभागवतप्रतिस्कन्धाश्रयणमिव कर्म्मणि खेदानुभवेन तादृग्गुणया श्रुतिलतया ब्रह्माश्रयणमिव रोमपुलकमुकुलस्वेदकणमधुस्रावचत्या प्रेमवैचित्यजडीभूतया तदालिङ्गनोत्साहपवनवेगचलितया ललितया बाहुलतया जग्राह श्लथद्वलयमल्लिका इति द्रुमस्कन्धाश्रितलतया कुसुमनिपातमिव भागवतस्कन्धाश्रितभक्तिलतया त्यक्तैहिकामुष्मिकसुखयोगसिद्धकुसुमजातमिव ब्रह्माश्रितश्रुतिलतया सवलितपुष्पितवचोव्रातमिव भगवत्स्कन्धाश्रितबाहुलतया श्लथन्त्यो वलयाकारा मल्लिका यस्याः। यद्वा श्लथन्तो वलयाः कवरग्रथितमल्लिकाश्च यस्या इत्यपि रासश्रमानुकारो बोध्यः तथाच लताश्रिततमालवत् भक्त्यालङ्कृतभागवतवत्श्रुत्यवभासितनित्यपरमानन्दब्रह्मवत्तयालिङ्गितो भगवान् शुशुभे इति भावः॥ ११ ॥ तस्या एव चरितान्तरमन्यस्या वा चरितमाह। तत्रकांसगतमिति। तत्र तस्यामेव प्रियस्कन्धालिङ्गनदशायां सा स्वीयैकांसे एकस्मिन् स्कन्धे गतं प्राप्तं कृष्णस्य बाहुं चुकुम्ब तत्रैव रासमण्डले एका काचिदन्या स्वांसगतं तद्बाहुं चुचुम्ब किम्भूतं बाहुं तदाह। उत्पलसौरभम् उत्पलमिव तत्सुरभिवन्मधु ततोऽप्युत्कृष्टं सौरभं यस्मिन् यद्वा उत्पलेऽपि सौरभं यस्य—

रसोऽहमप्सु कौन्तेय ! प्रभास्मि शशिसूर्ययोः। पुण्यो गन्धः पृथिव्याञ्चे त्यादिवचनैः॥

सर्वत्र सर्वगुणानां भगवदंशत्वात्। यद्वा अन्ये विषयाः पुनः पुनर्भुज्यमानाः सर्वेऽपि प्रतिपलं विरसतां गच्छन्ति विकारित्वात् इदन्तु उत्कृष्टमेव प्रतिपलं सौरभं यस्य स्वरूपात्मकतयैवाविकृतत्वात्। यद्वा तस्याः क्षीयमाणत्वेन प्रतिपलाभ्यस्यमानानुभवप्रकृष्टतया पदे पदे स्वादु स्वादु भागवतार्थ इव उत्कृष्टं प्रतिपलं सौरभं यस्य। यद्वा उत्कृष्टं किमपि वाचामगोचरं स्वरतानां सुखं पूर्वमद्भुतं पाति पुनश्चाधिकं लाति सौरभं यस्य। यद्वा उत्पलं नीलकमलं तद्वत्स्वकान्त्या सौरभं चरणकमलं तद्वत् करतलाङ्गुलिकान्त्या भातीत्युत्पलसौरभं। यद्वा उत्पलं रात्रिकमलं रात्रावेव भाति सौरं दिनकमलं तु दिने एव इदं तु उत्पलवद्रात्रौ सौरभं दिनेऽपि समानं भाति स्वत एवेदृगपि पुनश्चन्दनेनासमन्ताल्लिप्तम् अनेनातिसुरभित्वेऽपि चन्दनलिप्तत्वकथनेन चन्दनसौरभस्य तत्रातिशयापादनासम्भवेऽपि रविनिवेदितदीपवत्परमानन्दे ब्रह्मण्यपि श्रुत्योद्भुतसत्त्ववृत्त्यभिव्यक्तसुखत्ववत्स्वस्वरूपे एव स्वस्मिन् सखिसमागमसुखवद्भक्तप्रियत्वेन पत्रं पुष्पं फलं तोयमित्यादिस्वप्रतिज्ञानुसारेणावश्यस्वीकारो दर्शितः। यद्वा चन्दनेनालिप्तमपि स्वत

एवोत्पलादपि सौरभं बाहुमाघ्राय हृष्टरोमा तत्सुखातिशयेन प्रेमरसव्याप्ततनुत्वेन रससेवितभूमौ निपतिततृणलताद्युत्थानवत्प्रतिरोमव्याप्तहर्षा पुलकाङ्गी चुचुम्ब नासिकया सुरभिसुखातिशयलाभलुब्धा चुम्बनेन स्पर्शरसावास्वादितवतीति भावः । हेति स्फुटं सर्वसखिनृत्यसमाजे गतत्रपतया चुम्बनेन प्रागल्भ्यलक्षणानुभावो दर्शितः, किञ्च मुखकमलनिवासास्पदे स्कन्धे हरिकरकमलागमे जाते उत्कृष्टबन्ध्वागमे तच्चरणचुम्बनलक्षणादररीतिमवगत्य तत्करपद्मपदविश्रमिबालं चन्दनालेपसितविशालं चुचुम्बेति ध्वनिः ॥ १२ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

काचित्तु तदेव जात्युन्नयनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वोन्निन्ये उन्नीतवती तस्यै तथा गानपरायै बहु यथा स्यात्तथा मानमदात् वस्त्रालिङ्गनादिदानपूर्वकं साधुवादं श्रीमुकुन्दः कृतवान् विशाखाख्यैषा श्रीराधासखी । एवं नृत्यगीतादिपराणां भगवता सम्मानितानां मध्ये कस्याश्चिदतिप्रीतिविलसितं वृत्तमाह । काचित् पार्श्वस्थस्य गदां नटवृन्दाधिपत्युचितां गदाकारां यष्टिं बिभर्त्ति गदति वर्णानिति गदां वंशीमिति वा तथा च अनायासग्रहणस्य स्वानिरोधपरस्य मध्यशङ्कुस्थानिमूर्तेः प्रेष्ठस्य स्कन्धं बाहुना जग्राह यतो रासपरिश्रान्ता यतः सौकुमार्य्यात् श्रमकार्श्येन श्लथन्तो वलयाः गलन्त्यो मल्लिकाश्च कवरस्था यस्याः तथा च विश्रामाय तथा प्रवृत्तिपरा मध्यस्थप्रेष्ठसन्निहिता स्वाधीनभर्तृका प्रियापदप्रतिपाद्या सर्वाधिका श्रीराधिकाभिधालंकृतेयमितिध्वनितम् ॥ ११ ॥ तासु मध्ये एका रासपरिश्रान्तस्येषद्धाराक्रान्तस्य च कृष्णस्य स्वांसगतं बाहुं भगवत एवोत्पलतोऽप्यधिकसौरभं यस्य तं तत्रापि चन्दनेनालिप्तं चुचुम्ब । यतः हृष्टरोमा अन्तर्मातुमशक्यत्वाद्रोमद्वारा बहिर्निःसृतेन हर्षेण युक्ता प्रागल्भाख्योऽनुभावोऽयं “निःशङ्कत्वं सम्प्रयोगे बुधैरुक्ता प्रगल्भता” इत्युक्तेः श्यामलाख्यैषा सखी ॥ १२ ॥

रास–रहस्यम्

र टी०—रासपरिश्रान्ता रसानां समूहः रासः, चित्सुखरूपत्वेन पूर्णोऽतः श्रमासम्भवः, तथापि परमात्मना सह ऐकात्म्यबोधनिमित्तं पूर्वेषां बहूनां जन्मनां प्रयासं स्मृत्वा परिश्रान्ता इव क्लान्ता इव, श्लथद्वलयमल्लिकाः श्लथन्ति गलन्ति, वलयाकारेण परिवेष्टितैहिकामुष्मिकसुखभोगयोगसिद्ध्यर्थं मल्लिकापुष्पमिव भेदवादीनां देहात्मवादीनां च पुष्पितं वचव्रातं यस्याः सा, काचिन् कया परमात्मसुखेन आचीयते परिपूर्यते या सा, पार्श्वस्थस्य पार्श्वे समीपे प्रत्यग्रूपेण तिष्ठतीति पर्श्वस्थस्तस्य गदाभृतः गद्यते सच्चिदानन्दरूपेण व्यक्ताक्षरेण निगद्यते अनया गदा श्रुतिः, तां बिभर्ति धारयति पोषयतीति गदाभृत्, तस्य स्कन्धं बाहुना यूथिकालतया तमालद्रुमस्कन्धाश्रयणमिव श्रुतिलतयावलम्बितनित्याखण्डैकरसपरमानन्दघनकल्पवृक्षस्य ब्रह्मणः आश्रयणलक्षणं स्कन्धं, जग्राह गृहीतवती ॥ ११ ॥ तत्र तासां वृत्तीनां मध्ये एकावृत्तिः, असगतं अंस इव अंशे स्वस्वरूपस्य एकांशे गतं प्रविष्ट, उत्पलसौरभं अन्ये विषयाः पुनः पुनः भुज्यमानाः सर्वेऽपि प्रतिपलं विरसतां गच्छन्ति विकारित्वात्, इदं तु स्वरूपसुखरूपत्वादविकारि अत एव उत् सर्वातिशयेनोत्कृष्ट प्रतिपलं, कथम् सौरभं सुरभेरिदं अर्थात् कामधेनुवत् नित्यसुखप्रदं, चन्दनालिप्तमिति चन्द्रस्य स्वप्रकाशाभावेऽपि आह्लादकरत्वेन सूर्यप्रकाशादतिशयं द्योतयति तद्वत् परमानन्दे ब्रह्मण्यपि श्रुत्या उद्भूतसत्त्ववृत्त्यभिव्यक्त सुखरूपत्वं स्वस्वरूपे एव सुखातिशयं युक्तमिति आनन्ददायकत्वं, कृष्णस्य “रसोऽहमप्सु कौन्तेय ! प्रभास्मि शशिसूर्ययोः पुण्यणगन्धः पृथिव्यां च । इत्यादि वचनैः सर्वेषां वस्तूनां सारत्वेन प्रकटितस्य परमात्मनः, बाहुं करं प्रकाशमाघ्राय गृहीत्वा, हृष्टरोमाः हृष्टानि पुलकितानि रोमाणि रोमवत् व्यापकानि किरणानि यस्यास्तथाभूता सती, चुचुम्बह अर्थात् स्वात्मज्यातिर्मुखेन परमात्मज्योतिर्मुखं स्पर्शवत्यः, परमानन्दरसमास्वादितवतीति भावः ॥ १२ ॥

गूढार्थदीपिनी

गदति शब्दं करोतीति गदा वंशी तां बिभर्तीति तस्य कृष्णस्य । श्लथन्तो बलयादयो यस्याः ॥ ११ ॥ ह हर्षेण ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इत्थं नृत्यगीतादिभिः प्रसन्नेन भगवता सम्मानितानां व्रजाङ्गनानामतिप्रीतिविलसितं वृत्तमाह । काचिदिति चतुर्भिः श्लथन्ति बलयानि मल्लिकाश्च यस्याः सा पार्श्वस्थस्य समीपस्थस्य गदाभृतः स्कन्धं स्वबाहुना जग्राह ॥ ११ ॥ अंसगतं प्रसन्नेन भगवता स्कन्धे निहितम् उत्पलस्य सौरभवत्सौरभं यस्य तं बाहुं चुचुम्ब ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

काचिद्गोपी रासपरिश्रान्ता पार्श्वस्थस्य स्वसमीपस्थितस्य गदाभृतो गदाधरस्य श्रान्त्यादिप्रापकरोगाधारिणः । अनेन न स्वयमनवतीर्णनयाऽवसर इति ध्वनयति । स्रवन्त्यो विगलन्त्यः कबरान्मल्लिका यस्याः सा बाहुना स्कन्धं जग्राह ॥ ११ ॥ तत्र तत्समयेऽसङ्गतं स्वस्कन्धस्थमुत्पलसौरभमुत्पलानां सौरभं सौगन्ध्यं यस्य स तं चन्दनेन मलयजेन लिप्त रूषितं च स्वयमाघ्राय हृष्टरोमा हृष्टानि हृषितानि रोमाणि यस्याः सा । डावुभाभ्यामिति डाप् । चुचुम्ब चुम्बितवती ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अन्या पुनः उन्नीतमेव यावद्भगवता पुनर्गृह्यते तावत्तथैवोन्नयनं कृतवतीत्याह। तदेवोन्नीतं ध्रुवं निश्चलं यथा भवति तथा उन्निन्ये तं नादं ध्रुवनादे योजितवती ध्रुवः नादः कारणनादः स्थायी स्वरः "यत्रोपविशते रागः स्वरः स्थायी स कथ्यते" भगवन्नाद एव वा भगवता तथैव गीतमिति ध्रुवतालादिषु योजितवतीति केचित्तन्न विचारक्षमम् एवं ध्रुवयाजनायां भगवांस्तस्यै एव बह्वेव संमानमदात् चकारादभीष्टमपि एवं तासामन्तः सामर्थ्यं जातमिति बहिः सामर्थ्यं किम्वक्तव्यमिति भावः। बह्विति सर्वगोप्यधिकमैश्वर्यवीर्यरूपे चैते निरूपिते अन्याश्च चतस्रः क्रमेण बोद्धव्याः कीर्त्तिर्हि भगवन्तमेवावलम्बते। अतः कायिकं व्यापारं द्वयोराह। काचिदिति। रासेन परितः श्रान्ता स्वस्यैकस्मिन् पार्श्वे विद्यमानस्य स्कन्धं स्वबाहुना जग्राह। गदाभृत इति भगवता स्थिरत्वाय अधिकप्रयत्ने न अन्यथा क्रियमाणे रासो भज्येत परिश्रमो रसाधिक्यात् अन्यथा रसार्थं प्रवृत्तिर्न स्यात् मण्डलपरित्यागे मण्डलसिद्ध्यर्थं भगवतापि हस्तग्रहण सम्भवति अत एकस्मिन् पार्श्वे भगवानेव पार्श्वभागे विद्यमानस्य भगवतः कण्ठग्रहणं वृक्षाधिरूढालिङ्गनं भवति भगवता पूर्वं कण्ठे सा गृहीता तयापि भगवान् गृहीत इति मित्रवत्स्थितिः स्यादिति तन्निवृत्त्यर्थमाह। श्लथद्वलयमल्लिकेति। श्लथन्तो वलयाकारा मल्लिका यस्याः कवरे वलयाकारेण मल्लिका यस्याः कवरे वलयाकारेण मल्लिका माला बद्धा सा च शिथिला जातेति वैकल्यं प्रदर्शितम् आप्तता च प्रदर्शिता ॥११॥ अन्या पुनः स्वस्य एकांसगतं बाहुमुत्पलापेक्षया अधिकपरिमलयुक्तं चन्दनेन आलिप्तं बाहुमाघ्राय अन्तः प्रविष्टामोदा पूर्णानन्दा सती हृष्टरोमा बाहुमव चुचुम्ब रूपस्पर्शौ पूर्वमेव स्थितौ गन्धरसयोरप्यनुभवं कृतवतीति हेत्याश्चर्यं तत्रेति तस्मिन्नेव समये तत्रैव भगवति वा उभयपार्श्वस्थयोर्गोपिकयोस्तथा सति विनियोग उक्तो भवति एकांसगतमिति वा सैव तथा कृतवतीति केचित् सदानन्दत्वात् सर्वत्रैव समरसता उत्पल हि रात्रिविकासि तत्स्त्रीणां मनोज्ञमाघ्राणे चन्दनजसौरभमेव न हेतुः किन्तु ततोऽपि विलक्षणं साधारणजनावेद्यं तदपेक्षयापि सौरभयुक्तत्वेनात्यलौकिकभाववतीनामेव वेद्यं सहजं सौरभमित्यपि ज्ञापनावेदं विशेषणं चन्दनालेपः विवेकधैर्यनाशनार्थः घ्राणेनान्तः प्रवेशनमस्य प्रवेशनमस्या विशेषः एषा श्रीरूपा ॥ १२ ॥

श्रीसुबोधिनी-सारः

रासे परिश्रान्ता श्लथन्ति वलयानि मल्लिकाश्च यस्याः सा काचित् समीपे स्थितस्य गदाभृतः श्रीकृष्णस्य स्कन्धं बाहुना. हस्तेन जग्राह ॥ ११ ॥ उत्पलस्य सौरभमिव सौरभं यस्य तं चन्दनेनालिप्तं कृष्णस्य बाहुमंसगतं स्वस्कन्धं प्राप्तमेकाऽऽघ्राय हृष्टरोमा चुचुम्ब ह ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

काचिद्रासपरिश्रान्तेत्यत्र, भगवतः स्थिरत्वायेति। कदाचित्प्रभुर्गदामवष्टभ्य तिष्ठति चलति वा। यथेतस्ततश्चरणस्खलनं न भवति, तथा तद्गृहीतस्कन्ध एव यथापूर्वं मण्डलं नृत्यं चानुवर्तयतीति ज्ञाप्यत इत्यर्थः। **वृक्षाधिरूढालिङ्गनमिति।** 'रमणचरणमेकेनोरुणाक्रम्य खिन्नश्वसितमपरपादेनाश्रयन्ती तद्रूपम्। निजमथ भुजमेकं पृष्ठतोऽस्यार्पयन्ती'त्यादिना रसशास्त्रे निरूपितम् ॥ ११ ॥ **हृष्टरोमा चुचुम्ब हेत्यत्र, सदानन्दत्वादिति।** चुम्बनेन हि रस आस्वाद्यते। अधारादिवद् बाहौ न रसोऽतः कथं तथेत्याशङ्कानिरासायेदमुक्तम्। चन्दनालेपतात्पर्यमाहुः **विवेकधैर्ये**ति। अङ्गरागस्यानुभावात्मकत्वेन प्रचुरभावविशेषजननात्तेन तयोर्नाश इत्यर्थः। बाहौ तथा कृतिर्न लोकसिद्धाऽत सखीनां समक्ष कथमेवं करोमीति विवेकः। एकान्तसमयप्रतीक्षया स्थितिर्धैर्यकायेम ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं नृत्यगीतादिना श्रीकृष्णसम्मानितानां तासामतिप्रीतिविलसितं वृत्तान्तमाह—काचिदिति। श्लथन्ति हस्ताभ्यां वलयानि, शिरसः मल्लिकाकुसुमानि च यस्याः सा। तत्र हेतुमाह—रासेन परिश्रान्तेति। एवंभूता काचिद्गोपी स्वपार्श्वस्थस्य गदाभृतः कृष्णस्य स्कन्धं स्वबाहुना जग्राहेत्यन्वयः ॥ ११ ॥ तत्र तासां मध्ये एका गोपी अंसगतं स्वस्कन्धे निहितमुत्पलस्य सौरभमिव सौरभं यस्य तं चन्दनेनाऽऽलिप्तं कृष्णस्य बाहुमाघ्राय हृष्टानि पुलकितानि रोमाणि यस्यास्तथाभूता सती चुचुम्बेत्यन्वयः। तद्भाग्यस्याश्चर्यं सूचयति—हेति ॥ १२ ॥

अन्वितार्थप्रकाशिका

काचिदिति ॥ रासेन परिश्रान्ता श्लथन्ति हस्ताभ्यां बलयानि शिरसः मल्लिकाकुसुमानि यस्याः सा एवंभूता काचिद्गोपी स्वपार्श्वस्थस्य गदाभृतः कृष्णस्य स्कन्धं स्वबाहुना जग्राह। इयं राधा ॥ ११ ॥ तत्रेति ॥ तत्र तासां मध्ये एका गोपी अंसगतं स्वस्कन्धे निहितमुत्पलस्य सौरभमिव सौरभ यस्य तं चन्दनेनानुलिप्तं कृष्णस्य बाहुमाघ्राय हृष्टानि पुलकितानि रोमाणि यस्यास्तथाभूता सती चुचुम्ब। इयं श्यामला ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

रासेन परिश्रान्ता तच्छ्रमं पीडिता सौकुमार्यात् श्रमकार्श्येनश्लथन्तोवलयाः गलन्त्यो मल्लिकाश्च कबरस्था यस्याः सा विश्रमाय स्कन्धं जग्राह ॥ ११ ॥ उत्पलात्स्थलपद्माद्प्यधिकं सौरभं सुगधित्वं यस्य तं बाहुम् ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं नृत्यगीतवाद्यादिना श्रीकृष्णसंमानितानां तासामतिप्रेमविलसितं वृत्तमाह चतुर्भिः ॥ काचिदिति ॥ काचित्, रासपरिश्रान्ता रासविधानेन परिश्रमं ताप्ता, श्लथान्त वलयानि मल्लिकाश्च यस्यास्तथाभूता सती, बाहुना आत्मनः भुजेन, पार्श्वस्थस्य स्वसमीपस्थस्य, गदाभृतो भगवतः, स्कन्धमंसं, जग्राह ॥ ११ ॥ तत्रेति ॥ तत्र तासां मध्ये, एकाऽन्या काचित्, अंसगतमात्मनः स्कन्धनिहितं, उत्पलस्येव सौरभं सौरभ्य यस्य तं, चन्दनालिप्तं समन्ताच्चन्ददेन विलिप्तं, कृष्णस्य बाहुं आघ्राय, हृष्टानि पुलकितानि रोमाणि यस्यास्तथाभूता सती, ह स्फुटं यथा तथा चुचुम्ब । बाहुमुदरं वेति शेषः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

काचिद्रासेति : १०.३३.११.

आब्रह्मस्तम्बविश्वैकाऽऽधारस्तम्भात्मनोऽस्य हि । स्कन्ध एष इति श्रान्ता विश्रान्त्यै तमधारयत् ॥ ५१ ॥

सर्वांशतोऽप्यहमितस्तव सोऽनुकूलः कान्तेऽस्मि तत्त्यज वियोगभयादिशङ्काम् ।
इत्येवमर्थमनुबोधयितुं स तस्या अंसे गतं भुजमधाद् रसमाजिघृक्षुः ॥ ५२ ॥

तत्रैकेति : १०.३३.१२.

अवयवेष्वखिलेष्वपि वीर्यवान् भवति बाहुरिहैक इतीच्छया । तदपरा चतुरा सरसं रजोगुणभुजं भुजमेव चुचुम्ब ह ॥ ५३ ॥

कृष्णप्रिया

रास रमण क्रीडा से परिश्रान्त गोपी जी की वेणी में लगाई हुई वलयाकार मल्लिका कुसुमों की वेनी शिथिल हो गई तब समीप में ही रहे हुए गदाधारी गोविद जी के कन्धे को भुजा से ग्रहण किया और मण्डल भस्त बनी ॥ ११ ॥ राजन् जब रास चल रहाथा तब उस मण्डल में नृत्य करती कोई एक गोपीने, रात्री में विकसने वाले कमल की सुगन्ध से अधिक सुगन्धित एवं चन्दनचर्चित अपने स्कन्ध पर धरे हुए श्याम सुन्दर जी के कर कमल की सुगन्ध ली, तब गोपी जी को रोमांच हुआ और आनन्द में आकर प्रियतम के बाहु को चूम लिया ॥ १२ ॥

कस्याश्चिन्नाट्यविक्षिप्तकुण्डलत्विषमण्डितम्[1] । गण्डं[2] गण्डे सन्दधत्या प्रादात्ताम्बूलचर्वितम् ॥१३॥
नृत्यन्ती गायती काचित् कूजन्नूपुरमेखला । पार्श्वस्थाच्युतहस्ताब्जं श्रान्ताधात् स्तनयोः शिवम् ॥१४॥

कर्दमक्षमा

अन्वयः—नाटयविक्षप्त, कुण्डलत्विषमण्डितम्, (स्वस्य) गण्डम्, (कृष्णस्य) गण्डे, संदधत्याः, कस्याश्चित्, (कृष्णः) ताम्बूल चर्वितम्, प्रादात् ॥ १३ ॥ कूजत् नूपुरमेखला, नृत्यन्ती, श्रान्ता, पार्श्वस्था, काचित्, शिवम्, अच्युतहस्ताब्जम्, स्तनयोः, अधात् ॥ १४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नाट्येन नृत्येन विक्षिप्तयोश्चंचलयोः कुंडलयोस्त्विषेण त्विषा मंडितं गंडं कपोलं तथाभूते स्वगण्डे संदधत्याः संयोजयन्त्याः ॥ १३ ॥ कुजता नूपुरे मेखला च यस्याः सा ॥ १४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वगण्डे निजकपोले “गंडः स्यात्पुंसि खड्गिनि । ग्रहयोगप्रभेदे च वीथ्यंगे पिटकेऽपि च । चिह्नवीरकपोलेषु हयभूषणबुद्बुदे ॥” इति मेदिनी । आदादित्यनेन स्वस्मात्स्वानामभेदो दर्शितोऽस्ति, भेदे तन्न संगच्छत इति ॥ नाट्येन विक्षिप्तयोश्चचलयोः कुंडलयोस्त्विषा कांतिर्यत्र स चासावत एव मंडितश्च तस्मिन् गंडे कृष्णकपोले श्रमव्याजेन गण्डं संदधत्यै कस्यैचित् तांबूलचर्वितं प्राऽदात् । तस्या मुखं स्वमुख संमुखं कुर्वन्प्रकर्षणाऽदादित्यर्थः । इयं पूर्वोक्तसाम्याच्छ्लव्या ॥ १३ ॥ शिवम् सुखकरम् । अच्युतेति च्युतिराहित्यमाह ॥ नृत्यन्ती गायन्ती । हस्ताब्जमधादित्येका चन्द्रावली, हस्तग्रहणसाम्यात् । द्वितीया पद्मा तदानीं चरणाब्जं स्तनयारधात्, इदानीं हस्ताब्जं स्तनयोर्धत्ते स्मेति स्तनतापनिवृत्तेरुभयथापि सिद्धेः । अष्टमी भद्रा तु तत्रानुक्तापि पूर्ववदेव ज्ञेया ॥ १४ ॥

---

१. भूषितं–विज. ; मण्डिते–इति कस्यचित् । २. गण्डखण्डेऽभिदधत्या आदा ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ताम्बूलचर्वितादानसाम्येन नूनं पूर्ववत् श्रीशैव्याविलासमाह । कस्याश्चिदिति । स्वगण्डं श्रीकृष्णगण्डे नाट्ये ऽतिश्रमव्याजेन सन्दधत्या इति भावः । प्रादात् तस्या मुखं स्वमुखसम्मुखं कुर्वन् प्रकर्षेणादादित्यर्थः । अत्र दाने षष्ठी निगूढार्था आर्षी वा ॥ १३ ॥ श्रीहस्तग्रहणानुसारेण नूनं पूर्ववत् श्रीचन्द्रावलीविलासमाह । नृत्यती नृत्यन्ती गायती गायन्ती च कूजदित्यत्र गानानुरूपतालयुक्तं कूजितं ज्ञेयम् । पार्श्वस्थस्याच्युतस्य निश्चयत्वेन तत्पार्श्व एव स्थितस्य भगवतो हस्त एवाब्जं तापहारित्वादिना तत् श्रान्ता सती श्रमनिवृत्त्यर्थमिवेत्यर्थः । शिवं स्वतः सुखरूपम् । एवं मुख्याः षडुक्ताः तथैव सप्तमी पद्मापि ज्ञेया । सारल्येन लक्षिता पूर्ववद्विष्णुपुराणोक्ता भद्रा त्वियं स्फुटमष्टमी स्यात् । यथा । "काचित् परिलसद्बाहुः परिरभ्य चुचुम्ब तम् । गोपीगीतस्तुतिव्याजनिपुणा मधुसूदन"मिति । श्रीजयदेवचरणास्त्विमामेव वर्णनाविशेषेण सरसचरितां साधयित्वा व्यञ्जयामासुः । "रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा"मित्यादिना ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

षष्ठी चतुर्थ्याम् । स्वं-गण्डं श्रीकृष्णगण्डे, नाट्येति श्रमव्याजेन सन्दधत्या इति भावः । प्रकर्षेण सम्मुखत्वाभावेऽपि तन्मुखप्रवेशनादिचातुर्य्येणादात् ॥ १३ ॥ नृत्यती नृत्यन्ती इयमेका, गायती गायन्ती च परा, इति द्वे ज्ञेये । कुजदिति नृत्ये गाने च परमावेशं बोधयति, पार्श्वस्थस्याच्युतस्य निश्चयेन तत्पार्श्वे एव स्थितस्य भगवतो हस्त एव अब्जं तापहारित्वादिना तत्, श्रान्ता सति श्रमनिवृत्त्यर्थमिवेत्यर्थः । एतच्च पूर्व्वमुक्तमेव । शिवं स्वतः सुखरूपम्, एवं मुख्याः सप्तोक्ताः, अष्टमी च—'काचित् प्रविलसद्बाहुः परिरभ्य चुचुम्ब तम् । गोपीगीतस्तुतिव्याजनिपुणा मधुसूदनम् ॥" इति श्रीपराशरेणोक्तात्र ज्ञेया । यद्वा, नृत्यती गायतीत्येकैव, एवं षट्, तासाञ्च पूर्व्ववद्यथोत्तरं श्रेष्ठ्यमूह्यम् । द्वे च मण्डलमध्यवर्त्तिनः पार्श्वद्वये स्थिते श्रीराधा ललिते नोक्ते, प्रायोऽत्र मण्डलस्यैवोक्तेः । यद्वा, पूर्व्वव्याख्यानुसारेण सप्तैवोक्ता ज्ञेयाः । श्रीराधादेव्यैवैका तस्य मण्डलमध्यवर्त्तिनः सव्यपार्श्वस्थात्र नोक्तेति दिक् ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नाट्येन नृत्येन विक्षिप्तयोश्चञ्चलयोः कुण्डलयोस्त्विषेण त्विषा अदन्तत्वमार्षम् मण्डितं कपोलं तथाभूते स्वगण्डे सन्दधत्याः संयोजयन्त्याः कस्याश्चित्कस्यैचित्ताम्बूलचर्वितं ददौ ॥ १३ ॥ काचित्तु नृत्यन्ती गायती च कूजन्ती नूपुरे मेखला च यस्यास्तथाभूता श्रान्ता शिवं शान्तम्पार्श्वस्थस्याच्युतस्य हस्ताब्जमब्जवच्छीतलं हस्तं स्तनयोरधान्निदधे ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नाट्येन नृत्येन विक्षिप्तयोः किञ्चित्स्रस्तयोः कुण्डलयोः त्विषेण रोचिषा भूषिते मण्डिते त्विष दीप्ताविति धातोः अविकृते त्विष इति रूपं भवति गण्डखण्डे गण्डमण्डले "समूहे मण्डले खण्डमाहुः शब्दविशारदा" इत्युत्पलमाला अभिदधत्या सपत्न्याः कोपोद्बोधाय यत्किञ्चिन् मन्त्रयन्त्याः ॥ १३ ॥ अधादधौ शिवं सुखयतीति सुखम् ॥ १४

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तत्र काचिन्निकटे नृत्यन्त्याः सख्या मुखे स्वयमपि वात्सल्यात्ताम्बूलचर्वितं ददावित्यस्योन्यप्रीतिं कैमूतिकन्यायेनाह—कस्याश्चित्यादि । कस्याश्चित् प्रियसख्यास्ताम्बूलचर्वितं काचित् प्रियसखी प्रादात् प्रकर्षेणादौ नाट्यविक्षिप्तस्य कुण्डलस्य त्विषा मण्डितं स्वगण्डं गण्डे सन्दधत्याः । अथवा, काचित् कस्याश्चित् प्रादात् प्राददौ । अथवा, कृष्ण एव कौतुकवशात् कस्याश्चित्ताम्बूलचर्वितं प्रादात्, प्रकर्षेण ददौ, आददौ वा । तदा कुण्डलत्विषमण्डिते गण्डे इति कृष्णस्यैव गण्डे इति बोद्धव्यम् । तेन तस्यापि नाट्यमत्र बोद्धव्यम् । अथवा, कस्याश्चिद्गण्डे काचित् कृष्णो वा गण्डं प्रादात्, प्रकर्षेणाददौ वा । प्रीत्या गण्डेन गण्डस्पर्शनमभिनिन्ये ताम्बूलस्य चर्वितं यत्र अन्तस्ताम्बूलचर्वणेन बहिरुच्छूनमित्यर्थः । अथ चुम्बनेनाधरताम्बूलचर्वितरागस्तत्र लग्न इति चुम्बनपूर्वकं गण्डेन गण्डस्पर्शनमिति भावः । अन्यथा गण्डे गण्डसन्धानेन ताम्बूलचर्वितस्य दानादानयोरेव दुष्करत्वान्नातिर्लालित्वम् । कीदृश्याः ? सन्दधत्याः सन्धानं संश्लेषं कुर्वत्याः । अथवा ताम्बूलचर्वितं सम्यग् दधत्या गण्डे गण्डं प्रादादिति पूर्ववद्द्विविधोऽर्थः । कृष्णेन च मह्यं देहीति गण्ड एव गण्डधारणं कृतम्, नतु तयापि दत्तस्याप्यग्रहीत् । कौतुकमात्रमित्येकादशार्थाः ॥ १३ ॥ काचिदेकैव नृत्य-गीत-वाद्य-यौगपद्येनातिपरिश्रान्ता सती स्वयमेव तत्प्रतीकारमकरोदित्याह—नृत्यतीत्यादि । नृत्यतो, एवं गायती । कूजन्नूपुरमेखलेति सन्ततनृत्यगानक्रमेण तालतुल्यं कूजतोर्नूपुरमेखलयोर्नाद एव वाद्यम्, श्रान्ता सती पार्श्वस्थाच्युतस्य हस्ताब्जं स्तनयोरधात्, पार्श्वस्था वा । शिवं सुशीतलम् ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नाट्येन विक्षिप्तयोश्चञ्चलयोः कुण्डलयोस्त्विषा कान्तिर्यत्र स चासावत एव मण्डितश्च तस्मिन् गण्डे कृष्णकपोले श्रमव्याजेन गण्डं सन्दधत्यै कस्यैचित् ताम्बूलचर्वितं प्रादात् तस्या मुखं स्वमुखसंमुखं कुर्वन् प्रकर्षेणादादित्यर्थः । इयं पूर्वोक्त-

साम्याच्छैव्या ॥ १३ ॥ नृत्यन्ती गायन्ती हस्ताब्जमधादित्येका चन्द्रावली हस्तग्रहणसाम्यात् द्वितीया पद्मा तदानीं चरणाब्जं स्तनयोरधात् इदानीं हस्ताब्जं स्तनयोर्धत्ते स्मेति स्तनतापनिवृत्तेरुभयथापि सिद्धेः। अष्टमी भद्रा तु अत्रानुक्तापि पूर्ववदेव ज्ञेया ॥ १४ ॥

रसिकाह्लादिनी–टीका

इदानीं कस्याश्चिद् यूथमुख्याया रासविलासक्षुभ्यच्चित्ताया वैवश्य दृष्ट्वा ताम्बूलचर्वितदानेन रसं विवर्द्धयिषतः कृष्णस्य विलासपूर्वकं चेष्टितमाह कस्याश्चिदिति, काचिदञ्जलिना गृह्णात्तन्वी ताम्बूलचर्वितमित्यत्र पूर्वमास्वादिते ताम्बूलचर्विते साभिलाषाया इति। कस्याश्चिदिति। अत्र चतुर्थ्यर्थं षष्ठी कस्मैचिदित्यर्थः। श्रीकृष्णस्य ताम्बूलं चर्वितं प्रशब्देन लाघवं विवक्षितं अदात् प्रददौ स्वगण्डं स्वकपोलं श्रीकृष्णगण्डे सन्दधत्याः संयोजयन्त्याः अनेन ताम्बूलचर्वितं सापेक्षत्वं ग्रहणे लाघवं च सूचितम्। गण्डयोः संयोजनग्रहणदाने च चातुरीविशेषमाह सम्मुखत्वाभावेऽपि लाघवे च स्वमुखं सम्मुखीकुर्वन् ददाविति। कीदृशं गण्डं नृत्येन विक्षिप्तस्य चंचलस्य त्विषेन त्विषा मण्डितम्। अनेन शिरश्चालनं भेदप्रदर्शनमुक्तमिति। रसावेशेन नृत्यसम्भ्रमस्यापि च्युतिरुक्ता, यद्वा स्वगण्डे श्रीकृष्णगण्डं सन्दधत्या स्वप्रयत्नेन संयोजयन्त्याः स्वगण्डोपरि कृष्णगण्डं स्थापयन्त्यास्ताम्बूलचर्वितं तस्य आप्यायनकरं प्रादात्। अनेन स्वानुरागस्य सिद्धवत् कृत्वोक्तस्य ताम्बूलचर्वितरूपकेण दानमुक्तम्। सिद्धस्य दाने साधनप्रयासाभावोऽपि सूचितः। कीदृशं कृष्णगण्डं नाट्येन नृत्येन विक्षिप्तं चञ्चल यत्कुण्डलं तस्य त्विषेन त्विषा मण्डितम्। अनेन ग्रहणे तस्याः लाघवशक्तिः दाने श्रीकृष्णस्येति ॥ १३ ॥ अन्यस्याः कस्याश्चित् पूर्वं मनोरथचिन्तितं स्वकुचोपरि श्रीकृष्णहस्तस्थापनं तदिदानीमाह नृत्यन्तीति, काचित् प्रिया नृत्यन्ती गायती च नृत्यगानयोः परस्परविरोधेन साहचर्य्याभावेऽपि तस्या वैदग्धीविशेषप्राकट्यं सूचितं श्रमजनकत्वमप्युक्तम्। कीदृशी कूजती नूपुरे मेखला च यस्याः सा, अनेन चरणगतिभेदः कटिचालनभेदश्च सूचितः। किं च नृत्यगानयोरसविशेषजनकत्वे नूपुरमेखलारूपवाद्यभेदस्य साहाय्यं सूचितम्। अत एव श्रान्ता सती पार्श्वस्था स्वस्मिन् किंचिच्छैथिल्यमालक्ष्य शैथिल्यनिरसनं अच्युतस्य विलासच्युतिरहितस्य तयैव नृत्यगानालिङ्गनादिना पोषितत्वात् शैत्यहेतुश्रमनिवारक हस्ताब्जं अन्योन्यबाहुमण्डलं बन्धं त्योजयित्वा स्तनयोरधात् स्थापितवती। कीदृशी शिवं सुखरूपम्। अनेन नृत्यगानोत्तरवृद्धौ हस्तस्पर्शस्य परमहेतुत्वमुक्तम् ॥ १४ ॥

विशुद्धरसदीपिका

अथ दुर्गाव्रतपरासु कस्याश्चिन्मुख्यतमायाश्चेष्टितमाह। कस्याश्चिदिति। नाट्येन नृत्येन विक्षिप्तयोस्तरलयोः कुण्डलयोस्त्विषेत्यार्षं मण्डितं कुण्डलैर्गण्डलोलैरिन्यादिवत् गण्डं कपोलं गण्डे श्रीकृष्णस्येतिशेषः सन्दधत्याः समर्पयन्त्याः तच्च श्रमव्याजेनेति भावः ताम्बूलचर्वितं प्रादादिति। तस्या मुख इत्यर्थलब्धं वितरवीरनस्तेऽधरामृतामित्यस्या एव प्रार्थनमिति ज्ञेयं दाने प्रकर्षश्च चुम्बनादिव्याजेनोन्नेयः। अत एव षष्ठीप्रयोग इति ॥ १३ ॥ श्रुतिमुनिरूपासु मुख्यायाश्चेष्टितमाह। नृत्यतीति। तत्तत्कलाचातुर्य्यं कूजदिति चाञ्चल्यं पार्श्वस्थेति नृत्यादिव्याजेन स्वयमागत्य पार्श्वस्था सतीत्यधीरात्वम् अच्युतस्येति स्वभावतोऽप्रच्युतस्य। यद्वा तस्यामनासक्तस्य हस्ताब्जमिति तापहारित्वं शिवं सुखदं श्लेषेण कामविजयित्वेन विख्यातस्य शिवस्य तादात्म्यं कामविजयाभिप्रायेणैव स्तनयोरधात् इति किञ्चित्प्रागल्भ्यम् इयमधीरा दास्यप्रथमसख्या कृणु कुचेषु नः कृन्धि हृच्छयमित्ययस्या एव गीतकं तत्र चरणपङ्कजमिति दैन्येन अत्र हस्ताब्जमिति सौभाग्येनेति विवेकः ॥ १४ ॥

श्रीरामनारायणकृता भावभावविभाविका

कृष्णानुकम्पितमहद्भाग्यवत्याः कस्याश्चिच्चरितमाह। कस्याश्चिदिति। कस्याश्चित्तु ताम्बूलचर्वितं प्रादादित्यन्वयः। अत्र दानेऽपि षष्ठीनिगूढार्था आर्षी वा। यद्वा सामान्यसंबन्धे शेषे षष्ठीति विशेषपर्य्यवसाने दानपात्रार्थे पर्य्यवसानात् नत्वदानपात्रत्वसूचिका। यद्वा तत्सूचकत्वेऽपि प्रादादिति प्रकर्षेण स्वानुग्रहवादेवादादिति प्रेमपथिप्रेमवशीभूतस्य भगवतोऽपि स्वानुग्रहदशायां न पात्रापात्रविभाग इति द्योतनाय। यद्वा षष्ठ्या अपात्रत्वं निदिश्य पुनः प्रादादित्युक्त्या अपात्राणामपि भगवत्प्रेमिणां तदनुगृहीतानां पात्रत्वसूचनम्। यद्वा कस्याश्चित्ताम्बूलचर्वितं भगवानपि प्रकर्षेण प्रेमवश्यतया आदादिति दानार्थकदाधातोः आङ्पूर्वकत्वादादानार्थपरत्वेन स्वयमग्रहीदित्यर्थः। नच साक्षाद्भगवतोऽन्योच्छिष्टग्रहणायोग्यतेति वाच्यम, अन्यत्रायोग्यत्वेऽपि प्रेमपथि तदयोग्यत्वाभावात् न केनापि कर्मणा वर्द्धते नोकनीयानिति श्रुत्या परममहत्तरतस्य केनापि कर्मणा महत्त्वाक्षतेश्च अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिरित्यादि स्वापकर्षोक्तावपि भृगुपादावघातसहनेऽपि तन्माहात्म्यवृद्धिप्रसिद्धेः किञ्च धर्मशास्त्रेऽपि—

वत्सः प्रस्रवणे मेध्यः शकुनिः फलपातने। श्वा मृगग्रहणे मेध्यः स्त्रीमुखं रतिचुम्बने ॥

इत्यादि स्मृतेः स्त्रीमुखस्य रत्यादिविहारे मेध्यत्वदर्शनान्नोच्छिष्टशङ्कागन्धोऽपि। यद्वा ताम्बूलं चर्वितं येन तन्मुखमेव पाणिना मुखेनैव वाधरसुधास्वादायाग्रहीत्ताम्बूलचर्चितमिति पाठे तु सुगमम्मुखविशेषमेव किम्भूतायास्तस्या इति तां विशेषयति।

नाट्येन सङ्गीतनृत्यगत्या विक्षिप्तस्यातिलोलस्य कुण्डलस्य त्विषेणेति त्विषा मण्डितं गण्डं स्वकपोलं गण्डे तादृशे एव कृष्णकपोले रसावेशेन रासभ्रममिषेण ताम्बूलदानार्थमेव वा सन्दधत्याः सम्यग्याजयन्त्याः तथा च मुखसंनिधाने तद्दानादानसौकर्य्यसंभवात् । तत्र प्रकासवत्कुण्डलस्य रविसादृश्यं गोपीमौरगण्डस्य गङ्गाकारत्वं कृष्णस्निग्धामलकपोलस्य यमुनात्वं तथा च स्वतनयाया यमुनाया गङ्गायां सङ्गत्या स्वमानह । नमन्यमानकुण्डलभानुना तत्कपोलगङ्गामानीय कृष्णकपोलयमुनायां मेलने कृष्णकपोलयमुनायाः स्वगृहागतां पित्रानीतां गङ्गां मत्वादरेण तस्यै ताम्बूलदानं तत्प्रसादादानञ्च न्याय्यमेवेति भावः ॥ १३ ॥ ततोऽन्यस्याश्चरितमाह । नृत्यतीति । काचित्तु नृत्यती नृत्यन्ती गायती गायन्ती च काचिदिति अतिदक्षतया नृत्यगीतवाद्यप्रवीणा कूजन्नूपुरमेखला कूजन्त्यः गीतताळानुसृतरवयुक्ता नूपुरसहिता मेखला यस्याः तथाभूता मण्डले बद्धबाहुनृत्यमानतया पार्श्वस्थस्याच्युतस्य हस्ताब्जं करकमलं शिवं यद्यपि परानन्दघनकृष्णसन्निधानेन गतश्रमैव तथापि श्रान्तेव स्तनयोरधादित्यन्वयः । तत्रायं भावः विरहचिन्ताग्न्योर्भगवत्सन्निधानेन निवृत्तावपि बहुकालात्स्तनमूलं हृच्छयाग्नितापोपशमाय रासश्रममिषेण स्तनयोरधात्तत्र तत्तापोपशमाय हस्तविशेषणमुपन्यस्तमब्जेति तस्य तापोपशमने प्रशस्तत्वात् कामोपशमाय विशेषणं शिवमिति तस्य शिवध्वस्तत्वात् करस्य शिवत्वं तु पञ्चाङ्गुलिमस्तकविन्यस्तनखचन्द्रत्वात् । यद्वा स्तनयोः शिवपूजास्पदाकारत्वे तत्र शिवावेशस्यावश्यकत्वाद्वर्णितरीत्या करशिवप्रतिष्ठया प्राणप्रतिष्ठाचरणम् । यद्वा स्तनयोः शम्भुरूपत्वाच्छम्भुध्वस्ताङ्गः कामोऽनङ्गो यातुधानतया स्तनशम्भूनाविश्य मूलतो दग्धुं हृच्छयः सन् शिवस्याप्यशिवमाचरत्तथा च शिवशिवस्य हरिकरशिवं विना सम्भवात्करशिवस्य तत्र विनिवेशे तेन च भूताविष्टपीडने भूतोपशममालक्ष्य स्तनमर्दनेनैव स्तनशम्भुकामज्वरनिवृत्तौ नूपुरमेखलाकूजनव्याजेन हररक्षणहरिविजयवाद्यध्वनिरभवत् ॥१४॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

कस्याश्चित्तु नाट्येन नृत्येन विक्षिप्त चञ्चले च स्वाभाविकी गण्डत्विड् तत्समाहारः गण्डत्विषं तेन मण्डितं स्वगण्डं श्रीकृष्णगण्डे श्रमनिरासमनोरथेन सन्दधत्याः संयोजयन्त्याः मुखं स्वसम्मुखं कृत्वा ताम्बूलचर्वितं प्रादात् सैव्याख्येयं सखी ॥१३॥ अत्र काचित्पदावृत्त्या द्वे सखी प्रोक्ते इति ज्ञातव्यं तथा च कूजन्ती नूपुरे मेखला च यस्याः सा नृत्यन्ती काचित्पार्श्वस्थाच्युतहस्ताब्जं श्रमजनिततापनिवर्तकम् । अतः शिव श्रमशान्त्यर्थमञ्ज लना अधात् गृहीतवती । पूर्ववद्धस्तग्रहणानुसारात् चन्द्रावलीसंज्ञेयं सखी काचित्तु गायती तद्धस्ताब्जं शिवं श्रान्ता सती श्रमनिवृत्त्यर्थं स्तनयोरधात् चन्द्रावलीसहचर्य्योः स्तनयोर्धारणस्य पूर्वं साम्याच्च पद्माख्या चन्द्रवली सुहृद्भता सखायं भद्रासंज्ञा अष्टमीतु पूर्ववद्विष्णुपुराणादवगन्तव्या—

काचित्परिलसद्बाहुः परिरभ्य चुचुम्ब तम् । गोपीगीतस्तुतिव्याजनिपुणा मधुसूदनमिति तत्रोक्तेः ॥ १४ ॥

रास-रहस्यम्

र० टी—संकल्पविकल्पात्मकनाट्येन विक्षिप्तयोश्चञ्चलयोः कुण्डलयोः विषयविरागरञ्जितबुद्ध्योः बुद्धिवृत्त्यो, स्तिषेण स्वरूपसुखभोगेच्छया मण्डितं शोभमानं, यत्स्वगण्डं तत्स्थानीयं व्यष्ट्यभिमानं, कृष्णगण्डे परमात्माभिमाने अर्थात् समष्ट्यभिमाने, संदधत्याः संयोजयन्त्याः कस्याश्चित् वृत्तेः कृष्णः परमात्मा, स्वज्योतिः तदात्मज्योतिषा संयोज्य, ताम्बूलचर्वितं अर्थात् चर्विततताम्बूलवत् पूर्वजन्मसिद्धज्ञानमदात् ददौ ॥ १३ ॥ काचिदपरा पुनः कूजन्नूपुरमेखला इति देहसम्बन्धिशब्दादिवैषयिकभोगान् नृत्यन्ती नृत्यवदस्थिरान् दृष्ट्वा, गायती गानवत् मधुरशब्देन प्रचारं कुर्वती, श्रान्ता कलान्ता सती, वैराग्योदये पार्श्वस्थ पार्श्वे समीपे प्रत्येकस्वरूपेण स्थितं, शिवं कल्याणस्वरूपं, अच्युतहस्ताब्जं स्वस्वरूपतयास्थितस्याच्युतस्य परमात्मनः, हस्तः करः ज्योतिः, तदेवाब्जं कमलसदृशविशुद्धानन्ददायकं, तत् स्तनयोर्मध्ये हृदयान्तराले, अधात् धारितवती ॥ १४ ॥

गूढार्थदीपिनी

नाट्येन चञ्चलकुण्डले स्वाभाविकी त्विट् च तेषां समाहारः । द्वन्द्वाच्चुदषहान्तादिति टच् । गण्डे कृष्णकपोले स्वकपोलं संयोजयन्त्याः तस्या मुखे ताम्बूलचर्वितमदात् ॥ १३ ॥ शिवं कामशान्तिप्रदम् ॥ १४–१५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नाट्येन नृत्येन विक्षिप्तयोः इतस्ततश्चलमानयोः कुण्डलयोस्त्विषेण त्विषा कान्त्या मण्डितं गण्डं कपोलं स्वगण्डे सम्यक् दधत्या योजयन्त्याः कस्याश्चित्ताम्बूलचर्वितं प्रादात् ॥ १३ ॥ नृत्यती गायती च कूजन्ती नूपुरे मेखला च यस्याः सा एवं भूता श्रान्ता सती शिवं सुखदम् अच्युतहस्ताब्जं स्तनयोरधात् स्वहस्ताभ्यां गृहीत्वेति शेषः ॥ १४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नाट्य न विक्षिप्ताः सर्वत्र प्रसृताः कुण्डलयोस्त्विषः कान्तयः । हलन्ततायाष्टावन्तता । यस्मिन्स चासौ भूषितश्च तं मकरिकादिपत्राल्याः स्वगण्डं गण्डे कृष्णकपोले सन्दधत्याः कस्याश्चिद्गोपिकायाः पश्यन्त्याः सत्याः कृष्णस्य ताम्बूलचर्चितं या बाहुं चुचुम्ब साऽऽदराद्गृहीतवतीत्यन्वयः । कुण्डलत्विषभूषितं गण्डं गण्डे सन्दधत्या इति चतुरस्रः पाठः । त्विषदीप्तावित्यस्मात्पचाद्यचि

लघूपधगुणे त्विषेति निष्पत्तिरित्युक्तेः। नाट्येन विक्षिप्तं विक्षेपस्तेन त्विषं दीप्तिमदिति भूषितं तस्मिन्। गुणमात्रसंज्ञापूर्वकानित्यतेति विशेषः। गण्डखण्डे गण्डमण्डले समूहे मण्डले खण्डमाहुः शब्दविशारदा इत्युत्पलमाला। कृष्ण एव ताम्बूलचर्वितमादादिति सर्वेऽर्थात्सूचयन्ति। त्विषधातोः को वा भावे इगुपधलक्षणो वा घञर्थे क इति वा। तथा च त्विषेण कान्त्या भूषित इति पक्षद्वयेऽप्यन्वय इति वा॥ १३॥ नृत्यती गायती नर्तनं गानं च कुर्वती तत एव कूजन्त्यो नूपूरे च मेखला काञ्ची च यस्याः सा पार्श्वस्थाच्युतहस्ताब्जं करकमलं श्रान्ता सती स्तनयोरधाद्दधार। पार्श्वस्थश्चासावच्युतश्चेति वा। स्वयं नृत्यन्ती कूजन्नूपुरमे कूजन्नूपुरा च साऽहं च तस्या मे काचिद्गायती पार्श्वस्था खला। नीचेऽधमे खल इति विश्वान्नीचा सपत्नी। अच्युतहस्ताब्जं गृह्णीयादिति श्रान्ता शिवं मङ्गलकरं करमधादिति वा॥ १४॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

कयाचिद्भगवद्गृहीतं ताम्बूलं ज्ञानवद्गृहीतमित्याह। कस्याश्चिदिति कस्यैचित्ताम्बूलचर्वितमदादिति स्वगण्डं भगवद्गण्डे सन्दधत्या इति तस्या अपेक्षालाघवञ्च सूचितं सम्मुखत्वाभावेऽपि लाघवेनैव प्रादात् अनेन तस्यै स्वविद्यादत्तेति ज्ञापितं तेनेयमेवोपदेष्ट्री भगवदसन्निधाने सर्वासां भविष्यति कस्या विद्यायोग्यतां वक्तुं लौकिकक्रियाज्ञानशक्तिमत्त्वमाह। नाट्यविक्षिप्तकुण्डलत्विषमण्डितमिति। नाट्येन विक्षिप्तस्य कुण्डलं त्विषा मण्डितं गण्डं नाट्ये क्रिया शक्तिः। प्रतिष्ठिता कुण्डले ज्ञानशक्तिः क्रियाशक्त्या विक्षेपोऽत्यभ्यासः योगात्मकत्वात् साधनानि वा तस्य कान्तिरनुभवः तेनालङ्कृता भक्तिः भगवत्प्रेम्णा सम्बद्धा यथा सा भगवति रता एवं तस्यामपि भगवान् रतः तत्रापि गण्डमिदं साध्यरूपा भक्तिरुच्यते तां लक्ष्मीं प्रतिमूलपर्यटनमिति लक्ष्मीवन्तं प्रति पुनः पुनरावर्त्तत इति ज्ञानताम्बूलयोस्तुल्यता चर्वितमिति साधनप्रयासाभावेन सिद्धदानम्॥ १३॥ अपरा पुनः वैराग्यात्मकं क्रियारूपमच्छिद्रं ज्ञाने सहायार्थं भगवद्धस्तं स्वहृदये स्थापितवतीत्याह। नृत्यतीत्यादि। सा नृत्यन्ती गायन्ती स्थिता तत्राभिनयेन यथान्यहस्तः स्थाप्यते स्वहस्तो तथा भगवद्धस्तमेव स्थापितवती शाब्दज्ञानं तदर्थानुष्ठानञ्च तस्या वर्त्तत इति ज्ञापनार्थं नृत्यगानयोः कथनं कूजन्ती नूपुरे मेखला च यस्याः उपरि गानाभिनयनं पादयोर्नृत्यम् अत एव नूपुरयोर्मेखलायाश्च शब्दः स च भावोद्दीपकः अनेन तस्याः पूर्वस्थिता सर्वैव क्रियाशक्तिः सफलेति सूचितम्। एकस्मिन्नेव पार्श्वे विद्यमानस्य भगवतः हस्ताब्जं श्रान्ता सती तत्तापहरणार्थं स्तनयोरधात् तापहारकत्वमब्जस्य प्रसिद्धं श्रमो निर्वृतिसूचकः स्वस्याः पूर्वक्रियापरित्यागं बाह्यत एवेति भगवतः एकस्मिन् भागे स्थितिरुक्ता भगवत्क्रियाशक्तेरक्षयत्वसूचनायाच्युतेति अग्रे सम्बन्धस्यापि करिष्यमाणत्वात् तदविघातार्थं च तस्य पुनः कामाद्युद्बोधकत्वेन तापानाशकत्वमाशङ्क्याह। शिवमिति। तदेव कल्याणरूपमानन्दरूपत्वाच्च भगवतः॥ १४॥

श्रीसुबोधिनी–सारः

नाट्येन नृत्येन विक्षिप्तयोश्चंचलयोः कुंडलयोः त्विषा दीप्त्य मंडितं गण्डं कपोलं गण्डे संदधत्याः स्वकपोलं संयोजितवत्याः कस्याश्चित् तांबूलचर्वितमदात्॥ १३॥ कूजती नूपूरे मेखला यस्याः सा कापि नृत्यती गायती श्रान्ता पार्श्वे स्थितस्याच्युतस्य हस्याब्जं शिवं मंगलं स्तनयोरधात्॥ १४॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कस्याश्चिन्नाट्यविक्षिप्तमित्यत्र, अनेन तस्यै स्वविद्येति। यथा सर्ववेदान्तवाक्यानां निष्पीडितोऽर्थो ब्रह्मविद्या, तथोपनिषदादिवागधिपतिना रसात्मकेन स्वान्तरेव भक्तविषयकस्नेहकलाभिर्निष्पीड्य स्थापितं ताम्बूलचर्वितमिति तथेत्यर्थः। दानप्रयोजनमाहु**स्तेनेयमेवेति**। विप्रयोगदशायामुपस्थितमरणनिवर्तकवाक्यकथनेन सखीनां जीवयित्री भविष्यतीत्यर्थः। ब्रह्मविद्या हि ब्रह्मप्रापिका। अत्रापीयं स्वामिनी प्रियं प्रापयिष्यतीति भावः॥ १३॥ **नृत्यती गायतीत्यस्याभासः। अपरा पुनर्वैराग्यात्मकमित्यादि**। अत्रायं भावः। स्वस्यापि स्नेहातिभरेण विप्रयोगासहिष्णुत्वेऽन्यासां समाधानं न सम्भवतीति तदापि यथान्यासां समाधाने शक्तिर्भवति, तथा पूर्वदत्तज्ञानकार्यसिद्ध्यर्थं क्रियाशक्तिरूपमच्युतीयत्वेन तदापि कार्यक्षममच्छिद्रत्वेन फलाव्यभिचार्यब्जत्वेन तदापि तापकार्यनिवर्तकं तथाऽकरोदिति तापनिवर्तकत्वं च वैराग्ये प्रसिद्धम्। यद्यपि स भावोऽन्याप्रतिबध्यस्वभावस्तथापि प्रभुसम्बन्धित्वेन यथा स तथा तथा हस्ताब्जमपि तथेति। तदोभयोरनुवृत्त्योभयकार्यसम्भवेन विचित्रो महारसात्मको भाव उत्पद्यत इति भावः। ननु पूर्वोत्तरश्लोकोक्तनायिकयोर्मिथो भेदेनेदं सर्वमनुपपन्नमिति चेत्। मैवम्। अत्र ह्यैश्वर्यादषड्गुणरूपा एता एव। अत एतद्विशिष्टमेव स्वरूपं भगवच्छब्दवाच्यमिति निरूप्यते। धर्मयोर्भेदश्चावश्यकः, तथापि धर्म्यभेदात्सर्वोपपत्तेः। तथाच भगवती ज्ञानवैराग्ये वियोगदशायां स्वामिनीनामेवार्थ उपयुज्यत इत्युक्तं भवति। एतेन तस्मिन्समये प्रभोरपि रसात्मकत्वेन स्वामिनीविरहजभावकार्यशान्तिरेवाभ्यां भवतीति सूच्यते॥ १४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नाट्ये नृत्येन विक्षिप्तयोश्चञ्चलयोः कुण्डलयोस्त्विषेण त्विषा मण्डितं शोभमानं स्वगण्डं कपोलं कृष्णगण्डे सन्दधत्याः संयोजयन्त्याः कस्याश्चिद्गोप्याः कृष्णस्ताम्बूलचर्वितमदात्॥ १३॥ काचित्तु कूजन्ती नूपुरे मेखला च यस्याः सा नृत्यन्ती गायती

च अत एव श्रान्ता सती शिवं श्रान्तिनिर्वर्तकं सुखकरं पार्श्वस्थायाच्युतस्य एवं स्त्रीसमूहे स्थितावपि ज्ञानवैराग्यादिगुणच्युतिरहितस्य कृष्णस्य हस्ताब्जं स्वस्तनयोरधात् ॥ १४ ॥

अन्वितार्थप्रकाशिका

कस्याश्चिदिति । नाट्येन नृत्येन विक्षिप्तयोश्चञ्चलयोः कुण्डलयोस्त्विषेण त्विषा मण्डितं शोभमानं स्वगण्डं कपालं कृष्णगण्डे सन्दधत्याः संयोजयन्त्याः कस्याश्चिद्गोप्याः कृष्णस्ताम्बूलचर्वितं स्वमुखं तन्मुखेन संयोज्य प्रकर्षेण अदात् । त्विषशब्दे स्त्रीत्वाभाव आर्षः । घञर्थे कविधानं वा । यद्वा । नाट्यविक्षिप्तकुण्डले च स्वाभाविकी त्विट् च तेषां समाहारः । "द्वन्द्वाच्चुदषहान्तात्" इति टच् । यद्वा । नाट्यविक्षिप्तयोः कुण्डलयोः त्विषा कान्तिर्यत्र स चासौ मण्डितश्चेति तम् । इयं शैव्या ॥ १३ ॥ नृत्यन्तोति । कूजन्ती नूपुरे मेखला च यस्याः सा काचिन्नृत्यन्ती काचिद्गायती गायन्ती । नुमभाव आर्षः । श्रान्ता सती शिवं श्रमनिवर्त्तकं पार्श्वस्थस्य अच्युतस्य हस्ताब्जम् अधात् अञ्जलिना जग्राह । काचित्तु स्तनयोरधात् स्थापितवती । तोषिण्याद्यनुरोधात्काचित्पदावृत्त्या गोपीद्वयविषयतया व्याख्यातम् । पूर्वा चन्द्रावली । अपरा तत्सखी पद्मा । एवं सप्त सख्य उक्ताः । अष्टमी भद्रा तु ऊह्या ॥ १४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नाट्येन नृत्त्येन विक्षिप्ते कम्पमाने कुण्डले तयोः त्विषा मंडितं त्विट् शब्देऽकारान्तत्वमार्षं गण्डं कपोलं गण्डे तादृशे स्वकपोले । सन्दधत्याः संलग्नीकुर्वत्याः कस्याश्चित् गोपिकायाः हरिरदात् ॥ १३ ॥ कूजन्ती नूपुरे मेखला च यस्याः सा एवमन्या गोप्योऽपि प्रेमचेष्टित यथा योग्यं चक्रुरिति ज्ञातव्यम् ॥ १४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कस्याश्चिदिति ॥ नाट्येन नृत्येन विक्षिप्ते चञ्चले च ते कुण्डले च तयोः त्विषस्त्विट् तेन मण्डितं, गण्डं कपोलं, गण्डे तथाभूते स्वगण्डे, संदधत्याः संयोजयन्त्याः, कस्याश्चिदङ्गनायाः, कस्यैचिदित्यर्थः । ताम्बूलचर्वितं, अदात् कृष्णे ददौ । त्विषशब्दोऽकारन्त आर्षः ॥ १३ ॥ नृत्यन्तीति ॥ कापि काचित्तु, नृत्यन्ती, गायती, कूजती नूपुरे मेखला च यस्यास्तथाभूता, श्रान्ता च सती, शिवं शान्तिकरं, पार्श्वस्थस्याच्युतस्य हस्ताब्जमब्जवच्छीतलं हस्तमित्यर्थः, स्तनयोः स्वकुचयोः, अधात् निदधे ॥ १४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कस्याश्चिदिति : १०.३३.१३.

दृष्ट्वाऽन्यस्याः प्रतिकृतिमुपेन्द्रस्य गण्डे स्थिताऽसौ का वा धृष्टा मदनु सविधेऽत्रेत्यलं कापि कोपात् ।
निःसार्याऽस्मादियमिह यथाऽस्याः प्रवेशो न भूयो भूयाच्छुद्ध्या किमिति निदधे तस्य गण्डे स्वगण्डम ॥ ५४ ॥
कृष्णेनाहमुरीकृता तदनयोरप्यस्तु सङ्गोऽधुनेत्यालोच्याच्युतगण्डबिम्बितनिजात्माऽऽलिङ्गनाद्युत्सवे ।
कापि स्त्रीयझलत्कपोलविलसच्छ्रीकृष्णबिम्बं मुदा किं वा योजयितुं न्यधाद्भगवतो गण्डे स्वगण्डं तदा ॥ ५५ ॥
उद्दीप्तकीलविरहज्वलनोपशान्तिर्नैवाधरामृतमृते भवितेति भूयः ।
कृष्णोऽपिबत्तदधरामृतमुज्ज्वलश्रीः कृष्णाधरामृतमसावपि भूरितृष्णा ॥ ५६ ॥
प्रभुमुख्योऽनुरागी यः सत्कार्यः स न मे कथम् । इत्यन्या कापि तन्मुख्यरसताम्बूलमाददे ॥ ५७ ॥

नृत्यन्तीति : १०.३३.१४.

पदादम्बुजातं पुरा यातमस्य करे त्वम्बुजातं निराबाधमस्ति ।
विचिन्त्यैव काचित्स्वतापापहत्यै न्यधात्स्वस्तने तस्य हस्ताम्बुजातम् ॥ ५८ ॥

कृष्णप्रिया

कोई एक गोपीजी ने नृत्य समय चलायमान कुण्डलों की कान्ति से सुशोभित अपने कपोल को श्रीश्याम सुन्दरजी के कपोल से लगाया, और रसिकवर नटवर ने अपना चर्वित ताम्बूल उस गोपीजी के मुख कमल में समर्पित किया ॥ १३ ॥ रास में नृत्य करती और गान करती किसी गोपीजी कटि में रही कांची को किंकिणीओं से मञ्जुल ध्वनि आ रही थी परन्तु रास-परिश्रम से वह श्रान्त बन गई थी तब समीप में ही रहे अच्युत जी के कल्याणकर करकमल को अपने हृदय प्रदेश पर रख लिया ॥ १४ ॥

गोप्यो लब्ध्वाच्युतं कान्तं श्रिय एकान्तवल्लभम् । गृहीतकण्ठ्यस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे ॥ १५ ॥

कर्णोत्पलालकविटङ्ककपोलधर्मवक्त्रश्रियो वलयनूपुरघोषवाद्यैः[1] ।
गोप्यः समं भगवता ननृतुः स्वकेशस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्याम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—श्रियः, एकान्तवल्लभम्, अच्युतम्, कान्तम्, लब्ध्वा, तद्दोर्भ्याम्, गृहीतकण्ठ्यः, तम्, गायन्त्यः, विजह्रिरे ॥ १५ ॥ कर्णउत्पलअलकविटङ्क, कपोलधर्मवक्त्रश्रियः, स्वकेशस्र तस्रजः, गोप्यः, भ्रमरगायकरासगोष्ठ्याम, वलयनूपुरघोषवाद्यैः, भगवता, समम्, ननृतुः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवमन्या अपि गोप्यो यथायथं नानाविभ्रमैर्विजह्रुरित्याह । गोप्य इति ॥ १५ ॥ तत्र वादकेषु गायकेषु गन्धर्वकिन्नरादिषु रसावेशेन मुह्यत्सु नृत्यत्सु चान्यामेव वाद्यादिसंपत्तिं दर्शयन्रासस‌ंभ्रममाह । कर्णोत्पलैश्चालकविटङ्कैरलकालङ्कृतैः कपोलैश्च घर्मैश्च वक्त्रेषु श्रीः शाभा यासां ताः । घोषाः किंकिण्यः । वलयनूपुरघोषैर्वादित्रैः । स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः । एतेन तालगतिसंतुष्टाः केशाः सशिरः कम्पं पादेषु पुष्पवृष्टिमिवाकुर्वन्नित्युत्प्रेक्षितम् । भगवता सह ननृतुः । क । भ्रमरा एव गायका यस्यां राससभायाम् ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विभ्रमैः विलासैः । एकान्तवल्लभम् निर्णीतनियतभर्तारम् । तद्दोर्भ्याम् कृष्णभुजाभ्याम् । तम् कृष्णम् । विजह्रिरे क्रीडां चक्रुः ॥ एवमन्या अपि गोप्यः स्वस्वभावानुसारिण्यो विजह्रुरित्याह—गोप्य इति । अत्र 'यद्वाञ्छया श्रीर्ललनाऽचरत्तपः' इति नागपत्नोस्तुत्या, 'नायं श्रियोङ्ग उ नितान्तरतेः प्रसादः' इत्युद्धवोक्त्या, "श्रीः प्रेक्ष्य कृष्णसौन्दर्यं तत्र लुब्धाचरत्तपः" इति भागवतामृतोत्थापितपौराणिककथया च नारायणकान्तायाः श्रियः कृष्णसंगासंभवादेवं व्याख्येयम् । कान्तम् कमनीयमच्युतं कृष्णसंगासंभवादेवं व्याख्येयम् । कान्तम् कमनीयमच्युतं कृष्णमेकान्तवल्लभं लब्ध्वा विजह्रिरे । तद्दोर्भ्यां कृष्णभुजाभ्यां गृहीताः कण्ठा यासां ताः । श्रियः श्रिय इवेत्यर्थः । सा यथा नारायणवक्षोगृहीतगात्री, एता गोप्योऽपि तथा कृष्णभुजगृहीतकठ्य इत्यर्थः । यद्वा—नारायणेनैक्यात्कृष्णस्यापि श्रीवल्लभता ॥ १५ ॥ तत्र रासे । राससंभ्रमः रासावेशः । स्रजः पुष्पाणि तन्माला वा । 'स्रग्मालापुष्परज्जुषु' इति धरणिः । एतेन स्वकेशेत्याद्युक्तेन । उत्प्रेक्षितम् उत्प्रेक्षाविषयतां नीतम् । उत्प्रेक्षालक्षणं तु कुवलयानन्दे—"संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना । उक्तानुक्तास्पदाद्या स्यात्सिद्धासिद्धास्पदे परे ॥" इति अन्यधर्मसंबन्धनिमित्तेनान्यस्यान्यात्मतासंभावनमुत्प्रेक्षा । सा त्रिधा—कस्यचिद्वस्तुनो वस्त्वन्तरात्मना संभावनं वस्तूत्प्रेक्षा, सैव स्वरूपोत्प्रेक्षा, अहेतोर्हेतुतया सम्भावनं हेतूत्प्रेक्षा, अफलस्य फलतया संभावनं फलोत्प्रेक्षा । तत्राद्या वस्तूत्प्रेक्षा द्विधा—उक्तविषयाऽनुक्तविषया चेति । परे हेतुफलोत्प्रेक्षे अपि प्रत्येकं द्विविधे—सिद्धविषये असिद्धविषये च । तत्रोदाहरणम् क्रमात्—"धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम् । लिंपतीव तमोंगानि वर्षतीवांजनं नभः ॥" (१) । अथ प्रदोषे विसृत्वरतमसो नैल्यदृष्टिरोधत्वादिधर्मसबन्धेन गम्यमानेन निमित्तेन सद्यः प्रियविघटितसर्वदेशस्थकोकांगनाहृद्गतप्रज्वलिष्यद्विरहानलधूमस्तोमत्वसंभावनं स्वरूपोत्प्रेक्षा, तमसो विषयस्योपादानादुक्तविषया । तमो व्यापनस्य रोदोगताखिलवस्तुसान्द्रमलिनीकरणेन निमित्तेन तमः कर्तृकलेपनतादात्म्योत्प्रेक्षा । नभः कर्तृकाञ्जनवर्षणतादात्म्योत्प्रेक्षा चानुक्तविषया वस्तूत्प्रेक्षा "रक्तं तवांघ्रियुगलं भुवि विक्षेपणाद् ध्रुवम् । त्वन्मुखाभेच्छय नूनं पद्मैर्वैरायते शशी ॥" (२) चरणयोस्सहजे रागे विक्षेपणमहेतुर्हेतुत्वेन संभावितं हेतूत्प्रेक्षा, विक्षेपणस्य च विषयस्य सत्त्वात्सिद्धविषया । चन्द्रपद्मविरोधे सहजे कान्तामुखकान्तिकामनाहेतुरसतां च हेतुत्वेन संभावितेत्यसिद्धविषया हेतूत्प्रेक्षा । "मध्यः किं कुचयोर्धृत्यैः बद्धः कनकदामभिः । प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति ॥" (३) । अत्र स्वाभाविक्या मध्यकर्तृककुचधृतेः कनकदामबद्धत्वेनाध्यवसितवलित्रयशालिता फलत्वोत्प्रेक्षणं सिद्धविषया फलोत्प्रेक्षा । जलजस्य जले निजावस्थितेरुदकवासतपस्त्वेनाध्यवसितायाः कान्तापदसायुज्यप्राप्तिर्न फलमिति खपुष्पायमाणायास्तस्याः फलत्वेनोत्प्रेक्षणमसिद्धविषया फलोत्प्रेक्षेति । तथा चेह वस्तूत्प्रेक्षोक्तविषया ज्ञेया, विषयाणां कर्णोत्पलादीनामुक्तत्वादिति । कर्णोत्पलानि सौवर्णानि गोपिकास्थानीयानि वर्णसाम्यात्, अलकाः श्यामाश्चूर्णकुन्तलाः कृष्णस्थानीयाः, उभयोर्विटङ्कः परस्पराबद्धकरानुकारः, कपोलेषु रङ्ग स्थानीयेषु, धर्मश्च कालिंदीप्रवाहस्थानीयः, तेन तेन वक्त्राणां श्रीर्विलक्षणा रासमण्डलशोभा यासां ता इति द्विविधा रासलीला संजातेति । भ्रमराणां गायकत्वं तु स्वयमेव लिखितम् । "विटङ्कः पक्षिवासार्थकल्पितेऽलंकृतौ तथा" इति कोशात् । 'गोष्ठी सभा-

---

१. नादैः-प्रा. पा. । २. स्म केश-विज. ।

संलापयोः स्त्रियाम्' इति मेदिनी ॥ पृथक्पृग्गाननृत्यादिसाद्गुण्यशोभामुक्त्वा समुदितनृत्यजनितवक्त्रादिशोभां विवृणोति—कर्णोत्पलेषु कर्णधृतोत्पलोपलक्षितचक्रिकाकुण्डलेषु । अलकानामिति लौल्याद्विविधाष्टंका वेष्टनानि च कपोलेषु धर्मबिन्दवश्च तैर्वक्त्रेषु श्रीः शोभा यासां ताः । 'टकि—बन्धे' । वलयनूपुराद्यलंकाराणां घोषस्तुल्यस्वरतया नादो येषु तैर्वाद्यैः । तत्रानद्धशुषिरैस्तत्तदधिष्ठातृदेवताभिरेव स्वसफलीकरणार्थमागत्य वादितैः । स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः । एतेन तालगतिसंतुष्टाः केशाः सशिरः कम्पाः पुष्पवृष्टिमिवाकुर्वन्निति स्वामिचरणाः । भ्रमरा अपि गायका यस्यां तस्यां रासगोष्ठ्यां राससभायाम ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अच्युतं कस्माच्चिदपि रूपगुणादिमाहात्म्याच्च्युतिरहितम् । तस्य दुर्लभतामाह । श्रियोऽपि एकान्तं वैकुण्ठनाथादितोऽप्यतिशयान्नितान्तं वल्लभं यद्वाञ्छया श्रीर्ललनाचरत्तप इत्यनुसारेण प्रेमविषयं नतु लब्ध तं कान्तं रमणं लब्ध्वा । यद्वा । श्रियः कान्तं कामनास्पदम् एकान्तवल्लभं स्वैकनिष्ठप्रियतमं लब्ध्वा न केवलं लाभः किन्तु स्वल्पमपि विश्लेषमहमानेन तेन स्वदोर्भ्यां गृहीतः कण्ठो यासां तादृश्य इत्यर्थः । अत एवातिप्रेमानन्देन तमेव गायन्त्यो विजह्रिरे इति । एवं श्रियोऽपि सकाशात्तासामतिमाहात्म्यमभिव्यक्तं तथैव गास्यते श्रीमदुद्धवेन "नायं श्रियोऽङ्ग उचितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्या । रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषां य उदगाद्व्रजसुन्दरीणा" मित्यादि ॥ १५ ॥ तथैव तासां माहात्म्य दर्शयति । कर्णेति द्वाभ्याम् । कर्णेति तासां रासेन श्रमेऽपि परमशोभा दर्शिता तथापि नृत्ये हेतुमाह । भगवता निजाशेषमाधुर्यसारसर्वस्व प्रकटयता सममिति । तत्साहित्यस्य परमोल्लासकत्वात् । यतो गोप्यस्तदेकप्रेमवशत्वेन प्रसिद्धा इत्यर्थः । तेन सममित्यनेन तासां तत्सदृशवैदग्ध्यादिकमपि सूचितं तथा तासामिव तस्यापि कर्णोत्पलेत्यादिकं सर्वं वाध्यते । उत्पलधारणञ्च सम्प्रति श्रीकृष्णे नैव कारितमिति ज्ञेयम् । भ्रमरगायकेति । तत्तदुचितगानसमर्थत्वात्तेषाम् असाधारणत्वं व्यञ्जितम् । अन्यत्तैः । तत्र वादकेष्विति दुन्दुभिनादाभिप्रायेण तद्धि नादादिकं तेषां तन्नृत्यानुकूलमेवासीदिति तत्सम्मतम् । किन्नरादिष्विति च दिवौकसामित्युक्तेस्तदन्तर्गतत्वसम्भावनयेति । एवं तत्र तासां न काचिदन्यतो गीतादेरप्यपेक्षा किन्तु स्वानन्देनैव तेषां मध्ये मध्ये वादनादिचेष्टितमिति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अच्युतं कस्माच्चिदपि रूप-गुणादि-माहात्म्याच्च्युतिरहितं सुस्थिरं वा, कान्तं रमणं लब्ध्वा तस्य सुदुर्लभतामाह—श्रिय एव, न त्वन्यजनस्य, एकान्तेन एकनिष्ठया वल्लभम्; यद्वा, श्रियः कान्तम्, आत्मनश्चैकान्तवल्लभम्; नितान्तप्रेष्ठं लब्ध्वेति श्रियोऽपि सकाशात्तासां माहात्म्यमभिप्रेतम्, तदेव दर्शयति गृहीतेति । तथा च गास्यते श्रीमदुद्धवेन (भा० १०।४७।६०)—'नायं श्रियोऽङ्ग ! उचितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः । रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषाम्' इत्यादि ॥ १५ ॥ तथैव तासां माहात्म्यं कथयति—कर्णेति, तासां रासेन परमा शोभोक्ता । यद्वा, परिश्रान्तिः सूचिता, तथापि नृत्ये हेतुमाह—भगवता निजाशेषैश्वर्य्यसारसर्व्वस्वं प्रकटयता सममिति तत्साहित्यस्य परममोहनत्वात्, यतो गोप्यः—तदेकप्रेमपरवशा इत्यर्थः । तेन सममित्यनेन तासां तत्सदृशवैदग्ध्यादिकमपि सूचितम् । तथा तासामिव तस्यापि कर्णोत्पलादिक सर्व्वं बोध्यते । अन्यत्तैर्व्याख्यातम् । तत्र वादकेष्विति दुन्दुभिनादाभिप्रायेण, किन्नरादिष्विति च दिवौकसामित्युक्तेस्तदन्तर्गतत्वसम्भावनमिति । अथवोक्त श्रीतोऽप्यधिकमाहात्म्यमेव दर्शयति; किंवा पूर्व्वं गन्धर्व्वपतिगानादिकमुक्तम्, अधुना राससंरम्भेण तासां न काचिदन्यतो गीताद्यपेक्षेत्याह—कर्णेति । अर्थः स एव । यद्वा, पूर्व्वं गन्धर्व्वपतिगीतं निज-वलयादिवाद्यं चोक्तम्, अधुना च तत्तद्विनैव नृत्य चक्रुरित्याह कर्णेति । अकारप्रश्लेषेण न वलयादीनां वाद्यैरवलयादि-वाद्यैस्तदभावेनापीत्यर्थः । चिरं रासावेशेन तत्तत्स्खलनाद्यापत्तेः । तथा न विद्यते भ्रमरोऽपि गायको यस्यां रासगोष्ठ्याम्, अतएव स्वकेशेति केशाः पादानां पूजामकुर्व्वन्नित्यर्थः । तच्च तैर्व्याख्यातमेव । अन्यत् समानम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कर्णोत्पलालकाख्यालङ्कारवनमुखं यासां ताः यासां गोष्ठीषु भ्रमरा एव गायकाः ता भ्रमरगायकरासगोष्ठ्यः ॥ १६-२१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थमन्या अपि गोप्यः यथायथं नानाविधैर्विभ्रमैर्विजह्रुरित्याह । गोप्य इति । श्रियो लक्ष्म्या एकान्तवल्लभमनन्यपतिं लब्ध्वा तस्याच्युतस्य दोर्भ्यां गृहीताः कण्ठा यासां तास्तमच्युतं नायन्त्यो विजह्रिरे ॥ १५ ॥ तत्र वादकेषु गायकेषु च सखीकेषु गन्धर्वकिन्नरादिषु रसावेशेन मुह्यत्सु नृत्यत्सु चान्यामेव वाद्यादिसंपत्तिं दर्शयन् राससम्भ्रममाह कर्णोत्पलेति । कर्णोत्पलेति । कर्णोत्पलैः कर्णावतंसैरुत्पलैश्चालकविटङ्कैरलङ्कारालकृतैः कपोलैश्च घर्मैः स्वेदबिन्दुभिश्च वक्त्रेषु श्रीः शोभा यासां ता गोप्यः घोषाः किंकण्यः वलयादिभिर्वाद्यैः वादित्रैश्च भगवता सह भ्रमरा एव गायका यस्यां तस्यां राससभायां ननृतुः । कथंभूताः स्वकेशेभ्यः स्रस्ताः स्रजो यासां तथाभूताः । एतेनताललितमतिसंतुष्टाः केशा सशिरःकम्पाः पादेषु पुष्पवृष्टिमिवाकुर्वन्नित्युत्प्रेक्षितम् ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गृहीतकण्ठय आलिङ्गितकण्ठ्यः एकान्तवल्लभं निर्णीतनियतभर्तारं विजह्रिरे क्रीडां चक्रुः ॥ १५ ॥ कर्णोत्पलम् अलकः कुन्तलकश्च कर्णोत्पलालकौ ताभ्यां विटङ्कं कपोलं कपोलस्य विटङ्कोऽलंकारः घर्मस्तेन स्वेदजलं लक्ष्यते कपोलालङ्कारस्वेदजलेन च वक्त्राणां श्रीः शोभा यासां तास्तथा वलयनूपुरलक्षणवाद्यघोषैः समं भगवता च समं भ्रमरा एव गायकाः अनु स्वरदानकरा यस्यां सा तथा भ्रमरगायकरासगोष्ठी रासक्रीडा तस्याम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तास्याः गोप्याः । यद्वा श्रियोऽपि एकान्तं वैकुण्ठनाथादितोऽप्यतिशयात् प्रेमविषयं ननु लब्धं तं कान्तं रमणं लब्ध्वा न केवलं लाभः किन्तु स्वल्पमपि विश्लेषमसहमानेन तेन स्वदोर्भ्यां गृहीताः कण्ठा यासां तादृश्य इत्यर्थः ॥ १५-१६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ क्षणं विश्रम्य पुनर्विहारमारेभिरे इत्याह गोप्य इत्यादि । गोप्यः श्रियो गोपीरूपा याः श्रियः शोभाः एकान्तवल्लभमतिदयितं कान्त कमनीयमच्युतं लब्ध्वा तद्दोर्भ्यामच्युतभुजाभ्यां गृहीतकण्ठ्यः सत्यस्तं गायन्त्यस्तत्क्षणकृतेन तद्गुणरूपमाधुर्यवर्णनगीतपदेन नानारागादिकौशलेन गायन्त्यो विजह्रिरे ननृतुरित्यर्थः ॥ १५ ॥ इदानीं भगवता सह ननृतुरित्याह—कर्णोत्पलेत्यादि । गोप्यो भगवता समं ननृतुः । भगवान् यथा ननर्त, तथेत्यर्थः । सम-शब्दः सहार्थः सदृशार्थश्च । अर्थयोर्युगपदुद्भासनात् । अत्र नृत्यं तावद्द्विविधं भवति—निर्गीतं सगीतञ्च । निर्गीतं केवलवाद्यमात्रेण मन्दमन्देन सतालेन मुखकण्ठभ्रूनेत्रादि-कम्पनेन शनैः शनैर्नृत्यम् । सगीतं गीतार्थानुरूपं हस्तकादिगतिविशेषवत् । तत्र प्रथमं निर्गीतमेवेदं नृत्यमिति । भ्रमरगायका यत्रेति गीतान्तराभावः । कर्णोत्पलैश्चालकविटङ्कैरलकविभ्रमैश्च तथा कपोलघर्मैश्च वक्त्रेषु श्रीर्यासाम् । मुखनेत्रग्रीवादि दोलनेन चलद्भि कर्णोत्पलैः, चलद्भिरलकविटङ्कैः, स्फुरद्भिः कपोलघर्मैश्चेत्यर्थः । वलयानां नूपुराणां घोषा एव वाद्यानि तैरन्यवाद्यैरपि तदाविरतमेव । एतेन पूर्वं वाद्यान्तरमप्यासीदिति मन्तव्यम् । तदा तु भ्रमरगीतवलयादिवाद्याभ्यामेव नृत्यमित्यर्थः । स्वकेशेषु स्रस्तं स्रंसनं यासां तथाभूता स्रजो यासां तास्तथा स्वकेशेभ्यः स्रंसमानस्रज इत्यर्थः । अद्धस्रंसमानस्रक्त्वेन केशानां शोभातिशयः । स्व-शब्दो भगवद् व्यतिरेकार्थः । तस्य तु केशेषु तथैव स्रग् वर्तत इति भावः ॥ १६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवमित्यादि । यथार्भकः स्वप्रतिविम्वे स्वच्छायायां विभ्रमो विलासो यस्य स तथा स्वच्छाययैव खेलति यथा स्वयमभिनयति, तथा छायापि पुनश्छाया च यद्यदभिनयति तथा स्वयमर्पात्यर्भकस्य स्वभावः, तथा स्वच्छाया रूपाणां तासां विभ्रम एव विभ्रमो यस्य तेन तस्य तासाञ्च नृत्यादिविलासानामेकरूपता । अथवा एवं व्रजसुन्दरीभिः सह रेमे यथा स्वप्रतिविम्व-विभ्रमः स्वस्मिन् तासां प्रतिविम्ब इति विभ्रमो यस्य स तथा बभूवेत्यर्थः । रमेशोऽपि अर्भोऽर्भकः, को ब्रह्मा यस्य स तथाभूतोऽपीत्यपिरध्याहार्यः ॥ १६-१७-१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवमन्या अपि गोप्यः स्वस्वभावानुसारिण्यो विजह्रुरित्याह । गोप्य इति । अत्र "यद्वाञ्छया श्रीर्ललनाचरत्तप" इति । नागपत्नीस्तुल्या "नायं श्रियोऽङ्ग उचितान्तरतेः प्रसाद" इत्युद्धवोक्त्या च श्रीःप्रेक्ष्य कृष्णसौन्दर्यं तत्र लुब्धाचरत्तप इति भागवतामृतोत्थापितपौराणिककथया च नारायणकान्तायाः श्रियः कृष्णसङ्गासम्भवादेवं व्याख्येयम् । कान्तं कमनीयमच्युतं कृष्णमेकान्तवल्लभं लब्ध्वा विजह्रिरे । तद्दोर्भ्यां कृष्णभुजाभ्यां गृहीताः कण्ठा यासां ताः । श्रियः श्रिय इवेत्यर्थः । सा यथा नारायणवक्षोगृहीतगात्री एता गोप्योऽपि तथा कृष्णभुजगृहीतकण्ठ्य इत्यर्थः । यद्वा नारायणेनैक्यात् कृष्णस्यापि श्रीवल्लभता ॥ १५ ॥ पृथक् पृथक् गाननृत्यादिसादगुण्यशोभामुक्त्वा समुदितनृत्यजनितवक्त्रादिशोभां विवृणोति । कर्णोत्पलेषु । कर्णधृतोत्पलोपलक्षितचक्रिका—कुण्डलेषु अलकानामतिलौल्याद्विविधाट्टङ्का वेष्टनानि च कपोलेषु घर्मविन्दवश्च तैर्वक्त्रेषु श्रीः शोभा यासां ताः टकि बन्धे । वलयनूपुराद्यलङ्काराणां घोषस्तुल्यस्वरतया नादो येषु तैर्वाद्यैः तत्रानद्धशुषिरैस्तत्तदधिष्ठातृदेवताभिरेव स्वसफलीकरणार्थमागत्य वादितैः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः । एतेन तालगतिसन्तुष्टाः केशाः सशिरःकम्पं पुष्पवृष्टिमिवाकुर्वन्निति श्रीस्वामिचरणः । भ्रमरा अपि गायका यस्यां तस्यां रासगोष्ठ्यां राससभायाम् ॥ १६ ॥

रसिकाह्लादिनी-टीका

एवं यूथमुख्यानां कासांचित् पृथक् पृथक् चेष्टितमुक्त्वाऽधुना सर्वासां सामान्यतः स्वरूपकृतां लीलामाह गोप्य इति, गोप्यः स्वनिष्ठं रसं परस्परमपि गोपायन्ति ताः, अच्युतं क्षणमपि विलासच्युतिरहितं, कान्तं रमणं अन्तर्बहिश्च निजानन्ददायिनमित्यर्थः । लब्ध्वा प्रेम्णा सुलभत्वेन प्राप्य तस्य दुर्लभतामाह-सर्वासां प्रेयसीनां परमावधिरूपाया श्रिय एकान्तवल्लभं परमप्रेष्ठम्,

यद्वा एकान्ते अन्तपुर एव वल्लभम्। तत्रैव तस्या अधिकारो न तु रासगोष्ट्यामिति। यद्वा श्रियः कान्तं कामनाविषयमपि एकान्ते कालिन्दीपुलिने बन्धुम्। अर्थात् गोपीनामेवेति। यद्वा एकान्तं वृन्दारण्यप्रदेशादिकं वल्लभमतिप्रियं यस्येति वैकुण्ठादि सदोद्ग्राह्यमिति प्रसिद्धेः। कीदृशं कृष्णं श्रियं च्युतं तस्यामनाशक्तः "यद्वाञ्छया श्रीर्ललना चरत्तपो-विहाय कामानि"त्युक्तः अतश्च एवालभ्यलाभत्वेन लब्ध्वा तमेव गायन्त्यो विजह्रिरे, यथाभिलषितं चुम्बनालिङ्गनादिविलासमाविश्चक्रुरिति। न केवलं तासामेवालभ्यलाभत्वेनोत्कर्षः किं तु तस्यापीत्याह। तद्दोर्भ्यां उभयपार्श्वस्थितस्य तस्य दोर्भ्यां गृहीतः कण्ठो यासां ता दुर्लभत्वं कण्ठमित्येव सुवचं लब्ध्वा उभयतः कण्ठे नालिङ्गितवानित्यर्थः। अत एव गाननृत्ययोरत्यावेशः सूचितः। तत्र विहारे तासां स्वातन्त्र्यं च निरूपितमिति उद्धवोऽपि तथैवाग्रे वक्ष्यति च "नायं श्रियोऽङ्ग उचितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः। रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषं यः उदगाद्व्रजसुन्दरीणामि"त्यादि॥ १५॥ एवं तावत्तासां स्वातन्त्र्यमुक्त्वा रासरभसजनितं शोभाभरमभिनयेनाभि व्यञ्जयति, कर्णोत्पलेति, गोप्यः भगवता समं ननृतुः नृत्ये गोपीनां मुख्यत्वं भगवतो गौणत्वं तासां चरणविन्यासविशेषमालक्ष्य नृत्यमानत्वात्। भगवतेति गोपीसभापतित्वेन रसैश्वर्यव्यञ्जयता सममिति। तत्साहित्यं परमशोभाव्यंजकमिति सूचितम्। यद्वा समं सदृशं यथा भवति तथेति सर्वकलाकौशलदर्शनेन सामरस्यं सूचितम्। रासरभसे तासां श्रमजनितशोभाविशेषमाह कर्णेति। कर्णयो भूषणत्वेन स्थिताभ्यां अलकोत्पलादयस्तेषां विटङ्कौ आश्रयौ कपोलौ ताभ्यां च "कपोतपालिकायां च विटङ्कं पुन्नपुंसकमि"त्यभिधानात्, धर्मैः प्रस्वेदविन्दुभिश्च वक्त्रेषु श्री शोभा सम्पत् यासां ताः। अनेन तासां वक्त्रशोभैव श्रीकृष्णस्य नृत्योद्दीपका जाता। तस्य वलयनूपुरघोषवाद्यैरिति तासां नृत्योद्दीपकत्वं ध्वनितम्। वलयादिवाद्यानामुभयत्रोद्दीपकत्वं सूचितम। श्रमस्य सूचकान्तरमाह स्वकेशेति स्वकेशेभ्यः स्रस्ता स्रजो यासां ताः, कुत्रेत्यपेक्षायां तत्राह भ्रमरा एव गायका यस्यां रासगोष्ठ्यां राससभायां, अयमभिप्रायः पूर्वमुक्तं ततो दुन्दुभयो नेदुरिति, बलयानां नूपुराणामिति, सदा गन्धर्वादीनां शब्दसाङ्कर्येऽपि वाद्यानां शब्दस्य तदनुकूलत्वमेव तालगतिसमाप्तौ तेषां शब्दस्य साहचर्य्यात्। इदानीं लोकशास्त्रमर्यादातिक्रमेण नृत्ये प्रवृत्ते सति स्वरतालरागग्राममूर्छनाज्ञानाभावात्। गायकेषु वादकेषु चोपरतेषु सत्सु स्वयमुत्प्रेक्षिततालस्वरभेदमनुगतानां वलयादिवाद्यानामुद्दीपकत्वमुक्तम्, यद्वा देवदुन्दुभ्यादिशब्दस्यैतस्मिन्नेव लीनत्वान्न पृथक् श्रवणमिति भावः। अन्यच्च तालगतिसमाप्तिशब्दस्याभिभाव्यत्वं वलयादिशब्दस्याभिभावकत्वम्। अत एव वलयादिशब्देभ्य उच्चैः श्रूयमाणत्वात्। मुख्यदुन्दुभ्यादिशब्दस्यैतस्मिन्नैव लीनत्वान्न पृथक् श्रवणमिति भावः। अन्यच्च तालगतिसमाप्तिज्ञानाभावात् पुष्पवृष्टिरूपरतिः सूचिता, स्वरज्ञानाभावाद्गन्धर्वाणां गीतोपरतिः। भ्रमरास्तु मालासम्बन्धिन अत एव गोपीमण्डलसहचराः गोपिभिः सह तेषामपि परिभ्रमणमुक्तं वने भ्रमरा एवाधिकृताः, वाद्याधिकारे वलयनूपुराद्या अधिकृता, पुष्पवृष्टौ केशा एवाधिकृता इति स्वयमुत्प्रोक्षितमलौकिकं रसैश्वर्य्यमाविष्कृतमित्यर्थः। किं च कर्णयोरुत्पलन्यायममृतसम्भ्रमे पतनशङ्कानिरसनेन स्वचातुर्य्यप्रकाशनककपोलयोः परभागव्यञ्जनार्थमिति भावः। अलका भ्रमरा इव रसपातारस्तेषां विटङ्करूपैः कपोलौ तत्र धर्मो नृत्याभिनिवेशाज्जातं श्रमजलं तैर्वक्त्रेषु श्री शोभा सम्पद् यासां ताः, कपोलसंलग्नैरलकैः मृगमदपत्ररचना कृता। श्रमविन्दुभिर्मुक्तानामिव रचना विशेषः कृत इति सर्वं तेनालौकिकमेव सम्पादितमिति भावः॥ १६॥

विशुद्धरसदीपिका

सहचरीणां चेष्टितमाह। गोप्य इति। गोपयन्ति सर्वथा पालयन्ति निजनाथाविति। यद्वा गोपयन्त्यात्मसुखे निःक्षेपयन्तीति। यद्वा तयोः प्रिययोरन्योऽन्यासक्तिं गोपयन्ति ता गोप्यः। यद्वा गोशब्देनेन्द्रियाणि नेत्रादीनि तानि दर्शनादिना पान्ति रक्षन्ति ताः गोप्यः सख्य इत्यर्थः। श्रियः श्रयते हरिरेनामिति श्रीः स्वाधीनपतिका तस्याः परमरमायाः कान्तं तन्मुखैकपर्य्यवसितात्मसुखम् अच्युतं दृढप्रेमाणं लब्ध्वा ईदृशेऽनेकनायिकासमुदायेऽपि तदेकनाथावन्तं ज्ञात्वा तत एवैकान्तवल्लभं तस्या एव परमप्रेष्ठं मत्वा लब्धपरमानन्दाः तद्दोर्भ्यां गृहीतकण्ठ्यः नतु स्वदोर्भ्यामिति कान्तभावनासक्तिः सौहृदञ्च सूचितं श्रीराधिकानागरमेव गायन्त्यः तद्गानं यथा श्रीमत्सुधानिधौ—

अहोरसिकशेखरः स्फुरति कोऽपि वृन्दाटवी निकुञ्जनवनागरीकुचकिशोरकेलिप्रियः॥
करोतु स कृपां सखीप्रकटपूर्णनाट्योत्सवो निजप्रियतमापदे मधुमये दधद्यः शिरः।

यथा वा—

प्रत्यङ्गोच्छलदुज्ज्वलामृतरसे प्रेमैकपूर्णाम्बुधिर्लावण्यैकसुधानिधिः पुरुकृपा वात्सल्यसाराम्बुधिः॥
तारुण्यप्रथमप्रवेशविलसन्माधुर्य्यसाम्राज्यभूर्गुप्तः कोऽपि महानिधिर्विजयते राधारसैकावधिः॥

इत्यादि बहुशः विजह्रिरे विहृतवत्यः रासक्रीडादिना इति शेषः। शुद्धसहचरीणामयमेव विहार इतिसूचितं यथा तत्रैव—

कदा तु मणिकिङ्किणीवलयनूपुरप्रोल्लसन्महामधुरमण्डलाद्भुतविलासरासोत्सवे॥
अपि प्रणयिनो बृहद्भुजगृहीतकण्ठ्यो वयं पर निजरसेश्वरीचरणलक्ष्म वीक्षामहे॥

तदेवं सर्वथा श्रीराधैकतानताख्यापनायैवायं श्रीरासलीलासमुद्यमः श्रीभगवत इति साधु व्याख्यातम् एतदभिप्रायेणैवाह श्रीजयदेवः।

कंसारिरपि संसारवासनाबद्धशृङ्खलाम्। राधामाधाय हृदये तत्याज व्रजसुन्दरीमिति ॥

तदेवं श्रीकृष्णस्यापि प्रियामनु परमानुकूल्यं दर्शितं तदुक्तं श्रीमदुज्ज्वले —

राधायामेव कृष्णस्य सुप्रसिद्धानुकूलतेति। सर्वमनवद्यम् ॥ १५ ॥ अत एवैतासां पूर्वोक्ताभ्यां विलक्षणरसावेशवैवश्यमावेदयति। कर्णेति। गोप्यः पूर्वश्लोकोक्ताः सहचर्य्यः अभ्यासेन गोपीपदस्यात्रैव मुख्या वृत्तिरिति सूचयति भगवता किशोरीरमणने नित्यविहारिणा समं ननृतुरित्यन्वयः। शिक्षाभ्यासपाटवलेन नृत्यमनुचक्रुरित्यर्थः। कीदृश्यः। कर्णेति कर्णोत्पलानि उत्पलाकृतीनि कर्णभूषणानि तानि च सौवर्णानीति गोपिकास्थानीयानि वर्णसाम्यात् अलकाश्चूर्णकुन्तलास्तेच श्रीकृष्णस्थानीयाः तयोविटं परस्पराबद्धकरानुकारः संग्रथितत्वमिति यावत्। कपोलेषु रङ्गरङ्गस्थानीयेषु घर्म्मश्च कालिन्दीप्रवाहस्थानीयः तेन तेन च वक्त्राणां श्रीर्विलक्षणा रासमण्डलशोभा यासां ताः तथा वलयानां नूपुराणां च घोषा एव वाद्यविशेषास्तैरुपलक्षिताः तथा स्वस्वकेशेभ्यः स्रस्ताः पुष्पस्रजो यासाम्मिति पुष्पवृष्ट्यनुकरणं कुत्रेत्यत आह। भ्रमरेति। यत्र भ्रमरा एव गायकास्तादृश्यां रासगोष्ठ्यामिति रासरूपायां परिषदि इत्यर्थः। तासां तत्सम्बन्धिनामङ्गोपाङ्गानां सर्वेषामपि जडानामजडानां च परमरसावेशो दर्शित इतिदिक् ॥ १६ ॥

श्रीरामनारायणकृता भावभावविभाविका

सर्वासां भाग्यसुखविहारौ निरूपयति। गोप्यो लब्ध्वेति। ता गोप्योऽपि यतो गोप्यो गवामिन्द्रियाणां वागादीनां पालनशीलास्तदेकपरतयैवात्मनश्च तदितरसम्बन्धरूपसंसारात्तदभानात्मकतद्विरहाच्च रक्षणशीला। अतोऽच्युतं कुतश्चिदपि गुणशीलैश्वर्य्यस्वरूपमाहात्म्याच्च्युतिरहितं कान्तं कान्तिमन्तं कानां सर्वसुखानां पर्य्यवसानास्पदं वा तथा श्रिय एकान्तवल्लभं लक्ष्म्यापि सर्वानुत्सृज्यैकान्तवल्लभतया नितरां सेवितं यद्वाञ्छया श्रीर्ललनाचरत्तप इत्यादिवचनात्। यद्वा श्रियस्तद्रूपायाः श्रीराधाया एवैकान्तवल्लभमपि स्वकान्तं लब्ध्वा तथा च तदेकान्तवल्लभत्वात्तत्कृपया तदंशानुप्रवेशादेव कान्तं प्राप्य श्रियः कान्तमेकान्तवल्लभं लब्ध्वेति वान्वयः न केवलं लाभमात्रमपितु तदिति तल्लाभानन्तरमेव दोर्भ्यां गृहीतकण्ठ्यः दोर्भ्यां भुजभुजगपाशेन गृहीतः कण्ठो याभिस्ताः तथा च चित्रोऽयं भुजभुजगपाशः भुजगपाशनिवर्तकखगपतिपतेरपि वध्वा वध्वा सह नर्तकत्वात् भवबन्धमोचकस्य नित्यमुक्तस्यापि मुकुन्दस्य बन्धकत्वात् बन्धस्य दुष्टतयैवाकामैरपि बन्धमुक्तिकामदर्शनेऽप्यस्य बन्धस्य नित्यमुक्तमुकुन्दाभिकामित्वात्तद्विश्रामप्रदत्वात्। यद्वा तद्दोर्भ्यां तस्य बाहुभ्यां गृहीतः कण्ठो यासां तास्तं गायन्त्यः तद्गुणानेव गीतप्रबन्धादिषु वर्णयन्त्यस्तेन सह विजह्रिरे विहारं चक्रिरे। इदमप्यतिवैचित्र्यं प्रेमपथभुजबन्धस्य येन बद्धास्तद्गुणगानामति। अत्र यथा ता अन्तः कृष्णगुणैर्बद्धास्तथा कृष्णोऽपि तद्धितपाशेन निबद्धः परस्परं भुजबन्धनं तु बहिस्तन्निदर्शनं तत्र महत्कौशलं तासां प्रथमं तद्गुणैर्बद्धास्तं बबन्धुरिति महच्चित्रं तत्परस्परं निबद्धा एव विजह्रिरे इति वर्णितमपि तासां सौभाग्यं श्रीमदुद्धवेन—

नायं श्रियोऽङ्ग उचितान्तरतेः प्रसादः स्वर्य्योषितां नलिनगन्धरुचां कुतोऽन्याः।
रासोत्सवे ऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषां य उदगाद्व्रजसुन्दरीणाम् ॥ इति ॥ १५ ॥

भगवता सह तासां गाननृत्यशोभामाह। कर्णोत्पलेति। भ्रमरगायकरासगोष्ठ्यां वळयनूपुरघोषवाद्यैर्गोप्यो भगवता समं ननृतुरित्यन्वयः। अत्रायम्भावः देवगन्धर्वेषु पूर्वं भगवद्रासोत्सवोत्साहेन तद्गुणगानप्रवृत्तेषु तासां गाननृत्यवैचित्र्यदर्शनेन तत्तानवितानमूर्च्छनादिसौष्ठवं नृत्यगतिवैचित्र्यं चानवगत्य मुह्यत्सु तत्समं गातुमशक्नुवत्सु तासां च गाढनृत्योत्साहेन गानविरामे रासगोष्ठ्यां तत्तनुसुमनः सुरभिलुब्धसुमनसो भ्रमरा एव केवलं गायका आसंस्ततस्तद्गायकरासगोष्ठ्यां, यद्वा भ्रमन् रौतीति भ्रमरः तद्गाननृत्यगतिगतिमनवगत्य भ्रमितचित्तत्वेऽपि गुणगानरसलुब्धतया तत्त्यक्तुमशक्ता भ्रमन्मतय एव गुणगानरवं कुर्वन्तो भ्रमराः सर्वे गायका गन्धर्वादयः प्रेमवैचित्र्येन भ्रमन्मतय एव रवं कुर्वन्तो गायकाः गोपीजनाश्च यस्यां तादृग्गोष्ठ्यां, यद्वा नभसि हरेस्तान् गुणान् गायन्तोऽपि नभःप्रसरत्तदङ्गसौरभरभसाकृष्टमतयस्तद्रूपेण रासप्रवेशाधिकारमनालक्ष्य भ्रमररूपा एव गायका गन्धर्वादयः परस्पराङ्गसुरभिमत्ततया रूपमधुपानरततया च भ्रमरदशापन्नत्वेऽपि परस्परगुणगायका हरितत्सख्यो वा यस्यां तद्रासगोष्ठ्यां वलयानां मणिजटितकङ्कणानां नूपुराणाञ्च रूपसुधामानससरसि करचरणकमलयोर्भ्रमरनखपरतया भ्रमरगुञ्जारवच्छब्दायमानानां घोषैर्विबुधविबुधविविधवाद्यैश्च ननृतुः। यद्वा वादकेषु देवादिषु पूर्ववर्णितदिशा मुह्यत्सु वलयनूपुरघोषा एव गीतगत्यनुसृतवाद्यानि तैर्गोप्यो भगवता समं सहेत्यर्थः। ननृतुर्नर्तितवत्यः। यद्वा विचित्रमिदं देवादिषु तद्गतौ मुह्यत्सु गोप्योऽपि ग्राम्या अपि भगवता सर्वकळादिगुरुणा समं तुल्यमन्यूनं ननृतुः। यद्वा देवादिषु मुह्यत्सु गोप्योऽपि समं तुल्यमप्रच्युततालादिना ननृतुस्तत्तु भगवतैव निमित्तभूतेन तथा ननृतुः किंभूतास्तास्तदाह। कर्णोत्पलेत्यादि। कर्णेषु कृष्णेनानीय लम्बितोत्पलानि यद्वोत्पलाकाररत्नाञ्चितभूषणानि तान्येवोत्पलानि तथा अलं पूर्णं कं सुखं येभ्यस्तथा भूता अळकाः कुण्डलिताः कुन्तलाः ते एवाल्पवलयास्तैर्विटङ्कैः अळंकृते कपोले माधुर्य्यसरसी तत्र धर्मः एवोच्छलितरूपरसतरङ्गस्तेन श्रीपद्मवक्त्रपद्मे श्रीर्यासां पुनः किंभूताः स्वकेशस्रस्तस्रजः स्वकः

स्वीय ईशः स्वामी कृष्णः । यद्वा स्वीयं यत्कं सुखं तस्मिन्नीशः समर्थः । यद्वा स्वस्मिन्नेव कं सुखं येषां तेषामात्मारामसुनीनामपीश आराध्यः । यद्वा स्वक आत्मारामश्चासावेवेशश्चेति तथा । यद्वा स्वस्वरूपात्मकस्य कस्य सुखस्य दाने ईशः । यद्वा च आत्मरूपश्चासावेव कः सुखस्वरूपश्चेशश्च स्वकेशस्तस्मिंस्तदङ्गे स्रस्ताः पतिताः संसक्ता गुणग्रथितसुमनसः स्रज एव । यद्वा स स्वकेशः केशव एव तथैव गुणग्रथितसुमनस्तया स्रस्तस्रजो यासु । यद्वा नृत्यगतिचापल्यस्वकेशेभ्यः स्रस्ताः निपतिताः स्रजो यासाम् । अत्रायं भावः स्रजो गुणग्रथिताः सुमनसः पदसुमनसां मृदुत्वमञ्जुवर्णसुरभिगुणमोहिता लज्जया शिरसि स्थातुमशक्ताः स्वयं पदयोर्निपतन्ति । यद्वा के स्वर्गे वासिन ईशा देवा इव के शिरसि वर्तमानाश्च ते एवेशाः समर्थाश्च केशास्तेषां पदानां नृत्यगतिसौष्ठवेन सन्तुष्टाः सुमनसस्तास्वभिवर्षन्ति स्वस्रजो वा ददते । यद्वा वनसुमनोमाळानां हरिकरपदगुणमोहितानां तत्सुमनस्त्यागवत्केशाळयोऽपि तद्गुणतुष्टाः सुमनांसि त्यजन्ति । यद्वा यथा भक्तानां के शिरसि राजमान ईशस्तत्पदगुणगानतुष्टस्तेभ्यः सितसत्त्वगुणान्वितसुमनो ददाति तथा तासां के शिरसि स्निग्धकृष्णकेशकेशत्र एव केशरूपतया वर्तमानो गतितुष्टः सुमनः प्रदानवत्सुमनो ददातीति ॥ १६ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवम्मुख्यानामष्टानां वृत्तमभिधाय सर्वासां तदाह । गोप्य इति । अच्युतं स्वस्वरूपात्कदाप्यप्रच्युतं श्रिय एकान्तवल्लभं व्यभिचारिप्रेमविषयं नतु तथात्वेन लब्धं कान्तं लब्ध्वा तत्रापि तद्दोर्भ्यां गृहीतकण्ठ्यो गायन्त्यः सत्यो विजह्रिरे । यद्वा श्रियः कान्तमात्रं स्वासामेकान्तं वल्लभम् । एतेन श्रियोऽप्यधिकसौभाग्यमासामुक्तं वक्ष्यतेच "नायं श्रियोऽङ्ग उचितान्तरतेः प्रसाद इति ॥ १५ ॥ तत्र गायकेषु च वादकेषु च सस्त्रीकेषु गन्धर्वादिषु रसविशेषेण मुह्यत्सु नृत्यत्सु चान्यामेव वस्त्रादिसम्पत्तिं दर्शयन्नुक्तसौभाग्यं वर्णयति । कर्णेति द्वाभ्याम् । कर्णोत्पलैश्च अलकविटङ्कैः कुटिलकुन्तलालंकृतैः कपोलैश्च घर्मैः स्वेदबिन्दुभिश्च वक्त्रेषु श्रीः शोभा यासामिति रासश्रमेऽपि शोभोक्ता । ननु श्रमेऽपि कुतो नृत्ये प्रवृत्तिरित्याशङ्क्याह । भगवता सममिति । तथाच तत्साहित्याच्छ्रमोऽपि नाभिने गणित इति भावः । यतश्च गोप्यः गोपस्य भगवतः संबन्धिन्यः तथाच भगवति नृत्यति तदनुयायिनीनां तासां विरामो नोचित इति भावः । भगवता सममित्यनेन भगवन्नृत्यसमं तासां नृत्यमित्यपि कथितं वलयानां नूपुराणाञ्च घोषाः शब्दायमानाः किङ्किण्यस्तद्रूपैर्वाद्यैर्वादित्रैः पुनश्च भ्रमरा एव गायका यस्यां रासभायां ननृतुः अनेन । लोकविलक्षणता ध्वनिता तदानीं स्वकेशेभ्यः स्रस्ता विगलिताः स्रजो यासां ताः एतेन नृत्यगतिसन्तुष्टाः स्वकेशाः सशिरः कम्पं पादेषु पुष्पवृष्टिमिव चक्रुरित्युत्प्रेक्षा दर्शिता ॥ १६ ॥

रास-रहस्यम्

र० टी०—श्रिय एकान्तवल्लभं श्रियः लक्ष्म्याः ज्ञानसम्पदः, एकमद्वैतं, तस्मिन्नेव अन्तः पर्यवसानं यस्य स एकान्तः, वल्लभः परमप्रेमास्पदः तं, अच्युतं स्वस्वरूपात् कदाप्यप्रच्युतं कान्तं कानां सर्वसुखानामन्तं परमावधिरूपेण लब्ध्वा प्राप्य, तद्दोर्भ्यां गृहीतकण्ठ्यः तत् तस्य, दोर्भ्यां उभयकराभ्यां आत्मज्योतिः परमात्मज्योतिर्भ्यां, गृहीतकण्ठ्य आकण्ठगृहीताः परिपूरिता इव स्वात्मानं एकीभावं कृत्वा, गोप्यः गवामिन्द्रियाणां परमात्मैकपरतयारक्षणशीलावृत्तयः, तं परमात्मनं "सत्यं ज्ञानमनन्तं ब्रह्म ।" इत्यादि स्वरूपलक्षणं गायन्त्यः गानं कुर्वन्त्यः, स्वात्मन्येव आत्मक्रीडारूपेण विजह्रिरे विहारं चक्रिरे ॥ १५ ॥ कर्णेषु उत् उत्कृष्टतया प्रतिपलं कर्णोत्पलं, कथंभूतम् ? अलकं न लकं पृथिव्यादिशब्दसंयुक्तं, परन्तु शुद्धनादात्मकम् । लः तन्त्रशास्त्रे पृथिवीं द्योतयति, स्वार्थे कः, तैः विटङ्कैः उद्भासितौ, "ब्रह्मविदिव वै सौम्य भासि । इति श्रुत्या कपोलघर्मः कपोलं मुखं, घर्मः तेजः ब्रह्मवर्चसं, तवेव वक्त्रे श्रियः ज्ञानमाधुर्याणि यासां ताः, पुनः कथंभूतैः ? वलयनूपुरघोषवाद्यैः वलयनूपुरोपलक्षितझंकारात्मकनादैः, सकेशस्रस्तस्रजः सह केन ब्रह्मणा, ईशो रुद्रः सकेशः, तेन स्रस्तागलिता, स्रक् माला, तदुपलक्षितचन्दनवनितादिसांसारिकभोग्यविषया, अर्थात् ब्रह्मरुद्राद्युपासनया सांसारिकभोगासक्तिः नष्टाः यासां ताः, गोप्यः वृत्तयः, भ्रमरगायकरासगोष्ठ्यां "रसो वै सः" इति श्रुतेः, रसानां समूहः रासः रसोमयपरमात्मा, तस्य गोष्ठ्यां संसदि, अर्थात् मुमुक्षोः सुनिर्मलान्तःकरणे, भ्रमरगायकाः भ्रमन् रुवन्तीति भ्रमराः, गायका अर्थात् परमात्मानं केन्द्रीकृत्याद्वैतमूलकाः श्रुतयः गानं कुर्वन्त्यः सत्यः, भगवता समं परमात्मना सह, ननृतुः तालगानाद्यनुसरणवत् परमात्मना सह तन्मयताप्राप्त्यर्थं सर्वतोभावेन तस्यानुकरणं कृतवत्य इति भावः ॥ १६ ॥

गूढार्थदीपिनी

गोप्यः भगवता समं सह ननृतुरित्यन्वयः । क्व । भ्रमराः एव गायका यस्यां सा चासौ रासगोष्ठी तस्याम् । कथंभूताः । कर्णोत्पलैः कर्णावतंसैः अलकालङ्कृतैः कपोलैः धर्मैः स्वेदबिन्दुभिश्च वक्त्रेषु श्रीः शोभा यासां ताः । पुनश्च वलयादिभिः उपलक्षिताः । पुनश्च । स्वकेशेभ्यः स्रस्ताः गलिताः स्रजो यासां ताः तथोक्ताः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इत्थमन्या अपि गोप्यो नानाविलासैर्भगवता सह विजह्रुरिति वदन् तासां भाग्यातिशयं सूचयति । गोप्य इति द्वाभ्याम् । अच्युतमवाधितैश्वर्यम् श्रियं कान्तवल्लभमनन्यपतिं कान्तं लब्ध्वा तदनन्यया भक्त्या प्राप्य विजह्रिरे । अहो तासां भाग्यमिति

भावः ॥ १५ ॥ वादकादीनां रसावेशेन मोहं दर्शयति । कर्णेति । कर्णोत्पलैः सामरणेषु कर्णेषु यानि शोभार्थं योजितान्युत्पलानि तैश्च अलकविटङ्कैरलकालंकृतैः कपोलैश्च घर्मैः प्रस्वेदविन्दुभिश्च वक्त्रेषु श्रीः शोभा यासां ताः गोप्यः वलयनूपुरघोषवाद्यैः वलयनूपुरकिङ्किणीरूपैर्वादित्रैर्भगवता समं सह ननृतुः एतेन वादकानां गन्धर्वादीनां रसावेशेन मोहो दर्शितः । क ननृतुः भ्रमरगायकरासगोष्ठ्याम् भ्रमराः श्रीकृष्णपादपद्मसौरभाघ्राणाकृष्टा एव गायकाः यस्यां तस्याम् । एतेन गायकानां रसावेशेन मोहो दर्शितः कथम्भूताः गोप्यः स्वकेशस्रस्तस्रजः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः । एतेन तासां चरणेषु माल्यवृष्टिकराः केशा एव बभूवुः अन्येषां माल्यवृष्टिकर्तॄणां प्रशंसकानुमोदकादीनां च देवानां मोहो दर्शितः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

श्रियो रमाया एकान्तवल्लभं मुख्यभर्तारमच्युतं कान्तं लब्ध्वा प्राप्य तद्दोर्भ्यां बाहुभ्यां गृहीताः कण्ठा यासां तास्तं गायन्त्यो विजह्रिरे चिक्रीडुः ॥ १५ ॥ कर्णेषु धृतान्युत्पलानि तैस्तथाऽलकाश्चूर्णकुन्तला एव विटङ्काः पुरः पाताद्वक्रदारुविशेषा इव तैर्युतास्ताः कपोला यस्य तद्घर्मेण स्वेदोदकेन युतानि च तानि वक्त्राणि तेषां श्रीर्यासां ताः । घर्मः स्यादातपे ग्रीष्मे ह्युष्णस्वेदाम्भसोरपीति विश्वः । विटङ्कोऽलङ्कार इति वा वलयाश्च नूपुराश्च घोषाः पादभूषणविशेषा एतैर्वाद्यैश्चैतद्रूपवाद्यैरिति वा । घोष इति गतम् । भगवता समं गोप्यो ननृतुः । केशेभ्यः स्रस्ताः स्रजो यासां ता भ्रमरा गाया एव गायका । ण्वुलन्तः । यस्यां सा च सा रासगोष्ठी तत्स्थानं तस्यां गोष्ठी गतम् ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं षण्णां स्वरूपमुक्त्वा स्वरूपेण सर्वासां साधारणी लीलामाह । गोप्य इति । अच्युतः कान्तो भगवानेव भवति अन्तर्बहिश्च नित्यानन्ददायी । अत एव सर्वस्त्रीणां मूलभूतायाः श्रिय एकान्ततो वल्लभः परमः प्रियः तादृशं लब्ध्वा तमेव गायन्त्यो विजह्रिरे । ननु परमानन्दे प्राप्ते क्रियाया अपगम एवोचितः ननु पुनः क्रिया तत्कथं विहार इति चेत्तत्राह । तद्दोर्भ्यां गृहीतकण्ठ्य इति । भगवत्क्रिययैव व्याप्ताः नतु स्वक्रिया काचित् कण्ठे क्रियायाः स्थापितत्वात् गानं क्रिया च संभवतः इयं क्रियाशक्तिरूपेति स्वातन्त्र्यं तासां निरूपितम् ॥ १५ ॥ अतःपरं राधादामोदरवत् उभयोर्नृत्यमाह । कर्णेति । रासार्थमेवैतदपि परं प्रत्येकं रस उत्पद्यत इति गोष्ठीमात्रमुक्तम् उभयोगर्गाढनृत्ये विनियोगात् भ्रमरा । गायकः वाद्यन्तु पूर्ववदेव भविष्यति तदाह । वलयनूपुरघोषवाद्यैरिति । वलयानां नूपुराणां घोषशब्देन किङ्किणीनां शब्दा एव वाद्यशब्दाः अत्यन्तं नृत्याभिनिवेशार्थं स्वकेशात् स्रस्ताः स्रजो यासामित्युक्तं नृत्यारम्भे तासां शोभामाह । कर्णेति । अन्यथा पूर्वोक्तनृत्येन श्रान्तानां पुनर्नृत्यमनुचितमेव स्यात् । तवा रसालं कर्णे उत्पलस्थापनं तस्य अपतने चातुर्यार्थं तत्सहिताः अलकाः भ्रमरा इव रसपातारः तेषां विटङ्कः अलंकरणरूपं स्थानम् एतादृशौ कपोलौ तत्र यो धर्मः अन्तरुद्गतश्रमजलं नृत्याभिनिवेशाज्जातं तैः कृत्वा वक्त्रे श्रीरलौकिकी काचित्संपन्ना यथा मुक्ताभिर्मण्डितं भवति कपोलद्वयम् अनेन मुखे श्रमो निवारितः ताभिः सह भगवतः नृत्ये अनुभावकश्च भवति स्वतो वा क्रीडानिवृत्तिरनेन सूचिता गोप्य इति भगवत एव तासामेतावत्त्वं न स्वत इति ज्ञापितम् । अतो भगवता समं यथा यथा भगवान्नृत्यति तथा तथा ता अपि नृत्यन्तीति ॥ १६ ॥

श्रीसुबोधिनी–सारः

श्रियो लक्ष्म्या एकान्तप्रियम् अच्युतं कान्तं पतिं लब्ध्वा तस्य दोर्भ्यां गृहीतकण्ठ्यो गोप्यस्तं श्रीकृष्णं गायन्त्यश्चिक्रीडुः ॥१५॥ कर्णेषूत्पलैरलकविटङ्कैः केशालंकारैः कपोलैर्घर्मैश्च वक्त्रेषु मुखेषु श्रीर्यासां ताः वलयैः कंकणैर्नूपुरैर्मंजीरैर्घोषैः किंकिणीभिः तद्रवैर्लवमानैर्वा वाद्यैः भगवता समं स्वकेशेभ्यः स्रस्ताः स्रजो यासां ता गोप्यो ननृतुः भ्रमरा एव गायका यस्यां सा रासगोष्ठी तस्याम् ॥ १६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गायन्त्यस्तं विजह्रिर इत्यत्र, इयं क्रिया शक्तिरूपेति । शक्तिरूपा भगवत्सामर्थ्यरूपेत्यर्थः । तस्मिन्सति स्वातन्त्र्यमुचितमिति भावः ॥ १५ ॥ उपक्रमात्प्राप्तेऽपि नृत्ये यत्पुनर्वाद्योक्तिपूर्वकं नृत्यकथनं तत्कञ्चन विशेषमाश्रित्येति तमाहुः । **अतः परं राधादामोदरवदिति** । अथवा **रसावेशजनिता** मर्यादारहिता क्रिया विहार इति तदुक्त्योत्तरेस्यादिना पूर्वस्यावसानमिति न्यायवत् पूर्वनृत्यविरामो ज्ञात्यते । तथा सति पुनर्नृत्योक्तिरुचिता । तच्चेत्पूर्ववदेव स्यात्तदा तत्त्यागो न स्यात् । रसार्थमेव तत्करणात्तदुदयं विना तत्त्यागासम्भवात् । एवं सत्यपूर्वरसार्थमेवापूर्वमेव नृत्यमथोच्यत इति ज्ञायते । तदेवाहुरतः परमित्यादिना । **कर्णोत्पलालकेत्यत्र, स्वतो वेत्यादि** । श्रमाभावज्ञापकधर्मश्रीकथनेन रसावेशादेवैतदपि नृत्यं जायत इति तस्मिन्भवति सति स्वत एव पूर्वविहारवृत्तिर्जातेति सूचयत इत्यर्थः । अथवा । क्रीडाया अनिवृत्तिः क्रीडानिवृत्तिः । श्रमाभावसूचनेन पूर्वक्रीडाया निवृत्तिर्न स्वामिनीनामशक्येति सूचयत इत्यर्थः । **गोप्य इति भगवत एवेत्यादि** । भगवत्साम्येन नृत्यकृतिर्न पूर्वशिक्षया गोपजातीयानां, तत्रापि कुलवधूनां, तदसम्भवात्, किन्तु तथा **रसाविर्भावो** येन तथा नृत्यं स्वत एवाभूदिति ज्ञापनायेत्यर्थः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्रियो लक्ष्म्याः एकान्तवल्लभमतिप्रियमच्युतं कृष्णं कान्तं पतिं लब्ध्वा तस्य दोर्भ्यां गृहीताः कण्ठा यासां ता गोप्यस्तमेव गायन्त्यो यथेष्टं विजह्रिरे ॥ १५ ॥ एवं विश्रान्तानां पुनः रासः प्रवृत्तस्तमाह—कर्णेति । कर्णोत्पलैः कर्णावतंसैश्च अलकविटङ्कैः अलकालङ्कृतैः कपोलैश्च घर्मैः स्वेदबिन्दुभिः वक्त्रे श्रीः शोभा यासां ताः, घोषाः किङ्किण्यः । वलयनूपुरैः तद्घोषैरन्यैश्च वाद्यैर्वादित्रैरुपलक्षितैः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ता गोप्यः, भ्रमरा अपि गायकाः यस्यां तस्यां रासगोष्ठ्यां राससभायां भगवता समं सह ननृतुरित्यन्वयः । 'स्वकेशस्रस्तस्रज' इत्यनेन तालगतिसन्तुष्टाः केशाः सशिरःकम्पाः पादेषु पुष्पवृष्टिमिवाकुर्वन्निति उत्प्रेक्षितम् ॥ १६ ॥

अन्वितार्थप्रकाशिका

अन्या अप्येवं विजह्रुरित्याह—गोप्य इति ॥ श्रियो लक्ष्म्याः एकान्तवल्लभमतिप्रियमच्युतं कृष्णं कान्तं पतिं लब्ध्वा तस्य दोर्भ्यां गृहीताः कण्ठा यासां ताः गोप्यस्तमेव गायन्त्यो यथेष्टं विजह्रिरे ॥ १५ ॥ कर्णेति ॥ कर्णोत्पलैः कर्णावतंसैश्च अलकविटङ्कैः अलकालंकृतैः कपोलैश्च घर्मैः स्वेदबिन्दुभिश्च वक्त्रे श्रीः शोभा यासां ताः वलयनूपुरैः तद्घोषैः किङ्किणीभिरन्यैश्च वाद्यैर्वादित्रैरुपलक्षिताः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः गोप्यः एतेन तालगतिसंतुष्टाः केशाः पुष्पवृष्टिमकुर्वन्निति । उत्प्रेक्षितमिति स्वामिपादाः । भ्रमरा अपि गायकाः यस्यां तस्यां रासगोष्ठ्यां राससभायां भगवता समं ननृतुः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विजह्रिरे विहारं चक्रुः ॥ १५ ॥ अत्र रासे वाद्यवादकादिसंपन्निदर्शयन्नाह कर्णेति । कर्णोत्पलैः कर्णधृतपद्मैश्च अलकविटङ्कैः कुटिलकुन्तलालंकृतैः कपोलैश्च घर्मैः स्वेदबिंदुभिश्च वक्त्रेषु श्रीःशोभा यासां ताः स्वकेशस्रस्तस्रजः स्वकेशेभ्यः स्रस्ता अधः पतन्त्यः स्रजः पुष्पमाला यासां ताः गोप्यः वलयनूपुराणां घोषाः किंकिण्य एव वाद्यानि वादित्राणि तैः भगवता सह ननृतुः । कुत्र भ्रमरा एव गायका यस्यां तस्यां रासरूपायां गोष्ठ्यां सभायां भ्रमराः गायकाः किंकिण्यो वादित्राणि पादा नृर्त्तकाश्च तेषां नृत्येन हृष्टाः केशाः पादोपरि पुष्पमालां ददतः इत्युत्प्रेक्षितम् ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमन्या अपि गोपस्त्रियो यथायथं नानाविभ्रमैर्विजह्रुरित्याह ॥ गोप्य इति ॥ गोप्यः, श्रियो लक्ष्म्याः, एकान्तवल्लभमनन्यपतिं, अच्युतं श्रीकृष्णं, कान्तं पतिं लब्ध्वा, तद्दोर्भ्यां श्रीकृष्णभुजाभ्यां, गृहीता कण्ठा यासां तथाभूतास्ताः, तमच्युतं, गायन्त्यः सत्यः, विजह्रिरे ॥ १५ ॥ तत्र वादकेषु गायकेषु च सस्त्रीकेषु गन्धर्वकिंनरादिषु रसावेशेन मुह्यत्सु नृत्यत्सु चान्यामेव वाद्यादिसंपत्तिं दर्शयन् राससंभ्रममाह । कर्णोत्पलेति । कर्णोत्पलैः कर्णावतंसैरुत्पलैश्च अलकविटङ्कैरलकालंकृतैः कपोलैश्च घर्मैः स्वेदबिन्दुभिश्च वक्त्रेषु श्रीः शोभा यासां ताः, गोप्यः, वलयानि च नूपुराणि च घोषाः किङ्किण्यश्च तैर्वाद्यैर्वादित्रैः सहिताः, स्वकेशेभ्यः स्रस्ताः स्रजो यासां तथाभूताः सत्यः, भगवता श्रीकृष्णेन, समं सह, भ्रमरा एव गायका यस्यां सा च रासगोष्ठी राससभा तस्यां, ननृतुः । एतेन काललितगतिसंतुष्टाः केशाः सशिरःकम्पं पादेषु पुष्पवृष्टिमकुर्वन्निवेत्युत्प्रेक्षितम् ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गोप्यो लब्ध्वेति : १०.३३.१५.

विरत्यापि न चाऽध्यक्षं यदच्युतपदाम्बुजम् । रत्याप्तं तद्युक्तमतस्तद्व्रतस्तास्तदाऽभवन् ॥ ५९ ॥

कर्णोत्पलेति : १०.३३.१६.

भूयोऽजस्रं सहस्र-स्रवदमरनदी मुख्यतीर्थाञ्चिताऽङ्गोऽप्यङ्घिर्यत्पादधूलीकलितमिति जलं यामुनं मूर्ध्निधत्ते ।
तद्वर्ण्यं भाग्यमासां किमिह किमु तदालङ्कृतिस्रक्सुमानां लब्धो यैरङ्गसङ्गो मुनिजनसुमनोवृत्त्यलक्ष्योऽच्युतस्य ॥ ६० ॥
यासां पादेन पादं भुजमपि भुजतः पाणिना पाणिमंसं स्वांसेनास्येन चास्यं हृदयमपि निजोरःस्थलेनाङ्गमङ्गैः ।
आक्रम्याक्रम्य मुख्यं धयति रसमहो वासुदेवो मुदा यत् तद्भाग्यं वागगम्यं कथमिह न धराभोगसौभाग्यभूतम् ॥ ६१ ॥

कृष्णप्रिया

भगवती लक्ष्मीजी के अनन्य प्रिय श्री अच्युत भगवान को गोपियों ने प्रियकान्त रूप में प्राप्त किया और प्रभुने अपनी भुजा गोपियों के कण्ठ में समर्पित की, पुनः कमनीय कण्ठग्राही जुगल जोडी बनकर प्रियतम के साथ नृत्य एवं प्रियतम का गुणगान करने लगी ॥ १५ ॥ नृत्य के अवसर कानों में से गिरने न पावे इस प्रकार के नृत्य कौशल्य से कानों में धरे हुए

कमलों से और भ्रमरों के नांईं दिख पड़ते श्याम केशों से समलङ्कृत कपोल, एवं प्रस्वेद बिन्दुओं से जिनके मुख कमलों का सौन्दर्य अधिकतर बढ़ रहा है पुनः अलकावलिओं में अलङ्कृत की हुई कुसुमस्रजों के कुसुम जिनके गिर रहे हैं वैसी गोपीयाँ श्रीगोविन्दजी समान नृत्यकर रही थी। तब उस रास गोष्ठी में गुंजन करते हुए मकरन्द मत्त भ्रमर, और गोपियाँ के कर कमलों के कंगनों के और चरण कमलों के नूपुरों के शब्द रूप वाद्य रस की पुष्टि कर रहे थे ॥ १६ ॥

एवं परिष्वङ्गकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः।
रेमे रमेशो व्रजसुन्दरीभि[1]र्यथार्भकः स्वप्रतिबिम्बविभ्रमः ॥ १७ ॥
तदङ्गसङ्गप्रमु[2]दाकुलेन्द्रियाः केशान् दुकूलं कुचपट्टिकां वा।
नाङ्गः[3] प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमाला[4]भरणाः कुरूद्वह ॥ १८ ॥

कवंमक्षमा

अन्वयः—रमेशः, एवम्, परिष्वङ्ग, कराभिमर्श, स्निग्धेक्षण, उद्दाम, विलास, हासैः, व्रजसुन्दरीभिः, सह, यथा, स्वप्रतिबिम्ब, विभ्रमः, अर्भकः, तथा, (श्रीकृष्णः) रेमे ॥ १७ ॥ हे कुरूद्वह, तदङ्ग, सङ्ग, प्रमदाकुलेन्द्रियाः, विस्रस्त, माला, भरणाः, व्रजस्त्रियः, केशान्, दुकूलम्, वा कुचपट्टिकाम्, अञ्जः, प्रतिवोढुम्, न, अलम्, (बभूवुः) ॥ १८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यथा गोप्यो नानाविभ्रमैर्भगवता सह विजह्रुरेवं भगवानपि स्वविलासैस्ताभिः सह रेम इत्याह। एवमिति। तद्विलासानभिभूतस्यैव रतौ दृष्टान्तः। यथाऽर्भक इति। स्वप्रतिबिम्बैर्विभ्रमः क्रीडा यस्य स इव। अनेनैतद्दर्शितम्। स्वीयमेव सर्वकलाकौशलं सौगन्ध्यलावण्यमाधुर्यादि च तासु संचार्य ताभिः सह रेमे यथाऽर्भकः स्वप्रतिबिम्बैरिति ॥ १७ ॥ तास्तु भगवद्विलासैराकुला बभूवुरित्याह। तदङ्गेति। तस्यांगसंगेन प्रकृष्टा मुत्प्रीतिस्तया आकुलान्यवशानींद्रियाणि यासां ताः। विश्लथबंधान्केशादीनंजसा प्रतिव्योढुं यथापूर्वं धर्तुं नालं न समर्था बभूवुः। विस्रस्ता माला आभरणानि च यासां ताः ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ताभिः गोपीभिः। तासां विलासास्तद्विलासास्तैरनभिभूतोऽतिरस्कृतः। विलासस्तु—"यानस्थानासनादीनां नेत्रवक्त्रादिकर्मणा। उत्पाद्यते विलासो यः स विलासः प्रकीर्तितः ॥" इति भरतेनोक्तः। अनेन दृष्टान्तेन एतद्वृत्तं दर्शितम्। लावण्यं तु—"मुक्ताफलेषुच्छायायास्तरलत्वमिवान्तरे। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥" इति दर्शितम्। माधुर्यन्तु—"यतश्चेतो नापयाति तन्माधुर्यमितीरितम्" इति। आदिना सौस्वर्यग्रहः। तासु गोपीषु। संचार्य संप्रवेश्य। ताभिः गोपीभिः। अर्भको बालः। एतेनापि व्यभिचारदोषः परास्तः। प्रतिबिम्बानां बिंबाधीनसत्ताकत्वेन वस्तुस्तदविनाभावित्वात्तदभिन्नत्वमेव। तथा च गोपीनां भगवत्प्रतिबिंबत्वेनाभिन्नत्वाद्बाललीलावत्तल्लीलाप्यतर्क्यैवेति ॥ एवं रासनृत्यांगैरेव कृष्णस्य संभोगाङ्गान्यपि निर्वृतानीत्याह। परिष्वङ्ग आलिगनम्, एकैकया सह युग्मनृत्ये करेणाभिमर्शः, स्पर्शः, स च नृत्यगतिसमाप्तौ स्वदक्षिणकरेण प्रियावामवक्षोजे तालन्यासरूपः, स्निग्धेक्षणम् रहस्यांगेषु सप्रेमावलोकनम्, उद्दामविलासः पारितोषिकप्रदानमिवाच्चुम्बनादिः, हासस्तु तत्तत्प्राप्त्यनन्तरं मुखोल्लासः परिहासो वा तैः। रमेशः रमायां लक्ष्म्यामैश्वर्यं प्रकटयन् ब्रजसुन्दरीभिः सह रेमे न तु रमयेत्यर्थः। यथार्भको मुग्धस्तथैव तासु प्रेमाधीनत्वान्मौग्ध्यमेव दधन्न तु रमायामिवैश्वर्यमित्यर्थः। ननु परःसहस्राभिस्ताभिः कथमेकः संरेमे, तत्राह–स्वस्य प्रतिबिम्बं प्रतिस्वरूपमेव विभ्रमो विलासो यस्य सः। "प्रदर्श्यातप्ततपसामवितृप्त दृशां नृणाम्। आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम् ॥" इत्यत्र विम्बशब्देन यथा स्वरूपमुच्यते तथैवात्रापि। एकैकया प्रियया सह एकैकस्वरूपो रेमे इत्यर्थः। तासां ह्लादिनीशक्तित्वेन स्वरूपभूतत्वात्। स्वप्रतिच्छवित्वानौचित्याद्याख्यांतरं नेष्टम् ॥ १७ ॥ ताः गोप्यः। तस्य कृष्णस्य। अंगसंगेन शरीरसंपर्केण। तया मुदा। विस्रस्ताः विश्लथाः। कुरूद्वहेति सम्बुद्ध्या भक्त्या कृष्णे वशीभवतीति पश्य त्वमपि शुद्धकुरुवंशोद्भूतत्वाद्भक्तिं कृष्णमायत्ताकर्तुं कुर्वित्यभिमुखीकरोति। यद्वा–शुद्धवंशोद्भूतत्वात्तुभ्यमिमां रहस्यलीलां ब्रवीमीत्याशयः ॥ ततश्च ता भगवद्विलासैरानन्दविह्वला बभूवुरित्याह–तदङ्गेति। प्रकृष्टा मुत् आनन्दस्तयाऽऽकुलेंद्रियाः। कुचपट्टिकाम् कंचुलिकाम्। प्रतिव्योढुम् व्योढुम्। नालम् न समर्थाः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमिति। तैर्व्याख्यातम्। तत्रावतारिका दृष्टान्त बलादेव प्रतिपन्ना। ययार्भक इत्यादिका स एवेत्यन्तव्याख्या चास्या एवानुगता। उभयत्रापि प्रतिविम्बस्थानीयानां श्रीगोपीनामर्भकस्थानीयस्य श्रीभगवतश्च मुहुः परस्परमनुकरणात्। तत्र च श्रीभगवत

---

१. कामिनीभिर्यथा स्वतन्त्रः प्रतिघं विडम्बयन्–विज.। २. प्रमदा–विज.। ३. त्यक्तुं पतिं–विज.। ४. माल्या–विज.।

एवार्भकस्येव विलासाय स्वयं प्रवृत्तिस्तत् प्रवर्त्तनं तदीयविलासविशेषश्च लभ्यते । ततस्तद्विलासानभिभूतस्यैव रतौ दृष्टान्त इतीदंत्वागन्तुकमिव लक्ष्यते । यत्त्वनेनैतद्दर्शितमित्यादिकं व्याख्यातम् । तत्र च ता एव तद्‌गुणप्रकाशिका इति प्रतिपद्यते । यथार्भकः प्रतिविम्बद्वारत एव स्वीयमुखमाधुर्यमनुभवति नतु स्वतः तथा श्रीभगवानपि तादृशनिजप्रेयसीद्वारत एवेति हि गम्यते तासां प्रेममयमुदयं विना तदनुदयात् । यद्वा रमाया ईशः प्रभुरपि व्रजसुन्दरीभिरेव रेमे । ननु तयेति ततोऽपि तासां प्रेमगुणसौन्दर्यमधिकमभिप्रेतम् । यद्वा । रमाया ईशः प्रभुरेव नतु रमणः व्रजसुन्दरीभिस्तु रेमे तथापि तथैवाभिप्रेतम् । तदपि रमणमसाधारणमेवेति । सचमत्कारमाह । एवमिति । तत्र परिष्वङ्गस्तासामाश्लेषः । कराभिमर्शस्तासां करालभनं स्निग्धेक्षणं तन्मुखादीनां सरसावलोकनम् उद्दामविलासः स्तनस्पर्शनादिः हासश्च भावोद्रेकविलसितस्मितं नः । एवं तस्य तासामपि सर्वोपरिचरगुणत्वेन परस्परं साम्यमासक्तिञ्च दृष्टान्तेन व्यञ्जयति । यथेति । कश्चिदर्भकस्तद्वयः स्वभावेनात्यन्तक्रीडासक्तः स्वप्रतिविम्बे विभ्रमो विलासो यस्य तादृशश्च यथा स्वतुल्याभिस्ताभिः स्वप्रतिमूर्त्तिभी रमते तथासौ प्रेमवशतास्वभावेन तन्मयक्रीडासक्तः सन् स्वरूपशक्तित्वेन स्वप्रीतमूर्त्तित्वात् प्रतिबिम्बस्थानीयाभिस्ताभी रेमे । अत एव तत्सदृशस्वाभिप्रायेण पूर्वमपि गोपवध्व इत्यनुक्त्वा कृष्णवध्व इत्येवोक्तम् । तथाच ब्रह्मसंहितायाम् । “आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः । गोलोक एक निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामी”ति । अत्र च यथार्भको यादृशं मुखचालनादिकं कुरुते तादृशं तत्प्रतिविम्बमूर्त्तयोऽपि यादृशं तास्तादृशमेव क्रीडाकौतुकित्वात् सोऽप्येवं श्रीकृष्णश्च श्रीगोप्यश्च परस्परमासक्तत्वादनुचक्रुरिति ज्ञेयम् । अनेन तासामिव तस्याप्यत्र स्निग्धशब्दव्यञ्जितस्नेहविकारो दर्शितः । स च सात्त्विकोऽप्युक्तः श्रीपराशरेण “गोपीकपोलसंश्लेषमभिपत्य हरेर्भुजौ । पुलमोद्गममशस्याय स्वेदाम्बुवनतां गता”विति ॥ १७ ॥ ततश्च तासामत्यन्तानन्दवैवश्येनैव रासविरामोऽजनीत्याह । तदङ्गेति । तदङ्गसङ्गैः क्रमेण प्रकर्षं प्राप्ता या मुत् हर्षः तयाकुलेन्द्रियाः आकुलेन्द्रियतालक्षणमाह । केशानित्यादिना । दुकूलं परिधानीय क्षौमवस्त्रं कुचपट्टिकां कञ्चुकस्थानीयमुत्तरीयम् ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

परिष्वंगो गोपीनामाश्लेषः, कराभिमर्शस्तासामेव करालभनम्, यद्वा, स्वकरेण तासामभिमर्शः स्तनादिस्पर्शनम्, स्निग्धेक्षणं तन्मुखादीनां सरसनिरीक्षणम्, उद्दामविलासो नीवीश्लथनादिः, हासश्च भावोद्रेकविलसितस्मितम्, रमाया ईशः स्वामीति स्वामित्वेन तस्यास्तादृशरत्ययोग्यता, व्रजसुन्दरीभिरिति तासामेव तद्योग्यताभिप्रेता । लक्ष्मीतोऽपि भाववैदग्ध्यादिविशेषात्तमेव दर्शयन् श्रीभगवतस्तासाञ्च मिथः साम्यं दृष्टान्तेनाह—यथेति । यथा प्रतिबिम्बेन सहार्भकस्य क्वापि वैसादृश्यं नास्ति, तथा ताभिः सह कृष्णस्येत्यर्थः । क्रीडापरोऽर्भको यादृशं हस्तचालनादिकं कुरुते, तादृशं तच्छायापि, यथा छाया कुर्य्यात्, सोऽपि पुनस्तथैवानुकरोति, अर्भकत्वात् । एवं श्रीभगवान् यथा रेमे, ता अपि तथैव रेमिरे, ता यथा रेमिरे, सोऽपि तथैव रेम इत्यर्थः । अनेन श्रीभगवद्रतेरपि शोभा सूचिता । वैषम्ये तदसम्पत्तेरिति दिक् । तथा तासामिव तस्यापि प्रेमविकारोऽभिप्रेतः, स चोक्तः श्रीपराशरेण—‘गोपीकपोलसंश्लेषमभिपत्य हरेर्भुजौ । पुलकोद्‌गमसस्याय स्वेदाम्बुघनतामितौ ॥’ इति । अन्यत्तैर्व्याख्यातम् । यद्वा, प्रतिबिम्बेन विभ्रमो विलासो यस्य सोऽर्भको यथा तदेकनिष्ठः सन्नन्यत् किमप्यजानन् रमते तथायमपि । यद्वा, एवमुक्तप्रकारेण व्रजसुन्दरीभिर्ये परिष्वंगादयस्तैस्ताभिरेव सह रेमे, सोऽपि तादृशानेव परिष्वंगादीन् अकरोदिति दृष्टान्तेनाह—यथेति । अन्यत् समानम् । एवं तासां परिष्वङ्गादिभिरेव तस्य रतिः, स्वयञ्च तेन तासां तदनुकरणमिति स्वस्मादपि तासां महिमा दर्शितः ॥ १७ ॥ ततश्च तासामत्यन्तानन्दोऽजनीत्याह—तदङ्गेति, तस्यांगैः सङ्ग आलिंगनादिना मिलनमंगसंगः । आकुलेन्द्रियत्वलक्षणमाह—केशानित्यादिना । दुकूलं परिधानकौशेयवस्त्रम्, कुचपट्टिकामुत्तरीयं कञ्चुकं वा, तद्‌द्वयमेव वा, व्रजस्त्रिय इति प्रेमभरविशेषतया तादृशत्वं तासामुचितमेवेति भावः एवं तासामानन्दाधिक्यं सिद्धमेव । अत एव प्र-शब्दः । तच्च भवतावबुध्यत इत्याशयेन, यद्वा, गोपीनां परमकृतार्थतया तत्सदृशभावस्य तस्यापि तया कुरुकुलस्य परमभाग्य मत्वा सम्बोधयति—हे कुरूद्वहेति ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थङ्गोप्यो नानाविभ्रमैर्भगवता सह विजह्रुः तथा भगवानपि स्वविलासैस्ताभिः सह रेम इत्याह । एवमिति । इत्थं रमेशः श्रियः पतिर्भगवानपि व्रजसुन्दरीभिः सह परिष्वङ्गादिभी रेमे तत्र परिष्वङ्गः परिरम्भः कराभिमर्शः करेण स्तनोर्वादीनां संस्पर्शः स्निग्धेक्षणं सानुरागावलोकनम् उद्दामविलासः उदारलीलापरिष्वङ्गादिरूपं विहारं कृतवानित्यर्थः । रमेशो रेम इत्यननावाप्तसमस्तकामत्वादनपेक्षितविहारोऽपि सर्वकारणत्वादस्वात्मकवस्त्वन्तररहितोऽपि केवलं रेम इति सूचितं कथमेवं भूतस्य क्रीडा सङ्घटते इत्यतो दृष्टान्तमाह । यथेति । अर्भको यथा स्वप्रतिबिम्बैर्विभ्रमः क्रीडा यस्य तथाभूतो भवति तद्वत् यथा स्वप्रतिबिम्बैः स्वानन्यैरेव रमते तथा रमेशोऽपि स्वात्मिकाभिर्व्रजसुन्दरीभिः कामिनां स्त्रीपारवश्यं दर्शयन्निव रेम इत्यर्थः । अत्र बिम्बप्रतिबिम्बयोरिव स्वात्मिकानां व्रजसुन्दरीणां स्वशरीरत्वेन स्वकार्यत्वेन च स्वानन्यत्वमात्रेऽर्भकदृष्टान्तः नत्वज्ञत्वादावपीति द्रष्टव्यम् ॥ १७ ॥

तास्तु भगवतस्तद्विलासैरनभिभूतस्य विलासैराकुला बभूवुरित्याह तदङ्गसङ्गेति । तस्य भगवतोऽङ्गसङ्गेन प्रकृष्टा मुत्प्रीतिस्तयाकुलान्यवशानि इन्द्रियाणि यासां तास्तथा विस्रस्ता विश्लथा माला आभरणानि च यासां तथाभूताः विश्लथबन्धान् केशादानञ्जसा आशु प्रतिव्योढुं यथापूर्वं धर्त्तुं नालं न प्रबभूवुरित्यर्थः ॥ १८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

स्वतन्त्र ईश्वरो विधिनिषेधाद्यविषयः प्रतिघं विधिनिषेधविवर्जितं पुरुषमनुकुर्वन् । यद्वा प्रवृत्तिधर्मं "विध्याद्यगोचरे कोपे प्रवृत्ते प्रतिघं विदुरिति च ॥१७॥ तस्य कृष्णस्याङ्गसङ्गेनोत्पन्नेन प्रमदेनानन्देनाकुलानि पूर्णानीन्द्रियाणि यासां तास्तथा केशादीन् वोढुं पतिं कृष्णं वा त्यक्तुम् अलं पर्याप्ताः शक्तिवर्जिता आसन्नित्यर्थः । "अपपरी वर्जने" इति सूत्रात् । यद्वा शक्त्यभावेऽपि निवारिताः "अलन्तु भूषणे शक्तौ पर्याप्तौ शक्तिवारणे' इति प्रेमकामात्मत्वात् वहनादिशक्त्यभाव इत्यर्थः । कुरूद्वहेति विशेष्यसम्बोधनेन कृष्णस्य भक्तिभामिनीलोलत्वं पश्येत्यभिमुखोकरणेन भक्तेरावश्यकर्तव्यत्वं सूचयति ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

रमाया ईशः प्रभुरपि व्रजसुन्दरीभिरेव रेमे न तु तया । यद्वा । रमाया ईशः प्रभुरेव नतु रमणः व्रजसुन्दरीभिस्तु रेमे एव ॥ १७–१८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

समं ननृतुरिति समं शब्दस्य सादृश्यार्थः स्पष्टयति—एवमित्यादि । एवमनेन प्रकारेण ये परिष्वङ्गादयस्तै रमेशो रेमे । काभिः ? व्रजसुन्दरीभिः सह साहित्येन ताश्च रेमिर इत्यायातम् । तेन परिष्वङ्गादयस्तस्य च तासाञ्चेत्युभयकर्तृकत्वमेव । तेषां तस्मिन् परिष्वजने ताः परिष्वजस्य, तासु परिष्वजमानासु स च परिष्वजत इत्येवमादिप्रकारः एवं कराभिमर्शादिषु च । तत्र दृष्टान्तः—यथार्भकः अर्भक इव । कीदृशोऽर्भकः ? स्व प्रतिबिम्बेषु स्वप्रतिच्छायासु विविधो भ्रमो यस्य स तथा । अयं भावः । अर्भकः स्वयं यथा चेष्टते, तथा चेष्टमानायां प्रतिच्छायायां विविधं भ्राम्यति । 'मत्सदृशः कोऽयम्, अहं यथा करोमि तथैवायं करोति' इति । किंवा ह्ययं यथा करोति, तथैवाहं करोमीति भ्रान्तः स्तब्धो भवति, तथायमपि सान्द्रानन्दस्तब्धो भवति, ता अपि शुद्धा भवन्तीत्यर्थः । अथवा, स्वप्रतिबिम्बे भ्रमो विलासो यस्य स तथा, स्वच्छायया यथार्भकः खेलति तथा । तथा । यद्वा, वृजसुन्दरीभिः सह प्रतिबिम्बविभ्रमः सन् यथार्भकोऽर्भका इव स्तब्धो भूत्वा रेम इति । अयं भावः ।—साहित्यात्तस्य तासाञ्च स्वप्रतिबिम्बस्तासु तस्मिंश्च स्वच्छभावाल्लग्नः तत्र विभ्रमो विशिष्टभ्रमो यस्य स तथा पूर्वं ता अपि तथा कृष्णस्य प्रतिबिम्बे तासु लग्ने तमालोक्य किमहं नाना भूत्वा प्रत्येकमासां तनुषु लग्नः, किंवामी मत्प्रतिबिम्बा इति भ्रमो भवति । तासामपि प्रतिबिम्बे कृष्णो लग्ने तासञ्चा भ्रमो भवतीत्युभयोरेवार्भकसादृश्येन भ्रान्तिमत्त्वं व्यङ्ग्यम् । सहार्थतृतीयायां विशिष्टवैशिष्टयेनान्वयात् । यथा पुत्रेण स्थूलो गोमांश्च देवदत्त इत्युभयोरेव स्थौल्यं गोमत्वञ्चेति ॥ १७ ॥ एवं विहारे तासां पुनः प्रेमावेशमाह – तदङ्गसङ्गेत्यादि । तदङ्गसङ्गेन या प्रकृष्टा मुद्, तया आकुलानीन्द्रियाणि यासाम्, केशान् दुकूलादीनि स्रंसमानान्यपि प्रतिव्योढुं नालमसमर्था इत्यर्थः । अत्र प्रेमावेशोऽङ्गी भ्रमोऽङ्गम् ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवं रासनृत्याङ्गैरेव कृष्णस्य सम्भोगाङ्गान्यपि निर्वृत्तानीत्याह । परिष्वङ्ग आलिङ्गनम् एकैकया सह युग्मनृत्ये । करेणाभिमर्शः स्पर्शः सच नृत्यगतिसमाप्तौ स्वदक्षिणकरेण प्रियावामवक्षोजे तालन्यासरूपः । स्निग्धेक्षणं रहस्याङ्गेषु सप्रेमावलोकनम् उद्दामविलासः पारितोषिकप्रदानमिषाच्चुम्बनादिः । हासस्तत्तत् प्राप्त्यनन्तरं मुखोल्लासः परिहासो वा तैः । रमेशः रमायां लक्ष्म्याम् एश्वर्यं प्रकटयन् व्रजसुन्दरीभिः सह रेमे नतु रमयेत्यर्थः । यथार्भको मुग्धस्तथैव तासु प्रेमाधीनत्वान्मौग्ध्यमेव दधन्नतु रमायामिवैश्वर्यमित्यर्थः । ननु परःसहस्राभिस्ताभिः कथमेकः स रेमे तत्राह । स्वस्य प्रतिबिम्बं प्रतिस्वरूपमेव विभ्रमो विलासो यस्य सः । "प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् । आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम्"मित्यत्र बिम्बशब्देन यथा स्वरूपमुच्यते तथैवात्रापि एकैकया प्रियया सह एकैकस्वरूपो रेमे इत्यर्थः । तासां ह्लादिनीशक्तित्वेन स्वरूपभूतत्वात् । स्वप्रतिच्छवित्वानौचित्यात् व्याख्यान्तरं नेष्टम् ॥ १७ ॥ ततश्च ता भगवद्विलासैरानन्दाविह्वला बभूवुरित्याह । तदङ्गेति । प्रकृष्टा मुत् आनन्दस्तया आकुलेन्द्रियाः । कुचपट्टिकां कञ्चुलिकाम् । प्रति व्योढुं वोढुं नाल न समर्थाः ॥ १८ ॥

श्रीरसिकाह्लादिनी टीका

एवं सर्वलीलोपसंहारं वक्तुं प्रस्तुतस्य श्रीकृष्णविलासस्य प्राधान्यमाह एवमिति, लक्ष्मीतोऽपि तासां सौभाग्यातिशयं वर्णयति । एवं पूर्वोक्तप्रकारेण परिष्वङ्ग आलिङ्गनं ततः कराभिमर्शं कुचादिस्पर्शः स्निग्धेक्षणं भावव्यञ्जकं तत्तदवयवानामवलोकनं उद्दामोऽत्यूर्जितो विलासः । तदुक्तं रसार्णवे–"वृषभस्येव" गंभीरा गतिर्धीरं च दर्शनम् । सस्मितं च वचो यत्र स विलास

इतीरितः” । हासश्च चातुरक्षिके दर्शने भावगर्भे हासैः एतैः, यद्वा व्रजसुन्दरीणां परिष्वंगादिभिः तत्र परिष्वङ्गो नृत्यविशेषेन प्रसादत्वेन साधु साध्विति प्रशंसनपूर्वकमालिङ्गनं तदनन्तरं करयोरभिमर्शः । स्वकराभ्यां वैदग्धीविशेषेण सम्मर्द नं स्निग्धेक्षणं च भ्रूनर्त्तनादिभाव—विशेषास्वादकमीक्षणं उद्दामो निरर्गलो विलासः । तदुक्तं रसार्णवे “प्रियसम्प्राप्तिसमये भ्रूनेत्राननकर्मणाम् । तात्कालिको विशेषो यः स विलास इतीरितः” । परिष्वङ्गादिहेतुको हास एतैः करणभूतै रमेशोऽपि श्रीपतित्वमवगणय्य रमायां तादृशभावानाकलनात् व्रजसुन्दरीभिः सह रेमे । सामरस्य दृष्टान्तेनाह यथार्भक इति । अर्भकस्त्वनुद्देश्यक्रियाकारी स्वभावत एव हस्तमुखादिविकारादिक्रियां कुरुते । तादृशीं क्रियां स्वप्रतिबिम्बे यत पश्यति तदा तेन सह विभ्रमं करोति तद्वत् । अर्भको हि यावत् करोति तावदेव तस्य प्रतिबिम्बमपि करोति । सर्वथा वै सादृश्याभावे दृष्टान्तः । पूर्वं बिम्बे कृतिः पश्चात् प्रतिबिम्बे कृतिर्भवति । यथा च बिम्बप्रतिबिम्बयोरेकरूपत्वं धर्मेण न तु स्वरूपेण दृश्यते च स्वरूपभेदः । अत एव बालः आदर्शे प्रतिफलितमात्मानं न जानाति किं तु द्वितीयमेव तस्य च यथा प्रतिबिम्बदर्शनेनोत्साहाधिक्यं क्रीडाभिनिवेशश्च भवति तथात्रापि बिम्बस्थानीयः श्रीकृष्णः प्रतिबिम्बरूपाभिस्ताभिः सह स्वीयैः परिष्वङ्गादिभिस्तासामुद्दीपकैः करणैः रेमे अयमर्थः । पूर्वं श्रीष्णे विलासोदयः पश्चात्तदनुसारेण तासु विलासोदय इति । तदाचार्य्यैर्व्याकृतं स्वीयमेण कलाकौशलं तासु संचार्य्य भगवांस्ताभिः सह रेमे इति । तस्यायमभिप्रायः कृष्णविलासोदये तासां विलासो न तु तासु कलाकौशलाद्य भव इति अन्यथा रसाभासापत्तेरिति । अर्भकदृष्टान्तस्तु कृतिसाम्ये न तु मिथ्यात्वे । अन्यथा गोपीप्रतीतेः सोपाधिकत्वं स्यात् । वस्तुतस्तु यथा श्रीकृष्णः सच्चिदानन्दघनस्तथा ताः अपि सच्चिदानन्दस्वरूपा एव विजातीयत्वे रमारतिशैथिल्येन तासु रमासंभवात् । यद्वा रमेशोऽपि सर्वकलाकौशलयुक्तोऽपि औपपत्यसुखमधिकमिति ज्ञात्वा व्रजसुन्दरीभिः सह रेमे । कीदृशः स्वप्रतिबिम्बविभ्रमः स्वस्य यत् प्रतिबिम्बं स्वच्छेषु मुकुरस्थानियेषु गोपीनां गण्डेषु प्रतिफलितं बिम्बं तेन लावण्यपुञ्जवता विभ्रमो विलासो यस्य, यद्वा विविधो भ्रमो यस्य तासां गण्डेषु प्रतिफलितबिम्बबहुत्वमालक्ष्य भ्रमो यस्य, एकस्य मम कथं बहुरूपत्वमिति । तासां विलासाभिभूतस्य स्वरूपस्याननुसन्धानात् इति । यद्वा स्वस्मिन् तासां बिम्बं कराङ्गुलीनखादिषु प्रतिफलितं तेन विभ्रमः संभ्रमो यस्य, नृत्यमाना एताः कथमत्रागता इत्यादरातिशयेन पश्यत एव । यथा व्रजसुन्दरीभिः सह परिष्वङ्गादिभिः रेमे तथैव तासां प्रतिबिम्बैः सह परिष्वङ्गादिभिः रेमे । यथाऽर्भकः स्वप्रतिबिम्बेन सह प्रश्नहास्यहस्तस्पर्शादिना विहरति, यद्वा सुष्ठु अप्रतिनिरूपमेषु गापीबिम्बेषु विगतो भ्रमो यस्य, गोपीस्वरूपेषु निरूपमसौन्दर्य्यनिश्चयात् । रमायां सौन्दर्य्यविलासादिकं लोके च मन्दमिव लक्ष्य व्रजसुन्दरीभिः सह रेमे । अयमभिप्रायः रमा तु स्वांशैः सुरेन्द्रदितिजेन्द्रादिलोकेषु प्रविशति । एतासां नान्यत्र प्रवेशोऽनन्यत्वेन मदीयव्रज एव तिष्ठन्ति । अत एवैतासु मया प्रीत्यतिशयः सम्भावनोय इति भ्रमाभावः सूचितम् । स्वस्यापि नित्यं व्रज–प्रियस्वादिति तथा चोक्तं ब्रह्मसंहितायां–“आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्यः एव निजरूपतया कलाभिः । गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामि” ॥ १७ ॥ एव रसपराकाष्ठां निरूप्य प्राप्ते सति इति इतः परं वृद्धिमदृष्ट्वा पुनर्वृद्धिं गमयितुं तासु शैथिल्यं कारितवानित्याह तदङ्गेति, तस्याङ्गसङ्गालिङ्गनादिना सर्वावयवस्पर्शस्तेन प्रकृष्टा मुत् अवधि-भूत आनन्दस्तेनाकुलानीन्द्रियाणि यासां ताः, तासां सर्वासामतिकर्तव्यताशून्यत्वं जातमितिभावः । केशानिति–आकुलताचिह्नमाह केशान् कबरान् दुकूलं तदुपरितनीयं परिहितं च कुचपट्टिकां कुचोपरि उत्तरीयायान्त अञ्जः सामस्त्येन यथा पूर्वं प्रतिबोदु धर्तुं यथा स्थानं प्रापयितुमित्यर्थः नालं न समर्था जाता इति व्रजस्त्रिय इति । चातुर्य्यविशेषानभिज्ञत्वेन स्वातन्त्र्याभावोऽभिप्रेतः । आकुलेन्द्रियत्वे श्रमस्यापि हेतुमाह विस्रस्ता स्थानच्युताः मालाभरणानि च यासां ताः, यद्वा विस्रस्ता मालात्रुटिता सूत्रशेषा एव आ ईषदिव विभ्रतोति ताः रासक्रीडाश्रमसुखेन बहिर्वृत्तिशून्यं राजानमवधारयति कुरुद्वहेति अयं भावः स्वप्रतिबिम्बविभ्रम इति यदुक्तं तस्यायमर्थः पूर्वं बिम्बे क्रिया ततः प्रतिबिम्बेऽपि । एवं श्रीकृष्णे क्रीडोपयोगिनी क्रिया तदनुसारेन व्रजदेवीषु । इदानीं तासां विलासाभिभूते कृष्णे क्रियोपरतस्तदा तु तासु क्रियोपरतिः (क्रियोपरतिः) यथा बिम्बस्य क्रियाराहित्ये प्रतिबिम्बस्यापि कियाराहित्यं भवत्येव । तथाऽऽप्युन्नेयं विस्रस्तमालाभरणा जाता इति समञ्जसम् ॥ १८ ॥

विशुद्धरसदीपिका

इदानीमेवं विधेऽपि रासरसावेशे श्रीभगवतः श्रीराधानुकूल्यमावेदयति । एवमिति । यथैता निजनिजरसाविष्टा भगवता सह विजह्रिरे तथैव रमेशः श्रीराधारमणस्ताभिर्व्रजसुन्दरीभिः रेम इत्यन्वयः कैरित्यत आह । परीत्यादि । कयाचित्पारिष्वङ्गेन कयाचित्कराभिमर्शेन कचित्स्निग्धेनेक्षणेन कचिद्विलासेन कचिच्च हासेनेत्यर्थः । तैस्तैश्च परिष्वङ्गादिभिः रमया सहैव कृतैस्तासु च तत्प्रतिच्छविरूपासु प्रतिफलितैरिति रमेशपदेन सूचितं तत्र दृष्टान्तः । यथेति । अर्भकः उपचारात्प्रेममुग्ध इत्यर्थः । स्वशब्दोऽत्रात्मवचनः ततश्च तस्यात्मा परमरमा श्रीराधैव तस्या प्रतिबिम्बेष्वेव व्रजसुन्दरोषु विभ्रमो विलासो यस्य । यद्वा यथावत् निश्चितमेवेदमित्यर्थः । तदुक्तमलंकारकौस्तुभे—

राधाग्रतश्च पुरतो मम पार्श्वतश्च राधैवमेव च सति चेतसि सर्वतश्च ॥
लोकोऽत्र मां वदति सर्वजनोपकारी कृष्णोऽत्र मां स्फुरति कापि न राधिकान्येति ॥

एवं चार्भको यथा न स्वयं चेष्टते प्रतिबिम्बचेष्टितं दृष्ट्वैव तां तां चेष्टां करोतीति तस्मिंश्च सा सा चेष्टा बिम्बचेष्टितेनैवेति मिथुनस्य तासां च रसावेशः परमकाष्ठां प्राप्तः तथार्भक इत्यनेन क्रीडामात्र आसक्तिः नतु तच्छृङ्गारादिष्विति दिक् ॥ १७ ॥ तमेव प्रपञ्चयन् रासविराममाह । तदिति । तदङ्गसङ्गेन अङ्गस्पर्शमात्रेण या प्रकृष्टा मुत्प्रहर्षः प्रीत्युत्कर्षो वा तया आकुलेन्द्रियाः पूर्णमनोरथाः सत्यः केशादीन् प्रतिव्योढुं विस्रस्तान् संगमयितुं नालं न शक्ता इत्यर्थः । किं पुनः रासक्रीडादाविविति भावः । तथा विस्रस्ता माला आभरणानि च यासां ताः कुरूद्वहेति तद्वैवश्यश्रवणेन विवशं राजानं संबोधयति । यद्वा केशादीनलङ्कुरुमालादीनुद्वहेति क्रमेण व्युत्क्रमेण वान्वयः ॥ १८ ॥

श्रीरामनारायणकृता भावभावविभाविका

एवं तासां भगवता समं नृत्यशोभां निरूप्य भगवतस्ताभीरमणशोभामाह । एवमिति । अत्रैवमिति पदेन यथा स्थाल्यामेकतण्डुलदृष्ट्या सर्वतण्डुलानां तथात्वनिश्चयस्तथात्र किञ्चिद्विलासनिरूपणं कृतमेवमेव कल्पसमकालासु तासु सर्वासु निशासु एतादृशैरेव शृङ्गाररसाभिव्याप्तविहारै रमेशो व्रजसुन्दरोभी रेमे । अत्र रमत्यस्यामिति रमेति व्युत्पत्त्या रमायामेव तस्य रमणमन्यथा तस्यामरमणे रमेति तन्नाम न स्यात् तत्रैव रमणत्वे हेतुं दर्शयन्नाह । ईश इति । ईशस्य ईश्वर्य्यामेव रमणं तथा च रमारमण ईशोऽपि यतस्ताभी रेमेऽतो ध्रुवं तासु रामाया राधायास्तत्स्वरूपात्मकाह्लादिन्याः शक्तेरंशावेशः तासां तदंशप्रवेशे रमणार्हत्वे च तन्नाम्नैव हेतुं दर्शयन्नाह । व्रजसुन्दरीभिरिति । गेहादिभ्यो विरज्य तत्त्यागेन परिव्रजन्तीति । व्रजाश्चानुरागित्वेन सुन्दर्यश्च व्रजसुन्दर्य्यस्ताभिस्तथा च सर्वत्यागेनानुरागित्वमेव रमात्वेन तद्रमणार्हत्वे हेतुः रमाया अपि सर्वत्र सुरादिष्वपि दोषदृष्ट्या विरज्य सानुरागतदेकपरत्वेनैव तद्रमात्वं प्रेम्णश्चेदमेव स्वरूपं यत्स्वत एव सर्वतो विरज्यैकपरत्वमन्यथा सर्वेषां तत्तद्रतत्वेन प्रेमित्वं स्यात् स्वस्वरूपच्छायावेशेन तद्रमणे दृष्टान्तो यथार्भक इति स्वामिचरणानां तद्विलासानभिभूतस्यैव रतौ दृष्टान्त इत्यादिव्याख्यानमप्येतदभिप्रायकमेव यथार्भको दर्पणाद्युपाधिधर्म्मैरनाक्रान्तः केवलं तत्स्वच्छत्वप्रयुक्ततद्गतस्वप्रतिबिम्बविभ्रमैरेव विलासवान् भवति तथा तासां निष्कपटानुरागस्वच्छतया तत्राविष्टस्वाह्लादिनी शक्तिरमावेशेनैव तत्र रमणतस्तच्छक्तेः स्वस्वरूपात्मकतया नात्मारामत्वक्षतिरपि कै रेमे इत्यपेक्षायामाह । परिष्वङ्गेत्यादि । परिष्वङ्ग आलिङ्गनं कराभिमर्शः तत्करकञ्जानां मृदुत्वमञ्जुत्वसौरभ्यादिगुणवतां स्पर्शः स्ववक्षः स्थलादिषु धारण स्वकरैर्वा स्तनाद्यङ्गस्पर्शः सस्नेहेक्षणयोरुद्दामा उत्कृष्टा ये विलासा अपाङ्गनिरीक्षणानि । यद्वा सस्नेहेक्षणं निरीक्षणम् उद्दामा उच्छृङ्खला ये विलासा । विविधविहारा । यद्वा स्निग्धेक्षणानां सस्नेहतद्भावनाध्याननिरीक्षणपराणाम् उद्दामा भवबन्धनिवर्तकाये विलासा यद्वा तत्तद्विषयेष्वपि सौन्दर्य्यभ्रान्त्या स्निग्धेक्षणानां रागबद्धदृष्टीनां उद्दामास्तद्बन्धविमोचकास्तत्तद्विषयसाजात्यप्रतीत्या विषयरागिमतीनां स्वस्मिन् प्रवृत्तौ मतिशोधकतया नित्यरतिशयसुखतत्तद्गुणवत्तया च क्षुद्रानित्यनिरयानुबन्धि विषयविरक्त्या स्वस्मिन्नेव दृढश्लेषेण तद्रागबन्धनिवर्तका विलासा हासो मुखसुधाकरसुधाविस्तारात्मकस्मितरूपस्तैः ॥ १७ ॥ एवं रासरसप्रमोदमदाविष्टमतीनां तासां स्वाङ्गवस्त्राद्यननुसन्धानदशामाह । तदङ्गसङ्गेति । तस्य कृष्णस्याङ्गेन यः सङ्गः । यद्वा कृष्णविग्रहस्य "सच्चिदानन्दरूपाय कृष्णाय आनन्दमात्रकरपादमुखोदरादि"रित्यादिश्रुतिस्मृतिभ्यां स्वरूपात्मकत्वेन तत्र देहदेहिविभागासम्भवात्तस्य कृष्णस्य स्वीयाङ्गेषु यः सङ्गस्तेन या प्रमुदतिप्रकृष्ट आनन्दः एतस्यैवानन्दस्येत्यादि श्रुत्या यदा तन्मात्रकप्रतिबिम्बस्य सर्वभूतजीवनत्वं तदा किमु वाच्यं साक्षात्तत् सङ्गस्य तया प्रमुदाकुलानि व्याप्तानि तदाकुलतयैव समाधिवद्विषयान्तरप्रतीत्यसमर्थानीन्द्रियाणि यासां, यद्वा तदङ्गसङ्गप्रकृष्टमुदान् कुत्सितान क्षुद्रानन्यविषयान् लान्ति गृह्णन्तीन्द्रियाणि यासां "पराञ्चिखानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्म"न्निति । श्रुतौ तु अन्तरात्मदर्शने एवेन्द्रियाणां पराङ्मुखत्वलक्षणहिंसनोक्तेः एतास्तु व्रजस्त्रियो गोप्यो गा इन्द्रियाण्यन्तरात्मकृष्णपरतया हिंसनाभावेन पान्तीति न तदिन्द्रियाणां कुत्सितवराग्विषयग्राहित्वम् । यद्वा तदङ्गसङ्गप्रमुदा अकुलानि परागदर्शनान्तरात्मकृष्णदर्शनविमुखत्वस्वभावेन्द्रियकुलबहिर्भूतानीन्द्रियाणि यासां यथा ताभिः स्वकुलमर्य्यादास्त्यक्तास्तथा तासामिन्द्रियैरपीन्द्रियकुलमर्य्यादास्त्यक्ता इति भावः । यद्वा तदङ्गसङ्गप्रमुदैव "कुलं पवित्रं जननी कृतार्था वसुन्धरा पुण्यवती च तेन । अपरसंवित्सुखसागरेऽस्मिन् लीनं परे ब्रह्मणि यस्य चेत" इत्यादिवचनैः आ समन्तात्कुं पृथिवीं लान्ति सुखदानेनानुगृह्णन्ति रजसा गीतादिना च पवित्रयन्तीन्द्रियाणि पादवागादीनि यासां प्रमदाकुलेन्द्रिया इति पाठेतु तदङ्गसङ्गेन यः प्रकृष्टः प्रेमवैचित्यात्मकः सर्वविस्मारको मदस्तेनाकुलानीन्द्रियाणि यासान्ताः केशान् दुकूलं कुचपट्टिकां वा अञ्ज इति यथावत् प्रतिव्योढुमलं समर्था नाभवन् युक्तं चैतत् केशवपराणां केशसेवनभाराद्यसम्भारस्तत्कुलात्प्रतिकूलदुकूलविस्मृतिः कुचशंभुपट्टिकाविस्मरणेन तद्दिगम्बरतापादनञ्च तथापि अञ्ज इति पदेन केशब्रह्मेशसेवनादेर्यथावदसम्भवेऽपि न सर्वथा तैद्वपरीत्यमिति सूचितं पुनः किम्भूतास्ताः विस्रस्तमालाभरणाः विशेषेणेति प्रायः स्रस्तानि मालाद्याभरणानि यासां, यद्वा अङ्गेषु मां लान्तीति शोभाप्रदान्याभरणानि यासां तथा च भूषणभूषणमाधवधवसन्निधानलब्धमानां स्वयं मारूपाणां माभरणदत्तमाप्रयोजनमिति भावः । यद्वा ताः स्वयमञ्जः प्रतिव्योढुमलं नाभवन्निति तत्केशभाराम्बरादिसम्भारभारोऽपि तद्भाःप्रदातरि श्यारे नन्दकुमारे एवाभवत् । अत एवाविस्रस्तमालाभरणा इति पदान्न तदाभरणविच्छेदः तथा च कुरूद्वहेति संबोधनेन यथा तव कुरुकुलोद्वहनं न तव साध्यं किन्तु त्वन्मात्राराध्य कृष्णसंपाद्यं तथा बोध्यमिति दर्शनम् ॥ १८ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

यथा गोप्यो नानाविभ्रमैः भगवता सह विजह्रुरेवं भगवानपि स्वविलासैस्ताभिस्सह रेम इत्याह। एवमिति। रमाया ईशः पतिरपि व्रजसुन्दरीभिरेव रेमे न तयेति रमातोऽपि तासां प्रेमाधिक्यं सूचितम्। यद्वा ननु प्राकृतीभिस्ताभिरप्राकृतो भगवान् कथं रेम इत्याशङ्क्योक्तं रमेश इति तथाच तासु भगवदाज्ञया रमा प्रविष्टातस्तयैव भगवान् रेमे इति भावः तास्तय प्रवेशयोग्या इत्याशयेनाह। व्रजन्सुदरीणामिति। यद्वा रमेशो व्रजसुन्दरीभिरिति पदद्वयेन रमया परस्त्रीरूपमादाय रममाणे भगवति द्वयोर्विलक्षणो रस उद्भुत इति ध्वनितम्। एवं पदार्थमाह। परिष्वङ्गेति। आश्लेषश्च तासां करालम्भनञ्च तन्मुखादीनां सप्रेमावलोकनम् उद्दामविलासः स्तनस्पर्शादिश्च भावव्यञ्जकं स्मितं च तैस्तद्विलासानभिभूतस्यैव रतौ दृष्टान्तः यथार्भक इति। स्वप्रतिबिम्बैर्विभ्रमः क्रीडा यस्य स एव एतेन स्वयमेव कलाकौशलं सौगन्ध्यलावण्यमाधुर्य्यादिकं च तासु सञ्चार्य्य ताभिः सह रेम इति दर्शितम्। यद्वा तासां रमणयोग्यतायां दृष्टान्तः तथाच गुणलावण्यादिना स्वतुल्याभिः स्ववधूत्वयोग्याभिस्ताभिः रेमे। अत एव पूर्वं कृष्णवध्व इत्युक्तं यद्वा यथा कश्चित् प्रतिबिम्बद्वारै स्वमुखमाधुर्य्यमनुभवति तथा भगवानपि तादृशस्वप्रेयसीद्वारैवेत्यनेन व्यज्यते। यद्वा यथार्भको मुग्धस्तद्वत्तथा च तासु प्रेमाधीनत्वान्मौग्ध्यमेवाश्रितवान्नतु रमायामिव वैदग्ध्यमिति भावः। ननु असङ्ख्याताभिः कथमेकस्य रमणमित्याशङ्क्याह। स्वप्रतिबिम्बं प्रति स्वरूपमेव विभ्रमो विलासो यस्य सः तथा च एकैकया प्रियया सहैकैकस्वरूपः सन् रेमे इत्यर्थः। यद्वा परमेश्वरस्य नैवंविधा लीला घटत इत्याशङ्कानिवृत्त्यर्थमुक्तं यथार्भक इति तथा च यथा बाललीलां कृतवांस्तथेमामपीति भावः। यद्वा यथोक्तक्रीडादिना भगवति दोषापत्तिर्न शङ्क्या इत्याशयेनाह। स्वेति। तथाच स्वप्रतिबिम्बभूताभिस्ताभिर्बिम्बभूतस्य परमेश्वरस्य क्रीडां कुर्वतः का दोषप्रसक्तिसम्भावनेति भावः। ननु तथापि किमर्थं तथा कृतवानितिचेत्तत्राह। अर्भक इव तथाच बालकस्य कामक्रोधादिर्विनिर्मुक्तस्य विहारो यथा लीलामात्रं यथा भगवतोऽपि सृष्ट्यादिवदिदमपि विहरणं लीलामात्रमिति भावः॥ १७॥ अथ रासक्रीडाविरामहेतुं तासां भगवद्विलासैराकुलेन्द्रियत्वमाह। तदिति। तस्याङ्गसङ्गैः प्रकृष्टा या मुत् हर्षस्तया विवशेन्द्रियाः यत एवमतः केशान् दुकूलं कञ्चुकी च शिथिलतां गतान्येतानि अञ्जसा प्रतिव्योढुं यथा पूर्वं धर्तुं नालं समर्था बभूवुः। विस्रस्तानि मालाभरणानि यासां ताः। ननु केशादिशैथिल्ये हेतुभूतां व्रीडां लज्जां विहाय किमिति कर्तुं प्रवृत्ता इत्याशङ्क्याह। व्रजस्त्रियः नगरस्त्रीणां तादृशः स्वभाव इति भावः। तत्रापि राजवंशोद्भवानां स्त्रीणां तथा प्रवृत्तिर्नोचितेति सम्बोधनाशयः॥ १८॥

रास-रहस्यम्

र० टी०—एवं पूर्वोक्तप्रकारेण वृत्तीनामुद्यमं दृष्ट्वा रमेशः रमति अस्यामिति व्युत्पत्त्या रमा माया, "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।" इति श्रुत्या तामीष्टे इति ईशः रमेशः परमात्मा, व्रजसुन्दरीभिः व्रीयणाज्जायतेऽस्मिन्निति व्रजः अन्तःकरणं, तस्मिन् स्थिताः वृत्तयः परमात्मज्योतिर्ध्यानेन भ्रमरकीटन्यायेन ज्योतिरूपतां प्राप्तौ। अत्र सुन्दरीशब्देनाभिहिताभिः व्रजसुन्दरीभिः, परिष्वङ्ग आलिङ्गनं सर्वतोरूपेणैकात्म्यभावं प्राप्य, कथंभूतम्? कराभिमर्शः करेण स्वज्योतिषा स्पर्शः, पुनः कथंभूतम्? स्निग्धेक्षणं स्नेहपूर्वकावलोकनं सदयमिवेत्यर्थः, उद्दामविलासहासैः उत् उत्कान्ताः दामाः बन्धनानि भवबन्धनिवर्तिकाः ये विलासाः विविधाः चेष्टाः, ता एव हासश्च प्रकाशश्च, तैः रेमे ऐकात्म्यभावं प्राप्तवान् "रत्नस्थले जानुचरः कुमारः संक्रान्तमात्मीयमुखारविन्दम्। आदातुकामस्तदलाभखेदात् विलोक्य धात्रीवदनं रुरोदः॥" एवम्भूतस्यार्भकस्य रागद्वेषादिविनिर्मुक्तस्य स्वप्रतिबिम्बैः सह विभ्रमः क्रीडा यस्य सः शिशुः यथा रमते तथा परमात्माऽपि स्वभूताभिस्ताभिः वृत्तिभिः रेमे॥ १७॥ "आसुप्तेरामृतेः कालं नयेद् वेदान्तचिन्तया।" इति वचनानुसारेण वेदान्तविचारं करोतीति कुरुः, तथा "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा।" इति श्रुत्या जीवनपर्यन्तं वहतीति वहः, सम्बोधने हे कुरुद्वह! तदङ्गसंगप्रमुदाकुलेन्द्रियाः तत् तस्य परमात्मनः अंगमिव अंगेषु यत् संगः आश्लेषः ऐकात्म्यभावस्तेनोत्पन्नो यः प्रमुदः प्रकृष्टो मुदः आनन्दः "एतस्यैवानन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति।" बृ० ४-३-२२॥ इति श्रुत्या यदा तत्प्रतिबिम्बमात्रस्य सर्वभूतानां जीवनत्वं तदा किमुवाच्यं साक्षात्तेन एकात्मभावस्य, तेन प्रमुदितेनाकुलितानि सर्वेतिकर्तव्यताविमूढानि विषयान्तरप्रतीत्यसमर्थानीन्द्रियाणि यासां ताः, अतएव विस्रस्तमालभरणाः शरीरसम्बन्धि "घृणा शंका भयं लज्जा जुगुप्सा चेति पञ्चमी। कुलं शीलं च मानं च अष्टपाशाः प्रकीर्तिताः॥" इति अष्टपाशात्मिका माला, तथा धर्मकीर्त्याद्यात्मकानि आभरणानि च स्रस्तानि शिथिलतां गतानि यासां ताः, व्रजस्त्रियः अन्तःकरणवृत्तयः, विश्लथबन्धनात् देहात्मतायामवगतायां देहाद्यनुसन्धानरहितायां, केशान् दुकूलं कुचपट्टिकां वा इति अध्यासमूलकानि शरीरावरणानि, नाञ्जः प्रतिव्योढुमलं अञ्जः यथापूर्वमनुसन्धानपूर्वकं प्रतिव्योढुं प्रतिकूलतया वोढुं धारयितुं नालं न समर्थाः बभूवुः। यकाराधिक्यमार्षम्॥ १८॥

गूढार्थदीपिनी

एवं रमेशो भगवान् परिष्वङ्गादिभिः व्रजसुन्दरीभिः सह रेमे। यथा अर्भको बालः स्वप्रतिबिम्बैः सह विभ्रमः क्रीडापरो भवति। एवं भगवानपि स्वप्रतिबिम्बभूताभिः स्वकीयाभिः सह रेमे न परकीयाभिरता भगवति न व्यभिचारशङ्केति। स्वप्रतिबिम्बैः

विभ्रमः क्रीडा यस्येति बहुव्रीहिः। परिष्वङ्गः आलिङ्गनम। करेण अभिमर्शः स्तनादीनां स्पर्शः। उद्दामविलासः तीव्रकामचेष्टा ॥१७॥ व्रजस्त्रियः केशादीन् प्रतिव्योढु पुनर्धर्तुं अञ्जः सुखेन नालं न समर्था बभूवुरित्यन्वयः। कथंभूताः। तस्य भगवतोऽङ्गसंगेन या प्रकृष्टा मुत् हर्षः तया आकुलानि विवशानि इन्द्रियाणि यासां ताः। पुनश्च। विस्रस्ता माला आभरणानि च यासां ताः तथोक्ताः ॥ १८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गोप्यो नानाविलासैर्भगवता सह विजह्नुरित्युक्तमथ भगवानपि तद्भक्तियन्त्रितः स्वविलासैस्ताभिः सह रेमे इत्याह। एवमिति। एवं रमेशो माधवोऽपि व्रजसुन्दरीभिः सह परिष्वङ्गादिभी रेमे। अहो हरिभक्तेर्माहात्म्यमिति भावः। भगवता इत्यनेन सर्वात्मत्वसर्वस्वामित्वादिगुणनिधेस्ताभिः स्वानन्यभक्ताभिः सह रमणे योग्यता सूच्यते व्रजसुन्दरीभी रेमे इत्यनेन भक्तमनोरथपूरकत्वं द्योत्यते रमेश इत्यनेनावाप्तसमस्तकामतयाभिभूतत्वं सूच्यते तदेव दृष्टान्तेन दर्शयति। यथार्भक इति। यथा स्वप्रतिबिम्बैः स्वायत्तस्थितिप्रवृत्तिमद्भिर्विभ्रमः क्रीडा यस्य सः अर्भको यथा तथा स्वायत्तस्थितिप्रवृत्त्यादिमतीभिः स्वात्मिकाभिरित्यर्थः। नचानेन दृष्टान्तेनेशजीवयोर्बिम्बप्रतिबिम्बभावसिद्धिरिति शङ्क्यम् तत्रोपाधेर्नित्यत्वस्वीकारे अनिर्मोक्षप्रसङ्गापत्तेः अनित्यत्वस्वीकारे प्रतिबिम्बस्याप्यनित्यत्वेन जीवनित्यताप्रतिपादकशास्त्रव्याकोपापत्तेः, उभयपक्षेऽपि स्वरूपप्रतिबिम्बस्वीकारे अतीन्द्रियस्य सर्वगतस्य प्रतिबिम्बासम्भवादिदोषापत्तेश्च सविग्रहस्य प्रतिबिम्बस्वीकारे प्रतिबिम्बभूतेषु जीवेष्वपि श्रीवत्सादिचिह्नदर्शनप्रसङ्गाच्च अध्यासगीरिवज्रश्रुत्यन्तकल्पद्रुमादिग्रन्थेषु पूर्वैर्बहुशो निराकृतत्वादत्रोपरम्यते ॥ १७ ॥ व्रजसुन्दर्य्यस्तु भगद्विहारामृतनिधौ निमग्नाः भगवदङ्गसङ्गानन्दोद्रेकेणाकुलेन्द्रियाः बभूवुरित्याह। तदङ्गेति। तस्य श्रीकृष्णस्याङ्गसङ्गेन प्रकृष्टा या मुत्प्रीतिस्तया आकुलानि अवशानीन्द्रियाणि यासां ताः विस्रस्ताः मालाः आभरणानि च यासां ताः विश्लथबन्धान् केशादीन् अञ्जसा प्रतिव्योढु धर्तुं नालं न समर्था आसन् ॥ १८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यथा स्वतन्त्र ईश्वरः प्रतिघं प्रवृत्तिधर्मं विडम्बयन्नुन्मत्तादिवद्विध्याद्यगोचरं। विध्याद्यगोचरे कोपे प्रवृत्ते प्रतिघं विदुरिति च। अनुकुर्वन्रमते। एवं परिष्वङ्ग आलिङ्गनं कराभिमर्शः करपरिग्रहः स्निग्धानि तत्रैवेक्षणानि चक्षूंषि च। उद्दामेति विलासहासविशेषणं तै रमेशोऽपि व्रजकामिनीभी रेमे। यथा स्वतन्त्रः कश्चित्पतिः प्रतिघं कोपं तत्कोपप्रतिकोपं विडम्बयन्रमते तथेति। प्रतिघः प्रतिघाते स्यात्कोपेऽपि प्रतिघो मत इति विश्वः। स्वतन्त्रोऽपि प्रतिघं दन्तप्रतिघातमिति वा। यथाऽर्भकः स्वप्रतिबिम्बविभ्रम इति पाठेऽर्भको बालो जलादर्शादिप्रतिफलितस्वप्रतिबिम्बेन विभ्रमो विलासो यस्य स सन्यथा रमत एवं रेम इत्यर्थः ॥ १७ ॥ तस्य कृष्णस्याङ्गसङ्गजो यः प्रमद आनन्दस्तेनाकुलानि व्याप्तानीन्द्रियाणि यासां ता विस्रस्तमाल्याभरणा व्रजस्त्रियः केशान्दुकूलं वस्त्रं कुचेषु पट्टिका कञ्चुकादिकं वा त्यक्तुं तथा पतिं वोढु वाऽलं समर्था न द्वयं वोढु शक्ता इत्यर्थः। हे कुरूद्वहेति महीमहन्मह एवमिति सूचयति। व्रजस्त्रियो अविस्रस्तमाल्याभरणाः अः इति छेदः। स्त्रियः काश्चित्सपत्नीं प्रति वदन्ति। अविस्रस्तमाल्याभरणा सती। उपलक्षणया केशादिग्रहः। यो अः साक्षान्नारायणस्तं त्वमुद्वहत्तथा कुरु व्रज इत्यवदन्निति वा। अविस्रस्तं आलि आभरणा अः कुरु उद्वहेति आ सम्यगाभरणानि यस्याः सा हे आलि सखि त्वं तद्दुकूलादिकमविस्रस्तं कुरु। योऽस्तमुद्वह च व्रजेति तामपजहसुरिति वा। नाञ्जः प्रतिव्योढुमिति पाठोऽनर्थमूलः कल्पितो बहुकोशेष्वदृष्टः ॥ १८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं प्रादुर्भूते रसे अत्यन्तोद्गमनार्थं साक्षात्कामशास्त्रोक्ताश्चेष्टा निरूपयति। एवमिति। आलिङ्गनादयस्तत्र निरूपिताः एवमेव रसोद्गमनार्थं परिष्वङ्गः आलिङ्गनं ततः कराभिमर्शः तत्तदवयवेषु भगवद्धस्तस्पर्शः। ततः स्निग्धेक्षणं भावोद्गारि तत उद्दामो विलासः अमर्यादो भोगः ततो हास्यानि पूर्णमनोरथानामेवं परिष्वङ्गादिहासान्ताः सर्वासु। ननु प्राकृतीभिः कथं रेमे तत्राह। रमेश इति। रमाया ईशः सर्वत्र तासु रमापि भगवदाज्ञया निविष्टा ता अपि अधिष्ठानयोग्या इत्याह। व्रजसुन्दरीभिरिति। नन्वात्मारामः कथमेताभी रेमे लक्ष्मीस्तु ब्रह्मानन्द इति ब्रह्मानन्दे रमणमुचितमपि एतास्वावेशोऽप्यनुचितः ब्रह्मभावाभावादिति चेत्तत्राह। यथार्भक इति। बालको हि दर्पणजलादिकं पुरतः स्थापयित्वा तत्र तत्रात्मानं पश्यन् रमते तथा भगवानपि स्वसामर्थ्यं स्वरूपं वा तत्र स्थापयित्वा ब्रह्म ब्रह्मानन्दञ्चाविर्भावयित्वा रेमे। नन्वेतदप्यनुचितं किमनेनेति चेत्तत्राह। यथार्भकः यथा बाललीलां कृतवान् तथैतदपि कृतवानित्यर्थः। यद्वा कदाचित्प्रकारसाम्येऽपि नैतद्रसानुभवो लक्ष्म्यां भवितुमर्हति किन्त्वेतास्वेवेति ज्ञापयति पदद्वयेन रमेशो व्रजसुन्दरीभिरिति रमाया ईशः स्वामी भर्त्तेति यावत् एतास्तु व्रजसम्बन्धिन्योऽन्यसम्बन्धिन्यः सुन्दर्यो नतु विवाहिता इति रमारमणदशायामेतादृग्रसानुभवो नोभयोरपि सम्भवति रसस्वरूपस्यैव तादृशत्वादिति भावः। नन्वीश्वरे नेदमुचितमित्यत आह यथार्भक इति—

संमुह्यन्नवनीतमन्तिकमणिस्तम्भे। स्वबिम्बोद्गमं दृष्ट्वा—

त्यादिवाक्यनिरूपितमुग्धलीला वान्यथा निरूप्यते पूर्णज्ञानोऽपि तद्रसस्वरूपस्य तथात्वात्तथेहापि "रसो वै स" इति श्रुतेरिदं सर्वं रसमध्यपातित्वेन स्वरूपात्मकमेवेति तदुच्यत इति नानुपपत्तिः काश्चिच्छङ्काया एवानुदयादिति भावः। एतेन यथा प्रभुस्तद्भावो वा तथैता एतद्भावोऽपीति ज्ञापितं भवति तथा प्रतिबिम्बस्वभावात्। अत्र रमणं बहूनामप्येकदा भवति द्वयोश्च अग्रे तु प्रत्येकपर्यवसानं वक्ष्यति ॥ १७ ॥ एवं सर्वभावेन भगवद्धर्मावेशे तासां देहादिविस्मरणपूर्वकं महारसाभिनिवेशमाह। तदङ्गेति। तस्य भगवतः अङ्गसङ्गेन यः प्रकृष्टो मदः देहादिविस्मारको भाव उत्पन्नः तेनाकुलानीन्द्रियाणि यासां सर्वेतिकर्त्तव्यतामूढा जाताः। ततः केशपाशान् परिहितं दुकूलं कुचपट्टिकां वा स्वयमञ्जसा सामस्त्येन प्रतिसम्मुखतया विशेषेण वोढुमलं न जाताः पुनरल्पेनैव तथा विधा जाता इत्यत्र हेतुमाह। व्रजस्त्रिय इति। श्रमोऽपि जात इत्याह। विस्रस्तमालाभरणा इति। आकुलेन्द्रियत्वान्न विचारो लौकिकः गोपिकात्वान्न पारमार्थिकः श्रमोऽत्र दैहिकः। अत आद्यन्तमध्येषु तासु युक्ता भगवतैव धृता नताभिरित्यर्थः। यद्यप्यन्यप्रतीत्या ध्रियमाणा इव तथापि न स्वतो धारणं कुरुद्वहेति सम्बोधनमभ्रमाय विश्वासार्थञ्च ॥ १८ ॥

श्रीसुबोधिनी-सारः

एवमालिङ्गनहस्ततत्स्पर्शप्रेमनिरीक्षणोत्कटविलासहासैः व्रजस्त्रीभिः सह रमेशो लक्ष्मीपतिरपि रेमे स्वस्य प्रतिबिम्बैर्विभ्रमो विलासो यस्य सोऽर्भको बाल इव ॥ १७ ॥ तस्य हरेरंगसंगेन प्रमुदाऽतिहर्षेणाकुलानि परवशानींद्रियाणि यासां ताः विस्रस्तानि च्युतानि मालया सहाभरणानि यासां ता व्रजस्त्रियो गोप्यः केशान् दुकूलं वस्त्रं नीवीं वा कुचयोः पट्टिकां तिरोधानीं वा अञ्जः सुखेन प्रतिव्योढुं पूर्ववद्धर्त्तुं नालं न समर्था बभूवुः हे कुरूद्वह ॥ १८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

रेमे रमेश इत्यस्याभासे, ननु प्राकृतीभिरित्यादि। अत्राप्राकृतीत्वं निरूपयितुं तद्विपरीतधर्मोक्तिः पूर्वपक्षे। सिद्धान्तस्तु ब्रह्मानन्दरूपत्वेनाप्राकृती रमा। भगवांस्तु तदीशत्वेनाप्राकृतीरमणैकस्वभावः, तेनात्र रमणोक्त्यैवाप्राकृतीत्वमप्युक्तमेव भवतीति भावः। किञ्च। स्वामिनीनामप्राकृतत्वे का नाम शङ्का, यत एतत्सम्बन्धद्वारैव रमापि प्रभुसम्बन्धं प्राप्तवती, नान्यथेत्याहुः **रमापि भगवदाज्ञयेत्यादि**। तदुक्तं 'श्रयत इन्दिरे'त्यादि। तथा च स्वामिमीनीषु प्रभोः स्नेहभरदर्शनेन स्वयं तत्र प्रविश्य तद्द्वारा प्रभुसम्बन्धं प्राप्तुमिच्छन्त्यपि तन्महत्त्वस्फूर्त्या स्वयं न प्राविशत्, किन्तु तदार्तिं दृष्ट्वा तन्निवृत्त्यर्थं प्रभुणाज्ञापिता तथाकरादिति ज्ञापनायोक्तं **भगवदायेज्ञति**। अपरञ्च। यदा नागरीवदस्मदतिरिक्तायाः प्रभुसम्बन्धा मा भवत्विति चित्तकौटिल्यं स्यात्, तदा रमा न तथा कर्तुं शक्नुयात्, एतास्तु सर्वथाङ्गीकृतव्रजसम्बन्धिय इत्यतिसौजन्यादिगुणवत्य इति सुखाराध्या इति रमायास्तथाकरणमित्याशयेनाहुस्ता **अप्यधिष्ठानयोग्या इत्याहेति**। नन्वेतद्रसप्राप्त्यर्थं ह्येतदाज्ञापनम्। सा चोभयोरपि दम्पतित्वभावस्य जागरूकत्वेनात्रासंभाविता। एवं सति प्रियस्यापि पूर्वभावविलक्षणभावोत्पत्त्या रसाभासप्रसङ्गेन पूर्वरसस्यापि भञ्जिकेयमाज्ञा, स्वौधःस्पर्शमप्यसहमाना शिक्यस्थमपि क्षीरं नीरे पातयन्ती गौरिव अतस्तत्सम्पादनमनुचितम्। किञ्च। ब्रह्मभावे हि ब्रह्मानन्दाविर्भावो, रमा चैतद्रूपा। स्वामिन्यस्तु ततोऽधिकभगवद्रसभाववत्योऽतस्तत्सम्बन्धोऽत्राशक्यवचन इत्याहु**र्नन्वेतदप्यनुचितमित्या**दिना। अत्रार्भकदृष्टान्ते समाहितेरयमाशयः। यदुक्तं रमावेशे रसाभासप्रसंगः पूर्वरसविच्छेदश्चेति, तत्रोच्यते। यथा स्वप्रतिबिम्बं पश्यन् बालो दर्पणादौ गृहादिप्रतिबिम्बे सत्यपि स्वप्रतिबिम्ब एव रमते, न तु तदन्यस्मिन्, अत एव मूले स्वपदोपादानम्; तथा स्वामिनीषु रमासमागमेपि स्वस्य रसरूपत्वेन तदात्मकान् भावान्यत्र दृष्टवांस्तत्रेव तदनुरूपभावचेष्टावानेव रेमे, न तु रमास्फूर्तिरपि, येन भार्यात्वज्ञानेन पूर्वरसविच्छेदः स्यात्। तस्य रसस्य तादृक्स्वभावत्वादेव तथात्वं प्रभोः। अर्भकत्वस्वभावस्य तथात्वात्तस्येव। रमायास्तु भगवति भर्तृभाववत्त्वेन न मुख्यरसप्राप्तिः, अत एव 'नायं श्रियोङ्ग उ नितान्तरते'रिति श्रीमदुद्धववचनम्। किन्तूक्तभावाविशिष्टप्रियाङ्गसंगिव्रजाङ्गनाङ्गसगित्वेनैव पूर्वमननुभूतजातीयः कश्चनानन्दविशेषः समजनि, येन सर्वविस्मृतरभूत्। एतेनैव रमाप्रवेशे स्वामिनीनां भाववैलक्षण्येन पूर्वरसविच्छेद इति निरस्तम्। नहि प्रतिबिम्बाश्रयस्तज्ज्ञानं लोके क्वचिद्दृष्टचरम्। ज्ञानस्यात्मधर्मत्वेन तत्र तदसम्भवात्। अपिच। स्वामिनीनां प्रभोश्च तज्ज्ञानेऽपि न काचित्क्षतिः। यतो रसाभासभावासैर्मुख्यो रसः पोष्यते। प्रकृते च तदावेशतः क्षणमात्रं तथाभावोऽग्रिमक्षणजायमानरसविशेषानुभावक इतीष्ट एव। अतः प्रस्तुतस्वाधोभारधाराधरेण शिक्यस्थभाण्डान्यप्यतिशयेन पूरयन्त्यद्भुता गौरिवेयमाज्ञेत्युचिततरा। यच्चोक्तं ब्रह्मभावाभावात् तदानन्दरूपाया रमायाः सम्बन्धोनुपपन्न इति तत्रोच्यते। न हि ब्रह्मभावात्मकसाधनेनाविर्भवद्ब्रह्मानन्दो रमा, तस्य तद्विशिष्टेषु पुरुषेष्वप्याविर्भावात्, अस्याः पुरुषोत्तमैकनिष्ठत्वात्, किन्तु पुरुषोत्तमस्य रसात्मकत्वेन स यावद्विधस्तावद्विधोऽयं निरूपणीयः। तथा च स्निग्धदम्पतीभावोऽप्येकस्तत्प्रकार इति तदात्मकानन्दप्रकाशिका। 'अर्धो वा एष आत्मना यत्पत्नी'ति श्रुतेः स्वयमपि तदर्धत्वेनानन्दरूपा। ब्रह्मणः पुरुषोत्तमस्य या शक्तिः सा रमा ब्रह्मानन्दशब्देनोच्यते। तथा च एतादृश्याः सम्बन्धयोग्यतास्तीत्यत्र प्रवेश उपपद्यत इति। स्वामिनीनां प्रभोश्च रमाननुसन्धानपक्षमाश्रित्य 'बालको ही'त्यारभ्य 'स्थापयित्वेत्यन्तो ग्रन्थ उक्तः। अनुसन्धानपक्षमाश्रित्य ब्रह्मेत्यादिः। अत्र ब्रह्मपदेनोद्दीपकानुभावकवाक्कृतिभिराविर्भावितो व्यभिचारिभावपुष्टो मुख्यो रस उच्यते।

अविकृतो नित्योऽयं रस इति ज्ञापनाय ब्रह्मपदोपादानम् । ब्रह्मानन्दपदेन पूर्वोक्तो मुख्यरसपोषको रमावेशजनितो भावविशेष उच्यते । ननु स्वसामर्थ्यादिस्थापनेनैव चेद्रमणम् , तदा स्वत उत्तमनायिकात्वाप्राप्त्या स्वामिनीषु भगवतश्च स्वसामर्थ्यादियोजनव्यासंगेनोत्तमरसाननुभवप्रसंग इत्यरुच्या पक्षान्तरं वक्तुं तामुद्भावयन्ति नन्वेतदपीत्यादिना । सामर्थ्यादि योजयित्वा रमणे क्लिष्टकर्मत्वप्रसंगेनानुचितमिदमित्यर्थः । पक्षान्तरे दृष्टान्तस्याभासमाहुः किमनेनेति चेदित । स्वामिनीनामेवार्थे अस्या लीलायाः कियमाणत्वाद्रमावेशेन रमणेन स्वाभिनीनां किं फलं सम्पादितवानित्यर्थः । इयमाशङ्का दृष्टान्तेनापास्यते । तथाहि । यदा यशोदारोहिण्यादिसमक्षं तत्संकोचतः स्वयमाश्लेषाद्यकरणेनात्यार्तानां व्रजसुन्दरीणामार्तिहरणार्थं बालभावव्याजेन तदुरस्सु विविधविहारान् करोति, तदैतासां रसरीत्यैव रसपूर्तिरार्तिहरणं च भवति, अन्यासां तु विचित्रबालचेष्टात्वभानेन बाललीलारसानुभव एव भवति, एवमिहापि स्वामिनीनां निजरसभावानुरूप एव रसानुभवो रमायास्त्वेतत्प्रसंगेन निजभावानुरूप एव स इत्यर्थः । तथा च दृष्टान्तद्वयमत्र ज्ञेयम । । यथार्भको रेमे तथेत्येकः अग्रिमश्चापरः । सान्निध्यात्स एव तथाविधो यथेति । अत्रावृत्तेनार्भकपदेन लौकिकः स उच्यते । द्वितीयो दृष्टान्तः पूर्वोक्तप्रकारक एवेत्याचार्यैरत्र नोक्तः । एवं सति रमाप्रवेशत एवात्र रमणयोग्यतेति कश्चिन्मन्येतेत्यरुच्या पक्षान्तरमाहुः यद्वेत्यादि ॥ १७ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एवं शशाङ्कांशुविराजितेत्यत्र शास्त्राणां विषयस्तावद् यावन् मन्दरसा नराः । रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रम इति, एतद् वाक्यं वात्स्यायनीयसप्ताधिकरण्यां साम्प्रयोगिकाख्ये द्वितीयाधिकरणे द्वितीयाध्यायसमाप्तिस्थं, आरम्भतस्तु सप्तमाध्यायस्थम् ॥ १७ ॥

इति त्रिशोऽध्यायः समाप्त ॥ ३० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं यथा गोप्यो नानाविभ्रमैर्भगवता सह विजह्रुस्तथा रमेशो लक्ष्मीशो भगवान् अपि परिष्वङ्गादिभिर्नानाविलासैर्व्रजसुन्दरीभिः सह रेम इत्यन्वयः । परिष्वङ्ग आलिङ्गनम् , कराभिमर्शः करेण स्तनोर्वादीनां स्पर्शः, स्निग्धेक्षण सानुरागावलोकनम् , उद्दामविलासहासः । चुम्बनादिभिः परिष्वङ्गादिभिश्च क्रीडामकुर्वन्नित्यर्थः । एवं रमणे तस्यापि मोहासक्त्यादिदोषमाशङ्क्य तन्निराकुर्वन् दृष्टान्तमाह—यथेति । स्वप्रतिबिम्बैर्विभ्रमः क्रीडा यस्य सोऽर्भको यथा स्वालङ्कारवस्त्राद्यलङ्कृतैः प्रतिबिम्बैः सह रमते तथा भगवानपि स्वीयमेव सर्वकलाकौशल सौगन्ध्यलावण्यमाधुर्यादि च तासु सञ्चार्य स्वयमाप्तकामोऽपि तासां स्वभक्तानां मनोरथपूरणाय ताभिः सह रेमे । परन्तु बालस्याज्ञत्वान्मोहोऽपि भवति, भगवतस्तु सर्वज्ञत्वान्न मोहादिरित्यन्वयः।१७। 'तास्तु भगवतो विलासैर्मोहिता बभूवुः' इत्याह कृष्णेति । विश्वासार्थं सम्बोधयति कुरूद्वहेति । तस्य भगवतोऽङ्गसङ्गेन प्रकृष्टा या मुत् हर्षस्तया आकुलानि अवशानीन्द्रियाणि यासां ताः, अत एव विस्रस्ता माला आभरणानि च यासां ता व्रजस्त्रियः विश्लथद्बन्धान् केशादीन् अञ्जसा अनुसन्धानपूर्वकं प्रतिव्योढुं यथापूर्वं धर्तुं नालं समर्था न बभूवुरित्यर्थः ॥ १८ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ एवं रमेशो भगवानपि परिष्वङ्ग आलिङ्गनं कराभिमर्श करेण स्तनोर्वादीनां स्पर्शः स्निग्धेक्षणं सानुरागावलोकनम् उद्दामः श्रेष्ठो विलासः हासश्च तैः व्रजसुन्दरीभिः रेमे । यथा स्वप्रतिबिम्बैर्विभ्रमः क्रीडा यस्य सोऽर्भको यथा स्वालङ्कारवस्त्राद्यलङ्कृतैः प्रतिबिम्बैः सह रमते तथा भगवानपि स्वभूताभिस्ताभिः रेमे । एतेन भगवतो गोपीषु स्वीयकलाकौशललावण्यसंचारकत्वं स्वयं तद्विलासानभिभूतत्वं गोपीनां भगवच्छक्तिभूतत्वं चोक्तम् ॥ १७ ॥ तदङ्गेति ॥ हे कुरूद्वह ! तस्य भगवतः अङ्गसङ्गेन प्रकृष्टा या मुत् हर्षस्तया आकुलानि अवशानीन्द्रियाणि यासां ता अत एव विस्रस्ता माला आभरणानि च यासां ता व्रजस्त्रियः विश्लथद्बन्धनान् केशान् दुकूलं कुचपट्टिकां कञ्चुलिकां च अञ्जः अनुसन्धानपूर्वक प्रतिव्योढुं वोढुम् । यकाराधिक्यमार्षम् । यथा पूर्वं धर्तुं नालं न समर्था बभूवुः ॥ १८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गोपीवद्भगवानपि ताभिः सह रमते स्मेत्याह एवमिति । पूर्णकामः स्वानन्देनैव पूर्णः कामो मनोरथो यस्य एवंभूतोपि रमेशः नदिष्टः पूर्त्त्यैतासां गोपीनां इष्टपूर्त्त्यै स्वाभिलषितहृद्यंगसङ्गपरिपूर्णसुखप्राप्तये एवं गोप्यो यथा भगवता सह रमन्ते तथा स्वयमपि परिष्वंगादिभिः कृत्वा व्रजसुन्दरीभिः रेमे व्रजसुन्दरीभिः पूर्णोऽपि तासां सुखहेतवे नृपेति पाठे तु स्पष्टं परिष्वगः आलिंगनं करैः अभिमर्शः स्पर्शनं स्निग्धेक्षण स प्रेमावलोकनं च तैः उद्दामैर्मनोहरैः विलासैः स्तनस्पर्शादिरमणैश्च हासैर्भावव्यंजकस्मितैः ।१७। तदिति तस्य अगसगेन प्राप्ताप्रमुत्प्रकृष्टान्नदस्तया आकुलानि विवशानि इन्द्रियाणि यासां ताः विस्रस्तमालाभरणाः गोप्यः शिथिलबंधान्केशादीन् अञ्जः सद्यः प्रतिव्योढुं यथा पूर्वं कर्त्तुं नालं न समर्था अभवत् ॥ १८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं यथा गोप्यः नानाविभ्रमैर्भगवता सह विजह्रुस्तथा भगवानपि स्वविलासैस्ताभिः सह रेम इत्याह ॥ एवमिति ॥ एवमित्थं, रमेशः श्रियः पतिर्भगवान् अपि, व्रजसुन्दरीभिः स्वीयमेव सर्वकलाकौशल्यं सौगन्ध्यं लावण्यं माधुर्यं विलासचातुर्यादिकं च तासु संचार्य स्वसदृशतामापादिताभिर्व्रजाङ्गनाभिः सह, परिष्वङ्गः परिरम्भश्च कराभिमर्शः करेण स्तनोर्वादीनां संस्पर्शश्च स्निग्धेक्षणं सानुरागावलोकनं च उद्दामविलास उदारलीला च हासश्च तैः, रेमे। परिष्वङ्गादिरूपं विहारं कृतवानित्यर्थः रमेशो रेमे इत्यनेनावाप्तसमस्तकामत्वादनपेक्षितविहारोऽपि केवलं रेमे इति सूचितम्। कथमेवभूतस्य क्रीडा संघटते इत्यतो दृष्टान्तमाह यथेति। यथा अर्भकः सर्वकलाभिज्ञः कश्चिद्बालः, स्वप्रतिबिम्बैः स्वार्पितस्वगुणवत्त्वात् स्वसदृशैर्बालैः विभ्रमः क्रीडा यस्य तथाभूतो भवति। यद्वत् बालः यथा स्वसदृशैः सह रमते तद्वत् स्वसाधर्म्यं प्राप्ताभिस्ताभिः सह कृष्ण रेमे इत्यर्थः। रमेशोऽपि स्वात्मकाभिर्व्रजसुन्दरीभिः कामिनां स्त्रीपारवश्यं दर्शयन्निव रेमे इति भावः ॥ १७ ॥ तासु स्वविलासैरनभिभूतस्य भगवतो विलासैराकुला तदङ्गसङ्गेति बभूवुरित्याह ॥ हे कुरूद्वह, तस्य भगवतोऽङ्गसङ्गेन प्रकृष्टा मुत् प्रीतिस्तया आकुलान्यवशानि इन्द्रियाणि यासां ताः, तथा विस्रस्ता माला आभरणानि च यासां तथाभूताः व्रजस्त्रियः केशान् विश्लथबन्धनान् शिरोरुहान्, दुकूलं श्लथत्परिहितवसनं कुचपट्टिकां वा तथाविधां कञ्चुकीं च, अञ्जः आशु, प्रतिव्योढुं यथापूर्वं धर्तुं, अलं समर्थाः, न प्रबभूवुरिति शेषः ॥ १८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं परिष्वङ्गेति : १०.३३.१७.

रसं लब्ध्वाऽऽनन्दीभवति भुवि धीमानिति वचः श्रुतिश्राव्यं श्रीशः कलयितुमशेषेन्द्रियचरम्।
परीरम्भं वीक्षामतनुविषयामङ्गसुरभिप्रसारं किं चक्रे मधुररसना-ऽऽस्वादनमपि ॥ ६२ ॥
यादृग्यादृग्वृत्तिरासीत् स तासां तादृक्तादृक्तत्र रेमे रमेशः।
स्पष्टं तेनासञ्जिता पूर्णता च भक्ताभीष्टानन्ददायित्वमीशे ॥ ६३ ॥
पूर्णस्यात्र न मे किञ्चिदस्ति कर्तव्यमंशतः। तथाप्यस्म्येव तत्तुष्ट्यै भक्तव्यापृतितत्परः ॥ ६४ ॥

तदङ्गसङ्गेति : १०.३३.१८.

श्रीशाङ्गसङ्गसुखसंभ्रमतो युवत्यः स्मर्तुं स्वगोकुलमपि प्रभुतां न चापुः।
दूरेऽन्यसंस्मृतिरिदं क्षममेव यस्मात् तासामनन्यगमनो हि तदाऽऽस कामः ॥ ६५ ॥
सति पितरि सावकाशं लालयितरि दातरीह पादरि च। तनुजस्त्वनन्यगमनः स्फुट इति रतिपतिरभूत्स तत्रैवम् ॥ ६६ ॥
तिरस्कृताः सुमनसो यैर्येऽप्यत्रोज्झिताश्च तैः। तेषां कौटिल्यमालिन्यभाजां मुक्तिरदाऽद्भुतम् ॥ ६७ ॥
अरंकेशाः सुदृङ्मौलिश्रियः सूर्येन्दुशोभिनः। युक्तं तन्मिषतोऽपश्यन मुदाऽऽप्त सुरतोत्सवम् ॥ ६८ ॥
ये मुक्ताभरणाः सदैव सुमनः सङ्गादृतात्मश्रियः शान्तोः स्निग्धतमस्वभावसरलाः कृष्णस्वरूपेडिताः।
किञ्चानेकसुदृक्शिरोमणिपदास्ते बन्धभाजः कथं स्युर्युक्तं तदिदं तदा यदभजन् केशा विबन्धात्मताम् ॥ ६९ ॥
यद्योगतो वयमिहेदृशसौख्यभाजो जाता इति स्मरणमांशिकमप्यमूषाम्।
नास्तीति कोपचलितं किमितोऽधिवासादास्वेवमास शिथिलं ध्रुवमंशुकं तत् ॥ ७० ॥
एतत्सहस्थिततया विहितेऽधिवासे मोक्ता प्रभुः क्वचिदसावपि वा मम स्यात्।
इत्यादृतावपि न मां स्मरतोऽधुना तावित्यशुकं तदनुतापितयाऽऽप मुक्तिम् ॥ ७१ ॥
अस्मिन्नयत्नसुलभे सति मुक्तियोगे प्राप्तेऽलसं यदि वसामि तदन्यकाले।
सा नेति सभ्रमचलद्ध्रुवमंशुकं तत् पादे पपात विधृतोद्धरणाभिलाषम् ॥ ७२ ॥
स्वावासि सर्वजनमुक्तिसुखावहाऽपि काञ्चीमदाश्रयतया श्रियमाप मुक्तेः।
अद्याप्यनङ्गगृहगोपनकार्यहं चेद्धिङ् मामिति स्म गलदंशुकमास सद्यः ॥ ७३ ॥
मत्वा विष्णुपदं मयेदमनिशं निःशङ्कमासेवितं कोऽयं मे गुणिनोऽप्यधःस्थितिकरो मोहोऽलमित्याकुलम्।
दृष्ट्वा विष्णुपदं स रूपसुरतानन्दप्रसङ्गप्रदं प्राप्तुं तत्प्रथमं भ्रमास्पदमरं युक्तं जहौ चीवरम् ॥ ७४ ॥
काञ्च्याश्रितं सततविष्णुपदावलम्बि सञ्छादितान्यजन-सर्वजघन्यभोगम्।
नित्यानवद्यगुणरूप-विचित्रशोभं मुक्तं तदंशुकमभूद्धि किमत्र चित्रम् ॥ ७५ ॥
अभूतपूर्वोऽयमुपस्थितः समुत्सवः सुदृक्सौख्यकृदीशकल्पितः।
न भूततत्कार्यततेः प्रयोजनमिहेत्यधोऽगात् सगुणं तदम्बरम् ॥ ७६ ॥
अम्बरं वीक्ष्य गोपीनामम्बरं यदधोऽपतत्। युक्तं भूतस्वभावो यत् परोत्कर्षासहिष्णुता ॥ ७७ ॥

त्यक्तास्मदाश्रयतयैव पुरा यदेता निःसीमहार्दसुखदास्तु हरेर्बभूवुः ।
आलोच्य तद्रतिसुखर्धिसमीहया तद्युक्तं तदांशुकमभूत् तदनङ्गसङ्गम् ॥ ७८ ॥
कटिस्थिते तद्गलितेऽपि वासस्यनङ्गसङ्गित्वमखण्डमासीत् ! चित्रं च चित्रान्तरमङ्गदेश्रीरनङ्गदो बाहुरभूद् द्वयोर्यत् ॥ ७९ ॥

विषमेषु रतिस्थितिर्न कार्या गुणिना जातुचिदुद्गता यदि स्यात् ।
नहि निर्वहणं क्षमां विनेति सगुणोऽभूत् स पटः क्षमाश्रितोऽरम् ॥ ८० ॥
मध्यमस्यास्य संसर्गः सर्वदा शून्यवादिनः । न युक्त इत्यभूद्वस्त्रं सुदृक्पादनतं गुणि ॥ ८१ ॥
विधाय निर्बन्धमिदं मयाऽवितं यदर्थमासां कुचयुग्ममीदृशम् ।
अग्राहि तेनाद्य दयाब्धिनेति तत् कृतार्थभावादिव कञ्चुकोऽगलत् ॥ ८२ ॥
केशा मुक्ता गुणी मुक्तो नाद्भुतं सुरतोत्सवे । चित्रं मुक्ताः पुनर्मुक्ता मुक्ताः सुमनसोऽपि च ॥ ८३ ॥
अनङ्गयोग्या जाताः स्मो वयं कृष्णाङ्गसङ्गतः । इति स्रजोऽप्यलङ्कारास्तदाऽनङ्गश्रियं दधुः ॥ ८४ ॥

कृष्णप्रिया

जैसे बालक अपने प्रतिबिम्बों के साथ खेले वैसे भगवान श्रीरमा रमणजी, समालिङ्गन कर कमलों से अङ्गप्रत्यङ्गों में मधुर स्पर्श, स्नेहावलोकन, उत्कट विहार और मनोरम हास्य आदि रसोद्दीपक विलासों को श्रीव्रजसुन्दरीओं के साथ रमण करने लगे ॥ १७ ॥ श्रीश्यामसुन्दरजी अङ्ग सङ्ग से प्राप्त मद से छकी हुई इन्द्रियों वाली और खिसकती हुई कुसुममाला और खिसकते शृङ्गार वाली व्रजस्त्रियाँ अलकावलिओं दूकूलवस्त्र और कंचुकीओं को अपने अपने स्थानों पर न संभाल सकी ॥ १८ ॥

कृष्णविक्रीडितं वीक्ष्य मुमुहुः [1]खेचरस्त्रियः । कामार्दिताः [2]शशाङ्कश्च सगणो विस्मितोऽभवत् ॥ १९ ॥
कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः । रेमे [3]स भगवांस्ताभिरात्मारामोऽपि लीलया ॥ २० ॥

कर्दमक्षमा

अन्वयः—कृष्णविक्रीडितम्, वीक्ष्य, खेचरस्त्रियः, कामार्दिता, मुमुहुः, च, सगणः, शशाङ्कः, विस्मितः, अभवत् ॥१९॥ आत्मारामः, अपि, सः, भगवान्, यावत्यः, गोपयोषितः, आसन्, तावन्तम्, आत्मानम्, कृत्वा लीलया, ताभिः, (समम्) रेमे॥२०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

न केवलं ता एवाकुलेन्द्रियाः किं तु देव्योऽपीत्याह । कृष्णविक्रडितमिति । किं च शशांकश्चेति । अनेनैतत्सूचितम् । शशांकेन विस्मितेन गतौ विस्मृतायां ततः प्राक्तनाः सर्वेऽपि ग्रहास्तत्रतत्रैव तस्थुस्ततश्चातिदीर्घासु रात्रिषु यथासुखं विजह्रुरिति॥१९॥ किं च कृत्वेति । अयं भावः । "कात्यायनि महामाये महायोगिन्यधीश्वरि ॥ नन्दगोपसुतं देवि पतिं मे कुरु ते नमः ॥" इति प्रत्येकं ताभिः प्रार्थनाद्भगवताऽपि 'याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः' इति तथैव प्रतिश्रुतत्वात्तावंतमात्मान कृत्वा रेमे इति । यावतीर्यावत्यः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथान्यं तदद्भुतमाह—न केवलमिति । ता एव गोप्य एव । किन्तु अपि तु । देव्यो देवांगना अपि । न केवलं देव्य एव किन्तु देवा अपीत्याह—किञ्चेति । शशोंकश्चिह्न यस्य, वाहनत्वात् । सगणो रोहिण्यादिभगणसहितः । अनेन शशांकविस्मय-कथनेन । एतत् वृत्तम् । गतौ नक्षत्रसंचाररूपायाम् । ततः शशांकात् । प्राक्तनाः प्राक्तनर्क्षराश्यादिषु वर्तमानाः । सर्वेऽपि ग्रहाः भौमादयः, तत्र तत्रैव यत्र यत्र राश्यादौ स्थिता इति । ततश्च ग्रहगतिविस्मृतेर्ग्रहाणां चलनाभावाद्रात्रीणां दीर्घत्वं, ग्रहगत्यैव रात्र्यादेः समाप्तिदर्शनात् ॥ कामार्दिताः कृष्णविषयकेण कामेन पीडिताः । 'कामार्दिताः कृष्णविषयकेण कामेन पीडिताः । 'कामार्दितः' इति पाठे शशाङ्कोऽपि श्रीकृष्णमालोक्य स्त्रीभावं प्राप्तः कृष्णविषयकेण कामेन पीडितश्च । व्रजसुन्दरीगात्राणां तद्विलासानाञ्च योगमाययैव पुरुषदृष्टीः प्रत्यावरणं पूर्वं व्याख्यातमेव ॥ १९ ॥ अन्यदुपयोगमाह—किञ्चेति । लीलया योगमायया । अत्र लीला तात्पर्यमाह—अयं भाव इति । प्रत्येकम् पृथक्पृथक् । ताभिः गोपकन्याभिः । तथैव यथा ताभिर्वृतम् । प्रतिश्रुतत्वात् प्रतिज्ञातत्वात् । ततश्च ताभिः सह प्रत्येकं कुञ्जेषु रहस्यक्रीडाप्यभूदित्याह—कृत्वेति । यावतीर्यावत्संख्याका गोपयोषितो गोपवध्वो गोपकन्याश्च तावन्तमात्मानं तावत्सख्यमात्मप्रकाश कृत्वा । आत्मारामोऽपीति व्याख्यातार्थः ॥ २० ॥

---

१. व्यमुह्यन्त सुर–विज. । २. दितः–प्रा. पा. । ३. रराम विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्णस्य स्वयं भगवत्त्वेन माधुर्यादिभिः परमपरिपूर्णस्य विक्रीडितं पूर्वपूर्वतोऽपि वैशिष्ट्येन क्रीडां वीक्ष्य साक्षात् सेवादिमयप्रीतिवैशिष्ट्य न दृष्ट्वा खेचरा देवादयस्तेषां स्त्रियः सर्वा अपि कामेन श्रीभगवद्विषयकेण पीडिताः सत्यो व्यमुह्यन्। पूर्वं श्रीकृष्णप्राप्तौ निजायोग्यत्वादि विचारसहित्येन पश्चाद्देहादेरपि विस्मरणेन मोहवैशिष्ट्यं प्रापुः। अन्यत्तैः। तत्रातिदीर्घास्विति अन्यथा स्वच्छन्दबहुलसुखक्रीडानामप्रसिद्धिः स्यात्। अत एवाग्रे वक्ष्यमाणस्य ब्रह्मरात्र इत्यस्यार्थं ब्रह्मणश्चतुर्युगसहस्रपरिमितायां रात्रौ गतायामिति केचिद्व्याचक्षते तदपि सम्भवेदेव। भगवच्छक्त्याशेषविरुद्धस्य समाधेयत्वात् विस्मयादिना गतिस्थगितत्वं तूत्प्रेक्षामात्रम्। तेषां ज्योतिश्चक्राधीनगतित्वात् स्वगतैरत्यल्पत्वात्, प्रतिलोमत्वाच्च। वस्तुतस्तु तल्लीलामाधुर्येण नदीप्रवाहस्येव ज्योतिश्चक्रस्य स्तब्धत्वं ज्ञेयम्। रात्रिष्विति बहुत्वं च ता रात्रीरित्युक्तस्य निशा इति वक्ष्यमाणस्य चानुसारेणेति एवं रासक्रीडायाः श्रीकृष्णविषयकभावविशेषवर्धनेन परममोहनत्वं दर्शितम्। तच्च युक्तम्। तत् प्रकृत्यैव तत् सम्बन्धिनृत्यगीतादेस्तत्तद्भाववर्द्धनतातिशयात् तत्रापि तस्य साक्षात्तत्कर्तृकत्वात्। तत्रापि लक्ष्म्यादिदुर्लभतादृशसौभाग्याभिस्ताभिः सहितत्वात् तत्रापि तादृशपरिपाटीसम्बलितत्वादिति। अत्र कामार्दित इत्येकवचनान्तपाठस्तेषामसम्मतः। किन्तु देव्योऽपीत्यनेन तासामेव कामार्दितत्वस्वीकरात्। किञ्च। शशाङ्कश्चेति तदादेर्भिन्नवाक्यत्वाङ्गीकाराच्च ॥ १९ ॥ अथ रासानन्तरं विश्रम्य कृतं लीलाविशेषमाह। कृत्वेति द्वाभ्याम्। आत्मानमात्मनः प्रकाशमित्यर्थः। न चान्तन बहिर्यस्येति न्यायेन मध्यमत्वेऽपि तच्छ्रीविग्रहस्य विभुत्वात्। "चित्रं वतैतदेकेन वपुषा युगपत् पृथक्। गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहदि"त्येकाशाच्च। पौनरुक्त्यमिदं विश्रामसमय एकीभूतत्वात्। गोपयोषितो गोपजातीययोषितः। ततश्च काश्चिद्विवाहिताः काश्चित् कन्याश्चेति ज्ञेयम्। एकविंशद्द्वाविंशयोर्व्यूढाकन्यानां पृथक् पृथक् पूर्वानुरागवर्णनात्। "युवतीर्गोपकन्याश्च रात्रौ सङ्काल्य कालवि"दिति श्रीहरिवंशोक्तेश्च। एतच्च रूपेण लिखिते उज्ज्वलनीलमण्यादौ व्यक्तम्। लीलया शृङ्गाररसखेलया रराम रेमे। भगवानिति तदेव भगवत्तासारमाधुर्यसर्वस्वप्रकटनमिति भावः। तस्यैव प्रेमरसपरिपाकविलासविशेषात्मकत्वात्। तथा जगच्चित्ताकर्षकेण तेनैव स्वतः प्रेमविशेषविस्तारणात्। तच्चाग्रे व्यक्तं भावि श्रीभागवतामृते च विवृतम् आत्मारामोऽपीत्युक्तार्थम्। तद्रमणञ्च पृथक् पृथक्। तत्रैव निकटनिकुञ्जादिषु इति ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णस्य परमानन्द घनमूर्त्तेर्ज्जगच्चित्ताकर्षकस्य बा, विशेषेण पूर्व्वपूर्व्वतोऽसाधारण्येन क्रीड़ितं क्रीड़ाम्, विशेषतः साक्षात्सेवादिद्वारा वा, प्रीत्या ईक्षित्वा, कृष्णेत्यनेन तद्विक्रीड़ितस्यापि तादृशत्वमेवाभिप्रेतम्। खेचरा देवादयस्तेषां स्त्रियः सर्व्वा अपि कामेन भगवद्विषयकेनार्द्दिताः पीड़िताः सत्यः, विशेषेण सर्व्वविस्मरणादिना अमुह्यन् श्रीकृष्णाप्राप्तौ निज-योग्यत्वायोग्यत्वादिविचाररहिता अभवन्, दशाविशेषं वा प्रापुः। शशांक इति शशेन सहित इत्यर्थः; विस्मितोऽभूत, अदृष्टपूर्व्वत्वात्। अन्यत्तैर्व्याख्यातम्। अत्रातिदीर्घास्विति चिरकालस्वच्छन्दबहुलसुखक्रीड़नाभिप्रायेण, अन्यथा भावत् क्रीड़ानां यथानिबन्धाल्पकालेन निर्व्वाहासिद्धिः, अतएवाग्रे वक्ष्यमाणं (३८ श. श्लो०) 'ब्रह्मरात्रे' इति ब्रह्मणश्चतुर्युगसहस्रपरिमिताया रात्रौ गतायामिति केचिद्व्याचक्षते, तदपि सम्भवेदेव, भगवच्छक्त्याशेषविरुहस्य समाधानात्, रात्रीष्विति बहुत्वञ्च, ता रात्रीरित्युक्तस्य (२५श. श्लो.) 'निशाः' इति वक्ष्यमाणस्य चानुसारेणेति। अथवा देवानां देवीनाञ्च सर्व्वेषामेव व्योमयानानां विमोहमाह - खेचरास्तत्स्त्रियश्च, गण-शब्देन तत्पत्न्यः पराश्च तारकाः; चकारात् सोऽपि सगणः कामार्द्दितो व्यमुह्यदित्यर्थः। अनेन वक्ष्यमाणरतौ तेभ्यो लज्जादिना शंकोचो निरस्तः, सर्व्वेषामेव विमोहात्। तत्र शशांकस्य कामो भगवदभीप्सामात्रलक्षणः, किंवा दण्डकारण्यमुनीनामिव भावविशेषेण तादृश एव, तत्र च निजवंशावतीर्ण-श्रीकृष्णकामेनापि तस्य वस्तुतो दोषो न स्यादिति शशांक-शब्देन सूच्यते, यथा शशसम्बन्धमात्रणैव कलंकः, न तु तत्त्वतः, प्रत्युत महागुण एवेति दिक्। एवं श्रीरासक्रीडायाः श्रीकृष्णविषयकभावविशेषबर्द्धनेन परममोहनत्व सर्व्वक्रीडावर्गतोऽपि महाश्रेष्ठ्य दर्शितम्। प्रकृत्यैव नृत्यगीतादेर्भगवद्भाववर्द्धमानत्बात् तत्रापि तस्य श्रीभगवत्कर्त्तृत्वात्, तत्रापि ताभिः सह, तत्रापि तादृशप्रकारादिना, अतएव तस्य भक्तिगौरवादियुक्ताभिर्लक्ष्म्यादिपत्नीभिस्तथान्याभिश्च देवीभिराश्लेष चुम्बनाद्ययोग्याभिरसम्पत्तेः, केवलबिशुद्धप्रेमविशेषसम्पन्नाभी रतिविशेषपरमयोग्याभिः श्रीगोपीभिरेव रुसिद्धस्तद्योग्यस्थानेऽनन्यसाध्यन्यायेन श्रीव्रजेन्द्रकिशोरेणानन्यभोग्य रसायात्र सम्पादनमिति दिक्। अतएवारम्भे पूर्व्वमुक्तम् (भा० १०।३३।२) 'तत्रारम्भतगोविन्दः स्त्रीरत्नैः' इति ॥ १९ ॥ तत्रैव परमफलमाह—कृत्वेति द्वाभ्याम्। कृत्वैवेति शक्तिविशेषेण नानात्वं सत्यतापि सिद्धैत्र, गोपयोषितो गोप्य इत्यर्थः; ततश्च काचिद्विवाहिताः, काश्चित्कन्याश्चेति। यद्वा, गोपानां योषितो भार्य्याः, ततश्च काश्चितेषां पत्न्य एव, काश्चिच्च कृतकात्यायनीव्रता भगवदेकनिष्ठा अजातविवाहा अपि कथञ्चिद्भगवन्मायादिना सर्व्वैर्विवाहमननादत्रार्य्यात्वेन प्रतीता इति ज्ञेयम्। एतच्च श्रीमन्महानुभावावानां ललितमाधवनाटकादौ व्यक्तमेव, लीलया शृंगार-रसेन विचित्र-सौरतचेष्टया वा रराम रेमे। भगवानिति तदेव भगवत्तासारसर्व्वस्वप्रकटनमिति भावः। तस्यैव प्रेमरसपरिपाकविलास-विशेषात्मकत्वात्तथा जगच्चित्ताकर्षकेण तेनैव स्वतः प्रेमविशेषविस्तारणाच्चेति दिक्, तच्चाग्रे व्यक्तं भावि।

श्रीभागवतामृते च विवृतमेव। आत्मारामोऽपि इत्युक्तार्थमेव तद्रमणञ्च पृथक् पृथक् तत्रैव निकट-निकुञ्जादिषु, किंवा रासस्थल्यामेव तत्तदलक्षितत्वेन; एवं च पूर्ववदैश्वर्य्यमाधुर्य्यं द्रष्टव्यम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

न केवलं ता एवा कुलेन्द्रियाः किन्तु पश्यन्त्यो देवानां स्त्रियोऽपीत्याह। कृष्णविक्रीडितमिति। खेचराणां देवानां स्त्रियः किञ्च शशाङ्कश्चन्द्रः सगणः शुक्राङ्गारकगुर्वादिगणसहितः विस्मितो बभूव अनेनैतत्सूचितं विस्मितेन शशाङ्केन स्वगतो विस्मृतायामितरेऽपि ग्रहाः स्वस्वगतिं विस्मृत्य तत्र तत्रैव तस्थुरतो दीर्घारात्रिर्बभूव ॥ १९ ॥ कथमेकोऽनेकाभिर्युगपद्रेम इत्यत आह। कृत्वेति। गोपयोषितो यावतीर्यावत्यस्तावन्तमात्मानं कृत्वा ताभिः सह लीलया रेमे अध्ययनेन वसतीतिवत् हेतौ तृतीया आत्मारामोऽपि षाड्गुण्यपूर्णोऽपि लीलार्थं रेम इत्यर्थः ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सगणः रोहिण्यादिनक्षत्रगणेन सहितः। यद्वा गणनं सङ्ख्यानं तेन सहितः ॥ १९ ॥ किमत्र सङ्ख्येयमत्राह। कृत्वेति। यद्वा योगैश्वर्यात् बहुरूपग्रहणेन बह्वीभिः स्त्रीभी रमणं घटत इति राज्ञः सिद्धत्वेऽपि मन्दाशङ्कां परिहरति। यावतीर्यावत्यः ररामेति व्यत्ययेन परदाराभिमर्शनेन दोषो नास्तीति वक्ष्यमाणमर्थमिहैव सूचयति। यद्वा रराम चिक्रीडे रासक्रीडा विरामसूचनार्थं वा इति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कामार्दिता इति बहुवचनान्त एव पाठः टीकासम्मतः। किन्तु देव्योऽपीत्यनेन तासामेव कामार्दितत्वस्वीकारात्। किञ्च शशाङ्कश्चेति। तदादेर्भिन्नवाक्यत्वाङ्गीकाराच्च ॥ १९ ॥ आत्मानमात्मनः प्रकाशमित्यर्थः ॥ २०-२९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

एवं कृष्णेविक्रीडिते देवस्त्रियोऽपि मोहिता इत्याह—कृष्ण-विक्रीडितमित्यादि। खेचरा देवास्तेषां स्त्रियः ख—शब्दोऽत्र स्वर्गार्थः 'स्वर्व्योम्नोरपि खं विदुः'। काः खेचरस्त्रियो मा अर्दिताः ? अपि तु सर्वा एव। शशाङ्कस्तु पुनः सगणः सनक्षत्रगणो विस्मितोऽभवत्, विस्मयेन स्थगितोऽभवदित्यर्थः। शशाङ्कस्य विस्मितत्वेन स्थगितत्वम्, तेन च गत्यभावः, तेन च रात्रेर्दैर्घ्यं व्यज्यते ॥ १९ ॥ अथ सर्वासां प्रत्येकं वयोऽनुरूपमाशयानुरूपमाकारगतप्रमाणानुरूपं कलाकौशलानुरूपं प्रकाशमाविकुर्वन् रेम इत्याह—कृत्वेत्यादि। भगवानचिन्त्यपरमैश्वर्यः आत्माराम आत्मभिरात्मप्रायैर्भक्तैः सहारमतीति तथा, अथवा स्वलाभपरिपूर्णोऽपि स्वच्छन्दोऽपि वा लीलया कौतुकेन यावतीर्यावत्यो या वयस्यो यावदाशया यावदाकारप्रकारा यावत्कलाकौशलास्तावन्तं तत्प्रकारमात्मानं स्वभावं प्रकटय्य ररामेत्यर्थः। या आकारादिभिर्यादृशीः ताः प्रति तथा भुत्वेत्यर्थः ॥ २० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कृत्वा तावन्तमित्यादि। लीलया कुतुकेनात्मारामोऽपि ताभिः समं रराम, सह रमणमव तस्य प्रकृतम्, आत्मारामत्वन्तु लीलया। किं कृत्वा ? यावतीर्गोपयोषितः, या यथाविधास्तासु तथाविधमात्मानं कृत्वेत्यर्थः। वस्तुतस्तु नानाप्रकृतय एव तास्तासां प्रकृति भेदादात्मानं नाना प्रकृतिं कृत्वोत भावः ॥ १९-२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कामार्दिताः कृष्णविषयकेण कामेन पीडिताः। कामार्दित इति पाठे शशाङ्कोऽपि कृष्णमालोक्य स्त्रीभावं प्राप्तः। कृष्णविषयकेण कामेन पीडितश्च। व्रजसुन्दरीगात्राणां तद्विलासानाञ्च योगमाययैव पुरुषदृष्टीः प्रत्यावचरणं पूर्वं व्याख्यातमेव ॥ ९ ॥ ततश्च ताभिः सह प्रत्येकं कुञ्जेषु रहस्यक्रीडाप्यभूदित्याह—कृत्वेति। यावतीर्यावत्सङ्ख्याका गोपयोषितो गोपवध्वो गोपकन्याश्च तावन्तमात्मानं तावत्सङ्ख्यमात्माप्रकाशं कृत्वा आत्मारामोऽपीति व्याख्यातार्थम् ॥ २० ॥

रसिकाह्लादिनी–टीका

एवं सामान्यतः शृङ्गग्राहिकान्यायेनैकस्मिन् दिवसावसाने संक्षेपतः कृतां लीलां निरूप्यान्यदपि एवंविधं लीलानामन्ताभावं निरूपयिष्यत् तत्र सभर्त्तृकानां देवीनां मोहं विवृण्वन् सगणस्य चन्द्रस्यापि मोहमाह–कृष्णेति, कृष्णस्य परमानन्दमूर्तेः शृङ्गारमूर्त्तेरिति वा, तस्य विक्रीडितं रासविलासरूपं क्रीडां वीक्ष्य प्रीतिपूर्वकं दृष्ट्वा खेचराः देवादयः एके गायका एके वाद्यवादका एके पुष्पवृष्टिकर्तारः एके सभासदः एते सर्वे सर्वदा लीलादर्शनाधिकारिणः। अत्र तु स्त्रिप्राधान्येनागतानां तासां मोहेन तेऽपि मोहिता इत्याह। खेचराः देवादयस्तेषां स्त्रियो मुमुहुः। अग्रे युग्मश्लोकानुगीते एता एव वक्ष्यन्ति। व्योमयानवनिता इति। तत्र हेतुमाह कामार्दिताः कृष्णविषयेण लौकिककामेन पीडिता देवगन्धर्वादीनां पुरुषाणां चेन्मोहस्तदा स्त्रीणां मोहः किमुत वक्तव्यमिति।

यतो हि ते पुरुषा अपि चलिताः स्वस्यायोग्यत्वं देहादिकं विस्मृत्य तत्रैव निष्क्रियास्तस्थुः, अन्यच्च शशाङ्कश्चन्द्रः सगणो ज्योतिर्गणसहितो विस्मितोऽभवत्। आचार्य्यैरेवं व्याख्यातं—शशाङ्केन स्वगतौ विस्मृतायां सत्यां तदुपरितननामन्येषां ज्योतिर्गणानां गतिनिरोधो जातस्ततश्चातिदीर्घासु रात्रिषु स्वच्छन्दतो रेम इति वास्तवोऽर्थः। स्वयमवाऽभिप्रेतः उपक्रमे उक्तं "भगवानपि ता रात्री"रिति ऐश्वर्य्यनिरोध उक्तः। उपसंहारे च तथैवोन्नेयं ऐश्वर्य्यनिरोधात्। तच्चेष्टारूपस्य कालस्यापि निरोधो जातः। तदुक्तं देवकीस्तुतौ "योऽयं कालस्तस्य तेऽव्यक्तबन्धोश्चेष्टामाहुश्चेष्टते येन विश्वम्" इति। अत एव तदाश्रयस्य शिशुमाररूपस्य ज्योतिश्चक्रस्य निरोधे जाते तदाश्रयभूतानां ज्योतिर्गणानां स्वत एव निरोधो जातः, ततश्च रात्रीणामतिदीर्घत्वं जाते यथा सुखं रेमे। ननु ऐश्वर्य्यनिरोधे कालाधीनज्योतिश्चक्रस्य निरोधो भवतु चन्द्रस्य पृथग्गतिमतो निरोधः कथमिति चेत्तत्राह श्रीकृष्णस्य मनसि निरुद्ध सति शशाङ्कस्यापि निरोधो जातस्तस्य तु मनः कार्य्यत्वात्। "चन्द्रमा मनसो जात" इति श्रुतेः। किंच चक्रेऽवतीर्णानां देवीनां तदधिष्ठात्तृणां श्रीकृष्णविलासेन निरोधे जाते तदंशभूतस्य तारागणस्यापि निरोधो जात इत्यभिप्रेत्योक्तं सगणो विस्मृतोऽभवदिति। सर्वेषां देवीनां च विमोहे जाते शशाङ्कस्यापि मोहो जातस्तस्य देवोत्तमत्वात्। तारागणस्यापि मोहो जातस्तस्य देवीत्वादिति। ततश्चासंकोचेनातिदीर्घासु रात्रीषु रेम इति ॥१९॥ इदानीं स्वप्रतिश्रुतं सत्यं सम्पादयता श्रीकृष्णेन तासामभिप्रायेण कृतां बहुरूपतां निगमयति। कृत्वेति, यावतीः यावन्त्यो व्रजयोषितः। व्रजे पञ्चविधा गोप्यः एका नित्यसिद्धा १ उपासनासिद्धा २ देव्यश्च ३ उपनिषद् ४ दण्डकारण्यवासिनो मुनयश्च ५ तत् तदभिप्रायेण तावन्तमात्मानं कृत्वेति। श्रीकृष्णविग्रहस्याचिन्त्यशक्तित्वात् पूर्णत्वाच्च। तथा चात्रैवोक्तमाचार्य्यैः "बन्धने द्व्यगुला-पूर्त्या पूर्णतामन्यदर्शयति"। किं च मध्यपदानावृत्तिरेकवचनं च गोपीदृष्ट्यभिप्रायेण बहुत्वं चोक्तार्थमेव अग्रे वक्ष्यति च "चित्रं वतैतदेकेन वपुषा युगपत् पृथक्। गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहदिति"। आत्मारामोऽपि आत्मारामत्वमवगणय्य ताभिः सह लीलया रेमे। अनायासकर्मका क्रिया लीलेति। नन्वेकयूथवतीनां सम्माननं कथमिति चेत्तत्राह भगवानिति, सामर्थ्यद्योतनं ऐश्वर्य्येण विराजमान इत्यर्थः, अत एव तासां बह्वीनां मधुररसेन पोषणजातमिति। कात्यायन्यर्चनपराभिः यत् प्रार्थितं प्रत्येकं "पतिं मे कुरुते नमः" इति श्रीकृष्णेनापि प्रतिश्रुतत् सर्वं सिद्धः जातमिति ॥ २० ॥

विशुद्धरसदीपिका

एवञ्च शुद्धप्रेमलीलायां संम्प्रवृत्तायामनुषङ्गेणैव कामविजयो जात इति दर्शयति। कृष्णेति। सर्वाकर्षकपरमानन्दमूर्तेः विशिष्टं क्रीडितं विशेषेणेक्ष्य भग्नमानतया पलाय्य गतेन कामेनार्दिताः खेचरस्त्रियः मुमुहुः समरपराभूतोऽहि सामन्तो हीनबलानाबासान्विलुण्ठन् पलायत इति लोकप्रसिद्धिः खेचरत्वमत्र प्रेमशून्यत्वमेव युक्तं चैतत् कर्मफलभूतासु प्रेमलेशाभावात् शशाङ्कश्च तत्सहायः सगणः सोडुगणः स्थगित इत्यर्थोच्छिशुमारस्यापि तयात्वं सूचितम्। एवञ्चाधिदैवस्य चन्द्रमसोऽपि विस्मितत्वेन मनसो विस्मयस्तेन च कुतो मनोजावकाश इति ध्वनितम् ॥ १९ ॥ तदेवं कामविजयेन शुद्धप्रेमात्मिका क्रीडा दर्शिता इदानीं दाम्पत्यभावानां मयेमा रंस्यथा क्षपा इत्यादिना दत्तवराणां वाञ्छापूरणमपि प्रकाशभेदेन सम्पादितवानित्याह। कृत्वेति। आत्मानमात्मनः प्रकाशभेदमित्यर्थः। "चित्रं वतैतदेकेन वपुषा युगपत् पृथक्। गृहेषु द्व्यष्टसातस्रं स्त्रिय एकउदावह"दितिन्यायात्तल्लक्षणंच अनेकत्र प्रकटनारूपस्यैकस्येकदा सर्वथा तत्स्वरूपैव सप्रकाश इतीर्यते इति अथवा नचान्तर्न बहिर्यस्येत्यादिना मध्यमत्वेऽपि तच्छ्रीविग्रहस्यैव विभुत्वेनात्मानं स्वस्वरूपमेवेत्यर्थः। यद्वा प्रकाशभेदस्याभेदत्वज्ञापनायात्मपदेनाक्तिः तदुक्तं लघुभागवतामृते प्रकाशस्तु न भेदेषु गण्यते स हिनो पृथगिति व्रजयोषितः व्रजसम्बन्धिन्यो नन्दव्रजकुमारिकात्वेन प्रसिद्धाः पाठान्तरे गोपजातयो गोप्य इत्यर्थः। यावतीर्यत्संख्याकाः तावन्तं कृत्वात्मानमित्यर्थः। स प्रेमपरवान् भगवान् समग्रया श्रिया नित्ययुक्तः एवञ्च ता अपि तस्या एव प्रकाशभेदा इति ध्वनितं तासु कामलीला च प्रेमविवर्तरूपैव प्रेमैव गोपरामाणां काम इत्यगमत्प्रथा"मिति तन्त्रोक्तेः तादृश्यामपि क्रीडायां तदेकपरतामाह। आत्माराम इति। आत्मनि तस्यामेव रामो रमणं यस्य सोऽपि लीलया श्रृङ्गाररसखेलया तत्तन्नायिकारूपेण तथैव प्रकटितया रेमे तदुक्तमुज्ज्वले—

यथा स्युर्नायकावस्था निखिला एव माधवे। तथैव नायिकावस्था राधायां प्रायशो मता इति ॥

रमणं चेदं दृथक् पृथक् कुञ्ज ष्विति संक्षेपः ॥ २० ॥

श्रीरामनारायणकृता भावभावविभाविका

तासां देहाद्यननुसन्धानं कैमुत्यन्यायेन दृढीकतुं प्रेम प्रेमप्रमदमदिरोदधेरानभः प्रलयकारित्वेनान्तरिक्षदिवौकसां दशामाह। कृष्णविक्रीडितमिति। अत्र शशाङ्कश्चेति चकारानुकर्षणेन विस्मितत्वमोहितत्कामार्दितत्वानां सर्वत्रवचनपरिणामेन विनियोगो ज्ञेयः कृष्णस्य "रसो वै सः कृषिभूर्वाचक" इत्यादि श्रुतिस्मृतिवाक्यैर्नित्यपरिपूर्णानन्दाब्धेर्विशेषेण सर्वमतिप्रलयकारिरतिरङ्गतरङ्गैः क्रीडितं क्षणे क्षणे विशिष्टं विलक्षणं क्रीडितं वीक्ष्य विशेषेण तत्परतया साक्षात्कृत्वा खेचराश्च तत् स्त्रियश्च सगणो नक्षत्रगणसतारान्वितः शशाङ्कश्च उपलक्षणमेतत् शिशुमारस्यापि अखिलकलादिगुणैस्तादृशीनां रासादिक्रीडानां पूर्वदर्शनाभावात् अवितर्क्यासु

तासु मतिवितर्काप्रवेशात्प्रथमं विस्मिताः किमिदमतिचित्रमिति ततो मुमुहुः विगतदेहाद्यनुसंधाना जातास्ततो मोहेन स्वात्मनः कृष्णक्रीडायोग्यत्वायोग्यत्वानुसंधानाभावात् कामार्दिताश्चाभवन् । ननु स्वपतिसमीपस्थखेचरस्त्रीणां कथं कृष्णविक्रीडितदर्शने कामार्दितत्वमिति चेन्न । मोहितत्वनिर्देशेन तदननुसंधानेन समाहितत्वात् । ननु स्त्रीणां तथा दण्डकारण्यमुनीनामिव भावनया तदसम्भवाभावात् ननु अन्येषां सुराणां तत्सम्भवेऽपि चन्द्रस्य तत्कुलवृद्धस्य कथं तथात्वमितिचेन्न—

नूनं मायास्तु मे भर्तुर्नान्या मेऽपि विमोहिनीति ।

सङ्कर्षणेनाप्यार्येण भ्रातुरित्यनुक्त्वा भर्तुरिति कथनाल्लोकदृष्ट्या संबन्धान्तरप्रतीतावपि परमपुरुषे तस्मिन् सखीभावातिरिक्तसंबन्धान्तराभावात् तथा च तदा सर्वे भगणाः कृष्णरासदर्शनोत्साहोद्भूतप्रभया पूर्णशशाङ्कसन्निभा गतिभङ्गात् ध्रुवरूपाश्चभवन्नैतच्चित्रं यत्स्मरणमात्रेणाध्रुवमर्त्यानां ध्रुवत्वं तद्दर्शनप्राप्तावमर्त्यानां ध्रुवत्वे शङ्कानास्पदत्वात् अनेनैव सगणः शशाङ्कोपलक्षितकालचक्रस्य विस्मितत्वेन गतिविस्मृत्या निशानां कल्पसमानत्वं व्याख्यातं च स्वामिचरणैः शशाङ्केन विस्मितेन गतौ विस्मृतायां ततः प्राक्तनाः सर्वे ग्रहास्तथैव तस्थुः ततश्चातिदीर्घासु रात्रिषु यथासुखं विजह्रुरिति तोषणीकारैश्च अत एवाग्रे वक्ष्यमाणस्य ब्रह्मरात्र इत्यस्यार्थं ब्रह्मणश्चतुर्य्युगसहस्रपरिमितायां रात्रौ गतायामिति केचिद्व्याचक्षते सम्भवेदेव भगवच्छक्त्याशेषविरुद्धस्य समाधेयत्वादिति वाक्येन सम्मतं स्वामिव्याख्यायां दीर्घासु रात्रिष्विति बहुवचनं तु भगवानपि ता रात्रीरित्यत्रोक्तस्य सर्वा निशा इत्यत्र वक्ष्यमाणस्य च बहुवचनस्यानुसारेणेति बोध्यम ॥ १९ ॥ एवं रासविहारं निरूप्य सङ्क्षेपेणैव रतिविहारं दर्शयति । गोपयोषित इति गोपजातीया योषितो नतु गोपानां योषित इति तैस्तत्संबन्धाभावात् लोकप्रतीत्यनुवादेन दोषाभावात्तथा भवतु वा । यद्वा गोपरूपप्रादुर्भूतस्य स्वात्मन एव योषित इति । यद्वा गुपू रक्षणे इत्यस्मात्सर्वविश्वरक्षकस्य विष्णोः स्वात्मन एव योषित इति तथा च रक्षणसमर्थस्य योषितां तेन सर्वभावरक्षणमेव योग्यं नतु तन्मनोरथभङ्ग इति ध्वनिः । यद्वा गाः स्वसर्वेन्द्रियाणि घोरविरहतापसम्भावितमरणेऽपि कृष्ण रसास्वादायैव तद्गुणगानाद्यमृतेन पान्तीति तथा योषितस्तथा च तथा तप्ततपसां स्वरसास्वादसकामतयैव रक्षितस्वसर्वेन्द्रियाणामन्यविषयप्रवृत्तिभ्योऽपि रक्षितस्वसवन्द्रियाणां सर्वेन्द्रियरसदानस्यावश्यकत्वं द्योतितम् । यद्वा गाः कृष्णचन्द्ररश्मीन् मधुस्मितरूपानधरामृतपूरितान् शुक्लपक्षे चन्द्ररश्मीन् सुरा इव पिबन्तीति तथाभूता योषितः । यद्वा गोपयोषित इति कामकामगदुर्गतया कामगोपनशीला योषितस्तथा च तद्विजयोद्यतस्य तत्सर्वदुर्गवशीकाराय तावदाविर्भावस्यावश्यकत्वाद्यावत्यस्तास्तावन्तं तत्संख्याकप्रकाशवन्तमात्मानं कृत्वा "सर्वतः पाणिपादं त"दित्यादि स्मृत्या "विश्वतश्चक्षु"रित्यादि श्रुत्या च विभुसर्वाङ्गस्याखण्डस्य प्रकाशभेदं विना विभागानुपपत्तेः युक्तश्चैतत् । अत सातत्यगमने इत्यस्मात्सततसर्वगमनशीलस्य गम्यागम्यविभागशून्यस्य सततसर्वगमनाय तावत्त्वं तत्र सामर्थ्यं द्योतयन् विशेषयति । स भगवानिति । यतः स ताभी रसास्वादायाभिलषितो भगवान् भगमैश्वर्यं तद्वान् ईश्वरः कर्तुमकर्तुमन्यथा कर्तुं च समर्थः । यद्वा भगवानित्युक्त्या तस्यैव भगवत्त्वेनान्यस्य कस्यापि भगवत्त्वाभावेन सर्वभगस्वामिनस्तद्रमणे दोषाभावसूचनं किञ्च यः स्वयं भगवत्त्वेन स्वात्मारामोऽपि स्वात्मनि रमणशीलस्तस्यान्यासु रमणे न शङ्कागन्धोऽपि । यद्वा तस्य सार्वात्म्याद्रमणास्पदस्य सुखस्य सर्वत्र तदंशत्वाच्च रमणेऽप्यात्मारामत्वाक्षतेः । अत एवाह ताभिर्निमित्तभूताभिः स्वात्मन्येव रेमे तासामपि स्वात्मरूपत्वेन तासु रमणस्यापि स्वात्मरमणत्वमेव किमर्थं तादृग्रमणं तदाह । लीलया लीलानिमित्तेन स्मरतामुद्धारकलीलार्थं तत्र रेम इत्यत्र पूर्वमपि रासोत्सवे रमणस्यैव निरूपितत्वादत्र रमणे तद्वैलक्षण्यप्रतीत्याग्रे च तासामतिविहारेणेत्यत्र सुरतान्तर्भावप्रतीत्या मुख्यं रतिरमणमेवावगम्यते तत्रायं क्रमः आदौ रासविलासस्तु मृदुकामसंग्रामस्तत्र भगवान्मदनमदभङ्गं कृत्वा तदसंख्यातकामगदुर्गानारुह्य रतिरणोद्वशीकाराय तद्दुर्गसंख्याकात्मत्वाविष्कारेण तदारम्भेऽपि भ्रूयुगधनुर्विस्फूर्य्य तत्रातिचित्रसूर्य्यकरसदृशासंख्यालक्ष्यगतिलक्ष्यहृन्मर्मचिह्नवेजकायाङ्गीकरणापाङ्गाशुगामौर्वीघमोचकदृक्पद्मशरौ संयोज्य परस्परं तच्छरवर्षोद्धवर्षेऽपि जयपराजयावनवगम्य ततोऽप्यविरम्यैव रम्यबाहुयुद्धायाभिगम्य वज्रमणिनखभल्लकभालमृद्वङ्गुलिकुसुमकुसुमवाणवाणान्वितविशालमृदुबाहुकुसुमधनुर्युगधरोमुकामालरोमावलिगङ्गायमुनारूपजलदुर्गदुर्गमतद्दुर्गोच्चाश्रृङ्गकुचयुगयोश्चित्रं विचित्रसुखकरकरनखशरघातं विधाय तं दुर्गश्रृङ्गकुचकरगतकरणोद्भूताद्भुतरणात्साहः स्वयं मन्दरगिरिनिभमदनसुन्दरमन्दिरगोपदारोदारवपूंष्यधिरुह्य बहुतरबाहुयुद्धं प्रवर्त्य तदङ्गव्यूहसमूहं स्वाङ्गैरुपमर्द्य बहिरन्तस्तद्धृदयसिंहासनाधिरूढः प्रवर्तितकिङ्किणीनूपुरादिजयवाद्यध्वनिविशेषोऽनुपमाधरसुधासीधुपेपीयमानोऽच्युतः कामं निकामं विजित्य स्वभृत्यांस्तद्भयादमूमुचदिति तत् स्मरतां स्वत एव कामोपरमान्न कामभयशङ्कापीति भावः ॥ २० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

साक्षाद्भगवता विक्रीडतीनां तासां व्याकुलेन्द्रियत्वे किंचित्रं देवाद्यङ्गनानां तु दर्शनमात्रादेव व्याकुलता संजातेत्याशयेनाह । कृष्णस्य सदानन्दरूपस्य परमात्मनः विक्रीडितमलौकिकं क्रीडनं वीक्ष्य विशेषेणोपलभ्य कामार्दिताः सत्यो देवस्त्रियो मुमुहुः विकलचित्ताः बभूवुः खेचरस्त्रिय इत्यनेन तत्पतीनां पुरुषत्वाद्गुह्यलीलादर्शनाभावोयोगमायया सम्पादित इतिसूचितं तत्सर्वमवलोक्य शशाङ्कश्चन्द्रः सगणः ज्योतिश्चक्रेण सर्वेण सहितः विस्मितश्चकितहृदयोऽभवत् अनेन चन्द्रादिग्रहाणां गतिविस्मृतत्वात्कालदैर्ध्यं सूचितं तत्रापि योगमायया सर्वापेक्षया यामचतुष्टयात्मिका यथा रजनी तस्यामेव क्रीडानुकूलं दैर्ध्यं संजातमिति

द्रष्टव्यम् ॥ १९ ॥ अथ रासानन्तरं विश्रम्य रहस्यकृतां लीलामाह । कृत्वेति द्वाभ्याम् । यावत्यो गोपाङ्गनास्तावन्तमात्मानं प्रकटीकृत्य ताभिः सह भगवान् शृङ्गाररसलीलया रेमे रमणं चेदं पृथक् कुञ्जेषु तत्रैव वा योगमायया विरचितेषु परस्परमदृश्येषु तदनुकूलप्रदेशेष्विति ज्ञेयम् । अनेन "कात्यायनि महामाये महायोगिन्यधीश्वरि ! । नन्दगोपसुतं देवि पतिं मे कुरु ते नमः" इति प्रत्येकं तासां प्रार्थना "यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपा" इति भगवता दत्तस्य वरस्य च सार्थकता बोधिता २० ॥

रास–रहस्यम्

र० टी०—"पराञ्चिखानि व्यतृणच्छ्रयम्भुः तस्मात्पराङ् पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुरमृतत्त्वमिच्छन् ॥" इति श्रुत्या खेचरस्त्रियः खे इन्द्रियेषु चरणं गमनमेवशील यासा ताः बहिरिन्द्रियवृत्तयः, कृष्णविक्रीडितं कृष्णस्य परमात्मनः, विक्रीडितं विशेषेण क्रीडितं ऐकात्म्यभावलक्षणं, वीक्ष्य दृष्ट्वा, मुमुहुः विकलचित्ता बभूवुः अर्थात् ता अपि पराग् दर्शनं त्यक्त्वा अन्तरात्मान द्रष्टु तदभिमुख्यः बभूवुः । कामार्दिता परमात्मस्वरूपप्राप्त्यभिलाषया अर्दिताः पीडिता च सत्यः, सगणशशांकश्च सतारकचन्द्रश्च तदुपलक्षितः सर्वेऽपि ज्योतिश्चक्रः, अर्थात् सेन्द्रियमनोऽधिष्ठितदेवतावर्गः, "तस्य भासा सर्वमिदं विभाति ।" इति श्रुत्या परमात्मज्योतिषं दृष्ट्वा स्वस्वज्योतिषमतिशयेन न्यूनतामनुभूय, विस्मितोऽभवत् । के वयं प्रचण्डभास्करसमीपे क्षुद्रदीपकवदिति चकितोऽभवत् ॥ १९ ॥ सर्वशास्त्रप्रसिद्धः भगवान् परमात्मा यावतीर्गोपयोषितः यावत्यः "गुपु रक्षणे" इत्यस्मात् आत्माकारेण रक्षिताः आत्माकारवृत्तयः, तावन्तमात्मानं कृत्वा अर्थात् स्वात्मत्वेन गृहीत्वा "विश्वतश्चक्षुरुतः विश्वतोमुखो विश्वतः बाहुरुतः विश्वतस्पात् ।" "सहस्रशीर्षाः पुरुषः ।" "सर्वतः पाणिपादं तत् ।" इति श्रुतिस्मृतीभ्यां आत्मारामोऽपि "अत सातत्य गमने" इत्यस्मात् "अपाणि पादो जवनो ग्रहीता" इति वेदः, सततं सर्वत्रगमनशीलस्य गम्यागम्यविभागरहितस्य सततं सर्वत्रगमनाय नावत्यकरणे सामर्थ्यं द्योतयन् तस्य सर्वात्मत्वरूपेण रमणास्पदस्य सुखस्वरूपस्य सर्वत्र तदंशत्वाच्च रमणेऽपि आत्मारामत्वाक्षतेः, अत एवाह ताभिः निमित्तभूताभिरात्माकारवृत्तिभिः लीलया अनायासेनैव, रेमे रमयाञ्चकार अर्थात् एकीभावं यातः इति भावः ॥ २० ॥

गूढार्थदीपिनी

खेचराः देवादयः । कामार्दितः स्त्रीभावं प्राप्तः ॥ १९ ॥ यावतीः यावत्यः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

व्रजसुन्दरीभिः सह भगवतो विक्रीडितं दृष्ट्वा खेचराणां स्त्रियः मुमुहुः चन्द्रश्च सगणो विस्मितोऽभवत् ॥ १९ ॥ यावतीः यावत्यः तावन्तमात्मानं कृत्वा रेमे "नन्दगोपसुतं देवि ! पतिं मे कुरु" इत्येकवचनेन ताभिः प्रत्येकं प्रार्थनात् ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कृष्णविक्रीडितं तत्क्रीड़ां च वीक्ष्य सुरस्त्रियः कामार्दिता व्यमुह्यन्त सगणश्चन्द्रश्च विस्मितोऽभवत् । नास्मदादिसाहितीसहितो मन्मथो वा धत्तेऽमुं तथाऽपीयं कथेति विस्मितोऽभवत्सोम इति भावः ॥ १९ ॥ गोपयोषितो यावतीर्यावत्यस्तावन्तं तत्सङ्ख्यमात्मानं कृत्वाऽऽत्मारामोऽपि लीलया ताभिः सह रराम । पदव्यत्यासेन तत्सुखार्थमेव रमणमिति भावः सूच्यते ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं समुदायलीलां निरूप्य तस्याः परिज्ञानं केषामपि न जातमिति वक्तुं देवस्त्रीणां चन्द्रस्य च विस्मयमाह । कृष्णेति । न हि कस्याश्चित्पतिः परमानन्दो भवति नहि निरानन्देनानन्दो दातुं शक्यते "एष ह्येवानन्दयाती" तिश्रुतेः एवकारेणेतरनिषेधश्च तत्रापि विशेषेण क्रीडा नहि जीवो विशेषक्रीड़ां जानाति खेचराणां स्त्रिय इति तासां सर्वदर्शनार्थं भगवद्दत्तो वरो निरूपितः स्त्रीणाञ्च दर्शनं न दोषाय तासां मोह एवोत्पन्नः नतु परिज्ञानं रसो वा लौकिकोऽपि चन्द्रो दृष्टवान् सोमात्मकत्वात् "देहेऽस्य सोमः प्रथम" इति श्रुतेश्च साधारण्यश्च स्त्रियः तथापि तस्य दर्शनं तस्यैव हितकारि न भवतीति निरूपयितुमाह । शशाङ्क इति । सहि कलङ्की आनन्दमयोऽपि सगणो नक्षत्रसहितः तेनोद्दीपनेऽपि न तस्यान्यासु चित्तसम्भवः चकारात्सोऽपि मुमुहे यथा पुनरेता मोहनानन्तरं पुनः पुनर्दर्शने उद्बुद्धकामा जाताः गत्वास्माभिरपि कामरूपतया क्रीडाकर्त्तव्येति कामार्दिता जाताः तथा चन्द्रोऽपि भगवति निवेशनार्थं यत्नं कृतवान्, अतः कामार्दितो जातः अनेनाग्रे निसर्गात् सुखमिति पक्षे उपपात्तिरुक्ता अस्यैव चन्द्रस्य अशास्ततोनिवर्त्तिष्यन्त इति अन्यथा "सहस्रदर्शनान्मुक्ति" रित्येतत्सूत्रं विरुध्येत् सहस्रवर्णाभावात् । किञ्च सगणः स्वस्त्रीसहितोऽपि विस्मितो जातः विस्मयरस एवोत्पन्नः नान्यो रस इति ॥ १९ ॥ एवमाधिभौतिकानामाधिदैविकस्य च भगवदुत्पादितरसाभिनिवेशमुक्त्वा "नन्दगोपसुतं देवि पतिं मे कुर्विति" प्रत्येकं प्रार्थनया व्रतं कृतमिति प्रत्येकं रेम इत्याह । कृत्वेति गोपजातीया योषितो यावत्यः तावन्तमात्मानं कृत्वा तत्र तत्र मायोद्घाटनेन तथा तथा प्रकटो भवति एतन्महासौरम् एव करणे सामर्थ्यं यतः स सभगवानिति स इति

तदर्थमेवावतीर्णः । अत्र तासां व्रतार्थं ताभिः सहैव रेमे नत्वात्मारामता पूर्ववत् इममर्थमाह । आत्मारामोऽपीति । नत्वात्माराम एव चन्द्रप्रवेशान्न रमणं सम्भवति अस्यामपि दशायामात्मारामत्वमेव अधिकं तत्रानुप्रविष्टं नतु तद्धानिरिति तत्रापि आत्मरमण एव मुख्यतेत्याह । लीलयेति । यथा महानपि लीलया विसदृशं करोति स्वयं पदातिरिव मृगयायां गच्छति तथा अन्या अपि अवतारलीलाः तथैतामपि कृतवानित्यर्थः ॥ २० ॥

श्रीसुबोधिनी–सारः

कृष्णस्य विक्रीडितं रमणं वीक्ष्य दृष्ट्वा खेचराणां देवादीनां स्त्रियः कामेनार्दिताः पीडिता मोहं प्रापुः गणैः सहितः शशाङ्कश्चन्द्रो विस्मतोऽभवत् विस्मृत इति पाठे विगता स्मृतिश्चलनात्मिका यस्येत्यर्थः । तद्गतिष्टम्भेनान्येषामपि निरोधः सूचितः । तेन बहुरात्रिवदेकायां दीर्घरात्र्यां रेमे इति तत्त्वम् "मयेमा रंस्यथ क्षपाः" इति बहुवचनमप्यत्रार्थे एव पर्यवसितमिति शिष्टा महाजनप्रसिद्धिः ॥ १९ ॥ यावतीर्यावत्यो गोपानां योषितः स्त्रियः तावन्तमात्मानं कृत्वाऽऽत्मारामोऽपि स भगवान् लीलया ताभिः सह रेमे ॥ २० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कामार्दिताः शशाङ्कश्चेत्यत्र । एकस्मिन् वाक्य उक्तयावद्धर्मविशिष्टेन येन समं यस्योक्तस्यानुक्तस्योभयोर्वा समुच्चयस्तस्य तयोर्वा तावद्धर्मवत्त्वमावश्यकमिति चन्द्रेपि कामार्दितत्वं चकारेण बोध्यते । तत्रैतस्मिन्वाक्येऽनुक्तोऽकलङ्कश्चन्द्रोऽप्यनेन समुच्चीयत इत्याहुः **आनन्दमयोऽपीति** । अग्रे लौकिकेन्दोर्निरूपणम् । उक्तसमुच्चितमर्थमाहुः **चकारावित्यारभ्य तथा चन्द्रोऽपीत्यन्तेन** । **भगवति निवेशनार्थमित्यारभ्य जात** इत्यन्तेनालौकिकस्येन्दोः कथनम् । अन्यथा तथा चन्द्रोपीत्यतिदेशेनैव कामार्दितत्वं प्राप्तमेवेति पुनर्नोक्तं स्यात् । अत्रैवं निरूपणे नियामकमाहुः **अनेनाग्र** इत्यादिना । अत्रेदमाकूतम् । एवं परिष्वङ्गे'त्यादिना रसशास्त्रोक्तरीत्या रमणोक्त्या सहस्रवर्णादिकमपि प्राप्तमेव भवति, तस्य तावद्रूपत्वात्, परन्त्वखण्डरूपे भगवति स्वबुद्ध्या तन्नोपपादयितुं शक्यत इति गोप्यत्वाच्च प्रकटं न वक्तुं शक्यमित्यनेन प्रकारेण शुकदेवैर्ज्ञापितमित्याचार्यैस्तथाऽगादि । सोमस्य रेतोरूपत्वं श्रुतिसिद्धमिति नानुपपत्तिः काचिदंशनिवर्तन इति दिक् । ननु स्वरूपस्य रसात्मकत्वेनैव सर्वमुपपत्स्यत इति किमेतत्प्रवेशेनेति चेत् । मैवम् । अस्य रेतोरूपत्वात्तस्य चाध्यात्मिकरूपत्वेन स्वरूपान्तर्गतत्वात्तेन रूपेण प्रवेशस्यावश्यकत्वात् । न च तस्य तत्रैव स्थितेर्नेदं साधीय इति वाच्यम्, प्रकारबोधनपरत्वादस्या लीलायाः । अन्यथा तमिस्रायामियं लीला न स्यादिति ॥ १९ ॥ **आत्मारामोऽपि लीलयेत्यत्र**, **चन्द्रप्रवेशादिति** । रेतःपोषस्य भावपोषकत्वादिति भावः । **अस्यामपि दशायामिति** । प्रमाणसिद्धत्वेनोभयोरत्रविरोधाभावादिति भावः । एतद्विद्वन्मण्डने प्रपञ्चितमस्माभिः । वस्तुतस्तु लीला स्वरूपात्मिकेति तन्मध्यपातिन्योऽपि तथैवेत्यात्मरमणमेवात्रापीत्याशयेनाहुः **तत्रापि आत्मरमण एवेति** । अत एवाग्रे वक्ष्यति 'गोपीनां तत्पतीनां चे'ति श्लोकम् । लीलापदध्वनितमर्थमाहुः, **यथा महानपीत्यादिना** । ईश्वरोऽपि सन्नायिकाप्राधान्येन स्वस्य गौणभावेन रेमे, तस्य रसस्य तथात्वादित्यर्थः २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

न केवलं व्रजस्त्रिय एव मुमुहुः, किन्तु एवं कृष्णविक्रीडितं वीक्ष्य कामेनार्दिताः पीडिताः खेचराणां देवानां स्त्रियोऽपि मुमुहुः । तथा सगणः शुक्राङ्गारकगुर्वादिगणसहितः शशाङ्कश्चन्द्रश्च तद्वीक्ष्य विस्मितोऽभवत् आश्चर्यं प्राप । अनेन विस्मितेन शशाङ्केन स्वगतौ विस्मृतायां ततः प्राक्तनाः सर्वेऽपि ग्रहास्तत्रतत्रैव स्थिताः, ततश्चातिदीर्घासु रात्रिषु कथासुखं विजह्नुरिति सूचितम् ॥ १९ ॥ एवं समुदितानां विहारमुक्त्वा पृथग्विहारमाह–कृत्वेति । "कात्यायनि महामाये महायोगिन्यधीश्वरि ॥ नन्दगोपसुतं देवि पतिं मे कुरु ते नमः" इति प्रत्येकं ताभिः प्रार्थनात् भगवतापि "याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः" इति तथैव प्रतिश्रुतत्वात् यावतीः यावत्यो गोपयोषितः लीलया अनायासेनैवात्मानं तावन्तं तावत्सङ्ख्याकं कृत्वा सः सकलशास्त्रतात्पर्यगोचरः सर्वाराध्यो भगवान् ऐश्वर्यादिगुणपरिपूर्णः, अत एवात्मारामोऽपि तासां मनोरथानुसारेण कृपयैव प्रत्येकं ताभिः सह रेमे इत्यन्वयः ॥ २० ॥

अन्वितार्थप्रकाशिका

कृष्णेति । न केवलं गोप्यः किन्तु एवं कृष्णस्य विक्रीडितं वीक्ष्य कामेनार्दिताः खेचराणां देवानां स्त्रियोऽपि मुमुहुः । सगणः तारासहितः शशाङ्कश्च विस्मितोऽभवत् आश्चर्यं प्राप । कामार्दित इति पाठे शशाङ्कोऽपि स्त्रीभावं प्राप्तः कृष्णविषयककामार्दित इत्यर्थः । तारागणसहितस्य शशाङ्कस्य गतिविस्मरणाद्रात्रेरतिदैर्घ्यं व्यज्यते ॥ १९ ॥ कृत्वेति ॥ यावतीर्यावत्यो गोपयोषितः । पूर्वसवर्णदीर्घ आर्षः । लीलया अनायासेनैवात्मानं तावन्तं तावत्संख्याकं कृत्वा स शास्त्रप्रसिद्धो भगवान् आत्मारामोऽपि प्रत्येकं ताभिः सह रेमे । रमणं चेदं पृथक् कुञ्जादिषु पूर्ववज्ज्ञेयम् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

खेचरस्त्रियो देव्यः शशाङ्कश्चन्द्रः ॥ १९ ॥ तावन्त आत्मानन्तावतीः स्वमूर्त्तीः कृत्वा आत्मनि अनवधिकातिशयानन्दमयस्वस्वरूपे आरामः परमसुखं यस्य स आत्मारामोऽपि ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न केवलं ता एवाकुलेन्द्रियाः किं तु पश्यन्त्यो देवानां स्त्रियोऽपि तथाभूता जाता इत्याह ॥ कृष्णेति ॥ कृष्णविक्रीडितं वीक्ष्य, खेचरस्त्रियो देवानामङ्गनाः कामार्दिताः सत्यः, मुमुहुः । किं च शशाङ्कश्च चन्द्रोऽपि, सगणः शुक्राङ्गारकगुर्वादिगणसहितः, विस्मितः, अभवत् बभूव । अनेनतत् । सूचितम् । सशिशुमारेण विस्मितेन शशाङ्केन स्वगतौ विस्मृतायामितरेऽपि ग्रहाः स्वस्वगतिं विस्मृत्य तत्र तत्रैव तस्थुरतो रात्रिरपि दीर्घा बभूवेति ॥ १९ ॥ कथमेकोऽनेकाभिर्युगपद्रेमे इत्यत आह ॥ कृत्वेति ॥ गोपयोषितः यावतीर्यावत्यः, तावन्तं आत्मानं कृत्वा, ताभिः सह, आत्मारामोऽपि, सः भगवान् कृष्णः, लीलया रेमे । अध्ययनेन वसतीतिवद्धेतौ तृतीया । अयं भावः । 'कात्यायनि महामाये महायोगिन्यधीश्वरि । नन्दगोपसुतं देवि पतिं मे कुरु ते नमः' इति प्रत्येकं ताभिः प्रार्थनात् । भगवतापि 'यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः' इति तथैव प्रतिश्रुतत्वाच्च तावन्तमात्मानं कृत्वा रेमे इति ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कृष्णविक्रीडितमिति १०.३३.१९.

इदं सुखं हि सुलभं कृष्णपन्नखसेविनाम् । युक्तमासीत् तदप्राप्त्या मोहस्तत्र खेवासिनाम् ॥ ८५ ॥
स्वस्था अपीशचरितं समवेक्ष्य देव्योऽस्वस्था बभूवुरबलास्त्वबला नखस्थाः ।
जाताः सुखस्थितिजुषोऽद्भुतमन्यदत्रानन्दैकहेतुरभवत् स हि नन्दपुत्रः ॥ ८६ ॥
ऐकान्तिकीं मम पितुर्विहृतिं विलज्जाः पश्यन्त्यलं कथमहो विबुधस्त्रियोऽमूः ।
इत्यन्तरोदितरुषा मदनेन गाढं ता अर्दिता निजशरैरिति युक्तमेव ॥ ८७ ॥
अम्बरमालम्ब्यैवानुभूत—सुरतोत्सवो विधुर्युक्तम् । गलिताम्बरयुवतिकृतं विलोक्य तं विस्मिता यदभूत् ॥ ८८ ॥
गोकुलरमणीभिः सह हरिं केलिं वीक्ष्य विगतभयशङ्काम् । शशमण्डनस्य चित्तं कथमिव भविता न विस्मयोल्लासि ॥ ८९ ॥
ताराकामुकमानसे नहि मया यत्नः कृतोऽर्वाङ् महानस्यामस्त्वनिशं प्रजारहिततेत्यासीत्तु वैफल्यभाक् ।
श्रीकृष्णोऽयममोघवीर्यचरितः सम्पूर्णकामोऽपि तां सम्पाद्यासु भुनक्ति निर्भयमिति ग्लौ श्चित्रदृग् विस्मितः ॥ ९० ॥
नाहं नैते बुधाद्याः सुरगुरुकवयो भास्कराऽहस्करोऽपि कृत्स्नं यस्यैकपादं जगति कलयितुं नालमीशाः कुतोऽन्ये ।
स श्रीशस्तूर्णमाभिर्लघुकरयुगलेनावृतः सर्वतोऽपीत्यब्जः साश्चर्यचित्तः प्रतिकलमभवद् वीक्ष्येति युक्तम् ॥ ९१ ॥
अल्पीयसि वयस्येष मद्वंश्योऽहमिवार्भकः । सुरतानन्ददकरोऽभूदितीन्दुः स विस्मितः ॥ ९२ ॥
पुंसस्त्रियाश्चेतसि चित्तजाङ्कुरो मद्दर्शनादुद्भवति क्षपान्वये ।
जातोऽहमेवाद्य तु तद्विलोकनात् सकामचेता इति विस्मितो विधुः ॥ ९३ ॥
यदि स्वसृसुतोत्सवासहनवर्तनो मातुलः तदार्तिकरणोद्यतो भवति भागिनेयोऽन्ततः ।
इति स्वपितृकंसयोश्चरितमुक्तसम्बन्धिनोर्निरीक्ष्य मदनोऽप्यसावुचितमास चन्द्रार्तिदः ॥ ९४ ॥

कृत्वा तावन्तमिति : १०.३३.२०.

अनेकदेहसंयोगः स्फूर्तिर्वाऽनेकवृत्तिषु । युगपद्योगिनः स्पष्टस्तत्र योगीश्वरेऽद्भुतम् ॥ ९५ ॥
अस्मिन्नद्वैतरूपोऽप्यहमनुकलयाम्यात्ममूर्तीः सकामानानामद्भक्तिभाजां हृदयसमुदितानन्तसङ्कल्पसिद्ध्यै ।
एवं सम्बोधयल्लँक्ष्मीपतिरतुलकृपो भक्तभव्यैकवृत्तिर्मन्ये नानास्वरूपस्तदभिलषितसंपूर्तये संबभूव ॥ ९६ ॥
एकोऽप्यनेक इव वृत्तिषु यावतीषु स्वैरं वसामि विहरामि सदा सकामः ।
तासां स्वमात्रविषयाकलनस्पृहाणामज्ञातपूर्व इति किन्तु विशेष एषः ॥ ९७ ॥
यावन्तश्चोपाधिभेदा जनेषु तावत्संख्या बिम्बभेदाः प्रसिद्धाः । युक्तं तस्मादगोपिकास्वीश एष नैव न्यूनो नातिरिक्तोऽथवासीत् ॥९८॥
मन्मात्रोदितकामवृत्तिषु यदि स्यामासु योषस्वहं क्रीडावृत्तिषु कामतो विषमदृक् तद्दह्यमाना भवेत् ।
कामस्तेन भवेन्न चेप्सितममूषां तेन भक्तेष्टदेत्याख्या मे विफला भवेदिति विभुस्तास्वास तुल्येक्षणः ॥ ९९ ॥
सममदनुगतानां तुल्यशक्तिव्रतानामिह विषमफलाप्तिर्नोचिता जात्वमूषाम् ।
विरसकृदपि मा भूद्यात्र सापत्नभावो युगपद—भवदीशो-ऽनन्तमूर्तिस्तदेति ॥ १०० ॥

कृष्णप्रिया

इस प्रकार का समुदाय में श्रीकृष्णचन्द्रजी रास क्रीडन का अवलोकन से देवस्त्रियां कामातुर हो गई और नक्षत्र मण्डल सहित सशाङ्कचन्द्र आश्चर्य चकित हो गया ॥ १९ ॥ कात्यायनी व्रतनिष्ठ जितनी गोपियाँ थी उतने भगवान ने अपने स्वरूप धारण किए पुनः आत्माराम होते हुए लीला करते उनसे रमण किया तब भी आप आत्माराम ही रहे ॥ २० ॥

[1]तासामतिविहारेण श्रान्तानां वदनानि सः । प्रामृजत् करुणः प्रेम्णा शन्तमेनाङ्ग पाणिना ॥ २१ ॥
गोप्यः स्फुरत्पुरटकुण्डलकुन्तलत्विड्गण्डश्रिया [3]सुधितहासनिरीक्षणेन ।
मानं दधत्य ऋषभस्य जगुः कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः ॥ २२ ॥

कर्दमक्षमा

अन्वयः—हे अङ्ग ! अतिविहारेण, श्रान्तानाम्, तासाम्, वदनानि, करुणः, सः (कृष्णः) शन्तमेन, पाणिना, प्रामृजत् ॥ २१ ॥ तत्, कररुहस्पर्शप्रमोदाः, स्फुरत्पुरटकुण्डलकुन्तलत्विड्गण्डश्रिया, सुधितहासनिरीक्षणेन, ऋषभस्य, (कृष्णस्य) मानम्, दधत्यः, गोप्यः, (तस्य) पुण्यानि, कृतानि, जग्मुः ॥ २२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृपातिशयमाह । तासामिति ॥ २ ॥ ततोऽतिहृष्टानां गोपीनां चरितमाह । गोप्य इति । स्फुरतां पुरटकुण्डलानां कुन्तलानां च त्विषा गण्डेषु या श्रीस्तया सुधितेनामृतायितेन हाससहितेन निरीक्षणेन च ऋषभस्य पत्युः कृष्णस्य मानं दधत्यः पूजां कुर्वत्यस्तस्य कृतानि कर्माणि जगुः । तस्य कररुहैर्नखैः स्पर्शेन प्रमोदो यासां ताः ॥ २२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तासाम् गोपीनाम् । वदनानि मुखानि । प्रामृजत् समार्जितवान् । अङ्गेति सम्बुद्धिः शन्तमेन स्पर्शनादानन्दजनकेन ॥ तासां रतिविहारेण 'तासामतिविहारेण' इति च पाठः । श्रान्तानामिति—तासां रतिश्रान्तिमालक्ष्य करुणः रमणाद्विरतोऽभूदित्यर्थः । शन्तमेन सुखमयेन । प्रादुजदित्युपलक्षणम् बीजनानुलेपनप्रत्यंगप्रसाधनबीटिकाप्रदानान्यपि चक्रे ॥ २१ ॥ ततः भगवत्कृतस्वेद-मार्जनाद्यनन्तरम् । स्फुरताम् देदीप्यमानानां चलतां वा । त्विषा दीप्त्या । तया श्रिया । अमृतायितेन अमृतवदाह्लादजनकेन । मानम् सत्कारम् –अहो भगवता कृतार्थीकृता स्मः इत्यादिकम् । दधत्यः कुर्वत्यः । तस्य कृष्णस्य । प्रमोदः प्रकृष्टाऽऽनन्दः । नखक्ष-तस्यापि शृंगारांगतात्रोक्तति ॥ ततश्च ताः स्वाधीनकान्ताः कान्तपरिधापितरत्नालंकाराः कुंजेभ्यो निष्क्रम्य मिलिता रासोत्सव-समाप्तिसूचकं मंगलं जगुरित्याह—गोप्य इति । स्फुरन्त्या स्वर्णकुण्डलानां कुन्तलानां च त्विषा गण्डेषु या श्रीस्तया सूचितेन अमृतायितेन हाससहितानिरीक्षणेन ऋषभस्य पुरुषश्रेष्ठस्य कृष्णस्य मानमादरं दधत्यः कृतानि तत्कर्माणि जगुः । पुण्यानि चारूणि तस्य कररुहाणां नखानां स्पर्शेन प्रकृष्टो मोदो यासां ताः ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

रतिर्दम्पत्योर्मिथोऽनुरागस्तन्मयो विहारः विविधविदग्धचेष्टा अतिविहारेणेति पाठेऽपि स एवार्थः । तेन श्रान्तानां शन्तमेन परमसुखात्मकेन पाणिना प्रकर्षेणामृजत् । स्वेदविन्द्वपसारणालकसम्बरणादिना उज्ज्वलयामास । यतः करुणः परदुःखासहिष्णु-स्वभावः सत्यपि कारुण्ये न साधारण्ये तासान्तु तानि प्रामृजदिति परमवैशिष्ट्यं दर्शितम् । प्रेमा हि साद्गुण्यानुसन्धानेनाहन्ता ममतैकतरविषयत्वे च जाता चेतसि स्निग्धता तत्रापीदृशभावमयीति परम एव विशिष्टः स्वयं कारुण्यादिकमन्तर्भावयति । शन्तमे-नेति स्पर्शमात्रेणापि स्वभावतः परमसुखकरत्वं तत्र च प्रमार्ज्जनं, तत्रापि प्रेम्णा, तत्र च शन्तमेनेति परमसन्तोषणमुक्तम् । अङ्गेति प्रेमसम्बोधने ॥ २१ ॥ ततः प्रहृष्टा निजदेहादिना त्रिधा तस्य प्रहर्षं सञ्जनयामासुरित्याह । गोप्य इति । तत्रास्फुरदिति सौन्दर्येण सुधितेति भावेन जगुरिति सङ्कीर्त्तनेन । ऋषभस्य इति तैर्व्याख्यातम् । अत्र ऋषभस्य पत्युः श्रीकृष्णस्येत्यत्रायमभिप्रायः । कृष्णत्वञ्च स्वयमेव श्रीमुनीन्द्रेण व्यक्तीकृते वयं कथं गोपयामः । तस्मादस्माभिरव्याख्याता अपि दयितरमणादिशब्दाः केन वाऽन्यथा मन्तव्या इति । तदा च परस्परमनन्यभावेनाव्यक्तेर्दाम्पत्यस्फूर्त्त्या तस्य मानं दधत्य उक्तप्रकारैः पूजां कुर्वत्यः । यद्वा । अहो मम धन्यता यस्ये-दृश्यो वध्व इत्येतादृशं तस्य गर्वमर्पयन्त्यः पुण्यानि पुण्यकराणि चारूणि च जगुः । पुण्यन्तु चार्वपीत्यमरः । तस्यैकशेषत्वात् गाने हेतुः तस्य कररुहैः स्पर्शानुगाने गुणवत्योऽप्येताः कृतमौना इति प्रणयकोपने तत्प्रवर्त्तनाय किञ्चिन्मोदनात् प्रकृष्टो मोदः कासाञ्चि-द्यासां ताः इति रत्यादिश्रान्तानामपि गाने रसोल्लासो बोधितः । तासामित्यादिद्वये हेलानामायमनुभावः । यथा "चित्तस्याविकृतिः

---

१. मिति–प्रा. पा. ; रति–इति कस्यचित् । २. न्मकर–विज. । ३. सुरत–विज ।

सत्त्वं विकृतेः कारणे सति। तत्राद्य विक्रियाभावो वीजस्यादिविकारवत्। ग्रीवा रेचकसंयुक्तो भ्रूनेत्रादिविकाशकृते। भावादीषत्प्रकाशो यः स हाव इति कथ्यते। हाव एव भवेद्धेला व्यक्तः शृङ्गारसूचक" इति ॥ २२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

रतिः सुरतं सैव विहारस्तेन, इति तत्रासंकोचः सूचितः; यद्वा, रतौ विहारो विविधवैदग्ध्यचेष्टा तेन, स विदग्धशिरोमणिः परमप्रीतो वा श्रीकृष्णः शन्तमेन परमसुखात्मकेन पाणिना प्रकर्षेणामृजत् प्रस्वेदविन्द्वपसारणालकसम्वरणादिनोज्ज्वलयामास, यतः करुणः कृपालुः, न च केवलमन्यजनेष्विव कारुण्येन, किन्तु परमप्रियत्वेनेत्याह—प्रेम्णेति; इति कारुण्यविशेषोऽभिप्रेतः; शन्तमेनेति स्पर्शमात्रेणापि स्वभावतः परमसुखकरत्वम्, तत्र च प्रेमाज्जनं तत्रापि कारुण्येन तत्रापि प्रेमृणेति परमसन्तोषणमुक्तम्। यद्वा, प्रेमृणा मूर्त्त एव करुणरसस्तत्तत्प्रेमचेष्टितेनैव सद्यो विश्वरोदनापादनात्। अङ्गेति प्रेमसम्बोधने, एवमेकस्यैकेनैव पाणिना सर्व्वासां युगपद्वदनप्रमार्ज्जनादैश्वर्य्येण लौककत्वेन च पूर्व्ववन्मधुरभगवत्तासारप्रकटनं ज्ञेयम्। एवमन्यत्रापि ॥ २१ ॥ ततः प्रहृष्टा निजदेहादिना त्रिधा तं प्रहर्षं संजनयामासुरित्याह—गोप्य इति। तत्र स्फुरदिति सौन्दर्य्येण, सुधितेति भावेन, जगुरिति संकीर्त्तनेन, ऋषभस्य पुरुषश्रेष्ठस्येति तस्य परमवैदग्ध्यादिकमुक्तम्, तासामपि सिद्धमेव; अतएव तस्य मानं दधत्य उक्तप्रकारैः सम्मानं कुर्व्वत्यः। यद्वा, अहो मम धन्यत्वं यस्येदृश्यो वध्व इत्येतादृशं तस्य गर्व्वमर्पयन्त्यः, ऋषभत्वात्तत्कृतानामपि श्रेष्ठत्वं सूचितम्। तदेव दर्शयति—पुण्यानि साक्षात् पुण्यरूपाणि सुखात्मकानि वा जगुः। तत्र हेतुः—तस्य कररुहैः स्पर्शाद् गाने तदानीमेव तेन क्रियमाणात्, किंवा पूर्व्वकृतात्; यद्वा, मुखमार्ज्जने गण्डेषु जातात्; प्रकृष्टो मदो यासां ता इति रत्यादिपरिश्रान्तानामपि गाने श्रमाभावो रसविशेषश्च बाधितः ॥ २२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ऋषभस्य भर्तुर्गोप्यः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्य तासु कृपातिशयमाह। तासामिति। स च भगवान् रतिविहारेण रति विहाराभ्यां श्रान्तानां तासां गोपीनां वदनानि प्रस्विन्नानि अङ्ग हे राजन्! करुणः कृपावान् शन्तमेन निरतिशयसुखकरेण पाणिना प्रामृजत्परिमृष्टवान् ॥ २१ ॥ ततोऽतिहृष्टानां गोपीनां चरितमाह। गोप्य इति। तस्य भगवतः कररुहैर्नखैः स्पर्शेन प्रमोदो यासां ता गोप्यः स्फुरतां स्वर्णकुण्डलानां कुन्तलानाञ्च त्विषा गण्डेषु वा श्रीस्तया सुधितेनामृतायितेन हासयुक्तनिरीक्षणेनच ऋषभस्य भर्तुः कृष्णस्य मान दधत्यः पूजां कुर्वत्यः पुरटकुण्डलादित्विडादिभिस्तस्य हर्षं जनयन्त्य इत्यर्थः। तस्य कर्माणि चेष्टितानि जगुः ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इदं च भक्तपारवश्यं हरेरजस्रं स्मरेदित्याशयेन हरिचरितं वक्ति। तासामिति। प्रामृजत्सम्मार्जितवान् ॥ २१ ॥ ऋषभस्य प्रवृद्धानुन्मथितवीर्यस्य हरेः स्फुरतोश्चलतोर्मकरकुण्डलयोः कुन्तलानां त्विषा दीप्त्या दीप्तगण्डश्रिया युक्तसुरतयोग्यहासोपेताभीष्टाङ्गनिरीक्षणेनानन्दमात्मनो दधत्यः तस्य हरेः कररुहाणां नखानां स्पर्शेन स्मरोल्लासजनकमक्षणेन नखक्षतेनाभिव्यक्तः प्रमोदः प्रकृष्ट आनन्दो यासां तास्तथा ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

एवं रममाणस्तासां श्रममालोक्य स्वयमेव तदपनोदविनोदं चकारेत्याह—तासामित्यादि। शान्तमेन सुशीतलेन पाणिना वदनमार्जनेनैव श्रमो दूरीकृतः; पुनरुत्साहवृद्धिं कारयामासेत्यर्थः ॥ २१ ॥ एवं श्रमापनोदे सति पुनरुत्साहवत्यस्तमेव जगुरित्याह—गोप्य इत्यादि। गोप्य ऋषभस्य कृतानि लीला जगुः। कीदृशानि? पुण्यानि पुण्यजनकानि; तान्येव वक्ष्यति च–(३५ श-श्लो०) "विक्रीड़ितं व्रजवधूभिः" इत्यादि। ऋषभस्य परात्परस्य श्रीकृष्णस्येत्यर्थः। किं कुर्वत्यः? स्फुरन्त्या पुरटकुण्डलानां कुन्तलानाञ्च त्विषा गण्डयोर्या श्रीस्तया क्षुधितः सुधया व्याप्तौ यो हासस्तत्सहितेन निरीक्षणेन च मानं दधत्य सम्मानं वहन्त्यः कुर्वत्य इति वा। आद्ये स्फुरत्पुरटकुण्डलेत्यादि तृतीयान्तपदद्वयं कृष्णास्येति मन्तव्यम्, द्वितीये तासामेव। पुनः कीदृश्यः? तत्कररुहस्पर्शेन प्रकृष्टो मोदो यासाम् ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तासां रतिविहारेण तासामति विहारणेति च पाठः। श्रान्तानामिति। तासां रतिश्रान्तिमालक्ष्य करुणः रमणाद्विरतोऽभूदित्यर्थः शन्तमेन सुखमयेन प्रामृजदित्युपलक्षणं वीजनानुलेपनप्रत्यङ्गप्रसाधनवीटिकाप्रदानान्यपि चक्रे ॥ २१ ॥ ततश्च ताः स्वाधीनकान्ताः कान्तपरिधापितरत्नालङ्काराः कुञ्जेभ्यो निष्क्रम्य मिलिता रासोत्सवसमाप्तिसूचकं मङ्गलं जगुरित्याह। गोप्य

इति । स्फुरतां स्वर्णकुण्डलानां कुन्तलानाञ्च त्विषा गण्डेषु श्रीस्तया सुधितेन अमृतायितेन हाससहितनिरीक्षणेन ऋषभस्य पुरुषश्रेष्ठस्य कृष्णस्य मानमादरं दधत्यः कृतानि तत् कर्माणि जगुः । पुण्यानि चारूणि तस्य कररुहाणां नाखानां स्पर्शेन प्रकृष्टो मोदो यासां ताः ॥ २२ ॥

रसिकाह्लादिनी-टीका

इदानीं तत्सम्माननमेकेन श्रीकृष्णेन कृतमिति । श्रीशुकः स्वानुभवमेव कथयति—तासामिति, अतिविहारेण रासरभसेन निकुञ्जादिषु सुरताभिनिवेशेन वा श्रान्तानां सम्बर्द्धयितुमशक्तानां चैवाङ्गमिव प्राप्तानां तासां पञ्चविधानामपि वदनानि सन्तमेन परमसुखकरेण मधुररसं नवीकर्तुं पाणिनेति एकवचनं विग्रहस्यैकत्वविवक्षयेति । प्रामृजत् प्रस्वेदजलकणानपसारितवान् स्वच्छेष्वप्यलिकेषु गण्डमण्डलेषु स्वप्रतिबिम्बदर्शनार्थस्वेदविन्दुनिरसनमिति भावः । सीमन्तेषु मुक्ताभूषणानां स्वस्थानस्थापनेनालकानां समं नयनेन च गण्डमण्डलावलम्बनादिना मधुररसस्य पुनरपि नवीकरणमिति प्रशब्दस्यार्थः यतः करुणः । अतः करुणरसस्य मधुररसगमव, एकवचनेन स्वरूपैक्यमेवाभिप्रेतम् । प्रेम्णेति तासु प्रीत्यतिशयेन श्रीकृष्णस्य तदाराधनं परमपुरुषार्थं इत्यपि सूचितम् । अङ्गेति सम्बोधनेन श्रीकृष्णस्य तदायत्तत्वम् ज्ञाप्यते । तदेवं सर्वासां युगपद्वदनमार्जनादि एकस्यैव पाणी लाघवप्रदर्शनाचिन्त्यशक्तिप्रकटनमिति तात्पर्य्यार्थः ॥ २१ ॥ तदेवं श्रीकृष्णकर्तृकं तासां सम्माननमुक्त्वा उज्वलरसाविर्भूते सति ताभिः कृतं श्रीकृष्णस्य सम्माननमाह गोप्य इति । गाप्यः ऋषभस्य श्रेष्ठस्य बा उज्वलरसोद्दीपनेन श्रेष्ठत्वं सूचितम् इति । तस्य मानंसम्माननं दधत्यः पोषयन्त्यः तत्र साधनमाह—स्फुरदिति स्फुरत्कुण्डलानां कुन्तलानामलकानां त्विड् येषु तेषां गण्डानां कपोलानां श्रिया शोभया नृत्यविशेषे कुण्डलानामलकानां गण्डेषु स्वत एव स्फुर्तिर्भवति । इदमेव सन्मानन स्वशोभासवर्णम् इति । तत् सुधितो हास उज्वलो हासः चातुरक्षिके दर्शने निरर्गलो हासो भवतीति, मधुररसस्यायं स्वभावः । तत्पूर्वकं निरीक्षणेन चेति स्वहृदयसमर्पणम् । ऋषभस्यात्राप्यन्वयः । पुण्यानि श्रवणमात्रेणान्येषां पावनानि कृतानि गोवर्द्धनोद्धरणादीनि रहस्यानि जगुः । गानोद्दीपकमाह—तत्कररुहैर्नखर्यः स्पर्शः सदयं नखक्षतादिना स्पर्शः बालानामिदं यत् नखक्षतायोग्यत्वात् स्पर्श इत्युक्तः । एतास्तु कुमार्य्य एव कुण्डलधारणलिङ्गात्, प्रौढानां ताटङ्कधारणस्य प्रसिद्धत्वात् इति । तेन कटकस्पर्शेन प्रकृष्टो मोद आनन्दो यासां ताः, यद्वा स्फुरतोः पुरटकुण्डलयोः कुन्तलानां च त्विट् ययोर्गण्डयोः स्मितसुधितहासनिरीक्षणेन चोपलक्षितस्य ऋषभस्य मानं साधु साध्विति पूजां कुर्वत्यस्तस्य कृतानि पुण्यानि तनुसङ्गादीनि सुखानि जगुः अन्यत्समानम् ॥ २२ ॥

विशुद्धरसदीपिका

तास्वपि श्रीभगवतः प्रेमासक्तिरेवेत्याह । तासामिति । स विदग्धशिरोमणिः तासाम् अनिर्वचनीयसौभाग्यवतीनां राजकन्यापेक्षयेदम् अतिविहारेण श्रान्तानामिति सौकुमार्य्यं वदनानि शान्तमेन परमसुखात्मकेन पाणिना प्रकर्षे आमृजत् खेदापसारणादिनोज्वलयामास । तत्र हेतुः करुणः स्वभावतस्तासां श्रमदर्शनेन वा ननु किङ्कानेन नेत्याह । प्रेम्णेति ॥ २१ ॥ तासामाह गोप्य इति । गोपकन्याः ऋषभस्य गान्धर्ववृत्त्या वृतस्यास्य पत्युः कृतानि वैदग्ध्यचेष्टितानि जगुः पुण्यानि चारूणि पुण्यन्तु चार्वपीति कोशात् । यद्वा स्वीयात्वाभिमानेनानौचित्यसन्देहाभावात्पुण्यकराण्येवेत्यर्थः । किं कुर्वत्यः सुधितहासनिरीक्षणेन मान दधत्यः सुधा सञ्जातास्मिन्निति सुधितः परमोज्वलः स चासौ हासस्तत् सहितेन निरीक्षणेनेति हासस्य पुष्पस्थानीयत्वं निरीक्षणस्याञ्जलिबन्धत्वमुक्तं मानं पूजां चित्तसमुन्नतिं च कीदृशेन स्फुरन्ती पुरटस्य शुद्धहाटकविशेषस्य कुण्डलानां कुन्तलानां वक्रालकानाञ्च या त्विट् तया गण्डयोः श्रीर्यस्मिंस्तेन कुण्डलकुन्तलयोरन्योऽन्यमालिङ्गितयोर्गण्डपर्य्यङ्कविलसितमुद्रया भावमुद्दीपयन्त्य इत्यर्थः । हेलानामानुभावोऽयं यथा—

> चित्तस्याविकृतिः सत्त्वं विकृतेः कारणे सति । तत्राद्य विक्रियाभावो बीजस्यादिविकारवत् ॥
> ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकाशकृत् । भावादीषत्प्रकाशो यः स हाव इति कथ्यते ॥
> हाव एव भवेद्धेला व्यक्तशृङ्गारसूचकः ।

इति तत्कररुहेति कोपकारणेऽपि प्रमोदोत्पत्त्या परमासक्तिः सूचिता ॥ २२ ॥

श्रीरामनारायणकृता भावभावविभाविका

तासां सुरतान्तशायां प्रभोराचरिमाह । तासामिति । प्रीतिपूर्वकसम्बोधन रङ्गेति स तासां वदनानि वदनोपलक्षितसर्वाङ्गानि पाणिना प्रामृजदित्यन्वयः । किम्भूतानां तासां तत्राह । कृष्णस्य भगवतोऽखिलकलानिपुणस्य किञ्चिज्ज्ञवात्स्यायनादिकामशास्त्राचार्य्यनिरूपितरसकणकामार्णवविहारिणोऽतिविहारेण सर्वानतिक्रम्य विशेषेण हारो मनोहरो यो विहारो विविधासनबन्धाश्लेषादिचेष्टारूपस्तेनेत्युपलक्षणं धर्म्मेण स्थलकमलरसस्रववत्सुमनोऽङ्ग सुमनोभ्यः प्रवहत्स्नेहस्वेदमधुधाराणां कुसुममृदुत्वमणिगणश्रीहार-

हरितनुश्रीह्रीत्रुटितसुमनोमणिहाराणां सखिनखरेखासर्वतोभद्रालंकृतहरिवक्षोनीलमणिवेदिकागतहरिनखरेखालोचनरोचनरोचनालिपियुतकुचमङ्गलकलशभाराणां स्वकुचकुम्भालिङ्गनलग्नकुंकुमरागव्याजहरिहृदर्पितस्वहृदुच्चलितानुरागरससाराणां कुञ्जेभ्यः कुन्ददन्तसिन्दूरसुन्दररेखावत् स्वमुखाधरोल्लसितरदरेखाकाराणां प्रामृजदित्यत्र मार्जनं प्रस्वेदापनयनं तत्र प्रकर्षस्तु आह्लादनेन विकासनम् अलङ्करणं च यथा हरिः सूर्यः स्वकरैः कञ्जानां हिमकणानपनयंस्तान् विकाशयति तथा हरिरपि करेण तत् स्वेदमयनयन् विकाशयतीति भावः। अत एव पाणिविशेषणं शंतमेनेति भगवत आनन्दमात्रकरपादमुखत्वात् तत्र स्वपाणिना प्रमार्जने हेतुद्वयमाह करुण इति। प्रेम्णेति च तासां श्रान्तत्वदर्शनेन जाता करुणा मुखप्रस्वेदहरणमिषेण पुनरङ्गस्पर्शसौख्योत्साहोऽभूदतः प्रेमा च तत्र हेतुरिति भाव ॥ २१ ॥ भगवता लब्धमानानां प्रमोदमुदितानां तासां त्रिधा तदाह्लादजनने कृत्यं चाह। गोप्य इति। गोप्यो गोपस्वरूपस्य सर्वविश्वैकगोप्तुः श्रुतिभूमीन्द्रियगवां पालककस्याविष्कृतगोपलीलस्याह्लादिकाः शक्तय ऋषभस्य रसिकशिरोमणेस्तस्य मानं सम्मनं दधत्यः कृतानि तस्योदारलीलात्मककर्माणि जगुरित्यन्वयः स्फुरती देदीप्यमाने पुरटजटिते मणिकुण्डले तत्र स्फुरदित्युक्त्यैव तयोरविसादृश्यद्योतनं तयोः कुन्तलाः कृष्णस्निग्धकुटिलालकाः निशा तद्द्वारागता या त्विट् दीप्तिस्तदुद्भासिते गण्डे एव चन्द्रौ तयोः श्रिया अत्र यद्यपि निशासु प्रकासमानोऽपि पूर्णचन्द्रः सुधामयमण्डलत्वाद्रविप्रभयव भासते इति नात्यद्भुतत्वं तथापि रविचन्द्रनिशानां युगपदपरोक्षतया भासमानत्वं विरुद्धत्वेन चित्रं परन्तु भगवद्भजने विरोधासम्भवेनैव न तस्यापि चित्रता तथा कृष्णकुटिलस्वभावानां स्वद्वारान्योपकारकत्वं चित्रमपि स्निग्धत्वेनैव स्नेहमाहात्म्यात्सत्यपि कौटिल्ये तस्याकिञ्चित्करतया प्रत्युत स्निग्धानां कौटिल्यस्यापि प्रकाशप्रवेशपथरूपत्वेन साहाय्येन न चित्रत्वं तथा चन्द्रेण भ्रात्रा श्रीसमर्पणस्य चित्रत्वेऽपि श्रीपतये एव समर्प्यमाणत्वान्न चित्रत्वं तथा चन्द्रस्य द्वित्वं चित्रमपि कृष्णाय श्रीसमर्पणे हर्षाधिक्यान्न चित्रमिति ध्येयम् एवं स्वशरीरसौन्दर्येणालम्बनविभावेन भगवतो मानाधानं तथा सुधितोऽमृतमयो यो हासस्तद्युक्तेन सापाङ्गनिरीक्षणेन मनोभावसूचकेन हावेन तथा स्पष्टं तद्गुणगानलक्षणेन हेलानामानुभावेन तदुक्तम्—

चित्तस्याविकृतिः सत्त्वं विकृतेः कारणे सति।
तत्राद्यविक्रियाभावो बीजस्यादिविकारवत्। ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकाशकृत् ॥
भावादीषत्प्रकाशो यः स हाव इति कथ्यते। हाव एव भवेद्धेला व्यक्तशृङ्गारसूचक इति ॥

यद्वा यथा तस्माद्विक्रीडनादिना लब्धमानत्वेन स्वस्मिन् दैन्योदर्कं मानं जातं स्वीयतादृशश्रीनिरीक्षणगुणगानैरृषभस्यासम्भावितमानादिविक्रियस्यापि मानं दधत्यो मानं भवत्विति सम्भावयन्त्यः कृतानि जगुः। यद्वा ऋषभस्य तस्य तादृशगण्डश्रिया सुधितहासनिरीक्षणेन च स्वस्मिंस्तत्कृतं मानं वा तदनुग्रहविषयत्वेन स्वस्मिन्धन्यत्वरूपं मानं वा सम्भावयन्त्यस्तत्प्रत्युपकारान्तरासम्भवाद्भक्त्या तत्कृतान्येव जगुः। किम्भूतानि तस्य कृतानि पुण्यानि किमु वाच्यं तत् पुण्यत्वं स्मरतां महत्पापिनामपि पुण्यजनकानि संसारार्णवतारकाणि—

सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम्। सद्यस्तपस्वी भवति पङ्क्तिपावनपावनः ॥
जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः। त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुनेत्यादि ॥

वचनात् किम्भूतास्ताः विहारे तत्कररुहाणां नखानां स्पर्शेन सुरतान्ते च प्रामृजत्करुणः प्रेम्णा शन्तमेनाङ्गपाणिनेत्यत्र वर्णितकररुहोपस्पर्शस्तेन प्रमोदो वा यासामिति श्रान्तानामपि गुणगानप्रवृत्तौ प्रमोदोद्धर्षो हेतुर्दर्शितः। अयमत्र भावः विधातृकृतत्वेन सम्भावितविरहळेखस्य भगवताङ्गाङ्गमर्दने मार्जनपूर्वकस्वकररुहमणिरोचनळिपिभिरुपलक्षणमेतद्रदरेखाया अपि ततश्च कनकपत्रात्मकोरःकपोळाद्यङ्गेषु नित्याखण्डितसौभाग्यदानपत्रं कृतं तत्र च कपोलयोर्वर्तुलाकाररदपङ्क्तिद्वयमण्डळचिह्नेन तत्पत्रमुखे मुद्रिकाचिह्नं स्थापितं तेन जातप्रमादाः स्फटिकपात्रात्मककपोलधृतया कुन्तलप्रावरणावृतत्वेऽपि स्फुरन्त्या मणिस्वर्णकुण्डलश्रिया तदुपहारसमर्पणेन तथा सुधितहासे विद्रुमाधरसम्पुटितपद्मरागमणिसम्पुटकपोलान्तर्गतरदवज्रमणिसञ्चयस्याधरप्रावरणविकासपूर्वकसमर्पणेन तथा निरीक्षणेन कृष्णतारेन्द्रनीलान्वितदृग्जलजार्पणेन हृत्पद्मे च दृक्पद्मे कृष्णतारवद्भवतारकृष्णनिवेशद्योतकेन ऋषभस्य संमानं दधत्यः स्तुत्यै कृतानि जगुः ॥ २२ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अथ तासु भगवतः कृपातिशयमाह। तासामिति। अत्यर्थं रमणात्मकेन विहारेण रतिविहारेणेति क्वचित्पाठ इति विहारेणेति क्वचित्पाठः श्रान्तानां वदनानि सः भगवान् प्रामृजत् तत्रापि स्वहस्तकमलेन तत्रापि शन्तमेन स्पर्शमात्रेण स्वभावतः सुखकरेण तत्रापि कान्तोचितप्रेमविशेषेण यतः करुणस्तत्परिश्रमं द्रष्टुमक्षमः प्रेम्णेति वीजनापलेपनादेरुपलक्षणं तथा च तासां परिश्रममालक्ष्य तद्विहारान्निवृत्तः सन् तथा कृतवानित्यर्थः ॥ २१ ॥ ततः पूर्णाखिलमनोरथानां पुनर्मिलितानां तासां प्रहृष्टानां कृत्यमाह। गोप्य इति। ततश्च ताः स्वाधीनकान्ताः कान्तपरिधापितरत्नालङ्काराः कुञ्जेभ्यो निष्क्रम्य मिलिता रासोत्सवसमाप्तिसूचकं मङ्गळं जगुरित्याह। स्फुरतां कनककुण्डलानां कुन्तलानां च त्विषा या गण्डश्रीस्तया सुधितेनामृतायितेन सहासावलोकनेन

च गोप्यः ऋषभस्य पत्युर्भगवतो मानं पूजां कुर्वत्यः तस्य कृतानि जगुः । यतः पुण्यानि स्फुरदिति तन्वा सुधितेति मनसा जगुरिति वाचेति त्रिविध प्रहर्षणमुक्तं पुनश्च तस्य भगवतो नखस्पर्शेन प्रमोदो यासां ताः ।। २२ ।।

रास-रहस्यम्

र० टी०—हे अङ्ग ! हे प्रिय ! सः परमात्मा तासामतिविहारेण अतिशयेन विहार आत्मदर्शनोद्देशेन विविधः प्रयासः तेन, श्रान्तानां क्लान्तानां, वदनानि तदुपलक्षितः सर्वङ्गानि, करुणः सः सदयः, प्रेम्णा स्नेहेन, शन्तमेन निरतिशयसुखकरेण, पाणिना करेण ज्योतिषा, प्रामृजत् अविद्यान्धकारं प्रकर्षेण दूरीकृतवान् ।। २१ ।। तत्कररुहस्पर्शप्रमोदाः तस्य परमात्मानः कराणां ज्योतिषां प्रकाशः स्तेन स्पर्शः स्तेन स्पर्शन प्रमोदो यासां ताः, गोप्यः वृत्तयः, "हिरन्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ।" इति श्रुत्या अन्तकाले प्राप्ते सति आत्मानमात्मद्वारप्राप्तियाचनावत् पुरटकुण्डलकुन्तलत्विड् पुरटः हिरण्यमिव हिरण्यज्योतिस्तस्य पुरटस्य कुण्डलं पुरटकुण्डलं "हिरण्यकेशं हिरण्यश्मश्रुः" इति श्रुतेः ज्योतिर्मयं यत्कुन्तलमिव कुन्तलं विकीर्णकिरणानि तेषां त्विषा प्रकाशेन, गण्डेषु तदुपलक्षितमुखमण्डले प्रोद्भासिता या श्रीः ब्रह्मवर्चसं तया, सुधितहासनिरीक्षणेन "य एष एतस्मिन् मण्डले पुरुषा यश्चायं दक्षिणे अक्षन् पुरुषः ।" इति श्रुत्या अमृतायितेन प्रकाशयुक्तावलोकनेन च ऋषभस्य परमात्मनः, मानं प्रामाण्यं, दधत्य गृहीत्वा, पुण्यानि तदुपलक्षितपुण्यापुण्यनिवर्तकानि कृत्यानि, जगुः तेषां गायनं चक्रुः ।। २२ ।।

गूढार्थदीपिनी

शन्तमेन सुखप्रदेन । प्रामृजत् सम्मार्जितवान् ।। २१ ।। गोप्यः ऋषमस्य श्रेष्ठस्य भर्तुः श्रीकृष्णस्य मानं दधत्यः कुर्वत्य कृतानि चरितानि जगुरित्यन्वयः । केन । स्फुरता स्वर्णकुण्डलानां कुन्तलानां वक्रकेशानां च त्विषा गण्डेषु या श्रीः तया सुधितेन अमृतायिते हाससहितनिरीक्षणेन मानम् दधत्यः सुधितेत्याचारक्विबन्तात् क्तः तस्य भगवतः कररुहैः नखैः स्पर्शन प्रमोदो यासां ता गोप्यः ।। २२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

करुण इति तासां श्रमाधिक्यं सूचयति प्रेम्णेति तासां श्रमाधिक्येऽपि भगवत्प्रावण्यं सूचयति शन्तमेनेति सद्यः श्रमनिवृत्तिं द्योतयति ।। २१ ।। भगवदङ्गसङ्गेन प्रमुदितानां गोपीनां भगवत्प्रावण्यमाह । गोप्य इति । तस्य श्रीकृष्णस्य कररुहैर्नखैरुपलक्षणमेतदन्येषामङ्गानां नखादिभिरङ्गैः स्पर्शेन प्रमोदो यासां ताः गोप्यः स्फुरतां देदीप्यमानानां पुरटकुण्डलानां कुन्तलानां च त्विषा कान्त्या गण्डेषु या श्रीः शोभा तया सुधितं सुधामृतं संजातमस्य तत्तथा तेन हासयुक्तनिरीक्षणेन ऋषभस्य रासक्रीडानायकस्य मानं दधत्यः सत्कारं कुर्वन्त्यः हर्षयन्त्य इत्यर्थः । पुण्यानि श्रोतृणां श्रावयितृणां च पुण्यप्रदानि तस्य कृतानि कर्माणि जगुः ।। २२ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

रतिविहारेण सुरतक्रीडया रतिविहारो मन्मथरतेन तदुद्द्रवणेति वा श्रान्तानां तासां गोपीनां वदनानि स्विन्नान्नि शन्तमेन पाणिना प्रेम्णा सः प्रामृजन्मार्जयामास ।। २१ ।। स्फुरतां मकराकारानुकाराणां कुण्डलानां तथा कुन्तलानां चाथवा स्फुरन्मकराणां कपोललिखितपत्रालीनां कुण्डलानां वर्तुलानां च त्विट् कान्तिस्तद्युक्ता गण्डास्तेषां श्रिया शोभया सुरतस्य तत्सम्बन्धिहाससहितं च तन्निरीक्षणं च तेन तत्कररुहा नखास्तेषां स्पर्शेन प्रमोदो यासां ता मानं सत्कारं दधत्यो विदधत्यो ऋषभस्य स्वनाथस्य पुण्यानि तत्प्रापकाणि कृतानि कर्माणि जगुरगायन् ।। २२ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततस्तासां सुरतान्तो जात इत्याह । तासामिति । अतिविहारेणानेकबन्धैः सम्यक्श्रान्ता जाताः ततोऽग्रिमलीलार्थं तासां वदनानि स्वहस्तेन प्रामृजत् यतः स कृष्णः तदर्थमेवावतीर्णः सर्वत्रैव तथाविधं जातमिति ज्ञापयितुं बहुवचनं तथा करणे हेतुः करुण इति करुणायुक्तः सा करुणा उदासीना न भवतीत्याह । प्रेम्णेति । मार्जने क्लेश एव निवर्त्तत इति ज्ञापयितुं शन्तमेनेत्युक्तम् अङ्गेति सम्बोधनमप्रतारणाय ।। २१ ।। एवं तासां दुःखनिवारणपूर्वकं परमानन्दं स्थापितवान् ततोऽतिमुदितानां कृत्यमाह । गोप्य इति । गोप्यो मानं दधत्यः तत्कृतानि जगुः गाने हि रजोगुणाभिनिवेशो हेतुः तदर्थं सहजमेकं भगवत्कृतञ्च हेतुद्वयमाह तत्र प्रथमं सहजं निरूपयति स्फुरद्यत् पुरटं सुवर्णं दाहोत्तीर्णमुज्ज्वलीकृतं च तस्य ये कुण्डले कुन्तलाश्च तेषां त्विषा सहिता या गण्डश्रीः उज्ज्वला गण्डश्रीः पीता वा उज्ज्वला नीलाचेतरे एवं कान्तित्रयं मूलभूतगुणकार्यरूपं तेनासां सर्वोत्कर्षयोग्यता सुधितं सुधामिव प्राप्त यद्धासपूर्वकं निरीक्षणमत्राप्यन्तः स्थितो रागः निरीक्षणं हासश्चेति त्रितयमुक्त भगवदीयमेतत् अत उभाभ्यां समाननमभिमानं वा दधत्यः

स्वहृदयकृतविपरीतबुद्ध्या जातदोषनिराकरणार्थं तत्कृतानि जगुः तेषां न केवलं पापनिवर्त्तकत्वं किन्तु पुण्यरूपत्वमपीत्याह । पुण्यानीति भगवता कृतानि पापनिवर्त्तकानि पुण्यजनकानि च । अतः तासां दोषाभावः अग्रिमलीलायां पुण्योपचयश्चोक्तः पूर्वक्लेशविस्मारणार्थमानन्दाविर्भावमाह । तस्य भगवतः कररुहा नखाः तेषां स्पशन जातपीडया स्मृतसंभोगाः प्रमुदिता जाताः अन्तःपूर्णानन्दा गानेनापि जाता इति अन्ते विशेषणम् ॥ २२ ॥

श्रीसुबोधिनी-सारः

अतिविहारण श्रान्तानां तासां वदनानि मुखानि करुणो दयालुः स कृष्णः प्रम्णा शन्तमेनातिसुखकारिणा पाणिना हस्तेन प्रामृजदशू शुधत् हे अंग ॥ २१ ॥ स्फुरतां पुरटानां सुवर्णमयानां कुण्डलानां कुन्तलानां च त्विषा गण्डेषु कपोलेषु या श्रीः तया सुधितेनाऽमृतायितेन हासयुक्तेन निरीक्षणेन ऋषभस्य श्रेष्ठस्य पत्युर्मानं दधत्यः कुर्वन्त्यस्तस्य कररुहैः नखैयः स्पर्शस्तेन प्रमोदो यासां ता गोप्यस्तत्कृतानि पुण्यानि कर्माणि जगुः ॥ २२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

गोप्यः स्फुरदित्यत्र, गाने हीति । एवमत्र ज्ञयम् । पूर्वश्लोकेन हि स्वाधीनभर्तृकात्वमुक्तम्, अस्मिन्नपि कुण्डलकुन्तलगण्डशोभा प्रियकरकमलसम्पादितैव । अत एवास्या मानधारणे हेतुत्वम् । स्वनिष्ठत्वेन सहजत्वमस्य । एवं सत्युत्साहविशेषो यो गानजनकः स रजोगुणशब्देनोच्यते । तथा च पूर्वं मानेन दुःखमभूदिति तादृशत्वाभावाय गुणगानमिति । अत्रैव **मूलभूतगुणेति** । भगवच्चातुर्यकार्यमित्यर्थः । गानजः पुष्टो भावविशेषोऽलौकिकेष्टसाधकत्वेन पुण्यपदेनोच्यते ॥ २२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कृपातिशयमेव स्पष्टयति—एवं तासामिति । 'लीलारहस्यश्रवणे त्वमधिकारी' इति सूचयन् सम्बोधयति—अङ्गेति । अतिविहारेण श्रान्तानां तासां गोपीनां प्रस्विन्नानि वदनानि स करुणः कृपावान् कृष्णः शन्तमेन निरतिशयसुखकरेण पाणिना प्रम्णा प्रामृजत् परिमृष्टवान् ॥ २१ ॥ ततोऽतिहृष्टानां गोपीनां चरितमाह—गोप्य इति । तस्य भगवतः कररुहैर्नखैः स्पर्शेन प्रमोदो यासां ताः गोप्यः स्फुरतां पुरटस्य सुवर्णस्य कुण्डलानां कुन्तलानां च त्विषा गण्डेषु या श्रीः तया सुधितेन अमृतायितेन हासयुक्तनिरीक्षणेन च ऋषभस्य भर्तुः कृष्णस्य मानं विदधत्यः सन्मानं कुर्वन्त्यः पुण्यानि श्रवणकीर्तनादिपराणां पापनिवर्तकानि कृतानि तत्कर्माणि जगुरित्यन्वयः ॥ २२ ॥

अन्वितार्थप्रकाशिका

तासामिति ॥ अङ्ग हे राजन्! अतिविहारेण श्रान्तानां तासां गोपीनां प्रस्विन्नानि वदनानि सकरुणः कृपावान् कृष्णः शन्तमेन निरतिशयसुखकरेण प्राणिना प्रेम्णा आमृजत् परिमृष्टवान् । उपलक्षणतया बीजनानुलेपनप्रत्यङ्गप्रसाधनवीटिकाप्रदानान्यपि चक्रे । मृजेस्तुदादित्वमार्षम् ॥ २१ ॥ ततः कुञ्जेभ्यो विनिःसृत्य मिलिता रासोत्सवसमाप्तिसूचकं मङ्गलं जगुरित्याह—गोप्य इति ॥ तस्य भगवतः कररुहैर्नखैः स्पर्शेन प्रमोदो यासां ताः गोप्यः स्फुरतां पुरटस्य सुवर्णस्य कुण्डलानां कुन्तलानां च त्विषा गण्डेषु या श्रीः तथा सुधितेन अमृतायितेन हासयुक्तनिरीक्षणेन च ऋषभस्य भर्त्तुः कृष्णस्य मानं विदधत्यः सम्मानं कुर्वत्यः पुण्यानि श्रवणकीर्तनादिपराणां पापनिवर्तकानि कृतानि तत्कर्माणि जगुः । सुधितेत्याचारक्किबन्तात् क्तः ॥ २२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रामृजत् स्वेदापनं अकरोत् ॥ २१ ॥ ततोऽति रुष्टास्तं प्रहर्षयामासुरित्याह गोप्य इति । तस्य कररुहानां नखानां स्पर्शेन प्रमोदो हर्षो यासां ताः गोप्यः स्फुरन्तां कनकं कुण्डलानां कुन्तलानां केशानां च त्विषा गण्डेषु कपोलेषु या श्रीस्तया तथा सुधितेन अमृतवदाचरताहासयुक्तनिरीक्षणेन च ऋषभस्य सर्वोत्कृष्टस्य हरेः मानन्दधत्यः सम्माननं कुर्वत्यः सत्यः तस्य कृतानि जगुः ॥ २२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्य तासु कृपातिशयमाह ॥ तासामिति ॥ अङ्ग हे राजन्, स कृष्णः रतिश्च विहारश्च तत्समाहारस्तेन, श्रान्तानां, तासां गोपीनां वदनानि प्रस्विन्नान्याननानि, यतः स्वयं करुणस्ततः, शन्तनेन निरतिशयसुखकरणे, पाणिना प्रम्णा प्रामृजत् परिमृष्टवान् ।२१। ततोऽतिहृष्टानां गोपीनां चरितमाह ॥ गोप्य इति ॥ तस्य भगवतो ये कररुहा नखास्तेषां स्पर्शेन प्रमोदो यासां ताः, गोप्यः, स्फुरतां चञ्चतां पुरटकुण्डलानां स्वर्णकुण्डलानां कुन्तलानां शिरोरुहाणां च त्विषा गण्डेषु या श्रीस्तया, सुधितेनामृतायितेन हासयुक्तनिरीक्षणेन च, ऋषभस्य गान्धर्ववृत्त्यावृतस्य भर्त्तुः कृष्णस्य, मानं दधत्यः पूजां कुर्वत्यः सत्यः, पुण्यानि सम्यक् चारूणि, कृतानि तद्वैदग्ध्यचेष्टितानि, जगुः ॥ २२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तासामतीति : १०.३३.२१.

मद्व्रजनागणित-भूरिपरिश्रमा ये तेषां श्रमं परिहरिष्यति मां विना कः।
इत्थं स्वभक्तजनकारुणिको मुकुन्दः सञ्चिन्त्य तद्वदनधर्ममपाचकार ॥ १०१ ॥
आगन्तुकश्रमनिवृत्तिरयत्नसिद्धा मुख्यश्रमापनयने विहिते सतीति।
आलोच्य मङ्गलकरेण करेण तासां मुख्यश्रमापनयनं विदधे दयाब्धिः ॥ १०२ ॥

गोप्य इति : १०.३३.२२.

दीनोपकार कारुण्यमसीमं श्रीपतेरहो। क्षुद्रा अपि वयं येन नीताः श्रीसुखशेवधिम् ॥ १०३ ॥
यावत्स्त्रीजातिसौभाग्यानन्दराज्येऽभिषेचिताः। वयं पद्मातपत्रेण करेणेशेन लक्षिताः ॥ १०४ ॥

यत्पदाग्रमभिवाञ्छति पद्मा सोऽस्मदङ्गमखिलेन करेण।
लालयत्यनुकलं सकलेशो धन्यतामिति जगुः किल गोप्यः ॥ १०५ ॥
अयि राव्यनुभूतमुच्यसे विदिता तेऽस्ति वियोगिनीदशा।
तदितो न विधुर्यथा व्रजेदवलम्बस्य तथाऽस्य चांशुकम् ॥ १०६ ॥

अतनुसुखमवाप्तं चक्रवाकैरशेषैः समजनि च निरासः पद्मिनीम्लानतायाः।
दिनकर तव कृत्यं प्रायशो रासकेलौ समभवदिति वेगं स्वागमे मा कुरुष्व ॥ १०७ ॥

सर्वंसहा भवसि मूर्तिमती क्षमा च तत्प्रार्थनाभिरलमत्र तथापि वच्मः।
हल्लीसके पदसमोद्धरणस्थितौ त्वं धात्रि स्थिरा भव यथार्थनिजाभिधाना ॥ १०८ ॥

एवं भक्तिं वीक्ष्य तासामनन्यां तुष्टश्चित्ते पूर्णकामो मुकुन्दः।
देव्याऽलभ्यं यत्तदाऽदादनङ्गसौख्यं ता अप्यात्मभावं युवत्यः ॥ १०९ ॥
सन्निर्गुणाक्रिय-परात्मदृशो भृश ये ते स्वं सुखं भुवि गरिष्ठमिति ब्रुवन्तु।
एवं धिया मम तु भाति यदास तासां कृष्णाङ्गसङ्गसुखमस्य न तत्कलार्हम् ॥ ११० ॥

कृष्णप्रिया

हे अङ्ग ? अतिशय रमण से परिश्रान्त व्रजवनिताओं के मुख कमलों को करुणानिधान श्रीकृष्ण अपने श्रम हरने वाले और सुख प्रदान करने वाले कर कमलों से पोंछने लगे ॥ २१ ॥ चमकीले सुवर्ण के कुण्डल अलकावलियाँ की कान्ति, और कपालो की लावण्य श्री से और श्रीश्यामसुन्दर जी के सुधासभर हास्य अन्तरप्रेम और अनुरागमय अवलोकन से सहजप्राप्त मानवाली गोपियाँ उस रजोगुणजन्य मान को दूर करने के लिए भगवान श्रीकृष्णजी के नखक्षत से प्रमुदित होकर प्यारे ने किए हुए पुण्यमय सुकृतों का गान करने लगी ॥ २२ ॥

[1]ताभिर्युतः श्रममपोहितुमङ्गसङ्गघृष्टस्रजः[2] स[3] कुचकुङ्कुमरञ्जितायाः।
गन्धर्वपालिभिरनुद्रुत आविशद् वाः श्रान्तो गजीभिरिभराडिव भिन्नसेतुः ॥ २३ ॥
[4]सोऽम्भस्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः[5] प्रहसतीभिरितस्ततोऽङ्ग।
वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेन्द्रलीलः ॥ २४ ॥

कदमक्षमा

अन्वयः—यथा, श्रान्तः, इभराट , भिन्नसेतुः, गजीभिः, (युतः) श्रमम्, अपोहितुम्, वाः, (आविशति) तथा, इव, ताभिः, युतः, श्रमम्, अपोहितुम्, स्वकुचकुङ्कुमरञ्जितायाः, अङ्गसङ्गघृष्टस्रजः, गन्धर्वपालिभिः, अनुद्रुतः, (श्रीकृष्णः) वाः, प्राविशत् ॥२३॥ हे अङ्ग ! स्वयम्, स्वरतिः, अपि गजेन्द्रलीलः, अत्र, प्रहसतीभिः, युवतिभिः, इतः, ततः, अलम्, परिषिच्यमानः, प्रेम्णा ईक्षितः, (च) कुसुमवर्षिभिः, वैमानिकैः, ईड्यमानः, अम्भसि, अलं रेमे ॥ २४ ॥

---

१. ताभिर्यो–विज. । २. घ्वस्त–विज. । ३. सुकुच–विज. ; स्वकुच–वीर. । ४. सोन्तर्जले–विज. । ५. प्रेम्णी–वीर. ; प्रेमेतिक्षत-प्रहसिताभिरभिष्टुताङ्गः–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अथ जलकेलिमाह । ताभिरिति । तासामङ्गसंगेन घृष्टा संमर्दिता या स्रक् तस्या अत एव तासां कुचकुंकुमेन रंजितायाः सबंधिभिगंधर्वपालिभिर्गंधर्वपा गन्धर्वपतय इव गायन्तो येऽलयस्तैरनुद्रुतो ऽनुगतः स कृष्णो वाः उदकमाविशत् । भिन्नसेतुर्विदारितवप्रः । स्वयं चातिक्रान्तलोकवेदमर्यादः ॥ २३ ॥ सोऽम्भस्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोऽङ्ग ॥ वैमानिकः कुसुमवर्षिभिरीडयमानो रेमे स्वयं स्वरतिरत्र गजेन्द्रलीलः स्वरतिरात्मारामोऽपि रेमे । अत्र गोपीमण्डलेऽत्राम्भसीति । २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ स्थलक्रीडानन्तरम् । जलकेलिः जलक्रीडा । ताभिः गोपीभिः । तासाम् गोपीनाम् । अत एव संमर्दनादेव । गंधर्वपेत्युपमेयोत्तरसमासः । गधर्वपास्तुंबुर्वादय एव भगवल्लीलामन्वेष्टुमलिरूपेणागता इति ज्ञेयम् । श्रान्त इति जलात्यन्तावगाहात् । वप्रः तटः । यद्वा–श्रृ हिंसा तस्या अन्तो यस्य स श्रन्तस्स एव श्रान्तः नित्यनिरस्तमृत्युः । भिन्नसेतुर्विशेषितलोकमर्यादः 'भिन्नो विशेषे दलने' इति कोशात् । पृथक्पृथक्स्थापिततत्तत्सेतुरिति । एः कामस्य भं दीप्तिं राजति क्षिपतीतीभराट् । क्षेपेऽपि राज् धातुः । गोपीविषये गजीशब्दस्तु 'गज्–शब्दे' धातुः । गजीभिः शब्दं कुर्वतीभिः । भिन्नसेतुरिति गजस्य मदातिरेकसूचनेन कृष्णस्यापि तात्कालिकहर्षातिरेकमाह । भिन्नलोकवेदधर्ममर्याद इत्यर्थः । एतदर्थाऽऽश्रयणे तु "कृष्णे स्वधामोपगते धर्मः कं शरणं गतः" इत्युक्तिविरोधः स्यादित ॥ ततश्च रासोत्सवस्यावभृथस्नानमिव जलविहारमाह । ताभिर्युतः अपोहितु दूरीकर्तुम् । ताभिः काभिः याः स्वकुचकुंकुमैरेव रमणव्यापारवशेन रंजिताः । अंगसंगेनैव घृष्टाः संमर्दिताः स्रजो यासां ताः । 'स कुच–' इति पाठे सः कृष्णः । "गन्धर्वो मृगभेदे स्याद्गायने खेचरेऽपि च" इति विश्वप्रकाशाद्गंधर्वपा गायनश्रेष्ठा येऽलयस्तैरनुद्रुतः सन् । वाः जलमविशत् । भिन्नसेतुर्विदीर्णावरणः । कृष्णपक्षे, अतिक्रान्तलोकमर्यादः ॥ २३ ॥ परिषिच्यमान इति । नानाजलक्रीडाभेदै रार्द्रीक्रियमाणः । जलक्रीडाभेदास्तु कृष्णकर्णानन्दे उक्ताः । तथाहि–करयार्वामांगुष्ठमूलमापीडय तर्जन्याद्यगुलीभिर्मिथः संयोगरूपसंपुटेन क्षिप्त जलं यदि लक्ष्यीकृतं न स्पृशेत्तर्हि पराजितः, स्पृशेच्चेज्जित इत्येको भेदः १ । गण्डूषो यस्य लक्ष्यादर्वाक्पतेत्स पराजितः, लक्ष्य स्पृशेच्चेज्जित इति द्वितीयो भेदः २ । यस्य स्तनोरोभ्यां जलताडनेऽल्पास्तरंगाः प्रादुर्भवेयुः स पराजितः, बहवश्चेज्जित इति तृतीयो भेदः ३ । इतरेतरमंगुलीभिर्गृहीतमणिबन्धेन बाहुद्वये नालोडितजलोत्थफेनं यस्याचिरं लीयते स पराजितः, यस्य तु चिरेण स च जित इति चतुर्थो भेदः ४ । श्रोणिबिंबताडितपश्चाज्जलैर्यः पक्तित्रुटिता भवेत्स पारजितः, अन्यस्तु जित इति पञ्चमो भेदः ५ । इत्येवमपरेऽपि नाना सन्तीति । इतरततः सर्वाङ्ग षु । कुसुमवर्षिभिरिति— कृष्णभङ्ग क्रीडायां वितर्क्य बलवृद्ध्यर्थमिव जयजयेत्येवं स्तूयमानः । वैमानिकैरिति पुंस्त्वेन पुरुषैरेव स्त्रीणां तासां व्रजसुन्दरीपक्षपातित्वेन कुसुमवर्षादावप्रवृत्तेः । व्रजसुन्दरीविजये तु देवीभिरेव पुष्पवृष्टिर्जयजयेति शब्दश्च क्रियेत, न तु देवैरिति । गोपीमंडलस्य भेदाशंक्याह–अम्भसि वेति । स्वरतिस्स्वस्मिन्स्वेन वा रतिर्न परत्र परण वा यस्य स तथेति । अनेन तत्तत्काले रमणकथनं विशेषस्मरणाय वा सुरजनमोहनायेति बोध्यम् , अन्यथा "आत्मक्रीड आत्मरतिः" इति श्रुतिव्याकुप्येतेति । गजेन्द्र इव लीला यस्येति तथा । "गजो माने हस्तिनि च मुख्ये शब्दयुते तथा" इति निरुक्तेः । राजेन्द्राणां वेदशब्दयुतानां शिष्टानां लीला यस्य स तथेति । "यदायदा हि धर्मस्य ग्लानिर्भवति भारत" इत्यादिस्मृतेर्धर्मप्रवर्तक इत्यर्थः सम्यक् ॥ प्रेम्णेक्षितः' इति च पाठः । स्वं धनं रतिः क्रीडैव यस्य सः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततः परमहृष्टस्य श्रीभगवतोऽपि प्रेमचेष्टितमाह । ताभिरिति त्रिभिः । श्रमं तासामपोहितुमपनेतुम् । तादृशप्रेममयमधुरनरलीलाविष्टत्वादात्मनश्चेत्यर्थः । अङ्गसङ्गेत्यनेन पद्मिनीस्त्रीपूज्यपादानां तासामङ्गतः स्वाभाविकपरमामोदसञ्चारोऽभिप्रेतः । किञ्च स्वकुचेति स्वशब्दोऽत्रासाधारणार्थः । अत एवानुद्रुतः स्रक् कौन्दी ज्ञेया । परमशुभ्रत्वेन कुङ्कुमरञ्जितत्वसम्पत्तेः । एवं जलक्रीडायां कामोद्दीपनसामग्री च दर्शिता । वाः यामुनं आविशत् आसक्त्या प्राविशत् । दृष्टान्तो गजेन्द्रस्य बह्वीभिर्गजीभिः सह जलविहारासक्त्याद्यनुसारेण । अन्यत्तैः । यद्वा गन्धर्वपा गायनश्रेष्ठाः "गन्धर्वो मृगभेदे स्याद्गायने खेचरेऽपि च"ति विश्वः । त इव येऽलयश्च तैः । इति जलक्रीडायोग्यमुत्तमगीतमुक्तम् । यद्वा । काभिः श्रीभगवदङ्गसङ्गेन घृष्टस्रजो याः । याश्च निजकुचकुङ्कुमेन रञ्जिता रत्यावेशेन सर्वाङ्गेषु सम्पृक्तास्ताभिः । अत एव तासां श्रममपनेतुं न केवलं तासामेव स्वस्यापीत्याह । श्रान्त इति । भिन्न त्युपमानेऽपि श्रान्तत्वे हेतुः भिन्नसेतुरिव कृतलीलौद्धत्य इत्यर्थः । स कुचेति स्वाभिसम्मतः पाठः स श्रीकृष्ण इति व्याख्यानात् स्वेत्यस्याव्याख्यानाच्च ॥ २३ ॥ जलक्रीडामाह । स इति । स परमकौतुकी युवतिभिस्तादृशक्रीडारसमत्ताभिस्तादृशप्रवीणाभिस्ताभिरित्यर्थः । इतस्ततः सर्वासु दिक्षु स्थित्वाम्भसि जलमध्येऽर्थादम्भसैव सिच्यमानः प्रेम्णोक्षित इत्यपि पीठः । न केवलं तेन बहिरेव सिक्तः, अपि तु प्रेम्णोऽन्तरपि उक्षितः सिक्त इत्यर्थः इत्यन्तर्वहिरिति तत्क्रीडासक्तत्वं दर्शितं किं कुर्वतीभिः परिहासरसात् प्रकर्षेण

हसन्तीभिस्तादृशः सन् स्वयमपि रेमे तथैवान्तर्बहिरपि तेन ताः सिञ्चति स्मेत्यर्थः। कथंभूतोऽपि स्वरतिरपि तादृशोऽपि कथंभूतः सन् गजेन्द्रस्य लीलेव परमाशक्तिमयी लीला यस्य तादृशः सन् पुनः कीदृशोऽपि सन् वैमानिकैः कुसुमवर्षिभिरीड्यमानः सदा सर्वत्र स्तूयमानतया प्रकटपरममहिमापि सन्नित्यर्थः। तेषां तादृशलीलापरिकरतायामयोग्यत्वात् नान्यथा तु व्याख्येयम्। अङ्गेति हर्षसम्बोधने। अन्यत्तैः। यद्वा स्वेषु निजजनेषु स्वासु तास्वेन वा रतिः रागो यस्य सः। अतः स्वस्य जयादपि तासां जयेन सन्तोष इति भावः। यद्वा कृपया तज्जलक्रीडां विस्तार्य चेत्तत्राह। स्वा असाधारणी रतिर्जलादिक्रीडा यस्य सः। अतो दृष्टान्ताद्यभावेन सा विस्तरेण वर्णयितुं न शक्यत इत्यर्थः॥ २४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततः परमहृष्टस्य श्रीभगवतोऽपि प्रेमचेष्टितमाह—ताभिरिति त्रिभिः। श्रमं तासामात्मनश्चापोहितुमपनेतुं तत्र च सच्चिदानन्दघनमूर्त्तेरपि क्रीडायामावेशेन परमवैदग्ध्यादिसूचनार्थम्। प्रस्वेदकणिकादिना सौन्दर्य्यविशेषप्रदर्शनार्थञ्च श्रमः सम्भाव्य एव। अङ्गसंगेत्यनेन पद्मिनीस्त्रीवर्गपूज्यपादानां तासामङ्गतः स्वाभाविकामोदसञ्चारोऽभिप्रेतः। किञ्च, कुचेति, अत एवानुद्रुतः, स्रक् कौन्दी ज्ञेया, (मा० १०।३०।११) 'कुन्दस्रजः कुलपतेः' इति पूर्व्वोक्तेः। परमशुभ्रत्वेन कुंकुमरञ्जितत्व-सम्पत्तेश्च स्रक्सम्बन्धित्वेन तदानीमलीनां तत्र स्थितियोग्यता, तथा गन्धर्व्वपतिसदृशता, तत्र तेषामेव गीतिश्च बोधिता, एवं जलक्रीडायां कामोद्दीपनसामग्री च दर्शिता। स परमविनोदो 'वाः' यामुनमाविवेश, आसक्त्या प्राविशत्। दृष्टान्तो गजेन्द्रस्य वह्वीभिर्गजीभिः सह जलविहारासक्त्याद्यनुसारेण। अन्यत्तैर्व्याख्यातम्। यद्वा, गन्धर्व्वपा गायनश्रेष्ठाः—'गन्धर्व्वो मृगभेदे स्याद्गायने खेचरेऽपि च' इति विश्वः। ते च ते अलयश्च तैरिति जलक्रीडायोग्यमुत्तमगीतमुक्तम्। यद्वा, काभिर्भगवदङ्गसंगेन घृष्टस्रजो याः, याश्च निजकुचकुंकुमेन रञ्जिता रत्यावेशेन सर्व्वांगेषु संपृक्तास्ताभिः। अतएव तासां श्रममपनेतुम्, न केवलं तासामेव, स्वस्यापीत्याह—श्रान्त इति। अन्यत् समानम्॥ २३॥ जलक्रीडामाह—स इति। स परमकौतुकी, अम्भसि जलमध्ये, इतस्ततः सर्व्वदिक्षु, अलमतिशयेन परितः सर्व्वांगेषु सिच्यमानोऽम्भसैव स्वयं स्वातन्त्र्येण रेमे। यद्वा, स्वयमपि तथैव ताः सिञ्चन्नित्यर्थः। युवतिभिरिति कामरसमत्तत्वम्, तादृशसेकसामर्थ्यं च दर्शितम्। प्रहसतीभिः प्रकर्षेणोच्चैर्हसन्तीभिरिति महाकौतुकेन तस्य भंगवितर्केण वा; तस्य तु तेन प्रेमैव विवृद्धमित्याशयेनाह—प्रेम्णा प्रेमरसेनोक्षितः सिक्तः सन्। पाठान्तरे प्रेम्णेक्षितो दृष्टः। अङ्गेति प्रहर्षसम्बोधने। वैमानिकैर्विमानेन व्योम्नि चरद्भिर्देवादिभिः सर्व्वैरेव तत्क्रीडापरिकररूपैः कुसुमवर्षिभिः परमानन्देन वृष्टिवद्बहुलपुष्पाणि क्षिपद्भिः सद्भिरीड्यमानः साधु साध्विति। यद्वा, तस्य भङ्गं वितर्क्य बलवृद्ध्यर्थमिव जय जयेत्येवं स्तूयमानः, ततश्च वैमानिकैरिति पुंस्त्वेन पुरुषैरेवेति ज्ञेयम्। स्त्रीणां लज्जया विमोहेन वा तत्राशक्तेः, किंवा तासां गोपीपक्षपातित्वेन कुसुमवर्षादावप्रवृत्तेः, अतः स्वयमित्यस्यात्रैवान्वयः। स स्वयमेक एव तैः स्तूयमानः। अन्यत्तैर्व्याख्यातम्। यद्वा, स्वेषु निजजनेष्वेव रतिः प्रीतिर्यस्य सः, अतः स्वस्य जयादपि तासां जयेन सन्तोषात्तास्तथा चक्रुरिति भावः। यद्वा, ननु श्रीगुरो! कृपया तज्जलक्रीडां विस्तार्य वर्णयेति चेत्तत्राह—स्वा असाधारणा रतिर्जलादिक्रीडा यस्य सः, अतो दृष्टान्ताद्यभावेन सा विस्तरेण वर्णयितुं न शक्यत इत्यर्थः, एवमत्रान्ते वक्ष्यमाणात् श्रीहरिवंशोक्ताच्च द्वारकाजलविहारादप्यत्र विशेषः सूचितः। गजेन्द्रवल्लीला यस्य सः, पूर्व्वोक्ताभिप्रायमेव। यद्वा, तादृशजलसेकेऽपि गजेन्द्रस्येव सुखभरविवक्षयायं दृष्टान्तः॥ २४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सकुचकुङ्कुमरञ्जिततायाः कुचनिहितैः कुङ्कुमैः रञ्जितायाः अङ्गसङ्गघृष्टस्रजश्च ताभिर्युतः गन्धर्वपालिभिर्गन्धर्वसमूहैः॥ २३–२८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ तस्य ताभिः सह जलक्रीडामाह। ताभिरिति द्वाभ्याम्। अङ्गसङ्गेन घृष्टा सम्मर्दिता या स्रक् तस्याः अत एव तासां कुचकुङ्कुमेन रञ्जितायाः सम्बन्धिनः गन्धर्वपतय इव गायन्तो येऽलयो भृङ्गाः तैरनुद्रुतोऽनुगतः स कृष्णस्ताभिः श्रमं रतिविहारजं व्यपोहितुमपाकर्त्तुं वार्जलमाविशत् यथेभराट् गजपतिः श्रान्तो गजीभिः मुहुर्जलं प्रविशति तद्वत् भिन्नसेतुर्विदारिततटः दार्ष्टान्तिकेत्वतीतलोकवेदमर्यादः॥ २३॥ स इति। स भगवान् स्वयमात्मना स्वरतिरात्मारामोऽपि गजेन्द्रस्येव लीला यस्य तथाभूतः तदेवाह अम्भस्यलं नितरां प्रहसतीभिर्युवतिभिः प्रेम्णोक्षितः सिक्तः स्वयमपि ताः सिच्यमानः भ्वादिवद्दिवादेराकृतिगणत्वात्कर्तरि श्यन् सेयन्नित्यर्थः। यद्वा ताभिरतावत्किंचिदुक्षितः प्रत्युक्षणेन पुनः पुनः सिच्यमानः अङ्ग हे राजन् कुसुमानि वर्षन्तीति तथा तैर्वैमानिकैर्विमानारूढैर्देवैरीड्यमानः स्तूयमानोऽत्र रासे रेमे॥ २४॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वनक्रीडां निरूप्य जलक्रीडां वक्ति। ताभिरिति। कृष्णस्याङ्गसङ्गेन ध्वस्ताः सरतः स्रजो यासां ताः सुकुचानां कुङ्कुमरजोभिः रञ्जिता रागिताः याः ताभिर्गोपीभिः आगच्छन्ति आवृत्य गच्छन्तीत्यङ्कास्तरङ्कास्तत्सङ्गेन ध्वस्ता निरस्ताः स्रजो यस्याः

सा तथा तस्याः सुकुचकुङ्कुमरेणुभिरञ्जितायाः यमुनायाः वाः वार्या विशदित्यन्वयः गन्धर्वाणां पालिभिः श्रेणिभिः श्रान्तः भिन्नसेतुरिति द्वयमिभराड्विशेषणम्। यद्वा श्रुहिंसायामितिधातोः श्रान्तः नित्यनिरस्तमृत्युः भिन्नसेतुर्विशेषितलोकमर्यादः भेदो विशेषे दलन इति। अत्र विशेषो नाम व्यावर्तको धर्मोऽपि लक्ष्यते पृथक्पृथक्स्थापिततत्सेतुरिति वा एः कामस्य भां दीप्तिं राजयतीतीभराट् कामस्य भां राजति विपतीति वा इभराट् कृष्णः गोपीविषये गजगजि शब्द इति धातोः गजीभिः शब्दयन्तीभिः। यद्वा भिन्नसेतुरित्यनेन गजस्य मदातिरेकसूचनेन कृष्णस्य तात्कालिकहर्षातिरेकं व्यञ्जयति भिन्नवेदविहितधर्ममर्याद इत्यर्थः। कृष्णे स्वधामोपगते धर्मः कं शरणङ्गत इत्यादिस्वोक्तिविरुद्धं स्यादिति नासावङ्गीकर्तुं योग्य इति॥ २३॥ स्वस्मिन् स्वेन वा रितिर्न पराश्च न परेण वा यस्य स तथेत्यनेन तत्तत्काले रमणकथनं लोकमोहनाय विशेषस्मरणाय वेति गमयितव्यम्॥ २४॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ पुनः श्रमोत्पत्तौ तदपनोदाय जलक्रीडारभसमाह—ताभिर्युत इत्यादि। ताभिर्युतः सहितो वार्वारि अर्थात् कालिन्द्याः, (२४ श–श्लो०) "ततश्च कृष्णोपवने" इत्यादेर्वक्ष्यमाणत्वात्। किं कर्तुम्? श्रममपोहितुं दूरीकर्तुम्। कीदृश्याः यमुनायाः? अङ्गसङ्गेन घृष्टाम्लाना स्रजो यस्याम्। प्रवेशसमये तेन च ताभिश्च म्लाना माला उत्तार्य तस्यां न्यस्ता इति भावः। स्वस्मिन्नात्मविषये कुचकुङ्कुमैर्गोपाङ्गनानां कुचकुङ्कुमानि तै रञ्जितायाः। आदौ तासां कुचकुङ्कुमानि कृष्णे लग्नानि पश्चात्तदङ्गच्युतैः सापि रञ्जितासीदिति भावः। अत्र स्व-शब्दः कृष्णपरः, आदिशदिति कर्तृप्रत्ययात् कर्त्रा सह स्वशब्दस्य सम्बन्धात्। अथवा, स्वस्य च कुचानां गोपाङ्गनास्तनानाञ्च यानि कुङ्कुमानि त रञ्जितायाः। अत्र स्वशब्दस्य कृष्णपरत्वम्। मालाङ्गरागाभ्यां कालिन्दीं भूषयित्वा तत्राविशदिति भावः। गन्धर्वान् पान्तीति गन्धर्वपास्तत्स्वरूपा येऽलयस्तैः सह तेषां गानश्रवणानन्देन तन्निवृत्तेरस्वीकारादनुद्रुतो निकटमासाद्यत्वरया धावन् ताभिर्युत इति, ताश्च तथा कौतुकेन तथैवोचितमिति भावोक्तिः। क इव? श्रान्ताभिर्गजीभिः श्रान्तो गजराडिव, भिन्नसेतुः, गजपक्षे भिन्नवप्रः, पक्षे अतिक्रान्तकामतन्त्रमर्यादः। तथा च–'रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रमः इति। अथवातिक्रान्तलोकवेदमर्याद एव॥ २३॥ जलक्रीडाप्रकारमाह—सोऽम्भस्यलमित्यादि। जलमत्यर्थम्। युवतिभिः परितः सिच्यमानोऽपि प्रेम्णवोक्षितः न तु तैस्तैर्जलैः। इतस्ततः परि सर्वतोभावेन सिच्यमानत्वेऽपि सेककृतपरिभवं न सेदितवानित्यर्थः। अत एव कुसुमवर्षिभिर्वैमानिकैर्जयजयेति ईरितः स्तुतः प्रहसतीभिः प्रकर्षेण हसन्तीभी रेमे इति स्वयमपि ताः सिषेचेत्यर्थः। स्वासु तासु रतिर्यस्य, गजेन्द्रलील इति दीर्घकरदण्डजलसेके दृष्टान्तः। स्वयं रेमे इत्यन्वयः। स्वस्मिन् रतिर्वा तासां तथाविधजलसेकाश्रयत्वेन स्वस्मिन्नेव समाधिका रतिर्भवतीति भावः॥ २४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च रासोत्सवस्यावभृथस्नानमिव अलविहारमाह। ताभिर्युतः अपोहितुं दूरीकर्तुम्। ताभिः काभिः। याः स्वकुचकुंकुमैरेव रमणव्यापारवशेन रञ्जिताः अङ्गसङ्गेनैव घृष्टाः सम्मर्दिता स्रजो यासां ताः। स कुचेति पाठे स श्रीकृष्ण। "गन्धर्वो मृगभेदे स्याद्गायने खेचरेऽपि चे"ति विश्वप्रकाशाद्गन्धर्वेषा गायनश्रेष्ठा ये अलयस्तैरनुद्रुतः सन् वाः यामुने जलमाविशत्। भिन्नसेतुर्विदार्णावरणः। कृष्णपक्षे अतिक्रान्तलोकमर्यादः॥ २३॥ प्रेम्णेक्षितः प्रेम्णोक्षितः इति च पाठः स्वं धनं रतिः क्रीडैव यस्य सः॥ २४॥

रसिकाह्लादिनी–टीका

एवं रत्यभिनिवेशेन श्रान्तानामपि गाने सुखविशेषो दर्शितस्तेन च श्रमाभावोपि सूचित इति, इदानीं पुलिनलीलातोऽपि जलक्रीडासुखमनुभवितुं रतिजनितश्रमापनोदनछद्मना जलकेलिना हृताभिरिति तासां स्वकृतरतिजनितं श्रममपोहितुमपनेतुं वा जलमविशत्। कीदृशस्ताभिर्व्रजसुन्दरीभिर्युतः पुनः कीदृशः अङ्गसङ्गघृष्टस्रजः अङ्गयोः सङ्गेनाश्लषेण घृष्टा सम्मर्दिता सक् कुन्दकुसुममाला तस्या सम्वन्धिभिर्गन्धर्वपतय इव गानकर्तारस्तेषां तेऽलयैस्तैरनुद्रुतोऽनुगत इत्यर्थः। पूर्वमुक्तं गायकेषु वादकेषु च रसावेशेन मुह्यत् स सत्सु अन्यामेवन्तरंगो गायकवादकसम्पत्तिं प्रदर्शितवान्। अत् एवालिभिरेवानुगत इत्युक्तम्। कीदृशायाः स्रजः स्वकुचकुङ्कुमरञ्जितायाः स्वशब्देन व्रजसुन्दर्य्यस्तासां कुङ्कुमैरञ्जितायाः, अनेन सौगन्ध्यवैशिष्ट्यं सूचितम्। यद्वा स्वा स्वकीया चासौ कुङ्कुमरञ्जिता या स्रक् श्रीकृष्णस्यैव माला तासां कुचकुङ्कुमै रञ्जिता परभागं नीता। अनेनैतत्सूचितं श्रीकृष्णाङ्गसौगन्ध्यं पद्मिनीजातीनामेतासां स्वाभाविकदेहसौगन्ध्यं कुचकुङ्कुमस्य सौगन्ध्यं कुन्दकुसुमस्रजः सौगन्ध्यं एतत्सौगन्ध्यचतुष्टयलुब्धैस्तत्परिपुष्टैरन्तरङ्गैरलिभिरनुगतः। कालिन्दीसम्बधिशैत्यकवुरितं सौगन्ध्यमनुभवितुं वनेऽपि तत्र तदङ्गपरिमलं प्रत्यक्षीकर्त्तु एव परितः स्थिता इत्यर्थः। या व्रजसुन्दर्य्यस्तस्याङ्गसङ्गेन घृष्टा सम्मार्जिताः स्रजो यासां ताः, अत एव रत्यभिनिवेशेन यत् श्रमवारि तेन स्वांगानि निजकुचकुङ्कुमैरेव रञ्जितानि यासां ताभिर्युत इति जलकेलिष्वनुरूपं दृष्टान्तमाह। न केवलं ता एव श्रान्ताः किंतु श्रीकृष्णोऽपि इत्यत्र दृष्टान्त इमराडिव अविचारे हेतुगर्भं विशेषणमाह श्रान्त इति। श्रान्तस्य विचारासामर्थ्यात्।

जलक्रीड़ायां गजस्यैवौद्धत्यं गजीभिः करिणीभिः सह जले विहरति कीदृशो भिन्नसेतुः जलरक्षार्थं सेतवो बध्यंते तान् विदार्य्य जले प्रविशति। परिणामे विचाराभावः सूचितः। इभराडिवेत्यत्र स्वरूपैक्ये गजीभिरित्यनेन तासां बहुत्वं सूचितम्। श्रीकृष्णोपि वेदकृतमर्य्यादातिक्रमात् आत्मारामत्वातिक्रमात् भरतशास्त्रमर्य्यादातिक्रमात् च मिन्नसेतुरित्युक्तम्। न ह्य ताद‍ृशी रतिः क्वापि दृष्टा श्रुता वा। यथा भगवत अचिन्त्याऽतर्क्यशक्तिमत्वं तथा तासामपीति ज्ञेयम्। भगवत् प्रतिबिम्बरूपत्वात्तासामन्यथा सामरस्याभावः स्यादिति ॥ २३ ॥ इदानीं जलकेलिसम्भ्रममाह स इति, रत्यभिनिवेशेन यः श्रान्तः व्रजसुन्दरीजीवातुभूतः स इति। अम्भसि जलमध्ये युवतिभिस्तरुणीभिरलमतिशयेन पराजयमनुसन्धाय परिसिञ्च्यमानः परितः सम्वेष्टय इतस्ततः सर्वदिक्षु सर्वाङ्गेषु सिच्यमानः स्वयमपि ताः सिंचन् पराभवं नयन्निव रेमे। युवतिभिरिति रसपूर्णत्वमुक्तम्। प्रहसतीभिरिति स्वकृतसेकोद्रेके तस्य पराजयलक्ष्याद्दहासः सूचितः। पुनः कीदृक् प्रेम्णा ताभिरिक्षितो दृष्टः। यद्वा प्रेम्णैव ईक्षितः तदुक्तं "स प्रेमा भेदरहितं यूनोर्यद् भावबन्धन" मिति मूर्त्तिमता प्रम्णा ईक्षितः कटाक्षविषयीकृत अतस्ताभिः सह जले बिजहारेति पाठान्तरे प्रेम्णोक्षितः प्रेम्णानुक्षितः अन्तः सिक्त इत्यर्थः। बहिस्तु जलैः सिक्तः अयमभिप्रायः यथा जलैः सिक्तो वृक्षः पल्लवितो भवति तथात्र नवाऽनुरागपयसि बहिरन्तः सिक्तः पल्लवितो जात इति पूर्वमुक्तं देवादीनां गानवाद्यपुष्पवर्षाद्यधिकृतानां मोहेन स्थगितत्वम्। इदानीं रासोपरमे जलकेलिप्रारम्भे यथाधिकारसर्वेषामवधानप्रकारमाहवैमानिकैर्जलकेलिसम्भ्रममालक्ष्य इन्द्राद्यैः कुसुमवर्षिभिरीडयमानस्तस्य पराजयं दृष्ट्वा उत्साहं वद्धयद्भिः जय जयेति स्तूयमानः, यद्वा विरराम नायिकाकृतपराजयस्य रसपोषकत्वात्तं दृष्ट्वा विस्मितैः साधु साध्विति प्रशसमानः, यद्वा एतेन सर्वातिरेकेणानेकयूथानां तासां सेककृतपराजयमाकलय्य तदन्तरे कुसुमवर्षिभिः साधु साधु जय ययेति वाग्भ्यः स्तुयमानः स्वयं रेमे रतिं प्राप। अङ्गेति सम्बोधनेनाश्चर्य्यश्रवणेऽवधापनं कारयति। कीदृशः स्वरतिरपि आत्मारामोऽपि आत्मारामत्ववगणय्य ताभिः सह रेमे इति। यद्वा जयदर्शनेन स्वेषु प्रियेषु गोपीजनेष्वेव रतिर्यस्य, यद्वा सा स्वकीया असाधारणा अखण्डिता रति र्यस्य, यद्वा स्वेषां गोपीजनानां रति र्यस्मिन्, यथा जले सौक्षणं तया। तथा रतरुत्कर्षम् इति ज्ञापयितुं तेषां तत्वेनाह गजेन्द्रलील इति। गजेन्द्रस्य लीलेव लीला यस्येति उक्ताभिप्राय एव ॥ २४ ॥

विशुद्धरसदीपिका

तदेवं रहः क्रीडां प्रदर्श्य जलक्रीडां दर्शयति। ताभिरिति। ताभिः प्रागुक्ताभिः सर्वाभिरेव श्रमम्मधुरलीलाविष्टत्वं यथायथं राससुरतयोः खेदमपोहितुमपनेतुं काभिः याः श्रीभगवदङ्गसङ्गेन घृष्टा मर्दिताः स्रजो यासां ताः याश्च स्वैरसाधारणैः कुचकुंकुमै रञ्जिता इति सुरतान्तसूचनं ताभिस्ताभिरित्यन्वयः। वाः अर्थाद्यामुनमाविशत् आसक्त्या प्राविशत् कीदृशः गन्धर्वेति।

गन्धर्वपा गायनश्रेष्ठास्ते च ते अलयश्च तैः। गन्धर्वो मृगभेदे स्याद्गायने खेचरेऽऽपि चेति विश्वः ॥

यद्वा आलय इति पदच्छेदः जलक्रीडानुगुण्यगानपरैः सहचरीगणैरगत इत्यर्थः। यद्वा सकुचकुंकुमेति पाठः तत्राङ्गसन्नेत्यादिविशेषणद्वयमाक्षेपलभ्यायाः यमुनायाः नामानुक्तिश्च प्रेमवैवश्यादेव सच जलविहारो यथालङ्कारकौस्तुभे—

हारादिभिः सन्त्रुटितैर्निजाङ्गाद्विभूषयाभास पतङ्गपुत्रीम्। तस्याः सरोजादिभिरात्मनोऽङ्गम् राधालिवर्गो जलकेलिकाले ॥

अपिच—

कृष्णे कर्षति कोकयुग्ममवला दोर्भ्यां न्यधात्स्वस्तिकम् कण्ठे चारुमृणालमर्पयति सा बाहू दधे कुञ्चितौ।
पद्मञ्जिघ्रति पाणिनास्यमवृणोदित्थं जले खेलतोरस्पर्शासुरतियोः प्रियसखीवर्गस्य रस्याभवत् ॥

श्रीगोविन्दलीलामृते च—

निवारितसखीपाल्योर्मिथः संस्पर्द्धिनोस्तयोः। ईशेशयोर्द्वन्द्वयुद्धमासीदादौ जलाञ्जलि ॥
सखीपाल्यां वृतौ सत्यां कराकरि भुजाभुजि। नखानखि ततः पश्चान्मुखामुखि रदारदि ॥

तदेतदनुसन्धायाह। इभराडिवेति। निरंकुश इति भावः। भिन्नसेतुः अतिक्रान्तकामन्त्रमर्य्यादः—

प्रवृत्तेरतिचक्रे तु नैव शास्त्रं नच क्रम इति।

भरतोक्तेर्नित्यं तद्वशवर्तिनो ऽनुकूतस्यापि जलक्रीडावेशान्निरंकुशत्वं युक्तमेवेति भावः। यद्वा ताभिरिति बहुत्वेन तस्यान्यत्रासक्तिप्रसक्तिं समादधदाह। भिन्नेति। अतिक्रान्तानुकूलनायकमर्य्यादः तथात्वञ्च तस्यामेव निजवैदग्ध्यप्रदर्शनायेत्यविरोधः ॥ २३ ॥ तदेव प्रपञ्चयति परमकौतुकी युवतिभिः तत्तद्रसमत्ताभिः तादृशक्रीडाप्रवीणाभिश्च अलमतिशयेनाभितः इतस्ततः सर्वासु दिक्षु परिवृत्त्येति शेषः अम्भसि जले तेनैव सिच्यमान इति बहिः अन्तश्च प्रेम्णा ईक्षितः सिक्तः इत्युभयत्र क्रीडावेशो दर्शितः प्रकर्षेण हसन्तीभि स्वयमप्यन्तर्बहिश्च सिञ्चन् रेमे इत्यर्थः। क्रीदृशः स्वा असाधारणी रतिर्ज्जलक्रीडारूपा यस्य सः। यद्वा स्वेषु निजजनेष्वेव रतिर्यस्य स्वासु आत्मीयासु तास्वेव रतिर्यस्येति वा। अतः स्वपराजयेऽपि तासां जये सति सन्तोष इति भावः। वस्तुतस्तु स्वयंस्वरतिः स्वात्मनि श्रीराधायामेव रतिर्यस्य साऽपि अत्र गोपीजनसमुदाये गजेन्द्रलीलः निरर्गलचेष्टितः। यद्वा अत्र मम हृदि

स्वयं स्वस्वरूपेण स्वरतिः आत्मारामः श्रीराधारमण इति यावत् लोकवल्लीलायान्तु गजेन्द्रलीलः गजेन्द्रस्येव तन्मुखावेशाद्बह्वीभिः क्रीडामयी लीला यस्य सः अतएव परमोल्लासेन विस्मितैरपि पुनश्चेति तैवमानिकैः सुरादिभिः कुसुमवर्षिभिः सद्भिरीड्यमानः तादृसनित्यलीलतया संस्तूयमानः एवञ्च क्रीडाया निर्दोषत्वं साधितम् अङ्गेति सहर्षसम्बोन्धनं ततश्च निर्लेपतां कुछयुगानि निरञ्जनत्वं नेत्राणि मोक्षमगमन् रसनाकचाश्च नीव्यश्च निर्गुणदशां सह हारमाल्यामग्नासु तद्धनरसे रमणीस्वभूषामिति ब्रह्मानन्दरसादपि जलक्रीडायामधिको रसावेशो जात इतिसंक्षेपः ।। २४ ।।

श्रीरामनारायणकृता भावभावविभाविका

तासां श्रमापोहाय भगवतो जळविहारार्थं यमुनाप्रवेशमाह । ताभिर्युत इति । भगवतः साक्षात्सच्चिदानन्दविग्रहस्य श्रमस्य सम्भावयितुमप्यशक्यतया तासामेव श्रममपोहितुं तथाच श्रान्त इति दृष्टान्ते एवेभराड्विशेषणं ज्ञेयम् । यद्वा जनोद्धाराय स्वीकृतसर्वजनमनोहरगोपाललीलानुसारेण स्वैश्वर्य्यगोपनाय स्निग्धजनध्येयनित्याच्युतसुधाच्युद्दृक्चकोर्य्याप्यायनातिचित्रमुखचन्द्रच्छविप्रकटनाय च श्रमानुकारसम्भवेन तदपोहमिषेणैव ध्येयजलक्रीडाविष्काराय च श्रममपोहितुं यथा पररतिशान्त्याद्यन्विताः कुलश्रुतिकर्ममर्यादासेतुं भङ्क्त्वाभक्तास्तदनुरक्तिमत्ताः परमासक्त्या तत्तत्कर्मजनितश्रममपोहितुं नानारतिरङ्गतरङ्गान्वितविमलतापोपशमकस्यामरङ्गापगावाः प्रविशन्ति तथा ताभिर्वृतः सोऽतिस्वच्छशीतळश्यामलयमुनावाः गजीभिः सह भिन्नसेतुरिभराडिव भिन्नलोकमर्य्यादासेतुः सर्वज्ञोऽपि प्रेमोन्मत्तवदाविशत् युक्तश्चायं गोपीजनानुरागभगवत्कृपाप्रवाहवलाभ्यां तन्मर्य्यादाभङ्गः पुनः कीदृशः स तत्राह । कुचयोरालिङ्गनेन तत्संलग्नकुंकुमेन रञ्जितायास्तथा तासामङ्गसङ्गेन घृष्टायाः स्रजो वनमालायाः संबन्धिनस्तदामोदामोदापूर्णमनसो गन्धर्वपतय एवालयो भ्रमरास्तैरनुद्रुतः अत्रादौ स्रजः स्वत एवामोदवत्त्वं ततः पद्मिनीशिरोऽवतंसाङ्गसुमनः संघर्षेण ततः कुचकुंकुमरञ्जितत्वेन त्रिधामोदोत्कर्षस्तन्मन आकर्षणे हेतुर्दर्शितः अलीनाञ्च दिव्यत्वेन सुरत्वं तत्रापि सुरवत् गुञ्जारात्मकगानरतत्वेन गन्धर्ववत्त्वमभिहितं स्वकुचकुंकुमरञ्जितताया इति पाठेतु स्वशब्दस्तु तासां कुचकुङ्कुमस्यासाधारण्यद्योतकः तथानेनातिविलक्षणेन कुचकुंकुमेन रञ्जितत्वोक्त्यात्यामोदप्रभवत्वसूचनं तथाच यथा श्यामरङ्गगङ्गाप्रविष्टा भक्तजनाः स्वोरोऽनुरागरञ्जितहरितनुसुमनःस्रग्धरास्तथा भक्तिसङ्गानुरञ्जित सुमनोवृत्तिगणसुमनः स्रग्धरा हरिणैव तन्मध्वामोदोन्मदमधुपतयानुद्रूयन्ते तथा स्रजो गन्धर्वपाळिभिरनुद्रुत इति भावः । यथा भक्तजनोरस्युरोरागरञ्जिता हरितनुसुमनोमालाभक्तिसङ्गरङ्गरञ्जिता सुमनोवृत्तिमाला वा हरिणैव मधुपरूपतयानुद्रूयते तया भगवदुरसि कुचकुंकुमरञ्जितवनमालागन्धवरूपैर्भक्तैरलिरूपैरनुद्रूयते इति दर्शितम् । अत्र स्रगपि कौन्दी तस्य शौक्ल्येन रञ्जितत्वसंभवात् पूर्वं—

कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः । कुन्दस्रजः कुलपतेरिह वाति गन्ध इति ।।

निर्देशाच्च यद्वा या गोप्य एव भगवदङ्गसङ्गेन रतिरणाभिमर्शेन घृष्टाः स्रजः कुसुममाला यासां तथाभूता । यद्वा भगवदङ्गसङ्गघृष्टसुतनुसुमनस्तया घृष्टस्रग्रूपा अत एवाङ्गघर्षेण सर्वाङ्गप्रसरितस्वकुचकुङ्कुमेनैव रञ्जितास्ताभिर्युत इत्यन्वयः यद्वा । तासामात्मनश्चाङ्गसङ्गेन घृष्टाः स्रजः फुल्लितकुमुदादिकुसुमपङ्क्तयो यस्याः तथा कुचकुङ्कुमेन रञ्जिताया यमुनाया वाः आविशदिति सम्बन्धः ।। २३ ।। जलविहार एव निरूप्यते । सोऽम्भसीति । स इति नानारसविहारदक्षो रसाधारत्वेन प्रसिद्धो जलविहारानुरतः कृष्णसुरसात्मकातिस्वच्छकृष्णाम्भसि ताभिर्बहिरन्तः श्यामरसनिमग्नाभिर्युवतिभिः स्वसमानवयोनवकिशोरीभिस्तथा प्रहसतीभिः हसनं मुखचन्द्रसितप्रभामृतमयाह्लादिरश्मिभी रसवृष्टिः तथाच प्रकर्षण मुखचन्द्रकररसवृष्टिं कुर्वतीभिरितस्ततः सर्वादिग्भ्यः प्रेम्णेक्षितस्तथापरि सर्वतो बहिरन्तरतः सिच्यमानः तथा वैमानिकैः कुसुमवर्षिभिरीडयमानः स्तूयमानः स्वरतिः स्वयं रेमे इत्यन्वयः परिसिच्यमान इत्यत्र परिशब्देन सर्वतो बहिरन्तर्वृष्टिद्योतकेन बहुधा वृष्टयो द्योतितास्तत्र करकमलैर्बहिर्जलवृष्टिसेचनं प्रेम्णेक्षित इत्यनेन सितासितारुणघनात्मकदृग्भिरनुगौरोऽब्धिहृत्पूरितैः स्निग्धापाङ्गवर्षैः प्रेम्णान्तः सेचनम् । अतएव क्वचित्प्रेम्णोक्षित इति पाठः तत्रोक्षितः सिक्त इति स्पष्टमतः प्रेमरससिञ्चननिर्देशः तथा प्रहसतीभिरित्यनेन हसनं मुखचन्द्रसुधावर्षं रसस्य प्रकृष्टताद्योतकप्रशब्दपूर्वकत्वेनातिशयितसेचनसूचनं ताभिस्तथा बहिरन्तरार्द्रीभावापादकवृष्ट्या परिषिच्यमानः स्वयमपि तथा रेमे इत्यत्र भगवत्कर्तृका तासां बहिरन्तरार्द्रताप्रयोजिका अपि वृष्टयो ज्ञापिताः । तत्र हरि तत्सखीकरदृङ्मुखानां कमलत्वाद्यमुनाजलशोभापादकत्वं तथा पूर्वनिरूपिततज्जलादिवृष्टीनां तत्तत्कमलमधुस्रावत्वसम्भवात् तत्रत्यकमलानां स्वमधुवृष्ट्या लज्जोत्पादकत्वं तथा स्वधाम्नि सलिले सूर्यः स्वमित्रमित्रतनयासन्निधौ स्वसङ्कोचकहरितत्सखिविशालभालचन्द्रव्रातागमे तत्कमलैस्तेषु जलाद्यस्त्रप्रक्षेपज्ञापकत्वम् । यद्वा रिपुत्वेऽपि स्वगृहागतेषु तेषु स्वस्वमधुवृष्ट्यात्मकसमानेन सज्जनसद्रीतिद्योतकत्वमुत्प्रेक्षते । यद्वा प्रेमजडीकृततया स्वर्णयूथिकालतात्मकगोपीतनूनां श्रीकृष्णचन्द्रस्य करैरेव करैः करैर्जलसुधावृष्ट्या पुलकमुकुलात्फुल्लप्रत्यङ्गसुमनसां क्रीडोत्साहपवनजवलोलानां पूर्वोदितजलविन्द्वादिसुमनोवृष्टिः करदृङ्मुखैस्तत्सुमनोभिर्मधुवृष्टिर्वा ऊह्यते वैमानिकैरिति तु विमानेषु भवा वैमानिकाः सुरास्तैः । यद्वा विमानान्येव कानि साक्षात्स्वर्गाः तत्र तत्रत्यसर्वभोगसामग्रीसद्भावात् तत्र भवा वैमानिकाः । यद्वादौ विशेषमाना विमाना अतएव कुत्सितत्वाद्विमानका विमानका एव वैमानिका अधुना भगवच्छोभावलोकने तु विगतमाना विमानास्ते एव काः सुखरूपा विमानका एव वैमानिकास्तैस्तथा कुसुमवर्षिभिः कुः पृथिव्यपि सुमा सुष्ठु मा शोभा यस्यास्तादृशी येभ्यस्तानि कुसुमानि । यद्वा वृन्दावनसुमनसां

भगवत्तत्सखीतनुसुमनसां च शोभादर्शनलज्जितत्वेन कुत्सितां लज्जितत्वे तद्विमुखतामस्वीकृत्य तत्सम्मुखतया भगवत्प्रेमोत्साहेन सुष्ठु च मा शोभा येषां तानि कुसुमानि नन्दनवनसुमनांसि तद्वर्षोऽस्त्येषामिति कुसुमवर्षिणस्तैरीड्यमानः स्तूयमान इत्यनेन गोपीकर्तृकवृष्टित्रयवद्देवकर्तृकसुमनोवाग्वृष्टिद्वयमपि सूचितं तथा गोपीबहिरन्तरार्द्रतापादकभगवत्कर्तृकवृष्टिवत्सुरसुमनसामार्द्रत्वापादकरसवृष्टिरपि द्योतिता ताभिरभिषिच्यमानस्य भगवताऽपि तथा रमणे दृष्टान्तो गजेन्द्रलील इति गजेन्द्रो यथा करेणुभिर्बालगजैश्चाभिषिच्यमानः स्वयमभिषिञ्चति तद्वदिति भावः ॥ २४ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ततो रासोत्सवान्ते जातमवभृथस्नानमिव जलविहारमाह । ताभिर्युतः तासामङ्गसङ्गेन घृष्टाया मर्दितायाः कौन्दस्रजः अत एव तासां कुचकुङ्कुमेन रञ्जितायाः सम्बन्धिभिर्गन्धर्वपालिभिः "गन्धर्वो मृगभेदे स्याद्गायने खेचरेऽपि चेति श्वप्रकाशात् गायनश्रेष्ठैर्भ्रमरैरनुद्रुतः सः कृष्णः यमुनाया भगवदङ्गसङ्गेन घृष्टस्रजः । अत एव स्वकुचकुङ्कुमेन रत्यावेशात्प्रसृतेन रञ्जिताखिलदेहायास्ताभिर्युतस्तासां श्रमं निराकर्तुं स्वयमपि श्रान्तः सन् वार्यामुनं जलमाविशत् श्रान्ततायां हेतुः भिन्नः सेतुर्लीलामर्यादा येन कृतलीलौद्धत्य इत्यर्थः । गजोऽपि विदारितवप्रत्वात् श्रान्तः गजस्यैव वेद विशेषणद्वयं स्वयं चातिक्रान्तलोकवेदमर्याद इति केचित्॥२३॥ अङ्ग हे राजन् ! सः लीलाविलासचतुरः युवतिभिर्जलक्रीडां कर्तुमतिसमर्थाभिः अम्भसि इतस्ततः सर्वतः जलैः परिषिच्यमानः प्रम्णेक्षितश्च स प्रेमेक्षणेनान्तरपि षिच्यमानः क्वचित्प्रेम्णोक्षित इति पाठः परिषिच्यमानं प्रेष्ठमवलोक्य प्रहर्षेण हसन्तीभिः तदानीमपि पुष्पवर्षोपरायणैर्विमानस्थितैर्देवादिभिः स्तूयमानः स्वयं साक्षात् पुरुषोत्तमविग्रहो रेमे । तत्र दृष्टान्तः गजेन्द्रस्येव लीला यस्य अत्रैवं भूतरमणकालेऽपि वस्तुतः स्वरितः स्वस्मिन्नेव रतिर्यस्य न बहिः तथा च तादृशरमणं कुर्वतोऽपि भगवतः स्वमहिम्न्येव स्थानमेवासीदिति भावः । अत्र गोपीमण्डले अम्भसि वेत्यन्ये ॥ २४ ॥

रास-रहस्यम्

र० टी०—तासां वृत्तीनां कुचकुङ्कुमरञ्जिताया हृदयानुरागेणानुरक्तायाः, अङ्गसङ्गघृष्टस्रजः अङ्गः प्रियतमः आत्मा, तत्सङ्गेन ऐकात्म्यभावेन घृष्टा सम्मर्दिता सम्यग्रूपेण निराकृता या ऐहिकामुष्मिकभोगसिद्ध्यर्थं वासनासूत्रग्रथिता वादीनामापातरमणीयवाक्कुसुमानां या स्रक् तस्याः स्रजः, तत् सम्बन्धिभिर्गन्धर्वपालिभिः गन्धर्वाः देवताविशेषाः, तान् पालयन्तीति गन्धर्वपाः इन्द्रियाधिष्ठातृदेवाः, त एव अलं यावत् विषयमधुग्राहिणः इति गन्धर्वपालिस्तैरनुद्रुतः अनुगतविहारेण श्रान्ताः क्लान्ताः सन् , तं श्रममपहितुं अपाकर्तुं, ताभिर्युतः स जीवन्मुक्तो विद्वान् वाः उदकं उदः उत्कृष्टानि कानि सुखानि अर्थात् परमानन्दसागरं आविशत् , यथा भिन्नसेतुः विदारितवप्रः, इभराट् गजश्रेष्ठो गजीभिः सह श्रमनिरासार्थं जलं प्रविशति तथा विद्वान् अतिक्रान्तलोकवेदमर्यादो बभूव ॥ २३ ॥ हे अङ्ग ! हे प्रियतम ! प्रहसतीभिः, प्रहसन्तीभिः, नुमभाव आर्षः । प्रकर्षण सितप्रभामृतमयरश्मिभिः युवतिभिः वृत्तिभिः, इतस्ततः सर्वतः, अलमतिशयेन परिषिच्यमानः परितः सर्वतः स्वस्वज्योतिषा सिच्यमानः विकिर्णीक्रियमाणः, प्रेम्णेक्षितः अनुरागेणावलोकितः सन् , कुसुमवर्षिभिः स्तुतिलक्षणकुसुमानि तेषां वर्षणं यैः, वैमानिकैः विगतं मानमभिमानं येषां ते विमानाः स्वार्थे कः विमानकाः, स्वार्थे अण् , वैमानिकास्तैः अर्थात् इन्द्रियाद्याधिष्ठितदेवैरीड्यमानः स्तूयमानः स्वयं स्वररितः आत्मन्येवात्मना रतिर्यस्य अर्थात् आत्मारामोऽपि, गजेन्द्रलीलः गजेन्द्रस्य लीला इव लीला यस्य स जीवन्मुक्तः विद्वान् , अम्भसि चिन्मयानन्दसागरे मग्नः सन् रेमे आत्मारामो बभूव ॥ २४ ॥

गूढार्थबोधिनी

श्रान्त इव स कृष्णः श्रमम् अपोहितुं दूरीकर्तुं ताभिः युतः वाः जलमाविशदित्यन्वयः । कथंभूताः । कुचकुंकुमरञ्जितायाः स्रजः सम्बन्धिभिः गन्धर्वपैः गन्धर्वपतिभिरिव वर्तमानैः अलिभिः भ्रमरैः अनुगतः । इभराड् गजेन्द्रः । भिन्नसेतुः विदारितवप्रः । पक्षे अतिक्रान्तमर्यादः । वस्तुतः भिन्ना पृथक्–पृथक् स्थापिता सेतुः प्रेममर्यादा येन सः ॥ २३ ॥ अङ्ग हे राजन् ! स्वरतिः आत्मारामोऽपि सः कृष्णः अम्भसि जले ताभिः सह रमे विक्रीडेत्यन्वयः । वैमानिकैः देवैः । स्वासु स्वीयासु । स्वा असाधारणी वा रतिर्यस्य सः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्थलक्रीडामुक्त्वेदानीं जलक्रीडामाह । ताभिरिति द्वाभ्याम् । ताभिर्गोपीभिर्युतः तदङ्गसङ्गेन घृष्टा संमर्दिता या स्रक् तस्या अतस्तत्कुचकुङ्कुमेन रञ्जितायाः सम्बन्धिभिः गन्धर्वपालिभिः । गन्धर्वपतय इव गायन्तो येऽलयो भ्रमराः तैरनुद्रुतः अनुगतः स कृष्णः तासां श्रमं व्यपोहितुमपाकर्तुं वार्जलमाविशत् भिन्नसेतुर्विदारिततटः । अत एव श्रान्तो गजीभिर्युतः इभराड् यथोदकं प्रविशति तद्वत् दार्ष्टान्तिके स्वप्राप्ति प्रतिबन्धकतत्कर्मसेतुभिदित्यर्थः ॥ २३ ॥ जीवः स्वकीयोंऽशः शरीरं स्वकीयशक्ति-

परिणामजः अतः स्वकीयैर्गोपीजनैररतिर्यस्य सः अम्भसि युवतिभिः प्रेम्णा प्रथमतः स्नानविधिना उक्षितः सिक्तः अभिषिक्त इत्यर्थः। पुनः हे अङ्ग! अलमत्यर्थं हसतीभिः परिषिच्यमानः वैमानिकैरितस्ततः ईड्यमानश्च। अत्राम्भस्येव स्वयमपि ताभिः सह रेमे इत्यन्वयः ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

रासविलासमुक्त्वेदानीं जललीलां लपितुमारभते ॥ ताभिरिति। या अङ्गसङ्गध्वस्तस्रजोऽङ्गयोः परस्परं सङ्गकाले ध्वस्ता विगलिताः स्रजो यासां ताः सुकुचेसु सुकुङ्कुमेन रञ्जिताश्च ताभिर्वनिताभिः श्रममपोहितुं हापयितुं वार्यमुनानीरं ययौ। गन्धर्वाणां आलयः पङ्क्तयस्ताभिरनुद्रुतो याश्चाविशच्छिन्नसेतुर्मर्देन भिन्नः सेतुः सिकतादिकृतो येन स इवेभराट् एर्मन्मथस्य भर इभर इभरेणाटतीतीभराण्मदनातुर इव सुरतकाले गजीभिः करेणुभिर्यथा पाथो विशति तथाऽविशदित्यन्वयः। गन्धर्वपा इव विद्यमाना अलयस्तैरिति वा भिन्नसेतुर्भिन्नमर्याद इति कृष्णपक्षेऽप्यन्वयः ॥ २३ ॥ गजेन्द्रलीलः स्वरतिः स्वरमण एतद्रमणीरमणं तु लोकमोहनायेति मन्तव्यम। युवतिभिरन्तर्जले गतं जलमध्ये परिषिच्यमानः करनीरैर्दृतिद्वारा वा प्रेमपूर्वकमीक्षितं प्रहसितं च यासां ताभिरभिष्टुतमङ्गं यस्य स वैमानिकैर्गगनैर्देवैः कुसुमवर्षिभिश्चेड्यमानः स्वयं रेम इत्यन्वयः ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततस्ताभिस्तुल्याभिर्भगवान् जलक्रीडां कृतवानित्याह। ताभिर्युत इति। ताभिः सर्वाभिरेव युतः महारात्रसमये यमुनायां जलक्रीडार्थं प्रविष्टः तत्र प्रयोजनं श्रममपोहितुमिति तासां सर्वाङ्गश्रमं जलक्रीडयैव दूरीकुर्वन् भगवतस्ताभिः सह गमने जायमानां शोभां वर्णयति स्रजः गन्धर्वपालिभिरनुद्रुता इति यमुनाया वा विशेषणानि गन्धर्वाणां रक्षका गन्धर्वपाः गन्धर्वोत्तमाः ते च ते अलयश्च तैरनुद्रुतः सङ्गे शीघ्रं गतः वाः आविशत् आमोदस्य निवारणार्थं च तथा करणं सम्भोगेन श्रमोदके पद्मिनीनां कमलरूपो गन्धो भवति तदुपरोधेन च द्रुतपदविन्यास इति अनुद्रवणं ते च भ्रमरा भगवदीया एवेत्याह अङ्गयोः सङ्गे न घृष्टा या स्रक् तस्यास्ते यस्यां वा स्रक् तादृशी स्वा चासौ कुचकुङ्कुमरञ्जिता च भगवत एव माला कालिन्दी च कुचकुङ्कुमैरञ्जिता तत्र देहामोदः पुष्पामोदः कुङ्कुमामोदश्चेति स्वकीयत्वेनासाधारण्यं च आधिदैविकास्तु भ्रमराः तद्गन्धभोक्तार इति विशेषणं गन्धर्वपेति श्रान्तः इभराडिवेति अविचारे हेतुः श्रान्त इति विशेषणं लीलया गमनार्थं प्रत्येकसंभोगावधिभगवतोऽन्यो भावो निरूपित इति तदपगमात् श्रमलीलाप्याविष्कृता गजीभिरित्यन्यश्रमो निवारितः सेतवो बध्यन्ते जलरक्षार्थं ते सर्वे भिन्नाः तादृशगजेन भवन्ति भगवतापि ब्रह्ममर्यादा आत्मारामत्वरूपा जीवानां च मर्यादा तथा सति निवृत्ता कामरूपस्पर्शात् परदाराणामभिमर्षणाच्च पूर्वं तासां भगवत्स्पर्श एव स्थितः नतु भगवता ताः स्पृष्टा इति कामाभावात् देशकालमर्यादा च भग्ना। अतो हस्तिश्रेष्ठ इव जलक्रीडार्थं जलदेवतां दूरीकृत्य स्वयं तत्र प्रविष्ट इत्यर्थः ॥ २३ ॥ तत्र जलक्रीडां च कृतवानित्याह। स इति सः पूर्वोक्तः स्त्रीसहितः अम्भसि अलं युवतिभिः परिषिच्यमानो जातः ततः प्रेम्णा ईक्षितश्च प्रहसतीभिः कौतुकाभिनिविष्टाभिः इतस्ततः सिच्यमानः यदभिमुखमेव व्रजति तथैव सह रेम इति एवं सर्वाभिः यथा स्वयं माहात्म्यज्ञानपूर्वकं निर्भरस्नेहेन निर्दोषभावेन वदति शुकस्तथैव राजापि शृणोतीति ज्ञात्वा स्नेहेन स्वमध्यपातित्वं सूचयन् सम्बोधयत्यङ्ग ति। अत एव तुभ्यमिमां लीलां वदामीति भावः। ननु देवैः कथं न निषिध्यते तत्राह। कुसुमवर्षिभिर्वैमानिकैरीड्यमान इति। सर्वे देवा अभिनन्दनमेव कुर्वन्ति नतु निवारणमिति अन्यथा लोके कामरसो न व्यक्तो भवेदिति युवत्य इत्यविचारे परिषेके वीररसो माभावत्विति प्रेम्णैव ईक्षितः स्वयमितिपदेन बलात्कारेणापि तथेति सूच्यते तत्तदापि स्वस्मिन्नेव रतिर्यस्य परं स्वीकृता गजेन्द्रलीला येन यथा यथा जलेनोक्षण तथा तथा सुखमिति गजदृष्टान्तः महासौरतं च ॥ २४ ॥

श्रीसुबोधिनी-सारः

तासामङ्गसङ्गे न घृष्टायाः संमर्दितयाः स्रजो मालायाः कुचानां कुंकुमेन रञ्जितायाः संबंधिभिर्गंधर्वपालिभिः गंधर्वपतय इवालयो गायन्तस्तैरनुद्रुतः स कृष्णः ताभिर्गोपीभिर्युतो वार्जलम् आविशत् श्रान्तः श्रममपोहितुं दूराकर्त्तुं भिन्नाः सेतवो वेदमर्यादा येन "द्वयं तथा ब्रह्मणि कर्म नर्च्छति" इत्युक्तेः विदारितवप्र इभराट् गजेन्द्रो गजीभिरिव ॥ २३ ॥ अम्भसि जले प्रहसतीभिर्युवतीभिः स्त्रीभिरितस्ततः परिषिच्यमानः प्रम्णेक्षितोऽलं भृशं पुष्पवर्षिभिर्वैमानिकैर्देवैरीड्यमानः स्वस्मिन्नरतिर्यस्य स स्वयं रेमेऽत्र गजेन्द्रस्येव लीला यस्येति व्यधिकरणो बहुव्रीहिः ॥ २४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

ताभिर्युत इत्यस्याभासे, **तुल्याभिरिति**। निर्दोषपूर्णगुणत्वेन भावैरानन्दात्मकत्वेन च तुल्याभिरित्यर्थः। अत एव प्रतिषेकः सम्पत्स्यते। **रमणं जलस्थलभेदेन द्विविधम्। तच्च पूर्णरात्रिसाध्यम्। तत्रैकस्य पूर्तावितरस्यारम्भ इति महारात्रसमय**

इत्युक्तम् ।।२३।। **वैमानिकै**रित्यस्याभासः । **ननु देवै**रिति । अविचारमत्यर्थं बहुभिरेकदा कृतः परिषेको लोके व्याकुलतासम्पादको **दृष्ट** इत्यत्रापि तथा सम्भावनयान्तरङ्गभक्तैः स्वामिनीषु शनैः परिषेकः कार्यो नैवमिति विज्ञप्तिः कथं न कृतेत्यर्थः । अन्यस्य भक्तस्यापि तदा दर्शनं दुर्लभम्, परन्न पूर्वं विमानशतसंकुलमित्युक्तमिति तत्स्थितानां दर्शनं सम्भाव्यते । तेषां तु प्रभुलीलोपयोगिमण्डपस्थितिलक्षणसम्बन्धेनैव जनितानन्देन भगवदिच्छया पुष्पवृष्टिस्तुतिरसाभिनिवेश एव भवति, न तु दर्शनमपाति भावः । यद्यपि दर्शनेऽपि तैर्न किञ्चिद्वक्तुं शक्यम्, भगवदतिरिक्तस्यैतासु वक्तुमनधिकारात्, तथापि यदन्यत्र दुःखदं दृष्टं तदेताभिः कृतं प्रभोरतिसुखदमिति ज्ञापयितुमाचार्यैराभासस्तथोक्तः । **अत एवात्तगजेन्द्रलील** इत्युक्तम् । अत एवोत्क्षिप्तजलप्रतीकार उत्तानपाणिभ्यां सम्भवत्यपि प्रभुर्न करोति, प्रत्युत तदभिमुखमेव बाहू प्रसारयतीत्याशयेनाहुः **सर्वे देवा** इत्यादि । बाह्वोर्देवतारूपत्वेन तदवयवभूताङ्गुलीकरतलादीनामपि देवत्वमिति भावः । **अन्यथा लोके** इति । भगवता निवारणे कृते स्वामिनीलक्षणे लोके तथा न भवेदित्यर्थः ।। २४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ तस्य ताभिः सह जलक्रीडामाह—ताभिरिति द्वयेन । तासामङ्गसङ्गेन घृष्टा सम्मर्दिता या स्रक् तस्याः स्रजः अत एव तासां कुचकुङ्कुमेन रञ्जितायाः सम्बन्धिभिर्गन्धर्वपालिभिः गन्धर्वपाः गन्धर्वपतय इव गायन्तो ये अलयस्तैरनुद्रुतः अनुगतः, विहारेण श्रान्तः श्रममपोहितुमपाकर्तुं ताभिर्युतः स कृष्णो वार्जलमाविशत् । तत्र दृष्टान्तमाह—गजीभिरिति । भिन्नसेतुः विदारितवप्रः इभराट् गजश्रेष्ठो यथा गजीभिः सह श्रमनिरासार्थं जलं प्रविशति, तथातिक्रान्तलोकमर्यादो भगवानपि ताभिः सह जलमाविशदित्यर्थः ।। २३ ।। हे अङ्ग राजन् ! प्रहसतीभिर्युवतीभिरितस्ततः सर्वतः अलं अतिशयेन परिषिच्यमानः प्रेम्णेक्षितः कुसुमवर्षिभिर्वैमानिकैरीड्यमानः स्तूयमानः स्वयं स्वरतिः आत्मारामोऽपि गजेन्द्रस्य लीलेव लीला यस्य स भगवानत्राम्भसि रेम इत्यन्वयः ।। २४ ।।

अन्वितार्थप्रकाशिका

ततो रासोत्सवावभृथमिव जलविहारमाह—ताभिरिति ।। तासां स्वकुचकुङ्कुमेन रञ्जितायाः तासामङ्गसङ्गेन घृष्टा संमर्दिता चासौ स्रक् तस्याः स्रजः सम्बन्धिभिर्गन्धर्वपालिभिः गन्धर्वपाः गन्धर्वपतय इव गायन्तो ये अलयस्तैरनुद्रुतः अनुगतः विहारेण श्रान्तः श्रममपोहितुमपाकर्तुं ताभिर्युतः कृष्ण वार्जलमाविशत् । भिन्नसेतुः विदारितवप्रः इभराट् गजश्रेष्ठो यथा गजाभिः श्रमनिरासार्थं जलं प्रविशति तथा अतिक्रान्तलोकवेदमर्यादो भगवानपि । यद्वा । याः गोप्यः स्वकुचकुङ्कुमैरेव रञ्जिताः अङ्गसङ्गेनैव घृष्टाः स्रजो यासां ताभिर्युतः कृष्णः । स कुचेति पाठे स कृष्णः शेषं समम् ।। २३ ।। स इति ।। अङ्ग हे राजन् ! प्रहसतोभिः प्रहसन्तीभिः । नुमभाव आर्षः । युवतिभिरितस्ततः सर्वतः अलम् अतिशयेन परिषिच्यमानः प्रेम्णेक्षितः कुसुमवर्षिभिर्वैमानिकैर्देवैरीड्यमानः स्तूयमानः वयं स्वरितः आत्मारामोऽपि गजेन्द्रस्य लीलेव लीला यस्य स भगवानत्राम्भसि गोपीमण्डले वा रेमे ।। २४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ जलक्रीडामाह ताभिरिति द्वाभ्यां स्वकीयानां गोपीनां कुचकुङ्कुमैः रंजितायाः तासामङ्गसंगेन घृष्टाया स्रक्कुन्दपुष्पहारस्तस्याः गंधलुब्धैः गन्धर्वपतिसदृशैरलिभिर्भ्रमरैः अनुद्रुतः अनुगतः ताभिर्युतः कृष्णः श्रमं अपोहितु निवर्त्तयितुं वाः यमुनाजलं भिन्नसेतुर्भग्नवप्रः अतएव श्रान्तः गजाभिर्युतः इभराडिव आविशन् श्रीकृष्णपक्षे भिन्नसेतुः गोपीषु एकांतिकी भक्तिस्थापनाय भिन्नोभग्नः सेतुर्लोकमर्यादायेन सः ।। २३ स इति सः लीलयाश्चर्यजनकः स्वरतिः आत्मारामापि अत्र अंभसि युवतिभिः इतस्ततः सर्वदिक्षु जलैः परिषिच्यमानः स्वयं रेमे अंगेति परीक्षित् संबोधनम् ।। २४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ ताभिः सह तस्य जलक्रीडामाह ताभिरिति द्वाभ्याम् ।। ताभिरिति ।। सुकुचानां तासां शोभनस्तनसम्बन्धि यत् कुङ्कुम तेन रञ्जितायाः, अङ्गसङ्गस्तासामङ्गस्य संगमस्तेन घृष्टा संमर्दिता या स्रक् पुष्पमाला तस्याः, संबन्धिनः गन्धर्वपालयः गन्धर्वपतय इव गायन्तो ये अलयो भृङ्गास्तैः, अनुद्रुतोऽनुगतः, भिन्नसेतुरतीतलोकवेदमर्यादः कृष्णः, ताभिर्गोपीभिः युतो युक्तः सन्, श्रमं रतिविहारजं परिश्रमं, अपोहितुमपाकर्त्तुं, भिन्नसेतुर्विदारितनैकवप्रः, अत एव श्रान्तः, इभराट् गजपतिः गजीभिः सह इव, वार्जलं, आविशत् यमुनोदकं प्राविशत् ।। २३ ।। स इति ।। अङ्ग हे राजन्, सः कृष्णः, अम्भसि, युवतिभिः स्त्रीभिः, अलमतिशयेन, इतस्ततः परितः परिषिच्यमानः, प्रहसतीभिः प्रकृष्टहासं कुर्वतीभिस्ताभिः, प्रम्णा ईक्षितः, पाठान्तरे ताभिः प्रेम्णा उक्षितः सिक्तः, स्वयमपि ताः परिषिच्यमानः, कुसुमानि वर्षन्तीति तथा तैः, वैमानिकैर्विमानारूढैः, देवैः, ईड्यमानः स्तूयमानः, स्वयं स्वरतिरात्मारामः सन्नपि, गजेन्द्रस्येव लीला यस्य तथाभूतः सन्, अत्र गोपीमण्डलेऽम्भसि वा, रेमे ताभिरक्रीडत् ।। २४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ताभिर्युत इति : १०.३३.२३.

मत्प्रीतिहेतुकतयाऽपि रजोगुणश्चेल्लग्नः सतां हृदि तदा निजकौशलेन ।
कुर्वे तथा तदपनोदनमात्मभक्त्यृद्धिः स्याद्यथेत्यकृत तज्जलकेलियोगम् ॥ १११ ॥
बाह्योऽपि चेन्नहि मया निजभक्तिभाजां नीतः श्रमो बत लयं तदिहान्तरस्थम् ।
दूरं विधातुमसुमान् शरणं व्रजेन्मां को वेति तत्र सदयः क्षममुद्यतोऽभूत् ॥ ११२ ॥
अन्तर्बहिर्भवति यो रससंप्लुतात्मा तत्रैव तुष्टिरविशङ्कमनङ्गभूता ।
जानन्निदं स हि दयाब्धिरनङ्गपूर्णतुष्टिं विधातुमुचितं व्यदधाद्रसाक्ताः ॥ ११३ ॥
मदनुव्रतचारिणो भवेयुर्भुवि येऽनन्यधियामहं निशायाम् । वितरामि रसं स्वमेव तेषामिति तादृक्षु तदर्पणादबोधि ॥११४॥
अन्याङ्गनोपभोगोऽस्मिन्नदभ्रवसुशोभनः । अस्तीत्याकलयन्नीशस्तासु वस्त्वृद्धिमार्पयत् ॥ ११५ ॥
गोपिकयाऽऽगोऽपि कया नाकारिरिपो तवात्र नाकारि ।
इत्याशयतो लघु ता दिव्यं कर्तुं तदाऽऽपगामविशन् ॥ ११६ ॥
तीर्थप्रवेशे निशि चाऽप्रशस्ते शास्त्रप्रणेताऽप्यकरोत्तमीशः ।
तेन व्यबोधीदमिहानिशं यः सकामधीः स्यात् सहि भिन्नसेतुः ॥ ११७ ॥

सोऽम्भस्यलमिति : १०.३३.२४.

अस्मानिवेश जडजातविहारशीलानप्यच्युताऽव सुजनानिति सूचयन्त्यः ।
गोप्योऽम्बुकेलिमिषतः करनीरजातक्षीरै-र्व्यधुर्हरिशिरस्यभिषेकमीड्यम् ॥ ११८ ॥
तावत्तत्र जलेऽपि निर्जितनिशाधीशाननाब्जं चलद्भ्रूविक्षेपकटाक्षलक्षित-मृगीदाक्षिण्यनिक्षेपकम् ।
दुर्वर्णायितमात्मकान्तिकलया भूयः सुवर्णाचलं कुर्वन्तं स्तनगौरवाच्च महतो निम्नोत्तराशाश्रितम् ॥ ११९ ॥
वाराक्षेप विवर्तिताऽऽस्यविहिताप्रक्षेपजानन्यजव्यक्तोद्भूतिनिमित्तकाहितमृषा वर्ष्मैकसङ्घर्षणम् ।
किं वा लग्नमिहेति सम्भ्रमवशात् पश्येत्यसत्योक्तितः स्वाकृष्टाम्बरमूरुमूलममलं संदर्शयन्तं मुहुः ॥ १२० ॥
भीरत्रास्ति न कापि नाम हृदयं कस्मात् समुत्कम्पते पश्यैतत्त्वमिति प्रतार्य कुचयोरास्थापयन्तं करम् ।
मा भैषीस्त्वमशेषमाधिशमनं कुर्वेऽधुनैपाङ्गसेत्युक्त्वा गाढकृतप्रमर्दजनितानन्दार्धमीलद्दृशम् ॥ १२१ ॥
परस्पररसाद्भावि परस्परविहारकम् । पूर्णकामः स सानन्दं चक्रे तं कामिनीजनम् ॥ १२२ ॥ (कालापकम्)
कामैकपुष्टिकृतदृष्टिरहर्दिवं यः स्यादिष्टमस्य सततं जडजातमेव ।
तत्केलिमेव पशुवद् बहु मन्यते चेत्याधाज्जडोन्मदगतिं विशदां तदेशः ॥ १२३ ॥
यत्कराम्बुजमालम्ब्य तत्समुद्धरणोत्सुकः । गजेन्द्रलीलस्तत्काल आसीत्तद्युक्तमच्युतः ॥ १२४ ॥
यत्किञ्चिदद्भुतमुदीक्ष्य मनस्तदेति तद्दर्शने द्रुतममुष्य हि स स्वभावः ।
युक्तं विचित्रतममेतदवेक्ष्य दिव्यान्यागुर्द्रुतं सुमनसां सुमनांसि तत्र ॥ १२५ ॥
इत्थं देवास्तदीयं विविधविलसितं सम्यगालोचयन्तो धन्यास्ता गोपकन्यास्त्रिजगति च जलक्रीडनं धन्यमेतत् ।
ब्रह्मानन्दोऽपि तुच्छस्तृणमिव भवतात्यूचिरे यत्पुराऽस्मान् विद्वांसस्तत्सदीदृङ् न परमिति मुहुः श्लाघयैवाऽस्तुवस्ते ॥१२६॥
रसेन किं जडेनास्तु सरसोर्वी तथापगा । मूर्तिमद्रसशालिन्या गोप्य एवेति नो मतिः ॥ १२७ ॥
श्रीशार्ङ्ग्रिसङ्गतरतेर्मनुजस्य यत्र कुत्रापि नाम विहृतिः सुखदैव भूयात् ।
आसीच्छरन्निशि निशीथयुजीन्दुभाजि क्रीडासुखाय भृशमीशजुषां हि तासाम् ॥ १२८ ॥

कृष्णप्रिया

रासक्रीडा से प्राप्त सुखद श्रम के निवारण के लिए कोई विहार परिश्रान्त गजराज जल रक्षक बोधों को तोड़कर गजियाँ के साथ सरोवर में प्रवेश करता है वैसे रासपरिश्रान्त उन व्रजवनिताओं को साथ लेकर श्रमनिवारण के लिए, अङ्गों के समालिङ्गन से मर्दित हुई माला वाले श्रीवनमाली जी के पीछे गान करने गन्धर्वोत्तमतुल्य गुंजनरत मधुकर घूम रहे थे वैसे श्रीगोविन्दजी ने वक्षःस्थल लेप के कुङ्कुम से रंगे हुए श्रीयमुना जल में जलविहार के मध्य रात्री में प्रवेश किए ॥२३॥ हे अङ्ग ! राजन् ! जलविहार के लिए श्रीयमुनाजल में प्रवेश करने के पीछे, पुष्कल हास्यविनोद करती व्रजयुवतियाँ यमुना जल में स्थित हो चारों तरफ श्रीयमुनाजल को उछाल उछालकर वनबिहारीजी के अङ्ग प्रत्यङ्गों को सिचने लगी–मानो प्यारे का अभिषेक कर रही थी और मधुरहास्य के साथ श्याममनोहरजी करने लगी। अङ्ग उस पर्व प्रसङ्ग पर अपने अपने विमानों में विराजमान

देववृन्द पुष्पवृष्टि के साथ भगवान का यशोगान गाने लगे और आत्मा में रति रखने वाले आत्माराम श्रीकृष्ण ने गजेन्द्रलीला अनुकरण करते हुए जल रमण किया ॥ २४ ॥

ततश्च कृष्णोपवने जलस्थलप्रसूनगन्धानिलजुष्टदिक्तटे ।
चचार भृङ्गप्रमदागणावृतो यथा[1] मदच्युद् द्विरदः करेणुभिः ॥ २५ ॥
एवं शशाङ्कांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः ।
सिषेव [2]आत्मन्युपरुद्धसौरतः[3] सर्वाः शरत्काव्यकथारसाश्रयाः ॥ २६ ॥

कर्दमक्षमा

अन्वयः—ततः, च मदच्युत्, द्विरदः, करेणुभिः, यथा, (वने चरति) तथा, भृङ्ग प्रमदागणावृतः (भगवान् कृष्णः) जलस्थलप्रसूनगन्धानिलजुष्टदिक्तटे, कृष्णोपवने, चचार ॥ २५ ॥ अनुरताबलागणः, सत्यकामः, सः, (श्रीकृष्णः) आत्मनि, अवरुद्धसौरतः, शशाङ्कांशु, विराजिताः, शरत्काव्यकथारसाश्रयाः, सर्वाः, निशाः, एवम्, सिषेवे ॥ २६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्थलजलक्रीडे दर्शिते वनक्रीडां दर्शयति । ततश्चेति । कृष्णायाः युमुनाया उपवने जलस्थलप्रसूनानां गन्धो यस्मिंस्तेनानिलेन जुष्टानि दिशां तटान्यन्ता यस्मिन् । यद्वा दिशश्च तटं स्थलं च यस्मिन्नुपवने । भृंगाणां प्रमदानां च गणैरावृतः करेणुभिर्गजीभिरावृतो मदस्रावी गजो यथा ॥ २५ ॥ रासक्रीडां निगमयति । एवमिति । स कृष्णः सत्यसंकल्पोऽनुरता बलागणः अनुरागिस्त्रीकदम्बस्थ एवं सवा निशाः सेवितवान् । शरत्काव्यकथारसाश्रयाः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूता निशाः । यद्वा निशा इति द्वितीयाऽत्यन्तसंयोगोश्रृंगाररसाश्रयाः शरदि प्रसिद्धाः काव्येषु याः कथास्ताः सिषेव इति । एवमप्यात्मन्येवावरुद्धः **सौरतश्चरमधातुर्न तु स्खलितो यस्येति कामजयोक्तिः** ॥ २६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः स्थलजलक्रीडानन्तरम् । जलप्रसूनानि कुमुदादीनि, स्थलप्रसूनानि सौगंधिककुन्दादीनि । जुष्टानि परिमलितानि । तटशब्दस्यान्ते लक्षणातो मुख्यार्थश्रयणं न्याय्यमित्याह-यद्वेति । "तटं नपुंसकं क्षेत्रे प्रतीरे तु तटी त्रिषु" इति मेदिनी । भगवत्पक्षे मदच्युद् दुष्टगर्वहरः । द्वयोः पुण्य । पापयो रदो लेखनं येन स द्विरदः, चित्रगुप्तेन पुण्यपापलेखनकर्त्रेत्यर्थः । कैः-करे हस्तविषयेऽणुभिः सूक्ष्माग्रलेखनीभिः । भृंगवद्गायमानप्रमदावृत इति वा ॥ ततः जलविहारानन्तरम् । चकारेणांगमार्जनवनदेवतानीत तादात्विकवस्त्रालंकारपरिधानानन्तर च । कृष्णाया यमुनाया उपवने परःसहस्रकुञ्जयुक्ते तत्र स्वापलीलार्थं चचार जगाम । कीदृशे-जनस्थलवर्तिप्रसूनानां गन्धो यत्र तथाभूतैरनिलैर्जुष्टानि दिक्तटानि यस्य तस्मिन् । भृंगाणां प्रमदानां च गणैरावृतः । मदानां च्युत् च्योतनं क्षरणं यस्य सः ॥ २५ ॥ उपसहरति-एवमित्यनेन । रासक्रीडाया निगमनं बोधनम् । निशा नितरां शं सुखं यासु ताः । क्षणमपि रतिविरामो नासीदित्यन्वर्थता । अनुरतस्त्रीगणस्तदिच्छानुकूलरमितस्त्रीजनो वा । एतेन श्रीकृष्णस्य स्त्रीष्वनासक्तिर्द्योतिता । रसाः श्रृंगारहास्यादिरूपाः । निशानामचेतनत्वाद्रसाश्रयता न संपनीपद्यतेऽत आह-यद्वेति । चरमधातुरत्र रेतः । "रसाऽसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः" इत्यत्र धातुगणनायां शार्ङ्गधरेण शुक्रस्य चरमत्वमुक्तम् । किञ्चोत्पत्तिक्रमेणापि शुक्रस्य चरमत्वमेव । तदुक्तं संहितायम्-"रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते । मेदसोऽस्थि ततो मज्जा तस्माच्छुक्रस्य संभवः ॥" इति । रसादन्नादिरसादित्यर्थः । वीर्यं निरुध्य सुरतं करोतीति अयमेव कामजयः "स्त्रीसंगेऽपि न पतितं रेतो यस्य परेच्छया । स धन्यः पुरुषो लोके काम जेता स कथ्यते ॥" इति संहितोक्तेः ॥ शरत्पौर्णमासीनक्तंतनीं रासक्रीडामुपसहरन्नन्यास्वपि रात्रेषु विविधविचित्रापरिगण्यतादृशक्रीडा ताभिः सह बभूवेत्याह—एवं सर्वा एव योगमायायाः प्रभावाच्छशांकांशु विराजिता निशाः सिषेवे । स्वविलासैर्वृंदावनीयनिशासुखमास्वादयामासेत्यर्थः । षिवु धातोः कर्तृत्वेन क्रीडोपयोगिन्यस्ता निशाः परमादरणीयत्वेन भोग्याः किमुत तत्रत्याः कामविलासा इति द्योतितं, महाप्रसादान्नं सेवते भक्त इतिवत् । यतस्ते कामा विलासा न प्राकृता ज्ञेया इत्याह-सत्याः वास्तववस्तुरूपाः कामाः विलासा यस्य सः । किञ्च, रमणस्य कर्तृत्वं स्वं गोपीश्च प्रापयामासेत्याह-अनु तद्रमणानन्तरं रता रमणकर्तारोऽव लागणा अपि यस्य सः । अबलापदेन तत्र तासां प्रभविष्णुत्वाभाभावो व्यंजितः । तदा च भगवतो रात्रिंदिवं तत्केलिविलासैकतानमनस्त्वमभूदित्याह-आत्मनि मनसि । अवरुद्धा अवरुध्य स्थापिताः सौरताः सुरतसम्बन्धिनो हावभावविव्वोककिलकिंचितादयः, वाम्यौत्सुक्यहर्षादयः, स्तंभस्वेदवैवर्ण्यादयः, दर्शनस्पर्शनश्लेषादयश्च येन सः । "एवं सौरत-

---

[1] यथा मदान्धो-इति कस्यचित् । [2] उपरुद्ध-श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. रा. ध. । [3] सौभगः-विज. ।

संलापैर्भगवान्देवकीसुतः । स्वरतो रमयामास नरलोकं विडम्बयन् ।।" इत्यत्र विशेषविवक्षयैव संलापपदोपन्यासः । अत्रत्वविशेषेण सर्व एव ते संगच्छन्त इति ज्ञेयम् । सर्वा द्वादशमासिकीरेव निशाः सिषेवे । कीदृशीः—शरत्काव्यकथाश्रयाः 'हायनोऽस्त्री शरत्समाः' इत्यभिधानात् शरदि संवत्सरमध्य एव ऋत्वादिकर्माधिकृत्य ये काव्यकथारसाः संभवन्ति तेषामाश्रयाः या सांवत्सरिकनिशाः श्रीवृंदावनीयकृष्णक्रीडाधिकरणीभूतास्ता आश्रित्य सत्कवयः प्राचीनार्वाचीना व्यासपराशरजयदेवलीलाशुकगोवर्द्धनाचार्यश्रीरूपप्रभृतयः स्वस्वकृतेषु काव्येषु कथाः रसांश्च शृंगारप्रधानान्वर्णयित्वाऽपि न पारं प्राप्नुयुरित्यर्थः । अत एव मयापि सामस्त्येन वर्णयितुमशक्यत्वाद्दिगेवैषा दर्शितेति भावः ।। २६ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततो जलक्रीडानन्तरमिति पूर्वनेपथ्यापगमे तदानीं वन्यनेपथ्यस्य रोचकत्वात्तत्प्रचुरक्रीडाविशेषेच्छयेत्यर्थः । त्वर्थे चकारो भिन्नोपक्रमे । चचार पुष्पावचयनिकुञ्जान्तर्निलीनतादिविचित्रप्रकारेण क्रीडन्नितस्ततो बभ्राम । भृङ्गगणावृतत्वं पुष्पावचये तत्साहित्येनैवागमनात् । जलक्रीडायामङ्गेषु धौतेषु सहजमधुरसौरभ्यतयातिप्रकाशाच्च । अत एव तेषां मुहुरुक्तिः मदच्युदिति भृङ्गगणवृतत्वे हेतुता तथा द्विरदश्रेष्ठता स्वकान्तासक्तता च ।। २५ ।। अथाम्यां शरदि पूर्णिमायां कृतां रासक्रीडामुपसंहरन् तत्प्रकारतामन्यत्राप्युपदिशन्नन्यामन्यामपि क्रीडामुपलक्षयति । एवमिति । एवं पूर्वोक्तरासप्रकारेण शरत्काव्येति वक्ष्यमाणात् प्रतिशरदशशाङ्कांशुविराजिताः निशाः सर्वा एव सिषेवे परमादरेण परिचरितवानित्यर्थः । अन्यथा ऋत्वन्तरसम्भवात् ज्योत्स्नीस्तामसीश्च रहस्तत्तद्गृहप्रवेशतत्तदभिसारेण कुञ्जशयनादिना कदाचिद्रासेन चेति भावः । उत्तरासां विशेषज्ञापिकापूर्वा एव विशिनष्टि । शरदि ये काव्यकथारसाः सम्भवन्ति तेषामाश्रयो यासु श्रीभगवत्कृतानन्तलीलासु तादृशी निशा व्याप्येति पक्षे सर्वाः शरत्काव्यकथाः सर्वदेशकालकविभि र्यावत्यो वर्णयितुं शक्यन्ते तावतीस्ताः सिषेवे । किन्तु रसाश्रया रस एव आश्रयो यासां ता एव नतु कैश्चिद्विरसतया या ग्रथितास्ता अपीत्यर्थः । उपलक्षणं चैतदन्यासाम् । यद्वा । शशाङ्कांशुविराजिताः वसन्तादिसम्बन्धिन्योऽपि या निशास्त एवं रासप्रकारेण सिषेवे । तथा ऋतुषट्कात्मकस्य शरदाख्यस्य याः काव्यकथाः पूर्ववदनन्तास्ताश्च सर्वाः सिषेवे किन्तु रसाश्रया एवेति । कीदृशः सन् सिषेवे तत्राह । आत्मन्यन्तर्मनसि अवरुद्धाः समन्ततः स्थापिताः सौरताः तासां सुरतसम्बन्धिनो भावहावादयो येन तादृशः सन्निति । ततस्ताः परित्यक्तुं न शक्तवानिति भावः । अत्र विशेष्यनिर्देशादखिला एव भावादयो गृहीताः । "एवं सौरतसंलापैर्भगवान्देवकीसुतः । स्वरतो रमया रेमे नरलोकं विडम्बयन्नि"त्यत्र तु विशेषनिर्देशार्थमेव हि संलापशब्दो दत्त इति । आत्मन्यवरुद्धसौरतत्वे हेतुः अनुरतावलागणः निरन्तरमनुरक्तोऽवलागणो यस्मिंस्तद्विधः । तेषां सौरतानामनुरागप्रेमवत्त्वादनुराग एव तत्र कारणं नतु कामिजनवत् काम इत्यर्थः । सत्यकामः व्यभिचाररहिततादृशाभिलाष इति । एवमेवोक्तं श्रीपराशरवैशम्पायनाभ्याम् "एवं कृष्णो गोपीनां चक्रवालैरलङ्कृतः । शारदीषु सचन्द्रासु निशासु मुमुदे सुखी"ति । टीकायां त्वेवमपीत्यादिना स्मरपारवश्याभावमात्रप्रतिपादनाय सौरतशब्दस्य व्याख्यान्तरमप्रसिद्धमपि कृतमिति ज्ञेयम् ।। २६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततो जलक्रीडानन्तरमिति जलक्रीडया पुष्पमालादेर्म्लानत्वादिना पुष्पावचयनाद्यर्थमित्यर्थः । त्वर्थे चकारो भिन्नोपक्रम, जलप्रसूनानि कमलादीनि, स्थलप्रसूनानि जाती-कुन्दादीनि तत्तद्गन्धसम्बन्धेनानिलस्य शैत्यं सौरभ्यं च, जुष्टेति मान्द्यं च ज्ञेयम् । चचार पुष्पावचयनिकुञ्जान्तर्निलीनतादिविचित्रप्रकारेण क्रीडन् इतस्ततो बभ्राम । भृङ्गगणावृतत्वं पुष्पावचयनेन तत्साहित्येनैवागमनात्, किंवा जलक्रीडायामङ्गरागापगमेन सहजमधुरसौरभ्यप्रकाशात्, किंवा तेषां भावोद्दीपनस्वभावत्वेन सदा स्वीकारात् किंवा श्रीमुख-वनमालाद्यामोदेन सदाकृष्टत्वात्, अत एव तेषां मुहुरुक्तिः । मदच्युदिति भृंगगणावृतत्वहेतुता, तथा द्विरदश्रेष्ठता काममत्तता च, तथा गजीनामपि तत्संगात्तादृश्येव सूचिता । सर्वत्रायं दृष्टान्तः । प्रायो मत्तगजेन्द्रस्य कामाधिकतायास्तथा सदा गजीभिः सह स्वातन्त्र्येण क्रीडाया मिथः प्रीतेश्चापेक्षयेति दिक् । अन्यत्तैर्व्याख्यातम् । यद्वा, भृङ्गवद्लोला याः प्रमदास्तासां गणेनावृत इति तासां प्रेममत्ततोक्ता, अत एव प्रमदेत्युक्तम् ।। २५ ।। एवं तद्रात्रिकृतरासक्रीडामुक्त्वा तस्यामनुक्तमन्यमपि विलासं संगृह्णन् तथा बहुलरात्रकृतायामपि तस्यामुपलक्षयन्नुपसंहरीति—एवमिति, उक्तप्रकारेणेति । तद्रात्रावीदृशी परापि क्रीडा सूचिता, सा चात्यन्तविस्तीर्णत्वाद्वर्णयितुं न शक्यत इति भावः । तथा निशा इति बहुत्वेन तत्र च सर्व्वा इति साकल्येन सम्पूर्णं कैशोरं सर्वास्वेव रात्रिषु रासक्रीडा बोध्यते, श्रीपराशरेणापि तदुक्तमेव, सोऽपि कैशोरकवय इति, तत्र च—'कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । कैशोरमापञ्चदशाद्यौवनन्तु ततः परम् ।।' इत्यादि वचनादेकादशाब्दमारभ्य पञ्चदशाब्दपर्य्यन्तं गोकुलेऽत्र नित्यं सा क्रीडा ज्ञेया, यच्चोक्तं श्रीमदुद्धवेन तृतीयस्कन्धे (भा० ३।२।२६)—'एकादशसमास्तत्र गूढार्चिः सबलोऽवसत्' इति, तच्च कौमार-पौगण्डयोरयोग्यसमययो रासक्रीडानुदयेन भगवत्ताविशेषप्राकट्याभावाद्गुप्तैश्वर्य्यत्वाभिप्रायेण । अत एवोक्तम्—गूढार्चिरिति । अत एव रंगस्थले पितरौ प्रति श्रीभगवतैव वक्ष्यते (भा० १०।४५।३)—'नास्मत्तो युवयोस्तात' इत्यादि । यच्च मधुपुरीप्रवेशे वक्ष्यमाणस्य प्रागल्भ्यलीला-सम्भवात्, अन्यथा 'हसितावलोकनैः' इत्यादेरनुसारेण कैश्चिद् यौवनेऽपि श्रीभगवतो गोकुलक्रीडा मन्यते, तच्च नातीव संगतम्, कैशोरेऽपि तस्य वैदग्धीविशेषेण प्रागल्भलीलायाः सम्भवात्, अन्यथा (भा० १०।३८।२९)

'किशोरौ श्यामलश्वेतौ' इत्यक्रूरदृष्टेः। तथा (भा० १०।४४।८) 'किशोरौ नाप्तयौवनौ' इति पुरस्त्युक्तेर्विरोधः स्यादिति दिक्। किञ्च, एवमित्यनेन तद्रात्रिक्रीडाया ईदृशी अन्यरात्रिक्रीडापि तादृश्येवेति सूच्यते, ततश्च पूर्वं रासक्रीडारम्भे श्रीभगवस्तासाञ्च मिथोवाकोवाक्यं मध्ये प्रश्नोत्तरञ्च परमप्रेमरससंप्लुततयानुसन्धानाभावेन नित्यनूतनवत् प्रवृत्तेः, पुनः पुनः सर्वं सम्भवेदेव, एतच्च पूर्व्वं लिखितमेव, शशांकः सम्पूर्णचन्द्र इत्यर्थः, पूर्णत्वेनैव शशसदृशलाञ्छनस्य सम्यगुदयात्, तस्यांशुभिर्विशेषेण राजिता दिनवत् प्रकाशिताः। एवं श्रीभगवद्रासक्रीडार्थं तासु रात्रिषु चन्द्रः पूर्णिमायामिव पूर्णमण्डल एवोद्गच्छेदिति ज्ञेयम्। यथोक्तं श्रीवैशम्पायनेन—'एवं स कृष्णो गोपीनां चक्रबालैरलंकृतः। शारदीषु स चन्द्रासु निशासु मुमुदे सुखी ॥' इति। तत्र च शारदीष्वित्युपलक्षणम्, किंवा शारदीष्विवेति ज्ञेयम्। यद्वा, मधुपुरीमध्ये श्रीवसुदेवकृतपुत्रपरिवर्त्तनादिवत् कल्पभेदव्यवस्थया भेदः कल्प्य इति। ननु नित्यमेव तादृशरात्रौ तादृशप्रकारादिना कथं सा क्रीडा सिध्येत्तत्राह—सत्यकाम इति। ननु तथापि मानादिना पत्यादिपारवश्यादिना वा सदा तास्तस्यापि दुर्लभा मन्ये, तत्राह—अनु निरन्तरं रतोऽनुरक्तः सर्व्वथा बहुप्रबन्धेन सर्व्वोपेक्षया वा सम्बन्धोऽबलानां तदेकाधीनगोपीनां गणो यस्मिन्निति यद्वा, ननु पत्यादिभिरस्वतन्त्राणां तासां नित्यप्राप्तिः कथं स्यात्? तत्राह अनुरतेति। सर्वोपेक्षया सदा तस्मिन्नेव रतत्वादित्यर्थः। किं वा तासामनुरतत्वेन सामरस्याद्यत्र कुत्रापि यदा तदा येन केनापि प्रकारेण सिध्येदेवेति भावः। तत्र चासम्भावना नास्तीत्याह—स महामोहना रासरसिक इति। न च कदाचित् केनापि हेतुना तत्र तृप्तिः स्यादित्याह—सत्यम्, किन्तु प्रमपरवशः, अवरुद्धं स्वीकृतं सौरतं सुरतसमूहो लीलाविलासोद्रेको वा येन सः, तदर्थमेवाववतीर्णत्वादित्यर्थः। तच्चात्मन्येवेति, न केवलं स्वयमौदास्येन ता एव रमयामास, किन्तु आत्मन्येवाहरुद्धसौरत इति, किन्तु स्वस्मिन् साक्षात् स्वीकारेण तदासक्त्या स्वयमप्यनुभूतवानित्यर्थः। यद्वा, आत्मनि निमित्ते, इत्यात्मारामताद्युपेक्षया तस्यापि तेन परमाबोधितः। न केवलमुक्तप्रकारा रासक्रीडैव कृता, किन्तु ताभिः सह विचित्रप्रकारेण विचित्रा रतिश्च कृतेत्याह—शरदिति। शरदि कामस्य प्राबल्येन पुलिनादेश्च सौन्दर्य्येणोक्तम्। यद्वा, 'हायनोऽस्त्री शरत्समा' इत्यमरोक्तेः सम्बत्सरमध्ये यस्मिन् ऋतौ मासे दिवसे वायाः काव्येषु कथा निरूप्यन्ते, ताः सिषेवे, तदर्थान् प्रीत्यानुष्ठितवानित्यर्थः, ते च श्रीगीतगोविन्द विदग्धमाधवनाटकाद्युक्तप्रकारका ज्ञेयाः। अन्यत्तैर्व्याख्यातम्। यद्वा, एवं सिषेव इति रात्रिषु रासक्रीडा उक्ताः। अधुना कदाचिद्दिवसेष्वपि तादृशीमन्यामपि क्रीडां सूचयति—सर्व्वा इति, शरत्काव्यकथाश्च सर्वा सिषेवे। तत्र 'काव्य'-शब्देन परमवैचित्री तासां सूचिता, ताश्च गीतगोविन्दादिप्रसिद्धाः। तथा श्रीचण्डीदासादिदर्शितदानखण्ड-नौकाखण्डादिप्रकारकाश्च ज्ञयाः, इत्येषा दिक्। अन्यत् समानम् ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं स्थलजलकीडे वर्णिते अथ वनक्रीडां वर्णयति। ततश्चेति जलस्थलप्रसूनानां गन्धो यस्मिंस्तेनानिलनजुष्टानि दिशं तटान्यन्ता यस्मिंस्तस्मिन् कृष्णायाः। यद्वा दिशश्च तटंस्थलं च यमुनाया उपवने भृङ्गाणां प्रमदानाञ्च गणरावृतश्चचार कथं यथा मदच्युन्मघु धारास्रवन् द्विरदो मत्तगजः करेणुभिरिभीभिस्तद्वत् ॥ २५ ॥ रामक्रीडां निगमयति। एवमिति। इत्थं स भगवान् सत्यसङ्कल्पोऽनुरतोऽनुरागी स्त्रीणां गणो यस्य तथाभूतोऽप्यात्मन्येवावरुद्धः सौरतश्चरमधातुर्नतु स्खलितो यस्य तथाभूत इति कामजयः सूच्यते चन्द्रांशुभिर्विराजिताः सर्वाः शरदि काव्येषु कथ्यमाना ये कथारसास्तेषामाश्रयभूता निशाः सिषेवे ॥ २६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कृष्णायाः यमुनाया उपवने जलप्रसूनानि कुमुदादीनि स्थलपुष्पाणि सौगन्धिककुन्दादीनि तेषां गन्धमिश्रवायुना जुष्टाः परिमलिताः दिक्तटाः दिगन्ता यस्य स तथा तस्मिन् मदच्युन्मदजलस्रावी अयमत्र दुष्टगर्वनाशनः रदलेखन इतिधातोः पुण्यपापयोरदो लेखने येन स द्विरदः चित्रगुप्तेन पुण्यपापलेखनकर्तेत्यर्थः। करे हस्तविषये अणुभिः लतावत् दण्डायतबाहुभिरित्यर्थः। भृङ्गवद्गायमानप्रमदागणपरिवृतः यद्वा भृङ्गप्रमदा भृङ्गस्त्रियः तासां गणेन संवृतः ॥ २५ ॥ उपसंहरति। एवमिति। अनुरताबलागणः अनुरतस्त्रीगणः तदिच्छानुकूलरमितस्त्रीजनो वा नितरां शं सुखं यासु ताः निशाः रात्रीः एकोऽपि क्षणो रतिक्रियां विना न हापित इति शरत्काललक्षणवर्णनेन ये काव्यकथायां संयाताः रसाः शृङ्गाहास्यादिरूपाः एतेषामाश्रयः आश्रया इतिपाठे निशाबिशेषणं रसानाश्रयन्तीति रसाश्रयाः आत्मन्यवरुद्धं सौभगं सौरतं निर्दुष्टं रेता लक्षणं वीर्यं येन स तथा सुरतक्रिया वीर्यं निरुध्य क्रियत इत्यर्थः यद्वा वशीकृतयोगैश्वर्यः यद्वात्मनि देहे विकाशीकृतसौन्दर्यः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ जलविहारावसान–समये योगमाययोपनीतवस्त्रालङ्कारानुलेपान्तराणि यथास्वं सर्वा एव सोऽपि च परिधाय मधुपानलीलामाततानेत्याह—ततश्चेत्यादि। कृष्णाया उपवने पुलिनं हित्वा उपवनमध्यं गत्वेत्यर्थः, अन्यथा वैमानिका आलोकयिष्यन्। जलप्रसूनैः कुमुदादिभिः स्थूलप्रसूनैर्नानाविधैरेव यो गन्धानिलः स गन्धपवनस्तेन जुष्टा दिशस्तटानि च दिक्तटा इति वा। यत्र भृङ्गप्रमदागणावृत इति निभृतलीला सूचिता यतः पुंभृङ्गा अपि तदा नासन्। यदच्युद् द्विरदो यथेति दृष्टान्तेन मत्तता व्यङ्ग्या,

तया च मधुपानं ध्वनितम् ॥ २५ ॥ उपसंहरति—एवमित्यादि । सत्यकामः सत्यसङ्कल्पः स श्रीकृष्णः शशांकांशु विराजिता निशा व्याप्य, उक्तप्रकारे बहुत्वे वहुवचनम् शरत्काव्यकथाः सिषेवे शरदि संवत्सरे याः काव्यकथा ऋतुषट्कभवा था वनविहार–जलविहार मधुपान रत्योत्सवादयः काव्याङ्गभूताः कथास्ता इत्यर्थः । तादृशलीलानामतिगोप्यत्वात् श्रोतृणामनधिकाराच्च सङ्केतेनैवोपसंहृतं भगवता श्रीशुकाचार्येण । तत्र मदच्युद्द्विरद–दृष्टान्तेन मधुपानम् आत्मन्यवरुद्धसौरत इत्यनेन रतोत्सवः । अवरुद्धमवरोधः, सुरतमेव सौरतम् , आत्मन्यवरोधः सौरतं यस्येति रतमर्यादा चोक्ता सङ्केतेनैवेति दिक् , तच्च विपरीतरतमित्यर्थः । रसाश्रयाः भृङ्गाररसाश्रयाः ॥ २६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

'एवं शशाङ्कांशु' इत्यादि । निशा सिषेव इति निशाया बहुत्वम् , न प्रत्येकबोधकम् , सर्वासां निशानां पूर्वं शशाङ्कवत्त्वं न घटते, तेन निशा इति वहुवचनमेकीकृत भूरिनिशापरम् । तेन एवं शशाङ्केति एवं शब्दस्य, शशाङ्कश्च स्वगणो विस्मितोऽभवदिति पूर्वोक्त–विस्मितत्वेन निष्पन्दत्वम् , तेन निशारूपकालस्य वहुलत्वम् रहस्यम् । एवम्भूतो यः शशाङ्कस्तस्यांशुस्तुतिभिर्विराजिता इत्यव्येन सह समासः । उच्चैर्मुखादिवत् । एतेनैव (भा० १०।२९।१) "रात्रिः" इति तथा पूर्वं व्याख्यातम् । एवमेव कुतः ? स सत्यकामः सत्यसङ्कल्पः, एवमेव पूर्वं सङ्कल्पमकार्षीत् । आत्मन्यवरुद्धं सौरतं सुरत–सुखं येन प्रेमैव सुरतमित्यवरुरोधेत्यर्थः । अथवा आत्मन्यवरुद्धसौरत आत्मना न्यवरुद्धं सौरतं ग्राम्यधर्मो येनेत्येकमेव पदम् । ईश्वरस्य तस्य ईश्वरीणाञ्च तासां ग्राम्यधर्मोऽनुचितः, (ध्वन्यालोके ३।१४) "अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्" इति रसग्रन्थकाराः । तथाविध–दम्पतीनान्तु परस्पराधरपान–चुम्बनालिङ्गनादिरवाध एव शृङ्गारः । निशाः कथम्भूताः ? शरत्काव्यकथारसाश्रयाः शरदि सम्वत्सरे या काव्यकथा कविसम्बन्धिनी कथा ऋतुषट्कादि–वर्णनं चन्द्रोदय–मधुपानोत्सवादि च तस्य यो रसस्तदाश्रयाः ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततो जलविहारानन्तरं चकारेणाङ्गमार्जनवनदेवतानीततादात्विकवस्त्रालङ्कारपरिधापनानन्तरञ्च कृष्णाया यमुनाया उपवने परःसहस्रकुञ्जयुक्ते तत्र स्वापलीलार्थं चचार जगाम कीदृशः । जलस्थलवर्त्तिप्रसूनानां गन्धो यत्र तथा भूतैरनिलैर्जुष्टानि दिक्तटानि यस्य तस्मिन् । भृङ्गाणां प्रमदानाञ्च गणैरावृतः । मदानां च्युत् च्योतनं क्षरणं यस्य सः ॥ २५ ॥ शरत्पौर्णमासीनक्तन्तनीं रासक्रीडामुपसहरन्नन्यास्वपि रात्रिषु विविधविचित्राः परिगण्य तादृशक्रीडा ताभिः सह बभूवेत्याह । एवं सर्वा एव योगमायायाः प्रभावात् शशाङ्कांशुविराजिताः निशाः सिषेवे स्वविलासैर्वृन्दावनीयनिशासुखमास्वादयामासेत्यर्थः । सिवुधातोः कर्तृत्वेन क्रीडोपयोगिन्यस्ता निशाः परमादरणीयत्वेन भोग्याः किमुत तत्रत्याः कामविलासा इति द्योतितं महाप्रसादान्नं सेवते भक्त इतिवत् । यतस्ते कामविलासा न प्राकृता ज्ञेया इत्याह । सत्या वास्तववस्तुस्वरूपाः कामा विलासा यस्य सः । किञ्च रमणस्य कर्तृत्वं स्वं ता गोपीश्च प्रापयामासेत्याह । अनु तद्रमणान्तरं रता रमणकर्त्तारः अवलागणा अपि यत्र सः । अबलापदेन तत्र तासां प्रभविष्णुत्वाभावो व्यञ्जितः । तदा च भगवतो रात्रिन्दिवं तत्केलिविलासैकतानमनस्त्वमभूदित्याह । आत्मनि मनसि अवरुद्धाः अवरुद्ध्य स्थापिताः सौरताः सुरतसम्बन्धिनो भावहावविव्वोककिलकिञ्चितादयः । वाम्योत् सुक्यहर्षादयः स्तम्भस्वेदवैवर्ण्यादयः दर्शनस्पर्शनश्लेषादयश्च येन सः एवं सौरतसंलापे भगवान् देवकीसुतः । स्वरतो रमयामास नरलोकं विडम्बयन्नित्यत्र त्रिशेषविवक्षयैव संलापपदोपन्यासः । अत्रत्वविशेषेण सर्व एव ते सङ्गच्छन्ते इति ज्ञेयम् । सर्वा द्वादशमासिकीरेव निशाः सिषेवे । कीदृशीः । शरत्काव्यकथारसाश्रयाः । हायनोऽस्त्री शरत् समा इत्यभिधानात् । शरदि सम्वत्सरमध्य एव ऋत्वादिकमधिकृत्य ये काव्यकथारसाः सम्भवन्ति तेषामाश्रयाः या एव साम्वत्सरिकनिशाः श्रीवृन्दावने कृष्णक्रीडाधिकरणीभूता आश्रित्य सत्कवयः प्राचीनार्वाचीना व्यासपराशरजयदेवलीलाशुकगावर्द्धनाचार्यश्रीरूपादयः स्वस्वकृतेषु काव्येषु कथाः रसांश्च शृङ्गारप्रधानान् वर्णयित्वापि न पारं प्राप्नुयुरित्यर्थः । अत एव मयापि सामस्त्येन वर्णयितुमशक्यत्वाद्दिगेवैषा दर्शितेति भावः ॥ २६ ॥

रसिकाह्लादिनी–टीका

तेषां नृत्यक्रीडाजनितश्रमापनोदनाय जलक्रीडा वर्णिता, इदानीं जलविहारेण धौताङ्गरागाणां विपर्य्यस्त नेपथ्यानां पुनर्नवीकृतपुष्पमयनेपथ्यस्वीकारसहितविहारमाह ततश्चेति, जलकेल्यानन्तर्य्यार्थं तत इति, कृष्णोपवने कृष्णा यमुना तस्या उपवने चचार विजहार बभ्रामेति वा । कीदृशः जलस्थलप्रसूनानां गन्धो यस्मिन तेनानिलेन पवनेन जुष्टानि सेवितानि विष्यां तटीनि यस्मिन् अनेन वायोस्त्रैविध्यं सूचितमिति । जलसम्बन्धेन शैत्यं पवनसम्बन्धेन सौगन्ध्यं वनसम्बन्धेन मान्द्यं वायोरपि रत्युद्दीपने सहाय्यमुक्तम् । भृङ्गप्रमदागणावृत इति, भृङ्गाङ्गणावृतत्वं धौताङ्गरागस्यापि तस्य स्वाभाविकाङ्गपरिमलमुखामोदलुब्धभ्रमरसाहित्यं ज्ञेयम । प्रपदागणावृतत्वं पुनरपि पुष्पावचयपल्लवादिनिर्मित-शय्याभरणादि-पुष्पमयनेपथ्यादिरचनाकुंजादिप्रवेशनिलायनादिक्रीडाविशेषजनितसुखविशेषमनुभवितु प्रमदागणावृतत्वमुक्तं स्वातन्त्र्येण क्रीडायां इतरविस्मरणे च मिथः प्रीतौ च मिथः मत्ततायां

च दृष्टान्तः यथा मदच्युद् द्विरदः, मदं च्युवतीति मदच्युद् पूर्वपरानुसन्धानरहित इत्यर्थः। करेणुभिरिति तं विना तासां जीवनसन्देह इति रसवृत्तिः सूचिता एवमन्योन्यं रतौ परस्परसापेक्षत्वं सूचितम्। यथा गजेन्द्रो वने प्रविश्य कस्यचिद् वृक्षस्य शाखाभङ्गं करोति कुत्रचित् लताभङ्गं करोति कुत्रचिदालवालं भिनत्ति तद्वच्छ्रीकृणोऽपि वेदशाखोक्तधर्माऽतिक्रमं करोति लतास्थानीयानामुपनिषदामपि निगुंणचारा-तिक्रमं आलवालस्थानीयवर्णाश्रमधर्मातिक्रमं च कृतवानित्यर्थः। एवं स्थल-जल-वन-भेदेन त्रिविधापि लीला रसजनिकाऽत्यलौकिका जातेति अविचार-क्रीडायां दृष्टान्तः यथा द्विरद इति ॥ २५ ॥ एवमेकरात्रिकृतां लीलां एकरूपामतिदिशन्नुपसंहरति एवमिति, यथा शरदृतुप्रथम-रात्र्यां लीला कृता तथा सर्वास्वपि तथैवाऽनेन च प्रकारेणेत्याह एवममुना प्रकारेण शशाङ्कश्चन्द्रस्तस्यांशुभिर्विराजिता उज्ज्वलिताः निशाः सर्वा एव सिषेवे। तासु नैरन्तर्य्येणाक्रीडतिस्मेत्यर्थः। एकरात्रीकृता लीला संक्षेपतो दर्शिता वर्णिता बह्वीषु रात्रिषु कृतां को वर्णयितुं शक्नोतीतिभावः। पराशरेणाप्युक्तं "सोऽपि कैशोरकं वयो मानयन् मधुसूदनः"। "एवं स कृष्णो गोपीनां चक्रबालैरलंकृतः। शारदीषु सचन्द्रांशु निशासु मुमुदे सुखीति" शशाङ्कस्य पूर्णत्वात् सर्वा एव निशाः पूर्णाः, यद्यपि वृन्दावने सर्वर्त्तुनां निवासस्तथापि तदधिकरणे प्रदेशे सखण्डवत् शरत्काव्यकथारसाश्रयाः, शरदृतौ काव्येषु याः कथास्तासु ये रसाः शृङ्गारादयस्तेषामाश्रयभूताः, यद्वा रसाश्रया सर्वा शरत्काव्यकथा सिषेवे। तदनुसारेण चिक्रीडे तासु गीतगोविन्दादिषु प्रसिद्धं एव। ननु निरपेक्षस्य किं रमणेन स्यात्। चेत्तदा सर्वदा रात्रिषु रमणेनासामर्थ्यं विरक्तिश्च स्यादत आह—सत्यकाम इति, यद्वा सत्यो वाध्यो कामो अभिलाषो यासां ताः सत्यकामाः, यद्वा सत्ये श्रीकृष्णस्वरूपे कामो यासां ताः, श्रीकृष्णस्वरूपस्य सत्यत्वात् तद्विषयस्य कामस्यापि सत्यत्वम्। सामरस्यात्ताभिः सह हि सत्यकामः। ननु कदाचित् पत्यादिपारवश्येन लीलायाः कादाचित्कत्वं स्यादत आह अनुरतावलागणः पत्यादिप्रतिबन्धमवगणय्यानुरतो उचितोऽबलागणो यस्मिन्, यद्वा नैरन्तर्य्येण विलासाननुभवितुमनुरतोऽनुसृतोऽबलागणो येन सः, अत एव तासां नित्यसम्बन्धः सूचितः। सत्यकामत्वात्। तासु नित्यमेव रमणं न तु कादाचित्कं न हि काममन्तरेण रमणं सम्भवतीति तदुक्तं "नाकामस्य क्रिया काचित्दृश्यतेऽत्रेह क्वचित्। यद्यद् कुरुते जन्तुस्तत्तत्कामस्य चेष्टितमिति"। प्राकृतस्यापि प्राणिनो यदा सकामत्वेन क्रिया निर्वृतिरतदा परमशृङ्गारिणः किमुतेति तदुक्तं गीतगोविन्दे "शृङ्गारः सखि मूर्तिमानिवे"ति। तासामपि कामस्य श्रीकृष्णस्वरूपप्राप्तिरेव फलं न तु विषयभोगः। तदुक्तं श्री मुखेनैव "न मय्यावेशितधियां कामः कामाय कल्पते। भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते" इति। ननु निरन्तररमणेन वैरस्यं स्यादित्यत आह आत्मन्यवरुद्धसौरत इति सत्यकामत्वात्। व्रजदेवीविलासनिमग्नचित्तत्त्वाच्च। आत्मनि स्वस्मिन्नेवावरुद्धसौरतं सुरतसम्बन्धी चरमधातुस्खलनं येन स इति प्राकृतकामस्यायमेव स्वभावो यच्चरमधातुपातं कारयित्वा सुरतान्ते वैरस्यं कारयति। अप्राकृतकामस्तु प्रतिक्षणं नवाऽनुरागं वर्द्धयन् धातुपातं स्तम्भयित्वोत्तरोत्तरां रतिमेव जनयति। न तु सुरतान्तेऽन्यथा रसभङ्गप्रसङ्गात्, यद्वा आत्मनि मनसि अवरुद्धं स्वीकृतं सौरतं सुरतोपयोगिकलाकौशलं येन, कलाकौशलादेव न धातुपात इति। यद्वा स्वप्रयोजनमाह आत्मनि निमित्ते स्वसुखार्थं अवरुद्धं सौरतं सुरतमण्डनं येन सः। अत एव सत्ये कालत्रयावाध्ये गोपीमण्डले कामो अभिलाषो यस्येत्यर्थः। सत्यकामत्वादेवानुरता अनुगता अधीन-प्राप्ता अबलागणाः पतिं सम्मानयन्तीति सः सत्यविषयत्वात् कामस्य सत्यत्वम्। प्राकृतकामस्य प्रवेशानर्हत्वात्। कामजयोक्तिस्तु वाचो युक्तिः यदि प्राकृतकामस्य प्रवेशो भवेत्तर्हि तस्य जयः सम्भाव्येत न तु तदस्ति। यद्वा सत्यकामः श्रीकृष्ण आत्मनि निमित्ते स्वसुखार्थं रसाश्रया काव्यकथा यदा सिषेवे तदा शरदृतुरपि सर्वा निशा रममाणस्य मयावच्छिन्ना परिपूर्णचन्द्रांशुविराजिता सिषेव इति शरदृतावभिसेवकत्वं लीलोपयोगित्वं प्रसिद्धमेवेति ॥२६॥

विशुद्धरसदीपिका

तदनन्तरभाविनीं वनक्रीडामाह। तत इति। जलक्रीडानन्तरं कृष्णेति दाससाम्येन सख्याः श्रीयमुनायाः एवञ्च तदादीनां बुद्धिस्थे शक्तेः श्रीकृष्णया श्रीवृन्दादेव्या च समानीततदात्वोचितनेपथ्यरचनानन्तरमित्यर्थो ज्ञेयः उपवने तीरस्थे वने तदानीमेव पुष्पफलादिसम्पत्त्या सुसम्पादिते वा चचार तद्यथा श्रीगोविन्दलीलामृते—

अथाह वृन्दावनकाननेशौ पादाम्बुजे वा मृतुकारमुख्यैः। निवेदितं षड्भिरिहास्ति यत्तत्साद्धं समालोकयतं सखीभिः॥
प्रीत्यर्थं युवयोः सुचित्रितमिदं वृन्दावनं किङ्करैरस्माभिबहुयत्नतो निपुणतासर्वस्वप्रत्यर्पणैः॥
तन्नाथौ कृपया समीक्ष्य सकलं कर्त्तुं युवामर्हतं भृत्यानां हि विशेषकौशलकृतेरीशावलोकः फलम्॥
वृन्दावने स्थिरचरैस्तत्तलीलास्थलीस्थितैः! निवेदितं पदाब्जे वां यत्तद्धाश्रृणुतं प्रभू! ॥
अन्योऽन्यसङ्गोल्लसितौ भवन्तौ द्रष्टुं निजार्थैः करुणोद्भवैर्वाम्॥
निषेवितुं चाजनि या समीहा तामर्हतं नः सफलीविधातुम्॥
ततो वृन्दाटवीं वृन्दा स्फीतां तत्तदृतुश्रिया दर्शयन्ती स्वनाथौ तावभाषत पुरोगता॥
स्फुरंस्तम्भारम्भा विलसति चरैः कम्पवलिता। स्थिरैः कम्प्रैः स्विन्नाः स्त्रवद्रुपलकैर्गद्गदयुता॥
विरावैरस्पष्टैः पुलकवलिताङ्ग्यङ्कुरचयैः सखीश्रेणीवेशौ प्रणयविवशा सेयमटवी।

इत्यादि—

अथावादीत्प्रियां प्रेष्ठो दर्शयंस्तद्वनद्युतिम् । प्रिये ! पश्याटवीयं ते प्रमोदभरमञ्चति ॥

इत्यादि—

ततः कदम्बादवरुह्य तूर्णमुन्मण्डलीकृत्य कळापिवृन्दम् । पुरो नरीनर्त्ति सराधिकायां नाम्ना हरेस्ताण्डविकं कलापी ॥

राधाशंपालिङ्गितदेहेऽमृतवर्षे मन्द्रध्वाने कृष्णपयोदोः स्फुरिते स्फुरितेऽग्र केकाध्वानैरुन्नतपुच्छैः शिखरीभिर्नृत्यत्यारान्मत्तमयूरावलिरुच्चैः

शुकाः सार्य्यो वर्णयन्ति द्वयोः सुरतमाधुरीम् । जगुर्भृङ्गाः कोकिलाभिः पश्यति स्म मृगादयः ॥
इत्यादि तत्र कुसुमावचयो यथालङ्कारकौस्तुभे । सख्यैकया मूर्ध्नि धृतांशुकाञ्चला संवीज्यमाना दलमालयान्यथा ॥
अवेक्षमाणा दयितं विदूरतश्चिनोति मन्दंकुसुमानि राधिका ।

श्रीहरेर्यथा—

एकेनानिलचपलेन पत्रहस्तेनारौत्सीत्स्तवकपयोधरं परेण ।
आक्षेपं नन ननतेति चञ्चलालिभ्रूभङ्गया व्यधित हरिं विळोक्य वल्ली ॥

अपिच—

प्रियाळोके राधा कुसुमविचये कौतुकवती । धुनीते सत्रासं करतलमदष्टापि मधुपैः ॥
अखिन्नापि श्रान्त्या श्रयति भुजपालीभुजशिरः । परावृत्या पश्यत्यधृत वसनापि वृततिभिः ॥

अपिच—

सीमन्तोपरि बन्धजीवकुसुमं सिन्दूरबिन्दूक्ततम् । चित्रैर्नव्यदलैव्यधायि मकरी गण्डे नखाग्रक्षतैः ॥
चक्रे कञ्चुलिकाम्पयोधरभरे नानाप्रसूनच्छदैः । कृष्णेन प्रणयातिरेकरभसस्तस्याभिव्यञ्जितः ॥

अपि च—

नानावर्णसुगन्धपुष्पपटलैर्दीव्यद्दलैः पल्लवैः । क्लृप्तैः कुण्डलहारकङ्कणलसन्मञ्जीरकाञ्च्यङ्गदैः ॥
लीलावेशवसाम्मुदा प्रियतनौ या वेषभङ्गीकृता । सैवास्या नयनाब्जभूषणविधौ कामस्य भूषायते ॥
पौष्पैराभरणैश्चाथ राधा काण्डपटावृता । आलीभिर्भूषिता स्तब्धकृष्णेन तदनुज्ञयेति संक्षेपः ॥

विस्तरो भक्तिमञ्जूषायां द्रश्यः । जलेति । जलस्थलप्रसूनयोर्गन्धेन युक्तो योऽनिलस्तेन जुष्टं प्रीत्या सेवितं दिशां तटं दिग्भागो यस्तिंस्मिन् चचार पुष्पावचयनिकुञ्जनिलयानादिक्रीडाभिर्बभ्राम भृङ्गगणावृतः प्रमदागणावृतश्च तत्राद्येन विशेषणेन तत्तत्पुष्पेभ्योऽपि तदङ्गसौरभ्यातिशयपरेण कोटिकन्दर्पनिर्मञ्छनीयरूपातिशयश्चाभिप्रेतः स्पर्शमात्रसुखैकतात्पर्ये दृष्टान्तः । यथेति । मदच्युदिति श्रीमदङ्गसौरभ्यस्य मूर्त्तिमत्त्वमुक्तं करेणुरिति तदेकाश्रयत्वम् । एवञ्च वनक्रीडानन्तरं भोजनक्रीडाप्यूह्या साच श्रीगोविन्दलीलामृते—

ततस्तौ वृन्दयानीतौ भोजनानन्दकुट्टिमम् । प्रविष्टावुपविष्टौ च वेष्टितौ स्वसखीगणैः ॥
ततः पलाशपत्राणां रम्भावल्कलपत्रयोः । कुण्डीस्थाल्यादिपात्राणि सम्भृतानि पृथक्-पृथक्॥
उपविष्टा पुरो वृन्दा सम्वृता स्वानुगालिभिः । आनीयानीय दत्तानि फलादीन्युपवीविषत् ॥
लड्डुकानि सुगन्धीनि चन्द्रकान्तिं सशशर्कराम् । शर्करेन्दुलवङ्गैलामरिचादिभिरान्वताः॥
स्थूलसन्तानिकाः पिष्टाकृतानि लड्डुकानि च ।
पनसाम्राादिकरसान्मधुचन्द्रशितान्वितान् । पुनः सशितयास्वच्छमानीतानि प्रियलिभिः ॥
पर्य्यवेषयदेतानि ललिता मञ्जुभाषिणी । रुचिं दर्शयती ताभ्यां दत्तान्यालिभ्य एव च ॥
कर्पूरवासितं तोयं पपतुस्तौ परस्परम् । ततश्चाचेमतुस्तोयैः सखीदत्तैः सुवासितैः ॥
ताम्बूलवीटिकाः स्वस्वसखीभ्यः प्रविभज्य तौ । स्वयमात्तार्द्धखण्डं च व्यत्यासेन परस्परामिति ॥
ततश्च कन्दर्पमाध्वीकमदाकुलाङ्गी कन्दर्पमाध्वीकमदानुशिष्टे ॥
राधां समादाय हरिर्निकुञ्जे सुष्वाप तल्पे विगतालिजल्पे ॥
तत्रासीत् स्तिमितप्रायं पक्षिभृङ्गमृगादिकम् । निकुञ्जरन्ध्रेष्वाल्योऽप्यालीना निर्निमिषेक्षणाः ॥

इत्यादि रात्रिशेषे उत्थापनादिप्रकारश्च भक्तिमञ्जूषायां द्रश्यः विस्तरभिया न लिखित इति ॥ २५ ॥ तदेवमेकस्यां रात्रौ कृतां रासक्रीडामन्यत्राप्यतिदिशन्नुपसंहरति । एवमिति । इत्युक्तदिशा शरत्काव्येति वक्ष्यमाणप्रतिरशदीत्यर्थः । शशाङ्कांशुविराजिता

इति कौमुद्यां निशाः ताः सर्वा एव सिषेवे परमादरणे परिचरितवानित्यर्थः। यद्वा शरदि ये काव्यकथारसाः प्रसिद्धास्तेषामाश्रयो यासु श्रीभगवत्कृतानन्तलीलासु तादृशीर्निशाव्याप्येत्यर्थः। एवं च यत्संबन्धेन रात्रीणामपि सेव्यत्वमुक्तं किं वक्तव्यं तत्र श्रीराधायाः सेव्यत्व इति सुसिद्धं स्वाधीनपतिकात्वं तदेव दर्शयति। आत्मनीत्यादिना। आत्मानि परमप्रेमास्पदभूतायां श्रीराधायामेव अवरुद्धं सौरतं सुरतसम्बन्धि निजमुखं येन सः। यद्वा आत्मनि स्वस्मिन्नेव अवरुद्धम् अवरोधः तद्वत्सौरतं यस्येति पुरुषायितं सूचितं नन्वेवमन्यासु सापत्न्यमुदयेत इत्यत आह। अनुरतावलागणः सर्वासामपि तत्सुखासक्तेरिति भावः। कथमेवं सम्पन्नमित्यत आह। सत्यकामः अव्यभिचारताभिलाष इत्यर्थः। यद्वा आत्मैवसत्य पदाभिधेयः सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः ततश्च स्वरूपायां नित्यसिद्धायां श्रीराधायामेव कामोऽव्यभिचरिताभिलाषो यस्येत्यनुकूलत्वं सूचितम्। अन्यत्र तु तदिच्छया वा निरर्गलया भक्तजनाधिकरणककृपया तद्विभ्रमणे वा तथात्वानुकरणमिति सिद्धं राधिकैकतानत्वमेव श्रीभगवत इति तदेवं यथास्थानं साधयितव्ये षड्विधे भगवत्त्वे समग्रया श्रिया नित्ययोगोऽत्र साधित इति निखिलोऽपि प्रकरणार्थः सुसंगतो वेदितव्यः—

तथा चैश्वर्य्यस्य समग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेति ॥

विष्णुपराणोक्तलक्षणवाक्येऽपि रहस्यत्वादेव श्रियो मध्यगतत्वेनोपन्यासः कृतः। ततश्च धाम्नोऽपि वैशिष्ट्यं तत् कृतमेव वेदितव्यं तदुक्तं ब्रह्मयामले—

गोप्येकया युतस्तत्र परिक्रीडति नित्यदेति।

अत्र नित्यदेति प्रकटायामप्रकटायां च लीलायामित्यर्थः स्वरूपस्यापि तत्रैव—

भुजद्वययुतः कृष्णो न कदाचिच्चतुर्भुजः। वृन्दावनं परित्यज्य स क्वचिन्नैव गच्छतीति ॥

निखिलं निरवद्यम् एवं च शरत्पदस्यश्लिष्टत्वादब्दोपि वाच्यः ततश्चाब्दसम्बधिन्यो याः काव्यकथाश्चन्द्रोदयवनविहारजलविहारनौखेलऽदोलास्दोलनकुञ्जक्रीडाद्याः सर्वाः सिषेव इत्यर्थः। ता अपि रसाश्रया एव नत कामाश्रया नवात्यस्तैश्वर्यादिमत्त्वेन भावाश्रया इत्यर्थः। रतिर्दवादिविषयो भाव इत्यालङ्कारिकोक्तेः। यतः सत्यः कालत्रयावाध्यः कामो विहारो यस्येति नित्यविहारीत्यर्थः। अत्र निशा इत्याद्या द्वितीयान्त्यन्तसंयोगे ततश्च निशा इति शरत्काव्यकथा इति रसाश्रया इत्यादिपदानां सिषेव इत्यनेन प्रत्येकमन्वयः तथा च सर्वप्रकारैर्नित्यत्वमेव साधितं तत्र निशेत्यस्य शशाङ्केति विशेषणं पुलिनगतानां निशानां नित्यदा ज्योत्स्नीत्वमेव सूचितं द्वितीयस्य हायनोऽस्त्रीशरत्समा इति कोशादब्दोऽपि लक्षितः षड्ऋतुसम्बन्धिन्य इत्यर्थः। न चैतदप्यसम्भावितमिति मन्तव्यं सत्यकामत्वात् तदुक्तं शतकेषु—

क्षणाच्छरदुपागमं क्षणत एव वर्षागमक्षणात्सुरभिवैभवं क्षणत एव चान्यर्तुमत् ॥

इत्यादिना समानोदितचन्द्रर्कमित्यादि वृहद्गौतमीयतन्त्रे च तृतीयस्य रसः प्रेमरसः प्रोक्त इति भावप्रदीपोक्तेस्तदेकनिष्ठाः शृङ्गारादेस्तदङ्गत्वेनैवोपादानात्। अत एव शृङ्गारकथापदेशेन निवृत्तिपरेयं पञ्चाध्यायीति श्रीस्वामिपदाः। एवञ्च शुद्धप्रेमरसेनैव सेवनीयौ श्रीराधाकृष्णाविति प्रकरणार्थः। तथा श्रीरुद्रयामले—

ब्रह्मानन्दरसादनन्तगुणितो रम्यो रसो वैष्णवस्तस्मादप्यधिकोऽतिमुख्यसुखदः श्रीगोकुलेन्द्रानुगः ॥
तस्मादप्यधिकं चमत्कृतभरं वर्षद्रसानां परं श्रीराधापदपद्ममेव परमं सर्वस्वभूतं मम ॥

अत एव श्रीमत्सुधानिधौ—

दूरे सृष्ट्यादिवार्त्ता न कलयति मनाक् नारदादीन् स्वभक्तान्। श्रीदामाद्यैः सुहृद्भिर्न मिलति च हरेत्स्नेहवृद्धिं स्वपित्रोः ॥
किन्तु प्रमैकसीमां परमसुखचमत्कारसारैरगाधां श्रीराधामेव जानन्मधुपतिरनिशं कुञ्जवीथीमुपास्ते ॥

अत एवोपासकस्यापि वैशिष्ट्यमुक्तं शतकेषु—

धन्यो लोके मुमुक्षुर्हरिभजनपरो धन्यधन्यस्ततोऽसौ धन्यो यः कृष्णपादाम्बुजरतिरसपरमो रुक्मिणीशप्रियोऽतः ॥
याशोदेयप्रियोऽतः सुवलसुहृदतो गोपकान्ताप्रियोऽतः श्रीमद्वृन्दावनेश्वर्यतिरसविवशाराधकः सर्वमूर्धा ॥

इत्यलमतिप्रपञ्चितेन विशेषजिज्ञासायां भक्तिमञ्जूषा दृश्या ॥ २६ ॥

श्रीरामनारायणकृता भावभावविभाविका

एवं भगवता कामविजये कृते स्वीयत्वेन संपादिततद्बलरूपगोपीसमाजस्य रतिरणसम्भावितश्रमे जलविहारेणापनीते हरिविजितकामस्य हरिरूपतयैव तद्गृहगोपीहृदयनिवासेन तद्विजितानां तद्रूपतामाकलय्य वसन्तोऽपि जातोत्साहो भगवन्तमभिसंगम्यतेन पराभवेऽपि तत्त्राटितसुमनसां तद्गुणग्रथिततया तदुरोहारत्वेन तदङ्गसङ्गसौख्यमभिलषन् तद्गृहवनमभिव्याप्य स्वप्रभावप्रकटनेमद्बहिरन्तर्भावाभिज्ञस्येर्ष्यामिषेणाप्यभिलषितपूरकस्य कामबलसखीगणान्वितस्य तस्य समागमं संभाव्य कालिन्द्युपवने

नितरां स्वप्रभावमाविश्चकार भगवानपि तद्भावमालक्ष्य तथैव तद्वने विहरंश्चचारेत्याह । ततश्चेति । ततः पूर्ववर्णितरीत्या वसन्तप्रभावदर्शनानन्तरं भगवान् यमुनोपवने चचारेत्यन्वयः । कथम्भूते यमुनोपवने तदाह । जलस्थलेत्यादि । वसन्तप्रभावेणैवाकालेऽपि शरदि निशायां च प्रफुल्लितानि याणि जलप्रभवाणि कल्हारकञ्जोत्पलकुमुदादीनि स्थलप्रभवाणि मल्लिकामालतीस्थलकमलादीनि वासन्तशारददिवानिशाविकासानि प्रसूतानि प्रकृष्टान्यपि नन्दनचैत्ररथादिसुमनांसि सुष्ठूनानि येभ्यस्तानि तद्गन्धवाहोय ऋतुराजसचिवोऽनिलः शीतसुरभिवायुस्तज्जुष्टादिक्टादिशां प्रान्ता यस्य तस्मिन्अत्र वायोर्जलस्थलप्रसूनसम्बन्धेन शीतत्वं सुरभित्वं च द्योतितम् अनिलेति नाम्ना न इला वाणी शब्दविशेषो विद्यते अस्येति व्युत्पत्त्या रवशून्यतया मन्दत्वं दर्शितं तत्र वायोस्तथात्वेऽयमभिप्रायः भगवतो जगज्जीवनत्वाद्वायोश्च जगत्प्राणत्वान्मिथोमैत्र्यं मत्वा तस्य स्वोपवने तस्मिन् स्वागते तत्स्वागतार्थं सुमनस्तया सुमनआमोदेन सुमनआमोदमावेदयत तथा सज्जनानां श्यामस्नेहरसस्य श्यामे समर्पणरूपां प्रीतिरीतिं व्यञ्जयन् घनश्यामरसपूरतसरतिसरितलिलरसघनश्यामे समर्पयन्तथासुमन मोदं भगवति समर्पयंस्तत्तनुसुमनआमोदसाम्यमलब्ध्वा लज्जया मन्दगतिरभवत् किम्भूतश्चचार तदाह । भृङ्गप्रमदाणावृत इति । तत्र भृङ्गावसन्तसैनिकाः प्रमदाश्च प्रकृष्टमदयुक्ताः प्रकृष्टमादिकाश्च कामसैनिकास्तद्गणैरावृतो वेष्टितस्तैरासमन्तात् सर्वभावेन स्वामितयावृतो वा । तत्रायम्भावः यथा मन्मथमन्मथच्छवितया कामगकामदुर्गानधिरुह्य रतिरणेऽह्यप्रच्युतसौरतत्वेन तद्विजयितया तद्गणैः प्रमदाभिः स्वामितयावृतस्तथा वसन्तेन भगवत्साम्याय तत्समात्साहसमीरोत्फुल्लतनुसुमनसां सुमनसाङ्गानुकारार्थं प्रति द्रुमं प्रतिशाखं कृतेऽपि तत्कुसुमकुसुमविकाशे भुजविशालमृदुतरकरानुकाराय मृदुमञ्जुप्रवालोल्लासे प्रमात्कलितपुलकसाम्याय कृतेऽपि मुकुलप्रसादे किंकिणिनूपुरादिवंशवाद्यादिप्रवादायोद्भावितेऽपि विचित्रकलद्विजकोकिलादिनादे भगवत्तनुतमालालिङ्गितसखीजनलताविहारानुकाराय प्रतिद्रुमं कृतेऽपि ललितलताविस्तारे भगवत्तत्सखिसाम्यादर्शनेन तदीयभृङ्गगणैः पामरजनभ्रमरैर्भवविपिनोत्फुल्लविषयविषमविषलतामुग्धतया तत्रभ्रमणेऽपि कर्मठमधुपशठैः श्रुतिद्रुमबहुशाखागतकुसुमितवचनमधून्मत्ततया तद्रतत्वेऽपि हरिच्छविसारङ्गैर्मुनिसारङ्गैर्विविधदोषकण्टकनाशम्लानादियुतं तद्विहाय दोषम्लाननाशादिशून्यनिष्कण्टकहरिच्छविवनानुसरणतद्गणगणनवद्वसन्तवनं विसृज्य तच्छविवनमनुसरणे तैरप्यावृतश्चचार तस्मिन् स्वच्छविविजितेऽपि तत्सुमनोविकाशेन तदन्तर्भावमालक्ष्य सखीगणैः सह तत्रैव विविधरमणं चकार । बहुसखीभिर्वनविहारे कामस्पर्शसुखातिशये प्रीत्याधिक्ये च दृष्टान्तः । यथा मदच्युद्द्विरदः करेणुभिरिति । यद्वा यथा द्विरद इत्येतावदेव दृष्टान्तः मदच्युदिति भगवद्विशेषणं कामवसन्तादीनां मदाश्च्यवन्त्यस्मादित्यर्थः । अमदच्युदिति वाच्छेदः वसन्तसमीरादिसमीरितमदनवीरबहुसमितिररणेऽपि स्वात्मन्यवरुद्धसौरतत्वेन न मदश्च्यावितो यस्येत्यर्थः । केन ब्रह्मणा प्राप्या रेणवो यासामिति मध्यमपदलोपिसमासेन वाकाः सुखरूपाः सुखप्राचुर्येण तदात्मिकारेणवो वायासांकानि सर्वसुखानि रेणुभिर्वा यासां कानि सर्वसुखानि रेणवो मात्रात्मिकानि वा यासां तासां सर्वसुखविम्बभूतब्रह्मसुखात्मकत्वादित्यादिव्युत्पत्त्या करेणुभिरिति सखीजनविशेषणम् २५ ॥ एवं शरत्पूर्णिमायामेकनिशागतविहारं वणयित्वा तत आरभ्य व्रजावतीर्णसमस्तगोपीनां वृन्दावनस्थनित्यविहारसमवायेन प्रतिनिशं तादृग्विहारमुपदिशन्नानाशृङ्गारलीलामुपलक्षयति । एवमिति । स भगवान् एवम्पूर्ववर्णितलीलोपलक्षितप्रकारः तत आरभ्य सर्वा निशाः सिषेव इत्यन्वयः । किंभूता निशाः सर्वाः अपि शशाङ्कस्य नित्यापूर्णचन्द्रस्यशुभिः सितामृतमयाह्लादिरश्मिभिर्विशेषेण कुत्रापि तमः सम्भावनाशून्यतया राजिताः शोभिताः तत्र चन्द्रमा मनसो जात इति श्रुत्या चन्द्रमसो भगवन्मनोजत्वेन तन्मनोऽनुसारितया तत्रत्यसर्वनिशासु नित्यपूर्णप्रकाशत्वमिति केचित् भगवल्लीलायां दक्षशापाप्रवेशान्नित्यपूर्णप्रकाशता तस्येत्यन्ये स्ववंशप्रभवभगवल्लीलादर्शनोल्लासेन तथात्वमित्यपरे—

यदादित्यगतं तेजो जगद्भासयतेऽखिलं । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति ॥

स्मृत्या शशाङ्केऽप्यंशू रश्मिमात्रं यस्य स शशाङ्कांशुः कृष्णस्तेनैव विशेषेण राजिता इत्यपि केचित् । अन्येतु दक्षशापेन चन्द्रमसोऽलौकिकांशूनां ह्राससम्भवेऽपि पूर्वनिर्दिष्टवाक्त्स्य नव शशाङ्कगतैरलौकिकैः कृष्णांशुभिरेव विशेषेण राजितत्वं वस्तुतस्तु कृष्णनित्यलीलाधाम्नि चन्द्रमसोऽपि तत्स्वरूपात्मकत्वेनैवैकरसत्वं नित्यपूर्णत्वञ्च कांचत्यथोचिताभिसारादिकृष्णतत्सखीसमतलीलानुसारित्वञ्च पुनः किम्भूताः शरत्काव्यकथारसाश्रयाः शरदित्युपलक्षण वसन्तादीनामपि तथाच सर्वर्तुषु ये रसाः काव्यकथासु चये ये रसास्तेषामेवाश्रयाः नतु तद्दोषाणां लीलाधाम्नि तदप्रवेशात्रसोवैसइतिश्रुत्युक्तरसरूपस्य कृष्णस्य लीलाधाम्नि तत्स्वरूपात्मकत्वेन सर्वस्यापि रसात्मकत्वाच्च । अनेन काव्यकथानामपि भगवदाविर्भावितल्लीलासबन्धेनैव रसवत्त्वं तत्संबन्धाभावे नीरसत्वमेवेत्यपि ध्वनितं स किम्भूतः सत्यकामः सत्योऽप्रतिहतः कामः संकल्पो यस्य सच्छब्देन पृथिव्यप्तेजांसि त्यच्छब्देन वाय्वाकाशाविति सत्यं भूतपञ्चकं कामः सङ्कल्पो यस्येति वा "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिश्रुत्या सत्यश्च तथा—

सत्त्वं रसस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरष एक इहास्य धत्ते । स्थित्यादये हरिविरञ्चिहरेति संज्ञा इति ॥

स्मृत्या प्रकृतिगुणसम्बन्धेन को ब्रह्मा आविष्णुः म शिव इतिरूपत्रयात्मकश्चेति सत्यात्मप्राणारामम्मनआनन्दमिति श्रुत्या सत्याः स्वरूपात्मका एव सर्वे कामा आरामशब्दवाच्या रमणोपकरणा धाम तत्रत्यसर्वभोग्याश्च यस्य "कामः सङ्कल्पो

विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे''ति श्रुत्या कामो मनश्च यस्य कामो रतिर्विहारो वा यस्येति वा सत्यः नित्यसुखपर्य्यवसायित्वेनाबाधितः संसाराननुबन्धी कामोऽभिलाषो रतिविहारो वा यस्मिन्—

न मय्यावेशितधियां कामः कामाय कल्पते ।

इत्यादिवचनात् । यद्वा सत्यश्च कं ब्रह्म खंब्रह्मेत्यादिश्रुत्या कं सुखं तद्रूपश्च आसमन्तात् मा शोभा यस्मात् स्वमूर्त्यालोकलावण्यनिर्मुक्त्ये ति स्मृतेः यः सर्वज्ञः सर्वविदित्यादिश्रुतेर्वा आसमन्तादिति सर्वविषयिणी मा प्रमा यथार्थमतिर्यस्य । यद्वा सत्ये स्वस्वरूपे एव कामो रतिर्यस्य तदितरस्य रत्यास्पदत्वाभात् नन्वेवं भूतश्चेत्किंरमणेन तत्राह । अनुरताबलागणः । अन्वनुरतोऽबलानाङ्गणो यस्मिन् तयाच तदभिलाषपूरणाय रमणमिति । ननु तासां नित्यलीलासुखभाक्त्वादवतारदशायामेतल्लीलाविष्कारे किम्प्रयोजनं तत्राप्याहानुरतेति । गोपी रतिमनुरतोऽबलानां बलमैश्वर्य्यंज्ञानविरागादितद्धीनानां जीवानामागणो यस्मिन् तथाच सर्वजीवोद्धारकरतिप्रथप्रवर्त्तनमेव लीलाविष्कारप्रयोजनमितिभावः । ननु तथापि ताभीरमणे आत्मारामत्वक्षतिस्तत्राह । आत्मन्यवरुद्धसौरत आत्मन्येवावरुद्धं सौरतं सुष्ठु रतेः प्रेम्णो भावो येन । यद्वा तासामपितदात्मत्वात्तासु रमणेऽप्यात्मन्येवावरुद्धं सौरतं यस्य । यद्वा आत्मनि स्वविग्रहे एवावरुद्धं सौरतं सुरते भवं शुक्रं यस्येत्यसंख्यातगोपिकारमणेऽप्यप्रच्युतशुक्रत्वेन कामविजयख्यापनम् ॥ २६ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

स्थलजलक्रीडे वर्णयित्वा वनक्रीडां वर्णयति । ततो यथोक्तक्रीडानन्तरञ्च जलस्थलपुष्पाणां गन्धो यत्र तेन वायुना जुष्टानि दिशां तटानि अन्ता यस्मिन् तादृशे कृष्णाया यमुनाया उपवने सौगन्ध्यासक्तानां भृङ्गाणां लावण्यासक्तानां प्रमादानां च गणैरावृतः सन् विचचार विहृतवान् । यथा गजः मदच्युत्तथा भृङ्गगणावृतः करेणुभिश्चावृतस्तद्वत् ॥ २५ ॥ एवं प्रथमरात्रिकृतरासक्रीडामभिधायानुक्तं शंसन् अन्यरात्रिषु तत्प्रकारमतिदिशन्नुपसंहरति । एवमिति । सः श्रीकृष्णः अनुरक्तस्त्रीकदम्बस्थः सर्वा अपि शशाङ्कांशुविराजिताः शरदि भवाः काव्येषु कथ्यमानाः ये रसास्तेषामाश्रयभूता निशा सेवितवान् । यद्वा निशा इति द्वितीया अत्यन्तसंयोगे तथाभूतासु निशासु शरदि प्रसिद्धाः काव्येषु याः कथास्ताः सिषेवे सत्यसङ्कल्पस्य भगवतो रमणाधिकरणभूताः सर्वा अपि निशाः शशाङ्कांशुविराजिता एव सम्पन्ना इति बोधनाय सत्यकाम इत्युक्तं तस्मिन्नभिरमणे तासां नैर्वल्यमेव स्थितमितिसूचनाय अबलेत्युक्तम् । अतएवात्मन्येवावरुद्धं सौरतं चरमधातुर्नतु स्खलितो यस्येति कामविजयोक्तिः । यद्वा सर्वाः द्वादशमासिकाः "हायनोऽस्त्री शरत्समा" इति कोशात् शरदि सम्वत्सरमध्ये या श्रीवृन्दावनीयकृष्णक्रीडाधिकरणभूता आश्रित्य भूतभविष्यद्वर्त्तमानकविकृतकाव्येषु याः कथाः रसाश्च तेषामाश्रयभूता निशाः सिषेवे । रममाणश्च भगवानात्मन्यवरुद्धसौरतः आत्मनि मनसि अवरुद्धा अवरुध्य स्थापिताः सौरताः सुरतसम्बन्धिनो भावहावबिब्वोककिलकिंचितादयः संलापप्रलापादयः वाम्यौत्सुक्यहर्षादयः स्तम्भस्वेदवैवर्ण्यादयः दर्शनस्पर्शनाश्लेषादयश्च येन सः । यद्वा एकस्यामेव रजन्यामसंख्याताः स्वसङ्कल्पितशशांकांशुविराजिताः यतः सत्यसङ्कल्पः समानमन्यत् ॥ २६ ॥

रास-रहस्यम्

र० टी०—ततश्च आत्मसाक्षात्कारानन्तरं जलस्थलप्रसूनोपलक्षितानां यावतीयानां विषयाणां ये गन्धाः तत्सम्बन्ध्याकर्षणानि, सात्त्विकानिलेन वासनावायुना, जुष्टानि व्याप्तानि, दिशामाशायाः तटानि अन्ता यस्मिन् तस्मिन्, कृष्णोपवने कृष्णस्य परमात्मनः, उपवनं विहारस्थलं तस्मिन् विदुषः सुनिर्मलान्तःकरणे, भृङ्गप्रमदागणावृतः विकसितकुसुमेषु मधुकर इव प्रकर्षेणात्मानन्दरसपीयुषपीतमदमत्तैः वृत्तिसमूहै रावृतः परिवेष्टितः सन्, मदच्युद्द्विरदः मदश्रावणगजेन्द्रः करेणुभिरिव परिवेष्टितः वने यथा चरति तथा निर्द्वन्द्वो भूत्वा संसारमण्डलं परिबभ्राम ॥२५॥ एवं पूर्वोक्तप्रकारेण सर्वासां विषयकामनानां वासनानां विजयेन सत्यकामः त्रिकालेष्वप्यप्रतिहतकामः संकल्पो यस्य, सोऽनुरताबलागणः आनुकूल्येन रताः सलग्नाः, याः अबलाः वृत्तयः, तासामागणः आश्रयः यः स, आत्मन्यवरुद्धसौरतः आत्मनि मनसि, एवावरुद्धः अशेषेण रुद्धः चित्त सर्वतोरूपेण विषयान्तरेभ्यः निवर्त्य आत्मन्येवैकाग्रीकृतः, अत एव सौरतः सुष्ठुरतः सुरतः, सुरत एव सौरतः, सः परिव्राजकः विद्वान्, शशांकांशु विराजिताः प्रबोधलक्षणनित्यपूर्णचन्द्रस्यांशुभिः सितामृतमयाह्लादिरश्मिभिः विराजिताः विशेषेण कुत्राप्यज्ञानतमःसम्भावनाशून्यतया राजिताः उज्ज्वलीकृताः, शरत्काव्यकथारसाश्रयाः "भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ।" इत्यारभ्य एतत् श्लोकपर्यन्तायाः शरदि भवाः काव्येषु कथ्यमानाः ये रसास्तानेवावलम्ब्य क्रान्तदर्शिनां ऋषीणामनुभूतिस्वरूपाः याः कथाः, कथंभूताः ? रसाश्रयाः "रसो वै सः ।" इति रसानां समूहः रासः रसस्वरूप आत्मा इति "रासलीला ।" अर्थात् "आत्मलीला" आश्रयणेन आत्मक्रीडस्यात्मनः आपरोक्ष्येण साक्षात्कारस्यैव काव्यकथानां रसवत्त्वं सूचितमिति आत्माश्रयाः सर्वा एव निशाः रात्रीः तदुपलक्षितः आविदेहकैवल्यं दिवसान् सिषेवे सेवितवान् ॥ २६ ॥

गूढार्थदीपिनी

ततो जलविहारानन्तरम्। कृष्णः प्रमदावृतः सन् यमुनोपवने विचचार। कथंभूते। प्रसूनगन्धानिलेन जुष्टानि सुरभीकृतानि दिक्तटानि दिग्भागाः यस्य तस्मिन् यमुनोपवने। करेणुभिः हस्तिनीभिः। द्विरदः गजः इव ॥ २५ ॥ स कृष्णः सर्वा एव निशाः सेवितवान्। कीदृशीः। शरत्सम्बन्धी काव्येषु कथ्यमानो यः शृङ्गाररसस्तदाश्रय भूताः। अवरुद्धः सौरतश्चरमधातुर्यस्येति कामजयोक्तिः ॥ २६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ वनक्रीडामाह। ततश्चेति। ततो जलक्रीडानन्तरम् उपवने यमुनाया इति शेषः। भृङ्गप्रमदागणावृतः कृष्णश्चचार कथंभूते यमुनोपवने जलस्थलप्रसूनानां गन्धो यस्मिन् तेनानिलेन जुष्टानि दिशां तटानि यस्मिन् तथा मदच्युदित्यनेन मदाकृष्टभ्रमरैर्वृतः करेणुभिरिभीमिश्च आवृतः द्विरदो मत्तगज उपवने चरति तद्वत् ॥ २५ ॥ अथ रासक्रीडां निगमयति। एवमिति। आत्मन्यवरुद्धसौरतः आत्मनि परानन्दपूर्णे स्वासाधारणे मनसि अवरुद्धं सौरतं सुरतसुखसंकल्पो यस्य स स्वभावत एवापास्तविषयाभिलाषः सर्वदा जितकाकम इत्यर्थः। सत्यकामः यातावला व्रजं सिद्धा मयेमा रंस्यथ क्षपा इति “ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति व सत्यः सङ्कल्पो यस्य तादृशसंकल्पे हेतुं दर्शयितुं विशिनष्टि अनुरतावलागण इति। अनुरतः कृष्णेतरपदार्थपरित्यागपूर्वकं तच्चरणं शरणं गतः अबला गणो यस्य एवंभूतः स्वचरणशरणजनमनोरथपूरक इत्यर्थः। शरत्काव्यकथारसाश्रयाः शरदि भवाः काव्येषु कथ्यमानां ये रसास्तेषामाश्रयभूताः तदोडुराज इत्यत्रोक्तरीत्या शशाङ्कस्यांशुभिः किरणैर्विराजिताः सर्वा निशाः सिषेवे सेवितवान् ॥ २६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ततो जलविलासानन्तरं कृष्णाया उपवने यमुनोपवने जलस्थलप्रसूनानि कमलादीनि स्थलकमलस्यापि सत्त्वात्। उक्तेगीतगोविन्दमुक्तावल्यादौ। मल्लिकादिकानि वास्तद्गन्धवाननिलो गन्धवाहस्तज्जुष्टानि दिशां तटानि यस्मिंस्तत्तस्मिन् भृङ्गवद्विद्यमानाः प्रमदास्तासां गणेनावृतो मदच्युन्मदस्रावी द्विरदो गजः करेणुभिर्यथा चरति तथा चचार ॥ २५ ॥ उपसंहरति। एवमिति। सर्वाः शरत्काव्यकथारसाश्रयाः शरदनुसम्बन्धिनः काव्यकथायामुक्ता ये रसाः शृङ्गारादिरसास्तेषामाश्रयो यासु ताः शशाङ्कस्यांशवः किरणास्तैर्विराजिता निशा रात्रीरात्मनि स्वस्मिन्नेवावरुद्धं निरुद्धं सौभगं सौभाग्यं यस्य स नान्यत्र तादृक् सौभाग्यस्यावकाश इति भावः। अनुरतोऽबलागणो योषित्सङ्घोऽयं सः सत्यकामोऽप्रतिहतेच्छ एवं सिषेवे। निशा इति द्वितीयया क्षणमात्रं क्षपायां रत्यवर्तिं द्योतयति। सतीष्वकामस्तदिच्छारहित इति रहोभवाः ॥ २६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः पुष्पावचयक्रीडामाह। तत इति। जलक्रीडानन्तरं कृष्णायाः यमुनाया उपवने जलस्थलप्रसूनानां ये गन्धाः तत् सम्बन्धिना वायुना जुष्टाः दिक्तटाः सर्वदिग्भागा यस्मिन् वने तत्र पुनश्चचार भृङ्गैः प्रमदागणैश्चावृतः पुनर्भृङ्गाणां गमने हेतुं दृष्टान्तेनाह यथा मदच्युत् मदस्रावी गण्डयोरन्यत्र च द्विरदो हस्ती करेणुभिः सहितो भवति भ्रमरैश्च सहितः सहज एवान्तः स्थितो रस आविर्भूत इति भ्रमराणामनुद्रवणं चचारेति सर्वनानाविधलीला निरूपिता। क्वचिल्लतानम्भङ्गः क्वचिद्वृक्षशाखानां तथा मर्यादामार्गः लौकिकश्चान्यथा कृत इति एषा त्रिविधा लीला अत्यलौकिकी ततः अविचारेण रमणमिति ॥ २५ ॥ एवं लीलामुक्त्वोपसंहरति। एवमिति। शशाङ्कांशुभिः चन्द्रकिरणैः लौकिकैर्याः विराजिता निशाः ता एवं रेमे पूर्वोक्तप्रकारस्तु सर्वदा लीलारूपः स केनापि न विरुध्यते नन्वेवं रमणे को हेतुरिति चेत्तत्राह। स सत्यकाम इति। सत्यः कामो यासां ताः सत्यकामाः ताभिः सहित इति तथा प्रार्थितो वा एवमपि क्रीडायां कामः सत्य एवास्ति न तु क्षीणः असद्विषयको वा जातः अनुरताः अबला गणा यस्य सर्वथा रतासु नित्यसम्बद्धासु न कापि शङ्का सर्वथा प्रपन्नासु च अग्रे मर्यादाभङ्गः रसपोषाय तदुक्तम्—

शास्त्राणां विषयस्तावत् यावन्मन्दरसा नराः। रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रम इति ॥

तथापि तासु सत्य एव कामः स्थापितः यो मोक्षपर्यवसायी स कामो भगवन्तं प्रापयिष्यत्येव एवं निशाः सिषेवे तदनन्तरमात्मन्येव उपरुद्धं सौरतं यस्य तथा जातः ननु तासु रतिं स्थापितवान् तथा सति तासु स्वस्मात् पुत्रा भवेयुः सर्वा एव निशा एवं नीताः शरदपि नीता काव्यकथा अपि नीताः काव्योक्तप्रकारेण गीतगोविन्दोक्तन्यायेनापि रतिं कृतवान् तत्र हेतुः रसाश्रया इति कामरसस्तेष्वेव प्रसिद्धः यावत् पुरुषो रसे गौणभावं न प्राप्नोति तावन्नरसिको भवतीति शरद्वर्णनायां वा यत्काव्यं तद्रूपाः कथाः तेषां रसाश्रया इति निशा एता न लोकप्रसिद्धाः किन्तु काव्योक्ता एव तत्र हि नियतकृत्यादिराहित्यं ह्लादैकता अनन्याधीनता तथा अन्येऽपि गुणाः तथा भगवल्लीलारात्रयो जाता इत्यर्थः ॥ २६ ॥

श्रीसुबोधिनी–सारः

ततोऽनन्तरं कृष्णाया यमुनाया उपवने जलस्थलप्रसूनानां गन्धो यस्मिन् तेनाऽनिलेन वायुना जुष्टानि दिशां तटानि यस्मिन् दिशश्च तटं स्थलं च यस्मिन्निति वा भृङ्गाणां प्रमदानां गणैरावृतो युक्तः चचार। मदच्युन्मदस्रावी द्विरदो द्विदन्तो गजेन्द्रः करेणुभिर्वृतो यथा ॥ २५ ॥ अनुरतः संसक्तः प्रमदानां गणो यस्मिन् स सत्यसंकल्पः आत्मनि अवरुद्धं सौरतं येन यस्य वा स कृष्णः एवं सर्वा निशा रात्रीः सिषेवे। शशांकस्यांशुभिः किरणैर्विराजिताः प्रकाशिताः। शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूताः ॥ २६ ॥

(१) श्रीप्रभचरणविरचिता श्रीटिप्पणी

यथा मदच्युदित्येतत्तात्पर्योक्तौ, **ततः अविचारेणे**ति। पूर्वस्यां लीलायां देशकालनायिकाविचारपूर्वकं रमणं कृतम्, तदनन्तरं न तथेत्यर्थः ॥ २५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जलस्थलक्रीडे दर्शिते। वनक्रीडां दर्शयति—ततश्चेति। जलक्रीडानन्तरं जलस्थलप्रसूनानां गन्धो यस्मिंस्तेनानिलेन जुष्टानि व्याप्तानि दिशां तटानि अन्ता यस्मिंस्तस्मिन् यमुनाया उपवने मृगाणां प्रमदानां च गणैरावृतः कृष्णश्चचारेत्यन्वयः। तत्र दृष्टान्तमाह—यथेति। मदधारास्रावो द्विरदो मतङ्गजो यथा करेणुभिर्वृतो वने विचरेत्तथेति ॥ २५ ॥ रासक्रीडां निगमयति—एवमिति। एवमुक्तप्रकारेण स कृष्णः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूतास्ताः सर्वा एव निशाः सिषेवेत्यन्वयः। तासु सर्वास्वेवं क्रीडितवानित्यर्थः। तासां रसाश्रयत्वे हेतुमाह—शशाङ्कश्चन्द्रस्तस्यांशुभिः किरणैः विराजिता उज्ज्वलीकृता इति। तासु बह्वीषु रात्रिषु रमणे हेतुमाह—अनुरतः प्रीतियुक्तोऽबलागणो यस्मिन्निति। तासां सर्वासां मनोरथपूरणार्थं रेम इत्याशयः। 'तर्हि तासु पुत्राद्युत्पत्तिः स्यात्' इत्याशङ्क्याह-आत्मन्येवावरुद्धसौरतश्चरमधातुर्नतु स्खलितो यस्य सः इति कामविजय उक्तः। तत्र सामर्थ्यमाह—सत्यकाम इति। सत्यसङ्कल्प इत्यर्थः ॥ २६ ॥

अन्वितार्थप्रकाशिका

स्थलजलक्रीडे दर्शिते वनक्रीडामाह—ततश्चेति ॥ जलक्रीडानन्तरं चकारेणाङ्गमार्जनवनदेवतानीततादात्विकवस्त्रालङ्कारपरिधापनानन्तरं च जलस्थलप्रसूनानां गन्धो यस्मिंस्तेनानिलेन जुष्टानि व्याप्तानि दिशां तटानि अन्ता यस्मिंस्तस्मिन् कृष्णाया यमुनाया उपवने भृङ्गाणां प्रमदानां च गणैरावृतः कृष्णश्चचार। यथा मदच्युत् मदस्रावणः द्विरदो गजः करेणुभिर्वृतो वने चरति तथेति ॥ २५ ॥ एवमिति ॥ एवं सत्यकामः अनुरतः प्रीतियुक्तोऽबलागणो यस्मिन्निति आत्मन्येवावरुद्धः सौरतश्चरमधातुर्नतु स्खलितो यस्य सः इति कामविजय उक्तः। यद्वा। आत्मनि मनसि अवरुद्धा स्थापिता आध्याता इति यावत्। सौरता सुरतसम्बन्धिनो हावभावादयो येन स कृष्णः शशाङ्कस्यांशुभिर्विराजिताः उज्ज्वलीकृताः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूतास्ताः सर्वा एव निशाः सिषेवे। यद्वा। निशा इत्यत्यन्तसंयोगे द्वितीया। शृङ्गाररसाश्रयाः शरदि प्रसिद्धा याः काव्येषु कथास्ताः सिषेवे। अन्ये तु एवं योगमायाः प्रभावात् सर्वा द्वादशमासिकीः कृष्णाः शुक्लाश्च शशाङ्कांशुविराजिता निशाः सिषेवे। ताश्च शरदि वर्षमध्ये ऋत्वादिकमधिकृत्य ये काव्यकथासुरसाः संभवन्ति तेषामाश्रयाः श्रीकृष्णक्रीडाधिकरणीभूता आश्रित्य सत्कवयः प्राञ्चोऽवाञ्चश्च व्यासपराशरजयदेवादयः स्वकाव्येषु वर्णयित्वाऽपि नान्तं प्रापुरिति ॥ २६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत इति जलस्य स्थलस्य भूमेश्च प्रसूनानि पद्मकुन्दादीनि तेषां गन्धो यस्मिन् तेनानिलेन वायुना जुष्टं सेवितं दिशां तटं स्थलं यस्मिन् तस्मिन् कृष्णोपवनेयमुनोपवने भृंगाणां प्रमदानां गणैर्यूथैः आवृतो हरिः द्विरदोगज इव चचार ॥ २५ ॥ एवमेकरात्रकृता क्रीडामुक्त्वाप्तां प्रतमन्यरात्रकृताः क्रीडा आह एवमिति। अनुरतः आसक्तः अबलागणो युवति समूहो यस्मिन् सः सत्यः कामः संकल्पो यस्य। यद्वा सत्यः कामोभक्त मनोरथो यस्मिन्सः श्रीकृष्णः एवं सर्वाः निशाः आत्मन्येवावरुद्धं संरुद्ध सौरतं वीर्यं ते येन सः असंवलितचरमः धातुः सन् सिषेवे। कथंभूताः निशाः शशांकांशुभिः चन्द्रकिरणैः विराजिताः शोभिताः पुनः कथंभूताः शरत्काव्यकथारसाश्रयाः शरत्संबंधिनः काव्येषु कथ्यमानाः ये रसाः शृंगारादयस्तेषामाश्रयरूपाः। यद्वा सः सर्वाः निशाः अव्यवधानतया शृंगाररसाश्रयाः शरत्काव्यकथाः शरदिविख्याताः काव्येषु कविभिः वर्णिताः याः कथाः ताः सिषेवे। निशा इत्यत्रात्यन्तसंयोगे द्वितीया ॥ २६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं तस्य स्थलजलक्रीडे वर्णिते, अथ वनक्रीडां वर्णयति ॥ ततश्चेति ॥ ततश्च जलस्थलयोः संबन्धिनां प्रसूनानां, कुसुमानां गन्धो यस्मिंस्तेनानिलेन जुष्टानि दिशां तटान्यन्ताः दिशश्च तटं स्थलं च वा यस्मिंस्तस्मिन्, कृष्णाया यमुनाया उपवनं तस्मिन्,

भृङ्गा द्विरेफाश्च प्रमदाः स्त्रियश्च तासां गणास्तैः आवृतः परिवेष्टितः कृष्णः, मदच्युन्मदस्रावी, द्विरदो मतङ्गजः, करेणुभिर्हस्तिनीभिः, यथा तद्वत् चचार विचरति स्म ॥ २५ ॥ रासक्रीडां निगमयति ॥ एवमिति ॥ एवमित्थं, सत्यकामः सत्यसंकल्पः, अनुरतोऽनुरागी अबलागणः स्त्रीणां गणो यस्य तथाभूतोऽपि, आत्मन्येव अवरुद्धं सौरतं वीर्यं येन सः, अस्खलितचरमधातुरित्यर्थः। स कृष्णः, शशाङ्कश्चन्द्रस्तस्यांशवो मरीचयस्तैर्विराजिताः शोभमानाः, शरदि काव्येषु च ये कथारसास्तेषामाश्रया आश्रयभूताः शरद्यनुभाव्यानां काव्येषु कथ्यमानानां च कथारसानामाश्रयभूता इत्यर्थः। सर्वाः निशाः, सिषेवे। वंशीवादैररण्ये व्रजयुवतिजनाकर्षणं भाषणं तत्क्रीडा बध्वा सहान्तर्धिरिह युवतिभिर्मार्गणं चारुगीतम्। प्रादुर्भावः सुपृच्छोत्तरनटनरहः क्रीडनानि प्रमोदो वारिक्रीडा वने यद्विहरणमियती श्रीमती रासलीला ॥ २६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततश्चेति : १०.३३.२५.

वशीभूता यस्य व्रजविलसिता वृत्तिनिचया न तद्बन्धायास्मिन् भवति विहिता कापि विहृतिः।
स्फुटीकुर्वन्नेवं युवतिभिरलं ताभिरकरोद्वशाभिः श्रीनाथः स्थलजलवनारामविहृतिम् ॥ १२९ ॥
जडजातविहारशालिनः परिपश्यन्त्विह मां तु कीदृशम्। अहमस्मि सदा तु मद्दृशा सदुदासीनतटस्थलक्षणः ॥ १३० ॥
संयोग-विप्रलम्भद्वयानुभववज्जलस्थलानुभवम्। दातुं परिपूर्णरसप्रदोऽभिरेमे स ताभिरुभयत्र ॥ १३१ ॥
लब्ध्वाऽऽनन्दं कृतार्थः सन्बालोन्मत्तपिशाचवत्। विहरेज्ज्ञानवानेतद् व्यक्तयथोक्ता गजोपमा ॥ १३२ ॥
लब्धे चित्सुखसद्रसेऽथ नितरां कार्तार्थ्यपूर्णात्मना पुंसाऽशेषजडेष्वशेषशरदो नेया विहारादिभिः।
रुद्ध्वा कामफलाभिसन्धिमबहिर्धृत्वा बहिः कामतो वृत्तिं सप्रमदामिति स्फुटमभूत्तत्केलितः श्रीपतेः ॥ १३३ ॥

एवं शशाङ्केति : १०.३३.२६.

शिवविधिसवभाजां कुण्ठिता यत्र शक्तिर्निखिलभुवनवीरो विश्रुतः सोऽपि कामः।
युवतिसमवधाने निर्जितो येन रात्रौ किमपरमतिचित्रं तच्चरित्रं हि वाच्यम् ॥ १३४ ॥
विचित्रं चरित्रं विधायैवमीशः स्वतन्त्रां गतिं स्वैरवृत्त्या प्रदर्श्य।
भुजङ्गप्रयातोऽप्यनङ्गप्रदाताऽप्यनङ्गाङ्गभौजङ्गवृत्तिं व्यतानीत् ॥ १३५ ॥
मद्बलं तु कियद् दैत्यद्विषोऽग्र इति भीमतः। काव्यस्य रोधो दुःसाध्योऽप्यभून्निर्यत्नतः प्रभोः ॥ १३६ ॥
रसो वै स इति श्रुत्या रसात्मेश इतीरितम्। युक्तमेव ततः श्रीशः स्वस्माद्भिन्नं न तं व्यधात् ॥ १३७ ॥
नित्यानवद्यनिःसीमसुखिनः सुरतोत्सवे। प्रभोर्वैरस्यकृन्नासीद्रसावधिरिति क्षमम् ॥ १३८ ॥
तत्त्वभ्रान्तधियः स्वपूतगतयः पाण्डित्यगर्वोर्मयः काव्यालापविवर्जनं जगति यज्जल्पन्त्यनल्पेक्षणाः।
नित्यानन्दविधायिनीं निजरसां सत्काव्यगोष्ठीमिमां निर्मायात्र जने निनाय सदयस्तन्मन्दभावं वचः ॥ १३९ ॥
अरसकाव्यविलापविवर्जनं कविवचोविषयोऽलमिति क्षमम्।
सरसकाव्यकथाभिनिषेवणं यदकरोज्जगदादिगुरुः स्वयम् ॥ १४० ॥
यत्र विद्योतते श्रीशलीलागुणकथोदयः। सत्सत्काव्यं भवत्यत्र चतुर्वर्गफलप्रदम् ॥ १४१ ॥
लब्धं मानुषजन्म चेद्विधिवशात् तद्गोकुलप्रोल्लसन्नानावृत्तिवशंवदोऽप्यनुपदं कुर्वन् विवेकाश्रयम्।
ताताऽत्यन्तसुखप्रदाऽऽत्मजननीसेवामभीष्टप्रदां कुर्यादात्मनिरुद्धकाव्यविषयो यावद्विदर्कोदयः ॥ १४२ ॥
आसेव्यतां गुरुपदां सुखदामतीव चन्द्रप्रियां भुवि निशां सनिरुद्धकाव्यः।
एवं प्रभुः स्वजनभव्यकृदध्वदर्शी प्राबोधयत् स्वकृतितोऽद्भुतरासकेलौ ॥ १४३ ॥ (युग्मम्)

कृष्णप्रिया

राजन् ? विहारसे श्रम दूर कर गाविन्द जी श्रीकृष्णा के उपवनमें पधार रहे हैं—श्रीयमुना सलिल के विहार के बाद जैसे कोई मदसर मदमत्त मतङ्गराज माताङ्गियों के साथ विहार करता हुआ वनमें विचरता है वैसे ही रसराज श्रीश्याम सुन्दरजी जल एवं स्थल के सुमनों से सुवासित अनिल से सेवित श्रीकृष्णा जी के उपवनों की दश दिशाओं में विचर रहे हैं और श्रीनन्दनन्दन जी चारों भ्रमरो से और व्रजनारियाँ के वृन्द से परिवेष्टित है ॥२५॥ राजन् व्रजविहारी जी सत्यकाम है एवं प्रजवनितायें सत्यकाम है पुनः व्रजवनिता ओं के सब यूथ भगवान श्रीकृष्ण में नित्यानुरक्त है और नित्यसिद्ध है उन प्रजवनिताओं के साथ जो रतिविहार चल रहा था उस सौरत को अपने में अवरुद्ध कर भगवान रासेश्वर श्रीकृष्ण जो रत्रियाँ शरद कालीन काव्य में कही हुई कथाओं का वर्णन करती है लौकिक चन्द्रमा की किरणों से सुशोभित रात्रियों का रात्री रस के आश्रय वाली है उन रात्रियों में रस का सेवन करने लगे ॥ २६ ॥

[1]राजोवाच

संस्थापनाय धर्मस्य प्रशमायेतरस्य च । अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ २७ ॥
स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता । प्रतीपमाचरद् ब्रह्मन् परदाराभिमर्शनम् ॥ २८ ॥

कदमक्षम।

अन्वयः—राजोवाच—धर्मस्य, संस्थापनाय, च, इतरस्य, प्रशमाय, हि, अंशेन, (बलभद्रण सह) जगदीश्वरः, भगवान्, अवतीर्णः ॥२७॥ ब्रह्मन् ! धर्मसेतूनाम्, वक्ता, कर्त्ता, च, अभिरक्षिता, सः, परदाराभिमर्शनम्, प्रतीपम्, कथम्, आचरत् ॥२८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रतीपं प्रतिकूलमधर्ममित्यर्थः । आचरत्कृतवान । न चेदमधर्ममात्रं कलंजभक्षणातिवत्किं तु महासाहसमित्याह । परदाराभिमर्शनमिति ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ज्ञातशास्त्रतात्पर्योऽपि परीक्षित्स्विनाम्नोऽन्वर्थतां द्योतयंस्तथानभिज्ञश्रोतृसंदेहप्रहाणाय पृच्छति—राजेति । इतरस्य अधर्मस्य । प्रशमाय निवृत्तये । अंशेन बलदेवेन सह । "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥" इति श्रीमुखोक्तेः । यद्वा-यस्यांशेन जगत् स ईश्वरोऽवतीर्ण इत्यन्वयः । अंशेन चासौ जगदीश्वर इति वा ॥ अथ परीक्षित्सभोपविष्टां विविधवासनावतां कर्मिज्ञानिप्रभृतीनां हृदये संदेहं समुद्भूतमालक्ष्य तदुच्छेदार्थं पृच्छति-संस्थापनायेति । इतरस्य अधर्मस्य । यः खल्वंशेन जगदीश्वरो विष्णुर्भवति स स्वयं भगवानपीत्यर्थः । अंशेन बलदेवेन सह ॥ २७ ॥ इत्यर्थ इति । धर्मापेक्षयाऽधर्म एव प्रतीप इति भावः । अत्राक्षिपति-न चेति । विषदिग्धबाणहतमृगमांसं कलञ्जम् । किन्तु अपि तु । हेतुशून्यो धर्मव्यतिक्रमः साहसः । अभिमर्शनम् अविचार्यग्रहणम् । ब्रह्मन्निति वेदमूर्ते इत्यनेन संदेहहरणे सामर्थ्यं संचितम् ॥ प्रतीपम् प्रतिकूलमधर्मम् । यदि च स्वैरलीलयैवाचरदित्युच्यते तदा ब्रह्मशापमंगीकृत्य तत्फलं च कदाचिदीश्वरत्वेऽप्यंगीकरोति यथा तथा पापमंगीकृत्य तत्फलमप्यवश्यमंगीकुर्यादित्याक्षेप इत्येकः प्रश्नः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वंशीसञ्जल्पितमनुरतं राधयान्तर्द्धिकेलिः प्रादुर्भूयासनमधिपटं प्रश्नकूटोत्तरञ्च । नृत्योल्लासः पुनरपि रहःक्रीडनं वारिखेला कृष्णारण्ये विहरणमिति श्रीमती रासलीला । एवं सुखविशेषेणैव मुनीन्द्रेण प्रश्नस्य विस्तार्य च वर्णितायाः श्रवणाद्राज्ञोऽपि तत्र तत्र सुखोद्बोध एव जात इति लभ्यते नतु दोषदर्शनं वैरस्यापातात् तस्मात्तत्रत्यानां केषाञ्चित् सन्देहं वितर्क्य तेषामेव हितार्थं तमुत्थाप्य स्वसन्देहव्याजेन पृच्छति । संस्थापनायेति त्रिभिः । तत्राद्य द्वयं युग्यकम् संस्थापनाय लुप्तस्य प्रवर्त्तनाय प्रवृत्तस्य रक्षणायेत्यर्थः । न केवलं तदर्थमेव किन्त्वितरस्य अधर्मस्य प्रशमाय सर्ववासनोन्मूलनायेत्यर्थः । अन्यथा धर्मसंस्थापनस्याप्यसिद्धिः स्यात् । हि प्रसिद्धम् । "धर्मसंस्थापनार्थाय सम्भवामि युगे युग"इत्यादिवचनेभ्यः । भगवानिति तत एव भगवद्भावप्रकटनमपि स्यात् इति भावः । अंशेन श्रीवलदेवेन सहेति तत्र तत्राग्रहो दर्शितः यतो जगतामीश्वरः प्रतिपालकः । अन्यथा जगन्नाशापत्तिरित्यर्थः । यद्वा "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग"दिति न्यायेन यो जगदीश्वरः स्वयन्तु पूर्णैश्वर्ययुक्त इत्यर्थः । तस्यान्यकामना न सम्भवतीति भावः ॥ २७ ॥ स इति । पूर्वत्र यच्छब्दस्याध्याहारादन्वयः । धर्माः एव सेतवः लोकरक्षामर्यादाः धर्मे वैदिकनिबन्धा वा तेषां वक्तृत्वादेव कर्त्ता अन्यथा वाक्यव्यवहारयोर्विसम्वादेन लोकैरग्राह्यः स्यात् । किञ्च अभितो रक्षिता तत्प्रतिपक्षवधादिना बहुधा सम्वर्द्धनेन च पालकः । परदाराभिमर्षणरूपं प्रतीपं धर्मसेतूनामेव । धर्मसंस्थापनादेर्वा प्रतिकूलम् । ब्रह्मन् हे साक्षाद्वेदमूर्त्ते ! प्रतीपाचरणेन वेदातिक्रमात् भवादृशविप्रकुलातिक्रमोऽपि स्यात् । तच्च ब्रह्मण्यदेवस्य तस्यायुक्तमेवेति भावः । यद्वा । ननु तत्कारणं कथं मया ज्ञातु शक्यमीश्वरचेष्टितत्वादित्याशङ्क्याह । हे सर्ववेदात्मक ! सर्वज्ञत्वादित्यर्थः । अन्यत्तैः । यद्वा । प्रतीपमाचरदिति अधर्ममुक्तवान् कृतवान् अभिरक्षितवांश्चेत्यर्थः । तत्रोक्तिः मया परोक्षं भजता तिरोहितमित्यादिना रहोऽपि परदारान् भजे इत्यनुवादात् कृतिः साक्षादेव रमणात् अभिरक्षा पुनः पुनराचरणात् तेन लोके प्रवृत्तिसम्भवाच्चेति । स्वयमधर्मकर्तृभ्योऽपि तस्य महानेव दोषबन्ध आयातः । यद्वा । धर्मं प्रकर्षेण नाशितवान् अधर्मञ्च सम्यक् स्थापितवानिति श्लेषेण स्वयं सिद्धान्तमप्याह । संस्थापनायेति धर्मस्य स्थापनं नाम सामान्यतः संस्थापनन्तु तत्रैव शुद्धभक्तियोगस्य सर्वातिक्रमितया स्थापनात् । "स्मर्त्तव्यः सततं विष्णु र्विस्मर्त्तव्यो न जातु चित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्करा" इति पाद्मादिशास्त्रेश्यः । तदवतारस्य तन्मुख्यप्रयोजनत्वञ्चोक्तं प्रथमे श्रीकुन्तीदेव्या । "भक्तियोगविधानार्थं कथं पश्येमहि स्त्रिय" इति । भक्तियोगविधानार्थमवतीर्णं त्वामिति टीका च ।

---

[1] परीक्षिदु-प्रा. पा. ।

तद्धि तत्र विनाप्युपदेशं तत्प्रभावेणैव भवति। तथेतरस्य तद्विरुद्धस्य च स्वत एव नाशो भवतीति स तथाभूतोऽसौ परदाराभिमर्षणरूपं प्रतीपं कथमाचरत् अपि तु नैवाचरदिति कुतो धर्मसेतूनां सर्वधर्माश्रयभूतानां भक्तियोगभेदानां वक्तृत्वादिहेतोरित्यर्थः। अतो निजावतारमुख्यप्रयोजनभक्तिविशेषफलप्रेमविशेषविस्तारणाद्यर्थं तासां पतिसेवादिधर्मत्यजनेन अन्यधर्माद्यनादरो युक्त एवेति भावः। सच "तावत्कर्माणि कुर्वीत 'इत्यादि वचनात साधनदशायामपि युक्तः कमुत तासामिति। यद्वा। स भगवान् जगदीश्वरश्चेत्येव वा प्रतीपत्वे हेतुः सर्वांशित्वादन्तर्यामित्वाच्चेत्यर्थः। यद्वा। परे परमस्वशक्तिरूपा ये दाराः स्वीयरमण्यस्तदभिमर्षणमपि कथं प्रतीपमाचरत् अपि तु नैवेत्यर्थः। यतः भवद्भिरेवोक्तं कृष्णवध्व इति ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं प्रीतिविशेषेण श्रीवादरायणिना वर्णितायाः श्रीरासक्रीडायाः श्रवणान्मिथोऽपांगकूणनैर्निरीक्षमाणानामीषद्धसतां शुष्कतार्किकाणां केषाञ्चिदवैष्णवानामभिप्रायं वितर्क्य कृपया तेषामेव हितार्थं तमुत्थाप्य स्वसन्देहव्याजेन पृच्छति—संस्थापनायेति त्रिभिः। सम्यक् स्थापनाय लुप्तस्य प्रवर्त्तनाय वर्त्तमानस्य च विघ्नतो रक्षणाय चेत्यर्थः। न केवलं तदर्थमेव, किन्तु इतरस्याधर्म्मस्य प्रकृष्टशमाय सवासनोन्मूलनाय, अन्यथा धर्म्मसंस्थापनस्याप्यसिद्धिः। हि प्रसिद्धम्, 'संरक्षणाय धर्म्मस्य' इतीदृशवचनेभ्यः। भगवानिति तत एव भगवत्ताप्रकटनमपि स्यादिति भावः। अंशेन श्रीबलदेवेन सहेति तत्र तत्राग्रहोऽपि दर्शितः; यतो जगतामीश्वरः प्रतिपालकः, अन्यथा जगन्नाशापत्तिरित्यर्थः। श्लेषार्थश्चायम्—धर्म्मस्य भक्तिविरुद्धाशेषधर्म्मस्य संस्थापनं तस्मै प्रशमाय अत्यन्तनाशाय तादृशधर्म्माधर्म्माभावेनैव रासक्रीडादिमहालीलासिद्ध्या निजावतारमुख्यप्रयोजनसिद्धेः। ननु तर्हि स्वकृतवेदादिनिबन्धातिक्रमः स्यात्? तत्राह—जगतां ब्रह्मादीनामपीश्वरः परमस्वतन्त्रोऽयं कदाचिद्रसविशेषापेक्षया तादृशमपि कुर्य्यात्, तत्रास्य को नाम नियामकोऽस्त्वित्यर्थः। यद्वा, (भा० ११।१९।२७) 'धर्म्मो मद्भक्तिकृत् प्रोक्तः' इत्यादिन्यायेन भक्तिलक्षणो धर्म्मस्तस्य; इतरस्य तद्व्यतिरिक्ताशेषस्य मोक्षादेरपि अत्यन्तोपरमाय, यतो जगत्प्रतिपालको विघ्नविनाशनपूर्व्वकेण भक्तेः सम्यक स्थापनेनैव सर्व्वेषां स्वतः सुखसर्व्वार्थसम्पत्त्या जगत्पालनासिद्धेः ॥ २७ ॥ धर्म्मा एव सेतवो लोकरक्षा-मर्य्यादाः, धर्म्मवैदिकनिबन्धा वा तेषां वक्तृत्वादेव कर्त्ता, अन्यथा वाक्यव्यवहारयोर्विसम्बादेन लोकैरग्राह्यः स्यात्। किञ्च, अभितो रक्षिता तत्प्रतिपक्षवधादिना बहुधा संवर्द्धनेन च पालकः परदाराभिमर्षणरूपं प्रतीपं धर्म्मसेतूनामेव धर्म्मसंस्थापनादेर्वा प्रतिकूलम्; ब्रह्मन्! हे साक्षाद्वेदमूर्त्ते! प्रतिपाद्यचरणेन वेदातिक्रमाद्भवादृशविप्रकुलातिक्रमोऽपि स्यात्, तच्च ब्रह्मण्यदेवस्य तस्यायुक्तमेवेति भावः। यद्वा, ननु तात! तत्कारणं कथं मया ज्ञातुं शक्यम्, ईश्वरचेष्टितत्वादित्याशंक्याह—हे परब्रह्मरूपेति। सर्व्वज्ञत्वादित्यर्थः। यद्वा, हे सर्वव्यापकेति भक्तिविशेषेण त्वया तस्य हृद्यमपि दातुं शक्यत इत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, प्रतीपमाचरदित्यधर्म्म उक्तः, कुतोऽभिरक्षितश्चेत्यर्थः। तत्रोक्तः (भा० १०।३२।२१) 'मया परोक्षं भजता तिरोहितम्' इत्यादिना कृतः, साक्षादेव रमणादभिरक्षितः पुनः पुनराचरणात्, तेन लोके प्रवृत्तिसम्भवाच्चेति। यद्वा, धर्म्मः प्रकर्षेण नाशितः, अधर्म्मश्च सम्यक् स्थापित इति। श्लेषपक्षे—कथं केन प्रकारेणाचरत्, अपि तु न केनापीत्यर्थः। कुतः? भक्तिलक्षणधर्म्मसेतूनां वक्तृत्वादिहेतोरित्यर्थः। अतो निजावतारमुख्यप्रयोजन-भक्तिविशेषविस्तारणाय धर्म्माद्यनादरो युक्त एवेति भावः। स च तत्सेवकेष्वपि (भा० ११।२०।९) 'तावत् कर्म्माणि कुर्वीत' इत्यादिवचनाद् व्यक्त एव। यद्वा, प्रसिद्धधर्म्ममर्य्यादानां वक्त्रादिरपि किमर्थं प्रतिकूलमाचरत्, रासक्रीडया परमभक्तिप्रवर्तनेन तदेकसाध्यधर्म्मस्यापि साफल्यार्थमिति भावः। किञ्च, पराणां तदेकभक्तया श्रेष्ठानां दाराणां स्वस्त्रीणामभिमर्षणं भक्त्यर्थमवतीर्णस्य सर्व्वापेक्षया भक्त-मनोरथपूरणं युक्तमेवेति। किञ्च, 'पर'-शब्देन अन्यदीयभार्य्याणामेवाभिमर्षणं दोषः, तास्तदीया विशेषतः पराः सर्व्वतः श्रेष्ठा निजपत्न्य एवेति सूचितमिति ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उपदेशानुष्ठानविरोधिनिरसनादिभिः केवलं धर्मपरित्राणार्थमवतीर्णस्य भगवतः कथं परदारपरिग्रहरूपाधर्माचरणमिति पृच्छति राजा। संस्थापनायेति। इतरस्याधर्मस्य प्रशमनार्थं चांशेन बलरामेण सह सङ्कल्पात्मकज्ञानेनैव नतु कर्मणेति वावतीर्णः ॥ २७ ॥ स एवम्भूतः धर्ममर्यादानां स्वयं कर्त्तानुष्ठाता वक्तोपदष्टा च विरोधिनिरसनेनाभितो रक्षिताच सन् हे ब्रह्मन्! परदाराभिमर्शनात्मकं प्रतीपं धर्मप्रतिकूलमधर्ममिति यावत्कथमाचरत्कृतवानित्यर्थः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ज्ञातशास्त्रतात्पर्यार्थोऽपि परीक्षित्स्वनाम्नोऽर्थं सफलं कुर्वन् तथा श्रोतृजनविद्वज्जनचित्तसन्देहप्रहाणाय पृच्छति। संस्थापनायेति। इतरस्याधर्मस्य हिशब्देन "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत" इत्यादिवाक्यं प्रमाणयति ॥ २७ ॥ प्रतीपं प्रतिकूलं किमकारीत्यत्राह। अभिमर्शनम् अविचार्य ग्रहणम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तेषामेव तत्रत्यानां केषाञ्चित्तत्त्वमजानतां सन्देहं वितर्क्य कृपया तेषामेव हितार्थं तमुत्थाप्य स्वसन्देहव्याजेन पृच्छति। सस्थापनायेति ॥ २७–२८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ (भा० १०।२९।१६) "न चैवं विस्मयः कार्यो भवता भगवत्यजे। योगेश्वरेश्वरे" इत्यादिना प्रत्याख्यातोऽपि राजा श्रोतृणां सन्देहोच्छेदार्थं पुनः पृच्छति संस्थापनायेत्यादि त्रिभिः। अंशेन बलदेवेन ॥ २७ ॥ प्रतीपं विपरीतम्, तदेव किम् ? तत्राह—परदाराभिमर्शनम्, परस्त्रीसङ्ग इति बहिरर्थः। वस्तुतस्तु परात्परा दाराः स्वानन्दशक्तयः दारयन्त्यविद्यामिति दाराः ॥ २८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अवतीर्णो हि भगवानित्यादि परीक्षिन्-प्रश्नः। अश्यते विभज्यते कलाकलापोऽस्मादित्यंशः परिपूर्णभागस्तेन भगवान् श्रीकृष्णः स हि परात्परोऽवतीर्णः। अंशेन वलदेवेन ॥ २७ ॥ कथं प्रतीममाचरत् ? तदेव किम् ? तत्राह-परदाराभिमर्शणम् ॥२८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथ परीक्षित् सभोपविष्टानां विविधवासनावतां कर्मिज्ञानिप्रभृतीनां हृदये सन्देहं समुत्थितमालक्ष्य तदुच्छेदार्थं पृच्छति संस्थापनायेति। इतरस्याधर्मस्य यः खल्वंशेन जगदीश्वरो विष्णुर्भवति स स्वयं भगवानवतीर्णः। यद्वा। अंशेन बलदेवेन सह प्रतीपं प्रतिकूलमधर्मं यदि च स्वैरलीलयैवाचरदित्युच्यते तदा ब्रह्मशापमङ्गीकृत्य तत् फलञ्च कदाचिदीश्वरत्वेऽप्यङ्गीकरोति यथा तथैव पापमङ्गीकृत्य तत् फलमप्यवश्यमङ्गीकुर्यादित्याक्षेप इत्येकः प्रश्नः ॥ २७–२८ ॥

रसिकाह्लादिनी–टीका

एवं तावत् "उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गत" इति श्रीकृष्णप्रियाणामुत्कर्षकथनेन श्रीशुको राज्ञो मनःसन्तोषं कृतवान् इदानीं रासलीलाश्रवणेन परमानन्दपूर्णोऽपि सभायामुपविष्टानां बहु मुखानां कुतर्कनिष्ठानां व्रजसुन्दरीविलासश्रवणेन परमानं परस्परं नेत्रकूणनेन स्वमनसि श्रीकृष्णस्य जीवसाम्यमाशङ्कमानानां मुखाप्रसक्त्या तदभिप्रायमालक्ष्य मुनीन्द्रं प्रष्टुमशक्तानामिङ्गितज्ञो राजा स्वयमेव संशयमुत्पाद्याक्षिपति संस्थापनायेति, धर्मस्य संस्थापनायेति, धर्मस्य संस्थापनाय हेतुकैरुत्सादितस्यान्वयव्यतिरेकाभ्यां प्रामाण्यदर्शनेन विद्वांसयोगिवचनैराचरणेन दृढीकरणं संस्थापनं तत् प्रयोजनम्। इतरस्य दृष्टार्थवादिभिरतिबहिर्मुखैः कुतर्कनिष्ठैः प्रवर्तितस्याधर्मस्य प्रशमाय समूलनाशाय सवासनस्योन्मूलनायेत्यर्थः। भगवान् प्रकटितषडैश्वर्य्योऽपि अंशेन बलदेवेन सह, यद्वा अंशेन ज्ञानबलैश्वर्य्यादिना सहावतीर्णः। यतो जगदीश्वरः जगतां ब्रह्मादिस्थावरजङ्गमानां ईश्वरो नियन्ता, ये धर्ममर्य्यादामुल्लन्घयन्ति तेषां सर्वेषां दण्डकर्ता धर्मातिक्रमे जगधातो छेदापत्तेः। इदं तु धर्मरक्षणं अधर्मनिरसनं च सामान्यतोऽन्यावतारकार्य्यं तदुक्तं गीतायां—"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्" इति। अवतारिणः श्रीकृष्णस्य कार्य्यविशेषकः इति प्रश्नः कृष्णस्तु भगवान् स्वयमित्युक्तत्वात्तथापि विशेषनिर्द्धारणायाक्षेपः सामान्यतो धर्मरक्षणादेरन्यावतारै रेव चरितार्थत्वात्। स्वयमेव कार्य्यविशेषं निर्द्धारयति। श्रीकृष्णस्यावतारिणो धर्मविशेषं रक्षणं प्रवर्त्तनं च अधर्म-विशेषनिरसनं च प्रयोजनं द्वयमित्यर्थः। धर्मो मद्भक्तिकृत् प्रोक्त" इति श्रीमुखेनोक्तस्य धर्मस्य संस्थापनाय इतरस्य भक्त्युपयोगशून्यस्य प्रशमाय अभक्तेषु संचारणाय भक्तिविरुद्धधर्मस्य हेयत्वेन श्रूयमाणत्वात् अत्रोक्तं च। "स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः" इति। यद्वा भगवान् सर्वशक्तिविशिष्टोऽत्र गोकुलेऽवतीर्णः अंशेनाऽन्यत्र जगतां ब्रह्माण्डानां नियन्ता प्रभुरित्यर्थः। ये अतिबहिर्मुखाः श्रीकृष्णे जीवसाम्यं पश्यन्ति तान् श्रावयित्वानुवदति राजा रासक्रीडाश्रवणनिर्वृत्तोऽपि संशयरहितोऽपि तान् कुतर्कनिष्ठान् कर्तुं भगवत्यधर्ममारोप्य मुनीन्द्रमुखात् श्रीकृष्णस्यैश्वर्य्यं स्थापयितुं इदमनुपृच्छतीति तात्पर्यार्थः। स एव धर्म-संस्थापनद्वाराऽधर्मनिरसनद्वारा जगत्पालकः ॥ २७ ॥ धर्मसेतूनां धर्मा एव सेतवो जगद्रक्षणसमर्था मर्यादास्तासां वक्ता उपदेष्टा न केवल वक्तैव अपि तु कर्ता तदुक्तं गीतायाम्—"उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहमिति" पाषण्डिनां कुयुक्तिखण्डनेन बलाद् धर्मसेतुविदारणकर्त्तृणां बधेन चाभितो रक्षिता। एवं बहुधा धर्मस्य रक्षकः प्रातिकूल्यं नास्ति। तथापि को गृहीष्यदृषभस्य हि तत् प्रमाणमिति दृष्टान्तेन तादृशाचरणेन लोकस्यानिष्टं भवेदेवेति प्रतीपमित्युक्तम्। किं तदत्यपेक्षायामाह परदाराभिमर्शनमिति। यत् महासाहसमित्यर्थः। धर्मस्य वक्तृत्वं समक्षं दृष्टम् "भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमाययेति"—उक्त्वा पतिशुश्रूषणं कथयित्वा रमण साधितम्। अतो वक्तृत्वकर्तृत्वयोर्विसम्वादो जातः। वक्तव्यविस्मृतिपूर्वरमणस्याभितो रक्षणं जातमिति। प्रतीपं कथमाचरत्। अभिप्रायाज्ञानात् पृच्छते न तु तत्र किंचित् प्रतिकूलमस्तीति। विरुद्धधर्मादिकरणत्व दीश्वरस्येति। तद्यथा धर्माधर्मयारीश्वरे स्थितिश्रवणात् एवं कथनमन्यदेवाचरणमन्यदेवेति ईश्वरे न किमपि विरुद्धमिति। तथापि लोकसंग्रहपरस्येश्वरस्य सम्वेदनाचरणानान्यथात्वेन पृच्छाम इति भावः ॥ २८ ॥

विशुद्धरसदीपिका

संग्रह श्लोकः—

वंशीसञ्जल्पितमनुरतं राधयान्तर्धिकेलिः प्रादुर्भूयासनमधिपटं प्रश्नकूटोत्तरञ्च ॥
नृत्योल्लासः पुनरपि रहः क्रीडनं वारिखेला कृष्णारण्ये विहरणमिति श्रीमती रासलीला॥

एवञ्च शुश्रूषन्त्यः पतीनीति भर्तुशुश्रूषणमिति पतिसुतान्वयेति श्रीमुनीन्द्रस्य श्रीभगवतस्तासां च वाक्यजातेन सामान्यतः प्रतिभातं परिकीयात्वमाक्षिपन् राजोवाच वस्तुतस्तु श्रीमुनीन्द्रेण परमकरुणयार्थान्तराच्छादितैरपि पदैः प्रदर्शितेयं रहस्यातिरहस्य-क्रीडापरिपाटी मयानुभूतेति व्यञ्जनाय तदनाधिकारिणां बुद्धिवृत्तिर्मास्पृशत्विति प्रश्नभङ्ग्या तदाच्छादना। यद्वा पराऽयमन्यपर इत्यनुसन्धेयं तत्र श्रीराजोवाचेति—

उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति

न्यायात् परमविदग्ध इत्यर्थः। समिति युग्मक सम्यक्स्थापनाय लुप्तस्य प्रवर्त्तनाय प्रवृत्तस्य च रक्षणायेत्यर्थः। न केवलं तदर्थमेव किन्त्वितरस्य अधर्मस्य प्रकृष्टशमाय सवासनोन्मूलनायेत्यर्थः, अन्यथा धर्मसस्थापनासिद्धिः स्यात्। हि प्रसिद्ध—

धर्मसंस्थापनार्थाय सम्भवामि युगे युग इति।

श्रीगीताभ्यः भगवानिति तत एव भगवत्ताद्धिरिति भावः। अंशेन वलदेवेन सह इति तत्र तत्राग्रहो दर्शितः। यद्वा अंशेनापि धर्मादिस्थापनायेति किमुत स्वयं भगवत्त्वेनेति। यद्वा

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदि—

त्यंशेन यो जगदीश्वरः स्वयं तु पूर्णैश्वर्य्यादियुक्त एवावतीर्ण इत्यर्थः। तस्यान्या कामना न सम्भवतीति भावः॥ २७॥

स इति। पूर्वत्र यच्छब्दाध्याहारेणान्वयः धर्मा एव सेतवः लोकरक्षा मर्य्यादाः शास्त्रयोनित्वात्तषां वक्ता तथात्वादेव कर्त्ता नचैतावता वेदस्य पौरुषेयत्वप्रसङ्गः तन्निषेधस्य प्राकृतपुरुषपर्य्यवसितत्वादित्यन्यदेतत् अन्यथा वाक्यव्यवहारयोर्विसंवादेन लोकैरग्राह्यता स्यात्। किञ्च अभितो रक्षिता तत्प्रतिपक्षवाधनादिनातिशयेन वालकः एवम्भूतः सन् परदाराभिमर्शनरूपं लोकवेदविरुद्ध प्रतीपं धर्मसेतूनामिव स्थापनादेर्वा कथमाचरेत् न कथमपीत्यर्थः सम्भावनायां लिङ् ब्रह्मन्! वेदमूर्त तदतिक्रमे हि भवतामप्यतिक्रमाद्-ब्रह्मण्यताव्याघात इति भावः। यद्वा ईश्वरचेष्टितं मया कथं ज्ञातव्यमित्याशङ्क्याह। ब्रह्मन्निति सर्वज्ञत्यर्थः। तत्र मया परोक्षं भजतेत्युक्तिः साक्षादेव रमणात्कृतिः पुनः पुनराचरणादरक्षेति। यथायथं प्रतीपाचरणं युग्मं श्लेषेण सिद्धान्तमप्याह तथाहि धर्मः प्रोज्झितकैतव इत्याद्युक्तस्य श्रीभगवद्धर्मस्यैव शुद्धभक्तियोग्यस्येत्यर्थः। यथा पाद्मे—

स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित्। सर्वे विधिनिषेधाः स्युरेव किङ्करा इति॥

तत्रैव मुख्यो धर्मप्रयोगः तथा तदवतारस्य च तन्मुख्यप्रयोजनत्वम्—

भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः इति।

श्रीप्रथमे कुन्तीवाक्यात् तदितरस्य अवरधर्मादेः प्रशमाय समो मन्निष्ठता बुद्धेरित्येकादशतात्पर्यपर्यवसानायेत्यर्थः। प्रकर्षश्चात्र तत्त्यागपूर्वकस्वभक्तिनिष्ठाप्रापणमेव अतो निजावतारस्य मुख्यप्रयोजनभक्तिविशेषु परमलप्रेमविशेषविस्तारणायैव तासां पतिं मन्यसेवादिरूपपधर्मत्याजनेनान्यधर्माद्यनादरो युक्त एवेति भावः। सच—

तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते॥

इत्यादिना साधकदशायामपि युक्तः किमुत सिद्धदशायामिति तदर्थम् अंशेन श्रीवलदेवेन श्रीभगवद्धर्ममूर्तिना सहेति स तथाभूतोऽसौ धर्मसेतूनां तादृशधर्माश्रयभूतानां भक्ति योगभेदानां श्रवणादीनां श्रीमदुद्धवादिषु वक्ता श्रीगोवर्धनपूजादौ कर्ता यत्कृतो गोत्रधर्म इत्युक्तेः धर्मपुत्रादिपालनेनाभिरक्षिता परदाराभिमर्शनं पराश्च ते दाराः स्वकला इत्यर्थः—

आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिय एव निजरूपकलाभिरिति

ब्रह्मसंहितोक्तेः तोषमभिमर्शनं यद्वा सर्वकान्तिः संमाहिनी परेति वृहद्गौतमीयात्परायाः ये दारा दारयन्ति स्वहृदयेभ्यः काममुखं खण्डयन्तीति दाराः सखीजनाः पुंस्त्वनिर्देशेन श्रीकृष्णविषयककामासक्ताभावः सूचितः तेषामभिमर्शने बाहुप्रसारेत्यादिना स्पर्शनमात्रमेव नतु रमणमित्यर्थः। तद्रूपं किम्प्रतीपमाचरेदिति काकुः कामविजयक्रीडायां कामासक्तेरसम्भवादिति भावः।२८।

श्रीरामनारायणकृता भावभावविभाविका

एवं विचित्रकामविजयख्यापकसर्वजगदुद्धारकप्रेमपथप्रवर्तकपरमानन्दघनरासादिविहारं श्रुत्वा परमभगवदीयतया जातपरमाह्लादः गर्भे एव स्वरक्षणरूपदृष्टभगवत्प्रभावः सर्वविस्मारकयोनिप्रभावेणप्यविस्मृतभगवत्स्वरूपतया तत्परीक्षणादेव परीक्षिन्नाम्ना प्रसिद्धः साक्षाद्भगवतैव शुकरूपतयोपादिष्टतत्त्वो हरि हरिजनकृपापात्रं स्वयमसन्दिहानोऽपि तत्रत्यानां च साक्षाच्छुकश्रोतॄणां

तत्कृपादृष्टिशुद्धमतीनाञ्च सन्देहासम्भवेऽपि भाविकलिजनानां धर्मानभिज्ञानां विषयैकचित्ततया स्वभोगानुकूलविपरीतार्थग्राहिणां भगवतः सदाचारप्राप्तमत्या विपरीतप्रवृत्तिर्माभूदिति सन्दिहान इव पृच्छति त्रिभिः। संस्थापनायेति। यःसाक्षात्स्वयं भगवानथ च—

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति।

वचनादंशेन जगदीश्वरः ॥ २७ ॥

स एव—

यदा यदाहि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे इति ॥ इति।

वचनेन स्वधर्मप्रवृत्तिमतां साधूनां रक्षणेन दुष्कृतां तत्प्रतिकूलाधर्मरतानां नाशेन च धर्मस्य सम्यक् स्थापनायेतरस्याधर्मस्य प्रशमायावतीर्णः समस्तकल्याणगुणानलयतयाविभूतः "स्वयञ्च अस्य महतो भूतस्य निश्वशितमेतद्यदृग्वेदो यजुर्वेदः सामवेद" इत्यादि श्रुतेः निःश्वसितमस्य वेदा इति स्मृतेश्च निरायासवेदहेतुत्वात् धर्मसेतूनां वक्ता "द्वापरे द्वापरे विष्णुर्व्यासरूपी जनार्दन" इत्यादिरूपेण प्रवर्तकश्च—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन। नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥

इत्यादिकर्ता च स यथा—

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः। मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ ! सर्वश ॥ इत्यादिना

स्वीयाचरणेन विनाशाय दुष्कृतामिति तत् प्रतीपहननेन चाभिरक्षिता कथमतिसाहसरूपं परदाराभिमर्शनं प्रतीपमाचरत् ब्रह्मन्निति साक्षान् वेदात्मक ! वेदप्रतीपतया भवतां प्रतीपतापि स्यात्। सा च ब्रह्मण्यदेवस्य तस्य न संभवति। यद्वा किमहं जानीयामीश्वराचरितस्य दुर्विज्ञेयत्वादिति चेत्तत्राह। ब्रह्मन्निति। साक्षाद्ब्रह्मकृष्णस्वरूप तव तद्रूपत्वान्न तदभिप्रायस्य तवाज्ञानमिति भावः ननु कामविवशतया कृतं भविष्यति किमत्र चित्र तत्राह। आप्तेति। अनाप्तकामानां कुसङ्गिनां जुगुप्सिताचरणसंभवेऽपि स्वयं नित्यानन्दघनत्वादाप्तकामः यदूनामतिधर्मशीलानां च पतिः पालकः धर्मप्रवर्तकतयैव रक्षको यज्जुगुप्सितं कृतवान् तत्किमभिप्रायः इति तदभिप्रायप्रकटनेन नः इति बहुवचननिर्देशेन न मम ससंशयोऽपितु मूर्खबहुलं जगदिति लोके पामराणां बहुत्वात्तदीयसंशयं छिन्धि तत्रास्मच्छब्दादेशनिर्देशेन तेषां राज्ञो मम प्रजात्वान्मदीयानां संशयच्छेदनं मद्द्वारैव भाव्यमित्यभिमतिः। यद्वा यतःसर्वधर्मप्रतीपं परदाराभिमर्शनमाचरदतः कथं धर्मस्य संस्थापनायेतरस्य प्रशमाय चावतीर्णः कथंवांशेन जगदीश्वरो भगवान् कथं वा धर्मसेतूनां वक्ता कर्ताऽभिक्षिता यद्यस्माज्जुगुप्सितं कृतवानतः कथमाप्तकामः तादृशश्चेत्तत्करणे किमभिप्राय इति नः संशयं छिन्धीत्यन्वयः। यद्वा "धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" इति सर्वावताराणां धर्मस्थापनार्थत्वात् यथा भगवान् कृष्णोऽवतारशिरोमणिस्तथा भक्तियोगः सर्वधर्मशिरोमणिः तदुक्तं पाद्मे—

स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित्। सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः ॥
तथा जन्मान्तरसहस्रेण तपोध्यानसमाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥
धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः। नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥

इत्यादिनान्वयव्यतिरेकाभ्यां सर्वधर्मफलभूतश्चेति तत्स्थापनाय तदितरस्योपशमायावतीर्णस्तदप्युक्तं श्रीकुन्त्या "भक्तियोगविधानार्थं कथं पश्येमहि स्त्रिय" इति तत्र "तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथा श्रवणादौ वा श्रद्धा यावन्न जायत" इत्यादिना समाप्ताधिकाराणां त्यक्तपतिसेवनादीतरधर्माणां हरिवंशमुखात्तत्स्वरूपसूचकगीतश्रवणपूर्वकं पूर्ववर्णितरीत्या प्रेमपथसम्यक् स्थापनमेवात्र कृतं सतु धर्मसेतूनां वक्ता कर्ताभिरक्षिता प्रतीप परदाराभिमर्शनं कथमाचरत् न कथमपि किंतु संतु अशेन जगदीश्वरः परः पुरुषः तास्तु परस्य परमात्मनः कृष्णस्य दाराः कृष्णवध्व इति यत्र तत्रोक्तेरिति तदभिमर्शनं सर्वोद्धारकगुणगानार्थं यदाचरत्तत् कथं प्रतीपं न कथमपि तथाप्तकामे यदुपतौ जुगुप्सिताचरणासंभवादाप्तकामो यदुपतिः यत्कृतवान् तत्किं जुगुप्सितम् अपि तु नेत्येवं मदभिप्रायस्तथापि नोऽस्मत्प्रजानां पामराणां विपरीता प्रवृत्तिर्माभूदित्येतत्संभावितं संशयं छिन्धि। ननु किं मम संशयच्छेदनेन तत्राह। सुव्रतेति तव संशयच्छेदनव्रतवत्तया संशयात्मा विनश्यतीत्यादिना तन्नाशाद्रक्षणाय परमकृपालुतया चावश्यं तथा चरणीयम् ॥ २८–२९ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

भगवत्कृतां रासलीलामाकर्ण्य सर्वसंदेहनिवृत्तये राजा पृच्छति धर्म्मेति। परित्राणाय साधूनामित्युक्तत्वात् धर्मस्य सम्यक्स्थापनायेतरस्याधर्मस्य च प्रकर्षेण शमनाय भगवान् जगदीश्वरोंऽशेन बलदेवेन सहावतीर्ण इति प्रसिद्ध भगवानिति पदे-

नान्यथा पूर्णकामस्यावतरणं न घटत इति सूचयति युक्तश्चैवं भगवतो जगत्परिपालनमिति द्योतनाय जगदीश्वर इत्युक्तं यद्वा अंशेन जगदीश्वरः तदुक्तं "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग"दिति ॥ २७ ॥ एवंभूतः सः धर्म्मसेतूनां तत्प्रतिपादकवेदानां वक्ता तत्रापि न केवलं वक्ता किंतु तत्कर्त्ता तत्प्रतिपादकशास्त्रस्य निर्माता च किंच तदुक्ताचरणेन तद्विरुद्धवादिनिराकरणेन तत्प्रतिपक्षवलवद्वधादिना च रक्षिता पालकश्च कथं प्रतीपं धर्म सेतूनां प्रतिकूलं परदाराभिमर्शनरूपं ससाहसमधर्ममाचरत् न केवलं कलञ्जभक्षणादिवदेवाधर्ममात्रमित्यर्थः। ननु ईशचेष्टितं कथं मया ज्ञातुं शक्यमिति चेत्तत्राह हे ब्रह्मन् वेदमूर्त्ते! सर्वज्ञ तदभिन्नेति वा ॥ २८ ॥

रास-रहस्यम्

र० टी०—समस्तकल्याणनिलयः स्वस्वरूपतयाविर्भूतो जगदीश्वरो जगतां सर्वेषां जीवानामन्तर्यामिरूपेणेशनात् ईश्वरो भगवान् परमात्मा, तस्य अंशेनावतीर्णत्वं हि औपाधिकांश एव, तस्याऽऽविर्भावोऽपि धर्मस्य धारयत्युन्मार्गप्रवृत्तेरति धर्मः, उन्मार्गश्च देहगेहादिमिथ्यासांसारिकवस्तुषु अहंताममताभिनिवेशरूपस्तस्माद् धारणं च स्वस्वरूपावगमलक्षणं, तस्य "यः साक्षादपरोक्षाद् ब्रह्म।" इति श्रुतेः साक्षादपरोक्षाद्वैतब्रह्मस्वरूपस्य संस्थापनाय सम्यग्रूपेण केवलाद्वैततत्त्वप्रतिपादनाय इतरस्य भेदवादपरद्वैतविशिष्टाद्वैततार्किकसांख्यमीमांसकसमूहस्य प्रशमाय प्रकर्षेण शमाय निराकरणाय च ॥२७॥ हे ब्रह्मन्! ब्रह्मविद् ब्रह्मैव भवति।" इति श्रुतेः, भवान् ब्रह्मस्वरूपः अर्थात् सर्वज्ञ एव इति सम्भाव्य सम्बोधनम्। परदाराभिमर्शनं स्वस्मादात्मनः अन्ये परे विषयाः ते एवाविद्यायाः अज्ञानस्य दारा इव दाराः स्त्रियः, तासामभिमर्शनं विमर्दनं विशेषेण मर्दनं मिथ्यात्वेन खण्डनरूपं, प्रतीपं व्यवहारदृष्ट्या विरुद्धमाचरत् अनुष्ठितवान्, सः कथं धर्मसेतूनां "कुर्वन्नेवेह कर्माणि जिजीविषेत् शतᳯ समाः।" "अयमेव सेतुर्विधारणः" इति विधिप्रतिषेधात्मकश्रुत्या धर्मलक्षणसेतूनां स्वर्गनरकगमनागमनाधारभूतानाधारभूतानां वक्ताकर्ताभिरक्षिता कथं भवितुमर्हति युज्यते ॥ २८ ॥

गूढार्थदीपिनी

इतरस्य अधर्मस्य निवृत्तये। अंशेन बलदेवेन सह। यस्य अंशेन जगत् स ईश्वरः इत्यन्वयो वा ॥ २७ ॥ प्रतीपं प्रतिकूलमधर्मम्। अभिमर्शनं परस्त्रीसंभोगम् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अतत्त्वज्ञजनभ्रान्तिनिराकरणाय ब्रह्मविदाप्नोति परमित्यादिश्रुतिविरोधः कृष्णं विदुः परं कान्तं नतु ब्रह्मतदेत्यादि–प्रश्नप्रतिवचनाभ्यां परिहृतः। अथ धर्मान्न प्रमदितव्यमित्यादिश्रुतिविरोधः परिह्रियते। संस्थापनाय धर्मस्येत्यादि। प्रश्नोत्तराभ्याम् अंशने बलेन सह। यद्वा अंशेनेति जातावेकवचनं युधिष्ठिराजुनादिभिः सहेत्यर्थः ॥२७॥ परदाराभिमर्शनं प्रतीपं धर्मात्प्रतिकूलमधर्ममित्यर्थः। यो धर्मसेतूनां वक्त्रादिरूपः स कथमाचरत्कृतत्वात् ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भिन्नसेतुरित्याद्यसहमानः परीक्षिदप्राक्षीत्प्रक्षावन्तमित्याह ॥ राजेति। धर्मस्य संस्थापनायेतरस्याधर्मस्य प्रशमाय नाशाय च जगदीश्वरो भगवानंशेन पद्मनाभकृष्णकेशेनावतीर्णो हि प्रसिद्धमेतत्। यदा यदा हि धर्मस्य ग्लानिर्भवति भारतेत्यादौ ॥ २७ ॥ धर्मसेतूनां तन्मर्यादानां वक्ताऽन्येषां कर्ता स्वयमभिरक्षिता च स कथमेतत्प्रतीपं विरुद्धं परदाराभिमर्शनमाचरच्चचार ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमेतां लीलां श्रुत्वा राज्ञः सन्देह उत्पन्नः तन्निवारणार्थं शङ्कते। संस्थापनायेति त्रिभिः। अवतारविरुद्धं लोकविरुद्धं प्रमेयविरुद्धं चेति तादृशकरणे अवश्यं हेतुर्वक्तव्यः तदभावेऽपि लीलायाः सिद्धत्वात् तत्र प्रथममवतारविरोधमाह। धर्मसंस्थापनाय भगवदवतारः धर्मसंस्थापनार्थाय चेति वाक्यात् अधर्मनिवृत्तये च तदुभयार्थमेव भगवदवतारः दैत्यादिवधो भूभार हरणं च अधर्म निवृत्तये एतदर्थमेवावतारः नान्यार्थमिति हि शब्द आह। भगवानिति तस्य साधनमन्यथा पूर्णकामस्यावतारो न घटेतेति लोकोपकारश्च एताभ्यामेव अंशेन बलभद्रेण आगत्य तथा करणे हेतुः जगदीश्वर इति। स हि सर्वरक्षः अतः पालनार्थमेवं कृतवान् ॥२७॥ किमतो यद्येवमेतादित्याह। स कथमिति। धर्ममर्यादापालकानां निर्माता स्वयं वक्ता च उपघाते अभिरक्षिता च तादृशः प्रतीपं प्रतिकूलमाचरत् धर्मो नष्टः अधर्मः स्थापितः अधर्मः कृत उक्तः रक्षितश्च अतः प्रतीपाचरणमयुक्तं तत्र हेतुर्वक्तव्य इति ब्रह्मन्निति सम्बोधनं ये पञ्चपदार्था उक्ताः तेषां स्वरूपमेकत्रैवेति तं निर्दिशति परदाराभिमर्शनमिति ॥ २८ ॥

श्रीसुबोधिनी-सारः

राजप्रश्नः। अंशेन जगदीश्वरो भगवान् अवतीर्णो हि धर्मस्य संस्थापनार्थम् इतरस्य पापस्य प्रशमाय निवृत्त्यर्थं च ॥ २७ ॥ धर्ममर्यादानां वक्ता कर्त्ता पालयिता स कृष्णः परेषां दाराणामभिस्पर्शनम् इति प्रतीपमधर्मं कथमाचरत् हे ब्रह्मन्॥२८॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

प्रश्नतात्पर्यं तु लौकिकव्यपि यदा दृष्टिरित्यत्र निरूपितम्। **प्रतीपमाचरदित्यत्र, धर्मो नष्ट** इत्यादि। अधर्मनाश-धर्मस्थापनतत्करणतदुक्तितद्रक्षाणां पूर्वमुक्तानां प्रतीपा अर्था अनेनोक्ताः ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं रासलीलां श्रुत्वा तत्र विरोधमाशङ्क्य राजा पृच्छति—संस्थापनायेति त्रिभिः। धर्मस्य संस्थापनाय इतरस्याधर्मस्य प्रशमाय निरासाय च अंशेन बलरामेण सह भगवान् कृष्णः अवतीर्णः। अत्र "धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" इत्यादि-शास्त्रप्रसिद्धिं सूचयति-हीति। धर्मरक्षायां हेतुं सामर्थ्यं च सूचयन्नाह—जगदीश्वरेति। जगतः पालकत्वात् स्वामित्वान्नियन्तृत्वाच्चेत्याशयः ॥ २७ ॥ सर्वज्ञत्वं सूचयन् सम्बोधयति-ब्रह्मन्निति। स कृष्णो धर्मसेतूनां धर्ममर्यादानां वक्ता उपदेशेन प्रवर्तकः, कर्ता स्वयमप्यनुष्ठाता, विरोधिनिरसनेनाभितो रक्षिता च सन् परदाराभिमर्शनं परस्त्रीसम्भोगात्मकं प्रतीपं धर्मप्रतिकूलमधर्मं कथमाचरत् कृतवान् ? ॥ २८ ॥

अन्वितार्थप्रकाशिका

अथ परीक्षित्सभोपविष्टानां विविधवासनावतां कर्मिज्ञानिप्रभृतीनां हृदये सन्देहमुद्भूतमालक्ष्य तन्निवृत्तये पृच्छति—संस्थापनायेति ॥ हि यस्मात् जगदीश्वरो भगवान् धर्मस्य संस्थापनाय इतरस्याधर्मस्य प्रशमाय निरासाय च अंशेन बलरामेण सह अवतीर्णः ॥ २७ ॥ स इति ॥ हे ब्रह्मन्! स कृष्णो धर्मसेतूनां धर्ममर्यादानां वक्ता उपदेशेन प्रवर्तकः कर्ता स्वयमप्यनुष्ठाता। विरोधिनिरसनेनाभितो रक्षिता च सन् परदाराभिमर्शनं परस्त्रीसंभोगात्मकं महासाहसं प्रतीपं धर्मप्रतिकूलमधर्मं कथमाचरत् कृतवान् ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वंशीवादैररणे व्रजयुवतिजनाकर्षणं भाषणं तत्क्रीडा वध्वासहान्तर्धिरिह युवतिभिर्मार्गेण चारुगीतं प्रादुर्भावः सुपृच्छोत्तर-नटनरहः क्रीडनानि प्रमोदो वारिक्रीडावने यत् विहरणमियती श्रीमतीरासलीला इति तोषणीसारे अत्र संजातसंदेहो राजा पृच्छति त्रिभिः इतरस्य अधर्मस्य ॥ २७ ॥ प्रतीपं धर्मविरुद्धं परयुवतिसंस्पर्शनं कथमाचरत् ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विज्ञातशास्त्रतात्पर्योऽपि परीक्षित् स्वनाम्नोऽर्थं सफलं कुर्वन् तथा श्रोतृजनविद्वज्जनचित्तसंदेहप्रहाणाय पृच्छति ॥ संस्थापनायेति ॥ धर्मस्य वेदोदितस्य वर्णाश्रमव्यवस्थया स्थितस्य वृषस्य, संस्थापनाय, सम्यक् स्थापनं विधातुमित्यर्थः। इतरस्याधर्मस्य, प्रशमनाय च, प्रकर्षेण शमनं विधातुं चेत्यर्थः। जगदीश्वरः भगवान्, अंशेन बलरामेण सह, संकल्पात्मकज्ञानेनैव वा, अवतीर्णः न तु कर्मणाऽवतीर्णः। हि निर्विवादमेतत् ॥ २७ ॥ स इति ॥ हे ब्रह्मन्, सः कृष्णः, धर्मसेतूनां धर्ममर्यादानां, कर्त्ता स्वयमनुष्ठाता, वक्तोपदेष्टा, अभिरक्षिता विरोधिनिरसनेनाभितो रक्षिता च सन्, परदाराभिमर्शनं परदाराभिमर्शनात्मकं प्रतीपं धर्मप्रतिकूलमधर्ममिति यावत्। कथं आचरत्। कृतवानित्यर्थः। न चेदं कलञ्जभक्षणादिवदधर्ममात्रमपि तु महासाहसमपि बोध्यम् ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

संस्थापनायेति : १०.३३.२७.

यो यन्निषेद्धा नहि तेन जातु तत्कार्यमित्यादृतशास्त्रबुद्धिः। श्रुत्या निषिद्धं परदारसङ्गं कथं चचार स्वयमित्यपृच्छत् ॥ १४४ ॥
विचारं वृत्त्यंशेऽगुणसगुणभावैकविषयं विधायाद्याध्याये नृपतिरवधानायतमतिः।
अपृच्छद्भूयोऽपि स्थितिमनुपमानन्दजननीं तदा तादृग्वृत्तेरवितुरवजौ विस्मितमनाः ॥ १४५ ॥
साङ्गोपाङ्गसुयोगवैभवविधिर्व्यक्तीकृतः सर्वतो ज्ञातोऽप्यत्र रुचिर्न मेऽस्ति भगवद्भक्त्याऽमृतास्वादिनः।
केचित्त्वत्र विचक्षणा अपि जनास्तन्मात्रसक्ताभवन्त्येतस्मिन्नुदितं तु संशयमिमं युक्त्योक्तितोऽपाकुरु ॥ १४६ ॥
आम्नायप्रमुखाखिलाङ्गानचयैः सर्वैः समुद्घोषितो दोषो नित्यनिमित्तजोदितविधेर्लोपेऽनवद्यस्य हि।
सिद्धोऽसौ तु निसर्गतो बहुदिनव्यापारशून्यात्मनि योगे तद्युजि पुंसि तन्न सुकृतं स्यात्प्रत्युताघोदयः ॥ १४७ ॥

स कथमिति : १०.३३.२८.

तस्मात् सर्वमतश्रुतिस्मृतिचयप्राप्तां स्वधर्मस्थितिं त्यक्त्वाऽन्यस्थितिमाश्रितो व्रजगता गोपीः सकामा अपि ।
एकीकृत्य भुनक्तयहो रहसि यद्योगीति तन्मे दृशा निन्द्यं भात्यखिलार्थवित् त्वमसि तत् तत्तत्त्वमाविष्कुरु ॥ १४८ ॥

कृष्णप्रिया

भगवल्लीला गोपियों के स्वरूप का एवं भगवत्स्वरूप के अनभिज्ञ श्रद्धालु एवं श्रद्धाशून्य समाज को लक्ष्य में रखकर अन्तःसरस्वती परीक्षिद्राजा के माध्यम से प्रश्नोत्थान कर रही है—राजा ने पूछा—भगवन् ! जगदीश्वर भगवान् श्रीकृष्णचन्द्र जी श्रीबलदेवजी के साथ भूतलपर धर्म के संस्थापन के लिए एवं अधर्म के उन्मूलन के लिए प्रकट हुए हैं ॥२७॥ हे ब्रह्मन् भगवान तो वेदशास्त्रोक्त धर्मसिद्धान्तों के विधाता वक्ता और सर्वप्रकार से रक्षयिता हैं उन उत्तरदायी भगवान ने परदाराओं से सङ्ग करने जैसा धर्मविरुद्ध आचरण कैसे किया ? ॥ २८ ॥

[1]आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितम् । किमभिप्राय एतं नः संशयं छिन्धि सुव्रत ॥ २९ ॥

श्रीशुक उवाच

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम्[2] । तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥ ३० ॥

कर्वमक्षमा

अन्वयः—सुव्रत ? यदुपतिः, आप्तकामः, (वर्तते) किम्, अभिप्रायः, जुगुप्सितम्, कृतवान्, एतम्, नः, संशयम्, छिन्धि ॥ २९ ॥ श्रीशुक उवाच—ईश्वराणाम्, धर्मव्यतिक्रमः, दृष्टः च, साहसम् (दृष्टम्) सर्वभुजः, वह्नेः, यथा, तेजीयसाम्, न दोषाय ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आप्तकामस्य नायमधर्म इति चेत्तर्हि यद्येवं कामाभावान्निन्दितं केनाभिप्रायेण कृतवानिति पृच्छति । आप्तकाम इति ।२९। परमेश्वरे कैमुतिकन्यायेन परिहर्तुं सामान्यतो महतां वृत्तमाह । धर्मव्यतिक्रम इति । साहसं च दृष्टं प्रजापतीन्द्रसोमविश्वामित्रादीनां तच्च तेषां तेजस्विनां दोषाय न भवतीति ॥ ३०

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परिहरति-आप्तकामस्येति । यद्येवमाप्तकामत्वं तस्य तर्हि आप्तकामत्वे निन्दिताचरणमनुचितमिति कोऽभिप्रायो यस्य स किमभिप्रायः । किमाशयवानित्यर्थः । एतम् आप्तकामत्वे निंदिताचरणरूपम् । न इति तत्रत्यसमाजापेक्षया बहुत्वम् । सुव्रतेति । ब्रह्मचर्यनिष्ठोऽपि मत्कृपया ब्रूहीति संबुद्ध्यभिप्रायः ॥ परमेश्वरस्य नायमधर्म इति चेत्, निंदितमिदं केनाभिप्रायेण चकारेति पृच्छति-आप्तकाम इति । तेन स्वकामपूरणार्थमिदं कृतवानिति प्रत्युत्तरं न दातव्यमिति भावः । अवतारेऽस्मिन्नेतादृशं जुगुप्सितमेव कर्तव्यमिति चेदत आह-यदुपतिरिति । परमधार्मिकाणां यदूनां पतिस्तर्हि कथमभूदिति भावः । न इति-न तु केवलस्य ममात्र संशयोऽस्तीत्यर्थः । तस्याप्तकामत्वेऽप्यात्मारामत्वेऽपि प्रेमाऽऽनन्दस्वरूपाभिस्ताभिः सोत्कण्ठं रमणं युज्यत एवेति ज्ञातप्रायरहस्यसिद्धान्तत्वादिति भावः । सुव्रतेति । सदाचारपरायणस्य तवाप्यस्यामेव लीलायामत्यावेशदर्शनादेते संशेरत इति भावः ॥ २९ ॥ साहसं परिहर्तुम् अपाकर्तुम् । सामान्यतः साधारण्येन । ईश्वराणाम् योगैश्वर्यवताम् । साहसम् शास्त्रविद्धाचारः । प्रजापतेर्ब्रह्मणो दुहित्रनुगमनम्, इन्द्रस्याहल्यागमनम्, सोमस्य गुरुस्त्रीतारागमनम्, विश्वामित्रस्याभक्ष्यमांसाशनप्रवृत्तिः । आदिना सप्तर्षीणां शवभक्षणोद्योगः, अजीगर्तस्य पुत्रविक्रयः, पराशरस्य दासकन्यासंगश्च ग्राह्यः । तच्च साहसम् । तेषाम् प्रजापत्यादीनाम् । तेजीयसामिति हेतुगर्भितविशेषणम्-तपआदिप्रभावोद्भूततेजसा साहसस्य दग्धत्वाद्दोषाय पापाय नेति । "तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि ! नवनीते नले दुर्गे" इति यादवः । तत्रोपयोगिदृष्टान्तमाह-वह्नेरिति । न हि गोब्राह्मणादिशरीरामेध्यदाहेनाग्नेर्ब्रह्महत्यादिदोषो भवति तेजस्वित्वादिति भावः ॥ कृतस्याप्यधर्मस्य फलमीश्वराणामपि न भवेत्किमुत परमेश्वरस्य तस्येति प्रथमप्रश्नोत्तरमाह-धर्मेति षड्भिः । ईश्वराणां रुद्रादीनामपि धर्मव्यतिक्रमोऽधर्मो दृष्टः । साहसं साहसहेतुक इत्यर्थः । न दोषाय न प्रत्यवायाय, वह्नेर्यथा सर्वभुक्त्वं न दोषाय नापावित्र्याय तद्वदित्यर्थः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यदुपतिरिति । कृततादृशाकर्त्तव्यश्चेत् परमधार्मिकाणां यदूनां पतिरपि न स्यात् । एतमिति कुत्राप्यन्यः संशयो नास्तीत्यर्थः । न इति बहुत्वं सन्देहे वर्गाभिप्रायेण । संशयं प्राप्तशिरोमुकुटाचरितत्वशास्त्रविरुद्धत्वाभ्यां चित्तदोलनम् । सुव्रत ! हे ब्रह्मचर्या-

---

१. आत्मारामो-विज. । २. साहसः-विज. ।

दिनिष्ठ इति भवादृशामाचरितं विरुद्धं तत्तु जुगुप्सितमेवेति। यद्वा। हे सदाचारनिष्ठेति अन्यथा भवदादिसम्मतसदाचारलोप इति भावः। श्लेषपक्षे यदूनां भक्तानां पतिरिति भक्तकृपया कदाचिद्धर्मातिक्रमार्होऽपीत्यर्थः। जुगुप्सितं किं कृतवान् अपि तु नैव किन्तु भक्तवर्गसम्मतमेवाकरोदित्यर्थः। कुतः। आप्तो लब्धः कामो रासक्रीडादिना निजप्रेमभक्तिविस्तारणमनोरथो येन सः। सर्वसाध्यतमप्रेमभक्तिप्रवर्त्तनेन निन्दितानाचरणात् प्रत्युत तेन साधुवर्गसन्तोषणादेवेत्यर्थः। तथापि नः संशयमिति साञ्जलिकरचालनेन तत्रत्यसन्दिहानवर्गाभिप्रायेण तच्च विनयेन प्राय इति तत्र केषाञ्चिच्छास्त्रार्थतत्त्वविदां भक्तिपराणां सद्रसाभिषिक्तानां प्रेमभक्तिरसमयतदीयरासक्रीडादौ संशयान्तराभावात्। अतोऽनवहितानामेवात्रत्यानां केषाञ्चित् हितार्थमेव मया पृच्छ्यते नच निजसन्देहादिति भावः। तस्मात् अभि अभयं यथा स्यात्तेभ्यो भयमकृत्वा तेषां संशयशृङ्खलां छिन्धीत्यर्थः। सुव्रत हे भक्त्यैकनिष्ठ ॥२९॥ सहजकृपालुतया शिष्यस्नेहापेक्षया वा तदीयाक्षेपाभासपरिहारपूर्वकं श्लेषदर्शिततदीयसिद्धान्तितमेव परिहरति। धर्मेति सप्तभिः ईश्वराणां कर्मादि पारतन्त्र्यरहितानामित्यर्थः। तेषां धर्मव्यतिक्रमो यद्दृष्टः यथा ब्रह्मादीनां दुहितृकामनादौ तथा साहसं निर्भयता च यद्दृष्टं तथा बृहस्पतेरुतथ्यपत्नीगमनादौ तत्तच्च तेजीयसां तेषां न दोषाय प्रत्यवायाय। तत्र दृष्टान्तः। सर्वभुजो वह्नेर्यथा सर्वभुक्त्वं न दोषाय नापावित्र्याय तद्वदित्यर्थः॥ ३०॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यदुपतिरिति धर्म्मपरयदुवंशेऽवतीर्णत्वादपि तथा कर्तुं नार्हतीति भावः। वै प्रसिद्धौ; एतमिति कुत्राप्यन्यः संशयो नास्तीत्यर्थः। 'नः' इति बहुत्वं सन्देहिवर्गाभिप्रायेण, संशयमिति आप्तशिरोमुकुटमणेस्तस्य कृते दोषशंका नास्त्येव, किन्तु शास्त्रविरुद्धत्वेन तत्रास्माकं दार्ढ्याभावाच्चित्तदोलनं स्यादित्यर्थः। सुव्रत! हे ब्रह्मचर्य्यनिष्ठ! इति भवादृशानामाचरितविरुद्धम्, तत्तु जुगुप्सितमेवेति। यद्वा, हे सदाचारनिष्ठेति, अन्यथा भवदादिसम्मतसदाचारलोप इति भावः ॥२९॥ श्लेषपक्षे पाण्डवसम्बन्धिनां यदूनां पतित्वेन निजप्रभुतामभिप्रैति, इति दोषाभावो ध्वनितः। यद्वा, यदूनां भक्तानां पतिरिति भक्तवात्सल्येन धर्म्मातिक्रमार्होऽपीत्यर्थः। जुगुप्सित कि कृतवान्? अपि तु नैव, किन्तु भक्तवर्गसम्मतमेवाकरोदित्यर्थः। कुतः? आप्तो लब्धः कामो रासक्रीडादिना निजप्रेमभक्तिविस्तारणमनोरथो येन सः, सर्वसाध्यतम-प्रेमभक्तिप्रवर्त्तनेन निन्दितानाचरणात्, प्रत्युत तेन साधुवर्गसन्तोषणादेवेत्यर्थः। तथापि नः संशयं प्राय इति, तत्र केषाञ्चिच्छास्त्रार्थतत्त्वविदां भक्तिपराणां सद्रसाभिषिक्तानां प्रेमभक्तिरसमय–तदीयरासक्रीडादौ संशयाभावात्। यद्वा, प्रायेऽनशनसमयेऽस्मिन्निति संशयस्यायोग्यतोक्ता, अतः शीघ्रं तच्छेदनमभिप्रेतम्। 'नः' इति स्वीयत्वेन विपक्षाणामपि ग्रहणम्। सहजविनयादिना किंवा वाक्चातुर्य्येण परमविपक्षतादिबोधनार्थम्। अतो दुर्बुद्धीनामेवात्रत्यानां हितार्थमेव मया पृच्छ्यते, न च निजसन्देहादिति भावः। अतः 'अभि' अभयं यथा स्यात् तेभ्यो भयमकृत्वा तेषां संशय-शृङ्खलां छिन्धीत्यर्थः। सुव्रत! हे भक्त्येकनिष्ठेति॥ सहजकृपालुतया शिष्यस्नेहापेक्षया वा परिहरति—धर्मेति सप्तभिः। ईश्वराणां ज्ञाने भक्तौ च सामर्थ्यवतां भगवद्भजनादिना कर्म्मादिपारतन्त्र्य-रहितानामित्यर्थः। धर्मव्यतिक्रमो विशेषेणोल्लङ्घनम्, यथा ब्रह्मादीनां दुहितृकामनादि, साहसं निर्भयता, यथा इन्द्रादीनाम्, यथा बह्निः सर्व्वं भुङ्क्ते भक्षयति दहतीति वा तथा तस्य सर्वदाहेनापि यथाग्नेर्वधादि-दोषो न स्यात्, तद्वदित्यर्थः। अन्यतैर्व्याख्यातम्। यद्वा, धर्मव्यतिक्रम एव साहसम्। त्वर्थे चकारः, अनीश्वरेभ्यो भेदाय॥ २०॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आत्माराम इति निरतिशयानन्दस्य ग्राम्यभोगेच्छा कथमिति चोद्यम् ॥२९॥ उत्तरमीश्वराणामीश्वरवन्महातेजसाम्॥३०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च स्वयमवाप्तसमस्तकामोऽपि यदुपतिर्जुगुप्सितं निन्दितं कर्म कृतवान् अनवाप्तकामस्य जुगुप्सिताचरणं दृष्टं नत्वाप्तकामस्य स्वतन्त्रस्येति भावः। अतः केनाभिप्रायेण कृतवानिति पृच्छति। किमभिप्राय इति। एतदेतस्मिन् विषये नोऽस्माकं संशयस्तं हे सुव्रत! छिन्धि निराकुरु॥ २९॥ कैमुत्यनयेनोत्तरं विवक्षुः कर्मवश्यत्वप्रयुक्तशास्त्रवश्यानामेव शास्त्रविरुद्धकर्म प्रत्यवायजनकं नत्वकर्मवश्यानामिति तावदुत्तरमाह। धर्मव्यतिक्रम इति। यद्यपीश्वराणामशास्त्रवश्यानां धर्मव्यतिक्रमः शास्त्रोक्तधर्मातिलङ्घनं साहसं सहसा शास्त्रार्थाविमर्शेन कृतं साहसं कामचार इति यावत् तदुभयं दृष्टं तथापि तत्तेजीयसां न दोषाय न प्रत्यवायावहं स्वर्गिणां मुक्तानाञ्च व्यापारेषु व्यभिचारादिति भावः। नहि स्वर्गिमुक्त व्यापारः शाश्रानुवर्ती नवा प्रत्यवायावहः तेजीयस्त्वमत्र शास्त्रवश्यतानापादकसामर्थ्यत्वरूपं विवक्षितं पदार्थानां विलक्षणशक्तिकत्वादिति तात्पर्यं तत्र दृष्टान्तमाह। बह्नेरिति। यथा सर्वभुजः सर्वदाहकत्वं बह्नेर्दाहमात्रेण दाह्यपटादिगतमालिन्यसम्बन्धो न विद्यते तद्वत् नह्यवादिषु स्वसंबन्धिपृथिव्यादिगतलौहित्यादिकं दृष्टमिति वह्नावपि तत्प्रसङ्ग इति भावः॥ ३०॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विषयभोगलौल्यात् कृतं किं नेत्याह। आत्माराम इति। कोऽभिप्रायोऽस्य मच्चरितं चरेत् मदुक्तमेव चरेन्नाचरितं चरेदिति चेति नः परिसरवर्तिजनस्य ॥ २९ ॥ नारायणानुग्रहसुधापात्राणां स्मृतिविहितधर्मव्यतिक्रमो न दोषाय दृष्टः किमुत दूरीकृतविधिनिषेधबन्धस्य हरेरित्याशयेन प्रश्नं परिहरति। धर्मेति। च शब्दः कैमुत्यद्योतकः यद्यर्थो वा यद्यपीश्वराणां योगैश्वर्यपारङ्गतानां साहसः हेतुशून्यो धर्मव्यतिक्रमः शास्त्रविहिताचारविरुद्धाचारोऽजीगर्तस्य पुत्रविक्रयः विश्वामित्रस्य श्वभक्षणप्रवृत्तिः सप्तर्षीणां शवभक्षणोद्योग इत्यादिलक्षणा दृष्टः शास्त्रे तथापि स तेषां दोषाय धर्मप्रतिबन्धकाय न भवति तत्कुत इति हेतुगर्भविशेषणमाह। तेजीयसमिति—

तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि। नवनीतेऽनले दुर्गे इति यादवः ॥

तत्र दृष्टान्तमाह। वह्नेरिति। अमेध्यादिदहनलक्षणोपेतस्याग्नेः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आप्तकामस्य जुगुप्सितेऽति प्रवृत्तिर्न स्यात् जुगुप्सितं तु केनाभिप्रायेण कृतवानित्यर्थः ॥ २९ ॥ धर्मव्यतिक्रमो यद्दृष्टः यथा ब्रह्मादीनां दुहितृकामनादि तथा साहसं निर्भयता च यद्दृष्टम्। यथा बृहस्पतेरुतथ्यपत्नीगमनादिः। तत्तच्च तेजीयसां तेषां न प्रत्यवायाय सर्वभुजो वह्नेर्यथा सर्वभुक्त्वं नापावित्र्यायेत्यर्थः ॥ ३०–३१ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

वै जुगुप्सितं विगतं जुगुप्सितं विजुगुप्सितं तदेव वैजुगुप्सितं स्वार्थेऽण् ॥ २९ ॥ सिद्धान्तमाह—धर्मव्यतिक्रम इत्यादि। ईश्वराणां धर्मव्यतिक्रमोऽदृष्ट एव, कुत्रापि न दृष्ट एव। एवं साहसं सहसा कृतञ्च, ईश्वरैः कदाप्यधर्माचरणं न क्रियते, तथापि यति दृश्यते, तदा तेजीयसां कर्तुमकर्तुमन्यथाकर्तुं सामर्थ्यं तेजस्तज्जुषां धर्मव्यतिक्रमो न दोषाय, गुणायैव, तैस्तु यत् क्रियते तत्र निमित्तमेष्टव्यम् न तु रागप्राप्तं तत्। अतोधर्मव्यतिक्रम इवासौ दृश्यते, न तु वस्तुतो धर्मव्यतिक्रमः। अत्र दृष्टान्तः–बह्नेरित्यादि। वह्नेरनलस्य यथा सर्वभुजः सर्वभोगाः, क्विबन्ते वहुवचनम्। तस्य सर्वभुक्त्वं यथा न रागप्राप्तम् अति तु सहजम्, तथेदमपि तेनानुमन्तव्यम्। ईश्वरस्येयं लीला न धर्मव्यतिक्रमः,—ईश्वरस्य तत्करणासम्भवात्। तेन नासां परदारत्वम्, नैतस्य च धर्मव्यतिक्रम इति गन्थार्थः। एतदग्रे स्फुटीभविष्यति। ईश्वराणामिति वहुवचनं सर्वेश्वरत्वे तात्पर्यम् ॥ ३० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ईश्वरस्य कर्तुमकर्तुमन्यथा कर्तुं समर्थस्य स्वकृतमर्यादोलङ्घनमपीश्वरत्वस्य परिषोषकम्, न खलुवाधकमिति सिद्धान्तयति—धर्मव्यतिक्रम इति। ईश्वराणां प्रजापतीन्द्रादीनामेव किमुत सर्वेश्वरेश्वरस्य श्रीकृष्णस्य। तत्र दृष्टान्तः—वह्नेः सर्वभुज इति ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

परमेश्वरस्य नायमधर्म इति चेत् निन्दितमिदं केनाभिप्रायेण चकारेति पृच्छति। आप्तकाम इति। तेन स्वकाम पूरणार्थमिदं कृतवानिति प्रत्युत्तरं न दातव्यमिति भावः। अवतारेऽस्मिन्नेतादृशं जुगुप्सितमेव कर्त्तव्यमवश्यमिति चेदत आह। यदुपतिरिति। परमधार्मिकाणां यदूनां पतिस्तर्हि कथमभूदिति भावः। न इति नतु केवलस्य ममात्र संशयो ऽस्तीत्यर्थः। तत्याप्तकामत्वेऽप्यात्मारामत्वेऽपि प्रेमानन्दस्य सिद्धान्तत्वादिति भावः। सुव्रतेति। सदाचारपरायणस्य तवाप्यस्यामेव लीलायामत्यावेशदर्शनादन्ते संशेरते इति भावः ॥ २९ ॥ कृतस्याप्यधर्मस्य फलमीश्वराणामपि न भवेत् किमुत परमेश्वरस्य तस्येति प्रथमप्रश्नोत्तरमाह। धर्मेति षड्भिः। ईश्वराणां रुद्रादीनामपि धर्मव्यतिक्रमोऽधर्मो दृष्टः साहसं साहसहेतुक इत्यर्थः। न दोषाय न प्रत्यवायाय। वह्नेर्यथा सर्वभुक्त्वं न दोषाय नापावित्र्याय तद्वदित्यर्थः ॥ ३० ॥

रसिकाह्लादिनी–टीका

नन्वाप्तकाम एवायं किं न भवेत्, जुगुप्सिते प्रवृत्तिदर्शनादिति चेन्न कामप्राप्तौ सत्यां निन्दते प्रवृतिं दृष्ट्वा कोऽपि नोपालभेत्। ननु तदस्ति आप्तकाम इति, रमापतित्वात् सर्वसिद्धिप्रदत्वाच्च। यदुपतिरिति परमधर्मशीलयदुवंशजत्वात्। सद्वंशजातानां धर्मोपदेशेन पालकश्च किमभिप्रायो यस्य सः केनाभिप्रायेण जुगुप्सितं निन्दितं वै निश्चयेन कृतवान्। परस्परविरुद्धार्थत्वात्। आप्तकामत्वनिन्दितकर्त्तत्वयोः सामानाधिकरण्यं न सम्भवति। नन्वीश्वरस्य विरुद्धधर्माधिकरणत्वात् न किंचिदसमंजसमिति चेत् तथापि प्रयोजनं वक्तव्यम् नैतल्लोकहितं पूर्णत्वेन प्रयोजनाभावात् इति सन्दिहान् सर्वान् संगृह्य प्रार्थयते। नोऽस्माकं सर्वेषां एतत

एतस्मिन्नर्थे संशयं छिन्धि। हे सुव्रत शोभनसङ्कल्पो यस्य श्रीकृष्णस्य लीलामन्तरेण नान्यत्कथनीयमिति। यदीदमयुक्तं स्यात्तदा त्वया श्रद्धापूर्वमुक्तं न भवेत्। किं च यदि वायमधर्मः स्यात् तदा तव कथने रुचिर्न स्यादिति। लोकस्य कंचिद्भङ्गमेव प्रतीयतेऽतोऽभिप्रायो वक्तव्यः। वास्तवोऽर्थस्तु गोपीनां सङ्गत्या आप्ता लब्धाः कामा येन सः यदुपतिरिति। तदुक्तं पाद्मे "एते हि यादवाः नित्यं मद्गुणा एव भामिनि। सर्वदा मत् प्रियाः देवि मत्तुल्यगुणशालिनः" इति द्वारकालीलायाः नित्यत्वं कथितम्। "मथुरा भगवान् यत्र नित्यं सन्निहितो हरिरिति" मथुरालीलायाश्चा नित्यत्वं सूचितम् इति। तत्रापि स्वकीयसापेक्षत्वं सूचितम्। प्रायः किं जुगुप्सितं अपि तु न यतः अभि भयरहितं यथा भवति तथा कृतवान्। अतो मम संशयो नास्ति हेतुवादिनां केषाचिदुपरोधेन पृच्छते। संशयं सन्देहं छिन्धीति ॥ २९ ॥ एवं तावत्सामान्यतोऽन्यावतारविरुद्धं कथं कृतवान् इति यदाक्षिप्तं तत् प्रौढिवादेन श्रीशुकः परिहरति धर्मव्यतिक्रमेति, हेतुवादिनाभिप्रायमालक्ष्य यदाक्षिप्तं तदङ्गीकृत्य सानुप्सये इव तदुत्तरयति। ईश्वराणां देहादिपारतन्त्र्यरहितानामप्यन्येषां धर्मव्यतिक्रमा मर्य्यादोल्लङ्घनं दृष्टम्। यथा ब्रह्मणा दुहितर्य्यभिलाषः कृतः, सोमेन बृहस्पतिपत्नीस्वीकार इति अन्येषामपि ईश्वरतुल्यानां ज्ञानभक्तिबलेन मर्य्यादामतिक्रम्य वर्ततामपि वर्तमानधर्मोल्लङ्घनं दृष्टसाहसमविद्यमानकरणे निर्भयत्वं च दृष्टं सहसाऽविचारेण क्रियमाणत्वात्। नन्वेवं चेत् प्रत्यवायफलं कस्य न भवेत् इत्यत आह तेजीयसां अति तेजस्विनां न दोषाय अधर्मजननद्वारा न भवेत्। कर्म–दोषदहनसमर्थानां हेतुरपि दोषजनको न भवतीत्यत्र दृष्टान्तमाह सर्वभुजो वह्नेर्यथा दोषो न भवति, तर्हि सर्वान् दहन् सर्वं भक्षयन् बह्निस्तद्दोषभाग्न भवति ॥ ३० ॥

विशुद्धरसदीपिका

अपि च आप्तेति यदुपतिरिति। कृततादृशाकर्त्तव्यश्चेत्परमधार्म्मिकाणां यदूनां पतिरपि न स्यात् जायते चानाप्तकामस्य अकृत्येऽपि वृत्तिर्नतु तथास्तीति आप्तकाम इति अर्थक्रमेणेयं व्याख्या एतं नान्यमित्यर्थः। अत्यनुचितमिति भावः। शंसयं सदाचारतद्विरुद्धाचाराभ्यां चित्तदोलनं सुव्रत सदाचारिवर्गपूज्यचरण! भवतस्तादृशयशः संकीर्त्तनेन सञ्जायतेतरां शङ्केति भावः। श्लेषपक्षे यदूनां परमभक्तानां पतिरिति भक्तकृपया कदाचिद्धर्मातिक्रमार्होऽपीत्यर्थः। तेषां परमभक्तत्वञ्च यदोः प्रियस्यान्ववाय इति प्रथमात् जुगुप्सितं किंकृतवान् अपितु नैव भक्तवर्गसम्मतमेवाकरोदित्यर्थः। कुतः आप्तो लब्धः कामो रासक्रीडादिना निजप्रेमभक्तिविस्तारणमनारथो येन सः सर्वसाध्यतमप्रेमभक्तिप्रवर्त्तनेन निन्दितानाचरणात्प्रत्युत तेन साधुवर्गसन्तोषणादिति भावः। तथापि न इति साञ्जलिकरचालनेन सन्दिहानवर्गप्रदर्शनं किमभिप्राय इति पदद्वयं तत्र प्राय इति केषांचिच्छास्त्रतत्त्वविदां भक्तिपराणां प्रेमभक्तिपोषिकायां रासलीलायां न सन्देहः। केषाञ्चिदनवहितानान्तु स भवेदेवेति तद्धितार्थमेवायं प्रश्न इति। तस्मादभि अभयं यथा स्यात्तथा छिन्धि। यद्वा भवतोऽभिप्रायो न केनापि विज्ञातो ज्ञातकल्पः कथञ्चित्स्यात्सोऽपि प्रश्नव्याजेन चित्तवृत्तिरुपाय उत्तरागाम्ममैव इति भावः ॥२९॥ अथ सहजकृपालुतया शिष्यस्नेहानुरोधेन वा तदीयाक्षेपाभासपरिहारपूर्वकं श्लेषदर्शिततदीयसिद्धान्तमेवप्रपुष्णन् श्रीशुक उवाच। धर्मेत्यादिसप्तभिः। ईश्वराणां कर्मादिपारतन्त्र्यरहितानामित्यर्थः। यथाहि ब्रह्मणो दुहितृकामनादौ धर्मव्यतिक्रमो योऽसौ प्रसिद्धः सतु दृष्ट एव ननु वास्तवः तथा साहसं च तच्च बृहस्पतेरुतथ्यपत्नीगमनादौ निर्भयत्वं तत्तच्च तेजीयसां न दोषाय न प्रत्यवायाय। तेजोऽत्र वस्तुतो ऽनासक्तिरेव तत्र दृष्टान्त सर्वभुजो वह्नेर्यथा सर्वं भुक्त्वमपावित्र्याय नेत्यर्थः ॥ ३० ॥

श्रीरामनारायणकृता भावभावविभाविका

यद्यपि राज्ञः प्रश्नस्यान्तिमव्याख्यानानुसारेण वस्तुतः प्रतीपाचरणाभाव एव तथापि तदङ्गीकृत्योत्तरमाह। धर्मव्यतिक्रम इति। ईश्वरणां परमेश्वरानुग्रहलब्धैश्वर्य्याणामिन्द्रचन्द्रादीनामपि धर्मव्यतिक्रमोऽहल्याभिमर्शादिसाहसञ्च गुरुपत्न्या बलादाकर्षणादि दृष्टं तथापि तस्य सर्वथा दोषरूपत्वेऽपि तेजीयसां तेषां दोषाय पातित्याय न भवति चन्द्रश्यामाङ्कस्य तत्प्रभापराभववत् दोषस्य तत्तेजः पराभूतत्वात् तत्र दृष्टान्तमाह। वह्नेरिति। अभक्ष्यभक्षणस्य महादोषत्वेऽपि बह्निस्तेजीयस्त्वात्सर्वभुजोऽपि तस्याभक्ष्यभक्षणं न दोषाय तद्वत् ॥ ३० ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

अनु आप्तकामस्य भगवतो नाधर्मसंस्पर्श इति चेत्तत्राह। आप्तकाम इति। यद्याप्तकामस्तर्हि सुतरामिदं जुगुप्सितं कर्मकृतवान् तथा चाप्तकामस्यावतारावस्थायां यदूनां परमधार्मिकाणां पत्युरेवं विधं कर्म निन्दितमेव। ननु किमेवं परमेश्वरे दोषमुद्भावयितुं प्रवृत्तोऽसीत्याशङ्क्य नाहं तस्मिन् दोषमुद्भावयामि किन्तु तदाचरणे तस्याभिप्रायं पृच्छामीत्याह। किमिति। किमभिप्रायः कृतवान् एतन्नोऽस्माकं सर्वेषां संशयं छिन्धि न इति करचालनेन संशयाक्रान्ततां दर्शितवान् यथा ब्रह्मचर्यादिसुव्रतैर्भवद्भिस्तत्प्रतीपाचरण नो क्रियते तद्वत्तस्यापि तादृग्रमणं न शोभनमिति संबोधनाशयः। यद्वा हे संशयच्छेदनलक्षणसुव्रत! ॥२९॥ ईश्वराणामपि दृष्टेन धर्मव्यतिक्रमेण साहसेन च दोषाभावनिश्चयात् परमेश्वरे कुतस्तच्छङ्कोत्थानमिति कैमुत्यन्यायेन परिहर्तुं सामान्यत ईश्वराणां वृत्तमाह। धर्म्मेति। ईश्वराणां प्रजापतीन्द्रचन्द्रविश्वामित्रादीनां धर्मस्य व्यतिक्रम उल्लङ्घनं तथा साहस सहसा प्रवृत्तिरधर्माचरणञ्च दृष्ट तत्तजीयसां न दोषाय प्रत्यवायाय न भवति यथा बह्निः सर्वभुजः सर्वभुक्त्वं दोषावहं न भवति तद्वत् ॥ ३० ॥

रास-रहस्यम्

र० टी०—आप्तकामः सर्वकामनानां ब्रह्मविद्यायां प्राप्तायामेव पर्यवसानात् पूर्णकामः, यदुपतिः यदूनां धर्मशीलानां, धर्माणामात्मविचार एव साक्षात्ज्ञानप्राप्तिद्वारत्वात् तस्मिन् ये शीलाः धर्मशीलाः, तान् पालयतीति पतिः ब्रह्मविद्वरिष्ठः आधिकारिकपुरुषविशेषः, किमभिप्रायः किं प्रयोजनं साधयितुं, जुगुप्सितं वै संसारासक्तमहामूढपामराणां देहात्मवादीनां पतिपुत्रभ्रातृबन्धुभिः सह इहैव संसारे "यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्। भस्मीभूतस्य देहस्य पुनरागमनं कुतः।" इति विषयसुखमेव येषां मते परमार्थभूतः, तेषां दृष्ट्या तु वैराग्यपूर्वकमात्मीयबन्धूनां परित्यागेनादृश्यमापातफलरहितं ब्रह्मविचारात्मकं निन्दित कर्म एव कृतवान् आचरत्, अतः हे सुव्रत! जिज्ञासुनां संशयच्छेदनलक्षणं सुष्ठुव्रतं यस्य एवं भवान् नः अस्माकं एतं संशयं छिन्धि दूरीकुरु ॥ २९ ॥ धर्मव्यतिक्रमो धारयति उन्मार्गप्रवृत्तेरिति व्युत्पत्या धर्मः कर्तव्यविशेषः। नहि पुत्रः पितृवदाचरति। पुत्रस्य कर्तव्यं पितृकर्तव्यात् व्यतिरिक्तमेव। एवमेव कामासक्तविषयैकपराणां पामराणां कर्तव्यात् तीव्रवैराग्यसम्पन्नानां विवेकीनां कर्तव्यं भिन्नमेव भवति। यतः तीव्रवैराग्ययुक्तेभ्यः विवेकिभ्यः "यदहरेव विरजेत् तदहरेव प्रव्रजेत्।" "पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति।" इत्यादि श्रुतयः तस्मै आत्मज्ञानप्राप्त्यर्थं सर्वकर्तव्यपरित्यागेन आत्मविचारस्य परमकर्तव्यतारूपेणोपदिशन्ति। अतः ईश्वराणां स्वमनोपरिईशनशीलानां मनीषिणां, साधारणतया मातापित्रादिसेवालक्षणकर्तव्यस्य व्यतिक्रमो वर्तमानविधेरुल्लङ्घनं, साहसं च तद्विपरीतं तेषां परित्यागेन पारिव्राज्यग्रहणरूपं, तत्तेजीयसां शमदमादिलक्षणतेजोयुक्तानां, न दोषाय प्रत्यवायाय न भवति, यथा सर्वभुजोऽपि वह्नेः दाह्यपदार्थानां दोषगुणलिप्तता न भवति तद्वदित्यर्थः ॥ ३० ॥

गूढार्थदीपिनी

कोऽभिप्रायो यस्येति किमाशयवानित्यर्थः। जुगुप्सितं निन्दितं कर्म कृतवान् ॥ २९ ॥ व्यतिक्रमः उल्लङ्घनम्। यथा सर्वभुजः अग्नेः विष्ठादि सर्वममेध्यं प्रदहतोऽपि न दोषः। ईश्वराणाम् समर्थानां इन्द्रसोमादीनाम् ॥ ३० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आप्तकामः अवाप्तसमस्तकामः स्वप्रयोजनरहितः किमभिप्रायः जुगुप्सितं परदाराभिमर्शनं कृतवान् हे सुव्रत! हे नैष्ठिक ब्रह्मचर्यव्रतधर! नोऽस्माकमेतत्संशयं छिन्धि निराकुरु ॥ २९ ॥ जीवविषयावेव धर्माधर्मौ तत्रासमर्थोऽधर्माचरणेन पतितो भवति समर्थस्तु "पुण्येन पापमपनुदती" तिश्रुतेः कथञ्चिदधर्मं कृत्वापि स्वतेजसा शुद्धो भवति नतु तौ भगवद्विषयौ सतु "प्रधानक्षेत्रज्ञपति"रित्यादिश्रुतेः सर्वचेतनाचेतनपदार्थपतित्वात्सर्वैः सह विहर्तुं योग्यो न कदाचिदप्यधर्मवातलेशेनापि स्पृश्यते सर्वथा भूतहितायैव क्रीडां करोतीति प्रत्युत्तरमाह। धर्मव्यतिक्रम इत्यष्टभिः ईश्वराणां प्रजापतिसोमेन्द्रादीनां धर्मव्यतिक्रमः धर्मप्रातिकूल्यं सहसा कृत कर्म साहसञ्च दृष्टं तच्च तेषां तेजीयसां तप आदितेजोयुक्तानां दोषाय न भवति यथा सर्वभुजोऽपि वह्ने दाह्यपदार्थदोषलिप्तत्वं न विद्यते तद्वत् ॥ ३० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आत्मारामः स्वरमणो यदुपतिरेतज्जुगुप्सितं लोकनिन्दितं कृतवान् कोऽभिप्रायो यस्य स हे सुव्रत नो मदादीनां संशयं छिन्धि भिन्धि ॥ २९ ॥ यच्चरितामृतपायिनां न विहिताननुष्ठानं दुरितावहं का कथं श्रुतबन्धस्य मधुमथनस्येति समाधत्ते ॥ धर्मेति। ईश्वराणामनीश्वराणामपीश्वरत्वेन तरतमभावेन भगवस्थापितानां धर्मव्यतिक्रमो दृष्टः साहसं चन्द्रादीनां दृष्टं। तेजीयसां भगवदनुग्रहोपयातप्रभाववतां दोषाय न भवति। सर्वभुजो वह्नेर्यथाऽमेध्यदहनहेतुकदोषो न तथेति ॥ ३० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु कामात्करणमिति चेत्तत्राह। आप्तकाम इति। स्वत एवाप्ताः कामा येन। यदुपतिरिति। विद्यमानायामपि कामनायामनेकस्त्रीप्राप्तिः तादृशोऽपि भूत्वा जुगुप्सितं लोकनिन्दितं कृतवान् तत्र करणकोऽभिप्रायः परस्परविरुद्धार्थत्वात् उभयोर्ग्रहणं न सम्भवति नकतापि विरुद्धानां विरुद्धसर्वधर्माश्रयत्वेऽपि प्रयोजनं वक्तव्यं नैतत्कर्म लोकहितं नापि स्वहितं स्वस्य पूर्णत्वात् लोकस्य मर्यादैव हितकारिणी तथा गोपिकानामपि अन्तर्यामिण ईश्वरस्य न किञ्चिदसाध्यम् अत एवं सति किमभिप्राय एतत् कृतवान् कः अभिप्रायो यस्येति एतं नोऽस्माकं सर्वेषामेव संशयं छिन्धि किञ्च सुव्रत हे सदाचारलक्षणव्रतयुक्त! यदीदमसङ्गतमेव स्यात् त्वया नोक्तं स्यात् यदि वा अधर्मः स्यात् तव रुचिर्न स्यात् प्रतीयते च विपरीतमतोनिर्णयो वक्तव्य इत्यर्थः ॥ २९ ॥ प्रथमतः अवतारविरुद्धं कृतवानिति यदुक्तं तत्रोत्तरमाह। धर्मव्यतिक्रम इति। किमेतदीश्वराणां चरितं न भवतीत्युच्यत आहो स्विदन्यार्थमागतोऽन्यत् करोतीति नहि किञ्चिद्घटनार्थमागतः किञ्चन्न विघटयति नह्यन्यार्थमप्यागतः स्वधर्मं परित्यजति प्रकाशनार्थमागतो दीपः गृहेण स्पृष्टः चेत् दहत्येवं अत ईश्वरधर्मोऽयम् अन्यथा ईश्वर एव न भवेत् नहि वणिजामिव प्रभोर्नियमोऽस्ति सर्वकर्मसु

ईश्वरधर्माश्चैते इति तान् गणयति । धर्मव्यतिक्रमः साहसमित्यादयः धर्मव्यतिक्रमो विद्यमानोल्लङ्घनं साहसमविद्यमानकरणम् एतदुभयमीश्वरे दृष्टं नहि दृष्टे अनुपपन्नं नाम चकारादीश्वरसेवकानामपि वीर्यादिमतां वा एतदेव वा साहसं सहसा क्रियमाणत्वात्। नन्वेवं सति तत्कर्मफलं कथं न भवेदित्याशङ्क्याह् । तेजीयसामिति । अतितेजस्विनामेतन्नाधर्मजनकं विधिनिषेधवाक्यानां नियोज्यविषयत्वात् यथा लोके तथा वेदेऽपि अतितेजस्विनां सर्वकर्मदहनसमर्थानां दोषजनकं भवतीत्यत्र दृष्टान्तमाह् । वह्नेः सर्वभुज इति नहि सर्वान् दहन् वह्निः वधभाग्भवति सर्वं भक्षयन् अभक्ष्यभक्षको वा तथा सर्वं पिबत् सर्वत्र प्रविशन् सर्वसंबद्धः तत्तत्कारी भवति मिथ्याज्ञानसलिलावसिक्तायामेवात्मभूमौ कर्मबीजं धर्माधर्माङ्कुरमारभते नतु तत्त्वज्ञाननिदाघनिष्पीतसलिलतयोपरायाम् ॥ ३० ॥

श्रीसुबोधिनी-सारः

आप्तकामता नश्येदित्याह पूर्णमनोरथो यदुपतिः कृष्णो निन्दितं कृतवान् वै एव किमभिप्रायस्तस्य एतन्नोस्माकं संदेहं त्वं छिन्धि हे सुव्रत ॥ २९ ॥ शुकोक्तिः । ईश्वराणां धर्मव्यतिक्रमो दृष्टः प्रजापतिसोमेंद्रादीनां साहसं च दृष्टं तेजीयसां न दोषाय सर्वभुजोग्नेरिव ॥ ३० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं धर्ममर्यादोल्लङ्घनेन निन्दितकर्माचरणमनाप्तकामस्यैव दृष्टम् । यदुपतिः कृष्णस्त्वाप्तकामः पूर्णमनोरथः, अतः किमभिप्रायः ? केनाभिप्रायेणैतज्जुगुप्सितं परदारसम्भोगात्मकं निन्दितं कर्म कृतवानित्यन्वयः । 'उक्तेऽर्थे न सन्देहः' इति सूचयति—'वै' इति । 'भगवदुपासनालक्षणव्रतनिष्ठत्वात्तव न किञ्चिदविदितम्' इत्याशयेन सम्बोधयति—हे सुव्रतेति । नोऽस्माकं श्रोतृणां संशयमिमं छिन्धि निराकुरु ॥ २९ ॥ कैमुत्यन्यायेन भगवति शङ्कितं दोषं परिहर्तुं सामान्यतो महतां वृत्तान्तमाह—धर्मव्यतिक्रम इति । ईश्वराणां समर्थानां प्रजापतीन्द्रसोमविश्वामित्रादीनां धर्मव्यतिक्रमो धर्ममर्यादोल्लङ्घनं साहसं परदाराभिमर्शनाद्यर्थं हठात्प्रवृत्तिरूपं च दृष्टम्, परन्तु तेषां दोषाय पापाय न भवति । तत्र हेतुमाह—तेजीयसामिति । अतितेजस्वित्वेन कर्मास्पर्शित्वादित्यर्थः । तत्र दृष्टान्तमाह—वह्नेरिति । विष्ठादिसर्वममेध्यं प्रदहतोऽपि वह्नेर्यथा तद्दोषसम्बन्धोऽपि न भवति तथेत्यर्थः ॥ ३० ॥

अन्वितार्थप्रकाशिका

आप्तेति ॥ हे सुव्रत ! अनाप्तकामः कामाप्तये पापमाचरेदपि यदुपतिः कृष्णस्त्वाप्तकामोऽपि किमभिप्रायः सन् केनाभिप्रायेणैतज्जुगुप्सितं परदारसम्भोगात्मकं निन्दितं कम कृतवान् । अतः नोऽस्माकम् एतं संशयं छिन्धि निराकुरु ॥ २९ ॥ धर्मेति ॥ ईश्वराणां समर्थानां प्रजापतीन्द्रसोमविश्वामित्रादीनां धर्मव्यतिक्रमो धर्ममर्यादोल्लङ्घनं साहसं परदाराभिमर्शनाद्यर्थं हठात्प्रवृत्तिरूपं च दृष्टं परन्तु तेजीयसामतितेजस्वित्वेन कर्मफलास्पर्शिनां तेषां दोषाय पापाय न भवति । यथा सर्वभुजः विष्ठादिसर्वममेध्यं प्रदहतोऽपि वह्नेर्यथा तद्दोषसम्बन्धोऽपि न भवति तथेत्यर्थः ॥ ३० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आप्तकामः पूर्णकामः जुगुप्सितं सत्पुरुषसच्छास्त्राभ्यां निंदितं अत्र कोऽभिप्रायोऽस्ति किमिति नपुंसकत्वमार्षः ॥ २९ ॥ धर्मस्य व्यतिक्रमः अतिक्रमणं दृष्टः साहसं जुगुप्सितं कर्म च दृष्टं ईश्वराणां बलदेवाद्यवताराणां तेजस्विनां दोषाय प्रत्यवायाय न भवति अन्येषां तु भवत्येव सर्वभुजो वह्नेः सर्वभुक्त्वं यथा दोषाय न भवति तद्वत् ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अहो आप्तकामस्य सर्वनियन्तुः परमेश्वरस्य न कोऽप्ययमधर्मः लौकिककामतन्त्रत्वाभावाच्च न निन्दितं यत इदं तच्चरितं तु सतां गेयं गीतं सन्महाफलप्रदं चेति चेत्केनाभिप्रायेण कृतवानिति पृच्छति ॥ आप्तकाम इति ॥ किं च आप्तकामः स्वयमवाप्तसमस्तकामोऽपि, यदुपतिः श्रीकृष्णः, जुगुप्सितं निन्दितं कर्म, कृतवान् वै । अनवाप्तकामस्य हीन्द्रियपरवशतामापन्नस्य जुगुप्सिताचरण दृष्टं, न त्ववाप्तसमस्तकामस्य स्वतन्त्रस्येति भावः । अतः किमभिप्रायः कृतवान् । केनाभिप्रायेण विहितवानित्यर्थः । एतदेतस्मिन्विषये, नोऽस्माकं, संशयं एतस्मिन् विषये योऽस्माकं संशयस्तमित्यर्थः हे सुव्रत, छिन्धि निराकुरु ॥ २९ ॥ कैमुत्यनयेनोत्तरं विवक्षुः कर्मवश्यत्वप्रयुक्तशास्त्रवश्यानामेव विरुद्धकर्मप्रत्यवायजनकं, न त्वकर्मवश्यानामिति तावदुत्तरमाह ॥ धर्मव्यतिक्रम इति ॥ यद्यपि ईश्वराणामशास्त्रवश्यानां, धर्मव्यतिक्रमः शास्त्रोक्तधर्मातिलङ्घनं, दृष्टः । सहसा शास्त्रार्थाविमर्शेन कृतं साहसं कामचार इति यावत् । तच्चापि, दृष्टं प्रजापतीन्द्रसोमविश्वामित्रादिषु निरीक्षितमेव, तथापि तच्च तेजीयसामतितेजस्विनां तेषां, दोषाय न, निस्तेजस्कजनवदतिप्रत्यवायावहं न जायते इत्यर्थः । तत्र दृष्टान्तमाह । वह्नेरिति । यथा सर्वभुजः वह्नेः, सर्वदाहकस्य वह्नेः दाहमात्रेण दाह्यपटादिगतमालिन्यसंबन्धो न विद्यते तद्वत् ईश्वराणां यदा साहसं बाधकं न, तदा ईश्वरेश्वरस्य तद्बाधकरं न भवेदिति किमु वक्तव्यमिति भावः ॥ ३० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

आप्तकाम इति : १०.३३.२९.

सर्वोऽपि स्वात्महितो भवति जनः सर्वदेति निर्णयतः। तत्कृतिरपि हितकृत्स्यात्परन्तु कथमिति न वेद्मि तद्वद भोः ॥ १४९ ॥
एवमाशयमाज्ञाय राज्ञस्त्र्यर्थसमाश्रयम्। तत्त्वज्ञो मुनिरप्यूचे तत्र सत्तत्त्वमुत्तरम ॥ १५० ॥
राजन् सर्वमिदं न्यरूपी बहुशः प्रागेव विस्तारतः शङ्कोन्मेषहरं यथा भवति ते तत्राप्यसावुद्गतः।
तं भूयोऽपनयामि संशयमलं वाक्यैः श्रुतिस्थार्थगैरेवं गौरवमाविधाय निरघामेषामुवाचे स्थितिम् ॥ १५१ ॥

धर्मव्यतिक्रम इति : १०.३३.३०.

राजन् सत्यमिदं निषिद्धमिह यत्कुर्यान्न तज्जातुचिच्छास्त्रं किन्विदमन्वितं भवति भोस्तत्रैव योऽस्मिन्सदा।
राजाज्ञावदलं बिभेति विधितः सम्प्रत्ययं तु प्रभुः सर्वस्यापि विधेरपि प्रतिविधेः कर्ताऽस्य तद्भीः कुतः ॥ १५२ ॥
यन्मायाकलनासमर्थधिषणो दिङ्मूढवृत्तिर्विधिर्यत्पादे शरणीभवन्नतचतुर्मूर्धाऽऽप निष्पापताम्।
स्वातन्त्र्याद्यपदस्य सत्यवचसस्तस्य प्रभोरच्युतस्यास्यास्तत्कृतलेखलङ्घनभियः का नाम संभावना ॥ १५३ ॥
पित्रालेखप्रमाः पुत्रा न पिता पुत्रलेखधीः। धर्म एषोऽभवत्सुस्थो नाधर्मांशोऽस्ति कश्चन ॥ १५४ ॥
यदि स्यादधर्मस्तदंशं चरित्रं कथं शृण्वतां स्यादधर्मापहारि।
ततो निर्णयः स्पष्ट एवाजनीह स्वयं कर्तुमीशोऽन्यथा कर्तुमीशः ॥ १५५ ॥
विधिबोध्यो धर्म इति श्रुत्योक्तं स्थूलधिय इहोद्दिश्य। हरितोषदस्तु धर्मो दर्शित मे तत्तदात्मना श्रुत्या ॥ १५६ ॥
धर्मो धर्म इति श्रौतो घोषः फलबलादलम्। वक्तव्यस्तत्त्वमेवैतत् पश्याघमथवाऽनघम् ॥ १५७ ॥
स्युर्यत्साक्षितया लोके चतुर्दश हि साक्षिणः। तत्कृतौ कस्तदन्योऽस्ति साक्षी तत्सदसद्ग्रहे ॥ १५८ ॥
काकोलादनमग्निपानमचलोद्धारं करेणाचिराद् गोपोज्जीवनमप्यथाऽहिदमनं यच्चान्यदप्यद्भुतम्।
लीलामात्रमितीशकृत्यमखिलं निःशङ्कमाशृण्वतः शङ्काऽत्रैव तवोदितेति नृपते चित्रीयेते मन्मनः ॥ ॥ १५९ ॥
स्वर्णद्यामतिपूतिगन्धसलिलस्पर्शः करे चैन्दवे स्पर्शः शूद्रततेरभक्ष्यभजनासक्तिः कथं पावके।
अर्के दूरससंग्रहानुसरणं चेत्याद्यसत्प्रश्नकृन्मूर्खोऽस्मिन्निति जानता प्रभुकृतौ वाच्यं न वाच्यं क्वचित् ॥ १६० ॥
कृत्स्नाधिव्याधिविध्वंसनपटुविविधानेकजन्मार्जिताघव्रातप्रध्वंसकृद्यच्छ्रवणमपि सकृत् प्राणिनां प्रेष्टदायि।
तच्छ्रीनाथस्य भव्योज्ज्वलरसकलितं चित्रचारित्र्यमेतत् सार्घं चावद्यमेवं सकृदपि मनसा चिन्तयेत्कः कृतज्ञः ॥ १६१ ॥
अचिन्त्याः पन्थानो जगति महिमानोऽपि महतां ध्रुवं निःसीमानश्चरित-ममिताश्चर्यकृदहो।
अगाधप्रामाण्यं वचनमपि किंवा बहुगिराऽखिलं सर्वोत्कृष्टाद्भुतमिति न तत्राद्भुतमिदम् ॥ १६२ ॥

कृष्णप्रिया

हे सदाचार लक्षण सम्पन्न शुकाचार्य जी ? भगवान् यदुपति है आप्तकाम है पूर्णकाम है वे कभी निषिद्ध कर्म करेंगे नहीं और निन्दनीय कार्य करेंगे नहीं, वैसे पुरुषोत्तम यह रासक्रीडा कार्य किस अभिप्राय से किया ! मुझे यह संशय हो रहा है कृपया समाधान करें ॥ २९ ॥ श्री शुकाचार्य जी ने कहा राजन् ? ऐश्वर्यादि षड् धर्मों के धारक जो समर्थ ईश्वर हैं उनमें कभी धर्मोल्लङ्घन और साहसों के कार्य दीख पड़ते हैं लेकिन उनका रहस्य जानना सामान्य बुद्धि से अशक्य है। राजन् ? उन समर्थ तेजस्वियों में वैसे अधर्म जैसे दीख पड़ते कार्य दोषावह एवं दोषोत्पादक नहीं होते, अग्नि में अमल समल पदार्थ जलते देखे गए अग्नि ने सबको जलाया तो भी अग्नि दूषित न बनी लेकिन निर्दोष एवं पवित्र ही रही ॥ ३० ॥

नैतत् समाचरेज्जातु मनसापि ह्यनीश्वरः। [1]विनश्यत्याचरन् मौढ्याद्यथा [2]रुद्रोऽब्धिजं विषम् ॥ ३१ ॥
ईश्वराणां वचः [3]तथ्यं तथैवाचरितं क्वचित्। तेषां यत् स्ववचोयुक्तं बुद्धिमांस्तत् [4]समाचरेत् ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—अनीश्वरः, जातु, मनसा, अपि, तथा, न, आचरेत्, यथा, मौढ्यात्, अरुद्रः, अब्धिजम्, विषम्, पिबन्, तथा, आचरन्, विनश्यति ॥ ३१ ॥ ईश्वराणाम्, वचः, (सदा) तथ्यम्, तथैव, आचरितम्, क्वचित्, तथ्यम्, यः, तु, बुद्धिमान्, सः, तेषाम्, युक्तम्, यत्, स्ववचः, तत् समाचरेत् ॥ ३२ ॥

---

१. नश्यत्याश्वाचरन्–वीर. विज. । २. रुद्रोऽपि वद्–विज. । ३. सत्यं–श्रीधर. वंशी. जीव. वीर. विज. रा. शु. सु. । ४. मानेतदाचरेत्–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तर्हि 'यद्यदाचरति श्रेष्ठः' इति न्यायेनान्योऽपि तत्कुर्यादित्याशंक्याह। नैतदिति। अनीश्वरो देहादिपरतन्त्रः। यथा रुद्रव्यतिरिक्तो विषमाचरन् भक्षयन्॥ ३१॥ कथं तर्हि सदाचारस्य प्रामाण्यमत आह। ईश्वराणमिति। तेषां वचः सत्यमतस्तदुक्तमाचरेदेव आचरितं तु क्वचित्सत्यमतः स्ववचोयुक्तं तेषां वचसा यद्यद्युक्तमविरुद्धं तत्तदेवाचरेत्॥ ३२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्राक्षिपति-तर्हीति। अन्यः अतेजीयान्। एतत् साहसम्। जातु मनसापि किमुत कायेन। विनश्यति समूलं छिन्नो भवति। मौढ्यात् अज्ञानात्क्रोधाद्युद्रेकतो वा। 'नश्यस्याश्वाचरन्' इति पाठस्तु विजयध्वजोक्तः। तत्राशु पानोत्तरक्षणमेव, न तु विलम्बेनेत्यर्थः॥ तर्हि 'यद्यदाचरति श्रेष्ठः' इति न्यायेनान्योऽपि कुर्यादित्याशंक्याह—अनीश्वरः निकृष्टो यथा रुद्रव्यतिरिक्तः विषमाचरन भुञ्जानः सद्यो विनश्यति। रुद्रस्तु-भुक्त्वा प्रत्युत नीलकण्ठत्वेन शोभते स्मेति भावः॥ ३१॥ पुनराक्षिपति- कथमिति। सदाचारस्य सद्भिराचरितस्य। अतोऽत्राक्षेपे। समाधानमाह-ईश्वराणामिति। सत्यम् परमार्थत्वेनाभीष्टदम्। अतः सत्यत्वात्। तदुक्तम् ईश्वरोक्तम्। वचस एव सत्यत्वे "कुर्याद्विद्वास्तथा सक्तश्चिकीर्षुर्लोकसंग्रहम्" इति विधानस्य का गतिस्तत्राह्-आचरितं तु क्वचिदिति। हास्यादिनिवृत्त्यर्थं क्वचिदिति। वैदिकमार्गप्रदर्शनार्थं यदाचरणं तत्सत्यमेव, अतः क्वचित्सत्वादेव स्ववचो युक्तं स्वशब्देनेश्वरग्रहस्तथैव विगृह्णाति-तेषामीश्वराणां वचसा वचनेन वेदरूपेण यद्यदाचरणं युक्तमविरुद्धं तत्तदाचरणमीश्वराणामपि कुर्यादित्यर्थः। यद्वा-येषामीश्वराणां यत्स्ववचः स्ववचनं युक्तं वेदाविरुद्धं, विद्वांस्तदा चरेत्तत्स्वीकुर्याद्वेदविरुद्धं तु भक्तपरतंत्रतयेश्वरस्यान्यथाचरणमपि कदाचिद्भवाति तन्न ग्राह्यमिति भावः। अत एवोक्तं देवलबौधायनकौशिकैः-"कृतानि यानि कर्माणि दैवतैर्मुनिभिस्तथा। नाचरेत्तानि कर्माणि श्रुत्वा वापि न कुत्सयेत्॥ तदुक्तं तु सदा कार्यमाम्नायानुगतं यदि। स्मृतेर्वेदविरोधित्वे परित्यागो यथा भवेत्॥ तथैव लौकिकं वाक्यं स्मृतेर्बाधात्परित्यजेत्। वैदिकस्य परित्यागात्प्रायश्चित्ती भवेन्नरः॥ लौकिकं तु परित्याज्यमीश्वरोक्तं भवेद्यदि। यद्वेदेन विरुद्धं स्यान्न ततः किल्विषी पुमान्॥" इति निर्णयसुधाकरादौ बहुधा वर्णितमित्युपरम्यते। किञ्च—"अतर्क्याः खलु ये भावा न तांस्तर्केण योजयेत्" इति श्रुतेरपीश्वराणामचिन्त्यभावत्वात्तत्र तर्कोऽकिंचित्कर एवात ईश्वरे श्रुत्या तर्को निषिद्ध इति॥ कथं तर्हि सदाचारस्य प्रामाण्यमत आह-ईश्वराणामिति। सत्यम् सद्भ्यो हितम्। क्वचित् दशरथपुत्रत्वे सतीत्यर्थः। तस्मादियं व्यवस्थेत्याह-स्ववचोयुक्तम् अविरुद्धम् तदेवाचरेत्। बुद्धिमानिति-तत्रापि विचार्यैव "तदसौ वध्यतां पाप आतताय्यात्मबंधुहा" इति भगवतो वचोप्यर्जुनेनाश्वत्थामवधविधायकं न पालितमिति॥ ३२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तर्ह्यन्येषां का वार्त्ता तत्राह। नैतदिति। एतद्धर्मव्यतिक्रमादिमयमीश्वराचरितं न सम्यगाचरेत्। सम्यगित्यस्य निषेधे तात्पर्यम्। एकांशेनापि नाचरेदित्यर्थः। जातु कदाचिदपि तत्र च न मनसापि किमुत वाचा कर्मणा वा हि निश्चये। विशेषेण समूलतया लोकद्वयदुःखित्वादिप्रकारेण नश्यति। मौढ्यादीश्वराणामैश्वर्यमात्मनश्चासामर्थ्यमज्ञात्वेत्यर्थः। इति भक्षणे मौढ्यमेव हेतुरुक्तः। अन्यथा भक्षणाप्रवृत्तिः स्यात्। अब्धिजं कालकूटमिति परमतीक्ष्णतया सद्य एव विनाशोऽभिप्रेत ईश्वरस्तु न नश्येदेव प्रत्युत ऐश्वर्यविशेषप्रकाशादिना शोभते। यथा नीलकण्ठत्वादिना शिव इति भावः॥ ३१॥ वच आज्ञा सत्यं प्रामाण्येन ग्राह्यं स्ववचनेनाविरुद्धमिति स्वशब्देन तषामेव तथा विचारादाज्ञाया बलवत्तरत्वं व्यञ्जितं बुद्धिमानिति तत्तद्विचार्य्येत्यर्थः। अन्यथा निर्बुद्धिरेवेति भावः॥ ३२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एतदीश्वराचरितं साहसं न सम्यगाचरेत्, सम्यगित्यस्य निषेधे तात्पर्य्यम्, जातु, कदाचिदपि तत्र च न मनसापि किमुत वाचा कर्म्मणा वा। हि हेतौ निश्चये वा। विशेषेण समूलतया लोकद्वयदुःखित्वादिप्रकारेण नश्येत्, मौढ्यादीश्वराणामैश्वर्य्यमात्मनश्चासामर्थ्यमज्ञात्वेत्यर्थः। इति भक्षणे मौढ्यमेव हेतुरुक्तः, अन्यथा भक्षणाप्रवृत्तिः। अब्धिजं कालकूटमित्यर्थः, परमतीक्ष्णतया सद्य एव विनाशोऽभिप्रेतः, ईश्वरस्तु न नश्येदेव, प्रत्युत ऐश्वर्य्य विशेषप्रकाशादिना शोभत एव, यथा नीलकण्ठत्वादिना श्रीमहादेव इति भावः॥ ३१॥ स्वकीयेन वचसा युक्तमिति 'स्व' शब्देन कदाचित् प्रेमपरवशतयोन्मत्तवदुच्यमानमाचारविसम्वादिवचो व्यावर्त्तितम्, बुद्धिमानिति तत्तद्विचार्य्येत्यर्थः। अन्यथा निर्बुद्धिरेवेति भावः॥ ३२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

रुद्रो विषं यथाचरत् अभक्षयत् तथा चरन् भक्षयन् विनश्यति॥ ३१॥ स्ववचोयुक्तं स्ववचः समायुक्तम्॥ ३२-३३॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तर्हि "यद्यदाचरति श्रेष्ठ" इति न्यायेनान्योऽप्येवं कुर्यादित्याशङ्क्याह । नैतदिति । एतदशास्त्रवश्यत्वेनाचरितमनीश्वरः शास्त्रवश्यः कदाचिदपि मनसापि नाचरेच्चिकीर्षामपि न कुर्यादित्यर्थः । विपर्यये बाधकमप्याह । नश्यतीति । मौढ्यात्स्वस्याशास्त्रवश्यत्वाज्ज्ञानात्तत्प्रतिषिद्धमाचरन्नाशु नश्यति नाशोऽत्र निरयप्राप्तिः तत्र दृष्टान्तमाह । यथेति रुद्रो यथाब्धिजं विषमाचरदभक्षयत्तथा तदन्यो भक्षयन्नाशु नश्यति रुद्रस्य विषपानप्रयुक्तप्राणविपत्त्यनापादकशक्तिमत्त्वं स्वस्य तदभावञ्चाजानन्केवलं रुद्रो भक्षितवान् तथाहमपि भक्षयिष्यामीति यो मौढ्याद्भक्षयति स नश्यत्येवेत्यर्थः ॥ ३१ ॥ कथं तर्हि श्रेष्ठाचारस्य प्रामाण्यमित्याशङ्क्य न कार्त्स्न्येन प्रमाणमित्याह । ईश्वराणां कर्मवश्यत्वाभावप्रयुक्तशास्त्रवश्यत्वाभाववतामेव कुर्वेवं माकुर्वित्येवं रूपं वचः कार्त्स्न्येन सत्यमबाधितं प्रमाणमिति यावत् आचरितन्तु क्वचिदेव किञ्चिदेव प्रमाणमित्यर्थः । किन्तदाचरितं यत्प्रमाणमित्याह । तेषामीश्वराणां यदाचरितं स्ववचसां समायुक्तं स्ववचसोऽविरुद्धं तत्सत्यमित्यर्थः । तत्तस्माद्बुद्धिमानपीश्वरवचसोऽनुकूलमेवेश्वराचरितमाचरेत् बुद्धिमान्न तदाचरेदिति पाठे ऽयुक्तमितिच्छेदः स्ववचस ईश्वरवचसो विरुद्धमीश्वराणामाचरितं नाचरेदित्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नन्वेवञ्चेत्श्रेष्ठाचरितत्वेनाश्रेष्ठस्य परावराचरणप्रसङ्गः यद्यदाचरति श्रेष्ठ इत्यादिस्मृतेश्चेति तत्राह । नेति स्मृतिः सत्कर्मणः आचरमनुजानाति नत्वसत्कर्मणः लोकसङ्ग्रहमेवापि संपश्यन्कर्तुमर्हसीति विधानाच्चेतोममर्थं हिशब्देन विशिनष्टि । हि स्याद्विशेषणे हेताविति यादवः । मनसापि नाचरेत्किमुत कायेन विपक्षे बाधकमाह । नश्यतीति णश अदर्शन इति धातोः समूलमुच्छिन्नो भवतोत्यर्थः । अदर्शनं लोप इति सूत्रात् लुप छेदन इतिधातोः मौढ्यात्क्रोधोद्रेकात् मौर्ख्याद्वा मोहकान्मौर्ख्यमूढत इति मोहो मोहनितन्द्रित इति कालान्तरे सञ्जातेन निवर्तनेन नाशो न स्यादित्यतः आश्विति किञ्चित्कालमबसरं ददातीत्यर्थः । व्यतिरेकं दर्शयति । यथेति । यथा रुद्रो विषमपिबत् तथाहमपि विषम्पास्यामीति तत्पानेन नश्यति । तस्मात्तन्न कर्तव्यमित्यर्थः । विषपानेनाशु नाशः स्यादिति दर्शनाय तदुक्तं नतु समूलतरुच्छेदविषये विषपानान्मृतिं दृष्ट्वा अन्यस्यां निवृत्तिसम्भवात् । न तथा प्रकृत इति ॥ ३१ ॥ यद्येवं तर्ह्याप्तत्वेनेश्वरोक्तमपि ग्राह्यमित्यायातमिति तत्राह । ईश्वराणामिति । सत्यं परमार्थत्वेनाभीष्टज्ञापकं परमार्थेऽर्थवत्सत्यमिति यादवः तद्वचनमेव सत्यञ्चेत्—

कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ।

इति विधानं व्यर्थमिति तत्राह । तथैवेति । क्वचिदित्युपहासादिव्यावृत्तये अनुवर्तिनां वैदिककर्ममार्गप्रदर्शनार्थं यदाचारणं तदपि सत्यं फलदर्शनात्तर्हि वचनं सत्यं किं नेत्याह । तेषामिति । अयुक्तं वेदोऽप्रमाणलक्षणमित्यादिलक्षणं प्रतीतकार्थविषयं यद्वा स्ववचसोऽयुक्तं विरोधि तेषां यदाचरितं बुद्धिमानेतन्नाचरेदिति श्रुतिश्च ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वचः आज्ञा सत्यं प्रमाणम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ननु तर्ह्यनीश्वरोऽप्येतद्दृष्ट्या स्वाच्छन्द्यं कुर्वीतेत्याशङ्क्याह—नैतदित्यादि । अनीश्वरः श्रीकृष्णादन्यः कोऽपि मनसापि नैतत् साहसं समाचरेत्, जातु कदाचिदपि । आचरणे कः प्रतिबन्धः ? इत्याह—विनश्यतीत्यादि । मौढ्यादाचरन् सन् नश्यत्यास्त शीघ्रमेव । ईश्वरस्तु यद्याचरति तदैश्वर्यातिशयप्राकट्य सर्वलोकहिताभिव्यक्तिश्चेत्याह—यथेत्यादि । यथा विषं कालकूटं जुषन् स्वैश्वर्यं प्रकटयाञ्चकार सर्वहितञ्च, वस्तुतस्तु विषभक्षणं धर्मव्यतिक्रमः साहसञ्च, न तु तस्य तद्रागप्राप्तम्, अपि तु परस्वम्त्यर्थं । न तु तद्विषमन्यभोग्यं भवितुमर्हतीति प्रकृतेऽपि नैष धर्मव्यतिक्रमः साहसञ्च—तासामन्यभोग्यत्वाभावात् । तज् जीषणञ्चास्य परस्वस्त्ययनार्थञ्च । वक्ष्यति च-(३९ श० श्लो०) "विक्रोडितम्" इत्यादि । "अब्धिजं विषम्" इति पाठे आचरन् भक्षयन्, चरिर्भक्षणार्थेऽपि वर्त्तते ॥ ३१ ॥ अपि च ईश्वराणां वागाचरितादीनां सत्यत्वमेवेति तच्चरितमप्यनीश्वरः कुर्यात् ? नेत्याह—ईश्वराणामित्यादि ईश्वराणां स्वतन्त्राणां ब्रह्मादीनां वच एव सत्यम् न चाचरितम् । क्वचित् कुत्रापि ईश्वरेश्वरे श्रीकृष्णे आचरितञ्च सत्यम्, सत्यलीलत्वात् । तेषामीश्वराणामीश्वरेश्वरस्य च यदीहितं स्ववचोयुक्तं श्रुतिसिद्धम् तदेव बुद्धिमानाचरेत्, न तु सत्यत्वेन सर्वमेव तदीहितत्वमाचरेत्, वचस्तु सर्वमेवाचरेत्—ईश्वरवचस्त्वात् ॥ ३२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अनीश्वरस्तु एवं कुर्वन् बाध्यते एवेत्याह—नैतदिति—अत्र दृष्टान्तः—यथा रुद्रो जयते विषम्, अरुद्रो रुद्रभिन्नो विषं कालकूटं पिबन्नेव नश्यति ॥ ३१ ॥ ईश्वराणां पुनरियं रीतिः, किं पुनरीश्वरेश्वरस्येत्याह—ईश्वराणां रुद्रादीनां वचः सत्यम्, न

त्वाचरितम्। ईश्वरेश्वरे श्रीकृष्णे तथैवाचरितम्, यथा वचः सत्यम् तथा आचरितञ्च। तत्र वचसि आचरिते वा यत् स्ववचोयुक्तं श्रुतिसिद्धम्, स्ववचश्च श्रुतिः, तदेव बुद्धिमानाचरेत्, न तूभयोः सत्यत्वात् तत्कृतस्य पारदार्यस्यापि सत्यत्वे (गी० ३।२१) "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति न्यायात् तदप्याचरेत्, स्ववचः श्रुतेरयुक्तत्वात्॥ ३२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तर्हि यद्यदाचरति श्रेष्ठ इति न्यायेनान्योऽपि कुर्यादित्याशङ्क्याह। नैतदिति। अनीश्वरो निकृष्टो जीवः यथा रुद्रव्यतिरिक्तो विषमाचरन् भुञ्जानः सद्यो विनश्यति रुद्रस्तु भुक्त्वा प्रत्युत नीलकण्ठत्वेन शोभते स्मेति भावः॥३१॥ कथं तर्हि सदाचारस्य प्रामाण्यमत आह। ईश्वराणामिति। सत्यं सद्भ्यो हितं क्वचित् दशरथपुत्रत्वे सतीत्यर्थः। तस्मादियं व्यवस्थेत्याह। स्ववचोयुक्तम् अविरुद्धं तदेवाचरेत्। बुद्धिमानिति तत्रापि विचार्यैव। तदसौ वध्यतां पाप आततायात्मबन्धुहेति भगवतो वचोऽप्यर्जुनेनाश्वत्थामवधविधायकं न पालितमिति॥ ३२-३३॥

श्रीरसिकाह्लादिनी टीका

नन्वग्निदृष्टान्तेन दोषाभावस्तर्हि लोकस्य कथं श्रेयोऽवाप्तिः। तदुक्तं "यद्वृत्तमनुतिष्ठन्वै लोकक्षेमाय कल्पते" इति चेत्तत्राह नैतदिति। एतद्धर्ममतिक्रमरूपसाहसं न सम्यक् आचरेत् सम्यक्अतीव निषेधानादरेणेति। तत्र मनसापि न किमुत वाचा कर्मणा अपीति निश्चयेन स्वयमनीश्वरदेहादिपरतन्त्रः मौढ्यात् ईश्वरसादृश्यभ्रान्त्या ईश्वरवत्सामर्थ्याभावात् इश्वरे सामर्थ्यज्ञानात् आचरन् विशेषेण मूलतो नश्यति। यथा रुद्रव्यतिरिक्तोऽब्धिजं विषं कालकूटाख्यं अदन् सद्य एव म्रीयेत् रुद्रस्तु अदन्नपि न नश्यति प्रत्युतं लोकोपकारकतया शोभत एव॥ ३१॥ एवं तादृशसामर्थ्याभावे आचरन्तो मूढा ज्ञेया इति। अत एव जातु कदाचित्कौतुकेनापि ईश्वरकृतं नाचरत्। नन्वेकमेव कर्म कथमशुभजनकं कथं वा शुभजनकं तत्राह अधिकारिभेदेषु भेदादेव सर्वं घटत इति। रुद्रोऽब्धिजविषमिति। यथा कालकूटभक्षणेन लोकोपकरोपि जात इत्याह। ननु कथं सदाचारस्य प्रामाण्यमिति चेत्तत्राह ईश्वराणामिति, ईश्वराणां भक्तिज्ञानलब्धसामर्थ्यानां तदुक्तं गीतायां "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" तादृशानां लब्धभगवत् प्रसादानां तेषामाज्ञारूपं च एव सत्य आचरन्ति तु क्वचिदेव वचनांशादि चेद्भवति तदा सत्यमेव तथेश्वरे धर्माधर्मज्ञानाज्ञानैश्वर्यानैश्वर्यवैराग्यावैराग्यादयो धर्मा दृश्यन्ते। तथेश्वरधर्मविशिष्टानामन्योन्यमपीष्टानिष्टहेतवो न भवन्त्याशयेनोक्तम्। आचरितं किंचिदेव सत्यमिति तैरुक्तमाचरेत्। तेषां स्वच्छन्दाचरितं नाचरेत्। ते ह्यन्यथा वदन्ति। अन्यार्थवचनमाम्याधिकारिषु न सत्यमिति विचार्य्य बुद्धिमान् तत् स्वाधिकारार्हं समाचरेत् अन्यथाऽनिष्टहेतुरेव भवेदित्यर्थः॥ ३२॥

विशुद्धरसदीपिका

तर्ह्यन्येषां का गतिस्तत्राह। नैतदिति। एतदीश्वराचरितं धर्मव्यतिक्रमादि साहसञ्च अनीश्वरः कर्मादिपारतन्त्र्यः न सम्यगाचरेत् सम्यगिति एकांशेनापि नाचरेदित्यर्थः। जातु कदाचिदपि तत्र च मनसापि आचरंश्च विशेषेण लोकद्वयप्रविष्टो भवेदित्यर्थः। मौढ्यादिति भक्षणे हेतुः मौढ्यं च तेषामैश्वर्य्यस्यात्मनश्चानैश्वर्य्यस्याज्ञानमेव अब्धिजं कालकूटमिति सद्य एव नाशोऽभिप्रेतः एवं दार्ष्टान्तिकेऽपि ईश्वरस्तु न नश्येदेव प्रत्युतैश्वर्य्याविशेषप्रकाशनादिना शोभते यथा नीलकण्ठत्वेन रुद्र इति संक्षेपः॥ ३१॥ ईश्वराणामिति वच आज्ञा सत्यं प्रमाणत्वेन ग्राह्यं तथैव यथा वचस्तथैवाचरितमपि चेत्तदा ग्राह्यमेव नतु वचसा विरुद्धमिति वचस एव वलवत्तरत्वं तत्रापि यत्स्ववचोयुक्तं स्वशब्देन तेषामेव वचसाऽविरुद्धमित्यर्थः। यद्वा स्वशब्देनाधिकारिणमुद्दिश्य तेषां यद्वचस्तेन युक्तमित्यर्थः। शेषं स्पष्टम्॥ ३२॥

श्रीरामनारायणकृता भावभावविभाविका

नन्वेवं चेत्—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥

इत्यादिवचनैः स व्यतिक्रमः सर्वैरनुष्ठेयः इत्याशङ्क्य नेत्याह। नैतदिति। अनीश्वरः परमेश्वरानुग्रहाल्लब्धैश्वर्यादितद्धर्म ईश्वरस्तद्भिन्नस्तथा एतत्परदाराभिमर्शनादि कर्म जातु कदाचिदपि मनसापि नाचरेत्। ननु "कुशलान्याशु सिध्यन्ति नेतराणि कृतानि चे"त्यादिवचनैः कलौ मानसपापासिद्धिश्रवणात्किमिति मनसापि तन्निषिध्यते तत्राहैतदिति। एतत् परदाराभिमर्शनं तु मनसापि नाचरेत् "श्रवणं स्मरण कीर्तिर्दर्शनैकान्तभाषणम्" दृढसंकल्पसङ्गौ च भोगोऽष्टाङ्गं हि मैथुन"मित्यष्टाङ्गमैथुने स्वातन्त्रेण मानसस्मरणस्यापि गणनात् किञ्च पापान्तराणां मानसत्वे कलौ मानस व्यथामात्रहेतुतया तादृक्साक्षाच्छारीरकदुःखोपभोगानुपयोगेऽपि तदुपयोगिकायिकपापबीजतया मानसव्यथाहेतुत्वेन च तान्यपि हेयान्येव विपक्षे दोषमाह। विनश्यतीति। मौढ्यादीश्वराणा-

मात्मनश्च सामर्थ्याविविवेकात्तत्सामान्यदृष्ट्याचरंस्तु विशेषेण मरणेऽपि दुःखाप्रमोको यथा स्यात्तथा नश्यति मृत्वापि निरयादावुपतप्तलोहतदाकारालिङ्गनादिदुःखं प्राप्नोति किञ्च नेह वैदेवाः पापान्स्पृशन्ति नैव ऋषय इत्यादि वचनैर्देवादीनां तत्तद्देहकृतपापस्यैवाभावाद्विधिनिषेधशास्त्रस्य मनुष्यमात्राधिकारात्तेषां दोषानरूपणस्यापि मनुष्याणां भयजननार्थत्वात्तेषामधिकाराभावेन व्यतिक्रमस्यैवाभावान्न तद्दृष्ट्या तदाचरणौचित्यं मौढ्यादाचरणप्रयुक्तविनाशे दृष्टान्तमाह। यथेति। अरुद्रो रुद्रव्यतिरिक्तो यथाऽब्धिजं समुद्रादुत्पन्नकालकूटं विषमाचरन् चर गतिभक्षणयारित्यस्माद्भुञ्जन्विनश्यत्येव तस्य नीलकण्ठत्वादिना भूषणत्वेऽप्यन्यस्य विनाशकत्वमेव तदुक्तं "अकाण्ड ब्रह्माण्डक्षयचकितदेवासुरकृपा विधेयस्यासीद्यस्त्रिनयनविषं संहृतवतः। स कल्माषः कण्ठे तव न कुरुते निःश्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिन" इति॥ ३१॥ ननु गते तर्हि शिष्टाचारस्य प्रमाणत्व तत्राह। ईश्वराणामिति। ईश्वराणां वचो वाक्यन्तु सत्यमेव "चोदनालक्षणो ह्यर्थो धर्म" इति जैमिनिना भगवता चोदनाविधिरेव लक्षणं ज्ञापकं प्रमाणं यस्मिंस्तादृशस्यार्थस्य धर्मत्वनिर्णयात् तत्राप्यर्थशब्देन श्येनेनाभिचरन् यजेदिति विधिप्राप्तस्यापि श्येनयागस्याभिचारशब्दितशत्रुमारणफलद्वारानर्थत्वात्तद्व्यावर्तयति आचरितन्तु क्वचित्सत्यमलौलिकाविगीतशिष्टाचरस्यैव विध्यनुमापकतया प्रमाणत्वात् तदेवाह। तेषामिति। यत्तेषामाचरणं स्ववचोयुक्तं तदीयवचनाविरुद्धं बुद्धिमांस्तुविचार्य्य तदेव समाचरेत् यथा श्रुते तु वचस एव साक्षाल्लाभात्तदेव प्रमाणं स्यान्नाचरणं वचोविरोधाभावे आचरणस्य तद्वचोरूपविध्यनुमापकतया प्रमाणत्वं वचोविरोधे तु वचसा वाधदर्शनेऽनुमानानवतार एव॥ ३२॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु एवं तर्हि "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन" इति न्यायादितरस्यापि तदनुष्ठानं दोषावहं न भविष्यतीति तत्राह। नेति। इतरस्त्व एतन्मनसापि कदाचिदपि न समाचरेत् वाचा देहेन समाचरेदिदिति किमु वक्तव्यं हि यतः अनीश्वरः देहादिपरतन्त्रः विपक्षे बाधकमाह। मौढ्यात्सामर्थ्यासामर्थ्यविवेकराहित्यात्तद्वदाचरन् सन् विनश्यति तद्वत्॥ ३१॥ तस्मादीश्वराणां वचः सत्यं सर्वथाऽनुल्लङ्घनीयं तर्हि सदाचारः प्रमाणमिति घण्टाघोषस्य का गतिरिति चेत्तत्राह। तथैवेति क्वचित्तेषामाचरितमपि तथैव सत्यं तत्किमित्यपेक्षायामाह। तेषां यदाचरितं तेषां वचसा युक्तं तदेव बुद्धिमान् संम्यगाचरेदन्यथा निर्बुद्धिर्भवेत् तथा च धर्मबुद्ध्या सद्भिर्यदनुष्ठितं तदेव प्रमाणतयोपादेयं न सर्वमित्यर्थः॥ ३२॥

रास-रहस्यम्

र० टी०—अनीश्वरः देहादि परतन्त्रः विवेकवैराग्यादिशून्यः भोगासक्तः अधर्मगर्तपतितः आत्मोद्धारणेऽसमर्थः, जातु कदाचिदपि, माता पित्रादेः सेवालक्षण कर्तव्यं परित्यज्य पारिव्राज्यार्थं मनसाऽपि न समाचरेत् मनसाऽपि न चिन्तयेत्, अन्यथा धर्मशास्त्रविहितं महापातकमवश्यं प्राप्नुयात्, यथा अरुद्रः रुद्रव्यतिरिक्तः अब्धिजं विषं समुद्रादुत्पन्नं हालाहलं, मौढ्यात् सामर्थ्यासामर्थ्यविवेकराहित्यात्, आचारण 'चर गति भक्षणयो'रित्यस्मात् भक्षयन् विनश्यत्येव अर्थात् रुद्रस्य तु नीलकण्ठरूपेण भूषणत्वेऽपि विषस्यान्यस्य विनाशकत्वमेव तदुक्तम्—

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयनविषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहा विकारोऽपि श्लाघ्यो भुवनभयभंग व्यसनिनः॥ ३१॥

ईश्वराणां मनीषिणां वचः वाक्यं तु सत्यं सद्भ्यो हितमेव, आप्तत्वेन प्रमाणं च, लोककल्याणार्थं शास्त्रमर्यादारक्षणाय च शास्त्रविहितमेव ते उपदिशन्ति, तथा तेषामाचरणं तु क्वचित् सत्यं, यस्मादात्मारामतया विधिनिषेधबन्धनविनिर्मुक्तत्वेन सदा बहिर्व्यवहारे अमनस्कत्वात् स्वात्मनः क्वचित् प्रयोजनाभावाच्च प्रारब्धकारित्वात् "इन्द्रियाणीन्द्रियार्थेषु वर्तन्ते।" इति उद्देशरहितत्वात् सर्वदा सत्यमाचरणं नियमेन तु तेषां न सम्भवति, अतः अलौकिकाविगीतशिष्टाचारस्यैव विध्यनुमापकतया प्रमाणत्वात् स्ववचोयुक्तं तदीयवचनाविरुद्धमाचरणं बुद्धिमता तु स्वयं विचार्य तदेव समाचरणीयम्॥ ३२॥

गूढार्थदीपिनी

अनीश्वरः प्राकृतः निकृष्टः प्राणी जातु कदाचिदपि नाचरेत्। यथा अरुद्रः रुद्रव्यतिरिक्तः विषम् आचरन् भक्षयन् विनश्यति तथा॥ ३१॥ युक्तम् उचितम्॥ ३२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एतद्धर्मप्रातिकूल्यम् अनीश्वरः अतेजस्वी तप आद्यैश्वर्य्यहीनः अधर्मगर्ते पतितस्यात्मन उद्धरणे असमर्थ इत्यर्थः। जातु कदाचिदपि मनसापि न समाचरेत् अन्यथा तु विनश्यति यथा रुद्रस्य तेजीयसा विषभक्षणं दोषावहं नाभूत् अरुद्रः रुद्रभिन्नः

अब्धिजं विषं विषौषध्यादिरूपेण वर्त्तमानं मौढ्यादाचरन् भक्षयन् विनश्यत्येव तद्वत् ॥ ३१ ॥ ननु यद्येवं तर्हि "यद्यदाचरति श्रेष्ठस्तत्तदेवेतर जनः। स यत् प्रमाण कुरुते लोकस्तदनुवर्तते" इतिन्यायप्राप्त श्रेष्ठाचरणं केनांशेन ग्राह्य स्यादत्राह। ईश्वराणां समर्थानां वचः तथैव क्वचित् विधिशास्त्रानुरोधतः लोकशिक्षायै आचरितञ्च सत्य सतां मुमुक्षूणामुपादेयम् अतो बुद्धिमान् तेषां यत् लोकशिक्षायै आचरितं स्ववचोयुक्तम् अनेनेदमनुष्ठेयमित्येवं स्वाधिकारानुसारिवाक्येन युक्तमभिहितञ्च तदाचरेत् ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तत इत्यादेरीश्वरचर्यावश्यमनीश्वरेण कार्येति सर्वैरेवं कर्तव्यमित्यायातमिति तत्राह ॥ नेति। एतद्धरितदितरतेजीयः कृतमनीश्वरो जातु कदाचिदपि मनसाऽपि नाचरेत्। यदि चाचरन्भवेत्तत्र तन्त्र मौढ्यादिति। आशु नश्यति नाशश्च बहुप्रकारः सहसभवत्वादेः प्रमितत्वात्। नश्यत्यादौ दोषयुक्तो भवति तदनन्तरं यथायथं भवतीति वा दोषयुक्तपुरुषे नष्टशब्दप्रयोगादित्युक्तेः, तत्र व्यतिरेकनिदर्शनं दर्शयति ॥ यथेति। रुद्रो विषमपिबदिति स्वयमाचरंस्तद्भक्षयन्नश्येदेवेति। अरुद्रो रुद्रेतरो विषं शिष्टं प्राग्वत्। यथा वायुरपिबदिति रुद्रो विषमपिबन्नीलगलत्वादिना नष्टश्चेत्यन्वयो वा। वायुरस्मा उपामन्थतिरनष्टिस्माकुनन्नम। केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सहेत्यादि। स तत्पिबत्कण्ठगतेन तेन निपातितो मूर्छित आशु रुद्रः। नीलोऽस्य गलस्तदासीदित्यादिश्रुतिस्मृत्यादिकमुदाहृत्याष्टमे स्फुटीकृतमस्माभिस्ततोऽनुसन्धेयं। यथा रुद्रोऽब्धिजं विपमिति पाठो ललितान्वयः। हिशब्देन यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि। नो इतराणीति सुचरिताचरणाभ्यनुज्ञापनसिद्धिं सूचयति। यथा रुद्रो जह्नुरगस्त्यो वाऽब्धिजं विषं जलमपिबत्तथाऽऽचरन्नन्यो नश्येदतस्तथा नाचरेदिति वा। विषं तु गरले तोय इति विश्वः। यथा रुद्रः कोपी सञ्जह्नुरगस्त्यो वेति वा। रुद्रः क्रूरे महेश्वर इति नानार्थोक्तेः ॥ ३१ ॥ तर्हि सदुक्तिर्नानुसर्तव्येत्यायातामिति तत्र व्यवस्थया शङ्कां दुरवस्थाकरोति ॥ ईश्वराणामिति सत्यमर्थप्रापकतया यथार्थं तथैव तेषामाचरितं च सत्यं क्वचित्तेषामेव यत्स्ववचः स्वमात्रविषयकं यत्तदयुक्तं। तामेवायुक्ततां विशदयति। बुद्धिमान्नैतत्तन्मात्रयुक्तं स्वायुक्तं नाचरेदाचरंश्च प्रत्यवेपादिति भावः। स्ववचः कलिङ्गनीत्यादिरूपमयुक्तं मोहनार्थत्वात्। तदुक्तमेतन्नाचरेदिति वा। ईश्वराणां वचः सत्यं तथेवाचरितं सत्यं। अन्यथा तेषां चित्क्व। न तद्वचनसत्यतायामेषा संविदुत्पत्तिमार्गाभावाच्चिज्ज्ञानं क्वेत्यपि योजना ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु तेजीयसामपि ह्येतन्न सुश्लोक्यमिति न्यायात् "यद्वृत्तमनुतिष्ठन् वै लोकः क्षेमाय कल्पत" इति विरोधाच्च कथमेतन्कर्तुं शक्यत इतिचेत् तत्राह। नैतत्समाचरेदिति। एतदीश्वरकृतमनीश्वरो न समाचरेत् ऐश्वर्यसमानाधिकरणमेवैतत् नानिष्ट करोति अतः जातु कदाचिदपि औत्सुक्यादपि न समाचरेत् किम्बहुना मनसापि ऐश्वर्यतुल्यमेव तेषां तत्कर्म अतो यथैश्वर्यकामनायामपि अनीश्वरो वधमर्हति यथा महाराज्यानधिकारी तदिच्छां कुर्वन् अतो मनसापि न समाचरेत् विपरीते बाधकमाह। विनश्यतीति। माढ्यात् ऐश्वर्यसहभावं तस्य कर्मणः अज्ञात्वा केवलं तत्कर्माचरन् तेनैव कर्मणा नष्टो भवति। नन्वेकमेव कर्म कथ धर्मान्तरसहितं न नाशकमितरथा नाशकमितिचेत्तत्राह। अरुद्रः रुद्रव्यतिरिक्तः रुद्रसमानपराक्रमरहितः अब्धिजं विषं कालकूटमाचरन् आसमन्तात् भक्षयन् विनश्यति तथेत्यर्थः। निन्दित कर्मापि काळकूटवत् नाशकं तदीश्वरस्यैव शोभाकर येन नीलकण्ठो भवति तथैव गोपीजनवल्लभ इति ॥ ३१ ॥ ननूक्तं यद्वृत्तमनुतिष्ठन्निति तत्राह। ईश्वराणामिति। ईश्वराणां वच एव तथ्य नत्वाचरितं क्वचिदाचरितमपि वचनानुगुण चेत् ईश्वराणां बहवो धर्माः यथैश्वर्यं तथा धर्मात्मत्वं तथा दया तत्रैश्वर्यज्ञानवैराग्यैर्यत्करोति तत्स्वच्छन्दचरितमित्युच्यते बुद्धिमांस्तन्नाचरेत् ते ह्यन्यथा न वदन्ति अन्यार्थं कथनमन्याधिकारेणेति अतस्तद्विरुद्ध न कथयन्तीति ॥ ३२ ॥

श्रीसुबोधिनी–सारः

असमर्थं प्रत्याह। अनीश्वरो देहाद्यधीनः पुमान् मनसापि जातु कदाचिदपि एतत् ईश्वरकृत्यं न समाचरेत् "न देवचरितं चरेत्" इति नियमात्। विपक्षे दोषमाह "यद्यदाचरति श्रेष्ठः" इति न्यायात्कुर्वन्तं प्रत्याह मौढ्यात् मूढत्वात्तद्वदाचरन् विनश्यति अरुद्रो रुद्रभिन्नोऽब्धिजं समुद्रमथनोत्पन्नं विषमाचरन्भक्षयन्निव ॥ ३१ ॥ कथं तर्हि सदाचारस्य प्रामाण्यं तत्राह। ईश्वराणां वचः सत्यम् आचरितं क्वचित् श्रीरामचन्द्रादौ तथैव सत्यं तेषां वचसोक्तमपि यत् स्ववचसा युक्तं धर्मशास्त्रविहितं तद् बुद्धिमान्समाचरेत् ॥ ३२ ॥

(१) श्रीप्रभचरणविरचिता श्रीटिप्पणी

नैतत् समाचरेदित्यस्याभासः, ननु तेजोयसामपीत्यारभ्य न्यायादित्यन्तः। यद्यप्येतत्समाहितिर्नैतेन श्लोकेन भवति, तथाप्युत्तरार्धेऽन्यस्य कर्तुर्नाशोक्त्येश्वराणामनाशज्ञापनेन च समाहितिर्भविष्यतीत्याशयेनेदमप्युक्तमिति ज्ञेयम्। अन्तरङ्गै रेवेत्यग्रे वक्ष्यन्ति च ॥ ३१ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति न्यायेन श्रेष्ठाचरितत्वात् 'अन्योऽपि तदाचरेत्' इत्याशङ्क्याह—नैतदिति। अनीश्वरः कर्मपरवशस्तेजोहीनो जातु कदाचिदपि एतच्छास्त्रविरुद्धं मनसापि नाचरेत् तच्चिकीर्षामपि कुर्यादित्यर्थः। विपर्यये बाधकमाह—विनश्यतीति। हि यतो मौढ्यात् अज्ञत्वात् ईश्वरत्वाभिमानमात्राच्छास्त्रविरुद्धमाचरन्ननीश्वरो विनश्यति। तत्र दृष्टान्तमाह—यथेति। अरुद्रो रुद्रव्यतिरिक्तः अनीश्वरः अब्धिजंविषं भक्षयन् विनश्यति तथेत्यर्थः। रुद्रस्तु परमेश्वरत्वात् जनोपकाराय भक्षितवान्, न तेन तस्य किमपि वैगुण्यं जातमित्याशयः ॥ ३१ ॥ 'कथं तर्हि सदाचारस्य प्रामाण्यम्?' इत्यपेक्षायामाह—ईश्वराणामिति। ईश्वराणां ज्ञानवैराग्यादिभिस्तेजीयसां वचः आज्ञारूपं सत्यं प्रमाणम्, तदपि तैस्तात्पर्यवृत्त्योक्तं चेत्। अन्यथा परीक्षाद्यर्थमुक्तमश्वत्थामवधमकुर्वतोऽर्जुनस्य गृहपरिवर्तनमकुर्वतीनां गोपीनां च ईश्वराज्ञोल्लङ्घनदोषप्रसङ्गादिति ज्ञेयम्। तेषामाचरितं तु क्वचिदेव किञ्चिदेव तथा प्रमाणमित्यर्थः। 'किं तदाचरितं यत्प्रमाणम्?' इत्यपेक्षायामाह—तेषामिति। तेषामीश्वराणां यदाचरितं स्ववचोयुक्तं तात्पर्यवृत्त्योपदेशेनोपदेशात्मकेन स्ववचनेनैवाविरुद्धं बुद्धिमांस्तदेव सम्यगादरेणाचरेत् ॥ ३२ ॥

अन्वितार्थप्रकाशिका

तर्हि "यद्यदाचरति श्रेष्ठः" इति न्यायादन्योऽपि कुर्यात्तत्राह—नैतदिति ॥ अनीश्वरः कर्मपरवशस्तेजोहीनो जातु कदाचिदपि एतच्छास्त्रविरुद्धं मनसाऽपि नाचरेत् तच्चिकीर्षामपि न कुर्यात्। हि यतो मौढ्यात् अज्ञत्वात् ईश्वरत्वाभिमानमात्राच्छास्त्रविरुद्धमाचरन्ननीश्वरो विनश्यति। यथा अरुद्रा रुद्रव्यतिरिक्तः अनीश्वरः अब्धिजं विषं भक्षयन् विनश्यति तथेत्यर्थः। रुद्रस्तु परमेश्वरत्वात् जनोपकाराय भक्षितवान्। न तेन तस्य किमपि वैगुण्यं जातं प्रत्युत शोभैव जाता ॥ ३१ ॥ कथं तर्हि सदाचारस्य प्रामाण्यं तदाह—ईश्वराणामिति ॥ ईश्वराणां ज्ञानवैराग्यादिभिस्तेजीयसां वचः आज्ञारूपं सत्य सद्भ्यो हितं प्रमाणं च तदपि तैस्तात्पर्यवृत्त्योक्तं चेत् अन्यथा परीक्षाद्यर्थमुक्तमश्वत्थामवधमकुर्वतोऽर्जुनस्य गृहपरिवर्तनमकुर्वतीनां गोपीनां चेश्वराज्ञोल्लङ्घनदोषप्रसङ्गादिति ज्ञेयम्। तेषामाचरितं तु क्वचिदेव किञ्चिदेव तथैव प्रमाणमित्यर्थः। तेषामीश्वराणां यदाचरितं स्ववचोयुक्तं तात्पर्यवृत्त्योपदेशात्मकेन स्ववचनेनाविरुद्धं बुद्धिमांस्तत्तदेव सम्यगादरेणाचरेत् ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं तर्हि महदाचरणप्रमाण्यादन्योऽपि कुर्यादिति चेत्तत्राह नैतदिति। ईश्वरादन्यः अनीश्वरः परमेश्वरभिन्नः जातुकदाचित् मनसापि एतज्जुगुप्सितं नाचरेत मौढ्यात् आचरन् तत्कुर्वन् सन् विनश्यति उभयलोकाद्भ्रश्यति। यथाऽरुद्रः भिन्नो नरः अब्धिजं विषं अदन् विनश्यति तथा परमेश्वरभिन्नानां ब्रह्मादीनामपि महतां प्रतीपाचरणे सत्यलवजनैव हास्यं तज्जन्यशरघातादिकष्टं चाभूत् तर्ह्यन्येषां तु का कथा ॥ ३१ ॥ ईश्वरैः कृतं यद्विरुद्धाचरणं तदन्येन नाचरणीयमित्याह ईश्वराणामिति। ईश्वराणां ईश्वरावताराणां वचोवचनं सत्यं असत्यतया पालनीयं आचरितं तु देहाचरणं तु तथा तेन प्रकारेण क्वचित् योग्यस्थाने घटितं करणीयं न सदा सर्वं करणीयं तदेवाह। यत्तेषामाचरणं स्ववचोयुक्तं स्वेषां वचसा वचनेन सह युक्तमविरुद्ध तदेवसमाचरेत् कुर्यात् न त्वन्यत् ॥३२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तर्हि 'यद्यदाचरति श्रेष्ठः' इति न्यायेनान्योऽप्येवं कुर्यादित्याशङ्क्याह ॥ नैतदिति ॥ एतत् तेजीयसा यदशास्त्रवश्यत्वेनाचरितं तत्, अनीश्वरः शास्त्रवश्यः, जातु कदाचिदपि, मनसापि नाचरेत् चिकीर्षामपि न कुर्यादित्यर्थः। हि विपर्यये बाधकमप्याह। विनश्यतीति। मौढ्यात् स्वस्य शास्त्रवश्यत्वाज्ञानात्, तत् प्रतिषिद्धं, आचरन् विनश्यति आशु प्रणश्यति। नाशोऽत्र निरयप्राप्तिः। तत्र दृष्टान्तः। यथेति। रुद्रः शिवः, यथा अब्धिजं समुद्रोत्पन्नं, विषं गरलं, आचरदभक्षयत्। तथाऽन्या भक्षयन्नाशु नश्यति। रुद्रस्य विषपानप्रयुक्तप्राणविपत्त्यनापादकशक्तिमत्त्वं स्वस्य तदभावं चाजानन् रुद्रो यथाभक्षितवांस्तथाहमपि भक्षयिष्यामीति मौढ्याद्यो भक्षयति स नश्यत्येवेत्यर्थः ॥ ३१ ॥ कथं तर्हि श्रेष्ठाचारस्य प्रामाण्यमित्याशङ्क्य न कार्त्स्न्येन श्रेष्ठाचारः प्रमाणं, किं तु स शास्त्राविरोध्येव। श्रेष्ठवचस्तु कार्त्स्न्येन प्रमाणमित्याह ॥ ईश्वराणामिति ॥ ईश्वराणां कर्मवश्यत्वाभावप्रयुक्तशास्त्रवश्यताऽभाववतां, वचः एवं कुर्वेवं मा कुरु इत्येवंरूपं वचनं, सत्यं कार्त्स्न्येनाबाधितं, प्रमाणमिति यावत्। तथैव आचरित तु, क्वचिदेव प्रमाणं, किं तदाचरितं यत प्रमाणमित्यत्राह। तेषामीश्वराणां, यत आचरितं, स्ववचोयुक्तं स्ववचसोऽविरुद्धं भवेत्, तत् ईश्वराणामाचरितं, बुद्धिमान् समाचरेत् यथा वचस्तथैवाचरितमपि स्याच्चेत्तदा ग्राह्यमेव, न तु वचसा विरुद्धमिति, वचस एव बलवत्तरत्वमित्यर्थः ।३२।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नैतत्समाचरेदिति : १०.३३.३१.

येषां कर्तुमकर्तुमन्यथयितुं जागर्ति शक्तिः सतां तेषां गेयमघापहरि चरितं कार्यं न जातु स्वतः।
श्रेयः काङ्क्षिभिरादरादिह यतः स्वार्थे स्वतन्त्रा हि ते तस्मात्तद्वचनोक्तमुक्तवचनोपेतं च कुर्यात्कृती ॥ १६३ ॥

कृष्णप्रिया

जो व्यक्ति सर्वसमर्थ ईश्वर नहीं है उनके लिए उचित है कि वे ईश्वर के किए हुए आचरणों का कभी भी मन से आचरण न करें। राजन् ? महासागर के मन्थन समय उत्पन्न हुए विष का भगवान् खुद के सिवाय अन्य कोई पान करे तो नष्ट हो जाय वैसे ईश्वर विना अन्य कोई जन ईश्वर साध्य कर्म का मूढता से आचरण करेगा तो वह नाश ही हो जायगा ।।३१।। ईश्वरों के वचन सत्य-तथ्य है वैसे उनके चरित्र कहाँ कहाँ आचरणीय होते हैं सर्वत्र अनुकरणीय नहीं है। बुद्धिमान पुरुष के लिए उचित है कि जो कार्य समझ में आवे वैसे कार्य करें ॥ ३२ ॥

कुशलाचरितेनैषामिह [1]स्वार्थो न विद्यते। विपर्ययेण वानर्थो निरहङ्कारिणां प्रभो ॥ ३३ ॥
किमुताखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसाम्। ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥ ३४ ॥
यत्पादपङ्कजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबन्धाः।
स्वैरं चरन्ति मुनयोऽपि न नह्यमानास्तस्येच्छयाऽऽत्तवपुषः कुत एव बन्धः ॥ ३५ ॥

कर्दमक्षमा

अन्वयः—प्रभो! इह, निरहङ्कारिणाम्, एषाम्, कुशलाचरितेन, स्वार्थः, न, (विधते) च, विपर्ययेण, कश्चित्, अनर्थः, न, वर्तते ॥ ३३ ॥ अखिलसत्वानम्, च, तिर्यङ्मर्त्यदिवौकसाम्, च ईशितव्यानाम्, कुशलान्वयः, नास्ति, इति, किमुत (वक्तव्यम् ?) ॥ ३४ ॥ यत्पादपङ्कजपरागनिषेवतृप्ताः, योगप्रभावविधुताखिलकर्मबन्धाः, मुनयःस्वरम्, चरन्ति, (किन्तु) नह्यमानाः, (भवन्ति) (तर्हि) इच्छया, आप्तवपुषः, कुतः, एव, बन्धः, अस्ति ॥ ३५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु तर्हि तेऽपि किमेवं साहसमाचरन्ति तत्राह। कुशलेति। प्रारब्धकर्मक्षपणमात्रमेव तेषां कृत्यं नान्यदित्यर्थः ॥ ३३ ॥ प्रस्तुतमाह। किमुतेति। कुशलाकुशलान्वयो न विद्यत इति किं पुनर्वक्तव्यमित्यर्थः ॥ ३४ ॥ एतदेव स्फुटीकरोति। यस्य पादपङ्कजपरागस्य निषेवो निषेवणं तेन तृप्ताः। यद्वा। यस्य पादपंकजपरागे निषेवा नितरां सेवा येषां ते तथा ते च ते तृप्ताश्चेति भक्ता इत्यर्थः। तथा ज्ञानिनश्च न नह्यमाना बन्धनमप्राप्तवन्तः ॥ ३५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनरीश्वरेष्वाक्षिपति—नन्विति। तेऽपि ईश्वरा अपि। तत्र ईश्वरसाहसे। तेषाम् ईश्वराणाम्। ईश्वरशब्दार्थस्तूक्त एव। इत्यर्थ इति—प्रारब्धप्रतीक्षका एव विद्वांसो न तु कर्मासक्ताः किंचित्कुर्वंतीत्याशयः। श्लोकार्थस्तु-कुशलानां तपोदानयज्ञादीनामाचरितेन करणेनार्थः प्रयोजनं स्वर्गादिसुखं नास्ति। विपर्ययेण परस्त्रीसंगसुरापानादिनाऽनर्थो नरकादिलक्षणो न। निरहङ्कारिणामिति हेतुगर्भं विशेषणम्, निरहंकारित्वादित्यर्थः। अहंकारः कर्मस्वासक्तिः स एव बन्धकारणम्, तेषामनासक्तत्वाद्बन्धो नास्तीत्याशयः ॥ ३३ ॥ प्रस्तुतम् प्रकृतम्। तिर्यङ्मर्त्यदिवौकसाम् पशुपक्ष्यादिनरदेवानां सर्वेषामीशितव्यानां नियम्यानाम्। ईशितुः नियामकस्य। कुशलाकुशलान्वयः पुण्यपापफललेपः इत्यर्थ इति–यदि तत्कृपाकटाक्षावाप्तज्ञाननिर्गताहकाराणां कुशलाकुशलफलसम्बन्धो न तर्हि सर्वनियन्तुर्भगवतः कथं स भवेदित्यर्थः ॥ प्रस्तुतमाह–किमुतेति ॥ ३४ ॥ एतदेव कैमुत्यमेव। स्फुटीकरोति प्रकटयति। "तस्य ते पादसंस्पर्शो मम भूयादहर्निशम" इत्याद्युक्तेर्भगवत्सेवायां पशुमृते तृप्तेरश्रवणादस्वारस्यादर्थान्तरमाह—यद्वेति। ते च तृप्ता हरिसेवामृतेऽन्यविषयेषु प्राप्तालंबुद्धयः। इत्यर्थ इति–"अतृप्नुमः क्षुल्लसुखावहानामृते वयं कृष्णकथामृतौघात्" इत्याद्युक्तेरित्यर्थः। मुनयो मननशीला ज्ञानिनश्च। तथा भक्तवत्। बंधनम् पुत्रादिषु स्नेहादिरूप कर्मजन्यं वा। स्वैरं निर्बन्धाः। इच्छया निजया भक्तानां वा। स्वीकृतमूर्तेस्तस्य श्रीकृष्णस्य बंधहेत्वासक्त्यादेरभावाद्बन्धशङ्कैव नोदेतीत्यर्थः ॥ तद्भक्ता अपि धर्माधर्माभ्यां न बध्यन्तेऽतः–यदिति। निसेवो नितरां सेवनं, योगो भक्तियोगस्तत्प्रभावेण विधुतोऽखिलानां स्वद्रष्ट्णामपि कर्मबन्धः किमुत स्वस्य, यैस्ते मुनयो मननशीला भक्ता अपि न नह्यमाना बन्धनमप्राप्नुवन्तः, तस्य तु निरङ्कुशया स्वेच्छयाऽऽत्तानि स्वीकृतानि वपूंषि परस्त्रीशरीराणि येन तस्य ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

चकारादमुत्रापि वा शब्दःसमुच्चये अनर्थोऽपि नास्ति कुतः निरहङ्कारिणाम् अंहकारिभ्यो व्यतिरिक्तानाम् अंहकाराभावेन कर्मभिरलेपादित्यर्थः। प्रभो हे बाद्धुं समर्थ। यद्वा तस्यापीश्वरत्वाभिप्रायेण सम्बोधयति हे ईश्वरेति ॥३३॥ अहो यद्येव तेषामपि

---

१. चार्थो–वीर. ; विज.। २. मेष–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. शु. रा.।

निरहङ्कारतामात्रेणैवानर्थाभावस्तर्हि तेषामपि हितार्थमवतीर्णस्य परमेश्वरस्य कुतोऽनर्थशङ्कापीति कैमुतिकन्यायेन द्रढयन्नाह । किमुतेति । अखिलसत्त्वानां तिर्यगादयः क्रमेण तामसराजससात्त्विकाः ईशितव्यानां स्वभावत एव नियम्यानामिति मुक्तानामपि तदधीनता च सूचिता । त्वर्थे चकारः । ईशितव्यानां कुशलाकुशलाभ्यां पुण्यपापाभ्यां योऽन्वयः सम्पर्कः स किमुत सुतरामेव व विद्यते इति पूर्वेणान्वयः । सर्वनियन्तृत्वेन नियामकाभावात् । एतदेव हि परमेश्वरत्वं नामेति भावः । "बलवत् सुष्ठु किमुत स्वत्यतीव च निर्भरे" इत्यमरः ॥ ३४ ॥ तदेव कैमुत्यान्तरेण स्फुटं दर्शयति । यदिति । यत्तदोरन्वयाद्योगप्रभावेत्यादेरपि तदन्तः प्रवेशाद्यदिति यस्येत्यर्थः । सुब्लुक् छान्दसः । यद्यस्य पादपङ्कजयोः परागाणां कान्तिपरमाणूनां नितरां सेवनेन ध्यानरूपेणानुशीलनेन तृप्ताः अन्यत्रालंबुद्धयः तत् प्रेमपूर्णा इत्यर्थः । यस्यैव योगप्रभावेण भक्तियोगाख्यसाधनतेजसा विधूताखिलकर्मबन्धा ये ते चापि मुनयः स्वैरं स्वच्छन्दं यथा स्यात्तथा चरन्ति विहितमविहितमपि कुर्वन्ति तत्र नह्यमानाश्च न भवन्ति तस्मात्तस्य कुत एव बन्धः । अपि तु नास्त्येव बन्ध इत्यर्थः । तदेव कैमुत्येन दर्शयित्वा विशेषणविशेषादपि तस्य बन्धाभावं दर्शयति । इच्छयेति । इच्छया इच्छामात्रेण नतु जीववत् कर्मपारवश्येनात्तं तद्भक्तिसम्बन्धात् प्रपञ्चेऽप्यानीतं वपुर्येन तस्येति । अतो भक्तविशेषानुग्रहस्य दुर्वाससः पराभावनात् क्वचिन्मर्यादामप्यसौ लङ्घयतीति भावः ॥ ३५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कुशलं पुण्यं तस्याचरितेनानुष्ठानेन, एषामीश्वराणाम्; चकारादमुत्रापि; अर्थः फलम्, विपर्य्ययेण पापेनेत्यर्थः । वा-शब्दः समुच्चये । अनर्थोऽपि नास्ति । कुतः ? निरहंकारिणामहंकारिभ्यो व्यतिरिक्तानामहंकाराभावेन कर्म्मभिरलेपादित्यर्थः । प्रभो हे बाढ्धुं समर्थ ! एतत्त्वया सम्यग् बुध्यत एवेत्यर्थः । यद्वा, तस्यापीश्वरत्वाभिप्रायेण सम्बोधयति – हे ईश्वरेति ॥ ३३ ॥ अहो यद्येवं तेषामपि निरहंकारितामात्रेणैवानर्थाभावस्तर्हि सर्व्वजीवहितार्थमवतीर्णस्य परमेश्वरस्य कुतोऽनर्थशंकापीति कैमुतिक-न्यायेन द्रढयन्नाह—किमुतेति । अखिलसत्त्वानां सर्व्वजीवानाम्, तिर्य्यगादयः क्रमेण तामस-राजस-सात्त्विकाः; 'ईशितव्यानाम्' इति स्वभावत एव नियम्यानामित्यर्थः; इति मुक्तानामपि तदधीनता ध्वनिता; कुशलाकुशले पुण्यपापे ताभ्यामन्वयः सम्पर्कः, सर्व्वनियन्तृत्वेन तस्य नियामकाभावात् परमस्वतन्त्रत्वाच्च । एतदेव हि परमेश्वरत्वं नामेति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, ईशितव्यानां तद्भक्तानाञ्च किमुतेति ॥ ३४ ॥ परागेति—अतिनम्रत्वेन सेवया भक्तिविशेषो दर्शितः । नितरां सेवेति नि-शब्दः स्वभावत एव तेषां सेवासक्त्यभिप्रायेण । यद्वा, परागेति दूरसेवाभिप्रेता, 'नि'–शब्देन च स्वल्पमात्रसेवोक्ता, तथापि तन्माहात्म्येन दृप्ता निर्भयत्वादिदर्पयुक्ताः, अतएव स्वैरं चरन्ति विधिनिषेधानादरेण स्वच्छयैव कर्म्माणि कुर्व्वते, यतो न नह्यमानास्तैरवध्य-मानास्तत्रानासक्ताः । 'तृप्ताः' इति पाठे ततोऽन्यत्र सन्तुष्टा अनन्यापेक्ष्या इत्यर्थः; किञ्च, योगोऽष्टाङ्गः, समाधिर्ज्ञानं वा तस्य प्रभावेण शक्त्या विशेषतो धूतश्छिन्नः, कर्म्मभिरनन्तकोटिजन्मार्ज्जितैर्बन्धो बन्धनं तद्रूपो वा बन्धो यैस्ते मुनयोऽपि; 'अपि'–शब्देन भक्तेभ्यो मुनीनां न्यूनतोक्ता; अनेनैव श्रेष्ठ्याभिप्रायेण दृप्ता इत्युक्तम् । इच्छया स्वच्छन्देनैवात्तं प्रकटितं वपुर्येन तस्येति परम-स्वातन्त्र्यं दर्शितम् । यद्वा, निजप्रेमभक्तिविस्तारणेच्छया, ततश्च तदपेक्षया विधिनिषेधानादरो युक्त एवेति भावः । यद्वा, भक्ताना-मिच्छया आत्तानि वपूंषि मत्स्यकूर्म्मादिमूर्त्तयो येनेत्यवतारित्वेन परमैश्वर्य्यमुक्तम् । अतः कुत एव बन्धः ? अपि तु न कथमपि स्यादित्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, योगो भक्तियोगः; मुनयोऽपि, किमुत प्रथमत एव भक्तिमन्त इत्यर्थः । अथवा किं वक्तव्यम्, भक्ता इति योगिनोऽपि; किं वक्तव्यम्, योगिन इति कर्म्मपरा अपीत्येवं त्रिविधा अपि ज्ञेयाः, अत्र मुनीनां प्रायो गार्हस्थ्येन कर्म्मपरत्वम्, तथापि स्वैराचरणं ज्ञानित्वादेव । ततश्च ज्ञानिन एव द्विविधाः—केचिद्योगपराः, केचित् कर्म्मपरा इति; एवं यथोत्तरमेषां न्यूनत्वम्; अन्यत् समानम्, अप्यर्थे चकारः । किं वक्तव्यं प्रियत्वेन तेषां तासां चेति सर्व्वेषामपि तत्र संशय-निरासार्थमेव-शब्दः ॥ ३५ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कर्मवश्यानामपि तेजोविशेषात्प्रत्यवायहानिरुक्ता अपहतपाप्मन ईश्वरस्य किम्पुनरित्याह । किमुताखिलेति ॥ ३४-३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तेजीयसां न दोषायेत्येतदेव स्पष्टयति । कुशलेति । एषां तेजीयसामीश्वराणामिह लोके कुशलाचरितेन साधनेनार्थः । साध्यं प्रयोजनं न विद्यते नापि विपर्ययेणाकुशलाचरितेनानार्थोऽपि विद्यते तत्र हेतुं वदन्विशिनष्टि । निरहङ्कारिणामिति । अनात्मनि देहे आत्माभिमानरहितानामित्यर्थः । हे प्रभो ! देहाभिमानो हि पूर्वपूर्वकर्ममूलकः पुनरुत्तरोत्तरकर्ममूलश्च तदभावात्कर्मवश्यत्वाभाव-स्तदभावाच्च धर्माधर्ममूलकावर्थानर्थौ न स्त इति भावः ॥३३॥ यतोऽकर्मवश्यानां जीवानामेव कुशलाकुशलाचारनिमित्तकावर्थानर्थौ न स्तः इति भावः ॥३४॥ यतोऽकर्मवश्यानां जीवानामेव कुशलाकुशलाचारनिमित्तकावर्थानर्थौ न स्तः किम्पुनस्तेषामपि नियन्तुरपहत-पाप्मनो भगवत इत्याह । किमुतेति । तिर्यगादिरूपेणावस्थितानामखिलानां सत्त्वानां जीवानां नियम्यानां नियन्तुः सर्वेश्वरस्य कुशलाकुशलान्वयो नास्तीति किमु वक्तव्यमित्यर्थः । कुशलाकुशलकर्मप्रयुक्तसुखदुःखादिसम्बन्धोऽत्र कुशलाकुशलान्वयशब्दविवक्षितः

सत्त्वशब्दो जीवपरः सत्त्वमस्त्री तु जन्तुष्विति कोशात् जन्तुशब्दश्च जीवपर्यायः "प्राणीतुचेतनोजन्मी जन्तुर्जन्युशरीरिण"इति नामपाठात् सत्त्वंकृतिजंमुक्तमिति श्रीभगवदुक्तेश्च ॥ ३४ ॥ कैमुत्यनयेनोक्तमेव प्रपञ्चयति। यत्पादेति। यस्य पादपङ्कजपरागस्य निषेवणेन तृप्ताः निर्वृतशब्दादिविषयाभिलाषाः योगप्रभावेण यस्य पादपङ्कजानुध्यानात्मकयोगसामर्थ्येन विधुता अखिलाः कर्मात्मका बन्धा येषां ते मुनयः सनकादयोऽपि न नह्यमाना अनह्यमाना अवध्यमानाः शास्त्रावश्या इतियावत् स्वैरं यथेच्छं चरन्ति किमुतेच्छया नतु कर्मणेति भावः। आत्तं परिगृहीतं वपुरप्राकृतं शुद्धसत्त्वमयं येन तस्यापहतपाप्मनः श्रीभगवतः कुत एव बन्धः कुतश्चिदप्याचरितात्स्वैराद्बन्धो नास्त्येवेत्यर्थः ॥ ३५ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

इतोऽपि शुष्कजलनारिकेलफलवन्निर्मुक्तशरीराभिमानानां दूरीकृतकुशलानां फलवत्त्वाद्धर्मव्यतिक्रमो न दोषायेत्याशयेनाह। कुशलेति। इह संसारमण्डले अर्थः प्रयोजनं प्रारब्धकर्मनाशेनापातकदेहत्वादभीष्टत्वाच्च। विपर्ययाचरणेनानर्थो नरकपातादिलक्षणः। अत्र हेतुमाह। निरहङ्कारिणामिति ॥ ३३ ॥ उपसंहरति। किमुतेति। अखिलसत्त्वानां समस्तप्राणिनामित्यस्य विवरणं तिर्यङ्मर्त्येत्यादिना ईशितव्यानां नियम्यानाम् ईशितुर्नियामकस्य चः समुच्चये ईशितव्यानामचेतनानाञ्च कुशलाकुशलान्वयः पुण्यपापफललेपः किमुत ॥ ३४ ॥ कथान्तरात् कैमुत्वन्यायं दर्शयति। यत्पादेति। भक्तियोगप्रभावेण विधुतो विध्वस्तोऽखिलबन्धो येषां ते तथा न नह्यमाना अतएव पुत्रस्नेहेन बध्यमाना न भवन्ति कर्मभिर्वा ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

निरहङ्कारिणामनावेशिनां तथापि तत्तत्करणं प्रारब्धवशादेवेति भावः ॥ ३३ ॥ ईशितव्यानां कुशलाकुशलाभ्यां पुण्यपापाभ्यां योऽन्वयः सम्पर्कः स पुनरीशितुर्न विद्यत इति किमुत सुतरामेव नेति पूर्वेणान्वयः। "वलवत् सुष्ठु किमुत स्वत्यतीव च निर्भर" इत्यमरः ॥ ३४ ॥ योगप्रभावेति ज्ञानिनोऽप्युक्ताः ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अन्यच्च ईश्वरमात्रस्यैव रुद्रादेः स्वातन्त्र्याद् भद्राभद्रकरणेऽर्थानर्थौ न स्तः, निरहङ्कारत्वात्। ईश्वरेश्वरस्यास्य तु किमित्याह—कुशलाचरितैरित्यादि द्वाभ्याम्। एषामीश्वराणां रुद्रादीनां कुशलाचरितैः पुण्यकर्मभिरिह लोके अर्थ इष्टसिद्धिर्न विद्यते, विपर्ययेणाकुशलाचरितैरनर्थोऽनिष्टोत्पत्तिश्च न विद्यते। तत्र हेतुः—निरहङ्कारिणाम् ॥ ३३ ॥ अस्य तु सर्वेश्वरेश्वरस्य पुनः किमुतेत्याह—किमुत किं पुनरस्य ईशितुः सर्वेश्वरेश्वरस्य ईशितव्यानां लीलानां कुशलाकुशलान्वयो भद्राभद्रव्यवस्था सर्वैव लीला कुशलरूपा इत्यर्थः—सर्वमङ्गलमङ्गलचरितत्वादिति तु सिद्धान्तः। न तु गोपाङ्गनापरस्य धर्मव्यतिक्रमस्य दोषोद्धारपन्थाः, अयन्तु धर्मव्यतिक्रम एव न; गोपीनां स्वानन्दशक्तित्वात्तदङ्गसङ्गस्तस्य स्वारसिक एव ॥ ३४ ॥ यदि वासौ कर्तुमकर्तुमन्यथाकर्तुं समर्थतया लोकवेदातीतचेष्ट एव भवति, तदपि किं तेनास्येति भगवन्महिमानमाविष्टं सन् कथयति—यत्पादपङ्कजेत्यादि। योगप्रभावविधूताखिलबन्धा अपि यत्पादपङ्कजपरागनिषेवणतृप्ताः सन्तः स्वैरं चरन्ति लोकवेदातीताः सन्तो विचरन्ति शुभाशुभकर्मभ्यां न नह्यमाना न बध्यमानाः। मुनयः कीदृशाः? आत्तवपुषो मोक्षनैरपेक्ष्येण भजनानन्दाद्गृहीतदेहाः,—'मुक्ता अपि लीलया विग्रहं कृत्वा भगवन्तं भजन्ते' इत्युक्तेः। तस्य श्रीकृष्णस्य कुत एव बन्धः? यच्चरणसेवा बन्धच्छेदिका, तस्य स्वच्छन्दाचरणेन कुतो बन्ध इति ॥ ३५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कथमीश्वरः स्वातन्त्र्यं करोति? सत्यम् स्वतन्त्रस्य नियन्तुमशक्यत्वात् लीलैवेयमिति दर्शयति कुशलाचरिते नैषामित्यादि। एषामीश्वराणां रुद्रादीनां कुशलाचरितैरित्यर्थः। विपर्ययेण विरुद्धाचरणेनानर्थः, उभयमेव न विद्यते यतो निरहङ्कारिणामहं करोमीत्यहम्भावरहितानाम्, अहम्भाव एव लिप्ततायां हेतुः। प्रभो इति साक्रोशसम्बोधनम्। एतावद्भिर्महिमभिः श्रुतैरपि तत्र पूर्वपक्षः क्रियते अहोऽति प्रभुत्वमिति ॥ ३३ ॥ यदुक्तमिदं तत् सर्वमीश्वरत्व–सामान्यवतामेव किमुत ईश्वरेश्वरस्य श्रीकृष्णस्येत्याह—किमुतेत्यादि। अखिलसत्त्वानां ब्रह्मादीनां स्तन्वान्तानामीशितव्यानां व्याप्यानामीशितुर्व्यापकस्य सर्वेश्वरेश्वरस्य सर्वकारणकारणस्य श्रीकृष्णस्य कुशलाकुशलाचरणेनार्थानर्थौ–अयन्तु सिद्धान्तः ॥ ३४ ॥ किन्तु नैतत् पारदार्यं तस्येत्याह–यदिति। यद् यस्मात् या गोप्य इत्यध्याहार्यं तस्य श्रीकृष्णस्येच्छया आत्तवपुषो गृहीतदेहाः, वस्तुतस्तु ताः श्रीकृष्णस्य स्वानन्दशक्तयः, आसां गोपवधूत्वं तन्नाट्यम्, अतः कुत एव बन्धः, बन्धहेतवस्ता न भवन्तीत्यर्थः। आत्तवपुषः—सत्यः किं कुर्वन्ति? तत्राह—यत्पादपङ्कज–परागस्य पादपङ्कजलग्नस्य स्वकुचकुङ्कुमरजसो विषेवे तृप्ताः, निषेवणं निषेवो निस्यूत भावः, योगः श्रीकृष्णाङ्गसंयोगस्तत्प्रभावेण विधूता अखिलकर्मबन्धा यासाम् अतस्तयाभूताः यद्वा, योगप्रभावविधूताखिलकर्मबन्धा इति मुनिविशेषणम, स्वैरमकुतोभयत्वेन स्वप्रकाशतया स्वाच्छन्द्येन वा चरन्ति, न खलु गोपदारत्वेन। यथा मुनयो योगिनः। यतस्तेऽपि नह्यमाना बध्यमाना अर्थात् प्रारब्धकर्मणा, एतास्तु न तथा अतोऽभूः परदारा एव न भवन्ति ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रस्तुतमाह्। किमुतेति ॥ ३४ ॥ तद्भक्ता अपि धर्माधर्माभ्यां न बध्यन्त इत्याह्। यदिति। निषेवो नितरां सेवनम्। योगो भक्तियोगस्तत्प्रभावेण विधुताऽखिलानां स्वद्रष्टॄणामपि कर्मबन्धः, किमुत स्वस्य यैस्ते मुनयो मननशीला भक्ता अपि न नह्यमानाः बन्धनमप्राप्नुवन्तः। तस्य तु निरंकुशया स्वेच्छयैव आत्तानि स्वीकृतानि वपूंषि परस्त्रीशरीराणि येन तस्य ॥ ३५ ॥

रसिकाह्लादिनी–टीका

ननु यथान्यस्मै ते कथयन्ति तथा स्वयमपि किमिति नाचरन्तीति चेत्तत्राह् कुशलेति, एषामीश्वरणां कुशलाचरिते इह लोके कश्चन स्वार्थो न विद्यते स्वत एवानन्दपूर्णत्वात् विपर्य्येणाकुशलाचरितेनानर्थोऽपि न विद्यते यतो निरहङ्कारिणां साहङ्कारस्येदं विधिनिषेधिबोधकवेदनियम्यत्वं नान्यस्येतिभावः। यथा विहितकर्मणो इष्टाभावस्तथा निषिद्धकर्मणाऽनिष्टाभाव इति। कुशलाकुशलयोः कर्तृत्वाभिमानशून्यानां कर्मभिर्लेपो न शङ्कनीय इति भावः। हे प्रभो स्वमनसि बोद्धुं समर्थेति। यद्वा श्रीकृष्णस्य सर्वयोगविलक्षणज्ञापनार्थं सम्बोधनं हे प्रभो इति ॥ ३३ ॥ ननु यदि ज्ञानसहकृतेनाहङ्काराभावमात्रेण निष्ठाभावस्तदा ऐश्वर्य्यसहकृतेनाहङ्काराभावेन लीलास्वभावस्य कलितलोकहितार्थायावतीर्णम्य केयमनर्थशङ्कापीति कैमुत्यन्यायेनाऽह् किमुतेति, अखिलसत्वानां कीटानां तर्य्यङ्मर्त्यदिवौकसां तामसराजससात्विकानां ईशितव्यानां नियम्यानां तत्तदधिकाराधिकृतानां ईश्वराज्ञयाऽन्यनियामकत्वमुक्तं पार्षदानां कुशलाकुशलान्वयो नेति। तथा चोक्तं अकुशलान्वयोऽपि अजामिलप्रसङ्गे पार्षदैरेव निर्णयकृतः। परमेश्वरस्यान्यनियम्यत्वाभावात्। कुशलाकुशलान्वयः पुण्यपापसम्बन्धः किमुतेति न शङ्कनीय इत्यर्थः ॥ ३४ ॥ इदमेवार्थं कैमुत्यविवरणेन स्फुटयति यस्य पादपङ्कजयोः परागस्तस्य निषेवः निशब्देन व्यवधानेनोपासनमुक्तं तेन तृप्तास्तदिरत्र हेयबुद्धयः, सेवा भजनं भक्तिरिति पर्य्यायः। श्रवणकीर्त्तनान्युत्तमनिष्ठा भक्ता इति यावत् भक्तिसुखनिर्भरतया तद्विश्वासेन च स्वैरं चरन्ति विधिनिषेधानादरेण स्वेच्छयैव कर्माणि कुर्वन्ति न तु भक्तिविरुद्धानि यथा नारदादय इति तदुक्तं पाद्मे "न कर्म बन्धनं जन्म वैष्णवानां च विद्यते"। एकादशेऽपि तदुक्तं "देवर्षि–भूताप्तनृणां पितृणां न किङ्करो नायमृणी च राजन्। सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्तमिति" अत एव न नह्यमानाः स्वेच्छाकृतैः कर्म भरवध्यमानाः कस्याप्यऽनियम्याः सन्तश्चरन्ति। कीदृशाः योगो भक्तियोगस्तत् प्रभावेनासाधारणशक्तिवैभवेन विधुतः विशेषेण सवासनी धुतः च्छिन्नः अखिलानां कूटवीजप्रारब्धानां कोटिमत्रैव। "स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः। विकर्म यच्चोत्पतितं कथञ्चिद्धुनोति सर्वं हृदि सन्निविष्टः" इति। अथवा मुनयोऽपि सनकादयः स्वैच्छया चरन्ति अपि नार्थस्तु गौणो क्रियते। कीदृशाः योगोऽष्टाङ्गः ज्ञानयोगो वा तस्य प्रभावेन विधुतो विनष्टः अखिलकर्मबन्धो येषां ते। तदुक्तं "ज्ञानाग्निः सवकर्माणि भस्मसात्कुरुतेऽर्जुनेति"! तस्येति अन्यत्रातीवस्वातन्त्र्येण वर्तमानस्य इच्छयाअन्या नियम्यत्वेन, यद्वा भक्तानामिच्छया आत्तानि वपूंषि मत्स्यादिरूपाणि येन तदुक्तं "यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहायेति"। मत्स्यादीनामवताराणां तादृशेनैश्वर्य्यपुरस्कृतं चेत् स्वातन्त्र्यं तर्हि निरङ्कुशमहिम्नः परमावधिभूतस्यावतारिणः श्रीकृष्णस्योच्चावचैः कर्मभिः कुतो बन्धः। परमकैमुत्योक्तिः पामराणां संशयदूरीकरणार्थमेव शब्दः। यत्पादपङ्कजेति समान्यतो भक्तानां कम–बन्धाभावश्चेत्तर्हि श्रीकृष्णजीवातुभूतानां तत् प्रियाणां कथं सङ्केति भावः ॥ ३५ ॥

विशुद्धरसदीपिका

तत्र हेतुमाह। कुशलेति। निरिति अहङ्काराभावेन कर्मभिरलेपादित्यर्थः—

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमांल्लोकान्न हन्ति न निवध्यत इति ॥

श्रीगीताभ्यः प्रभो! बोद्धुं समर्थ! यद्वा तस्यापीश्वरत्वाभिप्रायेण सम्बोधयन्नाह। हे ईश्वर अहमादिविवर्जयन्नित्यर्थः ॥ ३३ ॥ एतदेव कैमुत्येन द्रढयति। किमिति। तिर्य्यगादयः क्रमेण तामसराजससात्त्विकाः ईशितव्यानां स्वभावत एव नियम्यानामति मुक्तानामपि तदधीनता सूचिता कैवल्यं सात्त्विकं ज्ञानमिति तस्यापि तदन्तः पातात् कुशलाऽकुशले पुण्यपापे अन्वयः सम्पर्कः, किमुत सुतरामेव नेत्यर्थः। सर्वनियन्तृत्वेन नियामकाभावात् एतदेवेश्वरत्वमित्यर्थः। "वलवत्सुष्ठु किमुत स्वत्यतीवच निर्भर" इत्यमरः ॥ ३४ ॥ अपि च यदिति। पादशब्देन गतिसाधनमुच्यते तच्च भगवतो गुणानुवाद एव आहूत इव मे शीघ्रं दर्शनं याति चेतसीति श्रीनारदानुभवति तत्परागश्च तदर्थः। पङ्कजत्वेन निरूपणात् तस्य निषेवणं श्रवणकीर्तनादिद्वारा तदास्वादस्तेन तृप्ताः अन्यत्रालंबुद्धयः तदेकरुचिविश्वासा भक्ता इत्यर्थः। स्वैरं तन्मात्रापेक्षत्वेनैहिकामुत्रिकसुखदुःखयोरागद्वेषाभावादनादृततत्तन्मर्य्यादं यथा स्यात्तथा चरन्ति तेन च नह्यमानाः वध्यमाना न भवन्ति। आस्ताममीषां वार्ता मुनयो ज्ञानिनोऽपि न नह्यन्ति किमुतैत इत्यर्थः। उभयत्र हेतुगर्भं विशेषणं योगेति। पूर्वत्र योगो भक्तियोगः उत्तरत्र ज्ञानयोगः विधूताखिलेति पूर्वावस्थाया अपि कमबन्धस्य त्याजकत्वेन नाशमङ्गीकृत्य तदवस्थायास्तु सुतरामङ्गीकृतम् इच्छयेति स्वच्छन्देनैवात्तं प्रपञ्च प्रवर्त्तिते

प्रकटितं वपुः श्रीविग्रहो येन तस्येति परमस्वातन्त्र्यं दर्शितम् । यद्वा निजप्रेमभक्तिरवस्तारणेच्छया ततश्च विधिनिषेधानादरो युक्त एवेति भावः । यद्वा भक्तानामिच्छया आत्तानि वपूषि पुरुषविष्णुमत्स्यादिरूप येनेति पारमैश्वर्य्यमुक्तं कुत एव नास्त्येवेत्यर्थः ॥३५॥

श्रीरामनारायणकृता भावभावविभाविका

ऐश्वर्येण धर्मव्यतिक्रमदोषाभिभवाद्दोषाभावमीश्वरानुग्रहाल्लब्धैश्वर्य्याणां दर्शयित्वा एषामेव तदनुग्रहाल्लब्धबोधानां सर्वकर्माश्लेषं सनिमित्तमाह । कुशलाचरितेनेति । एषामेव परमेश्वरानुग्रहलब्धबोधानां तज्ज्ञापकमाह । निरहङ्कारिणामिति । ज्ञानमहिम्नाऽज्ञानबाधे तत्कृताहङ्काराद्यध्यासशून्यानां कुशलाचरितेनेह संसारे कश्चिदर्थो न विद्यते विपर्ययेण पापाचरणेनानर्थो न विद्यते "नैनं कृताकृते पुण्यपापे तापयतः किमहं साधुनाकरवं किमहं पापमकरवं तत्सुकृतदुष्कृते विधूनुते यथा पुष्करपलाशे आपो नश्लिष्यन्ते एवमेव विदि पापं कर्म न श्लिष्यते—

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा यस्य नाहं कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांल्लोकान्न हन्ति न निबध्यते ॥

समाहितैः किङ्करणैर्गुणात्मभिर्गुणोभवेन्मत्सु विविक्तधाम्नः । विक्षिप्यमाणैरुतकिन्नुदूषणं घनैरुपेतैर्विगतै रवेः किम् । दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते । गुणबुद्ध्याच विहितं न करोति । यथार्भकः तत्पूर्वोत्तराघयोरश्लेषविनाशौ तद्दर्शना"दित्यादिश्रुतिसूत्रैः संचितागामिकर्मणां विनाशाश्लेषप्रतिपादनात् प्रारब्धसुखदुःखोपभोगस्य च बाधितानात्मदेहादिसंघातपर्य्यवसायित्वात् ॥ ३३ ॥ एवं तदनुग्रहप्राप्तैश्वर्य्यबोधयोः प्रभावमुक्त्वा तत्र कैमुत्यन्यायेनादोषतामाह । किमुतेति । यद्येवं तदेशितव्यानामखिलसत्त्वानां तिर्य्यङ्मर्त्यदिवौकसां तमोरजःसत्त्वप्रकृतीनां तत्र तिरश्चां तत्प्रेरिततमसैव बौद्धा समर्थः फलार्थी चाधिकारीत्यधिकारलक्षणगतबोधसामर्थ्ययोरभावादनधिकारतया न कुशलाकुशलान्वयः मर्त्यानां शास्त्राधिकारत्वेऽपि तत्कृपालब्धबोधानामुक्तप्रकारेण बोधमहिम्नैवाधिकारलक्षणफलार्थित्वाभावेन तस्य कार्य्यं न विद्यते इत्यादिनाधिकाराभावेन सकारणक्रियाकारकफलबाधेनच न कुशलाकुशलान्वयः दिवौकसां तत्प्ररितैश्वर्य्याणां तत्पराभूतदोषत्वेन न तदन्वयः, तर्हि तदीशितुः कुशलाकुशलान्वयो नेति किमुत वक्तव्यम् ॥ ३४ ॥ नन्वीशितव्यानामधिकाराभावात्कारकादिबाधाच्च कर्म्मानन्वयो दृष्ट ईशितुस्तु बोधसामर्थ्ययोः सत्त्वात् देहसम्बन्धे सति कारकाबाधात् फलार्थित्वस्यापि सम्भावयितुं शक्यत्वाद्भवतु कर्मबन्धस्तत्र पुनः कैमुत्येनैव सावधारणमाह । यत्पादेति —

योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया । ज्ञानङ्कर्मच भक्तिश्च नोपायोऽन्योऽस्ति कर्हिचिदिति ॥

योगत्रयस्यापि श्रेयो हेतुत्वादयोगिनामेव कर्म शुक्लकृष्णं योगिनां त्रिविधमितरेषामिति सूत्रेण कुशलाकुशलान्वयात्कर्मबन्धस्तत्र योगिनां बन्धाभावं वदन् भक्तियोगस्य—

यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु । नून्यं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

इत्यादिना कर्मसम्पूर्तिहेतुत्वेन—

वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥

इत्यादिना च ज्ञानकारणत्वेन स्वयञ्चानन्याधीनत्वेनाभ्यर्हितत्वं मत्वा पूर्वमाह । यत्पादेति । यस्य पादावेव पङ्कजे मृदुमञ्जुसुरभिसमूलत्रिविधतापापनोदपूर्वकनित्यपरमानन्दात्मकाह्लादाविर्भावुके तयोः परागस्तत्संबन्धितमोरजोऽपहारिरजस्तस्य गङ्गानीतस्य नितरां सेवनेन तृप्ता भवादयः—

पूर्णाः पुलिन्द्यउरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमण्डितेन ॥
तद्दर्शनस्मररुजस्तृणरूपितेन लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥

इत्यादिना व्रजसंचरणचरणसंलग्नरजोनिषेवतृप्ताव्रजवनौकसः ध्यानसेवनादौ तद्रजोनितरां सेवनेनैव तृप्ता विगतैहिकामुष्मिकाभिलाषाः सर्वे भक्ताः यद्वा । यत्पादपङ्कजपरागतद्रजोऽभिलाषया तद्भूरिभाग्यमिहजन्मकिमप्यटव्यामित्यादिना चलं ब्रह्मादिपदमपहाय व्रजाश्रयणेनागा निश्चलपदवीं समाश्रिता ये वृन्दावनाद्रिद्रुमास्तेषां नितरां सेवनेन तृप्ताः । यद्वा पादपङ्कजपराश्च त,एव वैराग्येण गृहबन्धुवित्तादि हित्वा अगानां गोवर्द्धनादिगिरीणां निषेवेन तृप्ताः । यद्वा पादपङ्कजे पात इति पादपङ्कजस्य पादुके तयो रागेण निषेवस्तेन तृप्ता । यद्वा यत्ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रियदधीमहि कर्कशेष्वित्यादिना यत्पादपङ्कजे कर्कशकुचस्पर्शादिना पान्तीति पादपङ्कजपास्तथा रागपरवशतया यत्तन्निषेवः शनैर्विधारणं तेनैव तृप्ता । यद्वा पिबति चात्तिचेति पादं मुखं तदेववर्णितगुणैः पङ्कजं चक्षुर्भ्यां तद्रूपसुधापाश्च वनादौ तदधरामृतस्य वात्यास्वादनेन तन्मुखपङ्कजमेव पिबन्तीति पादपङ्कजपः तथा रागः सा परानुरक्तिरीश्वरे इति भगवच्छाण्डिल्यसूत्रेण परा भक्तिः निषेव इत्युपलक्षणं श्रवणादिनवविधपरापरभक्ती ताभ्यां परापरभक्तिभ्यामेव तृप्ताः भक्ताः । यतो ननह्यमाना णह बन्धने इत्यस्माद्बन्धशून्या जीवन्मुक्ताः सन्तः स्वैरं यथेष्टं चरन्ति तथा

योगप्रभावविधुताखिलकर्मबन्धा योगोऽत्र कर्मयोगो ज्ञानयोगश्च तत्र तदर्पितसर्वकर्मात्मककर्मयोगप्रभावेण विधुताखिलकर्मबन्धत्वं दर्शितं श्रीमद्भागवते—

कर्मणा कर्मनिर्हार एष साधुनिरूपितः । यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पूरुषः ॥
एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः । त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ॥

इत्यादिज्ञानयोगपक्षेतु योगो विरुद्धोपाधितत्कल्पितधर्माणाञ्च जहदजहल्लक्षणया परित्यागेन त्वं पदार्थस्य तत्पदार्थस्वरूपाभेदज्ञानं तस्य प्रभावः कर्ममूलाज्ञानबाधनं तेन विधुता उन्मूलिता अखिलाः कर्मबन्धा येषां ते तथाभूताः—

"भिद्यते हृदयग्रन्थिश्छिद्यन्तेसर्वशंसयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ।

ज्ञानाग्निः सर्वकर्मणि भस्मसात्कुरुते तथा सर्वं कर्माऽखिलम्पार्थ ज्ञाने परिसमाप्यते "इत्यादिश्रुतिस्मृतिभिः तेच विधुताखिळकर्मबन्धाः सन्तः स्वैरञ्चरन्ति तथा मुनयो मननशीला ज्ञानयोगजिज्ञासवोऽपि "जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तत" इत्यादिना स्वैरञ्चरन्ति तदा तस्य स्वेच्छयैव स्वातन्त्र्येण तत्तद्भक्तादीनां कर्मादिबन्धबाधनेच्छया वा स्वीयानां भक्तादीनामिच्छया वा आत्तमाविर्भावितं नित्यं सच्चिदानन्दघनं वपुर्येन तस्य बन्धः कुत एव न कुतोऽपीत्यर्थः तत्रायं भावः । कर्माधीनभौतिकसविकारदेहे अविद्ययात्मन्यध्यस्ते तत्कर्माध्यासाज्जीवानां कर्मबन्धो भवेन्न त्वानन्दमात्रशरीरे स्वरूपातिरिक्तदेहतत्कर्मतदध्यासादीनामभावान्न बन्धसम्भावनापि तदुक्तं भगवज्जनिनिर्णये "किन्तु निर्दोषचैतन्यसुखनित्यां स्वकान्ततनुम् । आविर्भावयते सैव जनिर्विष्णोर्नचपरा । तथा वैष्णवतन्त्रे भगवद्विग्रहनिरूपणे "निर्दोषपूर्ण गुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः । आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा" इति ॥ ३५ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु तेऽपि स्ववचोऽनुरूपं कुतो नाचरन्तीत्याशङ्क्य स्ववचसो विधिनिषेधरूपत्वात्तेषां च तदप्रयोज्यत्वान्न स्ववचनानुसरणमित्याशयेनाह । कुशलेति । तथा चोक्तं भगवता "नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन" इति यतस्ते निरहङ्कारिणः तदुक्तं "यस्य नाहंकृतो भावो बुद्धिर्यस्य न ळिप्यत" इति तथा च तेषां तथा प्रवृत्तिरेतच्छास्त्रसार्थक्यमिति भावः । यथा प्रथोने साधनारूपस्य नियम्यता तद्वत्तेषामपि नासौ विधिनिषेधनियम्यतेति सम्बोधनाशयः ॥ ३३ ॥ तथा च यथोक्तरीत्या यदेवं तदातिर्यगाद्यखिलसत्त्वानां नियम्यानामीशितुर्नियामकस्य सर्वकर्मणां यथायथं फलप्रदस्य स्वतन्त्रस्य परमात्मनो नियम्याभ्यां कुशलाकुशलाभ्यामन्वयः नियम्यतारूपः सम्बन्धः कुतः सर्वथा न विद्यत इत्यर्थः ॥ ३४ ॥ किञ्च जीवानामपि तदनधिकारिणां नास्ति कर्मबन्धो यदा तदा परमेश्वरस्य कुतस्तत्सम्भव इत्याह । यदिति । यस्य भगवतः पादपद्मयोः परागाणां कान्तिलक्षणरेणूनां नितरां सेवनेन ध्यानादिना तृप्ता अन्यत्र जातालम्प्रत्यया यत्पादपङ्कजपरागेषु निषेवामेव ते इच्छन्ति तृप्ताश्चेति वा एवं भूताः भागवतप्रधानास्तथा ज्ञानयोगप्रभावेण विधुता निराकृता अखिलकर्मणां बन्धा येषां तत्त्वज्ञा मुनयोऽपि न नह्यमानाः कर्मभिरवध्यमानाः स्वैरं विधिनिषेधकर्मविनिर्मुक्ताश्चरन्ति तस्य स्वेच्छया स्वीकृतनरदेहस्य परमेश्वरस्यैव कुतो बन्धः सर्वथापि तत्र नाशङ्कनीयमित्यर्थः । यद्वा यद्भक्तयालब्धज्ञाना मुनयोऽपीति व्याख्येयम् ॥ ३५ ॥

रास–रहस्यम्

र० टी०—ईश्वराणां स्ववचसो अनीश्वराणां प्रत्येव विधिनिषेधरूपत्वात् एषामीश्वराणां तु ज्ञानमहिम्ना ज्ञानबाधेन तत्कृताहंकारादिशून्यानां कुशलाचरितेनेह संसारे क्वचित् स्वार्थः न विद्यते, विपर्ययेण प्रारब्धकर्मकारितेनाकुशलाचारितेन चानर्थो वा न भवति, "नैनं कृताकृते पुण्यपापे तपतः ।" "किमहं साधुनाकरवं किमहं पापमकरवम् ।" "तत्कृतसुकृतदुष्कृते विधूनुते पुष्करपलाशवत्तिष्ठन्ति ।" "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ।" "नैव तस्य कृतेनार्थो नाकृतेनेन कश्चन ।" "यस्य नाहंकृतोभावो बुद्धिर्यस्य न लिप्यते । हत्वाऽपि स इमाँल्लोकान् न हन्ति न निबध्यते ।" "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ।" इति श्रुतिस्मृतिसूत्रैः प्रारब्धसुखदुःखोपभोगस्य संघातमात्रपर्यवसायित्वात् , यथा लौकिकप्रभोरपि न कश्चिन्नियामकः भवति तद्वत् तेषामपि न कश्चित् विधिनिषेधनियम्यतास्तीतिभावः ॥ ३३ ॥ यदि ईशितव्यानां नियम्यानां अखिलसत्त्वानां सर्वजीवानां तिर्यङ्भर्त्यदिवौकसां तमोरजः सत्त्वप्रकृतिवतां, तत्र तिरश्चां तम आधिक्यतया कुशलाकुशलविवेकाभावात् न तेषां कुशलाकुशलान्वयः । मर्त्यानां रज आधिक्यानां मनुष्याणां शास्त्राधिकारलाभेऽपि ये शास्त्रमर्यादामुल्लंघ्य शरीरमात्रपोषणपराः भोगासक्ताः ते तु पशु वद्धेयाः । अन्ये ये शास्त्रविधिमनुसृत्य शास्त्रीयेणव मार्गेण चरित्वा आत्मसाक्षात्कारानन्तरं आत्मारामतया विधिनिषेधानां पारं गताः तेषामपि न कुशलाकुशलान्वयः । दिवौकसां सत्त्वाधिक्येऽपि भोगमात्रशरीरत्वात् प्रारब्धाधीनत्वाच्च न तथा, किमु वाच्यं ईशितुः सर्वेन्द्रियनियामस्य सर्वोपाधिविनिर्मुक्तस्य सर्वान्तर्यामिरूपेणात्मसाक्षात्कृतस्य निर्गुणनिष्क्रिया-

प्रमेयरूपेणात्मानं पश्यतः कुशलाकुशलान्वयः न विद्यते इति, यतः "ब्रह्मविद् ब्रह्मैव भवति" ॥ ३४ ॥ यत् यस्य भगवतः पादपङ्कजयोः चरणसरोजयोः, परागानां रेणुनां, निषेवनेन निगरां सेवनेन, "सा परानुरक्तिरीश्वरे ।" इति पराभक्तिमनुसृत्य तृप्ताः जातालंप्रत्ययाः, एवम्भूताः भगवद्भक्ताः, तथा साधनचतुष्टयसम्पन्नाः स्वस्वरूपानुसन्धानिनिष्ठाः, सर्वप्रपंचस्य "नेति–नेति ।" इति निषेधेन तत्वं पदार्थयोः भाग–त्यागलक्षणया विरुद्धसर्वज्ञत्वसर्वशक्तिमत्वाल्पज्ञत्वाल्पशक्तिमत्वाद्युपाधीनां परित्यागेनावशिष्टशुद्धचैतन्यमात्रस्वस्वरूपाभेदज्ञानेन प्रभावविधुताः प्रभावः कर्ममूलाज्ञानं विधुतां उन्मूलिताखिलं कर्मबन्धा येषां तथा भूताः ज्ञानयोगिनः "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।" "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ।" इति श्रुतिस्मृतिसिद्धाः तत्त्वज्ञाः मुनयोऽपि मनीषिणोऽपि न नह्यमानाः कर्मभिरबध्यमानाः स्वैरं चरन्ति यतः "जिज्ञासुरपियागस्य शब्द ब्रह्मातिवर्तते । तदा तस्याधिकारिकपुरुषस्य इच्छया स्वेच्छया स्वातन्त्रेण न कर्मणा, आत्तवपुषः आत्तं परिगृहीतं वपुरिव वपुः शरीरं येन तस्यापहतपाप्मनः कुत एव बन्ध न कुतोऽपीत्यर्थः ॥ ३५ ॥

गूढार्थदीपिनी

यदा निरहङ्कारिणां अध्यासरहितानां कुशलेन न स्वार्थः न सुखं विपर्येण अधर्मेण न अनर्थः न दुखं भवति तदा ईशितव्यानां नियम्यानां सर्वेषामपि सत्त्वानां जीवानाम् ईशितुः नियामकस्य भगवतः पुण्यपापसम्बन्धो न भवतीति किमुत वक्तव्यमित्यर्थः ॥ ३४ ॥ योगप्रभावेग विधुता निरस्ताः अखिलाः कर्मबन्धा येषां ते मुनयोऽपि न नह्यमाना बन्धनमप्राप्नुवन्तः स्वैरं यथेच्छं विचरन्ति तदा इच्छया स्वेच्छया गृहीतमूर्तेः भगवतः कुतो बन्धः ॥ ३५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु तेजीयसां तत्कृतो धर्मव्यतिक्रमः कुतो न दोषाय भवतीत्यत आह । कुशलाचरितेनेति । ते हि द्विविधा एके निरहङ्कारिणः ध्रुवास्मृतियुक्तास्तेषां परमेश्वरध्यानपरत्वेन विधिनिषेधविस्मृतिवशात् प्रारब्धकर्मकारितेन कुशलाचरितेन स्वार्थः विपर्ययेण प्रारब्धकर्मकारितेनाकुशलाचरितेनच अनर्थो वा न विद्यते अनिरहङ्कारिणामिति पदच्छेदादन्ये ज्ञेयाः ते हि पूर्वसञ्चितैर्महापुण्यपूगैः पूर्णाः पुनरपि बहूनि महापुण्यानि कर्तुं शक्ताः तेषां कुशलाचरितेन किञ्चिन्मात्रेण कुवेरगृहे वराटिकान्यास इव अर्थः विपर्ययेण कुवेरगृहे वराटिकापहार इव अनर्थो वा न विद्यते इत्यर्थः ॥ ३३ ॥ एवं सति केषुचित् जीवेषु कुशलाकुशलान्वयो न विद्यते तर्हि अखिलानां सत्त्वानामीशितव्यानां नियम्यानां जीवानामीशितुर्नियन्तुः परमेश्वरस्य सर्वस्वामिनः कुशलाकुशलान्वयो न विद्यते इति किम्पुनर्वक्तव्यमिति कैमुतिकन्यायो दर्शितः ॥ ३४ ॥ कुशलाकुशलकर्मफलास्पृष्टत्वमपि भगवतः कैमुतिकन्यायेन दर्शयति । यदिति । यस्य पादपङ्कजपरागे निशेवा येषां ते तथा ते च ते तृप्ताश्च पादपङ्कजपरागध्यानानन्दाः, अत एव योगप्रभावेण तद्ध्यानसामर्थ्येन विधुताः अखिलकर्मबन्धा येषां ते मुनयः भगवत्तत्त्वमननशीलाः भागवताः न नह्यमाना निर्बन्धनाः सन्तः स्वैरं चरन्ति तस्य भगवतः इच्छयैवात्तवपुषः परिगृहीताप्राकृतावग्रहस्य कुतो बन्धः कुशलाकुशलकर्मफलभूत इत्यर्थः । ३५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पक्कभक्तिप्रतिपत्तियुक्तानां न सांसारिकं सुकृतं दुष्कृतं च फलोपलम्भकमिति कथयति ॥ निरहङ्कारिणां ममताद्यतिगानामिति । कुशलचरितेनेह संसृतावर्थोऽभिनवो न हि विद्यते । विपर्ययेणाकुशलाचरितेनानर्थोऽक्लप्तविच्छिन्नत्तरूपो नरकाद्यनर्थोऽपि न विद्यते ॥ ३३ ॥ ज्ञानिमात्रस्य यदैवं तदा तदादिसर्वेश्वरस्य हरेर्न पुण्यपापलेप इति किमालपनीयमिति नृप प्रतिलपति ॥ किमिति । अखिलानि सत्त्वानि स्वभावादीनि तेषां तथा तिर्यञ्चश्च पक्ष्याद्याश्च मर्त्या नराश्च दिवौकसो देवाश्चेति तेषामीशितव्यानां प्रेर्याणां प्रेरणा तरतमभावापेक्षया तिर्यगादिकमत उक्तिः । ईशितुः प्रेरकस्य हरेः कुशलाकुशलान्वयो नेति किमुत न वाच्यमित्यर्थः ॥ ३४ ॥ परीक्षित्साक्षिद्धान्मुनीन्निदर्शयित्वाऽपि कैमुत्यं द्रढयति ॥ यत्पादेति । यस्य पादावेव पङ्कजे तयोः परागारेणवस्तेषां निषेवा यस्य स बोधस्तेन तृप्ता यत्पादपङ्कजपरागाणां निषेवा येषां ते यत्पादपङ्कजपरागनिषेवा अत एव तृप्ता इति वा योगप्रभावेन विधुतोऽखिलः समस्तोऽनन्यनिबर्हणीय इति दृढः कर्मबन्धो यैस्ते तथा मुनयो गतम् । स्वैरं गतम् । चरन्ति । तत्र निमित्तमाह ॥ न हीति । नेत्यभिमानवन्तस्ते ता नेति न न हि । अमाना द्वौ नञौ प्रकृतन्यायादत्यभिमानहीना निरहङ्कारिणां प्रभवित्यानुकुल्यमेवमन्वये ज्ञेयं । अत एवेति निर्गतिका गतिः । तस्य तदधिपस्येच्छायत्तवपुषः श्रीकृष्णस्य बन्धः कुत एव किंहेतुकः स्यात् ॥३५॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु यथान्यस्मै न कथयन्ति तथा स्वयमपि कुतो न कुर्वन्ति तदाह । कुशलाचरितेनेति । एषामीश्वराणां कुशलाचरितेन अर्थः प्रयोजनं न विद्यते ततोऽप्यनन्तफलस्य प्राप्तत्वादेव विपर्ययेण अकुशलाचरितेन अनर्थोऽपि न विद्यते ईश्वराणामेव निषिद्धकर्मणा अनिष्टाभाव इति न किन्तु ज्ञानिनामपीति ज्ञानवैराग्ययोस्तुल्यं स्वरूपमाह । निरहंकारिणामिति । अहंकाररहितानां न केनापि किमपि कर्तृत्वाभिमानाभावात् प्रभो ! इति सम्बोधनमीश्वरस्य लोकविलक्षणत्वज्ञापनार्थम् ॥ ३३ ॥ यत्र ज्ञानसहकृतमेव

तत्कर्म नानिष्टजनकं किंवक्तव्यमैश्वर्यसहकृतमित्याह । किमुतेति । ईश्वरस्य सेवकमारणे सेवकानामन्यथाकरणे च न काचिच्छङ्का भवति यथैहिकी तथा पारलौकिकी नियामकाद्धि शङ्का भगवतो न नियामकोऽन्योऽस्तीत्याह । अखिलसत्त्वानां सर्वजीवानां तिर्यङ्मर्त्यदिवौकसां गुणत्रयकार्याणां जीवजडानामप्राकृतप्राकृतानां वा सर्वेषामेव ईशितुः प्रभोः कृष्णस्य चकारादात्मनश्च ईशितव्यानां सेवकानां सम्बन्धी तत्कृतगुणदोषाभ्यां कुशलाकुशलयोरन्वयः कुतः नहि दासीभिः स्वात्मभूताभिः सम्बन्धे अनियम्यस्य ऐहिके पारलौकिके वा कश्चनापकारः सम्भवति अन्तरङ्गैरेव तथा ज्ञायत इति न सुश्लोकतानिवृत्तिः नापि कर्ममार्गविचारेण कर्मप्राधान्यपक्षेऽपि दोषः शङ्कनीयः ।।३४।। यथा परमेष्ठिनो वा एष यज्ञोऽग्र आसीत् ब्रह्म वा इदमग्र आसीत् स आत्मानमेवावेत् इत्यादिश्रुतिषु ज्ञानकर्मभ्यामुत्कर्षः एवमपकृष्टज्ञानकर्मभ्यामपकर्षोऽति संभाव्यत इति तत्राह । यत्पादेति । नहि सर्वेषामेव जीवानां समानकर्मणा समानं फलमुपलभ्यते अन्यथा शास्त्रवैफल्यापत्तिः उत्कृष्टकर्मादौ प्रवृत्तो नापकृष्टकर्मणा कादाचित्केन अपकृष्टो भवति तत्र मार्गत्रयं त्रिष्वपि प्रवृत्तो नापकर्षं यातीत्याह । तत्र प्रथमं भक्तिमार्गं प्रवृत्तस्य तत्र पुष्टस्य न केनाप्यपकर्ष इत्याह । यस्य भगवतः पादपङ्कजस्य परागभूता ये सेवकास्तेषां निषेवो निषेवणं तेन तृप्ताः भगवद्भक्तैः सह भगवद्गुणस्मरणेनैव विस्मारितदृष्टश्रुतसुखलेशाभासाः स्वैरं चरन्ति न तेषां कर्मोत्कर्षापकर्षौ साधकबाधकौ तथा कर्ममार्गेऽपीत्याह । योगप्रभावेति । महान् धर्मः अयं हि परमो धर्म इति स्मृतेः तस्य प्रभावः अणिमाद्यैश्वर्यसम्पत्तिः ज्ञानादयश्च तेनैव विशेषेण धुताः पूर्वकर्मजनिता अपि अखिलकर्मबन्धाः विशेषेण धुता भवन्ति तेऽपि स्वैरं चरन्ति ज्ञानमार्गेऽप्याह । मुनयोऽपि स्वैरं चरन्तीति सर्व एव न नह्यमाना अबध्यमानाः णह बन्धने सर्वत्रैव असम्बध्यमानाः यत्र भगवत्प्रवर्त्तितमार्गेष्वप्येषा व्यवस्था तत्र भगवतः किंवक्तव्यमित्याह । तस्येच्छयात्तवपुष इति । इच्छया भोगार्थमात्तानि वपूंषि यावतीर्गोपयोषित इति तावन्ति येन तस्य कुत एव बन्धो भवेत् यो हि तावद्रूपो भवति कार्यं कृत्वा च तान्याच्छादयति तस्य केन कर्मणा बन्धो भवेत् कर्म हि प्रतिनियतं व्यवस्थित तत्र यदि भिन्नो भिन्नो जीवः स्यात् तदा तेन कर्मणा बन्धो वा भवेत् आकाशवद्भगवद्रूपाणि प्रतिपदमन्यान्येव भवन्ति यथात्र भेदेनाप्येकदेहव्यवहारः एवं देशभेदेनापि भगवतः सर्वतः पाणिपादस्य तावत्परिच्छेदेन प्रादुर्भाव इच्छयेति स्वामिनीनां वा वपूंषि अतः सर्वथा प्रमाणप्रमेयविचारेणापि न बन्धः सम्भवति ।। ३५ ।।

श्रीसुबोधिनी–सारः

प्रारब्धवशेन तेषां तथा प्रवृत्तिरित्याह । पुण्याचरणेनेह लोके एषां निरहंकारिणां स्वार्थो न विद्यते विपर्ययेण पापाचरणेनाऽनर्थो वा नास्ति हे प्रभो ।। ३३ ।। फलितमाह । सर्वजीवानां तिर्यङ् मर्त्यदेवानाम् ईशितव्यानां नियम्यानामीशितुर्नियन्तुः पुण्यपापसम्बन्धो न विद्यत इति किमुत वक्तव्यम् ।।३४।। यस्य चरणपद्मरेणोर्निषेवणेन तृप्ता योगस्य प्रभावेण विधुतानि अखिलानि सर्वाणि कर्मबन्धनानि येषां ते मुनयोपि न नह्यमाना मुक्ताः स्वरं चरन्ति इच्छयात्तं गृहीतं वपुर्येन तस्य बंध एव कुतः ।। ३५ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

इच्छयात्तवपुष इत्यत्र, वपुष्शब्दस्य वपुष्प्राकट्यपरत्वमित्याचार्याणामाशयः । (अत्रैवाग्रे यथान्नभेदेनेति । यावद्यस्यान्नेन देहः पोषितो भवति, तावत्तदीयत्वेन लोके व्यवह्रियते । पुनरन्यस्यान्नेन पोषितः स एव तावत्तदीयत्वेनापि व्यवह्रियते । एवमेकदेहस्यान्नभेदेन भेदव्यवहार इत्यर्थः ।) ।। ३५ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तेजीयसां न दोषाय' इति यदुक्तं तत् स्पष्टयति—कुशले त । एषामीश्वराणा कुशलानामिति एषामाचरितेन कुशलाचारेणेत्यर्थः । जनसङ्ग्रहार्थं धर्मानुष्ठानेन इहलोके चकारात् परलोके च अर्थः फलं सुखं न विद्यते नैव भवति, तथा विपर्ययेण अधर्मानुष्ठानेनैषां लोकद्वये अनर्थो दुःखमपि न भवति । तत्र हेतुमाह—निरहङ्कारिणामिति । अनात्मनि देहेन्द्रियादावात्माध्यासरहितानामित्यर्थः । ईश्वरा द्विविधाः । तत्रेश्वरावताराणां विरुद्धे प्रवृत्तिर्लीलार्था, ज्ञानवैराग्यवतां जीवानां तु प्रारब्धवशादिति ज्ञेयम् । 'त्वमप्येतज्ज्ञाने समर्थोऽसि' इत्याशयेनाह—हे प्रभो इति ।। ३३ ।। कैमुत्यन्यायेन दर्शयति–किमुतेति । यदि ईशितव्यानां नियम्यानां निरहङ्कारिणां जीवानामपि कुशलाकुशलान्वयो न भवति, तदा तिर्यगादिरूपेण अवस्थितानामखिलानां सत्त्वानां जीवानां ईशितुः नियन्तुः श्रीकृष्णस्य कुशलाकुशलान्वयः पुण्यपापसम्बन्धो न भवतीति किमिति वक्तव्यमित्यन्वयः ।। ३४ ।। उक्तकैमुत्यन्यायमेव प्रपञ्चयति—यत्पादेति । यस्य भगवतः पादपङ्कजपरागस्य निषेवणेन तृप्ता निवृत्तशब्दादिसमस्तविषयाभिलाषा भक्ताः, तथा योगस्य यत्पादपङ्कजध्यानात्मकस्य प्रभावेण विधुता निवृत्ताः अखिलाः कर्मात्मका बन्धा येषां ते योगिनः, तथा मुनयो ब्रह्मात्म्यैक्यमननशीला ज्ञानिनश्च न नह्यमानाः बन्धनमप्राप्नुवन्तः स्वैरं चरन्ति यथेच्छं शास्त्रोल्लङ्घनेनापि कर्म कुर्वन्ति, तस्य स्वेच्छया आत्तवपुषः स्वीकृतदेहस्यैव विहरतोऽपि कुत एव बन्धः कस्मादेव हेतोर्बन्धः स्यात् ? ।। ३५ ।।

अन्वितार्थप्रकाशिका

कुशलेति ।। हे प्रभो ! निरहङ्कारिणामध्यासरहितानाम् एषामीश्वराणां कुशलाचरितेन जनसंग्रहार्थं धर्मानुष्ठानेन इह लोके चकारात्परलोके च अर्थः फलं सुखं न विद्यते नैव भवति । अतस्तेषां तादृशं चरितं "यस्य नाहं कृतो भावः" इत्यादिवचांसि

प्रमाणयितुमेवेति भावः। तथा विपर्ययेण अधर्मानुष्ठानेनैषां लोकद्वये अनर्थो दुःखमपि न भवति ॥ ३३ ॥ किमुतेति ॥ यदि ईशितव्यानां नियम्यानां निरहंकारिणां जीवानामपि कुशलाकुशलान्वयो न भवति तथा तिर्यगादिरूपेण अवस्थितानामखिलानां सत्त्वानां जीवानाम् ईशितुः नियन्तुः श्रीकृष्णस्य कुशलाकुशलान्वयः पुण्यपापसम्बन्धो न भवतीति किमुत वक्तव्यम् ॥ ३४ ॥ यत्पादेति ॥ यस्य भगवतः पादपङ्कजपरागस्य निषेवेण निषेवणेन तृप्ता निवृत्तविषयाभिलाषा भक्ताः तथा योगस्य प्रभावेण विधुता निवृत्ता अखिलाः कर्मात्मका बन्धा येषां ते योगिनः तथा मुनयो ब्रह्मात्म्यैक्यमननशीला ज्ञानिनश्च न नह्यमानाः बन्धनमप्राप्नुवन्तः स्वैरं चरन्ति। यथेच्छं शास्त्रोल्लङ्घनेनापि कर्म कुर्वन्ति तस्य स्वेच्छया आत्तवपुषः स्वीकृतदेहस्यैव विहरतोऽपि कुत एव हेतोर्बन्धः स्यात् इति गोपीनां परदारत्वमङ्गीकृत्य समाधानम् ॥ ३५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु तर्हीश्वरावतारा अपि किमर्थं प्रतीपमाचरन्तीति चेत्तत्राह कुशलेति कुशलाचरितेन वर्णाश्रमोचिताचरणेन एषामीश्वराणामिह लोके स्वार्थश्चतुर्वर्गप्रयोजनं न विद्यते तेषां चतुर्वर्गप्रापकत्वात् निरहंकारिणां देवत्वमनुष्यत्वाद्यहंभाववर्जितानां ॥ ३३ ॥ प्रकृतमाह ईशितव्यानां नियमम्यानामीशितुर्नियामकस्य सर्वावतारधारिणः पूर्णपुरुषोत्तमस्य श्रीकृष्णस्य कुशलाकुशलानां पुण्यपापानामन्वयः सम्बन्धः किमुतविद्यते न विद्यते ॥ ३४ ॥ यस्य हरेः पादपङ्कजयोः परापाणां रेणूनां सेवनेन तृप्ताः अतएव योगप्रभावविधुताखिलकर्मबन्धाः योगप्रभावेण हरिध्यानसामर्थ्येन विधुता अखिलाः कर्मणां बन्धा यैस्ते मुनयोऽपि स्वैरं चरन्ति यस्याज्ञानुसारेण स्वतंत्रा विचरंति न नह्यमानाः कुत्रचिद्बध्यमाना न भवंति। यद्वा एवंभूता मुनयोऽपि नह्यमानयादाज्ञया बध्यमानाः सतो न स्वैरं चरंति तर्ह्यन्येषां तु का कथा तस्य सर्वनियामकस्य इच्छाया स्वेच्छया आतवपुषः आत्तं गृहीतं लोके प्रकटितं वपुर्येन तस्य परमेश्वरस्य श्रीकृष्णस्य बन्धः कुतः स्यादेव ॥ ३५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु तर्हि तेऽपि किमित्येवं साहसमाचरन्ति तत्राह ॥ कुशलेति ॥ हे प्रभो राजन्, निरहंकारिणामनात्मनि वेहे आत्माभिमानरहितानामित्यर्थः। एषां तेजीयसामीश्वराणां, इह लोके, कुशलाचरितेन साधनेन, स्वार्थः स्वसाध्यं प्रयोजनं, न विद्यते। विपर्ययेणाकुशलाचरितेन, अनर्थो वा अनर्थोऽपि, न विद्यते। देहात्माभिमानिनो हि पूर्वपूर्वकर्ममूलकः देहः, पुनरुत्तरोत्तरं कर्म च तन्मूलं तदभावात्कर्मवश्यत्वाभावस्तदभावाच्च शास्त्रवश्यत्वाभावस्तदभावाच्च धर्माधर्ममूलकावर्थानर्थौ न स्त इति भावः ॥ ३३ ॥ यदाऽकर्मवश्यानां जीवानां कुशलाकुशलाचारनिमित्तकावर्थानर्थौ न स्तस्तदा तेषामपि नियन्तुरपहतपाप्मनो भगवतस्तौ न स्यातामिति किं पुनर्वक्तव्यमित्याह ॥ किमुतेति ॥ तिर्यञ्चश्च मर्त्याश्च दिवौकसश्च तेषां, तिर्यगादिरूपेणावस्थितानामित्यर्थः। ईशितव्यानां नियम्यानां, अखिलसत्त्वानां सकलजीवानां, ईशितुर्नियन्तुः सर्वेश्वरस्य, कुशलाकुशलान्वयः पुण्यपापफललेपः, किमुत च कुतस्तरामेव, नास्त्येवेत्यर्थः ॥ ३४ ॥ कैमुत्यनयेनोक्तमेव प्रपञ्चयति ॥ यत्पादेति ॥ यस्य भगवतः पादावेव पङ्कजे तयोः परागस्तस्य निषेवो निषेवण तेन तृप्ता निवृत्तशब्दादिविषयाभिलाषाः, योगः यत्पादपङ्कजानुध्यानात्मकस्तस्य प्रभावः सामर्थ्यं तेन विधुताः अखिलाः कर्मबन्धाः कर्मात्मकानि बन्धनानि येषां तु, मुनयः सनकादयः अपि, न नह्यमानाः, अबध्यमानाः, शास्त्रावश्या इति यावत्। स्वैरं यथेच्छं चरन्ति। इच्छया न तु कर्मणा, आत्तं परिगृहीतं वपुरप्राकृतं शुद्धसत्त्वमयं शरीरं येन यस्य, तस्यापहतपाप्मनो भगवतः, बन्धः कुतः एव स्वैरात् कुतश्चिदप्याचरिताद्बन्धो नास्त्येवेति भावः। गोपीनां परदारत्वमङ्गीकृत्य परिहृतम् ॥ ३५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यत्पादपङ्कज इति : १०.३३.३५.

येऽनन्यभावकलिताच्युतपादपद्मास्तेषामपीह नही साहसतोऽस्ति भीतिः।
साक्षादयं विधिनिषेधविबोधिवेदागम्यस्वरूप इति तत्र कुतोऽयमंशः ॥ १६६ ॥

कृष्णप्रिया

जो अहंकार से सर्वथा तर है, सर्वथा निरभिमानी है वेद शास्त्र विहित सुकृतों के समाचरणसे कोई फलाभिलाषा का स्वार्थ नही है एवं निषिद्ध कर्मो के आचरण से कोई हानि नहीं ॥ ३३ ॥ भगवान्कृष्ण समस्त जीवों के यश एवं पक्षिओं के मनुष्यों के और देवताओं के ईश्वर है और सर्वेश्वरों के भी स्वयं नियामक है उनको अपने सेवकों के साथ किए हुए कर्मों का इष्ट फल अथवा अनिष्ट फल से सम्बन्ध कैसे सम्भवित है। राजन् ज्ञानी का और योगी को भी इष्ट अथवा अनिष्ट फल से कोई सम्बन्ध नहीं होता तब परब्रह्म श्रीकृष्ण के लिए क्या कहना ? ॥ ३४ ॥ भगवान् श्रीकृष्णचन्द्र जी के पद पकज की रज की सेवा से विशुद्ध हुए भगवदीयजनों की सेवा से जो संतृप्त है, पुनः जो लोग योग की उपासना से समस्त कर्मों के बन्धनों से विशुद्ध बन गए हैं और जो मनन शील ज्ञानी जन है उनका भी स्वतत्र आचरण देखा गया है वे विधि निषेध के विधानों से पर है तब जा जीवों को परमानन्द की अनुभूति कराने के लिए भूतल पर स्वेच्छा से अलौकिक श्रीविग्रह लेकर पधारे हैं उन पूर्ण ब्रह्म के लिए बन्ध कैसे होगा ? ॥ ३५ ॥

गोपीनां तत्पतीनां [1]च सर्वेषामपि [2]देहिनाम् । योऽन्तश्चरति सोऽध्यक्षः [3]क्रीडनेनेह देहभाक् ॥ ३६ ॥

कदमक्षम।

अन्वयः—गोपीनाम्, तत्पतीनाम्, च, सर्वेषाम्, एव, देहिनाम्, अन्तःचरति, स, एव, अयम्, अध्यक्षः, क्रीडनेन, इह, देहभाक्, (समभवत्) ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

परदारत्वं गोपीनामंगीकृत्य परिहृतमिदानीं भगवतः सर्वान्तर्यामिणः परदारसेवा नाम न काचिदित्याह । गोपीनामिति । योऽन्तश्चरत्यध्यक्षा बुद्ध्यादिसाक्षी स एव क्रीडनेन देहभाङ्नत्वस्मदादितुल्यो येन दोषः स्यादिति सर्वात्मनि स्वपरभेदो न संभवतीति भावः ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वस्तुतो गोपीनां परदारत्वं नास्ति गान्धर्वविधानेन परिणीतत्वात्, तथापि निर्बन्धेन तद्गृह्यमाणं प्रति 'तुष्यतु दुर्जनः' इति न्यायेन तदङ्गीकृत्य स्वीकृत्य परिहृतम्—'यत्पादपंकज' इत्यादिनोत्तरितम् । परमार्थविचारे भगवतः पारदार्य नायातीत्याह—इदानीमिति । न काचित् न किंचिदिति । योऽन्तर्यामी स कृष्ण एव । क्रीडनेन लीलया हेतुना । इह जगति । देहभाक् आविष्कृतदेहः । तत्तद्दृष्ट्या तु सर्वान्तर्यामिणो भगवतो न केऽपि परे इत्याह—गोपीनामिति । योऽतश्चरति तस्य बहिरालिंगने को दोष इति भावः । अध्यक्षो बुद्ध्यादि द्रष्टा । तस्य रहस्यबहिर्मात्रदर्शने को दोष इति भावः । इह व्रजमण्डले । क्रीडनेन हेतुना । देहान् गोपीशरीराणि । भजते रतिश्रमप्रस्वेदाम्बुमार्जनादिना सेवते ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं गोपीनां परदारत्वमङ्गीकृत्यापि दोषः परिहृतः । तत्र च सति कुलटात्वं जारत्वं नापयाति तन्नाम च खलु धिक्काराय परं पर्यवस्यतीति तदसहमानस्तासां तत्परदारत्वमेव खण्डयति । गोपीनामिति तैर्व्याख्यातम् । तत्र बुद्ध्यादिसाक्षी परमात्मेत्यर्थः । अतो न तस्य परो नाम कश्चिदिति के वा परदारा इति भावः । ननु स तु निराकार इति श्रूयते तस्मादाकारवत्त्वादस्मदादितुल्य एवासौ न तत्राह । स एवेति । एव शब्दोऽयं चैवेत्यस्मादाकृष्टः । अत्र चशब्दः क्वचिन्नास्ति । क्रीडनेन स्वैरं तदिच्छयैव नतु कर्मपरवशत्वेन हेतुभाक् तदुचिते देशेतदुचिते निजदेहेप्रवर्त्तक इत्यर्थः । अन्तर्यामितायामाकारापेक्षाया अभावादेव तत्र निराकारत्वमुच्यते नतु वस्तुतः । "केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्त"मिति द्वितीयोक्तेरिति भावः । नत्विति नत्वस्मदादिजीववत् परस्परमनात्मकर्मपरवशश्चेत्यर्थः । एष क्रीडनदेहभागिति क्रीडनेनेह देहभागिति च पाठः । अथवा यो गोप्यादीनां सर्वेषामपि तत्तद्योग्यताप्रदेन परमात्मरूपेणान्तश्चरति स एवाध्यक्षस्तत्तदधिष्ठाता गोप्यः किमाचरदित्यादिना कात्यायनि महामाये ! इत्यादिना अपि वत मधुपुर्यामित्यादिना च व्यञ्जिततादृशममतामयभावविशेषाणां तासान्तु पतिरूप एवाध्यक्ष इत्यर्थः । ननु कथं परमात्मरूपेण क्रीडति कथञ्चानेन रूपेण क्रीडति तत्राह । एष बहिःप्रकटरूप एव स श्रीकृष्णस्तादृशक्रीडासाधनं देहं भजते नित्यमेवाश्रयति नत्वन्तःस्थः परमात्मरूप इति । पाठान्तरेऽपि इह बहिःप्रकटरूपत्व एवेत्यादि योज्यम् । एवमुत्तरत्रापि तदेवमन्तर्यामित्वपक्षे स्वदारत्वस्यातिव्याप्तिपरिहाराय किञ्चिदन्यदाहार्यव्याख्यातम् । तथापि विण्मूत्रपरिपूरितदेहासु त्वक्श्मश्रुनखरोमकेशेत्यादि रुक्मिणीवाक्यानुसारेण विशुद्धसत्त्वव्यक्तविशेषमयपरमज्योतिर्देहस्य तस्य प्रवृत्तिस्तज्जुगुप्सिततामेवावगमयति नतु भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेदित्यनुसारेण रोचमानताम् । अतएवान्तर्गृहगतानां कासाञ्चिदसिद्धदेहानां तद्देहपरित्याजनञ्च निर्दिश्यते । नच सैरिन्ध्यादावपि तत्प्रवृत्तिदर्शनादन्यथा मन्तव्यम् । मुकुन्दस्पर्शनात् सद्यो बभूव प्रमदोत्तमेति तत्स्पर्शादिना स्पर्शमणि लोहवृत्तान्तवत् ध्रुवदेहवच्च तद्योग्यदेहलक्षणप्रमदोत्तमात्वं प्राप्य तत्क्रीडनयोग्यता तत्र जातेति गम्यते । न चासामपि तादृशत्वं मन्तव्यं ताभिर्विधूतेत्यादौ प्रत्युत ताभिरेव असावधिकं व्यरोचतेत्युक्तत्वात् । किञ्च नायं श्रियोऽङ्ग इत्यादौ श्रीतोऽपि स्वर्योषिद्भ्योऽपि पराभ्योऽपि सर्वाङ्गनाभ्योऽहत्तमत्वे परत्वञ्चासां लभ्यते । यतः साधिक्षपमुक्तं कुतोऽन्या इति तस्मादासां विलक्षणत्वावगमाद्विलक्षणत्वेनैव व्याख्यान्तरं कर्त्तव्यम् । तथाहि गोपीनां तद्विशेषाणामासां तथा तत्पतीनां सम्प्रति तासां पतित्वेन प्रतीतानां तथा सर्वेषामपि गोपगवादीनां देहिनाञ्च योऽन्तर्मध्ये चरति जयति जननिवास इति दृष्ट्या अहो भाग्यमहो भाग्यमिति रीत्या "योऽसौ गोषु तिष्ठति योऽसौ गाः पालयती"ति तापनीश्रुत्या च तन्मध्ययोग्यक्रीडाभिर्नित्यमेव क्रीडति सः श्रीकृष्णो ऽध्यक्षः प्रापञ्चिकानां प्रकटः सन्नपि चरति तत्तद्योग्यमेव क्रीडति । उभयथापि क्रीडायां हेतुः । एषः श्रीकृष्णः क्रीडाशीलः श्रीगोपालवपुः प्रकाशनशील इति । यद्वा । स एव प्रापञ्चिकप्रत्यक्षः सन्नपि क्रीडनदेहान् स्वक्रीडाहेतुविग्रहान् गोप्यादींस्तानेव भजन्

---

१. चा–विज. । २. सर्वेषां चापि–वीर. ; मपि–विज. ; मेव–श्रीधर. वंशी. जीव, विश्व, शुक. सु. ध. रा. । ३. एष. क्रीडनदेह–वीर. विज. ।

क्रीडति । पाठान्तरेऽपि क्रीडनेनोपलक्षितांस्तद्रूपान् देहानिति । तदेवं तथैव नित्यविहारात्तासां तन्नित्यप्रेयसीत्वम् । ततस्तत्प्रतिमदेहत्वं च दर्शितम् । तत्र परसम्बन्धवर्णनेन सन्देहं प्रकटयन्त्यां प्रकटलीलायामपि सुखावेशात् स्पष्टमेवोक्तं तासु तद्रूपत्यं स्वयं श्रीशुकदेवेन अधोक्षजप्रिया इति भगवत्प्रिया इति कृष्णवध्व इति च । तापन्यां दुर्वाससा ताः प्रत्येव च । योऽसौ गोषु तिष्ठतीत्यादौ स वो हि स्वामी भवतीति परमसम्बन्धवर्णनेन सन्देनरहितायामप्रकटलीलायां कैमुत्येन तदेव निर्णीतम् । श्रीमदष्टादशाक्षरपटलेश्रीब्रह्मणा स्वसंहितायाम । "आनन्दचिन्मयरस प्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः । गोलोक एक निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामी" त्यत्र कलात्वेन निजरूपत्वप्राप्तेऽपि प्रकटलीलागतपरकीयत्वे सन्देहनिरासार्थम् । निजरूपतयेति एतदेव चोपक्रमोपसंहारयोस्तासु लक्ष्मीत्वस्य तस्मिन् परमपुरुषत्वस्य निर्देशेन तथैव निर्द्धारितं तत्र चिन्तामणि प्रकरसद्मस्वित्यादौ लक्ष्मीसहस्रशतसंभ्रमसेव्यमानमित्युपक्रमः । श्रियः कान्ताः कान्तः परमपुरुष इत्युपसंहारः । तत्र चान्यत्र च । साक्षात् गोपीशब्दप्रधानाः श्रीमदष्टादशक्षरप्रमुखमन्त्राश्च तथैव वदन्त आसते । तथाच तत्तन्मन्त्रव्याख्यायां गौतमीयतन्त्रे । तत्तन्मन्त्र द्रष्टारः श्रीमद् वर्षिचरणाः तत्प्रधानाः श्रीभगवतो नामधेयं बहिरङ्गदृष्टीनामपि प्रवृत्त्यर्थं रूढिमपि परित्यजन्तः सर्वेश्वरत्व मायास्वरूपशक्त्योर्वैभवभेदेन द्विधा निरुच्य तद्ध्यानगततदन्तरङ्गप्रेयसीभक्तानां प्रवृत्त्यर्थं श्रीगोपालमूर्त्तेस्तस्य श्रीगोपालीपतित्वमेवाश्रितरुचितया तत्राप्युत्तरपक्षतया पर्यवसायितवन्तः । तत्र चैवकारेण प्रकटलीलाप्रसिद्धस्वौपपत्यं निराकृतवन्तः । यथा "गोपीति प्रकृतिं विद्याज्जनस्तत्त्वसमूहकः । अनयोराश्रयत्वेन कारणत्वेन चेश्वरः । सान्द्रानन्दपरं ज्योतिर्वल्लभेन च कथ्यते । अथवा गोपीप्रकृतिर्व्जनस्तदंशमण्डलम् । अनयो र्वल्लभः स्वामी भवेत् कृष्णाख्य ईश्वरः । अनेकजन्मसिद्धानां गोपीनां पतिरेव वा । नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्द्धन" इति । अत्रानेकजन्मसिद्धानामिति बहूनि मे व्यतीतानि जन्मानि तव चार्जुन इतिवत् । तासामनादिकालपरम्पराप्राप्तश्रुतिपुराणतन्त्रादिप्रसिद्धावतारित्वमेव व्यनक्ति तस्माद्वस्तुतः परदारत्वमेव नास्ति किमुतायाग्यत्वमिति भावः ।। ३६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स इत्यनेनास्यान्वयः, स एवैष साक्षाद्भूतः; अध्यक्ष इति तदंशत्वेन तत्प्रेर्यत्वेन वा; तत्त्वविचारतस्तस्मिन्नेव भोक्तृत्वपर्य्यवसनात् किंवा अन्तर्य्यामित्वेऽपि मायावादिनामद्वैतव्याख्यानुसारेण परदारत्वाभावात् परदारसेवा नास्तीति परिहृतम्, अतएव परमात्मत्वसिद्धये सर्व्वेषामित्युक्तम् । एष श्रीगोपीरमणः क्रीडनेनेति लीलयेत्यर्थः । किंवा क्रीडनेन हेतुना क्रीडार्थमित्यर्थः । देहभाक् निजश्रीमूर्त्तिप्रकटकः । अन्यत्तैर्व्याख्यातम् । यद्वा, अध्यक्षः सर्व्वचित्ताधिष्ठाता सर्व्वेन्द्रियप्रवर्त्तकश्चेत्यर्थः । अतएवान्तश्चरति, एवमन्तर्य्यामितया सर्व्वकर्म्मसु सर्वप्रवर्त्तनेनापि यथा तस्य तद्गुण–दोषैर्लेपो न स्यात्, किंवा सर्व्वकर्म्मस्वन्तर्य्यामिदृष्ट्या प्रवृत्तेरन्येषामपि तैर्लेपो यथा न स्यात्तथात्रापीति भावः । तत्र गोप्यादिष्वन्तर्य्यामिणः प्रकाशतारतम्येन तेषां यथोत्तरं न्यूनतोह्या, इति परमैश्वर्य्येण पूर्व्वोक्तबन्धाभावे हेतुरभिव्यञ्जितः । विशेषतश्च रासक्रीडार्थमेव देहभाक् प्रकटित-तद्योग्य-श्रीगोपकिशोरमूर्त्तिरित्यर्थः । प्रेमरसविस्तारणार्थमवतीर्णस्य तदनुरूप एव व्यवहारो युक्तो नामेति सिद्धान्ततत्त्वम् ।। ३६ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यत् पृष्टमाप्तकामो यदुपतिरित्यादिना-वाप्तसमस्तकामस्य स्वतो निरतिशयानन्दस्य ग्राम्यचेष्टान्वयः कथमिति तस्योत्तरमाह । गोपीनामिति द्वाभ्याम् । गोपीनां तासां पतीनाञ्च तथान्येषां देहिनां जीवानाञ्च योऽन्तश्चरत्यन्तरात्मतया व्याप्नुवन्नियमयति यश्चाध्यक्षः । तत्तत्कर्मानुगुणसुखदुःखादिफलदश्च स एष भगवान्कृष्णः क्रीडनदेहभाक् क्रीडनाय देहभाक् नत्वस्मदादिवत्सुखदुःखादिभोगाय कर्माधीनदेहभागित्यर्थः ।। ३६ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

क्रीडनं क्रीडासाधनं देहं भजतीति क्रीडनदेहभाक् अध्यक्षः साक्षी अयञ्च बन्धाभावे हेतुः ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गोपीनाम् अत्र टीकानुसारेण श्रीभगवतः परदारा नाम न सन्तीति व्याख्यानेऽपि तासामयोग्यत्वं न व्याहन्यत एषा व्याख्या ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अन्यच्च गोपाङ्गनास्तस्य क्रीडापाञ्चालिका इव क्रीडादेहनिर्विशेषास्तस्य भजनमस्य नहि बहिरङ्गलीलैव अन्तर्यामितात्वस्य बहिरङ्गलीलैवेत्याह—गोपीनामित्यादि । स एष श्रीकृष्णः क्रीडनदेहभाक् क्रीडनदेहा व्रजदेव्यस्ता भजतीति स्वरूप-निर्देशः । ताच्छील्ये क्विप् । अध्यक्षः साक्षात् प्रत्यक्ष इति यावत् । यो नारायणरूपेणैव गोपीनां तत्पतीनाञ्च सर्वदेहिनाञ्चान्तश्चरतीति अन्तर्यामी गोपीनां पतयः पत्याभासास्तेषां सर्वषामपि देहिनाञ्च । न तु गोपीनां सर्वसाधारण्येनान्तर्यामिवत्त्वम् ,—आनन्दविग्रहत्वात् । एतेनास्य व्रजाङ्गनाभिः सह क्रीडनं स्वरूपविहार एव न धर्मव्यतिक्रम इति भावः ।। ३६ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एतदेव बहिर्मुखानां निग्रहाय स्पष्टयति—गोपीनामिति द्वाभ्याम्। एष क्रीडनदेहभाक् क्रीडनदेहान् गोपीदेहान भजतीति तथा अध्यक्षः प्रत्यक्ष एवान्तर्यामी, अतः परत्वं किल तस्येत्यर्थः। भक्तानामनुग्रहाय केवलं तादृशीः क्रीडा गोपीभिः सह विलासान् भजते, भक्तास्तु यच्छ्रवणेन परमसुखमनुभवन्ति। रसवासनावन्तो हि भक्ता एतेनैव विहारेणामोद्यन्त, सामाजिकत्वात्, याः श्रुत्वा मानुषं देहमाश्रित्य एव मनुष्यमात्रमेव न तु विवेचकत्वादियुक्तस्तत्परो भवति। वक्ष्यति चैतत् (भा० १०।३३। ४०) विक्रीडितं व्रजवधूभिरिदञ्च” इत्यादि ॥ ३६–३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्तद्दृष्ट्या तु सर्वान्तर्यामिणो भगवतो न केऽपि परे इत्याह। गोपीनामिति। योऽन्तश्चरति तस्य बहिरालिङ्गने को दोष इति भावः। अध्यक्षो बुद्ध्यादि द्रष्टा तस्य रहस्य बहिर्गात्रदर्शने को दोष इति भावः। इह व्रजमण्डले क्रीडनेन हेतुना देहान् गोपीशरीराणि भजते रतिश्रमप्रस्वेदाम्बुमार्जनादिना सेवते ॥ ३६ ॥

रसिकाह्लादिनी–टीका

पूर्वं गोपानां परदारत्वमङ्गीकृत्य यत्पादपङ्कजेनेत्याक्षेपः परिहारः कृतः, इदानीं परो नाम न कश्चित् येन गोपीषु परदारत्वं भवतीति सभायामुपविष्टानां केषांचिद्बहिर्मुखानां मुखाप्रसत्तीं दृष्ट्वा तस्यान्तर्यामितया स्त्री-पुं-साधारणजीवानां मुख्यपतित्वं प्रकटयन् उपाधिधर्मासंस्पर्शित्वेन महद् ऐश्वर्य्यमाह गोपानां तत्पतीनां चान्तश्चरति गोपीनां हृदि सदा स्वरूपेण प्रकाशते तत्पतीनां सर्वेषां देहिनां च शक्त्यान्तश्चरति। एवकारस्तु नित्यानुवादे। तदुक्तं श्रीमुखेन “साधवो हृदयं मह्यं साधूनां हृदयं त्वहमि”ति। अत्र स्वरूपोक्तिरन्यत्र धर्मेणेति। अत एवाध्यक्षः बुद्ध्यादिसाक्षी, अनेन परमात्मत्वमुक्तम्। नन्वेवं बुद्ध्यादिसाक्षीत्वं चेत्तर्हि निराकारत्वेन प्रतीतिः नेत्याह क्रीडनेन निमित्तेन रासादिक्रीडार्थमेव देहभाक्। क्रीडा तु प्रियवर्गसापेक्षा क्रियेति। यथान्तर्यामितया सर्वदा हि सम्बन्धेऽपि सर्वकर्मप्रवर्त्तनेऽपि तत्तद्गुणदोषैर्निर्लेपत्वं तथा सच्चिदानन्दविग्रहस्योच्चावचः कर्मभिर्निर्लेपत्वमितिभावः। यद्वा योऽन्तश्चरति सोऽध्यक्षः प्रतीक्षः क्रीडने लीलया नटवन्मानुषं देहं भजते। ननु परमात्मा चेत् तर्हि जुगुप्सितायाः सैरिन्ध्याः कथं सङ्गतस्तत्र समाधास्यति। “मुकुन्दस्पर्शनात्सद्यो बभूव प्रमदोत्तमेति”। श्रीविग्रहस्य बहिरन्तश्चैकरूपत्व न लौकिकत्वं चोक्तम्। न ह्येतादृशसामर्थ्यमन्यस्य भवितुमर्हतीति। सैरन्ध्रीस्पर्शेऽपि निर्लेपत्वमिति। यत् न चैतासां सैरिन्ध्र सादृश्यमूह्यम् “नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः। रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ-लब्धाशिषां य उदगाद् व्रजवल्लवीनामिति”। अन्यथोद्धवेनासां चरणरजः प्रार्थना नोपपत्तेः तस्माद्गोपीनां परदारत्वं न स्यात् चान्यदेहिसादृश्येन श्रीकृष्णस्योपपतित्वम्। सर्वदेहिनां सर्वकर्मप्रवर्त्तकत्वेन सर्वकर्मफलभोक्तृत्वेन च मुख्यपतित्वं सर्वशास्त्रसमन्वयस्य पर्य्यवसानात् शास्त्रफलं प्रयोक्तरीतिन्यायस्य सत्वान्न किंचिदसमञ्जसमिति ॥ ३६ ॥

विशुद्धरसदीपिका

तदेवं समाहितेऽपि प्रश्नाभासे परदाराभिमर्शने च तदवस्थतया प्रतिभासमानेऽपरितुष्यन् प्रकारान्तरेण समादधाति। गोपीनामिति। तैर्व्याख्यानं तत्र बुद्ध्यादिसाक्षी परमात्मेत्यर्थः। अतो न तस्य परो नाम कश्चिदिति केवा परदारा इति भावः। ननु स तु निराकारः श्रूयते इति चेत्सत्यम् अन्तर्यामिलीलायामाकारापेक्षाभावादेव निराकारत्वमुच्यते नत्वाकाराभावादिति—

केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तमिति।

श्रीद्वितीयादौ वसन्तमित्यनेन तदाकारस्य नित्यत्वावगमात् अन्यथा वसन्तमित्यत्र प्रकल्प्येत्युच्येत केचिदिति लौकिकत्वं तत्र तत्राचिन्त्यशक्तिरेव गतिः अथवा क्रीडनेनेत्येतदेवोत्तरं श्रीभगवतः साकारत्वे निराकारत्वे च क्रीडने हेतुः। स एवेति सामानाधिकरण्येनाभेदं निर्दिश्य देहभागिति तथात्वस्योत्कर्षो व्यञ्जितः परमार्थस्तु गोपीनां गोपजातिस्त्रीणां तत्पतीनां गोपज्ञातिपुरुषाणां तथा सर्वेषां गोमृगादिदेहिनां परिकराणां देहभाक सन् देहशब्दः स्वरूपवचनः योऽन्तः अप्रकटलीलायां चरति जयति जननिवास इति न्यायेन नित्यं क्रीडते स इह तत्तद्रूप एवाध्यक्षः प्रकटलीलायां प्रत्यक्षः योऽसौ गोषु तिष्ठति योऽसौ गाः पालयति योऽसौ गोपेषु गोपान्पालयति स वो हि स्वामी भवतीति श्रीगोपालतापिनीश्रुतेः। नच साधकशरीरेषु व्यभिचारः मुकुन्दस्पर्शनात्सद्यो बभूव प्रमदोत्तमेति सैरन्ध्रीन्यायेन स्पर्शमणिवत्तेषामपि योग्यतासम्पादनावगमात् जहुर्गुणमयं देहमिति तु तत्तद्भावत्यागेन किंचिदुर्वरितदुष्पचेलिमकषायशेषेण वा समाहितं प्राक् तासां परकीयात्वञ्च भगवत्प्रिया अधोक्षजप्रियाः कृष्णवध्व इत्यादिभर्विशेषणैरेव परास्तं तदन्यासाञ्च नित्यत्वं दशाक्षरमन्त्रव्याख्यायां श्रीदेवर्षिचरणैरुक्तं गौतमीयतन्त्रे—

गोपीति प्रकृतिं विद्याज्जनस्तत्त्वसमूहकः। अनयोराश्रयत्वेन कारणत्वेन चेश्वरः ॥
सान्द्रानन्दं परं ज्योतिर्वल्लभत्वेन कथ्यते। अनेकजन्मसिद्धानां गोपीनां पतिरेव वा ॥
नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्धन इति।

अत्र मायास्वरूपशक्त्योर्वैभवभेदेन व्याख्याद्वयम् अनेकेति—

बहूनि मे व्यतीतानि जन्मानि तव चार्ज्जुनेत्यादि ।

कल्पपरम्पराप्राप्तश्रुतिपुराणतन्त्रादिप्रसिद्धावतारित्वमेव व्यनक्ति । नच तत्पतीनामिति नित्यसिद्धपरदारत्वमपीति भ्रमः कार्य्यः मोहितास्तस्य माययेत्यादिवक्ष्यमाणोत्सवो हि स्वामी भवतीति निजस्वरूपतया कलाभिरिति स्मृतिश्रुत्यादिवाक्यानुरोधेन प्रकटलीलायामेव तत्प्रतीतिरिति निर्णयात् तत एव च गोपजातिपुरुषाणामिति व्याख्यात । ननु पति मन्यानामिति अन्यथा परमशुद्धायां लीलायामनौचित्यदोषो दुर्वार इत्यवधेयम् "अनौचित्यादृतेनान्यद्रसभङ्गस्य कारण"मित्यभियुक्तोक्तः । नवा प्राकृतत्वेनानौचित्यपरिहार इति वाच्यं प्रत्युत तदाधिक्यप्रसङ्गादिति दिक् । विवृतमिदं भक्तिमञ्जूषायम् ॥ ३६ ॥

श्रीरामनारायणकृता भावभावविभाविका

नन्वेवमिच्छयात्तसच्चिदानन्दवपुष्ट्वे सच्चित्सुखवपुषो विभुत्वमेव स्यात्तर्हि विभुत्वे रासनृत्यादि क्रियानुपपत्तिरितीमामाशङ्कामपनुदन्नेव पूर्वं धर्मव्यतिक्रमं स्वीकृत्य समाधानं कृतमधुना तु तस्य विभुत्वेनैव तासां परदारत्वाभावान्न व्यतिक्रमगन्धोऽपीत्याह । गोपीनामिति । तासामेव गोपीनां तत्पतीनामिति लोकदृष्टिविभ्रमेण पूर्ववर्णितश्रुतीनां तत्तद्देवपरत्वभानन्यायेन तत्तत्पतिमन्यतयापातदृष्ट्या भासमानानां तथा सर्वेषामपि देहिनां देहादिसंघाताध्यासेन पृथग् जीवतया प्रतीयमानानां योऽन्तश्चरति तत्तदुपाधीनामधिष्ठानतया तेषाञ्च स्वरूपभूतात्मतया प्रत्यक्तया वर्त्तमानः "कृष्णमेनमवेहि त्वमात्मनमखिलात्मनाम् । जगद्धिताय सोऽप्यत्र देहीवाभाति मायये" त्यत्रैतच्छब्दनिर्दिष्टं सर्वापरोक्षं कृष्णविग्रहं सर्वदेहिनामात्मात्वेन निर्दिश्य तस्य देही वेति भौतिककल्पितदेहपृथक्भूततदध्यासापन्नजीववद्भानन्तु माययेति निर्णीतं मायया तथा प्रतीतौ प्रयोजनञ्च जगद्धितायेत्यनेन दर्शितमत्र चोत्तरपद्ये वक्ष्यति अनुग्रहाय भूतानामिति गीतायाञ्चोक्तम् "अहमात्मागुडाकेशसर्वभूताशयस्थित" इति तथाच सोऽध्यक्षः सर्वाधिष्ठानप्रत्यक्चिद्रूपः इह क्रीडने व्यापकानामपि वर्णानामभिव्यञ्जकध्वन्यनुसारेण परिच्छिन्नतया तत्तद्वाक्यपदादिक्रमेण भातीति तदभिव्यञ्जकस्वेच्छानुसारेण परिच्छिन्नतया तत्तद्रासलीलादिक्रमापन्नत्वेन प्रतीतावपि देहभाक् न भवति किन्तु वर्णितरीत्या देहीवाभाति । नच कृष्णविग्रहस्यैवात्मत्वेन सर्वान्तश्चरत्वे कथ न सर्वेषां तदन्तरपरोक्ष इति वाच्यम्, अज्ञानावृतशुक्तेः समानांशेदन्त्वेन भानेऽपि विशेषशुक्तित्वाकारेणाप्रतीतिवत् समानसच्चिदात्मना भानेप्यानन्दविग्रहत्वेन प्रतीतिसंभवात् । नचात्मनो बहुश्रुतिषु निराकारत्वप्रसिध्या कृष्णविग्रहाकारत्वासिद्धिरितिवाच्यं निराकारशब्दस्य सर्वत्र मायिकभौतिकाकारनिरासपरत्वात् "सत्पुण्डरीकनयनं मेघाभवैद्युताम्बर"मित्यादिक्वचिदुपनिषदि श्रुताकारस्यानन्तानन्दवद्गुणोपसंहारन्यायेन सर्वत्रोपसंहरणयित्वाच्च । तथाच गोपीनामागन्तुककिञ्चित्कालिकलोकभ्रमकल्पितपत्यादिसंबन्धापेक्षया नित्यान्तश्चरात्मत्वसंबन्धस्य ज्यायस्त्वात्कृष्णस्यैव मुख्याध्यक्षत्वान्न तासां परदारत्वं लोकभ्रमसिद्धतत्पतीनामप्यात्मत्वाच्च । किञ्च नहि देहस्य पतित्वं पञ्चत्वे देहं दग्ध्वा पतिपिण्डदानादिदर्शनादात्मनः पतित्वे तु कृष्णस्य सर्वमुख्यपतित्वमत एव प्रायः पूर्वनिर्दिष्टमधोक्षज प्रिया इति कृष्णवध्व इति तापिन्याञ्च ताः प्रत्येव दुर्वाससो वाक्यं स वः स्वामी भवतीति श्रीमदष्टादशाक्षरपटले ब्रह्मसंहितायां तदुक्तिः "आनन्दचिन्मयरसप्रतिभावितााभिय एव निजरूपतया कलाभिः । गोलोक एव निवसत्यखिलात्मभूतो गोविन्दमादिपुरुषं तमहं भजामि" इत्यत्र कलात्वात्स्वीयत्वे निश्चितेऽपि लोकप्रसिद्धपरकीयत्वभ्रमपरिहारायैव निजरूपतानिर्देशः तत्रैवोपक्रमोपसंहारयोस्तासां लक्ष्मीत्वं तस्य परमपुरुषत्वञ्च दर्शितं लक्ष्मीसहस्रशतसंभ्रमसेव्यमानमित्युपक्रमः श्रियः कान्ताः कान्तः परमपुरुष इत्युपसंहारः तथा साक्षाद्गोपीनामसम्बद्धाष्टादशाक्षरादिमन्त्राः स्पष्टा भान्ति तथान्यत्रापि मन्त्रव्याख्याने एव "अनेकजन्मसिद्धानां गोपीरेव वा । नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्द्धन"इति तस्मात्तासां परदारत्वमेव नास्तीति भावः ॥ ३६ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

एवं गोपीनां परदारत्वं तदभिमर्शनजन्यदोषं चाङ्गीकृत्य समाहितम् । वस्तुतस्तु नास्ति तासां परदारत्वमतो नास्तितत्सेवाकृतदोषगन्धोऽपीत्याह । गोपीनामिति । यः गोपीनां तत्पतीनाञ्च किञ्च सर्वेषामेव देहिनामन्तर्जीवरूपेणान्तर्यामिरूपेण चरति स एवाध्यक्षस्तद्द्हादिनियन्ता क्रीडनेन क्रीडार्थं देहभाक् गृहीतलीलाविग्रहः । नत्वस्मदादिवत्कर्मभोगाद्यर्थदेहभाक् । अतो नास्ति तत्र दोषगन्धस्य शङ्कापीति भावः ॥ ३६ ॥

रास-रहस्यम्

र० टी०—गोपीनां वृत्तीनां तत्पतीनां च, तत् तासां पालयतृत्वेन तत्तदिन्द्रियाधिष्ठितदेवतानां च, किंबहुनाऽऽब्रह्मस्तम्बपर्यन्तः सर्वेषामेव देहिनां देहादिसघाताध्यासेन पृथक्-नृथक्जीवतया प्रतीयमानानां योऽन्तश्चरति तत्तदुपाधिनामधिष्ठानतया तेषां च स्वरूपभूतात्मतया प्रत्यक्तया चरति गच्छति वर्तमानः सोऽध्यक्षः सर्वाधिष्ठानः प्रत्यक् चिद्रूपेण सर्वबुद्धिसाक्षी इह देहे क्रीडनेन परिच्छिन्नतया देहभाक् शरीरधारीवाभाति मायया इत्यर्थः ॥ ३६ ॥

गूढार्थदीपिनी

अन्तश्चरति । किञ्च गोपीनां परदारत्वमपि नास्ति राधारोमोद्भवत्वात् तासां गान्धर्वविधिना भगवता परिणीतत्वात् ॥३६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं परमेश्वरः कुशळाकुशळकर्मतत्फलविषयो न भवति सर्वसत्त्वेशितृत्वेन सर्वस्वामित्वादित्युक्तमथ सर्वेशितृत्वमेव प्रपञ्चयति । गोपीनामिति । गोपीनां तत्पतीनां किम्बहुना सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां देहिनां य उपादानकारणतया प्रेरकतया च अन्तरश्चरति अतएवाध्यक्षस्तत्तद्बुद्ध्यादिसाक्षी तत्तद्देहभोक्तृमुख्यः स्वामी स एव इह लीलायां क्रीडनेनापि अध्यक्षः देहभाक् च अतस्त्वया प्रतीपमाचरद्ब्रह्मन् ! परदाराभिमर्शनं कृतवान्वै जुगुप्सितमिति शङ्का न कार्या तस्य सर्वपतित्वात् जुगुप्सितकर्तृत्वाभावादिति भावः ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

परदारसंसर्गमभ्युपेत्य दोषो नेषदिति प्रागुक्तमेतर्हि न स इत्यावेदयति ॥ गोपीनामिति । गोपीनां तासां पतयस्तत्पतयस्तेषां च किञ्च सर्वेषां देहिनां च योऽन्तश्चरति सोऽध्यक्षः सर्वसाक्षी । तर्ह्यत्र जन्म कुत इति तत्राह । एषः क्रीडनं क्रीडोपयुक्तं देहं भजतीति स तथेति । अनेन तत्र स्त्रीरूपी गोपेषु पुरुषरूपी मत्सन्निहित इति न साक्षात्तत्सम्पर्क इति सूच्यते । ई रमा च गोपीनामन्तश्चरति सः स्वयं च चरति तत्पत्नीनां सर्वेषां देहिनां चान्तश्चरति तयोरेव संसर्गो नाभीरभामिनीपरिरम्भादिरिति हृदयम् । ननु चतुर्थे तत्र सन्निहिता श्रीश्च यत्र सन्निहितो हरिः । नास्य सन्निधिमात्रेण रमा पत्नीत्वमाव्रजेत् । साक्षादेव तु साक्षाच्च हरेः सन्निधितः क्वचित् । गोप्यादिरूपा भवति विपरीतं न तु क्वचिदित्युक्तेर्गोपान्तर्गतभगवद्रूपस्य पत्नीत्वं रमासमायातीत्युक्तिर्बाधत इति चेत् । भावानवबोधात् । पुरुषाद्याविष्टविष्णुपत्नीत्वं न साक्षाद्रुक्मिण्यादिवदवतारायां रमायाः कृष्णादिसाक्षाद्रूपस्य रमं च सम्भवतीत्येतत्परत्वात्तत्तात्पर्यवचनस्य । यथा रमाऽत्राविष्टाऽपि साक्षादवतीर्णहरिपत्नी भवति तथा हरिरप्यन्यत्राविष्टसाक्षादवतीर्णरमापतिः क्वचिद्भवति किं नेत्याह ॥ विपरीतमिति । हरिरन्यत्राविष्टः साक्षादवतीर्णरमापतिः क्वचिदपि नैव भवतीत्यर्थ इत्यादिना विवृतमाचार्यैरनुसन्धेयम् ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु तथापि लोकमर्यादाया भग्नत्वात् यद्यदाचरति श्रेष्ठ इति न्यायेन शब्दबलविचारेण बन्धो भवेत् ते ह्यवधूतास्त्रयोऽपि न ते व्यवहारनियामकाः अतो विषमो दृष्टान्त इति चेत्तत्राह । गोपीनामिति । नहि स्वस्य स्पर्शः स्वस्य क्वापि निषिद्धः परा चासौ परस्य स्त्री उभयमपि न भगवति यतः भगवान् गोपीनां तत्पतीनाञ्च आत्मा बान्धवाः सर्वे लौकिकाश्च न मन्यन्त इति चेत्तत्राह । सर्वेषामपि देहिनामयमात्मेति यो भगवानन्तश्चरति आसन्यो जीवो वा सर्ववादिसिद्धान्तसंग्रहाय सामान्यवचनं योऽन्तश्चरतीति स एवायं भगवानध्यक्षः प्रत्यक्षः क्रीडनेन कृत्वा नटवत् पुरुषदेहं भजते वस्तुतस्तु नायं पुमान् नच स्त्री नाप्यन्यः कश्चित् न स्त्री न षण्डो न पुमानितिश्रुतेः । अतः केनापि विचारेण नास्या दोषसम्भवः ॥ ३६ ॥

श्रीसुबोधिनी–सारः

गोपीनां गोपानां सर्वेषां भूतानां योऽन्तश्चरति अन्तर्यामिरूपेण सोऽध्यक्षः सर्वसाक्षी क्रीडनेन लीलयेह विग्रहवान् नास्मदादिवत्कर्मपरतन्त्रः ॥ ३६ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

योऽन्तश्चरतीत्यत्र, वस्तुतस्तु नायमित्यादि । देहकृततत्तन्निषेधोऽत्र क्रियते । प्रभुस्तु स्वत एव पुमान् । अत एव श्रुतानेकस्मिन्नेव वाक्ये पुरुषं पुरुषविधमित्युक्तम् ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यदुक्तं 'परदाराभिमर्शनं धर्मप्रतिकूलं कृतवान्' इति तत्रोत्तरमाह—गोपीनामिति । गोपीनां तासां पतीनां च तथा सर्वेषामपि देहिनां योऽन्तश्चरति नियन्तृतया वर्तते सोऽध्यक्षः सर्वसाक्षी क्रीडनेन हेतुना इहलोके देहभाक् देहं स्वीकृतवानिति न तस्य केनापि भेदो येन तासां परदारत्वं स्यादित्याशयः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

वस्तुतो जारकुलटादिव्यवहारयोग्या भगवतः परदारसेवा नाम न काऽपीत्याह—गोपीनामिति । गोपीनां तासां पतीनां च तथा सर्वेषामपि देहिनां योऽन्तश्चरति नियन्तृतया वर्त्तते सोऽध्यक्षः सर्वबुद्ध्यादिसाक्षी तथा च योऽन्तश्चरति तस्य बहिरालिङ्गने

को दोषः । यश्च बुद्ध्यादिद्रष्टा रहसि बहिर्गात्रदर्शने च को दोष इति भावः । क्रीडनेन हेतुना इह लोके देहभाक् देहं स्वीकृतवानिति न तस्य केनापि भेदो येन तासां परदारत्वं स्यात् । यद्वा । यः सर्वेषां देहिनामन्तश्चरति स परमात्मैव गोपीनां सुराङ्गनावतारत्वेनोक्तानां सम्मान्यानां तथा तत्पतीनां तासु मुख्यानां तद्विशेषाणां राधाद्यानां चाध्यक्षः मुख्यः पतिः नतु लोके पतित्वेन प्रसिद्धास्ते ते इत्यर्थः । ताभिस्तेषां मनसा वृतत्वाभावात्तैः सह सम्भोगाभावस्योपपादितत्वा[illegible] न ते पतयः नहि बलाद्विवाहितानामसंभुक्तानां दारत्वसिद्धिः । अन्यस्मै दानविधानात् अतो न तासां परदारत्वम् एवं व्रतप्राप्तवराणामनूढानां तु नतरामिति भावः । तेषां तासु व्यूढता भ्रममात्रमिति प्रकारान्तरं तु परतरे पद्ये स्पष्टं भविष्यति । न च तथापि विण्मूत्रपूरितत्वग्रक्तमांसास्थिमयदेहासु तासु चिदानन्दमूर्तेस्तस्य रतिजुगुप्सितेति वाच्यं मुकुन्दस्पर्शनात्सद्यो बभूव प्रमदोत्तमेत्युक्तरीत्या तत्स्पर्शनादिना तदैव स्पर्शमणिलोहन्यायेन तद्रतियोग्यदेहत्वलक्षणं प्रमदोत्तमात्वं प्राप्य तत्क्रीडायोग्यता जातेति सिद्धान्तात् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गोपीनां परदारत्वनिवारणाय श्रीकृष्णस्य सर्वपतीत्वमाह गोपीनामिति । गोप्यादीनायोऽन्तश्चरति अन्तरात्मतया प्रविष्टो भवति । अतएवाध्यक्षः सर्वक्षेत्रज्ञकरणसाक्षित्वात् सर्वपतिः सः श्रीकृष्ण सः क्रीडनेन रमणेन हेतुना इहलोके देहभाक् देहिवत् प्रतीयमानः नतु तादृशः परमात्मा सर्वस्वामी परब्रह्मास्ति ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इदानीं भगवतः सर्वान्तर्यामिणः परदारसेवा नाम न काचिदित्याह । यत् पृष्टं 'आप्तकामो यदुपतिः' इत्यादिनाऽवाप्तसमस्तकामस्य स्वतो निरतिशयानन्दस्य ग्राम्यचेष्टान्वयः कथमिति तस्योत्तरमाह । गोपीनामिति ॥ गोपीनां गोपाङ्गनानां, तत्पतीनां तासां पतित्वेन वर्त्तमानानां गोपानां च, तथा सर्वेषां अपि देहिनां, अन्येषामपि सर्वशरीरिणामित्यर्थः । यः अन्तः चरति अन्तरात्मतया व्याप्नुवन्नियमयति, यश्च अध्यक्षः तत्तत्कर्मानुगुणसुखदुःखादिफलदश्च, स एष भगवान् कृष्णः, क्रीडनदेहभाक् क्रीडनाय देहभाक् । न त्वस्मदादिवत् सुखदुःखभोगाय कर्माधीनदेहभागित्यर्थः । क्रीडनेनेह देहभयादि पाठे, क्रीडनेन लीलया, इह देहभाक् , न त्वस्मदादितुल्यः येन दोषभाक् स्यात् ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गोपीनामिति : १०.३३.३६.

योऽखिलान्तर्गतोऽसौ तत् पत्यन्तरगतो न किम् । तथात्वे च स्फुटं श्रीशः पतिः सत्यश्च ता इति ॥ १६७ ॥
तासामास तदा ध्रुवं प्रभुरसौ सङ्केतभर्त्रात्मकः प्रोक्तं प्रागिति यत्ततोऽप्यजनि भोस्त्वत्प्रश्नवागुत्तरम् ।
किञ्चेहापि निजानमंसत जनाः दारात् स्वपार्श्वस्थितांस्तत्केनापि न हेतुना प्रभुकृतौ शङ्कावकाशोऽधुना ॥ १६८ ॥
वृत्तीनामवितुः, स्थितिः कथमियं कामेन लोभेन चाहङ्कारेण समन्वितेति यदिदं पृष्टं त्वया तन्मुधा ।
वृत्त्यंशो निरणाय्यशङ्कमिह चेत्तेनैव तच्छालिनो जातो निर्णय इत्यलं नृप पृथङ् नात्रोत्तरापेक्षणम् ॥ १६९ ॥
तत्राप्युक्तमिहैवार्वाक् स्पष्टं तत्स्थितिवर्तनम् । वशीभूतेति लब्ध्वेति लब्धेत्यूह्यं त्रिपद्यतः (युग्मम्) ॥ १७० ॥
वृत्तिष्वनन्यविषयासु सतीषु च स्वायत्तास्वथो तदवितुर्विहृतिर्यथाऽऽशम ।
जातापि नाघजननाय न बन्धनाय दोषाय वा न भवतीत्यवधारयैतत् ॥ १७१ ॥
यत्पृष्टं कर्मकाण्डस्खलनमिह भृशं पुंसि योगानुरागीण्यत्राज्ञानं तवैव स्फुरति नृपवराजानतस्तस्य तत्त्वम् ।
कः कालः कः कृतान्तः किमघमनुसृतानन्दसन्दसन्दोहभाजि किं वाऽनुष्ठेयमस्मिन् परमपदजुषि प्राणिनि प्राप्तकामे ॥ १७२ ॥
नित्यानन्देऽपि योगे यदयमुदयते संशयस्तर्हि राजन् स्वापं कस्मान्न सर्वस्त्यजति भुवि जनः सर्वकर्मावलोपम् ।
पुण्याघोत्पत्तिहेतुव्यवहृतविलयस्तत्र चेदत्र तुल्यः कालस्तस्मिंस्तु गण्यः स्वसुखमविदितं नैवमत्रेति लाभः ॥ १७३ ॥
नित्यं नैमित्तिकं चाभ्युपगतमपि यत्कर्म तत्तत्पुरस्तात् गङ्गास्नातुः प्रतोलीसमलजलमिवानादरस्यैव पात्रम् ।
यत्तत्संपाद्यमर्थं बहुदिननिचयैर्निर्व्यलीकात्मसौख्यं भुङ्क्तेऽसौ नित्यमेवेत्यनुपमचरितः कोऽस्ति धन्यस्तदन्यः ॥ १७४ ॥
स्वायत्तीकृत्य गोपी रहसि स हरति प्रोल्लसद्रासरूपानन्दक्षीराब्धिवासाश्रयणमिह महानेष एवास्य धर्मः ।
त्यक्त्वा तं बाह्यवृत्तिप्रसभरतिजुषो ये भवन्त्यन्यदारासक्तास्ते स्युः सतीत्थं नृप कथमधुना पृष्टवानन्यथैतत् ॥ १७५ ॥
वृन्दावने सदानन्दविभूतो सुरसात्मनि । कुर्वत्यपि न योगीशे स्पर्शः पुण्याघकर्मणाम् ॥ १७६ ॥
अल्पमनल्पं सुकृतं दुरितं वेत्युभयमप्यशेषजने । योगीश्वरमिममनुपममवेहि परमेकसुकृतमयमूर्तिम् ॥ १७७ ॥

कृष्णप्रिया

राजन् कृपानिधान भगवान् श्रीकृष्ण चन्द्र जी, श्री गोपीजनों के उनके पतियों के और देहधारी सर्वजीवों के अन्तर्यामी है सर्व की आत्मा है वही भगवान् लीला से क्रीडा करने के लिए ही श्रीकृष्ण विग्रह को धारण नयन गोचर बने हैं ॥ ३६ ॥

अनुग्रहाय [1]भक्तानां मानुषं देहमा[2]स्थितः । भजते तादृशीः [3]क्रीडा याः श्रुत्वा तत्परो भवेत् ॥ ३७ ॥

कर्दमक्षमा

अन्वयः—भक्तानाम्, अनुग्रहाय, मानुषम्, देहम्, आस्थितः, तादृशीः, क्रीडाः, भजते, याः, श्रुत्वा, भक्तः, तत्परः भवेत् ॥ ३७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नन्वेवं चेदाप्तकामस्य निन्दिते कुतः प्रवृत्तिरित्यत आह। अनुग्रहायेति। तत्परो भवेत् भगवति तत्परचित्तो भवेत्। शृङ्गाररसाकृष्टचेतसोऽतिबहिर्मुखानपि स्वपरान्कर्तुं तादृशीः क्रीडा बभाजेति भावः ॥ ३७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत्राशङ्कते—नन्विति। एवं चेत् निःस्पृहस्यापि स्वेच्छाविग्रहांगीकारेऽपि। निन्दिते लीलातात्पर्यानभिज्ञपुरुषगर्हिते परदारविनोदे। इत्यत इत्यत्र। तादृशीः शृङ्गारिजनानन्ददा रासादिरूपाः या लीलाः। स भगवानेव परः परायण यस्य स तथा। इति भाव इति–भगवदवतारस्य सर्वलोकहितार्थत्वेन शृङ्गारिणोऽपि सर्वान्तर्गता एव तदुद्धर्तुमेव भगवतः परिपूर्णकामस्य रासलीलादौ प्रवृत्तिः "भवेऽस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः। श्रवणस्मरणार्हाणि करिष्यन्" इति प्रथमस्कंधोक्तेः॥ जुगुप्सितं किमभिप्रायं कृतवानिति प्रश्नस्योत्तरमाह—अन्विति। भक्तानामनुग्रहाय तादृशीः क्रीडा भजते, याः श्रुत्वा मानुषं देहमाश्रित्य जीवस्तत्परस्तद्विषयकश्रद्धावान्भवेदिति क्रीडांतरतो वैलक्षण्येन मधुररसमय्या अस्याः क्रीडायास्तादृशी मणिमन्त्रमहौषधीनामिव काचिदतर्क्या शक्तिरस्तीत्यवगम्यते। तथैव मानुषदेहवत एव तद्भक्तावधिकारित्वं मुख्यमभिप्रेतम् ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वाप्तकामस्य कुतः क्रीडायां प्रवृत्तिः कुतस्तरां वा बहिर्दृष्ट्या लोकावगीते तस्मिन्नित्यत आह। अन्विति। भक्तानामनुग्रहाय "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः" इति पद्मपुराणीयश्रीभगवद्वचनात् मानुषं नराकारमाश्रितः ब्रह्मरूपेण सर्वाश्रयोऽपि स्वयमाश्रयं कृतवानिति तस्य परब्रह्म स्वरूपस्य परमाश्रयत्वं च दर्शितम्। एतदुक्तम्। "दशमे दशमं लक्ष्यमाश्रिताविग्रह"मिति। तथा च श्रीभगवदुपनिषद् ब्रह्मणो हि प्रतिष्ठाहमिति। आस्थितः इति पाठेऽप्यादरविषयः कृत इति स एवार्थः। स्वेच्छया मानुषं देहमधुनैव विरचय्याश्रित इति व्याख्यातुं न घटते परत्र तत्र लोकेऽधिष्ठातृत्वेन कृष्णाख्यनराकारपरब्रह्मणः श्रीगोपैरनुभूतत्वात् एवं भक्तानुग्रहार्थं तत् क्रीडेत्यभिप्रेतम्। आप्तकामत्वेऽपि भक्तानुग्रहो युज्यते। विशुद्धसत्त्वस्य तथा स्वभावात् यद्भावभाविते चान्यत्र दृश्यतेऽसौ। तथा रहूगणानुग्राहके श्रीजडभरतचरिते यथा वा भवदनुग्राहके मयीति। तत्र भक्तशब्देन ब्रजदेव्यो ब्रजजनाश्च सर्वे कालत्रयसम्बन्धिनोऽन्ये च वैष्णवा गृहीताः ब्रजदेवीनां पूर्वरागादिभिः ब्रजजनानां जन्मादिभिरन्येषाञ्च तत्तद्दर्शनश्रवणादिभिरपूर्वत्वस्फुरणात्। अत एव तादृशभक्तप्रसङ्गेन तादृशीः सर्व चित्ताकर्षिणीः क्रीडा भजते याः साधारणीरपि श्रुत्वा भक्तेभ्योऽन्योऽपि जनस्तत् परो भवेत्। किमुत रासलीलारूपामिमां श्रुत्वेत्यर्थः। वक्ष्यते च। विक्रीडितं ब्रजवधूभिरिदञ्च विष्णोरित्यादि। यद्वा मानुषं देहमाश्रितः सर्वोऽपि जीवस्तत् परो भवेत्। मर्त्यलोके श्रीभगवदवतारात्तया भजने मुख्यत्वाच्च। मनुष्याणामेव सुखेन तच्छ्रवणादिसिद्धेः। भूतानामिति पाठे निजावतारकारणभक्तसम्बन्धेन सर्वेषामेव जनानां विषयिणां मुमुक्षूणां मुक्तानाञ्चेत्यर्थः। इति परमकारुण्यमेव कारणमुक्तम्। तथापि भजनसम्बन्धेनैव सर्वानुग्रहो ज्ञेयः। अन्यत्तैः तत्र बहिर्मुखानपीति तत् पर्यन्तत्वं विवक्षितम्। परमप्रेमपराकाष्ठामयतया श्रीशुकस्यापि तद्वर्णनातिशयप्रवृत्तेः। गोपीनामित्यस्यार्थान्तरे त्वेवं व्याख्येयम्। नन्वेवमपि नित्यवद्गुप्तमेव तथा क्रीडतु किं प्रापञ्चिकेभ्यस्तत् प्रकटनेन तत्राह। भक्तानां प्रपञ्चगतानामनुग्रहाय मानुषं देहं मर्त्यलोकरूपं विराड्देहांशमाश्रितः तत्र प्रकटोऽभूदित्यर्थः। "यस्य पृथिवी शरीर"मित्यादि श्रुता। तत्रापि तच्छरीरशब्दप्रयोगात्। मानुषशब्देन तल्लोकलक्षितत्वाच्च। अन्यत् समानम् अथवा तत् परोभवेदित्यत्र भक्तानां भूतानां बहुत्वान्न ते कर्तृत्वेन विपरिणामाद्यनुवर्त्तेरन्। व्याख्यान्तरे चाध्याहारादि कष्टतापतेत्। भगवानिति तु तत्र तत्र व्याख्यानेऽपि प्रकरणादेव लभ्यते। तस्मात्तादृशीः क्रीडा असौ भजते याः श्रुत्वापि स्वयमपि तत् परो भवेत् यदा यदा शृणोति तदा तदासक्तो भवतीत्येवार्थः ॥ ३७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एतदेव प्रपञ्चयति—अनुग्रहायेति। यद्वा, अध्यक्षः प्रत्यक्षः सन् क्रीडनाय तत्क्रीडार्थं देहमवतारो येषां गोपीजनानां ब्रजजनानामेव वा तान् भजति रमयतीति तथा सः। अतस्तेषामन्तर्बहिश्चरतः क्रीडासाधनत्वान्न तस्य क्रीडया कस्यापि दोषः प्रसज्जेदिति भाव इत्येषादिक्। अलमतिविस्तरेण। भक्तानामनुग्रहाय; 'मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः' इत्यादि—

---

[1] भक्तानां–विज.। [2] माश्रितः–विज.। [3] शीं क्रीडां यां–विज.।

श्रीभगवद्वचनात् मानुषं नराकारमाश्रितः प्रकटितवान् सन् । यद्वा, प्रकटयामासेति वाक्यसमाप्तिः, इति भक्तानुग्रहार्थं तत्क्रीडेत्यभिप्रेतम्, तत्र 'भक्त'-शब्देन गोप्यो व्रजजनाश्च सर्व्वे तथा कालत्रयसम्बन्धिनोऽन्ये च वैष्णवाः; यद्वा, भक्तानां मुख्या गोपिका एवोक्ताः, तथापि मुख्यानामनुग्रहेणान्येषां सर्व्वेषामनुग्रहः सिध्येदेव, अतएव क्रीडा भजते प्रीत्या सम्पादयतीत्यर्थः । श्लेषेण, भजतेऽनुसरति प्रकाशयति वेति । क्रीडानां नित्यसिद्धत्वं सूचितम्, तेन च सर्व्वदोषः स्वत एव निरस्तः, तादृशीरनिर्व्वचनीयाः सर्व्वचित्ताकर्षिका इत्यर्थः । श्लेषेण रासस‌दृशक्रीडाश्रवणेनापि तत्परो भवेत्, किमुत रासक्रीडामित्यर्थः । तच्छब्देन भगवान् भक्ताः क्रीडा वा सर्व्वोऽपि जनो भवेत् । यद्वा, मानुषं देहमाश्रितः सर्व्वोऽपि जीवस्तत्परो भवेत्, मर्त्त्यलोके श्रीभगवदवतारात्तथा भक्तियोग्य-साधनेन भजने मुख्यत्वाच्च मनुष्याणामेव सुखं तच्छ्रवणादिसिद्धेः । यद्वा, 'अपि'-शब्दमवतार्य्य व्याख्येयम्,—मानुषं देहमाश्रितोऽपि, किं पुनर्मुनिदेवादय इति, ततश्च भक्तानुग्रहोऽयमेवेति भावः । भूतानामिति पाठे सर्व्वेषामेव जनानां विषयिणां मुमुक्षूणां मुक्तानां भक्तानां चेत्यर्थः; इति परम-कारुण्यमुक्तम् । एवं (भा० १०।३३।२७) 'स कथं धर्म्मसेतुनाम्' इत्यनेन धर्म्मविरुद्धं कथं कृतवानित्येकस्य प्रश्नस्य परिहारः (भा० १०।३३।२९) 'धर्म्मव्यतिक्रमः' इत्यादिभिः, तथा (भा० १०।३३।२८) 'आप्तकामः' इत्यनेन परिपूर्णस्य का तत्र स्पृहेति द्वितीयस्य 'अनुग्रहाय' इत्यनेनेति विवेचनीयम् ॥ ३७ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

स्वतो निरतिशयानन्दस्य ग्राम्यचेष्टान्वयं परिहरति । अनुग्रहायेति ॥ ३७-३८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अवाप्तसमस्तकामस्य किं क्रीडाजन्यसुखलेशेनेति शङ्कां समाधानाह । अनुग्रहायेति । भूतानामनुग्रहायास्मदादिभूताननुग्रहीतुं मानुषं मनुष्यस्येव सन्निवेशविशिष्टं देहमास्थितः तादृशीरुक्तविधाः क्रीडा भजतेऽनुकरोति क्रीडात्ववान्तरप्रयोजनं भूतानुग्रहस्तु श्रीभगवदवतारस्य परमं प्रयोजनमिति भावः । अवतारस्य क्रीडार्थत्वं क्रीडायास्त्वनुग्रहार्थत्वञ्चोक्तं कथं क्रीडा अनुग्रहार्थत्वमित्यत्राह । याः क्रीडाः श्रुत्वा तत्परः श्रीभगवत्परो भवेत् जन इति कर्तृपदाध्याहारः मत् क्रीडाः शृण्वतो लोकस्य निरतिशयपुरुषार्थभूते मयि इष्टानिष्टप्रापणपरिहारदक्षे नितरामासक्तिर्यथा स्यादित्येवमनुग्रहाय क्रीडाः भजते नतु स्वयमपरिपूर्णो भजत इति भावः ॥ ३७ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

स्वेच्छाविग्रहस्वीकारे निःस्पृहस्य किम्प्रयोजनमित्यत आह । अनुग्रहायेति । तादृशीं मानुषदेहक्रीडां चरितं श्रुत्वा तत्परः भगवानेव परो यस्य स तथा तस्मिन् तात्पर्ययुक्तो वा । यद्वा स पुरुष इव जन्ममृत्युशून्यो भवेत् ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्र च सति परैर्व्यूढत्वमासामसमञ्जसं बहूनां तेषां तस्मिन्नसूयायदि तदिति यन्मित्रं परमानन्दमित्यादिव्याहन्येत् ॥३७॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ननु तर्हि रहस्यभूतामीदृशीं क्रीडां कथं भुवि प्रकटितवान् ? इत्याह—अनुग्रहायेत्यादि । भक्तानामनुग्रहाय तादृशीः क्रीडा भजते याः श्रुत्वा मानुषं देहमाश्रितो यः कश्चिदेव तत्परः श्रीकृष्णपरो भवेत् । भक्तास्तावद् विविधाः—रसस्य वैविध्यात् । तेन नानारसा एव लीलाः करोति, तेषां स्वस्ववासनोपासनाभेदादिति भक्तानुग्रहार्थमेव लीलाः । तासां श्रवणात् कश्चिदेव मानुषदेहभाक् मुच्यत इत्यर्थः ॥ ३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जुगुप्सितं किमभिप्रायं कृतवानिति द्वितीयप्रश्नस्योत्तरमाह । अन्विति । भक्तानामनुग्रहाय तादृशीः क्रीडाः भजते याः श्रुत्वा मानुषं देहमाश्रितो जीवः तत् परस्तद्विषयकः श्रद्धावान् भवेदिति । क्रीडान्तरतो वैलक्षण्येन मधुररसमय्या अस्याः क्रीडायास्तादृशीः मणिमन्त्रमहौषधानामिव काचिदतर्क्या शक्तिरस्तीत्यवगम्यते । तथैव मानुषदेहवत एव तद्भक्तावधिकारित्वं मुख्यमित्यभिप्रेतम् ॥ ३७ ॥

रसिकाह्लादिनी-टीका

नन्वाप्तकामस्य क्रीडाऽपि कुतः प्रयोजनाभावात न हि प्रयोजनमनुद्दिश्य मन्दोऽपि नाम प्रवर्त्तत इति चेत्तत्राह अनुग्रहायेति, भक्तानामनुग्रहार्थमेव नराकारदेहमाश्रितः । तदुक्तं दशमस्कन्धोपक्रमे "दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहमिति" । तदुक्तमुपनिषदि-भोगार्थं सृष्टिमित्यन्ये क्रीडार्थमिति चापरे । देवस्यैव स्वभावाऽयमाप्तकामस्य का स्पृहेति" भक्तानुग्रहार्थमेव तादृशीः मानुषानुकरणीः सर्वाचित्तनुकरणीः क्रीडाः, यद्वा तादृशी रासक्रीडासदृशीरन्याः क्रीडा भजते करोति । क्रीडा तु स्वकीयप्रियवर्गसापेक्षा । यद्वा भक्तानां व्रजजनानां सर्वेषामनुग्रहाय, यद्वा भक्तानां गोपीनामनुग्रहाय तादृशीः क्रीडा वाचामगोचरा भजते, यद्वा भक्तानां योऽनुग्रहः स्वमिन् कटाक्षपातालिङ्गनादिस्तदर्थं प्राप्तयेत्यर्थः । तादृशीः पूर्वोक्ता बाहुप्रसारेत्याद्याः क्रीडा भजते ।

याः श्रुत्वा सर्वोऽपि जनस्तत्परो भवेत्। क्रीडाश्रयैकनिष्ठो भवेत्। यद्वा भक्तानां गोपीप्रभृतीनामनुग्रहाय तत्समानजातीयं मानुषं मनुष्याकारं देहमाश्रितोऽभूदिति। न हि विजातीयेन देहेन तास्वानन्दं संचारयितुं शक्यत इति। ईदृगेव निरोधात्मिका लीला यदैश्वर्य्यमुपेक्ष्य गोपीस्वानन्दं संचारितवानिति भूतानामितिपाठे मुक्त-मुमुक्षु-विषयिणामनुग्रहाय तानपि स्वपरान् कर्त्तुं राससदृशीरन्याः क्रीडा भजते। याः श्रुत्वा तत्परो भक्तो भवेत्। यद्वा याः श्रुत्वा तत्परो गोपीसेवनपरो भवेत्। गोपीप्रसादमन्तरेण रहस्यलीलाश्रवणमपि दुर्ल्लभमित्यर्थः। तदुक्तमुद्धवेन "आसामहो चरणरेणुजुषामहं स्यामिति"। यद्वा याः श्रुत्वाऽन्योऽपि मानुषदेहमाश्रितः जीवस्तत्परो भवेदिति ॥ ३७ ॥

बिशुद्धरसदीपिका

नन्वाप्तस्य कुतः क्रीडने प्रवृत्तिः कुतस्तरां लोकदृष्ट्या विगीते तस्मिन्नित्यत आह। अन्विति। भक्तानामिति—

मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः। इति पाद्मोक्तेः ॥

मानुषं नराकारमाश्रितः ब्रह्मस्वरूपेण सर्वाश्रयोऽपि स्वयमाश्रयं कृतवानिति नराकारस्य परब्रह्मत्वं च दर्शितं तदुक्तं हयशीर्षपञ्चरात्रे—

आनन्दो द्विविधः प्रोक्तो मूर्तश्चाभूर्त एव च। अमूर्तस्याश्रयो मूर्तो भगवान् पुरुषोत्तमः ॥
ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य चेति श्रीगीतासु च।

आस्थित इति पाठेऽप्यादरविषयः कृत इत्यर्थः। एवञ्च भक्तानुग्रहार्थं तथा क्रीडते इति स्थितिः नह्येषा कामक्रीडा न चैते परदाराः किन्तु परमात्मस्वरूपिण्याः श्रीराधायाः प्रतिविम्बरूपाः प्रेमविशेषक्रीडापरिकराः नित्यसिद्धाः साधनसिद्धभक्तजनानुग्रहाय प्रकटीभूय निजभावभावितस्वान्तान् विधाय परिकेषु प्रवेशयन्तीति कामविजय एव प्रकरणार्थ इति प्रेक्षावतां व्याख्या। आप्तकामत्वेऽपि भक्तानुग्रहो युज्यते विशुद्धसत्त्वस्य तथा स्वभावात् यद्भावितेचान्यत्रापि दृश्यतेऽसौ यथा रहूगणानुग्राहके जडभरते यथा भवदनुग्राहके मयीति। अत एव तादृशीः सर्वभक्तजनचित्ताकर्षणीः क्रीडा भजते याः श्रुत्वान्योऽपि जनस्तत्परो भवेत् नहि कामक्रीडाश्रवणेन लोकवेदविरुद्धपरदारविनोदश्रवणेन च कश्चित्तत्परो भवति। नच भक्तेभ्योऽपि सा रुचितोचिता च प्रत्युत प्रेमविघातकत्वेन तद्विरुद्धैवेति। यद्वा मानुषं देहमाश्रितः सर्वोऽपि जनस्तत्परो भवेदिति सम्बन्धः ॥ ३७ ॥

श्रीरामनारायणकृता भावभावविभाविका

तथापि सच्चिदानन्दघनस्य स्वानन्दपूर्णस्य मायया देहीव भानेविभोरपि स्वेच्छया क्रीडाप्रकाशे वा किं प्रयोजनमिति राज्ञः किमभिप्रायमेतन्नः संशयं छिन्धीति प्रश्नस्योत्तरमाह। अनुग्रहायेति। भूतानामनुग्रहाय प्रेमोद्दीपकश्रृङ्गारवात्सल्यादिरसोद्बोधाय सजातीयप्रतीतावेव वात्सल्यश्रृङ्गारादिरसे निःशङ्कता भवतीत्यभिप्रेत्य मानुषं देहमास्थित इव निर्धारकवाक्ये देहीवाभातीतीवशब्दनिर्देशात् याः क्रीडा श्रुत्वेव श्रवणमात्रेणैव सर्वोऽपि जनो विषयिमुमुक्षुमुक्तानाङ्किमु वाच्यंविरुद्धनास्तिकम्लेच्छादिरपि तत्परो भवेत् कृष्णलीलागाने आधुनिकानां म्लेच्छादीनामपि तदर्थहृतचित्तत्वेनैव प्रवृत्तिदर्शनात्—

निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोऽभिरामात्।

क उत्तमश्लोकगुणानुवादात्पुमान् विरज्येत विना पशुघ्नादित्यादि वचनाच्च तादृशीः क्रीडा भजते नित्यसिद्धा एव प्रकटयति ॥ ३७ ॥

श्रीवनपतिसूरिकृता भागवतगूढार्थदीपिका

नन्वस्त्वेवं तथापि लोकदृष्ट्या निन्दितस्य कर्मणोऽनुष्ठाने भगवतः कोऽभिप्राय इति चेत्तत्राह। अनुग्रहायेति। भूतानां संसारिणामनुग्रहाय मानुषं देहमास्थितः अतस्तादृशीः क्रीडा भजते याः श्रुत्वा तत्परः स्वक्रीडानुसन्धानपरो भवेन् तथा च श्रृङ्गाररसाकृष्टचेतसोऽत्यन्तबहिर्मुखा अपि मत्परा भूत्वा उद्धृताः स्युरित्यभिप्रायेण तदाचरणमिति भावः ॥ ३७ ॥

रास-रहस्यम्

र० टी०—प्रकृत्या प्राणिनः स्वसजातीयचेष्टामेवानुकुर्वन्ति विशेषेण मनुष्याः। अपितु मनुष्यशरीरं मुक्तिलक्षणं सौधस्य द्वाररूपत्वात् कर्मण्यधिकारवत्वाच्च इतरेषां प्रारब्धफलभोगपर्यवसायित्वात् भूतानां प्राणीवर्गाणां मध्ये यः कश्चित् मानुषं देहमास्थितः मनुष्यं शरीरं प्राप्य तादृशी क्रीड़ा पूर्ववर्णिता ब्रह्मात्मैक्यलक्षणं "रासलीलाख्या" या श्रुत्वा श्रवणमात्रेणैव भजते मयापि एवं कर्तव्यमिति स्वात्मनि स्वक्रीयते तथा च तत् तेषां भक्तानां स्वस्वरूपेण भजनशीलानां अनुग्रहाय अनु पश्चात् ग्रहाय सरलतया ग्रहणार्थं तत्परोभवेत् परमात्मानुसन्धानपरो भवेदिति ॥ ३७ ॥

गूढार्थदीपिनी

तत्परः भगवत्परः ॥ ३७–३८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नन्वेवं मास्तु जुगुप्सितकारित्वं तस्याप्तकामस्य जुगुप्सितेऽपि कर्मणि कुतः प्रवृत्तिरित्यत आह । अनुग्रहायेति । सः भूतानां तदानीन्तनानां गोप्यादीनां लीलायां केनापि प्रकारेणान्वितानां खेचरभूचराणामनुग्रहाय स्वप्रावण्य सिद्धये तादृशीः क्रीडा भजते न केवलं तदानीन्तनानामेवानुग्रहाय किन्तु मानुषं देहमास्थितः यः कश्चिदपि मनुष्यदेहगतो जीवः श्रुत्वा तत्परो भवेत् भगवदीयो भवेदित्यन्वयः ॥ ३७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नायव्ययौ कायस्वीकारस्तिथ्योरथाऽपीतीरयति ॥ अनुग्रहायेति । भक्तानामुपर्यनुपहाय मानुषं देहमाश्रितः । तादृशी-तन्मानुषतनुसदृशीं क्रीडां लीलां भजते यां क्रीडां श्रुत्वा नरस्तत्परस्तदात्मको भवेदिति तदनुकृतिरिति भावः ॥ ३७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु तथापि एवङ्करणे कोऽभिप्राय इति चेत्तत्राह । अनुग्रहायेति । भक्तानामनुग्रहार्थमेव भक्तसमानरूपं देहमास्थितः विजातीये तेषां विश्वासो न भवेदिति । ततो यथा मनुष्यानुग्रहाय मानुषो देहः प्रदर्शितः एवं गोपिकानामप्यनुग्रहाय स्वानन्दं गोकुले दातुं तादृशीः क्रीडाः भजते तत्तद्धर्मप्रवेशव्यतिरेकेण तस्य तस्य दोषस्यानिवृत्तत्वात् । यद्वा भक्तानां मानुषं देहं प्रति आस्था सञ्जाताऽस्मिन्निति स तथा तत्रापि महान् पूर्णकामः सर्वं दातुं शक्तः नत्वेवं निषिद्धप्रकारेणात्मानं दातुमिति । अत एतां लीलां निरोधपूर्वकादेयदानरूपां यः श्रोष्यति स सर्वथा भगवत्परो भविष्यतीति भगवता तथाचरणं कृतं तदाह यः श्रुत्वा तत्परो भवेदिति ॥ ३७ ॥

श्रीसुबोधिनी-सारः

लोकदृष्ट्यानिन्दिते प्रवृत्तिरपि गुणार्था इत्याह । भूतानामनुग्रहाय मानुषं देहमाश्रितः तादृशीर्बहिर्मुखतुल्याः क्रीडाश्चेष्टा भजते याः क्रीडाः श्रुत्वा तत्परो भवेत् ॥ ३७ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

भजते तादृशीः क्रीडा इत्यत्र, **तत्तद्धर्मप्रवेशेति** । श्रोतृणामिति शेषः । यल्लीलाश्रवणमेव भगवद्भावसाधकम् , तल्लीलामध्यपातिनां स्वरूपं किं वक्तव्यमिति भावः ॥ ३७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यत्पृष्टम् 'आप्तकामो यदुपतिः केनाभिप्रायेण निन्दितमेतत् कृतवान् ?' तत्रोत्तरमाह—अनुग्रहाय भूतानामिति । भगवानाप्तकामोऽपि भूतानि जीवान् अनुगृहीतुं यथाकथञ्चित् स्वैकपरान् कृत्वा उद्धर्तुमेव मानुषं देहमाश्रितः स्वीकृतवान् , अतस्तादृशीरेव क्रीडा भजते करोति । याः श्रुत्वा तत्परो भवेन् स्वैकपरो निरुद्धो भवेदित्यर्थः ॥ यथा कर्माधिकारिणः कर्मसु प्रवर्तयितुं कर्मानुष्ठानं कृतवान् तथा च ज्ञानयोगाधिकारिणः प्रति ज्ञानयोगाद्युपदेशं कृतवांस्तथा शृङ्गाररसाकृष्टचेतसोऽतिर्बहिर्मुखानपि स्वपरान् कर्तुं रासलीलामपि कृतवानित्याशयः ॥ ३७ ॥

अन्वितार्थप्रकाशिका

आप्तकामो यदुपतिरित्यस्योत्तरमाह—अनुग्रहायेति ॥ भगवानाप्तकामोऽपि भूतानामनुग्रहाय भूतानि जीवान् अनुग्रहीतुं यथा कथं चित् स्वैकपरान्कृत्वा उद्धर्तुमेव मानुषं देहमाश्रितः स्वीकृतवान् अतस्तादृशीरेव क्रीडा भजते करोति । याः श्रुत्वा तत्परो भवेत् स्वैकपरो भवेत् । यद्वा । याः श्रुत्वा मानुषं देहमाश्रितो जीवस्तत्परो भगवत्परो भवेत् तादृशीः क्रीडा भगवान् भजते । यथा कर्मज्ञानयोगाधिकारिणः कर्मज्ञानादिषु प्रवर्त्तयितुं कर्मानुष्ठानादिकं कृतवांस्तथा विषयिणो बहिर्मुखान् अपि स्वपरान् कर्तुं रासलीलामपि कृतवान् । इयं हि रसमयी क्रीडा सर्वेषां मनुष्याणां चेतो भगवन्तं प्रति बलान्नयतीति ॥ ३७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मानुषं देहमास्थितो मनुष्यसमानतयावर्त्तमानः तादृशीर्मनुष्यतुल्याः तत्परः श्रीकृष्णपरायणो भवेत् ॥ ३७–३८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अवाप्तसमस्तकामस्य किं क्रीडाजन्यसुखलेशेनेति शङ्कानिराकुर्वन्नाह ॥ अनुग्रहायेति ॥ भूतानां अनुग्रहाय अस्मदादिभूतान्यनुग्रहीतुमित्यर्थः । अथवा शृङ्गाररसाकृष्टचेतसोऽतिबहिर्मुखानपि स्वपरान् कर्त्तुमित्यर्थः । मानुष्यं मनुष्यस्येव संनिवेशविशिष्टं देहं, आस्थित आश्रितः, आश्रित्येत्यर्थः । तादृशीरुक्तविधाः क्रीडाः, भजतेऽनुकरोति क्रीडा त्ववान्तरप्रयोजनं भूतानुग्रहस्तु भगवद्वतारस्य परणं प्रयोजनमिति भावः । एवमवतारस्य क्रीडार्थत्वं क्रीडायास्त्वनुग्रहार्थत्वं चोक्तम् । कथं क्रीडाया अनुग्रहार्थत्वमित्यत्राह । याः क्रीडाः श्रुत्वा, जन इति शेषः । तत्परो भगवत्परः, भवेत् । मत्काण्डाश्रवणतो लोकस्य निरतिशयपुरुषार्थभूते इष्टानिष्टप्राणपरिहारदक्षे मयि नितरामासक्तिर्यथा स्यादित्येवंविधानुग्रहाय क्रीडाः स भजते, न तु स्वयमपरिपूर्णो भजत इति भावः ॥३७॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अनुग्रहायेति : १०.३३.३७.

भगवानिह पूर्णसर्वकामः स्वजनानुग्रहनित्यसाभिलाषः । भवतीति तदस्य सर्वकृत्वं नृप जानीहि सदैव सद्धितार्थम् ॥ १७८ ॥
अनवद्यपदाद्यभूमिभाजः सदयस्यास्य विधीन्द्रपूजिताङ्घ्रेः । यदवद्यमलीकमुक्तमस्मादनघां तन्नतिमाचराचरामि ॥ १७९ ॥

कृष्णप्रिया

भक्तजनों पर कृपा करने के लिए मनुष्याकृति देह धारण कर पूतना मोक्ष दावानलपान रासक्रीडा आदि दिव्य लीलायें करते हैं । इन दिव्य लीलाओं का भक्तवृन्द भगवान में तन्मय बन जाते हैं ॥ ३७ ॥

नासूयन् खलु कृष्णाय मोहितास्तस्य मायया । मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः ॥३८॥

कर्दमक्षमा

अन्वयः—तस्य, मायया, मोहिताः, व्रजौकसः, स्वान , स्वान , स्वदारान्, पार्श्वस्थान् , मन्यमानाः, खलु, कृष्णाय, न, अभ्यसूयन् ॥ ३८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वन्येऽपि भिन्नाचाराः स्वचेष्टितमेवमेति वदन्ति तत्राह । नासूयन्निति । एवंभूतैश्वर्याभावे तथा कुर्वतः पापा ज्ञेया इति भावः ॥ ३८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनराक्षिपति-भिन्नाचाराः दुराचाराः । स्वचेष्टितम् पारदार्यादि । एवमेव लोकानुग्रहार्थमेव । तत्र कथने । मायया मोहिता नासूयन्-इमाः स्वैरिण्या गृहे न प्रवेश्याः, कृष्णोऽपि व्यभिचारित्वात्कुकर्मैवेत्येवं मनसि नाकुर्वन्नित्यर्थः । वस्तुतस्तु भगवदात्मकानां व्रजौकसां मायामोहाऽसम्भवात्तस्य मायया करुणया मा यथार्थमतिरूहिता विचारविषयं प्रापिता येषां ते तथा । कृष्णं स्वात्मानं पश्यन्तस्तत्पार्श्वस्थान्स्वपार्श्वस्थानेव मन्यमाना नासूयान्निति । एवंभूतैश्वर्याभावे श्रीकृष्णसमसामर्थ्याऽसत्त्वे । तथा कुर्वतः तदनुकुर्वतः । इति भाव इति-तेजोयसां साम्यं कर्तुं प्रवृत्तोऽतेजीयान्नश्यत्येवेत्याशयः ॥ नन्वेवं सर्वास्वेव निशासु गोपस्त्रीभिः सह विहरति भगवति तासां पतिश्वश्र्वादयः स्वस्वगृहेषु ताः स्ववधूरदृष्ट्वा भगवते तस्मै कथं नाकुप्यंस्तत्राह—नेति । मायया योगमाययैव न तु बहिरङ्गमायया । भगवत्परिवारेषु तस्या अधिकाराभावात् । तन्मोहितानां च भगवद्वैमुख्यस्यावश्यं सम्भवात् । तेषां गोपानान्तु भगवद्वैमुख्यमात्राऽदर्शनात् । तथा मोहनं च गोपीषु कृष्णमभिसृतवतीषु तादृशीस्तावतीरेव गोपीस्सृष्ट्वा तान्दर्शयित्वैव । अतः स्वान्स्वान्दारान्स्वपार्श्वस्थानेव मन्यमानाः । यदुक्तमुज्ज्वलनीलमणौ–“मायाकल्पिततादृक्स्त्रीशीलनेनानसूयुभिः । जातु व्रजदेवीनां पतिभिः सह संगमः ॥” इति । ततश्च योगमायायाश्चिच्छक्तिवृत्तित्वात्तत्कार्याणामपि नित्यमत्यौचित्यासर्वमायिकप्रपंचना शेपि तेषु स्वस्वभार्याभिमानस्य च नित्यमन्यत्वमेव । मन्यमानां इत्यभिमानमात्रं न तु योगमायाकल्पितानामपि तासां पतिभिः सह संगोग इति तासां तदाकारतुल्याकाराणामन्यसंभुक्तस्यानौचित्यात् । अत एव स्वपार्श्वस्थानिति तु स्वतल्पस्थानित्युक्तम् । तच्च समाधानं योगमाययैव तत्पतीनां तासु कामभावानुत्पादनात्कृतमिति ज्ञयम् । श्रीभगवत्पार्श्वात्स्वस्वगृहं प्रति गोपीनामागमनसमये मायिकगोपीनां माययैवांतर्द्धानमपि ज्ञेयम् ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु भवतु परमात्मत्वेन वा नित्यमेव ताभिः प्रेयसीभिः सह विहारित्वेन वा तासु तत् परदारत्वस्य प्रत्याख्यानं तत्र प्रथमः पक्षस्त्वध्याहारादिना कथञ्चित् स्थापित एव । अथ नित्यप्रेयसीत्वेनोत्तरपक्षश्चेत्तर्हि हन्त कथं तासां परदारत्वं श्रूयते । येन तासामन्यत्र विवाहोऽपि संप्रति लभ्यते । ततश्च तं प्रति जन्मान्तरे विवाहप्राप्तत्वेन तासां तत्तत् पत्नीत्वमेव स्यात् । ततश्च तत् परता कारणाय भक्तानामनुग्रहाय तादृशीः क्रीडा भजते इति चेत्तर्हि तेषां दाराकर्षणेन तं प्रत्यसूयासम्भवात्तेषु व्रजवासित्वात् परमभक्तेषु कथम्वानुग्रहः सिध्येत् कथम्वा तासु तन्नित्यप्रेयसीषु तादृशदुरवस्थायास्तेषु परमभक्तेषु च तादृशतद्वर्णनस्य श्रवणेन परेषामपि भक्तानां तत् परता स्यात् । तत्र पाठक्रमादन्वयक्रमो बलीयानिति तत् क्रमेण सिद्धान्तयति । नासूयन् खलु कृष्णाय इति खलु निश्चये यस्मात् व्रजौकसः तस्मात् कदाचिदपि कृष्णाय नासूयन्नित्यर्थः । यद्वामार्थ सुहृत् प्रियात्मतनयेति तं प्रति ब्रह्मवचनात् । कृष्णेऽर्पितात्मसुहृदर्थकलत्र कामा इति राजानं प्रति श्रीशुकवचनाच्च । ननु तथाप्यनुग्राह्यानां जानतामजानताञ्च स्वयं तथानिष्टकरणमसमञ्जसम् । तत्रोच्यते । यदि तेषां विवाहतोऽपि ता दाराः स्युस्तर्हि तथा त्वमेव । यदि तेषां भ्रममात्रेण व्यूढतया प्रतीताः वस्तुविचारेण तु तस्यैव दारास्तेन तदाकर्षणं तासां श्रुतमिति श्रुतार्थान्यथानुपपत्त्या “दशा पवित्रेण गृहं संमार्ष्टी”त्यादि-

वदावृत्त्यान्वयः क्रियते। तत्र चायमर्थः। तस्य मायया प्रेमवैचित्रीरचनाय विचित्रलीलासमुल्लासिकया योगमायया मोहिताः सन्तस्ते तस्य दारान् स्वान् मन्यमानाः स्वस्वपार्श्वस्थांश्च मन्यमाना इति। तदेवं तस्येत्यस्य द्विधान्वयभेदो दर्शितः। तत्र पूर्वस्यान्वयविभेदस्यायमभिप्रायः। योगमायाकल्पितानामन्यासामेव तैर्विवहनं संप्रवृत्तं नतु भगवन्नित्यप्रेयसीनामिति तथा तासां तदानीं मायया गोपितानां मोहितानाञ्च न तद्वृत्तं ज्ञातमासीदन्यतः श्रुतमपि तदनभीष्टमेवासीदिति तासु तेषां दारत्वस्य मननमात्रं नतु वास्तवत्वम्। तथा तेषु तासां पतित्वञ्च मनसा त्यक्तमेव इत्येवं तासां तैर्विवाहसम्बन्धो न जात इति। यतो नासूयन्नित्यनेन गुणेऽपि दोषारोपं नाकुर्वन्नित्येव मयोक्तं नतु नैर्ष्यन्निति अथोत्तरस्यान्वयविभेदस्यायमभिप्रायः। रासाद्यर्थं तेन तासां कर्षेण योगमायाकल्पितानां संज्ञाकल्पितच्छायावत्तत्तत् प्रतिरूपाणामन्यासामनुभावेन तानेव ते स्वपार्श्वस्थान् मेनिरे ततोऽपि न दोषप्रसङ्ग इति। ननु श्रीभगवत् प्रयसीनां तासां कदाचिदपि यदि बलात्तच्छायानिदेशः स्यात्तर्हि महानेव दोष इत्याशङ्क्या द्वितीयेनैवान्वयविभागार्थेन सिद्धान्तं कृतवान् स्वपार्श्वस्थांश्च मन्यमाना इति विवाहवदेव तत्र मायया वञ्चितास्त इति भावः। एतदेवाह ताः प्रति स्वयमेव श्रीभगवान्। निरवद्य संयुजमिति। एतदेव च गर्गवाक्येन कैमुत्याल्लभ्यते "य एतस्मिन् महाभागे प्रीतिं कुर्वन्ति मानवाः। नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुरा" इति। तदेवमेव ब्रह्मणा। "श्रियः कान्ताः कान्तः परमपुरुष" इति प्रोच्यान्यथात्वं मायिकमेवेति दृढीकृतमिति। अत्रेदमपि विचार्यते। ता वार्यमाणा इत्यादौ यत्तासां पतिम्मन्यादिभिर्निवारणं श्रूयते तत् किमुत श्रीकृष्णाकर्षणमज्ञात्वा ज्ञात्वा वा। यद्यज्ञात्वां तर्हि तत्रासूया न घटत एवेति न पूर्वः पक्षः सङ्गच्छते ततश्च तन्निराकरणं व्यर्थमेव स्यात्। यदि च ज्ञात्वा तर्हि तासां स्वपार्श्वस्थता दर्शनान्निजनिवारणप्रतिपालनं मत्वा ताभ्यो नासूयेयुर्नाम तदाकर्षणकर्तृक श्रीकृष्णायासूयेरन्नेवेति पूर्वपक्षः सङ्गच्छेत। तासां तत्तत् पार्श्वस्थता तु सिद्धान्ताय न कल्पते। तस्मात्तदिदं वक्तव्यम् तदा श्रीकृष्गेन तासामाकर्षणं बुद्धिपूर्वकमिति तैर्नावगतम्। तथाहि विद्याविशेषमयत्वात् खल्वसौ वंशीनादस्तासामेव कर्णे प्रविष्टो न पुनरन्येषाम्। सर्वकर्णप्रवेशश्चेत्तर्हि शयनावसरप्राप्तं निजशयनगृहं हित्वा कथमसौ निशि विदूरनिर्जनवनं गत इति वितर्क्य मातरः पित्रादयः सर्व एव महत्या शङ्कया तत्र गच्छेयुः। तस्मादौत्पत्तिकादेव माधुर्यान्मुहुः सर्वमेव कर्षत्यसाविति अनुभूय तासामपि तद्दर्शनार्थं गमनमाशङ्क्यते कित्वसमयत्वात्तैर्निवारितम्। तथापि यद्यखण्डमपि रात्रिं तत्रामूः स्थिता इति ज्ञायेत तदा व्रजवासित्वात्तेषामसूयायास्तत्रासम्भवेऽपि तदाभासः स्यादेव यथा सोऽयमस्माकं जीवनादि मूलम्। सचायमखण्डनिशि परवधूनां निजनिकटस्थितिमनुमोदमान आसीदिति तस्य लोकधर्म मर्यादामङ्गलातिक्रममनुमाय विस्मितानां तेषां तन्मङ्गलचिन्तामयएवायम्भावः कोपमय इवेति तदाभासत्वमेव तत्र लभ्यते येन ते वधूभ्यः कन्याभ्यश्चासूयेयुः। तासां स्वपार्श्वस्थतया दर्शनात्त सोऽपि नासीदिति कुतस्तरामसूयावकाश इति। एतदभिप्रेत्यैव युगान्तरगतांस्तत् प्रयसीनां तासां गोत्रप्रवर्त्तकान् गोपान् प्रतिश्रीविष्णुना सोऽयं वरोदत्तः। यथा पाद्मे सृष्टिखण्डे। "यदानन्दप्रभृतययोः अवतारं धरातले। करिष्यन्ति तदा चाहं वसिष्ये तेषु मध्यतः। युष्माकं कन्यकाः सर्वा रमिष्यन्ते मया सह तत्र दोषो न भविता न रोषो नच मत्सर" इति किञ्च स्वरूपेणैव यस्य पर्याप्ति न भवति तत्रोपाधिस्वीकारानर्थक्यमिति व्रजौकस्त्वेनैव श्रीकृष्णं प्रति तेषामसूयानुत्पत्तिर्व्याख्याता। मायामोहितत्वं तत्र हेतुर्विरुद्ध एव। तन्मोहिता एव तं प्रत्यसूयां कुर्वन्ति नतु तदमोहिता इति। तस्मान्मोहिता इत्यादेरन्यभागेनैव सङ्गतिः। तत्र प्रयोजनञ्च श्रीकृष्णस्य यदसमञ्जसत्वं कैश्चित्तर्क्येत तथा यस्तेषां श्रीकृष्णमङ्गलचिन्तामयभाव एवासूयत्वेन प्रतीयते तयोर्निरसनमेव। तत्र माययेति करणं चेत्तर्हि कर्त्रपेक्षया तस्येत्यत्र तेनेत्येव प्रयुज्येत। यदिच हेतुत्वं तर्हि मोहिता इति न प्रयुज्येत। ततः कर्तृरूपैव सेति लभ्यते। तस्यास्तद्रूपत्वेन निर्देशश्च। प्रियजनप्रेममयलीलाविष्टस्य तस्य प्रेरणं विना सार्वभौमस्य परमदक्षप्रतिनिधिरिव तामन्तरान्तरलब्धां तल्लीलां पूर्वपूर्वतादृशतल्लीलाक्रममनुक्रम्य समुत्कर्षविलसद्रसतां सा नयतीति विवक्षया। तदेवमेव च दर्शितम्। योगमायामुपाश्रित इति। तदेवं तस्यास्तदीयत्वे प्रकरणेन लब्धे सति तस्येति पदस्य पूर्वत्र नातिप्रयोजकत्वात् श्रुतार्थान्यथानुपपन्नत्वाच्च तस्य दारान् स्वान् स्वान् स्वपार्श्वस्थांश्च मन्यमाना इति परेणापि योजयित्वा सार्थकतां समर्थयद्भिस्तासु श्रीकृष्णस्यौपपत्यं तासामन्यशय्यानिवेशः श्रीकृष्णाय व्रजवासिनामसूयाभासस्तस्यामसमञ्जसत्वञ्च परिहृतमिति। तत्र तस्य मायया ये स्वे स्वे दारास्तान् स्वपार्श्वस्थान् मन्यमानाः भगवत्प्रेयस्यवस्थानानर्हसमये तदभेदेनानुभवन्तः यतो मोहितास्तयैवेति च योजयन्ति। यतः पतिव्रतानामपि न परात्परिभवः सम्भवति। किमुत य एतस्मिन् महाभाग इति गर्गवचनानुसारेण श्रीभगत्पराणां किमुत तत्प्रेयसीनामिति गम्यम्। अतः कूर्मपुराणे उत्तरविभागे द्वात्रिंशदध्यायस्यान्ते तदिदमुपोद्बलकमस्ति। यथा। "पतिव्रता धर्मपरा रुद्राण्येव न संशयः नास्याः पराभवं कर्त्तुं शक्नोतीह जनः कश्चित्—

यथा रामस्य सुभगा सीता त्रैलोक्यविश्रुता। पत्नी दाशरथेर्देवी विजिग्ये राक्षसेश्वरम्॥
रामस्य भार्यां विमलां रावणो राक्षसेश्वरः। सीतां विशालनयनां चकमे कालचोदितः॥
गृहीत्वा मायया वेशं चरन्तीं विजने वने। समाहर्त्तुं मतिञ्चक्रे तापसः किल भाविनीम्॥
विज्ञाय सा च तद्भावं स्मृत्वा दाशरथिं पतिम्। जगाम शरणं वह्निमावसथ्यं शुचिस्मिता॥
उपतस्थे महायोगं सर्वदोषविनाशनम्। कृत्वाञ्जलिं रामपत्नी साक्षात् पतिमिवाच्युतम्॥
नमस्यामि महायोगं कृतान्तं गहनं परम्। दाहकं सर्वभूतानामीशानं कालरूपिणमित्यादि॥

इति वह्निं पूज्य जप्त्वा रामपत्नी यशस्विनी । ध्यायन्ती मनसा तस्थौ राममुन्मीलितेक्षणा ॥
अथावसत्थ्याद्भगवान् हव्यवाहो महेश्वरः । आविरासीत् सुदीप्तात्मा तेजसैव दहन्निव ॥
सृष्ट्वा मायामयीं सीतां स रावणवधेप्सया । सीतामादाय धर्मिष्ठां पावकोऽन्तरधीयत ॥
तां दृष्ट्वा तादृशीं सीतां रावणो राक्षसेश्वरः । समादाय ययौ लङ्कां सागरान्तरसंस्थिताम् ॥
कृत्वा च रावणवधं रामो लक्ष्मणसंयुतः । समादायाभवत् सीतां शङ्काकुलितमानसः ॥
सा प्रत्ययाय भूतानां सीता मायामयी पुनः । विवेश पावकं दीप्तं ददाह ज्वलनोऽपि ताम् ॥
दग्ध्वा मायामयीं सीतां भगवानुग्रदीधितिः । रामायादर्शयत् सीतां पावकोऽभूत् सुरप्रियः ॥
प्रगृह्य भर्त्तुश्चरणौ कराभ्यां सा सुमध्यमा । चकार प्रणतिं भूमौ रामाय जनकात्मजा ॥
दृष्ट्वा हृष्टमना रामो विस्मयाकुललोचनः । ननाम वह्निं शिरसा तोषयामास राघवः ॥
उवाच वह्ने ! भगवन् किमेषा वरवर्णिनी । दग्धा भगवता पूर्वं दृष्टा मत्पार्श्वमागता ॥
तमाह देवो लोकानां दाहको हव्यवाहनः । यथा वृत्तं दाशरथिं भूतानामेव सन्निधौ ॥
भर्तृशुश्रूषणोपेता सुशीलेयं पतिव्रता । भवानी पार्श्वमानीता माया रावणकामिता ॥
या नीता राक्षसेशेन सीता भगवता हृता । मया मायामयी सृष्टा रावणस्य वधाय सा ॥
यदर्थं भवता दुष्टो रावणो राक्षसेश्वरः । मयापसंहृता चैव हतो लोकविनाशनः ॥
गृहाण विमलामेतां जानकी वचनान्मम । पश्यन्नारायणं देवं स्वात्मानं प्रभवाप्ययम् ॥
इत्युक्त्वा भगवांश्चण्डो विश्वार्चिर्विततोमुखः । मानितो राघवेन्द्रेण भूतैश्चान्तरधीयतेति ॥

तस्मात्तदावसत्थ्याग्निवत्तलीलायामुपाश्रिता योगमायापि यत्र साहाय्यं कुर्यादेवेति गम्यते । ततः प्रस्तुतमेवानुसन्धीयताम् ॥ ३८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तासु तन्निवारणमतिक्रम्य गतास्वपि कृष्णं प्रत्यसूयां न चक्रुः । कुतः ? तस्य मायया शक्तिविशेषेण मोहिताः, प्रत्युत साध्वेवामन्यन्तेत्यर्थः । यतो व्रजौकसस्तदेकार्पितात्मदेहदेहिका इत्यर्थः । अतएव गतानपि तान् स्वस्वपार्श्वस्थानेव मन्यमाना बभूवुः । यद्वा, दारान् प्रति च नासूयन्त । कुतः ? स्वपार्श्वस्थानेव मन्यमानाः, तत्र च पूर्व्वं (भा० १०।२९।८) 'ता वार्य्यमाणाः' इत्यनेन निजवाक्यमतिक्रम्य साक्षाद्गतानामपि तासां तैः स्वस्वपार्श्वस्थात्वमननं पुनर्निवृत्यागमनस्य मननादिति ज्ञेयम् । अन्यत्तैर्व्यञ्जितम् । यद्वा, 'भक्तानामनुग्रहाय' इत्युक्तम्, तत्र गोपानां दाराकर्षणेन तस्मै तेषामसूयासम्भवात्तेषु कथमनुग्रहः सिध्येदित्याशंक्य तत्रोत्तरं वदन् प्रकृतञ्चानुसरति—नेति । अर्थः स एव ॥ ३८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नन्वेवमप्युक्ताभिप्रायेण क्रीडाः भजन्तं तदभिप्रायानभिज्ञा गोपीनां पतयः किंनाभ्यसूयन्नित्यत्राह । नेति । व्रजौकसः गोपीनां पतयः तस्य कृष्णस्य मायया मोहिताः स्वस्वदारान् स्वस्वपार्श्वस्थानेव मन्यमानाः कृष्णाय नासूयन् दोषबुद्ध्या न ददृशुः कृष्णायेत्यत्र क्रुधद्रुहेत्यादिना चतुर्थी ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वैरिणीवृत्तिमाश्रितानां गोपीनां ग्रहणं तद्भर्तृभिः कथञ्च कृतं कथञ्च कृष्णे दोषाविष्करणमकृतमत्राह । नेति । गुणेषु दोषाविष्करणमसूया "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप" इति चतुर्थी ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्राह । नासुयन्निति । तद्दिनमुपलक्षणमेव किन्तु विवाहादि सर्वावस्थास्वपि तथा ज्ञेयं सिद्धान्तरसव्याघातात् । मायानिर्मितान् स्वान् दारान् स्वपार्श्वस्थानेव मन्यमाना इति तत्राह यन्मित्रमिति यद्धामार्थं सुहृदित्यादि न्यायेनासूयाप्यत्र लोकरीतिरक्षणार्थं तदाभास एव च ज्ञेयः । नत्वाप्तकामस्य कुतः क्रीडने प्रवृत्तिः कुतस्तरां वा बहिर्दृष्ट्या लोकगीते तस्मिन् इत्यत आह । अन्विति । भूतानामिति पाठेऽपि भक्तानामेव सम्बन्धेनैवान्येषामनुग्रहो ज्ञेयः । अथवा नन्वेवमपि नित्यवत् गुप्तमेव तथा क्रीडतु किं प्रापञ्चिकेभ्यस्तत्प्रकटनेन तत्राह भक्तानां प्रपञ्चगतानाम् । मानुषं मर्त्यलोकरूपं विराड्देहांश्च समाश्रितः तत्र प्रकट इत्यर्थः । तत्र वस्तुनोऽपि प्रभावमाह । याः श्रुत्वेति अन्योऽपीति शेषः ॥ ३८–४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडायां श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

प्रकृतमाह—नासूयन्नित्यादि । असूयाभावे हेतुमाह—मोहितास्तस्य मायया योगमायया मोहिताः । मोहप्रकारमाह—मन्यमाना इत्यादि । योगमायैव तासां छायारूपाण्याविष्कारयामास ॥ ३८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मन्यमाना इत्यादि । स्वपार्श्वस्थानिति पूर्वव्याख्यातेन सह सङ्गतिः ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नन्वेवं सर्वास्वेव निशासु गोपस्त्रीभिः सह विहरति भगवति तासां पतयश्च श्वश्वादयः स्वस्वगृहेषु ताः स्ववधूरदृष्ट्वा भगवते तस्मै कथं नाकुप्यंस्तत्राह । नेति । मायया योगमाययैव नतु बहिरङ्गमायया । भगवत्परिवारेषु तस्या अधिकाराभावात् तन्मोहितानाञ्च भगवद्वैमुख्यस्यावश्यम्भावात् । तेषां गोपानान्तु भगवद्वैमुख्यमात्रादर्शनात् । तया मोहनञ्च गोपीषु कृष्णमभिसृतवतीषु तादृशीस्तावतीरेव गोपीः सृष्ट्वा तान् दर्शयित्वैव । अतः स्वान् स्वान् दारान् स्वपार्श्वस्थानेव मन्यमानाः । यदुक्तमुज्ज्वलनीलमणौ । "मायाकल्पिततादृक स्त्री शीलनेनानुसूयुभिः । न जातु व्रजदेवीनां पतिभिः सह सङ्गम" इति । ततश्च योगमायायाश्चिच्छक्तिवृत्तित्वात् तत्कार्याणामपि नित्यसत्यौचित्यात् सर्वमायिकप्रपञ्चनाशेऽपि तेषां पार्श्वस्थदाराणां तेषु स्वस्वभार्याभिमानस्य च नित्यसत्यत्वमेव मन्यमाना इत्यभिमानमात्रं नतु योगमायाकल्पितानामपि तासां पतिभिः सम्भोग इति तासां तदाकारतुल्याकाराणामन्यसंभुक्तत्वस्यानौचित्यात् अत एव स्वपार्श्वस्थानिति तु स्वतल्पस्थानित्युक्तम् । तच्च समाधानं योगमाययैव । तत्पतीनां तासु कामभावानुत्पादनात् कृतमिति ज्ञेयम् । श्रीभगवत्पार्श्वात् स्वस्वगृहं प्रति गोपीनामागमनसमये मायिकगोपीनां माययैवान्तर्द्धापनमपि ज्ञेयम् ॥ ३८ ॥

रसिकाह्लादिनी–टीका

पूर्वं राज्ञा पृष्टं परदाराभिमर्शनं धर्म-विरुद्धं कथं तत्र प्रौढिवादेन गोपीनां परदारत्वमङ्गीकृत्य "धर्मव्यतिक्रमो दृष्ट" इत्युत्तरं दत्तम् । आप्तकामो यदुपतिरिति । यत् पृष्टं तत्र अनुग्रहाय भक्तानामित्युत्तरितम् । यद्यपि राज्ञः समाधानं जातं तथाप्यन्येषां सभासदां संशयो जातः । तथा हि यदा श्रीकृष्णेन वेणुनादद्वारा आकृष्टास्तदाऽसूयाविष्टैस्तासां पत्यादिभिरवरुद्धास्तदा गुणमयं देहं जहुरिति उक्तम् । अन्येषामामि व्रजवासिनां तत्तुल्यत्वात् तासु सर्वासु गतासु गृहाणां शून्यत्वे जाते अन्वेष्टुं कथं ते न गतास्तत्र समाधत्ते नासूयन् इति व्रजौकसस्तासां पत्यादयस्तासु गतासु कृष्णाय नासूयन् कृष्णे दोषदृष्टि न चक्रुरिति । तस्य हेतुः तस्य मायया योगमायया मोहिताः "स्यात् कृपादम्भयोर्मायेति" विश्वः । ते यद्यपि जानन्ति तथापि तस्य मायया कृपया स्नेहविशेषेण मोहिताः दोषदृष्टिं न चक्रुः । यद्वा अभिज्ञानां मते माया 'अघटितघटनाचातुरीविशेषस्तेन मोहितास्तदाह यास्तु पूर्वं गृहमध्ये रुद्धास्तत्सदृशं देहं छायामयं तेभ्यो दत्वा तास्तेनैव देहेन श्रीकृष्णान्तिकं गतास्ताः रमयामास । तथात्रापि तासां छायामयदेहस्य पत्यादिसमीपे स्थापितत्वात्, अत एवासूयां न चक्रुरिति । यतः स्वान् स्वान् दारान् पार्श्वस्थान् स्वसमीपस्थान् मन्यमाना व्रजौकस इत्यनेन व्रज एव स्थिताः तन्निकटेऽन्वेष्टुं न गता इति भावः । अनुग्रहाय भक्तानामित्यनेनोक्तमनुग्रहं स्फुटयन् तेष्वसूयां नोत्पादितवानिति अन्यथाऽनुग्रहासम्भवेऽसूयाविष्टा भवेयुरितिभावः ॥ ३८ ॥

विशुद्धरसदीपिका

ननु भवतु नित्यसिद्धानां तथात्वं साधनश्रुतिमुतिरूपाणां तु पत्यादिश्रवणात्पति सुतान्वयभ्रातृवान्धवानित्यादिना तास्वपि तथात्वोद्भावनात्तत्पत्यादिषु च परमभक्तेषु कापट्यावरणेनासूयोदयात्कथमनुग्रहः सिध्येत् इत्यत आह । नेति । व्रजौकसः कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा इत्यादिना प्रसिद्धाः प्राग्दर्शितनिजलोकगतत्क्रीडासुखाः कृष्णं च तत्र तत् क्रीडासक्तमेव छन्दोभिः स्तूयमानं दृष्ट्वातिविस्मिताः सन्तो नासूयन् तत्र हेतुः मोहिता इति अत्र पतिमन्यत्वमेव मायामोहितत्वं सुतरां च तद्गमनाद्यपरिचय इति अन्यथा तत्तद्वञ्चने श्रीभगवत्यसामञ्जस्य प्रसज्येतैव कथम्भूताः स्वान् स्वान् दारान् तथात्वेन मायाकल्पितान् स्वपार्श्वस्थानेव मन्यमानाः एवञ्च ता वार्य्यमाणाः पतिभिरित्यादिकमपि मायाकल्पितैरेव तैरिति व्याख्यानसुसङ्गतं तेषां वास्तवत्वे तत्परिज्ञाने च दुरुद्धारदोषप्रसक्तिरित्यवधेयम् आसाञ्च गोत्रप्रवर्तकान् गोपान् प्रति प्रागेव श्रीविष्णुनसोऽयं वरो दत्तः यथा पाद्मसृष्टिखण्डे—

यदा नन्दप्रभृतयः अवतारं धरातळे । करिष्यन्ति तदाचाहं वसिष्ये तेषु मध्यतः ॥
युष्माकं कन्यकाः सर्वा रमिष्यन्ते मया सह तत्र दोषो न भविता न रोषो नच मत्सरः इति

निखिलं निरवद्यं प्रसिद्धव्याख्यायां तु दोषोऽपरिहार्य्यं इप्युपेक्षिता ॥ ३८ ॥

श्रीरामनारायणकृता भावभावविभाविका

ननु मुख्यभक्तानां व्रजवासिनां स्वपत्नीत्वाभिमतानामपकर्षणे नासूयाजनकाः क्रीडाः कथं सर्वभूतानामनुग्रहाय भवन्तीत्यपेक्षायां तेषां तदनुसूयकत्वं दर्शयति । नासूयन्निति । यतस्ते व्रजौकसः सच कृष्णोऽतस्ते तस्मै नासूयन् यद्वात्मार्थसुहृत्प्रियात्म

तनयप्राणाशयास्त्वत्कृते इति ब्रह्मवचनात् कृष्णेऽर्पितात्मसुहृदर्थ कलत्रकामा इत्यादिशुकोक्तेश्च तेषां व्रजवासिनां साक्षात्कृष्णैः नित्यानन्दरूपतया सर्वप्रेमास्पदे विशेषतः स्वमनः कर्षकेऽसूयाद्यभावः किमु वाच्यम्—

न क्रोधो नच मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानाम्भक्तानाम्पुरुषोत्तमे ॥

इत्यादिस्मृतिभिः समानभक्तानां यत्र कुत्रापि विद्वेष्यादावप्यसूयाद्यशुभमत्यभावनिर्द्धारदर्शनात्। अतो व्रजौकस्त्वादेव यथा तस्य मायया मोहिता असूयादि कुर्वन्ति तथा नासूयन्नित्यन्वयः। यद्वा मायया मोहितास्तस्य दारान्नित्यप्रियास्तच्छ्रुतिदेवतावत्स्वान्स्वान् मन्यमाना अपि तया माययैव तान् सीतासंज्ञादिच्छायाकारानिव प्रतिभासमानान् स्वपार्श्वस्थान् मन्यमाना असूयानिमित्तस्यैवाभावाच्च नासूयन् तथाच ताः पूर्वोक्तप्रमाणः कृष्णप्रेयस्य एव ब्रह्मवत्सहरणे भगवतस्तत्तदाकारत्वापत्तौ तद्विवाहान्न विवाहेनापि तत्सम्बन्धः कात्यायनीपूजनभगवद्वरदानादेरप्यन्यथाभावानौचित्यात् तासां नित्यदा तत्सम्बन्धप्रतीतिरपि रासनिशि तासां भगवद्विहारनिर्द्धारेऽपि स्वपार्श्वस्थत्वप्रतीतिवदेवेति न भगवतः परदारसम्बन्धो न वा भगवत्प्रेयसीनामन्यगोपादिसम्बन्धइत्यनद्यं, यद्वा ते व्रजौकसः कृष्णाय नासूयन् यतस्तस्य मायया कृपया "माया दम्भे कृपायाञ्चे"ति कोशात्। यद्वा तस्य मा प्रमा यया तया भक्त्या मोहिता मा प्रमा यथार्थमतिरूहिता येषां तथाभूताः स्वान् स्वांल्लौकिकभ्रान्त्या स्वीयत्वेन देहसबम्धितया प्रतिभासमानानपि तस्य परमात्मनः स्वस्वात्मभूतस्यैव दारान् मन्यमानाः तत्पार्श्वगतानपि तस्य स्वात्मत्वात्स्वपार्श्वस्थानेव मन्यमाना इति ॥ ३८ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

ननु एवम्प्रवृत्ते भगवति तत्पतीनामसूया कथं नोत्पन्नेत्याशङ्क्याह। नेति। व्रजौकसां तत्पतयः कृष्णाय नासूयन् यतस्तस्य योगमायया मोहिता। ननु कोऽसौ मोहो मूर्च्छारूपः किम्वान्यथाभावरूप इत्येपक्षायामाह। स्वान् स्वान् दारान् स्वपार्श्वस्थान्मन्यमानाः एतेनान्येऽपि भिन्नाचाराः स्वचेष्टितमेव वदन्तीत्याशङ्कापि निरस्ता यथोक्तैश्वर्यरहितानामन्यथाचरणे पापिष्ठत्वावगमात् तस्मान्न तदेव चरितं चरेदित्युक्तत्वादेवं विधा प्रवृत्तिर्न कस्यापि मनुष्यस्यैवेति भावः ॥ ३८ ॥

रास-रहस्यम्

र० टी०-प्रथमतः तत्तदिन्द्रियाधिष्ठितदेवानां जन्मजन्मान्तरविषयव्यसनसंस्कारवद्धत्वात् स्वात्मानं परमात्मनः दूरमिव मत्वा असूयाकारित्वसम्भवेऽपि यदा तस्य परमात्मनः मायया मा प्रमा यथार्थमतिरूपा तया, मोहिताः मा प्रमा प्रामाण्यरूपेण ऊहिताः कथिताः प्रतिपादिताः, सन्तः स्वान् स्वान् दारान् तत्स्थानीयाः स्व स्व वृत्तीः इत्यर्थः, स्वपार्श्वस्थान् भ्रान्त्या स्वकीयत्वेन मन्यमानान् अतः कृष्णाय स्वमनादिकर्षके परमात्मनि, खलु निश्चयेन नासूयन् विद्वेषं नाकुर्वन्, कथम्? यथार्थमत्युदये सति ते देवाः स्वात्मनः विभुत्वस्य परमात्मनाभेदरूपेण ज्ञातत्वात् वृत्तयः तदभिमुखीगता अपि स्वाभिमुखी एव मन्यमाना इत्यर्थः ॥ ३८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्य गोपगोप्यादीनां हितायावतीर्णस्य सर्वेश्वरस्य मायया कृपया मोहिताः वशीभूताः स्वान् स्वान् दारान् स्वपार्श्वस्थान् स्वकीयो यः कुलतः व्रजेशसूनुत्वात् गोबर्द्धनोद्धरणादिना च रक्षकत्वात् वैकुण्ठप्रदर्शनत्वेन परमप्राप्यत्वात् शास्त्रदृष्ट्या च स्वात्मत्वात् एवम्भूतस्य स्वस्य श्रीकृष्णस्य पार्श्वे स्थितान् मन्यमाना नासूयन् ॥ ३८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्पतयस्ता आस्तरणेऽदृष्ट्वा किं वाऽवदंश्चक्रुश्च किमित्यत आह ॥ नेति व्रजौकसो गोपाः स्वान्दारान्भार्यास्तस्य माययेच्छयेव मोहिताः स्वपार्श्वस्थामन्यमानाः कृष्णाय नासूयन्न दोषान्गुणेष्वाविष्कृतवन्त इत्यर्थः। क्रुधेति चतुर्थी ॥ ३८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु तथापि लोकव्यवहारे स्त्रियोऽन्याधीना इति अदत्तोपादाने गोपानां मनसि खेदस्तैः क्रियमाणा अपकीर्त्तिश्च न भवेदित्याशङ्क्याह। नासूयन्निति। ते भगवन्तं नासूयन् न दृष्टवन्तः प्रथमतः प्रवृत्तिं ज्ञात्वापि भगवन्मायया मोहिता नासूयन् अग्रेतु स्वपार्श्वस्थानेव स्वान् स्वान् दारान् मन्यमाना जाताः यतो व्रजौकसः पूर्वापरानुसन्धानरहिताः सर्वथाङ्गीकृता इति वा एतादृशानां प्रभ॰ दोषारोपासम्भवादिति भावः। अयमर्थः सर्वजनीन इति खल्वित्युक्तं भगवत्सांनिध्येऽपि मोहार्थे तस्येति बुद्धिरेव तेषां भ्रमात् शिष्टं भगवत एवेति मननमात्रेणैव सर्वदोषपरिहारः अनेन तास्वपि दोषारोपो निवारितः ॥ ३८ ॥

श्रीसुबोधिनी-सारः

तस्य मायया मोहिता व्रजवासिनः स्वान् स्वान् दारान् स्त्रीः स्वसमीपे वर्त्तमानान्मन्यमानाः कृष्णाय नाभ्यसूयत् नानिन्दन् तादृशैश्वर्यहीनास्तथा कुर्वतः पापा इति निष्कृष्टोर्थः ॥ ३८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

ब्रह्मरात्र इत्यत्र, वासुदेवपदतात्पर्यमाहुः **यतो भगवानित्यादि** । दिवा त्रिप्रयोगजातौ सत्यां दिनान्ते प्रियसंगमे य आनन्दो, न स सदा दर्शन इति सोऽत्र मीक्षपदेनोच्यते ।। ३६ ।।

श्रुतिसिद्धरसात्मत्वं प्रकटीकृत्य भूतले । क्रीडन्मल्लोचने शश्वच्छिशिरीकुरुते प्रभुः ।। १ ।।

इति त्रिंशोऽयायः ।। ३० ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'एवमप्येतदनभिज्ञास्तत्पतयः कृष्णाय किमिति नाभ्यसूयन्' तत्राह—नासूयन्निति । खलु अवधारणे । व्रजौकसा गोपीनां पतयः कृष्णाय नैवासूयन् दोषबुद्धया तं नैवापश्यन् । तत्र हेतुमाह—तस्य भगवतो मायया मोहिता इति । मोहमेव स्पष्टयति—स्वान् स्वान् दारान् स्वपार्श्वस्थान् मन्यमाना इति । अनेन लोके यदि केचिद्भ्रष्टाचारास्तदनुयायिनो वा निन्दितं स्वचरितमेवमभिप्रायकमेवेति भगवद्दृष्टान्तेन वदन्ति तदा तद्वचनं नाङ्गीकर्तव्यम्, एवंविधप्रभावाभावादिति सूचितम् ।। ३८ ।।

अन्वितार्थप्रकाशिका

नासूयन्निति ।। तस्य हरेर्मायया मोहिताः अतः स्वान् स्वान् दारान् दारदुहितृस्वस्रादीन् स्वपार्श्वस्थान् मन्यमानाः व्रजौकसः तासां पतिपित्रादयः कृष्णाय नासूयन् । ननु तथापि जानतामजानतामपि तषां दारभोगो न समञ्जस इत्याशङ्कायाम् आवृत्त्या वाक्यभेदेनानेनैवोत्तरं तस्य दारान् स्वान् स्वान् स्वस्वदारान्मन्यमाना इत्यर्थः । उभयत्र हेतुः योगमायया मोहिता इति । अयं भावः । भगवत्प्रेयस्यस्ताः न तेषां भार्याः विवाहकाले योगमायाकल्पितानामन्यासां तत्सदृशीनां तैः पाणिग्रहणात् । अतस्तासु तेषामूढात्वभ्रान्त्या भार्यात्वमननमात्रं रासलीलानिशासु तत्पूर्वापरनिशासु च संज्ञाकल्पितछायाख्यसूर्यभार्यावद्योगमायाकल्पिता अन्या एव स्वपार्श्वस्था अनुभूय ता एवेमा इति मेनिरे इति न किञ्चिदसमञ्जसम् ।। ३८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वेवंविधभगवदभिप्रायानभिज्ञा गोपीनां पतयः किं नाभ्यसूयन्नित्यत्राह ।। नासूयन्निति ।। व्रजौकसः व्रजस्थिता गोपीनां पतयः; तस्य कृष्णस्य, मायया मोहिताः अत एव, स्वान् स्वान् दारान् स्वस्वपत्नीरित्यर्थः । स्वपार्श्वस्थान् स्वस्वान्तिके वर्त्तमाना एवेत्यर्थः । मन्यमानाः, अभवन् । अतः, कृष्णाय न अभ्यसूयन् खलु । कृष्णं दोषबुद्धया न ददृशुरित्यर्थः । कृष्णायेत्यत्र 'कुधद्रुह—' इत्यादिना चतुर्थी ।। ३८ ।।

कृष्णप्रिया

राजन् ? भगवान् श्रीकृष्ण की व्रजवासियाँ पर असाधारण कृपा थी, जो व्रज वासी है वे अनेक लीला प्रसङ्गों से भगवान् की महिमा जानते थे, उनकी भगवान् में दोष बुद्धि नहीं हो सकती । वह व्रज जन अपनी अर्धाङ्गनाओं को अपने पास रही जानी इसलिए भगवान श्रीकृष्णमें उन्होने इर्ष्या नहीं की ।। ३८ ।।

ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः । अनिच्छन्त्यो ययुर्गोप्यः स्वगृहान् [1]भगवत्प्रियाः ।। ३९ ।।

विक्रीडितं व्रजवधूभिरिदं च [2]विष्णोः श्रद्धान्वितोऽनुश्रृणुयादथ वर्णयेद् यः ।
भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्व[3]पहिनोत्यचिरेण धीरः ।। ४० ।।

इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे[5] रासक्रीडावर्णनं नाम [6]त्रयस्त्रिंशोऽध्यायः ।। ३३ ।।

कदमक्षमा

अन्वयः—ब्रह्मरात्रे, उपावृते, भगवत्प्रियाः, गोप्यः, अनिच्छन्त्यः, वासुदेवानुमोदिताः, स्वगृहान् ययुः ।। ३९ ।। व्रजवधूभिः, विष्णोः, इदम्, विक्रीडितम्, श्रद्धान्वितः, अनुश्रृणुयात्, अथ, यः, वर्णयेत्, (सः) भगवति, पराम्, भक्तिम्, उपलभ्य, सः धीरः, हृद्रोगम्, कामम्, आशु, अचिरेण, अपहिनोति ।। ४० ।।

इति त्रयस्त्रिंशोऽयायः समाप्तः ।। ३३ ।।

---

१. न स्त्रियः-प्रा. पा. । २. हरौ-इति कस्यचित् । ३. शुविधुनो-वीर. । ४. पारमहंस्यां संहितायां-प्रा. पा. । ५. पूर्वार्द्धे रासक्रीडायां । ६. एकत्रिंशो-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते ॥ ३९ ॥ भगवतः कामविजयरूपरासक्रीडाश्रवणादेः कामविजयमेव फलमाह । विक्रीडितमिति । व्रजवधूभिः सह विष्णोर्विक्रीडितम् । अचिरेण धीरः सन्हृद्रोगं काममाशु अपहिनोति परित्यजतीति ॥ ४० ॥

सेयं श्रीपरमानन्दसेविश्रीधरनिर्मिता ॥ श्रीभागवतभावार्थदीपिका दशमाश्रया ॥ १ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्धे टीकायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

केचित्तु ब्रह्मरात्रसमकाले समाप्ते सतीत्याहुः । तदपि भगवन्मायाया अघटितघटनापटीयस्यास्संगच्छत एव, मार्कंडेयस्य क्षण एव सप्तकल्पप्रदर्शनात् । वासुदेवेन सर्वत्र प्रकाशमानेनानुमोदिताः स्वगृहादावपि दत्तानन्दा अनिच्छन्त्यो भगवद्विरहमसहमानाः । एतदेवाह—भगवानेव प्रियो यासां न गृहादि, तास्तथा ॥ ब्रह्मरात्र इति समासान्त आर्षः । ब्रह्मणोरात्रौ युगसहस्रप्रमाणायामुपावृत्ते उपाधिक्येनावृत्ते एकामावृत्तिं गते सति गोप्यः स्वगृहान्ययुः, एकस्यामेव रजन्यामेतावत्यो लीलाः कर्तव्या इति भगवतः सत्यसंकल्पत्वात् । नृत्यगीताद्यो यावंतो विलासा मनस्यभीप्सितास्तावतां संपूर्त्तौ यावन्तः समयास्संभवन्ति तावद्भिः समयैर्युगसहस्रं पूर्णं बभूव । तच्च युगसहस्रं प्रहरचतुष्टयात्मकरजनीमध्य एव रासस्थल्यां प्रविवेश । यथा पञ्चयोजनात्मकवृंदावनप्रदेशैकदेश एव पंचाशत्कोटियोजनप्रमाणानि ब्रह्माण्डानि प्रविष्टानि ब्रह्मणा दृष्टानि, यथा चातिस्तोकस्यैव भगवत उदरस्योपर्यपरिमितानि दामानि अंतरेव च ब्रह्माण्डमेव दृढमभूदित्यत्र नासं भावना कार्या । तदुक्तं भागवतामृते–"एवं प्रभोः प्रियाणञ्च धाम्नञ्च समयस्य च । अविचिन्त्यप्रभावत्वादत्र किंचिन्न दुर्घटम् ॥" इति । कालप्रचलनलीला लोकेपि दुर्लक्ष्यैव, यतोष्टादशशतघट्यात्मकत्रिंशद्दंशाः सार्द्धत्रयादिघट्यात्मकमेषादिराशिषु व्यतीयन्ते । एतच्च ज्योतिःशास्त्रतो निश्चेयं भवतीति । वासुदेवानुमोदिताः–मम च भवतीनां च प्रतितादृशक्रीडासिद्ध्यर्थं प्रच्छन्नकामतैवाभीष्टेति कृष्णेन कृतानुमोदना इत्यर्थः । यद्वा–चित्ताधिष्ठात्रा वासुदेवेनैव गुरुलज्जाभयादिकमुद्भाव्य प्रेरिताः । अत एव प्रियविरहस्य दुःसहत्वादनिच्छन्त्यो ययुः ॥ ३९ ॥ भगवल्लीलायाः संसारनिवृत्तिहेतुत्वाच्छ्रवणं सदा कार्यम्, सा च कामजयपूर्विका कामिनां दौर्गत्यावगतेरत्र लीलायां भगवतापि काम एव जितोऽत एतच्छ्रवणपरायणस्यापि स च जितो भवतीत्याशयेनाह–विक्रीडितमिति । विविधं जलस्थलवनादिभेदेन क्रीडितं विहरणम् । चेति पदं श्रद्धातिशयजननार्थकम् । यथान्यानि विक्रीडितानि तथैवेदं च लीलातात्पर्यावगत्यावाप्तधैर्यः सन् । कामत्यागस्य भगवद्रूपतापादकत्वेन संसारनाशकत्वं स्फुटम् । "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥" इति श्रुतेः । कामा वासनाः, मदनस्यापि वासनाजन्यत्वात्कामत्वम् (४०) ॥ श्रीपरमानन्दसेविना श्रीधरेण स्वामिना निर्मिता दशमाश्रया दशमस्कन्धांतर्गता श्रीभागवतभावार्थानां दीपिका या सा त्वियमेव, पदवाक्याद्यर्थानां प्रकाशिकास्त्वन्या बह्व्यः संतीत्यनेन निजानुत्कर्षः परोत्कर्षश्च सूचितः । वस्तुतस्तु श्रीपरमानन्दं निजस्वरूपानन्दं सेवितुं शीलमस्येति निजानन्दसेवी स चासौ श्रीधरो राधिकेशस्तेन निर्मिता रचिता या श्रीरासलीला सा इयमेव पंचाध्यायनिरूपितैव । किंभूता–श्रियो राधाया भागवतानामन्यासां गोपीनां यो भावो भक्तिरनुराग इति यावत् । स एवार्थः प्रयोजनं तस्य दीपिका भक्तिपारवश्यात्सर्वेश्वरेण हरिणा निषिद्धमपि स्त्रीभिर्नृत्यमंगीकृतमिति भावः । पुनर्दशमो लक्ष्मीभूतः श्रीकृष्ण एवाश्रयो यस्यास्सा तथा । कृष्णमाश्रित्या गोपीभिर्निजाभिमतं साधितमिति भावः (१) ॥ सर्वलीलाचूडामणे रासस्य श्रवणकीर्तनफलमपि सर्वफलचूडामणिभूतमेवेत्याह–विक्रीडितमिति । चकारादीदृशमन्यदप्यन्यकविवर्णितम् । ताभिः सह विक्रीडितं विष्णोरिति 'तासां मध्ये द्वयोर्द्वयोः' इत्युक्तव्यापकत्वाभिप्रायेण । नु निश्चितमनुदिनं वा श्रृणुयात् । अथ वर्णयेत् कीर्तयेत् । स्वकवितया काव्यरूपत्वेन निवध्नीतेति वा । परां प्रेमलक्षणां प्राप्येत्युक्त्वा प्रत्ययेन हृद्रोगवत्यप्यधिकारिणि प्रथमत एव प्रेम्णः प्रवेशः, तत्तत्प्रभायेणवा चिरतो हृद्रोगनाश इति प्रेमायं ज्ञानयोग इव न दुर्बलः परतंत्रश्चेति भावः । हृद्रोगरूपं काममिति भगवद्विषयकः कामविशेषो व्यवच्छिन्नस्तस्य प्रमामृतरूपेण तद्वैपरीत्यात् । धीरः पंडित इति । हृद्रोगे सत्यपि कथं प्रेमा भवेदिति नास्तिक्यलक्षणेन मूर्खत्वेन रहित इत्यर्थः । अत एव श्रद्धान्वित इति । शास्त्रविश्वासिनं नामापराधिनं प्रेमापि नांगीकरोतीति भावः ॥ श्रीकृष्णातिवशीकारचञ्चोर्जिष्णुशिरोमणेः । प्रेम्णा हास इवायं श्रीरासः श्रीरपि नापयम् ॥ शास्त्रबुद्धिविवेकाद्यैरपि दुर्गममीक्ष्यते । गोपीनां रसवर्त्मेदं तासामनुगतीर्विना ॥ पदवाक्यप्रकरणध्वनयोऽत्र सहस्रशः । सभ्यागम्याश्च गम्याश्च नोक्ता विस्तरभीतितः ॥ ४० ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेतत् प्रासङ्गिकं समाप्योपसंहरन् परमसुखामृतसिन्धुमवगाढानामपि तासामतृप्तिमाह । अनिच्छन्त्योऽपि गोप्यः स्वगृहान् ययुः तेन समं विहारेणैव व्रजं निकटप्रायमागत्य स्वस्वगृहवर्त्मानि जगृहुरित्यर्थः । तत्र हेतुः ब्रह्मेति तत्कालस्य गृहगमनायैव

योग्यत्वादित्यर्थः । ननु तदर्थत्यक्तसर्वाणां तासां कथं तदपेक्षा तत्राह । वसुदेवोऽत्र प्रागजन्मनि वसुषु विराजितत्वात् ब्रजेश्वर एव । गोकुललीलायां तदर्थः तस्यैव सान्निध्यात् ततश्चापत्यार्थेऽणि तेन तस्यापत्यतयापेक्षिततदनुस्मरणार्हप्रातःकालेन अनुमोदिताः पुनराशु स्वसङ्गदानाद्यङ्गीकारस्तुत्यादिभिः कारितानुमोदना इत्यर्थः । श्लेषविशेषेण तत्तन्निकटे सर्वदा एव सता क्रीडता चानुमोदिता इति प्रत्येकमप्यनुनयो दर्शितः । ऐश्वर्यार्थत्वे तु तेनाप्यनुनयात् तासां माहात्म्यं दर्शितम् । यद्वा । वसुदेवं तासां शुद्धमन्तःकरणम् । "सत्त्वं विशुद्धं वसुदेवशब्दित" मिति श्रीशिवोक्तेः । प्रेम्णा तदधिष्ठात्रेति तत्र सत्त्वमुक्तम् । ननु ताभिर्लब्धदुर्लभसङ्गानस्य तस्य त्यागे तदूयत्नेनाप्यनुमोदनं कथमिव घटेत प्रेमफलमिति तद्ध्यानादावपि कथं तद्वशत्वं तत्राह । भगवानेव प्रियो यासां ताः । भगवतः प्रेयस्यो वा अतः दुखमपि ताः सह्यन्ते नतु तत्सङ्कोचलेशमपीति भावः । सतु पुरुषाणां प्रेयसीवशत्वेऽपि लज्जा मर्यादा दाक्षिण्यादीभिस्तदेकसङ्गत्यागस्य दर्शनादिति च भावः ।। ३९ ।। अथ तादृशलीलाश्रवणादेरपि प्राकृतकामविरोधित्वेन श्रीभगवत्प्रेमावहत्वेन च कैमुत्यात्तल्लीलायाः परमभक्तिफलरूपत्वं दर्शयित्वा पूर्वसिद्धान्तमेवोत्कर्षयन् तल्लीलावर्णनसमाप्तौ सुखावेशेनोत्तरकालभावि तच्छ्रोतृवक्तृजनानाशिषयन्निव च स्वाभाविकतत्फलं कथयति । विक्रीडितमिति । विशिष्टां क्रीडां चकारादीदृशमन्यदपि विष्णोरिति तासां मध्ये द्वयोर्द्वयोरित्याद्युक्तव्यापकत्वाभिप्रायेण श्रद्धया विश्वासेनान्वित इति । तद्विपरीतावज्ञारूपापराधनिवृत्त्यर्थश्च नैरन्तर्यार्थश्च । तच्च फलवैशिष्ट्यार्थम् अतएव योऽनु निरन्तरं शृणुयात् अथानन्तरं स्वयंवर्णयेच्च उपलक्षणश्चैतत् स्मरेच्च भक्तिं प्रेमलक्षणां परां श्रीगोपिकाप्रेमानुसारित्वात् सर्वोत्तमजातीयाम् । प्रतिक्षणं नूतनत्वेन लब्ध्वा । हृद्रोगरूपं काममिति भगवद्विषयः कामविशेषो व्यच्छिन्नः । तस्य परमप्रेमरूपत्वेन तद्वैपरीत्यात् । काममित्युपलक्षणमन्येषामपि हृद्रोगाणाम् । अन्यत्र श्रूयते । "ब्रह्मभूतः प्रसन्नात्मा न शोचति काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते परा" मिति । अत्र तु हृद्रोगापहानात् पूर्वमेव परमभक्तिप्राप्तिः । तस्मात् परमबलवदेवेदं साधनमिति भावः । धीरः सन्निति धैर्यञ्च लभत इत्यर्थः । यद्वा । कामं यथेष्टम् आशु भक्तिं प्रतिलभ्य हृद्रोगमाधिं श्रीकृष्णाप्राप्त्यादिकृतमचिरेणापहिनोति तत्प्राप्तेरिति भावः । अन्यत् समानाम ।

क्रीडता बहिरन्तश्च जनोऽयं येन नर्त्यते । तस्य चैतन्यरूपस्य प्रीत्यै भगवतोऽस्त्विदम् ।। ४० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां त्रयस्त्रिंशोऽध्यायः ।। ३३ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वासुदेवेन चित्ताधिष्ठात्रा अनुमोदिता अन्तःप्रेरिता अपि; यद्वा, वसुषु अष्टासु दिव्यतीति वसुदेवो वसुप्रवरो द्रोणरूपः श्रीनन्दस्तत्पुत्रो वासुदेवस्तेन भगवत्ताप्रकटनपरेण श्रीकृष्णेन व्रजमंगलार्थमनुज्ञाताः, किंवा अनु निरन्तरं मोदिताः हर्षिताः, अतएवानिच्छन्त्यः, तथापि स्वस्वगृहं ययुः; कुतः ? भगवत्प्रियाः, तस्य प्रीतिमालोच्येत्यर्थः । अन्यथा पितृ-मातृवयस्यवर्गसन्तोषण-गोपालनादेस्तथा पूर्ववद्रासक्रीडासुखस्य चासम्पत्तिः, तत्तदसम्पत्त्या भगवतो माधुर्य्यविशेषासिद्धिश्चेति दिक् ।। ३९ ।। ब्रजे या वध्वो नूतनविवाहिता इव नवयौवना गोप्यः; यद्वा, रासक्रीडया साक्षात्तत्पत्नीत्वमिव प्राप्तास्ताभिः, इदञ्च रासक्रीडालक्षणं विशिष्टं क्रीडितं क्रीडाम्, 'च'कारादेतादृशमन्यदपि, किंवा त्वर्थे 'च'–शब्दोऽन्यतो विशेषात्, विष्णोरिति (भा० १०।३३।३) 'तासां मध्ये द्वयोर्द्वयोः' इत्याद्युक्त–व्यापकत्वाभिप्रायेण । श्रद्धान्वित इति, अन्यथा रसानुदयेन परमभक्त्यसम्पत्तिः, श्रद्धान्वितत्वादेव 'अनु' निरन्तरं शृणुयात्, एतच्च तथैव । यद्वा, नु निश्चितम् । अथ श्रवणानन्तरं श्रद्धान्वितत्वात् । यद्वा, विकल्पार्थेऽनुवर्णयेद्वा किंवा 'अनु' उक्तसमुच्चये, स्मरेच्च, प्रत्येकं सर्व्वेषां परमभक्तिसाधनत्वात्, तथापि श्रवणादित्रयस्यास्य यथोत्तरं तत्र श्रैष्ठ्यमेव ज्ञेयम् । य इत्यधिकारित्वापेक्षा निरस्ता । परां परमां प्रेमलक्षणां प्रतिक्षणं नूतनत्वेन लब्ध्वा हृद्रोगरूपं काममिति श्रीभगवद्विषयकः कामो व्यवच्छिन्नः, तस्य परमामृतत्वेन तद्वैपरीत्यात्, धीरः सर्व्वार्थतत्त्ववेत्ता, स पुनः कामादिक्षुभितचित्तो वा, हृद्रोगत्यागादिकमेतत् परमभक्तेरानुषंगिकं फलं ज्ञेयम्,–तस्या एव मुख्यफलत्वात्, तत्क्रीडाश्रवणादिनाप्येतत् स्यात् । किं वक्तव्यम्, तस्य लौकिक–निन्द्यकाम्यक्रीडावत् सा क्रीडेति प्रसंगानुसारेण तात्पर्य्यं कल्प्यम् । अतस्तस्य तपसाञ्च कामविशेषः प्रेमपरिपाकविलासविशेषरूप एव, न तु प्राकृत इति लिखितमेव, विवृतञ्च श्रीभागवतामृते । अन्यत्तैर्व्याख्यातम् । यद्वा, धीरो विचारयन् सन्नित्यर्थः । कामं यथेष्टमाशु भक्तिं प्रतिलभ्य हृद्रोगमाधिं श्रीकृष्णाप्राप्त्यादिकृतमचिरेणापहिनोति, तत्प्राप्तेरिति भावः । अन्यत् समानम् ।। ४० ।।

क्रीडता बहिरन्तश्च जनोऽयं येन नर्त्यते । तस्य चैतन्यरूपस्य प्रीत्यै भगवतोऽस्त्विदम् ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे रासक्रीडायां श्री-श्रीलसनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां त्रयस्त्रिंशोऽध्यायः ।। ३३ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

ब्रह्मरात्र उपावृत्ते ब्रह्मरात्रे ब्राह्ममुहूर्त्ते ।। ३९ ।। श्रोता आश्वपहिनोति वर्णयिता अचिरेण । यद्वा हृद्रोगनाशोपक्रमश्रवणयोर्मध्ये काल आशुशब्दः शमोन्मुखस्य रागादेरिव चिरेण निःशेषशान्तिशङ्काव्युदासायाचिरशब्दः ।। ४० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पूर्वार्धे रासक्रीडायां त्रयस्त्रिंशोऽध्यायः ।। ३३ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

प्रकृतमाह । ब्रह्मरात्र इति । ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते सति वासुदेवेनानुमोदिताः अनुमोदनपूर्वकमाज्ञापिता अपि गोप्यः भगवानेव निरतिशयप्रियो यासां तथाभूता अतएवानिच्छन्त्यः गन्तुमिति शेषः । कथञ्चित्स्वगृहान्प्रति ययुः ॥ ३९ ॥ प्रकृतरासक्रीडाश्रवणादिफलमाह । विक्रीडितमिति । व्रजवधूभिः साकम् इदं विष्णोः कृष्णस्य विक्रीडितं भावे क्तः यः पुमान् श्रद्धान्वितोऽनुक्रमेण शृणुयादथवा वर्णयेच्छ्रावयेच्च स भगवति परामुत्कृष्टां भक्तिं प्राप्य धीरः जीवदशायां जितेन्द्रियः कामं नितरां हृद्रोगं रोगवदनर्थकरं हृत्स्थमज्ञानमाश्वचिरेण विधुनोति निरस्यति श्रोता आशु धुनोति तथा वर्णयिताप्याचिरेण धुनोतीति प्रत्येकाभिप्राययोरचिरेणाशुशब्दयोः प्रयोगः । अतो न पौनरुक्त्यं वा यद्वा हृद्रोगनाशापक्रमणयोर्मध्ये कालविलम्बाभावाभिप्रायकः आशुशब्दः श्रवणोन्मुखरोगादेरिव चिरेण निःशेशान्तिकशङ्काव्युदासायाचिरेणशब्दः अचिरेण धीरः आशु विधुनोतीति वान्वयः हृद्रोगरूपं कामं मदनमाशु विधुनोति जयतीत्यथा वा ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडायां श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ब्रह्मरात्रे ब्राह्मे मुहूर्त्ते ॥ ३९ ॥ संसारनिवृत्तिहेतुत्वादस्मिन्कृष्णविक्रीडिते श्रद्धादिकं कार्यमिति विधायकफलमाह । विक्रीडितमिति । चशब्दः श्रद्धातिशयजननार्थः पूर्वोक्तविक्रीडितानि यथा संसारनिवर्तकानि तथेदञ्चेति । आशु भक्तिं प्रतिलभ्यानुदिनं कृत्वा हृद्रोगं काममनिष्टमपहिनोति प्रतित्यजति दुष्टकामत्याग एव संसारनिवृत्तिरित्यर्थः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडायां श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् एकत्रिंशोऽध्यायः ॥ ३१–३३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

फलितमाह—ब्रह्मरात्र इत्यादि । मिलितानामनेकरात्रीणां शेषयामार्द्धे उपावृत्ते भगवदिच्छया सम्प्राप्ते सति ता गोप्य ऊढानूढादिप्रकारोक्ताः सर्वा एव भगवत्प्रियाः सत्यः स्वगृहाननिच्छन्त्यो बासुदेवानुमोदिता वासुदेवमनुमोदयितुं शीलं यासामिति तथा तच्छ्रीवृन्दावनान्तर्वर्त्तिपुरविशेषं ययुरिति भावः । वस्तुतस्तु स्वगृहं पुनर्न गता एवेति ग्रन्थार्थः, स्वगृहाननिच्छन्त्य इति हेतुमद्विशेषणेन गृहान्तरं लक्ष्यते ॥ ३९ ॥ उपसंहरति—विक्रीडितमित्यादि । (३६ श–श्लो०) "भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत्" इत्युक्तस्य विशेषोऽयं हृद्रोगमन्तःकरणमालिन्यमचिरेण तत्क्षणादेव धीरः पण्डितो विचक्षण इत्यर्थः । अत इदं रहस्यं धीरो यो भवति, स श्रद्धान्वितः सन् शृणुयाद् वर्णयेत् कीर्त्तयेत् । स्वतः शक्तो यदि, तदा स्वपथेनापि वर्णयेत् । सुगमम् ॥४०॥

इति श्रीदशमे स्कन्धे श्रीबृहत्क्रमसन्दर्भे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ब्रह्मरात्र इत्यादि । ब्राह्ममुहूर्त्ते मिलितानामनेकरात्रीनामन्तिमरात्रिचरम-यामार्द्धे इति भावः । कालस्यापि निष्क्रियत्वात्तस्या नेदं चित्रम् । वासुदेवानुमोदितास्ता भगवत्प्रियाः स्वस्थानं ययुः, स्वगृहाननिच्छन्त्यस्तत्रैव वृन्दावने नित्यसिद्धं योगपीठाख्यं स्थलविशेषं ययुः । गोपास्तु छायारूपाभिरेव 'मन्यमानाः स्वपार्श्वस्थान्' इत्यादिना कृतार्था एव तं नासूयन्, तस्य नाट्यस्य महिमैवेयम् । यद्वा, पतिगृहाननिच्छन्त्यः स्वगृहान् योगमायाकृतान् निजगृहान् ययुः, वासुदेवेनानुमोदिताः सत्यः । यद्वा, वासुदेवानुमोदितस्थलं ता ययुः । वासुदेवेनोद्दिष्टं निजस्थान-विशेषम् ॥ ३९ ॥ भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेदिति । प्रतिपादयति—विक्रीडितमित्यादि । हृद्रोगं कामादिदोषम् । एतेन गोपीभिः सह स खलु विलासो हि साधनान्तरेणापि दुष्करं हृदयशोधनं करोतीति रहस्यम् ॥ ४० ॥

इति त्रयस्त्रिंशोऽध्यायः ॥ ३३ ।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ब्रह्मरात्रं इति समासान्त आर्षः । ब्रह्माणो रात्रौ युगसहस्रप्रमाणायामुपावृत्ते उप आधिक्येन आवृत्ते एकामावृत्तिं गते सति गोप्यः स्वगृहान् ययुः । एकस्यामेव रजन्यामेतावत्यो लीलाः कर्त्तव्या इति भगवतः सत्यसङ्कल्पत्वात् नृत्यगीतादयो विलासा यावन्तो मनस्यभीप्सिता आसन् तावतां सम्पूर्त्तौ यावन्तः समयाः सम्भवन्ति तावद्भिः समयैर्युगसहस्रं पूर्णं बभूव तच्च युगसहस्रं प्रहरचतुष्टयात्मकरजनीमध्य एव रासस्थल्यां प्रविवेश । यथा पञ्चयोजनात्मकवृन्दावनप्रदेशैकदेश एव पञ्चाशत्कोटियोजनप्रमामानि ब्रह्माण्डानि प्रविष्टानि ब्रह्मणा दृष्टानि यथा चातिस्तोक एव भगवत उदरस्योपरि अपरिमितानि दामानि अन्तरे च ब्रह्माण्डमेव दृष्टमभूदित्यत्र नासम्भावना कार्या । यदुक्तं भागवतामृते । "एवं प्रभोः प्रियाणाञ्च धाम्नश्च समयस्य च । अविचिन्त्यप्रभावत्वादत्र किञ्चिन्नदुर्घट" मिति । वासुदेवानुमोदिताः मम च भवतीनाञ्च प्रति तादृशक्रीडासिद्ध्यर्थं प्रच्छन्नकामतैवाभीष्टेति

कृष्णेन कृतानुमोदना इत्यर्थः। यद्वा। चित्ताधिष्ठात्रा वासुदेवेनैव गुरुलज्जाभयादिकमुद्धाव्य प्रेरिताः। अत एव प्रियविरहस्य दुःसहत्वादनिच्छन्त्योऽपि ययुः॥ ३९॥ सर्वलीलाचूडामणे रासस्य श्रवणकीर्त्तनफलमपि सर्वफलचूडामणिभूतमेवेत्याह। विक्रीडितमिति। चकारादीदृशमन्यदप्यन्यकविवर्णित ताभिः सह विक्रीडितम्। विष्णोरिति तासां मध्ये द्वयोर्द्वयोरित्याद्युक्तव्यापकत्वाभिप्रायेण नु निश्चितम् अनुदिवा शृणुयात्। अथ वर्णयेत् कीर्त्तयेत्। स्वकवितया काव्यरूपत्वेन निवध्नीतेति वा। परां प्रेमलक्षणां प्राप्येति क्त्वाप्रत्ययेन हृद्रोगवत्यप्यधिकारिणि प्रथमत एव प्रेम्णः प्रवेशस्ततस्तत्प्रभावेणैवाचिरते हृद्रोगनाश इति प्रेमाय ज्ञानयोग इव न दुर्बलः परतन्त्रश्चेति भावः। हृद्रोगरूपं काममिति भगवद्विषयकः कामविशेषो व्यवच्छिन्नः तस्य प्रेमामृतरूपत्वेन तद्वैपरीत्यात्। धीरः पण्डित इति हृद्रोगे सत्यपि कथं प्रेमा भवेदित्यनास्तिक्य लक्षणेन मूर्खत्वेन रहित इत्यर्थः। अत एव श्रद्धान्वित इति शास्त्रविश्वासिनं नामापराधिनं प्रेमापि नाङ्गीकरोतीति भावः।—

श्रीकृष्णातिवशीकारचुञ्चोर्जिष्णुशिरोमणेः। प्रेम्णो हास इवायं श्रीरासः श्रीरपि नाप यम्॥
शास्त्रबुद्धिविवेकाद्यैरपि दुर्गममीक्ष्यते। गोपीनां रसवर्त्मेदं तासामनुगतीर्विना॥
पदवाक्यप्रकरणध्वनयोऽत्र सहस्रशः। सन्त्यगम्याश्च गम्याश्च नोक्ता विस्तरभीतितः॥ ४०॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। दशमस्य त्रयस्त्रिंशः सङ्गतः सङ्गतः सताम्॥ ३३॥

श्रीरसिकाह्लादिनी टीका

एवं श्रीकृष्णस्य रसैश्वर्य्यं सपरिकरं निरूप्य तास्वपि निरंकुशमैश्वर्य्यं जनेषु प्रख्याप्य रससिन्धोः प्रस्तुतमगाधत्वमुपसंहरन् तासां श्रीकृष्णे धर्मधूर्य्ये तृप्त्याभावं व्यञ्जितम्। नवानुरागसद्भावेऽपि पुनरपि दिवसान्तरे तमेव रासविलासं प्रकटयितुं बलादिव कृष्णप्रेरितानां गमनमाह। ब्रह्मरात्रेतिब्राह्मे मुहुर्ते, यद्वा ब्रह्मरात्रे ब्रह्मणो रात्रितुल्ये काले उप समीपं उपावृत्ते जाते सति। पूर्वमाचार्य्यैरेव व्याख्यातं शशाङ्कश्च स—गणो विस्मितोऽभवदिति। ततश्चातिदीर्घासु ब्रह्मनिशासदृशीषु रेमे इत्युक्तम्, यद्वा ब्रह्मणः स्वानन्दपूर्णस्यापि तुल्यकाले उप समीपे आवृत्ते आ समन्तात् वृत्ते जाते पूर्णे सतीत्यर्थः, ब्रह्मत्वाननुसन्धानेन पूर्णरमणे जाते सति आत्मारामोऽप्यरीरमदित्याद्युक्तेः। पुनरपि करिष्यमाणरमणाभिसन्धिना नवानुरागवृद्धये, तदा वासुदेवानुमोदिताः वसुषु दीव्यतीति वसुदेवो नन्दस्तत् पुत्रेणेत्यर्थः। "द्रोणो वसूनां प्रवर" इत्युक्तेः। यद्वा वसुभिर्गोमहिष्यादिधनैर्दीव्यति प्रकाशते वसुदेवो नन्दस्तत् पुत्रेणेति। अयमभिप्रायः गोमहिष्यादि—दोहनादिसमये नन्दं स्मरिष्यतीति। तदनुसन्धानं नन्दस्यापि आनन्दवितरणप्रीतेन तेनानुमोदिताः। इदानीं दधि—निर्मंथनसमयो जातो गोदोहनादिसमयो जातः। पुनरप्येवं रजनीमुखे वेणुना आकारणीया इत्याश्वस्ताः; यद्वा वासुदेवेन चित्ताधिष्ठात्रानुमोदिताः प्रेरिताः पूर्वमागमनसमये प्रतियाह्यतेति बाह्यवृत्या प्रेरिता अपि न ययुः, यद्वा तच्चित्तस्याकृष्टत्वाद्गमनासम्भवः ताभिरप्युक्तं "चित्तं सुखेन भवतापहृतं गृहेषु" इत्यादिना। इदानीं चित्तस्य प्रेरितत्वात् त्वतो गमनमजातमिति भावः। यद्वा वसुदेवशब्दितं शुद्धमन्तकरणं तस्मिंस्तदधिष्ठातृत्वेन तिष्ठतीति वासुदेवस्तेनानुमोदिताः सदा तस्य चित्तेषु पूर्णत्वात्। तच्चित्तानुवृत्या तदाज्ञाभङ्गं कर्तुमपारयन्त्यः बाह्यवृत्या तदाज्ञां शिरसि धारयन्त्यस्तम्सङ्गमपि त्यक्तुमनिच्छन्त्यः, यद्वा गृहेषु परमदुःथानुसन्धानेन वाताशनवत् पतिपुत्रादिशुश्रूषणं तैः सह सम्भाषणमपि कर्तुंमनिछन्त्योपि प्रियप्रस्थापिताः स्वगृहान् ययुः। नन्वयुक्तस्वीकारत्वेन कथमनुमोदनं कृतं कथं च ताभिः स्वीकृतं इति चेत्तत्र ह भगवत्प्रिया भगवानेव प्रियो यासां ताः प्रियस्याज्ञा करणीयेति, आज्ञाभङ्गको षेद किं स्यात्। दास्यस्यापि स्वीकृतत्वात्। लाघवशक्त्यान्यत्सर्वं कृतत्वात् चेत्यऽनुसन्धानेन सुदुखमपि सहमाना ययुरिति। भगवत् प्रिया इति वा तद्वशवर्त्तित्वेनापि ता इति भावः॥ ३९॥ ननु रासविलासश्रवणेन पांमराणां कामोद्रेक एव भविष्यति किमेतच्छ्रवणेनेति चेत् समाधानं कुर्वन् प्राकृतकामजयद्वारा श्रीव्रजेद्रनन्दने परमं प्रेमभक्तिरूपफलं श्रोतृवक्तृजनानां प्रशंसन्। अप्राकृतकामतत्तल्लीलादर्शनाद्यकारित्वं सम्भांबयन्नाह पंच विधा गोप्यः रेमिरे, विक्रीडितं व्रजवधूभिः सह। विविधं क्रीडितम्। उक्ति–प्रत्युक्ति–रूपं तत्तद्भवे कदाचिन्नदीपुलिने कदाचिद्यमुनायां सर्वत्र वृन्दावनप्रदेशेषु व्रजदेवीभिः सहाबिर्भावितं विलासं, उपवनं उदाहरणमेतत् अन्यत्र सखिभिः सह कृत्यं नृत्यगानादिकं व्रजेश्वरीपरोक्षकृतं भाण्डभंगादिकं नवनीतचौर्य्यादिकं च एतत्सर्वमन्यदपि गोवर्द्धनोद्धरणादिचरितं श्रद्धान्वितो आस्तिक्यवुद्धिमान् अनु वारं वारं श्रुणुयात् श्रवणानन्तरं यः स्व यूथेषु वर्णयेन कीर्तयेत् स भगवति रसैश्ववर्य्यपूर्णो नन्दपुत्रे परां भक्तिं प्रेमलक्षणां प्रतिलभ्य आशु शीघ्रं हृद्रोगरूपं कामं प्राकृतविषयं अपहिनोति दूरीकरोति। श्रीकृष्णेऽलौकिककामस्य विधेयत्वात् भक्तिप्रतिबन्धकस्य कामस्य सद्भावे तदनुपपत्तेः, यद्वा कामं यथेच्छं हृद्रोगं मत्सरमपहिनोति भक्तौ निर्मत्सराणामधिकारश्रवणात्तदुक्तं "धर्मः प्रोज्झित—कैतवोऽत्र परमो निर्मत्सराणां सतामिति" यद्वा कृष्णे भक्तिं प्रतिलभ्य श्रीकृष्णप्राप्तिजनितं हृद्रोगं हृत्तापमाशु अपहिनोति। पुनश्च प्राप्तेऽपि हृद्रोगे भक्तिवासनया धीरो भवति॥ ४०॥

इति श्रीमन्नारदावतार–श्रीव्रजाचार्य–श्रीनारायणभट्टगोस्वामिविरचितायां रसिकाह्लादिनीटीकायां दशमस्कन्धे
रासविलासनिमगनं नाम त्रयस्त्रिंशोऽध्यायः॥ ३३॥

॥ समाप्तोऽयं ग्रन्थ॥

विशुद्धरसदीपिका

तदेवं प्रासङ्गिकं समाप्य प्राकरणिकमप्युपसंहरिष्यन् यत्र तत्र विज्ञापितस्य प्रेयसीभावानां सखीभावानाञ्च वर्गद्वयस्य यथायोग्यं रासानन्तरभाविचरितमाह । ब्रह्मरात्र इति । ब्राह्मे मुहूर्त्ते सूर्योदयात्प्राग्दण्डद्वयात्मके प्रातः काल इत्यर्थः । उपावृत्ते शिशुमारपरिवर्त्तनेन पुनरावृत्ते सति यदा ब्रह्मणश्चतुर्वक्त्रस्य रात्रेरप्रवृत्तिर्यत्र तादृशे निभृतिविहारे जाते सति । यद्वा ब्रह्मणो वेदस्यापि रात्रिरज्ञानं यत्र तस्मिन्, यद्वा ब्रह्मणः परब्रह्मणः श्रीकृष्णस्य रात्रिं सुखसत्रमयं पर्व यस्मिंस्तादृशे समये उपावृत्ते सम्प्रवृत्ते सति, यद्वा ब्रह्मणः सर्वविहारपूर्णस्य रात्रे उप अधिकमावृत्ते नित्यविहारस्य वृत्तौ ज्ञातायामित्यर्थः यद्वा । ब्रह्मणः श्रीराधायाः अयमात्मा ब्रह्मेति-श्रुतेः आत्मना रमयेति ब्रह्मसंहितायाः परात्परम्ब्रह्मेति रुद्रयामलात् रात्रे रात्रिं सुखमिति रात्रस्तादृशेऽवसरे उपावृत्ते सर्वोपरितया आवृत्ते सतीति प्रभूतार्थमिदं वासुदेवानुमोदिताः । अत्र वासुदेवेति श्लेषमहिम्ना वर्गद्वयान्वयि तथाहि वसुषु दीव्यति वसूनां देवो राजा वासुदेवः श्रीनन्दराजः द्रोणो वसूनां प्रवर इति प्रागुक्तेः तस्य पुत्रापत्यम्वासुदेव इत्यवताराभिप्रायं व्रजसम्बन्धिनामधेयं तदनुज्ञानाः प्रयसीत्वाभिमानाः श्रुतिमुनिरूपाश्च काश्चित् अनिच्छन्त्योऽपि प्रियतमापवादभीता युयुः व्रजमिति शेषः । भगवत्प्रियास्तु श्रीकिशोरीरमणैकसुखाः स्वगृहान् स्वस्वकुञ्जगृहानित्यावृत्यान्वयः तत्र तत्र वमनादिकं तासां तासामन्योऽन्यमपरिकलितमेव वृत्तमिति संक्षेपः ॥ ३९ ॥ एवञ्च कामविजयक्रीडायाः श्रवणफलमपि कामविजय एवेत्युपसंहरति । विक्रीडितमिति । विविधाभिर्व्रजवधूभिर्विविधं क्रीडितं विशिष्टं वा क्रीडितं चकारादीदृशमन्यदपि संग्राह्यं, यद्वा चोऽप्यर्थे ता गोप्यो हृद्रोगं जहुरिति किंवक्तव्यं यः कश्चिदेतासां क्रीडितं श्रृणुयात्सोऽपीत्यर्थः । विष्णोरिति । सर्वासां यथोचितमनोरथपूरणेन व्यापकस्य, यद्वा ब्रह्मर्क्षतृतीयरणप्रादुर्भावाद्विष्णुरिति श्रीनन्दात्मजस्यैव जन्मनाम ततश्च तासां तस्य नित्यसम्बन्धः सूचितः श्रद्धया दृढविश्वासेन अन्वितः असम्भावनाविपरीतभावनारहित इत्यर्थः । अनु निरन्तरं श्रृणुयात् अथ अनन्तरं स्वयं वर्णयेत् उपलक्षणं स्मरणस्य सर्वोऽप्ययं श्रद्धानुभावः सच परां शुद्धप्रेमलक्षणां भक्तिं भगवति श्रीराधावल्लभे प्रतिलभ्य सुखेन लब्ध्वा हृद्रोगमाशु तत्क्षणमेव अपहिनोति । एवञ्च हृद्रोगहानात्प्रागेव तत्कारणपराभाक्तिलाभ इति कथनात्कार्यशैध्य्प्रत्यायनं, ततश्च वलवदेतत्साधनम् । अत्र हृद्रोगपदेनैव गतार्थत्वे पुनः काममित्युक्तिः स्पष्टप्रतिपत्तये सन्ति बहवो हृद्रोगा एतस्मिन्विषयेतु काम एवेति भावः । अथवा कामं यथेष्टमिति क्रियाविशेषणम् अचिरेण धीरो भवतीति शेषः । धियं निश्चयात्मिकां चेतोवृत्तिं तस्मिन्नित्यविहारिणि भगवति राति योजयतीति धीरः तद्विहारभावुको भवेदित्यर्थः ॥ ४० ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासपञ्चाध्यायीव्याख्यां श्रीमत्किशोरीप्रसादविद्वत्कृतायां विशुद्धरसदीपिकायां पञ्चमोऽध्यायः ॥ ४ ॥

मूलस्य त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीरामनारायणकृता भावभावविभाविका

एवं प्रासङ्गिकं नृपप्रश्नसमाधानं समाप्य प्रकृतं ब्रुवंस्तत्परमानन्दनिमग्नामपि तत्रैवासक्तिं दर्शयन् प्रेमपथप्रवृत्तभगवत्कामानां गृहादित्यागावश्यकत्वेऽपि तत्पथसिद्धानां प्राप्ततत्स्वरूपानन्दानां तत्रैव निमग्नचित्तत्वेन गृहाद्यासक्तिशून्यानामपि भगवदिच्छया गृहादिसंबन्धाबाधकत्वमाह । ब्रह्मरात्र इति । ब्रह्मणो रात्रिसमकाले उपावृत्ते व्यतीते सति, यद्वा ब्रह्म कृष्णस्वरूपं राति तथा सर्वदोषदुःखादिभ्यः स्वानुसंधानवतोजनान् आसमन्तात् त्रातीति ब्रह्मरात्रो रासादिविहारस्तस्मिन्नुपावृत्ते सर्वजनोद्धाराय प्रेमिणामुल्लासाय चैवं प्रकाशमापन्ने ता यतो भगवतः प्रिया अतो वासुदेवेन वसुदेवतपसाविर्भूतेन, यद्वा द्रोणवसुनामेकदेवो वसुदेवस्तत्पुत्रेण गोपालब्रह्मणा यद्वा "सत्त्वं विशुद्धं वसुदेवशब्दित" मित्यादिवचनात् शुद्धसत्त्वात्मकान्तः करणे एवाविर्भावयोग्येनानु पुनः पुनर्मोदिता अपि यतो भगवत्प्रिया भगवानेव प्रियो यासां न गृहादयोऽतो गृहान् गन्तुमनिच्छन्त्योऽपि यतो गोप्यो भगवद्रहस्यानामनधिकारिभ्यो गोपनशीला । अथ च वसन्त्यस्मिन्भूतानीति वासुः सर्वाधारस्तथा देवो नियन्ता तेन वासुदेवेन सर्वावासक्रीडापरेण वानुमोदिता न मद्विहारस्य गृहे वने वोपराम इति बहिरन्तर्भावेन प्रत्येकं कृतानुमोदनाः तेन विहरन्त्य एव व्रजमागत्य स्वगृहान् ययुः ॥ ३९ ॥ एवम्परमानन्दरूपां सर्वजनोद्धारपरमानन्दनिमग्नताहेतुभूतां लीलां निरूप्य तच्छ्रवणादेः फलं दर्शयन्नस्य कामविजयोपाख्यानस्य श्रोत्रादीनामपि हृद्रोगकामनिवर्तकत्वान्न कामाधीनतया कथंचिद्भगवतः परकीयदारसम्बन्धभ्रमो नच निवृत्तिपराणमत्रौदासीन्ययोग्यता प्रत्युत—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् इति

भगवद्वचनाद्ब्रह्मज्ञानैकलभ्य परभक्तेर्भिद्यतेहृदयग्रन्थिरित्यादिश्रुतेर्ज्ञानैकसाध्यहृद्रोगविमोकस्य चात्र श्रवणादिमात्रलभ्यतयात्रैव सर्वथा प्रवृत्तिः कार्येति दर्शयति । विक्रीडितमिति । विष्णोर्व्यापकस्य "सर्वतः पाणिपादं तत्सर्वतोऽक्षि शिरोमुख" मित्यादिना विभुसर्वाङ्गस्यापीदं विक्रीडितं स्वरूपाभिव्यञ्जकस्वेच्छया यत्र तत्राविर्भावादिना विशिष्टं सर्वगुणोत्कर्षान्वितं क्रीडित तत्रान्यक्रीडापेक्षया विशिष्टत्वद्योतनायाह । व्रजवधूभिरिति । व्रजे याः स्वीया वध्व इति वधूशब्देन परदारत्वादिभ्रमव्यावृत्तिः

व्रजशब्देनान्यधामगतरुक्मिण्यादिवधूनां व्यावृत्तिस्ताभिरतथाच यथैकस्य परमरसायनस्याप्यनुपानभेदेन गुणवैचित्र्यं तथापरमरसायनस्य भगवत्क्रीडितस्याप्यन्यधामवधूरूपक्तीनां श्रीसरस्वत्यादीनामैश्वर्य्यज्ञानादिप्राधान्यतया ताभिः सह क्रीडतश्रवणादेरैश्वर्यादि फलत्वम् अत्र व्रजधामगतभगवद्वधूनां प्रेमरसैकप्राधान्यतया ताभिः सह विक्रीडियेश्रवणादेः प्रेमलक्षणपराभक्तिफलत्वमिति सर्वक्रीडाभ्यो वैशिष्टय ज्ञेयं तदेव दर्शयति। श्रद्धान्वित इत्यादिना। धीरो धैर्यादि गुणसम्पन्नः धियम्भगवतीरयतीति भगवद्रसजिज्ञासुर्वाधीनियन्तृतदुपाधिकजीवमात्रं वा "यच्छ्रद्धया विद्यया उपनिषदा क्रियते तद्वीर्य्यवत्तरं भवती"तिश्रुतेः "श्रद्धालोरेव सर्वत्र वैदिकेष्वधिकारत" इति वृद्धोक्तेश्च तयान्वितोऽनुश्रृणुयाद्भक्तिलीलारसिकतयाऽनु निरन्तरं मुहुस्तच्छ्रवणपरः स्यादथ वर्णयेत्स्वयमपि तद्रसभावुकेषु प्रेमभावोद्दीपनेन प्रकाशयेत् चकाराद्वक्तृश्रोत्रभावे स्मरेच्चित्तैकाग्र्येण ध्यायेच्च भगवति परामनुरक्तिरूपां "सा परानुरक्तिरीश्वरे" इति सूत्रितां प्रतिलभ्य चकाराद्ब्रह्मात्माववोधञ्चाज्ञात्वा प्रेमासम्भवात् कामं मनोजं हृद्रोगं यथा रोगोऽङ्गज एव तद्दुःखदस्तथा मनोजन्यमपि तद्दुःखदं, यद्वा काममन्यच्च सर्वहृद्रोगं क्रोधादिकं, यद्वा काममितराभिलाषमात्रं हृद्रोगं तन्मूलभूतान्तः करणाद्युपाध्यध्यासात्मकहृदयग्रन्थिञ्चाशु अचिरेणानायासेन चापहिनोति निवर्तयति। अत्रायं भावः निवृत्तिपरग्रन्थे सुमनोऽवलम्बमलब्ध्वा प्रथमं विषयेभ्यो दोषदृष्ट्या मनः संनिवर्त्य निरालम्बस्य भगवदालम्बनं भवति तत्र चिरम्प्रयासश्च। अत्र रसरूपलीलाश्रवणेन स्वभावतस्तत्र प्रेमोद्धर्षात् सावलम्बतया झटित्यनायासं कामहृद्रोगनिवृत्तिः किञ्च परभक्तिलाभेन परमानन्दावाप्तिहृद्रोगोपशमेन सर्वानर्थनिवृत्तिश्च, यद्वा मनोजादेरपि हृद्रोगान्तः पातित्वेन पृथगनुक्तेः कामं यथेष्टं परां भक्तिं प्रतिलभ्येति वा परां भक्तिं भगवति कामं कामसुखं सर्वकामं च "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते"ति श्रुत्या प्रतिलभ्य इति वार्थः, यद्वा कामं हृद्रोगमाश्वपहिनोत्यध भगवति परां भक्तिं प्रतिलभ्य धीरो गायत्र्यादौ धीप्रेरकत्वेन श्रुतः परब्रह्मकृष्णात्मक एव स्यात् ॥ ४० ॥

श्रीराधा गोपिकाः कृष्णो गुरवो वैष्णवा द्विजाः। प्रीयन्तां स्वप्रपन्नाय यच्छन्तु परमां रतिम् ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धान्तर्गत रासपञ्चाध्यायीव्याख्यायां श्रीचन्द्रभागाख्यविष्णुसख्यापन्नश्रीरामनारायण
विरचितायां भावभावविभाविकायां भगवच्छ्रीमद्रासविहारादि निरूपणे पञ्चमोऽध्यायः ॥ ५ ॥

मूले त्रयस्त्रिंशः ॥ ३३ ॥

श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका

इतः परं संशयमनुचितं मन्यमानः खिन्नचित्तः श्रीशुको रासक्रीडावर्णनमुपसंहरति। ब्रह्मरात्र इति। ब्रह्मरात्रौ समासान्त आर्षः। सत्यसङ्कल्पस्य भगवतः सङ्कल्पवशात् यामचतुष्टयात्मिकायां रजन्यां सहस्रयुगपरिमिते यथोक्तलीलानिर्वाहके काले उपावृत्ते सम्यगे कामावृत्तिङ्गते सति। नचात्र विस्मयः कार्यः भगवद्योगमायायां सर्वसंभवात्, तथाच यथा वृन्दावनस्य कस्मिंश्चित्प्रदेशे असंख्यातानि ब्रह्माण्डानि प्रवृत्तानि ब्राह्मणा दृष्टानि, यथा वा बाल्ये स्थितस्य भगवतः स्वल्पस्योदरस्योपर्य्यपरिमितानि दामानि। वद्धान्यवलोकितानि व्रजौकोभिर्यथा वा भगवन्मुखे चतुर्दशभुवनानि श्रीयशोदया तथा स्वल्पदेशे क्रीडायोग्यदेशस्य स्वल्पे काले तद्योगकालस्य चाभावे नास्ति किञ्चिदपि चित्रं ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते तासामन्तरङ्गमनोद्योगं स्वयमेवोत्पाद्य बहिरप्यनुमोदिताः। अतएवानिच्छन्त्योऽपि स्वगृहान् ययुः भगवानेव प्रियो यासां ताः, तथाच गमनागमनाभ्यां भगवत्प्रियमेव यासां सम्पाद्यमिति भावः। यद्वा स्वगृहान् प्रतिगता अपि भगवतः प्रीतिविषया एवेति भावः ॥ ३९ ॥ अथ भगवतः कामविजयरूपसर्वलीलावतंसरासक्रीडाश्रवणादेर्यथायोग्यं परमोत्कृष्टं फलमाह। विक्रीडितमिति इदं विक्रीडनं मया वर्णितं व्रजवधूभिर्विष्णोः पूर्णस्य क्रीडानुरूपरूपाणि प्रकटीकृत्य विविधं क्रीडितं श्रद्धान्वितः सर्वलोकोद्धारार्थमाप्तकामेन भगवतेदं विक्रीडनं कृतमिति विश्वासयुक्तः, योऽनु निश्चयेन संशयकलङ्करहितः श्रृणुयात् अनुदिनम्वा श्रृणुयात् अथवा यः कीर्तयेत् स भगवति परां प्रेमलक्षणां भक्तिं प्रतिलभ्य भगवदनुग्रहादचिरेण धीरः तत्त्ववित्सन् हृद्रोगं सर्वानर्थभूतं काममाऽऽशु शीघ्रमपहिनोति परित्यजति तथाच सर्वानर्थनिवृत्तिपरमानन्दप्राप्तिरूपपरमपुरुषार्थफलकोऽयं ग्रन्थः परमादरेण श्रोतव्यो वर्णयितव्यश्चेति—

श्रुति गोपाङ्गनाभिर्यः क्रीडते सत्सुमानसे। वने तं धनपत्याख्यो नौमि कृष्णं परात्परम् ॥ ४० ॥

इति श्रीपरमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिमिश्र-
सूरिकृतायां भागवतगूढार्थदीपिकायां दशमस्कन्धे पूर्वार्धे रासक्रीडायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

रास-रहस्यम्

र० टी०—ब्रह्मरात्रे ब्रह्मणः ब्राह्मीभावप्राप्तस्य विदुषः, रात्रं निशा, तमोमयत्वादज्ञानलक्षसर्वदुःखालयस्वरूपा, तद् उपावृत्ते उप आधिक्येन दीर्घकालमिव आवृत्तं व्यतीते सति, "सत्त्वं विशुद्धं वसुदेव शब्दितम्।" इति वचनात् विशुद्धसत्त्वात्मकान्तःकरणे एवाविर्भावयोग्ये ज्ञानसूर्योदये शतकोटीजन्मान्तरीयान्धकारे अपहिते सति वासुदेवानुमोदिताः वसन्त्यस्मिन् सर्वभूतानि इति वासु सर्वाधिष्ठानं, तथा देवः दिव्यतिप्रकाशते स्वयंज्योतिरूपेण सर्वस्मिन् हृदये इति देवः।

"सर्वावासं वासुदेवं क्षेत्रज्ञं तत्त्वतः ॥" ३४४।१८ ॥
"पुरुषो निष्क्रियश्चैव ज्ञानदृश्यश्च कथ्यते । यं प्रविश्य भवन्तीह मुक्ता वै द्विजसत्तमाः ।
स वासुदेवो विज्ञेयः परमात्मा सनातनः ॥" महा० शान्ति ३३०।२५ ॥

एवम्भूतेन वासुदेवेन सर्वाधिष्ठानेन सह ऐकात्म्यभावेन, अनुमोदिताः अनु पुनः पुनः मोदिताः ब्रह्मानन्दानुभाविताः, भगवत्प्रियाः भगवान् परमात्मा एव प्रियः यासां न गृहादयः ताः, स्वगृहान् स्वस्य स्वात्मत्वेनाभिमतान् गृहान् अत्रान्तःकरणलक्षणान् पुनः ममत्वेन ग्रहीतुमनिच्छन्त्याऽपि, गोप्यः ब्राह्मीभावप्राप्ताः वृत्तयः, अपि च गोप्यः एवत्तत्त्वरहस्यानामनधिकारिभ्यो गोपयितु योग्यः, अन्यथा शास्त्राणामपव्याख्यानं भविष्यतीति स्वाभिमानमिव "तद्यथेषीकातुलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मनः प्रदूयन्ते ।" "तद्यथा पुष्करपलाशः आपो न श्लिष्यन्ते एवमेवंविदि पापकर्माणि न श्लिष्यन्ते ।" "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ।" "यस्य नाहंकृतोभावो बुद्धिर्यस्य न लिप्यते । हत्वापि स इमाँल्लोकान् न हन्ति न निबध्यते ।" इत्यादि श्रुतिस्मृतिभिः सह ययुः ॥ ३९ ॥ यः कश्चिद्धीरः धियं निश्चयात्मिकां चेतोवृत्तिं, तस्मिन् परमात्मनि राति योजयतीति धीरः, विष्णोः "मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयः, सत्यज्ञानसुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः । मिथ्याबन्धविधूननेन परमानन्दैकतानात्मकं, मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः ।" एवम्भूतस्य व्यापकस्य परमात्मनः, व्रजवधूभिः व्रीयणाज्जायतेऽस्मिन् विशुद्धान्तःकरणे इति व्रजः, तत्स्थाः वध्व वः युस्मान् युस्मदस्मत्प्रत्ययान् धून्यन्ति विनाशयन्तीति वध्वः आत्माकारवृत्तयः, ताभिः इदं विक्रीड़ितं ब्रह्मात्मैक्याभिधेयं, "एवमेवैष सम्प्रसादोऽस्मात् शरीरात् समुत्थाय परं ज्योतिरुपसम्पद्यस्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः, स तत्र पर्येति जक्षत् क्रीड़न् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं शरीरम् ।" इति श्रुत्यभिहितमात्मविलासं श्रद्धान्वितो गुरुवेदान्त वाक्येषु पूर्णविश्वस्तो भूत्वा "यच्छ्रद्धया विद्यया उपनिषदा क्रियते तद्वीर्यवत्तरं भवति" इति श्रुतेः । "श्रद्धालोरेव सर्वत्र वैदिकेष्वधिकारतः ।" इति वृद्धोक्तेश्च अतुश्रृणुयात् अनु मुहुर्मुहुः निरन्वरं श्रवणादिपरः स्यात् "आत्मा वा अरे द्रष्टव्यः श्रातव्यो मन्तव्यो निदिध्यासितव्यः ।" अथ वर्णयेत् "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ।" इति श्रुतेः । प्रवचनादिकं तस्य करोति सः भगवति परमात्मनि परां भक्तिं आत्मानुसन्धानरूपां परामुत्कृष्टां भक्तिमनुरागं प्रतिलभ्यः सर्वतोरूपेण प्राप्य अर्थात् ब्रह्मात्मनावस्थितिं लब्ध्वा कामं विषयवासनोपलक्षितं हृद्रोगं तन्मूलभूतान्तःकरणाद्युपाध्यध्यासात्मकं हृदयग्रन्थिं सर्वानर्थरूपमाशु शीघ्रमचिरेण तत्कालमेव अनायासेनापहिनोति निवर्तयति । तथाहि श्रुतयः "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" ॥ ४० ॥

"तरति शोकमात्मवित् ।" "ब्रह्मविदाप्नोति परम् ।"
"ब्रह्मवेद ब्रह्मैव भवति ।"
ॐ तत्सत् ॐ

इति रहस्ये पञ्चमोऽध्यायः ॥ ३१ ॥

समाप्तोऽयं ग्रन्थः

गूढार्थदीपिनी

ब्रह्मरात्रे युगसहस्रप्रमाणे व्यतीते सति ॥ ३९ ॥ अचिरेण धीरः जितेन्द्रियः सन् कामम् आशु अपहिनोति त्यजति ।४०।

इति श्रीमद्भागवते महापुराणे दमशस्कन्धे पूर्वार्द्धे गुढार्थदीपिन्यां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ब्रह्मरात्रे तद्रात्रीणामन्ते ब्रह्ममुहूत वासुदेवानुमोदिता आज्ञापिताः क्षणमपि तद्वियोगमनिच्छन्त्यः यतो भगवानेव प्रियो यासां ताः कथञ्चित् स्वगृहान् ययुः ॥ ३९ ॥ कामविजयिसर्वेश्वररासक्रीडाश्रवणादेः कामजयं परभक्तियोगञ्च फलमाह । विक्रीडितमिति । यः धीरः श्रवणे वर्णने वा ये विघ्नास्तज्जयशीलः श्रद्धान्वितश्च विष्णोर्व्रजवधूभिः सह विक्रीडितम् कामं यथेष्टमनु अनुक्रमेण श्रृणुयात् अथवा वर्णयेत्स अचिरेण परां भक्तिं प्रतिलभ्य आशु हृद्रोग रोगवदनिष्टकरं काममपहिनोति परित्यजति ॥४०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्रयस्त्रिंशाध्यायार्थप्रकाशः ॥ ३३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

किं ताः कान्ताः कान्तारेऽवतस्थिरे तथैव किंवा गता गेहमित्यत आह ॥ ब्रह्मरात्र इति । ब्रह्मरात्रे ब्राह्मे मुहूर्ते । एकदेशपूर्वकत्वादच् । उपावृत्ते उपायाते वासुदेवेनानुमोदितः गच्छतेतः परं सदनमित्यनुमोदिता अनिच्छन्त्यो विरहासहिष्णुतया भगवान्प्रियो यासां ता भगवतः प्रिय इति वा स्वगृहान्ययुः । शरच्चन्द्रांशुसन्दोहेति श्लोकस्य व्याख्या द्वेधा प्रवृत्ता । तदनुरोधेन तद्दिने वा दिनान्तरे वा भगवन्मायायाः किं मान्द्ये ॥ ३९ ॥ एतद्रूपमेतस्य फलमिति निरूपणेनैतदाकर्णनं वर्णनं चावश्यं कार्यमिति

विधत्ते ॥ विक्रीडितमिति । विष्णोः कृष्णस्य व्रजवधूभिर्व्रजगजगामिनीभिः सहेदं न विक्रीडितं तच्चरितभरितां कथामिति यावत् श्रद्धान्वित आस्तिक्यबुद्धिरनुश्रृणुयादथ स्वयं वर्णयेदन्यान्प्रति परां साक्षादपरोक्षजनयित्रीं प्रतिलभ्य प्राप्य कामहेतुको यो हृद्रोगस्तमाशु शीघ्रमपहिनोति त्यजति । अचिरेण त्वरया धीरो धिया ज्ञानेन ज्ञाने वा रमत इति स तथा भवति । आशु प्रतिलभ्य धीरो धृतिसहितोऽचिरेण कामं हृद्रोगमपहिनोतीत्यन्वयो वा ॥ ४० ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे एकत्रिंशोऽध्यायः ॥ १०–३१ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं प्रासङ्गिकं परिहृत्य उक्ता लीलामुपसंहरति । ब्रह्मरात्र इति । अरुणोदयो ब्रह्मरात्रः तस्मिन् उपावृत्ते सम्यक्जाते तदन्तर्यामितया प्रविष्टो भगवान् गृहे गन्तव्यमीतीच्छामुत्पादितवान् ततः भगवता अनुज्ञाताः यतो भगवान् मोक्षदाता ताश्चेत् आसन्ध्यमन्तः स्मरणं करिष्यन्ति तदा मोक्षाधिकारिण्यो भविष्यन्तीति वासुदेवेनानुमोदिताः । यद्यपि तासामिच्छा न स्थिता सर्वपरित्यागेन भगवद्भजनस्य कृतत्वात् किंगृहेण लोकैर्वेति तथापि गोप्य इति विपरीतबुद्धिः हठबुद्धिश्च तासां नास्तीति स्वगृहान् ययुः तथापि तासां न गृहाः प्रियाः किन्तु भगवानेव नापि ससारभयं यतो भगवतः प्रियाः ॥ ३९ ॥ मोक्षार्थमिदं चरित्रमिति ज्ञापयितुमेतदुपाख्यानश्रवणस्य फलमाह । विक्रीडितमिति । ब्रजवधूभिः सह भगवत इदं विशेषेण क्रीडितं श्रद्धान्वितो भूत्वा सम्यक् कथ्यमानमुपश्रृणुयात् अथवा वर्णयेत् श्रवणानन्तरमेव कीर्त्तनमित्यथशब्दः । य इति नात्र वर्णादिनियमः किन्तु यः कश्चन भगवतो माहात्म्यश्रवणादेवमपि मोचयतीति भक्तानाञ्च सर्थथा प्रतिपत्तिश्रवणाच्च भगवति परां भक्तिमुपगतः ततो भक्त्या अन्तः स्थिरीभूतया हृदयस्य रोगरूपं काममाशु शीघ्रमेवापहिनोति यः पूर्वं हृदयबाधकत्वेन स्थितः शीघ्रमेव च बाधकर्त्ता तमाश्वेव दूरीकरोति श्रवणमात्रेणैव ततः पूर्ववासनया पुनरुद्गमे अचिरेणैव धीरो भवति अत इदं साभिप्रायं श्रोतव्यमिति फलप्रकरणत्वात् फलमुक्तम् ॥ ४० ॥

इति श्रीमद्भागवतसुबोधिन्याम् श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे पूर्वार्धे रासक्रीडायांत्रिंशाध्यायविवरणम् ॥ ३०–३३ ॥

श्रीसुबोधिनी–सारः

ब्रह्मरात्रे ब्राह्मे मुहूर्त्ते उपावृत्ते प्राप्ते देवरात्रे वेत्येके । वासुदेवेन श्रीकृष्णेनानुमोदिता भगवत्प्रिया गोप्यः स्वगृहाननिच्छंत्यो ययुः ॥ ३९ ॥ व्रजस्त्रीभिर्विष्णोः श्रीकृष्णस्य विक्रीडितम् इदं श्रद्धायुक्तो यः श्रृणुयादथ कथयेत् भगवति परां भक्तिमुपलभ्याचिरेण शीघ्रं धीरो हृद्रोगं काममपहिनोति परित्यजति आशु क्षिप्रम् ॥ ४० ॥

इति श्रीमद्भागवते दशमस्कन्धे सुबोधिन्यां टीकायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं प्रासङ्गिकमुक्त्वा प्रकृतमाह—ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते सति वासुदेवेनानुमोदिता अनुमोदनपूर्वकमाज्ञापिता गोप्यो गन्तुमनिच्छन्त्योऽपि स्वगृहान् प्रतिययुः । अनिच्छायां हेतुमाह—भगवत्प्रिया इति ॥ ३९ ॥ उक्तरासक्रीडादिफलमाह—विक्रीडितमिति । व्रजवधूभिः साकमिदं विष्णोः कृष्णस्य विक्रीडितं श्रद्धान्वितो यः पुमान् अनुक्रमेण श्रृणुयात् अथवा वर्णयेत् श्रावयेत् स तस्मिन् भगवति परामुत्कृष्टां भक्तिं प्रतिलभ्य प्राप्य अचिरेण जीवदशायामेव धीरः जितेन्द्रियः सन् हृद्रोगं हृत्स्थरोगवदनर्थकरं काममाशु अपहिनोति निरस्यति । चकारः क्रीडान्तरस्यापि कालान्तरसूचनार्थः ॥ ४० ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने । त्रयस्त्रिंशो गतो वृत्ति रासक्रीडानिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

ब्रह्मरात्र इति ॥ ब्रह्मरात्रे ब्राह्मे मुहूर्त्ते । समासान्त आर्षः । उपावृत्ते प्राप्ते सति । यद्वा । युगसहस्रप्रमाणे ब्रह्मणो रात्रिसमये उप आधिक्येन आवृत्ते एकामावृत्तिं गते एकस्यामेव रजन्यां नृत्यगीतादिविलासैर्युगसहस्रं पूर्णं बभूव तथा पञ्चयोजनात्मकवृन्दावनप्रदेशैकदेश एवासंख्यानां गोपीनां विलासपर्याप्तावकाशलाभादिकं भगवत्प्रभावात् वासुदेवेनानुमोदिता अनुमोदनपूर्वकमाज्ञापिता भगवत्प्रिया गोप्यो गन्तुमनिच्छन्त्योऽपि स्वगृहान् प्रति ययुः ॥ ३९ ॥ कामजयार्थाया रासलीलायाः कामजयमेव फलमाह-विक्रीडितमिति ॥ व्रजवधूभिः साकमिदं विष्णोः कृष्णस्य विक्रीडितं श्रद्धान्वितो यः पुमान् अनुक्रमेण श्रृणुयात् अथवा वर्णयेत् श्रावयेत् स तस्मिन् भगवति परामुत्कृष्टां भक्तिं प्रतिलभ्य प्राप्य अचिरेण जीवदशायामेव धीरः जितेन्द्रियः सन् हृद्रोगं हृत्स्थरोगवदनर्थकरं काममाशु अपहिनोति निरस्यति ॥ ४० ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमत्रयस्त्रिंशे व्यधादिमाम् ॥

इति श्रीमद्भागवते दशमेऽन्वितार्थप्रकाशिकायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ब्रह्मरात्रे ब्राह्म मुहूर्त्ते उपावृत्ते प्राप्ते सति भगवान् प्रियो यासां ताः ।। ३९ ।। एवं रासक्रीडा श्रवणेन जनानां कामजयः स्यादित्याह विक्रीडितमिति । आशु भक्तिं प्रतिलभ्य प्राप्य हृद्रोगं हृदयरोगतुल्यं कामम् । अचिरेण सद्यः धीरो विषय सुखेष्व व्याकुलः अपहिनोति त्यजति ।। ४० ।।

इति श्रीशुद्धकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने रासक्रीडायां त्रयस्त्रिशोऽध्यायः ।। ३३ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रकृतमाह ।। ब्रह्मरात्र इति ।। ब्रह्मरात्रे ब्राह्मे मुहूर्त्ते, उपावृत्ते प्राप्ते सति, वासुदेवेन श्रीकृष्णेनानुमोदिता अनुमोदनपूर्वमाज्ञापिताः अपि, गोप्यः । भगवानेव निरतिशयप्रियो यासां ताः, अत एव अनिच्छन्त्यः सत्यः, गन्तुमिति शेषः । कथञ्चित् स्वगृहान् प्रति, ययुः ।। ३९ ।। प्रकृतरासक्रीडाश्रवणादिफलमाह ।। विक्रीडितमिति ।। व्रजवधूभिः साकं, इदं विष्णोः श्रीकृष्णस्य, विक्रीडितं, भावे क्तः । यः पुमान्, श्रद्धान्वितः सन्, अन्वनुक्रमेण, शृणुयात् । अथवा वर्णयेच्छ्रावयेत्, सः पुमान्, भगवति परामुत्कृष्टां, भक्तिं आशु प्रतिलभ्य प्राप्य, धीरः जीवदशायां जितेन्द्रियः सन्, कामं कामाख्यं शत्रुं, हृत्स्थं रोमवदनर्थकरमज्ञानं च, अचिरेण अपहिनोति निरस्यति । श्रोताऽऽशु धुनोति । तथा वर्णयिताप्यचिरेण धुनोतीति प्रत्येकाभिप्रायोऽचिरेयाशुशब्दयोः प्रयोगोऽतो न पौनरुक्त्यम् ।। ४० ।।

कृता टीका मया रासपञ्चाध्याय्या यथामति । हरिस्तुष्टोऽस्तु तत् सद्भिः कृत्वा ममोपरि ।। १ ।।

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे त्रयस्त्रिशोऽध्यायः ।। ३३ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ब्रह्मरात्र इति : १०.३३.३९.

युक्तो योगप्रकारो य इह भृशमसौ योगविन्मौलिमान्यो मन्ये यद्ब्रह्मरात्रे विशदमभिहिते कल्पसन्धानमस्मिन् ।
भूतानां या निशाऽस्यां विहरति सुयमी चेत्यपि स्मार्तवादो भूयस्तस्यानुकूल्ये स्थित इति विशदं तद्विधिज्ञैर्विशोध्यम् ।।१८०।।

योगान्तरङ्गसुखसिन्धुसुधारसज्ञास्ता वृत्तयो ध्रुवमनादरमावहन्ति ।
आपातमञ्जुरस-गोकुलवर्तनेष्वित्यासीदनिच्छितगतैः स्फुटमत्र तासाम् ।। १८१ ।।

आकल्परात्रिमाकल्प्य यत्ताः प्रभुररीरमत् । ताच्छील्यमासां वात्सल्यमस्यासीममभूद् द्वयम् ।। १८२ ।।

धन्यं वन्यलतादि धन्यमुदकं धन्या च वन्यावनी धन्यान्येव सुमानि तान्यपि तथाऽन्ये तत्र तत्राश्रिताः ।
श्रीकान्तेन निशान्तशोभिनि वने कान्ताभिरैकान्तिकी क्रीडाऽकारि हि यत्र यत्र सकलानङ्गप्रदा पश्यताम् ।। १८३ ।।

नीचोऽस्तूच्चतरोऽस्तु वा तदवनं कुर्यामहं स्वाश्रयाद्गत्वा तत्र पदा निजेन यदसौ मद्भक्तिभाग्यान्वितः ।
इत्थं स्वं वचनं विधातुमुचित प्राप्तस्त्वमत्रान्यथा कुत्राब्धिः क्व च गोकुलं क्व च रमा क्वाभीरवामभ्रुवः ।। १८४ ।।

वल्लव्यो न च वल्लवा अपि न सा पल्ली न हल्लीसकं ताभिः फुल्ल-सुमल्लिका-परिमल-प्रोल्लासि-वृन्दावने ।
यच्चान्यच्च चरित्रमच्युतकृतं भूयस्त्वयाऽन्यत्र तत् किन्तु श्रीरमणाखिलोऽप्ययमसौ मत्पुण्यपाकोदयः ।। १८५ ।।

अनङ्गसुखसङ्गिनावपि कृताङ्गसङ्गौ मिथः सदाचरणतत्परावपि कुजन्मिलीलाप्रियौ ।
तडिद्घनविलासिनावपि च मेघविध्वंसिनौ नमाम्यमितकामदौ सुरसगोपिका-माधवौ ।। १८६ ।।

विक्रीडितमिति : १०.३३.४०.

हृद्रोगविगमायैव विक्रीडितमिदं हरेः । युक्तमुक्तं फलं तस्माद् गोपीवत्पठतामपि ।। १८७ ।।
यन्नामापि सकृत्प्रोक्तमनामयकरं नृणाम् । सुव्यक्तमेव हृद्रोगापहं तद्रासकीर्तनम् ।। १८८ ।।

वाङ्नाम्न्याः कामधेनोर्मुनिवरवदनक्षीरसिन्धूदितायानेशः शेषोऽप्यशेषं तदुदितमवनावर्थजातं ग्रहीतुम् ।
तत्राहं त्वल्पबुद्धिस्तदपि पृथुनृपादर्शिताध्वावलम्बी वत्सीभूयेप्सितार्थग्रहणमकरवं सद्भिरप्येवमूह्यम् ।। १८९ ।।

श्रीशाकल्पतरुक्रीडा० ।।

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते श्रीभक्तिरसायने त्रयस्त्रिशोऽध्यायः ।। ३३ ।।

कृष्णप्रिया

अब अरुणोदय ठीक प्रकार हो गया था, अन्तर्यामी भगवान् श्रीकृण की प्रेरणा से व्रजवनिताओं के अपने घर जाने की प्रेरणा हुई, भगवान् की अनुज्ञा पाली उनकी जाने की इच्छा न थी फिर भी भगवान् की प्यारी गोपियाँ प्रणाम कर अपने अपने घर पधारी ॥ ३९ ॥ अध्याय समाप्ति में श्री शुकाचार्य जी फलश्रुति का निरूपण करते कह रहे हैं कि राजन् ? यह रास लीला के चरित्र का "यः" कोई भी मनुष्य श्रद्धा से श्रवण करें श्रवण करावे क्योंकि श्रवण कीर्तन करने वाला मनुष्य निः संदेह रहे और श्रवण कीर्तन करे। राजन् व्रजवनिताओं के साथ भगवान् विष्णु जी का सर्वात्मा श्रीचन्द्रजी का श्रीव्रनिताओं के साथ रासक्रीडन प्रसङ्ग का कोई भी मनुष्य श्रद्धा पूर्वक श्रवण एवं कीर्तन करेगा वह विना विलम्ब भगवान् श्रीकृष्ण में पराभक्ति को प्राप्त कर लेगा और हृदय के रोग रूप जो काम है उससे शीघ्र मुक्त हो जायगा और तत् क्षण धीर बन जायगा ॥ ४० ॥

श्रीमद्भागवत दशम स्कन्ध निरोध तामस प्रकरण के फल प्रकरण में भगवान के ज्ञान ऐश्वर्य का
वर्णन करने वाला ३३ वाँ अध्याय सम्पूर्ण ॥ ३३ ॥

* * *

अथ चतुस्त्रिंशोऽध्यायः

श्लोकाः	अनु.	वंश	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
३२	३१	१	२	१०२४	११	४०	१०७५	३३।।	३

[1]श्रीशुक उवाच

एकदा देवयात्रायां गोपाला जातकौतुकाः। अनोभिरनडुद्युक्तैः प्रययुस्तेऽम्बिकावनम् ॥ १ ॥
तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं [2]विभुम्। आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेऽम्बिकाम् ॥ २ ॥
गावो हिरण्यं [3]वासांसि मधु मध्वन्नमादृताः। ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ॥ ३ ॥
ऊषुः सरस्वतीतीरे जलं प्राश्य [4]धृतव्रताः। रजनीं तां महाभागा [5]नन्दसुनन्दकादयः ॥ ४ ॥

कर्वमक्षमा

अन्वयः—श्रीशुक उवाच—एकदा, देवयात्रायाम्, जातकौतुकाः, गोपालाः, अनडुद्, युक्तैः, अनोभिः, ते, अम्बिकावनम्, ययुः ॥ १ ॥ नृप ? ते, तत्र, सरस्वत्याम्, स्नात्वा, देवम्, विभुम्, पशुपतिम्, च, अम्बिकाम्, देवीम्, अर्हणैः, भक्त्या आनर्चुः ॥ २ ॥ आदृताः, सर्वे, 'नः देवः, प्रीयताम्' इति ब्राह्मणेभ्यः, भावः, हिरण्यम्, वासांसि, मधु, च मध्वन्नम्, ददुः ॥३॥ नन्द सुनन्दाकादयः, धृतव्रताः, महाभागाः, जलम्, प्राश्य, ताम्, रजनीम्, सरस्वतीतीरे, ऊषुः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चतुस्त्रिंशेऽहिना ग्रस्तं नन्दं हरिरमूमुचत् ॥ विद्याध्रं चांगिरः शापाच्छंखचूडं तथावधीत् ॥ १ ॥
रासापदेशतः कामं किंकरीकृत्य कामतः ॥ अनुगृह्णन्वशं निन्ये तथा विद्याधराधिपम् ॥ २ ॥

तदेवं कामानुग्रहमुखेन कामजयं प्रतिपाद्य तथैव विद्याधरजयं प्रतिपादयितुं तत्प्रसङ्गं दर्शयति। एकदेति ॥ १-२ ॥ गावो गाः। मधु मधुरम्। मध्वन्नं सहितमन्नम् ॥ ३ ॥ जलमात्रं प्राश्योपोषितास्तां निशां तत्र ऊषुर्न्यवसन् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अहिना सर्पेण। अमूमुचत् मोचयामास। विद्यामन्तर्द्धानाविर्भावादिलक्षणां धरतीति तथा तम्। मूलविभुजादित्वाद्धरतेः कः। शंखचूडम् यक्षम् (१)। रासापदेशतः रासलीलाछलेन। कामतः स्वेच्छया। विद्याधराधिपं कामं चानुगृह्णन्नित्यन्वयः (२)। तदेवमिह तच्छब्दो वाक्यालंकारे एव। कामस्यानुग्रहाय मुखं प्रारम्भो यस्य वृत्तस्य तत्कामानुग्रहमुखं तेन "ये ये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन। ते ते गता विष्णुपुरीं नरेन्द्राः क्रोधोऽपि देवस्य वरेण तुल्यः ॥" इत्युक्तदिशा 'मोघा याच्ञा वरमधिगुणे' इत्युक्तदिशा च भगवत्कृतकामजयोऽपि कामानुग्रह एव। तथैव विद्याधरानुग्रहमुखेन तत्प्रसंगं विद्याधरमेलनम्। एकदा रासानन्तरं फाल्गुनशिवरात्रौ। अनोभिः शकटैः। गोवर्द्धनमखवत्कृष्णकौतुकमूलत्वेन तीर्थे दानार्थं बहुलद्रव्यस्य नयनार्थम् अम्बिकावनम्। मथुरादिग्विभागे वायव्ये सरस्वतीतीरस्थं शिवोमामूर्त्तिभूषितम् ॥१॥ तत्र वने। पशूनां जीवानां पतिम् "ब्रह्माद्याः स्थावरांताश्च देवदेवस्य शूलिनः। पशवः परिकीर्त्त्यंते संसारवशवर्त्तिनः। तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः ॥ मलमायादिभिः पाशैः स बध्नाति पशून्पतिः। स एव मोचकस्तेषां भक्त्या सम्यगुपासितः ॥ ब्रह्मादिस्तम्बपर्यंतान्पशून्बद्ध्वा महेश्वरः। पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकम् ॥" इति शैवोक्तेः। देवीम् अम्बिकाम् ॥२॥ देवः पार्वतीनाथः ॥ ३ ॥ तत्र सरस्वतीतीरे। ताम् या तत्र गतानामागतेत्यर्थः। सनन्दः श्रीनन्दानुजः, संज्ञायां कन्। अतस्तदग्रजस्योपनन्दस्य गोष्ठ एव स्थितिरवधार्य्यते, योग्यता च तस्य ज्ञानवयोधिक्यात् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ रासलीलाप्रसङ्गात्तादृशीं शङ्खचूडवधावसानामन्यां लीलां दर्शयितुं तयोर्मध्ये जातत्वेन क्रमप्राप्तं तत् प्रभावदर्शनमयत्वेन तादृशलीलाप्रतिकूलजनस्तम्भकतया तदुपयुक्तं च लीलान्तरमाह। एकदेति। तद्रासानन्तरं फाल्गुने शिवरात्रौ देवस्य

---

[1] बादरायणि–प्रा. पा.। [2] प्रमुम्–वीर. विज.। [3] ण्यवासां–विज.। [4] यत–वीर. विज.। [5] नन्दसनन्द–विज। नन्दसु–प्रा. पा.।

श्रीशिवस्य यात्रायां जातं कौतुकमौत्सुक्यं येषां ते। तदेतच्च गोवर्द्धनमखवत् श्रीकृष्णकौतुकमूलत्वेनैव च ज्ञेयम्। अनन्याश्रयमनस्त्वात्तेषाम्। यद्वा। ते गोपाः गोपालेन श्रीकृष्णेन हेतुना आ सम्यक् जातकौतुकाः। अत्र श्रीकृष्णस्य तु निजप्रेयसीभिः सह स्वच्छन्दलीलायां निगूढोऽभिप्रायो गम्यः। अतः पूर्वलीलासमानत्वञ्चास्य ज्ञेयम्। अनडुद्भिरिति प्रसिद्धार्थस्यापि निर्द्देशस्त्वनो वहति अनड्वानिति निरुक्तेर्विशेषविवक्षया सा चानायासगमनस्यानोर्निर्द्देशश्च तीर्थे दानार्थं बहुलद्रव्यनयनस्य अत एव प्रकर्षेण ययुः अम्बिकावनं श्री मथुरापुरवायव्य दिग्विभागे सरस्वतीतीरेस्थं श्रीशिवोमामूर्त्तिविभूषितं तद्दैवत्यम्। यद्वा। गुर्जरदेशे सिद्धपुरस्य नातिदूरवर्त्तितीर्थम् अम्बिकावनं तस्यैवातिप्रसिद्धत्वात्। देवं पूज्यं श्रीविष्णुर्वैष्णवैकप्रियत्वात् प्रभुं श्रीभगवद्भक्त्यादिप्रदानसमर्थं विभुमिति क्वचित् पाठः। अत एवार्हणैर्विविधोपचारैः। चकारेणाम्बिकाया अपि तादृशत्वं समुच्चीयते, हे नृपते! इति रासलीलाविष्टं तमवधापयति ॥ १-२ ॥ तेषां सकौतुकत्वेऽपि धर्मार्थनिष्ठत्वमाह। गाव इति द्वाभ्याम्। आदृताः तद्देवालयसेवकैः सम्मानिताः आदरयुक्ता वा सर्वे श्रीनन्दादयः प्रत्येकमेवेत्यर्थः। देवः श्रीशिवः श्रीविष्णुर्वा वैष्णवविष्णुप्रीतिरेव वैष्णवानां प्रयोजनमिति तच्च विष्णोराराधनार्थाय स्वपुत्रस्योदयाय चेतिवत् ज्ञेयम् ॥ ३ ॥ प्राश्य प्राशनमात्रं कृत्वा तत्र हेतुः यत संयमेन गृहीतं व्रतं यैः रजनीं शिवरात्रि तस्यास्तत् प्रधानत्वात् सुनन्दः श्रीनन्दानुजः संज्ञायां कन् अतस्तदग्रजस्योपनन्दस्य गोष्ठ एव स्थितिर्बुध्यते योग्यता च तस्यैव ज्ञानवयोऽधिकत्वात् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमैश्वर्य्यं सम्बलितलौकिक-लीलायाः प्रसंगात्तादृशीमेवान्यां वदन् गोपानां साक्षादाश्चर्य्य-दर्शनेन सर्व्वथा श्रीभगवति तेषां भक्तिविवृद्धिं दर्शयितुं प्रसंगान्तरमारभते—एकदेति। कैशोरं एव कस्मिंश्चित् समये तत्रापि युक्त्या शिवरात्रौ, कार्त्तिके इति केचित्। देवस्य श्रीशिवस्य यात्रायां जातं कौतुकमौत्सुक्यं येषां ते इति केवल कौतुकेनैव प्रयाणम्, न तु केनचित् कामादिनेत्यर्थः। यतो गोपालाः कौतुकशीला इत्यर्थः। यद्वा, गोपालाः श्रीभगवदेकनिष्ठा अपि अनडुद्भिर्महावृषभैर्युक्तैरनोभिरिति स्वभावतो गोपानां शकटैरेव गमनाद्विशेषतश्च तीर्थे दानार्थ-बहुलद्रव्यनयनात्, अतएव प्रकर्षेण ययुः, अम्बिकावनं श्रीमथुरापुरपश्चिमदिग्भागे सरस्वतीतीरस्थं श्रीशिवोमामूर्ति-विभूषितं तद्दैवत्यम्, गुर्ज्जरदेशे सिद्धपुरुषस्य नातिदूरवर्त्ति-तीर्थम्, अम्बिकावनमिति केचित् ॥ १ ॥ तत्र वने देवं पूज्यं श्रीविष्णुर्वैष्णवैकप्रियत्वात्, विशेषतः पशूनां पतिं पालकम्; किञ्च प्रभुं श्रीभगवद्भक्तिप्रदाने समर्थमतएव अर्हणैर्विविधोपचारैर्भक्त्या पूजयामासुः, चकारेणाम्बिकाया अपि तादृशत्वं समुच्चीयते। हे नृपते इति कौतुकशीलानां कौतुकाचरणवृत्तं राजत्वाद् भवता ज्ञायते एव; किंवा वैष्णवानामपि श्रीभगवद्भक्त्यर्थं तत्तत्पूजावृत्तं भगवता पाल्यत एवेति ॥ २ ॥ गाव इति प्रथमान्तत्वं छान्दसम्। यद्वा, वो युष्माकं सम्राजामिव यत् हिरण्यादि तदित्यर्थः। आदृता देवालयस्थैर्देवसेवकैः सम्मानिता आदरयुक्ता वा, सर्व्वे श्रीनन्दादयः प्रत्येकमेवेत्यर्थः। देवः श्रीशिवः श्रीविष्णुः श्रीकृष्ण एव वा, प्रेमभरेण सदा तत्प्रीत्येकापेक्षकत्वात् ॥ ३ ॥ प्राश्य प्राशनमात्रं कृत्वा, यतो यतं संयमेन गृहीतं व्रतं यैः, एतच्च श्रीशिवतीर्थाद्यपेक्षया तीर्थयात्रापेक्षयैव वा, महान् भागो भाग्यं प्राप्यांशो वा येषामिति श्रीभगवद्भक्त्यपेक्षया श्रीशिवार्च्चनं युक्तमेवेति भावः। सन्नन्दो नन्दस्य कनीयान् भ्राता, संज्ञायां कः। ज्येष्ठोऽप्युपनन्दो गमनप्रसंगे नोक्तः, मन्त्री, रक्षार्थं व्रजे स्थित इति ज्ञेयम्। आदि-शब्दादन्येऽपि वृद्धाः, तद्यात्रायां वृद्धानामेव प्राधान्यात्ते वृद्धा निर्दिष्टाः, न च श्रीभगवान् तद्वयस्या वा, तेषां प्रायो बाल्ये व्रताद्यनादरात् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ सुदर्शनाख्यविद्याधरस्य ब्राह्मणशापात्सर्पतां गतस्य शापविमोचनात्मकं संप्रस्तावं तथा शङ्खचूडाख्ययक्षवधतच्छिरोमण्यपहारात्मकञ्च भगवतः कर्मानुवर्णयति चतुस्त्रिंशेनाध्यायेन। एकदेत्यादिना। कदाचिद्देवयात्रायां साम्बं पशुपति प्रतिगमनतत्पूजाद्यात्मिकायां निमित्तभूतायामनडुद्भिर्वृषभैर्युक्तैरनोभिः शकटैरम्बिकावनं ययुः देवयात्रायां विषयभूतायां जात कौतुकं येषां ते तथा भूता ययुरिति वा ॥ १ ॥ तत्र तद्वनसमीपस्थायां सरस्वत्यां नद्यां स्नात्वा हे नृपते अर्हणैः पूजयामासुः ॥ २ ॥ ततो गावः गाः हिरण्यं वासांसि मधु मधुरं मधुसहितमन्नञ्च ब्राह्मणेभ्यो ददुः। कथम्भूताः देवः पशुपतिर्नोऽस्माकं प्रीतो भवत्वित्यभिप्रायवन्तः ॥ ३ ॥ ततो जलमात्रं प्राश्य यतं नियतं व्रतं ब्रह्मचर्यात्मकं येषां ते तथाभूताः तत्रैव सरस्वत्यास्तीरे नन्दप्रभृतयो गोपास्तां रात्रिमुषितवन्तः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मुकुन्दभक्त्या संसाराहिग्रासमोक्षस्य ज्ञानरत्नदानस्य निदर्शनाय नन्दस्य सर्पान्मोक्षं शङ्खचूडं हत्वा बलभद्राय तच्छिरोरत्नदानं च निरूपयत्यस्मिन्नध्याये। तत्र प्रथमतो गोपानां यात्राप्रकारं कथयति। एकदेति। अम्बिकामाहात्म्यविषयां किंवदन्तीमाकर्ण्य जातकौतुका उत्पन्नकुतूहलबुद्धयः अम्बिकावनं दुर्गावासस्थानं वनम् अनडुद्युक्तैः वृषभयुक्तैः अनोभिः शकटैः ॥ १ ॥ पशवो जीवाः तेषां पतिं प्रभुं समर्थं समर्थेऽधिपतौ प्रभुरिति च तत्र वने सरस्वत्यां स्यन्दमानायाम् अर्हणैः पुष्पोपहारादिसाधनैः ॥ २ ॥ मध्वन्नं मधुना युक्तमन्नं यद्वा मधुरान्नं मधुक्षौद्रम् ॥ ३-४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एकदा शिवरात्रौ अम्बिकावनं गुर्ज्जरदेशे सिद्धपुरनिकटे प्रसिद्धम् ॥ १–७ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

एवं श्रीकृष्णास्य रासमुक्त्वा सङ्कर्षणस्यापि यत् किञ्चित् कथयन् श्रीगोविन्दस्यापि पुनः पुनरपि रासक्रीडा जातेत्यपि बोधयति–कदाचिदित्यादि । अथ उक्तरासक्रीडानन्तरं गोविन्दः कदाचित् रामः कदाचित्व्रजयोषितां मध्यगौ भूत्वा वने रात्र्यां विजह्रतुः एकयोक्त्या द्विवचनम् क्रियाया एव, न तु कर्त्रोः, तेन कालभेदः, ज्ञानभेदः, करणभेदश्च । यथा कदाचित् सूर्य कदाचिच्चन्द्रश्च तमो नाशयत इति नैककालीनत्वं नैकस्थानत्वञ्च नैककरणत्वञ्च, किन्तु समासेन द्वयोस्तमोनाशकनिरुक्तिस्तथेहापि । व्रजयोषितश्च व्रजयोषितश्चेत्येकशेषः । तेन च तासां कृष्णपरिग्रहत्वेन रामपरिग्रहत्वेन च वैजात्यभाजां मध्यगौ । गोविन्दः स्वपरिग्रहाणां मध्यगः, रामश्च स्वपरिग्रहाणामित्यत्रापि एकयोक्त्यैव विशेषणस्य द्वित्वम्, न तु साहचर्य–व्यञ्जकम् । तस्मादिह विशेषण–द्वित्वं नैकजातीयगोपीनां मध्यवर्तित्वाभिधायकम्, अपि तु विजातीयानामेवेति । एवमुत्तरत्रापि ॥ १–२१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कदाचिदथ गोविन्दः—अथ एतस्य रास–विलासस्यानन्तरं कदाचित् गोविन्दः कदाचिद्रामश्च विजह्रतुः । एकयोक्त्या द्विवचनम् न तु कालस्यैकत्वे स्थलस्यैकत्वे च, कदाचित् सूर्यः कदाचित् चन्द्रस्तमांसि नाशयत । किम्भूतौ ? व्रजयोषितां मध्यगौ । गोविन्दः स्वपरिग्रहाणां मध्यगः, रामश्च स्वपरिग्रहाणामित्यत्राप्येकयोक्त्या द्विवचनम् । एवमुत्तरत्रापि ॥ १–२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चतुस्त्रिंशे नन्दपादग्रासि सर्पं स्पृशन् हरिः । उद्दधार मणिं शङ्खचूडाज्जग्राह तद्वधात् ॥

शारदीं रासलीलां वर्णयित्वा वासन्तीं होलिकागानलीलां वर्णयिष्यन् प्रथमं शिवरात्रियात्रामाह । एकदा फाल्गुनकृष्णाचतुर्दश्याम् अम्बिकावनं मथुरावायव्यदिग्विभागे सरस्वतीतीरस्थं श्रीशिवोमामूर्तिभूषितमित्येके गुर्ज्जरदेशस्थं सिद्धपुरनिकटस्थतीर्थमित्यन्ये प्राहुः ॥ १–२ ॥ गावो गाः मधु शिवाभिषेकावशिष्टं मधुसहितानाम् ॥ ३ ॥ सुनन्दो नन्दानुजः संज्ञायां कन् ॥ ४ ॥

गूढार्थदीपिनी

एकदा गोपालाः फाल्गुनशिवरात्रौ वृषभयुक्तैः अनोभिः शकटैः । अम्बिकावनम् प्रययुः कौतुकमुत्साहः ॥ १ तत्र वने । पशवो जीवाः तेषां पतिम् । अर्ह्यते ऽनेनेति अर्हणं पूजनद्रव्यम् ॥ २ ॥ या गावस्ताश्च । मधु मधुरम् मध्वन्नमिष्टान्नम् । आद्दृताः सादराः । नोऽस्माकं प्रीयतामिति सङ्कल्प्य ॥ ३ ॥ तां रजनीं शिवरात्रिम् ऊषुः निवासं चक्रुः । सुनन्दकः नन्दानुजः । संज्ञायां कन् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

चतुस्त्रिंशेऽध्याये अहेः सकाशात् श्रीनन्दविमोचनात्मकं ब्राह्मणशापादहिभूतस्य विद्याधरस्य विमोचनरूपं शङ्खचूडवधादिकं च भगवतः कर्मानुवर्णयति । एकदेति ॥ १–२ ॥ तदनन्तरं गवादिकं मधु मधुरं मध्वन्नं मधुना सहितमन्नं च ददुः गावः गाः ॥ ३ ॥ ऊषुः न्यवसन् ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ कंसारोरगग्रस्तमेवं मोचयतीति दिदर्शयिषुर्नन्दस्याहितो विहितं मोचनं तथा शङ्खचूडचूडारत्नहरणं तं मारयित्वा बलाय तद्वितरणं च कथयत्यस्मिन्नध्याये । तदादौ गोपानां यात्राप्रकारं निरूपयति ॥ एकदेति । जातमुत्पन्नं कौतुकमभिलाष उत्सवो वा येषां ते तथा । कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोः । परम्परासमावातमङ्गले च कुतूहले । विवाहसूत्रगीतादिभोगकामेषु च स्मृतमिति विश्वात्सम्भवद्विश्वार्थं तत्पदं । अनड्डुद्भिर्वृषैर्युक्तैरनोभिः शकटैरम्बिकावनम् । अम्बिकाऽत्र पार्वती । देवं पशुपतिं प्रभुं देवी च नृपतेऽम्बिकामिति जनसभाजनतरतमभावस्य वक्ष्यमाणत्वात् ॥ १ ॥ तत्र सरस्वत्यां स्नात्वा पशुपतिं देवाधिपम् । पशवो देवताः स्मृता इति छान्दोग्यभाष्योक्तेः । नन्द्यधीशमिति वाऽर्हणैः पूजासाधनैर्भक्त्याऽऽनर्चुरपूजयन् । चात्तामम्बिकामानर्चुरित्यन्वयः ॥ २ ॥ सर्वे रुद्रे ददुर्देवो वासुदेवो नः प्रीयतामिति । अयमेव कुतो नार्च्य इत्यतोऽप्याह ॥ देवोन इति । देवाद्वासुदेवादून इति । गाः व इति छेदः । मधुक्षौद्रं मध्वन्नं मधुरमन्ने देवो वासुदेव इदं सर्वं वो युष्माकमिति ददुः । देवो वो युष्मदन्तर्गतो देवः प्रीयतामिति ददुः ॥ ३ ॥ अलं प्राश्य पीत्वा यतव्रता इत्याभ्यां तीर्थोपोषणं गोपानां सूच्यते । तां रजनीं रात्रिं तत्रोपुरवात्सुः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवंरूपप्रपञ्चस्य पञ्चधा रसवर्णनम् । निरूप्य नामलीलातो रसार्थमिदमुच्यते ॥
एवमुद्धतभक्तास्तु यद्यन्यं समुपासते । दुःखभाजो भवन्त्येव मुच्यन्ते हरिणैव तु ॥
एकत्रिंशे सर्वभावान्निवृत्तानां तु पूर्ववत् । गानेन रमणं चक्रे प्रमाणानन्दसिद्धये ॥
बलभद्रेण सहितो वेदरूपेण सर्वथा । तद्दोषं नाशयामास हरिरित्युच्यते स्फुटम् ॥

शब्दतोऽप्यानन्दं निरूपयितुं प्रथमं गोकुलवासिनामन्यासक्तिं निवारयति । एकदेति विंशत्या लोकन्यायेनाप्यन्यत्र गमनेऽनिष्टं भवतीति तेषां यात्राप्रसङ्गो निरूप्यते । एकदा शिवरात्रिसमये प्रतिवर्षं न गच्छन्तीत्येकदेत्युक्तं देवयात्रा हि नित्या गोपालाश्च साधारणधर्मं एवाभियुक्ता इति तत्रापि धर्मबुद्धिः प्रासङ्गिकी । वस्तुतस्तु जातकौतुकाः अत एव न पद्भ्यां गमनं किन्त्वनोभिः शकटैः तत्रापि नाश्वयोजनं किन्तु अनडुद्युक्तैः प्रकर्षेण ययुः । महता समारम्भेण गृहे पुरुषानभिनिवेश्य अम्बिकालयं मथुरातः पश्चिमे देशे अर्बुदाचलनिकटे स्थितं तीर्थविशेषं ययुः ॥ १ ॥ तत्र गतानां पूजाप्रकारमाह । तत्र स्नात्वेति । सरस्वती तत्र प्रादुर्भूता अतः स्नात्वा पशुपाशविमोक्षणार्थं स्वयं पशुपालका इति पशूनामधिपतिं पशुपालने फलदातारं प्रभुं सर्वदानसमर्थमर्हणैः पूजाद्रव्यैरानर्चुः नतु पामरवत् गमनमात्रं देवीञ्च अम्बिकां पार्वतीमानर्चुः । चकारात्तदावरणदेवताः नृपत इतिसम्बोधनं यात्रायां तथाकरणे परिज्ञानाद्विश्वासार्थम् ॥ २ ॥ पूजामुक्त्वा दानान्यप्याह । गाव इति । सर्वकालान्येतानि दानानि हिरण्यं सुवर्णं वासांसि नानाविधानि मधु च मध्वन्नञ्च ग्राम्यारण्ययोः सिद्ध्यर्थं मधुमध्वन्नयोर्दानं गोभिः रुद्रः प्रीतो भवति हिरण्येनाग्निः सोऽपि रुद्र एव वासांसि सर्वदैवत्यानि सोमदैवत्यानि च उमया सहितः सोऽपि तेन प्रीतो भवति एवं पञ्चदानानि आदृता एव चक्रुः पात्रसम्पत्तिमाह । ब्राह्मणेभ्य इति । सर्वं इति सङ्गदोषोऽपि व्यावर्तितः कामनाश्च व्यावर्त्तयति देवो नः प्रीयतामिति । देवो महादेवः इति साधारण वचनं नोऽस्माकं प्रीतो भवत्विति नत्वन्या काचित्कामना ॥३॥ एवं यात्रायां कृत्यमुक्त्वा नियमेन तीर्थे स्थितिमाह । ऊषुरिति । सरस्वतीतीर एव अन्तः शुद्ध्यर्थं जलमेव प्राश्य तां रजनीमूषुः नतु रजन्यां किञ्चित्कृतमिति एतावान् धर्मः सिद्धः अग्रिमानिष्टं निवर्तिष्यत इति महाभागा इत्यनेन द्योतितं श्रोतुः सन्देहाभावाय नन्दः सुनन्दकश्च प्रधानभूतौ येषां नन्द इति प्रधाननाम्ना वा सर्वे व्यपदिष्टाः । सुनन्दकः आदिर्येषामिति सर्वेषामेव नन्दतुल्यता भगवत्सम्बन्धादत्यानन्दयुक्तः सुनन्दको भवति उपनन्दोऽन्यो वा नन्दएव वा धर्मप्राधान्येन गृहीतः ॥ ४ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । एकस्मिन्समये देवयात्रायां शिवरात्रिव्रतमुद्दिश्य जातोत्सवा गोपालास्तेऽनडुद्युक्तैरनोभिः वृषान्वितैः शकटैरम्बिकावनं प्रजग्मुः ॥ १ ॥ सरस्वत्यां नद्यां स्नात्वा तत्र वने देवं विभुं पशुपतिं श्रीरुद्रम् अम्बिका देवीं च ते भक्त्याऽर्हणैः पूजोपकरणैरानर्चुः ॥ २ ॥ गावो गाः सुवर्णं वासांसि मधु क्षौद्रं मिष्टान्नं सर्वं ब्राह्मणेभ्यो ददुः देवः शिवो नोऽस्माकं प्रीयतामिति हेतोः ॥ ३ ॥ जलं प्राश्याचम्य धृतव्रता महाभागा नन्दसुनन्दकादयः तां रात्रिं सरस्वत्यास्तीरे ऊषुः निवासं चक्रुः ॥ ४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अथैकत्रिंशाध्यायं विवृण्वन्त उक्तलीलानन्तरमन्यभजनं कुतुकादपि व्रजवासिनामनुपपन्नमित्याशङ्क्य इदं प्रकरणं न सर्वथा पूर्वप्रकरणमध्यपातीति ज्ञापनाय पूर्वप्रकरणार्थमनूद्यैतदुक्तितात्पर्यमाहुः **नामलीलात** इत्यारभ्य **हरिणैव** त्वित्यन्तेन । नामलीलातो यो रसस्तदर्थमन्यभजननिवृत्तिपूर्वकमिदं **प्रकरणमुच्यत** इत्यर्थः । यथा रूपलीला स्वतन्त्रा, तथा नामलीलापीति ज्ञापनाय भिन्नोपक्रमेणैतत्प्रकरणारम्भः कार्यः । तत्रान्यभजननिवृत्तिपूर्वकं भगवन्माहात्म्यज्ञानमङ्गं तदर्थं तथोच्यते । **एवमुद्धृतभक्ता** इति । इन्द्रभजननिवृत्तिपूर्वकमित्यर्थः । एतावान्परं विशेषो यद्रूपलीलारसानुभवे वैष्णवधर्माणामपि त्यागोऽङ्गम्, नामलीलारसानुभवेऽन्यदेवताभजननिवृत्तिस्तथा, न तु विहितानां भगवद्धर्माणामपि । विधेरपि नामलीलामध्यपातित्वान् मर्यादापुष्टिभेदेन तस्या द्विविधत्वान्मर्यादामिश्रपुष्टिमार्गीयाः पूर्वाध्याये कथ्यन्ते । शुद्धपुष्टिमार्गीया द्वितीये । मर्यादामार्गस्य सदोषत्वज्ञापनाय शङ्खचूडप्रसंगः ॥ ० ॥

रजनीं तां महाभागा इत्यत्र, **अग्रिमानिष्टमिति** । सर्वथा परिग्रहो भाग्ये महत्त्वं तद्वत्त्वादेतेषामन्यभजने दुःखसम्भवः, उपेक्षायां तु सुखमेव भवेदिति भावः ॥ ४ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

एकत्रिंशाध्याय एवमित्यादि का० ३०३ ३/४–३०६ ३/४ । एवं **रूपप्रपञ्चस्येत्यादि** एवं पञ्चभिरध्याये **रूपप्रपञ्चस्य पञ्चधा** 'आत्मना प्रथमा लीले'त्यादि प्रकारेण **रसवर्णनं निरूप्य नामलीलातो** गानात्मकशब्दलीलातो यो रसस्तदर्थमन्यभजननिवृत्तिपूर्वकमिद **प्रकरणमुच्यते** इत्यर्थः, **एवमुद्धृतभक्ता** इति इन्द्रभजननिवृत्तिपूर्वकमुद्धृता इत्यर्थः, अत एव नन्दस्याम्बिकाद्यन्य-

देवताभजनहेतुकः क्लेशो हरिणैव मोचनं च, पूर्ववदिति इन्द्रयागनिवृत्तिवदत्रापि अन्यभावाद् देवतान्तरभजनात् निवृत्तानां भक्तानां प्रमाणानन्दसिद्धये वेदात्मकप्रमाणरूपबलदेवसहितो रमणं चक्रे, ततो मर्यादामिश्रणात् प्राप्तं शङ्खचूडात्मकं दोषं सर्वथा नाशयामासेत्येकत्रिंश उच्यते इत्यर्थः, अत्र टिप्पण्यां मर्यादापुष्टिभेदेन नामलीलाया द्विविधत्वान् मर्यादामिश्रपुष्टिमार्गीयाः पूर्वाध्याये कथ्यन्ते शुद्धपुष्टिमार्गीया द्वितीये, मर्यादामार्गस्य स दोषत्वज्ञापनाय शङ्खचूडप्रसङ्ग इति ।

इति एकत्रिंशोऽध्यायः समाप्त ।। ३१ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

चतुस्त्रिंशे त्वहेर्ग्रासान्नन्दस्य तस्य शापतः ।। शङ्खचूडाच्च गोपीनां रक्षणं विनिरूप्यते ।। १ ।।

सर्पग्रस्तनन्दविमोचनात्मकं भगवतो लीलान्तरं सप्रसङ्गं निरूपयति—एकदेति । देवस्य महादेवस्य पूजार्थं यात्रा गमनं देवयात्रा, तस्यां जातं कौतुकमुत्साहो येषां ते गोपाला नन्दादयः अनड्डुद्भिर्वृषैर्युक्तैरनोभिः शकटैरम्बिकावनं मथुरातः पश्चिमदेशे स्थितं तीर्थविशेषं ययुरित्यन्वयः ।। १ ।। तत्र वने सरस्वत्यां नद्यां स्नात्वा हे नृप ! ते अर्हणैः पूजासाधनैर्गन्धपुष्पादिभिः पशुपतिं रुद्रमम्बिकां देवीं च भक्त्या आनर्चुः पूजयामासुः । पूजने हेतुमाह—विभुमिति । फलदाने समर्थम् ।। तत्रापि हेतुमाह—देवमिति ।। २ ।। 'ततश्च महादेवो नोऽस्माकं प्रीयतां प्रीतो भवतु' इत्यभिप्रायेण आदृताः आदरयुक्ताः सर्वे गोपाः गाः हिरण्यं वासांसि मधु मधुरं मधुसहितमन्नं च ब्राह्मणेभ्यो ददुरित्यन्वयः ।। ३ ।। ततश्च ते महाभागा नन्दादयो जलमात्रं प्राश्य पीत्वा धृतव्रताः गृहीतब्रह्मचर्यादिनियमास्तां रजनीं तत्र सरस्वतीतीरे ऊषुः न्यवसन् ।। ४ ।।

अन्वितार्थप्रकाशिका

चतुस्त्रिंशे त्वहेर्नन्दशापाद्विद्याधरं हरिः । त्रात्वाऽवधीच्छङ्खचूडं श्लोकास्तत्रार्धयुग्रदाः (३२।।) ।।
उवाचेति त्रयमथ (३) त्रयस्त्रिंशदनुष्टुभः (३३) ।। ३४ ।।

एकदेति ।। एकदा रासानन्तरं शिवचतुर्दश्यां देवस्य महादेवस्य पूजार्थं यात्रागमनं देवयात्रा तस्यां जातं कौतुकमुत्साहो येषां ते गोपाला नन्दादयः अनुडुद्भिर्वृषैर्युक्तैरनोभिः शकटैरम्बिकावनं ययुः । तच्च मथुरातः वायव्यदिशि स्थितं श्रीशिवामामूर्तिभूषितं तीर्थविशेषं प्राहुः । केचित्तु गुर्जरदेशप्रसिद्धं शिवक्षेत्रं सिद्धपुरनिकटस्थं वदन्ति ।। १ ।। तत्रेति ।। हे नृप ! ते तत्र वने सरस्वत्यां नद्यां स्नात्वा अर्हणैः पूजासाधनैः गन्धपुष्पादिभिः देवं प्रभुं पशुपतिं शिवमम्बिकां देवीं च भक्त्या आनर्चुः पूजयामासुः ।। २ ।। गाव इति ।। ततश्च महादेवो नोऽस्माकं प्रीयतां प्रीतो भवत्वित्यभिप्रायेण आदृताः आदरयुक्ताः तत्तीर्थस्थैर्मानिता वा सर्वे गोपाः गावः गाः । प्रथमाऽऽर्षी । हिरण्यं वासांसि मधु मधुरं शिवाभिषेकावशिष्टमधुसहितमन्नं च ब्राह्मणेभ्यो ददुः ।। ३ ।। ऊषुरिति ।। ततश्च ते महाभागाः नन्दादयो जलमात्रं प्राश्य पीत्वा धृतव्रताः गृहीतब्रह्मचर्यादिनियमास्तां रजनीं शिवरात्रिं तत्र सरस्वतीतीरे ऊषुः न्यवसन् । सुनन्दो नन्दानुजः । संज्ञायां कन् ।। ४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं चतुस्त्रिंशेऽध्याये अजगरग्रस्तनन्दमोचनं विद्याधरशापमोचनं शंखचूडहननं चेत्थंभूतं कृष्णचरित्रं निगद्यते एकदेति अनड्डुद्युक्तैः बलीवर्दसंयुक्तः ।। १ ।। अर्हणैः पूजनसामग्रीभिः ।। २ ।। मधुमधुमिष्टान्मिष्टम् अन्नं नोऽस्माकं देवः प्रीयतामित्युद्दिश्य ददुः ।। ३ ।। रजनीमिति अत्यन्तसयोगे द्वितीया ।। ४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ग्रस्तं नन्दं चतुस्त्रिंशेऽहिना हरिरमूमुचत् । विद्याध्रमङ्गिरः शापाच्छङ्खचूडं ततोऽवधीत् ।। १ ।।
कामं रासापदेशेन कृत्वा स्वं किंकरं हरिः विद्याधराधिपं चक्रेऽनुगृह्णन् स्ववशं तथा ।। २ ।।

सुदर्शनाख्यविद्याधरस्य विप्रशापतो विमोचनात्मकं शङ्खचूडाख्ययक्षवधतच्छिरोमण्यपहारात्मकं च भगवतः कर्मानुवर्णयति ।। एकदेति ।। एकदा कदाचित्, अम्बिकामाहात्म्यविषयकिंवदन्तीमाकर्ण्येति शेषः । देवयात्रायां, जातकौतुकाः संजातयात्राविधानोत्साहाः, ते व्रजप्रसिद्धाः, गोपालाः, अनड्डुद्युक्तैः नियोजितवृषभैः, अनोभिः शकटैः, अम्बिकावनं प्रति, प्रययुः ।। १ ।। तत्रेति ।। तत्र तद्वनसमीपस्थायां, सरस्वत्यां सरस्वत्याख्यायां नद्यां स्नात्वा, हे नृपते, अर्हणैः पूजासाधनैर्गन्धादिभिः, विभुं, देवं, पशुपतिं, देवीं अम्बिकां च, भक्त्या आनर्चुः पूजयामासुः ।। २ ।। गाव इति ।। ततः सर्वे गोपाः, देवः पशुपतिः, नोऽस्माकं, प्रीयतां प्रीतो भवतु । इति एवंविधाभिप्रायवन्तः, आदृता आदरयुक्ताः सन्तः; गावो गाः, हिरण्यं सुवर्णं, वासांसि वसनानि च, मधु मधुरं, मध्वन्नं मधुना सहितमन्नं च, ब्राह्मणेभ्यः, ददुः ।। ३ ।। ऊषुरिति ।। ततः महाभागा भगवत्सम्बन्धेन महाभाग्यवन्तः, नन्दसुनन्दकादयः गोपाः, जलं जलमात्रं प्राश्य, धृतं व्रतं ब्रह्मचर्यात्मकं यैस्ते, यतव्रता इति पाठेऽपि अयमेवार्थः । एवंभूताः सन्तः, सरस्वत्यास्तीरे एव, तां रजनीं, ऊषुरूषितवन्तः ।। ४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एकदेति : १०.३४.१.

या स्त्रीणां वरदा बभूव विहितानङ्गार्चनानामपि सा साङ्गार्चनतः प्रसादसुमुखी स्यादत्र कः संशयः ।
इत्थं निश्चितवासना व्रजजनाः सर्वेऽपि साभ्यर्हणमन्येऽन्यान्यपहाय देवसदनान्यागुस्तदम्बावनम् ॥ १ ॥

तत्र स्नात्वेति : १०.३४.२.

नित्यं कृष्णोल्लसद्दिव्यरसभाजो हि वल्लवाः । युक्तमेव तदाऽऽसंस्ते प्राप्तसारस्वताऽमृताः ॥ २ ॥
कालिन्द्यां विहितस्नानाः प्राप्तसारस्वताम्भसः । गङ्गाप्राप्त्यर्थमानर्चुः प्रायो गङ्गाधरं हि ते ॥ ३ ॥
गङ्गां तापापनुत्यै वहति सदमृतं दातुमेवामृतांशुं कामं रामानुषङ्गं जगति धनपतेर्मित्रतामर्थजातम् ।
नित्यं स्वाभीष्टदाता विशदयितुमलं स्वं जने शङ्करत्वं सत्यं धत्ते दयालुः शिवपदमपि यस्तत्पदेऽस्तु प्रणामः ॥ ४ ॥
आशावासस्थितिस्त्वं भव भवसि ततोऽभ्यर्थनीयं पुरस्ते किं वाऽऽस्तां तामपर्णा प्रतिकृतनतयो भूर्यपर्णा भवामः ।
गानस्त्वं पालयेथा यदसि पशुपतिर्गोगतिश्चेति तद्वाक्श्रुत्याऽऽनन्दी स गौरी स्मितमुखनयनः पातु नः पार्वतीशः ॥ ५ ॥
उचितमिदमवेमो गोव्रजत्राणकामा भुवि पशुपतिमेव प्रास्तुवन् गोपसङ्घाः ।
स्वहितनिहितदृष्टिः स्पष्टमस्मिन् सजातिं पुरुषमतनुभूतिं स्तौति लोकोऽखिलोऽपि ॥ ६ ॥
जननीति पदोल्लासस्त्वय्यैवाम्ब विराजते । प्रजापदं तथाऽस्मासु तद्रक्षस्व दयादृशा ॥ ७ ॥

गावो हिरण्यमिति : १०.३४.३.

जननीजनकौ समानरूपावपि माता निरुपाधिकप्रसादा । जनको न तथेत्यबोधि नूनं गिरिशप्रीतिकरार्थदानलेखात् ॥ ८ ॥

ऊषुरिति : १०.३४.४.

जडमन्तर्हितं कृत्वा तटस्थत्वमुपागतः । यस्तस्य व्यक्तमेवास्मिन्निर्व्यापारतया स्थितिः ॥ ९ ॥

कृष्णप्रिया

फल प्रकरण का यह छठ्ठा अध्याय है । इसमें भगवान के वैराग्य ऐश्वर्य का निरूपण किया जायगा । इस अध्याय में ३२ श्लोक है । फल प्रकरण के सात अध्यायों में रूप रमण के प्रारम्भ के पांच अध्यायों में देह-इन्द्रिय-वाक्-प्राण-मन आत्मा के **रमण** का निरूपण किया गया । अब दो अध्यायों में नाम रमण का वर्णन करेंगे । भगवदीयों को वैष्णव धर्मों में प्रवृत्त कराना और फलासक्ति रूप मर्यादा धर्मों से बचाना यह विषय इस अध्याय में कहा जायगा ।

श्रीशुक उवाच—श्रीशुकाचार्य जी महाराज ने प्रासङ्गिक निरूपण करते कहा राजन् ? शिवरात्री का पर्व था तब श्री मथुराजी से पश्चिम में अर्बुदाचल के निकट आये हुए तीर्थ-सरस्वती तीर्थ में कुतूहल वश ग्वाल लोग बैलों से जूने हुए शकटों में बैठकर यात्रा के निमित्त अम्बिका वन की ओर चल पड़े । यद्यपि यात्रा पैदल करनी चाहिए परन्तु कुतूहल प्रधान होकर वाहनों से चले ॥ १ ॥ राजन् परीक्षित् ? वहाँ तीर्थ में आकर प्रथम सरस्वती तीर्थ में स्नान किया, पुनः पशुओं के रक्षण के लिए पशुपति श्री महादेव जी का और अम्बिका माताजी का और अन्य देवताओं का विविध प्रकार के अर्चन द्रव्यों से श्रद्धा पूर्वक अर्चन किया ॥ २ ॥ विधि पूर्वक तीर्थ स्नान कर गौ सुवर्ण बस्त्र शहद और मिष्टान्न ऐसे पांच प्रकार के दान तीर्थ निवासी ब्राह्मणों को श्रद्धा एवं अत्यन्त आदर पूर्वक सर्व ने किया और कहा कि इष्टदेव हम पर प्रसन्न रहे । गोपों ने किसी भी प्रकार की फलाभिलाषा की नहीं ॥ ३ ॥ स्नान दान आदि धर्मानुष्ठान करने के बाद परम भाग्यवान् नन्दजी सुनन्दजी उपनन्दजी सर्व गोपों ने केवल जलपान कर उपोषण व्रत कर शिवरात्री को सरस्वतीजी के तीर पर रहे ॥ ४ ॥

कश्चिन्महानहिस्तस्मिन् विपिनेऽतिबुभुक्षितः । यदृच्छयाऽऽगतो नन्दं शयानमुरगोऽग्रसीत् ॥ ५ ॥
स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयम् । सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ॥ ६ ॥
तस्य चाक्रन्दितं श्रुत्वा गोपालाः सहसोत्थिताः । ग्रस्तं च दृष्ट्वा [1]विभ्रान्ताः सर्पं विव्यधुरुल्मुकैः ॥ ७ ॥
अलातैर्दह्यमानोऽपि नामुञ्चत्तमुरङ्गमः । तमस्पृशत् पदाभ्येत्य भगवान् सात्वतां पतिः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—तस्मिन्, विपिने, अतिबुभुक्षितः, यदृच्छया, आगतः, उरगः, कश्चिन्, महान्, अहिः, शयानम्, नन्दम्, अग्रसोत् ॥ ५ ॥ अहिना, ग्रस्तः, सः (नन्दरायः) हे कृष्ण ! हे कृष्ण ! अयम्, महान्, अहिः, माम्, ग्रसते, हे, तात !

---

[1] सम्भ्रा–वीर. विज. ।

(त्वाम) प्रपन्नम्, माम्, परिमोचय, इति, चुक्रोश ॥ ६ ॥ तस्य, आक्रन्दितम्, श्रुत्वा, सहसा, उत्थिताः, च, (श्रीनन्दं) ग्रस्तं, दृष्ट्वा, विभ्रान्ताः, गोपालाः, उल्मुकैः, सर्पम्, विव्यधुः ॥ ७ ॥ अलातैः, दह्यमानः, अपि, उरङ्गमः, तम्, न, अमुञ्चत्, तदा, सात्वताम्, पतिः, भगवान्, (श्रीकृष्णः) अभ्येत्य, पदा, अस्पृशत् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

महानहिरजगरः उरगः उरसा गच्छन्नित्य लक्षितत्वमुक्तम् । अग्रसीज्जग्रास ॥ ५-६ ॥ विव्यधुस्ताडयामासुः । उल्मुकैर्ज्वलत्काष्ठैः ॥ ७ ॥ अलातैस्तैरेवोल्मुकैः उरङ्गमोऽजगरः ॥ ८ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

कश्चित् अनिर्दिष्टनामा । यदृच्छया केनापि भाग्योदयेन । उरग इत्यलक्षितागमनः । यात्रिकलोकशून्यत्वाद्विपिन इति । किमर्थमागत्य जग्रास, तदाह-बुभुक्षितं शयानम् स्वीकृतनिद्रम् । पूर्वस्यां रात्रौ जागरणोपवासादिना श्रांतेनिर्भरनिद्राणमिति भावः ॥ ५ ॥ स नन्दः । वीप्सा त्रासात् । कृष्ण क्लेशकर्षक । तातेति स्नेहात् । तथा मे मृतित्रासो नास्ति किं तु त्वद्वियोगादेव यथेति भावः । महानित्यप्रतिकार्यताबोधकः । प्रकर्षेणापन्नं विपद्ग्रस्तम्, वृद्धत्वेन पाल्यत्वात्, शरणागतम्वा ॥ ६ ॥ तस्य नन्दस्य । आक्रन्दितम् अर्त्तिशब्दम् । सहसा शीघ्रम् ॥ ७ ॥ अलातैः उल्मुकैः, तेषामेव तिर्यग्योनिभीषणत्वात् । तम् नन्दम् । तम् सर्पम् । अभ्येत्य आगत्य संकोचेन वृद्धसंगाद्दूरे वयस्यवर्गात्संभ्रमेण पितृसन्निधौ प्राप्य पादस्पर्शमात्रेणैव नन्दं सर्पाकारं चामुञ्चत् । भगवानचिंत्यशक्तिस्तयैव सर्वं कर्तुं समर्थः सैरंध्रीवायकादिषु दृष्टत्वात्, पादस्पर्शस्तु संभ्रमादेवेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ तत्र तदनन्तरं रजनीवृत्तमाह । कश्चिदिति । कश्चिद्विलक्षण इत्यर्थः यदृच्छया केनापि भाग्योदयेन । शयानमुरग इति पदद्वयमज्ञाने हेतुः तत्र शयानमिति पूर्वस्यां रात्रौ जगरणोपवासादिना श्रान्तेर्निर्भरनिद्राणमित्यर्थः । उरगागमनं च यात्रिकलोकापगमेन निर्जनप्रायत्वात् अग्रसीत् चरणयोर्ग्रसितुं प्रवृत्तः ॥ ५ ॥ ग्रस्तः पदयोरेव वीप्सा त्रासात् तातेति स्नेहभरात् अतो मे मरणात्त्रासो नास्ति किन्तु त्वद्वियोगादेवेति भावः । त्रासादेवाह प्रपन्नं शरणागतं वृद्धत्वेन पुत्रस्य तव पालनीयवृन्दगतं वा परि सर्वतो भावेन तव मम कस्य चिदन्यस्य च क्लेशं विनैव मोचय महानित्यात्मना दुष्प्रतिकार्यत्वं तस्य शीघ्रागमनप्रार्थनं च निवेद्यते इदं च कालियदमनादिदृष्टय्येति ज्ञेयम् ॥ ६ ॥ आक्रन्दितं करुणदीर्घस्वरं चकाराभ्यां श्रवणदर्शनयोः प्राधान्येन द्वयोरप्येककालीनत्वं तेन च तेषां सावधानत्वं च बोधितम् अजगरस्य ग्रस्तापरित्यागस्वभावाशङ्कया परमदुःसहै विशेषतस्तिर्य्यग्जातिभीषणैरुल्मुकैरेव विव्यधुः हस्ताभ्या ध्रियमाणैस्तैस्तदवराङ्गे ताडयामासुः संभ्रान्तास्त्वरान्विताः पाठान्तरे विभ्रान्ता उद्विग्नाः ॥ ७ ॥ संकोचाद्वृद्धानां सङ्गपरित्यागेन निजवयस्य वर्गसङ्गे दूरे वासात् तदनन्तरमेव अभ्येत्य पितृस्नेहमयलीलावेशेन सम्भ्रमादाभिमुख्येनागत्य तं दीर्घपुच्छं पदास्पृशदेव नतु जघान स्पृष्टस्य तातस्य स्वयं पादेन स्पर्शस्याप्यनौचित्येन बुद्धिपूर्वकत्वाभावात् । प्रकारान्तरतोऽपि तच्छापविमोचनसामर्थ्यात् ब्रह्मदण्डाद्विमुक्तोऽहं सद्यस्तेऽच्युतदर्शनादिति वक्ष्यमाणाच्च अबुद्धिपूर्वकत्वेऽपि तत्तत्सम्बोधनासिद्धौ हेतुः भगवान् स्वभावत एव सर्वशक्त्याश्रयः । अथ सात्वतां पतिः सर्वभक्तपालकश्चेति तदेवं पूतनायाः सद्वेषग्रहणवत् ययाकथञ्चिद्भक्त्या तदस्पर्शोऽपि तत्पादस्पर्शफलपर्य्यवसान इति बोधितम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कश्चिदिति अन्याजगरतो विशिष्ट इत्यर्थः । तच्चाग्रे व्यक्तं भावि; इति तस्य निजोद्धारकृत्येऽनुसन्धानसद्भावः सूचितः । अतिबुभुक्षितः, चिरं भक्ष्याप्राप्तेः; अतएव तस्मिन् विपिन् यदृच्छया केनापि भाग्योदयेनागतः सन् । किंवा तत्र वर्त्तमान एव यदृच्छया श्रीनन्दान्तिकमागतः सन्, अग्रसीच्चरणयोर्ग्रसितुं प्रवृत्तः । ननु, अहिं दृष्ट्वा कथं स न पलायत ? तत्राह—शयानं पथश्रान्त्यादिना निद्राणम् । ननु श्रीनन्दं दृष्ट्वा कथमसौ न बिभेति स्म ? तत्राह—शयानं वस्त्राद्यावृतत्वेन भूमिशय्यायां निश्चेष्टतया वर्त्तमानमित्यर्थः । यदृच्छयेति सर्व्वत्रैव मुख्यो हेतुः, निजोद्धारार्थं परमार्त्त्या श्रीनन्दं सपादग्रहमाश्रित इति तत्त्वार्थः ॥ ५ ॥ ग्रस्तो ग्रस्यमानः पादयोर्वा ग्रस्तः, एवं वीप्सा त्रासात् स्नेहभराद्वा । महानित्यात्मना दुष्प्रतिकार्य्यत्वमुक्तम्, श्लेषेण विद्याधरश्रेष्ठतया वैष्णवत्वं सूचितम् । तातेति स्नेहभरादेव, अतो मे मरणाद्दुःखं नास्ति, किन्तु तद्वियोगादेवेति भावः । अतः प्रपन्नं भक्तं शरणागतं वेति. विनयेनार्त्तिभरेण वा, परितः सर्व्वमंगलतया, मोचय अस्मत्सुखत्याजनेन सर्व्वांगानिराकृत्यतया मोचयेत्यर्थः, अन्यथाजगरग्रस्ताङ्गरक्षानुद्भवात् । अतएव तथैव मोचयिष्यति । श्लेषेण, तात ! त्वत्पितरं मां प्रपन्नमेतं शापाद्विमोचय, ततश्च ममापि स्वत एव परिमोचनं सिध्येदिति ॥ ६ ॥ आक्रन्दितं करुणदीर्घस्वरमाक्रोशनमेव वा । गोपाला इति तदेकपरत्वं दर्शितम्, तस्य वल्लवेन्द्रत्वात् । अतएव सहसा तत्क्षणमेवोत्थिता इति तेऽपि आर्त्त्या सुप्ता इति बोधयति । सहसेत्यस्य पूर्व्वेणैवान्वयः । अकस्मात् श्रुत्वा, चकाराभ्यां श्रवणदर्शनयोः प्राधान्येन द्वयोरप्येककालीनत्वम्, तेन च तेषां सावधानत्वं बोधितम् । सुखं

तन्मोचनादिकं सर्व्वमेव कर्त्तुं समर्थानामपि केवलमुल्मुकैरेव व्यधने हेतुः—सम्भ्रान्ताः सम्भ्रमाकुला इति ॥ ७ ॥ पदा वामश्रीचरणाग्रेणास्पृशत्। अब्जत्वादिरूपकाप्रयोगः शीतलत्व-कोमलत्वादिगुण-नैरपेक्ष्येण केवलमीषत्स्पर्शमात्रविवक्षया। एवमग्रेऽपि। दर्शनमात्रेण शुभानुध्यानमात्रेणैव वा अजगराच्छ्रीनन्दस्य, तस्य च ब्रह्मशापाद्विमुक्तिः स्यात्, तथापि श्रीपदाब्जेन स्पर्शनं कोपपूर्व्वकपादप्रहारच्छलेन, वस्तुतश्च श्रीनन्दपादग्रहणभक्तिदृष्ट्या कारुण्येन निजभक्तिप्रदानार्थमिति ज्ञेयम्। तच्चाग्रे व्यक्तं भावि। अभ्येत्य अभिमुखमागत्येति संकोचतो वृद्धानां परित्यागेन निजवयस्यवर्गसङ्गे दूरे वासात्, भगवान् निजैश्वर्य्यं प्रकटयन्नित्यर्थः। ननु गूढैश्वर्य्यत्वमेव तत्रोचितम्, तत्राह–सात्वतां भक्तानां पतिः पालकः, श्रीनन्दस्य रक्षार्थं स्नेहातिशयात्तन्नापेक्षितमिति भावः ॥८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्मिन्विपिनेऽम्बिकावने कश्चिन्महाविपुलकायोऽहिः सर्पोऽतीव बुभुक्षितो न्यवसदिति शेषः स चोरगः सर्पः यदृच्छयागतस्तत्र सञ्चरन्नन्दं प्राप्तमग्रसीत् ॥ ५ ॥ सच ग्रस्यमानो नन्दश्चुक्रोश कृष्णमाह च किमिति हे तात! पुत्र महानयं सर्पो मां ग्रसते प्रपन्नं शरणागतं मां सर्पान्मोचयेति ॥ ६ ॥ तस्य नन्दस्याक्रन्दितं रोदनमाह्वानं चाश्रुत्य गोपालाः सर्वआशूत्थिताः सर्पेण ग्रस्त नन्दं दृष्ट्वाच सम्भ्रान्ता व्याकुलचित्ताः सर्पमुल्मुकैः साङ्गारकाष्ठैर्विव्यधुरताडयामासुः ॥ ७ ॥ सोऽप्यलातैरुल्मुकैस्ताड्यमानोऽपि तं नन्दं नामुञ्चन्न तत्याज ततः प्रपन्नानां पालको भगवानभ्येत्य गत्वा पदा पादेन तं सर्पमस्पृशत् पस्पर्श ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यदृच्छया तस्मिन्वने आगतोऽभूत् आगमने निमित्तमाह। अतिबुभुक्षित इति। शयानं निद्रां कुर्वन्तम् ॥ ५ ॥ प्रकर्षेणापन्नं विपदङ्गतं शरणागतं वा ॥ ६—१२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अस्पृशन्नतु जघान। स्पृष्टस्य जनकस्य तस्य स्वयं पादस्पर्शानौचित्येन बुद्धिपूर्वकत्वाभावात् ॥ ८–१५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

महानजगरः। उरसा गच्छतीत्युरग इत्यलक्षितत्वज्ञापनार्थं विशेषणम् ॥ ५ ॥ चुक्रोशेति। अनेन सर्वदुर्गाणीति गर्गोक्तिमनुस्मृत्येति भावः ॥ ६ ॥ उल्मुकैर्ज्वलत्काष्ठैः ॥ ७ ॥ अलातैस्तैरेव ॥ ८ ॥

गूढार्थदीपिनी

उरगः उरसा गच्छन् सन् अलक्षितागमनः अहिः अजगरः अग्रसीत् पारणादिने रात्रौ ॥ ५ ॥ प्रपन्नं शरणागतम् ॥ ६ ॥ आक्रन्दितं दीनवचनम् चकारात् रोदनं च उल्मुकैः ज्वलत्काष्ठैः विव्यधुः ताडयामासुः ॥ ७ ॥ सात्वतां यदूनाम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्मिन् विपिने कश्चिन् महानहिः आसीत् स उरगः महानहिः यदृच्छया आगतः शयानं नन्दम् अग्रसीत् जग्रास ।५–६। उल्मुकैरलातैर्विव्यधुः। ताडयामासुः ॥ ७–८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तस्मिन्विपिने वने कश्चिन्महानुरगोऽतिबुभुक्षितो यदृच्छया हीच्छयाऽऽगतः शयानं नन्दमग्रसीत्। तत्र निदर्शनमाह। कश्चिन्महानहिर्वृत्र इन्द्रमिवेति शेषः। यदावृणोत्तद्वृत्रस्य वृत्रत्वमित्यादेरिति। अहिर्वृत्रासुरे सर्प इति। विश्वः। उरगः शापतोऽहिर्न विद्यते हिस्तत्त्वेन निश्चयो यस्य तज्जात्यवच्छिन्न इति यावदिति चोरगविशेषणम्। अतोऽपि न पुरोगतोरगतः पुनरुक्तिरिति ज्ञेयम्। हिर्ज्ञानं तन्न विद्यते यस्याहिरज्ञः। यथोक्तमृग्भाष्यटीकायाम्। हीति निश्चयवाची स्यादिति वचनात् हि गतौ ततो हिस्ततो नञ्समासोऽहयो ज्ञानविरोधिन इत्युभयपक्षे ॥ ५ ॥ स नन्दोऽहिना ग्रस्तो महानयं सर्पो मां ग्रसते ग्रसति तात मां परिमोचयेति चुक्रोश। सतीह त्वयीयं दशेति महानयं परमान्यायं यथा तथा ग्रसत इति वा प्रपन्नापदविमोचनं महानयं महान्यायोपेतमतो मां परिमोचयेति वा ॥ ६ ॥ तस्य नन्दस्य ग्रस्तमहिना दृष्ट्वा चोल्मुकैर्विव्यधुरताडयत् ॥ ७ ॥ अनुवादेनैव ग्रन्थकृदुल्मुकपदं स्वयं व्याकरोति ॥ अलातैरिति। उरङ्गमच्छान्दसः। तं नन्दं नामुञ्चन्न तत्याज। तदा सात्वतां पतिस्तमभ्येत्य पदाऽस्पृशत्पस्पर्श ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं सर्वतो धर्मसम्पत्तियुक्तानां भगवद्भावे तिरोभूते निरोधस्य वक्तव्यत्वात् शकटाक्षेपवत् सर्पेण नन्दग्रासमपि भगवान् कारितवानित्याह। कश्चिदिति। महानहिरजगरः स हि क्षुधित एव तिष्ठति कदाचिदेवान्नञ्च प्राप्नोति तत्र दैवगत्या तस्मिन् विपिने आहाराभावात् अतिबुभुक्षितो जातः यदृच्छया आकस्मिकविधिना तेन नन्दः प्राप्तः। यदृच्छयैव नन्दसमीपमागतः नन्दोऽपि दैवगत्या निद्राणो जातः। वस्तुतस्तु जाग्रता स्थातव्यम् अतः शयानं नन्दं मुख्यमेव उरगः आगमने ज्ञातुमशक्यः अग्रसीत् जग्रास ।५।

ततो यज्जातं तदाह् । सचुक्रोशेति । कण्ठादधोभागे अहिना ग्रस्तः पूर्वं केवळं चुक्रोश पश्चान् माहत्म्यं स्मृत्वा कृष्णकृष्णेत्यादरेण भयाद्वा सम्बोधनं कृत्वा स्वानिष्टं निवेदयति । महानयं सर्पो मां ग्रसत इति तातेति सम्बोधनं स्नेहाद्वैक्लव्यात् परिमोचने हेतुं वदन्नेव प्रार्थयते प्रपन्नं परिमोचयेति ॥ ६ ॥ ततो भगवन्मोचनात् पूर्वमेव अन्ये गोपालाः प्रतिक्रियार्थमुद्यता जाता इत्याह् । तस्येति । नन्दस्य विज्ञतां बोधयितुमन्येषामविज्ञतां च प्रार्थनाप्रतिकियर्योर्निरूपणं तस्य नन्दस्य आक्रन्दितं श्रुत्वा सहसैव विचारमकृत्वैव भगवन्तमपृष्ट्वैव स्वयमेव उत्थिता नन्दञ्च ग्रस्तं विशेषेण भ्रान्ताः सन्तः शीवार्थं ज्वालितैरुल्मुकैः सर्पं विव्यधुः । अनेनोपायेन नन्दोऽपि म्रियेत तथाप्यज्ञानात् भगवति विद्यमाने यात्रावदिदमपि कृतवन्तः ॥ ७ ॥ तथाप्यनुपायत्वान्न फलितमित्याह् । अलातैरिति । सहिभक्षयितुमेव जानाति नतु त्यक्तुमतो नामुञ्चत् ततो यदुचितं तमुपायं भगवान् कृतवानित्याह् । तमस्पृशदिति । स्वयमभ्येत्य पदा तमस्पृशत् तस्य हि कर्मक्षयः कर्त्तव्यः स ज्ञानेन भक्त्या वा ज्ञाने त्वधिकारिशरीरमपेक्षते भक्तिरप्यत्र प्रमेयलभ्यैव अतस्तस्य भक्तिसिद्ध्यर्थं भगवदीयशरीरप्राप्त्यर्थं पदा अस्पृशत् स्वयमागत्येति तस्यापि साधनापेक्षाऽभावाय तस्य तथा करणसामर्थ्यावश्यकत्वाय सात्वतांपतिरिति वैष्णवानामयं पतिः अतो वैष्णवहितार्थं तथा कृतवान् ॥ ८ ॥

श्रीसुबोधिनी-सारः

तस्मिन् वने बुभुक्षितः कश्चिन्महानहिः सर्पो यदृच्छया स्वैरमागतः शयानं नन्दम् उरग उरसा गच्छन् अग्रसीत् ॥ ५ ॥ अहिना ग्रस्तः स नन्दः चुक्रोश हे कृष्ण कृष्ण अयं महान्सर्पो मां ग्रसते खादति प्रपन्नं शरणागत त्वं परिपाहि ॥६॥ तस्य नन्दस्याक्रोशं श्रुत्वा सहसोत्थिता गोपाला ग्रस्तं नन्दं दृष्ट्वा विभ्रांता व्यग्रा उल्मुकैर्ज्वलत्काष्ठैः सर्पं ताडयामासुः ॥ ७ ॥ अलातैः काष्ठैस्तैरेव हन्यमानापि उरंगसः सर्पः तं नन्दं नाऽमुञ्चत् तदा सात्त्वतां पतिर्भगवानभ्येत्य प्राप्य पदा पादेन तं सर्पमस्पृशत् ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्मिन् विपिने यदृच्छया अकस्मादेवागतः कश्चिन्महानहिर्नन्दमग्रसीत् जग्रास । तत्र हेतुमाह्—अतिबुभुक्षित इति । तदागमनाज्ञाने हेतुमाह्—शयानमिति । अथापि 'यदि पादाघातशब्दः स्यात्तदा जागरणं स्यात्, तदपि नास्ति' इत्याशयेनाह्—उरग इति । उरसा गच्छन्नित्यर्थः ॥ ५ ॥ स चाहिना ग्रस्तो नन्दश्चुक्रोश । तदाक्रोशमेव दर्शयति । तत्र सम्भ्रमेण सम्बोधनद्वयम्—कृष्ण कृष्णेति । पुनश्च स्नेहातिशयं सूचयन् सम्बोधयति—तातेति । अयं महान् सर्पो मां ग्रसते, अतः प्रपन्नं शरणागतं मां सर्पात्त्वं परिमोचयेति ॥ ६ ॥ एवं तस्य नन्दस्यातिक्रन्दितं दीनवचनं श्रुत्वा चकाराद्रोदनं च श्रुत्वा गोपालाः सहसा आशु उत्थिताः, नन्दं च सर्पग्रस्तं दृष्ट्वा विभ्रान्ताः व्याकुलचित्ताः उल्मुकैः एवमलातैरुल्मुकैर्हन्यमानोप्युरङ्गमः सर्पः तं नन्दं यदा नामुञ्चत् न तत्याज तदा सात्वतां पतिः भक्तानां पालको भगवान् ऐश्वर्यादिपूर्णः श्रीकृष्णः अभ्येत्य आगत्य सर्पं पदाऽस्पृशत् ॥ ८ ॥

अन्वितार्थप्रकाशिका

कश्चिदिति ॥ तस्मिन् विपिने यदृच्छया अकस्मादेवागतः अतिबुभुक्षितः उरगः उरसा गच्छन् । अनेनालक्षितत्वमुक्तम् । कश्चिन्महान् अहिः अजगरः शयानं नन्दम् अग्रसीत् । तङभाव आर्षः । इदं च वृत्तं शिवरात्रिजागरणानन्तरं पारणदिनस्य रात्रौ श्रान्ते गाढं निद्राणे नन्दे ज्ञेयम् । शिवरात्रौ तु जागरणमेव नतु निद्रा ॥ ५ ॥ स इति ॥ अहिना ग्रस्तः स नन्दश्चुक्रोश । अनेन सर्वदुर्गाणीति गर्गोक्तमनुस्मृत्येति भावः । हे कृष्ण कृष्ण ! हे तात ! अयं महान् सर्पो मां ग्रसते । अतः प्रपन्नं शरणागतं मां सर्पात्त्वं परिमोचय ॥ ६ ॥ तस्येति ॥ तस्य नन्दस्यातिक्रन्दितं दीनवचनं श्रुत्वा चकाराद्रोदनं च श्रुत्वा गोपालाः सहसा आशु उत्थिताः नन्दं च सर्पग्रस्तं दृष्ट्वा सम्भ्रान्ताः व्याकुलचित्ताः अजगरो ग्रस्तं न त्यजतीति स्वभावशङ्कया उल्मुकैः ज्वलत्काष्ठैरेव तं सर्पं विव्यधुः विविधुः ताडयामासुः । प्रथमं संप्रसारणाभाव आर्षः ॥ ७ ॥ अलातैरिति ॥ एवमलातैरुल्मुकैर्दह्यमानोऽप्युरङ्गमः सर्पः तं नन्दं यदा नामुञ्चत् न तत्याज तदा सात्वतांपतिः भगवान् अभ्येत्य आगत्य तं सर्पं पदाऽस्पृशत् ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अतिबुभुक्षितः अतिक्षुधितः महानहिः अजगरः उरगो हृदयेन गमनस्वभावः ॥ ५ ॥ सनन्दः ॥ ६ ॥ ग्रस्तं नन्दं विभ्रांताः व्याकुलाः उल्मुकैः ज्वलत्काष्ठैः विव्यधुस्ताडयाञ्चक्रुः ॥ ७ ॥ अलातैरुल्मुकैः तं नन्दं तमुरगं पदा पादेन ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कश्चिदिति ॥ तस्मिन् विपिने अम्बिकावने, कश्चिन् महान् विपुलदेहः, अहिः सर्पः, अत्यतीव बुभुक्षितः, न्यवसदिति शेषः । उरगः स एव महासर्पः, यदृच्छया, आगतस्तत्र समायातः सन्, शयानं प्रसुप्तं, नन्दं, अग्रसीत् ॥ ५ ॥ स इति ॥ सः नन्दः, अहिना तेन सर्पेण, ग्रस्तो ग्रस्यमानः सन्, हे कृष्ण हे कृष्ण, अयं महान् सर्पः, मां ग्रसते । ततः, हे तात, प्रसन्नं शरणागतं मां, परिमोचय । इति चुक्रोश ॥ ६ ॥ तस्येति ॥ तस्य नन्दस्य, आक्रन्दित रोदनमाह्वानं वा, श्रुत्वा, चोऽवधारणे । सहसा

उत्थिताः, गोपालाः, नन्दं च ग्रस्तं दृष्ट्वा, विभ्रान्ता व्याकुलचित्ताः सन्तः, सर्पं उल्मुकैः साङ्गारकाष्ठैः, ज्वलत्काष्ठैरिति यावत्। विव्यधुस्ताडयामासुः ॥ ७ ॥ आलातैरिति ॥ आलातैरुल्मुकैः, दह्यमानः अपि, उरङ्गमः सर्पः, तं नन्दं, न अमुञ्चत्। ततः सात्त्वतां पतिः भगवान् श्रीकृष्णः, अभ्येत्य तदन्तिके गत्वा; तं सर्पं, पदा पादेन, अस्पृशत् पस्पर्श ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कश्चिन् महानहिरिति : १०.३४.५.

सारस्वतं रसं लब्ध्वाऽप्यस्मिन् यो विपिने पुमान्। मायानिशि शयीताऽसावहिग्रस्त इति स्फुटम् ॥ १० ॥
अन्तर्हित महानन्दो भवत्येव क्षुधातुरः। इति किं व्यञ्जयन्नर्थं तमहिर्जग्रसे तथा ॥ ११ ॥

स चुक्रोशेति : १०.३४.६.

तिष्ठन् ब्रह्मण्यपीह श्रुतिभुवि तमसा विस्मृतात्मस्वरूपः स्याच्चेद्ग्रस्तोऽहिनाऽसौ प्रभवति सहसेत्यद्भुतं नाद्भुतं तु।
एतद्यत्तादृशोऽपि स्मरति यदि विभोर्नाम कृष्णस्य सद्यः पात्रं स्यात्तत्कृपायाः सुरुचिपृथुमहानन्दसच्छब्दवाच्यः ॥ १२ ॥
अघात् समुद्धृता येन पशुपाः पशवोऽपि सः। तद्ग्रस्तं तातमाश्रुत्य कथं न स्यात् त्वरान्वितः ॥ १३ ॥

अलातैरिति : १०.३४.८.

अनेकगोपाल-वितीर्ण-काष्ठप्रहार-वैफल्यमवेक्ष्य तत्र। सनन्ददुःखासहनः सवज्रपादप्रहारं क्षममच्युतोऽधात् ॥ १४ ॥
अहिहतिः पविना सुलभा हरेरजनि पूर्वमिहापि तथोचिता। इति विचिन्त्य हरिस्तमहिं द्रुतं पविपदेन पदेन जघान किम ॥ १५ ॥

भवति न विषबाधा यस्य कालत्रयेऽपि प्रभवति हि स एवान्यस्य सञ्जीवनाय।
इति विभुरवधार्य स्वाप्तसञ्जीवनार्थी सदमृतघटमङ्घ्रिं युक्तमस्मिन् युयोज ॥ १६ ॥

सद्दुर्लभं पदमहं निजमर्पयामि तस्मै विपत्स्थितिजुषे द्विषतेऽपि तोषात्।
यः सम्मुखीकृतमदिष्टजनस्त्वितीशेनाबोधि तादृगहये ददता पदं स्वम् ॥ १७ ॥

यन्मानुषादनपिचण्डिलदीर्घगात्रः पत्स्पर्शमात्रत इहाहिरगाद् विनाशम्।
नैतद् विचित्रमहिताक्ष्यर्निसर्गवैरं ताक्ष्यर्ध्वजस्य चरणोऽपि स सध्वजो यत् ॥ १८ ॥

मित्रारितुल्यदृक्त्वं स्वं दर्शयन्नहिनन्दयोः। विपज्जुषोरदात्तुल्यां पदस्पर्शात् सुखश्रियम् ॥ १९ ॥

यावन्निःशेषमायारजनिनिरसनं जायते सेवते यस्तावद् भूयो निगृह्येन्द्रियगणमसुतं ब्रह्म सारस्वतं सः।
न स्यात्क्रुध्यत्कृतान्तोरगमुखपतितो जातु जातोऽप्यबाधस्तस्मान्मुक्तश्च शीघ्रं हरिगुरुकृपया स्यादिति प्रोह्यमस्मात् ॥२०॥

सेवां देवस्य कस्याप्यतनुत पिबत श्रेष्ठमम्भोऽपि भूयः पुण्ये वाऽरण्यदेशे निवसत सुहृदोऽनेकशो वाऽऽश्रयध्वम्।
कालात्युग्राहि मुक्तिं त्वनुभवति जनः स्वात्मलाभं च तस्मादकस्मादेव कृष्णादिति कलयत भोरत्र साक्षी स नन्दः ॥ २१ ॥

प्रपञ्चत्वं लोके प्रकटयति यः कालभुजगस्तमप्यङ्घ्रिस्पर्शात् सपदि गतमोहं वितमसम्।
करोम्येवं भक्तार्थित इति जने संविशदयंस्तथा चक्रे श्रीशो निरुपधिदयस्तादृशमहिम् ॥ २२ ॥

अहिमपि मुक्तिपदं योऽनयदनुकम्पी स नायको लक्ष्म्याः। निजभजकं तद्ग्रस्तं विमोचयेदत्र कोऽस्ति सन्देहः ॥ २३ ॥

शापाहिभावमुपयातममुं पदेन सद्यः सुदर्शनपदं नयताऽच्युतेन।
व्यक्तीकृतं निजजनावनदीक्षितेन स्वीयं सुदर्शनकरेत्यभिधानमस्मिन् ॥ २४ ॥

कृष्णप्रिया

रात्री का समय था वन प्रदेश था रात्री में वन में जागृत रहना उचित था, देव वश श्रीनन्द बाबाजी निद्रा में थे तव उदर से चलने वाला अत्यन्त भूखे अजगर ने नन्दजी को ग्रस लिया ॥ ५ ॥ अजगर के मुख में ग्रसे हुए श्रीनन्दबाबा ने प्रथम करुण आक्रन्द उच्च स्वर से रुदन किया प्रार्थना करने लगे हे कृष्ण ? देखिए यह महान् अजगर मुझे ग्रस रहा है। हे तात मैं आपकी शरण हूँ शरणागत वत्सल आप मुझे छुड़ाइए ॥ ६ ॥ श्री नन्दराय जी का रुदन सुनकर विना विलम्ब सर्व गोपाल उठ खड़े हुए तो देखा कि अजगर नन्दबाबा को ग्रस रहा है, समी में शीतता को दूर करने के लिए जो लकड़ियाँ जलाई गई थी उसमें से जलती लकड़ियाँ लेकर अजगर को मारने लगे ॥ ७ ॥ जलती हुई लकड़ियाँ से जलते हुए भी उस अजगर ने श्रीनन्दबाबा को नहीं छोड़ा तब वैष्णवों के स्वामी भगवान् श्रीकृष्ण शीघ्र पधारे और कृपया अजगर को चरणस्पर्श कराया जिससे अजगर के पाप नष्ट हो जाय एवं भक्ति प्राप्त हो जाय ॥ ८ ॥

स वै भगवतः[1] श्रीमत्पादस्पर्शहताशुभः । भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितम् ॥ ९ ॥
तमपृच्छद्धृषीकेशः प्रणतं समुपस्थितम् । दीप्यमानेन वपुषा पुरुषं हेममालिनम् ॥१०॥
को भवान् परया लक्ष्म्या रोचते[2]ऽद्भु[3]तदर्शनः । कथं जुगुप्सितामेतां गतिं वा प्रापितोऽवशः ॥११॥

सर्प उवाच

अहं विद्याधरः कश्चित् सुदर्शन इति [4]श्रुतः । श्रिया[5] स्वरूपसम्पत्त्या विमानेनाचरं [6]दिशः ॥१२॥

कर्दमक्षमा

अन्वयः—भगवतः, श्रीमत्, पादस्पर्श, हत, अशुभः, सर्पवपुः, हित्वा, विद्याधरार्चितं, रूपम्, भेजे ॥ ९ ॥ दीप्यमानेन, वपुषा, समवस्थितम्, हेममालिनम्, प्रणतम्, तम्, पुरुषम्, श्रीहृषीकेशः, अपृच्छत् ॥ १० ॥ परया, लक्ष्म्या, रोचते, इति, अद्भुतदर्शनः, भवान्, कः ? वा जगुप्सिताम्, एताम्, गतिम्, अवशः, कथम्, प्रापितः ॥ ११ ॥ सर्पः, उवाच-सुदर्शनः इति, विश्रुतः, अहम्, कश्चित्, विद्याधरः, श्रिया, स्वरूपसम्पत्या, विमानेन, दिशः, अचरन्, रूपगर्वितः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विद्याधरैरप्यर्चितं पूजितम् ॥ ९ ॥ गोपेष्वात्मनः ऐश्वर्यं प्रकाशयितुमविद्वानिव तमपृच्छत् । दीप्यमानेन वपुषा समवस्थितम् ॥ १० ॥ यः परया शोभया रोचते प्रकाशते स भवान्क इति ॥ ११–१२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सः सर्पः ॥ ९ ॥ तम् त्यक्तसर्पवपुषं देवविशेषम् ॥ १० ॥ एताम् सर्परूपाम् । जुगुप्सिताम् गर्हिताम् । गतिम् दशाम् "गतिः स्त्री मार्गदशयोर्ज्ञाने यात्राभ्युपाययोः । नाडीव्रणसरण्योश्च" इति मेदिनी । वेति पक्षान्तरे । अवशः कर्मवशतः ॥११॥ श्रुतः प्रसिद्धः । श्रिया दीप्त्या । स्वरूपसंपत्त्या स्वपूर्वदेहावाप्तिलक्षणया । अग्रिमेण ग्राहसमितिक्रियापदेनान्वयः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वै प्रसिद्धमेवैतदित्यर्थः । भगवतोऽशेषनिजप्रभावान् प्रकटयतः श्रीमतः सर्वमाधुर्यसम्पत्तियुक्तस्य पादस्य स्पर्शेन तत्स्वभावेन हतान्यशुभानि महदपराधलक्षणान्तानि बहुजन्म सञ्चितान्यशेषपापानि यस्य स । अत्र श्रीमदिति कैमुत्यव्यञ्जकम् अत एव गौरवेण श्रीमत्पादस्पर्शेत्येव पुनरुक्तम् । नतु तत्स्पर्श इति मात्रम् । अत एवेदमपि न चित्रमित्याह । भेजे इति । विद्याधरेषु तैर्वार्चितं सुदुर्लभमित्यर्थः । इति पूर्वतोऽपि रूपविशेषप्राप्तिः सूचिता । अन्यत्तैः । अथवा श्लोकद्वयमेवं युज्यते । अलातैर्हन्यमानोऽपि य उरङ्गमस्तं श्रीनन्दं नामुञ्चत्तमभ्येत्य पदाम्पृशदिति तेन स्पर्शमात्रेणासावुरङ्गमस्तममुञ्चदित्यवगम्यते । प्रविश पिण्डीमित्यत्रैवाकाङ्क्षा लब्धत्वात् । भगवान् सात्वतां पतिरिति पदद्वयस्य सामर्थ्यात् । अन्यथा तं तथा परित्यज्य विद्याधरतां प्राप्ते तस्मिन् श्रीभगवतः पृच्छायामयोग्यत्वाच्च । अन्यथा सोऽजगरः कीदृगासीत् तत्राह । स वै इति । सर्पवपुः सर्पाकारं रूपमप्याकारमेव तव हेतुः, श्रीमदिति अशुभमेव तस्य हतं नतु वपुरिति तेनैव वपुषा विद्याधराकारं भेजे इत्यर्थः । अत्र चाचिन्त्यशक्तिरेव हेतुरित्याह भगवतः । श्रीमदिति वायकसैरिन्ध्यादिषु तथा दर्शनादिति भावः ॥ ९ ॥ हृषीकेशः सर्वेन्द्रियप्रवर्त्तकत्वेन सर्वज्ञोऽपीत्यर्थः । प्रणतं कृतप्रणामं सम्यक् बद्धाञ्जलित्वादिना अस्थितं दीप्यमानेन वपुषोपलक्षितं पुरुषं पुरुषाकारं हेमस्रग्युक्तम् । यद्वा हेम्नो माला पङ्क्तिः तद्वन्तं सौवर्णकिरीटकुण्डलादि दिव्यभूषणविभूषितमित्यर्थः ॥ १० ॥ शुभं सुन्दरं दर्शनं रूपं यस्य स भवान् अद्भुतदर्शन इति वा पाठः । कथं कस्माद्धेतोर्वा एतामाजगरीं गतिं प्रापितः केनेति शेषः । अवशः इच्छारहितः । वश कान्तौ बलादित्यर्थः । अन्यथा एतादृशस्यैतादृश गत्यसम्भवादिति ॥ ११ ॥ ततश्च तत्स्पर्शप्रभावेण तस्य भक्तिरप्युत्पन्नेति तद्वाक्यद्वारा व्यञ्जयितुमाह । सर्प उवाचेति । अत्र च सर्पतानिर्देशः पूर्ववच्छरीराभेदापेक्षया । कश्चिदिति विनयेन श्रुतः संज्ञातः स्वस्य रूपेण सम्पत्तिः सम्पन्नता यस्यास्तया श्रिया शोभया विशिष्टः । दिशोऽचरमितस्ततः क्रीडया भ्रमन्नासम् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सोऽजगरः वै प्रसिद्धमेवैतदित्यर्थः । भगवतः कारुण्याद्यशेषनिजगुणान् प्रकटयतः श्रीमतः सर्व्वसल्लक्षणशोभायुक्तस्य पादस्य स्पर्शेन हतान्यशुभानि बहुलजन्मसञ्चिताशेषपापानि, किंवा, अशुभं कथञ्चिदप्यप्रतिकार्य्यं महदपराधलक्षणं यस्य सः, अत एव पुनरुक्ततयैव श्रीमत्पादस्पर्शस्य साक्षान्निर्देशः, तत्र श्रीमदिति रूपविशेषसम्पादनहेतुतया विद्याधरेषु तैर्बार्चितं सुदुर्लभमित्यर्थः, इति पूर्व्वतोऽपि रूपविशेषप्राप्तिः सूचिता ॥ ९ ॥ हृषीकेशः सर्व्वेन्द्रियप्रवर्त्तकत्वेन सर्व्वज्ञोऽपीत्यर्थः प्रणतं कृतप्रणामं

---

[1] वता–प्रा. पा. । [2] शोभते शुभलक्षणः-इति कस्यचित् । [3] शुभद-वीर. । [4] स्मृतः–वीर. । [5] सुरूप–वीर. । [6] नेन च-वीर. ।

सम्यग् बद्धाञ्जलित्वादिना अवस्थितं वपुषा विशिष्टं पुरुषं पुरुषाकारं सत्पुरुषलक्षणयुक्तमिति वा, हेमस्रग् युक्तम्, यद्वा, हेम्नो माला पंक्तिस्तद्वन्तं सौवर्णकिरीटकुण्डलादि-दिव्यभूषणभूषितमित्यर्थः ॥ १० ॥ शुभ सुन्दरं सुखकरं वा दर्शनं दृश्यत इति रूपं सन्दर्शनमेव वा यस्य स भवान् कः ? कथं कस्माद्धतोर्वा एतामाजगरीं गतिं यानिं प्रापितः ? केन कथं केन प्रकारेणेत्येतदेव वा कर्त्तृ, अवशो बलादित्यर्थः, अन्यथा एतादृशस्येदृशगत्यसम्भवात्, तद्वदेति शेषः प्रश्नाभिप्रायस्तैर्व्यञ्जित एव, तत्र च गोपेष्वात्मैश्वर्य्यप्रकाशनं स्नेहविशेषदार्ढ्यार्थमेवेति । एवं पूर्वापरप्रसंगयोः सुश्लिष्टतोह्या, यद्वा, तेषां परमसुन्दराणां गोपानां श्रीमधुपुर्य्यादिगमनेन तपः कार्श्याद्विरूपेषु मुनिषु कदाचिदपराधमाशंक्य तन्निरसनाय पृष्टमिति ॥ ११ ॥ काश्चदेक इति विनयेन, श्लेषेण सर्वश्रेष्ठ इत्यर्थः । सुशोभनं दर्शनं रूपं यस्येत्यन्वर्थसंज्ञाभिप्रेता, श्रुतो विश्रुतः, श्रियो शोभया, स्वस्य रूपेण सौन्दर्य्येण, सम्पत्त्या च विभूत्या, यद्वा, स्वस्य रूपेण सम्पत्तिः सम्पन्नता यस्यास्तया श्रिया विशिष्टः, पूर्ववैवान्वयः । दिशोऽचरम्, इतस्ततः क्रीडया भ्रमन्नासम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सच सर्पो भगवतः श्रीमतः पादस्य स्पर्शेन हतमशुभं सर्पतापादकं यस्य तथाभूतः सर्पशरीरं त्यक्त्वा विद्याधरैः सम्माननीयं रूपं विद्याधरैरर्चितं प्राप ॥ ९ ॥ ततः प्रणतं कृतप्रणामं पुरतः दीप्यमानेन वपुषा तिष्ठन्ते हेममालाधरं तं पुरुषं भगवान् पप्रच्छ ॥ १० ॥ प्रश्नमेवाह । को भवानिति । अधुना यः परया लक्ष्म्या कान्त्या रोचते प्रकाशते स भवान्कः विद्याधरोऽहमितिचेत्तर्हि हे शुभदर्शन ! कथं निन्दितामेतां गतिं सर्पतां प्रापितः विप्रशापादिति चेत्तत्राह । अवशः कथं शापनिमित्तापचारनिमित्तदेहपारवश्यमिति भावः । यद्यपि सर्वज्ञस्य प्रश्नमुपपत्तिः तथाप्यात्मनः प्रभावं प्रकाशयितुमविदुष इव प्रश्नोपपत्तिः, अत एव सुदर्शदनपदपर्यायेण शुभदर्शनपदेन सम्बोधनं कृतम् ॥ ११ ॥ इत्यमापृष्टः सपूर्ववृत्तं विज्ञापयन्नात्मनः कृतार्थतामाविष्करोति । अहमिति । अहं तावत् कश्चिद्विद्याधरः सुदर्शन इति स्मृतः प्रसिद्धः सोऽहं श्रिया कान्त्या सुरूपसम्पत्त्या सौन्दर्यसमृद्ध्या च उपलक्षितः कदाचिद्विमानेन सर्वा दिशः समन्तात्सञ्चरन् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विद्याधरैरर्चितमिति तस्य विद्याधर श्रेष्ठत्वात् ॥ ९ ॥ तममपृच्छदिति बहुग्रामनगरेभ्य आगतान् यात्रिकानपि लोकान् ब्राह्मणानादरतो भीषयितुमिति भावः । अत एव हृषीकेशस्तत्रत्यजनान् सर्वानेव सुदर्शनोक्तावेकाग्रीकारयन् ॥ १० ॥ प्रापित इति । केनेति शेषः ॥ ११ ॥ श्रुतः विख्यातत्वात् सर्वलोकैरेव । दिशोऽचरमितस्ततः क्रीडया भ्रमन्नासम् ॥ १२ ॥

गूढार्थदीपिनी

हतमशुभं शापः रूपं यस्य सः सोऽजगरः । भेजे रूपं प्राप्तवान् ॥ ९-१० ॥ लक्ष्म्या सौन्दर्येण । अवशः कथमवशः सन् जुगुप्सितां निन्दितां गतिं योनिं प्रापितोऽसि ॥ ११ ॥ अचरं भ्रमन्नासम् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विद्याधरेषु अर्चितं पूजितं रूपं भेजे प्राप ॥ ९ ॥ हृषीकाणां सर्वप्राणीन्द्रियाणामीशः सर्वज्ञोऽपि मुग्ध इव तमपृच्छत् । कथंभूतं प्रणतं कृतप्रणामं पुरतः दीप्यमानेन वपुषा सम्यगवस्थितम् ॥ १० ॥ लक्ष्म्या शोभया यः रोचते प्रकाशते स भवान् कः ॥ ११ ॥ श्रिया शोभया तत्तदङ्गगतया स्वरूपसंपत्त्या शरीरसौन्दर्यसमृद्ध्या ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

श्रीमान्यः पादस्तस्य स्पर्शेन हतमशुभं शापतो दुर्जन्मप्रापकं कर्म यस्य स संस्तत्सर्पवपुर्हित्वा विद्याधरार्चितं स्वं वपुर्भेजे ॥ ९ ॥ दीप्यमानेन वपुषा स्थितम् ॥ १० ॥ लक्ष्मीः शोभा सति योनिमद्भुतदर्शनः परया लक्ष्म्या रोचते ॥ ११ ॥ को भवानिति भगवता पृष्ट आहाहिरित्याह ॥ सर्प इति । अहं प्राक् सुदर्शन इति श्रुतः प्रसिद्धो विद्याधरः कश्चिदिति यद्यपि श्रुतायुक्तमिवाभाति तथाऽपि दर्पायातसर्पत्वः प्रागिति स्वाहन्ताशान्ति प्रदर्शयितुं कश्चिदिति वदन्विपश्चिदिति मन्तव्यम् । श्रिया सम्पदा स्वरूपसम्पत्त्या सौन्दर्यातिशयेन विमानेन व्योमयानेन दिश आचरत्सञ्चरन् ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो यज्जातं तदाह । सर्वा इति । वै निश्चयेन स सर्पवपुर्हित्वा विद्याधररूपं भेजे परं पूर्वस्माद्विशिष्टं भगवदीयत्वात् तदाह । विद्याधरैरर्चितमिति । विद्याधराणां देवरूपो जातः सर्वापकृष्टा सर्पयोनिः सर्वोत्तमा भगवदीया एवञ्चरणप्रभावः तस्य सर्वाधमस्य सर्वोत्तमत्वप्रापणे प्रमेयबलमेव हेतुरित्याह । भगवत इति देहमात्रे उपपत्तिरुक्ता तस्य लोके सर्वोत्तमत्वाय चरणं विशिनष्टि । श्रीमत्पादेति । तस्य स्पर्शेन हतमशुभं यस्य सर्पवपुःपरित्यागे पापनाशो हेतुः गुणाधानेऽपि तत्स्पर्श एव हेतुः ॥ ९ ॥ यथायोग्यं पदार्थाभिनिवेशः कर्त्तव्यः चरणरज एव सामग्रीसम्पादकमेवमुपकारमयुक्ते कृतवानिति शङ्कां वारयितुं तस्य भगव-

त्कृतोपकारज्ञानमप्यस्तीति ज्ञापयितु भगवांस्तं पृच्छतीत्याह । तमपृच्छदिति । यद्यपि स्वयं तस्यान्तःकरणं सर्वमेव जानाति यतो हृषीकेशः तथापि तत्र शास्त्रीयं सामर्थ्यं स्थापयितुं परिभाषणपूर्वकं तस्यान्तःकरणं बोधयतीत्याह । हृषीकेश इति । तथा करणे हेतुः प्रणतमिति तर्हि पूर्वं कथमन्यथा कृतवानित्याशङ्क्याह । समवस्थितमिति । पूर्वं तु न सम्यगवस्थितः इदानीं तु नम्रभावेन स्थित इति आन्तरमप्यस्य स्वरूपं समीचीनामिति ज्ञापयितुं बहिःकान्ति वर्णयति । दीप्यमानवपुषेति यथा भगवदीयस्य तेजोवच्छरीरं भवति तथा दीप्यमानेन वपुषा उपलक्षितः उत्कृष्टयोनावपि भगवदीयत्वेऽपि तरतमभावोऽस्तीति कदाचित्तिर्यगादिरूपं वा प्राप्नुयादिति शङ्कां वारयितुमाह । पुरुषमिति । तत्रापि सर्वगुणपूर्णतां ज्ञापयितुमाह । हेममालिनमिति । महानेवालंकृतो भवतीति ॥ १० ॥ प्रश्नमाह । को भवानिति । क इति जातिनाम्नोः प्रश्नः स्वभावतोऽप्यमहतः सहसैव साधनेन महत्त्वमापद्यत इति । भगवानपि तं वर्णयति । परया लक्ष्म्या रोचते भवानिति किञ्च देवादयः सर्व एव समागताः बहुधा दृष्टाः परं भवानद्भूतदर्शनः अद्भुतं दर्शनं यस्येति नैवंविधः कश्चित्तेजस्वी दृष्टपूर्व इत्यर्थः । इदम्पूर्वपुण्यानि च व्यतिरेकेण न भवति तस्मिंश्च सति कथं जुगुप्सिता योनिरिति अवश्यं केनचित्प्रापित इति शाप एव किञ्चित्कारणं भविष्यतीति तथोच्यते तत्रापि वन केनवा प्रापित इति ॥ ११ ॥ अयं पूर्वमपि सर्प एवास्थितः भगवत्कृपया विद्याधरत्वं प्राप्त इति पुनः सर्प एवायं जातः अतः सर्प उवाचेति स्वस्य पूर्ववृत्तान्तमाह । अहमिति श्लोकद्वयेन विद्याधराः देवविशेषाः कश्चिदित्यप्रसिद्धः सुदर्शन इति विश्रुतः प्रसिद्धः अनेनव वैष्णवनाम्ना अग्रे भगवत्कृपा जातेति ज्ञापयितुं विश्रुतत्वकथनं तस्य देहकान्तिः धनम् अद्भुतसामर्थ्यं चेति पूर्वमपि गुणत्रयं स्थितमित्याह । श्रिया स्वरूपसम्पत्त्या विमानेनेति दिशः दश आ समन्ताच्चरन् सर्वत्राप्यप्रतिहतगतिः ॥ १२ ॥

श्रीसुबोधिनी-सारः

भगवतः श्रीमत्पादस्य स्पर्शेन हतं नष्टमशुभं पापं यस्य स सर्पः सर्पस्य वपुः शरीरं हित्वा विद्याधरैरर्चितं पूजितं रूपं भेजे प्राप ॥ ९ ॥ समुपस्थितं प्राप्तं प्रणतं दीप्यमानेन वपुषा शरीरेण सुवर्णमालिनं पुरुषं तं हृषीकेशः कृष्णोऽपृच्छत ॥ १० ॥ परया लक्ष्म्या शोभया प्रकाशतेऽद्भुतं दर्शनं यस्य स भवान्कः एतां जुगुप्सितां निन्दितां गतिं कथं केन प्रकारेणाऽवशः प्राप्तो वा ॥ ११ ॥ सर्पोक्तिः । सुदर्शन इति श्रुतः प्रथितः कश्चिद्विद्याधरोऽहं श्रिया लक्ष्म्या स्वरूपस्य संपत्त्या विमानेन युक्तो दिशोऽचरम् ॥ १२ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

स च सर्पः भगवतः भक्तमनोरथपूरकसम्पद्वतः पादस्य स्पर्शेन हतमशुभं सर्पतापादकं शापरूपं यस्य तथाभूतः सन् सर्पवपुर्हित्वा विद्याधरैरर्चितं सम्माननीयं विद्याधररूपं भेजे प्राप ॥ ९ ॥ ततश्च प्रणतं कृतप्रणामं दीप्यमानेन वपुषा शरीरेण पुरतः समवस्थितं पुरुषं पुरुषाकारं हेममालिनं सुवर्णमालाधरं तं हृषीकेशः सर्वेन्द्रियनियन्ता अपि भगवान् लोकेष्वैश्वर्यं प्रकाशयितुमविद्वानिवापृच्छत् ॥ १० ॥ प्रश्नमाह—क इति । य इदानीमद्भुतदर्शनः परया लक्ष्म्या शोभया रोचते प्रकाशते स भवान् कः ? उत्तमस्य तव पारवश्यं विना सर्पत्वासम्भवात् । कथमवशः सन्नेतां जगुप्सितां निन्दितां सर्पगतिं केन वा प्रापितासि इति।११। एवं भगवता पृष्ट आत्मनः सर्पत्वकारणं विज्ञापयन् कृतार्थतामविष्करोति अहमित्यादिसार्धैः सप्तभिः । सुदर्शन इति विश्रुतः प्रसिद्धः कश्चिद्विद्याधरः देवविशेषोऽहं श्रिया सुरूपसम्पत्त्या सौन्दर्यसमृद्ध्या चापलक्षितः कदाचिद्विमानेन सर्वा दिशः आसमन्तात् चरन् ॥ १२ ॥

अन्वितार्थप्रकाशिका

स इति ॥ स सर्पः भगवतः श्रीमान् यः पादस्तस्य स्पर्शेन हतमशुभं सर्पयोनेः कारणं शापरूपं यस्य तथाभूतः सन् सर्पवपुर्हित्वा विद्याधरैरर्चित संमाननीयं विद्याधररूप भेजे प्राप ॥ ९ ॥ तमिति ॥ ततश्च प्रणतं कृतप्रणाम दीप्यमानेन वपुषा शरीरेण पुरतः समवस्थितं पुरुषं पुरुषाकारं हेममालिनं सुवर्णमालाधरं तं हृषीकेशः लोकेष्वैश्वर्यं प्रकाशयितु बहुग्रामनगरेभ्य आगतान् यात्रिकानपि लोकान् ब्राह्मणानादरतो भीषयितु च अविद्वानिवापृच्छत् ॥ १० ॥ क इति ॥ य इदानीमद्भुतदर्शनः परया लक्ष्म्या शोभया रोचते प्रकाशते स भवान् कः कथमवशः सन्नेतां जुगुप्सितां निन्दितां सर्पगतिं केन वा प्रापितोऽसि ॥११॥ अहमिति ॥ सुदर्शन इति विश्रुतः प्रसिद्धः कश्चिद्विद्याधरः देवयोनिविशेषोऽहं श्रिया कान्त्या सुरूपसम्पत्त्या सौन्दर्यसमृद्ध्या चोपलक्षितः कदाचिद्विमानेन सर्वा दिशः अचरं भ्रमन्नासम् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विद्याधरेषु तैर्वा अर्चितं पूजितं प्रशंसितमिति यावत् ॥ ९ ॥ दीप्यमानेन प्रकाशमानेन वपुषा समवसितं समीपे वर्त्तमानम् ॥ १० ॥ लक्ष्माशोभया य शोभते स भवान् कः कथं एतामाजगरीं गतिं योनिं अवशः केन प्रापितः ॥ ११ ॥ सुदर्शन इति नाम्ना श्रुतो लोके विख्यातः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति ॥ स वै गोपैरुल्मुकैर्दाह्यमानः स एव सर्पः, भगवतः श्रीकृष्णस्य, श्रीमांश्चासौ पादश्च तस्य स्पर्शस्तेन हतमशुभं सर्पतापादकं दुष्कर्म यस्य तथाभूतः सन्, सर्पवपुः सर्पशरीरं, हित्वा त्यक्त्वा, विद्याधरार्चितं विद्याधरैः संमाननीयं, विद्याधरैरर्चितं वा, रूपमाकृतिं, भेजे प्राप्तवान् ॥ ९ ॥ तमिति ॥ ततः प्रणतं कृतप्रणामं, दीप्यमानेन, वपुषा समवस्थितं भगवतः पुरतोऽवस्थितं, हेममालिनं स्वर्णमालाधरं तं पुरुषं, हृषीकेशः श्रीकृष्णः, अपृच्छत् ॥ १० ॥ प्रश्नमेवाह ॥ को भवानिति ॥ हे शुभदर्शन, अधुना यः परया लक्ष्म्या कान्त्या, रोचते प्रकाशते, स भवान् कः, विद्याधरोऽहमिति चेत्, जुगुप्सितां निन्दितां, एतां सर्पदेहप्राप्तिरूपां गतिं, कथं वा प्राप्त इति शेषः। विप्रशापादिति चेत्, वशः वशेन्द्रियवत् प्रतीयमानो भवान्, कैर्विप्रैरिति शेषः। प्रापितः इमां गतिं गमितः। अवश इति छेदे अवशः सन्, प्रापित इति। यद्यपि सर्वज्ञस्य प्रश्नाऽनुपपत्तिस्तथाप्यात्मनः प्रभावं प्रकाशयितुं ह्यविदुष इव प्रश्नोपपत्तिर्नृनाट्यभावेन वा ॥ ११ ॥ इत्थं भगवता पृष्टः सः स्वपूर्ववृत्तं विज्ञापयन्नात्मनः कृतार्थतामाविष्करोति। अहमिति। अस्मात् सर्पवपुषः प्रागिति शेषः। अहं कश्चित् विद्याधरः, नाम्ना सुदर्शनः, इति श्रुतः प्रसिद्धः, श्रिया कान्त्या, सुरूपसंपत्त्या सौन्दर्यसमृद्ध्या च, उपलक्षितः सन्, कदाचित् विमानेन, दिशः सर्वा आशाः, आचरं समन्तादचरम् ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स वै इति : १०.३४.

धृते हि भावे भगवत्पदाप्तिः सर्वत्र सिद्धेति किमत्र चित्रम्।
त्यक्ते हि भावेऽपि स चित्रमासीद् विद्याधरो नाम सुदर्शनश्च ॥ २५ ॥
दुर्दर्शनो विपत्स्थितिरासीत् प्राग् विप्रयोगतो युक्तम्। भूयः सुदर्शनोऽभूत् सम्पत्स्थितिरपि स साधुसंयोगात् ॥ २६ ॥
गीताभ्यासी जातुचिन्मोहसर्पभ्रान्तो जातोऽप्येष विद्याधृदेव।
नष्टे दिष्टे दुर्भगे स्वात्मरूपं पश्यत्यस्मिन् सोऽहिरेव प्रमाणम् ॥ २७ ॥

तमपृच्छदिति १०.३४.१०.

गीताभ्यासरतोऽस्तु वा सुखगतिर्विद्याधरो वानिजात्मेक्षा हृष्टमति सुदर्शन इति प्रख्यातिमानस्तु वा।
स्याच्चेद्विप्रवरोपहासकृदसावप्येति सद्यस्तमस्तत्रान्यस्य तु का कथेति सुहृदां बोधाय पृच्छां व्यधात् ॥ २८ ॥
कस्यापि सहते नेशो ब्राह्मणस्यावहेलनम्। किं पुनर्भक्तियुक्तस्य विद्वद्वरशिखामणेः ॥ २९ ॥
जपस्तपस्तस्य सवादि वाऽखिलं प्रमादिना जायत एव निष्फलम्।
रहस्यमेतन्निगमस्य भाति मे सकृत् कृतं येन हि विप्रहेलनम् ॥ ३० ॥
विप्रः कृतापराधोऽपि वक्तव्यो नापभाषितैः। नात्र मानान्तरापेक्षा यच्छ्रीवत्सधरः प्रभुः ॥ ३१ ॥
विप्रविहितसाहसमपि परस्य पुंसस्तु भूषणायैव। अभवद्भृगुपदघातः श्रीपतिवक्षसि महानलङ्कारः ॥ ३२ ॥

अहं विद्याधर इति : १०.३४.१२.

विद्याधरेति मम नाम सुदर्शनेति मात्रेडितं सदयं केवलमास पूर्वम्।
तच्चार्थवद्विरचितं स्वपदार्पणेन नीत्वैनमीश कृपणं स्वसुखस्वरूपम् ॥ ३३ ॥

कृष्णप्रिया

भगवान् के श्रीवाले चरणारविंद के स्पर्श मात्र से समस्त पाप नष्ट हो गए और अजगर की देह छूट गई और विद्याधरों से समर्चित दिव्य स्वरूप को प्राप्त हुआ। पहिले वह मात्र देह सुन्दर था अब चरण स्पर्श प्रभाव से हृदय सुन्दर भक्त बना ॥ ९ ॥ गन्धर्व के गले में सुवर्ण की माला थी। उज्ज्वल कान्ति वाली काया वाले विनय पूर्वक अञ्जलिबद्ध समीप में उपस्थित उस पुरुष से भगवान ने प्रश्न किया ॥ १० ॥ देवों की कान्ति से भी अधिक शोभा-सौन्दर्य से सुशोभित अद्भुत दर्शन तुम कौन हो? और निन्दित सर्पयोनि किस कारणवश किसके श्रापवश प्राप्त की थी? ॥ ११ ॥ सर्प ने कहा, नाथ! मैं सुदर्शन नाम से प्रसिद्ध काई सामान्य विद्याधर था। काया की कान्ति धन, और अद्भुत सामर्थ्य से गर्विष्ठ था और विमान में बैठकर दिशाओं में विचरता था ॥ १२ ॥

ऋषीन् विरूपानाङ्गिरसः [1]प्राहसं रूपदर्पितः। तैरिमां प्रापितो योनिं [2]प्रलब्धैः स्वेन पाप्मना ॥ १३ ॥
शापो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः। यदहं लोकगुरुणा [3]पदा स्पृष्टो [4]हताशुभः ॥ १४ ॥
तं त्वाहं भवभीतानां प्रपन्नानां भयापहम्। आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् ॥ १५ ॥
प्रपन्नोऽस्मि महायोगिन् महापुरुष सत्पते। अनुजानीहि मां देव[5] सर्वलोकेश्वरेश्वर ॥ १६ ॥

---

१. प्रहन्नृप–वीर. । २. प्रलब्धः–विज. । ३. पादस्पृ–विज. । ४. गता–वीर. । ५. कृष्ण–वीर. विज. ।

कर्दमक्षमा

अन्वयः—विरूपान्, अङ्गिरसः, ऋषीन्, प्राहसम्, प्रलब्धैः, तैः, स्वेन, पाप्मना, इमाम्, योनिम्, प्रापितः ॥ १३ ॥ करुणात्मभिः, तैः, अनुग्रहाय, एव, मे, शापः, कृतः, यत्, लोकगुरुणा, पदा, स्पृष्ट, अहम्, हताशुभः, (उभिषम्) ॥ १४ ॥ हे अमीवहन् ? (भवतः) पादस्पर्शात्, शापनिर्मुक्तः, अहम्, भवभीतानाम्, प्रपन्नानाम्, भयापहम्, तम्, तु, अहम्, प्रपन्नः, आपृच्छे (सम्भाषणम् करोमि) ॥ १५ ॥ हे महायोगिन् ! हे महापुरुष ? हे सत्पते ! हे सर्वलोकेश्वर ? प्रपन्नः, अस्मि माम्, अनुजानीहि ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्राह ससुपहसितवानस्मि प्रलब्धैरुपहसितैः। मदीयेनैव पापेन निमित्तेन ॥ १३ ॥ यद्यतः शापात् ॥ १४ ॥ त्वा त्वाम् आपृच्छे स्वं लोकं गन्तुमनुज्ञां याचे। हे अमीवहन्दुःखनाशन ॥ १५–१९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तैः ऋषिभिः। विरूपान् सौन्दर्यरहितान्। अंगिरसः अंगिरसो वंश्यान्। "सौन्दर्ये च स्वभावे च रूपशब्दं प्रचक्षते" इति ॥ १३ ॥ तैः अंगिरोभिः ॥ १४ ॥ तम् त्रैलोक्यग्रहम्। 'अमीवं पापदुःखयोः' इति कोशात् ॥ १५ ॥ अनुजानीहि अनुज्ञां देहि ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विरूपान् विकृताकारान् तपसा च कार्श्यादि व्याप्तानित्यर्थः अङ्गिरसस्तद्वंश्यान् प्रलम्भे हेतुः स्वेनैव पाप्मनेति। यद्वा। तैः यत् प्रापितस्तत् स्वेनैव पाप्मनेति तेषां दोषः परिहृतः ॥ १३ ॥ अहो किं नाम वक्तव्यो महतां प्रभावो येन मम दुष्कृतमपि परमसुकृततां नीतमित्याशयेनाह। शाप इति। करुणात्मभिरित्यपराधाग्रहण दीनोद्धारव्यग्रत्वञ्च दर्शितम्। एतेन तत्र श्रीकृष्णपादाब्जस्पर्शात्ते परममङ्गलं भावीति तैरुक्तमिति ज्ञेयम्। अतोऽनुग्रहायैव शापः कृतः। लोकगुरुणा जगदीश्वरेण भवतेति सुदुर्लभत्वमुक्तम्। तत्रापि पदा श्रीचरणेन पादेति क्वचित् पाठः ॥ १४ ॥ ननु स्वलोकं गन्तुमनुज्ञां याचसे कथं न मोक्षमित्यत्राह। भवेति भवभीतत्वेन प्रपन्नानां मनसापि शरणागतानां तद्भयापहम् अस्माकन्तु साक्षात् प्राप्तपरमभक्तिनिदानपादस्पर्शानां स्वत एव स इति भावः ॥ १५ ॥ किन्तु यत्र कुत्रापि स्थितौ त्वत् प्रपत्तिरेव ममाभीष्टेत्याह। प्रपन्न इति। त्वामाश्रितोऽस्मि प्रपन्नोऽहमिति पाठेऽपि स एवार्थः। ननु सा सुदुर्लभेति चेत्तत्राह। महायोगिन् हे अनन्ताचिन्तैश्वर्ययुक्त ! कुतः महापुरुष हे परमेश्वर त्वत् प्रभावान्न किञ्चिद्दुर्लभमित्यर्थः। विशेषतश्च हे सतां पते पालक ! ततोऽङ्गिरसामङ्गीकारमङ्गीकुर्या एवेति भावः। तत्रापि हे कृष्ण हे पूतनादीनामपि भक्तपदप्रदेत्यर्थः। अतः प्रपन्नमनोरथपरिपूरणं तवोचितमेवेति भावः। देवेति पाठे हे विचित्रक्रीडाकौतुकप्रधान एतादृशाधमोद्धरणमपि तव क्रीडासु योग्यमिति भावः। अतः कृतार्थत्वादधुना मामनुजानीहि मल्लोकगमनायाज्ञामेव देहि। ननु मत् प्रपत्तीच्छालोकान्तरगमनेच्छा चेति विरुद्धमित्याशङ्क्य स लोकोऽपि त्वदीय एवेत्याह। हे सर्वलोकेश्वरेति। किञ्च कर्म फलदात्रान्तर्यामिणा त्वया तथैव प्रेर्योऽहं तत्र किं कर्त्तुं शक्नुयामित्याह। हे ईश्वरेति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विरूपान् स्वभावत एव विकृताकारान्, विशेषतश्च तपसा कार्श्यमालिन्य-धमनिसन्ततिव्याप्तानित्यर्थः। अंगिरसस्तद्वंश्यान्, रूपेणैव दर्पिता जनितगर्व्वैः, प्रलब्धैरिति उपहासभरैर्व्याप्तैरभिप्रेता, तथापि न क्रुद्धैः सद्भिरिति भावः। किञ्च, स्वेन पाप्मनेति तेषां दोषः परिहृतः ॥ १३ ॥ अहो किं नाम वक्तव्यो महतां प्रभावः, येन मम दुष्कृतमपि परमसुकृततां नीतमित्याशयेनाह—शाप इति। करुणात्मभिः कृपाशीलैः, इत्यपराधाग्रहणं दीनोद्धारव्यग्रत्वञ्च दर्शितम्, एतेन श्रीमथुरामण्डले जन्मवासञ्च लभस्व, तत्प्रभावेण तत्र श्रीकृष्णपादाब्जस्पर्शात्ते परममंगलं भावीति तैरुक्तमिति ज्ञेयम्, अन्यथा तस्य तादृशभाग्यासिद्धिः, अतोऽनुग्रहायैव शापः कृतः, लोकगुरुणा जगदीश्वरेण भवतेति। सुदुर्लभत्वमुक्तम्, तत्रापि पदा श्रीचरणेन। यद्वा, लोकेषु सर्व्वजीवेषु सर्व्वभुवनेषु वा मध्ये गुरुणा श्रेष्ठेन, किंवा तेषां परमपूज्येन पदा, तवेत्याद्यनिर्द्देशः परमगौरवादिना स्पृष्टत्वादेव दर्शनादेव वा हताशुभः; यद्वा, अकारप्रश्लेषेण—अहताशुभोऽप्यहमिति दैन्यात् शापान्निःशेषेण मुक्तः सन् ॥१४॥ तं दीनबन्धु परमनिस्तारकं त्वा त्वामापृच्छे। ननु स्वलोकं गन्तुमनुज्ञां याचसे, कथं न मोक्षमित्यत्राह—भवेति, भवाद् भीतत्वेन प्रपन्नानामपि भयमपहरति, दूरतो नाशयतीति तथा तम्, अतो जात्यैव सात्त्विकत्वेन त्वद्भक्तानामस्माकं कुतः संसारभयम्, प्रत्युत वाद्यादिना सहजत्वत्सेवया मोक्षादपि सुखविशेषः सम्पद्यतैवेति भावः। न चेतः प्रभृति परं किञ्चिदपि दुःखं महदपराधो वा शक्यतेत्याह—पादस्पर्शादिति। अनेनामीवस्य समूलसर्व्वपरिकरनाशोऽभिप्रेतः ॥ १५ ॥ किन्तु यत्र कुत्रापि स्थितौ त्वत्प्रेमभजनमेव याच इत्याशयेनाह—प्रपन्न इति। त्वामाश्रितोऽहं प्रपन्नोऽस्मीति पाठेऽपि स एवार्थः। ननु तत् सुदुर्लभमिति चेत्तत्राह—महायोगिन् हे अनन्ताचिन्त्यैश्वर्य्ययुक्तः। कुतः ? महापुरुष हे परमेश्वर ! त्वत्प्रभावान्न किञ्चिद्दुर्लभमित्यर्थः। विशेषतश्च हे सतां पते ! भक्तानां पालक ! यद्वा,

संश्चासौ पतिश्चेति हे पालकोत्तम ! तत्रापि कृष्ण ! हे अशेषैश्वर्य्यप्रकटनायावत्तीर्ण ! भगवन् ! अतः प्रपन्नमनोरथपरिपूरणं तवोचितमेवेति भावः। अथवा प्रपन्नानां भयापहमित्युक्तम्। तत्रात्मनः प्रपत्तिमनालोच्य स्तुवन् प्रपद्यते—प्रपन्न इति। प्रपत्तेर्हेतवः—महायोगिन्नित्यादयः, अतोऽधुना मामनुजानीहि मल्लोकगमनायाज्ञां देहि। नन्वत्रैव निजसेवया स्थीयताम्, तत्राह—कृष्ण ! नराकारपरब्रह्मन्निति मम देवत्वेन विसदृशत्वादत्र स्थातुं योग्यता नास्तीति भावः। किञ्च, स लोकोऽपि त्वदीय एवेत्याह–हे सर्व्वलोकेश्वरेति। किञ्च, ईश्वरेण त्वया दत्तं कर्म्मफलमवश्यमेव भोक्तुमपेक्षत इति, किंवा कर्म्मफलदात्रान्तर्य्यामिणा त्वया तथैव प्रय्योऽहं तत्र किं कर्त्तुं शक्नुयामित्याह—हे ईश्वरेति। यद्वा, सर्व्वेषा लोकेश्वराणां ब्रह्मादीनामपीश्वर इतीन्द्रभृत्योऽहं त्वदन्तिकेऽत्र स्थातुं नार्हामीति भावः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अमीवहन् पापापह ! ॥ १५–२२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सौन्दर्येण गर्वितो विरूपानङ्गिरसः ऋषीन् दृष्ट्वा हसितवानस्मि तदा मदीयेनैव पाप्मना पापेन हेतुना प्रलब्धैरुपहसितैस्तैरङ्गिरोभिः ऋषिभिरिमां योनिं सर्पजन्म प्रापितः ॥ १३ ॥ प्रलब्धैरपि तैराङ्गिरोभिः करुणात्मभिः हेतुगर्भमिदं कारुण्यस्वभावत्वान्मदनुग्रहार्थमेव शापः कृतः कुतः यत् यस्मादहं त्रिलोकगुरुणा त्वया कर्त्रा पदा करणेन स्पृष्टः अन्यथैतन्न सम्भाव्यत इति भावः कथम्भूतः गतमशुभं पापं यस्य तथाभूतोऽहम् ॥ १४ ॥ पादस्पर्शाद्धेतोः शापेन निर्मुक्तः हे अमीवहन्नमीवं पापं दुःखं वा हन्तीति तथाभूत ! त्रिलोकगुरुं भवीत्संसाराद्भीतानां प्रपन्नानां भयमपहन्तीति तथाभूतं त्वामापृच्छे स्वर्लोकं गन्तुमनुज्ञां चाचे ॥ १५ ॥ हे महायोगिन् अचिन्त्यविविधविचित्रशक्ते ! हे महापुरुष हे सताम्पत्ते त्वां प्रपन्नोऽस्मि मामनुजानीह्याज्ञापय हे अच्युत तव दर्शनाद्धेतोः सद्यः ब्रह्मशापाद्विमुक्तोऽहमित्येतन्न चित्रमिति वाक्यशेषः ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पाप्मना अपराधेन प्रलब्ध उपलब्धो विप्रलब्धो वा विरूपान् सौन्दर्यरहितान् "सौन्दर्ये च स्वभावे च रूपशब्दं प्रचक्षत" इति अङ्गिरसः पुत्रा अङ्गिरसः ॥ १३–१४ ॥ आपृच्छे आज्ञां प्रार्थये अमीवहन् दोषनाशन ! ॥ १५–१७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ब्रह्मदण्डादिति तन्मात्रेण सर्पदेहाध्यासनाश विवक्षया स वै भगवत इति तु तद्देहनाशादिविवक्षया ॥ १६–१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रलब्धैरुपहसितैर्मदीयेनैव पापेन निमित्तेन ॥ १३ ॥ यत् यतः शापात् ॥ १४ ॥ आपृच्छे स्वलोकं गन्तुमनुज्ञां याचे। अमीवहन् ! हे दुःखहन्तः ! ॥ १५ ॥ हे महायोगिन् ? क्वाहमधुनैव महाखलसर्पस्त्वत् पितरमग्रसम्। क्वाहमकस्मादधुनैव लब्धसद्विवेकस्त्वां स्तौमीत्यचिन्त्यम् तव योगैश्वर्यमिति भावः। महापुरुषाणां श्रीमन्नन्दादीनां साधूनां पते इति सर्पदेहान्माममोचयः स्वीयानेतांश्चापालय इत्यपारं तव कृपावैभवमिति भावः। अनु अनुचरमेव मां जानीहि ॥ १६ ॥

गूढार्थदीपिनी

अङ्गिरसो वंश्यान् कुरूपान्। प्रलब्धैः उपहसितैः तैः ॥ १३–१४ ॥ अमीवहन दुःखनाशन। 'अमीवं पापदुःखयोः' इति कोशात्। अनुजानीहि गन्तुमाज्ञां देहिं ॥ १५–१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विरूपान् तापसत्वात् सौन्दर्यमदेन मत्तः प्राहसमुपहसितवानस्मि तैः प्रलब्धैरुपहसितैर्मदीयेनैव पापेन निमित्तेन इमामाजगरीं योनिं प्रापितोऽस्मि ॥ १३ ॥ यत् यस्मात् लोकगुरुणा भवता पादस्पृष्टः चरणेन स्पृष्टोऽस्मि ॥ १४ ॥ हे अमीवहन् दुःखघ्न ! पादस्पर्शात् शापनिर्मुक्तः दर्शनात्प्रणामाच्च कृतार्थ एवेति भावः आपृच्छे भवत्परिचर्यां कर्तुं स्वलोकं गन्तुं वा ब्रूहीत्यर्थः ॥ १५–१६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विरूपांस्तपसाऽङ्गिरसस्तन्नामकान्नृषीन् रूपदर्पितः सौन्दर्यसञ्जातदर्पोऽहसं अहोऽमीषां रूपमिति स्वेन पाप्मनैतदनर्थसाधनेन प्रलब्धो वञ्चितोऽहं तैरङ्गिरोभिरिमां सर्पयोनिं प्रापितो विकृताकृतिमतः स्वान्दृष्ट्वाऽहसदसाधुरिति कर्णविकलगूढपत्त्वादिविकृतिमदहिताप्रापणं समुचितमिति तथा शापं कोपादपूयुजन्निति भावः। कश्चिदितिवद्दृषीस्तैरित्यादिबहुवचनभावो विभाव्यः। एतदुदंचकसञ्चितकर्मवञ्चित इमां दशां प्रापितस्तैरिति भावः ॥ १३ ॥ शापो यस्तैः करुणात्मभिः कृतः समनुग्रहायैव। कृतोऽनुग्रह

इत्यत आह ।। यदिति । लोकगुरुणा त्वया पादेन स्पृष्टो हतमहिताप्रापकमशुभं यस्य स जातो यदतोऽनुग्रहाय कृत इत्यन्वयः ।।१४।। हे अमीवहन् । पीवमीवेति मीवतेर्घञि नञ्समासे नलोपो नञ इति नलोपे चामीवमिति रूपम् । कार्श्यप्रदत्वाद्दुःखममीवशब्देनोच्यत इति भावः । डुमिञ् प्रक्षेपे मीङ् हिंसायामित्यस्माद्वा धातोः सेवायव्हाजिहामीवा इति स्त्रियामुणादिसूत्रवृत्तौ निपातितो बाहुलकाल्लिङ्गान्तरेऽप्यस्तीति तस्य वेदं रूपम् । यथोक्तं भागवत एव । यस्याखिलामीव हभिरिति । अमीव हवास्तोष्पत इत्येतत्परभाष्ये अमरोग इत्यस्माद्व ईवेति व्याख्यातत्वादमीवं रोगं वेति वा । अमीवा दुःखं तं हन्तीति स तथा तत्सम्बुद्धिः । भवभीतानां संसारभीतिमतां प्रपन्नानां जनानां तद्भयापहं तं त्वां पादस्पर्शात्पापनिर्मुक्तोऽहमापृच्छे । आङि पृच्छयामित्यात्मनेपदता । गन्तुमाज्ञां प्रार्थये ।। १५ ।। अनुजानीह्यनुज्ञां देहि ।। १६ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवंस्वरूपमुक्त्वा अपराधफले निरूपयति । ऋषीनिति । आङ्गिरसगोत्रे उत्पन्ना ऋषयः अष्टावक्रवत्विरूपाः स्थिताः स्वयन्तु रूपेण दर्पितः प्राह संयथाबालः प्राकृतो हसति पश्चात् तच्छापेन इमां सर्पयोनिं प्राप्तः सर्पयोनि प्राप्तौ विशेषहेतुमाह । प्रलब्धैरिति । प्रलब्धा वक्रोक्तत्या वञ्चिताः उद्वेजिताः स्वरूपतः निष्कारणमुद्वेजकः सर्प एव भवति अत इमां योनिं प्राप्त इति । नन्वल्पे अपराधे कथम्महान् दण्डः तैः कृत इत्याशङ्क्याह । स्वेन पाप्मनेति । पूर्वं हि ब्रह्मवृत्तिरपहृता अतस्तेन भाव्यमेव ऋषिभिः केवलं प्रकटितमित्यर्थः ।। १३ ।। एवमपराधशापौ निरूप्य तस्य वैष्णवत्वसिद्धयर्थं निर्मत्सरतामाह । शापोम इति । पूर्वम्विद्याधरत्वेन कदापि मुक्तिः स्यात् , अतोऽयं शापोऽनुग्रहार्थ एव, यद्यपि लोके अनिष्टरूपः तथापि मे अनुग्रहार्थ एव जातः यतस्ते करुणावन्तः नहि करुणावतां शापोऽन्यथा भवति तत्रापि प्रसिद्धानां तदाह । तैः करुणात्मभिरिति । तस्यानुग्रहरूपत्वमाह । यदहं लोकगुरुणेति । ननु शापः पूर्वसिद्धः सदोषात्मक एव तेन कथमिष्टसिद्धः तत्राह । कृत इति । अयं शापः तैरेवापूर्वं कृतः भगवद्दर्शनमृषीणामनुग्रहाद्भवति तदत्र शापादेव जातमिति तस्यानुग्रहत्वं किञ्च लोकगुरुणा त्रैलोक्यस्यैव ज्ञानोपदेशकर्त्रा पादेन स्पृष्ट इति गुरुसेवया हि ज्ञानं सिद्धयति सा सेवा तदा पुष्टा भवतीति निश्चीयते यदि स्वयम्पदा स्पृशति गुरुः अतिविश्वस्तं प्रीतिमन्तमेव स्वयंपदा स्पृशति तेनैव अपराधः पूर्वपापमपि गतमित्याह । हताशुभ इति । हतमशुभं यस्य ।। १४ ।। एवं भगवच्चरणस्पर्शाभिनन्दनं कृत्वा तेनैव जातं फलं प्रार्थनामिषेण कीर्तयति । तं त्वाहमिति सार्द्धैस्त्रिभिः । आदौ फलानुज्ञां प्रार्थयति तं सर्वफलदातारं तुशब्देन कर्मणापि फलमित्यादिपक्षं व्यावर्तयति । तं त्विति त्वा त्वां वां वा पूर्वार्थे आङ्मध्ये आसमन्तात् भवभीतानामिति ये केचन दुर्लङ्घ्यादपि संसाराद्भीताः तेषामपि भवान् भयं दूरीकरोति प्रपत्तिमात्रेणैव भगवत्सेवार्थं हि संसारे उत्पाद्यन्ते ते सर्वे संसारगतमायया विपरीता एव भवन्ति तथापि कृष्ण तवास्मीत्युक्तः सर्वमेवभयं दूरीकरोति अतोऽस्माकमपि वयं सापराधाः नन्दस्य ग्रासं कृतवन्तः किंकरिष्यतीतिशङ्का निवर्त्तिता अतःआपृच्छे आसमन्तात् पृच्छामि सम्भाषणं करोमि मध्ये समागतोऽप्युपद्रवो नष्ट इति आगन्तुकोऽपि दोषो नास्ति तदाह । शापनिर्मुक्त इति । पादस्पर्शादित्युभयत्र हेतुः तथापि सहजपापस्य जायमानत्वात् कथं सम्भाषणयोग्यतेत्याशङ्क्याह । अमीवहन्निति । अमीवं पाप हन्तीति ।। १५ ।। तथाप्यन्यप्रेरणया दण्डं माकुर्यादिति भीतः सन् शीघ्रं गमनं प्रार्थयन् पुनर्विज्ञापयति । प्रपन्नोऽस्मीति । पुनःशरणागतः शरणागतस्य सर्व अपराधा निवृत्ता भवन्तीति महायोगिन्निति तव नैते पित्रादयः किंत्वतियोगेन तथा विडम्बयसीति केऽपि त्वां न जानन्तीति ज्ञापयितुं महायोगित्वमुक्त किं च अल्प एव हि क्षुद्रस्यापराधं मन्यते त्वन्तु महापुरुषः सतांपतिः सन्तो हि तितिक्षवः तेषां पतिः सुतराम् अतः सर्वप्रकारेण मदपराधसहनं युक्तमिति भावः । अत एव मामनजानीहि सेवकत्वेन जानीहि देवेति संबोधनात् देवयोनिविद्याधरपक्षपातो युक्तः नतु मानुषपक्षपात इति । ननु मदनुज्ञापितोऽपि कथं यमादिभिर्न पीडितो भविष्यसि कालादयो हि मद्भक्तापराधे दण्डं करिष्यन्त्येवेतिचेत्तत्राह । सर्वलोकानां ये ईश्वराः तेषामपि त्वमीश्वर इति अतस्त्वत्कृपायां जातायां न कापि चिन्ता भविष्यतीति भावः ।। १६ ।।

श्रीसुबोधिनी–सारः

रूपगर्वितोहं कुरूपानंगिरस ऋषीन् प्राह संप्रलब्धैरुपहसितैः तैर्ऋषिभिरिमां योनिं सर्पदेहमहं प्रापितः स्वेन पापेन हेतुनैव ।। १३ ।। करुणात्मभिः कृपास्वभावैः तैः ऋषिभिः मे ममानुग्रहायैव शापः कृतः यत् यस्मात् लोकगुरुणा त्वया पदा स्पृष्ट इति । किं तत इत्यपेक्षायामाह हताशुभःधूतपापः ।।१४।। ते पादस्पर्शाच्छापनिर्मुक्तोह भवाद्भीतानां प्रपन्नानां भयापहं भयनिवर्त्तकं तं त्वा त्वामापृच्छे स्वगृहं गंतुमाज्ञापय हे अमीवहन् दुःखनाशन ।। १५ ।। हे महायोगिन् हे महापुरुष हे सत्पते हे देव हे सर्वलोकेश्वरेश्वर अहं प्रपन्नास्मि शरणंगतोऽस्मि मां त्वमनुजानीहि ।। १६ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

स्वेन पाप्मनेत्यत्र, पूर्वं हीति । ब्रह्मवृत्त्यपहारस्य सर्पयोनिफलकत्वादिति भावः । **प्रपन्नोऽस्मि महायोगिन्नित्यत्र तव नैते पित्रादय** इत्यादि । सर्पत्वादीनाधिकारित्वादेवं कथनमिति ज्ञेयम् ।। १६ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ऋषीन् प्राहसं हसितवानस्मि । तत्र हेतुद्वयं दर्शयन् ऋषीनात्मानं च विशिनष्टि—विरूपानिति । अष्टावक्रवद्विरूपानित्यर्थः । अहं च रूपेण सौन्दर्येण गर्वित इति । तेषामृषीणां शापे सामर्थ्यं सूचयन् विशिनष्टि-अङ्गिरस इति । अङ्गिरोगोत्रोत्पन्नानित्यर्थः । तैरुपहसितैर्ऋषिभिरिमां सर्पयोनिं अहं शापने प्रापितः । तत्र तेषां न कश्चिदपराधः, किंतु स्वेनैव पाप्मना पापेन निमित्तेन ॥ १३ ॥ शापस्तु तैर्ऋषिभिर्मे ममानुग्रहायैव कृतः । 'तेषामनुग्रहकरणे को हेतुः' इत्यपेक्षायां कारुण्यस्वभावत्वात्' इत्याशयेन ह—करुणात्मभिरिति । 'तच्छापेन किं शुभं प्राप्तम् , येन शापस्यानुग्रहार्थत्वम्' इत्यपेक्षायायाह—यदिति । यच्छापाद्धेतोः त्रिलोकगुरुणा सर्वपूज्येन त्वयाऽहं पादेन स्पृष्ट इति । 'पाद स्पर्शेनापि किम्' इत्यत आह—हताशुभ इति । तव पादस्पर्शेन हतमशुभं पापं यस्य तथा जात इति ॥ १४ ॥ हे अमीवहन् सर्वपापनिवारक ! तव स्पर्शाद्धेतोः शापेन निर्मुक्तोऽहं सर्वपापनिवारकं त्वां आपृच्छे स्वलोकं गन्तुमनुज्ञां याचे । 'प्रसन्नतया त्वदनुज्ञांविना गतस्य पुनः शापादि भयं स्यात्' इत्याशयेन विशिनष्टि—भवेति । भवेन संसारेण भीतानामत एव प्रपन्नानां शरणागतानां भयमपहन्तीति तथा तम् ॥ १५ ॥ 'अहमपि त्वां प्रपन्नः शरणमागतोस्मि, अतो मयि तवानुग्रहो युक्त' इत्याशयेन सम्बोधयति—सत्पते सतां भक्तानां पालकेति । पालकत्वे हेतु सूचयन् पुनः सम्बोधयति—सर्वलोकेश्वरेश्वर इति । सर्वलोकेश्वरस्येश्वरो ब्रह्मा, तस्यापीश्वरः । तत्रापि सामर्थ्ये हेतु सूचयन् पुनः सम्बोधयति-महायोगिन्निति । महान् योगः उपायभूतो मायाशक्तिरूपोस्यास्तीति तथाभूतः । तत्रापि हेतुं सूचयन् सम्बोधयति-महापुरुष इति । हे महापुरुष पुरुषोत्तम ! यत उत्कृष्टोन्यो नास्तीत्यर्थः ॥ 'एवंभूतस्य किं मनुष्यदेहग्रहणेन' इत्याशङ्क्य' क्रीडार्थमेवेदम् 'इत्याशयेन पुनः सम्बोधयति-देवेति । मामनुजानीहि स्वलोकगमनानुज्ञां देहि ॥ १६ ॥

अन्वितार्थप्रकाशिका

ऋषीनिति । रूपेण दर्पितः अहं विरूपान् अङ्गिरसः अङ्गिरोगोत्रोत्पन्नान् ऋषीन् प्राहसं प्रहसितवानस्मि । प्रलब्धैः उपहसितैः तैर्ऋषिभिः स्वेन मदीयेनैव पाप्मना पापेन निमित्तेन अहम् इमां सर्पयोनिं शापेन प्रापितः ॥ १३ ॥ शाप इति ॥ करुणात्मभिर्दयालुभिः तैः ऋषिभिः शापस्तु मे ममानुग्रहायैव कृतः । यद्यस्माच्छापाद्धेतोः त्रिलोकगुरुणा सर्वपूज्येन त्वयाऽहं पदा पादेन स्पृष्टः । तेन तव पादस्पर्शेन हतमशुभं पापं यस्य तथा जात इति ॥ १४ ॥ तमिति ॥ हे अमीवहन् दुःखनाशक ! तव पादस्पर्शाद्धेतोः शापान्निर्मुक्तोऽहं भवात् संसारात् भीतानामत एव प्रपन्नानां शरणागतानां भयमपहन्तीति तथा तं त्वाम् आपृच्छे स्वलोकं गन्तुमनुज्ञां याचे ॥ १५ ॥ प्रपन्न इति ॥ हे महायोगिन्नित्यादीनि पञ्च संबोधनानि । अहमपि त्वां प्रपन्नः शरणमागतः अस्मि ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

रूपदर्पितः सन् अंगिरसस्तत्कुलोत्पन्नान ऋषीन् अहं प्राह समुपहसितवानस्मि प्रलब्धैरुपहसितैः स्वेनमदीयेन पापेन हेतुना ॥ १३ ॥ को भगवान् यद्यतः शापात् लोक गुरुणात्वया पादेन स्पृष्टः ॥ १४ ॥ हे अमी वहन् पापनिवर्त्तकशापनिर्मुक्तः त्वामहं आपृछे स्वस्थानभूतं स्वर्गं यातुमाज्ञां याचे ॥ १५-१६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ऋषीनिति ॥ रूपदर्पितः सौन्दर्येण गर्वितः, अहं विरूपान् 'सौन्दर्ये च स्वभावे च रूपशब्दं प्रचक्षते' इति कोशात् । अङ्गिरसस्तत्कुलोत्पन्नान् ऋषीन् दृष्ट्वा, प्राहसं हसितवानस्मि । तदा स्वेन मदीयेनैव, पाप्मनां पापेन हेतुना. प्रलब्धैर्मयोपहसितैः, तैरङ्गिरोभिर्ऋषिभिः, इमां योनिं प्रापितः अस्मि । सर्पजन्मप्रापित इत्यर्थः ॥ १३ ॥ शाप इति ॥ प्रलब्धैर्मयोपहसितैरपि, करुणात्मभिः करुणार्द्रचित्तैस्तैर्मुनिभिः, शापः अयं सर्पयोनिप्राप्तिरूपः आक्रोशः, मम, अनुग्रहाय एव कृतः । यद्यस्मात् , अहं लोकगुरुणा त्वया कर्त्रा, पदा करणेन, स्पृष्टः । अन्यथैतन्न संभाव्यते इति भावः । अत एव, हतमशुभं पापं यस्य तथाभूतः, जातः ॥ १४ ॥ तमिति ॥ पादस्पर्शाद्धेतोः, शापनिर्मुक्तः, अहं हे अमीवहन् पापघ्न, तं त्रिलोकगुरुं, भवभीतानां संसाराद्भयं प्राप्तानां, अत एव प्रपन्नानां शरणागतानां, भयापहं भयविनाशकं, त्वा त्वां, आपृच्छे स्वर्लोकं गन्तुमाज्ञां याचे ॥१५॥ प्रपन्न इति । हे महायोगिन्नचिन्त्यविविधविचित्रशक्ते, हे महापुरुष, हे सत्पते साधुजनैकनाथ, हे सर्वलोकेश्वर, हे कृष्ण, क्वचिद् वेति पाठः । प्रपन्नस्त्वच्छरणं प्राप्तः अस्मि । मां अनुजानीह्याज्ञापय ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ऋषीनिति : १०.३४.१३.

विप्रो नाम पदार्थ एव भगवँल्लोकेऽभिवन्द्यः स्वतो विद्वाँस्तत्र तु किं पुनः पुनरसौ चेद् ब्रह्मनिष्ठाग्रणीः ।
तस्यैतस्य जगद्गुरोरपि मुधा येनोपहासः कृतो दण्डस्तस्य ममोचितोऽयमधुना त्वत्पादलाभोऽधिकः ॥ ३४ ॥

अहो सदय भक्तिमज्जनसुखावतारः प्रभो दयाविधिरयं च ते भुवि विभात्यनन्यादृशः ।
पुरा यदहिरप्यहं तदनु च स्वतातः समुद्धृतस्तदिदमद्भुतं मनसि कस्य न स्यादलम् ॥ ३५ ॥
सर्वशूराग्र्यराजोऽपि दयया रञ्जितो हि यः । तस्मै चित्रचरित्राय तुभ्यं कृष्णास्तु मन्नतिः ॥ ३६ ॥

कृष्णप्रिया

दिशाओं में विचरते मैने अष्टावक्र मुनि जैसे कुरूप अङ्गिरस कुलोत्पन्न ऋषियों को देखा । रूप वविरू मैंने उन ऋषियों का उपहास किया और वक्रोक्तियाँ सुनाई मेरे पूर्व जन्म के कर्म थे मैंने किसी ब्राह्मण की वृत्ति का उच्छेद किया था उन पाप कर्मों के फल रूप उन ऋषियों द्वारा मुझे यह योनि मिली ॥ १३ ॥ नाथ ! मेरे लिए यह शाप अनुग्रह ही हुआ । वे ऋषिलोग दया के सागर थे मेरी गर्व से अधिक अधोगति न होने पावे इस हेतु से सर्प होने का शाप दिया लेकिन आपके चरणस्पर्श का अनुग्रह मूलक वह शाप था । उसी शाप के कारण त्रिलोकगुरु आपके चरणों का स्पर्श मिला और आज मेरे सर्व पापों का नाश हुआ ॥ १४ ॥ हे पापनाशक पुरुषोत्तम ? भव भयभीत होकर चरणकमलों में शरण आए हुए प्रपन्न जनों के भवभय के हटाने वाले आपके श्री चरणों के स्पर्श मुक्तपाप मैं आपके सन्मुख खड़ा हूँ एवं आप से भाषण कर रहा हूँ ॥ १५ ॥ हे महायोगिन् ? हे महापुरुष ! हे सत्पते ! हे सर्व लोकेश्वरों के ईश्वर ! अब मुझे जाने की इजाजत दीजिए ॥ १६ ॥

ब्रह्मदण्डाद् विमुक्तोऽहं सद्यस्तेऽच्युत[1] दर्शनात् ।
यन्नाम [2]गृह्णन्नखिलान् श्रोतॄनात्मानमेव च । सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥१७॥
इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवन्द्य [3]च । सुदर्शनो दिवं यातः कृच्छ्रान्नन्दश्च मोचितः ॥१८॥

निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्ततः ।
समाप्य तस्मिन् नियमं पुनर्व्रजं नृपाययुस्तत् कथयन्त आदृताः ॥ १९ ॥

कदाचिदथ गोविन्दो रामश्चाद्भुतविक्रमः । विजह्रतुर्वने रात्र्यां मध्ये [4]गोव्रजयोषिताम् ॥२०॥

कर्दमक्षमा

अन्वयः—हे अच्युत ! ते दर्शनात्, सद्यः, ब्रह्मदण्डात्, विमुक्तः, (समभवम्) यन्नाम, गृह्णन्, आत्मानम्, च, अखिलान्, एव, श्रोतृन्, सद्यः, पुनाति, तस्य, ते, पदा, स्पृष्टः ! किम् भूयः ! वक्तव्यम् ॥ १७ ॥ इति, दाशार्हम्, अनुज्ञाप्य च, परिक्रम्य, च अभिवन्द्य, सुदर्शनः, दिवम्, यातः च, नन्दः कृच्छ्रात्, मोचितः ॥ १८ ॥ हे नृप ! कृष्णस्य, तत्, आत्मवैभवम्, निशाम्य, विस्मितचेतसः, व्रजौकसः, नियमम्, समाप्य, तस्मिन्, आदृताः, तत्, कथयन्तः, पुनः, व्रजम्, आययुः ॥ १९ ॥ अथ, कदाचित्, अद्भुतविक्रमः, रामः, च, गोविन्दः, गाव्रजयोषिताम्, मध्ये, रात्रौ, वने, विजह्रतुः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अहिदेहं निहत्यैवं प्रागुन्मत्तं सुदर्शनम् ॥ तद्वदुन्मादिनं कृष्णः शंखचूडमताडयत् ॥ १ ॥
तत्प्रसंगमाह । कदाचिदिति ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ब्रह्मदण्डात् ब्रह्मशापात् । गृह्णन्नुच्चरन् । तस्य अखिलपावनकर्त्तुः । यदि पदा स्पृष्टः पूतो भवेत्तर्हि भूयः पुनः किं वक्तव्यमिति कैमुत्यं सूचितम् । सार्द्धेनान्वयः ॥ १७ ॥ इति इत्थं संश्लाघ्य । दाशार्हम् श्रीकृष्णम् ॥ १८ ॥ तत् विद्याधरवर्णितम् । आत्मनस्स्वस्य वैभवं स्वाभाविकैश्वर्यम् । तस्मिन् श्रीकृष्ण एव । नियमम् व्रतादि "नियमो मंत्रणायां च प्रतिज्ञानिश्चये व्रते" इति मेदिनी । समाप्य समर्प्य । एतस्मिन्नार्चिते सर्वेऽर्चिताः स्युस्सर्वमूलत्वात् । मूले सिक्ते शाखादिसेकवत् । विस्मितचेतस इति–अहो अयमेव साक्षात्परमेश्वरः, यथा गर्गमुखात्प्रथमं श्रुतं तथैव वरुणादपि तदेवाधुना विद्याधरेणाप्युक्तमतो वयमप्येतत्सम्बन्धेन धन्या एवेति चिंतितवन्तः । ततः अम्बिकावनात् । तत् कृष्णवैभवम् ॥ १९ ॥ कथान्तरमाह–कदाचिदिति । अथ नन्दमोचनोत्तरम् । कदाचित्कालान्तरे ॥ २० ॥

---

१. दभुत–विज. । २. न्निखि–वीर. । ३. भिवाद्य–वीर. विज. । ४. मध्यगो–श्रीधर. वंशी. जीव. विज. विश्व. रा. शु. सु. ध. ; मध्ये–गो. वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्वन्माहात्म्यं चाधुना मयैव विशेषतोऽनुभूतमित्याह । ब्रह्मेत्यर्द्धकेन दर्शनमात्रेण सर्पाकाराध्यासो गतः चरणस्पर्शेन तु सर्पाकारतैव विद्याधराकारतां प्रापेति भावः । विनिर्मुक्तमिति श्रीचित् सुखसम्मतः पाठः । तत्र पूर्वेणान्वयः किञ्च त्वत्पादाब्जेन साक्षात् स्पृष्टोऽहं स्वलोकवर्त्तिनोऽन्यान् गत्वा स्वस्पर्शेन कृतार्थयिष्यामि किमुतात्मानमित्याशयेनाह । यन्नामेति । नामैकमपि गृह्णन् उच्चारयन्नपीति श्रद्धाद्यपेक्षा निरस्ता गृह्णन्निति वर्त्तमानत्वेन सम्पूर्णत्वापेक्षा अखिलानिति अधिकाराद्यपेक्षा सद्य इति कालापेक्षा च । श्रोतॄनिति केवलश्रवणप्राप्तिरेवाभिप्रेता । इवार्थे एव आत्मानमिवेति दृष्टान्तत्वेन श्रवणकीर्त्तनयोरविशेषोक्त्या माहात्म्यविशेषः सूचितः । चकारेण तत्तत् सम्बन्धिनोऽपि तस्य पदा स्पृष्टः सन् भूयोऽधिक यथा स्यात्तथा सर्वानेव तान् हि निश्चितं पुनामीति किं वक्तव्यमित्यर्थः ।। १७ ।। अनुज्ञाप्य मौनं सम्मतिलक्षणमिति न्यायेन पादस्पर्शप्रभावमात्रतः सर्पकवलशैथिल्यापादनेन कृच्छ्रादपादानात् श्रीनन्दश्च मोचितः श्रीकृष्णेनेति पूर्वसूचितार्थ एवात्र स्पष्टीक्रियते उभयोरपि मङ्गलं कृतमिति बोधनाय अत एव च शब्दश्च । तममोचयित्वा विद्याधरेण सङ्कथनं न युक्तमिति ।। १८ ।। आत्मवैभवं स्वरूपवैभवं कुतोऽपि विद्यादि प्राप्त्यैव नरलोकात् । विस्मये हेतुः व्रजौकसः तत् प्रेमभरविवशतया मुहुर्दृष्टमपि तादृशत्वमनुसन्धातुमशक्या इत्यर्थः । नियमं शिवरात्रतीर्थवासात्मकम् ।। १९ ।। अथ क्रमप्राप्तं देवयोनिमुक्तिदानरूपत्वेनात्मीयरक्षारूपत्वेन च पूर्वलीलासदृशं पूर्वविवक्षितं लीलान्तरमाह । कदाचिदित्यादिना यावत् समाप्तिः । अथ तच्छिवरात्र्यनन्तरं कदाचित् होलिका पूर्णिमायाम् । गोविन्दः श्रीगोकुलयुवराजः रमयति क्रीडयति कृष्णमिति राम इति निरुक्त्या तदानीं सख्यांशस्यैवोदयो ध्वनितः जन्मारभ्य सह विहारात् । बाल्यावशेषाच्च । व्रजे तदंशस्यैव प्राचुर्यदर्शनं राजधान्यामेवाग्रजत्वांशस्येति । अत्रास्य गौणता विवक्षया पश्चान्निर्देशश्चकारात् तदुपलक्षितत्वेन सखायोऽपि ज्ञेयाः मध्यदेशादौ तथैव होरिकाक्रीडाव्यवहारात् । भविष्योत्तरशास्त्राच्च । राजसूयावभृथे चेत्थमेव क्रीडा वर्णयिष्यते । वने व्रजसन्निहिते इति ज्ञेयम् । अद्भुतः अलौकिकः विक्रमः प्रभावो यस्य स इति द्वयोरपि विशेषणम् ।। २० ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

त्वन्माहात्म्यं चाधुना मयैव विशेषतोऽनुभूतमित्याह—ब्रह्मेति; अनेन दुष्परिहरत्वमुक्तम् । अच्युत ! भोः कथमपि कस्माच्चिन्माहात्म्याच्च्युतिरहित ! किंवा हे गोकुलकृतस्थिरवास ! तव दर्शनादेव सद्यो विशेषेणोत्कृष्टप्रकारेण मुक्तोऽहम् , विशब्दार्थः पूर्व्वमुद्दिष्ट इति पादाब्जस्पर्शात् प्रागेव विमुक्तिर्ज्ञेया, तथापि पादाब्जेन स्पर्शनं भक्तिविशेषसम्पादक-सद्बुद्ध्यादिविस्तारणार्थमित्युक्तमेव । 'विनिर्मुक्तम्' इति श्रीचित्सुखसम्मत-पाठः; विशेषतश्च तवैतन्माहात्म्यं त्वद्भक्तानां श्रीब्रह्मादीनामग्रे गत्वा कीर्त्तयेयमित्येतदर्थमनुजानीहीति भावः ।। १७ ।। किञ्च, त्वत्पादाब्जेन साक्षात् स्पृष्टोऽहं स्वलोकवर्त्तिनोऽन्यान् गत्वा स्पर्शेन कृतार्थयामीत्याशयेनाह—यन्नामेति, नामैकमपि, गृह्णन् उच्चारयन्नपि, इति तत्र श्रद्धाद्यपेक्षा निरस्ता; गृह्णन्निति वर्तमानत्वेन सम्पूर्णतापेक्षा; अखिलानिति अधिकाराद्यपेक्षा; सद्य इति कालापेक्षा च, श्रोतॄनिति केवलप्राप्तिरेवाभिप्रेता, अप्यर्थ एव, आत्मानमपीति दृष्टान्तत्वेन ज्ञेयम् । ततश्च श्रवणकीर्तनयोरविशेषोक्त्या माहात्म्यविशेषः सूचितः; 'च'–कारेण तत्तत्सम्बन्धिनोऽपि, तस्य ते पदा स्पृष्टः सन् भूयोऽधिकं यथा स्यात्तथा सर्व्वानेव तान् , हि निश्चितं पुनातीति किं वक्तव्यमित्यर्थः ।। १८ ।। 'इति' उक्तप्रकारकविज्ञापनेनानुज्ञाप्य 'मौन सम्मतिलक्षणम्' इति न्यायेन, विशेषतश्च सर्व्वलोकहितार्थं यदुकुलेऽवतीर्णत्वात्तत्र स्वारस्येन सम्मतिं प्राप्येत्यर्थः । अतएवोक्तं दाशार्हमिति, वस्तुतस्तु समुद्रकोटीगम्भीरत्वादिनिजैश्वर्य्य-विशेषप्रकटनपरस्य, अतएव तादृशस्तुति–प्रणति-पर-श्रीचतुर्म्मुखं प्रत्यप्यकृत-संलापस्य मे क एतं प्रति तदवकाशः, प्रश्नश्च केवलं श्रीगोपानां हितार्थमेव कृत इत्यभिवन्द्याष्टांगं प्रणम्य, चकाराच्छ्रीनन्दादीनपि; सुदर्शन इति सौन्दर्य्यविशेषसम्पत्तेः, किंवा साक्षाच्छ्रीनन्दनन्दनसन्दर्शनेन सुदृष्टिसिद्धेः । ततश्च सुशोभनं दर्शनं दृष्टिर्यस्येत्यर्थः । अतएव कृच्छ्राद्दुःसह तद्विरहदुःखनैव दिवं यातः, नन्दश्च तन्मोचनादेवानायासेन तस्मान्मोचितः; यद्वा, कृच्छ्रात् सर्पकवलनदुःखात् , श्रीनन्दश्च मोचितः ।। १९ ।। तत् सुदर्शनेनोक्तमात्मवैभवं स्वरूपवैभवम् , यद्वा, आत्मन आत्मीयमसाधारणं निजं वा, तदीयताभिमानेन तदीयसर्व्वस्यात्मीयत्वेनैव मननात् , यद्वैभवं माहात्म्यं तन्निशम्य विस्मितचेतसः सन्तः, यद्वा, तत् सुदर्शनमुखान्निःसृतम् , यतो व्रजौकसस्तत्प्रेमभरविवशतया पूर्व्वापरानुसन्धानाशक्ता इत्यर्थः । यद्वा, अकारप्रश्लेषेण निशम्याप्यविस्मितचेतसः, सदा बहुधा साक्षात्तन्महावैभवाकल्यनुभवात् , ततः सुदर्शनयानानन्तरं तस्मिन् वने नियमं व्रतं त्रिरात्रतीर्थवासात्मकं समाप्य पारणां कृत्वा । नृपेति हर्षेण सम्बोधनम् । यद्वा, भवादृशा यथा नॄन् पान्ति तथा तेऽपि तत्कथनेन सर्व्वलोकानरक्षन्निति भावः । आययुरिति श्रीमाथुरव्रजभूमेरुत्तरस्यां दिशि क्रोशसप्ततितमीये गंगातीरे श्रीवादरायणेस्तथा कथनाद्व्रजस्य तस्याग्नेय्यां तद्वनमिति बोधयति । यद्वा, भावविशेषेण तस्यात्मनो व्रजवर्त्तित्वाभिमानात् , गुर्ज्जरदेशस्थाम्बिकावनादाययुरिति केचित् । तदनुभूतं तत्रत्यवृत्तं वैभवमेव वा, आदृताः श्रीकृष्णेन श्रीनन्देन वा सम्मानिताः, किंवा सादराः, 'ततः' इति भक्तिविशेषो विवृद्ध इवेति भावः ।। २० ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एतदेव कैमुत्यनयेन स्पष्टयति । यदिति । यस्य तव नाममात्रमेव गृह्णन्नुच्चरन् पुमानात्मानं श्रोतॄंश्च सर्वान् जनान् सद्यः पुनाति किम्पुनः साक्षात्तादृशप्रभाववन्नाम्नस्तव पदा संस्पृष्टः शापाद्विमुक्त इति कियदेतदित्यर्थः ॥ १७ ॥ इत्थमनुज्ञाप्यानुज्ञां गृहीत्वा दाशार्हं कृष्णं प्रदक्षिणीकृत्याभिवाद्य च सुदर्शनः स्वर्गं प्रतिययौ नन्दोऽपि कृच्छ्रात्सर्पग्रासान्मोचितः ॥ १८ ॥ ततो व्रजौकसो गोपाः कृष्णस्य तदात्मवैभवमनितरसाधारणं प्रभावं निशाम्य दृष्ट्वा विस्मितं चेतो येषां तथा भूताः तस्मिन्नम्बिकावने नियमं व्रतं समाप्यादरयुक्ताः कृष्णस्यात्मवैभवमेव कथयन्तो हे नृप ! पुनर्व्रजं प्रत्याजग्मुः ॥ १९ ॥ अथ शङ्खचूडवधतच्छिरोमण्यपहारात्मकं कर्म प्रस्तौति । कदाचिदित्यादिना यावत्समाप्ति । अद्भुतविक्रम इति रामकृष्णयोरुभयोरपि विशेषणम् तावुभौ वने गवां व्रजस्त्रीणां च मध्ये विजह्रतुः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

चात्तं स्तुत्वा दाशार्हं कृष्णम् ॥ १८ ॥ निशाम्य दृष्ट्वा ॥ १९–२० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कदाचित् होरिका पूर्णिमायां रामश्चेत्युपलक्षणं सखायश्च । तथैव मध्यदेशाचारात् भविष्योत्तरपुराणाच्च । अत एव सम्प्रमत्तवदित्यत्रापि न दोषः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दर्शनादेव विमुक्तः किमुत पदा स्पृष्टः । नामैकमपि गृह्णन् यः कोऽपि किमुताहं दर्शनस्पर्शवानपि ॥ १७–१८ ॥ विस्मितचेतस इति । अहो योऽयमस्माकं बाल्य एवास्मान् विना क्षणमात्रमपि म निर्वृणोति स एव कृष्णः किं परमेश्वर एवञ्चेदेतत् पित्रादयो वयमपि महापुरुषा एव भवामेति धन्यो गर्गमुनिर्येन प्रथमत एवास्य नारायणसाम्यमुक्तम् । तथैव वरुणस्यास्य च विद्याधरस्य मुखादश्रौष्मेति भावः ॥ १९ ॥ कदाचिच्छिवरात्रिव्रतानन्तरं रात्र्यां चन्द्रिकाबहुलायाम् । व्रजयोषितां मध्यगाविति होलिका क्रीडायां तथैव व्यवहार इति वैष्णवतोषिणी ॥ २०–२१ ॥

गूढार्थदीपिनी

ब्रह्मेति अर्द्धम् । ब्रह्मदण्डात् शापात् ॥ १७ ॥ तस्य ते पदा स्पृष्टः पुनातीति किं पुनर्वक्तव्यमित्यर्थः ॥ १८ ॥ दाशार्हं श्रीकृष्णम् । अनुज्ञाप्य पृष्ट्वा ॥ १९ ॥ निशाम्य दृष्ट्वा । ततोऽम्बिकावनात् । आदृताः सादराः हे नृप ! ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ब्रह्मदण्डात् विमुक्तः पादस्पर्शात् दर्शनात् सर्वथा कृतार्थ एवेति शेषः ॥ १७ ॥ इत्येवमनुज्ञाप्य आज्ञां कृष्णात्पृष्ट्वा तेनाप्यक्षिसङ्कोचेनैव तल्लोकं प्रत्याज्ञापितः दाशार्हं कृष्णं परिक्रम्य दिवं यातः ययौ ॥ १८–२० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे अच्युत ते दर्शनात्सद्यस्तात्क्षणं यन्नाम गृह्णंश्चाखिलान् श्रोतॄनात्मानं पुनाति हि यतस्तस्य ते पदा स्पृष्टोऽहं ब्रह्मदण्डाद्विमुक्त इति भूयो महत्किं न महदित्यर्थः । हे अच्युत ते दर्शनमतति गच्छति प्राप्नोतीति सः सद्यो विमुक्तो भवति यथा पूर्वमुर्वरितम् ॥ १७ ॥ दाशार्हं कृष्णमनुज्ञाप्तानुज्ञाप्रदानोन्मुखं कृत्वा परिक्रम्य तथाऽभिवाद्य सुदर्शनो विद्याधरो दिवं यातः कृच्छ्रान्नन्दश्च मोचितः ॥१८॥ तदात्मवैभवं तत्स्वरूपभूतं माहात्म्यं व्रजौकसो निशाम्य दृष्ट्वा तस्मिन्सरस्वतीतीरे नियमं व्रतदीक्षां समाप्य तद्वैभवमादृताः कथयन्तः सन्तः पुनर्व्रजमाययुः ॥ १९ ॥ वने तत्रापि रात्र्यां व्रजयोषितां मध्यगौ विजह्रतुः ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नन्वहमुदासीनः सर्वत्र न मे द्वेष्योऽस्ति न प्रिय इति । अतोऽनिषिद्धाचरणे कालादयो बाधका एवेति चेत्तत्राह । ब्रह्मदण्डादिति । भगवद्दर्शनादेव ब्रह्मदण्डाद्विमोक्षः प्रत्यक्षसिद्धः । यद्यपि त्वमुदासीनः तथापि त्वद्धर्मा नोदासीनाः अन्यथाते दर्शनादेव ब्रह्मदण्डाद्विमोक्षना स्यात् तत्रापि सद्यः तत्रापि दर्शनादेव अच्युतेति संबोधनान्न भगवद्धर्माणां कादाचित्कत्वं तेन ये निवर्तितास्ते निवर्तिता एव । ननु यावदुपयोगमेव निवर्ततां कथं सर्वानिष्टनिवृत्तिरिति चेत्तत्राह । यन्नामेति । मम सर्वपापनिवृत्तो न संदेहः यस्य नामग्रहणमात्रेणैव श्रोतॄनात्मानञ्च निष्पापान् करोति तत्रापि नाधिकारिविशेषः किंतु सर्वानेव एवेत्यनेन आत्मशब्दः जीवपरो ज्ञायते न केवलं दैहिका दोषा निवर्त्तन्ते किंत्वज्ञानप्रभृतिसर्वमेव निवर्तते चकारात् श्रोतॄणामपि तथा समुच्चयार्थः सद्यः शुद्धिरिति शुद्धिहेतूनां देशादीनां निरपेक्षतामाह तत्रापि भूयो वारंवारमुच्चारयन् पुनातीति किं वक्तव्यं यत्र नाम्न एवैतादृशं माहात्म्यं तस्य स्वरूपमाहात्म्यं किंवक्तव्यमित्याह । तस्य पदा स्पृष्ट इति पादस्पर्शः सुतरां दुर्लभः तत्रापि भगवत्कर्तृकः तत्रापि चरणकर्तृकः

यतश्चरणे तादृशो रेणुः गङ्गादितीर्थानि अमृतरसः भक्ता इति सर्वसान्निध्याद्युक्तमेव सर्वदोषनिवर्त्तकत्वमित्यर्थः । तत्रापि तस्य ते सर्वदोषनिवारणार्थमेवावतीर्णस्य ।। १७ ।। भगवतो वक्तव्याभावात्तूष्णींभावेऽप्यङ्गीकारस्य सिद्धत्वात् भगवन्तमनुज्ञाप्य स्वयमेव गत इत्याह । इत्यनुज्ञाप्येति । यतो दाशार्हः सेव्यः एवभाव एव स्वामी सेव्यो भवतीति सर्वपुरुषार्थसिद्ध्यर्थं साधनमपि कृतवानित्याह । परिक्रम्येति । परिकम्य प्रदक्षिणीकृत्य सर्वपुरुषार्थास्तेन वेष्टिता इति तत्सिद्धिः । स्वाधीना अभिवादनेन स्वतन्त्रतया स्वोपार्जनत्वेन पुरुषार्थानामत्याधिक्यं सूचितं चकारात्स्तुत्वा भगवता चानुज्ञातः तथेत्युक्तो वा ये यथा मां प्रपद्यन्ते इति न्यायेन सर्वपुरुषार्थास्तस्मै दत्तवानिति वा । अतः सुदर्शननामत्वाच्च दिवं यातः विद्याधरलोकमेव गतः कृच्छ्रात् सर्वदोषात् । यतो मोचितः नन्दश्च तथा कृच्छ्रान्मोचितः चकाराद्वैभवञ्च ज्ञातवान् ।। १८ ।। ततस्ते गोपाः सर्वथा भगवत्परायणा जाता इत्याह । निशाम्येति । कृष्णस्य तद्वैभवं निशाम्य ज्ञात्वा सर्व एव व्रजौकसः विस्मितचेतसो जाताः अलौकिकसामर्थ्यस्य प्रकटितत्वात् नात्र कृतिसाध्यं किंचित् येन पूर्वेण गतार्थता स्यात् अयंत्वनुभावरूपो वैभवः अन्यथा पादस्पर्शः अलातहननोपक्षयातिसूक्ष्मत्वाच्च तेन कथं कार्यं स्यात् कृष्णस्येति परमानन्दः स्वानुभवसिद्ध इतिधर्म्युत्कर्षः आत्मन एवायं वैभवो नतु शक्तेः । अनेन स्वरूपमेव तथाविधमङ्गीकर्त्तव्यं यत्र क्रियाज्ञानादीनामभावः व्रजौकस इति दृष्टप्रत्यय एवातिभरः अत्यन्तविश्वसिताः अतः क्रियया विस्मिता अपि पुनरनुभावेनापि विस्मितचेतसो जाताः । ततः तस्मिन् भगवति नियमं समाप्य पुनर्व्रजं ययुः तत्समारब्धं कर्म कृष्ण एव निवेदितवन्तः अन्यथा तेन बन्धः स्यात् पुनर्व्रजमेव ययुः तत्रैव सर्वा सिद्धिरिति मनसाप्यन्यत्र गमनेच्छां न कृतवन्तः नृपेति सम्बोधनं विश्वासार्थं दृष्टे हि राज्ञां विश्वास इति आदृताः सन्तः तदेव कथयन्त इति चित्ते भगवदनुभावाभिनिवेश उक्तः ।। १९ ।। एवमनन्यभजनार्थं भगवदनुभावं निरूप्य शब्दब्रह्मानन्दं गोपिकाद्वारा सर्वेषु पूरयितुं पुनर्गोपिकाभिः सह शब्दात्मकेन बलभद्रेणापि सह क्रीडां निरूपयति । कदाचिदिति त्रयोदशभिः । इयं लीला कालप्रधाना अतोऽत्र दैत्यानां बाधकत्वं बाधने भगवत्सामर्थ्येन तन्निराकरणे कृते शब्दस्यैव माहात्म्यं निरूपितं भवतीति मणिदानमग्रजायैव लौकिकालौकिकमाहात्म्ये ज्ञात एव वेदानां स्वतः प्रामाण्यं सिद्ध्यति अन्यथा भ्रान्तमीमांसकानामिव सर्वो वेद उत्प्रेक्षापरः स्यात् कदाचिदशीतकाले अथ भिन्नोपक्रमेण पूर्वोक्तगोपिकाव्यतिरिक्ताभिः सह क्रीडायाः पूर्वं शास्त्रपरा लौकिकधर्मपराश्च स्थितास्तासामप्यनुभावदर्शनात् सर्वस्यापि तदधीनत्वज्ञानात् भगवता बलभद्रेण च सह रमणार्थमिच्छा जाता भगवांश्च गोविन्द इति तासामपीन्द्र इति क्रियाशक्तिप्रधानो रेमे रामश्च तेनापि सह रमणे चित्तप्रसादार्थमद्भुतो विक्रमः पराक्रमो यस्येत्युक्तं चकारस्त्वावेशसमुच्चयार्थः अनेन मध्यमाधिकारिणां वेदपरत्वं न दोषायेतिनिरूपितम् अन्यथा प्रमाणपराणामनन्यभावो भज्येत अद्भुतः पराक्रम इति केवलार्थपराणामेतस्योपयोगः सूचित अन्यथेतरनिराकरणं स्वार्थनिरूपणञ्चेति भगवति वेदे वा द्विगुणावृत्तिः स्यात् अर्थवदेव शब्दस्यापि लीलेति वने रात्र्यामित्युक्तम् उभावपि विजह्रतुः उभयो रमणार्थं पूर्वगोपिकापेक्षया हीना इति गोव्रजयोषितां मध्य इति उक्तं गोप्राधान्यो व्रजः तत्संबन्धिन्यो योषित इति ।। २० ।।

श्रीसुबोधिनी–सारः

हे अच्युत ते तव दर्शनात्सद्योहं ब्रह्मदण्डाद्विमुक्तोऽस्मि यस्य नामोच्चारयन् सर्वान् श्रोतॄन् आत्मानं च सद्यः तत्क्षणमेव पुनाति तस्यैव ते पदा स्पृष्टः आत्मानं पुनामीति किं भूयो वक्तव्यम् इत्येवं दाशार्हं कृष्णमनुज्ञाप्य परिक्रम्य प्रणम्य च सुदर्शनो दिवं स्वर्गं यातः प्राप्तः कृच्छ्रात् नंदश्च मोचितोऽभूत् ।। १७–१८ ।। कृष्णस्य तदाऽऽत्मवैभवं निशम्य श्रुत्वा विस्मितचेतसो व्रजवासीयास्तस्मिन् वने नियमं व्रतं समाप्य पूर्णीकृत्य ततः स्थानात् पुनर्व्रजमाययुः तत् कर्म कथयन्त आदृताः हे नृप ।। १९ ।। अथानन्तरं गोविंदो रामश्चाद्भुतो विक्रमो यस्य सः व्रजस्त्रीणां मध्यगौ रात्र्यां वने चिक्रीडतुः ।। २० ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

तदात्मवैभवमित्यत्र, यत्र क्रियाज्ञानादीनामिति । तेषां प्रयोजनाभाव इत्यर्थः । **कदाचिदथ गोविन्द** इत्यत्र । **इयं हि लीलेत्यादि** । तत्तत्काल एव कर्मविधानान्नामलीला कालप्रधाना । स चोपाधिरूपत्वेन स्वयंक्षयिष्णुरन्यानपि कालयति, दैत्याश्च तादृशा इति तदनुगुणः कालो भवतीति कालप्रधाने मार्गे दैत्यानां बाधकत्वमावश्यकम्, राजसे मार्गे तामसानां प्रभावस्योचितत्वाच्च । एवं सति तन्निवारणे भगवन्माहात्म्येन जातेपि तत्र नामलीलात्वस्यैव प्रयोजकत्वात्तन्माहात्म्यं नामलीलापर्यवसाय्येव भवतीत्यग्रजाय मणिदानेन ज्ञाप्यत इत्यर्थः । अत एव प्रकृते शिवरात्रिरात्रिनिशामुखसंमाननान्युक्तानि । तत्र बाधनिवारणस्यावश्यकत्वायाहुः **लौकिकालौकिकेति** । लौकिकं शङ्खचूडवधश्चरणारविन्दस्पर्शमात्रेण ब्रह्मशापजाहित्वस्यापि नाशोऽपूर्वरूपसम्पत्तिश्चालौकिकम् । **ज्ञात एव** । लौकिकैः प्रत्यक्षतया ज्ञात एवेत्यर्थः । विपरीते बाधकमाहुरन्यथेति । लौकिकालौकिकमाहात्म्याननुभवे फलश्रुतेर्यथाश्रुतार्थस्य प्रत्यक्षबाधितत्वेन तथोत्प्रेक्षापरत्वं कल्प्येत । यथा यजमानस्य बर्हिर्मुष्टिरूपत्वं प्रत्यक्षबाधितमिति यजमानः प्रस्तर इति वाक्यं यागोपयोगित्वेन, उभयोस्तत्त्वेनोत्प्रेक्ष्यते यजमान इति कल्पयन्ति । वस्तुतस्तु लौकिकमानानुरोधेन वेदार्थबाधका भ्रान्ता एव । यतो लौकिकं मानमलौकिकार्थसमर्पणे न समर्थम्, अतो यथाश्रुतार्थ एव प्रामाण्यं श्रुतेर्मन्तव्यमिति भावः । **क्रियाशक्ति-**

प्रधान इति। इन्द्रत्वेन देवत्वात्तथेति भावः। **अनेन मध्यमाधिकारिणामिति**। **प्रमाणरूपबलदेवपराणामपि** युगपदङ्गीकारेणेति भावः। अत एवैतादृशानामधिकारिणामनन्यत्वभङ्गोपि नेत्याहुः **अन्यथेति**। आवेशाभाव इत्यर्थः। तेनैव तेषामङ्गीकारान्न तद्भङ्ग इति भावः। **अद्भुतविक्रम** इत्यस्य तात्पर्यान्तरमाहुः **केवलार्थपराणामिति**। अत्रायमर्थः। अद्भुतं हि लौकिकोपपत्तिरहितं मनस उल्लासकं भवति। प्रकृते वेदरूपरामस्य विक्रमः क्रियाशक्तिफलरूपो विचित्रः स्वर्गादिस्तन्निरूपकस्य वेदस्य श्रुतितात्पर्याविदुषां यथाश्रुतार्थपराणामुपयोगः। वस्तुतस्तु स्वर्गशब्देन 'यन्न दुःखेन सम्भिन्न'मिति वाक्यादात्मसुखमेवोच्यत इति तत्त्वनिबन्धे विस्तृतं पितृचरणैरिति तात्पर्यविदन्यभजनराहित्येन प्रभुमेव भजेत्। तथा च केवलार्थपराणामित्यस्य यथाश्रुत्यर्थपराणामित्यर्थो वेदपक्षे। भगवत्पक्षे तु स्वप्रयोजनपराणाम्, न तु निरुपधिभगवत्पराणामित्यर्थः। अत्र स्वरक्षा कामसुखं च स्वप्रयोजनम्। एवं सत्यधिकारिभेदेन भजनभेदात्फलभेदोपीति तदुपपत्त्यर्थमुभयरूपेण क्रीडेति भावः। विपरीते बाधकमाहुः **अन्यथेति**। उभयरूपेणैतल्लीलाया अकरणे शङ्खचूडवधः स्त्रीणां स्वप्रयोजनसमर्पणं चेति कार्यद्वयमेकेनैव रूपेण न सम्भवतीति तद्रक्षार्थं रूपान्तरं प्रकटनीयं स्यादित्यर्थः। नामलीलायां शब्दप्राधान्यं मत्वा पक्षान्तरमाहुः **वेदे वेति**। यदि साधनरूपेण यथाश्रुतार्थपराणामर्थनिरूपणं फलरूपेण च तात्पर्यविदुषामितरनिराकरणं न कुर्यात्तदा 'हिंसायां यदि रागः स्याद्यज्ञ एव न चोदने'ति वाक्या'त्तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायत' इति वाक्याच्च यागादिविधीनां 'पञ्च पञ्चनखा भक्ष्या' इति वाक्यस्य तदितरभक्षणनिषेधपरत्ववद्यागातिरिक्तकर्मनिषेधपरत्वमेव सिध्यति, न तु यागविधानपरत्वम्। अकरणे प्रत्यवायश्रवणादवश्यकर्तव्यताकत्वविधानपरत्वं चेत्येकस्यैव विधेः स्वार्थपरत्वं स्वार्थातिरिक्तनिषेधपरत्वं चेति द्विगुणा वृत्तिः स्यादित्यर्थः ॥ १९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'एवं मनुष्यनाट्यग्रहणेपि न तव केनाप्यंशेन च्युतः' इति सूचयन् सम्बोधयति–हे अच्युत ! ते तव दर्शनादेव हेतोः सद्य एव ब्रह्मदण्डात् ब्राह्मणशापादहं विमुक्तस्तदेतन्नाश्चर्यमिति शेषः। एतदेव कैमुत्यन्यायेन स्पष्टयति—यन्नामेति। यस्य तव नाममात्रमेव गृह्णन् उच्चरन्पुमान् अखिलान् श्रोतॄनात्मानं च सद्य एव पुनाति, तस्य तव पदा स्पृष्टोऽहं पूत इति किं पुनर्वक्तव्यमित्यन्वयः। तस्मिन्नर्थे शास्त्रप्रसिद्धिं सूचयति—हीति ॥१७॥ इत्येवं सुदर्शनो विद्याधरः दाशार्हं कृष्णमनुज्ञाप्य स्पृष्ट्वा परिक्रम्याभिनन्द्य च दिवं स्वर्गं यातः गतः। नन्दश्च कृच्छ्रात् कष्टान्मोचितो बभूव ॥ १८ ॥ हे नृप ! व्रजौकसो गोपास्तत्पादस्पर्शमात्रेण सर्पान्नन्दस्य, शापात् सुदर्शनस्य च मोक्षलक्षणं कृष्णस्यात्मवैभवं स्वकीयमसाधारणं प्रभावं निशाम्य दृष्ट्वा विस्मितं चेतो येषां ते तथाभूतास्तस्मिन्नम्बिकावने नियमं पूजादिकं समाप्यादरयुक्तास्तदेव वैभवं कथयन्तस्ततस्थानात् पुनर्व्रजं प्रत्याययुरित्यन्वयः ॥१९॥ अथ शङ्खचूडवधात्मकं भगवच्चरितान्तरं सप्रसङ्गं निरूपयति—कदाचिदिति। अथेति लीलान्तरे। गोविन्दो रामश्च वने रात्र्यां व्रजयोषितां मध्यगौ सन्तौ विजह्रतुरित्यन्वयः। एवं निर्भयतया विहारे सामर्थ्यमाह—अद्भुतविक्रम इति द्वयोर्विशेषणम् ॥ २० ॥

अन्वितार्थप्रकाशिका

ब्रह्मेति अर्द्धम् ॥ हे अच्युत ! ते तव दर्शनादेव हेतोः सद्य एव ब्रह्मदण्डात् ब्राह्मणशापादहं विमुक्तः ॥ १७ ॥ यदिति ॥ यस्य तव नाममात्रमेव गृह्णन् उच्चारयन्नेव पुमान् अखिलान् इत्यधिकारानपेक्षा श्रोतॄन् किमुतात्मानं चात्तत्संबन्धिनोऽपि सद्य एवेति कालानपेक्षा पुनाति। तस्य तव पदा स्पृष्टोऽहं पूत इति किं पुनर्वक्तव्यम् ॥ १८ ॥ इतीति ॥ इत्येवं सुदर्शनो विद्याधरः दाशार्हं कृष्णमनुज्ञाप्य पृष्ट्वा परिक्रम्याभिनन्द्य च दिवं स्वर्गं यातः नन्दश्च कृच्छ्रात्कष्टान्मोचितो बभूव ॥ १९ ॥ निशम्येति ॥ हे नृप ! व्रजौकसो गोपाः तत्पादस्पर्शमात्रेण सर्पान्नन्दस्य शापात्सुदर्शनस्य च मोक्षलक्षणं कृष्णस्यात्मवैभवं स्वकीयमसाधारणं प्रभावं निशम्य दृष्ट्वा विस्मितं चेतो येषां ते तथाभूतास्तस्मिन्नम्बिकावने नियमं तीर्थे त्रिरात्रवासपूजादिकं समाप्यादृता आदरयुक्तास्तदेव वैभवं कथयन्तस्ततस्थानात्पुनर्व्रजं प्रत्याययुः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्य ते तव पदास्पृष्टो नरः पवित्रो भवेत्तत्र किं भूयो वक्तव्यम् ॥ १७-१८ ॥ तदा तस्मिन्काले आत्मवैभवं स्वप्रतापं निशम्य दृष्ट्वा तच्चरित्रं कथयन्तः ततोऽम्बिकास्थानात् पुनर्व्रजं आययुः ॥ १९ ॥ इदानीमन्यच्चरित्रमाह ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ब्रह्मदण्डादिति ॥ हे अच्युत, ते तव, दर्शनात्, अहं सद्यः ब्रह्मदण्डाद्ब्रह्मशापात्, विमुक्तः। इत्येतन्न चित्रमिति शेषः। एतदेव कैमुत्यनयेन स्पष्टयति। यन्नाम यस्य तव नाममात्रमेव, गृह्णन्नुच्चारयन् पुमान्, आत्मानं अखिलान् श्रोतॄंश्चापि, जनान् सद्यः एव पुनाति, हि तस्य तादृशप्रभाववन्नाम्नः, ते तव, पदा पादेन, स्पृष्टः अहं, किं भूयः शापाद्विमुक्तः स्यां कियदेतत्।१७। इतीति ॥ इतीत्थं अनुज्ञाप्याज्ञां गृहीत्वा, दाशार्हं श्रीकृष्णं, परिक्रम्य प्रदक्षिणीकृत्य, अभिवन्द्य प्रणामं कृत्वा च, सुदर्शनः, दिवं स्वर्गं यातः स्वर्गं प्रति ययावित्यर्थः। नन्दः कृच्छ्रात् सर्पग्रासात्, मोचितश्च ॥ १८ ॥ निशम्येति ॥ ततः व्रजौकसो गोपाः,

कृष्णस्य श्रीकृष्णस्य, स चासावात्मवैभवश्च तमनितरसाधारणं प्रभावमित्यर्थः। निशाम्य दृष्ट्वा, विस्मितं चेतो येषां तथाभूताः सन्तः, तस्मिन्नम्बिकावने, नियमं व्रतं, समाप्य, आद्दता आदरयुक्ताः तत् श्रीकृष्णवैभवमेव, कथयन्तः सन्तश्च हे नृप, पुनः व्रजं प्रति, आययुः ॥ १९ ॥ प्रागुन्मत्तमहेर्देहाद्विमोच्यैव सुदर्शनम्। कृष्ण उन्मादिनं तद्वच्छङ्खचूडं ततोऽबधीत्। अथ शङ्खचूडवधस्तच्छिरोमण्यपहारात्मकं कृष्णकर्म च प्रस्तौति कदाचिदित्यादिना यावदध्यायसमाप्ति ॥ कदाचिदिति ॥ अथ कदाचित्, अद्भुतविक्रमः, एतद्रामकृष्णयोरुभयोरपि विशेषणम्। गोविन्दः श्रीकृष्णः, रामो बलश्च, उभौ वने रात्र्यां, व्रजयोषितां, मध्यगौ मध्यगतौ सन्तौ, विजह्रतुः। क्वचित्तु मध्ये गोव्रजयोषितामिति पाठो दृश्यते तत्पक्षे गवां व्रजस्त्रीणां च मध्ये विजह्रतुश्चिक्रीडतुः। अस्मिन्पक्षे वक्ष्यमाणकथाविचारे तदानीं तत्र गोसम्बन्धश्चिन्त्यः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

निशम्येति : १०.३५.१९.

निशाम्य वैभवं श्रैशं निशम्य च तदास्यतः। व्रजस्थानां व्रजे भूयो वासेहाऽऽसीदिति क्षमम् ॥ ३७ ॥

कदाचिदिति : १०.३४.२०.

अशत्रुमुखसंस्पर्शे सदानन्दे विराजिते। निरामयाभियुक्तं तद्वृत्तिभिर्वर्तनं प्रभोः ॥ ३८ ॥
कृत्वाऽहिनिर्दलनमाप्तसुदर्शनश्रीर्योगी स्वयोगकलिताऽखिलवृत्तिजालः।
रात्रौ वने च विहरेदभयं मनोज्ञे सुव्यक्तमेतदजनीश-सरामकेल्या ॥ ३९ ॥
सुखस्थितिरहेर्दत्ता नाहिपस्य ममांशतः। नैव मे त्वग्रजह्रदीत्यनेनारभत प्रभुः ॥ ४० ॥

कृष्णप्रिया

हे अच्युत ! आज मैं आप के दर्शनों से निर्मुक्त हुआ। जो भक्त आप का नाम लेता है वह अपने को और जिनको श्रवण कराता है उन श्रवण करने वालों को भी तत्क्षण पवित्र कर देता है। वैसे समर्थ श्रीहरि के श्रीचरणों का मुझे स्पर्श मिला और मैं पवित्र हो जाऊँ उसमें कहना ही क्या है ॥ १७ ॥ श्रीशुकाचार्य जी ने कहा राजन् ! इस प्रकार सदा सेव्य श्रीकृष्णचन्द भगवान की आज्ञा प्राप्त कर भगवान की प्रदक्षिणा कर, और दण्डवत् प्रणाम कर विद्याधर नाम के लोक में गया और श्री नन्दबाबाजी कष्ट से मुक्त हुए ॥ १८ ॥ राजन् परीक्षित ! भगवान श्रीकृष्णचन्द्र जी की स्वरूप महिमा को देखकर समस्त व्रजजन आश्चर्यचकित चित्त बन गए। पुनः जो व्रताङ्ग नियम लिए थे उनको समाप्त कर अत्यंत आदर पूर्वक भगवान के अद्भुत चरित्रों का गान करते हुए व्रज की ओर पधार गए ॥ १९ ॥ राजन् ! अन्य पूर्वा अनन्य पूर्वाओं के रास करने के अवसर प्रतिबन्ध के कारण और यह धर्म विरुद्ध कार्य है ऐसा मानकर रासोत्सव से दूर रही थीं उन गोपीजन को माहात्म्य ज्ञान हुआ और भगवान के रासोत्सव की ईच्छा हुई तब अन्तर्यामी भक्त मनोरथ परिपूरक भगवान शब्द ब्रह्म श्रीबलभद्रजी को साथ लेकर प्रायः वसन्त समय वन में पधारे इस प्रसङ्ग का निरूपण करते हैं—कि वसन्त के समय अद्भुत पराक्रम वाले परब्रह्म श्रीगोविन्द और शब्दब्रह्म श्रीबलभद्र जी, गोव्रज में निवास करने वाली गोपियाँ के साथ रात्री में क्रीडा कर रहे थे ॥ २० ॥

उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः। [1]अलङ्कृतानुलिप्ताङ्गौ स्रग्विणौ विरजाम्बरौ[2] ॥ २१ ॥
निशामुखं मानयन्तावुदितोडुपतारकम्। मल्लिकागन्धमत्तालि जुष्टं कुमुदवायुना ॥ २२ ॥
जगतुः सर्वभूतानां मनःश्रवणमङ्गलम्। तौ कल्पयन्तौ युगपत् स्वरमण्डलमूर्च्छितम्[3] ॥ २३ ॥
गोप्यस्तद्गीतमाकर्ण्य मूर्च्छिता नाविदन् नृप। [4]स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः ॥ २४ ॥

कवंमक्षमा

अन्वयः—बद्धसौहृदैः, स्त्रीजनैः, ललितम्, उपगीयमानौ, स्वलङ्कृतानुलिप्ताङ्गौ, स्रग्विणौ, विरजाम्बरौ ॥ २१ ॥ उदितोडुपतारकम्, मल्लिकागन्धमत्तालिजुष्टम्, कुमुदवायुना (सेवितं) निशामुखम्, मानयन्तौ ॥ २२ ॥ युगपत्, स्वरमण्डल, मूर्च्छितम, कल्पयन्तौ, तौ, सर्वभूतानाम्, मनःश्रवणमङ्गलम्, जगतुः ॥ २३ ॥ हे नृप ! तद्, गीतम्, आकर्ण्य, मूर्च्छिताः, ततःस्रंसद्दुकूलम्, स्रस्तकेशस्रजम, आत्मानम्, न, अविदन् ॥ २४ ॥

---

[1]. अलं—श्रीधर. वंशी. जीव. वीर. विज. विश्व. रा. शु. सु. ध.। [2]. विरजोऽम्बरौ—श्रीधर. वंशी. जीव. वीर. विज. रा. शु. सु. ध.। [3]. मूर्च्छनं—वीर. ; मूर्च्छना—विज.। [4]. श्लथद्—विज.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

विरजांबराविति। विरजसी निर्मले अम्बरे ययोस्तौ ॥ २१ ॥ किं च। निशाप्रवेशं सत्कुर्वंतौ उदित उडुपस्तारकाश्च यस्मिंस्तत् मल्लिकागन्धेन मत्ता अलयो यस्मिंस्तत् ॥ २२ ॥ अनिबद्धत्वादन्यैर्युगपत्कल्पयितुमशक्यमपि तौ स्वरमंडलस्य मूर्छितं युगपत्कल्पयन्तौ। मनःश्रवणयोर्मंगलं यथा भवति तथा जगतुरगातमिति ॥ २३ ॥ मूर्च्छिता स्तद्गीतलीनचित्ताः श्लथद्भ्रंश्यद्दुकूलं यस्मात्तमात्मानं देहम्। स्रस्ता केशेभ्यः स्रजो यस्य तं च ततो नाविदन् ॥ २४–२५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उपगीयमानौ होलिकोचितगीतिभिर्वर्ण्यमानौ। तत्र हेतुः-बद्धं सौहृदयैरिति। एतेनरामस्यापि पृथक्प्रेयसीगणो लक्ष्यते तद्व्यञ्जितम् "गोप्योन्तरेण भुजयोरपि यत्स्पृहा श्रीः" इति। सर्वमेलस्तु होलिकावसरसङ्घर्षादेवेति ज्ञेयम्। ललितम् चेतोहरम् ॥ २१ ॥ कुमुदवायुना जुष्टमित्यन्वयस्तु "विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च" इतिवदवसेयः ॥ २२ ॥ अनिबद्धत्वात् अन्योन्यं भिन्नत्वात् "क्रमयुक्ताः स्वरा यत्र मूर्च्छना साभिधीयते" इति संगीतरत्नाकरोक्तेः अन्यैः रामकृष्णेतरैः। स्वराणां निषादादीनां सप्तानां मंडलस्यैकीभावस्य वा वृत्तिलक्षणस्य मूर्च्छितं मूर्च्छनामेकविंशति धम्। कदा एकस्मिन् क्षणे। तथा च भरतः-"सप्तस्वरास्त्रयो ग्रामा मूर्च्छना एकविंशतिः" इति, "क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम्। मूर्च्छनेत्युच्यते ग्रामत्रये ता एकविंशतिः ॥" इति संगीतसारोक्तेश्च ॥२३॥ तद्गीतम् ताभ्यां रामकृष्णाभ्यां गीतम् युगपन्मूर्च्छितम्। ततो गानश्रवणात् ॥२४॥

श्रीमज्जीवगोस्वामिकृत वैष्णवतोषिणी

विहारमेवाह। उपेति त्रिकेण। ललितं गाननर्मादिपरिपाटीभिर्मनोहरं यथा स्यात्तथा उपगीयमानौ होरिकोचितगीतिभिर्वर्ण्यमानौ। तत्र हेतुः बद्धं सौहृदं यैरिति। एतेन श्रीरामस्यापि पृथक् प्रेयसीगणो लक्ष्यते। तद्व्यञ्जितं गोप्यन्तरेण भुजयोरपि यत् स्पृहा श्रीरिति। अत एव गोप्यस्तद्गीतमाकर्ण्येति द्वयोरपि गीतस्य तादृशमोहहेतुत्वं वक्ष्यते। सर्वमेलनन्तु होरिकावसरसंघर्षादिति ज्ञेयम् अतो मिथोऽननुसन्धानमपि ॥ २१ ॥ उदितेति। शिशिरान्ते हिमकुज्झटिकापगमादतिशयेन प्राकट्यात्। मल्लिकेति वसन्तप्रवेशात् ॥२२॥ मङ्गळं सुखावहम्। स्वराणां मण्डलं समूहस्तस्य मूर्च्छनां तल्लक्षणं चोक्तं सङ्गीतसारे। "क्रमात् स्वराणां सप्तानामारोहश्चावरोहणम्। मूर्च्छनेत्युच्यते ग्रामत्रये ता एकविंशति"रिति ॥ २३ ॥ गोप्यो यथास्वं तयोः प्रेयस्यः तद्गीतं तयोर्गीतम् आकर्ण्य मूर्च्छिता बभूवुः। ततो हेतोः आत्मानं न स्रंसद्दुकूलमविदन् न च स्रस्तकेशस्रजमविदन् नाविदुरित्यर्थः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं पितरं प्रति स्नेहविशेषप्राकट्यं कृत्वा व्रजं प्रति प्राकट्यं चाकरोदित्याह—कदाचिदित्यादिना यावत्समाप्ति। अथ श्रीनन्दमोचनानन्तरं कदाचिद्वसन्ते गोविन्दो गोपचूडामणित्वेन रसिकशिरोमणिरित्यर्थः, रमयति सुखयति तथा प्रेयसीः प्रति सख्यविशेषेण कृष्णमिति रामः, इति व्रजे सख्यस्यैव प्राधान्यम्, न त्वग्रजत्वस्य, अतः सुखविशेषार्थप्रयोजनविशेषार्थञ्च तस्य तत्र नयनमिति सूचितम्, तच्चाग्रे व्यक्तं भावि, अतएव तस्य गौणत्वात् पश्चान्निर्देशः, अन्वाचये चकारः, अद्भुतोऽलौकिको विक्रमश्चरितं यस्य सः, इदं द्वयोरपि विशेषणम्; यद्वा, रामस्यैव विशेषणम्; शङ्खचूड़वधाय दूरगे कृष्णे व्रजसुन्दरीणां रक्षाकरणात्। ननु ताः कथं तत्र समागता इत्यपेक्षायामाह—मध्यगौ ज्योत्स्नोज्ज्वल-वसन्तरात्र्यां पुण्याहरणाद्यर्थमुपवनोपमे श्रीवृन्दावने संहत्य गतानां व्रजयोषितां सहसा मध्यं गतौ सन्ताविति। ननु तथापि कुतस्तास्तत्र स्थिताः? तत्राह—व्रजयोषितामिति। व्रजयोषित्त्वमेवात्रापि हेतुः, श्रीकृष्णप्रेमभरविशेषस्त्वासामित्यर्थः ॥ २१ ॥ विहारमेवाह—उपेति त्रिभिः। स्त्रिय एव जना लोकास्तैरिति स्त्रीजातीनां प्रायः सुरगानाभिप्रायेण, विशेषतस्तासां गानकौशलम् (भा०१०।३३।९) 'तदेव ध्रुवमुन्निस्य तस्यै मानञ्च बह्वदात्' इत्यादिनोक्तमेव, अतएव ललितं यथा स्यात्तथा समीप एव। तद्वा, तयोरुपगायनत्वेन किंवा कृष्णाचरितोपकरणत्वेन बलदेवचरितगानाद् द्वावेव गीयमानौ। ननु तदग्रजस्य साक्षात् कथमुपगानम्? तत्राह—बद्धं कृष्णे निविड़तया दृढं कृतं सौहृदं यैः, श्रीकृष्णसौहृदानि चैवं स्यादित्यर्थः। यद्वा, श्रीकृष्णेनैव बद्धं सौहृदं प्रेमश्शृंखला येषु तैः, तत्प्रीत्या ललितगानमात्रे दोषाभावादिति भावः। स्वलंकृतानि सुष्ठु विचित्रालंकारभूषितानि अनुलिप्तानि च यथाशोभं गन्धचन्दनादिचर्च्चितान्यंगानि ययोस्तौ, स्रक् अम्बरञ्च निजं रात्रौ यथाशोभमेव वा ज्ञेयम् ॥ २२ ॥ कुमुदानां वायुनेति रात्रौ विकसतां तेषां सम्बन्धेन वायोः शैत्यं सौरभ्यञ्च जुष्टमिति मान्द्यमप्युह्यम्। यद्यपि श्रीवृन्दावनेऽन्यान्यपि विचित्राणि पुष्पाणि सन्ति, तथापि मल्लिका कुमुदयोरत्रोक्तिः, पूर्वोन्नशि विकाशविशेषाभिप्रायेण ॥ २३ ॥ मंगल सुखावहम्, स्वराणां मण्डलं समूहस्तस्य मूर्च्छितं मूर्च्छनाम्; तल्लक्षण चोक्तं संगीतसारे—'क्रमात् स्वराणां सप्तानामारोहश्चावरोहणम्। मूर्च्छनेत्युच्यते ग्रामत्रये ता एकविंशतिः ॥' इति। एवं जगच्चमत्कारकारि—गानविशेषकुशलाभिः श्रीगोपीभिः सह तादृशयोस्तयोर्गानमय एव विहारः, न त्वन्यविध इति दर्शितम्, तत्र च गानं सर्वथा

समाभ्यां द्वाभ्यामेवोत्तमं सिध्यति, ततश्च तासामप्यानन्दविशेषः सम्पद्यत इति। एतदर्थं तथा संगीतविद्यापारंगाणां तासां सगे शेषावतारकत्वाद्गानविद्याचार्य्यस्य श्रीरामस्य तत्सुखविशेषानुभवार्थञ्च तस्य तत्र स्नेहविशेषेण नयनमिति प्रयोजनमेकम्। अन्यच्चाग्रे व्यक्तं भावि ॥ २४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

श्रवणमङ्गलं श्रवणसुखावहम् ॥ २३ ॥ आत्मानं नाविदन्नित्यन्वयः ॥ २४–२८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कथम्भूतौ बद्धं निश्चलं सौहृदं येषां तैः स्त्रीजनैर्ललितं यथा तथा उपगीयमानौ स्वलंकृतावनुलिप्तानि चाङ्गानि ययोः स्रजावनयोःस्त इति तथाभूतौ विरजसी निर्मले अम्बरे वाससी ययोस्तौ ॥ २१ ॥ पुनरपि तयोरेव वर्णनश्लोकाः। निशेति। उदित उडुपश्चन्द्रस्तारकाश्च यस्मिंस्तन्मल्लिकानां गन्धेन मत्तैरलिभिजुष्टं सेवितं स्वहचरितमित्यर्थः। कुमुदगन्धयुक्तेन च वायुना जुष्टं निशामुखं प्रशंसन्तौ ॥ २२ ॥ तौ रामकृष्णौ अनिवद्धत्वादन्यैर्युगपत्कल्पयितुमशक्यमपि स्वरमण्डलस्य मूर्च्छितं युगपत्कल्पयन्तौ मनःश्रवणयोः मङ्गलं यथा तथा जगतुर्गीतवन्तौ स्वरमण्डलमूर्च्छनं षड्जादिस्वरसमुदायस्य मूर्च्छनमारोहणावरोहणप्रकारः ॥२३॥ गोप्य इति। तयोर्गीतमाकर्ण्य मूर्च्छिताः परवशाः ततो हे नृप! आत्मानं देहं न विदुर्नानुसन्दधुः कथम्भूतं स्रंसद्भ्रंश्यत् दुकूलं यस्मात्स्रस्ताः केशेभ्यः स्रजो यस्य तञ्च तञ्च ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विरजाम्बरौ धौतवस्त्रौ ॥ २१ ॥ मल्लिकागन्धास्वादनेन मत्ता अलिनो भ्रमराः यस्मिन् मल्लिकागन्धमत्तालि ॥ २२ ॥ जगतुः गानं कृतवन्तौ कथंकारमिति तत्राह। ताविति स्वरमण्डलमूर्च्छनां सप्तानां स्वराणां मण्डलानां समूहानां मूर्च्छनामेकविंशतिलक्षणां कल्पयन्तौ युगपदेकस्मिन क्षणे। यद्वा मण्डलमावृत्तिलक्षणं सप्तस्वरास्त्रयो ग्रामा एकविंशतिमूर्च्छना इति भरतः।२५।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

बद्धसौहृदैरिति। श्रीरामस्यापि पृथक् प्रेयसीगणो लक्ष्यते। सर्वमेलनन्तु होरिकापर्वत एव ॥ २१–२९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं श्रीकृष्णस्य रासमुक्त्वा सङ्कर्षणस्यापि यत् किञ्चित् कथयन् श्रीगोविन्दस्यापि पुनःपुनरपि रासक्रीडा जातेत्यपि बोधयति—कदाचिदित्यादि। अथ उक्तरासक्रीडानन्तरं गोविन्दः कदाचित् रामः कदाचित्व्रजयोषितां मध्यगौ भूत्वा वने रात्र्यां विजह्रतुः। एकयोक्त्या द्विवचनम् क्रियाया एव, न तु कर्त्रोः, तेन कालभेदः, ज्ञानभेदः, करणभेदश्च। यथा कदाचित् सूर्यः कदाचिच्चन्द्रश्च तमो नाशयत इति नैककालीनत्वं नैकस्थानत्वञ्च नैककरणत्वञ्च, किन्तु समासेन द्वयोस्तमोनाशकनिरुक्तिस्तथेहापि। व्रजयोषितश्च व्रजयोषितश्चेत्येकशेषः। तेन च तासां कृष्णपरिग्रहत्वेन रामपरिग्रहत्वेन च वैजात्यभाजां मध्यगौ। गोविन्दः स्वपरिग्रहाणां मध्यगः, रामश्च स्वपरिग्रहाणामित्यत्रापि एकयोक्त्यैव विशेषणस्य द्वित्वम्, न तु साहचर्यव्यञ्जकम्। तस्मादिह विशेषणद्वित्वं नैकजातीयगोपीनां मध्यवर्तित्वाभिधायकम्, अपि तु विजातीयानामेवेति। एवमुत्तरत्रापि ॥ २१ ॥ उपगीयमानावित्यादि। एकयोक्त्या द्विवचनम्। स्त्रीजनैरित्यत्रापि विजातीयत्वं पूर्ववदनुसन्धेयम्। न तु एकदा, न तु सजातीयैः, स्त्रीजनैर्बद्धसौहृदैरिति विशेषणाद्वैजात्यम्। कृष्णपरिग्रहाः कृष्णंप्रति बद्धसौहृदाः, एवं रामपरिग्रहाश्च रामं प्रति ॥ २३–२४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कदाचिदथ गोविन्द—अथ एतस्य रास–विलासस्यानन्तरं कदाचित् गोविन्दः कदाचिद्रामश्च विजह्रतुः। एकयोक्त्या द्विवचनम् न तु कालस्यैकत्वे स्थलस्यैकत्वे च, कदाचित् सूर्यः कदाचित् चन्द्रस्तमांसि नाशयत। किम्भूतौ? व्रजयोषितां मध्यगौ। गोविन्दः स्वपरिग्रहाणां मध्यगः, रामश्च स्वपरिग्रहाणामित्यत्राप्येकयोक्त्या द्विवचनम्। एवमुत्तरत्रापि ॥ २१ ॥ स्त्रीजनैर्बद्धसौहृदैरिति—काश्चिद् गोविन्दे बद्धसौहृदाः, काश्चिद् रामे या बद्धसौहृदाः, तास्तु सुरयोषितः (भा०१०।१।२३) "सम्भवन्त्वमरस्त्रियः" इति तदन्तर्गता एव काश्चिदेता इति बोद्धव्यम् ॥ २३–२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निशामुखं निशारम्भं सत्कुर्वन्तौ। उदित उडुपस्तारका च यत्र तत्। कुन्दवायुना युक्तं युगपदेकदैव स्वरमण्डलानां मूर्च्छितं मूर्च्छनामनिबद्धत्वात् कल्पयितुमशक्यमपि शक्यमिव कल्पयन्तौ ॥ २२–२३ ॥ गोप्यः यथास्वं तयोः प्रेयस्यः। आत्मानं देहं स्रंसद्दुकूलं स्रस्ताः केशेभ्यः स्रजो यस्य तं नाविदन् नानुसन्दधुः ॥ २४–२५ ॥

गूढार्थदीपिनी

कदाचित् होलिकावसरे ॥ २१ ॥ उपेति त्रयम् । विरजोऽम्बरौ निर्मलवस्त्रौ । उदितः उडुपः चन्द्रः तारकाश्च यस्मिन् तत् कुमुद वायुना जुष्टमिति विभज्य अन्वेति मल्लिकागन्धेन मत्ता अलयो यत्रेति । अल्यन्तं पृथक् पदं वा मुखविशेषणम् । मङ्गलं सुखप्रदं यथा स्यात्तथा मूर्छितम् आलापप्रकारं जगतुः गानं चक्रतुः ॥ २२–२४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विरजसी अम्बरे ययोस्तौ विरजोऽम्बरौ विजह्रतुरिति पूर्वेणान्वयः ॥ २१ ॥ किञ्च उदितः उडुपस्तारकाश्च यस्मिंस्तत् मल्लिकागन्धेन मत्ता अलयो यस्मिंस्तत् कुमुदगन्धयुक्तेन वायुना जुष्टम् एवं भूतं निशामुखं रात्रिप्रवेशं मानयन्तौ सत्कुर्वन्तौ ॥२२॥ स्वरमण्डलमूर्च्छितं षड्जादिस्वरमण्डलमूर्च्छितम् युगपत्कल्पयन्तौ अनिबद्धत्वात् अन्यैर्युगपत् कल्पयितुमशक्यमपि युगपत्समर्थयन्तौ मनः श्रवणयोर्मङ्गलं यथा भवति तथा जगतुः अगायताम् ॥ २२ ॥ हे नृप ! गोप्यः तत्तयोर्गीतमाकर्ण्य मूर्च्छिताः गीताकृष्टचित्ताः ततः स्रंसत् भ्रश्यत् दुकूलं यस्मात् स्रस्ताः केशेभ्यः स्रजा यस्य तमात्मानं देहं नाविदन् ॥ २४–२५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वलङ्कृतान्यनुलिप्तानि गन्धादिना चाङ्गानि ययोस्तौ । विरजोऽम्बराविति सरलः पाठः । विरजाम्बराविति गतम् ।२१। मल्लिकागन्धेन मत्ता अलयो भृङ्गास्तैर्जुष्टम् । जुष्टमिति शब्दानुशासनमित्यत्रत्यशब्दशब्दवदुत्कृष्टं कुमुदवायुनेत्यनेनाप्यन्वेति । यद्वा मल्लिकागन्धेन मत्ता अलयो यस्मिंस्तदिति निशामुखविशेषणम् । जुष्टमिति वायुमात्रान्वयीति । उदित उडुपश्चन्द्रस्तारका नक्षत्राणि च यस्मिंस्तन्निशामुखं प्रदोषं मानयन्तो विजहुरित्यतीतेनान्वयः । जगतुरित्युत्तरेण वाऽन्वयः ॥ २२ ॥ तौ युगपत्स्वरमण्डलस्य सप्तस्वरसङ्घस्य मूर्छनां कल्पयन्तौ सा च समस्वरास्त्रयो ग्रामा एकविंशतमूर्छना इति भरतभारत्या ज्ञेया । कल्पयन्तौ सर्वभूतानां मनः श्रवणमङ्गल यथा तथा जगतुः ॥ २३ ॥ तन्मूर्छनासहितं गतिमाकर्ण्य मूर्छिता मोहं प्राप्तास्तथा श्लथन्ति दुकूलानि यस्मात्स तं तथा स्रस्ताः केशाः स्रजश्च यस्मात्तं चात्मानं नाविन्दन्न व्यजानन् ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्र शब्दप्राधान्यं निरूपयितुमाह । उपगीयमानौ ललितमिति । सर्वाः स्त्रियः अन्तःस्नेहसंबद्धाः भगवतो गुणगानपराः जाताः तासामाभ्यन्तरो बाह्यश्च भावो निरूपितः एवं युक्ताभिः सह स्वस्य सर्वोत्कृष्टस्यैव भावो युक्त इति उभयोः षड्गुणान् निरूपयति । अलंकृतेति सार्धैस्त्रिभिः । आदावलंकृतौ सर्वाभरणभूषितौ शब्दे शिक्षादयः अर्थे देशादयश्चोत्कृष्टालंकाराः तदभावे तत्र रतिर्न स्यात् ततः अनुलिप्ताङ्गौ चन्दनादिभिः सद्वासनाव्यतिरेकेणोभयत्रापि रतिर्न स्यादिति अङ्गेष्वपि सर्वेषु सद्वासनार्थमङ्गपदम् । स्रग्विणौ मालायुक्तौ कीर्त्तिरपि सहायत्वेनोभयत्राप्यपेक्ष्यत इति विरजे अम्बरे ययोरिति सर्वदोषाभावः शुद्धा माया चापेक्ष्यत इति ॥ २१ ॥ कर्मणां रात्रिरेव प्रधानमिति सन्ध्यायामेव सन्ध्याग्निहोत्रादिकमिति निशामुखस्य सन्माननं तं कालं गुणवन्तं वर्णयति प्रकृतोपयोगाय । उदितोडुपतारकमित्यादिना । उदितः उडुपः ताराश्च यस्मिन् चन्द्रोदयः पर्वसूचकः नक्षत्रोदयो मेघाभावसूचकः प्रमाणं चन्द्रः फलं नक्षत्राणीत्यपि पुण्यो वायुः फलसूचक इति तं वर्णयति । कुमुदवायुना जुष्टमिति । कुमुदसम्बन्धी वायुः शीतलो मन्दश्च भवति निशामुखस्य विशेषणम् उत्तमाधिकारिभिरपि सेवितमित्याह । मल्लिकागन्धमत्तालिजुष्टमिति मल्लिकागन्धशोभनवासनारूपः तेनच मत्ताः इतरविस्मारकाः तादृशाः अलयः षट्पदत्वात् सर्वज्ञाः तैः सेवितमिति एवं त्रिधा काल उत्तमो निरूपितः तादृशं कालं मानयन्तौ समीचीनोऽयमिति स्तुवन्तौ अनेनाङ्गेऽपि फलश्रुतिर्युक्तेति निरूपितम् ॥ २२ ॥ तदा सर्वप्राणिनामेव मनःश्रवणयोः मङ्गलं जगतुः गानं कृतवन्तो पर्यवसानोत्तमत्वात् मनोमङ्गलं स्वरूपोत्तमत्वात् श्रवणमङ्गलमिति तत्र गाने विशेषमाह । तौ कल्पयन्ताविति । युगपदेव स्वरमण्डलस्य स्वरसमूहस्य मूर्च्छितं मूर्च्छनां कल्पयन्तौ इति द्वयोरेकमुखता निरूपिता मूर्च्छनाव्यतिरेकेण न मनोलीनं भवति । लयव्यतिरेकेण च सर्वात्मना तत्परता न भवतीति तथा करणम् ॥ २३ ॥ ततः तस्य फलमपि जातमित्याह । गोप्य इति । तयोर्गीतं तादृशमाकर्ण्य मूर्च्छिताः सत्य आत्मानं नाविदन् मूर्च्छायामपि वासना तिष्ठतीति नाविदन्निति तदभावायोक्तं नृपेति सम्बोधनं गीतरसाभिज्ञत्वाय यो भावः सर्वथा न विस्मृतो भवति तं वर्णयति । स्रंसद्दुकूलमिति । दुकूलमधोवस्त्रं तदप्यधःपततीव स्रस्ताः केशाः तेषु स्रजश्च यासां देहे अतिविस्मरणं निरूपितम् ॥ २४ ॥

श्रीसुबोधिनी–सारः

बद्धं सौहृदं यैस्तैः स्त्रीजनैर्ललितं सुन्दरं यथा भवति तथोपगीयमानौ स्वलंकृतौ अनुलिप्तान्यंगानि ययोस्तौ च तौ च स्रग्विणौ वनमालिनौ शुद्धवस्त्रौ ॥ २१ ॥ उदिता उडुपश्चंद्रस्तारका यस्मिन् तत् मल्लिकाया गन्धेन मत्ता अलयो भ्रमरा यस्मिन् कुमुदयुक्तेन वायुना जुष्टं सेवितं निशाया रात्र्या मुखं मानयन्तौ प्रशंसन्तौ ॥ २२ ॥ सर्वभूतानां मनःश्रवणयोर्मंगलं यथा भवति तथा

स्वरमंडलेन मूर्छितं युगपत्कल्पयंतौ समकालं रचयंतौ तौ जगतुः गानं चक्रतुः ॥ २३ ॥ तयोर्गीतं तदिति प्रसिद्धं चाकर्ण्य श्रुत्वा मूर्छिता मोहिता गोप्यः स्रंसत् गलितं दुकूलं वस्त्रं यस्मात् तं स्रस्ताः पतिताः केशेभ्यः स्रजो यस्य तं चात्मानं नाबोधन् हे नृप ततो गानानन्तरम् ॥ २४ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

विरजाम्बरावित्यत्र, **शुद्धा माये**त्यादि । वेदमार्गे हि द्विधा प्रवृत्तिः । कर्मजडत्वेनैका, भगवदिच्छां ज्ञात्वा भगवत्परत्वेन चान्या । उभयत्रापि माया सहकारिणी । तत्र रजस्तमोयुक्ताऽऽद्ये । एतद्रहितो द्वितीय इति तथेति भावः ॥ २१ ॥ **उदितोडुपतारक**मित्यत्र, **प्रमाणं चन्द्र** इत्यादि । अत्रायं भावः । अत्र हि रामप्रभ्वोर्लीलोच्यते । तौ च प्रमाणफलरूपौ । सामग्र्यपि तद्रूपैवेत्युच्यते । तथा च रसप्रमापकत्वादिन्दुस्तथा । 'सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणी'ति श्रुतेः सुकृतफलानुभवसामयिकतेजोरूपत्वादुडूनां तदुदयोक्त्या फलोदयो ज्ञाप्यत इति । **मत्तालिजुष्ट**मित्यत्र, **षट्पदत्वा**दिति । गत्यर्थशब्दानां ज्ञानार्थत्वाज्ज्ञानसाधनषट्कवत्त्वमत्र सूच्यते । तानि दर्शनरूपाण्येवेति सर्वज्ञत्वम् ॥ २२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तावेव वर्णयति—बद्धं सौहृदं प्रेम यैस्तैः स्त्रीजनैर्ललितं यथा तथा उपगीयमानाविति । स्वलङ्कृतौ च तौ अनुलिप्तानि चन्दनेनानुलिप्तानि अङ्गानि ययोस्तौ च, स्रग्विणौ वनमालाधरौ, विरजसी विरजस्के निर्मले अम्बरे वाससी ययोस्तौ ॥ २१ ॥ तथा उदितः उडुपश्चन्द्रः तारकाश्च यस्मिंस्तत्, मल्लिकानां गन्धेन मत्तैरलिभिर्जुष्टं सेवितं सहचरितमित्यर्थः, कुमुदगन्धयुक्तेन वायुना च जुष्टं निशामुखं निशाप्रवेशं मानयन्तौ प्रशंसन्तौ ॥ २२ ॥ तौ रामकृष्णौ अनिबद्धत्वादन्यैर्युगपत्कल्पयितुमशक्यमपि स्वरमण्डलस्य स्वरसमूहस्य मूर्च्छितं आरोहणावरोहणप्रकारं युगपत्कल्पयन्तौ सर्वभूतानां श्रोतॄणां मनःश्रणयार्मङ्गलं सुखं यथा भवति तथा जगतुः अगायतामित्यन्वयः ॥ २३ ॥ तयोस्तद्गीतमाकर्ण्य श्रुत्वा मूर्च्छिता मोहं गता गोप्यस्ततस्तस्मात् मोहात् हे नृप ! स्रंसन् भ्रश्यन् दुकूलं यस्मात्स्रस्ताः भ्रष्टाः केशेभ्यः स्रजस्तथाभूतमात्मानं देहं नाविदन् देहात्पतद्वस्त्राद्यनुसन्धानं न कृतवत्य इत्यर्थः ॥ २४ ॥

अन्वितार्थप्रकाशिका

कदाचिदिति ॥ अथ कदाचित् शिवरात्र्यनन्तरं होलिकापूर्णिमायाम् अद्भुतविक्रमः गोविन्दो रामश्च वने रात्र्यां व्रजयोषितां मध्यगौ सन्तौ विजह्रतुः । एतेन बलदेवस्यापि पृथक् प्रेयसीगणोऽभूदिति सूचितम् । सर्वमेलस्तु होलिकावसरे तथा व्यवहारात् ॥ २१ ॥ उपगीयमानाविति त्रयम् ॥ बद्धं सौहृदं प्रेम यैस्तैः स्त्रीजनैर्ललितं यथा तथा उपगीयमानाविति स्वलंकृतौ च तौ चन्दनेनानुलिप्तानि अङ्गानि ययोस्तौ च स्रग्विणौ वनमालाधरौ विरजसी विरजस्के निर्मले अम्बरे वाससी ययोस्तौ ॥ २२ ॥ निशेति । उदितः उडुपश्चन्द्रः तारकाश्च यस्मिंस्तत् वसन्तप्रवेशात् मल्लिकानां गन्धेन मत्तैरलिभिर्जुष्टं सेवितं सहचरितमित्यर्थः । कुमुदगन्धयुक्तेन वायुना च जुष्टम् । यद्वा । मल्लिकागन्धेन मत्ता अलयो यत्रेति भिन्नं पदम् । निशामुखं निशाप्रवेशं मानयन्तौ प्रशसन्तौ ॥ २३ ॥ जगतुरिति ॥ तौ रामकृष्णौ अनिबद्धत्वादन्यैर्युगपत्कल्पयितुमशक्यमपि स्वरमण्डलस्य स्वरसमूहस्य मूर्छितम् एकविंशति भेदम् आरोहणावरोहणप्रकारं युगपत्कल्पयन्तौ सर्वभूतानां श्रोतॄणां मनःश्रवणयोर्मङ्गलं सुखं यथा भवति तथा जगतुः अगायताम् ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वलंकृतौ धृतभूषणौ च तौ अनुलिप्तांगौ च विरजसीशुद्धे अम्बरे वस्त्रे ययोस्तौ ॥२१॥ निशामुखं रात्र्यारंभं मानयन्तौ प्रशन्सन्तौ तच्च निशामुखं कीदृशं उदिताः उडुपश्चंद्रः तारकाश्च यस्मिंस्तत् मल्लिकागंधेन मत्ता अलयो यस्मिंस्तत् कुमुदगन्धवायुनाजुष्टं ॥२२॥ युगपत् एककालाऽवच्छिन्नतया अन्यैरालापयितुमशक्यमपि तौ स्वरमंडलस्य स्वरकलापस्य मूर्छितमेकविंशति मूर्छनाः युगपत् कल्पयन्तौ मनः श्रवणयोः मंगलं सुखावहं यथा तथा जगतुः गानं चक्रतुः ॥ २३ ॥ ततो मूर्च्छिताः तस्मिन्निरुद्धामानसाः सस्रत् च्यवत् दुकूलं यस्मात्त स्रस्ताः पतन्त्यः केशेभ्यः स्रजो यस्य तं आत्मानं स्वदेहं नाविदन् ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तौ विशिनष्टि ॥ उपीयमानाविति ॥ बद्धं सौहृदं निश्चलः सुहृद्भावो यैस्तैः, स्त्रीजनैः, ललितं यथा तथा, उपगीयमानौ, स्वलंकृतान्यनुलिप्तानि चाङ्गानि ययोस्तौ, स्रजावनयोः स्त इति तथाभूतौ, विरजसी निर्मले अम्बरे वाससी ययोस्तौ ॥ २१ ॥ निशेति ॥ उदित उडुपश्चन्द्रस्तारकाश्च यस्मिंस्तत्, मल्लिकानां गन्धेन मत्ता येऽलयो भ्रमरास्तैर्जुष्टं सेवितं, कुमुदवायुना कुमुदगन्धयुक्तेन पवनेनापि जुष्टं, निशामुखं, मानयन्तौ प्रशंसन्तौ ॥ २२ ॥ जगतुरिति ॥ अन्यैर्युगपत्कल्पयितुमशक्यमपीति शेषः । स्वरमण्डलमूर्च्छितं, युगपत् कल्पयन्तौ, तौ रामकृष्णौ सर्वभूतानां मनसः श्रवणयोश्च मङ्गलं यथा तथा, जगतुः गीतवन्तौ त्रयाणामेक-

सम्बन्धः । स्वरमण्डलमूर्च्छितं नाम षड्जादिस्वरसमुदायस्यारोहणावरोहणप्रकारः ।। २३ ।। गोप्य इति ततः हे नृप, गोप्यः तद्गीतं तयोर्गीतं आकर्ण्य, मूर्च्छिताः परवशाः सत्यः, स्रंसत् संभ्रश्यत् दुकूलं यस्मात्तं, स्रस्ताः केशेभ्यः स्रजो यस्य तं, आत्मानं देहं, न अविदन् ।। २४ ।।

कृष्णप्रिया

हृदय में स्नेह से भरी हुई गोपियाँ भगवान की मनोहर लीलाओं का गान कर रही थी दोनों भैया ने उत्तम आभूषण धारण किए थे। श्री अङ्ग पर चन्दन का लेप किया था, वन माला धारण की थी और दिव्य वस्त्र धारण किए थे ।।२१।। राजन् ? सन्ध्या का मङ्गल काल था। अग्निहोत्री ऋषिवृन्द के सन्ध्यावदन और अग्निनारायण का होम विधि से अर्चन किए जाते हैं वैसा पुण्य और पर्वकाल था, उस काल को निशामुख कहा जाना है। ऐसा कल्याण कर पुण्यकाल था, तारापति और ताराओं का उदय होने जा रहाथा, निशा विकास शील कुमुदों की सुगन्ध वायु फैल रही थी, मल्लिका की सुगन्ध से मद भरे भौंरे गुंजन करते थे ऐसे रमणीय वसन्त सौरभ सुवासित समय को ध्यान में लेकर समस्त प्राणियों के मन और श्रवणों का मङ्गल करने वाला एवं स्वर समूह की एक ही साथ मूर्च्छना करते हुए दोनो भैया कल मधुर वेणु गान कर रहे थे ।। २२ ।। हे राजन् ? हृदयंगम, वासना से मुक्त करने वाला मङ्गलवेणु नाद का श्रवण कर समस्त गोपियाँ मूर्च्छित हो गई, वासना मुक्त बन गई अङ्गलता से दुकूल वस्त्र सरक गए उसका भी अनुसंधान न रहा अलकावली में गूंथी हुई कुसुम स्रजें भी सरक रही उनका भी अनुसधान नहीं रहा ।। २४ ।।

एवं विक्रीडतोः स्वैरं गायतोः सम्प्रमत्तवत् । शङ्खचूड इति ख्यातो धनदानुचरोऽभ्यगात्[1] ।।२५।।
तयोर्निरीक्षतो [2]राजंस्तन्नाथं प्रमदाजनम् । क्रोशन्तं कालयामास दिश्युदीच्यामशङ्कितः ।।२६।।
क्रोशन्त कृष्ण रामेति विलोक्य स्वपरिग्रहम् । यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावताम् ।।२७।।
मा भैष्टेत्यभयारावौ शालहस्तौ [3]तरस्विनौ । आसेदतुस्तं तरसा त्वरितं गुह्यकाधमम् ।।२८।।

कर्दमक्षमा

अन्वयः—एवम्, तयोः, विक्रीडतोः, च, सम्प्रमत्तवत्, स्वैरम्, गायतोः, शङ्खचूड, इति, ख्यातः, धनदानुचरः, अभ्यगात् ।। २५ ।। राजन्! तयोः, निरीक्षतोः क्रोशन्तम्, तन्नाथम्, प्रमदाजनम्, अशङ्कितः, उत्तराम्, दिशि, कालयामास ।।२६।। हे कृष्ण! हे राम! इति, क्रोशन्तम्, स्वपरिग्रहम्, यथा, दस्युना, ग्रस्ताः, गाः, (तथा) विलोक्य, भ्रातरौ, अन्वधावताम् ।।२७।। मा भैष्ट, इति, अभयारावौ, शालहस्तौ, तपस्विनौ, (तौ) तम्, गुह्यकाधमम्, तरसा, त्वरितम्, आसेदतुः ।। २८ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

निरीक्षतोर्निरीक्षमाणयोः । तौ नाथौ यस्य तं प्रमदाजनं कालयामास हठात्प्रेरयामास ।। २६ ।। दस्युना व्याघ्रेण ।।२७।। मा भैष्ट भयं मा प्राप्नुतेत्यभयवाचौ ।। २८-३० ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवम् उक्तविधया हे राम कृष्ण अस्मांस्त्रायस्वेति वदन्तं नित्यात्मीयत्वेन स्वीकृतत्वात् । धनदानुचरः कुबेरभृत्यः ।।२५।। तयोः रामकृष्णयोः । क्रोशन्तम् त्राहित्राहीत्युक्त्वा रुदन्तम् निजेशदिशि । कालयामास निजयष्टिचूर्णनेन माययित्वादीचीं दिशं प्रति विद्रावयामासेत्यर्थः । तेन स्पर्शस्तासां नाभूदिति ज्ञेयम् 'यथा गाः' इत्यग्रिमोक्तेः । अशङ्कितो निर्भयः ।। २६ ।। यथा दस्युना ग्रस्ता गास्तथा क्रोशतमाह्वयंतम् । स्वपरिग्रहम् निजस्त्रीजनम् 'दस्यू तस्करशार्दूलौ' इति यादवः ।। २७ ।। माप्नुत भीता मा भवन्त्वित्यर्थः । शालो वृक्षविशेषः । 'तालहस्तौ' इति पाठे तु तालो गीतांगवाद्यविशेषस्तृणराजो वा हस्तयोर्ययोस्तौ तथा । मनस्विनौ अभीतौ "मनस्वी निर्भयोदारस्थिरधीयागिराजसु" इति निरुक्तिः । तरसा शीघ्रं बलेन बलेन वा 'तरसी बलरहसी' इति विश्वः । त्वरितम् धावन्तम् । गुह्यकेषु यक्षेष्वधमं परदारग्राहित्वात् ।। २८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमिति । होरिकोचितमेवं विक्रीडतोर्गायतोश्च । अत एव स्वैरं यथा स्यात्तथा सम्प्रमत्तवच्चेति । भविष्योत्तरविधिना तथा लोकव्यवहारात् । वतिप्रत्ययादन्यो जनो यथा तथैवेत्यर्थः । संशब्दात्तु प्रेममय तद्गीतादि माधुर्येण तत्रापि विशेषत इत्यर्थः । अभ्ययादभ्यगादिति पाठद्वयम् ।। २५ ।। अभियानादेव निरीक्षमाणयोः अनादरे षष्ठी यतोऽशङ्कितः । उदीच्यां दिशीति गुह्यकानां

---

[1] भ्ययात्-प्रा. पा. । [2] रेव-विज. ; राजस्तं तावत्-प्रा. पा. । [3] मन्त्र-विज. ।

तस्यां निवासेन एवं तासां पृथक् पङ्क्तिस्थितत्वावगमाद्धोरिकारीतिरेव स्पष्टा ॥ २६ ॥ स्वपरिग्रहं नित्यात्मीयत्वेनाङ्गीकृतमित्यवश्यरक्ष्यत्वं तदर्थं परमवैयग्र्यादिकञ्च ध्वनितम् । भ्रातराविति मिथः स्नेहादिना तत्रैकमत्यादिकं सूचितम् । एकेनानेकासां कालेन तत्पालकानां व्यग्रत्वेन दृष्टान्तः यथा दस्युना हठादपहरता चोरेण ग्रस्ता विद्राव्यात्मसात् कृता । गा विलोक्य गोपी धावन्ति तद्वदित्यर्थः । एतेनास्पर्शोऽपि व्यञ्जितः ॥ २७ ॥ तरसा जवेन त्वरितं यथा स्यात्तथा । यद्वा । त्वरा युक्तं गुह्यकाधमम् आसेदतुर्निकटे गतौ ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गोप्यः परमविदग्धा इत्यर्थः अतस्तस्य कृष्णस्य गीतम् , ततस्तद्गीता वर्णनात् पश्चादिति निजधैर्य्यरक्षार्थं प्रयत्नाचरणेन किञ्चिद्विलम्बापत्तेः । यद्वा, ततस्तस्माद्गीतादेवेत्यन्यनिरपेक्षस्य तस्यैव मोहानत्वमभिप्रेतम् । हे नृपेति तदभवतावकल्यत तासां धैर्य्यहानौ नानौचित्यमिति भावः ॥ २५ ॥ अधुना तासां गीतैस्तयोरपि मोहस्तत्राधिकोऽजनीति सूचयन्नाह—एवमिति । तासां गीतकौशलेन स्वैरं निरंकुशं परस्परं विशेषेण क्रीड़तोः सतोरनुजाग्रयोः; अतएव संप्रमत्तवत् , वतिप्रत्ययेन तत्त्वतः सम्यक् प्रमत्ततां निरस्यते । विक्रीड़नमेवाह—गायतोरिति । गानस्य स्वैरताहृतमस्त्वेन विश्रृंखलताः; यद्वा, संप्रमत्तवदिति शंखचूड़मत्यानुसारेण तल्लक्षणम् ; स्वैरं विक्रीडतोरिति, अथवा तासां गाने लीनचित्ततया संप्रमत्तवद् गायतोश्च सतोः; संशब्देन च मोहो ताभ्योऽपि विशेषः सूचित एव । तत्र कृष्णस्य मोहस्तासां गीतजन्य–भावविशेषेण, बलदेवस्य तु गीतमाधुर्य्यातिशयेनैव, वतिस्तु विचित्रवासनकानां मुनीनां साक्षादीश्वरस्य तादृशत्वकथनेन संकोचादिति, अतएव तदानीमभ्ययादभिमुखमेवागतः; शङ्खस्तदाकारबृहद्वत्वं चूडायां यस्येत्यन्वर्थसंज्ञा, अतएव ख्यातः प्रसिद्ध इति प्रकटनिजरूपेणैवाभ्ययादिति च सूचितम् । ननु तद्रत्नं कुतस्तेन प्राप्तम् , कतमो वासावित्यपेक्षायामाह—धनदेति । सेवया प्रसन्नेन कुबेरेण दत्तं जात्या यक्षादीनां मध्येऽन्यतरश्च न इत्यर्थः । अतएव धनदेति तस्याप्यन्वर्थसंज्ञत्वमभिप्रेतम् । यद्वा, तेन धनरक्षायां नियुक्तेनानेन चोरयित्वा तद्रत्नं गृहीतम् , अतो गुह्यकत्वात् कुबेरस्य सेवकोऽपि । अकारप्रश्लेषेण—न धनदमनुचरति सेवत इति तया सः, अतो देवपक्षपरित्यागेन दैत्यपक्षत्वप्राप्तया कंसस्य भृत्यतां गत इति ज्ञेयम् ॥ २६ ॥ अभियानादेव निरीक्षमाणयोः, अनादरे षष्ठी । हे राजन्निति—तस्य दुर्बुद्धिवैभवाश्चर्य्येण परमार्त्त्या वा सम्बोधनम् ; राजमानः सन्निति वा संप्रमत्तसादृश्येन, अतएवाशंकितो निर्भयः सन् प्रमदाजनं स्त्रीलोकमिति माद्वेन तत्कालनं न दुःशकमिति भावः । एकवचनाच्छ्रीललितमाधवनाटकोक्तानुसारेण कंसप्रेरणया श्रीराधादेवीमेकावेति बोद्धव्यम् । ततश्च वक्ष्यमाणं (२९ श० श्लो०) 'माभैष्ट' इति, (३१ श० श्लो०) 'स्त्रियः' इति च बहुत्वं गौरवेण, तत्सहचरीणामपि सहकालनेन वा, किंवा मा भैष्टेत्यादिनासामेवाश्वासनादिकमिति ज्ञेयम् । यद्वा, जातावेकत्वम् , ततश्च जनशब्दादपि सर्व्वागोपीरित्यर्थः, विशेषेण प्रकृष्टो मदो गीतादिना प्रेममत्तता यासामिति तासामप्यनवहितत्वं सूचितम् । क्रोशन्तमुच्चैरार्त्तस्वरेण कृष्णं रामं चाह्वयन्तम् । इदमेवाभिव्यञ्जयिष्यते,—कालयामास बलेन बहुलच्छलेन च दूरतश्चालयामास; उदीच्यां दिशीति गुह्यकानां तस्यां निवासेन प्रागात्मगृहे नयनार्थम् । यद्वा, श्रीगोवर्द्धनपूर्व्वदिग्भागे तयोः क्रीड़नेन तस्मादुत्तरस्यां मधुपुर्य्यां कंसान्तिके नयनार्थमिति ॥ २७ ॥ हे कृष्ण हे रामेत्येतत् क्रोशन्तमुच्चैः कीर्त्तयन्तम् । यद्वा, इत्येव भावाह्वयन्तमित्यर्थः । क्रोशनेनैव विशेषेण लाकयित्वेति विवक्षया, किंवा क्रोशनस्याविच्छेदापेक्षया; अतएव वर्तमाननिर्देशोऽपीति । स्वपरिग्रहं निज–प्रियजनमित्यवश्यरक्ष्यत्वम् , तदर्थं परमवैयग्र्यादिकञ्च ध्वनितम् , भ्रातराविति मिथः स्नेहादिना तत्रैकमत्यादिकं सूचितम् ; अनु तत्पश्चादधावताम् ; यथा दस्युना व्याघ्रेण ग्रस्ता दन्तैर्गृहीता गा गोपाग्रयतरत्वाद्धावन्तं केचिदन्यत्रत्या वा धावन्ति, तद्वदित्यनुधावनेऽत्यन्तवेगोऽभिप्रेतः, अन्यथा सद्य एवानर्थापत्तेः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं स्वरं यथेष्ट सम्प्रमत्तवद्रामकृष्णयोर्विहरतोर्गायतोश्च कुवेरस्यानुचरः शङ्खचूडाख्य आजगाम ॥२५॥ सच शङ्कारहितः तयो रामकृष्णयोर्निरीक्षमाणयोः सतोः तावेव रामकृष्णौ नाथौ यस्य तं स्त्रीजनम् उदीच्यां दिशि कालयामास हठात्प्रेरयामास ततस्ततो निःसारयामासेत्यर्थः ॥ २६ ॥ कथम्भूतं क्रोशन्तं हे कृष्ण हे रामेति सरोदनमाह्वयन्तं तदेवं दस्युना ग्रस्ता गाव इव व्याघ्रेण गृहीता गाव इव क्रोशन्तं तेनोदीचीं दिशं प्रति कृष्यमाणं स्वपरिग्रहं स्वपरिगृहीतं स्त्रीजनमवलोक्य भ्रातरौ श्रीकृष्णरामावन्वधावताम् ॥ २७ ॥ शाला वृक्षौ हस्तयोर्ययोस्तौ भयं मा कार्ष्टेत्येवम्विधो रावः शब्दः ययोस्तथाभूतौ महाबलिनौ रामकृष्णौ त्वरितं यथा गुह्यकाधमं शङ्खचूडमासेदतुः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तौ नाथौ यस्य स तन्नाथः कालनं द्रावणम् ॥ २६ ॥ स्वपरिग्रहं स्वस्त्रीजनं दस्युना व्याघ्रेण ग्रस्ताः क्रोशन्तीः गा यथा तथा क्रोशन्तं विलोक्य "दस्युतस्करशार्दूलौ हन्तारौ गां नृसिंहकाविति च ॥ २७ ॥ माभैष्ट भीता माभवन्त्वित्यभयवाक्ययुक्तौ

तालोगीताङ्गवाद्यविशेषः। यद्वा तालस्तृणराजः स हस्ते ययोस्तौ तथा मनस्विनौ विशिष्टमनोयुक्तौ तरसा बलेन तरसी बलरंहसी इति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

गोप्य इत्यादि। तस्य तस्य गीतं तद्गीतम्, गोप्यो रामसङ्गिन्यः कृष्णसङ्गिन्यश्च। रामगीतमाकर्ण्य रामप्रिया आत्मान नाविदन् कृष्णगीतमाकर्ण्य कृष्णप्रिया इत्यर्थः। कीदृशम्? स्रंसद्दुकूलवलयं स्रंसमानवस्त्राभरणमित्यत एव साहचर्य-विहारो न रस्यः ॥ २५ ॥ अथाखण्डपरमानन्दस्य भगवत एवानन्दलीला निराबाधा इति प्राग् दर्शितम्, पश्चादपि तस्या निराबाधत्वं दर्शयितुं तदितरस्य न तथेति दर्शयति—एवं विक्रीडतोरित्यादि। एवमुक्तप्रकारेण क्वचित् कृष्णो विहरति, क्वचिद् राम इति प्रकारेण विहरतोस्तयोः स्वतः स्वैरं गायतोश्च सतोः शङ्खचूडो धनदानुचरः सङ्कर्षणस्याभिमुखमयात् प्राप्तः। धनं ज्ञानं द्यतीति धनाहङ्कारः तमनुचरति अधिष्ठातृत्वेन वर्त्तते, अनुपूर्वात् चरेः क्विपि कृते धनदानुचरिति व्यञ्जनान्ता प्रकृतिः ततः षष्ठ्यन्तं पदम्। कीदृशस्य? प्रमत्तवत् ख्यातः कथयतः, ख्या प्रकथन इति शत्रन्तस्य षष्ठ्यां रूपम्—वारुणीपानेन विह्वलोक्तेः। अथवा, ख्यातः प्रकथयतः स्वप्रमदाजनैः समं कथयतो रामस्य अति सम्मुखमयादित्यर्थः ॥ २६ ॥ तयोरित्यादि। तयोः श्रीरामकृष्णयोर्मध्ये निरीक्षतोः निरीक्षमाणस्य श्रीरामस्य तन्नाथं स श्रीराम एव नाथो यस्य तं तथाभूतं प्रमदाजनमुदीच्यां दिशि कालयामास चालयामास। क्रोशन्तं 'राम राम एषोऽस्मान् कालयति, त्रायस्व' इति क्रोशन्तम्। अशङ्कित इति कृष्णस्य दूरस्थत्वं व्यज्यते। तस्मिन् सन्निहिते शङ्काया अवश्यम्भावित्वम् ॥ २७ ॥ पुनः प्रमदाजनो दूरस्थं कृष्णञ्चाजुहावेत्याह—क्रोशन्तमित्यादि। कृष्ण रामेति विपर्ययाह्वानेन कृष्णस्य भिन्नस्थानस्थितत्वं व्यज्यते, दूरस्थ एवादौ आहूयते। आह्वानं समकालमेव स्वपरिग्रहैः सह विहारं त्यक्त्वापि सर्वज्ञः सर्वव्यापी भगवांस्तत आगत्य बलदेवेन सह मिलित्वान्वधावतामित्याह—भ्रातरा वत्यादि। प्रमदाजनमन्वधावताम्, प्रमदाः प्रकृष्टमत्ताः वारुणी सहपानात्। अत एव बलदेवसम्बन्धिनामित्यर्थः। श्लोकद्वयेनैवान्वयः। कीदृशम्? स्व परिग्रहं सुष्ठु अपरिग्रहोऽस्पर्शो यासु। अर्थात् शङ्खचूडस्य वाचैव कालयामास, न तु स्पर्शेनेन। तत्र दृष्टान्तः दस्युना ग्रस्तो गतः। यथा भ्रात्रा सह गृहस्थो धावति, तथा दस्युना अग्रस्ताः, ईषदर्थे नञ्, कियद्दूरं चालितः। ग्रस्त-शब्दो लाक्षणिकः ॥२९-३२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

उभयक्रीड़ा समासेनोक्ता, गोप्यस्तद्गीतमित्यत्र तत्तत् सम्बन्धिन्यो गोप्यस्तद्गीतं तस्य तस्य गीतमित्येकशेषः, न त्वेकरूपा नैककालीनाः ॥ २६ ॥ तयोर्निरीक्षतो राजन्निति वक्तव्ये कृष्णस्य दूरस्थत्वादग्रे क्रोशनम्। एतेनैव पृथक् त्वं क्रीडास्थानयोः अशङ्कित इति कृष्णं दूरस्थं मत्वा अशङ्कितः सर्वज्ञः सर्वदर्शी स च श्रीकृष्णः क्रोशनसमकालमेव समागतः पश्चान्मिलित्वा भ्रातरौ अन्वधावताम् ॥ २८-३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निरीक्षमाणयोरित्यनादरे षष्ठी क्रोशन्तं हे राम! हे कृष्ण! अस्मांस्त्रायस्वेति सक्रन्दनं फूत्कुर्वन्तम्। कालयामास महायष्टिघूर्णनेन भीषयित्वा उदीचीं दिशं प्रति विद्रावयामासेति। तेन स्पर्शस्तासां नाभूदिति ज्ञेयम्। यथा गा इत्यग्रिमश्लोकोक्तेः ॥ २६ ॥ दस्युना चोरेण ग्रस्ता आत्मसात् कर्त्तुं विद्राव्य स्वदेशं प्रति चालिताः ॥ २७-२८ ॥

गूढार्थदीपिनी

मूर्छिताः मोहिताः स्रंसत् शिथिलीभवत् दुकूलं यस्मात् तम् आत्मानं देहम् ॥२५॥ स्वैरं यथेच्छं धनदः कुबेरः ॥२६॥ तौ नाथौ यस्य। क्रोशन्तं चीत्कृत्य रुदन्तं कालयामास बलात् विद्रावयामास ॥ २७ ॥ क्रोशन्तम् आह्वयन्तं स्वपरिग्रहं स्त्रीजनम्। दस्युना व्याघ्रेण ग्रस्ता गा दृष्ट्वा यथा कश्चित् धावेत् तथा अन्वधावताम् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तयोः रामकृष्णयोः निरीक्षमाणयोः सतोः कालयामास बलात् प्रेरयामास ॥ २६-२७ ॥ माभैष्ट भयं माप्राप्नुतेत्येवं विधो रावः शब्दो ययोस्तौ ॥ २८-३० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सम्प्रमत्ताविव सम्प्रमत्तवत्क्रीडतोः सतोः शङ्खचूड इति ख्यातः कुबेरभृत्योऽभ्यगात् ॥ २५ ॥ निरीक्षतो निरीक्ष्यमाणयोस्तन्नाथं तौ नाथौ यस्य तं प्रमदाजनमुदीच्यां दिशं क्रोशन्तं कालयामास व्यद्रावयत्। स्वस्वामिस्वाम्यं यत्र तदुदीच्यामिति सम्भवि। अशङ्कितो निःसंशयः ॥२६॥ स्वपरिग्रहं स्वस्त्रीजनं यथा दस्युना हिंसकेन व्याघ्रादिना ग्रस्ता गास्तथा शङ्खचूडान्मोचयितुं भ्रातरावन्वधावताम्। दस्यूतस्करशार्दूलाविति यादवः ॥ २७ ॥ तालो वाद्यविशेषस्तृणराजो वा हस्तयोस्तौ। तं तरसा बलेन त्वरितं शीघ्रं गुह्यकाधममासेदतुः। तरो बलं च वेगे चेति विश्वः ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

लीलामुपसंहरति । एवं विक्रीडतोरिति । स्वैरं यथा भवति तथा विशेषेण क्रीडतोरिति मूर्च्छिताभिरिव प्रमत्ताभिरिव क्रीडा अत्यन्तं स्वच्छन्दा भवतीति मध्ये क्रीडा मध्ये गानमिति द्वयं निरूपयति क्रीडतोर्गायतोः सतोरिति स्त्रीभिः सह समानधर्मतासिद्ध्यर्थं सम्प्रमत्तवदिति आवेशावतारयोः आवेशदशायां तुल्यतेति ज्ञापयितुं द्वयोः सामान्येन निरूपणं एवं सर्वस्मिन्नेव विकले शङ्खचूडनामा कश्चित् धनदस्य कुवेरस्यानुचरः स्त्रीकामः भगवन्तं प्राकृतं मत्वा स्वयं ता नेतुमागत इत्याह । शङ्खचूड इति शङ्खनिधिः चूडायाम्वर्तत इति अनेन नारदस्यापि दोषः परिहृतः यथा तौ पूर्वन्धनमत्तावेव मयमपि प्राप्तनिधिरिति सम्प्रमत्तः धनद इति नाम्ना च सर्वैव सामग्री श्रीमदरूपा निरूपिता यत्र धनन्तत्रैव स्त्रिय उचिता इति सर्वा एव श्रुतयो लौकिकाः कर्तव्या इति पाषण्डिनां बुद्धिः ॥ २५ ॥ ततो यत्कृतवांस्तदाह । तयोर्निरीक्षतोरिति । राजन्निति सम्बोधनं शत्रूणां स्त्रीहरणं स्वाभाविकमिति तव सहजदोष इति ख्यापनार्थं तावेव नाथौ यस्य प्रमदाः स्त्रीविशेषाः तेषां जनः समूहः सामान्यशब्दः समूहवाची भवतीति विशेषपराश्चेत् न गच्छेयुरिति ज्ञापयितुं सामान्यवचनं क्रोशन्तमिति तासामनिच्छा तस्य च भयाभावः सूचितः कालयामास यथाकालः अप्रतिहतबलः सर्वानेव कालयति हरति तद्वदित्यर्थः । उदीच्यां दिशीति स्वगृहे वलाधिक्याय अत एवाशङ्कितः किङ्करिष्यति भगवानिति।२६। ततो भगवद्भ्यां यत्कृतं तदाह । क्रोशन्तमिति । यदि ताः कृष्णरामेत्याक्रोशं न कुर्युः तदा न निवारयेदपि नहि भगवान् स्वतोऽन्यचित्तं निवारयति तत्राप्यन्यस्यचेन्न निवारयेत् किन्तु स्वपरिग्रहं स्वेन पूर्वमेव परिगृहीत इति क्रोशन्त स्वपरिग्रहं विलोक्य अन्वधावदिति भ्रातरावित्युभयोः परिग्रहः उभाभ्यां रक्षणीय इति अनुग्रहणानन्तरमेवाधावताम् ।।२७।। दूरे नीयमानाः दूरादेवाश्वासितवन्तावित्याह । माभैष्टेत्यभयारावाविति । माभैष्टेत्यभयमारावः भयनिवर्तको भवति शालवृक्षौ हस्ते ययोरिति महासामर्थ्यं दूरादेव प्रदर्शितं नतु तयोः कश्चनोद्योगोऽस्ति तरस्विनाविति वेगवन्तौ यथा मध्ये एकामपि गृहीत्वा न गच्छेन्न स्पृशेद्वेति शीघ्रमासेदतुः निकटे गतौ सन्तौ आसेधतुः निवारितवन्तौ वा तं शङ्खचूडं तरसाविचार्यैव देवमनुष्यापेक्षया महाबलो भवतीति विचारप्राप्तः त्वरितं पलायनार्थं यतो गुह्यकानां यक्षाणां मध्ये अधम आगमने यक्षत्वं प्रयोजकं पलायने अधमत्वम् ॥ २८ ॥

श्रीसुबोधिनी-सारः

एवं स्वैरं यथेच्छं संप्रमत्तवत् चिक्रीडतोर्गायतोः सतोः शंखचूड इति ख्यातो धनदस्य कुबेरस्यानुचरो भृत्य आयात् ।२५। तयोर्निरीक्षतोः संपश्यतोः सतोः तौ नाथौ यस्य तं स्त्रीजनं क्रोशन्तम् आकर्षयांचकार उदीच्यां दिशि अशंकितः निर्भयः ॥ २६ ॥ दस्युना चौरेण व्याघ्रेण ग्रस्ता गा इव हे कृष्ण हे रामेति क्रोशंतं स्वपरिग्रहं निजजनं विलोक्य दृष्ट्वा भ्रातरौ द्वावन्वधावताम् ।।२७।। यूयं मा भैष्टेत्यभयारावौ निर्भयशब्दौ शालहस्तौ वेगवन्तौ त्वरितं शीघ्रं गुह्यकेष्वधमं तं शंखचूडमापतुः ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं स्वैरं यथेष्टं संप्रमत्तवद्रामकृष्णयोर्विक्रीडतोर्गायतोश्च सतोः शङ्खचूड इति नाम्ना ख्यातः कथितो धनदस्य कुबेरस्यानुचरो भृत्योऽभ्यगात् ॥ २५ ॥ 'इयमपि भगवतो राजलीला' इति सूचयन् सम्बोधयति-हे राजन्निति । तयो रामकृष्णयोनिरीक्षमाणयोरेव सतोः तावनादृत्य तौ नाथौ स्वमिनौ यस्य तं क्रोशन्तं रोदनपूर्वकमाह्वयन्तं प्रमदाजनमुदीच्यां दिशि कालयामास हठात् प्रेरयामास । तत्र हेतुमाह—अशङ्कितः स्वानर्थशङ्काशून्यः निर्भय इत्यर्थः ॥ २६ ॥ तं स्वपरिग्रहस्वकीयत्वेन परिगृहीतं स्त्रीजनं 'हे कृष्ण ! हे राम !' इत्येवं क्रोशन्तं रोदनपूर्वकमाह्वयन्तं विलोक्य भ्रातरौ रामकृष्णौ अन्वधावतामित्यन्वयः । 'तासां रक्षणं धर्म' इति सूचयन् दृष्टान्तमाह-यथेति । दस्युना चौरेण काल्यमानां गाः दृष्ट्वा तद्विमोचनार्थं यथा कश्चिद्धावेत्तथेत्यर्थः ।२७। तत्प्रकारमाह-मेति । मा भैष्ट भयं मा कार्षीरित्येवंभूतः अभयः गोपीनां भयनिवर्तकः आरावः शब्दः ययोस्तौ, शालहस्तौ हस्ते गृहीतशालवृक्षौ, तरस्विनौ अतिवेगवन्तौ, अत एव तरसा वेगेन त्वरितं यथा भवति तथा गुह्यकेष्वधमं नीचं तं शङ्खचूडं आसेदतुः प्राप्तवन्तौ ॥ २८ ॥

अन्वितार्थप्रकाशिका

गोप्य इति ॥ हे नृप ! तयोस्तद्गीतमाकर्ण्य श्रुत्वा मूर्च्छिताः तद्गीतलीनचित्तत्वात् मोहं गता गोप्यस्ततस्तस्मात् मोहात् हे नृप ! स्रंसत् भ्रश्यत् दुकूलं यस्मात् । शतार्षः । श्लथदित्यपि पाठः । त्रस्ताः भ्रष्टा केशेभ्यः स्रजस्तथाभूतमात्मानं देहं च नाविदन् । देहात्पतद्वस्त्राद्यनुसन्धानं न लेभिरे । विदॢ लङ् ॥ २५ ॥ एवमिति ॥ एवं स्वैरं यथेष्टं होलिकासमयोचितं संप्रमत्तवद्रामकृष्णयोर्विक्रीडतोर्गायतोश्च सतोः शङ्खचूड इति नाम्ना ख्यातः कथितो धनदस्य कुबेरस्यानुचरोऽभ्यगात् ॥ २६ ॥ तयोरिति ॥ हे राजन् ! अशङ्कितः स शङ्खचूडः तयो रामकृष्णयोर्निरीक्षतोरेव सतोः । शतार्षः । तावनादृत्य तौ नाथौ स्वामिनौ यस्य तं क्रोशन्तं रोदनपूर्वकमाह्वयन्तं प्रमदाजनमुदीच्यां दिशि कालयामास हठात्प्रेरयामास ॥ २७ ॥ क्रोशन्तमिति ॥ तं स्वपरिग्रहं स्वकीयत्वेन परिगृहीतं स्त्रीजनं हे कृष्ण ! हे रामेत्येवं क्रोशन्तं रोदनपूर्वकमाह्वयन्तं विलोक्य भ्रातरौ रामकृष्णौ यथा दस्युना व्याघ्रेण ग्रस्ताः । यद्वा चौरेण ग्रस्ताः आत्मसात्कर्तुं विद्राव्य स्वदेशं प्रति चालिताः गाः दृष्ट्वा तद्विमोचनार्थं यथा कश्चिद्धावेत्तथा अन्वधावताम् ।।२८।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

संप्रमत्तवत् मदव्याप्तवत् स्वैरं स्वतंत्रतया गायतोः सतोः ख्यातोनाम्नाविख्यातः ॥२५॥ कालयामास गृहीत्वा जगाम ।२६। स्वपरिग्रहं निजपरिवारं दस्युना व्याघ्रेण ग्रस्ता गा यथा क्रोशन्त ॥ २७ ॥ अभया रावौ अभयवचनौ त्वरितं शीघ्रं गच्छंतं । आसेदतुर्निकटं प्रापतुः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ एवं स्वैरं यथेष्टं, संप्रमत्तवत विक्रीडितोर्विहरतोः, गायतोश्च सतोः, शङ्खचूड इति ख्यातः, धनदानुचरः कुबेरस्यानुचरः, अभ्यगात् समाजगाम ॥ २५ ॥ तयोरिति हे राजन् , अशङ्कितः शङ्कारहितः, स शङ्खचूडः, तयो रामकृष्णयोः निरीक्षतोः निरीक्ष्यमाणयोः सतोः, तौ रामकृष्णौ नाथौ यस्य तं, क्रोशन्तं, प्रमदाजनं स्त्रीजनं, उदीच्यां दिशि, कालयामास हठात्प्रेरयामास ॥ २६ ॥ क्रोशन्तमिति ॥ दस्युना व्याघ्रेण, ग्रस्ताः परिगृहीताः, गाः यथा क्रोशन्ति, तथा हे कृष्ण, हे राम, इति संबोध्य, क्रोशन्तं सरोदनमाह्वयन्तं, स्वपरिग्रहं स्वपत्नीभावेनानुवर्त्तमानं स्त्रीजन विलोक्य, भ्रातरौ रामकृष्णौ, अन्वधावताम् ।२७। मा भैष्टेति ॥ मा भैष्ट, इति अभयारावौ, भीता मा भवतेत्यभयवाक्ययुक्तावित्यर्थः । शालहस्तौ हस्तोपात्तशालतरू, तरस्विनौ अतिरंहोयुक्तौ, महाबलवन्तौ वा रामकृष्णौ, तरसा बलेन, युक्तमिति शेषः । गुह्यकाधमं यक्षेष्वस्याधमं, तं शङ्खचूडं, त्वरितं यथा तथा, आसेदतुः तं संप्रापतुः ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तयोर्निरीक्षतोरिति : १०.३४.२६.

> सद्वृत्तवृत्तिमपहर्तुमलं किलास्मिन् स्वल्पं धनं स हि पुनर्धनदार्पितश्रीः ।
> तद्युक्तमेव निधिमौलिरशेषयोषाः सद्यो जहार दिशि तादृशि दुर्मदान्धः ॥ ४१ ॥
> निर्बलसाहसविधौ धनवन्न लोके वस्त्वन्यदस्तमितशङ्कमलं नियोक्तुं ।
> एतत्स्फुटं हि सबलाच्युतसन्निधाने तत्संश्रिता अपि जहार सता धनाढ्यः ॥ ४२ ॥

शालहस्ताविति : १०.३४.२८.

> श्रयान्कुजोऽप्ययं न त्वं यदसौ मत्कराश्रितः । त्वं तु सप्रमदोऽपैषीत्यबोधि दधता द्रुमम् ॥ ४३ ॥

कृष्णप्रिया

इस प्रकार दोनों भ्राता मन्दोन्मत की नाई मधुर कल गान करते स्वतंत्र विहार कर रहे थे उस अवसर कुबेर का सेवक शंखचूड वहाँ आ गया ॥ २५ ॥ राजन् उस दुष्ट की दुष्टता और धृष्टता निःसीम थी, दोनों भैयाजू देख रहे थे और दोनों भैयाजू उन व्रजाङ्गनाओं के स्वामी है ऐसी गोपियाँ खींचते आक्रन्द करती हुई गोपियाँ को उठाकर वह खल निःशङ्क वनकर उत्तर दिशा की ओर चल पड़ा ॥ २६ ॥ कोई दुष्ट चोर जैसे रंभाती गैयाँ को हरण कर ले जाय वैसे ही हे कृष्ण हे राम हे राम हे कृष्ण २ ऐसा करुण क्रन्दन करती और श्रीकृष्णार्पित प्राण उन गोपियों को उठाकर ले जाने वाला शंखचूड के पीछे दोनों भैया दौड़े ॥ २७ ॥ "मत डरो, मत डरा" ऐसे निर्भय शब्द को कहते हुए हाथ में शाल के वृक्ष को धारण किए हुए अत्यंत त्वरित गति से दौड़ते दोनों भैया शंखचूड के समीप पहुँच गए ॥ २८ ॥

स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् । विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीविते[1]च्छया ॥ २९ ॥
तमन्वधावद् गोविन्दो यत्र यत्र स धावति । जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन् स्त्रियो बलः ॥ ३० ॥
अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः । जहार मुष्टिनवाङ्ग सहचूडामणिं विभुः ॥ ३१ ॥
शङ्खचूडं निहत्यैवं मणिमादाय भास्वरम्[2] । अग्रजायाददात्[3] प्रीत्या पश्यन्तीनां च योषिताम् ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे शङ्खचूडवधो नाम [5]चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

कर्दमक्षमा

अन्वयः—कालमृत्यू , इव, अनुप्राप्तौ, तौ, वीक्ष्य, उद्विजन् , मूढः, स्त्रीजनम् , विसृज्य, जीवितेच्छया, प्राद्रवत् ॥२९॥ तत् शिरोरत्नम् , जिहीर्षुः, गोविन्दः, सः, यत्र, यत्र, धावति, तम् , अन्वधावत् , (च) बलः, स्त्रियः, रक्षन् , (तत्र) तस्थौ ॥३०॥

---

[1] जीवने–विज. । [2] भासुरं–विज. । [3] जाय ददौ–वीर. । [4] पारमहंस्यां संहितायां–प्रा. पा. । [5] द्वात्रिंशो–विज. ।

हे अङ्ग ! विभुः, अविदूरे, इव, अभ्येत्य, मुष्टिना, एव, तस्य, दुरात्मनः, शिरः, जहार, च, सह, चूडामणिम्, जहार ॥ ३१ ॥
एवम्, शङ्खचूडम्, निहत्य, भास्वरम्, मणिम्, आदाय, च, योषिताम्, पश्यन्तीनाम्, प्रीत्या, अग्रजाय, अदात् ॥ ३२ ॥

इति चतुस्त्रिंशोध्यायः समाप्तः ॥ ३४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अविदूरे समीपत इवाभ्येत्य शिरसा सह चूडामणिं जहारेत्यर्थः ॥ ३१–३२ ॥

इति श्रीमद्भागवते म० दशमस्कन्धे पूर्वार्धे टीकायां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सः शंखचूडः। तौ रामकृष्णौ। कालो मृतिसमयाभिमानो देवस्तन्नामातिबलोऽसुरो वा। मृत्युर्यमः। उद्विजन् विभ्यत् ॥ २९ ॥ तम् गुह्यकम्। तस्य शंखचूडस्य। शिरोरत्नं चूडामणिम्। चूडामणिहरणान्तमेव तज्जीवनमिति जानन्नेव तं जहारेति तत्त्वम् ॥ ३० ॥ अविदूरे समीपे। इवशब्देन किञ्चिद्दूरम्। तस्य यक्षस्य मुष्टिना 'मुष्टिर्द्वयोः पले बद्धपाणौ त्सरौ च' इति मेदिनी। (इत्यर्थ इति। सहादियोगे तृतीयया भाव्यमतः शिर इति तृतीयार्थे द्वितीया बोध्यार्षत्वात्) ॥ ३१ ॥ एवम् उक्तप्रकारेण। भास्वरम् देदीप्यमानम्। पश्यन्तीनामिति—मह्यमेषोतिसुभगायै दास्यतीत्येवं प्रत्येकं चिंतयंतीनां तासां मत्सराभावार्थं कस्यैचिदप्यदत्त्वा श्रीरामे स्वरक्षणात्प्रेमाणञ्च ज्ञात्वा श्रीरामायैवादात्। स च सर्वज्ञत्वाच्छ्रीकृष्णाभीप्सितदेश एव तं न्यधादिति ज्ञेयम् ॥ ३२ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कालः प्रेरकः मृत्युश्च तत् प्रेर्यस्ताविति यथाक्रममनुरूपो दृष्टान्तः। मूढः प्रद्रवणेऽपि जीवनासम्भवात् स्ववधे स्वयमेव प्रवृत्तेश्च। यद्वा। कृत्यं किमप्यजानन्नित्यर्थः ॥ २९ ॥ ननु शालप्रक्षेपेण दूरत एव तमधमं किं न हन्यात् तत्राह। जिहीर्षुरिति। मृतस्य सतः स्पर्शायोग्यत्वेन तस्य जीवत एव रत्नग्रहेच्छयेत्यर्थः। श्रीरामाय तद्दानेच्छया तु तस्यैव मुख्यप्रयोजनतया निर्देशः। यद्वा। तन्मणिसङ्गपर्यन्तं तज्जीवननिबन्धात्तज्जिहीर्षा ॥३०॥ अविदूर इव अतिदूरेऽपि किंचिद्दूर इवाभिमुखं गत्वा वेगेन पलायमानस्य पृष्ठे हननायोग्यत्वात् पलायमानस्यापि तस्य वधो युक्त इत्याह। दुरात्मनः दस्योरित्यर्थः। मुष्टिनैव नतु शालेन न चापायान्तरेण तत्रापि तेनैकेनैवेति प्रयासाभाव उक्तः। यतो विभुरीश्वरः। अन्यत्तैः। तत्र शिर इति तृतीयायाश्छान्दसो लुक्। यद्वा शिरश्चूडामणिञ्च सह एकदैव जहार ॥ ३१ ॥ नितरां हत्वेति निशब्दः सूक्ष्मशरीरस्य नाशात्। पश्यन्तीनामिति सर्वासामात्मनि सौभाग्यातिशयाभिमानात्। तथापि ता अनादृत्याग्रजाय अदादिति सर्वासां मात्सर्याभावाय तस्य मान्यत्वात् कृतरक्षत्वाच्च। प्रत्युत सन्तोषायैव स्यादित्यभिप्रेत्येति भावः। प्रीत्येति तत् पालके तस्मिन् प्रीत्यतिशयोदयोऽयं सर्वास्वेव तासु पर्यवस्यतीति भावः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इति—ईदृश एष वा अभयो भयनिरसन एव, न त्वतिसम्भ्रमादन्यपर आरावः प्रत्याक्रोशनं ययोस्तौ, तं महादुष्टं स्त्रीजनकालनकमासेदतुर्निकटे गतौ। शालहस्तयोरपि त्वरितासादने हेतुः—बलिनाविति; वक्ष्यमाण–तत्प्रद्रवण–हेतुत्वेन वा, गुह्यकेष्वधमम्, पूर्वमपि विविधदुष्टताचरणात् ॥ २९ ॥ तौ श्रीकृष्णरामौ 'अनु' पश्चादेव प्राप्तौ वीक्ष्येति संप्रमत्तमत्या तयोरागमनशंकाराहित्येऽपि महाभयान्मुहुः पश्चादवलोकनात्। कालः प्रेरकः, मृत्युश्च तत्प्रेर्यस्ताविति तथाक्रममनुरूपो दृष्टान्तः; परमानन्दघनमूर्त्त्योरपि तयोस्तस्मिन् दुष्टबुद्धौ भयेन तथैव परिस्फूत्तः, एतच्चाग्र रंगस्थले (भा० १०।४३।१७) 'मल्लानामशनिः' इत्यादिना व्यक्तं भावि; अतएवोद्विजन् उच्चैर्विभ्यन्निभृतं प्राद्रवद् वेगेन पलायत। किमर्थम् ? जीवितस्यैव, न तु यशआदेरिच्छया, युद्धाद्यकरणेन केवलप्रद्रवणात्; यतो मूढः, प्रद्रवणेऽपि जीवितनाशाद्यदर्शनात् स्ववधे स्वयमेव प्रवत्तेश्च; यद्वा, कृत्य किमप्यजानन्नित्यर्थः ॥ ३० ॥ गोविन्दो गोकुलेन्द्र इति तासां मोचनार्थं तस्य च दुष्टस्य वधार्थं क्रोधेनानुधावनं युक्तमेवेति भावः। ननु लोष्ट्रादिप्रहारेण दूरत एव तमधमं किं न हन्यात् ? तत्राह—जिहीर्षुरिति। मृतस्य सतस्तस्य स्पर्शनायोग्यत्वेन तस्य जीवत एव रत्नग्रहणेच्छयेत्यर्थः। यत्र स्त्रियस्तेन विसृष्टास्तत्रैव तस्थौ, अनुजेच्छातिक्रमणाशक्तेः। दुष्टतो रक्षणे सामर्थ्यं दर्शयति—बल इति। यद्वा, तस्यापि तद्वधादौ सामर्थ्यं बोधयति, तथापि तस्य स्थितौ प्रयोजनम्, स्त्रियो रक्षन्निति तदानयने मुख्यं प्रयोजनम् ॥ ३१ ॥ अविदूर इव, अतिदूरेऽपि निकट इवाभिमुखं गत्वा वेगेन पलायमानस्य पृष्ठे हननायोग्यत्वात्। यद्वा, अभितः प्राप्य दुष्टतोऽपि

तस्य वधो न युक्त इत्याह —दूरात्मनः इति स्त्रीजनकालनात्। एवकारेण केवलमेकमुष्टिनैवेति प्रयासाभाव उक्तः, यतो विभुरीश्वरः। अंग हर्षसम्बोधने अन्यत्तव्याख्यातम्। यद्वा, शिरः चूडामणिं च सह एकदैव जहार। एवमुक्तप्रकारेणेति हननेऽप्रयास एव दृढ़ीकृतः। मण्यर्थमेव तथा हननमिति च बोधयति ॥ ३२ ॥ नितरां हत्वेति नि-शब्दः, धनप्राणयोर्द्वयोरपि हरणात्; भास्वरं स्वभावत एव महातेजस्विनमिति निजप्रियतमायै कस्यैचिदेकस्यै निभृतं दातुं स्वयं ध्रियमाणमधुना दत्तं वा मया तयापि निह्नुत्य रक्षितुमशक्यमिति भावः। अतएवाग्रजाय दत्तवान्। प्रीत्या पश्यन्तीनामिति, अहमेवास्य प्रेयसीति प्रत्येकं सर्व्वासां मननान्मह्यमेव दास्यतीति हर्षेण श्रीकृष्णं मणिमेव वा निरीक्षमाणानामित्यर्थः; अनादरे षष्ठी। एकस्यै दत्तेऽन्यासामीर्ष्या सम्भाव्य तत्परिहारार्थं ता अनादृत्य तस्माद् एवादादिति भावः। अत्र चाग्रजायेति मान्याय दत्ते सति कस्याश्चिदपि मात्सर्य्यं न भवितैवेति गूढोऽभिप्रायः। प्राणप्रियतमायै श्रीराधिकायै मणिरेषोऽवश्यमर्पयितुमिष्यते, साक्षान्मया दत्ते च खलु मह्यमसूया सम्भवेत्, अतोऽग्रजाय, दत्तोऽप्ययं परमाभिज्ञेन मत्प्रीत्येकापेक्षकेण तस्या एवानेन दातव्यः, ततो न रोषः कोऽपि शंकेत, गुरौ च तासां कथमप्यसूया न सम्भवेदेवेति। एवं प्रीत्यैतयेतस्य पूर्व्वेणेवान्वयः। अथवा अन्योऽन्यमीर्ष्याद्यनुदयार्थ श्रीरामं प्रति तद्दाने सर्व्वासामेव सम्मत्या हर्षेण सर्वास्वेव तासु विलोकयन्तीषु सतीष्वित्यर्थः। अन्यथा तं प्रत्यपि तद्दानाशक्तेः, तथापि गूढभावः स एव, तथापि तत्र तन्नयने प्रयोजनान्तरम्। एवं श्रीबलदेवं प्रति बहुधा स्नेहो दर्शितः। अतएव तं प्रति तासां महागीतविमोहनत्वदर्शनाय निरीक्षमाणेनापि स्वयं तत्सहितेन तेन दुष्टकालामानानां क्रोशन्तीनामपि तासां क्षणमसम्भालनम्। अन्यथा तदसम्भवात्, अन्यस्येव श्रीकृ्णचरितस्यास्य सर्व्वेषां लज्जाकरत्वेन व्रजे तदानीं तदकथनाच्छ्रीनन्दयशोदादिषु तत्प्रचारो नोक्तः। यद्वा, ताभ्यां ताभियेव वा केनापि छलेनोक्तेऽपि तद्वृत्ते तेषां बहुधा सतत–तन्माहात्म्यभरानुभवेनाश्चर्य्यमननाच्छ्रुतस्याप्यश्रुतत्वे पर्य्यवसानाद्विशेषान्तराभावेन श्रीशुकदेवैः परं न किञ्चित् कथितम् ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रीमत्-सनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कालः कालाभिमानि देवता मृत्युः प्राणवियोगकरीदेवता ॥ २९–३० ॥ पराङ्मुखस्यापि शिरोहरणं प्रतिभटबुद्ध्या अतो नान्यायः ॥ ३१–३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पूर्वार्धे रासक्रीडायां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स गुह्यकाधमः कालमृत्यू इव प्राप्तौ रामकृष्णाववलोक्य उद्विजन् बिभ्यत्स्त्रीजनं विहाय जीवितुमिच्छया मूढः तच्छरणागत्यात्मकजीवनोपायानभिज्ञः केवलं प्राद्रवत् ॥ २९ ॥ स शङ्खचूडो यत्र धावति तत्र तं शङ्खचूडं श्रीकृष्णोऽन्वधावत् किञ्चिकीर्षुस्तस्य शिरोरत्नं हर्तुमिच्छुः बलरामस्तु स्त्रियः स्त्रीः रक्षस्तत्रैवावतस्थौ ॥ ३० ॥ ततोऽविदूरे समीप एवाभ्येत्य तदभिमुखं गत्वा विभुर्भगवान् मुष्टिनैवाङ्ग हे राजश्चूडामणिसहितं दुरात्मनस्तस्य शङ्खचूडस्य शिरो मूर्धानं जहार ताडयामास ॥ ३१ ॥ इत्थं शङ्खचूड हत्वा भास्वरं तेजोयुक्तं मणिमादायागत्य योषितां पश्यन्तीनां प्रीत्या अग्रजाय रामाय दत्तवान् ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडायां श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मरणकालः कश्चिदसुरो वा मृत्युर्यमः उद्विजन् बिभ्यत् ॥ २९–३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूवार्धे रासक्रीडायां श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् द्वात्रिंशोऽध्यायः ॥ ३२–३४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तच्छिरोरत्नजिहीर्षा तन् पर्यन्तं तज्जीवितनियमादिति तर्क्यते ॥ ३०–३१ ॥ अग्रजायेति। सर्वासामपि तत्र प्रीतेः। प्रीत्येति विशेषतस्तासां रक्षणेनेत्यर्थः ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडायां श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ भ्रातरावन्वधावतामेव, किन्तु कृष्ण एव तमवधीदित्याह—अग्रजायेत्यादि। तं हत्वा तस्य शिरोरत्नमादाय अग्रजाय बलदेवायाददात् पश्यन्तीनां योषितां बलदेवयोषिताम् ॥ ३३ ॥

इति श्रीदशमे स्कन्धे श्रीबृहत्क्रमसन्दर्भे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अग्रजायाददादित्यस्यायं भावः—तस्य परिग्रहाणां कालनेन सोऽत्यन्तं विमना आसीत् । तस्यैव वैमनस्यस्योपशमनाय पश्यन्तीनाञ्च तद्‌योषितामग्रे साक्षादग्रजायैवाददात् च-कारेण तस्येत्याक्षिप्यते ॥ ३२ ॥

इति चतुस्त्रिंशोऽध्यायः ॥ ३४ ।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कालमृत्यू कालः प्रेरकः मृत्युः प्रेर्य्यस्ताविव शीघ्रं जहीति रामः प्रेरकः अयमहमिमं हन्मीति कृष्णः प्रेर्य्यस्तौ ॥ २९ ॥ स्त्रियो विद्रावणश्रान्तास्तत्रैव स्थिरीकृत्य आश्वास्य तस्थौ ॥ ३० ॥ अतिदूरेऽपि तत्र अविदूर इवाभ्येत्येत्यर्थः ॥ ३१ ॥ पश्यन्तीनामिति । मह्यमेवातिसुभगायै दास्यति मह्यमेवात्यादरणीयायै दास्यतीत्येवं प्रत्येकमुत्सुकानां तासां मदमत्सरानुद्गमार्थं कस्यैचिदप्यदत्त्वा रामायादात् सच महाविज्ञः कृष्णाभीप्सितस्थल एव तं मणिं न्यधादिति ज्ञेयम् ॥ ३२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमस्य त्रयस्त्रिंशः सङ्गतः सङ्गतः सताम् ॥ ३४ ॥

गूढार्थदीपिनी

अभयारावौ अभयवचनौ । त्वरितं धावन्तम् ॥ २९ ॥ उद्विजन् बिभ्यत् ॥ ३० ॥ इव शब्देन किंचिद्दूरम् । मुष्टिनैव खङ्गभावनायुक्तेन शिरः जहार चकर्त । अङ्ग हे राजन् ! अददात् इति पाठ ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विभुः श्रीकृष्णः अविदूरे तत् समीपे अभ्येत्य सहचूडामणिं शिरो जहार ॥ ३१–३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुस्त्रिंशोऽध्यायार्थप्रकाशः ॥ ३४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कालश्च मृत्युश्च ताविव । अकालमृत्युश्चेत्कथञ्चिन्मन्थरयितुं शक्योऽयं न तथेति कथयति ॥ कालमृत्यू इवेति । कालप्राप्तौ मृत्यू इवानुप्राप्तौ शङ्खचूड उद्विजन् स्त्रीजनं विसृज्य मूढः परिहाराचतुरं स्वं न विद्वानिति मूर्खो जीवनेच्छया प्राद्रवत् ॥ २९ ॥ यत्र यत्र स धावति तत्र तत्र गोविन्दस्तमन्वधावच्छिरोरत्नं जिहीर्षुः शिरश्च तत्रत्यं रत्नं चेति वा बलः स्त्रियो रक्षस्तस्थौ ॥ ३० ॥ इवाविदूरेऽल्पसमीपेऽभ्येत्य तस्य दुरात्मनः शिरो मुष्टिनैव सहचूडामणिम् । नायममन्तः किन्तु विन्द्वन्तः । अशनायां हि मृत्युः सर्वाशनेननेत्यर्थे बिन्दुरिति बृहद्भाष्योक्तेः । प्रशस्तचूडामणिशिर इत्यन्वयः । यः शिरस्तं सहचूडामणिमिति वाऽन्वयः । निचकर्त शिरान्द्रौणिरित्यादेः । मुष्टिना सहैव जहार मुष्टेर्भिः सरणे सह तेन शिर एव निःसृतमिति भावः । न विद्यते मणिर्यस्यां साऽमणिश्चूडा च साऽमणिश्च ताम् । विशेषणस्य परनिपातः । मणिरहितां चूडां विभावयतीति विभूरिति वा । सह चूडामणिप्रभूरिति पाठस्तु निष्प्रयासान्वयः ॥ ३१ ॥ भासुरं मणिमादाय प्रीत्याऽग्रजायाददात् । योषितां पश्यन्तीनां सतीनां ता अनादृत्य ॥ ३२ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां द्वात्रिंशोऽध्यायः ॥ १०–३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

पूर्वं ताभिः सहितः शीघ्रं गच्छन् स्थितः इदानीं स्वयमेव पलायितुं विचारितवानित्याह । स वीक्ष्येति । अनुप्राप्तौ भगवन्तौ वीक्ष्य सोऽल्पबुद्धिः स्त्रीजनं विसृज्य प्राद्रवदिति सम्बन्धः । तस्य तथा करणे या बुद्धिरासीत्तामाह । कालमृत्यू इवोद्विजन्निति । एकः कालः स्वस्य नाशसमयः अपरो मारक इति एकोऽप्यनिवार्यः तत्रोभयोः किंवक्तव्यमिति पलायने जीवितेच्छैव हेतुः सति जीवने भोग इति । ननु शरणं कुतो न गतः जीवेत् ननु पलायनं जीवनसाधनमितिचेत्तत्राह । मूढ इति इममर्थं न जानातीति ॥ २९ ॥ अनुपाये प्रवृत्तस्य न कार्यं सिध्यतीत्याह । तमन्वधावदिति । गोविन्द इति तेषां रक्षार्थं विनियोग आवश्यकः स्वक्रियाया अन्यथेन्द्रत्वं न स्यादिति रक्षा च दोषस्य मूलोच्छेद एव ननु तस्मिन् कथमपि विद्यमाने अतो यत्र यत्रैव स पलायते तत्रैव तमन्वधावत् । ननु दूरादपि मरणे सम्भवति भगवान् किमिति धावनं कृतवान् तत्राह । जिहीर्षुरतच्छिरोरत्नमिति । दूरान्मारणे यक्षास्तदीयास्तं नयेयुः अमारितश्च स्यात् मणौ विद्यमाने मणिरिव शस्त्रैरप्यवध्यः, अतः स्वस्यैव गमनं जीवानामवध्य इति स्त्रियो रक्षन् बलः जातः अन्यथा ततोऽन्यो हरेत् तदीया हि बहवः ते घातयेयुरेव । अत एकेन रक्षितव्याः बल इति बहूनामप्यागमने रक्षार्थमुक्तं स्त्रियो हि रक्षणीया एव ॥ ३० ॥ ततो भगवान् यत् कृतवांस्तदाह । अविदूर इवेति कियद्धावनेनैव संप्राप्तः अविदूरे निकट एव वस्तुतस्तु दूरे गतः परं कालविलम्बाभावात् अविदूर इवाभ्येत्य निकटे गत्वा तस्य शिरो जहार । ननु पलायितवधो निषिद्धः किमिति भगवान् किंकृष्टं कृतवानित्याशङ्क्याह । दुरात्मन इति । सहि दुरात्मा वध्य एव त्रयोद्विषोहि हन्यन्त एव निमित्तन्तु

दारापहारित्वं जातमेव अन्यथा पूर्वमेव हन्यात् अधुना परित्यागे पुनरागच्छेत् केवलबलभद्रक्रीडायां वा समागत्योपद्रवं कुर्यात् यतो दुष्टान्तःकरणः अतो वध्य एवं अतस्तस्य शिर एव ज्ञानशक्तिप्रधानं मुष्टिनैव जहार नतु भेदनं कृतवान् किन्तु यथा राशेः सकाशात् मुष्टिना तण्डुलाः ह्रियन्ते तथा राशीभूतास्तस्यावयवाः मुष्टिनैवाहृताः यदैव स गोपिकाहरणार्थमुद्यमं कृतवान् तदैव संयोजका देवा अवयवेभ्यो निर्गताः केवलं मणिप्रभावादवयवी स्थितः भगवान् पुनः चूडामणिसहितं तच्छिरो जहार स्वकर्मणैव विशकलित इति भगवान् अक्लिष्टकर्मैव किञ्च विभुः समर्थः मणेरपि सामर्थ्यं दूरीकर्त्तुम् ।। ३१ ।। एवं कृते स हतो जात इत्याह । शङ्खचूडं निहत्येति । एवं प्रकारेण तस्य हननं नतु प्रकारान्तरेण तस्य मुक्तिनिराकरणार्थं निहत्यैवेत्युक्तं मृतद्रव्यं न ग्राह्यमित्यत आह । भास्वरमिति । आस्थानान्मय्युत्तममिति । वाक्यात् मणिग्रहणेन मणिगता देवता ताः कामयन्तीति पक्षे कामना सफला कृता मणिग्रहणेन तस्य मुक्तिर्द येति शङ्कां वारयितुम् अग्रजायाददत् तत्रैव स्थित्वा देवताया अप्युपभोगो भवत्विति प्रीत्यैवाददत् नतु याचितः स्त्रीणां प्रार्थनाभावायाह । पश्यन्तीनामिति । चकारात्सर्वाभ्यः प्रदर्श्य तासां स्पर्शानन्तरं योषितामन्येषाञ्च देवानां पश्यतामिति प्रमाणसिद्ध्यर्थं यत्किंचित्करोति तत्सर्वं तदधिष्ठातर्य्येव प्रयच्छतीति ज्ञापितं प्रमाणबलमेवात्र मुख्यमिति न प्रमेयविचारेण कोऽप्यर्थः शङ्कनीयः ।। ३२ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यामेकत्रिंशाध्यायविवरणम् ।। ३१–३४ ।।

श्रीसुबोधिनी–सारः

कालमृत्यू इवानुप्राप्तौ तौ वीक्ष्य दृष्ट्वोद्विजन् कम्पमानो मूढः स्त्रीजनं विसृज्य त्यक्त्वा जीवनवाञ्छयाऽपलायत् ।। २९ ।। स दैत्यो यत्र यत्र धावति तत्र तत्र तमन्वधावत् गोविंदः तस्य शिरसि रत्नं हर्त्तुमिच्छुः स्त्रियो रक्षन् बलः तस्थौ ।। ३० ।। अविदूरे समीपे एवाभ्येत्य प्राप्य तस्य दुरात्मनः पापिनः शिरश्चूडामणिं स विभुः समर्थः कृष्णो मुष्टिना जहार हे अंग ।। ३१ ।। एवं शंखचूडं निहत्य भास्वरं मणिमादायाग्रजाय रामायादात् प्रीत्या योषितां स्त्रीणां पश्यन्तीनां सतीनाम् ।। ३२ ।।

इति श्रीमद्भागवते दशमस्कन्धे सुबोधिन्यां टीकायां चतुस्त्रिंशोऽध्यायः ।। ३४ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

मणिमादाय भास्वरमित्यत्र, मणिग्रहणेन मणिगता देवतेति । गृहीतेति शेषः । तदधिष्ठानं विना भास्वरत्वाभावादन्यथा विशेषणं न वदेदिति भावः । **ताः कामयतीति पक्ष इति** । बल इति शेषः । उपभोगायान्या अपि कामयत इति ज्ञापनाय बहुवचनम् । नन्वेवं चेद्देवताया एव ग्रहणमुचितम्, न तु मणेरपीत्यत **आहुः तत्रवेति** । मणिनियामकत्वलक्षणाधिकाररूपं देवतात्वं हि भगवद्दत्तम् । तच्च तत्रैव स्थिताया भवति । तथा च तत्रैव **मणावेव** स्थित्वा या देवतात्वं भजते तस्या अपीत्यर्थः । **यत्किञ्चित्करोतीति** । यन्मार्गसम्बन्धि यत् करोति तत् तन्मार्गाधिष्ठातरि तथेत्यर्थः । प्रकृते प्रमाणमार्गसम्बन्धिफलात्मकमण्याहरणं कृतवानिति तथेति भावः । तर्हि सर्वमूलत्वाद्भगवतस्तत्रैवास्य स्थापनमुचितम् । प्रभुकरस्पृष्टस्य मुक्त्यभावश्चानुपपन्न इत्याशङ्क्याहुः **प्रमाणबलमेवेति** ।। ३२ ।।

इत्येकत्रिंशोऽध्याय ।। ३४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स शङ्खचूडः कालः अनिवार्यो मरणसमयः मृत्युर्मारको देवविशेषः ताविव भयंकरौ तौ रामकृष्णौ अनुप्राप्तौ वीक्ष्य उद्विजन् बिभ्यत् जीवितेच्छया स्त्रीजनं विसृज्य त्यक्त्वा प्राद्रवत् पलायितः । ननु 'यदि जीवितेच्छा तर्हि कालमृत्युरूपौ दृष्ट्वापि तच्छरणमेव कुतो नागतः ?' तत्राह—मूढ इति ।। २९ ।। स शङ्खचूडो यत्र यत्र धावति तत्र तत्र गोविन्दः कृष्णस्तमन्वधावत् । धावनप्रयोजनमाह—तस्य शिरोरत्नं हर्तुमिच्छुः इति । बलरामस्तु स्त्रियो रक्षन् तत्रैव तस्थौ ।। ३० ।। अङ्ग हे राजन् ! विभुः सर्वकरणे समर्थः कृष्णः अविदूर इव समीप एवाभ्येत्य तदभिमुखमागत्य मुष्टिनैव चूडामणिसहितं तस्य शङ्खचूडस्य शिरो जहार । पलायितवधस्य अनुचितत्वमाशङ्क्य तन्निरासायाह—दुरात्मन इति । दारहर्तृत्वेनाततायित्वान्न तद्वधोऽनुचित इत्याशयः ।। ३१ ।। एवं शङ्खचूडं निहत्य भास्वरं तेजायुक्तं तच्छिरोमणिमादायागत्य योषितां पश्यन्तीनां सतीनां प्रीत्याऽग्रजाय रामाय अददत् ददौ । स्वनिकटे मणिस्थापने योषितां मध्ये एकस्यै कस्यैचिद्दाने वा योषितां दौर्मनस्यं स्यादतस्तद्रक्षकायाग्रजायव ददौ । तेन तासां सर्वासां सन्तोष इति ज्ञेयम् ।। ३२ ।।

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ।। १ ।।
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ।। २ ।।
रचिता दशमे तत्र तामसरोधवर्णने । चतुस्त्रिंशो गतो वृत्ति नन्दरक्षादिविनिरूपकः ।। ३ ।।

अन्वितार्थप्रकाशिका

मेति ।। मा भैष्ट भयं मा कार्ष्ट इत्येवंभूतः अभयः गोपीनां भयनिवर्तकः आरावः शब्दः ययोस्तौ शालहस्तौ हस्ते गृहीतशालवृक्षौ तरस्विनौ अतिवेगवन्तौ अत एव तरसा वेगेन त्वरितं यथा भवति तथा गुह्यकेष्वधमं नीचं तं शङ्खचूडम् आसेदतुः प्राप्तवन्तौ ।। २९ ।। स इति ।। मूढः स शङ्खचूडः कालः प्रेरकः मृत्युः प्रेर्यस्ताविव शीघ्रं जहीति रामः प्रेरकः शीघ्रमिमं हन्मीति प्रेर्यः कृष्णः तौ रामकृष्णौ अनुप्राप्तौ वीक्ष्य उद्विजन् बिभ्यन । तङ्भाव आर्षः । जीवितेच्छया स्त्रीजनं विसृज्य त्यक्त्वा प्राद्रवत् पलायितः ।। ३० ।। तमिति ।। स शङ्खचूडो यत्र यत्र धावति तस्य शङ्खचूडस्य शिरोरत्नं जिहीर्षुः हर्तुमिच्छुः गोविन्दोऽपि तत्र तत्र तमन्वधावत् । बलो रामस्तु स्त्रियो रक्षन् तत्रैव तस्थौ ।। ३१ ।। अविदूर इति ।। अङ्ग हे राजन् ! विभुः कृष्णः अविदूर इव समीप एवाभ्येत्य तदभिमुखमागत्य मुष्टिनैव दुरात्मनः तस्य शङ्खचूडस्य शिरः चूडामणिं च सह एकदैव जहार शङ्खचूडमिति ।। एवं शङ्खचूडं निहत्य भास्वरं तेजोयुक्तं तच्छिरोमणिमादायागत्य योषितां पश्यन्तीनां सतीनां प्रीत्या अग्रजाय रामाय अददत् अददात् । ह्रस्वत्वमार्षम् । ददधातोश्चेत्तङ्भाव आर्षः । क्वचित् अददादिति शुद्धोऽपि पाठः । एकस्यै प्रेयस्यै तद्दानेऽपरासां वैमनस्यं विचार्याग्रजायादात् । अग्रजश्च महाविज्ञः कृष्णाभीष्टस्थल एव न्यधात् इति ज्ञेयम् ।। ३२ ।।

इति श्रीमद्भागवते महापुराणे दशमेस्कन्धेऽन्वितार्थप्रकाशिकायां चतुस्त्रिंशोऽध्यायः ।। ३४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उद्विजन्नुद्वेगं प्राप्नुवत् ।।२९।। तस्य शिरसि स्थितं रत्नं मणिंजिहीर्षुः हर्तुमिच्छुः ।। ३० ।। अविदूरे इव अंग हे राजन् शिरःचूडायाः केशपाशस्य मणिं च सहैकदैव जहार ।। ३१ ।। अग्रजाय रामाय दत्तवान् ।। ३२ ।।

इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने रासक्रीडायां चतुस्त्रिंशोऽध्यायः ।। ३४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति ।। स गुह्यकाधमः, कालमृत्यू इव, अनुप्राप्तौ तौ रामकृष्णौ, वीक्ष्यावलोक्य, उद्विजन् बिभ्यत्, मूढः एतयोः शरणागमनरूपजीवनोपायानभिज्ञः शङ्खचूडः, स्त्रीजनं विसृज्य विहाय, जीवितेच्छया जीवितुमिच्छया, प्राद्रवत्केवलं पलायितवान् ।। २९ ।। तमिति ।। स शङ्खचूडः, यत्र यत्र धावति, तत्र तत्र, तं शङ्खचूडं अनु पश्चात्, तच्छिरोरत्नं तस्य शिरसि वर्त्तमानं रत्नं, जिहीर्षुः हर्तुमिच्छुः, गोविन्दः श्रीकृष्णः, अधावत् । बलस्तु स्त्रियः रक्षन्, तस्थौ ।। ३० ।। अविदूर इति ।। ततः विभुः कृष्णः अविदूरे इव तत्समीप इव, अभ्येत्य तदभिमुखं गत्वा, हे अङ्ग राजन्, दुरात्मनः तस्य शङ्खचूडस्य, शिरः मूर्द्धानं, चूडामणिं शिरःस्थं रत्नं च सहैकदैव, मुष्टिनैव, जहार तं हतवांस्तन्मणिं च हृतवानित्यर्थः ।। ३१ ।। शङ्खचूडमिति ।। एवमित्थं, शङ्खचूडं निहत्य भास्वरं तेजोयुक्तं, मणिं आदाय, आगत्य च, पश्यन्तीनां, योषितां पुरः, प्रीत्या अग्रजाय बलभद्राय, आददत् दत्तवान्।।३२।।

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे चतुस्त्रिंशोऽध्यायः ।। ३४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स वीक्ष्येति : १०.३४.२९.

आत्मरक्षार्थमाजह्याद्भूमिमित्यस्ति विश्रुतम् । युक्तमेव तदा स्वार्थं योषितस्त्यक्तवानसौ ।। ४४ ।।

तमन्वधावदिति : १०.३४.३०.

यदुन्मादादयं यक्षाधमः सप्रमदोऽभवत् । हर्तव्यं तदिति श्रीशो युक्तं तन्मणिवासनः ।। ४५ ।।
अबलाश्रितस्य बहुलप्रमदापहृतिर्हि तादृशेन मया । विहितेति बोधनाय स्वयमबलः संस्तमच्युतोऽधावत् ।। ४६ ।।
योगबलेन हि वृत्तीः सर्वाः संरुद्ध्य योगवित्सृजनः । बाह्योपाधीन् हन्यादिति विशदं युवतिरक्षणाद् बलतः ।। ४७ ।।
निष्ठा चेत्कृष्णपदे सद्योऽप्यकुतोभयो भवति जन्तुः । स्पष्टमिदं ता अबला अपि सबलाः कृष्णभक्तितो ह्यासन् ।। ४८ ।।
विशालमन यदि शालतोऽहं भृशं हनिष्यामि तदा ह्यनीतिः । भूयादितीशः स्वकरेण राजराजाश्रितस्यापि शिरो जहार ।। ४९ ।।
ममैकः पाञ्चजन्योऽस्ति शङ्खचूडाश्रितो मणिः । तदन्यः कोऽयमत्रेति जहार सदिदृक्षितः ।। ५० ।।
धनमल्पमनल्पं वा लब्धं चेदनुजन्मना । तत्र स्वत्वं त्वग्रजस्येत्यादात्तस्मै मणिं प्रभुः ।। ५१ ।।
बाह्योपप्लवविलये योगबलावाप्त ससुखवसतीनाम् । वृत्तीनां न परोक्षं किञ्चिदपीति स्फुटं तदीक्षणतः ।। ५२ ।।

श्रीशकल्पतरुक्रीडा० ।।

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते श्रीभक्तिरसायने चतुस्त्रिंशोऽध्यायः ।। ३४ ।।

कृष्णप्रिया

काल और मृत्यु जैसे उन दोनों भ्राताओं को अपने समीप देख वह मूढ शंखचूड़ अपने प्राणों की रक्षा के लिए व्रजवनिताओं को छोड़कर अकेला ही भागने लगा ॥ २९ ॥ यह शंखचूड जहाँ जहाँ दौड़ जाता था वहाँ वहाँ श्री गोविन्द जी उसको पकड़ने की इच्छा से दौड़े और व्रजवनिताओं की रक्षा के लिए वहाँ खड़े रहे ॥ ३० ॥ हे अङ्ग ? शंखचूड समीप ही त्वरित गति से पहुँच कर उस दुरात्मा के मस्तिष्क में एक मुक्की लगाकर मणिके साथ मस्तक तोड़ दिया ॥ ३१ ॥ भगवान् श्रीकृष्णने इस प्रकार शंखचूड का वध किया मस्तक में रही कान्तिमयी मणि उठा ली और वापिस लौट कर गोपियों के देखते हुए ज्येष्ठ भैया बलदेवजी को आदर पूर्वक अर्पित किया ॥ ३२ ॥

श्रीमद्भागवत दशम स्कन्ध निरोधलीला के तामस प्रकरण के फल प्रकरण में भगवान के वैराग्य धर्म का
निरूपण करने वाला ३४ वाँ अध्याय सम्पूर्ण ॥ ३४ ॥

* * *

अथ पञ्चत्रिंशोऽध्यायः

श्लोकाः	अनु.	स्वागता.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
२६	२	२४	३	११२०	१६	४२	११७८	३६।।।	२

[1]श्रीशुक उवाच

गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः । कृष्णलीलाः[2] प्रगायन्त्यो निन्युर्दुःखेन वासरान् ॥ १ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—कृष्णे, वनम् , याते, तम् , अनुद्रुतचेतसः, गोप्यः, कृष्णलीलाः, प्रगायन्त्यः, वासरान् , दुःखेन, निन्युः ॥ १ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पंचत्रिंशे वनं याते कृष्णे गोकुलयोषितः । युग्मश्लोकानुगीतेन निन्युर्दुःखेन वासरान् ॥ १ ॥

एवं रात्रिषु कृष्णेन स्वरमभिरमितानां दिवा तद्विरहितानामनुगीतेन दिननिस्तारप्रकारमाह । गोप्य इति । दुःखेन कृच्छ्रेण ॥ १ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दुःखेन कृच्छ्रेण । निन्युः व्यतीयुः (१) । एवम् रासादिना । दिवा दिने । तद्विरहितानाम् कृष्णविरहयुतानाम् । अनुगीतेन मुहुर्मुहुर्गानेन । गोप्य इति–तम् श्रीकृष्णम् । अनु पश्चात् । द्रुतं गतं चेतो यासां ताः । प्रगायंत्यः प्रकृष्टं गानं भक्तिलक्षणमिति ध्येयम् । अथ वेणुगीताध्यायः । पंचत्रिंशे वेणुगीतं द्वादशश्लोकयुग्मतः । वर्ण्यते यत्प्रियाः पीत्वा विरहिण्योऽनयन्दिनम् ॥ (१) ॥ संभोगशैत्यं ज्यौत्स्नीषु विच्छेदौष्ण्यंदिनेष्वदात् । प्रेमा ताभ्यः स्वपुष्ट्यर्थं स्वयं तद्द्वितयात्मकः । (२) । एवं रात्रिषु गोप्यः स्वकान्तेन सह लब्धांगसंगाः सनृत्यगीतनर्माधरामृतादिकं पिबंत्यः संभोगरसनिमग्ना बभूवुरित्युक्तम् । इदानीं दिनेषु तेन सह लब्धमनोमात्रसंगास्तद्वेणुगानामृतमात्रं पिबन्त्यो विप्रलंभरसनिमग्ना बभूवुरित्याह—तं वनं गच्छतमनुलक्ष्यीकृत्य द्रुतानि वेगेन सह चलितानि चेतांसि यासां ताः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वेवं श्रीव्रजेन्द्रकुमारेण रात्रिषु रासक्रीडादिना बहुधा रमितानां तासां दिवसेषु तद्विरहेण महद्दुःखं सम्भाव्यत एव उक्तं श्रीपराशरेण । "स तथा सह गोपीभी रराम मधुसूदनः । यथाब्दकोटिप्रतिमः क्षणस्तेन विनाभव"दिति । अतस्तावद्दुःखं वत् ताभिः कथं निस्तीर्णमित्यपेक्षायां तादृशरजनीवर्गसम्भोगं पोषयितुं दिनवर्गगतं विप्रलम्भं वर्णयन् तत् कालक्षेपणहेतुं दर्शयति । गोप्य इति । तमनु तेन सह द्रुतं वेगेन गतं चेतो यासां ताः । तं लक्ष्यीकृत्य श्लथितहृदया इति वा तत्र तमनुद्रुतचेतस्त्वेन गृहकृत्याद्युपरतिर्दर्शिता ॥ १ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नन्वेवं श्रीव्रजेन्द्रकिशोरेण रात्रिषु रासक्रीडादिना बहुधारमितानां तासां दिवसेषु तद्विरहेण महद्दुखं सम्भाव्यत एव, उक्तञ्च श्रीपराशरेण (वि. पु. ५।१३।५७)—'स तथा सह गोपीभी रराम मधुसूदनः । यथाब्दकोटिप्रतिमः क्षणस्तेन विनाभवत् ॥' इति; अतस्तद्दुःखं वत ताभिः कथं निस्तीर्णमित्यपेक्षायामाह गोप्य इति । प्रकृत्यैव तद्विरहासहा अपि कृष्णे परमानन्दघनमूर्त्तौ परमाकर्षके वा वनं याते दिवा श्रीवृन्दावनं प्रयाते सति, अतएव तं कृष्णमनु पश्चात् संलग्नतया वेगेन द्रुतं गतं चेतो यासां ताः, अतएव कृष्णस्य लीला मुहुर्नवनववेशादिना वन्यक्रीडाः प्रकर्षेण प्रायो मोहनवेणुवादनप्रधानत्वेन जगच्चित्ताकर्षकतया गायन्त्यस्तत्र तमनुद्रुतचेतस्त्वेन गृहकृत्याद्युपरतिर्दर्शिता । कृष्णस्येति तल्लीलानामपि तादृशत्वमभिप्रेतम् , अतएव दुखेन शिष्टानपि निन्युर्गमयामासुः, तथा चान्ते वक्ष्यते (भा० १०।३५।२६)—'एवं व्रजस्त्रियः इति । एवं तासां दिननयनहेतुत्वेन तल्लीलाप्रगानस्य

---

१. बादरायणि–प्रा. पा. । २. लीलां–वीर. विज. ।

माहात्म्यं दर्शितम्, यद्वा, दुःखेन कृच्छ्रेणैव निन्युस्ताभिस्तद्विरहस्य सुदुःसहत्वात्, तत्रापि तल्लीलाप्रगानात्, यतो गोप्यस्तदेकप्रिया इत्यर्थः, एतदनुसारेण एवमित्यस्यार्थोऽग्रे व्यक्त एव भावी—

जयन्ति व्रजदेव्यस्ता यासां गीतार्थमीप्सति । अज्ञोऽपि यासां महात्म्यप्रपत्त्येकवलादयम् ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथेत्थं निशासु विहरन्तीनामहःसु तेन विश्लिष्टानां गोपीनां तल्लीलानुवर्णनेन कालनिर्यापणप्रकारमाह पञ्चत्रिंशेन । गोप्य इति । कृष्णे वनं यातेऽतस्सु इति शेषः तं कृष्णमनुद्रुतमनुवृत्तं तदासक्तमिति यावत् तच्चेतो यासां ता गोप्यः कृष्णस्य लीलाः प्रगायन्त्यः वासरानहानि दुःखेन कृच्छ्रेण कथञ्चिन्निन्युर्निर्यापयामासुः ॥ १ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

स्त्रीणामुपासनाप्रकार ईदृश इति दर्शयितु गोपीनां भगवल्लीलानुस्मरणं कथयत्यस्मिन्नध्याये । तत्र प्रथमतस्तासां कृष्णे भक्तिलक्षणं वक्ति । गोत्य इति । प्रकृष्टगानेनादृतचेतस्त्वं भक्तेर्लक्षणं सूचयति ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नानासभागतानां श्रीगोपीनां वाक्यसङ्ग्रहोऽध्यायोऽयम् । अतः क्वचित् व्रजदेव्य इति क्वचित्तव सूनुरनघे तव वत् स इति च सम्बोधनेन भेदो दृश्यते । सङ्ग्रहस्तु प्रातरादि सायं पर्यन्तं लीलाक्रमेण तत्रादौ वनवर्त्मनि वेणारीरिते व्योमयानवनितानां सर्वोपरि वर्त्तमानत्वेन प्रथममनुभवन्तीनां मोहमाहुः । वामेति युगलेन कोमलेनेति प्रयोगः स्नेहेन ईरयति गातुं प्रेरयति ॥ १–३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथ योगमायाबलेन छायारूपेण स्थिता अपि या गोपिकास्ता अपि यासां छाया तासामेव प्रकृत्याकृती एव जगृहुः । यास्तु अच्छायारूपाः प्रकृतास्ता अपि गोपगृहान् हित्वा भगवदालये नित्यसिद्धत्वेन स्थिता इति विदुः । अतो दीनान्तरेष्वपि पूर्वपूर्वदिनवद्गाश्चारणार्थं वनं गते भगवति श्रीकृष्णे गाढानुरागाकृष्टहृदयतयाऽथान्योन्यं तद्गुणान् कीर्तयन्ति । तथा रासानन्तरसुस्था अपि तास्तच्छायारूपा अपि गोपगृहस्था यद् वर्णयन्ति, तदाह—गोप्य इत्यादि । वासरानेव दुःखेन निन्युर्न तु रात्रीः ॥ १ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

इदानीं श्रीकृष्ण-प्रणयिनीनां गोपीनामुत्कण्ठमाह—गोप्य इत्यादि । गोचारणार्थं कृष्णे वनं याते सति निन्युर्दुःखेन वासरानिति सुखेन रात्रीर्निन्युर्नेष्यन्तीत्याक्षिप्यते ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पञ्चत्रिंशे वेणुगीतं द्वादशश्लोकयुग्मतः । वर्ण्यते यत् प्रियाः पीत्वा विरहिण्योऽनयन् दिनम् ।
सम्भोगशैत्यं ज्योत्स्नीषु विच्छेदौष्ण्यं दिनेष्वदात् । प्रेमा ताभ्यः स्वपुष्ट्यर्थं स्वयं तद्द्वितयात्मकः ॥

एवं रात्रिषु गोप्यः स्वकान्तेन सह लब्धाङ्गसङ्गा नृत्यगीतनर्माधरामृतादिकं पिबन्त्यः सम्भोगरसनिमग्ना बभूवुरित्युक्तम इदानीं दिनेषु तेन सह लब्धमनोमात्रसङ्गास्तद्वेणुगानामृतमात्रं पिबन्त्यो विप्रलम्भरसनिमग्ना बभूवुरित्याह । गोप्य इति । तं वनं गच्छन्तमनुलक्ष्यीकृत द्रुतानि वेगेन तेन सह चलितानि चेतांसि यासां ताः ॥ १ ॥

गूढार्थदीपिनी

पञ्चत्रिंशे वियोगार्ता वेणुमुद्दिश्य गोपिकाः । युगलं गीतमाचेरुर्व्यतीयुस्तेन वासरान् ॥ १ ॥

अनुद्रुतमासक्तम् ॥ १ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपः

एवं निशासु भगवता सह विहरन्तीनामहःसुः तेन वियुक्तानां तल्लीलानुवर्णनेन दिननिर्यापणप्रकारमाह पञ्चत्रिंशेनाध्यायेन । गोप्य इति ॥ १ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ गतादेवसितासिताक्ष्यः कथमवसन्ननुभूतप्रभुसङ्गरुचय इत्यत एवं कृष्णकृतक्रीडाः क्रोडीकृत्य परस्परं तत्कीर्तनपरा अनितरप्राप्तावसरा वासराननयन्निति निरूप्यतेऽत्राध्याये । तत्रादौ तत्पारवश्यं दर्शयञ्छुक आहेत्याह ॥ श्रीशुक इति । अनुद्रुतं चेतोः यासां ता दुःखेन तद्विरहजं दुःखसहितं च तत्खं च सुखं लीलास्मरणजं च तेन वासरान् एकमहः । बहुवचनं च विरहदहनतो भानं तथेत्यर्थद्योतकम् । दुर्दुःखमिति सम्प्रोक्तं खं सुखं प्रोच्यते बुधैरिति तात्पर्यान्तरोक्तेः । केवलं दुःखमेव चेद्वनितानां तल्लोना स्मृतिः कथ स्यादिति वर्णयन्ति । द्वौ द्वौ श्लाकावेकैकस्या उक्तितया योज्यौ ॥ १ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

द्वात्रिंशेऽन्तर्गोपिकानां स्वानन्दं भगवान् हरिः । पूरयामास येनैव पूर्णानन्द इतीर्यते ।।
अन्तः प्रविष्टो भगवान् मुखादुद्धृत्य कर्णयोः । पुनर्निवेश्यते सम्यक् तदा भवति सुस्थिरः।।
शब्दार्थयोर्मुख्यतात्र युग्माः श्लोकास्ततोऽत्र हि । सर्वेषु चैव मासेषु यत्करोत्यच्युतोऽत्र तत्।।
अतोऽत्र मासयुग्मो हि प्रक्रमः फलमेव च । आद्यन्ते चामरं युग्मं त्रयोदश भवन्ति तत् ।।

एवं भगवता सह रात्रौ क्रीडामुक्त्वा दिने तासां संसारप्रवृत्तिर्भविष्यतीत्याशङ्क्य दिवसेषु भगवद्गुणवर्णनपरा जाता इति वदन् गुणवर्णनाया आवश्यकत्वायारम्भे दुःखं पर्यवसाने सुखमिति निरूपयन् प्रथमं प्रथमप्रवृत्तावपि गोपिकानां दिवसेषु परमं दुःखं जातमित्याह । गोप्य इति । केवलपदात् पूर्वोक्ता ग्राह्याः सदानन्दे वनङ्गते तमन्वेव द्रुतं चित्तं यासां वस्त्वन्तरग्रहणाक्षमं चित्तं जातं द्रुतशब्दात् विलय उक्तः ततः सर्वतः प्रसृतं सूक्ष्मभावापन्नं सदानन्दस्य लीलां गृहीतवत् अतः कृष्णलीलाः प्रगायन्त्यो जाताः यथास्वरूपं सदानन्दरूपं तथा तल्लीला अपीति तदात्मकत्वञ्च लीलानां ज्ञापयितुं पुनर्नामग्रहणं कृतमन्यथा तत्पदमेव वदेत्तथा सति तत्संबन्धित्वमात्रं प्राप्येत नतूक्तरूपत्वम् अवश्यवाच्यं चैतद्यतः स्वरूपवियोगे तदतिरिक्तस्य न जीवनहेतुत्वं ततो हीनत्वात् ततो यथा कथञ्चिन् महता मानसदुःखेन वासरान् निन्युः यदा पुनस्तच्चित्ते प्रकीर्णे भगवच्चरित्रे विलीनं सत् एक भावं प्राप्स्यति तत्तदा पूर्णमनोरथा भविष्यन्ति इदानीं सर्वा सामग्री विशकलितेति दुःखेन दिननयनं वासरपदात् रात्र्यर्थं कथञ्चित् प्राणानां धारणं लक्ष्यते ।। १ ।।

श्रीसुबोधिनी–सारः

शुकोक्तिः । कृष्णे वनं याते गते तमनुद्रुतं चलितं चेतो यासां ता गोप्यः कृष्णस्य लीलाः प्रगायन्त्यो दुःखेन वासरान् दिनानि निन्युः यापयामासुः ।। १ ।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

द्वात्रिंशाध्यायायार्थोक्तौ, द्वात्रिंशेऽन्तरित्यादि । यद्यप्यानन्दः सर्वत्रैवान्तरेवानुभूयते तथापि बाह्यरमणे शरीरचेष्टयोरेव प्राधान्यात्स्वरूपस्य मूर्तत्वेन तदात्मकानन्दस्यापि तथात्वाच्छरीरेन्द्रियादिष्वपि स्वरूपतः स्थापितस्य मनसाऽनुभवो भवति । प्रकृते त्वन्तःसङ्गे न प्रकटेनानन्देन शरीरेन्द्रियादिषु बाह्यरमणेनेव धर्मा भवन्तीत्यभिप्रेत्यान्तरित्युक्तम् । **स्वानन्दं पूरयामास इतीर्यत** इति सम्बन्धः । ननु धर्मिस्वरूपविरहजदुःखनिवारणं धर्मरूपेण गुणगानेन कथं सम्भाव्यते । तत्रापि स्वरूपेणेवानन्दपूरणं चेत्यत आहुः **येनैवेति** । यथा स्वरूपं पूर्णानन्दात्मकम् , तथा नामलीलापीति सर्वमुपपद्यत इत्यर्थः । यद्वा । येन स्वरूपलक्षणेन हेतुना पूर्वं तथा कृतवांस्तेनैवान्तःस्थितेनैवात्युद्रेकेण मुखकमलद्वारा निर्गतेनाधुनापि तथा कृतवानित्यर्थः । एतदेव विवृतमन्तः**प्रविष्ट** इत्यादिना । यद्वा । यथा यथा स्वविषयिकां भक्तानामार्तिं पश्यति भगवांस्तथा तथा मुदितो भवतीति वस्तुस्थित्या दिवा विरहजातिपूर्णानां सायं मिलने यो रसो भगवतः स न दिवा संगमे सतीति च येनैव स्वानन्देन स्वयं पूर्णानन्दो ज्ञातो भक्तैस्तादृशं तं पूरयामासेत्यर्थः । यद्यपि गुणगानं भावस्वभावादेव भवति, न तु प्रयोजनानुसन्धानेन, तथापि पूर्वभावस्थैर्यमप्यनेन भवतीत्याहुः **अन्तःप्रविष्ट** इत्यनेन । पूर्वं या नादद्वारा सुधा प्रविष्टा भावात्मकभगवदात्मिका 'रन्ध्रान्वेणोरधरसुधया पूरय'न्नित्यत्र निरूपिता सा पूर्वोक्तप्रकारैर्बहिःफलानुभवपर्यन्तैः क्रमेण पुष्टा सती स्वविषयरूपं स्वपोषकं बहिःसम्बन्धमलभमाना तदर्थं स्वयं गुणगानरूपेण प्रकटाप्यलब्धविषया सती स्वप्राकट्यात्पूर्वमन्तःसाक्षात्प्रियप्राकट्यात्पुनस्तत्रैव स्वस्यान्यासां च श्रोत्रद्वारा प्रविष्टा तत्र स्वविषयं पोषकं प्राप्य सुस्थिरा जाता । तदेतदुक्तमन्तः**प्रविष्ट** इत्यादिना । युग्मश्लोकैर्गाने हेतुमाहुः **शब्दार्थयोरिति** । पूर्वं नादमात्रमनुभूतमिति नादप्राधान्येन 'अक्षण्वता'मित्यादिना गीतम् , अधुना स्वरूपानुभवोऽपि साक्षादवृत्त इत्युभयोरपि महारसरूपत्वज्ञापनाय द्वाभ्यां कथनमुभयोरप्येकरूपत्वमिति ज्ञापनायैकवाक्यता चेत्यर्थः । **संख्यातात्पर्यमाहुः सर्वेष्विति** । निरूप्यते यत इति शेषः । अत्र हि वर्षे वर्षे यावतीं लीलां प्रभुः करोति, तावती सर्वा लीला क्रमेण स्वामिनीभिर्गीता, न त्वेतावन्मात्रेति ज्ञापनाय पूर्णवर्षस्य द्वादशमासात्मकत्वान् माससमानसंख्याका युग्माः श्लोका उच्यत इत्याहु **अतोऽत्रेति** । किञ्च । उपक्रमोपसंहाराभ्यां चैकं युग्मं भवति, तेनाधिमासेपि यत्करोति तदपि स्वामिनीभिर्गीयत इति ज्ञाप्यत इत्याशयेनाहुः **आद्यन्त** इति । समाहारोऽत्र । तत्र प्रतिपाद्यं रूपमाहुः **प्रक्रम** इति । **गोप्यः कृष्ण** इत्यत्र **केवलपदादिति** । गोव्रजयोषितामितिवदपकर्षज्ञापकधर्मानुक्तिपूर्वकं शुद्धभावज्ञापकगोपीपदाद् रासमण्डलमध्यस्था एवोच्यन्ते, न तु, पूर्वाध्यायोक्ता इत्यर्थः ।। १ ।।

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

द्वात्रिंशाध्याये द्वात्रिंश इत्यादि का० ३०७$\frac{३}{४}$–३१०–$\frac{३}{४}$ । गोपिकानामन्तःकरणे **स्वानन्दं पूरयामासेति** अत्राध्याये ईर्यते, गुणगानेनेतिशेषः, स्वानन्दपूरणमेव विवृण्वन्ति **अन्तःप्रविष्ट** इति, गुणगानेन मुखादुद्धृत्य गुणानुवादश्रवणेन पुनः **कर्णयोः** कर्णद्वारा सम्यक् यदा **निवेश्यते** तदेत्यर्थः, अत्र युग्मश्लोकैर्गाने हेतुमाहुः **शब्दार्थयोर्मुख्यतात्रेति**, **अत्राध्याये** नादात्मकस्य

शब्दस्य तत्प्रतिपाद्यभगवत्स्वरूपात्मकस्यार्थस्य च **मुख्यतेति**ज्ञापनाय **युग्माः** श्लोका इत्यर्थः. पूर्वं वेणुगीते नादमात्रानुभवः, अत्रोभयोरनुभव इतिद्वाभ्यां कथनं, सङ्ख्यातात्पर्यमाहुः **सर्वेषु चैव मासेष्विति,** अत्र गुणगाने हि वर्षं वर्षं यावतीं लीलां प्रभुः करोति तावती सर्वा लीला क्रमेण स्वामिनीभिर्गीता, न त्वेतदध्याये यावत्युक्ता तावन्मात्रेतिज्ञापनाय पूर्णवर्षस्य द्वादशमासात्मकत्वान् माससमानसङ्ख्याका युग्माः श्लोका उच्यन्त इत्याहुः। अतोऽत्र **मासयुग्मा** हीति, **माससमानसङ्ख्याका युग्मा मासयुग्मा** इति मध्यमपदलोपीसमासः, किञ्चोपक्रमोपसंहाराभ्यां चैकं युग्मं भवति, तेनाधिमासेपि यत् करोति तदपि स्वामिनीभिर्गीयत इति ज्ञाप्यत इत्याशयेनाहुः **आद्यन्ते** चापरं **युग्म**मिति, आदिश्चाद्यन्तौ तस्मिन्नाद्यन्त इतिविग्रहः, समाहारोत्र, तत्र प्रतिपाद्य रूपमाहुः प्रक्रम इति, आद्यश्लोके गानोपक्रमः, अन्त्यश्लोके "तच्चितास्तन्मनस्का" इतिफलं, **त्रयोदश भवन्ति** तदिति अत्र तदित्यव्ययं तस्मादित्यर्थे ॥ ० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गोप्यः कृष्णे वनं याते तस्मिन्नाविष्टचेतसः ॥ कृष्णलीला जगुरेतत् पञ्चत्रिंशे निरूप्यते ॥ १ ॥

'एवं रात्रिषु श्रीकृष्णेन स्वैरमभिरमितानां परमानन्दे निमग्नानां दिवसेषु तद्विरहितानां निस्तारः कथम्' इत्यपेक्षायामाह—गोप्य इति। कृष्णे वनं याते सति तं कृष्णमनुद्रुतं तस्मिन्नासक्तचेतो यासां ताः गोप्यः कृष्णलीला एव प्रगायन्त्यो दुःखेन कष्टेन वासरान् दिनानि निन्युः ॥ १ ॥

अन्वितार्थप्रकाशिका

पञ्चत्रिंशे वनं याते युग्मश्लोकैर्व्रजाङ्गनाः ॥ प्रेम्णा कृष्णं जगुस्तत्र श्लोकाः षड्विंशतिर्मताः (२६) ॥
उवाचवाचां त्रिशतं (३) पञ्चत्रिंशदनुष्टुभः (३५) ॥ ३५ ॥

गोप्य इति ॥ कृष्णे वनं याते सति तं कृष्णमनुद्रुतं तस्मिन्नासक्तं चेतो यासां ताः गोप्यः कृष्णलीला एव प्रगायन्त्यो दुःखेन वासरान् निन्युः ॥ १ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं पञ्चत्रिंशेऽध्याये गोपीनां युगलगीतमुच्यते एवं रात्रिषु हरिणा बहुधारमितादिवसे तद्विरहाकुला गोपिकास्तन्महद्दुःखं कथं तीर्णा इत्याशंकायामाह गोप्य इति तं श्रीकृष्णमनुद्रुतं तेन सह वेगेन गतं चेतो यासां ताः वासरान् दिनानि ॥ १ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वनं याते हरौ पञ्चत्रिंशेऽथ व्रजयोषितः दुःखेन वासरान्निन्युर्युग्मश्लोकानुगीततः ॥ १ ॥

अथेत्थं निशासु कृष्णेन विहरन्तीनामहःसु च तेन विश्लिष्टानां गोपीनां तल्लीलानुवर्णनेन कालनिर्यापणप्रकारमाह ॥ गोप्य इति ॥ कृष्णे श्रीकृष्णभगवति, वनं याते, अहस्स्विति शेषः। तं श्रीकृष्णं, अनु पश्चात्, द्रुतमनुवृत्तं तदासक्तमिति यावत्। तच्चेतो यासां ताः, गोप्यः कृष्णलीलाः श्रीकृष्णचरित्राणि, प्रगायन्त्यः सत्यः, वासरानहानि, दुःखेन कृच्छ्रेण कथंचिदिति यावत्। निन्युर्निर्यापयामासुः ॥ १ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गोप्य इति : १०.३५.१.

द्वयोः स्त्रीभिः सह क्रीडां निरीक्ष्येतस्तदद्वयम्। ता बोधयन्त्यो युग्मेनास्तुवन् केवलमीश्वरम् ॥ १ ॥
द्वैतोरीकरणादृते न घटते सर्वात्मनाऽऽत्मस्तुतिवृत्तीनामपि वा प्रवृत्तिरगुणे नैवात्मनि स्यादिति।
आम्नायप्रतिपादितार्थविशदीभावाय ता गोपिका युग्मेनैव तमस्तुवन् व्रजगता वृन्दावनोद्यद्रतिम् ॥ २ ॥
युग्म एव सुखोल्लासः समुज्ज्वलरसे निशि। नाद्वैत इति तद्राससुखिता-स्तुष्टुवुस्तथा ॥ ३ ॥
सच्छायो मिहिरो घनश्च सतडिद्राकान्वितश्चन्द्रमा भूपो भूकलितो विभुः प्रकृतियुग् दाता युतः सम्पदा।
सस्त्रीकः पुरुषो नयोऽपि च धिया कामोऽपि रत्यान्वितः साधुर्भक्तियुतो मधुश्च सुलतस्तद्वत्त्वमस्मच्छ्रितः ॥ ४ ॥
प्राप्नोषि सुषमामेवं व्यञ्जयन्त्यो निजाशयम्। चक्रुर्द्वादशयुग्मैस्ता गीथं गोप्योऽच्युतार्थकम् ॥ ५ ॥ (युग्मम्)
वृत्तीनां यौगिकामन्दरसभाजां बहिः स्थितिः। व्युत्थानजाहीदृशीति तदहस्थितितः स्फुटम् ॥ ६ ॥
आरामः सुमनोलताभिरिह सत्पुष्पाभिरम्भोधरोवर्षाभिश्च समुज्ज्वलाभिरभितस्ताराभिरेवोडुपः।
सौभाग्यं सुरतातिशायि सुखमप्याप्नोति नैवाऽन्यथा जानन्नेवमसौ प्रभुः सखि कथं संत्यज्य नः क्रीडति ॥ ७ ॥

कृष्णप्रिया

फल प्रकरण का यह सातवाँ धर्मी 'अध्याय है। इस अध्याय को युगल गीत' के नाम से सब जानते है। इस अध्याय में २६ श्लोक है। भगवान श्रीकृष्ण वन में गौचारण करते वेणुवाद करते थे तब गृहकार्यरत परवश गोपियाँ भगवान के अनुग्रह से दूरदर्शन दूरश्रवण शक्तियाँ से कार्य मग्न होने पर भी वेणुनाद का श्रवण करती थी और श्याम सुन्दर के सुन्दर स्वरूप का दर्शन करती थी। बाद में ब्रह्म द्वारा भगवान प्रथम ब्रह्मानन्द स्वरूप में उनके श्रवणों से हृदयनिविष्ट होकर पुनः वेणु माधुरी द्वारा मुख सरोज से बाहर निकल कर पुनः कर्णोंद्वारा श्रीहरि परमानन्द स्वरूप से हृदय में विराजेंगे। श्रीयुगल गीत में भगवान श्रीकृष्ण बारह मास में गोचारण के समय जो जो लीलाओं ऋतु ऋतु के अनुसार करते हैं वैसी प्रायः बारह प्रकार की लीला ओं का संक्षेप में निरूपण किया है।

श्रीशुकाचार्य जी कहते हैं कि राजन्? भगवान् श्रीकृष्ण जी, गोचारण के लिए जब वन में पधार जाते है तब श्रीश्यामसुन्दर जी के श्री चरणों में संलग्न मना व्रजवनितावृन्द श्रीकृष्ण प्रभुजी की लीला ओं का प्रेम पूर्वक गान करता था ॥१॥

गोप्य ऊचुः

वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम्[1] ।
कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ॥ २ ॥
व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः ।
काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ ३ ॥

कर्दमक्षमा

अन्वयः—हे गोप्यः! वामवाहुकृतवामकगेलः, वल्गितभ्रुः, मुकुन्दः, कोमलाङ्गुलिभिः, आश्रितमार्गम्, अधरार्पितवेणुम्, ईरयति (१) तदा, सिद्धैः, सह, व्योमयानवनिताः, तद्, उपधार्य, विस्मिताः, काममार्गणसमपितचित्ताः, सलज्जाः, अपस्मृतनीव्यः, कश्मलम्, ययुः ॥ २–३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वामबाहुकृतवामकपोल इत्यादीनि द्वादशयुगललानि। हे गोप्यो वामे बाहौ तन्मूले कृतोऽर्पितो वामकपोलो येन सः वल्गिते नर्तिते भ्रुवौ येन स वल्गितभ्रुर्मुकुन्दः। अधरे अर्पितवेणु[1] कोमलाभिरंगुलिभिराश्रिता मार्गाः सप्तस्वरच्छिद्राणि यस्य तं यत्र यदा ईरयति वादयति ॥ २ ॥ तदा व्योमयानानां सिद्धानां वनितां सिद्धैः स्वपतिभिः सह वर्तमाना अपि तद्वेण्वीरणमुपधार्याकर्ण्य प्रथमं विस्मितास्ततः काममार्गणेभ्यः समर्पितानि चित्तानि याभिस्तास्तत्परवशा इत्यर्थः। सलज्जाः सत्यः कश्मलं मोहं ययुः। अत्र लिंगम्। अपस्मृता विस्मृता नीव्यो याभिरिति। अत एवंभूतस्य कृष्णस्य विरहं कथं सहामहे इति सर्वत्र वाक्यशेषः ॥ ३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एकैकया द्वौद्वौ श्लोकावम्याः प्रति गीताविति द्वादश युगलानि चतुर्विंशतिश्लोकाः। हे गोप्य इति–शृणुतेति शेषः। मुकुन्द इति भक्तेर्मोक्षदत्वं सूचयन्त्य आहुः (२) ॥ पूर्वश्लोके यदेत्युक्तस्तदेति लभ्यते। व्योमयानं विमानं तत्रस्था वनिता व्योमयानवनिताः। व्योम्नि नभसि यानं गतिर्येषां ते व्योमयाना देवास्तेषां वा। सिद्धो देवयोनिशिशेषः। 'गुह्यकः सिद्धो भूतोऽमी देवयोनयः' इत्यमरः। ततः विस्मयानन्तरम्। काममार्गणेभ्यः स्मरबाणेभ्यः। 'मार्गणो याचके शरे' इति मेदिनी। इत्यर्थ इति–कामपारवश्यात्तेन स्वाधीनवस्तुग्रहणवत्तासां चित्तानि गृहीतानीति भावः। अत्र मोहे। लिंगम् ज्ञापकम्। नीवी कटिवस्त्रग्रंथिः। मुच्यमानवस्त्रग्रंथिस्मरणरहिता इत्यर्थः। यत एतादृशः कृष्णोऽतो हेतोः। एवंभूतस्य वेनुवादनमोहितदेवांगनस्य। सर्वत्र युगलेषु ॥ वृन्दावने गाः संचार्य तत्रत्यतरुवल्लीमृगखगादीन्नक्तनस्वविरहखिन्नानाश्वासयन्स्वागमनमावेदयितुं यदा वेणुना कृष्णः संजगौ तदा तदाकर्णनेनोद्दीप्तभावा गोप्यः स्वस्वपूयस्थाः सखीः प्रत्याहुः–वामेत्यादिद्वादशयुगलानि। हे गोप्यः वामबाहुमूले कृतोऽर्पितो वामकपोलो येन सः। गीतस्यारोहावरोहयोर्गमकमयीकरणं तेनव प्रकारेण संभवेत्। तथैव वामजंघोपरि दक्षिणजंघाधस्तटन्यासोऽपि ज्ञेयः। तेन त्रिभंगललितस्तिर्यग्ग्रीवस्त्रैलोक्यमोहन इति नामत्रयं प्रकटीबभूवेति भावः। वल्गिते नर्तिते भ्रुवौ यनेति सुबलादीन्पुरस्थितान् गानसौष्ठवेऽवधापयितुमिति भावः। ह्रस्वत्वमार्षम्। अधरेऽर्पितो न्यस्तो दत्तो वा यो वेणुस्तम्। यत्र यदेरयति। कीदृशम्–

---

१. वेणुः—वीर. विज.।

कोमलाभिरन्यजनांगापेक्षया सुकुमाराभिः 'अकर्मकठिनौ हस्तौ' इति सामुद्रिकात्स्वांगापेक्षया त्वीषत्कठिनाभिरंगुलीभिराश्रिता मार्गाः सप्तस्वरच्छिद्राणि यस्य तम् ।। तदा व्योमयानानां सिद्धानां वनिताः सिद्धैः स्वपतिभिः सहिता अपि प्रथमं तद्वेण्वीरणमवधार्याकर्ण्य विस्मिताः अहो वेणुनादस्यैतावन्मोहवत्वमननुभूतचरं, यतोऽस्मान्साध्वीरपि मोहयति, अस्मान्पुरुषानपि स्त्रीभावयुक्तीकृत्य मोहयतीति प्रथमं विस्मययुक्तास्ततश्च सिद्धैः सहैव सलज्जाः–अस्मद्व्यभिचारमस्मत्पतयो वितर्केयुरिति तथैवास्मत्पुस्त्वविपर्ययमत्पत्न्यो वितर्केयुरिति स्वस्वपतिभ्यः सकाशात्स्वस्वपत्नीभ्यश्च सकाशाल्लज्जायुक्ता अभूवन् । ततश्च सिद्धैः सहैव कामस्य मार्गणेभ्यः समर्पितानि दत्तानि याभिस्ताः । आयातान् श्रीकृष्णविषयककामशरानालक्ष्य–भोः श्रीकृष्णकामशराः युष्मभ्यमेतान्यस्मच्चित्तानि दत्तानि, एतानि शीघ्रं विद्धीकुरुत अस्माभिः पातिव्रत्याय जलांजलिर्दत्तः, कृष्णोऽस्माभिः सह कृपया रमतामिति । तथास्माभिरपि स्वपुंस्त्वं देवत्वं च त्यक्तं कृष्णोऽस्मान्सद्य एव स्वयोवगबलेन गोपस्त्रीकृत्यास्माभिस्सह रमतामिति समर्पितपदव्यंग्यं ज्ञेयम् । ततश्च सिद्धैः सहैव कश्मलं कामशरपीडया मोहं मूर्छां ययुः प्रापुः । कश्मलस्यानुभावमाह—अपस्मृता न स्मृताः स्खलिता अपि नीव्यो याभिस्ताः । सिद्धैस्तु सहैव शिथिलवस्त्रबंधकेशबधादिका बभूवुरित्यर्थः । समासान्ताभाव आर्षः । अकस्माद्देवीनां देवानां च यद्येतादृशावस्थास्तर्हि वयं मानुष्यस्तत्रापि गोप्यस्तत्राप्येकनगरस्थास्तत्रापि लब्धांगसंगाः कथं तं विना स्थास्यामस्तदुत्तिष्ठत सख्य एतान्दग्धमुखान्पश्यतोऽपि पतिश्वशुरादींस्तिरकृत्य केनचिन्निमिषेण वृन्दावनं प्रविश्य प्राणप्रेष्ठेन सार्द्धं विलसाम इति ध्वनिः प्रतियुगलांतमेवानुवर्तनीयः ।। २-३ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जयति व्रजदेवीनामपूर्वा महिमावली । यदालम्बलवादेव तद्गीतं व्याचिकीर्षति ।।

अथ परः कोटीनां यूथश एकैकशश्च भिन्नानुभावानामेकस्यां सभायां दुर्घटयुगपत् सर्वसमावेशानामत एव व्रजदेव्य इति तव सुतः सतीति नानासम्बोधनीयजनानां प्रतिदिनलीलासामान्यवर्णनपराणां सङ्क्षेपेण वाक्यसंग्रहोऽयमध्याय इति यद्यपि न मिथो वाक्यसङ्गतेरपेक्षया तथापि श्रीमता कवीन्द्रेण प्रातरादि तत्तल्लीलाक्रमत एव तत्तत्सङ्ग्रहः कृत इति क्वचित् द्वित्रादिकमपि युगलमेकसभागतमिति च सङ्गतिः कर्त्तव्या । तत्र प्रति नियतयुगलतया वर्णनं प्रतियुगलञ्च लीला तत् प्रजनयोः पूर्वापरीभावेनेत्यत्रैवमभिप्रयन्ति यद्यपि श्रीकृष्णलीलैव केवलं पुरुषार्थतत्पोष्यजनस्तु तदनुगततयैव तथापि तद्युगलतां विना न सुखलाभ इत्यहो कष्टमस्माकमेव तादृश्यां लीलायां प्रवेशो नास्तीति तदेवं गृहान्निःसरणमारभ्य तत्रागमनावधि श्रीभगवतो वन्यक्रीडाः कदाचित् काश्चन काश्चिदनुभूय यथास्वं यथानुभवं गायन्त्यस्तत्र चादौ प्रातर्बहिर्भूय वनवर्त्मनि तेन वेणावीरिते सति सिद्धवनितानां सायं गृहं प्रविष्ट तमपश्यन्तीनां तद्दिदृक्षया नक्तं व्योम्नि स्थितानां तद्वाद्यस्य तद्वादनमुद्रया तदीयसौन्दर्यलीलाविशेषस्य च तासां व्योमयानत्वादनावृतत्वेन प्रागेवानुभवात् श्रीभगवतश्च वामबाहुकृतवामकपोलत्वेन प्रायो वक्रार्द्धदृष्टिभङ्गितया स्वविषयक तद्दृष्टिमननाच्च प्राधान्यतस्तासामेव प्रेममोहमाहुः वामेतियुगलेन । वासशब्दस्यार्थान्तरेण मनोहरता व्यञ्जनात् स एव प्रयुक्तो न सव्यादिशब्दः । वामबाहुकृतवामकपोलत्वेन श्रीग्रीवाया ईषनपरिवर्त्तनं तिर्यक्त्वञ्च तया वक्रोर्द्धावलोकनं तथा वेणुवादनेऽभिनिवेशस्तथा सुप्रसिद्धत्रिभङ्ग्यनुसारेण श्रीवामजङ्घोपरि श्रीदक्षिणजङ्घातस्य न्यासश्च ज्ञेयः । वल्गितभ्रूरिति ह्रस्वत्वमार्षम् । दीर्घोऽपि पाठः क्वचित् । अधरेऽर्पितो यो वेणुस्तम् । यद्वा । अधरोऽर्पितो न्यस्तो यस्मिन् दत्तो वा यस्मै स चासौ वेणुश्चेति विग्रहः तम् । सदा तस्य संयोगाभिप्रायेण । इदञ्च निष्ठायाः पूर्वनिपाताभावार्थमाहिताग्न्यादौ पठनीयम् । विभ्वादिरूपकाप्रयाग आरुण्यमाधुर्यगुणास्फूर्त्तावपि तत्सम्बन्धमात्रेणैव वेणुवाद्यस्य मोहनत्वबोधनाय । किम्वा सदा वेणुसंसर्गेण तस्मिन्नीर्ष्योदयात् । अकर्म कठिनौ हस्तौ पादौ चाध्वनि कोमलाविति महापुरुषलक्षणत्वेऽपि कोमलेति प्रयोगः स्नेहेन । अन्याङ्गापेक्षिककाठिन्यांशमनपेक्ष्य वस्त्वन्तरापेक्षिककौमल्यांशस्फूर्त्तेः । तथा मात्सर्येण तस्यातिकठिनमुरलीस्पर्शानौचित्याभिप्रायात् । अतोऽस्मासु कोमलाङ्गिष्वेव तत्स्पर्शोऽपि युक्त इति गूढोऽभिप्रायः । एव सहजमहासौन्दर्यमयस्यापि तस्य वेणुवादने मुद्राविशेषेण सौन्दर्यविशेषो दर्शितः । तेन च वेणुवाद्यस्य महामोहनत्वमेवाभिप्रेतम् । हे गोप्य इति परमविदग्धाभिस्तत्तत्त्वं युष्माभिरेव बोद्धुं शक्यते नत्वन्यैर्जनैरिति भावः । यत्र यदेति वक्ष्यमाणमोहप्राप्तौ तत्कालजातत्वं तस्यां वेण्वीरणैकहेतुत्वञ्च आवश्यकत्वादिकमप्यभिप्रेतम् । एवमग्रेऽपि । व्योमयानं विमानं तद्वनिता देव्यः । सिद्धैस्तद्यानैर्देवैरित्यर्थः । अपूर्वत्वात्तैरपि सह विस्मिता बभूवुः । अतस्तैः पतिभिर्महद्भिश्च सह वर्त्तमाना अपि काममार्गणैः कर्तृभिः समर्पितं चित्तम् अर्थात् कृष्णाय यासां तथाभूता बभूवुः ततः सलज्जा बभूवुः । एव लज्जावत्योऽपि तन्मार्गणेन मोहपर्यन्तां दशां प्रापुः । यत्रापस्मृता स्खलिता अतिविस्मृता नीव्यो याभिस्तादृश्यो बभूवुरित्यर्थः अन्यत्तैः । यद्वा । विस्मयानन्तरं स्त्रीस्वभावेन कामोदयात् सलज्जा बभूवुः । ततश्च काममार्गणैः समर्पितं बलादाच्छिद्य श्रीकृष्णायार्पितं चित्तं यासां तथा भूताः सत्यो मोहं ययुः । तत्रास्तां तावन्मानसविकारमात्रे लज्जा यतस्तेषामग्रतोऽपस्मृतनीविकाश्चापि बभूवुरित्यर्थः । अतो यत्र देव्योऽपि मुह्यन्ति तत्र का वयमिति भावः ।। २-३ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत्र स्वतन्त्राणां वह्वीनां वक्तृत्वात् सर्वत्र वक्तृभेद एव कल्प्यः, तत्र च स्व-स्वरूच्यनुसारेण किंवा कथञ्चित् साक्षात्तदनुभवेनैव तथा तथोक्तिरूह्या । ततश्च वगेशः स्वस्वस्थाने स्थितासु मध्ये श्रीव्रजेश्वरीनिकटे वर्त्तमानानां तत्सम्बोधनेनाग्रे विविधेत्याद्युक्तिर्ज्ञेया, तथापि सतां सन्तोषायैकवाक्यतया यथाभक्ति संगतिर्दर्श्यते । तत्र गृहान्निःसरणमारभ्य तत्रागमनवाधि-क्रमेण श्रीभगवता वन्यक्राडा गायन्त्यस्तत्र चादौ प्रातर्वनगमनार्थं तेन वहिर्वेणावीरिते सति सिद्धवनितानां सायं गृहं प्रविष्ट तमपश्यन्तीनां तद्दिदृक्षया नोक्तम्, व्योम्नि स्थितानां तद्वाद्यस्य तद्वादनमुद्रया तदीयसौन्दर्य्यलीलाविशेषस्य च तासां व्योमयानत्वादनावृतत्वेन प्रागेवानुभवात्तासामेव प्रेममोहमाहुः—वामेति युगलेन । वामबाहुकृतवामकपोलत्वेन श्रीग्रीवाया ईषत् परिवत्तनं तिर्य्यक्त्वञ्च तथा वक्रोर्द्धावलोकनं तथा वेणुवादनेऽभिनिवेशस्तथा सुप्रसिद्ध-त्रिभङ्ग्यनुसारेण श्रीवामजङ्घोपरि श्रीदक्षिणजङ्घान्तस्य न्यासश्च ज्ञेयः । अधरोऽर्पितोन्यस्तो यस्मिन् दत्तो वा यस्मै तञ्च वेणुश्चेति समासः, सदा तस्य तत्संयोगाभिप्रायेण बिम्बादिरूपकाप्रयोगः । कारुण्य-माधुर्य्यादिगुणानपेक्षयापि तत्सम्बन्धमात्रेणैव वेणुवाद्यस्य मोहनत्वबोधनाय, किंवा सदा वेणुसंसर्गेण तस्मिन्नीर्ष्योदयात् । कोमलेति कैशोरे स्वभावतः श्रीमदङ्गानामनुद्भिन्नकाठिन्यस्य सौन्दर्य्यस्यैव वा विवक्षया, न तु केवलं मृदुलत्वाभिप्रायेणैव. 'अकर्म्मकठिनौ हस्तौ पादौ चाध्वनि कोमलौ' इति सत्पुरुषलक्षणे हस्तयोः सहजकाठिन्यस्यैवोक्तः, यद्वा, वेण्वीरणस्य मधुरमन्दत्वविवक्षया । यद्वा, मुष्टिनैव शङ्खचूड़शिरा हत्वा दुष्टेषु कठिनतरयोरपि प्रियजनेषु तेषु कोमलतयैव परिस्फूर्त्तेरिति । एवं सहजमहासौन्दर्य्यमयस्यापि तस्य वेणुवादने मुद्राविशेषेण सौन्दर्य्यविशेषा दर्शितः, तेन च वेणुवाद्यस्य महामोहनत्वमेवाभिप्रेतम्, श्लेषेणोक्तमिदम् । अधरार्पणेन वेणोस्तदमृतपानतः सौभाग्यभरं मत्वा प्रेमरसकोमलाभिः सतीभिरंगुलिभिस्तस्य मार्गमाश्रित इति, हे गोप्य इति परमविदग्धाभिस्तत्तत्त्वं युष्माभिरेव बोद्धुं शक्यते, न त्वन्यैर्जनैरिति भावः । ईरयति प्रेरयति तत्प्रेरणमात्रेणैव वेणुर्गायतीत्यर्थः । ईरणे प्रयोजनम्—मुकुन्दो जगतां परमानन्दं ददादित्यर्थः । यत्र यदेति वक्ष्यमाणमोहप्राप्तौ तदात्वं तत्कालजातत्वं तस्यां वेण्वीरणैकहेतुत्वञ्चावश्यकत्वादिकमप्यभिप्रेतम् । एवमग्रेऽपि ।। २ ।। व्योमयानं विमानं तद्वनिताः, यद्वा, व्योम्ना यानं गमनम्, यद्वा, व्योम्नि यानानि विमानानि येषां सिद्धानां तेषां वनिताः, यासां वनितानां ता इति वा, इति तासां श्रीभगवन्निकटत्वं श्रीवृन्दावनभूवर्त्तित्वादिकञ्च निरस्तम् । केवलमुपरि दूरवर्त्तित्वमेवाभिप्रेतम्, तथापि सिद्धा देवविशेषा जीवन्मुक्ता वा, क्रमेण मुक्तिपदारोहका इति तेषां भक्तिरसाभावः सूचितः, तैरपि सह विस्मिताः, अपूर्वत्वात्; तादृशानां पतीनां महतां वा साक्षात्काममार्गणसमर्पितचित्तत्वात् सलज्जा लज्जिताः, पश्चाद्धैर्य्यं हान्या कश्मलं ययुः । अन्यत्तैर्व्याख्यातम् । यद्वा, सिद्धैः सहेति सिद्धानामपि तादृशत्वमुक्तम्, तद्रसग्रहणे स्त्रीणामेव भावविशेषेण प्राधान्यमेषां च गौणत्वात् साहित्येन निर्देशः उपधार्य्य श्रवणद्वारा हृदयेऽभिनिवेश्येत्यर्थः । प्रथमं विस्मितास्ततः कामोदयेनापस्मृतनीव्यो विश्लथीभूत-नीविकाः, ततः सलज्जाः, ततश्च कामोद्रेकेण कामस्य सम्मोहनादि-पञ्चशरेभ्यः सम्यगर्पितं मरणभयादिनोपहारीकृतं निजधनतुल्यं चित्त याभिस्ताः, नितरां तद्वशीभूतचित्ता इत्यर्थः । कुत्रापि निभृतं गोपयितुं योग्या इत्यर्थः । एवमनेन युगलेन रूपलीलादेर्वेणुनादस्य च परममोहनत्वमुक्तम् । यद्यपि तेन तेन सर्वेषामेव मोहः सम्भवेत्, तथापि विशेषेण सिद्धवनितानामेवात्र तदुक्तिः । वामबाहुकृतवामकपोलत्वेन प्रायो वक्रोर्द्धदृष्टिभङ्ग्या तासां स्वविषयक तद्दृष्टिमननेन तादृशभावादये प्राधान्याभिप्रायेण । एवमग्रेऽपि । तत्र तत्र तेषां तेषां प्राधान्यापेक्षयैव तत्तदुक्तिरुह्या, तद्विशेषश्च तत्र तत्रैव व्यक्तो भावी । तत्र युग्मश्लोकेनैव सर्वत्रान्वयः, श्रीकृष्णस्यात्मनश्चान्योन्यं सम्मिलनेनैवाभीष्टपरिपूर्त्तिः स्यादित्यभिप्रायेण । तत्र च प्राय एकेनादौ रूप-लीलादेर्वर्णनम्, अन्येन च वेणुनादकृतस्य, तदपि स्वतन्त्रस्यापि तस्य मिथः संगत्यैव माधुर्य्यविशेषः स्यादित्याशयेनेति दिक् । अत्रापि सर्वत्र पूर्ववच्चित्रवणविन्यासो विचार्य्यः ।।३।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

वामबाहुकृतेत्यादिश्लोकेषु द्वौ द्वौ श्लोकावेकार्थतयान्वितौ यदा आश्रितच्छिद्रं वेणुमीरयति स्वनयति तदा व्योमयानवनिताः कश्मलं माह ययुः ।। २-३ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कीदृशं तल्लीलाप्रमाणं येन वासरान्निन्युरित्यतस्तद्दर्शयति । वामबाहुकृतवामकपोल इत्यादिना । अत्र द्वौ द्वौ श्लोकावेकवाक्यतया नेतव्यौ । हे गोप्यः ! कृष्णो यत्र यदा वामे बाहौ त-मूले कृतः अर्पितः वामः कपोलो येन वल्गिते नर्तिते भ्रुवौ येन तथाभूतः कोमलाभिरङ्गुलिभिराश्रिता मार्गाः सप्तस्वरच्छिद्राणि यस्य तमधरेऽर्पितं वेणुमीरयति शब्दाययति ।। २ ।। तदा व्योमयानानां वनिताः कश्मल ययुरित्यन्वयः । व्योम्न यानं गमनं येषां ते व्योमयानाः व्योम्नि यान्तीति वा तथासिद्धाः नन्द्यादेराकृतिगणत्वात्कर्तरि ल्युः तेषां वनिताः सिद्धः स्वपतिभिः सहवर्त्तमाना अपि तद्वेणुगीतमुपधार्याकर्ण्य प्रथम विस्मिताः ततः कामस्य मदनस्य मार्गणे समर्पितानि चित्तानि याभिस्तास्तत्परवशाः इत्यर्थः । सजज्जाः सत्यः कश्मलं मोह ययुः तत्र लिङ्गं वदन्त्यस्ता विशिंषन्ति अपस्मृतनीव्योऽपस्मृता नीव्यः भ्रश्यद्दुकूलवन्धाः याभिस्तथाभूताः एवंविधस्य श्रीकृष्णस्य विश्लेषं कथं सहेमेति सर्वत्र वाक्यशेषः ।। ३ ।।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

द्वौ द्वौ ग्रन्थौ एकस्य गीतं तद्द्वाभ्यां द्वाभ्यां श्लोकाभ्यामन्वयः। एका गोपी गोप्यन्तराणि सम्बोधयति। हे गोप्यः शृणुतेति शेषः वामबाहुमूले कृतं वामकपोलं येन स तथा वल्गिता नर्तिता भ्रूर्यस्य स तथा अधरोष्ठे अर्पितो वेणुर्येन स तथा मुकुन्दो यत्र यदा कोमलाङ्गुलिभिः आश्रितमार्गमाच्छादितरन्ध्रं वेणुमीरयति गायतीत्यर्थः ॥२॥ तदासिद्धैः सह व्योमयानवनिताः विमानस्थाः स्त्रियः तद्गीतमुपधार्य श्रुत्वा विस्मिताः अनन्तरं स्वयमशक्ताः सलज्जाः कामबाणेन समर्पितं विद्धं चित्तं यासां तास्तथा अपस्मृता नीवी वस्त्रग्रन्थि र्यासां ताः मुच्यमानवस्त्रग्रन्थिस्मरणरहिताः कश्मलं मूर्च्छां ययुरित्यर्थः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

वामबाहुकृतेनेत्यादिना प्रथमतो वेणुवादनलीलां वर्णयन्ति द्वाभ्याम् । हे गोप्यः। अथवा, गोप्य रहस्यतिनिर्जनस्थल इति यावत्, तेनायं वेणुनादः सङ्केतपरः श्री राधिकोक्तिः। अथवा तत्सखीनामेव पूर्वानुभूतवेणुकथानुकरणम्। तथाहि वामबाहौ कृता वामबाहुना श्लिष्टा वामकपोला राधा येन अतएव वल्गिता चञ्चला भ्रूर्यस्य, भावितत्वात्। अतो गोप्ये रहसि यत्रेत्यस्य विशेषणम्। तदा व्योमयानवनिताः कश्मलं मोहं ययुरिति परेणान्वयः। व्योमचरत्वाद् गोप्येऽपि स्थले तास्तथाविधं पश्यन्तीति भावः। पूर्वं तदुपधार्य सलज्जाः पश्चात् काममार्गणसमर्पितचित्ता अपस्मृतनीव्योऽपस्मृतनीविमोक्षा कश्मलं ययुरित्यर्थः। अथवा सह सिद्धैरिति पतिसाहित्ये सलज्जत्वम्। एवं द्वादशभिर्युग्मकैर्द्वादश वक्तयो बोद्धव्यः ॥ २–३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

वामबाहुरित्यादि। प्रथमतो वेणुवादन–लीला एव वर्णयन्ति द्वाभ्याम्। एवं द्वादशभिर्युग्मकैर्द्वादश रतयो बोद्धव्याः। हे गोप्यः! अथवा गोप्ये गोपनीये स्थले अति निभृते यत्र यदा वेणुमीरयति, तदा कश्मलं ययुरित्युत्तरेणान्वयः। कीदृशः? वामबाहौ कृता वामबाहुना परिरब्धा वामकपोला राधा येन श्रीकृष्णास्य गण्ड–प्रतिविम्बेन वामो मनोहरः कपोलो यस्याः सा तथा। वल्गिता भ्रूर्यस्य भ्रूभङ्गतां पश्यन् हृद्गतां वा कथं प्रकाशयन्; वस्तुतस्तु वामबाहौ कृतो वामकपोल इति यथाश्रुतोऽर्थो नातिललितः—ग्रीवा भङ्गस्य व्यथाजनकत्वात्॥ व्योमयान–वनिता इति। कीदृश्यः? ताः सह सिद्धैः विस्मिता अपस्मृतनीव्यः सत्यः कश्मलं ययुः। सहसिद्धैरित्यस्यायं भावः—तथाविधं लावण्यं दृष्ट्वा सिद्धानामपि मनोरथगम्ये भोग्यत्वे वनितासजातीये कश्मलमासीत्। तेषामपि तद्भावेन काममार्गण–समर्पितचित्तत्वमिति भावः। अतः स्ववनिताः प्रत्यसूया नाभूदित्यर्थः। सलज्जा इति रमितानां पति–सङ्कोचेन तेषां सजातीयभाव–परित्यागेन–इत्यद्भुतं महदिति विस्मयो भावः ॥ २–३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वृन्दावने गाः सञ्चार्य तत्रत्यतरुवल्लिखगमृगादीन् नक्तन्तनस्वविरहखिन्नान् आश्वासयन् स्वागमनमावेदयितुं यदा वेणुना कृष्णः सञ्जगौ तदा तदाकर्णनेनोदीप्तभावा गोप्यः स्वस्वयूथस्थाः सखीः प्रत्याहुर्वामेन्यादि द्वादशयुगलानि हे गोप्यः! वामबाहौ वामबाहुमूले कृतः अर्पितः वामकपोलो येन सः गीतस्यारोहावरोहयोर्गमकमयीकरणं तेनैव प्रकारेण सम्भवेत् तथैव वामजङ्घोपरि दक्षिणजङ्घाधस्तटन्यासोऽपि ज्ञेयः तेन त्रिभङ्गललितस्तिर्य्यग्ग्रीवस्त्रैलोक्यमोहन इति नामत्रयं प्रकटीबभूवेति भावः। वल्गिते नर्तिते भ्रुवौ येनेति सुवलादीन् पुरः स्थितान् गानसौष्ठवे अवधापयितुमिति भावः। ह्रस्वत्वमार्षम्। अधरेऽर्पितो न्यस्तोऽधराय दत्तो यो वेणुस्तं यत्र यदा ईरयति कीदृशं कोमलाभिरन्यजनाङ्गापेक्षया सुकुमाराभिः अकर्मकठिनौ हस्ताविति सामुद्रिकात् स्वाङ्गापेक्षयात्वीषत्कठिनाभिरङ्गुलीभिराश्रिताः मार्गाः सप्तस्वरच्छिद्राणि यस्य तं तदा व्योमयानानां सिद्धानां वनिताः सिद्धैः स्वपतिभिः सहिता अपि प्रथमं तद्वेण्वीरणमुपधार्य्य आकर्ण्य विस्मिता अहो वेणुनादस्यैतावन्मोहनत्वमननुभूतचरं यतोऽस्मान् साध्वीरपि मोहयति अस्मान् पुरुषानपि स्त्रीभावयुक्तीकृत्य मोहयतीति प्रथमं विस्मययुक्ताः। ततश्च सिद्धैः सहैव सलज्जाः अस्मद्व्यभिचारमस्मत्पतयो वितर्कयेयुरिति तथैवास्मत् पुंस्त्वविपर्य्ययमस्मत्पत्न्यो वितर्कयेयुरिति स्वस्वपतिभ्यः सकाशात् स्वस्वपत्नीभ्यश्च सकाशात् लज्जायुक्ता अभूवन्। ततश्च सिद्धैः सहैव कामस्य मार्गणेभ्यः शरेभ्यः समर्पितानि दत्तानि चित्तानि याभिस्ताः आयातान श्रीकृष्णविषयककामशरानालक्ष्य भोः श्रीकृष्णकामशराः युष्मभ्यमेतानियस्मच्चित्तानि दत्तानि एतानि शीघ्रं विद्धीकुरुत अस्माभिः पातिव्रत्याय जलाञ्जलिर्दत्तः कृष्णोऽस्माभिः सह कृपया रमतामिति तथा अस्माभिरपि स्वपुंस्त्वं देवत्वञ्च त्यक्त कृष्णोऽस्मान् सद्य एव स्वयोगेन गोपस्त्रीकृत्यास्माभिः सह रमतामिति समर्पितपदव्यङ्ग्यं ज्ञेयम्। ततश्च सिद्धैः सहैव कश्मलं कामशरपीडया मोहं मूर्च्छां ययुः प्रापुः। कश्मलस्यानुभावं सहैवमाहुः अपस्मृता न स्मृता स्खलिता अपि नीव्यो याभिस्ताः सिद्धैस्तैः शिथिलितवस्त्रबन्धकेशबन्धादिका बभूवुरित्यर्थः। समासान्ताभावः आर्षः। अकस्माद्देवीनां देवानांच यद्येतादृश्यवस्था तर्हि वयं मानुष्यस्तत्रापि गोप्यस्तत्राप्येकनगरस्थास्तात्रापि लब्धाङ्गसङ्गाः कथं तं विना स्थास्यामस्तदुत्तिष्ठत सख्यः! एतान् दग्धमुखान् पश्यतोऽपि पतिश्वशुरादींस्तिरस्कृत्य केनचिन्निमिषेण वृन्दावनं प्रविश्य प्राणप्रेष्ठेन सार्धं विलसाम इति ध्वनिः प्रतियुगलान्त एवानुवर्त्तनीयः॥२–३॥

गूढार्थदीपिनी

हे गोप्यः मुकुन्दः यत्र यदा अधरार्पितवेणुम् ईरयति वादयति तदा सिद्धवनिताः सिद्धैः स्वपतिभिः सह तत् गीतमुपधार्य श्रुत्वा विस्मिताः सलज्जाश्च सत्यः कश्मलं मोहं ययुरिति द्वयोरन्वयः। अत्र सर्वत्र तस्य विरहं कथं सहामहे इति वाक्यं योजनीयम्। कथंभूतो मुकुन्दः। वल्गिते नर्तिते भ्रुवौ येन सः। कथंभूतं वेणुम्। अङ्गुलिभिः आश्रिताः स्पृष्टा मार्गाः सप्तस्वरछिद्राणि यस्य तम्। कथंभूता वनिताः। कामवाणैः व्याकुलानि चित्तानि यासां ताः। पुनश्च। अपस्मृता स्खलिता नीव्यः कटिवस्त्रग्रन्थयोऽपि यासां ताः। व्योम्नि यानं गमनं येषां ते व्योमयानाः सिद्धाः। चतुर्विंशतिपद्येषु स्वागतावृत्तम् ॥ २–३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तल्लीलाप्रगानमेव वर्णयति। वामेति द्वादशभिर्युगलैः हे गोप्यः वामबाहौ तन्मूले कृतो निहितो वामकपोलो येन सः वल्गिते नर्तिते भ्रुवौ येन सः मुकुन्दः कोमलाङ्गुलिभिः आश्रिताः मार्गाः षड्जादिस्वरच्छिद्राणि यस्य तम् अधरार्पितम् अधरे संयोजितं वेणुं यत्र यदा ईरयति वादयति तदा व्योम्नि यानं गमनं येषां ते व्योमयानाः देवाः तेषां वनिताः सिद्धैः स्वर्गार्थकृतैः स्वकर्मभिः सिद्धैर्देवैः स्वभर्तृभिः सह वर्तमाना अपि तदुपधार्य्य मुकुन्दवेणुगीतमाकर्ण्य प्रथमं विस्मिताः तदनन्तरं काममार्गणे समर्पितानि संयोजितानि चित्तानि याभिस्ताः "मार्गणं याचनेऽन्वेषे मार्गणस्तु शरेऽर्थिनी"ति हैमः अत एव अपस्मृताः विस्मृताः नीव्यो याभिस्ताः भ्रश्यद्दुकूलबन्धा इत्यर्थः। कश्मलं कामसन्तापं ययुः प्रापुः पुनः तत् शान्त्यर्थं श्रीकृष्णसंयोगं लेभिरे अतो धन्या वयमित्येवं वाक्यशेषो यथासम्भवं बोध्यः ॥ २–३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सम्मुग्धतया गोप्य ऊचुरिति प्रतिश्रुत्य तत्रैकाऽनेका गोपीः सम्बोध्य वक्तीति वक्ति ॥ वामबाह्विति। शृणुतेति तृतीयश्लोकादाकृष्य हे गोप्यः शृणुतेत्यवेतव्यम्। वामो बाहुस्तस्मिन्कृतो वामः सव्य इत्युक्तर्मनोहर इत्यप्यर्थः। कपोलो यस्य स भार्याभागो वाम इति प्रसिद्ध इत्युक्ते रमैव स्वद्वारं द्वारकानायकनायतामित्यादौ तद्भाग पुरस्कृत्यास्तुवन्निति तात्पर्यमवधेयम्। वल्गिते नर्तितेभ्रुवौ यस्य स अधरे ओष्ठेऽर्पिते वेणुर्येन सः। वेणुमिति पाठस्तु ललितः। कोमलाभिरङ्गुलिभिराश्रितो मार्गो मूर्छनादिमार्गो यस्य तं वेणुं मुकुन्दो यत्र यदा यदेरयति स्वपूरणेन प्रेरयति ॥ २ ॥ तदा व्योमयानवनिता विमानोपविष्टा योषित इति केचित्। व्योमयाना दिविपदस्तेषां योषित इत्यपरे। सिद्धैः श्रवणसन्नद्धैः सह विस्मितास्तद्गीतमुपधार्याकर्ण्य काममार्गणैः समर्पितं चित्तं यासां ताः सलज्जा अपस्मृतनीव्यो विस्मृतवस्त्रा वा तद्ग्रान्थिमत्यो वा कश्मलं मर्छादिकं ययुः ॥ ३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सर्वोत्तमा हरेर्लीला वेणुनादपुरः सरा। हेतुः सर्वत्र वाच्येऽर्थे प्रथमेषु निरूप्यते ॥
देवस्त्रियस्तथा गावः सरितः पादपा लताः। पक्षिणश्च तथा मेघा ब्रह्माद्या गोपिकास्तथा ॥
हरिण्यो देवगन्धर्वा द्विधा च भगवान् हरिः। उत्तरेषु निरूप्यन्ते रसज्ञा वेणुवादने ॥
जानाति भगवानेव जानात्येव हरिः स्वयम्। अन्ते च भगवानुक्तो वारद्वयमनन्यधीः ॥
अनुभावस्तु नादस्य स्त्रीषु पूर्वमुदीर्यते। त्रिविधासु ततःपुंसु ब्रह्मा गोपी तथा मृगी ॥
त्रयाऽत्र त्रिविधाः प्रोक्ताः प्रकीर्णाः सकलाः सुराः। सर्वा एवानभिज्ञा हि वस्तुसामर्थ्यसंयुताः ॥
एवं वेणुर्द्वादशधा फलतीति निरूपितम्।

तत्र प्रथमस्त्रीप्राधान्यान् देवस्त्रियो मुख्या इति तासु वेणुनादप्रभावं वक्तुं येन प्रकारेण नाद उत्तिष्ठति तं प्रकारमाहुः। वामबाहुकृतवामकपोल इति। यत्र मुकुन्दः अधरार्पितवेणुमीरयति तत्र तस्मिन् क्षणे व्योमयानवनिताः कश्मलं ययुरिति सम्बन्धः। वेणुनादः पञ्चधा भवति मुखस्य परितः समतया उपर्यधश्च धारणेन तत्र स्त्रीणां कामोद्बोधकः वामपरावृत्तः स्त्रीणां पुरुषाणां च दक्षिणदेवानामुच्चैः अधस्तिरश्चां समतया सर्वेषामचेतनानां च तत्र देवस्त्रीणां वामपरावृत्त एवेति तथा निरूप्यते मानुषभावात् देवभावो महानिति मानुषनादेन देवस्त्रीणां भ्रमो न भविष्यतीत्याशङ्क्य तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यमिति वाक्यात् भ्रूविन्यासं नादं योजितवान् तदाह। वामबाहौ कृतो योजितो वामकपोलो येन वल्गिता भ्रूर्यस्येति भ्ररत्र दक्षिणा तथैवालिनयभावात् वल्गिता उच्चैर्गीतयुक्ता अधरः पूर्ववर्णितः लोभात्मकः तत्र चेतसमर्पितः परमानन्दं न प्रयच्छति काममेवोद्बोधयति यतःश्रुत्वापि विरहजनितक्लेशमेव प्राप्नुवन्ति नतु परमानन्दं तत्रापि क्रियाशक्तिः पुष्टा चेद्भवेत् तदा लुब्धादपि फल सिध्येत् तदपि नास्तीत्याह। कोमलाङ्गुलिभिराश्रितो मार्गो यस्य आदौ मन्दप्रकारेणैव वेणुनादस्योचितत्वात् मार्गास्तस्य रन्ध्राः तेषां गाढभावेन निष्पीडने तारो नादो भवति मध्यभावे मध्यमः कोमले मन्द इति गोप्य इति सम्बोधनं सर्वानुभवसाक्षिकमेतदिति ज्ञापयितुम् ईरणमत्र वादनं प्रयोजनमाह। मुकुन्द इति वेणुनादेन शुद्धं चेन जगत् तदा मोक्षं दास्यामीति ॥ २ ॥ एवं हितार्थ ऽपि वेणुवादने ये मोक्षानधि-

कारिणः तेषां काम एव जात इत्याहुः । व्योमयानवनिता इति । व्योमयानाः विमानयानाः सर्वे देवयोनयः तेषां वनिता अधिकारित्वात् स्त्रीत्वात् भोग्यत्वाच्च न मुक्त्यधिकारिण्यः सिद्धैः सहिता अपि भगवद्व्यतिरिक्तं सर्वमेव दातुं शक्ताः स्वयमत्यन्तज्ञाने निपुणाः आदौ वेणुनादं श्रुत्वा विस्मिता जाताः ततोऽल्पकामोद्रेके तद्वेणुनादमुपधार्य सलज्जा जाताः । भर्त्तारो ज्ञास्यन्तीति ततोऽत्यन्तमुद्रेके स्वात्मरक्षार्थं कामेन मरणशङ्कया काममार्गणेभ्यः समर्पितं चित्तं याभिः तादृश्यो जाताः यथा मारकाय मारणात् पूर्वं स्वयमेव समर्प्यते भीरुभिः ततः कामेन पीडिताः कश्मलं मूर्च्छां ययुः सा मूर्च्छा अत्यन्तविस्मारिकेत्याह । अपस्मृता नीवी कटिवस्त्रं याभिरिति एवं वेणुनादोऽत्यन्तं कामबोधक इत्यस्माकं मूर्च्छादौ किमाश्चर्यमिति भावः ॥ ३ ॥

श्रीसुबोधिनी-सारः

वामे बाहौ बाहुमूले कृतो न्यस्तो वामः कपोलो येन स वल्गिते नर्त्तिते भ्रुवौ येन स मुकुन्दः तत्र यदा कोमलाभिरङ्गुलीभिः आश्रिता मार्गाः सप्तस्वरभेदभिन्ना यस्य तं वेणुमीरयति वादयति हे गोप्यः ॥ २ ॥ तदा व्योमाकाशं यानं यासां ताश्च ता वनिताः स्त्रियश्चेति सिद्धैः स्वपतिभिः सह तद्गीतमुपधार्य श्रुत्वा विस्मिताः कामस्य मार्गणेभ्यः बाणेभ्यः समर्पितं चित्तं याभिस्ता इति भ्रान्तोक्तिः । अर्पितचित्ता इति पाठः साधुः । संध्यभाव आर्षः बाहुलकात्तद्विपर्ययः सलज्जाः कश्मलं मोहं ययुः प्रापुः । तत्र हेतुः । अपस्मृता नीव्यः परिधानानि याभिस्ताः ॥ ३ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

अन्त्ययुग्मद्वयतात्पर्योक्तौ **जानाति भगवानेवेति** । **ततः पुंस्विति** । त्रिविधेष्विति शेषः । लतानां तरुमध्यपातित्वेव पुंस्वेव गणना कृता । **वल्गितभ्रुरित्यस्याभासे, मानुषभावादिति** । मानुषभावमनतिक्रम्य लीलां करोतीति तथोक्तम् ॥ २ ॥ मुकुन्दतात्पर्योक्तौ **वेणुनादेनेति** । परोक्षवादोऽत्र कृतो, विविक्षितार्थस्य गोप्यत्वात् । **शुद्धिर्भगवद्भावान्यभावराहित्यम्, मोक्षो** भजनानन्दानुभवः ॥ ३ ॥

(५) भगवदीयनिर्भयरामनिर्मिता श्रीसुबोधिनीकारिकाव्याख्या

वामबाहुकृतेत्यस्याभासे सर्वोत्तमेत्यादि का० ३११$\frac{३}{४}$-३१७$\frac{१}{४}$ । **सर्वोत्तमेति वेणुनादपुरः सरा** हरेर्लीला युगलश्लोकानां मध्ये **सर्वत्र प्रथमेषु श्लोकेषु निरूप्यते,** कीदृशी लीलेत्याकाङ्क्षायामाहुर्वाच्येर्थे हेतुरिति, युगलद्वितीयश्लोकेषु वाच्यो योऽर्थः व्योमयानवनितामूर्च्छादिरूपस्तत्र **हेतुभूतेत्यर्थः, पादपा लताश्चैकश्लोकोक्ता** एकविधा ज्ञेयाः, **देवस्त्र्यादयो** देवगन्धर्वान्ता दशविधा वेणुवादरसज्ञा दशयुगलनिरूपिता उक्ताः, अन्त्ययुग्मद्वये तु भगवानेव उक्त इत्याहुर्द्विधा च **भगवान् हरिरिति,** श्लोकद्वयोक्त इत्यर्थः, एते द्वादशविधा **वेणुवादने रसज्ञा उत्तरेषु** युग्मद्वितीयश्लोकेषु **निरूप्यन्ते** इत्यर्थः, अन्त्ययुगलद्वयतात्पर्योक्तौ **जानाति भगवानेव जानात्येव हरिः** स्वयमिति, यतो **भगवानेवैतद्रसं जानात्यतः** कारणादन्ते "उत्सवं श्रमरुचे" तिश्लोके "यदुपतिर्द्विरदराजविहार" इतिश्लोके च **वारद्वयं भगवानेवोक्तः,** अत्र **जानाति भगवानेव जानात्येत्व हरिः स्वयमिति** वारद्वयोक्तिर्भगवतः श्लोकद्वयोक्तत्वबोधनाय, तत्र भगवत्त्वतापहारकत्वबोधनाय **भगवत्पदहरिपदे, ततः पुंस्विति** त्रिविधेष्वितिशेषः, पादपपक्षीमेघेष्वित्यर्थः, **लतानां तरुमध्यपातित्वेन पुंस्स्वेव** गणना कृता, **त्रयोपि त्रिविधाः प्रोक्ता** इति त्रयाणां त्रयाणां त्रयस्त्रयो भेदास्त्रिधा राजससात्त्विकतामसा इत्यर्थः, देवस्त्र्यादयस्त्रयो राजसाः, पादपलतादयः सात्त्विकाः, ब्रह्मगोपीमृगीभेदास्तामसा इति विवेचितं सुबोधिन्यां, **प्रकीर्णा** इति उपदेवगणादय इत्यर्थः, अनुभावमाहुः **सर्व एवेति,** अत्र श्रीवल्लभगोस्वामिनः, पूर्वं दशाप्येते नादरसानभिज्ञाः पश्चान् नादश्रवणमात्रेण **वस्तुनो यत् सामर्थ्यं मूर्च्छाद्युत्पादनं** तत्संयुतास्तदाधारा जाताः, अयमनुभाव इत्यर्थः, अत्र हेत्वन्तराभावान् नादानुभाव एवायमिति हिशब्दः, **पूर्वं द्वादशैते रसज्ञा** इत्युक्तं, तत्र दश पूर्वं **रसानभिज्ञास्ततो** नादानुभावेन किञ्चिद्रसज्ञा जाताः, **द्विविधो भगवास्तु सर्वथा रसज्ञ** इतिविभेदः ॥ २ ॥

इति श्रीतामसप्रकरणीयकारिकाव्याख्या ।

समाप्तोयं ग्रन्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तासां गानप्रकारमाह—वामबाहुकृतेत्यादिना । अत्र द्वौ द्वौ श्लोकावेकवाक्यतया नेतव्यौ । **रहस्यकथने प्रेमाधिक्यं** हेतुं सूचयन्त्यः सम्बोधयन्ति—गोप्य इति । वामे बाहौ तन्मूले कृतः अर्पितो वामकपोलो येन सः, वल्गिते नर्तिते भ्रुवौ येन सः, मुकुन्दः कोमलाभिरङ्गुलिभिराश्रिता मार्गा सप्तस्वरच्छिद्राणि यस्य तं अधरे अर्पितं वेणुं यदा ईरयति वादयति ॥ २ ॥ तदा व्योम्नि यानं गमन येषां तेषां सिद्धानां वनितास्तत् वेणुगीतमुपधार्य श्रुत्वा प्रथमं विस्मिताः आश्चर्यं प्राप्तास्ततः काममार्गणेभ्यः समर्पितानि चित्तानि याभिस्ताः कामबाणपीडिताः सलज्जाश्च सत्यः कश्मलं मोहं ययुरित्यन्वयः । लज्जायां हेतुमाहुः—सिद्धैः स्वपतिभिः सह वर्तमाना अपि कामपीडिता । **मोहे लिङ्गमाहुः**—अपस्मृता विस्मृता नीव्यो याभिस्ताः भ्रश्यद्वस्त्रानुसन्धानरहिता इत्यर्थः । **'अत एवंभूतस्य कृष्णस्य विरहं कथं सहामहे ?'** इति सर्वत्र वाक्यशेषः ॥ ३ ॥

अन्वितार्थप्रकाशिका

वामेति ।। अत्र द्वयोर्द्वयोः श्लोकयोरेकं वाक्यम् । तादृशानि द्वादश युग्मानि । तत्र पूर्वपद्ये लीला उत्तरपद्ये तत्पोष्यवर्गः । पोष्यवर्गं विना लीला नोल्लसति । ता विना पोष्यवर्गोऽपीति युग्मप्रयोजनम् । तत्र प्रातरारभ्य क्रमेण सायंकालपर्यन्तं लीला गीयते । आदौ प्रातर्बहिरागत्य कृष्णेन रात्रिशेषे वेणौ वादिते तद्गीतं शृण्वतीनां सिद्धवनितानां मोह उपवर्ण्यते । अत्र गीतेऽपि प्रथमद्वितीययोः तृतीयचतुर्थयोश्च पादयोराद्यक्षरैक्यं सावर्ण्यं वा । हे गोप्यः ! वामे बाहौ तन्मूले कृतः अर्पितो वामकपोलो येन सः गीतस्यारोहावरोहयोर्गमकमयीकरणं तेनैव प्रकारेण संभवेत् तथा वामजङ्घोपरि दक्षिणजङ्घाधस्तटन्यासोऽपि ज्ञेयः । तेन त्रिभङ्गललितस्तिर्यग्ग्रीव इति त्रैलोक्यमोहनमूर्तिरभूत् । वल्गिते नर्त्तिते भ्रुवौ येन । ह्रस्वमार्षम् । मुकुन्दः कोमलाभिरङ्गुलिभिराश्रिता मार्गाः सप्तस्वरच्छिद्राणि यस्य तम् अधरे अर्पितं वेणुं यत्र यदा ईरयति वादयति स्वागताश्चतुर्विंशतिः ।।२।। तदा सिद्धैः स्वपतिभिः सह वर्तमाना अपि व्योम्नि यानं गमनं येषां तेषां सिद्धानां वनितास्तत् वेणुगीतमुपधार्य श्रुत्वा प्रथमं विस्मिताः आश्चर्यं प्राप्तास्ततः काममार्गणेभ्यः समर्पितानि चित्तानि याभिस्ताः कामव्रणपीडिताः । अतः अपस्मृताः विस्मृता नीव्यो वस्त्रग्रन्थयो याभिस्ता भ्रश्यद्वस्त्रानुसन्धानरहिताः । कबभाव आर्षः । पतिसान्निध्यात्सलज्जाश्च सत्यः कश्मलं मोहं ययुः । ईदृशस्य कृष्णस्य विरहं कथं सहामह इति सर्वत्र वाक्यशेषः ।। ३ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तद्गानं द्वादशश्लोक युग्मेन चक्रुः वामेति हे गोप्यः वामेसव्ये बाहौ बाहुमूलेकृतो धृतोवामः कपोलोगण्डस्थलपेन सः वलितेबालिते भ्रुवौभृकुटौ येन सवलिता भ्रुमुकुन्दः कोमलाभिरंगुलिभिराश्रितामार्गाः सप्तस्वररन्ध्राणि यस्य तमधरे अर्पितं वेणुं मुरली यत्र यदा ईरयति वादयति ।। २ ।। तदा व्योमयानानांदेवानां वनिताः यद्वा व्योमयाने विमानेस्थिता वनितादेव्यः सिद्धैः स्वस्वामिभिः सहिता अपि तद्गीतमुपधाय श्रुत्वा आदौ विस्मितास्ततः काममार्गणैर्मनोजबाणैः कर्तृभिः समर्पितानि कृष्णे प्रापितानि चित्तानियासां ताः स्वस्वामिसानिध्यात् स लज्जाः सत्यः कश्मलं मोहं ययुः मोहेचिह्नं अतः अपसृतनीव्यः अपस्मृताः स्खलिता अपि विस्मृतानी व्योवस्त्रग्रयं यो याभिस्तथाभूता बभूवुः यत्र देव्योऽपि मुह्यति तत्र वयं का इत्यभिप्रायः एतादृशस्य श्रीहरेर्वियोगं कथं वयं सहाम इति युग्मं योज्यं ।। ३ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कीदृशं तल्लीलाप्रगानं येन वासरान्निन्युरित्यतस्तद्दर्शयति वामबाह्वित्यादिना ।। वामेति ।। तत्र द्वादशसु युगलेषु द्वौ द्वौ श्लोकावेकवाक्यतयान्वेतव्यौ । हे गोप्यः, मुकुन्दः श्रीकृष्णः, यत्र यदा, वामश्चासौ बाहुस्तन्मूलं तस्मिन् , कृतोऽर्पितः वामः कपोलो येन सः, वल्गिते नर्त्तिते भ्रुवौ येन तथाभूतः सन् , कोमलाङ्गुलिभिर्मृदुलाभिः करशाखाभिः, आश्रिता मार्गाः सप्तस्वरच्छिद्राणि यस्य तं, अधरार्पितवेणुं स्वाधरोष्ठार्पितां वंशीं, ईरयति शब्दयति वादयतीत्यर्थः ।। २ ।। व्योमेति ।। तदा व्योम्नि यानं गमनं येषां ते, व्योम्नि यान्तीति वा तथाभूताः सिद्धाः, नन्द्यादेराकृतिगणत्वात्कर्त्तरि ल्युः । तेषां वनिताः स्त्रियः, सिद्धैः स्वपतिभिः सह वर्त्तमानाः अपि, तच्छ्रीकृष्णकृतं वेणुगीतं, उपधार्य उपाकर्ण्य, प्रथमं तु विस्मिताः, ततः कामस्य मनोभुवः मार्गणे बाणे समर्पितानि चित्तानि याभिस्तास्तत्परवशा इत्यर्थः । सलज्जा लज्जया सहिताः, अपस्मृता नीव्यो दुकूलबन्धा याभिस्तथाभूताः सत्यः, कश्मलं मोहं, ययुः । एवंविधस्य श्रीकृष्णस्य विश्लेषं कथं सहेमेति सर्वत्र वाक्यशेषः ।। ३ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वामबाहुकृतेति : १०.३५.२.

सबाहुः सकपोलोऽपि पुमानत्रास्ति को रसः । तद्दक्षिणयोरेव-मुभयो-रथवोचितम् ।। ८ ।।
यदस्माभिः पेयं मधुरमधुरस्थामृतमसावसारस्तद्वेणुः पिबति भविता बीजमिह किम् ।
अपुण्यं वास्माकं सुकृतमथवा तस्य किमुताविवेकोऽयं दातुर्यदनुचितपात्रे वितरणम् ।। ९ ।।

व्योमयानेति : १०.३५.३.

आदावङ्गुलिमण्डलीभिरभितो वेणुं निरीक्ष्याश्रितं साश्चर्याः पुरुषायितस्थितिमथो निर्णीय सापत्रपाः ।
कामेष्वर्पितमानसास्तदनु ताः कान्ताः सकान्तास्तदा जातास्तद्रसलिप्सया नखगताः कृष्णस्य स्वस्था अपि ।। १० ।।
वेणुमङ्गुलिभिराश्रितमार्गमेतदङ्घ्रिफलितार्थविचारे । तत्कृतश्च पुरुषायितभावो भाति भावकुशलैरवलोक्यः ।। ११ ।। (युग्मम्)
वादयतीशे वेणुं जातास्तन्मूर्च्छनाश्रिता देव्यः । चित्रं न चित्रमथवा श्रुतिसङ्घटिता हि ता यतो गदिताः ।। १२ ।।
देव्योऽपीहि सुखस्थिता अपि सदा संसिद्धयोगा अपि श्रुत्वा नन्दभवाननाम्बुजमरुत्-घूर्णाङ्गवेणुस्वरम् ।
तत्कालं मुमुहु-र्मुहुर्मुहु-रहो तत्रापरासां कथा का वा गोकुलगोजुषामिति तदा योषास्तथाऽवर्णयन् ।। १३ ।।
श्रुतिविषयाप्तसुखानां ननु वासोपस्मृतिः सदपि समभूत् । युक्तं तच्चित्रमिदं यत्स्मृतिजन्माभवद् युवतिहृदये ।। १४।।

कृष्णप्रिया

हे गोपियाँ ! देखो और सुनो ! श्रीमुकुन्द भगवान् वाम भुजा पर वाम कपोल रखकर, चंचल भौंहें वाले कोमल अधर दल वेणु जी पधराकर श्री वेणु जी के छिद्रों पर स्वर माधुरी प्रकट करने के लिए विद्युत् गति से कोमल अङ्गुलियों को फिराते वंशी बजा रहे हैं, तब विमान में अपने प्रियतम पति देवों के साथ विराजमान सिद्धाङ्गनाओं ने वेणुसुधाजी का पान किया, वे विस्मित हो गई है, मदनराज के मादक वाणों से घायल हो गई है, वेणु सुधा के आस्वाद से परवश बन चुकी है मुग्ध बन गई है उनकी नीवीओं की ग्रन्थियाँ भी शिथिल बन गई है और लज्जित बनकर अपने पतिओं के सामने विभोर बन बैठी है ॥ २-३ ॥

हन्त चित्रमबलाः शृणुतेदं [1]हारहास उरसि [2]स्थिरविद्युत् ।
नन्दसूनुरयमार्तजनानां [3]नर्मदो यर्हि कूजितवेणुः ॥ ४ ॥
वृन्दशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस [4]आरात् ।
दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥ ५ ॥

कर्दमक्षमा

अन्वयः—हन्त ! अबलाः, इदम् , चित्रम् , शृणुत, हारहासः, आर्तजनानाम् , नर्मदः, उरसि, स्थिरविद्युत् , अयम् , नन्दसूनुः, यर्हि, कूजितवेणुः, तर्हि, वेणुवाद्यहृतचेतसः, वृन्दशः, व्रजवृषाः, मृगगावः, धृतकर्णाः, दन्तदष्टकवलाः, आरात्लिखित-चित्रम् , निन्दिताः, इव, आसन् ॥ ४-५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हन्त हे अबला इदं चित्रं शृणुत । हारहासो हारवद्विशदो हासो यस्य सः । यद्वा वेणुवादनेनाधोवदनेन हसतो हारेषु स्फुरन्हासो यस्य सः । यद्वा हारवद्वक्षसि शोभमानो हासो यस्य सः । यद्वा हाराणां हास इव विशदा स्फूर्तिर्यस्मिन्नुसीति । तस्मिन् उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः । यर्हि यदा कूजितवेणुर्नादितवेणुर्भवति ॥ ४ ॥ तदा व्रजे वृषा मृगा गावश्च वेणुवाद्येन हृतानि चेतांसि येषां ते । आराद्दूरादेव दन्तैर्दष्टाः कवला ग्रासा यैस्ते धृता उत्तंभिताः कर्णा यैस्ते निद्रिता इव लिखितचित्रमिव चासन् अविदुषां तिरश्चामिदमतिचित्रमित्यर्थः ॥ ५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

(यु० १) ॥ हन्तेति हर्षे । हारन्मुक्तावलिवद्विशदः श्वेतो हासो यस्य स तथा 'हारो मुक्तावलौ युधि' इति मेदिनी । 'विशदश्वेतपांडुराः' इत्यमरः । हासस्य वस्ततोऽमूर्तत्वात्तत्र विशदत्वारोपणमनुचितमिव मत्वाह—यद्वेति । कदाचिन्मुक्तावल्यसत्त्वे विशेषणवैय्यर्थ्यं मत्वाह—वक्षसि । हास्यावसरे दन्तदीधितिपुञ्ज एव हारवद्भातीत्यर्थः । संभवत्वादुरोविशेषणं शोभनमिदमिति मत्वाऽऽह—यद्वेति । हाराणां हास इवेत्युत्प्रेक्षैव हारदीप्तेर्हासत्वेनोत्प्रेक्षणात् । एवमेव विद्युतो लक्ष्मीत्वेनोत्प्रेक्षणमेव । अयमित्युक्तिर्बुद्धिसन्निहितत्वात् । आत्मविरहार्तानां नर्मदः परिहासदः । आनन्दजनक इत्यर्थः । "द्रवकेलिपरीहासाः क्रीडा खेला च नर्म च" इत्यमरः ॥ (४) ॥ वृन्दंवृन्दमिति वृन्दशः । इह "संख्यैकवचनाच्च वीप्सायाम्" इति शस् । एकैकवृन्देन पृथक् पृथक् स्थिता इत्यर्थः । अविदुषामल्पज्ञानतामित्यर्थः । इहाल्पार्थेन नञा समासो न त्वभावार्थकेन तेषामप्याहारमैथुनादिज्ञानदर्शनात् । इदम् ग्रासस्थितिपूर्वकं वेणुनादश्रवणम् । इत्यर्थ इति—किंचिज्ज्ञानवतां यदीयं दशा तर्हि किमस्माकं विशेषज्ञानवतीनामनवधाने वक्तव्यमिति भावः । देववनितानां विदग्धप्रवराणां का वार्ता मूढजनानामपि मोहं शृणुतेत्यन्या आहुः—हन्त चित्रमित्यद्भुतादप्यद्भुतमित्यर्थः । हे अबला इति स्त्रीणां युष्माकं पातिव्रत्यबलं कृष्णेन प्रथमत एवापहृतमिति भावः । हाराणां बलाकानामिव हासः प्रकाशो यत्र तथाभूतः । उरसि मेघोपमा स्थिरा विद्युत्तत्रत्यलक्ष्मी रेखैव यस्य सः । तेन बलाकाविद्युद्भूषितकृष्णवक्षोमेघेनैव भवतीनां पातिव्रत्यनिदाघो ध्वंसित इति भावः । अत एवायमार्तजनानां युष्माकं नर्म सर्वलोककर्तृकमुपहासं ददातीति सः कदा यर्हि कूजितवेणुर्भवति तदेत्यर्थः । वेणुनादमात्रेण शिथिलनीवीकबरीकाः प्राप्तोन्मादाः सर्वलोकहासास्पदीभूता भवत्यो भवन्तीति भावः ॥ युष्माकं मानुषीणां का वार्ता तिर्यग्जातयोऽपि वेणुनादेन मूर्छिताः क्रियन्त इत्याहुः—वृंदशः । प्रतियूथमित्यर्थः । व्रजस्था वृषा व्रजस्था मृगा गावश्च दन्तैर्दष्टाः कवलास्तृणग्रासा यैस्त इति तृणेषु दन्तैर्दष्टेषु सत्सु तन्निगलनात्पूर्वमेवारब्धेन वेणुनादेनैव बलात्कर्णमार्गैरेव देहान्तः प्रविष्टं न तु मुखमार्गेण तृणग्रासा देहान्तः प्रविष्टाः । अत एव धृता उत्तंभिताः कर्णा यैस्ते । ततश्च

---

१. भास-विज. । २. स्थित-वीर. विज. । ३. शर्मदो-विज. । ४. एत्य-विज. ।

तेन हृतानि येषां त इत्यत एव सर्वेंद्रियव्यापाराभावान्निद्रिता इव, तत एव तृणग्रासास्ते दन्तदष्टत्वस्यान पगमाद्भुव्यपि नो पतिता इति भावः। ततश्च प्रबलीभूतेन जाड्यसंचारिणा जनिते तस्यातिशये सति मूर्छायां च सत्यां श्वासस्यापि प्रायस्तब्धीभावाल्लिखितचित्रमिवेत्युपमान्तरं दत्तम्। तत्रापि लिखितेत्युत्कीर्णचित्रादपि लिखितचित्रस्य चमत्कारित्वातिशयविवक्षयोक्तम्। केनाप्यद्भुतचित्रकारेणाकाशपट्टे लिखितानि चित्राणीति विस्मयरसो ध्वनितः ॥ ४–५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततो वनान्तिकं गच्छन् सर्वगोगोपालसङ्कलनार्थं वन्यमृगादिहर्षणाय स्वानुव्रज्याकरश्रीगोपादीनां ससान्त्वनगृहनिवर्त्तनाय च वेणुमवादयत्, तत्रास्तामन्येषां वार्त्ता तस्योभयतो व्रजवनयोः स्थिताः पशवोऽपि मुमुहुरित्याहुः ॥०॥ हन्तेति। हृदयस्थविस्मयचमत्कारद्योतकं तथैव साक्षाद्वदन्ति चित्रमद्भुतम्। हे अबला! इति तच्छ्रवणेन प्रेमविह्वलतयेन्द्रियादिशक्तिराहित्याभिप्रायेण। अत एव शृणुतेत्यवधापयन्ति। स्थिरविद्युदिति वक्षस्थां रेखारूपां लक्ष्मीमेवोत्प्रेक्षन्ते। प्रसिद्धत्वात्तु नानुवदन्ति। तत्र स्थिरेति चित्रत्वे कारणम्। विद्युत्त्वेनोरसश्च घनत्वं व्यञ्जयन्ति। तस्याश्च नायिकात्वमाशङ्क्य तत्रापि स्थिरत्वं विभाव्य मात्सर्यम्। तथापि विद्युद्घनसहयोगेन हारहासयोर्वलाकात्वं तादृशघनत्वेन तत्पहारित्वञ्च। अत एव नन्दयति जगदिति नन्दस्तस्य सूनुरिति स्वभावेनानन्दकत्वमुक्तम्। अतएवार्त्तजनानां गवादीनां मृगादीनाञ्चानन्ददाता। अयमित्यधुनैव यो गृहान्निर्गतः स इत्यर्थः। साक्षात् सर्वैरनुभूयमान इति वा। कूजितेत्यादि कर्मणि क्तः। अन्यत्तैः। यद्वा। हारो मनोहरो हासो यस्य सः। यद्वा। यस्मिन्नुरसि। अन्यत् समानम। व्रजे ये निरुध्य पाल्यमानाः शकटवाहो वृषास्ते, मृगाः कृष्णसाराः तत्सम्बन्धेन गावो वनगामिन्यस्तदुपलक्षणत्वेनान्येऽपि तत्तज्जातयो दन्तैर्दष्टा एव हृतचेतस्त्वेन न गीर्णा न चर्विता नापि त्यक्ताः कवलास्तृणग्रासा यैः अत एव हृतचेतस्त्वेनेत्यत्र तस्या मुरल्याः शब्दान्तरोत्थानभयेनेत्युत्प्रेक्ष्यम्। दन्तैस्तृणधारणे मोहभयान्मार्गायेति तन्निवेदनव्यञ्जना च। निद्रितानामपि किञ्चिच्चलनादिकमप्यस्तीति तत्परिहारार्थं दृष्टान्तान्तरमाह। लिखितेति। पटादौ लिखितं वृषादीनां चित्रमिव। लिखितग्रहणं लिखितचित्रस्योत्कीर्णचित्राच्चमत्कारकरत्वापेक्षया। एकत्वं सङ्घटेनैकतामिव गता इत्यपेक्षया ॥ ४–५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततो वनान्तिकं गच्छतस्तस्य विरहार्त्तानां पश्चात् प्रयान्तीनां श्रीगोपीनां गृहेषु प्रेषणार्थम्, तथा रात्रिविच्छेददुःखितानां सहचराणां ग्राम्यवन्यपश्वादीनाञ्च सन्तोषणार्थम्, वेणुकुजनेन व्रजजनानुग्रहाद्व्रजसम्बन्धविशेषवतां वृषादीनां प्रहर्षणमोहमाहुः,—हन्तेति युगलेन। हन्त—आश्चर्य्यसम्बोधने, चित्रमद्भुतम्। हे अबला इति तच्छ्रवणेन प्रेमविह्वलतयेन्द्रियादिशक्तिराहित्याभिप्रायेण, गौरवर्णचाञ्चल्यादिना विद्युदिव लक्ष्मीः; विद्युच्छब्देन वक्षसो मेघत्वं ध्वन्यते, अभूतोपमा ज्ञेया, मेघे यदि विद्युत् स्थिरा स्यात्तदा यथा तस्य शोभा तथा लक्ष्म्या तदुरस इति शोभाविशेष एव तस्याभिप्रेतः। यद्वा, लक्ष्मीस्वरूपापि तदुरसि पीतसूक्ष्म रेखा ताभिस्तदज्ञानाद्विद्युद्रूपत्वेनैव वर्णिता। नन्दयति जगदिति नन्दस्तस्य सूनुरिति पितृस्वभावेनाप्यानन्दकत्वमुक्तम्। अयमिति अधुनैव यो गृहान्निर्गतः स इत्यर्थः। इति वेणुकूजनस्य निकटवर्त्तमानत्वञ्चाभिप्रेतम्। यद्वा, नन्दसूनुरिति स्वभावत एव व्रजजनानन्दकत्वम्, अयमिति तस्य साक्षात् सर्व्वैरनुभूयमानत्वं चोक्तम्। अतएव आर्त्तानां जनानां रात्रौ जाताद्विच्छेदात् सहचराणां ग्रामारण्यपशुपक्ष्यादीनाञ्च निजवनप्रयाणविज्ञापनेन दिवसे उपसन्नत्वाच्च श्रीगोपीनामपि समाश्वासनेन नर्म्म ददातीति सः, सुखं दातुमित्यर्थः, कुजितेत्यतीतनिर्द्देशो वृषादीनां दूरवर्त्तित्वेन सद्योऽश्रवणात्, वामबाहुकृतेत्यादिकमत्रापि यथोपेक्षमनुवर्त्त्यम्, प्रायस्तथैव तद्वादनात्। अन्यत्तैर्व्याख्यातम्। यद्वा, हन्त हर्षे खेदे वा। हारो मनोहरो हासो यस्य सः। यद्वा, यस्मिन्नुरसि, अतएव उरसि स्थिरा नित्यं विद्यमाना विद्युत्—विशिष्टा द्युत् द्युतिर्यस्याः सा लक्ष्मीर्यस्य सोऽपि, कूजनं कूजस्तद्युक्तो वेणुर्यस्य तथाभूतो यदा भवति तस्यार्त्तजनसुखेच्छया यदा स्वयमेव वेणुर्नदतीत्यर्थः। अन्यत् समानम्। एवमन्यार्थमेव वेणुवाद्य तत्र च शब्दमात्रमेव, न तु विशेषतो गीतादीत्यभिप्रेतम्। एवमग्रेऽपि। तथापि व्रजे ये वृषादयस्ते सर्व्व एवेत्यर्थः। तत्र मृगाः कृष्णसाराः, वत्सतराणां वृषेषु वत्सतरीणाञ्च गोष्वन्तर्भावः,। नूतनवत्साश्च मातृभ्यो दूरतोऽन्यत्रैव चरन्ति, केचिच्चातिकोमला व्रजान्तर्निरुद्धा वर्त्तन्त इति ते तेन निर्दिष्टाः। यद्यपि महिष्यादयो ग्राम्याः शूकरादयश्च वन्याः परेऽपि बहवः पशवः सन्ति, तेऽपि वेणुवाद्येन तादृशा एव भवन्ति; तथापि वृषादीनामेव निर्द्देशः, तेषु श्रीकृष्णस्य स्नेहविशेषात्। अतएव व्रजे पशुसहचरत्वेन मृगाणां व्रजवर्त्तिमध्य एव निर्द्देशः। यद्वा, प्रधानतया ते तत्रोपलक्षणत्वेनोक्ताः, अन्येऽपि स्वतो द्रष्टव्या एव। तत्र वृषादीनां हृतचेतस्त्वादौ यथोत्तरं श्रैष्ठ्यमूह्यम्। तत्र वृषेभ्यो मृगाणां श्रैष्ठ्यम्; गानरसिकत्वादिबुद्धिविशेषापेक्षयति दिक्। सहचराश्च गोपा नोक्ताः, तेषां सदा सर्व्वथैव परमानन्दोदयात्; वाद्यं वादनं भावे कृत्यं तेनैव हृतचेतसः, रूपदर्शनानपेक्षयापि केवल वेणुवाद्येनैव हृतचेतस्त्वविवक्षया, किंवा हृतचेतस्त्वे तदा वेणुवाद्यस्य प्राधान्यापेक्षया, अतएव पुनर्वेणुवाद्यस्य प्रयोगः। दन्तैर्दष्टा एव शब्दान्तरोत्थानभयादिव चर्व्विताः, यथा हृतचेतस्त्वेन न गीर्णा नापि त्यक्ताः कवलास्तृणग्रासा यैर्धृतास्तद्वाद्यश्रवणायैवोत्तम्भिताः कर्णा यैः, निद्रितानामपि किञ्चिच्चलनादिकमस्तीति तत्परिहारार्थं दृष्टान्तान्तरमाहुः,—लिखितेति। पटादौ लिखित वृषादीनां चित्रमिव,

अद्भुतार्थत्वस्य व्यावृत्तार्थं लिखितेति विशेषणम्, एकत्वञ्च जात्यपेक्षया। अन्यत्तैर्व्याख्यातम्। यद्वा, सकृद्दूराद्वेणुवाद्येनैव हृतचेतसः परमव्याकुलाः पुनस्तद्विशेषश्रवणेन श्रीकृष्णविच्छेदकमरणभयादिव तदश्रवणाय कथञ्चिदग्रपादाभ्यां घृता मुद्रिताः कर्णा यैस्तथाभूताः सन्तः, प्रयत्नात्तदन्दिकमेत्य तद्वाद्यापरमार्थं दन्तदष्टकवलास्तद्धृत्या मियेण दन्तैर्गृहीततृणाः, पश्चात्तद्रूपदर्शनेन मुहुर्वाद्यश्रवणेन च प्रेमभरोदयान्मोहिता इव बभूवुरित्यर्थः। एवं पूर्वोक्त-सिद्धस्त्रीभावताऽप्येष विशेष उह्यः ॥४–५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

हारभासः निर्मलभासः उरसि स्थितविद्युत् उरसि स्थितश्रीरित्यर्थः ॥ ४–५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हन्तेति। हे अबला! इदं चित्रं शृणुत हन्तेति आश्चर्यमेतत् अयं नन्दसूनुः हारवद्विशदोऽमलो हासो यस्य। यद्वा हारेषु स्फुरद्धासो यस्य उरसि स्थिता विद्युदिव लक्ष्मीर्यस्य तथाभूतः आर्त्तजनानां तद्विश्लेषजदुःखं पीडितानां मादृशां नर्मदो नितरां दुःखकारकः सन् यर्हि कूजितो वादितो वेणुर्येन तथाभूतो भवति ॥ ४ ॥ तदा व्रजे ये वृषा मृगा गावश्च वेणुवाद्येन हृतानि चेतांसि येषान्ते आराद्दूरादेव दन्तैर्दष्टा एव नतु चर्विताः कवलास्तृणग्रासा यैस्ते धृता उत्तम्भिताः कर्णा यैस्ते निद्रिताः सञ्जातनिद्राः इव लिखितचित्रमिव चित्रितवृषादिरिव चासन् तस्थुः अविदुषां तिरश्चामपीदमानन्दपारवश्यजनकं वेणुगीतमतोऽपि चित्रमिति भावः ॥ ५ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हारेण भासत इति हारभासः हारवद्विशदो हासो यस्य स तथेति पाठार्थौ उरसि स्थितविद्युत् विद्युदिव विष्णुं द्योतयति श्रीवत्साङ्कनामेति यर्हि यदा कूजितवेणुर्भवति ॥ ४ ॥ तदा एत्य समेत्य व्रजवृषादयः लिखितचित्रमिव निश्चेष्टा आसन्नित्यन्वयः धृतकर्णाः निश्चलकर्णाः कवलस्तृणग्रासः निद्रिताः कार्यान्तररहिताः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ततो वनान्तिकं गच्छन् गोगोपसङ्कलनार्थं वेणुमवादयत् तत्रास्तामन्येषां वार्त्ता पशवोऽपि मुमुहुरित्याहुः। हन्तेति युगलेन। स्थिरविद्युदिति वक्षस्थां रेखारूपैल्लक्ष्मीमेवोत्प्रेक्षेन्ते। प्रसिद्धत्वात्तु नानुवदन्ति व्रजे ये निरुद्धाः पाल्यमाना वृषास्ते तत्तत्सम्बन्धेनान्येऽपि ज्ञेयाः। निद्रितानां किञ्चिच्चलनादिकमप्यस्तीति दृष्टान्तान्तरं लिखितेति लिखितग्रहणं चोत्कीर्णचित्रापचमत्कारित्वापेक्षया। एकत्वञ्च एकीभावापेक्षया ॥ ४–५ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अथान्या ऊचुः—हन्तेत्यादि द्वाभ्याम्। हे अबलाः! इदं शृणुत। किं तत्? इत्याह—चित्रं व्योमयानवनितानां स्त्रीत्वभावात्तन्नातिचित्रम्, वृषादीनां पशुत्वाद् यदीदृशं वैवश्यम् तत्तु चित्रमेवेत्यर्थः। कीदृशः? हारस्य हासो यत्र तस्मिन्नुरसि स्थिरा विद्युदिव श्रीर्यस्य आर्तजनानामस्माकं वेणुध्वनिनैव नर्मदः। तदस्माभिरेव बुध्यते नान्यैरिति भावः। अतो यस्य वेणुध्वनिना पशवोऽप्येवं भूताः तस्य वेणुनादकृत-नर्मश्रवणेनापि गृहे वयं तिष्ठामः, अहो नः परमकाठिन्यमिति निर्वेदः ॥ ४–५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

हे सख्यः! इदं नातिचित्रम्, एतास्तु स्त्री-स्वभावेन तल्लावण्याकृष्टतया कश्मलं प्राप्नुयुर्नाम, इदन्तु चित्रमित्यन्या आहुः—हन्तेत्यादि द्वाभ्याम्। हे अबलाः! बलं स्वातन्त्र्यं तन्न विद्यते यासां तास्तथा, अत इदं शृणुत। हन्त आश्चर्ये। इदं चित्रं यर्ह्ययं कूजितवेणुस्तदा व्रजवृषा मृगगावो दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन्—इति यत्। कीदृशः? हारस्य हासो यस्य तस्मिन्नुरसि स्थिरविद्युत् स्थिरा विद्युदिव विद्युच्छ्रीर्यस्य आर्त्तजनानामस्माकं वेणुध्वनिनैव नर्मदः परिहास-कारी अतो यस्य वेणुध्वनितं श्रुत्वा पशवोऽपि चित्रप्राया भवन्ति, तस्य वेणुनादकृत-नर्मश्रवणेनापि सर्वव्यापारमस्माकमास्ते इति धिगस्मान्। ग्लानि-खेद-विषाद-मति-स्मृतीनां शाबल्यम् ॥ ४–५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देववनितानां विदग्धप्रवराणां का वार्ता मूढजन्तूनामपि मोहं शृणुतेत्यन्या आहुः। हन्तचित्रमत्यद्भुतादप्यद्भुतमिदमित्यर्थः। हे अबलाः स्त्रीणां युष्माकं पातिव्रत्यबलं कृष्णेन प्रथमत एवापहृतमिति भावः। हाराणां बलाकानामिव हासः प्रकाशो यत्र तथाभूते उरसि मेघोपमे स्थिरा विद्युत्तत्रत्यलक्ष्मीरेखैव यस्य सः तेन बलाकाविद्युद्भूषितकृष्णवक्षोमेघेनैव भवतीनां पातिव्रत्यनिदाघो ध्वंसित इति भावः। अतएवायम् आर्तजनानां युष्माकं नर्म सर्वलोककर्तृकमुपहासं ददातीति सः कदा यर्हि कूजितवेणुर्भवति तदेत्यर्थः। वेणुनादश्रवणमात्रेण शिथिलनीवीकवरीकाः प्राप्तोन्मादाः सर्वलोकहास्यास्पदीभूता भवत्यो भवन्तीतिभावः। युष्माकं मानुषीणां का वार्त्ता तिर्यग्जातयोऽपि वेणुनादेन मूर्च्छिताः क्रियन्ते इत्याहुः। वृन्दशः प्रतियूथमित्यर्थः। व्रजस्थाः वृषा

वनस्था मृगाः गावश्च दन्तैर्दष्टाः कवलास्तृणग्रासा यैस्ते इति तृणेषु दन्तैर्दष्टेषु सत्सु तन्निगिलनात् पूर्वमेव आरब्धेन वेणुवाद्येनैव बलात् कर्णमार्गैरेव देहान्तः प्रविष्टं नतु मुखमार्गेण तृणग्रासा देहान्तः प्रविष्टा अतः एव धृता उत्तम्भिताः कर्णा यैस्ते ततश्च तेन हृतानि चित्तानि येषां ते इत्यत एव सर्वेन्द्रियव्यापाराभावान्निद्रिता इव तत एव तृणग्रासास्ते दन्तदष्टत्वस्यानपगमाद् भूमावपि न पतिता इति भावः। ततश्च प्रबलीभूतेन जाड्यसंचारिणा जनिते स्तम्भातिशये सति मूर्च्छायांच सत्यां श्वासस्यापि प्रायस्तब्धीभावाल्लिखितचित्रमिवेत्युपमान्तर दत्तं तत्रापि लिखितेत्युत्कीर्णचित्रादपि लिखितचित्रस्य चमत्कारत्वातिशयविवक्षयोक्तं केनाप्यद्भुतचित्रकारेणाकाशपटे लिखितानि चित्राणीति विस्मयरसोध्वनितः ॥ ४–५ ॥

गूढार्थदीपिनी

हे अबला ! इदं चित्रमाश्चर्यं श्रृणुत। अयं नन्दसूनुः यर्हि कूजितवेणुर्भवति तदा व्रजगवादयः निद्रिता इव लिखितचित्रमिव प्रतीयमानाः आसन्। तारवत् विशदो हासो यस्य। उरसि स्थिरा विद्युत् लक्ष्मीः यस्य। नर्मदः सुखदः। अरात् दूरादेव वाद्यश्रवणेन आकृष्टचित्ता दष्टा एव न तु चार्विताः नापि त्यक्ताः तृणग्रासा यैस्ते ॥ ५

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अः वासुदेव एव बलं यासां तास्तथा तासां सम्बुद्धौ हे अबलाः ! कृष्णाधाराः हन्तेत्यव्ययं हर्षे हन्त हर्षकरं चित्रमिदं श्रृणुत यः उरसि अस्माकमहर्निशं वर्तते सोऽयम् हारेषु तदीयेषु अधोवदनेन क्वचिद्धसतः अस्मदीयेषु चाभिमुख्येन विहरतः स्फुरद्धासो यस्य सः। यद्वा हारवद्विशदो हासो यस्य सः स्थिरा अचला वक्षोगता विद्युदिव भासमाना लक्ष्मीः देहगता कान्तिर्वा यस्य सः आर्तानां संसारतापपीडितानामस्मदादीनां नर्म तदार्त्तत्वनिराकरणपूर्विकां क्रीडां ददातीति सः द्रवकेलिपरीहासाः क्रीडा खेलादि नर्मचेति कोशात् यर्हि यदा कूजितो वादितो वेणुर्येन स तथाभूतो भवति तदा व्रजसंबन्धिनः वृषा मृगा गावश्च वृन्दशः वेणुवाद्येन हृतान्याकृष्टानि चेतांसि येषां ते दन्तैर्दष्टाः कवलाः ग्रासाः यैस्ते धृताः वेणुगीतश्रवणानुकूलीकृताः कर्णा यैस्ते निद्रिताः सुखातिशयेन संजातनिद्रा इव लिखितचित्रमिव च आरात् केचिद्दूरे केचित्समीपे इत्येवं यथायथमेव आसन् तस्थुरित्यर्थः। आरादित्यव्ययं दूरसमीपयोः तच्चात्रोभयार्थपरत्वविवक्षयोपन्यस्तम् ॥ ४–५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे अबला हारभासो हारस्य भा यस्य भा येन तस्य कृष्णस्येदं चित्रं कर्म श्रृणुतेत्यन्वयः। हन्त हर्षः। हारहास इति पाठे हारवन्मुक्तासरवच्छुभ्रो हासो यस्य स इति नन्दनन्दनविशेषणं। हारो मुक्तावली हारा मुक्तावलीत्यमरविश्वौ। स्थिता विद्युद्विशेषणे द्योतमानेति विद्युद्रमा यस्य सः। तत्स्थानमाह ॥ उरसीति। अर्तजनानां शर्मदः सुखदोऽयं नन्दसूनुर्यर्हि यदा कूजितवेणुस्तदा वृन्दशः सङ्घशो व्रजवृपो व्रजेन्द्रो नन्दसूनुरिति वा। मृगा गावश्च वेणुवाद्येन वेणुसम्बन्धिनादनयोग्यस्वरेण हृत चेता यासां ता एत्याभ्येत्य दन्तैर्दष्ट कवलस्तृणग्रासो यासां ता धृताः कर्णा याभिरिति तत्स्वभावोक्तिः। निद्रयाऽऽनन्दतुन्दिलतया निद्रणं लिखितचित्रं चित्रलिखितगाकुलमिव निश्चेष्टा आसन्। अत एव तद्विरहं कथं हा सहासह इति सर्वत्रान्वेतव्यम् ॥ ४–५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

गवामपि वेणुमादेन तथा जातमिति वक्तुं प्रकारान्तरेण वेणुरवोद्गममाहुः। हन्त चित्रमिति। हे अबलाः ! इदमाश्चर्यं श्रृणुत यर्हि नन्दसूनुः कूजितवेणुः तर्हि वृषा गावः दन्तदष्टकवलाः निद्रिता आसन्निति सम्बन्धः कामः पशुषु सजातीय एव नोत्कृष्टे नापकृष्टे अश्वतरे त्वन्यैव व्यवस्था हीनेषु महतो रमणार्थं संबन्धोऽपि रसाभासजनकः अतः सम्भोगलक्षणं कामं निराकृत्य पशुष्वत्यावश्यकं भक्षं निरुणद्धि पूर्वोक्तं वामबाहुकृतवामकपोलत्वमनुवर्त्तते। तत्रैवावान्तरभेदो वक्तव्यः हन्तेति खेदे यत्र गवामपि सर्वक्रिया निवृत्तिः तत्रास्माकं न निवर्त्तत इति चित्रं पूर्वापेक्षयाप्यूत्कृष्ट देवस्त्रियो हि पुरुषोत्तमे कामुक्यो भवन्त्येव इद त्वत्याश्चर्यमिति अबला इति संबोधनङ्कृत्वा दर्शनाभावाय इदं मया प्रोच्यमानं श्रृणुत अत्र गोपिका नवविधाः गुणातीते प्रकारत्रयमिति कर्मज्ञानभक्तिभिः वक्तृव्यवस्थैषा प्रथमा राजस्यः इयं राजसराजसी अपेक्षितं पूर्वं सर्वमेवानुवर्त्तते। सर्वत्र आदौ भगवतः स्वरूप श्रृणुतेति तं चतुर्द्धा वर्णयति हारवत् हासो यस्य उरसि स्थिरा विद्युत् यस्य नन्दस्य च सूनुः आर्त्तजनानां सर्वेषामेव नर्मदः तत्र हेतुरयमिति अन्यथेदानीमग्रे प्रकटो न भवेत् द्वितीये मुहूर्ते निर्गच्छन्तं वालक्ष्याह तदा प्रतिमुहूर्त्तं युगलानि भवन्ति सन्ध्यासन्ध्यांशयोरन्तरेण द्वादशैव मुहूर्त्ता इति सोमोत्पत्तौ निर्णयः अन्येषां हास्यं किर्मीरितन्तत्रातिरज्जुवत् भगवतस्तु दन्तानां कान्त्या विभक्तो हासः मुक्ताहारवद्भवति यथा रत्नैर्व्यहिता मुक्ता इति अनेन जगतः प्रपञ्चे मोहजनकत्वं स्थिरीकृतं स्नेहकलाभिर्मायाविभक्तश्रुतार्थापत्तिरर्थनिरूपणे मूलं सर्वत्र यथा दृष्टे नानुपपत्तिः दृष्टानुसारेणैव सर्वं व्यवस्थाप्यते। नहि दृष्टे अनुपपन्नं नामाव्याघातादिति लौकिकानामेषा व्यवस्था सर्वथा दृष्टविरोधो नाङ्गीक्रियत इति तथा वैदिकानां श्रुतिः यावतैव बोध्यमानः पदार्थः स्थिरीभवति तावांस्तदनुगुण उच्यत इति सर्वत्रैवेषा व्यवस्था न केवलं संसारे पुत्राद्यासक्तिमेव स्थिरीकरोति किन्तु धनासक्तिमपीत्याह स्थिरा लक्ष्मीर्यत्रेति एवम्प्रमाणबलनिराकरणर्थं द्वयं विधाय प्रमेयबलनिराकरणार्थं द्वयं कृतवानित्याह यतः स्वयमेव नन्दस्य सूनुर्ज्जातः आर्त्तानाञ्च

स्वयमागत्य सुखं प्रयच्छति परिदृश्यतेच तथेति च प्रमाणं नहि महानेवं करोति । अत इदमाश्चर्यम् एतमेवार्थं प्रकटीकुर्वन् कूजितवेणुर्भवति अथवा पूर्वापेक्षया अधोवक्त्रलोलया वेणुर्वाद्यते हारवद्धासो यस्मिन् उरसि तस्य स्थिरताविभागः स्थैर्यं चाश्चर्यं श्रीवत्सोऽप्युत्कृष्ट इति शोभार्थं तस्य स्थिरत्ववर्णनं तादृशस्य नन्दसूनुत्वे स्नहो वर्द्धते तत्रापि स्वोपकारक इति कूजितत्वं वादनविशेषधर्मः सर्वेषामान्तरं प्राणधर्ममप्याकर्षति ॥ ४ ॥ यत्र पशूनामपि प्राणादिधर्महारी तत्रान्येषां किं वक्तव्यमिति पशूनां निरूपयति एकस्य तथात्वे हेत्वन्तरसिद्धमपि भवेत् अत उक्तं वृन्दश इति । समूहशः यत्रैव वेणुनादः प्रविष्टः तेषां सर्वेषामित्यर्थः व्रजस्थिता वृषाः ककुद्मिनो मत्ताः उत्सृष्टवृषा इव शकटादिनेतारः ते व्रजसमीप एव तिष्ठन्तीति ग्राम्यपशूपलक्षणार्थं व्रजपदं मृगा गावश्च अरण्ये मिलिता भवन्ति आरण्या ग्राम्याश्चैवं भवन्तीति ज्ञापनार्थं मृगपदं किं बहुना सर्वे एव पशवः वेणुवाद्येन कृत्वा हृतचेतसो भवन्ति नापि भगवत्समीपगमने समर्थाः किन्तु हृतचेतसः दूरादेव भवन्ति अनेन वेणुनादस्य स्वाभाविक एवायं धर्मो नतु भगवत्समीपकृत इति केवलास्तृणरूपाः केवलं दन्तैर्दष्टाः न त्यागे न च भक्षणे समर्थाः दन्तदंशमात्रेणैव प्रयत्नो निवृत्त इति नादस्येतरकार्यनिवर्त्तकत्वमुक्तं पूर्वं क्रियाया अत्यावश्यकत्वाय कवलपदं देवस्त्रीवन्मूर्च्छानिवृत्त्यर्थमाह । धृतकर्णा इति । अन्यत्सर्वं परित्यज्य कर्णमेव साधनं धृतवन्तः ततो बाह्यान्निवृत्ता इत्याह । निद्रिता इति । ततो नादने सर्वतो व्याप्ताः लिखितं गवादीनां चित्रमिव पश्चात्त जाताः स्थावरापेक्षयापि स्थिरा जाताः पूर्वोक्तार्थादधिकोऽर्थ इति चित्रता ॥ ५ ॥

श्रीसुबोधिनी–सारः

हन्तेति हर्षे । हे अबला इदं चित्रं यूयं शृणुत हारवद्विशदो हासो यस्य हारो मनोहरो हासो यस्येति वा उरसि हृदये स्थिता विद्युत् श्रीर्यस्य स आर्त्तजनानां नर्मदो हास्यप्रदोऽयं नन्दपुत्रो यर्हि वादितवेणुर्भवति ॥ ४ ॥ तदा व्रजे वृषा मृगा गावो वृन्दशः संघशः वेणोर्वाद्येन हृतं चेतो येषां ते आराद् दूरात् दन्तैर्दष्टाः कवला ग्रासा यैस्ते धृता उत्तभिताः दत्ता वा गीतश्रवणार्थं कर्णा यैस्ते निद्रिता निद्रालव इव लिखितं चित्रमिवासन् ॥ ५ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

हन्त चित्रमित्यत्र, सोमोत्पत्तौ निर्णय इति । तत्रामावास्यायां सोमस्य दिवा स्थितिस्थानमुक्तम् । 'त्रिमुहूर्तं वकेदर्के त्रिमुहूर्तं जले वसेत् । त्रिमुहूर्तं वसेद्गोषु त्रिमुहूर्तं वनस्पता'विति । एवं सति दिनस्य द्वादशमुहूर्तात्मकत्वात्प्रतिमुहूर्तं यां यां प्रभुः करोति, सा सा लीलाऽत्र गीयत इति संख्यया ज्ञापितं भवति । लीलासहितो भगवान् हृदि प्रकट इति यदा यां लीलां प्रियः करोति, तदैव सैव लीला स्वामिनीहृदयेषु स्फुरतीति नानुपपत्तिः काचित् । **हारहास** इत्यत्र, केवलमुक्ताहारतुल्यत्वे चित्रता नास्तीति यथा रत्नैरित्युक्तम् । अधरप्रभाभिररुणत्वं दन्तानां सहजम् । हासविभागस्थैर्यसूचितमर्थमाहुः **अनेनेति** । भगवत्स्नेहेन सर्वात्मना मायाद्यपगमः प्रमाणबलम् । तत्स्थैर्यकृत्या तु तन्निराकरणं भवति । एवं सति स्नेहमायाकार्ययोः सहभावकरणेन भगवत्स्नेहवतोऽपि जगतो व्रजीयजीवरूपस्य प्रपञ्चे विषयरूपे तथात्वं तथेत्यर्थः । इदमप्येकं चित्रम् । एतादृशस्य सूचितस्यार्थस्योक्तौ **हन्तीति** खेदोक्तिबीजम्, भगवति रागवतामन्यत्रापि रागदर्शने भक्तानां खेदोत्तेरावश्यकत्वात् । अन्यथा तु स्नेहेन सर्वत्यागे तैः सह लोके लीला न स्यादिति तथा कृतिरिति भावः । लोके नैवं हासः सम्भवतीत्यत्राप्यसम्भावना मा भवत्विति प्रमाणमुक्त **श्रुतार्थापत्ति**रित्यादिना । अग्रिमपदेऽप्येवमेव ज्ञेयम् । अचिरस्थायित्वधर्मसाम्येन विद्युत्पदेन धनं लक्ष्यते । यद्वा । हारवद्भगवदुरस्येव हासस्थित्या विभागस्थैर्यसूचिता या प्रपञ्चविषयिण्यासक्तिस्तामपि स्वविषयिणीमेव करोति । एवं सति प्रपञ्चे प्रपञ्चविषयको यो मोहस्तस्य स्वविषयकत्वेन जनकत्वं स्थिरीकृतं स्वस्मिन्निति टीकार्थः सम्पद्यते । स्वमात्रविषयकासक्तिजनकत्व लोकेऽत्यप्रसिद्धमिति चित्रतात्र । एवमेवाग्रेपि ज्ञेयम् । अस्मिन्पक्षे हन्तेति हर्षे । अत्र न कस्यापि बलं प्रभवतीति ज्ञापनाय सम्बोधनम् । विशेषणयोर्मुख्यार्थोऽतिगोप्य इति **पितृचरणैर्न** लिखितः । अत एव स्वामिनीभिरपि गूढार्थज्ञानार्थं सावधानतया श्रोतव्यमित्याशयेनेदं **शृणुतेत्युक्तम्** । अस्माभिरप्यत एव न लिख्यते । तदनुग्रहवतां स्वत एव तत्स्फूर्तेः, अन्येषां तज्ज्ञानस्यानुचितत्वात् । भगवन्मात्रस्नेहवतोऽन्यधर्मनिवृत्तिः स्वाभाविकीति प्रमाणबलनिरासः ॥ ४ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

'यत्र अनधिकारिणां पशूनामपि मोहो भवति तत्राधिकारिणीनां देवस्त्रीणां मोहे किमाश्चर्यम् ?' इत्याशयेनापरा आहुः— हे अबलाः ! इदमस्माभिः कथ्यमानं हन्त चित्रं अतिचित्रं शृणुतेति । हारहासः हारवद्विशदो हासो यस्य सः । यद्वा वेणुवादनार्थमधोवदनेन हसतो हारेषु स्फुरन् हासो यस्य सः, उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः, अयं नन्दसूनुः कृष्णो यर्हि आर्तजनानां तद्विरहपीडितानामस्मदादीनां नर्मदः सन् सुखयितु कूजितो वादितो वेणुर्यस्य तथाभूतो भवति ॥ ४ ॥ तदा व्रजे गोष्ठे ये वृषा मृगा गावश्च ते आराद् दूरादेव वेणुवाद्येन वेणुनादश्रवणेन हृतानि चेतांसि येषां ते वृन्दशः समुदिताः सर्वे एव दन्तैर्दष्टा एव नतु चर्विताः कवलास्तृणग्रासा यैस्ते धृताः श्रवणोन्मुखीकृताः उत्तम्भिताः कर्णा यैस्ते निद्रिताः सञ्जातनिद्रा इव लिखितचित्रमिवासन् तस्थुः ॥ ५ ॥

अन्वितार्थप्रकाशिका

अथ वनान्तिकं गत्वा गोगोपालमेलनाय गोपीनिवर्तनाय वेणौ वादिते व्रजवनस्थाः पशवोऽपि मुमुहुरित्याहुः—हन्तेति ॥ हे अबलाः ! इदमस्माभिः कथ्यमानं हन्त चित्रम् अतिचित्रं शृणुतेति हारहासः हार इव विशदो वक्षसि शोभमानो हासो यस्य । यद्वा । अधोवदनेन हसतः हारेषु स्फुरन् हासो यस्य । यद्वा । हाराणां हासः विशदा स्फूर्त्तिर्यत्र तस्मिन्नुरसि इति उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः अयं नन्दसूनुः कृष्णो यर्हि आर्तजनानां तद्विरहपीडितानामस्मदादीनां नर्मदः सन् सुखयितुं कूजितो वादितो वेणुर्यस्य तथाभूतो भवति ॥ ४ ॥ तदा व्रजे गोष्ठे ये वृषाः वने मृगा गावश्च ते आराद् दूरादेव वेणुवाद्येन वेणुनादश्रवणेन हृतानि चेतांसि येषां ते वृन्दशः समुदिताः । सर्व एव दन्तैर्दष्टा एव नतु चर्विता कवलास्तृणग्रासा यैस्ते धृताः श्रवणोन्मुखीकृताः उत्तम्भिताः कर्णा यैस्ते निद्रिताः सञ्जातनिद्रा इव लिखितचित्रम् इव च आसन् तस्थुः । देववनितानां विदग्धानां का वार्त्ता अविदुषां तिरश्चामपि मोह इतीदमतिचित्रं पश्यतेति ॥ ५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

युग्मं ॥१॥ गोप्यो द्वितीयं युग्ममाहुः हन्तेति । हे अबलाः इदं चित्रमन्यदाश्चर्यं यूयं शृणुत हारहासः वंशीनिनादनादधोमुखेन हसतो हरेर्हारेषु रत्नमालासु स्फुरन् हासो यस्य । यद्वा हारोमुक्ताहारस्तद्वत्शुद्धो हासो यस्य यद्वा हारतुल्यः सरत्नहृदये राजमानो हासो यस्य । यद्वा हारो मनोहरो हासो यस्य । यद्वा हाराणां हास इव विशुद्धा कान्तिर्यस्मिंस्तस्मिन् उरसि स्थिराविद्युदिव श्रीर्यस्य । यद्वा स्थिराविशेषेण द्युतः कांतयो यस्य सः नर्मदः सुखदः अयं नंदसूनुः यर्हि कूजितवेणुः वादितवेणुः वर्त्तते ॥ ४ ॥ तदा वेणुवाद्येन वेणुनैव वाद्येन वादित्रेण । यद्वा वेणोर्वाद्येन वादनेनेत्यर्थः । हृतानि चेतांसि तेषां आरात् दूरात् दंतैर्दष्टाग्रस्ताः कवलास्तृणग्रासा यैस्ते धृताः वेणुशब्दे आरोपिताः कर्णा यैस्ते वृंदशः व्रजे ये वृषाः मृगाश्च गावश्च ते निद्रितानिद्रां प्राप्ता इव लिखितं चित्रमिव निश्चेष्टाः आसन् पशूनामिदमति चित्रमिति भावः ॥ ५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हन्तेति ॥ हे अबलाः, इदं चित्रं शृणुत । हन्तेत्याश्चर्यमेतत् । हारवद्वितततो हासो यस्य सः, यद्वा हारेषु स्फुरद्धासो यस्य सः, यद्वा । हारवद्विशदो हासो यस्य सः, यद्वा । हारवद्वक्षसि शोभमानो हासो यस्य सः, यद्वा हारो मनोहरो हासो यस्य सः, उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य तथाभूतः, अलुक् समासः । यद्वा । हाराणां हास इव विशदा स्फूर्त्तिर्यस्मिंस्तस्मिन् हारहासे, उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः, आर्त्तजनानां तद्विश्लेषजदुःखपीडितानामस्मादृशां जनानां, नर्मदः नितरां दुःखकारकः, अयं नन्दसूनुः यर्हि यदा, कूजितो वादितो वेणुर्वंशी येन तथाभूतो भवति ॥ ४ ॥ वृन्दश इति ॥ तदा, व्रजवृषाः व्रजे ये वृषाः, मृगगावः मृगा गावश्चेत्यर्थः । वृन्दशः ओघीभूताः, वेणुवाद्येन हृतानि चेतांसि येषां ते, आराद् दूरादेव, दन्तैर्दष्टा एव न तु चर्विताः कवलास्तृणग्रासा यैस्ते, धृता उत्तम्भिताः कर्णा यैस्ते, निद्रिताः संजातनिद्राः इव लिखितचित्रमिव वृषादयश्चित्रचित्रिता इव च, आसंरतस्थुः । अविदुषां तिरश्चामपि इदमानन्दपारवश्यजनकं वेणुगीतमतो विचित्रमिति भावः ॥ ५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

हन्त चित्रमिति : १०.३५.४.

वेणुध्वनितस्तनितो मुहुः स्फुरद्धार-हाससित-विद्युत् । कोऽयमकाले कृष्णः प्राप्तो घन इति सुविस्मिता आसन् ॥ १५ ॥

वृन्दश इति : १०.३५.५.

पशवोऽपि वेणुनादं शृण्वन्तस्तत्यजुस्तदा भोज्यम् । वयमिह मनुजा अपि सखि गोकुलभिरता इदं न किं चित्रम् ॥ १६ ॥
अनवद्यं श्रुतिवेद्यं हृद्यं सन्नादमन्तरोल्लसितम् । अवधार्य युक्तमासीन्निष्क्रियवृत्तिस्थितिस्तदा तेषाम् ॥ १७ ॥

कृष्णप्रिया

हे व्रज सुन्दरियाँ सुनो री यह आश्चर्य का कहनी है जिन मुकुन्द का हास्य हो उज्ज्वल हास्य गज मौक्तिक का हार है वक्षःस्थल में सर्वत्र चला लेकिन यहां अचला बन गई है वैसी विद्युचला लक्ष्मी जी विराजमान है वैसे श्री नन्दराजकुमारजी अतिजनों को आनन्द देने के लिए श्री वेणुजी का मधुर कुंजन गान कर रहे हैं, तब वेणु सुधा माधुरी के पान से बैलों के वृन्द, मृगों के वृन्द और गोवृन्द के चित्त चित्तचोर ने चुरा लिए है जरा उनकी सुख समाधि का दर्शन कहिए उनके दाँतो से चर्वित घास के कौल ज्यों की तहाँ रह गए है, उनके कान सवेज बन गए है–ऊँचे खड़े होके रसपान कर रहे हैं हमको यह लगता है कि ये सब चित्र में चित्रित होंगे या तो समाधि में निमग्न होंगे ॥ ४–५ ॥

बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडम्बः　।
कर्हिचित् सबल आलि स गोपैर्गाः समाह्वयति यत्र मुकुन्दः॥ ६ ॥
तर्हि भग्नगतयः सरितो वै तत्पदाम्बुजरजोऽनिलनीतम् ।
[1]स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः [2]स्तिमितापः॥ ७ ॥

कर्दमक्षमा

अन्वयः—हे आलि कर्हिचित्, बर्हिणः, स्तबकधातुपलाशैः, बद्धमल्लपरिबर्हविडम्बः, सबलः, मुकुन्दः, सगोपैः, यत्र गाः, समाह्वयति, तर्हि, वयम्, इव, अबहुपुण्याः, सरितः, अनिलनीतम्, तत् पदाम्बुजरजः, स्पृहयतीः, वै भग्नगतयः, प्रेमवेपितभुजः स्तिमित्तापः (भवन्ति) ।। ६–७ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च अचेतनासु सरित्सु तदतीव चित्रमित्याहुः। हे आलि सखि बर्हिणस्य मयूरस्य स्तबका मयूरपिच्छा धातवो गौरिकादयश्च पलाशानि पल्लवाश्च तैर्बद्धश्चासौ मल्लानां परिबर्हः परिकरस्तं विडंबयत्यनुकरोतीति तथा स मुकुंदो गोपैः सह। वेणुनेत्युपरितनमत्रापि ज्ञातव्यम्। यत्र यदा गाः सम्यगाह्वयति ।। ६ ।। तर्हि तदा। तद्ध्वनिश्रवणात् अनिलेनानीतं तस्य पदांबुजरजः स्पृहयन्त्य इव भग्नगतयः सरितो वै निश्चितं वयमिव ता अप्यबहुपुण्या यतो न प्राप्नुवंति। केवलं प्रेम्णा वेपिताः कंपिता भुजास्तरंगा यासां ताः। स्तिमिता निश्चला आपो यासां ताः। गोप्योऽपि लोचनयोः स्तिमितजला भवन्तीति ।। ७ ।।

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

(२) ।। इतोऽप्यधिकमाहुः–किञ्चेति। तत् वेणुनादाकर्णनम्। उपरितनं श्लोकेऽत्रापठितमप्यष्टमश्लोके पठितम्। अत्रापि षष्ठश्लोकेऽपि। सबलो बलदेवसहितः ।। (६) ।। यतः अबहुपुण्यत्वात्। सरति चलन्तीति सरित इति सरिच्छब्दार्थहानिः स्तिमिताप इत्यनेनोक्ताऽत्र ।। वृषमृगादीनां चेतनानां का वार्ता अचेतनानामपि वेणुश्रवणहेतुकं स्तंभं शृणुतेत्यन्या आहुः–बर्हिणस्य मयूरस्य स्तबकाः पिच्छानि। यद्वा–बर्हिणशब्देनैव बर्हिणपिच्छानि लक्षितानि च, स्तबकाः पुष्पगुच्छाश्च। धातवो गैरिकादयश्च, पलाशानि पल्लवाश्च, तैर्बद्धो यो मल्लानां परिबर्हः परिकरस्तं विडम्बयत्यनुकरोति स्वभावत उपहसति वा सः। बलदेवसहितः स मुकुन्दो गोपैर्युक्तः गाः हिही कालिंदि गंगे सरस्वतीति तासां नामभिर्यत्र यदाह्वयति ।। तर्हि सरितो यमुनामानसगंगासरस्वत्याद्याः सरितोऽन्याश्च व्रजस्था अचेतना अपि चेतनां प्राप्य हन्तहन्ताहो अस्माकं भाग्यं यतस्स्नानावगाहनाद्यर्थमस्मानाह्वयति तदिदं स्वतीक्ष्णप्रवाहेण तटं भित्त्वा याम इति कृष्णपार्श्वं यियासवोऽपि भग्नगतयोऽत्यानन्दजाड्येन स्वाभाविकगतेरपि स्तंभाद्विगतप्रवाहा एव भवन्तीति शेषः। श्लेषेण कृष्णांगसंगसुखप्राप्त्यभावादन्यनदीकृतोपहासाच्च ऐहिकी गतिर्भग्ना, पातिव्रत्यलोपाल्लौकिकी च गतिर्नष्टा। अहो तासामभाग्यमिति भावः। किंचिद्भाग्यं चाहुः–तस्य पदाम्बुजरजः अनिलनीतमनुकूलवातानीतं स्पृहयन्त्यः प्राप्यापि तृप्त्यभावादेव पुनःपुनरिच्छन्तीत्यर्थः। अतो वयमिव कृष्णसंगाद्यप्राप्तिप्राप्तिभ्यामबहुपुण्या नाप्यपुण्या, अल्पपुण्या, इत्यर्थः। प्रेम्णा वेपिता भुजास्तरंगा यासां ताः। अस्माकमपि भुजाः प्रेम्णा कम्पन्ते स्तिमिता जाड्येन कठिनीभूयापि पुनरार्द्रीभूता आपो यासां ताः। वयमपि नेत्रयोस्तिमितजला जलैस्तिमिता भवामः। आहिताग्न्यादिः। समासांताभाव आर्षः। एवं वयमपि पतिभ्रात्रादिभिः कृष्णाभिसारवारणाद्भग्नगतयः लोकोपहासात्पातिव्रत्यलोपाच्चैहिकपारलौकिकगतिरहिताश्च तदंगसौरभ्यस्पृहावत्यश्च ।। ६–७ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततो वनान्तःप्रविष्टस्य मल्लवेशोचितवन्यभूषणैर्भूषितस्य गवादिजलपानाद्यपेक्षया विदूरनदीकसरोवरमयदेशगतस्य गोसमाह्वानार्थवेणुवाद्यविशेषान्नदीनामपि भावविशेषोदयेन मोहं सम्भावयन्ति। बर्हिण इति। स वेणुवाद्यविशारदो मुकुन्दः कर्हिचिद्गवां प्रथमं पानसमये यत्र यदा सम्यक् प्रीतिपूर्वकं तत्तद्विचित्रनामभिराह्वयति अप्रधान एव सहार्थे तृतीया विधानात्। श्रीकृष्णनादपोषणार्थ एव श्रीबलादीनां नादो बोध्यते तेन च सरितां श्रीकृष्णनिष्ठ एव भावोद्बोधो व्यज्यते। संहत्य नादश्च तासां सर्वासामेव दूरगत्वात् अत एव गा इति बहुत्वं ततो दूरश्रवणात् सरित इति च वक्ष्यते। आलि ! हे सखीति सरितां तादृशभावो विश्वासार्थम्। यद्वा सख्येनैव स्वसादृश्यं कथ्यत इति भावः। अन्यत्तैः। अथवा बर्हिणशब्देन कथञ्चिद्बर्हमेवोच्यते। स्तबकाः पुष्पगुच्छाः पलाशाः कोमलपत्राणि। यदा हे गङ्गे हे यमुने हे सरस्वतीति गङ्गादिनाम्नीर्गाः समाह्वयतीति मधुरतमस्वकण्ठेनैवाह्वयतीति विशेषो ज्ञेयः। तदा सरितो माथुर्यो मानसगङ्गायमुनासरस्वत्याद्याः प्रकारान्तरेप्राप्त्ययोग्यता मननेनानिलमात्रप्रापितं रज

---

[1] आमृशत् पयसि वा बहुपुण्याः–विज.। [2] स्तिमितापाः–प्रा. पा. ; हृतवेगाः–विज.।

एकमपि स्पृहयन्त्यो लक्ष्यन्ते "स्पृहेरीप्सित" इति सम्प्रदानत्वेऽपि रजसः कर्मत्वं "कर्त्तुरीप्सिततमं कर्मे"ति स्मरणादीप्सिततमत्वविवक्षया। यतस्तत्स्पृहाहेतोः स्तब्धप्रवाहतया भग्नगतयो लक्ष्यन्ते। सरित इत्यन्वर्थतया सततप्रवाहवत्योऽपीत्यर्थः। भग्नगतय इति श्लेषेण निजपतिसमुद्रानुसरणभङ्गेन लोकद्वयोपेक्षोक्ता। अतस्तादृश्योऽतस्तदप्राप्त्या वयमिवाबहुपुण्या अप्रचुरशुभादृष्टा एव लक्ष्यन्ते अस्माकमिव तासामिव तासामपि श्रीकृष्णक्रीडाश्रयसजातीयविजातीयगणभेदासंख्यत्वेन विरलावसरत्वादिति भावः। किन्तु केवलं प्रथमतः प्रेम्णा तद्रजः प्राप्तीच्छया वेपिता भुजाः प्रसारितकरा इव तरङ्गा यासां तादृश्यो लक्ष्यन्ते। पश्चात् स्तिमितापो निस्तरङ्गतया स्तब्धसमस्तचेष्टाश्च लक्ष्यन्ते इत्यर्थः। अन्यत्तैः। तत्र गोपीनां लोचनयोः स्तिमितजलत्वं सदा सार्द्रत्वात्। यद्वा सरित्स्वपामङ्गत्वात् स्वपक्षे स्तिमिताङ्गा इत्यर्थः। तदेतावानुत्प्रेक्षाक्रमः। वस्तुक्रमस्तु प्रमथं तादृशशब्दस्पर्शस्ततः प्रवाहस्तम्भस्ततस्तरङ्गमावशेषचलनत्वं ततस्तद्राहित्यमपीति। किञ्चोत्प्रेक्षाक्रम एवं ज्ञेयः। प्रथमं तच्छ्रवणं ततो गतिभङ्गः ततस्तद्वादकालिङ्गनेच्छया भुजकम्पः ततस्तदप्राप्तिदुःखेन स्तम्भः ततस्तादृशरजोमात्रस्पृहेति। तदेवं तथा तथाभूता अपि तन्मात्रं स्पृहयन्त्य एव लक्ष्यन्ते नतु प्राप्तवत्यः अनिलानुकूल्यात् सुलभत्वात्। यतो वयमिवाबहुपुण्या इत्यन्वयो ज्ञेयः। तदेवमचेतनानामप्येवं वार्त्ता को वा नामास्माकं दोष इति भावः ॥ ६–७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततो वनान्तः प्रविष्टस्य तस्य वन्यभूषणैर्भूषितस्य गवादिप्रथमजलपानाद्यपेक्षया नदीनामन्तिकं गतस्य नटवरतुल्यमल्लवेशेन तत्र च गोसमाह्वानार्थं वेणुवाद्यविशेषेण तासामपि भावविशेषोदयेन मोहमाहुः—बर्हिणेति युगलेन। कर्हिचित् कदाचिदिति सदा श्रीबलभद्रेण गोपैश्च सह गवामनाह्वानात्, किन्तु तेषां श्रवण सुखार्थं स्वयमेव तदाह्वानात्, यद्वा, अस्य-पूर्वेणान्वयः, मल्लवेशस्य कादाचित्कत्वात्, ततश्च तत्तत्सहितस्यापि गोसमाह्वानेन सरितां भावोदयात्तदेकनिष्ठताराहित्येन तत्तत्समाद्धाष्टर्येन च ताः प्रत्युपहास इव ज्ञेयः। यद्वा, सबलोऽपि गोपैः सहापि, किमुत एकाकी स्वेयमित्यर्थः। तत्तत्साहित्येन तदाह्वानस्य संकीर्णतया माधुर्य्यविशेषास्फूर्त्यापीति भावः। यद्वा, तेन भक्तवत्सल्य विशेषप्रकटनान्माधुर्य्यभरोदयोऽभिप्रेतः, स मुरलीवदनो वेणुवाद्यविशारदः सम्यक् तत्तद्विचित्रनामभिर्बहुधा प्रीत्या आह्वयति। मुखे कुन्दान्येव कुन्दतुल्या वा दन्ता यस्येति मुकुन्दः, इति वेणुना समाह्वाने दन्तरुचिविकासेन परमसौन्दर्य्यं ध्वनितम्। आलि हे सखीति सरितां तादृशभावे विश्वासार्थम्। यद्वा, साख्येनैव स्वसादृश्यतस्तं कथ्यत इति भावः। यद्वा, प्रेमार्त्ता श्रीराधादेवीं प्रति प्रेमार्त्तिवार्त्ताप्रतिपादनार्थं श्रीललितादीनां विशेषतः सम्बोधनमिदम्, सरितः सदाप्रवाहवत्योऽपीत्यर्थः। यद्वा, यदा हे गंगे! हे यमुने! हे सरस्वतीति गंगादिनाम्नीर्गाः समाह्वयति, तदा सरितः मानसंगा—यमुना–सरस्वत्याद्याश्च माथुरनद्यः, भग्नगतय इति श्लेषेण निजपतिसमुद्रानुसरणभगेन लोकद्वयोपेक्षोक्ता। रजोलाभयोग्यतामाहुः—अनिलेन नीतं प्रापितं रज एकमपि स्पृहन्त्यः, दूरादास्य मात्रमिच्छन्त इत्यर्थः। रज इति स्पृहेश्चतुर्थ्यामपि द्वितीया, रजस ईप्सिततमत्वविवक्षया, वयमिवात्रहुपुण्या इति बहुशस्तत्प्राप्तावप्यतृप्तेः, तथा निजभावानुसारेण तासामपि स्वसादृश्यमननाच्च। यद्यपि प्रेम्णैव भग्नगतित्वादिकं सर्वम्, तथापि प्रेम्णा वेपितभुजा इति वेपनस्य विशेषविवक्षया। अन्यत्तैर्व्याख्यातम्। यद्वा, बर्हिणो मयूरा विद्यन्ते स्वामितया येषां तानि वर्हिणानि मयूरपिच्छानि, अर्श आदित्वादच्, स्तवकाः पुष्पगुच्छाः, पलाशानि पत्राणि, वै उत्प्रेक्षायाम्। स्पृहयन्त इव, इति नदीनां तस्मिन् भावविशेषो ध्वनितः। तत्र च निलेन दूतरूपेण नीतमिति, तथा भग्नगतय इति जाड्यं सञ्चारिभावः। प्रेमेत्यादिविशेषणाभ्याञ्च कम्पस्तम्भौ शृंगारानुभावावित्यूह्यम्। यद्वा, भग्नगतय इति स्तम्भः, प्रेमेति कम्पः, स्तिमितेति चेष्टादिराहित्यलक्षणो मोहः, अथवा प्रेम स्पृहयन्त्योऽपि। कथम्भूतम्? तत्पदाम्बुजरजसोऽनिलेन नीतं दूरात् किञ्चित्तत्सम्बन्धि-प्रसादगन्धप्रापितमपीत्यर्थः। अन्यत् समानम्। एवं प्रेमस्पृहयाप्यचेतनजल–प्रवाहमयीषु नदीषु तादृशभावोदयात् पूर्वतो विशेषोऽत्र द्रष्टव्यः। यद्यपि तादृशीनां तासां तादृशभावकारणं तद्रूपदर्शनवेणुनादश्रवणादिकं न सम्भवेत्, तथापि तद्रूपादि-प्रभावेणैव सर्व्वमुपद्यतैवेति दिक् ॥ ६–७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

बर्हिणशब्देव पिच्छो लक्ष्यते कर्हि कदाचित् यत्र देशे यस्मिन् देशे इत्यर्थः। तर्हि तदा स्पृहयतीः स्पृहयन्त्यः प्रेमवेपितभुजाः प्रेमचळिततरङ्गाः ॥ ६–९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतोऽप्यतिचित्रं शृणुतेति काश्चिदाहुः। बर्हिण इति। हे आलि! सखि बर्हिणः मयूरस्य स्तवको बर्हः। यद्वा बर्हिणशब्देन तत्पिच्छो लक्ष्यते सच स्तवका गुच्छा धातवो गैरिकादयश्च पलाशानि पल्लवाश्च तैर्बद्धश्चासौ मल्लानां परिबर्हः परिकरश्च तं विडम्बयत्यनुकरोतीति तथा स मुकुन्दो बलरामेण सहितः कर्हिचिद्यदा यत्र देशे गोपैः गाः समाह्वयत्यस्य वेणुगीतेनेत्यादिः वेणुगीतेन गोपान् गाश्च समामह्वयति ॥ ६ ॥ तर्हि तदाऽचेतनाः सरितोऽप्यनिलेन नीत प्रापितं तस्य पदाम्बुजरजः स्पृहयतीः स्पृहयम्त्य

इव भग्ना गतिर्यासां तथाभूताः वै निश्चितं भुग्नगतय इति पाठे कुटिलगतयः तथापि ता वयमिवाबहुपुण्या यतो न प्राप्नुवन्ति केवलं प्रेम्णा वेपिताः कम्पिताः भुजास्तरङ्गा यासां स्तिमिता आपो यासां तथाभूताश्च गोप्योऽपि लोचनयोः स्तिमितजला भवन्तीति वयमिवेति दृष्टान्ताभिप्रायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हे आलि ! सखि कर्हिचित्दकाचित्। यत्र यदा यस्मिन् देशे स्थित्वा गाः समाह्वयति ॥ ६ ॥ तर्हि तदा तस्मिन् देशे स्थिताः सरितस्तीरे पयसि वाऽनिलनीतं तत्पदाम्बुजरजः आमृशन् अस्पृशन्वै इत्यन्वयः। कथं भूतः बर्हिणस्य मयूरस्य स्तबकैः पिच्छबन्धविशेषैः धातुभिर्गिरिसंभवैः मनःशिलादिभिः पलाशैः पल्लवः बद्धस्य मल्लपरिबर्हस्य मल्लपुरुषशिरःपरिकरस्य विडम्बोऽनुकारो यस्य स तथा 'मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुगित्यमरः। किञ्च बहूनि अनेकानि पुण्यानि यासां तास्तथा विपुलानेकयोर्बहुरिति यादवः। प्रेम्णा कामोन्नतस्नेहेन वेपिताः कम्पिताः भुजास्तरङ्गलक्षणा यासां तास्तथा। अतएव हतवेगाः मन्दीकृतस्यन्दनलक्षणजवाः। अतएव भग्नगतयः स्तिमितप्रवाहाः आसन्नित्यनुषङ्गः, अनेन सरन्तीति सरित इति सरिच्छब्दार्थो लुप्त इति दर्शितम् ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ततो वनान्तःप्रविष्टस्य तस्य वन्यभूषणैर्भूषितस्य गवादिप्रथमजलपानाद्यपेक्षया विदूरनदीकसरोवरमयदेशगस्य गोसमाह्वानार्थं वेणुवाद्यविशेषात् नदीनामपि भावविशेषोदयेन मोहं सम्भावयन्ति। बर्हिणेति युग्मकेन। अप्रधान एव सहार्थे तृतीया विधानात्। श्रीकृष्णनादपोषणार्थ एव श्रीबलादीनां नादो बुद्ध्यते। तेन च सरितां श्रीकृष्णनिष्ठ एव भावोद्बोधो ज्ञाप्यः तदा सरितः प्रकारान्तरप्राप्त्ययोग्यतामननेनानिलमात्रप्रापितं रज एकमपि स्पृहयन्त्यो लक्ष्यन्ते। यतस्तत्स्वप्रवाहतया भग्नगतयो लक्ष्यन्ते। ततस्तादृश्योऽपि तदप्राप्त्या वयमिवाबहुपुण्या अप्रचुरशुभादृष्टा एव लक्ष्यन्ते। अस्माकमिव तासामपि श्रीकृष्णक्रीडाश्रयसजातीयबिजातीयगणभेदासङ्ख्यत्वेन विरलाबसरादिति भावः, किन्तु केवलं प्रथमतः तद्रजः प्राप्तीच्छया वेपिता भुजाः प्रसारितकरा इव तरङ्गा यासां तादृश्यो लक्ष्यन्ते। पश्चात्स्तिमितापो निस्तरङ्गतया स्तब्धचेष्टाश्च लक्ष्यन्त इत्यर्थः। तदेवमुत्प्रेक्षा क्रमः। वस्तुक्रमस्तु प्रथमं तादृशशब्दस्पर्शस्तत्प्रवाहस्तम्भस्ततरङ्गमात्रावशेषचलनत्वं ततस्तद्राहित्यमपीति ॥ ६–७ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथान्या ऊचुः—हे सखि वृषादीनां तावत् सङ्गीतश्रवणेन सुखं जायते। तथा च—शिशुर्वेत्ति पशुर्वेत्ति वेत्तिगीतरसं फणी। हरिर्वेत्ति हरो वेत्ति नारदो वेत्ति नापरः ॥' इति दिशा इदं त्वतिचित्रम् यत् परितोऽपि भग्नगतयः स्युरित्याहुः—बर्हिण इत्यादि द्वाभ्याम्। आलीत्येकवचनं केवलनर्मसखीत्वसूचनार्थम्,—रहस्यकथायास्तथात्वात्। रहस्यं त्विदम्—सर्वा एव तस्य वेणुध्वनिमहिमानमेव प्रथयन्ति, न तु केवलस्वरसौभाग्यम्। मुरलीनादतोऽपि तस्य स्वरसौभाग्यमतिमधुरमिति यच्छ्रुत्वा अचेतना अपि सरितो वयमिव तत्पादाम्बुजरजः स्पृहयन्त्यः स्तिमितापो भवन्तीत्यर्थः। गाः समाह्वयतीति गवामाह्वानस्वरस्यैवं महिमा अस्तु तावत्तद्गानस्य। अनिलनीतमित्यनुकूलेन मरुता तत्पदरजः पुरः पुरो नीयते तेन पार्श्वस्थितत्वात्ताभिर्न लभ्यते, केवलं स्पृहाविषयमेव तद्भवति यथास्माकं तेन वयमिवाबहुपुण्याः। इति दैन्यम् ॥ ६–७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तेषां वृषादीनाञ्च यत् किञ्चित् ज्ञानमस्ति तेन तथाभाव एषां नातिचित्रः। इदं त्वतिचित्रमित्यन्या आहुः—बर्हिण इत्यादि द्वाभ्याम्। हे आलीत्येकवचनं केवलनर्मसखी-परत्वसूचकम्,—रहस्य-कथायास्तथास्वभावात्। रहस्यकथा चेयम्—सर्वा एव तस्य वेणुध्वनिमहिमानमेव वर्णयन्ति न तु तस्य केवलस्वर–सौभाग्यस्य। हे आलि ! त्वामेव कथयामि, न कुत्रापि प्रकाशनीयम्। मुरलीनादस्य माधुर्यं तत्स्वरसौभाग्यत एवेति जानीयाः। यस्य गवामाह्वानध्वनिमात्रेणैव नद्योऽपि भग्नवेगा भवन्तीत्याहुः–गाः समाह्वयति। यत्र मुकुन्दः, यत्र यदा गाः समाह्वयति, अस्तु तावत् यदा गायतीति। सरितो भग्नगतयो भवन्ति, अनिल-नीतमपि तत्पादरजः स्पृहयन्ति अबहुपुण्या इव वयमिव। अयमर्थः—वनगमनेऽनुकूलेनानिलेन तत्पदरजो नास्माकमभिमुखमानीयते। तस्य पुरतः पुरत एव तद्याति। अतस्ता अपि वयमिव न लभन्ते, पार्श्वस्थितत्वात्। अतो भग्नगतयो भवन्ति, गतिः प्रवाहः, वयन्तु कुलमर्यादामद्यापि न भञ्जयाम इत्यहो धिगस्मानिति ग्लानि-दैन्ययोः साङ्कर्यम् ॥ ६–७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वृषमृगादीनां चेतनानां का वार्ता अचेतनानामपि वेणुश्रवणहेतुकं स्तम्भं शृणुतेत्यन्या आहुः। बर्हिणस्य इति चिन्त्यम्। मयूरस्य स्तवकाः पिच्छानि यद्वा बर्हिणशब्देनैव बर्हिणः पिच्छानि लक्षितानि च स्तबकाः पुष्पगुच्छाश्च धातवोगैरिकादयश्च पलाशानि पल्लवाश्च तैर्बद्धो यो मल्लानां परिबर्हः परिकरस्तं विडम्बयति अनुकरोति स्वशोभया उपहसतीति वा सः बलदेवसहितः स

मुकन्दः गोपैर्युक्तः गा हिही कालिन्दि गङ्गे सरस्वतीति तासां नामभिर्यत्र यदा आह्वयति तर्हि सरितो यमुना मानसगङ्गा सरस्वत्याद्याः सरितोऽन्याश्च व्रजस्था अचेतना अपि चेतनां प्राप्य हन्त हन्ताहो अस्माकं भाग्यं यतः स्नानावगाहनाद्यर्थमस्मान् आह्वयति तदितः स्वतीक्ष्णप्रवाहेण तटं भित्वा याम इति कृष्णपार्श्वं यियासवोऽपि भग्नगतयः अत्यानन्दजाडयेन स्वाभाविकगतेरपि स्तम्भात् विगतप्रवाहा एव भवन्तीति शेषः। श्लेषेण कृष्णाङ्गसङ्गसुखप्राप्त्यभावादनन्यनदीकृतोपहासाच्च ऐहिकी गतिर्भग्ना पातिव्रत्यलोपात् पारलौकिकी च गतिर्नष्टा अहो तासामभाग्यमिति भावः किंचिद्भाग्यं चाहुः। तस्य पदाम्बुजः अनिलनीतम् अनुकूलपवनेनानीतं स्पृहयन्त्यः प्राख्यापि तृप्त्यभावादेव पुनः पुनरिच्छन्तीत्यर्थः। अतो वयमिव कृष्णसंगाद्यप्राप्तिभ्याम् अबहुपुण्याः नाप्यपुण्या अल्पपुण्या इत्यर्थः। प्रेम्णा वेपिता भुजास्तरङ्गा यासां ता अस्माकमपि भुजाः प्रेम्णा कम्पन्ते स्तिमिताः जाडयेन कठिनीभूयापि पुनरार्द्रीभूता आपो यासां ताः वयमपि नेत्रयोः स्तिमितजला जलैस्तिमिता भवामः। अहिताग्न्यादिः समासान्ताभाव आर्षः। एवं वयमपि पतिमात्रादिभिः कृष्णाभिसारवारणात् भग्नगतयः लोकोपहासात् पातिव्रत्यलोपाच्च ऐहिकपारलौकिकगतिरहिताश्च तदङ्गसौरभ्यस्पृहावत्यश्च ॥ ६-७ ॥

गूढार्थदीपिनी

हे आलि सखि ! यत्र यदा गोपैः सह मुकुन्दः गाः समाह्वयन्ति। कथंभूतः। बर्हिणस्तवका मयूरपिच्छाः तदादिभिः बद्धो यो मल्लानां परिकरो वेषभूषा तं विडम्बयति अनुकरोति उपहसतीति वा ॥ ६ ॥ तदा सरितः पदाम्बुजरजः वयमिव स्पृहयन्त्यः स्तिमितापः स्थिरजला भवामः न च तल्लभामहे यतो अबहुपुण्याः। भुजाः तरङ्गाः। अत्र स्पृहेरीप्सित इति रजसः सम्प्रदानत्वेऽपि ईप्सिततमत्वविवक्षया कर्मत्वम् ॥ ७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्याः अतोऽतीव चित्रं शृणुतेत्याशयेनाहुः बर्हिण इति। हे आलि ! बर्हिणो मयूरस्य स्तबकैर्बर्हः इति समासान्निःसार्यः योऽयम् धातुभिर्गैरिकादिभिः पलाशैः बद्धश्चासौ मल्लानां परिबर्हः परिकरः तं विडम्बयति अनुकरोतीति तथा सः सबलः बलेन रामेण सहितः गोपैश्च सहितः सः अस्माकं प्रियो मुकुन्दः कर्हिचित्कस्मिंश्चित्समये यत्र देशे गाः समावह्वयति वेणुगीतेनेति शेषः। तर्हि तदा सरितः यमुनाद्याः तत्पदाम्बुजरजोऽनिलनीतं वायुना तासां तटेषु आनीतं वै निश्चितं स्पृहयतीः स्पृहयन्त्यः प्रेम्णा वेपिताः भुजास्तरङ्गा यासां ताः स्तिमिता निश्चला आपो यासां तास्तथाभूता भग्नगतया भवन्ति अतः वयमिव आ सर्वतो बहुपुण्याः॥६-७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भ्रान्तस्वान्तत्वात्कान्तानामनेकत्वेऽप्यालीत्येकवचनमिति मन्तव्यं। हे आलि सखि बर्हिणो मयूरस्य स्तवकैः पिच्छगुच्छैर्धातुभिर्गौरिकादिभिः पलाशैः पल्लवैर्बद्धो यो मल्लपरिबर्हो मल्लभूषाविशेषस्तं विडम्बयत्यनुकरोति स तथा। बर्हिणस्तबकैरिति समस्तं वा। मयूरो बर्हिणो बर्हीत्यमरः। कर्हिचित्कदाचित्सबलो गोपैः सहितः स यत्र मुकुन्दो वेणुना गाः समाह्वयति तर्हि तदा भग्ना गतिर्यासां ताः सरित एतद्ध्वनिदन्धनीकृतस्पन्दना वयमिव ता अप्यबहुपुण्या महासुकृतहीनाः प्रेमवेपितभुजाः प्रेमविशेषकम्पिततरङ्गा अनिलनीतं वायुना नीतं तत्पदयोरम्बुजयो रजः परागं स्पृहयतीः काङ्क्षन्त्यः स्तिमिता आपो यासां ताः स्तिमितापा आसन्। वैशब्दोऽचेतनानां नदीनां यदेयं दशाऽस्माकं केति तद्भावसूचकः। स्तिमिताप इति पाठे समासान्तविधेरनित्यतपा स्पृहयतोर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापा आमृशन्पयसि वां बहुपुण्याः प्रेमवेपितभुजाहृतवेगा इति वा पाठः। पयसि स्वोदकेऽनिलनीतं तत्पदाम्बुजरज आमृशन्नस्पृशन्नतो बहुपुण्याहृतवेगाः प्रेमवेपितभुजा भग्नगतयो मन्दस्पन्दना आसन्नित्यर्थः।६-७।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

वेणुनादेन नदीनामतिजडानामपि स्पृहा जायत इति वक्तुं पुनर्वेणुनादं वर्णयन्ति। बर्हिण इति। आवेशो देववेशश्च पूर्वं निरूपितौ लीलावेशोऽधुना निरूप्यते निरन्तरक्रिया हि नदीनाञ्चेतनानान्तु निद्रामूर्च्छादौ क्रियानिवृत्तिरपि दृष्टा नदीनान्तु न कदापि निवर्त्तत इति। तत्रापि महतीनां बन्धोऽपि न तासां भवति सापि वेणुनादेन निवृत्ता बर्हिणो मयूरस्य स्तवकाः पुष्पगुच्छानि धातवो गैरिकादयः पत्राणि च धातूनां वा पत्राकारेण लेखाः कमलपत्रस्यापि आकारार्थं बध्यन्त इति तैः कृत्वा मल्लानां परिबर्हः अलङ्करणं वेश इति यावत् स्वयं स्तवकादिभिः बद्धो योऽयं मल्लपरिबर्हस्तं विडम्बयति विडम्बो वाबद्धः अस्वाभाविकं विडम्बनमेव भवति नटमल्लवत् अनेनायं नादो नृत्योपयोग्येन निरूपितः तेन क्रियाशक्तिरुद्गता नादस्था निरूपिता नदीनामाकर्षे हेतुर्भवति कर्हिचिदिति यदोत्साहः क्रियाशक्तौ, अतएव सबलः बलभद्रसहितः आलीति सम्बोधनं गोप्यतया अयमर्थो निरूपितः। अप्रतारणार्थं च प्रायेणैषा तदा दर्शनार्थं गतवती स्नानादिव्याजेन एवं सामग्रीं विधाय सोऽस्माकं भोक्ता वस्तुतो वा जातो वा तादृशो गोपैः सहितः अनेनात्र वैकुण्ठस्थितलीला सूचिता। अत्रापि लक्ष्मीः अस्माभिः सहिता रात्रौ गोपैः सहिता दिवसे तिष्ठतीति। अत एव सम्बोधन रहस्यसूचकम् तदा गाः समाह्वयति वेणुनादेनैव प्रकरणितत्वात् वेणुनाह्वयति इत्यग्रे वक्ष्यति वेणुतुल्यतया निरूपणार्थं वा वेणोरग्रहणं गवामाह्वाने हेतु मुकुन्द इति मोक्षो हि ताभ्यो देय इति स्वतस्तासां साधनाभावादाकार्यं प्रयच्छति

स्वरसं वा तत्र स्थापयितुमुद्गता क्रियाशक्तिर्महदेव कर्म करोतीति गवमाकारणमुक्तम् ॥ ६ ॥ तत्र योगार्थं ज्ञात्वा नद्योऽपि नित्यं गच्छन्तीति ताः स्थगिता जाता इत्याह । तर्हीति । तत् क्षणमेव भग्नगतयो जाताः नहि भगवदाज्ञा केनाप्युल्लङ्घ्या भवति । सरित इति प्रवाहैकस्वभावत्वं निरूपितं तासां वैष्णवत्वकामना तासां हि समुद्रोऽधिपतिः यथा भगवान् भूयात् तदर्थं तत्पदाम्बुजरजः स्पृहयतीर्जाताः स्पृहयन्त्यः रजसः सम्बन्धार्थमुपायमाह । अनिलनीतमिति । अनिलेन वायुना स्वार्थं नीतं तेन सहप्रत्यासत्तिः जलार्थी सः भगवदीया एव भगवत्सम्बन्धं प्राप्नुवन्तीति रजःकामना दूराभिप्राया काम एवात्रोद्देश्यः देवतात्वान्नदीनाम् । अत एवाग्रे कालिन्दी तथा भविष्यति इदानीं तथाभावे भाग्यं नास्तीत्याहुः । अहुबहुपुण्या इति । न वहुपुण्यं यासां यथा शीघ्रमेव गोरूपत्वं गोपालरूपत्वं दिवसे रात्रौ स्त्रीरूपत्वमिति पुण्यैर्विना समीहितार्थसिध्यभावात् कथं ज्ञायते तासामेवं भाव इति तत्राह । वयमिवेति । यथा वयम् अबहुपुण्याः अन्यथा दिवसे गावो गोपा वा भवेम । अतः स्वदृष्टान्तेन ज्ञायते स्पृहामेव कुर्वन्ति नतु तासां कार्यं सिध्यतीति किञ्च तासां सात्त्विकभावादपि हृद्गतो भावो लक्ष्यत इत्याहुः । प्रेमवेपितभुजा इति । प्रेम्णैव भुजानां वेपनं नतु वायुवशात्, अतो विरहसन्तापयुक्ताश्च लक्ष्यन्ते किञ्च स्तम्भोऽपि जात इत्याहुः । स्तिमिताप इति । स्तिमितः स्तब्धाः आपो यासाम् । एवं रजोभेदास्त्रिविधा निरूपिताः ॥ ७ ॥

श्रीसुबोधिनी–सारः

बर्हिणो मयूरस्य स्तबकाः पिच्छाः धातवो गैरिकादयः पलाशानि पल्लवास्तैर्बद्धो मल्लानां परिबर्हः परिकरस्तं विडम्बयत्यनुकरोतीति सबलः सरामः स मुकुन्दो यर्हिकर्हिचित्समये गाः समाह्वयति हे आलि गोपैः सह ॥ ६ ॥ तर्हि अनिलेन वायुना नीतं तस्य पदाम्बुजरजः स्पृहयन्त्यो वयमिवाऽबहु लघु पुण्यं यासां प्रेम्णा वेपिताः कंपिता भुजास्तरंगा यासां स्तिमिता निश्चला आपो जलानि यासां ताः सरितो नद्यो भग्नगतयो भवन्ति वै एव ॥ ७ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

कर्हिचित् सबल आलीत्यत्र, गोप्यतयायमर्थ इति । एतेन कर्हिचिदेव सबलः, कर्हिचिदेव गोपैः सहित इत्यपि सम्बन्धो ज्ञाप्यते । तेन सदैकान्ते भोक्तैवेति स इत्यनेनोच्यते । **मुकुन्द** इत्यत्र, दर्शनसुखमात्रं मोक्षः, स्वरूपरसज्ञानं स्वरसंस्थापनमिति ज्ञेयम् ॥ ६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अपरास्तु 'आस्तां चेतनानां वार्ता, अचेतनासु सत्सु मोह इत्यतिचित्रम्' इत्याहुः—बर्हिण इति । आलि हे सखि ! बर्हिणो मयूरस्तबकाः पिच्छगुच्छाः धातवो गैरिकादयश्च पलाशानि पल्लवाश्च तैर्बद्धश्चासौ मल्लानां परिबर्हः परिकरश्च त विडम्बयति अनुकरोति तथा सः बलेन सहितो गापैश्च सह वर्तमानो मुकुन्दः कर्हिचित् यदाकदाचित् यत्र देशे वेणुना गाः समाह्वयति ॥ ६ ॥ तदा तर्हि सरितोऽपि अनिलेन नीतं तस्य पदाम्बुजरजः स्पृहयतीः स्पृहयन्त्यो भवन्ति । वै निश्चयम् । तत्र चिह्नमाहुः—भग्ना गतिर्यासां ताः । एतदेव स्पष्टयन्ति—स्तिमिताप इति । स्तिमिता निश्चला आपो यासां ताः, प्रेम्णा वेपिताः कम्पिताः भुजाः भुजस्थानीयास्तरङ्गा यासां ताः, स्पृहयन्त्येव केवलं न तत्प्राप्नुवन्ति । तत्र हेतुमाहुः—अवहुपुण्या इति । तत्प्राप्तौ पुण्याधिक्यमपेक्षितं तदभावात् । तत्र दृष्टान्तमाहुः—वयमिवेति । वयं यथा पुण्यप्रचयाभावात् तत्पदाम्बुजरजः स्पृहयन्त्यो भग्नगतयः प्रेमकम्पितभुजा नेत्रयोः स्तिमितजलाश्च भवामो न तल्लभामहे तथेत्यर्थः ॥ ७ ॥

अन्वितार्थप्रकाशिका

ततो वनं प्रविष्टे जलपानार्थं गवाह्वानाय वेणौ वादिते वृत्तमाह—बर्हिणेति ॥ हे आलि ! हे सखि ! बर्हिणो मयूरस्तस्य स्तबकाः पिच्छगुच्छाः । यद्वा । बर्हिणशब्देन लक्षणया बर्हिपिच्छानि स्तबकाः पुष्पगुच्छाः धातवो गैरिकादयश्च पलाशानि पल्लवाश्च तैर्बद्धश्चासौ मल्लानां परिबर्हः परिकरश्च तं बिडम्बयति अनुकरोति तथा सबलः बलेन सहिता गोपैश्च सह वर्तमानो मुकुन्दः कर्हिचित् यदा कदाचित् यत्र देशे वेणुना गाः समाह्वयति कालिन्दि गङ्गे इत्यादिगोनामभिराकारयति ॥ ६ ॥ तदा तर्हि वेणुध्वनिश्रवणात् यमुनामानसगङ्गाद्याः अचेतना अपि सरितोऽपि स्वाह्वानमिव मन्यमानाः भग्ना गतिर्यासां ताः स्तिमिता निश्चला आपो यासां ताः । समासान्ताभाव आर्षः । तदालिङ्गनलाभाय प्रेम्णा वेपिताः कम्पिताः भुजाः भुजस्थानीयास्तङ्गा यासां तास्तथाभूताः सत्यः आलिङ्गनमप्राप्य अनिलेनानीतं तस्य पदाम्बुजरजः स्पृहयतीः स्पृहयन्त्यो वयं गोप्य इव अबहुपुण्या एव यथा वयम् अबहुपुण्याः पुण्यप्रचयाभावात् तत्पदाम्बुजरजः स्पृहयन्त्यः भग्नैहिकलौकिकगतयः प्रेमकम्पिभुजा नेत्रयोः स्तिमितजलाश्च भवामो न तल्लभामहे । स्पृहयतीरित्यत्र नुमभावपूर्वसवर्णदीर्घावार्षौ । अतिशयविपक्षया संप्रदानसंज्ञायाः कर्मसंज्ञया बाधः । अत्रैवं क्रमः । आदौ नादश्रवणं ततो गतिभङ्गः ततस्तदालिङ्गनेच्छया भुजकम्पः ततो रजोमात्रस्पृहा ततस्तदप्राप्त्या निश्चेष्टत्वम् ॥ ७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

॥ यु० २ ॥ किं च अचेतनासु नदीषु वक्ष्यमाणमतीवाश्चर्यमाहुः बर्हिण इति । कर्हिचित् हे आलि सखि बर्हिणो मयूरस्य स्तबकैस्तत्पिच्छैः धातुभिर्गैरिकादिभिश्च पलाशैः पल्लवैश्च बद्धश्चासौ मल्लानां परिबार्हो भूषणसामग्री च तं विडम्बयति अनुकरोतीति तथाभूतः मल्लवेषः सदृशवेषवानित्यर्थः । बलदेवेनसहितः गोपैः सह सः मुकुन्दः वेणुनेति उत्तरयुगलदत्राकृषं गाः यत्र यदा सम्यक् आह्वयति सम्बोधयति ॥ ६ ॥ तर्हि तदा मुरलीरश्रवणात् अनिलेन वायुनानीतं प्रापितम् तस्य श्रीकृष्णस्य पदाम्बुजरजः स्पृहमतीः स्पृहयन्त्यः अतो भग्नगतयः स्थिरप्रवाहाः अतएव स्तिमितापः निश्चला आपो यासां ताः सरितो वै निश्चितं वयमिव ताः अबहुपुण्याः यत आलिंगनाय केवलप्रेम्णा वेपिताः कंपिताः भुजास्तरंगायाभिस्ताः प्रेमवेपितभुजा अपि सद्यः तं न प्राप्नुवंति । अत्रैवंक्रमः आदौ नादश्रवणं पश्चाद्गतिभंगस्तदनन्तरं स्तिमितजलत्वं अंगस्थिरत्वं वा तत आलिंगनेच्छया भुजकम्पस्ततो रजो मात्रस्पृहातदप्राप्तौ सत्यां चेष्टाराहित्यमित्युत्प्रेक्षा यद्य चेतनानामप्येवं भवेत्तंह्य स्माकं तु का कथेति भावः ॥ ७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतोऽप्यतिचित्रं शृणुतेति काश्चिदाहुः ॥ बर्हिणेति । हे आलि सखि, बर्हिणस्य मयूरस्य स्तबकाः पिच्छबन्धविशेषाश्च धातवो गिरिसम्भवा मनः शिलादयश्च पलाशानि पल्लवाश्च तैः, बर्हिणशब्दोऽत्रादन्तः 'मयूरो बर्हिणो बर्ही' इत्यमरे तथादर्शनात् । बद्धश्चासौ मल्लानां परिबर्हः परिकरस्तं विडम्बयत्यनुकरोतीति तथाभूतः । सबलो बलभद्रसहितः, सः मुकुन्दः श्रीकृष्णः, कर्हिचित् कदाचित् , यत्र यदा, गोपैः सह, गाः धेनूः, समाह्वयति, वेणुतेत्युपरितनमत्रापि ज्ञातव्यम् ॥ ६ ॥ तर्हीति ॥ तर्हि तदा, सरितोऽचेतना अपि नद्यः, अनिलनीतं वायुना प्रापितं, तत्पदाम्बुजरजः श्रीकृष्णचरणकमलसंबन्धिरेणुं, स्पृहयतीः स्पृहयन्त्यः इव, वै निश्चितमेव, भग्ना गतिर्यासां तथाभूताः सत्यः, वयं इव, अबहुपुण्याः । यतो न प्राप्नुवन्ति । केवलं प्रेम्णा वेपिताः कम्पिता भुजास्तरङ्गा यासां ताः, स्तिमिता निश्चला आपो यासां तास्तथाभूता भवन्ति । गोप्योऽपि लोचनयोः स्तिमितजला भवन्तीति वयमिवेति दृष्टान्ताभिप्रायः ॥ ७ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

बर्हिण इति : १०.३५.६.

रजोगुण तमोगुण-प्रचुर-सात्त्विकाडम्बरः समाह्वयति गा यदा सदुपयोगिगोपैर्वृतः ।
अधन्यमनुभाव्य वै सरसचेतसः स्वं जनास्तदाऽन्वभिलषन्ति तत्पदरजः प्रभोः साधु तत् ॥ १८ ॥

तर्हीति : १०.३५.७.

सद्रसाश्च सरितोऽतनुतप्तास्तत्पदाम्बुजरजोऽनिलनीतम् । कामयन्त इह तत्सखियुक्तं पङ्कजातकलिता वयमेताः ॥ १९ ॥
अजपदाब्जरजः सखि दुर्लभ यदभवत् सरितां जडताजुषाम् ।
उचितमेतदसाध्विदमीक्ष्यतां सरसभावविदामपि नोऽधुना ॥ २० ॥

कृष्णप्रिया

अयि आलि । सुनो ! और देखो ? आज तो श्री मुकुन्दजी ने मयूरपिच्छों के गुच्छ, गैरिक धातु तरुवरों के कोमल नव पल्लवों से मल्लकच्छ का शृङ्गार सजा है और श्रीबलदाऊ जी गोपगण, गोपीवृन्द और मित्रवृन्द के साथ मिलकर भिन्न-भिन्न गावृन्दों के यूथों को उनके नदी आदि के नाम संकेत से बुलाते हैं, तब अपने नामों का संकेत सुनकर गङ्गादि नदियाँ, पवन की प्रेरी हुई श्रीमुकुन्द पदाम्बुज से रज की कामना करती है । उनकी गति भी रुक गई है लेकिन वे और क्या कर सकती है ? जैसे हम सब स्वरूप सुकृत वालियाँ है और श्री मुकुन्द पद सरोज रज को प्राप्त नहीं कर सकती है वैसे वे भी रज लालसा की पूर्ति नहीं कर पाती है, मालुम हो रहा है उनका जल स्थिर बन गया है मानो की वे सिद्धासन बन कर अपनी तरङ्ग भुजा से कम्पित हाकर श्याम सुन्दर को वन्दन कर रही है कि सेवोपयोगी तनुओं का प्रदान करें ॥ ६–७ ॥

अनुचरैः समनुवर्णितवीर्य आदिपुरुष इवाचलभूतिः ।
वनचरो गिरितटेषु चरन्तीर्वेणुनाऽऽह्वयति गाः स यदा हि ॥ ८ ॥
वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्याः ।
प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः [1]ससृजुः स्म ॥ ९ ॥

---

[1] ववृषुः–प्रा. पा. ।

कर्दमक्षमा

अन्वयः—अनुचरैः, समनुवर्णितवीर्यः, आदिपुरुषः, इव, अचलभूतिः, वनचरः, स, यदा, हि, गिरितटेषु, चरन्तीः, गाः, आह्वयति, (तदा) प्रणतभारविटपाः, तरण (एवम्) वनलताः, आत्मनि, विष्णुम् , व्यञ्जयन्त्यः, इव, प्रेमहृष्टतनवः पुष्पफलाढ्याः, मधुधाराः, ससृ्जुः स्म ॥ ८-९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्थावरेष्वप्यतिचित्रं दृश्यत इत्याहुः । अनुचरैर्गोपैर्देवादिभिर्वा । मुग्धानां वाक्यमादिपुरुष इवेति । अचलभूतिर्निश्चलश्रीः । वेणुना तत्तन्नाम्ना गानेन ॥ ८ ॥ तदा प्रणता भारेण विटपाः शाखा यासां ता वनगता लताः स्वस्मिन्विष्णु प्रकाशमानं सूचयन्त्य इव मधुधारा ववृषुः । स्मेति विस्मये । तरवश्च तथा तत्पतीनामपि तथैवानन्द इति विस्मय इति भावः । एतानि विष्णुव्यक्तिलक्षणानि ॥ ९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

(३) ॥ मुग्धानां मूढानां साक्षादादिपुरुषत्वात्तस्यात्रेव शब्दप्रयोगोऽयुक्त एवेति भावः । केचित्तु अनुचरैः सनकाद्यैः । अचलभूतिः स्थिरश्रीः 'भूतिः श्रीजन्मभस्मसु' इति यादवः । वनचरो जलशायी । गिरिर्वायुस्तस्य तटर्वाद्वशदे मुखे वर्तमाना गा वेदवाणीराह्वयति । तथा च-सनकादिस्तुतजलशायी आदिपुरुषो यथा श्रुतीराह्वयति वायुमुखेन तथा कृष्णोऽपीति पक्षः सुबोध एव । तत्र चरन्तीस्तृणं भक्षन्तीः ॥ (८) ॥ तथा मधुधारा ववृषुः स्म । तत्पतीनाम् लतापतीनाम् वृक्षाणामपि । तथैव लतावत् । इति भाव इति-पत्नीनामानन्दं दृष्ट्वा स्वयमप्यानंदिता बभूवुरित्याशयः । एतानि प्रणति रोमांचानन्दाश्रुपातादीनि । "कथं विना रोमहर्षं द्रवता चेतसा विना । विनानन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः ॥" इत्याद्युक्तेः । पक्षे, तरवः संसारतरणशीलास्तीर्णसंसारा मुमुक्षवो मुक्ता वा । आत्मनि हृदये स्थितं विष्णु व्यंजयन्तो अपरोक्षीकुर्वत इव ज्ञानपुष्पेण जीवन्मुक्त्यवस्थाफलेनाढ्याः । प्रणतस्य भारो भरणं येषां ते पिटपा भुजा येषां ते, मूर्ध्नि धृतांजलिपुटा इत्यर्थः । अत एव भक्त्युद्रेकेण रोमांचितगात्राः वनेऽरण्ये रता निवृत्तिधर्ममनुतिष्ठन्तः । यद्वा-वने भासि-ग्रीष्मे पंचाग्निज्वालासेवायां, वर्षर्तौ वने कानने, हिमर्तौ वने कण्ठदघ्नजले वसन्तः । 'वनं भास्यप्सु कानने' इति यादवः । मधुधारा आनन्दम्बुसन्ततीः ससृजुः, तत्स्वभावा बभूवुरित्यर्थः । "धारास्त्यागेम्बुसन्तत्यां सैन्याग्रेऽश्वगतिष्वपि" इति यादवः । सर्गः 'स्वभावविमोक्ष-' इत्यमरः । इह वनचरशब्दसामर्थ्यान्मत्स्यकूर्मवराहादिविषयेऽप्येतौ श्लोकौ शब्दशक्तिविशारदैर्ज्ञेयौ । ग्रन्थविस्तरभियोपरम्यत इति ॥ नदीनामनादिसिद्धानामचेतनत्वेऽपि देवतारूपाणां का वार्ता, श्वःपरश्वोदृष्टजन्मनामतिनिकृष्टानामपि जडानां रसिकतां क्षेणुश्रवणहेतुकां पश्यतेत्यन्या आहुः-अनुचरैर्गोपैः । आदिपुरुषो नारायण इव निश्चलश्रीः तदपि वनचरः वन्यजीवेष्वनुरागादिति भावः ॥ तदा गृहस्थवैष्णवाः सस्त्रीकाः संकीर्तनश्रवणेन यथा भाववन्तो भूत्वा प्रणमंति तथैव वनलताः स्त्रियस्तरवस्तत्पतय आत्मनि मनसि स्फुरन्तं विष्णु व्यञ्जयंत्यो ज्ञापयन्त्य इवाश्रुतुल्या मधुनो मकरन्दस्य धाराः ससृजुर्मुमुचुः । 'ववृषुः' इति पाठेऽश्रूणामाधिक्यम् । पुष्पेण हर्षसंचारिणा फलेन रतिस्थायिना च विराजमानाः, प्रणता भारेण विटपाः शाखा यासामित्यनुभावः प्रणामः । प्रेम्णा हृष्टा रोमहर्षयुक्तास्तनवो येषां ते इति रोमाञ्चः ॥ ८-९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणो

ततो गाः पाययित्वा स्वयमपि च पीत्वा ताभिः सह सुतरुच्छायां पर्वतभूमिमवगाह्य दत्तस्वाच्छन्दास्ताश्चारयंस्तत्र तत्र निजचरितमयं सखिगीतं शृण्वन्ननवधानेन दूरगतास्ताः स्वयमेव वेणुना जुहाव । यत्र च तत्रास्तां स्वस्वाधिष्ठातृरूपेण परमदेवीनां नदीनां वार्त्ता तथा अन्येषां तत्रत्यानां जङ्गमजातीनामहो स्थावरजातानामप्येतादृशत्वमित्याहुः । अन्विति । अनुचरैः सदा सङ्गिभिर्गोपैरिति प्रणयविशेषो दर्शितः । अत एव समिति सम्यक्तया सर्वांशतः प्रेमविशेषतश्चोत्तमप्रकारेणेत्यर्थः । आन्वत्यनुक्रमेण व्यञ्जितमातापित्रादिस्नेहानुबन्धेन जन्मादिलीलाप्रबन्धेनेत्यर्थः । यद्वा । सह भावेन सर्वैर्मिलित्वा इत्यर्थः । यद्वा । तत्समीपवर्त्तित्वेन प्रत्येकस्वस्ववैदग्धीज्ञापनपूर्वकत्वेनेत्यर्थः । तादृशतया वर्णितं सकौतुकं रसभावालङ्कारगानतालाभिनयनादिप्राचुर्येण, प्रस्तुतं वीर्यं तत्तत्प्रभावमयं चरितं यस्य सः असाधारण एव चासावित्याहुः । आदीति । यद्वा । आदिपुरुषः आदिनारायणो यथा तथैवाचलश्रीरपि वनचर इत्यादिनान्वयः । तेन च परमविनोदित्वादिकमुक्तम् । दृष्टान्तश्च तादृशत्वनिश्चयार्थः । सर्वोत्तमायामपि तस्यैवादिपुरुषतायामिव शब्दप्रयोगस्तासां तादृशकेवलतन्माधुर्यमयभावविशेषस्वभावेनाननुसन्धानात् । अचलश्रीत्वनिर्देशस्तु तस्य च्युतिरहितोदित्वरासमोर्ध्वस्वाभाविक तत्तत्सम्पदनुभवात् । एतदचलभूतित्वमेवोत्तरोत्तरं दर्शयिष्यते । वनचरः वनेषु चरन्नित्यर्थः । इति गवामदृश्यता सूचिता । वस्तुतस्तु नित्यवृन्दावनविहार्येव सन्नचलविभूतिरित्यर्थः । गिरितटेषु विषमप्रदेशेषु चरन्तीरिति परिश्रान्तिः सूचिता । अत एव वेणुनादेनैव समाह्वयति स गोपचूडामणिर्विचित्रः तदाह्वानचतुर इत्यर्थः । हि एव यदैव वनेति सप्तम्या लुक् छान्दसः । तदा वने यावत्यो लतास्ताः सर्वा अपीत्यर्थः । श्लेषेण वन्यत्वात्तत्रापि लतात्वाद्वैदग्ध्यादिरहिता अपी-

त्युक्तम्। तथा वने यावन्तस्तरवस्तावन्तश्च। तत्र लिङ्गव्यत्ययेन व्यञ्जयन्त इति बोद्धव्यम्। लतानामादौ निर्देशः स्त्रीत्वेन स्वतुल्यभावप्राधान्यविवक्षया। विष्णुमिति सर्वत्र स्फुरद्रूपत्वाद्व्यापकत्वेन प्रवेशशीलत्वेन वा वर्त्तमानतया श्रीकृष्णमित्यर्थः। तमात्मनि स्फुरन्तं व्यञ्जयन्त्यो बोधयन्त्य इवेति भावपरवशचेष्टयव व्यञ्जनेन स्वयमेव दृष्टान्तगर्भश्लेषेण विष्णुं श्रीनारायणमिव तमित्यर्थः। दृष्टान्तव्यञ्जना च आदिपुरुष इवेत्युक्त स्पष्टीकरणाय। तत्र दृष्टान्तपक्षे लतातरवः स्त्रीपुरुषजातयः पुष्पफलाढ्याः। यस्यास्ति भक्तिर्भगवत्यकिञ्चनेति सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसेति च प्रमाणेन सर्वसाधनसाध्यसम्पन्नाः। तथापि प्रणतभारविटपा नेमुर्निरीक्ष्य परितृप्तदृशो मुदाङ्कैरिति चतुःसनादिवन्नम्राः मधुधारा अश्रूणि दार्ष्टान्तिकपक्षे लतातरुत्वादि मिषेण तत्तद्रूपा इत्यर्थः। तत्रांकुरोद्भेदमिषेण हृष्टतनवः। ततश्चास्पन्दनं गतिमतां पुलकस्तरूणामित्यादिभिः श्रीगोकुले प्रसिद्धमेव प्रेमव्याप्येति पक्षद्वयेऽपि सर्वत्र सम्बन्धनीयम्। समासप्रविष्टस्यापि वा प्रेमशब्दस्यार्थवशादन्यत्र सम्बन्धः। ववृषुर्निरन्तरं बहुशोऽमुञ्चन् ससृजुरिति सार्वत्रिकमूलपाठे अपूर्वत्वेन प्रवर्त्तयामासुः। यद्वा। मधुनो धारा यासु तथाभूताः सत्यः प्रेम ससृजुः। सार्वदिकेषु च लोकेषु स्ववृत्तान्तेन श्रीकृष्णप्रेमविस्तारयामासुरित्यर्थः। तदेवमुभयत्र विष्णुत्वं तद्व्यक्ति चिह्नानि च व्याख्यातानि ॥ ८–९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततो धर्मागमे निच्छायं सरित्कच्छं परित्यज्य घनवनोच्चप्रदेशं हर्षात्तृणचरणक्रमेणाग्रतो दूरमदृश्य-स्थानं गतानां गवां वेणुना समाह्वानात्। तत्रास्तां स्वस्वाधिष्ठात्रीरूपेण परम-देवीनां नदीनां वार्त्ता, तत्रत्यानां जंगमजातीनामहो लतादीनां स्थावराणामपि भावविशेषोदयमाहुः—अन्विति युगलेन। अनुचरैः सदा संगे चरद्भिर्गोपैः सम्यक् सहविहारादि–स्वविषयक-कारुण्यविशेषप्रदर्शनादिना अनुगवाह्वानानन्तरं निरन्तरं वा वर्णितानि वीर्य्याणि अद्भुतचरितानि यस्य स आदिपुरुषः श्रीनारायणो यथा तथा चलश्रीरपि, इति तस्य वनचरत्वादिना परमविनोदित्वादिकमुक्तम्। यद्वा, भूतिः सौन्दर्य्यम्, वनचरो वनेषु चरन्नित्यर्थः, इति गवामदृश्यता सूचिता, तथा गिरितटेषु विषमप्रदेशेषु चरन्तीरिति परिश्रान्तिश्च, अत एव वेणुनाह्वयति स गोपचूडामणिस्तदाह्वाननिपुणः, हि एव, वने या लतास्ताः सर्वा अपीत्यर्थः। श्लेषेण वन्यत्वाद्वैदग्ध्यादि-राहित्यमुक्तम्, तरवश्च, अत्रापि लिंगव्यत्ययेन व्यञ्जयन्त इति बोद्धव्यम्। यद्वा, हे मालति। हे मल्लिके! हे वासन्ति! हे यूथिके! इति मालत्यादिलतानाम्नीर्गा यदा आह्वयति, तदा वनलता मालत्याद्यास्तत्संसर्गेण तरवश्च मधुधाराः ससृजुः, विष्णुमिति व्यापकत्वेन प्रवेशनशीलत्वेन चात्मनि वर्त्तमानमिवेत्युत्प्रेक्षायाम्, गोप्यत्वेन तत्त्वतो व्यञ्जनायोग्यत्वात्, पुष्पैः फलैश्चाढ्याः सम्पन्ना इति बाह्यसम्पत्, विष्णुस्थितिबाह्यलक्षणम्। यद्वा, तैस्तैराढ्या अपि धनादिस्थानीयपुष्पादिसम्पत्त्या विष्णुस्थितेर्विशेषतश्च तत्तद्भावस्य योग्या अपीत्यर्थः, प्रणतभारविटपा इत्यत्र विष्णुव्यक्तिलक्षणम्, हस्तसदृशानां शाखानां पूजोपकरणद्रव्यभारेण नम्रत्वम्. किंवा प्रणामेन चूडाग्रवर्गरूपप्रवालविस्ताराणां नम्रत्वं प्रेम्णा हृष्टतनव उद्भिन्नत्वं च इत्यर्थः। यद्यपि मधुधारादिकमपि प्रेम्णैव, तथापि प्रेमहृष्टतनव इति लतादीनां स्वभावतोऽपि कदाचित्तत् सम्भवेत्, हृष्टतनुत्वञ्च परमविलक्षणप्रेम्णैव स्यादित्यभिप्रायेण ववृषुः, निरन्तरं बहुशो मुञ्चन्। 'ससृजुः' इति पाठे अपूर्वत्वेन प्रवर्त्तयामासुरित्यर्थः। अत्र च वार्य्यसमनुवर्णनेन गोपैर्निजसंगित्वादिना स्वविषयकतदीयकारुण्यभरे वर्णिते वनगिरिवर्त्तिन्यो लतादयो मात्सर्य्येण तदसहमाना एव स्वविषयकमपि तत्कारुण्यभरं दर्शयन्त्यस्तादृश्यो बभूवुरिति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, कथं समनुवर्णितवीर्य्यः? तदाहुः—आदिपुरुष इव श्रीनारायणसादृश्येनापि, कि पुनर्गोकुलोत्सवत्वादिनेत्यर्थः, आदिपुरुषः, तद्वर्णने हेतुः—अचला भूतिर्लक्ष्मीरैश्वर्य्यरूपवैभवमेव वा यस्येति, इवेति तत्त्वतः परमनिधिवदत्यन्तगोप्यत्वेन सम्यगव्यञ्जनात् लतानामादौ निर्देशः, स्त्रीत्वेनात्मन इव तासां तादृशभावे प्राधान्यविवक्षया। अन्यत् समानम्। यद्वा, माधुनो धारा यासु तथाभूताः सत्यः प्रेम ववृषुः, तदानीन्तनेषु आधुनिकेषु च लोकेषु स्ववृत्तान्तेन भगवत्प्रेम विस्तारयामासुरित्यर्थः। एतदुक्त भवति, यथा श्रीकृष्णभक्ताः पुण्यतुल्यै रूप–जाति–धनैश्वर्य्यादिभिः, फलतुल्यैश्च पुत्रादिभिर्युक्ताः, किंवा पुष्पतुल्यार्थवादबहुलवेदैस्तदध्ययन–तदुक्तकर्म्माचरणादिभिः, तथा फलैरैहिकामुष्मिक–सुखभोगैः सम्पन्ना अपि प्रणता विनयादिसद्गुणैर्नम्रतां गता विटपाः परिवारा अपि येषां तथाभूताः, श्रीविष्णुं सदान्तर्बहिरशेषकरणव्यापकतयात्मनि देदीप्यमानं भगवन्तं प्रयत्नाद्गोप्यमानमपि तद्गीतादिश्रवणेन प्रेमभरादयतः सम्बरणाशक्त्या प्रकाशयन्तः पुलकाञ्चिता आनन्दाश्रुमुञ्चन्ति। द्वितीयपक्षे—आनन्दाश्रुव्याप्ता यथा लोकेषु प्रेम विस्तारयन्ति, तद्वादिति। इवेति तथापि संगोपनाभिप्रायेण ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स्थावरेष्वप्यतिचित्रं दृश्यत इत्याहुः। अनुचरैरिति। स कृष्णो यदा हि वने चरति गिरेस्तटेषु चरन्तीर्गाः वेणुना तन्नामोपेतेन वेणुगीतनाह्वयति कथं भूतः अनुगोपैर्देवादिभिर्वा सम्यगनुवर्णितं वीर्यं यस्य तथाभूतः मुग्धानां वचनमादिपुरुष इवेति अचला भूतिर्लक्ष्मीर्यस्य सचेति इतरेषु चलापि लक्ष्मीर्न तस्मिंश्चलेति भावः। तथा तदा प्रणता भारेण विटपा यासां ताः पुष्पैः फलैश्चाढ्याः प्रेम्णा हृष्टा उदाञ्चितास्तनूरुहा यासां ता वनगता लताः स्वस्मिन्विष्णुं प्रकाशमानं सूदयन्त्य इव मधुधाराः ववृषुस्तथा तरवश्च तत्पतीनामपि तथैवानन्द इति भावः स्म विस्मये ॥ ८–९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

अनुचरैः सनकादिभिः अन्यत्र गोपैः अचलभूतिः स्थिरश्रीः भूतिः श्रीजन्मभस्मस्विति यादवः। वनचरः कक्षे सञ्चरन्। अन्यत्र वने चरणं शयनं जलशयन इत्यर्थः। यदा वेणुना ध्मातवेणुध्वनिना गिरितटेषु चरन्तीः तृणभक्षणं कुर्वतीः अन्यत्र वायोस्तटवद्विस्तृते मुखे वर्तमाना गाः पशून् अन्यत्र वेदवाणीराह्वयति सनकादिभिः स्तूयमानो जलशयानः आदिपुरुषो वायुमुखे वर्तमानश्रुतीस्तदर्थकथनपूर्वकमुपदिशति ॥ ८ ॥ तदात्मनि स्थितं विष्णुं व्यञ्जयन्त इव पुष्पफलाढ्याः। अतः एव प्रणतं प्रणमनं बिभ्रतीति प्रणतभाराः अण्प्रत्ययः विटपाः शाखा येषां तरूणां यासां लतानां वा ते तास्तथा। यद्वा पुष्पफलभारेण नता विटपा येषां ते तथा प्रेम्णा हृष्टरोमाञ्चितास्तनवो येषां यासां वा ते तास्तथा एवंविधा वनलतास्तरवश्च मधुधारा रसधाराः ससृजुः स्म स्मृत्वा सृष्टवन्त इत्यर्थः। अन्यत्र आत्मनि हृदये स्थितं विष्णुं व्यञ्जयन्तः अपरोक्षी कुर्वन्त इव ज्ञानपुष्पेण जीवन्मुक्त्यवस्थाफलेनाढ्याः प्रणतस्य भारो भरणं येषां ते प्रणतभाराः ते विटपा भुजा येषां ते तथा मूर्ध्न्यारोपिताञ्जलिपुटा इत्यर्थः। अतएव भक्त्युद्रेकेण रोमाञ्चितगात्राः वने अरण्ये रता निवृत्तिधर्ममनुतिष्ठन्तो वने भासि ग्रीष्मे पञ्चाग्निज्वालासेवायां वर्षर्तौ कानने वने जले हिमर्तौ कण्ठलग्नसलिले वसन्तः वनं भास्यप्सु कानन इति यादवः। तरवः संसारतरणशीलाः तीर्णसंसारा वा मुमुक्षवो मुच्यमाना मुक्ताश्च यथायोग्यमधिकारिणो मधुधाराः ज्ञाननैशत्वाद्यानन्दाम्बुसन्ततीः ससृजुस्तत्स्वभावा बभूवुरित्यर्थः। धाराः स्वाङ्गाम्बुसन्तत्यां सैन्याग्रे स्वर्गतिष्वपीति सर्गः स्वभावनिर्मोकनिश्चयाध्यायसृष्टिष्विति च। अत्र वनचरशब्दसाध्यान्मत्स्याद्यवतारविषयत्वेनापि ज्ञातव्यावेतौ श्लोकौ शब्दशक्तिविशारदैरिति ग्रन्थबाहुल्यभया—दुपरम्यत इति ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ततस्तरुच्छायां पर्वतभूमिमवगाह्य सखिगीतं शृण्वन् अनवधानेन दूरगा गाः स्वयमेव वेणुनाह्वयामास। तत्र तत्र स्थावरजातीनामप्येतादृशत्वमित्याहुः। अन्विति युगलेन। वने या लतास्ताः सर्वा अपीत्यर्थः। प्रेम व्याप्य विष्णुमिति सर्वत्र स्फुरद्रूपत्वात् व्यापकतया श्रीकृष्णमित्यर्थः। दृष्टान्तगर्भश्लेषेण विष्णुं श्रीनारायणमिवेत्यर्थः। दृष्टान्तव्यञ्जनया च आदिपूरुष इवेत्युक्तस्पष्टीकरणाय। तत्र दृष्टान्तपक्षे लतातरवः स्त्रीपुरुषजातयः पुष्पफलाढ्याः सर्वसाधनसम्पन्ना अपि प्रणतभारविटपाः श्रीचतुःसनादिवत् नम्रा एव बभूवुः। मधुधारा अश्रूणि ॥ ८–९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अन्यास्तत्संवादेन तमेवार्थं द्रढयन्त्य आहुरनुचरैरिति द्वाभ्याम्। स यदा केवलेन वचसा गाः समाह्वयति तदेव सरितामपि वैवश्यम्, यदा तु वेणुना गा आह्वयति तदेवमित्याशयः। वनलतास्तरवश्च प्रेमहृष्टतनवः सन्तो मधुधारा ववृषुः स्म, वर्त्तमानायामतीतनिर्देशः। स्म आश्चर्ये; मधुधारा अश्रुधारा इवेति भावः। आत्मनि चित्ते विष्णुं व्यञ्जयन्त्य इव आत्मस्थिते हि विष्णौ प्रेमहृष्टतनुत्वं सम्भवति। पुष्पं साधनम्, फलं साध्यम् तदुभयाढ्यता च भवतीति भावः। तरवो लताश्चेति पतिसाहित्येनैव तथात्वं दृश्यते। न त्वस्माकं तथेति दैन्यमेव ॥ ८–९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अन्यास्तत्संवादेन तमेवार्थं द्रढयन्त्य आहुः अनुचरैरित्यादि-द्वाभ्याम्। स यदा केवलेन वचसा गाः समाह्वयति, तदैवं जातम्, यदा तु वेणुना गाः समाह्वयति, तदैवं किं तत्? वनलतास्तरवश्च प्रेमहृष्टतनवः सन्तो मधुधारा ववृषुः स्म। वर्त्तमानायामतीतकालः। स्म आश्चर्ये, मधुधारा अश्रुधारा इव लताश्च तरवश्चेति पतिसहिता एव जातविकारा बभूवुः, नैताः पतयोऽभ्यसूयन्ति, वयन्तु न तथेत्यहो नो दौर्भाग्यमिति दैन्य-विषादौ ॥ ८–९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नदीनामनादिसद्धानामचेतनत्वेऽपि देवतारूपाणां का वार्ता श्वः परश्वो दृष्टजन्मनामतिनिकृष्टानामपि जडानां रसिकतां वेणुश्रवणहेतुकां पश्यतेत्यन्या आहुः। अनुचरैर्गोपैः आदिपुरुषो नारायण इव निश्चल श्रीः। यदपि वनचरः वन्यजीवेष्वनुरागादिति भावः। तदा गृहस्थवैष्णवाः सस्त्रीका यथा सङ्कीर्त्तनश्रवणेन भाववन्तो भूत्वा प्रणमन्ति तथैव वनलताः स्त्रियः तरवस्तत्पतयः। आत्मनि मनसि विष्णुं स्फुरन्तं व्यञ्जयन्त्यः ज्ञापयन्त्य इव अश्रुतुल्या मधुनो मकरन्दस्य धाराः ससृजुर्मुमुचुः। ववृषुरिति पाठे अश्रूणामाधिक्यम्। पुष्पफलाढ्याः पुष्पेण हर्षसञ्चारिणा फलेन रतिस्थायिना च विराजमानाः। प्रणता भारेण विटपाः शाखा यासामित्यनुभावः प्रणामः प्रेम्ना हृष्टा रोमहर्षयुक्तास्तनवो येषां ते इति रोमाञ्चः ॥ ८–९ ॥

गूढार्थदीपिनी

गिरितटेषु चरन्तीः गाः यदा स आह्वयति तदा वनलतादयः आनन्दोद्रेकेण पुष्पफलादिभिः आत्मनि भगवद्व्यक्तिं सूचयन्त्य इव मधुधारामिषेण अश्रुधारा मुमुचुः। स्म विस्मये। भूतिः लक्ष्मीः। भारेण प्रणता इति प्रणतभारा शाखा यासां ताः लताः 'राजदन्तादिषु परम्' इति नियमात् ॥ ८–९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इतो ऽप्यतिचित्रं शृणुतेति काश्चिदाहुः। अनुचरैरिति। अनुचरैरनुयायिभिः सम्यगनुवर्णितं वीर्य्यं यस्य सः "कृष्णं विदुः परकान्त नतु ब्रह्मतया मुने" इत्यनेन राज्ञोक्तानां श्रीकृष्णे मुग्धानां वाक्यमादिपुरुष इव अचलभूतिरचलश्रीः इति। यद्वा इन्दुरिन्दुरिव श्रीमानित्यादिवदनन्वयालङ्कारः। सः श्रीकृष्णः यदा गाः वेणुना तद्गीतेन तत्तन्नाम्ना आह्वयति तदा प्रणता भारेण विटपा यासां ताः पुष्पैः फलैश्च आढ्याः प्रेम्णा हृष्टास्तनवो ऽङ्गानि यासां ताः वनगताः लताः स्वस्मिन् विष्णुं प्रकाशमानं व्यजयन्त्यः सूचयन्त्यः इव मधुधाराः ससृजुः ववृषुः स्मेति विस्मये तथा तरवस्तत्पतयोऽपि अहो तासां तेषां च भाग्यम् ॥ ८-९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अनुचरैर्गीतैर्ब्रह्मादिभिश्च सम्यगनुवर्णितानि वीर्याणि यस्य स अचला स्थिरा विभूतिर्लक्ष्मीः सम्पद्वा यस्य स वनचरो जलं विजनं च तत्र चरतीति स तथा। आदिपूरुष इव श्रीनारायण इव गिरितटेषु पर्वतप्रदेशेषु गिरिर्वायुर्मातूक्ताप्राक् स एव तटाः। जातौ बहुवचनं। तट इयदामनादित्यधिकारिपाररूपस्तस्मिंश्चरतोर्विद्यमाना अन्यत्र तृणादनं कुर्वतीर्गा वेदवाणीरन्यत्र सुरभीराह्वयति स्वप्रतिपादकत्वेन स्वीकरोति परत्राकारयति यदा। अनुचरैः सुग्रीवादिभिरचलभूतिश्चित्रकूटसम्पत्प्रद आदिपूरुष आदिनो रावणाद्यास्तेषां पुरि लङ्कायां पुरेऽलंकायै रुषा रोषो यस्य सः। हलन्तत्वाट्टाबन्ता। पुरे रुषा यस्य स आदिनां पुरुष इति न ऋक्पूरब्ध्वति समासान्ताकारप्रत्ययप्रसक्तिः। वनचरो यः कपिसङ्घो गिरितटेषु तं विद्यमानमाह्वयति तथेति वा। अचलभूतिः पर्वतगतविभूतिरूप इति वा कृष्णः ॥ ८ ॥ तदा वनलतास्तरवश्चात्मनि स्वान्तस्थितं व्यञ्जयन्तो व्यक्तीकुर्वन्त इव पुष्पफलैराढ्याः प्रणतं। क्तो भावे प्रणतिं बिभ्रतीति ते विटपाः शाखा येषां ते प्रेमहृष्टतनवो भक्ता आनन्दोदबिन्दूनिव मधुधारा रसप्रसरान्ससृजुः स्मेत्याश्चर्ये ॥ ९ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सत्त्वभेदान् निरूपयितुं भगवन्तमपि तथा वर्णयन्ति। अनुचरैरिति त्रिभिः। लता विहङ्गमा मेघाः सात्त्विकाः, एते वेणुनादेन भक्तिपूर्णा जाताः। तत्र प्रथमं वृन्दावनस्था लतास्तरवश्च वैष्णवाः वेणुनादेन उद्गतप्रेमरसा जाता इति तदर्थं प्रकारान्तरेण वेणुनादमाह। तदर्थं प्रकारान्तरेण भगवानपि वर्णनीयः सच भक्त्यनुसारेण लोकवेदानुसारेण च वर्णनीयः तत्र भक्त्यनुसारेण प्रथममाह। अनुचरैः सेवकैर्गोपैः सम्यक् अनुवर्णितानि वीर्याणि यस्य आदिपुरुष इव पुरुषोत्तम इव अनुचरैर्वेदैः सम्यक् सर्वोत्तमत्वेन वर्णितानि जगत्कर्तृत्वादीनि वीर्याणि यस्य लोकानुसारेण माहात्म्यमाह सर्वोत्कृष्टम्। आदिपुरुष इवाचलभूतिरिति। अचला विभूतिर्लक्ष्मीर्यस्य अनुचरैः सर्वैरेव देवादिभिस्तथोक्तः लौकिकः स्वव्यवहार्यत्वात् पुरुषोत्तमतुल्यतामेवाहुः। अतो दृष्टान्तभावः भिन्नतया वर्णनायां हेतुमाह। बनचर इति। वृन्दावनचरः सात्त्विकभावापन्नः सत्त्वभूमौ प्रतिष्ठित इति गिरितटेषु गिरिप्रान्तेषु चरन्तीः विषमस्थानात् समदेशे पशुहिते स्वयं तत्रत्यो भूत्वा समाह्वयति लौकिकत्वाभावाय वेणुनैवाह्वयति वेणुद्वारा तत्र प्रविष्ट इति अग्रिमचरित्रेण ज्ञायते अन्यथा वृक्षाणां तथात्वं न स्यात्। स इति येषु वनप्रदेशेषु रेमे। यदैव आह्वयन् तदैव मधुधाराः समृजुः स्मेति सम्बन्धः युक्तश्चायमर्थः अन्यथा वेणुनादाभिज्ञता तत्र च स्वनामसङ्केतो न स्यात्। अतस्तद् द्वारा भगवान् प्रविष्ट इत्यग्रेऽपि तथात्वं युक्तमेव ॥ ८ ॥ वनस्था लताः अस्मन्निकटे भगवांश्चरति स्वकीयांश्चाकारयतीति ज्ञात्वा तेषां भोगसिध्यर्थं स्वस्मिन् विद्यमानमानन्दं प्रकटितवत्यः तथा तरवश्च यथा स्त्रियः पुरुषाश्च भगवदीयाः भगवति भगवदीयेषु च समागतेषु आनन्दयुक्ता भवन्ति भोगार्थं स्वकीयञ्च प्रयच्छन्ति तद्वदेतेऽपि। नन्वयं धर्मो जङ्गमानां न स्थावराणामिति चेत्तत्राह। आत्मनि विष्णुं व्यञ्जयन्त्य इति चेतनेष्वेव भगवतः क्रियाज्ञानशक्त्योराविर्भावः सच्चिदानन्दरूपता च क्रमेणाविर्भवति एतत् सर्वं भगवति निविष्टे भवति सोऽपि निविष्टश्चेत् प्रकटीभवति तदैवं युज्यत इति ते वृक्षादयः पञ्चधर्मयुक्ताः आत्मनि विष्णुं व्यञ्जयन्त्य इव जाताः। तत्र प्रथमं क्रियाशक्त्याविर्भावमाह। पुष्पफलाढ्या इति। यत्र हि भगवान् निविशते तत्रावान्तरफलं परमफलञ्च भवति अतः कार्यात् व्यञ्जयन्त्य इव जाताः पुष्पाण्यवान्तरफलरूपाणि परमफलानि तु फलानि तैः सर्वैराढ्या जाताः भगवदर्थं सदाधिक्यमाहुः। प्रणतभारविटपा इति। भारेणापि नमनं सम्भवतीति तन्निरासायादौ प्रणतत्वमुक्तं प्रकर्षेण नताः भारेण विटपाः शाखा येषाम्। प्रेमहृष्टतनव इति चिदुत्कर्षो ज्ञानरूपो निरूपितः भक्ता एव हि प्रेम्णा हृष्टरोमाञ्चा भवन्ति। पूर्वमहरितानामपि तदा हरितत्वं पूर्वस्मात् स्थौल्यं प्रत्यवयवमुच्छूनत्वं प्रभाविशेषश्चात्र प्रेमहृष्टतनुत्वम् अपरञ्च वेणुनादनिष्ठसुधास्वादवत्यः स्वामिन्य इति तद्धर्मं परिचिन्वन्ति ता एवेति तदुक्तावन्यविचाराक्षमत्वं युक्ततरमिति नाधिकं लेखनीयम् क्रममधुधाराः स्वस्मिन् विद्यमानमानन्दं भगवदर्थं बहिः प्रकटितवन्तः एतत्सर्वपरिज्ञानमेव ज्ञानशक्तिः ॥ ९ ॥

श्रीसुबोधिनी-सारः

अनुचरैर्गोपैः समनुवर्णितं वीर्यं यस्य स आदिपुरुषः श्रीविष्णुरिवाचला निश्चला भूतिः श्रीर्यस्य स कृष्णो वनचरो गिरितटेषु चरन्तीर्गा यदा वेणुनाह्वयति ॥८॥ तदा वनलता आत्मनि स्वस्मिन् विष्णुं सूचयन्त्य इव पुष्पैः फलैराढ्या युक्ता भवन्ति प्रणता नम्रीभूता भारेण विटपाः शाखा येषां ते तरवो वृक्षाः प्रेम्णा हृष्टा तनवो देहा येषां ते मधुधारा ववृषुः स्मेति विस्मये ॥ ९ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

वनचर इत्यत्र, **सात्विकभावापन्न** इति । वृन्दावनस्य रसोद्दीपकत्वेन स्तम्भादिसात्त्विकभावहेतुत्वात्तद्युक्त इत्यर्थः । आदिपुरुषस्य तद्रहितत्वेन श्रवणात्तस्माद् भेदेन वर्णनमुचितमिति भावः । **वनलतास्तरव** इत्यत्र, **पञ्चधर्मयुक्ता** इति । 'पश्यतैतान्महाभागा'नित्यादिनोक्ताश्चत्वारो भगवदीयत्वं चैकमिति तथा ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'स्थावरेष्वप्यतिचित्रं दृश्यते' इत्याहुः-अनुचरैरिति । आदिपूरुषः पुरुशोत्तम इवानुचरैर्गोपैः सम्यगनुवर्णितं वीर्यं यस्य सः, अचला भूतिः लक्ष्मीर्यस्य सः वनचरः सन् स कृष्णो गिरितटेषु चरन्तीर्गा यदा हि वेणुना तत्तन्नामोपेतेन वेणुगीतेनाह्वयति ॥ ८ ॥ तदात्मनि पूर्णानन्दं व्यञ्जयन्त्य इव पुष्पैः फलैश्चाढ्याः युक्ताः, अत एव प्रणता भारेण विटपाः शाखा यासां ताः, प्रेम्णा हृष्टा रोमाञ्चिता इव तनवो यासां ताः वनलताः तरवश्च तथाभूताः मधुधारा ववृषुरित्यन्वयः । 'स्म' इति विस्मयं सूचयन्ति ॥ ९ ॥

अन्वितार्थप्रकाशिका

अथ जलं पीत्वा तृणं चरन्तीषु गोषु दूरगतासु तदाह्वानाय वेणौ वादिते वृत्तमाह-अनुचरैरिति ॥ आदिपूरुषः पुरुषोत्तम इवानुचरैर्गोपैः देवादिभिश्च सम्यगनुवर्णित वीर्यं यस्य सः अचला भूतिः सम्पत् लक्ष्मीश्च यस्य सः वनचरः सन् स कृष्णो गिरितटेषु चरन्तीर्गा यदा हि वेणुना तत्तन्नामोपेतेन वेणुगीतेनाह्वयति ॥ ८ ॥ तदा सस्त्रीका मुनय इवात्मनि स्वस्मिन् विष्णुं पूर्णानन्दं व्यञ्जयन्त्य इव पुष्पैः फलैश्चाढ्याः युक्ताः अत एव भारेण प्रणताः प्रणतभाराः । राजदन्तादिः । तादृशाः विटपाः शाखा यासां ताः प्रेम्णा हृष्टा रोमाञ्चिता इव तनवो यासां ताः वनलताः तरवश्च तथाभूताः तत्पतीनामपि तथैवानन्द इति भावः । अश्रुधारा इव मधुधाराः ससृजुः ववृषुः स्म । मुमुचुरित्यपि पाठः । एतानि विष्णुभक्तिलक्षणानि ॥ ९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यु० ३ ॥ तर्वादिष्वप्पति चित्रमस्तीत्याहुः अनुचरैरिति । अनुचरैर्गोपैः अमरैर्नंदसुनंदनादिभिर्वासमनुवर्णितपराक्रमः अचलाभूतिः लक्ष्म्याद्यसंख्याशक्तियस्य आदिपुरुषः सर्वेषामादिः स्वयमनादिः पुरुषः पूर्वसिद्धः पूर्ववाहमिहासामति तत् पुरुषस्य पुरुषत्वमिति बृहदारण्यात् वनचरो गोप इव अज्ञजनैः दृश्यमानः स श्रीकृष्णः वेणुनागिरितटेषु तृणानि चरन्तिः गाः यदा आह्वयति ॥ ८ ॥ तदा प्रणतभारविटपाः भारेण प्रणतानम्रीभूताः प्रणतभाराः राजदन्तादित्वात् भारशब्दस्य परनिपातः तादृशा विटपाः शाखाः यासां ता येषां ते च वने लताः राजदन्तादित्वात् तरवश्च पुरःस्थितं विष्णुं कृष्णं आत्मनि अंतःकरणे ज्ञातं व्यंजयन्त्यः अयं भगवानिति जनान् सूचयन्त्य इव प्रेम्णाहृष्टतनवः प्रफुल्लत्वचः अतएव पुष्पफलैः आढ्या युक्ताः संतः मधुधाराः कर्माणि ववृषुः ससृजुः स्म विस्मये ॥ ९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्थावरेष्वप्यतिचित्रं दृश्यत इत्याहुः ॥ अनुचरैरिति ॥ अनुचरैर्गोपैः देवादिभिर्वा, सम्यगनुवर्णितं वीर्यं यस्य सः आदिपूरुषः इव, अचला भूतिर्यस्य सः, निश्चलश्रीरित्यर्थः । इदं मुग्धानां वचनम् । इतरेषु चलापि श्रीर्न तस्मिंश्चलेति भावः । एवंभूतः, स श्रीकृष्णः, वनचरः सन् , गिरितटेषु गोवर्द्धनशिखरेषु, चरन्तीः गाः धेनूः, वेणुना तत्तन्नामोपेतेन वेणुगीतेन, यदा हि यस्मिन् समय एव, आह्वयति ॥ ८ ॥ वनलता इति ॥ तदा प्रणताः भारेण विटपा यासां ताः येषां ते, पुष्पाणि च फलानि च तैराढ्याः संपन्नाः, प्रेम्णा स्नेहेन हृष्टा रोमाञ्चितास्तनवो यासां ता येषां ते, एवंविधाः वनलताः वनगता वीरुधः, तरवश्च आत्मनि स्वस्मिन् , विष्णुं श्रीकृष्णं, व्यञ्जयन्त्यः इव प्रकाशमानं सूचयन्त्यः व्यञ्जयन्तश्चेवेत्यर्थः । मधुधाराः ससृजुः ववृषुः । स्मेति विस्मये । वनलतानां स्त्रीणां यथैवानन्दाविर्भावस्तथैव तरूणां तत्पतीनामप्यानन्दोदयः समान इति भावः । एतानि विष्णुभक्तिलक्षणानि बोध्यानि ।९।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अनुचरैरिति : १०.३५.८.

यदा भवचरो भवत्यखिललोकसद्वर्तनो गिरिभ्रमजुषः समाह्वयति गास्तदा स प्रभुः ।
महासुकृतशालिनस्त इह तत्तङ्कैर्हितं विबुध्य विभुमर्चयन्त्यलघुभक्तिभारेण ये ॥ २१ ॥

वनलता इति : १०.३५.९.

धन्यास्ते तरवो लता अपि वनोद्भूताः सखि प्रेमतः सम्प्राप्तं निजपत्रपुष्पफलतः सन्तोषयन्त्यच्युतम् ।
भूत्वाऽस्मिन् सुलताश्रिता अपि वयं भूयो वनश्रीजुषः पात्रं नाच्युततोषपोषकविधेर्जाताः स्म इत्यद्भुतम् ॥ २२ ॥

कृष्णप्रिया

देखो सखि ? श्रीश्यामसुन्दर जी में अनुरक्त यह अनुचरवृन्द, प्यारे का अलौकिक वीर्य का आमतौर से और प्यार से वर्णन कर रहा है, स्वयं श्री कृष्णचन्द्र जी तो आदिपुरुष श्री नारायण जी के समान अविचल लक्ष्मी जी वाले है वे भी अपने यशो गान को सुनकर छके नहीं है, वन में विचर रहे हैं और पर्वतों की तरहटी में चरती हुई और लताओं के नाम संकेत वाली गायों को वंसी ध्वनि से उनके नाम लेकर बुलाते हैं तब सब नाम साम्य से वनलता और तरुपर के अन्त स्तल में श्री विष्णु जी विराजमान हो गए हैं ऐसा अनुभव को अभिव्यक्ति करने के लिए सोर वृक्ष एवं लता अपने को फलों एवं फूलों से समृद्ध कर देते हैं। देखिए इनकी शाखाएँ फल फूलों की मार से नम गई है इन सबको रोमोद्गम हो गया है और लता तरुवरों में से मकरन्द की धाराएँ बह रही है ॥ ८–९ ॥

दर्शनीयतिलको[1] वनमालादिव्यगन्धतुलसीमधुमत्तैः ।
अलिकुलैरलघुगीतमभीष्टमाद्रियन् [2]यर्हि [3]कूजितवेणुः ॥ १० ॥
सरसि सारसहंसविहङ्गाश्चारुगीतहृतचेतस एत्य ।
हरिमुपासत ते [4]यतचित्ता हन्त मीलितदृशो धृतमौनाः ॥ ११ ॥

कर्दमक्षमा

अन्वयः—दर्शनीयतिलकः, (श्रीकृष्णः) वनमालादिव्यगन्धतुलसीमधुमत्तैः, अलिकुलैः, (कृतम्) अभीष्टम्, अलघु, गीतम्, आद्रियन्, यर्हि, कूजितवेणुः, (भवति) हन्त ?, (तदा), चारुगीतहृतचेतसः, सरसि, सारसहंसविहङ्गाः, एत्य, यतचित्ताः, ललितदृशः, धृतमौनाः, हरिम्, उपासते ॥ १०–११ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च सरसि कमलवनेषु विहरतां पक्षिणामपि मन आकर्षणं तद्गीतं किं पुनरन्येषामित्याहुः। दर्शनीयतिलक इति। दर्शनीयस्तिलको यस्य। दर्शनीयानां सुन्दराणां मध्ये मुख्य इति वा। वनमालासु या दिव्यगन्धा तुलसी तस्या मधुना मत्तैरलिकुलैरलघु उच्चैरभष्टिमनुकूलं गीतमाद्रियन्नादरेण गृह्णन् यर्ह्यधरे संधितवेणुर्भवति ॥ १० ॥ तर्हि ये सरसि सारसा हंसा अन्ये च विहंगास्ते चारुणा गीतेन हृतचेतस एत्य तत आगत्य हरिमुपासताभजन्। तत्समीपे उपविविशुर्वा। हन्तेति विषादे ॥ ११ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

(४) अन्यदद्भुतमाहुः–किं चेति। तद्गीतम् कृष्णवेणुगीतम्। तिलको भल्लाकृतिपुंड्रविशेषः। तदुक्तम्–"नासाग्रात्केशपर्यन्तमूर्ध्वपुण्ड्रमुदाहृतम्। अधो भल्लाकृतियुतं कृष्णधार्यमतिस्फुटम् ॥" इति वैष्णवशास्त्रे। दर्शनीयतिलकास्त्वन्येऽपि सन्तीत्यरुच्याह–दर्शनीतानामिति। "तिलको द्रुमभेदाश्वरोगेषु तिलकालवो। सौवर्चले प्रधाने च विवरणे च विशेरणे च विशेषके ॥" इति हलधरः ॥ (१०) ॥ अन्ये च चक्रवाकप्लवकारण्डवादयः। हृतचेतस आकृष्टबुद्धयः। यतचित्ता एकाग्रमनसः। मीलितदृशोऽर्द्धोन्मीलितनेत्राः। धृतमौनास्यक्तनिजारावाः। ततः सरसः। उपासनपदस्योभयार्थत्वादाह–सत्समीप इति ॥ गृहारामाणामिव तरुलतानां वैष्णवतामुक्त्वा आत्मारामाणामिव हंससारसादीनां वेणुश्रवणहेतुकां विष्णूपासनामाहुः–दर्शनीयं द्रष्टुमर्हं तिलकं गौरिकादिमयं यस्य सः। दर्शनीयेष्वतिसुंदरेषु मध्ये तिलकतुल्य इति वा। वनमालासु पंचवर्णपुष्यपत्रमयीषु दिव्यगंधा या तुलसी तस्य मधुना मत्तैरलिकुलैः, मत्तत्वादेवासंकुचद्भिः। अलघुगीतम् उच्चैर्गीतम्। ननु च कमलमालतीनागकेशरादिपुष्पाण्येव लोकाः सुसौरभत्वेन ख्यापयंति, न तु सर्वतो माहात्म्येनाधिकामपि तुलसीम्, उच्यते–तुलस्या गंधः कश्चित्प्राकृतलोकैर्ग्राह्योऽत्यल्पतर एव, अप्राकृतलोकैस्तु ततोऽधिकः, भगवन्मालाधिकारिभृंगैस्तु ततोऽप्यधिकोऽत्यसाधारणः, सर्वाधिकतमस्तु भगवन्नासिकैकमात्रवेद्य एव अन्यत्र योगमाययावरणात्। तदुक्तं वैकुण्ठवर्णने–"गंधेऽर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहुमानयन्ति" इति। अभीष्टमिति–वेणुगानारंभे केन स्वरेण गेयमिति सति तदैव मिलितानां भ्रमराणां हुंकारे वृत्ते साधुसाधु भ्रमर एष एव स्वरो गृह्यते इत्याद्रियन्सम्मानयन्यर्हि अधरे संधितवेणुः सम्यग्धृतवेणुर्भवति, संधानं संधा सा जाता अस्येति संधित इतच्प्रत्ययान्त ॥ तदा हरिमेत्य सरसः सकाशात् हरिसमीपमागत्य तमुपासत दर्शनश्रवणमननैरभजन्। मीलितदृश इति दृङ्मीलनं रसास्वादानुभावः ॥ १०–११

---

[1]. विकचोत्पलमाला–विज.। [2]. यर्हि–विज.। [3]. संधितवेणुः–त. पु. मूले ; संहित–इति कस्यचित्। [4]. यत।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं पूर्वं मल्लवेषप्राप्तत्वेन मल्ललीला सूचिता ततश्च गानश्रवणेन भ्रमणम् सम्प्रति तु वेषान्तरादिवर्णनेनेदं लभ्यते ततः परिश्रान्त आसन्ने मध्याह्ने क्वचिन्महासरसि स्नात्वा द्रुतरचिततिलकवनमालामात्रस्वल्पवन्यवेषपूर्वकं तैः सह तत्कालोपयुक्तवन्यभोजनपूर्वकं च प्रथितोच्चदेशे महातरुतलशिलायामुपविश्य गोसम्भालनाय प्रस्थापितेषु सखिषु नूतनवनमालाकृष्टभ्रमरमात्रपरिवारतया कृततदवधानः सन्नेवं वेणुवाद्यविनोदेन रमत इति वर्णयन्त्यस्तत्र चास्तां सर्वत्र विश्वस्तानां स्थावराणां वार्त्ता तद्विपरीतानां पक्षिणामपि श्रूयतामित्याहुः। दर्शनीयेति। दर्शनीयः सर्वदैव द्रष्टुं योग्यः सन्ततमनोहरो गैरिकादिमयस्तिलको यस्य सः। दिव्यातिदिव्यपुष्पगणवनमालायामपि दिव्यः सर्वोत्तमो गन्धो यस्याः सा तुलसीत्यलिकुलानामाकर्षणे हेतुः। अत एव तन्मधुनोऽपि तादृशत्वं दर्शितं मदस्य च। अलिकुलैरित्यत्यन्तसङ्कीर्णताशङ्कापरिहाराय पर्य्यायेणैव तत्सान्निध्यं बोद्धव्यं बलिभिर्दुर्बलानामपसारणात् मत्तत्वादेव अलघु तस्मादेव वैशिष्ट्यं च ज्ञेयम्—अभीष्टमिति। स्वजात्यनुसारेण ते यद्यद्गायन्ति तदेव तस्य परमकौतुकित्वादनुकूलमित्यर्थः। यद्वा तेषां श्रीवृन्दावनसम्बन्धिनामलौकिकत्वात्तस्य यदा यदा यद्यदभीष्टं तदा तदा तत्तदेव विचित्ररागेण गायन्तीति तथोक्तम्। अत्र चाभीष्टमिति सप्रणयेर्ष्यं सन्त्येव विचित्राणि तदभीष्टानि किन्त्वस्मत्संबन्धं विनेति भावः। अभीष्टत्वादेवाद्रियन् यर्हि सन्धितवेणुरिति यदा तदीयस्वरोचिततद्गानारम्भमात्रमित्यर्थः। तदैव सरसि तस्मिन् स्थिता ये ते सर्वेऽपीत्यर्थः। विहङ्गाश्चक्रवाकादयः। एत्य तद्गीताभिमुखमागत्य हरिं मनोहरस्वभावतया तथा प्रसिद्धं श्रीकृष्णमुपलक्ष्यीकृत्यासत तेऽनन्ताः सुखविहारपरा अपि। यद्वा परमभागधेयाः तत्र तेषामानन्दमूर्च्छामाहुः। यतचित्ता इत्यादिना। हन्त खेदे तथा निजाभीष्टालाभात् विस्मये वा हरिमिति पूर्ववत् दृष्टान्तगर्भः श्लेषः। ततः पक्षे हरिं विष्णुम् उपासत अभजन्त उपासनालक्षणं यतेत्यादि ॥ १०-११ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्चासन्नमध्याह्नसमये क्रमेण पुनर्वनान्तःप्रविष्टस्य मल्लवेशपरित्यागेन स्वीकृतवेशविशेषस्य मन्दमधुरवेणुवाद्येन तत्र तत्र वर्त्तमानसरश्चारिणां दूरवर्त्तिनामपि दक्षिणां मोहमाहुः—दर्शनीयेति युगलेन। दर्शनीयो वैष्णवप्रवर-श्रीनन्दात्मजत्वेन गैरिकादिना सुनिर्म्माणात् सुन्दरस्तिलक ऊर्ध्वपुण्ड्रं यस्य सः, दिव्यगन्धेति स्वरूपमात्रनिर्देशः अलघु उच्चैर्दीर्घं वा, आद्रियन्निति—तादृशालिगीतश्रवणेन प्रहर्षात्तादृशगीतार्थमधरे वेणुसन्धाने हेतुः। किंवा तद्गीतानाच्छादनेन तादृशमन्दमधुरवेणुवाद्यं बोधयति—सन्धितवेणुरिति, अधरे सन्धानमात्रेणैव स्वयं गायतीति पूर्ववत् परममोहनत्वादधरस्यानिर्देशः। सरसीति—जातावेकत्वम्, तत्र स्थिता ये ते सर्व्वेऽपीत्यर्थः। विहङ्गाश्चक्रवाकादयः, सारसानां हंसानाञ्च विशेषतो निर्देशः तेषां प्रायः सरश्चारित्वात्। श्लेषेण—भक्त्याख्यसरसद्रव्यादिसम्बन्धिनः सारसाः, हंसाश्च क्षीरनीरविभजनशक्त्या परमविवेकिन इति। एत्य ततस्तद्गीतध्वन्यभिमुखमागत्य, हरिं स्वचेतोहरं श्रीकृष्णम्, तेऽनन्ताः सुखविहारपराः। चाविति, गीतविशेषणं क्रियाविशेषणं वा, तत्र च प्रेमगतिविशेषेण एत्येत्यस्या उपासतेत्यस्या वा, हृतचेतस्त्वलक्षणमुपासनप्रकारञ्चाहुः—यतेति विशेषणत्रयेण, तेन चान्तरबाह्यकरणानामन्यविषयकवृत्त्युपरमेण तदेकनिष्ठतोक्ता; तत्र दृश इति ज्ञानेन्द्रियाणामुपलक्षणम्, तान्येव वा, धृतमौना इति वागिन्द्रियवृत्त्युपरमेण क्षोभकनिवृत्त्यान्यकर्म्मेन्द्रियाणामप्युपरामो लक्ष्यः, यद्वा, दृशो नेत्राणि, तैश्चाङ्गमुख्यैरन्यान्यप्यंगान्युपलक्ष्यन्ते, ततश्च मनः कायवाचां वृत्त्युपरामः क्रमेण ज्ञेयः, अथवा ततश्च तत्तद्रूपदृष्ट्या परमप्रेमाविर्भावेन मोहिता बभूवुरित्याहुः—त इत्यादिना, यतमुपरतं लीनं चित्तं येषामित्येव तत्तन्मोहलक्षणं ज्ञेयम्, मत्तानामप्यलीनां गीतादरेण परमदीनवात्सल्यं सम्भाव्य सौभरिमुख्यजलाविवासरतमुनिवर्गवत् सरसि वर्त्तमानाः सारसादय आगताः, किंवा अलिकुल-गीत-संकुल-मधुरमन्दवेणुगीतश्रवणेन पक्षिविषयकतत्पक्षपातं मत्वा प्रीत्या तदन्तिकमागताः, पश्चात् सौन्दर्य्यं च दृष्ट्वा प्रेम्णा मोहिता इति भावः। श्लेषेण—निजधनहरं जनं यथा तच्चिह्नेन दूरतस्तं प्राप्यापि तस्य महाधूर्त्तस्य भङ्गीं दृष्ट्वा किमपि कर्त्तुं वक्तुं चाशक्तास्तद्भयेन विस्मयेन वा मुदितनेत्राः केवलं तत्पार्श्वे निविश्य लोकास्तिष्ठेयुस्तद्वदिति ॥ १०-११ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

दर्शनीयतिलकः दर्शनीयश्रेष्ठः लक्ष्यते अलिकुलैः सहितमलघुगीतमाद्रियन् आद्रियमाणः संवृतवेणुः हरिमुपासते सानुषु स्थिता इति शेषः ॥ १०-११ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कमलवनेषु विहरतां पक्षिणामपि चित्ताकर्षकं तद्गीतं किंपुनरन्येषामित्यभिप्रायेणाहुः। दर्शनीयेति। दर्शनीयानां सुन्दराणां मध्ये तिलकः श्रेष्ठः कृष्णः वनमालायां या दिव्यगन्धा तुलसी तस्या मधुना मत्तैरलिकुलैः क्रियमाणमलघूच्चैरभीष्टमाद्रियन्नादरेण गृह्णन् यह्यधरे संहितवेणुर्भवति ॥ १० ॥ तदा ये सरसि सारसाश्च हंसाश्चान्ये विहङ्गाश्च ते चारुणा गीतेन हृतं चेतो येषां तथाभूता एत्यागत्य हरिं कृष्णमुपासतेऽभजन्त तत्समीपे विविशुर्वा कथम्भूताः यतं विषयान्तरेभ्य आहृतं चित्तं यैस्तं मौनं संशीलनं येषां तथाभूताश्च हन्तेति भगवद्विरहजखेदे ॥ ११ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यर्हि यदा संधितवेणुं स्वरेणेतिशेषः कृष्णः दर्शनीयायाः चक्षुः प्रियायाः विकचैः उत्पलैः नीलोत्पलैः कृताया मालाया दिव्यगन्धाया अमानुषपरिमलायाः तुलस्याश्च मधुना पीतेन मत्तैरलिकुलैः अभीष्टं गातुमुपक्रान्तम् अलघु गम्भीरं गीतमाद्रियत् आर्चत् आदृतौ सादरार्चिताविति ॥ १० ॥ तदा सरसि विचरन्तो ये सारसहंसविहङ्गा ते पक्षिणः एत्य संभूय चारुणा गीतेन हृतचेतसः आकृष्टबुद्धयः अतएव यतचित्ताः एकाग्रकृतमानसाः । अर्धनिमीलितनेत्राः धृतमौनाः स्वजातिचापल्यरहिता हरिमुपासते इत्यन्वयः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत आसन्ने मध्याह्ने क्वचिन्महासरसि स्नात्वा तिलकवनमालामात्रवेशपूर्वकं महावेशपूर्वकं महातरुतलशिलायामुपविश्य गोसम्भालनाय प्रस्थापितेषु सखिष्वेकाकितया कृतभ्रमरगानावधानः सन्नेवं वेणुवाद्यविनोदेन रमत इति वर्णयन्त्यस्तत्र चास्तां सर्वत्र विश्वस्तानां स्थावराणां वार्त्ता तद्विपगीताना पक्षिणामपि श्रूयतामित्याहुः । दर्शनीयेति युगलेन । अलिकुलानां पर्यावेणैव तत्सान्निध्यं ज्ञेयम् । बलिभिर्दुर्बलानामपसारणात् । अभीष्टमिति परमकौतुकित्वात्तस्य अलौकिकत्वाद्वा तेषां हरिमिति पूर्ववत् दृष्टान्तगर्भः श्लेषः । ततः पक्षे हरिमुपासत उपासनालक्षणं यतेत्यादि ॥ १०-११ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

हे सख्यः न केवलं वनलतास्तरवश्च प्रेमाविष्टाः सारसादीनामपि सौभाग्यं पश्यतेत्यन्या आहुः—दर्शनीयेति द्वाभ्याम् । दर्शनीयेति केवलं दर्शनीयम् नतु विशिष्यवचनीयं तिलकं यस्य सन्धितो गदितो वेणुर्येन सः । अलिकुलैर्गीतमाद्रियत् सादरमभिनन्दन् । कुतः ? अभीष्टं वेणुनादानुकरणेन समश्रुति स्वरमूर्च्छनादिवत्तयामनोऽनुकूलम् । सारसादयः कीदृशाः ? यतचित्ता आहारादिमुखाः । हन्त विस्मये, मीलितदृशः कृतध्यानाः वेणुनादश्रवणादनिकटवर्तित्वे ध्यानम् । धृतमौनास्तूष्णीकाः सिद्धत्वाद् भवन्ति, तूष्णीं परमेत्य निर्वृताः इत्युक्तेः । एते परमभागवता एव, न तिर्यञ्चः । इति मतिः ॥ १०-११ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

हे सख्यः ! न केवलं सरितो भग्न गतयः पादरजोवाञ्छन्ति, न केवलं वनलतास्तरवश्च आत्मनि विष्णुं व्यञ्जयन्तो मधुधारा वर्षन्ति, पश्य पश्य, सारसादोनामुपासनामित्यन्या आहुः—सरसीत्यादि द्वाभ्याम् । यतचित्ता अहो वादि-विमुखा अन्तर्विस्मये मीलितदृशः कृतध्याना धृतमौना निःशब्दाः सन्तो हरिमुपासते, एते किल सिद्धा एव यतो (भा० ११।३।३२) "भवन्ति तूष्णीं परमेत्य निर्वृताः" इत्यादि । एतैः सह कोऽस्य सम्बन्धस्तथाप्येतेतिर्यञ्चोऽपि सिद्धाः, अस्माभिः सह को न वा सम्बन्धः तथापि वयमीदृश्य इति निर्वेदः ॥ १०-११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गृहारामाणामिव तरुलतानां वैष्णवतामुक्त्वा आत्मारामाणामिव हंससारसादीनां वेणुश्रवणहेतुकां विष्णुपासनामाहुः । दर्शनोयं द्रष्टुमर्हं तिलकं गैरिकादिमयं यस्य सः दर्शनीयेष्वतिसुन्दरेषु मध्ये तिलकतुल्य इति वा । वनमालासु पञ्चवर्णपत्रपुष्पमयीषु दिव्यगन्धा या तुलसी तस्या मधुना मत्तैः अलिकुलैर्मत्तत्वादेवासंकुचद्भिरलघुगीतमुच्चैर्गीतम् । ननु च कमलमालती–नागकेशरादि पुष्पाण्येव लोकाः सुसौरभत्वेन ख्यापयन्ति । नतु सर्वतो माहात्म्येनाधिकामपि तुलसीम् । उच्यते तुलस्या गन्धः कश्चिन् प्राकृतैर्लोकैर्ग्राह्यो ऽत्यल्पतर एव अप्राकृतलोकैस्तु ततोऽधिकः । भगवद्वनमालाधिकारिभृङ्गैस्तु ततोऽप्यधिकः । अत्यसाधारणः सर्वाधिकतमस्तु भगवन्नासिकैकमात्रवेद्य एव । अन्यत्र योगमायया आवरणान । यदुक्तं वैकुण्ठवर्णने । गन्धेऽर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहुमानयन्तीति । अभीष्टमिति । वेणुगानारम्भे केन स्वरेण गेयमिति विचारे सति तदैव मिलितानां भ्रमराणां झङ्कारे वृत्ते साधु साधु भ्रमर एष एव सरो गृह्यते इति आद्रियन् सम्मानयन् यर्हि अधरे सन्धितवेणुः सम्यग्धृतवेणुर्भवति । सन्धानं सन्धा सा सञ्जाता यस्येति सन्धितः इतच् प्रत्ययान्तः । तदा हरिमेत्य सरसः सकाशात् हरिसमीपमागत्य तमुपासत दर्शन-श्रवण-मननैरभजन् । मीलितदृश इति । दृङ्मीलनं रसास्वादानुभावः ॥ १०-११ ॥

गूढार्थदीपिनी

दर्शनीयानां मध्ये तिलको मुख्यः भगवान् कृष्णः दिव्यागन्धा तुलती तस्या मधुना मत्तैः अलिकुलैः उच्चैः गीतमाद्रियन् यर्हि अधरे सन्धितवेणुर्भवति तदा सारसादयः एत्य आगत्य हरिमुपासते तत्समीपम् उपविविशुः हन्त विषादे वयं नेति द्वयोरन्वयः । मधु मकरन्दः । सन्धानं सन्धा सा सञ्जाता अस्येति इतच्प्रत्ययः ॥ १०-११ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काश्चित्पक्षिणामपि वेणुगीतेन श्रवणेन हरिप्रावण्यं भवति किमुतान्येषामित्याहुः। दर्शनीयतिलक इति। दर्शनीयस्तिलको यस्य दर्शनीयानां सुन्दराणां मध्ये तिलको मुख्यो वा श्रीकृष्णः वनमालाया या दिव्यगन्धा तुलसी तन्मधुना मत्तैरलिकुलैः भ्रमरगणैः क्रियमाणमलघुमहदभीष्टमनुकूलं गीतमाद्रियन् आदरेण गृह्णन् यर्हि यदा सन्धितोऽधरे संयोजितो वेणुर्येन स तथा भूतो भवति तदा सरसि ये सारसाः अन्ये च विहङ्गाः ते चारुणा मनोहरेण वेणुगीतेन हृतं चेतो येषां ते एत्य समीपमागत्य हरिं क्लेशहरं श्रीकृष्णमुपासत अभजन्त अहो तेषां भाग्यमिति भावः ॥ १०–११ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यर्हि यदा सन्धितो वेणुरधरे येन स दर्शनीयतिलको दर्शनीयस्तिलकोऽलिके यस्य स दर्शनीयेषु सुन्दरेषु तिलको मुख्य इति या वनमालाया दिव्यगन्धेन तथा तुलस्या मधुना च मत्तैर्दर्शनीयानि विकचानि विकसितान्युत्पलान्यस्मत्कचसम्बन्धरहितानीति तेषां मालाया इतरत्समं। अलिकुलैर्भृङ्गसङ्घैरधीष्टं स्वाभीप्सितमलघु गम्भीरं गीतमाद्रियच्चार्चिचत् तदा सरसि सारसाश्च हंसाश्चेत्येतदादयो विहङ्गाश्चारु यद्गीतं तेन हृतं चेतो येषां ते सन्त एत्य समेत्य यतचित्ता धृतमौना मीलितदृशो हरिमुपासत हन्तेदं चित्रम् ॥ १०–११ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

पक्षिणामपि वणुनादकार्यं जातमिति तत्रोपयोगिरूपं वेणुनादश्च वर्णयन्ति। दशनीयतिलक इति। यद्यपि पक्षिणो मुनयः न तेषां गीतादिना भगवद्भावो भवति किन्तु स्वभावत एव तथापि लोकदृष्ट्या कदाचिदन्यथाबुद्धिर्भवेत् अतो रूपनादाभ्यां तेषां भजनसिद्धिर्न्निरूप्यते तत्र रूपं वर्णयन्ति। दर्शनीयतिलक इति। दर्शनीयानां मध्ये तिलकरूपोऽतिसुन्दरः पक्षिणश्च रूपप्रधानाः रूपभेदविदः किञ्च यो वेणुनादः स स्वहितकारी स्वकीयानामपराधमपि न मन्यते तदाह। वनमालादिव्यगन्धतुलसीमधुमत्तैः। अलिकुलैः कृतमलघुगीतमपि आद्रियन् आदरं कुर्वन्नेव कूजितवेणुर्यतः यथैव भ्रमरा झङ्कारं कुर्वन्ति तथैव तन्नादमनुकुर्वन्नेव अनुरणनवदेव वेणुनादं करोति पक्षिणां मध्ये अलयो हीना निकृष्टाश्च तेषामपि कुलानि समूहाः नानाविधजातिभेदाः तदप्यलघु यथा भवति तथा गीतं तस्याप्यादरं कुर्वन् तत्राप्यलयः मत्ताः मदोऽपि येनानुचितः नहि तुलसी पुष्पान्तरवन्मादहेतुः तत्रापि दिव्यगन्धा तत्रापि भगवद्वनमालागता तेषामप्यादरञ्चेत् कुर्यात्तदा सरोवरादिषु ये सरसा रसिकाः क्षीरनीरविवेकिनश्च तेषामादर कथन्न कुर्यादिति वनमालायाः या दिव्यगन्धतुलसी तस्या मकरन्देन मत्तैः किञ्च आदरोऽपि भ्रमराणां यथाभीष्टं भवति तथा वनमालायां समागतान् भ्रमरान्न दूरी करोति किन्तु ते यथानोपद्रुता भवन्ति तथैवादरं करोति अतो यर्ह्येव आदरं कुर्वन्नेव कूजितवेणुः ॥ १० ॥ तदैव सरसि विद्यमानाः जलवासिनः सारसाः सरसानां भक्तानां सम्बन्धिनः हंसाः क्षीरनीरबिवेकिनः तेच विहङ्गा उत्कृष्टगतियुक्ताः पुरुषापेक्षया ते पुनर्भगवद्भजनाधिकारिण इति तान् विशिनष्टि। चारुगीतहृतचेतस इति। चारु यथा भवति निष्कामार्थं भगवद्गीतेनैव हृतं वशीकृतं चित्तं येषां तदपि भजनं भक्तिमार्गानुसारेण नतु स्थानस्थितानामन्तर्यामिरूपे ज्ञानरूपे वा तदाह एत्य आगत्य हरिमुपसमीपे सेवमाना जाताः। यतस्ते भगवदुक्ता मुनयः भजने भमराद्विशेषमाह। यतचित्ता इति। यतं नियतं चित्तं येषां चित्तनैयत्येन भगवद्भजनं मुख्यं नतु विक्षिप्तचित्ततया किञ्च हन्त इति हर्षे एतद्भाग्यमेतेषामेव भवतीति बहिर्व्यापाररहिता भजने सर्वोत्तमाः बहिर्व्यापारेषु च नेत्रे वाक् च नियम्या यस्यैतत् द्वय नियतं वाक् नान्यं वदति चक्षुश्च नान्यत् पश्यति तदाह। मीलितदृशो धृतमौना इति। मीलिता दृक् येषां धृतं मौनव्रतं यैः साम्प्रतमेते नादपराः अतो दृष्ट्या अन्यचित्तता भविष्यतीति नेत्रमीलनम्। दर्शनीयतिलक इति। इदमत्राकूतम् अतिरसिका एते मुनयः स्वस्य पुरुषत्वेन रसलीला यामनुपयोग मत्वा पक्षीभूय विविधस्वकूजनैर्भगतो भक्तानाञ्च रसोद्दीपनं कुर्वन्तः स्वकृतार्थतां मन्वानाः शब्दमेवाधिकमभीष्टं मन्यन्ते अतः शब्दप्रधानकीर्तिरूपवनमालाधर्माणामेवात्रोपयोग उच्यते "यथा वृक्षस्य सम्पुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाती"ति श्रुत्या कीर्त्तेर्गन्धसाम्येन निरूपणं कृतं वनमालायाः कीर्त्तिरूपत्वात्तन्निरूपकाणि गीतान्यावश्यकानि तानिच तद्रसास्वाद विना न सम्भवन्त्यतो गुणातीतभक्तिरूपवक्ष्यमाणरूपगन्धवती तुलसो तन्मध्वत्यलौकिकभक्तिरसात्मकमितरविस्मारकमतोऽतिमत्ताः स्वदेहाद्यनुसन्धानरहिता ईश्वरधर्माननुसन्धाना अपीति तन्निकट एवालघु गायन्ति। वस्तुतस्त्विदमेव महत्तम समाराधनं प्रभोरलिभिः क्रियते। अतएव प्रभोरभित इष्टं तद्गतम् अपरञ्च चार्वादिपदानि विहाय तत्र भवनार्थकप्रत्ययवत्पदोक्त्या भगवद्वनमालास्थतुलसीगन्धस्य दिवि भवत्वस्य विधितत्वादग्रे स्वामिनीषु व्रजदेवीत्वस्य वक्ष्यमाणत्वाद्दिवुधातोः क्रीडावाचकत्वाच्च स्वामिनोभिः सहक्रीडाजनितोऽयं गन्ध इति समभिव्याहारादवगम्यते एतेन यथादिविभवोऽर्थो नेतरलोकस्थजनविषयस्तथायमन्तरगतमलीलाप्रपञ्चस्थभक्तैकगम्य इति ध्वन्यते। अतएव प्रभोरपि भावोद्बोधस्तेनासीदिति ज्ञापनाय कूजनमुक्तं किञ्च वनमालास्थपुष्पमध्वनुक्त्वा तुलस्या एव तद्यदुक्तं तदपि तद्गन्धतुलस्या इति वाक्याद्बाहुं प्रियांस इत्युपक्रम्य तुलसिकालिकुलैर्मदान्धैरन्वीयमान इति वाक्याच्च तद्गन्धमध्वादिस्वरूपम्प्रभुरेव वेत्तीति नान्यगम्यः स विशेषस्तद्भोक्तारोऽलयोऽपि न साधारणाः किन्त्वितरेभ्यो विजातीया अत्युत्तमा इति

ज्ञापनार्थमेव कुलपदमुक्तम् अतएवालिपदमुक्तम् अलंशब्दोहि पूर्णतावाची तथा च तद्वानलिरित्यत्रोच्यते रसो न लीयते न नश्यति यत्र येन वा सोऽलिरित्युच्यते यद्यप्यत्र दीर्घः सम्भवति तथापि "दशहूतो हवैनामैषः तं वा एतं दशहूतं सन्तं दशहोतेत्याचक्षते परोक्षप्रियाहि देवा" इति श्रुतिन्यायेन परोक्षं मम च प्रियमिति भगवद्वाक्याच्च स्वप्रियार्थस्य गोपनं प्रभोः प्रियमिति ज्ञायते प्रकृते च स्वान्तरङ्गरसपोषकतैतेषु गोप्येति परोक्षेण ह्रस्वान्तम्पदं प्रभुः प्रकटितवानेवं सत्येत एवालयोऽन्येतु भ्रमरा एव क्वचिदेतेष्वप्यन्यनामप्रयोगस्तात्पर्यविशेषेणेतिज्ञेयं तारत्वञ्चानुक्त्वा लघुत्वाभाव एव उक्तस्तेन तद्गीतरसभरं वोढुं नान्यः शक्तः प्रभुं विनेति ज्ञाप्यते। महत्त्वेयत्ता नास्त्येवेत्यपि ज्ञापनाय तथोक्तिः। एवं सति तदादरं कथन्न कुर्यात् यर्हीति पदात्तद्गीतरसपानपरवशश्चिरं तूष्णीमेव तिष्ठति। कदाचिद्रसभरेणैव कूजितवेणुर्भवतीति ज्ञाप्यते अग्रेगीतोक्त्या पूर्वं तद्गीतोद्बुद्धभावेन स्वप्रियाणां भावोद्बोधनाय तथैवाकरोत्ततो यदा पूर्णरसो भूत्तदा जगाविति ज्ञाप्यते। अतिसुन्दरत्वनिरूपणे तिलकत्वोक्त्या तद्यथाभाग्यस्थाने भाले तिष्ठति तथेदमपि स्वरूपं परमभाग्यवतीष्वेव तिष्ठतीति ध्वन्यते अत्र कर्मधारयो ज्ञेयः स्वामिनीनां हृदि प्रियातिरिक्ते दर्शनीयत्वास्फूर्त्तेः। अत्र यद्यप्युभयं मुख्यं तथापि नादे विशेषो निरूप्यते अन्यथा मीलितदृक्त्वं नोच्येत तत्र हेतुः सरसि विद्यमानैरेव तैर्वेणुगीतं श्रुतं तच्च चारुत्वेन मनोहरेणैकस्वभावमतो नादाधीना एव निकटे समागताः आदावेव नादहेतुभूतस्वरूपसौन्दर्यनिरूपणान्नादरस एव स्वरूपरसमप्यनुभवन्तीति ज्ञाप्यते इदमप्यतिचित्रं यन्मत्तानां गीतानुरणनरूपेण गीतेन यतचित्तत्वं यन्मत्तानां गीतानुरणनरूपेण गीतेन यतचित्तत्वं सर्वेन्द्रियवृत्तिनिरोधश्चेति एतेषामियं गीतरसपानदशेत्येवं रूपतैवोपपद्यते। एतज्जन्यत्वेनैतदुत्तरकालीनत्वान्मदस्य अलिकुलानामपि तुलसीगन्धमधुपानदशा पक्षितुल्यैव पश्चात्तत्स्वभाववशादुक्तरूपत्वं परमिति ज्ञायते मुनित्वात्पक्षिणामग्रेऽप्यन्तरेव निरन्तरमेतद्रसमग्नतैवेति न मत्ततोक्ता अथवा प्रभुरसस्वभावादनुक्तसिद्धैवाग्रिमा सेति नोक्ता तदैतेषामप्यलिकुलवद्दशा भविष्यति। वस्तुतस्तूक्तरूपरसमत्तालिकुलालघुगीतमभीष्टत्वेनातिचित्तनैयत्येनैवानुभवन्प्रभुर्वेणुकूजनगाने करोतीति तच्छ्रवणे पक्षिणामपि तथात्वमेवोचिततरमावश्यकत्वादिति युक्तमुत्पश्यामः तथाप्यादौ स्वरूपसौन्दर्यमेवोक्तमिति स्वस्य तद्दिदृक्षातिभरेण पक्षिणां तत्प्राप्तिदशायां यत्प्रतिबन्धस्मरणेन कश्चित्खेदोऽभूदिति हन्तेत्युक्तम् एवमेतेषां भाग्यं सात्त्विकत्वान्निरूपितवत्यः ॥ ११ ॥

श्रीसुबोधिनी-सारः

दर्शनीयः तिलको यस्य स वनमालायां दिव्यो गन्धो यस्याः सा चाऽसौ तुलसी तस्या मधुना मत्तैरलीनां भ्रमराणां कुलैरलघु दीर्घं महदिति यावत् अभीष्टं प्रियं गीतम् आद्रियन् प्रशंसन् यर्हि संधितो वेणुर्येन स तथा भवति ॥ १० ॥ तदा सरसि ये सारसा हंसा विहंगाश्च चारुणा गीतेन हृतानि चेतांसि येषां ते एत्यागत्य यतचित्ता रुद्धमनस्का मीलितनेत्रा धृतमौनास्ते हरिमुपासत हन्तेति विषादे ॥ ११ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

एत्येत्यस्याभासे, ज्ञानरूपे वेति। आत्मन्येव ब्रह्मत्वेन ज्ञात इत्यर्थः ॥ ११ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्च 'सरसि कमलवनेषु विहरतां पक्षिणामपि मनआकर्षकं तद्गीतम्, किं पुनरन्येषाम् ?' इत्याशयेनाहुः–दर्शनीयतिलक इति। दर्शनीयानां सुन्दराणां मध्ये तिलक इव मुख्यः वनमालासु या दिव्यगन्धा तुलसी तस्याः मधुना मत्तैः अलिकुलैः अलघु उच्चैः क्रियमाणमभीष्टमनुकूलं गीतमाद्रियन् आदरेण गृह्णन् कृष्णः यर्हि अधरे सन्धितवेणुर्भवति ॥ १० ॥ तर्हि ये सरसि सारसाः हंसाः अन्ये च विहङ्गास्ते चारुगीतेन हृतं शब्दादिविषयेभ्यः प्रत्याहृतं चेतो येषाम्, अत एव यतम् एकाग्रीकृतं चित्तं यैस्ते एत्य आगत्य धृतं मौनं तूष्णींभावो यैस्ते श्रवणसुखेन मीलिते दृशौ यैस्तथाभूताश्च सन्तो हरिमुपासत तत्समीपे उपविविशुरित्यन्वयः। 'हन्त' इति भगवद्विरहजं स्वरभेदं सूचयन्ति ॥ ११ ॥

अन्वितार्थप्रकाशिका

अथ स्नात्वा भूषितो भुक्त्वा गोसंभालनाय सखीन्प्रस्थाप्य भ्रमरमात्रसहायो वेणुं वादयति तद्वृत्तमाह–दर्शनीयेति। दर्शनीयस्तिलको यस्य दर्शनीयाना सुन्दराणां मध्ये तिलक इव मुख्यो वा वनमालासु पञ्चवर्णपत्रपुष्पमयीषु या दिव्यगन्धा तुलसी तस्याः मधुना मत्तैः अलिकुलैः अलघु उच्चैः क्रियमाणमभीष्टमनुकूलं गीतमाद्रियन् आदरेण गृह्णन्। शतार्षः। कृष्णः यर्हि अधरे सन्धानं सन्धा साऽस्य जाता स सन्धितो वेणुर्येन तादृशो भवति ॥ १० ॥ तर्हि ये सरसि सारसा हंसाः अन्ये च विहङ्गास्ते चारुगीतेन हृतं शब्दादिविषयेभ्यः प्रत्याहृतं चेतो येषामत एव युतम् एकाग्रीकृतं चित्तं यैस्ते गीताभिमुखम् एत्य आगत्य धृतं मौनं तूष्णींभावो यैस्ते श्रवणसुखेन मीलिते दृशौ यैस्तथाभूताश्च सन्तो हरिमुपासत तत्समीपे उपविवशुः ॥ ११ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यु० ४ ॥ वेणुना पक्षिणा मया मय्याकर्षणं दर्शयन्त्य ऊचुः दर्शनीयेति दर्शनीयं भालमध्यस्थकुंकुमचन्द्रकेण सुंदरं तिलकं ऊर्ध्वपुंड्रं यस्य वनमालासु या दिव्यगन्धातुलसी तस्यामधुनामकरन्देन मत्तैः अलिकुलैः अलघुमहत् अभीष्टं स्वानुकूलं गीतं

आद्रियन् आदरेण सत्कुर्वन् यर्हि अधरे संधितवेणुः भवति ॥ १० ॥ तर्हि सरसि अल्पतडागे महातडागे च नद्यां च स्थिताः ये सारसाः हंसाश्च विहंगाः अन्ये चक्रवाकादयश्च ते सर्वेऽपि चारुगीतेन हृतचेतसो गीताऽभिमुखमेत्य यत चित्तादिविशेषण विशिष्टाः संतः हरिमुपासते श्रीकृष्णं लक्षीकृत्य समीपे तस्थुः ॥ ११ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सरोगतकमलवनेषु विहरतां पक्षिणामपि चित्ताकर्षकं तद्गीतं, किं पुनरन्येषामित्यभिप्रायेणाहुः । दर्शनीयेति । दर्शनीयानां सुन्दराणां मध्ये तिलकः श्रेष्ठः, भाव्यश्रीकृष्णावताराकृतिं निरीक्ष्य विशेषयन्ति । दर्शनीयः तिलकः नासाप्रान्तवर्त्ती लक्ष्मात्मकस्तिलको यस्य सः, यद्वा दर्शनीयं वीक्षकजनमनोहरं तिलकं कुङ्कुमचन्द्रकसहितमूर्ध्वपुण्ड्राख्यतिलकं यस्य सः, वनमालायां या दिव्यगन्धा तुलसी तस्याः मधुना मत्तानि तैः, अलिकुलैः क्रियमाणं, अलघु उच्चैःस्वरं, अभीष्टमनुकूलं, गीतं आद्रियन्नादरेण गृह्णन्, कृष्णः, यर्हि संधितवेणुः वादितवेणुः, संहितवेणुरित्यपि पाठः । भवति ॥ १० ॥ सरसीति ॥ तदा ये सरसि सरोवरे सारसाश्च हंसाश्च विहङ्गा अन्ये पक्षिणश्च ते स्थिताः स्युः । ते, चारु च तद्गीतं च तेन हृतं चेतो येषां ते, यतं विषयान्तरेभ्योऽपहृतं चित्तं यैस्ते, एकाग्रीकृतमानसा इत्यर्थः । मीलिता दृशो यैस्ते, अर्द्धनिमीलितनेत्रा इत्यर्थः । धृतं मौनं यैस्ते, स्वजातिचापल्यरहिता इत्यर्थः । एवंभूताः सन्तः, एत्य कृष्णान्तिके आगत्य, हन्तेति भगवद्विरहजखेदे, हरिं श्रीकृष्णं, उपासताभजत तत्समीपे उपविविशुर्वा ॥ ११ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दर्शनीयेति : १०.३५.१०.

ये हंसाः समुपासते हरिपदं सद्यः प्रसादोन्मुखतेष्वीशोऽपि न चित्रमत्र यदिमे सन्मानसारोचिताः ।
चित्रं ये तु सकृन्निजाङ्घ्रितुलसीस्वादाः प्रसादाद्दतांस्तान्मत्तान् मलिनानलींश्च कुरुते तत्स्तोत्रदत्तश्रुतिः ॥ २३ ॥

सरसीति : १०.३५.११.

हंसानामपि यच्चित्तमोहकृद्गीतमैश्वरम् । किं चित्रमत्र तद्गीतमुग्धा गोमतयो वयम् ॥ २४ ॥

मत्तालि-गीत श्रुतिदत्तकर्णोऽप्युपास्तिकृद्धंसकृतादरो यत् ।
सर्वत्र तुल्या फलिता दयाऽस्मादस्मासु सख्यः किमिहाधुनैतत् ॥ २५ ॥

कृष्णप्रिया

सखि ? हमारे श्रीनन्दनन्द जी के दर्शनीय पुरुषो में शिरमौर है–तिलक तुल्य है– सौन्दर्य शिरोमणि है । अपने अपने वक्षः स्थल में वनमालाओं को धारण किया है उनमें रही हुई दिव्यगन्ध वाली श्री तुलसी जी के मकरन्द रस के यत्न से छके हुए भौंरें ऊँचे स्वर से प्यारे के यशोगान कर रहें है, उनके गुंजन का बहुमान करते हुए प्रभुजी जब मधुर मुरली रव करते हैं तब वन के सरोवरों के सारस हंस आदि विहंगम, प्रियतम के हृदयहारि वंशीगान से मुग्ध बन कर श्यामजू के समीप में आकर नेत्रों को मुंदकर मौन धारण कर चित्त को संयमित कर श्रवण करते हुए ऐसे लगते है कि वे सब श्रीकृष्ण प्रभुजी सेवा कर रहे हैं ॥ १०–११ ॥

सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः ।
[1]हर्षयन् यर्हि वेणुरवेण जातहर्ष उपरम्भति[2] विश्वम् ॥ १२ ॥
महदतिक्रमणशङ्कितचेता मन्दमन्दमनुगर्जति मेघः ।
सुहृदमभ्यवर्षत् सुमनोभिश्छायया च [3]विदधत् प्रतपत्रम् ॥ १३ ॥

कर्दमक्षमा

अन्वयः –हे व्रजदेव्यः !, स्रगवतंसविलासः, (प्रभुः) सहबलः, क्षितिभृतः, सानुषु, (विचरन्) जातहर्षः, यर्हि, वेणुरवेण, विश्वम्, उपरम्भति, तर्हि, महदतिक्रमणशङ्कितचेताः, मेघः, मन्दमन्दम्, अनुगर्जति, छायया, प्रतपत्रम्, विदधत्, सुमनोभिः, सुहृदम्, अभ्यवर्षत् ॥ १२–१३ ॥

---

१. आह्वयत्–विज । २. रंभितविश्व–विज. । ३. विदधेवित ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

मेघोऽपि हरिं सेवत इत्याहुः। महबल इति। भो व्रजदेभ्यो गोप्यः सहबलः सरामः कृष्णः स्रग्भिर्निर्मिताश्यामवतंसाभ्यां कर्णभूषणाभ्यां विलासो यस्य। यद्वा मुक्ताफलस्रगापीडेन विलासो यस्येति। क्षितिभृतः सानुषु गिरेस्तटेषु वर्तमानः स्वयं जातहर्षो विश्वं हर्षयन्यदावेणुरवेणोपरम्भति निनादयति। नादेन पूरयतीत्यर्थः॥ १२॥ तदा मेघो महतः कृष्णस्यातिक्रमणे शंकितं चेतो यस्य स न पुरतो याति न पुनरुपरि अतियाति न चोच्चैर्गर्जति किं तु तत्रैव स्थितः सन्वेणुरवमनु मन्दंमन्दं गर्ज्जति। किं च सुहृदं विश्वार्तिहरणादिसाम्यात्सुहृत्सखा कृष्णस्तं सुमनोभिरभ्यवर्षत्। अदृश्यैर्देवैः क्रियमाणं कुसुमवर्षं मेघे कल्पयित्वोक्तम्। तुषारो वा कुसुमतया कल्पितः स एव वा देवतारूपो ऽभ्यवर्षदिति। प्रतपादातपात्त्रायत इति प्रतपत्रं छत्रं तच्छायया कुर्वन्निति॥ १३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

(५)॥ अन्यदाहुः–मेघ इति। स्रग्भिः पुष्पैः। अप्राप्तरत्नैर्विशेषतः पुष्पालंकारा ध्रियन्ते कृष्णस्तु न तादृश इत्याह–यद्वेति। मुक्ताफलानां स्रग्भिः पंक्तिभिः कृतेनापीडेन मुकुटेन विलासो लीला यस्येति "स्रक्पुष्पे पुष्पमालायां रज्वालिरचनासु च" इति निरुक्तेः। "अवतंसो न स्त्रियां स्यात्कर्णपूरे च शेखरे" इति मेदिनी। "विलासो हारभेदे स्याल्लीलायामपि पुंस्ययम्" इति मेदिनी। स्वयं जातहर्षः स्वाभाविकानन्दवान्, न तु भूषणवस्त्रादिधारणजानन्द इत्यर्थः। उपाद्रम्भतेः परस्मैपदमार्षम्। इत्यर्थ इति–धातूनामनेकार्थत्वान्निनादेऽपीति भावः॥ (१२)॥ पुरतोऽग्रे। किं तु अपि तु। तत्रैव यत्र कृष्ण इत्यर्थः। न केवलं स्थित इत्याह्–किञ्चेति। मेघो हि वर्षणेन तापदुर्भिक्षादिनाशकरत्वाज्जगदार्तिहरः, श्रीकृष्णस्तु दुष्टनाशकत्वेन तथेति साम्यम्। कुसुमतया स्पर्शसाम्येन कल्पिदः। स एव मेघ एव, कामरूपत्वान्मेघानाम् "जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः" इति कालिदासोक्तेः। 'विपूर्वो धा करोत्यर्थे' इति व्याडयुक्तेर्विदधत्कुर्वन्नित्यर्थः॥ भूमिष्ठानामानन्दमनुवर्ण्याकाशस्थानां जडानामपि वेणुनादहेतुकं तं वर्णयति–सहबलः सहचरसैन्यसहितः। स्रग्भिश्चूडावक्षःस्थलवर्तिनीभिः, अवंतसाभ्यां कर्णवर्तिनीभ्यां च विलासः शोभा यस्य सः। सानुषु गिरोर्नितम्बेषु स्थितः स्वयं वेणुरवेण जातहर्षो विश्वं यर्हषन् हर्षयितुं यदा उपरम्भति। रलयोरैक्यादंतर्भावितण्यर्थत्वाच्च वेणुरवमुपलम्भयत्यास्वादयतीत्यर्थः। अत्र कृष्णस्य गिरिनितम्बवर्तिमेघत्वे स्रगवतंसानां बलाकात्वं, पीतांबरस्य विद्युत्त्वं, वेणुरवस्य वृष्यमाणसुधारसासारत्वं गम्यम्॥ तदा मेघ आकाशस्थो महदतिक्रमेण महतः सतः सकाशादतिश्रेष्ठस्य कृष्णमेघस्यातिक्रमणशंकितचित्तः मंदंमंदमनुगर्जति, वेणुरवस्यानुकूल्येनैव प्रतिकूलो नेत्यर्थः। सुहृदम् विश्वार्तिहरणकर्मवर्णसाम्याभ्यात्सखायम्। सुमनोभिः सूक्ष्मपुष्पतुल्यैर्हिमकणैः, अभि परितः सूर्यातपनिवृत्त्यर्थमवर्षत्॥ १२–१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च मध्याह्ने सखिभिरानीतैः स्रगवतंसादिविचित्रवेषैर्विलसन् गवामनुरोधेन निश्छायेष्वपि गिरेः समभूभागेषु भ्रमन् मेघच्छायेच्छया मल्लाररागङ्गायन् श्रीवलादिसभिः प्रतिध्वनिभृद्गिरिसानुभिरतत्तत् प्रतिध्वनिभृद्विश्वेन च कृतानुगानस्तादृशतदिच्छया स्वल्पाकर्षणप्रयोगात्तावन्मात्रमेघागमनेन मन्दमात्रगर्जनजनितवाद्यस्तत्तुमुलशब्देन स्वयमपि हृष्टो विश्वमपि हर्षयन्नत एव मेघाच्छन्नदेवादिभिः कृतपुष्पवृष्टिस्तच्छायायां विक्रीडतिस्म तदेतल्लीलास्फूर्तियुक्तानां तासामभिप्रायेणावतारिकेयम् अहो आस्तां पृथक् पृथक् तदुल्लेखो विश्वस्याप्यानन्दो दृश्यतां तत्र चान्येषां का वार्त्ता दूरस्थाचेतनचलस्वभावस्य मेघस्यापीति वर्णयन्त्यस्तद्रूपगुणचेष्टाभिः श्रीकृष्णेन सौहृद्यमेव सम्भावयन्ति। सहबल इति। श्रीबलभद्रेण सहित इत्युपलक्षणं सख्यन्तराणां सखिसैन्येन सहित इति वा विलासो विनोदः क्षितिभृतः प्राधान्येन गोवर्धनस्य कदाचिदन्यस्यापि सानुषु समभूभागेषु तत्र यौगिकार्थस्तु तत्प्रशंसासूचकः अस्यैव क्षितिभृत्त्वं युक्तमिति भावः। हे व्रजदेव्यः! परमदिव्यगणस्पृहणीयसौभाग्यस्य व्रजजनस्यापि मध्ये देव्यो दिव्यत्वेनाभिमता इत्यर्थः। अतः परमवैदग्धी च सूचिता। अतस्तद्वेणुगानतत्त्वं युष्माभिरेवावधार्यत इति भावः। तदेवं सपरिकरस्य तस्य विश्वस्यापि परमहर्षे सति नूनं मेघोऽपि प्रहर्षेणोच्चैर्गर्ज्जितुमिच्छन्नपि महतः श्रीकृष्णस्यातिक्रमेण निजोच्चशब्देन तद्वेणुरवाच्छादनापराधस्तस्मिन् शङ्कितचेताः सन्ननुकूलतया तद्गानपोषायेत्यर्थः। मन्दमन्दं गर्जति परिश्रान्तञ्च मत्वा तमाप्यायतीत्याहुः। सुहृदं तद्वर्णाद्यनुकारात्। सखायं श्रीकृष्णम् अभिलक्ष्यीकृत्य सुमनोभिः करणभूतैरभ्यवर्षत् अभ्यषिञ्चदित्यर्थो वा। गर्जनस्य वर्त्तमानप्रयोगेण पौनःपुन्यम्। वृष्टेरतीतप्रयोगेण सुहृत्त्वं बोध्यते। किं कुर्वन् छायया तदुपरिच्छत्रं विदधत् छायां कुर्वता स्ववपुषेत्यर्थः। अन्यत्तैः तत्र स्रग्भिरिति प्रथमार्थे खण्डितनानावर्णपुष्पदलरचितान्तरन्तः सूक्ष्मसूक्ष्मतरसूक्ष्मतममण्डलमयीभिः श्रेणिभिरित्यर्थः। निदादयतीति शब्दार्थस्य रभेरन्तर्भूतण्यर्थताङ्गीकारः। परस्मैपदं नुम् चार्षम्। यद्वा स्रग्भिरवतंसाभ्याञ्च कर्णपूराभ्यां विलासो यस्य। यद्वा। स्रग्भिरवतंसो मौलिविलासश्च विविधक्रीडा यस्य सः। उपरम्भति रभ राभस्य इत्यस्मात् कौतुकी भवतीत्यर्थः। परस्मैपदं नुम् चार्षम्। मन्दमन्दमित्यस्यावर्षदित्यस्यावर्षदित्यनेनाप्यन्वयः। श्लेषेण सुमनोभिरिति शोभनमनोवृत्तिभिश्छायया च निजदेहेन मन्दमन्दगर्जनाच्च वाचापीत्येव त्रिधा सेवाप्युत प्रेक्ष्या॥ १२–१३॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्च मध्याह्ने गिरिसानुषु प्रयातस्य पूर्ववेशपरित्यागेन स्वीकृतविचित्रमालामयवेशस्य तेषु प्रहर्षे वेणुवादनं जगदानन्दनं परममधुरं निजगर्ज्जनादप्यधिकं ज्ञात्वा तेनैव विश्वोपकारञ्च मत्वा सुहृत्तया प्रहृष्टो मेघो बहुधा तमसेवतेत्याहुः—सहेति युगलेन। श्रीबलभद्रेण सहित इति विश्वोपरम्भणार्थं वेणुनादाधिक्याय, किंवा बलं सामर्थ्यं तद्युक्तः सन् किञ्चिद्बलं प्रकाश्येत्यर्थः, विलासं क्रीडा शोभा वेति हर्षे कारणम्, किञ्च, क्षितिं बिभर्त्ति रक्षति पुष्णाति वेति क्षितिभृत् श्रीगोवर्द्धनस्तस्य, जाताबेकत्वं वा, तस्य तत्समीपवर्त्तिनामन्येषामपि, 'सानुषु' इति वेणुरवस्य तले प्रतिशब्दोदयेनाधिक्यं दर्शितम्। क्षितिभृत इति—तत्सानुषु तादृशवेणुवादनात्तस्यान्वर्थसञ्ज्ञत्वमप्यभिप्रेतम्। हे व्रजदेव्य इति व्रजमध्ये व्रजस्यापि वा पूज्या यूयमेवेति। यद्वा, व्रजदेवः श्रीकृष्णस्तस्य प्रिया इति तत्त्वतो युष्मदर्थमेवेति भावः। यद्वा, व्रजदेवः श्रीकृष्णस्तस्य प्रिया इति तत्त्वतो युष्मदर्थमेवेति भावः। यद्वा, व्रजे क्रीडापरा यूयं तत्तद्वनक्रीडा—सौभाग्यहीना इति भावः। विश्वं हर्षयन्नित्यत्र हेतुः—जातहर्षः प्रादुर्भूतानन्दविशेष इति, अतो मेघोऽपि प्रहर्षेणोच्चैर्गर्ज्जितुमिच्छन्नपि महतः श्रीकृष्णस्यातिक्रमः, तदुपर्य्यवस्थानात्, किंवा निजोच्चशब्देन तद्वेणुरवाच्छादनादपराधस्तस्मिन् शंकितचेतास्ततश्च परिश्रान्तं मत्वा तमाप्याययामासेत्याहुः—सुहृदं सखायम्, तद्वर्णाद्यनुकारात्, किं वा अपराधेऽपि सुशोभनं हृद्यस्य तम्। यद्वा, विश्वहर्षणेन निरुपाधिहितकारिणमस्माकं सुहृदमिति वा, अत एवाभितोऽवर्षद्व्यापयामासेत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, स्रग्भिरवतंसाभ्याञ्च कर्णपूराभ्यां विलासो यस्य। यद्वा, स्रग्भिरवतंसौ मौलिर्विलासश्च विचित्राभरणक्रीडा यस्य, सानुषु स्थितः सन्, अतः क्षितिभृतः श्रीगोवर्द्धनाद्रीन् हर्षयन् महदतिक्रमणशंकितचेता इव मन्दं मन्दमनुगर्ज्जति, इत्यन्तर्भूतोत्प्रेक्षार्थो ज्ञेयः, वस्तुतस्तु वेणुरवेण तस्य विश्वोपरम्भणेच्छामनुसृत्य वेणुरवस्याधिक्यार्थमिव तत्सम्मिलनेन तन्नादानन्तरं गर्ज्जतीति। यद्वा, हर्षेण श्रीगोवर्द्धनादीनामुपर्य्योगतो महतां तेषामतिक्रम उल्लंघनमाक्रमणं वा, किंवा तेषां हर्षार्थं वेणुरवस्याच्छादनेन तेष्वपराधः, किंवा महतो वेणोरतिक्रमस्तस्माच्छंकितचेताः। अन्यत् समानम्। मन्दमन्दमित्यभ्यवर्षदित्यनेनाप्यन्वयः, श्लेषेण—सुमनोभिरतिशोभनमनोवृत्तिश्छायया च निजदेहेन मन्दमन्दगर्ज्जनाच्च, वाचापीत्येवं त्रिधा सेवा पूर्व्ववदूह्या ॥ १२–१३ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उपरन्धितः विश्वः उपग्रथितविश्वः ॥ १२–२६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पूर्वार्धे रासक्रीडायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मेघोऽपि हरिमुपास्ते इत्याहुः। सहबल इति। हे व्रजदेव्यः! गोप्यः सहबलः सरामः कृष्णः स्रग्भिर्निर्मिताभ्यामवतंसाभ्यां कर्णभूषणाभ्यां विलासो यस्य। यद्वा मुक्तास्रगापीडने विलासो यस्य सः क्षितिभृतो गिरेस्तटेषु वर्तमानः स्वयञ्जातहर्षः विश्वं हर्षयन् यदा वेणुरवेण उपरम्भितविश्वः उपग्रथितविश्वः अनुरक्तलोको भवतीत्यर्थः। उपरञ्जितविश्वमिति पाठान्तरं तदा विश्वमुपरञ्जयति नादयति नादेन पूरयतीत्यर्थः ॥ १२ ॥ तदा तस्य स्वतुल्यच्छायत्वेन विश्वार्त्तिहरणादिना च साम्यात्स्वसखः मेघः महतः श्रीकृष्णस्यातिक्रमेण शङ्कितं चेतो यस्य तथाभूतः पुरतो न याति नवोच्चैर्गर्जति किन्तु तत्रैव स्थितः सन् वेणुरवमनु मन्दं मन्दं गर्जति सुहृदं श्रीकृष्णं सुमनोभिरभ्यवर्षच्छायया प्रतपत्रमातपत्रं व्यदधदकराच्च विदधदिति पाठेत्वडभाव आर्षं शत्रन्तम्वा प्रतपत्रं कुर्वन् सुमनोभिरभ्यवर्षच्चेत्यर्थः अदृश्यदेवैः क्रियमाणं कुसुमवर्षं मेघकर्तृकं कल्पयित्वेत्थमुक्तं तुषारो वा कुसुमतया कल्पितः ॥ १३ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हे व्रजदेव्यः! बलेन सहितः स्रजा मालयाऽवतंसेन कर्णोत्पलेन च विलासः कान्तिविशेषो यस्य तथा। यद्वा स्रगवतंसयोर्विलासो यस्य स तथा आत्मशोभा जनकत्वेन धृतयोः स्रगवतंसयोः शोभा जनक इत्यर्थः। क्षितिभृतो गिरेः सानुषु शिखरेषु स्थितः लोकदृष्ट्या तदानीं जातहर्षः आविष्कृतानन्दविशेषः कृष्णो यर्हि यदा वेणुरवेण आह्वयत् गा इति शेषः। विश्वं देहमाविश्य वर्तमानं प्राणिजातम् उपरम्भति ऊर्ध्वमुखीकरोति आह्वयति वा नूतनं कर्तुमुपक्रमते वा उपरम्भस्तूर्ध्वमुखे प्रक्रमे निर्वृते तथेति च ।१२। तदा मेघः महतो हरेरुच्चैर्गर्जनेन कर्णबाधिर्यजनकातिक्रमणमतिलङ्घनं स्यादिति शङ्कितमनाः मन्दं मन्दम् अनुवेणुरवानुकूलं यथा भवति तथा गर्जति। किञ्च सुमनोभिः पुष्पसदृशसलिलबिन्दुभिः श्यामवर्णसाम्यात्सुहृदं मित्रमभ्यवर्षत्। किञ्च छायया वितपत्रं वितपात् आतपात् त्रायत इति वितपत्रं विदधे च हरेरिति शेषः। सितपत्रमिति पाठे श्वेतच्छत्रमित्यर्थः। वेणुरवेण व्रजदेवीराह्वयदिति वा ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ततश्च मध्याह्ने सखिभिरानीतैः स्रगवतंसादिभिर्विलसन् गवामनुरोधेन निश्छायेष्वपि गिरितटेषु भ्रमन् मेघच्छायेच्छया मल्लाररागं श्रीबलादि सखिभिः प्रतिध्वनिभृद्गिरिसानुभिस्तत् प्रतिध्वनिभृद्विश्वेन च कृतानुगानस्तन सदृशस्तदिच्छया स्वल्पकर्षण-प्रयोगात्तावन्मात्रं मेघागमनेन मन्दमात्रं गर्ज्जनजनितवाद्यस्तत्तुमुलशब्देन स्वयमपि हृष्टो विश्वमपि हर्षयन् अत एव मेघाच्छन्न-देवादिभिः कृतपुष्पवृष्टिस्तच्छायायां विक्रीडति स्म तदेतल्लीलास्फूर्त्तियुक्तानां तासामभिप्रायेणावतारिकेयम् अहो आस्तां पृथक् पृथक् तदुल्लेखो विश्वस्याप्यानन्दो दृश्यतां तत्र चान्येषां का वार्त्ता दूरस्थाचेतनचलस्वभावस्य मेघस्यापि श्रूयतामिति वर्णयन्त्य-स्तद्रूपगुणचेष्टाभिः श्रीकृष्णे सौहृद्यमेव सम्भावयन्ति । सह बल इति युगलेन । श्रीबलभद्रादिभिः सहित इत्यर्थः । महतः श्रीकृष्ण-स्यातिक्रमः तद्वेणुरवाच्छादनापराधस्तस्मिन् शङ्कितचेताः सन् सुहृदं तद्वर्णाद्यनुकारात् सखायं श्रीकृष्णम् उपरम्भति रभ राभस्य इत्यस्मात् कौतुकी भवतीत्यर्थः ॥ १२–१३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अन्या गोवर्द्धननिकटवासिन्यो गोवर्द्धनकन्दराकृतसङ्केतत्वेन प्राकृतविलासाः काश्चिदाहुः—सहबल इति द्वाभ्याम् । हे व्रजदेव्यः ! यर्हि यदा वेणुरवेण स्वयं जातहर्षो विश्वमपि स्थिरजङ्गमं हर्षयन् सहबलः बलं बलात्कारस्तेन सह वर्तमानः सबलो बलवानिति यावत्, उपरम्भति परिरम्भते; तदा क्रीडाश्रमहानये मेघः सुमनोभिर्जलशीकररूपैः पुष्पैः सुहृदं भिन्नम्, वर्णसामा-न्यात् अभ्यवर्षत् सिषेच । न केवलं सिषेच छायया प्रतपत्रम्, आतपत्रञ्च विदधत् विधत्ते, आख्यातप्रतिरूपक-कृतप्रत्ययः । न केवलं तथा, मन्दं मन्दमनुगर्जति, वेणुनादमनुकरोतीत्यर्थः । अथवा, महदतिक्रमणशङ्कयैवानुगर्जति । महतः श्रीकृष्णस्यातिक्रमण-मुपरिवर्तनं, तेन शङ्कितं चेतो यस्य । अयं भावः—स्नेहेनातपक्रमनिरासार्थमुपरिवर्तमान आतपत्रं विधत्ते । अथवोपरिवर्तमानत्वेन कोपोऽपि तस्य भवति, तेन स स्वयमेव मन्दं मन्दं गर्जति । यद्यपि ममायमपराधस्तथापि छायां करिष्याम्येव । एष ममापराधः क्षन्तव्य एवेति शब्दायते । कुत्रेत्याह—सानुष्वित्यादि । क्षितिभृतो गोवर्द्धनस्य उपरम्भति परिरभत इत्यत्रेर्षा ॥ १२–१३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

गोवर्धननिकटवासिन्यो गोवर्धन-कन्दराया कृतसङ्केतत्वेन कृतविलासाः काश्चिदाहुः—सहबल इत्यादि द्वाभ्याम् । हे व्रजदेव्यः ! इदन्त्वतिरहस्यमित्याक्षेप-लभ्यम् । यर्हि यदा वेणुरवेण जात-हृषः स्वयं विश्वमपि हर्षयन् बलं बलात्कारस्तेन सह वर्त्तमानः सहबल उपरम्भति परिरम्भते, तदा क्रीडाश्रम-हानये मेघः सुमनोभिर्जलसीकररूपैः पुष्पैः सुहृदं वर्णसामान्यान्मित्र-मभ्यवर्षत् सिषेच । न केवलं सिषेच, छायया प्रतपत्रं छत्रं च विदधत् विधत्ते 'आख्यातप्रतिरूपकः कृतप्रत्ययः ।' न केवलं तथा तथैव करोति, मन्दमन्दमनुगर्जति वेणुनादमनुकरोतीति भावः । विश्वं मादृशं सर्वं गोपीजनं प्राप्योपरम्भतीत्युपरम्भः परिरम्भः स इवाचरतीति 'लुप्ता वीर्वा', आलिङ्गनमिव भवतीत्यालिङ्गनातिरेके तात्पर्यम् । कुतः प्रतपत्रादिकं विधत्ते ? तत्राहुः—महदतिक्रमण–शङ्कितचेताः महतः सर्वेश्वरस्यास्यातिक्रमणमातपादिना परिभवस्तत्र शङ्कितं शङ्कायुक्तं चेतो यस्य; यद्वा तदुपरिवर्त्तमानत्वात् तदतिक्रमे शङ्कितचेता अपि प्रतपत्रं विदधद्भक्तैरपि स्नेहस्याधिक्यं वस्तु व्रजदेव्य इति गोवर्धनदूरस्थव्रजवासिनीः प्रति सोत्प्रास-परम् । यथा वयमभिज्ञाः न तथा यूयमिति सानुषु क्षितिभृत इति व्रजदेव्य इति शब्दद्योत्यं रहस्यम् ॥ १२–१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भूमिष्ठानामानन्दमनुवर्ण्य आकाशस्थानां जडानामपि वेणुनादहेतुकं तं वर्णयन्ति । सहबलः सहचरसैन्यसहितः । स्रग्भिश्चूडावक्षस्थलवर्त्तिनीभिः अवतंसाभ्यां कर्णवर्त्तिनीभ्याञ्च विलासः शोभा यस्य सः । सानुषु गिरेर्नितम्बेषु स्थितः स्वयं वेणुरवेण जातहर्षः विश्वं हर्षयन् हर्षयितुं यदा उपरम्भति रलयोरैक्यादन्तर्भावितण्यर्थत्वाच्च वेणुरवमुपलम्भयत्यास्वादयतीत्यर्थः । अत्र कृष्णस्य गिरिनितम्बवर्त्तिमेघत्वे स्रगवतंसानां वलाकात्वं पीताम्बरस्य विद्युत्त्वं वेणुरवस्य वृष्यमाणसुधारसासारत्वं गम्यम् । तदा मेघ आकाशस्थः महदतिक्रमेण महतः सतः सकाशादतिश्रेष्ठस्य कृष्णमेघस्यातिक्रमणशङ्कितचित्तः । मन्दमन्दमनुगर्जति वेणुरवस्यानुकूल्येनैव न प्रातिकूल्येनेत्यर्थः । सुहृदं विश्वार्त्तिहरणकर्मवर्णादि साम्यात् सखायं सुमनोभिः सूक्ष्मपुष्पतुल्यैर्हिमकणैः अभि परितः सूर्यातपतापनिवृत्त्यर्थमभ्यवर्षत् । प्रतपादातपात् त्रायत इति प्रतपत्रं स्वच्छायया कुर्वन् ॥ १२–१३ ॥

गूढार्थदीपिनी

स्रग्भिर्निर्मिताभ्यां कर्णभूषणाभ्यां विलासः शोभातिशयो यस्य स भगवान् यर्हि वेणुरवेण विश्वं हर्षयन् उपरम्भति नादेन पूरयति तदा मेघः छायया आतपत्रं विदधत् सुहृदं सुमनोभिः कुसुमतुषारैः अभ्यवर्षत् । कथंभूतो मेघः । महतः श्रीकृष्णस्य अतिक्रमणे शङ्कितं चेतो यस्य स मेघः । क्षितिभृतः गोवर्धनस्य शिखरेषु वर्तमानः कृष्णः । हे व्रजदेव्यः ॥ १२–१३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कश्चिन्मेघोऽपि श्रीकृष्णं सेवते इत्याहुः। सहबल इति। हे व्रजदेव्यः गोप्यः स्रगवतंसेन मुक्ताफलस्रगापीडेन विलासो यस्य सः क्षितिभृतः गोवर्द्धनस्य सानुषु सहबलः वर्तमानः स्वयं जातहर्षः विश्वं हर्षयन् यर्हि वेणुरवेण उपरम्भति निनादयति नादेन पूरयति तर्हि महदतिक्रमणेन श्रीकृष्णातिक्रमेण शङ्कितं चेतो यस्य सः प्रातिकूल्यगमनभाषणाभ्यां श्रीकृष्णस्योपेक्षो भविष्यामीति व्यवसायवान् मेघः वेणुरवमनु मन्दमन्दं गर्जति किञ्च सुहृदं घनश्यामत्वेन लोकार्तिहरत्वेन च स्वसाम्यात्सुहृद्भूतं श्रीकृष्णं सुमनोभिरभ्यवर्षत् प्रतपादातपात् त्रायते इति प्रतपत्रं छत्रं च छायया विदधत् कुर्वन्॥ १२–१३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे व्रजदेव्यो गोप्यः सहबलो बलरामसहितः स्रगवतंसविलासः स्रजावतंसेन कर्णोत्पलेन च विलासो यस्य स क्षितिभृतो संभृतः सानुषु प्रस्थेषु स्थितो जातहर्ष इव जातश्च गा आह्वयत्। साधनमभिधत्ते॥ वेणुरवेणेति। तदा च विश्वं चेतनमात्रमुपरमत्युत्तानाननं करोति। उपरम्भस्तूर्ध्वमुखे प्रक्रमे निर्वृते तथेति वचनादुपरम्भति नादेन पूरयतीत्यपरे। तदा बलाहका अपि घाटीमिमामाटीक नाः काञ्चन सेवां देवस्याकुर्वन्नित्याह॥ सहदिति। महता स्वस्वरेणातिक्रमोल्लङ्घनं तेन शङ्कितं चेतो यस्य स सन् मन्दं मन्दमेवोऽनुगर्जति। अनु मुरलीस्वरानुसारि यथा तथा गर्जति। सुमनोभिः। उपमानवाचकपदादुपमेयं लक्ष्यते। कुसुमसमजलबिन्दुभिरनिमित्तविश्वोपकारादनुकाराच्च वर्णेन सुहृदं कृष्णमभ्यावर्षत्। किञ्च स्वच्छायया। वितपत्रं प्रतपत्रं विदधे सितपत्रमिति त्रय पाठाः। तत्र द्वौ वितपात्प्रतपादातपात्त्रायत इत्येकार्थौ। अवेः सूर्यस्य तत्पात्त्रायत इति वा। तृतीये सितपत्रं श्वेतछत्रमित्यर्थः। विदधेऽकरोत्॥ १२–१३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

मेघः सर्वहितकारी तस्यापि वेणुनादजनितभावमाह पूर्ववत्। सहबल इति द्वाभ्याम्। हे व्रजदेव्यः गोप्यः! व्रजे देवतारूपाः अनेन विश्वासो भविष्यतीति निरूपितं यर्हि वेणुरवेण विश्वमुपरम्भति पूरयति तर्हि महदतिक्रमेण शङ्कितचेताः सुहृदं भगवन्तम् अभ्यवर्षत् स्वदेहच्छायया च आतपत्रं विदधज्जातः। तद्वा कुर्वन् अभ्यवर्षत् अयं नादो महाबलयुक्तः विश्वगतान्सर्वानेव धर्मान् दूरीकृत्य स्वयमेव पूर्णस्तदा आभासरूपोऽपि मेघः धूमादिसमूहात्मा विश्वं भगवतैव कृतार्थीभूतमिति स्वयमुपचरितार्थोऽपि स्वजन्मसाफल्याय भगवन्तमेव ववर्ष तत्र यादृशेन वेणुनादेन एतद्भवति तादृशकर्त्तारं भगवन्तं वर्णयति विशेषणचतुष्टयेन अन्यथा उपरम्भणमर्थवादरूपं स्यात् तत्र क्रियाशक्तिः सम्पूर्णेति वक्तुं सहबलो बलभद्रसहित इत्युक्तं सृष्टिकरणक्रियापेक्षयापीयम्महती क्रियेति ज्ञापयितुं स्रग्रूपो योऽयमवतंसः कर्णाभरणं तत्र विलासो यस्येति लीला निरूपिता मालाकीर्त्तिमयी दश दिशः श्रोत्रं कीर्तिर्दिक्षु पूरिता यया सा भवत्येव सर्वोत्तमा भगवत्कीर्तिप्रतिपादकं वा भागवतादिशास्त्रं सर्ववेदेष्वाभरणरूप तत्र विलासयुक्ता तत्प्रतिपादिका च एवं क्रियायाः स्वरूपतो गुणतश्च माहात्म्यं निरूपितं तस्याः सहकारिण्या इच्छाया माहात्म्यमाह स्वयञ्जातहर्षः सर्वमेव च हर्षयन्निति एवं वेणुनादस्य कारणभूतक्रियोत्कर्षमुक्त्वा देशतोऽप्युत्कर्षमाह। क्षितिभृतः सानुष्विति। सर्वाधारभूता पृथिवीं ये बिभ्रति तेषामप्युच्चस्थानेषु स नादो जायते कथन्न विश्वं पूरयेत् रवः अनुरणनमतिगम्भीरम् उपरम्भति नादेन पूरयतीति मेघादप्यधिकक्रिया निरूपिता तदैव मेघः महतो वासुदेवस्य उपरिगच्छन् भगवदतिक्रमणे शङ्कितचित्तो भूत्वा उपर्येव तिष्ठन् अग्रे गमनार्थमुद्यतः नीलमेघश्याम विश्वजीवनं भगवन्तं स्वमित्रं ज्ञात्वा सुहृदमवर्षत् सुमनोभिः पुष्परूपैः स्वबिन्दुभिः अर्थात् पुष्पैः पूजितवान् न केवलं पूजामेव कृतवान् किन्तु राज्यमपि दत्तवानित्याह। आतपत्रन्दधदिति। न केवलं राज्यमेव दत्तवान् किन्त्वात्मनिवेदनमपि कृतवानित्याह। छाययेति सूर्येः अधः स्थिते उपरि स्थितेन न छाया भवतीति पृथक् छायानिर्देशः॥ १२–१३ ॥

श्रीसुबोधिनी–सारः

हे व्रजदेव्यः सहबलः सरामः स्रग्भिर्मालाकारैरवतंसः कर्णभूषणैर्विलासो यस्य स क्षितिभृतः पर्वतस्य सानुषु जातहर्षो वेणुशब्देन विश्वं हर्षयन् यर्हि उपरम्भति क्रीडति॥ १२॥ तदा महतः श्रीकृष्णस्यातिक्रमणेऽतिवर्तने शंकितं चेतो यस्य मेघो मन्दमन्दमनुगर्जति सुहृदं कृष्णं सुमनोभिः पुष्पैरभ्यवर्षत् छायया प्रतपादातपात्त्रायत इति प्रतपत्रं छत्रं च विदधत् कुर्वन्॥ १३ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

विदधत्प्रतपत्रमित्यस्याभासे, किन्तु राज्यमपीति। सुरभीकृतगोविन्दाभिषेकवदस्यापि स्वाधिपतित्वेनैव वरणमिति तथोक्तम्॥ १३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'मेघोऽपि कृष्णं सेवते' इत्याहुः–सहबल इति। भो व्रजदेव्यो गोप्यः! स्रग्भिर्निर्मिताभ्यां अवतंसाभ्यां कर्णभूषणाभ्यां विलासः शोभातिशयो यस्य सः, सहबलः बलेन सहितः, क्षितिभृतः गोवर्धनगिरेः सानुषु तटेषु वर्तमानः, स्वयं जातहर्षः श्रीकृष्णो

यर्हि यदा विश्वं हर्षयन् वेणुरवेण उपरम्भति निनादयति नादेनापूरयति ॥ १२ ॥ तदा महतः ब्रह्मादिपूज्यस्य कृष्णस्यातिक्रमणे शङ्कित चेतो यस्य स मेघस्तदुपरि न याति न चोच्चैर्गर्जति, किंतु तत्रैव स्थितः सन् वेणुरवमनु मन्दं मन्दं गर्जति । किंच विश्वतापनिवर्तकत्वश्यामत्वादिसाम्यात् सुहृदं सखायं श्रीकृष्ण स्वच्छायया प्रतपत्रं प्रतपात् आतपात् त्रायत इति प्रतपत्रं छत्रं विदधत् कुर्वन् सुमनोभिरभ्यवर्षत् । अदृश्यैर्देवैः क्रियमाणकुसुमवर्षमेव कल्पयित्वेदमुक्तम् ॥ १३ ॥

अन्वितार्थप्रकाशिका

अथ मध्याह्नवृत्तमाह—सहबल इति ॥ भो व्रजदेव्यो गोप्यः ! स्रग्भिर्निर्मिताभ्याम् अवतंसाभ्यां कर्णभूषणाभ्यां विलासः शोभातिशयो यस्य सः सहबलः बलेन सहितः क्षितिभृतः गोवर्धनगिरेः सानुषु प्रस्थाख्येषु समभूभागेषु वर्तमानः स्वयं जातहर्षः श्रीकृष्णो यर्हि यदा विश्वं हर्षयन् वेणुरवेण उपरम्भति निनादयति नादेनापूरयति । तङ्भाव आर्षः ॥ १२ ॥ तदा महतः ब्रह्मादिपूज्यस्य कृष्णस्यातिक्रमणे शङ्कितं चेतो यस्य स मेघस्तदुपरि न अतियाति न पुरतो याति न चोच्चैर्गर्जति । किंतु तत्रैव स्थितः सन् वेणुरवमनु मन्दं मन्दं गर्जति । किञ्च । विश्वतापनिवर्तकत्वश्यामत्वादिसाम्यात् सुहृदं सखायं श्रीकृष्णं स्वच्छायया प्रतपत्रं प्रतपात् आतपात् त्रायत इति प्रतपत्रं छत्रं विदधत् कुर्वन् सुमनोभिरभ्यवर्षत् अदृश्यैर्देवैः क्रियमाणकुसुमवर्षमेव कल्पयित्वेदमुक्तम् । विरलजलवृष्टिर्वा कुसुमतया कल्पिता मेघ एव देवरूपो वा कुसुमान्यभ्यवर्षत् ॥ १३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यु० ५ ॥ जीमूतोऽपि तमुपास्ते इत्यूचुः सहेति हे व्रजदेव्यः हरेर्भक्तत्वेन द्योतमानाः सरामः स्रग्भि; पुष्पमुक्ताफलादीनां हारैः अवतंसैः पुष्पमुक्तादीनां शेखरैः अवतंसाभ्यां कर्णाभरणाभ्यां वा विलासः शोभयस्यानुवत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे इति कोशात् क्षितिभृतो गोवर्द्धनगिरेः सानुषु शिखरेषु स्थितः स्वयंजातहर्षः वेणुरवेण विश्वं हर्षयन् यर्हि उपरम्भति वेणुं वादयति ।१२। तर्हि तच्छ्रवणेन जातहर्षे मेघोऽपि उच्चैर्गर्जितुमिच्छन्नपि महतः श्रेष्ठस्यातिक्रमणं स्वगर्जितेन तच्छब्दस्य गौणीकरणं तस्मिन् शंकितं संजातशंकं चेतो यस्य एवंभूतः सन् मंदं मंदं शनैः शनैर्मधुरवंशी नादमनुसृत्य गर्ज्जति पुनः किं छायया प्रतपत्रं छत्रं विदधत् सन् सुमनोभिः पुष्पसदृशबिंदुभिः । यद्वा मेघस्था दृश्यदेवसमूहः सुमनोभिः पुष्पैः सुहृदं जनदुःखहरणस्वभावतया श्यामवर्णतया च अगोचरकर्मतया च सुहृच्छ्रीकृष्णम्तं अभ्यवर्षत् ववर्ष प्रतपादातपात्त्रायत इति प्रतपत्रम् ॥ १३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मेघोऽपि हरिमुपास्ते इत्याहुः ॥ सहबल इति ॥ हे व्रजदेव्यो गोप्यः, सहबलः सरामः, स्रग्भिर्निर्मिताभ्यामवतंसाभ्यां कर्णभूषणाभ्यां विलासो यस्य सः, यद्वा मुक्ताफलस्रगापीडेन विलासो यस्य सः, यद्वा स्रजा पुष्पमालया अवतंसेन कर्णोत्पलेन च विलासः कान्तिविशेषो यस्य सः, यद्वा स्रगवतंसयोर्विलासो यस्य सः, आत्मशोभाजनकत्वेन धृतयोः स्रगवतंसयोः शोभाजनक इति भावः । क्षितिभृतो गोवर्द्धनगिरेः, सानुषु तटेषु, वर्त्तमानः स्वयं जातहर्षः हर्षयन् विश्वमिति शेषः । पाठान्तरे व्रजदेवीर्व्रजाङ्गनाः हर्षयन् , कृष्णः यर्हि यदा, वेणुरवेण, उपरम्भितं विश्वं येन सः, अनुरक्तलोक इत्यर्थः । भवति । पाठान्तरे विश्वं, उपरम्भति निनादयति । नादेन पूरयतीत्यर्थः ॥ १२ ॥ महदिति ॥ तदा, तस्य स्वतुल्यकान्तित्वेन विश्वार्त्तिहरणादिता च साम्यात्सुहृदिति शेषः । मेघः, महतः श्रीकृष्णस्यातिक्रमेण शङ्कितं चेतो यस्य सः, उच्चैर्गर्जनेन महतः श्रीहरेः कर्णबाधिर्यजनकतया त्वतिक्रमणं स्यादिति शङ्कितमनाः सन् इत्यर्थः । मन्दं मन्दं यथा तथा, अनु वेणुनादमनुकृत्य, गर्जति शङ्कितमानसः सन् पुरतो न याति न चोच्चैर्गर्जति, किं तु तत्रैव स्थित्वा वेणुरवमनु मन्दं मन्दं गर्जतीत्यर्थः । सुहृद श्रीकृष्णं, सुमनोभिः पुष्पैः, अभ्यवर्षत् । अभिवर्षति । अदृश्यैर्देवैः क्रियमाणं कुसुमवर्षणं मेघे कल्पयित्वोक्तं, तुषारो वा कुसुमतया कल्पितः । छायया प्रतपादातपात्त्रायते तत् प्रतपत्रमातपत्रं च, विदधत् विदधाति ॥ १३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सह बल इति : १०.३५.१२.

यदा समुदमुद्वहन् शिरसि सञ्चरन् भूभृतः प्रमोदयति गोपिका व्रजगताः स्वगीतस्वरैः ।
उपैति भयमन्तरे बहुमला हि मेघस्थितिस्तदेति कविवद्वचः सफलमास तासामपि ॥ २६ ॥
या अतीन्द्रियतया लताश्रया एषा तासु वनदेवतास्वहो । हर्षदो भवति सर्वदा पदस्वर्चिकास्विह कुतोऽयमीदृशः ॥ २७ ॥

महदिति : १०.३५.१३.

आम्नायसिद्धमेवालि सख्यं जीवपरेशयोः । तन्मेघसुमनोदानग्रहणे साधुनी मिथः ॥ २८ ॥
सर्वदा त्वमसि मत्पदे स्थितो मत्पुरः कथमिहाब्द गर्जसि । नैवमेतु हृदये हरेरितिच्छत्रभावमुररीचकार सः ॥ २९ ॥

कृष्णप्रिया

अयि व्रजदेवियाँ ? देखो तो सही, कुसुम कलियाँ के वने कर्णाभरण और मालाओं से विलसित वनमाली जी अपने बड़े भया श्रीबलदाऊ जी के साथ धराधर गिरिवरों के शिखरों में विचरते हुए जातहर्ष श्रीहरि वेणुनाद से अखिल ब्रह्माण्ड को हर्षपूर्ण करते हैं तब परम विवेकी और श्यामसखा यह श्यामल मेघ महत् पुरुषों के अतिक्रमण के भय से संशय से आगे नहीं बढता है और उच्चस्वर से गर्जना करता है किन्तु वेणुनाद के अनुरूप मन्द मन्द गर्जना करता है पुनः अपने प्रिय सुहृद–श्रीकृष्ण बलभद्र जी और ग्वालबाल एवं गोवृन्द पर अपने अङ्ग से छत्र बनकर शीतल सीकरों की कुसुमवर्षा करते हुए सेवा कर रहा है ॥ १२–१३ ॥

विविधगोपचरणेषु विदग्धो वेणुवाद्य [1]उरुधा निजशिक्षाः ।
तव सुतः सति यदाधरबिम्बे दत्तवेणुरनयत् स्वरजातीः ॥ १४ ॥
[2]सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ।
कवय आनतकन्धरचित्ताः[3] कश्मलं ययुरनिश्चिततत्त्वाः ॥ १५ ॥

कर्दमक्षमा

अन्वयः—हे सति यशोदे, विविध, गोपचरणेषु, विदग्धः, तव, सुतः, यदा, अधरबिम्बे, दत्तवेणुः, वेणुवाद्ये, उरुधा, निजशिक्षाः, स्वरजातीः, अनयत , तदा, शक्र, शर्वपरमेष्ठि, पुरोगाः, सवनशः, सुरेशाः, तत् , उपधार्य, कवयः, (अपि) अनिश्चिततत्त्वाः, आनतकन्धरचित्ताः, कश्मलम् , ययुः ॥ १४–१५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च महदेतदाश्चर्यमित्याहुः । विविधेति । हे सति यशोदे तव सुतो नानागोपक्रीडासु विदग्धो निपुणो वेणुवाद्ये विषये निजैव शिक्षा यासु ताः । स्वोत्प्रेक्षिता न त्वन्यतः श्रुताः इत्यर्थः । स्वरजातीर्निषादर्षभादिस्वरालापभेदाननयदुन्नीतवान् ॥ १४ ॥ तत्ताः स्वरजातीः सवनशो मन्द्रमध्यमतारभेदेन यतो गीतध्वनिरागतस्ततश्चानता कन्धरा चित्तं च येषां ते उपधार्य समाकर्ण्य कवयः कोविदा अपि न निश्चितं तत्त्वं तद्भेदो यैस्ते कश्मलं मोहं ययुरिति ॥ १५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अपि च अन्यच्च । स्वेनैवोत्प्रेक्षिताः कल्पिताः । इत्यर्थ इति—एतस्यैव सर्वशास्त्रयोनित्वम् । "शास्त्रयोनित्वात्" इति न्यायात् । यद्वा–विविधानां गवां गीतशब्दाना पतयो गन्धर्वास्तेषां चरणेषु गीतगतिषु विदग्धः समर्थः । यद्वा—विविधानां स्वस्वजातिस्वभावचेष्टासु नानाविधानां गोपानां चरणेषु कर्मसु विदग्धः कुशलः । यद्वा—विविधो गोपो रक्षणं तस्य चरणेषु तत्तदापद्रक्षणविधिषु विदग्ध इत्यर्थः (१४) मन्द्रो गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु" इत्यमरः । यता यत्र । ततस्तत्र । कोविदा अपि गानपारज्ञा अपि । तद्भेदो गानभेदः । कस्मिन्स्वरे को रागो भैरवश्रीरागहिंदोलमालकौशिकमेघमल्लारदीपकादिष्वन्यतमः । का वा शाबरीगुर्जरीललितठोदीगन्धाविलावलसिंधुजयवन्तीगौरी कल्याणकर्णाटपर्जदेशसोरठशोणीविहागादिष्वन्यतमा गीयत इति । तत्तत्त्वं न विदुः अपूर्वगानश्रवणात्तन्निश्चयं कर्तुं न शेकुरिति भावः ॥ अथापराह्णे काश्चन गोप्य आगमिष्यतः स्वप्रेयसश्चिरदर्शनासिद्ध्यर्थं विचारितयुक्तयः केनचिन्मिषेण व्रजेश्वरीसदनं गतास्तत्र च विविधवृद्धायुवतिबालिकाभिः संभूय विस्तार्यमाणाः स्वसुतगुणकर्मप्रभावकथाः शृण्वन्तीं स्वयञ्च कथयन्तीं सुतविरहविह्वला तां स्वस्वमनश्च समाश्वासयितुं तां सम्बोध्य वेणुगानगुणप्रभावं वर्णयन्ति–विविधेति । हे सति श्रीयशोदे विविधं गोपानां चरणान्याचरणानि गवां कालतो दोहनवशीकरणादीनि तेषु विदग्धस्तव सुतः अधरबिम्बे दत्तवेणुः सन् यदा स्वराणां षड्जादीनां जातीरष्टादशमुख्याः अन्याः सहस्रशो वा नयत् उन्नीतवान् । कीदृशीः—वेणुवाद्यविषये उरुधा बहुप्रकारा निजात्स्वस्मादेव न तु परस्मात्कस्माच्चिदपि शिक्षा यासु ताः ॥ सवनशः समये समये तत्स्वरजात्युन्नयनमुपधार्य शक्रशर्वपरमेष्ठिनः पुरोगा मुख्या येषां ते शक्रोपेन्द्राग्नियमादयः शर्वकात्यायनीस्कन्दगणेशादयः ब्रह्मचतुःसननारदादयश्च कवयो गानतालादिसृष्टिकर्तारोऽपि आनता कन्धराश्चित्तानि च येषामिति गानमाधुर्यस्वादानुभावः न निश्चितं रागस्य तालस्य तानस्वरादीनां च तत्त्वं स्वरूपं यैस्ते । ततश्चाज्ञानाद्वेणुमाधुर्याच्च मोहं प्रापुः । अहो जगदीश्वरा यत्र मुमुहुस्तत्र जगदीशितव्यानामन्येषां मोहे को विचार इति । आर्य जगन्मोहनोऽयं तव सुतोऽभूदिति भावः ॥ १४–१५ ॥

---

१. मधुरं–विज. । २. सुमनसः–विज । ३. गात्राः–बिज. ।

श्रीमज्जीवगोस्वामिकृत वैष्णवतोषिणी

एवमेकान्तगोष्ठीं संगृह्य श्रीगोष्ठेश्वरी गोष्ठीगतापि गोष्ठी तल्लीलाक्रमप्राप्ततया संगृह्यते । तत्रापि विविधप्रकारविशेषेण तत् कथामेव ताः कुर्बन्तीति विवक्षया तत्रोत्क्रान्ते मध्याह्ने स्वपुत्रागमनविलम्बाशङ्कया तां खिद्यमानां तद्विलम्बहेतूपन्यासपूर्वकमगोपनीयरसनिबन्धेन निखिलपरमाश्चर्यवैदग्धीमयतत्क्रीडाभिनिवेशवर्णनेन प्रोत्साहयन्त्यः सान्त्वयन्ति । निगूढन्तु स्वासामपि झटिति तदागमनेच्छया तद्द्वारा तदभिनिवेशं वारयितुमभिप्रयन्ति साधारणजनवत् स्पष्टं तद्वार्त्ताकथनेन निजभावगूहनमपि कुर्वन्ति । विविधेति । विविधगोपाचरणेषु विदग्ध इति । इति सामान्यतस्तैरेव सर्वमनोहर इत्यर्थः । तत्र चाधरविम्बे दत्तवेणुस्तेनातिविराजमानः सन्नित्यर्थः । यदा विश्वहर्षणादिसमये स्वरजातीरुत्थापितवान् तत्रापि वेण्वित्यादि लक्षणाः उरुधा निजैव शिक्षा यासु ताः तादृशीश्च ताः वेणुवाद्य इति पार्ष्णिकोऽन्वयः । अन्योऽन्यस्वरादावपि निजशिक्षामयत्वे वेणुवाद्यत्वाधिक्यमिति दर्शितम् । यद्वा स्वरजातीः कथम्भूताः निजशिक्षाः । पुनः कथम्भूताः वेणुवाद्य उरुधा तत्र तु नाना प्रकाराः । तत्रापि पूर्ववत् । हे सति ! जगत्पूज्ये अतस्त्वत्सुतस्यापि तादृशत्वं युक्तमेवेति भावः । उपधार्य श्रुत्वेति स्वस्वस्थानादेव श्रवणं लभ्यते । ततश्च तस्य फलरूपत्वेऽपि सर्वव्यापकत्वं बोधिते तथैव निजशिक्षाविशेषात् सुरेशा गन्धर्वादिद्वारा गीतादिश्रवणसम्पत्तिमन्तोऽपि स्वयं कवयोऽपि शक्रपुरोगास्तत्सहितलोकपालादयो देवजातयः शर्वपुरोगास्तत्सहितदेवीस्कन्दगणेशादयस्तद्गणाः परमेष्ठिपुरोगास्तत्सहितचतुःसननारदसप्तर्षिप्रजापतिगणादयः । क्रमस्तु शक्रादीनां बहिरिन्द्रियेण प्रथमत एव तच्छ्रवणात् । शर्वस्य कैळासस्थत्वेऽप्यन्तर्निष्ठत्वेतदनन्तरमेव । परमेष्ठिनस्तु दविष्ठत्वेन नदनन्तरमेवेति । चित्तस्य आनतत्वं तत्श्रवणत्वमेकस्य स्वरस्यायं प्रभेदो गीयते इति निश्चयाभावात् । वेणुनादमाधुर्याच्च कश्मलं ययुः । अन्यत्तैः । अथवा स्वरान् जातीश्च सवनशः अनुकालं बारम्बारमपि श्रुत्वेत्यर्थः । यद्वा न निश्चितं तत्त्वं किमद्भुतमाधुरीमयमिदं किम्वा अन्यः परमचमत्कारकारी तावदपूर्वः कर्णग्राह्यः कोऽपि विषयः । किम्वा महामोहनः कोऽप्येष मन्त्र उल्लसतीति वेणुगीतस्य याथार्थ्यं यैः तथाभूताः सन्तः पश्चात् कश्मलं ययुः तदेकलीनचित्तत्वात् सर्वं विसस्मरुरित्यर्थः । अन्यत् समानम् ॥ १४-१५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं प्रगायन्त्योऽकस्मात्तत्रागतां तां श्रीव्रजेश्वरीं किंवा ईदृशप्रगानेन तस्याः सर्व्वातिशायितां मनसि कृत्वा सम्बोध्य गोप्य उत्कर्षं वर्णयन्त्यः सर्व्वसम्पत्तिमतां परमाभिज्ञानामपि श्रीब्रह्मादीनामपूर्व्वानुभूतेन गोपक्रीडाविशेषेण वेणुवाद्येन च मोहमाहुः,—विविधेति युगलेन; विविधानि गोपानां चरणान्याचरणानि क्रीडास्तेषु विदग्धः, अतोऽधरबिम्बे दत्तवेणुः सन् यदा स्वरजातीरनयत्, गोपानामेव वेणुवादनेन रसिकत्वात्; तत्रापि गोपचूडामणित्वेन निजशिक्षा असाधारणतया स्वयमेव प्रवर्त्तिता इत्यर्थः । तद्वेणुवादनं च गोपक्रीडावैदग्ध्या कदाचित् कृतं किंवा मध्याह्ने विश्वहर्षणार्थं विश्वपरिपूरक यत् कृतमिति, अधरबिम्बे दत्तेतानेन तत्परममधुरत्वं मोहनत्वञ्च ध्वनितम्; अत्र मातरं प्रति पुत्रोत्कर्षवर्णने निजभावं संगोप्य तत्सन्तोषार्थमिव बिम्बेति रूपकं प्रयुक्तम् । हे सति ! जगत्पूज्ये ! अतस्तत्सुतस्य तादृशत्वं युक्तमेवेति भावः । उपधार्य्य स्वस्वस्थान एव स्थित्वाकर्ण्य, सुरेशा इति गन्धर्व्वादिद्वारा गीतादिसम्पत्तिदर्शिता, शक्रादीनां त्रयाणां सुरेशत्वादौ यथोत्तरं श्रैष्ठ्यम् । तत्र शर्व्वादपि परमेष्ठिनस्तज्जनकत्वात्, पुरोग शब्देन अन्ये लोकपालाः श्रीगरुडादिपार्षदा वा, चित्तस्यानतत्वं तत्प्रवणत्वम्, कश्मलं मोहं प्राप्ताः, तस्य स्वरस्यायं प्रभेदो गीयत इति निश्चयाभावात्, किंवा मोहनवेणुनादस्वभावादेव । अन्यत्तैर्व्याख्यातम् । यद्वा, वेणुवाद्ये उरुधास्वरजातीरनयदित्यन्वयः । कथम् ? अधरबिम्बे दत्तवेणुः सन्, सवनशोऽनुकालमुपधार्य्य तदन्तिकमागत्य श्रुत्वेत्यर्थः । तादृशयुक्तिस्तासां तत्तद्दर्शनादिसम्भावनया तस्यां श्रीव्रजेश्वर्याविश्वासात्, सुरेशा इति सर्व्वज्ञानविभूत्यादिमत्त्वमुक्तम्, कवयश्च योगीश्वराः श्रीसनकादयः, आनतकन्धरचित्ता इति स्वस्वस्थानादागत्य श्रीकृष्णं दृष्ट्वा तं प्राग्भक्त्या प्रणतवन्तः सन्त इत्यर्थः । यद्वा, न निश्चितं चित्ते दृढतया धर्त्तुं न शक्तं तत्त्वमात्मस्वरूपादिकं यैः, मोहनवेणुवाद्येन हृतचित्तत्वात् । यद्वा, न निश्चितं ब्रह्मैव तत्त्वं किंवा वेणुवाद्यमेवैतत्तत्त्वमिति न निर्णेतुं शक्तं यैः, वेणुवाद्यस्य तादृशपरमानन्दरसमयत्वात्, किंवा ब्रह्मानन्दादपि वेणुवाद्यस्य माहात्म्येन तद्विस्मारणात् । यद्वा, न निश्चितं तत्त्वं किम्भूत-माधुरीमयं शुषिरगीतमिदम्, किंवा अन्यः परमचमत्कारकारी तावदपूर्व्वः कर्णग्राह्यः कोऽपि विषयः, किंवा महामोहनः कोऽप्येष मन्त्र उल्लसतीति वेणुगीतस्य याथार्थ्यं यैस्तथाभूताः सन्तः पश्चात् कश्मलं ययुः, तदेकलीनचित्तत्वात् सर्व्वं विसस्मरुरित्यर्थः । अन्यत् समानम् ॥ १४-१५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ब्रह्मादीनामपि पारवश्यजनकं त्वत्सुतवेणुरवमिति यशोदां प्रत्याहुः । विविधेति । हेसति ! यशोदे यदा तव सुतो गोपक्रीडासु निपुणः अधरबिम्बे बिम्बतुल्येऽधरे निहितो वेणुर्येन सः वेणुवाद्यविषये बहुप्रकारा निजैव शिक्षा यासु ताः नत्वन्यतः श्रुता इत्यर्थः । स्वश्जातीर्निषादर्षभादिस्वरालापभेदाननयदुन्नीतवान् ॥ १४ ॥ तदा शक्रप्रभृतयः तत्ताः स्वरजातीः सवनशः वारं वारं मन्द्रमध्यतारभेदेन वा क्रमशो वा यतो गीतध्वनिरागतस्तत अनता कन्धरा चित्तं च येषां ते उपधार्य सम्यगाकर्ण्य कवयः कोविदा अप्यनिश्चितं तत्त्वं तद्भेदो यैस्तथाभूताः कश्मलं मोहं प्रापुः इत्याश्चर्यम् ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हे सति यशोदे विविधानां गवां गीतशब्दानां पतयः गन्धर्वाः तेषां चरणेषु गीतगतिषु विदग्धः समर्थः । यद्वा विविधानां स्वस्वजाति स्वभावचेष्टासु नानाविधानां गोपानां चरणेषु कर्मसु विदग्धः कुशलः । यद्वा विविधो गोपो रक्षणं तस्य चरणेषु तत्तदापद्रक्षणविधिषु इत्यर्थः । अधरबिम्बे दत्तवेणुः अधरोष्ठबिम्बफले न्यस्तवेणुः तव सुतः यदा वेणुवाद्यमधुरां वेणुलक्षणवाद्ये कर्णसुखहेतुं निजशिक्षामात्मीयगानशिक्षां प्रति स्वरजातीः षड्जादिस्वरसामान्यमनयत्प्रापयामास ॥ १४ ॥ तदा सुमनसो देवाङ्गनाः सुरेश्वराश्च गीतविषये कश्मलं मोहं ययुरित्यन्वयः । कीदृशाः आनतकन्धरगात्राः ईषन्नतकण्ठदेहावयवाः कवयः गानपारज्ञा निश्चिता अप्यनिश्चिततत्त्वाः अभूतपूर्वगीतश्रवणात् गीततत्त्वनिश्चयरहिताः किं कृत्वा तद्गानमुपधार्य तात्पर्येण श्रुतिं निधाय ॥१५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवमेकान्तगोष्ठीं संगृह्य गोष्ठे श्रीगोष्ठेश्वरी गोष्ठीगतापि तल्लीलाक्रमप्राप्ततया संगृह्यते तत्रापि विशेषेण तत्कथामेव ताः कुर्वन्तीति विवक्षया । तत्रोत्क्रान्ते मध्याह्ने पुत्रागमनविलम्बशङ्कया तां खिद्यमानां तद्विलम्बहेतूपन्यासपूर्वकगोपनीयरसनिबद्धेन निखिलपरमाश्चर्य वैदग्धीमयतत्क्रीडाभिनिवेशवर्णनेन प्रोत्साहयन्त्यः सान्त्वयन्ति । विविधेति युगलेन । उपधार्य श्रुत्वेति कलरूपस्यापि तस्य सर्वव्यापकत्वं बोधितम् । तथैव निजशिक्षाविशेषात् ॥ १४-१५ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

आधूलिखेलनपरिचयविसाध्वसाभिर्भवतीभिरेव नानाकलाकौशलधुरन्धराभिः कौतुकवशान्नानाविधेषु यमुनापारावारकरण-दधिभारवहनादि-नानाचपल चेष्टा-ग्राहणेन मम तनयो नित्यमेव तरलीक्रियत इति श्री व्रजेश्वर्या बहुशः प्रागाक्षिप्ताः काश्चित् सम्प्रति विप्रलम्भ-दशायामुन्मादमापन्नास्तामेव पुरस्थितामेव जानन्त्य आहुः—विविध गोपचरणेष्वित्यादि द्वाभ्याम् । हे सति ! शुद्धे अकुटिले व्रजेश्वरि ! तव सुतः विविधगोपचरणेषु गोपक्रीडासु विदग्धः स्वयमेव निपुणः, न केनाप्यसौ शिक्षितः । अथवा, गोपो ग्रामेषु भूरिषु, बहुग्रामाधिकारी गोपः, स यथा क्वचिद्वर्त्मनि सलिले च पारावारे घट्टपालादि चेष्टां कुर्वन् परोपद्रवं करोति, तथायमपि गव्यादिषु दानक्रियां कुर्वन्नस्मान् कदर्थयति । अतोऽयं तथाविधेषु गोपचरणेषु स्वयमेव विदग्ध इत्यर्थः । तत्र वेणुनाद एव प्रमाणम् । यथा वेणुवाद्ये विदग्धः स्वयमुरुधा बहुप्रकारा निजात्मीया शिक्षा यासु ताः स्वरजाीः, न तु कस्यापि तत्रोपदेशः । स्वरजातीः स्वराणां षड्जादीनां जातीरान्ध्री प्रभृतीरनयत् नयति, वर्तमानेऽतीत-विवक्षायां कालविपरिणामः । तदा कवयः सङ्गीतकर्तारो ब्रह्मादयोऽप्यनिश्चिततत्त्वाः सन्तः कश्मलं मोहं ययुः, किमिदमिति तत्त्वं न ज्ञातवन्तः । य एवं वेणुवाद्ये निजशिक्षां प्रकटयति, तस्य गोपचरणेषु विविधेषु यद् वैदग्ध्यं तत् केनोपदेष्टव्यमिति मद्विधाः प्रति वृथासूयां मा कार्षीरिति वाक्यार्थः । इति उन्मादः ॥ १४-१५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

आधुनिकक्षणपरिचय-विसाध्वसाभिर्भवतीभिरेव, नानाकौशलधुरन्धराभिः कौतुकवशान्नानाविधेषु यमुनापारवारादिकरण-दधिभारवाहनादि नानाधाष्टर्य सूचकचेष्टाग्राहणेन मम स्तनन्धयो नित्यमेव चपली क्रियते इति यशोदया प्रागाक्षिप्ताः काश्चित् सम्प्रति विप्रलम्भ-शृङ्गारस्योन्माददशायां तदेवानुस्मृत्य यशोदां पुरःस्थितामिवोद्भावयन्त्य आहुः—विविधगोपचरणेषु इत्यादि द्वाभ्याम् । हे सति शुद्धे अकुटले यशोदे ! तव सुतः खलु विविधगोपचरणेषु ग्राम्यैर्ग्राम्यैश्वर्याचरणेषु वर्त्मनि सलिले च घट्टपालादि-लीलाविलासेषु यमुना-नाविकत्वादिषु च विहारेषु ग्राम्येषु स्वयमेव विदग्धः केनापि न शिक्षितः । तत्र वेणुवादनविनोद एव प्रमाणम्, यथा वेणुवाद्ये विदग्धः तत्र स्वयं विदग्धतां प्रपञ्चयन्ति—उरुधा उरुप्रकारा निजा आत्मीया सिद्धा यासु ताः स्वरजातीः स्वराणां षड्जादीनामान्ध्री प्रभृतीर्जातीः तदा कवयः सङ्गीतकर्त्तारो मुनयोऽप्यनिश्चित-तत्त्वाः सन्तः कश्मलं ययुः, यासां स्वरजातीनां "कफादि-दूषिते कण्ठे आसां व्यक्तिर्न जायते । अतो वीणाद्वयं वक्ष्ये चलं चाचलमेव च" इति ब्रह्मणा वीणाद्वयं चक्रे । सोऽपि तन्निर्मिताः स्वरजातीः श्रुत्वा मुमोहेत्यर्थः । "गोपो ग्रामेषु भूरिषु" इति भूरि ग्रामाध्यक्षो गोपस्तस्य घट्टपालकरग्रहणादि-विविध ग्राम्यैश्वर्यचेष्टावत् तस्यापि तथाविधग्राम्यलीला उह्याः । यद्वा, गोप्यन्त इति गोपा गोपनीया इति यावत् तानि चरणानि चरितानि तासु गोप्यलीलास्वित्यर्थः ॥ १४-१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथापराह्णे काश्चन गोप्य आगमिष्यतः स्वप्रेयसश्चिरदर्शनसिद्ध्यर्थं विचारितयुक्तयः केनचिन्मिषेण व्रजेश्वरीसदनं गतास्तत्र च विविधवृद्धायुवतिबालिकाभिः सम्भूय विस्तार्यमाणाः स्वसुतगुणकर्मप्रभावकथाः शृण्वतीं स्वयञ्च कथयन्तीं सुतविरहविह्वलां तां स्वस्वमनश्च समाश्वासयितुं तां सम्बोध्य वेणुगानगुणप्रभावं वर्णयन्ति । विविधेति । हे सति ! श्रीयशोदे विविधं गोपानां

चरणान्याचरणानि गवां कालेन दोहनवशीकरणादीनि तेषु विदग्धः तव सुतः अधरविम्बे दत्तवेणुः सन् यदा स्वराणां षड्जादीनां जातीरष्टादशमुख्याः अन्याः सहस्रशो वा अनयत् उन्नीतवान्। किदृशीः वेणुवाद्यविषये उरुधा बहुप्रकारा निजात् स्वस्मादेव नतु परस्मात् कस्माच्चिदपि शिक्षा यासु ताः। सवनशः समये तत् स्वरजात्युन्नयनम् उपधार्य शक्रशर्वपरमेष्ठिनः पुरोगा मुख्या येषां ते। शक्रोपेग्नियमादयः शर्वकात्यायनी स्कन्दगणेशादयः। ब्रह्म चतुःसननारदादयश्च। कवयः गानतालादिसृष्टिकर्त्तारोऽपि। आनताः कन्धसश्चित्तानि च येषामिति गानमाधुर्यास्वादानुभावः। न निश्चितं रागस्य तालस्य तानस्य स्वरादीनाञ्च तत्त्वं स्वरूपं यैस्ते तदश्चाज्ञानाद्वेणुमाधुर्याच्च मोहं प्रापुरहो जगदीश्वरा यत्र मुमुहुस्तत्र जगदीशितव्यानामन्येषां मोहे को विचार इति आर्ये जगन्मोहनोऽयं तव सुतोऽभूदिति भावः॥ १४–१५॥

गूढार्थदीपिनी

हे सति यशोदे तव सुतः अधरे न्यस्तवेणुः सन् यदा स्वरजातीः स्वरालापभेदान् अनयत् उन्नीतवान् तदा शक्रादयः तत् ताः जातीः स्वरालापान् उपधार्य श्रुत्वा कश्मलं मोहं ययुः। सवनशः मन्द्रमध्यतारभेदेन वेणुवाद्ये उरुधा बहुप्रकारा निजैव शिक्षा यासु ता स्वरजातीः। गोपचरणेषु गोपक्रीडासु विदग्धौ निपुणः॥ १४–१५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

त्वत्सुतवेणुगीतेन ब्रह्मादयोऽपि मोहं ययुरिति श्रीयशोदां प्रति काश्चिदाहुः। विविधेति। हे सति यशोदे! तव सुतः विविधेषु गोपचरणेषु गोपविहारेषु विदग्धो निपुणः अधरबिम्बे अधरच्छद्मनैव विद्यमाने बिम्बे अरुणबिम्बाकारे ऽधरे इत्यर्थः। दत्तो निहितो वेणुर्येन सः वेणुर्येन सः वेणुवाद्यविषये निजैव शिक्षा यासु ताः स्वस्य सर्वकलाकुशलत्वात् स्वरजातीः निषादर्षभादिस्वरभेदान् यदा अनयत् उन्नीतवान् तदा तत् ताः त्वत्सुतोन्नीताः स्वरजातीः सवनशो मन्दमध्यतारभेदेन यतो गीतध्वनिरागतस्तत आनता कन्धरा चित्तं च येषां ते उपधार्य्य सम्यगाकर्ण्य कवयः बहुज्ञा अपि ते अनिश्चितं तत्त्वं भगवदुत्प्रेक्षितानां स्वरजातीनां भेदो यैस्ते कश्मलं मोहं ययुः॥ १४–१५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्र गजयात्रां काञ्चित्काचिद्यशोदां विधाय सूत्वा त्वं सुतमेतमस्मदसुहरणं कृतवत्यसि सौभाग्यवति हेति मनसा कल्पयित्वा वदतीति वक्ति॥ विविधेति। तस्याश्वस्रा एतत्कूटघटने रसाभासप्राप्तेः पाक्षिक्यामागताविल्यवददिति वेति केऽपि। सति यशोदे विविधानां गवां गीतध्वनीनां पतयो हि गन्धर्वास्ततोऽपि चरणेषूत्तरानुत्तरीकृतिषु विदग्धः कुशलो विविधानि गोपो गोपनं तदुपयुक्तानि चरणान्युपायरचनानि तेषु विदग्ध इति वेणुवाद्ये माधुर्यावहामिति वेणुमधुरतां निजशिक्षां स्वयं कल्पिता नेतरजल्पिता तां शिक्षां तव सुतो यदाऽधरबिम्बे तन्मण्डले तत्सावर्ण्याद् बिम्बफले वा दत्तः स्थापितो वेणुर्येन स सन् स्वरजातीर्निषादादिस्वरजातीश्चानयत्प्रापयत्। अजातीरतद्योग्यजातिमतीः प्रजाः स्वः स्वर्गमनयदिति वा। तदा तद्गानं सुमनसः शुद्धमानसा देव्यो या तथा सुरेशाः शक्र इन्द्रः शर्वः शिवः परमेष्ठी प्रजापतिरित्येते पुरोगा येषां ते तथा। नन्वत्र नोत्तमक्रमोऽधमक्रमः कुत इति चेत्। सत्यम्। कश्मलोपगमस्तथा तत्त्वानिश्चयश्चेतरासुरापेक्षया सहस्राक्षे तदपेक्षया त्र्यक्षे तदपेक्षया ब्रह्मणि च तरतमया वर्तत इति द्योतनायैवं वचनमित्यवेहि। स्वराकर्णनक्रम एव इत्येवमुक्तिरिति वा। हस्ताभ्यां तद्ग्रहोऽनन्तरं गानमनःकरणं तदुपरि स्वरवेदं गर्भीकृत्य सरस्वतीविलास इति वा शक्रशर्वपरमेष्ठिपुरस्कार इति कवयो गानगतिज्ञा इति कवयः प्रकृतानुकूल्यात्। एतादृशा अप्यनिश्चितं तत्त्वं स्वरस्तालोऽयमियं स्वरमूर्छना चेयं विषमेति यैस्ते तथा। अनवधानेन तथेति नेति कथयति॥ आनतकन्धरगात्रा इति। आनता कन्धरा ग्रीवा येषां तानि गात्राणि येषां तेऽप्युपधार्याकर्ण्य कश्मलं मोहं ययुः। अतो न कन्धराबाध इति ज्ञेयम्। कन्धरो वारिवाहे स्याद्ग्रीवायामपि कन्धरेति विश्वः॥ १४–१५॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

उत्तमांस्त्रिविधान् वक्तुं तेषामपि वेणुनादेन किञ्चिज्जातमिति वक्तुं वेणुनादं वर्णयन्ति भगवन्तञ्च। विविधगोपचरणेष्विति युग्मत्रयेण। सन्देहो मोहः सर्वपरित्यागश्च ज्ञानिनां श्रुतीनामरण्यवासिनां वेणुनादेन कृतः तत्र ये विश्वगुरवो ब्रह्मादयस्तेषामपि सन्देहार्थं भगवतो वेणुनादं वर्णयन्ति। विविधेति। लोके जायमानः अलौकिकप्रकारः सन्देहमुत्पादयति। ननु न तद्रूपमस्तीश्वरे यन्न वेदे श्रुतमस्तीति सर्वविद्यास्थानानां ब्रह्मा अभिज्ञ इति कथं तस्य सन्देह इत्याशङ्क्याह। वेणुवाद्य उरुधा निजशिक्षा इति। सुषिरभेदो वेणुः तस्यापि प्रकाराः शास्त्रे निरूपिताः ते ब्रह्मणा ज्ञायन्ते एते तु प्रकाराः उरुधा अनेकधा निजशिक्षाः निजेनैव शिक्षा शिक्षणमभिव्यक्तिप्रकाराः यासु अनेन नादब्रह्म नित्यमिति निरूपितं तत्र क्रियाशक्तिः साधनमिति तस्य लौकिकत्वे कथं नादः अलौकिको भविष्यतीत्याशङ्क्य तस्याप्यलौकिकत्वायाह विविधेषु गोपचरणेषु गोपानां सञ्चारविशेषेषु विदग्ध इति गोपसञ्चारा न वेदोक्ताः किन्तु लौकिकाः ब्रह्माण्डान्तरस्थिता अपि भवन्ति। न लोकेऽन्यत्र प्रसिद्धाः नापि वेदे भगवांस्तु सर्वत्रैव विदग्धः,

अतो यं ब्रह्मा प्रकारं न जानाति तमेव प्रकारं कृतवान्। ननु ब्रह्मसृष्टावाविर्भूतः कथं ब्रह्मणोऽप्यज्ञातं करोतीति चेत्तत्राहुः। तव सुत इति। यशोदां प्रति वदन्ति स्त्रीमण्डले समागतामत एवात्र न कामादिवार्त्ता किन्तु अनिषिद्ध एवोत्कर्षो निरूपितः यथा तव पुत्रोऽपि सन तव मनसाप्याकलितुमशक्यं करोति तथा ब्रह्मणोऽपि ब्रह्माण्डे जातः सतीति संबोधनं विश्वासार्थम् अज्ञाने हेतुमाहुः। अधरबिम्बे दत्तवेणुरिति। लोभात्मकोऽधर इति पूर्वमुक्तमतो न लोके प्रसिद्धः तस्य रसो भगवता न दत्त इति तत्रापि बिम्बरूपः सूर्यवत् प्रकाशकः नहि प्रकाश्याः प्रकाशकस्वरूपं विदुः। तत्र च स वेणुः स्थापितः ततोऽप्युत्तमत्वख्यापनाय स्वरजातीः षड्जादिस्वरजातिभेदाननयत् नूतनत्वेनोत्पादितवान्। यर्हि तदा तत्परिज्ञानार्थं त्रिगुणप्रधाना अपि देवाः कालत्रयेऽपि समागत्य सोऽपि काल अधिदैविक इति ख्यापयितुं सवनपदं तं वेणुनादं सवनश उपधार्य शक्रः सात्त्विकः शर्वस्तामसः परमेष्ठी राजस इति ते पुरोगमा येषां देवानां सर्व एव देवास्त्रिगुणात्मका भवन्ति कवयो निपुणा अपि नादे इन्द्रो हि त्रैलोक्याधिपतिः सर्वदा नादपरः शर्वस्तु शास्त्रकर्त्ता परमेष्ठी तयोरपि गुरुः, अतएव परमेष्ठिपदं तेषामन्यचित्तताभावायाह। आनतकन्धरचित्ता इति। आ समन्तात् नता कन्धरा बाह्याभिनयार्थं चित्तञ्च येषां ग्राहकं चित्तं नमनमत्र सर्वतः तेऽप्यनिश्चिततत्त्वा जाता नाप्यौदासीन्येन कियत्कालं विचार्य अज्ञाने तूष्णीं भूता इति मन्तव्यं यतः कश्मलं ययुः, चिन्तया मूर्च्छिताश्च जाताः वेणुनादेन वा मोहिताः। अतएव आभासत्वपक्षोऽपि निराकृतः अलौकिकरसोत्पादकत्वात्॥ १४–१५॥

श्रीसुबोधिनी–सारः

विविधासु नानाप्रकारासु गोपानां क्रीडासु विदग्धो निपुणः वेणोर्वाद्ये विषये उरुधा बहुधा शिक्षा यासु ता स्वरजातीः अधरबिम्बे दत्तो वेणुर्येन स तव सुतः श्रीकृष्णो यदाऽनयत्। हे सति यशोदे ॥१४॥ तदा तत्ताः स्वरजातीः सवनशो मन्द्रमध्यतारभेदेनोपधार्य श्रुत्वा इन्द्रशिवब्रह्मप्रधानाः सुरेशाः कवयः शुक्रादयोऽपि अनिश्चितं तत्त्वं तद्भेदरहस्यं यैस्ते आनताः कन्धरा चित्तं च येषां ते कश्मलं मोहं ययुः॥ १५॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

स्वरजातीरनयदित्यत्र, नूतनत्वेनेति। यद्यपि स्वरजातिप्रापकत्वमेव मूल उच्यते, निजशिक्षा इति विशेषणेनापूर्वत्वं च प्राप्यते, न तु नूतनोत्पत्तिः, तथाप्यन्यज्ञानमपेक्ष्येदमुक्तमिति ज्ञेयम्, अतो नादब्रह्म नित्यमिति पूर्वग्रन्थाविरोधोऽपि॥ १४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आश्चर्यान्तरमाहुः—विविधेति। हे सति यशोदे! विविधेषु गोपचरणेषु गोपक्रीडासु विदग्धो निपुणः वस्तुतः तव सुतः कृष्णः अधरबिम्बे बिम्बतुल्ये रक्ते अधरे दत्तो निहितो वेणुर्येन तथाभूतः सन् वेणुवाद्यविषये उरुधा बहुप्रकारा निजैव शिक्षा यासु ताः न त्वन्यतः शिक्षिताः स्वरजातीः निषादर्षभादिस्वरालापभेदान् यदा अनयत्॥ १४॥ तदा शक्रप्रभृतयो सुरेशाः तत्ताः स्वरजातीः सवनशो मन्द्रमध्यतारभेदेन क्रमशः यतो गीतध्वनिरागतः ततः आनता कन्धरा ग्रीवा चित्तं च येषां ते उपधार्य सम्यगाकर्ण्य कवयः अतिनिपुणा अपि ते न निश्चितं तत्त्वं तद्भेदो यैस्ते कश्मलं मोहं ययुरित्यन्वयः॥ १५॥

अन्वितार्थप्रकाशिका

अथ मध्याह्नोत्तरवृत्तं वर्णयन्त्यः यशोदासमीपं गत्वा कृष्णप्रत्यागमनवर्णनेन यशोदां प्रीणयन्त्य आहुः—विविधेति॥ हे सति यशोदे! विविधेषु गोपचरणेषु गोपक्रीडासु विदग्धो निपुणः तव सुतः कृष्णः अधरबिम्बे बिम्बतुल्ये रक्ते अधरे दत्तो निहितो वेणुर्येन तथाभूतः सन् वेणुवाद्यविषये उरुधा बहुप्रकारा निजैव शिक्षा यासु ता न त्वन्यतः शिक्षिताः स्वरजातीः निषादर्षभादिस्वरालापभेदान् मुख्यानष्टादश अन्यान्याः सहस्रशः यदा अनयत्॥ १४॥ तदा शक्रशर्वपरमेष्ठिपुरोगाः शक्रप्रभृतयो गानतानाद्याचार्या अपि सुरेशा तत् ताः स्वरजातीः सवनशः समये समये मुहुर्मुहुर्वा मन्द्रमध्यतारभेदेन क्रमशः यतो गीतध्वनिरागतस्ततः आनता कन्धरा ग्रीवा चित्तं च येषां ते उपधार्य सम्यगाकर्ण्य कवयः अतिनिपुणा अपि न निश्चितं तत्त्वं तद्भेदो यैस्ते कश्मलं मोहं ययुः॥ १५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वपुत्रागमनसमयेऽतीते सतीप्रतीक्षमाणयशोदाबोधनेन वेणुं प्रशंसन्त्यः प्राहुः विविधेति। हे सति यशोदे विविधगोपचरणेषु विविधेषु गोपानां चरणेषु रमणेषु विविधगोपरणेष्विति पावेतु रणेषु क्रीडायुद्धेषु विदग्धो निपुणः तव सुतः वेणुरूपे वाद्ये वादित्रे निजास्वकीयैव शिक्षास्वेनैव क्षिणं नान्यतो या सुताः निजशिक्षाः उरुधा नानाविधाः स्वरजातीः स्वरालापभेदान् अधरबिम्बेदत्तवेणुः सन् यर्हि अनयत् उन्निन्ये ॥१४॥ तर्हि शक्र इन्द्रश्च शर्वः शिवश्च परमेष्ठी ब्रह्मा च एते पुरोगा मुख्या येषां ते सुरेशाः देवाधिपाः कवयः निषादरुषभादिस्वरालापभेदवेदननिपुणा अपि सवनशः प्रभातादिकाले मुहुर्मुहुः तत् कृष्णकृतनानाविधस्वरजाति-

भेदवृन्द उपधार्य श्रुत्वातच्छब्दम भिमुखे आनते नम्रीकृते कन्धरा चित्तेयैस्ते तथापि अनश्चितं तत्वं तद्भेदयाथार्थ्यंयैस्तै एवंभूताः सन्तः कश्मलं मोहं ययुः प्राप्पुः ॥ १५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ब्रह्मादीनामपि पारवश्यजनकं त्वस्सुतकृतवेणुगीतमिति यशोदां प्रत्याहुः ॥ विविधेति ॥ हे सति यशोदे, विविधानां गवां गीतशब्दानां पाः पतयो गन्धर्वाः तेषां चरणेषु गीतगतिषु, विदग्धः समर्थः, यद्वा । विविधगोपचरणेषु नानाविधगोपक्रीडासु, विदग्धो निपुणः, तव सुतः श्रीकृष्णः, यदा अधरबिम्बे बिम्बतुल्ये अधरे इत्यर्थः । दत्तो निहितो वेणुर्येन तथाभूतः सन् , वेणुवाद्ये विषये, उरुधा बहुप्रकाराः, निजैव शिक्षा यासु ताः स्वोत्प्रेक्षिता न त्वन्यतः श्रुता इत्यर्थः । स्वरजातीः निषादर्षभादिस्वरालापभेदान् , अनयदुन्नीतवान् ॥ १४ ॥ सवनश इति ॥ तदा शक्र इन्द्रश्च शर्वो रुद्रश्च परमेष्ठी ब्रह्मा च ते पुरोगाः प्रभृतयो येषां ते, सुरेशा देवाः, तत्ताः स्वरजातीः, सवनशो वारं वारं, मन्द्रमध्यमतारभेदेन वा क्रमशो वा, आनता यतो गीतध्वनिरागतस्ततो नम्रा कन्धरा गीवा चित्तं च येषां ते तथाभूताः सन्तः, उपधार्य सम्यगाकर्ण्य, कवयः कोविदा अपि, न निश्चितं तत्त्वं तद्भेदो यैस्तथाभूताः भूत्वा, कश्मलं मोहं, ययुः संप्रापुः, इत्याश्चर्यम् ॥ १५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विविधेति : १०.३५.१४.

नानाजीवविहारचारुचरितः श्रीशो यदा कौतुकात् तत्तज्जात्यभिमानशाल्यभिनयान्व्यक्तीकरोत्यञ्जसा ।
तत्सत्तात्त्विकरूपनिर्णयविधौ संभ्रान्तचित्तास्तदा ब्रह्माद्याः कवयोऽपि तत्र सुखदे का वा यशोदे वयम् ॥ ३० ॥
यद्वेणुवादनलसत्-स्वरजातिभेदं ज्ञातुं चतुःश्रुतिमुखोऽपि न चालमास ।
तत्राबलाः समपकृष्टमनःस्वभावाः का वेत्ति पश्य तव पुत्र महत्त्वमेतत् ॥ ३१ ॥
यदस्मान्व्यत्यस्ताभरणवसनस्रग्विलसिताः समालोक्यानल्पं वदसि बत मूर्खा इति मुहुः ।
इदं मत्पुत्रस्याद्भुतकृतिफलं वेत्सि न जनेऽथवा सिद्धं ह्येतज्जनयितृमुदे स्वात्मजकृतिः ॥ ३२ ॥

सवनश इति : १०.३५.१५.

बाले मदीयतनुजे किमहो समग्रा आरोपयन्ति वितथार्थमनल्पशब्दैः ।
नैवं वदाम्ब पथि गोगणसंवृतं यं वृद्धाः पितामहमुखा अपि संनमन्ति ॥ ३३ ॥
विधि-शिवादि-सुरेशविमोहकं भवति गीतमियं बत मानुषी । समवधार्य तदेत्यखिला अपि तदलमूचुरशङ्कतया सतीम् ॥ ३४ ॥

कृष्णप्रिया

हे सति ! यशोदा मैया ? आपका सुकुमार कुमार गोपजाति की विविध प्रकार की क्रीडाओं में एवं गोचारण क्रियाओं में अत्यन्त निपुण है, वह नन्दकुमार रविकिरण समान अरुण कान्तिवाले अधर पर वेणु जी को पधारकर अपना स्वतन्त्र एवं नवीन प्रकट की हुई विविध प्रकार की गीत जातियाँ को प्रकट करते हैं—तब स्वर निष्णात इन्द्र जी शिव जी ब्रह्माजी आदि सर्व सुरवरो उस स्वर गान का स्वरूप को जाति को न समझने पर आश्चर्य चकित होकर स्वर जाति के ज्ञान के लिए गर्दन झुकाकर और चित्त लगाकर सुन रहे है । हे माँ ! ये सब देववर इस दिव्यगान के स्वरूप-भेद-जाति को समझने से जिज्ञासु एवं मुग्ध बन बैठे है ॥ १४–१५ ॥

निजपदाब्जदलैर्ध्वजवज्र[1]नीरजाङ्कुशविचित्रललामैः ।
व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः ॥ १६ ॥
व्रजति[2] तेन वयं सविलासवीक्षणार्पितमनोभववेगाः ।
[3]कुजगतिं गमिता न विदामः कश्मलेन [4]कबरं वसनं वा ॥ १७ ॥

कवमक्षम।

अन्वयः—ध्वजवज्रनीरजाङ्कुशविचित्रललामैः, निजपदाब्जदलैः, व्रजभुवः, खुरतोदम् , शमयन् , वर्ष्मधुर्यगतिः, ईडितवेणुः, व्रजति, (तदा), तेन, सविलासवीक्षणार्पितमनोभववेगाः, कुजगतिम् , गमिताः, वयम् , कश्मलेन, कबरम् , वा, वसनम् , न, विदामः ॥ १६–१७ ॥

---

१. धरैन्–इति कस्यचित् च. पु. टी. । २. व्रजमितेन–विज. । ३. व्रज–विज. । ४. कबरीं–च. पु. टी. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्माकं तु मोहं किं ब्रूम इत्याहुः। निजपदाब्जदलैरिति। ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैर्निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं खुराक्रमणव्यथां शमयन्वर्ष्मणा देहेन धुर्यो गजस्तद्वद्गतिर्यस्य स कृष्णो वादितवेणुः सन्यद्व्रजति ॥ १६ ॥ तेन निमित्तेन सविलासवीक्षणेनार्पितो मनोभववेगो यासु ता वयम्। कुजा वृक्षास्तेषां गतिं गमिताः सत्यो मोहेन न विदामः कबरं वा वसनं वेति ॥ १७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

(७) ॥ पुनराह–अस्माकमिति। "ललामोऽस्त्री ध्वजे श्रेष्ठे भूषायां पुंड्रचिह्नयोः" इति यादवः। यद्वा–निजानि नित्यानि पदानि पादाङ्का एवाब्जानि तेषां दलैरितस्ततस्थापनैः ॥ (१६) तेन निमित्तेन वर्ष्मधुर्यवद्गमनरूपेण हेतुना सविलासवीक्षणेन विभ्रमोपेतदृष्ट्या वेग उद्रेकलक्षणसंस्कारः कौ भूमौ जायते इति कुजो वृक्षः। 'व्रजगतिम्' इति पाठे तु ब्राह्मे मुहूर्ते रासान्ते कृष्णेन प्रेषिता इत्यर्थः। मोहेन मनोऽनवस्थालक्षणेन कबरं केशपाशं वसनं कट्यादिधृतम् ॥ अथान्ययूथस्थाः स्वसखीः प्रति वेणुहेतुकं स्वमोहमेवाहुः-निजपदान्येवाब्जदलानि तैः। कीदृशैः–ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैः। गोष्ठगमनसमयेऽग्रतो गतानां गवां खुरतोदं खुराक्रमणव्यथां व्रजभुवः शमयंस्तदुपरि स्वचरणाब्जन्यासेन शमयितुं यदा वर्ष्मणा देहेन धुर्यो गजस्तद्वद्गतिर्यस्य स कृष्णो व्रजति ॥ तदा तेन कृष्णेन सविलासवीक्षणेनैवार्पितो मनोभववेगो यासु ता वयं कुजा वृक्षास्तेषामिव गतिं गमिताः प्रापिताः सत्यो मोहेन कबरं वसनं वा न विदामस्तयोः स्खलनं न जानीम इत्यर्थः। तेन व्रजभुवः चरणाम्बुजन्यासेन शमयामास, व्रजसुभ्रुवां तु मनसिजतोदं नयनाम्बुजन्यासेनोत्पादयामासेत्येवमेवास्माकं ललाटमिति द्योतितम्।१७।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ तदनन्तरजातलीलामयी गोपनीयरसनिबद्धा पुनरेका काचिदेकान्तगोष्ठी संगृह्यते तत्र तादृशनानातत्कथाश्रयेण लङ्घितेऽपि तृतीये यामे नागते श्रीभगवति काश्चिदुत्कण्ठितचित्ता गोपिकाः गोपावृत्तिसमये तदन्वेषणार्थं पुष्पावचयादिमिषेण कदाचिद्गच्छन्ति च वनमध्यं तत्र दृष्टं दिनान्तरे प्रस्तुवन्ति च तदेवमवतारिका अहो प्राणसख्यस्तत्र तत्र चान्येषामस्तु मोहकथा स्फुटमस्माकमेव श्रूयतामिति भाववैवश्येनाहुः। निजेति। निजशब्देनासाधारणत्वं व्यज्यते। बहुत्वं गौरवेण प्रतिन्यासमपूर्वरूपत्वविवक्षया वा निजत्वादेव ध्वजादीनि विचित्राणि अद्भुतानि ललामानि येषु तैः। यद्वा ध्वजादिभिर्विचित्रैः ललामैश्च सुन्दरैः उपलक्षणानि चैतानि प्रसिद्धानां चक्रादीनामनतिप्रसिद्धानामष्टकोणादीनां च व्रजभुवः व्रजसम्बन्धिगोप्रचारभूमेः लक्षणया तद्गततृणादीनामित्यर्थः। गवादिखुराक्रमणव्यथां शमयन्निति गवाम्पश्चात्पश्चाद्गच्छतो भगवतः पदाब्जस्पर्शस्वभावत एव सद्यस्तृणाद्यङ्कुरोत्पत्तेः। अत एवासंख्यधेनुवृन्दनित्यचारणसमावेशः स्यात्। तत्र विलासमाहुः। वर्ष्मधुर्यगतिः गजेन्द्रवच्छनैः शनैर्लीलया चलन्नित्यर्थः। यत ईरितवेणु शीघ्रगमने सम्यग्वेणुवादनासम्पत्तेः यद्यपि स्वाभाविकमेव तस्य तत्तथापि विलासविशेषेण विशिष्टमपि स्यादिति तथोक्तं ततोऽस्मद्दृष्टिविषये त्वधिकमेव तथा चरितमिति व्यञ्जितं व्रजति इतस्ततो भ्रमतीत्यर्थः। तेन कारणभूतेन यत्सविलासं सलीलं वीक्षणमस्मासु तत्र तत्र च दृष्टिः तेनार्पितोऽन्तर्निहितो मनोभवस्य वेगो यासु ताः इति स्वतोऽतिकातर्यत्वमुक्त कुजगतिं स्थावरत्वं जाड्यमित्यर्थः। गमिताप्रापिताः, यद्वा तेनेति कुजगतिगमितत्वे सविलासे सति न विदाम इत्यत्र हेतुर्विवेचनीयः। तस्य व्रजजनेनास्माकमगत्वं वैदग्ध्या च मुग्धत्वमिति कारणवैपरीत्येनाद्भुतत्वं ततस्तस्य परमं मोहनत्वं स्वेषां दैन्यं च दर्शितं कबरं वसनं वा न विद्मः स्खलितमिति शेषः। तदनुक्तिर्लज्जया कबरमिति कियत वसनमपीत्यर्थः। वा समुच्चये टीकायामपि तथैव ॥१६–१७॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत्र चाकस्मात् श्रीव्रजेश्वरीं प्रति तदुक्तेः कालक्रमो नापेक्ष्यः, किंवा उक्तन्यायेन माध्याह्निकतद्वेणुरवानुसारादत्रापि स द्रष्टव्यः, अधुना प्रसंगात् परमार्त्या निजमोहमप्याहुः—निजेति युगलेन। निज-शब्देन पादुकादिव्यवधानं निरस्तम्। बहुत्वं पदानां बाहुल्यात्, अब्जदलरूपकं चाग्रविस्तीर्णपश्चात्संकुचिताब्जान्तर्दलाकारुण्यमार्दवादिसादृश्यात्, 'तलैः' इति पाठः केषाञ्चिन्मतः। ततश्च गौरवेण पदबाहुल्याभिप्रायेणैव वा बहुत्वम्, निजत्वादेव ध्वजादीनि विचित्राण्यद्भुतान्यसाधारणानि ललामानि लक्षणानि येषु तैः, शङ्ख-चक्रयोरनुक्तिरसाधारणश्रीविष्णुचिह्नयोस्तयोः सुप्रसिद्धत्वात्। व्रजभुवः श्रीगोवर्द्धन-वृन्दावनादिगोप्रचारभूमेः, गवादिखुराक्रमणव्यथां शमयन्निति पादाब्जस्पर्शस्य स्वभावत एव सर्व्वतापहरत्वात्, विशेषतश्च खुरक्षोदाद्याच्छादकध्वजादिचिह्नसुन्दरपदानामुदयात् सर्व्वतापहरत्वात्, अतएव वर्ष्मधुर्य्यगतिः—गजेन्द्रवच्छनैः शनैर्लीलया चलन्नित्यर्थः। यत ईरितवेणुः शीघ्रगमने सम्यग्वेणुवादनासम्पत्तेः; यद्यपि तासां मोहनार्थमेव तत्तत्, तथापि धाष्ट्र्य परिहारार्थम्, किंवा अतृप्तत्वेन तदमननात्तथा नोक्तम्, भुवस्तोदस्तु खुरचिह्नोदयेन केवलं क्षतसादृश्यात्, न तु तत्त्वतः, पशूनां तेषां भगवदीयत्वात्। यद्वा, धेनुकारिष्टादिखुराणि ज्ञेयानि। व्रजति व्रजाद्वनं प्रयाति। यद्वा, चलति—इतस्ततो भ्रमतीत्यर्थः। तेन निमित्तेन यत् सविलासं सशोभं

सलीलं वा, वीक्षणमस्मासु तत्र तत्र वा दृष्टिः, तेनार्पितो तन्निहितो मनोभवस्य वेगो यासु ता इति स्वतोऽप्रतिकार्य्यत्वमुक्तम्, तथा अन्यहेतुकस्यापि तद्वीक्षणस्य कामवेगार्पकत्वेन महामोहनत्वञ्च सूचितम्, एवं क्रमेण सौन्दर्य्यलीलामाधुर्य्यं उद्दिष्टाः, अतः कुजानां वृक्षाणां गतिं स्थावरत्वं जाड्यमित्यर्थः; गमिताः प्रापिताः सत्यः। यद्वा, कुजगतिगमितत्वेनेत्येको हेतुः, विशेषतश्च सविलासेत्यन्यः। यद्वा, तेनेति कुजगतिगमितत्वे सविलासेति 'न विदायः' इत्यत्र हेतुर्विवेचनीयः। तस्य व्रजने नास्माकमगत्वं वैदग्ध्या च मुग्धत्वमिति कारणवैपरीत्येन तस्य परमं मोहनत्वं निजदैन्यञ्च दर्शितम्। कवरमुक्तमपि वसनं स्खलदपि न विद्मः। वा समुच्चये अप्यर्थ एव वा। यद्यपि मोहेन सर्व्वेषामेव देह-दैहिकानामवेदनं स्यात्तथापि विशेषतः कवर-वसनयोरुक्तिरंगनानां तयोस्तत्रापि वस्त्रस्यावश्यमेवानुसन्धेयत्वात्। युगलेऽस्मिन् पूर्व्वयुगलेष्विव प्रतिश्लोकं वाक्यसमाप्तिनिर्व्वाहपरित्यागेन द्वाभ्यामेव वाक्यैक्यम्। केवलं व्रजनादेव जाड्यम्, तच्च संगमादेवेत्याद्यभिप्रायेण। अन्यत्तैर्व्याख्यातम्। तत्र गृहकृत्यार्थं किंवा पुत्रोत्कर्ष-श्रुत्या द्विगुणित-तद्विच्छेददुःखात्तस्यां निर्गतायाम्, श्रीयशोदागमनपक्षे च निजाशंकायां निरस्तायामुक्तब्रह्मादिमोहप्रसंगात्, परमार्त्त्या पूर्व्ववन्मिथो निजमोहमेवोचुरिति ज्ञेयम्। विचित्रेत्यनेनान्यानि च विविधानि यव-चक्रादीनि चिह्नान्युच्यन्ते, ध्वजादिभिर्ललामैः सुन्दरैः कुजगतिं गमिताः स्तब्धतां प्रापिताः, पश्चाच्च मोहेन न विद्मः। अन्यत्तथैव ॥ १६–१७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अस्माकन्तु मोहं किं ब्रूम इत्याहुः। निजेति। ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैर्निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं खुराक्रमणव्यथां शमयन्वर्ष्मणा शरीरेण धुर्यः धुरं वहतीति तथा सच गजराजस्तद्वद्गतिर्यस्य सः कृष्णः वादितवेणुः सन् व्रजतीति यत् ॥ १६ ॥ तेन निमित्तेन सविलासवीक्षणेन च अर्पितो मनोभववेगो यासु ता वयं कुजा वृक्षास्तेषां गतिं प्रकारं निश्चेष्टतामिति यावत् गमिताः प्रापिताः सत्यो मोहेन कबरं वसनं वा न विदामः ॥ १७ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ध्वजादयः। एवं विचित्राणि नानाकाराणि ललामानि लाञ्छानि येषां तानि तथा। यद्वा ललामानि तिलका येषां तानि तथा। यद्वा ललामानि भूषणानि येषां तानि तथा तैः "ललामोऽस्त्री ध्वजे श्रेष्ठे भूषायां पुण्ड्रचिह्नयो" रिति च निजपदाब्जयोर्दलैः अङ्गुलीलक्षणैः। यद्वाजानि नित्यानि अन्येनामार्जितानि पदान्येव पादाङ्का एवाब्जानि यानि तेषां दलैर्विभागैः व्रजभुवः गवाङ्खुरतोदं खुरनिखातव्यथां प्रकर्षेण शमयन् परिहरन् वर्ष्मणा महता शरीरेण युक्तो धुर्यो वृषभस्तस्य गतिरिव गतिर्यस्य स वर्ष्मधुर्यगतिः। यद्वा वर्ष्मधुर्यो गजराजः तदा ईरितवेणुः शब्दितवेणुर्यः ॥ १६ ॥ तेन व्रजमितेन प्राप्तेन कृष्णेन सविलासवीक्षणेन अर्पितो मनोभवस्य कामस्य वेग उद्रेकलक्षणः संस्कारो यासु तास्तथा रात्रिविशेषे वनाद्व्रजगतिं गोष्ठाख्यमन्दिरं गमिताः प्रापिताः वयं कश्मलेन मनोऽनवस्थानलक्षणेन मोहेन स्रस्तं कबरं केशभारं वसनं वस्त्रं वा स्थितिं वा न विदामः न जानीम इत्यन्वयः। कुजगतिमितिपाठे स्थावरस्वभावमित्यर्थः। ब्राह्ममुहूर्तादुत्थाय कृष्णाज्ञया वनात्प्राप्तव्रजानां पश्चादागतस्य कृष्णस्य पुनर्दर्शनेन मुग्धानां गोपिकानां वचनमिदमिति भावः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ तदनन्तर जातलीलामयी गोपनीयरसनिबद्धा पुनरेका काचिदेकान्तगोष्ठी संगृह्यते। तत्र तादृश नाना तत्कथाश्रयेण लङ्घितेऽपि तृतीये यामे नागते श्रीकृष्णे काश्चिदुत्कण्ठितचित्ता गोपरावृत्तिसमये तदन्वेषणार्थं पुष्पावचयादिमिषेण काश्चिद्गच्छन्ति च वनमध्यम्। तत्र दृष्टं दिनान्तरे प्रस्तुवन्ति च तदेवमवतारिका। अहो प्राणसख्यस्तत्र तत्र चान्येषामस्तु मोहकथा। स्फुटमस्माकमेव श्रूयतामिति भाववैवश्येनाहुः। निजेतियुगलेन। निजेत्यसाधारणत्वं व्यज्यते। बहुत्वं गौरवेण प्रतिन्यासमपूर्वरूपत्वविवक्षया दलैरिति क्वचिद्व्रजभुवस्तत्सम्बन्धिभूमेर्लक्षणया तद्गततृणादीमित्यर्थः। गवादिखुरतोदं शमयन्निति गवां पश्चाद्गच्छतः श्रीकृष्णस्य पदाब्जस्पर्शस्वभावत एव सद्यस्तृणाद्यङ्कुरोत्पत्तेः। अतएवासंख्यधेनुवृन्दनित्यचारणसमावशः स्यात्।१६–१७।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

हे सख्यः ? यद्येवं तस्य वेणुवाद्यकौशलं न स्यात्, तदा कथमस्माकमीदृगवस्था स्यादित्यपरा आहुः—निजपदाब्जेत्यादि द्वाभ्याम्। दलैरिति बहुमाने बहुत्वम्। ध्वजवज्रादीनि विचित्राणि ललामानि येषां तैः। वर्ष्मधूर्यो हस्ती तद्वद्गतिर्यस्य यदेड़ितवेणुर्वादितवेणुस्तदा वयं कुजगतिवृक्षवज्जाड्यं गमिताः सत्यः कश्मलेन कबरं वसनं वा स्खलितमस्खलितं वा न विदाम इत्यर्थः ॥ १६–१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथान्ययूथस्थाः स्वसखीः प्रति वेणुहेतुकं स्वमोहमेवाहुः। निजपदान्येव अब्जदलानि तैः कीदृशैः ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैः गोष्ठगमनसमये अग्रतो गतानां गवां खुरतोदं खुराक्रमणव्यथां व्रजभुवः शमयन् तदुपरि स्वचरणाब्जन्यासेन शमयितुं यदा वर्ष्मणा देहेन धुर्यो गजस्तद्वद्गतिर्यस्य स कृष्णो व्रजति तदा तेन कृष्णेन सविलासवीक्षणेनैवार्पितो

मनोभववेगो यासु ता वयं कुजा वृक्षास्तेषामिव गतिं गमिताः प्रापिताः सत्यो मोहेन कवरं वसनं वा न विदामः । तयोः स्खलनं न जानीम इत्यर्थः । तेन व्रजभुवः खुरतोदं चरणाम्बुजन्यासेन शमयामास । व्रजसुभ्रुवान्तु मनसिजतोदं नयनाम्बुजन्यासेनोत्पादयामासेत्येवमेवास्माकं ललाटमिति द्योतितम् ॥ १६-१७ ॥

गूढार्थदीपिनी

ध्वजादिविचित्रचिह्नैः निजपदाब्जदवैः खुरतोदं खुरजन्यव्यथां शमयन् कृष्णः वादितवेणुः सन् यत् व्रजति तेन कश्मलेन मोहेन कुजानां वृक्षाणां गतिं निश्चेष्टतां गमिताः प्रापिताः सत्यः वयं केशपाशं वसनं वा न विद्मः । कथंभूतः कृष्णः । वर्ष्मणा देहेन धुर्यः उच्चो गजः तद्वत् गतिर्यस्य । कथंभूताः गोप्यः । साभिलाषवीक्षणेन उद्दीपितः कामवेगो यासु ताः ॥ १६-१७ ॥

श्रीमच्छुकदेवकृत सिद्धान्तप्रदोपः

काश्चित्स्वमोहातिशयमनुवर्णयन्ति । निजपदाब्जदलैरिति । ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैः ध्वजादीन्यन्येषामप्युपलक्षणानि निजपदान्येवाब्जदलालि तैर्बहुवचनं "कृत्वा तावन्तमात्मान"मिति बहुमूर्त्यभिप्रायेण यदा पदाब्जयोर्दलैरलीभिः व्रजभुवः खुरतोदं गवादिखुराक्रमणव्यथां शमयन् वर्ष्मणा देहेन धुर्य्यः धुरं वहतीति स तथा तद्वद्गतिर्यस्य सः श्रीकृष्णः वादितो वेणुर्येन सः तथाभूतः सन् यद्व्रजति तेन हेतुना सविलासं यत्तदीयं वीक्षणं तेन अर्पितो मनोभववेगो यासु ता वयं कौ पृथिव्यां जायन्ते इति कुजाः वृक्षास्तेषां गतिं निश्चेष्टतां गमिताः सत्यो मोहेन कबरं वसनं वा न विदामः ॥ १६-१७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यदा धुर्यगतिर्वृषभगमनो व्रजभुवो व्रजभूमेः खुरतोदं गवादिखरखुरजनितव्यथां ध्वजो वज्रो नीरजं चाङ्कुशश्चेत्येतदादीनि विचित्राणि ललामानि चिह्नानि येषां तानि तैः । वज्रे ति वा पादान्तस्त्वसौ वक्त्र इत्युक्तेः । वज्रस्य पदान्तिमवर्णत्वान्न लाघवमिति पूर्वत्रोतरत्र ज्ञेयम् । ललामोऽस्त्री ध्वजे श्रेष्ठे भूषायां पुण्ड्रचिह्नयोरिति च । ललाम च ललामं च लाञ्छनध्वजवाजिषु । शृङ्गे प्रधाने भूषायां रम्ये वालन्धिपुण्ड्रयोरिति विश्वः । निजपदाब्जयोर्दलैरङ्गुलिरूपैः शमयन्नीरितवेणुर्भवति तदा तेन व्रजमिते प्राप्तेन वयं सविलासं विलाससहितं यद्वीक्षणं निरीक्षणं विलाससहितं यथा तथेति वा । यद्वीक्षणं तेनैवार्पितो यो मनोभवस्तस्य वेग उद्रेको यासां ता ब्रह्मरात्रवृषावृत्त इत्युक्तरीत्या व्रजगतिं तद्रूपं मन्दिरं तेन गमिताः कश्मलेन विरहप्रवहन्मोहेन वसनं वस्त्रं कबरं केशवेषं वर्ष्मास्मच्छरीरमिदमिति च न विदामः । कश्मलः स्यात्पिपासा च कश्मलो मोह एव चेत्यनेकार्थध्वनिपदमञ्जरीं । वर्ष्मणा कायेन धुर्यो महान्गजो वा वृषभो वा तद्वद्गतिर्यस्य स इति तत्रैवान्वयो वा ॥ १६-१७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अस्त्वन्येषां वार्त्ता वेणुनादोऽस्माकमेवान्ययात्वं सम्पादयतीत्याहुर्द्वयेन पूर्ववत् । निजपदाब्जदलैरिति । यर्हि ईरितवेणुः सन् व्रजति तदा तेन नादेन कुजगतिं स्थावरत्वं गमिता वयं गोप्यः सर्वा एव कश्मलेन मूर्च्छया वसनं परिहितं केशपाशं वा न विदाम इति सम्बन्धः । अयं वेणुनादः अस्मदर्थमेव जायत इति तस्य चेष्टया अनुभवाच्च ज्ञायते तत्र चेष्टा या गोकुलनिवासिनामेवार्थे जायते तथा व्याप्तः कथमन्यकार्यं कुर्यात् । अतः प्रथमं भगवतो गोकुलहितकर्तृत्वमाहुः । निजस्य स्वस्यैव यत्पदाब्जद्वयं तस्य दलैर्दशाङ्गुलीभिः तलभागैर्वा व्रजभुवः निरन्तरं पश्वाक्रमणेन जातव्यथायाः व्रजभूमेः खुरैर्ज्जातं तोदं शमयन्निति शनैः शनैर्ल्लीलया भगवद्गतिर्न्निरूपिता क्षतांशः गतिविलासेन पादस्पर्शेन निराकृतः आध्यात्मिकाद्यंशस्तु ध्वजादिना तामसः भौतिकः ध्वजेन निराक्रियते । राजसः आध्यात्मिकः वज्रे ण सात्त्विक आधिदैविकः नीरजाकृतिचिह्ने न तान्येव विचित्राणि ललामानि पदेषु तेन लौकिकालौकिकप्रकारेण व्रजभुवः खुरतोदप्रशमनं व्रजे तिस्रः प्रधानभूताः भूमिः गावो गोप्य इति तत्रभूमेर्दुःखनिवृत्ति गत्या निरूप्य गत्याकृत्या च गवां दुःखं निवारयतीत्याहुः । वर्ष्मधुर्यगतिरिति । वर्ष्मधुर्यो महावृषभः ककुद्मी स यथा लीलया मन्थरगतिः तथा गच्छन् गवामपि दुःखहारीव निरूपितः ईडितवेणुर्व्रजयीति गोपिकानां तदास्माक वेणुनादेन जाते कामे स्वावरत्वमधिकं जातमित्याहुः । तेनेति । स्वभावत एव वेणुनादेन जातः कामः तत्रापि सविलासवीक्षणेन अर्पितः मनोभववेगा यासु अतो वेगेन स्तम्भे जाते कुजगतिं वृक्षगतिं गमिता जाताः तेषामन्तर्ज्ञानमस्तीति तदर्थमाहुः । न विदाम इति । सुषुप्तावपि न जानन्तीति तद्व्यावृत्त्मर्थमाहुः । कश्मलेनेति कश्मलेन मूर्च्छया स्त्रीणामत्यावश्यकं वसनज्ञानं कबरज्ञानञ्च वेणुनादप्रस्ताव एवैतज्जातमिति गतिदृष्ट्यादिभिरपि कृतमत्र निरूप्यते ॥ १६-१७ ॥

श्रीसुबोधिनी-सारः

ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैर्निजपदान्येवाऽब्जदलानि पद्मपत्राणि तैर्व्रजभूमेः खुरतोदं खुराक्रमणतो व्यथां शमयन् वर्ष्मणा देहेन धुर्यः स्थूलो गजस्तद्वद्गतिर्यस्य स कृष्णो यदा वादितवेणुर्यद्व्रजति तदा तेन हेतुना सविलासेन वीक्षणेनार्पितो नियुक्तो मनोभवस्य कामस्य वेगो यासु ता वनं कोभूमेर्जाताः कुजा वृक्षास्तेषां गतिं गमिताः स्थावरतां प्रापिता कबरं केशबन्धं वसनं वस्त्रं न विदामो न विद्मः ॥ १६-१७ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

'अस्माकं तु मोहे किं ब्रूम' इत्याहुः—निजपदेति । ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैः निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं गोखुराक्रमणव्यथां शमयन् वर्ष्मणा धुर्यो गजस्तद्वत् गतिर्यस्य स कृष्णः ईडितवेणुः वादितवेणुः ॥ १६ ॥ यत् व्रजति तेन निमित्तेन सविलासनिरीक्षणेन चार्पितो मनोभवस्य कामस्य वेगो यासु ता वयं कुजानां वृक्षाणां गतिं दशां निश्चेष्टतां गमिताः सत्यः कश्मलेन मोहेन वसनं कबरं वा न विदामः । विगलद्वस्त्रस्य मुक्तकबरस्य चानुसन्धानरहिता भवाम इत्यर्थः ॥ १७ ॥

अन्वितार्थप्रकाशिका

तृतीययामेऽपि नागते कृष्णे आहुः—निजपदेति ॥ ध्वजवज्रनीरजाङ्कुशानि विचित्राणि ललामानि चिह्नानि येषां तैः निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं गोखुराक्रमणव्यथां शमयन् वर्ष्मणा धुर्यो महान् गजस्तद्वत् गतिर्यस्य स कृष्णः ईरितवेणुः सन् यद्व्रजति तेन निमित्तेन सविलासवीक्षणेन चार्पितो मनोभवस्य कामस्य वेगो यासु ता वयं कुजानां वृक्षाणां गतिं दशां निश्चेष्टतां गमिताः सत्यः कश्मलेन मोहेन वसनं कबरं वा न विदामः न विद्मः । शब्लुगभाव आर्षः ॥ १६–१७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यु० ७ ॥ एवंविधानां यदि मोहः स्यात्तर्ह्यस्माकं तु किं वदाम इत्याहुः निजेति । ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषु तैः निजपदानि स्वकीयचरणा एव अब्जदलानि पद्मपत्राणि तैः व्रजभुवः खुरतोदं गवादिखुराक्रमणदुःखं शमयन् वर्ष्मणा शरीरेण धुर्यः श्रेष्ठो नागेन्द्रस्तद्वद्गतिर्यस्य सः हरिः नादिते वेणुः सन् यदा व्रजति गच्छतीत्युत्तरेण सम्बन्धः ॥ १६ ॥ तदा तेन गमनेन निमित्तेन स विलासं विलाससहितं यद्वीक्षणं तेनार्पितः प्रापितो मनोभवस्य कामस्य वेगो यासु ताः वयं कुजानां तरूणां गतिं स्थिरतां गमिताः प्रापिताः सत्यः कश्मलेन तत्स्वरूपे चित्तनिरोधात्मकमोहेन वसनं परिधानं उत्तारीयं वस्त्रं च कबरं केशपाशं च विशीर्णां तद्बन्धनग्रंथिमित्यर्थः न विदामः ॥ १७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अस्माकं मोहं तु किं ब्रूम इत्याहुः । निजेति । ध्वजश्च वज्रं च नीरजं च अङ्कुशं च तानि विचित्राणि ललामानि चिह्नानि येषां तैः, निजानि पदान्येवाब्जदलानि तैः, व्रजभुवः खुरतोदं खुराक्रमणव्यथां, शमयन्, वर्ष्मणा महता शरीरेण युक्तो धुर्यो वृषभस्तस्य गतिरिव गतिर्यस्य सः, यद्वा । वर्ष्मणा देहेन धुर्यो गजस्तद्वद्गतिर्यस्य सः, कृष्णः ईडितवेणुः वादितवंशिः सन् ।१६। व्रजतीति ॥ व्रजतीति यत्, तेन निमित्तेन, सविलासवीक्षणेन विलाससहितेनावलोकनेन चार्पितो मनोभववेगो यासु ताः, वयं कुजा वृक्षास्तेषां गतिं प्रकारं चेष्टामिति यावत् । गमिताः प्रापिताः सत्यः, कश्मलेन मोहेन, कबरं केशभारं, वसनं वस्त्रं वा, न विदामः ॥ १७ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

निजपदाब्जेति : १०.३५.१६.

ध्वज-पवि-यवा-ऽम्बुजा-ऽङ्कुशविचित्रशोभैः पदैर्व्रजावन्याः । दुःखं हरता हरिणा कार्यं दुःखापहरणमस्माकम् ॥ ३५ ॥

व्रजतीति : १०.३५.१७.

ध्वजाङ्कुशयवाम्बुज-प्रमुखलक्ष्मणः श्रीपतेः पदस्य हृदि धारणादपगताऽखिलाधस्थितिः ।
सति प्रणयितां गता मतिरनङ्गभावा च नस्ततः समुचितोऽधुना हृदि विदेहभावो न किम् ॥ ३६ ॥

कृष्णप्रिया

ध्वज, वज्र, कमल एवं अङ्कुश आदि विचित्र चिह्नों से अलङ्कृत निजपदपङ्कज की कोमल अङ्गुलीदलों से, गोवत्सादिके पाद खुरों से उत्पन्न हुई श्री व्रजदेवी-व्रज भूमि देवता की व्यथा को शमन करने वाले और हूहू वाले वृषभ राज के समान मन्दर गति से चलते हुए गैयाँ ओ की पीडा को हरने वाले और वेणुवाद से व्रजवनिताओं के विरह ताप को शमन करने वाले जब नन्दालय की ओर पधारते हैं—तब श्रीनन्द कुमार के विलासपूर्वक अवलोकन से हमारे रोम रोम में कामावेश हो जाने से हमारी हालत तरुवरों जैसी स्तब्ध बन जाता है और परिणाम यह आता है कि हमारे वस्त्र सरक जाते हैं और केश विखर जाते हैं उसका भी अनुसन्धान नहीं रह पाता ॥ १६–१७ ॥

मणिधरः क्वचिदागणयन्[1] गा मालया दयितगन्धतुलस्याः ।
प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन् भुजमगायत यत्र ॥ १८ ॥
क्वणितवेणु[2]रववञ्चितचित्ताः कृष्णमन्वसत[3] कृष्णगृहिण्यः ।
[4]गुणगणार्णवमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः[5] ॥ १९ ॥

कर्दमक्षमा

अन्वयः –मणिधरः, गाः आगणयन्, दयितगन्धतुलस्याः, मालया, प्रणयिनः, अनुचरस्य, अंसे, भुजम्, प्रक्षिपत्, यत्र, कदा, क्वचित्, अगायत, तदा, क्वणितवेणुरववञ्चितचित्ताः, कृष्णगृहिण्यः, हरिण्यः, गुणगणार्णवम्, कृष्णम्, अनुगत्य, गोपिका, इव, विमुक्तगृहाशाः (कृष्णम्) अन्वसत ॥ १८–१९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च । मणिधरो मणीन् ग्रथितान्गोपनार्थं धरतीति मणिधरः क्वचिद्देशे एतैर्मणिभिर्गा आसमन्ताद्गणयन् । तथा दयितगन्धा या तुलसी तस्या मालया सह वर्तमानः प्रणयिनः प्रियस्यानुचरस्यांसे भुजं प्रक्षिपन् यत्र यदा कदाचिदगायत ॥ १८ ॥ तदा क्वणितवेणुरवेण वञ्चितान्यपहृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य गृहिण्यो भार्या गुणगणार्णवं गुणगणसमुद्रं कृष्णमनुगत्य प्राप्य ताः कृष्णमेवान्वसतान्वासत न न्यवर्तंतेत्यर्थः । यतो विमुक्ता गृहाशा याभिस्ता गोपिका इव ता अपि ह्येवमेवान्वासतेति ॥ १९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

(८) ॥ अन्यदाहुः–किञ्चेति । तथा विशेषणान्तरमाह–अंसे भुजशिरसि । प्रक्षिपन्निदधानः । यद्वा–मणिधरः कौस्तुभधरः "मणिः स्त्रीपुंसयो रश्मजातौ मुक्तादिकेषु च । कंठदेशस्तनेऽजाया लिंगाग्रऽलिंजरेऽपि च ॥" इति मेदिनी ॥ (१८) ॥ अन्वसतेह दीर्घाभावस्त्वार्षः । इत्यर्थ इति–किंचिद्गुणवानपि लोके न त्यज्यते किमुत गुणगणाब्धिरित्याशयः । तत्र हेतुमाशंक्य समादधिरे–कुत इति । यतो हेतोर्गृहाशा त्यक्ताऽतो हेतोः कृष्णमुपासत, त्यक्तसर्वपरिग्रहैरेव कृष्ण उपास्यत इति भावः ॥ गोष्ठस्थानां स्वेषां मोहनमिव वनस्थानां मृगीणां वेणुहेतुकं मोहनमाहुः–मणिधरः गोगणसंख्यानमणि मालाधरः । शुक्लरक्तश्यामपीतानां चतुर्णां वर्णानां प्रत्येकं पंचविंशतिप्रभेदैः शतं वर्णा भवन्ति । तथैव चित्रितत्वचन्दनतिलकत्वादिवर्णैर्मृदंगमुखत्वाद्याकारैश्चान्येऽप्यष्ट प्रभेदा भवन्ति । ततश्च तत्तद्वर्णाकारैरष्टोत्तरशतमणि गोलकैर्गोगणनार्थं श्रीकृष्णेन गोजपमालैका कृतास्ति, तां मालां गृहीत्वैवासंख्यानामपि गवामष्टोत्तरशतं यूथान् पृथक्पृथग्वर्णान् गणयति । तथाहि–हिही धवरीत्याह्वानेन धवरीत्याह्वानेन धवलीयूथो यथा तथैव हंसी चंदनी गंगे मुक्ते इत्याह्वानेन, तत्प्रभेदाश्चतुर्विंशतिरन्येऽपि यूथा आयान्ति । कुंकुमी सरस्वतीत्यादिसंज्ञा, श्मामला धूमलायमुनेत्यादिसंज्ञा, पीता पिंगला हरितालिकेत्यादिसंज्ञा, चित्रिता चित्रतिलका दीर्घतिलका तिर्यक्तिलकेत्यादिसंज्ञा, मृदंगमुखी सिंहमुखीत्यादिसंज्ञाश्च स्वस्वनामभिराहूता आयान्त्यतो वनाद्गोष्ठगमनसमये काश्चनापि गावो विस्मृता भवेयुरित्येकैकमणिगोलकावर्तनेन गा गणयन् दयितगन्धा तुलसी तस्या मालया सह वर्तमानः प्रणयिनः प्रियस्यानुचरस्य स्कन्धे भुजं प्रक्षिपन् यदाऽगायत ॥ तदा वेणो रवेण वंचितान्यपहृतानि चित्तानि यासां ताः, कृष्णस्य गृहिण्यो हरिण्यः कृष्णमन्वसत अन्वासत । अन्ववर्ततेत्यर्थः । यतो गुणगणार्णवं गुणसमुद्रं कृष्णमनुगत्य प्राप्य तद्गुणानास्वाद्येत्यर्थः । विमुक्ता गृहाशा याभिस्ताः गोपिका इव वयमप्येवंवृत्ता भवामः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथा पराह्णे स्वीकृतवेशान्तरो गृहागमनाय मुहुर्वेणुगानेन गाः समाहरति गणयति च । अहो बत तत्र मृग्याऽप्याक्रियन्ते किमुत वयं गोप्य इत्याहुः । मणीति । मणिमालाधारी सन् गा आगणयन् जगौ क्रमशस्तत्तद्यूथमुख्यमुख्याया नाम वेणुना गायतिस्म तास्तथैव स्वस्वयूथेनागतास्तत्तद्वर्णादिसङ्केतीकृतत्तन्मणिमालया गणयति स्म चेत्यर्थः । यद्यपि कृष्णवत्सैरसंख्यातैरिति पूर्वोक्तं तथापि यूथेशादि गणनाभिप्रायेणैवेदमुक्तं तद्बुद्धिप्रावीण्याभिप्रायेण वा । उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धय इति न्यायेन दयितगन्धत्वेन तुलस्या मालया पत्रादिनिर्मितया सदा विशिष्ट इत्यर्थः । यद्वा भ्रमरगानं मालायां प्रकल्प्य सापत्न्येन सेर्ष्यमाहुः । तथा सहागायतेति तस्या धाष्टर्यं व्यञ्जितङ्किकुर्वन्नगायत किञ्चिन्नीचभूमिकास्थितस्य अनुचरस्यांसे भुजं वामं दक्षिणमेव वा कूर्परोर्ध्वभागं प्रक्षिपन् लीलया विन्यसन् । अतः स एव प्रमयुक्तसौभाग्यवान् नतु वयमिति भावः । क्वणितवेणुरवेति वक्ष्यमाणत्वाद्वेणुनैवागायदिति सिद्धं क्वणितेति विशेषणेन क्वणनविशेषेण वादितो यो वेणुस्तस्य रवेण वञ्चितानि प्रलम्भितानि तत्पूर्वकमपहृतानि

---

१. दागमयन्–विज. । २. वेगुमुप–विज. । ३. मायुरनु–विज. । ४. गणार्णव । ५. गृहेशाः–विज. ।

चित्तानि यासां ताः कृष्णगृहिण्यः कृष्णेति देशपावनपतिका अपीत्यर्थः। गृहिण्य इति मानुषजातिवत् पत्युः परमप्रेयस्योऽपीत्यर्थः। कृष्णमन्वसत तत्परित्यागेन कृष्णमेवाश्रिता इत्यर्थः। तत्र हेतुः गुणगणार्णमिति कृष्णगृहिण्य इति श्लेषेणापि कृष्णस्य भार्य्यात्वं प्राप्ता नर्म। विमुक्तेति तैर्व्याख्यातम्। यद्वा विमुक्ता गृहाः आशाश्चाशनं याभिस्ताः गृहं पत्यादिपरिकरः वयमित्यनुक्त्वा गोपिका इत्युक्तं गोपिका जातित्वेनैव तदेकस्वभावसिद्धेः तदभावेऽपि तासामिस्यभिप्रायेण। यद्वा वयमित्युक्तेरपि गोपिका इत्यस्य रसविशेषपोषकत्वं परोक्षवचनात्॥ १८–१९॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो वत गोपिकानामस्माकं तदेकगतीनां तैर्मोहो युक्त एव, पशुस्त्रीणामपि दूरतस्तस्य सौरम्येण गीतेन च मोहोऽभूदित्याशयेन, किंवा प्रकृतमनुसृत्य अपराह्णे आसन्नागृहागमनसमये स्वीकृतवेषान्तरस्य गवामागमनार्थं वेणुगानेनैणीनामपि मोहः किमुतास्माकं गोपीनामित्याहुः,—मणीति युगलेन। मणयः—मौक्तिकादयः; आगणयन्निति व्रजं प्रति निवर्त्तनेनावश्यं सम्भालनात्, गा गोजातीर्धेनुवृषादीनित्यर्थः। अन्यपशुवर्गसद्भावेऽपि गवां गणनं तेषु स्नेहविशेषेण, यद्यपि (भा० १०।१२।३) 'कृष्णवत्सैरसंख्यातैः' इति पूर्व्वोक्तेः, पृथक् चार्य्यमाणानां वत्सानामप्यत्यनन्त्येन गवामन्येषाञ्च पशूनां परमानन्त्येन गणना न सम्भवेत्, तथापि यूथादिभेदेन गणना कल्प्या। यद्वा, गवामसंख्यत्वेऽपि तद्गणनं तत्सम्भालनं गोपानामावश्यकमिति हि व्यवहारः, दयितगन्धत्वेन तुलस्या मालया पत्रादिभिर्निर्म्मितया सदा विशिष्ट इत्यर्थः, पशूनां घ्राणवेदित्वेन दूरात्तद्घ्राणेन हरिणीनामागमने कारणमेकमुक्तम्। किञ्च, अनुचरस्यांसे भुजं वामं प्रक्षिपन्निति लीलावस्थानं स्नेहादिकञ्च दर्शितम्, 'प्रणयिणः' इति वेणुनागाने प्रायस्त्रिभंगीललितमुद्रया श्रीवामबाहुना तत्कण्ठपरिवेष्टनतो गाढ़ालिंगनसम्पत्तेः, अतः स एव प्रेमयुक्तः सौभाग्यवान्, न तु वयमिति भावः। क्वणितवेणुरवेति वक्ष्यमाणत्वाद्वेणुनैवागायदिति सिद्धमेव। क्वणितेति विशेषणेन सदा सहज–नादमयत्वं तथा रवेत्यनेन च केवलं सकृदीषद्वादनमेवाभिप्रेतम्, न च विचित्रमधुरस्वरगानादिकमपेक्षितम्, तथापि सहज–माधुर्य्यमयत्वात्तद्रवोऽपि गीते पर्य्यवस्यत्येवेत्युक्तम्—अगायतेति। यद्वा, श्रीमुखेनैव यदा अगायत्, तदा गानानन्तरं रसविशेषेण क्वणिता वादितो यो वेणुस्तस्य रवेण वञ्चितचित्ताः, वञ्चितेति श्लेषेण प्रतारणं सूचितम्, अन्यथा यादृशमोहनान्तिके तथास्थित्यनुपपत्तिः, कृष्णगृहिण्यः पतिसहिता अपीत्यर्थः, तत्परित्यागेन कृष्णमेव अन्वसत अनुगता आसन्नित्यर्थः। तत्र हेतुः—गुणगणार्णमिति। विशेषतश्चानुगम्य प्राप्य अनुसृत्येति वा; कृष्णगृहिण्य इति श्लेषेण ता अपि कृष्णस्य भार्य्यात्वं प्राप्ता इति तन्मर्म। किंवा आत्मनस्तासाञ्च स्वभावस्यैक्य–विवक्षया विशेषेण स्नेहादिपरित्यागेन समूलतया मुक्ता गृहेषु गृह–तत्सम्बन्धिषु आशा–वाञ्छापि याभिस्ताः। यद्वा, विमुक्ता गृहा आशश्चाशनं याभिः, यथा वयं तस्य वेशलीलावेणुगीतादिमोहितास्तमनन्तगुणमनुसृत्य ततोऽत्यल्पगुणनिजपतिपरित्यागेन तस्य भार्य्यात्वं प्राप्ता विमुक्तदेह–गेहतत्सम्बन्धिपुत्रधनाद्याशाः सत्यो हरिण्यस्तद्विरहपाण्डुरास्तमेवानुवर्त्तामहे, तद्वदिति; वयमित्वनुक्त्वा गोपिका हेत्युक्तं तज्जातित्वेनैव तदेकस्वभावप्रसिद्धेः। यद्वा, वयमित्युक्तेः सकाशादपि गोपिका इत्यस्य रसविशेषपोषित्वात्; श्लेषेण—गोपयन्तीति गोपिका देहरक्षणपराः, अन्यथा तद्विरहेण जीवनानुपपत्तिरिति भावः। यद्वा, अनुगम्यास्तेनैवानुसर्त्तुं योग्या अपि हरिण्यः। अयं भावः—एतादृशं तस्य वेशादिमोहनत्वं येनानुसर्त्तारमपि स्वयमवानुसरन्तीति एतदप्यात्मभावाभिप्रायेणैव। अन्यत् समानम्॥ १८–१९॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च मणिधरः मणीन् ग्रथितान् गोगणनार्थं धरतीति मणिधरः क्वचिद्देशे तैर्मणिभिर्गा आसमन्ताद्गणयन् तथा दयितगन्धा इष्टगन्धा या तुलसी तस्या मालयोपलक्षितः प्रणयिनः प्रियस्यानुचरस्यांसे स्कन्धे भुजं प्रक्षिपन्निदधत् यत् यदा क्वचिदगायत्॥ १८॥ तदा तत्र क्वणितस्य वादितस्य वेणो रवेण वञ्चितान्यपहृतानि चित्तानि यासां ताः। यन्त्रितचित्ता इति पाठे परवशीकृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य गृहीण्यो भार्या हरिण्यो गुणगणार्णं गुणगणसमुद्रं कृष्णमनुगत्य प्राप्य तं कृष्णमेवान्वसत अन्वासत न न्यवर्तन्तेत्यर्थः। कुतः यतः विमुक्ताः त्यक्ताः गृहाशाः याभिः कथं गोपिका इव ता अपि ह्येवमेव तमन्वासतेति॥ १९॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मणिधरः कौस्तुभरत्नधारी दयितगन्धा प्राणप्रियगन्धा तुलसी यस्यां सा तथा तया मालयोपलक्षितः प्रणयिनः स्निग्धतमस्यानुवर्तमानस्य कस्यचिद्गोपस्यांसे भुजशिरसि भुजं प्रक्षिपन्निदधानो गा आगमयन् वनाद्व्रजमावर्तयन् कृष्णः क्वचित्कस्मिंश्चित्काले यत्र यस्मिन्देशे अगायत॥ १८॥ तदा वञ्चितचित्ताः प्रलोभितान्तःकरणाः कृष्णगृहिण्यः कृष्णमृगपरिग्रहभूताः हरिण्यो गुणगणार्णं गुणगणसमुद्रं क्वणितवेणुं ध्मातवेणुं कृष्णमनुगम्य उपान्वीयुः उपासतेत्यन्वयः का इव विमुक्तगृहेशाः परित्यक्तनिजपतयः उभयत्र समानं गोपिका गोपाङ्गना इव अन्यत्र गोपनशीला इव॥ १९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथापराह्णे स्वीकृतवेशान्तरो गृहागमनाय मुहुर्वेणुगानेन गाः समाहरति गणयति च अहो बत तत्र मृग्योऽप्याकृष्यन्ते किमुत वयं गोप्य इत्याहुः । मणीति युगलेन । मणिमालाधारी सन् ॥ १८–१९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

हे सख्यः ! वयमेव तत्रानुरक्ताः । एवंविधं तद्वेणुरवाकर्णनजनितकश्मलत्वादिति मा गर्वं कुरुध्वम् ; पश्यत हरिणीनां तत्रानुरागमित्याहुः—मणिधर इत्यादि द्वाभ्याम् । मणिधरः कौस्तुभधारी; यद्वा, गोगणनेन तत्संख्यासङ्केतितान् हारसम्बन्धिनी मणीन् धरतीति तथा । प्रणयिनोऽनुचरस्य प्रियसखस्य सुवलादेः कदा कस्मिन्नपि समयेऽगायत, वेणुनेति शेषः एतास्तु कृष्णगृहिण्य इति नाम्नैवात्मानं तोषयन्ति, अस्माकन्तु तथा नाम न केचिदपि वदन्ति । एता विमुक्तगृहाशाः, वनस्थितत्वात्, वयं त्वद्यापि गृहे वर्तामहे । गोपिका इव कृष्णमन्वसत अन्वासतेत्यर्थः । न का इव ? अपि तु स्वयमिव, अत्रोदाहरणाभावः । अथवा, गोपिका इहान्वसत । अपि तु विमुक्तगृहाशा एतः गोपिकास्तु न तथेति विशेषः; यतो गोपिका वयमद्यापि गृह एव वर्तामह इति दैन्यम् ॥ १८–१९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

हे सख्यः । वयमेव तस्य प्रिया इति गर्वमुद्वहामः । पश्यत हरिलीलायामनुरागमित्यन्या आहुः—मणिमय इत्यादि द्वाभ्याम् । मणिधरः कौस्तुभधारी एतास्तु कृष्णगृहिण्य इति नाम्नैवात्मानं तोषयन्ति, वयन्तु न तथा; हे गोपि ! एता विमुक्तगृहाशाः; का इव ? वयमिव न हि न हि वयमद्यापि गृहे तिष्ठामः, एतास्तु वन एव एतेन सर्वथास्मदधिकानुरक्ता एता इति दैन्यम् ॥१८–१९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गोष्ठस्थानां स्वेषां मोहमिव वनस्थानां मृगीणां वेणुहेतुकं मोहमाहुः । मणिधरः गोगणनसंख्यानमणिमालाधरः । शुक्लरक्तश्यामपीतानां चतुर्णां वर्णानां प्रत्येकं पञ्चविंशतिप्रभेदैः शतं वर्णा भवन्ति । तथैव चित्रितत्वचन्दनतिलकत्वादिवर्णैर्मृदङ्गमुखत्वाद्याकारैश्चान्येऽप्यष्टप्रभेदा भवन्ति । ततश्च तत्तद्वर्णाकारैरष्टोत्तरशतमणिगोलकैर्गोगणनार्थं कृष्णेन गोजपमालैका कृतास्ति तां मालां गृहीत्वैवासङ्ख्यानामपि गवामष्टोत्तरशतं यूथान् पृथक् पृथक् वर्णान् गणयति । तथाहि । हिही धवलीत्याह्वानेन धवलीयूथो यथा आयाति तथैव हंसी चन्दनी गङ्गे मुक्ते इत्याह्वानेन तत्प्रभेदाश्चतुर्विंशतिरन्येऽपि यूथा आयान्ति । एवमरुणी कुंकुमी सरस्वतीत्यादि संज्ञाः श्यामला धूमला यमुनेत्यादि संज्ञाः पीता पिङ्गला हरितालिकेत्यादि संज्ञाः चित्रिता चित्रतिलका दीर्घतिलका तिर्यक्तिलकेत्यादि संज्ञाः मृदङ्गमुखी सिंहमुखीत्यादि संज्ञाश्च स्वस्वनामभिराहूता आयान्त्यतो वनाद्गोष्ठगमनसमये काश्चनापि गावो विस्मृता माभवेयुरित्येकैकमणिगोलकावर्त्तनेन गा गणयन् दयितगन्धा तुलसी तस्या मालया सह वर्त्तमानः । प्रणयिनः प्रियस्यानुचरस्य स्कन्धे भुजं प्रक्षिपन् यदा अगायत तदा क्वणितस्य वेणो रवेण वञ्चितान्यपहृतानि चित्तानि यासां ताः कृष्णस्य कृष्णसारस्य गृहिण्यो हरिण्यः कृष्णमन्वसत अन्वासत अन्ववर्त्तन्तेत्यर्थः । यतो गुणगणार्णं गुणसमुद्रं कृष्णमनुगम्य प्राप्य तद्गुणानास्वाद्येत्यर्थः । विमुक्ता गृहाशा याभिस्ता गोपिका इव वयमप्येवं वृत्ता भवामः ॥ १८–१९ ॥

गूढार्थदीपिनी

तुलस्या मालया सह गोगणनार्थं मणिमालाधरः कृष्णः कस्यचित्प्रणयिनोऽनुचरस्य स्कन्धे भुजं प्रक्षिपन् स्थापयन् स्थापयन् यत्र यदा कदाचित् अगायत् तदा कृष्णसारमृगस्य भार्याः कृष्णमनुगस्य प्राप्य तमेव अन्वासत अन्वर्तन्त न न्यवर्तन्तेत्यर्थः । कथंभूताः । क्वणितवेणुरवेण वञ्चितानि अपहृतानि चित्तानि यासां ताः । गुणगणानाम् अर्णवम् ॥ १८–१९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काश्चित्तु नारीणां विमोहस्य का कथा मृगीणां मोहोऽदृष्टो दृष्ट इत्याहुः । मणिधर इति । दयित इष्टोऽपि गन्धो यस्याः सा दयितगन्धा तुलसी तस्या मालयोपलक्षितः श्रीकृष्णः मणीन् ग्रथितान् गवां गणनार्थं धरतीति मणिधरः क्वचित्तैर्मणिभिर्गाः आसमन्ततो गणयन् प्रणयिनः स्नेहवतो ऽनुचरस्यांशे स्कन्धे भुजं प्रक्षिपन् यत्र यदा अगायत् तदा क्वणितस्य वादितस्य वेणो रवेण वञ्चितानि विमोहितानि चित्तानि यासां ताः कृष्णगृहिण्यः कृष्णहरिणभार्या हरिण्यः गोपिका इव विमुक्तगृहाशाः गुणगणानां कल्याणगुणसमूहानामर्णं समुद्रं श्रीकृष्णमनुगत्य प्राप्य तमेव अन्वसत अन्वासत अन्ववर्तन्तेत्यर्थः ॥ १८–१९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यत्रदेशे कदाकदाचित्मणिधरः कौस्तुभधारी क्वचित्स्थलविशेषे गा आगमयन्नावर्तयन्दयितो गन्धो यस्यां सा तुलसी यस्यां सा तया मालया युतः । षष्ठीपाठेऽपि दयितगन्धतुलस्या पालयेत्यन्वयः । प्रणयिनः स्नेहपात्रस्यानुचरस्य भृत्यस्यांसे स्कन्धे

भुजं स्वं प्रक्षिपन्नगायत तदा क्वणितो ध्वनितो वेणुर्येन तं गुणगणार्णवं गुणगणसमुद्रं कृष्णं विमुक्ताः परित्यक्ता गृहेशाः पतयो याभिस्ताः कृष्णस्य गृहिण्यो भार्या वयमिव गोपिका गावश्च पिकाश्चा त इव हरिण्यो हरिणतरुण्यो वञ्चितचित्ता अनुगम्योपान्वीयुरुपासत। गोपिका अनुगम्येवान्वीयुरिति वाऽन्वयः। अनेन कृष्णगृहिण्य इत्यनेन हरिणीत्वलाभाद्धरिण्य इत्यतिरिक्तं विपर्ययो वेति परास्तम्। नारायणं निखिलपूर्णगुणार्णं इत्यृग्भाष्यटीकाटिप्पणेषु तद्धिता इति बहुवचनज्ञापितो मत्वर्थ ह इत्यतिविशदमुक्तेरयमर्णः समुद्रवाच्यर्णशब्द इति मन्तव्यम्। अर्णं वारिणि च प्रोक्तमर्णं स्यादक्षरेऽपि चेति विश्वः॥ १८–१९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

हरिणीनां वेणुनादेन यथाजातं तद्वक्तुं पूर्ववद्वेणुनादं वर्णयन्ति। मणिधर इति द्वाभ्याम्। गवामाधिदैविकानि रूपाणि मणयः तान् स्वस्मिन् बिभर्तीति मणिधरः अभिज्ञानार्थं वा स्वप्रियाणामभिज्ञापका मणयः अतस्तैः कदाचित् गाः आसमन्तात् गणयन् जातः अनेन ताः तद्गता धर्माश्च भगवत्येव प्रतिष्ठिता इति तासां संसाराभावः सूचितः। अत एव गोपिकानामपि, अत एव हरिणीनामपि पशुत्वाविशेषात् ग्राम्याणां चेदुद्धारकः विशेषतः आरण्यानां भविष्यतीति युक्ता कृष्णपरता मालया दयितगन्धतुलस्याः उपलक्षितः यथा भगवतः नीलं रूपं प्रियं स्पर्शः स्त्रीणां शब्दो वेणोः रसो नवनीतस्य तथा गन्धः तुलस्याः तद्गतोत्तमता सात्त्विकानां केषाञ्चिदनुभवसिद्धा तादृशी तुलसी अतस्तस्या मालां बिभर्ति अतो यदा वयमपि प्रिया भविष्यामः तदा अस्मानपि अस्मद्धर्मान् वा धारयिष्यतीति कृष्णसारस्त्रीणां प्रवृत्तिः कृष्णसारस्तु वेदे नियुक्त इति भक्तौ तासां विनियोगार्थं प्रवृत्तिः किञ्च प्रणयिनोऽतिप्रेमवतः अनुचरस्य गोपस्यांसे भुजं प्रक्षिपन्निति कदा कदाचित् “आशंसायां भूतवच्च” इति वा कदा अगायतेति मध्ये गानांशं सा यथा गोपालस्य तथा स्नेहसेवाधर्मयोः सद्भावे एवं भविष्यतीति गोपिकानामिव हरिणीनामपि तथात्वाय स्नेहभजनं देहास्फुरणात् न विजातीयत्वेन कामाभावः॥ १८॥ तदैव क्वणितो यो वेणुः आकस्मिकः शब्दविशेषो मनोहारी क्वणनात्मकः स चेद्वेणोर्निर्गतस्तत्सम्बन्धादन्येऽपि शब्दाः चित्तवञ्चका इति रवपदं शब्देन मृगाणां वशीकरणं सिद्धमेव इदानीमेवोपयोगो भविष्यतीति प्रतीतिजननाद्वञ्चकत्वम् अतो रवेण वञ्चितचित्ताः कृष्णमन्वसत कृष्णसमीपे आसत उपविष्टा जाताः यथाप्रायमुपविशति एवं कृष्णमनूपविष्टाः। ननु स्त्रियोऽन्यस्य कथमन्यस्य हेऽन्यस्य समीपे उपविष्टा इति तत्राह। कृष्णस्य कृष्णसारस्य गृहिण्य इति कृष्ण इति तास्तस्य गृहिण्यो जाताः वञ्चितचित्तत्वाद्वा रूपं विस्मृत्य शब्दमात्राभिनिविष्टा जाताः वेणुनादेन वा सानुभावेन कृष्णसारेऽपि कृष्णमत्या कृष्णमेवान्वासत। ननु कृष्णसारेऽपि कृष्णभ्रमात् शब्दोऽपि वर्त्तत इति तं परित्यज्य कथमागता इत्यत आह। गुणगणार्णमिति। कृष्णसारे एको द्वौ वा गुणौ अतो यत्रैव भगवान् गच्छति तत्रैव तमनुगत्य सर्वा एव हरिण्यः विमुक्तगृहाशा जाताः गृहं गमिष्याम इत्याशामपि त्यक्तवत्य सान्निध्येन भगवद्रसः पीत इति लब्धस्वादुभावाः गोपिका इव तदेकपरा जाताः एतन्नयनेषु स्वप्रियानयनसादृश्यदर्शनेन यादृशेन भावेन ताः पश्यति तादृशेनैवता अपि पश्यन्तीत्येतासामपि तत्सजातीयभावोत्पत्तिस्तथैव वेणुक्वणनञ्च अत एवाग्निबीजामृतबीजात्मकं रवपदमुक्तं यतस्तच्छ्रवणेऽत्यार्त्तिस्तत्तापशमनञ्च सम्पद्येते अतः स्वदृष्टान्तोक्तिर्युक्ता॥ १९॥

श्रीसुबोधिनी–सारः

क्वचित् गा आ सर्वतो गणयन् दयितः प्रियो गन्धो यस्याः सा चासौ तुलसी तस्या मालया हंस मणिं धरतीति तथा प्रणयिनः स्निग्धस्यानुचरस्य गोपस्यांसे स्कन्धोपरि कदा भुजं हस्तं प्रक्षिपन् यत्र यदाऽगायत॥ १९॥ तदा क्वणितः शब्दितो वेणुस्तस्य रवेण नादेन वंचितानि आकर्षितानि चित्तानि यासां ताः कृष्णस्य मृगस्य गृहिण्यः स्त्रियो हरिण्यो गुणगणसमुद्रं कृष्णमनुगत्य प्राप्य गोपिका इव विमुक्तास्त्यक्ता गृहाशा याभिस्ताः कृष्णमनु असत सर्वतोऽस्थुः॥ १९॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

रववञ्चितचित्ता इत्यत्र, **इदानीमेयोपयोग** इत्यादिना प्रतीतिप्रकारकथनम्। उपयोगो नायिकावदुपभोग इति यावत्। वेणुनादस्यैतादृगनुभावो यदेतासामप्येवं भावस्तत्रान्यासां का वार्तेति भावः॥ १९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किंच मणिधर इति। मणीन् ग्रथितान् गोगणनार्थं धारयतीति मणिधरः, तथा दयितः प्रियो गन्धो यस्यास्तस्यास्तुलस्याः मालयोपलक्षितः, क्वचिद्देशे तैर्मणिभिर्गाः आ समन्तात् गणयन्, प्रणयिनः प्रियस्य अनुचरस्य सख्युरंसे स्कन्धे स्वभुजं प्रक्षिपन् स्थापयन् यत्र यदा कदाचिदगायत॥ १८॥ तदा तत्र क्वणितस्य वादितस्य वेणोः रवेण शब्देन वञ्चितानि अपहृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य गृहिण्यो भार्या हरिण्यस्तं गुणगणार्णं माधुर्यादिगुणसमूहानां समुद्रं कृष्णमनुगस्य अन्वसत अन्वासत सर्वतः आवृत्य स्थिता इत्यर्थः। ननु ‘चञ्चलस्वभावानां पतिभिः सह वने विचरन्तीनां कथमेवं स्थितिः सम्भवति ?’ तत्राहुः—विमुक्तगृहाशा इति। तत्र दृष्टान्तमाहुः—गोपिका इवेति॥ १९॥

अन्वितार्थप्रकाशिका

अथ चतुर्थयामारम्भे कृष्णस्य व्रजं प्रत्यागमने गोगणनादिकमाहुः—मणिधर इति ॥ मणीन् ग्रथितान् गोलकान् गोगणनार्थं धारयतीति मणिधरः। तथा हि शुक्लरक्तश्यामपीतादीनां वर्णानां भेदैरष्टोत्तरशतमणिगोलकैर्गोगणनार्थं कृष्णस्य मालाऽभूत्। तां गृहीत्वैवासंख्यानामपि गवामष्टोत्तरशतं यूथान् पृथग्वर्णान् कृष्णो गणयति स्म। तथा हि। ही ही धवलीत्याह्वानेन धवलीयूथो यथा आयाति तथा हंसी चन्दनी गङ्गे इति अरुणी कुङ्कुमी सरस्वतीति श्यामला धूमला यमुनेति पीता पिङ्गला हरितालिकेत्यादि-संज्ञाश्च यूथाः स्वस्वनामभिराहूता आयान्त्यतो वनाद्गोष्ठगमनसमये काश्चनापि गावो विस्तृता मा भवेयुः। इत्येकैकमणिगोलका-वर्तनेन गवां गणनम्। तथा दयितः प्रियो गन्धो यस्यास्तस्यास्तुलस्या मालयोपलक्षितः क्वचिद्देशे तैर्मणिभिर्गाः आसमन्तात् गणयन् प्रणयिनः प्रियस्य अनुचरस्य सख्युरंसे स्कन्धे स्वभुजं प्रक्षिपन् स्थापयन् यत्र यदा कदाचिदगायत। तङार्षः ॥ १८ ॥ तदा तत्र क्वणितस्य वादितस्य वेणो रवेण वञ्चितानि अपहृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य गृहिण्यो भार्या हरिण्यः गोपिका इव विमुक्तगृहाशाः सत्यः गुणगणार्णं माधुर्यादिगुणगणसमुद्रम्। अर्णवेव लोप आर्षः। तं कृष्णमनुगत्य प्राप्य अन्वसत अन्वासत। ह्रस्वमार्षम् ॥ १९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यु० ८ ॥ पुनः किञ्च मणीति धरतीतिधरः कण्ठे मणीनां नानाविधवर्णनां कौस्तुभादीनां धरोमणिधरः दयितगन्धायाः स्वप्रियकमनीय गन्धायाः तुलस्याः मालया तुलसीकाष्ठनिर्मितया स्रजा क्वचित्स्थाने समये वा गाः आसमन्ताद्गणयन् प्रणयिनः स्निग्धस्यानुचरस्य स्वसेवकगोपस्य अंसे स्कन्धे भुजं प्रक्षिपन् यत्र यदा कदाचिदगायत ॥ १८ ॥ तदा वादितवेणुरवेण वंचितानि हृतानि चितानि यासां ताः कृष्णगृहिण्यः कृष्णसारमृगवध्वो हरिण्यो विमुक्तगृहाशा गोपिका इव गुणगणानां अर्णं अर्णवं श्रीकृष्णमनुगत्य प्राप्यान्वसत अन्वासतसमीपं स्थितवत्यो न निवर्त्तन्ते इत्यर्थः ॥ १९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मणिधर इति ॥ किं च मणीन् गोगणनार्थं ग्रथितान्मणिकान् धरतीति मणिधरः स्वयं कृष्णः, क्वचिद्देशे, तैर्मणिभिः गा धेनूः, आ समन्तात्, गणयन्, तथा दयितगन्धा इष्टगन्धा या तुलसी तस्याः मालया, उपलक्षितः सन्, प्रणयिनः प्रियस्यानुचरस्य, अंसे स्कन्धे, भुजं प्रक्षिपन् निदधत् संश्च, यत्र यदा कदा कदाचित्, अगायत ॥ १८ ॥ क्वणितेति ॥ तदा क्वणितस्य वादितस्य वेणोर्यो रवः शब्दस्तेन वञ्चितान्यपहृतानि चित्तानि यासां ताः, यन्त्रितचित्ता इति पाठे यन्त्रितानि परवशीकृतानि चित्तानि यासां ताः, कृष्णगृहिण्यः कृष्णवर्णहरिणस्य अङ्गना हरिण्यः, गुणगणार्णं गुणगणसमुद्रं, कृष्णं अनुगत्य प्राप्य, अन्वसत। तास्तमेवान्वासतेत्यर्थः। न न्यवर्त्तन्तेति भावः। कुतः। यतः गोपिकाः इव, विमुक्ताः परिहृताः गृहाशा याभिस्ता, यथा परित्यक्तगृहाशा गोपिका एवं ता अपि तथाविधा भूत्वा तमेवान्वासतेत्यर्थः ॥ १९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मणिधर इति : १०.३५.१८.

भक्तानां स्वपदानुरञ्जितधियां गास्तोषदा मालया तौलस्या गणयन् करोति सदयो गीतोपदेशं यदा।
जीवन्मुक्तसुखाशया जगति ते श्रीमद्गुणाकर्णनासक्ताः स्युर्मनसोज्झिताखिलमिलत्तृष्णाश्च कृष्णोद्धृता ॥ ३७ ॥

क्वणितवेणुरवेति : १०.३५.१९.

वयमिव मुक्तगृहाशा हरिण्य इति साधुता इवात्र वयम्। सखि कृष्णसारसुखजुषो न जाता इतीदमतिचिन्त्यम् ॥ ३८ ॥

कृष्णप्रिया

देखो री सखियाँ ! प्यारे श्याम सुन्दर जी ने विविधरङ्ग की मणियों की माला धारण की है कभी गौओं संख्या को गिनने की इच्छा हो जाती तब उस मणि माला से गणना करते हैं। देखो ? सखि भक्तिमय सुगन्ध वाली एव अत्यन्त श्री तुलसी जी की माला को धारण किए हुए और प्रिय सखा के कन्धे पर अपने श्री हस्त को रखकर जब वंशी बजाते हैं तब मधुर वेणुक वर्णन–रव का श्रवण करने वाले कृष्ण हरिणों की वधू हरणियाँ, व्रजवनिताओं की नाईं गृह परिवार की आशा ममता का त्यागकर गुण महासागर श्री गोविन्द जी के समीप जाकर उनकी ही आश्रित बन बैठती हैं ॥ १८–१९ ॥

कुन्ददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ।
नन्दसूनुरनघे तव वत्सो नर्मदः[1] प्रणयिनां विजहार ॥ २० ॥
मन्दवायुरुपवात्यनुकूलं मानयन् मलयजस्पर्शेन ।
वन्दिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥ २१ ॥

कर्दमक्षमा

अन्वयः—हे अनघे यशोदे ! कुन्द, दाम, कृत, कौतुकवेशः, गोप, गोधन, वृतः, प्रणयिनाम्, नर्मदः, तव, वत्सः, नन्दसूनुः, यमुनायाम्, विजहारः, (तदा) मन्दवायुः मलयस्पर्शेन, (तम्) मानयन, अनुकूलम्, उपवाति, (च) ये, उपदेवगणाः, वन्दितः, इव वाद्यगीतबलिभिः परिवव्रुः ॥ २०-२१ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवं वृन्दावनप्रदेशेषु क्रीडित्वा सयाह्ने गोधनानि परावर्त्य यमुनायां क्रीडतस्तस्य सौभाग्यमनुवर्णयन्ति । कुन्ददामकृतकौतुकवेष इति । गोपीनामुत्सवाय कुन्ददामभिः कृतः कौतुकेनोत्सवेन वेषोऽलंकारो येन सः । हे अनघे यशोदे तव वत्सः पुत्रो नन्दसूनुः कृष्णः । यद्वा सहैव बह्व्यः कथयन्त्यः काश्चित्तव वत्स इति काश्चिन्नन्दसूनुरिति चाहुः । नर्मदो हर्षदः सन्यदा विजहार क्रीडति स्म ॥ २० ॥ तदा मलयजस्पर्शेन मलयजस्य चन्दनस्येव सुरभिः शीतश्च यः स्पर्शस्तेन तं कृष्णं मानयन्ननुकूलं यथा तथोपवाति वीजयति । यद्वा मलयजो दक्षिणा वायुः । यद्वा मलयजस्य कृष्णेन स्वांगेऽनुलिप्तस्य चन्दनस्य स्पर्शनं मानयन्निति । किं च वन्दिन इव स्तावकाः संतो गन्धर्वादिगणा वाद्यगीतपुष्पवर्षादिभिः परिवव्रुः परित उपासत ॥ २१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

(१) ॥ तदेवम् तदेत्थम् । केचित्तु विवाहे यद्वरकरे पूगपीतसर्षपादियुतं सूत्रं बध्यते तत्कौतुकं, तत्सम्बन्धी वेषो वैवाह्यवेषो यस्य स तथा । "कौतुकं त्वभिलाषे स्यादुत्सवे नर्महर्षयोः । तथा परंपरायातमंगले च कुतूहल ॥ विवाहसूत्रगीतादिभोगयोरपि न द्वयोः " इति मेदिनी । तव वत्स इत्यनेनैव सुतत्वसिद्धौ नन्दसूनुरिति महामुनेः कथनं वसुदेवात्मजत्वभ्रांतिवारणायैव, नन्दाद्यशोदायां साक्षाज्जात इति तत्त्वाबोधाय चेति । नेयमेकोक्तिः पुनरुक्तिदोषाद्वदन्त्या भ्रांतिसंभावनाकल्पनाच्चात आह–यद्वेति । हर्षदः लीलावचनेनानन्दद ॥ (२०) ॥ उपमानगर्भसमासापेक्षया तद्रहित एव स साधुः । " अर्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेत्" इति न्यायेनात आह–यद्वेति । मलयसम्बन्धी वायुः स्वभावत एव सुगंधिशीलो भवतीति पुनरुक्तिदोषवायुद्वयसम्बन्धकल्पनाच्चास्वारस्यप्रतीतेरर्थान्तरमाह–यद्वेति । न केवलं वायुरेवापास्त किन्त्वन्येऽपीत्याह–किञ्चेति । स्तावका मंगलपाठकाः । गन्धर्वादीहादिना चारणविद्याधरादयो ग्राह्याः । पुष्पादीत्यत्रोक्तादिनाभिनयादिग्रहः । तं कृष्णम् । परिरत्रोपार्थे उपसर्गाणामप्यनेकार्यत्वात् ॥ अथ व्रजेश्वरीसदनं गता गोप्यस्तमपराह्ने स्वपुत्रागमनविलम्बेन विक्षुभ्यन्तीं तद्विलंबकारणोक्त्या सांत्वयंति–कुन्ददामेति युगलत्रयेण । वैष्णवतोषणी–यमुनायां पर्यटन् श्रमोपशान्त्यर्थं तत्र स्नात्वा तत्तट उपविश्य कौतुकव्यंजक वेशं परमोत्कण्ठया मेलिष्यतः स्वबंधून्सुखायितुं कृत्वा यदा विजहार पादविहरणं चकार तदा मन्दवायुरुपवातीत्यन्वयः । प्रणयिनां वयस्यानां नर्मदः परस्परं हासोपहास द्यति खण्डयति ददाति चेत्यर्थः । अनघ इति–तव प्राक्तनमर्वाचीनं वा किमप्यघं नास्ति यतः पुत्रानिष्टं स्यात्तत् किमिति किंचिद्विलंबमात्रेणैवासुरादिहेतुकं । तदनिष्टं शंकस इति भावः । यतो नन्दस्य पुण्यवच्छिरोमणित्वेन प्रसिद्धस्य सूनुः, तव च महापुण्ययशस्वित्वेनव यशोदाया वत्सो महावात्सल्यपात्रीभूतः पुत्रः, लोके हि मातापित्रोरभाग्येनैव बालस्यानिष्टं भवेदतो न कृष्णस्य किमप्यनिष्टमिति भावः ॥ तद्विलंवस्य कारणं वयं बालकानां मुखेभ्य एव श्रुत्वा जानीमस्तच्छृणिवत्याह—मंदेति । मलयजस्य मलयपर्वतात्पन्नचन्दन वृक्षस्य स्पर्शेन सौगन्ध्यं शैत्यं च गृहीत्वा तयोर्भारेण द्रुतं चलितुमसमर्थो वायुः कृष्णं मानयन्ननुकूलं यथा स्यात्तथोपवाति । वन्दिनस्तावका ये उपदेवगणा गंधर्वादयस्तेऽपि स्वस्वगुणान् दर्शयन्तो वाद्यादिभिः परिवव्रु रावृण्वन् । अत एव तत्तदनुमादनहेतुको विलम्बो जायते एव 'गुणिज्ञो रमते' इति न्यायात् । न चात्र खेदः समुचितः । त्वपुत्र ते यदेवं संमानयंति तत्तवैव भाग्यमिति भावः ॥ २०-२१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ पुनर्व्रजेश्वरीसभागतम् पूर्वोक्तगोसमाहरणादिसामयिकलीलानन्तरं लीलावर्णनं संगृह्यते । तच्च समाहरणं द्वितीयजलपानसमय एव स्यात् इति व्यज्यते च । तत्र तादृशीञ्च लीलां स्वयमनुभूय कालातिक्रमेणार्तां तन्मातरं तदागमनवार्त्तया स्वस्थयितुमभिगम्य पूर्ववदाहुः । कुन्देति युग्मकत्रयेण । कुन्देति मन्देति च कार्त्तिकमासोऽयमिति लभ्यते वसन्ते कुन्दानर्हत्वात्

---

१. शर्मदः–विज. । २. जस्य रसेन–प्रा. पा. ।

हेमन्तशिशिरयोर्वायोर्द्वेषाच्च। तत्र च तदीयेन सर्वसुखदलीलत्वेन सर्वसेवासुखपात्रत्वेन च तां स्वस्थयन्ति विलम्बे कारणमपि निवेदयन्ति। कुन्देति। यमुनायां विजहार तस्या जले स्नानकेलिं विधाय तीरे सविलासं चिक्रीडेत्यर्थः। कीडशः सन् विजहार तत्राहुः। कुन्ददामेति। समस्तदिनभ्रमणश्रान्त्या स्नानस्यापेक्षत्वात् कुन्ददाम्नां जलक्लिन्नतायामरुचिप्रदत्वेन तत्पश्चाद्धावयोग्यत्वाच्च। तत्र सर्वसुखलीलात्वादिकं वदन्त्यो विलम्बे कारणमपि सूचयन्ति। गोपेत्यादिभिः तस्य च तादृशत्वं युवयोः पुत्रत्वादनुरूपमेवेत्यर्थः। सर्वानन्दकतया तन्नाम्ना प्रसिद्धस्य सूनुः। न विद्यते अघं दुःखं सर्वेषामपि यतः हे तथाभूते इति तथैव सर्वानन्दिन्यास्तव च वत्स इत्यर्थः। तत्र वत्स इति धेनूनां वत्स इव परमस्नेहविषय इत्यर्थः। अतस्तव त्वत्यर्थं वैयग्र्यं युक्तमेवेति भावः। गोपेति। जलादितृप्ततया स्थगितगमनैर्गोपैर्गोधनैश्चावृत इत्यर्थः। तत्रापि प्रणयः सख्यमयस्नेहस्तद्वतां नर्मदः सपरिहासकेलिभिः सुखद इत्यर्थः। कौतुकं क्रीडोत्सवो हर्षो वा। वेशो ऽवतंसाद्यलङ्कारः। एवं पूर्ववेशपरित्यागेन वेशान्तरं ज्ञेयम्। अनुकूलं प्रियम्। यद्वा। पृष्ठवायुत्वेन गमनानुकूलं यथा स्यादिति सोऽपि तत्स्वैरचारितायां सहाय इति भावः। अतो मन्दपदं श्लिष्टमपि ज्ञेयम्। तमिति कर्मसम्बन्धात् उपवाति वीजयतीत्यर्थः। यद्वा। उपसमीपे वाति। यत्रादौ तत्रैव तादृशो वायुर्नान्यत्रेत्यर्थः। मानयन् पूजयन् मलयजेति तैर्व्याख्यातम्। अत्र मलयजो दक्षिणो वायुरिति पक्षे वैकल्पिको विसर्गलोपः। शरदि तस्य च सद्भावात् तादृशानुकूल्याय तु सुतरां पृष्ठवायुत्वपक्षे सोऽप्यनुकूलं यथा स्यात्तथैवोपवातीत्यर्थः। उपदेवा गणदेवा गन्धर्वादयो ये ते सर्वेऽपीत्यर्थः। वन्दिन इति गातेति च गीतद्वारा स्तुतिर्बोध्यते। वलिवाद्ययोस्तु तदनुगतत्वम्। वलिरत्र दिव्यवस्त्रालङ्कारभोगादिसामग्रीमयो ज्ञेयः। अतो गीतप्राधान्यात् गन्धर्वादिगणा इति तैरप्युक्तम्। परिवव्रुरिति तेऽपि तदागमनविलम्बं चक्रुरित्यर्थः। किन्तु वायोरेषाञ्च प्रस्थानमाङ्गलिकत्वात् शीघ्रसुखागमनं भवेदेवेति भावः॥ २०–२१॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ क्षणादाश्वस्य पुनः पुत्रोत्कर्षशुश्रूषया तत्रागतां श्रीव्रजेश्वरीम्। यद्वा, पुत्रविच्छेदार्त्तां पुत्रागमनवार्त्तया स्वस्थयितुं तामभिगम्याहुः—कुन्देति युगलेन। कौतुकं क्रीडोत्सवम्, वेषोऽवतंसाङ्गदाद्यलंकारः, एवं पूर्व्ववेषपरित्यागेन वेषान्तरं ज्ञेयम्। गोपैर्गोधनैश्च वृत इति विकाले गृहागमने गोपानां सर्व्वदिनक्रीडापरिश्रान्त्याद्युपशमार्थः गवां चान्तिमजलपानार्थमिति तासां तादृशपरिपाल्यतापेक्षयोक्तम्, धनेति श्लेषेण गोपा गावश्चैव तस्य धनानि, न त्वन्ये एतादृशा जना इति भावः। 'नन्दसूनुस्तव वत्सः' इति द्वयोरपि तयोर्हर्षार्थम्, तत्र 'तव वत्सः' इति तस्या अधिकवात्सल्यमभिप्रेतम्। हे अनघे! इति हे सर्व्वक्लेशानभिज्ञे! किंवा न विद्यते अघं दुःखं यस्याः सकाशादन्येषामपीति त्वत्स्नेहभरेणैव; काले तस्यागमनात् त्वत्तोऽस्माकमपि दुःखं विनष्टमिति भावः। एतच्च प्रेमभरस्वाभाविकदैन्येन यमुनाया जले तीरे वा विजहार। तत्र हेतुः—प्रणयः स्नेहविशेषस्तद्वतां सहचराणां नर्म्मदः सन्निति त्वरितदर्शनविघ्नकारित्वेन व्रजप्रवेशे विलम्बे हेतवः, सहचरा इतीर्ष्यया भेदं जनयन्ति। अनुकूलं प्रियं यथा भवति। मन्देति—अत्यन्तसंयुक्ताभिप्रायेण समस्ततया विशेषणम्। क्लिन्नानामपि तासामुत्सवार्थमेव धारणं ज्ञेयम्। मलयजो दक्षिणवायुरिति विसर्गलोपे पृथक् पदमिति मान्द्यं सौगन्ध्यं शैत्यञ्चेति गुणत्रयम्। तमिति कर्म्मपदसम्बन्धात्, उपवातीत्यस्य बीजयतीत्यर्थः। उपदेवा विद्याधरादयस्तेषां ये गणास्ते सर्व्व एवेत्यर्थः। वन्दिन इति—गीतद्वारा स्तावकत्वापेक्षया मूलोक्त-वाद्य-गीतादि—क्रमोल्लङ्घनेन गानपरगन्धर्व्वाणामादौ लेखः। यद्वा, लेखकभ्रमोऽयम्। विद्याधरादिगणा इत्येव लेखः, यद्वा, मूल एव गीतवाद्येति पाठ इति। अथवा कौतुकं हर्षः, वेषश्छन्दः, श्यामजलायां श्रीयमुनायां विहारार्थं पूर्व्ववेशपरित्यागेन शुभ्रकुन्दमालावेशस्वीकारः। नन्दयतीति नन्दश्चासौ सूनुश्च वत्सः, नवप्रसूताया धेनोरिव तवात्यन्तस्नेहविषय इत्यर्थः। उप समीपे वाति, मलयजस्य चन्दनस्य स्पर्शेनेति दक्षिणत्वं सौरभ्यं चोक्तम्, तेन च वसन्तः कालो बोध्यते, तस्मिन्नपि कुन्दपुष्पाणि सर्व्वर्त्त्वाश्रयश्रीवृन्दावनस्वभावादेव। यद्वा, दक्षिणवायोरतिशैत्योष्णत्वेन क्रीडायामपेक्षत्वाद्रासक्रीडायां राकाचन्द्र इव सदा तस्योदयो ज्ञेयः। अतएव वासरा॥न्नन्युरिति सार्व्वकालिकदिनानामेव तादृशप्रगानेन नयनमपि सुसंगच्छेतेति दिक्। ये वन्दिनो जातिविशेषा गोकुलस्थिता अग्रेऽभिगताः, ये च देवगणा वाद्यादिभिर्विशिष्टास्ते सर्व्वे तं परिवव्रुः, स्वस्वसेवया वेष्टयित्वा स्थिता इत्यर्थः। तत्र वलयो गन्धपुष्पवस्त्रालंकारादयः। अन्यत् समानम्॥ २०–२१॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं वृन्दावनप्रदेशेषु क्रीडतो लीलाः प्रगीताः अथ सायाह्ने गोधनानि परावृत्य यमुनां क्रीडतः सौभाग्यमनुवर्णयन्ति। कुन्देति। कुन्ददामभिः कुन्दकुसुमस्रग्भिः कृतः कौतुकेनोत्सवेन वेषोऽलङ्कारो येन सः हे अनघे! यशोदे श्रीकृष्णः तव वत्सः पुत्रः नन्दसूनुः। यद्वा सहैव बह्वयः कथयन्त्यः काश्चित्तव वत्स इति काश्चिन्नन्दसूनुरिति चाहुः। प्रणयिनां सखीनां नर्मदः हर्षदः गोपैर्गोकुलेन च वृतो यमुनायां विजहार यदेति शेषः॥ २०॥ मन्दवायुरित्यस्य तु तदेत्यादिः तदा मन्दवायुर्मलयजस्येव सुरभिः शीतश्च स्पर्शस्तेन कृष्णं सम्मानयन्निति अनुकूलं यथा भवति तथा उपवाति बीजयति। यद्वा मलयजो दक्षिणो वायुः यद्वा मलयजस्य कृष्णेनालिप्तस्य स्पर्शेन मानयन्निति किञ्च ये वन्दिनस्तावका उपदेवगणाः सिद्धविद्याधरादयः ते वाद्यगीतपुष्पवर्षादिभिः तं कृष्णं परिवव्रुः परित उपासत॥ २१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

हे अनघे ! यशोदे कुन्ददाम्ना पुष्पमालयालङ्कृतः कौतुकवेषः विवाहकाले वरस्य हस्ते यत्सूत्रं बध्यते तत्कौतुकं तदीयो वेषः स यस्य स कुन्ददामकृतकौतुकवेषः "कौतुकं विषयाभेदे हस्तसूत्रे कुतूहल" इति यादवः । गोपादिभिः परिवृतः प्रणयिनां नर्मदः लीलावचनेन आनन्ददः तव वत्सः बालः नन्दसूनुर्यदा यमुनायां विजहार ॥ २० ॥ तदा मलयजस्पर्शेन चन्दनगन्धदानेन कृष्णं मानयन् वायुर्यथानुकूलो भवति तथा मन्दम्मन्दमुपवाति बीजयतीत्यन्वयः । किञ्च तदा ये उपदेवगणाः देवसमीपे वर्त्तमानाः गन्धर्वाः वन्दिनो वन्दमानाः । यद्वा मङ्गलपाठकाश्च वाद्येन गीतेन बलिना उपहारेण च तं कृष्णं परिवव्रुः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ पुनर्व्रजेश्वरीसभागतं पूर्वोक्तगोसमाहरणादि सायिकं लीलानन्तरं लीलावर्णनं सङ्गृह्यते तच्च समाहरणं द्वितीयजलपानसमय एव स्यादिति व्यज्यते च तत्र तादृशीं च लीलां स्वयमनुभूय कालातिक्रमेणार्त्तां तन्मातरं तदागमनवार्तया स्वस्थयितुमभिगम्य पूर्ववदाहुः । कुन्देति युगलत्रयेण तत्र च तदीयेन सर्वसुखदलीलात्वेन सर्वसेवासुखपात्रत्वेन च तां स्वस्थयन्ति विलम्बे कारणमपि निवेदयन्ति कुन्देति युगलेन यमुनायां विजहार तस्या जले स्नानकेलिं विधाय तस्यास्तीरे सविलासं चिक्रीडे इत्यर्थः । कुन्देति मन्देति च कार्तिकमासोऽयमिति लक्ष्यते । वसन्ते कुन्दानर्हत्वात् हेमन्तशिरयोर्वायोर्द्वेषाच्च ॥ २०-२१ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

नन्दयशोदयोर्भाग्यवशादेवायमस्मादृशां दृग्गोचर इति कृत्वा तावेव स्तुवन्त्यः काश्चिदन्या आहुः-कुन्ददामेति । द्वाभ्याम् हे नन्द ! तव सूनुः हे अनघे व्रजेश्वरि ! तव वत्सो यदा यमुनायां विजहार, तदा मन्दवायुरनुकूलं यथा स्यात्तथा उप समीपे वाति वन्दिनश्च तं परिवव्रुरित्युत्तरेणान्वयः । यद्वा, हे अनघे राधे ! नन्दसूनुः श्रीकृष्णो यदा यमुनायां विजहार तदैवमित्यर्थः । कीदृशः ? तव वत्सो नर्मदः, वत्सस्य वक्षस ऊः संवरणम्, तस्मिन् यन्नर्म परिहासस्तद्ददातीति तथा । 'उरो वत्सञ्च वक्षश्च' इत्यमरः । 'वेञ् संवरणे' इत्यस्य क्विपि संप्रसारणे सिद्धम् । प्रणयिनां प्रणयिजनानां गोपीजनानां मध्ये इति निर्द्धारणे षष्ठीति श्रीराधां प्रति श्रीराधासख्युक्तिः ॥ २०-२१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नन्दयशोदयोर्भाग्यवशादेवास्मद्विधानां दृग्गोचरोऽयमिति मनसि कृत्वा तावेव स्तुवन्त्यो वत्सला ऊचुः—कुन्ददामेत्यादि द्वाभ्याम् । हे नन्द ! तव सूनुः अनघे यशोदे ! तव वत्सो वात्सल्यपात्र एकदा यमुनायां विजहार तदैवमित्युत्तरेणान्वयः । यद्वा, हे अनघे पुण्यवति राधे ! तव नर्मदो नन्दसूनुर्यदा यमुनायां विजहारेति राधासखीनामेवोक्तिः । नर्मदत्वमाह—प्रणयिनां मध्ये तव वत्सः—वत्समाचष्ट इति तथा उरो वत्सञ्च वक्षश्चेति वत्सयतीति वत्स, अचि असिके वा रूपम् । वत्सोनर्मद इत्येकं वा पदम् ; वत्से वक्षसि उः सीवनं यस्य तथाविधं यन्नर्म तद्ददातीति तथा, यन्नर्म वक्षसि प्रविशति तदित्यर्थः; हासः ॥ २०-२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथ व्रजेश्वरीसदनं गता गोप्यस्तामपराह्णे स्वपुत्रागमनविलम्बेन विक्षुभ्यन्तीं तद्विलम्बकारणोक्त्या सान्त्वयन्ति । कुन्ददामेति युगलत्रयेणेति वैष्णवतोषिणी । यमुनायां पर्यटन् श्रमोपशान्त्यर्थं तत्र स्नात्वा तत्तटे उपविश्य कौतुकव्यञ्जकं वेशं परमोत्कण्ठया मिलिष्यतः स्वबन्धून् सुखयितुं कृत्वा यदा विजहार पादविहरणं चकार तदा मन्दवायुरुपवातीत्यन्वयः । प्रणयिनां वयस्यानां नर्मदः परस्परं हासोपहासं द्यति खण्डयति ददाति चेत्यर्थः । अनघे ! इति तव प्राक्तनमर्वाचीनं वा किमप्यघं नास्ति यतः पुत्रानिष्टं स्यात्तत् किमिति किञ्चिद्विलम्बमात्रेणैवासुरादिहेतुकं तदनिष्टं शङ्कसे इति भावः । यतो नन्दस्य पुण्यवच्छिरोमणित्वेन प्रसिद्धस्य सूनुः । तव च महापुण्ययशस्वित्वेनैव यशोदाया वत्सः महावात्सल्यपात्रीभूतः पुत्रः । लोके हि मातापित्रोरभाग्येनैव बालकस्यानिष्टं भवेदतो न कृष्णस्य किमप्यनिष्टमिति भावः । तद्विलम्बस्य कारणं वयं बालकानां मुखेभ्य एव श्रुत्वा जानीमस्तत् शृण्वित्याहुः । मन्देति मलयजस्य मलयपर्वतोत्पन्नचन्दनवृक्षस्य स्पर्शेन सौगन्ध्यं शैत्यञ्च गृहीत्वा तयोर्भावेन द्रुतं चलितुमसमर्थो वायुः कृष्णं मानयन्ननुकूलं यथा स्यात्तथा उपवाति । वन्दिनस्तावका ये उपदेवगणा गन्धर्वादयस्तेऽपि स्वस्वगुणान् दर्शयन्तो वाद्यादिभिः परिवव्रुरावृण्वन् अत एव तत्तदनुमोदनहेतुको बिलम्बो जायते एव गुणिनि गुणज्ञो रमत इति न्यायात् । न चात्र खेदः समुचितः । त्वत् पुत्रं ते यदेवं सम्मानन्त्येतत्तवैव भाग्यमिति भावः ॥ २०-२१ ॥

गूढार्थदीपिनी

दाम माला । हे अनघे यशोदे । नर्मदः सुखदः तव वत्सः यदा विजहार तदा मलयजस्य अङ्गलिप्तचन्दनस्य स्पर्शे अनुकूलं वायुः तं मानयन् सत्कुर्वन् सन् उपवाति वीजयति । किञ्च ये उपदेवा गन्धर्वादयः तेऽपि तदा वाद्यादिभिः तं परिवव्रुः परिवेष्टिवन्तः ॥ २०-२१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदेवं भगवतः श्रीमद्वृन्दावनप्रदेशेषु क्रीडा अनुवर्णिताः सम्प्रति सायाह्ने गाः परावर्त्य श्रीयमुनायां क्रीडतः सौभाग्यं श्रीयशोदां प्रति वर्णयन्ति। कुन्देति। हे अनघे! यशोदे तव वत्सः नन्दसूनुः श्रीकृष्णः 'कौतुकं त्वभिलापे स्याद्विवाहे नर्महर्षयोरिति' मेदिनीकारः कुन्ददामभिः कुन्दपुष्पमालाभिः कौतुकेन हर्षेण वेषोऽलङ्कारो येन सः नर्मदः केलिप्रदः सन् यदा यमुनायां विजहार क्रीडति स्म तदा मन्दवायुः मलयजस्य चन्दनस्येव सुरभिः शीतलश्च यः स्पर्शस्तेन तं श्रीकृष्णं मानयन् पूजयन् अनुकूलं यथा भवति तथोपवाति तथा वन्दिनः स्तावकाः सन्तः उपदेवगणाः गन्धर्वादिगणाः वाद्यगीतकुसुमवृष्ट्यादिभिस्तं परिवव्रुः परित उपासते॥ २०–२१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे अनघे यदा कुन्ददाम्ना धृतकुन्दमालया कृते कौतुकमुत्सवो यस्य स वेषो यस्य सः। गतम्। कौतुकेन वेषो यस्येति वा। सुमनसस्तदुपधार्येत्यारभ्यैकोननिंशश्लोकर्यन्तं यशोदां लक्ष्यीकृत्योक्तिरिति स्फोरयितुं पुनरनुक्तौ बहुसंविधानसापेक्षतया चेतश्चाञ्चल्यं स्यादिति नन्दसूनुरनघ इत्युक्तिरिति ज्ञेयम्। गोपैर्गोधनैश्च वृतो नन्दसूनुरित्युक्तावुदरान्तरज इति स्यादिति तव वत्स इत्युक्तिः। न धर्मादयः कुन्तीसूनव इवायमिति बोधयितुं नन्दसूनुरिति। प्रणयिनां नर्मदो विनोदजनितानन्ददो यमुनायां विजहार चिक्रीड॥ २०॥ मलयजस्पर्शेन चन्दनपरागदानेन कृष्णं मानयन्ननुकूलं यथा तथा मन्दवायुरुपवाति वीजयति। ये उपदेवगणा गन्धर्वसङ्घास्ते वन्दिनः स्तुतिपाठका इव वाद्यैर्गीतैर्बलिभिः सह परिवव्रुः। एवं महापुण्यवती त्वगिति सूचयन्त्यनघ इत्यनेनेति मन्तव्यम्॥ २१॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं नवप्रकारं वेणुनादं निरूप्य गुणातीतप्रकारेण त्रिधा निरूपयन् वेणुनादेन भगवान् जगदेव वशीकृतवानित्याहुः। कुन्ददामेति द्वाभ्याम्। यर्हि भगवान् यमुनायां विजहार तत्रापि पूर्वोत्तरदशायामपेक्षितो वेणुनादः परिगृह्यते प्रकरणित्वात् प्रकारविशेषाभावाच्च न पृथगुक्तः तदा उपदेवगणाः परिवव्रुरिति सम्बन्धः। यमुनायामिति सामीप्यसप्तमी अधिकरणसप्तमी वा धर्मे गवां गोपालानाञ्च जले स्थितिः सम्भवति तत्र विहारो गोपैः सहजलक्रीडा गवां प्रक्षालनादिः सर्वत्रोद्वेगशान्त्यर्थं वेणुनादः सहकारी तदानीमनलंकृतत्वमाशङ्क्य अलङ्कारमाह। कुन्ददामेति। वस्त्राभरणाद्यलङ्कारा भविष्यन्त्येव पुष्पालङ्काराः न भविष्यन्तीत्याशङ्क्य तदेव निरूप्यते कुन्ददाम्ना कृतः कौतुकवेशो यस्य दामान्यनेकप्रकाराणि तैस्तथा वेशो निर्मीयते यथा अत्यद्भुतो भवति। अत्र तु यथैव हास्यरस उत्पद्यते तथैव निर्म्मीयते इति। नन्वेतादृशीं प्राकृतलीलां भगवान् कथं कृतवान् इत्याशङ्कायमाहुः। नन्दसूनुस्तव वत्स इति। यया लीलया नन्दपुत्रो भवति तयैव लीलया प्राकृतलीलामपि सम्पादयति अनघ इति सम्बोधनं क्रोधाभावाय विश्वासार्थंच तव च वत्सो जातः अनेन त्वं गोरूपेति सर्वगुप्तरसानभिज्ञत्वं सूचितम् अन्यथा उलूखलबन्धनलीलां न कुर्यात् मध्ये निर्दोषत्वेन सम्बोधनादुभयोर्निर्दोषत्वं ज्ञाप्यते तादृश्या यत्सत्वेन भगवत्यपि तथा पूर्णगुणत्वलक्षणमाधिक्यं चोच्यतेऽग्रिमविशेषणेन किञ्च प्रणयिनां नर्मदः ये केचन स्नेहयुक्ताः यथैव ते स्निग्धा भवन्ति तथैव लीलां करोति अनेन सर्वत्रैव हेतुरुक्तः यत्रैव लीलासक्त्या क्रीडा सविहारः सोऽत्र जलक्रीडा नृत्यक्रीडा वेणुवादनक्रीडा च ज्ञेया अन्यथा वाद्यादीनामुपयोगो न स्यात्। विद्यावन्तो हि वशीकिर्त्तव्याः तत्र विद्योत्पादको वायुः देवाश्च तदाधारभूताः तत्राप्युपदेवगणाः वन्दिनश्च बहिर्विद्याप्रकटनपराः अतोऽन्यापेक्षया तेषु विशेष उक्तः प्रथमतः कारणभूतं वायुं निरूपयन्ति मन्दो वायुः अनुकूलं यथा भवति तथा उपवातीति अनुकूल कुलसमीपे हितं च अनेन शैत्यं निरूपितं मलयजस्पर्शेन सहित इति सौरभ्यम् अनेन दाक्षिणात्योऽयं वायुरिति निरूपितं भगवत्स्वरूपे दत्तेन वा मलयजेन सह भावात् अधिकशैत्यनिरूपकत्वेन अनुकूलत्वं मलयजस्येव वा स्पर्शः तथा सति तत्रत्यानां सर्वेषामेव भगवद्भावं सम्पादयिष्यतीति मानयन्निति स्वकीयैस्त्रिभिर्गुणैः यथैव सन्मानं भवति तथैव वातीत्यति वश्यता उपदेवगणाश्च गन्धर्वादयश्च वन्दिनः कीर्त्तिनिरूपका जाताः गायकाश्च सन्तः य इति भगवदीयाः वाद्यगीतपूजासाधनैः तामसराजससात्त्विकैः सहिताः परिवव्रुः सर्वत्रैवापेक्षितं कृतवन्तः॥ २०—२१॥

श्रीसुबोधिनी–सारः

कुन्दानां दामभिः स्तम्बैः कृतः कौतुकार्थं वेषो येन गोपैर्गोधनैर्वृतो नन्दस्य सूनुः तव वत्सः पुत्रः इत्यभिज्ञानभिज्ञोक्तिः। प्रणयिनां भक्तानां नर्मदः हास्यदः कृष्णो यमुनायां यदा विजहार॥ २०॥ तदा मलयजस्य चन्दनस्य स्पर्शेन मानयन्सत्कारं कुर्वन् मन्दो वायुरनुकूलं यथा भवति तथा वाति वीजयति वन्दिनः स्तावका ये उपदेवानां गंधर्वाणां गणा वाद्यगीतबलिभिः तं कृष्णं परिवव्रुः परित उपासांचक्रुः॥ २१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदेवं वृन्दावनप्रदेशेषु क्रीडित्वा मध्याह्ने गोधनानि परावृत्य यमुनायां क्रीडतस्तस्य सौभाग्यमनुवर्णयन्ति—कुन्देति। 'तव निर्दोषत्वमेव पुत्रस्य गुणवत्त्वे हेतुः' इति सूचयन्त्यो यशोदां सम्बोधयन्ति—अनघे इति। सहैव बह्व्यः कथयन्त्यः काश्चित्तव वत्सः पुत्र इति, काश्चिन्नन्दसूनुरिति चाहुः। कुन्ददामभिः कुन्दपुष्परचिताभिर्मालाभिः कृतः कौतुकेन उत्सवेन वेषोऽलङ्कारो येन सः गोपैर्गोधनैश्च वृतो यदा यमुनायां विजहार क्रीडति स्म, पूर्णकामस्याप्येवं विहारे प्रयोजनं सूचयन्त्य आहुः—प्रणयिनां प्रेमवतां गोपानां नर्मदः हर्षदः हर्षप्रदानार्थमित्यर्थः ॥ २० ॥ तदा मलयजस्पर्शेन मलयस्य चन्दनस्यैव सुरभिः शीतश्च यः स्पर्शस्तेन तं कृष्णं मानयन् मन्दो वायुः अनुकूल यथा भवति तथा उपवाति वीजयति। किं च वन्दिन इव स्तावकाः सन्तः ये उपदेवगणाः गन्धर्वादिगणास्ते वाद्यादिभिस्तं कृष्णं परिवव्रुः परित उपासत ॥ २१ ॥

अन्वितार्थप्रकाशिका

अथ कृष्णगमनविलम्बकारणं कथयन्ति—कुन्देति ॥ हे अनघे यशोदे ! सहैव बह्व्यः कथयन्त्यः काश्चित्तव वत्सः पुत्र इति काश्चिन्नन्दसूनुरिति चाहुः। कुन्ददामभिः कुन्दपुष्परचिताभिः मालाभिः कृतः कौतुकेन उत्सवेन वेषोऽलङ्कारो येन सः गोपैर्गोधनैश्च वृतः प्रणयिनां प्रेमवतां गोपानां नर्मदः हर्षदः तव वत्सः नन्दसूनुः यदा यमुनायां विजहार क्रीडति स्म ॥ २० ॥ तदा मलयजस्य चन्दनस्येव सुरभिः शीतश्च यः स्पर्शस्तेन तं कृष्णं मानयन् मन्दो वायुः अनुकूलं यथा भवति तथा उपवाति बीजयति। यद्वा। मलयजो दक्षिणो वायुः। "खर्परे शरि वा" विसर्गलोपः। यद्वा। मलयजस्य कृष्णेन स्वाङ्गेऽनुलिप्तस्य स्पर्शेन मानयन् किं च वन्दिन इव स्तावकाः सन्तः ये उपदेवगणाः गन्धर्वादिगणास्ते वाद्यादिभिस्तं कृष्णं परिवव्रुः परित उपासत। अत उपदेवाद्यनुमोदन एव विलम्बः ॥ २१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

युु० ९ ॥ एवं वृन्दावने लीलां कृत्वाऽपराह्णे धेनुवृन्दानि परावृत्त्य कालिंद्यां विहरतो हरेः सौंदर्यं निरूपयन्त्यः प्रोचुः कुंदेति कुंदपुष्पमालाभिः कृत आश्चर्यमयो वेषो येन हे अनघे यशोदे तव वत्सो बालकः नंदसूनुर्गोविंदः यद्वा बह्वीनां सहोच्चारणादेकाभिर्नंदसूनुरित्युक्तः अन्याभिस्तववत्तत्स इत्युक्तः प्रणयिनां प्रेमिजनानां नर्मदः परिहासकेलिभिः। परमानन्दप्रदो यदा यमुनायां विजहार।२०। तदा मलयजस्य मलयाचलोत्पन्नस्य चंदनतरुकला यस्य स्पर्शेन मानयन् संमानं कुर्वन् सन् मंदवायुः अनुकूलं यथा भवति तथोपवाति। यद्वा खर्परे शरिपरे विसर्गलोपेन मलयज इति पृथक्पदं मलयजो दक्षिणो वायुः शेषं पूर्ववत् वंदिनस्तत्तुल्यतया प्रशंसकाये उपदेवगणा गंधर्वादिसमूहा वाद्यगीत कुसुमवृष्णादिभिर्बलिभिरुपहारैस्तं परिवव्रुः परितः सत्कारं कृतवन्त इत्यर्थः ॥२१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं वृन्दावनप्रदेशेषु क्रीडतः कृष्णस्य लीलाः प्रगीताः, अथ सायाह्ने गोधनानि परावृत्य यमुनायां क्रीडतोऽस्य सौभाग्यमनुवर्णयन्ति ॥ कुन्देति ॥ हे अनघे यशोदे, कुन्ददामभिः कुन्दकुसुमस्रग्भिः कृतः कौतुकेनोत्सवेन वेषोऽलंकारो येन सः, तव वत्सः पुत्रः, नन्दसूनुः, यद्वा। सहैव बह्व्यः कथयन्त्यस्तत्र काश्चित्तव वत्स इति काश्चिन्नन्दसूनुरिति चाहुः। प्रणयिनां सखीनां, नर्मदो हर्षदः गोपैर्गोधनेन च वृतः, एवंभूतः सन्, यमुनायां, विजहार क्रीडति स्म। यदेति शेषः ॥ २० ॥ मन्दवायुरिति ॥ तदा मन्दवायुः मलयजस्य चन्चनस्येव सुरभिः शीतश्च यः स्पर्शस्तेन, तं श्रीकृष्णं मानयन्, अनुकूलं यथा तथा उपवाति वीजयति। किं च ये, वन्दिनस्तावकाः, उपदेवगणाः सिद्धविद्याधरादयः, ते वाद्यगीतबलिभिः वाद्यवादनगीतगायनपुष्पवर्षादिभिः, तं कृष्ण, परिवव्रुः परितस्तमुपासतेत्यर्थः ॥ २१ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

कुन्ददामेति : १०.३५.२०.

यदा कौतुकात् केशवो भक्तिभाजां सुखायानघेऽस्मिन् भवे गोपगोपः।
समाक्रीडति प्रेमतश्चित्तमन्तस्तदा त्वर्चनोत्कण्ठितं देवतानाम् ॥ ३९ ॥

मन्दवायुरिति : १०.३५.२१.

स्तोत्रपाठमवलम्व्य मुकुन्दं तोषयाम इति धीस्तु वृथा नः।
बन्दितामपि वलम्ब्य सुरौघा यं क्षमा वशयितुं न बभूवुः ॥ ४० ॥

कृष्णप्रिया

अये पुण्यमयी माँ ? आपके कुँवर श्रीनन्दकुमारजी ने कुन्दकलियाँ की मालाओं से कमनीय वेश बनाया है, गोवृन्द और गोपवृन्द से घिरे हुए हैं और अपने स्नेही निजजनों को आनन्दविनोद कराने वाले हैं, हे माँ ? वे जब श्रीयमुना जी

में विहार करते वेणु गान करते हैं–तब अपने सुखकर स्पर्श से सुख देने वाला शान्तानुकूल दक्षिणका पवन देव शीत मन्द और सुगन्ध इन तीन गुणों को प्रकट करता है। देखो तो सही यह गन्धर्वादि देववृन्द भी बन्दी जनों की नाई यशो गान करते हुए, वाद्य गीत के साथ प्रभु जी के श्री चरणों में भेट पूजा चढ़ाते हुए चारों ओर घेर रहे हैं ॥ २०–२१ ॥

वत्सलो व्रजगवां [1]यदगध्रो वन्द्यमानचरणः पथि वृद्धैः।
कृत्स्नगोधनमुपोह्य दिनान्ते गीतवेणुरनुगे [2]डितकीर्तिः ॥ २२ ॥
उत्सवं श्रमरुचापि[3] दृशीनामुन्नयन्[4] खुररजश्छुरितस्रक्।
दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ २३ ॥

कर्दमक्षमा

अन्वयः – अगधुः, व्रजगवाम्, वत्सलः, पथि, वृद्धैः, वन्द्यमानचरणः, अनुगेडितकीर्तिः, खुररजश्छुरितस्रक्, देवकीजठरभूः, उडुराजः, दिनान्ते, गीतवेणुः, कृत्स्नगोधनम्, उपोह्य, श्रमरुचा, अपि, दृशीनाम्, उत्सवम्, उन्नयन्, सुहृदाशिषः, दित्सया, एष, एति ॥ २२–२३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आयान्तमालोक्य हृष्यन्त्यः परस्परमूचुः। वत्सल इति। व्रजस्य गवां च। यद्वा व्रजे निबद्धानां गवामनुकम्प्यानामस्माकमित्यर्थः। वत्सलो हितकृत्। कुतः। यद्यस्मादगध्रः अगं धरतीति गोवर्धनोद्धरणः। बहुशो रक्षणस्योपलक्षणमेतत्। वृद्धैर्ब्रह्मादिभिः पथि वन्द्यमानचरण इति। ते सेर्ष्यं सायं शीघ्रमागन्तुं न ददति हि। सर्वैर्वन्द्यमानचरण इत्यर्थः। उपोह्य एकीकृत्य गीतयुक्तो वेणुर्यस्य सः ॥ २२ ॥ श्रमयुक्तयाऽपि कान्त्या नेत्राणां हर्षमुन्नयन्नुच्चैः प्रापयन्। खुररजोभिश्छुरिता व्याप्ताः स्रजो यस्य। सुहृदामस्माकमाशिषो मनोरथस्य दित्सया दातुमिच्छया देवक्या जठरे भवतीति तथा स एवोडुराजश्चन्द्रो निर्वृतिहेतुत्वेन स एष एतीति ॥ २३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

(१०) व्रजशब्देन गोपा ग्राह्याः 'तास्थ्यात्ताच्छब्द्यम्' इति न्यायेन। ते च तात्पार्श्वे एव सन्ति तथा गावोऽपि तद्वात्सल्यार्थन्नायान्तीति शोभनं न प्रतिभातीत्यत आह्–यद्वेति। व्रजे गोकुले निबद्धानां बद्धवद्गृहे स्थितानाम्। गोशब्दोऽत्रानुकम्प्ये। यथा गावोऽनुकम्पार्हास्तथा वयमपीत्यभिप्रेत्योक्तमस्माकमित्यर्थ इत्याशयोऽत्र ध्येयः। वत्सलत्वे हेतुमाशंक्य समादधते—कुत इत्यादिना। बहुश इति–बहुवारमित्यर्थः। तेन दावाग्निपूतनादिभ्योऽपि रक्षणमुपलक्ष्यत इति। ते च ब्रह्मादयः। इत्यर्थ इति—तत्कृतपूजनेन विलम्बत्वादित्याभिप्रायः ॥२२॥ सुहृदाम् अनिमित्तबन्धूनाम्। सः चन्द्रः। एषः कृष्णः। उडुराज इहोडुराज इवेति लुप्तोपमा बोध्यः। उडुराजोऽपि व्रजगवामध्वपशूनां पथिकानां च वत्सलः–वत्सं वर्षं सामर्थ्यात्कामोद्रेक लाति तदातीति तथा। "वत्सः पुत्रादिवर्षयोः। तर्णके नोरसि क्लीबम्" इति मेदिनी। 'गोष्ठाध्वनिवहा व्रजाः' इत्यमरः। अगेनोदयाचलेन ध्रियते इत्यगध्रः, अगान्वृक्षान्धरति पुष्णातीति वाऽगध्रः। वृद्धैः सप्तर्षिभिः। पथि व्योममार्गे। दिनान्ते रात्रौ। कृत्स्नगोधनं समस्तकलासमेधितचंद्रिकाख्यमुपोह्य परिपूर्य गतिवेणुः कावभिर्वर्णितवंशः वेणुशब्दः त्वक्सारपरोऽपि लक्षितलक्षणयाऽन्वयमाह। अनुगै रोहिण्यादिनक्षत्रैरीडितकीर्तिः परिकृतगणनः। श्रमं रविकिरणजं लुञ्चति छिनत्तीति श्रमलुक् तेन रलयोरैक्यमत्र। तृतीया हेतौ। 'लुञ्च–अपनयने' इत्थं सुधीभिर्ज्ञेयम् ॥ ननु तर्हि कौतुकलोलुपो मत्पुत्रो विलम्बमानः संध्यासमाप्तावपि नैष्यति ततश्चाहं मरिष्याम्येवेति तत्र तदीयशीघ्रगमने हेतुमुपन्यस्य तामाश्वसयन्त्य आहुः–वत्सल इति। व्रजगवां व्रजे निबद्धानां वृषाणां वत्सलस्तेषां स्वविरहदुःखमनुस्मृत्य गन्धर्वादीनप्यवमत्य शीघ्रमायास्यत्येवेत्यर्थः। टजभाव आर्षः। न च गोचारकस्य तस्य गवां दर्शनस्पर्शनगात्रकण्डूयनघासप्रदानादिकौतुकात्स्वतोऽतिनिकृष्टगायकगन्धर्वादिगानकौतुकं चित्ताकर्षकं वाच्यमित्याहुः–यद्यस्मादगध्रः येषां गवां रक्षणार्थमगं गोवर्धनमपि धृतवान्। अतस्तेषु महान्स्वाभाविक एव स्नेहः, गंधर्वादिषु तु गुणोपाधिकोऽपि प्रीतिलेशो न तस्यास्तीति भावः। ननु यद्येवमभविष्यत्तदैतावत्क्षणपर्यन्तं गृहमागमिष्यदेवेति तत्र विलम्बे पुनरपि हेतुमुपन्यस्यंति–वृद्धैर्ब्रह्मरुद्रादिभिः पथिपथि वन्द्यमानौ चरणौ यस्य सः। वेणुगानाकृष्टैः स्वस्वभवनादागत्य निकटे नभसि स्थितैः सर्वमेव दिनं कृष्णं दृष्ट्वा लब्धानन्दैः संप्रति गोष्ठागमनसमये स्वस्वभवनगमनोन्मुखैर्नभसो भुवमवतीर्य ब्रह्मरुद्रेन्द्रादिभिः प्रत्येकमेव त्वत्पुत्रानुग्रहमर्थयितुं चरणौ वन्द्येते तेनात्र

---

१. यदगाध्रो–विज. । २. रनुगोद्धृत–विज. । ३. श्रममपोह्य–विज. । ४. मुदवहन्–विज. ।

किं कर्तव्यमिति तेषामनुरोध एव विलंबाधिक्ये हेतुरिति ध्वनिः । त्वत्पुत्रस्य चरणौ ब्रह्मादयोऽपि वन्दन्त इति स्वभाग्यं किं न पश्यसि, किमिति खिद्यसीत्यनुध्वनिः । तर्हि भो व्रजबालिकाः शीघ्रमट्टालिकाः शीघ्रमट्टालकापृष्ठमारुह्य पश्यत कियद्दूरे वत्स आयातीति तया साश्रुगद्गदमुक्ताः सर्वोद्ध्र्वलभीं शीघ्रमारुह्योच्चैराहुः — कृत्स्नेति । एष कृष्णः सुहृदां स्वबन्धूनामाशिषो मनोरथस्य दित्सया एतीत्यन्वयः । उपोह्य एकीकृत्य । गीतयुक्तो वेणुर्यस्य सः ॥ श्रमेण या रुक् शोभा तयापि दृशीनामुत्सवमानन्दमुन्नयन्नुच्चैः प्रापयन् । खुररजश्छुरिता व्याप्ता स्रग्यस्येति स्वसंगिनीः सखीः प्रत्यपांगभङ्ग्या श्रीयशोदाद्यलक्षितं किमप्युक्तम् । अत्र स्रज्येव खुररजोनिर्देशादन्यत्र रजो नास्तीति लभ्यते । तच्च सखिभिर्मुहुर्निजोत्तरीयेण रजसोऽपसारितत्वात्स्रजि तु रजस्थस्य प्रविश्य स्थितत्वादपसारणयत्ने दलभंगः स्यात् । मणिनापीयं माला यन्न दूरीक्रियते दशधृतवस्त्रसंपुटस्था नवीनाप्यन्या यन्न परिधीयते तस्मादियं माला यया प्रियया स्वहस्तेन संग्रथ्य सखीद्वारा दत्ता तां प्रियामेव स्वकण्ठधृतामेनां दर्शयितुं कृष्णस्य यत्न इति । देवकी यशोदा तस्या जठरमेव क्षीरधिस्तस्मिन् भवतीति सः । “द्वे नाम्नी नन्दभार्याया यशोदा देवकीति च” इति पणोद्देशदीपिकाधृतादिपुराणवाक्यात् । उडुराजश्चन्द्रः ॥ २२–२३ ॥

श्रीमज्जीवगोस्वामिकृत वैष्णवतोषिणी

ततश्चोत्कण्ठाभिरट्टालिकादिकमारुह्य तदेव दर्शयन्ति । वत्सल इति । तत्र चागमनं वर्णयितुं प्रथमं परमोल्लासेनासाधारणीं तत्कृपामेव तत्र हेतुं व्यञ्जयन्ति । वत्सलो व्रजगवामिति । तत्रोदाहरणमाहुः । यदिति । यद्यस्मात् परमकोमलोऽप्यसौ तदर्थं पर्वतमपि धरतीत्यर्थः । अत्र वर्त्तमान प्रयोगश्चात्यन्तकृतज्ञतया कृतः सदातनत्वेनैव तत्स्फूर्त्तेः । यदेवं तद्विरहेऽपि तद्वदेव निजामार्त्ति रक्षाञ्च व्यञ्जयन्ति । अथागमनं वर्णयन्ति वन्द्यैत्यादिना । तत्र वृद्धैः पथि वन्द्यमानचरण इति व्रजान्तः प्रवेशे तेषां तदप्राप्यत्वात् । अत एव वन्द्यमानेति वर्त्तमाननिर्देशेन । वन्दनादनिवृत्तिर्बोध्यते । अतः सङ्कोचेन तदनिच्छायामपि तैस्तत्क्रियत इति व्यक्तम् । अहो एतादृशगुणज्यायस्त्वमिति भावः । गोधनोपवहनार्थं व्रजवर्त्तिषु निजागमनमङ्गलविज्ञापनार्थं च गीतवेणुः तदीयरागतालानुसारेण तद्गानसम्बन्धिषु तदीयानुगानभङ्ग्यैवानुगैर्गोपैरीडिता कीर्त्तिः पूतनामोक्षादिरूपा एतद्दिनक्रीडात्मिका वा यस्य सः । श्रमस्तज्जनितप्रस्वेदादिस्तदाश्रययापि सहज शोभयेत्यर्थः । यद्वा । श्रमेण या रुक् शोभा तयापि दृशीनां दृङ्मात्राणां किमुतास्मदीयानामित्यर्थः । तत्र तादृशशोभानिदर्शनं गवां खुररजोभिः परागैरिवच्छुरिता कर्वुरिता स्रक् माला यस्य सः स्रज्येव रजोनिर्देशादन्यत्र रजो नास्तीति लभ्यते । तच्च सखिभिर्मुहुरङ्गतो विजोत्तारीयेण रजस्यपसारितेऽपि तस्यां तस्य प्रविश्य स्थितत्वात् । परमान्तरङ्गप्रियजनदत्तायास्तस्या दलादिभङ्गशङ्कया तेनैव तन्निवारितत्वाद्वा । दूरतोऽपि रजआदीनां निर्देशस्त्वनुमानतप्रेमवलतो निकटात् स्फूरगेन वा । पूर्वव्यञ्जितमागमने कृपाया एव कारणत्वं साक्षादप्याहुः । दित्सयेति । अन्यथा श्रीवृन्दावने पूर्वपूर्ववर्णितानुसारेण किम्वा सुखं तस्य नास्तीति भावः । सुहृदामिति सामान्योक्तिर्दृशीनामितिवत् । एषः इत्यङ्गुल्या निर्दिशन्तिः । देवकीशब्देनात्र श्रीयशोदैव सादरं प्रस्तूयते । व्रजराजत्वात् देव एव देवकः श्रीनन्दस्तत्पत्नी देवकीति तस्या एव एव सान्त्वनायां प्रवृत्तेर्मातृतया मतत्वात्तव सुतः सतीति नन्दसूनुरयमार्त्तजनानामिति पूर्वसम्वादाच्च । मात्रन्तरसूचने तु प्रत्युत तद्विरोधापत्तेः । सभान्तरवाक्येऽप्यौदासीन्यापत्तेश्च । अतस्तस्यास्तदप्येकं नामेति वा लभ्यते । नाभेरसावृषभ आस सुदेविसूनुरित्यत्र मेरुदेव्या एव सुदेवीति संज्ञावत् । उक्तञ्च द्वे नाम्नो नन्दभार्याया यशोदा देवकीति चेति । उडुराजः दिनतापहरणादिसाम्यात् । उडुस्थानीयाश्चात्र सखायो ज्ञेयाः । इति श्रीकृष्णजन्मस्थानत्वेन देवकीजठरस्य विशुद्धसत्त्वमयत्वेन परमशुभ्रत्वात् क्षीरसमुद्रत्वं ध्वनितम् ॥ २२–२३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्च पुत्रोपभोगसम्पादनार्थं तस्यामासक्तायां पूर्ववदन्योन्यमूचुः—‘वत्सलः’ इति युगलेन । वृद्धैः पथि वन्द्यमानचरण इति व्रजान्तः प्रवेशे तेषां तदप्राप्यत्वात्, अतएव वन्द्यमानेति वर्त्तमाननिर्देशेन वन्दनादनिवृत्तिर्बोध्यते ? यत एतावत्पर्य्यन्तं पूर्वोक्तं सर्व्वं स्वयं श्रीकृष्णेन तत्सहचरैर्वा कैश्चित् कदाचिद्वर्णितदिनान्तरक्रीड़ानुसारात्, किंवा कथञ्चित्तत्तदवसरे तत्र गमनेन साक्षाद्दर्शनादेवेत्यूह्यम् ; दिनान्तत्वात् कृत्स्नमेव गोरूपं धनमुपोह्य; धनमिति-दिवसे तत्पालनासक्तत्वात् प्रेमर्ष्ययोक्तम्, तदुपोहनार्थं व्रजवर्त्तिषु च निजागमनमंगलविज्ञापनार्थं गीतवेणुः । किञ्च, अनुगैर्गोपैरीड़िता कीर्त्तिः पूतनामोचनादिरूपा तद्दिनक्रीड़ात्मिका वा यस्य सः; यद्वा, दिने गोपीभिरिव रात्रिविरहदुःखनिस्तारार्थमनुगैरीड़िता प्रीत्या संकीर्त्तयितुमारब्धा कीर्त्तिर्यस्य सः । दृशीनामिति—सामान्यतः सार्व्वकीणां किंवा स्वकीयानामेव, ततश्च धाष्टर्य परिहाराय व्यक्ततयानुक्तिर्ज्ञेया । श्रमरुक् च श्रीमुखप्रस्विन्नताधरबिम्बशुष्कतादिरूपा बोद्धव्या, गो-व्यतिरिक्तानां महिष्यादीनामपि पशूनां खुररजोभिश्छुरितत्वसम्भवेऽपि गवामेवेति बोद्धव्यम्, तासामेव निकटवर्त्तित्वात् । तद्रजसामेव मंगलत्वेन ग्राह्यत्वाच्च, अतएव स्पष्टत्वात्तासामनिर्देशः, उपलक्षणमेतत् । अलकादीनामपि रजश्छुरितत्वं ज्ञेयम् । सुहृदामिति—सामान्येनोक्तिर्दृशीनामितिवत्, एष इति निकटागतत्वादंगुल्यादिना दर्शयन्ति—देवकीजठरभूरिति । केवलं तस्यां जन्ममात्रम्, पालनाद् ध्रुवपुत्रस्तु श्रीयशोदाया एवेति सूचितम्; किंवा देवकी यशोदैवेति पूर्व्वमुक्तम् ।

उडुराजो दिनतापहरणादिसाम्यादिति श्रीकृष्णचन्द्रजन्मस्थानत्वेन देवकीजठरस्य विशुद्धसत्त्वमयत्वेन परमशुभ्रत्वात् क्षीरसमुद्रत्वं ध्वनितम्। अन्यत्तैर्व्याख्यातम्। यद्वा, ये गावः शाकटिकवृषा नव्यवत्साश्च तेषां सर्व्वेषामेव वत्सलः परमस्निग्धः, अतएव दिनान्ते, कृत्स्नं गोधनं ताः सर्व्वा एव धनत्वेन प्रयत्नादुपोह्य निवर्त्त्य वन्दिषु स्तुतिपाठकेष्वपि न विद्यते मानं परिमितिर्यस्य, तादृशं चरणमाचरणं सच्चरितं यस्य। पथि वृद्धैः श्रीनन्दादिभिरग्रेऽभिगतैः सह वर्तमानः। यद्वा, ज्ञानवृद्धैः कैश्चिद्गोपैः पुरोहितैर्वा वन्द्यमानौ चरणौ यस्य। यद्वा, अभिगतैः श्रीनन्दादिभिरेव पथि वन्द्यमानं प्रशस्यमानं चरणं वन्यक्रीडा यस्य सः, श्रमेणापि या रुक् शोभा तयेत्यर्थः। सुहृत् प्रियः सर्व्वेषामस्माकमेव वा। एवमाशिषोऽपीति, उडूनां नक्षत्राणां राजेति तारास्थानीयानामस्माकं प्रभुरिति, किंवा सखिवर्गवेष्टित इत्यभिप्रायेण दृष्टान्तेऽपि यथाकथञ्चित् सर्व्वमेव संगतम्; तच्च श्रीचित्सुखेन व्याख्यातमेव ॥ २२-२३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथायान्तमवलोक्य हृष्यन्त्यः परस्परमूचुः। वत्सल इति व्रजस्य गवां च वत्सलः। यद्वा व्रजे निबद्धानां गवामनुकम्प्यानामस्माकं च वत्सलः कुतः हितकृत् यद्यस्मादगध्रः अगङ्गोवर्द्धनं धरतीति तथा इदं बहुशो रक्षमाणस्थोपलक्षणं वृद्धैर्ब्रह्मादिभिः पथि वन्द्यमानौ चरणौ यस्य सः दिनान्ते सायंकाले कृत्स्नं गोधनमुपोह्यैकीकृत्य गीतयुक्तो वेणुर्यस्य सः अनुगैरनुचरैरीडिता कीर्त्तिर्यस्य सः ॥ २२ ॥ स्मररुजा स्मररोगेण अस्ता नष्टप्राया दृशो दृष्टयो यासां तासामस्माकं नेत्राणामुत्सवं हर्षमुन्नयन्नुच्चैः प्रापयन् खुररजोभिर्व्याप्ताः स्रजो यस्य सः सुहृदामस्माकमाशिषः मनोरथस्य दित्सया दातुमिच्छया देवक्या जठरेऽभवदिति देवकीजठर भूः स एष उडुराजश्चन्द्र एत्यागच्छति निर्वृतिहेतुत्वेन स एष एवेत्युक्तम् ॥ २३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किञ्चिदुत्पन्नोपमेयज्ञानाः वदन्ति। वत्सल इति। व्रजगवां विषये वत्सलः गोष्ठगोषु स्निग्धतमः अगाधः गम्भीरः अन्याविज्ञातमहिमा पथि ज्ञानादिवृद्धैर्वन्द्यमानचरणः स्तूयमानपादन्यासः दिनान्ते सन्ध्यायामासन्नायां कृत्स्नं गोधनं समस्तपशुलक्षणं धनमपोह्य व्यावर्त्य गीतवेणुः गातुमुपक्रान्तवेणुः अनुगर्वयस्यैः उद्धृता मणिम्पङ्कादुद्धृत्येव प्रकाशिता कीर्तिर्यस्य स तथा ॥ २२ ॥ वनपरिभ्रमणोत्पन्नं श्रममपोह्य निरस्य स्वद्रष्टॄणां दृशीनामुत्सवं सुखोत्सवमुद्वहन् खुररजश्छुरितस्रक् गोखुरसमुत्पन्नधूल्यामिश्रिता माला यस्य स तथा देवक्या जठरमेव भूर्व्यक्तिस्थान यस्य स तथा उडुराजश्चन्द्र इव लुप्तापमेयं स यद्यदा व्रजमेति तदा एष कृ णः सुहृदामनिमित्तबन्धूनामाशिषः इष्टफलानि दित्सया दातुमिच्छयैवेति इत्यन्वयः। चन्द्रोऽपि व्रजगवामध्वपशूनां पथिकानां वत्सं वर्षसामर्थ्यात् कामोद्रकं लाति रातीति वत्सलः "वत्सो नाम कुजे वर्षे" इति यादवः गोष्ठाध्वनिवहा व्रजा इति च अगस्य उदयपर्वतस्य अधः शृङ्गे वर्तमानः उदयस्याधित्यकाशृङ्गं चन्द्रमार्गादूर्ध्वमिति ज्योतिषिकाः संगिरन्ते वृद्धैः सप्तर्षिभिः पथि व्योममार्गे दिनान्ते रात्रौ कृत्स्नगोधनं समस्तकलासमेधितचन्द्रिकाख्यधनमपोह्य परिपूर्य गीतवेणुः कविभिः वर्णितस्ववंशः अनुगैः अश्विन्यादिनक्षत्रैः उद्धृतकीर्ती राश्युपरिकृतगणनः रविकिरणसंसर्गसमुत्पन्नश्रमं निधूय उत्सवमित्युभयत्र समं जननसमये क्षीराब्धितीरवालुकासु नववीथीषु विक्रमं कुर्वत उच्चैः श्रवसः खुररजश्छुरितस्रक् चन्द्रोऽपि ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ततश्चोत्कण्ठाभिरट्टालिकादिमारुह्य तदेव दर्शयन्ति। वत्सल इति युग्मेन। देवकीशब्देनात्र श्रीयशोदैव सादरं प्रस्तूयते। व्रजराजत्वात् देव एव देवकः श्रीनन्दः तस्य पत्नी देवकीति। तस्या एव सान्त्वनायां प्रवृत्तेः मातृतया ममत्वात् अभिमतत्वाच्च। मात्रन्तरसूचनेतु प्रत्युत तद्विरोधापत्तेः। सभान्तरवाक्येऽप्यौदासीन्यापत्तेः ॥ २२-२५ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

हे सख्यः? उपदेवगणास्तं वाद्यगीतगतिभिः परिवव्रुरिति यदुक्तम्, तत् किमिति चित्रम्। ब्रह्मादिभिरपि चरणवन्दनं तस्य क्रियत इत्येव चित्रमिति अन्या आहुः—वत्सले व्रजगवामित्यादि द्वाभ्याम्। अगध्रो गोवर्द्धनधरः, व्रजगवां व्रजस्थानां गवां वत्सलो दिनान्ते सुहृदाशिषः सुहृदामस्माकमाशिषः सुखस्य दित्सया यदा एति, तदा वृद्धैर्ब्रह्मादिभिः पथि वन्द्यमानचरणः न तु वन्दितचरणः। वन्द्यमानत्वेन श्रद्धाभक्तिमत्तया पुनः पुनर्वन्द्यत इत्यर्थः। तेन शीघ्रमाजिगमिषुरपि विलम्बते। अतोऽस्माकं तद्वन्दनं प्रतिकूलमेवेति। वृद्धैरिति सासूयकथनम्। देवकी जठरभूरिति सम्बन्धस्थगनपरम् उडुराज इति दिनान्तोदयः सोऽपि सुहृदां कुमुदिनीनां सुखदित्सयैवोदेति। अगध्रोऽपि उदयपर्वतस्थत्वात् कृत्स्न-गोधनं सकलरश्मिरूपं धनमुपोह्य गृहीत्वेति यथायथं श्लेष उह्यः ॥ २२-२३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एतावद्भिरनुरागालापैस्तासां दिवसे याते सायंकाले सति वनात् प्रति निवर्त्तमानं श्रीकृष्णं विश्राव्य काश्चिदाहुः—वत्सल इति द्वाभ्याम्। दिनान्त इति 'गतोऽस्तमर्कः' इत्यादिवद् बहुव्यञ्जनापरम्। वन्द्यमान-चरणः पथि सिद्धैरित्याक्रोशपरम्, वृद्धानां

ब्रह्मादीनां पथि चरण-ग्रहण–सेवया शीघ्रमाजिगमिषुरपि तथा न शक्नोतीत्यर्थः। देवकीजठरभूरिति सन्निकृष्ट-सम्बन्धविशेष-स्थगनसूचनम्, तथा सति गोपत्वेन भ्रातृत्वादिसम्बन्धः स्थगितो भवति। दृशीनां दृशि चक्षुषि ईनां लक्ष्मीणां दृक्श्रियामित्यर्थः उत्सवं श्रमरुचापि ऊन्नयन्। औत्सुक्यगर्वयोः ॥ २२–२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु तर्हि कौतुकलोलुपो मत्पुत्रो विलम्बमानः सन्ध्यासमाप्तावपि नैवेष्यति ततश्चाहं मरिष्याम्येवेति तत्र तदीयशीघ्रागमने हेतुमुपन्यस्य तामाश्वासयन्त्य आहुर्वत्सल इति। व्रजगवां व्रजे निबद्धानां वृषाणां वत्सलस्तेषां स्वविरहदुःखमनुस्मृत्य गन्धर्वादीनप्यवमत्य शीघ्रमायास्यत्येवेत्यर्थः। टजभाव आर्षः। नच गोचारकस्य तस्य गवां दर्शनस्पर्शनगात्रकण्डूयनघासप्रदानादि-कौतुकात् स्वतोऽतिनिकृष्टगायकं गन्धर्वादिगानकौतुकं चित्ताकर्षकं वाच्यमित्याहुः। यद्यस्मादगध्रः येषां गवां रक्षणार्थम् अगं गोवर्द्धनमपि धृतवान्। अतस्तेषु महान् स्वाभाविक एव स्नेहः। गन्धर्वादिषु तु गुणोपाधिकोऽपि प्रीतिलेशो न तस्यास्तीति भावः। ननु यद्येवमभविष्यत्तदा एतावत् क्षणपर्य्यन्तं गृहमागमिष्यदेवेति तत्र विलम्बे पुनरपि हेतुमुपन्यस्यन्ति वृद्धैर्ब्रह्मरुद्रादिभिः पथि पथि वन्द्यमानौ चरणौ यस्य सः। वेणुगानाकृष्टैः स्वस्वभवनादागत्य निकटनभसि स्थितैः सर्वमेव दिनं कृष्णं दृष्ट्वा लब्धानन्दैः सम्प्रति गोष्ठागमनसमये स्वस्वभवनगमनोन्मुखैर्नभसो भुवमवतीर्य ब्रह्मरुद्रेन्द्रादिभिः प्रत्येकमेव त्वत्पुत्रस्यानुग्रहमर्थयितुं चरणौ वन्द्येते तेनात्र किं कर्त्तव्यमिति तेषामनुरोध एव विलम्बाधिक्ये हेतुरिति ध्वनिः त्वत्पुत्रस्य चरणौ ब्रह्मादयोऽपि वन्दन्ते इति स्वभाग्यं किं न पश्यसि किमिति खिद्यसीत्यनुध्वनिः। तर्हि भो व्रजबालिकाः! शीघ्रमट्टालिकापृष्ठमारुह्य पश्यत कियद्दूरे वत्स आयातीति तया साश्रुगद्गदमुक्ताः सर्वाद्र्ध्ववलभीं शीघ्रमारुह्योच्चैराहुः। कृत्स्नेति। एष कृष्णः सुहृदां स्वबन्धूनामाशिषो मनोरथस्य दित्सया एतीत्यन्वयः। उपोह्य एकीकृत्य गीतयुक्तो वेणुर्यस्य सः श्रमेण या रुक् शोभा तयापि दृशीनां लोकनेत्राणामुत्सवमानन्दमुन्नयन् उच्चैः प्रापयन् खुररजश्छुरिता व्याप्ता स्रक् यस्येति। स्वसङ्गिनीः सखीः प्रत्यपाङ्गभङ्ग्या श्रीयशोदाद्यलक्षितम् किमप्युक्तम्। अत्र स्रज्येव खुररजानिर्देशादन्यत्र रजो नास्तीति लभ्यते। तच्च सखिभिर्मुहुर्निजोत्तरीयेण रजसोऽपसारितत्वात् स्रजि तु रजस्तस्य प्रविश्य स्थितत्वात् अपसारणयत्ने दलभङ्गः स्यात् मणिनापीयं माला। यन्न दूरीक्रियते दासधृतवस्त्रसम्पुटस्था नवीनापि अन्या यन्न परिधीयते तस्मादियं माला यया प्रियया स्वहस्तेन संग्रथ्य सखीद्वारा दत्ता ता प्रियामेव स्वकण्ठधृतामेनां दर्शयितुं कृष्णस्य यत्न इति देवकी श्रीयशोदा तस्या जठरमेव क्षीरसमुद्रस्तस्मिन् भवतीति सः। द्वे नाम्नी नन्दभार्य्या या यशोदा देवकीति चेति गणोद्देशदीपिकाधृतादिपुराणवाक्यात्। उडुराजश्चन्द्रः ॥ २२–२३ ॥

गूढार्थदीपिनी

अगं पर्वतं धरतीति अगध्रः व्रजगवां वत्सलश्च उडुराजः इव श्रीकृष्णचन्द्रः लुप्तोपमा सम्पूर्णं गोधनमेकीकृत्य आशिषो भोगान् दातुमिच्छया दिनान्ते एति आयातीत्यन्वयः। श्रमरुचापि नेत्राणाम् उत्सवमानन्दं उन्नयन् जनयन्। वृद्धैः ब्रह्मादिभिः वन्द्येति खुररजोभिः छुरिता व्याप्ताः स्रजो यस्य। अनुगैः ईडिता कीर्ति र्यस्य जठरमेव क्षीरनिधिः तत्र भवतीति ॥ २२–२३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

दिनान्ते आयान्तमवधार्य्य प्रमुदिताः परस्परमूचुः। वत्सल इति। अगध्रः अगमचलं गोवर्द्धनं धरतीति स तथा उपलक्षणमेतदन्येषां रक्षणोपायानाम् पथि मार्गे वृद्धैः ज्ञानेन वयसा च सर्वेभ्यः श्रेष्ठैः ब्रह्मादिभिर्वन्द्यमानौ चरणौ यस्य सः दिनान्ते सायङ्काले कृत्स्नं सकलं गोधनमुपोह्यैकीकृत्य गीतयुक्तो वेणुर्यस्य अनुगैरनुयायिभिर्गीता कीर्तिर्यस्य सः श्रमरुचा श्रमयुक्तया कान्त्या दृशीनां नेत्राणाम् उत्सवं हर्षमुन्नयन्नुच्चैः प्रापयन् खुररजोभिश्छुरिता व्याप्ताः स्रजो यस्य सः सुहृदामस्मदादीनाम् आशिषः कामस्य दित्सया दातुमिच्छया देवकीजठरभूः देवकीगर्भरत्नाकरोद्भूतः स एष उडुराजः श्रीकृष्णापरनामा चन्द्रः एत्यायाति ॥ २२–२३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

व्रजगवां व्रजजनानां गवां च विषये वत्सलः स्निग्धो यद्यतोऽगाधोऽनितरालीढ्यः पथि अध्वनि वृद्धैर्ज्ञानादिवृद्धैर्वन्द्यमानौ चरणौ यस्य सः कृत्स्नं समस्तं गोधनं दिनान्ते प्रदोषसमयेऽपोह्य प्रत्यावृत्त्यानुगैर्ब्रह्मादिभिरूद्धृता कीर्तिर्यस्य स गवां गमने मध्ये मार्गमनुगैरुद्धृता कीर्तिः पङ्को यस्य स इति वा। उद्धृतेति पदमुद्धृतमेवमिति मन्तव्यम्। कीर्तिः प्रसादयशशोर्विस्तारे कर्दमेऽपि चेति विश्वः। गोखुरादि नीररजः सङ्गतो भवन्तं पङ्कं पादलग्नं पश्चादागच्छदनुगा उद्धरन्ति निष्कासयन्तीति तात्पर्यम्। गीतो वेणुर्येन स तथा ॥ २२ ॥ श्रमं स्ववियोगजमिव वनते वनजं चापोह्य निरस्य दृशीनां द्रष्टृदृष्टीनामुत्सवमुद्वहत्प्रापयन्खुराणां गोखुराणां रजोभिर्धूलिभिश्छुरिता मिश्रिता सहमाला यस्य स देवकीजठरनूरेपा देवक्या जठरादुद्भवतीति तथा ज्ञानितया देवकीजठरभूरिति सत्योऽभ्यधुः। इयं यशोदापरोक्ष्यदशायामुक्तिरिति वा। नो चेत्कुष्येदेताभ्यो राज्ञीति। यद्वा तस्याः श्रुतवत्या अपि प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज इति गर्गानर्गलगिरं स्मृतवत्या न कोपो नापि ताप इति वा मन्तव्यम्। उडुराजश्चन्द्रः। लुप्तोपमेयम्। सुहृदाशिपः सुहृदभिलाषान्दातुमिच्छा दित्सा तयाऽभियाति। चन्द्रोऽपि भविष्यद्देवकयदितिस्तद्भवो रूपान्तरेणेति। व्रजगवामध्यगगवादीनां

वत्सलस्तापापनोदक इति स्निग्धोऽगस्यास्तं गिरेरधो वृद्धैः सप्तर्षिभिः पथि च वन्द्यमानचरणो गगनाध्वनीनचरणः स्तुत्यसञ्चारो वा दिनान्ते कृत्स्नं गोधनं किरणधनमपोह्योपसंहृत्य गीतवेणुः क्व रे चन्द्र इति वृद्धैरपटुचक्षुष्कैः पृष्टै स्पष्टदृष्टिभिर्गीतो वेणुर्यस्य सः। अहो तत्र वेणुः शाखोपरि लसतीति गीतवेणुरनुगाभिरश्विन्पादिभिः सहोद्धृता भूस्त ऊर्ध्वं धृता कीर्तिविस्तारो यस्य सोऽनुगं गमने उद्धृत इत्युच्चैः स्थित इति कीर्तिः कीर्तनं ज्योतिषकैर्यस्य स इति वा श्रमं दिनमणिघृणिजमपोह्य दृशीनामुत्सवमुद्वहन्खुररजसाऽत्रत्येनैव छुरिता स्रक् किरणहारो यस्य स तावत्पर्यन्तमिदं रजो गतमिति भावः। यद्वाऽन्तर्गतकुरङ्गखुररजच्छुरितलोकस्य चन्द्रमण्डलादुपरितनत्वेन ततो गोविन्दाभिषेकार्थमागच्छत्सुरभ्यादीनां चरणरजच्छुरितस्रग्वा। शान्तिपर्ववचनं च प्रागुदाहृतम्। सुहृत्सुहृन्मनोनियम्यत्येनास्यास्तीति स आशिषो दित्सयेतीत्युडुराजो देवकीजठरभूरिवेति चान्वेतव्यम्॥ २३॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं गुणातीते प्रकीर्णतां निरूप्य युगलद्वयेन केवलं भगवत एव चरित्रमाहुः। वत्सल इति। भगवान् यत् गोकुलं गोष्ठे समानयति तत्र कृपया अन्यथा एकस्यामपि लीलायां व्यापृता गावो मुच्येरन् तथा गोपिकाः परं कृपयैव भजनानन्दानुभवार्थं तथा करोति। अत्र हेतुः यदगध्र इति। यद्यस्मात् कारणात् अगं पर्वतं धारयतीति। यदि भजनानन्दं न दद्यात्तदा गोवर्द्धनोद्धरणं न कुर्यात्। एतद्भगवन्माहात्म्यं सर्वजनीनमिति ज्ञापयितुमाहुः। पथि वृद्धैर्वन्द्यमानचरण इति। वृद्धाः सर्वतो निपुणाः बहुज्ञैरेव भगवान् सेव्यो भवति, अतः कृत्स्नमेव गोधनमुपोह्य ततः पृथक् कृत्य उप समीपे समाहृत्य वा दिनान्त इति अग्रे वनस्थितेरयुक्तत्वात् लीलान्तरस्य च चिकीर्षितत्वात् गीतवेणुर्ज्जातः श्रमापनोदार्थं व्रजस्थानां ज्ञापनार्थं च अस्य नादस्याग्रे कार्यं वक्तव्यं गोपिका एव कृतार्थाः करोतीति न किन्तु गोपानपीति ज्ञापयितुं तत्कृतस्तोत्रमाहुः। अनुगेडितकीर्त्तिरिति। अनुगैः सेवकैरीडिता कीर्त्तिर्यस्य अनेन रात्रौ तेषामपि गानमुक्तं भवति यथा दिवसे गोपिकानाम् अन्यथा सर्वेषां निरोधो न भवेत्॥ २२॥ एतादृशस्य स्वस्य कार्यं स्वयमेव करोतीत्याहुः। उत्सवमिति। श्रमरुचा व्रजस्थदृशामुत्सवमुन्नयन् आशिषो दित्सया एतीति सम्बन्धः। श्रमयुक्ता रुक् कान्तिः भगवतः श्रमाभावपक्षे प्रदर्शनमात्रपरत्वम् अस्ति श्रम इति सिद्धान्तः “भर्त्ता सन् भ्रियमाणो बिभर्त्ति एको देवो वहुधा निविष्टः यदाभारं तं द्रयते स भर्तुं निधाय भारं पुनरस्तमेती”ति श्रुतेः सर्वधर्माश्रयत्वाच्च विरुद्धधर्माश्रयत्वादश्रान्तोऽपि नतु केवलमश्रान्त एव श्रमः सुखकारक इत्यपरे तत्संबन्धिनी रुक् सा नायकगता स्त्रीणां न हितकारिणी तथाप्यस्माकं हितकारिण्येव जातेत्याहुः। दृशीनामुत्सवमुन्नयन्निति दृशिर्दर्शनं यदि भगवान् श्रान्तो न भवेत् तदा शीघ्रं गच्छेत् तदा दृष्टीनां परमानन्दसन्ततिर्न स्यात् ऊर्ध्वं नयन्निति संघाते दृशीनां य आनन्दः स्थितः यावान् तदपेक्षया अधिकं कृतवानित्यर्थः। भगवत्कीर्त्तेः सर्वपुरुषार्थदातृत्वाय प्रकारं वदन् श्रममुपपादयति। खुररजश्छुरितस्रगिति। गोखुररजोभिः छुरिताः व्याप्ता स्रजो माला यस्य वायुवशादुद्गतो रेणुः न स्थिरो नापि नियतः खुरजातस्तु तथा खुराणामेव गोत्वात् प्रकृतत्वाच्च न गोग्रहणं पशवो वा एक शफमित्यत्र तथा निर्णयात् अनेन धर्मोऽयमिति निरूपितं रजोऽर्थः व्याप्तिः काम इति आगमनस्य तु यत् कार्यं तदाहुः। सुहृदां सर्वेषामेव सम्बन्धिनामाशिषः सर्वा एव देवा इति उक्तं गोपिकाद्वारा सर्वेष्वानन्दप्रवेश इति। प्रदर्श्याहुः एष इति। यतः स्वस्मिन् लीला ज्ञापिता भवति साधारण्येन सर्वेषां तापनाशकत्वाय भगवद्व्रतमसाधारणं धर्ममाहुः। देवकीजठरभूरुडुराज इति। “अदितिर्देवकी अदितिर्द्यौरदितिरन्तरिक्ष”मिति श्रुतेः। अदित्यवतारत्वात् द्युरूपा सा तस्यामवश्यं चन्द्रोदयोऽपेक्षित एव सा पुनर्विशेषरूपं गृहीतवतीति चन्द्रोऽपि विशिष्टकार्यं करोति लौकिकस्तापस्त्रिविधः भगवद्विरहजश्च। अयं त्रिविधमपि नाशयतीति पूर्वोक्तमानन्ददातृत्वमुपपादितं देवकीजठरे भवतीति देवकीजठरभूः स एव उडुराजः जायते। यथा उदयाद्रौ पतिस्तु नक्षत्राणामेव भवति तथा देवक्यां जातः परं सुखदोऽस्माकमेव। अथवा एतास्तु भगवद्विरहेणार्ता इति स्वाभिलषितप्रकारेण तदङ्गसङ्गव्यतिरेकेण नैतासामुत्सवो भवतीत्यार्ता एव स्थिताः परं दृशीनां दर्शनं मुख्यमिति तेनैवोत्सवोन्नयनमुच्यते तथा चार्त्तानामस्माकं दृशीनामिति समासो ज्ञेयः। आर्त्ताशब्दस्य ह्रस्वोऽपि छान्दसः नहि दृशीनामेवार्त्तत्वमत्र विवक्षितं प्रकारान्तरेणापि तत्स्वरूपरसास्वादवत्यः स्वामिन्य इति सर्वेन्द्रियाणामेवार्त्तत्वसम्भवात्। तदैव सर्वत्रोत्सवे पुनराशिषोऽनभीप्सितत्वेनाग्रे तद्दित्सोक्तिरप्यनुपपन्ना स्यात् दृशीनामुत्सवो बहिरेवान्तरुत्सवस्य त्वधिकरणं मनस्तस्यातृप्तत्वान्न स इदानीम्परमग्रे सम्भोगसामयिकदर्शने भविष्यतीति ज्ञापनायोर्ध्वमित्युक्तं यथा गोप्यो दिदृक्षितदृशोऽभ्यगमन् समेता इत्यत्र दर्शनानन्तरमपि दृशांदिदृक्षितत्वमेवमत्रापि ज्ञेयम्। अत एव दृशीनामिति सम्बन्धषष्ठ्याप्येतत्सर्वस्य तत्सम्बन्धित्वमेव प्राप्यते तत्रापि भगवत्कर्तृकनयनोक्त्या तासां बहिरुत्सवोऽपि प्रियप्रापित इति तद्दर्शनस्वभावान्न स्वत इति बोध्यते। अत एवोत्सवकरणत्वं श्रमरुचाऽपि युज्यते अन्यथा चिरादुत्कण्ठितानामासां प्रियतमागतश्रमं निरीक्षणेनाग्रिमरसप्रतिबन्धशङ्कया नोत्सवः स्यात्प्रत्युत पूर्वापेक्षयाधिकतरः खेद एव स्यात् किञ्च विनास्माभिरन्येन प्रियः श्रमापनोदं न कारयति वयमतः परं करिष्याम इति श्रमरुचस्तथात्वं युक्तमेव श्रमस्य कान्तिनिरूपणेनापि स्वमनोरथाप्रतिबन्धकत्वात्तथेति ध्वन्यते। श्रमोऽप्यन्यनायिकाविषयकश्चेत्कथं दृशामुत्सव इति चेत्तथा नेत्याहुः। खुररजश्छुरितस्रगिति। यद्यन्यनायिकाविषयकः स्यात्तदा स्रजि तदङ्गराग एव स्यान्नतु खुररजः रजोप्यागमनसामयिकञ्चेत्सम्भवेदपि तथापरं चिरकालीनमिति ज्ञापनाय छुरितत्वमुक्तम्। अल्पकालेन तथात्वस्यासम्भवात् किञ्च तथा चेत्स्रगपि न स्यात् क्रीडान्तरायत्तत्वात् अतो ज्ञायते सुहृदामस्माकमाशिषो दित्सया एतीति। एतीत्यागमनक्रियायां कर्मानुक्त्यापि

तथेति ज्ञायते । अयम्भावः "कर्तुरभीप्सिततमं कर्म" भवति तेनात्र भगवतः कर्तृत्वात्तदभीप्सिततमत्वमस्माकमेव नान्यस्य अन्यथा व्रजमेतीत्युक्तं भवेत् यद्यपि सर्वेषामेव निरोधश्चिकीर्षितो भगवत इति व्रजस्याप्यभीप्सितत्वं तथाप्यभीप्सिततमत्वलक्षणोऽतिशयोऽस्मास्वेवेति तथोक्तं तन्निदर्शनमेवाहुः । एष इति । अन्यथा कथमात्मानं प्रदर्शयेत् दक्षिणनायकत्वेनान्तर्भाववैषम्याभावायाहुः । देवकीजठरभूरिति । सर्वथा निर्दुष्टा हि देवकी तदुदरे प्रकटस्तथेत्यर्थः । तादृशस्य भवतीषु को विशेष इत्यत आहुः । उडुराज इति । यथा चन्द्रः सर्वेषां तापहारको दूरादेव परम्पतित्वेनातिनिकटे नक्षत्राणामेव तथायमपि सर्वेषां तथा दूरादेव परम्पतित्वेनास्माकमेव तथेति भूयान्विशेषः सम्पद्यते स यथा नक्षत्रमण्डले तिष्ठंस्तैरेव राजमानः सर्वतापनिवर्त्तकस्तथायमप्यस्मन्मण्डले तिष्ठन्नस्माभिरेव राजमानस्तथेत्युडुराजपदेन द्योत्यते इदं सर्वं कार्यं वेणुनादसाध्यमिति प्रकरणितत्वाज्ज्ञेयम् ॥ २३ ॥

श्रीसुबोधिनी–सारः

व्रजे गवां वत्सलो हितकृत् अगं गोवर्द्धनं धरतीति अगध्रः वृद्धैर्ब्रह्मादिभिः पथि मार्गे वन्द्यमानौ पूज्यौ स्तुत्यौ चरणौ यस्य स दिनस्यान्ते सायंकाले कृत्स्नं समग्रं गोधनम् उपोह्य एकीकृत्य गीतयुक्तो वेणुर्यस्य सोऽनुगैर्गोपैरीडिता कीर्तिर्यस्य सः ॥ २२ ॥ श्रमयुक्तयापि रुचा दीप्त्या दृशीनां नेत्राणाम् उत्सवं हर्षम् उन्नयन् उच्चैः प्रापयन् खुराणां रजोभिः छुरिता धूम्राः स्रजो माला यस्य स सुहृदामस्माकम् आशिषः कामस्य दित्सया दातुमिच्छया देवक्या जठरे उदरे भवतीति उडुराजश्चन्द्र इवाह्लादकर एष एति आयाति ॥ २३ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

वत्सलो व्रजगवामित्यत्र, गावो मुच्येरन्निति । एकैकेक्षणादिलीलारसस्य निरवधिमहारसत्वेनैकत्र निमग्ना नात्मानमपि जानीयुः, किमुतान्यदित्यर्थः ॥ २२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आयान्तमालोक्य हृष्यन्त्यः परस्परमूचुः—वत्सल इति । व्रजे स्थितानां गवामिवानुकम्प्यानामस्माकं वत्सलः हितकृत्, तत्र ज्ञापकमाहुः—यत् यस्मात् अगध्रः अस्मद्रक्षार्थं गोवर्धनमुद्धृतवान्, एतच्च बहुशो रक्षणस्योपलक्षणम् । वृद्धैर्ब्रह्मादिभिः पथि मार्गे वन्द्यमानचरणः, अनुगैर्गोपैरीडिता कीर्तिर्यस्य सः, गीतयुक्तो वेणुर्यस्य सः, दिनान्ते सायंकाले कृत्स्नं गोधनमुपोह्य एकीकृत्य ॥ २२ ॥ श्रमरुचा श्रमयुक्तयाऽपि कान्त्या दृशीनामस्मन्नेत्राणामुत्सवं हर्षमुन्नयन् उच्चैः प्रापयन् खुररजोभिश्छुरिता व्याप्ताः स्रजो यस्य देवक्या जठरे भवतीति देवकीजठरभूः स एव उडुराजः निर्वृतिहेतुत्वाच्चन्द्रः सुहृदामस्माकमाशिषः मनोरथस्य दित्सया दातुमिच्छया एष एति आगच्छति । यद्यपि नायकगता श्रमरुक् नायिकानां सुखकरी न भवति, तथापि यदि भगवान् श्रान्तो न भवेत्, शीघ्रमेव गच्छेत्तदा दर्शनसुखं न स्यात् । 'अतो मन्दगमनहेतुत्वात् सा गोपीनां सुखकर्येव जाता' इति अपिशब्देन ज्ञेयम् ॥ २३ ॥

अन्वितार्थप्रकाशिका

अद्य कृष्णागमं वर्णयन्ति–वत्सल इति ॥ व्रजस्य गवां च यद्वा व्रजे स्थितानां गवामिवानुकम्प्यनामस्माकम् । अत्र पक्षे टजभाव आर्षः । वत्सलः हितकृत् तत्र ज्ञापकमाहुः । यत् यस्मात् अगध्रः अस्मद्रक्षार्थं गोवर्द्धनमुद्धृतवान् एतच्च बहुशो रक्षणस्योपलक्षणम् । वृद्धैर्ब्रह्मादिभिः पथि मार्गे वन्द्यमानचरणः अनुगैर्गोपैरीडिता कीर्तिर्यस्य सः गीतयुक्तो वेणुर्यस्य सः दिनान्ते सायंकाले कृत्स्नं गोधनमुपोह्य एकीकृत्य ॥ २२ ॥ श्रमरुचा श्रमयुक्तयाऽपि कान्त्या दृशीनामस्मन्नेत्राणामुत्सव हर्षमुन्नयन् उच्चैः प्रापयन् खुररजोभिश्छुरिता व्याप्ताः स्रजो यस्य अङ्गात्तु सखिभिः स्वोत्तरीयै रजोऽपसारितमिति भावः । देवक्या यशोदाया जठरे भवतीति देवकीजठरभूः "द्वे नाम्नी नन्दजायाया यशोदा देवकीति च ।" इति प्रागुक्तादिपुराणात् । स एव उडुराजः निर्वृत्तिहेतुत्वाच्चन्द्रः सुहृदामस्माकमाशिषः मनोरथस्य दित्सया दातुमिच्छया एष एति आगच्छति इति गोरजआदिभिः कृष्णागमनं निश्चीयते इत्यङ्गुल्या निर्दिशन्ति ॥ २३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यु० १० ॥ आगच्छन्त कृष्णं ज्ञात्वा आनन्दयन्त्यः अन्योऽन्यं जगदुःवत्सल इति व्रजस्य गवां च वत्सलो हितकारी यद्वा व्रजेस्थितानां पालनीयतया गोसदृशानामस्माकमपि वत्सलः कुतः यद्यस्मादगध्रः अगं गोवर्द्धनाख्यं धरतीति तथाभूतः अगधारणं बहुस्थाने अनेकविधरक्षणसूचकं वृद्धैर्विधि शिवादिभिः पथिव्रजागमनमार्गे वन्द्यमानचरणः वृद्धैरित्युक्तिस्तु तेषां स्थविरत्वात् ते शीघ्रागमनेऽसमर्था इति सोपहासवचनतां बोधयितुं भवतीति ज्ञेयमिति भावः । दिनान्ते सायंकाले कृत्स्नं समग्रं गोधनं उपोह्य समूहीकृत्य व्रजस्थानां स्वागमनबोधनाय गीतवेणुर्गीतसहितावंशीयस्य स अनुगैरनुचरैर्गोपैः ईरिता गीताकीर्त्तिर्यस्य स एवंभूतः ॥ २२ ॥ श्रमरुचा श्रमोत्पन्नस्वेदादियुक्ता कान्त्यादृशीनामस्मन्नयनानां उत्सवमानन्दं उन्नयन् दाधिक्यं प्रापयन् खुररजोभिः

छुरिताः संगताः स्रजो यस्य देवक्यादेवकपुत्र्याः जठरोत्पन्नः उडुराजः जनानां दिनतापशामकोडुराजवत् विरहजतापशांतिकत्वाच्चन्द्रतुल्यः एषः कृष्णः सुहृदामस्मदादीनामाशिषो मनोरथस्य दित्सया दातुमिच्छया एति आगच्छति ॥ २३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आयान्तमालोक्य हृष्यन्त्यः परस्परमूचुः ॥ वत्सल इति ॥ व्रजस्य गवां च वत्सलः, यद्वा व्रजे निबद्धानां गवां गोवदनुकम्प्यानामस्माकं वत्सलो हितकृत्, यद्यस्मात्, अगध्रः अस्मत्परित्राणार्थमासप्तदिनं गोवर्द्धनधरः, इदं बहुशो रक्षणस्योपलक्षणम्। पथि मार्गे, वृद्धैर्ब्रह्मादिभिः, वन्द्यमानौ चरणौ यस्य सः, सायमपि शीघ्रमागन्तुं न ददतीति भावः। दिनान्ते सायंकाले, कृत्स्नं समग्रं यत् गोधनं तत्, उपोह्य एकीकृत्य, गीतवेणुः गीतयुक्तो वेणुर्यस्य सः, तथाभूतः, अनुगैरनुचरैरीडिता कीर्त्तिर्यस्य सः ॥ २२ ॥ उत्सवमिति ॥ स्मररुजा स्मररोगेण, अस्ता नष्टप्राया दृशो नेत्राणि यासां तासां, स्मररोगनष्टप्रायास्मन्नेत्राणामित्यर्थः। उत्सवं हर्षमुन्नयन्नुच्चैः प्रापयन्, श्रमरुचापि दृशीनामिति पाठे, श्रमरुचा श्रमयुक्तयापि कान्त्या, दृशीनां नेत्राणां, उत्सवं हर्षं, उन्नयन्, श्रमरुजार्त्तदृशीनामिति पाठे, श्रमरुजार्त्ता येऽस्मदादयो जनास्तेषां दृशीनां दृष्टीनां, उत्सवं उन्नयन्, खुररजैर्गवां खुररजोभिच्छुरिता व्याप्ताः स्रजो यस्य सः, 'रजसापि रजः समम्' इति द्विरूपकोशः। खुररजच्छुरितस्रगिति पाठे रजःशब्दः सान्तः। देवक्याः जठरेऽभवदिति देवकीजठरभूः, यद्वा। देवकया जठरमेव भूर्व्यक्तिस्थानं यस्य सः, एषः उडुराजश्चन्द्रः, सुहृदाशिषः सुहृदामस्माकं मनोरथस्य, दित्सया दातुमिच्छया, एत्यागच्छति। निर्वृतिहेतुत्वेन एष इत्युक्तम् ॥ २३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वत्सल इति : १०.३५.२२.

भवाध्वनि यदा सदाचरणवृद्धिकृद्भक्तिभृज्जनाश्रितपदः प्रभुर्भवति वत्सलः सद्गवि।
तदा तदवनश्रमादपि समुत्सवं दर्शयन् पुनः पुनरतन्द्रितः श्रयति तद्रजो ऽघापहम् ॥ ४१ ॥

उत्सवमिति : १०.३५.२३.

देवकीजठरभूरिति शब्दो गोपिकाभिरपि गर्गवदुक्तः। मोहवैभवमिहैशमचिन्त्यं सा च ताश्च मुमुहुः पुनरज्ञाः ॥ ४२ ॥

कृष्णप्रिया

देखो री जननी ? श्रीगिरिवर धारी, व्रजजन और गोधन के वत्सल-प्रियतम, और लौटते समय मार्ग में बहुविद् बुजुर्गों से संसेवित अभिवन्दित, निज अनुचर जन से निरंतर प्रशंसित, गौओं के खुरों से उड़ी हुई रज से अभिछुरित मालाओं से सुशोभित, देवकी-अदिति जी के जठर से प्रकट हुए चन्द्र श्रीकृष्ण चन्द जी सायं काल के समय वंशी नाद करते हुए, समस्त गोवृन्द को साथ लेकर, श्रमयुक्त मुखकमल की कान्ति से भी व्रजवनिताओं की दृष्टि को उत्सव प्रदान करते हुए अपने सुहृदजनों को आशीर्वाद प्रदान करते पधार रहे हैं ॥ २२–२३ ॥

मदविघूर्णितलोचन ईषन् मानदः स्वसुहृदां वनमाली।
बदरपाण्डुवदनो मृदुगण्डं मण्डयन् कनककुण्डललक्ष्म्या ॥ २४ ॥
यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते।
मुदितवक्त्र उपयाति दुरन्तं मोचयन् व्रजगवां दिनतापम् ॥ २५ ॥

कर्दमक्षमा

अन्वयः—मद-विघूर्णित-लोचनः, स्वसुहृदाम्, ईषत्, मानदः, बदरपाण्डुवदनः, वनमाली, कनक, कुण्डललक्ष्म्या, मृदुमण्डम्, मण्डयन्, द्विरदराजविहारः, यदुपतिः, दिनान्दे, मुदित, वक्त्रः, एषः, उपयाति, तदा, व्रजगवाम्, दुरन्तम्, दिनतापम्, यामिनीपतिः, इव, मोचयन्, एति ॥ २४–२५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतिसंभ्रमेण काश्चित्समीपमायान्तं कथयन्ति। मदेति। ईषन्मदेन विघूर्णिते विह्वलिते लोचने यस्य सः। बदरपाण्डुवदनः ईषत्पक्वबदरवत्पाण्डुरं वदनं यस्य सः। अत्र हेतुः। कनककुण्डलयोर्लक्ष्म्या कान्त्या मृदू कोमलौ गण्डौ यस्मिंस्तद्वदनं मण्डयन्निति कोमलगण्डस्थलं वा शोभयन्निति ॥ २४ ॥ यदुपरिति देवकीजठरभूरिति च 'प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः' इत्यादिगर्गवाक्यप्रसिद्ध्योक्तम्। यद्वा 'सख उदेयिवान्सात्वतां कुले' इतिवज्ज्ञात्वा काश्चिद्वदन्तीति। गजेन्द्रस्येव गतिर्यस्य चन्द्र इव प्रसन्नवक्त्रो व्रजगवामस्माकमनन्तं दिनतापं च शमयन्नुपयातीति एष समीपमायातीति ॥ २५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

(११) अतिसंभ्रमेण सहसा । अत्र पाण्डुरत्वे । गण्डौ कपोलौ । इन्द्रनीलमणिदर्पणसदृशयोः कनककुण्डलप्रभान्येन बदर इव वदनं यस्य भातीति भावः । समासापेक्षया भिन्नं भिन्नं पदं शोभनं, झटित्यर्थावबोधकत्वादत आह–कोमलेति ॥ (२४) ॥ यद्वा अथवा । वस्तुतस्तु पूर्वोक्तरीत्या गोपानां यदुत्वं यशोदाया देवकीत्वं च साधितमेव । विजयध्वजेन पाठान्तरं कल्पयित्वा बलदेवपक्षे योजना कृता, सा च 'कृष्णलीलानुगायतीः' इत्यनेन विरोत्स्यतीति । चन्द्रपक्षे मदे आनन्दकरे विघूर्णित इतस्ततः प्रसृतः लोचनः प्रकाशो यस्य स तथा । 'लुच–प्रकाशेऽपि' स्वसुहृदां स्त्रीणां मानदो अभिमानखण्डनः । वनानां भासां दीप्तीनां माला अस्यास्तीति वनमाली । बदरो बृहस्पतिः, पाण्डुः शुक्रस्तयोरिव वदनं वचनं यस्य स तथा । व्रजगवामिति व्याख्या तत् ॥ इदानीं नगरप्रान्तपर्यंतमागतस्तत्रापि किंचिद्विलम्बस्य कारणं शृण्वित्याहुः–मदेति । मदेन पित्रादिदर्शनोत्थेनानन्देन प्रेयसीजनदर्शनोत्थकाममत्ततया च विघूर्णिते विह्वले लोचने यस्य सः । प्रथमार्थो वात्सल्यरसपरिकरैर्द्वितीयार्थो मधुररसपरिकरैस्तत्रत्यैर्बुध्यत इत्येवमग्रेऽपि ज्ञेयम् । स्वसुहृदां पुरोहितादिमातुलादिभ्रात्रादिदासादिताम्बूलिकादीनां यथोचितमाशीर्वादादिकृतामीषन्मानदः राजपुत्रत्वादल्पवयस्त्वेनानधिगतनीतिशास्त्रत्वाच्च ईषन्मात्रं यथोचितं शिरोनमनादिकं मानं ददातीति सः । इत्ययमपि विलम्बहेतुरिति भावः । पक्षे, स्वसुहृदां प्रेयसीनां चंद्रशालिकाद्यारुह्य हसितापाङ्गनीलोत्पलैः पूजयन्तीनामीषदन्यजनाऽलक्षितं मानमभीष्टदानव्यञ्जकैः कटाक्षैर्ददातीति सः । वनपर्यटनश्रमेण क्षुत्पिपासाभ्यां च ईषत्पक्वबदरवत्पांडु वदनं यस्य सः । पक्षे, स्वाभीष्टप्रेयसीविरहानुभावोऽयं वदने पांडिमा । मृदुगण्डं मृदू गण्डौ कनककुण्डलयोश्चलयोर्लक्ष्म्या कान्त्या मण्डयन् ॥ यदुपतिरिति–गोपानां यादवत्वस्य पूर्वं प्रतिपादितत्वात् । द्विरदराजविहारो गजेन्द्रतुल्यमंदगमनः । मुदितवक्त्रः प्रफुल्लितमुखः । उपयाति निकटमायाति । व्रजगवां व्रजस्थजननेत्राणाम् ॥ २४–२५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ईषदित्यस्य विशुद्धसत्त्वमयत्वेन विघूर्णितेत्यनेन सम्बन्धः मदो हर्षं कृतचित्तविकारः सच स्वभावत एव विशेषतश्च नवयौवनात् ततो ऽपि विशेषतः प्रेयसीजनदर्शनाद्विज्ञेयः । एवं बहुष्वपि व्यङ्ग्येषु तत्सभायां तत्तदुपलब्धिस्तु स्वस्ववासनानुसारेणैवेति न रससाङ्कर्य्यदोषः । तेन मदेन मनाक्विविधतयाघूर्णिते लोचने यस्येति श्रीनेत्रयोर्विलासविशेष उक्तः व्रजप्रवेशसमयेऽभिगच्छतां स्वस्य सुहृदां तेभ्यो मानं प्रणामालिङ्गनसस्मितसम्भाषणप्रणयावलोकनर्मावलोककृपावलोकादिलक्षणं यथोचितं ददातीति तथा सः वनमालीति पूर्वोक्तकुन्ददामानुसारेण कुन्दैरेवापादलम्बिकात्वेन रचितया मालया युक्त इति ज्ञेयम् । मृद्विति कैशोरस्वभावेन सुकोमलकान्तित्वात् मण्डयन्निति स्वभावत एव कुण्डलयोर्गण्डाभ्यां संयोगात्विशेषतश्च गजेन्द्रगत्या मन्दमन्दचलनेन मुहुरुपसर्पणापसर्पणाभ्यां शोभाविशेषात् यदुपतिरिति । पूर्वदर्शितस्कान्दोक्त्यनुसारात् यादवेष्वपि सर्वेषु भवन्तो मम वल्लभा इति यदुपुराद्व्रजमागतस्य श्रीरामस्य गोपान् प्रतिहरिवंशप्रसिद्धवचने निर्द्धारणसप्तमी निर्देशाच्च यदूनां गोपानां पतिरिति । सर्वस्यापि गोकुलस्य परमाश्रयत्वेन परमप्रेमास्पदत्वं दर्शितं मुदितवक्त्र इति । उपयातीति च दुरन्तमपरिच्छिन्नमपि तदनिष्टाशङ्काहेतुकं तद्विच्छेदहेतुकं च व्रजगवां तापं विमोचयन् तत एव परममानन्दं च ददातीति ज्ञेयम् । अन्यत्तैः तत्र व्रजगवामस्माकमिति व्रजस्यास्मद्विशिष्टस्य तज्जनस्य गवां च शकटादीनां व्रजस्थानामित्यस्मत्संवलितत्वादस्माकमेवेत्यर्थः । यद्वा व्रजस्य गवां नेत्राणां "स्वर्गेषु पशुवाग्वज्रदिङ्नेत्र घृणिभूजले लक्ष्यदृष्ट्यां स्त्रियां पुंसि गौ"रिति नानार्थवर्गात् वदरवत्पाण्डुवदन इति निजभावानुसारेण तस्यापि स्वविरहदुःखनिश्चयात्तथा दृष्टः भावान्तरवज्जनेतु श्रमवैवर्ण्यव्यञ्जनात् यामिनीपतिश्चन्द्रो यथा दिनान्ते उदेति तथेति युग्मकानि पूर्णानि ॥ २४–२५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ईषदित्यस्य विघूर्णितेत्यनेन सम्बन्धः, मदो हर्षो मत्तता वा, स च स्वभावत एव, विशेषतश्च श्रीगोपीगणदर्शनाद्विज्ञेयः । तेन मनाग् विविधतया घूर्णिते लोचने यस्येति श्रीनेत्रयोः सौन्दर्य्यविशेष उक्तः, स्वस्य सुहृदां मातापित्रादीनां मानं पादाभिवन्दन सम्मान ददातीति तथा सः; यद्वा, स्वः स्वयं स एव सुहृद्यासां तासां गोपीनां परितो विलोकतादिना मदविघूर्णितलोचनत्वेनैव वा मानं ददादित्यर्थः । यद्वा, मानं चिरं गोपैः सह क्रीडया सत्वरानागमनेन मानिनीत्वं द्यति खण्डयतीति तथा सः. वनमालीति पूर्वोक्तगोपे-गोपूत्सवार्थं कुन्ददामाणुसारेण कुन्दैरेवापादलम्बिकात्वेन रचितया वनमालया युक्त इति ज्ञेयम्, मृद्विति–कैशोरस्वभावेन श्मश्र्वाद्यनुद्गमेन सुकोमलकान्तित्वात्, मण्डयन्निति—स्वभावत एव कुण्डलयोर्गण्डाभ्यां संयोगात् विशेषतश्च गजेन्द्रगत्या मन्दमन्दचलनेनाधिकसम्पर्कात् । यदुपतिरप्येव व्रजगवां दिनतापं मोचयन्नुपयाति । यदुपतिरिति–यदुभ्यो व्रजजन विषयकोऽनुग्रहविशेष ध्वनितः । यद्वा, यदुपतिरिति—यदवो गोपा इति स्कान्द–मथुराखण्डे उक्तत्वात्, तेषां पतिरिति पूर्ववत् गुणप्रकटनमेवाभिप्रेतम्, तदर्थमेव तत्कुलेऽवतीर्णत्वात् । मुदितवक्त्र इति–लीला स्मितनिरीक्षणादिकम्, तेन च भावविशेषोदयं च सूचयति; अत एव दूरं तमपरिच्छिन्नमपि तापं मोचयन् । अत्यत्तैर्व्याख्यातम् । यद्वा, वनमाली पत्रपुष्पमयमालावानिति वन्यवेशेन

शोभाभरो दर्शितः। बर्हमौलिकुण्डलोपरिन्यस्तगुञ्जाप्रालम्बादिवन्यवेशोऽपि पूर्वोक्तानुसारेणोक्तः। एवं पूर्ववेशपरित्यागेन वेशान्तरं ज्ञेयम्। ईषन्मानद इति सम्बन्धः, तदानीं समग्रमनोरथापूरणात्, बदरवत् पाण्डुवदन इति निजभावानुसारेण तस्यापि विरहमननात्तथा दृष्टेः। किंवा याथार्थ्येणैव जातविरहस्वभावात्, गण्डं मण्डयन्निति गजेन्द्रगतिस्वभावादेव, लक्ष्म्येति श्लेषेण गण्डचुम्बनात् कुण्डलयोर्लक्ष्मीत्वं ध्वनितम्, व्रजगवां व्रजसम्बन्धिन्यो या गावस्तासामेव दिनतापं वत्सैः सह सम्मेलनेन मोचयन्, न त्वस्माकमिति प्रेमातृप्त्युक्तिः। यामिनीपतिश्चन्द्रो यथा दिनान्ते उदेति, यामिनीपतित्वेन दिने तद्विरहेण यथा यामिन्या लयस्तस्य च तद्विरहेण म्लानतादि तथेति श्लेषार्थः। चन्द्रोऽपि यदुपतिस्तद्वंशप्रवर्त्तकत्वात्। द्विरदराजविहारश्च मन्दमन्दमुपयाति, मुदितवक्त्रश्च प्रसन्नपूर्णमण्डलत्वात्, यद्वा, मुदितानि लोकानां वक्त्राणि यस्मात् सः, दिनतापापनोदनात्, व्रजन्तीति व्रजाः जंगमाः प्राणिनस्तेषां गावश्चक्षुंषि तासां दिनजं तापं मोचयन्निति। अन्यत् समानम्॥ २५॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

काश्चिदतिसम्भ्रमेण समीपमायान्तं बलरामं कथयन्ति। मदविघूर्णितलोचन इति। ईषन्मदेन वारुणीमदेन विघूर्णिते लोचने यस्य सः स्वसुहृदां मानदः ईषत्पक्वबदरवत्पाण्डुवदनं यस्य सः। अत्र हेतुः कनककुण्डलयोर्लक्ष्म्या मृदू गण्डौ यस्मिंस्तद्वदनं मण्डयन् कोमलं गण्डस्थलं मण्डयन्निति वा द्विरदराजस्यैरावतस्येव विहारा यस्य सः, बलभद्रस्य श्वेतवर्णत्वाद्दिनान्ते चन्द्र इव मुदितं प्रसन्नं वक्त्रं यस्य सः, व्रजभुवामस्मदादीनां दुरन्तमपारं दिने सर्वविश्लेषजं तापं मोचयन्नुपयाति एष समीपमायाति। यद्वा इदं श्लोकद्वयं कृष्णपरमेव योज्यं तदा मदेन मन्मथेन विघूर्णिते लोचने यस्य सः द्विरदराजविहारो गजेन्द्रगतिः॥ २४–२५॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

श्रीकृष्णं प्रशस्य बलभद्रप्रशंसयोपसंहरति। मदविघूर्णितेति। वारुणीपानोत्पन्नमदेन ईषद्विघूर्णितलोचनः विभ्रान्तनेत्रः अन्यत्र घूर्णप्रकाशः लुषप्रकाश इतिधातुः। चन्द्रः कीदृशः स्त्रीणां मानदः अभिमानखण्डनः। दो अवखण्डन इति धातुः। वनानां भासां कान्तीनां मालास्यास्तीति वनमाली बदरश्चन्द्रः तद्वत्पाण्डुसुन्दरं वदनं यस्य स तथा "मानवो बदरः सिन्धुः शशिनस्तु त्रिनामक" मितिवचनात् बदरफलवद्रागोपेतं वदनमित्यर्थो न शोभते। पाण्डुशब्दो व्यर्थः स्यात् बदरो बृहस्पतिः पाण्डुः शुक्रस्तयोर्वदनमिव वदनं यस्य स तथा चन्द्रः कनककुण्डललक्ष्म्या मृदुगण्डं मण्डयन् अलंकुर्वन्नित्युभयत्र समम्॥ २४॥ दुरन्तं व्रजगवां दिनतापं मोचयन्नित्यपि समं द्विरदराजवद्विहारो गमनक्रीडा यस्य स तथा इदमपि पुरुषलक्षणं सममेवं विध एष यदुपतिः बलभद्रः यामिनीपतिश्चन्द्र इव दिनान्ते सायन्तनसमये उदयपर्वतशिखरं व्रजमुपयातीत्यन्वयः उपयातीति लटा गोपस्त्रीणामेवं नित्यमनुस्मरणं न कादाचित्कमिति सूचयति॥ २५॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तदेव दिनान्तागमनसौभाग्यं वर्णयन्त्योऽन्या उपसंहरति—मदविघूर्णितेत्यादि द्वाभ्याम्। वनमाली दिनान्ते उपैतीति सम्बन्धः। मदो विकारः सौभाग्ययौवनाद्यवलेपजः तेनेषद्घूर्णिते लोचने यस्य। स्व सुहृदां मानदः; यामिनीपतिरिति श्लिष्टम्, यामिन्यामेवास्माकं पतिरिति, पक्षे चन्द्र इव स यथा स्वसुहृदां कुमुदिनीनां मानदः। कनककुण्डललक्ष्म्या मृदुगण्डं कोमलगण्डं मण्डयन् अतएव बदरपाण्डुवदनः, उभयतः कनककुण्डलत्विषां प्रतिबिम्बेन तथात्वम् यदुपतिः 'ज्ञातीनां वो दिदृक्षया' इति भगवदुक्ते गोपाश्च यदवः; अथवा पूर्ववत् सम्बन्धस्थगनपरम्। व्रजगवां गोप्रायाणामस्माकं दूरस्थं दिनकृतं तापं मोचयन् अन्योऽपि यामिनीपतिर्दिनतापमोचको भवतीति॥ २४–२६॥

इति श्रीदशमे स्कन्धे श्रीबृहत्क्रमसन्दर्भे पञ्चत्रिंशोऽध्यायः॥ ३५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एतावति कथने समीपमागतं तं निरूपयन्त्यः शान्तोद्वेगाः काश्चिदाहुः—मदविघूर्णितेत्यादि–द्वाभ्याम्। मदो विकारः सौभाग्ययौवनाद्यवलेपज इत्यभिक्ताः। तेन घूर्णिते लोचने यस्य कीदृशः? ईषत् ईर्लक्ष्मीस्तस्यां सीदतीति स्वसुहृदां मानदः कनककुण्डललक्ष्म्या बदरपाण्डुवदनो यदुपतिरिति पूर्ववत् सम्बन्धस्थगनसूचनम्। व्रजगवामिति स्वात्मपरम्, व्रजस्थ–गोरूपाणामस्माकमित्यर्थः। दिनतापमिति रात्रितापो नास्त्येवेत्यर्थः। औत्सुक्य–दैन्य-हर्ष-विस्मयादीनाम्॥ २६॥

इति पञ्चत्रिंशोऽध्यायः॥ ३५।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इदानीं तु नगरप्रान्तपर्य्यन्तमागतस्तत्रापि किञ्चिद्विलम्बस्य कारणं शृण्वित्याहुः। मदेन पित्रादिदर्शनोत्थानन्देन प्रेयसीजनदर्शनोत्थाकाममत्ततया च विघूर्णिते विह्वले लोचने यस्य सः। प्रथमोऽर्थो वात्सल्यरसपरिकरैर्द्वितीयोऽर्थो मधुररसपरिकरैस्त-

त्रत्यैर्बुध्यते इत्येवमग्रेऽपि ज्ञेयम् । स्वसुहृदां पुरोहितादि-मातुलादि-भ्रात्रादि दासादि-ताम्बूलिकादीनां यथोचितमाशीर्वादादिकृताभीषन्मानदः राजपुत्रत्वादल्पवयस्त्वेनानाधिगतनीतिशास्त्रत्वाच्च ईषन्मात्रं यथोचितं शिरो नमनादिकं मानं ददातीति सः इत्ययमपि विलम्बहेतुरिति भावः । पक्षे स्वसुहृदां प्रेयसीनां चन्द्रशालिकाद्यारुह्य हसितापाङ्गनीलोत्पलैः पूजयन्तीनाम् ईषदन्यजनालक्षितं मानमभीष्टानव्यञ्जकैः कटाक्षैर्ददातीति सः । वनपथपर्यटनभ्रमणेन क्षुत्पिपासाभ्याञ्च ईषत्पक्वबदरवत् पाण्डुवदनं यस्य सः । पक्षे स्वाभीष्टप्रेयसीविरहानुभावोऽयम् । वदने पाण्डिमा मृदुगण्डं मृदुगण्डो कनककुण्डलयोश्चञ्चलयोः कान्त्या मण्डयन् । यदुपतिरिति गोपानां यादवत्वस्य प्रतिपादितपूर्वत्वात् द्विरदराजविहारो गजेन्द्रतुल्यमन्दगमनः मुदितवक्त्रः प्रफुल्लितमुखः । उपयाति निकटमायाति व्रजगवां व्रजस्थजननेत्राणाम् ॥ २४–२५ ॥

गूढार्थदीपिनी

ईषन्मदेति योज्यम् । कनककुण्डलयोः लक्ष्म्या मृदुगण्डं वदनं मण्डयन् । द्विरदो गजः । दुरन्तं दुर्निवारम् ॥ २४–२५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काश्चित्समीपमायान्तमालोक्याति औत्सुक्यादूचुः । मद इति । ईषन्मदेन नैसर्गिकेणैव दृष्टीनां वैवश्यापादकेन गुणविशेषेण घूर्णिते विह्वलिते लोचने यस्य सः बरदवत् ईषत्पाण्डुरनीलवर्णातिसुन्दरबदरवत्पाण्डुरं वदनं यस्य सः । अत्र हेतुः कनककुण्डलयोर्लक्ष्म्या कान्त्या मृदुगण्डौ यस्मिन् तद्वदनं मण्डयन् द्विरदराजवत् गजराजवत् विहारो यस्य सः यागिनीपतिः कलानिधिः तद्वन्मुदितं वक्त्रं यस्य व्रजगवां व्रजे निवद्धानां गवामनुकम्प्यानामस्माकं दुरन्तमनन्तमन्येनानिवार्यं वा तापं मोचयन् शमयन् उपयाति समीपमागच्छति ॥ २४–२५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मदविघूर्णितेति पद्ये बदरशब्दस्य विवक्षितार्थाप्रतीतेः स्वयं मानेन तदर्थमाह ॥ मानव इति । मानवो बदरो सिन्धुरिति शशिनस्त्रिनामकं सार्थकं नामत्रिकमित्यर्थः । यो वेद स रोगान्मुच्यते मुक्तो भवति । तत्र दृष्टान्तमाचष्टे । विष्णुनामोच्चारितेनाधिकारी संसृतेः संसारादिव यथा तथा मुच्यत इति ॥ ततश्चायं श्लोकार्थः ॥ किञ्चित्कामिनी मधुनाथमधुनाऽपि द्वाभ्यां प्रस्तुतं स्तुत्वोपसंहरति ।। मदेति । ईषत्किञ्चिदपि मानदः स्वसुहृदामत्यावश्यककामिनीनां स मद्यविघूर्णिते अविचालिते अभ्रामिते इति यावत् लोचने यस्य स अतत्कदाक्षिताहमित्यर्थः । मदो हर्षविशेषस्तेन विघूर्णिते उद्भ्रान्ते लोचने यस्य स वा वनमाली बलिध्वंसी । शिखादिरियम् । बदरेणोद्यच्चद्रेण पाण्डुवदनं यस्य सः । लपनोपरि परिपतितसान्द्रचन्द्रिकातस्तत्पाण्डुवदनं यस्येति वा । तत्र तन्त्रमाह । कनककुण्डललक्ष्म्या कनकात्मककुण्डलकान्त्येति । पडि गतौ, ततो मृगव्यादिः कुः । पृषोदरादिदीर्घः । हरिणः पाण्डुरः पाण्डुरिति व्याख्यायां पाण्डुस्तु पीतभागार्धः केतकी धूलिसन्निभ इति शब्दार्णवः । पाण्डुः कुन्तीपतौ सित इति हैमः । त्रीणि पीतसंपलितशुक्लस्येत्युक्तेश्चन्द्रिकाशौक्ल्यं कनककुण्डलपीततेति तयोः संवलनं ज्ञेयम् । मृदु यथा तथेति वा । मृदुश्चासौ गण्डश्च तं मण्डयन्नलङ्कुर्वन्द्विरदराजोगजराजस्तद्वद्विहारो यस्य स दिनान्ते यामिनीपतिश्चन्द्रो दिनान्त इव व्रजगवां व्रजगवानां दिनतापं मोचयन् दुरन्तमेतद्विनाऽन्यस्मादनन्तं मुदितवक्त्र उपयाति । वनमाली जलमाली वनोपरिग इति तन्माली वा । दिनतापं मोचयन्निति समम् । वस्तुतो वियुक्तानां तन्मात्रानुरक्तानामङ्गस्मरणं नास्तीत्येतावता विना भगवन्तमन्यत्र मनो मनागपि गच्छेदिति प्रक्रमानुसारेणैवोपसंहारस्य न्याय्यत्वान्नाप्रस्तुतस्तुत्योपसंहरणं मनोहरम् । विष्णुं शशिवर्णमित्युक्तं तथा प्रदर्शनमिति वा । दैवं चामीकरं नाम प्रोद्यदादित्यसन्निभमिति बृहद्भाष्योक्तेरादित्ये च । तदेवदादित्यस्य शुक्लं रूपमिति छान्दोगोपनिषदुक्तेः । कनककुण्डललक्ष्मीः शुभ्रेति बदरपाण्डुरतापीडितेति मन्तव्यम् । गोप्यः कृष्णे वनं याते इति कृष्णलीलां प्रागायन्त्य इति । तथा एवं व्रजस्त्रियो राजन्कृष्णलीलानुगायतीः । रेमिरेऽहस्सु तच्चित्तास्तन्मनस्का महोदया इति शुक एव भगवत्स्तुतिं सन्पुटीमाटीकतेति करसम्पुटीं कृष्णायैव कुर्युः ॥ २४–२५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

साधारणीं लीलामुक्त्वा गोपिकास्वेव वेणुकृतां भगवतैव जनितां लीलामाह । मदेति । यदुपतिः मुदितवक्त्र उपयातीति पूर्वोक्ता एव वेणुनादा अत्र ग्राह्याः दशलीलाः पूर्वं निरूपिताः ताः सर्वाः अस्मदर्थमेवेति दशधा भगवन्तं विशेषयन्ति एक एव भगवानुभयत्रेति युगलत्वेऽपि नात्यन्तविभागः सर्वत्रैव वेणुनादे रजो गुणः मुख्य इति सोऽस्मदर्थं फलित इत्याहुः । मदेन विघूर्णिते लोचने यस्येति मदोऽत्र स्वानन्दास्थित्या पूर्णावबोधः स ज्ञानमार्ग एवेति प्रकटयितुं सर्वविषयान् व्यावर्त्तयितुं विघूर्णितलोचनत्वमुक्तम् । अयं धर्मो भगवन्निष्ठो निरूपितः स्वरूपस्थित्यर्थं तादृशोऽपीषन्मानदः मानं प्रयच्छति सन्माननां करोति तेनास्माकं गम्यो भवतीति ज्ञायते । मानमभिमानं रजोगुणाप्राकट्यात् प्रयच्छति खण्डयतीति वा ज्ञानप्राकट्यात् प्रयच्छति मानं द्यति खण्डयति

त्रिष्वपीषदेव तत्तत्कार्यं ननु पूर्णस्य भवतीष्वेवं करणे को हेतुस्तत्राहुः। स्वसुहृदामिति। स्वपदादसाधारण्यं तेन स्वस्यैव सुहृदस्ताः महतोऽपि सुहृत्कार्यं कर्तव्यमिति साधारणं कार्यमाह। वनमालीति। कीर्तिमयीं वनमालां प्रकटयतीति बदरवत्पाण्डुवदन इति। बदरोऽत्र फलवाचकः सद्विधर्मेण प्रतिक्षणं विसदृशीं कान्तिं करोति। तत्राप्यर्द्धपक्वः पाण्डुवर्णो भवति अग्रे त्वारक्तः तथेदानीमर्द्धरक्तः अग्रेत्वत्यन्तं रतो भविष्यतीति ईषन्मानदत्वाद्विशेषः साधनं कीर्तिरिति मध्ये विशेषणान्तरम्। अथवात्र पाण्डुशब्देन आरक्त एव गुण उच्यते तदा वदनं वक्त्रम् अधरामृतपानं लक्षितं भवति। वनवासिनां वा एतदुपभोग्यमिति वने गत्वा एतदुपभोग्यमिति सर्वाः ज्ञापयन्ति ततोऽपि विशेषमाहुः कनककुण्डललक्ष्म्या मृदुगण्डं मण्डयन्निति श्मश्रूद्गमाभावात् आनन्दनिधानत्वाच्च मृदुत्वं भोगार्थमुपपाद्यते गण्ड एव रससमाप्तिरिति कनकपद वर्णान्तरज्ञापनार्थम् उत्कृष्टेनापि परमानन्देनापि अस्मदर्थं कामरस एवोद्बोध्यत इति सर्वथास्मदर्थमेव भगवदागमनमिति निश्चीयते अन्यथा शिरोभेदान् अस्मत्समक्षं न कुर्यादिति ॥ २४ ॥ ननु यद्यपि महान् तथापि बाल इति नन्दसूनुरिति कथमसाधारिणीं लीलां करिष्यतीत्याशङ्कां वारयन्ति। यदुपतिरिति। अयं यादवानां पतिः ते हि बहुस्त्रीका भवन्ति अमर्यादार्थं विशेषणान्तरमाहुः। द्विरदराजविहार इति। महासुरते गजेन्द्र इव महान् तेन विना न पूर्तिरिति तदपेक्षयाप्यादौ पूर्वतापं दूरीकरिष्यतीत्याहुः। यामिनीपतिरिवेति। सम्पूर्णाया यामिन्या अयं पतिः अतस्तद्गतानां विशेषेण सुखदः नन्वहर्पतिरपि कथमुच्यते यामिनीपतिरिवेति तत्राहुः। एष इति। सर्वालंकारभूतस्तत्र अधुनातु श्रान्तं तिष्ठति इव दिनान्ते एष यामिनीपतिरिव चन्द्र इव दूरादेव तापनाशकः। साम्प्रतम् अग्रेतु यामिनीपतिरिव इममर्थं ज्ञापयतीति लक्ष्यते, यतो मुदितवक्त्रः प्रसन्नवदनो भूत्वा उपयाति समीपमागच्छति अयं, भावस्तासामेव हितकारीति पूर्वं साधारण्यमुक्तमुपसंहारे पुनराहुः। मोचयन् व्रजगवामिति। व्रजस्य गवां च सम्पूर्णे दिवसे यावांस्तापः त सर्वमेव मोचयतीति ॥ २५ ॥

श्रीसुबोधिनी–सारः

मदेन विघूर्णिते लोचने यस्य स स्वसुहृदां मानदः वनमाली ईषत् किंचित् बदरवत् पाण्डु वदनं यस्य स कनकं सुवर्णं तन्मययोः कुण्डलयोर्लक्ष्म्या शोभया मृदु कोमलं गण्डं मंडयन् अलंकुर्वन् ॥ २४ ॥ "प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः" इति गर्गोक्तेः। यदुपतिः द्विरदराजो गजेन्द्र इव विहारो रमणं गतिर्वा यस्य स दिनांते संध्यासमये यामिनी रात्रिस्तस्याः पतिश्चन्द्रमा इव मुदितवक्त्रः प्रसन्नमुखः व्रजे गवामनुकम्प्यानामस्माकं दुरन्तमनन्तं दिनतापं मोचयन् सन्नेष श्रीकृष्ण उपयाति समीपमागच्छति।।२५।।

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

मदविघूर्णितेत्यत्र, रजोगुणो मुख्य इति उद्दीप्तो रसभाव इत्यर्थः, तस्मिन् सत्येव तत्करणात्। **मदविघूर्णितेत्यत्र** मदोऽत्रेत्यारभ्योक्तमित्यन्तम्। पूर्वानुभूतविविधनायिकाविविधविलासस्मृतिधाराजनितानन्दसन्दोहानुभवः पूर्णावबोध इत्युच्यते। स चेतरविस्मारक इति **मदरूपः**। सोऽधुना भवतीनामिव ममापि भवतीसम्बन्धस्मृत्यैव वनेऽपि मोदः, न त्वन्यनायिकाविषयिण्या क्रिययापीति ज्ञापयितुं ज्ञानप्रापकनयनयोरेव **मदः प्रदर्श्यते**। ज्ञानमपि भवतीमात्रविषयकम्, न त्वन्यविषयकमपीति ज्ञापयितुं विघूर्णितत्वम्। तादृग्बहिःप्रसरद्रूपं न भवतीति तथा। **प्रकुरप्रेमवतीनां** तत्रापि दिवा क्लिष्टानां प्रियदर्शने तत्रैवात्मप्रवेशः स्यादिति तदभावायेषदेव मानं ददाति यावता पृथक्-स्थितिर्भवतीत्याशयेनाहुः **स्वरूपस्थित्यर्थ**मित्यादि। यद्वा। इयदवधि पृथक् स्थित इति ज्ञानेन माने सम्भवत्यपि ज्ञापितार्थज्ञानेनेषदेव मानो भवतीति तथा। अथवा। उक्तज्ञापनेनेषदपि मानं द्यतीत्यर्थः। यद्वा। प्रचुरस्मरभाव एव मदस्तेन तथेति पूर्ववत्। यद्यप्येतादृशस्य स्वप्रियाभ्यः पूर्णमेव सम्मानं कर्तव्यं भवति, तथापि भव्येमार्गमन्येपि पश्यन्तीति तेषामनुचितत्वज्ञानं यावता न भवति, तावदेव कृतवानितीषन्मानदः। अत्र हेतुः कीर्तिमत्त्वमेव, अन्यथा तु लोका अन्यथा वदेयुरित्याशयेनोक्तं **वनमालीति**। ईषत्त्वे हेतुमाहुः **त्रिष्वपीति**। त्रिष्वपि पक्षेष्वित्यर्थः। ते सन्माननमानमानखण्डनरूपाः। रूपेणाश्वस्तानां स्मितेक्षणादिना य आश्वासः स स्वल्प एव कार्यः सम्माननस्य। पृथक् स्वरूपस्थितिमात्रं मानस्य। पूर्णमानवतीनामशेषमानखण्डने सति प्रचुरप्रेमवत्त्वेन लोकाद्यनुरोधाभाववत्त्वात्तदैव स्वानुरूपं सर्वं कुर्युः। अतस्तत्खण्डनं तावदेव यावता तदा लोकविगीतं न भवति। **बदरपाण्डुवदन**मित्यत्र, **ईषन्मानदत्वा**दिति। अग्रे पूर्णमानप्रद इति तस्माद्विशेष इत्यर्थः। **मृदुगण्ड**मित्यत्र, **मृदुत्वं भोगार्थ**मिति। रसविशेषानुभवार्थमित्यर्थः। तदुक्तं 'अनङ्कुरितकूर्चकः शृतसितोपलाढ्यं पयस्ततोऽङ्कुरितकूर्चकः सलवणाम्बु तक्रं पयः। ततः पलितकूर्चकः क्वथितगुग्गुलूद्वगकृद् भवन्ति हरिणीदृशां सततमेव भावाश्रय' इति ॥ २४ ॥ **यामिनीपतिरिवैष** इत्यत्र, **नन्वहर्पतिरपीति**। चन्द्रदृष्टान्तेन दिवा सुखदानं न प्राप्यते, तस्यातथात्वात्। भगवांस्तु दिवापि सुखं ददातीति कथमयं दृष्टान्तो युज्यत इत्यर्थः। अङ्गीकृत्योत्तरमाहुः **सर्वालंकारेति**। सर्वासामलंकारभूतो वृन्दमध्ये तिष्ठति यस्ता विहाय स्थातुमशक्तः परस्परगुणानुवादश्रवणतद्भावानुभवजनितानन्दसमुद्रलहरीभिरार्द्रार्द्रो रसपोषायाप्रकट इव दिवा यः स एष इत्यनेन प्रदर्श्यते। इतोऽप्यानन्दपोष इति ज्ञायते। यथान्यासां लीलानां परिज्ञानं भावबलात्, तथा स्थितेरपि। परन्तु कादाचित्कामदं ज्ञानम्, अन्यथा गानरस एव न स्यात्। तथा च दिवा निकट एवाप्रकटः सन्सुखयति प्रकारान्तरेण। दिनान्ते तु प्रकटः सन् दूरादेव चन्द्र इव तापनाशकः। यामिनतिपदाद्यथाग्रे यामिनीं पूर्णां साक्षाद्भुङ्क्ते सः, तथा प्रियोऽप्यस्मान् भोक्ष्यतीति ज्ञाप्यते।

मोचयन् व्रजगवामित्यत्र, गवां चेति । सद्यःप्रसूतानामिति शेषः । यद्वा । यथा रात्रिजं विरहजं तापं दिवा स्वरूपनादादिभिर्गवां मोचयति, तथा व्रजस्थिताः सर्वे तदेकनाथत्वेन तदेकपोष्यत्वेन तदधीनप्राणादिधर्मत्वेन, यथा तद्देहप्राणादिरक्षार्थं दिवा ता वने नीयन्ते, तथा तदर्थं निशीति च गाव इवेति गोपदेन स्वामिन्य एवोच्यन्ते ॥ २५ ॥

पितृपादस्ब्जकृपया निरोधविवृतिर्मया । स्फुटीकृता यथाशक्ति भक्तानां तुष्टये हरेः ॥ १ ॥
अनेनैव प्रकारेण निरोधविवृतौ बुधैः' । छेत्तव्यः संशय इति तं प्रदर्श्योपरम्यते ॥ २ ॥
न हि व्रजवधूपदाम्बुजपरागरागं विना मनागपि विचारणे भवति शक्तिरस्यास्तः ।
मया चिरविचारहृद्गततदीयतात्पर्यमाश्रितेन लिखितं सदा गिरिवरेशपादाम्बुजम् ॥ ३ ॥
संशयपङ्ककलंकितहृदया गोविन्दविहृतिविवृतौ ये । ते श्रीविठ्ठलवाणीपाथोभिर्निर्मलाः सन्तु॥ ४ ॥

इति श्रीगोपीजनवल्लभचरणैकतानश्रीविट्ठलेश्वरदीक्षितबिरचितो दशमस्कन्धप्रकरणद्वयविवृतिप्रकाशः समाप्तः ॥ ३५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

समीपमायान्तमनुवर्णयन्ति—मदेति । ईषन्मदेन विह्वलिते लोचने यस्य सः, बदरपक्वबदरवत् पाण्डुरं वदनं यस्य सः, अत्र हेतुमाहुः—मृदू गण्डौ यस्मिंस्तद्वदनं कनककुण्डलयोर्लक्ष्म्या कान्त्या मण्डयन् शोभयन्, वनपुष्पमालाधृक्, स्वसुहृदां निजस्नेहवतां भक्तानां मानदः सन्मानकर्ता ॥२४॥ द्विरदराजो गजश्रेष्ठः तद्वद्विहारो गतिर्यस्य सः, मुदितवत्वक्त्रः प्रसन्नवदनः, दिनान्ते सायंकाले यामिनीपतिश्चन्द्रः यथा दिनतापं मोचयन् आयाति तद्वद्व्रजगवामस्माकं दुरन्तं एतद्दर्शनं विना दुर्निवारं दिनविरहजं तापं मोचयन्नेष यदुपतिः उपयाति समीपमायाति ॥ २५ ॥

अन्वितार्थप्रकाशिका

आयात्येव कृष्ण इत्याहुः-मदेति ॥ ईषन्मदेन विघूर्णिते विह्वलिते लोचने यस्य सः बदरपाण्डुददनः ईषत्पक्वबदरमिव पाण्डुरं वदनं यस्य सः । अत्र हेतुमाह । मृदू गण्डौ यस्मिंस्तद्वदनं कनककुण्डलयोर्लक्ष्म्या कान्त्या मण्डयन् शोभयन् वनमाली वनपुष्पमालाधृत् स्वसुहृदां निजस्नेहवतां भक्तानां मादनः सम्मानकर्ता ॥ २४ ॥ द्विरदराजो गजश्रेष्ठः । तद्वद्विहारो गतिर्यस्य स मुदितवक्त्रः प्रसन्नवदनः दिनान्ते सायङ्काले यामिनीपतिश्चन्द्रो यथा दिनतापं मोचयन्नायाति तद्वद्व्रजस्य गवामिवास्माकम् । टजभाव आर्षः । दुरूतम् एतद्दर्शनं विना दुर्निवारं दिनविरहजं तापं मोचयन्नेष यदुपतिः उपयाति समीपमायाति । गोपाना यादवत्वं प्रतिपादितमेव ॥ २५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यु० ११ ॥ ततोऽपि समीपे आयान्तं कृष्णं कथयन्ति मदेति । ईषन्मदेन स्वासंख्यतैश्वर्यस्य किंचिद्द्रवेण विघूर्णिते व्याप्ते लोचने यस्य सः बदरपांडुवदनः पक्वबदरमिव पाण्डुरं दिनतापेन ईषद्रक्तं वदनं यस्य सः । स्वसुहृदां व्रजप्रवेशसमये द्रष्टुमागतानां स्वमित्राणां मानदः स्मितभाषणावलोकनादिना यथार्ह मानदाता कनककुण्डलयोः लक्ष्म्या शोभया मृदूकोमलौ गण्डौ कपोलौ यस्मिंस्तत् मुखमिति शेषः । मंडयन् मृदुगंडस्थलं वा ॥२४॥ यदुपतिः देवकीजठरभूरित्याद्युक्तिस्तु प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज इति गर्गवाक्याज्जातज्ञानेन भवति अतो वसुदेवस्यैव पुत्रो ज्ञातव्यः । द्विरदराजस्य नागेन्द्रस्य विहार इव विहारो गतिर्यस्य सः दिनान्ते सायंकाले यामिनीपतिरिव निशापति चन्द्र इव मुदितवक्त्रः प्रसन्नवदनः एषः श्रीकृष्णः । व्रजगवां व्रजेस्थितानां गवां रक्षणोयतया गोतुल्यानामस्माकं यद्वा व्रजस्य समग्रस्य गवां लोचनानां विरहजं दुरन्तं दिनतापं मोचयन् सन् उपयाति समीपमागच्छति ॥ २५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

काश्चित् समीपमायान्तमतिसंभ्रमेण कथयन्ति ॥ मदेति ॥ ईषत् किंचित्, मदेन विघूर्णिते विह्वलिते लोचने यस्य सः, स्वसुहृदां मानदः, वनमाली वनपुष्पमालाधरः, बदरवदीषत्पक्वबदरीफलवत् पाण्डुरं वदन यस्य सः, अत्र हेतुः । कनककुण्डलयोलक्ष्मीः कान्तिस्तया, मृदू कोमलौ गण्डौ यस्मिंस्तत्, मण्डयन्, वदनमिति शेषः । यद्वा मृदु कोमलं, गण्डं गण्डस्थलं, मण्डयन् ॥ २४ ॥ यदुपतिरिति ॥ द्विरदराजो गजेन्द्रस्तस्येव विहारो गतिर्यस्य सः, यामिनीपतिरिव चन्द्र इव, मुदितवक्त्रः प्रसन्नवदनः, व्रजगवां रक्षणीयतया गोसमानानामस्माकं, दुरन्त दुःसहं, दिनतापं मोचयन्, यदुपतिः एष कृष्णः, दिनान्ते, उपयाति समीपमायाति । केचित्तु एतच्छ्लोकद्वयं काश्चिदतिसंभ्रमेण समीपमायान्तं बलरामं कथयन्ति । मदेतीत्युक्त्वा बलभद्रपरतया योजयन्ति । अत्र गीते द्वादशस्वपि युगलेषु क्वचित् श्लाके पूर्वोत्तरार्द्धयोः स्थितयोर्द्वयोः पादयोरादौ सस्वरयोः केवलहलोर्वा वर्णयोः प्रायेणैक्यमेव । तत्र कुत्रचित् पूर्वार्द्धयोर्वर्त्तमानयोः पादयोः क्वचिदुत्तरार्द्धयोर्वर्त्तमानयोः पादयोराद्यवर्णैक्यं, तत्राद्यवर्णानयने सकारशकारयोरैक्यमुक्तमस्तीति बोध्यम् ॥ २५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यदुपतिरिति : १०.३५.२५.

अनन्यशरणावनोल्लसदहङ्कृतिर्मानदः सतां सुहृदनुग्रहं खलु यदेच्छतीशः स्वयम्।
तदा बदरवत्पुरः स्फुरति गोकुलस्थायिनां त्रितापमखिल हरन् झटिति पूर्णचन्द्रोदयः ॥ ४३ ॥
एणा गावो मयूरा विपिनतरुलता आपगाः षट्पदाश्च हंसोत्तंसा विहङ्गा जलधरपवना अप्यलं मानयन्तः।
दृष्ट्वा कूजत्सुवेणुं यदुपतिममितामोदपूर्णान्तरङ्गा धन्या वृन्दावनेऽस्मिन् सपदि सखि यथाशक्ति संपूजयन्ति ॥ ४४ ॥
वयं तत्पदभाजोऽपि तद्गोकुलकृताशयाः। धन्यं वाऽधन्यमात्मानं नैव जानीमहे सखि ॥ ४५ ॥ (युग्मम्)
गोपदाभिहतिखेदमपीशो नैव यद्वनभुवः सहते स्म। तत्कथं सखि सहेत स दीनत्राणकार्यतनुखेदमहो नः ॥ ४६ ॥
भक्तत्राणनिमित्तकाखिल-लसल्लीलस्य मायेशितुर्ये लीलामनुवर्णयन्ति सुदृशस्तत्प्राप्तिमात्रस्पृहाः।
तेषामेष महादयालुरचिरात् प्रत्यक्षभावं भजत्यत्रोदाहरणं स्फुटं व्रजगतास्तास्तादृशो गोपिकाः ॥ ४७ ॥
अनल्पमाकल्पमपि त्रितापं सकृत्स्मृतो योऽमपाकरोति।
दिनानुतापापहरं तदीशवक्त्राब्जमासीदिति नात्र चित्रम् ॥ ४८ ॥
मुनिवरकृततादृक्पदविन्यासालोचनेन यः फलितः। लिखितः स युगुलगीतार्थः श्रीगोविन्ददर्शितपदार्थः ॥ ४९ ॥
यद्यपि नवं न गीतं मया प्रभो तत्तथोह-रहितेन। तद्गीतं त्वनुगीतं तदच्युतास्मिञ्जनेऽपि भव सदयः ॥ ५० ॥
श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते श्रीभक्तिरसायने पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

कृष्णप्रिया

मद भरे नयन वाले, स्वसुहृद वृन्द को कुछ सन्मान करते, वेर के परिपक्व फल के जैसे पाण्डु वदन, श्री वनमाली जी, सुतप्त सुवर्ण के कुण्डलों की शोभा से कोमल कपोलों को सौन्दर्य दान देने वाले, गजराज की मद माती चाल से विहरते श्रीयदुराज सांझ के समय हास्य करते हुए प्रसन्नवदन श्रीनन्दनन्दन जब व्रज में पधारते हैं तब व्रज तथा भौओं के अनन्त दिन ताप को यामिनी नाथ चन्द्र की तरह दूर करते हैं ॥ २४–२५ ॥

श्रीशुक[1] उवाच

एवं व्रजस्त्रियो राजन् कृष्णलीला नु गायतीः। रेमिरेऽहःसु तच्चित्तास्तन्मनस्का महोदयाः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे[2] दशमस्कन्धे[3] गोपिकायुगलगीतं नाम [4]पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

कर्दमक्षमा

अन्वयः—राजन् ! एवम्, तच्चित्ताः, तन्मनस्काः, महोदयाः, व्रजस्त्रियः, कृष्णलीलानुगायतीः, अहःसु, रेमिरे ॥ २६ ॥

इति पञ्चत्रिंशोऽध्यायः समाप्तः ॥ ३५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं विरहदुःखेनापि नु अहो कृष्णलीला एव गायन्त्यस्तस्मिंश्चित्तं चेतना जीवितं यासां तास्तस्मिन्नेव मनः संकल्परूपं यासां ता अतो महानुदय उत्सवो यासां ता अहःस्वपि रेमिरे ॥ २६ ॥

इति श्रीमद्भागवते० म० दशमस्कन्धे पूर्वार्धे टीकायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

(१२) ॥ चिन्त्यते संज्ञायते इन्द्रियप्रवर्तकत्वेनेति 'चित्तम् 'चिती—संज्ञाने' अतः क्तप्रत्यये इडभावः ईदित्त्वात्। तस्मिन् श्रीकृष्णे। अतो भगवन्मनस्त्वादेव। महान् वक्तुमशक्यः अहस्स्वपीहापिना रात्रिक्रीडापि बोधितेति ॥ नु भो राजन्। गायतीर्गायन्त्यः। तस्मिन् श्रीकृष्ण एव चित्त यासां ताः। तस्य श्रीकृष्णस्यापि मनो यासु ता इत्यतः श्रीकृष्णतात्प्रयाणां परस्परविषयाश्रयत्वात्परस्परमनो ग्रहणम् अतः प्रतिक्षणमनिशस्मरणात्। रेमिर इति विप्रलम्भप्रेम्णो दुःखमयत्वेन तदाविष्टजनप्रतीतत्वेऽपि परमसुखमयत्वं प्रेक्षावत्प्रतीतमस्त्यतः प्रेम्णः पुरुषार्थचूडामणित्वं व्यञ्जितम् ॥ २६ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे पंचत्रिंशोऽध्यायः ॥ ३५ ॥

---

[1] "शुक उवाच" एवं "व्रज" नास्ति–प्रा. पा.। [2] पारमहंस्यां संहितायां–प्रा. पा.। [3] पूर्वार्द्धे वृन्दावनक्रीडायां। [4] त्र्यस्त्रिशो–विज.।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उपसंहरति । एवमिति । व्रजस्थिता अपि स्त्रियः हे राजन्निति तासां विरहगीते प्रेम्णा मुह्यन्तं राजानं सुस्थयति अहःसु तद्विरहमयेष्वपि रेमिरे जातनिर्वृतिप्राया बभूवुः। तत्र हेतवः तच्चित्ता इत्याद्याः तस्य परमानन्दघनस्वभावत्वादिति भावः। अन्यत्तैः। यद्वा एवमुक्तप्रकारेणेति तत्रेदृशलीलान्तरगानमपि बोध्यते। तच्चित्तत्वतन्मनस्कत्वतद्गानैस्तदेकगतज्ञानेच्छाप्रयत्नत्वमुक्तं महान् तदाविर्भावरूपत्वात्सर्वतोऽप्युत्कृष्ट उदयः सत्कर्मसिद्धिर्यासां ताः तदेवमुत्तरोत्तरमाविर्भाववैशिष्ट्येन रमणस्यापि वैशिष्ट्यं ज्ञेयं तत्र वत्सल इत्यादिषु साक्षादाविर्भावात्साक्षादेव रमणं तत्राप्युत्तरोत्तरतारतम्यमिति पूर्वत्र तु विरहेऽपि रमणं निजालम्बनस्य मनः स्फुरितत्वादंशेन भवत्येवेति सर्वत्र रेमिर इति शिलष्टमेव ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उपसंहरति—एवमिति । व्रजे स्थिता अपि स्त्रियः । हे राजन्निति तासां विरहगीतया प्रेम्णा मुह्यन्तं राजानं स्वस्थयति-कृष्णस्य परमानन्दघनमूर्त्तेर्लीला इति तल्लीलामपि पूर्ववत्तादृशत्वमेवाभिप्रेतम्; अहः सु तद्विरहसमयेष्वपि रेमिरे सुखिन्यो बभूवुः । तत्र हेतवः—तच्चित्ता इत्याद्याः अन्यत्तैर्व्याख्यातम् । यद्वा, एवमुक्तप्रकारेण ईदृशीरिति वा, ततश्चान्या अपि तादृशीर्लीलाः प्रगायन्ति स्मेति बोद्धव्यम् । तच्चित्तत्वेन तन्मनस्कत्वेन च सदा प्रेमार्त्ता एव, विशेषतश्च तल्लीलागानेन महान् उदयः साक्षादिव कृष्णस्याविर्भावो यासां ताः, ततश्च तदागमनगानं तस्य रूपलीलादिगानक्रमेण चित्तावेशेन दिनान्ते परोक्षत्वेऽपि साक्षादिव तस्याविर्भावात्, सायञ्च स्वतस्तद्दर्शनसुखं भवेदेवेति । दिनार्त्तिनिस्तारप्रकारकथनेऽत्र तन्नोक्तमिति । यद्वा, दिनं गानेनैव सदा निन्युः । अतएवादावुक्तम्—कृच्छ्रेणेति । सायञ्च साक्षात्तद्दर्शनेन सुखिन्यो बभूवुरिति विवेचनोयम् । ततश्च एवमुक्तप्रकारेण गायन्त्यस्तथा महान् साक्षाद्दर्शनेनोत्सवो यासां तथाभूताश्च सत्य इत्यर्थः । अतएव तैरपि व्याख्यातम्–आयान्तमालोक्येति श्रीकृष्णं प्राप्तं दृष्ट्वेति च । अन्यत् समानम् । एवं पूर्व्वाह्णादिभेदेन तत्राप्यवान्तरभेद–क्रमेण त्रिषु कालेषु प्रत्येकं त्रीणीत्येवं नवयुगलानि, अकस्माच्छ्रीयशोदां प्रति विविधेत्यादियुगलमेकम्, तत्प्रसंगाच्च निजावस्थावर्णने युगलमेकमित्येवमेकत्राहुः, सर्व्वान्ते च समीपागमनहर्षेण युगलमेकमधिकमित्येवं द्वादशयुगलैस्तल्लीला गानं विवेचनीयम् ॥ २६ ॥

गोकुलोत्सवलीलायाः समाप्तौ सद्रसाम्बुधेः अन्यत्र कः प्रवर्त्तेत विना निजदुराग्रहम् ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उपसंहरति शुकः । एवमिति । हे राजन्नित्थं कृष्णस्य लीला अनुगायन्त्यो गोप्यः अहःस्वपि तस्मिंश्चित्तं चेतना जीवितं यासां तस्मिन्नेव मनः सङ्कल्पविकल्परूपं यासां ता अत एव महानुदय उत्सवो यासां तास्तथाभूता रेमिरे ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडायां श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

एवं विधाः कृष्णलीला अनुगायतीः अनुगायन्त्यः अल्लोपश्छान्दसो वृत्तभङ्गभयाद्वा कृतः । यद्वा एवं वेणुं विकल्प्य "नुविकल्पो नुपृच्छाया"मित्यमरः महानुदयः सम्पद्यासां ताः महोदयाः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् त्रयस्त्रिंशोऽध्यायः ॥ ३३–३५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

रेमिरे जातनिर्वृतिप्राया बभूवुः । अत्र हेतवः तच्चित्ता इत्याद्यास्तस्य परमानन्दघनस्वभावत्वात् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नु भो राजन्! गायतीः गायन्त्यः । तस्मिन् श्रीकृष्ण एव चित्तं चेतो यासां ताः । तस्य श्रीकृष्णस्यापि मनो यासु ता इत्यतः कृष्णतत्प्रियाणां परस्परविषयाश्रयत्वात् परस्परमनोग्रहणतः प्रतिक्षणमनिशरमणात् रेमिरे इति विप्रलम्भप्रेम्णो दुःखमयत्वेन तदाविष्टजनप्रतीतत्वेऽपि परमसुखमयत्वं प्रेक्षावत्प्रतीतमस्त्यतः प्रेम्णः पुरुषार्थचूडामणित्वं व्यञ्जितम् ॥ २६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । पञ्चत्रिंशोऽपि दशमे सङ्गतः सङ्गतः सताम् ॥ ३५ ॥

गूढार्थदीपिनी

नु अहो कृष्णलीला गायन्त्यः रेमिरे । महान् उत्सवो यासां ताः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दमशस्कन्धे पूर्वार्द्धे गुढार्थदीपिन्यां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उक्तार्थमुपसंहरति । एवमिति । हेराजन्! एवं कृष्णस्य लीलां जात्यभिप्रायमेकवचनम् अनुगायन्त्यः तस्मिन् चित्तं चेतना जीवितं यासां ताः । तस्मिन् मनो यासां ताः अतो महानुदय उत्सवो यासां ताः अहस्स्वपि रेमिरे धन्यास्ता इति भावः ॥२६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये पूर्वार्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चत्रिंशाऽध्यायार्थप्रकाशः ॥ ३५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

लीलाः नुगायतीरिति छेदः । ऐकपद्यं वा । कृष्णलीला अनुगायतीः कृष्णलीलानुगायन्त्योऽहस्सु तच्चित्ता मुनय इव तन्मनस्का महोदया इति समं रेमिरे चिक्रीडुः ॥ २६ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं निरोधं निरूप्य स्त्रीणामुपसंहरन् प्रकरणस्थानामेव तद्वाक्यमुपसंहरति । एवमिति । राजन्निति संबोधनं विश्वासार्थं व्रजगता अपि स्त्रियः एवम्प्रकारेण अहस्सु भगवत्सम्बन्धरहितदशायामपि कृष्णलीला एव आनुपूर्व्येण बहुकालानुवृत्त्यर्थमनुगायतीः अनुक्रमेण गायन्त्यः रेमिरे स्वत आनन्दरूपा कौतिस्ताः प्रति जातेति तासां क्रिया शक्तिर्ज्ञानशक्तिश्च भगवन्निष्ठैव जातेत्याह । तन्मनस्काः तच्चित्ता इति । चित्तं ज्ञानप्रधानं मनः कर्मप्रधानमिति । एवं सर्वप्रकारेण प्रपञ्चविस्मृतिर्भगवदासक्तिश्च निरूपिता । नन्वेवङ्कथं तासां निरोधः फलित इति तत्रोपपत्तिमाह । महोदया इति । महानेवाभ्युदयो भाग्यराशिर्यासामिति सर्वं सुस्थम् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां
सुबोधिन्याम् द्वात्रिंशाध्यायविवरणम् ॥ ३२–३५ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । तस्मिन् श्रीकृष्णे चित्तं यत्तं यासां तस्मिन्नेव मनः संकल्परूपं यासां महानुदय उत्सवो यासां ता व्रजस्त्रियो गोप्य एवं युगलगीतेन कृष्णस्य लीला गायतीर्गायन्त्योऽहस्सु दिनेषु रेमिरे नु निश्चितम् ॥ २६ ॥

इति श्रीमद्भागवते दशमस्कन्धे पू० सुबोधिन्यां टीकायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

उपसंहरति । गोपीनां स्नेहातिशयं सूचयन् सम्बोधयति–राजन्निति । तस्मिन् कृष्ण एव चित्तं चेतना जीवितं यासां ताः, जीवितं यासां ताः, तथा तस्मिन्नेव मनः सङ्कल्पात्मकं यासां ताः, अतएव महान् उदय उत्सवो यासां ता, व्रजस्त्रियः अहःसु तद्विरहेऽपि एवं कृष्णलीला एवानुगायतीः गायन्त्यो रेमिरे इत्यन्वयः ॥ २६ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र तामसरोधवर्णने । पञ्चत्रिंशो गतो वृत्ति युग्मगीतनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ हे राजन्! तस्मिन् कृष्ण एव चित्तं चेतना जीवितं यासां ताः तथा तस्मिन्नेव मनः संकल्पात्मकं यासां ताः अत एव महानुदय उत्सवो यासां ताः व्रजस्त्रियः अहःसु तद्विरहेऽपि एवं कृष्णलीला एवानुगायतीः गायन्त्यः । नुमभावः पूर्वसवर्णदीर्घश्चार्षः । रेमिरे ॥ २६ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमपञ्चत्रिंशे व्यधादिमाम् ॥
इति श्रीमद्भागवते महापुराणे दशमेस्कन्धेऽन्वितार्थप्रकाशिकायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यु० १२ ॥ एवमिति एवं विरहतप्ता अपि कृष्णलीला एवानुगायन्तीः गायंत्यः त्यचिताः तस्याः लीलाया एव चित्तं अखण्डस्मृतिरूपं ज्ञानं यासां ताः अतएव तन्मनस्काः अतएव महान् उदय उत्सवो यासां एवंभूताः अहस्सु श्रीकृष्णविरहमयेषु दिनेष्वपि रेमिरे ॥ २६ ॥

इति श्रीशुद्धकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने युगलगीतनामा पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उपसंहरति ॥ एवमिति ॥ हे राजन् , एवमित्थं, कृष्णलीलाः अनुगायतीरनुगायन्त्यः, संधिरार्षः । व्रजस्त्रियो गोप्यः, अहस्स्वपि, तस्मिन् श्रीकृष्णे चित्तं चेतना जीवितं यासां ताः, तस्मिन्नेव मनः संकल्पविकल्पात्मकं यासां ताः, अत एव महानुदय उत्सवो यासां तथाभूताः सत्यः, रेमिरे ॥ २६ ॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तम श्रीसहजानन्दस्वामिसुत श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

कृष्णप्रिया

श्री शुकाचार्यजी कहते हैं कि —राजन् ! ज्ञान प्रधान चित्त और कर्मप्रधान मन्त केवल श्रीकृष्ण में ही विराजमान है वैसी बड़भागिनी गोपियाँ गोविन्द प्रभुजी की लीलाओं का गान करती हुई दिनों में श्रीकृष्णमय मन बनकर प्रसन्नमना रमण करती है ॥ २६ ॥

श्रीमद्भागवत दशम स्कन्ध निरोधलीला तामस प्रकरण के फल प्रकरण में धर्मी निरूपक ३५ वाँ अध्याय सम्पूर्ण ॥ ३५ ॥

❖

श्री कृष्णः शरणं मम

श्रीमद्वल्लभाचार्यचरणा विजयन्तेतमाम्

श्री कृष्णद्वैपायन-वेदव्यास-महर्षिप्रणीतमनेकव्याख्यासमलङ्कृतम्

श्रीमद्भागवतमहापुराणम्

सात्वतसंहिता

दशमस्कन्धः - पूर्वार्द्धः

राजसप्रकरणे प्रमाणप्रमेय प्रकरणे

चतुर्दशं फलम्

आचार्यवर्याणां - प्राचेतसाञ्च विविधाष्टीकाः

* * *

कर्दमक्षमा (अन्वयः) श्रीधरस्वामिविरचिता - भावार्थदीपिका, श्रीवंशीधरकृतः- भावार्थदीपिकाप्रकाशः, श्रीमज्जीवगोस्वामिकृता - वैष्णवतोषिणी, श्रीमत्सनातनगोस्वामिकृता - बृहद्वैष्णवतोषिणी, श्रीमद्वीरराघवाचार्यकृता - भागवतचन्द्रचन्द्रिका, श्रीमद्विजयध्वजतीर्थकृता - पदरत्नावली, श्रीमद्विश्वनाथचक्रवर्तिकृता - सारार्थदर्शिनी, गूढार्थदीपिनी, श्रीमच्छुकदेवकृतः - सिद्धान्तप्रदीपः, श्रीसत्यधर्मकृता - श्रीभागवतटिप्पणी, श्रीमद्वल्लभाचार्यकृता - सुबोधिनी, श्रीसुबोधिनीसारः, गोस्वामिश्रीगिरिधरलालकृता - बालप्रबोधिनी, श्रीगङ्गासहाय प्रणीता - अन्वितार्थप्रकाशिका, श्रीगोपालानन्दमुनिविरचितं - निगूढार्थप्रकाशव्याख्यानम्, भगवतप्रसादाचार्यविरचिता - भक्तमनोरञ्जनी, श्रीहरिसूरिविरचितं - श्रीभक्तिरसायनम्, इत्येताभिर्व्याख्याभिः श्रीकृष्णशंकरशास्त्रिनिवर्तित - कृष्णप्रियाभाषानुवादेन च समलङ्कृतम् ।

संकलन कर्ता—

कर्दमऋषितनुजो भागवतः ऋषिः
विक्रम संवत्सरः २०५४

प्रकाशक :

श्रीभागवत विद्यापीठः
कृष्णधाम कर्णावती
३८२४८१

सम्पादकः परिवेषकश्च

कृष्णशंकर शास्त्री
शालिवाहनः १९१९

सम्पादकः
कृष्णशंकरः शास्त्री । श्रीभागवतविद्यापीठः । कृष्णधाम सोला । कर्णावती - ३८२ ४८१

— श्रीभागवतविद्यापीठन्यासिपरिषद् —

कृष्णशंकरः शास्त्री
जशवन्तराय उपाध्याय
गिरिधारीलाल महेता
दीपकभाई शेठ
इन्द्रकान्त परीख
नटवरलाल दलाल
पंडित देवेन्द्र विजय
शान्तिलाल शाह
नरेन्द्रभाई शास्त्री
सुरेशभाई व्यासः
क्षमा कर्दम शास्त्री
दिनेशभाई महेता
जयंतिलाल रामराम
भोगीलाल यादव
भागवत शास्त्री
गांडाभाई पटेल
नानालाल चोकसी

— सर्वेऽधिकाराः श्रीभागवतविद्यापीठाधीनाः —

प्राप्तिस्थानानि

श्रीभागवतविद्यापीठ :	कृष्णधाम : सोला : कर्णावती ३८२४८१ दूरध्वनि ७४७३८३९
शहर दफतर :	३०२, रीलीफ शोपींग सेन्टर, जी.पी.ओ. पास, कर्णावती - ३८० ००१. टे.नं. ५५०२२४५
श्रीमती वीणाबहिन मनहरलाल	५ आनंद, ५ वाँ रोड नवयुग सोसायटी वीले पारले मुम्बई ५६ टे.नं. ६१४२६५
सरला दलाल	३५-न्युनवरंग ३ मजला पेडररोड मुम्बई - २६ दूर. ३८८२४३३

श्रीहरिः

* श्रीगणेशाय नमः *

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः पूर्वार्धः

—:-❀❀-:—

अथ षट्त्रिंशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४०	३८	२	३	१३४४	१८	३८	१४००	४३।।।	

श्रीशुक उवाच

अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः। महीं महाककुत्कायः कम्पयन् खुरविक्षताम् ॥ १ ॥
[1]रम्भमाणः खरतरं पदा च विलिखन् महीम्। उद्यम्य [2]पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् ॥ २ ॥
किञ्चित् किञ्चिच्छकृन्मुञ्चन् मूत्रयन् स्तब्धलोचनः। यस्य निर्ह्रादितेनाङ्ग निष्ठुरेण गवां नृणाम् ॥ ३ ॥
[3]पतन्त्यकालतो गर्भाः स्रवन्ति स्म भयेन वै। निर्विशन्ति घना यस्य ककुद्यचलशङ्कया ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच अथ, तर्हि, महाककुत् कायः, वृषभासुरः, अरिष्टः खुरविक्षताम्, महीम्, कम्पयन्, गोष्ठम्, आगतः ॥ १ ॥ खरतरम्, रम्भमाणः, च, पदा, महीम्, विलिखन्, पुच्छम् उद्यम्य, विषाणाग्रेण, च, वप्राणि, उद्धरन्, आगतः ॥ २ ॥ हे अङ्ग १—(सः) किञ्चित्, किञ्चित्, शकृत्, मुञ्चन्, मूत्रयन् स्तब्धलोचनः, यस्य निष्ठुरेण, निर्ह्रादितेन, गवाम्, च, नृणाम्, गर्भाः भयेन, अकालतः, वै पतन्ति स्म, च स्रवन्ति स्म, यस्य ककुदि, अचलशङ्कया, घनाः, निर्विशन्ति ॥ ३–४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

षट्त्रिंशे तु हतेऽरिष्टे नारदोक्त्या बलाच्युतौ। वसुदेवसुतौ ज्ञात्वा कंसोऽक्रूरं समादिशत् ॥ १ ॥
गोपीरासांतरायातं शखचूडं निहत्य सः। अहन् गोपीमहानंदासहं दुष्टमरिष्टकम् ॥ २ ॥

एवं देवगंधर्वादिगीतनृत्यवाद्यकुसुमवर्षादिभिः कृष्णं प्राप्तं दृष्ट्वा व्रजस्य परमोत्सवे वर्तमाने तद्विरुद्धार्थान्तराधिकारार्थमथशब्दः। तर्हि तदा। वृषभाकृतिरसुरः। तं वर्णयति सार्धत्रयेण। महांतौ ककुत्कायौ यस्य सः। खुरैर्विदारिता महीं कम्पयन् ॥१॥ रंभमाणो वृषभजातिशब्दं कुर्वन्। विलिखन् विदारयन्। उद्यम्योर्ध्वं कृत्वा। वप्राणि तटान्युत्क्षिपन् ॥ २ ॥ किंचित्किंचिच्छकृन्मध्येमध्ये ईषदीषत्पुरीषं मुंचन्। तथा मूत्रयन्मूत्रमुत्सृजन्। स्तब्धलोचनोऽनिमिषलोचनः। यस्य ध्वनिना गवां नारीणां च ॥ ३ ॥ तत्र "आ चतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः। अत ऊर्ध्वं तु नारीणां प्रसवः परिकीर्तितः ॥" इति विभागः। ककुदि गलपृष्ठमांसपिण्डेऽचलोऽयमिति भ्रांत्या वर्षन्तीत्यर्थः। घनो हि प्रायेण गिरौ वर्षति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अरिष्टे वृषाकृतिदैत्ये (१)। रासस्यांतरे मध्य आयातम्। स कृष्णः। गोपीनां महांतमानंदं न सहत इति तथाभूतम्(२) एवम् उक्तरीत्या। तद्विरुद्ध उत्सवविरुद्धोऽर्थांतराधिकारो गोगोपगोपीनां भयजनकारिष्टागमनरूपस्तदर्थम्। तम् दैत्यम्। ककुत्कायौ स्कंधोऽदूर्ध्वभागदेहौ ॥ तर्हीत्यस्य यत्पदसापेक्षत्वात्प्रदोषे यदा कृष्णो रासार्थमुद्यतोऽभूदिति विष्णुपुराणद्रष्टव्या शेषा देयः।

---

१. रवमाणः–विज.। २. पुच्छमभ्राणि–विज.। ३. पतन्त्यकालिका गर्भाः–वीर.।

तद्वाक्यम्–"प्रदोषाऽर्द्धे कदाचित्तु रासासक्ते जनार्दने। त्रासयन्भयदो गोष्ठमरिष्टः समुपागतः॥" इति। महदुच्चं ककुत् पृष्ठाग्रशिखा यत्र तथाभूतः कायो यस्य सः॥ १॥ खरतरम् अतितीक्ष्णम्॥ २॥ यस्य अरिष्टस्य। निर्ह्रादितेन गर्जितेन। निष्ठुरेण कठोरेण॥ भीतमिव राजानमालक्ष्याश्वासयति—हे अंगेति श्रीकृष्णस्तं मारयिष्यतीति मा त्रस्तो भवेति भावः॥ ३॥ तत्र पातस्रावयोः। आ चतुर्थाच्चतुर्थमासपर्यन्तं गर्भपातस्य स्रावसंज्ञा। अतः षष्ठमासादूर्ध्वम्। यस्य अरिष्टस्य। अचलो नगः॥ निर्विशन्ति घना इति कूलं पिपतीषतीतिवदचेतनेऽपि निर्वेशसंभवात्। यद्वा—मेघाश्चेतना एव देवतारूपेण "इन्द्रः प्राचोदयत्क्रुद्धो मेघानां चांतकारिणां गणम्" इत्युक्तेः। "मेघा नद्योऽथ गिरयोऽचेतनाश्चेतना अपि। द्विरूपा एव वर्तंते सत्यमेतद्द्विजोत्तमाः श्रूयन्ते सर्वशास्त्रेषु वर्ण्यमाना महर्षिभिः" इति संहितोक्तेश्च॥ ४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथेति सार्द्धद्वयकं तर्हीति पूर्वोक्तप्रकारेण यदा श्रीकृष्णो गोष्ठमागतस्तदानीं प्रदोष इत्यर्थः। तथा च श्रीविष्णुपुराणे। प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्दने। त्रासयन् समदो गोष्ठमरिष्टः समुपागत इति। एवं प्रायः श्रीहरिवंशेऽपि इति नित्यमेव ताभिर्लीलागानलब्धपराणामह्नां कस्यचिदन्त्यस्य प्रदोषे तत्पूर्वत एव भोजनादिकं विधाय रासार्थं शय्यागृहान्निर्गत्य गोष्ठाद्बहिर्निर्गते श्रीभगवतीति ज्ञेयम्। अतो व्रजस्य प मोत्सव इति सामान्यत एव तैर्व्याख्यातं गोष्ठमिति गोष्ठनिकटमित्यर्थः। खुरविक्षतामित्यादिकं युद्धोद्यतमहामत्त वृषभस्य स्वाभाविकमेव तत्र खुरविक्षतामिति स्थौल्यादिस्वभावेन खुरपातैरेव॥ १॥ विदारणान् महीं पदा विलिखन्निति च मत्ततया युद्धोद्यमेन। अन्यत्तैः॥ २॥ तत्र मूत्रमुत्सृजन्निति मूत्रयन्नित्यस्य टीका॥ ३॥ भयानकत्वमेवाह। यस्येति सार्द्धद्वयकेन निर्ह्रादितेन वज्रनिस्पेषवद्ध्वनिना। अङ्गेति सभयमिव सम्बोधनं स्म प्रसिद्धौ वै निश्चये महेति सूचितं स्थौल्यं दर्शयति। निर्विशन्तीति अचले ककुदि च प्रवेशे बुद्धिपूर्वकत्वमुत्प्रेक्षत एव अचेतनत्वात्। उभयत्र घनपथपर्यन्तोच्छ्रायस्तु विवक्षित इति विशेषश्चान्यः श्रीपराशरेणोक्तः। सतोय-तोयदच्छायस्तीक्ष्णशृङ्गोऽर्कलोचनः। लेलिहानः सनिष्पेषं जिह्वयौष्ठौ पुनः पुनः। सरम्भाविद्धलांगूलः कठिनस्कन्धबन्धनः। उदग्रककुदाभोगः प्रमाणाद्दुरतिक्रमः। विण्मूत्रलिप्त सर्वाङ्गो गवामुद्वेगकारकः। प्रलम्बकण्ठोऽतिमुखस्तरुघाताङ्किताननः। सूदयंस्तापसानुग्रो वनान्यटति यः सदेति। उत् उच्चैर्वीक्ष्यात्युच्चतर महाकायत्वात्। अप्यर्थे चकारः किं वक्तव्यं स्त्रीस्वभावाद्गोप्य इति गोपा अपि तत्रसुः पशवो भीताः तस्य सुदुष्टत्वात्। तच्चोक्तं श्रीवैशम्पायनेन। "युद्धसज्जविषाणाग्रो द्विषद्वृषभसूदनः। अरिष्टो नाम हि गवामरिष्टो दारुणाकृतिः। दैत्यो वृषभरूपेण गोकुलं परिधावति। पातयानो गवां गर्भान् धृष्टो गच्छत्यनार्त्तवम्। भज्यमानश्च चपलो गोष्ठं सम्प्रचचार ह। शृङ्गप्रहरणो रौद्रः प्रहरन् गोषु दुर्मदः। गोष्ठंतु न रतिं लेभे विना युद्धेन गोवृष" इत्यादि। एतावन्तं कालमत्रानागमनं तु कंसानुमत्यैव इति लक्ष्यते। गोकुलं व्रजं सन्त्यज्येति प्रदोषे वाढमत्याज्यस्यापि व्रजस्य त्यागेन महाभीतत्वं तेन दूरे दूरे द्रवणं च सूचितम् अतएव हे राजन्निति विस्मयेन तादृशभावोदयाद्भयेनैव वा॥ ४–५॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीकृष्ण-पादपद्मैक-रजः सम्बन्ध-मात्रतः। प्रेम्णा प्रहृष्यतो वन्दे महतोऽनुगताशयः॥

अथ शब्दार्थस्तैर्व्याख्यात एव, अथवा अरिष्टवधोपसादितश्रीमधुपुरीप्रयाण-प्रसंगस्य गोकुलानन्दलीलया परमविरुद्धत्वादत्यन्तभिन्नताभिप्रायेण। तर्हीति पूर्वोक्तप्रकारेण यदा श्रीकृष्णो गोष्ठमागतस्तदानीं प्रदोष इत्यर्थः। तथा च श्रीविष्णुपुराणे (५।१४।१)—'प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्द ने। त्रासयन् समदो गोष्ठमरिष्टः समुपागतः॥' इति, एवं श्रीहरिवंशेऽपि (विष्णुः प० २१।१) प्राय इति नित्यं दिनविरहतापनिस्तारार्थं तल्लीलागानस्य कस्मिंश्चिदन्त्यप्रदोष इति ज्ञेयम्। गवादीनां सर्वेषामेवारिष्टरूपत्वादरिष्टनामा। महाककुत्काय इति परमस्थौल्यादिस्वभावेन खुरपातैरेव विदारणात्; महीं पदा विलिखन्निति च मत्ततया युद्धोद्यमेन॥ १–२॥ भयानकत्वमाह—यस्येति। अंगेति सभयसम्बोधने, स्म प्रसिद्धौ, वै निश्चये॥ ३॥ महेति सूचितं स्थौल्यं दर्शयति—निर्विशन्तीति। विशेषश्चान्यः श्रीपराशरेणोक्तः, (वि० पु० ५।१४।२–५)—

'सतोय-तोयदच्छायस्तीक्ष्णशृङ्गोऽर्कलोचनः। लेविहानः सनिष्पेषं जिह्वयौष्ठौ पुनः पुनः॥
संरम्भाविद्धलांगूलः कठिनस्कन्धबन्धनः। उदग्रककुदाभोगः प्रमाणाद्दुरतिक्रमः॥
विन्मूत्रलिप्तसर्वांगो गवामुद्वेगकारकः। प्रलम्बकण्ठोऽतिमुखस्तरुघातां किताननः॥
सूदयंस्तापसानुग्रो वनान्यटति यः सदा॥' इति।

उत् उच्चैर्वीक्ष्य, अत्युच्चमहाकायत्वात्, अप्यर्थे चकारः। किं वक्तव्यं स्त्रीस्वभावाद्गोप्य इति गोपा अपि तत्रसुः, वृषत्वेनाप्रतिकार्यत्वात्। पशवः सुरभीवृषादयो महिषादयोऽपि भीतास्तस्य सुदुष्टत्वात्, तच्चोक्तं श्रीवैशम्पायनेन (हरिवंशे, विष्णु पु० २१।६–९)—

'युद्‍वृसज्जविषाणाग्रो द्विषद्वृषभसूदनः। अरिष्टो नाम हि गवामरिष्टो दारुणाकृतिः।
दैत्यो वृषभरूपेण गोकुलं परिधावति। पातयानो गवां गर्भान् धृष्टो गच्छत्यनार्त्तवम्॥
भञ्जमानश्च चपलो गोष्ठं संप्रचचार ह। शृंगप्रहरणो रौद्रः प्रहरन् गोषु दुर्म्मदः॥
गोष्ठे तु न रतिं लेभे विना युद्धेन गोवृषः॥' इत्यादि।

गोकुलं व्रजं सन्त्यज्येति प्रदोषेऽत्यज्यस्यापि व्रजस्य त्यागेन महाभीतत्वं तेन दूरे द्रवणञ्च सूचितम्। अत एव हे राजन्निति विस्मयेन भयेनैव वा तादृशभावोदयात्॥ ४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ वृषभासुरवधात्मकं भगवतः कर्मानुवर्णयन्नारदस्य मुखात्तदा श्रुतवतः कंसस्य भगवद्धननोद्योगमनुवर्णयति षट्‍त्रिंशेन अथेत्यादिना। इत्थं श्रीकृष्णेन व्रजे हर्ष्यमाणे सति तर्ह्यथारिष्टाख्यो वृषभासुरो गोष्ठं प्रत्यागतः तं वर्णयति सार्द्धत्रयेण। महीमित्यादिना। महान्तौ ककुत्कायौ यस्य सः खुरैर्नितरां क्षतां विदारितां महीं कम्पयन्॥ १॥ खरतरं यथा तथा रम्भमाणः वृषभजातिशब्दं कुर्वाणः पदा महीं विलिखंश्च पुच्छमुद्यम्य उन्नमय्य शृङ्गाग्रेण वप्राण्युन्नतस्थालानि उद्धरन्नुत्क्षिपन्मध्ये मध्ये किञ्चित् किञ्चच्छकृत्पुरीषं मुञ्चन्मूत्रयंश्च स्तब्धेऽनिमेषे लोचने यस्य सः अङ्ग हे राजन्! यस्यारिष्टस्य निष्ठुरेण कठिनेन निर्ह्रादेन गवां नारीणाञ्च गर्भा अकालिका अप्राप्तप्रसवकाला अपि भयेन पतन्ति स्रवन्ति च–

आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः। अत ऊर्ध्वन्तु नारीणां प्रसवः परिकीर्त्तित इति॥

यस्यारिष्टस्य ककुदि गलपृष्ठे चलशङ्कया पर्वतशृङ्गभ्रान्त्या मेघा निर्विशन्ति विपुलककुद्मानेत्यर्थः। तीक्ष्णशृङ्गं तमरिष्टमवलोक्य गोप्यो गोपाश्च तत्रसुः त्रासं प्रापुः॥ २–३–४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अरिष्टनामासुरहननलक्षणं विक्रमं देवकार्यसिद्धिकामुकेन नारदेनोद्बोधितन्यासुरजातेः कंसस्य सज्जनोपद्रवोद्योगञ्च कथयत्यस्मिन्नध्याये अथ शङ्खचूडवधानन्तरं दैत्यान्तरनिग्रहलक्षणकथा आरभ्यते शङ्खचूडं निहत्य यदा गोपस्त्रीभिः सह व्रजमागतः श्रीकृष्णस्तर्हि तदा वृषभासुरः वृषभाकारो दैत्यः महान्तौ ककुत् कायश्च यस्य स तथा॥ १॥ रवमाणः रवं कुर्वाणः॥ २॥ शकृद्रोमयं स्तब्धे स्थूणीकृते अतिस्थिरे लोचने यस्य स तथा निर्ह्रादितेन गर्जितेन॥ ३॥ मासत्रयादर्वाक् गर्भस्रावः तत आसप्तमात्पतनं ततः प्रसवः नृणां मनुष्यस्त्रीणाम् अचलशङ्कया पर्वतशङ्कया॥ ४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

षट्‍त्रिंशे निहतेऽरिष्टे पितरौ रामकृष्णयोः। ज्ञात्वा कंसो नारदात्तौ बद्ध्वाक्रूरं समादिशत्॥

तर्हीत्यस्य यत्पदसापेक्षत्वात् प्रदोषे यदा कृष्णो रासार्थमुद्यतोऽभूदिति विष्णुपुराणवाक्यदृष्ट्या शेषो ज्ञेयः। तच्च वाक्यं यथा। प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्दने। त्रासयन् समदो गोष्ठमरिष्टः समुपागत इति। अत एव रासविरुद्धार्थान्तराधिकारार्थमथशब्दः। महदत्युच्च ककुत् पृष्ठाग्रशिखा यत्र तथाभूतः कायो यस्य सः। खुरविदारितां महीं कम्पयन् खरतरं यथा स्यात्तथा विलिखंश्च। रम्भमाणः वृषभजातिशब्दं कुर्वन् वप्राणि प्राचीरतटानि शकृत् पुरीषम्॥ १–३॥ निर्ह्रादितेन शब्देन। स्रवन्ति पतन्तीति आचतुर्थात् भवेत् स्रावः पातः पञ्चमषष्ठयोरिति स्मृतिः॥ ४–५॥

गूढार्थदीपिनी

षट्‍त्रिंशे निहतेऽरिष्टे सुतौ तौ वसुदेवजौ। ज्ञात्वा मुनेरिहानेतुं कंसोऽक्रूरं समादिशत॥ १॥

विरुद्धकथाधिकार्थमथ शब्दः। महती ककुत् कायश्च यस्य सः। वृषपृष्ठाग्रऋङ्गः॥ १॥ रम्भेति सार्द्धम्। खरतरं कर्कशं रम्भमाणः स्वजातिशब्दमुद्गिरन्। वप्रम् उच्चप्रदेशम्। विषाण शृङ्गम्। स्तब्धे निर्निमेषे लोचने यस्य॥ २॥ यस्येति सार्द्धम्। अङ्ग हे राजन्। निर्ह्रादितेन गर्जितेन नृणां नारीणां च। चतुर्थमासपर्यन्तं स्रावः तदूर्ध्वं पातः। ककुदि पृष्ठाग्रशृङ्गः।३। दुद्रुवुः पलायिताः॥ ४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

षट्‍त्रिंशेऽध्याये वृषासुरवधं देवर्षिवचनाद्रामकृष्णौ वसुदेवसुतौ ज्ञात्वा तदानेतुं कंसेनाक्रूरं प्रति कृतामाज्ञां चानुवर्णयति। अथेति। एवं श्रीकृष्णेन व्रजे आनन्दिते अथानन्तरं तर्हि तदा वृषाकाराऽसुरः अरिष्टो नामतो गोष्ठ व्रजमागतः तं वर्णयति। महीमिति सार्द्धत्रयेण। महान्तौ अतिस्थूलौ ककुत्कायौ यस्य सः खुरैर्विक्षितां विदारिता महीं कम्पयन्॥ १॥ खरतरं यथा भवति तथा रम्भमाणः वृषभजातिशब्दं कुर्वाणः वप्राणि तटानि उद्धरन् उत्क्षिपन्॥ २॥ शकृत्पुरीषं किञ्चित् मुञ्चन्॥ ३–४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ अरिष्टासुरविनष्टिं कृष्णकृतां तथा कृतान्तमुखं खलं कंसं यापयित्वा वासुदेवसेवां विधित्सुर्विधिसुतः सर्वं वसुदेवादिकृतं कर्ममर्म शशस । तेन च हिंसोद्योगं कंसश्चकारेत्यत्र प्रतिपाद्यते । तत्र गोपीपरिवृतो व्रजमुपव्रज्य किं कृतवान्भगवानिति परीक्षकपरीक्षिच्छङ्कां स्वयं परिहरति शुक इति कवयति ॥ श्रीशुक इति । अथ शङ्खचूडाहननानन्तरम् । तर्हि तदेत्यव्यवधानं सूचयति । अथ मङ्गलसूचकं सत्प्रारम्भार्थं विक्रमान्तरमारभ्यत इति । हे अथ निरन्नराजन्निति वा । ततो न तद्व्यतिरेकः । अरिष्टो नामतो वृषभाकारोऽसुरो वृषेषु भासुर इति वा गोष्ठं गतम् । महान्ककुत्कायश्च यस्य महास्कन्धाङ्गः खुरविक्षतां महीं कम्पयन्नागतः । हे महि त्वमेवास्मद्धननमूलं चेत्त्वत्प्रार्थनं कुतोऽवतरेद्धरिरिर्नावतरेच्चेत्पूतनादियातः कुतो भवेदिति मतितस्तत्क्षितिसक्षतीकरणमसुरस्येति तात्पर्यं । किञ्च स्वनासिकाछेदनमपीह सोढ्वा खलो निरुन्धे खलु सत्प्रयाणमिति वत्स्वयं पशुत्वं सम्पाद्यापि लोकबाधाकर्तव्येति मनुतेऽयं दनुज इति दुर्जनस्वभावोऽसुर इत्यनेनासूचि ॥ १ ॥ रवमाणो रवन् हम्भाध्वनिं कुर्वन्विषाणाग्रेण शृङ्गप्रान्तेन चात्पुच्छेनाप्यभ्राणि मेघानुद्धरन् । अनेन तावदौन्नत्यं ध्वन्यते । कृष्णसावर्ण्यान्मेघा अपि मेघकारिण इति चोत्तुङ्गशृङ्गोद्धरणमिति ध्वनिः ॥ २ ॥ शकृन्मल स्तब्धलोचनः स्तब्धे लोचने यस्य सः । मदभावोऽयं निर्ह्रादितेन नादेन नृणां तद्योषितां नृणां निष्ठुरेण श्रवणासह्येनाकालतो गवां गर्भा इत्यन्वयः । आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः । पञ्चमषष्ठयोः पातो मासचतुष्टयात्प्राक् चेत्स्राव इति विवेकः । ककुद्यचलशङ्कया पर्वतशङ्कया निर्विशन्ति । तावानायामः ककुद इति भावः ॥ ३-४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

गुणातीतस्वरूपेण तामसत्वाद्व्रजस्थिताः । निरुद्धास्तत्त्वसंख्यातैरध्यायैरिति वर्णितम् ॥
प्रद्युम्नरूपो भगवान् वसुदेवहिताय हि । रजोलीलां तथा चक्रे राजसानां निरोधकृत् ॥
असम्बद्धाः पूर्वमुक्ताः संबद्धा राजसाश्च हि । उभयेषां निरोधोऽतः सर्वान्ते फलितो भवेत्॥
तत्त्वसंख्यैरथाध्यायैश्चतुर्द्धा पूर्ववद्धरिः । गुणैः स्वरूपतो लीलां क्रमादेव तथाकरोत् ॥
बन्धूनान्तु सुखं दत्त्वा वंशवृद्धिं चकार ह । एतावता निरुद्धास्ते खण्डद्वयमतो यदि ॥
उद्यमो मानतां यातः सप्तभिः स निरूपितः । सप्तभिः सुखदानञ्च विवाहश्चापि सप्तभिः ॥
त्रिविधोऽन्ये फवांशे हि प्रविशन्ति यथा सुता । उषाहरणपर्यन्तमिदं प्रकरणं मतम् ॥
न कालनियमोऽन्यत्र सात्विकेनापि च क्रमः । क्रमः पूर्वत्र संसिद्धः सात्त्विका विरला यतः॥
नारदो द्विविधो ह्यत्र प्रमाणे विनिरूप्यते । कर्मज्ञानविभेदेन ह्यक्रूरो भक्तिबोधकाः ॥
प्रेमार्थबोधिका गोप्यो भगवद्बोधकश्च सः । कार्यं च ज्ञापयामास कंसः सम्भृतिबोधकः ॥
एवं सप्तभिरध्यायैः प्रमाणमिह रूप्यते । तत्राद्यः कर्ममार्गस्य ततो भक्त्या विरुध्यते ॥
साधनञ्च फलं तस्य त्रयमत्र निरूप्यते । लौकिकारिष्टगमने कर्ममार्गः प्रवर्त्तते ॥
अतोऽरिष्टवधो हेतुः सर्वतस्त्वर्थबोधने । फलमुद्यम एवास्य कंसस्य व्यग्रभावतः ॥
सात्त्विकं तामसञ्चैव प्रेषयामास राजसः । अत्र वध्या राजसा हि प्रसङ्गादपरेऽपि च ॥
त्रयस्त्रिंशे ततोऽध्याये ह्यरिष्टवध उच्यते । नारदोक्तिस्तथाकंसमन्वणञ्च रजो महत् ॥
नारदोक्तिस्तथाकसमन्त्रणञ्च रजो महत् । कलाभिः साधिकैराद्यः सार्द्धाभ्यां वचनं तथा॥
त्रयोविंशतिभिः शिष्टविप्राभकृतिकास्तथा ।

पूर्वं च गोपिकादीनां निरोध उपपादितः अधुनान्येषां निरोधं वतुं प्रक्रियान्तरमारभते । अथेति । यदैव भगवता निरोधो जात इति ज्ञातवान् तद्यैव तदैवारिष्टः समागत इत्यर्थः । वृषो हि गोष्ठमायातीति नाश्चर्यं तथाप्ययमरिष्टो वृषमाकृतिरसुरः महीं कम्पयन् समागत इति राजसे सामर्थ्यविशेषो निरूपितः महान् ककुत् कायश्च यस्य अदृष्टद्वारा कम्पकत्वायाह खुरविक्षतामिति । खुरविक्षत यथा भवति तथा वा ॥ १ ॥ सार्द्धाभ्यामागमनं निरूप्यत इति चेष्टामाह । खरतरमत्यन्तं निष्ठुरं यथा भवति तथा रम्भमाण रम्भण तज्जातायमत्तशब्दः पदा च एकेन विशेषेण महीं लिखन् चिन्तासमये ह्येवं करोति पश्चात् तुच्छमुद्यम्य मध्ये पशुत्वात् पशुचेष्टा करोतीत्याह । वप्राणि विषाणाग्रेण चोद्धरन्निति । गोकुलनिकटे स्थिताः प्रकाराः उभाभ्यां भेदने बलमत्यन्तं नष्टं भवतीति एकेनैव शूलवत्प्रविष्टेन उद्धरणं करोति चकारात्परिवृत्या अपरेण द्वाभ्यां च क्वचित् अंशतः पृथक्करणमुद्धरणम् ॥ २ ॥ मत्तस्वभावमाह । किञ्चित् शकृन्मुञ्चन् गोमयं त्यजन् गोमूत्रञ्च स्तब्धलोचनश्च जातः अनिवृत्तक्रोधत्वज्ञापनाय राजसत्वाद्विचारे प्रवृत्तः न सहसा प्रविष्टः भगवदिच्छया गोष्ठाधिष्ठातृदेवेन निरुद्धानामनुभावेन च न प्रविष्टः तस्य क्रियया यज्जातं तत् स्पष्टमेवेति रम्भणस्यैव कार्यमाह । यस्य निर्ह्रादितेनेति । निष्ठुरेण अन्तः प्रविश्यापि मारयतीति तेन गवां नृणाञ्च अकालतोऽपि कालस्य निमित्तत्वाभावेऽपि गर्भाः पतन्ति स्रवन्ति च भयेन तृतीये चतुर्थे स्रावः पातः पञ्चमषष्ठयोर्मासयोः ॥ ३ ॥ तत्र हेतुर्भयं नतु तस्य

नादः मन्त्रारिष्टवदद्दष्टद्वारा तथा सति लौकिकोत्कर्षो न स्यादिति तस्य शरीराधिक्यमाह । निर्विशन्तीति । यस्य ककुदि पर्वतबुद्ध्या मेघा उपविशन्ति अनेन देहमहत्त्वं व्याख्यातम् । एवं तस्य शरीरक्रियाशब्दानामन्तःकरणस्य च क्रौर्यं निरूप्य ततो यज्जातं तदाह । तं तीक्ष्णशृङ्गमिति । तीक्ष्णे शृङ्गे यस्य ऊर्ध्वं दृष्ट्वा अत्युच्चैरिति उद्वीक्षणात् गोपा गोप्यः पशवश्च तत्रसुः निरुद्धा इति कदाचिद्देहाभिमानाभावात् भयं भविष्यतीत्याशङ्क्य निरूपितम् ।। ४ ।।

श्रीसुबोधिनी–सारः

अथानन्तरम् अरिष्टो वृषभासुरो गोष्ठं व्रजं तर्हि तदा गतः महान्तौ ककुत्कायौ यस्य स खुरैर्विक्षतां विदारितां महीं भूमिं कंपयन ।। १ ।। खरतरमतिनिष्ठुरं यथा भवति तथा रंभमाणो वृषभजातिशब्दं कुर्वाणः पदा च महीं विलिखन् विदारयन् पुच्छमुद्यम्य ऊर्द्धं कृत्वा वप्राणि तटानि उत्क्षिपन् उर्द्धं चालयन् विषाणयोः शृंगयोरग्रेण ।। २ ।। किञ्चित् किञ्चित् शकृत् गोमयं मुंचन तथा मूत्रं कुर्वन् स्तब्धे निमेषशून्ये लोचने यस्य सः यस्य निष्ठुरेण कठोरेण निर्ह्रादितेन शब्देन गवां नृणां नारीणाम् ।। ३ ।। अकालतः समयं विना गर्भाः पतंति स्रवंति च स्म यस्य ककुदि गलपृष्ठशृंगे ग्रीवोर्द्धभागे वाऽचलशंकया पर्वतभ्रांत्या भयेन वै एव घना मेघा निर्विशंति ।। ४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं तामसभक्तानां निरोधो विनिरूपितः ।। अग्रे राजसभक्तानां निरोधो विनिरूप्यते ।। १ ।।
अथारिष्टवधः कृष्ण-ज्ञानं कंसस्य तेन हि ।। अक्रूराज्ञापनं चेति षट्त्रिंशे विनिरूप्यते ।। २ ।।

एवं भगवज्जन्मारभ्य नानाविधतल्लीलादर्शनादिना व्रजवासिनां परमानन्दो निरूपितः, अतोऽग्रेऽरिष्टागमनादिना तथा नन्दो नास्तीति पूर्वोक्तविरुद्धार्थान्तरं सूचयन्नाह–अथेति । यत्तदोनित्यसबन्धात् यदा चेद्भगवान् पुनः रासार्थमुद्यतस्तर्हि अरिष्टनामा वृषभाकृतिरसुरः स्वखुरैर्विक्षतां विदारितां महीं कम्पयन् गोष्ठं व्रजमागत इत्यन्वयः । एवं चोक्तं विष्णुपुराणे–"प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्दने । त्रासयन् समदो गोष्ठमरिष्टः समुपागतः" ।। महीकम्पने हेतुं सूचयन्नाह–महान्तौ ककुत्कायौ यस्य स इति ।१। तं वर्णयति–रम्भमाण इति त्रयेण । खरतरं ककशं यथा भवति तथा रम्भमाणः वृषजातिब्दं कुर्वन् पदा च महीं विलिखन् विदारयन् पुच्छमुद्यम्य ऊर्ध्वं कृत्वा विषाणाग्रेण वप्राणि उन्नतस्थलानि चोद्धरन् उत्क्षिपन् ।। २ ।। किञ्चित् किञ्चित् ईषदीषत् शकृत् पुरीषं मुञ्चन् तथा मूत्रयन् मूत्रमुत्सृजन् स्तब्धे निमेषरहिते लोचने यस्य सः, हे अङ्ग राजन् ! यस्य निष्ठुरेण भयंकरेण निर्ह्रादितेन शब्देन गवां नृणां नारीणां च ।। ३ ।। अकालतः प्रसूतिसमयं विनैव भयेन गर्भाः स्रवन्ति पतन्ति च । स्रावपातविभागश्च "आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः । अत ऊर्ध्वं तु नारीणां प्रसवः परिकीर्तित" इति वचनाज्ज्ञेयः । तस्य महत्त्वं सूचयन्नाह–यस्य ककुदि गलपृष्ठमांसपिण्डे अचलशङ्कया घना निर्विशन्तीति ।। ४ ।।

अन्वितार्थप्रकाशिका

षड्त्रिंशे तु हतेऽरिष्टे ज्ञात्वा तौ वसुदेवजौ । अक्रूरं प्रादिशत्कंसस्तत्र श्लोकाः कुसिन्धवः (४१) ।।
उवाचेति द्वयं (२) च द्वाचत्वारिंशदनुष्टुभ (४२) ।। ३६ ।।

एवं नवमदशमैकादशवर्षेषु नानालीलाविधानमुक्तम् । एकादशे वर्षे चैत्रपौर्णमास्यां कृतमरिष्टवधमाह–अथेति ।। यत्तदोनित्यसंबन्धात् यदा गोष्ठं प्रविष्टस्तदुत्तरं भोजनादि विधाय गोष्ठाद्बहिर्निर्गत्य भगवान् पुनः रासार्थमुद्यतस्तर्हि सूर्यास्तोत्तरं घटीत्रयेऽतिक्रान्ते महती ककुत् कायश्च यस्य सः अरिष्टनामा वृषभाकृतिस्सुरः स्वखुरैर्विक्षतां विदारितां महीं कम्पयन् गोष्ठं व्रजमागत इत्यन्वयः । एवं चोक्तं विष्णुपुराणे "प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्दने ।। त्रासयन्समदो गोष्ठमरिष्टः समुपागतः ।। १ ।।" रम्भमाण इति सार्द्धम् ।। हे राजन् ! स्तब्धे क्रोधावेशात् निश्चले लोचने यस्य सः खरतरं कर्कशं यथा भवति तथा रम्भमाणः वृषजातिशब्दं कुर्वन् पदा महीं विलिखन् विदारयन् पुच्छमुद्यम्य ऊर्ध्वं कृत्वा विषाणाग्रेण वप्राणि उन्नतस्थलानि चोद्धरन् उत्क्षिपन् किञ्चित् किञ्चित् ईषदीषत् शकृत् पुरीषं मुञ्चन् तथा मूत्रयन्मूत्रमुत्सृजन् आगत इत्यनुषङ्गः ।। २ ।। यस्येति सार्द्धम् ।। अङ्ग हे राजन् ! यस्य निष्ठुरेण भयङ्करेण निर्ह्रादितेन शब्देन गवां नृणां नारोणां च अकालतः प्रसूतिसमयं विनैव भयेन गर्भाः स्रवन्ति पतन्ति च "आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।" यस्य ककुदि गलपृष्ठमांसपिण्डे अचलशङ्कया पर्वतभ्रान्त्या घना निर्विशन्ति इति घनपथपर्यन्तोच्छ्रायो विवक्षितः ।। ३ ।। तमिति ।। हे राजन् ! तीक्ष्णशृङ्गं तमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः हे राजन् ! पशवश्च तं वीक्ष्य भीताः सन्तो गोकुलं संत्यज्य दुद्रुवः पलायिताः ।। ४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं षड्त्रिंशेऽध्यायेऽरिष्टहननं नारदोक्त्या रामकृष्णयोर्वसुदेवपुत्रत्वज्ञानात्तत्पित्रोः कंसकृतं बंधनं च तयोरानयनाय गोकुलेऽक्रूरप्रेषणं चोच्यते तत्रादौ अथेत्यादि । सार्द्धत्रयेणारिष्टवर्णनमाह महांतौ ककुच्च कायो देहश्च तौ यस्य सः खुरैर्विक्षतां खनितां

महीं कंपयन् ।। १ ।। खरतरं अतिक्रूरं रंभमाणो वृषभजातीयरवं कुर्वन् पदामहीं विलिखन् उत्खनन् उद्यम्य उच्चैः निधाय शृङ्गाग्रेण वप्राणितटानि च उद्धरन् उल्लिखन् ।। २ ।। किंचित्किंचित् ईषदीषत् शकृत् पुरीषं मूत्रयन् मूत्रं त्यजन् स्तब्धलोचनः स्थिरनेत्रः निष्ठुरेण खरेण यस्य निर्ह्रादितेन वज्रतुल्यशब्दीतेन गवां नृणां नारीणां च नारीणामिति वक्तव्ये नृणामित्युक्तिस्त्वार्षौ अकालतः कालं विनाऽपि गर्भाः पत्तंति भयेन हेतुना स्रवंति चेत्युत्तरेणऽन्वयः आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः अत ऊद्र्ध्वंप्रसूतिः स्यादिति ज्योतिर्विदो विदुरिति विभागः ।। ३ ।। यस्य ककुदि पृष्ठस्थे शिखराकारेंऽगे पर्वत शंकया घनाः मेघाः प्रविशंति ।। ४–५ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हतेऽरिष्टे तु षट्त्रिंशे देवष्युक्तया बलाच्युतौ । ज्ञात्वा शौरिसुतावौग्रसेनिः श्वाफल्किमादिशत् ।। १ ।।

अथ वृषभासुरवधात्मकं भगवतः कर्मानुवर्णयन्नारदस्य मुखाच्छुतवतः कंसस्य तदा भगवद्धननोद्योगमनुवर्णयति ।। अथेति ।। एवं देवगन्धर्वादिगीतवाद्यकुसुमवर्षादिभिः कृष्णं प्राप्तं दृष्ट्वा व्रजस्य परमोत्सवे वर्त्तमाने तद्विरुद्धार्थान्तराधिकारार्थमथशब्दः । तर्हि तदा, वृषभासुरः वृषभसमानाकृतिधरोऽसुरः, अरिष्टोऽरिष्टाख्यः, गोष्ठं प्रति, आगतः । तं वर्णयति सार्द्धत्रयेण । महान्तौ ककुत्कायौ यस्य सः, खुरैः विशेषतः क्षता विदारिता तां, महीं कम्पयन् ।। १ ।। रम्भमाण इति ।। खरतरमतिक्रूरं यथा तथा, रम्भमाणः वृषभजातिशब्दं कुर्वाणः, पदा पादेन, महीं भूमिं, विलिखन् विदारयंश्च, पुच्छं उद्यम्योन्नमय्य, विषाणाग्रेण शृङ्गाग्रेण, वप्राणि तटानि उन्नतस्थलानीति यावत् । उद्धरन्नुत्क्षिपंश्च ।। २ ।। किंचिदिति ।। किंचित् किंचित् मध्ये मध्ये, ईषत् शकृत् पुरीषं, मुञ्चन् मूत्रयन् मूत्रं मुञ्चंश्च स्तब्धे लोचने यस्य सः, अङ्ग हे राजन् , यस्यारिष्टस्य, निष्ठुरेण कठिनेन, निर्ह्रादितेन निर्ह्रादेन, गवां धेनूनां नृणां नारीणां चेत्यर्थः । गर्भाः, अकालतः आकालिकाः अप्राप्तप्रसवकाला अपीति यावत् । भयेन पतन्ति स्रवन्ति च स्म वै 'आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः । अत ऊर्ध्वं तु नारीणां प्रसवः परिकीर्त्तितः' इति ।। ३ ।। निर्विशन्तीति ।। यस्यारिष्टस्य, ककुदि गलपृष्ठे, अचलशङ्कया पर्वतशृङ्गभ्रान्त्या, घना मेघाः, निर्विशन्ति । विपुलककुद्मानित्यर्थः । तीक्ष्णशृङ्गं, तमरिष्टं, उद्वीक्ष्य अवलोक्य, गोप्यः गोपाश्च, तत्रसुस्त्रासं प्रापुः ।। ४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अथ तर्हीति : १०.३६.१.

श्रीशे परोक्षेऽक्षिगतामुपेयुषि प्रायोऽन्तरायः स पुरस्तु निष्फलः ।
श्रेयःसु विघ्ना इति लोकजल्पितं तर्हीति शब्दादवधार्यतेऽत्र हि ।। १ ।।
मया जितं चेन्निखिलं समञ्जसं न चेद्गतिर्माऽस्तु ममापि पूर्ववत् ।
इतीव संचिन्त्य तदा नु गोकुले स गोपतिं तं वृषवर्ष्मणाऽऽययौ ।। २ ।।
वृषात्मना संविशतोऽत्र गोकुले भयं मम स्यान्न मनागरेः क्वचित् ।
उपेन्द्र एषोऽस्ति हि धर्मरक्षकः स चेति तादृग्वपुषा किमाययौ ।। ३ ।।
स्वधर्माच्च्यावयिष्यामि त्वां बलाढ्यमपि क्षणात् । अकम्पयदिति व्यक्तीकर्तुं तामचलामसौ ।। ४ ।।

रम्भमाण इति : १०. ३६. २.

अस्मत्स्वामिमनः प्रियां क्षितिमिमां गोपाङ्गनावद्वशीकर्तुं वाञ्छसि तस्य सम्प्रति फलं दास्यामि रे शिक्षणात् ।
इत्थं रम्भणकैतवात् कटु रटन्नीदृकचारित्रा धरे ! त्वं चापीति स कंसशंसनमतिस्तद्बोधनायालिखत् ।। ५ ।।
बालोऽयं यति लोकबालसदृश स्तर्ह्य स्त्यकिञ्चित्करः स्याच्चेच्छ्रुत्युपदिष्ट-दिष्टपदभाक् पुष्टात्मशक्तिस्तदा ।
अस्मादप्यधिको भवाम्यलमिति प्राप्तो महानन्दितां द्वाभ्यां पार्थिवमुद्धरन्नतिचलं बालं चकारैष किम् ।। ६ ।।
बालपृष्ठोऽहमेषोऽपि शृङ्गाराध्युल्लसद्बलः । तद्युक्तमेतद् द्वन्द्वित्वं ममेस्यास स तादृशः ।। ७ ।।

किञ्चित् किञ्चिदिति : १०.३६.३.

अपवित्रमलत्यागं विना न स्याद्वृषात्मना । सत्यामेऽन्यदृशेत्याधान्मलमूत्रविसर्जनम् ।। ८ ।।
दुर्मार्गार्पितचेतसापि सकृदप्यालोकितश्चेत् प्रभुर्बुद्ध्या हन्त यया कयापि तदपि स्यात्तन्मलोत्सादनम् ।
पश्यन् वैरधिया दुरध्ववसतिः कृष्णं सतृष्णो यदुत्सृज्यासौ मलमूत्रमन्तरगतं सद्योऽभवन्निर्मलः ।। ९ ।।

पतन्तीति । १०.३६.४.

दाम्भिकोऽप्युच्छ्रितो धर्मः स्यान्नृगो गर्भमोचकः । सत्यश्चेत्तत्र किं वाच्यमेतद् व्यक्तमभूदतः ।। १० ।।

कृष्णप्रिया

अब इस अध्याय से राजस प्रकरण का प्रारम्भ होता है। राजस प्रकरण में २८ अध्याय है। प्रमाण-प्रमेय-साधन एवं फल संज्ञक राजस प्रकरण के चार प्रकरण है। तामस प्रकरण की लीलाओं से भगवान ने व्रजभक्तों का तामस भाव को दूर किया और तामस भक्त राजस भक्त बने। अब राजस लीलाओं द्वारा व्रजभक्तों के राजसभाव को दूर करेंगे और इन भक्तों को सात्विकावस्थापन्न बनायेंगे। सात्विक स्थिति सम्पन्न भक्तजन गुणातीत लीलाओं का रसपान करके निर्गुण बनेंगे। इस प्रकार दशम स्कन्ध की सङ्गति निरूपित की गई है। इस सङ्गति के अनुसार राजस प्रकरण का ३६ वाँ अध्याय प्रारम्भ हो रहा है। यह ३६ वाँ अध्याय ऐश्वर्याध्याय है।

श्री शुकाचार्यजीने कहा राजन् परीक्षित् ? अब गोकुल में अरिष्ट नाम का एक असुर ने बैलरूप लेकर प्रवेश किया। वह खुरों से पृथ्वी को खोदता और कंपाता प्रवेश कर रहा था। उसकी कूबर-कांध बड़ी थी उसकी विशाल थी और वृषभासुर अत्यंत ऊँचा लम्बा और चौड़ा था ॥ १ ॥ वह अपने रामन-कठोर शब्द से कानों को फोड़ देता था, अपने एक पांव से मही को खोदता था और कुछ कार्य को सोचता था। ऊपर के भाग में पूछ को उठाया था और शृङ्गों की नोंक से दीवारों को एवं कंगारों को तोड़ रहा था ॥ २ ॥ रस क्रिया के साथ बीच में कुछ अंश में गोबर एवं गोमूत्र का त्याग करता चल रहा था रक्त वर्ण वाली भयावनी आँखें दिखाकर गर्जना करता था। अये वत्स परीक्षित! उसकी अत्यंत कठोर गर्जना को सुनकर व्रज की गायें, गोप गोपी जन और प्राणी मात्र भयभीत बन गए एवं अकाल में ही उनके गर्भ गिरने लगे एवं गर्भस्राव रुधिर स्राव होने लगा। उसकी अतिशय ऊँची काँध पर पर्वत की भ्रान्ति से घनावली उस पर ठहर जाती थी इतनी ऊँची अरिष्ट की कांध थी अत्यंत तीक्ष्ण शृङ्ग को उठाते आये अरिष्ट को देखकर गोप गोपीजन और गोधन अत्यंत भयभीत बन गए। बन्धन को छुडाता सारा गोधन गोकुल से बहार निकल कर दौड़ने लगा ॥ ३-४ ॥

तं तीक्ष्णशृङ्गमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः। पशवो दुद्रुवुर्भीता राजन् संत्यज्य गोकुलम् ॥ ५ ॥
कृष्ण कृष्णेति ते सर्वे गोविन्दं शरणं ययुः। [1]भगवानपि तद् वीक्ष्य गोकुलं भयविह्वलम् ॥ ६ ॥
मा भैष्टेति गिराऽऽश्वास्य वृषासुरमुपाह्वयत्। [3]गोपालैः पशुभिर्मन्द त्रासितैः किमसत्तम ॥ ७ ॥
[4]बलदर्पहाहं दुष्टानां त्वद्विधानां दुरात्मनाम्। इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—हे राजन् ? तीक्ष्णशृङ्गम्, तम्, उद्वीक्ष्य, गोप्यः, गोपा च पशवः, तत्रसुः, भीताः, (ते) गोकुलम्, सन्त्यज्य, दुद्रुवुः ॥ ५ ॥ ते, सर्वे, कृष्ण ? कृष्ण इति (वदन्तः) गोविन्दम्, शरणम्, ययुः, भगवान्, अपि, तत्, वीक्ष्य, भयविह्वलम्, गोकुलम्, मा भैष्ट, इति, गिरा, आश्वास्य, हे मन्द! हे असन्तम् ? त्रासितैः, गोपालैः, त्रासितैः, पशुभिः, किम् (ते बलम् अस्ति सामर्थ्यं चेदागच्छ इत्याकारयत् ॥ ६-७ ॥ त्वद् विधानाम्, दुष्टानाम्, दुरात्मनाम्, अहम्, बलदर्पहा, (अस्मि) (इत्युक्त्वा) अच्युतः, (बाहुम्) आस्फोटय, तलशब्देन, अरिष्टम्, कोपयन् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तीक्ष्णे शृंगाग्रे यस्य तं वीक्ष्य ॥ ५ ॥ कृष्ण कृष्ण रक्षेति ॥ ६-७ ॥ इत्येवं वदन्। आस्फोटय करतलेन बाहुमाहत्य तेन तलशब्देन कोपयन् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तम् अरिष्टम्। तत्रसुर्भीता आसन् ॥ पुनरपि तथैव हे राजन्निति। भगवत्प्रभावज्ञानेन राजमानस्त्वं कुतो गोकुलवासिजनभयं शंकस इति भावः ॥ ५ ॥ ते गोकुलवासिनः। कृष्णकृष्णेति संबोध्य संभ्रमत्वाद्रक्षेति क्रियाविस्मृतिः, तत्तस्माद्गोकुलमित्यन्वयः ॥ हे कृष्णेति भक्तक्लेशकर्षकत्वान्नः क्लेशमपाकुर्विति भावः। वीप्सा तु संभ्रमे। गोविंदं गोकुलेंद्रतयाभिषिक्तम्। सर्वे इत्युक्तेः पशवोऽपि कृष्णकृष्णेति प्रोचुः। उक्तञ्च सुरभिगमने-'स्वसंतानैरुपामंत्र्य' इति। गोवर्धनरासस्थलात्कोलाहलश्रवणेनाभिसुखमायांतं शरणं ययुरित्यर्थः ॥ ६ ॥ आश्वास्य सांत्वय्य। हे मंद किं प्रयोजनम् ॥ मंद अल्पमते। पशूनां त्रसनात् त्रसितैः किं फलं न किमपीति भावः। यतोऽहमेव दुष्कर्मणां शास्ताऽतो मयि सति तैः किं प्रयोजनमिति भावः। ननु वृषभोऽहं कथं शासनीयस्तत्राह-हे असत्तमेति। कृत्रिममेव तव वृषत्वं तत्त्वतो दुष्टदैत्य एवेति भावः ॥ ७ ॥ त्वद्विधानाम् त्वत्समानाम् ॥ त्वद्विधानां त्वत्सदृशानां, किमुत तवेति भावः। अच्युतस्तत्स्थानादच्चलितः। न चचाल ततः स्थानात्' इति पराशरोक्तेः ॥ ८ ॥

---

[1] नथ-बिज. । [2] विद्रुतम्-श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [3] सबालैः-वीर. ; सपालैः-विज. । [4] "बलदर्पहा" अयं पूर्वार्द्धः कुत्रचिन्न दृश्यते-प्रा. पा. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्णेत्यर्द्धकम् । ततो गोविन्दं श्रीगोकुलेन्द्रतयाभिषिक्तं तमेव शरणं ययुः । कोलाहलश्रवणेन श्रीगोवर्द्धनवासस्थलादभिमुखमायान्ते शरणतयोपसेदुः । अन्यत्तैः । यद्वा । कृष्णकृष्णेत्येतन्मात्रमेव क्रोशन्तः त्रस्तत्वाद्रक्षेत्याद्यन्योक्तावशक्तः । इत्थन्ते निजकृत्यं चक्रुः । श्रीगोविन्दोऽपि निजकृत्यं चकारेत्याह । भगवानपीति । अथेति पाठे अरिष्टागमनानन्तरमेव वा । तत् स्वपाल्यमानं गोकुलं तत्रत्यान् सर्वानेवेत्यर्थः । वृषरूपमसुरमिति तं तादृशं ज्ञात्वेत्यर्थः । अत उप स्वसमीपे गोष्ठाद्दूर एवाह्वयत् । तत्र युद्धोपद्रववञ्चनार्थम् अत एव विवेश गोष्ठामिति वक्ष्यते ॥ ६ ॥ आह्वानप्रकारमाह । सपालैरिति । बुद्धिबलाधिक्यात्त्रासे पालानां गौणत्वं तद्वैपरीत्यात् पशूनां मुख्यत्वमिति तथोक्तम् । गोपालैरिति पाठः क्वचित् । मन्द अल्पबुद्धे ! पशूनां त्रासनात् । त्रासितैः किं स्यादपितु न किमपि फलमित्यर्थः । कुतस्तदाह । मयीति शास्तरि दण्डयितरि सति । पठान्तरे यतो बलदर्पहाहं दुष्टानां दुष्टकर्मणां दुरात्मनां दुष्टस्वभावानाम् । अधुनैव मया त्वयि हते सर्वे एवैते निर्भया भविष्यन्तीति भावः । त्वद्विधानामिति त्वं शासनीय इति किं वक्तव्यं त्वद्वद्दुष्टत्वानुकारका अपि शासनीया इत्यर्थः । ननु वृषरूपोऽहं कथं शासनीय इति चेत्तत्राह । असत्तमेति तत्त्वतो दुष्टदैत्य एव त्वमसीत्यर्थः ॥ ७–८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णेत्यर्द्धकम् । ते गोप्यादयः सर्व्वे इत्यत्यन्तभयाद्वनेऽपि स्वास्थ्यमलभमानाः पशवोऽपि निवृत्त्यागताः शरणं ययुः, शरणागतत्वेनान्तिकमायाता इति ज्ञेयम् । यतो गोविन्दं गोकुलेन्द्रम्, अन्यत्तैर्व्याख्यातम् । यद्वा, कृष्ण कृष्णेत्येतन्मात्रमेवाक्रोशन्तः त्रस्तत्वाद्रक्षेत्याद्यन्योक्तावप्यशक्तः । यद्वा, शरणयानप्रकारमेवाह— कृष्ण कृष्णेति ॥ ५ ॥ इत्थं ते निजकृत्यं चक्रुः, श्रीगोविन्दोऽपि निजकृत्यं चकारेत्याह —भगवानपीति । अथेति पाठे अरिष्टागमनानन्तरं सद्य एवेत्यर्थः । तत् परमहृष्टं निजपाल्यमानं वा गोकुलं तत्रत्यान् सर्व्वानेवेत्यर्थः । भयेन विद्रुतं प्रागीतस्ततो वेगेन गतम्; यद्वा, गवां कुलं भयेन दूरे गतमेव गोप्यो गोपा गावश्चेत्येते सर्व्वे शरणं ययुः, वृषरूपमसुरमिति तं तादृशं ज्ञात्वेत्यर्थः । अत उप समीपे आह्वयत् ॥ ६ ॥ कथम् ? तदाह—सपालैरिति । त्रासे पालानां गौणत्वमेव, वीरत्वात् पशूनामेव मुख्यत्वमिति । मन्द अल्पबुद्धे ! पशूनां त्रासनात् त्रासितैः किं स्यात् ? अपि तु न किमपि फलमित्यर्थः । कुतः ? तदाह—मयीति शास्तरि नियन्तरि, दुष्टानां दुष्टकर्म्मणां दुरात्मनां दुष्टस्वभावानामधुनैव मया त्वयि हते सर्व्व एवैते निर्भयाः सुखिनो भविष्यन्तीति भावः । त्वद्विधानामिति—त्वं शासनीय इति किं वक्तव्यम्, त्वद्दुष्टतानुकारका अपि शासनीया इत्यर्थः । ननु वृषरूपोऽहं कथं शासनीय इति चेत्तत्राह—हे असत्तमेति । तत्त्वतो महादैत्यो जगदुपद्रावकः परमदुष्टस्त्वं मया शासनीय एवेति भावः ॥ ७ ॥ सख्युः श्रीदाम्नोंऽसे भुजैव भोगः सुवृत्तत्वपृथुत्वायतत्वादिना अहिदेहस्तं प्रसार्य्येति निर्भयत्वं सावज्ञत्वं च दर्शितम् । सख्युरिति भावविशेषेण तत्सख्यभाग्याभिनन्दनात् । अन्यत्तैर्व्याख्यातम् । यद्वा, अच्युत इति तत्स्थानादविचलनाभिप्रायेण, तथा चोक्तं श्रीवैशम्पायनेन (हरिवंशे विष्णु–प० २१।१५)–'तस्मात् स्थानान्न व्यचलत् कृष्णो गिरिरिवाचलः' इति; श्रीपराशरेणापि (वि० पु० ५।१४।९)—'न चचाल ततः स्थानादवज्ञास्मितलीलया' इति । हरिरिति तादृशावस्थानेन मनोहरत्वात् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे राजन् पशवस्तु भीता गोकुलं सन्त्यज्य दुद्रुवुः ते गोपा गोप्यश्च कृष्ण कृष्णेति वदन्तः तं शरणं रक्षितारं प्रापुः ॥ ५ ॥ अथ भगवान् भयेन विह्वलन्तद्गोकुलमवलोक्य माभैष्ट भयं माकार्ष्टेति गिरा आश्वास्य सान्त्वयित्वा वृषासुरमुपाह्वयदाजुहाव ॥६॥ आह्वानप्रकारमाह । सबालैरिति । हे मन्द ! सबालैः सवत्सैः पशुभिः किन्तेभ्यो भयजननेन तव किम्प्रयोजनमित्यर्थः । हे असत्तम त्वद्विधानां दुरात्मनां बलं दर्पं च हन्तीति तथाभूतोऽहं समवस्थितः ॥ ७ ॥ इतीत्थमाह्वयन्नाश्रितार्तिरः आश्रितान्न च्यावयते त्यजतीत्यच्युतः आस्फोट्य करतलेन बाहुमाहत्य तलशब्देनारिष्टं कोपयन् कोपयुक्तं कुर्वन्सख्युरंसे स्कन्धे भुज एवाभोगः सर्पदेहस्तं प्रसार्यावस्थितः ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तत्रसुः त्रस्ताः मीता आसन् ॥ ५–६ ॥ हे मन्द ! निर्भाग्य ॥ ७ ॥ भुजाभोगम् आभोगभुजं पुष्टवृत्तभूतम् । ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सर्वग्रहणात् पशूनामपि कृष्णकृष्णेत्युक्तिर्लभ्यते । उक्तश्च सुरभिगमने स्वसन्तानैरुपामन्त्र्येति ॥ ६–४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पशुभिः गोभिश्च असत्तमेति वृषरूपस्य तव वधे गोवधपापं न स्यादिति भावः ॥ ७ ॥ आस्फोट्य करतलेन वामबाहुमाहत्य तेन तलशब्देन स्वशौर्य्यद्योतकेनेत्यर्थः । सख्युः सुबलस्य स्कन्धे भुजा भुज एव भोगः सर्पदेहस्तं प्रसार्य्येति सावज्ञत्वं दर्शितम् ॥ ८ ॥

गूढार्थदीपिनी

कृष्णेति सार्द्धम् ॥ ५ ॥ आश्वास्य सान्त्वय्य ॥ ६-७ ॥ आस्फोटय करतलेन बाहुमाहत्य । तेनैव करतलशब्देन । सख्युः श्रीदाम्नः स्कन्धे भुजाभोगं सर्पाकरं भुजम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णकृष्णेतिभाषमाणाः शरणं रक्षितारम् ॥ ६-७ ॥ न च्यवते न क्षरतीत्यच्युतः स्वयमन्यान्दुर्वृत्तांस्तु हरतीति हरिः इत्येवमास्फोट्य करतलेन बाहुमाहत्य तेन तलशब्देन अरिष्टं वृषासुरं कोपयन् भुज एवाभोगोऽहिदेहस्तं सुलक्षणं भागिभोगाकार सख्युरंसे प्रसार्य्यावस्थितो बभूव ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तीक्ष्णे क्रूरे शृङ्गे यस्य सः ॥ ५ ॥ तद्गोकुलं तत्स्थजनं ॥ ६ ॥ आश्वास्य समाधाय मन्ददरिद्राज्ञं वा ॥ ७ ॥ बलं च दर्पश्च तौ हन्तीति स तथा त्वद्विधानां तव विधा प्रकारो येषां ते तथा तेषामास्फोट्य तलेन बाहुं वोरू वाऽऽहत्य । तलशब्देन परस्परं तलध्वनिनाऽऽभोगो हि कायो महान्भुजस्तदाकार इति भुजाभोगस्तं । भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः । सख्युरंसे प्रसार्यावस्थितः । अनेन तदलक्ष्यता ध्वन्यते ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

पशुषु विशेषमाह । भीताः सन्तो दुद्रुवुरिति । सावधानार्थसंबोधनं गोकुलं सन्त्यज्येति पुनरागमनापेक्षां त्यक्त्वेति भावः तदा सर्वभयेषु भगवान् शरणमिति ज्ञात्वा ते सर्वे कृष्णकृष्णेति शरणं गताः स तस्य स्वाभाविको हृदि स्थितो धर्मः यो महाभये मुखान्निःसरति व्रजस्थानां पुनः कृष्ण एव निविष्ट इति कृष्णेत्येवाहुः किञ्च गोविन्दो यः स्वेन्द्र इति ॥ ५ ॥ न केवल तेषां वचनाङ्किन्तु भगवानापि तन्निरीक्ष्य वृषासुरमुपाह्वयदिति सम्बन्धः भयेन विह्वलमिति माभैष्टेत्यादौ गोकुलमाश्वास्य मनसा तद्वधं प्रतिज्ञाय पश्चादुपाह्वयत् नतु समाधानार्थं वृष इति दैत्यांशाः सर्व एव वध्याः यथा ब्रह्मणः पौत्रादयः तथा वृषादयोऽपि देवांशानामेव वधे दोष इति धर्ममर्यादा तदाह । वृषासुरमिति असुरा वध्या एष रोगमलप्रायाः ॥ ६ ॥ राजसत्वादादौ वचनमाह । गोपालैरिति । गोपालाः पशवश्चाल्पसत्त्वाः सजातीयास्तत्पालकाश्च नहि महान् अल्पैः सह युध्यति सजातीयैर्वा अत एव विचाराभावान्मन्देति सम्बोधनं मारयितुं त्वयैव न शक्यते तथा सति शत्रुपक्षापकर्षोऽपि भवेत् केवल त्रासितैः किं कार्यम अत एव वृथैव सद्भयजनको मारणीय इति ज्ञापयितुं सम्बोधयति असत्तमेति क्रियया दुष्टोऽसन् अन्तः करणे नासत्तमः स्वरूपोऽपि क्रूरस्तथा ननु दुष्टानां कार्यमेवमेवेति चेत्तत्राह । बलदर्पहाहमिति । बलं तज्जनितं दर्पञ्च हन्तीति तथा बहुलं छन्दतीति ब्रह्मभ्रूणवृत्रेष्वेवोपपदेषु न नियमः अहमित्यात्मानं प्रदर्श्याह स्वपौरुषं ख्यापयन्निव दुष्टानामेवाहं सामान्यतो दर्पहा तत्रापि त्वद्विधानामुद्वेजकानां दुरात्मनामत्यन्तःकरणदोषयुक्तानां क्रियया अन्तः करणेन स्वरूपतश्च दुष्टा वध्या एवेति ॥ ७ ॥ एवमुक्त्वा आस्फोटय बाहुस्फोटनं मल्लवत् कृत्वा आस्फोटनतलशब्देनैव तं कोपयन् हीनो ऽसि त्वमिति ज्ञापनेन कोपं जनयन् अच्युतत्वात् स्वयन्निभयः अवगणनया लीलां कृतवानित्याह । सख्युरंस इति । भुजाभोगं महान्तं भुजं प्रसार्यावस्थितो जातः एवं करणे हेतुमाह । हरिरिति । यथा सोऽप्यरिष्टो लीलासहितं भगवन्तं पश्यन् अन्ते तमेव ध्यायन् ॥ ८ ॥

श्रीसुबोधिनी-सारः

तीक्ष्णे शृंगे यस्य तं वृषभासुरमुद्वीक्ष्य गोपाश्चोद्विविजिरे गोकुलं संत्यज्य भीताः पशवो दुद्रुवुरय सखुः हे राजन् ॥५॥ हे कृष्णकृष्णेति ते सर्वे गोविंदं शरणं जग्मुः भनवानपि भयेन विद्रुतं गोकुलं तत् वीक्ष्य दृष्ट्वा ॥ ६ ॥ यूयं मा भैष्टेति गिरा चाश्वाश्वास्य वृषासुरं समीपमाह्वयत् त्रासितैर्गोपालैः पशुभिः किं हे मंद हे असत्तम ॥ ७ ॥ त्वत्सदृशानां दुरात्मनां पापिनां दुष्टानां बलगर्वहं ताहमस्मीति हेतोरास्फोटय करतलेन बाहुमाहत्यारिष्टं कोपं कारयन् ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तीक्ष्णशृङ्गं तमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः । हे राजन् ! पशवश्च तं वीक्ष्य भीताः सन्तो गोकुलं सन्त्यज्य दुद्रुवुः पलायिताः ॥ ५ ॥ हे कृष्ण ! हे कृष्ण ! रक्ष रक्षेति वदन्तस्ते गोपादयः सर्वे गोविन्दं शरणं ययुः । अथ तेषामार्तवचनश्रवणानन्तरं भयेन विद्रुतं व्याकुलं वीक्ष्य मा भैष्ट भयं मा कार्ष्टेति गिरा आश्वास्य भगवान् वृषासुरमुपाह्वयत् स्वसमीपमाकारितवान् ॥ ६ ॥ तत्प्रकारमाह—गोपालैरिति । मन्द हे मन्दबुद्धे ! असत्तम हे दुष्ट ! शब्देनैव त्वया त्रासितैर्गोपालैः पशुभिश्च तव किं फलम ? न किमपि । यतस्त्वविधानां दुष्टानां परोद्वेजकानां दुरात्मनां दुर्बुद्धीनां यो बलप्रयुक्तो दर्पः गर्वस्तं हन्तीति तथाभूतोऽहम । त्वं बलगर्वितश्चेत्तर्हि ममाग्रे आगच्छेति शेषेणान्वयः ॥ ७ ॥ हरिर्भक्तदुःखहर्ता भगवान् कृष्ण इत्येवं वदन् आस्फाटय करतलेन

बाहुमाहत्य तेन तलशब्देन तमरिष्टं कोपयन् भुजा भुजः स एव भोगः सर्पदेहस्तं सर्पदेहाकारं भुजं सख्युरंसे स्कन्धे प्रसार्य संस्थाप्यावस्थितः। एवं निर्भयतयाऽवस्थाने हेतुमाह—अच्युत इति। अप्रतिहतप्रभाव इत्यर्थः ॥ ८ ॥

अन्वितार्थप्रकाशिका

कृष्णेति अर्द्धम् ॥ हे कृष्ण ! हे कृष्ण ! रक्ष रक्षेति वदन्तस्ते गोपादयः सर्वे गोविन्दं शरणं ययुः ॥ ५ ॥ भगवानिति ॥ अथ भयेन विह्वलं व्याकुलं विद्रुतमित्यपि पाठः। तद्गोकुलं वीक्ष्य मा भैष्ट भयं मा कार्ष्टेति गिरा आश्वास्य भगवान् वृषासुरमुपाह्वयत् स्वसमीपमाकारितवान। आङ्भावात्स्पर्द्धायामपि न तङ् ॥ ६ ॥ गोपालैरिति ॥ हे मन्द मन्दबुद्धे ! हे असत्तम दुष्ट ! वृषरूपिणोऽपि तव मारणे दोषो नास्तीति भावः। शब्देनैव त्वया त्रासितैर्गोपालैः पशुभिश्च तव किं फलं न किमपि। यतस्त्वद्विधानां दुष्टानां परोद्वेजकानां दुरात्मनां दुर्बुद्धीनां यो बलप्रयुक्तो दर्पः गर्वस्तं हन्तीति तथाभूतोऽहं तिष्ठामि। त्वं बलगवर्तिश्चेत्तर्हि ममाग्रे आगच्छ ॥ ७ ॥ इतीति ॥ हरिर्दुःखहर्ता अच्युतः इत्येवं वदन आस्फोट्य करतलेन बाहुमाहत्य तेन तलशब्देन स्वशौर्यद्योतकेन तमरिष्ट कोपयन् भुजा भुजः स एव भौगः सर्पदेहस्तं सर्पदेहाकारं भुजं सख्युः सुबलस्य श्रीदाम्नो वा अंसे स्कन्धे प्रसार्य संस्थाप्यावस्थितः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे कृष्णे हे कृष्णेति अस्मान् पाहीति वदन्तः ॥ ६–७ ॥ इतीति इत्येवमुच्चारयन् अस्फोट्यहस्ततलेन बाहुंताडयित्वा तेन तलशब्देन कोपयन् सख्युरंसेस्कंधे भुजाभोगं भुजाशब्देन करो बोध्यः सैवभोगः सर्पदेहस्तदाकारं भुजं प्रसार्य हरिःदुष्टहारकः अवस्थितः एवं स्थित्पातस्पनिर्भयत्वं सूचितं ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पशव इति ॥ हे राजन्, पशवस्तु, भीता भयं प्राप्ताः सन्तः, गोकुलं संत्यज्य, दुद्रुवुः। सर्वे ते गोप्यो गोपाश्च, कृष्ण कृष्ण इत्येवं वदन्तः सन्तः, गोविन्दं कृष्णं, शरणं, ययुः संप्रापुः ॥ ५ ॥ भगवानिति ॥ अथ भगवान्, तत् गोकुलं, भयविह्वलं वीक्ष्य अवलोक्य, मा भैष्ट भयं मा कार्ष्ट, इत्येवं विधया, गिरा वाचा, आश्वास्य सान्त्वयित्वा, वृषासुरं वृषभाकृतिमरिष्टासुरं, उपाह्वयदाजुहाव ॥ ६ ॥ आह्वानप्रकारमाह। सबालैरिति ॥ हे मन्द मूढ, सबालैः सवत्सैः, पशुभिः त्रासितैः, किम्। पशुभ्यो भयजननेन तव किं प्रयोजनमित्यर्थः। हे असत्तम, त्वद्विधानां भवादृशानां, दुरात्मनां दुष्टचित्तानां, दुष्टानां खलानां, अहं बलदर्पहा बलसंबन्धिगर्वनिवर्त्तकः, जातोऽस्मीति शेषः ॥ ७ ॥ इतीति ॥ इत्येवं वदन्, अच्युतः श्रीकृष्णः, आस्फोट्य करतलेन बाहुमाहत्य, तलशब्देन, अरिष्टमरिष्टासुरं, कोपयन् कोपयुक्तं कुर्वन्, सख्युः स्वमित्रस्य, अंसे स्कन्धे, भुज एवाभोगः सर्पदेहस्तं, प्रसार्य, सर्पदेहाकारं स्वभुजं मित्त्रांसे प्रसार्येत्यर्थः। हरिः अवस्थितः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तं तीक्ष्णशृङ्गमित : १०.३६.५.

रजोगुण-तमोगुणाऽन्यतरभागपि प्राणभृन्मुधाऽर्दयति सात्त्विकान् भुवि जनान् समुद्वेजयन्।
अयं त्वघदतद्गुणद्वयविषाणमूर्तिः खलो निरीक्ष्य परितत्रसुस्तमिति नात्र चित्रं हिते ॥ ११ ॥

कृष्णेति : १०.३६.६.

तत्प्राणसङ्कटमवेक्ष्य तदा व्रजस्था गोविन्दमेव शरणं ययुरेतदीड्यम्।
स श्रीपतिः स्वविरुदावनदीक्षितस्तानाश्वासयन्निजगिरेत्यपि युक्तमेव ॥ १२ ॥

वृषासुरमि : १०.३६.७.

बाह्याभ्यन्तरसत्त्ववृत्तिकलितो यः स्यात् स एवावनौ धर्मः प्रीतिकृदच्युतस्य न परो यो दाम्भिकोऽघाश्रितः।
युक्तं सद्व्रजभीतिदं बहुरयःसंयोग मग्रे पदैः कुर्वन्तं च वृषाधमं प्रभुरसौ हन्तुं यदैषीत्तदा ॥ १३ ॥
कृत्रिमाकृत्रिमैर्भावैर्भविता लोकवञ्चनम्। सर्वज्ञस्य पुरो युक्तं मृषा तद्वञ्चनाविधिः ॥ १४ ॥

बलदर्पहेति : १०.३६.८.

ये मद्भक्तभयावहा भुवि दुरात्मानोऽखिलानामपि तेषां दर्प-बल-प्रमादहरणे यौ नित्यमुत्कण्ठितौ।
तावत्रैव हि जागृतो मम भुजौ त्वद्धिंसनात्युत्सुको जातौ सम्प्रति पश्यताविति तलध्वानेन सोऽबोधयत् ॥ १५ ॥
दृष्ट्वैव मामभिमुखं ननु शूरराजं यत्त्वं समुत्सृजसि मूत्रमले हि भीरो।
निर्णीतमेतदसि वर्षवरो न वीरस्तद्योग्यशब्दकृतितः किमबोधयत् तम् ॥ १६ ॥
भक्तालिङ्गनहार्दभावविलसद्वक्षस्थलोऽधोक्षजो यच्चक्रे द्विषतस्तदा निजभुजाभोगप्रसारं पुरः।
नैतच्चित्रमनेककल्पजतदभ्यासस्य कृष्णस्य यत् सामान्योऽपि हि जायतेऽल्पकलिताभ्यासानुसारिस्थितिः ॥ १७ ॥

कृष्णप्रिया

गोकुल निवासी व्रजजन अरिष्ट को देखकर हे श्रीकृष्ण हे श्रीकृष्ण हे नाथ ! ।। ५ ।। सम्बोधनों से आर्तनाद करते कहने लगे हे नाथ ? आप बैल रूप धारण कर आए हुए इस अरिष्टासुर से हमें बचाईए, हम शरणागत है ऐसा पुकार कर श्री गिरिवरधारी श्री गोविन्द भगवान् के शरण में आए। शरणागत वत्सल भगवान् श्रीकृष्ण ने भी समग्र गोकुल को भयभीत होकर इधर उधर भागते देखा, तब अभय वाणी से प्रभु ने कहा, डरना नहीं, डरो मत डरो मत, ऐसा अभयदान देते हुए वृषभासुर अरिष्ट को ललकारते कहा अरे कायर अरे खल ? इन गोप गोपियाँ को और पशुओं को डराकर क्या ताकात बताते हो, है यदि सामर्थ्य तब आ जाओ सामने मैं खड़ा हूँ ।। ६–७ ।। अरिष्ट को ललकारते प्रभु ने कहा, तुम्हारे जैसे दुर्मति दुष्टाचरणवाले दुष्टों के बल के अभिमान को चूर्ण करने वाला मैं यहाँ विद्यमान हूँ, आजा यदि तेरे में ताकत है इतना कह कर भगवान् श्रीकृष्ण ने ताल ठीककर उस अरिष्ट को उत्तेजित किया और कोपित किया ।। ८ ।।

सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ।
सोऽप्येवं कोपितोऽरिष्टः खुरेणावनिमुल्लिखन् । उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ॥ ९ ॥
अग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतम् । [1]कटाक्षिप्याद्रवत्तूर्णमिन्द्रमुक्तोऽशनिर्यथा ॥ १० ॥
गृहीत्वा शृङ्गयोस्तं वा अष्टादश पदानि सः । प्रत्यपोवाह भगवान् गजः प्रतिगजं यथा ॥ ११ ॥
सोऽपविद्धो भगवता पुनरुत्थाय [2]सत्वरः । [3]आपतत् स्विन्नसर्वाङ्गो निःश्वसन् क्रोधमूर्च्छितः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—हरिः, सख्युः, अंसे, भुजाभोगम्, प्रसार्य, अवस्थितः, एवं कोपितः, सः, अरिष्टः, खुरेण, अवनिम्, उल्लिखन्, उद्यत् पुच्छभ्रमन् मेघः कुद्धः, सन्, कृष्णम्, उप अद्रवत् अग्रन्यस्तविषाणाग्रः, स्तब्धासृग लोचनः, यथा, इन्द्रमुक्तः अंशनिः, तथा, कटाक्षिप्य, अच्युतम्, तूर्णम्, आद्रवत् ।। ९–१० ।। सः, भगवान्, तम्, शृङ्गयोः, गृहीत्बा, गजः, यथा, प्रतिगजम्, तथा, तम्, अष्टादश, पदानि, वै, प्रत्यपोवाह ।। ११ ।। भगवता, विद्धः, स, अपि पुनः उत्थाय, क्रोधमूर्च्छितः, स्विन्नसर्वाङ्गः, निःश्वसन्, सत्वरः, आपतत् ।। १२ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

भुजाभोगं भुजा भुजः स एव भोगः सर्पदेहाकारं भुजामित्यर्थः । स्वयमच्युतः अन्यान्दुष्टान्हरतीति हरिः । उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमंतो मेघा यस्मात्सः ।। ९ ।। अग्रे न्यस्ते विषाणाग्रे येन सः । स्तब्धे असृक्तुल्ये लोचने यस्य सः । कटाक्षिप्य कटाक्षेण तिर्यङ् निराक्ष्येत्यर्थः ।। १० ।। प्रत्यपोवाह प्रतिलोमं व्यनुदत् ।। ११ ।। अपविद्धोऽपक्षिप्तः । आपतदाद्रवत् । स्विन्नानि स्वेदयुक्तानि सर्वांगानि यस्य सः । क्रोधमूर्छितः क्रोधेन व्याप्तः ।। १२ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति—सर्पदेहवत्स्निग्धं पुष्टं वक्रीभवनशीलमित्यभिप्रायः । अच्युतः सर्वदैकस्वभावः । एवं तलशब्दास्फोटनादिना ।। सख्युः सुबलस्य । श्रीदाम्न इति तोषिणी । सख्युरंसे भुजस्थापनेन सावज्ञत्वं दर्शितम् ।। ९ ।। न्यस्ते कृते । विषाणाग्र शृंगाग्रभागे । स्तब्धे स्तिमिते । कटशब्दोऽत्रैकदेशन्यायेन कटाक्षपरः । कटेन कटाक्षेणाक्षिप्य । इह समासस्त्वार्षः । आक्षिप्येत्यनेन तिर्यङ्निरीक्षणं लक्ष्यते । अशनिर्वज्रम् ।। कटाशब्देन कटाक्ष एव बोध्य एकदेशन्यायेन ।। १० ।। स कृष्णः । तम् अरिष्टम् । प्रतिलोमम् पृष्ठतः । व्यनुदत् पातयामास ।। ११ ।। सः असुरः ।। १२ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सख्युः श्रीदाम्नोंऽसे भुजैव भोगः सुवृत्तत्वपृथुत्वायतत्वादिनाहिदेहस्तं प्रसार्येति सावज्ञत्वं दर्शितम् । सख्युरिति तस्यापि तादृशत्वदर्शनाय भावविशेषेण तत् सख्यभाग्याभिनन्दनाय च । अन्यत्तः । तत्राच्युत इति तत् स्थानादविचलनाभिप्रायेण । तथा च श्रीवैशम्पायनः । तस्मात् स्थानान्न व्यचलत् कृष्णो गिरिरिवाचल इति । श्रीपराशरश्च । न चचाल ततः स्थानादवज्ञास्मित लीलयेति । हरिरिति तादृशावस्थानेन मनोहरणात् । उद्यता पुच्छेन चलन्तः तस्य स्पर्शाद्वाताद्वा इतस्ततो निपतन्तो मेघा यस्मात् उपाद्रवत् समीपे वेगेनागमत् ।। ९ ।। कथं तदाह । अग्रेति । अत्र कटाक्षशब्दैकदेशेन कटाशब्देन स एवोच्यते । कुटाशब्देन गाङ्कुटादित्यादिसूत्रलक्षितपादवत् । ततः कटा कटाक्षेणाक्षिप्य तिर्यग्दृष्ट्या संतर्ज्येत्यर्थः । तूर्णंद्रवणे परासह्यत्वे च दृष्टान्तः ।

---

१. कट्या–विज. ; कटा । २. सत्वरम्–प्रा. पा. । ३. आद्रवत्–वीर. ।

इन्द्रेण मुक्तो बलात् प्रक्षिप्तोऽशनिर्यथेति अच्युतमिति तत्र तस्य वैयर्थ्यं बोधयति ॥ १० ॥ वै प्रसिद्धौ स परमविनोदशीलः विनोदमेव दृष्टान्तेनाभिव्यञ्जयति गजः। स्वप्रतिभटगजं यथेति तद्योग्यमेव बलमाविष्कृत्येत्यर्थः ॥ ११ ॥ सत्वरं स्यात् पाठान्तरे सत्वरः सन् क्रोधेन मूर्च्छिता विस्मृतात्मा स्विन्नसर्वाङ्गः परिश्रान्तत्वात् क्रोधादेव वा ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अरिष्टममंगलं साक्षात्तद्रूपत्वादरिष्ट इत्यन्येषां दुष्प्रतिकार्य्यत्वादिकं सूचितम्, उद्यता पुच्छेन भ्रमन्तस्तस्य स्पर्शाद्वा-ताद्वा इतस्ततो निपतन्तो मेघा यस्मादिति पुच्छस्य कठिनता बहुलदीर्घबालमयता च दर्शिता। कृष्णं क्रोधोत्पादनेन तस्याकर्षकम्, यद्वा, महावीरदर्पप्रकटनेन भूमौ श्रीपार्ष्णिप्रहारेण तत्प्रकर्षणात् कृतमरिष्टकुण्डाख्यं तीर्थम्, तथा हि आदिवाराहे—'घातयित्वा ततस्तस्मिन्नरिष्टं वृषरूपिणम्। कोपेन पार्ष्णिघातेन महास्तीर्थं प्रवर्त्तितम् ॥' उपाद्रवत् समीपे वेगेनागमत् ॥ ९ ॥ कथम्? तदाह—अग्र इति। तूर्णं द्रवणे हिंस्रत्वे च दृष्टान्तः। इन्द्रेण मुक्तो बलात् प्रक्षिप्तोऽशनिर्यथेति ॥ १० ॥ वै प्रसिद्धौ। स परमविनोदशीलो भगवान् श्रीकृष्णः। विनोदमेव दृष्टान्तेनाभिव्यञ्जयति—गजः प्रतिगजं स्वसदृशं गजं यथेति, अन्यथा सद्यो वध्यत्वात्, अत एवाग्रे वक्ष्यति (१६ श० श्लो०)—अद्भुतकर्म्मण्य' इति। ततश्च भूमौ निपपातेति ज्ञेयम्, अग्रे पुनरुत्थानोक्तेः ॥ ११ ॥ भगवता कौतुकं दर्शयतेत्यर्थः, स्विन्नसर्व्वाङ्गः, परिश्रान्तत्वात् क्रोधमूर्च्छितत्वादेव वा ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः सोऽरिष्टोऽपीत्थं कुपितः खुरेण भूमिमुत्क्षिपन्नुद्यता ऊर्ध्वङ्गच्छता पुच्छेन भ्रमन्तो मेघा यस्मात्स क्रुद्धः सन् कृष्णमुपाद्रवत् ॥ ९ ॥ तदेवाह। अग्रे न्यस्ते विषाणाग्रे येन स्तब्धे ऽसृग्लोचने रक्तनेत्रे यस्य सः कटाक्षिप्य कटाक्षेण तिर्यङ्निरीक्ष्य यथेन्द्रेण मुक्तोऽशनिर्वज्रस्तद्वत्तूर्णं श्रीकृष्णं प्रत्युपाद्रवत्समीपमगात ॥१०॥ ततः श्रीकृष्णः किं कृतवांस्तदाह। गृहीत्वेति। तदा सोऽच्युतः तमरिष्टं शृङ्गयोर्गृहीत्वा ऽष्टादशपदानि प्रत्यपोवाह प्रत्यगमयत् यथा गजः प्रतिगजं तद्वत् ॥ ११ ॥ ततः सोऽरिष्टो भगवता अपविद्धः अपक्षिप्तः प्रतिगमनेन पातितः सत्वरः पुनरुत्थाय स्विन्नानि प्रस्वेदयुक्तानि सर्वाण्यङ्गानि करचरणादीनि यस्य सः क्रोधेन मूर्च्छितः परवशः निःश्वसन् श्वासं मुञ्चन्नपि पुनराद्रवत् कृष्णं प्रत्याद्रवदित्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उद्यति पुच्छे भ्रमन्तो मेघा यस्य स तथा ॥ ९ ॥ स्तब्धे निश्चले असृक्रुधिरमिव रक्ते लोचने यस्य स तथा कट्याक्षिप्य कटीस्फिजौ आक्षिप्य निःक्षिप्य प्रदर्श्येत्यन्वयः कटाक्षित्वेति पाठे कटाक्षेण निरीक्ष्येत्यर्थः अशनिर्वज्रम् ॥ १० ॥ प्रत्यपोवाह प्रत्यपातयत् अभ्याकृष्य पृष्ठतोऽपनीतवानित्यर्थः तिर्यङ्नीतवान्वा ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमन्तो मेघा यस्मात् सः ॥ ९ ॥ स्तब्धे असृग्लोचने रक्तनेत्रे यस्य सः कटा कटाक्षस्तया आक्षिप्य तिर्य्यग्दृष्ट्या सन्तर्ज्य इत्यर्थः ॥ १० ॥ प्रत्यपोवाह प्रतिलोमं व्यनुदत् ॥ ११ ॥ अपविद्धः अपक्षिप्तः ॥ १२ ॥

गूढार्थदीपिनी

अवनिं पृथ्वीम् उल्लिखन् विदारयन् उद्यता ऊर्ध्वीकृतेन पुच्छेन भ्रमन्तो मेघा यस्मिन् सोऽरिष्टः ॥ ९ ॥ अग्रन्यस्ते विषाणाग्रे शृङ्गाग्रेयेन सः। स्तब्धे निश्चले रक्तनेत्रे यस्य सः। कटशब्दोऽत्र एकदेशन्यायेन कटाक्षपरः कटेन आक्षिप्य। अशनिः वज्रम् ॥ १० ॥ प्रत्यपोवाह पृष्ठतोऽपनीतवान् ॥ ११ ॥ अपविद्धः अधःक्षिप्तः। आपतत् कृष्णमभ्यद्रवत्। स्विन्नानि स्वेदयुक्तानि ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सोऽरिष्टोऽप्येवं कोपितः उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमन्तो मेघा यस्मात् सः क्रुद्धः सन् खुरेणावनिमुल्लिखन् कृष्णमुपाद्रवदित्यन्वयः ॥ ९ ॥ तदेव वर्णयति। अग्रे इति। अग्रे न्यस्ते विषाणाग्रे येन सः स्तब्धे असृग्लोचने अरुणनेत्रे यस्य सः कटाक्षिप्य कटाक्षेण तिर्यङ्निरीक्ष्य अच्युतं तूर्णमुपाद्रवत् ॥ १० ॥ अष्टादशपदानि प्रत्यपोवाह प्रतिलोमं चालयामास अच्युतेनाष्टादशपदान्तरे ऽपक्षिप्त इति फलितोऽर्थः ॥ ११ ॥ सोऽरिष्टो ऽपविद्धो ऽपक्षिप्तः स्विन्नानि स्वेदयुक्तानि सर्वाण्यङ्गानि यस्य सः क्रोधेन मूर्च्छितो व्याप्तः आपतत् श्रीकृष्णं प्रत्याद्रवत् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उद्यत्पुच्छं बालस्तेन भ्रमन्तस्तस्मिन्वा मेघा येन सः ॥ ९ ॥ अग्रे विधाय स्वविषाणयुग्ममुग्रोऽच्युतं प्रत्यगमत्सहायं। दोष्णा तदुत्पाटयता मुरारेः कुर्वन् शिरोभारजिहीर्षयेवेत्याह ॥ अग्रन्यस्तेति। अग्रे पुरोभागे न्यस्ते स्थापिते विषाणयोरग्रे प्रान्तभागे येन स स्तब्धे जडीकृते असृग्वद्रक्ते लोचने यस्य सः। कटाक्षिप्य कटाक्षगोचरं कृत्वा। इन्द्रमुक्तोऽशनिर्वज्रो विषे यथा तथा

तूर्णमभ्यद्रवत् । अनेवं व्याख्याने निदर्शनमिदमप्रदर्शनीयं स्यात् । अर्थविपर्यासादिति मन्तव्यं । यथैव वज्रो विपत्तौ वृथा भवेदिति भगवदुक्तेः ॥ १० ॥ शृङ्गयोस्तदग्रयोस्तं गृहीत्वाऽष्टादशपदानि प्रत्यपोवाह पश्चात्प्रातिलोम्येन नीतवान् । प्रतिगजमित्युक्तिर्भगवद्यशोविशेषणार्थमिति मन्तव्यं ॥ ११ ॥ स एवमपविद्धो घर्षणसमयेऽवनिजानुसमासज्जनेन पतितः पुनः सत्वर उत्थाय स्विन्नसर्वाङ्गो निःश्वसन्क्रोधमूर्छितश्चापतत्कृष्णोपर्यपतत् ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्यापि वृत्तान्तमाह । सोऽपीति । एवमाक्षेपैः कोपितः स्वभावतोऽप्यरिष्टरूपः खुरेण अवनिं भूमिमुल्लिखन् पूर्ववन्मारणप्रकारं विचारयन् पश्चादुद्यत्पुच्छो भूत्वा तेनोर्ध्वपुच्छेन भ्रमन्तो मेघा यस्य पुच्छाघातेन मेघा इतस्ततो विक्षिप्ताः ततः क्रुद्धः सन् अयुक्तं करोतीति ज्ञापयितुं कृष्णं सदानन्दमुपसमीपपर्यन्तमाद्रवत् ॥ ९ ॥ आद्रवणे प्रकारमाह । अग्रन्यस्ते अग्रे प्रथमतो न्यस्ते स्थापिते विषाणाग्रे येन स्तब्धे असृग्वर्णे लोचने यस्य बहिरन्तर्मारणसाधनपरिग्रह उक्तः तयोरसाधनत्वसूचनायाह । अच्युतमिति । आदौ दृष्टिवेधार्थं कटाक्षीकृत्य वस्तुतस्तु कटाक्षेणापि भगवान् न विद्धः तथापि अकटाक्षमपि कटाक्षीकृत्य तूर्णमाद्रवत् अविचारेण समागमने दृष्टान्तमाह । इन्द्रमुक्त इति । यथा पर्वतपक्षच्छेदने दुष्टानामेव छेदनार्थं प्रवृत्तः अन्यत्रापि गतः एवमयं भगवत्समीपमप्यागतः अत्रैव वा अविचारदशायामिन्द्रेण मुक्तः नमुचिप्रस्तावे वा ॥१०॥ तदा भगवता यत् कृतं तदाह । गृहीत्वेति लोकेति साहसं शृङ्गयोरेव धृत्वा तं प्रसिद्धमरिष्टं वै निश्चयेन अष्टादशविद्यास्थानेषु वृषो न वध्यत इति पश्चाद्भागे अष्टादशपदानि प्रत्यपोवाह यथा महान् छागं नयति तथा करणे सामर्थ्यं भगवानिति ज्ञाने च ननु भगवांश्चेत् स्वबलं प्रदर्शितवान् तदा कथं पुनरागत इत्याशङ्क्य विशेषतो न ज्ञापितवानिति वक्तुं दृष्टान्तमाह । गजः प्रतिगजं यथेति । तद्बलापेक्षया अल्पमेवाधिकं बलं प्रकटितवानित्यर्थः ॥ ११ ॥ न केवलं भगवता नीत एव तावत् दूरं किन्तु भूमौ त्यागसमये निः क्षिप्तः तादृशोऽपि पुनरागत इत्याह । सोऽपीति । महतो भूमौ पतितस्य गात्रभङ्गसम्भवात् कथमागत इत्याशङ्क्य भगवता विद्ध इति तथैव विद्धः यथा पुनः यतोऽयं वध्य एव अतः पुनरुत्थाय पूर्वापेक्षयापि सत्वरः आपतत् आगत एव भगवत्समीपम् अधुनायं मारणीय इति ज्ञापयितुं विशेषणद्वयमाह । स्विन्नानि सर्वाङ्गानि यस्य अनेन देहाभावार्थं मारणपर्यन्तं तेनैव प्रयत्नः कृत इति मारितो वा मारयित्वा वा निवर्त्तते नान्यथेति ज्ञापितं क्रोधेन मूर्च्छित इत्यन्तःकरणप्रवृत्तिरनिवर्त्या निरूपिता ॥ १२ ॥

श्रीसुबोधिनी-सारः

सख्युर्मित्रस्यांसे स्कंधोपरि भुजाभोगं बाहुसर्पं प्रसार्य हरिरवस्थितः एवमुक्तप्रकारेण कोपितोऽरिष्टः खुरेणावनिं पृथ्वीमुल्लिखन् विदारयन् उद्यता पुच्छेन भ्रमन्तो मेघा यस्मिन्स क्रुद्धः कृष्णमभ्यद्रवत् ॥ ९ ॥ अग्रे न्यस्ते कृते विषाणयोरग्रे येन स स्तब्धे उग्रे असृक्तुल्ये लोचने यस्य सोऽरिष्टः कटाक्षिप्य कटाक्षेणाच्युतं तिर्यङ् निरीक्ष्य कटकटाशब्दं कृत्वा कृष्णमाद्रवत् तूर्णं शीघ्रम् इन्द्रान्मुक्तोऽशर्निर्वज्रमिव ॥ १० ॥ तं चासुरं शृंगयोर्गृहीत्वा स भगवानष्टादशपदानि प्रत्यपोवाह विलोमं चालितवान् पृष्ठतोपसारयामास हस्ती प्रतिहस्तिनमिव ॥ ११ ॥ भगवताऽपविद्धोऽपक्षिप्तः सोऽसुरः सत्वरः पुनरुत्थाय स्विन्नानि स्वेदयुक्तानि सर्वाण्यंगानि यस्य स निःश्वसन् श्वासं मुंचन् क्रोधेन मूर्छितो व्याप्त आपतत् ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवमाक्षेपवचनेन कोपितः, अतः क्रुद्धः सोऽरिष्टोऽपि खुरेण अवनिमुल्लिखन् विदारयन् हन्तुं कृष्णमुपाद्रवत् आजगाम । तस्य महत्त्वं वेगातिशयं चाह-उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमन्तो मेघा यस्मिन् सः ॥ ९ ॥ आगमनप्रकारमाह-अग्रेति । अग्रे न्यस्ते विषाणाग्रे येन सः, स्तब्धे असृग्वद्रक्ते लोचने यस्यः सः, कटाक्षिप्य कटाक्षेण तिर्यङ् निराक्ष्य अच्युतं कृष्णं प्रति तूर्णं शीघ्रमाद्रवत् । तस्य वेगातिशयं सूचयन् दृष्टान्तमाह—इन्द्रेण मुक्तः अशनिर्वज्रं यथा गच्छेत्तथेति ॥ १० ॥ स भगवान् कृष्णः शृङ्गयोस्तं गृहीत्वा अष्टादश पदानि प्रत्यपोवाह प्रतिलोमं व्यनुदत् । तस्य प्रबलत्वं सूचयन् दृष्टान्तमाह—गजमिति । गजश्रेष्ठो यथा गजं प्रति नुदेत्तथेत्यर्थः ॥ ११ ॥ ततश्च सोऽरिष्टो भगवता अपविद्धः अपक्षिप्तः पुनः सत्वरः शीघ्रमुत्थाय आपतत् वेगेन कृष्णाभिमुखमाजगामेत्यन्वयः । तत्र हेतुः – क्रोधेन मूर्छितो व्याप्तः । तत्र लिङ्गमाह—स्विन्नानि स्वेदयुक्तानि सर्वाङ्गानि यस्य सः, निःश्वसन् श्वासानुच्चैर्मुञ्चन् ॥ १२ ॥

अन्वितार्थप्रकाशिका

सोऽपीति ॥ एवमाक्षेपवचनेन कोपितः अतः क्रुद्धः सोऽरिष्टोपि खुरेण अवनिमुल्लिखन् विदारयन् उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमन्तो मेघा येन सः अरिष्टः हन्तुं प्रहर्तुं कृष्णमुपाद्रवत् आजगाम ॥ ९ ॥ अग्रेति ॥ अग्रे न्यस्ते विषाणाग्रे येन सः स्तब्धे असृक्तुल्ये रक्ते लोचने यस्य सः कटा कटाक्षेण । इनभाव आर्षः । आक्षिप्य तिर्यङ् निरीक्ष्य इन्द्रेण मुक्तः अशनिर्वज्रं यथा आगच्छेत्तथा अच्युतं कृष्णं प्रति तूर्णं शीघ्रमाद्रवत् ॥ १० ॥ गृहीत्वेति ॥ स भगवान् तं शृङ्गयोर्गृहीत्वा गजश्रेष्ठो यथा गजं प्रति नुदेत् तथा अष्टादश पदानि प्रत्यपोवाह प्रतिलोमं व्यनुदत् ॥ ११ ॥ स इति ॥ ततश्च सोऽरिष्टो भगवता अपविद्धः

अपक्षिप्तः क्रोधेन मूर्च्छितो व्याप्तः अतः स्विन्नानि स्वेदयुक्तानि सर्वाङ्गानि यस्य सः निश्वसन् श्वासानुच्चैर्मुञ्चन् पुनः सत्वरः शीघ्रमुत्थाय आपतत् वेगेन कृष्णाभिमुखमाजगाम् ।। १२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अवनिं महीं उद्यता उच्चैः कृतेन पुच्छेन भ्रमन्त इतस्ततश्चलन्तो मेघाः यस्मात् सः ।।९।। अग्रेति अग्नेन्यस्तौ विषाणयोः शृङ्गयोः अग्रे अग्रभागौ येन सः स्तब्धे स्थिरेऽसृक्लोचने रक्तनेत्रे यस्य सः कटाकटाक्षेण आक्षिप्य वक्रं दृष्ट्वा अशनि वज्रं ।।१०।। प्रत्यपोवाह् प्रतिलोमं नोदयामास ।। ११ ।। अपविद्धः प्रतिलोमक्षेपणेन तिरस्कृतः पुनः आपतत् आगच्छत् स कथंभूतः स्विन्नानि स्वेदविशिष्टानि सर्वांगानि यस्य सः क्रोधेन मूर्छितो व्याकुलः ।। १२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सोऽपीति ।। ततः सोऽरिष्टोऽपि, एवमित्थं, कुपितः, खुरेण अवनिं भूमिं, उल्लिखन्, उद्यदुच्छ्रितं पुच्छं लाङ्गूलं तेन भ्रमन्तो मेघा यस्य सः, यद्वा । उद्यतोर्द्धं गच्छता पुच्छेन भ्रमन्तः चलन्तो मेघा यस्मिन् सः, यद्वा । उद्यताः ऊद्ध्र्वं गताः पुच्छेन भ्रमन्तो मेघाः यस्मात्सः, क्रुद्धः सन्, कृष्णं उपाद्रवत् ।। ९ ।। तदेवाह ।। अग्रेति ।। अग्रे न्यस्ते विषाणाग्रे येन सः, स्तब्धे स्थिरतोपेते असृग्लोचने रक्तवर्णे नेत्रे यस्य सः, कटाक्षप्य कटाक्षेण तिर्यङ्निरीक्ष्य, यथा इन्द्रेण मुक्तः, अशनिर्वज्रस्तद्वत्, तूर्णं अच्युतं श्रीकुष्णं प्रति, अद्रवत् समीपमगात् ।। १० ।। ततः श्रीकृष्णः किं कृतवांस्तदाह ।। गृहीत्वेति ।। तदा सोऽच्युतः, भगवान् कृष्णः, तं वा तथाभूतमेवारिष्टं, शृङ्गयोः गृहीत्वा, अष्टादश पदानि, प्रत्यपोवाह् प्रतिलोमं व्यनुदत् । कथमिव । गजः प्रतिगजं, यथा ।। ११ ।। स इति ।। ततः, सोऽरिष्टः, भगवता अपविद्धः अपक्षिप्तः प्रतिगमनेन पातित इति यावत् । तथापि, सत्वरः पुनः उत्थाय, स्विन्नानि प्रस्वेदयुक्तानि सर्वाण्यङ्गानि यस्य सः, क्रोधेन मूर्च्छितः परवशः, निःश्वसन् श्वासं मुञ्चन् सन्, आपतत् पुनः श्रीकृष्णं प्रत्याद्रवदित्यर्थः ।। १२ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सख्युरसे इति : १०.३६.९.

धर्मस्कन्धा धर्मरूप इम एव मता मम । न त्वं वृषेति मित्रांसार्पितबाहुरबोधयत् ।। १८ ।।
विभौ स्वशरणागतोद्धृतिमहे त्वमेहीति सद्वचस्यभिमुखं स्थितेऽपि च पुरस्कृतोरस्थले ।
मदाकुलविलोचनो यदयमभ्यधावद्रुषा स एष महिमा क्रुधो निखिललोकसिद्धोऽवनौ ।। १९ ।।

अग्रन्यस्तेति : १०.३६.१०.

रजस्तमःपुरस्कृतिं विना न रुष्टमन्तरम् । भवेदिहेशमित्यगात् पुरस्कृतस्वशृङ्गकः ।। २० ।।
कथमाकारयत्येष वीरं मां मन्दशब्दतः । इति रोषाद् वृषोऽधावदमन्दमशनिस्थितः ।। २१ ।।
तस्मिन्नुपगते सोऽभूदचलस्थितिभागिति । मुन्युक्ताऽस्योपमा युक्ता फलतः सा परं मुधा ।। २२ ।।
यादृक् शस्त्रास्त्रवान् स्याद्रिपुरिह समितौ स्वेन भाव्यं तथैवेत्यालोच्यैवाजिधर्मं रिपुमपि समदि प्रेक्ष्य शृङ्गैकशस्त्रम् ।
मन्ये श्रीशस्तदानीं रणरसिकजन-स्तूयमानप्रतापोद्दृष्टाऽरिष्टासुरेण व्रजभुवि युयुधे प्रोल्लसद्बाहुदृश्टङ्गः ।। २३ ।।

गृहीत्वेति : १०.३६.११.

येन यस्य बलं भूरि निग्राह्यं तस्य तत्पुरा । धीमतेति विचिन्त्येशो युक्तं जग्राह शृङ्गयोः ।। २४ ।।
अष्टादशस्मृति–पुराणमयानि धर्म्याण्यस्मिन् पदानि किल यानि मदीक्षितानि ।
तेभ्यो बहिष्कृतगतिस्त्वयघात्मा तावत्पदै-स्तदपवाहनतो ऽन्वबोधि ।। २५ ।।
षोडशपदोपलक्षित-सप्तदशाभिधपदं तु जीवित्वम् । तद्रहितममुं कर्ताऽस्मीति च किमबोधयत्तथा कृतितः ।। २६ ।।
मत्प्राप्त्युपायसारार्था विद्या अष्टादश स्मृताः नैकस्यामप्यधिकृतिरस्येत्यैशो–ऽथवाऽऽशयः ।। २७ ।।
पुरस्कृत-रजस्तमःप्रकृतिरत्र यः स्यादसौ न जातुचिदपि स्मृतिष्वधिकृतिं पुराणेषु वा ।
लभेत वृषभासुरोऽप्यधिगतोपदेशोऽपि वेत्यबोधि विभुना तथापसृतितस्तदा तादृशः ।। २८ ।।

सोऽपविद्ध इति : १०.३६.१२.

योऽष्टादश–बहिर्भूतो मया चाप्यवमानितः । वृषः स पुनरुत्क्रान्तोऽप्यफलः स्यान्मदाप्तितः ।। २९ ।।

कृष्णप्रिया

भगवान् श्रीहरि अपने एक सखा के कन्धे पर मजबूत हस्त को फैलाकर खड़े थे । इस प्रकार भगवान् कृष्ण से उत्तेजित एवं कुपित किया गया वह वृषभासुर खुरों से अवनी को खोदता और पूंछ को उपर उठाकर मेघ को गोला घूमाता

कुपित होकर भगवान् श्रीकृष्ण की ओर वेग से बैठा ॥ ९ ॥ अरिष्टासुर ने अपने तीखी सींगो की तीखी नोंक को आगे किए स्थिर और अतिशय लाल लोचने निकालने एवं अच्युत भगवान् श्रीकृष्ण पर टेढी दृष्टि डालता हुआ, राजा इन्द्र के हस्त से फेंके गए वज्र की नाँई तीव्र वेग से अरिष्टासुर आगे बढ़ा ॥ १० ॥ राजन् ! जैसे अरिष्टासुर भगवान् के सन्मुख झपटा भगवान् ने अरिष्ट को दोनों सींग को पकड़ कर जैसे कोई मदोन्मत गज अपने से भिड़ने आए दूसरे मत्त गज को रेल के पीछे धकेल देता है वैसे ही अरिष्ट को अठारह पेड पीछे धकेल दिया। अठारह स्थानों में बैल नहीं मारा जाता है ऐसी धर्म व्यवस्था के मर्मज्ञ भगवान् ने अरिष्ट को अठारह पेड पीछे धकेला ॥ ११ ॥ भगवान् ने सामान्य शक्ति का उपयोग करके दया से अरिष्ट को कुछ ही दूर धकेला था लेकिन वह क्षुद्र अरिष्ट पुनः सम्हल कर झपटा। अरिष्ट के देह पर पसीना पसीना हो गया था फिर भी (जड़) अरिष्टासुर पुनः लम्बी लम्बी सांस छोड़ता हुआ क्रोध विमूर्च्छित होकर प्रभु के सामने दौड़ा ॥ १२ ॥

तमापतन्तं स निगृह्य शृङ्गयोः पदा समाक्रम्य निपात्य भूतले।
निष्पीडयामास यथाऽऽर्द्रमम्बरं कृत्वा विषाणेन जघान सोऽपतत् ॥ १३ ॥
असृग् वमन् मूत्रशकृत् समुत्सृजन् क्षिपंश्च [1]पादाननवस्थितेक्षणः।
जगाम कृच्छ्रं निर्ऋतेरथ क्षयं पुष्पैः किरन्तो हरिमीडिरे सुराः ॥ १४ ॥
एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः। [2]विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः ॥ १५ ॥
अरिष्टे निहते [3]दैत्ये कृष्णेनाद्भुतकर्मणा। [4]कंसायाथाह भगवान् नारदो देवदर्शनः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—सः, कृष्णः. आपतन्तम्, तम्, शृङ्गयोः, गृहीत्वा, भूतले, निपात्य, पदा, समाक्रम्य, यथा आर्द्रम्, अम्बरम् (तथा तम्) कृत्वा, निष्पीडयामास, विषाणाग्रेण जघान, सः, अपतत् ॥ १३ ॥ अनवस्थितेक्षणः, सः, असृग्, वमन्, मूत्रशकृत्, समुत्सृजन् च पादान्, क्षिपन्, कृच्छ्रम्, (महता कष्टेन) निर्ऋतेः, क्षयम्, (लोकम्) जगाम, अथ, सुराः, पुष्पैः, किरन्तः, हरिम् ईडिरे ॥ १४ ॥ एवम्, कुकुदमिनम्, हत्वा, स्वाज्ञातिभिः, स्तूयमानः, गोपीनाम्, नयनोत्सवः, सबलः (कृष्णः) गोष्ठम्, विवेश ॥ १५ ॥ अद्भुतकर्मणा, कृष्णेन, अरिष्टे, दैत्ये, निहते, अथ, देवदर्शनः, भगवान्, नारदः, कंसाय, आह ॥१६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृत्वा उत्कृत्य विषाणमुत्पाट्य तेनैव जघान स चापतत् ॥ १३ ॥ मूत्रं च शकृच्च मूत्रशकृत्। एकवद्भावः। तदुभयं समुत्सृजन्नित्यर्थः। पादांश्च क्षिपन्नितस्ततश्चालयन् अनवस्थितेक्षणः प्रचलितनेत्रः। कृच्छ्रं कष्टं जगाम। अथ निर्ऋतेर्मृत्योः क्षयं निवासं जगाम। कृच्छ्रं यथा भवति तथा मृत इति वा ॥ १४ ॥ नयनोत्सवो नयनानांमूर्तिमानुत्सवः ॥ १५ ॥ कामं व्रजे वसन्तं तं कृष्णं तेन तु विस्मृतम्। नारदः स्मारयामास कंसं दूतगिरेव तु ॥ १ ॥ तदाह। अरिष्ट इति। देवदर्शनो देवर्षिः। यद्वा एवं कथिते एवं भविष्यतीति साक्षाद्देवदर्शनं ज्ञानं यस्य सः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तम् असुरम्। सः कृष्णः। अम्बरम् वस्त्रम्। कृत्वा 'कृती–छेदने'। विषाणमिति शेषः। सः आसुरः ॥ १३ ॥ इत्यर्थ इति–अतिपीडितस्य मलमूत्रे निःसृते इति तात्पर्यम्। निर्गता ऋतिः कल्याणं निंदा वा यस्मात्स निर्ऋतिः "ऋतिः कल्याणवर्त्मनोः। जुगुप्सास्पर्धयोः स्त्री स्यात्" इति मेदिनी। "निर्ऋतिः स्यादलक्ष्म्यां स्त्री दिगीशाऽद्य मृत्युषु" इति धरणिः। "क्षयो रोगांतरे वेश्मकल्पान्तापचयेषु च" इति मेदिनी। कर्मद्वयापेक्षया क्रियाविशेषणे लाघवं मत्वाह—कृच्छ्रं यथेति। निर्ऋतेः क्षयं जगामेति मुनींद्रस्य कोपोक्तिरेव। वस्तुतस्तु—'ये च प्रलंबखरदर्दुरकेश्यरिष्ट–' इत्यादावस्यापि मोक्षश्रवणान्निर्ऋतेर्मृत्योर्हेतोः क्षयं भगवन्निवासं गत इत्येवार्थः। विश्वनाथस्तु—निर्ऋतेर्मृत्योः सकाशात् क्षयं वधं जगाम। निर्ऋतिरेवागत्य तं जघान न तु कृष्ण इत्युत्प्रेक्षते। स तु सद्यो मुक्तिमापेत्याह ॥ १४ ॥ एवम् शृङ्गताडनादिना। ककुद्मिनम् वृषासुरम्। निपातनात्ककुदोग्मिनिप्रत्ययः। स्वजातिभिर्देवैर्गोपैर्वा। जातिभिर्गोपैस्तेषामेवांतरंगत्वात्। सबल इत्यरिष्टवधेऽनुजस्नेहेन स्वक्रीडातस्तस्याप्यागमनात्। अत्र यद्धरिवंशे—"स चोपेंद्रो वृषं हत्वा कान्तचंद्रे निशामुखे। अरविंदाभनयनः पुनरेव रराम ह ॥" इति। तत्र गोष्ठप्रवेशानंतरं पुनर्निर्गम्येति ज्ञेयमिति भगवतस्तत्र रागविशेषो दर्शितः। यच्चोक्तमादिवाराहे श्रीगोवर्द्धनपरिक्रमे—"गंगायाश्चोत्तरं गत्वा देवदेवस्य

---

[1] पादाननिमीलितेक्षणः–विज.। [2] विवेश भगवान् गोष्ठं–विज.। [3] गोष्ठे–वीर. विज.। [4] कंसाय प्राह–वीर. विज.।

चक्रिणः। अरिष्टेन समं यत्र महद्युद्धं प्रवर्तितम् ॥ घातयित्वा ततस्तस्मिन्नरिष्टं वृषरूपिणम्। कोपेन पाणिघातेन मह्यास्तीर्थं प्रकल्पितम् ॥ वृषभस्य वधो ज्ञेय आत्मनः शुद्धिमिच्छता। स्नातस्तत्र तदा कृष्णो वृषं हत्वा सगोपकः ॥ राधां विपाप्मा प्रोवाच कथं भद्रे भविष्यसि। वृषो हतो मया चायमरिष्टः पापसूचकः ॥ तत्र राधा समाश्लिष्य कृष्णमक्लिष्टकारिणम्। स्वनाम्ना विदितं कुंडं कृतं तीर्थमदूरतः ॥ राधाकुंडमिति ख्यातं सर्वपापहरं शुभम्। अरिष्टराधाकुंडाभ्यां स्नानात्फलमवाप्नुते ॥ राजसूयाश्वमेधाभ्यां नात्र कार्या विचारणा। गोहत्या ब्रह्महत्या च पापं क्षिप्रं प्रणश्यति ॥" तत्र—गंगायाः मानसगंगायाः, चक्रिणः करचरणादिगतचक्रादिमहाभगवल्लक्षणस्य देवदेवस्य दिव्यातिदिव्यमहैश्वर्यमाधुर्यस्य श्रीकृष्णस्येत्यर्थः। यत्र महद्युद्धं प्रवर्तितं प्रवृत्तम्। घातयित्वा कोपेन गोष्ठोपद्रवहेतुककोपविशेषेण यः पार्ष्णिघातस्तेन। पृथिव्याः तद्युद्धप्रपंचशुश्रूषामाशंक्याह—वृषभस्येति। मम तल्लीलाकथनावेशे सति तीर्थमाहात्म्यकथनं न स्यादिति भावः। वृषानुकर्तृवधात् शुद्धिं तदनुकरणमिच्छता इच्छन्नित्यर्थः। महातीर्थमिदं पातालात्समुत्थितमिति व्याजेन स्वतीर्थमहिमदर्शनाय तत्र स्नातस्य। तदेवं स्नानानन्तरं मूलानुसारेण गोष्ठं प्रविश्य द्वित्रिदण्डान्स्थित्वा श्रीहरिवंशानुसारेण पुनरपि रासाय वेणुवाद्यादिसंकेतेन राधादिभिः सह हतारिष्टे रासवर्त्मनि तत्र सर्वाभ्यः पृथग्गतस्य तां प्रति स नर्मवचनमाह—विपाप्मेति। तत्परिहासाशंकया विपाप्मत्वं व्यंजयन्नित्यर्थः। मम तावत्पापं नोत्पन्नमेव प्रत्युत तीर्थनिर्माणपुण्येन कृतकृत्यः सिद्धसर्वार्थोऽभूवमेतादृशतीर्थनिर्माणाभावात्त्वं कथं भद्रे पुण्यविषये भविष्यसीत्यर्थः। विपाप्मत्वमेव व्यंजयति—वृषो वृषाकारमात्रोऽरिष्टनामा पापसूचकः सुदुश्चारित्रेण निजपापत्वेनासुरत्वमेव यो व्यंजयतीत्यर्थः। लब्धचिंतायाः श्रीराधायास्तु तन्मेलने स्नेह एवोदितवानित्याह—तत्रेति। तत्प्रसंगे समाश्लिष्य स्वाभाविकीं लज्जामपि त्यजन्ती सम्यगालिंग्य ततस्तत्सौहार्देन स्वयमपि तत्र कुण्डं कृतवतीत्याह—स्वनाम्नेति। राधेति राधयेत्यर्थः। स्वयमिति ज्ञेयम्। स्वयं कर्त्रीकत्वेनैव तत्कुंडतुल्यताप्राप्तेः सखीलक्षसहायत्वात्कुण्डस्य स्वल्पप्रमाणत्वाच्च। अत एव समाश्लिष्य कृतमिति तदैव करणं बोध्यते। तच्चारिष्टखुरचूर्णितबहलमृदपसारणया प्रथममीषदेव पश्चात्तु विशालतेति ज्ञेयम्। अदूरतस्तत्कुण्डयुग्मतयेत्यर्थः। अधुनापि तथा श्रीगोवर्धनेशानकोणांते दृश्यत इति ॥ १५ ॥ कामम् स्वेच्छया। यद्वा—कस्य कंसस्यामं रोगवत्तन्नाशकम्। तेन कंसेन। दूतस्य गिरेव न तु स दूत इतीवेन ज्ञायते। 'कृतांतोऽनंतमस्मृतिम्' इति पाठे कृतांतः कालाऽप्यूनो हीनो यस्मात्तम्। पाठा० अनंतमियत्ताशून्यम्। किं भूतं कंसम्—न स्मृतिर्व्यवहाराकुलत्वाद्यस्य स तथा तमित्यर्थः (१)। कथान्तरद्योतनायायं श्लोकः। तत् नारदवृत्तम्। अथ अरिष्टहननोत्तरम्। पश्यति सर्वमिति दर्शनः, देवश्चासौ दर्शनश्चेति देवदर्शन इत्यभिप्रेत्यैव स्वामिचरणैरुक्तम्—देवर्षिरिति। देवर्षित्वे तु कर्दमादिवत्तपोज्ञानादिनिष्ठत्वमेवायाति न तु देवकार्यसाधकत्वमत आह—यद्वेति। देवानामिंद्रादीनामिव दर्शनमतींद्रियं ज्ञानं यस्येति। यद्वा—देवस्य हरेर्दर्शनं यस्य। देवं हरिं दर्शयतीति वा। देवानां दर्शनं मतं यस्येति वा। एतेन नारदस्य देवकार्यसाधकत्वं ज्ञायते, न त्वसुरकार्यकर्तृत्वमिति। अरिष्ट इति। निहत इत्यतीतनिर्देशादत्र चिरादिति ज्ञेयम्। गोवर्धनगतरासस्य वसंतमध्योद्भवत्वेन कंसवधस्य तु शिवरात्रिचतुर्दशीगतत्वेन प्रसिद्धेः। गोष्ठे विषयेऽद्भुतकर्मणेति पूतनावधाद्यरिष्टवधांताद्भुतकर्मणा कंसं प्रति श्रीनारदेन कथनस्याभिप्रायेण देवदर्शन इति तैर्व्याख्यातम्। अत्र प्रथमेऽर्थे पश्यतीति दर्शनो मंत्रदर्शीति ऋषिवाचिता, द्वितीये प्रतिकल्पमेव गोकुले प्रकटलीलेयं यादवपांडवादिभक्तगणरक्षानुरोधेनैव तावदेव नरलीलेन भगवता क्रियते नाधिकेति सा समाप्तैव। संप्रति यादवाः परमदुःखिनो देवाश्चोद्विग्ना अतः श्रीभगवता कंसवधस्याविलम्बकार्यत्वं ज्ञातं, तस्मादवसरोऽयमिति तथा कथयामि यथा कंसस्तमत्रानयेत् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अधुना दुष्टस्य तस्य वधं हर्षेण गायन्निवाह। तमिति द्वाभ्याम्। कृत्त्वा विषाणमुत्पाट्य। तथा च श्रीविष्णुपुराणे। उत्पाट्य शृङ्गमेकञ्च तेनाताडयत्तथा इति। श्रीहरिवंशे च। शृङ्गञ्चास्य पुनः सव्यमुत्पाट्य यमदण्डवत्। तेनैव प्राहरद्वक्त्रं स ममार वृषो हत इति। अपतत् मृतः ॥ १३ ॥ तत्प्रकारमेवाह। असृगिति। सम्यगुत्सृजन् मुञ्चन्निति किञ्चित् किञ्चिच्छकृन्मुञ्चन्निति पूर्वोक्तात् विशेषार्थः। निर्ऋतेः क्षयं जगामेति श्रीमुनीन्द्रस्य क्रोधमयमेव वचनम्। वस्तुतस्तु ये च प्रलम्बखरदर्दुरकेश्यरिष्टेत्यादावस्यापि मोक्षश्रवणात्। विर्ऋतेर्मृत्योर्हेतोः क्षयं भगवन्निवासं गत इत्येवार्थः। अथ तन्मरणानन्तरमेव सुरा ईडिरे इति तद्भयेन सद्यस्तेषां तत्राशक्तेः ॥ १४ ॥ स्वजातिभिर्गोपैरिति तेषामेवान्तरङ्गत्वं विवक्षितम्। सवल इत्यरिष्टवधेऽनुजस्नेहेन स्वक्रीडातस्तस्याप्यागमनात्। नयनोत्सव इति। स्वाभाविकत्वमुक्तं तदानीन्तु महाशत्रुं मारयित्वागतस्य तस्य वैशिष्ट्यं बोधयति। अत्र यदुक्तं श्रीहरिवंशे स चोपेन्द्रो वृषं हत्वा कान्तचन्द्रे निशामुखे। अरविन्दाभनयनः पुनरेव ररामहेति तत्र गोष्ठप्रवेशानन्तरं पुनर्निर्गम्येति ज्ञेयम् इति श्रीभगवतस्तत्र रागाविशेषो दर्शितः यच्चोक्तम् आदिवाराहे श्रीगोवर्द्धनपरिक्रमे—

गङ्गायाश्चोत्तरं गत्वा देवदेवस्य चक्रिणः। अरिष्टेन समं यत्र महद्युद्धं प्रवर्त्तितम् ॥
घातयित्वा ततस्तस्मिन्नरिष्टं वृषरूपिणम्। कोपेन पार्ष्णिघातेन मह्यास्तीर्थं प्रकल्पितम् ॥
वृषभस्य वधो ज्ञेय आत्मनः शुद्धिमिच्छता। स्नातस्तत्र तदा कृष्णो वृषं हत्वा सगोपकः ॥
विपाप्मा राधां प्रोवाच कथं भद्रे भविष्यसि। वृषो हतो मया चायमरिष्टः पापसूचकः ॥

तत्र राधा समाश्लिष्य कृष्णमक्लिष्टकारिणम् । स्वनाम्ना विदितं कुण्डं कृतं तीर्थमदूरतः ॥
राधाकुण्डमिति ख्यातं सर्वपापहरं शुभम् । अरिष्टराधाकुण्डाभ्यां स्नानात् फलमवाप्नुते ॥
राजसूयाश्वमेधाभ्यां नात्र कार्या विचारणा । गोहत्या ब्रह्महत्या च पापं क्षिप्रं प्रणश्यतीति ॥

तत्रायमर्थः । गङ्गाया मानसगङ्गायाः चक्रिणः करचरणादिगत तदादि महाभगवल्लक्षणस्य देवदेवस्य दिव्यातिदिव्यैश्वर्यमाधुर्यस्य श्रीकृष्णस्येत्यर्थः । यत्र महद्युद्धं प्रवर्त्तितं प्रवृत्तम् । घातयित्वा कोपेन गोष्ठोपद्रवहेतुककोपविशेषेण यः पार्ष्णिघातस्तेन पृथिव्यास्तद्युद्धप्रपञ्च शुश्रूषामाशङ्क्याह वृषभस्येति मम तल्लीलाकथनोवेश सति तीर्थमाहात्म्यकथनं न स्यादिति भावः । वृषानुकर्तृवधात् शुद्धिं तदनुकरणमिच्छता इच्छन्नित्यर्थः । महातीर्थमिदं पातालात् समुत्थितमिति व्याजेन स्वतीर्थमहिमदर्शनाय तत्र तत्र स्नातश्च तदेवं स्नानानन्तरं मूलानुसारेण गोष्ठं प्रविश्य द्वित्रिदण्डान् स्थित्वा श्रीहरिवंशानुसारेण पुनरपि रासाय वेणुवाद्यादिसङ्केतेन श्रीराधिकादिभिः सह हतारिष्टे रासवर्त्मनि तत्र सर्वाभ्यः पृथक् गतस्य तां प्रति सनर्मवचनमाह विपाप्मेति । तत्परिहासाशङ्कया विपाप्मत्वं व्यञ्जयन्नित्यर्थः । मम तावत् पापं नोत्पन्नमेव प्रत्युत तीर्थनिर्माणपुण्येन कृतकृत्यः सिद्धसर्वार्थोऽभूवम् । एतादृश तीर्थनिर्माणाभावात् त्वं कथं भद्रे पुण्यविषये भविष्यसीत्यर्थः । विपाप्मत्वमेव व्यञ्जयति वृषो वृषाकारमात्रोऽरिष्टनामा पापसूचकः सुदुश्चारित्रेण निजपापत्वेनासुरत्वमेव यो व्यञ्जयतीत्यर्थः । लब्धचिन्तायाः श्रीराधायास्तु तन्मिलने स्नेह एवोदितवानित्याह–तत्रेति । तत्प्रसङ्गे समाश्लिष्य स्वाभाविकीं लज्जामपि त्यजन्ती सम्यगालिङ्ग्य पतस्तत्सौहार्देन स्वयमपि तत्र कुण्डं कृतवतीत्याह स्वनाम्नेति राधेति राधयेत्यर्थः । स्वयमिति ज्ञेयम् । स्वयं कर्त्राकर्तृत्वेनैव तत्कुण्डतुल्यता प्राप्तेः । सखीलक्षसहायत्वात् कुण्डस्य स्वल्पप्रमाणत्वाच्च । अत एव समाश्लिष्य कृतमिति तदैव कारणं बोध्यते । तच्चारिष्टखुरचूर्णितबहुलमृदपसारणया प्रथममीषदेव पश्चात्तु विशेषत इति ज्ञेयम् । अदूरतस्तत्कुण्डयुग्मतयेत्यर्थः । अधुनापि तथा श्रीगोवर्द्धनेशानकोणान्ते दृश्यत इति ।१५।
प्रकृतमनुसरामः अरिष्ट इति सार्द्धद्वयकम् । निहत इत्यतीतनिर्देशादत्र चिरादिति ज्ञेयं गोवर्द्धनगतरासस्यास्य वसन्तमध्योद्भवत्वेन कंसवधस्य तु शिवरात्रिचतुर्दशीगतत्वेन प्रसिद्धेः गोष्टे विषयेऽद्भुतकर्मणेति पूयनावधाद्यरिष्टवधान्तद्भुतकर्मणा कंसं प्रति श्रीनारदेन कथनस्याभिप्रायेण । देवदर्शन इति तैर्व्याख्यातम् अत्र प्रथमार्थे पश्यतीति दर्शनो मन्त्रदर्शीति ऋषिवाचिता । द्वितीये प्रतिकल्पमेव गोकुले प्रकटलीलेयं यादवपाण्डवादिभक्तगणरक्षानुरोधेनैव तावदेव नरलीलेन श्रीभगवता क्रियते नाधिकेति सा समाप्तैव । संप्रति यादवाः परमदुःखिनो देवाश्चोद्विग्नाः अतः श्रीभगवता कंसवधस्याविलम्बकार्यत्वं जातम् । तस्मात्तदवसरोऽयमिति तथा कथयामि यथा कंसस्तमत्रानयेत् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना दुष्टस्य तस्य वधं हर्षेण गायन्निवाह—तमिति द्वाभ्याम् । कृत्त्वा विषाणमुत्पाट्य; तथा च श्रीविष्णुपुराणे (५।१४।१२)—"उत्पाट्य शृंगमेकञ्च तेनैवाताडयत्ततः" इति, श्रीहरिवंशे च (विष्णु० प० २१।२१)—'शृंगञ्चास्य पुनः सव्यमुत्पाट्य यमदण्डवत् । तेनैव प्राहरद्वक्त्रे स समार वृषो हतः ॥' इति । अपतत् मृतः ॥ १३ ॥ तत्प्रकारमेवाह—असृगिति, सम्यगुत्सृजन् मुञ्चन्निति किञ्चित् किञ्चिच्छकृन्मुञ्चन्निति पूर्व्वोक्ताद्विशेषार्थम् । अथ तन्मरणानन्तरमेव सुरा ईडिरे इति तद्भयेन सद्यस्तेषां तत्राशक्तेः ॥ १४ ॥ स्वजातिभिर्गोपैरिति, वेदस्तवादपि तेषां स्तवने सन्तुष्टिरभिप्रेता, गोष्ठं विवेशेत्यनेन गोष्ठाद्बहिररिष्टवधार्थं किञ्चिदग्रेऽभिगत इति । अतश्च 'अरिष्टो गोष्ठमागतः' इति गोष्ठान्तिकमागच्छदिति ज्ञेयम् । किं वा कण्टकल्पनया अन्तः प्राविशदित्यर्थः । सबल इत्यरिष्टवधेऽनुजस्नेहात्तेन सहैवावस्थानात् नयनोत्सव इति तद्दर्शनं विना तासां कथमपि सुखलेशस्याप्यनुदयात्, अतोऽरिष्टवधार्थं गतस्य तस्यादर्शनात् परमं दुःखं तद्वधानन्तरमागमनाच्च परमसुखमिति सूचितम् । यद्वा, अरिष्टवधेन परमप्रीत्या दर्शनविशेषान्नयनोत्सव इति । एवं तद्रात्रावपि रासक्रीडा सिद्धेति गम्यते । तथा चोक्तं श्रीवैशम्पायनेन (हरिवंशे विष्णु-प० २१।२४)—'स चोपेन्द्रो वृषं हत्वा कान्तचन्द्रे निशामुखे । अरविन्दामनयनः पुनरेव रराम ह ॥' इति ततश्च श्रीवार्ष्णि प्रहाराज्जलोद्गमेनारिष्टकुण्डं नाम कुण्डमेकं जातम् । पश्चाद्वृषभवधतः श्रीराधादेव्या कृतेन नमणा तत्सन्तोषार्थं कुण्डमन्यज्जगत्सेव्यं तया निष्पादितम्, श्रीभगवता च तन्नाम्ना ख्यापितमिति विशेषः श्रीवराहपुराणाद्विज्ञयः । तत् कुण्डद्वयं चाधुनापि श्रीगोवर्द्धनपूर्व्वप्रान्ते विराजते ॥ १५ ॥ गोष्ठे विषये, अद्भुतकर्म्मणेति तादृशलीलया तद्धननात्, यद्वा, अद्भुतानि कर्म्माणि पूतनावधादीनि यस्य, तेनेति तत्तत्कर्म्मणो कंसं प्रति श्रीनारदेन कथनस्याभिप्रायेण । अथ अरिष्टहननानन्तरमेवेत्यर्थः, पूर्ववद्वा, देवदर्शन इत्यधुना प्रायोऽभिव्यक्ततया गोकुललीलाः समाप्ताः, यादवाः परमदुःखिनो देवाश्चोद्विग्नाः, अतः कंसोऽवश्यमेव वध्यः, तदवसरश्चायं जातः, तत्तथा करोमि, यथा कंसः श्रीकृष्णमत्रानयेत्, ततश्चेमं स्वयमसौ हनिष्यतीति विचार्य्येत्यर्थः । तत्र हेतुः–भगवान् सर्वज्ञ इति । यद्वा, ननु भक्तिरसिकोऽसौ श्रीगोकुलवासिनामेवं दुःखं कर्तुं नार्हतीत्याशक्याह—भगवान् भगवदवतारत्वात् परमभक्तत्वेन तत्साहश्याद्वा । अनेन व्रजे नित्यविहारं सर्व्वगोप्यमपि जानात्येवेत्यर्थः । अतस्तं प्रत्यसूया नोपयुक्तेति भावः । यद्वा देवानेव पश्यति स्वीयतयेति तथा सः, देवर्षित्वाद्देव प्रयोजनसिद्धये तथाकरोदित्यर्थः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स भगवान्पुनरागतं तमरिष्टं शृङ्गयोर्गृहीत्वा स्वचरणेन समाक्रम्यावष्टभ्य भूतले निपात्य यथार्द्रमम्बरं वस्त्रं तद्वन्निष्पीडयायास ततः कृत्त्वा कृती छेदने उत्पाटच विषाणमिति शेषः तेन विषाणेन जघान ताडयामास, सच ताडितोऽरिष्ट आपतत् ॥१३॥ मूत्रे शकृच्च तयोः समाहारः तदुत्सृजन्नसृग्रुधिरं वमन्नुद्गिरन् पादान् क्षिपन्नितस्ततश्चालयन्ननवस्थितेक्षणः प्रचलितनेत्रश्च कृच्छ्रं कष्टं प्राणोत्क्रमणात्मकं जगाम। अथ निर्ऋतेर्मृत्योः क्षयं निवासञ्च जगाम। ततः पुष्पैः किरन्तो हरिं तुष्टुवुः ॥ १४ ॥ इत्थं ककुद्मिनमरिष्टं हत्वा भगवान् स्वजातिभिर्गोपैः स्तूयमानः गोपीनां नयनानां मूर्त्तिमानुत्सवः स रामो गोष्ठ विवेश ॥ १५ ॥ इत्थं गोष्ठेऽद्भुतकर्मणा कृष्णेनारिष्टे हत सति देवदर्शनो देवर्षिर्नारदः, यद्वा एवङ्कथिते एवं विष्यतीति साक्षाद्देवचेष्टिताभिज्ञः कंसालयं गतस्तं प्राह ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अम्बरं वस्त्रं कृत्त्वा उत्कृष्य विषाणमिति शेषः तेन विषाणेन ॥ १३ ॥ मूत्रशकृती अनिमीलितेक्षणः विवृतनेत्र-निर्गता ऋतिर्यस्मात्स तथा निर्ऋतिर्यमः तस्य क्षयं गृहं यमलोकमित्यर्थः ॥ १४ ॥ ककुद्मिनं वृषासुरं स्वजातिभिः गोपैर्देवैर्वा ॥ १५ ॥ देवो नारायणः तद्विषयं दर्शनं ज्ञानं यस्य स तथा, यद्वा देवं दर्शयतीन्द्रियत्वात्स, यद्वा देवानामिव दर्शनं यस्यातीन्द्रियत्वात्स तथा देवानां यद्दर्शनं मतं तदेव यस्य दर्शनं स तथेति वा यथा कंसहननं शीघ्रतमं स्यात्तथाहेति द्योतनार्थः प्रेत्युपसर्गः अनेन देवकार्यमेव नारदेन साध्यते नत्वसुरकार्यमिति ज्ञायते ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

विवेश गोष्ठं सबलो गोपीनां नयनोत्सव इत्यत्रोत्सव इति करिष्यमाणपरिहास सूचकम्। यदास्माकमभ्यर्णे समायाति, तदा मास्मान् स्प्राक्षीर्यतोऽयं वृषो अतस्त्वयेति। नयनस्फारतादिना तथाविधोत्सवो जात इति भावः ॥ १–४० ॥

इति श्रीदशमे स्कन्धे श्रीबृहत्क्रमसन्दर्भे षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

गोपीनां नयनोत्सव इति चक्षुः स्फारतादिना परिहसनीयोऽहमधुना यदास्मान् प्रष्टुमायाति, तदा न दास्यामः प्रष्टुमित्याशयसंसूचनार्थमुत्सवपदम् ॥ १–४० ॥

इति षट्त्रिंशोऽध्यायः ॥ ३६ ।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शृङ्गयोर्निगृह्य नितरां गृहीत्वा आर्द्रमम्बरं कृत्वा यथा कश्चिन्निष्पीडयामास ततश्च विषाणेन उत्पाटितेन तं जघान ॥१३॥ कृच्छ्रं कष्टं जगाम प्राप अथ निर्ऋतेर्मृत्योः सकाशात् क्षयं वधं जगाम निर्ऋतिरेवागत्य तं जघान नतु कृष्ण इत्युत्प्रेक्षा सतु सद्यो मुक्तिं प्राप पुष्पैः पुष्पाणि किरन्तः ॥ १४ ॥ अरिष्टवधान्ते राधाकृष्णयोर्नर्मसंलापमयी तत् कुण्डद्वयोत्पत्तिकथा पौराणिकी विंशत्या श्लोकैर्निबध्यते। यथा—

"मास्मान् स्पृशाद्य वृषभार्दन हन्त मुग्धा घोरोऽसुरोऽयमयि कृष्ण तदप्ययं गौः।
वृत्रो यथा द्विज इहास्त्ययि निष्कृतिः किं शुध्येद्भवांस्त्रिभुवनस्थिततीर्थकृच्छ्रात् ॥ १ ॥
किं पर्यटामि भुवनान्यधुनैव सर्वा आनीय तीर्थविततीः करवाणि तासु।
स्नानं विलोकयत तावदिदं मुकुन्दः प्रोच्यैव तत्र कृतवान् बत पार्ष्णिघातम् ॥ २ ॥
पातालतो जळमिदं किल भोगवत्या आयातमत्र निखिला अपि तीर्थसङ्घाः।
आगच्छेति भगवद्वचसा त एत्य तत्रैव रेजुरथ कृष्ण उवाच गोपीः ॥ ३ ॥
तीर्थानि पश्यत हरेर्वचसा तवैवं नैव प्रतीम इति ता अथ तीर्थवर्याः।
प्रोचुः कृताञ्जलिपुटालवणाब्धिरस्मि क्षीराधिरस्मि शृणुतामरदीर्घिकास्मि ॥ ४ ॥
शोणोऽपि सिन्धुरहमस्मि भवामि ताम्रपर्णी च पुष्करमहञ्च सरस्वती च।
गोदावरी रविसुता सरयूः प्रयागो रेवास्मि पश्यत जलं कुरुत प्रतीतिम् ॥ ५ ॥
स्नात्वा ततो हरिरतिप्रजगल्भ एव शुद्धः सरोऽप्यकरवं स्थितसर्वतीर्थम्।
युष्माभिरात्मजनुषीह कृतो न धर्मः कोऽपि क्षितावथ सखीर्निजगाद राधा ॥ ६ ॥
कार्यं मयाप्यतिमनोहरकुण्डमेकं तस्माद्यतध्वमिति तद्वचनेन ताभिः।
श्रीकृष्णकुण्डतटपश्चिमादिश्यमन्दो गर्त्तः कृतो वृषभदैत्यखुरैर्व्यलोकि ॥ ७ ॥

तत्रार्द्रमृण्मृदुलगोलततीः प्रति स्वहस्तोद्धृता अनतिदूरगता विधाय।
दिव्यं सरः प्रकटितं घटिकाद्वयेन ताभिर्विलोक्य सरसं स्मरते स्म कृष्णः॥ ८॥

प्रोचे च तीर्थसलिलैः परिपूरयैतन् मत् कुण्डतः सरसिजाक्षि ! सहालिभिस्त्वम्।
राजा तदा नननेति जगाद यस्मात्त्वत् कुण्डनीरमुरुगोवधपातकाक्तम्॥ ९॥
आहृत्य पुण्यसलिलं शतकोटिकुम्भैः सख्युर्वदेन सह मानसजाह्नवीतः।
एतत् सरः स्वमधुना परिपूरयामि तेनैव कीर्तिमतुलां तनवानि लोके॥ १०॥

कृष्णेङ्गितेन सहसैत्य समस्ततीर्थसख्यस्तदीय सरसोधृतदिव्यमूर्त्तिः।
तुष्टाव तत्र वृषभानुसुतां प्रणम्य भक्त्या कृताञ्जलिपुटः स्रवदस्रुधारः॥ ११॥

देवि त्वदीयमहिमानमवैति सर्वशास्त्रार्थविन्न च विधिर्न हरो न लक्ष्मीः।
किंत्वेक एव पुरुषार्थशिरोमणिस्त्वत् प्रस्वेदमार्जनपरः स्वयमेव कृष्णः॥ १२॥

यश्चारुयावकरसेन भवत् पदाब्जमारच्य नूपुरमहो निदधाति नित्यम्।
प्राप्य त्वदीयनयनाब्जतटप्रसादं स्वं मन्यते परमधन्यतमं प्रहृष्यन्॥ १३॥
तस्याज्ञयैव सहसा वयमाजगाम तत् पार्ष्णिघातकृतकुण्डवरे वसामः।
त्वञ्चेत् प्रसीदसि करोषि कृपाकटाक्षं तर्ह्येव तर्पविटपी फलितो भवेन्नः॥ १४॥

श्रुत्वा स्तुतिं निखिलतीर्थगणस्य तुष्टा प्राह स्म तर्षमयि वेदयतेति राधा।
याम त्वदीय सरसीं सफला भवाम इत्येव नो वर इति प्रकटं तदोचुः॥ १५॥

आगच्छतेति वृषभानुसुता स्मितात्या प्रोवाच कान्तवदनाब्जधृताक्षिकोणा।
सख्योऽपि तत्र कृतसंमतयः सुखाब्धौ मग्ना विरेजुरखिला स्थिरजङ्गमाश्च॥ १६॥

प्राप्य प्रसादमथ ते वृषभानुजायाः श्रीकृष्णकुण्डगततीर्थवराः प्रसह्य।
भित्त्वेव भित्तिमतिवेगत एव राधाकुण्डं व्यधुः स्वसलिलैः परिपूर्णमेव॥ १७॥
प्रोचे हरिः प्रियतमे ! तव कुण्डमेतन् मत् कुण्डतोऽपि महिमाधिकमस्तु लोके।
अत्रैव मे सलिलकेलिरिहैव नित्यं स्नानं यथा त्वमसि तद्वदिदं सरो मे॥ १८॥

राधाब्रवीदहमपि स्वसखीभिरेत्य स्नास्याम्यरिष्टशतमर्दनमस्तु तस्य।
योऽरिष्टमर्शनसरस्युरुभक्तिरत्र स्नायाद्वसन्मम स एव महाप्रियोऽस्तु॥ १९॥
रासोत्सवं प्रकुरुते स्म च एव रात्रौ कृष्णाम्बुदः कृतमहारसहर्षवर्षः।
श्रीराधिकाप्रवरविद्युदलंकृत – श्रीत्रैलोक्यमध्यवितती कृतदिव्यकीर्त्तिरिति'' ॥ २०॥

ककुद्मिनं वृषासुरम्॥ १५॥ देवः परमेश्वर इव पश्यति कृष्णलीलातत्त्वं जानातीति सः ब्रजलीलासमाप्तिमवधार्य माथुरीलीलामाविर्भावयितुं कंसद्वारैव कृष्णं मथुरामानेतुं युक्त्युत्थापनविचक्षण इत्यर्थः। किमाहेत्यत आह। देवक्या अष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतामाह यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं च प्रसिद्धं रामञ्च रोहिण्याः पुत्रमाह। ननु तौ चेत् केन ब्रजं प्रापितौ तत्राह। वसुदेवेत्यादि॥ १६–१७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यदुपतिमृदुहस्तेनोद्धृतं तस्य शृङ्गं व्यसुमसुरमकार्षीत्तत्क्षणेनेति युक्तम्। अपि शिरसि धृतो यस्त्वीय एवान्तकाले करवशमुपयातः शत्रुतामेति शत्रोरित्याह॥ तमिति। सन्ततं कथमपोथन्मधुमथन इत्यतो वा कथयति॥ तमापतन्तमिति। तमायां रात्र्यां पतत्पततीति तमापततं। तमा तमसि गीयत इत्यनेकार्थध्वनिपदमञ्जरी। तमे तमस्यापततं तत्पातयोग्यमित वा गतं। अनेन गोर्न पदा स्प्रष्टव्येति सामान्यतो गोमात्रपादस्पर्शेऽविहिते विहितवान्कथं धर्ममर्मविद्भगवानिति परास्तम्। शृङ्गयोर्निगृह्य पदा समाक्रम्य भूतले निपात्यार्द्रमम्बरं वस्त्रं न यथा तथामृगाद्रं यथा सम्यङ्निष्पीडयामास विषाणे शृङ्गे कृत्त्वोत्कृत्य ताभ्यां जघान स चापतत्। विषाणं दन्तशृङ्गयोरित्यमरः॥ १३॥ असृक् अश्यतेरौणादिके प्रत्ययेऽसृक्शब्दो बोध्यः। रक्त वमन्नुद्गिरन्मत्रेण सहितं शकृत्समुत्सृजन्पादांश्चतुरः समुत्क्षिपन्ननिमीलितेक्षणः सीत्कोचलोचनः कृच्छ्रं प्राणसङ्कटं जगाम। अथानन्तर निरहृतेमृं त्योःक्षयं गृहं जगाम च सुराः पुष्पैः किरन्तः सन्तो हरिमीडिरे पूजयामासुः॥ १४॥ ककुद्मिनं वृषभं स्वजातिभिर्गोपैर्देवैर्वा॥ १५॥ देवदर्शनो देवानां दर्शनं रहस्यं मतं यस्य स देवकार्याभिज्ञ इति यावत् प्रेण यथा कंसस्याश्वासो भवेद्भवेच्च तेन कृष्णद्वषस्तेन च तस्य हिंसा सत्वरं स्यात्तथा वचनस्य प्रकृष्टतां सूचयति॥ १६॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदा स भगवता मारित इत्याह । तमापतन्तमिति । उपरि पतन्तमरिष्टं शृङ्गयोर्धृत्वा तस्य बलं निगृह्य यथा बलक्षीणो भवति तथा कृत्वा पश्चाद्भूमौ पातयित्वा पादेनाक्रम्य यथा यज्ञे पशुर्निष्पीड्यते तथा निष्पीडयामास तथा क्षताभावेऽपि रोमकूपद्वारा रुधिरं निःसारितवानित्यर्थे दृष्टान्तमाह । यथार्द्रमम्बरमिति । तदपि हस्तेन निष्पीडितमम्बरं न सर्वं जलं विमुञ्चति यथा रजकादिभिः काष्ठखण्डैर्निष्पीडितं तदाह । विषाणेन कृत्वेति विपरीतनिर्देशः अग्रिमसंबन्धार्थः विषाणेनच तञ्जघान येनैव मारणार्थं स प्रवृत्तः तेनैव स मारित इति "ये यथा मां प्रपद्यन्त" इत्यर्थ उक्तो भवति, विषाणद्वयमेकं वा तदुदरे निवेशितवानित्यर्थः । ततः स अपतत् पुनरुत्थानप्रयत्नं न कृतवानित्यर्थः ॥ १३ ॥ अन्तस्तु प्राणोद्गमनरूपः प्रयत्नो जात इत्याह । असृग्वमन्निति । मुखद्वारा ससृक् मूत्र मध्ये शकृदन्ते एवं सर्वतः सर्वं निःसृतमिति महान् प्रयत्नो मरणात्मकः सूचितः गच्छतः प्राणस्य चेष्टामाह । क्षिपंश्च पादानिति न अवस्थिते ईक्षणे यस्य नेत्रे विपरीते जाते अनेन नेत्रद्वारा प्राणगमनमिति निरूपिते प्रथमतः कृच्छ्रं जगाम ततो न पुनरावृत्तः किन्तु अथ निर्ऋतेः क्षयं मृत्युमेव जगाम अथवा प्रथमतो निर्ऋतेः क्षयम् । अथ तदनन्तरं क्षयं स्वस्थानमाश्रयभूतं जगाम मुक्तिप्रकरणे गौणतत्वात् वृषभवधः कृतिसाम्याद्युक्त इव भविष्यतीत्याशङ्क्य देवानुमोदनेन तद्युक्तमिति समर्थयति । पुष्पैः किरन्त इति । पुष्पवृष्टिं कृत्वा स्तोत्रमपि कृतवन्तः यतः स्वदुःखं दूरीकृतवान् तदर्थपरिज्ञानाय सुरा इति ॥ १४ ॥ उपसंहरति । एवमिति । सजातीया अपि कठिना इति स्वजातिभिरपि गोपैः स्तूयमानः । अत एव जातिपदं ततो गोष्ठशत्रुं हत्वा गोष्ठं प्रविवेश सबलो बलभद्रसहितोऽपि जातः प्रमाणसहितत्वात्तस्य गोष्ठे प्रवेशस्य कारणं गोपीनां नयनोत्सवरूपमिति अनेन निरोधस्य सिद्धत्वात् नातः परं संबन्ध इतिसूचितम् ॥ १५ ॥ एवं हेतुभूते अरिष्टवधे जाते तत्फलम् अग्रे निरूपयिष्यन् प्रथमं कार्यमाह सार्द्धाभ्याम् । गोष्ठे अरिष्टे निहते नातः परं गोष्ठे कार्यमिति सर्वमेव दुःखमेतन्मूलकमिति । ननु सदानन्दोऽप्यपेक्षित इत्याशङ्क्याह । कृष्णेनेति । साधनत्वमापन्नः सदानन्द एवेति न तदर्थमन्यत्कार्यम् अद्भुतकर्मणेति भगवता अरिष्टो न हतः किन्तु गोकुले स्थापितः यतः तत्प्रभृति गोकुले दुःखमेवेति विपरीतक्रियैव अद्भुतकर्मता तदा भगवानागमिष्यतीति ज्ञात्वा रथादिप्रेषणार्थं नारद उपायं कृतवानित्याह । कंसायाथाहेति । अथ तदनन्तरमेव यदैव भगवान् गन्तुमियेष तदैव देववत् दर्शनं यस्येति भगवत इव तस्य ज्ञानं निरूपितं लोकविरुद्धस्यापि करणे दोषाभावाय देववद्वा आराधितप्रत्यक्षे यथेष्टं भवति तथा नारदस्य दर्शनेन सर्वेष्टं जातमिति ज्ञापितम् अथवा यो देवः पूर्वमाह अस्यास्त्वामष्टमो गर्भ इति तस्मिन् दृष्टे यथा भवति सर्वसन्देहनिवृत्तिः तथा नारदे दृष्टे जातेति ॥ १६ ॥

श्रीसुबोधिनी–सारः

आपतन्तं तमरिष्टं शृंगयोर्निगृह्य भूतले निपात्य प्रक्षिप्य पदा पादेन समाक्रम्य स कृष्ण आर्द्रमम्बरं वस्त्रमिव कृत्वा निष्पीडयामास ततो लब्धेन विषाणेन शृंगेण जघान सोरिष्टोपतत् ॥ १३ ॥ असृक् रुधिरे वमन् उद्गिरन् मूत्रशकृत् कुर्वन् पादान् क्षिपन् अनवस्थितेक्षणः प्रचालितनेत्रः भ्रमदृष्टिः स कृच्छ्रं कष्टं यथा भवति तथा निर्ऋतेर्मृत्योः क्षयं निवासं गृहं जगाम । अथानन्तरं पुष्पैः किरन्तो वर्षन्तः सुरा देवा हरिमीडिरे तुष्टुवुः ॥ १४ ॥ एवं ककुद्मिनं वृषभासुरं हत्वा स्वजातिभिर्गोपैः स्तूयमानः सबलः सरामो गोपीनां नयनानामुत्सवो यस्मात् स कृष्णो गोष्ठं व्रजं विवेश ॥ १५ ॥ अद्भुतानि कर्माणि यस्य तेन कृष्णेनारिष्टे दैत्ये निहते सति अथानन्तरं देववत् दर्शनं ज्ञानं वा यस्य स नारदो भगवान्कंसायाह ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स श्रीकृष्ण आपतन्तं तमरिष्टं शृङ्गयोर्निगृह्य गृहीत्वा भूतले निपात्य पदा समाक्रम्य निष्पीडयामास । तत्र दृष्टान्तमाह–यथेति । यथा रजकादिजनः अम्बरमार्द्रं वस्त्रं पदा समाक्रम्य हस्तेन निष्पीड्य ततो जलं निःसारयति, तथा तं निष्पीड्य तद्रोमाच्छिद्रेभ्यो रुधिरं निःसारितवानित्यर्थः । ततश्च तद्विषाणं कृत्वा उत्पाट्य तेन विषाणेन तं जघान, स च तेन हननेनापतत् ॥ १३ ॥ ततश्च स मुखतोऽसृक् रुधिरं वमन् मूत्रं शकृच्च एकवद्भावस्तदुभयं समुत्सृजन् विमुञ्चन् पादांश्च क्षिपन् इतस्ततश्चालयन् अनवस्थिते चलिते ईक्षणे नेत्रे यस्य सः कृच्छ्रं कष्टं यथा भवति तथा निर्ऋतेर्मृत्योः क्षयं जगाम । मृत इत्येव विवक्षितम्, भगवतः सन्मुखं तद्धस्तेन मृतस्य यमस्थानगमनासम्भवात् । एवं मृतानां मुक्तिकथनाच्च ॥ अथानन्तरं सुरा देवाः पुष्पैः हरिं किरन्तः आच्छादयन्तः ईडिरे तुष्टुवुः ॥ १४ ॥ एवं ककुद्मिनं वृषभासुरं हत्वा स्वज्ञातिभिर्गोपैर्वनेषु स्तूयमानः गोपीनां नयनोत्सवो यस्मात् सबलः बलेन सहितः श्रीकृष्णः गोष्ठं विवेश ॥ १५ ॥ एवं कृष्णेन अरिष्टे दैत्ये निहते सति अथ अनन्तरं नारदः कंसायाहेत्यन्वयः । 'भगवता अरिष्टो निहतः, किंतु व्रजे रिष्टः संस्थापितः, तत्प्रभृतिदुःखाधिक्यस्यैव निरूपणीयत्वात्' इति सूचयन्नाह–अद्भुतकर्मणेति । 'व्रजे स्वैरं क्रीडतः सतस्तद्विरुद्धं नारदः कथमाह' इत्यशङ्क्याह—देवदर्शन इति । 'एवं कथिते सति कंसवधादिना देवकार्यं भविष्यति' इति देवेषु दर्शनं कृपादृष्टिर्यस्य सः । 'कथं तस्य भाविज्ञानं' तत्राह—भगवानिति सर्वज्ञ इति ॥ १६ ॥

अन्वितार्थप्रकाशिका

तमिति ॥ स श्रीकृष्णः आपतन्तं तमरिष्टं शृङ्गयोर्निगृह्य नितरां गृहीत्वा भूतले निपात्य पदा समाक्रम्य यथा रजकादिजनः अम्बरमार्द्रं वस्त्रं पदा समाक्रम्य हस्तेन निष्पीड्य ततो जलं निस्सारयति तथा निष्पीडयामास निष्पीडनेन रोमच्छिद्रेभ्यो

रुधिरं निःसारितवान्। ततश्च तद्विषाणं कृत्वा उत्पाट्य तेन विषाणेन तं जघान। सच तेन हननेनापतत्॥ १३ ॥ असृगिति ॥ ततश्च स मुखतोऽसृक् रुधिरं वमन् मूत्रं शकृच्च एकवद्भावः। तदुभयं समुत्सृजन् विमुञ्चन् पादांश्च क्षिपन् इतस्ततश्चालयन् अनवस्थिते चलिते ईक्षणे नेत्रे यस्य सः कृच्छ्रं कष्टं जगाम प्राप। अथ निर्ऋतेर्मृत्योः सकाशात् क्षयं वधं जगाम। निर्ऋतिरेवागत्य तं जघान नतु कृष्ण इत्युत्प्रेक्षा। यद्वा। कृच्छ्रं यथा भवति तथा निर्ऋतेर्मृत्योः हेतोः क्षयं हरेर्निवासं जगाम इत्येव विवक्षितम्। नतु यमस्थानगमनं दर्दुरकेश्यरिष्टेति पूर्वं हरिनिलयगमोक्तेः। अथानन्तरं सुरा देवाः पुष्पैः हरिं किरन्तः आच्छादयन्तः ईडिरे तुष्टुवुः। आमभाव आर्षः॥ १४ ॥ एवमिति॥ एवं ककुद्मिनं वृषभासुरं हत्वा स्वज्ञातिभिर्गोपैः स्तूयमानः गोपीनां मूर्त्तिमान् नयनयोरुत्सवः सबलः बलेन सहितः युद्धं श्रुत्वा बलस्य तत्रागमनात् श्रीकृष्णः गोष्ठं विवेश॥ १५॥ अरिष्ट इति॥ एवम् अद्भुतकर्मणा कृष्णेन अरिष्टे दैत्ये वसन्तर्त्तौ निहते सति अथानन्तरं माघमास आगते भगवान् देवदर्शनः देवर्षिः। यद्वा। एवं कथिते एवं भविष्यतीति साक्षाद्देववदर्शनं ज्ञानं यस्य सः नारदः कंसायाह स्म॥ १६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तं अरिष्टं श्रृङ्गयोः विषये गृहीत्वा भूतले निपात्य पदाक्रम्य पादेन नियम्य आर्द्रं अंबरं वस्त्रं यथा तथा निष्पीडयामास कृत्वा विषाणे उत्पाट्य तेन विषाणाद्वयेन तं जघान ततः सोऽरिष्टः अपतत् निश्चेष्टो बभूव। कृञ् हिंसायामित्यस्य रूपं कृत्वेति ।१३। असृक्रुधिरं उद्वमन् मूत्रं च शकृत् पुरीषं चेति समाहारद्वंद्वस्तदुभयं समुत्सृजन्सजन् अनवस्थितेक्षणः विपरीतनेत्रो निर्ऋतेर्मृत्योः क्षयं स्थानं कृच्छ्रं कष्टं यथा तथा जगाम पुष्पैः किरन्तो वर्षंतः॥ १४॥ ककुद्मिनं ककुद्वंतं वृषभासुरं स्वजातिभिर्गोपैः स्तूयमानः॥ १५॥ देवदर्शनः देवस्य हरेर्दर्शनमिव दर्शनं यस्य सः॥ १६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति॥ स भगवान्, आपतन्तं पुनः स्वसन्मुखमागच्छन्तं तमरिष्टं, श्रृङ्गयोः विषाणयोः, निगृह्य गृहीत्वा, पदा स्वचरणेन, समाक्रम्यावष्टम्य, भूतले भूम्युपरि निपात्य, आर्द्रं जलाप्लुतं, अम्बरं वस्त्रं, यथा तद्वत्, निष्पीडयामास। ततः कृत्त्वा 'कृती छेदने' छेदनमत्रोत्पाटनं विषाणमिति शेषः विषाणमुत्पाट्येत्यर्थः। विषाणेन तेनैव तच्छृङ्गेण, जघान तं ताडयामास। सः भगवता तच्छृङ्गेण ताडितोऽरिष्टासुरः, अपतत् मृत्युचिह्नान्यगमदित्यर्थः॥ १३॥ तानि दर्शयति॥ असृगिति॥ मूत्रं च शकृच्च तयोः समाहारस्तत्, समुत्सृजन् असृग्रुधिरं वमन्नुद्गिरन्, पादान् क्षिपन्नितस्ततश्चालयन्, अनवस्थितेक्षणः प्रचलितनेत्रः कृच्छ्रं कष्टं प्राणोत्क्रमणात्मकं दुःखं, जगाम प्रापत्। अथानन्तरं, निर्ऋतेर्मृत्योः, क्षयं निवासं च जगाम। ततः सुरा देवाः, पुष्पैः किरन्तः सन्तः, हरिं श्रीकृष्णं, ईडिरे तुष्टुवुः॥ १४॥ एवमिति॥ एवमित्थं ककुद्मिनमरिष्टासुरं हत्वा, भगवान् स्वजातिभिर्गोपैः, स्तूयमानः गोपीनां नयनानां मूर्त्तिमानुत्सवः, सबलो बलभद्रसहितः सन्, गोष्ठं, विवेश॥ १५॥ कंसेन विस्मृतं कृष्णं वसन्तं कामतो व्रजे स्मारयामास देवर्षिर्दूतवाचेव मातुलम्॥ अरिष्टे इति॥ इत्थं, गोष्ठे अद्भुतकर्मणा कृष्णेन, अरिष्टे दैत्ये निहते सति, देवदर्शनो देवर्षिः भगवान्, नारदः कंसाय, अथ साकल्येन, आह कथयामास। क्वचित्तु कंसाय प्राहेत्यपि पाठो दृश्यते॥ १६॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तमापतन्तमिति : १०.३६.१३.

अदभ्रगर्वेण मदङ्गरूपं निपीडितं प्रागमुनाम्बरं यत्। प्रभुः प्रतीकारमिवास्य कर्तुं तत्पीडनं चापि तथा चकार॥ ३०॥
लभते जनः स्वगुणतो गतिमधरामिह न तत्प्रदाताऽहम्। इति किं विशदीकर्तुं हरिरसुरं तं जघान तच्छृङ्गात्॥ ३१॥
ये यथा मां प्रपद्यन्ते स्वाशयं व्यञ्जयन् प्रभुः। श्रृङ्गेण स्वं जिघांसन्तं श्रृङ्गेणैव जघान तम्॥ ३२॥
मदतमोगुण-तद्धतिवासनामय-रजोगुण-रूपविषाणयोः। गलितमादिममास तदन्यतो गतिमवाप सतामिति साधु तत्॥ ३३॥

असृग् वमन्निति : १०.३६.१४.

पादस्पर्शव्यपगतमलं तं विधायासुरेन्द्रं नाम्नाऽरिष्टं यमदिशि कथं प्रेषयामास कृष्णः।
नैवं शक्यं क्वचिदपि जनैरित्यवोचन्मुनीन्द्रो दुःसंस्काराहितमतिरसा संजगाम स्वयं ताम्॥ ३४॥
शरीरे रथसंज्ञा हि स्पष्टा श्रुतिषु यत्ततः। युक्तं तल्लयतोऽरिष्टो रथक्षयमगादिति॥ ३५॥
प्रभोः पादस्पर्शप्रभव-मपुनर्भावमवनौ फलं पूर्णं शास्त्रे निगदितमयं पुण्यजनवत्।
अरिष्टोऽपि प्राप स्फुटमिति मुनिः पुण्यजनसंश्रितां काष्ठामेवावददिति न काचित् क्षतिरिह॥ ३६॥
यद्वा धर्मालयं यातोऽसुरोऽसौ क्षममेव तत्। यद्धर्मपदभागेव वृषः कोशसमीरितः॥ ३७॥
शान्तचित्तकृतो धर्म एवेश्वरपदान्वयी। तदन्यस्तु भवेद्रक्षःपदस्थीरति स्फुटम्॥ ३८॥

एवं ककुद्मिनमिति : १०.३६.१५.

यद्गोकुले विहरतामपि भक्तिभाजां नाशाय जातुचिदुपागतमप्यरिष्टम् ।
बद्ध्वा दृढं परिकरं तदहानिहन्यां मन्ये व्यबोधि विभुनैतदरिष्टनाशात् ॥ ३९ ॥
कारागारमभूदरिष्टभवनौ यस्योद्भवेऽसौ कथं शत्रोः स्वस्य सभासुरं बहुलसद्म च मृङ्गोच्छ्रितम् ।
दृष्ट्वाऽरिष्टमनिष्टदं बत तितिक्षेतेति मग्नः क्रुधि तद्भग्नाकृति भग्नशृङ्गमकरोद् यच्छत्रुजित् साधु तत् ॥ ४० ॥
पापपुण्यपदवाच्यमरिष्टं यज्जघान वृषभासुरमीशः । तस्य बीजमुभयोरविनाशे स्यान्न मुक्तिपदयोग इतीह ॥ ४१ ॥
योऽरीष्टकारी प्रागासीत्तस्यैवेतोऽपकर्षणात् । मन्येऽरिष्टं रिपोरेवं निर्मितं प्रभुणा तदा ॥ ४२ ॥
अरिष्टं कुर्वता नष्टं युगपच्छत्रमित्रयोः । सर्वक्लेशहृतौ तेन चातुर्यं दर्शितं निजम् ॥ ४३ ॥
वीक्ष्य विस्मयमापन्नाः सुराः सुरतरूद्भवैः । पुष्पैः किरन्तस्तत्स्तोत्रं तदा चक्रुरिति क्षमम् ॥ ४४ ॥ (युग्मम्)

अरिष्टे निहत इति : १०.३६.१६.

अरिष्टनाशोत्तरमेव नारदो तत्तत्त्वतः कंसमवोचताखिलम् ।
निदानमस्येशविरोध्यरिष्टकं विनष्टमालोक्य स हृष्टतां ययौ ॥ ४५ ॥

कृष्णप्रिया

जब अरिष्ट प्रभु के सन्मुख आया तब भगवान् श्रीकृष्ण ने असुर के दोनों सींग दोनो हस्त से पकड़ लिए और उसको जमीन दोस्त कर दिया । पुनः उसके शरीर को पाँव नीचे दबाकर, कोई व्यक्ति जैसे गीले कपड़े को दोनों पैरों के बीच पकड़कर दबाकर निचोड़ते हैं इस तरह अरिष्ट को मरोड़ दिया । पुनः अरिष्ट के सींग को उखाड़ कर उसी से प्रहार करके मार दिया और वह जमीन पर गिर पड़ा ॥ १३ ॥ उनके प्राणों के निकलने के साथ मुँह से रुधिर बहने लगा, आंखें बाहर आ गई बार बार पैर पटकने लगा और अतिशय कष्ट से वह मृत्युलोक को गया तब दिव्यलोक से देववृन्द श्रीवृन्दावनविहारी श्रीहरि पर पुष्प वर्षा कर गुण गान करने लगे ॥ १४ ॥ इस प्रकार बड़ी कांध वाले अरिष्टासुर को मार कर, स्वजातीय गोपवृन्द के मुख से अपने यशोगान को सुनते हुए गोपीजन के नेत्रों को उत्सव देने वाले श्रीनन्दनन्दन भगवान श्री बलभद्र भैयाजू के साथ गोकुल में पधारे ॥ १५ ॥ लोकोत्तर आश्चर्यपूर्ण चरित्र करने वाले भगवान श्रीकृष्ण ने जब अरिष्टासुर को मारकर मृत्युलोक को भेज दिया, तब दिव्यदृष्टि श्री देवर्षि नारद जी ने भगवान के हृदय संकेत को जानकर कंस के समीप जाकर कंस को कहा ॥ १६ ॥

यशोदायाः सुतां कन्या देवक्याः कृष्णमेव च । रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता ॥ १७ ॥
न्यस्तौ स्वमित्रे [1]नन्दे वै याभ्यां ते पुरुषा हताः । निशम्य [2]तद् भोजपतिः कोपात् प्रचलितेन्द्रियः ॥ १८ ॥
निशातमसिमादत्त वसुदेवजिघांसया । निवारितो नारदेन तत्सुतौ मृत्युमात्मनः ॥ १९ ॥
ज्ञात्वा लोहमयैः पाशैर्बबन्ध सह भार्यया । प्रतियाते तु देवर्षौ कंस [3]आभाष्य केशिनम् ॥ २० ॥

कर्दमक्षमा

अन्वयः—कन्याम्, यशोदायाः, एव, सुताम्, आह, च कृष्णम्, देवक्याः, एव, पुत्रम्, आह, च, रामम्, देवक्याः पुत्रम्, च रोहिणी पुत्रम् आह, (भवतः) विभ्यता, वसुदेवेन, स्वमित्रे, नन्दे, (तौ) स्थापितौ वै याभ्याम्, वै, ते, पुरुषाः॥१७॥ तत् निशम्य, कोपात्, प्रचलितेन्द्रियः, भोजपतिः, वसुदेवजिघांसयानिशातम्, असिम्, आदत्त ॥ १८ ॥ (सः कंसः) नारदेन, निवारितः, (कंसः) तत्सुतौ, आत्मनः, मृत्युम्, ज्ञात्वा, भार्यया, सह, (वसुदेवम्) पाशैः, बबन्धः ॥१९॥ देवर्षौ, तु, प्रतियाते, कंसः, भवता,राममाधवौ, हन्यताम्, (इति) केशिनम्, आभाष्य प्रेषयामास ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आप्तेनेव नारदेनोक्तमाह । यशोदाया इति । देवक्याः अष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतमाह । यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह । रोहिणीपुत्रं रामं च देवक्याः सप्तमं सुतमाह । यद्वा नन्दसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्याया रोहिण्याः पुत्रमाह । तौ वसुदेवसुतौ चेत्कथं व्रजं गतौ तत्राह । वसुदेवेनेति । ते तव पुरुषाः सेवकाः ॥ १७-१८ ॥ निवारित इति । हते वसुदेवे तौ पलायेतामतो बध्यतामिति मंत्रं वदता नारदेन निवारित इति ॥ १९-२२ ॥

---

१. नन्देऽस्मिन्–वीर. । २. निशम्येतत्–वीर. । ३. आहूय:–वीर. आशास्य–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आप्तेन यथार्थवक्त्रा । अप्रसिद्धेः क्लिष्टकल्पनां मत्वाह—यद्वा । वसुदेवसुतत्वे आक्षिपति—वसुदेवेति । तत्राक्षेप उत्तरमाह । त्वत्त इति शेषः ॥ ततश्चैनं स्वयमेवासौ हनिष्यतीति श्रीकृष्णलीलाशैलीं देववद्ब्रह्मादिवज्ज्ञानन्निति रामं रोहिण्याः पुत्रमपि देवक्या एवेति गर्भसंकर्षणमपि कथयामासेति ज्ञेयम् । बिभ्यता त्वत्त इति । भीरुत्वान्न तव वध्य इति भावः ॥ १७ ॥ स्वस्य मित्रे विश्वसनीये सुहृदि । याभ्याम् रामकृष्णाभ्याम् । ते तव । पुरुषा नियोगकारिणास्तृणावर्तादयः । तत् नारदोक्तम् । निशम्य श्रुत्वा । निशातम् तेजितम् । स्वो ज्ञातिश्चासौ मित्रं चेति । वै प्रसिद्धमेतत् । केवलं त्वमेव मूढो न जानासीति भावः । पुरुषा आप्तजनाः ॥ १८ ॥ तौ रामकृष्णौ । अतो हेतोः । पलायनाभावार्थमित्यर्थः । तत्सुतौ वसुदेवसुदेवसुतौ । भार्यया देवक्या वसुदेवसुदेवसुतौ । भार्यया देवक्या वसुदेवमिति शेषः । निवारित इति । हते पितरि तन्निर्वेशायावसरप्रतीक्षामपि कुर्व्वीयातां बद्धयोस्तु पित्रोर्मोचनार्थमद्यश्वो वाऽऽगच्छेतां, किञ्चाधुनातनीं जिघांसां तयोर्वसुदेवो न ज्ञापनीयस्तथा सति स्वमित्रं नन्दं प्रति तेनोक्तेः स सपुत्र एव पलायिष्यत इत्यतो वसुदेवदेवक्योर्बंधनमेवाधुना कृत्वा केनापि मिषेण रामकृष्णौ मथुरामानीयेतामिति मन्त्रं ददतेति ज्ञेयम् । न च वसुदेवदेवक्यौ बन्धयता नारदेन तयोर्विप्रियं कृतमिति वाच्यम्, प्रत्युत प्रियमेव कृतं परमोत्कण्ठाभ्यां ताभ्यामायत्यां स्वपुत्रमुखदर्शनलाभेन स मुनिराशीः शतसंप्रदानपात्रीकरिष्यत एवेति मुनेस्तद्विषयकापराधो नाभूदिति ॥ १९ ॥ आभाष्य बहुधोक्त्वा । भवता मद्भृत्येषु पूज्येन यद्यप्यत्रभवत्तत्रभवच्छब्दावेव पूज्येऽर्थे स्तस्तथापि क्वचित्केवलोऽपि प्रयुज्यते 'सर्वे सर्वार्थ वाचका' इति न्यायमाश्रित्येति ध्येयम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्चैवं स्वयमेवादौ हनिष्यतीति श्रीकृष्णलीलाशैली देववद्ब्रह्मादिवज्ज्ञानन्नित्यर्थः । रामं रोहिण्याः पुत्रमपि देवक्या एवेति गर्भसङ्कर्षणमपि कथयामासेति ज्ञेयम् । बिभ्यता त्वत्त इति भीरुत्वान्न तव वध्यः स्यादिति भावः । स्वस्य मित्र इत्यसाधारणस्नेहविशेषो बोधितः । स्वो ज्ञातिश्चासौ मित्रञ्चेति वा । वै प्रसिद्धमेवैतत् सर्वं केवलं त्वमेव मूढो न जानासीत्यर्थः एतच्चाप्ततार्थमुक्तम् । पुरुषा आप्तजना हता इति लक्षणेव स्वोक्तं दृढीकृतम् । तथा महाबलत्वसूचनया भयञ्च तस्य नितरां जनितम् ॥ १७ ॥ प्रचलितं क्षुभितमिन्द्रियं मनो यस्य सः इति विवेकहानिरुक्ता ॥ १८ ॥ बबन्धेति । हते किल पितरि तन्निवेशायावसरप्रतीक्षापि कुर्वीयातां बद्धयोस्तु पित्रोर्मोचनार्थमत्राद्य श्वो वागच्छेतामिति श्रीनारदमन्त्रणयैवेति ज्ञयम् । सह भार्यया देवकीसहितम् एतच्चागमनाविलम्बार्थं परमदुष्टत्वादेव वा ॥ १९ ॥ प्रतियाते त्विति । केशिप्रेषणं मन्त्रभङ्गशङ्कया किं वा तत्प्रेरणस्यापि निवारणाशङ्कया आभाष्य भो भ्रातर्महावीरेत्येवं सम्बोध्य दूतगिरा समादिश्येति श्रीपराशरवैशम्पायनयोर्मतम् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णञ्च देवक्या एवेति रामं रोहिण्याः पुत्रं देवक्या अपात्येव·शब्दार्थः । इति गर्भसंकर्षणमपि कथयामासेति ज्ञेयम् । विभ्यता त्वत्त इति भीरुत्वन्न तव वध्यः स्यादिति भावः । स्वस्य मित्र इति परस्परं स्नेहविशेषो बोधितः । वै प्रसिद्धमेवैतत् सर्व्वं केवलं त्वमेव मूढो न जानासीत्यर्थः, एतच्चाप्ततार्थमुक्तम्, पुरुषा भृत्या हता इति लक्षणेन स्वोक्तं दृढीकृतम्, तथा कोपो महाबलतया भयं च तस्य नितरां जनितम् ॥ १७ ॥ भोजपतिरिति महैश्वर्य्यमत्त्वमुक्तम्; श्लेषेण भुञ्जते बहुलमिति भोजास्तेषु श्रेष्ठ इति वह्वाशित्वेनाल्पबुद्धिरिति । अतः प्रचलितं क्षुभितमिन्द्रियं मनो यस्य स इति विवेकहानिरुक्ता ॥ १८ ॥ बबन्धेति—हते किल पलायिष्येते, बद्धे च पितरि तन्मोचनार्थमत्रागच्छेतामिति श्रीनारदमन्त्रणयैवेति ज्ञयम्, सह भार्य्यया देवकीसहितम्, एतच्चागमनेऽविलम्बार्थं परमदुष्टत्वादेव वा ॥ १९ ॥ प्रतियाते त्विति—केशिप्रेषणमन्त्रभंगशंकया किंवा तत्प्रेषणस्यापि निवारणशंकया आभाष्य—भो भ्रातर्महावीरेत्येवं सम्बोध्य 'दूतगिरा प्रचोदितः' इति श्रीपराशरवैशम्पायनयोर्मतम् । भवतेत्यादरात्; एवमग्रे भवद्भ्यामिति च, गोकुलरमणाद्रामः, मधुवंशोद्भवत्वात् माधवश्च तौ; यद्वा, स्वसुहृत्परित्यागेन गोकुलमेव रमयत इति रामौ यौ माधवौ इति दोष आरोपितः, मात्सर्य्येण तत्तन्नामनी न गृहीते च । यद्वा, तत्तन्नाम्ना प्रसिद्धत्वादवज्ञया संज्ञैवोक्ता । एवमग्रेऽपि ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किमाहेत्याह । यशोदाया इति सार्द्धेन । देवक्याः कन्यामष्टमगर्भत्वेन प्रसिद्धां यशोदायाः सुतामाह । तथा यशोदायाः पुत्रत्वेन प्रसिद्धं कृष्णं देवक्या अष्टमं गर्भमाह । तथा रोहिणीपुत्रत्वेन प्रसिद्धं रामं च देवक्याः सप्तमं गर्भमाहेति सम्बन्धः । ननु देवकीसुतौ चेत्कथं व्रजगतौ तत्राह वसुदेवेन त्वत्तः बिभ्यता स्वमित्रे नन्दे न्यस्तौ न्यासरूपेण निहितौ याभ्यां रामकृष्णाभ्यां तव पुरुषा भृत्या अरिष्टादयो हताः वसुदेवे हते तु तौ पलायेतामतः स न वध्य इत्यर्थतोऽत्र द्रष्टव्यम् ॥१७॥ तन्नारदोक्तं निशम्याकर्ण्य भोजपतिः कंसः कंसः कोपात्प्रचलितानीन्द्रियाणि यस्य स वसुदेवं हन्तुमिच्छया तीक्ष्णं खड्गमाददे ॥ १८ ॥ ततो नारदेन निवारितस्तस्य वसुदेवस्य सुतमेवास्यात्मानः स्वस्य मृत्युं हन्तारं ज्ञात्वा नारदोपदेशादिति शेषः लौहमयैः पाशैर्भार्यया देवक्या सह वसुदेवं

बबन्ध ॥ १९ ॥ ततो नारदे गते सति कंसः केशिनं नाम दैत्यमाहूय प्रेषयामासाज्ञापयामास किमिति भवता रामकेशवौ हन्येतामिति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किमाहेति तत्राह । यशोदाया इति । कन्यां दुर्गां यशोदायाः सुतां कृष्णं देवक्याः पुत्रं रामं बलभद्रं रोहिणिपुत्रमाह वसुदेवेन तौ किंकृतावत्राह । विभ्यता त्वदिति शेषः ॥ १७ ॥ स्वस्य मित्रे विश्वसनीये सुहृदि याभ्यां कृष्णरामाभ्यां ते तव पुरुषा नियोगकारिणः ॥ १८ ॥ निशातं तेजितमित्यर्थः ॥ १९ ॥ आशास्य सम्यक् शिक्षित्वा भवता मद्भृत्येषु पूज्येन ॥ २०–२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

असिमादत्तेति वसुदेवस्य परोक्षमेव ॥ १८ ॥ निवारित इति हते वसुदेवे तौ पलायेतां किञ्चाधुना तज्जिघांसामपि वसुदेवो न ज्ञापनीयः तथा सति स्वमित्रं नन्दं प्रति तेनोक्ते तद्वृत्तान्ते नन्दः सपुत्र एव पलायिष्यत इत्यतो वसुदेवदेवक्योर्बन्धनमेवाधुना कृत्वा केनापि मिषेण रामकृष्णौ मथुरामानीयेतामिति मन्त्रं ददतेति ज्ञेयम । नच वसुदेवदेवक्यौ बन्धयता नारदेन तयोर्विप्रियं कृतमिति वाच्यं प्रत्युत प्रियमेव कृतं परमसोत्कण्ठाभ्यां ताभ्यामायत्यां स्वपुत्रमथदर्शनानन्दलाभेन स मुनिराशीः शतसम्प्रदानपात्रीकरिष्यत एवेतिमुनेस्तद्विषयकोऽपराधो नाभूदिति ज्ञेयम् ॥ १९ ॥ वाग्देवीमते हन्येतां प्राप्येतां तत्र लीयतामित्यर्थः ॥ २०–२२ ॥

गूढार्थदीपिनी

यशोदेति सार्द्धम् । देवक्या अष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतामाह । यशोदाया सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह । रोहिणीपुत्रं रामं च देवक्याः सप्तमं सुतमाहेति सम्बन्धः कार्यः ॥ १७ ॥ निशातं तीक्ष्णम् ॥ १८ ॥ मृत्यु मृत्युरूपौ ज्ञात्वा हते वसुदेवे तौ पलायेतामतो मा वध्यतामिति मन्त्रं वदता नारदेनेत्यर्थः ॥१९॥ केशिनम् अश्वाकृतिं दैत्यम् ॥२०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किमाहेत्यत्राह । यशोदाया इति सार्द्धेन ॥ १७ ॥ निशातं तीक्ष्णम् ॥ १८ ॥ नारदेन वसुदेवे हते न किञ्चित्प्रयोजनमित्यादि ज्ञानदेन तत्सुताविति राममपि तत्र सहायतया कारणं ज्ञात्वेत्यर्थः ॥ १९—२२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यशोदायाः सुतां प्राहेत्यन्वयः । कन्यां दुर्गां कृष्णमेव सुतमित्यन्वयः । विभ्यता त्वत्तो भीतेन स्वमित्रे नन्दे नन्दगोपे न्यस्तौ याभ्यां ते पुरुषा हताः । योषिदेकैव पूतनेति तदनुक्तिः । अपुरुषा हता अ इति छेदः । यः अः तेन हतेत्यपि वदन्ति । पुरुषाश्च हता इत्यावृत्त्यान्वयने तल्लाभ इति ज्ञेयं । तौ स्थापितौ ॥ १७ ॥ तन्नारदेरितं निशातमुत्तेजितं ॥ १८ ॥ तत्सुतौ वसुदेवसुतौ लोहमयैः कृष्णायोविकृतैः पाशैः सह भार्यया वसुदेवं बबन्ध ॥ १९ ॥ केशिनं तन्नामानं दनुजमाशास्य शिक्षयित्वा। तत्किंरूपं शासनीमत्यतः शंसति । तौ रामकेशवौ भवताऽऽशास्येत्यप्यन्वेति प्राक् प्रहारादिभिराशास्य हन्येतामिति प्रेषयामास। एवमाशास्य मनस्यभिलाषं कृत्वेत्यर्थः ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नारदस्य वाक्यान्याह । यशोदायाः सुतामिति । दैवमप्यनृतं वदतीति तस्य या विपरीतबुद्धिः सा प्रथमतः अपोह्यते कन्या न देवक्याः नापि यशोदायाः पुत्रः किन्तु यशोदायाः कन्या देवक्यास्तु पुत्रः सर्वत्राहेति सम्बन्धः यशोदायाः सुतामाह कन्यां कृष्णं तु देवक्याः पुत्रमाहेति रामश्च देवक्याः पुत्रं रोहिणीपुत्रमपि एवकारस्तद्व्यावृत्त्यर्थः । यथा देवक्या रोहिण्याश्च रामः पुत्रः एवमेव देवक्या यशोदायाः पुत्रो न भवतीति कथमेवं व्यत्यासो जात इति चेत्तत्राह । वसुदेवेन बिभ्यता न्यस्तौ स्वमित्रे नन्द इति । एतावत्यर्थे नारदोऽपि न जानाति यथा नन्दोऽपि न जानाति तथा भगवांस्तत्र तिष्ठतीति परमार्थतो वा न्यासः मित्रपदं ज्ञात्वाप्यन्यथा न करिष्यतीति ज्ञापनार्थं वै निश्चयेन याभ्यां कृष्णरामाभ्यां ते पुरुषाः सर्व एव प्रलम्बादयो हता इति अन्यथा नान्यो मारयितुं शक्नुयात् एतावदुक्त्वा तुष्णीं तत्रैव स्थितः ॥ १७ ॥ ततो यज्जातं तदाह । निशम्येति । नारदोक्त तत्प्रमेयं निशम्य अन्यथा करणे सामर्थ्यार्थमाह । भोजपतिरिति । भोजानां पतिः अकस्माज्जातेन कोपेन प्रकर्षेण चलितानीन्द्रियाणि जातानि अन्यायो वसुदेवस्येति ज्ञात्वा तज्जिघांसया निशातं तीक्ष्णं खड्गमाददे ॥ १८ ॥ प्रायेण वसुदेवः सभायामेवास्ते तदा भीतो नारदः निवारयामासेत्याह । निवारित इति । ननु तन्निवारितः कथमसौ न मारयेदिति आशङ्क्याह । नारदेनेति । स हि तेषां मान्यः तुल्यो देवेषु तेषु च तथापि शत्रुरिति वद्ध इत्याह । तत्सुतावात्मनो मृत्यू इति देवकीवसुदेवौ बबन्ध भ्रातृणामपि स्वमध्यपातात् सेवकानाञ्च सुताविति द्विवचनम् अविशेषकथनात् सन्देहाद्वा लोहमयैः पाशैरिति न पादे शृङ्खला किन्तु सर्वावयवेषु शृङ्खलाभिरिव बन्धनम् एतावदुक्त्वा नारदो निर्गतः केचित्तु बन्धनमपि नारदेनैवोक्तमित्याहुः । मारणे तत्सुतौ पलायनं करिष्यत इति तदुपेक्षणीयमनृतवादप्रसङ्गात् ॥ १९ ॥ ततो देवर्षौ प्रतियाते पुनस्तस्यान्यथा बुद्धिः पूर्ववद्भविष्यतीत्याशङ्क्य तुशब्दो वारयति यतोऽयं

देवानामपि मन्त्रद्रष्टा तदा कंसः स्वनिकटे स्थितं स्वस्य पार्षदरूपं केशिनमाभाष्य हे केशिन्निति संबोध्य गोकुले प्रेषयायास त्वं गच्छ गोकुलमिति अर्थसिद्धत्वान्नोक्तं गतस्य कृत्यमाह । हन्येतामिति गत्यर्थोऽपि हनधातुर्रात आनयनार्थमेव घोटकः प्रेषित इति लक्ष्यते सुखासनं तन्न भवतीति पश्चाद्रथप्रेषणं तस्या तथा सामर्थ्यमग्रे वक्ष्यति तस्य हेषितसंत्रस्ता इति माधवपदं मधुवंशोत्पन्नाभिप्रायेण रामस्तु प्रसिद्धः ॥ २० ॥

श्रीसुबोधिनी–सारः

यशोदायाः सुतां पुत्रीं कन्यां देवक्याः कृष्णं चेति रोहिणीपुत्रं रामं चाह त्वत्तो बिभ्यता वसुदेवेन स्वमित्रे नन्दे न्यस्तौ निक्षिप्तौ याभ्यां रामकृष्णाभ्यां ते पुरुषा हताः तत् निशम्य श्रुत्वा कोपात् प्रचलितेंद्रियो भोजपतिः कंसः ॥ १७–१८ ॥ वसुदेवस्य हंतुमिच्छता निशातं तीक्ष्णमसिं खड्गम् आदत्त नारदेन निवारितोऽभूत तस्य सुतौ आत्मनो मृत्युं ज्ञात्वा ॥१९॥ लोहमयैः पाशैर्भार्यया देवक्या सह वसुदेवं बबन्ध देवर्षौ नारदे प्रतियाते सति केशिनं संबोध्य कंसः प्रेषयामास ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किमाह इत्यपेक्षायामाह—यशोदाया इति । देवक्या अष्टमगर्भतया प्रसिद्धां कन्यां यशोदायाः सुतामाह, यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह, रोहिणीपुत्रं रामं च देवक्याः सप्तमसुतमाह—‘एवं वर देवसुतौ चेत् कथं व्रजं गतौ’ तत्राह—त्वत्तो बिभ्यता वसुदेवेन स्वमित्रे नन्दे न्यस्तौ गुप्ततया स्थापितौ । याभ्यां रामकृष्णाभ्यां ते तव पुरुषाः पूतनादयः दैत्या हताः ॥१७॥ तन्नारदेन वर्णितं निशम्य श्रुत्वा कोपात् प्रचलितानि व्याकुलानीन्द्रियाणि यस्य सः भोजपतिः कंसः वसुदेवजिघांसया निशातमसिं खड्गमादत्त गृहीतवान् ॥ १८ ॥ तदा च ‘वसुदेवे हते सति तच्छ्रुत्वा तौ पलायेतां तदा शत्रुभूतयोस्तयोर्वधो न स्यात्, अतो वसुदेवं बद्ध्वा प्रथमं तयोर्वधोपायः कर्तव्य’ इति मन्त्रं वदता नारदेन निवारितः । एवं च नारदवाक्येन तस्य वसुदेवस्य सुतौ आत्मन आत्माश्रयदेहस्य मृत्युं मृत्युरूपौ ज्ञात्वा लोहमयैः पाशैः भार्यया देवक्या सह वसुदेवं बबन्धेत्यन्वयः ॥१९॥ देवर्षौ नारदे प्रतियाते तु कंसः केशिनमाभाष्य हे केशिन् इति सम्बोध्य ‘गोकुलं गत्वा राममाधवौ भवता हन्येताम्’ इत्याज्ञाप्य तं व्रजे प्रेषयामासेत्यन्वयः ॥ २० ॥

अन्वितार्थप्रकाशिका

यशोदाया इति सार्द्धम् । देवक्या अष्टमगर्भतया प्रसिद्धां कन्यां यशोदायाः सुतामाह स्म । यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह स्म । रोहिणीपुत्रं रामं च देवक्याः सप्तमं सुतमाह स्म । यद्वा । नन्दसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्याया रोहिण्याः सुतमाह स्म । याभ्यां रामकृष्णाभ्यां ते तव पुरुषाः उपलक्षणतया पूतनादयोऽपि हताः तौ रामकृष्णौ त्वत्तो विभ्यता वसुदेवेन स्वमित्रे नन्दे न्यस्तौ गुप्ततया स्थापितौ इति चाह स्म ॥ १७ ॥ निशम्येति ॥ तन्नारदेन वर्णितं निशम्य श्रुत्वा कोपात्प्रचलितानि व्याकुलानीन्द्रियाणि यस्य सः भोजपतिः कंसः वसुदेवजिघांसया निशातं तीक्ष्णं खड्गमादत्त गृहीतवान् । वसुदेवश्च परोक्षमेव ॥ १८ ॥ निवारित इति ॥ तदा च वसुदेवे हते सति तच्छ्रुत्वा तौ पलायेतां किंच वसुदेवस्तज्जिघांसामपि न ज्ञापनीयस्तथा सति नन्दः श्रुत्वा तत्सुतसहितः पलायेत तदा शत्रुभूतयोस्तयोर्वधो न स्यादतो वसुदेवं बद्ध्वा प्रथमं तयोर्वधोपायः कर्तव्य इति मन्त्रं वदता नारदेन निवारितः । न च नारदेन देवकीवसुदेवयोरप्रियं कृतमिति वाच्यं तस्य शीघ्रं कंसहननसंपादनेन पुत्रदर्शनप्रापकत्वात् । एवं च नारदवाक्येन तस्य वसुदेवस्य सुतौ आत्मनः स्वस्य मृत्युं मृत्युरूपौ ज्ञात्वा लोहमयैः पाशैः भार्यया देवक्या सह वसुदेवं बबन्ध ॥ १९ ॥ प्रतीति ॥ देवर्षौ नारदे प्रतियाते तु कंसः केशिनमाभाष्य हे केशिन्निति संबोध्य गोकुलं गत्वा राममाधवौ भवता हन्येतामित्याज्ञाप्य तं व्रजे प्रेषयामास । वस्तुतः हन्येतां प्राप्येतां तत्र लीयतामित्यर्थः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नारदोक्तिमाह यशोदाया इति कन्यां यशोदायाः सुतामाह कृष्णं च देवक्याः सुतमेवाह रामं च रोहिणीपुत्रमाह । नन्वेवं कथं तत्राह तौ बिभ्यता वसुदेवेन नन्दे नन्दगेहे न्यस्तौ स्थापितौ याभ्यां रामकृष्णाभ्यां ते पुरुषाः बकादयो हताः ॥१७॥ भोजपतिः कंसः तन्नारदवचनं निशम्य श्रुत्वा निशातं तीक्ष्णं ॥ १८ ॥ वसुदेवात्ते मृत्युर्नास्ति तस्मिन्हते तु तौ पालायिष्येतां, अतस्तं बधीहि नतु जहीति निवारितः तस्य वसुदेवस्य सुतौ आत्मनः स्वस्य मृत्युं मृत्युकरौ ज्ञात्वा तं बबन्ध ॥ १९–२० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किमाहेत्यत्राह ॥ यशोदाया इति सार्द्धेन ॥ यशोदाया इति ॥ देवक्याः कन्यामष्टमगर्भत्वेन प्रसिद्धां, यशोदायाः सुतां आह । तथा यशोदायाः, पुत्रत्वेन प्रसिद्धं कृष्णं च, देवक्याः, अष्टमगर्भमाह एव । तथा रोहिणीपुत्रं रोहिणीपुत्रत्वेन प्रसिद्धं रामं च, देवक्याः सप्तमं गर्भमाहेति सम्बन्धः । ननु कृष्णरामौ देवकीसुतौ स्यातां चेत् कथं व्रजं गतौ तत्राह । बिभ्यता त्वत्तो भीतिभाजा,

वसुदेवेन, स्वमित्रे नन्दे न्यस्तौ न्यासरूपेण निहितौ। याभ्यां रामकृष्णाभ्यां, वै निश्चितमेव, ते तव, पुरुषा अरिष्टादयो भृत्याः, हताः ॥ १७ ॥ निशम्येति ॥ तन्नारदोक्तं वचः, निशम्याकर्ण्य, भोजपतिः कंसः कोपात् प्रचलितानीन्द्रियाणि यस्य तथाभूतः सन्, वसुदेवजिघांसया वसुदेवं हन्तुमिच्छया, निशातं तीक्ष्णं, असिं खड्गं, आदत्त आददे ॥ १८ ॥ निवास्ति इति ॥ ततः नारदेन, वसुदेवे हते तु तौ पलायेतामतः स न वध्य इत्युक्त्वेति शेषः। निवारितः सन्, तत्सुतं वसुदेवस्य पुत्रमेव, आत्मनः स्वस्य, मृत्युं हन्तारं ज्ञात्वा, नारदोपदेशादिति शेषः, लोहमयैः पाशैः भार्यया देवक्या सह, वसुदवमिति शेषः। बबन्ध ॥ १९ ॥ प्रतियात इति ॥ ततः, देवर्षौ नारदे, प्रतियाते गते सति, कंसः, केशिनं केशिनामानं दैत्यं, आभाष्याहूय, हे केशिन्, भवता रामकेशवौ, हन्येतां व्रजे गत्वा व्यापादनीयावित्यर्थः। इत्युक्त्वा च, प्रेषयामास ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

न्यस्तौ स्वमित्र इति : १०.३६.१८.

विना रामं कृष्णागमनमिह चेन्मुष्टिकवधो न कूटस्यापि स्यात् स तदुभयहन्तेत्यजलिपिः।
मृषा स्यादित्यूचे न्यसनमुभयोर्नन्दसदनेऽन्यथैकस्मिन् न्यस्ते कथमुभयविन्यासकथनम् ॥ ४६ ॥

निवारितो नारदेनेति : १०.३६.१९.

प्रियौ देहपुत्रावुभौ लोकसिद्धौ स्वदेहावनार्थं यथा त्वत्प्रयत्नः।
तथाऽकारि तेनापि पुत्रावनायेत्यमन्तुं न हन्तुं त्वमेनं तु योग्यः ॥ ४७ ॥

पाशैर्बबन्धेति : १०.३६.२०.

कृष्णमयश्रीपाशावासाते एव तौ विचिन्त्य सुतम्। ज्ञात्वेति तदघपूर्त्यै मुनिरनुमेने सकंसमतिपाशम् ॥ ४८ ॥
इमौ सपाशौ यदहं न कुर्यामपाशता स्वेषु ततः कथं स्यात्।
इत्यन्तरालोचित-तत्त्वधर्मस्तथा चकाराऽच्युतदर्शनोत्कः ॥ ४९ ॥
कृते ब्रह्मर्षिणा तत्त्वोपदेशे युक्तमेव सः। चित्तं निगृह्य तत्साक्षात्कारायोत्कण्ठितोऽभवत् ॥ ५० ॥
अधिका भक्ततोऽप्यासीद्भक्तिस्तस्य विभोः पदे। यत्सर्वदैव तद्ध्यानबुद्धि-स्तद्गतमानसः ॥ ५१ ॥
पुरोऽपि तत्तच्चरितादिति स्फुटं तदीयवृत्तिः प्रभुदर्शनोत्सुका। तथार्षवाक्यादपि तद्विभाव्यते तत्रैवमत्रांशतया निगद्यते ॥ ५२ ॥

कृष्णप्रिया

देवर्षि ने कहा सुनो राजन्! देवकी जी के आठवें गर्भ से कन्या का जन्म नहीं हुआ, वह कन्या तो यशोदा की थी। कृष्ण तो देवकी के पुत्र हैं और बलराम रोहिणी के पुत्र हैं ॥ १७ ॥ राजन् परीक्षित्! देवर्षि नारद जी के श्रीमुख से यह वृत्तान्त श्रवण कर राजा कंस को क्रोध उमड़ आया और अत्यन्त विह्वल बन गया। उसने अपने हस्त में तीक्ष्ण खड्ग उठाया और दरबार उपस्थित वसुदेवजी का वध करने के लिए सक्रिय बना ॥ १८ ॥ श्री नारदजी सभा में विद्यमान थे कंस की यह अनुचित चेष्टा को समझाकर रोक लिया और कहा कि, राजन्? सुनो? वसुदेव जी आप को किसी भी अवस्था में कुछ भी हानि नहीं पहुँचा सकते, उनके दो पुत्र कृष्ण एवं बलभद्रजी आपके मृत्युरूप हैं, दोनों ही आप की मृत्यु है–यह मार्गदर्शन मिलते कंस राजा ने वसुदेव जी के प्राण तो नहीं लिए लेकिन उनकी पत्नी देवकी जी के साथ वसुदेव जी को फिर लोहे की शृङ्खला से जकड़ कर कारागार में डाल दिया ॥ १९ ॥ श्री देवर्षि नारदजी कंस राजा को समझाकर चले गए तब कंस राजा ने केशी नाम के असुर को बुलाया और आदेश दिया कि भैया! तुम व्रज में जाओ और राम एवं माधवकृष्ण का वध कर डालो यदि कंस कृष्ण का वध कर देना ऐसा न कहा माधव का वध करना ऐसा कहने से आकाशवाणी का समर्थन मिला यह मधुवंशज मेरा शत्रु है। यदि भूल से भी एक बार मुख से कृष्ण शब्द निकल जाय कंस को भय लगा कि भक्त जाऊँगा इस भय से माधव कहा ॥ २० ॥

प्रेषयामास हन्येतां भवता राममाधवौ[1]। ततो मुष्टिकचाणूरश[2]लतोशलकादिकान् ॥ २१ ॥
अमात्यान् हस्तिपांश्चैव [3]समाहूयाह भोजराट्। भो भो निशम्यतामेतद् वीरचाणूरमुष्टिकौ[4] ॥ २२ ॥
नन्दव्रजे किलासाते सुतावानकदुन्दुभेः। रामकृष्णौ [5]ततो मह्यं मृत्युः [6]किल निदर्शितः ॥ २३ ॥
भवद्भ्यामिह सम्प्राप्तौ हन्येतां मल्ललीलया।
मञ्चाः क्रियन्तां विविधा मल्लरङ्गपरिश्रिताः। [7]पौरा जानपदाः सर्वे पश्यन्तु स्वैरसंयुगम् ॥ २४ ॥

---

[1] केशवौ–श्रीधर. वंशी. जीव. वीर. विज. विश्व.। [2] बछल–वीर.। [3] साम्ना–वीर.। [4] मुष्टिक–श्रीधर वीर. विज.; मुष्टिकाः–प्रा. पा.। [5] सुतौ–विज.। [6] मृत्यु कालनिदर्शितो–वीर विज.; कालनिदर्शित;–इति कस्यचित्। [7] पौरजान–विज.।

कर्दमक्षम।

अन्वयः—ततः, भोजराट्, मुष्टिक चाणूरशल तोशलकादिकान्, च, अमात्यान्, च, हस्तिपान्, एव, (न तु विपक्षन्) समाहूय, आह ॥ २१ ॥ भो, भो, वीरचाणूरमुष्टिकौ, एतत्, निशम्यताम्, आनकदुन्दुभेः, सुतौ, नन्दव्रजे, किल, आसाते ॥२२॥ ततः, मह्यम्, मृत्युः, किल, निर्दशितः, इह, सम्प्राप्तौ, रामकृष्णौ मल्ललीलया, भवद्भ्याम्, हन्येताम् ॥२३॥ मल्लरङ्गपरिश्रिताः विविधाः, मञ्चाः, क्रियन्ताम्, सर्वे, जानपदाः, पौराः स्वैरसंयुगम्, पश्यन्तु ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मह्यं मम निर्दशितौ विधात्रा नारदेन वा। व्रजं गंतुमुद्यतौ। तावाह। भवद्भ्यामिति ॥ २३ ॥ मंचा उत्तुंगस्तंभादिरचितस्थानानि ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः केशिप्रेषणोत्तरम्। मुष्टिकादिनाम्नो मल्लान्। हस्तिपानाधोरणिकान् ॥ २१ ॥ एतत् वक्ष्यमाणम्। आसाते तिष्ठतः आनकदुन्दुभेरिति—तज्जन्मवृत्तान्तेन नारदोक्तिरेव प्रमाणितेति भावः। नारदोक्तिस्तु—'इमौ त्वां वधिष्यतः' इति लक्षणा ॥२२॥ ततस्ताभ्याम्। विधातृदर्शितमृत्युज्ञानं तु योगिनामेवात आह—नारदेन वेति। यद्यपि कंसेन वीरपदेनान्येऽप्यामन्त्रितास्तथापि द्वयोर्नामग्रहणात्तौ चाणूरमुष्टिकौ गोकुलं, गन्तुं सज्जौ दृष्ट्वा कंसो वक्ति—इह मथुरायाम् ॥ निर्दशितः कथितः। संप्राप्ताविति तत्र तस्य "स्थानं प्रधानं न बलं प्रधानं स्थाने स्थितः कापुरुषोऽपि शूरः। जानामि नागेन्द्र तव प्रभावं कण्ठे स्थितो गर्जसि शङ्करस्य"। इत्युक्तेः स्वस्थानस्थितत्वेन नाशासम्भवोऽपीतीह प्राप्तौ हन्येताम्। गीर्मते, प्राप्येतामिति तत्र नीयतामित्यर्थः ॥ २३ ॥ मल्लरङ्गस्य मल्लायोधनस्थानस्य परितः सर्वासु दिक्षु श्रिताः स्थिताः। स्वैरसंयुगं मोद्धाकांक्षापूरकं युद्धम् ॥ मल्लरङ्गो मल्लक्रीडास्थानं तस्य परितश्रिताश्चतुर्दिक्षु वेष्टनरूपेण स्थिता इत्यर्थः। वस्तुतस्तु तयोः पलायननिरोधार्थमेव मञ्चवृत्तिः कृता तेनेति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्यक् ससम्मानं निभृतमाहूय आह। क्रमेण नियुयोज ॥ २१ ॥ भो भो इति युग्मकम्। वीप्साऽवधानार्थं वीरेति प्रोत्साहनाय प्राधान्येन द्वयोरेव सम्बोधनम्। अयमेकवचनान्त एव पाठः स्वामिसम्मतः। व्रजं गन्तुमित्यादि वक्ष्यमाणात्। बहुवचनान्तपाठस्तु बहुत्र हे वीराः हे चाणूर हे मुष्टिकेत्यर्थः ॥ २२ ॥ किल निश्चितं श्रीनारदोक्तौ प्रामाण्यात्। आनकदुन्दुभेरिति तज्जन्मपूर्ववृत्तेन तदैव प्रमाणितम्। ततस्ताभ्यां सकाशात् किल निश्चये निर्दशित उदाहृतः कथित इत्यर्थः। इह सम्प्राप्ताविति तत्र तस्य स्थानवलेनानिष्टसाधने भवतोरशक्तेरिति भावः। मल्ललीलयेति अन्यथा सावधानत्वे तयोरनिष्टस्य दुःशकत्वादिति भावः। वाग्देवीमते तु हन्येतां तयोर्नीयतामित्यर्थः ॥ २३ ॥ अतस्तद्व्यञ्जनार्थं मञ्चाद्युत्सवसामग्री साध्यतामित्याह। मञ्चा इति। विविधाः राजामात्यादियोग्यभेदेन बहुप्रकाराः मल्लानां रङ्गः क्रीडास्थानं तस्य परितः श्रिताः चतुर्दिक्षु वेष्टनरूपेण स्थिता इत्यर्थः। किमर्थं तदाह। पौरेति। पौराः पुरवर्त्तिनो जना जानपदाश्च देशवर्त्तिनः स्वैरेण स्वच्छन्दतया ननु बलात् प्रवर्त्तिततया संयुगं मल्लयुद्धमिति पौरादीनां वञ्चनप्रकारप्रतिपादनम् ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आदि—शब्दादन्ये मल्लाः कंकादयश्च भ्रातरः; सम्यक् सानुग्रहं निभृतमाहूय ॥ २१ ॥ भो भो इत्यादिकं परमावधानार्थम्, वीरेति प्रोत्साहनाय, किल निश्चितम्, श्रीनारदोक्तौ प्रामाण्यात्, आनकदुन्दुभेरिति तज्जन्मपूर्ववृत्तेन तदेव प्रमाणितम् ॥ २२ ॥ ततस्ताभ्यां सकाशात्, किल निश्चये. निर्दशितो लक्षणेनोक्त इत्यर्थः। यद्वा, किल वितर्के, नितरां दर्शिता ज्ञापितः। इह संप्राप्ताविति—तत्र तस्य स्थानबलेनानिष्टसाधने भवतोरशक्तेरिति भावः। मल्ललीलयेति—अन्यथा सावधानत्वे तयोरनिष्टस्य दुःशकत्वादिति भावः ॥ २३ ॥ अतस्तद्व्यञ्जनार्थं मञ्चाद्युत्सवसामग्री साध्यतामित्याह—मञ्चा इति। विविधा राजामात्यादियोग्यभेदेन बहुप्रकाराः 'विधिना' इति पाठेऽपि स एवार्थः, मल्लानां रंग क्रीड़ास्थानम्, तस्य परितः श्रिताश्चतुर्दिक्षु वेष्टनरूपेण स्थिता इत्यर्थः। किमर्थम्? तदाह—पौरा इति, पौराः पुरवर्त्तिनो जना जानपदाश्च देशवर्त्तिनः, स्वैरेण स्वच्छन्दतया, न तु बलाज्जिघांसया, संयुग मल्लयुद्धम्, इति पौरादीनां वञ्चनप्रकारप्रतिपादनम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो मुष्टिकादीनमात्यांश्च हस्तिपांश्च सामोक्त्याहूयोवाच ॥ २१ ॥ उक्तिमेवाह। भो भो इत्यादिभिः पञ्चभिः। भो भो इति द्विर्वचनं प्रत्येकाभिप्रायकं वीरचाणूरेति कर्मधारयः आनकदुन्दुभेर्वसुदेवस्य सुतौ रामकृष्णौ नन्दव्रजे वर्तेते खलु तौ तु मम मृत्यू हन्तारौ दैवेन निर्दशितौ ज्ञापितावतः कथञ्चिदुपायेनेहानीतौ भवद्भ्यां मल्ललीलया हन्येतां हन्तव्यौ ॥ २२-२३ ॥

मञ्चा उत्तुङ्गस्तम्भादिरचितस्थानानि क्रियन्तां कथम्भूताः मल्लयुद्धस्थानपर्यन्तस्थानविशिष्टाः किमर्थं तत्राह । पौराः पुरवासिनो जानपदा देशवासिनश्च सर्वे मञ्चेषूपविश्य स्वैरं यथेष्टं संयुगं युद्धं पश्यन्तु ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मृत्यू मारकौ कालेन यमेन नितरां दर्शितौ ॥ २३ ॥ मञ्चाः उत्तुङ्गस्तम्भादिरचितस्थानानि मल्लरङ्गस्य परितः सर्वासु दिक्षु श्रिताः स्थिताः स्वैरसंयुगं योधाकाङ्क्षापूरकं युद्धम् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मह्यं मम निर्दर्शितो नारदेन ॥ २३ ॥ किञ्च तयोर्वञ्चनार्थमुत्साहवर्द्धनार्थं च महोत्सवप्रसिद्धिः क्रियतामन्यथा तौ पलायिष्येते इत्याह । मञ्चा इति ॥ २४ ॥

गूढार्थदीपिनी

भोजराट् कंस ॥ २१–२२ ॥ मह्यं मम । निदर्शितः सूचितः । हन्येतां प्राप्येतां तत्र लीयतामिति वास्तवोऽर्थः ॥ २३ ॥ मल्लरङ्गो मल्लभूमिः । स्वैरं यथेच्छं संयुगं युद्धम् । जानपदा बहिर्देशीयाः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ततस्तयोरेकतरात् कृष्णात् मह्यं मम मृत्युर्निदर्शितः अस्यास्त्वामष्टमो गर्भो हन्तेत्याकाशवाण्येति शेषः ॥ २३ ॥ मल्लरङ्गपरिश्रिताः मल्लयुद्धस्थानस्य परितो वर्तमानाः मञ्चा उत्तुङ्गस्तम्भादिमयानि स्थानानि स्वैरसंयुगं स्वेच्छकं मल्लयुद्धम् ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हस्तिपान् इदानीमेव दानवारिभयत एकं वस्तु दृष्टमनेकधा भवतीति सूचयति बहुवचनम् । अवान्तराम्बष्टसहितमिति बहुवचनमिति वा । महामात्रेति चैकमात्रसम्बोधनात् । हस्तिपाधिपवाग्वित् हमात्रशब्दस्वारस्याच्चेति ज्ञेयम् ॥ २१ ॥ वीरेति चाणूरमुष्टिकोभयविशेषणम् । अनेनानयोरितरशलतोऽसलयो विशेषस्तत्रापि तन्मुख्य ज्ञानशब्दयोरितिवच्चेन्द्रकामावित्यादिवत्तरतमभावो ध्वन्यते ॥ २२ ॥ मृत्यू कालेन दुर्गारूपेण । यथोक्तमेकादशतात्पर्ये । हरिश्च प्रकृतिश्चत्यारभ्य कालशब्दोदिताः क्रमादिति । निर्दशिताविति छत्रिन्यायेन । क्वचिज्जात इत्येव तदुक्तेः ॥ २३ ॥ मल्लरङ्गं परितः श्रिताः स्वैरं योद्धृपरिश्रमसर्वस्वं संयुगं पश्यन्तु ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सोऽपि भक्तो भविष्यतीति साक्षाद्भगवन्नाम न मुखान्निःसृतं हृदये तेन कार्यं सेत्स्यतीति ज्ञात्वा सर्वानेवाहूय मन्त्रयामासेत्याह । तत इति । मुष्टिकादया मल्लाः अमात्या गृहमन्त्रिणः हस्तिपाः युद्धकुशलाः चकारादन्यांश्च बन्धून् एवकारेण न विपक्षान् समाहूय गृहस्थितानाकारयित्वा आगमनार्थं हेतुमाह । भोजानां राजेति ॥ २१ ॥ समागतेषु तेषु स्ववृत्तान्तमाह । भो भा इति सामान्यसंबो धनद्विरुक्त्या सर्वेषामेव संबोधनं लक्ष्यते तेन प्रत्येकं नाम गृहीत्वा कथयतीति ज्ञापितम् एतन्निशम्यतामिति सावधानाकरण वीरेति विशेषण प्रकृतोपयोगित्वात् सर्वेषा चाणूरेति भिन्नतया निरूपणे तस्यैव वा वीरो वा कश्चित् मुष्टिकादीनां प्रधानेन ग्रहणात् बहुवचनं वा अज्ञातवृत्तान्तमाह । नन्दव्रज इति । मन्त्रे वक्तुर्नाम न ग्राह्यमिति किलेत्याह प्रसिद्ध एवायमर्थः आसाते किल नन्दव्रजे किल आनकदुन्दुभेः सुतौ किल ॥ २२ ॥ नाम्ना प्रसिद्ध्यर्थं नामाह । रामकृष्णाविति । किमतो यद्यवमित्याशङ्क्याह । तता मह्यमिति । मृत्युर्मरणम् अत्रापि पूर्ववत् किलेति निदर्शित इति नितरां दर्शितः प्रत्यक्षतया सर्वैरुक्तः तर्हि किङ्कर्त्तव्यमित्याकाङ्क्षायामाह । भवद्भ्यामिति । इह सम्यक् प्राप्तौ भवद्भ्यां चाणूरमुष्टिकाभ्यां मल्ललीलया हन्येतामिति प्राप्यतामित्युक्तं भवति । यदि लौकिकभाषया स विरुद्ध न वदेत् तदा भगवानपि लोकरीत्या तं न मारयेत् लीलयेति पदं भागिनेयाविति प्रकटतया तथा करणमनुचितमिति । अत एव भगवतापि तथैव कृतं नतु शस्त्रेण नापि मुष्टिभिः ॥ २३ ॥ अयम्भावः भगवता तद्धृदये स्थापित इति बालकवञ्चनार्थं मल्लरङ्गप्रकारः । मञ्चाः क्रियन्तामिति विविधा इति । मनोहरत्वाय येनान्यचित्तत्व भार यतु शक्यत मल्लाना रङ्गस्थानमाश्रित्य परितिस्तष्ठन्तीति मञ्चानां सर्वतः करणं येनैव सुखेन मल्लैः सह युद्धं तत्रैव भ्रमाथ कवलभ्रमा न भविष्यतीति तत्र लोकानां निवेशनमाह । पौरा जानपदा इति । पुरवासिनो जनपदवासिनश्च पृथक् पृथक् मञ्च स्थिताः स्थरसयुगं स्वेच्छया युद्धं पश्यन्त्विति तेषां कोलाहलेन वा अन्यचित्ततेति अपकीर्त्यभावश्च फलिष्यतीति ॥ २४ ॥

श्रीसुबोधिनी–सारः

भवता त्वया रामकेशवौ हन्येतां ततोऽनन्तरं मुष्टिकादीन् मल्लान् ॥ २१ ॥ अमात्यान् मंत्रिणो हस्तिपानंबष्ठांश्च समाहूय भोजराट् कंस आह भोभो वीरचाणूरमुष्टिकाः एतद्वचो निशम्यतां श्रूयताम् ॥ २२ ॥ आनकदुंदुभेर्वसुदेवस्य सुतौ नंदस्य व्रजे किल

निश्चयेनासाते वर्त्तेते रामकृष्णौ इति नामानौ ततस्ताभ्यां मह्यं मम मृत्युः प्रदर्शितः ॥ २३ ॥ इह मधुरायां संप्राप्तौ तौ मल्ललीलया भवद्भ्यां चाणूरमुष्टिकाभ्यां हन्येतां मल्लरंगेन परिश्रिता युक्ता विविधा नाना प्रकारा मंचाः क्रियन्तां मण्डपाकृतयो मञ्चा ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततः केशिप्रेषणानन्तरं भोजराट् कंसो मुष्टिकादीन् समाहूयाहेत्यन्वयः ॥ २१ ॥ यदाह तद्दर्शयति–भो भो इति । 'भो भो वीर' इति सामान्यसम्बोधनद्विरुक्त्या सर्वेषामेव सम्बोधनं लक्ष्यते । तत्रापि मुख्यौ सम्बोधयति—चाणूरमुष्टिकौ इति । एतन्मदाज्ञापनं निशम्यतां श्रूयताम् । एवं सावधानीकृत्याह नन्देति । नन्दव्रजे रामकृष्णौ आनकदुन्दुभेः सुतावासाते । किलेति नारदोक्तं प्रमाणं सूचयति ॥ २२ ॥ ततः किमत आह—तत इति । ततस्ताभ्यां मह्यं मम मृत्युर्नारदेन निदर्शितः । 'ततः किं कर्त्तव्यम्' इत्यत आह—इह सम्प्राप्तौ तौ भवद्भ्यां चाणूरमुष्टिकाभ्यां मल्ललीलया हन्येतामिति ॥ २३ ॥ मल्लरङ्गपरिश्रिताः मल्लयुद्धभूमिं सर्वतः संल्लग्नाः विविधा मञ्चा उत्तुङ्गस्तम्भादिरचितस्थानानि क्रियन्तां विरच्यन्ताम् । 'किमर्थम्' इत्यपेक्षायामाह—पौराः पुरवासिनः जानपदा बहिर्देशवासिनश्च सर्वे तत्रोपविष्टाः स्वैरं यथेष्टं संयुगं युद्धं पश्यन्त्विति ॥ २४ ॥

अन्वितार्थप्रकाशिका

तत इति ॥ ततः केशिप्रेषणानन्तरं भोजराट् कंसः मुष्टिकचाणूरादिकान् समाहूयाह स्म ॥ २१ ॥ भो भो इति द्वयम् ॥ वीर इति सामान्यसम्बोधनम् । चाणूरमुष्टिकौ इति मुख्यसम्बोधनम् । हे वीराः ! हे चाणूरमुष्टिकाविति द्वन्द्वः । एतन्मदाज्ञावचनं निशम्यतां श्रूयताम् । नन्दव्रजे रामकृष्णौ आनकदुन्दुभेः सुतावासाते । किलेति ततस्ताभ्यां सकाशात् मम मृत्युर्नारदेन निदर्शितः । अतः इह संप्राप्तौ तौ भवद्भ्यां चाणूरमुष्टिकाभ्यां मल्ललीलया हन्येताम् । वास्तवोऽर्थः प्राग्वत् ॥ २२–२३ ॥ अमात्यानाह—मञ्चा इति ॥ मल्लरङ्गपरिश्रिताः मल्लयुद्धभूमिं सर्वतः संलग्नाः मञ्चाः उत्तुङ्गा स्तम्भादिरचितस्थानानि क्रियन्तां विरच्यन्ताम् । पौराः पुरवासिनः जानपदाः बहिर्देशवासिनश्च सर्वे तत्रोपविष्टाः स्वैरं यथेष्टं सयुगं युद्धं पश्यन्त्विति पौरवञ्चनप्रकारः ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अमात्यान् सचिवान् ॥ २१ ॥ निशम्यतां श्रूयतां ॥२२॥ ततस्ताभ्यां मह्यं मम मृत्युः नारदेन दैवेन वा निदर्शतः ॥२३॥ मंचाः उच्चैः स्थम्भादिनिर्मितस्थानानि कुत्र मल्लरंगे मल्लरमणस्थाने परिश्रिताः आश्रिताः स्वैरसंयुगं स्वतंत्रयुद्धम् ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः, भोजराट् कंसः, मुष्टिकश्च चाणूरश्च शलश्च तोशलकश्च ते आदयो येषां तान्, अमात्यांश्च, हस्तिपांश्च, समाहूय, आह सामोक्तिपूर्वमुवाच एव ॥ २१ ॥ उक्तिमेवाह भो भो इत्यादिभिः पञ्चभिः ॥ भो भो इति ॥ भो भो इति द्विवर्चनं प्रत्येकाभिप्रायकम् । हे वीरचाणूरमुष्टिकाः, पाठान्तरे वीरचाणूरेति कर्मधारयः । एतन्मद्वचनं, निशम्यतां श्रूयताम् । नन्दव्रजे, आनकदुन्दुभेर्वसुदेवस्य, सुतौ, आसाते स्थितौ भवतः किल निश्चितमेव ॥ २२ ॥ रामकृष्णाविति ॥ ततः, रामकृष्णौ रामकृष्णनामानौ तौ, मह्यं मम, मृत्यू निदर्शितौ । विधात्रा नारदेन वेति शेषः । किल । अतः, इह संप्राप्तौ, तौ भवद्भ्यां, मल्ललीलया मल्लक्रीडया, हन्येतां व्यापादनीयावित्यर्थः ॥ २३ ॥ मञ्चा इति ॥ किं च मल्लरङ्गपरिश्रिताः मल्लयुद्धस्थानपर्यन्तस्थानविशिष्टाः मल्लभावावेशपूरकाः इति केचित् । विविधाः नैकविधाः, मञ्चाः उत्तुङ्गस्तम्भरचितस्थानानि, क्रियन्ताम् । किमर्थं तत्राह । येषु स्थित्वेति शेषः । पौराः पुरवासिनो जनाः, जानपदा देशवासिनो जनाश्च, सर्वे, स्वैरसंयुगं यथेष्टसंग्रामं, योधाकाङ्क्षापूरकं युद्धमित्यर्थः । पश्यन्तु । अत्र केषुचित्पुस्तकेषु द्रुमिलगन्धर्ववीयतः कंसोत्पत्तिश्लोकाः दृश्यन्ते, ते तु क्षेपकवत्प्रतीयमानत्वान्न व्याख्याताः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

प्रेषयामासेति : १०.३६.२१.

आगच्छत्विह शीघ्रं श्रीशो मदनुग्रहार्थमिति कंसः । तन्मिषतो निजमश्वं प्रायः समयोजयत्ततः स्वरथम् ॥ ५३ ॥
केशिप्रेषणमिषतस्तत्पदसक्तं निजं मनः कृत्वा । कंसः स तत्त्वबुद्धिः स्वशुभायोपादिशत् सुधर्मगतिम् ॥ ५४ ॥

कृष्णप्रिया

केशी दानव को सूचना करके भोजराज कंस ने मुष्टिक चाणूर शल ताशेल दश हजार हस्तियों के समान महा बलिस्ट भल्लों को, कुवलयापीड हाथी के महावतो और अपने समस्त अमात्यों को बुलाकर कहा, लेकिन अपने विपक्षीओं को न बुलाये ॥ २१ ॥ हे वीर चाणूर ! हे वीर मुष्टिक ! हे वीरपुरुषों ! और हे बलिस्ट मल्लों ? सुनो' आनकदुन्दुभि वसुदेव के दा पुत्र कृष्ण एवं बलदेव दोनों वर्त्तमान में नन्द के व्रज में निश्चित रूप से रहते हैं । श्री देवर्षि नारद जी ने मुझे कहा है कि उनके हाथ से मेरी मृत्यु है । मैं उन दोनों को यहाँ बुला लेता हूँ ॥ २२–२३ ॥ सभासदो को बिराजने के विविध प्रकार के मञ्चों की रचना की जाय और मध्य स्थली में एक विशाल अखाड़ा बनाया जाय, नागरिक लोग और भिन्न–भिन्न देश नगर गावों से आये हुए लोग निर्दिष्ट मञ्चो पर बैठकर उस स्वैच्छिक विनोद मल्लदंगल को देखें ॥ २४ ॥

[1]महामात्र त्वया भद्र रङ्गद्वार्युपनीयताम् । द्विपः कुवलयापीडो जहि तेन ममाहितौ ॥ २५ ॥
आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि । विशसन्तु पशून् मेध्यान् भूतराजाय मीढुषे ॥ २६ ॥
इत्याज्ञाप्यार्थतन्त्रज्ञ[2] आहूय यदुपुङ्गवम् । गृहीत्वा पाणिना पाणिं [3]ततोऽक्रूरमुवाच ह ॥ २७ ॥
भो भो दानपते मह्यं क्रियतां मैत्रमादृतः । नान्यस्त्वत्तो हिततमो विद्यते भोजवृष्णिषु ॥ २८ ॥

श्रीमद्वीरराघवाचार्यविजयध्वजकृतव्याख्यानुसारि [**मूलम्**]

१. महामात्र निबोधेदं वचो मम महामते । गजः कुवलयापीडः प्रभिन्नकटकामुखः ॥ १ ॥
संस्थाप्यो द्वारि रङ्गस्य करारोपितमुद्गरः । तेन तौ तत्र हन्तव्य। सुतावानकदुन्दुभेः ॥ २ ॥
इत्युक्त्वा तं महामात्रं कंसस्तत्रैव दुर्मतिः । उवाच भूयो वचनं समेतान्ज्ञापयन्नृप ॥ ३ ॥
कंसः—शृणुध्वमेतद्वचनं मयोदितं निशम्य सर्वं यदि धारयन्तु तत् ।
येनाहमेतेष्वसुहृत्त्वमादितश्चरामि बन्धुष्वपि तत्र कारणम् ॥ ४ ॥
माता मम महाभागा कदाचिन्कमलेक्षणा । विचरन्ती गृहोद्याने मन्दमारुतवीजिते ॥ ५ ॥
प्रोत्फुल्लाशोकबकुलपूगपुन्नागशोभिते । भ्रमद्भ्रमरसङ्घातकूजत्कोकिलसंयुते ॥ ६ ॥
नृत्यच्चित्रखण्डिनिवहे मर्कटाटोपसुन्दरे । वसन्तसमये रम्ये सालमण्डलमण्डिते ॥ ७ ॥
चरन्ती तत्र मे माता चिन्तयामास सुव्रता । भर्तारं कामसन्तप्ता ऋतुस्नाता स्वलंकृता ॥ ८ ॥
अत्रैव कश्चिद्गन्धर्वो द्रविडो नाम नामतः । चरन्नन्तर्हितः काले दृष्ट्वा तामेकचारिणीम् ॥ ९ ॥
विज्ञाय चिन्तितं तस्याः सर्वसत्वाशयार्थवित् । उग्रसेनवपुर्बिभ्रत्सस्मितालापवीक्षितः ॥ १० ॥
तामाससाद कामार्तो कामयानः पतिव्रताम् । अजानमाना साऽभ्येत्य रेमे तेन समं वने ॥ ११ ॥
सा तं विदित्वं रमणेतरं सतो नितान्तखेदाविललोचनाशया ॥ १२ ॥
उवाच कस्त्वं कितवार्यगर्हितं दुरात्मना येन कृतं त्वमेदृशम् ॥ १३ ॥
इति ब्रुवन्ती परिसान्त्वयन्शनैस्स दीर्घबाहुर्द्रमिडोऽभ्यभाषत । वयं हि गन्धर्वकुलोद्भवाऽबले गीर्वाणतुल्यामरवल्लभानुगाः ॥१४॥
भवादृशीनां मनुजाङ्गनानां जानीहि भद्रे सुलभा वयं न च । जराविनाशाद्यखिलाधिभागिनां नृणां सुराणां महदन्तरं शुभे ॥१५॥
इति ब्रुवन्तं सा भूयः क्रोधपर्याकुलेन्द्रिया । किं मां सान्त्वयसे भूयः कृत्वेत्यर्थं दुष्टचेष्टितम् ॥ १६ ॥
इमानतिक्रम्य महीजलाग्निसमीरणाकाशनिशेशसूर्यान् ।
दिक्कालधर्मांश्च तथैव सन्ध्ये दुरात्मनेत्थं मलिनीकृताहम् ॥ १७ ॥
गजेनेव मदान्धेन पद्मिनी वनमध्यगा । विशृङ्खलेन विमला येनाहं मलिनीकृता ॥ १८ ॥
सत्वं किमिति मां भूयस्सान्त्वयास्यमराधम् । इति ब्रुवन्तीं प्रोवाच सभयश्शापशङ्कितः ॥ १९ ॥
अनुलोमस्तु कञ्जाक्षि मनुष्यासु दिवौकसाम् । नराणां देवकान्तासु प्रतिलोमो हि सङ्गमः ॥ २० ॥
जानीहि मामनागस्कृत्ते हि पङ्कजगन्धिनी । तस्मात्ते जायतां पुत्रो मद्वीर्यं न वृथा भवेत् ॥ २१ ॥
श्रीमान्धीमान्महोत्साहो न मे वाग्जायते मृषा । इत्येवं वादिनं क्रुद्धा मम माता यशस्विनी ॥ २२ ॥
प्राह संत्यज्य संशप्ता पातिव्रत्यं सुदुर्लभम् । निस्सेतोभिन्नवृत्तस्य पापस्योन्मादवर्तिनः ॥ २३ ॥
क्रूरस्ते तनयो भूयात्साहसी निर्गुणादयः । नानुग्राह्यो देवतानां द्विजानां च तपस्विनाम् ॥ २४ ॥
इत्थं वदन्त्यां तस्यां सः क्रुद्धायां शापशङ्कितः । तावकानां भवेच्छत्रुरित्युक्त्वान्तरधीयत ॥ २५ ॥
गते तस्मिन्गृहाद्यानान्माता मम यशस्विनी । केनाप्यज्ञातवृत्तान्ता गृहानेवाभ्यपद्यत ॥ २६ ॥
ततस्सा गर्भिणीं काले कालेनैव सुषाव माम् । इति मे नारदः प्राह कदाचिद्भगवानृषिः ॥ २७ ॥
तदा प्रभृत्यहं द्वेष्मि तानेतान्बन्धुदुर्जनान् । यूयं तत्र प्रमाणं हि द्विषन्ते तेऽपि मां सदा ॥ २८ ॥
उग्रसेनं च दुर्बुद्धिं देवकं च दुराशयम् । वसुदेवं च कितवमन्यांश्च तदुपाश्रयान् ॥ २९ ॥
हत्वा न जायते दोषो मम गन्धर्वजन्मनः । तेनादेक्ष्यामि परुषं हन्येतामिति तावहम् ॥ ३० ॥
ताभ्यां हताभ्यां बालाभ्यां कुञ्जरेण बलीयसा । कृत्वा भद्रात्मिकीं पूजां यान्तु तत्पदवीमिमे ॥ ३१ ॥
वसुदेवोग्रसेनौ च तथा तौ नन्ददेवकौ । गोपाला यादवाश्चैव ये चान्ये तावनुव्रताः ॥ ३२ ॥
पश्यन्तु विविधैर्नन्त्रैर्हन्यमानौ स्वदारकौ । आहूयन्तां जानपदाः पश्यन्तु स्वैरसंयुगम् ॥ ३३ ॥

एते (३३) श्लोकाः कोशान्तरे मुद्रिताः कुत्रापि न व्याख्याता अपि विषयसौष्टवात्परिग्राह्या इति ग्रन्थेस्मिन् पाठान्तरतया संयोजिताः ।

२. अर्थं तत्वज्ञं–विज. । ३. तत्राक्रू–बिज. ।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका [टीका]

हे महामात्र ! हस्तिपक तस्यैव सम्बोधनं महामते इति इदं वक्ष्यमाणं वचः शृणु कुवलयापीडाख्यो द्विपो गजो रङ्गस्य युद्धस्थानस्य द्वारि संस्थाप्य कथम्भूतः प्रभिन्ने विकसिताग्रे करे भा कान्तिर्यस्य तन्मुखं यस्य करे आरोपितो ग्राहितो मुद्गरो यस्य सः तेन कुवलयापीडेन तावानकदुन्दुभेः सुतौ तत्रैव द्वार्येव हन्तव्यौ । अथ स महामात्रः व्याकुलचित्तः प्राह किमिति पृथ्वीपतेर्भोजराजस्य कंसस्य तव भगिनीपुत्रौ रामकृष्णौ कथं मया हन्तव्यौ इत्ययोग्यतासूचनाय स्वस्रीयावित्युक्तिः तेन महामात्रेणेत्थमुक्तः स कंसो दुर्मतिर्नृपः समुदितान्सर्वान् श्रावयन् पुनराह कंसवचनमेवाह । शृणुध्वमित्यादिना भूतनाथाय मीढुष इत्यन्तेन । एतद्वक्ष्यमाणं वचः शृणुध्वमिति श्रवणाभिमुख्यप्रार्थनामामोदितमाकर्ण्य तत्सर्वं भवन्तो हृदि धारयन्तु इति श्रुतस्य चित्ते स्थिरीकरणप्रार्थना किन्तदित्यपेक्षायां तावदात्मनो बन्धुषु विद्वेषकारणपरमिति हासं प्रतिजानीते । येनेति । येन हेतुमाह बन्धुषु असुहृत्त्वं द्वेषमाश्रितस्तेष्वेव चराभि तस्य विद्वेषपूर्वकचरणस्य कारणं ब्रवीमि इति शेषः । तत्परमितिहासमाह । मातेत्यादिना महाभाग सुन्दरी भाग्यशालिनी वा मम माता महत्युद्याने वने कदाचिद्विचरन्ती बभूव । कथम्भूते वने मन्देन मारुतेन वीजिते सञ्चलिते प्रोत्फुल्लैरशोकादिभिर्युते भ्रमतां भ्रमराणां संघातः सङ्घा यस्मिन् कूजद्भिः कोकिलैः संकुले व्याप्ते नृत्यतां शिखण्डिनां मयूराणां निवहः सङ्घो यस्मिन् मर्कटानामाटोपेन सम्भ्रमेण सुन्दरे वसन्तकालसहाचरिते रम्ये । शालानां वृक्षाणां मण्डलेन मण्डिते तत्रैवं भूते महोद्याने चरन्ती सुव्रता पतिव्रता ऋतुस्नाता स्वलंकृता च मे माता भर्तारं चिन्तयामास तदैव कश्चिन्नाम्ना द्रुमिल इति प्रसिद्धः गन्धर्वः इतरैरलक्ष्यमाणश्चरन् गां मम मातरमसहायचारिणीं दृष्ट्वा तस्याश्चिन्तितं विज्ञाय सर्वेषां तत्त्वतोऽभिप्रेतमर्थं वेत्तीति तथाभूतः हेतुगर्भमिदं तत्त्वात् विज्ञाय सस्मिते आलापवीक्षिते यस्य तदौग्रसेनम् उग्रसेनसदृशं वपुर्बिभ्राणः कामार्तस्तां पतिव्रतां कामयानामिच्छानुरूपं वने चरन्तीमाससाद सस्मितालापवीक्षितमिति क्रियाविशेषणं वा सा त्वजानन्त्यभ्येत्य वने तेन सह रेमे । ततः सेङ्गितादिभिः कथञ्चित्पत्युरन्यं विदित्वा सती पतिव्रता हेतुगर्भमिदम् । अतो नितान्तोऽपारः खेदो यस्याः आविले व्याकुले लोचने आशयो मनश्च यस्याः तथाभूता प्राह किमिति हे कितव ! धूर्त येन दुरात्मना त्वयेत्थमार्यैर्गर्हितं निन्दितं कृतं स त्वं क इति इत्थं ब्रुवन्तीं तां शनैः परिसान्त्वयन् स दीर्घबाहुर्द्रुमिलः प्राह किन्तदाह । वयमिति । वयं तावद्गन्धर्वदेहजा गन्धर्वाः गीर्वाणैर्देवैस्तुल्या अमरवल्लभस्येन्द्रस्यानुचराश्च तुल्यामरेत्यत्र सन्धिरार्षः कर्मधारयो वा हे भद्रे ! वयं भवादृशानां मनुजासक्ताशनानां मनुजोपभोग्यानां मानुषीणामिति यावत् न च सुलभाः किन्तु दुर्लभा वयमित्यर्थः । तत्र हेतुमाह । जनुरिति जनुर्विनाशौ जन्ममरणे आदी येषां तानाधिर्मनःपीडा इदं व्याधीनामुपलक्षणं तान् भजन्तीति तथा तेषां नृणां तद्विपरीतानां सुराणाञ्च महत्तारतम्यमस्ति तस्माद्वयं दुर्लभा इत्यर्थः । इत्थं ब्रुवन्तं द्रुमिलं प्रति सा क्रोधादाकुलानीन्द्रियाणि यस्याः सा पुनराह किमिति । इत्थं दुष्टचेष्टितं कृत्वा भूयः किमर्थं मां सान्त्वयसे इमान् दशपुण्यपापसाक्षिणः अतिक्रम्यावधीर्य तिरस्कृत्य च येन त्वयेत्थमहं मलिनीकृता निशेशश्चन्द्रः यथा मदान्धेन गजेन्द्रेण पद्मिनी तद्वत्तत्तत्तनुमध्यस्था निर्मलाचाहं विश्रृङ्खलेन लोकवेदमर्यादाविलङ्घिना येन त्वया मलिनीकृता स त्वं मां मलिनीकृतां हे अमराधम ! किमिति सान्त्वयसे इत्थं ब्रवतीं तां स पुनः शापशङ्कितः प्रोवाच तदेवाह । अनुलोम इति । हे सरोजाक्षि ! मनुष्याणां दिवौकसां च सङ्गमोऽनुलोमः क्रमप्राप्तः न्याय्य एवेति भावः । देवकान्तासु नराणान्तु सङ्गमः प्रतिलोमोऽन्याय्य इति जानीहि तेन कारणेन हे पङ्कजगन्धिनि नाहमपराधकृत् किञ्च तस्मादनुलोमात्संगमाच्छ्रीमान्धीमान्महोत्साही च पुत्रो जायतां सर्वथा च मद्वीर्यं न वृथा भवेन्नापि मे वाङ्मृषा भवेत् इत्थं वादिनं प्रति क्रुद्धा मम माता सुदुर्लभं पातिव्रत्यं सन्त्यजात एव सन्तप्ता तमाह । तदेवाह निःसेतोरिति । मर्यादातिलङ्घिनः भिन्नं निरस्तं वृत्तं स्वाचारो येन तस्य पापात्मनः लोकवेदप्रतिषिद्धाचारवर्त्तिनस्तव जनिष्यमाणः तनयः क्रौर्यादिगुणको भूयात् अगुणः अक्रोधाद्यात्मगुणरहितः देवतानां तपस्विनां द्विजानां च निग्राह्यः इतीत्थं तस्यां मन्मातरि ब्रुवन्त्यां क्रुद्धायां च सत्यां स द्रुमिलः शापशङ्कितः मह्यमियं शपेतेति शङ्कितस्तर्हि तावकानां त्वद्बन्धूनामेव शत्रुर्भवेदित्युक्त्वान्तर्हितवान् तस्मिन् द्रुमिले तस्मान्महोद्यानाद्गते सति मम माता उद्याने च केनाप्यविज्ञातः स वृत्तान्तो यस्यास्तथाभूताऽभ्यपद्यत गृहमिति शेषः । ततः सा गर्भं धृत्वा प्रसवकालेनैव सुषाव प्रसूतवती कथमयं वृत्तान्तस्त्वया विज्ञात इत्यत्राह । इतीति । यदा नारद आह तत आरभ्याहं बन्धुषु तांस्तान् दुर्जनान्मम प्रतिकूलान् द्वेष्मि, एतेऽपि मां सदा द्विषन्ति तत्र यूयं प्रमाणं खलु भवन्तो जानन्ति खल्वित्यर्थः, अत उग्रसेनादीन् हत्वा वर्तमानस्यापि मम दोषो न जायते तत्र हेतुर्गन्धर्वजन्मन इति । गन्धर्वान्नतूग्रसेनाज्जन्मोत्पत्तिर्यस्य तस्य ममेति यतो न दोषस्तेन कारणेनाहमादेक्ष्याम्याज्ञापयामि किमिति तौ रामकृष्णौ पुरुषं यथा तथा हन्येतामिति तावद्बलीयसा कुञ्जरेण कुवलयापीडेन हताभ्यां बालाभ्यां रामकृष्णाभ्यां पूजोपकरणभूताभ्यां पारत्रिकीं परलोकस्य वैवस्वताद्युद्देश्यकपूजां कृत्वा इमे वसुदेवादयोऽपि तयोः पदवीं यान्तु ततस्तावल्लोकान्तरप्राप्तिरेव वसुदेवादिभिः परत्र कर्त्तव्या पूजेति वा भोः अतो वसुदेवादयस्तदनुव्रताश्च सर्वे हन्यमानौ दारकौ बालकौ वारिभृतैः शोकाश्रुजलपूर्णनेत्रैरित्यर्थः । पश्यन्तु जानपदा देशवासिन आहूयन्तां किमर्थं मम पौरुषं पश्यन्तु ।

कर्दमक्षमा

अन्वयः—हे महामात्र ! हे भद्र ! (अभद्र इति सरस्वती संकेतः) त्वया, रङ्गद्वारि, द्विपः कुवलयापीडः, उपनीयताम्, तेन, मम, अहितौ जहि ॥२५॥ चतुर्दश्याम्, यथाविधि, धनुर्यामः, आरभ्यताम्, भूतराजाय, मेध्यान्, पशून्, विशसन्तु ॥२६॥ इति, (महामात्रादीन्) आज्ञाप्य, ततः, अर्थतन्त्रज्ञः, यदुपुङ्गवम्, अक्रूरम्, आहूय, पाणिना, पाणिम्, गृहीत्वा, ह उवाच॥२७॥ भो, भो, दानपते ? आद्दतः (भवान्) मह्यम्, मैत्रं (मित्रकार्यं) क्रियताम् भोजवृष्णिषु, त्वत्तः, अन्यः, हिततमः, अन्यः, न, विद्यते ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अहितौ शत्रू ॥ २५ ॥ मीढुषे वरदाय ॥ २६ ॥ अर्थतंत्रज्ञोऽर्थसिद्धांतमेव जानातीत्यर्थः ॥ २७ ॥ हे दानपते अक्रूर मैत्रं मित्रकृत्यं त्वया क्रियताम्। त्वत्तोऽन्य आद्दतः सादरो हिततमश्च न विद्यत इति ॥ २८–३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

महामात्र हस्तिप "महामाऽत्रोतिविस्तारे हस्तिपे चावनौ स्त्रियाम्" इति निरुक्तिकोशे। "रङ्गोक्तीरागनृत्यायोधनभूमित्र पुष्वथ" इति कोशात्। कुवलयं भूमण्डलमापीडयतीति। यद्वा—कुवलयं कैरववनं, वा कुवलयं कैरवमापीडे शेखरे यस्य स तथा ॥ हे भद्रेति। त्वं चतुरशिरोमणिरसीति प्रोत्साहनाय सम्बुद्धिरियम्। **ममाहिताविति**–ननु तौ तु त्वद्भागिनेयावेवेति चेत्तत्र तं हरिवंशीयवृत्तान्तेन नारदाच्छ्रुतेन हस्तिपं कंसो बोधयामास। तच्च सौभपतिद्रुमिलदानवादुग्रसेनरूपधरात्तत्पत्न्यां मज्जन्मेति नारदेन मह्यमुक्तमिति। अतस्तौ शत्रू मे, नाहं यादवः किन्तु दानव एव, तौ च दानवारी एवेति तत्त्वम् ॥ २५ ॥ धनुर्यागो धनुषोऽर्चाबलिदानादिरूपः। भूतराजाय भैरवविग्रहधारिणे रुद्राय। मीढुषे समर्थायाभीष्टदात्रे वा ॥ न केवलं लौकिक एवोपायः कार्यः किन्तु दैवोऽपीत्याह—आरभ्यतामिति। **भूतराजाय** भूतेश्वराय मथुरापालाय तस्य धनुषोऽपि दैवताय श्रीरुद्राय। मेहति सिंचति वरदानेन तर्पयति निजार्चकमिति तस्मै ॥२६॥ अर्थसिद्धान्तमेवेत्यत्रैवकारेण धर्मादिज्ञानराहित्यमुक्तम्। "तंत्रं कुटुम्बकृत्ये स्यात्सिद्धांते चौषधोत्तमे। प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे ॥ श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके। इतिकर्तव्यतायां च" इति मेदिनी। ततः पाणिग्रहणानन्तरम् ॥ अर्थो द्वितीयपुरुषार्थस्तस्यैव तन्त्रं सिद्धान्तं जानाति न तु धर्ममोक्षयोरित्यसूच्यनेन। यदुपुंगवमिति—सर्वेषां यदूनामास्थास्पदमतोऽस्यैव योग्यता न तु केवलं मदीयानामिति। वस्तुतस्तु यदूनामेव हितकरः न तु तस्य, स्वस्य दानवमननादिति भावः। पाणिग्रहणं तु केवलस्नेहप्रदर्शनार्थं निजोक्तिपालनार्थमेवेति ॥ २७ ॥ दानपते अक्रूरहस्ते काचिद्दानपतित्वसंपादिका रेखास्ति, तेन भाविदानपतित्वमालक्ष्याऽऽमंत्रित इति प्रतीयते। यद्वा—कंसस्य दानाध्यक्ष एव स इति ज्ञेयम्। यद्वा—दानमस्ति येषां ते दाना उदाराः। मत्वर्थीयोऽच्। तेषां पते ॥ भोभो इत्यादरे वीप्सा। दानपते हे वदान्यवरेत्यर्थः। अतो मदर्थितमपि त्वयाऽवश्यं संपाद्यमिति भावः। ननु भोजराज कुतो मामेव प्रेरयसि सर्वे यादवास्त्वदाज्ञाकारिणस्तत्राह—आद्दत इत्यादि। त्वत्तोऽन्यो नैपुण्येन कार्यसाधको न कोऽप्यस्तीत्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली [टीका]

हे महामात्र ! हस्तिप कुवलयं भूमण्डलमापीडयतीति कुवलयं कैरवमापीडे शेखरे यस्य स तथेति प्रभिन्नकरटामुखः मदस्राविगण्डमुखः ॥ मुद्गरो लोहदण्डः ॥ जगतीपतेः राजप्रधानलोकभर्तुः जगतीराजप्रधानेऽपीति हलयुधिः ॥ सालानां सर्जानां मण्डले समूहेनालंकृते ॥ नाम प्रसिद्धः ॥ सर्वेषां सत्त्वानां प्राणिनां आशयार्थम् अभिप्रेतार्थं वेत्तीति सर्वसत्त्वाशयार्थवित् ॥ नितान्तखेदेन अतिमात्रव्यथया आविलौ संकुलौ लोचनाशयौ यस्याः सा तथा ॥ गीर्वाणतुल्यश्चामरवल्लभानुगाश्च अमरवल्लभ इन्द्रः ॥ जराच विनाशश्च जराविनाशौ तौ आदी येषाम् अखिलानांमाधीनां ते जराविनाशाद्यखिलाधयः तान् भजितुं शीलमेषामस्तीति जराविनाशाद्यखिलाधिभागिनः तेषां महान्तरं विशेषः ॥ अस्तु विशेषस्ततः किंदोषः स्यादिति धिया वक्ति इतीति ॥ ननु कथमेतद्दुष्टचेष्टितं किमप्यतिक्रम्याकरणाद्दोष्यत्वादिति तत्राह। इमानिति। अवधार्य अवज्ञाय ॥ मलिनत्वं सदृष्टान्तमाह। गजेनेति। अमरैरधमः गर्हितः अधमो गर्हितन्यूनाविति च देवयोनिषु नीच इति वा ॥ मया कृतस्य कर्मणः सावद्यत्वे जलाग्त्यतिक्रमणदोषापादनं न स्याद्देवयोनित्वेन मम त्वत्सङ्गमोऽनुकूल एव विहितत्वादिति छलाभिसन्धिराह। इतीति। दिवौकसां देवानां मर्त्यास्त्रीषु सङ्गमो ऽनुलोमोऽनुकूलः ॥ मनुष्याणां देवस्त्रीषु समः प्रतिलोमो विरुद्धः शन्तन्वादीनां गङ्गादिषु सङ्गमो दृष्टचरोऽतः कथमेतदिति। मन्दाशङ्कां पूर्वाऽवस्थामपेक्ष्य दोषाशङ्का नास्तीति हि शब्देन परिहरति ॥ निरसेतोरित्यस्य विवरणं भिन्नवृत्तस्येति वृत्तं चरितम् अस्य विवरणम् उन्मार्गवर्तिन इति निर्दयः निर्गता करुणा यस्मात्स तथा अघृणः अकृत्यजुगुप्सारहितः घृणा जुगुप्सा कृपयोरिति च दयदानगतिशोषणादिष्विति धातोः यजनादिधर्मशून्यः घृणा कृपा तया रहितः ॥

तावकातां देवानामिति शेषः ॥ बन्धुषु दुर्जनान् बन्धुभूतान् दुर्जनान्वा ॥

के ते इति तत्राह। उग्रसेनमिति ॥ कुतः पितृहत्यादिदोषो नास्तीति तत्राह। ममेति ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो किम्वा मल्लानां प्रियतमानां श्रमोत्पादनेन मत्तहस्तिनैव सुखं तत् साध्यमिति वहिर्व्यञ्जयन्नन्तस्तु बिभ्यदेवाह। महेति। भद्र! हे चतुरेति प्रोत्साहयति एतदर्थमेवास्मिन् स्वयमनेन श्रीनारदाच्छ्रुतमात्मजन्म सौभपति द्रुमिलाख्यदानवादुग्रसेनस्य रूपधरात् तत्पत्न्यां स्वदुर्जन्म यथा वृत्तं तथा कथितं तद्विशेषः श्रीहरिवंशे वर्त्तत एव। रङ्गस्य द्वार्युपसमीपे नीयतां प्रायो राजवाहनहस्तिनो द्वार्य्येव स्थापनरीतेः सङ्कटस्थानत्वादिति तु गूढो दुष्टभावः। वाग्देवीमते जहीति पूर्ववत् ॥ २५ ॥ न केवलं लौकिक एवोपायः कर्त्तव्यः। किन्तु दैवोऽपि क्रियतां येन तन्मूलकोत्सवे मल्लक्रीडादर्शनव्याजेन तावप्यानेयौ स्यातामित्याशयेनाह। आरभ्यतामिति। भूतराजाय भूतेश्वरसंज्ञाय मथुरापालाय तस्य धनुषोऽपि दैवताय श्रीरुद्राय मीढुषे। मेहति सिञ्चति वरदानेन तर्पयतीति तस्मै। इयमपि भयोक्तिरेव ॥ २६ ॥ अर्थो द्वितीयपुरुषार्थः। तत्र तन्त्रं सिद्धान्तः। किम्वा तस्य शास्त्रमेव नतु धर्मादिशास्त्रं जानातीति तथा सः। यदुपुङ्गवमिति सर्वेषामेव यदूनामयमास्थास्पदं ततोऽस्यैवात्र योग्यता नतुकेवलमदीयानामिति तद्विचाराभिप्रायेणोक्तम्। गृहीत्वेति स्नेहप्रदर्शनार्थम् अवश्यमात्मोक्तप्रतिपालनार्थञ्च। अत एव तत्र तस्मिन्नेव निजपरिवारगोष्ठीमध्ये तत इति पाठे स एवार्थः ह स्फुटम् ॥ २७ ॥ भो भो इत्यादरे वीप्सा दानपते! हे वदान्यवरेत्यर्थः। अतो मदर्थितमपि त्वयावश्यं सम्पाद्यमिति भावः। मदर्थं मित्रोचितकृत्यं क्रियताम्। ननु भोजराज! कुतो मामेव प्रेरयसि सर्वे यादवास्तवाज्ञाकारिणस्तत्राह। आद्दत इत्यादिना ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो किंवा मल्लानां प्रियतमानां श्रमोत्पादनेन मत्तहस्तिनैव सुखं तत् साध्यमित्याशयेनाह—महेति। भद्र! हे चतुरेति प्रोत्साहयति। एतदर्थमेवास्मिन् स्वयमनेन श्रीनारदाच्छ्रुतमात्मजन्म सौभपति-द्रुमिलाख्यदानवादुग्रसेनस्य रूपधरात्तत्पत्न्यां यथावृत्तं तत् कथितम्, तद्विशेषः श्रीहरिवंशे वर्त्तत एव। रंगस्य द्वारि उप समीपे नीयताम्, प्रायो राजवाहनहस्तिनो द्वार्य्येव स्थापनरीतेः संकटस्थानत्वादिति गूढो दुष्टभावः। कुवलयं पृथ्वीमण्डलमापीडो मुकुटवल्लीलया शिरोन्यासो यस्य स इति महाबलिष्ठत्वं ध्वनितम्। यद्वा, कुवलयं आ सम्यक् पीडयतीति तथा सः ॥ २५ ॥ नन्विष्टदेवसेवयैवेदं सिध्यतीति मत्वा। यद्वा, तौ कुतोऽत्रागमिष्यत इत्यपेक्षायां धनुर्यागोत्सवे मालक्रीडादर्शनव्याजेनानेयाविति मन्त्रमाह—आरभ्यतामिति। भूतराजाय भूतेश्वरसंज्ञाय मथुरापालाय श्रीरुद्राय कस्मैचिद्भूतगणश्रेष्ठाय वा ॥ २६ ॥ अर्थो द्वितीयपुरुषार्थः, तत्र तन्त्र सिद्धान्तः किवा तस्य शास्त्रमेव, न तु धर्म्मादिशास्त्रं जानातीति तथा सः, स्वपाणिना तस्य पाणिं गृहीत्वेति स्नेहप्रदर्शनार्थमवश्यमात्मोक्तप्रतिपालनार्थञ्च। अतएव तत्र निजपरिवारगोष्ठीमध्ये; ह स्फुटम् ॥ २७ ॥ भो इत्यादरे वीप्सा। दानपते! हे वदान्यवरेत्यर्थः। अतो मदर्थितमपि त्वयावश्यं सम्पाद्यमिति भावः। मह्यं मम मैत्रं मित्रकृत्यं हितमित्यर्थः। ननु भोजराज! मामेव कुतः प्रेरयसि, सर्व्वे यादवास्तवाज्ञाकारिणस्तत्राह—आद्दत इत्यादिना ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे महामात्र! हे भद्र कुवलयापीडाख्यो गजो रङ्गद्वार्युपनीयतां प्राप्यतां तेन कुवलयापीडेन मम शत्रू जहि घातय ॥ २ ॥ चतुर्द्दश्यां यथाविधि धनुर्याग आरभ्यतां मीढुषे इष्टवर्षिणे भूतराजाय रुद्राय मेध्यान्पशून् विशसन्तु ॥ २६ ॥ इत्थमाज्ञाप्यार्थतन्त्रज्ञः शास्त्रसिद्धान्ताभिज्ञः कंसः यदुश्रेष्ठमक्रूरमाहूय तस्य पाणिं स्वपाणिना गृहीत्वा अक्रूर यथा तथोवाच ॥ २७ ॥ तदेवाह। भो भो इति। आदरात्सम्बोधनद्वयं दानपते! महोदार मह्यं किञ्चित्त्वया मैत्र मित्रकृत्यं क्रियतां यतस्त्वत्तोऽन्यो हिततमो भोजेषु वृष्णिषु च न विद्यते ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

विशसन्तु सूदयन्तु भूतराजाय भैरवविग्रहधारिणे रुद्राय मीढुषे समर्थाय अभीष्टदात्रे वा अर्थतत्वज्ञं प्रयोजनयाथार्थ्यवेत्तारं यदुपुङ्गवं यदुश्रेष्ठम् ॥ २५–२७ ॥ दानशब्देन वदान्या लक्ष्यन्ते तेषां पते अक्रूर मैत्रं मित्रकर्म ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

महामात्र! हे हस्तिनियन्तः अहितौ शत्रू ॥ २५ ॥ ममाभ्युदयार्थं विशसन्तु च्छित्वा यच्छन्तु भूतराजाय भूतेश्वराय मीढुषे वरदाय ॥ २६ ॥ अर्थतन्त्रं द्वितीयपुरुषार्थस्यैव सिद्धान्तं नतु धर्ममोक्षयोर्जानातीति शः ॥ २७ ॥ मह्यं मां प्रसादयितुं मैत्रं मित्रकृत्यम् ॥ २८ ॥

गूढार्थदीपिनी

महामात्र हस्तिप । अहितौ शत्रू । मम अहितौ अहितकरौ जहि प्राप्नुहि । तत्रैव लीयस्वेत्यर्थः ओहाङ् गतौ धातुः।२५। मेध्यान् यज्ञार्हान् । भूतराजाय भैरवाय । मीढषे वरसेक्त्रे । विशसन्तु ॥ २६ ॥ अर्थतन्त्रज्ञः कार्यसाधनकुशलः यदुपुङ्गवमक्रूरमित्यत्रान्वेति । ह हर्षे ॥ २७ ॥ मैत्रं मित्रकृत्यम् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हेमहामात्र ! हस्तिप अहितौ शत्रू ॥ २५ ॥ मीदुषे वरदाय भूतराजाय रुद्राय ॥ २६ ॥ अर्थतन्त्रज्ञः अर्थशास्त्राभिज्ञः नतु मोक्षशास्त्राभिज्ञः ॥ २७ ॥ भोभो दानपते ! वदान्य आदृतः भोजेषु वृष्णिषु च त्वत्तोऽन्यो न विद्यते उभयकुलप्रियोऽसीत्यर्थः । अतो महागुणो भवान्मम हिततमः अतः मह्यं किंचिन्मैत्रं मित्रकृत्यं त्वया क्रियतामित्यन्वयः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे महामात्र हस्तिपाधिप । महामात्रः समृद्धेऽथाप्यमात्ये हस्तिपाधिप इति विश्वः । मम वच इदं निबोध शृणु प्रभिन्ने करटयोर्गण्डयोरामुखे ईषन्मदोदकनिःसरणद्वारे यस्य सः । करटो गजगण्डे स्यात्कुसुम्भे कुच्छ्रजोविनीति । मुखं निःसरण इति विश्वः ॥ २५ ॥ करे शुण्डायामारोपितो मुद्गरो यस्य स ते त्वया ॥ २६ ॥ महामत इति सम्बोधनयोग्यतां प्रकटयन्नाहेत्याह ॥ सोऽपीति । स्वस्रीयौ स्वसुः पुत्रौ गतं षष्ठे । भोजराजस्य तत्कुलपतेर्जगती पृथिवी तस्याः पत्युः कंसस्य तवेत्यन्वयः । कथं हन्तव्यावित्याकुलमतिरतिविह्वलबुद्धिस्तं प्रत्येवमाह । जगती रत्नगर्भा भूर्भूतधात्र्यब्धिमेखलेत्यमरः ॥ २७ ॥ स्वमातृदोषाविष्करणं न कार्यमिति मतिरहितत्वाद्दुर्मतिः । तदपि नैकान्त इत्याहेव नैकवारामित्यप्याह ॥ भूयो वचनं समेताञ्छ्रावयन्निति । मतिदौष्ट्योपोद्बलकमिदमपीति ज्ञेयम् ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवदर्थमेवैतज्ज्ञातं तत्रापि सन्देहे उपायान्तरमाह । महामात्रेति । महामात्रो महाहस्तिपः कुवलयापीडस्य पट्टहस्तिनो यन्ता तस्य सम्बोधनं प्रोत्साहार्थं त्वया कुवलयापीडः रङ्गद्वारिनेतव्यः न त्वन्येन नाप्यन्यः भद्रेति सम्बोधनं तव कापि चिन्ता न भविष्यतीति ज्ञापनार्थं सरस्वतीसंवादात् अभद्रेति ज्ञानं कुः पृथिवी तस्या वलयस्य आपीडं मुकुटरूपं ततः किमत आह मम आहतौ कामक्रोधौ जहीति न त्वन्यः अहितः ॥ २५ ॥ एवं लौकिकमुपायमुक्त्वा अलौकिकमाह । आरभ्यतामिति । अयं विष्णवंश इति तस्य प्रतीतिः अतः शिव आराध्यः स एव तत्प्रतिवलो भवितुमर्हतीति तत्रापि तस्य यागा वहवः तन्मध्ये युद्धजयो ऽभिकाङ्क्षित इति धनुर्याग एव कर्त्तव्यः यत्र धनुषि शिवः पूज्यते स शैवतन्त्रे धनुर्यागः प्रसिद्धः चतुर्दश्यां स कर्त्तव्यः यतश्चतुर्दशी शिवतिथिः यथाविधीति अधिवासनादिपुरःसरं तत्तन्त्रोक्तन्यायेन हिंसाप्रचुरश्च यागः कर्तव्यः शैवतन्त्रे शिवभेदा बहवः सन्तीति तदर्थं हिंसाप्रचुरश्चेत् क्रियते तदा तादृश एव देवो भवतीति तदाह । भूतराजायेति । मीढुषे कामपूरकाय सर्वथा फलदात्रे ॥ २६ ॥ एवं दृष्टादृष्टोपायमुक्त्वा समानयनोत्तरकालमेतदिति समानयनार्थमक्रूरं प्रेषयितुं तमाकारितवानित्याह । इत्याज्ञाप्येति । अर्थतन्त्रज्ञः कार्यपरिकराभिज्ञः अक्रूरं विना नान्येन कार्यं सिध्यतीति ज्ञात्वा यदुपुङ्गवं यादवश्रेष्ठं गृहादाहूय पाणिना तस्य पाणिं गृहीत्वा सन्माननार्थं परिगृह्य ततः प्रीतं ज्ञात्वा स्वभावतोऽप्यक्रूरमुवाच हेत्याश्चर्यं नहि भगवद्भक्त एवं कार्यार्थे प्रेषयितुमुचित इति ॥२७॥ भोभो इति सम्बोधने द्विरुक्तिरत्यादरसूचिका दानपत इति तद्धर्मकीर्त्तनं स हि दानमात्रस्वाधिष्ठाता द्वादशसंवत्सरपर्यन्तं प्रत्यहं गोदाने क्रियमाणे जातः तन्मातापि तथा गान्दिनी यथा आर्त्तेभ्योऽन्नदानं तथा मह्यमार्त्ताय भगवान् देय इत्यर्थः । मह्यं मैत्रं मित्रकार्यं क्रियताम् अनेन त्वयि मैत्री स्थाप्यते यथा मित्रस्योचितं तथा कुर्वित्यर्थः । तत्राप्यादृतः आदरयुक्तः कर्त्तरि क्तः मया वा आदृतः आदृतो यतः एतादृशं कर्म अन्येन कारणीयमित्याशङ्क्याह । नान्य इति । त्वत्तः अन्यः मे हिततमो नास्ति अनुवृत्त्या ज्ञायते भोजाः पितृवंश्याः वृष्णयो यादवाः सामान्यविशेषभावे तद्द्वयमाह । अतः सामान्यतो वा विशेषतो वा नान्योहिततमो वर्तत इत्यर्थः ॥ २८ ॥

श्रीसुबोधिनी–सारः

पौराः पुरवासीया जनपदा देशादागताः सर्वे स्वैरसंयुगं स्वेच्छया युद्धं पश्यन्तु हे महामात्र हे भद्र रंगस्य द्वारि प्रवेशमार्गे कुवलयापीडो द्विपो हस्ती त्वयोपनीयतां प्राप्यताम् ॥ २५ ॥ तेन हस्तिना ममाऽहितौ शत्रू त्वं जहि मारय तद्वंचनार्थं कृष्णचतुर्दश्यां यथाविधि धनुर्याग आरभ्यतां मीढुषे वरदाय कामवर्षिणे वा भूतराजाय शिवाय मेध्यान् पवित्रान् पशून् विशसन्तु ॥२६॥ इत्येवमाज्ञाप्यार्थतन्त्रज्ञः स्वार्थनिपुणः कंसो यदुपुंगवमक्रूरमाहूय हस्तेन तद्धस्तं गृहीत्वा ततोऽनन्तरमुवाच ह स्फुटम् ॥२७॥ भोभो दानपतेऽक्रूर मह्यं मैत्रं मित्रकृत्यं त्वया क्रियतां भोजेषु वृष्णिषु त्वत्तोन्य आदृतः सत्कारार्हो हिततमः प्रीतिकर्त्ता न विद्यते ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं मल्लान् रामकृष्णौ हन्तुमादिश्य तत्रापि तद्धनन आशङ्कितचित्तो हस्तिपं प्रत्युपायान्तरमाज्ञापयति—महामात्रेति। तं प्रोत्साहयितुं पुनः सम्बोधयति—भद्रेति। त्वया कुवलयापीडो द्विपो हस्ती रङ्गद्वार्युपनीयताम्। 'किमर्थम्?' इत्यपेक्षायां तां पूरयन्नाह—तेन हस्तिना ममाहितौ शत्रुभूतौ इहागतौ रामकृष्णौ जहि ॥ २५ ॥ एवं लौकिकमुपायमुक्त्वा अलौकिकमाह—आरभ्यतामिति। अयं हि मम शत्रुर्विष्णवंश इति नारदात् पूर्वमेव ज्ञातम्, अतोऽतिप्रबलस्तत्प्रतिपक्षयोग्य एव कश्चिदाराधनीय इति, तादृशश्च शिव एव, अतः स एवाराध्यः। तत्रापि तस्य यागा बहवः सन्ति, तन्मध्ये युद्धे विजयाकाङ्क्षिभिः शैवतन्त्रप्रसिद्धः यत्र धनुषि शिवः पूज्यते स धनुर्यागः कर्तव्यः। चतुर्दशी हि शिवतिथिः, अतः स तस्यामेव यथाविधि तन्त्रोक्तप्रकारेण कर्तव्यः। तत्र मीढुषे कामपूरकाय शिवाय तं प्रसादयितुं मेध्यान् तद्योग्यान् शुद्धान् पशून् विशसन्तु मारयन्तु। पशुहननं विना तत्सन्तोषो न स्यात्। 'पशुहनने तु तत्परिकरभूता भूतादयोऽपि तेन सन्तुष्टाः साहाय्यं इत्येवमुपायान् कर्तुमाज्ञाप्य तौ समानेतु यदुपुङ्गवं यादवेषु श्रेष्ठं अक्रूरमाहूय सम्मानार्थं स्वपाणिना तत्पाणिं गृहीत्वा ततश्च हेति हर्षेण उवाचेत्यन्वयः। तच्चातुर्यमाह—अर्थतन्त्रज्ञ इति। इदं कार्यमनेनैव भविष्यतीति रहस्यज्ञ इत्यर्थः। यद्वा 'ननु ततो मृत्युं ज्ञात्वा किमिति तदानयनाय आज्ञप्तवान्' तत्राह—अर्थतन्त्रज्ञ इति। आग्रहात् स्वप्रयोजनमेव विचारयति, फलानुसन्धानं तु तस्य नास्तीत्यर्थः ॥ २७ ॥ तदुक्तिमाह—भो भा इति द्विरुक्तिरादरार्था। 'यथान्यद्दानं करोषि, तथा मत्प्रार्थितमपि सम्पादय' इत्याशयेन सम्बोधयति—दानपते इति। मह्यं मम मैत्रं मित्रकृत्यं त्वया क्रियताम्, यस्मात्त्वत्तोऽन्यो भोजवृष्णिषु मध्ये आदृतः आदरयुक्तः हिततमश्च न विद्यते इति ॥ २८ ॥

अन्वितार्थप्रकाशिका

हस्तिपमाह–महामात्रेति ॥ हे महामात्र! हे भद्र! त्वया कुवलयापीडो द्विपो हस्ती रङ्गद्वार्युपनीयतां तेन हस्तिना ममाहितौ शत्रुभूतौ इहागतौ रामकृष्णौ जहि मारय। राजद्वारे हस्तिस्थापनरीतिः प्रसिद्धेति तयोर्वञ्चनं स्यात् ॥ २५ ॥ पुनरमात्यानाह—आरभ्यतामिति ॥ चतुर्दश्यां शिवस्य तिथौ धनुर्यागः शत्रुविजयफलकः धनुषि शिवपूजनरूपः शैवतन्त्रप्रसिद्धः यथाविधि आरभ्यताम्। एतदुत्सवव्याजेन तयोरानयनं सुकरमिति भावः। तत्र च मीढुषे कामपूरकाय भूतराजाय भूतेश्वरनाम्ने मथुराक्षेत्रपालकाय शिवाय तं प्रसादयितुं मेध्यान् तद्यागयोग्यान् पशून् विशसन्तु ॥ २६ ॥ इतीति ॥ अर्थतन्त्रज्ञः स्वकार्यसाधनमात्रविज्ञः नतु धर्मज्ञः कंस इत्येवं मल्लादीन् आज्ञाप्य यदुपुङ्गवमक्रूरमाहूय सम्माननार्थं पाणिना पाणि गृहीत्वा ततो हेति हर्षेण उवाच ॥ २७ ॥ भो भो इति ॥ हे दानपते अक्रूर! मह्यं मम मैत्रं मित्रकृत्यं त्वया क्रियतां यस्मात्त्वत्तोऽन्यो भोजवृष्णिषु मध्ये आदृतः आदरयुक्तः हिततमश्च न विद्यते ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ममाहितौ शत्रू ॥२५॥ मीढुषे वरवर्षिणे भूतराजाय रुद्राय पशून् विशसन्तुघ्नन्तु ॥२६॥ अर्थतंत्रज्ञः अर्थशास्त्रसिद्धांतज्ञो न तु धर्ममोक्षशास्त्रज्ञः इति एवं अमात्यादीन् आज्ञाप्य यदुश्रेष्ठं अक्रूरं आहूय ॥ २७ ॥ भो भो इति आदरे वीप्सा हे दानपतेऽक्रूरमैत्रं सुहृदत्कृत्यं त्वया क्रियतां त्वतोऽन्यः आदृतः श्रद्धालुः हिततमश्च न विद्यते ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

महामात्रेति ॥ हे महामात्र, हे भद्र, कुवलयापीडः कुवलयापीडाख्यः, द्विपो गजः, रङ्गद्वारि रङ्गस्थानस्य द्वारप्रदेशे, त्वया उपनीयतां प्राप्यतां, तेन कुवलयापीडेन, मम अहितौ शत्रू, जहि घातय ॥ २५ ॥ आरभ्यतामिति ॥ चतुर्दश्यां, यथाविधि, धनुर्यागः, आरभ्यताम्। मीढुषे इष्टवर्षिणे, भूतराजाय रुद्राय, मेध्यान् मेधगुणयुक्तान्, पशून् विशसन्तु व्यापादयन्तु ॥ २६ ॥ इतीति ॥ इतीत्थं आज्ञाप्य, अर्थतन्त्रज्ञः अर्थशास्त्रसिद्धान्ताभिज्ञः कंसः, यदुपुङ्गवं यदुश्रेष्ठं अक्रूरं आहूय, पाणिमक्रूरहस्तं, पाणिना स्वहस्तेन, गृहीत्वा, ततः अक्रूरं, ह स्फुटं यथा तथा, उवाच ॥ २७ ॥ तदेवाह ॥ भो भो इति ॥ भो भो इति आदरात् सम्बोधनद्वयम्। हे दानपते महोदार, मह्यं मम, किंचित् त्वया, मैत्रकृत्यं क्रियताम्। यतः, त्वत्तः अन्यः, आदृतः सादरः, हिततमश्च भोजवृष्णिषु भोजेषु वृष्णिषु चेत्यर्थः। न विद्यते ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

आरभ्यतां धनुरिति : १०.३६.२६.

वीक्ष्य धनुः सूर्याश्रितमपीश्वरं तं च लब्धुमतिलोलः। समबलतया स चक्रे धनुरध्वरनियममुक्तदिने ॥ ५५ ॥
स्वधर्मे निधनाच्छ्रेयो नान्यधर्मावलम्बनात्। संचिन्त्यैवं धनुर्यागमेवोचे क्षत्रियर्षभः ॥ ५६ ॥
भूवलयं मम भूषणमित्येवं स्वं मदं बहिर्द्वारि। विनिधाय युक्तमाधाद्यत्नं ह्यक्रूरयोगसंयमने ॥ ५७ ॥

इत्याज्ञाप्येति : १०.३६.२७.

त्यक्त्वा परान् यदुवरानपि लब्धवर्णानक्रूरमाह्वयदसौ क्षममेव तत्र ।
सामानुबोधितमती रिपुरल्पयत्न साध्यो भवत्यरमितीह सुराजनीतिः ॥ ५८ ॥
स्विष्टानिष्टमचिन्तयन् स्वमपरस्याभ्यर्थितं साधयेद् दातारो भुवि सन्तु नाम बहवः सत्यं स दानव्रती ।
तस्माद्दानपतिः सदा भृशमुदासीनोऽपि दानव्रतं मा भग्नं भवतु स्वमित्यलमलं कुर्यान्मदीयार्थितम् ॥ ५९ ॥
सत्यस्तत्पुरुषो भवेद्यदि तदा तत्रोग्रकर्मान्यथा सिद्धो मामक एव मद्गतबहुव्रीहिस्मृतिश्चेद् भृशम् ।
न स्यान्मद्भयतश्च जातुचिदसौ कार्येऽत्र भेदाश्रितस्तद्योग्यो ह्ययमेव साम्प्रतमिति प्रायस्तमाहूतवान् ॥६०॥ (युग्मम्)
हठयोगान्विलोक्यास्मिन्विफलान् बहुशोऽपि सः । श्रीशप्राप्त्यर्थमक्रूरयोगोद्युक्त इति क्षमम् ॥ ६१ ॥
मनस्वी तेजस्वी हिमभृति तपस्वी भवतु वा तथा योगी योगी विरिपुरपरागी च सततम् ।
रमाप्रेयःप्राप्तौ भवति न समो दानपतिनेत्यसौ कृष्णाह्वाने ह्युचितममुमेवाधिकृतवान् ॥ ६२ ॥
ये याता वकपूतनाप्रभृतयोऽनश्वरस्वरूपाः पुरा तेऽप्यश्वस्थितिमापिता मदरि वा केशीत्विहाश्वस्थितिः ।
इत्यालोच्य स केशिनं प्रहितवांस्तत्साधु चक्रे च यज्ज्ञत्वाऽक्रूरमनश्वरञ्जितगुणं तत्प्रेषणे गौरवम् ॥ ६३ ॥
नष्टेऽरिष्टे बलवति हरिप्राप्तिकामेन पुंसा ज्ञात्वा श्रौतं गुरुवरमुखात् तत्त्वतस्तत्स्वरूपम् ।
संयोज्य प्राक् स्थितमिह मनो दुर्ग्रहाश्वं प्रसह्य कार्यः पश्चात् कृतहितदृशा शीघ्रमक्रूरयोगः ॥ ६४ ॥
सत्येवमच्युतप्राप्तिः पुंसो भवति वैभवे । गूढोऽर्थोऽयं समाख्यातश्चरित्रेऽस्मिन्विभाव्यताम् ॥ ६५ ॥ (युग्मम)

गृहीत्वेति : १०.३६.२८.

यन्मदिष्टं त्वदिष्टं तज्जानीह्यक्रूर निश्चितम् । इति तद्विश्रम्भकृते पाणिना पाणिमस्पृशत् ॥ ६६ ॥
वैफल्यं क्रूरयोगानामालोक्य त्वामहं ब्रुवे । अक्रूरस्तु त्वमेवैकः साधयाक्रूरकर्म तत् ॥ ६७ ॥

कृष्णप्रिया

हे भद्र महावत ? तुम भी उस समय रङ्ग भूमि के द्वारपर कुवलयापीड हाथी को खडा कर देना फिर जब मेरे शत्रु वे दोनो भाई जब रङ्गद्वार समीप आ पहुँचे, सब वहीं स्थान पर भीतर प्रवेश करने के पहिले दोनों का वध कर देना ॥ २५ ॥ चतुर्दशी के दिन शैव तन्त्रोक्तविधि के अनुसार युद्ध जयाकङ्क्षा से किया जाने वाला कामपूरक भगवान् भूत्तनाथ का धनुष्य-याग किया जाए और आशुतोष अवढ वरदानी रुद्र भगवान की पूजा के लिए अनेक यज्ञीय पशुओं का वलिदान किया जाए। आसुरी वृत्ति वाले ऐसे उग्रयाग करते हैं वेद भगवान इन यागों में संमत नहीं है ॥ २६ ॥ स्वार्थ साधुकार्य कुशल राजा कंस ने इस प्रकार मल्लों को महावतों को एवं अमात्यों को आदेश देकर पुनः यदु कुलवरेण्य श्री अक्रूर जी को निमंत्रित कर एकान्त में मिलकर अपने हाथ में उनके हाथ रखकर उनको कहने लगा ॥२७॥ राजा कंस ने कहा–हे अक्रूर जी आप तो दातारों में अग्रणी है (श्रीश्वफल्क एव माता गांदिनी जी भक्त पुत्र की कामना से द्वादश पर्यन्त नित्यगोदान व्रत किया और श्रीहरि की कृपा से अक्रूर जी का जन्म हुआ) यदुकुल में आपसे अधिक मैं किसी का आदर नहीं करता। और आप से अधिक मेरे हित चिन्तक सुहृद् कोई नहीं है। आपको मेरा एक अत्यन्त महत्व पूर्ण कार्य करना होगा ॥ २८ ॥

अतस्त्वामाश्रितः सौम्य कार्यगौरवसाधनम् । यथेन्द्रो विष्णुमाश्रित्य स्वार्थमध्यगमद् विभुः ॥ २९ ॥
गच्छ नन्दव्रज तत्र सुतावानकदुन्दुभेः । आसाते ताविहानेन रथेनानय मा चिरम् ॥ ३० ॥
[1]निसृष्टः किल मे मृत्युर्देवैर्वैकुण्ठसंश्रयैः । तावानय समं गोपैर्नन्दाद्यैः साभ्युपायनैः ॥ ३१ ॥
घातयिष्य इहानीतौ कालकल्पेन हस्तिना । यदि मुक्तौ ततो मल्लैर्घातये वैद्युतोपमैः ॥ ३२ ॥

कदमक्षम।

अन्वयः—हे सौम्य ! अतः, त्वाम्, आश्रितः, यथा, विभुः, इन्द्रः, विष्णुम् आश्रित्य, स्वार्थम्, अध्यगात् (तथा) कार्यगौरवसाधनम्, त्वाम्, आश्रित्य, (कार्यं कुर्याम्) ॥ २९ ॥ नन्दव्रजं, गच्छ, तत्र, आनकदुन्दुभेः, सुतौ, आसाते, तौ अनेन, रथेन, इह, आनय, चिरम्, मा (कुरु) वैकुण्ठसंश्रयैः, देवैः, मे, मृत्युः, निसृष्टः, किल, साभ्युपायनैः, नन्दाद्यैः, गोपैः, समम्, तौ आनय ॥ ३०–३१ ॥ इह, आनीतौ, तौ, कालकल्पेन, हस्तिना, घातयिष्ये, यदि, मुक्तौ, ततः, वैद्युतोपमैः, मल्लैः, घातये ॥ ३२ ॥

---

[1] निसृष्टो खलु मे मृत्यो–वीर. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तौ मे मृत्युर्नितरां सृष्टः। वैकुण्ठसंश्रयैर्विष्णुसंश्रयैर्देवैः ॥ ३१ ॥ किं ततस्तत्राह। घातयिष्य इति। कालकल्पेन। वैद्युतोपमैरशनितुल्यैः ॥ ३२–३४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतस्त्वादृशो मद्धितकरो नास्ति अतो हेतोः। हे सौम्य प्रियदर्शन। मित्रत्वद्योतनायेयं सम्बुद्धिः। "सौम्यो विप्रे सोमजीवसुन्दरे सोमदैवते" इति यादवः। कार्येषु महत्तत्साधयतीति तथाभूतं त्वामिति सम्बन्धः। विष्णुम् वामनम्। स्वार्थम् स्वर्गवाप्तिरूपम्। विभुः समर्थः। एतेन समर्थेनापि कञ्चिद्द्वारीकृत्यैव कार्यं साध्यते इति सूचितम् ॥ हे सोम्येति प्रोत्साहयति। निजमित्रत्वेन सहजशान्तवेन वाश्रितः शरणं गतः। किमर्थम्–कार्यस्य गौरवं गुरुत्वं तत्साधनं गुरुप्रयोजनं साधयितुमित्यर्थः। ननु त्वमेव स्वयं सर्वार्थे शक्तः किं मयेति चेत् सत्यम्, समर्थस्यापि साहाय्येनैव कार्यं किल संसिद्ध्येदित्यत्र दृष्टान्तः—यथेति। विभुः समर्थोऽपि। द्वेषादिंद्रादपि विष्णोर्न्यूनत्वं सूचितम् ॥ २९ ॥ तत्र नन्दगोकुले। तौ वसुदेवसुतौ। इह मथुरायाम् ॥ तत्रैवासाते न तु पलायिताविति वक्तव्यमिति भावः। अनेनेति तर्जन्याह—अधुनैवालङ्कृत्य स्थापितेनेत्यर्थः। निजयानदानेनानुग्रहविशेषो दर्शितः। सुन्दराभिनवपरिष्कृतं सुरथं दृष्ट्वा बालकौ तौ सुखं स्वयमेवारोक्ष्येते इति भावः। कंसोपमुक्तो रथो भगवदारोहणानर्ह इत्यन्यो रथः श्रीभगवदिच्छयैव तेनाज्ञप्त इति ॥ ३० ॥ तौ वासुदेवौ। वैकुंठसंश्रयैर्विष्ण्वाश्रितैः समं सार्धम्। अभ्युपायनमुपाहारः "स्यादभ्युपायनं सैन्य उपहारे स्फुटाध्वनिः" इति निरुक्तिः ॥ वैकुण्ठसंश्रयैरिति। तैर्निसृष्टेन तेन मम किं स्यादिति भावः। ताविति–एकप्रयत्नत्वात्तयोरिति भावः। नन्दाद्यैरिति–अन्यथा शंकया तौ नागमिष्यत इति भावः। तेषामप्यनिष्टमत्र करिष्यामीति गूढोऽभिप्रायः। साभ्युपायनैरिति–घृतदध्यादिसहितैः। एतच्च धनुर्यागसत्यताबोधनार्थम् ॥ ३१ ॥ आक्षिपति–किमिति। ततस्तदानयनात्। किं स्यादिति। तत्र आक्षेपे। इह पुरे। ततो हस्तितः ॥ वाग्देवीमते तु–यदीह मधुपुर्यामानीतौ भवतस्तदा स्वपराजयेन तयोर्द्वारान्तः प्रवेशोत्साहबर्द्धनाद्धस्तिनैव द्वारभूतेन घातयिष्ये रंगांतः प्रापयिष्यामि। अतः कालकल्पेन मल्लानां मम चेत्यर्थात्। ततस्तदनतरं मुक्तौ स्वमुक्तिनिमित्तं पूर्ववन्मल्लैरेव द्वारभूतैर्घातये स्वसमीपमपि प्रापयिष्पामि। अतो मम मुक्तिहेतुत्वाद्वैद्युतोपमैः क्रममुक्तिमार्गनेतृभगवत्संबंधिदिव्यपुरुषोपमैरिति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हे सौम्येति। प्रोत्साहनार्थं निजमित्रत्वेन सहजशान्तत्वेन वा आश्रितं शरणं गतोऽहम्। किमर्थं कार्यस्य गौरवं गुरुत्वं तस्य साधनं गुरुप्रयोजनं साधयितुमित्यर्थः। ननु त्वमेव स्वयं सर्वार्थे शक्तः किं मयेति चेत् सत्यं समर्थस्यापि साहाय्येनैव कार्यं किल संसिध्येदिति दृष्टान्तेनाह। यथेति। विभुः समर्थोऽपि इति द्वेषेणेन्द्रादपि विष्णोर्न्यूनत्वं सूचितम् ॥ २९ ॥ एव प्रोत्साह्य कार्यमाह। गच्छेति। तत्रैवासाते नतु प्रपलाय्यान्यत्र गताविति वक्तव्यमिति भावः। अनेनाधुना सुनिर्माय बहुधालङ्कृत्यावस्थापितेनेत्यर्थः। इति निज-यानदानेनानुग्रहविशेषो दर्शितः। सुन्दराभिनव सुपारिस्कृतरथं दृष्ट्वा बालकौ तौ सुखं स्वयमेवारोक्ष्येते इति भावः। वस्तुतस्तु श्रीभगवदिच्छया पुरप्रवेशसामग्री सा ज्ञेया माचिरम् अचिरादेव ॥ ३० ॥ किमर्थं तदाह। निसृष्ट इति द्वाभ्याम्। तयोरेकतरादिति शेषः। वैकुण्ठसंश्रयैरिति। तैर्निसृष्टेन तेन मम किं स्यादिति भावः। तावानयेति एकप्रयत्नत्वाद्द्वयोरिति भावः। अक्रूरप्रवर्त्तनार्थं तयोर्विष्णुत्वं त्वपह्नुतम्। नन्दाद्यैः सममिति अन्यथा शङ्कया तौ नागमित्येते इति भावः। तेषामप्यनिष्टमत्र करिष्यामीति गूढो दुष्टभावः। साभ्युपायनैर्घृतदध्यादिसहितैः एतच्च धनुर्मखसत्यताबोधनार्थम् ॥ ३१ ॥ तच्च किमर्थं तदाह। घातयिष्य इति। ततस्तदा। अन्यत्तैः। वाग्देवीमते तु यदीह मधुपुर्यामानीतौ भवतस्तदा स्वपराजयेन तयोर्द्वारान्तः प्रवेशोत्साहवर्द्धनत्वाद्धनत्वाद्धस्तिनैव द्वारभूतेन घातयिष्ये रङ्गान्तः प्रापयिष्यामि। अतः कालकल्पेन मल्लानां मम चेत्यर्थात्। ततस्तदनन्तरं मुक्तौ स्वमुक्तिनिमित्तं पूर्ववन्मल्लैरेव द्वारभूतैर्घातये स्वसमीपमपि प्रापयिष्यामि। अतो मम मुक्तिहेतुत्वात् वैद्युतोपमैः क्रममुक्तिमार्गनेतृभगवत्सम्बान्धदिव्यपुरुषोपमैरित ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे सोम्येति प्रोत्साहनार्थम्। निजमित्रत्वेन सहजशान्तत्वेन वा आश्रितः शरणं गतोऽहम्। किमर्थम् ? कार्य्यस्य गौरवं गुरुत्वं तस्य साधनं गुरुप्रयोजनं साधयितुमित्यर्थः। सप्तम्यन्तपाठेऽपि स एवार्थः। ननु त्वमेव स्वयं सर्व्वार्थे शक्तः, किं मयेति चेत् सत्यम्, समर्थस्यापि साहाय्येनैव कार्य्यं किल संसिध्येदिति दृष्टान्तेनाह—यथेति। विभुः समर्थोऽपि, इति द्वेषेणेन्द्रादपि विष्णोर्न्यूनत्वं सूचितम् ॥ २९ ॥ एवं प्रोत्साह्य कार्य्यमाह—गच्छेति। तत्रैवासाते इति, न तु पलाय्यान्यत्र गताविति वक्तव्यमिति भावः। अनेनाधुना सुनिर्म्माय बहुधालङ्कृत्य च स्थापितेनेत्यर्थः। सुन्दराभिनवसुपरिष्कृतं कथं दृष्ट्वा बालकौ तौ सुखं स्वयमेवारोक्ष्येत इति भावः। वस्तुततु श्रीभगवदिच्छया पुरीनवप्रवेशसामग्री सा ज्ञया। मा चिरमचिरादेव ॥ ३० ॥ किमर्थम् ? तदाह–

निसृष्ट इति द्वाभ्याम्। किल निश्चितम्। वैकुण्ठसंश्रयैरिति—विष्णुमाश्रित्य तद्द्वारा नितरां सृष्ट इत्यर्थः। यद्वा, तावेव मम मृत्युर्देवैर्निसृष्टः प्रेरितः, मन्मृत्युरूपौ तौ देवैरत्र प्रेषितावित्यर्थः, नन्दाद्यैः सममिति, अन्यथा केवलत्वेन शंकया तौ नागमिष्यत इति भावः। तेषामप्यनिष्टमत्र करिष्यामीति गूढो दुष्टभावः, साभ्युपायनैर्घृतदध्यादिसहितैः, एतच्च धनुर्मखसत्यताबोधनार्थम् ॥ ३१ ॥ तच्च किमर्थम्? तदाह—घातयिष्य इति। कालकल्पेनेत्यपरिहार्य्यत्वं दर्शितम्। यदीति-मुक्तौ न भविष्यत एव, यदि वा कथञ्चिन्मुक्तौ भवेतां ततस्तदेत्यर्थः। वैद्युतोपमैरित्यप्रतिकार्य्यत्वमुक्तम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अतस्त्वामेव हे सौम्याहमाश्रितः कथंभूतं गुरुतरकार्यसाधकं यथा विष्णुमाश्रित्येन्द्रः स्वार्थं स्वाभीष्टमध्यगमत्प्राप्तवांस्तथाहमपि त्वामाश्रितः प्राप्तवानिति ॥ २९ ॥ अतस्त्वं नन्दव्रजं गच्छ किमर्थं तत्र नन्दव्रजे वसुदेवस्य पुत्रावासाते तावनेन रथेनानय प्रापयाचिरे विलम्बं माकार्षीः ॥ ३० ॥ किमर्थं तत्राह। निसृष्टाविति। संश्रीयत इति संश्रयः वैकुण्ठो विष्णुः संश्रयो येषां तैर्देवैस्तौ मम मृत्यू निसृष्टौ कल्पितौ खल्वतः साभ्युपायनैर्नन्दादिभिर्गोपैः सह ताविहानयानीय दर्शयेत्यर्थः ॥ ३१ ॥ आनीतावेतावनेन मृत्युतुल्येन हस्तिना घातयिष्ये यदि ततो हस्तिना मुक्तौ भविष्यतस्तद्वशनितुल्यैर्मल्लैश्चाणूरादिभिर्घातये ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

सौम्य! सुन्दर सौम्यो विप्रे सोमजीवे सुन्दरे सोमदैवते इति च कार्यगोरवसाधनं महतः कार्यस्य साधनम् समर्थनम् ॥ २९–३० ॥ निसृष्टः क्लृप्तः अभ्युपायनैः सहितैः ॥ ३१ ॥ वैद्युतो विद्युतो निर्गतोऽग्निः तस्योपमा येषां तैः ॥ ३२–३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कार्य्यगौरवेण गुरुतया साधयतीति तं ममात्र बन्धुषु मध्ये त्वतोऽन्यो नैपुण्येन कार्य्यसाधकः कोऽपि नास्तीत्यर्थः ॥२९॥ अनेनेति तर्ज्जन्या कमपि नवीनं विचित्रं रथं दर्शयति। बालकत्वान्नवीनं चित्रमालोक्य ताभ्यामत्रायातुं शीघ्रमयं रथ आरोक्ष्यते इति भावः। कंसभुक्तो रथो भगवदारोहणानर्ह इत्यन्येन तत्र गत इति ज्ञेयम् ॥ ३० ॥ तौ मे मृत्युर्नितरां सृष्टः वैकुण्ठो विष्णुस्तदाश्रितं ॥ ३१ ॥ वैद्युतोपमैरशनितुल्यैः ॥ ३२ ॥

गूढार्थदीपिनी

कार्यगौरवस्य गुरुतरकार्यस्य साधने सम्पादने त्वाम् सप्तम्यन्तम्। विष्णु श्रीवामनम् स्वार्थ स्वार्गाधिपत्यम् ॥ २९ ॥ तत्र असाते तिष्ठतः ॥ ३० ॥ वैकुण्ठसंश्रयैः विष्णवाश्रितैः। निसृष्टः सूचिताः। समं सह। अभ्युपायनम् उपहारः ॥ ३१ ॥ कल्पेन सदृशेन। वैद्युतोपमैः वज्रतुल्यै मल्लैः ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यतो भवान् महागुणोऽतः कार्य्यगैरवसाधनं गुरुतरकार्यसाधकं त्वामहमाश्रितोऽस्मि ॥ २९–३० ॥ वैकुण्ठो विष्णुस्तत्संश्रयैर्देवैर्यो मे मृत्युर्नितरां सृष्टः ययोरेकत्तरः मे मृत्युः कल्पित इस्यर्थः। ततो समं सह आनयेत्यन्वयः ॥ ३१ ॥ कालकल्पेन वैद्युतोपमैः अशनितुल्यैः ॥ ३२–३४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एतद्वचनमन्यदीयमेव मयोदितमनुभाषणमिषेण सर्वे यूयं शृणुध्वं निशम्य श्रुत्वा च भवन्तो हृदि धारयन्तु येन कारणेनाहमेतेषु कृष्णादिषु बन्धुष्वसुहृत्त्वं द्वेषितामादितः प्राक्तश्चरामि करोमि तस्य कारणं शृणुध्वमिति ॥ २९ ॥ महाभागेत्यमनःपूर्वकर्ता वक्ष्यमाणकर्मणः सूचयति। कमलेक्षणेति द्रुमिलमनःकरणकारणोक्तिरिति ज्ञेयं। गृहान्तर्गतलीलावने ॥ ३० ॥ प्रोत्फुल्लेत्यशोकादिविशेषणम् ॥ ३१ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः किमत आह। अतस्त्वामाश्रित इति। एतावत् कालं मां त्वमाश्रितः अधुना तु त्वामहमाश्रितः सौम्येति संबोधनम् आश्रययोग्यार्थं कार्यस्य महद्गौरवं तस्य साधनं प्रति तत्साधयितुं साधने वा साधनार्थं ननु विधेयस्याश्रयः कथं युक्त इति चेत् तत्राह। यथेन्द्र इति। इन्द्रो ज्येष्ठः विष्णुरुपेन्द्रः कनिष्ठः तथापि दैत्यैस्त्रैलोक्ये हृते तत्सिद्ध्यर्थं विष्णुमाश्रित्य कार्यं साधितवान् एवमहमपि साधयितुमुद्युक्तः स्वार्थं गमिष्यामि विभुरुपीन्द्रः। अतः कार्यार्थं समाश्रयणे न निन्दितमिति भावः ॥२९॥ तत्कार्यमाह। गच्छ नन्दव्रजमिति। ततः तत्रानकदुन्दुभेः जन्मकालेऽपि भगवदधिष्ठानत्वेन प्रसिद्धस्य सुतौ रामकृष्णौ तत्र व्रजे आसाते ततः किमत आह ताविहानेन रथेन आनय चिरं मा विलम्बो न कर्त्तव्यः ॥ ३० ॥ प्रयोजनाकाङ्क्षायामाह। निसृष्ट इति। किलेति प्रसिद्ध्या पूर्वन्नारदगोपनम् उभावेव मृत्यू देवैर्निसृष्ट इत्यनुल्लङ्घ्यः। ननु दैत्यानां देव वध्या इति किन्तैरितिचेत्तत्राह। वैकुण्ठ-

संश्रयैः वैकुण्ठो विष्णुः स एव सम्यगाश्रयो येषाम् अतो भगवदाश्रयणं देवैः क्रियत इति नान्यथा सो ऽर्थः सेत्स्यति पूर्वं रथेनानयेत्युक्त्वा मृत्युत्वेन निर्देशे नानेष्यतीति पुनराह । तावानयेति । विशेषमाह समं गोपैरिति । सहैव कदाचिदायास्यतीति बालकत्वाद्वा नायास्यतीति पित्रा सखिभिः सहानयेति नन्दाद्यैरित्युक्तं व्याजार्थमाह । साभ्युपायनैरिति । अभ्युपायनं गृहीत्वा समागन्तव्यमिति वक्तव्यम् ॥ ३१ ॥ ततः स्वस्य भगवते निर्दोषार्थमन्तर्गतं भावमाह । इहानीताविति । अयं कुवलयापीडः कालादीषन्न्यूनः । अतः कालकल्पः योऽर्थः कालेन साधनीयः सोऽनेनेति कदाचित् कुवलयापीडो मत्तः अनवहितश्चेत् ततोऽन्तः प्रविष्टो भगवान् त्वामेव मारयिष्यतीत्याशङ्कायामाह । यदि मुक्ताविति । ततो यदि मुक्तौ तदा मल्लाः सन्ति ते विद्युदग्नितुल्याः न तेषां प्रतीकारः कश्चन तैः कार्यं साधयिष्यातीति भावः ॥ ३२ ॥

श्रीसुबोधिनी-सारः

अतः कारणात्कार्यस्य गौरवे महत्त्वे साधनं हेतुं त्वामहमाश्रितोऽस्मि यथा विभुः समर्थ इन्द्रो विष्णुमाश्रित्य स्वार्थं प्रापत् ॥ २९ ॥ वैकुण्ठं हरिं व्रजं त्वं गच्छ तत्र व्रजे आनकदुंदुभेर्वसुदेवस्य सुतौ आसाते तिष्ठतः तौ द्वौ अनेन रथेनेह मथुरायां त्वमानय माचिरं शीघ्रम् ॥ ३० ॥ वैकुंठं हरिं संश्रयन्तीति तथा तैर्देवैर्मम मृत्युस्तौ निसृष्टः कल्पितः साभ्युपायनैः सबलिभिर्नन्दाद्यैर्गोपैः समं सह तौ त्वमानय ॥ ३१ ॥ किं ततस्तत्राह । इहानीतौ तौ कालकल्पेन मृत्युतुल्येन हस्तिनाहं मारयिष्यामि "निश्चितं फलति स्थाने संदिहानो विनश्यति" इत्याह व्यग्रतां यदि ततो गजान्मुक्तौ वैद्युतोपमैरशनिसमैर्मल्लैरहं घातयिष्ये ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अतः कारणात् हे सौम्य हे प्रिय ! कार्यगौरवस्य गुरुतरकार्यस्य साधने निमित्तेऽहं त्वामाश्रितः । ननु 'महतस्तव कथं निकृष्टाश्रयणं युक्तम्' इत्याशङ्क्य तस्य गुणाधिक्येन योग्यत्वं सूचयन् दृष्टान्तमाह—यथेति । विभुर्महानपि इन्द्रो यथा विष्णुं कनिष्ठमपि वामनमाश्रित्य स्वार्थमभ्यगमत् बलिनाऽपहृतां त्रिलोकीं पुनः प्राप्तवानित्यर्थः ॥ २९ ॥ एवं सम्प्रार्थ्य 'किं मैत्रं मया कार्यम् ?' इत्यपेक्षायामाह—गच्छेति । नन्दस्य व्रजं त्वं गच्छ, तत्र च आनकदुन्दुभेर्वसुदेवस्य सुतावासाते, तौ अनेन मदीयेन रथेनेहानय । मा चिरं विलम्बो न कार्य इत्यर्थः ॥ ३० ॥ नारदोक्तं प्रमाणं सूचयति—किलेति । वैकुण्ठो विष्णुः संश्रयः आश्रयो येषां तैर्देवैस्ताभ्यां मे मम मृत्युर्निसृष्टः प्रकल्पितः, अतो नन्दाद्यैर्गोपैः समं सह तावानय । 'मदभिप्रायं सङ्गोप्य धनुर्मखनिरीक्षणार्थमुपायनं गृहीत्वा राजाज्ञया चलनीयमिति वक्तव्यम्' इत्याशयेनाह—साभ्युपायनैरिति ॥ ३१ ॥ 'ततः किं करिष्यसि' तत्राह—इहानीतौ तौ कालकल्पेन मृत्युतुल्येन हस्तिना घातयिष्ये । यदि कथंचित्ततो हस्तितो मुक्तौ भविष्यतस्तर्हि वैद्युतोपमैः अशनितुल्यैर्मल्लैश्चाणूरादिभिर्घातये घातयिष्ये ॥ ३२ ॥

अन्वितार्थप्रकाशिका

अत इति ॥ अतः कारणात् हे सौम्य ! हे प्रिय ! कार्यगौरवस्य गुरुतरकार्यस्य साधने निमित्तेऽहं त्वामाश्रितः । साधनमिति पाठे कार्यं गौरवेण गुरुतया साधयतीत्यक्रूरविशेषणम् । यथा विभुर्महानपि इन्द्रो यथा विष्णुं कनिष्ठमपि वामनमाश्रित्य स्वार्थमभ्यगमत् बलिनापहृतां त्रिलोकीं पुनः प्राप्तवान् ॥ २९ ॥ गच्छेति ॥ नन्दस्य व्रजं त्वं गच्छ तत्र च आनकदुन्दुभेर्वसुदेवस्य सुतावासाते । तौ अनेन अङ्गुलिनिर्दिष्टेन बालमनोमोहकेन मदीयेन रथेनेहानय । मा चिरं विलम्बो न कार्यः । नवीनं चित्रं रथं दृष्ट्वा तौ शीघ्रमायास्यतः इति भावः ॥ ३० ॥ निसृष्ट इति ॥ वैकुण्ठः संश्रयः आश्रयो येषां तैर्देवैस्ताभ्यां मे मम मृत्युर्निसृष्टः प्रकल्पितः । अतः साभ्युपायनैः उपायनसहितैः नन्दाद्यैर्गोपैः समं तावानय एकमात्राह्वाने शङ्का स्यात् ॥ ३१ ॥ घातयिष्य इति ॥ इहानीतौ तौ कालकल्पेन मृत्युतुल्येन हस्तिना घातयिष्ये । यदि कथञ्चित्ततो हस्तितो मुक्तौ भविष्यतस्तर्हि वैद्युतोपमैः अशनितुल्यैर्मल्लैः चाणूरादिभिर्घातये घातयिष्ये । वास्तवोऽर्थस्तु यदि पुर्यामानीतौ भवतस्तर्हि हस्तिना हेतुना घातयिष्ये रङ्गान्तः प्रापयिष्यामि । गजो हि पराभूतस्तयोरुत्साहवर्द्धनेन अन्तःप्रवेशे हेतुः । ततो मुक्तौ स्वमुक्तिनिमित्तं वैद्युतोषमैः क्रममुक्तिमार्गस्थआतिवाकिकतेजोमयनेतृदेवतुल्यैर्मल्लैः स्वस्वसमीपं प्रापयिष्ये ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कार्याणां कृत्यानां गौरवं महत् साधनं यस्मात्तं त्वां अभ्यगमत् प्राप ॥ २९–३० ॥ वैकुण्ठसंश्रयैः अच्युताश्रितैः तावेव मे मृत्युः निसृष्टो निर्मितः साभ्युपायनैः नवनीतादिसामग्रीसहितैः ॥ ३१ ॥ कालकल्पेन मृत्युसदृशेन वैद्युतोपमैः वज्रतुल्यैः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अत इति ॥ हे सौम्य, कार्यगौरवसाधकं गुरुतरकार्यसंसाकं, त्वां आश्रितः सन्, स्वार्थं गमिष्यामि । कथमिव । यथा विभुः त्रिलोकनाथः, इन्द्रः, विष्णुं वामनं आश्रित्य, स्वार्थं अध्यगमत् तथा ॥ २९ ॥ गच्छेति ॥ हे दानपते, तव मम चातिसौहार्दादिति शेषः । त्वं, नन्दव्रजं, गच्छ । किमर्थं, यतः तत्र आनकदुन्दुभेर्वसुदेवस्य सुतौ, आसाते । तौ द्वौ, इह अनेन रथेन,

आनय। चिरं मा, विलम्बं मा कार्षीः ॥ ३० ॥ किमर्थं तत्राह ॥ निसृष्टाविति ॥ संश्रियते इति संश्रयः वैकुण्ठः भगवान् संश्रयो येषां तैः, देवैः मे मम, मृत्यू मृत्युहेतुभूतौ, निसृष्टौ भवतः। किल खलु। अतः, साभ्युपायनैरुपायनसहितैः, नन्दाद्यैर्नन्दादिभिः, गोपैः समं सह, तौ आनय। इहानीय दर्शयेत्यर्थः ॥ ३१ ॥ घातयिष्य इति ॥ इह आनीतौ च तौ, कालकल्पेन मृत्योरीषन्न्यूनेनानेन हस्तिना, घातयिष्ये। यदि ततो हस्तिनः, मुक्तौ भविष्यतः, तर्हि वैद्युतोपमैरशनितुल्यैः, मल्लैश्चाणूरादिभिः, घातये मारयिष्यामि ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अतस्त्वामाश्रित इति : १०.३६.२९.

मदाश्रितस्त्वमद्यावध्यासीः सौम्याऽधुना त्वहम्। त्वदाश्रित इति स्वेषु प्रतिष्ठां वितनोमि ते ॥ ६८ ॥
अहं कनीयानिति किं करोमि गरीयसस्ते हितसाह्यमेवम्। न वाच्यमक्रूर यतः प्रसिद्धमुपेन्द्र एवेन्द्रहितर्धिकारी ॥ ६९ ॥

गच्छेति : १०.३६.३०.

अक्रूरगुणवंश्योऽसौ सौम्य एक न संशयः। तत्त्वद्वशो विना यत्नं स्यादक्रूरगुणान्वयात् ॥ ७० ॥
सत्य गोदानदोऽक्रूर सदाऽसीति भवाधुना। शीघ्रं मद्रथमाश्रित्य मन्मनोरथपूरकः ॥ ७१ ॥
अश्वस्थितया गतः केशी त्वं त्वक्रुरगुणाग्रणीः। तन्मदिष्टमकुर्वाणो नात्र श्वस्थितिमाचर ॥ ७२ ॥

कृष्णप्रिया

हे सज्जनवर ? मेरे एक महत्व पूर्ण कार्य की सिद्धि के लिए केवल आप एक ही समर्थ है आप का ही केवल आधार है। हे सौम्य ? इन्द्र यद्यपि शक्ति सम्पन्न था फिर भगवान् विष्णु का अवलम्बन लेकर सर्व कार्य सिद्ध किए। वैसे आप भी मेरे कार्य को सिद्ध करें ॥ २९ ॥ हे मान्यवर। आप आज ही नन्दराय के व्रज-गोकुल में जाईए। वहाँ आनक दुन्दुभी वसुदेव के कृष्ण एवं बलराम नाम के दो पुत्र रहते हैं। इस रथ को आप ले जाईए और इस रथ पर बैठा कर अति शीघ्र यहाँ लाइए इस कार्य में आप विलम्ब न करें ॥३०॥ वैकुण्ठनाथ के दृढाश्रय वाले देवों में श्रेष्ठ कृष्ण को मेरी मृत्यु के लिए है यहाँ भेजे हैं यह सुनिश्चित बात है। अब आप विविध प्रकार के नजराणें लेकर नन्दराय अदि गोपजनों को उन दोनों भाईओं के साथ यहाँ ले आईए ॥ ३१ ॥ यहाँ आ जाने पर काल समान वलिस मेरे कुवलयापीड हाथी से दोनों को यमलोक पहुँचा दूँगा। शायद दोनो हाथी से किसी हेतु बच गए तो वज्र तुल्य दृढाङ्ग और बीजली तुल्य फुर्तीले मल्लों से मरवा डालूँगा ॥ ३२ ॥

तयोर्निहतयोस्तप्तान् वसुदेवपुरोगमान्। तद्बन्धून् निहनिष्यामि वृष्णिभोजदशार्हकान्[1] ॥ ३३ ॥
उग्रसेनं[2] च पितरं स्थविरं राज्यकामुकम्। तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ॥ ३४ ॥
ततश्चैषा मही मित्र भवित्री नष्टकण्टका। जरासंधो मम गुरुर्द्विविदो दयितः सखा ॥ ३५ ॥
शम्बरो नरको बाणो[3] मय्येव कृतसौहृदाः। तैरहं सुरपक्षीयान् हत्वा भोक्ष्ये महीं नृपान् ॥ ३६ ॥

कर्दमक्षमा

तयोः, निहतयोः, तप्तान्, वसुदेवपुरोगमान्, वृष्णिभोजदशार्हकान्, तद्, बन्धून्, निहनिष्यामि ॥ ३३ ॥ (ततः) राज्यकामुकम्, स्थविरम्, पितरम्, उग्रसेनम्, च, तद्भ्रातरम्, देवकम्, च, अन्ये, मम, विद्विषः, (तान्) घातयिष्ये ॥३४॥ हे मित्र ?, ततः, च, एषा, मही, निष्कण्टका, भवित्री, जरासन्धः, मम, गुरुः (श्वसुरः, उपदेष्टा) द्विविदः, दयितः, सखा (वर्तते) शम्बरः, नरकः, बाणः, मयि, एव, कृतसौहृदाः, (सन्ति) तैः, अहम्, सुरपक्षीयान्, नृपान्, हत्वा, महीम्, भोक्ष्ये ॥ ३५–३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नष्टकंटका नष्टशत्रुः। ननु कतिपयसुहृद्वधेन नष्टकंटका कथं स्यादिति तत्राह। जरासंध इति ॥ ३५–३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तयो रामकृष्णयोः। तद्बन्धूंस्तयोर्ज्ञातीन् ॥ ननु तद्बन्धुभ्यस्त्वानिष्टाच्छङ्के, तत्राह–तद्बन्धूनिति द्वाभ्याम्। ननु तयोः पूर्वमेव कथं न हनिष्यसि, तत्राह–तयोर्निहतयोः सतोरनुतापतप्तानेव सत इति कोपातिशयो दर्शितः। वाङ्मते तु–मुक्तौ तयोः प्राप्तयोः सतोस्तद्बंधूनपि प्राप्स्यामि। अव्यभिचारादिति भावः ॥ ३३ ॥ तद्भ्रातरम् पितुः सहोदरम्। अन्ये यादवाः ॥ ३४ ॥

---

[1] दक्षार्हजान्–प्रा. पा. । [2] मत्पितरं–वीर. विज. । [3] मयेव–वीर ।

ततः ससुहृद्रामकृष्णादिमरणोत्तरम्। मित्र अक्रूर। एषा या बहुराजास्तीत्यर्थः। अत्राशंकते-नन्विति। जरासंधादिसत्त्वे एषां वधेनापि नष्टकण्टका भूर्न भविष्यतीत्याशंकाशयः। तत्र आशंकायाम्। गुरुः असुर एव, तस्याहं पुत्रतोऽपि प्रिय इति भावः। दयितोऽतिप्रियः॥ नन्वहमपि भोजेषु किं तद्बन्धुर्नेत्याह-हे मित्रेति। त्वं तु मम हितकारी अतस्त्वां प्रति पृथ्वीमपि विभजेऽहमिति भावः॥ ३५॥ तैः जरासन्धादिभिः। सुरपक्षीयान् कौरवादिवंश्यान्॥ सुरपक्षीयान्नृपान् कौरवादीन्। वाङ्मते तु-महीं भोक्ष्ये मुक्तौ सर्वानन्दान्तर्भावात्॥ ३६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु तद्बन्धुभ्यः स्वानिष्टाच्छङ्क तत्राह। तयोरिति द्वाभ्यां तद्बन्धून् तत्सुहृदो वसुदेवादीनपि हनिष्यामि। ननु कथं तयोः पूर्वमेव न हनिष्यसि चेत्तत्राह। तयोर्निहतयोः सतोरनुतप्तानेव सतः इति क्रोधातिशयो दर्शितः। वाग्देवीमते तु मुक्तौ तयोः प्राप्तयोः सतोस्तद्बन्धूनपि प्राप्स्यामि अव्यभिचारादिति भावः॥ ३३॥ अन्ये च तत् पक्षपातिनः॥३४॥ तत इत्यर्द्धकं नन्वहमपि भोजेषु किं तद्बन्धुः नेत्याह। हे मित्रेति त्वन्तु मम हितकारी अतस्त्वां प्रति पृथ्वीमपि बिभजेयमिति भावः। जरेति सार्द्धकं सुरपक्षीयान् नृपान् कौरवादीन् वाग्देवीमते तु महीं भोक्ष्ये इति मुक्तौ सर्वानन्दान्तर्भावात्॥ ३५-३६॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तद्बन्धुभ्यस्तवात्मनश्चानिष्टाच्छङ्के, तत्राह-तयोरिति द्वाभ्याम्। तप्तानिति सुखहननीयत्वमुक्तम्। ननु ते तवापि ज्ञातयस्तत्राह—तयोर्बन्धून् मित्राणीति। नितरां हनिष्यामि, धनानि प्राणांश्च हरिष्यामीत्यर्थः॥ ३३॥ स्थविरमपि राज्यकामुकम् ये चान्ये मद्बन्धूनां मध्ये मम विद्विषो मद्द्वेष्टारस्तान् हनिष्यामि॥ ३४॥ नन्वहमपि भोजस्तद्बन्धुरिति चेन्नेत्याह—हे मित्रेति। त्वं मम हितकारी, अतस्त्वां प्रति पृथ्वीमपि विभजेयमिति भावः। दयितः सखा प्रियसख इत्यर्थः। तस्य महावीरत्वेनान्येभ्यो विशेषादेवमुक्तम्। सुरपक्षीयान् नृपान् पाण्डवमत्स्यपाञ्चालादीन्॥ ३५-३६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततस्तयोर्निमित्तयोस्तप्तान् दुःखितान्वसुदेवप्रभृतीन् तद्बन्धूंश्च वृष्ण्यादीन् हनिष्ये॥३३॥ ततोऽथातः स्थविरमप्यधुनापि राज्यमेव कामयमानं मत्पितरमुग्रसेनं तस्य भ्रातरं देवकञ्च तथान्ये च मम विद्विषस्तान्सर्वान्हनिष्यामीति॥ ३४॥ ततश्चैवं सति हे मित्र! इयं पृथ्वी नष्टकण्टका नष्टशत्रुर्भविष्यति। कुतस्त्वं सर्वान्हन्तुं प्रभुस्तत्राह। जरासन्ध इति। द्विविदो वानरः प्रियः सखा॥ ३५॥ शम्बरादयोऽसुरा मयैव सहकृतं सौहृदं यैस्तथाभूताः तैर्जरासन्धादिभिः सहितोऽहं सुरपक्षीयान्नृपान्हत्वा महीं भोक्ष्ये अनुभविष्यामि॥ ३६॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मत्पितर एव एत इति शेषः॥ ३४॥ मे मित्र भवित्री भविष्यति ननु त्वत्तोऽधिका जरासन्धादयः कण्टकाः सन्ति तत्राह। जरासन्ध। इति॥ ३५-३६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निहतयोः सतोः॥ ३३॥ ये चान्ये तांश्च॥ ३४॥ ननु कथं नष्टकण्टका स्याज्जरासन्धादीनां विद्यमानत्वादेव तत्राह। जरेति गुरुः श्वशुरः॥ ३५-३६॥

गूढार्थदीपिनी

ये च अन्ये तानापि निहनिष्यामि॥ ३४॥ नष्टकष्टका शत्रुहीना भविष्यति॥ ३५॥ जरासन्ध इति सार्द्धम्। गुरुः श्वशुरः॥ ३६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नष्टकण्टका नष्टाहिता भवित्री भविष्यति ननु कुतः सयक्षाः प्रबलास्ते हन्तुं शक्याः अत आह। जरासन्ध इति॥३५-३६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सुव्रता पतिव्रता॥ ३३॥ नामतो द्रुमिलो नाम प्रसिद्धं। अन्तर्हितो मायया। एकैव चरतीत्येकचारिणी तां॥ ३४॥ सवर्षां सत्त्वानां प्राणिनामाशयेऽन्तःकरणे स्थिताश्च तेऽर्थाश्च तान्वेत्तीति स तथेति तच्चिन्तितज्ञाननिदानाभिधानं। उग्रसेनस्य वपुरिव विद्यमानं वपुः सस्मितालापवीक्षितं विभ्रद्दधत्॥ ३५॥ तामाससाद अजानमाना पतीतर इत्यजानती॥ ३६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततोऽपि यत्कर्त्तव्यं तदाह । तयोरिति । तप्तत्वात्तेषां युद्धादौ न सामर्थ्यं वसुदेवः पुरोगमः येषां तद्वन्धून् वृष्णिभोजादयः सर्व एव गणिताः ।। ३३ ।। तत उग्रसेनोऽपि यद्यपि पिता तथापि स दुष्ट इति वक्तुं तस्य दोषमाह । स्थविरं राज्यकामुकमिति । वृद्धोऽपि भूत्वा राज्यं कामयत इति य एव शत्रुषु स्थास्यति स एवापकरिष्यतीति तद्भ्रातरं देवकञ्च मारयिष्यामि किञ्च ये केचन मम विद्विषः बान्धवाः अन्ये च तान् सर्वानेव निहनिष्यामि तेषां हनने हेतुः विद्विषः इति ।। ३४ ।। ननु सर्वेषु हतेषु भोगो न भविष्यतीति कि हननेनेति चेत्तत्राह । ततश्चेति । एषा मही नष्टकण्टका भविष्यति ये केचन राजानः भूमौ चरन्ति पथिका इव तत्र ये प्रतिबन्धकाः ते कण्टकाः तेषु गतेषु नष्टकण्टका भवति अनेनास्याभिनिवेशवर्णनेन यदा भगवानस्मै मुक्तिं दास्यति तदास्य मनोरथः कर्त्तव्य इति भक्तहितार्थं निष्कण्टकं कृतवानिति निरूपितम् । अन्यथास्य मनोरथवर्णनं व्यर्थं स्यात् । विपरीतोक्तिरिति गतिरग्रे वक्तव्या निष्कण्टकभूमौ भोगः सिध्यति सहायाश्च वर्त्तन्त इत्याह । जरासन्धो मम गुरुरिति । गुरुः श्वशुरः हितोपदेष्टा च द्विविदो वानरः स दयितः प्रियः स्वभावतोऽपि सखा च ।। ३५ ।। शम्बरादयश्च तथेत्याह । मय्येव नान्यस्मिन् अन्यथा दैत्येष्वपि परस्परविसम्मतौ भोगो न सेत्स्यतीति तदर्थमेवकारः कृतं सौहृदं यैरिति पूर्वमपि तैरुपकारः कृत इति अग्रेऽपि कर्त्तव्य इत्यर्थः । ननु बहवो देवपक्षाः कथन्त्वयैकाकिना निवार्या इत्याशङ्क्याह । तैरहमिति । भोगेऽपि तेषां सहभावः शत्रुनिवारणेऽपि पूर्वं दैत्यानामेव भूमिः राज्यं स्वर्गश्च । अत एव पूर्वदेवास्ते ब्राह्मणावस्थिता देवाः पुरोहिता इव पाश्चाद्यज्ञादिभिः तान्निवार्य भगवन्तमाराध्य नित्यसृष्टिप्रकारेण वेदं दृष्ट्वा ततो देवा जाता इति कृत्रिमा एव ते नतु सहजा इति अत एव कालः तेषामपि पक्षपातं करोति तथाधुनाऽपि करिष्यतीति तस्य मनोरथः नृपा युधिष्ठिरादयः । अतः शान्तमेव विरोधकार्यं सेत्स्यतीति न भयं त्वया कर्त्तव्यम् ।। ३६ ।।

श्रीसुबोधिनी-सारः

मनोरथं सेत्स्यतीत्याह तयो रामकृष्णयोर्निहतयोः सतोः तद्दुःखेन तप्तान् वसुदेवमुख्यान् तयोर्बन्धून् वृष्णिभोजदशार्हकान् अहं निहनिष्यामि ।। ३३ ।। स्थविरं वृद्धं राज्यमिच्छन्तं पितरमुग्रसेनं तस्य भ्रातरं देवकं च निहनिष्यामि ये चान्ये मम विद्विषः शत्रवस्तांश्च हनिष्यामि ।।३४।। ततोऽनंतरमेषा मही भूमिर्गतकण्टका भवित्री भविष्यति जरासंधो मम गुरुः "यश्च कन्यां प्रयच्छति" इति धर्मशास्त्रात् द्विविदो वानरो दयितः प्रियः सखा मित्रम् ।। ३५ ।। शंबरो नरको भौमासुरो बाणो मय्येव कृतमैत्राः तैः सह सुरपक्षीयान् नृपान् हत्वा महीमहं भोक्ष्यामि ।। ३६ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तयो रामकृष्णयोर्निहतयोः सतोस्ततो वसुदेवपुरोगमान् तद्बन्धून् वृष्ण्यादींश्च हनिष्यामि । 'तेषां हननं सुकरमेव, तद्वियोगदुःखेन सन्तप्तत्वात्' इत्याशयेनाह—तप्तानिति ।। ३३ ।। उग्रसेनं स्वपितरं च हनिष्यामि । तत्र हेतुमाह—स्थविरं वृद्धमपि राज्यकामुकमिति । देवकं च हनिष्यामि । तत्र हेतुमाह—तद्भ्रातरमिति । तत्पक्षपातिनमित्यर्थः । तथा येऽन्ये मम विद्विषस्तांश्च सर्वान् हनिष्यामि ।। ३४ ।। ततश्च हे मित्र ! एषा मही नष्टकष्टका शत्रुभीतिरहिता भवित्री भविष्यति । एतदेव स्पष्टयति-जरासन्धो मम गुरुः पूज्यश्च, श्वशुरत्वात् । द्विविदाख्यो वानरो मम दयितः सखा ।। ३५ ।। शम्बरादयो दैत्याश्च सर्वे मय्येव कृतं सौहृदं स्नेहो यैस्तथाभूताः । अतस्तैर्जरासन्धादिभिः सहितोऽहं सुरपक्षीयान् नृपान् हत्वा सर्वां महीं भोक्ष्ये ।। ३६ ।।

अन्वितार्थप्रकाशिका

तयोरिति ।। तयो रामकृष्णयोर्निहतयोः सतोस्ततो वसुदेवपुरोगमान् तद्वधशोकतप्तान् तद्बन्धून् वृष्णिभोजदशार्हकान् हनिष्यामि । वास्तवोऽर्थस्तु मुक्तौ तयोः निहतयोः प्राप्तयोः तप्तान् मम वधं दृष्ट्वा सौशील्येन मद्विषयकानुतापयुतान् तद्बन्धूनपि प्राप्स्यामि ।। ३३ ।। उग्रसेनमिति ।। स्थविरं वृद्धमपि राज्यकामुकं स्वपितरं तद्भ्रातरं देवकं च ये चान्ये मम विद्विषस्तांश्च सर्वान् हनिष्यामि ।। ३४ ।। ततश्चेत्यर्द्धम् ।। ततश्च हे मित्र ! एषा मही नष्टकण्टका शत्रुभी रहिता भवित्री भविष्यति ।। ३५ ।। जरासन्ध इति सार्द्धम् ।। जरासन्धो मम गुरुः पूज्यश्च श्वशुरत्वात् । द्विविदाख्यो वानरो मम दयितः सखा । शम्बरो नरकः बाणश्चैते दैत्याः सर्वे मय्येव कृतं सौहृदं स्नेहो यैस्तथाभूताः अतस्तैर्जरासन्धादिभिः सहितोऽहं सुरपक्षीयात् नृपान् हत्वा सर्वां महीं भोक्ष्ये ।। ३६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निहतयोः सतोः ।। ३३ ।। विद्विषः शत्रवस्तानऽप्यहं हनिष्यामि ।। ३४ ।। हे मित्र अक्रूर दयितः स्नेही ।। ३५ ।। शंबरासुरादयः सुरपक्षीयान् पाण्डवादीन् ।। ३६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तयोरिति ।। निहतयोः तयोः, निमित्ततः, तप्तान् दुःखितान्, वसुदेवपुरोगमान् वसुदेवप्रभृतीन्, तद्बन्धून्, वृष्णिभोजदशार्हकांश्च, निहनिष्यामि ।। ३३ ।। उग्रसेनमिति ।। तथा, स्थविरं वार्द्धकं प्राप्याधुनापीत्यर्थः । राज्यकामुकं राज्यमेव कामयमानं,

पितरं, उग्रसेनं च, तद्भ्रातरं तस्य बन्धुं देवकं च, अन्ये ये मम विद्विषः मद्द्वेष्टारस्तांश्च, निहनिष्यामि ॥ ३४ ॥ तत इति ॥ ततश्च एवं सतीत्यर्थः । हे मित्र, एषा मही पृथिवी, नष्टकण्टका नष्टशत्रुः, भवित्री भविष्यति । कुतस्त्वं सर्वान् हन्तुं प्रभुस्तत्राह । जरासंध इति । जरासंधः, मम गुरुः श्वशुरः द्विविदः द्विविदनामा वानरः, मम प्रियः सखा भवति ॥ ३५ ॥ शम्बर इति ॥ शम्बरः शम्बरासुरः, नरको नरकासुरः बाणो बाणासुरः, एते सर्वे, मय्येव कृतं सौहृदं यैस्ते तथाभूताः, सन्ति । अतः, अहं तैर्जरासंधादिभिः सहितः सन्, सुरपक्षीयान् देवतापक्षपातिनः, नृपान् हत्वा, महीं भुवं भोक्ष्ये अनुभविष्यामि ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततश्चेति : १०.३६.३५.

जरादिघटिताकृतिं द्विमतिकं च मायामयं स बाणमिह नारकं वदति तावदात्मात्मकम् ।
न यावदभिवीक्षितः प्रभुरनेन पुंसेत्यसावुवाच वचनं जराद्युचितमेतदालोच्यताम् ॥ ७३ ॥

कृष्णप्रिया

उन दोनों की मृत्यु हो जाने से शोक संतप्त उनके वसुदेव प्रभृति बन्धु गण अन्य भोज दाशार्ह आदि यादवगण और उनके वंशजो को सहज आसानी से मार दूँगा क्योंकि वे सब उनके पुत्रों के सहायक है और मुझ से आन्तर वैर भाव रखने वाले है ॥ ३३ ॥ उन सब के नाश के बाद वृद्धावस्था होने पर राज्य के लालची है वैसे मेरे पिता उग्रसेन को उनके भाई देवक को देवक के बन्धुओं को भी मार दूँगा ॥ ३४ ॥ हे प्रिय मित्र अकूर ! इन सब का नाशके बाद सारी भूमि मेरे लिए निष्कंटक हो जाएगी, ॥ ३५ ॥ राजा जरासन्ध तो मेरे श्वसुर है, द्विविद वीर वानर मेरे प्रिय मित्र है, शम्वरु सुर नरकासुर तो मुझ से स्नेह रखने वाले सुहृद है । उनके सहयोग से सुरगण के पक्षकर राजाओं को मार कर चक्रवर्ती बन कर समस्त पृथ्वी का भोक्ता सम्राट् बनूँगा ॥ ३६ ॥

एतज्ज्ञात्वाऽऽनय क्षिप्रं रामकृष्णाविहार्भकौ । [1]धनुर्मखनिरीक्षार्थं द्रष्टुं [2]यदुपुरश्रियम् ॥ ३७ ॥

अक्रूर उवाच

राजन् मनीषितं [1]सम्यक् तव [2]स्वावद्यमार्जनम् । सिद्ध्यसिद्ध्योः [3]समं कुर्याद् दैवं हि फल[4]साधनम् ॥३८॥
मनोरथान् करोत्युच्चैर्जनो दैवहतानपि । युज्यते हर्षशोकाभ्यां [5]तथाप्याज्ञां करोमि ते ॥ ३९ ॥

श्रीशुक उवाच

[6]एवमादिश्य चाक्रूरं मन्त्रिणश्च विसृज्य सः । प्रविवेश गृहं कंसस्तथाक्रूरः स्वामालयम् ॥ ४० ॥

इति श्रीमद्भागवते[7] महापुराणे दशमस्कन्धे[8] ऽक्रूरसंप्रेषणं[9] नाम [10]षट्त्रिंशोऽध्यायः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—(हे अक्रूर) एतत्, ज्ञात्वा, क्षिप्रम्, रामकृष्णौ, अर्भकौ, धनुर्मखनिरीक्षणार्थम्, (च) यदुपुरश्रियम्, द्रष्टुम्, इह, आनय ॥ ३७ ॥ अक्रूर, उवाच, राजन् ! स्वावद्यमार्जनम्, तव, मनीषितम्, सम्यक्, सिद्ध्य सिद्ध्योः, समः, कुर्यात्, हि, दैवम्, फलसाधनम् ॥ ३८ ॥ जनः, दैवहतान्, अपि, उच्चैः, मनोरथान्, करोति, हर्षशोकाभ्याम्, युज्यते, तथा, अपि ते, आज्ञाम्, करोमि ॥ ३९ ॥ श्रीशुक उवाच—(राजन्) सः, एवम्, अक्रूरम्, आदिश्य, मन्त्रिणः, च, मल्लान्, च, (महामात्रम्) विसृज्य, कंसः, गृहम्, प्रविवेश, तथा, अक्रूरः, स्वम्, आलयम् (प्रविवेश) ॥ ४० ॥

इति दशमस्कन्धे निरोधलीलायां राजसप्रकरणस्य प्रमाणप्रकरणस्य ३६ अध्यायस्य अन्वयाः समाप्तः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यदुपुरश्रियं द्रष्टुं चेति ॥ ३७ ॥ तत्र स्वमनीषितं विचारितम् । सम्यक् सम्यक् स्वावद्यं मरणं तन्मार्जनम् । तथाप्येतावानभिनिवेशो न कार्य इति भविष्यत्सूचयन्नाह । सिद्ध्यसिद्ध्योरिति ॥ ३८ ॥ पुरुषकारस्य व्यभिचारमाह । मनोरथानिति ॥ ३९–४० ॥

इति श्रीभा० म० दशमस्कंधे पूर्वार्धे टीकायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥

---

१. सम्यक्–श्रीधर. वंशी. जीव. । २. चावद्य–विज. । ३. समम्–श्रीधर. वंशी. जीव. विज. । ४. भावनम्–वीर. विज. । ५. स्यां यथा–विज. । ६. इत्युक्तवन्त मामंत्र्य–वीर. । ७. पारमहंस्यां संहितायां–प्रा. पा. । ८. पूर्वार्द्धे–प्रा. पा. । ९. कंसमंत्रणं–प्रा. पा. । १०. चतुस्त्रिंशोऽध्यायः–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतत् मम वृत्तम्। तौ कथमानयिष्य इति चेत्तत्राह—धनुरिति। यदुपुरस्य मधुपुरस्य श्रियं छविं वा द्रष्टुमिति वेति शेषः। तत्पार्श्वे धनुरुत्सवमथुरासौन्दर्यवर्णने स्वयमेवागमिष्यत इति भावः॥ अर्भकाविति-त्वया प्रतार्य तावानेतुं त्रैक्याविति भावः। तत्प्रकारं शिक्षयति—धनुरिति। अन्येभ्यस्तत्राप्यर्भकेभ्यो यज्ञोत्सवपुरीशोभादर्शनं नितरां रोचेतेति भावः। तथा च श्रीहरिवंशे–"वाच्यश्च नन्दगोपो वै करमादाय वार्षिकम्। शीघ्रमागच्छ नगरं गोपैः सर्वैः समन्वितः॥ कृष्णसंकर्षणौ चैव वसुदेवसुतावुभौ। द्रष्टुमिच्छति कंसो वै सभृत्यः सपुरोहितः॥ एतौ युद्धविदौ रंगे कालनिर्वाणयोधिनौ। दृढौ च कृतिनौ चैव शृणोम्यव्याहतोद्यमौ॥ पितृष्वसुः सुतौ मुख्यौ व्रजवासौ वनेचरौ। अस्माकमपि मल्लौ द्वौ सज्जौ युद्धकृतोद्यमौ॥ ताभ्यां सह नियोत्स्येऽहं तौ युद्धकुशलावुभौ। द्रष्टव्यौ च मयावश्यं बालौ तावमरोपमौ॥ वक्तव्यं च व्रजे तस्मिन्समीपे व्रजवासिनाम्। राज्ञा धनुर्मखं नाम कारयिष्यति वै सुखी॥" इति॥३७॥ तव मनीषितमित्यन्वयः। स्वस्यावद्यं स्वावद्यं न वदति यत्र तदवद्यम्। 'अवद्यं मृत्युपापेयाः' इति व्यक्तिकारः। यद्यपि मृत्युर्वारणी यस्तथाप्यहमवश्यमेतेन निधिना वारयिष्याम्येव कालमेतावानियान्हठो न कार्य इति भविष्यत्तन्मरणम्। समं चेतः कुर्यादिति चेत इति शेषः। फलं साधयतीति तथा। दैवं पूर्वादृष्टमेव। यथादृष्टं फलं स्यादित्यर्थः॥ तच्छ्रुत्वा स्वीयभगवद्दर्शनतद्वारा तन्मारणलक्षणदीर्घस्वाभीष्टयुगलसिद्ध्याशया तत्तदर्थमेव स्वीयतदात्मीयतां प्रख्यापयितुमिच्छया च तद्वाक्यं श्लाघते राजन्निति द्वयेन। सम्यगिह हेतुः। हे राजन्निति—राज्ञस्तव दण्डनीतिशास्त्रानुग मित्वादिति भावः। ननु धार्मिकोऽयं कथं केवलां दंडनीतिमनुमोदते, तस्येदं वाक्यं कूटमेवेत्याशंक्य स्वाशयं गोपयँस्तदनुवादेनापि श्लाघते—कुर्यादिति। विधिलिङ्ग धर्मशास्त्रमतेऽप्येतादृशसंकटप्रतीकारादौ प्रयतेतैवेत्यर्थः। तदुपेक्षायामात्महत्यादिपापोपपत्तेः। किन्तु मनीषितस्य सिद्ध्यसिद्ध्योः समो हर्षदुःखरहित एव सन् कुर्यादिति विशेषः। 'समम्' इति पाठे क्रियाविशेषणत्वं भावमिति शेषं वा। हि यतो दैवमदृष्टमेव फलं भद्रमभद्रं वा भावयति करोतीति तत्॥ ३८॥ पुरुषकारस्य पुरुषार्थस्य। व्यभिचारमनियतफलत्वम्। मनोरथसिद्धौ हर्षस्तदभावे शोको विषादः। यद्यपि सिद्धिरसिद्धिर्वा दैवाधीना तथापीति॥ निवृत्ति धर्मपराणामस्माकं तु तदपि न कर्तव्यं किं तु सर्वदेवमयस्य राज्ञस्तवाज्ञयैव क्रियत इति प्रकारान्तरेणापि स्वाशयं गोपयितुं तस्मिन्स्वभक्तिं दर्शयितुं चाह—मनोरथेति। अपिशब्दात् किमुत दैवोपकृतात्, तस्मात्कृतेऽपि साम्यभावेन यथावसरं हर्षशोकाभ्यां युज्यत एव, न तु निवृत्तिवदधिकृतं सुखमित्यर्थः। यद्यप्येवं तथापि ते तवाज्ञां करोमि करवाणीत्यर्थः। भाविसूचना चेयम्। स्वावद्यमार्जनमसुरत्वखंडनं मुक्तिप्राप्तिः। कुर्याद्भवानिति शेषः। हि यस्माद्दैवं श्रीकृष्णलक्षण ईश्वर एवात्र फलदातृ, न तत्र भवतस्वाधीनत्वमिति भावः। जनो भवादृशः। यद्यप्येवमीश्वर एवात्र स्वयं कर्ता न मादृशस्यात्र किञ्चित्करत्वं तथापि त्वदानुकूल्यरूपेण तदुक्तजन व्यवहारेणैव करोमीति। अत्रारिष्टवधानन्तरम्। कंसस्य यादवान्प्रति सकपटप्रोत्साहनवाक्यं, वसुदेवं प्रति च निंदनं तथा कंसं प्रति धिक्कारः। अन्धकस्य वाक्यजातमिति हरिवंशमतम्। एवम् उक्तप्रकारेण। सः कंसः। श्रतावपि वृषासुरवधस्तथाहि—"प्रनेमास्मिन्ददृशे सोमो अन्तर्गोपा नेममाविरस्था कृणोति स तिग्मशृङ्गं वृषभं युयुत्सन्द्रुहस्तस्थौ बहुले बद्धो अंतः" इति। एतदर्थस्तु—अंतर्गोपाः अंतः स्थित्वा गोपायन्नंतर्यामि नेमस्मिन्नर्धप्रपंचे स्थावरे सोमः सोमादिरूपः ददृशे प्रकर्षेण दृष्टः। नेममर्द्धप्रपञ्चम्। अस्थाः अस्थिरं जंगममाविः कृणोति प्रकटी करोति। स तिग्मशृङ्गं वृषभं युयुत्सन् योद्धुमिच्छन्। दृङ्मात्रेण भस्मीकर्तुं शक्तोऽपि लीलया तेन सह युयुत्सन् द्रुहः द्रोहं कृतवांस्तं ततवानित्यर्थः। ततश्च बहुले व्रजे। अतः रासमंडलमध्ये बद्धः भक्तजनेन प्रेमपाशेन बद्धः संस्तस्थौ। क्रीडितुमिति शेषः॥ ४०॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे षट्त्रिंशोऽध्यायः॥ ३६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अर्भकाविति त्वया प्रतार्य तावानेतुं शक्याविति भावः। तत् प्रकारं शिक्षयति। धनुरिति। वन्येभ्यस्तत्राप्यर्तकेभ्यो यज्ञोत्सवपुरीशाभादर्शनं नितरां रोचेतेति भावः तथा च श्रीहरिवंशे—

वाच्यश्च नन्दगोपो वै करमादाय वार्षिकम्। शीघ्रमागच्छ नगरं गोपैः सर्वैः समन्वितः॥
कृष्णसङ्कर्षणौ चैव वसुदेवसुतावुभौ। द्रष्टुमिच्छति संको वै सभृत्यः सपुरोहितः॥
एतौ युद्धविदौ रङ्गे कालनिर्वाणयोधिनौ। दृढौ च कृतिनौ चैव शृणोम्यव्याहतोद्यमौ॥
अस्माकमपि मल्लौ द्वौ सज्जौ युद्धकृतोत्सवौ। ताभ्यां सह नियोत्स्येते तौ युद्धकुशलावुभौ॥
द्रष्टव्यौ च मयावश्यं बालौ तावमरोपमौ। पितृस्वसुः सुतौ मुख्यौ व्रजवासौ वनेचरौ॥
वक्तव्यश्च व्रजे तस्मिन् समीपे व्रजवासिनाम्। राजा धनुर्मखं नाम कारयिष्यति वै सुखी॥
सन्निकृष्टे प्रजास्तत्र निवसन्तु यथासुखम्। जनस्यामन्त्रितस्यार्थे यथा स्यात् सर्वमव्ययम्॥
पयसः सर्पिषश्चैव दध्नो दध्युत्तरस्य च। यथा कामप्रदानाय भोज्याधिश्रयणा चेति॥ ३७॥

तच्छ्रुत्वा स्वीयभगवद्दर्शनतद्द्वारा तन्मारणलक्षणदीर्घ स्वाभीष्टयुगलसिद्ध्याशया तत्तदर्थमेव स्वीय तदात्मीयतां प्रख्यापयितुमिच्छया च तदुक्तं श्लाघते राजन्निति द्वयेन । सध्र्यगित्यत्र हेतुः हे राजन्निति । राज्ञस्तव दण्डनीति शास्त्रानुगामित्वादित्यर्थः । ननु धार्मिकोऽयं कथं केवलां दण्डनीतिमनुमोदते तस्मादस्येदं कूटवाक्यमेवेत्याशङ्क्य स्वाभिप्रायं गोपयन् तदनुवादेनापि श्लाघते कुर्यात् विधिलिङा धर्मशास्त्रमतेऽप्येतादृशसङ्कटप्रतीकारादौ प्रयतेत एवेत्यर्थः । तदुपेक्षायामात्महत्यादि पापापत्तेः । किन्तु सिद्ध्यसिद्ध्योः समो हर्षदुःखरहितः एव सन् कुर्यादिति विशेषः । सममिति पाठे क्रियाविशेषणत्वं भावमिति शेषो वा ।। ३८ ।। निवृत्तधर्मपराणामस्माकं तु तदपि न कर्त्तव्यं किन्तु सर्वदेवमयस्य राज्ञस्त्वाज्ञैव क्रियत इति प्रकारान्तरेणापि स्वाभिप्रायं गोपयितुं तस्मिन् स्वभक्तिं दर्शयितुं चाह । मन इति । अपि शब्दात् किमुत दैवोपकृतान् तस्मात् कृतेऽपि साम्यभावने यथावसरं हर्षशोकाभ्यां युष्यते एव ननु निवृत्तिवदधिकृतं सुखमित्यर्थः । यद्यपि एवमथापि ते तवाज्ञां करोमि करवाणीत्यर्थः । भाविसूचना चेयं स्वावद्यमार्जनमसुरत्वखण्डनं मुक्तिप्राप्तेः कुर्याद्भवानिति शेषः हि यस्माद्दैवं श्रीकृष्णलक्षण ईश्वर एवात्र फलदातृ न तत्र भवत् स्वाधीनत्वमिति भावः । जनो भवादृशः यद्यप्येवमीश्वर एवात्र स्वयं कर्त्ता न मादृशस्यात्र किञ्चित् करत्वम् । अथापि तदानुकूल्यरूपेण तद्भक्तजनव्यवहारेणैव करोमीति । अत्रारिष्टवधानन्तरं कंसस्य पादवान् प्रति सकपटप्रोत्साहनवाक्यं श्रीवसुदेवं प्रति च निन्दनं तथा कंसं प्रति साक्षात्तैर्धिकारः अन्धकस्य च वाक्यजातमिति श्रीहरिवंशमतम् ।। ३९ ।। स्वगृहमन्तःपुरं स्वमालयं पुरम् ।। ४० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां षट्त्रिंशोऽध्याय ।। ३६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अर्भकाविति—त्वया प्रतार्य्य तावानेतुं शक्याविति भावः । तत्प्रकारं शिक्षयति—धनुरिति । वन्येभ्यो यज्ञोत्सव—पुरीशोभादर्शनं नितरां रोचत एवेति भावः । तथा च श्रीहरिवंशे (विष्णु० प० २२।८६–९३)—

'वाच्यश्च नन्दगोपो वै करमादाय वार्षिकम् । शीघ्रमागच्छ नगरं गोपैः सर्व्वैः समन्वितः ।।
कृष्ण–संकर्षणौ चैव वसुदेवसुतावुभौ । द्रष्टुमिच्छति वै कंसः सभृत्यः सपुरोहितः ।।
एतौ युद्धविदौ रंगे कालनिर्व्वाणयोधिनौ । दृढौ च कृतिनौ चैव श्रृणोम्यव्याहतोद्यमौ ।।
अस्माकमपि मल्लौ द्वौ सज्जौ युद्धकृतोत्सवौ । ताभ्यां सह नियोत्स्येते तौ युद्धकुशलावुभौ ।।
द्रष्टव्यौ च मयावश्यं बालौ भावमरोपमौ । पितृष्वसु सुतौ मुख्यौ व्रजवासौ वनेचरौ ।।
वक्तव्यश्च व्रजे तस्मिन् समीपे व्रजवासिनाम् । राजा धनुर्मखं नाम कारयिष्यति वै सुखी ।।
सन्निकृष्टे व्रजास्तत्र निवसन्तु यथासुखम् । जनस्यामन्त्रितस्यार्थे यथा स्यात् सर्व्वमव्ययम् ।।
वयसः सर्पिषश्चैव दध्नो दध्युत्तरस्य च । यथाकामप्रदानाय भोज्याधिश्रयणाय च ।।' इति ।।

यदर्थमेतावन्तं कालमस्य दुष्टस्याप्यनुकूलेन सता मया तोषितं तत्फलमिदं प्राप्तम् , अतोऽनेन मम तत्त्वतो हितमेव कृतमतो मयाप्यस्य हितमेव कर्त्तुं युज्यत इति । यद्वा, किञ्चिद्धितेऽनुक्ते सत्यौदास्यमाशंक्य विश्वासमकृत्वा यदि मामयं न प्रस्थापयिष्यते, तर्हि मम दीर्घाशा न पूर्य्येतेति किञ्चिद्धितं वाच्यमित्याशयेनाह,—राजन्निति द्वाभ्याम् । हे राजन्निति राज्यस्य राजदेहस्य च रक्षार्थमिदमुचितमेवेति । यद्वा, इदं राज्ञो नीतिशास्त्रानुरूपमेव, न तु कर्म्मादिविचारेणेति भावः । सिद्धौ असिद्धौ च समः सन् कुर्य्यात् कर्म्माचरेत् , निजमनोरथे सिद्धेऽतिहृष्टो न स्यादसिद्धे च नार्त्त इत्यर्थः । कुतः ? दैवं निजादृष्टमेव फलं भावयति, तत् पुरुषकारेण किं स्यादित्यर्थः । 'समम्' इति पाठे क्रियाविशेषणम् । समं भावमिति वा शेषः । तथापि स एवार्थः ।। ३८ ।। तदेव दर्शयति—मनोरथानिति । कदाचिद्धर्षेण युज्यते, मनोरथसिद्धेः, कदाचिच्छोकेन च युज्यते, तदसिद्धेः, अतस्तत्र नैयत्यं नास्ति, फले दैवस्यैव प्राधान्यात् , तस्मात्तत्राभिनिवेशो न कार्य्य इति भावः । एवं दैवं पुरुषकारेणातिक्रम्यत इति नीतिशास्त्रोक्तं परिहृतम् , श्लोकस्य पश्चान्निर्देशेन तव मनोरथासिद्ध्या शोक एव फलिष्यतीति गूढो भावः । अतस्तत्र यद्यपि यत्नः कर्त्तुं न युज्यते, तथापि तद्वशवर्त्तित्वात्तवाज्ञां करोमि करिष्यामीत्यर्थः । एवं तवाज्ञयैव तत्र प्रयामि, न तु स्वेच्छयेति तस्मिन् स्वाभिमतसंगोपनार्थमिति ।। ३९ ।। चकाराभ्यां द्वयोरपि प्रयोजनयोः प्राधान्यं बोध्यते, निजमन्त्रिष्विवाक्रूरेऽपि विश्वासोत्पत्त्या द्वयोः साम्यात् स दुर्मन्त्रकुशल आसन्नमरणः । चार्थे तथाशब्दः, अतः स्वमित्यस्य गृहमित्यनेनापान्वयः ।। ४० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील–सनातन्–गोस्वामिपाद–कृतायां श्रीवृहद्वैष्णवतोषण्यां
श्रीदशम–टिप्पण्यां षट्त्रिंशोऽध्यायः ।। ३६ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एतत् सर्वं मम चिकीर्षितं ज्ञात्वा रामकृष्णावर्भकौ इहानय ननु वां हन्तुं कंस आहूतवानित्युक्ते सति तौ पळायेतां तत्राह धनुरिति । धनुर्मखनिरीक्षणार्थं मधुपुरश्रियञ्च द्रष्टुमाहूतवानिति त्वया वाच्यमित्यर्थः ।। ३७ ।। इत्थमुक्तः प्राहाक्रूरः । राजन्निति

स्वावद्यं मरणं तस्य मार्जनं परिहार इति यत्तव मनीषितं विचारितं तत्सम्यगेव तथाप्यत्राभिनिवेशो न कार्य इति भविष्यत्सूचयन्नाह । सिद्ध्यसिद्ध्योरिति । हि यस्माद्दैवं फलभावनं फलदमतः सिद्ध्यसिद्ध्योः समः कर्म कुर्यात् ॥ ३८ ॥ पुरुषकारस्य व्यभिचारमाह । मनोरथानिति दैवहतानुच्चैर्मनोरथान्करोति जनः स्वसुखार्थकर्मणा दुःखेन युज्येत कदाचित्सुखं न तथापरदुःखार्थेन स्वयमेव दुःखेन युज्यते परस्तु सुखेनैवेति यद्यप्येवं तथापि तवाज्ञां करोमि ॥ ३९ ॥ इत्युक्तस्तमक्रूरपमामन्त्र्य पृष्ट्वानुज्ञाप्य मन्त्रिणो विसृज्याज्ञाप्य कंसः स्वगृहं प्रविवेश तथाक्रूरश्च स्वगृहं विवेश ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

आनयते निमित्तमाह । धनुर्योगलक्षणोत्सवार्थम् ॥ ३७ ॥ मनीषितं मनसा कर्तुमिष्टं मरणं ज्ञात्वापि परिहारप्रयत्नो न कृत इति यदत आत्महत्यालक्षणं यदवद्यं तस्य मार्जनं परिहरणं भवति फलनिष्पत्तिमज्ञात्वा प्रयत्नो व्यर्थ इति न निरूप्य इत्याह । सिद्धीति । फलसिद्धावसिद्धौ च हर्षशोकाभ्यां न विषमो भूत्वा कर्म कुर्यादितिविधिशास्त्रं तर्हि फलावाप्तिः किमधीनेति तत्राह । दैवमिति फलभावनं फलकारणम् ॥ ३८ ॥ तर्हीदं नापेक्षितं किंनेत्याह । मनोरथानिति । जनेन क्रियमाणं यत्त्वयाप्यनुष्ठेयमिति भावः । यद्यपि फलसिद्धिः हर्यधीना तथापि ॥ ३९–४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इदं रहस्यतत्त्वं न वाच्यं त्वेतदित्याह । धनुरिति ॥ ३७ ॥ मनीषितं सध्र्यक् सम्यक् स्वावद्यं मरणं तन्मार्ज्जनं तदप्यत्र नीतिशास्त्रविधिं शृण्वित्याह । सिद्ध्यसिद्ध्योरिति । मनीषितस्य सिद्धावसिद्धौ च पुमान् समं भावमिति शेषः हि यतो दैवमदृष्टमेव भद्रमभद्रं वा भावयति करोतीति तत् ॥ ३८ ॥ जन्तुर्निकृष्टलोको ननु भवानिति ! प्रकटोऽर्थः वस्तुतस्तुः त्वं जन्तुरेव पशुनिर्विशेष इत्यर्थः । दैवहतान् अपकाराद्दैव पालितान् मनोरथान् करोति तत्र दैवपालितेषु मनोरथेषु हर्षः दैवहतेषु शोकः ताभ्यां जन्तुर्युज्यते युक्तो भवति तथापि एवमपि तवाज्ञां करोमि यतो भवांस्तु भाग्यवान् हर्षमेव प्राप्स्यतीति प्रकटो भावः वस्तुतस्तु अथापि यद्यपि जन्तोर्मुमूर्षोस्तवाज्ञा कर्त्तुं न युज्यते तदपि करोमि तव राजत्वान्मम तु त्वत्प्रजात्वादिति भावः । यद्वा अथापि तव मनोरथासिद्धावपि मम तु मनोरथः सेत्स्यत्येवेत्याज्ञां करोमीति ॥ ३९-४० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । षट्त्रिंशो दशमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ३६ ॥

गूढार्थदीपिनी

यदुपुरस्य मथुरायाः ॥ ३७ ॥ मनीषितं विचारितम् । स्वावद्यमार्जनं मृत्युपरिहारः पापमार्जनं च । 'अवद्यं मृत्युपापयोः' समं चित्तमिति शेषः । फलं साधयतीति ॥ ३८–४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वस्यावद्यं मरणं तस्य मार्जनं निवर्तकम् तव मनीषितं यद्यपि सध्र्यक् सम्यक् तथापि सिद्ध्यसिद्ध्योः समं यथा भवति तथा कुर्यादाचरेत् हि यतः फलभावनं दैवम् ॥ ३७–३८ ॥ दैवमन्तरेण पुरुषकारसिद्धिर्नास्तीत्याह । मनोरथानिति । मनोरथान् करोति यद्यपि तथापि दैवहतान् पश्यामः अतो दैवमेव फलभावनं पुरुषकारस्य तु निमित्तमात्रत्वमिति भावः । हर्षशोकाभ्यां युज्यते नतु हर्षमात्रमेव यद्यपि दैवमन्तरेण मनोरथसिद्धिर्नास्ति तथापि ते आज्ञां करोमि ॥ ३९–४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षट्त्रिंशाध्यायार्थप्रकाशः ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सा मन्माता सती रमणेन ग्राम्यकर्मणैवेतरं पतिभिन्नं नित्यानुमृतव्यत्यस्तैः शङ्किता साऽभवत्पश्चात्तस्य गौरवदर्शनात् । सा तमाहोत्थिता नत्वा भीता मम पतिर्ध्रुवमिति हरिवंशोक्तेः विदित्वा ज्ञात्वा नितान्तं गाढं खेदो यस्तेनाविलौ अनाच्छौ लोचनाशयौ नयनमानसे यस्या आर्यगर्हितं महद्भिर्निन्दितं कितव वञ्चक येन दुरात्मना दुष्टमनस्केन त्वयेदृशं कृतं त्वं क इत्युवाच ॥३७॥ इति ब्रुवन्तीं दीर्घबाहुर्द्रुमिलस्तत्प्रसूत इति स्वस्य बलिष्ठतां सूचयितुमिदं । परिसान्त्वयन् शनैरभाषत । महात्म् सङ्गे जाते मोदः सम्पादनीयः खेदः कुत इति द्रुमिलो निजदुर्मिलतां ललनां प्रतिलपयति ॥ वयमिति । हि यतः प्रिये वयं गन्धर्वकुलोद्भवा जात्या गन्धर्वाः किञ्च गीर्वाणैर्देवैस्तुल्याः समाश्च तेऽमरवल्लभ इन्द्रस्तस्यानुगा भृत्याश्च ते या गीस्तया बाणतुल्यास्तामभाषतेत्यन्वयः

॥ ३८ ॥ भवादृशीनां मनुजाङ्गनानां हे भद्रे वयं सुलभाः सुखलभ्या न चेति जानीहि पुनर्भद्रे प्रिये वयं वयमित्युक्तिः पद्ममुखी सुमुखी कृत्यः इति ज्ञेयं । दुर्मिलता च त इति तां विलासयति । जरा च विनाशश्च तावादी येषां ते च तेऽखिलाधश्च तान्भजन्ति तच्छीला इति । तेषां नृणां सुराणां निर्जराणां महदन्तरं महान्विशेष इति ॥ ३९ ॥ जारारे विशेषोऽस्तु किमनेन न दोषः स्यादिति मतिमत्याह ॥ इति ब्रुवन्तीमिति । सा क्रोधाकुलेन्द्रिया । कस्त्वमित्युक्तः प्राग्भूय इत्युक्तिः । इत्थं दुष्टचेष्टितं दुर्व्यापारं कृत्वा मां भूयः किं सान्त्वयसे । मूढेति निरूढः पाठः । सान्त्व यासे समाधत्से ॥ ४० ॥ हे कान्ते एकान्ते यज्जातं जातं कोऽपि न वेत्तीतीया-कोपः कुत इत्यतः सुकृतदुष्कृतसाक्षिण एत इति सा सारसाक्षी प्रोच्य तं तुच्छीकरोति ॥ इमानिति । इः इच्छा तेनैव मम मं विषं येन स तत्सम्बुद्धिः । मासे च समये चन्द्रे यमे वेधसि मं विषमिति विश्वः । हे आनतिक्रम्य आनतिः सत्कार्यप्रवणता क्रम्या क्रमणीया क्षेप्या यस्य स तत्सम्बुद्धिः । जडेषु चेतनग्रहः समीरणो वायुरवधीर्य । धृङ्नादरे । विस्तृतं चैतद्युक्तिपादीयसुधास्थगौरवमनुरुध्य प्रयोजननमवधीर्यतामिति वात्स्यटिप्पणे । अवज्ञायातो नैकतरातिरेकः । वैशकलित्येषार्घपोरन्वय इति पदद्वयं वा । येन दुरात्मनाऽहं मलिनीकृता । च्विना प्रागित एतादृङ्मालिन्याभावः सूचित इति ज्ञेयम् ॥ ४१ ॥ वनमध्यगेति पद्मिनीपक्षे जलमध्यगेति पद्माक्षीपक्षे वनमध्यमुद्यानमध्यं गच्छतीति सा तथेत्यर्थो ज्ञेयः । विश्रृङ्खलेनोद्घाटितनिगडेन । अन्यत्र सन्मात्रमपहाय स्वैरेणेत्यर्थः । हे अभराधम देवगर्हित एतत्ते कर्म तव विदित्वा त्वां गर्हयेयुरिति भावः । अधमौ गर्हितन्यूनाविति च । अधमः कुत्सिते न्यून इति विश्वः । देवनीच वा ॥४२॥ नाधर्मो मयाऽचारीति समाधत्ते ॥ इतीति । हे पङ्कजगन्धिनि पङ्कजस्य गन्धः सोऽस्यास्तीति तत्सम्बुद्धिः । हे सरोजाक्षि मनुष्यासु दिवौकसां सङ्गमोऽनुलोमो युक्तः स्वभावतस्तेषामुत्तमत्वात् । देवकान्तासु नराणां सङ्गमः प्रतिलोमो विरुद्धः स न कार्यः । हि शब्देन तत्तज्जातित्वेनैवैतस्य विरुद्धता नावतारादिष्विति शन्तनुगङ्गादिव्योर्वृत्तिर्मोनप्रसिद्धेरिति सूचयति । तेन हेतुनाऽहमागस्कृदपराधकर्ता न ॥ ४३–४४ ॥ तस्माच्छ्रीमान्धीमान्महोत्साहः पुत्रो जायते मद्वीयं रेतो न वृथा भवेत् । मे वाक् च मृषा न जायते ॥ ४५ ॥ सुदुर्लभं पातिव्रत्यं सन्त्यज्य स्थितेति क्रुद्धा मम मातैवं वादिनं निन्दा द्योत्यत इति ना इति प्राह ॥४६॥ निर्निर्मितः सेतुर्येन निर्जितराक्षसो रामस्तस्य सकाशाद्भिन्नं विलक्षणं वृत्तमाचारो यस्य । एकपत्नीव्रतरामविलक्षणवृत्तस्य व्यभिचारिण इति यावदुन्मार्गवर्तिनः पापस्य ते तव तनयः साहसी स्वबलमनवलोक्य कर्ता निर्दयोऽदाताऽघृणः कृपाविकलोऽघृणो जुगुप्सारहितो निर्दयोऽघृण इति वा । घृणा जुगुप्सा कृपयोरिति विश्वः । दया दानेति स्मृतेः । भूयाद्धीमाच्छ्रीमान्महोत्साहीति भावः ॥ ४७ ॥ देवतानां तपस्विनां द्विजानां च नानुग्राह्यः क्रुद्धायां तस्यामित्थं वदन्त्यां शापेन शङ्कितः सतीयं कुपिता सती यदि दद्याच्छापं तर्हि न सोऽन्यथा भवेदिति सन्देहग्रस्तस्तावकानां सतां स्वकीयानां शत्रुर्भवेदित्युक्त्या तत्रैव स्थितस्थान एवान्तरधीयतान्तर्हितोऽभूत् ॥ ४८ ॥ तस्मिन्गन्धर्वे ॥ ४९ ॥ ततस्तद्दिनप्रभृति गर्भमालम्ब्य काले दशमे मासि मां सुषावासूत ॥ ५० ॥ भगवानृषिरित्यन्यथाकथनहेतूक्तिः । ततः प्रभृति तद्दिनमादीकृत्यैतान्बन्धुदुर्जनान्बन्धवः स्वकीयाश्च ते दुर्जनाश्च तानहं द्वेष्मि द्वेषं करोमि । अनेन स्वैरसंयुगमित्यत्र स्वैः असंयुगमिति पदत्रयं । अनिमान इत्यत्रेव नञर्थस्याकारस्य स्वपदेनान्वयः । अस्वैर्न स्वकीयैः संयुगं पश्यन्त्विति वृत्त्यन्तरमादर्शि ॥ ५१ ॥ तेऽपि मां सदा विद्विषन्ति । न केवलमहमेकल एवं कलयामि किन्तु यूयं सर्वेऽपि तत्र तन्मद्द्वेषे प्रमाणं साक्षिणो मद्विषये तद्द्वेषो युष्मत्साक्षिसिद्धो नाहं वितथकथ इति भावः । दुर्बुद्धिमुग्रसेनं दुराशयमाहुकं च ॥ ५२ ॥ कितवं पोतं तत्र प्रस्थाप्य कन्यामन्यायतो नीत्वा यात इति मायावीति कितवम् । हत्वा स्थितस्य मम दोषो न जायते । क्षेत्रमात्रस्वाम्युग्रसेनोऽतो गन्धर्वजन्म नो ममेति निर्लेपताया मार्गान्तरप्रदर्शनम् ॥ ५३ ॥ तेन हेतुना पुरुषं प्रस्तुतं केशिनं तौ हन्येतां स्वयेत्यहमादेक्ष्याम्याज्ञापयामि । यथाकथञ्चिन्मुक्तौ चेत्केशिना बलीयसा कुञ्जरेण हताभ्याम् ॥ ५४ ॥ पारत्रिकीं पूजां मदभिप्रेतप्रेतकार्यमिममुग्रसेनाद्या अपि तत्पदवीं मृत्युमार्गं यातु तानपि घातयामीत्याशयः । वसुदेवश्चोग्रसेनश्च ताभ्यामन्यौ नन्ददेवकौ च ॥ ५५ ॥ गोपाला यादवाश्चेत्येते विगतं वृतमावरणं येषां विवृतास्तैर्नत्रैर्वक्त्रनेत्रारण्यगाण्डीवानि नपुंसके चेति लिङ्गानुशासनसूत्रान्नेत्रशब्दः पुल्लिङ्गः । प्रकृते सङ्गमय्योक्तिरियमन्यथाऽपि निर्वाहादिति ज्ञेयम् । हन्यमानौ स्वदारकौ पश्यन्तु ॥ ५६ ॥ जनपदा देशस्था जना हे महामात्र हे भद्र रङ्गद्वारि रङ्गकवाटेऽपनीयतामुपनीयताम् । अपाश्रय इति वदयम् । उपनीयतामित्यपि क्वचित्पाठः । इतोपनीयतामिति ॥ ५७ ॥ तेन द्विपेन ममाहितौ वैरिणौ जहि । रङ्गन्नेत्राभ्यां स्रवद्वारि पयो यथा भवति तथा जहीति वाऽन्वयः । यथाविधि चतुर्दश्यां धनुर्यागश्चारभ्यताम् ॥५८॥ भूतराजाय मीढुषेऽभिलषितसेचकाय मेध्यान् शुद्धान्पशून्विशसन्तु सूदयन्त्विति महामात्रादीनाज्ञाप्यार्थतत्त्वज्ञं प्रयोजनरहस्यज्ञं यदुश्रेष्ठमाहूयाकारयित्वा पाणिना स्वहस्तेन तद्धस्तं गृहीत्वा तत्र तत्समयेऽक्रूरं कर्मणा शर्मणा चोवाच ॥ ५९ ॥ भो भो दानपते दातृपते शुद्धिमदधिपंवा । दानं गजमदे त्यागे पालनच्छेदशुद्धिष्विति विश्वः । मह्यं मम मैत्र्यमादृत इत्युभयान्वयि । मयादृते मय्यादृत इति क्रियताम् । किं तावदाप्तता तव मयि त्वयि मम वेत्यत आह । त्वत्तोऽन्यो भोजवृष्णिषु हिततमोऽतिमित्रं न विद्यत इति ॥ ६० ॥ सौम्य शान्त सुन्दर वा । सौम्यो विप्रे सोमजीवे सुन्दरे सोमदेवत इति । गौरवेण प्रभुगौरवेण साधनं येन स कार्यस्य गौरवसाधनस्तं त्वामाश्रितः । तत्र निदर्शनमिन्द्रो विष्णुमुपेन्द्रमाश्रित्य स्वार्थं बलिबलादिजयलभ्यमध्यगमत्प्राप । कार्येषु गौरवं यस्य कार्यस्य तस्यापि साधनं साधकमिति वा ॥ ६१ ॥ स्तुतिरियती कुतः प्रस्तुतं किं किं शंससेत्यतः शंसति ॥ गच्छेति । आनकदुन्दुभेः सुताविति तद्व्यञ्जनसूचनार्थम् । तत्र नन्दव्रजे आसाते । अनेन रथेन ताविहानय । नालस्यं विलास्यमित्याह ॥ मा चिरमिति ॥ ६२ ॥ भो भो राजन् कुतः कुतः कुमारमारणमिति

न वदेति स्वयं हेतुमाह ॥ निसृष्ट इति । वैकुण्ठो हरिस्तत्संश्रयैर्देवैर्मे मृत्युर्हन्ता निसृष्टः क्लृप्तौ मयैवाग्रे जाग्रता भाव्यमिति तावानयेत्युक्तिः । एको नाकार्यः कार्यः प्रकाशः स्यादिति तावति नन्दाद्यैर्गोपैः सममिति च वचनम् । साभ्युपायनैर्देयदायसहितैः ॥ ६३ ॥ इहानीतौ कालकल्पेन यमसमेन ततो हस्तिहस्ततो वैद्युतोपमैर्विद्युतो निर्गतो वैद्युताग्निस्तेनोपमा येषां ते तैर्मल्लैः । ते नेतरधृता इत्यप्याह ॥ अमल्लैरिति । मल्लो धारणं तन्नैषामित्यमल्लास्तैः । मलमल्लधारण इति स्मरणात् ॥ ६४ ॥ कुतो मनोरथे न्यूनता स्वप्ने च पयोन्नाशने कुतो द्रवतेति नीतेः सर्वं स्वाभिप्रेतं शंसति ॥ तयोरिति । तन्नान्दुःस्वतः ॥ ६५ ॥ उग्रसेनं मत्पितरं स्थविरं राज्यकामुकमिति मारणकारणनिकुरुम्बोक्तिः । तत इत्येतद्घातानन्तरं मही नष्टक्षुद्रोपद्रवा भवित्री । स्वानुबन्धिनः कथयति ॥ जरासन्ध इति । मम गुरुः श्वशुरः । श्वशुरः पञ्चमो गुरुरित्युक्तेः ॥६७॥ बाण इति सरलः पाठः । वात इति वात एव तन्नामा कल्पको वातापिर्वा तैः सह सुरपक्षीयान्नृपाहत्वा महीं भोक्ष्य इत्यन्वयः ॥ ६८ ॥ एतज्ज्ञात्वाऽपदेशमुपादिशति ॥ धनुरिति । यदुपुरश्रियं द्रष्टुं च ॥ ६९ ॥ श्रुतत्वद्वचनश्चातुरीत आतुरं प्रति वक्ति ॥ राजन्निति । मनीषितं सध्र्यक्सम्यगिति समीचीनौ पाठौ । अवद्यमार्जनमवद्यं मृत्युमेष्यन्तं ज्ञात्वा न यत्नं तेन इति यदवद्यमप्राबुद्धय तस्य मार्जनम् । अन्तरङ्गतस्तु ममावद्यस्य पापस्य नाशनमिति । अत एव च शब्दोऽपि । सिद्धिश्चासिद्धश्च तयोः समं यथा तथा कुर्यात् । कुतो न मदुक्तिसोत्कण्ठो भवति भवानसन्दिग्धेऽर्थे च कुतः सन्दिग्धे इत्यत आह ॥ हीति । यतो दैवं फलं भावयत्युत्पादयतीति तत्तथेति । यत्नस्तु सर्वथाऽनुष्ठेयः फलं त्वीश्वरायत्तमिति तात्पर्यम् ॥ ७० ॥ तर्हि यदर्हणं निष्फलं तुभ्यं न मदर्थितं रुरुच इत्यतः स्वावश्यकमिदमिति बाधकमुपन्यस्यापि किञ्चित्साशं कुर्वन्नाह ॥ मनोरथानिति । जनो मनोरथान्दैवहतानपि करोति कुर्वंश्च हर्षशोकाभ्यां युज्यते । साहसमेव न कार्यं चेदपि ते आज्ञां करोमि गच्छामीति यावत् । प्रभ्वाज्ञायाः प्राज्ञेनानुल्लङ्घ्यत्वादिति भावः ॥ ७१ ॥ गृहं कंसः प्रविवेश तथाऽक्रूरोऽपि स्वमालयं प्रविवेशेत्यन्वयः ॥ ७२ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

किन्त्वेतज्ज्ञात्वा क्षिप्रमानय ननु समर्थौ रामकृष्णौ कथं मया आनेतुं शक्याविति चेत्तदाह । अर्भकाविति । बालकौ हि कौतुकार्थं यत्र क्वचनागच्छतः तयोः स्थाने नास्मदभिप्रेतं वक्तव्यं किन्तु धनुर्मखनिरीक्षार्थं यदुपुरस्य मथुरायाश्च श्रियं द्रष्टुमिति मित्रभेदं न करिष्यतीति सर्वमेतदुक्तवान् अक्रूरोऽयं द्विस्वभावो जीवः सात्त्विकार्यार्थं दैत्याविष्टश्च अन्यथा तं प्रति कंसो न वदेत् नापि दैत्यैः सह प्रीतिः स्यात् तद्दत्तविषयान्वा अनुभूयात् एवं सति तस्य कार्यकर्तृत्वमपि न विरुद्धं भवति स्यमन्तकादिप्रसङ्गश्च न विरुद्धो भवति ॥ ३७ ॥ सांदिग्धन्तं प्रत्युत्तरमाह । द्विस्वभावत्वात् राजन्निति । संबोधनम् आज्ञाकरणावश्यकत्वार्थं स्नेहसूचनार्थं मनीषितं विचारितं सम्यगेव तदपि तव ननु मम विचारस्य सम्यक्त्वे हेतुः स्वावद्यमार्जनमिति । येन स्वस्य लौकिकप्रतीत्यापराधो न भवति । अनेन कालो राजा त्वन्तु सेवक इति निरूपितम् अन्यथा कथमयं भीतो भवेत् भ्रमाल्लोकानामन्यथा प्रवृत्तौ कालस्तानेव दुष्टान् जानीयादिति न तव दण्डः स्यात् दैत्यसिद्धान्तश्चान्तश्चावलम्बित इति नशास्तद्द्वारापि विरोधः देवानामेव हि राज्ये तेषामधिकारात् तदुक्तरीत्या नरकस्वर्गौ ननु दैत्यानामधिकारे अन्यथा दैत्यैर्देवपराजयो न स्यात् । ग्रहास्तु साधारणाः अतो मनीषितं सम्यगिति न विरुध्यते । अयञ्च सर्वसिद्धान्ताभिज्ञः कालस्यैषा व्यवस्था भगवान् सर्वप्रकार इति न भगवच्छास्त्रविरोधः अन्यथा वाचनिकी दैत्यानां मुक्तिर्बाधिता स्यात् विरुद्धेऽवपि मतेष्वनुभावश्च न स्यात् कालग्रहे प्रविष्टश्च भगवान् स्वकीयान् कालस्थानुद्धृतं नयतीति भगवल्लक्षणो देशः कालादतिरिच्यते अतो व्यवारार्थं सर्व एव कालात् बिभ्यति भगवांश्च कालं वञ्चयित्वैव भक्तान्नयति कालरूपश्च भवति अतो भगवदवतारः कालाप्रमाणबलं सर्वजनीनम् अन्यथा देवा ब्राह्मणाः धर्मश्च प्रतिष्ठिता न भवेयुः मध्यमकालौ द्विविधाविति देवदैत्यविभागः शूलभूतस्तु समः । अतः क्रमार्थ एवेति प्रमेयबलासिद्धिरिति प्रमाणबलन्तु मूलोल्लङ्घनमपि कारयतीति सिद्धान्तरहस्यं यतो दैत्यानां सिद्धान्तो ऽनेनावलम्बितः अतः सिद्धान्तानुसारेण सम्यगेवावलम्बितम् अतः पक्षद्वये संबन्धात् मूल कालः कियनुगुण इति ज्ञातुमशक्यत्वात् नैकतरसिद्धान्तः सिद्ध्यतीति तं प्रतिसिद्धान्तमाह । सिद्ध्यसिद्ध्योः समः कुर्यादितिप्राणिना सर्वसिद्धान्ताभिज्ञेन यत् कर्तव्यं तत्राग्रहो न कर्त्तव्यः यतो द्वैधस्य विद्यमानत्वात् प्रयत्न एव स्वस्य न तु फलं दैवाधीनमित्याह । दैवंहि फलभावनमिति । फलं दैवमेव भावयति अनेन पक्षद्वयं समानमुक्तम् ॥ ३८ ॥ तदन्याद्भवति इदानीन्तु भगवान् वतीर्ण इति द्वितीयपक्ष एव मुख्यः अतोऽनेन विचारितमनोरथः वृथैवेति विशेषमाह ! मनोरथान् करोतीति । उच्चैः स्वयोग्यैः इदं हि सर्वेश्वरेण विचारयितुं शक्यते अल्पोऽपि मनोरथस्तस्य सिद्ध्यतीत्याह । दैवहतानपीति । यदैव भगवानवतीर्णः तदैव सर्वे कंसादयो मारणीया इति अतो भगवता हता एव मनोरथास्तान् करोतीति भ्रान्त एवायं यतो जनः स्वयमेव जातः यद्यस्य मनोरथः सिद्ध्येत् कदाचिदपि तदा परगर्भे कथं जायेत कस्यचिद्वा मलरूपं रेतः कथंसमाश्रयेत् अतो यो मनोरथः कर्त्तव्यः स आत्मानं विचार्य कर्तव्यः अन्यथा चेत् हर्षशोकाभ्यां युज्यते कदाचिद्भगवान् किञ्चित्करोति किञ्चिच्च न करोतीति यद्यप्येवं ज्ञायते तथापि ते आज्ञां करोमीति अन्यथा स्वस्य तव कार्यं न सेत्स्यतीति ॥ ३९ ॥ एवमन्योऽन्यपरिभाषणमुक्त्वा उभयोः स्वस्थानगतिमाह ।

एवमिति। अक्रूरोक्तं तेन न विचारितमेव कार्यवैग्रयात् अतस्तस्यैव कृतमनूद्योपसंहरति। एवमादिश्येति। चकारात् केशिनं हस्तिपांश्च जानपदाकरणार्थं प्रवृत्तांश्च मन्त्रिणश्च विसृज्य तान् बहिरेव स्थापयित्वा स्वयमन्तः पुरं गतः तथा अक्रूरः स्वस्यालयं गतः इति न तस्मिन् दिवसे गृहान्निर्गमनं सोऽन्तः स्थितः तमर्थं चिन्तयिष्यति। अयमपि स्वगृहं गतः गमनोपायं प्रकारं च अत्रस्थतृतीयाध्याये कृत्यं वक्तव्यं विचारितं च ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां
त्रयस्त्रिंशाध्यायविवरणम् ॥ ३३–३६ ॥

श्रीसुबोधिनी–सारः

एतत् फलं ज्ञात्वा रामकृष्णावर्भकौ बालौ क्षिप्रमरं त्वमानय धनुर्यागदर्शनार्थं यदुपुरस्य श्रीमथुरायाः श्रियं शोभां द्रष्टुम् ॥ ३७ ॥ अक्रूरोक्तिः। राजन् सम्यक् मनीषितं विचारितं त्वया तव स्वावद्यं स्वदोषो निन्दारूपस्तस्य मार्जनं शुद्धिर्यस्मिन् यतो वा। सम्यक्त्वमाह सिद्ध्यसिद्ध्योः सिद्धिमसिद्धिं च समं कुर्यात् फलसाधनं दैवं हि नान्यदिति नियमात् ॥ ३८ ॥ निःश्वसन् आह दैवेन हतानपि मनोरथान् उच्चैर्जनः करोति हर्षशोकाभ्यां युज्यते तथापि ते तवाज्ञामहं करोमि ॥ ३९ ॥ एवमक्रूरमादिश्य मंत्रिणश्च विसृज्य त्यक्त्वा कंसो गृहं प्रविवेश। तथाऽक्रूरः स्वमालयं स्थानं प्रविवेश ॥ ४० ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतन्मच्चिकीर्षितं ज्ञात्वापि 'धनुर्मखनिरीक्षणार्थं तथा यदुपुरस्य मथुरायाः श्रियं शोभां द्रष्टुं च राजाऽऽहूतवान्' इत्युक्त्वा अर्भकौ वसुदेवपुत्रौ रामकृष्णाविह क्षिप्रं शीघ्रमानयेत्यन्वयः ॥ ३७ ॥ एवमुक्तोऽक्रूर आह—राजन्निति। राजन्निति सम्बोधनेन तदाज्ञापालनस्यावश्यकत्वं सूचयति। स्वावद्यस्य स्वमरणस्य मार्जनं परिहारः सम्यक् मनीषितं विचारितम्। तथाप्यत्राभिनिवेशो न कार्यः, यतः फलसिद्धौ तदसिद्धौ वा जनश्चित्तं समं कुर्यात्। हि यस्मात् दैवं फलभावनं परमेश्वराधीनमेव फलमित्यर्थः ॥३८॥ श्रीकृष्णे आगते सति धनुर्भङ्गाद्युपद्रवस्यावश्यंभावित्वात् कंसस्य च दुष्टस्वभावत्वात् कदाचित् 'मत्कर्तृकानयनेनोपद्रवो जात इति मत्वा, अयं मय्येव कुपितो भवेत्' इत्याशङ्क्य स्वदोषपरिहारार्थमुक्तमीश्वराधीनत्वमेव स्पष्टयति—मनोरथानिति। अयं जनः प्राणी दैवहतान् एकदा दैवेन प्रारब्धफलदात्रेश्वरेण हतान् निघ्नितान् मनोरथानुच्चैः करोति मनोरथान् कृत्वा तदुपायेषु प्रवर्तते। फललाभालाभयोरीश्वराधीनत्वात्तल्लाभे हर्षेण तदलाभे च वृथा साधनक्लेशात् शोकेन च युज्यते। यद्यप्येवं व्यवहारो लोके प्रसिद्धः, तथापि ते तवाज्ञामहं करोमि सेवकत्वात्तवाज्ञया तावानेतुं गच्छामि, फलं तु दैवाधीनमित्यर्थः ॥ ३९ ॥ एवमक्रूरं चकारात्केश्यादीन् ग्रामादिवासिजनानानेतुमन्यांश्चादिश्य मन्त्रिणश्च विसृज्य गृहं प्रस्थाप्य स कंसः स्वगृहं प्रविवेश। तथा अक्रूरोऽपि स्वमालयं गृहं गतः ॥ ४० ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येह भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने। षट्त्रिंशोऽपि गतोऽरिष्टघातादिविनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

एतदिति ॥ एतन्मच्चिकीर्षितं रहस्यं ज्ञात्वापि तत्रैवं न वाच्यं किन्तु धनुर्मखनिरीक्षणार्थं तथा यदुपुरायाः श्रियं शोभां द्रष्टुं च राजाऽऽहूतवानित्युक्त्वा अर्भकौ वसुदेवपुत्रौ रामकृष्णाविह क्षिप्रमानय ॥ ३७ ॥ राजन्निति ॥ हे राजन्! स्वावद्यस्य स्वमरणस्य मार्जनं परिहारः सम्यक् मनीषितं विचारितं तथापि फलसिद्धौ तदसिद्धौ वा जनश्चित्तं समं कुर्यात्। हि यस्मात् दैवमेव फलस्य भावनं साधकं परमेश्वराधीनमेव हि फलम् ॥ ३८ ॥ मनोरथानिति ॥ अयं जनः प्राणी निकृष्टश्लोको नतु भवानिति प्रकटोऽर्थः। वस्तुतस्तस्यैव निकृष्टत्वं व्यङ्ग्यम्। दैवहतान् एकदा दैवेन प्रारब्धफलदात्रेश्वरेण हतान् विघ्नितानपिशब्दाद्दैवपालितानपि मनोरथान्कृत्वा तदुपायेषु प्रवर्त्तते। ततश्च फललाभे हर्षेण तदलाभे शोकेन च युज्यते तथापि ते तवाज्ञां करोमि फलं तु दैवाधीनम् ॥ ३९ ॥ एवमिति। एवमक्रूरं चात्केश्यादींश्चादिश्य मन्त्रिणश्च विसृज्य गृहं प्रस्थाप्य स कंसः स्वगृहं प्रविवेश तथाऽक्रूरोऽपि स्वमालयं गृहं गतः ॥ ४० ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्। गङ्गासहाय षट्त्रिंशे दशमस्य व्यधादिमाम् ॥
इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अर्भकौ इह क्षिप्रं शीघ्रं त्वमानय ।। ३७ ।। एवं वदतं कंसमक्रूरः प्राह राजन्निति हे राजन् स्वावद्यमार्ज्जनं स्वस्य **अवद्यं मृत्युस्तस्य** मार्ज्जनं निवर्त्तनं त्वया समीचीनं मनीषितं मनीषया चिन्तितं तथाप्येवं निर्धारो न कर्त्तव्य इति भावि सूचयन्नाह फलभावनं फलजनकं दैवं नरा दृष्टं भवति अतः क्रियमाणे कर्मणि जनः सिध्यसिध्योः समं समत्वं कुर्यात् ।। ३८ ।। सांप्रतं पुरुषप्रयत्नस्य व्यर्थत्वं दर्शयन्नाह मनोरथानिति ।। ३९ ।। स्वं स्वकीयं आलयं गेहम् ।। ४० ।।

इति श्रीशुद्धैकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धव्याख्याने कंसमंत्रनाम षट्त्रिंशोऽध्यायः ।। ३६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एतदिति ।। एतदेतत् सर्वं मम चिकीर्षितमित्यर्थः । ज्ञात्वा, अर्भकौ बालकौ, रामकृष्णौ, इह क्षिप्रं शीघ्रमेव, आनय । ननु वां हन्तुं कंस आहूतवानित्युक्ते सति तौ पलायेतां तत्राह । धनुर्मखनिरीक्षार्थं यदुपुरश्रियं द्रष्टुं च, आहूतवानिति त्वया वाच्यमित्यर्थः ।। ३७ ।। इत्थं कंसेनोक्तोऽक्रूरः प्राह ।। राजन्निति ।। हे राजन्, स्वावद्यं मरणं तन्मार्जनं परिहारः इति यत्, तव मनीषितं विचारितं, तत् सम्यगेव । तथाप्यत्राभिनिवेशो न कार्य इति भविष्यत् सूचयन्नाह । सिद्ध्यसिद्ध्योरिति । हि यस्मात्, दैवं फलभावनं फलप्रदमस्ति । अतः, सिद्ध्यसिद्ध्योः समत्वं कुर्यादित्यर्थः । 'दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता' इति वचनात् । तत्र दैवं जन्मान्तरकृतं कर्म ।। ३८ ।। तत्र पुरुषकारस्य सव्यभिचारतामाह ।। मनोरथानिति ।। जनः, दैवहतान् अपि, उच्चैः मनोरथान् करोति, सः हर्षशोकाभ्यां युज्यते । कदाचित् स्वसुखार्थेनापि कर्मणा दुःखेन युज्यते कदाचित् सुखेन च, तथा परदुःखार्थेन कर्मणा स्वयमेव दुःखेन युज्यते, परस्तु सुखेनैव यद्यप्येवं तथापीत्यर्थः । अहं ते तव, आज्ञां करोमि ।। ३९ ।। एवमिति एवमित्थमुक्तवन्तं, अक्रूरं आमन्त्र्य पृष्ट्वा, आदिश्येति पाठे अनुज्ञाप्य, मन्त्रिणश्च विसृज्याज्ञाप्य, सः कंसः, गृहं प्रविवेश । तथा अक्रूरश्च स्वं स्वकीयं, आलयं गृहं, प्रविवेश ।। ४० ।।

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तम श्रीसहजानन्दस्वामिसुत श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे षट्त्रिंशोऽध्यायः ।। ३६ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

राजन्निति : १०.३६.३८.

मोदामोदनिदानमेकमवनौ जानन्न दृष्टं पुमान् । सिद्धिं प्राप्य न हृष्यतीशहृदयो न ग्लानिमेत्यन्यथा ।
अक्रूराग्रहसङ्गृहीतविषयो योऽक्रूरयोगोन्मुखस्तस्येशाप्तिरदुर्लभेत्यवगतार्थोऽक्रूरवाक् तत्क्षमम् ।। ७४ ।।
त्वया यदुक्तं निखिलं समञ्जसं मयापि निस्तन्द्रमहो विधीयते । परं शुभं वाऽशुभमत्र यद्भवेज्जानाति सत्यं भवितव्यतैव ।। ७५ ।।

मनोरथनिति : १०.३६.३९.

पुंस्यज्ञातप्रज्ञे लघुरिति गर्वोक्तिरगुरुतां फलति । स्वस्मिन्नेव निदर्शनमस्मिन् जागर्ति भार्गवो जगति ।। ७६ ।।
यः शक्तः स कचिदपि विसदृश इति परमुपेक्षते नैव । लघ्वपि कमलोदरगतमर्कोऽनलसस्तिरस्करोति तमः ।। ७७ ।।
तेजस्वी च महानप्यग्निर्यद्यपि तथापि न समेति । स्वपरप्रकाशकत्वं विनाऽतिलघुतूलवर्तिकां लोके ।। ७८ ।।
यन्महदग्रे वदति क्षुद्रस्तद्भवति कीर्तिकृन्महताम् । व्याघ्रप्रसिद्धिकारी गोमायोर्भवति तत्पुरः शब्दः ।। ७९ ।।
सेवाधर्मः सेवकाधीन एवं भर्तुर्धर्मो भर्त्रधीनः प्रसिद्धः । तन्नाकारि प्राक्तनः पथ्यवाचा धर्मं पश्यस्वाम्यसीत्युत्तरस्थम् ।। ८० ।।
उक्त्वैवमेतदुचितं च निशम्य धीमान् विज्ञाय सर्वमिदमिष्टकृदच्युतस्य ।
नोवाच किञ्चिदपि भावि तदा प्रतस्थे बाढं त्वदुक्त्यनुचरोऽहमिति ब्रुवन् सः ।। ८१ ।।

एवमादिश्येति : १०.३६.४०.

येन केन प्रकारेण मनः कृष्णे निवेशयेत् इत्यर्थज्ञौ हि तौ साधु स्वं स्वं स्थानमुपेयतुः ।। ८२ ।।

श्रीशाकल्पतरुक्रीडा० ।।

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते श्रीभक्तिरसायने षट्त्रिंशोऽध्यायः ।। ३६ ।।

कृष्णप्रिया

प्रिय मित्र अक्रूर ! मेरा यह निवेदन जानकर आप शीघ्र व्रज पधारें, कृष्ण और बलदेव तो दोनो बालक हैं उनको मल्लों के दङ्गल, मथुरापुरी का ऐश्वर्य, एवं धनुष्ययाग महोत्सव दिखाने के बहाने यहाँ ले आईए ॥ ३७ ॥ श्री अक्रूरजी ने कहा—महाराज भोजराज ! आपका अवलोकन एवं अभिलाप ठीक है। हाथी के या मल्लों के साथ दङ्गल में मारे जानेसे आप पर किसी प्रकार का दोषारोपण भी नहीं होगा और अपना अनिष्ट को हटाना वह मनुष्य का कर्त्तव्य भी है। मनुष्य इच्छाओं और कार्यों में सिद्धि होना न होना, मनोरथों की पूर्ति होना या न होना यह अपने वश की बात नहीं है क्योंकि विधाता ही फल प्रदाता है। ३८ ॥ प्रायः मनुष्य बड़े बड़े मनोरथों को करते हैं। उनके मनोरथ दैव से प्रतिबन्धित होते हैं फिर भी पुनः पुनः मनुष्य उद्यम करता है। जब अपने संकल्पों की सफलता होती है तब आनन्द की अनुभूति करता है और निष्फलता पाने पर शोकग्रस्त हो जाता है। फिर भी आप राजा हैं आपके आदेश का अवश्य पालन करूँगा ॥ ३९ ॥ श्रीशुकाचार्य जी ने कहा—राजन् परीक्षित् ? श्री अक्रूरजी इस प्रकार आदेश प्रदान कर भोजराज कंस ने मल्लों महावतों और मन्त्रियों को विदा किया और स्वयं अपने राजमहल में गया, पुनः श्री अक्रूर जी भी निज निकेतन की ओर चल पड़े ॥ ४० ॥

श्रीमद्भागवत दशम स्कन्ध निरोधलीला के अन्तर्गत राजसलीला प्रमाणप्रकरण का ऐश्वर्य निरूपक ३६ वाँ अध्याय समाप्त ॥ ३६ ॥

* * *

अथ सप्तत्रिंशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	वंश.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं श्लो.	अक्ष.
३४	२३	१०	१	२	१२६१	१२	४०	१३१३	४१	१

श्रीशुक[1] उवाच

केशी तु कंसप्रहितः खुरैर्महीं महाहयो [2]निर्जरयन् मनोजवः ।
सटावधूताभ्रविमानसङ्कुलं कुर्वन् नभो हेषितभीषिताखिलः ॥ १ ॥
[3]विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहाम्बुदोपमः[4] ।
दुराशयः कंसहितं चिकीर्षुर्व्रजं स नन्दस्य जगाम कम्पयन् ॥ २ ॥
तं त्रासयन्तं भगवान् स्वगोकुलं [5]तद्धेषितैर्वालविघूर्णिताम्बुदम् ।
आत्मानमाजौ मृगयन्तमग्रणीरुपाह्वयन्[6] स व्यनदन्मृगेन्द्रवत् ॥ ३ ॥
स तं [7]निशान्याभिमुखो मुखेन[8] खं पिबन्निवाभ्यद्रवदत्यमर्षणः ।
जघान पद्भ्यामरविन्दलोचनं [9]दुराशयश्चण्डजवो[10] दुरत्ययः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—कंसप्रेषितः, महाहयः, मनोजवः हेषितभीषिताखिलः, केशी, तु, महीम्, खुरैः, निर्जरयन्, नभः, सटावधूताभ्रविमानसंकुलम्, कुर्वन् (ययौ) ॥ १ ॥ सः, विशालनेत्रः, विकटास्यकोटरः, बृहद्गलः, नीलमहाम्बुदोपमः, दुराशयः, कंसहितम्, चिकीर्षुः, नन्दस्य, व्रजम्, जगाम ॥ २ ॥ भगवान्, तद्धेषितैः, स्वगोकुलम्, त्रासयन्तम्, बालविघूर्णिताम्बुदम्, आत्मानम्, आजौ मृगयन्तम्, तम्, अग्रणीः, स, आह्वयन् (तदा) सः, मृगेन्द्रवत्, व्यनदत् ॥ ३ ॥ सः, (केशी) तम्, (आह्वानम्) निशम्य, अभिमुखः (सन्) मुखेन, खम्, पिबन्, इव, अति, अमर्षणः, अभ्यद्रवत्, (पुनः) दुरत्ययः, चण्डजवः, दुराशयः, सः (केशी) अरविन्दलोचनम्, (श्रीकृष्णम्) पद्भ्याम्, जघान ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सप्तत्रिंशे हते केशिन्यच्युतो भाविकर्मभिः ॥ नारदेन स्तुतः क्रीडन्व्योमासुरमथावधीत् ॥ १ ॥
वृषवेषासुरं यद्वत्केशिनं हयवेषिणम् ॥ कंसप्राणसखं हत्वा कंसं व्यसुमिवाकरोत् ॥ २ ॥

केशीत्विति । प्रथमश्लोकेन य एवम्भूतः केशीत्यनूद्य तं भगवानुपाह्वयदिति द्वितीयेनान्वयः महाहयः सन्महीं निर्जरयन् श्लथयन्विदारयन्नित्यर्थः । सटाभिः केसरैरवधूतानीतस्ततः क्षिप्तान्यभ्राणि विमानानि च तैः संकीर्णं नभः कुर्वन् । हेषितैरश्वजातिशब्दैर्भीषितमखिलं विश्वं येन तम् ॥ १ ॥ तद्धेषितैस्तैरतिनिष्ठुरैर्हेषितैः वालैः पुच्छलोमभिर्विघूर्णिताः परिभ्रामिता अम्बुदा येन तम् । आजौ संग्रामार्थं । आत्मानं कृष्णम् । अग्रणीः पुरतो निर्गतः सन्नुपाह्वयत्स्वसमीपमाजुहाव । स च केशी तन्निशम्य मृगेंद्रवद्व्यनदत्सिंहनादमकरोदित्यर्थः ॥ २ ॥ ततः केशी तं कृष्णं निशाम्य दृष्ट्वा मुखेन खं पिबन्निव मुखं विवृत्याभिमुखः सन्नभिजगाम । किं च । अत्यमर्षणाऽतिकुपितोऽत्यन्तमसहमानो वा प्रत्यक्पद्भ्यां जघान । दुरासदोऽन्यैरभिभवितुमशक्यः । दुरत्यय उद्यतः सन् दुरतिक्रमः । अत्र हेतुः । चंडजवश्चंडस्तीव्रो जवो वेगो धावनं यस्य ॥ ३ ॥ तद्धननं वञ्चयित्वा तं च हननाय प्रसारितयोः प्रत्यक्पादयोर्हस्ताभ्यां गृहीत्वा । परिविध्य भ्रामयित्वा । व्यवस्थितस्तथैव स्थितो बभूव ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भाविकर्मभिरग्रे करिष्यमाणकर्मभिः । अथ केशिवधानंतरम् (१) । यद्वद्यथा वृषासुरं तद्वद्धयवेषिणामित्यन्वयः । व्यसुमिव मृतकसमम् (२) । अनूद्य वर्णयित्वा । इत्यर्थ इति–यद्यपि निरुपपदो जॄधातुः समृद्ध्यर्थेऽस्ति 'निर्जरा देवाः' इत्यादिव-

---

[1] श्रीबादरायणिरुवाच–प्रा. पा. । [2] निर्ज–श्रीधर. वंशी. जीव. विश्व. शुकाः ; निर्द–विज. ; निर्झ–वीर. । [3] "विशालनेत्रः" इत्यधिकः–श्रीधर. वीर. विज. । [4] महोद्यनोपमः–वीर. । [5] स्वह्लेषितैः–विज. । [6] ह्वयत्–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुकादयः । [7] निशम्य–म. पु. मूले । [8] नभस्तलं–विज. । [9] दुरासदः–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुकादयः । [10] रवो–वीर. ।

तथाप्यनेकार्थत्वाद्विदारणेऽपीत्याशयः। 'हेषा ह्रेषाऽश्वशब्दे द्वे' इति नामरत्नाकरे केशिसंज्ञान्वर्थतामाह-सटेत्यादि ॥ १ ॥ तम् केशिनम्। अग्रणीः कृष्णो ज्ञेयः ॥ स्वगोकुलं निजव्रजम्। तच्च श्रीवैशंपायनेनोक्तम्-"नृशब्दानुसरः क्रुद्धः स कदाचिद्दिनागमे। जगाम घोषसंवासं नोदितः कालधर्मणा ॥ तं दृष्ट्वा दुद्रुवुर्गोपाः स्त्रियश्च शिशुभिः सह।" इत्यादि। किंभूतं स्वगोकुलम्-तत् अनिर्वचनीयप्रेमास्पदमित्यर्थः। यद्वा-तस्य केशिन इव हेषितैरिति समस्तमेव। तत्राग्रणीरिति भीतान् गोष्ठजनान् पृष्ठीकृत्य यमुनामार्गे निर्गतः सन्स्वसमीपं प्रत्याजुहावेत्यर्थः। श्रीगोविन्दस्थानमुत्तरेण यमुनाघट्टविशेषस्य केशिघट्टतीर्थत्वेन प्रसिद्धः। तथा च वाराहे-"गंगाशतगुणं पुण्या यत्र केशी निपातितः" इति। अत्र विवरणं श्रीविष्णुपुराणे-"त्राहि त्राहीति गोविंदस्तेषां श्रुत्वा तदा वचः। सतोयजलदध्वानगंभीरमिदमुक्तवान् ॥ अलं त्रासेन गोपालाः केशिनः किं भयातुरैः। भवद्भिर्गोपजातीयैर्वीर्यं विलोप्यते किमनेनाल्पसारेण हेषिताटोपकारिणा। दैतेयबलबाह्येन बलिना दुष्टवाजिना ॥" इति। श्रीहरिवंशे च-"तमापतन्तं संप्रेक्ष्य केशिनं हयदानवम्। प्रत्युज्जगाम गोविंदस्तोयदः शशिनं यथा ॥ केशिनस्तु तमभ्यासे दृष्ट्वा कृष्णमवस्थितम्। मनुष्यबुद्ध्यो गोपाः कृष्णमूचुर्हितैषिणः ॥ कृष्ण तात न खल्वेष सहसा ते हयाधमः। उपसर्प्यो भवान्बालः पापश्चैष दुरासदः ॥ एष कंसस्य सहजः प्राणस्तात बहिश्चरः। उत्तमश्च हयेंद्राणां दानवोऽप्रतिमो युधि। त्रासनः सर्वदेवानां तुरंगाणां महाबलः। अवध्यः सर्वभूतानां प्रथमः पापकर्मणाम् ॥" इति। तत्र शशिनमित्युक्तेः केशिनः शुक्लपक्ष एव वधो ज्ञेयः ॥ २ ॥ ततो नादानन्तरम्। न केवलमभ्याजगामेवेत्याह-किञ्चेति। निर्बलस्यातिकोपेन किमित्याह। अत्यन्तेपि। प्रत्यक्पद्भ्यां पश्चिमपद्भ्याम्। अत्र दुरत्ययत्वे ॥ अरविंदलोचनमिति। प्रफुल्लपद्माभस्मेरनेत्रोन्मीलनेन वीक्षणादिति सावज्ञत्वमुक्तम्। यद्वा-श्रीबादरायणेस्तन्निंदोक्तिरियम्। तादृशसुन्दरसुकुमारांगे दृष्टेऽपि तद्दुष्टभावानपगमात् ॥ ३ ॥ तम् असुरम्। सावज्ञं सावमानं क्रियाविशेषणम् वा। तथैव यथापूर्वम् ॥ अधोक्षज इंद्रियज्ञानाविषयो यः स कथं तत्पादघातविषयः स्यादित्यहो तस्य मूढतेति भावः। रुषा स्वगोकुलत्रासजनक्रुधा। यद्वा-अरुषा लीलयैव ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

केशीतु नन्दव्रजं जगामेति शेषः। संज्ञाया अन्वर्थतां दर्शयति। सटेति ॥ १ ॥ स्वगोकुलं निजव्रजं त्रासयन्तम्। तच्च श्रीवैशम्पायनेनोक्तं "नृशब्दानुसरः क्रुद्धः स कदाचिद्दिनागमे। जगाम घोषसम्वासं नोदितः कालधर्मणा। तं दृष्ट्वा दुद्रुवुर्गोपाः स्त्रियश्च शिशुभिः सहे"त्यादि। कथम्भूतं स्वगोकुलं तत् तादृशप्रेमास्पदमित्यर्थः यद्वा। तस्य केशिन इव हेषितैरिति समस्तमेव। तैस्तमुपह्वयदित्यन्वयः। तत्राग्रणीरिति भीतान् गोष्ठजनान् पृष्ठीकृत्य यमुनामार्गे निर्गतः सन् स्वसमीपं प्रत्याजुहावेत्यर्थः। श्रीगोविन्दस्थानमुत्तरेण यमुनाघट्टविशेषस्य केशिघट्टतीर्थत्वेन प्रसिद्धेः तथाच वाराहे यमुनामाहात्म्ये। गङ्गाशतगुणं पुण्या यत्र केशी निपातित इति। अत्र विवरणं श्रीविष्णुपुराणे। त्राहि त्राहीति गोविन्दस्तेषां श्रुत्वा तदा वचः। सतोयजलदध्वानगभीरमिदमुक्तवान्। अलं त्रासेन गोपालाः! केशिनः किं भयातुरैः। भवद्भिर्गोपजातीयैर्वीरवीर्यं विलोप्यते किमनेनाल्पसारेण हेषिताटोपकारिणा। दैतेयबलवाह्येन बलिना दुष्टवाजिनेति। श्रीहरिवंशे च।—

तमापतन्तं संप्रेक्ष्य केशिनं हयदानवम्। प्रत्युज्जगाम गोविन्दस्तोयदः शशिनं यथा ॥
केशिनस्तु तमभ्यासे दृष्टा कृष्णमवस्थितम्। मनुष्यबुद्धयो गोपाः कृष्णमूचुर्हितैषिणः ॥
कृष्ण तात न खल्वेष सहसा ते हयाधमः। उपसर्प्यो भवान बालः पापश्चैष दुरासदः ॥
एष कंसस्य सहजः प्राणस्तात बहिश्चरः। उत्तमश्च हयेन्द्राणां दानवा ऽप्रतिमो युधि ॥
त्रासनः सर्वदेवानां तुरङ्गाणां महाबलः। अव यः सर्वभूतानां प्रथमः पापकर्मणामिति ॥

तत्र शशिनमित्युक्तेः केशिनः शुक्ल एव वर्णो ज्ञेयः ॥ २ ॥ जघान हन्तुं प्रवृत्तः अरविन्दलोचनामिति प्रफुल्लपद्माभस्मेरनेत्रोन्मीलनेन वीक्षणादिति सावज्ञत्वमुक्तम्। यद्वा। श्रीबादरायणेस्तन्निन्दोक्तिरियं तादृशसुन्दरसुकुमाराङ्गे दृष्टेऽपि तद्दुष्टभावानपगमात्। निशम्य निशाम्य दृष्ट्वेत्यर्थः। दुरासदो दुर्ग्रहः। यतश्चण्डजवः अत एव दुरत्ययः दुरभिभव इति ॥ ३ ॥ तं तादृशमपि। अधोक्षज इन्द्रियज्ञानविषयो यः स कथं तत्पादघातविषयः स्यादित्यहो तस्य मूढतेति भावः। अत एव वञ्चयित्वा। रुषा स्वगोकुलत्रासनतः यद्वा। अकारप्रश्लेषेण अरुषा लीलयैवेत्यर्थः। उत्सृज्य प्रक्षिप्य ततश्च केशी मुमुहे इति ज्ञेयम् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तु शब्दोऽरिष्टतोऽस्य विशेषं सूचयति। तमेवं दर्शयति—कंसेत्यादिविशेषणैः। स्वत एव महादुष्टः, पुनश्च दुष्टतार्थं कंसेन तत्र प्रहित इत्यर्थः। निःशेषेण जरयन् चूर्णयन्, मनसो जव इव जवो यस्य सः। केशीति संज्ञाया अन्वर्थतां दर्शयति—सटेति ॥ १ ॥ स्वगोकुलं निजव्रजम्, यद्वा, स्वस्य गवां कुलं तत्सहचारित्वेन गोपा अपि ग्राह्याः। एवं श्रीवृन्दावनान्तर्गोचारणसमये प्रातः केशी समागत इति ज्ञेयम्। अतस्तत्र यमुनातीरे श्रीगोविन्ददेवादुत्तरतस्तद्वधः संगत एव, अत एव वक्ष्यतेऽपि (२५ श. श्लो.) 'भगवानपि गोविन्दः' इत्यादि। यच्च श्रीवैशम्पायनेनोक्तम् (हरिवंशे विष्णु प० २४।१५) 'नृशब्दानुसरः क्रुद्धः स

कदाचिद्दिनागमे । जगाम घोषसंवासं नोदितः कालधर्म्मणा । तं दृष्ट्वा दुद्रुवुर्गोपाः स्त्रियश्च शिशुभिः सह ।' (इत्यादि; तच्च कल्पभेदकल्पनया व्यवस्थापनीयम् । यद्वा, तन्मते गमनं तस्य तत्रैव मारणं चाग्रेऽभिगतेन भगवता तत्र यमुनातीर एवेति ज्ञेयम् , गंगाशतगुणाः प्रोक्ता यत्र केशी निपातितः' इति श्रीवाराहोक्तात्तत्रैव तद्वधप्रसिद्धेः । स्व-शब्देन गोकुलस्यावश्यपरिपाल्यत्वं सूचितम् , यतो भगवान् तत्र निजाशेषैश्वर्य्यप्रकटकः । यद्वा, स्वज्ञातयो गोपा गोकुलानि च, द्वन्द्वैक्यम् , तैर्हेषितैरपि त्रासयन्तम् । यद्वा, तस्यैव हेषितैरुपाह्वयत् , आत्मानमाजौ मृगयन्तमिति तुच्छबुद्ध्या तेनान्येनोपद्रुता इति ज्ञेयम् , अग्रणीर्गोपानां भयमत्यन्तं दृष्ट्वा तानाश्वासितुम् , व्यादायेत्यस्य पृष्ठतः कृत्वा पुरतो बहिर्निर्गतः सन् । तथा च श्रीविष्णुपुराणे (५।१६।४–५)—

'त्राहि त्राहीति गोविन्दस्तेषां श्रुत्वा तदा वचः । सतोयजलदध्वानगम्भीरमिदमुक्तवान् ॥
अलं त्रासेन गोपालाः केशिनः किं भयातुरैः । भवद्भिर्गोपजातीयैर्वीरवीर्य्यं विलोप्यते ॥
किमनेनाल्पसारेण हेषिताटोपकारिणा । दैतेयबलवाह्येन वल्गता दुष्टवाजिना ॥' इति ।

श्रीहरिवंशे च (विष्णु० प० २४।१९–२३)—

'तमापतन्तं सम्प्रेक्ष्य केशिनं हयदानवम् । प्रत्युज्जगाम गोविन्दस्तोयदः शशिनं यथा ॥
केशिनस्तु तमभ्यासे दृष्ट्वा कृष्णमवस्थितम् । मनुष्यबुद्धयो गोपाः कृष्णमूचुर्हितैषिणः ॥
कृष्ण तात न खल्वेष सहसा ते हयाधमः । उपसर्प्यो भवान् बालः पापश्चैष दुरासदः ॥
एष कंसस्य सहजः प्राणस्यात् बहिश्चरः । उत्तमश्च हयेन्द्राणां दानवोऽप्रतिमो युधि ॥
त्रासनः सर्व्वदेवानां तुरगाणां महाबलः । अवध्यसर्व्वभूतानां प्रथमः पापकर्म्मणाम् ॥' इति ।

तत्र शशिनमित्युक्तेः केशिनः शुभ्रवर्णो ज्ञेयः, विशेषेण नादं चक्रे । कीदृशम् ? तमाह—मृगेन्द्रेति । अन्यत्तैर्व्याख्यातमेव यद्वा, स महाबलो भगवान् व्यनदच्च । अन्यत् समानम् ॥ जघान हन्तुं प्रवृत्तः, अरविन्दलोचनमिति प्रफुल्लपद्मामश्रीनेत्रोन्मीलनेन निरीक्षणादिति सावधानत्वं चोक्तम् । यद्वा, श्रीवादरायणेः शोकोक्तिरियम् , तादृशसुन्दरसुकुमारांगे दृष्टेऽपि पद्भ्यां हननात् अन्यत्तैर्व्याख्यातम् । तत्र दृष्ट्वेति व्याख्यानान्निशाम्येति पाठो दृष्टव्यः । मुखेन संपिबन्निवेत्यस्यैव व्याख्या, मुखं विवृत्येति–व्यादायेत्यधिकं लेखभ्रमात् । निशम्येति पाठनिश्चये तु, तत् आह्वानम् , तं नादं वा श्रुत्वेत्यर्थः । दुरासदो दुर्ग्रहः, यतश्चण्डजवः, अत एव दुरत्ययो दुरभिभव इति ।। ३ ॥ तं तादृशमपि 'अधोक्षज इति इन्द्रियज्ञानाविषयो यः स कथं तत्पादघातविषयः स्यादिति भावः । अत एव वञ्चयित्वा रुषा स्वगोकुलत्रासनतः यद्वा, अकारप्रश्लेषेण—अरुषा लीलयैवेत्यर्थः । प्रगृह्य प्रग्रहरूपेण गृहीत्वा, इति दुर्म्मोचकत्वमुक्तम् । उत्सृज्य प्रक्षिप्य पश्चाद्भागग्रहणेनविज्ञयोत्सर्ज्जने दृष्टान्त —यथेति, ततश्च केशी मुमोहेति ज्ञेयम् ।।४।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

प्रतियाते तु देवर्षौ कंस आहूय कोशिनम् प्रेषयामासेत्युक्तम् । प्रेषितः स किमकरोदित्यत्राह । केशीत्वित्यादि नवभिः । केशी नामासुरः कंसेन प्रेषितः महाश्वः सन् मनस इव जवो वेगो यस्य सः खुरैर्महीं पृथ्वीं निर्जरयन् विदारयन् सटाभिः केसरैवधूतानीतस्ततः क्षिप्तान्यभ्राणि विमानानि च तैः संकीर्णं नभः कुर्वन् हेषितैरश्वजातिशब्दैर्भीषितमखिलं विश्वं येन विशाले नेत्रे यस्य विकटं विशालमास्यविलं यस्य वृहन् पीनो दीर्घश्च गलो यस्य नीलो महांश्च घनो मेघ उपमा यस्य सः दुराशयः दुष्टः आशयः कृष्णजिघांसात्मकः अभिप्रायो यस्य सः प्रसिद्धः कंसस्य हितं कर्तुमिच्छुः नन्दस्य व्रजं कम्पयन् जगाम ॥ १–० ॥ हेषितैस्ततस्वस्य गोकुलं त्रासयन्तं भीषयन्तं बालैः पुच्छरोमभिर्विघूर्णिताः परिभ्रामिता अम्वुदा येन तमाजौ युद्धे निमित्ते आत्मानं कृष्णं मृगयन्तमन्वेषयन्तं केशिनमग्रणीः पुरतो निर्गतः सन् भगवानाह्वयदाजुहाव ॥ २ ॥ स केशी रुषा मृगेन्द्र इव नादमकरोत्ततः स केशी तमाह्वयन्तं कृष्णं निशम्यावलोक्याभिमुखः सन्मुखेन खमाकाशं पिबन्निवात्ममर्षणः अत्यन्तक्रोधयुक्तः अभ्यद्रवदभ्यपतत् किञ्च प्रत्यक्पद्भ्यामरविन्दलोचनं कृष्णं जघान ताडितवान् कथम्भूतः दुरासदः अन्यैरभिभवितुमशक्यः चण्डः दुरतिक्रमो जवोवेगो यस्य सः ॥ ३ ॥ तद्धननं वञ्चयित्वा तं केशिनं हननाय प्रसारितपादयोः हस्ताभ्यां गृहीत्वा परिविध्य भ्रामयित्वा धनुःशतान्तरे धनुःशतपरिमितदूरे सावज्ञं सावहेलनं यथा तथोत्सृज्य पातयित्वा व्यस्थितः यथा तार्क्ष्यसुतो गरुत्मानुरगमुत्सृज्य व्यवतिष्ठते तद्वत् ।।४।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

श्रोतॄणां मन्तॄणां प्रवक्तॄणां ध्यातॄणां च बुद्ध्यारोहार्थं सङ्कल्प्य भगवद्विक्रमं वर्त्तमानं वर्तिष्यमाणं च कथयत्यस्मिन्नध्याये तत्रादौ केशिदैत्यवधलक्षणं भगवद्विक्रमं वक्तुमाह । केशीति । निर्दरयन् भिन्दन् मनोजववत् जवो यस्य स तथा अभ्राणि च विमानानि च अभ्रविमानानि सटाभिः स्कन्धदीर्घरोमभिः अवधूतानि अभ्रविमानानि तैः संकुलं ह्रेषितेनाश्वजातिशब्दितेन भीषितमखिलं यस्य स तथा ह्रेषा ह्रेषा च वाजिनामिति हलायुधः ॥ १ ॥ विकटं विस्तृतम् आस्यकोटरं मुखगतं यस्य स तथा दुराशयः दुष्टाभिप्रायः कृष्णहननलक्षणो यस्य स तथा ॥ ० ॥ वालेन पुच्छेन विघूर्णितो विभ्रान्तोऽम्बुदो यस्य स तथा तम्

आजौ क्षेपार्थमात्मानं स्वं मृगयन्तं विचिन्वन्तम् अजगतिक्षेपणयोरिति धातुः । युद्धे वा इयमपि तादर्थ्ये सप्तमी अग्रणीस्तस्याभिमुखे स्थितः ॥ २ ॥ तं नादम् ॥ ३ ॥ तद्धननं सावज्ञम् अवमानसहितमिति क्रियाविशेषणम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सप्तत्रिंशे केशिवधो भातिलीलोक्तिभिः स्तुतिः । नारदेन हरेश्चौर्य्यक्रीडाव्योमबधोऽप्यभूत् ॥ केशी तु यः कंसप्रहितस्तं भगवानुपाह्वयदिति द्वितीयेनान्वयः । यद्वा नन्दव्रजं जगामेति शेषो देयः निर्जरयन् खुराघातैर्महीं निःशेषेण जीर्णां कुर्वन् सटाभिः केसरैरवधूतानि कम्पितानि अभ्राणि विमानानि च तैः संकुलं व्याप्तं नभः कुर्वन् हेषितमश्वजातिशब्दः ॥ १ ॥ वालाः पुच्छलोमानि स केशी च व्यनदत् ॥ २ ॥ स केशी तं श्रीकृष्णं निशाम्य दृष्ट्वा दुरासदः अन्यैर्निकटमपि गन्तुमशक्यः दुरत्ययः कुतः पुनरतिक्रमितुं शक्य इत्यर्थः ॥ ३ ॥ तत् हननं वञ्चयित्वा तं दोर्भ्यां स्वहस्ताभ्यां हन्तुं प्रसारितयोः पदयोः प्रगृह्य परिविध्य भ्रामयित्वा विशेषेण स्वस्थान एवावस्थितः ॥ ४ ॥

गूढार्थदीपिनी

सप्तत्रिंशे हत केशी भाविलीलाभिकाङ्क्षिणा । नारदेन स्तुतो भावादहन् व्योमासुरं हरिः ॥

कंसप्रेषितः केशी तु महीं निर्जरयन् विदारयन् व्रजं जगाम तं भगवान् अग्रणीः सन् उपाह्वयत् स च मृगेन्दुवत् व्यनदत् इति त्रयाणामेकान्वयः । सहामि स्कन्धकेशैः अवधूतानि इतस्ततः क्षिप्तानि अभ्रादीनि तैः संकुलम् नभः कुर्वन् हेषितै तज्जातिशब्दैः भीषितम् अखिलं विश्वं येन । तद्धे हितैः त्रासयन्तम् । विकटम् आस्यकोटरं मुखच्छिद्रं यस्य । बालैः पुच्छलोमभिः परिभ्रनिताः अम्बुदा येन । आजौ संग्रामार्थम् आत्मानं श्रीकृष्णम् अन्वेषयन्तम् ॥ १–३ ॥ स केशी तं श्रीकृष्णं निशम्य दृष्ट्वा पद्भ्यां जघानेत्यन्वयः अत्यन्तमसहमानः । अभिमुखः सम्मुखः सन् अभ्यद्रवत् अधावत ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सप्तत्रिंशे केशिवधो देवर्षिकृतभगवत्स्तवो व्योमासुरवधश्चानुवर्ण्यते । केशीति । केशीनामासुरः महाहयाकृतिः कंसप्रहित-कंसेन प्रेषितः महीं निर्जरयन् श्लथयन् विदारयन्नित्यर्थः । सटाभिः केसरैः अवधूतानीतस्ततः क्षिप्तान्यभ्राणि विमानानि च तैः संकुलं संकीर्णं नभः कुर्वन् हेषितैरश्वजातिशब्दैर्भीषितमखिलं विश्वं येन सः ॥ १ ॥ कराले क्रूरे नेत्रे यस्य सः विकटं भयानकमास्यकोटरं मुखविवरं यस्य सः वृहन् विपुलो गलो यस्य सः नीलमहाम्बुद उपमा यस्य सः दुष्टः आशयो यस्य सः कंसस्य हितं कर्तुमिच्छुः सः प्रसिद्धः केशी नन्दस्य व्रजं कम्पयन् जगाम ॥ ० ॥ तद्धेषितैः तैरतिनिष्ठुरैः हेषितैः स्वगोकुलं त्रासयन्तं वालैः पुच्छलोमभिर्विघूर्णिताः परिभ्रामिताः अम्वुदा येन तम् आजौ युद्धे युद्धार्थम् आत्मानं मृगयन्तमन्वेषयन्तं भगवान् अग्रणीः पुरोगतः सन् उपाह्वयत् आजुहाव स केशी अपि मृगेन्द्रवत् व्यनदत् ननाद ॥ २ ॥ स च केशी तं श्रीकृष्णं निशम्य अवलोक्य मुखेन खमाकाशं पिबन्निव अभिमुखः सन् अभ्यद्रवत् अभिजगाम । ततश्च अत्यमर्षणः अत्यन्तक्रोधयुक्तः अत्यन्तमसहमानो वा प्रत्यक् पद्भ्यामरविन्दलोचनं जघान ताडितवान् कीदृशः दुरासदः अन्यैरासादितुमभिभवितुमशक्यः दुरत्ययो दुर्घटमरणः चण्डजवः प्रचण्डवेगः ॥ ३ ॥ अधोक्षजः अक्षिनिरपेक्षज्ञानवान् सर्वज्ञः तद्धननं बञ्चयित्वा हननाय प्रसारितयोः पादयोस्तं केशिनं हस्ताभ्यां परिगृह्य गृहीत्वा परिविध्य भ्रामयित्वा धनुःशतान्तरे सावज्ञं यथा तथोत्सृज्य पातयित्वा व्यवस्थितस्तत्रैव स्थितो बभूव यथा तार्क्ष्यसुतो गरुडः उरगमुत्सृज्य व्यवतिष्ठते तथा ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ नारदः स्वस्य वर्तमानवर्तिष्यमाणचरितमतिरस्तीति सूचयितुं तथाऽस्तौषीदिति प्रमेयं निरूप्यते । तत्रादौ कंसशंसितः केशी किं चकारेत्यत ईरयति ॥ केशी त्विति । कंसेन प्रहित आदिष्टो महाहयस्तदाकारः खुरैर्महीं विदारयन्भिन्दन्मनोजव इवेत्यूहनाज्ज्ञातः सटाभिः स्कन्दगतरोमभिरवधूतान्यभ्राणि मेघा विमानानि च तैः सङ्कुलं नभो गगनं कुर्वन् ह्रेषितास्वशब्दाद्भीषितमखिलं येन सः ॥ १ ॥ विशालो नेत्रौ यस्य स विकटं विशालं विकरालं वाऽऽस्यं कोटरं गतं यस्य सः । विकटः सुन्दरे प्रोक्तो विशालविकरालयोरिति विश्वः । बृहद्गलः स्थूलगलप्रदेशो नीलमहाम्बुदेनोपमा सादृश्यं यस्य स दुर्दुष्ट आशयोऽभिप्रायो यस्य स नन्दस्य नन्दगोपस्य व्रजं कम्पयन्नन्दस्य मुदां व्रजं कम्पयंश्चालयन्नित्यप्यर्थो जगाम ॥ २ ॥ स्वह्रेषितैर्गोकुलं त्रासयन्तं बालेन पुच्छेन विघूर्णिता अम्बुदा येन तमात्मानं स्वमाजौ युद्धविषये मृगयन्तमग्रणीस्तत्पुरःसर आह्वयन्स मृगेन्द्रवद्व्यनदन्ननाद ॥ ३ ॥ स केशी तं केशवनादं यो दुरत्ययस्तमरविन्दलोचनं पद्भ्यां जघानेत्यप्यन्वयः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

चतुस्त्रिंशे प्रेषितस्य तामसस्य निरूप्यते । कार्यं वाक्यानि च ऋषेर्लीलां काङ्क्षद्धरेः प्रियाम् ॥
हेतुकार्यकलान्यत्र पूर्ववद्बोधितानि हि । केश्यागमनकार्यं तु ऋषिवाक्यान्नचान्यथा ॥

वधेन जातेनागच्छेदनर्थं कृतवानिति । वधो निदर्शनं तस्मादतो वाक्यानि बोधने ॥
बोधितश्चेद्धरिर्लीलां न कुर्यात् स्वेच्छया मुदा । तदा प्रमेयरीतिर्हि दुर्वलैव भवेत्सदा ॥
अतः फलार्थं लीला हि पूर्वजाता निरूप्यते ।
सिंहावलोकनं चापि करिष्यति हरिः स्वयम् । अतो न गोकुले चिन्ता कापीत्यपि निरूप्यते ॥
केशी हतो गुणैः कृत्वा तथा व्योम ऋषिः पुनः । कलामात्रमुवाचेति नव षोडश वै नव ॥

पूर्वाध्याये केशी प्रेषित इत्युक्तं तस्यागतस्य कृत्यमत्र नवभिरुच्यते पूर्वदैत्यवत् केश्यागमनं न भवतीति वक्तुं भिन्नं प्रकारमाह । केशीत्विति । अन्ये पूर्वं साधारण्येन नियुक्ताः केशी तु कंसेन प्रेषितः विशेषाकारेण तदा खुरैः महीं विदारयन् व्योमवदेवागतः निर्दरयन् विदारयन् । ननु केशिनो राक्षसस्य कथं खुरा इत्याशङ्क्याह । महाहय इति । महानयमश्वः । ननु संध्यायामाज्ञप्तः कथं शीघ्रमागत इति चेत्तत्राह । मनोजव इति । पूर्ववदस्यापि सामर्थ्यमाह । सटाभिरवधूताः अभ्रा विमानानि च तैः संकुलं नभः कुर्वन् इति । तस्य कायिको व्यापार उक्तः वाचनिकमाह । हेषितभीषिताखिल इति । हेषितो ऽश्वशब्दः तेनैव भीषितमखिलं येन साधारणप्रयोगः दैत्यानामपि भयजनकोऽयमिति ज्ञापनार्थः ॥ १ ॥ तस्य क्रियाव्यतिरेकेणापि रूपं दृष्ट्वैव बिभ्यतीति ज्ञापयितुं रूपं वर्णयति । विशालनेत्र इति विशाले नेत्रे यस्य इय विशालता प्रकरणवशात् भयानका ज्ञातव्या विकटमास्यकोटरं यस्य वृहन् गलो यस्य नीलो महान् घनः तस्योपमा यस्य नीलघनापेक्षयाऽधिक इति उपमानत्वनिरूपणार्थमुपमापदं रूपमेकेन गुणत्रयं मुखे वर्त्तत इति तत् ज्ञापनार्थं नेत्रे आस्यं कण्ठश्च वर्णितः अन्तर्दोषानाह । दूराशय इति । स्वभावतोऽप्यन्तःकरणं दुष्टमिदानीं तु सुतरामित्याह । कंसहितं चिकीर्षुरिति । ततो नन्दस्य व्रजं जगाम उपद्रवार्थमेव ॥ ० ॥ स तु शीघ्रमेव कार्यं करिष्यतीति तस्मिन्नागत एव रूपं दृष्ट्वैव त्रासः मारणपरिज्ञानयोः सामर्थ्यज्ञापनार्थं भगवानिति अक्लिष्टकार्योऽपि तथा कृतवानित्यत्र हेतुमाह । स्वगोकुलमिति । स्वस्य गोकुलमिति स्वा गावश्च तेषां कुलमित्यपि तैः प्रसिद्धैर्हेषितैः यानि देवानामपि भयजनकानि शीघ्राकारणे हेतुमाह । वालविघूर्णिताम्बुदमिति पुच्छभ्रामणेन विशेषेण घूर्णिता मूर्च्छिता अम्वुदा यस्य पुच्छभ्रामणमात्रेण यदैवं महाननर्थः तदा किंचिद्विलम्बेऽपि महानन्यायो भवेदिति । नन्वकस्मादागत्य कथं न गोकुलं मारितवान् तत्राह । आत्मानमाजौ मृगयन्तमिति न स गोकुलमारणार्थमागतः किन्तु भगवता सह युद्धं कर्तुमाजौ सङ्ग्रामे आत्मानं भगवन्तं मृगयन्तमन्वेषयन्तं कास्ति कृष्ण इति । नन्वेवं कथं धाष्टर्यात् कंसो यस्माद्बिभेति तत्राह । सः प्रसिद्धः केशी अत एव मृगेन्द्रवत् सिंहवत् स ह्यन्यान् गजानिव मन्यते बलभद्रं कथं न प्रेषितवानित्यत्र हेतुरग्रणीरिति भगवानेवाग्रणीः भगवान् अग्र एव उपद्रवान् दूरीकरोतीति ॥ २ ॥ भगवदाह्वानं श्रुत्वा यत्कृतवांस्तदाह । स तमिति । उपाह्वयन्वा स भगवानेव स केशी तद्भगवद्वाक्यं निशम्य मुखेनोच्चैर्व्यनदया अथवा पूर्वं भगवन्तं दृष्ट्वैव गर्ज्जनं कृतवान् पश्चात् वाक्यं श्रुत्वा यत् यत्करिष्यति तदग्रे निरूप्यते स केशी तद्भगवद्वाक्यं निशम्य मुखेनाकाशं पिबन्निव व्यात्ताननः अभिमुखः अभ्यद्रवत् ग्रासार्थीव शीघ्रमागमने आकाशो निविशतीव दृष्ट इति पिबन्निवेत्युक्तं यत्राकाशमेव ग्रसति तत्र तन्मध्यपातिनः सुखग्रासा इति बहिश्चेष्टा निरूपिता अत्यमर्षण इत्यान्तरी तदा निकटे समागत्य परावृत्य पद्भ्याञ्जघान धेनुकवत् । ननु सम्मुखमागत्य मुखेनैव मारणसम्भवेऽपि किमिति परावृत्त इति चेत्तत्राह । अरविन्दलोचनमिति । कमलनयनो भगवानिति भगवतः परमसौन्दर्यं दृष्ट्वा साक्षादतिक्रमासमर्थः परावृत्य अपश्यन्नतिक्रमं कृतवानित्यर्थः । ननु पद्भ्यामपि भगवद्रूपं स्मृत्वा कथमतिक्रमः भवतीत्याशङ्क्याह । दुराशय इति । दुष्टान्तःकरणत्वात् तथा कृतवान् दुरासद इति पाठे कथं रामादिभिः अतिक्रमो न निवारित इत्याशङ्क्याह । दुरासद इति । दुःखेनासादो यस्येति न कोऽपि तन्निकटे गन्तुं शक्नोतीत्यर्थः । तत्र हेतुमाह । चण्ड जव इति । अतिशीघ्रमागच्छति तस्य प्रतीकारो दूरे तस्मिन्नागते पलायनमप्यशक्यमित्याह । दुरत्यय इति । दुःखेनात्ययो यस्येति ॥३॥ भगवानतिचतुरः स सुरासुरैः शस्त्रैश्चावध्य इति यस्य प्रकारान्तरेण समाधानं कृतवानित्याह । तद्वञ्चयित्वेति । तत्पादप्रहरणं तिर्यग्भूत्वा वञ्चयित्वा मोघत्वं सम्पाद्य ततः दोर्भ्यां तस्य पादद्वयं धृत्वा परिविध्य भ्रामयित्वा उत्तोल्य धनुःशतान्तरे सावज्ञमुत्सृज्य व्यवस्थित इति सम्बन्धः । ननु शीघ्रमागतो मारयितुं पादप्रसारणं कृतवान् यथा न प्रतिहतो भवति साधनवेगः तत्कथं प्रतिहतो जात इत्याशङ्कायामाह । अधोक्षज इति । इन्द्रियजन्यं तस्य ज्ञानं क्रिया वा तं न विषयीकरोति अतो युक्त एव तस्य पादासम्बन्ध इति वञ्चनमपि भगवतो लौकिकसामर्थ्याद्युक्तमिति न किञ्चिदनुपपन्नं संमुखमागतः किमिति परावृत्त इति रोषेण दोर्भ्यां गृहीतः कदाचित्तस्य हृदये भीतः सन् वञ्चनं कृतवानिति शङ्का स्यात् ततो भगवान् निःशङ्कमाप्तमिव दोर्भ्यां परिगृहीतवान् तत उत्तोलनञ्च कृतवान् यौ पादौ भगवते चिक्षेप तत्रैव स्थाने स गृहीत इति दत्तमेव गृह्णातीत्यपि सूचितम् उत्तोलनादिकं सर्वं यथा पुनर्नायाति तथा ज्ञापनार्थं महान् देवलब्धवर इति तस्य वेगनाशार्थं सावज्ञमवज्ञापूर्वकमुत्सर्गः शतशब्दोऽपरिमितवाची धनुःपदं वीरत्वज्ञापनार्थं ननु देहेन महान् सः बालकश्च भगवान् अलौकिकश्च सामर्थ्यं न प्रकटितवान् तत्कथं तस्योत्तोलनादिकमित्याशङ्क्य दृष्टान्तमाह । यथोरगमिति । गरुडो यथा महान्तमप्युरगं भक्ष्यत्वात् क्लृप्तत्वात् भक्ष्यमाणः बले विद्यमाने पराक्रमं करिष्यतीति बलक्षयार्थं तथा क्रियते तथा भगवानपि असुरो निवार्य एवेति बलक्षयार्थं तथाकरणम् एवं कृत्वा न महत्कर्म कृतमिति मेने किन्तु पूर्ववदेव विशेषेणैव लीलयैव स्थितः ॥ ४ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः। अक्रूरप्रयाणव्यवधानसूचकः तु शब्दः तेन तन्मध्यवर्त्तिवृत्तमाह कंसेन प्रहितः प्रेषितः केशी महाहयोऽश्वरूपी खुरैर्महीं निर्जरयन् उल्लिखन् मनोवद्वेगो यस्य सः सटाभिः केसरैरवधूतानि इतस्ततः क्षिप्तानि अभ्राणि विमानानि तैः संकुलं व्याप्तं नभः स्वं कुर्वन् हेषितैरश्वजातिशब्दैर्भीषितं कंपितमखिलं सर्वं जगत् येन सः ॥ १ ॥ तैर्हेषितैः शब्दैः स्वगोकुलं त्रासयन्तं बालैः त्रासयन्तं बालैः पुच्छगतैर्विघूर्णिताः संभ्रामिता अंबुदा मेघा येन तम् आजौ युद्धनिनिमित्तमात्मानं श्रीकृष्णं मृगयन्तम् अग्रणीः गोपाग्रवर्त्ती उपाह्वयन मृगेन्द्रवत् सिंहवत्स केशी जगर्ज ॥ २ ॥ तं कृष्णं निशाम्य दृष्ट्वाऽभिमुखः संमुखः स केशी मुखेन खमाकाशं पिबन्निवात्यमर्षणोऽतिकुपितोऽभ्यद्रवत् दुरासदोऽन्यैरभिभवाऽनर्हः दुरत्ययोऽसह्यः चण्डवेगोऽरविंदलोचनं पद्भ्यां जघान ॥ ३ ॥ तद्धननं वंचयित्वाऽधोक्षजः कृष्णस्तं केशिनं दोर्भ्यां प्रगृह्य पादयो रुषा परिविध्य परिभ्राम्य सावज्ञं यथा भवति तथा धनुःशतांतरे उत्सृज्य प्रक्षिप्य उरगं सर्पं ताक्ष्यर्सुतो गरुड इव व्यवस्थितोऽभूत् ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सप्तत्रिंशे हयं हत्वा नारदेन स्तुतो हरिः ॥ व्ययोमासुरं जघानेति शुकेन विनिरूयते ॥ १ ॥

'कंसः केशिनमाहूय प्रेषयामास' इत्युक्तं तत्र 'प्रेषितः स किमकरोत्' इत्यपेक्षायामाह—केशी त्विति। तुशब्देन तस्य बलपराक्रमयोराधिक्यं सूचयति। स तु कंसेन प्रहितः केशी महाहयः सन् महीं कम्पयन् खुरैर्निर्जरयन् विदारयन् नन्दस्य व्रजं जगामेति द्वयोरन्वयः। प्रबलत्वं महत्त्वं च स्पष्टयन् विशिनष्टि-मनसः जव इव जवो वेगो यस्य सः, सटाभिः स्कन्धकेशैः अवधूतानि इतस्ततः क्षिप्तानि यानि अभ्राणि विमानानि च तैः सङ्कुलं सङ्कीर्णं नभः कुर्वन्, हेषितैरश्वजातिशब्दैर्भीषितमखिलं विश्वं येन सः ॥ १ ॥ विशाले नेत्रे यस्य सः, विकटमास्यकोटरं मुखच्छिद्रं यस्य सः, बृहत्पीनो दीर्घश्च गलो यस्य सः, नीलो महांश्च अम्बुदो मेघ उपमा यस्य सः, कंसहितं कृष्णरामवधं चिकीर्षुः कर्तुमिच्छुः, तत्र हेतुमाह—दुराशयः दुष्टचित्तः ॥ २ ॥ तद्धेषितैः तैरतिनिष्ठुरैर्हेषितैः स्वगोकुलं स्वकीयं गोकुलवासिजनं त्रासयन्तं वालैः पुच्छरोमाभिः विघूर्णिताः परिभ्रामिताः अम्बुदाः येन तमाजौ सङ्ग्रामार्थमात्मानं कृष्णं मृगयन्तमन्वेषयन्तं तं केशिनमग्रणीः पुरो निर्गतः सन् भगवान् कृष्ण उपाह्वयत् स्वसमीपमाजुहाव। स च केशी तन्निशम्य मृगेन्द्रवत् व्यनदत् नादमकरोत् ॥ ३ ॥ ततश्च स केशी तं कृष्णं निशाम्य दृष्ट्वा अत्यमर्षणः तदुत्कर्षमत्यन्तमसहमानः अभिमुखः सन् मुखेन खमाकाशं पिबन्निव मुखं व्यादाय अभ्यद्रवत् आजगाम। ततः प्रत्यक् पद्भ्यामरविन्दलोचनं कृष्णं जघान ताडयामास। ननु 'तर्ह्यन्यैः कुतो न स निवारितः' इत्याशङ्क्याह-दुरत्य इति। अन्यरत्येतुमशक्यः ॥ तत्र हेतुमाह-दुरासद इति। तत्समीपगमनमप्यशक्यम्, तन्निराकरणस्य का कथा? तत्रापि हेतुमाह-चण्डजव इति। महावेग इत्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

सप्तत्रिंशे हतः केशी नारदेन स्तुतो हरिः। अवधीद्व्योमासुरं च श्लोकास्तत्र त्रिवह्नयः (३३) ॥
उवाचवाचोर्द्वि (२) तयमष्टत्रिंशदनुष्टुभः (३८) ॥ ३७ ॥

माघकृष्णद्वादश्यां प्रातः केश्यागमनमाह—केशीति द्वयम् ॥ स तु कंसेन प्रहितः प्रेषितः केशी महाहयः सन् मनोजवः महावेगः नभ आकाशं सटाभिः स्कन्धकेशैः अवधूतानि इतस्तत क्षिप्तानि यानि अभ्राणि विमानानि च तैः संकुलं संकीर्णं कुर्वन् हेषितैः अश्वजातिशब्दैर्भीषितमखिलं विश्वं येन स विशाले नेत्रे यस्य स विकटमास्यकोटरं मुखच्छिद्रं यस्य सः बृहत्पीनो दीर्घश्च गलो यस्य सः नीलो महांश्च अम्बुदो मेघ उपमा यस्य सः कंसहितं कृष्णरामवधं चिकीर्षुः कर्तुमिच्छुः। तत्र हेतुमाह। दुराशयः दुष्टचित्तः स महीं कम्पयन् खुरैर्निर्जरयन् निःशेषतो जीर्णां कुर्वन् विदारयन्नित्यर्थः। जीर्यतेर्मितो णिच्। नन्दस्य व्रजं जगाम। निवृत्तप्रेषणाण्णौ शुद्धेन तुल्योऽर्थः इति वा ॥ १-२ ॥ तमिति ॥ तद्धेषितैः तैरतिनिष्ठुरैर्हेषितैः स्वगोकुलं स्वगोकुलं स्वकीयं गोकुलवासिजनं त्रासयन्तं वालै पुच्छरोमभिः विघूर्णिताः परिभ्रमिताः अम्बुदाः येन तमाजौ संग्रामार्थमात्मानं कृष्णं मृगयन्तमन्वेषयन्तं शता आर्षः। केषुचित्पुस्तकेषु विशालनेत्र इति श्लोको नास्ति। तत्र यः केशी कंसप्रहितस्तं भगवानुपाह्वयदित्यग्रेतनेनान्वयः। नन्दव्रजं जगामेति शेषो वा देयः। तं केशिनमग्रणीः पुरो यमुनातटे केशिघट्टत्वेन केशिमथनतीर्थत्वेन च प्रसिद्धेर्निर्गतः सन् भगवान् कृष्ण उपाह्वयत् स्वसमीपमाजुहाव। स च केशी तन्निशम्य मृगेन्द्रवत् व्यनदत् नादमकरोत् ॥ ३ ॥ स इति ॥ ततश्च दुरासदः समीपमपि गन्तुमशक्यः किम्पुनरतिक्रमितुं शक्यः चण्डजवः महावेगः दुरत्ययः अन्यैरत्येतुमशक्यः स केशी तं कृष्णं निशाम्य दृष्ट्वा अत्यमर्षणः तदुत्कर्षमत्यन्तमसहमानः अभिमुखः सन् मुखेन खमाकाशं षिबन्निव मुखं व्यादाय अभ्यद्रवत् आजगाम। ततः प्रत्यक्पद्भ्यामरविन्दलोचनं कृष्णं जघान ताडयामास ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं सप्तत्रिंशेऽध्याये केशिहननं नारदप्रोक्त भविष्योक्तिश्च व्योमासुरवधश्चोच्यते केशीति महाहयः महाश्वःसन् महीं निर्जरयन् सटाभिः केसरैर्विधूतानिकं पितानि अभ्राणि विमानानि च तैः संकुलं संकीर्णं नभो गगनं कुर्वन् हेषितैः हयजातिरवैः भीषितं भयं प्रापितं अखिलं येन सः केशीगोकुलं आजगाम इति शेषः ॥ १ ॥ हेषितैः स्वजातिशब्दैः तत्स्वगोकुलं त्रासयन्तं वालैः पुच्छरोमभिर्विघूर्णिताः प्रचालिता अम्बुदा मेघा येन तं आजौ युद्धे आह्वार्थं आत्मानं परमात्मानं हरिं मृगयंतं मृगयमाणं विचिन्वंतं तं केशिनं अग्रणीः पूर्वयमुनाकूले निर्गतः श्रीकृष्णः उपाह्वयत् संबोधितवान् स केशी च मृगेन्द्रवत् सिंह इव व्यनदत् ॥ २ ॥ स इति ततः स केशी तं कृष्णं निशम्य दृष्ट्वा मुखेन खं गगनं पिबन्निव मुखं प्रसार्येत्यर्थः अभिमुखं यथा तथा अभिमुख इति पाठे तु अभिमुखः सन्नभ्य द्रवत् आजगाम अत्यमर्षणः अतिक्रोधवान् असहनो वा अपरपादाभ्यां चरणाभ्याम रविंदलोचनं जघान स कथंभूतः दुरासदो दुरवग्रहः दुरत्ययः अपरैर्हंतुमशक्यः अतएव चंडजवो भयंकरवेगः ॥ ३ ॥ तत्पादक्षेपणं वंचयित्वा जिघांसया निक्षिप्तयोः पादयोर्विषये अधोक्षजः प्राकृतेन्द्रियजन्यज्ञानाविषयः तं कराभ्यां प्रगृह्य गृहीत्वारुषापरिविध्य भ्रामयित्वा सावज्ञमवज्ञासहितं यथा तथा धनुःशतांतरे चापशतमानाद्बहिः उत्सृज्य निक्षिप्य व्यवस्थितः स्थिरोऽभूत् यथा गरुड उरगं सर्पं ततः केशी मूर्च्छित इति ज्ञेयम् ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हिनते केशिनि कृष्णः संस्तुतो भावविकर्मभिः । नारदेनायनत् सप्तंत्रिंशे व्योमासुरं हरिः ॥ १ ॥

'प्रतियाते तु देवर्षौ कंस आहूय केशिनम् । प्रेषयामास, इत्युक्तं ततः प्रेषितः स तत्र गत्वा किमकरोदित्यत्राह । केशीति नवभिः ॥ केशी तु केशिनामाऽसुरस्तु, कंसेन प्रहितः प्रेषितः, ततः स महाहयः महाश्वरूपधरः सन् , मनस इव जवो वेगो यस्य सः, खुरैः स्वशफैः, महीं पृथिवीं, निर्जरयन् विदारयन् , सटाभिः केसरैः अवधूतानीतस्ततः क्षिप्तान्यभ्राणि विमानानि च तैः संकुलं संकीर्णं, नभ आकाशं कुर्वन् , हेषितैरश्वजातिशब्दैः भीषितमखिलं जगद्येन सः ॥ १ ॥ करालेति ॥ कराले विशाले नेत्रे यस्य सः, विकटं विस्तृतमास्यकोटरं मुखगर्त्तो यस्य सः, बृहत्पीनः दीर्घश्च गलो यस्य सः, नीलो महांश्च योऽम्बुदो मेघ उपमा यस्य सः, दुर्दुष्टः आशायः कृष्णजिघांसात्मकोऽभिप्रायो यस्य सः, अतिप्रसिद्धः सः कंसहितं चिकीर्षुः कंसस्य हितं कर्त्तुमिच्छुः सन् , नन्दस्य व्रजं कम्पयन् संत्रासयन् सन् , जगाम । माघकृष्णद्वादश्यां प्रातः समाययावित्यर्थः । इति द्वयोः संबन्धः ॥ २ ॥ तमिति ॥ तद्धेषितैस्तैरतिनिष्ठुरैः हयजातिशब्दैः, स्वगोकुलं स्वकीयव्रजजनं, त्रासयन्तं भीषयन्तं, वालैः पुच्छलोमभिः विघूर्णिताः परिभ्रामिताः अम्बुदा मेघा येन तं, आजौ युद्धे निमित्ते, आत्मानं कृष्णं, मृगयन्तमन्वेषयन्तं, तं केशिनं, भगवान् कृष्णः, अग्रणोः पुरतो निर्गतः सन् , उपाह्वयत् स्वसमीपमाजुहाव । स केशी चापि, मृगेन्द्रवत् , व्यनदन्नादमकरोत् ॥ ३ ॥ स इति ॥ ततः स केशी, तं स्वमाह्वयन्तं श्रीकृष्णं, निशाम्यावलोक्य अभिमुखः सन् , मुखेन खमाकाशं, पिबन् इव, मुखं विवृत्येत्यर्थः अत्यमर्षणः अतिकोपयुक्तः सन् , अभ्यद्रवदभ्यपतत् । किं च दुरासदः अन्यैरभिभवितुमशक्यः, चण्डोऽतिभयंकरो जवो वेगो यस्य सः, दुरत्ययः उद्यतः सन् दुरतिक्रमः सः, अरविन्दलोचनं कमलनयनं कृष्णं, पद्भ्यां प्रत्यग्भ्यां पादाभ्यां, जघान ताडितवान् ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

केशी त्विति : १०.३७.१.

लोभे पराभवपदं गमिते हि शङ्खचूडाभिधे वृषमये तदरिष्टरोषे ।
अक्रूरयोगज-सुखाय मनो दुरश्वसन्निग्रहो व्रजजुषामभियुक्त आसीत् ॥ १ ॥
यो बुद्ध्यादिचतुष्टयाङ्घ्रिशिखरैः कृत्स्नां महीं क्षोदयन् सर्वासीमजवः स्ववृत्तिकलित-स्वाराज्यदीव्यत्सुखः ।
सङ्कल्पोक्ति-विभीषिता- ऽखिलजगज्जाल-स्वभावस्तमोभूः पञ्चेन्द्रियनायकः स दुरतिक्रम्यो मनोऽश्वः स्फुटम् ॥ २ ॥
नानावृत्तिभिरीश्वरं स मृगयन् व्यर्थं निजं गोकुलं भूयस्त्रासयतीत्यवेक्ष्य भगवांस्तद्वेगतो वेगवान् ।
शब्देन प्रणवात्मनेन्द्रियचरस्त्वासीत्तदा चिन्मयो वृत्त्यग्राह्य-महागुहाग-हरिवत् तद्युक्तमाम्नायतः ॥ ३ ॥
तादृक्शब्दैकलक्ष्योऽथ स तदभिमुखीभूय वेगाददन् सन् शून्यं सर्वाक्षिगाम्यन्यचरणयुगतः स्प्रष्टुकामो बभूव ।
ब्रह्म प्रत्यक्स्वरूपं यदिह तदुचितं ह्यस्ति यच्छ्रौतघोषः पराङ्मुख्येन वृत्तेर्भवति सुविदितं ब्रह्म नैवान्यथेति ॥ ४ ॥
एवमक्रूरसंयोगसाधको दर्शितो विधिः । दिगध्वना पुरोऽप्येवमूह्योऽर्थः सूक्ष्मदर्शिभिः ॥ ५ ॥

कम्पयन्निति : १०.३७.२.

गन्धर्वराट् स्वरविशेषरतिर्मृदङ्गोद्घास्यो लसद्घनरवो विलसत्प्रवालः ।
स्थाने तुरङ्गमहितो जनरञ्जनाय नृत्यन् व्रजं यदकरो–दतनुप्रकम्पम् ॥ ६ ॥

तमिति : १०.१७.३.

गोकुलं तु निखिलं मदधीनं सिद्धमित्यवगणय्य तदश्वः । गोकुलेश्वर-ममार्गयदीशं युक्तमात्मनिहितेक्षणबुद्धिः ॥ ७ ॥
स्वयं त्वसुग्योऽहमिहास्मि सर्वदा कृतप्रयत्न – स्त्वयमात्मवीक्षणे ।
तद्वासनापूर्तिरलं भवत्विति प्रत्यक्षतामाप स गोकुलस्थितः ॥ ८ ॥
रूपोद्रेकतिरस्कृत - द्विजवरो भुञ्जन्नहित्वं पुरा गन्धर्वः समावेक्ष्य यं पुनरपि प्राप्तः सगन्धर्वताम् ।
अत्याश्चर्यमिदं यदीयचरणद्वेषेण मातङ्गतां प्राप्तोऽश्वोऽपि हरेस्तदुद्धृतिकृते युक्तस्तु सिंहध्वनिः ॥ ९ ॥
भवति स चरणस्थिरप्रहारः प्रभुरपि सोऽपि च राधिकोल्लसच्छ्रीः ।
चपलतरगति – श्चमत्कृतिज्ञस्तदुचितमास तदा द्वयाभिमुख्यम् ॥ १० ॥
यद्रूतेक्षणलज्जया समभजद्वायुर्विरूपस्थितिं यल्लक्ष्मश्रवणानुतप्तहृदयोऽप्युच्चैःश्रवस्त्वं हयः ।
मन्ये यद्गतिलाघवेक्षणजनिव्रीडाभरादन्वहं यत्कार्श्यं समगान्मनः कणभुजाऽणुत्वेन तत्कीर्तिम् ॥ ११ ॥
तस्याश्वस्याद्भुतगुणतया सस्पृहं लोकमानो नैच्छच्छ्रीशो हतिमतिहठान्माधवो धर्ममूर्तिः ।
दोषोऽन्यस्य प्रसभहनने विश्रुतोऽनागसो यज्जानन्नासीत् सदयहृदयस्तत्कृतागः प्रतीक्षः ॥ १२ ॥ (युग्मम्)

स तमिति : १०.३७.४.

असुरमनोऽधःपातं पदतः प्राङ्नीतवन्तमालोक्य । सुखयितुमथ कंसमनः स तं स्वपदतो जघान युक्तमिदम् ॥ १३ ॥
नाम्ना कृतितः स खलो नाम्नैवायं त्वतो न दुःसाध्यः । नैवमयं गणयत्विति तत्कृतिमकरोत्स्फुटां स निजपदतः ॥ १४ ॥

कृष्णप्रिया

राजस प्रकरण का यह दूसरा अध्याय है । इसमें भगवान का वीर्य निरूपण किया जाएगा । केशी एवं व्योमासुर नाम के दैत्यों का वध एवं श्री देवर्षि नारदजी का व्रजमें पधारना इत्यादि प्रसङ्ग का वर्णन होगा केशी वध से यह निश्चय हुआ कि भगवान कंस को मारने में समर्थ है ।

श्री शुकदेव जी कहते हैं—महाराज परीक्षित् ! राजा कंसने भेजा हुआ केशी दानव महान् अश्वका रूप लेकर अपनी खुरों से भूमि को खोदता हुआ मन के वेग से भी अधिक वेग से गोकुल में पहुँचा । केशी अपनी केशावली की थपडे से नभोगत बादल एवं विमानों को छिन्न भिन्न कर रहाथा । उनका भयावह हिहिनाद–हींहना को सुनकर अखिल–देव दानव दैत्य पशु पक्षी आदि समग्र विश्व भयभीत हो गया ॥ १ ॥ उसकी आंखे विशाल थी, मुख गुफा के समान अतिशय भयानक था, विशाल गल्म था, देखने पर वह विशाल नील मेघ सा लगता था । गोकुल विनाश करने को दुष्ट दानव था, कंस का हित चाहक था । गति से भूमि को थर थराता नन्दराय जी के व्रज में पहुँचा ॥ २ ॥ भगवान् श्रीकृष्ण ने देखा कि यह केशी असुर अपनी हिहिनाह से गोकुल को त्रास दे रहा है और युद्ध के लिए मुझको खोज रहा है अथवा ललकारता है उसकी पूंछ के केशो के पहार बादलों को छिन्न भिन्न कर रहा बादलों को चूर्ण कर रहा है । सारी परिस्थिति ख्याल कर श्रीकृष्ण प्रभु केशी के सन्मुख आकर उसको ललकारा । भगवान् श्रीकृष्ण को सन्मुख देखकर केशी असुर भी सिंह की तरह गरजा ॥ ३ ॥ भगवान् श्रीकृष्ण की ललकार आह्वान को सुनकर केशी सन्मुख आ पहुँचा । उसका वेग प्रचण्ड-भयावह था इसलिए उसके समीप जाने की कोई हिम्मत नही रखता था । बुरीदानत थी कि सारे व्रज को नष्ट कर दूँ कोध के आवेश से भरा हुआ मानो सारे आकाश को पी जाने की चेष्टा वाला मुँह फैलाकर भगवान् श्रीकृष्ण के ऊपर झपटा और निकट जाकर श्रीकृष्ण भगवान पर अपने पीछे की दुलती लगाई ॥ ४ ॥

तद् वञ्चयित्वा तमधोक्षजो रुषा[1] प्रगृह्य दोर्भ्यां परिविध्य[2] पादयोः ।
सावक्षमुत्सृज्य धनुःशतान्तरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः ॥ ५ ॥
स लब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसाऽऽपतद्धरिम् ।
सोऽप्यस्य वक्त्रे भुजमुत्तरं स्मयन् प्रवेशयामास यथोरगं बिले ॥ ६ ॥
दन्ता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयः स्पृशा यथा ।
बाहुश्च तद्देहगतो महात्मनो यथाऽऽमयः संववृधे उपेक्षितः ॥ ७ ॥
समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् ।
प्रस्विन्नगात्रः परिवृत्तलोचनः पपात [3]लेण्डं विसृजन् क्षितौ व्यसुः ॥ ८ ॥

---

१. मुखं–विज. । २. पीड्य–विज. । ३. लम्बं–विज. ।

कवंमक्षमा

अन्वयः—अधोक्षजः, तद्, वञ्चयित्वा, दोर्भ्याम् , पादयोः, तम् , प्रगृह्य, परिविध्य, ताक्ष्यर्सुतः, उरगम् , यथा (तथा) तम् , सावज्ञम् , धनुःशतान्तरे, उत्सृज्य, व्यवस्थितः ॥ ५ ॥ लब्धसंज्ञः, पुनः, उत्थितः, सः, केशी, रुषा, (मुखम्) व्यादाय, हरिम् , तरसा, आपतत् , सः (कृष्णो भगवान्) स्मयन् , अस्य, वक्त्रे, उत्तरम् , (वामम्) भुजम् , यथा, बिले, उरगम् , (तथा) प्रवेशयामास ॥ ६ ॥ भगवद्, भुजस्पृशः, केशिनः, ते, (सर्वे दृढतराः) दन्ताः, स्पृश यथा तप्तमयः स्पृशः, (लोकानां दन्ताः पतन्ति) तथा निपेतुः, च, महात्मनः (कृष्णस्य) तद्देहगतः, बाहुः, उपेक्षितः, आमयः, यथा, (तथा) संववृधे ॥ ७ ॥ कृष्णबाहुना, समेधमानेन, सः (केशी) निरुद्धवायुः, चरणान् विक्षिपन , प्रस्विन्नगात्रः, परिवृत्तलोचनः, लेण्डम् , विसृजन् , च व्यसुः, क्षितौ, पपान ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्यादाय मुखं प्रसार्य वेगेन हरिं पुनरापतत् प्रत्याद्रवत् । सोऽपि हरिर्हसन्नुत्तरं सव्यं भुजम् । निर्भयत्वे दृष्टान्तः । यथोरगं बिल इति ॥ ५ ॥ ततः किं तदाह । दन्ता इति । चर्वणाय भगवद्भुजं स्पृशन्तीति तथा ते व्यादानेन ये विवृताः । अयो लोहं स्पृशान्तीति स्पृशः । यद्वा तप्तमयमतितप्तं लोहादि स्पृशन्तो यथेति । आमयो जलोदराख्यो रोगः ॥६॥ लेण्डं पुरीषमुत्सृजन्।७। कर्कटिकाफलं हि पक्वं सत्साद्यन्तं विदीर्णं भवति तद्वद्विदीर्णात्तस्य देहात् । व्यसोर्विगतप्राणात् । अविस्मितो गर्वरहितः । अयत्नेन हतोऽरिर्येन सः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सोऽसुरः । सव्यं वामम् । बिले छिद्रे ॥ संज्ञा चेतना । स हरिरपि । स्मयमान इति-किमरे ग्रसितुमायासि ग्रसेति वामांगुष्ठं दर्शयित्वा । उत्तरं वामं भुजम् । यथेति-मूषिकं घातयितुं मूषिकबिले यथा कश्चिदुरगं प्रवेशयति तथैव केशिप्राणघातार्थं तस्य वक्त्रे इति । उरगश्च सस्पृहमकष्टमेव तत्र प्रविशति तथैव भुजोऽपि प्रविवेश ॥ ५ ॥ ततो भुजप्रवेशात् । किं किं जातम् । तदाह—यज्जातं तद्वक्ति—व्यादानेन प्रसारणेन ये दन्ता विवृत्ताः प्रकिटतास्ते । तप्तमयस्स्पृश इति त्रिपदं भिन्नं क्लिष्टान्वयं विसृज्यार्थांतरमाह—यद्वेति । अत्र मयडन्तः पाठो न तु सान्तः । तद्देहगतोऽसुरदेहप्रविष्टः । जलोदरग्रहणमुदरवृद्धिद्योतनाय ॥ हन्तहन्त दंष्ट्राकराले तस्य वक्त्रविवरे नीलोत्पलमृणालसुकुमारस्तस्य भुजः कथं प्रविवेशेति शंकाकुलं राजानं तत्त्वमाह-दंता इति । चर्वणाय भगवद्भुजं स्पृशतीति तथा ते दंता निपेतुः निर्मूलतया पेतुः । 'दशनैर्मूलनिर्मुक्तैः' इति हरिवंशोक्तेः । तप्तम् अयः लोहं स्पृशन्तीति स्पृशः पदार्था यथा । अय इति कर्मणि षष्ठ्यभावः 'अधायि रामोदमुत्तमम्' ? इतिवत् "तदर्हम्" इति निर्देशात् । नीलोत्पलसुकुमारशीतलमपि तद्भुजमतिसन्तप्तवज्रनिर्मितमिव केशी स्वदन्तैः स्पृष्ट्वाऽमन्यतेति भावः । 'पित्तेन दूने रसने सितापि तिक्तायते' इति न्यायात् । ववृधेऽघासुरवद्वृद्धिर्ज्ञेया ॥ ६ ॥ स दैत्यः । विक्षिपन्नितस्ततश्चालयन् । परिवृत्ते बहिर्निर्गते लोचने यस्य स तथा । 'लेण्डं बद्धपुरीषे स्यात्' इति धरणिः । क्वचित् 'लम्बम्' इति पाठः । "तुरगस्य शकृल्लम्बं लम्बा प्राकारकोशयोः" इति हलायुधोक्तेः । सोऽपि सम्यक् ॥ यावता तद्देहो विदारितः स्यात्तावद्ववृध इत्युक्तं—समेधमानेनेति । तद्देहविदारणेनैव तन्मृत्योर्विहितत्वात् । "यत्त्वया पाटितं देहं भुजेनानतपर्वणा । एषोऽस्य मृत्युरह्नाय विहितो विश्वयोनिना ॥" इति हरिवंशे नारदोक्तेः ॥ ७ ॥ कर्कटयेव कर्कटिका कर्कधूलता कर्कटी, भाषायाम् 'ककडी' इति प्रसिद्धा तत्फलं सदृशात् । यद्वा-कर्कटी मत्स्यजातिभेदस्त्री तस्याः फलं गर्भस्तत्सदृशात् । सा प्रसवे यथा स्वयं म्रियते जठरस्फुटनात्तथा भुजापकर्षणात्सोऽसुरो मृत इत्यर्थः । "कर्कटो विहगे राशौ कुर्लारे शाल्मलीफले" इति कोशाच्छात्मलीफलोपमाद्वा । शाल्मलीफलमपि पक्वं सत् विदीर्यत इति । तद्देहतोऽसुरशरीरात् । उत्स्मयैस्स्मितैः । दिविषदो देवाः । 'आदितेया दिविषदः' इत्यमरः । केशीवधमाह श्रुतिः—"न ता अर्वा रेणुककाटो अश्नुते । न संस्कृतत्रमुपयंति ता अभि । उरुगायमुभयं तस्य ता अनु । गावो मर्त्यस्य विचरंति यज्वनः" इति । अर्थस्तु-ता गा अर्वा अश्वरूप्यसुरः । रेणुककटति अतिशयेन वर्षति तेन वाऽऽवृणोति विश्वमिति रेणुककाटः 'कटे-वर्षावरणयोः' इत्यस्माद्यङ्लुकि घञ् । नाश्नुते न व्याप्नोति । संस्कृतः संस्कारो दाहच्छेदनौषधपानादिस्तेन त्रायते इति संस्कृतत्रो वैद्यस्तं प्रत्यपि ताः गावः नाभ्युपयन्ति निर्बाधितत्वात् । यतस्ता गावः मर्त्यस्य यज्वनः नन्दादेः संबंधिन्योऽभयं उरुगायं महाकीर्तिमनुलक्ष्यीकृत्य चरन्तीति मंत्रार्थः ॥ कर्कटिकाफलोपमादित्यत्र विशेषः श्रीविष्णुपुराणे—"द्विपादपृष्ठपृष्ठार्धश्रवणैकाक्षिनासिके । केशिनस्ते द्विधाभूते शकले च विरेजतुः ॥" इति । अयत्नहतारिकोऽप्यविस्मितः अहमेवं कर्तेति विस्मयात्मकगर्वरहितः । यद्वा-तादृशदुष्टमहाभीषणवधेऽप्यविगतस्मितः अश्रमेणैव लीलयैव मारणात् । तदुक्तं श्रीपराशरेण—"अनायस्ततनुः स्वस्थो हसंस्थितः" इति । 'हतारिरुत्स्मयैः' इति पाठे सुरैरित्यध्याहार्यम् । एतदनंतरं श्रीपराशरः—"ततो गोपाश्च गोप्यश्च हते केशिनी विस्मिताः । तुष्टुवुः पुडरीकाक्षमनुरागमनो रमम् ॥" इति । वैशंपायनश्च—"तं हतं दृष्ट्वा गोपा गोपस्त्रियस्तथा । बभूवुर्मुदिताः सर्वे हतावघ्ना हतक्लमाः ॥ दामोदरं तु श्रीमन्तं यथास्थानं यथावयः । अभ्यनन्दन्प्रियैर्वाक्यैः पूजयन्तः पुनः पुनः ॥" इति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स महादुष्टः उत्सृष्टोऽपीति वा यथेति यथा कश्चिदुरगं तत्क्रीडाकौतुकी तदनिष्टशङ्कारहितः केशिप्राणस्थानीयमूषिकविलं प्रवेशयति तद्वदित्यर्थः ॥ ५ ॥ नितरां निर्मूलतया पेतुः । तथाच श्रीहरिवंशे । दशनैर्मूलनिर्मुक्तैरिति । भगवतः सर्वैश्वर्य्ययुक्तस्य भुजस्पृश इति भुजस्याविकृतत्वं स्पर्शमात्रेणैव दन्तानां पतनं चाभिप्रेतं ते वज्रोपमा महास्थूला तथाच श्रीविष्णुपुराणे सिताभ्रावयवा इवेति । अय इति कर्मणि षष्ठ्यभावो धायैरामोदमुत्तममिति भट्टिकाव्यवत्तदर्हनिर्द्देशात् । तप्तमिति विशेषणात्तु न समस्तं पक्षे तप्तं तापः भावे क्तः । तन्मयं द्रव्यं लोहादि स्पृशन्तीति तथा ते । अतितप्तलोहादिस्पर्शमात्रेण दन्तानां सद्यो निपातदर्शनात् । वैकल्पिकविसर्गलोपादुभयत्र निर्विसर्गत्वं युक्तम् । महात्मनः अपरिच्छिन्नमूर्त्ते इति तद्बाहोर्वृद्धिर्नाम तावद्देशप्राकट्यमेव ततस्तत्र शैघ्र्यमपि नाद्भुतमिति भावः । सम्यक् प्राणादिमार्गसंनिरोधेन ववृधे हि निश्चितं तच्च नान्यैर्लक्षितमिति तद्देहत इत्यनेन बोधितं एकांशे दृष्टान्तः यथामय इति । तद्विधेषु दुःखरूपत्वेन भानात् । नाशनाय सहसान्तरङ्गेषु युद्धेश्च ॥ ६ ॥ सम्यगेधमानेनेति । यावता तद्देहो विदारितः स्यात्तावत्त्वस्याभिप्रायेण तद्देहविदारणेनैव तन्मृत्योर्विहितत्वात् । तथाच श्रीहरिवंशे श्रीनारदवाक्यम् यत्त्वया पाटितं देहं भुजेनानतपर्वणा । एषोऽस्य मृत्युर-हाय विहितो विश्वयोनिनेति ॥ ७ ॥ कर्कटिकाफलोपमादित्यत्र विशेषः श्रीविष्णुपुराणे । द्विपादपुच्छपृष्ठार्द्धश्रवणैकाक्षि नासिके । केशिनस्ते द्विधा भूते शकले च विरेजतुरिति । अयत्नहतारिकोऽप्यविस्मितः । अहमेवं कर्त्तेति विस्मयात्मकगर्वरहितः । यद्वा । तादृशदुष्टमहाभीषणवधेऽपि अविगतस्मितः । अश्रमेण लीलयैव मारणात् । तदेवाह । अयत्नेति तथा चोक्तं श्रीपराशरेण । अनायस्ततनुः स्वस्थो हसंस्तत्रैव संस्थित इति । प्रसूनवर्षैः कृत्वा वर्षद्भिरिति प्रसूनवर्षाणि बहुशः कुर्वद्भिरित्यर्थः । हतारिरुत्स्मयैरिति पाठे सुरैरित्यध्याहार्य्याहार्य्यम् । एतदनन्तरञ्च श्रपराशरः । ततो गोपाश्च गोप्यश्च हते केशिनि विस्मिताः । तुष्टुवुः पुण्डरीकाक्षमनुरागमनोरममिति । वैशम्पायनश्च । तं हतं केशिनं दृष्ट्वा गोपा गोपस्त्रियस्तथा । बभूवुर्मुदिताः सर्वे हतविघ्ना हतक्लमाः । दामोदरन्तु श्रीमन्तं यथास्थानं यथावयः । अध्यनन्दन् प्रियैर्वाक्यैः पूजयन्तः पुनः पुनरिति ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स महादुष्टः, उत्सृष्टोऽपीति वा पुनरापतत् धावन्नभिगतः । हरिं स्वप्राणहरं भगवन्तं स्मयमान इति कौतुकेनानायासेन च प्रवेशनं सूचयति । अनायासप्रवेशने दृष्टान्तः—यथेति ॥५॥ नितरां निर्मूलतया पेतुः, तथा च श्रीहरिवंशे (विष्णु० प० २४।३७) 'दशनैर्मूलनिर्म्मुक्तैः' इति । भगवतः सर्व्वैश्वर्य्ययुक्तस्य भुजस्पृश इति भुजस्याविकृतत्वं स्पर्शमात्रेणैव दन्तानां पतनं चाभिप्रेतम् । ते वज्रोपमा महास्थूलाः, तथा च श्रीविष्णुपुराणे (५।१६।१०) 'सिताभ्रावयवा इव' इति, तप्तमयः, भावे क्तः, तन्मयं द्रव्यं लोहादि स्पृशन्तीति तथा ते, अतितप्तलोहादिस्पर्शमात्रेण हि दन्तानां सद्यो निपातप्रसिद्धेः । महात्मनोऽपरिच्छिन्नमूर्त्तेरिति तद्बाहोः संवृद्धौ नाद्भुतत्वमिति भावः । यद्वा, अकारप्रश्लेषेण कैशोरे तदनुरूपसूक्ष्ममूर्त्तेरपि सम्यक् प्राणादिमार्गसंरोधनेन ववृधे । हि निश्चितम्, तच्च नान्यैर्लक्षितमिति । तद्देहगत इत्यनेन बोधितमेव; यथामय इति देहनाशकान्तरीणमहारोगावृद्धिमात्रापेक्षया दृष्टान्तः ॥ ६ ॥ सम्यगेधमानेनेति । यावता तद्देहो विदारितः स्यात्तावत्तस्याभिप्रायेण तद्देहविदारणेनैव तन्मृत्योर्विहितत्वात् । तथा च श्रीहरिवंशे (विष्णु० प० २४।६४) नारदवाक्यम्—'यत्त्वया पाटितं देहं भुजेनायतपर्व्वणा । एषोऽस्य मृत्युरन्ताय विहितो विश्वयोनिना ॥' इति । कृष्णस्य नराकृतिपरब्रह्मणो बाहुनेति बाहोरपि तादृशत्वात् । निरुद्धो वायुः श्वासलक्षणो यस्य सः, निरुद्धवायुत्वेन यज्जातं तदाह—चरणानित्यादिना ॥ ७ ॥ कर्कटिकाफलोपमादित्यत्र विशेषः श्रीविष्णुपुराणे (५।१६।१५)—'द्विपादपुच्छपृष्ठार्द्धश्रवणैकाक्षिनासिके । केशिनस्ते द्विधाभूतेशकले च विरेजतुः ॥' इति, भुजमपाकृष्य विदीर्णपृष्ठद्वारा निःसार्य्य अपह्नुतवृद्धितया वाकृष्य, महाभुज इति भुजस्य केशिदेहान्तर्वृद्ध्यभिप्रायेण स्वभावेनैव वा, एवं स्वतएव तस्यापरिच्छिन्नता, अतः सूक्ष्मत्वेऽपि स्थूलता, स्थूलत्वेऽपि सूक्ष्मता, वैष्णवसिद्धान्तप्रसिद्धेः, वृद्धेरुक्तिस्तु बहिर्दृष्ट्यैवेति भावः । अयत्नहतारिकोऽप्यविस्मितो गर्व्वरहितः, यद्वा, तादृशदुष्टमहाभीषणवधेऽप्यविगतस्मितः, अश्रमेण लीलयैव मारणात्, तदेवाह—अयत्नेति । तथा चोक्तं श्रीपराशरेण (वि० पु० ५।१६।१६)—'अनायस्ततनुः स्वस्थो हसंस्तत्रैव संस्थितः' इति । ततश्च देवा अपि निर्भयाः सन्तो नितरां हृष्टा इत्याह—सुरैरिति । प्रसूनवर्षैर्वर्षद्भिरिति प्रसूनवर्षाणि बहुशः कुर्व्वद्भिरित्यर्थः । यद्वा, प्रसूनानि वर्षन्तीति तथा तैर्वर्षद्भिः, अन्येषामपि कामान् बहुशो ददद्भिरित्यर्थः, केशिवधेनैव वरदातृत्वसिद्धेः । अतो गोपादीन् प्रति, प्रहर्षवशेन विचित्रवरा दत्ता इति ज्ञेयम्, अतएवोक्तम् 'सुशोभनं रान्ति' इति, 'सुरास्तैः' इति, 'हतारिरुच्छ्रयैः' इत्यपि पाठः । उच्छ्रया देवाः ॥

भगवद्भक्त्यादिगुरुं महाभागवतोत्तमम् । देवर्षिं नारदं वन्दे सदा कृष्णैकवल्लभम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स केशी लब्धा संज्ञा येन सः मूर्च्छितः पुनर्लब्धस्मृतिरित्यर्थः । पुनरुत्थितः रुषा व्यादाय वक्रमिति शेषः बलेन पुनर्हरिं प्रत्यभ्यद्रवत्तदा हसन्निर्भयः सोऽपि हरिरत्यस्य केशिनो वक्त्रे सव्यै भुजं प्रवेशयामास निर्भयत्वे दृष्टान्तः । यथोरगं विल इति ।

यथा सर्पविद्यावित्सर्पं विले प्रवेशयति तद्वत्। यद्वा सर्पभोगवद्दीर्घं भुजं विलवद्दुष्प्रवेशे तदास्यकुहरे प्रवेशयामासेति दृष्टान्तार्थः ।५। ततः किं तदाह। दन्ता इति। भगवद्भुजं संस्पृन्तीति तथा ते तस्य केशिनो दन्ता निपेतुः यथा तप्तमयस्तप्तं लोहपिण्डं स्पृशन्तो निपतन्ति तद्वत् केशिनो देहे प्रविष्टो महात्मनो भगवतो भुजस्तु ववृधे एधांबभूव यथोपेक्षितोऽचिकित्सितः आमयो जलोदरो वर्द्धते तद्वत् ॥ ६ ॥ स केशी सम्यगेधमानेन कृष्णस्य बाहुना निरुद्धः वायुः श्वासो यस्य स चरणान्विक्षिपन्नितस्ततश्चालयन्प्रस्विन्नं प्रस्वेदयुक्तं शरीरं यस्य परिभ्रममाणे लोचने यस्य स विगतप्राणो लेण्डं पुरीषं विसृजन् भूम्यां पपात ॥ ७ ॥ कर्कटिकाफलं हि पक्वं सदत्यन्तं विदीर्णं भवति तद्वद्विदीर्णात्तस्य केशिनो देहाद्व्यसोर्गतप्राणान्महाभुजो भगवान्भुजमाकृष्टवानविस्मितो गर्वरहितोऽयत्नेन हतोऽरिर्येन सः प्रसूनवर्षाणि वर्षद्भिरुत्स्मयैर्देवैरीडितः स्तूयमानः बभूवेति शेषः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

मुखं व्यादाय विदार्य ॥ ५ ॥ तप्तमयोनाम लोहं स्पृशन्तः तप्तमयं तापात्मानं पदार्थं स्पृशन्तीति तप्तमयस्पृश इति वा उपेक्षितः आमयो व्याधिः ॥ ६ ॥ विक्षिपन्नितस्ततः प्रसारयन् लम्बं शकृत् तुरगस्य शकृल्लम्बं लङ्काप्रकारकोशयोरिति च कोशं वा ॥ ७ ॥ कर्कटी कर्कन्धूलता तत्फलसदृशमुर्वारुकवत् मृदुलमित्यर्थः कर्कट्याः फलं गर्भस्तत्सदृशं प्रसवे स्वयं म्रियते यथा भुजापकर्षेण मृत इत्यर्थः। व्यसोर्मृतस्य उस्त्रियैर्यदेवैः उस्त्रिया अमरा देवास्त्रिदिवेशा दिवौकस इति च प्रसूनवर्षैः फलपुष्पसमूहैः प्रसूनं फलपुष्पयोरिति च ववृषद्भिरित्यत्र ताच्छीलिकः शतृप्रत्ययः अवेत्यत्र अकारलोपश्च तेन अयं वर्षः औत्पत्तिको गुणो लक्ष्यत इति ॥ ८-९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यथामय इति। तत्र दुःखदतामात्रांशे अन्तरङ्गेषु वर्द्धमानतांशमात्रे च दृष्टान्तः दिव्यज्ञानत्वात् ॥ ६-८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

संज्ञा चेतना व्यादाय मुखं प्रसार्य्य हरिं प्रत्यापतदाद्रवत् स हरिरपि स्मयमान इति किमरे प्रसितुमायास ग्रसेति वामाङ्गुष्ठं दर्शयित्वा उत्तरं वामं भुजं यथेति मूषकं घातयितुं मूषकविले यथा कश्चिदुरगं प्रवेशयति तथैव केशिप्राणघातार्थं तस्य वक्त्रे इति उरगश्च सस्पृहमकष्टमेव यथा तत्र प्रविशति तथैव भुजोऽपि प्रविवेश ॥ ५ ॥ हन्त हन्त दंष्ट्राकराले तस्य वक्त्रविवरे नीलोत्पलमृणालसुकुमारस्तस्य भुजः कथं प्रविवेशेति शङ्काकुलं राजानं तत्त्वमाह। दन्ता इति। चर्वणाय भगवद्भुजं स्पृशन्तीति तथा ते दन्ता निपेतुः निर्मूलतया पेतुः तप्तमयः लोहं स्पृशन्तीति स्पृशः पदार्थो यथा अथ इति कर्मणि षष्ठ्यभावो धायै रामोदमुक्तममिति निर्देशात् नीलोत्पलसुकुमारशीतलमपि तद्भुजमतिसन्तप्तवद्धनिर्मितमिव केशी स्वदन्तैः स्पृष्ट्वा अमन्यतेति भावः "पित्तेन दूने रसने सितापि तिक्तायते" इति न्यायात् ववृधे इति वृद्धिरघासुरवध इव व्याख्येया आमयो जलोदरम् ॥ ५ ॥ लेण्डं पुरीषम् ॥ ७ ॥ कर्कटिकाफलं हि पक्वमतिविदीर्णं स्यात्तत्तुल्यात्। अविस्मितः तादृशमहासुरहननेनापि विशिष्टगर्वरहितः। यतोऽयत्नेन प्रयासाभावेनैव हतो ऽरिर्येन सः। प्रसूनानि वर्षद्भिः श्रमापनोदनार्थं जलकणा अपि वर्षद्भिः ॥ ८ ॥

गूढार्थदीपिनी

तत् हननम्। दोर्भ्यां भुजाभ्यां पादयोः प्रगृह्य भ्रामयित्वा प्रक्षिप्य च यथावत् स्थितः। धनुर्हस्तचतुष्टयम्। तार्क्ष्यः कश्यपस्तस्य सुतो गरुडः ॥ ५ ॥ व्यादाय मुखं प्रसार्य हरिमपतत्। उत्तरं वामं भुजम् ॥ ६ ॥ ते दन्ता निपेतुः इति योज्यम्। तप्तमयम्। अतितप्तं लोहादि स्पृशन्तीति स्पृशः यथा पतन्ति तथा। अत्र मयडन्तः पाठो न तु शान्तः। आमयो जलोदरः ॥ ७ ॥ समेधमानेन वर्धमानेन। परिवृत्ते बहिर्निर्गते लोचने यस्य। लेण्डे बद्धपुरीषे स्यात् इति धरणिः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स केशी व्यादाय मुखं प्रसार्य हरिमापतत् प्रत्यभ्यद्रवत् स हरिरपि स्मयन् हसन् उत्तरं वामं भुजम् अस्य केशिनो वक्त्रे प्रवेशयामास यथा कश्चित्सर्पं विले प्रवेशयति तद्वत् उरगविलमुरगस्य सुखदमेव तथा सर्वान्तरात्मनो ऽसुरदेहोऽपि सुखद एवेति फलितोऽर्थः ॥ ५ ॥ केशिनः भगवद्भुजं संस्पृशन्तोति तथा ते दन्ताः निपेतुः यथा तप्तमयः अग्नितप्तं लोहपिण्डं स्पृशन्तो निपतन्ति तद्वत् महात्मनः श्रीमात्पुरुषोत्तमस्य बाहुश्च यथोपेक्षितो ऽचिकित्सित आमयो जलोदरा वर्धते तथा तस्य केशिनो देहगतो ववृधे ॥ ६ ॥ स केशी प्रस्विन्नं गात्रं शरीरं यस्य परिवृत्ते लोचने यस्य सः लेण्ड पुरीषं व्यसृजन् उत्सृजन् व्यसुर्विगतप्राणः सन् पपात ॥ ७ ॥ महान्तौ विश्वपालनपोषणसमर्थौ भुजौ यस्य सः अयत्नेन हतोऽरिर्ये सः कर्कटिकाफलं पक्वं विदीर्य्यते तद्वदुपमा यस्य तस्मात् व्यसोर्विगतप्राणात् तस्य देहात् भुजमपाकृष्य अविस्मितो गर्वरहितः संस्थितो ऽभूत्तदा प्रसूनवर्षैः प्रसूनानिवर्षद्भिर्देवैरीडितो बभूव ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्पादहननं सावज्ञं सानादरं यथा तथा ॥ ५ ॥ यद्व्यादायायतीकृत्य हरिं प्रत्यभ्यपतत् । स हरिरप्यस्य तस्मिन्वक्त्रे उत्तरं दक्षिणं स्मयन्निति पदच्छेदः । प्राप्तः प्रवेशयामास । यथा मन्त्रज्ञो बिले तत्कृतसुषिरे उरगं सर्पं प्रवेशयति तथेत्यनेन व्यथा-सामान्याभावं सूचयति ॥ ६ ॥ ते भगवद्भुजस्पृशः केशिनो दन्ता निपेतुः । तप्तमग्नावयः स्पृशन्तीति स्पृशो यथा तथा पेतुः । क्वचिदेकसकारः पाठः । तत्र तप्तमयमतितप्तं लोहादितत्स्पृश इवेत्यर्थः । प्रवेशित ईशितुर्बाहुस्तद्देहगत उपेक्षितो रोगिणाऽऽमयो रोगो यथा वर्धते तथा ववृधे । विवृक्षाभावात्सन्ध्यभावः ॥ ७ ॥ समेधमानेन वर्धमानेन निरुद्धश्यमानवायुः प्रतिबद्धश्वासो लम्बं शकृत्तुरगस्य शकृल्लम्बं लङ्काप्राकारकोशयोरित्यभिधानं । लेण्ढमिति च पठन्ति स्फुटोऽर्थः । व्यसुर्निष्प्राणः ।। ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

प्रक्षिप्तस्य वृत्तान्तमाह । स लब्धसंज्ञ इति । पूर्वं मूर्च्छितः पश्चाल्लब्धसंज्ञस्तथापि न निवृत्तः किन्तु पुनरुत्थितः ततो मुखं व्यादाय यतः केशी तरसा शीघ्रमेव हरिमभ्यापतत् ततो । भगवानपि भोजनार्थमिव व्यात्तमुखं भोजितवानित्याह । सोऽपीति । भगवानप्यस्य वक्त्रे उत्तरं वामभुजं स्मयन् हसन् भक्षणार्थमायासि चेत् भक्षयेति वदन्निव प्रवेशयामास वामो हि भुजो दैत्याना-मेवेति स निःशङ्कं प्रविष्ट इति वक्तुं दृष्टान्तमाह । यथोरगं विल इति ॥५॥ भुजप्रवेशनं कथं मारणोपाय इति शङ्कायां प्रकारमाह । दन्ता निपेतुरिति । स भक्षणार्थं प्रवृत्तः दन्तसंबन्धं कारितवान् तदा भगवद्भुजस्पृशो भगवद्भुजं स्पृशन्तीति तथाभूता दन्ता निपेतुः ते प्रसिद्धा यैर्द्वे वा अपि हन्यन्ते तत्रापि केशिनः अतिप्रसिद्धस्य अलौकिकप्रकारेणौषधादिस्पर्शेनेव दन्ताः पतिता भविष्य-न्तीत्याशङ्क्य दृष्टान्तमाह । तप्तमयःस्पृश इति । तप्तमयः अग्निवर्णं ये स्पृशन्ति ते तप्तमयःस्पृशः तप्तमयो वा तप्तलोहं स्पृशः षष्ठ्यर्थे द्वितीयेति ततो बाहुरपि तद्देहान्तः प्रविष्टः ववृधे तस्य वृद्धौ साधनं नापेक्षत इत्यत्र दृष्टान्तमाह । यथामय इति । यदेव किञ्चित्करोति पुरुषस्तद्रोगप्रतीकारमकुर्वन् तेनैव स वर्द्धते नहि देहवृद्धाविवरोगवृद्धौ साधनमपेक्ष्यते । ननु वृद्धौ विकारित्वं स्यात् तथाचानुभावो न स्यात् दोषश्च स्यात् इति चेत् तत्राह । महात्मन इति । स हि व्यापकः सर्वतः पाणिपादान्तः यावत्दूरे मायामुद्-घाटयते येन तेनैवावयवेन वृद्ध इत्युच्यते महानात्मा स्वरूपं यस्य अस्य च उपेक्षा प्रणिपाताकरणं पलाय्य गमनं वा ॥ ६ ॥ ततो यज्जातं तदाह । समेधमानेनेति । सम्यक्परितः एधमानेन वर्द्धमानेन स केशी कृष्णपदमेतदर्थमेवावतीर्ण इति ज्ञापनार्थं बाहुश्च क्रियाप्रधानः अतोऽसमीचीने बाहुप्रक्षेपणादिकं न विरुध्यते वक्त्रविवरस्य बाहुना पूर्णत्वात् निरुद्धवायुर्ज्जातः तदा व्याकुलः चरणांश्च विक्षिपन् विशेषेण क्षिपन् दुरात्मभिरेवाहमानीतो मारणार्थमिति क्षिपन्निव चकारात् कंसञ्च अन्तः प्रयासात् प्रस्विन्नगात्रो जातः परिवृत्ते लोचने यस्य अन्तर्बहिः क्रियापगमः ज्ञानापगमश्च सूचितः तदा पपात लेण्डं विसृजन्निति पायुद्वारा मलं विसृजन् लेण्डशब्देन शकृदुच्यते क्षितावपतदिति न पातेन कश्चिदुपद्रुत इति सूचितम् ॥ ७ ॥ ततः कार्ये सम्पन्ने भगवान् सर्वैः पूजितो गृहे गतइत्याह । तद्देहत इति । समारब्धा वृद्धिः ततो न निवृत्ता गतेष्वपि प्राणेषु वर्द्धमानो देहम्पक्वकर्कटिकाफलवत् विदीर्णं कृत्वा विदीर्णद्वारा हस्ते निर्गते निवृत्ता मुखतो हस्तनिःसारणे क्रियापरिवृत्ता भवतीति तदर्थं देहविपाटनं व्यसोरिति निष्कासने हेतुः त्यक्तप्राणो देहः अशुचिर्भवतीति कृतकार्यत्वञ्च ज्ञापितम् अपाकर्षणं ततो निःसारणं पूर्ववत् करणञ्च महान् भुजो यस्येति भुजेनापि मुक्तिं दातुं शकयत इति तस्य मुक्तावपि न सन्देह इत्यर्थः । महती तस्य क्रियाशक्तिरिति च ज्ञापितम् एवमपि कृत्वा अविस्मितः नहि तृणे छिन्ने कस्यचिदभिमानो भवति तदेव ज्ञापयति । अयत्नहतारिरिति । न कोऽपि भगवता प्रयत्नः कृतः अनायासेन हत इति केचिन्मायापगमः स्वाज्ञयेति न प्रयत्नः ऊर्ध्वंस्मयैः हसद्भिः सर्वैरेव देवैः प्रसूनवर्षैः पुष्पवृष्टिभिः सहितैः भगवानीडितः तत्र स्थितवाक्यानि न सन्ति किन्तु पुष्पवृष्टिरेव तदाह । वर्षद्भिरिति । वर्षणमिव स्तोत्रमिति प्रसूनानां वर्षो येषामिति पुष्पवृष्ट्यधि-कारिणो देवाः तैर्वर्षद्भिरर्थात् पुष्पैरेव ईडित इति स्तोत्रं भिन्नमेव एवं हेतुत्वेन केशिवधा निरूपितः ॥ ८ ॥

श्रीसुबोधिनी-सारः

लब्धसंज्ञः प्राप्तचेष्टः स केशी उत्थितः पुनर्मुखं व्यादाय तरसा वेगेन हरिमभ्यद्रवत् । सोऽपि कृष्णः स्मयन् हसन् उत्तरं भुजं सव्यं बाहुम् अस्य केशिनो वक्त्रे मुखे प्रवेशयामास । बिले उरगं सर्पमिव ॥ ५ ॥ चर्वणार्थं कृष्णभुजस्पृशः केशिनस्ते दन्ता निपेतुः । तप्तमयो लोहं स्पृशः पुंस इव महात्मनः श्रीहरेः तस्य देहं गतो बाहुः संववृधे उपेक्षितोऽचिकित्सित आमयो जलोदरमिव ॥ ६ ॥ सम्यक् एधमानेन वर्द्धमानेन कृष्णस्य बाहुना निरुद्धो वायुः प्राणो यस्य स प्रस्विन्नगात्रः स्वेदयुक्तदेहः परि-भ्रमन्नेत्रः चरणान् पादान् विक्षिपन् लेण्डं पुरीषं व्यसृजन् कुर्वन् व्यसुः प्राणरहितः क्षितौ भूमौ पपात ॥ ७ ॥ कर्कटिकाफलमुपमा यस्य स तस्मात् विदीर्णात् व्यसोर्मृतात्तस्य देहतो भुजमपाकृष्य महाभुजः कृष्णोऽविस्मतो विगर्वः अयत्नतः प्रयत्नं विनैव हतोऽरिर्येन स उत्स्मयैर्विस्मितैर्दिविषद्भिर्देवैः प्रसूनवर्षैरीडितः संस्तुतोऽर्चितो वा ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अधोक्षज इन्द्रियागोचरो भगवान् तत्तस्य हननं वञ्चयित्वा रुषा तं केशिनं हननाय प्रसारितयोः पादयोः दोर्भ्यां हस्ताभ्यां प्रगृह्य परिविध्य भ्रामयित्वा धनुःशतपरिमितदेशे सावज्ञं उत्सृज्य प्रक्षिप्य व्यवस्थितः यथासुखं स्थितो बभूव । तत्र

दृष्टान्तमाह–यथेति । तार्क्ष्यसुतो गरुडः यथा अनायासेनैव उरगं क्षिप्त्वा निर्भयतयाऽवतिष्ठते तद्वदित्यर्थः ॥ ५ ॥ एवं भगवत्प्रक्षिप्तः केशी प्रथमं मूर्छितः पुनश्च लब्धा संज्ञा स्मृतिर्येन सः पुनरुत्थितः सन् रुषा क्रोधेन मुखं व्यादाय तरसा वेगेन हरिं ग्रसितुमापतत् आजगाम । स हरिरपि स्मयन् स्मयन् सहन् एवास्ये वक्त्रे उत्तरं वामं भुजं प्रवेशयामास । तत्र दृष्टान्तमाह —यथा मूषकग्रहणार्थं तद्बिले सर्पः प्राविशति तथा तत्प्राणग्रहणाय तन्मुखे भगवान् स्वभुजं प्रवेशितवान् इत्यर्थः ॥ ६ ॥ ततश्चर्वणाय भगवद्भुजं स्पृशन्तीति तथा ते केशिनो दन्ता निपेतुः । तत्र दृष्टान्तमाह —तप्तमयो लोहपिण्डं स्पृशो यथा पतन्ति तद्वदिति । तस्य देहगतो भगवतो बाहुश्च ववृधे । तत्र दृष्टान्तमाह—उपेक्षितः अचिकित्सितः आमयो जलोदरादि रोगो यथा वर्धते तथेति ॥ ७ ॥ सम्यगेधमानेन कृष्णभुजेन निरुद्धः प्राणवायुर्यस्य स केशी चरणान् विक्षिपन् इतस्ततश्चालयन् प्रस्विन्नं प्रस्वेदयुक्तं गात्रं यस्य सः परिवृत्ते परिभ्रममाणे लोचने यस्य सः लेण्डं पुरीषं विसृजन् व्यसुः प्राणरहितः सन् भूमौ पपात ॥ ८ ॥

अन्वितार्थप्रकाशिका

तदिति ॥ अयोक्षजः भगवान् तत्तस्य हननं वञ्चयित्वा रुषा तं केशिनं हननाय प्रसारितयोः पादयोः दोर्भ्यां हस्ताभ्यां प्रगृह्य तार्क्ष्यस्य कश्यपस्य सुतो गरुडः उरगं यथा भ्रमयति तथा परिविध्य भ्रामयित्वा धनुःशतान्तरे तत्परिमितदेशे सावज्ञं सावहेलम् उत्सृज्य प्रक्षिप्य व्यवस्थिः यथासुखं स्थितो बभूव ॥ ५ ॥ स इति ॥ एवं हरिणा क्षिप्तः केशी प्रथमं मूर्छितः पुनश्च लब्धा संज्ञा चेतना येन सः पुनरुत्थितः सन् रुषा क्रोधेन मुखं व्यादाय तरसा वेगेन हरिं ग्रसितुमापतत् आजगाम । स हरिरपि हसन्नेव । शतार्षः । यथा कश्चित् मूषकं घातयितुं तद्बिले उरगं सर्पं प्रवेशयति तथा केशिप्राणग्रहणाय अस्य वक्त्रे उत्तरं वामं भुजं प्रवेशयामास । एवमुरगो यथा सुखं प्रविशति तथा भुजोऽपि प्रविवेश ॥ ६ ॥ दन्ता इति ॥ ततश्चर्वणाय भगवद्भुजं स्पृशन्तीति तथा ते केशिनो दन्ताः तप्तमयो लोहपिण्डं स्पृशन्तो यथा पतन्ति तथा निपेतुः । कृद्योगे कर्मणि षष्ठ्यभाव आर्षः । तदर्हमिति निर्देशेन तत्षष्ठ्या अनित्यत्वादित्येके । "धार्यैरामोदमुत्तमम्" इति भट्टिश्चाह । तस्य देहगतो महात्मनो हरेः बाहुश्च उपेक्षितः अचिकित्सितः आमयो जलोदरादिरोगो यथा वर्धते तथा संववृधे । असन्धिः संहिताया अविवक्षणात् ॥ ७ ॥ समिति ॥ सम्यगेधमानेन कृष्णबाहुना निरुद्धः प्राणवायुर्यस्य स केशी चरणान् विक्षिपन् इतस्ततश्चालयन् प्रस्विन्नं प्रस्वेदयुक्तं गात्रं यस्य सः परिवृत्ते परिभ्रान्ते लोचने यस्य सः लेण्डं पुरीषं विसृजन् व्यसुः प्राणरहितः सन् क्षितौ भूमौ पपात ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स इति लब्धसंज्ञः प्राप्तस्मृतिः व्यादाय वक्त्रंपसार्य तरसावेगेन हरिमापतत् तं प्रत्याजगाम सोऽपि हरिरपि स्मयन् हसन् उत्तरंसव्यं भुजं अस्य केशिनः वक्त्रे बिले सर्पं यथा तथा प्रवेशयामास ॥ ५ ॥ तप्तं अयो लोहं स्पृशतो यथा तथा केशिनो दैत्यस्य भगवद्भुजस्पृशः चर्वणाय हरिकरं स्पृशन्तो महात्मनः । श्रीकृष्णस्य बाहुस्तद्देहगतः सन् उपेक्षित आमयोरोगो यथा तथा संववृधे ॥ ६ ॥ समेधमाने संवर्द्धमानेन परिवृते प्रसारिते लोचने येन सः लेण्डं पुरीषं अत्त्यजन् व्यसुः प्राणहीनः ॥ ७ ॥ पक्वस्य कर्कटिका फलस्य उपमासादृश्यं यस्य तस्मात् व्यसोः प्राणहीनात् तस्य देहात् भुजं अपाकृष्य निष्कास्य अयत्नेन हतोऽरिर्येन सः उत्स्मयैः अतिहृष्टैर्विस्मितैर्वा प्रसूनानां वर्षैर्वर्पणैः कृत्वा वर्षद्भिर्देवैः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति ॥ अधोक्षजः श्रीकृष्णः, तत्तत्कृतं हननं, वञ्चयित्वा, तं केशिनं च, पादयोर्हननाय प्रसारितयोः पदोः, दोर्भ्यां हस्ताभ्यां, प्रहीत्वा, रुषा परिविद्ध्य भ्रामयित्वा, तार्क्ष्यसुतो गरुडः, उरगं सर्पं, तथा तथा, सावज्ञं सहेलनं यथा तथा, धनुःशतान्तरे धनुःशतपरिमितदूरे, उत्सृज्य पातयित्वा, व्यवस्थितः पूर्ववदेवावस्थितो बभूव ॥ ५ ॥ स इति ॥ सः केशी, लब्धसंज्ञः संप्राप्तचेतनः सन् , पुनः उत्थितः, ततः रुषा व्यादाय मुखं प्रसार्य, तरसा वेगेन, हरिं प्रति, अपतदाद्रवत् । सोऽपि स श्रीहरिरपि, स्मयन् हसन् सन् , अस्य केशिनः, वक्त्रे मुखे, उत्तरं सव्यं, भुजं उरगं सर्पं, विले यथा, निर्भयत्वेऽयं दृष्टान्तः । प्रवेशयामास । यथा सर्पविद्यावित् सर्पं विले प्रवेशयति तद्वत् ॥ ६ ॥ ततः किं जातं तत्राह ॥ दन्ता इति ॥ भगवद्भुजं स्पृशन्ति चर्वणाय भगवद्भुजस्पर्शं कुर्वन्तीति भगवद्भुजस्पृशः, ते केशिनः दन्ताः, तप्तं वह्निना परितापितं, अयो लोहं, स्पृशन्तीति स्पृशः, यथा तथा, परितप्तलोहस्पर्शं कृत्वा यथा पतन्ति तद्वदित्यर्थः । निपेतुः । तद्देहगतः तस्य केशिनो देहे प्रविष्टः, महात्मनो भगवतः बाहुश्च भुजस्तु, उपेक्षितः अचिकित्सितः, आमयो जलोदरादिः रोगो यथा, तथा संववृधे एधांबभूव ॥ ७ ॥ समेधमानेनेति ॥ सः केशी, समेधमानेन सम्यग्वर्द्धमानेन, कृष्णबाहुना श्रीकृणस्य भुजेन, निरुद्धः वायुः श्वासो यस्य सः, चरणान् विक्षिपन्नितस्ततश्चालयन् , प्रस्विन्नं प्रस्वेदयुक्तं गात्रं यस्य सः, परिवृत्ते परिभ्रममाणे लोचने यस्य सः, लेण्डं पुरीषं, व्यसृजन् मुञ्चन् , व्यसुर्गतप्राणः संश्च क्षितौ भूमौ, पपात ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तद्वञ्चयित्वेति : १०.३७.५.

अश्वपदैकपरीक्षा क्षत्रसदक्षा न चान्यजनजाते । जानन्नेवमिहेशश्चकार दोर्भ्यां तदश्वगतिमुच्चाम् ॥ १५ ॥
रे केशिन्मत्पुरतो धनुः शताध्वरचितोऽपि विफलः स्यात् । योगस्तत्र किमस्य तु गणनैकस्येत्यदर्शि तद्व्याजात् ॥ १६ ॥
यो लोके व्रजकम्पकृन्मम भृशं संत्रासयन् गोकुलं पद्भ्यां मामपि ताडयन्नपि यदि स्यादात्मशुद्ध्युन्मुखः ।
तत्पादौ भृगुवद्धामि करतो नाम्नैव चेद्वाडवस्तं दूरे विजहाम्यदो द्वयमबोधीशेन किं तद्वयात् ॥ १७ ॥
यः सङ्कल्पविकल्पवृत्तिचरणाभ्यां दुर्वहाभ्यां यदि मां संप्रष्टुमगोचरं श्रुतिगिरां हन्तेहते वाडवः ।
तत्ताभ्यां तमनन्तधर्मकलिते मार्गे सुकर्मोच्छ्रिते त्यक्ष्यामीति धनुः शतान्तरपदप्रक्षेपणादध्वनि ॥ १८ ॥
मुखभञ्जनात्तँरूपलुप्तं भविता ततो हि तुरगाऽसौ । स्यादुरगः श्रीनाथस्ताक्ष्र्यध्वज इति यथार्थगतिरुपमा ॥ १९ ॥

वक्त्रे भुजमिति : १०.३७.६.

सखलीनो वशोऽश्वोऽस्मिन्नान्यथेति विभावयन् । सुखलीनं चकारेशः स्वबाहुं किमु तन्मुखे ॥ २० ॥
नाकेशः केशिनो हन्ता भवेदिति धिया प्रभुः । तमिन्द्रदेवताकेन भुजेनाऽऽस्ये रुरोध किम् ॥ २१ ॥
यस्याश्वस्तस्य भूरेवं लोकोक्त्यसहनः प्रभुः । भूभृद्भुजं निजं तस्य मुखप्रोत्सादकं व्यधात् ॥ २२ ॥
सुकेशी वारिसेनासु स्वाढ्याः केशीति मानयन् । वामं बाहुं पुरश्चक्रे तस्य स्त्रीसदृशस्य सः ॥ २३ ॥
असुरो धनेन दृप्तो यस्माद् भूरि स्वसञ्चितेन ततः । असुरो धनेन दण्ड्योऽयमिति च कररुद्धमच्युतः किमधात् ॥ २४ ॥

दन्ता निपेतुरिति : १०.३७.७.

सम्प्राप्य दुर्जनमुखस्थितिमप्यभक्ष्यभक्षी द्विजो यदि भवेत्तदिहास्य दण्डे ।
राजन्य एव गदितो निगमैरितीव तद्दन्तदण्डनकृते भुजमादिदेश ॥ २५ ॥
यो दुर्वर्णरुचिस्त्विह खलमुखवसतिह्य भक्ष्यभुक्तिचणः । स त्वन्त्यजो द्विजस्तद्धननं दोषान्वयादिति स्पष्टम् ॥ २६ ॥
शुचयोऽप्यधिगतभगवद्धस्तस्पर्शा अपि द्विजा अपि ते । खलमुखसहवासफलं तदधःपातं क्षणेन संप्राप्ताः ॥ २७ ॥
भगवद्धस्तस्पर्शादनुतप्तास्ते द्विजा जहुः सद्यः । खलमुखसम्बन्धमतः कान्तात्खलतोऽन्त्यजो द्विजोऽपि वरम् ॥ २८ ॥
अयस्थितिकरो बाहुः सर्वदैव सतां प्रभोः । तप्तानां पापिसम्बन्धात् तप्तायःस्थितिकार्यभूत् ॥ २९ ॥
अधितिष्ठतो दशाङ्गुलमवनिं व्याप्याच्युतस्य बाहुरपि । तन्मुखभुवं स्ववृद्ध्या व्याप्य स पञ्चाङ्गुलः क्षममतिष्ठत् ॥ ३० ॥

समेधमानेनेति : १०.३७.८.

गोकुलार्तिकृतस्तस्य मुखरोधं व्यधाद्विभुः । तद्युक्तमेव यत्सोऽपि तेनासीद् व्याकुलेन्द्रियः ॥ ३१ ॥
इन्द्रियेषु सबलो हृदयाश्वः पञ्चधारचितवेगविवर्तः । वृत्तिरोधनमिहास्य विरोधीतीश्वरः स्फुटमधान्मुखरोधात् ॥ ३२ ॥
निजभुजतन्मुखरोधाद्विकलीभावं तदाकृतिं नयता । मन्येऽच्युतेन विशदीकृतं स्वरूपं तदस्य कौतुकिना ॥ ३३ ॥
बाह्याक्षाणि तु नैव जातु विषयीकुर्वन्ति मामीश्वरं चेतोऽपि द्विषदाकुलं यदि च तन्मद्दूरतस्तिष्ठति ।
तादृक् चेदपि निग्रहेण मयि संप्राप्तं तदाऽवासनं कुर्यां तत्क्षण इत्यबोधि तरगाक्षेपास्यरोधादिह ॥ ३४ ॥
आमूलोत्तर - साराढ्य-पञ्चशाखागमो मुखे । यस्य तस्य समाप्त्याप्तिरिति युक्तमिहेरितम् ॥ ३५ ॥
तद्वादिवादनं वीक्ष्य जगद्गुरुरधोक्षजः । युक्तं चक्रेऽस्य सिद्धान्तं पञ्चशाखोपदेशतः ॥ ३६ ॥
यदा भवति संल्लीनं मनो निर्वासनं प्रभौ । त्यजत्यन्तर्मलं कृत्स्नं व्यक्तं मलविसर्जनात् ॥ ३७ ॥
योऽसावङ्गुष्ठमात्रः श्रुतिसमभिसितस्तं महान्तं प्रपश्यन् रुद्ध्वैव प्राणवायुं स्थितिमिह लभते त्यक्तसङ्कल्पवृत्तिः ।
रेण्डं कृत्स्नं विसृज्यातनुगतिलसितो भक्तिपाकप्रभूतं सिद्धः स्याद्विष्णुराता ऽनुपदमपगता – मूलबीजोऽखिलज्ञः ॥ ३८ ॥
अस्मिन् श्रीशाचरित्रे ध्रुर्वाममृषिरर्थमवददिति भाति । अश्लीलं लेण्डपदं सकलपदज्ञोऽन्यथा कथं ब्रूयात् ॥ ३९ ॥
(युग्मम्)

कृष्णप्रिया

अधोक्षज भगवान् कृष्ण ने आसानी से दुलती प्रहार से अपने आपको बचाते हुए अपने दोनों हाथों से उसके पीछले दोनों पैर पकड़कर, ताक्ष्र्य कुमार श्री गरुड जी जैसे कोई साधारण सर्प को झिटक देते हैं वैसे ही केशी असुर को उपर उठाकर घुमाकर सो धनुष्य-चार सौ हाथ दूर फेंक दिया, और आप जहाँ खड़े थे वहाँ ही मुस्कराते खड़े रहे ॥ ५ ॥ सो धनुष्य पर्यन्त

दूर फेंकने पर केशी बेहोश हो गया फिर होश आने पर खड़ा होकर मुँह फैलाकर जोशीले वेग से भगवान् की ओर दौड़ा। खड़े रहे भगवान् श्रीकृष्ण ने मुस्कराते अपने बाँये हस्त को उसके मुँह के भीतर कर दी। भगवान् की वह वाम भुजा जैसे सर्प अनायास अपने बोंबी में निःशंक चला जाय वैसे बाई भुजा विना श्रम मुँह में चली गई ॥ ६ ॥ भगवान् श्रीकृष्ण की बांई भुजा का स्पर्श मात्र से केशी असुरे सारे दाँत इस तरह गिर गए जैसे संतप्त लोहे के स्पर्श से लोगों के दांत गिर जाते है। उसके दांतो को बांई भुजा, जैसे मरीज के शरीर में उपेक्षित रोग बढने लगता है वैसे ही शरीर मुँह में घुस कर उत्तरोत्तर उदर में बढने लगी ॥ ७ ॥ केशी के उदर में उत्तरोत्तर बढती वाम भुजा से उसके श्वासोच्छ्वास की गति अवरुद्ध हो गई और केशी दम घुटने लगा, क्षण में वह जमीन दोस्त हो गया टांग पछाड़ने लगा दोनों नेत्र बाहर निकल आए शरीर पर पसीना छा गया पुनः मल के साथ ही उसके प्राण भी निकल गए ॥ ८ ॥

तद्देहतः कर्कटिकाफलोपमाद् व्यसोरपाकृष्य भुजं महाभुजः।
[1]अविस्मितोऽयत्नहतारिरुत्स्मयैः प्रसूनवर्षै[2]र्वर्षद्भिरीडितः ॥ ९ ॥
देवर्षिरुपसङ्गम्य भागवतप्रवरो[3] नृप। कृष्णमक्लिष्टकर्माणं रहस्येतदभाषत[4] ॥ १० ॥
कृष्ण कृष्णाप्रमेयात्मन् योगीश[5] जगदीश्वर। वासुदेवाखिलावास [6]सात्वतां प्रवर प्रभो ॥ ११ ॥
त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसाम्। गूढो गुहाशयः साक्षी महापुरुष ईश्वरः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—महाभुजः, (कृष्णः) कर्कटिकाफलोपमात्, व्यसोः, तद्देहतः, भुजम, अपाकृष्य, अयत्नहतारिः, अविस्मितः, (भगवान् श्रीकृष्णः) उत्स्मयैः, (उर्ध्वं, हसद्भि रमरैः) प्रसूनवर्षैः, वर्षद्भिः, ईडितः ॥ ९ ॥ हे नृप ! भागवतप्रवरः, देवर्षिः, उपसङ्गम्य, अक्लिष्टकर्माणम्, कृष्णम्, रहसि, एतद्, अभाषत ॥ १० ॥ हे कृष्ण ! हे कृष्ण ! हे अप्रमेयात्मन् ! हे योगीश ! हे जगदीश्वर ! हे वासुदेव ! हे अखिलावास हे सात्वतां प्रवर ! हे प्रभो ! ॥ ११ ॥ ऐधसाम्, ज्योतिः, इव, त्वम्, सर्वभूतानाम्, एकः, आत्मा, गूढः, गुहाशयः, साक्षी, महापुरुषः, ईश्वरः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कंसाय कृष्णमादिश्य तद्रहस्यादिपैशुनैः ॥ कंसघातादिकृष्णस्य कार्यमावेदयन्मुनिः ॥ १ ॥

तदाह देवर्षिरित्यादिना। न चायं सूचकः किं तु सर्वसुहृदित्याह। भागवतप्रवर इति ॥ ९ ॥ अस्मद्रहस्यं शौरिणि कंसे सूचितवानिति मा शंकीरीत्याह कृष्णकृष्णेत्यादिना। अयं भावः त्वमीश्वरो भूभारदैत्यसंहारायावतीर्णोऽस्यतस्तदनुरूपाचरणेन विश्वं परिपालयेति। तत्र त्वयि तावद्भयशङ्कैव नास्तीत्याह। अप्रमेयात्मन्नपारिच्छिन्नस्वरूप ! योगेशचिंत्यप्रभाव। जगदीश्वर विश्वनियन्तः। वासुदेव सर्वभूतेषु वर्तमान। अखिलावास सर्वस्याश्रय। संप्रति सात्वतां प्रवर श्रेष्ठ। प्रभो सर्वशक्ते ! ॥ १० ॥ कथमेवंरूपोऽहमिति चेदत आह। त्वमात्मेति। न हि त्वं जीववत्परिच्छिन्नः किं तु सर्वभूतानामान्तर एकोऽनुस्यूत आत्मा। अन्तरनुस्यूतत्वे दृष्टान्तः। एधसां काष्ठानामन्तर्ज्योतिरिवेति। भूतेषु स्थितोऽपि तैर्न दृश्यस इत्याह। गूढ इति। अत्र हेतवः। गुहाशयो बुद्धेरप्यान्तरः। किं च साक्षी न हि साक्षी दृश्यत इत्यर्थः। अपि च महापुरुषः अतः परिच्छिन्नमतिभिर्न ज्ञायस इत्यर्थः। तर्हि सर्वांतरत्वे किं प्रमाणमत आह। ईश्वर इति। न हीश्वरं विना परतन्त्राणां जीवानां प्रवृत्तिर्घटत इत्यर्थः ॥ ११ ॥ अहमीश्वरोऽन्यत्सर्वमीशितव्यमित्येतदेव कुत इत्यत आह। आत्मनेति। साधनांतरनिरपेक्ष एवात्माश्रयः स्वतन्त्रः मायया शक्त्या भगवान् गुणान्ससृजे सृष्टवान्। तैः सृष्टैर्गुणैरिदं विश्वं सृजसि अत्सि संहरस्यवसि पालयसि। ननु सृष्ट्यादिक्रिया षट्कारकसाध्यैव दृष्टेत्याह। सत्यसंकल्प इति। न हि संकल्पैकसाध्ये बहिःसाधनापेक्षेति भावः। अतस्त्वमीश्वर इत्युपसंहारः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वृत्तान्तान्तरसूचनाय श्लोकमाह—तस्य कृष्णस्य रहस्यादीनां गोपनादीनां पैशुनैः सूचनैः 'यशोदायाः सुतां कन्याम्' इत्याद्युक्तलक्षणैः। कृष्णं तन्मृत्युमादिश्य पुनः कृष्णस्य कृष्णाय (१)। तद् वृत्तम्। सूचकः पिशुनः। किन्तु अपि तु। भागवतेषु प्रवरो मुख्यः ॥ व्रजलीलां समाप्य स्वां लीलां दर्शय माथुरीम् ॥ इत्यावेदयितुं तत्र देवर्षिस्तुष्टुवे प्रभुम् ॥ (१) भागवतानां

---

१. अविस्मितोऽयं निहतारिरुत्स्मयैः–विज. ; सुविस्मितैः पद्मभयादिभिः सुरैः–प्रा. पा.। २. दिविषद्भिः–श्रीधर. वंशी. ; रमरैः स ईडितः–वीर. ; वृषद्भि–विज ; दिविजैरभिष्टुतः–बालहतारिकः सुरैः प्रसूनवर्षैर्वर्षद्भिरीडितः–चक्र.। ३. भगवत्प्रवरो–विज. ; भगवत्प्रपन्नो–इति कस्यचित्। ४. दुवाच ह–वीर.। ५. योगेश–श्रीधर. वंशी. जीव. वीर. विज. विश्व. आदयः। ६. खिलाधार–विज.।

प्रकृष्टो वरो मनोरथसिद्धिर्यस्मात्सः । अक्लिष्टेनाक्लेशेन कर्म केशिवधादिकं यस्य तम् ॥ ९ ॥ कृष्णकृष्णेत्यादिना कथं शंकावारणं स्यादत आह–अयं भाव इति, अयमत्राभिप्रायः । यतो दैत्यसंहारायावतीर्णोऽतो हेतोः तदनुरूपाचरणेन यथा भूभारापहारस्तदनुकूलव्यापारेण । तत्र भूभारसंहारे । भयं तु परिच्छिन्नदेहादेरेव न त्वात्मन इत्यर्थः । सर्वभूतेष्वखिलजीवेषु । सात्वतानां यदूनाम् । केचित्तु–अप्रमेयात्मन्नित्युक्तेः "अङ्गुष्ठमात्रः पुरुषः" इति श्रुतेः का गतिस्तत्राह–योगेशेति । योगिनां योगविषयत्वेन स्वेच्छाविग्रहग्रहणेन तदुपपत्तेः । योगस्य वायुविषयत्वमिति मन्दाशंकां निरस्यन्नाह–जगदीश्वरेति । "आत्मन एष प्राणः श्रद्धा खं वायुः" इत्यादि श्रुतेर्वायोर्जगदन्तपातित्वेन तदीशत्वं न पृथग्वक्तव्यमित्यर्थः । कृष्णशब्दस्यापि बह्वर्थत्वात्को ग्राह्यस्तत्राह—वासुदेवेति । बहुवाची तत्राह—अखिलावासेति । तथाप्यखिलावासत्वमाकाशादीनामपि तत्राह—सात्वतप्रवरा अप्येनेकेऽक्रूरादयः सन्तीति चेत्तत्राह–प्रभो सर्वाधिप सर्वसमर्थेति च 'समर्थोऽधिपतौ प्रभुः' इति यादवः ॥ मया यत्कंसं प्रति सूचितं तद्भवदीयतादृशलीलावसरं ज्ञात्वैव । यतो भवत्प्रसादेन भवतस्तत्त्वं लीलानुक्रमं च जानामीति ज्ञापयन्नाह—कृष्णकृष्णेत्येकादशभिः । कृष्णकृष्णेत्यानन्देन । भगवंस्तव नामसंकीर्तनकृद्भक्ताभासो नारदोऽस्मीत्यात्मानं स्मारयति । निजक्लेशकर्षकत्वात्त्वमेव सर्वसुखं दातुं समर्थ इति भावः । वीप्सा परमादरे । अप्रमेयः प्रमातुमशक्यः आत्मा मनो यस्येत्यतः परं व्रज एव विराजमानो व्रजस्थान्पित्रादीनानन्दयिष्यसि मथुरां यास्यंस्तत्रत्यानेवेत्यतः कस्त्वन्मनो वेदयितुं क्रमत इति भावः । किञ्च—योगेश योग मायाधीश्वरत्वादुभयत्रापि विराजस्वेति भावः । जगदीश्वरेति—जगत्कार्यं भारावतारणमपि कर्तव्यमिति भावः । वासुदेवेति—नन्दस्य पुत्रत्वेन प्रसिद्धिमकार्षीरेव, इदानीं वसुदेवस्यापि तद्भाग्यं प्रकटयेति भावः । अत एवाखिलावासेति,–अखिलांस्त्वद्भक्तान्कंसभयविच्युतानानीय मथुरायां वासयेति भावः । यस्त्वं सात्वतां यादवानां प्रवरः । यद्वा–प्रकृष्टो वरो मनोरथो यस्य, सिद्धिस्वरूपोऽसि । प्रभो त्वं सकलं कर्तुं शक्नोषि।१०। भगवत आक्षेपमाशंक्य समाधत्ते—कथमित्यादिना । परिच्छिन्नो मितदेशवर्ती । अपि तु आन्तरोऽन्तस्थः । तैर्भूतैः । अत्र गूढत्वे । अन्यदाह—किञ्चेति । इत्यर्थ इति–साक्षिणोऽदृश्यत्वे साक्षित्वमेव व्यापद्येत 'साक्षाद्द्रष्टेति साक्षी' इति निरुक्तेः, "साक्षाद्द्रष्टरि संज्ञायाम्" इति पाणिन्युक्तेश्च । न केवलं साक्षित्वादेव गूढ इत्याह—अपि चेति । अतो महापुरुषः सर्वाधिष्ठानम् । अतो महापुरुषत्वादेव । परिच्छिन्नमतिभिरल्पबुद्धिभिः । इत्यर्थ इति–पुरुषस्यैव दुर्ज्ञेयत्वान्महापुरुषज्ञानं तु दूरापास्तमित्यर्थः । तर्हि ज्ञानाविषयत्वे । ईश्वरं नियन्तारम् । इत्यर्थ इति–"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि" इत्यादि स्मृतेः, "केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि" इति स्मृतेश्च । ननु मे यथेच्छा तथा करोमि करिष्यामि च तत्र त्वं किमेवं विशेषं निवेदयसि, तत्राह—त्वमात्मा ममान्तर्यामी, त्वमेव मां निवेदयितुं प्रेरयसि । तत्राहं किं करोमीति भावः । न केवलं ममैव अपि तु सर्वभूतानामन्तश्चित्ते तिष्ठसि । एधसां काष्ठानामन्तर्ज्योतिरिव गूढः । किञ्च, गुहाशयः यथा नंदपुत्ररूपेण गोवर्धनगुहायां शेषे तथैवांतर्यामिरूपेणांतःकरणगुहायां शेषे । साक्षी–तत्र शयानोऽपि सर्वं साक्षात्पश्यसि । तत्र हेतुः–महापुरुषोऽप्रतिहतयोगबल इत्यर्थः । किन्तु महापुरुषा ईशितव्या अपि भवन्ति त्वन्त्वीश्वरः सर्वनियन्ता ॥ ११ ॥ पुनर्भगवदाक्षेपं समाधत्ते—अहमित्यादिना । पुनराशंकते—नन्विति । षट्कारकसाध्या कर्तृकर्मकरणसंप्रदानापादानाधिकरणरूपषट्कारकनिष्पाद्यैव । इति भाव इति–साधनापेक्षत्वे जीवत्वं स्यादित्याशयः । अतः सत्यसंकल्पत्वादेव । इत्युपसंहार इति पर्यवसानम् ॥ यदि त्वमस्मानस्मद्बुद्ध्यादिकं च नास्रक्ष्यस्तदाहमप्येवं नावेदयिष्यमित्याह—आत्मनेति । गुणान्महदादीन् यदि त्वं सृष्टवानेव तदान्ये जनास्त्वत्प्रेरिता एव स्वस्वकृत्यं कर्तुं चेष्टंते तथैवाहमप्यद्य त्वामेतन्निवेदयितुं चेष्ट इति भावः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्णभक्तेरादिगुरुं महाभागवत्तोत्तमम् । देवर्षिं नारदं वन्दे कृष्णलीलाप्रवर्त्तकम् ॥

भाष्यस्य रहस्यत्वाद्रहस्यभाषत । अन्यत्तैः । तत्र सर्वसुहृदिति व्रजेऽपि सेनासहितकंसजरासन्धाद्यागमनभयनिवर्त्तनाय तथाचरणात् । कंसादेरपि मुक्तिपर्य्यवसायकत्वात् । यद्वा दिव्यज्ञानत्वात् देवश्चासौ ऋषिश्चेति श्रीगोपालमन्त्रगणद्रष्टा च इति परमान्तरङ्गत्वं सूचितम् । भागवतप्रवर इति । भगवतो लीलाधिकारनियुक्तभक्तेषु श्रेष्ठः । ततस्तत्सम्पादनार्थं तस्य तथा चेष्टा रहस्यागत्य निवेदनञ्च युज्यत एवेति भावः ॥ ९ ॥ मया यत् कंसं प्रति सूचितं तद्भवदीयतादृशलीलावसरं ज्ञात्वैव यतो भवत् प्रसादेन भवतस्तत्त्वं लीलानुक्रमञ्च जानामीति ज्ञापयन्नाह । कृष्ण कृष्णेत्येकादशभिः । तत्र तत्त्वं तावदाह त्रिभिः । तत्रैव कृष्णेति युग्मकम् । तत्र च श्रीकृष्णरूपत्वमेव मूलमित्याशयेन प्रथमं तन्नाम्ना सम्बोधयति कृष्णेति वीप्सा तन्निर्धारणाय । परममधुरस्वलालाविष्टस्य तस्य तेनैवात्मन्यवधानं स्यादित्येतदर्थाय च । मूलरूपत्वमेव स्पष्टयन् श्रीकृष्णस्य स्वरूपलक्षणमाह । अप्रमेयात्मन् ! सर्वातीतत्वेनानन्त्येन चाप्रमेयः सर्वापरिच्छेद्यः । स्वस्यापि विस्मापक आत्मा स्वयं भगवद्रूपं स्वरूपं यस्य हे तथाभूत ! तटस्थलक्षणान्याह । हे योगापरपर्य्यायया योगमायया पूर्णस्वरूपशक्तया ईशनलील अत एव हे प्रापञ्चिकाप्रापञ्चिककृत्स्नस्थेश्वर ! अत एव हे तत्र तत्र सर्वत्र विभुत्वाद्वसन् विराजमान ! अत एव हे तत्तदाश्रय ! तत्र स्पष्टमवे श्रीकृष्णत्वं व्यञ्जयन् तदीयपरिवाराणां तादृशलीलानाञ्च नित्यत्वमपि स्पष्टयति । सात्वतां क्षत्रियरूपाणां गोपरूपाणाञ्च सात्वतां मध्ये प्रवर श्रेष्ठ ! जातौ निर्द्धारणे षष्ठी । तत्परिवारक तादृशलीलत्वेनैव सर्वदा विराजमानेत्यर्थः । जयति जननिवास इत्यादेः तथा नित्यत्वे हेतुः हे प्रभो ! काला-

दीनामप्युपरिप्रभवनशीलेति कृष्णादिपदैरनुपमश्यामसुन्दरत्वादिना तन्नाम प्रसिद्धासमोर्ध्वस्वरूपवैभव यादवगोपपरिकर तदुचितलीलत्वं तव तत्त्वमिति विज्ञापितम् ॥ १० ॥ एवं सम्बोधनेनैव तस्य निजतत्त्वं दर्शयित्वा स्वांशतत्त्वमपि "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग" दित्यनुसारेण दर्शयति त्वमिति द्वाभ्याम् । सर्वभूतानां प्रापञ्चिकस्थावरजङ्गमानामेकस्त्वमात्मा । परमात्मा तृतीयं सर्वभूतस्थमित्युक्तेः । महापुरुषो महत्स्रष्टा च । एकन्तु महतः स्रष्टृत्युक्तेः । ईश्वरो ब्रह्माण्डान्तर्य्यामी च । द्वितीयं त्वण्डसंस्थितमित्युक्तेः । एधसामिति सर्वत्र स्थितस्यापि ज्योतिषो यथा तेष्वेकांशेन स्थितिस्तेष्वेव झटित्युपलब्धिश्च तद्वदित्यर्थः ॥ ११ ॥ अत्र मुख्यत्वेन प्रस्तुतोपयोगित्वेन च महापुरुषकार्य्यं दर्शयति । आत्मनेति । तैर्व्याख्यातं । तत्र मायया ससृज इति साधनान्तरापेक्षमाशङ्क्य व्याचष्टे शक्त्येति सापि तस्यैव शक्तिरिति न दण्डादिवत्त्वमिति भावः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

देवर्षिरिति देवकार्य्यपरत्वं बोधयति । अतएव उप समीपे संगत्य मिलित्वा, यद्वा, सम्यगन्यैरलक्षितत्वेन गत्वा, भाष्यस्य रहस्यत्वात्, अतएव रहसि निर्ज्जनेऽभाषत, तथापि तं प्रत्यसूया नैव कार्य्येत्याशयेनाह—भागवतेषु प्रवरः परमश्रेष्ठो भगवद्धर्म्मादिगुरुत्वाद्भक्त्येकरसिकत्वाच्चेति सूचकत्वादिदोषो निरस्तः । देवयादवादिभक्तवर्गप्रतिपालनार्थमेव तथाकरोदिति भावः । तन्नामाग्रहणं गौरवात्, हे नृपेति असूयाविष्टचित्तं श्रीपरीक्षितं प्रसादयति, यथा सर्व्वप्रजारक्षार्थं भवादृशो महाराजस्य प्रयासस्तथा सर्व्वभक्तसुखार्थं तस्यापीति भावः । ननु तथापि महादुष्टमल्लादिसमेत-कंसस्य साक्षाच्छ्रीभगवतो नायनमनुचितम्, तत्राह—अक्लिष्टानि क्लेशरहितानि कर्म्माणि पूतनावधादीनि । यद्वा, सद्य एव साक्षात्, कृतमक्लिष्टं केशिवधलक्षणं कर्म्म यस्य तमनायासेनैव कंसादीन् हनिष्यतीति, तत्र कापि शंका न सम्भवेदेवेति भावः । ननु तथापि स्वच्छन्दगोकुलक्रीडामहारससिन्धौ निमग्नं तं ततो निःसारयितुमसौ नार्हः, तत्राह—कृष्णं सर्व्वानन्दप्रदं यादवादीन् प्रत्यप्यवश्यं सुखं तेन देयमिति, तथा सर्व्वानन्दप्रदत्वादेव व्रजेऽपि तस्य नित्यलीला सिध्येदेवेति भावः । रहसीति केशिपतनाश्चर्य्यसन्दर्शनाय सङ्घशः सहचरवर्गाणां किञ्चिद्दूरे गमनात्, किंवा गोकुलपरमार्त्तिजनकविज्ञापकस्य श्रीनारदस्यागमनं ज्ञात्वा प्रागेव श्रीभगवता विचित्रव्याजेन तेषां दूरे प्रस्थापनात् । श्रीपराशरवैशम्पायनमते चाकाशस्थोऽन्तर्हितोऽसाववदादिति, तत्र श्रीवैशम्पायनेनोक्तम् (विष्णु० प० २४।७५-७६)— 'नारदस्य वचः श्रुत्वा देवसंगीतयोनिनः ॥ गोपाः कृष्णं समानीय विविशुर्व्रजमेव तु ॥' इति । अत्र च कल्पभेदव्यवस्थैव गतिः, यथा श्रीहरिवंशेऽरिष्टवधानन्तरं कंसस्य यादवान् प्रति सकपटप्रोत्साहन-वाक्यम्, श्रीवसुदेवं प्रति च निन्दनम्, तथा कंसं प्रति साक्षात्तैर्धिक्कारः, अन्धकस्य च वाक्यजातमिति । एवमन्यदप्युह्यम् ॥ ९ ॥ कृष्ण कृष्णेति वीप्सा, तन्नाम्नो जिह्वाकर्षणस्वभावत्वात्, भक्तिविशेषाद्वा । यद्वा, आद्यस्य परमब्रह्मघनमूर्त्तेरिति, द्वितीयस्य च निजाशेषभगवत्ताप्रकटनपरस्येत्यर्थः । तत्तदेव दर्शयति—अप्रमेयात्मन्नित्यादिना । तत्रादौ परब्रह्मघनमूर्त्तेरैश्वर्य्यं त्रिभिः, ततो भगवत्ताप्रकटनं नवभिरिति विवेचनीयम् । अन्यत्तैर्व्याख्यातम् । यद्वा, भागवतवर्गपूज्यश्रीभगवन्मातापितृदेवकीवसुदेव-बन्धन-दुःखहेतुत्वेनात्मनोऽपराधमत्यन्तं मत्वा महदपराधातिभीतः शरणागतत्वेन प्रपद्यापराधं क्षमयितुं भगवन्तं निवेदयति—कृष्णेत्यादिना । तत्र च न वक्तव्यमिदं परब्रह्माहं कस्य पुत्रः ? तथा जगतामेवेश्वरोऽहमिति सर्व्वेऽपि जीवा मद्भृत्यास्तत्र को नाम विशेष इति, यतः कृष्णः परब्रह्मघनमूर्त्तिरपि त्वं कृष्णो निजाशेषभगवत्ताप्रकटनपरः, अतएव पित्रादिभक्तिविशेषापेक्षापि घटेतैव, अन्यथा भगवत्ताप्रकटनासिद्धिरिति भावः । एवमग्रेऽपि यथासंख्यं विरोधालंकारतया सर्व्वं व्याख्येयम् । तथाहि—यद्यपि हे अप्रमेयात्मन् ! सर्व्वव्यापकमूर्त्ते । तथापि वासुदेव, हे वसुदेवनन्दन ! यद्यपि योगेश आत्माराम ! तथापि अखिला सम्पूर्णं शुद्धसत्त्वरूपा सर्व्वथान्यूना वा श्रीदेवकी, तस्यां वासः सैव वासो वा यस्य सः, हे देवकीगर्भरत्नेति साक्षात्तन्नामानुक्तिगौरवेण, यद्यपि जगदीश्वर ! तथापि सात्वतां सात्वतानां यादवानां प्रवराः शूरोग्रसेनादयस्तेषामेव प्रभो ! यद्वा, हे प्रवर परमश्रेष्ठेति । ननु सर्व्वमेतद्विरुद्धत्वादसम्भवमिव ? सत्यम्, तवैश्वर्य्येण दुर्घटमपि सर्व्वं सुघटमेवेत्याशयेनाह—प्रभो हे अचिन्त्यानन्तैश्वर्य्येत्यर्थः । एतदेव हीश्वरत्वं नामेति भावः ॥ १० ॥ उक्तमेवाविरोध दृष्टान्तेन साधयति—त्वमिति । सर्व्वजीवानामात्मा परमात्माप्येकः, 'द्वौ सुपर्णौ' इत्यादिवचनप्रामाण्येन प्रतिजीवमेकः, परमात्मेति बहुलोऽपि एक एवेत्यर्थः । अन्यथानैश्वर्य्यप्रसंगात्, तच्च वेदान्तादौ स्पष्टमेव; तत्र दृष्टान्तः—ज्योतिरिति; यथा काष्ठभेदेन ज्योतिषो नानात्वं प्रतीयते, एकस्य प्रज्वालनादिनान्यस्य प्रज्वालनाद्यसिद्धेः । वस्तुतस्तु एकमेव तत्र तत्र स्थितस्यापि भेदराहित्यात् तद्वदिति, अतो गूढो दृश्योऽपि त्वं गुहाशयः श्रीगोवर्द्धनगुहायां सुखशायी, साक्षी असंगोऽपि महापुरुषः सहस्रशीर्षादिरूपेण महाविभूतिमान् । यद्वा, आत्मप्रदो भक्तवश्यो वा पुरुषोत्तमः, तच्च सर्व्वं सम्भवेदेवेति पूर्व्ववदाह—ईश्वर इति । पुनस्तथैवोक्तिस्तेनैकेनैव सिद्धान्तेनाशेषविरोधानां सुख-परिहार्य्यत्वात्; एवमग्रेऽपि ॥ ११ ॥ किञ्च, यद्यपि सत्त्वादिगुणैः सर्व्वेषामेव जगतां यथाकालं पालनादिकं त्वमेव कुरुषे, तथाप्यधुना विशेषेण साधुनाञ्च परिपालनाय अत्रावतीर्णोऽसीत्याह—आत्मनेति द्वाभ्याम् । आत्मनेति स्वातन्त्र्यम्, आत्माश्रय इति माया-सम्बन्धराहित्यम्, सत्यसंकल्प इतीच्छामात्रेण सृष्ट्यादिशक्तिरुक्ता । तथापि भवान् सृष्ट्यर्थं गुणानासृजत्, तच्च मायया कृत्वेत्येवमद्भुतो विनादो ज्ञेयः । किञ्च, सृजसि पश्चादवसि, तथापि संहरसि । यद्वा, (भा० १०।७४।२१) 'आत्मनात्माश्रयः' इति सृष्टानां सर्व्वजीवानां स्वतो भगवदात्मीयतोक्ता । सत्यसंकल्प

इति च संकल्पमात्रेण दुष्टविनाशादौ शक्तोऽपि दैत्यादीनां किमाशयावतीर्णोऽसीति वक्ष्यमाणाभिप्रायेण एतादृशो दुस्तर्को विनोदोऽपि तवैश्वर्य्यात् संगच्छेतैरेत्याह—ईश्वर इति। अवसीत्यस्य पश्चादुक्तिः, संप्रति भक्तिप्रवर्त्तनेन पालनापेक्षया, किंवा स्वभावतो भगवतः पालकत्वात् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथेत्थं हतकेशिने भगवते ऽनन्तरं कर्तव्यमावेदयति देवर्षिरिति हे नृप भागवतश्रेष्ठो देवर्षिर्नारद उदारचेष्टितं कृष्णमुपसङ्गम्य रहस्येकान्ते एतद्वक्ष्यमाणमुवाच ॥ ९ ॥ तदेवाह। कृष्णेति। सर्वज्ञं कर्तव्याभिज्ञमपि भगवन्तं त्वरयन्निवावेदयितुं तावत्कृतं केशिवधमभिनन्दितुकामः तावत्स्वसङ्कल्पमात्रपरिक्लृप्तजगत्पालनार्थमवतीर्णस्य तद्दुष्कृद्विनाशनमुचितमेवेत्यभिप्रयन् स्तौति। कृष्णेति द्वाभ्याम्। यतोऽप्रमेयत्वादिगुणकस्तत आत्मनैवात्माश्रयः सृजसीति हेतुहेतुमद्भावपरतया व्याख्येयं कर्त्राद्यनेककारकसाध्या हि सर्वा क्रिया लोके दृष्टा जगत्सृष्ट्यादिक्रिया तु कर्त्रादिकारकषड्भावापन्नत्वदेकसाध्येत्युच्यते पूर्वं सृष्टेः प्राक् त्वमात्मना स्वेनैव कर्त्रा आत्मा स्वयमेवाश्रय आधारो यस्य तथाभूतः मायया स्वसङ्कल्पेणैव गुणान् स्वशरीरभूतप्रधानगुणकार्यभूतान्महदादीन्सृजसीति हि तदर्थः: "तदात्मानं स्वयमकुरुत ब्रह्मवनं ब्रह्म स वृक्ष आसीत् आत्मन आकाशः संभूत" इत्यादि श्रुतेरिति भावः। तत्रैकस्यैवानेककारकभावोपयुक्तगुणवत्तां वदन् सम्बोधयति। अप्रमेयात्मन्नित्यादिभिः। कथमेकस्यानेककारकभावापत्तिरित्यतः सन्बोधयति। योगेशेति। विविधविचित्रानन्तशक्ते इत्यर्थः। ननु महादादय एव सृज्या नत्वहं तत्राह। अप्रमेयात्मन्नपरिच्छेद्यस्वरूप! अनेन सर्वसृज्यशरीरकत्वेन सर्ववस्तुसामानाधिकरण्यार्हत्वात्स्वयमेव सृज्य इति भावः। ननु चतुर्मुखादयः सृष्ट्यादिकर्त्तारो नत्वहं तत्राह। जगदीश्वर जगन्नियन्तः कार्यभूतजगदन्तर्भूतचतुर्मुखादिनियन्तृत्वेन तद्गतं कर्तृत्वं त्वय्येव पर्यवसन्नमिति त्वमेव कर्त्तेति भावः। ननु ब्रह्माण्डादिर्जगदाधारो नत्वहमित्यत आह। वासुदेवेति वासुदेवशब्दार्थं वदन्सम्बोधयति। अखिलाधारेति। अखिलस्य ब्रह्माण्डान्तर्गतादिवस्तुन आधारभूत अखिलमाधारो व्याप्यं यस्य तथाभूतेति वार्थः। नन्वेवं भूतः परमात्मा नत्वहमित्यत आह। सात्वताम्प्रवरेति। सात्वतामिति कर्तरि षष्ठी सात्वतैर्भक्तैर्नितरां प्रीयमाणेत्यर्थः। परमात्मैव सन् भक्तैः समाश्रयणीयत्वायैवं रूपेणावतीर्ण इत्यर्थः। प्रभो! अकर्मवश्य इत्यर्थः ॥ १० ॥ परमात्मत्वमेवोपपादयति। त्वमिति। सर्वभूतानां ब्रह्मादिस्थावरान्तानां महदादिपृथिव्यन्तानाञ्चैकस्त्वमेवात्मान्तः प्रविश्य प्रशासनेन धारकः एकः सर्वत्रैकरूपः व्याप्यवस्तुगतविकाररहित इत्यर्थः। इदमेव हि परमात्मत्वं यत्सर्वानुप्रवेशतद्गतधर्मास्पर्शनियमनैर्भर्तृत्वम् एकत्वे दृष्टान्तमाह। यथैधसां काष्ठानामन्तर्ज्योतिरेधोगतवक्रत्वादिभिर्न स्पृश्यते तद्वदित्यर्थः। यद्यहं सर्वभूतानामात्मा तर्हि तैर्दृश्येत्यत आह। गूढ इति। अत्रापि ज्योतिरिवैधसामित्येतद्दृष्टान्ततया योज्यं यथैधःसु ज्योतिरन्तर्गतमपि गूढं मथनाद्युपायमन्तरेण न तेभ्यो विविच्य दृश्यते तथा योगविशुद्धमनसा विना न दृश्यस इत्यर्थः। क गूढ इत्यत आह। गुहाशयः गुहायां हृदयकुहरे जीवे वा शेत इति तथा कारणत्वोपयुक्तं सार्वज्ञ्यमाह। साक्षीति। सर्वस्य साक्षाद्द्रष्टा सर्वज्ञ इत्यर्थः। अत एव महापुरुषः ब्रह्मादिजीर्वविलक्षणः पुरुष ईश्वरस्तेषामधिपतिश्च ॥ ११ ॥ यत एवं भूतस्ततो हे ईश्वर सत्यसङ्कल्पस्त्वं सकलकारकभावमापन्नः तावत्स्वसङ्कल्पेन गुणकार्यभूतान् स्वशरीरभूतान्महदादिपृथिव्यन्तान्सृजसि ततस्तैर्गुणैरिदं पारिदृश्यमानं विचित्रसन्निवेशविशिष्टं ब्रह्मादिस्तम्बपर्यन्त जगत्सृजसि अवसि पालयरयत्सि संहरसि च ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अप्रमेयात्मन्! अपरिच्छेद्यस्वभाव नन्वेवञ्चेदङ्गुष्ठमात्रः पुरुष इत्यादिपरिमाणवचनस्य का गतिरिति तत्राह। योगेशेति। योगिनां योगविषयत्वेन स्वेच्छाविग्रहग्रहणेन तदुपपत्तेर्योगेशत्वस्य वायुविषयत्वमिति मन्दाशङ्कां निरस्यति। जगदीश्वरेति। "आत्मन एष प्राणो जायते आकाशाद्वायुः प्राणः श्रद्धा खं वायु"रित्यादिश्रुतेः वायोर्जगदन्तः पातित्वेन तदीशत्वं न पृथग्वक्तव्यमिति भावः। कृष्णशब्दस्य बह्वर्थविषयत्वेनोक्तविशेषणविशिष्टः क इति संशयनिवृत्तिः कथमिति तत्राह। वासुदेवेति। वासुदेवशब्दस्यार्थान्तरमाह। अखिलेति। नन्वेवञ्चेत्संशयस्तदवस्थ इति तत्राह। सात्वतामिति। नन्वनेन सात्वज्जातिश्रेष्ठ इत्येवायातं नतु तदाधिपत्यमित्यत उक्तं प्रभो इति समर्थे ऽधिपतौ प्रभुरिति ॥ १० ॥ उक्तविशेषणानामन्यत्रापि कथञ्चिद्वृत्तिसंभवेनापि विष्णुत्वानिश्चय इति तत्राह। त्वमिति। प्रत्यगात्मान्तर्यामीत्यर्थः। ईदृशोऽन्यो नास्तीत्याह। एक इति। एकस्य च वहुष्ववस्थानं कथमिति तत्राह। ज्योतिरिति। मथनादिना दृग्विषयत्वेनाग्नेः सत्ता ज्ञायते न तवेति तत्राह। गूढ इति। कथं गूढत्वमित्यत उक्तं गुहेति हृदयगुहायां शेत इति जीववत्तर्हि त्वं संसारी चेतनः किन्नेत्याह। साक्षीति। संसारिणामनुष्ठीयमानयोः पुण्यापुण्ययोर्द्रष्टा वायोरन्तःस्थत्वेन साक्षित्वेऽपि मुख्यसाक्षित्वं तवेत्याशयेनाह। महापुरुष इति। पुरुषोत्तम इत्यर्थः। पुरुषोत्तमस्यैव मुख्यसाक्षित्वं यतोऽत ईश्वरत्वं तस्यैव मुख्यं न पशुपतेरिति भावेनाह ईश्वर इति ॥ ११ ॥ अलौकिकत्व वस्तुनोऽसाधारणलक्षणेन निर्णतुं शक्यते इति तत्राह। आत्मनेति। पूर्वं जगदादौ आत्मना परिप्रेरणामन्तरेण केनोपादानेनेत्यत उक्त माययेति मायया प्रकृत्या कुलालस्य शालाद्यधिष्ठानदर्शनादस्य किमधिष्ठानमिति तत्राह। आत्माश्रय इति। "स भगवान् कस्मिन्प्रतिष्ठित इति स्वे महिम्नी"ति श्रुतेः गुणान् महदादीन् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

देवश्चासौ ऋषिः श्रीगोपालमन्त्रगणद्रष्टा चेति सर्वलीलातत्त्वतदनुक्रमाज्ञत्वं विवक्षिते परमान्तरङ्गत्वञ्च सूचितं भागवतप्रवर्त इति भगवतो लीलाधिकारनियुक्तभक्तेषु श्रेष्ठः। ततस्तत्सम्पादना तस्य कंसादौ तत्तत्कथनं तस्य रहस्यागत्य निवेदनञ्च यज्यते इति भावः ॥ ९ ॥ मया यत् कंसं प्रति सूचितं तद्भवदीयतादृशलीलावसरं ज्ञात्वैव यतो भगवत्प्रसादेन भगवतस्तत्त्वं लीलानुक्रमञ्च जानामीति विज्ञापयन्नाह। कृष्ण कृष्णेत्येकादशभिः ॥ १०—१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

व्रजलीलां समाप्य स्वां लीलां दर्शय माथुरीम्। इत्यावेदयितुं तत्र देवर्षिस्तुष्टुवे प्रभुम् ॥

भागवतप्रवर इति। मथुरास्थानामपि भागवतानां प्रकृष्टो वरो मनोरथसिद्धिर्यस्मात् सः अक्लिष्टन अक्लेशेनैव कर्म केशिवधादिकं यस्य तम् ॥ ९ ॥ प्रथमं कृष्ण कृष्णेत्यानन्देन भगवत् स्तवनामसङ्कीर्त्तनकृद्भक्ताभासो नारदोऽस्मीत्यात्मानं स्मारयति। अप्रमेयः प्रमातुमशक्य आत्मा मनो यस्येत्यतः परं व्रजे एव विराजमानो व्रजस्थान् पित्रादीनानन्दयिष्यसि मथुरां यास्यंस्तत्रत्यान् वेति कस्त्वन्मनो वेदयितुं क्षमत इति भावः। किञ्च योगेश योगमायाधीश्वरत्वादुभयत्रापि विराजस्येवेति भावः। जगदीश्वर इति। जगत्कार्य्यं भारावतरणमपि कर्त्तव्यमिति भावः। वासुदेवेति। नन्दस्य पुत्रत्वेन स्वस्य प्रसिद्धिमकार्षीरेव। इदानीं वसुदेवस्यापि तद्भाग्यं प्रकटयेति भावः। अत एवाखिलावासः अखिलांस्त्वद्भक्तान् कंसभयाद्विच्युतानानीय मथुरायां वासयेत्यर्थः। यस्त्वं सात्वतां यादवानां प्रवरः। यद्वा प्रकृष्टो वरो मनोरथो यस्य सिद्धिस्वरूपोऽसि। प्रभो ! त्वं सर्वं वर्त्तुं शक्नोषि। ननु मे यथेच्छा तथा करोमि करिष्यामि च तत्र त्वं किमेवं विशेषं निवेदयसि तत्राहं त्वमात्मा ममान्तर्यामी त्वमेव मां निवेदयितुं प्रेरयसि तत्राहं किं करोमीति भावः। न केवलं ममैव अपि तु सर्वभूतानामन्तश्चित्ते तिष्ठसि। एधसां काष्ठानामन्तर्ज्योतिरिव गूढः किञ्च गुहाशयः यथा त्वं नन्दपुत्ररूपेण गोवर्द्धनगुहायां शेषे तथैवान्तःकरणगुहायामन्तर्यामिरूपेण शेषे साक्षी तत्र शयानोऽपि सर्वं साक्षात् पश्यसि। तत्र हेतुः महापुरुषः। अप्रतिहतयोगबल इत्यर्थः। किञ्च महापुरुषा ईशितव्या अपि भवन्ति त्वन्त्वीश्वरः सर्वनियन्ता ॥ १०-११ ॥ किञ्च त्वं यद्यस्मानस्मद्बुद्ध्यादिकं सर्वमिदं जगच्च नास्रक्ष्यस्तदा अहमप्येवं न न्यवेदयिष्यमित्याह। आत्मनेति। आत्माश्रयः स्वतन्त्रः आत्मना आत्मरूपया शक्त्या भवान् गुणान् महदादीन् ससृजे। तेनेदं त्वं यदि सृष्टवानेव तदान्ये जगज्जनास्त्वत्प्रेरितः स्वस्वकृत्यार्थं चेष्टन्ते तथैवाहमप्यद्य त्वामेतन्निवेदयितुमेवं चेष्टे इति भावः ॥ १२ ॥

गूढार्थदीपिनी

कर्कटिकाफलोपमात् तद्देहतः (ककड़ी) व्यसोः निर्गतप्राणात्। उत्स्मयैः विस्मितैः देवै रीडितः अविस्मितः गर्वरहितः ॥ ९ ॥ अक्लिष्टेन अक्लेशेन कर्म केशिवधादिकं यस्य ॥ १० ॥ कृष्णेति द्वयम् आत्मा अन्तर्यामी एधसा काष्ठानाम् अन्तर्ज्योतिः अग्निरिव गूढः ॥ ११-१२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भागवतप्रवरः छन्दोग्यप्रसिद्धभूमादिशब्दवाच्यभगवद्विद्यामुपनयनपूर्वकं निजाचार्य्याद् गृहीत्वा तद्विद्योपदेशेन भागवतसम्प्रदायप्रवर्तकत्वात् भागवतेषु प्रवरो मुख्यः एतद्वक्ष्यमाणमभाषत ॥ ९ ॥ कंसं तद्वधार्थम्प्रवर्त्य दैत्यविनाशाय धर्मसेतुरक्षणाय चावतीर्णोऽस्यतः दिष्ट्या केशी हतः चाणूरादिसहितंकंसञ्च निहतं द्रक्ष्ये इत्यादि वक्तुकामः प्रथमं सदानन्दत्वाप्रमेयत्वादिगुणवर्णनेन भगवन्तं स्तौति। कृष्णेति त्रिभिः। हे कृष्ण सदानन्द आदरेवीप्सातस्येयत्तानवच्छिन्नत्वं दर्शयितुं सम्बोधयति। अप्रमेयात्मन्निति। अप्रमेयः सकलप्रमाणैः दयत्तावच्छेदेन प्रमातुमशक्यः आत्मा स्वरूपं विग्रहो वा यस्य। ननु तर्हि कथङ्गमनागमनादिव्यवहारसिद्धिरित्यतः सम्बोधयति। योगेशेति। हे अचिन्त्यप्रभावेत्यर्थः। सर्वनियन्तृत्वेन सम्बोधयति। जगदीश्वर ! निखिलप्रपञ्चनियन्तः ! सर्वनियन्तृत्वेऽपि भक्तवश्यतां दर्शयितुं सम्बोधयति। वासुदेवेति वसुदेवापत्य देवकीजठरधार्य्येऽपि तस्मिन् सर्वाधारत्वं दर्शयितुं सम्बोधयन्ति। अखिलावास ! हे सर्वचेतनाचेतनाधार एकान्त्युपास्यतया सम्बाधयति। सात्वतां प्रवरेति सर्वशक्तिमत्त्वे दर्शयितुं सम्बोधयति प्रभो इति ॥ १० ॥ एवं सम्बोधनैः संस्तुत्य सर्वात्मादिना स्तौति। त्वमिति। सर्वेषां चेतनाचेतनानां त्वमात्मा आश्रय इत्यर्थः। किञ्च एधसां काष्ठानामन्तर्ज्योतिरिव सूक्ष्माग्निरिव सर्वभूतानां गुहाशयस्त्वमसि द्वद्याकाशगोऽसि एधसामन्तर्ज्योतिर्वत्सर्वगोऽपिसर्वदोषास्पृष्टोऽसीत्यर्थः। एवमेव गूढोऽसि यथैधःसु अरणीप्रभृतिषु उपायेनाग्निलाभस्तथोपायतोऽधिकारिभिर्द्रष्टुं शक्योऽसीत्यर्थः। किञ्च सर्वेषां भूतानां साक्षी अतः महापुरुषः सर्वश्रेष्ठस्त्वमेवासि ॥ ११ ॥ अथ स्वाश्रयत्वेन विश्वजन्मादिहेतुत्वेन च स्तौति। आत्मनेति १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

व्यसोः कर्कटिकाफलमुर्वारुकविशेषस्तदुपमात्तद्देहतो महाभुजो भुजमपाकृष्य स्वयमविस्मित उस्मियैर्देवैर्गतं। प्रसूनवर्षैर्वृषद्भिवर वृषद्भिरल्लोपेनावकिरद्भिरित्यर्थः। वृषतो वर्षणादिति भाष्यप्रयोगान्न गुणः। ईडितः स्तुतः। प्रसूनं फलपुष्पयो-

रित्युक्तः फलपुष्पवर्षैरित्यर्थः ॥ ९ ॥ कंसं प्रति शंसित्वा तद्धिंसकं प्रति प्रतिवक्तुमागतो नारदो विशारदमेवमवोचदित्याह देवर्षिरिति। भागवतप्रवरो देवर्षिरक्लिष्टकर्माणं कृष्णं रहस्युपसङ्गम्य देवगुह्यस्याप्रकाश्यत्वाद्रहसीत्युक्तिः। इदं वक्ष्यमाणमभाषत ॥ १० ॥ अस्मन्मर्म कंसापशंसितवान्किल कथमुतरत्रेति मुरमथनेनेश्वरे त्वयि दुश्चित्ततेति भावेन स्तौति ॥ कृष्ण कृष्णेति। श्रुतिप्रतीकधृतिरिति श्लोकद्विके पुनरुक्तिरार्थिकी न दोषाय। एतेन कृतकृत्या इति न कृत्यविचारे मम आयासनार्यं। अप्रमेयात्मन् अपरिच्छिन्नस्वामिन् अपरिच्छिन्नकाय वा योगेश ज्ञानाद्युपायस्वामिन् हे योग सर्वयोजक। यथोक्तं पञ्चमतात्पर्ये। युज्यतेऽनेनेति योगो हरिरिति। ईश लक्ष्मीपते जगदीश्वर जगत्स्वामिन् प्राणपते वासुदेव। प्रतिनिमित्तमाह ॥ अखिलावासेति। प्रकृते सात्वतां प्रवर यादववर। वस्तुतस्तु सात्वन्तो भक्ताः पञ्चरात्रिकास्तत्प्रवर प्रभो जगदुत्पादक सात्वतां प्रवराणां प्रभविति वा ॥ ११ ॥ सर्वभूतानामात्माऽन्तर्नियामक एको मुख्य एधसां काष्ठानां मध्ये ज्योतिरग्निरिव मतिमथनलभ्यो गुहाशयो हृदयगुहायामाशेत इति स गूढः प्रसादं विना साक्षीकृतसुकृतासुकृतसाक्षाद्द्रष्टा महापुरुषः क्षराक्षरपुरुषोत्तम ईशेभ्यो वर ईश्वरः श्रुतय एतन्मूलभूताः षष्ठादौ प्रदर्शिता विमृश्याः ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो नारदस्य स्वापराधक्षमापणार्थं वाक्यानि निरूपयन् पञ्चदशभिः प्रथमतः तस्य समागमनमाह। देवर्षिरिति। यदैव तदैव समागतः निकटे भक्तवन्नमस्कुर्वन् तदाह। उपसङ्गम्येति। देवर्षित्वाच्च तदर्थपरिज्ञानं भगवान् कथं तमनुज्ञातवानित्याह। भागवतप्रवर इति। भागवतानां मध्ये प्रवर श्रेष्ठः भागवतमार्गोपदेष्टृत्वात् नृपेति सम्बोधनम् अनभिप्रेतोऽप्यागच्छतीति राजळीलायाः परिज्ञापनार्थमुच्यमानः कथञ्चित् अनभिप्रेतो नारद इति भगवान् मारयेत् अतः कथन्निर्भयो भूत्वा तथा वदतीत्याशङ्क्याह। अक्लिष्टकर्माणमिति। स्वतोऽप्यागमनं परमानन्दरूपत्वात् सम्भवति तदाह। कृष्णमिति रहसीति। उभयोरदृश्यत्वे एकान्ते वा गत्वा उभयोरपि तथा सामर्थ्यसम्भवान्नानुपपत्तिः। इदं वक्ष्यमाणस्तोत्रपूर्वकं निवेदनात्मकमभाषत ॥ ९ ॥

स्वापराधनिवृत्त्यर्थं त्रिधास्तोत्रं चकार ह।
मूलरूपन्तु सम्बोध्य मध्यकार्ये निरूपिते। ततोऽवतारकार्यस्य निरूपणमतः कृतम् ॥
अनुमोद्य करिष्यन् यः पञ्चभिस्तदुदीरितम्। सामान्येन कृतं द्वेधां द्वाभ्यां स्वेन तथान्यतः॥
ज्ञानभक्तिविभेदेन स्वरूपञ्च निरूपितम्। आनन्दचित्सतां रूपं ज्ञाने भक्ताविहोद्गतिः ॥
कार्यार्थमवतीर्णत्वात् भक्तिमार्गे न दूषणम्। कृतन्तु भगवानेवेत्येवं सप्तभिरीर्यते ॥
कर्ममार्गेऽप्यदोषाय सामान्यद्वयमीर्यते। ततोऽन्ते ज्ञानभक्ती च स्वापराधो यतो नहि ॥
उपक्रमगतिभ्याञ्च षोडशात्मा निरूपित ॥

प्रथमं भगवन्तं नवधा संबोधयति। कृष्ण कृष्णेति। मूलरूपं निरूपयन् कृष्णेति सदानन्दो मूलम् अन्यथा जगतस्तदात्मत्वं फलरूपता च न स्यात् तत्र प्रमाणद्वयमाहानुभवं वेदञ्चाग्रिमाभ्यां पुनः कृष्णेति द्विरुक्तिरादरे परमानन्द एवादरणीयो भवतीति यद्यपीदमित्थंतया नानुभूयते तथापि वस्तुस्वाभाव्यात् तत्रादर उत्पद्यते अत्रार्थे प्रमाणं वदन् वेदानां गम्य इति तदर्थं वेदोत्पत्तिरिति द्वितीयं प्रमाणमाह। अप्रमेयात्मन्निति। न प्रमातुं योग्यः केनाप्यात्मा यस्य सर्वथा प्रमाणभावो नास्तीति न मन्तव्यम् आत्मत्वात् अतो भगवतैव स्वरूपकथनञ्चोपपद्यते एवं द्वाभ्यां प्रमाणरूपतां निरूप्य साधनरूपतां निरूपयति द्वाभ्यां योगीशजगदीश्वरेति। बहिर्योगः अन्तरीश्वरत्वेन नियमनं तदर्थमाराधना च यथा सम्यगेव प्रेरयतीति ईश्वरत्वाद्वावश्यं सेव्य इति फलरूपत्वमाह द्वयेन। वासुदेवाखिलावासेति। वासुदेवो मोक्षदाता अखिलावासेति तस्य दाने परिज्ञानं भोक्तृरूपश्च सः भोग्यरूपश्चेति फलत्वञ्च सम्पद्यते प्रमेयरूपत्वेन निरूपयन् भगवत्सिद्धान्तसिद्धमेव प्रमेयमिति ज्ञापयितुं द्वयमाह। सात्वतां प्रवरप्रकर्षेण व्रियत इति प्रवरः प्रकृष्टो वा वरः भर्ता सात्वतैः यो व्रियते स एव प्रमेयमिति। यश्च परिपालयितुं शक्तः स एव च पतिः एवमुपास्योपासकयोः निरूपको धर्मो निरूपितः ॥ १० ॥ एवं नवधा मूलरूपं निरूप्य स्वदोषपरिहारार्थं भगवतः सर्वात्मकत्वं निरूपयति। त्वमात्मेति। जीवा अप्यात्मानो भवन्तीति तद्व्यावृत्त्यर्थमेक एवत्वं सर्वभूतानामात्मेति जीवाः प्रत्येकमात्मानः अयमात्मशब्दः ब्रह्मवादे परमात्मपरः योगशास्त्रे विभूतिपरः भगवच्छास्त्रे आत्मनामात्मा आधिदैविको गङ्गेव सांख्ये तु न जीवब्रह्मविभागः पुरुषेश्वरयोरत्रेत्यत्र निषिद्धत्वात् चतुर्ष्वपि पक्षेषु भगवतो न विलक्षणत्वं प्रतीतिस्तूपाध्यादिविषय इति तत्र दृष्टान्तमाह। ज्योतिरिवैधसामिति। सर्वेषामेव काष्ठानां मध्ये ज्योतिरग्निरेक एव वर्णान्तरप्रतीतिस्त्वौपाधिकी सम्बन्धी निरूपितः नतु तत्त्वाधिकरणत्वम्। अनेन काष्ठमग्निरेव काष्ठतापरमग्नेर्लयप्रतिबन्धिका तस्मिन् दग्धे स्वरूप एव वह्निस्तिष्ठतीति अत एव गूढः विद्यमानमपि न कोऽपि जानाति अग्नेः स्वरूपमुभयथा प्राप्नोति भ्रातृव्यवशात् दाह्याभावाद्वा उपाधिरुभयस्यापि प्रतिबन्धकः यथा न दहति तथा न शाम्यति च तथा सङ्घाते जगति विद्यमाने आत्मा न स्वरूपं प्राप्नोति न साधनैर्नापि बाधकैः एतदर्थमेवमुक्तवान् अस्तीत्यत्र मथनवत् प्रमाणमाह। गुहाशय इति। गुहायामाशेत इति अन्यथा सर्वप्रकाशो न स्यात् किञ्च साक्षी सर्वकर्माणी पश्यति अन्यथा अयमहमेतत्सर्वंद्रष्टेति अन्यथा फलभोगोऽपि न स्यात् इत्यपि निरूपितं जीवव्यावृत्त्यर्थमाह। महापुरुष इति। स्वानुभावः पुरुषो

महापुरुषः अनुभावश्च परमकाष्ठामापन्नः चतुर्ष्वपि पक्षेषु भगवद्धर्म एव किञ्च ईश्वरस्त्वं सर्वनियामकः नियम्यास्तु जीवा इति यथा नियमयसि तथा कुर्वन्तीति स्वरूपत्वात्प्रेरकत्वाच्च सामान्यन्यायेन न मम दोषः ॥ ११ ॥ किञ्च उत्पत्तिविचारेणापि त्वयैव भिन्नतया सृष्टा इति न कंसस्य नापि मम दोष इत्याह । आत्मेति त्वं कर्त्ता आत्माश्रयस्त्वमेवाधिकरणं स्वरूपस्थितापवपि त्वमेव करणमिति प्रथमतः करणनिर्देशः आत्मना मायया सर्वभवनसामर्थ्यमप्यात्मैव उभयेनेत्येके मायया लोकानामन्यथा प्रतीत्यर्थं वा उत्पादिवास्तु सच्चिदानन्देभ्यः सत्वरजस्तमांसि लोकानां प्रतीतिस्तु प्रकृतिरिति अन्यथा भगवतः कर्तृत्वमेव न स्यात् । स्वातन्त्र्याभावात् स्वातन्त्र्येतु उभयोः स्वतन्त्रता न सम्भवतीति प्रकृतिस्तदधीना मन्तव्या अत आत्मनैव गुणान् सृजन् मायामपि करणत्वेन स्वीकृतवान् गुणानामुपादानमात्मैव स्वरूपञ्च अन्यथा प्रतीत्यर्थमेव भगवद्रूपा भगवच्छक्तिर्व्याप्रियत इति पश्चात् तैरेव इदं सर्वं जगत् सृजसि अत्सि भक्षयसि अवसि पालयसि । ननु किमर्थमेवं करोतीत्याशङ्क्याह । ईश्वर इति । ईश्वरेच्छाया नियन्तुमशक्यत्वात् अन्यथा स्वविचारेण प्रयोजनस्याभावात् लीलायामपि प्रयोजनासम्भवः । अत ऐश्वर्यमेव नियामकमिति अतस्त्वयैव सृष्टमिति त्रिभिर्गुणैरपि अग्रिमकार्यं च विचारितमिति न कस्यचित् दोषः साक्षाद्भगवतः सर्वं जायत इति वक्षः प्रकृते न सम्भवति तथा सति वैलक्षण्ये नियामकाभावात् स्वापराधस्तिष्ठेदेव स्वकृतवैयर्थ्यं च स्यादतोऽन्य एव पक्ष आश्रितः ॥ १२ ॥

श्रीसुबोधिनी–सारः

हे नृप भागवतेषु प्रवरः श्रेष्ठो देवर्षिर्नारदोऽक्लिष्टं कर्म यस्य तं कृष्णं रहसि एकान्ते उपगम्य प्राप्यैतदब्रवीत् ॥ ९ ॥ हे कृष्णकृष्णेति स्पष्टम् ॥ १० ॥ सर्वभूतानां त्वमेक आत्मा एधसां काष्ठानां ज्योतिरग्निरिव गूढो गुप्तो गुहाशयः सर्वान्तरः साक्षी महापुरुषः श्रीविष्णुरीश्वरः ॥ ११ ॥ आत्माश्रयः स्वाधीनः आत्मना स्वयमेव पूर्वमादौ मायया गुणान् ससृजे रचितवान् तैर्गुणैः सत्यसंकल्प ईश्वरस्त्वमिदं विश्वं सृजसि, अत्सि संहरसि, अवसि पासि ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

व्यसोः विगतप्राणस्य केशिनो देहात् महान्तौ भजौ यस्य स कृष्णः स्वभुजमपाकृष्य निःसार्य अविस्मितो गर्वरहित एवावस्थितः । तदा उत्स्मयैः तादृशदैत्यस्य अनायासेनैव वधादाश्चर्ययुक्तैर्दिविजैर्देवैः प्रसूनवर्षैः पुष्पवृष्टिभिः सह अभिष्टुतः स्तूयमानो जातः । 'महाबलपराक्रमस्य हनने कुतो न तस्य गर्वोऽभूत्' इत्यपेक्षायामाह—अयत्नहतारिरिति । अयत्नेनैव हतोरिर्येन सः । नहि तृणे छिन्ने वीरस्य गर्वो युक्तः, भगवतोऽग्रे तस्य तृणतुल्यत्वात् । ननु 'बालविघूर्णिताम्बुदम्' इत्युक्तस्तस्य महत्त्वमुक्तम्, तथा 'महाभुज' इति भगवतोऽपि तादृक्प्राणनिरोधकमहाभुजत्वमुक्तम्, तथाच तस्मिन् मृतेऽपि "ततो भुजनिःसारण एव महानायासः सम्भवति, कथमयत्नहतारित्वम्" इति शङ्कां दृष्टान्तेन निरस्यति—कर्कटिकाफलोपमादिति । कर्कटिकाफलं हि पक्वं विदीर्णं भवति, तद्वद्विदीर्णाद्देहादनायासेनैवाकृष्येत्यर्थः । 'प्रसूनवर्षैर्दिविषद्भिरीडित' इति पाठान्तरम् ॥ ९ ॥ 'नारदविज्ञप्तिः सावधानतया श्रोतव्या' इत्याशयेन सम्बोधयति—नृपेति । देवर्षिः देवपक्षपाती नारदः केशिवधानन्तरं रहसि एकान्ते कृष्णमुपसङ्गम्य एतद्वक्ष्यमाणमभाषतेत्यन्वयः । 'नारदस्यैतद्भाषणे किं प्रयोजनम् ?' इत्यपेक्षायां 'मथुरादिनिवासिभक्तमनोरथपूरणार्थम्' इत्याशयेनाह—भागवतप्रवर इति । 'भगवानपि तत्प्रार्थितं किमिति करिष्यति' इत्यपेक्षायां 'तस्यापि दुष्टवधसाधुरक्षाया अभिप्रेतत्वात्' इत्याशयेनाह—अक्लिष्टकर्माणमिति ॥ १० ॥ नारदोक्तिमेवाह—चतुर्दशभिः । आदरं सूचयति । सम्बोधयति—कृष्ण कृष्णेति । 'मया कंसं प्रति रहस्यसूचने कृतेऽपि तव भयं नास्ति' इत्याशयेन पुनः सम्बोधयति—अप्रमेयात्मन्निति । न प्रमेय आत्मा स्वरूपं यस्य सः । 'योगिनोप्येवंभूता भवन्ति, किं पुनस्तत्फलदाता' इत्याशयेन पुनः सम्बोधयति—योगेशेति । तत्र हेतुं सूचयन् सम्बोधयति—जगदीशेति । 'जगदीश्वरत्वं न केवलं नियन्तृत्वमात्रम्, किंतु तदाधारत्वमपि' इत्याशयेन सम्बोधयति—अखिलावासेति । 'वसुदेवपुत्रस्य तव वसुदेवरक्षाप्युचितैव' इत्याशयेन सम्बोधयति—वासुदेवेति । एतदवतारप्रयोजनमपि 'भक्तरक्षैव' इत्याशयेन पुनः सम्बोधयति—सात्वतां प्रवर भक्तानां पालकेति । एवं पूर्वोक्ते सर्वत्र सामर्थ्यं सूचयन् सम्बोधयति—प्रभो अचिन्त्यमायास्वामिन् ! ॥ ११ ॥ 'सर्वान्तरात्मत्वेनापि तव भयं नास्ति' इत्याशयेनाह—त्वमेक एव सर्वभूतानामात्मेति । 'तर्हि कुतो न तथात्वेन सर्वदृश्य' इत्याशङ्क्याह—गूढ इति । तत्र हेतुमाह—गुहाशय इति । तत्र दृष्टान्तमाह—एधसां काष्ठानामन्तर्ज्योतिरिवेति । 'सर्वबुद्धिवृत्तिज्ञश्च त्वम्, अतः किं बहु विज्ञापनीयम्' इत्याशयेनाह—साक्षीति । 'ब्रह्मादिसर्वाराध्यः सर्वोत्तमश्च त्वमेवासि' इत्याह—महापुरुष इति । तत्र हेतुमाह—ईश्वर इति । इष्टानिष्टफलदाने समर्थः ॥ १२ ॥

अन्वितार्थप्रकाशिका

तदिति ॥ व्यसोः विगतप्राणात् कर्कटिकाफलोपमात् कर्कटिकाफलं हि पक्वमत्यन्तं विदीर्णं भवति तद्वद्विदीर्णात् केशिनो देहात् अयत्नेनैव हतोऽरिर्येन स महाभुजः स कृष्णः स्वभुजमपाकृष्य निःसार्य अविस्मितो गर्वणाश्चर्येण च रहित एवावस्थितः । तदा उत्स्मयैः तादृशदैत्यस्यानायासेनैव वधादाश्चर्ययुक्तैः प्रसूनवर्षैः पुष्पाणि वर्षद्भिः श्रमहरणाय जलकणानि च वर्षद्भिः दिविषद्भिर्देवैरीडितः स्तूयमानो बभूव । प्रसूनवर्षैर्दिविजैरभिष्टुत इति पाठान्तरम् ॥ ९ ॥ देवर्षिरिति ॥ हे नृप ! भागवतेषु सर्वभूत-

सुहृत्सु प्रवरो देवर्षिः नारदः एतेन तस्य पिशुनत्वं निरस्तम् । रहसि एकान्ते अक्लिष्टेन क्लेशराहित्येनैव कर्माणि केशिवधादीनि यस्य तं कृष्णमुपसंगम्य एतद्वक्ष्यमाणमभाषत ॥ १० ॥ कृष्णेति द्वयम् ॥ हे कृष्णेत्यादीनि सम्बोधनानि । न प्रमेय आत्मा यस्य अपरिच्छन्नरूपत्वमेक एव सर्वभूतानामात्मा अन्तर्यामी एधसां काष्ठानामन्तर्ज्योतिरग्निरिव गूढः गुहाशयः साक्षी महापुरुषः विराडन्तर्यामी ईश्वरो महदादिस्रष्टा चासि । एतेन विष्णोस्तु त्रीणि रूपाणि इत्युक्तं रूपत्रयमुक्तम् ॥ ११-१२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अक्लिष्टं क्लेशरहितत्वादानन्दजनकं कर्म यस्य तं रहसि एकांते ॥९॥ अभक्तकरणैः अप्रमेय आत्मामूर्त्तिर्यस्य तत्सम्बुद्धिः हे अखिलावास सर्वव्यापक ॥ १० ॥ आत्मा अन्तःप्रविष्टः कथमिव राधसां काष्ठानां अन्तःप्रविष्टं ज्योतिरग्निर्यथा तथा तत्रस्थितोऽपिगूढः अज्ञजनादृश्यत्वात् गुप्तः गुहाशयः गुहायामक्षरयाम्रि आशेते तिष्ठतीति तथाभूतः अतः साक्षीसर्वद्रष्टा महापुरुषः पुरुषोत्तमः, अत ईश्वरः सर्वनियामकः ॥११॥ अधुना सर्वनियन्तृत्वं स्फुटं दर्शयन्नाह आत्मानेति आत्मना अक्षरपुरुषरूपेण त्वया पूर्वं इक्षितया मायया आत्माश्रयः स्वाधीनो भवान् गुणान् सत्वादीन् ससृजे सत्यसंकल्पस्त्वं तैगुणैः इदं विश्वं सृजसि अवसि च रक्षसि अत्सि नाशयसि ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति ॥ कर्कटिकाफलं उपमा यस्य तस्मात्, कर्कटिकाफलं हि पक्वं सत् स्वयमेव साद्यन्तं विदीर्णं भवति तद्वद्विदीर्णादित्यर्थः । व्यसोर्विगतप्राणात्, तद्देहतः केशिशरीरात्, महाभुजो भगवान् कृष्णः, भुजं स्वबाहुं, अपाकृष्य, अयत्नत एव हतोऽरिः शत्रुर्येन एवंभूतः सन्नपि, अविस्मितो विस्मयरहितः, उत्स्मयैरतिविस्मितैः, प्रसूनवर्षाणि पुष्पवर्षाणि वर्षद्भिः देवैः, ईडितः स्तूयमानः, बभूवेति शेषः । प्रसूनवर्षैर्दिविषद्भिरीडित इति पाठे, दिविषद्भिर्देवैः प्रसूनवर्षैः सह, ईडितः बभूवेत्यन्वययोजना ॥ ९ ॥ अथेत्थं हतकेशिने भगवते अनन्तरं कर्त्तव्यमावेदयद्देवर्षिरित्याह ॥ देवर्षिरिति ॥ ततः, हे नृप, भागवतप्रवरः भगवदेकान्तिकभक्तश्रेष्ठः, देवर्षिर्नारदः, अक्लिष्टकर्माणमुदारचेष्टितं, कृष्णं, रहस्येकान्ते, उपसंगम्य संप्राप्य, एतद्वक्ष्यमाणं, अभाषत उवाच ॥ १० ॥ तदेवाह ॥ कृष्णेति ॥ तत्र एकस्यैवानेककारकभावोपयुक्तगुणवत्तां वदन् सम्बोधयति । हे योगेश विविधविचित्रानन्तशक्ते, हे अप्रमेयात्मन् अपरिच्छेद्यस्वरूप, हे जगदीश्वर जगन्नियन्तः, हे वासुदेव, वासुदेवशब्दार्थं वदन् सम्बोधयति । हे अखिलाधार अखिलस्य ब्रह्माण्डतदन्तर्गतादिवस्तुन आधारभूत, अखिलमाधारो व्याप्यं यस्य तथाभूतेति वा । हे सात्त्वतां प्रवर, सात्त्वतामिति कर्त्तरि षष्ठी । सात्त्वतैर्भक्तैः प्रकर्षेण व्रीयमाणेत्यर्थः । हे प्रभो अकर्मवश्य, हे कृष्ण, हे कृष्ण ॥ ११ ॥ साम्प्रतं कृष्णस्यैव पारमार्थिकीं परमात्मतामुपपादयति ॥ त्वमिति ॥ सर्वभूतानां ब्रह्मादिस्थावरान्तानां महदादिपृथिव्यन्तानामिति वा । त्वमेव, आत्मा अन्तः प्रविश्य प्रशासनेन धारकः, एकः सर्वत्रैकरूपः, व्याप्यवस्तुगतविकाररहित इत्यर्थः । इदमेव हि परमात्मनस्तव परमात्मत्वं यत् सर्वत्रानुप्रवेशतद्गतधर्मास्पर्शनियमनैर्भर्त्तृत्वम् । एकत्वे दृष्टान्तमाह । एधसां काष्ठानां, ज्योतिः इव, यथैधसामन्तः स्थितं ज्योतिरेधोगतवक्रत्वादिभिर्न स्पृश्यते तद्वदित्यर्थः । यदि अहं सर्वभूतानामात्मा तर्हि तैर्भूतैः सह तत्प्रेक्षकैर्दृश्येय इत्यत आह । गूढः, अत्रापि एधसां ज्योतिरिवेति योज्यम् । यथैधस्सु ज्योतिरन्तर्गतमपि गूढं सन्न तैरेधोभिः सह तदीक्षकैर्दृश्यं तद्वदित्यर्थः । यथैधोगतं ज्योतिः गूढत्वान्मथनाद्युपायमन्तरेण ज्योतिष्कामैर्न तेभ्यो विविच्य दृश्यते प्राप्यते च, तथा योगविशुद्धमनसा विनात्मदर्शनकामैर्न दृश्य इति भावः । क्व गूढ इत्यत आह । गुहायां हृदयकुहरे शेते इति गुहाशयः । कारणत्वोपयुक्तं सार्वज्ञमाह । साक्षी सर्वस्य साक्षाद्द्रष्टा, सर्वज्ञ इत्यर्थः । अत एव, महापुरुषः ब्रह्मादिविलक्षणः पुरुष इत्यर्थः । ननु कथमहं ब्रह्मादिविलक्षणस्तत्राह । ईश्वरः ब्रह्मादीनामप्यधिपतिश्च, इति द्वयोः सम्बन्धः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तद्देहत इति : १०.३७.९.

बहुबीजा मनोमूर्तिरमला स्याद्यदा तदा । युक्तमेव महाभोगकरापाकर्षणं प्रभोः ॥ ४० ॥
पन्नखेनैव षडरिध्वंसं विदधता मया । बाहुनैष हतो दैत्यश्चित्रं नात्रेत्यविस्मितः ॥ ४१ ॥
केशिनस्तु पुरुषा यदाप्तये केशिनो भुवि भवन्त्यनेकशः । चित्रमेतदधिगम्य तं पुरा केश्यसौ हि यदकेशितां गतः ॥ ४२ ॥
अघारिनाममालासु केशिसूदन इत्यदः । प्रपिष्टमधिकं नामेत्यानन्दादस्तुवन्सुराः ॥ ४३ ॥
कुर्वन्तं वीक्ष्य तं शत्रुमनोऽपि सुमनोऽधिकम् । सुमनोवर्षुका एव युक्तं श्रीशं तदाऽस्तुवन् ॥ ४४ ॥

देवर्षिरिति : १७.३७.१०.

मत्तात्त्विकस्थितिमनेन निवेद्य शत्रोर्वृद्धौ वृथैव पितरौ निगडीकृतौ मे ।
एवं प्रभोर्मनसि जातुचिदागतं स्यात् तन्माष्टुं मुद्यतमनाः सरहस्तमागात् ॥ ४५ ॥

त्वमात्मेति ः १०.३७.१२.

नहि तादृग्रुट्शान्तिर्भवति विना तादृशीं नुतिं च नतिम् । आलोच्यैव मतीतानागतनुतिमृषिरवोच दुचितमिदम् ॥ ४६ ॥

कृष्णप्रिया

परिपक्व कर्कटिका फल-फूल के समान विदीर्ण हुए केशी के निष्प्राण शरीर से महाभुज भगवान् श्रीकृष्णजी ने अपना हस्त निकाल लिया । बिना श्रमकेशी असुर को मारने पर भी भगवान् को गर्व अथवा तो आश्चर्य नहीं हुआ । अन्तरिक्ष में रहे हुए देववृन्द भगवान् का सर्व पराक्रम का दर्शन करते हुए अत्यन्त आश्चर्य चकित बन गए । केशी वध से प्रसन्न देवगण भगवान् नन्दनन्दनजी की स्तुति करने लगे एवं पुष्पवृष्टि से अभिनन्दन करने लगे ॥ ९ ॥ राजन् परीक्षित ? इस अवसर पर परम भागवत देवर्षि श्री नारदजी भगवान् श्रीकृष्णचन्द्र के दर्शनार्थ आए और प्रभु के समीप में आकर एकान्त में स्तवन एवं निवेदन करने लगे ॥ १० ॥ हे पूर्णानन्द हे सदानन्द हे नन्दनन्दन हे श्रीकृष्ण ! हे अप्रमेयात्मन् ! प्रमाणज्ञान से पर हे भगवन् ! आप के आत्मस्वरूप का ज्ञान केवल आप की कृपा से होगा इसलिए आप की आत्मा अप्रमेय है, हे योगीश ! हे जगदीश ! हे वासुदेव ! आप सर्व वस्तुओं में व्याप्त है एवं सर्व वस्तु आप में समाप्त हो अखिल विश्व के निवास स्थान हे अखिलाश्रय ! हे यादव श्रेष्ठ ! हे प्रभो ! आपके चरणों में प्रणाम ॥११॥ काष्ठकोठरे में जैसे अग्नि ओत प्रोत है, वैसे ही आप सर्वप्राणियों के भीतर आत्मा के रूप में आष ओतप्रोत है विराजमान है फिर भी आप मूढ है इसलिए लोग आप का दर्शन नहीं कर पाते । आप प्राणीमात्र की बुद्धि गुहा में भीतर रहने वाले और साक्षी है । आप महापुरुष है एवं शासक-ईश्वर है ॥ १२ ॥

आत्मनाऽऽत्माश्रयः पूर्वं मायया ससृजे गुणान् । तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः ॥१३॥
स त्वं [1]भूधरभूतानां दैत्यप्रमथरक्षसाम् । अवतीर्णो विनाशाय साधूनां[2] रक्षणाय च ॥१४॥
दिष्ट्या ते निहतो दैत्यो लीलयायं हयाकृतिः । यस्य हेषितसंत्रस्तास्त्यजन्त्यनिमिषा दिवम् ॥१५॥
चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिनम् । कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभो ॥१६॥

कर्दमक्षमा

अन्वयः—(भवान्), सत्यसङ्कल्पः, आत्माश्रयः, पूर्वम् , आत्मना, मायया, गुणान् , ससृजे, तैः, इदम् , सृजसि, अत्सि, अवसि, (यतः हि) ईश्वरः ॥ १३ ॥ सः, त्वम् , भूधरभूतानाम् , दैत्यप्रमथरक्षसाम् , विनाशाय, च साधूनाम् , रक्षणाय, अवतीर्णः, (अस्ति) ॥ १४ ॥ यस्य, हेषितसंत्रस्ताः, अनिमिषाः, दिवम् , त्यजन्ति, (सः) अयम् , हयाकृतिः, दैत्यः, ते, लीलयानिहतः, दिष्ट्या ॥ १५ ॥ हे विभो ? चाणूरम् , मुष्टिकम् , मल्लान् , अन्यान् , (धनुरक्षकान्) हस्तिनम् , कंसम् , परश्वः, अहनि, ते (भवता) निहतम् , द्रक्ष्ये, च, (युद्धम्) द्रक्ष्ये, च (कंसभातॄन्) मृतान् , द्रक्ष्ये ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रस्तुतमाह । स त्वमिति । भूधरभूतानां भुवं धरन्तीति भूधरा राजानस्तद्रूपाणाम् ॥१३-१४॥ परश्वोऽह्नीति । अद्यवाक्रूर एष्यति श्वो मथुरां गन्ताऽसि परश्वश्चाणूरादींश्च ते त्वया निहतान् द्रक्ष्यामीति सिद्धवन्निर्देशो विज्ञापनप्रकारविशेषः ॥ १५ ॥ तस्यानु तदनन्तरम् । शंखादीनाम् । शंखः शंखजनः । वधं द्रक्ष्यामीति शेषः । भाविनिर्देशमात्रमेतन्न त्वानन्तर्यं विवक्षितम्॥१६-१७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रस्तुतं प्रकृतम् । प्रमथा रुद्रगणास्तेषामपि बाणासुरयुद्धे नाशनात् । 'प्रमथाः स्युः पारिषदाः' इत्यमरः ॥ अधुना लीलामनुक्रामन्नवतारे कारणमाह-स त्वमिति । दैत्यानां स्वभक्तिविरुद्धानाम् । साधूनां स्वभक्तिप्रवर्तकानाम् । पाठान्तरे सेतूनां स्वभक्तिमर्यादानाम् । प्रमथा राजरूपाः काशिराजादय एव । यद्वा-बाणासुर सहाय्यार्थमागतरुद्रेण युद्धे साक्षादेव प्रमथा रुद्रपार्षदा ग्राह्याः ॥ १३ ॥ अयं केशी । लीलयाश्रमेणैव । यस्य केशिनः । अनिमिषा देवाः 'सुरमत्स्यावनिमिषौ' इति यादवः ॥ तत्र पूतनादयो ये हतास्तेऽपि दुष्टा एव किं त्वयं परमदुर्मार इत्याह-दिष्ट्येति । अयमधुना साक्षादेवेत्यर्थः । अतस्त्वं केशवनामा भविष्यसीति शेषः । "यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन । तस्मात्केशवनामा त्वं लोके गेयो भविष्यसि" ॥ इति विष्णुपुराणोक्तेः ॥ १४ ॥ योगबलेन भाविनोऽर्थान्वक्ति-चाणूरमित्यादि । ते त्वया निहतान् । सिद्धवत्संजातवत् । निर्देशः कथनम् । कर्तुरुत्साहवर्धकत्वने बोधननैपुण्यमित्यर्थः ॥ स्वस्य तल्लीलाभिज्ञतां विवृन्भविष्यं विवृणोति-चाणूरमित्यादि । अप्यर्थ चकाराः सर्वैः सह योज्याः, तैश्च चाणूरादीनामवश्यबध्यत्वं सूचितम् । मल्लानन्यान्कंकन्यग्रोधादींश्च । हे विभो प्रभो त्वं सर्वं कर्तुं समर्थोऽसीति भावः । विभुप्रभू च पर्यायौ ॥ १५ ॥ आनन्तर्यं क्रमो नात्र हनने ज्ञेयमिति ॥ १६ ॥

---

१. भूभार-वीर. ; भूभर विज. । २. सेतूनां-श्रीधर. वंशी. ; साधूनां-जीव. वीर. विज ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवमुभयरूपं दर्शयित्वा लीलामनुक्रामन् निजरूपावतारे कारणमाह । स त्वमिति । तादृशोऽपि त्वं दैत्यादीनां स्वभक्तिविरुद्धानां साधूनां स्वभक्तिप्रवर्त्तकानां पाठान्तरे सेतूनां स्वभक्तिमर्य्यादानां राजरूपाः प्रमथाः काशिराजादयः ॥ १३ ॥ तत्र पूतनादयो ये विनाशितास्तेऽपि दुष्टा एव किन्त्वयं परमदुर्मार इत्याह । दिष्ट्येति । अयमधुना साक्षादेवेत्यर्थः । अतस्त्वं केशव नामा भवितासीति शेषः । तथा च तेनोक्तं श्रविष्णुपुराणे । यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्द्दन ! तस्मात् केशवनामा त्वं लोके गेयो भविष्यसीति ॥ १४ ॥ अथ स्वस्य तल्लीलानुक्रमाभिज्ञतातिशयं विज्ञापयन् भविष्यं विवृणोति । चाणूरमित्यादिभिः । अप्यर्थे चकाराः सर्वैः सह योज्या तैश्च चाणूरादीनामवश्यं वध्यत्वं सूचितम् । द्रक्ष्ये द्रक्ष्यामि मल्लानिति बहुत्वं कङ्कन्यग्रोधादीनपि विप्रो ॥ १५ ॥ तस्येति पञ्चकम् । शङ्खादीनां वधमिति शेषः । इत्यादीनां द्रक्ष्याम्यहं तानीति वक्ष्यमाणेनान्वयः । वीराः क्षत्रियेषु शूराः तत्कन्यानां हे वीरेति वा । प्रायः स्ववोर्य्येणैवोद्वहनात् अत एवाह वीर्यं पराक्रमः तदेव शुल्कम् आदि शब्देन कन्याभक्त्यादि । तदेव लक्षणं प्रकारो यस्य तं तत्र क्वचित् समुदितं क्वचित्तु केवलभक्तिः यथा कालिन्द्यादेरिति ज्ञेयं पापात् विप्रगोहरणजातात् शापादिति पाठस्तु श्रीशुकसम्मतः । अग्रे शापाकथनात् । तत्र द्वारकायामिति यथार्थं पूर्वत्र परत्र च योज्यमिति द्वारकाप्रयाणमपि सूचितं हे जगत्पते ! इति तत्रेन्द्राद्यागमनेन साक्षाद्गरुडारोहणादिना च तादृशैश्वर्य्यप्रकाशनात् ॥ १६-१७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स ईदृगसाधुसाधुमयजगत्सृष्ट्यादिकरोऽपि त्वम् , राजरूपाः प्रमथाः काशिराजादयः, वि-शब्दोऽत्यन्ताभावलक्षणमोक्षाभिप्रायेण । अतस्त्वद्द्रक्ष्यसाधुवरबन्धनेन मम महापराधो जात एवेति भावः ॥ १३ ॥ त्वन्त्वपराधमगृह्णन् मादृशां हितमकरोः करिष्यसि चेत्याह—दिष्ट्येत्यष्टभिः । अयमधुना साक्षादेवेत्यर्थः । लीलयैव ते त्वया नितरां हतो मोक्षदानेन पुनरावृत्तिशंकानिवृत्तेः । एतद्दिष्ट्या भद्रं जातम् , अतोऽन्येऽपि चाणुरादयो लीलयैव हन्तव्या इति भावः । महादुष्टत्वमेव दर्शयति-यस्येति । हेषितैरपि सम्यक् त्रस्ताः सन्तः, अनमिषा अमरत्वात् कालभयरहिता अपीत्यर्थः । यद्वा, तदागमनं शङ्कमानाः सदेतस्ततः एकदृष्ट्या निरीक्षमाणा अन्वर्थसंज्ञका जाता इत्यर्थः । अतस्त्वं केशवनामा भवितासीति शेषः । तथा च श्रीविष्णुपुराणे (५।१६।२३) 'यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्द्दन । तस्मात् केशवनाम्ना त्वं लोके गेयो भविष्यसि' ॥ इति, एवं श्रीहरिवंशेऽपि (विष्णु पु० २४।६५) अत्र च स्पष्टं तदनुक्तिः, सुप्रसिद्धत्वात् ॥ १४ ॥ अप्यर्थे चकाराः सर्व्वैः सह योज्याः, तैश्च चाणुरादीनामवश्यवध्यत्वं सूचितम् । द्रक्ष्य एवेत्यन्वयः । तच्च विज्ञापनचातुर्य्यमेव, यद्यपि शल-तोषलकौ द्वावेत्यन्वयः । तच्च विज्ञापनचातुर्य्यमेव, यद्यपि शल-तोषलकौ द्वावेवान्यौ मल्लौ हतौ, तथापि मल्लानन्यांश्चेति बहुत्वं मल्लाचार्य्यादीनां भंगेन मरणतुल्यत्वात् , किं वा महामात्रादीनामपि परमबलिष्ठत्वेन मल्लेष्वेव गणनात् , ते त्वया । ननु एकदैव बहूनां तेषां वधोऽसम्भाव्यः ? तत्राह—प्रभो हे सर्व्वं कर्त्तुं समर्थेति । यद्वा, अतित्वरया कथं तत् कर्त्तव्यम् ? तत्राह—प्रभो हे यादवादीनां मादृशामीश्वर ! भक्तहितार्थमित्यर्थः, वक्ष्यमाण चाणुरादिवधक्रमस्यातिक्रम उपकृति कथनमात्रेण क्रमे तात्पर्य्याभावात् ॥ १५ ॥ तस्येति तैर्व्याख्यातम् , तत्र वधमिति शेषः । लिखितेऽपि द्रक्ष्य इति पूर्व्वेण द्रक्ष्यामीति परेण वान्वयो भवेदेव, तथापि द्रक्ष्यामीति लिखनं सुखबोधार्थम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्र पालनं स्वावतारैः मन्वादिरूपेण चेत्यनेकविधं तत्र स्वावतारेण पालनं दुष्कृद्विनाशपूर्वकमित्यभिप्रेत्याह । सत्वमिति । स उक्तविधस्त्वं भुवो भारभूतानां दैत्यादीनां विनाशाय साधूनां रक्षणाय चावतीर्णः प्रमथा रुद्रभूतानि रक्षणाय चेति चशब्दो विनाशायेत्यननोन्वेतव्यः सचान्वाचयद्योतकः दुष्कृद्विनाशनमानुषङ्गिकमवतारप्रयोजनं सङ्कल्पमात्रेणापि तत्सिद्धेः साधुपरित्राणमेव परमप्रयोजनमिति बोध्यम् ॥ १३ ॥ एवंविधस्य तवाचिन्त्यप्रभावस्येदं केशिहननमुचितमेवेत्यभिनन्दति । दिष्ट्येति । अयमश्वाकृतिदैत्यः केशी लीलयैव ते त्वया हतः दिष्ट्याऽयमस्माकं महानानन्द इत्यर्थः । लीलया हत इत्यनेन दुर्वधोऽपि लीलया इत्येतदद्भुतमित्यभिप्रेतं दुर्वधत्वमेव व्यनक्ति । यस्य केशिनो हेषितेन संत्रस्ता नितराम्भीताः सन्तोऽनिमिषा इन्द्रादयो दिवं त्यजन्तीति ॥ १४ ॥ कर्तव्यमावेदयति । चाणूरमित्यादिना । अद्यैवाहन्यक्रूर एष्यति श्वो मथुरां गन्तासि परश्वश्चाणूरादींस्त्वया निहतान् द्रक्ष्यामि इति सिद्धवन्निर्देशो विज्ञापनप्रकारविशेषः ॥१५॥ तस्यानु तदनन्तरं शङ्खादीनां नरकस्य च वधमिति शेषः । द्रक्ष्ये इत्यनुषङ्गः शङ्खः पञ्चजनः भाविनिर्देशमात्रमेवैतन्न त्वानन्तर्यं विवक्षितं यानि पारिजातापहरणादीनि यानि च द्वारकामधिवसन् भवान् वीर्याणि चेष्टितानि कर्त्ता करिष्यति तानि सर्वाणि कविभिरस्मदादिभिर्गेयान्यहं द्रक्ष्यामीति सम्बन्धः ।१६।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अवनप्रकारं दर्शयति । सत्वमिति ॥ १३ ॥ अनिमिषा देवाः सुरमत्स्यावनिमिषाविति च ॥ १४ ॥ स्वोक्तार्थे वचनं प्रमाणयितुं भाविनमर्थं दिव्यचक्षुषोपलभ्य वक्ति । चाणूरमित्यादिना ते तव करेण ॥ १५ ॥ यथेदानीङ्केश्यादिहननं प्रत्यक्षं

भवत्येवमेव कालान्तरे क्रियमाणमपि कर्म दृग्विषयं भविष्यतीति भावेनाह। तस्येति तस्य कंसस्य अनु अनन्तरं शङ्खादीनां हननमिति शङ्खः पञ्चजनासुरः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मल्लानिति बहुत्वं कङ्कन्यग्रोधादीनामपि तदन्तः पाताय ते त्वया ॥ १५–२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अत एव निवेदनरूपं स्वकृत्यं करोम्येवेत्याह। स जगत्स्रष्टा त्वं भूधरा राजानस्तद्रूपाणाम् ॥ १३ ॥ दिष्ट्या लोकानां भाग्येन ॥ १४ ॥ पूर्वपूर्वदृष्टत्वदवतारलीलाक्रममहमेवं जानामीत्याह। चाणूरमिति ॥ १५ ॥ शङ्खः पञ्चजनः। भावि निर्देशमात्रमेतत् नत्वानन्तर्य्यमात्रं विवक्षितम् ॥ १६–१७ ॥

गूढार्थदीपिनी

आत्माश्रयः स्वतन्त्रः। आत्मना पुरुषेण प्रेरितया मायया इदं विश्वम् तैर्गुणैः अत्सि संहरसि ॥ १३ ॥ भुवं धरन्तीति भूधराः राजानः तद्रूपाणाम्। सेतूनां धर्ममर्यादाम् ॥ १४ ॥ दिष्ट्येति मङ्गलार्थेऽव्ययम्। हेषितेन शब्देन अनिमिषा देवा दिव स्वर्गम् ॥ १५ ॥ ते त्वया निहतम् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स उक्तप्रकारस्त्वं भुवं धरन्तीति भूधरा भूपास्तद्रूपाणां दैत्यादीनाम् ॥ १३ ॥ अयं केशी ते त्वया दिष्ट्या निहतः ॥१४॥ परश्व इति अर्थात् अद्याक्रूर एष्यति श्वो मथुरां गन्तासि परश्वस्तु ते त्वया चाणूरादीन् निहतान् द्रक्ष्ये द्रक्ष्यामि क्रमोऽत्र हस्त्यादिवधे न विवक्षितः ॥ १५ ॥ तस्य चरितस्य अनु अनन्तरं शङ्खवधादिकं यानि चान्यानि वीर्य्याणि द्वारकामावसन् कर्ता तानि च द्रक्ष्यामीति पञ्चमेनान्वयः शङ्खः पञ्चजनः यवनः कालयवनः मुरश्च तेषां वध पौण्ड्रकस्य वधमिति वधशब्दस्यात्राप्यन्वयः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

साक्षादधोक्षज एव भवान्भुव्येतदर्थमवतीर्ण इत्याह ॥ आत्मन्सर्थस्वामिन्निति। पूर्वमादौ मायया स्वेच्छया निमित्तभूतया मायया प्रकृत्योपादानभूतया गुणांस्त्रीन्सृजसे सृजसि तैः स्वसृष्टैर्गुणैरिदं जगत्सृजस्यवस्यत्सि भक्षयसि च। ईश्वर इत्येतत्सम्भावकं नान्याश्रय इत्याह ॥ आत्माश्रय इति। स्वाश्रयः स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति श्रुतिः। आत्मनेति पाठे स्वेनैव प्रेरकव्यतिरेकेण। यद्वाऽऽत्मनां चेतनानां नात्मनां जडानां चाश्रय इत्यर्थः। प्रतिज्ञाप्रतिहतिर्नास्तीति सत्यसङ्कल्प इति ॥ १३ ॥ तत्रावनानवनेऽधिकार्यानुगुण्येन कर्तुं विश्वभर्तुस्तवावतार इत्याह ॥ स इति। स भगवद्रूपस्त्वं गोपरूपो भूभाररूपदैत्यप्रमथरक्षसां विनाशय साधूनां रक्षणाय चावतीर्णोऽसि ॥ १४ ॥ मुने नाधुना मया तदनुष्ठितमिति न वदेति कृतं किञ्चिदुदाहृत्य भाविनं व्यापारमपारविदाह ॥ दिष्ट्येति अयं हयाकृतिर्दैत्यो दैत्यस्वरूपो लीलया ते त्वया हत इति दिष्ट्या मुखं जातम्। किं तन्महत्त्वमित्यत आह ॥ अस्येति। हेषितात्सन्त्रस्त अनिमिषा दिवं त्यजन्ति। तद्भूस्तावत्पर्य्यन्तं स्वरभीरभूदिति भावः ॥ १५ ॥ स्वयं यत्पीठिकादृढीकृत्यायातस्तमर्थमाह ॥ चाणूरमिति। मुष्टिकोक्तिस्तु बलोऽप्युपलतुलस्त्वमेव तत्र स्थित्वा हंसीति ध्वनयितुमिति ज्ञेयम्। तोषपारवश्येन कथापौर्वापर्यमिति तात्पर्यं ज्ञेयम्। अन्यांस्तोसलादीन्हरितपांस्तदादीन्परश्वोऽहनि कंसं च निहतं द्रक्ष्ये पश्यामि। न च स्वोक्ताधिकरणदिनापेक्षया चतुर्थेति जातस्य कंसहिंसनस्य कंसं च निहतं द्रक्ष्ये परश्वोऽहनि त इति परश्वो दर्शनोक्तिर्नास्य निर्युक्तिकेति वाच्यम्। परश्व इत्यस्य पराभ्यां श्वोत्तराभ्यां तिथिभ्यां सहितं श्व इति विग्रहकरणे विवक्षितस्य चतुर्थस्याहोलाभसम्भवात्। यद्वा ते त्वां परश्वो मधुरायां द्रक्ष्येऽहनि तदितरेऽहनि निहतं कंसं च द्रक्ष्य इति योजनायामभिलषितसिद्धेः। अथवा परश्व इति भिन्नलाभे तच्च योग्यतया चतुर्थमेवाहा गृहीतुं शक्यत्वात् ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एतस्मिन्नर्थे हेतुं वदन् एतदर्थमेव त्वमवतीर्ण इति सेवकैरपि तदनुगुणमेव कर्त्तव्यमिति न ममापराध इति वक्तुमाह। स त्वमिति। भूधरा राजानः ते भूमारका एव भूपालकत्वेन जाताः वस्तुतो दैत्याः तेषु सात्त्विका प्रमथा यक्षा राजसाः रक्षांसि तामसानि एते त्रयोऽपि सर्वनाशकाः नहि नाशकैः पालनं सम्भवति अतः केवलं पर्वतभूताः भाराय जाताः तेषां नाशाय अवतीर्णो भगवान् तेन भूमेर्भारो गच्छति साधवश्च परिपालनीयाः अराजके राज्ये साधूनां परिपालनं न सम्भवति अरक्ष्यमाणाः सर्व एवासाधवश्च भवन्ति। अतः प्रकारान्तरेण दैत्यवधेऽपि न कार्यं सिध्यति सर्वेषां वधे प्रलय एव स्यात् अतो राजानो विधायैव दैत्या हन्तव्याः अतो भगवान् स्वयमवतीर्णः साधूनां रक्षणार्थं च चकारात् भक्त्यर्थं च अतस्तदनुगुणं सेवकैरपि कर्त्तव्यमिति मयापि कर्त्तव्यमिति भावः ॥ १३ ॥ एतन्निदर्शनं वदन् भगवता साम्प्रतं कृतमनुमोदति दिष्ट्येति। त्वया अयं महान् नितरां हतः हय

इत्याकृतिमात्रं वस्तुतो दैत्यः लीळयेति । स्वयंपीडाञ्च नाप्नुवन् अन्यथा पीडायामपि सेवकस्यापराध एव स्यात् अत एव दिष्ट्या मम महद्भाग्यं ननु तुच्छोनायासेनैव मार्यते किमाश्चर्यमित्याशङ्क्याह । यस्येति । हेषितेन संत्रस्ताः अनिमिषा अपि दिवन्त्यजन्ति ज्ञानशक्तिः स्थिरा अनिभिषाणां तेषामपि भयेन तन्नाशो निरूप्यते किञ्च निमिषोऽपि येषां नास्ति तेषां मूर्च्छादिकमसम्भावितमिति भयं सर्वथा अयुक्तं तेषामपि हेषितमात्रेण भयं जनयति तदपि भयं महत्कार्यं करोतीत्याह । दिवमपि त्यजन्तीति । अत आयासः कृतो भवेत् स न कृत इति महद्भाग्यम् ॥ १४ ॥ अन्यदप्यग्र भविष्यतीति तदहं सर्वं द्रक्ष्यामीति मया मत्सुखार्थमेवैतत् कृतमिति स्वौत्सुक्यं प्रकटयन् स्वस्यापि दोषं स्वयमेव निवेदयन् आह । चाणूरमिति । योगजधर्मज्ञानेन सर्वात्मना सर्वं विषयीकरोतीति ज्ञापनार्थं व्युत्क्रमेण वर्ण्यते अन्यथा हास्तेयः प्रथमहतः नृगः पश्चात् प्रथमञ्च स्यमन्तकः ततोऽपि पूर्वं मृतपुत्रोपादानं मुष्टिकचाणूरयोः प्रधानत्वात् कीर्त्तनं वलभद्रेणापि मारितो योगजधर्मात् भगवदावेशाच्च भगवत्कृत एवेति ज्ञायते निहतं युद्धं चेति चकारार्थः अद्य सन्ध्यायामक्रूरः समायास्यति श्वो गन्तव्यं मथुरायां परश्वो हन्तव्या इति । तदप्यह्न्येव नतु रात्रिपर्यन्तमपि विलम्बः उपलक्षणमेतत् पूर्वाह्ण एव मल्लाः शलादयः अन्ये च धनूरक्षकाः चकारात् कंसभ्रातरश्च नारदत्वात्समनोरथः विभो इति सम्बोधनं सर्वथा तथा भविष्यतीति निश्चयार्थम् ॥ १५ ॥ न केवलं कंसं हत्वा निवृत्तो भविष्यसि किन्तु अन्यानपि मारयिष्यसीति तान् गणयति । तस्य कंसस्य वधमनु शङ्खः पञ्चजनः यवनः कालयवनः मुरो नरकमित्रमेतेषां वधं द्रक्ष्यामीति सम्बन्धः एते त्रयः सात्विकराजसतामसभेदाः नरकस्य च तथा वधं द्रक्ष्यामीति सम्बन्धः । अयं भगवत्पुत्रो विशिष्ट इति प्रथमं निरूपितः चकारादन्येऽपि तत्सेवकाः पीठादयः ततो वधं परित्यज्य केवलं जयं वक्तुं निमित्तफलान्याह । पारिजातस्य हरणं निमित्तमिन्द्रस्य पराजयः ॥ १६ ॥

श्रीसुबोधिनी–सारः

भूधराः पर्वतास्तद्रूपाणां दैत्यादीनां विनाशार्थं धर्मसेतूनां रक्षणार्थं च त्वमवतीर्णोऽसि ॥ १३ ॥ हयाकृतिरश्वाकारोऽयं दैत्यः केशी ते त्वया लीलया निहतः । दिष्ट्या मंगलं जातम् यस्य हयरूपिणः ह्रेषितात् शब्दात्संत्रस्ता उद्विग्ना अनिमिषा देवा दिवं स्वर्गं त्यजन्ति ॥ १४ ॥ हे प्रभो परश्वोऽहनि अग्रेतनदिनेषु ते त्वया निहतं चाणूरं मुष्टिकम् अन्यान् मल्लान् हस्तिनं कंसं च द्रक्ष्यामि ॥ १५ ॥ तस्यानु तदनन्तरं शंखादीनां च मृत्युं द्रक्ष्ये नरकस्य भौमस्य च पारिजातस्य कल्पवृक्षस्यापहरणमुत्पाटनमानयनं वा इन्द्रस्य पराजयं च द्रक्ष्ये ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'सर्वाधारस्याप्याधारः कश्चिदन्यः स्यात्' इत्याशङ्क्याह–आत्माश्रय इति । उक्तं जगदीश्वरत्वमेव स्पष्टयति–आत्मना स्वरूपभूतया मायया प्रकृत्या पूर्वं सत्त्वादिगुणांस्त्वं ससृजे, तैश्च गुणैरिदं विश्वं सृजसि उत्पादयसि, अवसि रक्षसि, अत्सि उपसंहरसि अतस्त्वं जगदीश्वरः । 'तत्रापि तवायासो नास्ति, सङ्कल्पेनैव कर्तृत्वात्' इत्याह–सत्यसङ्कल्प इति ॥ १३ ॥ 'सात्वतां प्रवर' इत्यनेन सूचितमवतारप्रयोजनं स्पष्टयति–स इति । स परमेश्वर एव त्वं भूधरभूतानां भुवं धरतीति भूधरा राजानः तद्रूपाणां दैत्यादीनां विनाशाय, सेतूनां धर्ममर्यादारूपाणां साधूनां रक्षणायावतीर्णोऽसीत्यन्वयः ॥ १४ ॥ उपलक्षणविधया केशिवधमभिनन्दति–दिष्ट्येति । अयं हयाकृतिः अश्ववेषधरो दैत्यस्ते त्वया निहतः तत् दिष्ट्या । तेन सर्वेषां भद्रमेव जातमित्यर्थः । 'कुत' इत्यपेक्षायां तस्य भयंकरत्वमाह–यस्येति । यस्य हेषितेन शब्दमात्रेण सन्त्रस्ता भीताः सन्तः अनिमिषा देवाः दिवं स्वर्गं त्यजन्ति स्म । ईदृशस्यापि हनने यदि भगवतः प्रयासः स्यात्तदापि भक्तानां तदायासस्मरणेन तादृश आनन्दो न स्यात् , सोऽपि न जातोऽतो महानानन्द इत्याशयेनाह–लीलयेति ॥ १५ ॥ 'एवं व्रजे यत् कर्तुमुचितं तद्भवान् कृतवान् , इत्युक्त्वा इदानीं चाणूरादिदुष्टहननेन वसुदेवादिभक्तरक्षां कुर्विति भाव्यपि योगजज्ञानेन सिद्धवत् कृत्वा विज्ञापयति–चाणूरमित्यादिना । अद्यैवाऽक्रूर एष्यति, श्वो मथुरां गन्तासि, परश्वश्चाणूरादींस्त्वया निहतान् द्रक्ष्यामि । हे प्रभो समर्थः ! ॥ १६ ॥

अन्वितार्थप्रकाशिका

आत्मनेति ॥ आत्माश्रयः स्वतन्त्रः सत्यसङ्कल्पः कारकापेक्षारहितः संकल्पमात्रेण सृष्ट्यादिकरः ईश्वरः त्वम् आत्मना स्वाभिन्नया मायया शक्त्या पूर्वं गुणान् ससृजे । तङार्षः । तैर्गुणैश्च इदं विश्वं सृजसि अवसि अत्सि चेति ॥ १३ ॥ स इति ॥ स परमेश्वर एव त्वं भूधरभूतानां भुवं धरन्तीति भूधरा राजानः तद्रूपाणां दैत्यादीनां विनाशाय सेतूनां धर्ममर्यादारूपाणां साधूनाम् क्वचित्साधूनामित्येव पाठः । रक्षणाय चावतीर्णोऽसि ॥ १४ ॥ दिष्ट्येति ॥ यस्य हेषितेन शब्दमात्रेण संत्रस्ता भीताः सन्तः अनिमिषा देवाः दिवं स्वर्गं त्यजन्ति स्म सोऽयं हयाकृतिर्दैत्यः केशी ते त्वया लीलया निहतः । तद्दिष्ट्या भद्रं जातम् । दिष्ट्या लोकानां भाग्येन निहत इति वा ॥ १५ ॥ चाणूरमिति ॥ हे विभो ! अद्यैवाक्रूर एष्यति श्वो मथुरां गन्ताऽसि परश्वः अहनि चाणूरं मुष्टिकम् अन्यान् मल्लान् शलादीन् हस्तिनं कंसं च ते त्वया निहतं द्रक्ष्ये । तङार्षः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भूधरभूतानां भूधराः पृथिवीधारकाः राजानस्तद्भूतानां तद्रूपाणां विनाशाय ॥ १३ ॥ अनिमिषाः देवाः ॥ १४ ॥ हस्तिनं कुवलयापीडं परश्वोऽहनि तृतीये दिवसे एतान् हतान् द्रक्ष्ये द्रक्ष्यामि ॥ १५ ॥ तस्य कंसस्य अनुपश्चात् शंखादीनां वधमिति शेषः द्रक्ष्यामीति पञ्चमश्लोकस्थेन सम्बन्धः शंखः पञ्चजनो दैत्यः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आत्मनेति ॥ यतस्त्वमेवंभूतस्ततः, हे ईश्वर, सत्यसंकल्पः त्वं, आत्माश्रयः सन्नेव, आत्मना स्वशरीरभूतया स्वशक्तिरूपया वा, मायया, यद्वा । आत्मना स्वत एव, मायया स्वसंकल्पेन, पूर्वं गुणान् स्वशरीरभूतान्महदादिपृथिव्यतानित्यर्थः । सृजसे । ततः तैर्गुणैः, इदं परिदृश्यमानं विचित्रसंनिवेशविशिष्टं ब्रह्मादिस्तम्बपर्यन्तं जगदित्यर्थः । सृजसि, अवसि पालयसि, अत्सि संहरसि च ॥ १३ ॥ तत्र पालनं स्वावतारैर्मन्वादिरूपेण चेत्यनेकविधं तत्र स्वावतारेण पालनं स्वकीयसाधुपरित्राणं तच्च तेषां द्रोहकर्तृ दुष्कृतिविनाशपूर्वकमित्यभिप्रेत्याह ॥ स त्वमिति ॥ स उक्तविधः त्वं, भूभारभूतानां केवलं पृथिव्या भाररूपाणां, दैत्याश्च प्रमथा रुद्रभूतानि च रक्षांसि च तेषां, विनाशाय, साधूनां रक्षणाय च, अत्र साधुशब्देन न केवलं त्यागिन एव किन्तु साधवो धर्मशीलाः स्वस्वधर्मस्थितिपूर्वं भगवदाश्रयं कृत्वा तमेकान्तिकभावेन भजतः शरीरिण इत्यर्थः । अवतीर्णः ॥ १४ ॥ एवंविधस्य तवाचिन्त्यप्रभावस्येदं केशिहननमुचितमेवेत्यभिनन्दति ॥ दिष्ट्येति ॥ हयाकृतिरश्वाकृतिः, अयं दैत्यः केशी, ते त्वया, लीलया लीलामात्रेणैव, निहतः । दिष्ट्या अनेनास्माकं महानानन्द इत्यर्थः । लीलया हत इत्येतदद्भुतमित्यभिप्रेतम् । अस्य दुर्वध्यत्वं व्यनक्ति । यस्य केशिनः, हेषितेन संत्रस्ता नितरां भीताः सन्तः, अनिमिषा इन्द्रादयो देवाः, दिवं स्वर्गं, त्यजन्ति, तथाभूतः स त्वया निहत इति सम्बन्धः ॥ १५ ॥ साम्प्रतं कर्त्तव्यमावेदयति चाणूरमित्यादिना ॥ चाणूरमिति ॥ हे प्रभो, अहन्यस्मिन्दिन एव अक्रूर एष्यति श्वो मथुरां गन्तासीति शेषः । परश्वः, चाणूरं मुष्टिकं च अन्यान् मल्लांश्च, हस्तिनं कुवलयापीडगजं, कंसं च, ते त्वया निहतं एव, निहतानित्यपि पाठः । द्रक्ष्ये द्रक्ष्यामि । एष सिद्धवन्निर्देशो विज्ञापनप्रकारविशेषः ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स त्वमिति : १०.३७.१४.

तत्त्वं रूपमलं ह्यवाङ्मनसगं प्राहुस्तवाधोक्षज श्रुत्यर्थानुभवार्कफुल्लहृदयाम्भोजा हि वाचंयमाः ।
पश्यन्नेवमशेषघोषजनुषां दृक्तोपपोषावहं रूपं वृत्तिविशारदं त्वहमितः किं वा दधाम्यन्तरे ॥ ४७ ॥
मुनिवर यदगास्त्वं तत्पुरे स्वैरवृत्त्या मनसि किमपि बीजं न्यस्य वा तस्य पुण्यात् ।
यदकलुषजनेषु प्रायशस्तद्विधानां गतिरिति विभुचित्तं तर्कयन्नात्मनाऽऽह ॥ ४८ ॥
न स्वैरवृत्तितस्तस्य पुण्याद्वा किं तु दुर्मतेः । पुण्यावशेषवीक्षार्थं तत्क्षत्यै च गतोऽस्म्यहम् ॥ ४९ ॥

दिष्ट्या ते निहत इति : १०.३७.१५.

हन्ता हनिष्यस्यपि चासुरान् परान् परं त्वहन्तामयमूर्तिरेष हि ।
हयाकृतिर्हन्त हतोऽद्य यत्त्वया निरामयास्तेन मया सहामराः ॥ ५० ॥

चाणरमिति : १०.३७.१६.

या कंसाय निवेदिता यदुपते त्वद्गोकुलावस्थितिस्त्वत्प्राणौ पितरौ च यत्सनिगडौ कारागृहं प्रापितौ ।
आलोच्यैव समग्रतः कृतमिति स्वोक्तौ स तत्प्रत्यये ज्योतिर्वित्त्व–मनागतार्थकथना–दाविश्चकारात्मनः ॥ ५१ ॥
तत्त्वाख्यानं तुल्यमाख्याय कंसेशाभ्यामग्र्यः सूचितोऽक्रूरयोगः ।
शत्रौ मित्रे या प्रवृत्तिः समाना स ख्यातो यत्सद्भिरक्रूरयोगः ॥ ५२ ॥
यावदहङ्कृतिलासो गोकुलवासः सुखावहस्तावत् । तन्निग्रहे तु मधुरौवस्थितिरुचितेति तत्र गतिरुक्ता ॥ ५३ ॥
लीलाविग्रहनिर्मितं धृतरसं सद्वैतमद्वैतदृग् विद्वद्विस्मयकृद्विलासमनिशं भुङ्क्ते ह्यनङ्गस्थितः ।
स्वैरं तिष्ठति गच्छति प्रविशति स्नात्यश्नाति क्रीडति भुङ्क्ते चैवमहो जडस्थितिकृतावासः स देहाश्रितः ॥ ५४ ॥
त्रिस्थलीस्थायिनश्चैवमस्य वैभवविस्तरः । वर्णितो मुनिनायोऽस्मिन् स विद्वदुपदेशकृत् ॥ ५५ ॥

कृष्णप्रिया

भगवन् आप आपके ही आश्रय में रहने वाले सर्वथा स्वतन्त्र है । पुनः आप सत्य संकल्प है । ब्रह्माण्ड निर्माण में आप साधन निरपेक्ष हैं, स्वयं निजी माया शक्ति द्वारा गुणों की सृष्टि का निर्माण किया है । उन गुणों द्वारा ब्रह्माण्ड की रचना

रक्षा और संहृति करते हैं ॥ १३ ॥ हे नाथ ! हे सत्य संकल्प भगवन् ? इस भूतल पर राजाओं के रूप में स्वांग में दीख पड़ते लेकिन प्रजा पर अत्याचार और त्रास गुजारने वाले कंसादि नृपगण क्रूर दानव दैत्य ही हैं उनका एवं भारभूत असुर समूहों का संहार के लिए पुनः साधुजनों का संरक्षण के लिए ही आप का भूतल पर अवतरण है ॥ १४ ॥ यह परम हर्ष की गाथा है कि अम्ब स्वरूप लेकर आया हुआ केशी दैत्य लीलामात्र में वध किया । भगवन् यह खल ऐसा खतरनाक था कि रस के केवल हिहिनाह-हीं सना शब्द सुनकर देव गण स्वर्लोक छोड़ कर भागते थे और आश्रय स्थान खोजते थे ॥ १५ ॥ नाथ मैं दो दिन के बाद चाणूर मल्ल, मुष्टिक मल्ल, शल, तोशल मल्लों का एवं अन्य तत्सहायक अन्य मल्लों का, कुवलयापीड हाथी का, राजा कंस, कंस के भ्राताओं का, धनुष्य रक्षकों का शीघ्राति शीघ्र विनाश देख रहा हूँ ॥ १६ ॥

तस्यानु शङ्खयवनमुराणां नरकस्य च । पारिजातापहरणमिन्द्रस्य च पराजयम् ॥ १७ ॥
उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणम् । नृगस्य मोक्षणं [1]पापाद् द्वारकायां जगत्पते ॥ १८ ॥
स्यमन्तकस्य च मणेरादानं सह भार्यया । मृतपुत्रप्रदानं[2] च ब्राह्मणस्य स्वधामतः ॥ १९ ॥
पौण्ड्रकस्य वधं पश्चात् काशिपुर्याश्च दीपनम् । दन्तवक्त्रस्य निधनं चैद्यस्य च महाक्रतौ ॥ २० ॥

कर्दमक्षमा

अन्वयः—तस्य, अनु, (कंसादिवधानन्तरम्) शङ्खयवनमुराणाम, नरकस्य, च (वधम्) द्रक्ष्यामि, च, (नरकस्य सेवकादीनां वधम्) पारिजातापहरणम्, इन्द्रस्य, पराजयम्, द्रक्ष्यामि ॥ १७ ॥ वीर्यशुक्लादिलक्षणम्, वीरकन्यानाम्, (रुक्मिण्यादीनां भौमकाराग्रहगतानां कन्यानाञ्च) उद्वाहम्, हे जगत्पते ! द्वारिकायाम्, पापात् मृगस्य मोक्षणम्, द्रक्ष्ये ॥१८॥ भार्यया (जाम्बवत्या, सत्यभामया) सह स्यमन्तकस्य, मणेः, आदानम्, (गुरोः), मृतपुत्रप्रदानम् च (ब्राह्मणस्य) (मृतपुत्राणाम) स्वधामतः (आदानं प्रदानञ्च) द्रक्ष्ये ॥ १९ ॥ पश्चात् पौण्ड्रकस्य, च, (काशिराजस्य) वधम्, काशिपुर्याः, दीपनम्, महाक्रतौ, चैद्यस्य, दन्तवक्रस्य, च, (विदूरथादीनाम्) निधनम्, द्रक्ष्ये ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भार्यया जाम्बवत्या सह । स्वधामतो महाकालपुरात् । १८-१९॥ द्वारकामावसन् द्वारकायां वसन् । कर्ता करिष्यति॥२०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वीर्यशुल्कादीत्यत्रादिना लक्ष्यवेधादिग्रहः । लक्षणं चिह्नम् 'लक्षणं नाम्नि चिह्ने च' इति मेदिनी । पापादज्ञातविप्रधनापहारलक्षणात् ॥ वीराः क्षत्रियास्तेषां कन्यानाम् । यद्वा—हे वीरेति । त्वं वीरत्वात्सर्वं करिष्यसीति भावः । वीर्य पराक्रमः तदेव शुल्कं मूल्यम्, आदिपदात्कन्यानां भक्त्यादिकं च लक्षणं प्रकारो यस्योद्वाहस्य तम् । तत्र क्वचित्समुदितं क्वचित्तु केवलभक्तिरेव यथा कालिंद्यादेरिति ज्ञेयम् । पापात् विप्रगोहरणजात् । द्वारकायामित्युक्तेर्द्वारकानिर्माणप्रयाणमपि सूचितम् । तत्र कर्तव्यं च यथार्हं पूर्वत्र परत्र च योज्यम् । जगत्पते इति—तत्रेन्द्राद्यागमनेन गरुडारोहणादिना तादृशैश्वर्यप्रकाशनादिति भावः ॥ १७ ॥ ब्राह्मणस्य द्वारकावासिनः । यद्वा —अवन्तीवासिनो गुरोः सांदीपनेः । तत्र स्वशब्दः स्वीयपरः, स्वीयस्य यमस्य धामतः । ब्राह्मणस्येति चतुर्थ्यर्थे षष्ठी ॥ ब्राह्मणस्येह संप्रदानाभावस्तु तस्यैव स्वत्वात् । स्वधामत इति—अनावृत्तिस्थानादपीति परमस्वातन्त्र्यं दर्शितम् ॥ १८ ॥ पौंड्रकस्य मिथ्यावासुदेवस्य । महाक्रतौ युधिष्ठिरराजसूये ॥ पश्चात् पौण्ड्रकवधानन्तरम् ॥ १९ ॥ भुवि गेयानीत्युक्त्या वीर्याणां संसारनिवृत्त्यर्थमेव कृतत्वं सूचयति ॥ यानि एकेनैव युगपद्बह्वीनां बहुधा विवाहादीनि श्रीदामानुग्रहादीनि तानि चाहं द्रक्ष्यामि । अत एवैकादशे—"गोबिन्द भुजगुप्तायां द्वारकायां कुरूद्वह । अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥" इति । अहो भाग्यमाहात्म्यं मम, अहो कारुण्यमाहात्म्यं तवेति भावः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मृतपुत्राणां प्रदानं ब्राह्मणस्येति सम्प्रदानत्वाभावस्तस्यैव स्वत्वात् । उपादानमिति क्वचित् पाठः । स्वधामतस्तद्विशेषात् अनावृत्तिस्थानादपीत्यर्थः । इति परमस्वातन्त्रयं दर्शितं पश्चात् पौण्ड्रकवधानन्तम् ॥ १८-१९ ॥ यानि एकेनैव युगपद्बह्वीनां बहुधा विवाहादीनि श्रीदामानुग्रहादीनि तानि चाहं द्रक्ष्यामि अत एवैकादशे । गोविन्दभुजगुप्तायां द्वारकायां कुरूद्वह । अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालस इति । अहो भाग्यमाहात्म्यं मम अहो कारुण्यमाहात्म्यं तव चेति भावः ॥ २० ॥

---

[1] शापाद्—वीर. । [2] पुत्रोपदानं च—इति कस्यचित् ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वीराः क्षत्रियाः, तेषु शूरा वा, तेषां कन्यानाम्, हे वीरेति वा, प्रायः स्ववीर्य्येणैवोद्वहनात्, अत एवाह—वीर्य्यं पराक्रमः, हरणं जयादिलक्षणन्तदेव शुल्कं कन्यार्थदेयद्रव्यम्। आदि-शब्देन कन्याभक्त्यादि यथा कालिन्द्यादेः, तदेव लक्षणं प्रकाशे यस्य तम्। पापादज्ञानकृतविप्रगोहरणजात्, 'शापात्' इति पाठश्चिन्त्यः। अग्रे तत्प्रसङ्गे विप्रशापाश्रवणात्। तच्चान्यत्र मुन्यन्तरोदितमेव। द्वारकायामित्यत्र विशेषोक्तिस्तत्रत्य–कुपतस्तदुद्धरणाभिप्रायेणेति द्वारकाप्रयाणमपि सूचितम्। हे जगत्पते इति तत्रेन्द्राद्यागमनेन साक्षाद्गरुडारोहणादिना च निजैश्वर्य्यप्रकाशनात् ॥१७॥ स्वधामत इति महाकाल पुरगमनेन स्वस्वरूपोपलब्ध्या मोक्षप्राप्तेरपीत्यर्थः। तच्च श्रीभागवतामृतोत्तरखण्डे विवृतम्। अत्र चाग्र तत्प्रसंगेऽभिव्यञ्जनीयम् ॥ १८ ॥ पश्चात् पौण्ड्रकवधानन्तरम्, महाक्रतौ श्रीयुधिष्ठिरराजसूये, चैद्यस्य शिशुपालस्य च निधनम् ॥ १९ ॥ वीर्य्याण्यद्भुतकर्म्माणि, अत एव कविभिः श्रीव्यासादिभिर्भुवि गेयानि गातुं योग्यानि गास्यमानानि वा, एकेनैव युगपद्वह्वीनां बहुधा विवाहादीनि श्रीदामानुग्रहादीनि च तानि चाहं द्रक्ष्यामि। अत एवैकादशे, (भा० ११।२।१)—'गोविन्दभुजगुप्तायां द्वारवत्यां कुरुद्वह। अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥' इति। अहो भाग्यं मम, अहो कारुण्यमाहात्म्यञ्च तवेति भावः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

वीर्यमेव शुल्कादिलक्षणं प्रदेयद्रव्यस्वरूपं यस्मिंस्तं वीराणां भीष्मकादीनां या कन्या रुक्मिण्यादयस्तासां विवाहमित्यर्थः नृगस्य शापान्मोक्षणं त्याजनमिति सम्बन्धः हे जगत्पते ! ॥ १७ ॥ भार्यया जाम्बवत्या सत्यभामया च सह द्वारकायां स्यमन्तकाख्यस्य मणेरादानं ब्राह्मणस्य ब्राह्मणाय स्वधामतः स्वस्थानात्सङ्कर्षणलोकादित्यर्थः। आनीयेति शेषः मृतानां पुत्राणां प्रदानम्।१८। दीपनं दाहनं महाक्रतौ युधिष्ठरराजसूये चैद्यस्य शिशुपालस्य च निधनं वधम् ॥ १९–२० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

आदिशब्देन लक्ष्यवेधनमाह। लक्षणं कालिके चिह्ननाम्नि मुद्राङ्कसङ्गयोरिति च ॥ १७–१९ ॥ वीर्याणामवश्यज्ञेयत्वमाह। गेयानीति। भुवीति विशेषणेन वीर्याणां संसारनिवृत्त्यर्थमेव कृतत्वं सूचयति ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भार्य्यया जाम्बवत्या सह। स्वधामतो महाकालपुरात् ॥ १८–२० ॥

गूढार्थदीपिनी

अनुपश्चात् शंखः पञ्चजनः। नरको भौमासुरः। अत्र केवलं संग्रह एव न तु क्रमो विवक्षितः ॥ १७ ॥ पापात् विप्रगोहरणजात् ॥ १८ ॥ द्वारकावासिनः सान्दीपनेर्वा ब्राह्मणस्य ब्राह्मणस्येत्यत्र सम्प्रदानाभावस्तु तस्यैव स्वत्वात् ॥ १९ ॥ पौण्ड्रको-मिथ्यावासुदेवः चैद्यस्य शिशुपालस्य ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वीर्य्यमेव शुल्कादिलक्षणं प्रदेयद्रव्यस्वरूपं यत्र तं वीरकन्यानामुद्वाहम् ॥ १७ ॥ भार्यया जाम्बवत्या सह स्वधामतः स्वस्थानतः ॥ १८ ॥ महाक्रतौ राजसूये ॥ १९ ॥ कर्ता करिष्यति ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तस्यानु तमनु शङ्खः पञ्चजनासुरो यवनः कालयवनो मुरस्तेषां नरकस्य भूमिजस्य पारिजातस्य हरणं द्वारकां प्रति। इन्द्रस्य च पराजयम् ॥ १७ ॥ हे वीर कन्यानां प्रत्याहृतानां वीराणां कन्यास्तासामिति वा। रुक्मिण्यादीनां वीर्यशुल्कादिलक्षणं वीर्यशुल्कं कन्यामूलद्रव्यं तदेवादिर्यस्य लक्ष्यवेधादेस्तदेव लक्षणं चिह्नं यस्य स समुद्वाहं द्रक्ष्य इत्यन्वयः। हे जगत्पते द्वारकायां तत्रापि गत नृगस्य कृकलासस्य मोक्षणम् ॥ १८ ॥ भार्ययेति भाविभावोक्तिः। कान्त्या श्रेष्ठेति वा। श्यमन्तकस्य मणेः सत्राजितः सकाशादादानं ब्राह्मणस्य सान्दीपनेः स्वमातुश्च तया तृणावहस्य च मृतपुत्राणामुपादानं तत्समीपे दानं स्वधामत एकत्र यमलोकः स्वधामापरत्रानन्तासनमिति विवेकः। पुत्रोऽपि न तत्क्षणे मृत्वा स्थितो न देहः। परीक्षित्तत्रासून्निवेशयामासेत्यपि नेत्याह ॥ स्वधामत इति। स्वधाकारः पितॄणामित्यादेः स्वधया मतः सत्कृतः पितृवर्गप्रविष्टो यस्तस्य पुत्रस्योपादानं ज्ञेयमिति स्वगेहादित्यनुक्त्वा स्वधामत इत्युक्त्याऽसूचयदिति ज्ञेयम्। द्विजदारकान्मयोपनीता द्विजात्मजा इति तद्बहुत्वाद्दिनबाहुविध्याज्जातो जात इत्युक्तेश्च स्वधायोग्यत्वात्तथोक्तिर्वेति मन्तव्यम्। स्वधायामस्मत्कर्मिकायां मतः सम्मतो यस्तत्पुत्रोपादानमिति वा ॥१९॥ पौण्ड्रकस्य स्वज्ज्येष्ठभ्रातुः काशिपुर्याः करवीरनगर्या दीपनं दाहं दन्तवक्रस्य चैद्यस्य च महाक्रतौ धर्मराजसूये ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

वीरकन्यानामुद्वाहः विवाहः फलं ननु गृहीतानां तत्रापि वन्द्या गृहीतानां कथं विवाह उचित इति चेत्तत्राह । वीर्यशुल्क एव आदिर्यस्य मनस्तोषणादिः गान्धर्वादिर्वा तदेव लक्षणमसाधारणो धर्मो यस्योद्वाहस्य विवाहे वीर्यमेव प्रयोजकं मूल्यक्रीते यथा न काचिच्चिन्ता सर्वं पण्यगतं शुचीति वाक्यात् तथापि वीर्यशुल्कमपि क्षत्रियकन्यानामेवोचितं ननु यस्य कस्यचित् तत्राह । वीराणामेव याः कन्याः दानमेव प्रयोजकं चेत् तदा नृगस्य दानात् न किञ्चित्सिद्धमिति पापात् ब्राह्मणगोहरणात् कृकलासरूपाद्वा द्वारकायामिति तस्योद्धारे भक्तत्वे च हेतुः। ननु ब्राह्मणगोहरणमक्षय्यं भवति तत्कथमुद्धार इति चेत्तत्राह । जगत्पत इति । स एव पतिर्नियामकः ॥ १७ ॥ सत्राजितप्रसङ्गे स्यमन्तकमणेरथानयनं जाम्बवता हि नीतः पश्चाज्ज्ञात्वा कन्यामपि दत्तवानिति भार्यया सह नयनं मृतपुत्रोपादानं गुरोः चकारात् मृतपुत्राणां ब्राह्मणस्य उपादानं स्वधामतो मूलस्थानात् योगजधर्मोत्ते सर्वं स्फूरिताः तिरोहिता अपि योगजधर्मस्यैतावदेव बलं नत्वविद्यमानपि पश्यति अत एव वैनाशिकप्रक्रिया असङ्गता ॥ १८ ॥ पश्चात् पौण्ड्रकस्य वध इति स्वदर्शनापेक्षया पौण्ड्रको मिथ्यावासुदेवः चकारात् काशिराजस्यापि काशीनगर्या दीपनं ज्वालनं दन्तवक्त्रस्य शिशुपालस्य च ततो वधः विपरीतक्रमः पूर्वजन्मद्वये हिरण्याक्षः कुम्भकर्णश्च प्रथमं हत इति तथैव मारयिष्यतीत्युक्तवान् महाक्रतौ राजसूये चकारात् सर्वत्र तत्संवन्धिपदार्थो ग्राह्यः ॥ १९ ॥ एवं विशेषतो निरूप्य सामान्यतो निरूपयति । यानि चान्यानि चेति शाल्वबधादीनि वीर्याणि स्त्रीणां गृहेषु नानाविधा लीलाश्च अन्यानि जीवसाधारणानि द्वारकायां वसन्निति प्रासङ्गिकानि तानीत्युक्तं भवानिति सम्मुखतया स्वस्याप्रदर्शनं सूचितं ननु दर्शनेन किंस्यादित्याशङ्क्य वीर्याणां माहात्म्यमाह । गेयानि कविभिरिति । अथवा मयोपदेष्टव्यानीति तदर्थं मया द्रष्टव्यानि भुवीति अग्रिमाणां मुक्त्यर्थानीत्यपि सूचितम् ॥ २० ॥

श्रीसुबोधिनी–सारः

वीर्यं बलमेव शुल्कं मूल्यं तदादिलक्षणं वीरकन्यानां राजपुत्रीणामुद्वाहं विवाहं द्रक्ष्ये । जगत्पते द्वारकायां पापात् नृगस्य मोक्षणं कृकलासयोनेरित्यर्थः ॥ १७ ॥ स्यमन्तकस्य मणेर्भार्यया जाम्वक्त्या सहादानमानयनं स्वधामतो वैकुण्ठात् ब्राह्मणस्य ब्राह्मणाय मृतानां पुत्राणां प्रदानम् ॥ १८ ॥ पौंड्रकस्य कपटवासुदेवस्य वधं मृत्युं काशिपुर्या दाहनम् । महाक्रतौ राजसूये चैद्यस्य शिशुपालस्य निधनं दन्तवक्त्रस्य च निधनं द्रक्ष्ये इत्यन्वयः ॥ १९ ॥ द्वारकाम् आवसन् यानि अन्यानि वीर्याणि भवान् कर्त्ता करिष्यति भुवि पृथिव्यां कविभिर्गेयानि तान्यहं द्रक्ष्यामि ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्य अनु तदनन्तरं शङ्खादीनां वधादिकं द्रक्ष्यामीति श्लोकपञ्चकस्यान्वयः । शङ्खः पञ्चजनः ॥ १७ ॥ वीर्यं स्वप्रभावप्रदर्शनमेव शुल्कादिलक्षणं प्रदेयद्रव्यादिरूपं यस्मिंस्तथाभूतं वीरकन्यानामुद्वाहं हे जगत्पते ! पापात् ब्राह्मणगोहरणजनितात् कृकलासयोनिनिमित्तात् ॥ १८ ॥ भार्यया जाम्बवत्या सह स्वधामतो महाकालपुरत 'आनीय' इति शेषः ॥ १९ ॥ महाक्रतौ युधिष्ठिरराजसूये चैद्यस्य शिशुपालस्य च निधनं वधम् ॥ २० ॥

अन्वितार्थप्रकाशिका

तस्येति ॥ तस्यानु पश्चात् शङ्खयवनमुराणां नरकस्य च वधं द्रक्ष्ये । शङ्खः पञ्चजनः पारिजातस्यापहरणं तत्रेन्द्रस्य पराजयं द्रक्ष्ये । अत्र भाविसङ्ग्रहमात्रं नतु क्रमः ॥ १७ ॥ उद्वाहमिति ॥ वीर्यं पराक्रमप्रदर्शनमेव शुल्कादिलक्षणं प्रदेयद्रव्यादिरूपं यस्मिंस्तथाभूतं वीरकन्यानामुद्वाहं द्रक्ष्ये । हे जगत्पते ! पापात् ब्राह्मणगवीहरणजनितात् कृकलासयोनिनिमित्तात् पापात् द्वारकायां नृगस्य मोक्षणं द्रक्ष्ये ॥ १८ ॥ स्यमन्तकस्येति ॥ भार्यया जाम्बवत्या सह स्यमन्तकस्य मणेः आदानं द्रक्ष्ये । स्वधामतः महाकालपुरात् आनीय ब्राह्मणमृतपुत्रस्य प्रदानं च द्रक्ष्ये ॥ १९ ॥ पौण्ड्रकस्येति ॥ पौण्ड्रकस्य वधं द्रक्ष्ये । पश्चात् काशिपुर्याः दीपनं दाहं द्रक्ष्ये । दन्तवक्त्रस्य निधनं द्रक्ष्ये । महाक्रतौ युधिष्ठिरराजसूये चैद्यस्य शिशुपालस्य च निधनं द्रक्ष्ये ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वीर्यमेव शुल्कं मुल्पं ते देवादिर्यस्य एवं भूतं लक्षणं यस्य तं वीरणां शूराणां राज्ञां कन्यास्तां सा उद्वहं द्रक्ष्यामीति सर्वत्रयोज्यं नृगस्य कृकलास रूपस्य ॥१७॥ भार्यया जाम्बवत्या सह स्वधामतः स्वस्थानात् ॥१८–१९॥ द्वारका मा वसन् द्वारकायामावसन् सन् कर्त्ता करिष्यति ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्येति ॥ तस्यानु तदनन्तरं, शङ्खश्च यवनश्च मुरश्च तेषां, नरकस्य च, वधमिति शेषः द्रक्ष्ये इत्यस्य सर्वत्रानुषङ्गः । तत्र शङ्खः पञ्चजनोऽसुरः, यवनः कालयवनः, मुरो भौमासुरपुरपरिखावासोऽसुरविशेषः । भाविनिर्देशमात्रमेवैतन्न त्वानन्तर्यवि-

वक्षितम्। पारिजातापहरणं, इन्द्रस्य, पराजयं च, द्रक्ष्ये ॥ १७ ॥ उद्वाहमिति ॥ वीर्यशुल्कादिलक्षणं वीर्यात्मकप्रदेयद्रव्यं लक्षणं यस्मिंस्तं, वीरा भीष्मकादयस्तेषां याः कन्या रुक्मिण्यादयस्तासां, उद्वाहं, विवाहं, हे जगत्पते, द्वारकायां, स्थितवता त्वया कृतमिति शेषः। नृगस्य, पापात्, मोक्षणं, द्रक्ष्ये ॥ १८ ॥ स्यमन्तकस्येति ॥ भार्यया जाम्बवत्या सह, स्यमन्तकस्य मणेः, आदानं च, जाम्बवती सत्यभामाया अप्युपलक्षणम्। स्वधामतः स्वस्थानात्, आनीयेति शेषः। ब्राह्मणस्य मृतपुत्रप्रदानं मृतानां पुत्राणां समर्पणं च, द्रक्ष्ये ॥ १९ ॥ पौण्ड्रकस्येति ॥ पौण्ड्रकस्य, वधं, ततः पश्चात् काशिपुर्याः, दीपनं दाहनं, महाक्रतौ युधिष्ठिरराजसूये, चैद्यस्य शिशुपालस्य, दन्तवक्त्रस्य च, निधनं वधं, द्रक्ष्ये ॥ २० ॥

कृष्णप्रिया

उन सबके वध के उत्तरकाल में ही शंखासुर, मुरदानव, नरकासुर आदि खलों का वध देख रहा हूँ। इतना ही नहीं किन्तु राजा इन्दु का पराजय करके स्वर्गलोक से पारिजात कल्पवृक्ष को भी ले आवेंगे ॥ १७ ॥ हे भगवन्! क्षत्रियों के यहाँ विविध प्रकार के स्वयम्वर होते हैं। आप वही वीर्य शुक्ल मूल्य देकर भौमासुर के काराग्रह ग्रस्त १६००० सोलह हजार वीर नृपति की कन्याओं को बन्धन मुक्त करने के बाद व्याह भी करेंगे। वैसे ही रुक्मिनी जाम्बवती प्रभृति अष्ट वीर कन्याओं को पराक्रम से जीत कर, व्याह कर पट्टराणियों बनावेंगे पुनः द्वारिकापुरी का निर्माण कर नृग राजा का द्वारिकापुरी में शापमुक्त करेंगे ॥ १८ ॥ जाम्बवान को पराजित कर स्यमन्तकमणि को श्री जाम्बवती भार्या के साथ द्वारिका पधार कर सत्यभामाजी के साथ व्याह करेंगे। श्री सान्दीपनि गुरुजी के मृतपुत्र को यमलोक से लाकर गुरु दक्षिणा में प्रदान करेंगे और द्वारिकास्थ ब्राह्मण के पुत्रों को मूल स्थान से लाकर ब्राह्मण को समर्पित करेंगे ॥ १९ ॥ भगवन् दारपरिग्रह के पश्चात् द्वारिका में रहते हुए पौण्ड्रक वध करेंगे, पौण्ड्रक काशी नरेश को मारेंगे और काशी नरेश पुत्र ने प्रयुक्त किए हुए अग्नि को नष्ट करके सुदर्शन चक्र से काशीपुरी का दहन करेंगे। पुनः युधिष्ठिर महाराज के राजसूय यज्ञ में दन्तवक्र एवं शिशुपाल का वध करेंगे। महाराज! आप के इन सर्व चरित्रों का मैं दर्शन करूंगा यहां पर श्लोक में दन्त वक्र का प्रथम उल्लेख इसलिए किया कि श्री वाराह अवतार में और श्रीराम अवतार में हिरण्याक्ष और कुम्भकर्ण का प्रथम वध किया उसका अनुस्मरण कराते हुए दन्तवक्र का प्रथम उल्लेख करते हैं ॥ २० ॥

यानि चान्यानि वीर्याणि द्वारकामावसन् भवान्। कर्ता द्रक्ष्याम्यहं तानि [1]गेयानि कविभिर्भुवि ॥२१॥
अथ ते कालरूपस्य क्षपयिष्णोरमुष्य वै। अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः ॥२२॥
विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवाञ्छितम्[2]।
स्वतेजसा नित्यनिवृत्तमाया, गुणप्रवाहं भगवन्तमीमहि ॥२३॥
त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनम्।
क्रीडार्थम[3]द्यात्तमनुष्यविग्रहं नतोऽस्मि धुर्यं यदुवृष्णिसात्वताम् ॥२४॥

कर्दमक्षमा

अन्वयः—द्वारिकायाम्, आवसन्, भवान्, यानि, (शाल्वादिवधादीनि) च (गृहलीलाः) वीर्याणि, कर्ता, कविभिः भुवि, गेयानि, तानि, द्रक्ष्यामि ॥ २१ ॥ अथ, अर्जुनसारथेः, कालरूपस्य, अमुष्य, (भूमेः) (भारम्) क्षपयिष्णोः अक्षौहिणीनाम्, निधनम्, वै, द्रक्ष्यामि ॥ २२ ॥ (हे श्रीकृष्ण!) विशुद्ध विज्ञानघनम्, स्वसंस्थया, समाप्तसर्वार्थम्, अमोघे, वाञ्छितम्, स्वतेजसा, नित्यनिवृत्तमायागुणप्रवाहम्, भगवन्तम्, ईमहि ॥ २३ ॥ ईश्वरम्, स्वाश्रयम्, आत्ममायया, विनिर्मिताशेषविशेषकल्पनम्, अद्य (अधुना) क्रीडार्थम्, आत्तमनुष्यविग्रहम्, यदुवृष्णिसात्वताम्, धुर्यम् त्वाम्, नतः, अस्मि ॥२४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अमुष्य विश्वस्य भूभारस्य वा ॥ २१ ॥ एवं विज्ञाप्य कृताभिनन्दनं भगवन्तं नमस्यति द्वयेन। विशुद्धविज्ञानघनमिति। केवलं ज्ञानैकमूर्तिमित्यर्थः। अत एव स्वसंस्थया स्वरूपसम्यक्स्थित्यैव परमानन्दरूपया सम्यगाप्ताः सर्वेऽर्था येन तम्। आप्तकामतोक्त्वा सत्यसंकल्पतामाह। अमोघवाञ्छितमिति। ननु वाञ्छा चेदस्ति तर्हि दुर्निवारा संसृतिरत आह। स्वतेजसेति चिच्छक्त्या नित्यनिवृत्तो मायाकार्यरूपो गुणप्रवाहो यस्मात्तम्। अतो भगवन्त निरतिशयैश्वर्यमीमहि शरणं व्रजेमेति ॥२२॥ ननु त्रिकालज्ञस्त्वं कथं मत्प्रपञ्चं न जानासि जानासि चेत्कथमगुणप्रवाहं ब्रवीषि तत्राह। त्वामिति। ईश्वरमन्यस्य वशयितारं स्वाश्रयमन्यस्यावशमत आत्ममायया आत्माधीनया मायया विनिर्मिता अशेषविशेषा महदाद्या यादवादिरूपा वा कल्पना येन तं धुर्यं श्रेष्ठं नतोऽस्मीति ॥ २३–२५ ॥

---

१. यानि शेषाणि वै भुवि–प्रा. पा.। २. वर्तिनं–विज.। ३. मद्याप्त–वीर.; माद्यन्त–विज.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रकृतत्वाद् भूभारस्य चेति । अक्षौहिणीनामष्टादशानाम् । अर्जुनसारथेरित्यनेन भारतयुद्ध इति ध्वनितम् ॥ अमुष्येति षष्ठी आर्षी । निधनं निधनरूपं चरितमिति शेषः ॥२१॥ एवमुक्तरीत्या । अत एव ज्ञानमूर्तित्वादेव । अर्थाः प्राप्तकामता श्रुत्युक्ता । योगिजीवसाम्यतामादायाशङ्कते – नन्विति । अतोऽत्र । अतो निवृत्तगुणप्रवाहत्वात् । यद्वा—स्वतेजसा स्वप्रभावेण, योगिजीवादीनां तु भगवत्प्रसादावाप्तयोगादिभिः संसृत्यभावो न तु स्वप्रभावेणेति विशेषः । चिच्छक्त्या सदा ब्रह्माहमस्मीति निष्ठयेति बोध्यम् । स्वामिव्याख्याने 'तेजो बले प्रभावे च' इति यादवः ॥ २२ ॥ ईमहि न तु जानीम इत्यत्राशङ्कते—नन्विति । मत्प्रपञ्चं भगवन्मायाप्रभावम् । अगुणप्रवाहं गुणप्रवाहस्य दृष्टत्वात् । तत्र ज्ञानज्ञाने । अतोऽनन्याधीनत्वात् । अशेषाः सर्वे । विशेषा भेदाः । 'धुर्यो मुख्ये बलीवर्दे समर्थे' इति धरणिः ॥ २३ ॥ एवमित्थम् । यदुपतिं गोपेशम् । तस्य कृष्णस्य दर्शनेनोत्सवो यस्य सः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ तत्तत्सर्वानन्तरमर्जुनसारथितया सतस्ते तव सम्बन्धे तत्र तत्सम्बन्धमात्रेणैवेत्यर्थः । तच्च त्वयि नाश्चर्यमित्याह । कालेति । अमुष्येत्यादौ विश्वमित्यर्थः । कालरूपस्य सतो विश्वमपि क्षपयिष्णोस्तन्नाशनसमर्थस्येत्यर्थः ॥ २१ ॥ विशुद्धेति । तैर्व्याख्यातं तत्र केवलेति "न चक्षुषा गृह्यते रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्" इति श्रुतेः । स्वप्रकाशत्वेन केवलज्ञानरूपा तस्य च ज्ञानस्य बहुमूर्त्तित्वेऽपि एकस्या मुख्याया मूर्त्ते रंशित्वादेका मूर्त्तिर्यस्य तं तदुक्तमक्रूरेण बहुमूर्त्त्येकमूर्त्तिकमिति । एकेति विशब्दस्यार्थः विशिष्टाभिधायित्वेनासाधारणतया तादृशनिगमनात् । अत एवेति यतो मूर्त्तेरपि केवलं ज्ञानरूपत्वमखण्डत्वञ्चतदनुभवसिद्धम् । अतः सर्वं स्वरूपत्वं स्वरूपं चात्मा आत्मा च सर्वाभयः सर्वश्च ज्ञानाश्रयत्वेनैव भासत इति । यत आत्मत्वमत एव परमानन्दरूपेणैव स्थितिः । निरुपाधिपरमप्रेमास्पदरूपत्वात् । यतस्तथात्वमतः स्वरूप एव सर्वार्थप्राप्तिः । आनन्दानुगत्यैव सर्वस्यार्थत्वात् । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यादिति श्रुतेरित्यर्थः । अत एव तस्य नानारूपादिरर्थः स्वरूपत एव प्राप्त इति ज्ञानस्यैव मूर्त्तित्वं युक्तमेवानुभूतं तेनेति भावः । एवमाप्तकामत्वेऽपि वाञ्छा नित्यप्राप्तस्यापि लीलायामप्राप्तत्वसम्पादनपूर्वकप्राप्त्यर्थो तस्याश्चामोघत्वं तादृशासम्भवकारित्वात् । साच मायिकी न भवेदिति व्याचष्टे नन्वित्यादिना । अतस्तद्रूपादीनामप्यमायिकत्वमवधारितम् । अत एव भगवन्तमीमहीति भगवानेव निजालम्बनतया निगमितो नतु निर्विशेषब्रह्मेति । यद्वा लोकप्रसिद्धविज्ञानमतीतमिति तत्सम्बन्धाभावाद्विशेषेण शुद्धं विज्ञानमानन्दं ब्रह्मेति प्रसिद्धं ब्रह्माख्यमानन्दात्मकं यद्विज्ञानं तद्रूपो यो घनोमूर्त्तस्तल्लक्षणं भगवन्तमीमहि शरणं यामि । ननु विज्ञानस्य कथं करचरणाद्याकारमयमूर्त्तित्वं कथम्वा भगवत्त्वमित्याशङ्क्य श्रुतिप्रसिद्धस्य तस्य तत्प्रसिद्धत्वेनैव तादृशं वैलक्षण्यमाह । स्वसंस्थयेति । परास्य शक्तिर्विविधैव श्रूयते इति न चक्षुषा गृह्यते रूपमस्येति श्रुत्या व्यञ्जितया तत्तद्व्यञ्जकरूपशक्त्या सम्यगाप्तस्तत्तद्रूपः सर्वोऽप्यर्थो येन तं तथाप्यमोघवाञ्छितम् इच्छाशक्त्या तत्तत्प्रकाशनाप्रकाशनसमर्थः । नन्वपरा मायाख्या शक्तिरपि मम विद्यत इति "श्रूयते मायान्तु प्रकृतिं विद्यान्मायिनन्तं महेश्वर"मिति श्रुतेः । ततस्तद्दोषेणाप्यहं स्पृष्टो भवेयमित्याशङ्क्याह स्वतेजसेति । स्वतेजसा स्वरूपशक्तिप्रभावेणेति दिक् ॥ २२ ॥ त्वामिति च तैर्व्याख्यातं तत्र ब्रवीषीति निषिध्यमानत्वेनेति शेषः । यद्वा । शुद्धवैकुण्ठादिलक्षणे मत्प्रपञ्चे जाते तत्र मायानिषेधोऽप्ययुक्तः सूर्यमण्डले तमोनिषेधवदित्यभिप्रायेणाक्षिपति नन्विति । तत्र सिद्धान्तभाग आत्माधीनयेति न शुद्धे स निषिध्येत किमुत मायिकप्रपञ्च या तव लीला तस्यामेव । यतः प्रकृतिक्षोभात् पूर्वत्वेन शुद्धापि तवेक्षणलीला प्रकृतिमुपधाय भवति तथा स्वयं भगवत्सम्बन्धिरूपत्वेन शुद्धैवैषा स्वान्तरङ्गपरिकरस्य तव जन्मादिलीला तदितरपूर्वापरयदुवंशमुपधायेति भावः । यदुप्रभृतीनां श्रेष्ठमिति यथा तव तच्छ्रेष्ठत्वं तथा तदन्तरङ्गानां तेषामपि तद्वंश्यत्वमिति भावः । वृष्णिसात्वतानां पृथगुक्तिः श्रैष्ठ्यापेक्षयेति । ननु तादृशस्य मम मायिकप्रपञ्चेऽभिव्यक्तिः किमर्थं तत्राह । क्रीडार्थमभि प्रपञ्चगतभक्ताभिमुख्येन आत्त आनीतो मनुष्यविग्रहे नराकृतिपरब्रह्माख्यो येन तं यद्वा । तादृशविहारार्थमङ्गीकृतं मनुष्यजातीययुद्धं येन तम् । अभ्यार्त्तेति पाठे स एवार्थः । अद्येति त्वदवतारसमये इत्यर्थः । अथवा उपक्रमानुसारेण उपसंहरन्नमस्यति विशुद्धेति द्वयेन । तत्र त्वामीश्वरमित्यादिकमर्द्धं पूर्ववत्तदंशतत्त्वपरम् ईश्वरं पुरुषरूपं स्वयन्तु क्रीडार्थामित्यादि । अन्यत् पूर्ववदिति ॥ २३ ॥ यदुपतिमिति । तदापि श्रीगोकुलत्यागानिच्छया साक्षान्न किञ्चिदङ्गीकृतवान् किन्तु यदुपतित्वव्यञ्जकलक्षणविशेषेणैव तत्तदङ्गीकृतवानिव यस्तमित्यर्थः । प्रणिपत्य साष्टाङ्गं प्रणम्येत्यत्र हेतुः भागवतेति अतो भगवदभिप्रायं जानन् द्वारकादौ तु तादृशलोकसङ्घट्टे तन्मर्यादां दर्शयति तस्मिन्नन्यथाप्याचरतीति भावः । तस्य कृष्णस्य दर्शनमेवोत्सवो यस्य सोऽपि यया । कुतोऽभितोऽनुज्ञातः कृष्णेन प्रस्थापितः सन् ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथेति युद्धादुपरते सतीत्यर्थः; यद्वा, भिन्नोपक्रम एव पूर्वतो लीलाविशेषात्तमेवाह—कालरूपस्यापि । अतोऽमुष्य विश्वस्य क्षपयिष्णोरिच्छामात्रेण संहारसमर्थस्यापि । वै प्रसिद्धौ । यद्वा, वै अपि, अमुष्य कालस्यापि क्षपयिष्णोः प्रेरणशीलस्यापि

अर्ज्जुनसारथेः सतः 'कर्त्तरि षष्ठी', इति परमवश्यत्वं दर्शितम्, अतोऽर्ज्जुनादीनामपि परमपूज्ययोः श्रीवसुदेवदेवक्योर्हि बन्धनेन मम महापराधो जात एवेति तात्पर्य्यम् ।। २१ ।। विशुद्धेति, तत्र किं त्वां प्रति निवेद्यमिति । स्वसंस्थयेति तवान्यतः किञ्चिदपेक्षाराहित्येन निरूपाधिकृपाकरत्वान्मदुक्तं सर्व्वं स्वयमेव करिष्यसीति, अमोघेति - तत्र च श्रमः कोऽपि नैवं भवितेति । स्वतेजसेति च न तत्र किञ्चिद्वञ्चनादिकं शङ्क्यमिति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, कंसादिभ्यो भयमिदं भक्तानां विनाशयेति किं प्रार्थ्यम्, संसारभयमप्यपहरसीत्याह—स्वतेजस्य निजप्रभावेण नित्यं निवृत्तो विनष्टो माया गुणप्रवाहो भक्तानां यस्मात्तम् । अभि सर्व्वतोभावेनाप्तः प्रकटितो मनुष्यविग्रहो नराकारो येन तम्, अतो यद्वादीनां धूर्य्यम्, 'अद्य' इति पाठेऽपि स एवार्थः, यद्यपि यदुशब्देनैव वृष्ण्यादयोऽपि गृह्यन्ते, भोजादयोऽन्येऽप्यवान्तरभेदाः सन्ति, तथापि प्राधान्यापेक्षया यद्वादीनामुक्तिः, अन्यत्तैर्व्याख्यातम् । तत्र गुणाप्रवाहस्योक्त्या तमेव जानाति, न तु—यादवादिभगवत्प्रपञ्चमिति शंका तद्वर्णनेन परिहृतेति । तत्र च यादवरूपेति व्याख्या, पक्षे आत्ममाययेति निजसच्चिदानन्दशक्तिविशेषेणेति ज्ञेयम्, ततश्च क्रीडार्थमिति पूर्व्वेण परेणापि योज्यमिति । अथवा विशुद्धज्ञानघनादिरूपोऽपि त्वं परमकारुण्येन जगद्धितक्रीडार्थमवतीर्णः सन् निजाशेषैश्वर्य्यं प्रकटयन्नसीति स्तुवन् प्रणमति,—त्वामिति । ईश्वरं जगत्प्रभुमपि, यद्वादीनां स्वाश्रयमन्यनिरपेक्षमपि विशेषेण निर्म्मितोऽशेषो विशेषो भेदो वैशिष्ट्यं वा यस्यां सा, कल्पना वेणुगीतादिरचना रिंगणादिलीला वा येन तम्, अतएवाभ्यात्तमनुष्यविग्रहम्, अन्यत् समानम् । यद्वा, यास्यन् त्वां नतोऽस्मीत्युक्तम् । ननु त्वं ब्राह्मणो मद्वन्द्यः, लघुं मां कथं प्रणमसि ? ऐश्वर्य्यप्रकटनेन व्यवहारानपेक्षणादिति वदन् विशिनष्टि,—ईश्वरमित्यादि । अभ्यात्तमनुष्यविग्रहमपीश्वरं परमेश्वरं निजाशेषैश्वर्य्यप्रकटनात्, तत्रापि, यद्वादीनां धूर्य्यमपि स्वाश्रयं स्वा निजासाधारणो गोकुललक्षण आश्रयो निवासो यस्य तम्, अतएव क्रीडार्थमात्ममाययेत्यादि । यद्वा, अतएव अभि अभयं यथा स्यात्तथा नतोऽस्मीति । अन्यत् समानम् । अत्रैश्वर्य्यप्रकटनेन मत्पित्रापि भक्त्या वन्दितत्वान्मया वन्दितुं योग्य एवासीति भावः, अतएवाग्रे द्वारकायामत्रत्यैश्वर्य्यविशेषसम्वरणादयमेव भगवता वन्दिष्यत इति दिक् । पक्षान्तरे चापराधं क्षमयन् शरणं याति—विशुद्धेति । देवयादवादिहितार्थमिदं मया कृतमिति त्वं स्वयं जानास्येवेति भावः । ननु तथापि तयोर्मत्पित्रोर्दुःखं त्वत्त एव, तदुपसन्नमिति चेत्तत्राह—स्वस्य तव संस्थया गोकुलेऽत्र सम्यगवस्थित्या, अकारप्रश्लेषेण—न सम्यगाप्तास्ताभ्यां सर्व्वार्था यस्मात्तम्, अतस्तत्र त्वद्गमनेनैव तयोर्दुःखं शाम्येत्, तदुपायेन चानेन सुखमेवेति भावः । ननु तत्र गतस्य मम दुष्टमल्लादिभिः सह युद्धश्रमादिदर्शनात् स्नेहभरेण तौ दुःखं प्राप्स्यत एव ? तत्राह,—अमोघेति । इच्छामात्रेण सर्वेष्टसिद्धेस्तव श्रमः कोऽपि तत्र न भावीति भावः । ननु भवत्वेतत्, मधुपुर्य्यां मम गमनार्थमुपायान्तरमकृत्वा कंसाय तादृशं कथयता बन्धनेन तयोर्दुःखं साक्षात्त्वया कारितमित्यपराधः कथं क्षम्यः स्यादिति चेत्तर्हि सहज-निजकारुण्येनैव क्षम्यतामित्याशयेनाह,—स्वतेजसा निजप्रभावेनैव नित्यं निवृत्तो नितरां वृत्तो माया मया तल्लक्षणगुणस्य प्रवाहः परम्परा यस्मिन् तम्, तत्रापि भगवन्तं निजकारुण्याद्यशेषगुणप्रकटनपरम्, अत ईमहि शरणं यामः, बहुत्वं निजशिष्याद्यभिप्रायेण । ननु महदपराधो महद्भिस्तैरेव क्षम्यः स्यान्न च मदाश्रयेण ? तत्राह—त्वामिति । ईश्वरं सर्व्वशक्तिमन्तम्, किञ्च, स्वेषां भक्तानामपि तेषामाश्रयम् । किञ्च, निजशक्तिविशेषेण विनिर्म्मिता अशेषविशेषाणां भक्तवर्गस्यास्याखिलवैशिष्ट्यानां तत्तद्विचित्रानन्तमाहात्म्यानां कल्पना सृष्टिर्येन, तत्र च क्रीड़ार्थमभ्यात्तमनुष्यविग्रहम्, तत्र च यद्वादीनां धूर्य्यं निजाशेषभगवताप्रकटनद्वारा जगद्धितार्थं यदुकुलेऽवतीर्णमित्यर्थः, अतो ममापि हितं त्वया कर्त्तुं युज्यत एव, तत्र मदपराधः स्वयमेव क्षम्यताम्, किंवा पितरौ प्रार्थ्य मर्ष्यतामिति । तद्द्वारोऽधुना त्वय्योवेति भावः । यद्वा, यदुवंशधूर्य्येण त्वया क्षान्तः सन् तदनुगैस्त्वत्पित्रादिभिः सर्व्वैः क्षन्तव्य एवेति भावः ।। २३ ।। यदूनां पतिमिति तेषामवश्यरक्ष्यत्वमुक्तम्, तत्रापि कृष्णं भक्तवात्सल्याकृष्टचित्तमतस्तेषामर्थे तस्य तादृशविज्ञापनेन तं प्रति तस्यासूयादिकं न जातमिति भावः । भागवतप्रवर इत्युक्तार्थमेव पुनरुक्तिस्तस्मिन् राज्ञोऽसूयासन्निवृत्तये । यद्वा, प्रणिपत्य साष्टाङ्गं प्रणम्येत्यत्र हेतुः-भागवतेति । एवं यदुपतिमपि कृष्णं गोकुलमहोत्सवमिति पूर्व्वोक्तानुसारेण प्रणिपत्येत्यत्र हेत्वन्तरं वा ज्ञेयम् । तस्य कृष्णस्य दर्शनमेवोत्सवो यस्य, सोऽपि ययौ । कुतः ? अभितोऽनुज्ञातः सन् । यद्वा, अभि अभयं यथा स्यात्, उक्तप्रकारेण विप्रस्यात्मनः कृष्णं प्रति नमस्कारे तस्माद्भयमकुर्व्वन्नित्यर्थः । ननु भगवद्भक्तिमहारसिकोऽसौ प्रयत्नेन तं प्रार्थ्य तत्रैव कथं नावसत् ? तत्राह—मुनिः । अधुनात्र निवासतः श्रीकृष्णस्यात्रत्य—तत्प्रियतमानाञ्च स्वच्छन्दसुखक्रीड़ाविघ्नेन ममापराध एव स्यादिति जानन्नित्यर्थः । यद्वा, श्वो मधुपुरीं यास्यताऽस्य संगत्या मद्गमने मत्प्रेरणयैवास्य तत्र गमनं मत्वा, नूनं व्रजजना मां शप्स्यन्तीति विचारयन्नित्यर्थः ।। २४ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ ननु अमुष्य भूभारस्येति कर्मणि षष्ठी क्षपयिष्णोरपचिकीर्षोः कालशरीरकस्य ते त्वयाऽक्षौहिणीनां सेनानां निधनं द्रक्ष्यामि हे अर्जुनसारथे अर्जुनादिप्रयोज्यकर्तृभिः क्षपयिष्णोरित्यभिप्रायेणार्जुनसारथे इति सम्बोधनम् ।। २१ ।। एवं विज्ञाप्य कृताभिनन्दनं भगवन्तं प्रपद्य नमस्करोति विशुद्धेति द्वाभ्याम् विशुद्धविज्ञानघनमपहतपाप्मत्वादिगुणकं केवलज्ञानैकस्वरूपं स्वसंस्थया स्वनिष्ठया निरतिशयानन्दस्वात्मानुभवनिष्ठया समाप्ताः सर्वेऽर्थाः कामा यस्य तं प्रयोजनान्तरानपेक्षमित्यर्थः । यद्वा सम्यगाप्ताः

सर्वेऽर्थाः यस्य तमवाप्तसमस्तकाममित्यर्थः । सत्यसङ्कल्पतामाह । अमोघवाञ्छितमिति अमोघवर्त्तिनमितिपाठेऽमोघं यथा भवति तथा कार्ये वर्तमानं स्वतेजसा पराभिभवसामर्थ्येन नित्यं निवृत्ताः मायागुणास्तेषां प्रवाहः संसारो यस्य तं भगवन्तं षाड्गुण्यपूर्णमीश्वरं त्वामीमहि प्रपद्येमहि ॥ २ ॥ स्वयमेवाश्रयो यस्य तं "स्वे महिम्नि प्रतिष्ठित" इति श्रुत्युक्तरीत्याऽनन्याधारमित्यर्थः । आत्ममायया स्वसङ्कल्पेन विनिर्मिता अशेषाः सर्वविशेषाः पृथिव्यादयस्तेषां कल्पना देवादिरूपा सृष्टिर्येन तमद्याधुना क्रीडार्थमात्तः मनुष्यस्येव विग्रहो येन तम् । यद्वा देवादीनां धुर्यं त्वां नताऽस्मि यद्यपि सात्वच्छन्दोभगवतपरस्तस्यापि सात्वटेष्वपि भक्तित्वयोगात्प्रवर्त्तत एवमन्यत्रापि द्रष्टव्यम् ॥ २३ ॥ एवमिति । तस्य कृष्णस्य दर्शनादुत्सुकः हृष्टमनाः प्रययौ ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अथ भारतयुद्धे अमुष्य भूवलयस्यावशिष्टं क्षपयिष्णोः क्षीणं कर्तुकामस्य अक्षौहिणीनामष्टादशानामिति शेषः अर्जुनसारथेरित्यनेन भारतयुद्ध इति सूचयति ॥ २१ ॥ उपास्यरूपं विशिनष्टि । विशुद्धेति । भगवन्तं शरणमीमहीत्यन्वयः कीदृशं विशुद्धविज्ञानघनम् अप्राकृतज्ञानमूर्तिं स्वसंस्थया स्वव्यवस्थया अपराधीनस्थित्या समाप्तसर्वार्थं समाप्ताशेषपुरुषार्थं केचिद्वरेवृत्तिर्मायामयीति सङ्गिरन्ते तत्राह । अमोघेति । कुत एतत्कथ्यते इति तत्राह । नित्येति । नित्यनिवृत्तः मायागुणानां प्रकृतिगुणानां प्रवाहः परम्परा यस्मिन्स तथा नन्वेतन्मुक्तानामप्यस्तीति तत्राह । स्वतेजसेति । स्वप्रभावेण तेजोवले प्रभावेऽन्न इति ॥ २२ ॥ हे आद्यन्तराक्षसनाशकर्तरीश्वरं त्वां नतोऽस्मि ईश्वरत्वं समर्थयते । स्वाश्रयमित्यादिना । आत्माधीनया मायया प्रकृत्या स्वेच्छया वा क्रीडार्थं क्रीडितुं विनिर्मिताशेषविशेषकल्पनं विरचितसमस्तदेवब्राह्मणासुरादितत्तद्वस्तुतारतम्यलक्षणविशेषव्यवस्थानं मनुष्यविग्रह इव विग्रहो यस्य स तथा तं मांसदृष्ट्या मनुष्याकारमित्यर्थः । मनुष्यदेहस्वीकारे कृत्यमाह । धुर्यमिति । धुरं वहति यो धुर्य इत्यतो यदुवृष्णिसात्वतां धुरस्य वोढारम् आद्यन्तधुर्यमिति विशेषणद्वयेन दुष्टविनिग्रहविशिष्टपालनरक्षणकार्यार्थं मनुष्यविग्रहस्वीकार इति विज्ञायते आद्यन्तो मनुष्यविग्रहो यस्येत्यर्थाङ्गीकार "आदिनो राक्षसाः प्रोक्तास्तदन्तत्वाज्जनार्दन" इति वचनं निरुणद्धि विशुद्धविज्ञानघनमित्यादिविशेषणानि चोक्तानि व्याहतानि स्युरिति ॥ २३ ॥ तस्य दर्शनेनोत्सव उत्कृष्ट आनन्दो यस्य स तथा ॥ २४–२५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अमुष्य क्षपयिष्णोर्विश्वमपि नाशयितुं समर्थस्येत्यर्थः ॥ २१ ॥ विशुद्धेति द्वयम् ॥ २२–३३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

त्वामीश्वरं स्वाश्रयमित्यादि । त्वां नतोऽस्मीत्यनुषङ्गः । कीदृशम् ? ईश्वरं सर्वैश्वर्य युक्तं मूर्त्तानन्दम्, स्वस्य मूर्त्तानन्दस्य ब्रह्मण आश्रयम् । तथा च हयशीर्षपञ्चरात्रे—'आनन्दो द्विविधः प्रोक्तो मूर्तामूर्त प्रभेदतः । अमूर्तस्याश्रयो मूर्तो भगवानच्युते मतः ॥' इति आत्ममायया विनिर्मितमशेषविशेषं कल्याणं येन । क्रीडार्थं कौतुकार्थमभ्यात्तो गृहीता मनुष्यैर्मानुषरूपैरसुरैः कंसादिभिः सह विग्रहो युद्धं येन तम् ॥ २४–३३ ॥

इति श्री दशमेस्कन्धे श्रीबृहत्क्रमसन्दर्भे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

क्रीडार्थमभ्यात्तेत्यादि । क्रीडार्थं कौतुकार्थम्, अभ्यात्तो गृहीतो मनुष्यैर्मनुष्यरूपैः कंसादिभिर्दुर्योधनादिभिर्वाविग्रहो युद्धलीला येन तं त्वामीश्वरमाश्रये, स्वानां भक्तानामाश्रयम् ॥ २४–३३ ॥

इति सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अमुष्य विश्वस्य । षष्ठी आर्षी । निधनं निधनरूपं ते चरितमिति शेषः ॥ २१ ॥ एवं कार्यं निवेद्य भगवन्तं प्रणमति द्वाभ्याम् । विशुद्धं विज्ञानमनुभवस्वरूपं यद्ब्रह्म तदेव घनं सान्द्रीभूतं त्वामीश्वरमीमहि शरणं व्रजेम प्रणमामेति वा स्वीयया संस्थया सम्यक् प्रकारेण लीलापरिकरादिविशिष्टयां स्थित्या सार्वकालिक्या सम्यगाप्ता भवन्ति सर्वार्थाः सर्वविधभक्तमनोरथा यस्मात्तम् अत्र एवामोघमव्यर्थं वाञ्छितं स्वभक्तमनोरथनिष्पादनलक्षणं यस्य तं स्वस्य स्वीयानां वा तेजसा नित्यं प्रतिदिनमेव निवृत्तो गुणप्रवाहो यस्मात्तम् ॥ २२ ॥ एव विधोऽन्यः कोऽपि नास्तीत्याह । त्वामिति । ईश्वरम् अन्यस्य वशयितारं स्वाश्रयं न कस्याप्याश्रितमतोऽन्यस्यावश्यम् एतदेवान्यानधोनमैश्वर्य्यमाह आत्माधीनया मायया विनिर्मितमशेषविशेषकल्पनं विश्वं येन तं किञ्च क्रीडैव अर्थः स्वप्रयोजनं यस्य तम् अद्य तु आत्तो गृरीतो मनुष्यैः कंसादिभिः सह विग्रहः कंसप्राणतुल्यकेशिवधहेतुकं शाश्वं येन तम् अभ्यात्तेति च पाठः । एषापि तवैका क्रीडेति भावः । यतो यदुवृष्णिसात्वतां सबन्धीनां धुरं रक्षणपोषणादिभार वहसीति तम् ॥ २३–२४ ॥

गूढार्थदीपिनी

वीर्याणि चरितानि यानि कर्ता करिष्यत तानीति योज्यम् ॥ २१ ॥ अमुष्य भूमारस्य शेषे षष्ठी निधने सेनाविनाशरूपं तव कर्म द्रक्ष्यामि ॥ २२ ॥ त्वां भगवन्तम् ईमहि शरणं व्रजेम । कथंभूतम् । विज्ञानघनं विज्ञानमूर्तिम् । स्वसंस्थया स्वरूपस्थित्यैव सम्यक् आप्ताः प्राप्ताः सर्वेऽर्थाः कामाः येन । नित्यनिवृत्तः मायाकार्यरूपो गुणप्रवाहः संसारो यस्मात् तम् ॥ २३ ॥ विनिर्मिता कृता विशेषाणां महदादीनां कल्पना रचना येन तम् । आत्तो गृहीतो मनुष्यविग्रहो येन तं नतोऽस्मि धुर्यं श्रेष्ठम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कालरूपस्य कालात्मनः । अमुष्य भूभारस्य क्षपयिष्णोरपाचिकीर्षोः । ते कृत्यभूतमक्षौणीनां निधनं द्रक्ष्यामि ॥ २१ ॥ एवं केशिवधमनिन्द्य भाविकर्म सिद्धवन्निर्दिश्य तच्छ्रवणेन प्रसन्नं भगवन्तं नमस्यति । विशुद्धविज्ञानघनमिति द्वाभ्याम् । विशुद्धविज्ञानघनं स्वभावतोपाऽस्तसमस्तदोषं केवलं परज्ञानैकस्वरूपम् । अत एव स्वकीयया स्वरूपस्थित्यैव परमानन्दात्मिकया समाप्ताः सर्वेऽर्था यस्य तम् अमोघवाञ्छितं सत्यसंकल्पं स्वतेजसा स्वासाधारणेन प्रभावेण नित्यनिवृत्ताः मायागुणास्तत्प्रवाहः संसारश्च यस्य तम् एवंभूतं भगवन्तं स्वाभाविकैश्वर्य्यषड्गुणानिधिम् ईमहि शरणं व्रजेम ॥ २२ ॥ अद्यत्वां नतोऽस्मि कथम्भूतम् ईश्वरम् सर्वेषां नियन्तारम् स्वाश्रयं नियन्तृरहितं समानातिशयशून्यत्वात् । स्वमायया संकल्परूपया त्रिगुणमय्या वा विनिर्मिता अशेषाणां पृथिव्यादीनां कल्पना नामरूपात्मिका सृष्टिर्येन तम् । ननु वसुदेवतनयस्यैवं भूतमीश्वरत्वं मम कथं घटेतात आह । क्रीडार्थं भक्तैः सह विहर्तुम् आत्ताः पितृत्वादिभावेन स्वीकृताः मनुष्यविग्रहाः येन तम् ॥२३॥ तस्य श्रीकृष्णस्य दर्शनेनोत्सवो यस्य सः ।२४-२५।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यानि चान्यानि तव वीर्याणीति साम्मुग्ध्याऽभिधानं यादृशतादृशानि तानीत्यौदारीन्येन न किन्तु कंसाद्यायुरल्पमवशिष्टं कृष्णेन गन्तव्यमागन्तव्यमक्रूरेणेति तद्दृष्टव्येति मन्तव्यम् । भुवि द्वारकायामावसम्भवान्कर्ता तानि द्क्ष्यामि । कविभिर्गेयानि ते च मुक्ता अमुक्ताश्चेति ज्ञेयम् ॥२१॥ सञ्जिहीर्षाया परमिकायाः कार्यमुदीर्य पुनर्भगवत्त्वेन स्तुवन्नुपसंहरति ॥ अथ त इत्यादिना । कालरूपस्य संहाराकारस्वीकारिणः क्षपयिष्णोरमुष्येत्यर्जुनसारथिपदसमस्तार्जुनपदेन योग्यतयाऽन्वेति । कौरवबलं क्षपयिष्णोः संहर्तुकामस्यामुष्यार्जुनस्य सारथिस्तस्य । यद्वा कालरूपस्यापेक्षितवितरणकल्पतरोः क्षपयिष्णोः संहर्तुमिच्छोरर्जुनसारथेरमुष्य तव सकाशादक्षौहिणीनामष्टादशसङ्ख्यानां निधनं द्रक्ष्यामीति ॥ २२ ॥ विशुद्धं विज्ञानं विशिष्टज्ञानं तेन घनं निविडं तद्रूपमिति यावत् स्वसंस्थया स्वस्थित्या समाप्ताः प्राप्ताः सर्वेऽर्था येन यं वा स्वकर्तृकया संस्थया मृतिरूपिण्या समाप्ताः समापिताः स्वस्वकारणनिविष्टा अर्था येन स तमसोघवर्तिनमव्यर्थं यथा तथा वर्तत इति तं स्वतेजसा स्वसामर्थ्यनैव नित्यं निवृत्तो मायागुणानां प्रकृतिगुणानां प्रवाहो येन स तं भगवन्तमीमहि शरणमिति शेषः ॥ २३ ॥ त्वामीश्वरं स्वाश्रयमिति श्लोके आद्यन्तेति पदमर्शआद्यच्युत्पत्तिनाशवत्परमिति भ्रमभ्रंशं मानेन तनोति ॥ आदिन इति । आदिन आ सम्यगदोऽदनं येषामस्ति त इत्यादिनो राक्षसाणि निर्वा तदन्तत्वात्तन्नाशकत्वादाद्यन्त इति विज्ञेयः । ब्रह्माणि चतुर्मुखे स्थित्वा प्रेरणादीशनात्परेश इति विज्ञेयः । अनेन परस्येशनं तस्मादिति व्युत्पत्तिः सूचिता अथ मूलार्थः ॥ स्वाश्रयमीश्वरमात्ममायया स्वेच्छयैव विनिर्मितमशेषाणां ये विशेषाः सत्याधिपत्यादयस्तेषां कल्पनं येन तमशेषाश्च ते विशेषाश्चेति वा विनिर्मिता निर्मितविरुद्धा नित्या अशेषा ज्ञानादयस्तेषां विशेषमहिम्नेति कल्पनमानन्द आनन्दीति यस्मिंस्तं वा क्रीडार्थमाद्यन्तमनुष्यविग्रहं । अनेनाकर्मनिर्मिततां तद्विग्रहस्याभिप्रैति । यदुवृष्णिसात्वतां धुर्यं वयं नतोऽस्मीत्यन्वयः । आद्यन्तश्चासौ मनुष्यविग्रहश्च तं मनुष्यवद्विग्रहो यस्याद्यन्तमनुष्यविग्रहम् ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं साक्षात्स्वकृतमुक्त्वा कारितमाह । अथेति । परम्परया करणे हेतुं सामर्थ्यं चाह । कालरूपस्येति । अनेन कालरूपो भूत्वा भारतकार्यं कृतवानिति ज्ञातव्यं नतु कालोऽस्मीति वाक्यात् । कालरूप एव भगवान् इति कालस्य नियन्ता भगवानिति तथा कराग्र हेतुमाह । अमुष्य भूभारस्य क्षपयिष्णोः वै निश्चयेन कालो हि निमित्तत्वमेवापद्यते अक्षौहिणीनामष्टादशपरिमितानाम् अक्षाहिणीपरिमाणञ्च—

एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका । पत्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥
सेनामुखं गुल्मगणौ वाहिनी पूतना चमूः ।
अनीकिनी दशानीकिन्यक्षौहिणीत्येकविंशतिसाहस्त्री सप्तत्यष्टशताधिका ।
सङ्ख्या रथाश्विनोः प्रोक्ता नराणां लक्षमुच्यते । तथा नव सहस्राणि त्रीणि चैव शतानि च ॥
पञ्चाशच्च तथाश्वानां पञ्चषष्टिसहस्रकम् । दशाधिकसहस्राणि षडेवेत्येष सङ्ग्रहः ॥

एवं स्वरूपाणामक्षौहिणीनां निधनं द्रक्ष्यामि भगवता कारितमित्यत्र लौकिकं निदर्शनमाह । अर्ज्जुनसारथेरिति ॥२१॥ एवञ्चरित्रनिरूपणेन लौकिकदृष्टिप्रधानानां स्वदृष्टान्तेन भगवतोऽपि लौकिकत्वं मत्वा ब्रह्मत्वाय लीलयैवैतत् कृतमिति मत्वा स्वरूपमाह द्वाभ्याम् ज्ञानभक्तिसिद्धान्तनिरूपकाभ्याम् । विशुद्धेति । त्वं स्वरूपतः ज्ञानरूपः तच्च ज्ञानं न जन्यं नापि सविषयं तदाह विशुद्धेति । ज्ञानशक्तिस्त्वजन्यापि न विषया भवति तदैव विशिष्टा शुद्धिर्भवति तच्च विज्ञानं ब्रह्मरूपमिति वक्तुं घनमित्याह । घनमेव हि बृहत् बृंहितञ्च भवति एतादृशस्य ब्रह्मणः सर्वां सामग्रीं जगत्कारणे आधारादिभूतां फलञ्च स्वरूपमेव अन्यथा असङ्गत्वभङ्गप्रसङ्गः स्यात् विकारित्वञ्च स्यात् स्वरूपपक्षे तु तथैव प्रादुर्भवतीति न कोऽपि दोषः सिध्येत् तदाह । स्वसंस्थयेति । स्वस्मिन्नेव सम्यग्या स्थितिः तयैव कृत्वा समाप्तसर्वार्थः समाप्ताः सर्वे अर्था यस्य बोभूयमानाशेषपुरुषार्थस्वरूपमेव तस्य स्वरूपं तत्स्वरूपस्थित्यैव भवति बहिर्मुखत्वेन भवतीति नित्यं स्वरूपे भगवानेव स्थितो नत्वन्य इति तस्यैव सिद्धाः सर्वे कामाः न केवलमिष्टसिद्धिरेव स्वरूपस्थित्या किन्त्वनिष्टमेव निवर्त्तत इति तदाह । स्वतेजसेति स्वस्य यत् तेजः कोटिसूर्याधिकप्रकाशं चैतन्यं स्वप्रकाशं तेनैव नित्यनिवृत्ता ये मायागुणाः सत्त्वादयः तेषां प्रवाहः कार्यपरम्परा यस्य एते हि दोषास्तम इव सर्वदा सर्वत्र भवन्ति । सूर्यमण्डले तु यथा न तमः तथा भगवति न भवन्ति तत्र हेतुरवश्यं वक्तव्यः हेतुवशादेव नित्यनिवृत्तत्वम् अन्यथा सर्वत्र प्रवर्त्तमाना दोषास्तत्र गता न निवृत्ता भवेयुः सच्चिदानन्दगुणास्तूपयोगिन इति तन्निवारणार्थं मायेति एतादृशमपि औडुलोमिमतवत् न निर्गुणं निराकारं किन्तु भगवन्तं षड्गुणैश्वर्यसम्पन्नं त्वामीमहि शरणं व्रजेम प्रार्थनायां लिङ् ॥२२॥ भक्त्यनुसारेण भगवन्तं निरूपयति । त्वामीश्वरमिति । सर्वनियन्ता भगवान् ईश्वरः अन्ये त्वीशितव्याः एतादृशोऽपि न स्वार्थमीशितव्यानपेक्षते लौकिकेश्वरवत् तदाह । स्वाश्रयमिति । स्वमात्मानमेवाश्रित्य तिष्ठति यथा गरुडादेः धारणप्रयत्नः स्वस्मिन्नेव वर्त्तत इति नाधारान्तरमपेक्षते स प्रयत्नः शाम्यतीति गरुडादयः कदाचिदन्याधारा अपि भवन्ति भगवतस्तु स प्रयत्नो नित्य इति न कदाचिदप्यन्याश्रितः परिदृश्यमानोऽपि सम्बद्ध इव दृश्यते नतु सम्बध्यते अत एव "यः पृथिव्यां तिष्ठन्नि"त्यादिश्रुतयः एवमपि सति असंयुक्त एव संयोगोऽपि न तेन सह जायते यत आत्ममाययैव निर्मिता अशेषविकल्पा येन सर्वे विकल्पाः अन्यथाबुद्धिहेतवः ते वस्तुतः माययैव प्रदर्श्यन्ते स्वरूपन्तु भगवानेवेति भगवानसङ्गोऽपि ननु दृश्यन्ते अवतारेषु देहेन्द्रियादिधर्मा इति चेत्तत्राह । क्रीडार्थमिति । क्रीडायां ये अर्थाः परिगृह्यन्ते कुजत्वादयो धर्मा वाहनत्वादयश्च ते आकारसङ्गे क्रियन्ते नतु भगवद्धर्माः सहजास्ते तथापि कर्म तद्भवतीति फलसाधकत्वं सहजत्वे दोषरूपत्वात् तदपि न स्यात् अत एव नतोऽस्मि निर्दोषपूर्णगुणविग्रहं विशेषमाह । धुर्यमिति । यादवा वृष्णयः सात्वताश्च सात्त्विकाः यदुवृष्णिरूपा वा वैष्णवाः तेषां धुरं सर्वमेव भारं वहतीति सर्वभक्तोद्धारक इत्यर्थः ॥ २३ ॥ एतावदुक्तेऽपि न भगवान् किञ्चिदुवाच भ्रान्तोऽयमिति केवलं गमनार्थमनुज्ञां दत्तवानित्याह । एवमिति । एतदुक्तमवश्यं करिष्यतीत्याज्ञापनार्थं यदुपतिमिति तेषां पतिर्हि तत्कार्यं करिष्यतीति कृष्णं सदानन्दं किञ्चिदप्यकरणे स्वतः पुरुषार्थरूपम् अवश्यं स्वज्ञातं स्वकृतञ्च स्वामिने निवेदनीयमिति निवेदितवानित्याह । भागवतप्रवर इति । एष्यत्परिज्ञाने हेतुः मुनिरिति गमनार्थं साष्टाङ्गं प्रणामं कृतवान् पश्चात् भगवता अभ्यनुज्ञातः ययौ ननु तमागतो न किञ्चित् प्राप्तवान् कथं व्यर्थमेव गत इति चेत् तत्राह । तस्य भगवतो दर्शनमेवोत्सवो यस्य लोके महाफलमुत्सवं तद्रूपं दर्शनमेव प्राप्तवानिति ॥ २४ ॥

श्रीसुबोधिनी–सारः

अथानन्तरम् अमुष्य भूभारस्य क्षपयिष्णोर्विनाशकर्त्तुः कालरूपस्य तेऽर्जुनसारथेर्हेतोरक्षौहिणीनां निधनमहं द्रक्ष्यामि ॥ २१ ॥ विशुद्धं विज्ञानघनं स्वे स्वरूपे संस्थया सम्यक् स्थित्या परमानन्दरूपया सम्यगाप्ताः प्राप्ताः सर्वेऽर्था येन तम् अमोघं वाञ्छितं यस्य स सत्यसंकल्पत्वात्तं स्वस्य तेजसा नित्यं निवृत्तो निरस्तो मायाया गुणानां प्रवाहो यस्मात् । येनेत्येके । तं भगवन्तं वयमीमहि शरणं यामः ॥ २२ ॥ स्वाश्रयं स्वतंत्रम् आत्मनो मायया विनिर्मिता अशेषाणां विशेषाणां कल्पना येन तं क्रीडार्थं धृतमनुष्यदेहं यदुवृष्णिसात्वतां धुर्यं मुख्यम् ईश्वरं त्वाम् अहं नतोस्मि । अद्य इदानीम् ॥ २३ ॥ शुकोक्तिः । एवं यदूनां पतिं कृष्णं प्रणिपत्य तेनाभ्यनुज्ञात आदिष्टः परमभागवतो मुनिर्नारदः तस्य हरेर्दर्शनमेवोत्सवो यस्य स ययौ ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं कर्मकरणं भाविश्रोत्रादिजनोद्धारार्थम्' इत्याशयेनाह—कविभिर्भुवि गेयानि इति ॥ २१ ॥ अथानन्तरममुष्य भूभारस्य कर्मणि षष्ठी भूभारं क्षपयिष्णोः अपचिकीर्षोस्ते तव अक्षौहिणीनां निधनं विनाशरूपं कर्म द्रक्ष्यामीत्यन्वयः । भूभारहरणे समर्थ्यमाह—कालरूपस्येति । 'तदपि भूभारहरणमर्जुनादिद्वारा' इत्याशयेनाह—अर्जुनसारथेरिति । 'अत्र सन्देहो नास्ति' इत्याशयेनाह—वा इति ॥ २२ ॥ एवं विज्ञाप्य कृताभिनन्दनं भगवन्तं शरणं व्रजति विशुद्धेति । वयं भक्तास्त्वामीमहि शरणं व्रजेम । 'त्वमेव शरणयोग्यो, नान्य' इत्याशयेन विशिनष्टि—विशुद्धविज्ञानघनं केवलज्ञानैकमूर्तिम्, अत एव स्वसंस्थया स्वरूपसम्यक्स्थित्यैव निरतिशयानन्द स्वात्मानुभवरूपया सम्यगाप्ताः प्राप्ताः सर्वे अर्थाः कामा यस्य तम्, अमोघं वाञ्छितं यस्य तम् । ननु 'वाञ्छास्ति चेत्तर्हि तदधीनः संसारोऽपि दुर्वार' इत्याशङ्क्याह—स्वतेजसेति । चिच्छक्त्या नित्यनिवृत्तो मायाकार्यरूपो

गुणप्रवाहः संसारो यस्मात्तम्, अत एव भगवन्तं निरतिशयैश्वर्यपूर्णम् ॥ २३ ॥ एवं शरणमागत्य प्रणमति—यदुवृष्णिसात्वतां धुर्यं श्रेष्ठं त्वामहं नतोऽस्मीत्यन्वयः। श्रेष्ठत्वे हेतुमाह—ईश्वरमिति। ईश्वरत्वमेव स्पष्टयति—आत्ममायया स्वेच्छयैव विनिर्मिता ये अशेषाः सर्वे विशेषाः महदादयस्तैः कल्पना देवादिसृष्टिर्येन तम्, अद्य क्रीडार्थमात्तः स्वीकृतो मनुष्यविग्रहो येन तम् ॥ २४ ॥

अन्वितार्थप्रकाशिका

यानीति ॥ भगवान् द्वारकामावसन् सन यानि प्रोक्तेभ्यो अन्यानि कविभिर्भुवि गेयानि वीर्याणि कर्त्ता करिष्यति तानि चाहं द्रक्ष्यामि ॥ २१ ॥ अथेति ॥ अथ कालरूपस्य अर्जुनसारथेः अमुष्य भूभारस्य। शेषे षष्ठी। भूभारं क्षपयिष्णोः अपजिहीर्षोस्ते तव अक्षौहिणीनां निधनं विनाशरूपं कर्म द्रक्ष्यामि ॥ २२ ॥ विशुद्धेति ॥ वयं भक्ताः विशुद्धं वृत्त्याद्युपाधिरहितं यस्य यत् विज्ञानं तदेव घनं सान्द्रीभूतम् अत एव स्वसंस्थया स्वरूपसम्यक्स्थित्यैव चिच्छक्त्या निरतिशयानन्दरूपया सम्यगाप्ताः प्राप्ताः सर्वे अर्थाः कामा येन तममोघं वाञ्छितं यस्य तं स्वतेजसा चिच्छक्त्या नित्यनिवृत्तो मायाकार्यरूपो गुणप्रवाहः संसारो यस्मात्तं भगवन्तं त्वाम् ईमहि शरणं व्रजेम। आर्षः ॥ २३ ॥ त्वामिति ॥ ईश्वरम् अन्यस्य वशयितारं स्वाश्रयमन्यस्य अवशम् आत्मनः अधीनया मायया विनिर्मिता ये अशेषाः सर्वे विशेषाः महदादयस्तैः कल्पना देवादिसृष्टिर्येन तम्। अद्य क्रीडार्थमात्तः स्वीकृतो मनुष्यविग्रहो येन तम् अभ्यात्तेति वा पाठः। यदुवृष्णिसात्वतां धुर्यं श्रेष्ठं त्वामहं नतोऽस्मि ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अमुष्य भूभारस्य क्षपयिष्णोः ते तव त्वयाकर्त्रा अक्षौहिणीनां कृतं निधनम् ॥२१॥ एवं मुक्त्वा श्लोकद्वयेन स्तुवन्नमस्यति विशुद्धेति विशुद्धं विज्ञानघनं स्वरूपं यस्य तं स्वस्य संस्थया अनवधिकातिशयाऽऽनन्दरूपया सम्यक्स्थित्यासमाप्ताः सम्यक्प्राप्ताः सर्वं अर्था येन तम्। स्वतेजसा नित्यं निवृत्तोमायायाः गुणप्रवाहो येन तं त्वां ईमहि शरणं आगछेम ईणं धातोः पदव्यत्यसेन लडात्मनपदे कृते सति ईमहीति रूपं बोध्यः ॥ २२ ॥ एवंभूतोऽहमत्र कुत आगतः इति चेत्तत्राह त्वामिति ईश्वरं सर्वेषां वशीकारकं स्वाश्रयं स्वाधीनं न त्वन्याधीनं अतः आत्ममायया स्वाधीनया मायया विनिर्मिता कृता अशेषाणां समग्राणां विशेषाणां देवमनुष्यादिभेदानां च कल्पना रचना येन तं अद्य अधुना क्रीडार्थं जनकल्याणरूपरमणार्थं आतः प्रकटीकृतो मनुष्यविग्रहो येन तं धुर्यं मुख्यं त्वां नतोऽस्मि ॥ २३–२५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यानीति ॥ द्वारकां आवसन्, भवान् अन्यानि यानि वीर्याणि च, कर्त्ता करिष्यति, भुवि कविभिः, गेयानि तानि, अहं द्रक्ष्यामि ॥ २१ ॥ अथेति ॥ अथ अमुष्य भूभारस्य, कर्मणि षष्ठी। क्षपयिष्णोरपचिकीर्षोः, कालरूपस्य कालशरीरकस्य, अर्जुनसारथेः पाठान्तरे अर्जुनसारथे इति संबोधनम्। ते तव, त्वयेत्यर्थः। कृतमिति शेषः। अक्षौहिणीनामष्टादशाक्षौहिणीसंख्यातसैन्यानां, निधनं, द्रक्ष्यामि वै ॥ २२ ॥ एवं विज्ञाप्य कृताभिनन्दनं प्रपद्य नमस्करोति द्वाभ्याम् ॥ विशुद्धेति ॥ विशुद्धविज्ञानघनमपहतपाप्मत्वादिगुणकं केवलज्ञानैकस्वरूपं, स्वसंस्थया स्वनिष्ठया निरतिशयानन्दस्वात्मानुभवनिष्ठयेति यावत्। समाप्ताः सर्वेऽर्थाः कामा यस्य तं, प्रयोजनान्तरानपेक्षमित्यर्थः। यद्वा। सम्यगाप्ताः सर्वेऽर्था यस्य तमवाप्तसमस्तं काममित्यर्थः। अमोघवाञ्छितमिति सत्यसंकल्पतामाह। अमोघवर्त्तिनमिति पाठे, अमोघं यथा भवति तथा कार्ये वर्त्तमानं, स्वतेजसा स्वानिष्टपराभिभवसामर्थ्येन, नित्यनिवृत्तः मायागुणात्प्रवाहः संसारो यस्य तं, भगवन्तं षाड्गुण्यपूर्णमीश्वरं, त्वां ईमहि प्रपद्येमहि 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' इत्यत्र ईकारोऽपि धात्वन्तरं प्रश्लिष्यते इति भट्टोजिदीक्षितोक्तेरीधातोः पदव्यत्ययेन लडात्मनेपदे कृते सति ईमहीति रूपं बोध्यम्। शरणं व्रजेमेत्यर्थः ॥ २३ ॥ त्वामिति ॥ स्वाश्रयं स्वयमेवाश्रयो यस्य तं तथाभूतं, 'स्वे महिम्नि प्रतिष्ठितः' इति श्रुत्युक्तरीत्याऽनन्याधारमित्यर्थः। आत्ममायया स्वसंकल्पेन, विनिमिता अशेषाः सर्वे ये विशेषाः पृथिव्यादयस्तेषां कल्पना देवादिरूपा सृष्टिर्येन तं, अद्य अधुना, क्रीडार्थं, आत्तो मनुष्यस्येव विग्रहो येन तं, यदवश्च वृष्णयश्च सात्त्वन्तश्च तेषां, धुर्यं श्रेष्ठं, ईश्वरं त्वां, नतः अस्मि। सात्त्वच्छब्दोऽत्र भागवतपरस्तथापि सात्त्वतेष्यपि भक्तत्वयोगात् प्रवर्त्तत इति एवमन्यत्रापि द्रष्टव्यम् ॥ २४ ॥

कृष्णप्रिया

भगवन्? मैंने आप के गिने चुने कितनेक चरित्र गाएँ लेकिन द्वारिका में विराजते हुए आप और अनेक चरित्र करेंगे उन सबका मैं दर्शन करूँगा। भूतल पर बिराजते आप जो जो चरित्र करेंगे उन चरित्रों का कवि पुङ्गव व्यास प्रभृति कविवर गान करेंगे ॥२१॥ हे नाथ? भूमि का भार उतारने का कार्य जब अनिवार्य बनेगा तब आप कालरूप बनकर महाभारत संग्राम में पार्थसारथि बनकर अट्ठारह अक्षौहिणी सेनाओं का संहार करेंगे और भूमिभार हरेंगे वह भी मैं देखूँगा एक अक्षौहिणी सेना में २१८७०, हाथी, २१८७० रथ, ६५६१०, अश्व, १०९३५० पदाति होते हैं ॥ २२ ॥ भगवन्! स्वतःसिद्ध

विज्ञान ही आपका घनीभूत स्वरूप है आपने अपने परमानन्दस्वरूप से ही सर्व अर्थ प्राप्त है—आप पूर्ण काम हैं, आपका अभिलषित सदा सिद्ध है, माया के कार्य तीन गुणों की कार्यपरम्परा को अपने तेज से चैतन्य से आप नित्य निवृत्त करते हैं, ऐसे पूर्णपुरुषोत्तम भगवान् आपका मैं शरणागत दास हूँ ॥ २३ ॥ श्रीदेवर्षि जी षडैश्वर्य श्रीकृष्ण भगवान का यशोगान करते छह विशेषणों से भगवान् को प्रणाम करते हैं—भगवन् सर्वतन्त्रस्वतन्त्र ईश्वर है, आप अपने ही आश्रय पर रहते हैं, आप अपनी माया नाम की शक्ति से महत् तत्व से लेकर सर्वतत्त्वों की विशिष्ट रचना करते हैं, वर्तमान में क्रीडा करने के लिए आपने मनुष्य का श्रीविग्रह धारण किया है, आप यदुवंश-वृष्णिवंश एवं सात्वतवंश में सर्वश्रेष्ठ है। भगवन्! मै आपके श्रीचरणों को प्रणाम करता हूँ ॥ २४ ॥

श्रीशुक उवाच

एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः। प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः ॥ २५ ॥
भगवानपि गोविन्दो हत्वा केशिनमाहवे। पशूनपालयत् पालैः प्रीतैर्व्रजसुखावहः ॥ २६ ॥
एकदा ते पशून् पालाश्चारयन्तोऽद्रिसानुषु। चक्रुर्निलायनक्रीडा [1]श्चोरपालापदेशतः ॥ २७ ॥
तत्रासन् कतिचिच्चोराः पालाश्च कतिचिन्नृप। मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः ॥ २८ ॥

कदंमक्षमा

अन्वयः—श्रीशुक उवाच—भागवतप्रवरः, मुनिः, यदुपतिम्, कृष्णम्, एवम्, (विज्ञाप्य) प्रणिपत्य अभ्यनुज्ञातः, तद्दर्शनोत्सवः, ययौ ॥ २५ ॥ भगवान्, व्रजसुखावहः, गोविन्दः, अपि, आहवे, केशिनम्, हत्वा, प्रीतैः, पालैः, सह, पशून्, अपालयत् ॥ २६ ॥ एकदा, ते, पालाः, अद्रिसानुषु, पशून्, पालयन्तः, चौरपालापदेशतः, निलायनक्रीडाः, चक्रुः ॥ २७ ॥ हे नृप ! तत्र, कतिचित्, चौराः, आसन्, कतिचित्, पालाः, च ये चौरा अभवन् पुनस्ते पाला भवन्ति पालाश्चौरा भवन्ति इति चकारार्थः) च, तत्र एक, मेषायिताः, च (तत्र, एके, चौरायिता अभवन्) अकुतोभयाः, विजह्रुः ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु नारदेन व्योमवधो न दृष्टस्तत्कथं व्योमवधप्रसक्तिरिति तत्रोच्यते। प्रातरेव केशिवधानन्तरं नारदेनोक्तमङ्गीकृत्य पुनस्तथैव पशूंश्चारयता व्योमो हतः। यद्वा व्योमवधः पूर्वमेव वृत्तोऽपि वेषधारिवधप्रसङ्गादत्रोच्यत इति द्रष्टव्यम्। केचित्पुनः शंखचूडवधात्पूर्वमेव पठन्ति च। तमाह। एकदेति ॥ २६–२७ ॥ मेषायितान्मेषवदाचरितान्स्वय चोरवदाचरितः सन्नपोवाहापकृष्य निनाय ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भगवानपीत्यत्रापिना तद्दर्शनोत्सव एव तस्याद्भुतश्रावकत्वादिति भावः। पालैर्गोपैः ॥ २५ ॥ पुनस्तद्दिन एव। तथैव पूर्ववत्। ननु व्योम प्रेषणाद्यश्रुतेरत्र तद्वधः प्रकृतासंगत इव भातीत्यत आह—यद्वेति। द्रष्टव्यं ज्ञेयम्। केचित्तु पूर्वं रासलीलोत्तरमित्यर्थः। तं व्योमवधम्। ते गोपाः। अद्रिसानुषु गोवर्धनप्रस्थेषु। चोरपालापदेशतः वयं पशूंश्चोरयिष्यामो वयं पालयिष्याम इत्यपदेशेन छन्नमनसा। व्याजेनेति यावत्। "अपदेशः पुमाल्लँक्ष्ये निमित्तव्याजयोरपि" इति मेदिनी। निलायनं निलीनकर्म ॥ व्योमवधस्य श्रीनारदानुक्तत्वात्तद्दिने तद्वधे एकदेत्युक्तेरसंगतत्वात्तादृशलीलायाः कौमारान्त एव योग्यत्वाच्च। अतः 'वृषमयात्मजात्' इति गोपिकावाक्यञ्च संगच्छते। वृषात्मजो वत्सो मयात्मजो वत्सो मयात्मजो व्योमासुर इति पूर्वव्याख्यानात्। निलायनं नाम चोरितस्य तिरोधापनं, तद्रूपां क्रीडाम् ॥ २६ ॥ तत्र क्रीडायाम्। मेषायिता मेषवद्वर्तमानाः ॥ अकुतोभया इति–चोरयितव्याश्चोरयितारः पालकाश्चैतत्त्रयं वयं सखाय एवेति विश्वासात् ॥ २७ ॥ अपकृष्य बलात्कारेण गृहीत्वा ॥ अपोवाह चोरयामास ॥२८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मुनिर्ययौ भगवानपि पशूनपालयदित्यपिशब्दार्थः। यतो गोविन्दः तस्मिन् गते सति प्रकृतगोकुलेन्द्रत्वोचितलीलामेवानुमोदमान इत्यर्थः। तत्र हत्वेति नारदसम्वादात् पूर्वस्याप्यनुवादः। आहव इति तस्यान्येन युद्धे घात्यत्वमनभिप्रेत्य महाबलिष्ठत्वादिकं सूचितम्। अतः प्रतितैर्गततद्विषयकभयैः पालैस्तत्सङ्गेन गोपालकैः सह पशूनपालयत्। व्रजान्निर्गच्छन्तं तमनुगतानां व्रजजानानाञ्च सुखावहो जातः ॥ २५ ॥ एकदेति तैर्व्याख्यातं तत्र यद्वेति व्योमवधस्य श्रीमुनीन्द्रेणानुक्तत्वात् तद्दिन एव तद्वधे एकदेत्युक्तेरसङ्गतत्वात् तादृश लीलायाः कौमारान्त एव योग्यत्वाच्च अतो वृषमयात्मजादिति गोपिकावाक्यञ्च सङ्गच्छते वृषात्मजो

---

[1] क्रीडां–वीर. विज.।

वत्सो मयात्मजो व्योमासुर इति पूर्वव्याख्यानात्। निलायनं नाम चोरितस्य तिरोधापनं तद्रूपां तामेवाह। चौरेति। चौराः पालाश्च रक्षकास्तेषामपदेशतः अभिनयात् तद्द्वयेन मेषापदेशिनामपि ग्रहणम्। सम्बन्धिशब्दत्वात्॥ २६॥ तत्र तस्यां क्रीडायाम्। मेषायिता इति। मेषाणां वधेऽपि क्रोशनाद्यभावेन सुखचौर्य्यत्वात् तत्राद्रिसानुषु विजह्रुः॥ २७॥ प्रायो बहून् सर्वानेव चतुःपञ्चानामेवावशिष्टत्वात्॥ २८॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मुनिर्ययौ, भगवानपि पशूनपालयदित्युक्तसमुच्चयेऽपि-शब्दः, यद्वा, भक्तवत्सलोऽसौ निजभक्तिलालसं तं कथं तत्र नारक्षदित्यपेक्षायामाह—भगवानपि पालैर्गोपैः सह पशूनेवापालयदिति, यतो गोविन्दो गोकुलेन्द्रः, किञ्च, व्रजस्यैव सुखमावहत्याविच्छेदेन प्रापयतीति तथा सः, अतस्तैः सह तत्तत्क्रीडाविशेषसुसिद्धये तस्य तत्र रक्षणं न युक्तमित्यपि-शब्दार्थः। यद्वा, उक्तन्यायेन व्रजजनेषु तस्यागः शङ्कया तं नारक्षत्, भक्तवात्सल्यादेव, तदेवाह—भगवान् गोविन्द इति। आहव इति महाबलिष्ठत्वादिकं सूचितम्। प्रीतैः केशिवधेन प्रहृष्टैरिति विचित्रमधुरस्तुतिः कृतेति सूचितम्। तथा चोक्तं श्रीपराशरेण (वि० पु० ५।१६।१७) 'ततो गोप्यश्च गोपाश्च हते केशिनि विस्मिताः। तुष्टुवुः पुण्डरीकाक्षमनुरागमनोरमम्॥' इति, श्रीवैशम्पायनेन च (हरिवंशे विष्णु० प० २४।५२–५३)—

'तं हतं केशिनं दृष्ट्वा गोपा गोपस्त्रियस्तथा। बभूवुर्मुदिताः सर्व्वे हतविघ्ना गतक्लमाः॥
दामोदरन्तु श्रीमन्तं यथास्थानं यथावयः। अभ्यनन्दन् प्रियैर्वाक्यैः पूजयन्तः पुनः पुनः॥'

इति। तत्र गोप्य इति गोपस्त्रिय इति च तयोर्मते व्रजान्तिक एव केशिवधात् तत्र यद्यपि श्रीनारदात् प्रागेव तेषां स्तुतिर्घटते, तथाप्यत्र पश्चात्तत्सूचनम्। परमगुरुश्रीनारदस्य गौरवाच्छ्रीबादरायणिना तत्स्तुतेरादावुक्तेः। किंवा सद्यः श्रीनारदागमनापेक्षया श्रीभगवता गोपानामितस्ततस्त्वरया प्रेषणावदानीं तेषां स्तुतावशक्तेः। यद्वा, हेलया तद्वधेनाद्भुतत्वाभावात् स्तुतिर्व्यक्तं न कृतैवेति। व्रजसुखावह इत्यनेन तादृश-श्रीनारदविज्ञापनेनापि तस्य मधुपुरीजिगमिषा न जातेत्यपि सूचितम्॥ २५॥ एकदेति तैर्व्याख्यातम्। तत्र च व्योमवधस्य श्रीनारदेनानुक्तत्वात्। यद्वा, तद्दिन एव तद्वधे एकदेत्युक्तेरसंगतत्वात्तथा व्याख्यातमिति ते केशिवधप्रीताः श्रीकृष्णादयो वा निलायनं नाम चोरितस्य वृक्षमूलादौ तिरस्करणं तद्रूपां क्रीडां तामेवाह—चौरेति। चौराः पालाश्च रक्षकास्तेषामपदेशतोऽभिनयान्मेषायितानामत्रानुक्तिस्तेषां मेषायिततया तत्तत्क्रीडायां चेष्टाविशेषराहित्येनाप्राधान्यात्।२६ तत्क्रीडाप्रकारमेव प्रपञ्चयति, तत्रेति। तस्यां क्रीडायां तेषु मध्ये वा, मेषायिता इति मेषाणां वधेऽपि क्रोशनाद्यभावेन सुखचौर्य्यत्वात्तत्राद्रिसानुषु विजह्रुः, यतोऽकुतोभयाः, न कुतश्चिदपि भयं येषाम्, श्रीभगवत्प्रभावेण दैत्यादिभ्यो भयाभावात्। यद्वा, श्रीवृन्दावनान्तर्वर्त्तिमहादैत्यकेश्यादिवधेनाशेषभयनिवृत्तेः। अयं च तेषु व्योमस्य प्रवेशे हेतुरप्यूह्यः, तेषां निःशङ्कत्वेन क्रीडापरतया तेषु सुखप्रवेशसिद्धेः, यद्वा, कालादिभयस्याप्यभावात् श्रीभगवद्विच्छेदादिशङ्काराहित्याद्वा। हे नृपेति, तत्त्वया बुध्यत एव, यथा सद्राजतः प्रजानामकुतोभयत्वमिति भावः॥ २७॥ मयो नाम दैत्यमुख्यो महामायाविषु प्रसिद्धः, तस्य पुत्रः, अतो महामायः, यद्वा, तस्मादपि मायित्वाधिक्यात्, अतो गोपालवेशधृक्, अत एव तैर्न परिचित इति भावः। यद्वा, श्रीभगवता कथमसौ तत्क्रीडायां स्वीकृत इत्यपेक्षायामाह, गोपालेति। भक्तवेशनापि तदनुग्राह्यत्वादिति भावः। प्रायो बहून् सर्वानेव, चतुःपञ्चानामेवावशिष्टत्वात्। यद्वा, प्रकृष्टोऽयो गतिर्भक्त्यदिप्रदर्शनरूपो यस्य सः, अयमपि तदानीं तेन तस्यापेक्षायां तेतुरूह्यः। किंवा, अत एव गोपा विश्वस्याक्रोशनादिकं न चक्रुरिति भावः॥ २८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ भगवानाहवे युद्धे केशिनं हत्वा नारदेन विज्ञापितश्च व्रजस्य सुखमावहतीति तथाभूतः गोपैः सह पशूनपालयन्॥२५॥ प्रातरेव पुनस्तथैव पशून्पालयता व्योमासुरो हतः। यद्वा व्योमवधः पूर्वमेव वृत्तोऽपि वेषधारिवधप्रसङ्गादत्रोच्यत इति द्रष्टव्यं केचित्पुनः शङ्खचूडवधात्पूर्वमेव पठन्ति च। एकदेति। कदाचित्ते गोपाः पशूनद्रेः सानुषु चारयन्तः चोरपालव्यवहारो निलायनाख्यां क्रीडां चक्रुः॥ २६॥ तामेव दर्शयति। तत्रेति तत्र गोपानां मध्ये कतिचिद्गोपाश्चौरव्यपदेश्या बभूवुः हे नृप केचित्तु पालाश्चौरेभ्यो रक्षकाः अवशिष्टास्तु केचिन्मेषवदाचेरुरेवं निर्भया विजह्रुः॥ २७॥ एवं सति तदा मयस्य पुत्रो व्योमो महामायोऽत एव गोपालस्येव रूपं बिभ्राणः स्वयं प्रायशश्चोर एव तद्वदाचरन् मेषवदाचरितान् बहून् गोपानपोवाह अपकृष्य निनाय॥ २८॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

चोरपालापदेशतः वयं पशूंश्चोरयामः वयं पालयाम इति अपदेशेन छन्नमनसा निलायनक्रीडां निलीनकर्मलक्षणक्रीडाम्॥ २६–२७॥ चोरायितश्चोरवद्वर्तमानः॥ २८॥

गूढार्थदीपिनी

तेन अभ्यनुज्ञातः दत्ताज्ञः ॥ २५ ॥ आहवे युद्धे ॥ २६ ॥ ते पालाः गोपालाः । निलायनं चोरितवस्तुतिरोधापनम् । अपदेशवः व्याजतः ॥ २७ ॥ मेषायिताः मेषवत् वर्तमानाः विजह्रुः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निलायनं चोरितवस्तुतिरोधापनम् अपदेशोऽभिनयः ॥ २६ ॥ अकुतोभया इति । चोरयितव्याश्चोरयितारश्च पालकाश्चैते त्रयो वसं सखाय एवेति विश्वासात् ॥ २७ ॥ अपोवाह चोरयामासः ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निलायनक्रीडां पशुतच्चोरपालरूपधारणादिलीलाम् ॥ २६–२७ ॥ अपोवाह । अपकृष्य निनाय ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पूर्वत्रात्र च भागवतप्रवर इति वर्णाधिक्यं न वैकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्यामित्युक्तेर्न छन्दश्छेदकम् । तद्दर्शनोत्सवस्तस्यं केशवकृतचाणूरकंसादिहिंसाकर्मणां दर्शने उत्सवो यस्य सः । चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिपान् । कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभाविति प्रार्थनानुकूल्यात् ॥ २५ ॥ प्रीतैः पालैः सह ॥ २६ ॥ निलायनक्रीडां नयनाच्छादनानन्तरमेकेन गन्तव्यं नेयाः पशवस्तेन तन्मार्गणं कर्तव्यमिति चोरपालापदेशतस्तद्व्याजतः क्रियमाणा निलयनक्रीडा तां ॥ २७ ॥ मेषायितास्ताननुकुर्वन्तः ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवम्मध्ये समागतं नारदमुपसंहृत्य केशिवधानन्तरं भगवान् गोकुले गत इति नोक्तमिति तदुपसंहरति । भगवानपीति । यतो गोविन्दः यथा नारदो गतः एवं भगवानपि ततो गोकुलं गतः आहवे संग्रामे अन्यथायं वधः राजसप्रकरणे न वक्तव्यो भवेत् पूर्ववदेव पशूनपालयत् नतु नारदवाक्येन ऐश्वर्यभावे च खेदो वा जात इति प्रीतैः पालैरिति स्वाभिप्रेतनिवेदनं पूर्ववच्च स्थितिरुक्ता किञ्च अहर्निशं पूर्ववदेव व्रजसुखावहो जातः ॥ २५ ॥ यद्यप्यग्रिमकथा तस्मिन्नेव दिवसे न कृता तथापि सिंहावलोकनन्यायेन कथां निरूपयति इतो गतोऽपि भगवान् गोकुलं पालयिष्यतीति ज्ञापनार्थम् । एकदेति नवभिः । पूर्वमस्याः कथायाः प्रकरण न स्थितमिति स्वकालेनोक्ता तदाह । कदाचित्ते सर्व एव गोपालाः अद्रिसानुषु पशून् चारयन्तः गोवर्द्धनोच्चप्रदेशेषु स्थिताः दूरादपि द्रष्टुं शक्नुवन्तीति निलायनक्रीडां चक्रुः तत्र निलायनं यासु क्रीडासु ये क्रीडन्ति तन्मध्य एव केचन लीना भवन्ति केचनान्वेषणार्थं प्रवृत्ता भवन्ति तत्रापि विशेषमाह । चोरपालापदेशत इति । एवमपि केचन निलीनाः चौरा एव भवन्ति अन्वेषकाः पाला एव ।२६। चौर्यविषयसिद्ध्यर्थं विशेषमाह । तत्रासन्निति । सर्वे गोपालास्त्रिविधा जाताः प्रयत्नाधिक्यात् । प्रथमतश्चोराः चकारात् सर्वे परावृत्या सर्वं भवन्तीति । नृपेति सम्बोधनं लीलामात्रत्वज्ञापनार्थमेषानीयमानास्तूष्णीं तिष्ठन्तीति न छागादिरूपा निरूपिताः एक इत्याशङ्का भगवता कृत्वा न कुतश्चिद्भयं येषां प्रायेण भगवान् बलभद्रश्च तस्मिन् दिवसे न गोचारणार्थं गतौ अन्वथा समागमनमात्रेणैव स हतो भवेत् गोकुले स्थित एव तत्र गत्वा मारितवानिति विमर्शः ॥ २७ ॥ दैत्यांशत्वात् कंसस्य तद्धितकारी मयपुत्रः स्वयमागत्य गोपानामुपद्रवं कृतवानित्याह । मयपुत्र इति । महती माया यस्येति गोपालान् वञ्चयितुं मारयितुञ्च शक्तिरुक्ता पलायनं करिष्यन्तीति व्योमासुरो गोपालरूपो जातः चौरायितप्रतिच्छायरूपः मेषायितान् मेषवत्पातत्वा स्थितान् यथान्ये गोपाला नयन्ति परन्तेषु नीयमानेषु पालायिता जाग्रति अस्मिंस्तु नीयमाने नयति सति मायया कृत्वा न कस्यापि जागरणमिति बहूनेव नीतवान् ॥ २८ ॥

श्रीसुबोधिनी–सारः

आहवे युधि केशिनं हत्वा भगवानपि गोविन्दो व्रजस्य सुखावहः सुखप्रापकः प्रीतैः पालैर्गोपैः सह पशूनपालयत् ॥ २५ ॥ एकस्मिन् काले ते पाला गोपा अद्रेः सानुषु पशून् चारयन्तः चौराः केचन पालाश्चान्ये इत्यपदेशतो मिषेण निलीयन्ते जना यासु इति निलीयन्ते जना यासु इति निलायनास्ताश्च ताः क्रीडाश्च ताः चक्रुः ॥ २६ ॥ तथाहि तत्र क्रीडासु कतिचित् चौराः कतिचित् पाला रक्षका आसन् तत्र एके मेषवदाचरन्तः अकुतोभया निःशङ्कां विजह्रुः ॥२७॥ महती माया यस्य स मयस्य पुत्रो व्योमो नामतः गोपालरूपी चौरायितः चौरवदाचरन् प्रायो बहून् मेषायितान् अपोवाह जहार ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्य कृष्णस्य दर्शनेनोत्सव आनन्दो यस्य स भागवतप्रवरो मुनिर्नारद एवं यदुपतिं कृष्णं प्रणिपत्य तेनाभ्यनुज्ञातो ययावित्यन्वयः ॥ २५ ॥ भगवानपि आहवे युद्धे केशिनं हत्वा बालैर्गोपैः सह पशून् गाः अपालयत् । 'तत्पालनमप्यावश्यकम्' इत्याशयेनाह—गोविन्द इति । गवामिन्द्रतया इन्द्रादिभिराभिषिक्तः । अपिशब्देन सूचितं भक्तवात्सल्यं स्पष्टयन्नाह—व्रजसुखावह

इति । व्रजजनस्य सुखमावहतीति तथा । तेषां भक्तिं दर्शयति—प्रीतैरिति ।। २६ ।। प्रातरेव केशिवधानन्तरं नारदोक्तमङ्गीकृत्य पशून् पालयता श्रीकृष्णेन व्योमो हतः तत्प्रसङ्गमाह—एकदेत्यादिना । एकदा ते रामकृष्णादयो गोपालाः अद्रेः गोवर्धनस्य सानुषु तटप्रदेषु पशून् चारयन्तः चोरपालापदेशतः चोरपालव्याजेन निलीय चोरयित्वा स्थापनं यासु ता निलायनाख्याः क्रीडाश्चक्रुरित्यन्वयः ।। २७ ।। ताः क्रीडाः स्पष्टयति—तत्रेति । तेषु गोपेषु केचिच्चोरा आसन् । केचित् रामकृष्णादयो मुख्याः पालाः स्वामिनः आसन् । एके च दुर्बला मेषायिताश्चासन् । तत्र चौरा मेषायितांश्चोरयन्ति, पालाश्च तान् विचिन्वते । एवमकुतोभया निर्भयाः सन्तः सर्व विजह्रुः ।। २८ ।।

अन्वितार्थप्रकाशिका

एवमिति ।। तस्य कृष्णस्य दर्शनेनोत्सव आनन्दो यस्य स भागवतप्रवरो मुनिर्नारद एवं यदुपति कृष्णं प्रणिपत्य तेनाभ्यनुज्ञातौ ।। २५ ।। भगवानिति ।। व्रजजनस्य सुखमावहति स गोविन्दो भगवानपि आहवे युद्धे केशिनं हत्वा प्रीतैः पालैर्गोपैः सह पशून् गाः अपालयत् ।। २६ ।। अथ व्योमवधः स च बकवधोत्तरमेव कृतोऽपि वेषधारिप्रसङ्गादत्रोक्तः । अत एव नारदेन भावितया नोक्तः । किञ्चेयं लीला कौमारे एव शोभते । अत एव वृषमयात्मजादिति गोप्युक्तिरपि सङ्गच्छते इति तोषिणी । प्रातरेव केशिवधानन्तरं नारदोक्तमङ्गीकृत्य पुनस्तथैव पशून्पालयता व्योमो हत इति समाधानान्तरं स्वामिपादाः प्राहुः । एकदेति ।। एकदा बकवधोत्तरकाले ते रामकृष्णादयो गोपालाः अद्रेः गोवर्धनस्य सानुषु समप्रदेशेषु पशून् चारयन्तः चोरपालापदेशतः चोरपालव्याजेन निलीय चोरयित्वा स्थापनं यासु ता निलायनाख्याः क्रीडाश्चक्रुः । निलायनं चोरितवस्तुतिरोधापनम् अपदेशोऽभिनय इति चक्रवर्ती ।। २७ ।। तत्रेति ।। हे नृप ! तत्र तेषु गोपेषु कतिचित् केचिच्चौरा आसन् कतिचित् रामकृष्णादयो मुख्याः पालाः स्वामिनः आसन् । एके च दुर्बला मेषायिताश्चासन् । तत्र चौरा मेषायितांश्चोरयन्ति पालाश्च तान् विचिन्वते । एवमकुतोभया निर्भयाः सन्तः सर्वे विजह्रुः ।। २८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यद्यप्यं दौनारदेन भविष्योक्तिः कथिता तथापि व्योमासुरवधादनन्तरमेव ज्ञेयाकुतः यतस्तत्रव्योमवधस्याकथनात्तं व्योमवधप्रसंगमाह एकदेति । पालाः गोपाः निलायनाभिधाः क्रीडाः चोराः पालारक्षकाश्च तेषां अपदेशतो व्याजेन ।। २६ ।। तत्र तस्यां क्रीडायां पालाः अजायितानां रक्षकाः मेषायिताः अजवदाचरिताः एवं तत्राद्रिसानुषु चिक्रीडुः ।। २७ ।। चोरायितः स्वयं चोरवदाचरितो व्यामः अपोवाह गृहीत्वाऽन्यत्राप्रापयामास ।। २८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ।। भागवतप्रवरः भगवत एकान्तिकभक्तेषु श्रेष्ठः, मुनिर्नारदः, यदुपतिं कृष्णं, एवमुक्तप्रकारेण, विज्ञाप्येति शेषः । प्रणिपत्य, भगवता अभ्यनुज्ञातः, तस्य दर्शनादुत्सुको हृष्टमनाः सन्, ययौ ।। २५ ।। भगवानिति ।। अथ भगवान्, गोविन्दः अपि, आहवे केशिनं हत्वा, व्रजसुखावहः सन्, प्रीतैः गोपैः सह, पशून् अपालयत् ।। २६ ।। नन्वत्र नारदगमनानन्तरं व्योमवधः प्रवक्तुं समारब्धः, स च नारदेन न दृष्टोऽदृष्टत्वात्केशिवधानन्तरं चाणूरमारभ्य भाव्यं यदुक्तं तत्र व्योमवधो न दृश्यते, तत् कथं व्योमवधप्रसक्तिरिति तत्रोच्यते । प्रातरेव केशिवधानन्तरं नारदेनोक्तमङ्गीकृत्य पुनस्तथैव पशून् पालयता व्योमो हतस्ततोऽत्र स्वपृष्टकेशिवधानन्तरं नोक्तः ततोऽकाण्डस्फुरितचाणूरितचाणूरादिवधादिकं चोक्तं, एवं केशिवधानन्तरं स्वेनादृष्टत्वात्स नोक्तः भाविचाणूरादिवधोक्तावपि तदस्फूर्त्या स नोक्तः । यद्वा । व्योमवधः पूर्वमेन वृत्तोऽपि वेषधारिवधप्रसङ्गादत्रोच्यते इति द्रष्टव्यम् । केचित्पुनः शङ्खचूडवधात् पूर्वमेव पठन्ति एवं सर्वथा तत्सत्त्वात्तमाह ।। एकदेति ।। एकदा कदाचित्, पालाः गोपाः, पशून् अद्रेर्गोवर्द्धनस्य सानुषु, चारयन्तः सन्तः, चोरपालापदेशतः चोरपालव्यवहारेण, निलायनक्रीडां, चक्रुः । वयं पशूंश्चारयामः यूयं पालयतेत्यपदेशेने कर्त्तव्या या विलीनकर्मलक्षणा क्रीडा तां चक्रुरित्यर्थः ।। २७ ।। तामेव दर्शयति ।। तत्रेति ।। हे नृप, तत्र तेषु गोपेषु मध्ये, कतिचित् गोपाः, चौराः चौरव्यपदेशाः, आसन् बभूवुः । कतिचित्तु, पालाश्चौरेभ्यो रक्षकाश्च, आसन् । तत्र एकेऽवशिष्टा अन्ये केचित्तु, मेषायिताः मेषवदाचरन्तः, अकुतोभयाः सन्तश्च, विजह्रुः ।। २८ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं यदुपतिमिति : १०.३७.२५.

वन्दे श्रीगोविन्द त्वत्पदपद्मं सुसद्म पद्मायाः । वृन्दावनानुरक्तं साधुमनोलिस्तुतं विविक्तरसम् ।। ५६ ।।
इत्यानम्य पुनः पुनः सुरमुनिर्दृग्लक्षिताङ्घ्र्यम्बुजो गायं केशव वासुदेव नृहरे नारायण श्रीपते ।
श्रीमद्विष्णुपदादृते न शरणं मे किञ्चिदप्यन्यदित्युक्त्वोत्थाय तदैकमात्मान मुदा दध्यौ परं चाऽऽश्रयत् ।। ५७ ।।
वायुप्रेरितवल्लकीगुणभवन्-मञ्जुस्वरानुस्वराद्गीतानन्त-मुकुन्द-कृष्ण-भगवद्-गोविन्दनामावलिः ।
हस्तोद्बोधिततालमात्मविहितानन्दानुमोदस्फुरद्रोमाऽसौ सहसा सनातनगुरुं नत्वा ययौ सत्पथम् ।। ५८ ।।

भगवानपीति : १०.३७.२६.

दैत्यहन्ता मुनिस्तोत्रपात्रमप्यच्युतस्तदा । त्यक्त्वा गर्वं शिशुक्रीडोऽभूदहो भक्तवश्यता ॥ ५९ ॥

एकदेति : १०.३७.२७.

निलायनं नेत्रपिधानमत्र हि तदात्मकेलिस्तु समाधिरेव सः ।
यथाधिकारं व्यधुरेव तं मुदा तदा तु तत्केलिमिषाच्चिरायुषः ॥ ६० ॥

कृष्णप्रिया

श्रीशुकदेव जी ने कहा राजन्, परम भागवत देवर्षि नारदजी ने यदुपति भगवान् श्रीकृष्ण चन्द्र का चौदह श्लोकों से स्तवन किया । दर्शन से आनन्द विधि पाया विदा होने के लिए अनुमोदन प्राप्त किया पुनः प्रस्थान किया ॥ २५ ॥ ब्रज को सदा सुख देने वाले भगवान् गोविन्द भी युद्ध में केशो असुर का वध कर प्रसन्न मन वाले गोपों के साथ गायें चराते गोकुल में पधारे ॥ २६ ॥ इस प्रकार नित्य गोपाल करते भगवान् गोविन्द और सर्व गोप श्रीगोवर्धनगिरि के शिखर कदाचित् गायें चराते चराते, परस्पर चोर और पशुपाल वन कर निलायन क्रीडा–छिपने खोजने का खेल खेलने लगे याह गोवर्धन गिरि के उच्च शिखर पर किया जाता है ताकि सर्व देख सके खेल में कितने छिप जाते हैं वे चोर कहे जाते और खोजने वाले "पाल" कहे जाते । भगवान् सखाओं के निलायन क्रीडा करते थे ॥ २७ ॥ राजन् ! उस क्रीडा में उन बालकों में से तो कुछ चोर बने, कुछ बालक भेड़-बकरे बकरी बने और कितने पाल चरवाहे वने । जो बालक भेड़-बकरे बनते उनको चोर बनने बालक चुरा जाते थे और चरवाहे उनको खोजने लगते थे । इस प्रकार ग्वाल बाल निर्भीक बनकर खेलते थे ॥ २८ ॥

मयपुत्रो महामायो व्योमो गोपालवेषधृक्[1] । मेषायितानपोवाह प्रायश्चोरायितो बहून् ॥२९॥
गिरिदर्यां विनिक्षिप्य नीतं [2]नीतं महासुरः । शिलया पिदधे द्वारं चतुःपञ्चावशेषिताः ॥३०॥
तस्य तत् कर्म विज्ञाय कृष्णः शरणदः सताम् । गोपान् नयन्तं जग्राह वृकं हरिरिवौजसा ॥३१॥
स निजं रूपमास्थाय गिरीन्द्रसदृशं बली । इच्छन् विमोक्तुमात्मानं नाशक्नोद् [3]ग्रहणातुरः ॥३२॥
[4]तं निगृह्याच्युतो[5] दोर्भ्यां पातयित्वा महीतले । पश्यतां दिवि देवानां पशुमारममारयत् ॥३३॥
गुहापिधानं निर्भिद्य गोपान् निःसार्य कृच्छ्रतः । स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलम् ॥३४॥

इति श्रीमद्भागवते[6] महापुराणे दशमस्कन्धे[7] [8]व्योमासुरवधो नाम [9]सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

कर्वमक्षमा

अन्वयः—महामायः, मयपुत्रः व्योमः, गोपालवेषधृक्, चौरायितः, प्रायः, बहून्, मेषायितान्, (बालान्) अपोवाह ॥२९॥ महासुरः, नीतम्, नीतम्, (बालम्) गिरिदर्याम्, विनिक्षिप्य, शिलया, द्वारम्, पिदधे, (इत्थम्) चतुःपञ्च, अवशेषिताः ॥३०॥ सताम्, शरणदः, कृष्णः, तस्य, तत्, कर्म, विज्ञाय, हरिः, ओजसा, वृकम्, इव, गोपान्, नयन्तम्, (व्योमम्) जग्राह ॥ ३१ ॥ सः, बली, आत्मानम्, विमोक्तुम्, इच्छन् गिरीन्द्रसदृशम्, निजम्, रूपम्, आस्थाय, (स्थितः तथापि आत्मानम्) विमोक्तुम् न, अशक्नोत्, सः, ग्रहणातुरः, जातः, मृतप्रायोजातः ॥३२॥ अच्युतः, तम्, दोर्भ्याम्, निगृह्य, महीतले, पातयित्वा, देवानाम्, दिवि, पश्यताम्, पशुमारम्, अमारयत् ॥ ३३ ॥ गुहापिधानम्, निर्भिद्य, गोपान्, कृच्छ्रतः, (कष्टात्) निःसार्य, सुरैः, गोपैः, स्तूयमानः, स्वगोकुलम्, प्रविवेश ॥ ४ ॥

इति दशमस्कन्धे निरोधलीलायां राजसप्रकरणस्य प्रमाणप्रकरणस्य ३७ अध्यायस्य अन्वयाः समाप्तः ॥ ३७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पिदधे छादितवान् ॥ २९ ॥ शरणद आश्रयप्रदः । हरिः सिंह इव ॥ ३०–३१ ॥ पशुमारं पशुमारो यथा भवति तथा । अनिःश्वासमित्यर्थः ॥ ३२ ॥ भुवि गोपैः स्तूयमान उपारे वैमानिकैर्देवैरिति ॥ ३३ ॥

इति श्रीभा० म० दशमस्कंधे पूर्वार्धे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

---

१. रूप–विज. । २. नीतान्नीतान्महा–वीर. । ३. गुरुणातुरः–विज. । ४. स निगृह्य–विज. । ५. ततो–वीर. । ६. पारमहंस्यां संहितायां–प्रा. पा. । ७. पूर्वार्द्धे–प्रा. पा. । ८. केशिव्योमवधो–प्रा. पा. । ९ पञ्चविंशो–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गिरिदर्या पर्वतगुहायाम् ।। विनिक्षिप्य विशेषेण दूरतोऽन्तःप्रदेशप्रवेशनेन नितरां क्षिप्त्वा ।।२९।। तस्य व्योमस्य । तत्कर्म बालमयनतत्पिधानरूपं कर्म । वृकम् ईहामृगम् 'कोकस्त्वीहामृगो वृकः' इत्यमरात् ।। सतां भक्तमात्राणाम् । शरणदः शरणरूपमात्मानं दाता किमुत तत्तत्सत्तमगणदुर्लभभागधेयानां तेषामित्यर्थः ।। ३० ।। सः व्योमः । ग्रहणेन कृष्णकरपीडनेनातुरः ।। बल्यपि आत्मानं मोक्तुमिच्छन्नपि निजं रूपमास्थायापि नाशक्नोत् ।। ३१ ।। तं व्योमम् । इत्यर्थ इति--यज्ञे हि पशुः 'अथ हृदयमर्द्यात' इत्यादि मन्त्रैर्हृदयादिषु निष्पीड्य निःश्वासरहित एव मार्यत इति भावः ।। पश्यतां हर्षेण पश्यत्सु दिवीति तदानीमप्याशङ्कया स्थित्वेत्यर्थः । पशुमारममारयत् यज्ञियं पशुमिव श्वासरोधेनामारयत् । "उपमाने कर्मणि च" इति णमुल् । ण्यन्तस्य म्रियतेरप्रयोगश्च । इदमप्यनुरूपमेव तस्यां क्रीडायां चोरदण्डस्यापि क्षणिकतनुकरणरूपत्वात्तेनापि गोपानां श्वासरोधनाच्च । अच्युत इति तादृशसमुचितलीलातोऽचलनाभिप्रायेण ।। ३२ ।। स्वगोकुलमित्यनेन स्वीयत्वेन गृहीतं गोकुल, गोकुलोपलक्षितं वृंदावनम् । प्रविवेश बहिर्लीलामाच्छाद्य नित्यलीलां स्वीचकारेति । अतः परं नन्दनन्दनलीला वृन्दावननिकुञ्जादिषु रहस्य भविष्यति प्रत्यक्षांतर्द्धास्यतीति ध्वनितमिति ज्ञेयं श्रीहरिप्रियैः ।। कृच्छ्रतो गुहारूपात्कृच्छ्रस्थानान्निःसार्य, अत एव गोपैर्देवैश्च स्तूयमानः, अत एव प्रकर्षण । 'विवेश स्वस्य गोकुलम्' इत्यागामिलीलास्मरणशंकया स्वचित्तं समादधाति—नायन्तीनास्तत्परित्यागो भविष्यतीत्यभिप्रायात् ।।३३।।

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे सप्तत्रिंशोऽध्यायः ।। ३७ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विशेषेण दूरतोऽन्तः प्रदेशप्रवेशनेन नितरां क्षिप्त्वा ततश्च चत्वारः पञ्च वा ते चतुःपञ्चा अवशेषिता बभूवुः । अर्थान्मेषायितगोपा एव । सन्धिरार्षः । वशेषिता इति वा । वतंस इति वत् । यद्वा । चतुःपञ्चा अवशेषिता येषां तथाभूता बभूवुः तावत् पर्य्यन्तं तदज्ञानं च स्वचोरकृतापहारभ्रमात् ।। २९ ।। तन्महादारुणं कर्म तस्य विज्ञाय सतां भक्तमात्राणां शरणदः शरणरूपमात्मानं दाता । किमुत तत्तत्सत्तमगणदुर्ल्लभभागधेयानां तेषामित्यर्थः ।। ३० ।। वल्यपि आत्मानं मोक्तुमिच्छन्नपि निजं रूपमास्थायापि नाशक्नोत् ।। ३१ ।। पश्यतां हर्षेण पश्यत्सु इत्यर्थः । दिवीति तदानीमपि शङ्कयान्तर्द्धानेन स्थित्वेत्यर्थः । पशुमारममारयत् यज्ञियं पशुमिव श्वासरोधेनामारयत् । "उपमाने कर्मणि च" इति णमुल ण्यन्तस्य म्रियतेरनुप्रयोगश्च । इदमप्यनुरूपमेव तस्यां क्रीडायां चोरदण्डस्यापि क्षणिकतदनुकरणरूपत्वात् तेनापि गोपानामुच्छ्वासरोधनाच्च अच्युत इति तादृशसमुचितलीलातोऽचलनाभिप्रायेण ।। ३२ ।। कृच्छ्रतः गुहारूपात् दुःखस्थानान्निःसार्य्य अत एवानु गैर्गोपैर्देवैश्च स्तूयमानः । अत एव प्रकर्षेण विवेश । स्वस्य गोकुलमिति आगामिलीलास्मरणशङ्कया । स्वचित्तं समादधाति नात्यन्धोनस्तत् परित्यागो भविष्यतीत्यभिप्रायात् । तथात्वमग्रतो व्यञ्जयिष्यति । सुरैर्गोपैरिति बहुत्र पाठे सुरैः स्तूयमानोऽपि गोत्रैः सह स्वगोकुलमेवेति ।। ३३ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां सप्तत्रिंशोऽध्याय ।। ३७ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विशेषेण दूरतोऽन्तःप्रदेशप्रवेशनेन नितरां क्षिप्त्वा, यद्वा, विनयेन न्यासतया रक्षित्वा, अन्यथा तैस्तस्य दुष्टत्ववितर्कणेन तेषां तेन निक्षेपणाशक्तेः । नीतानिति बहुत्वमेकदैव बहूनां नयनात् । तत्र सामर्थ्यं दर्शयति—महासुर इति, मायित्वादित्यर्थः, ततश्च चत्वारः पञ्च वावशेषिता मेषायिता एवेति गोपा बभूवुरिति शेषः, सन्धिरार्षः । यद्वा, चतुःपञ्चा अवशेषिता येषां तथाभूता वभूवुः, ते च मेषायिता एवेति तेषामेव चौर्य्येण नेयत्वात्, अन्यथानन्तानां गोपानां तेनैकेनाचिरान्नयनासम्भवात् ।। २९ ।। तत् महादारुणम्, शरणदः सतमिति गोपालवंशधरस्यापि ग्रहणे हेतुः, अन्यथा सत्तमानां गोपानां रक्षणासिद्धिः, ओजसा वेगेन जग्राह । तत्रैव दृष्टान्तः—वृकमिति वृकोपमानस्य दुष्टत्वात् ।। ३० ।। स व्योमः, गिरीन्द्रेण सदृशमिति स्थौल्यकाठिन्यादिकमुक्तम् । वल्यापि नाशक्नोद् यतो ग्रहणेनैव आतुरो विवशः ।। ३१ ।। दोर्भ्यां निगृह्य नितरां गृहीत्वा, तन्निग्रहं कृत्वा वा, पश्यतां हर्षेण पश्यत्वित्यर्थः । दिवीति तदानीमपि शङ्कयान्तर्द्धानेन स्थित्वेत्यर्थः । पशुमारममारयत् पशुमिवामारयत्, उपमाने णमुल् । कण्ठमुखनिष्पीडनादिना श्वासमार्गनिरोधेन यथा पशवो याज्ञिकैर्माध्यन्ते तथेत्यर्थः । इदमपि तत्क्रीडानुरूपमेव, महाचौरस्य तथैव दुर्निग्रहोपपत्तेः । अच्युत इति तथापि तदेकस्थानतोऽचलनाभिप्रायेण ।। ३२ ।। कृच्छ्रतो गुहारूपाद्दुःखस्थानानि निःसार्य्य, अत एव अनुगैर्गोपैर्देवैश्च स्तूयमानः, अत एव प्रकर्षेण, किंवा श्रीगोप्यादिसमागमरूपेण विवेश अविशत्, स्वस्य गोकुलमिति तदानीमपि तस्य तज्जिहासाराहित्यं सूचयति ।। ३३ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीवृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां सप्तत्रिंशोऽध्यायः ।। ३७ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं नीतान्नीतान् गोपान् गिरिदर्य्यां गिरिगुहायां विनिक्षिप्य तस्या द्वारं शिलया पिदधे छादितवान् क्रीडायान्तु चत्वारः पञ्च वा गोपा अवशेषिताः ॥ २९ ॥ तथा तस्य व्योमस्य कर्म चेष्टितं विज्ञाय सतां शरणदः आश्रयप्रदः हेतुगर्भितत्वाद्गोपान्नयन्तं व्योमं सिंहो वृकमिवौजसा बलेन जग्राह ॥ ३० ॥ तथा स व्योमः पर्वतश्रेष्ठतुल्यं स्वासाधारणं रूपं बिभ्रद्बली ग्रहणात्पीडितः आत्मानं विमोक्तुमिच्छुरपि नाशक्नोत् ॥ ३१ ॥ तथा तं व्योमं नितरां गृहीत्वा भूतले पातयित्वा च दिवि देवानां पश्यतां सतां पशुमारो यथा भवति तथा यज्ञियपशुमिवेति यावत् मारयामास ॥ ३२ ॥ ततो गुहायाः पिधानं छादनं शिलां निर्भिद्य कृच्छ्रतो दुःखाद्गिरिदरीपतनजान्निःसार्य गोपैः सुरैः स्तूयमानश्च स्वगोकुलं प्रविवेश ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गिरिदर्यां पर्वतगुहायाम् ॥ २९ ॥ हरिः सिंहः ॥ ३० ॥ गुरुणा महता हरिणा गृहीत इति शेषः ॥ ३१ ॥ पशून्मारयति त्यक्तप्राणान्करोति ॥ ३२-३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चतुःपञ्च मेषायिता सखायः ॥ २९ ॥ हरिः सिंहः ॥ ३०-३१ ॥ पशुमारं यज्ञियं पशुमिव श्वासरोधेनामारयत् तेनापि गुहाद्वारनिरोधादिति भावः । "उपमाने कर्मणि च" इति णमुल ण्यन्तस्य म्रियतेरनुप्रयोगः ॥ ३२-३३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । षट्त्रिंशो दशमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ३७ ॥

गूढार्थदीपिनी

चोरायित स्वयं चोरवत् आचरितः । मेषायितान् अपोवाह चोरयामास ॥ २९ ॥ पिदधे आच्छादितवान् । चत्वारः पञ्च च चतुष्पञ्चाः वशेषिताः बहुव्रीहौ डच् । भागुरिमतेन अकारलोप ॥ ३० ॥ शरणदः रक्षकः । हरिः सिंहो यथा वृकम् । ओजसा बलेन ॥ ३१ ॥ बली अपि इच्छन्नपि रूपमास्थायापि विमोचयितुम् । ण्यर्थः नाशक्नोत् यतो ग्रहणेन आतुरो विवशः ॥ ३२ ॥ यज्ञियपशुं यथा मारयति तथा श्वासनिरोधपूर्वकं मुष्टिभिः अमारयत् । 'उपमाने' कर्मणि च इति णमुल् ॥ ३३ ॥ पिधानम् आच्छादनशिलाम् ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पिदधे छादितवान् ॥ २९-३१ ॥ पशुमारं यज्ञियपशुमारो यथा स्यात्तथाऽनिश्वसन्तमसुरममारयत् ॥ ३२-३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तत्रिंशाध्यायार्थप्रकाशः ॥ ३७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

व्योमो नाम्ना गोपालरूपधृक् स्वयं चोरायितो मेषायितान्बहून्गोपानपोवाहापाजहार ॥ २९ ॥ नीतं नीतं मेषरूपगोपं गिरिदर्यां निक्षिप्य शिलया द्वारं पिदधे आच्छादयामास । अवशेषितसङ्ख्यामाह ॥ चतुःपञ्चावशेषिता इति । चत्वारः पञ्च वा चतुःपञ्चावशेषिता उर्वरिताः ॥ ३० ॥ सतां शरणदस्तस्य तत्कर्म वीक्ष्य हरिः सिंहो वृकं श्वापदमिव जग्राह ॥ ३१ ॥ वेषमुन्मुच्य निजं रूपं गुरुणा महताऽऽस्मानं मोक्तुं मोचयितुमिच्छन्नपि नाशक्नोच्छक्तो नाभूत् ॥ ३२ ॥ पशुमारममारयत्पशुमारं यथा तथा हिंसितवान् । उपमाने कर्मणि चात्कर्तरि चेत्युक्तेः । पशुवदमारयत् । णमुलन्तः शब्दः ॥ ३३ ॥ गुहापिधानं निर्भिद्य कृच्छ्रतो व्योमकृतकष्टाद्गोपान्निःसार्य निष्कासयित्वा गोपैः सुरैश्च स्तूयमानः स्वगोकुलं प्रविवेश ॥ ३४ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

क्रीडार्थं न नयनं किन्तु मारणार्थमित्यग्रिमकृत्यमाह । गिरिदर्य्यामिति । बहूनप्येकवारं नयति बहुवारञ्च नीतवान् गुहाद्वारमतिसूक्ष्ममिति ज्ञापयितुं नीतं नीतमित्येकवचनम् ननु बालाः दयापात्रं कथमेवं गुहायां प्रक्षिपतीत्याशङ्क्याह । महासुर इति । अत्यन्तमासुरस्वभावः अत एव न गुहाप्रवेशनमात्रमेव कारितवान् किन्तु शिलया द्वारमपि दधे एवं मेषायिताः क्षीणाश्चेत् चोरयितारः पालयिताश्च मेषायिता एव क्रमेण भवन्तीति चत्वारः पञ्च वा अवशिष्टाः तदानीं नीयमानेन सह पञ्च नोचेत्

चत्वारः ॥ २९ ॥ तदान्यत्र स्थितो भगवान् व्योमस्य कर्म ज्ञात्वा समागत्य यत्कृतवांस्तदाह । तस्येति । तत्कर्म गुहायां निःक्षिप्य शिलापिधानलक्षणं विशेषेण ज्ञात्वा प्रत्यक्षदर्श्येव तथाज्ञाने हेतुः कृष्ण इति तदानन्दो हि सः यदैव स्वानन्दस्तेभ्यः तिरोभूतः सद्रूपाश्च ते अतो ज्ञातवान् तथापि अक्लिष्टकर्मा भगवान् सर्वसमः किमिति तं जगृह इत्याशङ्क्याह । सतां शरणद इति । यदि भगवान् सर्वावस्थासु न पालयत्तदा न कोऽपि शरणं गच्छेत् ततः शरणदानमेव न स्यात् मनसि तद्दुःखं भवेदित्यपि शास्त्ररीतिरपि नश्येदित्यपि गोपान्बहूनेव नयन्तं पालायित इव तत्रैव प्रादुर्भूतः आगतो वा जग्राह तस्यैकदेशग्रहणव्यावृत्त्यर्थं दृष्टान्तमाह । वृकं हरिरिवेति । स हि सर्वाङ्गे तं व्याप्य आच्छाद्य गृह्णातीति तथा सर्वाङ्गे गृहीत इत्यर्थः ॥ ३० ॥ ततः स विचारितवान् यद्यपि भगवान् महान् तथापि रूपान्तरं गृहीतवानिति मया स्वरूपे गृहीते भगवान् स्वल्परूप इति न मारयितुं शक्ष्यति भगवानपि चेत् स्वरूपं गृह्णीयात्तदाऽवतारसमाप्तिरेव भविष्यतीति कंसादीनामस्माकञ्चामारणमेव स्यादित्यभिप्रेत्य स्वरूपं गृहीतवानित्याह । स निजमिति । निजमासुरं रूपं ग्रहणायोग्यत्वायाह । गिरीन्द्रसदृशमिति । पराक्रमोऽपि वर्त्तत इति ज्ञापयितुमाह । बलीति । एवमपि कृत्वा आत्मानं मोक्तुमिच्छन्नपि अत्यन्तप्रयत्नं कुर्वन्नपि आत्मानं विमोक्तुं नाशक्नोत् दूरापास्तं विमोचनं ग्रहणेनातुर एव जातः अन्तिमावस्था ग्रहणमात्रेणैव जातेति ॥ ३१ ॥ तथापि मुख्यदैत्यत्वात् लीनो न भविष्यतीति स्वयम्मारितवानित्याह । तं निगृह्येति । दोर्भ्यां निग्रहं कृत्वा स्वयं भयरहितः अच्युतः महीतले तं पातयित्वा यथा भूमिष्ठा देवास्तं न त्यज्यन्ति तथा कृत्वा यज्ञार्थं तस्य वधो भवत्विति धर्मनिरूपणार्थं पश्यतामेव सर्वेषां देवानां पशुमारं यथा भवति तथा अमारयत् मुखमुद्रणं कृत्वा गलमोडनं कृतवानित्यर्थः । देवानां दर्शनं सुखार्थम् अन्यथा भगवानक्लिष्टकर्मा तथा न कुर्यात् ॥ ३२ ॥ ततो यत्कृतवांस्तदाह । गुहापिधानमिति । मायया स्थापितं निर्भिद्य नितरां भित्त्वा यथा पुनरन्योऽपि न प्रवेशयेत् तथा गुहात्वमेव दूरीकृतवान् कृच्छ्रतः सङ्कटात् गोपात् निःसार्य तैरेव सुरैः गोपैश्च स्तूयमानः भगवत्कृतमुपकारं ते जानन्तीत्युक्तं ततः तैः सह स्वगोकुलं प्रविवेश सर्वत्र प्रत्यापत्तिर्न्निरूप्यते अग्रे लीलापराणमपि तथात्वाय ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां
चतुस्त्रिंशाध्यायविवरणम् ॥ ३४–३७ ॥

श्रीसुबोधिनी-सारः

नीतं नीतं गोपं गिरेर्दर्यां विनिक्षिप्य महासुरो व्योमः शिलया द्वारं रुरोध । चतुःपञ्चाऽवशिष्टा एवम् ॥ २९ ॥ सतां शरणदः कृष्णः तस्य व्योमस्य तत्कर्म विज्ञाय बुद्ध्वा गोपान्नयन्तं व्योमं जग्राह । ओजसा बलेन । हरिः सिंहो वृकमिव ॥३०॥ बली स दैत्यो गिरीन्द्रसदृशं पर्वततुल्यं निजं स्वीयं रूपम् आस्थायात्मानं विमोक्तमिच्छन् नाऽशक्नोत् । तत्र हेतुः । ग्रहणेनातुरः पीडितः ॥ ३१ ॥ दोर्भ्यां भुजाभ्यां तं व्योमं निगृह्य महीतले भूपृष्ठे पातयित्वाऽच्युतः कृष्णः पशुमारममारयत् । दिवि स्वर्गे देवानां पश्यतां सताम् ॥ ३२ ॥ गुहायाः पिधानमावरणं शिलां निर्भिद्य भित्त्वा कष्टतो गोपान् निःसार्य बहिष्कृत्य सुरैर्गोपैः स्तूयमानः स्वगोकुलं प्रविवेश ॥ ३३ ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा च महामायावो महामायावित्वेन प्रसिद्धस्य मयस्य पुत्रो व्योमाख्योऽसुरो गोपालवेषधरः स्वयं प्रायशश्चोरायितः सन् मेषायितान् बहून् गोपान् अपोवाह अपकृष्य निनाय ॥ २९ ॥ एवं नीतं नीतं गोपं गिरेर्दर्यां गुहायां स महासुरो निर्दयो व्योमो विनिक्षिप्य तस्या द्वारं शिलया पिदधे आच्छादितवान् । ततश्च मेषायिता गोपाश्चत्वारः पञ्च वाऽवशेषिताः तदानीं नीयमानेन सह पञ्च नो चेच्चत्वारः अवशिष्टाः ॥ ३० ॥ तदस्य व्योमस्य तत् गोपपिधानरूपं कर्म विज्ञाय गोपान्नयन्तं तं व्योमं कृष्णो जग्राह । तत्र वृकं यथा हरिः सिंहः ओजसा बलेन गृह्णाति तथेति । तद्ग्रहणे हेतुमाह—सतां निजभक्तानां गोपानां शरणद आश्रयप्रद इति ॥ ३१ ॥ तदा गोपरूपं विहाय गिरीन्द्रसदृशं पर्वतश्रेष्ठतुल्यं निजरूपमास्थाय स्वीकृत्य स बलवानपि व्योम आत्मानं विमोक्तुं विमोचयितुमिच्छन्नपि मोचयितुं नाशक्नोत् । तत्र हेतुमाह—ग्रहणातुर इति । तद्ग्रहणेन व्याकुल इत्यर्थः ॥ ३२ ॥ अच्युतो बलप्रभावच्युतिरहितः कृष्णस्तं व्योमं दोर्भ्यां भुजाभ्यां निगृह्य भूतले पातयित्वा दिवि अन्तरिक्षे स्थितानां देवानां पश्यतां पशुमारं यथा भवति तथा यज्ञीयपशुमिव मुष्टिभिरमारयत् । 'पशुमारम्' इत्यनेन 'तस्य मारणं धर्म' इति सूचितम् । 'देवानां पश्यताम्' इत्यनेन तस्य देवभयङ्करत्वं सूचितम् ॥ ३३ ॥ ततश्च भगवान् गुहायाः पिधानमाच्छादनं निर्भिद्य कृच्छ्रतः तन्निरोधजात् कष्टात् गोपान्निःसार्य तैः सुरैश्च स्तूयमानः स्वगोकुलं प्रविवेशेत्यन्वयः ॥ ३४ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येह भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने । सप्तत्रिंशो गतः केशि–वधादिविनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

मयेति ॥ तदा च महामायो महामायस्य च मयस्य पुत्रो व्योमाख्योऽसुरो गोपालवेषधरः स्वयं प्रायशश्चोरायितः सन् मेषायितान् बहून् अपोवाह अपकृष्य निनाय ॥ २९ ॥ गिरीति ॥ एवं स महासुरो निर्दयो व्योमो नीतं नीतं गोपं गिरेर्दर्यां गुहायां विनिक्षिप्य तस्या द्वारं शिलया पिदधे आच्छादितवान् । ततश्च मेषायिताः गोपाश्चत्वारः पञ्च वा चतुष्पञ्चावशेषिताः । बहुव्रीहौ डच् । वष्टिभागुरिरित्यवस्य अकारलोपः । चतुष्पञ्चावशेषपर्यन्तं पालकगोपानामज्ञानं च स्वीयैरेव चोरायितगोपालैरपहृता इति भ्रमात् ॥ ३० ॥ तस्येति ॥ तस्य व्योमस्य तत् गोपपिधानरूपं कर्म विज्ञाय गोपान्नयन्तं तं व्योमं सतां निजभक्तानां शरणदः रक्षकः कृष्णः वृकं यथा हरिः सिंह ओजसा बलेन गृह्णाति तथा जग्राह ॥ ३१ ॥ स इति ॥ तदा बली बलवानपि गोपरूपं विहाय गिरीन्द्रसदृशं पर्वतश्रेष्ठतुल्यं निजरूपमास्थाय स्वीकृत्यापि कृष्णकर्तृकग्रहणेन आतुरः स व्योम आत्मानं विमोक्तुं विमोचयितुमिच्छन्नपि मोचयितु नाशक्नोत् ॥ ३२ ॥ तमिति ॥ अच्युतस्तं व्योमं दोर्भ्यां भुजाभ्यां निगृह्य भूतले पातयित्वा दिवि अन्तरिक्षे स्थितानां देवानां पश्यतां पशुमारं यज्ञियं पशुमिव श्वासं रुद्ध्वा मुष्टिभिरमारयत् । "उपमाने कर्मणि च" इति णमुल् । तस्यां क्रीडायां धृतचोरस्य क्षणं दण्डोऽप्यनुक्रियते तद्व्याजेनामारयत् । श्वासरोधनं च तेनानुच्छ्वासरोधनात् गोपानाम् ॥ ३३ ॥ गुहेति ॥ ततश्च भगवान् गुहायाः पिधानमाच्छादनशिलां निर्भिद्य कृच्छ्रतः तन्निरोधजात् कष्टात् गोपान्निःसार्य भुवि गोपैः दिवि सुरैश्च स्तूयमानः स्वगोकुलं प्रविवेश ॥ ३४ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहाय सप्तत्रिंशे दशमस्य व्यधादिमाम् ॥
इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शिलया द्वारं पिदधे छादयामास चत्वारो वा पञ्च वेति चतुःपञ्चाऽवशेषिताः अवशेषिताः अवाप्योरुपसर्गयोरित्यल्लोपः ॥ २९ ॥ शरणदः आश्रयप्रदः हरिर्व्याघ्रः वृकमिव ॥ ३०–३१ ॥ पशुमारं यथा स्यात्तथा अनिःश्वासमित्यर्थः ॥ ३२ ॥ गुरुहायाः पीधानं शिलां निर्भिद्य ॥ ३३ ॥

इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धे व्याख्याने अरिष्टव्योमवधनामा सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मयपुत्र इति ॥ तत्रैवं कीडायां, प्रवृत्तायां सत्यामिति शेषः । मयपुत्रो मयनाम्नो दानवस्य सुतः, महामायो बहुमायः, व्योमो व्योमासुरः, गोपालवेषधृत् महामायित्वाद्गोपालस्येव रूपं बिभ्राणः, स्वयं प्रायः प्रायशः, चोरायितः चोरवदाचरन् सन्, बहून् मेषायितान् मेषवदाचरतः गोपान्, अपोवाह अपकृष्य निनाय ॥ २९ ॥ गिरिदर्यामिति ॥ महासुरः व्योमः, नीतं नीतं गोपं, गिरिदर्यां गोवर्द्धनाचलगुहायां विनिक्षिप्य, द्वारं तस्याः मुखं, शिलया पिदधे छादितवान् । क्रीडायां तु, चत्वारः पञ्चावशेषिताः ॥ ३० ॥ तस्येति ॥ तस्य व्योमस्य, तत्तथाविधं कर्म विज्ञाय, सतां शरणदः, कृष्णः, गोपान् नयन्तं तं, हरिः सिंहः, ओजसा वृकं इव, जग्राह ॥ ३१ ॥ स इति ॥ स व्योमः, गिरीन्द्रसदृशं पर्वतश्रेष्ठसमानं निजं रूपं आस्थाय, वर्त्तमानः बली सन्नपि, ग्रहणातुरः कृष्णकृतग्रहणेन पीडितः, अत एव, आत्मानं स्वं, विमोक्तुं कृष्णाद्विमोचयितुं, इच्छन्नपि, न अशक्नात् ॥ ३२ ॥ तमिति ॥ अच्युतः श्रीकृष्णः, तं व्योमं, दोर्भ्यां बाहुभ्यां, निगृह्य नितरां गृहीत्वा, महीतले भूतले, पातयित्वा दिवि आकाशे, देवानां पश्यतां सतां, पशुमारं यथा भवति तथा, अनिःश्वासमित्यर्थः । अमारयत् । केचित्तु, यज्ञीयपशुमिवामारयदित्यव्याख्यन् ॥३३॥ गुहेति ॥ ततः गुहापिधानं गिरिदर्याच्छादनशिलां निर्भिद्य, कृच्छ्रतो दुःखात्, गिरिदरीपतनजात् कष्टादित्यर्थः । गोपान् निःसार्य, सुरैः गोपैश्च, स्तूयमानः सन्, स्वगोकुलं, प्रविवेश ॥ ३४ ॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तम श्रीसहजानन्दस्वामिसुत श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मयपुत्र इति : १०.३७.२९.

यद्व्योमचरितं केशिनिग्रहोत्तरमीरितम् । युक्तं मनोनिग्रहतः पुंसो व्योमावलम्बनम् ॥ ६१ ॥
क्षणमात्रं योगिनां हि शून्यस्थितिरलं ततः । श्रीशापरोक्षानन्दाप्तिर्व्यक्तं व्योमगुहापदात् ॥ ६२ ॥

सिद्धेष्वप्यत्र केचिद् बहिरवहिरहोरात्र-मक्षावनोत्काः केचिद्बाह्यैकदम्भा विषयरसभुजस्त्वन्तरे मोषवृत्त्या ।
अन्ये त्वानन्दभोगापरिचितमनसो मेषवन्मार्गभाजस्तत्राद्यान्नैव माया स्पृशति तदपरान् किञ्चिदन्यांस्तु पूर्णम् ॥ ६३ ॥

शून्याकारः स मायाप्रसर इह पुनस्तान् प्रपञ्चाद्रिदर्यां प्रक्षिप्यैवाऽऽवृणोति प्रचुरतरतमोभाजि सद्यस्ततस्ते ।
स्युश्चेच्छ्रीनाथपादाम्बुजरतिमतयस्तं निरस्याच्युतस्तांस्तस्याः शीघ्रं प्रमोच्य प्रकटयति निजानन्दसान्निध्ययोगम् ॥ ६४ ॥

तस्मात्त्राता सर्वदा सर्वतोऽपि सर्वत्रापि श्रीश एको दयालुः ।
निश्चित्यैवं तत्पदाजावलम्बः कार्यः पुंसेत्यर्थ ईदृक्चरित्रे ॥ ६५ ॥ (विशेषकम्)

तादृक् चेतोनिग्रहोऽनागतार्थदृक्संसिद्धिः स्यात्ततो व्योमयोगात् ।
तूष्णींवासो धीगुहायां ततः श्रीज्ञप्तानन्दः सिद्ध इत्याशयो वा ॥ ६६ ॥

क्रीडासक्तोऽपि न त्वं स्वान् विस्मरस्यच्युतान्वहम् । मद्रक्षणोदितदयो न मां त्यज विभोऽधुना ॥ ६७ ॥

श्रीशकल्पतरुक्रीडा०

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

कृष्णप्रिया

राजन् इस निलायन क्रीडा में मयदानव का व्योमासुर नाम का महामायावी लड़का इन ग्वालबालों के बीच में ग्वाल रूप धारण कर प्रविष्ट हुआ । उसने खेल में चोर का अभिनय धारण किया और जो बालक भेड़ के रूप में खेलते थे उनको चुराकर ले जाने लगा । इस प्रकार उसने बहुत बालकों को गिरिशिखर से उठा ले गया ॥ २९ ॥ वह महासुर व्योम क्रम से एक एक बालक को उठा कर ले जाता था और गिरिवर की गुफा में रख देता और द्वार को शिला से ढककर दूसरे बालक को लेने के लिए लौट आता था । इस क्रीडा में जो बालक चोर बनता वह क्रम से भेड़ बनता तो कभी चरवाह भी बनता इसलिए किसी इस दुष्ट की करामत का पता नहीं लगा । किन्तु चुराये बालक को छिपाते केवल चार पांच ही बालक रहे ॥ ३० ॥ सज्जनों की रक्षा करने वाले कृपालु भगवान् ने जाना कि यह दुष्ट व्योम असुर गोपाल बनकर निलायन क्रीडा में संलग्न बना है और चोर के अभिनय से सब बालकों को गुफा में रख देता है । इतने में पुनः यह व्योम बालक को उठाकर चल रहा था तब भगवान् जैसे कोई वनराज सिंह वृक-भेड़िए-मृग सर्वाङ्ग से पकड़कर दबा ले वैसे व्योम को झपटकर दबोच लिया ॥ ३१ ॥ भगवान् ने जब व्योम को पकड़ा तब बलिष्ठ असुर ने गिरिवर जैसा अपना मूल स्वरूप प्रकट किया पुनः अपनी जान छुड़ाने का भरसक प्रयत्न भी किया लेकिन अपनी देह छुड़ाने में सफल नहीं हुआ ॥ ३२ ॥ भगवान् अच्युत ने बलिष्ठ उस व्योमासुर को अपने दोनों हस्तों से पकड़कर पृथ्वी पर पटका पुनः नभो निवासी देवों के देखते पशुओं की मार से खूब मार कर मार दिया ॥ ३३ ॥ व्योम को वैकुण्ठ पहुँचाकर भगवान् श्रीकृष्ण ने कन्दरा का ढक्कन खोलकर बन्दी किए बालकों को बाहर निकाल कर कष्ट से मुक्त किए । व्योम वध से प्रसन्न हुए गोप एवं सुरलोग भगवान् का यशोगान करने लगे और भगवान् श्रीकृष्ण निज गोकुल में पधारे ॥ ३४ ॥

श्रीमद्भागवत दशम स्कन्ध निरोधलीला के अन्तर्गत राजसलीला प्रमाणप्रकरण का ऐश्वर्य निरूपक ३७ वाँ अध्याय समाप्त ॥ ३७ ॥

◆ ◆

अथाष्टात्रिंशोऽध्यायः

श्लोकाः अनु. इ. वं. वं. मि. उ. उ. व. उ. श्लो. अ. उ. अ. अ. अ. सं. श्लो. अ. सं श्लो. अ.
३४ २४ ३ २ १३ १ १ १६७६ ६ ३७ १७१९ ५३॥ ७

श्रीशुक उवाच

अक्रूरोऽपि च तां रात्रिं मधुपुर्यां महामतिः । उषित्वा रथमास्थाय प्रययौ नन्दगोकुलम् ॥ १ ॥
गच्छन् पथि महाभागो भगवत्यम्बुजेक्षणे । भक्तिं परामुपगत एवमेतदचिन्तयत् ॥ २ ॥
किं मयाऽऽचरितं भद्रं किं तप्तं परमं तपः । किं वाथाप्यर्हते दत्तं यद् द्रक्ष्याम्यद्य केशवम् ॥ ३ ॥
ममैतद् दुर्लभं मन्य उत्तमश्लोकदर्शनम् । विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच – महामतिः, च (भक्तवरः) अक्रूरः, अपि, ताम्, रात्रिम्, मधुपुर्याम्, उषित्वा च (प्रातः कार्यं शीघ्रं समाप्य) रथम्, आस्थाय, नन्दगोकुलम्, प्रययौ ॥ १ ॥ पथि, गच्छन्, महाभागः, अम्बुजेक्षणे, भगवति, पराम्, भक्तिम्, उपगतः, एतद्, एवम्, अचिन्तयत् ॥ २ ॥ मया, किम्, भद्रम्, आचरितम्, मया, किम्, परमं तपः तप्तम्, अथवा, अर्हते, किम्, दत्तम्, यत्, अद्य, अहम्, केशवम्, द्रक्ष्ये ॥ ३ ॥ शूद्रजन्मनः, यथा, ब्रह्मकीर्तनम्, दुर्लभम्, (भवति) तथा, विषयात्मनः, मम एतत्, उत्तम, श्लोकदर्शनम्, दुर्लभम्, मन्ये ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अष्टत्रिंशे यथा व्यायन्नक्रूरो गोकुलं गतः ॥ तथैव रामकृष्णाभ्यां गृहं नीत्वा सुसत्कृतः ॥ १ ॥
प्रातः केशिवधे वृत्ते द्वादश्यां निर्गते मुनौ ॥ ततो व्योमे हतेऽक्रूरः सायं गोकुलमागमत् ॥ २ ॥

तदेवं नारदेन कंसवधादिकार्ये विज्ञापिते श्रीकृष्णो मथुरां गन्तुमुद्यतो वर्तते तदाऽक्रूरोऽपि गोकुलमागमदित्याह । अक्रूरोऽपीति ॥ १–२ ॥ अपिः संभावनायाम् । वा अथवा अर्हते योग्याय ॥३॥ स्वस्य कृष्णस्य दर्शनेऽसंभवमाशङ्क्य पुनस्तत्संभावयति ममैतदिति द्वयेन । विषयात्मनो विषयाविष्टचित्तस्य मम । शूद्राज्जन्म यस्य तस्य ब्रह्मकीर्तनं वेदोच्चारणं यथेति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सुसत्कृतो मानितः (१) । वृत्ते जाते । मुनौ नारदे । ततो नारदगमनोत्तरम् (२) । तदेवं वाक्यालङ्कारेऽव्ययद्वयम्, निदर्शने वा । तदा कृष्णोद्युतिसमये । उद्यत उत्कंठितः । तां यस्यां रात्रौ न्ययुंक्त तामित्यर्थः ॥ अक्रूरोऽपीति अपिशब्दः समुच्चये । समुच्चयश्च श्रीकृष्णस्य मथुरागमनोद्यमेनेति । यद्वा–अपिचशब्दः केशिगमनसमुच्चये उभयोः कंसादिष्टत्वात् । यस्यां रात्र्यां कंसेनादिष्टस्ताम् । तथा श्रीहरिवंशे–"निशि स्तिमितमूकायां मथुरायां जनाधिपः" इति । अत एवात्रापि पूर्वमुक्त–'प्रविवेश गृहं कंसः' इत्यादि । यच्च तत्रैवोक्तम्–"तस्मिन्नेव मुहूर्ते तु मथुरायास्स निर्ययौ । प्रीतिमान्पुण्डरीकाक्षं द्रष्टुं दानपतिः स्वयम् ॥" इति तत्कल्पभेदाद्भिन्नम् । यद्वा–यादवैः सह कंसस्य बहुलसंकथया प्रायो रात्रिशेष एवोपसन्नेऽक्रूरं प्रति तस्य प्रेरणया तथैव पर्यवस्यतीति । महती भक्तिरूपा मतिर्यस्य सः । तथा चैकादशीं रात्रीं भगवदर्चनकथाकीर्तनादिभिर्जागरणेनैवोषित्वा पारणमकृत्वैव ययाविति विश्वनाथः । श्रीगोकुलजनवैक्लव्यहेतुकं तद्गमनवर्णनमनिच्छुरपि केवल तद्भक्तिभागास्वादनमवलम्ब्यैव मुनीन्द्रोऽवर्णयत् । ज्ञातत्वेऽपि पुनर्नंदेति विशेषणं स्वस्य तद्विशिष्टतयैव स्फूर्तेः ॥ १ ॥ महामतित्वमाह–गच्छन्निति । महाभाग इति–बहुषु सत्सु कृष्णानयनार्थं तस्यैवाज्ञप्तत्वात् । परां प्रेमरूपाम् । एतद्वक्ष्यमाणम् । एवम् इत्थम् ॥ २ ॥ स्वभाग्यमभिनन्दन्नाह–किमिति । भद्रमिति सामान्योक्तं विशिनष्टि–किं तप्तमित्यादिना । योग्याय विष्णुभक्त्यादिगुणसंपन्नाय । यत् यतः भद्रकर्मणां मध्ये किं मया भद्रं कृतं यद्यतः केशवं ब्रह्मरुद्राभ्यामपि दुर्दर्शम् ॥ ३ ॥ एतत् किं यदुत्तमश्लोकदर्शनमिति । शूद्रजन्मन इति–अश्रौतजन्मत्वाच्छूद्रस्य । "गायत्र्या ब्राह्मणमसृजत्त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छूद्रम्" इति श्रुतेः श्रुतिजन्मनामेव श्रुत्युच्चरणेऽधिकार इति । शूद्रस्तु–"वेदाक्षरोच्चरणाच्च शूद्रश्चांडालतां व्रजेत्" इति स्मृतेः शूद्रत्वादपि पपतीत्याशयः ॥ एतत् ईदृशं तत्तद्भद्राचरणादिसाध्यम् । यद्वा–आधुनिकमुत्तमश्लोकदर्शनम् । यद्वा–स्वानुभवमात्रवेद्यमाहात्म्यताविवक्षयादावेतदित्युक्तम् । उत्तमः ससाराख्यतमोनिरसनः श्लोकः यशो यस्य तस्य तस्य दर्शनं मम मत्संबन्धे दुर्लभम् । साधनवाहुल्यं यदि स्यात्तदापि जन्मान्तर एव लभ्यं मन्ये । कुतः–विषयात्मनः प्रारब्धवशेन विषयतादात्म्यं प्राप्तस्य । अनुरूपो दृष्टान्तो यथेति । शूद्रजन्मन इति–साधनबाहुल्ये सति विप्रजन्मन्येव तत्स्यात् । कर्मशूद्रस्य तु प्रायश्चित्तविशेषेणेह जन्मन्यपि स्यादिति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अक्रूराय नमस्तस्मै येन कंसोऽपि सेवितः। कुतोऽपि व्याजन्तो द्रष्टुं सेवितुञ्च निजेश्वरम्। अक्रूर इति तैर्व्याख्यातम्। तत्रापि च शब्दः समुच्चयेऽभिप्रेतः। समुच्चयश्च श्रीकृष्णस्य मथुरागमनोद्यमेनेति। यद्वा। अपि च शब्दः केशिगमनसमुच्चये उभयोः कंसादिष्टत्वात् यस्या रात्रौ कंसेनादिष्टस्तां तथा श्रीहरिवंशे निशि स्तिमितमूकायां मथुरायां जनाधिप इति। अत एवात्रापि पूर्वमुक्तं प्रविवेश गृहं कंस इत्यादि। यच्च तत्रैवोक्तं तस्मिन्नेव मुहूर्त्ते तु मथुरायाः स निर्ययौ। प्रीतिमान् पुण्डरीकाक्षं द्रष्टुं दानपतिः स्वयमिति। तत् कल्पभेदाद् भिन्नं यद्वा। यादववर्गैः सह कंसस्य बहुलसंकथया प्रायो रात्रिशेष एवोपसन्नेऽक्रूरं प्रति तस्य प्रेरणया तथैव पर्य्यवस्यतीति। महती भक्तिरूपा मतिर्यस्य तादृशः सन्निति श्रीगोकुलजनवैक्लव्यहेतुत्वेनारोचकं तत् प्रस्थानं केवलं वर्णयितुमनिच्छुस्तद्भक्तिभागास्वादमेवावलम्बते प्रययौ प्रतस्थे ज्ञातत्वेऽपि पुनर्नन्देति विशेषणम् स्वस्य तद्विशिष्टतयैव स्फूर्त्तेः ॥१॥ महामतित्वमेवाह। गच्छन्नित्यादिना नृपेत्यन्तेन। गच्छन्नेव पथि परां भक्तिमुपगतः सन्नेवं किं मया चरितमित्यादि मनोरथप्रकारैरेतत् मयापि भगवान् द्रक्ष्यते इति मनोरथसामान्यमचिन्तयत् यतो महान् भागस्तादृशं श्रीकृष्णकृपारूपं भाग्यं यस्य सः भक्तेः परात्वे हेतुः भगवति निजाशेषैश्वर्यप्रकटनपरे तथाम्बुजेक्षणे तादृशत्वोपलक्षणकमहामाधुर्यप्रकटनपरे च श्रीकृष्णे तत्तत् स्फूर्त्तेरित्यर्थः ॥ २ ॥ नाना सञ्चारिभावैश्चिन्तितमेवाह। किमित्यादिना स्वबन्धुष्वित्यन्तेन। तत्र सवितर्कमाह। किमिति। किं कतमत् परमं भद्रं भगवत् पूजादीनां भद्रकर्मणामपि मध्ये परमम् एवं परमं तपो भगवद्व्रतानां मध्ये वा समुच्चये अथ कार्त्स्न्ये भद्रादीनां यथोत्तरं श्रैष्ठ्यमूह्यं यद्यस्माद्भद्रादेः केशवं परमदुर्दर्शानां ब्रह्मरुद्रादीनामपीश्वरं द्रक्ष्यामि तच्चाद्येति अन्यत्तैः तत्र योग्याय महाभागवतायेत्यर्थः। यद्वा पूज्याय तस्माद् एवेत्यर्थः। ममापीत्यन्वयः गर्हितेनापि मयेत्यर्थः ॥ ३ ॥ पुनः सदैन्यमाह। ममेति। एतदीदृशं तत्तद्भद्राचरणादि साध्यं यद्वा। आधुनिकमुत्तमःश्लोकदर्शनं यद्वा स्वानुभावमात्रं वेद्यमाहात्म्यताविवक्षया आदावेतदित्युक्त्वा वाग्गोचरत्वे क्रियमाणे तु यत्किञ्चिदेवोक्तं स्यादित्यभिप्रायेण पश्चात्तादृशानामविशेषणेन साक्षादपि निर्दिशति उत्तमः संसाराख्यमो निरसनः श्लोकः यशोऽपि यस्य तस्य दर्शनं मम मत्सम्बन्धे दुर्लभं साधनं बाहुल्यं यदा स्यात्तदापि जन्मान्तरं एव लभ्यं मन्ये। कुतः विषयात्मनः प्रारब्धवशेन विषयतादात्म्यं प्राप्तस्य। अनुरूपो दृष्टान्तः यथेति। शूद्रजन्मन इति। यथा तस्य तद्बाहुल्ये सति विप्रजन्मन्येव न स्यात् तद्वत् कर्मशूद्रस्य तु प्रायश्चित्तविशेषेणेह जन्मन्यपि स्यादिति ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अक्रूराय नमस्तस्मै येन कंसोऽपि सेवितः। गोकुले गोपगोप्याढ्य-श्रीकृष्णैकदिदृक्षया ॥

कंसादि—हननाय महाभागवतोत्तमेन श्रीनारदेनापि मधुपुरीप्रयाणाय भगवान्निवेदितः, अक्रूरोऽपि प्रययौ, अत्यर्थेऽपि च, यद्वा, त्वर्थे चकारः, 'तान्तु' इति श्रीभगवतोऽनिच्छायामपि मधुपुरीगमने भक्तवरद्वयाग्रहो मुख्यो हेतुः सूचितः; यस्यां रात्रौ कंसेनादिष्टस्ताम्; तथा च श्रीहरिवंशे (विष्णु-प. २२। ७)—'निशि स्तिमितमूकायां मथुरायां जनाधिप' इति; अत एवात्रापि पूर्व्वमुक्तम् (भा. १०।६६।४०।)—'प्रविवेश गृहं कंसः' इत्यादि। मधुनाम्ना महादैत्येन पूर्व्वमधिष्ठिततया तदीयत्वेन प्रसिद्धा। यद्वा, मधुवंशोद्भवा मधवो यादवा एव, तेषां या पुरी तस्यामुषित्वेति गोकुले प्राक् श्रीकृष्णदर्शनस्यैवापेक्षया, तच्च वनादागमे सति विकाल एव घटेतेत्याशयेन; किंवा वनमध्ये रात्रौ गमनं वर्त्माज्ञानादिना न सिध्येदित्याद्यभिप्रायेण। यच्च श्रीवैशम्पायनेनोक्तम् (विष्णु-प.२२।१०३)—'तस्मिन्नेव मुहर्त्ते तु मथुरायाः स निर्ययौ। प्रीतिमान् पुण्डरीकाक्षो द्रष्टुं दानपतिः स्वयम् ॥" इति। तच्च कल्पभेदाद्भिन्नम्। यद्वा, यादववर्गैः सह कंसस्य बहुलसंकथया प्रायो रात्रिशेष एवोपसन्ने अक्रूरं प्रति तस्य प्रेरणया तथैव पर्य्यवस्यतीति दिक्। महामतिरिति वक्ष्यमाणमनोरथाभिप्रायेण, रथं कंसोद्दिष्टम्, आस्थाय श्रीभगवदारोह्यत्वेन केवलं सारथितयाधिष्ठाय आश्रित्येत्यर्थः। प्रकर्षेण वक्ष्यमाणतत्तन्मनोरथसुखादिना ययौ, नन्दस्य गोकुलं सर्व्वगोपावासं व्रजमेव। यद्वा, उपनन्दादिगोकुलव्यवच्छेदार्थं नन्दस्येति विशेषणम्, तत्रैव श्रीभगवत्सन्दर्शनसम्भवात्। यद्वा, नन्दयतीति नन्दं यद्गोकुलं तत्। श्लेषेण चाय्यैराहतोऽपि, महामतिरपि गोकुलात् श्रीकृष्णानयनार्थं वत प्रवृत्तः। अतो विपरीत एवेति श्रीबादरायणेः शोकोक्तिरिति ॥ १ ॥ कथं प्रययो? तदाह—गच्छन्नित्यादिना नृपेत्यन्तेन। गच्छन् सन् पथि एवं वक्ष्यमाणप्रकारेण एतद्वक्ष्यमाणमचिन्तयत्, यतो महान् भागो भाग्यं यस्य सः, तत् कुतः? भगवति निजाशेषैश्वर्य्यप्रकटनपरे श्रीकृष्णे परमां भक्तिम्, उप समीपे अनायसत एव प्राप्तः; अग्नेरौष्ण्यवत् स्वभावत एव भक्तिमत्त्वात्। अम्बुजेक्षण इति विषयस्य परमसौन्दर्य्यादिना परमभक्त्युपगतिः सम्भाविता, अथवा स्वभावतो भक्त एव, अधुना च गोकुले गच्छन्; एवमीदृशीं परां भक्तिमुपगतः अन्यत् समानम् ॥ २ ॥ चिन्तितमेवाह—किमित्यादिना स्वबन्धुष्वित्यन्तेन। किं कतमत्, एवमग्रेऽपि, भद्रं यज्ञादिसत्कर्म्म, तपः सर्व्वभूताभयदानलक्षणम्, तच्च परमं निर्म्मानिनिष्कामत्वादिना। यद्वा, तपश्चित्तैकाग्र्यं परमम्, श्रीभगवद्विषयकत्वात्; एवं परममित्यस्य भद्रमित्यनेनाप्यन्वयः। ननु तथापि विना महदनुग्रहेण नैतत् सिध्येदित्याशंक्य पक्षान्तरं चिन्तयति—किम्वेति। वाथ अथवेत्यर्थः, अर्थेति मांगल्ये वा। अर्हते दानात्, किंवा न दत्तम्। भद्रादीनां यथोतरं श्रेष्ठ्यमूह्यम्। यद्यस्मात् भद्रादेः, केशवमादिपुरुषं केशि-हन्तारं वा द्रक्ष्यामि। तच्चाद्येति। अन्यत्तैर्व्याख्यातम्। यद्वा, अपि निश्चितम्; यद्वा मयेत्यनेनान्वयः।

मयापि अत्यन्ताधमेनापीत्यर्थः। किमिति वितर्के, किं कृतम् ? अपि तु कृतमेवेति गम्यते, अन्यथानुपपत्तिन्यायात्। तदेव मनस्याह,—यदिति यतः; अपि तु न कृतमेव यद्यस्माद्भद्रादेः, अतो द्रष्टुमनर्होऽहं कुतो द्रक्ष्यामीत्यर्थः ॥ ३ ॥ तदेवाभिव्यञ्जयति—ममेति। एतदुत्तमश्लोकदर्शनम्। यद्वा, निगूढत्वादिमाहात्म्यविवक्षयादौ सामान्येनैतदुक्त्वा पश्चान्निर्दिशति—उत्तमेति, उत्तमः सर्व्वोत्कृष्टः, यद्वा, उत्तमः संसाराख्यतमोनिरसनः श्लोको यशस्तत्कीर्त्तनादिकमपि यस्य तस्य दर्शनं मम दुर्लभमसम्भाव्यं मन्ये। कुतः ? विषयात्मनः। दुर्लभत्वे दृष्टान्त- तथेति। शूद्रजन्मन इति शूद्रजातेरित्यर्थः। सर्व्वेषामेव शूद्राणां वेदपाठेऽनधिकारात्। न च वक्तव्यं विप्रवं सत्कर्म्मादियुक्तः शूद्रः संगृहीतः, कर्म्मशूद्रो विप्रकुलजो व्यवच्छिन्न इति (भा० १।४।२५) 'स्त्री-शूद्रद्विज-बन्धूनां त्रयी न श्रुतिगोचरा' इत्यादिवचनात्तस्य स्वत एव तदनधिकारादिति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अर्हते योग्याय पात्राय ॥ १-३ ॥ ब्रह्मकीर्त्तनं वेदोच्चारणम् ॥ ४-५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथाक्रूरः स्वमालयमित्युक्तं ततः स किमकरोदित्याशङ्क्य व्रजं प्रत्यक्रूरगमनं तस्य च मनोरथसिद्धिञ्चाहाष्टात्रिंशेन। अक्रूरोऽपीति। महती भगवद्विषया मतिर्यस्य स उषित्वा स्थित्वा प्रभाते रथमधिरुह्य नन्दगोकुलं प्रति ययौ प्रतस्ये इत्यर्थः ॥ १ ॥ महाभागः दुर्लभतरभविष्यद्भगवद्दर्शनात्मकमहाभाग्यवान् भगवति परां भक्तिं प्राप्तः इतीत्थं वक्ष्यमाणप्रकारेणाचिन्तयत् ॥ २ ॥ कंसकृतनिर्बन्धादलब्धभगवद्दर्शनः सम्प्रति तत्प्रेषणया भगवन्तं दिदृक्षुस्तावदात्मनस्तद्दर्शननिदानं बहुधा तर्कयति। किम्मयेति। अर्हते योग्याय सत्पात्रभूताय दत्तं किमित्यूहः कुतः यद्यस्माद्द्यकेशवं द्रक्ष्याम्यन्यथैतन्न सम्भाव्यत इति भावः ॥ ३ ॥ पुनः श्रेयांसि बहुविघ्नानि” इति न्यायेन दर्शनासम्भवमाशङ्क्य पुनः सम्भावयति। ममैतदिति द्वाभ्याम्। विषयात्मनः विषयाविष्टचित्तस्य ममैतदुत्तमैर्ब्रह्मादिभिः केवलं श्लोक्यस्य स्तुत्यस्य वितर्क्यस्येति यावत् नतु दृश्यस्येति भावः तस्य दर्शनं दुर्लभं मन्ये यथा शूद्राजन्म यस्य ब्रह्मकीर्त्तनं वेदवचनं दुर्लभं तद्वत् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अज्ञानां भगवद्भक्तिकरणनिदर्शनार्थं गोकुलयात्राकथनच्छद्मनाऽक्रूरस्य भक्त्युद्रेकः प्रतिपाद्यतेऽस्मिन्नध्याये मधुपुर्यां मथुरायां यस्यां रात्र्यां न्ययुङ्क्त तां रात्रिम ॥ १-२ ॥ भद्रं पुण्यं सामान्योक्तं विशिनष्टि। किन्तप्तमित्यादिना। अर्हते विष्णुभक्त्यादिगुणसम्पन्नाय ॥ ३ ॥ ब्रह्मकीर्तनं वेदाध्ययनम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

दुर्लभं साधनबाहुल्यं यदि स्यात्तदापि जन्मान्तर एव लभ्यं मन्ये कुतः विषयात्मनः प्रारब्धवशेन विषयतादात्म्यं प्राप्तस्य अनुरूपो दृष्टान्तो यथेति। शूद्रजन्मन इति। यथा तद्बाहुल्ये सति विप्रजन्मन्येव तत् स्यात्तद्वत् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ममैतद्दुर्लभमित्यादि। विषयात्मनः शूद्रजन्मनो यथा ब्रह्मकीर्तनं ब्रह्म वेदस्तत्स्वरूपं यच्छ्रीभागवतादि तत्कीर्त्तनम्। विषयात्मन इति वैष्णवशूद्रव्यावृत्तिपरम्—तस्य वैष्णवत्वात्। कदाचिदयमनुरागादेव तत्पठति, तेन ममानुरागश्चेत्तथा भवति, तदा तदपि घटेत। अन्यथा शूद्रजन्मन इत्येव सिद्धे विषयात्मन इति विशेषण-वैयर्थ्यम् ॥ ४-७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

विषयात्मनः, शूद्रजन्मनो यथा ब्रह्मकीर्तनं ब्रह्मभागवतं (भा० १।३।४०) “ब्रह्म-सम्मितम्” इति लिखितत्वात्, विषयात्मन इति वैष्णवशूद्रव्यावृत्तिपरम् ॥ ५-७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अष्टत्रिंशे व्यधात्कृष्णो यथाक्रूरो मनोरथान्। तथा तान् पूरयामास तदातिथ्यं च सोऽकरोत् ॥

कंसः फाल्गुनकृष्णैकादश्यां कृत्वैव मन्त्रणाम् प्रेष्य केशिनमक्रूरमादिश्य प्राहिणोद्व्रजम्। प्रातः केशिवधोऽक्रूरप्रस्थानं नारदस्तुतिः। अपराह्णे व्योमवधोऽक्रूरःसायंव्रजेऽविशत्। तामेकादश्या रात्रिं महामतिरिति। भगवत्कथार्चनादिभिर्जागरणेनैवोषित्वा पारणमकृत्वैव ययौ ॥ १-२ ॥ सहर्षवितर्कमाह। किमिति। अपिः संभावनायाम् अर्हते योग्याय ॥ ३ ॥ दैन्याम्बुधौ निपतन्नाह। मम कीदृशस्य विषयात्मनः विषयाविष्टस्य शूद्रजातेर्वेदकीर्तनमिव उभयत्रैवानर्हत्वं ध्वनितम् ॥ ४ ॥

गूढार्थदीपिनी

अष्टत्रिंशे सुतो नेतुमक्रूरो गोकुलं गतः । सत्कृतो रामकृष्णाभ्यां लेभे तत् चिन्तितं पथि ॥ १ ॥

यस्यामादिष्ट तां रात्रिम् ॥ १ ॥ परां प्रेमलक्षणाम् एतत् वक्ष्यमाणम् ॥ २ ॥ भद्रं पुण्यम् । तप्तं कृतम् । पाकं पचतीति वन्निर्देशः अर्हते सत्पात्राय ॥ ३ ॥ विषयात्मनो मम दर्शनम् दुर्लभं मन्ये ब्रह्मकीर्तनं वेदोच्चारणं यथा शूद्रस्य ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अष्टत्रिंशे ऽक्रूरभाग्योदयं वर्णयति । अक्रूरोऽपीति ॥ १ ॥

श्रीनारदेन कंसवधादिकार्य्य विज्ञापिते सति भगवानपि तदर्थं तत्र गन्तुमियेष यदा तदाक्रूरोऽपि कंसेन नियुक्तस्तां रात्रिं मथुरायामुषित्वा तदनन्तरं रथमारुह्य नन्दगोकुलं प्रययौ ॥ १ ॥ एवमेतत् वक्ष्यमाणमचिन्तयत् ॥ २ ॥ अपीति सम्भावनायां किं साधनं मयाचरितमनुष्ठितम् अर्हते योग्याय ॥ स्वस्य श्रीकृष्णदर्शनानधिकारित्वं शङ्कते । ममैतदिति । विषयेषु आत्मा मनो यस्य तस्यान्यासक्तस्य मम ब्रह्मकीर्तनं वेदपाठः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ इतोऽप्यधिकारी संसारकारागारबन्धं ध्वंसयितुं समीहमानः स्वयमक्रूरवद्भक्तिं कुर्यादिति दिदर्शयिषुरक्रूरस्य क्रूराज्ञातो गोकुलगमनं तत्र मनोरथकरणं तत्फललाभश्चेत्येतदेतदध्याये प्रतिपाद्यते । तत्रादौ तदाज्ञप्तः किं तत्क्षणे निष्कान्तः किंवा तां क्षणदां तत्रैव स्थित्वा प्रातरिति प्रथममनभ्युपगमेन द्वितीयमभ्युपगमेन समाधत्त इत्यभिधत्ते ॥ श्रीशुक इति । तां कंसशंसितवासरशर्वरीम् ॥ १ ॥ महान्भागो दैवं यस्य स एतद्वक्ष्यमाणं प्रमेयं नानाप्रकारेणाचिन्तयच्चिन्तयामास ॥ २ ॥ मया किं भद्रं मङ्गलमाचरितं पुरा परमं किं तपस्तप्तं कृतम् । अर्हते योग्याय किंवा दत्तम् । अथाऽप्ययोग्यसहवासे सत्यपि यद्येन केशवं द्रक्ष्यामि । अद्येति न दवीयः पदवी मधुरागोकुलयोरिति सूचयति ॥ ३ ॥ शूद्रज-मनस्तज्जातिजातस्य ब्रह्मकीर्तनं वेदाध्ययनं यथा दुर्लभम् । श्रवणे त्रपुजतुभ्यां श्रोत्रपरिपूरणमध्ययने जिह्वाच्छेद इत्यादेः । तथा विषयात्मनो विषयेषु लौकिकेष्वात्मा मनो यस्य तस्य ममोत्तमश्लोकस्य ब्रह्माद्युत्तमस्तुत्यस्य दर्शनं दुर्लभं मन्ये ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

पञ्चत्रिंशे भक्तिमार्गस्थापनाय निरूप्यते । अक्रूरागमनं भक्तिः फलं चैव हि मानसम् ॥
सात्त्विकश्चेदभिमुखस्तदा भवति भक्तिमान् । अन्यथादैत्यसंसर्गे स्तब्धा भक्तिर्भवेद्ध्रुवम् ॥

त्रयस्त्रिंशेऽध्याये अक्रूरः प्रेषित इत्युक्तं तस्यागमनं निरूपयति । अक्रूरोऽपीति । यस्यां रात्रौ समादिष्टः तां रात्रिं मथुरायामेव स्थितः सा हि भगवदधिष्ठिता भूमिः भगवांश्चेत् निवारयेत् मथुरा वा भगवत्सेवको वा कश्चित् तदा न गमिष्यामीति निश्चित्य तत्रैव स्थितः ततो गमनमेव समीचीनमिति ज्ञात्वा प्रचलित इत्याह । महामतिरिति । अयमुपायः सर्वेषामेव हितकारी अतो गत्वा समानेय इति ततः कंसदत्तं दिव्यं रथमास्थाय स्वयमेकाकी सारथिरूपः नन्दस्य गोकुलं प्रति प्रकर्षेण बहिरन्तः सन्तोषपूर्वकं गृहे च सम्भृतिं कृत्वा ययावित्यर्थः ॥ १ ॥ सात्त्विकस्य भगवदाभिमुख्ये भक्तिर्भवतीति ज्ञापयितुं तस्य भगवद्विषयको मनोरथो जात इत्याह । गच्छन्निति पथि मार्गगन्तुः भक्तिरुचितैव पथि गच्छन्निति रथप्रेरणं नापेक्षत इति सूचितम् । ननु दुष्टसंसर्गं प्राप्य स्थितो दुष्टप्रेरितः कथं भक्तो जात इत्याशङ्क्याह । महाभागवत इति । पूर्वसञ्चित पुण्यराशिः सर्वमेव भाग्यमद्यफलोन्मुखं जातमित्यर्थः । तत्फलमाह । भक्तिपरामुपगत इति । परां प्रेमलक्षणां विषयो न विभूतिरूप इत्याह भगवतीति । अम्बुजवदीक्षणे यस्येति दृष्ट्यैव सर्वतापनाशकत्वं निरूपितम् अतः फलदातरि पुरुषोत्तमे भक्तिर्युक्ता सापि भक्तिः पूर्वं जाता मध्ये गता तिरोहिता पुनरुपसमीपे स्वयमेवागता एतद्वक्ष्यमाणमेवं प्रकारेणाचिन्तयदिति गता भक्तिः समागता स्वतः प्रवेशमलभमाना कामना द्वारा प्रविष्टेति भगवते महत्त्वं ज्ञात्वा तेन स्वस्योत्कर्षं यथा कामयते तथा चिन्तायुक्तं कृतवतीत्यर्थः ॥ २ ॥ प्रथमतो भगवद्धर्माणां माहात्म्यमाह । भक्तिदार्ढ्याय तत्रापि दर्शनस्य सर्वोत्कृष्टत्वमाह । किम्मया चरितं भद्रमिति । त्रयोविभागाः स्वयं भगवानन्ये सर्वे च तेषामुत्कृष्टधर्मैः सहजैरागन्तुकैर्वा सर्वात्मको भगवांस्तुष्यतीति ज्ञायते तस्मिंस्तुष्ट एव तस्य दर्शनं भवतीति यतो ब्रह्मेशयोरपि मुखमोक्षदाता भगवानिति तत्र स्वधर्म आचारः भगवद्धर्मस्तपः सर्वलोकोपकारी दानमिति आचारप्रभवो धर्म इति तदुक्तं किम्मयाचरितमिति । भद्रं कल्याणरूपं तपो मे हृदयं साक्षादिति वाक्याद् भगवच्छक्तिस्तपः अत उक्तं किन्तप्तमिति जीवधर्मतपोव्यावृत्त्यर्थं परममिति सर्वोपकारी धर्मो दानं सुपात्र एव महाफलं साधयतीति अर्हते दत्तमिति । अथेति भिन्नप्रक्रमे किंवेत्याकाङ्क्षायामत्यन्तं भगवत्पराय भगवदर्थमेव सर्वविनियोगाय श्रद्धया दत्तमिति धर्मशास्त्राद्भिन्नः प्रक्रमः अन्यथा अद्यैव भगवद्दर्शनं न भवेदतो ज्ञायते त्रयाणामन्यतरत्कृतमिति ॥ ३ ॥ एवङ्कार्यावश्यकतां ज्ञात्वा कारणं परिकल्प्य तत्र बाधकमाशङ्क्य परिहरति द्वाभ्याम् । ममैतद्दुर्लभं मन्य इति । एतद्दर्शनं मम साधने विद्यमानेऽपि दुर्ल्लभं तत्रोपपत्तिर्मन्य इति युक्त्यैवं निश्चीयते मम

दर्शनं न भविष्यतोति अयञ्च तर्कः भगवतः अलौकिकत्वज्ञापकः लौकिकत्वे इति शङ्कैव नोदेतीति दर्शनाभावे हेतुद्वयमाह। भगवन्निष्ठं स्वनिष्ठञ्च धर्मद्वयं भगवन्निष्ठमाह। उत्तमश्लोकस्य दर्शनमिति। उत्तमैरपि श्लोक्यत एव न च दृश्यते उत्तमाः सर्वज्ञा भक्ताः स्वनिष्ठमाह। विषयात्मन इति। किञ्च विषयाणां न केवलं प्रतिबन्धकत्वं तथा सति कदाचित् अनित्यत्वात् विषयाणां दर्शनमपि भवेत् किन्त्वधिकारनिवर्त्तकत्वमपि यतः सिद्धेऽपि सुलभे विषये स्वस्य न योग्यतेति तदाह। यथेति ब्रह्मकीर्त्तनं वेदोच्चारणं पूर्वजन्मनि ब्राह्मणोऽपि सर्वज्ञोऽपि वेदोच्चारणसमर्थोऽपि शूद्रबीजाच्चेदुत्पन्नः तदा नार्हति कीर्त्तनं कर्तुम् ॥ ४ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः। महामतिः शुद्धबुद्धिरक्रूरोऽपि तां रात्रिं मथुरायामुषित्वा रथमारुह्य नन्दस्य गोकुलं प्रययौ ॥ १ ॥ पथि मार्गे गच्छन् महाभागोऽक्रूरोऽबुजेक्षणे पद्मनेत्रे भगवति परां भक्तिमुपगतः प्राप्त एवं प्रकारेणैतद्वक्ष्यमाणमचिन्तयत् ॥ २ ॥ तथाहि मया किं भद्रं मंगलं पुण्यं कर्माचरितम्। परममुत्कृष्टं तपः किं तप्तम्। अर्हते योग्याय किं वा दत्तं यत् यतो हेतोरद्य इदानीं केशवम् अहं द्रक्ष्यामि ॥ ३ ॥ मम एतद्दुर्लभमहं मन्ये। किं तदित्यत आह। उत्तमश्लोकस्य दर्शनमिति यत् विषयेष्वात्मा चित्तं यस्य तस्य शूद्रजन्मनो ब्रह्मणो वेदस्य कीर्तनमुच्चारणं यथा दुर्लभम् ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अष्टात्रिंशे यथाक्रूरः कृतवान् स्वमनोरथम् ॥ तथैव रामकृष्णाभ्यां सत्कृतश्चेति वर्ण्यते ॥ १ ॥

कंसेनाज्ञप्तोऽक्रूरः किं कृतवान्' इत्यपेक्षायामाह–अक्रूरोऽपीति। यस्यां रात्रौ कंसेन समादिष्टस्तां रात्रिं मधुपुर्यामेवोषित्वा महामतिः महती सूक्ष्मा परमार्थग्रहणे समर्था मतिर्बुद्धिर्यस्य सोऽक्रूरोऽपि प्रातःकाले रथमास्थाय नन्दस्य गोकुलं प्रति ययौ प्रतस्थे। 'महामतिः' इत्यनेन सूक्ष्मबुद्धित्वात् कंसस्यार्थोऽनर्थो वा भवतु, मम तु तावद्भगवद्दर्शनादिना कृतार्थता भविष्यत्येवेति गमने तदभिप्रायः सूचितः ॥ १ ॥ पथि गच्छन्नम्बुजवच्छोभमाने कृपादृष्ट्यैव सन्तापहारके ईक्षणे यस्य तस्मिन् भगवति परां भक्तिमुपगतः, अत एव महाभागोऽक्रूरः एवं वक्ष्यमाणप्रकारेण एतद्वक्ष्यमाणमचिन्तयत् ॥ २ ॥ तत्रादौ भगवद्दर्शनं निश्चित्य तत्कारणं स्वभाग्यं बहुधा तर्कयति–किमिति। भद्रं यज्ञादि मया किमाचरितम्? किं वा परमं तपः व्रतोपवासादि तप्तं कृतम्? अथवा किमर्हते पूज्याय पात्राय दत्तम्?। कुत एतन्मया कृतमिति सम्भावयति। तत्राह–यदिति। यस्मादद्य केशवं ब्रह्मरुद्रयोरपि पूज्यं कृष्णं द्रक्ष्यामि। अन्यथैतन्न सम्भाव्यते इति भावः ॥ ३ ॥ स्वस्य श्रीकृष्णदर्शनासम्भवमाशङ्कते—ममेति। एतदुत्तमश्लोकस्य अविद्यानिवर्तकयशसो दर्शनं मम दुर्लभं मन्ये। 'कुत एतत्?' इत्याशङ्क्य तत्राधिकार्यभावमाह–विषयात्मन इति। विषयाक्रान्तचित्तस्य तदसम्भवादित्यर्थः। तत्र दृष्टान्तमाह–यथेति। शूद्राज्जन्म यस्य तस्य यथा ब्रह्मणो वेदस्य कीर्तनमध्ययनं दुर्लभं तत्राधिकाराभावात्तथेत्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

अष्टत्रिंशे पथि ध्यायन्नक्रूरो गोकुलं गतः ॥ सत्कृतो रामकृष्णाभ्यां तत्र श्लोकास्त्रिवार्द्धयः (४३) ॥
उवाचद्वयमर्द्धाढ्या द्विपञ्चाशदनुष्टुभः (५२॥) ॥ ३८ ॥

अक्रूर इति ॥ यस्यां रात्रौ कंसेन समादिष्टस्तामेकादशीरात्रिं जागरणाद्यर्थं मधुपुर्यामेवोषित्वा महामतिः सोऽक्रूरोऽपि अकृतपारण एव प्रातःकाले रथमास्थाय नन्दस्य गोकुलं प्रति ययौ प्रतस्थे। इयं माघकृष्णद्वादशी फाल्गुनद्वादशी वा ॥ १ ॥ गच्छन्निति ॥ पथि गच्छन् अम्बुजेक्षणे भगवति परां भक्तिमुपगतः अत एव महाभागोऽक्रूरः एवं वक्ष्यमाणप्रकारेण एतद्वक्ष्यमाणचिन्तयत् ॥ २ ॥ किमिति ॥ मया भद्रं यज्ञादि किमाचरितं किं वा परमं तपः व्रतोपवासादि तप्तं कृतम् वा अथवा किम् अर्हते पूज्याय पात्राय दत्तं यद्यस्मादद्य केशवं द्रक्ष्यामि ॥ ३ ॥ ममेति ॥ यथा शूद्राज्जन्म यस्य तस्य जनस्य ब्रह्मणो वेदस्य कीर्तनं दुर्लभं तथा एतदुत्तमश्लोकस्य हरेः दर्शनं विषयात्मनो विषयाविष्टचित्तस्य मम। शेषे षष्ठी। दुर्लभं मन्ये ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानी अष्टत्रिंशेऽध्याये श्रीकृष्णं मथुरां प्रतिनेतुं गोकुले ऽक्रूरेणागमनं कृतमित्याह तत्र नारदोक्तिं श्रुत्वा हरौ मथुरां गन्तुमुद्यते सति अक्रूरागमनं प्रोच्यते अक्रूर इति ॥ १ ॥ एतद्वक्ष्यमाणं ॥ २ ॥ अर्हते योग्यपुरुषाय ॥ ३ ॥ स्वस्य कृष्णदर्शने दुर्ल्लभत्वमाह ममेति द्वाभ्यां विषयेषु आत्मामनो यस्य तस्य मम ब्रह्मकीर्तनं वेदोच्चारणम् ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यथा ध्यायन् व्रजं यातोऽष्टत्रिंशेऽक्रूर एकलः। कृष्णाभ्यां स्वगृहं नीत्वा तथैवासौ सुसत्कृतः ॥ १ ॥
वृते केशिवधे प्रातर्द्वादश्यां च मुनौ गते। व्योमे हते ततोऽक्रूरो गोकुलं सायमागमत् ॥ २ ॥

'तथाक्रूरः स्वमालयम्' इत्युक्तं ततः स किमकरोदित्याशङ्क्य व्रजं प्रत्यक्रूरगमनं तस्य मनोरथसिद्धिं चाह ॥ अक्रूरोऽपीति ॥ महती भगवद्विषयत्वादुत्तमा मतिर्यस्य सः, अक्रूरः अपि, तामेकादश्याः सम्बन्धिनीं, रात्रिं मधुपुर्यां मथुरायां, उषित्वा

स्थित्वा, प्रभाते पारणां कृत्वेति शेषः । रथं आस्थाय नन्दगोकुलं, प्रययौ ॥ १ ॥ गच्छन्निति ॥ महाभागः दुर्लभतरभविष्यद्भगवद्दर्शनात्मकमहाभाग्यवान्, अम्बुजेक्षणे कमलनयने, भगवति साक्षाच्छ्रीकृष्णे, एवं वक्ष्यमाणप्रकारां, परां भक्तिं, उपगतः प्राप्तः अक्रूरः, पथि मार्गे, गच्छन्, सन्, एतदित्थं, अचिन्तयत् । वक्ष्यमाणप्रकारेण चिन्तयामासेत्यर्थः ॥ २ ॥ कंसकृतनिर्बन्धादलब्धदर्शनः संप्रति तत्प्रेषणेन भगवन्तं दिदृक्षुस्तावदात्मनस्तद्दर्शननिदानं बहुधा तर्कयति ॥ किमिति ॥ मया किं भद्रं मङ्गलं, सुकृतमिति यावत् । चरितमाचरितं स्यात् । परमं सर्वोत्तमं, किंविधं तपः तप्तं कृतं स्यादित्यर्थः । अथ किंवा, किं नु अर्हते योग्याय, सत्पात्रभूतायेत्यर्थः । दत्तं विश्राणितं अपि स्यात् । यद्यस्मादुक्तविधान्यतमसुकृतात्, अद्य केशवं द्रक्ष्यामि । उक्तविधसुकृतान्यतमसुकृताभावे एतन्न संभाव्यते इति भावः ॥ ३ ॥ पुनः श्रेयांसि बहुविघ्नानीति न्यायेन दर्शनासंभवमाशङ्क्य पुनः संभावयति द्वाभ्याम् ॥ ममेति ॥ विषयात्मनः विषयाविष्टचित्तस्य, मम शूद्रात् जन्म यस्य तस्य, जनस्य, ब्रह्मकीर्त्तनं वेदवचनं वेदोच्चारणमित्यर्थः । यथा दुर्लभं, तद्वत् एतत्, उत्तमैर्ब्रह्मादिभिः श्लोक्यते स्तूयते इत्युत्तमश्लोकस्तस्य दर्शनं दुर्लभं, मन्ये ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं विहारै रममाणचित्ताः सन्तः स्वसन्तोषजुषो वसन्ति । सन्तः स्वघोषे खलु नान्दनाम्नि ह्यक्रूरयोगोऽर्थत एव तेषाम् ॥ १ ॥

अक्रूरोपीति : १०.३८'१.

आनन्दभाजनमिदं पदमेकमेव लोकेशमुख्य-सुरपूजितमच्युतस्य ।
जानन्नहं न सहसा परिहासभूमिं भूमौ श्रयामि लघुभूपतिपादसेवाम् ॥ २ ॥
यस्य देहे यदा व्यक्ता भवत्यक्रूरयोगिता । स एवं चिन्तयन् याति पथि कृष्णेक्षणोत्सुकः ॥ ३ ॥

किं मयाऽऽचरितमिति : १०.३८.३.

को वाऽकारि जपस्तपः किमु कृतं तीर्थं किमासेवितं किं वा दानमदायि सद्व्रतविधिर्यागोऽपि योगोऽपि वा ।
यस्यैतत्फल—मिन्दिराधिप—पदाम्भोज—प्रसादेक्षणं प्रादुर्भूत- मभूतपूर्व—ममरब्रह्मेश—सच्चेतसाम् ॥ ४ ॥

कृष्णप्रिया

अक्रूर जी की व्रज यात्रा

श्रीशुकदेव जी कहते हैं—परीक्षित् ! महामति अक्रूरजी भी वह रात मथुरापुरी में बिताकर प्रातःकाल होते ही रथपर सवार हुए और नन्दबाबा के गोकुल की ओर चल दिये ॥ १ ॥ परम भाग्यवान् अक्रूरजी व्रज की यात्रा करते समय मार्ग में कमलनयन भगवान् श्रीकृष्ण की परम प्रेममयी भक्ति से परिपूर्ण हो गये । वे इस प्रकार सोचने लगे ॥ २ ॥ मैंने ऐसा कौन सा शुभ कर्म किया है, ऐसी कौन सी श्रेष्ठ तपस्या की है अथवा किसी सत्पात्र को ऐसा कौन सा महत्वपूर्ण दान दिया है, जिसके फलस्वरूप आज मैं भगवान् श्रीकृष्ण का दर्शन करूँगा ॥ ३ ॥ मैं बड़ा विषयी हूँ । ऐसी स्थिति में, बड़े-बड़े सात्विक पुरुष भी जिनके गुणों का ही गान करते रहते हैं, दर्शन नहीं कर पाते-उन भगवान् के दर्शन मेरे लिये अत्यन्त दुर्लभ हैं, ठीक वैसे ही जैसे शूद्रकुल के बालक के लिये वेदों का कीर्तन ॥ ४ ॥

[1]मैवमेकाधमस्यापि स्यादेवाच्युतदर्शनम् । ह्रियमाणः कालनद्या[2] क्वचित्तरति कश्चन ॥ ५ ॥
ममाद्यामङ्गलं नष्टं फलवांश्चैव मे भवः । यन्नमस्ये भगवतो योगिध्येयाङ्घ्रिपङ्कजम् ॥ ६ ॥
कंसो बताद्याकृत मेऽत्यनुग्रहं द्रक्ष्येऽङ्घ्रिपद्मं प्रहितोऽमुना [3]हरेः ।
कृतावतारस्य दुरत्ययं तमः पूर्वेऽतरन् यन्नखमण्डलत्विषा ॥ ७ ॥
यदर्चितं ब्रह्मशिवादिभिः[4] सुरैः श्रिया च देव्या मुनिभिश्च सात्वतैः[5] ।
गोचारणायानुचरैश्चरद्[6] वने यद् गोपिकानां कुचकुङ्कुमाङ्कितम्[7] ॥ ८ ॥

कर्दमक्षमा

अन्वयः—मा एवम्, (अधमस्यदर्शनं कुत इति नैव चिन्त्यम्) अधमस्य, अपि, अच्युतदर्शनम्, स्यात्, एव, कालनद्या, ह्रियमाणः, कश्चन, क्वचित्, तरति ॥ ५ ॥ अद्य, मम, अमङ्गलम्, नष्टम्, च, मे, भवः, फलवान्, एव, यत्,

---

१. मैवं ममाधमस्यापि–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । २. नद्यां–विज. । ३. मुरारेः–वीर. । ४. भवादिभिः–श्रीधरादयः । ५. ससात्वतैः–श्रीधरादयः । ६. स्समं वने–विज. । ७. कुंकुमाचितं–इति कस्यचित् ।

भगवतः, योगिध्येय अङ्घ्रिपङ्कजम्, नमस्ये ॥ ६ ॥ कंसः, बत, अद्य, मे, अत्यनुग्रहम्, अकृत; अमुना, प्रहितः, अद्यः, (अहम्) कृतावतारस्य, हरेः, अङ्घ्रिपद्मम्, द्रक्ष्ये, यत्, नखमण्डलत्विषा, पूर्वे, दुरत्ययं तमः, अतरन् ॥ ७ ॥ ब्रह्मशिवादिभिः, सुरैः, श्रिया, देव्या, च, मुनिभिः, च (कविभिः) च, सात्वतैः, यद् अर्चितम्, अनुचरैः, गोचारणाय, वने, यद्, अचरत्, च, गोपिकानाम् यद्, कुचकुङ्कुमाङ्कितम्, अङ्घ्रिपद्मम्, द्रक्ष्ये ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यद्वा मैवं किं त्वधमस्य नीचस्यापि मम स्यादेव । कुत इत्यत आह । ह्रियमाणः कालनद्येति । अयं भावः । यथा नद्या ह्रियमाणानां तृणादीनां मध्ये किंचित्कदाचित्तरति कूलं प्राप्नोति तथा कर्मवशेन कालेन ह्रियमाणानां जीवानामपि मध्ये कश्चित्तरेदिति संभवतीति ॥ ५ ॥ अतोऽनया प्रवृत्त्यैव ममामंगलं ध्रुवं नष्टमेवेति ज्ञायते । भवो जन्म च सफलं जातमिति । यद्यता नमस्करिष्यामि ॥ ६ ॥ अमंगलनाशे शूचकान्तरमाह । कंस इति । बतेत्याश्चर्ये । अतिखलः कंसोऽपि ममात्यन्तमनुग्रहं कृतवान् । यतोऽमुना कंसेन प्रहितो हरेरंघ्रिपद्मं द्रक्ष्ये द्रक्ष्यामीति । पूर्वेंऽबरीषादयस्तमः संसारमतरंस्तीर्णास्तत् ॥ ७ ॥ अंघ्रिपद्मं विभावयति । यदिति । ब्रह्मादिभिरर्चितमिति परमैश्वर्यमाह । श्रिया चेति सौभाग्यातिशयम् । मुनिभिर्भक्तसहितैरिति परमपुरुषार्थत्वम् । गोचारणायेति कृपालुत्वम् यद्गोपिकानामिति प्रेममात्रसुलभत्वम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पक्षान्तरमाह—यद्वेति । मैवं, कृष्णदर्शनं मम भविष्यत्येवेत्याह—किंत्विति । हेतुमाशङ्कते–कुत इति । इत्यत इत्यत्र । अत्राशयमाह—अयं भाव इति किञ्चित्तृणादि तरति तटे लगति । कदाचिद्वाय्वादिविवर्त्तनादिनेत्यर्थः । कश्चिद्भगवदनुगृहीतः ॥ मतिधृतिभ्यामाह—मैवमिति । अधमस्येति तत्संदर्शनाऽखिलसाधनराहित्यं तद्वैपरीत्यं चोक्तम् । तथाप्यच्युतस्य सद्भजनाभावेऽपि कृपालुतादिमाहात्म्याच्च्युतिरहितस्य श्रीकृष्णस्य दर्शनं तन्माहात्म्यबलात्स्यादेवेत्यर्थः । संभावनाया लिङ् । अत्र निदर्शनम्–तत्तत्कर्मभोगकालप्रवाहेण संसार्यमाणेऽपि क्वचित्सांकेत्य नामादिनिमित्ते सति कश्चनाजामिलादिसदृशस्तरति तत्कूलायमानं भगवन्त प्राप्नोति । यथा कथञ्चित्तदभिगमनादौ सति पूतनादिसदृशो वा नदीरूपकेण यथा तद्ध्रियमाणस्तृणादिरनुकूलवातादिनिमित्ते सति तरति तद्वदिति व्यंजितम् ॥ ५ ॥ अतः कालवशेन तरणसंभवात् । अमंगलं सर्वोऽप्यन्तरायः । योगिभिरपि यद्ध्येयमेव तन्नमस्ये साक्षात्कृत्य नमस्यामीत्यर्थः ॥ ६ ॥ अमंगलनाशे संदेहाभावमाह—यतोऽनुग्रहात् । प्रहितः प्रषितः । द्रक्ष्य इत्यात्मनेपदमार्षम् । संसारं संसारहेतुमविद्याम् । यस्यांघ्रिपद्मस्य नखमण्डलत्विषा नखसमूहतेजसा । तेजसा तमस्तरणस्य नियतत्वादिति भावः ॥ संभावितश्री भगवत्कारुण्यस्यैव लक्षणं सविस्मयमाह—कंस इति । अनुग्रहं ममाभीष्टसाचिव्यम् । यन्नखमंडलत्विषा तत्कान्त्या तत्स्फूर्तिमात्रेणैवातरन्, आस्तां तद्भक्तिवार्तेति भावः । एतेन नराकृतिविग्रहस्य सनातनत्व विग्रहान्तराणां तदन्तरभावश्च लभ्यते ॥ ७ ॥ विभावयति चिन्तयति । यदंघ्रिपद्मं सर्वजगत्स्कर्तुः पूज्यगत्वेन परमैश्वर्यम् । अतिसुन्दरता लक्ष्मीतोऽधिका न कुत्राप्यस्ति तत्पूज्यत्वेन सौभाग्यस्याधिक्यं स्फुटमेव । मुनिभिर्मनननिष्ठैर्जीवन्मुक्तैर्मुमुक्षुसहितैः तैः स्वर्गादिवदनुपेक्ष्यत्वात्परमपुरुषार्थता । कृपावशेन गवां तृणाद्यशनार्थं तदनुचरत् जातिवर्णाश्रमधर्माद्यपोहेनापि गोपिकाभिः केवलं प्रेम्णैव तत्स्पर्शानन्दाऽनुभूयत इत्यर्थः ॥ यदिति—अत्र यच्छब्दस्य वाक्यांतिमत्वात्तच्छब्दानपेक्षयैव योजना स्यादिति पूर्वेण युग्मकं न कृतम् । तदुक्तं काव्यप्रकाशे—"यच्छब्दस्तूत्तरवाक्यपदार्थगतत्वेनोपपत्तः सामर्थ्यात्पूर्ववाक्यार्थगतस्य तच्छब्दस्योपादानं नापेक्षते" इति । ततश्च प्रपञ्चाधिकारिभिर्यदंघ्रिपद्ममार्चितम् । "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्तमाने क्तः । "क्तस्य च वर्तमाने" इति षष्ठ्यभावस्त्वार्षः । तैरागमोक्तमार्गेण सदोपास्यमानमिति । एतदेव द्रढयितुं क्रमेण तच्छिरस्पदैस्तदधस्पदैरप्युपास्यत्वमाह । श्रियेति वैकुण्ठपरिकराणामुपलक्षणम् । मुनिभिरिति प्रपञ्चस्थसर्वभक्तग्राहकम् । तत्र मुनिभिः श्रुतिपुराणाद्यनुसारिभिः । सिद्धैः साधकैश्च ससात्वतैः पाञ्चरात्रिकसहितैः । तत्साहित्यमत्र तस्यावश्यकत्वाभिप्रायेण । तदेवं यस्योत्कर्षप्रतिपादनाय तदिदं त्रयमुक्त तस्य गोकुलस्य परमोत्कर्षं दर्शयति—गोचारणायेत्यर्धेन । यत्तेषामागममार्गेण यात्वार्चितं तदेव स्वयं गोचारणायानुचरैश्चरद्भवति । तदप्यास्तां गोपिकानां कुचनिर्माल्यरूपैः कुंकुमैरंकितं भवतीत्यहो परमाश्चर्यमिति भावः । 'आचितम्' इति पाठे व्याप्तमित्यर्थः । तदेव प्रायो देवर्षिमुखाद्रासश्रवणेन केवलं तत्प्रेमसुलभमेव चिंतितं न तु रतिकेलिमयविशेषमिति तद्दास्यभावेऽस्मिन्न रसाभासत्वं, किं वा गोपिकानां तमतिबालं वात्सल्याद्वक्षसि लालयन्तीनां ज्यायसीनां कासांचिदित्यर्थः । गोपिका अप्यत्रोपलक्षणमेव गोपालादीनामिति ज्ञेयम् । सेयमस्य गोकुलमहिमस्फूर्तिस्तदाभिमुख्यप्रभावेणैवेति ध्येयम् । विश्वनाथस्तु—यस्यानुचरा ब्रह्मादयस्तदंघ्रिपद्मं गवामनुचरन्, यस्यार्चका ब्रह्मभवादयस्तद्गोपिकानां तु कुचोच्छिष्टकुंकुमास्वादकमित्युत्कर्षपरमावधिः । न चाक्रूरेण दासेन स्वप्रभोरुज्ज्वलरसास्वादनं रसाभासत्वादनुचितमिति वाच्यम्, वाक्यस्यास्य स्वगतत्वात् । स्वगतोक्त्या हि पित्रादयोऽपि हर्षात्पुत्रादीनां शृंगाररसमनुमोदयन्तो दृष्टाः । यथा मनुना—"अन्विच्छति पतिं युक्तं वयःशीलगुणादिभिः । यदा तु भवतः शीलश्रुतरूपवयोगुणान् ॥ अशृणोन्नारदादेषा त्वय्यासीत्कृतनिश्चया ।" इति कर्दमोपाख्याने पुत्र्या अपि शृंगाररसानुमोदनात् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मतिधृतिभ्यामाह । मैवमिति । अधमस्येति तत्सन्दर्शनाखिलसाधनराहित्यं तद्वैपरीत्यं चोक्तम् । तथाप्यच्युतस्य तद्भजनाभासेऽपि कृपालुतादिमाहात्म्याच्च्युतिरहितस्य श्रीकृष्णस्य दर्शनं तन्माहात्म्यबलात् स्यादेवेत्यर्थः । सम्भावनायां लिङ् । अत्र निदर्शनं चिन्तयति । तत्तत्कर्मभोगकालप्रवाहेण संसार्य्यमाणोऽपि क्वचित् साङ्केत्यनामादिनिमित्ते सति कश्चन अजामिलादिसदृशस्तरति तत्कूलायमानं श्रीभगवन्तं प्राप्नोति यथा कथञ्चित्तदभिगमनादौ सति पूतनादिसदृशो वा । नदीरूपकेण यथा तद्ध्रियमाणः तृणादिरनुकूलवातादिनिभित्ते सति तरति तद्वदिति व्यञ्जितम् ॥ ५ ॥ एवं निश्चित्यैव सगर्वमाह । ममेति । अमङ्गलं तद्दर्शने सर्वोऽप्यन्तरायः । यदिति क्रमेणाविर्भाविना श्रीभगवत्कारुण्यस्यैव प्रभावेणेति भावः । योगिभिरेव ध्येयं तैरपि ध्येयमेव च यदङ्घ्रिपङ्कजं तन्नमस्ये साक्षात्कृत्य नमस्यामीत्यर्थः । तच्च भगवतः निजाशेषैश्वर्य्यं प्रकटयतः श्रीकृष्णस्येत्यर्थः ॥ ६ ॥ सम्भावितश्रीभगवत्कारुण्यस्यैव लक्षणं सविस्मयमाह । कंस इति । तैर्व्याख्यातं तत्रापिशब्दात् भगवत्कारुण्यं विनोदं विना न सम्भवतीति भावः । अनुग्रहं ममाभीष्टसाचिव्यमित्यर्थ इति । किम्वा हरेरित्यमङ्गलहरणाभिप्रायेण कृतावतारस्येति तत्रापि सम्प्रति सकललोककृपार्थप्राकट्याभिप्रायेण । यस्याङ्घ्रिपद्मस्य नखमण्डलं तद्विम्वं तस्य त्विषा एकयापि कान्त्या तत्स्फूर्त्तिमात्रेणापि पूर्वे तद्भक्त्यैवातरन् आसतां तावत्तेषां भजनान्तराणीति भावः । इति श्रीनराकृतिविग्रहस्य सनातनत्वं विग्रहान्तराणां तदन्तर्भावश्च लक्ष्यते ॥७॥ पुनस्तस्याङ्घ्रिद्वन्द्वस्य महिमाधिक्यमनुसंदधानस्तादृशस्यापि प्रेमवश्यत्वगुणं स्मरन् तच्च गोकुलस्यापि परमोत्कर्षव्यञ्जकतया पर्य्यवसाययन् सचमत्कारमाह । यदिति । पूर्ववदत्र च यच्छब्दस्य वाक्यान्तिमत्वात्तच्छब्दानपेक्षयैव योजना स्यादिति पूर्वेण युग्मकं न कृतं तदुक्तं काव्यप्रकाशे । यच्छब्दस्तूत्तरवाक्यपदार्थगतत्वेनोपपत्तेः सामर्थ्यात् पूर्ववाक्यार्थगतस्य तच्छब्दस्योपादानं नापेक्षत इति । ततश्च प्रपञ्चाधिकारिभिर्ब्रह्मादिभिः सुवैर्यदङ्घ्रिपद्ममर्चितमिति "मतिबुद्धी" त्यादिना वर्त्तमाने क्तः । "क्तस्य च वर्त्तमान" इति षष्ठ्यभावस्त्वार्यः । तैरागमोक्तमार्गेण सदापास्यमानमिति । तदेवं ब्रह्मादिकर्तृकसदोपास्यत्वमुक्त्वा तदेव द्रढयितुं क्रमेण तच्छिरस्पदैस्तदधस्पदैरपि तादृगुपास्यत्वं दर्शयति । श्रिया च देव्येत्यादिना । श्रियेति वैकुण्ठपरिकराणामुपलक्षणम् । मुनिभिरिति प्रपञ्चस्थसर्वभक्तग्राहकं तत्र मुनिभिः श्रुतिपुराणाद्यनुसारिभिः सिद्धैः साधकैश्च ससात्वतैः पाञ्चरात्रिकसहितैस्तत्साहित्यमत्र तस्यावश्यकत्वाभिप्रायेण । तदेवं यस्योत्कर्षप्रतिपादनाय च तदिदं त्रययुक्तं तस्य गोकुलस्य परमोत्कर्षं दर्शयति । गोचारणायेत्यर्द्धेन यत्तेषामागममार्गेण ध्यात्वार्चितं तदेव स्वयं गोचारणायानुचरैश्चरद्भवति तदप्यास्तां गोपिकानां कुचनिर्माल्यरूपैः कुङ्कुमैरङ्कितं भवतीत्यहो परमाश्चर्य्यमिति भावः । आचितमिति पाठे व्याप्तमित्यर्थः । तदेवं प्रायो देवर्षिमुखाद्रासश्रवणेन केवलं तत्प्रेमसुलभमेव चिन्तितं नतु रतिकेलिविशेषममिति । तदास्य भावेऽस्मिन्न रसाभासत्वं किम्वा गोपिकानां तमतिवालं वात्सल्याद्वक्षसि लालयन्तीनां ज्यायसीनां कासाञ्चिदित्यर्थः । गोपिका अप्यत्रोपलक्षणमेव गोपालादीनामिति ज्ञेयम् । सेयमस्य गोकुलमहिमस्फूर्त्तिस्तदाभिमुख्यप्रभावेणैवेति ज्ञेयम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधमस्येति—तत्सन्दर्शनाखिलसाधनराहित्यं तद्वैपरीत्यं चोक्तम्, तथाप्यच्युतस्य निरुपाधिकृपालुत्वादिमाहात्म्याच्च्युतिरहितस्य श्रीकृष्णस्य दर्शनं तन्माहात्म्यबलात् स्यादेवेत्यर्थः । सम्भावनायां सप्तमी । अत्रानुरूपमर्थान्तरमुपन्यस्यति— ह्रियमाण इति । पारवश्येन स्वसामर्थ्यराहित्यमुक्तम् । क्वचित् कस्मिंश्चित् सत्तीर्थादौ कालविशेषे वा कश्चन जनस्तरेत्, तच्च यथा केवलं श्रीभगवत्कृपाप्रभावेणैव, तथेदमपि सम्भवेदिति भावः । एवं सन्दर्शनं सम्भाव्य ततश्च कार्य्यं प्रणामं विभाव्य तेन हि स्वकृतार्थता मन्यते ॥ ५ ॥ यद्वा, तदधुना तत्कारुण्यमहिम्ना ममाधमत्वमपगतमित्याह—ममेति । अमंगलमशुभादृष्टं मुमुक्षादिना योगिभिर्ध्येयं हृदि चिन्त्यं यदङ्घ्रिपङ्कजम्, तत् साक्षान्नमस्ये, तच्च भगवतो निजाशेषैश्वर्य्यं प्रकटयत इत्यर्थः । पंकजमित्येकत्वेऽपि द्वित्वं नित्ययुगलत्वात् सिध्येदेवेति पूर्वमुक्तमेव । यद्वा, एकवचनेन किञ्चिन्नमनमेवाभिप्रेतम्, अमंगलं सत्यं नष्टमेवेत्येतस्य ॥ ६ ॥ यद्वा, सम्भावितश्रीभगवत्कारुण्यस्यैव लक्षणमाह—कंस इति । हरेरित्यमंगलहरणाद्यभिप्रायेण, तत्रापि कृतावतारस्येति भगवत्ताप्रकटनमभिप्रेतम् । अतरन्नित्यनेन तमसः समुद्रत्वं ध्वनितम्, अत एव दुरत्ययं दुस्तरं यस्याङ्घ्रिपद्मस्य नखानां मण्डलं समूहः, किंवा नखस्यैकस्य मण्डलं बिम्बं तस्य त्विषा एककान्त्या ईषद्भक्त्येत्यर्थः, (भा० ९।४।१८) 'स वै मनः कृष्णपदारविन्दयोः' इत्याद्युक्त्याम्बरीषस्य तदनुगानामपि श्रीकृष्णभक्तिरेव बोद्धव्या, तेषां तदेकनिष्ठत्वाभावे च सति, तत्रापि कृतावतारस्येति पश्चाद् योज्यम् । यद्वा यदित्यस्य पूर्वेणान्वयः । कृतावतारस्य वामनरामादिरूपस्यापि नखमण्डलत्विषा, अयञ्चावतारी साक्षाद्धरिरेव, अतोऽस्याङ्घ्रिपद्मं यद्द्रक्ष्य इत्यर्थः अन्यत्तैर्व्याख्यातम् । यद्वा, तमोऽज्ञानं मुमुक्षादिदुर्व्वासनामूलम् । पूर्वे वैष्णवा मुनयः ॥ ७ ॥ निजजन्मसाफल्यप्रदर्शनार्थमङ्घ्रिपद्मं वर्णयति —यदिति । अर्चितं अर्च्यमानमित्यर्थः । यद्वा, अतीतनिर्देशोऽधुनात्र तेषां तदर्चनाशक्तेः । आदि शब्दादिन्द्रचन्द्रादयः । देव्येति ब्रह्मादिदेवानां परमपूज्यया तत्तत्सम्पत्तिप्रदकृपाकटाक्षया महाविभूतिमय्या महालक्ष्म्येकावताररूपयेत्यर्थः । मुनिभिरात्मारामैस्तस्यां श्रियामप्यपेक्षारहितैः । सात्वतसहितैरिति—मुनीनामपि सात्वतवर्गकृपयैव तत्संगत्यर्च्चनसिद्धेः । अनुचरैर्गोपैश्चार्चितं तदपि न सदा सर्वत्रेत्याह, गोचारणाय वने श्रीवृन्दारण्ये

चरदिति । कुचकुंकुमेनांकितं लाञ्छितं यथा स्यात्तथा गोपिकानां गोपिकाभिरप्यर्च्चितम् । 'आञ्चितम्' इति पाठे व्याप्तमित्यर्थः । अतीतनिर्देशः सदार्चितत्वस्याभिप्रायेण । यद्वा, प्रियसखतया गोपानां पादपद्माच्चर्चने तादृश-तात्पर्य्याभावादर्च्चितमित्यत्र न योज्यम्, एवमुत्तरत्रापि । इति गोपीकुचकुंकुमांकितत्वेनाङ्घ्रिपद्मस्य सर्वत उत्कर्षविशेषविवक्षया यदित्यस्यान्ते पुनरुक्तिः, इत्थं ब्रह्मादीनां यथोत्तरं श्रैष्ठ्यं द्रष्टव्यम्, तत्रादिशब्दगृहीता इन्द्रादयस्तयाज्या गौणत्वात्, अत एव तेषां साक्षादनिर्देशः । अन्यत्तै-र्व्याख्यातम् । यद्वा, ब्रह्मादिभिरिति परमदेवतात्वं परमेश्वरत्वं च, श्रियेति परमविभूतिमयत्वं सौभाग्यभरवत्त्वं च । मुनिभिरिति परमपुरुषार्थाधिक्यम्, सात्वतैरिति आत्मप्रदत्वेन परमौदार्य्यं भक्त्येक-लभ्यत्वं च, गोचारणायेति परमसख्यविशेषो विनोदित्वञ्च, यद्गोपिकानामिति परमं सौन्दर्य्यं वैदग्ध्यं प्रेमविशेष-विस्तारकत्वं चोक्तम्, परञ्च श्रीभागवतामृतोत्तरखण्डे विस्तार्य्य व्याख्यातमेव ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भवः जन्म ॥ ६ ॥ अत्यनुग्रहम् अकृत अकरोत् तमः पापं "पाप्मा वै तमः" इति श्रुतेः ॥ ७ ॥ गोचारणाय गवां सञ्चारणाय यवसभक्षणातिष्पादनाय वा ॥ ८-१० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यद्वा मैवं किन्त्वधमस्य नीचस्यापि ममाच्युतदर्शनं स्यादेव कुत इत्यत आह । ह्रियमाण इति । अयम्भावः यथा नद्या ह्रियमाणानां तृणादीनां मध्ये किञ्चित्कदाचित्तरति तथा कर्मवशेन कालेन ह्रियमाणानां जीवानामपि मध्ये कश्चित्तरेदिति सम्भवतीति ॥ ५ ॥ अनया प्रवृत्त्यैव ममाद्यामङ्गलं नूनं नष्टं भवो जन्मापि सफलं जातं कुतः यत् यतो योगिभिः केवलं ध्येयमेव नतु दृश्यमङ्घ्रिपङ्कजं नमस्करिष्ये ॥ ६ ॥ अद्याधुना कंसो मे मह्यमत्यर्थमनुग्रहमेवाकृताकरोत् वतेत्याश्चर्ये कुतः यतः अमुना कंसेन प्रहितः प्रेषितोऽहं मुरारेरङ्घ्रिपङ्कजं द्रक्ष्यामि कथम्भूतस्य कृतः अवतरो येन तस्य कथम्भूतं यस्याङ्घ्रिपङ्कजस्य नखमण्डलत्विषा हृदि धार्यमाणया साधनभूतया पूर्वे ब्रह्माद्वयः दुरत्ययं तमः तमःकार्यं संसारमतरन् तमः पापं वा "पात्मा वै तमः" इति श्रुतेः ॥७॥ अङ्घ्रिपद्मं विभावयति । यदिति । यच्छब्दयोस्तदङ्घ्रिपद्मं द्रक्ष्यामि इति पूर्वेण संबन्धः ब्रह्मरुद्रावादी येषां तैः सुरैरर्चितमनेन परत्वमुक्तम् देव्या देवस्य विष्णोः सम्बन्धिन्या श्रिया लक्ष्म्या चार्चितमनेन पारमैश्वर्यमुक्तम् श्रिया ब्रह्मादिभिराश्रीयमाणया लक्ष्याप्यर्चितत्वोक्तेः सात्वतैर्भक्तैः सहमुनिभिरर्चितमित्यनेन सौभाग्यातिशय उक्तः सात्वन्त एव सात्वताः प्रज्ञादित्वात् स्वार्थेऽण् अनुचरैः सह वने गोचारणार्थननुचरदित्यनेन वात्सल्यं सौशील्यं चोक्तं गोपिकानां कुचकुङ्कुमैरङ्कितमित्यनेन कमनीयत्वमुक्तम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उक्तमनुवदति । मैवमिति । अहमेवमच्युतदर्शनं दुर्लभमिति आत्मानं मावमंस्यामि नावजानामि कुत इत्यत्राह । स्यादिति । कथमेतत्सम्भवतीत्यत्राह । ह्रियमाण इति । कश्चन विष्णुभक्तिमान् ॥ ५ ॥ भवो जन्म योगिभिः सनकादिभि ॥ ६ ॥ बत आश्चर्यम् अद्य अत्यनुग्रहमधिकानुग्रहमकृत अकरोत् अतिममात्यनुग्रमिति पाठे अति अत्यर्थं स मे कृतवानित्यर्थः प्रहितः प्रेषितः अङ्घ्रिपद्मं विशिनष्टि । कृतावतारस्येति । पूर्वे ब्रह्मादयो यस्याङ्घ्रिपद्मस्य नखानां मण्डलस्य त्विषा तेजसा दुरत्ययं तमोऽज्ञानं मघं वाशुचम् अतरन् तीर्णवन्त इत्यन्वयः ॥ ७ ॥ यच्च ब्रह्मादिभिः सुरैरर्चितं ससात्वतै पाञ्चरात्रिकै सहितैः यच्च गोचारणाय गवां तृणचरार्थमनुचरैः गोपै समं वने भ्रान्तं यच्च वने गोपिकानां कुचकुङ्कुमेनाङ्कितं मुद्रितं तद्द्रक्ष्य इति पूर्वत्रान्वयः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अच्युतस्य सद्भजानाभावेऽपि कृपालुतादिमाहात्म्याच्च्यतिरहितस श्रीकृष्णस्य दर्शनं तन्माहात्म्यवलात् स्यादेवेत्यर्थः । अत्र निदर्शने तत्तत्कर्मभोगकालप्रवाहेण संसार्य्यमाणोऽपि क्वचित् साङ्केत्यना मादिनिमित्ते सति कश्चनाजामिलादिसदृशस्तरति तत्कूलाय मानं भगवन्तं प्राप्नोति । यथा कथञ्चिदभिगमनादौ सति पूतनादिसदृशो वा ॥ ५-९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

यदर्चितं ब्रह्मभवादिभिरित्यादि । यद्ब्रह्मभवादिभिः शूरैः श्रिया च देव्यो मुनिभिः सात्वता भागवतास्तत्सहितैः । तच्छ्रीचरणारविन्दं गोपिकानां कुचकुङ्कुमार्चितमित्यहो गोपिकानां सौभाग्यमिति भावः ॥ ८-९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ब्रह्मभवादिभिः श्रिया च यदर्चितं तद्गोपीनां कुचकुङ्कुमार्चितमित्यहो गोपिकानां सौभाग्यमिति ॥ ८-९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मैवमिति मतिधृतिभ्यां दैन्यं संमर्द्याह । ममेति स्यादेव स्यादपीत्यर्थः ॥ ५ ॥ एवं निश्चित्य सगर्वमाह । ममाद्येति ।६। किंच कंसेन भगवत्प्रातिकूल्ये निदिष्टस्यापि ममात्यन्तमानुकूल्यं फलतोऽभूदित्याह । कंस इति । वतेत्याश्चर्य्ये खलोऽपि कंसः

अद्यात्यनुग्रहमकृत यतोऽमुना प्रहितः प्रेषितः पूर्वे अम्बरीषादयः तमः संसारम् अतरन् तीर्णाः ॥ ७ ॥ यदङ्घ्रिपद्मं ब्रह्मादिभिरनुपद्दतैर्गन्धमाल्यादिभिरर्चितं पूज्यत इत्यर्थः । "मतिबुद्धिपूजार्थेभ्यश्चे"ति वर्तमाने क्तः षष्ठ्यभाव आर्षः । गोचारणाय अनुचरैः सह चरत् गवां पश्चाच्चरदित्यर्थः । यस्यानुचरा ब्रह्मादयस्तदङ्घ्रिप्रपद्मं गवामनुचरं यस्यार्चका ब्रह्मभवादयस्तद्गोपिकानां तु कुचोच्छिष्टकुंकुमास्वादकमित्युत्कर्षपरमावधिः । कुंकुमार्चितं कुंकुमार्चितमिति पाठद्वयं नच अत्राक्रूरेण दासेन स्वप्रभोरुज्ज्वलरसास्वादनं रसाभासत्वादनुचितमिति वाच्यं वाक्यस्यास्य स्वगतत्वात् । स्वगतोक्त्या हि पित्रादयोऽपि हर्षात् पुत्रादीनां शृङ्गारसमनुभोदयन्ता दृष्टाः ॥ ८ ॥

गूढार्थदीपिनी

एवं दुर्लभं मा किन्तु अधमस्यापि मम स्यादेव ॥ ५ ॥ भवो जन्म ॥ ६ ॥ बत हर्षे । अमुना कंसेन प्रहितः प्रेषितः । यन्नखमण्डलत्विषा पूर्वे अम्बरीषादयः नमः संसाराख्यम् अतरनतीर्णाः तत् अङ्घ्रिपद्मं द्रक्ष्ये इत्यन्वयः कृतावतारस्य हरेः इति योज्यम् ॥ ७ ॥ ससात्त्वतैः भक्तसहितैः । अनुचरैः सखिभिः सह यत् वने विचरत् तत् द्रक्ष्ये इति योज्यम् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ तद्दर्शनाधिकारं सम्भावयति । मैवमित्यादिना । मवमनधिकारो मास्तु ममाधमस्यापि अच्युतदर्शनं स्यादेव प्राप्तदर्शनावसरत्वादित्याशयेनाह । ह्रियमाण इति ॥ ५ ॥ अद्य श्रीकृष्णदर्शनार्थावसरे अमङ्गलदर्शनप्रतिबन्धकं कर्म नष्टमेव भवो जन्म सफलमेव जातं यत् यतः योगिध्येयाङ्घ्रिपङ्कजं नमस्करिष्यामि ॥ ६ ॥ दुरत्ययं दुस्तरं तमः संसारं यस्याङ्घ्रिपद्मस्य नखमण्डलमात्रस्य ध्येयस्य त्विषा कान्त्या पूर्वे ध्यातारोऽपि अतरन् तीर्णाः अहन्तु अमुना कंसेन प्रहितः अङ्घ्रिपद्मं सकलं द्रक्ष्ये एतत्सकलमनुग्रहं बतेत्याश्चार्ये भागिनेयहन्ता बन्धुध्रुक् कंसः मे परकीयस्य अनुग्रहमकृत कृतवान् अतो ज्ञायते ममामङ्गलं नष्टं भवश्च फलवानद्येति भावः ॥ ७ ॥ एवं श्रीभगवच्चरणकमलदर्शने स्वस्य असम्भावनां पुनः सम्भावनाञ्च कृत्वा अथ चरणकमलस्य ब्रह्मादिसेव्यत्वेन स्वस्य अतिदुर्लभत्वेऽपि भक्तवश्यत्वेन सुलभत्वं विभावयति । यदिति ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दैवं देवो विजानाति नावजानामि मामहमिति ससम्भावनमावेदयति ॥ मैवमिति । एवमहं मां नावमंस्यामि सर्वथा योग्य इति न घटते घटनेति नावजानामि । अच्युतदर्शनं स्यादेव । कालनद्या ह्रियमाणः कश्चिद्द्विपश्चित्तरति न सर्वः सर्वदेति कश्चन क्वचिद्भ्यां ध्वनयति । प्रायेण सर्वं योषिन्मूलमिति ध्वनयितुं कालनद्येत्युक्तिः ॥ ५ ॥ अद्य ममामङ्गलं सर्वं नष्टं ध्वस्तम् । ममैव ममतैवाद्यं यस्य तदमङ्गलमिति पदमेकं वा । ततो मे भवो जन्म फलवान्सफलो योगिभिरुपायवेदितृधात्रादिभिर्ध्येयमङ्घ्रिपङ्कजं नमस्य इति यद्योगिभिः सनकादिभिर्वा ॥ ६ ॥ अन्येषु सत्सु सान्निध्ये तान्विहाय मामाज्ञापयद्राजा मय्यनुग्रहं महान्तं कृतवानिदं प्रयोजनयोजकत्वादिति चेतस्यालोच्य तुष्यन्भाषते ॥ कंस इति । कंसो मे मदुपर्यद्यात्यनुग्रहमकृत बताश्चर्ये । येनामुना प्रहितोऽहं हरेः कृतावतारस्याङ्घ्रिपद्मं द्रक्ष्ये । पूर्वं आद्या यन्नखमण्डलत्विषा यस्य नखसमूहस्य महसा यद्दुरत्ययं तमोऽज्ञानं वा ग्लानिं वाऽतरंस्तस्य ॥ ७ ॥ ब्रह्मभवादिभिः सुरैरङ्घ्रिपद्मं देव्या श्रिया च ससात्विकैः पाञ्चरात्रिकसमेतैर्मुनिभिश्चार्चितमनुचरैर्गोपैः समं वने गोचारणाय गवां सञ्चारणार्थं तृणखादनार्थं वा गोपिकानां कुचकुङ्कुमेनाङ्कितं यदेतीति वत्तदङ्घ्रिपद्मं द्रक्ष्य इति पूर्वेण वा द्रक्ष्यामीत्युत्तरेण वाऽन्वयः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवम्प्रतिकूलतर्कं निरूप्य अनुकूलेन तस्य पराहतिमाह । मैवं ममेति । मेति निषेधार्थे यदुक्तं त्वया विषयित्वात् नाधिकारो विषयाश्च बाधका इति महतामपि केवलं स्तुत्य एव नतु दृश्य इति च एतन्मा किन्तु एवमेवैतत् उभयत्रापि साधकधर्मद्वयमाह । अधमस्यापि अच्युतदर्शनं स्यादेवेति विषयाणाम् अधमाधिकारित्वसम्पादकत्वमेव नत्वधिकारनिवारकत्वम् आसुरत्वमेव तथा "असुर्यः शूद्र" इति श्रुतेः नापि प्रतिबन्धकत्वं विषयैरपि भगवद्भजनस्य शास्त्रे निरूपितत्वात् "यद्यदिष्टतमं लोक" इति किन्त्वधमत्वमेव सम्पादयति सर्वथा निर्विषय उत्तमः बहिर्निर्विषयः मध्यम उभयत्रापि सविषयोऽधम इति अधमस्यापि स्यादेवाच्युतदर्शनम् अन्यथाधमोऽधिकार एव न स्यात् किञ्च भगवानच्युतः सर्वथा च्युतिरहितः स्वरूपतो धर्मतश्च यदि कीर्त्तितः तत्कीर्त्तनं न व्यर्थमिति भगवानेव फलमिति दर्शयेदेव कदाचित् अतः स्यादेव ननूक्तो दृष्टान्तो बाधक इति तत्साधकोऽपि दृष्टान्तोऽस्तीत्याह । ह्रियमाण इति । कालनद्या ह्रियमाणः क्वचित् कदाचित् कश्चित्तरतीति यथा तृणं दृश्यते च नौका जले पतिता स्वयमेव कूलान्तरं गच्छति कालोऽपि नदीरूपः भगवन्तं जीवसमूहश्चान्तरा प्रवहति विषयमाया जलात्मा तत्र तीरस्थान् कदाचिन्मध्ये पातयित्वा उत्तरकूलं नयति अनेन कालवशादपि मोक्षः सिध्यतीति केषाञ्चिन्मतमुक्तम् अत्र नियामको भगवदवतारः ॥ ५-६ ॥ ननु बाधकस्य कालस्य कथम्मोक्षसाधकत्वमिति चेत्तत्राह । कंस इति । कदाचिद्बाधकान्येव साधकानि भवन्ति विषम्भक्षयित्वा जीवति अन्यथा म्रियत इति लोकप्रसिद्धिः तदाह । कंस इति । बतेति हर्षे यः सर्वथा बाधकः स एव मे अद्यानुग्रहमकृत य एव हि

भगवद्दर्शनं कारयति स एवानुग्रहं करोतीति कदाचिदनुग्रहं करोति लौकिकं विषयादिद्वारा अयन्त्वत्यनुग्रह इति येन प्रहितोऽङ्घ्रिपद्मं द्रक्ष्य इति । ननु विपरीतार्थं प्रेषितवान् ततः कथमिष्टसिद्धिरिति चेत्तत्राह । हरेरिति । स हि सर्वदुःखहर्ता सम्बन्धमात्रमपेक्षते स सम्बन्धोऽनेन कारित इति कंसस्यैवायमनुग्रहः यथा कथञ्चित् सम्बन्ध एवात्र प्रयोजक इति ज्ञापायितुमाह कृतावतारस्येति । एतदर्थमेव भगवदवतार इति तथात्वे प्रमाणमाह । पूर्वेऽतरन्निति यस्य नखमण्डलत्विषापि पूर्वे भगवदीयाः अतरन् संसारं भावितो हृदये प्रकाशमानश्चरणः मुक्तिं ददातीति अविद्यान्धकारहरणार्थं कान्तिर्निरूपिता मण्डलपदं सूर्यादिरिव निवारकत्वं ज्ञापयति नतु दीप इव एकेनापि सूर्येणान्धकारो निवार्यते किम्पुनर्दशभिरिति ख्यापयितुं नखेति तरणं पादपोतेनैवेति अर्थात् पादयोः अतो यत्र चरणसम्बन्धमात्रेणैव ध्यानप्राप्तेन सर्वे तीर्णाः तत्र दर्शनवतो मम तरणे कः सन्देहः ॥ ७ ॥ एवं स्वस्य फलमधिकारञ्च निश्चित्य बहुवादिविप्रतिपन्नत्वाद्भगवता मोक्षदातृत्वं साधयति । यदर्चितमिति । अवश्यं मोक्षोऽस्तीत्यभ्युपगन्तव्यं स च किञ्चिदधीन इति च तत्र सन्मार्गे ब्रह्मा लोके महालक्ष्मीश्च विषयत्वेन ज्ञानशास्त्रे मुनयः भगवच्छास्त्रे सात्वताः एतदवतारे चतुर्द्धा अवतीर्णस्य दिनरात्रिभेदेन गोपा गोप्यश्च सेवकाः ये धृष्टाः अज्ञाश्च न कञ्चन मन्यन्ते तत्रापि स्त्रियः तत्रापि तेन प्रकारेणेति सर्वत्र भक्तिप्राधान्यार्थं पदग्रहणं जगति त्रयो मुख्याः ब्रह्मविष्णुशिवाः तत्र ब्रह्मा शिवश्च आदिभूतौ येषां सात्विककल्पे विष्णुर्भगवानिति गुणावतारेऽपि विशेष उक्तः तैः सर्वैरेवेन्द्रादिभिः स्वेष्टसिध्वर्थमर्चितं स्वामित्वाद्वा श्रिया चार्चितं प्रथमतोऽपि तस्याः परिज्ञाने सामर्थ्यमाह । देव्येति । मुनिभिश्चेति चकारात् कर्मिभिरपि फलार्थिभिः सात्वतैरिति वैष्णवभेदा उक्ताः ये सत्त्वैकनिष्ठाः गोपानामर्चनपरिज्ञानार्थमाह । अनुचरैरिति । अलौकिकं गवां चारणं शिक्षणीयमिति ते पूर्वं सेवकाः यस्माद्वने ग्राम्याणां भगवदनर्चने बाधकसद्भावात् न भवतीति स्त्रीणामपि भजने हेतुं सूचयति । कुचकुङ्कुमैरङ्कितमिति । कामेनैव तासां भजनं ताभिः बहिरपि हृदये स्थाप्यत इति—

ऐश्वर्यं श्रीस्तथा ज्ञानं कीर्त्तिर्द्धर्मो विरागता । षड्गुणास्त्वत्र निर्दिष्टाः क्रमो नात्र विवक्षितः ॥ इति ॥ ८ ॥

श्रीसुबोधिनी-सारः

संभाव्याह । एवं मास्तु अधमस्यापि ममाच्युतस्य श्रीकृष्णस्य दर्शनं स्यादेव । काल एव नदी संसारप्रवाहिनी तथा ह्रियमाणः कश्चन तरति क्वचित् कदाचित् ॥ ५ ॥ अद्याधुना ममाऽमंगलं पापं नष्टम् । मे मम भवो जन्म फलवान् सफलम् । यत् यतो योगिभिऽयमंघ्रिपंकजं पादपद्मं भगवतोऽहं नमस्यामि ॥६॥ मे ममाति अत्यन्तमनुग्रहं कृपां कंसोऽद्याऽकृत वतेति हर्षेऽमुना कंसेन प्रहितोहं हरेरंघ्रिपद्मं द्रक्ष्यामि । कृतोऽवतारो येन यस्यांघ्रिपद्मस्य नखमण्डलकान्त्या पूर्वेऽम्बरीषादयः तमः संसारमतरन्।७। तद्विशिनष्टि । ब्रह्मशिवादिभिर्देवैर्लक्ष्म्या देव्या सभक्तैर्मुनिभिर्यत् अर्चितं पूजितम् । गवां चारणार्थम् अनुचरैर्गोपैः सह वनेऽचरत् । गोपिकानां कुचकुङ्कुमैरंकितं यदंघ्रिपद्मम् ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवमाशङ्क्य पुनर्दर्शनं सम्भावयति—मैवमिति । दर्शनं न स्यादिति न, किं त्वधमस्य विषयाविष्टचित्तत्वेन नीचस्यानधिकारिणोऽपि ममाच्युतस्य दर्शनं स्यादेव । 'कुत' इत्यपेक्षायामाह—ह्रियमाण इति । यथा नद्या ह्रियमाणानां तृणादीनां किञ्चित्, कदाचित्तरति कूलं प्राप्नोति, तथा कर्मवशेन कालेन ह्रियमाणानां जीवानां मध्येऽपि कश्चित्तरेदिति । ममापि संसारसागरतरणं सम्भवतीति भावः ॥ ५ ॥ किञ्च अद्य ममामङ्गलं संसारदुःखकारणं पापं नष्टं अयं च मे मम भवो जन्म फलवान् परमफलमोक्षवान् । 'कुत एवं निश्चयः ?' तत्राह—यदिति । यस्माद्भगवतो योगिभिः केवलं ध्येयमेव नतु दृश्यमङ्घ्रिपङ्कजं नमस्ये ॥ ६ ॥ अघटितघटनातोऽपि स्वोद्धार सम्भावयति—कंस इति । 'बत' इत्याश्चर्यम् । भगवद्भक्तद्रोह्यपि कंसोऽद्य मे ममात्यनुग्रहमकृत कृतवान् । यस्मात् यस्य चरणकमलस्य नखमण्डलस्य त्विषा नखसमूहकान्त्या हृदि ध्यायमानया पूर्वे ध्यातारोऽम्बरीषादयः दुरत्ययं तमः दुस्तरं संसारमतरन् । तत्कृतावतारस्य हरेरङ्घ्रिपद्ममनुना कंसेन प्रहितः प्रस्थापितोऽहं द्रक्ष्ये इत्यन्वयः ॥ ७ ॥ चरणस्य सर्वत उत्कर्षमाह —यदिति । यच्छब्दयोस्तद्द्रक्ष्ये इति पूर्वेणान्वयः । यच्चरणकमलं ब्रह्मादिभिः सुरैरर्चितमित्यैश्वर्यातिशयम्, श्रिया देव्या चार्चितमिति सौभाग्यातिशयम्, ससात्वतैर्भक्तसहितैर्मुनिभिश्चार्चितमिति परमपुरुषार्थत्वम्, अनुचरैः सखिभिः सह गोचारणाय यद्वनेऽचरदिति कृपालुत्वम्, यद्गोपिकानां कुचकुङ्कुमाङ्कितमिति भक्तिमतां सुलभत्वं च दर्शितम् ॥ ८ ॥

अन्वितार्थप्रकाशिका

मैवमिति ॥ दर्शनं न स्यादिति न किं त्वधमस्य विषयाविष्टचित्तत्वेन नीचस्यानधिकारिणोऽपि ममाच्युतस्य दर्शनं स्यादेव । यथा नद्या ह्रियमाणानां तृणादीनां किंचित्कदाचित्तरति कूलं प्राप्नोति तथा कर्मवशेन कालेन ह्रियमाणानां जीवानां मध्ये ह्रियमाणोऽपि कश्चित्तरेदिति ममापि संसारसागरतरणं संभवति ॥ ५ ॥ ममेति ॥ अद्य ममामङ्गलं संसारदुःखकारणं पापं

नष्टम् । अयं च मे मम भवो जन्म फलवान् परमफलमोक्षवान् यत् यस्मात् योगिभिरपि केवलं ध्येयमेव न तु दृश्यं भगवतोऽङ्ध्रिपङ्कजं नमस्ये नमस्करिष्यामि । तङार्षः ॥ ६ ॥ कंस इति ॥ बतेत्याश्चर्यं भगवद्भक्तद्रोह्यपि कंसोऽद्य मे ममात्यनुग्रहमकृत कृतवान् यत यस्मात् यस्य चरणकमलस्य नखमण्डलस्य त्विषा नखसमूहकान्त्या हृदि ध्यायमानया पूर्वे ध्यातारोऽम्बरीषादयः दुरत्ययं तमः दुस्तरं संसारमतरन् तत्कृतावतारस्य हरेरङ्घ्रिपद्ममगुना कंसेन प्रहितः प्रस्थापितोऽहं द्रक्ष्ये । तङार्षः ॥ ७ ॥ यदिति ॥ यच्चरणकमलं ब्रह्मभवादिभिः सुरैः अर्चितमिति परमैश्वर्यम् । “मतिबुद्धि” इति वर्त्तमाने क्तः । सुरैरिति षष्ठ्यभाव आर्षः । श्रिया देव्या इति सौभाग्यातिशयः सात्वतैर्भक्तसहितैर्मुनिभिः अर्चितम् इति परमपुरुषार्थता । यच्च अनुचरैः सखिभिः सह गोचारणाय वनेऽचरत् इति कृपालुता । “यद्गोपिकानां कुचकुङ्कुमाङ्कितम्” इति प्रेममात्रसुलभम् । तच्चरणकमलं द्रक्ष्ये । इदं च नारदादिमुखाद्रासादि श्रुत्वा प्रेम्णा चिन्तितमिति न दासभावविरोधः । बालकृष्णमुरस्याधाय लालयन्तीनां गोपीनामिति वाऽर्थः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं शुद्रस्य वेदोच्चारणवत् मा भवतु किंतु हरेर्दयालुत्वादधमस्यापि मम अच्युतदर्शनं स्यादेव तत्र दृष्टान्तः कालरूपया नद्या ह्रियमाणो जन समूहः तेषु जनेषु मध्ये कश्चन् एकोजनः क्वचित् कुत्रचित्स्थाने यथातरति तद्वन्मम दर्शनं स्यादित्यर्थः । संप्रतिभगवद्दर्शनेनजन्मसाफल्यमाह ममेति । अमंगलं पापं भवोजन्म फलवान् सफलः यद्यतः योगिध्येयं अंघ्रिपंकजं पादपद्मं अहं नमस्येनमस्यामि ॥ ६ ॥ अत्र भगवतो दयैव हेतुरित्याह कंस इति । अद्य मेत्यनुग्रहंदयामकृतविहितवान् यतः अमुना कंसेन प्रहितः प्रेरितः हरेः पादपद्मं द्रक्ष्ये द्रक्ष्यामि भगवत्कृपां विना स कथं मामेव प्रेषयेदिति भावः यस्य प्रत्यक्ष्यस्य हरेर्न मंडलं तस्य त्विषाकान्त्या अन्तः स्फुरणेन पूर्वभक्ताः दुरत्ययं तमोरूपमज्ञानमतरनूतीर्णाः ॥ ७ ॥ तदेव पादपद्मं संभावयन्नाह यदिति ब्रह्मादिभिः यत्पादपद्ममर्चितं पूजितं यद्वनेचरत् यद्गोपीनां कुचकुकुमैरंकितं चिह्नितं तदंघ्रि पद्ममहं द्रक्ष्यामीत्युरेणान्वयः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मैवमिति ॥ यद्वा मैवम् । किं तु, अधमस्य नीचस्य अपि मम, अच्युतदर्शनं, स्यात् एव । कुत इत्यत आह । कालनद्या ह्रियमाणः, कश्चन क्वचित् तरति एव । अयं भावः । यथा नद्या ह्रियमाणानां मध्ये किंचित् कदाचित् कूलं प्राप्नोति, तथा कर्मवशेन कालेन ह्रियमाणानां जीवानां मध्येऽपि कश्चित्तरेदिति संभावयतीति ॥ ५ ॥ ममेति ॥ अतोऽनया वृत्त्यैव, अद्य मम अमङ्गलं, नूनं नष्टम् । मे मम, भवोऽपि जन्म चापि, फलवान् सफलः, जातः एव । कुतः । यद्यतः, भगवतः श्रीकृष्णस्य, योगिध्येयं च तदङ्घ्रिपङ्कजं च तत्, नमस्ये नमस्करिष्ये । भगवदङ्घ्रिपङ्कजं योगिनां ध्येयमेव, न तु दृश्यं, तं दृष्ट्वाऽहं नमस्करिष्यामीत्यहो मद्भाग्यमिति भावः ॥ ६ ॥ कंस इति ॥ अद्याधुना, कंसः, मे मह्यं, अत्यनुग्रहं एव, अकृताकरोत् । बतेत्याश्चर्ये । कुतः । यतः, अमुना कंसेन, प्रहितः प्रेषितः, अहं कृतः धृतः अवतारो येन तस्य, हरेः श्रीकृष्णस्य, यस्याङ्घ्रिपङ्कजस्य ये नखाः तेषां मण्डलं तस्य या त्विट् तया मोक्षसाधनभूतत्वेन हृदि धार्यमाणया नखकान्त्या, पूर्वे ब्रह्मादयः, दुरत्ययं दुर्विनाश्यं, तमः तमःकार्यं संसारं, अतरन् । तमः पापं वा । ‘पाप्मा वै तमः’ इति श्रुतेः । एवंभूतं, अङ्घ्रिपद्मं चरणपङ्कजं, द्रक्ष्ये द्रक्ष्यामि ॥ ७ ॥ अङ्घ्रिपद्मविभुत्वं प्रदर्शयति ॥ यदिति ॥ यत् ब्रह्मा च भवश्च तावादी येषां तैः, सुरैर्देवैः, अर्चितं, अनेन परमत्वमुक्तम् । देवस्य विष्णोः संबन्धिनी देवी तया, श्रिया लक्ष्म्या च, अर्चितं, अनेन परमैश्वर्यत्वमुक्तम् । ससात्त्वतैर्भक्तैः सह, मुनिभिः सनकादिभिश्च, अर्चितं अनेन सौभाग्यातिशय उक्तः । सत्त्वन्त एव सात्त्वताः । प्रज्ञादित्वात् स्वार्थेऽण् । अनुचरैः सह, वने गोचारणाय गोचारणार्थं, चरदनुचरत्, अनेन वात्सल्यं सौशील्यं चोक्तम् । किं च यत् गोपिकानां गोपाङ्गनानां कुचकुङ्कुमाङ्कितं स्तनानुलिप्तकाश्मीरचिह्नितं, अनेन कमनीयत्वमुक्तम् । तदङ्घ्रिपद्मं, द्रक्ष्य इति पूर्वेण सम्बन्धः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ममाद्येति : १०.३८.६.

दुर्दिष्टं नष्टमद्याखिलमपि निखिलैर्दुर्ग्रहैः सद्ग्रहैर्वा संत्यक्तं प्रातिकूल्यं विलयमुपगताः सर्व एवान्तरायाः ।
साङ्गानुष्ठानमद्याकृतमपि सुकृतं सङ्गताः स्वेष्टयोगाः सर्वेऽप्यद्यानवद्या यदहमिह हरिं चक्षुषा लक्षयामि ॥ ५ ॥

कंसो बतेति : १०.३८.७.

अहो ह्यद्यतनस्य नाम किमहं श्रेयस्करत्वं ब्रुवे यस्मिन्नीदृशशासनादुपकृतं कंसेन तेनारिणा ।
नैकं केवलमेतदेव धरणौ सर्वारिचक्राण्यपि मय्यध्वन्युपकुर्वते हरिपदाब्जस्पृरेण्वर्पणैः ॥ ६ ॥
अरिणा कंसेन रथं दत्तमवेक्ष्यारिचक्रमपि मन्ये । तदनुगुणाधिकरेणूत्करमिह मे संभ्रमात्समर्पयति ॥ ७ ॥
सुरेशप्रजेशोरगेशादिजुष्टैरजोमी रमेशाङ्घ्रिमृष्टैः । अपि स्यन्दनो मय्यमन्दोपकारी निजैरेव योऽङ्गैर्मदङ्गं धिनोति ॥ ८ ॥
मनोज्ञभावं भजतां हयानां वदन्तु केचिद्रथवाहकत्वम् । कृष्णे क्षणोद्भूतमनोरथस्य निर्वाहकत्वं त्वहमत्र वच्मि ॥ ९ ॥

कृष्णप्रिया

परन्तु नहीं, मुझ अधम को भी भगवान् श्रीकृष्ण के दर्शन होंगे ही। क्योंकि जैसे नदी में बहते हुए तिनके कभी-कभी इस पार से उस पार लग जाते हैं, वैसे ही समय के प्रवाह से भी कहीं कोई इस संसारसागर को पार कर सकता है।५॥ अवश्य ही आज मेरे सारे अशुभ नष्ट हो गये। आज मेरा जन्म सफल हो गया। क्योंकि आज मैं भगवान के उन चरण कमलों में साक्षात् नमस्कार करूँगा, जो बड़े-बड़े योगी-यतियों के भी केवल ध्यान के ही विषय हैं॥ ६॥ अहो! कंस ने तो आज मेरे ऊपर बड़ी ही कृपा की है। उसी कंस के भेजने से मैं इस भूतल पर अवतीर्ण स्वयं भगवान् के चरण कमलों के दर्शन पाऊँगा। जिनके नख मंडल की कान्ति का ध्यान करके पहले युगों के ऋषि-महर्षि इस अज्ञानरूप अपार अन्धकार राशि को पार कर चुके हैं, स्वयं वही भगवान तो अवतार ग्रहण करके प्रकट हुए हैं॥ ७॥ ब्रह्मा, शङ्कर, इन्द्र आदि बड़े-बड़े देवता जिन चरण कमलों की उपासना करते रहते हैं, स्वयं भगवती लक्ष्मी एक क्षण के लिए भी जिनकी सेवा नहीं छोड़ती, प्रेमी भक्तों के साथ बड़े-बड़े ज्ञानी भी जिनकी आराधना में संलग्न रहते हैं—भगवान् के वे ही चरणकमल गौओं को चराने के लिये ग्वाल-बालो के साथ वन-वन में विचरते हैं। वे ही सुर-मुनि-वन्दित श्री चरण गोपियों के वक्षःस्थल पर लगी हुई केसर से रंग जाते हैं, चिह्नित हो जाते हैं॥ ८॥

द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकञ्जलोचनम्।
मुखं मुकुन्दस्य गुडालकावृतं प्रदक्षिणं मे प्रचरन्ति[1] वै मृगाः॥ ९॥
अप्यद्य विष्णोर्मनुजत्वमीयुषो भारावताराय भुवो निजेच्छया।
लावण्यधाम्नो भवितोपलम्भनं मह्यं न न[2] स्यात् फलमञ्जसा दृशः॥ १०॥
य ईक्षिताहंरहितोऽप्यसत्सतोः स्वतेजसापास्ततमोभिदाभ्रमः।
स्वमाययाऽऽत्मन् [3]रचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते[4]॥ ११॥
यस्याखिलामीवहभिः सुमङ्गलैर्वाचो विमिश्रा गुणकर्मजन्मभिः।
प्राणन्ति शुम्भन्ति पुनन्ति वै जगद् यास्तद्विरक्ताः[5] शवशोभना मताः॥ १२॥

कर्दमक्षमा

अन्वयः—अहो, सुकपोलनासिकम्, स्मितावलोकारुणकञ्जलोचनम्, गुडालकावृतम्, मुकुन्दस्य, मुखम्, नूनम्, द्रक्ष्यामि, यत्, मृगाः, वै, मे प्रदक्षिणम्, प्रचरन्ति॥ ९॥ भुवः, भारावताराय, निजेच्छया, मनुजत्वम्, ईयुषः, लावण्य धाम्नः विष्णोः, अपि, (निश्चयेन) अद्य, उपलम्भनं, मह्यं, न स्यात् इति न, (यतो हि) दृशः, अञ्जसा, फलम्, स्यात्॥ १०॥ यः, अहं रहितः, अपि असत् सतोः, ईक्षितां, स्वतेजसापास्ततमोभिदा भ्रमः, तदीक्षया, स्वमायया, आत्मनि, रचितैः, प्राणाक्षधीभिः, सदनेषु, अभीयते॥ ११॥ यस्य, अखिलामीवहभिः, सुमङ्गलैः, गुणकर्मजन्मभिः, विमिश्राः, वाचः, जगत्, प्राणन्ति, शुम्भन्ति, वैं, पुनन्ति याः तद्विरक्ताः, शवशोभनाः, मताः॥ १२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मनोरथान्तरं करोति। द्रक्ष्यामीति। शोभमानौ कपोलौ नासिका च यस्मिंस्तत्। स्मितसहितोऽवलोको यस्मिन् अरुणकंजवल्लोचने यस्मिन् तच्च तच्च मुखम्। गुडालकावृतं वक्रकेशावृतम्। तदानीमेव शुभसूचकं दृष्ट्वातिहृष्यन्नाह। प्रदक्षिणमिति॥९॥ पुनरप्यन्यच्चिन्तयति। अप्यद्येति। ईयुषः प्राप्तवतः लावण्यस्य धामाऽऽश्रयस्तस्य विष्णोः। यद्वा विष्णोर्लावण्ययुक्तं यद्धाम वपुस्तस्य उपलंभनं दर्शनं भविता भविष्यति अपि यद्येवं स्यात्तर्हि मह्यं मम दृशो लोचनस्य फलं न स्यादिति न अपि तु स्यादेवेत्यर्थः।१०। य ईक्षितेत्यादि चतुर्भि कालापकम्। तत्रैवं शंका। नन्वस्मदादिवदेव भोक्तृत्वकर्तृत्वादिधर्मैस्तत्रतत्र प्रतीयमानस्य कथं विष्णुत्वमितीमां शंकां श्लोकत्रयेणापाकुर्वंश्चतुर्थेन तमहं द्रक्ष्यामीति मनोरथं करोति। तथाहि य ईक्षितेति। असत्सतोः कार्यकारणयोरीक्षितापि ईक्षणमात्रे कर्ताऽप्यहंरहितोऽहंकारहीनः। तथाऽपास्ततमोभिदाश्रमः तमः स्वाज्ञानं ततो भिदा भेदस्ततो श्रमोऽभिनिवेशादिः अपास्ता अपाकृतास्तम आदयो यस्मिन्सः। कुत एतत्तत्राह। स्वतेजसा चिच्छक्त्या नित्यस्वरूपसाक्षात्कारेण। तथापि स्वमायया स्वाधीनया मायया तदीक्षया तस्यैवेक्षया प्राणाक्षधीभिः सहितैरात्मन्नात्मनि स्वस्मिन्नेव रीचतैर्जीवैः सदनेषु वृन्दावन-

---

१. चरन्त्यर्मा—वीर.। २. ननु स्यात् फलमद्य सद्दृशः—विज.। ३. रचितेषु तत् सन् प्राणादिभिर्जन्तुषु भाति चित्रधा—विज.।
४. धीयते—प्रा. पा.। ५. स्युश्शोभनाः—विज.; तद्विरिक्ताः शव—इति कस्यचित्।

तरुषु गोपीगृहेषु च लीलया कर्माणि कुर्वन्सक्तवद भीयते आभिमुख्येन प्रतीयते ।। ११ ।। ननु सर्वथाऽहंकारादिरहितस्यात्मारामस्य लीलाऽपि कुत इत्याशंक्य परानुग्रहार्थेत्याशयेनाह । यस्येति । अखिलान्यखिलस्य वा अमीवानि पापानि घ्नंतीत्यखिलामीवहानि तैः । तथा सुमंगलैः शोभनानि मंगलानि येभ्यस्तैः गुणाः करुणादयः कर्माणि जन्मानि च तैर्विमिश्रा युक्ता वाचो जगत्प्राणन्ति जीवयन्ति शुम्भन्ति शोभयन्ति पुनन्ति पवित्रयन्ति । व्यतिरेकमाह । या इति । तैर्विरक्ता रहितास्तास्तु वाचः स्वलंकृता अपि वस्त्राद्यलंकृतशवच्छोभमाना मताः सतां संमताः ।। १२ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतोऽप्यधिकं मनोरथं करोतीत्याह—मनोरथान्तरमिति । गुडा निविका अलकाः कुन्तलास्तैरावृतम् । यद्वा-गुडा अंगुलिकास्तद्वद्वक्राः । यद्वा-गुड इक्षुविकारस्तद्वत्स्निग्धाः । "गुडः पिंडेक्षुविकृतौ स्नुह्य गुलिकयोर्गुडा" इति यादवः । वै·शब्दादन्येऽपि शुभसूचका भारद्वाजादयो ग्राह्याः । तदुक्तम् —"भारद्वाजो मयूरश्च शुकश्च गरुडस्तथा । एतेषां दर्शनं पुण्यं गतौ वामे विशेषतः ।।" इति ज्योतिषे ।। इत्थं सहजदास्येनादौ पादाब्जदर्शनं विभाव्य तत एव प्रमोद्रेकेण लोभाच्छ्रीमुखदर्शनेऽपि मनोरथं करोति—द्रक्ष्यामीति । अत्र मृगा इति अयुग्मवैशिष्ट्यार्थम् । कृष्णमृगसहिताश्चेति ज्ञेयम् । तदुक्तं शकुनतन्त्रे-"पुण्येन गत्या गवया अयुग्माः प्रदक्षिणं गौरमृगाश्चरन्ति । समा न शस्ता न च वामयाताः कृष्णैर्विमिश्रा न भवन्ति दुष्टाः ।।" इति ।। ९ ।। इदानीमन्यत्ततोऽप्यधिकं स्मरतीत्याह—पुनरिति । लावण्याधिकरणत्वोक्तिः शरीरे संगच्छते न त्वात्मनीत्य स्वारस्यादाह—यद्वेति । यद्येवं स्याद् यदि दर्शनं स्यात् । इत्यर्थ इति-'द्वौ नञौ प्रकृतार्थं गमयतः' इति वामनोक्तेः । लुनाति छिनत्ति द्रष्टृणां चेतो हरतीति लवणं सौंदर्यं तदेवाधिकं लावण्यमिति "लावण्यं त्वतिसौंदर्ये छेदे मधुवने तथा" इति निरुक्तेः ।। ननु तद्दर्शनमत्सुरा अपि लभन्त एव तत्र तवैव का भाग्यश्लाघेत्यत आह—अप्यद्येति । अद्य निजच्छयैव मनुजत्वमस्मद्वैवस्वतवंशप्रादुर्भूतत्वं गतवतो विष्णोर्लावण्यधाम्नः किमुपलम्भनं यथार्थानुभवितेत्यसुराणां दर्शनमात्रं न तु लावण्योपलम्भ इति भावः । फलं सार्थकत्वम् "अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेश यतो वयस्यैः । वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ।।" इत्युक्तेः । अञ्जसा साक्षादेव न तु छायादिव्यवधानेनेति भावः । यद्वा—उपलम्भनं समीपप्राप्तिः । दृशः फलं दर्शनमञ्जसाऽनानायासेन चक्षुरुन्मीलमात्रेणैव न तु योगादिसाधनबाहुल्येनेति भावः ।।१०।। कालापकमिति-"श्लोक एकेन युग्मं हि द्वाभ्यां वैशेषिकं त्रिभिः । कालापकं चतुर्भिः स्यात्कुलकं तु ततः परैः ।।" इति साहित्यसंदर्भोक्तेः । तत्र भगवति । एवं वक्ष्यमाणपरीत्या । शंकाक्षेपोऽस्तीत्याह नन्विति । तत्र तत्र युद्धादौ स्त्र्यादिग्रहणे च । अपाकुर्वन्निरस्यन् । तथाहि दर्शयति । तम आद्यपास्तौ हेतुमाशंक्य समाधत्ते-कुत इति । एतत् तम आदि निरसनम् । तत्र आक्षेपे । यद्यपि स्वरूपसाक्षात्कारवान्सदैवास्ते तथापि तस्यैव भगवत ईक्षया ईक्षणेन स ऐक्षत "एकोऽहं बहु स्याम्" इति श्रुतेः । स्वस्मिन्नेव प्रकाशिते रज्जूरगवत्प्रदर्शितैर्जीवैः । एतेनाध्यस्तानामधिष्ठानातिरेकेण सत्ताया अभावाद्वस्तुतः प्रतीतिकर्तृत्वमेव न तेषां स्वयमेवात्मनात्मानमपश्यदिति । अयमेवार्थो वतिना सक्तवदित्युक्तेनाभिधीयते "लोकवत्तु लीलाकैवल्यम्" इति न्यायोऽप्यत्रानुकूल एवेति ।। मनुष्यकृतेस्तस्य लावण्योपलम्भो नयनाभ्यामेव, स च साम्प्रतं नन्दग्राम एव अन्तर्यामिणः परमेश्वरस्य तस्य त्वनुमानेनैवोपलम्भोऽस्मदादीनां सदा सर्वत्र वर्तत एवेत्याह—य इति । असत्सतोर्जीवस्याशुभशुभकर्मणोरीक्षिताऽहंरहितोऽप्यहं पश्यामीत्यहंकारहीनोऽपीत्यपिकारेण जीवो देहाहंकारसहित एवेक्षिता, परमात्मा तु तद्देहाहंकाररहित एव द्रष्टा उदासीनः सन्साक्षीत्यर्थः । नन्वहंकारराहित्याभ्यां को विचारः ? देहस्थितश्चेत्तद्वर्तिशोकमोहादिभिर्युज्यत एव, न हि गृहे स्थित आसक्तोऽनासक्तो वा गृहवर्ति ध्वान्तमौष्ण्यं शैत्यं वा नानुभवेत्तत्राह—स्वतेजसा चिच्छक्त्यापास्तं तमोऽज्ञानं तत्कृता भिदा भ्रमश्च येन सः । यो ह्यन्तर्यामी स्वीयया माययात्मनि जीवेऽधिकारेण रचिताः सृष्टा याः प्राणेंद्रियधियस्ताभिस्तासां स्रष्टा स ईयतेऽनुमीयते, तथा तदीक्षया तासां प्राणादीनामीक्षया प्रकाशेन च तासां प्रकाशकः स सदनेषु समष्टिव्यष्टिदेहेष्वनुमीयते । तदुक्तम्—'गुणप्रकाशैरनुमीयते । तदुक्तम्-'गुणप्रकाशैरनुमीयते भवान्' इति । तद्रूपलावण्यानुभवो हि परमभाग्यफलमेव ।। ११ ।। लीलायामाक्षिपति—नन्विति । अखिलानीति कर्मधारये कस्येत्याकांक्षोदयात्तत्पुरुषमाह—अखिलस्य वेति । वाचो भक्तानुकुंपिन्मुरारे यशोदासूतो इत्येवं लक्षणाः । व्यतिरेकं गुणकर्मजन्ममिश्राभावमाह । तैर्गुणकर्मजन्मभिः । ता वाचः । स्वलङ्कृताः उपमारूपमोत्प्रेक्षाद्यालंकारयुक्ता अपि । यथास्या मुखं सुन्दरमित्यर्थे वर्णनीये अस्या मुखं कमलमिवेत्युपमा । एतन्मुखमेतन्मुखमिवेत्यनन्वयः । मुखकमलं रम्यमिति रूपकम् । अस्या मुखे भ्रमरा अब्जमत्या पतन्तीति भ्रांतिमदलंकारः । "अस्या मुखे कृते धात्रा किं पद्मे न किमिंदुना" इति आक्षेपः । एतन्मुखं किं तु कमलमित्यपह्नुतिः । मन्य एतन्मुखं कमलमित्युत्प्रेक्षा, एवमन्यदप्यूह्यम् । यथा सुवस्त्राद्यलङ्कृतोऽपि शवो न शोभते तद्वत् । अत एवोक्तम् —"न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्यु शिक्क्षयाः ।।" इति प्रथमे ।। यस्य संकीर्तनान्यपि यदुद्धारकाणीत्याह —यस्येति । अखिलानि अखिलस्य वाऽमीवानि पापानिघ्नन्तीत्यखिलामीवहानि तैः, शोभनानि मंगलानि येभ्यस्तैर्यस्य गुणकर्मविमिश्रा वाचो वाक्यानि जगत् तद्वक्तृश्रोत्रात्मकं प्राणन्ति जीवयन्ति, जीवयित्वा शुंभन्ति कृपालुत्वनिर्मत्सरत्वादिभिरलंकारैः शोभयन्ति, शोभयित्वा च पुनन्ति आविद्यकदोषात्पवित्रयन्ति । तद्रहिता वाचो गुणालंकारादिमत्योऽपि शवाञ्शोभयन्ति ताः ।

प्रथमं जीवतोऽपि तद्वक्तश्रोत्रात्मकाञ्जनाञ्छवान्कुर्वन्ति, तत उपमाद्यैरलंकारैरिव शोभयन्तीति । तदुक्तम्—"जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः । बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य ॥" इत्याद्युक्तेः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्थं सहजदास्येनादौ पादाब्जदर्शनं विभाव्य तत एव प्रेमोद्रेकेण लोभात् श्रीमुखदर्शनेऽपि मनोरथं करोति । द्रक्ष्यामीति । नूनं निश्चये । मुकुन्दस्येति पूर्वकृतनिरुक्त्या श्रीदन्तानां कुन्दसादृश्येन स्मितकृततदीषद्विकाशेन च श्रीमुखस्य सौन्दर्य्यमेवाधिकं दर्शितं तन्निश्चये हेतुः मम प्रदक्षिणं यथा स्यात्तथामी साक्षादित्यर्थः । रथनिर्घोषेण दूरवर्त्तित्वाददःशब्दप्रयोगः । वै इति पाठे व्यक्तमित्यर्थः । प्रदक्षिणमिति । अत्र मृगा अयुग्मवैशिष्ट्यार्थं कृष्णमृगसहिताश्चेति ज्ञेयं तथा च शाकुनतन्त्रे । पुण्येन गत्या गवयोरयुग्माः प्रदक्षिणं गौरमृगाश्चरन्ति । समा न शस्ता न च वामयाताः कृष्णैर्विमिश्रा न भवन्ति दुष्टाः इति ॥ ९ ॥ पुनरातलोभोद्रेकेण सर्वाङ्गदर्शने मनोरथं करोति । अपीति । अद्योपलम्भनं भवितेत्यर्थः । विष्णोः सर्वव्यापकस्य परिपूर्णस्य स्वयं भगवत इत्यर्थः । तादृशस्यापि मनुजत्वमीयुषः लीलामाधुर्य्याय प्रसिद्धमनुजसाधारणां नित्यामेव प्राप्तवतः । अयमात्मापहतपाप्मेतिवन्निष्ठाप्रयोगः । मनुवंशे प्रादुर्भूतत्वं प्राप्तस्येति वा । न चात्र स्वातन्त्र्यभङ्ग इत्याह । निजेच्छयेति । भक्तेच्छयेत्यर्थत्वेऽपि तदिच्छाभक्तेच्छयोरेकात्मकत्वात् तथैवार्थः । न केवलमेवं लीलामाधुर्य्याणामेवाश्रयत्वं सौन्दर्य्याणामपीत्याह । लावण्यधाम्न इति । अन्यत्तैः । तत्रापिशब्दस्य सम्भावनार्थत्वाद्यदीत्यादि व्याख्या । तर्हीति तर्ह्यर्थं फलं सार्थकत्वम् । एवकार इत ऊर्ध्वं तन्नास्तीति विवक्षया । तदुक्तम् अक्षण्वतां फलमिदमित्यादि तत्र चाञ्जसा साक्षात् स्वरूपेणैव नतु छायादिवद्व्यवधानेनेति भावः । यद्वा । उपलम्भनं समीपप्राप्तिः । दृशः फलं दर्शनमञ्जसाऽनायासेन भवितेति न किन्तु चक्षुरुन्मीलनमात्रेणैव भविताः । नतु योगादिसाधनबाहुल्येनेत्यर्थः । यद्वाऽपीति प्राकाश्ये तदेवं कामयित्वा तत्प्राप्तिं निर्द्धारयति । मह्यमिति । तदुपलम्भनरूपं दृशःफलं मम न भवितेति नापि तु भवितैव पूर्वनिश्चयादिति भावः । अत्राप्यञ्जसा न भवितेति पूर्ववत् ॥ १० ॥ अथ त्रिभिरेव कुलकम् । स चावतीर्ण इत्यन्तेनान्वयपरिप्राप्तेः तत्र य ईक्षितेति तैर्व्याख्यातम् । तत्र ननु अस्मदादिवदेवेत्यादिकं परमतमेवानूदितं पूर्वं श्रीभगवति दृढश्रद्धामयत्वेनोक्तत्वात् तथेक्षणमात्रकर्त्ताप्यहंरहित इतीक्षणमात्रं स करोति तदीक्षणलब्धसामर्थ्यया मायाया एव सृष्ट्यादिकर्तृकत्वमिति भावः । तस्मिन्नीक्षणेऽप्यहङ्काररहित आवेशशून्य इत्यर्थः । तदेवमावेशाभावाज्जीववैलक्षण्यमुक्तम् । स्वतेजसेत्यादिनान्येषामपि तम आदिध्वंसकत्वाज्जीवन्मुक्तेभ्योऽपि । चिच्छक्तिशब्देन हि तृतीये योगमाया व्याख्याता सा च श्रीसनकादौ निषिद्धेति ततश्चिच्छक्तिस्वरूपसाक्षात्कारयोर्वैयधिकरण्य एव तृतीया तस्यावृत्तित्वात्तस्य । प्राणाक्षधीभिः कर्मेन्द्रियज्ञानेन्द्रियान्तःकरणैः । आत्मनिआत्मांशे "ममैवांशो जीवलोके जीवभूतः सनातन" इति श्रीभगवदुपनिषद्दृशा । "जाग्रत्स्वप्नसुषुप्तञ्च गुणतो बुद्धिवृत्तयः । तासां विलक्षणो जीवः साक्षित्वेन विनिश्चित" इति श्रीभगवद्वाक्यान्तररीत्या शुद्धजीवे जीवैः प्रमातृरूपैः अतः स्वेषां प्राणाद्यावृतत्वानुसारेणईश्वरस्यापि तत्प्रतीतिः । तत्र च तदीक्षयेति मायायाः स्वतः सामर्थ्याभावेन आत्मनि रचितैरिति च तेषां तदेकाश्रयत्वे स्वतो यथार्थज्ञानभावोऽभिप्रेतः । वृन्दावनतरुष्वित्यादिकमभिशब्दस्वारस्येन ज्ञेयम् । तत्राभिमुख्येन सक्तवत्त्वं सक्तवत्तस्य प्रस्तुतविषयत्वेन वृन्दावनेत्यादि तत्र च वतिप्रत्यये हेतुर्लीलयेति पुनः पुनरिदमज्ञानमक्रूरस्य संशयानुच्छित्तेः । श्रीकृष्णस्य तत्प्रेमासक्तत्वे निर्णीते ततो नयनाप्रवृत्तिः स्यात् । यद्वा । यः स्वाधीनया मायया आत्मनि देहे रचितैः कारिताध्यासैर्जीवैः सदनेषु चिच्छक्त्या अपास्तं तमो जीवस्येवाज्ञानं तत्कृता भिदा भ्रमश्च येन । कैः प्रतीयते तत्राह । सदसतोरीक्षया याः प्राणाक्षधियः कर्मन्द्रियज्ञानेन्द्रियान्तःकरणानि तत्तद्रूपतां प्राप्तास्ताभिरेव तामीक्षां विना ताः स्वस्वकार्य्यक्षमा न भवन्तीति विचार्य्येत्यर्थः ॥ ११ ॥ ततेव परमात्मत्वेन दुर्लभत्वमुक्त्वा सर्वमङ्गलार्थं कृतनानालीलावतारत्वेन सुलभस्यापि ये वहिर्मुखास्तान् निन्दति । यस्येति । गुणादिभिस्तत्प्रतिपादकवाग्भिर्विमिश्रा इति मध्ये मध्येऽपि विशिष्टतया तद्युक्ता इत्यर्थः । तादृश्यो वाचो भस्त्राः किं न श्वसन्त्युतेति न्यायेन तद्व्यतिरेके मृतप्रायत्वात् । प्रथमं तावत् सम्बन्धमात्रेण सफलजीवनं कुर्वन्ति । ततश्च यस्यास्ति भक्तिर्भगवत्यकिञ्चनेत्यनुसारेण तत्तद्गुणप्रकाशेन शोभयन्ति । ततश्च पुनन्ति मुमुक्षापर्य्यन्तविविधदुर्वासनाध्वंसनेन शोधयन्ति । अतस्तासां वाचान्तु सुतरां तत्तद्भावं इति भावः । जगदित्यधिकारापेक्षा निरस्ता । वै प्रसिद्धौ । तत्तद्धेतुत्वेन गुणादीनां स्वभावानाह । अखिलेति । सुमङ्गलेति च सर्वदुःखनाशकैः सर्वोत्तमगुणप्रदैरित्यर्थः । विशेषेण रिक्ता शून्या इति स्थानैकद्वयसम्बन्धेनापि तदाद्यभिप्रेतं शवेति सालङ्कारा अपि शवप्राया इत्यर्थः । शवस्य स्वतो व्यर्थस्थितत्वात् पुत्रोत्पादनाशक्त्या परस्यापि प्राणप्रदत्वाभावात् तथा स्वतोऽशोभनत्वात् स्वाधिष्ठानस्याप्यशोभाहेतुत्वात् तथा स्वतोऽपवित्रत्वात् परस्याप्यपावनत्वाच्च तैरिति निर्देशेन रहिता इति च व्याख्यानेन तेषामपि मते विरक्ता इत्येव पाठो नतु विरिक्ता इति स पाठस्तु प्रायः सर्वत्र तेषु विरक्ता आसक्ता इत्यर्थः । अन्यत्तैः । तत्र लीलायाः परानुग्रहाद्यर्थत्वे यद्यपि परमतप्रेमवत्सु व्रजवासिषु तद्वैशिष्ट्यापत्त्या सक्तत्वमपि विशेषतः समायाति तथापि वैशिष्ट्यज्ञानात् पूर्ववत्तदज्ञानमेवेति तथावतारितम् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्थं सहज-दास्येनादौ पादाब्जदर्शनं विभाव्य तत एव भक्त्युद्रेकेण लोभाच्छ्रीमुखदर्शनेऽपि मनोरथं करोति,—द्रक्ष्यामीति। नूनं वितर्के निश्चये वा। मुकुन्दस्येति पूर्व्वकृतनिरुक्त्या श्रीदन्तानां कुन्दसादृश्येन स्मितकृततदीषद्विकाशेन च श्रीमुखस्य श्रीसौन्दर्य्यमेवाधिकं दर्शितम्, तद्दर्शनमेव सन्निमित्तदर्शनेन निश्चिनोति, मम प्रदक्षिणं यथा स्यात्तथा, अमी इमे साक्षादित्यर्थः। रथनिर्घोषेण दूरवर्त्तित्वाददः शब्दप्रयोगः। 'वै' इति पाठे व्यक्तमित्यर्थः। यद्वा, हतौ यम्मादित्यर्थः। मृगा इत्यविशेषेणोक्ता अपि अयुग्मा गौरा ज्ञेयाः, तथा च शाकुनतंत्रे—'पुण्येन गत्या गवयोरयुग्माः प्रदक्षिणं गौरमृगाः प्रयान्ति। समा न शस्ता न च वामयाताः, कृष्णैर्विमिश्रा न भवन्ति दुष्टाः॥' इति॥ ९॥ अधुना पुनरतिलोभोद्रेकेण सर्व्वाङ्गसन्दर्शने मनोरथं करोति,—अपीति। विष्णोर्व्यापकस्यापि मनुजत्वं मर्त्त्यलोके मनुष्यचेष्टामीयुषः, यद्वा, अन्तर्य्यामित्वेन सर्व्वत्र प्रविश्य वर्त्तमानस्यापि नराकृत्या प्रकटीभूतस्येत्यर्थः। किमर्थम्? भुवो भारो दैत्यमयस्तन्मूल-पापादिमयश्च, तस्यावताराय उत्तारणाय, न च तथापि स्वातन्त्र्यभंग इत्याह,—निजेच्छयेति। यद्वा, सोऽपि किमर्थं निजानां भक्तानां श्रीब्रह्मादीनामिच्छया स्वभक्तविनोदार्थमित्यर्थः। मनुजत्वादेव लावण्यधायः, न न स्यादिति निजदैन्येनादावसम्भावितत्वान्निषिद्धम्, दृक्फलं पश्चात्तद्दर्शनसम्भावनया साधयति,—अञ्जसेति। तदर्थं स्वप्रयास विशेषाभावात्, यद्वा, उत्तममित्यर्थः। अन्यत्तैर्व्याख्यातम्। तत्र 'अपि किम्, इत्यस्य व्याख्यानम्। 'प्रदक्षिणं मे' इति पूर्व्वदर्शनस्य सम्भावितत्वात्, अतोऽपि-शब्दस्य यदीत्यर्थः कृतः। तथापि सन्देहार्थतानिरसनार्थं यद्येवं स्यादिति पृथग् व्याख्यातमिति। अथवा मह्यं मां प्रत्युपलम्भनं स्पर्शः समीपे प्राप्तिर्वा यदि भविता, तदा दृशो भक्तिमाहात्म्यादिज्ञानस्य। अन्यत् समानम्॥ १०॥ ईक्षिताप्यहंरहित इत्यनेन जीववैलक्षण्यमुक्तम्, स्वतेजसेत्यादिना च, तत्र जीवन्मुक्तेभ्यो वैलक्षण्यार्थं तेषां चिच्छक्त्यभावात्, स्वमायया, प्राणाक्षधीभिः प्राणः सूत्रात्मा देहधारकः, यद्वा, प्रान्ति पूरयन्ति सर्व्वमिति प्राणाः पञ्चमहाभूतानि विषयाश्च, अक्षाणि इन्द्रियाणि, धियोऽन्तःकरणानि ताभिः सह रचितैरिति सपरिवाराणां जीवानां मायावृतत्वादात्मानुसारेण ईश्वरस्यापि तथैव मननात् सक्तवत् प्रतीतौ हेतुः। तत्र च तदीक्षयेति, मायायाः स्वतः सामर्थ्याभावेन, आत्मन्रचितैरिति तेषां तदेकाधिष्ठानतया स्वतो यथार्थज्ञानराहित्यमेवाभिप्रेतम्, अतः सक्तवत् प्रतीतिरत्यन्तमिथ्यैवेति भावः,—अलुप्तज्ञानाद्यैश्वर्यत्वादिति। अन्यतैर्व्याख्यातम्। अथवा ननु गोचारणायेत्याद्युक्त्या तादृशमेव कथं द्रष्टुमिच्छसि, न च कथमहंकारादिरहितमित्याशंक्याह,—य इति। ईक्षितापि सदसतोर्ब्रह्माण्ड-तत्कारणयोरहंरहितो ममेदमित्याद्यभिमानहीनोऽपि स्वतेजसापास्ततम-आदिरपि श्रीनन्दगृहादिषु सक्तवदेवाभीयतेऽनुभूयते जनैः। कैरित्यपेक्षायामाह—स्वमाययेत्यादि। स्वशब्देन आत्म-शब्देन तच्छब्देन च स्वीयत्वेनानुगृहीतैर्जीवैरित्यर्थः। प्राणाक्षधीभिः सहेति, अन्यथा तादृशप्रतीत्यभावेन तदसेवया तासां वैयर्थ्यापत्तेः। ननु तस्योपलम्भनं परमदुर्लभम्? तत्राह—य इति। त्रिभिर्विशेषणैः सुदुर्लभत्वमुक्तम्, तथापि निजगृहेऽपि तदीक्षया तदनुसन्धानेन जीवैरभीयते अभितः प्राप्यते, किं पुनः श्रीनन्दगृह इत्यर्थः। तत्र हेतुः—स्वमायया निजकृपया आत्मन् आत्मनि भवा इति निमित्ते तत्प्राप्त्यर्थं प्राणाक्षधीभिः कृत्वा रचितैः सृष्टैः। यद्वा, तस्य तया वा निजानुग्रहसम्बलितया ईक्षया दृष्ट्या प्राणादिभिः सह रचितैः, अभि अभयं यथा स्यात्तथा ईयते प्राप्यते। अनेन प्रियतया प्राप्तिरभिप्रेता, अन्यत्तथैव। अतएवोक्तं मोक्षधर्म्मे—'जायमानं हि पुरुषं पश्येद्यं मधुसूदनः। सात्त्विकः स तु विज्ञेयो भवेन्मोक्षार्थनिश्चितः॥' इति। अस्यार्थः—पश्येत् कृपयावलोकयेत्, मोक्षस्यार्थः फलं भक्तिस्तस्मिन्निश्चिता दार्ढ्यं गत इति। यद्वा, अहंकाररहितोऽपि अपास्ततमआदिरपि, स्वस्य तेजसा प्रभावेण कारुण्यमहिम्ना सदसतोः स्थूलसूक्ष्मयोर्नीचोच्चयोर्वा ईक्षिता अवलोकत इति परमकारुण्यमुक्तम्। अतः स्वमायया तदीक्षयात्मन्रचितैरत्यन्तमायावशैरपि जीवैरित्यर्थः। प्राणादिभिस्तत्तच्चेष्टया कृत्वा अभीयतेऽनुभूयते। तत्र प्राणचेष्टा देहचेष्टैव—विविधपरिचर्य्यात्मिका, इन्द्रियचेष्टा-दर्शनादिरूपा, धीचेष्टा—विश्वासाद्यात्मिका ज्ञेया। अन्यत् समानम्। अलमतिविस्तरेण॥ ११॥ अमीवहभिरिति सवासनाशेषपापहन्तृत्वमुक्तम्। तेनाखिलदुःखविनाशकत्वमपि तेषां सिद्धम्। महापुण्यजनकत्वं तेन परमसुखप्रदत्वं चाह—सुमंगलैरिति। सु-शब्देन क्षयिष्णुत्वादिकं दर्शितम्। गुणादिभिर्विमिश्रा वाच इति स्वभावतः कथामानासु बहुविधग्राम्यकथासु कवीनां काव्येषु वा कथञ्चिदापातैर्भगवद्गुणादिभिर्युक्ता अपि, किं पुनः केवलगुणादिकीर्त्तनात्मिका इत्यर्थः। तत्र च वि-शब्देन विकलतया योगेन च साकल्येनेति द्योत्यते, कर्म्माणि पूतनावधादीनि, जन्मानि अवताररूपाणां जन्मस्वेवान्तर्भावः, जन्मानुरूपाकारादिमत्त्वात् प्रथमं प्राणन्ति। जीवतामपि गुणादिशोभां विना मरणसादृश्यमेवेत्यत आह—शुम्भन्ति। तथापि दुर्व्वासनया मुमुक्षादिकया शोभा न स्यादित्यत आह,—पुनन्ति, विविधदुर्वासनाध्वंसनेन शोधयन्ति जगदिति अधिकारापेक्षा निरस्ता। वै समुच्चये, प्रसिद्धौ वा। सा चाजामिलोपाख्यानादौ ज्ञेया। विशेषेण रिक्ताः शून्या इति, यत्किञ्चित्सम्बन्धेनापि सत्यत्वं शोभनत्वमभिप्रेतम्। अन्यत्तैर्व्याख्यातम्। तत्र तैरिति वाक्येन तेषामपि मते 'विविक्ताः' इत्येव वा पाठः, अन्यथा 'तेषु' इत्येव वक्तुं युज्यते। किञ्च, रागवैराग्यादिधर्म्मश्चेतनानामेवेति वाक्षु स न सम्भवेदेवेति। पक्षान्तरे चेदम्—अहो किं वक्तव्यम्, तत्कारुण्यमहिम्ना जीवानां तादृशत्वं स्यादिति कथञ्चित्तज्जन्मादिसन्बन्धेनापि अचेतनाः प्राणहीनाः प्रियारूपा वाचोऽपि सप्राणाः सर्व्वोत्कर्षवत्यो भवन्तीत्याह—यस्येति। प्राणन्ति सप्राणा भवन्ति,

प्राणोऽहंकारविशेषः, फलं वा, शुम्भन्ति अलंकाररहिता अपि शोभन्ते, यै अपि, जगदपि पुनन्ति, शवा अपि शोभना याभ्यस्ताः, शवानां निष्प्राणत्वं शोभाराहित्यमपावनत्वञ्च व्यक्तमेव। तेभ्योऽपि भगवद्गुणादिरहितवाचामशोभनत्वमन्येषामपि पापादिजनकत्वेन जीवनादिहरणादिति। अयं साधारणः सर्व्वत्र तस्य महिमा राजत एव ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ईक्षितेति। अहं शब्देनात्मन्यहंकारो लक्ष्यते। जीवाः स्थूलोऽहं पश्यामीति मन्यन्ते। एवं तदहे बुद्धिरहितोऽपि अत एव स्वगतजातिगुणादिभिदाभ्रमरहितोऽपि यः सदसतोः चिदचितोः कार्यकारणायोर्वा ईक्षिता ज्ञाता द्रष्टा सदनेषु भोगायतनेषु देहेषु तदीयस्वसंकल्पेन रचितैः प्राणाक्षधीभिः लिङ्गव्ययत्यय आर्षः अधीयते गम्यते बुध्यते प्राणादीनां कारणतया ज्ञायत इत्यर्थः। प्राणादिभिर्जन्तुषु भाति चित्रधा इति पाठे प्राणादीन् परमात्मशरीरत्वात् तैर्विशिष्ट चित्रधा बहुधा भातीति ॥ ११ ॥ शास्त्रवशादप्याह। अमीवहभिः पापापहैः वाचः प्राणन्ति शुम्भन्तीति। अन्तर्भावितण्यर्थनिर्देशः। जगज्जीवयन्ति शोभयन्ति पुनन्ति चेत्यर्थः या वाचस्तद्विरक्ता भगवज्जन्मादिप्रतिपादनरहिताः ताः शवशोभनाः शवकल्पानां जीवन्मृतानाज्ञानां शोभनाः। यद्वा गुणादिशून्याः वाचो निष्प्राणदेहतुल्याः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

द्रक्ष्यामीति नूनमहं मुकुन्दस्य मुखं द्रक्ष्यामि तत्सूचकं शुभं दृष्ट्वा हृष्यन्नाह। अमी मृगा मे मम प्रदक्षिणं यथा तथा प्रचरन्ति गच्छन्ति कथम्भूतं मुखं शोभनौ कपोलौ नासिका च यस्मिन् स्मितसहितः अवलोको यस्मिन् तच्च तच्च अरुणे कञ्जवल्लोचने यस्मिन् तच्च गुडालकैर्वक्रकेशैरावृतमिति ॥ ९ ॥ पुनरप्यन्यच्चिन्तयति। अप्यद्येति। भुवो भारावताराय भारापनोदनाय निजेच्छया नतु कर्मणा मनुष्यत्वमीयुषः प्राप्तवतो निरतिशयलावण्याश्रयस्य विष्णोरुपलम्भनं दर्शनं भविता भविष्यत्यप्यद्य यद्यधुनैव स्यात्तर्हि मह्यं मम दृशोर्लोचनस्याञ्जसा आश्वव्यवहितं फलं न स्यादिति नापितु स्यादेवेत्यर्थः। द्वौ न शब्दौ प्रकृतार्थमनुद्रढयतः ॥ १० ॥ ननु कोऽसावस्मदादिविलक्षणो यो मनुजत्वमीयिवान् यस्य च दर्शनं बहुमन्यसे इत्याशङ्क्याह। य इत्यादि चतुर्भिः श्लोकैः। यच्छब्दयोः सचावतीर्ण इत्युत्तरणे सम्बन्धः अहं रहित इत्यत्राहं शब्देन अनात्मनि आत्माभिमानहेतुरहङ्कारो लक्ष्यते असत्सतोः स्वशरीरभूतयोः प्रकृतिपुरुषयोरीक्षिता द्रष्टा ज्ञाता अपि अहं रहितः जीववत्स्वाभेदभ्रमरहितः जीवो हि देहं पश्यन् स्वाभिन्नमनुसन्धत्ते तद्वद्यः प्रकृतिपुरुषौ वीक्षन्नपि न स्वाभिन्नावनुसन्धत्ते किन्तु स्वरूपतः स्वभावतश्च स्वस्मादत्यन्तविलक्षणावेव पश्यतीत्यर्थः अनेन बद्धजीववैलक्षण्यमुक्तं तत्र हेतुं वदन्मुक्तवैलक्षण्यमप्याह। स्वतेजसेति। स्वतेजसा नित्यासंकुचितापरिच्छिन्नज्ञानेनापास्तं निरस्तं प्रतिपक्षितमोऽज्ञानं तन्मूलको भिदाभ्रमः भेदभ्रमः अस्वात्मकस्वतन्त्रवस्तुभ्रमश्च यस्य स मुक्तो हि वद्धदशायां सङ्कुचितज्ञानेनानिरस्ताज्ञानतन्मूलकाब्रह्मात्मकस्वतन्त्रवस्तुभ्रमयुक्तः। यद्वा स्वतेजसो स्वसम्बन्धिना पराभिभवसामर्थ्येन निरस्तं तमोऽज्ञानं तन्मूलको भिदाभ्रमः स्वस्मिंस्तद्द्वारकदेवत्वमनुष्यत्वादिभेदभ्रमश्च यस्य सः कथमेवं भूतो विज्ञायते इत्यत्राह। स्वमायया स्वशरीरभूतया प्रकृत्या कारणभूतया तदीक्षया तद्विषयकेण करणभूतेन स्वसङ्कल्पेनात्मनि स्वास्मिन्नेवाधारभूते रचितैः प्राणेन्द्रियबुद्धिभिः लिङ्गव्यत्यय आर्षः रचिताभिः प्राणेन्द्रियबुद्धिभिः कार्यभूताभिः सदनेषु भोगायतनेषु देहेषु अभीयते अभिगम्यते बुध्यते इति प्राणादीनां कारणतया ज्ञायते इत्यर्थः। प्राणादिभिर्जन्तुषु भाति चित्रधेति पाठे प्राणादीनामपि परमात्मशरीरत्वात्तैर्विशिष्टश्चित्राधा भातीति शास्त्रवशादवगम्याह। नच प्राणादिसृष्टिर्जीवकर्तृकेति तत्कारणतया ज्ञायमानोऽपि जीवान्नातिरिच्यत इति वक्तुं युक्तं स्वस्य प्राणादिसृष्टेःस्वस्य कर्तृत्वासम्भवात् नहि प्रबुद्धः स्वदुःखसाधनानि स्वयं सृजति नापि सर्वप्राणादिसृष्टिरेकजीवकर्तृकैवेति युक्तिमत् तस्यापि स्वयं प्राणादिरहितस्य कर्तृत्वासंभवात् प्राणादिमत एव कर्तृत्वदर्शनात् प्राणादिमत्त्वेतु तत्सृष्टेः कर्त्रन्तरसापेक्षत्वात् नच तावत्स्वस्य प्राणादीन् सृष्ट्वा ततोऽन्येषामपि सृजतीति वक्तुं युक्तं तावत्प्राणादिरहितस्य प्राणादिसृष्टिकर्तृत्वासम्भवादन्योऽन्याश्रयश्च परमात्मा तु करणायत्तज्ञाननिरपेक्षः सङ्कल्पमात्रेणव प्राणादीन् स्रष्टुं शक्नोतीति तत्कारणतया ज्ञायत इति सुष्ठूक्तम् ॥ ११ ॥ यस्येति। अखिलानां पठतां शृण्वताञ्च जनानामीवं पापं घ्नन्तीति तथा तैर्यस्य गुणकर्मभिः सुमङ्गलैः निरतिशयश्रेयस्करैः विमिश्रा वाचो गिरः प्राणन्ति शुम्भन्तीत्यन्तर्भावितण्यर्थनिर्देशः। जगज्जीवयन्ति शोभयन्ति पुनन्ति चेत्यर्थः। तत्र गुणा वात्सल्यसौशील्यसौलभ्यादयः कर्माणि जगद्व्यापारप्रभृतीनि चेष्टितानि जन्मानि रामकृष्णादीनि या वाचस्तद्विरक्ता भगवद्गुणादिप्रतिपादनरहितास्ताः पदलावण्यार्थलावण्ययुक्ता अपि शवशोभनाः वस्त्राद्यलंकृतशववच्छोभनाः मताः ज्ञाताः शवकल्पानामभिमता इति भावः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नूनं निश्चयात् स्मितावलोकेऽरुणे कञ्जसदृशे लोचने यस्य तत्तथा स्मितसहितोऽवलोको ययोस्ते तथा गुडाः निविडाः अलकाः तैरावृतं यद्वा गुडाः गुलिकाः तद्वद्वक्राः। यद्वा गुडः इक्षुविकारः तद्वत् स्निधा अलकास्तैरावृतं दर्शननिश्चये शकुनं वक्ति। प्रदक्षिणमिति। वा इत्यनेन अन्ये भरद्वाजादिपक्ष्यादयो गृह्यन्ते इति सूचयति गुडः पिण्डे क्षुधिकृते स्नुहीगुलिकयोर्गुड इति च ॥ ९ ॥ ईयुषः गतवतः उपलम्भनं दर्शनं भविष्यति मह्यं मम दृशः नेत्रस्य सं समीचीनं फलं स्यान्ननु स्यादेव समभेदे समीचीने

इति च । दृश इत्येकं वा पदं न संदृशे तिष्ठतीति श्रुतिः सन्दर्शनसाधनस्य नेत्रस्येत्यर्थः ।। १० ।। चैतन्यैकरसस्य हरेर्गोपत्वेनावभासनं न चाद्यामति भावेनाह । य इति । यः हरिः अहं रहितः अविद्यमानं दर्शनमात्मनि यद्यभिमन्येत तदा ह्युक्तदोषः स्यात् न चासावस्तीत्यर्थः । यज्ञदत्तवद्देहस्थस्याज्ञानादिसम्भवेनाहंभावशून्यत्ववचनमौपचारिकं किन्न स्यादिति तत्राह । अपास्तेति। अपास्तः निराकृतः तमाभिदाभ्यामज्ञानान्यथाज्ञानाभ्यामुत्पन्नो भ्रमः प्रवृत्तिर्यस्य सः भ्रमु अनवस्थान इति धातोःष्ठागतिनिवृत्तविति अवस्थानं गत्यभावस्तदभावः कार्येषु प्रवर्तमानमित्यर्थः । वस्तुतत्त्वज्ञानविपरीतनिमित्तप्रवृत्तियुक्तो न भवतीत्यर्थः । यद्वा तमसा वस्तुतत्त्वाज्ञानेन जाता भिदा इदं रजतमित्यन्यथाज्ञानं तदेव भ्रमो भ्रान्तिज्ञानं यस्य दूरोत्सारितं सः । ननु मुक्तोऽप्येतादृश इत्यत उक्तं स्वतेजसेति सत्य किन्तु—

बलमानन्द ओजश्च सहो ज्ञानमनाकुलम् स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोरिति ।।

श्रुतेरस्य परप्रभावेण तदात्मानमेव वेदाहं ब्रह्मास्मीति स्वमायया स्वेच्छया आत्मन् आत्माधारतया रचितेषु जन्तुषु प्राणादिभिः सह चित्रधा सुरनरतिर्यगादिनानाजातिमिश्रत्वेन भाति । ननु तर्हि विकारोऽपि स्यादित्यत्राह । तत्सन्निति तथैव सन् अविकार एवाभ्यर्हितः श्रेष्ठ इत्यर्थः । सर्वैरभ्यर्हितो वा सत्सत्येऽभ्यर्हिते श्रेष्ठे साधीयसि भवत्यपीति च अनेन मूलरूपी हरिर्यथा निर्विकारस्तथा रूपान्तरवानिति सूचितं भवति हेयदेहित्वेनाभासमानस्य किं कर्मेति तत्राह । ईक्षितेति । असत्सतो अशुभशुभयोः ईक्षिता द्रष्टा जन्तुभिः क्रियमाणस्य पुण्यपापलक्षणस्य कर्मणः साक्षीत्यर्थः । नत्वस्य दर्शनाभिमानलक्षणविकरः आपन्नमुद्दिश्येति वा ।। ११ ।। यस्य हरेरखिलामीवहभिः अखिलानि अमीवानि पापनिघ्नन्तीत्यखिलामीवहानि तैः, अत एव सुमङ्गलैः गुणकर्मजन्मभिः विमिश्राः सङ्कलिता वाचः श्रीकृष्णकृष्णसखवृष्णिवृषेत्यादिलक्षणा जगत्प्राणन्ति आह्लादयन्ति जीवयन्ति वा शुम्भन्ति शोभयन्ति शुभयुक्तं कुर्वन्ति पुनन्ति पवित्रयन्ति वै गङ्गादौ प्रसिद्धमित्यन्वयः या वाचस्तैः विष्णवादिभिः विरक्ताः शून्याः वर्जिताः स्युस्ताः सद्भिः अशोभना मनाः अवबोधिता इत्यन्वयः ।। १२ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु सर्वथा अन्योपलम्भनं भवितेत्यन्वयः । विष्णोः सर्वव्यापकस्य परिपूर्णस्य स्वयं भगवत इत्यर्थः । तादृशस्यापि मनुजत्वमीयुषः लीलामाधुर्य्याय प्रसिद्धमनुजसाधारण्यं नित्यमेव प्राप्तवतः । अयमात्मापहतपाप्मेत्यादौ क्तप्रयोगवदत्र प्रयोगः । मनुवंशे प्रादुर्भूतत्वं प्राप्तस्येति वा ।। १० ।। ननु कथं तस्य तादृशं दौर्लभ्यं तल्लाभमाहात्म्यञ्च । यदि च तत्तर्हि कर्हि सौलभ्यं येन तथापि तादृशभाग्यश्लाघा स्यादित्यत्र विवृणोति । य ईक्षितेति चतुर्भिः । तत्राद्यद्वयं कैमुत्येनाह द्वाभ्याम् । दौर्ल्लभ्यं तावदाह । य ईक्षितेति । अपीति समुच्चये । सदसतोरीक्षितापि तदावेशरहितोऽपि । उभयत्र हेतुः स्वतेजसेति । ईक्षितेत्यादिरूपत्वेन सर्वगोचरस्वरूपो यः स्वमायया स्ववीक्षया चात्मनि रचितत्वेन स्वतः सामर्थ्यहीनैस्तं द्रष्टुमयोग्यैश्च जीवैः प्राणादिप्रवृत्तिलिङ्गेन सदनेषु तदधिष्ठानरूपेषु सर्वभूतेषु अभीयते प्रतीयते । अनुमीयते मात्रं नतु दृश्यते यथोक्तं द्वितीये “भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकै”रिति एवं “विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग”दिति उक्तदिशा तदंशस्यापि परमदौर्लभ्यं दर्शितम् ।। ११–१३ ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अप्यद्येत्यादि । मनुजत्वमीयुषो मनुजमात्रस्य भुव उत्पत्तेर्भारोवताराय । भवनं भूर्जन्म तस्य भारावतारो मुक्तिस्तस्यैव निजेच्छयावतीर्णस्येत्यर्थः । यद्वा, तदर्थमेव विष्णोर्व्यापकस्य इतस्ततः प्रकटलावण्यधाम्नः श्रीकृष्णस्य दृशः फलभूतमुपलम्भनं तन्न स्यात् ? स्यादेव, अञ्जसा सुखेन मह्यं ममेत्यर्थः । अथवा, मनुजत्वमीयुषो मम लावण्यधाम्नो विष्णोरुपलम्भनं न न स्यात् ? स्यादेव । भुवो भारावताय निजेच्छया अञ्जसा सुखेन दृग्दर्शनं यस्य भुवोभारापहरणार्थं यदवतीर्णस्तेन सर्वैरेव सुखेन दृश्यत इति भावः । तेन ममापि दर्शनं भवत्येव । उपलम्भनं कीदृशम् ? मह्यं महनीयं फलं सर्वपुरुषार्थानां पूण्यं फलमित्यर्थः ।। १० ।। महानीयत्वमेव दर्शयति—य इक्षितोहऽमित्यादि । योऽहं तदीक्षयैव ईक्षिता तद्द्रष्टा भविष्यामीत्यर्थः । यतः स्वतेजसा स्वसामर्थ्येन रहितः । कीदृश्या तदीक्षया ? स्वमायया सुष्ठु अमायया तदीक्षया तद्दर्शनेन तस्य निष्कैतवावलोकेन । तदिति कस्य ? तदाह—रचितैर्विलासैः सदनेषु गोपीनां भवनेषु प्राणाक्षधीतिः सह य ईषते, ‘ईङ् गतौ दैवादिकः, गच्छतीत्यर्थः । प्राणैर्जीवनैरक्षैरिन्द्रियैर्धीभिर्बुद्धिभिः सह भवनेषु ईयते गम्यत इति वा कमसाधनम् । स्वतेजसा स्वसामर्थ्येन रहितोऽप्यसत्सतोर्मध्ये निरस्तभिदाश्रमः सञ्जात वा । तदीक्षयेत्यावर्त्तनीयम् । असत् कारण सत् कार्यम् । हे आत्मन् ! हेमनः ! इत्यात्मन एव सम्बोधनम् , मनसा सह संकथया । यद्वा, तदीक्षया योऽहं सदसतोरीक्षिता भविष्यामीत्यर्थः । कीदृश्या ? सुष्ठु अमाययेति पूर्ववत् । रचितैर्विलासैर्युक्तयेति विशेषणे तृतीया । तदीक्षयेति तच्छब्दसापेक्षो यच्छब्दोऽध्याहार्यः । यः सदनेष्वीयते गम्यते गोपीनां गृहेषु लभ्यत इत्यादि पूर्ववत् । (भा० १०।२८।८) “यद् गोपिकानां कुचकुङ्कुमाचितम्” इत्यत्र गोपिकाशब्द–श्रुत्या तत्सम्बन्धित्वं भवनानां बहुत्वाच्च, अन्यथा भवनेष्विति बहुत्वं न घटते ।। (१२–१५ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अप्यद्येत्यादि। मनुजत्वमीयुषो मनुष्यमात्रस्य भुव उत्पत्तेर्भारावहाराय निजेच्छया लावण्यधाम्नः स्वभावेन लावण्यमयविग्रहस्यास्य विष्णोर्व्यापकस्योपलम्भनं दृशः फलभूतम्, तन्न स्यात्? अपि तु स्यादेव। अथवा मनुजत्वमीयुषो मम दृशः फलं मह्य महनीयम् 'महधातोः क्यप्'॥ १०॥ महनीयत्वमेवाह—य ईक्षिताहमेवेत्यादि। रचितैर्विलासैः, सदनेषु गोपीनां भवनेषु प्राणाक्षधीभिः प्राणैर्जीवनैरक्षैरिन्द्रियैर्धीभिः सह सदनेषु अर्थात्तासामभीयते अभिगच्छति, ईङगतौ दैवादिको षः, अभीयते प्रतीयते इति कर्म प्रत्ययो वा। तमहमीक्षिता, तत्र कारणमाह—तदीक्षया कथम्भूतया? सुष्ठु अमाययेति भावः। स्वतेजसा स्वसामर्थ्येन रहितोऽपि असत्सतोर्मध्ये निरस्ततमोभिदाश्रम सन् हे आत्मन्! इति आत्मन एव सम्बोधनम्। यद्वा, तदीक्षया मोहं सदसतोरीक्षिता भविष्यामीत्यर्थः। रचितैर्विलासैः 'विशेषणे तृतीया', विलासयुक्तयेत्यर्थः। तदीक्षयेति लब्धो यः स सदनेषु गोपीगृहेषु अभीयते प्रत्यक्षीक्रियते। कैः? प्राणैर्जीवनेनाक्षैरिन्द्रियैर्धिया बुद्ध्यां च॥ १०-१५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शुभशकुनं पश्यन्मनोरथसिद्धिं निश्चिनोति। द्रक्ष्यामीति। नूनं निश्चितमेव गुडालकावृतं यतः प्रदक्षिणमिति॥ ९॥ ननु तद्दर्शनमसुसुरा अपि लभन्त एव तत्र तत्रैव का भाग्यश्लाघेत्यत आह। अप्यद्येति। निजेच्छयैव मनुजत्वमस्मद्वैवस्वतमनुवंशप्रादुर्भूतत्वं गतवतो विष्णोर्लावण्यधाम्नः किमुपलम्भनं यथार्थानुभवो भवितेत्यसुराणां दर्शनमात्रं नतु लावण्योपलम्भ इति भावः। ततश्च मम दृशः फलं न न स्यादपितु स्यादेवेत्यर्थः॥ १०॥ मनुष्याकृतेस्तस्य लावण्योपलम्भो नयनाभ्यामेव स च साम्प्रतं नन्दग्राम एव अन्तर्यामिणः परमेश्वरस्य तस्य त्वनुमानेनैवोपलम्भोऽस्मदादीनां सदा सर्वत्र वर्तत एवेत्याह। य इति। असत् सतोः जीवस्याशुभशुभकर्मणोरीक्षिता अहंरहितोऽप्यहं पश्यामीत्यहङ्काररहीनोऽपीत्यपिकारेण जीवो देहाहङ्कारसहित एव ईक्षिता परमात्मा तु तद्देहाहङ्काररहित एव ईक्षिता द्रष्टा तदासीनः सन् साक्षीत्यर्थः। नन्वहङ्काराराहित्यसाहित्याभ्यां को विचारः देहस्थितश्चेत्तद्वृत्तिशोकमोहादिभिर्युज्यत एव न हि गृहे स्थित आसक्तोऽनासक्तो वा गृहवर्तिध्वान्तमौष्ण्यं शैत्यं वा नानुभवेत्तत्राह स्वतेजसा चिच्छक्त्या अपास्तं तमोऽज्ञानं तत्कृता भिदा भ्रमश्च येन सः यो ह्यन्तर्यामी स्वीयया आत्मनि जीवेऽधिकरणे रचिताः सृष्टा याः प्राणेन्द्रियधियस्ताभिस्तासां स्रष्टा स ईयते अनुमीयते तथा तदीक्षया तासां प्राणादीनामीक्षया प्रकाशेन च तासां प्रकाशकः स सदनेषु समष्टिदेहेषु अनुमीयते यदुक्तं "गुणप्रकाशैरनुमीयते भवा"निति तद्रूपलावण्यानुभवो हि परमभाग्यफलमेव यस्य सङ्कीर्तनान्यपि जगदुद्धारकाणीत्याह। यस्येति। अखिलानि अखिलस्य वा अमीवानि पापानि घ्नन्तीत्यखिलामीवहानि तैः शोभनानि मङ्गलानि येभ्यस्तैर्यस्य गुणकर्मजन्मभिर्विमिश्रा युक्ता वाचो वाक्यानि जगत् तद्वक्तृश्रोत्रात्मकं प्राणन्ति जीवयन्ति जीवयित्वा शुम्भन्ति कृपालुत्वं निर्मत्सरत्वादिभिरलङ्कारैः शोभयन्ति शोभयित्वा च पुनन्ति आविद्यकदोषात् पवित्रयन्ति व्यतिरेकमाह। या इति। तैर्गुणकर्मजन्मभिर्विरक्ता रहिता वाचः गुणालङ्कारादिमत्योऽपि शवशोभनाः शवान् शोभयन्तीति ताः प्रथमजीवतोऽपि तद्वक्तृश्रोत्रात्मकान् जनान् शवान् कुर्वन्ति तत उपमाद्यलङ्कारैरलंकारैरिव शोभयन्तीति शवशोभनाः सतां सम्मताः यद्यशः॥ ११-३३॥

गूढार्थदीपिनी

मुकुन्दस्य मुखं नूनं द्रक्ष्यामीत्यन्वयः। यतो मृगा मे प्रदक्षिणं गच्छन्ति। कथंभूतं मुखम्। स्मितसहितः अवलोको यस्मिन् अरुणकञ्जनवत् लोचने यस्मिन् तच्च। गुडालकैः वक्रकेशै आवृतम् च। ९॥ मनुजत्वं प्राप्तवतः विष्णोः लावण्यमूतः अपि यदि उपलम्भनं दर्शनं भविता भविष्यति तर्हि अञ्जसा साक्षात् मम दृशः फलं न स्यादिति न अपि तु स्यादेव। यद्वा विष्णोर्लावण्ययुक्तं यत् धाम वपुः तस्य॥ १०॥ असत्सतोः कार्यकारणयोः ईक्षिता ईक्षणमात्रेण कर्ताऽपि अहम् अहङ्कारेण रहितः। पुनश्च स्वेतजसा चिच्छक्त्या अपास्ताः निराकृताः तम आदयो येन सः एवंभूतोऽपि स्वमायया भक्तवात्सल्येन सदनेषु गोपीगृहेषु विहरन् तदीक्षया गोपीदृष्ट्या अभीयते आसक्तवत् प्रतीयते। कथंभूतः। आत्मन्येव रचितैः प्रकाशितैः प्राणाक्षधीभिः दिव्यविग्रहैः सहितः स व्रजे आस्ते इत्युत्तरेणान्वयः॥ ११॥ अखिलेति अखिलपापनिवर्तकैः यस्य गुणादिभिः तिमिश्रा वाचः जगत् प्राणिमात्रं प्राणन्ति जीवयन्ति सफलजीवनं कुर्वन्ति शोभयन्ति पुनन्ति च स व्रजे आस्ते इति योज्यम्। तद्विरक्ता याः शववत् शोभताः मताः॥ १२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शुभसूचकं दृष्ट्वा हृष्यन्नाह। द्रक्ष्यामीति। मृगाः मे मम प्रदक्षिणं यथा तथा प्रचरन्ति वै हेतौ अतो हेतोः नूनं निश्चितं मुकुन्दस्य मुखमहं द्रक्ष्यामि कथं भूतं शोभनौ कपोलौ नासिका च यस्मिन् तत् स्मितसहितोऽवलोको यस्मिन् अरुणकञ्जे इव लोचने यस्मिन् तच्च तच्च तत् गुडालकैः वक्रकुन्तलैरावृतम्॥ ९॥ फलवांश्चैव मे भव इत्येतत् प्रपञ्चयन् बहूनीतरजन्मानि निष्फलान्येव गतानीदं मनुष्यत्वं त्वद्य सफलं भविष्यतीत्याशयेनाह। अप्यद्य विष्णोरिति। अपि सम्भावनायाम् मनुष्यत्वमीयुषः

बहुषु नानाविधेषु निष्फलेषु जन्मसु गतेषु मनुष्यभावमीयुषः प्राप्नुवतः मह्यं मम निजेच्छया भुवो भारावतारायावतीर्णस्येति शेषः। लावण्यस्वाप्राकृतविग्रहसौन्दर्य्यस्य धाम आश्रयस्तस्य विष्णोः अद्य उपलम्भनं दर्शनं भविता भविष्यति एवं सति दृशो लोचनस्य फलं न न स्यादपितु स्यादेवेत्यन्वयः ॥ १० ॥ ननु विष्णोः सर्वत्र सतः सर्वत्र दर्शनं कुतो वा नन्दादिसदनेष्वेवेत्यत्राह। य इति। अहं रहितः प्रकृतिकार्यभूताहङ्कारोपलक्षितसर्वप्राकृतपदार्थविलक्षणः स्वतेजसा स्वप्रभावेण अपास्तं तमः संसारः असंसारित्वात् भिदा भेदः सर्वात्मत्वात् भ्रमः भ्रान्तिः सर्वज्ञत्वात् यस्मात् स जीवविलक्षण इत्यर्थः। असत्सतोः प्रकृतिपुरुषयोः ईक्षिता द्रष्टा सर्वकारणकारणः सर्वगो विष्णुर्द्रष्टा दृश्येन द्रष्टुमशक्य इत्यर्थः। तथापि स्वमायया स्वकृपया आत्मनि स्वविषये आत्मदर्शनार्थमित्यर्थः। प्राणाक्षधीभिः प्राणेन्द्रियबुद्धिभिः सह रचितैर्भावितैर्जीवैः सदनेषु नन्दालयादिषु तदीक्षया तद्दत्तया दृष्ट्या अभीयते प्रत्यक्षतोऽभिगम्यते इत्यर्थः। य इत्यस्य स चावतीर्ण इति वक्ष्यमाणेन पदेन सम्बन्धः ॥ ११ ॥ कृपया भावितैः प्रत्यक्षतोऽभिगम्यते इत्युक्तं तत्र तत्कृपालभ्येन तद्गुणकर्मजन्मप्रतिपादकशास्त्रश्रवणेन जीवाः भाविता भवन्तीत्याह। यस्येति पदस्य स चावतीर्ण इत्यनेन सम्बन्धः अखिलानां ब्राह्मणादिश्वपचान्तानाममीवानि पापानिघ्नन्तीत्यखिलामीवहानि तैः सुमङ्गलैः शोभनानि मङ्गलानि येभ्यस्तैः यस्य विष्णोर्गुणकर्मजन्मभिः विमिश्रा युक्ता वाचः वै निश्चितं जगत् प्राणन्ति जीवयन्ति शुम्भन्ति शोभयन्ति पुनन्ति यास्तु वाचः तैर्विष्णुगुणादिभिर्विरक्ता रहिताः तास्तु वस्त्राद्यलंकृतशववत् शोभमाना मता सम्मताः सतामिति शेषः ॥१२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मुकुन्दवदनं द्रक्ष्यामि न चेदेवं शकुनसम्पन्न स्यादित्याह ॥ द्रक्ष्यामीति। सुशोभने कपोलनासिके यस्य तत्स्मितावलोकेन सहिते अरुणकञ्जे इव विद्यमाने लोचने यस्य तद्गुडालकावृतं गुडवदिक्षुविकृतवतिनग्धैरलकैश्चूर्णकुन्तलैरावृतम्। गुडः स्याद्गोलके हस्तिसन्नाहेक्षुविकारयोरिति विश्वः। मृगादयः प्रदक्षिणं प्रचरन्ति ये गरुडादयस्ते प्रदक्षिणं प्रगतदक्षिणं वामभागमित्यप्यर्थः। यैर्यैर्यथा यथा गन्तव्यं ते तथा चरन्तीति भावोऽवसेयः ॥ ९ ॥ भुवो भारावताराय मनुजत्वं मनुष्यतामीयुषो गतवतो निजेच्छया स्वरूपभूतेच्छया लावण्यधाम्नः सौन्दर्याश्रयस्य मह्यं ममोपलम्भनं भविता दर्शनं भविष्यत्यद्यादरातिशयादुक्तिः। पृथक् पृथगन्वयो वा। मह्यं मम सदृशः फलं स्यान्ननु निश्चयः। समिति सामीचीन्यस्य योग्यतया फलपदार्थेऽन्वयः। दृशोरिति वक्तव्ये यद्दृश इत्युक्तं तेन ज्ञानस्यापि सफलतां सूचितवानिति। ननु स्यात्फलमञ्जसा दृश इत्यसदृशः पाठः ॥ १० ॥ स्वमाययाऽऽत्मन् रचितेषु तत्सन्निति श्लोके सन्विद्यमान इत्येतावताऽन्वयपूर्तौ तदित्यनावश्यकमित्वतोऽनूद्य तदर्थमाह ॥ तत्संस्तथैव सन्निति। तदित्यव्ययं तथैवाविकारेणैवेत्यर्थः ॥ ततश्चायं श्लोकार्थः ॥ योऽहमित्यहङ्कारवाच्यव्ययम्। अभिमानरहितो जन्तुभिरनुष्ठीयमानयोरसत्सतोरक्षुभशुभयोः कर्मणोः। यद्यपि सदसतोरिति वक्तव्यं तथाऽप्यसुरा बहुला यस्मादित्यादेस्तदसद्बाहुल्यादसत्पुरस्करणमिति मन्तव्यम्। स्वतेजसा स्वसामर्थ्येन। अनेन मुक्ताव्यक्तव्युदासः। अपास्तश्चाज्ञानभिदा चान्यथामतिस्ताभ्यां जातो यो भ्रमोऽनवस्थानं येन सं तमो ग्लानिर्भिदा गुणकर्मभेदो भ्रमश्चेत्येतेऽपास्ता येनेति वा तमश्चाभिदाभ्रमोऽभेदभ्रमश्च येनेति वाऽऽस्मन्नात्मनि स्वाधारत्वेन स्वमायया स्वेच्छया निमित्तभूतयोपादानभूतया प्रकृत्या च रचितेषु जन्तुषु तत्तथैवाविष्कृत एव सन्वर्तमानः प्राणादिभिः सहेक्षिता साक्षी चित्रधा नानात्मना भाति ॥ ११ ॥ यस्याखिलामीवहभिरिति श्लोके शुभ शुम्भभाषणे हिंसायां चेति धात्वनेकार्थताया अत्राभिप्रेतार्थोऽयं तथाऽन्तर्णीतणिजर्थ इति तदनूद्य व्यातनोति ॥ शुभन्ति शोभयन्तीति। तत्र प्रमाणं च पठति शुम्भनं शोभनं शुम्भं शुभं चेति शब्दाः पर्यायवाचका इत्यर्थः। शुभशम्भशोभार्थ इति मणिना शुम्भमाना इत्यृक्टीकाटिप्पणोक्तं चानुसन्धेयम् ॥ ततश्चायं मूलार्थः ॥ यस्यामीवहभिरमीवानि पापानि घ्नन्तीति तैः। अमीवेति गतम्। गुणाश्चानन्दादयश्च कर्माणि गजगर्जनमोचनादीनि प्रस्तुतानि च जन्मानि स्तम्भादित इति तैः सुमङ्गलैश्चिन्तयितृमङ्गलप्रदर्मिश्रा वाचः कृष्ण कृष्णाप्रमेयात्मन्नित्याद्या जगत्प्राणन्ति जीवयन्ति शुम्भन्ति शोभयन्ति शुभवत्कुर्वन्ति वा पुनन्ति पवित्रयन्ति। प्रसिद्धमिति वैकारो द्योतयति। यास्तद्विरक्ता गुणकर्मजन्मभिस्तै रहिताः अशोभना मताः ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं सर्वनिर्द्धारं कृत्वा व्रजन् शकुनं दृष्ट्वा प्रोत्साहने इष्टरूपं दर्शनं भविष्यतीत्याह। द्रक्ष्यामीति। यतो मृगाः दक्षिणं प्रचरन्ति अतो नूनं द्रक्ष्यामि कंसभृत्यत्वात् भगवान् न सम्मुखो भविष्यतीत्याशङ्क्य मुखारविन्दमेव द्रक्ष्यामीत्याह। मुखमिति। तथापि क्रुद्धः कदाचिद्भवेत् अपकारं वा विचारयन् तिष्ठेत् तदा कपोलौ नासिका च वक्रा विषमा च भवेत्तन्निवारणार्थमाह। सुकपोलनासिकमिति। सुष्ठु कपोलौ नासिका च यस्मिन् इति भक्तिः तद्रसश्च निरूपितौ ननु तथाप्यपकारार्थं समागच्छन्तं कथमङ्गीकुर्यात् तत्राह। स्मितावलोकारुणकञ्जलोचनमिति स्मितमल्पहासस्तेन ज्ञानेऽर्द्धव्यामोहस्तेनैव व्यामोह इति न ममापराधः युक्तार्थं चैतत्कृतवानिति ज्ञानाधारभूतक्रियायामरुणकमलसादृश्यं निरूपितम् अक्ष्णोररुणता युद्धं सूचयति। मुखदर्शनेन सर्वं फलं सेत्स्यतीत्याह। मुकुन्दस्येति। ननु वादिविप्रतिपत्त्या कथम्भगवानेवं मुखदर्शनेनैव मोक्षं प्रयच्छति इति चेत् तत्राह गुडालकावृतमिति। अलकाः तत्त्वविद इति पूर्वं निरूपितं ते चेत्कुण्डलाकाराः सर्व एव कुण्डलाकाराः प्रपन्नाः तेच पुनर्मात्सर्यं परित्यज्य

सर्वे सम्भूय भगवन्तमाश्रयन्ति तदा न विवाद इति गुडशब्देन परावर्त्तनमुच्येत सर्वतः प्रसरणस्वभावाः पिण्डीभावं प्राप्नुवन्तीति प्रकर्षो यथाभिलषितार्थः मदिच्छयैव वा तथा भवन्तीति मदर्थमेव शकुनं कुर्वन्तीति ज्ञायते प्रकर्षेण च चरन्ति नतु पलायन्ते अयमुक्तः सर्वोऽप्यर्थः न सन्दिग्धो नापि भ्रान्तिप्रतिपन्न इति वै निश्चयेनेत्युक्तम् ॥ ९ ॥ एवं शकुनेनापि दर्शनन्निर्द्धार्य अद्यैव भविष्यतीति मनोरथं करोति। अपीति। दुर्लभं दिनमेतदिति सम्भावना विभूतिर्भविष्यतीत्याशङ्क्याह। विष्णोर्मोक्षदातुः लीलया मनुष्यत्वमीयुषः स्वीकृतवतः उपलम्भनं भविता एतदपि किंसम्भावितमिति प्रयोजनमाह। भारावताराय भुव इति। तत्रापि नियतं हेतुमाह। निजेच्छयेति। भक्तानां ब्रह्मादीनामिच्छया फलदानं कालान्तरेऽस्तु मा वा इदानीमेव दर्शनमात्र एव परमानन्द इति तदर्थमाह। लावण्यधाम्न इति। सौन्दर्यमात्रस्यैव स्थानभूतस्य उपलम्भनं निकटे दर्शनं यदि भविष्यति तदा मह्यमेव भविष्यति मदर्थमेव मम दृशः दृष्टीनामञ्जसाफलञ्च भविष्यति आत्मा तु मुक्त एव भविष्यति न संदेहः जन्मापि सफलं भविष्यति इन्द्रियाणां साफल्यात् ॥ १० ॥ एवं शीघ्रदर्शनं सम्भाव्य अवतारे अन्यधर्मसम्बन्धमाशङ्क्य तथा सति सर्वमेवान्यथा भविष्यतीति तन्निवृत्त्यर्थं भगवति प्रापञ्चिकधर्मसम्बन्धाभावमाह। य ईक्षितेति। भगवतोऽन्यधर्मसम्बन्धः अहङ्कारे गुणेषु तत्कार्ये चेन्द्रियादौ वर्त्तमाने भवति अहङ्कारादीनां तु कार्यं दृश्यमानमपि स्वरूपेणैव भवतीति न भगवतोऽन्यधर्मसम्बन्धः तत्र प्रथममहङ्काराभावेऽपि तत्कार्यमाह। अहंरहितोऽपि असत्सतोर्य ईक्षिता द्रष्टा लौकिकः साहङ्कारो भवति इन्द्रियेष्वहमध्यासव्यतिरेकेण द्रष्टृत्वाभावात् ममतायां वा तथा त्वे वैदिकातिरिक्तसिद्धान्तेषु स्मार्त्तेषु पौराणिकेष्वपि अध्यासो मूलमिति ममतापक्षेऽप्यहङ्कारापेक्षा भगवांस्तु आनन्दमात्रकरपादमुखोदरादिरिति चक्षुषश्चक्षुरिति अहंरहितोऽपीक्षिता भवति अनेन भगज्ज्ञानं निर्विषयमेवेत्युक्तं दीपवदेव सर्वं प्रकाशयति तदा विषयदोषसम्बन्धाभावात् सतः असतश्चापीक्षिता भवति कार्यकारणयोर्वा सत्यञ्चानृतञ्चेतिश्रुतेः कार्यमेव सर्वं गुणकृतदोषसंबन्धाभावमाह। स्वतेजसेति। भगवत्तेजसैव अपास्ता दूरीकृताः तमस्तामसमज्ञानं भिदा भेदस्तत्कृतो राजसः ततो भ्रमः सात्त्विकोऽपि विश्वप्रतीतिरूपः नहि तमसि दूरीकृते तत्कृतचोरभयादयो वा सम्भवन्ति भगवतीन्द्रियादिसम्बन्धप्रतीतिर्माययैव न वस्तुत इत्याह। स्वमाययेति। स्वाज्ञाकारिणी या सर्वभवनसमर्था माया तया कृत्वा आत्मनि स्वस्मिन्नेव रचितैः प्राणाक्षधीभिः प्राणेन्द्रियान्तः करणैः सहितेषु सर्वेष्वेव देहेषु गृहेषु अभीयते प्रकाशते भगवान् स्वाधीनया स्वकीयानां देहेन्द्रियान्तरः कणानिप्रतीयन्ते तेष्वात्मप्रतीतिसिध्यर्थमात्मनि रचितैः तेष्वात्मप्रतीतिर्भवत्विति वस्तुतः सर्वत्रायमेव प्रतीयते यत्रान्यत्रापि स्थितो भगवान् न तद्धर्मैर्युज्यते तदा केवलः कथं युक्तो भवेत् अन्यत्रापि ते सर्वे धर्माः भगवदिच्छयैव भगवद्रूपाः माययान्यथा प्रतीयन्ते तत्र भगवत्येव किंवक्तव्यम् अथवा लोकप्रतीत्यर्थं सदनेषु गोपिकागृहेषु यथा भगवानतत्रत्योऽपि तत्रत्य इव प्रतीयते एवं प्राणाक्षधीभिः सहितोऽप्यधीयते आत्मस्थान एव मायया तथा प्रतीत्युपपत्तेः उभयोस्तुल्यत्वात् न दृष्टान्तभाव उक्तः अर्थतस्तु साधनीयं द्वयमपि विमर्शेत्वयमेवात्मा सर्वत्रेति कस्य दोषेणायं संयुक्तो भवेदित्यर्थः ॥ ११ ॥ किञ्च यदि भगवति केनाप्यंशेन प्राकृतधर्मसम्बन्धः स्यात् तदा भगवद्गुणनामादिकीर्त्तने कस्यापि पापक्षयो न स्यादित्यभिप्रायेणाह। यस्याखिलामीवहभिरिति। अखिलानामेव अमीवानि पापानि घ्नन्तीत्यमीवहानि भगवन्नामानि न केवलं पापनाशकानि किन्तु सुष्ठु मङ्गलजनकानि तैर्विमिश्रिताः अन्यदीया अपि वाचः गुणाः सत्यादयः कर्माणि गोवर्द्धनोद्धरणादीनि जन्मानि देवकीपुत्रादीनि सर्वेषां सर्वाण्येव पापनाशकानि अत एव या वाच एतद्युक्ताः ताः प्राणन्ति जीवन्ति वाचः प्राणरूपाः भगवद्गुणा इति शुम्भन्ति शाभनयुक्ताः पुष्टा भवन्ति ततः सानुभावा अपि भवन्ति जगत्पुनन्तीति यथा देह प्राणाः अन्नं धमश्च एवं वाचि भगवद्गुणजन्मकर्माणि तथैव मनस्यपि त्रयो ज्ञातव्याः मनः पूर्वरूपं वागुत्तररूपमिति श्रुतेः न पृथगुभयोर्निर्द्देश उक्तः आधिक्यपरं भविष्यतीति सिद्धे साध्यवाक्यं तदाधिक्यं बोधयतीति न्यायात् इत्याशङ्क्य विपरीते बाधकमाह। यास्तद्विरक्ता इति। यथा शवानां शोभो वस्त्राभरणैः क्रियते तथाप्यमङ्गलरूपैव प्राणाभावात तत्पोषकान्नाभावात् प्राणकार्यधर्माभावाच्च अतो भगवति शतांशेनापि प्राकृतधर्मसंबन्धो भवेत् तदैतन्न स्यादिति भावः ॥ १२ ॥

श्रीसुबोधिनी–सारः

सुष्ठु कपोलौ नासिका यस्मिन् तत्। स्मितयुक्तोऽवलोको यस्मिन्। अरुणे रक्ते कञ्जवल्लोचने यस्मिन् तत्। गुडैर्वक्रैरलकैः केशैरावृतं मुकुंदस्य मुखमहं द्रक्ष्यामि। नूनमेव मृगा मे प्रदक्षिणं विचरन्ति वै ॥९॥ भुवो भारावतारणाय स्वेच्छया मनुजत्वं नरत्वमीयुषो दधतो लावण्यस्य चातुर्यादिकलावणस्य धाम्नो आश्रयस्य विष्णोरुपलम्भनमालिंगनं दर्शनं वा मह्यं भविष्यति। दृशो नेत्रस्य फलमञ्जसा सुखेन न स्यात् इति न, अपि तु भवेदेव ॥ १० ॥ सदसतोः कार्यकारणयोर्य ईक्षिता सन्निधिमात्रेण प्रेरकोऽहंकारहीनः स्वतेजसाऽपास्ता निरस्ताः तमोऽज्ञानं भिदा भेदो भ्रमोऽभिनिवेशस्ते येन सः स्वमाययाऽऽत्मन् आत्मनि रचितैः प्राणाक्षधीभिः प्राणेन्द्रियबुद्धिभिर्यः सदनेषु स्थानेषु वृंदावनादिषु अभीयते प्रतीयते तस्यैवेक्षयाऽऽलोचनात्मकतपसा ॥ ११ ॥ अमीवं पापं सर्वपापहन्तृभिः सुमंगलैर्गुणजन्मकर्मभिर्विमिश्रा युक्ता यस्य वाचो जगत् प्राणन्ति जीवन्ति शुभन्ति शोभयंति पुनन्ति पवित्रयन्ति तैर्विरक्ता रहिता या वाचः काव्यालंकारयुक्ता अपि शववत् मृतकवत् शोभना मताः ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदानीमेव शुभसूचकं शकुनमिति दृष्ट्वा मनोरथपूर्तिं निश्चिनोति—द्रक्ष्यामीति। प्रसिद्धिं द्योतयन्नाह—वै इति। यतो मृगा मे मम प्रदक्षिणं यथा भवति तथा प्रचरन्ति गच्छन्ति ततो नूनं निश्चितं नात्र सन्देहः, शोभनौ कपोलौ तथाभूता नासिका च यस्मिंस्तत्। स्मितसहितः अवलोकश्च यस्मिन् अरुणे कञ्जवल्लोचने यस्मिंस्तच्च तच्च गुडालकैर्वक्रकेशैर्वृतं मुकुन्दस्य संसारविमुक्तिप्रदस्य कृष्णस्य मुखं द्रक्ष्यामीत्यन्वयः॥ ९॥ पुनरन्यच्चिन्तयति—अप्यद्येति। भुवो भारावताराय निजेच्छया मनुजत्वमीयुषोर्मनुष्यनाट्यं स्वीकृतवतो लावण्यस्य सौन्दर्यातिशयस्य धाम्नः आश्रयस्य विष्णोरपि यदि अद्य उपलम्भनं दर्शनं भविता भविष्यति तर्हि मह्यं मम दृशो लोचनस्य फलं न स्यादिति न अपि तु स्यादेवेत्यर्थः॥ १०॥ य ईक्षितेत्यादिचतुर्णामेकं कुलकम्। तत्रैवं शङ्का —ननु 'अस्मदादिवदेव कर्तृत्वभोक्तृत्वादिधर्मैस्तत्र तत्र प्रतीयमानस्य कथं विष्णुत्वम्?' इतीमां शङ्कां श्लोकत्रयेणापाकुर्वन् चतुर्थेन तमहं द्रक्ष्यामीति मनोरथं करोति-यः सदसतोः कार्यकारणयोः ईक्षिता—ईक्षणमात्रेण कर्तापि अहंरहितः तत्राहंममाभिमानरहितः। तत्र हेतुमाह—स्वतेजसा सच्चिदानन्दस्वरूपप्रकाशेनैवापास्ताः तमोभिदाभ्रमा येन सः। तमः स्वरूपाज्ञानं, भिदा तत्कृतो भेदः, भ्रमः अनात्मन्यात्मबुद्धिः। एवंभूतोऽपि सदनेषु गोपीगृहवृन्दावनादिषु विहरंस्तदीक्षया तेषां जीवानां दृष्ट्या स्वमायया स्वेच्छया आत्मन् आत्मनि स्वस्मिन् रचितैः प्रकाशितैः प्राणादिभिर्युक्तोऽस्मदादिवदभीयते प्रतीयते॥ ११॥ ननु 'सर्वथाऽहङ्कारादिरहितस्यात्मारामस्य अवतारो विहारो वा कुत' इत्याशङ्क्य 'परानुग्रहार्थ एव' इत्याशयेनाह—यस्येति द्वाभ्याम्। यस्य भगवतो गुणादिभिर्विमिश्रा युक्तास्तत्प्रतिपादिका वाचो जगत् वक्तृश्रोत्रादिप्राणिमात्रं प्राणन्ति जीवयन्ति सफलजीवनं कुर्वन्ति, शुम्भन्ति सज्जनसभासु शोभयन्ति, पुनन्ति पवित्रयन्ति। 'नात्र सन्देह' इति सूचयन्नाह—वै इति। तत्र गुणाः कृपालुत्वादयः, कर्माणि गोवर्धनोद्धरणादीनि, जन्मानि रामकृष्णादीनि। पवित्रीकरणे हेतुमाह—अखिलानि यान्यमीवानि वक्त्रादीनां पापानि तानि घ्नन्तीति तथा तैरिति। शोभादिकरणे हेतुमाह—सुमङ्गलैरिति। शोभनानि मङ्गलानि धर्मादिपुरुषार्था वक्त्रादीनां येभ्यस्तैः। विपक्षे दोषमाह—या इति। या वाचस्तैर्भगवद्गुणादिभिर्विरक्तास्तत्प्रतिपादनरहिताः तास्तु विचित्रैः पदैः रागादिभिश्च स्वलङ्कृता अपि वस्त्राद्यलङ्कृतशववच्छोभमाना मताः सतां सम्मताः। यथा शवालङ्कारवस्त्रादिदर्शनग्रहणाद्यधिकारिणो नीचा एव नोत्तमास्तथा भगवद्यशोव्यतिरिक्तप्रतिपादना वाक् श्रवणाद्यधिकारिणोऽपि विषयाविष्टचित्ता नीचा एव, नोत्तमा इति ज्ञेयम्॥ १२॥

अन्वितार्थप्रकाशिका

द्रक्ष्यामीति॥ वै प्रसिद्धौ। यतो मृगा मे मम प्रदक्षिणं यथा भवति तथा प्रचरन्ति गच्छन्ति ततो नूनं निश्चितं नात्र संदेहः। "प्रदक्षिणगताः श्रेष्ठा यात्रायां मृगपक्षिणः" इत्युक्तेः। शोभनौ कपोलौ तथाभूता नासिका च यस्मिंस्तत् स्मितसहितः अवलोकश्च यस्मिन् अरुणे कञ्जे इव लोचने यस्मिंस्तच्च गुडालकैर्वक्रकेशैर्वृतं मुकुन्दस्य मुखं द्रक्ष्यामि॥ ९॥ अप्यद्येति॥ भुवो भारावताराय निजेच्छया मनुजत्वमीयुषो मनुष्यनाट्यं स्वीकृतवतो लावण्यस्य सौन्दर्यातिशयस्य धाम्नः आश्रयस्य विष्णोः यद्वा विष्णोर्लावण्ययुक्तं यद्धाम वपुस्तस्य अपि यदि अद्य उपलम्भनं दर्शनं भविता भविष्यति तर्हि मह्यं मम दृशो लोचनस्य फलं न स्यादिति न अपि तु स्यादेव॥ १०॥ अथ श्रीकृष्णस्य परमेश्वरत्वं त्रिभिः प्रतिपादयति-य इति॥ यः असत्सतोः कार्यकारणयोः ईक्षिता ईक्षणमात्रेण कर्त्तापि अहंरहितः तत्राहंममाभिमानरहितः स्वतेजसा चिच्छक्त्या सच्चिदानन्दस्वरूपंप्रकाशेनैवापास्ताः तमोभिदा भ्रमा येन सः तमोमूलाविद्याद्यं स्वरूपाज्ञानं भिदा तत्कृतो भेदः भ्रमः अनात्मन्यात्मबुद्धिः एवंभूतोऽपि सदनेषु वृन्दावनतरुषु गोपीगृहेषु च विहरंस्तदीक्षया तेषां जीवानां दृष्ट्या स्वमायया आत्मन् आत्मनि स्वस्मिन् रचितैः प्रकाशितैः प्राणक्षधीभिर्युक्तोऽस्मदादिवदभीयते प्रतीयते। अत्रार्थे रचितैरिति सामान्ये नपुंसकमार्षं वा। यद्वा। एवंभूतोऽपि स्वाधीनया मायया तदीक्षया तस्यैव ईक्षया प्राणाक्षधीभिः सहितैः आत्मन् आत्मनि स्वस्मिन्नेव रचितैः जीवैः सदनेषु गोपीगृहादिषु लीलाया कर्माणि कुर्वन् सक्तवत् अभीयते प्रतीयते। यद्वा। स्वीयया आत्मनि जीवेऽधिकरणे रचिताः सृष्टा याः प्राणेन्द्रियधियस्ताभिस्तासां स्रष्टा सः अभीयते अनुमीयते। तथा तदीक्षया तासां प्राणादीनामीक्षया प्रकाशेन तासां प्रकाशकः सः सदनेषु समष्टिव्यष्टिदेहेषु वा अनुमीयते॥ ११॥ यस्येति॥ अखिलानि अखिलानां वा अमीवानि पापानि घ्नन्ति तैः अखिलामीवहभि सुमङ्गलैः यस्य भगवतो गुणैर्दयाद्यैः कर्मभिगोवर्द्धनोद्धरणादिभिः जन्मभिरवतारैः विमिश्रा युक्तास्तत्प्रतिपादिका वाचो जगत् वक्तृश्रोत्रादि प्राणिमात्रं प्राणन्ति जीवयन्ति सफलजीवनं कुर्वन्ति शुम्भन्ति सज्जनसभासु शोभयन्ति पुनन्ति पवित्रयन्ति। या वाचः तैर्भगवद्गुणादिभिर्विरिक्ताः शून्यास्तत्प्रतिपादनरहिताः। विरक्ता इति वा पाठः। तास्तु विचित्रैः पदैः रागादिभिश्च स्वलङ्कृता अपि वस्त्राद्यलङ्कृतशववच्छोभमाना मताः संमताः। यथा शवो व्यर्थः अशोभनः अपवित्रश्च तद्वत्ता इति १२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अन्यमनोरथमाह द्रक्ष्यामीति समीचीनाः कपोलनासिका यस्मिन् तत् स्मितेन ईषद्धास्येन युक्तः अवलोको यस्मिन्। अरुणे पद्मतुल्ये लोचने यस्मिन् तत् तच्च तच्च तत् गुडालकैः कुटिलकेशैः आवृतं मुकुंदस्य मुखं नूनं निश्चयेन द्रक्ष्यामि कुतो यतः

मृगाः मे प्रदक्षिणं प्रचरन्ति गच्छन्ति ॥ ९ ॥ इदानीं सर्वांगदर्शने मनोरथं कुर्वन्नाह अपीति ईयुषः प्राप्तस्य लावण्यानां सौन्दर्याणां धाम भूमिस्तस्य विष्णोः अद्य उपलम्भनं दर्शनं भविता मे भविष्यति अपि यद्येवं भवेत्तदा मह्यं मम दृशो नेत्रस्य फलं न स्यादिति न अपि तु स्यादेवेत्यर्थः ॥ १० ॥ अद्य श्रीकृष्णस्य माहात्म्यं वर्णयन्नाह य ईक्षितेति चतुर्भिः कुलकं ननु मनुष्यत्वेन दृश्यमानस्य कथं विष्णुत्वमिति इमं संदेहं त्रिभिः श्लोकैर्निवर्त्तयन् चतुर्थेन तमहं द्रक्ष्ये इति मनोरथं करोति तदाह य इति असत्सतोः असन् अचेतनवर्गश्च सन् चेतनवर्गश्च तयोः ईक्षिता साक्षात्द्रष्टा तथापि अहं रहितो द्रष्टृत्व गर्वहीनः स्वतेजसा निजैश्वर्येण स्वाश्रितानां जीवानां अपास्ताः निरस्ताः तमोऽज्ञनं च भिदादेव मनुष्यादि प्राकृतभेदश्च भ्रमोदुःखात्मकशब्दादौ सुखबुद्धिश्च येन सः यो नारायणोऽस्ति तदीक्षया तस्य हरेः ईक्षा ईक्षणं यस्यां तया स्वमायया स्वकीयया त्रिगुणरूपया प्रकृत्या आत्मन् आत्मनि जीवसमूहे रचितैः प्राणेन्द्रियान्तःकरणैः कृत्वा जनैः स एव श्रीकृष्णः सदनेषु गोपिकादीनां गृहादिषु अभीयते प्रत्यक्षं प्राप्यते ॥ ११ ॥ यस्य कृष्णस्य अखिलानि अमीवानि पापानिघ्नन्तीति तथाभूत्तैः गुणादिभिः विमीश्राः युक्ताः वाचो वचनानि जगत् विश्वं प्राणन्ति जीवयन्ति शुभन्ति शोभयन्ति तैर्विरक्ताः हीनाः काव्यरचनायुक्त्यलंकृता अपि वस्त्राद्यलंकृतशबलवत् शोभमानाः मताः महद्भिः संमताः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

द्रक्ष्यामीति । नूनं अहं मुकुन्दस्य सु शोभनौ कपोलौ नासिक च यस्मिंस्तत्, स्मितसहितोऽवलोको यस्मिन् अरुणे रक्तवर्ण कञ्जवल्लोचने यस्मिंस्तच्च तच्च तथाभूतं, गुडालकैर्वक्रकेशैः, आवृतं मुखं, द्रक्ष्यामि नूनम् । तत्सूचकं शुभं दृष्ट्वा हृष्यन्नाह । अमी मृगाः, मे मम, प्रदक्षिणं, प्रचरन्ति गच्छन्ति वै ॥ ९ ॥ पुनरप्यन्यच्चिन्तयति । अप्यद्येति ॥ भुवः पृथिव्याः भारावताराय भारापनोदनाय, निजेच्छया न तु कर्मणा, मनुजत्वं मनुष्यभावं, ईयुषः प्राप्तवतः, लावण्यधाम्नः निरतिशयलावण्याश्रयस्य, विष्णोः श्रीकृष्णस्य, उपलम्भनं दर्शनं, अद्य अधुनैव, भविता भविष्यति । अपि यद्येवं स्यात्तर्हीत्यर्थः । मह्यं मम, दृशो लोचनस्य अञ्जसा आशु, फलं अव्यवहितं फलं न स्यादिति न । अपि तु स्यादेवेत्यर्थः । द्वौ नञौ प्रकृत्यर्थमनुसरतः ॥ १० ॥ पूर्वश्लोके मनुजत्वमीयुषो विष्णोरित्युक्तं तदेव मनुष्यत्वमीयुष कथं विष्णुत्वमिति चेन्मनुष्यत्वभागेव दिव्यत्वभाक् दिव्यत्वयुक्त एव मनुष्यत्वभाक् सोऽस्तीति हृदि निधाय भगवन्माहात्म्यमाह चतुर्भिः ॥ य इति ॥ असन्नाऽचिद्वर्गश्च सञ्चिद्वर्गश्च तयोः, चेतनाचेतनात्मकप्रकृतिपुरुषयोरित्यर्थः । ईक्षिता 'स ऐक्षत' इति श्रुतेः साक्षात् द्रष्टा सन्नपि, अहं रहितः द्रष्टृत्वाभिमानवर्जितः, स्वतेजसा स्वैश्वर्येण, अपास्ताः निरस्तास्तमोभिदाभ्रमाः यस्य सः, तत्र तमोऽज्ञानं, भिदा स्वस्मिन् देवत्वमनुष्यत्वादिप्राकृतो भेदः, भ्रमो दुःखात्मके शब्दादौ विषये सुखबुद्धिः, एवं भूतः यो विष्णुः, स विष्णुः, तस्य ईक्षा ईक्षण यस्यां तया, स्वमायया स्वशक्तिभूतया प्रकृत्या, आत्मन् गोपगोपीजनानामात्मस्वित्यर्थः । रचितैः सृष्टापितैः, प्राणाक्षधीभिः प्राणेन्द्रियबुद्धिभिः करणैः, युक्तैर्गोपीजनादिभिः कर्तृभिरिति शेषः । सदनेषु वृन्दावनतरुषु स्वस्वगृहेषु च, अभीयते लीलया कर्माणि कुर्वन् संसक्तवत् प्रत्यक्षतयेक्षणादिविषयः क्रियते इत्यर्थः ॥ ११ ॥ यस्येति ॥ अखिलानां पठतां शृण्वतां च सकलजनानाममीवं पापं घ्नन्तीति तैः, सुमङ्गलैः निरतिशयश्रेयस्करैः, यस्य भगवतः, गुणाश्च कर्माणि जन्मानि च तैः, तत्र गुणा वात्सल्यसौशील्यसालभ्यादयः, कर्माणि जगद्व्यापारप्रभृतीनि हि चेष्टितानि, जन्मानि रामकृष्णहरिकृष्णप्रभृतीनि, विमिश्रा गुणादिभिर्युक्ता इत्यर्थः । वाचो गिरः, जगत् विश्वं, प्राणन्ति जीवयन्ति । शुभन्ति शोभयन्ति । अन्तर्भावितण्यर्थावेतौ धातू । शुभन्तीत्यत्र गुणाभावः परस्मैपदभावश्चार्षः पुनन्ति च वै । या वाचः, तद्विरक्ताः भगवद्गुणादिप्रतिपादनरहिताः, ताः पदलावण्यार्थलावण्ययुक्ताः सत्योऽपि इति शेषः । शवशोभनाः वस्त्राद्यलंकृतशववच्छोभनाः, मता ज्ञाताः विभूषितशवकल्पा अभिमता इति भावः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

द्रक्ष्यामीति : १०.३८.९.

यान् श्रीशोऽनिशमीक्षते स्वरमणीचञ्चत्कटाक्षेक्षितान् ये वा श्रीशमशङ्कितेन मनसा पश्यन्त्यवश्येन्द्रियाः ।
तेऽमी फुल्लदृशः कुरङ्गशिशवः पश्यन्त एवादराद् यद्गच्छन्ति भृशं प्रदक्षिणतया स्पष्टं मदिष्टं ततः ॥ १० ॥

यस्येति : १०.३८.१२.

यल्लीलायितजन्म-कर्म-गुणभृद्वाग्लोकसिद्धाप्यहो निःसीमं शुभमाश्वतैव तनुते तं त्वद्य साक्षादहम् ।
द्रक्ष्याम्यत्र पदाम्बुजे निजशिरो धास्यन् वचोऽगोचरं लप्स्याम्यच्युतदेहसङ्गजसुखं शिष्टं किमिष्टं ततः ॥ ११ ॥
चन्द्रस्तापोपशान्तौ मिहिर इव तमोऽपाकृतौ दोषनाशे वैद्यो रक्षोविनाशे रघुरवजलधिप्राशने द्रागगस्त्यः ।
कल्पः स्वेष्टप्रदाने नयनसुखकरो मित्रवत्पात्रभूतः पूर्णानन्दस्य नन्दव्रज इह भविता दृक्चरोऽस्म्यद्य धन्यः ॥ १२ ॥
चतुरागमवेदिनोऽपि धातुर्यदलभ्यं किल पद्रजो मुरारेः । तदहो सुलभं किरातजातेः किमु धन्येयमधन्य एव वासः ॥ १३ ॥

रूपाण्यादाय तत्तत्तरुमृगपतगाम्भश्चराणां समन्तात् सोत्साहा अभ्यतिष्ठन् सुरमुनिनिकरास्तद्विदाऽधोक्षजेन ।
आहूता नामभिः स्वैर्व्रजभुवि बहुशस्तेन मन्ये तदानीं नो चेत्तन्नामधेयैर्व्यवहृतिरवनावेषु कस्मात् प्रसक्ता ।। १४ ।।
देशोऽयं श्रीशपादाम्बुजकलितरजोराजिसाम्राज्यशोभो देशोऽयं श्रीशहस्ताकलितसुमलताद्यागमोद्भास्यमानः ।
देशोऽयं श्रीशरत्युत्सुकयुवतिकृता-ऽनेकपुष्पाल्पतल्पो देशोऽयं श्रीशकेलिश्रितसितसिकतालङ्कृतः संविभाति ।। १५ ।।
भूभागोऽयमलङ्कृतः सरलित-द्रुप्रान्तहिन्दोलकैः स्वाच्छन्द्यदनुकल्पितैरभिनवैर्नानाविधैः क्रीडनैः ।
भूभागोऽप्ययमूर्जितस्तरुदलै-राभुक्तदध्योदनस्वल्पानेककणैः प्रतिक्षणमहो वातागमोद्गामिभिः ।। १६ ।।
न तादृग् भूभागो य इह हरिपादाब्जरहितो न तादृग् वा वृक्षो हरिकरमृदुस्पर्शविकलः ।
न वा तादृग् जन्तुर्हरिसदयवीक्षा-विरहित-स्तदेतेषां भाग्यं युगपदुपलब्धं कथमहो ।। १७ ।।
यस्मिन् क्रीडितमिन्दिराधिपतिना देशः स धन्यो न किं ते वा धन्यतराः कथं न तरवो येषां फलेप्सुः प्रभुः ।
ते वा धन्यतमाः कथं न हरिणा भुक्तं त्वहो यैः समं धन्याद् धन्यतराच्च धन्यतमतोऽप्यद्यास्मि धन्यो न किम् ।। १८ ।।
अत्रेमे पृथुनलभूभृतो विभान्ति नाना-सद्द्विजकलिताऽऽगमोपदेशाः ।
देशेऽस्मिन् बहुमुनयस्तपस्विनोऽपि तन्मन्ये हरिचरणाप्तिरेव हेतुः ।। १९ ।।
धन्यास्ते किल केकिनो जितघनां पश्यद्भिरैशीं तनुं यैरालक्षि न लास्यकर्मणि निजेऽनध्यायकालः क्वचित् ।
धन्यास्तेऽपि चकोरकाश्च पिबतां तद्वक्त्रचन्द्रद्युतिं येषां नोदयमागता हृदि मनाग्राकाऽमयोर्भेदधीः ।। २० ।।
भो भोः पक्षिगणः सदागमजुषः श्रुत्यर्थवाचोऽखिलान् युष्मानेष विशेषतोऽतिकृपणोऽक्रूरोऽहमभ्यर्थये ।
यूयं चाप्युपदेशिनोऽहमपि वोऽन्तेवासितामागतस्तन्मे तं कुरुतोपदेशमतनुश्रीयः श्रुतः श्रीपतेः ।। २१ ।।
पादाम्भोजजुषां प्रणम्रवपुषां सत्सङ्गमासेदुषां नामानन्दपुषां जिताखिलरुषां तत्त्वोल्लसच्चक्षुषाम् ।
रूपारूपनिरूपणेष्वविषयोऽप्यग्रे सतां मूर्तिमान् श्रीशः सञ्चरतीत्यहं किमधुना स्यां वा तदन्तर्गतः ।। २२ ।।
यत्त्यक्ता दृषदात्मता पदरजो लब्ध्वा पुनर्दुर्लभं स्यादेवेत्यविभाव्य मुन्यबलया नैतत्कृतं साध्विति ।
आलोच्यैव शिला मुहुर्मुहुरिमास्तद्रूपतोऽवस्थिता मन्ये तत्पुनराप्तये त्वितरथा तच्चैतदेकं रजः ।। २३ ।।
विध्वस्ताखिलपातकैर्बहुतप-शुद्धान्तरङ्गैरपि दुष्प्राप्यः सकृदेव यः किल करस्पर्शः स लक्ष्मीपतेः ।
यत्पृष्ठोदरकन्धरं प्रतिपदं प्रत्यङ्गमेवाप्यते गोभिस्तद्विधिवर्णने विधिरपि स्याद्वा समर्थः क्वचित् ।। २४ ।।
यन्नाभ्युद्भवपद्मभूरपि तपःसिद्धोऽपि यस्य प्रभोः शुश्रावैकमगोचरस्य च तपेत्येवोक्तवर्णद्वयम् ।
क्रीडाकौतुकिभिः सगोपशिशुभिः साकं रमानायको ब्रूते स्वैरमहर्दिवं तदिह ते कस्याधिकेऽन्या न वै ।। २५ ।।
व्याबालस्थविरं जना इह गताः श्रीशाल्लभन्ते सुखं यादृक् श्रीपतिरप्यनन्तगुणितं प्राप्नोति तेभ्यस्ततः ।
एतत्पुण्यफलं किमच्युतपदावासोऽत्र किं वा प्रभोरस्यैवातुलपुण्यमूर्तय इमे नैतत्तु निर्णीयते ।। २६ ।।
कुण्ठोऽष्टश्रुतिरप्यनष्टमतिरप्यष्टादशालोकने षट्तत्त्वार्थविवेचने च चतुराम्नायेषु यत्राजनि ।
कर्तुं तद्व्रजवासिभाग्यगणनासीमां समीहेत यः स स्वस्फीतिशिरोऽवधूननकृते वन्ध्यासुतं वाञ्छतु ।। २७ ।।
कस्मादीशो वशीभूतः कस्मात्तैर्वा वशीकृतः । इत्यन्योन्यविवेक्तारावुभौ तावेव नेतरे ।। २८ ।।

कृष्णप्रिया

मैं अवश्य-अवश्य उनका दर्शन करुँगा । मरकतमणि के समान सुस्निग्ध कान्तिमान् उनके कोमल कपोल हैं, तोते की ठोर के समान नुकीली नासिका है, होंठो पर मन्द-मन्द मुस्कान, प्रेम भरी चितवन, कमल-के समान कोमल रतनारे लोचन और कपोंलों पर घुँघराली अलके लटक रही हैं । मैं प्रेम और मुक्ति के परम दानी श्रीमुकुन्द के उस मुख कमल का आज अवश्य दर्शन करुँगा । क्योंकि हरिन मेरी दायीं ओर से निकल रहे हैं ।। ९ ।। भगवान् विष्णु पृथ्वी का भार उतारने के लिये स्वेच्छा से मनुष्य की—सी लीला कर रहे हैं । वे मम्पूर्ण लावण्य के धाम हैं । सौन्दर्य की मूर्तिमान निधी हैं । आज मुझे उन्हीं का दर्शन होगा ! अवश्य होगा ! आज मुझे सहज में ही आँखों का फल मिल जायेगा ।। १० ।। भगवान् इस कार्य-कारण-रूप जगत के द्रष्टापात्र है, और ऐसा होने पर भी द्रष्टापन का अहङ्कार उन्हें छूतक नहीं गया हैं । उनकी चिन्मयी शक्ति से अज्ञान के कारण होने वाला भेदभ्रम अज्ञान सहित दूर से ही निरस्त रहता है । वे अपनी योग माया से ही अपने-आप में भ्रूविलासमात्र से प्राण, इन्द्रिय और बुद्धि आदि के सहित अपने स्वरूप-भूत जीवों की रचना कर लेते हैं और उनके साथ वृन्दावन की कुओं में तथा गोपियों के घरों में तरह तरह की लीलाएँ करते हुए प्रतीत होते हैं ।। ११ ।। जब समस्त पापों के नाशक उनके परम मङ्गलमय गुण, कर्म और जन्म की लीलाओं से युक्त होकर वाणी उनका गान करती है, तब उस गान से संसार में जीवन की स्फूर्ति होने लगती है, शोभा का सञ्चार हो जाता है सारी अपवित्रताएँ धुलकर पवित्रता का साम्राज्य छा जाता हैं, परन्तु जिस वाणीं से उनके गुण, लीला और जन्म की कथाएँ नही गायी जातीं वह तो मुर्दे को ही शोभित करनेवाली है होने पर भी नहीं के समान—व्यर्थ है ।। १२ ।।

स चावतीर्णः किल सात्वतान्वये स्वसेतुपालामरवर्यशर्मकृत् ।
यशो वितन्वन् व्रज आस्त ईश्वरो गायन्ति देवा [1]यदशेषमङ्गलम् ॥ १३ ॥
तं त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकान्तं दृशिमन्महोत्सवम् ।
रूपं दधानं श्रिय ईप्सितास्पदं द्रक्ष्ये ममासन्नुषसः सुदर्शनाः ॥ १४ ॥
अथावरूढः[2] सपदीशयो रथात् प्रधानपुंसोश्चरणं स्वलब्धये ।
धिया धृतं योगिभिरप्यहं ध्रुवं नमस्य आभ्यां च सखीन् वनौकसः ॥ १५ ॥
अप्यङ्घ्रिमूले पतितस्य मे विभुः शिरस्यधास्यन्निजहस्तपङ्कजम् ।
दत्ताभयं कालभुजङ्गरंहसा प्रोद्वेजितानां शरणैषिणां नृणाम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—(सः) स्वसेतुपालामरवर्यशर्मकृत्, देवाः, यदशेषमङ्गलम्, गायन्ति, सः, ईश्वरः, सात्वतान्वये, अवतीर्णः, यशः, वितन्वन्, व्रजे, आस्ते, किल ॥ १३ ॥ महताम्, गतिम्, गुरुम्, दृशिमत्, महोत्सवम्, त्रैलोक्यकान्तम्, रूपम्, दधानम् श्रियः, ईप्सितास्पदम्, तम् (भगवन्तं श्रीकृष्णम्) तु, अद्य, नूनम् द्रक्ष्ये, (यतः) उषसः, सुदर्शनाः ॥ १४ ॥ स्वलब्धये, योगिभिः, अपि, धिया, (भावनया) धृतम्, प्रधानपुंसोः, ईशयोः, चरणम्, अथ, रथात्, अवरूढः, सपदि, ध्रुवम्, नमस्ये, आभ्याम्, वनौकसः, सखीन्, च, सर्वान्, नमस्ये ॥ १५ ॥ अङ्घ्रिमूले, पतितस्य, मे, शिरसि, (सः) विभुः, भुजङ्गरंहसा, प्रोद्वेजितानाम्, शरणैषिणाम्, नृणाम्, दत्ताभयम्, निजहस्तपङ्कजम्, अपि, अधास्यत् (किम् !) ॥ १६ ॥

श्रीवरस्वामिविरचिता भावार्थदीपिका

स्वयं रचितान्सेतून्वर्णाश्रमधर्मान्पालयताममरवर्याणां सुखकर्ता सन्नवतीर्णः । यद्यशः ॥ १३ ॥ त्रैलोक्ये एकमेव कान्तम् दृशिदृष्टिस्तद्वतां महानुत्सवो यस्मात् । यद्वा महानुत्सव एव । अत एव श्रिय ईप्सितमास्पदमेवं भूतं रूपं श्रीमूर्तिं दधानं तमीश्वरं द्रक्ष्यामीति । अत्र लिंगम् । उषसः प्रभातसमयाः । सुदर्शनाः सुप्रसन्नं दर्शनं येषां ते शुभदर्शना इत्यर्थः । सुखं प्रभाता रजन्यः शुभसूचिका बभूवुरित्यर्थः ॥ १४ ॥ किं च । अथ दर्शनानन्तरं सपदि तत्क्षणमेव रथादवतीर्णः सन्प्रधानयोः पुरुषयो रामकृष्णयोश्चरणं योगिभिरप्यात्मलाभाय केवलं धियैव धृतं साक्षादहं नमस्यामि । आभ्यां सहानयोः सखीन् गोपांश्च नमस्यामीति ॥ १५ ॥ किं च । अपीति । अधास्यत् धास्यति । तद्विभावयति दत्ताभयमिति सार्धेन ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अस्त्वेवं प्रकृते किमागतं तत्राह—स चेति । स च भगवान् । किलेति प्रसिद्धम् । सोऽवतीर्ण इह किं मानमिति चेदाह–गायन्ति । देवा व्यासदेवप्रभृतयः । गेयसंभवे गानं युक्तम् 'सति कुड्ये चित्रम्' इति न्यायेन । अशेषाणां सर्वेषां श्रोतृवक्तृप्रभृतीनां मंगलं श्रेयस्करम् ॥ तदेवं य ईक्षिता यस्य च नानागुणकर्मणां तादृङ् माहात्म्यं स तु सोऽपि स्वयं सात्वतान्वयेऽवतीर्णः सन्व्रज आस्त इति सम्बन्धः । किलेति महत्सु शान्तेषु च प्रसिद्धिं प्रमाणयति । स्वसेतवो भगवद्धर्मादिमर्यादाः । अमरवर्या ब्रह्मरुद्राद्याः । न केवलं तदवतारादिदर्शिनां तेषामेव शर्मकृदपि त्वन्येषामपीत्याह—यश इति । तदेव प्रशंसति—यद्यशो देवाः सर्वाराध्या अपि गायन्ति । यच्च परमनिकृष्टपर्यन्ताशेषजीवानां मंगलमिति । तत्तत्कर्तृत्वञ्च नास्मदादिवत्कर्मपारवश्येन किं तु स्वातन्त्र्येणेत्याह—ईश्वरः ॥ १३ ॥ स्वमानसं प्रति वक्ति–तं कृष्णम् । महतां गतिं महद्भिर्गम्यम् । एकमेवेत्येव कारेणान्यत्र तादृशसौन्दर्यव्यवच्छेदो बोध्यते 'स्वमूर्त्या लोकलावण्यनिर्मुक्त्या' इति वक्ष्यमाणत्वात्, 'परं पदं भूषणभूषणांगम्' इत्याद्युक्तेश्च । पंचमीबहुव्रीहिणोत्सवहेतुत्वं प्रतीयते । पुत्र जन्मादिवन्न तूत्सवरूपत्वमित्यस्वारस्यादाह—यद्वेति । 'उत्सवो मह उत्सकेः' इति कोशादुत्सवो भद्रहेतुरित्यर्थः । "भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः" इति श्रुतेः । एवंभूतं श्रीकांक्षितम् । अत्र दर्शने । लिङ्गं हेतुः । इत्यर्थ इति–प्रातः शुभशकुनादिभिर्ज्ञायतेऽवश्यं मे भगवद्दर्शनं भविष्यतीति भावः ॥ नन्वेवं साधारण्यञ्चेत्तस्मात्तव किं वैशिष्ट्यं तत्राह—तं त्विति । नूनं निश्चये । तु शब्दः सर्वयादवादितोऽपि निजभाग्यवैशिष्ट्यविवक्षया । अहं त्वद्यैव तं द्रक्ष्ये, महतां महाभागवतानां गतिं गम्यं गुरुञ्चोपदेष्टारमिति साध्यसाधनत्वमुक्तम् । रूपं सौंदर्यम् । एवं सामान्यत उक्त्वा श्रीकृष्णरूपे तस्मिन्विशेषमाह—त्रैलोक्य (मध्ये मध्योऽर्धलोकः स च महावैकुण्ठपर्यन्तः सोऽपि महानारायणपर्यन्तस्तस्मादपि) कान्तम् । अत एव स्वसहितानां तादृशामपि दृशिमतां महोत्सवम् । वक्ष्यते च महाकालपुरनाथेन श्रीभगवता–"द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीताः" इति । उक्तञ्च उद्धवेन—'विस्मापनं स्वस्य च' इति । न केवलं स्वरूपरीयसामेव तादृशं तत्, अपि तु स्वशक्तिवरीयस्या

---

[1] तदशेष–विज. । [2] 'यथावरूढः' अधिक इति विज. ; यथावरूढः–म. पु. मूले ; अथवातीर्णः–प्रा. पा. ।

अपीति वदंस्तादृशसुभगतायां हेतुमाह—सर्वसौभाग्याश्रयरूपायाः श्रियोऽपि ईप्सितमीप्सा तस्या आस्पदं न तु महानारायणादिवद्भोग्यमपीत्यर्थः। तदुक्तम्—यद्वाञ्छया श्रीललनाचरत्तपः' इति। उषस इत्यनेन बह्व्यो रात्रयश्चिरं सुप्रभाताः सन्ति, अन्यथेदृशं फलं न स्यादित्यर्थः ॥ १४ ॥ घृतं ध्यातं न तु दृष्टम्। आभ्यां रामकृष्णाभ्यां सह ॥ वनौकसः वृन्दावनसकलप्राणिनः ॥ १५ ॥ अन्यदाह —किञ्चेति। अपीति सम्भावनायाम्। कालसर्पवेगेन प्रोद्विजितानां त्रस्तानाम्। तद्धस्तपंकजम्। विभावयति विवृणोति। विभुरिति सर्वव्यापित्वान्मन्मनोरथं करिष्यत्येवेत्याह ॥ नृणामीति षष्ठी चतुर्थ्यर्थे ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं य ईक्षिता यस्य च नानागुणकर्मणां तादृङ्माहात्म्यं स तु सोऽपि स्वयं सात्वतान्वयेऽवतीर्णः सन् व्रजे आस्त इत्यन्वयः। किलेति महत्सु शान्तेषु च प्रसिद्धं प्रमाणयति। स्वसेतवो भगवद्धर्मादिमर्य्यादाः अमरवर्य्याः ब्रह्मरुद्रादयः। न केवलं तदवतारादिदर्शिनां तेषामेव शर्मकृत्। अपि त्वन्येषामपीत्याह। यश इति। तदेव प्रशंसति यद्यशो देवाः सर्वाराध्या अपि गायन्ति। यच्च परमतद्भक्तदंशावतारस्यापि लाभमाहात्म्यमाह। यस्येति। निकृष्टपर्य्यन्ताशयजीवानां मङ्गलमिति। तत्तत्कर्तृत्वञ्च नत्वस्मदादिवत् कर्मपारवश्येन किन्तु स्वातन्त्र्येणेत्याह। ईश्वर इति ॥ १३ ॥ नन्वेवं साधारण्यं चेत्तस्मात्तव किं वैशिष्ट्यं तत्राह। तं त्विति। नूनं निश्चये। तुशब्दः सर्वयादवादितोऽपि निजभाग्यवैशिष्ट्यविवक्षया अहन्त्वद्यैव तं द्रक्ष्ये महतां महाभागवतानां गतिं गम्यं गुरुञ्चोपदेष्टारमिति साध्यसाधनत्वमुक्तं रूपं सौन्दर्यम् एवं सामान्यत उक्त्वा श्रीकृष्णरूपे तस्मिन् विशेषमाह। त्रैलोक्यमधोमध्योर्ध्वलोकः स च महावैकुण्ठपर्य्यन्तः सोऽपि महानारायणपर्य्यन्तः तस्मादपि कान्तम्। अत एव स्वसहितानां तादृशामपि दृशिमतां महोत्सवं वक्ष्यते च महाकालपुरनाथेन श्रीभगवता। "द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता" इति। उक्तञ्च श्रीमदुद्धवेन विस्मानं स्वस्य चेति। न केवलं स्वरूपवरीयसामेव तादृश तत् अपि तु स्वशक्तिवरीयस्या अपीति वदन् तादृशसुभगतायां हेतुर्माह सर्वसौभाग्याश्ररूपायाः श्रियोऽपि ईप्सितमीप्सा तस्या आस्पदं नतु महानारायणादिवद्भोग्यमपीत्यर्थः। तदुक्तं यद्वाञ्छया श्रीर्ललना इति। उषस इत्यनेन चिरं बह्व्यो रात्रयः सुप्रभाताः सन्ति अन्यथेदृशं फलं न स्यादित्यर्थः। अथवा चतुःश्लोकीयमेवं प्रसञ्जनीया। ननु कथं तस्य तादृशं दौर्लभ्यं तल्लाभमाहात्म्यञ्च यदि च तर्त्तहि कथं सौलभ्यं येन तवापि तादृशभाग्याश्लाघा स्यादित्यत्र विवृणाति चतुर्भिः। तत्राद्य द्वयं कैमुत्येनाह द्वाभ्यां दौर्लभ्यं तावदाह। य इक्षितेति। अपीति समुच्चये। सदसतोरीक्षितापि तदावशेरहितोऽपि उभयत्र हेतुः स्वतेजसेति ईक्षितेत्यादिरूपत्वे सर्वागोचरस्वरूपो यः स्वमायया स्ववीक्षया चात्मनि रचितत्वेन स्वतः सर्वसामर्थ्यहीनैस्तं द्रष्टुमयोग्यैश्च जीवैः प्राणादिप्रवृत्तिलिङ्गेन सदनेषु तदधिष्ठानरूपेषु सर्वभूतेषु अभीयते प्रतीयतेऽनुभीयते मात्रं न तु दृश्यते। यथोक्तं द्वितीये। "भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरि"रिति। एवं "विष्टभ्याहमिदं कृत्स्न"मित्युक्तदिशा तदंशस्यापि परमदौर्लभ्यं दर्शितम्। तद्भक्तदंशावतारगणस्यापि लाभमाहात्म्यमाह। यस्येति। तथापि सौलभ्ये कारणमाह चेति। निगमयति। तं निगमयति। तं त्विति। तस्मान्महदेव मम भाग्यमिति भाव ॥ १४ ॥ भक्ततया दर्शनमात्रेणातृप्त्या मनोरथान्तरं कुरुते। अथेति। नमस्ये नमस्यामि इति वर्त्तमानसामीप्ये लट्। धिया अभ्यासे यच्छता सुविचारेण। धृतं दार्ढ्येन चिन्तितं योगिभिरात्मारामैरपि किं पुनर्भक्तियोगिभिः। स्वस्य भगवतः प्राप्तये आभ्यां सह वर्त्तमानान् सखीन् अनयोर्वयस्यान् आभ्यामनयोरिति वा। ननु भवदीया यादवाश्च केचित् सखायो भविष्यन्ति कुतस्तेष्वेवैतावानादरस्तत्राह। वनौकसः एकान्ते तेन सह विहारेण तेषामेव सख्यातिशयादिति भावः। यद्वा। किं पुनः सखीन् सर्वानपि वृन्दावनप्राणिनो नमस्यामीत्याह। वनेति। एवं पूर्वनमस्कारतो विशेषो ज्ञेयः। अन्यत्तः। तत्रेति शब्दस्यैतावदेव मम कृत्यमित्यर्थः ॥१५॥ अधुना भक्तिविशेषोदयेन नमस्कारेणातृप्त्या करस्पर्शैः मनोरथं करोति अपीति द्वाभ्यात्। अपि प्राकाश्ये। अङ्घ्र्योर्मूले तले विभुः प्रभुः निजं तादृशं तदीयं हस्तपङ्कजं तादृशत्वमेव दर्शयति। दत्तेत्यादिना। यद्यपि तत्प्रियसखस्य कस्यचिद्गोपस्य हस्तधारणेनापि मम कृतार्थता स्यादेव तथापि निजं किं धास्यतीति भावः। काल एव भुजङ्गः प्राणिसंहारकत्वात् अलक्ष्यगमनहेतुसाधनत्वेऽपि शीघ्रगामित्वाच्च। तस्य रंहसा अनुद्रवणेनोद्विजितानाम्। अत एव शरणैषिणां सतां नृणां जीवमात्राणां चतुर्थ्यां षष्ठी तेभ्यो दत्ताभयम् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना चात्र भगवत्त्वाप्रकटनेनातोऽपि विशिष्ट इत्याशयेनाह,—स चेति। त्वर्थे चकारः। पूर्व्वतो विशेषाय तमेव दर्शयति—यदुकुलेऽवतीर्ण इत्यादिना। यद्वा, अप्यर्थे चकारः, सोऽपि, किलेति शास्त्रादिप्रसिद्धिं प्रमाणयति—स्वसेत्विति। अन्यथामरवर्य्याणां दुःखेन निजकृतमर्य्यादाभिदापत्तेरिति भावः। यद्वा, स्वसेतुपालोऽमरवर्य्यो ब्रह्मा तस्य शर्म्मकृत्, तस्यैव प्रार्थनयावतीर्णत्वात्, तदुक्तमेव (भा० १०।३१।४) 'विखनसार्थितः' इति। तथापि ब्रह्माण्डनायकस्य तस्य शर्म्यकृत्त्वेन तत्रत्यानां सर्व्वेषामेव स्वतः शर्म्म सिध्येदेव। विशेषेण तन्वन् पूर्व्वतोऽप्याधिक्येन विस्तारयन्, अशेषभगवत्ताप्रकटनात्, व्रज आस्ते वसतीति, अन्यत्र तादृशयशोविस्तारणासिद्धेः। ईश्वर इति निजाशेषैश्वर्य्यप्रकटनाभिप्रायेण, यद्वा, ईश्वर इच्छामात्रेण कंसादिवधतो भूभारहरणेऽमरवर्य्यशर्म्मकरणे च समर्थोऽपि व्रज आस्ते, किमर्थम्? यशो वितन्वन्। यद्वा, ईश्वरो मादृशां प्रभुरपि व्रज

एव यशो वितन्वन् आस्ते, अशेषाणि मंगलानि यस्मिन् यस्माद्वा, यद्वा, अशेषाणां विषयिमुमुक्षु—भक्तादीनां मंगलम्, तच्च केषाञ्चित् साधनत्वेन केषाञ्चिच्च साध्यत्वेनेत्येवं यथायथं विवेचनीयम्। अतः कथञ्चिदेव व्रजादागच्छेदिति, यद्वा, यशसोऽशेषमंगलत्वेन देवगेयत्वेन च। देवयादवादिहितार्थमागमिष्यत्येवेति निगूढो भावः॥ १३॥ यद्वा, एवं यशसो महात्म्यं प्रदर्शितम्, तादृशं यस्य यशस्तमद्य साक्षाद्द्रक्ष्यामीत्यत्र तात्पर्य्यमूह्यम्, तु-शब्दो वाक्यालंकारे। पूर्व्वोक्तार्थे चकारः। यद्वा, नूनमद्य द्रक्ष्यामि महतां श्रीब्रह्मादीनां भागवतानां वा गतिं गम्यं गुरुं चोपदेष्टारमिति साध्यसाधनत्वमुक्तम्। एवं सामान्येनोक्त्वावतारेऽस्मिन् विशेषमाह—त्रैलोक्येत्यादिना। यद्वा, महतां श्रीनन्दादीनाम्, दधानं प्रकटयन्तम्, अन्यत्तैर्व्याख्यातम्। तत्र दधानमित्यस्य प्रकटयन्तमिति व्याख्यानं विशेषणविशिष्टतया धारणस्य विशेषण एव तात्पर्य्येण दोषास्पर्शात्, एवमन्यत्राप्युह्यमिति। अथवा त्रैलोक्यमपि कान्तं भवति यस्मात्, सौन्दर्य्यसमुद्रस्य यस्यांशांशविभागमात्रप्राप्तेरात्रिलोकीवर्त्ति सौन्दर्य्यं तदित्यर्थः। यद्वा, त्रैलोक्यस्य कं सुखं तस्यान्तो नाशो यस्मात् तद्रूपादिदृक्षयापि त्रिलोकीसुखे वैराग्योत्पत्तेः, न केवलं त्रिलोक्यन्तर्गतविषयसुख एव तेन वैराग्यं स्यात्, किन्तु मोक्षसुखेऽपीत्याह—दृशिरात्मानुभवस्तद्वतां महोत्सवरूपं सौन्दर्य्यम्, अधुना भक्तमनोहरत्वमाह,—श्रियो भक्तवर्गपूज्याया महालक्ष्म्या अपि ईप्सितमीप्सा दृग्भ्यां साक्षादनुभवितुमिच्छा तस्या आस्पदम्, न तु दृश्यमित्यर्थः। उषस इति बहुत्वेन चिरं वह्वो रात्रयः सुप्रभाताः सन्तीति बोधयति॥ १४॥ भक्ततया दर्शनमात्रेणातृप्त्या मनोरथान्तरं कुरुते,—अथेति। चरणमित्येकत्वेऽपि द्वित्वसिद्ध्या तयोः प्रत्येकं चरणाविति गम्यत एव, यद्वा, द्वाभ्यां हस्ताभ्यां तयोरेकैकं चरणं धृत्वा युगपन्नमस्यामीत्यभिप्रायेणैकत्वम्, भविष्ये वर्त्तमानात्यन्तसामीप्याभिप्रायेण। अब्जादिरूपकाप्रयोगः परमलालसोदयेन केवलं तन्नमस्कारमात्रापेक्षया तद्गुणाद्यनपेक्षणात्, धियेति सप्तम्यर्थे तृतीया, चित्त धृतमित्यर्थः। यद्वा, धारणयेति, यद्वा, अन्याशेषतुच्छतादिविचारेणेत्यर्थः। ततश्च धृतमिति दार्ढ्येन चिन्तितमित्यर्थः, योगः समाधिः स्मरणलक्षणभक्तियोगो वा, ततश्च स्वो बन्धुरित्येवं लब्धये बन्धुत्वेन प्राप्तमित्यर्थः। आभ्यां सह वर्त्तमानान् सखीन् अनयोर्वयस्यान्, यद्वा, आभ्यामनयोः, किं पुनः सखीन् सर्व्वानपि गोकुलवासिनो नमस्यामीत्याह—व्रजेति; व्रजौकसो व्रजप्राणिनः; एवं पूर्व्वतो विशेषो ज्ञेयः॥ १५॥ अनुना भक्तिविशेषोदयेन नमस्कारेणातृप्त्या करस्पर्शे मनोरथं करोति—अपीति द्वाभ्याम्। अङ्घ्र्योर्मूले तले सन्निधौ वा; यद्वा, अङ्घ्रिरेव मूलं सर्व्वार्थाश्रयस्तस्मिन्, विभुर्व्यायकोऽपि; यद्वा, जगदीश्वरो मत्प्रभुरिति वा, निजमसाधारणहस्तपंकजम्, निजत्वमेव दर्शयति—दत्तेत्यादिना। अथवा तत्प्रियसखस्य कस्यचिद्गोपस्य हस्तधारणेनापि मम कृतार्थता स्यादेव, तथापि निजं किं धास्यतीत्यर्थः। काल एव भुजंगः, सर्व्वग्रासकत्वात्, तस्य रंहसा वेगेन प्रकर्षेणोद्वेजितानां नितरां भीषितानामतएव शरणैषिणां शरणमिच्छतां सतां दत्ताभयम्; नृणां सर्व्वेषामेव जीवानामित्यधिकारापेक्षा निरस्ता॥ १६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

स्वसेतुः स्वकृतमर्यादा॥ १३॥ दृशिमतां चक्षुष्मतामुत्सवमानन्दकरम्। असवः इन्द्रियाणि सुदर्शनाः सुप्रसन्नाः॥१४॥ प्रधानपुंसोः श्रेष्ठयोः पुंसोः योगिभिरपि धिया बुद्ध्या धृतान् चरणान् अथावरूढः। जगदाधारत्वेन निरूपणेऽनन्तः स्वलब्धये स्वसत्तासिद्ध्यर्थम् अधात् दधार पादपीठव्यवधानमात्रं भूमण्डलं व्यवधानमिति भावः। आभ्यां रामकृष्णाभ्यां सहितान् सखीन् वनौकसो नमस्ये॥ १५–१६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स चेति। य एवं विधो विष्णुरीश्वरः स एव सात्वतान्वये यादवकुले श्रीकृष्णरूपेणावतीर्णः किल स्वसेतुः स्वकृतमर्य्यादा तं पालयन्तीति तथा तेषाममरवर्य्याणां दैवीं सपत्तिमभिजानां शर्म सुखं करोतीति तथा भूतः यशः कीर्त्ति वितन्वन् व्रजे आस्ते यशो विशिनष्टि। अशेषाणि अखिलानि मङ्गलानि यस्मात् तत् यच्च देवा गायन्ति॥ १३॥ तमिति सात्वतां कुले ऽवतीर्णमुक्तविधमहमद्य नूनं द्रक्ष्यामि यतो मम उषसः लिङ्गव्यत्यय आर्षः उषांसि प्रभातसमयाः सुदर्शनाः प्रसन्नाः सुखप्रभाता रजन्यः शुभसूचक। बभूवुरित्यर्थः। कथम्भूतं महतां स धूनां गतिं स्वप्राप्त्युपायं गुरुं हितकारिणं किञ्च रूपं विग्रहं दधानं बिभ्राणं कथम्भूतं रूपं त्रैलोक्यकान्तं त्रिलोकसुन्दरं दृशिमतां चक्षुष्मतां महानुत्सवोहर्षो यस्मात् तत् श्रियो लक्ष्म्या ईप्सितमास्पदमाश्रयभूतम्॥ १४॥ किञ्चाथेति। अथास्य दर्शनानन्तरं सपदि रथादवरूढोऽहमीश्वरयोः प्रधानपुंसो पुरुषोत्तमयो रामकृष्णयोश्चरणं नूनं ध्रुवं नमस्ये चरणं कथम्भूतं योगिभरप्यात्मलब्धये स्वसत्तासिद्ध्यै धिया केवलं धृतं भावितं नतु दृष्टमिति भावः। ततः आभ्यां प्रधानपुभ्यां सहानयो सखीन् वनौकसो गोपान्नमस्ये॥ १५॥ किञ्चाथानन्तरमङ्घ्रिमूले पतितस्य मम शिरसि विभुः कृष्णः स्वयं हस्यपङ्कजमधास्यत् आधास्यति हस्तपङ्कजं विभावयति। दत्तायमित्यादिना सार्द्धेन। काल एव भुजङ्गस्तस्य रंहसा वेगेन प्रोद्वेजितानां संसारभीरूणां शरणैषिणां रक्षणोपायत्वेनाध्यवस्यतां जनानां दत्तमभयं येन तत्॥ १६॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अस्त्वेवं विधमाहात्म्यो भगवांस्ततः प्रकृते किमत्राह। स चेति। चशब्द एवार्थे ईश्वर एव व्रजे आस्ते किलेत्यन्वयः सात्वतामन्वये यदुकुले अवतीर्णः किङ्कार्योयेति तत्राह। स्वसेत्विति। स्वेन कृतः सेतुर्मर्यादा तां पालयन्ति रक्षयन्तीति स्वेसेतुपालाः

अमराणां वर्याः अमरवर्याः स्वसेतुपालानाममरर्याणामिन्द्रादीनां शर्मकृत् सुखकृत् देवकार्यायावतीर्ण इत्यर्थः। अत्र किम्प्रमाणमित्यत्राह। गायन्तीति। देवाः व्यासादयः पुराणादिषु गेयसम्भवे गानं युक्तं तत्कथमित्यत्राह। यश इति। यद्यशो वितन्वन्नास्ते अशेषाणां मङ्गलं श्रेयस्करं तद्यशः॥ १३॥ स्वमानसं प्रति वक्ति। तं त्विति। अहमद्य तमेव द्रक्ष्ये इत्यन्वयः दृशिमतां चक्षुष्मतां महोत्सवं त्रैलोक्यकान्तं कमीनयं रूपं दधानं "भद्रं कर्णेभिः श्रृणुवाम देवा भद्रं पश्येमाक्षभिर्यजत्रा" इति श्रुतिः ममाद्य उषसः प्रभातकालावयवा क्षणादयः सुदर्शनाः सर्वजगत्पूज्यवस्तुदर्शनप्रदा आसन्नित्यन्वयः॥ १४-१५॥ कालाख्यभुजङ्गस्य रंहसा रंहोलक्षणविशेषेण अधास्यत् धास्यति धरिष्यत्यपि किम्॥ १६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

निगमयति। तं त्विति। तस्मान्महदेव मम भाग्यमिति भावः॥ १४॥ आभ्यां सह वर्त्तमानान् सखीन वनौकस एकान्तविहारेण सख्यातिशययुक्तानित्यर्थः॥ १५-१७॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अप्यङ्घ्रीत्यादि। हस्तपल्लवमित्येव सिद्धे निजशब्दस्यायं भावः। अन्यान्य लीलावतारास्तु लीलावतारा एव अयं तु स्व स्वरूपः यथावतीर्णस्तथैव शाश्वतः, तेनास्याविकृतत्वान्नित्वम्॥ १६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अप्यङ्घ्रिमूले पतितस्येत्यादौ निजहस्तपल्लवमिति निजशब्दोऽसाधारणपरः स तु स्वरूपसिद्ध श्रीकृष्णाङ्गपरः॥ १६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दृशिमतां चक्षुष्मतां महोत्सवस्वरूपं श्रियो विष्णुवक्षः स्थलस्थिताया अपि लक्ष्म्या ईप्सितानां रतिरासविलासादीनामास्पदं रूपं दधानं तमीश्वरं द्रक्ष्यामि अत्र लिङ्गम् उषसः प्रभातसमयाः सुदर्शनाः शुभसूचका बभूवुरित्यर्थः। बहुवचनेन वह्वीनां रात्रीणां ज्ञेयाः अन्यथेदृशं फलं न स्यादिति भावः॥ १४॥ अथ दर्शनानन्तरमेव रथात् अवरुढः सपदि अवरोहणसमय एव प्रधानयोः श्रेष्ठयोः पुंसो रामकृष्णयोश्चरणं योगिभिरपि आत्मलाभाय केवलं धियैव धृतं साक्षादहं नमस्यामि आभ्यां सहितान् सखींश्च नमस्यामि वार्तमानसामीप्ये लट् ततो वनौकसः सर्वान् व्रजवासिनोऽपि॥ १५॥ ततश्च अपीति। अधास्यत् धास्यति हस्तपङ्कजं विशिनष्टि। दत्ताभयं नृणामिति चतुर्थ्यर्थे षष्ठी॥ १६॥

गूढार्थदीपिनी

सात्वतान्वये यदुकुले। स्वसेतून् धर्ममर्यादाः वर्णाश्रमधर्मान् पालयताम् अमराणां शर्म सुखं करोतीति तथा यत् यशः अशेष मङ्गलं सर्वं श्रेयस्करं देवा गायन्ति॥ १३॥ तं तु अद्य नूनं द्रक्ष्ये इत्यन्वयः। कुतः। उषसः प्रभातसमयाः शुभशकुनां भवन्ति। कथंभूतम्। महतां भक्तानां गतिं गम्यं गुरुम् उपदेष्टारं च। पुनश्च। रूपं दधानम्। कीदृक् तत्। त्रैलाक्ये कान्तं सुन्दरम्। दृशिमतां चक्षुष्मतां महान् उत्सवो यस्मात्। श्रियः आस्पदं चेति विशेषणत्रयम्॥ १४॥ अथ दर्शनानन्तरं सपदि तत्क्षणमेव रथात् अवतीर्णः सन् अहम् अनयोः चरणम् आभ्यां सह अनयोः सखींश्च नमस्ये इत्यन्वयः। वर्तमानसामीप्ये लट्। धियैव यत् धृतं चिन्ततं नतु-दृष्टम् तत् साक्षादित्यन्वयः। स्वलब्धये स्वरूपज्ञानीय॥ १५॥ अपि किम् हस्तपंकजम् अधास्यत् शिरसि धारयिष्यति। कीदृशम्। कालिसर्पेण प्रोद्वेजितानां त्रस्तानां नृणां नृभ्यः दत्तात्रयम्॥ १६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स उक्तप्रकारः स्वसेतुर्भगवद्रचितो धर्मसेतुस्तत्तालानाम् अमरो विष्णुर्वर्य्यः पूज्यो येषां तेषां शर्म सुखं करोतीति तथा अशेषाणि सम्पूर्णानि मङ्गलानि यस्मात् तदशेषमङ्गलं यद्देवा ब्रह्मादयो गायन्ति तत् यशो वितन्वन् सात्वतान्वये यादवानां वंशे अवतीर्णः सन् व्रजे आस्ते॥ १३॥ उषसः प्रभातसमयाः प्रभाता रजन्यो मम सुदर्शनाः शुभसूचका आसन् अतो नूनं निश्चितमुक्तप्रकारमद्यद्रक्ष्ये द्रक्ष्यामि कथभूतं महतां गतिं गम्यते इति गतिः प्राप्यं गतिं स्वप्राप्तिसाधनं गुरुम् उपदेष्टारं त्रैलोक्ये एकमेव कान्तं सुन्दरं दृशिमतां दृष्टिमष्टां महानुत्सवो यस्मात्तम् श्रियः ईप्सितं वाञ्छितमास्पदमाश्रयं रूपं विग्रहं दधानं बिभ्राणम्॥ १४॥ किञ्च अथ दर्शनानन्तरं सपदि रथादवतीर्णः प्रधानयोः सर्वश्रेष्ठयोः पुंसोः रामकृष्णयोश्चरणं योगिभिः ध्यानयोगनिरतैर्मुमुक्षुभिरपि स्वलब्धये अपहतपाप्मत्वादिगुणयुक्तस्वरूपलब्धये भगवत्साधर्म्यसिद्ध्यै धियैव केवलं धृतं भावितम् अहं तु साक्षान्नमनस्यामि अहो मम भाग्यमिति भावः। किञ्च आभ्यां प्रधानपुंभ्यां सह अनयोः सखीन् गोपांश्च नमस्यामि किं बहुना श्रीकृष्णसंबन्धित्वाद्वनौकसः सर्वजन्तूनपि॥ १५॥ शिरसि भगवद्धस्तस्पर्शं लब्ध्वा कृतार्थो भविष्यामीत्याशयेन तत्स्पर्शं तत्प्रभावञ्च चिन्तयति। अपीति द्वाभ्याम्। निजहस्तपङ्कजम् अधास्यत् धास्यति कथम्भूतं काल एव भुजङ्गस्तद्रंहसा वेगेन प्रोद्वेजितानां मुमुक्षूणां शरणं रक्षितारमिच्छतां दत्तभयं येन तम्॥ १६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एतावतोक्तं पर्यवसाययति ॥ स चेति । स च स एव सात्वतान्वये । अकारान्तः सात्वच्छब्दपर्यायः सात्वतशब्दः । तेषामन्वयेऽवतीर्णः । स वाऽवतीर्ण इति न पठ पठंश्च स चेति सुखेनावतीर्णो न देवाद्यवतारवदंशांशिसुखानुसन्धानादिव्यत्ययस्त्यवतार इति द्योतयामासुः । इन्द्र इद्धर्योः स चासंमिश्ल इत्यृग्भाष्ये स चासुखेनेत्युक्ते । षच समवाये धात्वादेः षः सः । सम्पदादित्वात्क्विपि तृतीयैकवचनं धात्वनैकार्थ्यात्सुखार्थता । स चेति निपातपक्षे न कोऽपि क्लेशः । यथोक्तं माधवेन । स चेत्यस्य निपातत्वपक्षे स्फुटमाद्युदात्तत्वमिति । स्वसेतुपालाः स्वमर्यादारक्षका येऽमरवर्यास्तेषां शर्म सुखं तत्करोतीति कृत् । सु अत्यन्तमसेतुपाला अमरेभ्यो वर्या अग्रतो जाताः पूर्वदेवास्तेषां शर्म कृन्ततीति स तथेति वा । यद्यशो वितन्वन्विस्तारयतीश्वरो व्रजे आस्ते तद्यशोऽशेषमङ्गलं देवा गायन्ति स चामूलरूपेण समवेतः सन्नेवावतीर्ण इति । स्वश्चासौ सेतुपश्च तं न लान्ति नाददत इति न तत्त्वेन स्वीकुर्वन्तीति स्वसेतुपाला उर्वरितं पूर्ववत् । अमरा भवतेति वरो येषामस्ति तेऽमरवरिणः स्वसेतुपालाश्च तेऽमरवरिणश्च तेषां शर्मकृत्सुखदातेति वा ॥ १३ ॥ महतां गतिं प्राप्यं तेषां च गुरुं त्रैलोक्ये कान्तं मनोहरं दृशिमन्महोत्सवं दृशो लोचनानि सन्ति येषां ते दृशिमन्तस्तेषां चक्षुष्मतां महानुत्सवो येन तच्छ्रियो रमाया ईप्सितं काङ्क्षितमास्पदं गतम् । वक्षःस्थलं यस्मिंस्तद्वपुर्दधानमद्य द्रक्ष्ये नूनं निश्चयः । ममोषसः षष्ठीसम्बन्धिनः क्षणादयः प्रातः सुदर्शनाः सम्यग्दर्शनं येषां ते दृश्या आसन् । मम आ असन्निति पदानि आ उषसः सुदर्शनमुपलम्भो येषां ते शकुनविशेषा आसन्निति वा । दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिष्विति विश्वः ॥ १४ ॥ अङ्घ्रिमूले पतितस्य । प्रणतस्येत्यनुक्त्वोक्त्वा च पतितस्येति स्वाहन्ताशान्त्यै पतितदूतत्वात्तत्प्रायस्यापि मम शिरसि विभुः पतितोद्धरणसमर्थो निजहस्तपङ्कजं स्वकरकमलमास्यदपि धारयेत् । किं तन्महत्त्वं किमित्यत आह । कालभुजङ्गः कालियस्तद्रंहो वेगस्तेन प्रोद्विजितानां गोपानां यथेदानीं दत्ताभयं तथा कालाख्यो भुजङ्गस्तस्य रंहो वेगस्तेन प्रोद्विजितानां शरणैषिणां रक्षककामानाम् । नृणामिति सदुपलक्षणम् । तेषां दत्तमभयं येन तदिति ॥ १५ ॥ कौशिक इन्द्रः । आत् न इन्द्रकौशिकेत्यृग्भाष्ये मात्रा कुशैर्गृहीतत्वादित्युक्तेः कुशगृहीतत्वात्कौशिकः । कौशिको नकुले व्यालग्रहे गुग्गुलशक्रयोरिति विश्वः यत्राङ्घ्रौ समर्हणं निधाय विधाय महाबलिश्च यत्र हस्तपङ्कजे समर्हणं धारोदकदानादिपूजां निधाय दत्वा जगत्त्रयेन्द्रतामाप । किञ्च विहारे तत्समये योषितां श्रमं सौगन्धिकगन्धि सौगन्धिकानां कल्हाराणामिव गन्धो यस्य । उपमानाच्चेतीत्वम् । स्पर्शेनापानुदत्पर्यहर्षाद्यत्तद्धास्यत्किम्।१६।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एतादृश एवायमवतीर्णो न तु धर्मतिरोभावेनेति वक्तुमाह । सचावतीर्णं इति । चकारात् अन्तर्यामितयावतीर्णोऽपि पुनर्बहिरप्यवतीर्ण इति चकाराद्बलभद्रे वा शेषरूपः किलेति प्रसिद्धिः प्रमाणं महतो यत्र क्वाप्यवतारो न भवतीति सात्वतान्वय इत्युक्तं यादवाः सर्वे वैष्णवाः तेषां वंशप्रसिध्यर्थं वा अवतारप्रयोजनमाह । स्वस्य सेतुपालाः भगवता कृता जगति या मर्यादा तस्याः पालका देवा इति तेषामवताराणां शर्म सखं यथैव भवति तथैव करोति अवतारेणैव भवतीति अवतारं करोतीत्यर्थः । मुख्यं प्रयोजनमाह । यशो वितन्वन्निति । अग्रे जनिष्यमाणानां मोक्षार्थं यावत्तानि कर्माणि सिद्धानि न भवन्ति तावद्व्रज आस्ते । ननु व्रजे स्थितौ किम्प्रयोजनम् उत्कृष्टस्थाने स्थितेनैव तथा कर्त्तुमुचितमितिचेत्तत्राह । ईश्वर इति । अपकृष्टे स्थाने स्थित्वा तादृशं कर्म कुर्वन् सर्वेषां मोक्षं साधयतीति रहस्यसिद्धान्ते चैतत्साधितम् अत एव यद्भगवतश्चरित्रं सर्वे गायन्ति विशेषतो देवाः यस्मादशेषस्यापि मङ्गलभूतं भवतीति ॥ १३ ॥ एवं भगवतो माहात्म्यमुक्त्वा सम्यगलौकिकत्वं सम्पाद्य तद्दर्शनं पुरुषार्थो भवतीति कामयते । तं त्वद्येति । तं पूर्वोक्तन्तुशब्देन प्रातीतिकं पक्षं व्यावर्त्तयति अद्यैव द्रक्ष्यामि नूनं नात्र सन्देहः किन्तु निश्चितमेवैतत् भगवतः पुरुषोत्तमत्वप्रतिपादनाय सर्वफलरूपत्वमाह । महतामेव फलं भवतीति तेषां गतिः गम्यः फलमिति यावत् साधनमपि स एवेत्याह । गुरुमिति । उपदेष्टापि स एव ज्ञानं ज्ञानोपदेष्टा च एवम्वैदिकप्रकारेणाह । त्रैलोक्यकान्तमिति । कान्तः पतिः सुन्दरश्च किञ्च विशेषतो दृशिमतां ज्ञानवतां वा महानुत्सवो भवति । उत्सवः फलं भवतीत्यविवादं सर्वेषामेव पतिरपेक्ष्यत इति लौकिकं द्वयमपि फलम् एवं लौकिकवैदिकफलरूपं दधानमिति दर्शनं महाफलमिति सूचितम् । किञ्च लोके सर्वपुरुषार्थरूपा लक्ष्मीः "तया विना क देवत्व"मित्यादिवाक्यात् तस्या अपि ईप्सितमास्पदं स्थानं दर्शने आवश्यकं लक्षणमाह । ममासन्नुषसः सुदर्शना इति । एते प्रातःकालाः अद्यतनाः प्रतिक्षणं सुष्ठु दर्शनं येषां तथाविधाः प्रतिक्षणमानन्दजनका दृश्यन्ते ॥ १४ ॥ एवं दर्शनमनोरथमुक्त्वा दर्शनानन्तरमनोरथमाह । अथावरूढ इति । रथावरूढ उत्तीर्णः भगवद्दर्शनानन्तरं सम्भावितदर्शने वा ईशयोः चरणं नमस्ये इति आवेशावतारयोः चरणभेदो नास्तीत्येकवचनम् । ननु बालकयोः कथन्नमस्कार उचित इति चेत् तत्राह । प्रधानपुंसोरीशयोरिति । मातापित्रोरपि स्वामिनोरिति भावः । अतो गर्भदासाः सर्व एवेत्युक्तं भवति । ननु नमस्कारे किम्प्रयोजनं दर्शनेनैव सर्व पुरुषार्थसिद्धिरिति तत्राह । स्वलब्धये योगिभिरपि धिया धृतमिति । आत्मप्राप्त्यर्थं यत्पदं बुद्ध्या मानसिकं ध्रियते तत्साक्षान्नमस्कृतं किङ्कि न करोतीति नमस्कारमनोरथोऽपि युक्त इत्यर्थः । तर्ह्यनेन नमस्कारेण मोक्षः प्रार्थ्यत इत्याशङ्क्य तन्निवृत्त्यर्थं भक्तिरेव सिध्यत्वित्यभिप्रायेणाह । आभ्यां सह एतत्सखीन् गोपालानपि नमस्य इति ततो व्रजौकस एव सर्वान्नमस्य इति भगवद्धर्माणां सर्वेषामेव सर्वोत्कृष्टत्वज्ञानं भक्तिहेतुरिति ॥ १५ ॥ ततो भगवत्प्रसादरूपमनोरथमाह । अप्यङ्घ्रिमूले पतितस्येति । भक्त्युद्रेकात्

शनैर्न नमस्कारः किन्तु चरणमूले पातः नन्वदृष्टपूर्वे त्वयि कथम्भगवान् कृपां करिष्यतीतिचेत्तत्राह । विभुरिति । स हि ज्ञाने प्रसादे च समर्थः अप्यधास्यत् "आशंसायां भूतवच्चे"ति अपीति सम्भावनायां प्रायेण हस्तं धास्यतीति धारणेनैव महत्सुखं भविष्यतीति अन्यदपि ततः फलं भविष्यतीति हस्तपङ्कजं वर्णयति । दत्ताभयमिति । पङ्कजं हि जलकार्यं करोति विषेहि जलेन प्रतीकारः तापरूपत्वाच्च अत्रापि काल एव भुजङ्गः तस्य रंहसा वेगेन प्रोद्वेजितानां दंशे तु मन्त्राद्यपेक्षा केवलं दृष्ट्वैव भीताः पलायिताः कालो ग्रसिष्यतीति त्यक्तपरिग्रहाः सन्न्यासिनः विवेकिनो वा गृहस्थाः ते च ते भगवच्छरणान्वेषिणः अन्ये पुनर्दुर्वादियोनयः साधनं कर्त्तुं शक्ताः पश्वादयस्त्वज्ञा एव । अत उक्तं नृणामिति अभयं प्रयच्छति पङ्कजमिति जले स्थिते कमले यः प्रविशति तस्य न भवत्येव सर्पभयं जले विषस्य न पराक्रमः नापि कमलं सर्पः प्रविशति ।। १६ ।।

श्रीसुबोधिनी–सारः

सात्त्वतान्वये यदुकुले स चेश्वरोऽवतीर्णः स्वसेतुपालानाममरवर्याणां देवोत्तमानां शर्मकृत् सुखकर्त्ता स्वयशः कीर्त्ति वितन्वन् विस्तारयन् व्रजे आस्ते । अशेषं न शिष्टं मंगलं यस्मात् तत् यत् यशो देवा गायन्ति ।। १३ ।। महतां गतिं गुरुं त्रैलोक्ये कान्तं सुंदरं दृशिमतां चक्षुष्मतां महोत्सव श्रियो लक्ष्म्या ईप्सितं वांछितमास्पदं स्थानभूतं रूपं दधानं तमद्याहं द्रक्ष्यामि । सुष्ठु दर्शनं येषु मंगलादेस्ते उषसः प्रभातसमया ममाऽऽसन् ।। १४ ।। अथ दर्शनानंतरं सपदि शीघ्रमेव रथादवरूढ उत्तीर्णः स्वप्राप्त्यर्थं योगिभिर्धिया धृतम् ईश्वरयोः चरणमहं नमस्ये । आभ्यां रामकृष्णाभ्यां सह वनवासिनः सखींश्च नमस्ये । ध्रुवं निश्चयेन ।। १५ ।। कालसर्पवेगेन कंपितानां शरणमिच्छतां नृणां दत्तमभयं येन तत् स्वहस्तपद्ममंघ्रिमूले पतितस्य मे मम शिरसि विभुः कृष्णोऽधास्यत् धास्यति अप्येव ।। १६ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'च' इत्यवधारणे । स एव सात्वतान्वये यादवकुले श्रीकृष्णरूपेणावतीर्णः सन् व्रजे आस्ते । अवतारप्रयोजनमाह–यशो वितन्वन् विस्तारयन् । तत्प्रयोजनमाह—स्वसेत्विति । स्वयं रचितान् सेतून् वर्णाश्रमधर्मान् पालयताममरवर्याणां शर्मकृत् । दैत्यादिवधेन सुखकर्ता सन् । प्रयोजनान्तरमप्याह—गायन्तीति । अशेषाणां सर्वेषां श्रोत्रादीनां मङ्गलं वाञ्छितं फलं यस्मात्तत् यद्यशो देवा गायन्ति । भवत्वेवं लोकप्रयोजनम्, तस्य तु किं 'प्रयोजनं ? येनावतारादि करोति' तत्राह—ईश्वर इति । ईश्वरत्वात् स्वप्रयोजनाभावेपि जीवानां पुरुषार्थसिध्यर्थं अवतारादि करोति इत्याशयः ।। १३ ।। तं श्रीकृष्णं त्वद्य नूनमहं द्रक्ष्यामीत्यन्वयः । 'कथमेवं निश्चय' इत्यपेक्षायां तत्र ज्ञापकमाह—उषसः प्रभातसमयाः मम सुदर्शना आसन् शुभसूचका बभूवुरित्यर्थः । तद्दर्शनेनात्मनः कृतार्थतां सूचयन्नाह—महतां साधूनां गतिं प्राप्यमिति । ननु 'गुरुं विना कथं कृतार्थता' इत्याशङ्क्याह—गुरुमिति । महतां गुरुरुपदेष्टापि स एवेति । तद्दर्शनाद्यर्थमेव तन्मार्गोपदेष्टा गुरुरपेक्षितस्तद्दर्शनादौ जाते तु न गुर्वन्तरापेक्षा इत्याशयः । तद्दर्शनेनैव कृतार्थतायां परमानन्दजनकं तत्स्वरूपसौन्दर्यातिशयं हेतुमाह–श्रियो लक्ष्म्या ईप्सितमास्पदमाश्रयभूतं स्वरूपं दधानमिति । श्रिय ईप्सितत्वहेतुमाह—दृशिमतां चक्षुष्मतां महानुत्सवो हर्षो यस्मादिति । तथात्वेऽपि हेतुमाह—त्रैलोक्ये एकमेव कान्तमिति ।।१४।। किञ्च अथास्य दर्शनानन्तरं सपदि झटित्येव रथादवरूढः अवतीर्णोऽहं प्रधानपुंसोः पुरुषोत्तमयोः । रामकृष्णयोश्चरणं तथा आभ्यां अनयोः सखीन् वनौकसो व्रजवासिनश्च नमस्ये इति ध्रुवं निश्चितमत्र सन्देहो नास्तीति अहो मे भाग्यम् । पुरुषोत्तमत्वे हेतुमाह-इशयोरिति । तच्चरणदर्शनस्पर्शादेर्दुर्लभत्वमाह—स्वलब्धय इति । अनाद्यविद्याच्छादितस्वपरमार्थरूपप्रकाशाय योगिभिरपि केवलं धिया धृतं चिन्तितं न त्वेवं साक्षाद्दृष्टमित्यर्थः ।। १५ ।। किञ्च न केवलं नमस्कारादिलाभमात्रम्, किंतु स्वाङ्घ्रिमूले पतितस्य मे मम शिरसि विभुर्महत्तमत्वात् कृष्णो निजहस्तपङ्कजं अधास्यत् आधास्यति तेनाप्यहं कृतार्थ एव स्याम् । तत्र हेतुमाह—दत्तेति। काल एव भुजङ्ग अजगरस्तस्य रंहसा वेगेन प्रोद्वेजितानामत्यन्तभीतानाम्, अतएव शरणैषिणां स्वरक्षकत्वेनाङ्गीकृतानां नृणां दत्तमभयं येन तत् ।। १६ ।।

अन्वितार्थप्रकाशिका

स इति ।। स्वान् स्वयं रचितान् सेतून् वर्णाश्रमधर्मान् पालयताममरवर्याणां शर्मकृत् यशः वितन्वन् स ईश्वरः सात्वतान्वयें यादवकुले श्रीकृष्णरूपेणावतीर्णः सत् व्रजे आस्ते । अशेषाणां सर्वेषां श्रोत्रादीनां मङ्गलं वाञ्छितं कलं यस्मात्तत् यद्यशो देवा गायन्ति ।। १३ ।। तमिति ।। त्रैलोक्यं एकमेव कान्तं सुन्दरं दृशिमतां चक्षुष्मतां महान् उत्सवा यस्मात्तत् महोत्सवरूपं वा श्रियो लक्ष्म्या ईप्सितमास्पदमाश्रयभूतं रूपं दधानं त्रैलोक्येत्यादिविशेषणम् । महतां साधूना गतिं प्राप्य गुरुं तं भगवन्तमद्य नुनं द्रक्ष्यें। तङ्कार्षः । यतः उषसः प्रभातसमयाः । पुंस्त्वमार्षम् । मम सुदर्शनाः शुभसूचका आसन् ।। १४ ।। अथेति ।। अथ दर्शनानन्तरं सपदि झटित्येव रथादवरूढः अवतीर्णोऽहं स्वलब्धये स्वरूपज्ञानप्राप्तये योगिभिरपि धिया धृतं चिन्तितम् ननु साक्षाद्दृष्टम् ईशयोः प्रधानयोः पुंसोः पुरुषोत्तमयोः रामकृष्णयोश्चरणं तथा आभ्यां सह अनयोः सखीन् वनौकसो व्रजवासिनश्च ध्रुवं निश्चितं नमस्ये

नमस्कारं करिष्यामि । वर्तमानसामीप्ये लट् तङार्षः ॥ १५ ॥ अपीति स्वाङ्घ्रिमूले पतितस्य मे शिरसि विभुर्हरिः काल एव भुजगः अजगरस्तस्य रंहसा वेगेन प्रोद्वेजितानामत्यन्तभीतानाम् अत एव शरणैषिणां स्वरक्षकत्वेनाङ्गीकृतानां नृणां दत्तमभयं येन तादृशं निजहस्तपङ्कजम् अधास्यत् । लङार्षः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सात्वतानां यदूनां अन्वये वंशे स्वसेतून् स्वकृतवर्णाश्रमधर्मान् पालयन्तोऽमरवर्यास्तेषां शर्मकृत् सुखकारकः अवतीर्णः ।१३। त्रैलोक्यैकान्तम् एकमेव सुन्दरं नान्यत् दृष्टिमतां महोत्सवो यस्मात्तत् श्रियो लक्ष्म्या ईप्सितं च तदास्पदं स्थानं च एवंभूत रूपं दधानं तं हरिं द्रक्ष्यामि कुतो यतः उषसः प्रातःकालाः शुभदर्शनाः शुभसूचकाः आसन् ।। १४ ॥ किं च अथेति अथ दर्शनानन्तरं सपदि शीघ्रमेव रथादवरूढः अधोऽवतीर्णः योगिभिरपि स्वलब्धये आत्मस्वरूपमाप्तये धियान्तःकरणेन धृतं ईशयोः सर्वेश्वरयोः प्रधानयोः सर्वश्रेष्ठयोः पुंसोः रामकृष्णयोः चरणमहं नमस्ये नमस्करिष्यामि आभ्यां रामकृष्णाभ्यां सह स्थितान् तत्सखीन् गोपाश्च नमस्यामि ॥ १५ ॥ विभुः शरणैषिणां नृणां दत्ताय भयं निजहस्तपङ्कजं मे शिरसि अधास्यत् धास्यति धरिष्यति ।। १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स चेति ॥ य एवंविधः, ईश्वरो विष्णुः, स एव सात्त्वतान्वये यादवकुले, अवतीर्णः श्रीकृष्णरूपेण प्रादुर्भूतः, किल । स च स्वसेतुः स्वकृतमर्यादा त पालयन्तीति तथाभूता ये अमरवर्या दैवसंपत्तिमभिजातास्तेषां शर्म सुखं करोतीति तथाभूतः, अशेषाण्यखिलानि मङ्गलानि यस्मादित्यशेषमङ्गलं, यत् यशः, देवाः गायन्ति तथाभूतं, यशः कीर्त्ति च, वितन्वन् व्रजे आस्ते ॥१३॥ तमिति ॥ महतां तु साधूनामपि, गतिं संप्राप्त्युपायं, गुरुं हितकारिणं, त्रैमुक्तविधं सात्त्वतां कुलेऽवतीर्णं कृष्णाख्यं विष्णुं अद्य नूनं द्रक्ष्ये द्रक्ष्यामि । यतः मम उषसः उषांसि, लिङ्गव्यत्यय आर्षः । प्रभातसमया इत्यर्थः । सुदर्शनाः प्रसन्नाः आसन् । सुखप्रभाता रजन्यः शुभसूचका बभूवुरित्यर्थः ॥ १४ ॥ अथेति ॥ किं च अथ अस्य दर्शनान्तरं, सपदि रथात् अवरूढः अहं, ईशयोरीश्वरयोः, प्रधानपुंसोः पुरुषोत्तमयो रामकृष्णयोः, योगिभिः अपि, स्वलब्धये आत्मलाभाय, धिया बुद्ध्या, केवलं धृतं भावितम् । न तु दृष्टमिति भावः । चरणं, नमस्ये । एवं आभ्यां प्रधानपुम्भ्यां, सह सखीन् अनयोर्मित्राणि, वनौकसो वनवासिनो गोपांश्च, नमस्ये ॥ १५ ॥ अथेति ।। किं च अथान्तरं, अङ्घ्रिमूले पतितस्य मे मम, शिरसि विभुः श्रीकृष्णः, काल एव भुजंगस्तस्य रंहो वेगस्तेन । प्रोद्वेजितानाम् । संसारभीरूणामित्यर्थः । अत एव, शरणैषिणां रक्षणोपायत्वेनाभ्यवस्यमानानां, नृणां जनानां, जनेभ्य इत्यर्थः । दत्तमभयं येन तत् , एवंभूतं, निजहस्तपङ्कजं स्वकीयहस्तकमलं, अधास्यत् आधास्यति ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अथावरूढ इति : १०.३८.१५.

तापापहं पापहरं शिवङ्करं दधाम्यहं मूर्ध्नि पदं दयोदधेः ।
स्पर्शोऽपि यस्याजनयत् सुमित्रतामहेश्च तार्क्ष्यस्य च नित्यवैरिणोः ॥ २९ ॥

कृष्णप्रिया

जिनके गुणगान का ही ऐसा माहात्म्य है, वे ही भगवान् स्वयं यदुवंश में अवतीर्ण हुए हैं । किसलिये ? अपनी ही बनायी मर्यादा का पालन करने वाले श्रेष्ठ देवताओं का कल्याण करने के लिये । वे ही परम ऐश्वर्यशाली भगवान् आज व्रज मे निवास कर रहे हैं और वहीं से अपने यश का विस्तार कर रहे हैं । उनका यश कितना पवित्र है ! अहो देवता लोग भी उस सम्पूर्ण मङ्गलमय यश का गान करते रहते है ॥ १३ ॥ इसमे सन्देह नहीं कि आज मैं उन्हें अवश्य देखूँगा । वे बड़े-बड़े सन्तों और लोकपालो के भी एकमात्र आश्रय हैं । सबके परम गुरु हैं । और उनका रूप सौन्दर्य तीनो लोकों के मन को मोह लेने वाला है । जो नेत्र वाले हैं, उनके लिये वह आनन्द और रस की चरम सीमा है । इसी से स्वयं लक्ष्मी जी भी, जो सौन्दर्य की अधीश्वरी है, उन्हें पाने के लिये ललकती रहती हैं । हाँ, तो मैं उन्हें अवश्य देखूँगा । क्योंकि आज मेरा मङ्गल प्रभात हैं, आज मुझे प्रातः से ही अच्छे-अच्छे शकुन दीख रहे हैं ॥ १४ ॥ जब मैं उन्हें देखूँगा तब सर्वश्रेष्ठ पुरुष बलराम तथा श्री कृष्ण के चरणों में नमस्कार करने के लिये तुरन्त रथ से कूद परूँगा । उनके चरण पकड़ लूगाँ । ओह ! उनके चरण कितने दुर्लभ हैं ! बड़े-बड़े योगी-यति आत्मसाक्षात्वार के लिये मन-ही-मन अपने हृदय में उनके चरणों की धारणा करते हैं और मैं. तो उन्हें प्रत्यक्ष पा जाऊँगा और लोट जाऊँगा उनपर । उन दोनों के साथ ही उनके वनवासी सखा एक-एक ग्वाल बाल के चरणों की भी वन्दना करुँगा ॥ मेरे अहो-भाग्य । जब मैं उनके चरण कमलों में गिर जाऊँगा, तब क्या वे अपना कर-कमल मेरे सिर पर रख देगें । उनके वे कर कमल उन लोगों को सदा के लिये अभयदान दे चुके हैं जो काल रूपी साँप के भय से अत्यन्त घबड़ाकर उनकी शरण चाहते और शरण में आ जाते हैं ॥ १६ ॥

समर्हणं यत्र निधाय कौशिक[1] स्तथा बलिश्चाप जगत्त्रयेन्द्रताम् ।
यद् वा विहारे व्रजयोषितां श्रमं स्पर्शेन सौगन्धिकगन्ध्यपानुदत् ॥ १७ ॥
न मय्युपैष्यत्यरिबुद्धिमच्युतः[2] कंसस्य [3]दूतः प्रहितोऽपि विश्वदृक् ।
योऽन्तर्बहिश्चेतस एतदीहितं क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा ॥ १८ ॥
अप्यङ्घ्रिमूलेऽवहितं[4] कृताञ्जलिं मामीक्षिता[5] सस्मितमार्द्रया दृशा ।
सपद्यपध्वस्तसमस्तकिल्बिषो वोढा मुदं वीतविशङ्क ऊर्जिताम् ॥ १९ ॥
सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथ माम् ।
आत्मा हि तीर्थीक्रियते तदैव मे बन्धश्च [6]कर्मात्मक उच्छ्वसित्यतः ॥ २० ॥

कर्दमक्षमा

अन्वयः—कौशिकः, तथा, च, बलिः, यत्र, समहर्षणम् , निधाय, जगत्त्रयेम्द्रताम् , आप, यद्, वा विहारे, व्रजयोषिताम् , श्रमम् , सौगन्धिकगन्धि, स्पर्शेन अपानुदत् , (तत् करसरोजं मच्छिरसि नूनं विधास्यति) ॥ १७ ॥ विश्वदृक् , (भगवान्) अच्युतः, अयम् , कंसस्य, दूतः एवं (कंसेन) प्रहितः इति, (हेतोः) मयि, अरिबुद्धिम् , न उपेष्यति, यः क्षेत्रज्ञः अमलेन, चक्षुषा, चेतसः, अन्तः, (च) बहिः, एतत् रहितम् , ईक्षति ॥ १८ ॥ अङ्घ्रिमूले, कृताञ्जलिम् , अवहितम् , माम् , सस्मियम् , आर्द्या दृशा, ईक्षिता, अपि, (निश्चयेन) सपदि, अयध्वस्तसमस्तकिल्बिषः, वीतविशङ्कः उर्ज्जिताम् , मुदम् , वोढा ॥ १९ ॥ सुहत्तमम् , ज्ञातिम् , अनन्यदैवतम् , अथमाम् , वृहद्भ्याम् दोर्भ्याम् , परिरप्स्यते त्तया एव, हि आत्मा, तीर्थी क्रियते, अतः मे च कर्मात्मकः बन्धः, उच्छ्वसति, ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

बलिना तावत्पदत्रयपरिमितभूदानसमये तस्य हस्ते उदकं निहितम् । कौशिकः कौशिकगोत्रोत्पन्न इन्द्रस्ते नापि कदाचित्किंन्निहितमिति ज्ञातव्यम् । मुमुक्षूणां संसारभयनिवर्तकं सकामानामभ्युदयप्रदं चेत्युक्तमथानुरक्तानां परमसुखदं चेत्याह । यद्वेति । वाशब्दो वितर्के । यत्करपंकजं विहारे रासक्रीडायाम् । सौगंधिकस्य गंध इव गंधो यस्य तत्सौगन्धिकगन्धि ॥१७॥ एवं परमानुग्रहं संभाव्य पुनरप्यसंभवमाशङ्क्य परिहरति । न मयीति । यद्यप्यहं कंसेन प्रहितोऽतस्तस्य दूतस्तथापि मय्यरेरयमिति बुद्धिं नोपैष्यति न करिष्यतीत्यर्थः । यतो विश्वदृक् सर्वज्ञोऽतो मम चेतसोऽन्तश्च बहिश्च यदीहितं चेष्टितमेतद्यः क्षेत्रज्ञोऽन्तर्यामी नित्यज्ञानेनेक्षते । अयं भावः । चेतसो बहिरेव कंसमनुवर्तेऽन्तस्तु कृष्णमेव तदेतदसौ हृदि स्थितो जानातीति । यद्वा एतस्य जगत ईहितमिति ॥ १८ ॥ अपि यद्यङ्घ्रिमूले चरणोपान्तेऽवहितं संयतं कृपामृतेनार्द्रया दृशा मामीक्षिता द्रक्ष्यति तर्हि सपद्येव विनष्टाखिलकल्मषः परां मुदं वोढा प्राप्स्यामीति ॥ १९ ॥ अथ मां परिरप्स्यते आलिंगिष्यति यदा तदैव तेन मे आत्मा देहस्तीर्थी क्रियतेऽतिपवित्रीकरिष्यते । बंधश्च अतो देहात् उच्छ्वसिति श्लथो भविष्यति ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यत्र हस्तपंकजे । कौशिकत्वमिन्द्रस्य यथा जातं तद्धरिवंशतोऽवसेयम् । निहितं स्थापितम् । 'दत्ताभयम्' इत्यादिना मुमुक्षूणां 'समर्हणम्' इत्यादिना सकामानाम् । अनुरक्तानां परमप्रेमवताम् । 'सौगंधिकं तु कह्लारम्' इत्यमरः । यद्धस्तपंकजम् । अपानुदन्निराकरोत् ॥ सम्यगर्ह्यते पूज्यते येन तत्समर्हणं संकल्पोदकम् , तच्च सार्वभौमावतारे पुरन्दरेण तस्य हस्ते जलं दत्तमिति पुराणान्तरे । बलिना च वामनावतार इत्यष्टमे वर्णितमेव ! यच्च विहारे रासक्रीडानन्तरसंप्रयोगे श्रमं विहारश्रमोत्थस्वेदांबु मार्जयामास । तदुक्तम्—"तासां रतिविहारेण श्रान्तानां वदनानि सः । प्रामृजत्करुणः प्रेम्णा शंतमेनांग पाणिना ॥" इति । तेन तासां परममाधुरी ध्वनिता । तत्किंभूतं–स्पर्शेन तासां मुखस्पर्शेन सौगंधिकगंधि मानससरो करकमलं सौगंधिकमिति पुराणान्तरे प्रसिद्धम् । इहापि पूर्ववत्स्वस्वगतोक्तत्वान्न रसाभासः ॥ १७ ॥ संभाव्य विचार्य । असंभवं दर्शनादेर्मनस्येवाह । अथ वा–किं प्रलापेन तव कंसभृत्यत्वात्तत्प्रहितत्वाच्च त्वय्यच्युतोऽरि बुद्धिं करिष्यत्येवेति मंदाशंकां परिहरन्नाह–न मयीति । अतः कंसप्रहितत्वात् । इत्यर्थ इति–धातूनामेकार्थत्वादेतिरत्र करणेऽर्थ बोध्य इत्याशयः । यतो यस्माद्धेतो अतो हेतोः । एतत् संकल्पलक्षणम् । क्षेत्रं श्रीगीतोक्तलक्षणम् "महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥ इच्छा द्वेषः सुखं दुखं संघातश्चेतना धृतिः । एतत्क्षेत्रम्" इत्येवंरूपं जानाति साक्षात्पश्यतीति क्षेत्रज्ञः । निजाभिप्रायमाह—अयं भाव इति । पूर्वव्याख्याने ममेहितमित्युक्तं-

---

१. कौशिको महाबलि–विज. । २. त्वप्रिय–विज. । ३. भृत्यः–वीर. विज. । ४. पतितं–विज. । ५. मामीक्षते–विज. ६. कामात्मकः–विज. ।

भगवतः परिच्छिन्नदर्शित्वप्रतीतेरस्वारस्यादाह–यद्वेति ॥ १८ ॥ 'अतो नु अपि यद्यर्थ' इत्याह–अपि यदि । ईक्षिता लुटः प्रथमपुरुषैकवचनम् । वीता गता विविधा शंका 'शत्रुप्रेषितोऽयं नांगसंगार्हः' इत्येवमादिका यस्य स तथा । ऊर्जितामुद्रिक्ताम् । वोढेति वहते पूर्ववत् ॥ सपदि तत्क्षणमेव ॥ १९ ॥ अथ दृष्टयनंतरम् । तीर्थीक्रियते ज्ञानयोग्यपात्री क्रियते इति वा भगवदालिंगने विनैवोप्रास्ति ज्ञानयोग्यो जात इति भावः । कर्मात्मकः संसृतिलक्षणः । अतो देहाद्बन्धः, अतोङ्गसंगाद्वा ॥ सुहृत्तमं श्रीवसुदेवादिहितकारित्वात् । न केवलं सुहृत्तमतैव किन्तु ज्ञातिम् । ज्ञातित्वेऽपि सत्यनन्यदैषतम् ऐकांतिकदास्यवंतम् । ततश्च तेन मे देहस्तीर्थी क्रियते तीर्थं करिष्यते, देहः पूतो भूत्वाऽन्येषामपि पावनो भविष्यति । अतः परिरम्भाद्धेतोः । उच्छ्वसिति उद्गतो भविष्यति ॥२०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुनरपि तदेव हस्तपङ्कजं विशिंषन् स्वमनोरथं प्रबलयति । समर्हणमिति । सम्यगर्ह्यते पूज्यते येन तत् समर्हणं दानसङ्कल्पोदकं कौशिकस्य तन्निधानं शतक्रत्वनन्तरसमये ज्ञेयं तत्कराश्रयत्वादिन्द्रपदस्य । बलिश्च जगत्त्रयेन्द्रतामापेति प्रथमत एव फलस्यापूर्वरूपत्वेनोदयात् । तथैवोक्तं श्रीविष्णुपुराणे । "यत्राम्बुविन्यस्य बलिर्मनोज्ञानवाप भोगान् वसुधातलस्थः । तथामरत्वं त्रिदशाधिपत्यं मन्वन्तरं पूर्णमपेतशत्रु"रिति । अस्य निष्कामत्वन्तु तच्छिरसि श्रीत्रिविक्रमचरणधारणात् अनन्तरमेव ज्ञानं तथापीश्वरेच्छयैव श्रीप्रह्लादवत्तदङ्गीकार । तदेवं पूर्वार्द्धे तस्य वदान्यस्वभावत्वेन सकामभक्तेषु सर्वसमृद्धिप्रदत्वमुपालक्ष्य परमानन्दस्वरूपत्वेन स्वैकनिष्ठेषु सर्वदुःखनिवर्त्तकत्वमुपलक्षयति । यद्वेति वा शब्दो वितर्के । कस्माचिद्यत् किञ्चित् श्रुत्वा वितर्कयामीत्यर्थः । यदेव हस्तपङ्कजं सौगन्धिकेषु दिव्यपङ्कजविशेषेषु गन्धो गुणलेशो यस्य तादृशं व्रतयोषितां कोटिसङ्ख्यानां विहारे रासाख्यनृत्यक्रीडा विशेषश्रमं पुनः पुनरावेशान्मूर्च्छापर्य्यन्तं किम्वा होरिकारूपे शङ्खचूडोपद्रवाद्रासेन मूर्च्छामयं स्पर्शेन तन्मात्रेण युगपदपानुदत् इत्यर्थः । ततः पूर्ववदत्रापि शब्दस्वरसयोग्यांश एव चिन्तितः । तत्र गोपीनां तत्पतीनाञ्चेति पद्यद्वये यथा स्वामिभिर्व्याख्यातं तद्वदेवं प्रायस्तद्विधानामभिप्राय इति ॥ १७ ॥ अथार्त्तस्वभावेन चिन्तामतिभ्यामाह । न मयीति । अच्युतः अलुप्तज्ञानैश्वर्य्य इत्यर्थः । अत एव विश्वदृक् ॥ १८ ॥ किल्विषं कंससेवादिलक्षणं वीता अपगता विविधा शङ्का यस्य तथा भूतः सन् । अन्यत्तैः । तत्र यदीति निश्चये । धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नीतिवत् । यद्वा । तदेवं निश्चित्यातृप्तिस्वभावेन मनोरथान्तरं करोति । अपीति ॥ १९ ॥ तेनाप्यतृप्त्या मनोरथान्तरं करोति । सुहृत्तममिति । सुहृत्तमं परममित्रं श्रावसुदेवादिहितकारित्वात् । बृहद्भुजामिति गाढालिङ्गनमभिप्रेतं हि निश्चितम् । अतीर्थमपि तीर्थं क्रियते तत्परिरम्भणेनेति । शेषः । इति दैन्योक्तिः । एवकारेणान्यनैरपेक्ष्यमुक्तं कर्म प्रारब्धलक्षणं तन्मयो बन्धो बन्धनम् । अन्यत्तैः । तत्र आत्मा देह इत्येव लेखनं युक्तम् । असाविति मूलपाठाभावात् । अथवा परेषामपि पावनत्वात्तीर्थी क्रियते न केवलमेतावत् अपित्वतो देहाद्धेतोरस्य वीक्षणादिनां तेषां कर्मात्मकबन्धश्चोच्छ्वसिति ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्यगर्ह्यते पूज्यते येन तत् समर्हणम्—पूजोपकरणम्, बलिश्च जगत्रयेन्द्रतामापेति 'बलिरिन्द्रो भविष्यति' इतिवचनप्रामाण्येन तन्निर्द्धारणात् । तथा चोक्तं श्रीविष्णुपुराणे (५।१७।३१)—'यत्राम्बु विन्यस्य बलिर्मनोज्ञा,—नवाप भोगान् वसुधातलस्थः । तथामरत्वं त्रिदशाधिपत्यं, मन्वन्तरं पूर्णमपेतशत्रुः ॥' इति । किंवा पूर्व्वकृतविश्वजिद्यज्ञप्राप्तेन्द्रत्वाभिप्रायेण, ततश्च तद्यज्ञस्य भगवदर्पणेन तच्छ्रीहस्ते जलादिसमर्पणनिधानमूह्यम् । वा–शब्दउक्ताशेषोत्कर्षनैरपेक्ष्येणास्यैवोत्कर्षार्थः । व्रजस्य योषितामिति—प्रेमविशेषेण तासामेव तद्योग्यता दर्शिता, तत्र विहार इति विनोदित्वम्, व्रजयोषतामिति प्रियतम–जनेषु प्रेमविशेषविस्तारित्वम्; श्रममिति वैदग्ध्यम्, स्पर्शेनेति सर्व्वदुःखहरत्वम्, सौगन्धिकगन्धीति परममनोहरत्वं चोक्तम्; अस्य विशेषणस्यान्तेऽत्रैव प्रयोगः,—तासामेव तत्सम्यगनुभवनीयत्वात् । तच्च श्रीभागवतामृतोत्तरखण्डे विस्तारितमेवास्ति । अन्यत्तैर्व्याख्यातम् । यद्वा, इन्द्रः ज्ञाताश्वमेध–समर्पणं निधाय जगत्त्रयेन्द्रतामाप, तदर्पणं बिना सम्यक् फलासिद्धेः । बलिश्च तथानिर्वचनीयं द्वारपालत्वादिना तद्वशीकरणादिकमापेति योज्यम्; यद्वा, कौशिको विश्वामित्रः श्रीरघुनाथावतारे अस्त्रमन्त्रं निजाश्रमे तं प्रत्यातिथ्येनान्नदिकं च समर्थ्य तथा सुप्रसिद्ध तद्भक्त्याद्यात्मकं महात्म्यं प्राप्तः, बलिश्च निजजगत्त्रयेन्द्रतां पादत्रयभूदानव्याजेन यत्र जलोत्सर्गेण निधाय तथा प्राप; च–कारेण तथेत्यस्यात्रापि सम्बन्धादर्थः स एव ॥ १७ ॥ एवमभयदानादीनामेषां यथोत्तरं श्रेष्ठयम् । अच्युतोऽलुप्तज्ञानैश्वर्य्य इत्यर्थः । अतएव विश्वदृक् । अन्यत्तैर्व्याख्यातम् । यद्वा, ईदृशे तत्परमानुग्रहे मम कंससेवकत्वेन योग्यता नास्तीत्याशंक्य तत् परिहरति —नेति । एतस्य जनस्य ममेहितम्; अन्यत् समानम् । यद्वा, क्षेत्रं श्रीमथुरालक्षणं राजत्वेन जानातीति क्षेत्रज्ञः कंसः, तस्मिन् यदेतस्येहितम् ॥ १८ ॥ किल्विषं कंससेवादिलक्षणं मुमुक्षादिदुर्वासनालक्षणं वा; वीता अपगता विविधा शंका यस्य तथाभूतः सन्; अन्यत्तैर्व्याख्यातम् । यद्वा, इत्थमनुग्रहं सम्भाव्य, स च न केवलं शिरसि श्रीहस्तधारणमात्रेण, किन्तु सस्मितकृपादृष्टौ वेत्यतृप्त्या तत्र मनोरथं करोति । अपीति – अपि किमवहितमवधानेन स्थितम्; अन्यत् समानम् ॥ १९ ॥ तेनाप्यतृप्त्या तत्र मनोरथान्तरं करोति,—सुहृत्तममिति । सुहृत्तमं परममित्रम्, श्रीवसुदेवादिहितका-

रित्वात् । बृहद्भ्यामिति गाढ़ालिंगनमभिप्रेतम् । हि निश्चितम् , अतीर्थमपि तीर्थं क्रियत इति दैन्योक्तिः । एवकारेणान्यनैरपेक्ष्यमुक्तम् । कर्म्मप्रारब्धलक्षणं तन्मयो बन्धो बन्धनम् ; अन्यत्तैर्व्याख्यातम् । अत्र आत्मा देह इत्येव लिखनम् ; 'असौ' इति मूलपाठाभावात् , तथा आश्लेषात् कर्म्मात्मकः कर्म्ममयो बन्धश्चेति टीका गुज्जरव्यासरचिता ज्ञेया । तदैवेत्यस्यस्याश्लेषादिति व्याख्यानुपपत्तेः । अतो देहादिति च तैर्व्याख्यातमेव । एवमग्रे महीयसा श्रीकृष्णेनेत्यादिकमपि तद्रचितमेवोक्तम् , दुर्बोधार्थस्यैव तैर्व्याख्यानात् । इत्थमन्यदप्यूह्यम् , तच्च पुरातनपृथगवर्त्ति-टीकादृष्ट्या स्पष्टमेव स्यादिति । अथवा परिरप्स्यते किम् ? एवमग्रेऽपि । तीर्थीक्रियते परमपावनत्वसम्पत्तयान्येषामपि संसारतारकः क्रियते; कर्म्म-श्रीभगवत्परिचर्य्यालक्षणम् , तदात्मकस्तद्रूपो बन्धो निर्बन्धो नित्यकृत्यत्वेन नियमः, उच्छ्वसिति प्रफुल्लो भवति वर्द्धत इत्यर्थः । अन्यत् समानम् । अतः परिरम्भादिति वा ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अर्हणम् अर्घ्यजलं तद्धस्ते कर्मभिश्च कौशिक इन्द्रः ॥ १७ ॥ यद्यप्यहं कंसस्य भृत्यभूतस्तेन प्रहितस्तथापि विश्वदृक् स मयि न शत्रुबुद्धिमुपेयात् क्षेत्रज्ञः युगपत् सर्वाणि क्षेत्राणि जानातीश्वरः एतदीहितं चेतसो व्यापारं चेतसोऽन्तर्बहिस्तिष्ठन् य ईक्षते इत्यर्थः । "यो मनसिष्ठ"न्निति श्रुतेः ॥ १८ ॥ वीतशङ्कः गतशङ्कः ॥ १९ ॥ तीर्थी क्रियते पवित्रीक्रियते उच्छ्वसिति शिथिली भवति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च यत्र यस्मिन् हस्तपङ्कजे बलिर्वैरोचनिः पदत्रयपरिमितभूदानसमयेऽर्हणमर्घ्यजलं निधाय जगत्त्रयेन्द्रतां जगत्त्रयाधिपत्यं प्राप प्राप्स्यति भाविनि मन्वन्तरे इन्द्रो भविष्यतीत्यर्थः । तथा कौशिक इन्द्रोऽपि कदाचिदर्घ्यं निधाय जगत्त्रयेन्द्रतां प्राप्तवानिति प्रसिद्धिमुपजीव्येत्थमुक्तम् एवं मुमुक्षूणां मोक्षदं सकामानामभ्युदयप्रदञ्चेत्युक्तम् । अनुरक्तानां परमसुखदञ्चेत्याह । यद्वेति वा शब्दो वितर्के उक्तसमुच्चयद्योतको वा निपातानामनेकार्थत्वात् यच्चेत्यर्थः । व्रजयोषितां विहारे यः श्रमस्तं सौगन्धिकगन्धि यद्धस्तपङ्कजं कर्तृ अपानुदत् दूरीचकार । सौगन्धिकस्येव गन्धो यस्य तत्सौगन्धिकगन्धि सौगन्धिकं कमलजातिविशेषः ॥ १७ ॥ एवं परमानुग्रहं सम्भाव्य पुनरप्यसम्भवमाशङ्क्य परिहरति । न मयीति । यद्यप्यहं कंसेन प्रहितः प्रेषितस्तस्य भृत्यश्च तथापि न मयि अरिबुद्धिम् अरेरयमिति बुद्धिं नोपैष्यति न करिष्यतीत्यर्थः । यतः स विश्वदृक् सर्वसाक्षी विश्वदृक्त्वमेव प्रपञ्चयति क्षेत्रज्ञः युगपत्सर्वाणि क्षेत्राणि जानन्नीश्वरः नियन्ता च सन् एतन्मच्चेतस ईहितं व्यापारं चेतसोऽन्तर्बहिश्च वसन् "यो मनसि तिष्ठन्निति" श्रुतेः योऽमलेन सङ्कोचविकासरूपविकाररहितेन चक्षुषा धर्मज्ञानेन ईक्षते सर्वं युगपत् साक्षात्करोति । अयम्भावः बहिरेवाहं कंसमनुवर्त्ते अन्तस्तु कृष्णमेव तदेतदसौ हृदिस्थो जानातीति ॥ १८ ॥ अपि तच्चरणोपान्तेऽवहितं संयतं वद्धाञ्जलिं च मां स्मितेन सहितं यथा तथा कृपामृतेनार्द्रया दृशा दृष्ट्या द्रक्ष्यति तर्हि सपद्येव विनष्टाखिलकल्मषः विगतशङ्कश्चोर्जितां प्रभूतां मुदं वोढा प्राप्स्यामि ॥ १९ ॥ किञ्च सुहृत्तमं ज्ञाति न विद्यते यस्मादन्यद्दैवतं यस्य तं मां पृथुभ्यां दीर्घाभ्यां भुजाभ्यां परिरप्स्यते आलिङ्गिष्यति यदा तदैव मम आत्मा देहः तीर्थी क्रियते पवित्री करिष्यते । अतो हेतोर्मम कर्मात्मकः बन्धश्च उच्छ्वसिति शिथिली भविष्यति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यत्र निजहस्तपद्मे समर्हणं जलपूर्वपूजां निधाय दत्त्वा कौशिकः इन्द्रः जगत्त्रयेन्द्रतामाप महाबलिश्च तथा इन्द्रवत् यद्धस्तपङ्कजं सौगन्धिकस्य कह्लारस्य गन्ध इव गन्धोऽस्यास्तीति विहारे वनक्रीडायाम् अपानुदत् निराकरोत् ॥ १७ ॥ ननु किं तव वुहुप्रलापेन यतस्त्वं कंसभृत्यः तत्प्रहितश्च अतस्त्वय्यप्रियबुद्धिं कुर्यादच्युत इति मन्दाशङ्कां परिहरन्निवाह । न मयीति । नोपैत्यपि किं नापैत्येवेत्याह । विश्वदृगिति । विश्वदृक्त्वान्मम मनोनैर्मल्यं विजानातीत्यर्थः । एतदेव विवृणोति । य इति चेतस एतदीहितं सङ्कल्पलक्षण चेष्टितम् अन्तर्बहिश्च स्थितमिति व्याप्तिकथनमात्रेण चेतनस्य चेष्टितसाक्षित्वं सम्यङ् न विवृतं स्यादिति क्षेत्रज्ञ इत्युपादत्त "इद शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते" इत्यादिना क्षेत्रज्ञशब्दार्थः सम्यग्विवृतः ॥१८॥ दयार्द्रया दृशा मां सस्मितमीक्षते किम् ईक्षणफलमाह । सपदीति । ईक्षणानन्तरमपास्तकिल्विषः सम्यङ् निराकृताशुभोऽत एव वीता विविधा शङ्का यस्य स वीतशङ्काऽहमूर्जितामुद्रिक्तां मुदं वोढा वहिष्यमीत्यन्वयः ॥ १९ ॥ अथ यदा परिरम्भणे हेतुमाह । सुहृत्तममिति । अन्यद्दैवतमिष्टप्रदं यस्य नास्ति स तथा परिरम्भणात् किं फलमाप्तं भवतीति तत्राह आत्मेति । अतोऽस्मात् परिरम्भणात् आत्मा देहस्तीर्थीक्रियत शुद्धजलवत् क्रियते पात्रीक्रियते वा ज्ञानदानाय योग्यो भवतीत्यर्थः । अन्येषां भगवद्भक्तौ बुद्ध्यवतारीक्रियते वा ज्ञानोपदेशाय वाधाक्रियते वा किमत इत्यत्राह । बन्धश्चेति । कामात्मकः विषयतृष्णालक्षणो बन्धः उच्छ्वसिति निर्वीर्यः छिन्नो भवतीत्यर्थः च उच्छेदेऽपि समुच्चये अतो देहहेतुको वा प्रवाहरूपेण सत्यो वा ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथार्त्तिस्वभावेन चिन्तामतिभ्यामाह । न मयीति । परेषामपि पावनत्वात्तिर्थीक्रियते न केवलमेतावदेव । अपि तु अतो देहाद्धेतोरस्य वीक्षणादिना तेषां कर्मात्मकबन्धश्चोच्छ्वसिति न तस्येत्यत्र सिद्धान्तः परमात्मसन्दर्भत्रिनवतितमवाक्यस्यावतारिकाप्रघट्टके दृश्यः देहं भृतां देहभृताम् ॥ १८–३२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अनिजत्वं दर्शयति—समर्हणं यत्रेत्यादि । कौशिक इन्द्रः, वलिः प्रसिद्धः । इति लीलावतारान्तर-हस्तस्यानिजत्वं दर्शयित्वा पुनर्निजहस्तपल्लवमिति यत् प्रागुक्तम्, तद्दर्शयति—यद्वेति व्रजयोषितां विहारे यन्निजहस्तपल्लवं तासांश्रममपानुदत् । कीदृशम् ? सौगन्धिकगन्धीति । पूर्वोक्तनिजहस्तपल्लवस्य निरुक्तिः पूर्वार्द्धेऽवतारान्तरस्येति निजत्वयोः प्रकटनम् ॥ १८–२६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अनिजत्वमवतारान्तरपरं तदेव दर्शयन् निजानिजत्वे प्रपञ्चयति—समर्थनमित्यादि । परस्पर-विपक्षाभ्यां कौशिकवलिभ्यामपि तुभ्यं प्राप्तमिति भावः । तेन नास्य दुर्लभत्वम्, वामनावतारस्य हस्तस्यानिजत्वं दर्शितम् । सम्प्रति निजत्वं दर्शयति—यद्वेत्यादि, वा-शब्दः प्रसिद्धो, यद्व्रजयोषितां विहारजश्रममपानुदत्, तदेव निजं स्वरूपसिद्धं तत् किं भवाध्व-श्रमं हरिष्यति ? अतस्तस्य मच्छिरसि स्पर्शोऽत्य सम्भावनीय एव ॥ १८–२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यत्र हस्तपङ्कजे सम्यक् अर्ह्यते पूज्यते येन तत् समर्हणं दानसङ्कल्पोदकं निधाय कौशिकः पुरन्दरः बलिश्च जगत्त्रयेन्द्रत्वमवाप । तच्च सार्वभौमावतारे पुरन्दरेण वामनावतारे बलिना तस्य हस्ते उदकं दत्तं तत्र पुरन्दर इन्द्रत्वमाप बलिराप्स्यतीति बोद्धव्यम् यत् हस्तपङ्कजं वा शब्दो वितर्के विहारे रासक्रीडानन्तरसम्प्रयोगे श्रमं विहारश्रमोत्थप्रस्वेदाम्बु अपानुदत् मार्जयामास यदुक्तं "तासां रतिविहारेण श्रान्तानां वदनानि सः प्रासृजत् करुणः प्रेम्णा सन्तमेनाङ्गपणिने"ति तेन तस्य पादपङ्कजं ब्रह्माद्यर्चितमपि यथा तासां कुचोच्छिष्टकुङ्कुमधारकमुक्तं तथा हस्तपङ्कजमपीन्द्राद्यर्हितं तासां श्रमाम्बुमार्जकमित्यहो तासां परमोत्कर्षमाधुरी ध्वनिः, पङ्कजमपि कीदृशं स्पर्शेन तासां मुखस्पर्शेन सौगन्धिकगन्धि मानसरोवरकमलं सौगन्धिकमिति पुराणप्रसिद्धं स्वगतोक्तत्वात् पूर्ववदत्रापि न रसाभासः ॥ १७ ॥ तदपि स्वस्मिन्ननुग्रहासम्भवमाशङ्क्य परिहरति । नेति । यद्यप्यहं कंसस्य दूतः प्रहितस्तेन प्रेषतोऽपि भवामि अरिबुद्धिम् अरेरयमिति भावनां न उपैष्यति न करिष्यतीत्यर्थः । यतो विश्वदृक् चेतसोऽन्तबहिर्वर्त्तमानः एतदीहितं एतस्य सर्वजगतोऽपीहितं ईक्षते ॥ १८ ॥ अपि किम् अङ्घ्रिमूले व्यवहितं प्रणम्य संयतन्तं मां कृपामृतेनार्द्रया दृशा ईक्षिता ईक्षिष्यते सपदि तत्क्षणादेव ऊर्जितां मुदं वोढा प्राप्स्यामि तदैव वीतविशङ्कश्च मदन्तःकरणं प्रभुर्जानातिस्मेति निश्चेष्यामीत्यर्थः ॥ १८ ॥ परिरप्स्यते आलिङ्गिष्यति तत्र हेतुः सुहृत्तमं न केवलं सौहार्दातिशय एव किन्तु ज्ञातिं ज्ञातित्वेऽपि सत्यनन्यदैवतम् ऐकान्तिकदास्यवन्तं ततश्च तेन मे आत्मा अयं देहः तीर्थीक्रियते तीर्थं करिष्यते देहः पूतो भूत्वाऽन्येषामपि पावनो भविष्यतीत्यर्थः । अतस्तत्परिरम्भादेव हेतोर्बन्धश्च उच्छ्वसिति उद्ग्रथितो भविष्यतीत्यर्थः ॥ २० ॥

गूढार्थदीपिनी

कौशिकः इन्द्रः यत्र हस्तपङ्कजे । सम्यक् अर्ह्यते पूज्यतेऽनेनेति समर्हणं सङ्कल्पोदकम् यद्वा यच्च श्रमम् अपानुदत् दूरीकृतवान् तत् शिरसि अधास्यत् किमित्यनुषङ्गः । सौगन्धिकं कमलगन्धि ॥ १७ ॥ मयि अरिबुद्धिं न उपैष्यति न करिष्यति । तस्य दूतः तेन प्रहितः प्रेषितोऽपि यतः विश्वदृक् अतो मम चेतसः अन्तर्बहिश्च यत् एतत् ईहितं चेष्टितं तत् ईक्षते । यद्वा । एतस्य जगतः ॥ १८ ॥ अवहितं दण्डवत् पतितं माम् ईक्षिता द्रक्ष्यति तदा अहम् ऊर्जिताम् अधिकतरां मुदं वोढा प्राप्स्यामि । तृनन्तं न तु लुटि उत्तमपुरुषे तु वोढास्मीति स्यात् । कथंभूतः । अपध्वस्त न समस्तं पापं यस्य सः सपदि तत्क्षणमेव ॥ १९ ॥ ज्ञातिं पितृव्यम् न विद्यते अन्यत् दैवतं यस्य तथाभूतं मां परिरप्स्यते आलिङ्गिष्यति तदैव मे आत्मा अन्तःकरणं देहो वा पवित्रीक्रियते बन्धश्च संसृतिलक्षणः अतो देहात् उच्छ्वसिति शिथिलीभविष्यति ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कौशिकः इन्द्रः बलिश्च बुभुक्षुः यत्र यस्मिन् पङ्कजे समर्हणं निधाय जगत्त्रयेन्द्रताम् । लोकत्रयाधिपत्यमवाप । वा समुच्चये सौगन्धिकस्य पद्मजातिविशेषस्य गन्ध इव गन्धो यस्य तत्सौगन्धिकगन्धि तत् हस्तपङ्कजं विहारे रासक्रीडायां व्रजयोषितां श्रमं स्पर्शेन अपानुदत् ॥ १७ ॥ अपि यद्यपि अहं कंसेन प्रहितः अतः कंसस्य दूतोऽपि तथापि मयि अरिबुद्धिमच्युतो न उपैष्यति । तत्र हेतुं दर्शयितुमच्युतं विशिनष्टि । विश्वस्मिन् दृक् दृष्टिर्यस्य सः एतदेव प्रपञ्चयति यतः क्षेत्राणि व्यष्टिसमष्टिरूपाणि शरीराणि जानातीति क्षेत्रज्ञः चेतसोऽन्तर्बहिश्च यच्चेष्टितमेतदमलेन चक्षुषा । कंसेन प्रेषितमपि मां स्वानन्यभक्तं जानात्येवेति फलितोऽर्थः ॥ १८ ॥

अपीति सम्भावनायाम् । अङ्घ्रिमूले अवहितम् अङ्घ्र्योर्मूले तन्मध्यवर्तिभूप्रदेशे उत्तमाङ्गे निवेश्य दण्डवत्पातितम् । आर्द्रया कृपामृतवर्षिण्या दृशा सस्मितं यथा भवति तथा ईक्षिता द्रक्ष्यति तदा सपद्येवापध्वस्तानि समस्तानि किल्विषाणि पापानि यस्य सः तथाभूतः । वीतविशङ्कः । विगतविविधसंशयः सन् ऊर्जितां प्रभूततरां मुदं वोढा प्राप्स्यामि ॥ १९ ॥ अथानन्तरं न विद्यते कृष्णादन्यद्दैवतं यस्य तं मां परिरप्स्यते आलिङ्गिष्यति यदा तदा में आत्मा देहस्तीर्थी क्रियते अतिपवित्रीकरिष्यते अतः कर्मात्मको मे बन्धश्चोच्छ्वसिति शिथिलीभविष्यति ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दुराशीस्तव प्रादुरासीदरे क्रूरारेः क्रूरस्य निदेशत एतद्देशमायात इति मतिमान्न दययेद्यदुनाथ इति मन्दसन्देहसन्दोहं परिहरन्नाह ॥ न मयीति । अच्युतः । अनेन कंसच्युतिरहितस्य मदहितप्रहितता किं तान्ति कर्त्रीति भावो ध्वन्यते । कंसस्य भृत्यस्तेन प्रहित इति मय्यप्रियबुद्धिं नोऽपैति । मम मनः सदासद्वेति न परमुखविचार्यप्रमेय इत्याह । विश्वदृक् यश्चेतसोऽन्तर्बहिश्चेष्टितं चेष्टितममलेन चक्षुषा क्षेत्रज्ञः क्षेत्राणि जानातीति स तथेक्षतीक्षते । इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते । क्षेत्रज्ञं चापि मां विद्धीत्यादेः । ईक्षत्यमलेनचक्षुषेति पदमेकम् । ईक्षतेनाशब्दमितिवद्धातुनिर्देशः । तेन तदर्थ ईक्षणं लक्ष्यते । ईक्षणसाधनं यदमलं तदीक्षत्यमलं तच्च तदिनयुक्तं सूर्यसहितं यच्चक्षुस्तेनैव यः क्षेत्रज्ञोऽपरोक्षीकृतसकलक्षेत्र इति फलितार्थ इति वा । अमलेतीनविशेषणं वा । अ ईषन्मलं यस्य सोऽमलश्चन्द्रश्चेनः सूर्यश्च ताभ्यां सहितं यच्चक्षुरिति वा । हेमसारङ्गलीलेत्यादेः । किञ्चित्सञ्चितमलस्यापि चन्द्रस्य चक्षुरन्तःस्थापनं दययैवेति मामपि तथैव दयास्पदं तनुयादेवेति ध्वनयति । अनेन लोकसाक्षित्वेनेक्षतेर्लक्षितलक्षणातो ज्ञानसाधनतया तदाश्रयौ तावेव तद्युक्तचक्षुषा षष्ठे सूर्याग्निः स्वं मरुद्भावः सोम इत्याद्युदाहृत्य स्फुटीकृतमनुसन्धेयं ।१७। कृताञ्जलिमङ्घ्रिमूले पतितं मां सस्मितं यथा तथाऽऽर्द्रयाऽऽनन्दोदकक्लिन्नया दृशेक्षतेऽपि स्वित्सपदि तत्क्षणेऽपध्वस्तसमस्तकिल्विषः सन्वीतविशङ्कोऽपगतमहासंशय ऊर्जितामुद्रिक्तां मुदं वोढा भविष्यामि ॥ १८ ॥ सुहृत्तमं तथा ज्ञातिं वंशसम्भवमनन्यदैवतं न विद्यतेऽन्यद्दैवतमुपास्यं यस्य तं । इति परिरम्भणकारणोदीरणं बृहद्भ्यां दोर्भ्यां यद्यात्मा स्वामी परिरभ्यते अथानन्तरमात्मा शरीरं तीर्थीक्रियते तदैव मे मम कामात्मको विषयाभिलाषरूपबन्धश्चातः परिरम्भणादेवोच्छ्वसति स्रस्तो भवति । अतो देहादिति वा । अथेत्यनेन तदैवेत्यनेन च तदानन्तर्यप्रतीतेरतः परिरम्भणादित्यवक्तव्यमिति वदन्ति ॥ १९ ॥ उरुश्रवा महाकीर्तिरेवं लब्धाङ्गसङ्गकृताञ्जलिं प्रणतं मां हे अक्रूर तत तात । तातेति वक्तुं जिह्वा जिह्रेतीति ततेत्युक्तिः । तातस्तत इति द्विरूपकोशोक्तः । वक्ष्यति चेत्तदा वयं जन्मभूतः सार्थकीकृतजन्मानो महीयसाऽतिमहता कृष्णेन यो नैवादृतोऽमुष्य तस्य तज्जन्म धिक् निन्द्यमित्यर्थः ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमनिष्टनिवारकत्वेन चरणं संस्तूय इष्टदातृत्वेनापि स्तौति । समर्हणमिति । यत्र हस्ते समर्हणं निधाय देयं किञ्चित्समर्प्य कौशिकः इन्द्रः बलिश्च जगत्त्रयेन्द्रतामवाप अयमिन्द्रः पूर्वजन्मनि कौशिकगोत्रे उत्पन्नः बलिरिव भगवद्धस्ते सर्वं निवेदितवान् तस्य कथा क्वचित्प्रसिद्धा भविष्यति बलेस्तु प्रसिद्धैव अवापेति प्रवाहनित्यत्वात् पूर्वमपि बलिरैन्द्रं पदं प्राप्तवानिति "छन्दसि लुङ्लङ्लिट" इति भविष्यदर्थे वा लिट् एवं प्रभुत्वेन अनिष्टनिवारकत्वमिष्टदातृत्वं चोक्त्वा मित्रवदपि कार्यं करोतीत्याह । यद्वा विहार इति । व्रजयोषितां सम्बन्धिनि विहारे तासां श्रमं सौगन्धिकगन्धि सौगन्धिकपुष्पवत् गन्धयुक्तं श्रमजलमपानुदत् वायुना हि श्रमो गच्छति त्रिगुणेन तद्वद्धस्तेनापि गतमिति सूचयितुं श्रमजलसम्बन्धः मान्द्यञ्च सिद्धमिति सौरभ्यार्थं तथोक्तवान् अनेन नित्यं स भगवच्चरित्रानुसन्धानं करोतीति सूचितं वेति बह्वर्थसूचनार्थम् अनेन सर्वेषामेव धर्मान् करोतीति सर्वफलदातृत्वं सूचितम् ॥ १७ ॥ ननु शत्रुरेव भवान् शत्रुकार्यं च साधयतीति केश्यादेरिव तवापि वधमेव करिष्यति न तु प्रसादमित्याशङ्क्याह । न मय्युपैष्यतीति । मयि अरिबुद्धिं नोपैष्यति शत्रुरयमिति नाङ्गीकरिष्यति तत्र हेतुरच्युत इति अच्युतत्वात् तस्य न कुतश्चिद्भयम् अतः स्वापकारकत्वेन न कोऽपि भगवतः अरिः दैत्यानां मारणन्तु तेषां लोकानां चोपकाराय यद्यप्यहं कंसस्य दूतः तेनैव प्रेषितः मां प्रति यावदुक्तं तावच्च करिष्यामि । ततो लोकदृष्ट्या अरिबुद्धिः कर्त्तव्या तथाप्यच्युतत्वान्न करिष्यति मारणनिमित्तं तु मयि नास्तीति भावः । किञ्च विश्वदृक् व्याजेन अपकारार्थं प्रवृत्त इति ममैव हितार्थं वधं कुर्यात् तद्भगवति व्याजो न सम्भवति यतो विश्वमेव पश्यति इदञ्च ज्ञायत इति न व्याजञ्च करिष्यामि नाप्यतिक्रमम् अस्मिन्नर्थे प्रमाणमाह । योऽन्तर्बहिरिति चेतसोऽन्तर्बहिश्च ईहितं भगवानीक्षते कदाचिदपि चित्तवृत्तिरेतादृशी भवेत् तदा मारणमेवोचितमन्यथा तु न मारयिष्यति किंच एतदपि चित्तोहितं विश्वासरूपं भगवान् जानाति स्वरूपे स्थित एव जानाति प्रकारान्तेणापि जानातीत्याह । क्षेत्रज्ञ इति । सर्वं क्षेत्रं जानातीति शरीरं क्षेत्रं "महाभूतान्यहङ्कार" इत्यादिना निरूपितं सविकारं क्षेत्रदर्शनेऽपि विशेषमाह अमलेन चक्षुषेति चक्षुषः चक्षुषा तदात्ममेव भवति अमलं चक्षुर्वस्तुयाथात्म्यमेव गृह्णाति अतः सर्वमेव भगवतः प्रत्यक्षमिति मद्वृत्तान्तं जानातीति न मय्यरिबुद्धिः चित्तस्य बहिः कार्यमान्तरमिच्छाज्ञानञ्च इच्छामध्य इति केचित् । एवं सति चित्तस्य चिदानन्दसद्रूपता भवति ॥ १८ ॥ ननु तथापि

संसर्गदोषात् अन्नादिदोषाच्च त्वां नाङ्गीकरिष्यतीत्याशङ्क्य तत्परिहरन्मनोरथमाह । अप्यङ्घ्रिमूलेऽवहितमिति । पूर्वपुण्यवशात् अहं पादयोः पतिष्यामि ततः अपराधे गते मयि दया उत्पत्स्यते नष्टो जायत इति तदा दयादृष्ट्या सपद्येवापध्वस्तसमस्तकिल्विषो भूत्वा मुदं परमानन्दं वोढा वहिष्यामि वीतविशङ्कश्च ततः प्रभृति भविष्यामि ऊर्जितश्च चरणमूले पतितो ऽवश्यं दृश्यते अन्यथाग्रे गमनं न भवेत् कदाचिदाक्रम्योल्लङ्घ्य वा अन्यचित्तो गच्छेदित्याशङ्क्याह । अवहितमिति । अहं सावधान आत्मानं ज्ञापयिष्यामि प्रपन्नोऽहमिति नान्यथा बुद्धिर्भविष्यतीत्येतदर्थमाह । कृताञ्जलिमिति । अत एव मामीक्षिता अवश्यं द्रक्ष्यति तत्र प्रमाणमाह । असाविति । इदानीमेव प्रत्यक्षो जातः तदा किंवक्तव्यमिति मम प्रवृत्तिं पूर्वदौरात्म्यञ्च स्मृत्वा सस्मितोऽपि भविष्यति । ततः प्रवृत्तिं ज्ञात्वा आर्द्रापि दृष्टिर्भविष्यति एवम्भगवतः दृष्टिमन्दहासस्नेहेषु जातेषु देशकालकर्मापेक्षाया निवृत्तत्वात् सपद्येव गतपापो भविष्यामि वासनापि गमिष्यति मां परित्यज्य अधस्तादेव पतिष्यति भगवता ममैतावानुपकारः कृत इति फलसिद्ध्या निरन्तरं सन्तोषं च प्राप्स्यामि पूर्वं यावानपराधः कृतः तावानग्रे न भविष्यतीति पूर्वस्य चेद्भगवान् निवारको जातः अग्रे कः सन्देहो भविष्यतीति वीतशङ्कः शङ्कैव न भविष्यति ततो भगवदीयकार्येषु वा ऊर्जितः समर्थश्च भविष्यामि एतस्य सर्वस्य सर्वस्यापि मूलं दर्शनमेव ॥ १९ ॥ ततो मनोरथान्तरमाह । सुहृत्तममिति । भगवान् बृहद्भ्यां दोर्भ्यां मां परिरप्स्यते किं तथा चेदात्मा मे देहः तीर्थीक्रियते अतीर्थभूतमपि तीर्थं भविष्यति लोकानामप्युद्धारं करिष्यति किम्पुनर्ममेति आलिङ्गनं त्रयाणां भवति । अन्तःकरणसम्बन्धिनां देहसंबन्धिनां शास्त्रतो भक्तानाञ्च अहन्तु त्रिरूपोऽपीति ममालिङ्गनं करिष्यत्येव सुहृत्तमोऽति स्निग्धः ज्ञातिगोत्रजः न विद्यते अन्यत् दैवतं यस्य सुहृत्तमत्वं लोके सन्दिग्धमपि स्वानुभवान्निर्णीतमिति सिद्धवत्कारेणोक्तं हेतुत्रयं बाधाभावाय आवश्यकत्वाय कार्याय च देहे आत्मपदप्रयोगः । भगवत्स्पर्शात् स्पर्शे वा तस्योत्तमत्वख्यापनाय युक्तश्चायमर्थः सर्वाङ्गे चरणो हीनः तत्र चेद्गङ्गादितीर्थान्युत्पद्यन्ते तत उत्तमाङ्गेषु ततोऽपि बहून्येव तीर्थानि निर्गच्छन्तीति परिरम्भणानन्तरं निर्गतो देहः गङ्गाद्यपेक्षयापि महानेव भवति तदैवेत्यग्रेणैव सम्बन्धः तदैव जातो ऽग्रेऽप्यनुवर्त्तत इति तदैव कर्मात्मकश्च बन्ध उच्छ्वसिति विदीर्णो भवति अनेन स्वपरोपकार उक्तः अतोऽस्मात् शरीरात् मत्तो हेतोर्वा ॥ २० ॥

श्रीसुबोधिनी-सारः

यत्र हस्ते समर्हणं पूजां निधाय समर्प्य कौशिक इन्द्रः तथा बलिश्च जगतां त्रयस्येन्द्रतामाप । वा वितर्के । सौगन्धिकस्य गन्ध इव गन्धो यस्य तत् यद्धस्तपद्मं विहारे रासमंडले गोपिकानां श्रमं खेदं दूरे कृतवत् ॥१७॥ न पूतनादिवन्मम मरणशंकेत्याह कंसस्य दूतस्तेन प्रहितः प्रेषितोऽहमस्मि । अच्युतः कृष्णो मयि अरि बुद्धिं शत्रुभावं न करिष्यति । तत्र हेतुः विश्वदृक् सर्वज्ञः क्षेत्रज्ञो यश्चेतसोऽन्तर्बहिः एतत् ईहितं चेष्टितम् एतस्य जगतो वा अमलेन चक्षुषा दिव्यदृष्ट्या ईक्षते पश्यति ॥१८॥ अङ्घ्रिमूलेऽवहितमवस्थितं कृताञ्जलिं मां सस्मितं यथा भवति तथाऽऽर्द्रया दृशा कृपादृष्ट्याऽपि यदि मामीक्षिता द्रक्ष्यति तदा सपदि तत्क्षणमेवापध्वस्तं नष्टं समस्तं सर्वं किल्बिषं पापं यस्य सोहं वीतविशङ्को निर्भय ऊर्जितां परां मुदं हर्षं वोढा प्राप्स्यामि ॥ १९ ॥ सुहृत्तमं परमित्रं ज्ञातिं स्वजनम् अनन्यदैवतं सत्परं मां बृहद्भ्यां दोर्भ्याम् आश्लेक्ष्यति तदैव मे ममात्मा देहः तीर्थीक्रियते पवित्री सम्पाद्यते अतः कारणात् कर्मात्मको बन्धो निवर्त्तिष्यते ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं हस्तकमलस्य मुमुक्षूणां मोक्षप्रदत्वमुक्तम् । अथ सकामानामभ्युदयप्रदत्वमाह— समर्पणमिति । कौशिकः कौशिकगोत्रोत्पन्नः इन्द्रः कश्चित् पूर्वजन्मति तथा बलिश्च वैरोचनिः पदत्रयपरिमितभूतलदानसमये यत्र यस्मिन् हस्तकमले अर्हणं जलमात्रं निधाय समर्प्य जगत्त्रयेन्द्रतामवाप । कौशिकेन किञ्चित्कदाचिद्भगवद्धस्ते दत्तम्, येनेन्द्रत्वं लब्धमिति पुराणान्तराज्ज्ञेयम् । अथानुरक्तानां परमानन्दजनकत्वमाह—यद्वेति । वा शब्दः आश्चर्ये । सौगन्धिकस्य कमलविशेषस्य गन्ध इव गन्धो यस्य तथाभूतं यत् विहारे रासक्रीडायां व्रजयोषितां विहारजं श्रमं स्पर्शेनापानुदत् दूरीचकार ॥ १७ ॥ ननु 'शत्रुणा कंसेन प्रेषितस्त्वमपि शत्रुरेव, अतः कथं त्वय्येवमनुग्रहं करिष्यति ?, इत्याशङ्क्याह—नेति । यद्यप्यहं कंसेन प्रहितः प्रेषितस्तथाऽप्यच्युतः श्रीकृष्णो मय्ययं कंसस्य दूतः कार्यसाधकः इत्यरिबुद्धिं नोपैष्यति न करिष्यति इत्यर्थः । यतो विश्वदृक् सर्वसाक्षी । तत्राऽप्यच्युतज्ञानत्वं हेतुरच्युतपदेन सूचितः । एतदेव स्पष्टयति—य इति । यः क्षेत्रज्ञः साक्षी अमलेन यथार्थग्रहणे समर्थेन चक्षुषा चिच्छक्त्या चेतसोऽन्तर्बहिश्च स्थितस्य प्राणिजातस्येहितं चेष्टितमीक्षते । तथाचाहं बहिरेव कंसानुवर्ती, अन्ततस्तु तत्सेवक एव, अतः सर्वज्ञः स मयि नारिबुद्धिं करिष्यतीति भावः ॥ १८ ॥ अतोऽपि यदि अङ्घ्रिमूले चरणोपान्ते अवहितं संयतं रचिताञ्जलिं मां सस्मितं यथा भवति तथा कृपामृतेनार्द्रया दृशा दृष्ट्या ईक्षिता द्रक्ष्यति तर्हि सपदि तत्क्षण एवापध्वस्तो विनष्टः समस्तकिल्बिषो दुरितं पापं यस्य, वीता निवृत्ता पुनर्जन्मादिशङ्का यस्य तथाभूतश्च सन्नहमूर्जितां वृद्धां मुदं वोढा प्राप्स्यामीत्यन्वयः ॥ १९ ॥ किञ्च अथ दर्शनानन्तरं स यदि बृहद्भ्यां दोर्भ्यां भुजाभ्यां मां परिरप्स्यते आलिङ्गयिष्यति तदैव मे ममात्मान्तःकरणविशिष्टो जीवस्तीर्थीकियते पवित्रीकरिष्यते । 'कुत' इत्यत आह -अतः अस्मात् तदालिङ्गनाद्धेतोः कर्मात्मको बन्धश्च उच्छ्वसिति शिथिलीभविष्यति । 'परमेश्वर-

स्त्वां कथं परिरप्स्यते' इत्याशङ्क्य तद्योग्यतां सूचयन्नात्मानं विशिनष्टि—सुष्ठु हृत् यस्य स सुहृत् अतिशयेन सुहृदिति सुहृत्तमस्तं तद्विषयककापठ्यरहितं ज्ञातिंपितृव्यं न विद्यते यस्मात् अन्यद्दैवतं यस्य तमनन्यभक्तं चेति । किञ्च यदा उरुश्रवाः महायशाः श्रीकृष्णः लब्धोऽङ्गसङ्गः परिरम्भो येन तं प्रणतं बद्धाञ्जलिं च मां हे अक्रूर हे तातेति च वक्ष्यते प्रेम्णा सम्बोधयिष्यति तदा वयं जन्मभृतः सफलजन्मानो भविष्यामः । स्वकुटुम्बाभिप्रायेण बहुवचनम् । 'उरुश्रवा' इत्यनेनैवं दीनेष्वनुग्रहेणैव तद्यशोविस्तारस्त्वन्यथा न स्यादिति सूचितम् । व्यतिरेके दोषमाह—यस्तु पुमान् महीयसा सर्वपूज्येन भगवता नैवादृतः स्वकीयत्वेन गृहीतः अमुष्य पुंसः तज्जन्म धिक् निन्द्यमित्यर्थः ॥ २०–२१ ॥

अन्वितार्थप्रकाशिका

हस्तपङ्कजं विशिनष्टि—समर्हणमिति ॥ कौशिकः कौशिकगोत्रः कश्चित् इन्द्रः तथा बलिर्वैरोचनिश्च पदत्रयपरिमितभूतलदानसमये यत्र यस्मिन् हस्तकमले अर्हणं जलमात्रं निधाय समर्प्य जगत्त्रयेन्द्रतामवाप । अत्र कौशिक इन्द्रतामवाप बलिस्त्ववाप्स्यति यौगपद्योक्त्याऽत्र द्वयोः भूतनिर्देशः कौशिकेन किंचित्कदाचिद्भगवद्धस्ते दत्तं येनेन्द्रत्वं लब्धमिति पुराणान्तरात् ज्ञेयम् । सार्वभौमावतारे पुरन्दरेण भगवतो हस्ते उदकं दत्तमिति चक्रवर्ती । यच्च हस्तपङ्कजं वा आश्चर्ये वितर्के वा सौगन्धिकस्य कमलविशेषस्य गन्ध इव गन्धो यस्य तथाभूतं यत् विहारे रासक्रीडायां व्रजयोषितां विहारजं श्रमं स्पर्शेनापानुदत् दूरीचकार । तासां रतिविहारेण श्रान्तानां वदनानि सः प्रामृजत्करुणः प्रेम्णा शन्तमेनाङ्गपाणिना इति प्रागुक्तेः । तेन यथा तस्याः पादपङ्कज ब्रह्माद्यर्चितमपि गोपीकुचोच्छिष्टकुङ्कुमधारकमुक्तं तथा हस्तपङ्कजमिन्द्राद्यर्हितमपि तासां श्रमाम्बुमार्जकमित्यहो गोपीनां सौभाग्यम इति ध्वनिः ॥ १७ ॥ नेति ॥ यद्यप्यहं कंसेन प्रहितः प्रेषितस्तथाऽप्यच्युतः श्रीकृष्णो मयि अयं कंसस्य दूतः कार्यसाधकः इत्यरिबुद्धिं नोपैष्यति न करिष्यति इत्यर्थः । यतो विश्वदृक् सर्वसाक्षी यः क्षेत्रज्ञः साक्षी अमलेन यथार्थग्रहणसमर्थेन चक्षुषा चिच्छक्त्या चेतसोऽन्तर्बहिश्च स्थितस्य प्राणिजातस्येहितं चेष्टितमीक्षति ईक्षते । तङ्भाव आर्षः ॥ १८ ॥ अपीति ॥ अतोऽपि यदि अङ्घ्रिमूले चरणोपान्ते अवहितं संयतं कृताञ्जलिं मां सस्मितं यथा भवति तथा कृपामृतेनार्द्रया दृशा दृष्ट्या ईक्षिता द्रक्ष्यति तर्हि सपदि तत्क्षण एवापध्वस्तं विनष्टं समस्तं किल्विषं यस्य वीता निवृत्ता पुनर्जन्मादिशङ्का यस्य तथाभूतश्च सन्नहमूर्जितां प्रवृद्धां मुदं वोढा प्राप्तिशीलः । तृन्नन्तम् । भविष्यामि । वोढा प्राप्स्यामीति वदतां स्वाम्यादीनामपि तृन्नन्त एव तात्पर्यम् नतु लुटि उत्तमपुरुषे वोढाऽस्मीत्यापत्तेः ॥१९॥ सुहृत्तममिति ॥ अथानन्तरं सुहृत्तममतिशयेन सुष्ठु हृदयं ज्ञातिं पितृव्यं न विद्यते यस्मात् अन्यद्दैवतं यस्य तमनन्यभक्तं च मां हरिः यदि बृहद्भ्यां दोर्भ्यां भुजाभ्यां परिरभ्यते आलिङ्गिष्यति तदैव मे ममात्मान्तःकरणविशिष्टो जीवस्तीर्थीक्रियते । स्वयं पवित्रोऽन्यपवित्रीकरश्च करिष्यते । अतः अस्माद् आलिङ्गनाद्धेतोः अतो देहाद्वा कर्मात्मको बन्धश्च उच्छ्वसिति शिथिलीभविष्यति ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

बलिः त्रिपदपरिमितभूमिदानकाले यत्र हरिहस्तपङ्कजे समर्हणमुदकं निधाय दत्त्वा जगत्त्रयस्य त्रिलोक्या इन्द्रः तां आपत्तथा तेन प्रकारेण कदाचित्समये कौशिक इन्द्रोऽपि अर्हणं दत्त्वा त्रिलोक्या इन्द्रतामपतच्च करपद्मं मुमुक्षूणां संसृतिदुःखनिवर्त्तकं स कामानां चेप्सितप्रदं चास्तीति गदितं अथस्नेहिनां च महानन्दप्रदमस्तीत्याह । वा वितर्के यत्सौगंधिकस्य दिव्यपङ्कजस्य गंध इव गंधो यस्य तत् सौगंधिकगंधिहस्तपंकजं स्पर्शेन विहारे रासमणे व्रजयोषितां श्रममपानुदत् निवर्त्तयामास । कौशिको गुग्गुल शकयोरिति विश्वः ॥ १७ ॥ यतः कंसेन प्रहितप्रेरितोऽतः अक्रूरस्तस्य दूतोऽस्तीति मम शत्रुः एवंभूतां मयि अरिबुद्धिं विश्वदृक् न उपैष्यति न प्राप्स्यति न करिष्यतीत्यर्थः जनानां यः अन्तर्बहिः अन्तर्यामितया वर्त्तमानः बहिः गोपरूपेण अक्षरधामनि दिव्यविग्रहेण च स्थितः स च क्षेत्रज्ञः क्षेत्राणि चेत्तनाचेतनवृन्दानि स्वशरीरभूतानि जानातीति तथाभूतः श्रीकृष्णः अमलेन चक्षुषा अप्राकृतेन नेत्रेण चेतसो ममाऽन्तःकरणस्य एतदीहितं विचारितमीक्षते हरेश्चेतनाचेतनशरीरत्वे प्रमाणानि यस्यात्मा शरीरमिति यस्याक्षरः शरीरमिति यस्य पृथ्वी शरीरमिति यस्य सर्वाणि भूतानि शरीराणीत्यादीनि ॥ १८ ॥ अपि यदि अङ्घ्रिमूले पादसमीपे अवहितं स्थितं तां दयारूपपीयूषेण या दृशामामीक्षिता इक्षिष्यते तर्हि स पद्येव अपध्वस्तानि नष्टानि समस्तकिल्विषाणि सर्वपापानि यस्य सः विगतशङ्कः सन् ऊर्जितां परमां मुदं वोटा प्राप्स्यामिनृन्निति सूत्रेण भविष्यदर्थे वह धातोर्विहितस्य तृनो वोटेति रूपं ॥ १९ ॥ नास्ति अन्यच्छ्रीकृष्णाद्भिन्नं दैवतं उपास्यो देवो यस्य तं मां दोर्भ्यां यदा परिप्स्यते आलिंगयिष्यन्ति तदैव मे आत्मा शरीरं तीर्थी क्रियते शुद्धो भविष्यति अतः आलिंगनात् मे बंधश्च उच्छ्वसिति शिथिलो भविष्यति ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

समर्हणमिति ॥ किं च यत्र यस्मिन् हस्तपङ्कजे, बलिर्वैरोचनिः, पदत्रयपरिमितभूदानसमये इति शेषः । समर्हणमर्घ्यंजलं निधाय, जगत्त्रयेन्द्रतां जगत्त्रयाधिपत्यं, आप प्राप्स्यति । भाविनि मन्वन्तरे इन्द्रो भविष्यतीत्यर्थः । तथा कौशिक इन्द्रोऽपि,

कदाचिद्यत्पाणावर्घ्यं निधाय जगत्त्रयेन्द्रतां प्राप्तवानिति प्रसिद्धिमुपजीव्येत्थमुक्तम्। एवं मुमुक्षूणां मोक्षप्रदं सकामानामभ्युदयप्रदं चेत्युक्तमथानुरक्तानां परमसुखदं चेत्याह यद्वेति। वा शब्दो वितर्के उक्तार्थसमुच्चयद्योतको वा, निपातानामनेकार्थत्वात्। यच्चेत्यर्थः। व्रजयोषितां गोपाङ्गनानां, विहारे रासक्रीडोद्भूत परिश्रममित्यर्थः। सौगन्धिकस्य प्रचुरोत्तमसुगन्धमयपद्मस्य इव गन्धो यस्य तत्, हस्तपङ्कजं कर्त्तृ, स्पर्शेन अपानुदद्दूरीचकार। तन्मच्छिरसि अधास्यदिति पूर्वेण संबन्धः 'सौगन्धिकं तु कह्लारम्' इत्यमरः॥ १७॥ एवं सर्वोत्तममनुग्रहं संभाव्य पुनरप्यसंभवमाशङ्क्य परिहरति॥ न मयीति॥ प्रहितः अद्यप्यहं कंसेन प्रेषित इत्यर्थः। कंसस्य दूतो भृत्यश्च अस्मि, तथापि, क्षेत्रज्ञः युगपत्सर्वाणि क्षेत्राणि जानन्, अत एव विश्वदृक् सर्वसाक्षी, 'यो वेत्ति युगपत् सर्वं प्रत्यक्षेण सदा स्वतः' इति श्रुतेः। एतत् मम, चेतसः ईहितं व्यापारं, अन्तः चेतसोऽन्तःप्रदेशे, बहिश्च वसन्, 'यो मनसि तिष्ठन्' इति श्रुतेः। अमलेन संकोचविकासरहितेन, चक्षुषा ईक्षति सर्वं साक्षात् करोति इत्थंभूतः, यः अच्युतः श्रीकृष्णो भवति, सः मयि, अरिबुद्धिमरेरयं भवतीति मतिं, न उपैष्यति न करिष्यति। अयं भावः। चेतसो बहिरेव कंसमनुवर्त्तेऽन्तस्तु कृष्णमेव तदेतदसौ हृदि स्थितो जानातीति॥ १८॥ अपीति॥ अपि अतः, यतो मदन्तःस्थं जानात्यत इत्यर्थः। अङ्घ्रिमूले चरणोपान्ते, अवहितं संयतं, कृताञ्जलिं बद्धाञ्जलिं च, मां, सस्मितं स्मितेन सहितं यथा तथा, आर्द्रया कृपामृतेनार्द्रया, दृशा दृष्ट्या, ईक्षिता यर्हि द्रक्ष्यति, तर्हीत्यर्थः। सपद्येव, अपध्वस्तानि विनष्टानि समस्तानि किल्बिषाणि यस्य सः, वीता विगता विशङ्का विशिष्टा आशङ्का यस्य सः, इत्थंभूतः सन्, ऊर्जितां प्रभूतां, मुदं, वोढा प्राप्स्यामि॥ १९॥ सुहृत्तममिति॥ किं च सुहृत्तमं हिततमं, ज्ञातिं सगोत्रं न विद्यते अन्यद्यस्मादितरद्दैवतं यस्य तं, मां बृहद्भ्यां दीर्घाभ्यां, दोर्भ्यां भुजाभ्यां, परिरप्स्यते आलिङ्गिष्यति। तदा, एव मे मम, आत्मा देहः, अथ कार्त्स्न्येन तीर्थीक्रियते पवित्रीकरिष्यते। अतः हेतोः, मम कर्मात्मकः बन्धश्च, उच्छ्वसिति शिथिलीभविष्यति॥ २०॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

समर्हणमिति, न मयीति : १०.३८.१७-१८.

इन्द्रेऽग्रजे रिपुपदे च बलौ स्वदासीभूतासु चास्वपि समप्रसृतोपकारः।
स श्रीपतिर्न मयि शत्रुमतानुगेऽपि कार्कश्यमेष्यति मनस्यखिलान्तरज्ञः ३०॥

अप्यङ्घ्रिमूल इति : १०.३८.१९.

यद्यहमस्मि समन्तुरस्मि च महापापैकराशिर्भृशं कंसादेश-निशापिशाच-विवशोऽप्यन्याय-विन्यासभूः।
दीनार्तिप्रशमैक-सद्व्रतजुषा दृष्ट्येक्षितः स्यां यदा शिष्टं स्यान्न तदैकमेष्वपि ततः स्पष्टं प्रमोदम्लभे॥ ३१॥
पुण्यं स्वल्पमजीर्णमेव वृजिनं सिद्धं न चोग्रं तपो यस्याऽसौ कथमीशदर्शनचणोऽक्रूरोऽजनि क्रूरधीः।
स्वस्वास्याब्जनिवेशिताङ्गुलिदलं देवादिकानामपि स्यामद्याहमहो सुविस्मयजनेर्हेतु-र्ह्यसाधारणः॥ ३२॥
सान्निध्यं पदयोरुपेयुषि मयि श्रीनेतुरब्जप्रभाद्दृग्दोषं शमयेन्मदीयमिह किं चित्रं यदक्रूरगा।
चित्रं कोटिसुधांशुकान्तिललितं दृष्ट्वा यदास्याम्बुजं दृग्दोषं शमयाम्यलं प्रतिपदं लोलाङ्गुलीमोटनैः॥ ३३॥

सुहृत्तममिति : १०.३८.२०.

यत्संस्पर्शसुखं रहस्यनुपदं जानाति सैका रमा तेनालिङ्गनमाचरिष्यति भुजद्वन्द्वेन तद्वक्षसा।
धन्यत्वं किमु तद्वदामि किमु वा पावित्र्यमात्मोदितं यावत्तीर्थपदस्य तस्य वपुषः सङ्गैरनङ्गप्रदैः॥ ३४॥

कृष्णप्रिया

मैं कंस का दूत हूँ। उसी के भेजने से उनके पास जा रहा हूँ। कहीं वे मुझे अपना शत्रु तो नहीं समझ बैठेंगे राम-राम! वे ऐसा कदापि नहीं समझ सकते। क्योंकि वे निर्विकार हैं, सम हैं अच्युत हैं, सारे विश्व के साक्षी हैं सर्वज्ञ हैं वे चित्र के बाहर भी हैं और भीतर भी। वे क्षेत्रज्ञ रूप से स्थित होकर अन्तः करण की एक-एक चेष्टा को अपनी निर्मूल ज्ञान-दृष्टि के द्वारा देखते रहते हैं॥ १८॥ तब मेरी शंका व्यर्थ हैं। अवश्य ही मैं उनके चरणों में हाथ जोड़कर विनीत भाव से खड़ा हो जाऊँगा। वे मुस्कुराते हुए दया भरी स्निग्ध दृष्टि से मेरी ओर देखेंगे। उस समय मेरे जन्म-जन्म के समस्त अशुभ संस्कार उसी क्षण नष्ट हो जायँगे और मैं निःशङ्क हो कर सदा के लिये परमानन्द में मग्न हो जाऊँगा॥ १९॥ मैं उनके कुटुम्ब का हूँ। और उनका अत्यन्त हित चाहता हूँ। उनके सिवा और कोई मेरा आराध्यदेव भी नहीं है। ऐसी स्थिति में वे अपनी लंबी लंबी बाँहों से पकड़कर मुझे अवश्य अपने हृदय से लगा लेंगे। अहा! उस समय मेरी तो देह पवित्र होगी ही, वह दूसरों को पवित्र करने वाली भी बन जायगी और उसी समय उनका आलिङ्गन प्राप्त होते ही—मेरे कर्ममय बन्धन, जिनके कारण मैं अनादि काल से भटक रहा हूँ हट जायँगे॥ २०॥

लब्धाङ्गसङ्गं प्रणतं कृताञ्जलिं मां वक्ष्यतेऽक्रूर ततेत्युरुश्रवाः ।
तदा वयं जन्मभृतो महीयसा नैवादृतो यो धिगमुष्य जन्म तत् ॥ २१ ॥
न तस्य कश्चिद् दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा ।
तथापि भक्तान् भजते यथा [1]तथा [2]सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥ २२ ॥
[3]किंवाग्रजो मावनतं यदूत्तमः स्मयन् परिष्वज्य गृहीतमञ्जलौ ।
गृहं प्रवेश्याप्तसमस्तसत्कृतं संप्रक्ष्यते कंसकृतं स्वबन्धुषु ॥ २३ ॥

श्रीशुक उवाच

इति सञ्चिन्तयन् कृष्णं श्वफल्कतनयोऽध्वनि । रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप ॥ २४ ॥

कर्दमक्षमा

अन्वयः—लब्धाङ्गसङ्गम्, प्रणतम्, कृताञ्जलिम्, माम्, उरुश्रवाः, अक्रूर !, तत, इति माम्, वक्ष्यते, तदा, वयम्, जन्मभृतः, यः, महीयसा, न एव, आदृतः, अमुष्य, तत्, जन्म, धिक् ॥ २१ ॥ तस्य, कश्चित्, दयितः, न, सुहृत्तमः, न, अप्रियः, न, च, द्वेष्यः, न, वा, उपेक्ष्य न एव, यद्वद्, सुरद्रुमः, उपाश्रितः, (तद्वद्) अर्थदः, तथा यथा भक्ताः भजन्ते तथा भक्तान् भजते ॥ २२ ॥ किञ्च, अवनतम्, अञ्जलौ, गृहीतम्, मा, यदूत्तमः, अग्रजः, स्मयन्, परिष्वज्य, गृहम्, प्रवेश्य, आप्तसमस्तसत्कृतः, स्वबन्धुषु, कंसकृतम्, संप्रक्ष्यते ॥ २३ ॥ श्रीशुक उवाच—श्वफल्कतनयः, अध्वनि, इति, कृष्णम्, सञ्चिन्तयन्, रथेन, गोकुलम्, प्रातः, हे नृप, सूर्यः, अस्तगिरिम्, प्राप्तः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततः भोस्तातेति । तदा जन्मभृतः सफलजन्मानः । अन्यथा तंज्जन्मैव न भवतीत्याह् । महीयसेति । महीयसा श्रीकृष्णेन योऽनादृतोऽमुष्य तस्य तस्य जन्तोस्तज्जन्म धिक् ॥ २१ ॥ ननु सुहृदादिषु परिष्वङ्गसंप्रश्नादयो जीवधर्माः कथमीश्वरे संगच्छन्तेऽत आह् । न तस्येति । दयितः प्रियस्तद्विपरीतोऽप्रियः सुहृत्तमो हिततमस्तद्विपरीतो द्वेष्य एतत्सर्वव्यतिरिक्त उपेक्ष्य इति । दयितादयो न सन्तीति सत्यं तथापि भक्तान्भजते । तत्र यथा ये भक्तास्तांस्तथा भजते । "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति भगवद्वचनात् । अविषमत्वेपि भक्तेभ्य एव फलं ददातीत्यत्र दृष्टान्तः । यद्वत्सुरद्रुम इति ॥२२॥ यो मयाञ्जलिः करिष्यते तस्मिन्नेवाञ्जलौ गृहीतं स्वकरेण धृतं माम् । आप्तानि समस्तान्यर्घादिसत्कृतानि येन तं मां गृहं प्रवेश्य ॥ २३ ॥ एवंप्रकारेणाध्वनि संचिन्तयन् स तु मार्गमपि न वेद तथापि सूर्यास्तगमने रथेन गोकुलं प्राप्त इति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तन्यते विस्तार्यते वंशोऽनेनेति ततः, तनोतेः क्तप्रत्ययेऽनुनासिकलोपेन रूपसिद्धेः । 'ततोऽनुकम्प्ये जनके' इति मेदिन्युक्तेर्जनकभ्रातृत्वान्मयि ततशब्द उपचर्यते । भगवद्दृष्ट्याऽनुकम्प्यत्वाद्वा मां ततेति वक्ष्यते । तत एव तात इत्यभिप्रेत्यैवोक्तम्—भो कीर्तिनरुतातेति । महीयसाऽतिपूज्यतमेन । यः पुमान् । अमुष्य पुंसः । तज्जन्म यस्मिञ्जन्मनि नादृत इत्यर्थः ॥ उरु महत् श्रवः पाधकृपाकरत्वादिलक्षणा यस्य सः । महीयसा सर्वपूज्यतमेन भगवता प्रेमसंभाषणादिना न संमानितः । अमुष्य तादृशस्य । तन्महत्तमानादृतम् । यद्वा–परमापकृष्टत्वेनाऽनिर्वचनीयम् । यद्वा–संजात्यादिनोत्कृष्टमपि । यद्वा–महीयसा कृपादिगुणमहत्तमेन तत्सेवकेन केनचिदपि । किं पुनस्तेन सर्वकृपालुगुणमूर्द्धन्यमणिनेर्थः ॥ २१ ॥ तत्रानीश्वरतामाशंकते—नन्विति । अतोऽत्र । तस्मात्प्रियाद्विपरीतः । एतस्माद्दयितादिचतुष्काद्व्यतिरिक्तो भिन्नः । इति सत्यम्—दयितत्वाद्यभावस्तत्र सत्यं विद्यतेऽपि । तत्र दयितत्वादिमत्सु । यथा दयितत्वादिरूपेण । तान् दयितत्वादिमतः । तथा–दयितत्ववन्तं दयितत्वेन, द्वेष्यं द्वेष्यत्वरूपेण । तथा च श्रीगीतासु । इत्यत्रैतस्मिन्विषये । यद्वद्यथा सुरद्रुमः कल्पतरुः । न हि कल्पद्रुमस्य केनापि साकं रागद्वेषादि तथापि फलं तु सेवकायैव ददातीतिवद्भगवानपीति भावः ॥ ननु तस्य परमेश्वरत्वात्सर्वत्र साम्यमेव संभवेत् एवं च त्वं स्वस्मिं स्तत्सुहृत्तमत्वादिकं किं संभावयसीति तत्राह्—न तस्येति । तथापि भक्तान्भजत इति—"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥" इति तदुक्तेः । तत्रापि यथा तथेति ये यथा भक्तास्तांस्तथा भजते । "ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम्" इति तद्वचनात् । यद्वत्सुरद्रुम इति–आश्रयणतारतम्म् ।

---

१. यथा–विज. । २. वनस्पति–विज. । ३. किञ्चा–श्रीधर. वंशी. जीव. विर. विज. विश्व. शुक. ।

अनाश्रितेभ्यः फलाऽप्रदानं च तदपि सुरद्रूमस्य यथा न वैषम्यं तथा तस्य भगवतोऽपि। किञ्च-सुरद्रूमस्याश्रिताधीनत्वं तथा नास्ति यथा भगवतो भक्ताधीनत्वम्। अतो भक्तिसम्बन्धेन तस्य साहौर्दद्वेषोपेक्षा अपि दृष्टा एव। यथाम्बरीषादौ सौहार्दं, तद्द्वेष्टृदुर्वासःप्रभृतौ द्वेषोपेक्षे च दृष्टे एवेति ॥२२॥ इदानीं बलदेवविषयिणीं चिन्तां कुरुते-किञ्चेति। स्मयन्नह्य मां पितृव्यः सन्नमतीति मंदस्मितं कुर्वन् स्वबन्धुपु संप्रक्ष्यतेऽनुयोक्ष्यते॥ स्वबन्धुषु वसुदेवादिषु ॥२३॥ इति इत्थम्। सूर्यश्चास्तगिरिमिति-प्रातश्चलितो मथुरातोऽल्पेऽपि मार्गे भगवद्ध्यानावेशितचेतस्त्वादश्वरश्मिसंचालनादिकं न सस्मारेति भावः। नृपालनादिव्यग्राणामेतद्दौर्लभ्यमाह नृपेति संबोधयन्निति भावः॥ सूर्यश्चास्तगिरिमिति सहोपमा। सा चास्तगिरिणा सूर्यस्येव गोकुलमहसा तस्यावृतत्वं ध्वनयात ॥२४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुनरप्यतृप्यतृप्त्या मनोरथान्तरं करोति। लब्धेति। प्रणतमिति। अङ्गसङ्गलब्ध्या हर्षेण पुनः कृतप्रणाममित्यर्थः। किञ्च। कृताञ्जलिं तद्ध्रुवत्वं प्रेमवैक्लव्येन वक्ष्यते यदा किमिति तथा वक्ष्यति परमकृपालुत्वादित्याह। उरु महत् श्रवः कीर्त्तिर्निरुपाधि कृपाकरत्वादिलक्षणा यस्य सः। तदा वयं जन्मतृत इत्यनेनास्य मनोरथस्य सर्वतो महत्त्वमभिप्रतं प्रेमभाषणेनैव परमानन्दसिद्धेः। एवं कृतानान्तु मनोरथानामुत्तरोत्तरं श्रैष्ठ्यं महीयसा श्रीभगवता नादृतः सम्भाषणादिना न सन्मानितः एवकारेण कदाचित् सुखं कदाप्यादरेण सफलजन्मता सूच्यते। अमुष्येति परोक्षोक्तिस्तादृशस्य तद्दूरवर्त्तित्वाभिप्रायेण तन्महत्तमानादृतम् अमुष्येत्युक्तेऽपि तदित्युक्तिरनादरदाढर्थ्य बोधनार्था। यद्वा। परमापकृष्टत्वेनानिर्वचनीयमित्यर्थः। यद्वा साजात्यादिनोत्कृष्टमपि। अन्यत्तैः। तत्र जन्तोरिति महत्तमानादृततया अशेषगुणहीनताभिप्रायेणेति अथवा महीयसा कृपादिगुणमहत्तमेन तत्सेवकेन केनचिदपि किं पुनस्तेन सर्वकृपालुगुणमूर्द्धन्यमणिनेत्यर्थः। अन्यत् समानम् ॥ २१ ॥ न तस्येति। तैर्व्याख्यातं तत्र कथमीश्वर इत्याप्तकामत्वादिना प्रियाद्यभावादिति भावः। प्रियः सगुणेन प्रीतिविषयः तद्विपरीतः स्वदोषेणाप्रीतिर्विषयः परगुणदोषयोरावेशाभावात्तौ द्वौ न हित उपकारतः प्रत्युपकारविषयः तद्विपरीतस्त्वपकारतो द्वेषविषयः तस्मिन्नपकारादिनिमित्तासम्भवात्तौ च न सर्वस्य तदेकात्मकत्वात् उपेक्ष्योऽपि न इति सत्यमिति नञ्द्वयान्वयायोह्य मूले चकारः सुहृत्तमादित्रयेऽप्यन्वितः पुनर्नकारः पूर्वनिषिद्धविरोधित्वात् प्राप्तस्य प्रियादित्रयस्य निषेधनिर्द्धारणार्थः एवकारस्तु भक्तादित्यनेनान्वितः भक्तेभ्य एवेति व्याख्यास्यमानत्वात् अत्रानुपयुक्तत्वाच्च वाशब्दस्तद्गुणद्वयव्यतिरिक्तस्योपेक्षस्यापि समुच्चयं तथाहि तस्य कश्चिदेकोऽपि दयितः सुहृत्तमश्च न नैवाप्रियश्च द्वेष्यश्च उपेक्ष्यो नाम यः सच नेत्यर्थः। यद्यप्येवं प्रीत्यादिविषयो न तथापि भक्तानेव भजते। यद्यपि चाप्रीत्यादिविषयो न तथाप्यभक्तान्न भजत इत्यर्थः। तत्र च यथा यादृशभावनादिना ये भक्तास्तांस्तथा तादृशप्रादुर्भावादिनेति वशताप्राप्तिरप्यभिप्रेता तदुक्तं श्रीवैकुण्ठदेवेन' 'अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज। साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रिय'' इति भक्तिसम्बन्धेनैवेति कृपोदयो भवति कृपया च वशीभूय सुहृत्तममित्यादिपूर्वोक्तसुहृत्तमत्वज्ञातित्वपरिरम्भित्वादिकमपि प्राप्नोति न मय्युपैष्यतीत्यादिपूर्वोक्तविद्वेषिद्वेष्टृत्वमपीति सिद्धान्तः तथोक्तंश्रीभगवद्गीतास्वेव "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः। ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यह''मिति तत्रत्यं मयि त इत्यादिकं श्रीवैकुण्ठदेवेन विवृतम् "साधवो हृदयं मह्यं साधूनां हृदयन्त्वहम्। मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी''ति ईश्वरस्य सतो भक्तकृपासद्भावे तु दोषः पूर्वमेव दर्शितः। एवमेव च वैषम्यनैर्घृण्ये परिहृते स्यातां प्राकृतगुणदोषैस्तच्चित्तास्पर्शात् भक्त्या तत्तत्स्पर्शादिति विशेषविचारस्तु श्रीभागवतसन्दर्भस्य परमात्मसन्दर्भे ज्ञेयः दृष्टान्तोऽपि तथा तस्मात् पश्यन्ति पादपास्तस्मात् शृण्वन्ति पादपा इति भारतीयन्यायेन कल्पवृक्षे तु देवत्वांशसद्भावेन सुतरां सज्ञानत्वे बुद्धिपूर्वकप्रवृत्तेः अबुद्धिपूर्वकत्वे तु पूर्वप्रकरणप्राप्तपरिष्वङ्गादिद्वारकतत्कृपालुताभिप्रायासिद्धेः स्यात् कल्पवृक्षेणापि तत्कृपैकप्रार्थकेभ्यस्तद्वरोऽपि देय इति सर्वं समञ्जसम् ॥ २२ ॥ अतः श्रीवासुदेवादिपरमभक्तसम्बन्धेन मय्यपि सुहृत्तमादिभावं श्रीकृष्णः करिष्यत्येव इति सम्भाव्य लब्धाश्वासो मनोरथान्तरं कुरुते कि वेति किमिति सम्भावनायां वा समुच्चये अग्रजश्च किमित्यर्थः। यदूत्तम इति। सुहृत्तमत्वं ज्ञातिवदभिप्रायः अञ्जलावेव ग्रहणञ्च सङ्कोचेनैव कृते तस्मिन्निति भावः। अग्रज इति स्वयमञ्जलिग्रहेण गृहप्रवेशेनादौ हेतुः स्मयन् स्मयगान इति मनः प्रसादापेक्षयोक्तम् अतएवातिथ्येनाप्तसमस्तसत्कृतमिति तत्परिणामापेक्षया अस्य बन्धुषु श्रीवसुदेवादिषु कंसस्य कृतं चेष्टितमिति तस्यापि विशेषापेक्षया तथा सति तेनानुकूलीकृतेन श्रीकृष्णमिति आनेतुं शक्ष्यामीति चाभिप्रेतम् ॥ २३ ॥ रथेनेति तैर्व्याख्यातम् अतएवानतिदूरेऽप्यध्वनि विलम्बो जातः रथमारुह्यैव श्रीभगवत्समीपपर्यन्तगमनं सूर्यश्चास्तगिरिं प्राप्त इति सहोपमा सा चास्तगिरिणा सूर्यस्येव गोकुलमहसा तस्यावृतत्वं ध्वनयति ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पुनरप्यतृप्त्या मनोरथानन्तरं करोति—लब्धेति। अंगसंगः परिरम्भलक्षणः, प्रणतमिति अंगसंगलब्ध्या हर्षेण पुनः कृतप्रणाममित्यर्थः। किञ्च, कृताञ्जलिं वक्ष्यते यदा किमिति, तथा वक्ष्यति परमकृपालुत्वादित्याह,—उरु महत् श्रवः कीर्तिनिरुपाधिकृपाकरत्वादिलक्षणा यस्य सः। तदा वयं जन्मभूत इत्यनेनास्य मनोरथस्य सर्व्वतो महत्त्वमभिप्रेतम्,—प्रेमसम्भाषणेनव

परमानन्दसिद्धेः। एवं कृतानां तत्तन्मनोरथानां यथोत्तरं श्रैष्ठ्यं द्रष्टव्यम्। महीयसा श्रीभगवतानादृतः सम्भाषणादिना न सम्मानितः, एवकारेण कदाचित् कथञ्चिदप्यादरेण सफलजन्मता सूच्यते। अमुष्येति परोक्षोक्तिस्तादृशस्य तत्र दूरवर्त्तित्वाभिप्रायेण, तत् महत्तमानादृतम्, अमुष्येत्युक्तेऽपि तदित्युक्तिरनादरदार्ढ्यबोधनार्था। यद्वा, परमापकृष्टत्वेनानिर्व्वचनीयमित्यर्थः। यद्वा, सज्जात्यादिनोत्कृष्टमपि। अन्यत्तैर्व्याख्यातम्। तत्र जन्तोरिति महत्तमानादृततया अशेषगुणहीनताभिप्रायेणेति। अथवा महीयसा तत्सेवकेन केनचिदपि, किं पुनस्तेनेत्यर्थः। अन्यत् समानम् ॥ २१ ॥ न तस्येति, एवमपि उपेक्ष्योऽपि, वाशब्दः कटाक्षे। दयितादयो न सन्ति, जगदीश्वरस्य सर्व्वेष्वेव साम्यात्। यद्यप्येवं तथापि भक्तान् भजत एव जनान् भजते तन्मनोरथं पूरयति, न त्वभक्तान् भजत इत्यर्थः। यथा सुरद्रुमः कल्पवृक्ष उपाश्रितः सामीप्येन सेवितः सन्नेवार्थदः, उपसेविनामिष्टदो भवति, आश्रितानां सर्व्वेषामेवाविशेषेणेष्टप्रदानेन, अनाश्रितानां च तददानेनापि यथा तस्य वैषम्यं न स्यात्, तथा भक्तानामेव मनोरथपूरणेन श्रीभगवतोऽपीत्यर्थः, भक्तेरेव तत्फलत्वात्, अन्यत्तैर्व्यञ्जितम्। यद्वा, यथा यथावत् भजते, यद्वत् सुरद्रुमस्तथेति योज्यम्। यद्वा, यथा तथा येन केनापि प्रकारेणेत्यर्थः, अन्यत् समानम्। यद्वा, यथा लोके सख्याचरणादिना दयितो भवेत्तादृशः कश्चिद्दयितो नास्ति, तथोपकारादिना प्राकृतजन्मादिना वा यथा सुहृत्तमस्तादृशश्च नास्ति, किन्तु स्वभावत एव नित्यं दयितः सुहृत्तमश्च वर्त्तत इत्यर्थः। तथा प्रीत्यनाचरणादिना लोके यथाऽप्रियः, द्रोहादिना च यथा द्वेष्यः, तादृशश्च नास्ति, किन्तु स्वभक्त-प्रीत्यर्थं लोकहितार्थञ्च तौ स्त इत्यर्थः। तर्हि दयितादीनामभावे उपेक्ष्योऽस्तु, नेत्याह, उपेक्ष्योऽपि नास्ति, सहजपरमदयामयत्वेन सर्व्वजीवहिताचरणपरत्वात्। अप्रियादीनां सत्तात्यन्तनिरसनार्थं पुनर्न चेति प्रयुक्तम्, भक्तान् यथाकथञ्चित् सख्यादिना भजतोऽपि लोकान् भजते, अतो भक्तेषु प्रीत्यनाचरणादिनाऽप्रियादिष्वप्रीत्यादिकमपि कुर्य्यादिति ज्ञेयम्। सुरद्रुमोऽप्याश्रितप्रार्थनया तथैवाचरेत्, अतः प्राकृतसेवकस्यापि द्वेष्यकंसाश्रितस्यापि मम मनोरथं पूरयिष्यत्येवेति भावः। अथवा दयितादयो न सन्तीति न, अपि तु सन्त्येवेत्यर्थः। द्वाभ्यां नञ्भ्यां प्रकृत्यर्थगमनात्, चकाराद्यव्ययत्रयस्य अप्रिय इत्यादिभिस्त्रिभिः प्रत्येकं सम्बन्धः, तथेत्यव्ययं तस्मादित्यर्थः। अपि-शब्दस्य यथा तथेत्यनेनान्वयः। सुरद्रुमो यद्वदुपाश्रितोऽर्थदः, तद्वत् किम्?—काका, अपि तु नैवेत्यर्थः। किन्तु यथा तथापि निजनिबन्धातिक्रमादिनापि भजते, तथा च भगवद्गीतासु (४।११) 'ये यथा माम्' इत्यादि। अस्यार्थः—ये यथा मां प्रपद्यन्ते तांस्तथैवाहमपि भजामि किम्?—काका, अपि तु नैवेत्यर्थः। तर्हि कथं भजसीत्यपेक्षायामाह,—यथा सर्व्वे मनुष्याः सर्व्वशो मम वर्त्म भक्तिमार्गमनुवर्त्तन्ते, तथा भजामि, भजनादप्यधिकफलप्रदानादिति। यद्वा, दयितः सुहृत्तमश्च नास्तीति दैन्येनात्मानमुद्दिश्यैवोक्तम्, तस्य प्रियतां विना च न जन्मसाफल्यमित्याशंक्य पुनराह,—न चाप्रिय इति। सर्व्व एव तस्य प्रिय इत्यर्थः। अतएव न च द्वेष्यो नाप्युपेक्ष्याऽपीत्यर्थः। ननु तर्हि कथं कंसं हन्यात्? कथं वा तादृशानां मनोरथं न परिपूरयेदित्याशंक्याह—तथापीति। हितार्थमेव कंसादीन् हन्यात् मनोरथञ्च भक्तानामेव परिपूरयेत्, न त्वन्येषामिति भावः। अन्यत् समानम्। यद्वा, दयित एकान्तभक्तो जनः, सुहृत्तमः परमोत्तमबन्धुश्च नास्ति किम्? अपि त्वस्त्येव। तत्र दयितो वैकुण्ठे श्रीगरुड़ादिर्महालक्ष्म्यादिर्वा, गोकुले च श्रीदामादिः श्रीराधादेव्यादिर्वा, सुहृत्तमश्च कश्यपादिः श्रीनन्दादिर्वा, एवमग्रेऽप्यूह्यम्, अत आधुनिक-सकामे यद्वजने तस्य न काप्यपेक्षा, तथा दुष्टादिसंगेनाप्रियत्वादिकञ्च भवेदेवेत्यर्थः। तथापि दुष्टसंगे यथा तथा भक्तानपि भजते, तस्य भक्तिमात्रप्रियत्वात्। यथा तथा भजनेनापीष्टसिद्धौ दृष्टान्तः—सुरेति। अतो दुष्टसंगिनोऽपि मम भजनाभासेनापि कृपयिष्यत्वेवेति भावः। अलमतिविस्तरेण ॥ २२ ॥ श्रीभगवतो नन्द-नन्दनत्वेन स्वस्य मननात गोपगोपीषु परमासक्त्या स्वस्मिंस्तादृशमनुग्रहमसम्भाव्य श्रीबलदेवस्य सुव्यक्तेन श्रीबसुदेवनन्दनत्वेन स्वसम्बन्धं मत्वा तस्यानुग्रहे मनोरथं कुरुते—किं वेति। वा-शब्दः श्रीकृष्णानुग्रहस्य दुर्लभताभिप्रायेण। अग्रज इति ज्येष्ठसम्माननपरः, पश्चात् सोऽपि तमेवानुसरिष्यतीति गूढो भावः। अवधानेन नतम्, यदुत्तम इति श्रीवसुदेवात्मजत्वेन तस्य प्रसिद्धत्वात्। स्मयन् स्मयमान इति मनः प्रसादापेक्षयोक्तम्, गृहं प्रविश्येति अग्रजत्वेन तस्य गृहकृत्यापेक्षत्वात्, ततश्चातिथ्येनाप्तसमस्तसत्कृतं सन्तं स्वस्य बन्धुषु श्रीवसुदेवादिषु कंसस्य कृतं चेष्टितं किं सम्यक् प्रक्ष्यति, यदुत्तमत्वात्। तथा सति तेन समं सम्मन्त्र्य श्रीकृष्णमितो नेतुं शक्ष्यामीति गूढ़ो भावः ॥ २३ ॥ इति उक्तप्रकारेण कृष्णमध्वनि सम्यक् चिन्तयन्, स्वफल्कतनय इति मुनिपुत्रत्वेन तद्योग्यतोक्ता। यद्वा, तादृशकार्य्ये प्रवृत्तत्वात्तन्नाम नोक्तम्, रथेनेति तैर्व्याख्यातमेव। यद्वा, रथेन सहैव श्रीभगवतस्तदारोहणाद्यर्थम्, अन्यथा रथारूढ़तया तस्य तत्र प्रवेशानुपपत्तेः, सूर्य्यश्चास्तगिरिं प्राप्त इति सायंकाले गोधूलिसंज्ञकसल्लग्ने इत्यर्थः। तथा चोक्तं श्रीवैशम्पायनेन (विष्णु प. २४।१)—'अथास्तं गच्छति तदा मन्दरश्मौ दिवाकरे' इति; श्रीपराशरेण (वि. पु. ५।१७।१९) च—'किञ्चित् सूर्य्ये विराजति' इति। यद्यपि श्रीमधुपुरीतो वायव्यकोणे क्रोशत्रयोदशकान्तरे व्रजान्ते सुप्रसिद्धं नन्दीश्वराख्यं श्रीनन्दगृहं रथवेगेन मध्याह्ने एव गतं स्यात्, तथापि सायमेव तत्र तस्य गमनं सल्लग्नापेक्षया, किंवा दीर्घमनोरथाभिनिवेशेनाश्वानामप्रेरणादिना स्वच्छन्दमन्दगमनादिति ज्ञेयम्। हे नृपेति शोकसन्तप्तं राजनं स्वस्थयति; यद्वा, स्वयमेव शोकेन सम्बोधयति ॥ २४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तत तातेत्यर्थः । "तत कस्मै मां दास्यती"ति श्रुतिनिर्देशः यदा वक्ष्यते तदा परं जन्मभृतः सफलजन्मानः । महीयसा कृष्णेन यो नादृतः अमुष्य जन्म धिक् ॥ २१-२२ ॥ संप्रक्ष्यते संप्रश्नं करिष्यतीति ॥ २३-२६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्चोरुश्रवाः कृष्णः लब्धोऽङ्गसङ्गः परिरम्भो येन तं प्रणतं बद्धाञ्जलिञ्च मां हे अक्रूर ! हे तत तातेति च वक्ष्यति सम्बोधयति तदा वयं जन्मभृतः सफलजन्मानः भविष्यामः यस्तु पुमान् महीयसा भगवता नैवादृतः आदृतो न भवति अमुष्यानादृतस्य तज्जन्मधिक् निन्द्यमित्यर्थः ॥ २१ ॥ पुनरपि सुहृत्तमत्वज्ञातित्वादिप्रयुक्तपरिरम्भादेरसम्भवमाशङ्क्यानन्यदैवतत्वप्रयुक्तस्य तस्य सम्भवमाह । न तस्येति । यद्यपि सर्वसमस्य तस्य न दयितादयः सन्ति न विषमा बुद्धिरस्तीत्यर्थः । तथापि यथा भक्ता आत्मानं भजन्ते तथा भक्तान् भजत एव "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय" इति तदुक्तेरिति भावः । अवैषम्येऽपि भक्तानेवानुभजत इत्यत्र दृष्टान्तः सुरद्रुमः कल्पतरुः यद्वत् यथा उपाश्रितानां भक्तानां भजतामेवार्थदः कामदस्तद्वत् नह्येतावता तस्य वैषम्यमस्तीति भावः ॥ २२ ॥ किञ्च यदूत्तमः अग्रजो रामः अवनतं प्रणतं मां स्मयन् परिष्वज्य यो मयाञ्जलिः क्रियते तस्मिन्नेव गृहीतं मां गृहं प्रवेश्य आत्तानि लब्धानि समस्तानि सत्कृतान्यर्घादीनि येन तं मां प्रति स्वबन्धुषु विषयभूतेषु कंसकृतं द्रोहं सम्प्रक्ष्यते प्रच्छ ज्ञीप्सायां वाचि ॥ २३ ॥ इत्थं श्वफल्कतनयोऽक्रूरः पथि कृष्णमेवानुचिन्तयन् रथेन गमनसाधनेन गोकुलं प्राप्तः हे नृप ! सूर्यश्चास्तगिरिं प्राप्तः अस्तमितो बभूव यद्यपि गोकुलमधुपुर्योरन्तरा क्रोशत्रयमेवाक्रूरस्तु प्रभातसमय एव रथारूढो मधुपुर्याः प्रतस्थे तथापि कृष्णानुचिन्तया परवशस्तत्र तत्र विलम्बयन् सायन्तनवेलायां गोकुलं प्राप्त इति भावः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भगवत ईक्षणसमये इदमित्याशयेन वक्ति । लब्धाङ्गसङ्गमिति । उरुश्रवाः पूर्णकीर्तिः व्याप्तश्रवणशक्तिमान्वा हे अक्रूर ! हे तात वत्सेति सम्बोधयति च यदि जन्मभृतः साफल्यं प्राप्ताः बाधकमाह । महीयसेति । महत्तमेन भगवता यो नादृतः वागादिना सादरमर्चितो न भवति अमुष्य पुंसो यज्जन्म तत् धिक् निन्दामि निष्फलत्वात् ॥ २१ ॥ अयं श्रीकृष्णः क्षीराब्धिशाय्येव नान्य इति तस्य लक्षणमाह । नेति । "वनस्पतिर्वृक्षमात्रे कल्पादौ पुष्पवर्जिते" इत्युत्पलमाला यथा यथा स्वस्वयोग्यफलदानेन ॥ २२ ॥ इदानीं बलभद्रमुद्दिश्याक्रूरचिन्तां वक्ति । किं चेति गृहीतसंचितौ गृहीतपशुपादबन्धनरज्जौ यदूत्तमोऽग्रजोऽवनत मानयन् स्मयन् रामः मम स्वबन्धुषु वसुदेवादिषु कंसकृतं कर्म सम्प्रेक्ष्यते विचारयिष्यति किञ्चेत्यन्वयः "पादबन्धनपाशन्तु पशूनां सञ्चितिं विदु"रिति वररुचिः गृहीतमानने अग्रजे इति पाठे सुगमः पन्थाः । यद्वा यदूत्तमः गृहीतानां फलदानाय शुभानां सञ्चितिः सङ्ग्रहो येन स तथा तस्मिन्सति स्मयन्मन्दस्मितं कुर्वन् कृष्णः मां सम्प्रेक्ष्यत इति कृष्णविषयो वा ॥ २३-२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदेति । हे तात ! इति तदा जन्मभृतः सफलजन्मानः अन्यथा जन्मनो वैयर्थ्यमित्याह । महीयसा महत्तरलोकेन ॥२१॥ ननु तस्य परमेश्वरत्वात् सर्वत्र साम्यमेव सम्भवेत् । एवञ्च त्वं स्वमिन् तत् सुहृत्तमत्वादिकं किं सम्भावयसीति तत्राह । न तस्येति । तथापि भक्तान् भजत इति । "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यह"मिति तदुक्तेः तत्रापि यथा तथेति ये यथा भक्तास्तां स्तथा भजते "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह"मिति तद्वचनात् । यद्वत् सुरद्रुम इति । आश्रयणतारतम्येन फलदानतारतम्यम् अनाश्रितेभ्यः फलाप्रदानञ्च तदपि सुरद्रुमस्य यथा न वैषम्यं तथा तस्य भगवतोऽपि किञ्च सुरद्रुमस्याश्रिताधीनत्वं तथा नास्ति यथा भगवतो भक्ताधीनत्वम् अतो भक्तिसम्बन्धेन तस्य सौहार्द द्वेषोपेक्षा अपि दृष्टा एव यथाम्बरीषादौ सौहार्दं तद्द्वेष्टृदुर्वासःप्रभृतौ द्वेषोपेक्षे च दृष्टे एवेति ॥ २२ ॥ तस्याग्रजो बलदेवः मा मामञ्जलौ मत्कृताञ्जलौ स्वदक्षिणहस्तेन गृहीतं मामाकृष्य गृहमेकान्तसंलापार्थं प्रवेश्य सत्कृतं सत्कारः ॥ २३-२४ ॥

गूढार्थदीपिनी

तन्मते वंशोऽनेनेति ततः हे पितः । तनोतेर्निष्ठान्तं रूपम् । जनकभ्रातृत्वात् अनुकम्प्यत्वाद्वा मयि तथोपचर्यते । उरुश्रवा विपुलकीर्तिः । महीयसा श्रीकृष्णेन यो नादृतः अमुष्य तत् जन्म धिक् ॥ २१ ॥ यथा भक्तः तथा सोऽपि भजते । यद्वत् यथा कल्पवृक्षः उपाश्रितः सेवितः अर्थदः फलप्रदो भवति ॥ २२ ॥ अग्रजो बलदेवः स्मयन् ईषद्धसन् सन् अञ्जलौ गृहीतं मां गृहं प्रवेश्य कंसकुकृत्यं सम्प्रक्ष्यते इत्यन्वयः । प्राप्तसमस्तसत्कारम् ॥ २३ ॥ श्वफल्कोऽक्रूरपिता ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे अक्रूर ! हे तत हे तातेति च वक्ष्यते यदा तदा वयं जन्मभृतः लब्ध जन्मफलाः भविष्यामः यस्तु जनो महीयसा श्रीकृष्णेन नैवादृतः अमुष्य जनस्य जन्म धिक् अयुक्तमित्यर्थः ॥ २१ ॥ ननु तस्य सर्वेश्वरस्य कंस उपेक्षो भवान् सुहृत्तमश्च

कुतोऽत आह । नेति । तत्तत्कर्मानुसारेण निग्रहानुग्रहकर्तुस्तस्य भगवतः सर्वात्मनः सर्वसमस्य कश्चिदपि उपेक्षो न तथा दयितः प्रियस्तद्विपरीतोऽप्रियश्च कश्चिदपि नास्ति नच सुहृत्तमो हितस्तद्विपरीतो द्वेष्यश्चास्ति तथापि भक्तान् भजते तत्र च यथा ये भक्तास्तां स्तथा भजते तदुक्तं श्रीमन्मुखेनैव "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह" मिति सर्वसमत्वेऽपि भक्तेभ्यस्तत्तत्स्वभावानुसारेण फलं ददातीत्यत्र दृष्टान्तः यद्वत्सुरद्रुम उपाश्रितोऽर्थद इति ॥ २२ ॥ किञ्च अग्रजः कृष्णपूर्वजः रामः अवनतं नम्रं यो मयाञ्जलिः करिष्यते तस्मिन्नेव गृहीतं गृहं प्रवेश्य आप्तानि प्राप्तानि समस्तानि अर्घादिसत्कृतानि येन तं मा मां प्रति बन्धुषु कंसकृतं सम्प्रक्ष्यते ॥ २३ ॥ स्वफल्कतनयः अक्रूरः ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

देवदेवस्वभावमावेदयति ॥ नेति । तस्य कस्यचिद्योग्यतामतिक्रम्येति सर्वत्र ज्ञेयं । सुहृत्तमोऽतिप्रियोऽप्रियोऽपि न वा नैव द्वेष्यो द्वेषपात्रमुपेक्ष्योऽपि नास्ति । तथाऽपि यथा यथा योग्यतामनुसृत्य भक्तान्भजतः स्वयमपि फलदानेन भजते विभज्य फलं ददातीति यावत् । तत्र निदर्शनमाह । सुरद्रुमः कल्पतरुरुपाश्रितार्थदो यद्वत्तद्वदिति । वनस्पतिरिति पाठे वनस्पतिर्वृक्षमात्रे कल्पादौ पुष्पवर्जित इत्युत्पलमालोक्तेर्वनस्पतिः सुरतरुरित्येवार्थः ॥ २१ ॥ इयता कृष्णकृतचिन्तामुक्त्वेदानीं बलराममुद्दिश्यापि कृतामक्रूरचिन्तां वक्ति ॥ किञ्चेति । अग्रजो यदूत्तमो गृहीतसञ्चितो गृहीता हस्ते या सञ्चितिः पशुपाशस्तस्यां सत्यामप्यवनतं मां स्मयन्परिष्वज्यालिङ्ग्य गृहं प्रवेश्याप्तं समस्तं सस्कृतं सत्कारो येन स तं स्वबन्धुषु त्वो कृष्णः स्वयं च बन्धवो वसुदेवाद्यास्तेषु कंसकृतं कंसेन करिष्यमाणं कृतं कर्म सम्प्रक्ष्यते पृच्छेत्किं । पदबन्धनपाशं तु पशूनां सञ्चितिं विदुरिति वररुचिः । गृहीतमञ्जलाविति पाठोऽर्थाप्रतिमानमूलः कल्पितः । गृहीता जन्मान्तरगृहीता सञ्चितिः पुण्यसञ्चयो येन तस्मिन्मयि दृष्टे स्मयन्निति वा । गृहीतमानन इति सुगमः पाठः । यद्वाऽग्रजो रामो यदूत्तमो कृष्णः पृथक् पृथगन्वयात्सम्प्रक्ष्यत इत्याद्युपपन्नं । इति सञ्चिन्तयन्कृष्णमित्युपसंहारानुसारसारस्यमत्र ज्ञेयं ॥ २२ ॥ अध्वनि निःशब्दं यथा तथा चिन्तयन्सूर्यश्चात्प्राप्त इत्यन्वय इति सूचयति ॥ २३ ॥ अखिललोकपालानां किरीटेषु मुकुटेषु चूडामणय इव विद्यमानाः पादरेणवो यस्य तस्य गोष्ठे क्षितिकौतुकानि क्षिते कौतुकं मङ्गलं यैस्तानि गतं । अब्जयवाङ्कुशाद्यैर्विलक्षितानि चिह्नितानि पदानि ददर्श ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं मनः शरीरसम्बन्धौ प्रार्थयित्वा वाचनिकं प्रार्थयति लब्धाङ्गसङ्गमिति पूर्वधर्माणामनुवृत्त्यर्थमनुवादः अन्यथा विकल्पो भवेत् लब्धः अङ्गसङ्गो येन एतावता गवा भवेदित्यत आह । प्रणतमिति । पूर्वधर्मश्चायं ततः कृताञ्जलिः पुनर्विज्ञापकः तदा हे अक्रूर ! हे तातेति मां वक्ष्यति किं नाम्ना सम्बोधनं महत्त्वख्यापकं पितृतुल्यत्वेन बन्धुत्वं स्नेहित्वञ्च ख्यापयति इति शब्दः प्रकारवाची एवं संबोधने फलमाह । तदा वयं जन्मभृत इति स्वभावतः कुलतश्च अन्यथा महत्त उत्पत्तिस्तादृशे कुले चोत्पत्तिर्व्यर्था स्यात् । ननु भगवान् किमित्येवं प्रतिष्ठां दद्यात् तत्राह । उरुश्रवा इति । यस्य गृहे यदधिकं भवेत् तदेवान्यस्मै च दद्यात् उरु अधिकं श्रवो यस्येति । ननु स्वभावतो महान् भगवता चेन्नाङ्गीकृतः तदा किं स्यादित्याशङ्क्याह । महीयसा योऽनादृतः अमुष्य जन्म धिगिति सर्वदा आदराभावेऽपि कदाचिदप्यादरोऽपेक्ष्यते तदभावे जन्मवैयर्थ्यमेव तेन जन्मना लौकिकमपि कार्यं न भवतीति ज्ञापनार्थं धिगित्युक्तम् ॥ २१ ॥ ननु पुरुषोत्तमो भगवान् त्वमत्यन्तं हीनः कथमेवं तवादरं करिष्यति यस्य बन्धुत्वादि तु नापेक्ष्यत एवेति चेत् सत्यं तथापि मन्मनोरथः सेत्स्यतीत्याह । न तस्येति । वस्तुतो भगवान् सर्वेषामेव स्वरूपमन्तरान्यथा भावेतु पञ्च भगवता सह व्यवधानानीति लोके जीवानां परस्परं पञ्च सम्बन्धा भवन्ति । बुद्धिस्त्रिविधा अपेक्षोपेक्षाद्वेषभेदात् अपेक्षा द्विविधा देहसम्बन्धान्मित्रभावाद्वा द्वेषश्च द्विविधः स्वस्य द्विष्टतया तत्कृतापकारेण वा तत्र दयितः देहसम्बन्धी स्निग्धः सुहृत्तमोऽतिमित्रं भगवान् सर्वसख इति तद्व्यावृत्त्यर्थं तमप्प्रत्ययः अप्रियः स्वस्य द्वेषविषयः द्वेष्यः द्वेषहेतुः विपरीतं वा भगवांस्तु कस्यापि किमपि न भवति यतो देहधर्मा एवैते तथा च लौकिकन्यायेन पुरस्कारः अपकारो वा न भवति दृष्टान्तार्थं द्वितीयमुक्तं तथापि भक्तिशास्त्रात् तथा करिष्यतीत्याह । तथापीति । अन्यथा "ये यथा मां प्रपद्यन्त" इति प्रतिज्ञा विरुद्धा स्यात् तेऽपि भगवन्तं भजन्त इति भक्तान् भजेत् यथा भक्तास्तथा । नन्वेवं सत्यनर्थ एव स्यात् प्रयोजनाभावश्च भक्तो नमस्करोति पादसंवाहनञ्च करोति तथा चेत् कुर्यात् जीवानां कार्यमेव नश्येत् तुलसी हि समर्प्यते भगवते भगवानपि चेत् तुलसीमेव दद्यात् किं स्यादित्याशङ्क्याह । सुरद्रुमो यद्वदिति । भजनार्थमेव हि तथा करणं भगवांस्तु तदनुसार्यपेक्षितमेव फलं प्रयच्छति नापि तत्कृतं नापि स्वेच्छया यथा कल्पवृक्षः निकटे गत एव कार्यं साधयति अनेन सर्वात्मकत्वेऽपि भगवतः भक्तेभ्य एव दानमिति वैषम्यं परिहृतं नह्यपेक्षितं प्रयच्छन् कल्पवृक्षो विषमो भवति अन्यथा व्यवस्थितिर्न स्यादिति कर्मफलं तु तुच्छं तथा सति भगवत उत्कर्षोऽपि न स्यात् अत उपाश्रितायैव पुरुषार्थदः नत्वनुपाश्रितायेति सर्वं सुस्थम् ॥ २२ ॥ एवं भगवद्विषयकं कायवाङ्मनोरूपं मनोरथमुक्त्वा बलभद्रविषयकं मनोरथमाह । किं चेति । अग्रजो ज्येष्ठभ्राता अनेन मया सर्वोऽपि वृत्तान्तो ज्ञायत इति मयि कृपां करिष्यतीति भावः । तस्याप्यहमवनतः ज्येष्ठस्यापि कनिष्ठावनतौ उत्तमत्वं प्रयोजकमिति यदूत्तम इत्युक्तं स्मयन्निति सम्यक्त्वमागतः कंसं घातयितुमिति बन्धुत्वात्

परिष्वज्य महत्त्वपूर्वकं मामञ्जलौ गृहीत्वा अतिनिकटत्वात् गृहं प्रवेश्य भोजयित्वा गृहगतमिव कृत्वा ततोऽप्यधिकं वा आप्ता समस्ता सत्कृतिर्येन तादृशं पश्चाद्विश्रान्तं स्वबन्धुषु कंसकृतं सम्प्रक्ष्यते किमिति लोके सिद्धमिति भगवान् महानिति मनोरथः ॥२३॥ एवं मार्गे रथं स्थापयित्वा सन्ध्यापर्यन्तमनेकविधं मनोरथमेव कृतवान् तथापि भगवत्सम्मुखं प्रवृत्तौ सर्वे एवानुगुण भवन्तीति रथ एव तं गोकुले समानीतवान् तदाह । इति कृष्णं सञ्चिन्तयन्नेवान्तः श्वफल्कतनयो महान् यदान्तर्भगवन्तं प्राप्तवान् तदा रथेन गोकुलमपि प्राप्तः भगवानानन्दरूपः स्त्रीणामेवेति सन्ध्यावधिरात्राविति मनोरथसिध्यर्थं सूर्योऽप्यस्तङ्गत इत्याह । सूर्य इति । चकारात् सूर्योऽप्यनुगुणः सर्वप्रकारेण नृपेति सम्बोधनं मन्त्रणं गुप्ततयैव कर्तव्यमिति ज्ञापनार्थम् अश्लीलव्यावृत्त्यर्थं गिरिपदं श्वफल्को महानुभाव इति तन्नाम्ना निर्दिष्टस्तथात्वाय अन्यथा अनिष्टरूपो न गच्छेत् ॥ २४ ॥

श्रीसुबोधिनी-सारः

प्राप्तांगसंगं प्रणतं कृताञ्जलिं मां हे अक्रूर हे तात इत्युरुश्रवा कृष्णो वक्ष्यति तदा वयं जन्मभृतः सफलजन्मानः स्याम । महीयसा कृष्णेन यो नैवादृतो न सत्कृतोऽमुष्य पुंस तज्जन्म धिक् ॥ २१ ॥ तस्य हरेर्दयितः प्रियोऽप्रियः सुहृत्तमो द्वेष्य उपेक्ष्यः त्याज्यो वाऽऽदेयो न कश्चित् तथापि ये यथा सेवन्ते तथा भक्तान् भजतेऽनुगृह्णाति । सर्वत्र समस्यापि भक्तावरदाने दृष्टान्तः । सुरद्रुम कल्पवृक्षः उपाश्रितः सेवितो यद्वत् अर्थदो वांछितार्थप्रदो भवति ॥ २२ ॥ यो मयाञ्जलिः क्रियते तस्मिन्नेवाञ्जलौ गृहीतमवनतं मा मां परिष्वज्यालिंग्य स्मयन् हसन् यदूत्तमोऽग्रजः कृष्णपूर्वजो रामो गृहं प्रवेश्य प्रवेशयित्वाऽऽप्तानि प्राप्तानि समस्तानि सत्कृतानि पाद्यर्घ्यादीनि येन तं मां स्वबन्धुषु वसुदेवादियादवेषु कंसकृतं शुभाशुभं संप्रक्ष्यते किं वा ॥ २३ ॥ शुकोक्तिः । इत्येवमध्वनि मार्गे कृष्णं संचिंतयन् रथेन गोकुलं प्राप्तः श्वफल्कस्य तनयोऽक्रूरः । सूर्यश्चास्तगिरिं प्राप्तः । संध्याकाये व्रजं प्राप्त इति भावः हे नृप ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'सुहृदादिषु परिष्वङ्गसम्प्रश्नादयो विषमस्य जीवस्य धर्मास्तस्मिन्नीश्वरे कथं सङ्गच्छन्ते ? तस्य समत्वादन्यथा वैषम्यं स्यात्' इत्याशङ्क्याह—नेति । यद्यपि तस्य प्रियादयो न सन्ति तथापि ये भक्तास्तं यथा भजन्ते तान् भक्तान् सोऽपि तथैव भजते, अतो न वैषम्यमित्यन्वयः । तत्र दृष्टान्तमाह—सुरद्रुमः कल्पतरुः यद्वत् यथा उपाश्रितानां भजतामेवार्थदः फलप्रदो भवति न सर्वेषां न ह्येतावता तस्य वैषम्यं भवति तद्वदित्यर्थः । दयितः प्रियः । अस्यैव विवरणं सुहृत्तम इति मित्रमित्यर्थः । तथाऽप्रियः अस्य विवरणं द्वेष्यो द्वेषविषयः, आप्तकामत्वात् । 'तह्यु पेक्ष्य एव कश्चित् स्यात्' इत्याशङ्क्याह—उपेक्ष्य एवेति, सर्वपालकत्वादित्याशयः ॥ २२ ॥ श्रीकृष्णविषयकान् मनोरथान् कृत्वा रामविषयकं मनोरथं करोति—किञ्चेति । यदूत्तमः अग्रजो रामः स्मयन् हसन् अवनतं कृतप्रणामं मां परिष्वज्य तदा यो मयाञ्जलिः करिष्यते तस्मिन्नेव गृहीतं मां गृहं प्रवेश्य तत्राप्तानि लब्धानि सत्कृतानि अर्घ्यादीनि येन तं मां प्रति स्वबन्धषु कंसकृतमपकारादिकं सम्प्रक्ष्यते इत्यन्वयः ॥ २३ ॥ इत्येवं श्वफल्कतनयोऽक्रूरः अध्वनि मार्गे कृष्णमेवानुचिन्तयन् रथेन गोकुलं प्राप्तः सूर्यश्चास्तं प्राप्तः । 'इयमक्रूरावस्था चान्येषां दुर्लभा' इति सूचयन् सम्बोधयति—नृपेति । यद्यपि गोकुलमथुरयोरन्तरा क्रोशत्रयमेवाक्रूरस्तु प्रभातसमय एव रथारूढो मथुरातः प्रतस्थेऽतः शीघ्रमेव तदागमनं युक्तं, तथापि मनोरथपरवशस्तत्र तत्र विलम्बयन् सायंकाले गोकुलं प्राप्तः इति ज्ञेयम् ॥ २४ ॥

अन्वितार्थप्रकाशिका

लब्धेति ॥ यदा उरुश्रवाः महायशाः श्रीकृष्णः लब्धोऽङ्गसङ्गः परिरम्भो येन तं प्रणतं कृताञ्जलिं च मां हे अक्रूर ! हे ततेति तातेति च वक्ष्यते प्रेम्णा सम्बोधयिष्यति तदा वयं जन्मभृतः सफलजन्मानो भविष्यामः । स्वकुटुम्बाभिप्रायेण बहुवचनम् । यस्तु पुमान् महीयसा सर्वपूज्येन भगवता नैवादृतः स्वकीयत्वेन न गृहीतः अमुष्य पुंसः तज्जन्म धिक् निन्द्यमित्यर्थः ।२१। नेति ॥ यद्यपि तस्य कश्चिदपि दयितः प्रियः सुहृत्तमः हितवृत् नास्ति न च अप्रियः प्रीत्यविषयः द्वेष्यः द्वेषविषयः उपेक्ष्यश्च नैव अस्ति । तथापि ये भक्तास्तं यथा भजन्ते तान्भक्तान् सोऽपि तथैव भजतेऽतो न वैषम्यमित्यन्वयः । तत्र दृष्टान्तमाह । सुरद्रुमः कल्पतरुः यद्वत् यथा उपाश्रितो भजतामेवार्थदः फलप्रदो भवति न सर्वेषां न ह्येतावता तस्य वैषम्यं भवति तद्वदित्यर्थः ॥ २२ ॥ किञ्चेति ॥ यदूत्तमः अग्रजो रामः स्मयन् हसन् । शता आर्षः । अवनतं कृतप्रणामं मां परिष्वज्य तदा यो मयाऽञ्जलिः करिष्यते । तस्मिन्नेव गृहीतं मां गृहं प्रवेश्य तत्राप्तानि लब्धानि समस्तानि सत्कृतानि अर्घ्यादीनि येन तं मां प्रति स्वबन्धुषु कंसकृतमपकारादिकं संप्रक्ष्यते । तङार्षः ॥ २३ ॥ इतीति ॥ हे नृप ! इत्येवं श्वफल्कतनयोऽक्रूरः अध्वनि मार्गे कृष्णमेवानुचिन्तयन् रथेन गोकुलं प्राप्तः सूर्यश्चास्तंगिरिं प्राप्तः । यद्यपि प्रातः मथुरातः क्रोशत्रयमेव गोकुलं व्रजतः शीघ्रमागमनं युक्तं तथापि मनोरथमग्नः स तु मार्गमपि न वेदेति शनैरेवाजगामेति ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उरुश्रवाः पुरुकीर्त्तिर्हरिः हे अक्रूर हे तातेति मां यदा वक्ष्यते तदैव वयं जन्मभृतः सफलजन्मा नो भवामः यर्हि महीयसा सर्वश्रेष्ठेन कृष्णेन यो नैवादृतो न सत्कृतस्तर्हि तस्यामुष्य जनस्य जन्मधिक् वृथास्ति ततेति ह्रस्व आर्षः ॥ २१ ॥ ननु

मित्रादिष्ठालिंगनादयो देहाभिमानि जीवस्यभावा ईश्वरे कथं सम्भवन्तीति चेत्तत्राह नेति तस्य श्रीकृष्णस्य कश्चिद्दयितः स्नेही नास्ति तथा तस्य सुहृदादयश्च न सन्ति तथापि भक्तान् भजते ये यथा भक्तास्तांस्तथैव भजते ये यथा मां प्रपद्यन्ते तांस्तथैव भजामीति कृष्णोक्तेः यद्वत् यथा उपाश्रितः कल्पतरुः अर्थदो वांछितमनोरथं प्रदस्तद्वत् ॥ २२ ॥ किंच अग्रजो रामः अजलिनाऽवनतं नमन्तं अञ्जलौ गृहीतं मां स्म यत् हसन् परिष्वज्य आलिंग्य आप्तानि प्राप्तानि समस्तानि पूजनादि सत्कृतानि येन तं मां प्रति स्वबंधुषु कंसकृतं प्रक्षते प्रक्ष्यति ॥ २३ ॥ श्वफल्कस्य तदभिधयादवस्य तनयः पुत्रोऽक्रूरः अस्ताचलं प्राप्तः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

लब्ध्वेति ॥ किं च उरुश्रवाः महाकीर्त्तिः श्रीकृष्णः लब्धोऽङ्गसङ्गः परिरम्भो येन स तं, प्रणतं कृतप्रणामं, बद्धाञ्जलिं च मां, हे अक्रूर, हे तत, हे तात, इत्येवं यदा, वक्ष्यते कथयिष्यति, तदा वयं जन्मभृतः सफलजन्मानः, भविष्यामः । यः पुमान्, महीयसा भगवता, नैव आदृतः आदृतो न भवति अमुष्य अनादृतस्य पुरुषस्य, तत् जन्म, धिक् निन्द्यमित्यर्थः ॥ २१ ॥ पुनरपि सुहृत्तमत्वज्ञातित्वादिप्रयुक्तपरिरम्भादेरसंभवमाशङ्क्यानन्यदैवतत्वप्रयुक्तस्य तस्य संभवमाह ॥ न तस्येति ॥ तस्य सर्वसमस्य श्रीहरेः कश्चित् दयितः प्रियः, न भवति । सुहृत्तमः न, वाऽथवा, द्वेष्य, उपेक्ष्यश्च, न एव विषमा बुद्धिर्नैव विद्यते इत्यर्थः । तथापि, भक्ताः यथा यथैवात्मानं भजन्ते, तथा तथैव भक्तान्, स्वयं भजते 'ये यथा मां प्रपद्यन्ते तां स्तथैव भजाम्यहम् । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इति भगवद्वचनात् । अवैषम्येऽपि भक्तानेवानुभजते इत्यत्र दृष्टान्तः । सुरद्रुमः कल्पतरुः, यद्वत् यथा, उपाश्रितः स्यात्, तथा, अर्थदः उपाश्रितार्थदः कामप्रदः, तद्वत् । न ह्यं तावता तस्य वैषम्यमस्तीति भावः ॥ २२ ॥ किं चेति ॥ किं च यदूत्तमः यदुषु श्रेष्ठः, अग्रजो रामः, अवनतं प्रणतं मां, स्मयन् सन्, परिष्वज्य अञ्जलौ यो मयाञ्जलिः क्रियते तस्मिन् एव, गृहीतं मा मां, गृहं प्रवेश्य, आत्तानि गृहीतानि समस्तानि सकलानि सत्कृतान्यर्घ्योदीनि येन तं, आप्तेति पाठान्तरे, आप्तानि लब्धानि समस्तानि येन तं, मां प्रति, स्वबन्धुषु वसुदेवादिषु, कंसकृतं कंसविहितापकारं, संप्रक्ष्यते ॥ २३ ॥ इतीति ॥ इतीत्थं, श्वफल्कतनयोऽक्रूरः, अध्वनि पथि, कृष्णमेव, चिन्तयन् सन्, रथेन गमनसाधनेन स्यन्दनेन, गोकुलं, प्राप्तः । हे नृप, सूर्यश्च अस्तगिरिमस्ताचलं, प्राप्तः । अस्तमितो बभूवेत्यर्थः । यद्यपि गोकुलमधुपुर्योरन्तरायः क्रोशत्रयपरिमित एवास्ति तथाप्यक्रूरस्तु प्रभातसमय एव रथारूढः सन् मधुपुर्याः प्रतस्थे तथापि श्रीकृष्णानुचिन्तया परवशस्तत्र तत्र विलम्बयन् सायन्तनवेलायां गोकुलं प्राप्त इति भावः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

लब्धाऽङ्गसङ्गमिति : १०.३८.२१.

आगत्याऽऽरात्सत्वरं मत्पुरस्तात् ताताक्रूरेत्येवमाभाषमाणम् । पश्यामीशं तं यदा तन्न किं स्यां सर्वज्येष्ठब्रह्मपूज्यप्रतिष्ठः ॥ ३५ ॥

न तस्य कश्चिदिति : १०.३८.२२.

निजपादगतार्थिचिन्तितार्थप्रदकल्पे न यथारिमित्रभावः । सदयेऽपि विभौ तथैव कामं शरणायातजनावनस्वभावे ॥ ३६ ॥
मदवश्यशिक्षको यो मदवश्यो नैव स स्वयं भवति । इति सिद्ध एव तादृक् प्रभुस्ततो मद्वशोऽत्र का शङ्का ॥ ३७ ॥
धन्यत्वं मम चक्षुषोऽद्य भगवद्वक्त्राब्जसंवीक्षणात् तद्वेदप्रियहादवाक्श्रवणतो भूयस्तरां कर्णयोः ।
अङ्गस्यापि तदङ्गसङ्गसुखतः प्रत्यङ्गवृत्तेरपि तद्वीक्षाविषयत्वतो व्रजमिमं धन्यं हि मन्ये सदा ॥ ३८ ॥
याऽपाशतासीत्सुहृदाप्तमोचनेष्वस्माकमेतावदसौ दयावशः । तां भञ्जयन्नाशु न किं करिष्यति पित्रोरपाशत्वमथास्मदुक्तितः ॥ ३९ ॥

समग्रगोत्राभरणं रमेशपादाम्बुजातध्वजराजमानम् । व्रजं त्वमेनं वृजिनं विहातुमक्षिस्ववीक्षाविषयं कुरुष्व ॥ ४० ॥
तं वीक्ष्य सततानन्तनेत्रोत्सवविधायिनम् । स्वानन्दातिशयोद्रेकादवर्णयदनेकधा ॥ ४१ ॥
सूर्यमण्डलमेवेदं व्रजरूपेण तिष्ठति । कस्यात्रानुमतिर्न स्यान्मध्ये नारायणे स्थिते ॥ ४२ ॥
उदयैककृतावासो निस्तमस्कगतिः सदा । अतस्तदन्यो मन्येऽहमचरोऽयं प्रभाकरः ॥ ४३ ॥
सहस्र-गोप्रसारेण समयो व्रजसूर्ययोः । एको लसत्परागश्रीरन्यो यात्यपरागताम् ॥ ४४ ॥
सकलावनिसुन्दर्या नासैवैषा व्रजावनिः । यदत्र राजते नित्यं मुक्ताभरणमुत्तमम् ॥ ४५ ॥
पश्यतां तिष्ठतां वापि कृष्णरूपकरोऽनिशम् । शुचिरप्येष तन्मन्ये हेतुर्नीलाम्बराश्रयः ॥ ४६ ॥
क्रीडत्कृष्णं विलोक्यैनं प्रशंसाघोषघोषितः । देवादिभिस्तदाद्येष घोषाख्यां समगाद् व्रजः ॥ ४७ ॥
क्वचित्तीर्थं क्वचित्क्षेत्रं क्वचित्सन्तः क्वचित्प्रभुः । सर्वेऽप्यविकला यत्र नासावनुपमः कथम् ॥ ४८ ॥
नित्योल्लासि यशोदयाश्रितमहो गोपाललीलागृहं सत्यानन्दमुखाखिलर्धिरनघा यत्रानिशं राजते ।
तद्वृन्दावनमत्र गोकुलमलं श्रेयस्कृदीशाश्रितं प्रागश्राव्यधुना व्यलोक्यजनि तच्छ्रुत्यक्षिमैत्र्यं दृढम् ॥ ४९ ॥

एवं विचित्रतरशोभमवेक्ष्य कामं घोषं स्वतोषपरिपोषितचित्तवृत्तिः।
मेने किरीटमखिलावनिमण्डलस्य श्रीकृष्णसन्मणिविराजितमौलिभागम् ॥ ५० ॥

इति संचिन्तयन्निति : १०.३८.२४.

सश्रीशं गोकुलं देहो विशत्येवं यदा तदा। अस्तं याति जगच्चक्षुरित्यर्थकमृषेर्वचः ॥ ५१ ॥
पूर्णाक्रूरगुणोल्लासो नैति शोभां विना निशाम्। युक्तमेव तदा तस्यां सोऽभूद्गोकुलशोभनः ॥ ५२ ॥

कृष्णप्रिया

जब वे मेरा आलिङ्गन कर चुकेंगे और मैं हाँथ जोड़ सिर झुकाकर उनके सामने खड़ा हो जाऊँगा तब वे मुझे चाचा अक्रूर! इसप्रकार कह्कर सम्बोधन करेंगे! क्यों न हो, इसी पवित्र और मधुर यश का विस्तार करने के लिये ही तो वे लीला कर रहे हैं। तब मेरा जीवन सफल हो जायगा। भगवान् श्रीकृष्ण ने जिसको अपनाया नहीं जिसे आदर नहीं दिया—उसके उस जन्म को, जीवन को धिक्कार है ॥ २१ ॥ नतो उन्हे कोई प्रिय है नतो अप्रिय। नतो उनका कोई आत्मीय सुहृद् है नतो शत्रु। उनकी उपेक्षा का पात्र भी कोई नहीं है। फिर भी जैसे कल्प वृक्ष अपने निकट आकर याचना करने वालों को उनकी मुँहमाँगी वसु देता है, वैसे ही भगवान श्रीकृष्ण भी, जो उन्हे जिस प्रकार भजता है, उसे उसी रूप में भजते हैं—वे अपने प्रेमी भक्तो से ही पूर्ण प्रेम करते हैं ॥ २२ ॥ मै उनके सामने विनीत भावसे सिर झुकाकर खड़ा हो जाऊँगा और बलराम जी मुस्कुराते हुए मुझे अपने हृदय से लगा लेंगे और फिर मेरे दोनों हाथ पकड़कर मुझे घर के भीतर ले जायँगे। वहाँ सब प्रकार से मेरा सत्कार करेंगे। इसके बाद मुझसे पुछेंगे कि कंस हमारे घर वालो के साथ' कैसा व्यवहार करता है? ॥ २३ ॥ शुकदेव जी कहते हैं—परीक्षित! श्वफल्कनन्दन अक्रूर मार्ग में इसी चिन्तन में डूबे–डूबे रथ से नन्दगाँव पहुँचगये और सूर्य अस्ताचल पर चले गये ॥ २४ ॥

पदानि तस्याखिललोकपाल[1]किरीटजुष्टामलपादरेणोः।
ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवाङ्कुशाद्यैः ॥ २५ ॥
तद्दर्शनाह्लादविवृद्धसम्भ्रमः [2]प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः।
रथादवस्कन्द्य[3] स तेष्वचेष्टत [4]प्रभोरमून्यङ्घ्रिरजांस्यहो इति ॥ २६ ॥
[5]देहंभृतामियानर्थो हित्वा दम्भं भियं शुचम्। संदेशाद् यो हरेर्लिङ्गदर्शनश्रवणादिभिः[6] ॥ २७ ॥
ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ। पीतनीलाम्बरधरौ शरदम्बुरुहेक्षणौ ॥ २८ ॥

कर्वमक्षमा

अन्वयः—अखिललोकपालकिरीटजुष्टामलपादरेणोः, तस्य, अब्जयवाङ्कुशाद्यैः, विलक्षितानि, क्षितिकौतुकानि, पदानि, गोष्ठे, ददर्श ॥ २५ ॥ तद्दर्शनाह्लादविधूतविभ्रमः, प्रेम्णा, उर्ध्वरोमाश्रुकलाकुलेक्षणः, सः, अहो, प्रभोः, अमूनि, अङ्घ्रिरजांसि, इति, रथात्, अवस्कन्द्य तेषु, अचेष्टत ॥ २६ ॥ देहम्, भृताम्, इयान्, अर्थः, दम्भम्, भियम्, शुचम्, हित्वा, यः, हरेः, सन्देशात्, लिङ्ग, दर्शन, श्रवणादिभिः, भजते ॥ २७ ॥ व्रजे, पीतनीलाम्बरधरौ, शरदम्बुरुहेक्षणौ, गोदोहनम्, गतौ ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अखिलैर्लोकपालैः किरीटेषु जुष्टाः अमलाः पादरेणवो यस्य तस्य। क्षितिकौतुकानि क्षितेरलंकाररूपाणि ॥ २५ ॥ तद्दर्शनेन तेषां पदानां दर्शनेन य आह्लादस्तेन विवृद्धः संभ्रमो यस्य सः प्रेम्णा ऊर्ध्वानि रोमाणि यस्य सः। अश्रूणां कलाभिर्लेशैराकुले ईक्षणे यस्य सः। अवस्कंद्यावप्लुत्य तेषु पदेषु सोऽक्रूरः अचेष्टत व्यलुठत्। अहो इति दुर्भलतां भावयन् ॥ २६ ॥ ननु किमर्थमेवं व्यलुठत् नास्ति प्रेमसंभ्रमे फलोद्देश इत्यत आह। देहंभृतामिति। देहभाजामेतावानेव पुरुषार्थः। कः। कंसस्य संदेशात्संदेशमारभ्य हरेलिङ्गदर्शनश्रवणादिभिर्दम्भादि हित्वा योऽयमक्रूरस्य वर्णित इति। संदेश आद्यो यस्यार्थस्य स संदेशाद्यो यावानक्रूरस्य जात इति वा ॥ २७ ॥ ततः कृष्णं रामं च ददर्श। गावो दुह्यन्तेऽस्मिन्निति गोदोहनं तत्स्थानं गतौ प्राप्तौ ॥ २८–२९ ॥

---

१. चूडामणि–विज. । २. प्रेम्णोत्थ–विज. । ३. दवप्लुत्य–वीर. । ४. रिमान्यङ्घ्रि–वीर. । ५. ''देहं भृताम्'' अधिक इति विज. ।

६. चिरमावेष्टय सोत्थाय रथमारुह्य वेगतः। क्वतिष्ठतिगवेशानः कृष्णो राम इति ब्रुवन् ॥
गोष्ठमध्य इति श्रुत्वा तरुस्यैर्नोपबालकैः। कृष्णसंदर्शनाकांक्षी प्रकाशे सवितुः सति ॥ अधिको कुत्र दृश्येते।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य श्रीकृष्णस्य। पदानि पादतलचिह्नानि। विलक्षितानि विलक्षणत्वेन ज्ञापितानि। 'अलंकारेऽपि कौतुकम्' इति कोशान्तरात् ॥ ननु रथोपर्यासीनेन सायं गोधूलिकृतान्धकारे बहुलगोपगणपदावृतानि तस्य पदानि कथं दृष्टानि तत्राह–क्षितीति। क्षितेः कौतुकमुत्सवो येभ्यस्तानीति। निजालंकारत्वेन तयैव सुव्यक्ततया रक्षणात्। तत्र च भक्तजनदृष्टौ स्वतः स्फुरणादिति भावः। ननु तस्यैव तानीति कथं विज्ञातं तत्राह–अब्जाद्यैर्विलक्षितानि असाधारणानि ॥२५॥ तेषां पदानां दर्शनेन। संभ्रमोऽत्र भक्त्युद्रेकनिमित्तव्यापारविशेषः। संभ्रमः कर्तव्यतानुसंधानाभावः। अश्रूणां कला कलनमतिक्षरणं तेनाकुले ईक्षणे यस्य सः। अहो भाग्यं दुर्लभलाभो ममायमिति सगद्गदं ब्रुवन्॥२६॥ रजोलोठने किं प्रयोजनमित्याक्षिपति–नन्विति। प्रेमसंभ्रमे प्रेमावेशे फलोद्देशः फलमुद्दिश्य प्रवृत्तिर्भवतीति। पदविभागमुपेक्ष्यैकपदस्य लघुत्वादाह–बहुव्रीहिणा। मतुबन्तेन मतुबन्तस्यान्वयो वा, तुल्यालिनिवेशन्यायेन वा। संदेशः परमुद्दिश्य निजवृत्तकथनम् ॥ मथुरातो यात्रामारम्य नन्दव्रजे प्रवेशपर्यंतमक्रूरस्य मनोवाक्कायचेष्टितं वर्णयित्वा तदेव दृष्टान्तीकृत्य सिद्धांतसारमाह–देहमिति। देहमिति द्वितीयार्षी। अलुक्समासे प्रथमाद्वितीययोरग्रहणात्। तच्च प्रयोगादर्शनात्तत्रोदाहरणाभावाच्चेति ध्येयम्। देहधारिणामियानेतावानेव पुरुषार्थः। कंसस्य सदेशादारभ्य हरेर्लिङ्गदर्शनश्रवणादिभिर्योऽयमक्रूरस्य वर्णितः। यथा हरेर्लिङ्गं पदचिह्नं दृष्ट्वा अक्रूरस्तत्रैव धूलौ लुलोठ। तत्राक्रूरो राजमंत्री राज्ञोऽत्यादरणीयः कथं गोचारकस्य पदधूलौ लोठामीति दम्भं हित्वैव, मद्दूतोऽपि भूत्वा मच्छत्रोः कृष्णस्य पदधूलौ लोठतीत्युपजापकंपितात्कंसाद्भयं हित्वा, कुपितकंसविनाश्येषु गृहकलत्रादिषु च शुचं शोकं हित्वैव लुलोठ। यथा तथैव वयं पंडितत्वादभिजातत्वादैश्वर्यवत्त्वाच्च श्रेष्ठाः कथं सर्वलोकानादृत कुचैलाकिञ्चननिकृष्टवैष्णवधूलौ पताम इति दंभं स्वजनिंदनाद्भयं तत्तत्त्यागाच्छोकञ्च हित्वा हरेर्लिंगं वैष्णवं दृष्ट्वा तच्चरणधूलौ पतेयुः। यद्वा–हित्वेत्यादिकं देहभृत्स्वेव योग्यं न त्वक्रूरे प्रेमविह्वल इति। यथा हरेर्नारदादिमुखाद्यशः श्रवणेन स्मरणेन चाक्रूरो यथा दास्यरसानुकूलान्मनोरथाञ्चकार तथैव कदा हरिं परिचरिष्यामः अपि किं तं द्रक्ष्याम इत्यादिमनोरथान् कुर्युरिति ॥ २७ ॥ ततोंघ्रिरजोलोठनोत्तरम्। गोदोहनं क्रियां वा ॥ प्रथमं दूरतो वस्त्रदर्शनात्तदेवादौ वर्णयति–पीतनीलेति। ततस्तडिदादिभ्योऽपि प्रकाशबहुलत्वेन नेत्रदर्शनात्तयोरेव वर्णनम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गोष्ठे तत्समीपे ददर्श अचिरादेव श्रीभगवतो गोष्ठान्तःप्रवेशात् पदानां माहात्म्यमाह। अखिलेति। तत्र न तिष्ठति मनः संसारादिलक्षणो येभ्य इत्यमळत्वं किरीटजुष्टत्वे हेतुः। ननु रथोपर्यासीनेन सायं गोधूळिकृतान्धकारे बहुळगोपगणपदावृतानि तस्य पदानि कथं दृष्टानि तत्राह। क्षितीति। क्षितेः कौतुकमुत्सवो येभ्यस्तानीति तथैव निजालङ्कारत्वेन सुव्यक्ततया रक्षणात् तत्र च भक्तजनदृष्टौ स्वतः परिस्फुरणादिति भावः। ननु तस्यैव तानीति कथं विज्ञातं तत्राह। अब्जाद्यैर्विलक्षितानि विशेषेण निरूपितानि असाधारणानि वा ॥ २५ ॥ सम्भ्रम आवेग इति कर्त्तव्यतानुसन्धानाभावः अत एवाचेष्टत प्रेम्णेत्यस्य यथापेक्षं सर्वैरप्यन्वयः प्रभोः परमेश्वरस्यामूनि इमानि अन्यत्तैः तत्राहो इति प्रभोरित्यादिकस्य सर्वस्यैवोपलक्षणार्थमिति शब्दस्य सर्वान्वयित्वात् ॥ २६ ॥ अक्रूरस्य श्रीभगवत्पदेषु तथा विलुठनकथनेन भक्त्युद्रेकात्तं प्रशंसति देहं भृतां देहधारिणाम् अन्यथा देहधारणवैफल्यमिति भावः। अन्यत्तैः किञ्च दम्भादिकं हित्वा योऽयं जात इति योजनिकयैवं गम्यते यथाक्रूरस्यात्र दम्भो नासीत् न मय्युपैष्यत्यरिबुद्धिमच्युत इत्यादि चिन्तनात् अथान्तःसुखान्तरतात्पर्यलक्षणो यदि दम्भो न स्यात् यथा च कंसप्रतापितो यो बन्धुगर्भस्तत्प्रतापयितव्यश्च यः तस्य तस्य हेतोर्निजकुलरक्षावतीर्णश्रीकृष्णपुरतो व्यञ्जनीयः शोको भीश्च तादृशावेशे हेतुर्नासीत् तद्दर्शनाह्लादेत्याद्युक्तेः प्रेमविभिन्नधैर्य इति तृतीयोक्तेश्च तथा यदि निजदुःखहानितात्पर्यं न स्यादिति लिङ्गमनुभवहेतुः भिय शुचमिति पाठो बहुत्र। अथ गोकुलाभ्यन्तरे रथनयनार्थे पुनरारूढ इति ज्ञेयं रथात्तूर्णमवप्लुत्येति वक्ष्यमाणत्वात् ॥ २७ ॥ ददर्शेति षट्कं प्रथमतः श्रीकृष्णं ददर्श अक्रूरस्य भक्तिविशेषेण तस्य प्रभावविशेषेण च व्रजे गवामावासमध्ये कीदृशौ तौ गोदोहनस्थानं गतौ तत्रापि वत्सवर्गमध्ये ददर्शेति श्रीपराशरवैशम्पायनौ तथा च श्री विष्णुपुराणे "स ददर्श तदा तत्र कृष्णमादोहने गवाम्। वत्समध्ये गतं फुल्लनीलोत्पलदलच्छवि"मिति श्रीहरिवंशे च "प्रविशन्नेव च द्वारि ददर्श दोहने गवाम्। वत्समध्ये स्थितं कृष्णं सवत्समिव गोवृष"मिति तच्च गोपैर्दुह्यमानाभिर्गोभिः समं वत्सानां संमेलनार्थं ज्ञेयं तावेव यथानिर्देशं वर्णयति। पीतेति। सार्धपञ्चभिः तत्र दूरादेव वस्त्रदर्शनं तदेव तयोरात्मनि यः कृपावलोकस्तत्स्वभावेनान्तर्बहिरिन्द्रियाकर्षणात् तारातडिदादितोऽपि परमकान्तिकन्दलीतुन्दिलानां लोचनानामालोचनं तत्र तु रक्तिमादिना व्यक्तं व्यक्तीभूतस्य कैशोरस्यानुभवः अथ सर्वानुभवाय जातेन चापलेन प्रथमं वर्णनिर्वर्णनं ततो महाशोभोपलम्भः ततः पश्चाद्गवादिसम्भालनार्थं समुत्थापितयोर्भुजयोरवलोकनं ततः परमसुखेन तेन श्रीमुखनिभालनं ततः किञ्चिन्निकटीभूय पश्यता तेन सर्वाङ्गसौन्दर्यपर्यालोलनं ततो बालौ किशोरावपि द्विरदविक्रमाविति महौजःसहोवलागमः ॥ २८–२९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तस्य कृष्णस्य पदानि, गोष्ठे तत्समीपे व्रजबहिःप्रदेशे ददर्श, अचिरादेव श्रीभगवतो वनाद्गोष्ठान्तःप्रवेशात् । तस्य चालभ्यलाभोऽभूदित्याशयेनाह —अखिलेति । तत्र किरीटजुष्टेति परमभक्तिनम्रतया दूरादेव प्राप्तिः सूचिता । अमलः सुन्दरः, किंवा न तिष्ठति मलः संसारलक्षणो मुमुक्षादिदुर्व्वासनालक्षणो वा येभ्य इत्यमलत्वं किरीटजुष्टत्वे हेतुः । ननु रथोपर्य्यासीनेन सायं गोधूलिकृतान्धकारे बहुलगोपगणावृतस्य तस्य पदानि कथं दृष्टानि ? तत्राह—क्षितीति । धरण्या निजालंकारत्वेन सुव्यक्ततया धारणात् तत्र च भक्तजनदृष्टौ परमोत्सवरूपेण परिस्फुरणादिति भावः । ननु तस्यैव तानीति कथं विज्ञातम् ? तत्राह—अब्जाद्यैर्विलक्षितानि विशेषेण चिह्नितान्यसाधारणानि वा, 'आद्य–' शब्देन ध्वजवज्रादीनि, अन्यत्तैर्व्याख्यातम् । यद्वा, अखिलानां लोकानां पालो ब्रह्मा, तस्य किरीटैर्जुष्टाः श्रीवृन्दावनेऽनुग्रहान्तरमेव सेविता अमलपादरेणवो यस्य, तदुक्तमेव (भा० १०।१३।६२)—'स्पृष्ट्वा चतुर्मुकुटकोटिभिरङ्घ्रियुग्मम्' इति, यद्वा, अखिलैर्लोकपालैर्ब्रह्मशिवादिभिः किरीटेषु जुष्टः कथञ्चित् प्राप्य क्रमेण सेवितोऽमलपादरेणुरेको यस्येति परमदुर्लभत्वमुक्तम् । तस्य रेणुश्रेणीमयानि पदानि साक्षाद्ददर्शेति तेभ्योऽप्यस्य परमभाग्यमुक्तम् ॥ २५ ॥ सम्भ्रम आवेग इति कर्त्तव्यतानुसन्धानाभावः, अतएवाचेष्टत प्रेम्णेत्यस्य यथोपेक्ष्यं सर्व्वैरप्यन्वयः, तेनव पुलकाश्र्वादिसम्पत्तेः, तत्रोद्ध्र्व-शब्देन रोमाञ्चस्यातिरेकः, कलाकुलेक्षणत्वेनाश्रुणोऽपि ज्ञेयः । प्रभोर्जगदीश्वरस्य मत्स्वामिनो वा, अमूनीति इमानि, अन्यत्तैर्व्याख्यातम् । यद्वा, कला विन्दवो धारापातो वा, 'कलिहली कामधेनु' इति वचनात्, इति वदन् ॥२६॥ अक्रूरस्य श्रीभगवत्पदेषु तथा विलुण्ठनकथनेन भक्त्युद्रेकादाह—देहमिति, देहधारिणामिति, अन्यथा देहधारणे वैफल्यमिति भावः । दम्भादिकं हित्वेति स्वरूपनिरूपणमात्रम्, प्रेमसम्भ्रमे स्वत एव तत्तदभावात्, तत्र दम्भः कापट्यम्, शुक् इष्टवियोगतः, भीर्दुष्टतः, तेषां सत्त्वे विलुठनाद्यसिद्ध्या तत्तत्त्याग उक्तः । यद्वा, हित्वेत्युपदेशः, यद्यपि दम्भादिनाप्यर्थः सिध्येदेव, तथापि प्रेमसम्पत्त्यपेक्षया तत्तत्त्यागोऽभिहितः । हरेरिति मनोहरणाभिप्रायेण, लिङ्गं किञ्चिच्चिह्नम्, आदि-शब्दात् स्मरण-कीर्त्तनादि, अन्यत्तैर्व्याख्यातम् । यद्वा, सन्देशो वाचिकं दौत्यकर्म्मणापीत्यर्थः । अन्यत् समानम् । यद्वा, इयान् प्रेम्णा भूमौ विलुण्ठनात्मक एवार्थः । कथम्भूतः सन्देशः ? संकीर्त्तनं यथा (२६ श० श्लो०) 'प्रभारमुनि' इत्यादिकमक्रूरकृतः स एवाद्य आदौ भवा यस्मिन् 'जय जय श्रीकृष्ण' इत्यादिपूर्व्वक इत्यर्थः, यद्वा, तत्प्रधान इत्यर्थः । लिंगं श्रीमूर्त्त्यादि, तथापि स एवार्थः, केवलं प्रेममयत्वात् कीर्त्तनस्य प्राधान्यमप्रेक्षितमिति भेदः, पश्चाच्च गोकुलाभ्यन्तरे रथनयनार्थं रथं पुनरारूढ़ इति ज्ञेयम्, रथात्तूर्णमवप्लुत्येति वक्ष्यमाणत्वात् ॥ २७ ॥ ददर्श कृष्णमिति तस्यादौ निर्देशः, तस्मिन् भक्तिविशेषेण किंवा प्रभावविशेषेण तस्यैवादौ दर्शनसम्पत्तः, व्रजे गवावासस्थानमध्ये, तत्र च गोदोहनस्थानं गतौ, तत्रापि वत्सवर्गमध्ये ददर्शेति श्रीपराशर-वैशम्पायनौ, तथा च विष्णुपुराणे (५।१७।२०)—'स ददर्श तदा तत्र कृष्णमादोहने गवाम् । वत्स-मध्ये गतं फुल्लनीलोत्पलदलच्छविम् ॥' इति, श्रीहरिवंशे (विष्णु० प० २५।१६–१७) च—'प्रविशन्नेव च द्वारि ददर्श दोहने गवाम् ॥ वत्समध्ये स्थितं कृष्णं सवत्समिव गोवृषम्' इति । तत्र गोपैर्दुह्यमानाभिर्गोभिः समं वत्सानां सम्मेलनार्थं ज्ञेयम् । अथाग्रे गमनानुक्रमेणाक्रूरेण यथा तौ दृष्टौ, तदनुसारेण द्वावपि यथोक्तक्रमं विशिनष्टि—पीतेति सार्द्धपञ्चभिः । तत्रादौ वस्त्र-परिस्फूर्त्त्या पीतेति परिधानमाह, तच्चोपलक्षणम्, अन्यान्यपि स्वर्णालंकारणानि ज्ञेयानि, तानि चाग्रे (३३ श० श्लो०) 'केनकाचितौ' इति सूचितान्येव, ततः श्रीलोचनपरिस्फूर्त्त्या शरादीति तदाह, तेनोपलक्षितमन्यदप्यंगसौष्ठवं द्रष्टव्यम् ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

देहभृतां देहिनां संदेशात् शास्त्रानुसारात् दर्शनश्रवणादिभिः शुद्धो भवतीति यत् इयान् देहभृतामर्थः फलमियदित्यर्थः ॥ २७–३१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पदानीति । अखिलैर्लोकपालै किरीटेषु जुष्टाः अमलाः पादरेणवो यस्य तस्य भगवतः सम्बन्धीनि क्षितेरलङ्काररूपाणि अब्जादिरेखाभिर्विलक्षितानि चिह्नितानि पदानि गोष्ठे ददर्श । तेषां पदानां दर्शनेन य आह्लादस्तेन विवृद्धः सम्भ्रमो यस्य प्रेम्णोर्ध्वान्युदञ्चितानि रोमाणि यस्य अश्रूणां हर्षजानां कलाभिर्लेशैराकुले ईक्षणे यस्य सोऽक्रूरः रथादवप्लुत्य तेषु पदेषु अचेष्टत व्यलुठत् । अहो प्रभोः कृष्णस्यामून्यङ्घ्रयो रजांसि ब्रह्मादीनामपि दुर्लभानीति भावयन् अचेष्टतेत्यन्वयः ॥२५–२६॥ नन्ववसादवदुद्धर्षोऽपि भक्तियोगविरोधी अतः किमित्येवमचेष्टतेत्यत्राह । देहभृतामिति । देहभाजामेतावानेव पुरुषार्थः कोऽसौ दम्भादस्त्यिक्त्वा हरेः सन्देशाद्वृत्तान्ताद्गुणानुकथनाल्लिङ्गानां विग्रहाणां चिह्नानाञ्च दर्शनश्रवणादिभिश्च योऽवस्थाविशेषः स एवेति प्रदर्शयितुमित्यर्थः । भक्तेः पराङ्काष्ठां दर्शयितुमचेष्टतेति भावः ॥ २७ ॥ ततो व्रजे कृष्णञ्च रामं च ददर्श कथम्भूतौ गावो दुह्यन्तेऽस्मिन्निति गोदोहनं तत्स्थानं गतौ प्राप्तौ श्यामलश्च श्वेतश्च तौ श्रियो लक्ष्म्याः शोभायाश्चाश्रयभूतौ बृहद्भुजौ पीनवत्तुलदीर्घभुजयुक्तौ शोभने प्रसन्ने मुखे ययोस्तौ बालद्विरदस्य कलभस्येव पदविन्यासौ ययोः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अखिललोकपालानां किरीटेषु सत्सु चूडामणिषु पादरेणवो यस्य स तथा तस्य क्षितिकौतुकानि भूमिमङ्गलकराणि पदानि पादतललाञ्छनानि अब्जादिभिर्विलक्षितानि लाञ्छितानि विवाहहस्तसूत्रे च मङ्गले कौतुकं विदुरिति च ॥ २५ ॥ संभ्रमः भक्त्युद्रेकनिमित्तव्यापारविशेषः उत्थानि रोमाणि यस्य स तथा रोमाञ्चितगात्रश्चायम् अश्रुकलयाकुलेक्षणश्च आकुले कलिले ईक्षणे यस्य स तथा अवस्कन्द्य अवरुह्य ॥ २६ ॥ गोदोहनं स्थानमिति शेषः गोदोहनक्रियां गताविति वा ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

देहं भृतामित्यादि । दम्भं व्याजम्, शुचं शोकम्, भियं भयं हित्वा स्थितानां देहं भृतां प्राणिनामियानेवार्थः पुरुषार्थः, एतावानेव पुरुषार्थः । योऽक्रूरस्याभूदित्याह—सन्देशादिति । सन्देशमात्रात् कंसस्याज्ञया कृष्णानयनरूपो यः सन्देशस्तस्मात् हरेर्लिङ्गं पदचिह्नादि, ततः परं दर्शनम्, ततः परं स्पर्शनम् तदादिभियोऽक्रूरस्याभूदिति । यद्वा, सन्देशादिति ल्यब्लोपेपञ्चमी कंस संदेशं हित्वा, स तु काम्यो न भवति ॥ २८–३१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

दम्भं व्याजं शुचं शोकम् मया किं कृतमिति पश्चात्तापम्, कोऽपि मां निन्दिष्यतीति भियम्, हित्वा वर्त्तमानस्य जनस्येयानेवार्थः, यः खलु अक्रूरस्याभूत् ॥ २८–३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पदानि पदचिह्नानि क्षितेः कौतुकं सविस्मयसौभाग्यं यतः ॥ २५ ॥ अश्रूणां कला कलनमतिक्षरणं कलिहली कामधेनू अवस्कन्द्य सहसैवावप्लुत्य स अक्रूरः तेषु पदेषु अचेष्टत सरोदनमलुठत् अहो भाग्यं दुर्लभलाभो ममायमिति सगद्गदं ब्रुवन् ॥२६॥ मथुरातो यात्रामारभ्य नन्दव्रजप्रवेशपर्यन्तमक्रूरस्य मनोवाक्कायचेष्टितं वर्णयित्वा तदेव दृष्टान्तीकृत्य सिद्धान्तसारमाह । देहंभृतामिति । द्वितीया आर्षी देहधारिणामियान् एतावानेव पुरुषार्थः कंसस्य सन्देशादारभ्य हरेर्लिङ्गदर्शनश्रवणादिभिर्योऽयमक्रूरस्य वर्णितः यथा हरेर्लिङ्गं पदचिह्नं दृष्ट्वा अक्रूरस्तत्रैव धूलौ लुलोठ तत्राहमक्रूरो राजमन्त्री राज्ञोऽत्यादरणीयः कथं गोचारकस्य पदधूलौ लुठामीति दम्भं हित्वैव मद्दूतोऽपि भूत्वा मच्छत्रोः पदधूलौ लुठतीत्युपजापकुपितात् कंसात् भयं हित्वा कुपितकंसविनाश्येषु शुच गृहकलत्रादिषु शाकं हित्वैव लुलोठ यथा तथैव वयं पण्डितत्वादाभिजात्यादैश्वर्यवत्त्वाच्च श्रेष्ठाः कथ सर्वलोकानादृतकुचेलाकिञ्चनानिकृष्टवैष्णवचरणधूलौ पताम इति दम्भं स्वजननिन्दनाद्भयं तत्तत् त्यागाच्छोकं च हित्वा हरेर्लिङ्गं वैष्णवं दृष्ट्वा तच्चरणधूलौ पतेयुः । यद्वा हित्वेत्यादिकं देहभृत्स्वेव योग्यं नत्वक्रूरे प्रेमविह्वले इति यथा हरेर्नारदादिमुखाद्यशःश्रवणेन स्मरणेन चाक्रूरो यथा दास्यरसानुकूलान् मनोरथांश्चकार तथैव कदा हरिं परिचरिष्यामः अपि किं तं द्रक्ष्याम इत्यादिमनोरथान् कुर्युरिति ॥ २७ ॥ गावो दुह्यन्तेऽस्मिन् इति गोदोहनं तत् स्थानं गतौ प्राप्तौ । यद्वा गवां दोहनं कर्मप्राप्तौ गां दुहन्तावित्यर्थः । सानुक्रोश सानुकम्पे सस्मिते च ईक्षणे ययोस्तौ प्रधानभूतौ पुरुषौ जगति अवतीर्णौ अर्थेषु भारावताररूपेषु प्रयोजनेषु मध्ये स्वांशः स्वस्वो यो भागस्तेन हेतुना यथा अघबकादीन् कृष्णो जघान धेनुकप्रलम्बादीन् रामो जघान यथा च चाणूरकंसादीन् कृष्णः मुष्टिकद्विविदादीन् रामो हनिष्यतीति ॥ २८–३४ ॥

गूढार्थदीपिनी

गोष्ठे व्रजे तस्य पदानि ददर्शेत्यन्वयः । कौतुकानि भूमेः अलङ्कारभूतानि । अब्जादिभिः रेखारूपैर्विलक्षितानि चिह्नितानि । अखिललोकपालैः किरीटेषु जुष्टाः घृताः पादरेणुः यस्य तस्य ॥ २५ ॥ विवृद्धः सम्भ्रमः किंकर्तव्यमूढता व्याकुलता यस्य । अश्रुबिन्दुभिः पूर्णे ईक्षणे यस्य सः । अवस्कन्द्य अवप्लुत्य । रजांसि इति सन्मानयन् तत्र धूलौ अचेष्टत लुलोठ ॥ २६ ॥ कंसस्य सन्देशात् हरेर्दर्शनादिभिः योऽक्रूरस्य जातः एतावानेव अर्थः परमपुरुषार्थः ॥ २७ ॥ गावो दुह्यन्तेऽस्मिन्निति गोदोहनं तत्स्थानम् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र तस्य श्रीकृष्णस्य क्षितिकौतुकानि भूमेरलङ्काररूपाणि पदानि ददर्श तच्चरणसंस्पृष्टरेणोरपि ब्रह्मादिकिरीटकोटिसेवितत्वं दर्शयति । अखिलैः सर्वैः लोकपालैर्ब्रह्मादिभिः किरीटेषु जुष्टा अमलाः पादरेणवो यस्य तस्येति ॥ २५ ॥ सः अक्रूरः तेषां दर्शनेन य आह्लादस्तेन विवृद्धः सम्भ्रमो यस्य प्रेम्णोर्ध्वान्युदञ्चितानि रोमाणि यस्य सः अश्रूणां कलाभिर्लेशैराकुले ईक्षणे यस्य सः रथादवस्कन्द्यावप्लुत्य अहो प्रभोरमून्यङ्घ्रिरजांसीति दुर्लभतां भावयन् तेषु पदेषु अचेष्टत व्यलुठत् ॥ २६ ॥ अन्यान् शिक्षयितुमक्रूरवृतान्तं श्लाघते । देहंभृतामियानेव एतावानेव अर्थः पुरुषार्थः कोऽसौ दम्भादीन् हित्वा कंसस्य सन्देशादारभ्य हरेर्लिङ्गदर्शनश्रवणादिभिर्योऽयमत्राक्रूरस्य वर्णित इति शेषः । एवमेव देहभृद्भिर्भगवति भावः कर्तव्य इति भावः ॥ २७ ॥ ततो व्रजे रामं कृष्णं च ददर्श । कथम्भूतौ गावो दुह्यन्ते यत्र तद्गोदोहनं स्थानं गतौ प्राप्तौ ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तद्दर्शनेन जनिताह्लादस्तेन विवृद्धः सम्भ्रम आदरो यस्य स उत्था रोमाञ्चा यस्य स चासावश्रुकलाभिश्चाकुले ईक्षणे यस्य स च । उभयत्रापि हेतुः प्रेम्णेति । प्रेमा । क्वचित्प्रेमोत्थेति पाठः । स प्रेमावहो रथात्स्वोपविष्टादवस्कन्द्य । तत्र पारवश्यमनेन ध्वन्यते । प्रभोरिमान्यङ्घ्रिरजांसि अहो इति । तेषु रजस्सु अचेष्टत व्यलुण्ठत् । प्रेमोर्ध्वरोमा इति पाठोऽपि रोमहर्षदः । अहो इति तद्दौर्लभ्यं विभावयति ॥ २५ ॥ गोदोहनं तत्स्थानं गतौ प्राप्तौ गोदोहनं क्षीरक्षारणव्यापारं गताविति वा । पीतं च नील चेत्यम्बरयोर्धरौ ॥ २६ ॥ श्यामलश्च श्वेतवर्णतस्तौ । श्रीरेकत्र रमा परत्र शोभावताश्च नासत्येद्याश्रयणाच्छ्रिय ईरितेत्यादेर्वारुणी वा रेवती वा तन्निकेतौ ॥ २७ ॥ बलमूलरूपविवक्षातो विषं श्रीस्तन्निकेत इति वा गतम् । सानुक्रोशानि सदयानि विकसितानीक्षणानि ययोस्तौ शोभमानौ शोभयन्तौ ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अत्र मध्ये तस्य भक्त्यतिशयार्थं कायिकोऽपि व्यापारो वक्तव्य इति लोकप्रसिद्ध्यर्थं च निरूपयति । पदानीति त्रिभिः । हेतुक्रियाकलनिरूपकः यो भगवान् हृदये फलत्वेन भाव्यते तस्य पदानि भूमावुद्गतानि भगवदीयशरीरसम्पादकरजोयुक्तानि दृष्टवान् तद्रजो ग्राह्यमिति वक्तुं तस्य रजसः ब्रह्मत्वाद्यपेक्षयापि महत्त्वमाह । अखिललोकपालकिरीटजुष्टामलपादरेणोरिति । अखिलाः सर्वे लोकपालाः सर्वेषामैश्वर्यं भगवदधीनमेवेति निरूपयितुं देवदैत्यादयः सर्व एव परिगृहीताः लोकपाला इति स्वरूपतोऽपि महत्त्वं महतां सेव्य एव महान् भवतीति किरीटजुष्टत्वेन धर्मार्थं तेषां प्रवृत्तिर्निवारिता धर्मार्थं यो नमस्करोति स देहेनैव सर्वाभरणभूषितस्तु ईश्वरमेव नमस्करोतीति मार्गरजोऽपि गच्छतां मुकुटसंबन्धि भवति तद्व्यावृत्त्यर्थं रजसोविशेषणमालमिति एतादृशश्चरणरेणुर्यस्येति भगवत्संबन्धादेव तस्य माहात्म्यं नतु मृगमदवत् स्वरूपतो रेणुर्महान् तादृशस्य पदानि ददर्श इति निधानप्राप्तिरिति सूचिता । ननु कथं ज्ञातवानेतानि भगवत्पदानीति तत्राह । विलक्षितानीति । सुखसेव्यत्वाय फलदानाय चाब्जरेखा कीर्तिप्रकटनार्थं यवाकृतिः मनोगणनिवारणार्थमङ्कुशरेखा आदिशब्देन ध्वजादयोऽपि । ननु भगवानेवं दुर्ल्लभानि किमिति प्रकटितवानित्यत आह । क्षितिकौतुकानीति । क्षितौ कौतुकरूपाणि भूमौ रसप्रकटनार्थं कौतुकत्वेन प्रकटितवान् भूमिष्ठानां भजनसिध्यर्थं यत्राल्पस्थानेऽपि महाफलान्येवं प्रयच्छतीति ॥ २५ ॥ भक्तस्य दर्शने यदुचितं तत्कृतवानित्याह । तद्दर्शनेति । भगवदीयशरीरजनकास्ते रेणवस्तेषां दर्शने पूर्वस्थितदेहादीनां निवृत्तिर्वक्तव्या, तत्र भक्तिरसस्तस्मिन्निविष्टः स्वधर्मप्राकट्येन तद्धर्मान् दूरीकृतवान् तदाह । तेषां पदानां दर्शनेन यो जातो महाह्लादः तेन विवृद्धः सम्भ्रमो यस्य मानसो धर्मः व्याकुलता निरूपिता प्रेम्णा ऊर्ध्वानि रोमाणि यस्य दैहिको धर्मो निरूपितः अश्रुकलाभिराकुले ईक्षणे यस्येतीन्द्रियधर्मा निरूपिताः ततः पूर्वधर्म्माणां गतत्वात् सङ्घातस्तेषु पतित इत्याह । रथादवस्कन्द्येति । अवस्कन्दनमचेतनानां तथा स पतित इत्यर्थः । ततो रजःप्रभावात् सः प्रसिद्धः अक्रूरो जातः अन्तर्देहो भगवदीयो जातः बहिर्देहस्यापि तथात्वाय तेषु रेणुष्वचेष्टत लुठनं कृतवान् बाह्यस्तथा संवेदनाभावात् चेष्टामात्रमाह । ननु लुठने को हेतुर्वारं वारं तत्राह तद्गतमभिप्रायं प्रभोरिति । एतावत्कालं शास्त्रार्थत्वेन ईश्वरत्वेन महत्त्वेन संबन्धित्वेन वा ज्ञातवान् इदानीं शुद्धः स्वयं सेवको जातः भगवांश्च प्रभुः तथा सति तस्य परमदुर्ल्लभान्यङ्घ्रिरजांसि कथमेवं भूमौ स्थातुमुचितानि भवन्तीति स्वशरीरे तानि सर्वाण्यवे योजयितुं यावत् तानि रजांसि सर्वाणि प्रविशन्ति तावत् लुठनं कृतवान् किञ्च आश्चर्यरसाविष्टोऽपि जातः अहो इति माहात्म्यमनेन सूचितम् ॥ २६ ॥ एवं तस्य कृतमुक्त्वा फलमाह । देहंभृतामिति । यदस्य जातम् इयानेव देहंभृतामर्थः पुरुषार्थः जन्मसाफल्यम् उत्पन्नेन हि परमः पुरुषार्थः साधनीयः स च भगवदीयभावः तथा यत्नः कर्त्तव्यः यथा स भवति ज्ञानादिस्तु अवान्तरफलरूपः मोक्षादपि स्वभावत एवायं भावोऽधिकः तदुपपादितं भगवदीयत्वेनेत्यत्र अत इयानेव पुरुषार्थ इति युक्तमिति हिशब्दः देहसङ्ग्रहणं क्लेशात्मकं तदपि कृत्वा यदि परमपुरुषार्थं न साधयेत् तदा वैयर्थ्यमिति स कोऽर्थ इत्याकाङ्क्षायामाह । सन्देशादिति । सन्देशमारभ्य हरेलिङ्गश्रवणदर्शनादिर्योऽर्थो जातः अयमेवार्थः सन्देशानन्तरमेव तस्य चित्तं भगवत्परं जातं तद्वर्द्धमानं भगवदीयत्वञ्च सम्पाद्य माहात्म्यज्ञानं कारितवत् लिङ्गानां चिह्नानां भगवत्पदानां प्रथमतो दर्शनं ततस्तत्सायुज्यमिति ततो भगवदीयत्वं माहात्म्यज्ञानञ्च सर्वे च भगवदीया धर्माः सन्देशादिति हेतोर्वा अन्यार्थमपि प्रयुक्तं वाक्यमेतावत्फलं साधयतीति अल्पप्रसङ्गेनाप्येतावत्त्वं महाफलमित्यर्थः । परन्तत्र दोषत्रयं परित्यज्यैतत्कर्त्तव्यमित्याह । हित्वेति । दम्भो राजसः भयं सात्त्विकं शोकस्तामसः दम्भो बाह्यः भयं शारीरं शोकोऽन्तःकरणस्य एतत्सर्वथा त्यक्तव्यम् अनेनापि त्यक्तमिति दम्भं कापट्यं त्यक्तवान् यथा कंसेनोक्तं भयञ्च त्यक्तवान् भगवान् किङ्करिष्यतीति शोकञ्च त्यक्तवान् भगवति तत्र गते कंसः किङ्करिष्यतीति भयानन्तरं चैतद्भवतीत्युक्तं भगवतो माहात्म्यज्ञानाभावे शोको भवति नान्यथा एवमन्यैरपि लौकिका अलौकिकाश्चते भावाः त्यक्तव्याः अन्यथा एतावत्त्वं न भवेदिति ॥ २७ ॥ ततो योग्यशरीरं प्राप्य भगवन्तं दृष्टवानित्याह । ददर्शेति यादृशः सेवकः तादृशं वर्णयित्वा यादृशो भगवान् तादृशं वर्णयति षड्भिः—

स्वरूपञ्च वयश्चैव देहेन्द्रियविचेष्टितम् । शोभा स्वरूपञ्च तथा शोभा तस्याप्यलौकिकी ॥

तत्र प्रथमम्परिदृश्यमानं स्वरूपं वर्णयति भक्तत्वात् प्रथमं कृष्णं ददर्श ततो राममावेशिनं चकारादाविष्टं व्रजे अधिकरणे तत्रापि गोदोहनं गतौ गोदोहनस्थाने स्थितौ गावो दुह्यन्ते अस्मिन्निति देशमुक्त्वा आवरणमाह । पीतनीलाम्बरधराविति । भगवान् पीताम्बरधरः रामो नीलाम्बरधर इति तादृशमेव वस्त्रद्वयं द्वयं परिधृतमस्तीति ज्ञापयितुमम्बरधरावित्युक्तं शरत्काले ये अम्बुरुहे सम्यक् जाते तद्वदीक्षणी ययोः अनेन गुणा उक्ताः देशकालयोः स्वाभाविकयोः विपरीतत्वेऽपि तत्समीचीनं विधाय ज्ञानादिसर्वपुरुषार्थान् प्रयच्छतीति तथोक्तम् ॥ २८ ॥

श्रीसुबोधिनी–सारः

गोष्ठे व्रजेऽखिलैः सर्वैर्लोकपालैः किरीटेषु जुष्टाः तेषां किरीटैर्वा जुष्टा अमलाः पादरेणवो यस्य कृष्णस्य क्षितेः कौतुकानि अलंकाररूपाणि अब्जादिभिर्विलक्षितानि चिह्नितानि पदानि ददर्श ॥ २५ ॥ तेषां दर्शनेन य आह्लादस्तेन विवृद्धः संभ्रमो यस्य सः प्रेम्णोर्ध्वानि रोमाणि यस्य सोऽश्रूणां कलाभिराकुले व्याप्ते ईक्षणे यस्य स सोऽक्रूरो रथादवस्कंद्यावतीर्य प्रभोः श्रीकृष्णस्यामूनि चरणरजांसीति हेतोः तेषु रजःसु अचेष्टत व्यलोठिष्ट । अहो दुर्लभमेतत् ॥ २६ ॥ दम्भं मायां श्रियं धनादिगर्वं शुचं शोकं हित्वा त्यक्त्वा संदेशादारभ्य हरेर्लिंगदर्शनश्रवणादिभिर्यो वर्णितोऽक्रूरस्य देहधारिणामियानेतावानेवार्थः पुरुषार्थोऽस्ति ॥ २७ ॥ व्रजे गोदोहनं गतौ कृष्णं रामं च ददर्श क्रमेण पीतनीलाम्बरधरौ शरत्पद्मनिभेक्षणौ ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र च क्षितेः कौतुकानि अलङ्काररूपाणि अब्जादिरेखाभिर्विलक्षितानि अङ्कितानि अखिलैर्लोकपालैः किरीटेषु जुष्टाः सेविताः अमलाः अविद्यादिसकलमलनिवर्तकाः पादरेणवो यस्य तस्य भगवतः सम्बन्धीनि पदानि ददर्शेत्यन्वयः ॥ २५ ॥ तेषां पदानां दर्शनेन य आह्लादस्तेन विवृद्धः सम्भ्रमो व्याकुलत्वं यस्य सः, तथा प्रेम्णा ऊर्ध्वानि उदञ्चितानि रोमाणि यस्य सः, तथा अश्रूणां हर्षजानां कलाभिर्लेशैराकुले ईक्षणे यस्य सोऽक्रूरः । अहो इति दुर्लभतां द्योतयति । ब्रह्मादीनामपि दुर्लभानि अमूनि प्रभोः कृष्णस्याङ्घ्रिरजांसीति विभावयन् रथादवस्कन्द्य अवप्लुत्य तेषु पादरजस्सु अचेष्टत व्यलुठदित्यन्वयः ॥ २६ ॥ प्रसङ्गादक्रूरभक्तेः परमपुरुषार्थत्वमाह—देहभृतामिति । सन्देशात् गुरूपदेशात् दम्भं मनस्यन्यथा सत्त्वेपि बहिरन्यथाप्रकाशनं, भियं भयं, शुचं शोकं च हित्वा हरेर्लिङ्गानां मूर्तीनां दर्शनं गुणानां श्रवणमादिपदेन कीर्तनस्मरणादिग्रहणं देहभृतां प्राणिनामियानेतावानेवेत्यर्थः परमपुरुषार्थः । 'कोऽसौ' इत्यपेक्षायामाह—य इति । कंसादेशादारभ्य यो भक्तिविशेषोऽक्रूरस्य जातः स इत्यर्थः ॥ २७ ॥ ततश्च स व्रजे कृष्णं रामं च ददर्श । तौ वर्णयति–गावो दुह्यन्त्यस्मिन्निति गोदोहनं दोहस्थानं गतौ प्राप्तौ पीताम्बरधरः कृष्णः नीलाम्बरधरः रामः शरत्कालीनाम्बुरुहवदीक्षणे ययोस्तौ ॥ २८ ॥

अन्वितार्थप्रकाशिका

पदानीति ॥ तत्र च गोष्ठे क्षितेः कौतुकानि अलङ्काररूपाणि अब्जयवाङ्कुशाद्यैः रेखाकारैः विलक्षितानि अखिलैर्लोकपालैः किरीटेषु जुष्टाः सेविताः अमलाः पादरेणवो यस्य तस्य भगवतः सम्बन्धीनि पदानि ददर्श ॥ २५ ॥ तदिति ॥ तेषां पदानां दर्शनेन य आह्लादस्तेन विवृद्धः संभ्रमो व्याकुलत्वं यस्य सः तथा प्रेम्णा ऊर्ध्वानि उदञ्चितानि रोमाणि यस्य सः तथा अश्रूणां हर्षजानां कलाभिर्लेशैराकुले ईक्षणे यस्य सोऽक्रूरः अश्रूणां कलनमतिक्षरणं कलिवली कामधेनू इति चक्रवर्ती । अहो इति दुर्लभतां द्योतयति । ब्रह्मादीनामपि दुर्लभानि अमूनि प्रभोः कृष्णस्याङ्घ्रिरजांसीति विभावयन् रथादवस्कन्द्य अवप्लुत्य तेषु पादरजःसु अचेष्टत व्यलुठत् ॥ २६ ॥ देहमिति ॥ कंसस्य संदेशादनन्तरं हरेर्लिङ्गानां मूर्तीनां दर्शनं गुणानां श्रवणमादिपदेन कीर्तनस्मरणादिग्रहणं तैः गोपालस्य पदधूलौ कथं लुठामीति दम्भं तेन लोठनेन कंसाद्भयं कुपितकंसकृतानिष्टेषु शुचं च हित्वा योऽयमक्रूरस्य भगवच्चरणाङ्करेणुषु लुठनादिभक्तिप्रकर्षो जातः देहंभृतां जीवानां इयान् एव अर्थः पुरुषार्थः । देहमिति द्वितीया आर्षी तदर्हमिति निर्देशात्षष्ठी अनित्या वा । दम्भं भियं शुचमिति सर्वजीवसाधारण्येन वा योज्यम् । यद्वा । सन्देश आद्यो यस्य सः यावान् अर्थोऽक्रूरस्य जातः ॥ २७ ॥ ददर्शेति ॥ अक्रूरः रामं कृष्णं च ददर्श । तौ विशिनष्टि षड्भिः । गावो दुह्यन्तेऽस्मिन्निति गोदोहनं गतौ प्राप्तौ पीताम्बरधर कृष्णः नीलाम्बरधरो रामः शरत्कालिकाम्बुरुहे इवेक्षणे ययोस्तौ ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अखिललोकानां पालैः रक्षकैः ब्रह्मेन्द्रादिभिः किरीटेषुः जुष्टाः धृताः अमल्याः पादरेणवो यस्य तस्य क्षितिकौ तु कानि भूमेः भूषणभूतानि पदानि गोष्टे ददर्श ॥ २५ ॥ तेषां पदानां दर्शनेन य आह्लाद आनन्दस्तेन विवृद्धः संभ्रमस्त्वरा यस्य सः प्रेम्णा ऊर्द्ध्वानि रोमाणि यस्य सः अश्रूणां कलाभिर्बहुभिः आकुले व्याप्ते ईक्षणे यस्य एवंभूतः सन् रथादवस्कंद्य वेगेनोत्तीर्य अहो इत्याश्चर्ये प्रभोः अमून्यंघ्रिरजांसि भवन्तीति ज्ञात्वा तेषु पादरेणुषु सः अचेष्टत व्यलुठत् ॥ २६ ॥ नन्वेवं कस्याच्चेष्टितवांस्तत्राह देहभृतामिति दम्भकान्हित्वा कंसस्य संदेशादारभ्य हरेर्लिंगस्य स्वरूपस्य दर्शनश्रवणादिभिः अक्रूरस्य यः स्नेहउत्पन्नः इयानेव एतावानेव देहभृतां करणीयः अर्थः पुरुषार्थो ज्ञेयः ॥ २७ ॥ गवां दोहनं यस्मिंस्तत्स्थानं गतौ ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पदानीति ॥ अखिला ये लोकपालास्तै किरीटेषु मुकुटेषु जुष्टाः धारिता अमलाः पादरेणवो यस्य तस्य, तस्य श्रीकृष्णभगवतः संबन्धीनि, क्षितेः पृथिव्याः कौतुकान्यलंकाररूपाणि, अब्जं च यवश्च अङ्कुशं च तदाद्यैः अब्जादिलक्ष्मभिः, विलक्षितानि विलसितानि, पदानि, गोष्ठे गोष्ठान्तिकप्रदेशे, ददर्श । अक्रूरोऽपश्यत् ॥ २५ ॥ तदिति ॥ तेषां पदानां दर्शनेन य आह्लादस्तेन विवृद्धः संभ्रम उत्सवो यस्य सः, प्रेम्णा, ऊर्ध्वान्युदञ्चितानि रोमाणि यस्य सः, अश्रूणां हर्षजातानां नयनजलानां कलाभिर्लेशैराकुले ईक्षणे नयने यस्य, सोऽक्रूरः, रथात् अवस्कन्द्य अवप्लुत्य, तेषु पदेषु, अहो प्रभोः श्रीकृष्णस्य, अमूनि अङ्घ्र्यो रजांसि पादरेणवः, इमानि तु ब्रह्मादीनामप्यतिदुर्लभानीति विभावयन्, अचेष्टत अलुण्ठत् ॥ २६ ॥ नन्ववसादवत् हर्षोऽपि भक्तियोगविरोधीत्यतो हर्षोद्रिक्तः सन् किमिति तेष्वेवमचेष्टतेत्यत्राह ॥ देहभृतामिति ॥ देहभृतां देहभाजां, इयानेतावानेव, अर्थः पुरुषार्थः, कोऽसौ । दम्भं, भियं शुचं, हित्वा संत्यज्य, हरेः संदेशात् वृत्तान्तात्, गुणानुकथनात् इत्यर्थः । लिङ्गानां विग्रहाणां चिह्नानां च दर्शनं च श्रवणं च ते आदी येषां तैः, योऽवस्थाविशेषः स एवेति शेषः । इति भक्तः परां काष्ठां दर्शयितुमचेष्टतेति भावः । यद्वा । देहभाजां, एतावानेव पुरुषार्थः । दम्भादीन् हित्वा कंसस्य संदेशात् आरभ्य हरेर्लिङ्गदर्शनश्रवणादिभिः यः अयं अक्रूरस्य, वर्णितः इति ॥ २७ ॥ ददर्शेति ॥ ततः अक्रूरः, कृष्णं रामं च तौ, ददर्श । तौ सत्रिपादपञ्चभिर्विशिनष्टि । व्रजे गावः दुह्यन्तेऽस्मिन्निति गोदोहनं तत् स्थानं, गतौ प्राप्तौ, पीतं च नीलं च तथाभूते ये अम्बरे वसने तयोर्धरौ धर्त्तारौ. शरदम्बुरुहे शरत्कालीनकमले इव ईक्षणे ययोस्तौ ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पदानि तस्येति : १०.३८.२५.

अत्राजानुपदं स्थितं समपदं प्रोड्डीय चात्र स्थितं मण्डूकप्लुतितोऽत्र चात्र च तिरःप्रक्षिप्तपद्भ्यां गतम् ।
अत्राद्रावि सवेगमत्र च शनैरिङ्गत्पदं चात्र च क्रीडाश्रान्ततयाऽऽसितं भगवतेतीक्षोत्सुकाद्दग्भव ॥ ५३ ॥

तद्दर्शनेति : १०.३८.२६.

दृष्ट्वाऽरिचक्रकलितोद्धतसंभ्रमं मां मा केश्यरिष्टबकवद् गणयत्वनन्तः ।
इत्यात्मदृक् तदरिचक्रशताङ्कवासं सन्त्यज्य सद्व्रजसदाचरणो बभूव ॥ ५४ ॥
सर्वस्मिन्नपि गोकुले स हि तदा दिग्देवताऽधीशितुः श्रीनाथस्य पदान्यवेक्ष्य विलसत्पद्मादि-लक्ष्माण्यलम् ।
तज्जानन्दविवृद्ध-सात्त्विकमहाहार्दात्मभक्तिजवाद् विस्मृत्य क्षणमात्मभावमवनौ तद्भाज्यलोडीन्मुदा ॥ ५५ ॥
श्रीशाङ्घ्रिसंस्पृष्टरजः प्रभूतं सुखं यदादौ शिर एव लेभे ।
सर्वेषु गात्रेषु शिरः प्रधानं साधूक्तमेतद्वचनं हि साधु ॥ ५६ ॥
सद्धंसव्योमयानेक्षणललितगतिः सूर्यभूत्यम्बुजातोल्लासी तत्कीर्तिसारस्वत-मधुररस-प्रेमभृच्चित्तवृत्तिः ।
यद्ब्रह्मैवास्मि सम्प्रत्यतनुजनिपदावेक्षणोत्कण्ठिताक्षस्तद्युक्तं व्याहरामि स्वपदमिति विभोः पादपद्मं प्रपन्नः ॥ ५७ ॥

ददर्श कृष्णं राममिति : १०.३८.२८.

एवं यो भक्तिपूर्णो भवति भुवि जनः स स्वयं स्वात्मनीशौ पश्यन्नाकाशवर्णौ सुमहितचरितौ नीरजस्कौ प्रसन्नौ ।
आद्यौ हेतू जगत्याः सुकृतमयतनू सद्व्रजं शोभयन्तावुत्प्लुत्य स्यन्दनात्तत्पदसुखनिहितं स्वं करोत्याप्तकामः ॥ ५८ ॥
श्रुतिश्रुतो दृष्टिदृष्टो मनसाऽऽलिङ्गितो दृढम् । शिरसाऽपि पदस्पर्शं करोम्यस्येत्यधावत ॥ ५९ ॥

कृष्णप्रिया

जिनके चरण कमल की रज को सभी लोकपाल अपने किरीटों के द्वारा सेवन करते हैं, अक्रूरजी ने गोष्ठ में उनके चरणचिह्नों के दर्शन किये । कमल, यव अङ्कुश आदि असाधारण चिह्नों के द्वारा उनकी पहचान हो रही थी और उनसे पृथ्वी की शोभा बढ़ रही थी ॥ २५ ॥ उन चरणचिह्नों के दर्शन करते ही अक्रूरजी के हृदय में इतना आह्लाद हुआ कि वे अपने को संभाल न सके, विह्वल हो गये । प्रेम के आवेग से उनका रोम रोम खिल उठा, नेत्रों में आँसू भर आये और टप-टप टपकने लगे । वे रथ से कूदकर उसी धूलि में लोटने लगे, और कहने लगे—अहो ! यह हमारे प्रभु के चरणों की रज है ॥ २६ ॥ परीक्षित ! कंस के सन्देश से लेकर यहाँ तक अक्रूर जी के चित्त जैसी अवस्था रही है, यही जीवों के देह धारण करने का परम लाभ है । इसीलिये जीव मात्र का यही परम कर्तव्य है कि दम्भ, भय और शोक त्याग कर भगवान की मूर्ति (प्रतिमा भक्त आदि) चिह्न, लीला, स्थान तथा गुणों के दर्शन—श्रवण आदि के द्वारा ऐसा ही भाव सम्पादन करें ॥ २७ ॥ व्रज में पहुँचकर अक्रूरजी ने श्रीकृष्ण और बलराम दोनों भाइयों को गाय दूहने के स्थान में विराजमान देखा । श्यामसुन्दर श्रीकृष्ण पीताम्बर धारण किये हुए थे और गौर सुन्दर बलराम नीलाम्बर । उनके नेत्र शरत्कालीन कमल के समान खिले हुए थे ॥ २८ ॥

किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ । सुमुखौ सुन्दरवरौ बालद्विरदविक्रमौ । २९ ॥
ध्वजवज्राङ्कुशाम्भोजैश्चिह्नितैरङ्घ्रिभिर्व्रजम् । [1]शोभयन्तौ महात्मानौ सानुक्रोशस्मितेक्षणौ ॥ ३० ॥
उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ । पुण्यगन्धानुलिप्ताङ्गौ स्नातौ विरजवाससौ ॥ ३१ ॥
प्रधानपुरुषावाद्यौ[3] जगद्धेतू [4]जगत्पती । अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—किशोरौ, श्यामलश्वेतौ, श्रीनिकेतौ बृहद्भुजौ, सुमुखौ, सुन्दरवरौ, बालद्विरदविक्रमौ ॥ २९ ॥ ध्वजवज्राङ्कुशम्भोजैः, चिह्नितैः, अङ्घ्रिभिः, व्रजम्, शोभयन्तौ, महात्मानौ, सानुक्रोशस्मितेक्षणौ ॥ ३० ॥ उदाररुचिरक्रीडौ, स्रग्विणौ, वनमालिनौ, पुण्यगन्धानुलिप्ताङ्गौस्नातौ, विरजवाससौ ॥ ३१ ॥ प्रधानपुरुषौ, आद्यौ, जगदहेतू, जगत्पती, स्वांशेन, जगत्यर्थ निजांशेन, आनन्दांशेन, अवतीर्णौ, बलकेशवौ ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनुक्रोशोऽनुकम्पा तद्विलसितस्मितयुक्तमीक्षणं ययोस्तौ ॥३०॥ उदारा रुचिरा क्रीडा ययोस्तौ । स्रग्विणौ रत्नस्रग्भिरलंकृतौ विरजे निर्मले वाससी उत्तरीये ययोः ॥ ३१ ॥ प्रधानभूतौ पुरुषौ प्रकृतिपुरुषात्मकौ वा । कुतः । आद्यौ । तदपि कुतः । जगद्धेतू । अत एव जगत्पती । विपरीतो वा चतुर्णां पदानां हेतुहेतुमद्भावः । जगत्यर्थे पृथिव्या भारापनयनाय स्वांशेन मूर्तिभेदेन बलकेशवौ संताववतीर्णौ ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

किशोरावनाप्तयौवनौ । "किशोरोऽश्वशिशौ सूर्ये वयसि यौवनाग्रिमे" इति धरणिः ॥ ततः किञ्चिच्चलने सति व्यक्तीभूतकैशोरस्य ततो वर्णस्य तत्र शोभोपलम्भात्तद्वर्णनम् । ततो गवां सम्भालनार्थमुत्थापितभुजावलोकनं, ततः श्रीमुखनिभालनं, ततः किञ्चिन्निकटीभूय पश्यता तेन सर्वांगसौन्दर्यावलोकनं, ततो बालौ किशोरावपि महाबलत्वेन द्विरदविक्रमौ मत्तगजवच्चलन्तौ ददर्श ॥ २९ ॥ महात्मानौ परपुरुषौ ॥ ३० ॥ उदारा महती ख्याता चातुर्यविशिष्टा वा रुचिरा द्रष्टृचेतो हरा । "उदारो महति ख्याते दक्षिणे दानशौण्डके" इति शाश्वतः । वनमालायाः पृथगुपादानाद्रत्नस्रग्भिरित्युक्तम् । पुण्यः सुरभिर्गंधो यस्य तुलसीदारुपटीरादेः स पुण्यगन्धस्तेन "नास्ति प्रियोऽनुलेपोऽन्यो हरेस्तुलसिजो यथा" इति हरिभक्तिचन्द्रोदये ॥ उदाररुचिरा महामनोहरा क्रीडा गवाह्वानरोधनादिषु विलासहासादिरूपा ययोस्तौ । कृपया निजमाधुरीं दर्शयितुं तमदृष्ट्वैव स्थितयोरनयोः क्रीडायां कौतुकावेशः । तत्र च वेशविशेषाणां प्रत्येकनिशामनमिति क्रमेण वर्णनम् । स्रग्विणौ ह्रस्वमध्यमालाधारिणौ । वनमालिनौ दीर्घमालाधारिणौ । विरजं वासो ययोस्तौ । विरज इत्यकारान्तो रजशब्दः 'अर्थाः पादरजोपमाः' इति प्रयोगात् । स्रग्वीत्यादिकं तु स्नानानन्तरमेव गृहात्तत्रागमादिति ज्ञेयम् ॥ ३१ ॥ 'अप्रसिद्धेः प्रसिद्धिर्बलीयसी' इति न्यायेनाह–प्रकृतिपुरुषात्मकौ वा । बलदेवस्य शेषावतारत्वेन प्रकृतित्वं ज्ञेयम् । तच्च 'यस्याद्य आसीद्गुणविग्रहो महान्' इत्यादिना "महानहंवैकृततामसेंद्रियाः सृजाम सर्वे यदनुग्रहादिदम्" इत्यन्तेन पञ्चमस्कंधेऽवसेयम् । तत्राशंकते – कुत इति । तदपि आद्यत्वमपि । अत एव जगद्धेतुत्वादेव, उत्पादकस्य प्रायो रक्षकत्वदर्शनात् । वैपरीत्ये विनिगमनाविरहात्तदप्यस्त्वित्याह—विपरीतो वेति । जगत्पतित्वं कुतो—यतो जगद्धेतू, तदपि कुतो—यत आद्यौ, तदपि कुतो यतः प्रधानपुरुषाविति । स्वांशेन निजैश्वर्येण मायया वा ॥ कृष्णस्य सर्वापेक्षया प्रधानत्वं, रामस्य त्वन्यापेक्षया स्वांशेन स्वाविर्भावभेदेन हेतुना । यथाऽघबकादीन् कृष्णो धेनुकप्रलम्बादींश्च रामो जघानेति । यथा चाणूरकंसादीन्कृष्णो मुष्टिकद्विविदादीन्राम इत्युभावेव जगतीक्षेमायावतीर्णाविति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततो भगवल्लक्षणालक्षणम् अङ्घ्रिभिरिति बहुत्वं द्वयोश्चतुष्टयत्वात् ततो अद्भुतमाधुरीभिर्विश्वेषामपि स्तम्भात् स्थगितगतिना तेन पुनरपि कृपादृष्टिवृष्टिलाभः ॥ ३० ॥ तत उदाररुचिरा महामनोहरा क्रीडा गवाह्वानरोधनादिषु विलासहासादिरूपा ययोस्ताविति कृपया सम्यगिव निजमाधुरीं दर्शयितुं तमदृष्ट्वैव स्थितयोरनयोश्च क्रीडायां कौतुकावेशः तत्र च वेशविशेषाणां प्रत्येकनिशामनमिति यथाक्रममेव वर्णनं स्रग्विणौ ह्रस्वमध्यमादिमालाधरौ वनमालिनौ दीर्घमालाधरौ विरजावित्यकारान्तो रजशब्दः "अर्थाः पादरजोपमा" इति प्रयोगात् स्रग्वित्वादिकं गृहात् स्नानाद्यनन्तरमेवात्रागमनात् ॥ ३१ ॥ तदेवं तस्य तस्य

---

१. क्षोभयन्तौ–विज. । २. महात्मानावनु–श्रीधर वंशी. जीव. वीर. विज. विश्व. शुक. आदयः । ३. षण्याघ्नौ–प्रः. पा. ।
४. जगन्मयो–वीर. ।

माधुर्यानुभवचमत्कारजाते तद्भावानुसारेण पारमैश्वर्यानुभवचमत्कारोऽपि जात इत्याह । प्रधानेति । कृष्णस्य सर्वापेक्षया प्रधानत्वं रामस्यान्यापेक्षयेति स्वांशेनेति स्वाविर्भावभेदेनेत्यर्थः । अतएव जगत्पती इति द्वित्वं बलेति बलाधिक्यस्फूर्त्तेः केशवेति साम्प्रतं केशिहन्तृत्वस्फूर्त्तेः कंसमारणे निश्चयं बोधयति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्च किशोराविति वयः, श्यामलश्वेताविति वर्णः, श्रियो विविधशोभाया निकेताविति लावण्यादि, बृहद्भुजाविति वीर्य्यवत्त्वम्, सुमुखाविति मनोहरत्वम्, यद्वा, श्रियो वक्षसा निकेताविति वक्षः, बृहद्भुजाविति भुजौ, सुमुखाविति श्रीमुखमेवोक्तम्, अनुक्तमन्यत् संगृह्णाति—सुन्दरवराविति । पराक्रममाह—बालेति । बालगजोपमा कैशोरमात्राभिप्रायेण, विक्रमवत्त्वदर्शनञ्च सुदृप्तत्वादिदर्शनादिति ज्ञेयम् । एवमन्यदप्युह्यम् । यद्वा, विक्रमः पादविन्यासः, बालद्विरदोपमा गतिचाञ्चल्यविवक्षया ॥ २९ ॥ तदेवाह—ध्वजेति । अङ्घ्रिभिस्तच्चिह्नै रित्यर्थः । किंवा, प्रत्येकं द्वाभ्यामित्येवं चतुर्भिः । पादाब्जैर्व्रज शोभयन्ताविति लीलयेतस्ततः परिभ्रमन्तावित्यर्थः । यद्वा, 'मण्डयन्तौ' इति गवां दोहनं गतौ गा दुहन्तावित्यर्थः निरस्तः । अतएव श्रीविष्णुपुराणे (५।१७।२२)—'तुगरक्तनखं पद्भ्यां धरण्यां सुप्रतिष्ठितम्' इति, श्रीहरिवंशे च (विष्णु० प० २५।२५)—'भुवि पद्भ्यां व्यवस्थितः' इति । गुणानाह—महात्मानौ सर्व्वसद्गुणवन्तावित्यर्थः । तत्र मुख्यं कारुण्यं सूचयति—सानुक्रोशेति । एतेन माधुर्य्यमप्युक्तम् ॥ ३० ॥ लीलामाह,—उदारा सर्व्वतो विलक्षणा सर्व्वार्थप्रदा वा रुचिरा च क्रीडा वेणुवादन-गवाह्वानादिलक्षणा ययोस्तौ । वेशमाह—स्रग्विणाविति । पञ्चभिर्विशेषणैः स्रग्रत्नमाला शिरोवेष्टनपुण्यमाला वा । आपादलम्बिवनमालेतरा वा माला, पुण्यो दिव्या गन्धः, यथाशोभं गीत-नीलादिवर्णः, श्रीखण्डसहघृष्टकुङ्कुमाद्यनुलेपस्तेन भक्तिच्छेदरूपेणानुलिप्ताङ्गौ । स्नाताविति गृहे मातृभ्यां गोरजोऽपसरणाद्यर्थं पुनः स्नपनात्; अतएव विरजे विरजसी वाससी ययोस्तौ, विरजेति 'अर्थाः पादरजोपमाः' इत्यादिप्रयोगादकारान्तस्यापि रजशब्दस्य वृत्तेः ॥ ३१ ॥ माहात्म्यमाह—प्रधानेति । स्वांशेनेति एक एव भगवान् द्विधावतीर्णावित्यर्थः । इति तयोर्द्वित्वापेक्षयैव सर्व्वत्र द्विवचनान्तप्रयोगः, अन्यथा 'जगत्पती' इत्यादावेकस्यैव जगत्पतित्वादिना द्वित्वानुपपत्तिः, भूतारहरणसामर्थ्यमन्वर्थेन तत्तन्नाम्नैव बोधयति—बलेति । तत्र (भा० १०।८।१२)—'बलाधिक्याद्बलं विदुः' इति तस्य बलिष्ठता, केशिहननाच्च केशवत्वेन तस्यापि सा सुप्रसिद्धैवेति बलस्यादावत्र निर्देशोऽवतरणक्रमापेक्षया, अन्यत्तैर्व्याख्यातम्; यद्वा, जगत्यर्थे निजप्रेमभक्तिविस्तारणेन जगतो हितार्थमित्यर्थः । अतएव स्वानां श्रीगरुडादीनामंशेन, जातावेकत्वम्; अंशैः श्रीदामादिभिः सह, अन्यत् समानम् । ततश्च प्रथमस्कन्ध-तृतीयाध्यायोक्तानुसारेणावतारद्वयविवक्षया द्वित्वं ज्ञेयम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ध्वजादिरेखाभिश्चिह्नितैराङ्घ्रिपङ्कजैर्व्रजमलङ्कुर्वन्तौ महात्मानौ सुशीलौ अनुक्रोशोऽनुकम्पा तद्विलसितस्मितयुक्तमीक्षणं ययोः ॥ २९-३० ॥ उदारा रुचिता क्रीडा ययो रत्नस्रजावनयोः स्त इति तौ पुण्येन श्रेष्ठेन गन्धेन चन्दनेनानुलिप्तानि अङ्गानि ययोः विरजे निर्मले वाससी ययोः ॥ ३१ ॥ प्रधानपुरुषौ श्रेष्ठपुरुषौ आद्यौ सृष्टेः पूर्वं विद्यमानौ जगत्कारणभूतौ जगन्मयौ जगच्छरीरकत्वेन तत्प्रचुरौ जगत्यर्थ जगत्परिपालनार्थमंशेन सङ्कल्पेनावतीर्णौ बलाधिक्याद्बलः केशौ ब्रह्मरुद्रौ वाति उत्पादयतीति केशवः—

क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् । आवां तवाङ्गसम्भूतौ तस्मात् केशवनामवानिति ॥

रुद्रेणैव केशवशब्दार्थस्य निरुक्तेः बलश्च केशवश्च बलकेशवौ ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

श्रियो लक्ष्म्याः कान्तेर्वा निकेतौ मन्दिरायमाणौ ॥ २९ ॥ अनुक्रोशेन दयया स्मितेन सहितमीक्षणं ययोस्तौ तथा ॥३०॥ उदारा महती ख्याता वा दक्षिणा वा रुचिरा च क्रीडा ययोस्तौ "उदारे महती ख्याते दक्षिणे दानशौण्डक" इति यादवः स्नातौ शुद्धौ ॥ ३१ ॥ जगत्यर्थे भूमेरर्थे अर्थप्रदाने प्रधानपुरुषावित्यादावुच्यमाना गुणा बलभद्रे हरेः सन्निधानादुच्यन्ते नवत्वौत्पत्तिकाः तदुक्तं वैन्यपार्थबलेशादावाविष्टं पुरुषोत्तमम् । अपेक्ष्य तद्गुणाः सर्वे इत्यादौ ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

प्रधानपुरुषावाद्यावित्यादि । स्वांशेन बलकेशवौ स्वांशानां निजानां सर्वेषामंशानां इनौ प्रभू च तौ बलकेशवाविति तथा । अथ बलकेशवाविति विशेष्यपदस्य विशेषणानि, यथा किशोरौ श्यामलश्वेतौ, यथा मारकतः शैलो रौप्यश्च कनकाचिताविति व्यतिक्रमेण निर्दिष्टानि, तथात्रापि जगत्यर्थे स्वांशेन स्वं स्वस्वरूपमंशश्च द्वन्द्वैक्यम् । कृष्णः स्वेन स्वरूपेण बलो अंशेन कृष्णस्यैवांशेनेति व्यतिक्रमनिर्देशः ॥ ३२-४३ ॥

इति श्रीदशमे स्कन्धे श्रीबृहत्क्रमसन्दर्भे अष्टात्रिंशोऽध्यायः ॥ ३८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

'स्वांशेन कलकेशवौ' इति जगत्यर्थं स्वांशानामिनौ प्रभू च तौ रामकेशवौ चेति तथा। अथवा कलकेशवाविति विशेष्यपदयोर्विशेषणपदानि व्यक्तिक्रमेणैव निर्दिष्टानि, श्यामलश्वेतौ यथा मारकतः शैलो रौप्यश्च कनकाचितौ इति पौर्वापर्यविपर्ययः, तथात्रापि; कीदृशौ ? जगत्यर्थं स्वांशेनावतीर्णौ स्वं स्वरूपञ्च अंशश्च द्वन्द्वैकत्वान्नपुंसकमेकवचनञ्च। कृष्णः स्वरूपेणावतीर्णः बलोहंशेनेति विपर्ययेण विशेषणम् ॥ ३२-४३ ॥

इत्यष्टात्रिंशोऽध्यायः ॥ ३८ ।

गूढार्थदीपिनी

द्विरदो गजः। विक्रमो गतिः ॥ २९ ॥ महात्मानौ उदारस्वभावौ। सानुक्रोशं सानुकम्पं स्मितेक्षणं ययोस्तौ ॥ ३०-३१ ॥ जगत्यर्थे भूभारहरणार्थम् स्वांशेन निजैश्वर्येण ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीनिकेतौ शोभाश्रयभूतौ अतिसुन्दरौ अत एवाभ्येषु वरौ श्रेष्ठौ ॥ २९ ॥ अनुक्रोशेन अनुकम्पया विलसितेन स्मितेन मन्दहसितेन युक्तमीक्षणं यथोस्तौ ॥ ३० ॥ उदाराः रुचिराः क्रीडा ययोस्तौ स्रजः रत्नमालाः अनयोः स्युरिति स्रग्विणौ पुण्यैर्गन्धैरनुलिप्तान्यङ्गानि ययोस्तौ ॥ ३१ ॥ प्रधानभूतौ सर्वश्रेष्ठौ पुरुषौ आद्यौ सर्वसृष्टेः पूर्वं विद्यमानौ जगत्यर्थे भूभारोपनयनाय स्वांशेन स्वसङ्कल्पेनावतीर्णौ कश्च ईशश्च केशौ तौ वातीति केशवः ब्रह्मशिवयोरुत्पादकः वा गतौ "आत" इति कः ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उदारा महती रुचिरा मनोज्ञा क्रीडा ययोस्तौ इदानीमाक्रीडा न विद्यते क्रीडा ययोस्तौ। गोदोहनं गतावित्युक्तिस्वारस्यात्। तावुदाररुचिः दर्शेत्यन्वयः। स्रग्विणौ इतरसरसरसौ वनमालिनौ आपादपद्मं लसतीं वनमालां विदुर्बुधा इति वचनाद्वनमाला ययोर्वनमालामुद्दिश्यायाता आ अलीनो भ्रमरा भ्रमन्तो ययोस्ताविति वा। विरजवाससौ गतं ॥ २९ ॥ प्रधानपुरुषावित्यत्र प्रधानपुरुषत्वाद्यत्वाद्यं साम्येन केशवरामयोः शंसितमिव भाति। इदं कथमित्यतो मानेन तद्वास्तवार्थं दर्शयति। वैन्यपार्थेति। वैन्यः पृथुः पार्थः पृथासुतोऽर्जुनो बलस्तु प्रस्तुत ईशः शिव एत एवादयो यस्य वासवादिस्तस्मिन्नाविष्टं पुरुषोत्तमं भगवन्तमपेक्ष्य तद्गुणास्तज्जीवानां वैन्यादिजीवेष्वभाविनोऽविद्यमाना अपि पुराणेषु विशेषाद्यतस्तेषु सन्निधिस्तत उच्यन्त इत्यन्वयः। इति माहात्म्ये तन्नामग्रन्थे। अथ मूलार्थः। प्रधानपुरुषावाद्यौ सर्वादिभावौ जगद्धेतू कृष्णन्निमित्तभूतौ तथा तत्स्वामिनौ जगत्यर्थं भूप्रार्थनातस्तदर्थे स्वांशेन कृष्णेन शुक्लेन केशेन च ॥ ३० ॥ वितिमिरा निरन्धकारा मरकतः शैल इन्द्रनीलपर्वतस्तथा कृष्णो रौप्यो रूप्यं रजतं तन्मयश्च कैलासादिस्तद्वदुभावपि कनकान्वितावकराकरत्वात्तथा तथेति। कृष्णकृष्णप्रभाऽपि तमो निवारयित्री तदेतदादित्यस्य कृष्णं रूपमिति छान्दोग्योक्तेस्तद्यथा तमः परिहारकृत्तथेति मन्तव्यं। न श्यामलताभ्राष्ट्रवत्किन्त्विन्द्रनीलकान्तिरप्यन्तः शुभ्रेति तमोहृतिः सम्भवतीत्येके। अत्र कनकाभरणसम्बद्धावित्यर्थः ॥३१॥ अवप्लुत्यावस्कन्द्य स्नेहो भक्तिस्तेन विह्वलश्चलत्कलेवरः ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

वय आह। किशोराविति। कैशोरे वयसि विद्यमानौ एकादशवार्षिकौ नववर्षादूर्ध्वं षोडशवर्षपर्यन्तं किशोरावस्था गोकुलवासिषु विद्यमानः कालः स्वस्मिन् गृहीत इति तं प्रकटयितुं तथावस्थो जातः अग्रे प्रयोजनाभावात् कालावस्थां न वक्ष्यति अत एव ध्याने भक्तकृपया तामवस्थां गृह्णातीति सन्तं वयसि कैशोर इत्युक्तम् एकः श्यामलः अपरः श्वेतः कैशोरे वयसि रूपमभिव्यक्तं भवतीति वयः कार्यत्वेन रूपमुक्तं श्रीनिकेतौ श्रीवत्साङ्कितौ असाधारणं भगवच्चिह्नमेतत् भगवत्त्वज्ञापकं तदपि तदैव प्रकटमिति भगवतो महती क्रियाशक्तिरिति बृहद्भुजावित्युक्तम् अव्यग्रत्वाय सुमुखाविति। भक्तदर्शनावस्थायां सुमुखत्वे तस्य सर्वपुरुषार्थाः सिध्यन्तीति। सुन्दरवराविति। सुन्दरश्रेष्ठौ यत्राकृतिस्तत्र गुणा वसन्तीति सर्वगुणनिधानावित्यर्थः। बालो यो द्विरदः हस्ती तद्वद्विक्रमो ययोरिति अमानुषपराक्रमौ निरूपितौ—

सौन्दर्यं च तथा पुष्टिः प्रदृश्यत्वमसृएयता। निर्भयत्वं स्वतः सिद्धशाधनत्वञ्च रूप्यते ॥
अरण्य एव एद्वृद्धिः सुखं तस्य गृहे पुनः। नान्यत्रेति च बोधाय विदेशश्लेशबाधने ॥

तद्वत्पराक्रम इति कौतुकार्थं सर्वानेव गोपालान् दूरादेव प्रक्षिपतीति निरूपितम् ॥ २९ ॥ भगवतो धर्मान् निरूपयन् बाह्यानि निरूपयति। ध्वजवज्रेति। ध्वजादिभिश्चतुर्भिश्चिह्नैः पुरुषार्थचतुष्टयरूपैः चिह्निता ये अङ्घ्रयः तैर्भूमावुद्गतैः व्रजं शोभयन्तौ शोभायुक्तं कुर्वन्तौ ये सर्वपुरुषार्थदातारः ते यत्र शोभाकरा जाताः भगवत्कृपया इतोऽधिकं भगवान् व्रजस्य किं कुर्यात् महानात्मा स्वरूपं ययोः अयं धर्मिनिर्देशः धर्माणामुत्कर्षख्यापकः तयोर्माहात्म्यमुक्त्वा कृपालुतामाह। सानुक्रोशस्मितेक्षणाविति।

दयापूर्वकं स्मितपूर्वकमीक्षणं ययोः दीनेषु दया समेषु स्मितमुत्तमेषु ज्ञानमिति संसारे क्लिष्टेषु दया ततः कर्मणा परित्यागेन वा क्लिष्टेषु अल्पमोहनेन सुखदानं ततो भक्तेषु ज्ञानस्थापनमिति पर्यवसानतया दयया सुखदानं प्रत्यक्षत एव स्मितेनैव परमानन्दज्ञानमिति ॥ ३० ॥ ततो लीलामाह । उदारेति । उदारा रुचिरा क्रीडा ययोः भगवल्लीला पात्रापात्रविचारव्यतिरेकेण सर्वेभ्य एव सर्वपुरुषार्थान् प्रयच्छतीति उदारा रुचिरा मनोहरा च स्वतः फलरूपा क्रीडेति सामान्यापि लीला आभासरूपा लीला न भवतीति भगवन्तं वर्णयति । स्रग्विणाविति । शिरसि कण्ठे नानाविधाः स्रजो ययोः वनमालायुक्तौ च आपादावलम्बिनीमाला वनमालेति आगन्तुकैः सहजनिवृत्तिं मत्वा वनमाला पृथङ् निरूपिता विरतिवेलेति चन्दनपुष्पवस्त्राभरणान्येयोक्तानि विरत्यवेदनत्वाद्वा पुण्येन गन्धेन अनुलिप्तान्यङ्गानि ययोः एते अभिलेपा एव पुण्यगन्धाः स्नानाङ्गभूताः ततः स्नातौ ततो नूतननिर्मलवस्त्रपरिधानमिति विरजवाससौ ॥ ३१ ॥ कथमेवं गोकुलवासिनोर्महती पूजा संभृतिरितिचेत्तत्राह । प्रधानपुरुषाविति । प्रधानपुरुषावुभावपि कार्यप्रधानपुरुषव्यावृत्त्यर्थमाह । आद्याविति । तयोः प्रधानपुरुषत्वे हेतुमाह । जगद्धेतू इति । य एव जगत्कारणं स एव प्रथमं प्रधानपुरुषरूपो भवतीति । प्रधानपुरुषत्वं मुख्यपुरुषत्वं वा जगत्कारणत्वमपि साधयति । जगत्पती इति । भर्त्ता स य एव स्रष्टा उत्पत्तिस्थितिलयानामेककर्तृकत्वात् पालकत्वं तस्य सर्वजनीनम् अत एव साम्प्रतं रक्षामाशङ्क्य जगत्यर्थे भूम्यर्थमवतीर्णौ स्वस्य निजांशेन आनन्दांशेन उभयोरागमने विशेषकार्यं नाम्नैव निरूपयति बलः क्रियाशक्तिप्रधानः उत्पत्तिस्थितिलयकर्त्ता केशवो मोक्षदाता ब्रह्मादीनामपि ॥ ३२ ॥

श्रीसुबोधिनी–सारः

किशोरौ एकादशवर्षौ श्यामलश्वेतवर्णौ लक्ष्मीस्थानभूतौ महाभुजौ सुमुखौ अतिसुन्दरौ बालद्विरदवत् बालगजवद्विक्रमः पराक्रमो ययोस्तौ ॥ २९ ॥ ध्वजादिभिश्चिह्नितैरंघ्रिभिः पादैर्व्रजं शोभयन्तौ महात्मानौ परमपूज्यौ सानुक्रोशं सदयं यत्स्मितं तेन युक्तमीक्षणं ययोस्तौ ॥ ३० ॥ उदारा रुचिरा मनोहरा क्रीडा ययोस्तौ स्रग्विणौ मुक्तामालिनौ आपादमालिनौ पुण्यो गंधो यस्य तेन चन्दनेनानुलिप्तान्यंगानि ययोस्तौ स्नातौ शुद्धवस्त्रौ ॥ ३१ ॥ प्रधानपुरुषौ आद्यौ जगतो हेतू जगतः पती जगती भूमिस्तदर्थे स्वांशेन मूर्त्तिभेदेनावतीर्णौ बलकृष्णनामानौ ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्रियो लक्ष्म्याः शोभायाश्च निकेतौ आश्रयभूतौ बृहद्भुजौ पीनवर्तुलदीर्घभुजयुक्तौ बालो यो द्विरदो गजस्तद्वद्विक्रमो गतिर्ययोस्तौ ॥ २९ ॥ विरेखाभिश्चिह्नितैरङ्घ्रिभिर्व्रजं शोभयन्तौ महात्मानौ सुस्वभावौ अनुक्रोशोनुकम्पा तद्विलसितस्मितयुक्तमीक्षणं ययोस्तौ ॥ ३० ॥ उदाराः श्रोत्रादिजनानां वांच्छितफलप्रदाः रुचिरा मनोहराः क्रीडा ययोस्तौ ॥ ३१ ॥ प्रधानपुरुषौ पुरुषोत्तमौ । तत्र हेतुः—जगद्धेतू इति । जगत्कारणभूतावित्यर्थः ॥ तत्रापि हेतुमाह—आद्याविति । सृष्टेः पूर्वमपि विद्यमानौ जगतः पती पालकौ, अतो जगत्यर्थे जगत्पालनार्थं स्वांशेन मूर्तिभेदेनावतीर्णौ बलकेशवौ बलाधिक्याद्बलः केशौ ब्रह्मरुद्रौ वाति उत्पादयतीति केशवः । 'क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् ॥ आवां तवाङ्गसम्भूतौ तस्मात् केशवनामवान्' इति रुद्रेण केशवशब्दार्थनिरुक्तेः तौ ॥ ३२ ॥

अन्वितार्थप्रकाशिका

किशोरौ श्यामलश्वेतौ क्रमेण तद्वर्णौ श्रियो लक्ष्म्याः शोभायाश्च निकेतौ आश्रयभूतौ बृहद्भुजौ पीनवर्तुलदीर्घभुजयुक्तौ सुमुखौ सुन्दरेषु वरौ बालो द्विरदो गजस्तद्वद्विक्रमो गतिर्ययोस्तौ ॥ २९ ॥ ध्वजवज्राङ्कुशाम्भोजैस्तद्रेखाभिश्चिह्नितैरङ्घ्रिभिर्व्रजं शोभयन्तौ महात्मानौ सुस्वभावौ अनुक्रोशोऽनुकम्पा तद्विलसितस्मितयुक्तमीक्षणं ययोस्तौ ॥ ३० ॥ उदाराः श्रेष्ठा रुचिराः मनोहराः क्रीडा ययोस्तौ स्नातौ स्रग्विणौ रत्नादिमालाधरौ वनमालिनौ पुष्पमालाधरौ पुण्यः सुष्ठु गन्धो यस्य तेन चन्दनेनानुलिप्तानि अङ्गानि ययोस्तौ विरजे निर्मले वाससी ययोस्तौ । अदन्तोऽपि रजशब्द इति तोषिणी ॥ ३१ ॥ प्रधानपुरुषौ पुरुषोत्तमौ प्रकृतिपुरुषात्मकौ वा आद्यौ जगतो हेतू जगतः पती अतो जगत्यर्थे जगत्पालनार्थं स्वांशेन मूर्तिभेदेनावतीर्णौ ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

बालद्विरद विक्रमौ द्विरदो गजः विक्रमः पादन्यासः पराक्रमो वा ॥ २९ ॥ अनुक्रोशो दयास्मितं हास्यं च ताभ्यां सहितमीक्षणमवलोकनं ययोस्तौ ॥ ३० ॥ उदारा महती रुचिरासुन्दरा क्रीडा ययोस्तौ स्रग्विणौ पंचवर्णरत्नरचितस्त्रग्भूषितौ विरजेति तमसेन तमः प्रोक्तं रजेनापि रजः सममितिशब्दप्रभेदाद् दन्तोपिरजः शब्दोऽस्ति ॥ ३१ ॥ प्रधानभूतौ सर्वमुख्यौ पुरुषौ जगती भूमिस्तस्या अर्थे भारावतरणाय स्वांशेन अर्जुन प्रद्युम्नादि मूर्त्तिभेदेन सह अवतीर्णौ ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किशोराविति ॥ किशोरौ किशोरावस्थां प्राप्तौ, श्यामलश्चश्वेतश्च तौ, श्रीनिकेतौ लक्ष्म्याः शोभायाश्चाश्रयभूतौ, बृहद्भुजौ पीनवर्त्तुलदीर्घभुजयुक्तौ, सु शोभने मुखे ययोस्तौ, सुन्दरवरौ सुन्दरतावत् सु श्रेष्ठौ, बालः कलभश्चासौ द्विरदः करी च

तस्येव विक्रमः पादन्यासो ययोस्ता ॥ २९ ॥ ध्वजेति ॥ ध्वजश्च वज्रं च अङ्कुशं च अम्भोजं च तैः, ध्वजादिरेखाभिरित्यर्थः। चिह्नितैः, अङ्घ्रिभिश्चरणपङ्कजैः, व्रजं शोभयन्तो अलंकुर्वन्तो, महात्मानौ सुशीलौ, सानुक्रोशमनुकम्पासहितं यत् स्मितमनुकम्पाविलसितो मन्दहासस्तद्युक्तं ईक्षणं ययोस्तौ ॥ ३० ॥ उदारेति ॥ उदारा महती रुचिरा मनोहरा क्रीडा ययोस्तौ। स्रग्विणौ नानाविधोत्तमरत्नमालाधरौ, वनमालिनौ परिधृतवनकुसुममालौ, पुण्यः श्रेष्ठश्चासौ गन्धश्चन्दनं तेनानुलिप्तानि अङ्गानि पाणिपादाद्यवयवा ययोस्तौ, स्नातौ यथाविधि कृताप्लवनौ, विरजे निर्मले वाससी ययोस्तौ ॥ ३१ ॥ प्रधानेति ॥ प्रधानभूतौ पुरुषौ प्रधानपुरुषौ, प्रधानभूतः पुरुषः केवलः कृष्ण एव, बलभद्रे तत्त्वोक्तिः श्रीकृष्णसंनिधानादेव बोध्या। तथा च पुराणान्तरे। 'वैन्यपार्थबलेशादाविष्टं पुरुषोत्तमम्। अपेक्ष्य तद्गुणाः सर्वे प्रोच्यन्ते न तु तात्त्विकाः' इति। आद्यौ सृष्टेः पूर्वमपि विद्यमानौ, जगद्धेतू जगत्कारणभूतौ, जगन्मयौ जगच्छरीरकत्वेन तत्प्रचुरौ, जगत्यर्थे तत्पालनार्थं, अंशेन संकल्पेन अवतीर्णौ। बलाधिक्याद्बलः केशौ ब्रह्मरुद्रौ वात्युत्पादयतीति केशवः, बलश्च केशवश्च तौ, 'क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्। आवां तवाङ्गे संभूतौ तस्मात्केशवनामवान्' इति रुद्रेण केशवशब्दार्थनिरुक्तेरुक्तत्वात् ॥ ३२ ॥

कृष्णप्रिया

उन्होंने अभी किशोर अवस्था में प्रवेश ही किया था। वे दोनों गौर श्याम निखिल सौन्दर्य की खान थे। दुःखों का स्पर्श करने वाली लम्बी-लम्बी भुजाएँ, सुन्दर वदन, परम मनोहर और गजशासक के समान ललित चाल थी ॥ २९ ॥ उनके चरणों में ध्वजा, व्रज अङ्कुश और कमल के चिह्न थे। जब वे चलते थे, उनसे चिह्नित होकर पृथ्वी शोभायमान हो जाती थी। उनकी मन्द-मन्द मुसकान और चितवन ऐसी थी मानो दया बरस रही हो। वे उदारता की तो मानो मूर्ति ही थे ॥ ३० ॥ उनकी एक-एक लीला उदारता एवं सुन्दर कला से भरी थी। गले में वनमाला एवं मणियों के हार जगमगा रहे थे। उन्होंने अभी-अभी स्नान करके निर्मल वस्त्र पहने थे और शरीर में पवित्र अङ्गराग एवं चंदन का लेप किया था ॥ ३१ ॥ परीक्षित। अक्रूर ने देखा कि जगत् के आदि कारण, जगत् के परमपति, पुरुषोत्तम ही संसार की रक्षा के लिये अपने सम्पूर्ण अंशों से बलराम जी और श्रीकृष्णजी के रूप में अवतीर्ण होकर अङ्गकान्ति से दिशाओं का अन्धकार दूर रहे हैं। वे ऐसे भले मालूम होते थे जैसे सोने के बने हुए मरकतमणि एवं चांदी के पर्वत जगमगा रहे हों ॥ ३२–३३ ॥

दिशो वितिमिरा राजन् कुर्वाणौ प्रभया स्वया। यथा मारकतः शैलो रौप्यश्च कनकाचितौ ॥ ३३ ॥
रथात्तूर्णमवप्लुत्य सोऽक्रुरः स्नेहविह्वलः। पपात चरणोपान्ते दण्डवद् रामकृष्णयोः ॥ ३४ ॥
भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः[1]। पुलकाचिताङ्ग[2] औत्कण्ठ्यात् स्वाख्याने[3] नाशकन् नृप ॥ ३५ ॥
भगवांस्तमभिप्रेत्य रथाङ्गाङ्कितपाणिना। परिरेभेऽभ्युपाकृष्य प्रीतः प्रणतवत्सलः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—राजन्! स्वया, प्रभयादिशः, वितिमिराः, कुर्वाणौ, कनकाञ्चितौ, यथा, मारकतः, शैलः, च उभौ, कृष्णम्, च, रामम्, उभौ, ददर्श ॥ ३३ ॥ स्नेहविह्वलः, सः, अक्रूरः, रथात्, तूर्णम्, अवप्लुत्य, रामकृष्णयोः, चरणोपान्ते, दण्डवत्, पपात ॥ ३४ ॥ हे नृप ? भगवद्दर्शनाह्लाद्बाष्पपर्याकुलेक्षणः, पुलकाञ्चितः औत्कण्ठ्यात्, स्वाख्याने, नाशकत् ॥ ३५ ॥ प्रीतः, प्रणतवत्सलः, भगवान्, तम्, अभिप्रेक्ष्य, रथाङ्काङ्कितपाणिन, उपाकृष्य, परिरेभे ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वप्रभया विगततिमिरा दिशः कुर्वाणो। कनकाचितौ सुवर्णव्याप्ताविति सालंकारयोः शैलसादृश्यार्थमुक्तम् ॥ ३३–३४ ॥ भगवद्दर्शनाह्लादेन यद्बाष्पं तेन पर्याकुले ईक्षणे यस्य सः। पुलकैराचितं व्याप्तमङ्गं यस्य सः। स्वाख्यानेऽक्रूरोऽहं नमस्करोमीति नाशकन्नाशक्नोत् ॥ ३५ ॥ अभिप्रेत्याक्रूरोऽयमेतदर्थमागत इति ज्ञात्वा कंसहननसामर्थ्यं द्योतयन्निव रथांगेन चक्रेणांकितो यः पाणिस्तेनाभ्युपाकृष्य तमालिङ्गितवान् ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मारकतः श्याममणिस्तच्छैलोपमः कृष्णः। रूप्य रजतं तत्समो रामः। ननु कृष्णप्रभाया अन्धकारनिरासकता न संभवति तत्तुल्यत्वदर्शनादिति चेत्कश्चिन्मन्दो वदेत्तं प्रत्याह—"यदेतदादित्यस्य परं कृष्णं रूपम्" इह श्रुतौ, "आकृष्णेन रजसा वर्तमानः" इति श्रुतौ च रवितेजः कृष्णमेव यथा तमोऽपहं तथैवात्राप्यनुसंधेयम्। नेत्रेऽपि कृष्णवर्णैव कनीनिका प्रकाशिकास्तीत्याबाल-

---

१. पूर्णा–विज. । २. काङ्क्षितं–विज. । ३. व्याख्यातुं–विज. ।

गोपालप्रसिद्धेः ॥ ननु दूरतस्तद्विशेषः कथं दृष्टः, उच्यते—महातेजस्वित्वादिति । यतः क्रमशः रात्र्यंशे जातेऽपि विशेषतो विद्योतेतामित्याह—दिश इति शैलदृष्टांतोऽन्यसवयस्कापेक्षया । तथा च विष्णुपुराणे—'प्रांशुमुत्तुंगबाहुंसम्' इत्यादि । योजना चेयं यथा मारकतश्शैलौ रौप्यश्च कनकाचितौ भवतस्तथा तौ ददर्शेति ॥ ३३ ॥ तूर्णं दर्शनसमकालमेव । अपप्लुत्यावरुह्य ॥ अयं भावः—दूरतः प्रथमदर्शने यद्रथान्नावप्लुतस्तत्र स्नेहवैकल्यमेव हेतुः । भूमौ रथे वा स्थितोऽहमित्यनुसंधानाभावात्, तदभिमुखगामितुरगेण रथेन तदीयरूपाकृष्टदृष्टिमनसः स्वस्यानुकूल्यालाभाच्च । अथ । निकटागतो यदवप्लुतस्तत्रापि तदेव हेतुः । दूरस्वभावस्तदात्मन ईषदूर्ध्वं स्थितेन स्फुटमवगतासीत्, निकटात्तु स्फुटमवगताऽतस्तदनुसंधानादादराकर्षणे जाते इति । तथा पितृव्यताव्यवहारेण योग्यतायामपि प्रणामे यथाविधि तदविधाने हेतुर्दुर्गम्य इति ॥ ३४ ॥ आह्लादोऽत्यानन्दः । पुलकै रोमाञ्चैः "पुलको मणिदोषेऽश्मभेदे कृमिविशेषके । रोमाञ्चे हरिताले गंधर्वे हस्त्यन्नपिंडके ॥" इति धरणिः ॥ स्नेहविह्वलत्वं सहेतुकमभिव्यञ्जयति—भगवदिति । पर्याकुले० सम्यक् द्रष्टुमपि नाशकदिति सूचितम् । उत् उच्चैर्गतः कण्ठस्तद्भवः स्वरो यस्य स उत्कण्ठस्तस्य भाव औत्कण्ठ्यं तस्मात्सन्नकण्ठत्वादित्यर्थः । स्वाख्यानेऽपि नाशकत् किं पुनः प्रसंगापादन इति भावः ॥ ३५ ॥ तम् अक्रूरम् । रथांगपदेन निशातन द्योतकेन बलाधिक्यं द्योतितम् । अभ्युपाकृष्य समीपमानीय । प्रीतस्तद्भक्त्यवबोधनेन ॥ भगवानिति सार्वज्ञ्यं परमकारुण्यादिकञ्चाह । अभिप्रेत्य ज्ञात्वा । रथांगेत्युपलक्षणं, तदुक्तं पराशरेण—"सोऽप्येनं ध्वज वज्राब्जकृतचिह्नेन पाणिना । संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वजे ॥" इति । प्रीतः सम्परिरेभे न तु पितृव्यव्यवहारेण । तदमनने हेतुः—प्रणतवत्सल इति । तदीयदास्यमयभक्तिविशेषवशः 'ये यथा मां प्रपद्यन्ते' इत्यादेः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु दूरतस्तद्विशेषः कथं दृष्टः उच्यते महातेजस्वित्वादिति यतः क्रमशः रात्र्यंशे जातेऽपि विशेषतो व्यद्योतेतामित्याह । दिश इति । शैलदृष्टान्तोऽन्यसवयस्कापेक्षया बृहत्त्वादेः स्तनशैलादिवत् तथा च श्रीविष्णुपुराणे प्रांशुमुत्तुङ्गबाहुंशमित्यादि योजनाचेयं यथा मारकतः शैलो रौप्यश्च कनकाचितौ भवतः । तथा तौ ददर्शेति बृहत्तया सवर्णतया तथा सौवर्णालङ्कारतया चेति भावः । किं कुर्वन्तावित्यत्राह । दिश इति । एवमेव तैः सूचितं कनकेति ॥ ३३ ॥ स तथा निकटागतोऽक्रूरो रथात्तूर्णमवप्लुत्य अवाक् प्लुत्य पतित्वा रामकृष्णयोः समानस्थितयोश्चरणसमीपे दण्डवत् पपात कतिचित् पदानि पद्भ्यामेवागत्येति शेषः । तत्र सर्वत्र हेतुः स्नेहविह्वलः दास्यभावोचितप्रेमविशेषमोहित इति । अयं भावः । दूरतः प्रथमदर्शने यन्नावप्लुतस्तत्र स्नेहवैकल्यमेव हेतुः । भूमौ रथे वा स्थितोऽहमित्यनुसन्धनाभावात् तदभिमुखं द्रुतगामितुरगेण रथेन तदीयरूपाकृष्टदृष्टिमनसः स्वस्यानुकूल्यलाभाच्च । अथ निकटागतो यदवप्लुतस्तत्रापि तदेव हेतुः । दूरस्वभावतस्तदात्मन ईषदूर्ध्वस्थितेन स्फुटमवगतासीत् निकटात्तु स्फुटमवगता । अतस्तदनुसन्धानादादराकर्षणे जाते इति । तथा पितृव्यताव्यवहारेण योग्यतायामपि प्रणामे यथाविधि तदविधाने च हेतुर्गम्य इति ॥ ३४ ॥ स्नेहविह्वलत्वमेव सहेतुकमभिव्यञ्जयति । भगवदिति । पर्य्याकुलेति सम्यग्द्रष्टुमपि नाशकदिति सूचितम् । उत् उद्गतः उच्चैर्गतः कण्ठस्तद्भवः स्वरो यस्य स उत्कण्ठस्तस्य भावः औत्कण्ठ्यं तस्मात् सन्नकण्ठत्वादित्यर्थः । स्वाख्यानेऽपि नाशकत् किं पुनरप्रसङ्गत्वादिसम्पादने इत्यर्थः । नाशकन्नृपेति बहुत्र पाठेऽपि तथैवोह्यम् ॥ ३५ ॥ भगवानिति सार्वज्ञ्यं परमकारुण्यादिकञ्च दर्शितम् अभिप्रेत्य सर्वज्ञोऽपि लीलया श्रुतेनाकारेणाक्रूरोऽयमिति सम्भाव्य रथाङ्गाङ्कितत्वेन भगवल्लक्षणं व्यज्य तत्स्पर्शेनाक्रूरस्य भाग्यमाहात्म्यं दर्शयति । रथाङ्गेत्युपलक्षणं यथोक्तं श्रीपराशरेण सोऽप्येनं ध्वजवज्राब्जकृतचिह्नेन पाणिना । संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वज" इति प्रीतः सन् परिरेभे नतु पितृव्यव्यवहारेण नमस्कृतवान् तत्र प्रीतत्वेऽपि पितृव्यव्यवहाराननेऽपि हेतुः । प्रणतवत्सल इति । ददीयदास्यभक्तिविशेष इत्यर्थः । ये यथा मामित्यादेः श्रीकृष्णेन प्राक् परिरम्भेऽप्ययमेव हेतुः अन्यत्तैः तत्र इवेत्युत्प्रेक्षायां ततो वस्तुतो द्योतनार्थं नोपाकर्षत् किन्तु प्रीत्यैवेत्यर्थः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु रथोपरि दूरे वर्त्तमानेन कथं विरजवासस्त्वादिकं दृष्टम् ? तयोः सहजदीप्त्यैव तत्तत्प्रकाशनादित्याह—दिश इति । अनेन परमसुतेजस्वितोक्ता । राजन्निति अक्रूरमहाभाग्यत आश्चर्य्येण सम्बोधनम् । यद्वा, शैल इत्यनेनास्यान्वयः, राजमान इत्यर्थः; अन्यथा सादृश्याभावेन दृष्टान्तानुपपत्तिः, अतएव एकत्वेन निर्दिष्टस्यापि शैलस्यानाश्रितद्वित्वापेक्षया कनकाचिताविति विशेषणमन्यथा सालंकारयोस्तयोः केवल-मारकत-रौप्य-शैलाभ्यामुपमानुपपत्तिरिति, तच्च तैरपि व्याख्यातमेव । शैलदृष्टान्तेन तयोराकारस्य बृहत्ताऽपि ध्वनिता । अतएव श्रीहरिवंशे तत्प्रसङ्ग एव (विष्णु० प० २५।२०)—'पर्व्वतप्रवराकृतिः' इति; श्रीविष्णुपुराणेऽपि श्रीबलदेवमुद्दिश्य (५।१७।२५)—'प्रांशुमुत्तुंगबाहुंसम्' इत्यादि । सा च स्वभावत एवान्यजनापेक्षया दुरभिभवत्वेन वा; किंवा सादृश्यातिशयेन दुरतिक्रमत्वेन वा, किंवा कंसादिहननसामर्थ्यबोधनार्थं तस्मिन्नेव तथैव परिस्फूर्त्त्येति, अन्यथा (भा० १०।४४।८) 'क चातिसुकुमारांगौ' इत्यादिपुरस्त्रीगणशोकानुपपत्तिः; न च वक्तव्यं स्नेहविशेषेण तासु तादृशयोरपि तथैव स्फूर्त्तिरिति श्रीभागवते कुत्राप्यन्यत्र बृहदाकाराश्रवणात्, तथात्यन्तवैषम्येण व्रजजनादिभिः सह क्रीडाशोभाहानेश्चेति दिक् ॥ ३३ ॥

स चिरं गोकुले तौ दिदृक्षुः कृत-तत्तन्मनोरथो वा, चरणानामुपान्ते ईषत् समीपे दण्डवत् पपातेति प्रणामरीत्यभावो दर्शितः। तत्र हेतुः—प्रेम्णा विह्वल इति। रामस्यादौ निर्देशः,—अक्रूरसमागमेच्छयाभिमुखमागतयोस्तयोर्ज्येष्ठत्वादग्रे श्रीबलदेवस्यावस्थानात् ॥ ३४ ॥ प्रेमविह्वलत्वेन दण्डवत् पातमात्रमेव सहेतुकमभिव्यञ्जयति—भगवदिति। अनेन तस्य प्रेमविस्तरः सूचितः अतएव पर्य्याकुलेति बाष्पस्यातिरेको ध्वनितः। इति सम्यक् द्रष्टुमपि नाशक्नोदिति सूचितम्। आचितेति पुलकातिरेक उक्त एव, औत्कण्ठ्यात् प्रेमवैवश्यादित्यर्थः, स्वाख्यानेऽपि नाशकत्, किं पुनः प्रणामाष्टांगत्वादिसम्पादन इत्यर्थः, हि निश्चितम्, 'नाशकन्नृप' इति पाठेऽपि तथैवार्थः। तत्र नृपेति पुनरप्यक्रूरस्य भाग्यविशेषं दर्शयन्, किंवा, तत्प्रेमोद्रेकश्रवणात् प्रेमविवशं राजानं स्वस्थयन् सम्बोधयति ॥ ३५ ॥ भगवानिति सार्व्वज्ञ्यं करमकारुण्यादिकं च दर्शितम्। रथांगांकितपाणित्वस्य सामर्थ्यविशेषे तात्पर्य्यम्, तथोक्तं श्रीपराशरेण च (वि॰ पु॰ ५।१८।२)—'सोऽप्येनं ध्वजवज्राब्जकृतचिह्नेन पाणिना। संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वजे ॥' इति; प्रीतः सन् परिरेभे। तत्र हेतुः—प्रणतवत्सल इति। भक्तवात्सल्येनैव प्रीतिः, न तु तदागमनप्रयोजनादिनेति भावः। अयञ्च द्वयोश्चरणोपान्ते पतितस्यापि तस्य श्रीभगवता प्राक् परिरम्भणे हेतुरपि ज्ञेयः। अन्यत्तैर्व्याख्यातम्। यद्वा, अभिप्रेत्य तस्य हृद्यं मनोरथं ज्ञात्वा तत एव प्रीतस्तं परिरेभे ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे राजन्! स्वया प्रभया दिशो वितिमिराः कुर्वाणौ यथा कनकेनाचितः मध्ये खचितः मारकत शैलः इन्द्रनीलपर्वत इति यावत् इयं कृष्णस्योपमा रौप्य इत्यस्याञ्जनाचित इति शेषः। इयं रामस्योपमा एवम्भूतौ ददर्शेति सम्बन्धः ॥ ३३ ॥ तदा सोऽक्रूरः तत्क्षणमेव रथादवप्लुत्य प्रेम्णा विह्वलः रामकृष्णयोश्चरणोपान्ते दण्डवत्पपात ॥ ३४ ॥ भगवद्दर्शनजाह्लादेन यद्बाष्पं तेन परित व्याकुले व्याप्ते ईक्षणे यस्य सः पुलकैराचितं व्याप्तमङ्ग यस्य तथाभूतः हे नृप! औत्कण्ठ्यात्स्वाख्यानेऽक्रूरोऽहं नमस्करोमीति कथने नाशकत् न प्रबभूव ॥ ३५ ॥ भगवान् श्रीकृष्णस्तदक्रूरोऽयमेतदर्थमिहागत इत्येतज् ज्ञात्वा प्रणतवत्सलत्वात् रथाङ्गेन चक्रेणाङ्कितो यः पाणिस्तेन तमभिमुखं समीपे आकृष्य प्रीतः परिरेभे आलिङ्गितवान् ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मरकतसदृशः कृष्णः रजतपर्वतसदृशो रामः कनकाचितावित्युभयोः समं यदेतदादित्यस्य परं कृष्णरूपमित्यत्र यथादित्यस्य कृष्णप्रभा तिमिरापहा कृष्णमरकतश्यामप्रभापि दिशो वितिमिराः करोतीति युक्तमित्यनेन कृष्णप्रभाया अन्धकारनिरासकत्वं कथमिति मन्दाशङ्का दूरतो निरस्तेति ॥ ३३ ॥ अवप्लुत्य अवरुह्य ॥ ३४ ॥ आह्लाद आनन्दः ॥ ३५ ॥ रथाङ्गं चक्रं तेनाङ्कितेन पाणिना ॥ ३६–३७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यथा मारकतः शैलो रौप्यश्च कनकाचितौ भवतः तया तौ ददर्शेत्यन्वयः। बृहत्तया सर्वात्मतया सुवर्णालङ्कारतया चेति भावः। किं कुर्वन्तावित्यत्राह। दिश इति ॥ ३३–३५ ॥ अभिप्रेत्य लक्षणादिना लोकरीत्या वितर्क्य ॥ ३६–३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वाख्याने अक्रूरोऽहं नमस्करोमीति स्वकथनेऽपि न शशाक ॥ ३५ ॥ अभिप्रेत्य अक्रूरोऽयमेतदर्थमागत इति ज्ञात्वा रथाङ्गाङ्कितेन चक्रचिह्नाङ्कितेन पाणिना तमभ्युपाकृष्य स्वनिकटमाकृष्य आकर्षणेन कंसहननसामार्थ्यं ज्ञापयन्निवेति भावः ॥३६॥

गूढार्थदीपिनी

मारकतः नीलमणिमयः। रौप्यो रजतमयश्च। वितिमिराः अन्धकारशून्याः दिशः कुर्वाणौ तौ ददर्शेत्यनुषङ्गः ॥ ३३ ॥ दण्डवत् ययात् ॥ ३४ ॥ बाष्पैः अश्रुभिः पर्याकुले व्याप्ते अक्षिणी यस्य सः। पुलकैः रोमभिः आचितं व्याप्तम् अङ्गं यस्य सः व्याख्याने स्वपरिचयदाने नाशक्नोत् ॥ ३५ ॥ रथाङ्गं चक्रम् ॥ ३६–३७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मारकतः इन्द्रनीलमणिमयः रौप्यः रूप्यमयश्च शलो भवति इति तयोः शरीरोपमा तौ च शैलौ यथा कनकाचितौ भवत इति सुवर्णमयालङ्कारोपमा दर्शिता उभयोः सुवर्णालङ्कारालङ्कृतत्वात् एवं भूतौ हे राजन्! दिशो वितिमिरा स्वया प्रभया कुर्वाणौ ॥ ३३ ॥ स्नेहेन प्रेम्णा विह्वलः विकलः ॥ ३४ ॥ भगवद्दर्शनजेनाह्लादेन यद्बाष्पं तेन परितः आकुले व्याप्ते ईक्षणे यस्य सः पुलकैराचितं व्याप्तमङ्गं यस्य सः स्वाख्याने स्वनामगोत्रादिकथनेनाशक्नोत् ॥ ३५ ॥ भगवान् सर्वज्ञः अक्रूरोऽयमस्मदानयनार्थमागत इत्यभिप्रेत्य विज्ञाय कंसादिवधसामर्थ्यं सूचयन्निव रथाङ्गेन सुदर्शनेनाङ्कितो यः पाणिस्तेनाभ्युपाकृष्य तमालिङ्गितवान् रथाङ्गाङ्कितपाणिशब्दः श्रीकृष्णविग्रहस्यानाद्यनन्ततां द्योतयति ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

औत्कण्ठ्यादुत्कण्ठायाः। उत्कण्ठोत्कलिके सम इत्यमरः। व्याख्यातमक्रूरोऽहं भो अभिवादयामीति भाषितुं नाशकत्समर्थो न बभूव ॥ ३३ ॥ रथाङ्गं चक्रं तेनाङ्कितश्चासौ पाणिर्हस्तश्च तेन तत्स्नेहपारवश्येनाव्याहरणं हरिरभिप्रेत्य ज्ञात्वाऽभिस्वप्रमुखमुपाकृष्य प्रीतः प्रणतवत्सलः परिरेभे आलिलिङ्गे ॥ ३४ ॥ सङ्कर्षणश्च प्रणतमक्रूरं महामना उपगुह्यालिङ्ग्य पाणिना पाणिं गृहीत्वा सानुजो रामो गृहमनयत् ३५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तादृशस्यावतारे लोके अभिज्ञापकमाह। दिश इति। दश दिशः त्वया असाधारण्या प्रभया वितिमिराः कुर्वाणौ कान्तिरेव सूर्याधिका अलौकिकी न शीता नचोष्णा सर्वतापनाशिका सर्वेषां सर्वानन्ददायिनी ब्रह्मत्वबोधिका भवति राजन्नित्यलौकिकवस्तुपरिज्ञानार्थम् अभूतोपमामाह। यथा मारकतः शैल इति। मरकतमणिनिर्मितः शैलः भगवान् रौप्यः कैलाशस्तत्तुल्यो बलभद्रः उभावपि कनकशृङ्गाङ्कितौ चेत् उपमां प्राप्नुतः सर्वत्र भगवान् धराधरत्वेन वर्ण्यते सर्वाश्रयत्वाय महत्त्वादिधर्मार्थं च ॥ ३३ ॥ एवं भगवन्तं वर्णयित्वा तादृशे स्वमिति तादृशसेवकस्य कर्त्तव्यं पूर्वकं भगवत्कार्यमाह दशभिः। तत्र द्वाभ्यां तस्य कृत्यम् अष्टभिर्भगवत्कृत्यमिति प्रपत्तिः तस्य अष्टैश्वर्यादिदानं भगवतः रथादिति आदौ दृष्ट्वा रथे स्थित एव तूर्णमवप्लुत्य तत उच्चस्थाद् भूमौ पतित्वा नतूत्तीर्य स प्रसिद्धः पूर्वं चरणरजस्सु यः पतितः साक्षाद्दर्शनानन्तरमत्युत्कटो यो जातः स्नेहः तेनापि विह्वलः रामकृष्णयोश्चरणोपान्ते निकट एव पपात पाते देहादेरविचारार्थमाह। दण्डवदिति। अत्र ज्येष्ठानुक्रम उक्तः व्यवहारे वयसो मुख्यत्वख्यापनार्थः ॥ ३४ ॥ अकस्मात्पतिते शङ्का भवतीति कथं स्वनाम गृहीतवान् तत्राह। भगवद्दर्शनेति। भगवद्दर्शनेन योऽयं महानाह्लादो जातः तेनान्तः पूर्णेन बहिर्बाष्पतया निर्गतेन पर्याकुले ईक्षणे यस्य ज्ञानफलेन ज्ञानं तिरोहितमिति तस्य न विचार उत्पन्न इत्यर्थः। नन्वन्यो मास्तु विचारः अयमहमिति अपूर्वदर्शनत्वात् कथं न स्वाभिधामुक्तवान् तत्राह। पुलकाञ्चित इति। सर्वाङ्गे रोमाञ्चः प्रेमातिभरात् जातः तेन विवशत्वात् स्वाख्याने अयमहमस्मीति कथनेऽपि नाशकत् न समर्थो जातः परिज्ञानार्थं सम्बोधनमादरार्थं वा ॥ ३५ ॥ ततस्तस्य वचनव्यतिरेकेणैव भगवांस्तं ज्ञात्वा कर्त्तव्यं कृतवानित्याह। भगवानिति। भगवत्त्वात् तमक्रूरोऽयमित्यभिप्रेत्य दुष्टसंसर्गजनितदोषनाशार्थं रथाङ्गेन चक्रेणाङ्कितेन कालात्मकेन तद्दोषं दूरीकृत्य पाणिना तमाकृष्य स्वसमीपे आनीय तस्मिन् स्वप्रवेशे लौकिकं कार्यं सेत्स्यतीति तमेव स्वस्मिन् आनीतवान् ततः परिरेभे उभयोरैक्यं सम्पादितवान् दण्डवत्पातेनैव प्रीतः। नन्वस्य बहवो दोषाः सन्ति संसर्गजाः तत् कथं प्रीत इति चेत्तत्राह। प्रकर्षेण नतेषु वत्सलः वात्सल्ययुक्तः भक्तकृपालौ प्रकर्षेण नतिमात्रेणैव कृपा अभिव्यक्ता भवति अत आलिङ्गनमुचितमेव यो भगवता परिगृहीतः यः कृष्णपादाङ्कितेषु लोटनेन भगवदीयत्वं प्राप्तः स भगवति सायुज्यमेव प्राप्तवान् न स पुनरुद्गतः भगवता परित्यक्त इति वचनाभावात् तस्य पूर्वकामितसिध्यर्थं प्रतिकृतिमेव कृत्वा पृथक्कृतवानिति लक्ष्यते नहि परमप्रेम्णा भगवत्सायुज्यं प्राप्तस्य पुनरुत्थानं सम्भवति लौकिकन्याये तु भक्तिर्वृथैव स्यात् अतो बलभद्रालिङ्गानुपानुपपत्त्या भगवद्विश्लेषः तस्य कल्पयितुं शक्यः एवं सति भक्तिमार्गः सफलो भवति अन्यथा भावान्तरमुत्पादयन् पाक्षिकफलः स्यात् ॥ ३६ ॥

श्रीसुबोधिनी–सारः

हे राजन् त्वया प्रभया भासा वितिमिरा अन्धकारहीनाः प्रकाशोज्ज्वला दिशः कुर्वाणौ मारकतो नीलमणिपर्वतो रौप्यः श्वेताद्रिः कैलासगिरिः द्वौ कनकेन स्वर्णेनाचितौ व्याप्तौ यथा ॥ ३३ ॥ रथात्तूर्णं शीघ्रम् अवतीर्य सोऽक्रूरः प्रेमव्याकुलो रामकृष्णयोः चरणोपांते पादसमीपे दंडवत् पपात ॥ ३४ ॥ भगवतो दर्शनेनाह्लादो हर्षस्तेन यद्बाष्पं नेत्रजलं तेन पर्याकुले व्याप्ते ईक्षणे यस्य सः पुलकै रोमांचैराचितं व्याप्तमगं यस्य स औत्कण्ठ्यात् प्रेमो द्रेकाद्धेतोः स्वस्याख्यानेऽक्रूरो नमस्करोमीति कथने न समर्थोऽभूत्। हे नृप ॥ ३५ ॥ भगवान् प्रीतः प्रणतेपु वत्सलः तमक्रूरमभिप्रेत्य ज्ञात्वा रथाङ्गं चक्रं तेनांकितश्चिह्नितः पाणिर्हस्तस्तेनाभ्युपाकृष्य समीपमाकृष्यालिलिंग ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तयोरेव स्वरूपं सदा प्रयत्नेन ध्येयम्' इत्याशयेन सम्बोधयन्ति—राजन्निति। त्वया प्रभया दिशा विगततिमिराः कुर्वाणौ। तत्र दृष्टान्तमाह—यथा कनकेन व्याप्तो मारकत इन्द्रनीलपर्वत इति कृष्णस्योपमा तथाभूतो रौप्यश्च भवपर्वत इति रामस्योपमेति विवेकः। एवंभूतौ ददर्शेति पूर्वेण सम्बन्धः ॥ ३३ ॥ तदा स्नेहेन विह्वलः सोऽक्रूरः तूर्णं शीघ्रमेव रथादवप्लुत्य रामकृष्णयोश्चरणोपान्ते दण्डवत् पपातेत्यन्वयः ॥ ३४ ॥ भगवद्दर्शनेन यः आह्लादस्तेन यद्बाष्पं तेन परितः आकुले ईक्षणे यस्य सः, पुलकैरुत्थितरोमभिराचितं व्याप्तमङ्गं यस्य सः अक्रूरः हे नृप! औत्कण्ठ्यात् बाष्पेन कण्ठनिरोधात् स्वाख्याने अक्रूरोऽहं नमस्करोमीति कथने नाशकत् न प्रबभूव ॥ ३५ ॥ भगवान् कृष्णस्तमभिप्रेत्य 'अक्रूरोऽस्मदानयनार्थमागत' इति ज्ञात्वा प्रीतः सन्

कंसहननसामर्थ्यं द्योतयन् रथाङ्ग न चक्रेण अङ्कितस्तत्किणयुक्तो यः पाणिस्तेन तमभ्युपाकृष्य सम्मुखं समीपमाकृष्य परिरेभे आलिङ्गितवान्। यतः प्रणवत्सलः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

हे राजन् ! यथा कनकाचितौ सुवर्णेन व्याप्तौ इति सालङ्कारयोः शैलसादृश्यार्थमुक्तम्। मारकत इन्द्रनीलपर्वतः तथाभूतो रौप्यपर्वत इति तथा स्वया प्रभया दिशो विगततिमिराः कुर्वाणौ बलकेशवौ ददर्शेत्यनुषङ्गः ॥ ३३ ॥ रथादिति। तदा स्नेहेन विह्वलः स्वपितृव्यत्वानुसन्धानशून्यः सोऽक्रूरः तूर्णं शीघ्रमेव रथादवप्लुत्य रामकृष्णयोश्चरणोपान्ते दण्डवत्पपात ॥ ३४ ॥ भगवदिति ॥ हे नृप ! भगवद्दर्शनेन य आह्लादस्तेन यद्बाष्पं तेन परितः आकुले ईक्षणे यस्य सः पुलकैरुत्थितरोमभिराचितं व्याप्तमङ्गं यस्य सः अक्रूरः औत्कण्ठ्यात् बाष्पेन कण्ठनिरोधात् स्वाख्याने अक्रूरोऽहं नमस्करोमीति कथनेऽपि नाशकत् न प्रबभूव। किं पुनरष्टाङ्गत्वसम्पादने ॥ ३५ ॥ भगवानिति ॥ प्रणतवत्सलः भगवान् तमभिप्रेत्य अक्रूरोऽस्मदानयार्थमागत इति ज्ञात्वा प्रीतः सन् कंसहननसामर्थ्यं द्योतयन् रथाङ्गेन चक्रेणाङ्कितस्तत्किणयुक्तो यः पाणिस्तेन तमभ्युपाकृष्य संमुखं समीपमाकृष्य परिरेभे आलिङ्गितवान् नतु पितृव्यव्यवहारेण नमस्कृतवान्। अक्रूरस्य दास्यभावाभिलाषित्वात्। "ये यथा मां प्रपद्यन्ते" इति गीतोक्तः ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वितिमिराः अन्धकारहीनाः मारकतः श्याममणिजातीयः शैलः पर्वतः रौप्यः श्वेतमणिजातीयश्च तौ कनकाञ्चितौ हिरण्यव्याप्तौ यथा तथा शोभमानौ ददर्शेति पूर्वेणसंबन्धः ॥ ३३ ॥ चरणोपान्ते पादसमीपे ॥ ३४ ॥ भगवद्दर्शनाह्लादेन यानि बाष्पाणि कंठरोधयुक्ताश्रुबिन्दवस्तैः पर्याकुले व्याप्ते ईक्षणे यस्य सः पुलकैः ऊद्र्ध्वरोमावलिभिः आचितानि व्याप्तानि अंगानि यस्य सः औत्कण्ठ्यात् अतिहर्षकंठरोधाद्धेतोः स्वाख्याने अहमक्रूर आगतोस्मि त्वां नमस्करोमीत्युच्चारणे नाशकन्न समर्थो बभूव ॥ ३५ ॥ अक्रूरोऽयमिति तम् अभिप्रेत्य ज्ञात्वा कंसमारणं बलं प्रकाशयन्निवरथांगेति ध्वजवज्राब्जानामुपलक्षणं तेन चक्रध्वजवज्राब्जैरंकितश्चिह्नितो यः पाणिस्तेनाक्रूरं अभ्युपाकृष्य परिरेभे ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दिश इति ॥ हे राजन्, स्वया स्वकीयया, प्रभया दिशः, वितिभिरा अन्धकाररहिताः, कुर्वाणौ, कनकेन सुवर्णेन आचितो मध्ये खचितः, मारकत इन्द्रनीलमणिसंबन्धी शैलः पर्वतः, यथा इत्येषा कृष्णोपमा। अञ्जनाचित इति शेषः। रौप्यः शैलश्च यथा, इयं रामस्योपमा तथा, शोभमानौ कनकाचिताविति पाठे, यथा मारकतः शैलः रूप्यश्च शैलः कनकेनाचितौ सन्तौ शोभेते तद्वच्छोभमानौ ॥ ३३ ॥ रथादिति ॥ तदा सः अक्रूरः, तूर्णं तत्क्षणमेव, रथात् अप्लुत्य, स्नेहविह्वलः प्रेम्णा विह्वलः सन्, राभकृष्णयोः चरणोपान्ते, दण्डवत् पपात ॥ ३४ ॥ भगवदिति ॥ भगवतो यद्दर्शनं तस्माद्य आह्लादस्तेन यद्बाष्पं तेन परि परित आकुले व्याप्ते ईक्षणे यस्य सः, पुलकैः रोमोद्गमैः आचितं व्याप्तमङ्गं यस्य तथा भूतोऽक्रूरः, हे नृप, औत्कण्ठ्यात्, स्वाख्याने अक्रूरोऽहं नमस्करोमीति कथने, न अशकत् न प्रबभूव ॥ ३५ ॥ भगवानिति ॥ भगवान् कृष्णः, तत् अक्रूरोऽयमेतदर्थमिहागत इत्येतदित्यर्थः। अभिप्रेत्य ज्ञात्वा, तमिति पाठेऽपि तमक्रूरमभिप्रेत्येत्यर्थः। प्रणतवत्सलः हेतुगर्भमिदम्। तत्त्वात्, प्रीतश्च सन्नेव रथाङ्गेन चक्रेणाङ्कितो यः पाणिस्तेन, अभ्युपाकृष्य स्वसमीपे आकृष्य, परिरेभे आलिङ्गितवान् ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

भगवद्दर्शनाह्लादेति : १०.३८.३५.

अदृष्टश्रुतपूर्वस्य दर्शनं भुविः वस्तुनः। सिद्धमानन्ददं त्वेतत् साक्षादच्युतदर्शनम् ॥ ६० ॥
तव पदे निहितं हि शिरोऽधुना स्पृश करेण हरे करवालतः। इति मनःस्थितमर्थमुदीरयन् क्वतित एव तदा न वचोऽब्रवीत् ॥ ६१ ॥
व्यक्तं लोकदृशाक्रूरकर्मकर्तुर्ममाधुना। त्रपोपहासयोः पात्रं स्यात्स्वनामेत्यनुक्तवान् ॥ ६२ ॥

भगवानिति : १०.३८.३६.

सप्रमभावं तमवेक्ष्य कृष्णः शुद्धान्तरङ्गं शरणं प्रपन्नम्। संसारिचक्रदपि ते न भीरित्यावेदयंस्तत्करतोऽस्पृशत्तम् ॥ ६३ ॥
संप्रेषितो यदरिणाऽयमिहापि सारिचक्रेण मामुपगतः सहसा रथेन।
इत्थं विभाव्य भगवान् स सहस्रधारिचक्रेण तं निजकरेण तदा चकर्ष ॥ ६४ ॥
पाणौ यथा मम ममत्वमनेकधाऽरिचक्राङ्कितेऽपि नहि नश्यति तादृशेऽपि।
तद्वत्त्वयीति स विबोधयितुं तमेव तस्मै निदर्शनमदर्शयदात्महस्तम् ॥ ६५ ॥
न केवलं तदा तेन लब्धो ह्यभयदः करः। किन्तु तन्मिषतः सर्वो निर्व्याजसुहृदाशयः ॥ ६६ ॥

कृष्णप्रिया

उन्हें देखते ही अक्रूरजी प्रेमावेग से अधीर होकर रथ से कूद पड़े और भगवान् श्रीकृष्ण तथा बलराम के चरणों के पास साष्टाङ्ग लोट गये ॥ ३४ ॥ परीक्षित ! भगवान के दर्शन से उन्हें इतना आह्लाद हुआ कि उनके नेत्र आँसू से सर्वथा भर गये। सारे शरीर में पुलकावली छा गयी। उत्कण्ठा वश गला भर आने के कारण वे अपना नाम भी न बतला सके ॥ ३५ ॥ शरणागत वत्सल भगवान् श्रीकृष्ण उनके मन का भाव जान गये। उन्होंने बड़ी प्रसन्नता से चक्राङ्कित हाथों के द्वारा उन्हें खींच कर उठाया और हृदय से लगा लिया ॥ ३६ ॥

संकर्षणश्च प्रणतमुपगुह्य महामनाः। गृहीत्वा पाणिना पाणिमनयत्[1] सानुजो गृहम् ॥ ३७ ॥
पृष्ट्वाथ स्वागतं तस्मै निवेद्य च[2] वरासनम्। प्रक्षाल्य विधिवत् पादौ [3]मधुपर्कार्हणमाहरत् ॥ ३८ ॥
निवेद्य गां चातिथये संवाह्य श्रान्तमादृतः। अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद् विभुः ॥ ३९ ॥
तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित्। मुखवासैर्गन्धमाल्यैः परां प्रीतिं व्यधात् पुनः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—च सानुजः, महामनाः, संकर्षणः, प्रणतम्, उपगुह्य, पाणिना, पाणिम्, गृहीत्वा, गृहम्, अनयत् ॥ ३७ ॥ अथ, तस्मै, स्वागतम्, पृष्ट्वा, वरासनम्, निवेद्य, च (प्रणम्य) विधिवत्पादौ, प्रक्षाल्य, मधुपर्कार्हणम्, उपाहरत् ॥ ३८ ॥ विभुः (श्रीकृष्णः) अतिथये, गाम्, च (वस्त्रादिकम्) निवेद्य, श्रान्तम्, संवाह्य (तैलाभ्यङ्गमर्दनादिनासर्वाङ्गश्रमंदूरीकृत्य। मेध्यम्, रोहिण्यापवित्रयापक्वम्) बहुविधम्, अन्नम्, श्रद्धया, अकालेरात्रावपिविविधसामग्रीयुतम्) उपाहरत् ॥ ३९ ॥ भुक्तवते, तस्मै, परमधर्मवित्, रामः, पुनः, मुखवासैः, गन्धमाल्यैः पराम्, प्रीतिम्, व्यधात् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पाणी अञ्जलिरूपेण संहतावेव स्वपाणिना गृहीत्वा ॥ ३७ ॥ मधुपर्क एवार्हणं तस्मिन्वा यदुचितमर्हणं तदाहरत् आनीय समर्पितवानित्यर्थः ॥ ३८–४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पाणी अनयदिह प्रकृतिभावः ॥ सानुज इति अग्रजत्वव्यवहारेणातिथ्यकरणे तस्यैव मुख्यत्वात्। गृहं श्रीनन्दगृहम्। श्रीरामस्यापि स्वगृहत्वेनैवाभिमानात्। पाणिना स्वदक्षिणेन। पाणी अञ्जलिभूतौ। गृहीत्वेति 'गृहीतमंजलौ' इति तन्मनोरथात्।३७। "मधुपर्कं घृतक्षौद्रदधिभिः संभवेन्मुनेः" इत्यादिपुराणात्। तत्तद्द्रव्यमानीय मधुपर्कं कृत्वार्चयदिति भावः। पूर्वव्याख्यानेऽर्हपदं व्यर्थं ज्ञात्वा व्याख्यान्तरं कृतवानिति ध्येयम् ॥ वरं श्रेष्ठं रत्नादिमयम्। प्रक्षाल्य पादावित्यत्र तदप्रत्याख्याने हेतुः—आदृतः सादरः। तथादरपरिपाटीभिः स्वमाधुरी व्यञ्जिता यथाऽक्रूरोऽपि तदैश्वर्यादिकं विस्मृत्य तदिच्छानुसारी बभूवेति भावः ॥ ३८ ॥ गां गोशब्दोपलक्षितां वासार्थभूमिम्। पानीयादि दुग्धार्थं धेनुं वा। संवाह्य पादसेवां कृत्वा। बहुगुणं षड्सयुक्तं पायसं वा। विभुः स्वयं भगवान्। किञ्च,—गोनिवेदनं किमर्थमिति प्रश्ने "न त्वेवामांसोऽर्घः स्यात्" इति श्रुतेः तुशब्दः पक्षव्यावृत्तौ। अर्घोऽर्चनममांसः पश्वालंभनवर्जितो नैव भवेत्। अत्र "यद्यालभेद्यद्युत्सिसृक्षेत्" इत्यनेन सूत्रेण गवालंभस्य विकल्पं विधाय "न त्वेवामांसोऽर्घः" इत्यनेनार्घमात्रे गवालम्भनं नियमेन विधत्ते। तथा तद्द्वयोः स्मृत्यंतरविरोधेनाप्रामाण्ये प्राप्ते व्यवस्थामाह—'अधियज्ञमधिविवाहं कुरुते' इत्येवं ब्रूयात्। अधियज्ञं यज्ञे। अधिविवाहं विवाहे। कुरुते विदधाति। 'गवालम्भनपाप्मानं हिनोमि' इत्यस्यान्ते इत्येवं ब्रूयात्। अन्यत्र पाप्मा हतः पाप्मानं हन्मीति वा विकल्पः। यद्यप्येवं मधुपर्के "तद्यथैवादो मनुष्यराज आगतेऽस्मिन्वार्हत्युक्षाणं वेहतं वा क्षदन्ते" इति श्रुतेर्वेहतं वन्ध्यां गां क्षदन्ते हिंसंति इति गवालंभो विहितस्तथाप्यस्वर्ग्यत्वाल्लोकविद्विष्टत्वाच्च "मा गामनागामदितिं वधिष्ट" इति श्रुतेः, "अश्वालंभं गवालम्भं संन्यासं पलपैतृकम्। देवराच्च सुतोत्पत्तिं कलौ पंच विवर्जयेत् ॥" इति स्मृतेश्च, कलौ न विधेयः। "अत्रोपविष्टं कार्ष्णिं तं शाश्वतः प्रत्यपूजयत्। पाद्यं निवेद्य प्रथममर्घ्यं गां च न्यवेदयत् ॥ स च तां मंत्रवत्पूजां प्रत्यगृह्णाद्यथाविधि। प्रतिगृह्य तु तां पूजां जनकाद्द्विजसत्तमः ॥ गां चैव समनुज्ञाय" इति मोक्षधर्मेषु भारतोक्तेर्गां धेनुं समनुज्ञाय तृणादनार्थं सम्यगाज्ञां दत्त्वान्यां पूजां प्रत्यगृह्णादिति टीकोक्तेश्च कलौ न विधेयः। "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नहि" इति याज्ञवल्क्यस्मृतिषु निषेधदर्शनात्। अर्घ्याश्च "षडर्घ्या भवंति" इति श्रुतेः षडेव अर्घ्या अर्घार्हाः।

---

[1] पाणी अनयत्–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. आदयः। [2] निवेद्य परमासनम्–विज. ; प्रवरासनम्–प्रा. पा.। [3] पर्कमुपा–वीर. ; मधुपर्कार्हं–विज.।

के ते—"आचार्य ऋत्विग्विवाह्यो राजा प्रियः स्नातकः" इति श्रुतेः। आचार्य उपनयपूर्वकं वेदाध्यापकः। ऋत्विक् श्रौतस्मार्तादिकर्मार्थं वृतो ब्रह्मादिः। विवाह्यो वरः। राजा अभिषेकादिगुणवान्प्रजापालनेऽधिकृतः क्षत्रियः। प्रिय उत्कृष्टजातिः समानजातिर्वा सखा। स्नातको ब्रह्मचर्यात्समावृत्तः। आचर्यस्यार्घ्यो नान्यस्य। तथा च मनुः—"तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः। स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवा॥" इति। ब्रह्म वेदः स एव दायस्तं हरतीति तथा। प्रतीतिं—प्रतिसंवत्सरमागतानाचार्यादीनर्घेण पूजयेयुर्नार्वागित्यलं प्रपंचेन। तथा चाक्रूरस्य प्रियत्वादर्घ्यत्वम्। तत्र गोप्रदर्शनमेव योग्यं न त्वालंभो याज्ञवल्क्येन यज्ञोद्वाहयोरपि कलौ निषिद्धत्वाद्यज्ञविवाहाभ्यामन्यत्राविहितत्वाच्च॥ एवं संवाह्य पादसंवाहनं कृत्वा उभयत्र ण्यंतत्वं वा॥ ३९॥ तस्मै अक्रूराय। मुखवासैः कर्पूरतांबूलैः। पुनर्मुखवासादिदानांते॥ ४०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सङ्कर्षण इति। यदूनामपृथग्भावादित्युक्तौचित्याभिप्रायेण महत् श्रीकृष्णभक्तेषु वात्सल्यादिगुणैः सर्वत उत्कृष्टं मनो यस्य स इति पूर्ववद्धेतुः सानुज इत्यग्रजत्वव्यवहारेण तस्यातिथ्यकरणे मुख्यत्वात् गृहं श्रीमन्नन्दगृहे श्रीरामस्यापि स्वगृहत्वेनैवाभिमानात्॥ ३७॥ वरं श्रेष्ठं रत्नादिमयमासनं विधिवत् यथाविधीत्यर्थः इदं सर्वत्र योज्यं प्रक्षाल्य पादावित्यत्र तदप्रत्याख्याने हेतुः आदृतः सादरः तथादरपरिपाटीभिः स्वमाधुरीव्यञ्जिता यथाक्रूरोऽपि तदैश्वर्यादिकं विस्मृत्य तदिच्छैकानुसारी बभूवेति भावः। एवं सम्वाह्य पादसम्वाहनं कृत्वेति च उभयत्र ण्यन्तत्वं वा॥ ३८–३९॥ प्रीत्या भुक्तवते षष्ठ्याश्चतुर्थी परमधर्मेण वैष्णवधर्मेण अतिथिं तत्रापि द्वादशीपारणायां तत्रापि वैष्णवं प्रत्येवमेव व्यवहर्त्तव्यमिति लोकैः प्रवर्त्तयन्नित्यर्थः। अतः पुनरपि परमां प्रीतिं व्यधात् तस्य दिनस्य द्वादशीत्वं परश्वश्चतुर्दश्यां भूतराजपूजायां कंसराजमारणात् पारणायाः प्रातरकरणन्तु भगवद्दिदृक्षया न रात्रौ पारणं कुर्यादिति नियमातिक्रमस्तु साक्षाद्भगवद्गृहान्नप्राप्तेः॥ ४०॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

संकर्षण इति (भा० १०।८।१२)—'यदुनामपृथग्भावात्' इत्युक्तस्य यदुभिः सह तदभेदस्य, किं वा श्रीकृष्णवदाकर्षणस्याभिप्रायेण। प्रणतमिति पुरैव कृतप्रणामात्, किंवा तदनुग्रहप्राप्तये पुनस्तं प्रति पृथक् प्रणामात्। महामना इति वक्ष्यमाणातिथ्यादौ परमौदार्य्यात्, किंवा श्रीमाननुजोऽयं भक्तवात्सल्येन विवशो वृत्तः, तातश्च श्रीनन्दोऽद्य सपरिवारोऽप्रसन्नमनाः शोकार्त्त इव गृहान्तर्वर्त्तते, अतो मया विनाद्य अस्यातिथ्यं न सम्पाद्यमित्यादि सम्यग्विचारयन्नित्यर्थः, किंवा तदातिथ्यार्थं व्रजमहार्त्तिहेतु—तद्वार्त्तादिसंगोपनादिति; 'सानुजः' इत्यातिथ्ये श्रीकृष्णस्य गौणत्वात्, किंवा, विवशस्य तस्याप्यानयनाद्, गृहं श्रीनन्दस्यैव, श्रीयशोदारोहिण्योरेकत्रैव निवासात्॥ ३७॥ अथ गृहानयनानन्तरम्, वरं श्रेष्ठं रत्नादिमयमासनम्, विधिवदिति यथाविधि तथेत्यर्थः, इदन्तु सर्व्वैरपि योज्यम्, अग्रेऽप्यनुवर्त्त्यम्, तत्तद्विधिश्च स्मृत्यादौ प्रसिद्ध एव॥ ३८॥ सम्बाह्य पादयोः सम्बाहनं कृत्वा, नत्वक्रूरेण तत् कथं कारितम्? तत्राह—आदृतः सादर आतिथ्ये प्रीतिमानित्यर्थः। तस्य प्रीत्यपेक्षया तेन सोढमिति भावः। बहुगुणं मेध्यं चेति प्रायो गोरसमयत्वात्, उपाहरत् समीपे निविश्य परिवेशनपूर्व्वकं समर्पितवानित्यर्थः। श्रद्धयेति पुनः पुनराग्रहेण परिवेशनं मधुवाचा भोजनार्थं प्रार्थनादिकञ्च बोधयति। विभुस्तत्र तत्र समर्थ इति तत्तत्सम्पूर्णता सूचिता॥३९॥ अत एव प्रीत्या भुक्तवते, षष्ठ्यर्थे चतुर्थी, राम इति तथा तद्रमणात्, परमधर्म्मो वैष्णवधर्म्मलक्षणस्तद्वित्, अतिथिं तत्रापि पारणायां तत्रापि वैष्णवं प्रत्येवमेवमेव व्यवहर्त्तव्यमितिति लोके प्रवर्त्तयन्नित्यर्थः। अतः पुनरपि परमां प्रीतिं सम्पादितवान्॥४०॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

संवाह्य अङ्गसंवाहनं कारयित्वा॥ ३९॥ मुखवासैः कर्पूरादिभिः॥ ४०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः सङ्कर्षणोऽपि प्रणतमक्रूरमुपगुह्याश्लिष्य प्रीतमनाः स्वपाणिना तस्य पाणिं गृहीत्वा सानुजो गृहमनयत्॥ ३७॥ ततः स्वागतं पृष्ट्वा तस्मै अक्रूराय श्रेष्ठमासनं समर्प्य यथाविधि पादौ प्रक्षाल्य मधुपर्कमुपाहरदानीय समर्पितवान्॥ ३८॥ तत आदृतोऽतिथये अक्रूराय गां समर्प्य श्रान्तं तं सम्वाह्य पादसम्वाहनादिकं कारयित्वा मेध्यं विशुद्धं बहुगुणोपेतं षड्रसयुक्तमन्नं श्रद्धया समर्पयामास॥ ३९॥ तस्मा इति। मुखवासैः कर्पूरादिभिर्गन्धमाल्यताम्बूलैश्च तस्मै तस्य परां प्रीतिं व्यधादुपापादयत्॥४०॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मधुपर्कार्हं मधुपर्कपूजां "मधुपर्कं च सक्षौद्रं दधि प्रोक्तं मनीषिभिरिति तान्त्रिकाः आहरत् दत्तवान्॥ ३८॥ संवाह्य पादाविति शेषः॥ ३९॥ मुखवासैः कर्पूरताम्बूलादिभिः॥ ४०–४३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां षट्त्रिंशोऽध्यायः॥ ३६–३८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रक्षाल्य विधिवत् पादावित्यत्र हेतुः आदृतः सादरः तथादरपरिपाटीभिः स्वमाधुरीव्यञ्जिता यथाक्रूरोऽपि तदैश्वर्य्यादिकं विस्मृत्य तदिच्छैकानुसारी बभूवेति भावः ॥ ३८–४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पाणिना स्वदक्षिणेन पाणी अञ्जली भूतौ गृहीत्वेति गृहीतमञ्जलाविति तथैव तन्मनोरथात् ॥ ३७–३८ ॥ निवेद्य गामिति । पाद्याद्युपचारेषु गौरियं दृश्यतां तवेति नयनेन्द्रियसुखदानार्थं सुन्दरगवोपस्थानमप्येको मङ्गलोपचारः मेध्यमिति द्वादशीपारणविहितमित्यर्थः । अस्य दिनस्य द्वादशीत्वं परश्वश्चतुर्दश्यां भूतराजपूजायां कंसमारणात् न रात्रौ पारणं कुर्य्यादिति नियमातिक्रमः कृष्णगृहान्नप्राप्तिलोभात् ॥ ३९–४० ॥

गूढार्थदीपिनी

मधुपर्कं घृतक्षौद्रदधिभिः 'संभवेन्मुने' इत्यादिपुराणात् । आदरत् समर्पितवान् ॥ ३८ ॥ गां मधुपर्काङ्गभूताम् ऋचम् निवेद्य संश्राव्य । केचित्तु गां वासार्थं भूमिं धेनुं वा । संबाह्य पादसेवां कृत्वा । बहुगुणं षड्रसोपेतम् । मेध्यं पवित्रम ॥ ३९–४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अञ्जलिरूपेण संहतावेव पाणी सानुज इत्यनेनैकतः सङ्कर्षणः एकतस्तदनुजश्च गृहीत्वा गृहमनयत् ॥ ३७ ॥ मधुपर्करूपमर्हमर्हणमुपाहरत् आनीय समर्पितवान् ॥ ३८ ॥ संवाह्य चरणसंवाहनादिकं कारयित्वा ॥ ३९ ॥ मुखवासैः ताम्बूलादिभिः गन्धैः कर्पूरादिभिः माल्यैः पुष्पैश्च परामुत्कृष्टां प्रीतिं व्यधात् उदपादयत् ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वागतं पृष्ट्वा तस्मै परमासनं परमासनं वा निवेद्य विधिरतिथिसंस्कारबोधकसमयसहितं यथा तथा पादौ प्रक्षाल्य मधुपर्कार्हं मधुपर्करूपमर्हणसाधमहरदानिनाय । मधुपर्क च सक्षौद्रं दधि प्रोक्तं मनीषिभिरिति वचनात्तदर्थो ज्ञेयः । दधि मध्विति संसृज्य कांस्येन वर्षीयसा पिधाय कूर्चाभ्यां प्रतिगृह्य मधुपर्क इति प्राह । त्रिवृतमेकं घृतं च प्राक्क्तमेकधानाः सक्तुश्चेति गृह्यसूत्रादधिमधुसंसृष्टं मधुपर्कः । पयो वा मधुसंसृष्टमभाव उदकमिति धर्मसूत्राच्च तत्प्रकारो ज्ञेयः संवाह्य पादौ मेध्यं पवित्रं बहुगुणं षड्रसोपेतं ॥ ३७ ॥ मुखवासैरेलालवङ्गजातीफलाद्यैर्गन्धमाल्यैश्च पुनः पूरां प्रीतिं व्यधादकरोत् ॥ ३८ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सङ्कर्षणोऽपि प्रणत इति भावसङ्कटात् सङ्कर्षणोऽपि तं तथा कृतवानित्याह । सङ्कर्षणश्चेति । अत्रापि प्रणतत्वमेव हेतुः न तु लौकिक इति चकारेणातिदिष्टोऽप्यर्थः कर्तृधर्मपर इति पुनराह । प्रणतमिति । महामना इति । तस्य लौकिकधर्माभिनिवेशः ततोऽयं पितृव्यः समागत इति पाणिना पाणिं गृहीत्वा भगवत्सहितः तं गृहमनयत् कामनासिद्धेति कथनार्थमुच्यते ॥ ३७ ॥ ततो लौकिकवैदिकमार्गेण तं पूजितवानित्याह । पृष्ट्वेति । अनामयमारोग्यं पृष्ट्वा उत्कृष्टं तस्य गृहेऽपि दुर्ल्लभम् आसनं निवेद्य ततः शास्त्रानुसारेण अभ्यागते यथा कर्त्तव्यं तथा पादौ प्रक्षाल्य मधुपर्कसहितमर्हणं पूजामाहरत् ॥ ३८ ॥ निवेद्येति । ततो गां निवेद्य महोक्षं वा महाजं वेति स्मृतेः उत्सर्गपक्ष एव वात्र यद्यप्ययमभ्यागतः तथाप्यपूर्व इत्यतिथिरेव धर्मं च भगवान् करोति नतु सम्बन्धेनेति ज्ञापयितुञ्च तथोक्तवान् अतिथिस्तु गोघ्ना भवतीति हननार्थमेवेति केचित् चकारान्महाजञ्च वस्त्रादिकञ्च ततः संवाह्य तैलाभ्यङ्गमर्दनादिना सर्वाङ्गश्रमं दूरीकृत्य आदृतो जातः संवाहे हेतुः श्रान्तमिति ततो बहुगुणमनेकव्यञ्जनयुक्तमन्नमोदनं श्रद्धापूर्वमुपाहरत् । मेध्यमिति । तदानीं शुद्धतया निर्मितं रोहिण्या पक्वमित्यर्थः । नतु यथा कथं चित्सम्पादितं तथात्वे श्रद्धा हेतुः अकालेऽपि सहसा सर्वसामग्रीसिद्धौ हेतुः । विभुरिति । अतिथिधर्मं जानातीत्यक्रूरः सर्वं तथैव कृतवान् उभावपि भिन्नभावापन्नाविति न किञ्चिद्विरुध्यते ॥ ३९ ॥ भोजनान्तमेवातिथिकृत्यमिति अग्रिमोपचारं न कुर्यादिति पुनराह । तस्मा इति । भुक्तवते आतृप्तेः ततः परमप्रीत्या मुखवासैस्ताम्बूलादिभिः गन्धैश्चतुः समैः माल्यैश्च राजवत् तस्मै परं प्रीतिं व्यधात् अयमसाधारणो धर्मः अतिथिं स्वसदृशं कुर्यादिति ततोऽप्यधिकं कृतवान् यद्यपि पूर्वं मधुपर्कादिसमये माल्यं दत्तमेव तथापि प्रीत्यै तद्दानमिति पुनरित्यनेनास्य लौकिकत्वं मुक्तम् ॥ ४० ॥

श्रीसुबोधिनी–सारः

महामना उदारचित्तः संकर्षणो रामश्च प्रणतमक्रूरमुपगुह्याश्लिष्य पाणिना पाणी द्वौ करौ गृहीत्वा । अञ्जलित्वात् तयोः । सानुजः सकृष्णो गृहमनयत् ॥ ३७ ॥ अथानन्तरं स्वागतं पृष्ट्वा तस्मा अक्रूराय वरासनं निवेद्य दत्त्वा विधिवत् पादौ

प्रक्षाल्यावनिज्य मधुपर्कमेवार्हणं तद्युक्तं वासमर्पयत् ॥३८॥ गां निवेद्य वाचमित्येके तन्न स्वागतस्योक्तत्वात् अतिथये दानपात्राय, न तु सर्वत्र गोदानम् । श्रांतमक्रूर संवाह्य विश्रान्तं कृत्वाऽऽद्दतो विभुर्बहुगुणं घृतशर्करादियुक्तं मेध्यं पवित्रमन्नं श्रद्धयाऽदात ॥३९॥ भुक्तवते तस्मै प्रीत्या परमधर्मवित् रामो गन्धमाल्यैर्मुखवासैः ताम्बूलैः पुनः परां प्रीतिमकृत ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततः सङ्कर्षणोऽपि कृतप्रणतिमक्रूरमुपगुह्य आश्लिष्य महामनाः हृष्टमनाः स्वपाणिना तस्य पाणी अञ्जलिरूपेण संहतौ हस्तौ गृहीत्वा सानुजः कृष्णेन सहितो गृहमनयत् ॥ ३७ ॥ अथ ततः स्वागतं पृष्ट्वा तस्मै अक्रूराय प्रवरं श्रेष्ठमासनं निवेद्य समर्प्य यथाविधि पादौ प्रक्षाल्य मधुपर्कार्हणमाहरत् आनीय समर्पितवान् ॥ ३८ ॥ ततश्च आद्दतः आदरयुक्तो विभुः रामः अतिथये तस्मै अक्रूराय गां समर्प्य श्रान्तं तं संवाह्य पादसंवाहनादिना तच्छ्रममपनीय मेध्यं विशुद्धं बहुगुणोपेतं षड्रसयुक्तमन्नं श्रद्धयोपाहरत् समर्पयामास ॥ ३९ ॥ भुक्तवते तस्मै अक्रूराय रामः प्रीत्या मुखवासैः कर्पूरताम्बूलादिभिः गन्धमाल्यैश्च पुनः परां निर्वृतिं तदागमनजन्यं सुखं मत्वा प्रीतिं व्यधात् उदपादयत् । तत्र हेतुमाह—परमधर्मविदिति। अतिथिपूजनस्य परमधर्मतत्त्वज्ञ इत्यर्थः॥४०॥

अन्वितार्थप्रकाशिका

संकर्षण इति ॥ ततः सङ्कर्षणोऽपि प्रणतं कृतप्रणतिमक्रूरमुपगुह्याश्लिष्य महामनः हृष्टमनाः स्वपाणिना तस्य पाणो अञ्जलिरूपेण संहतौ हस्तौ गृहीत्वा गृहीतमञ्जलाविति तथैव तन्मनोरथात् सानुजः कृष्णेन सहितो गृहमनयत् ॥ ३७ ॥ पृष्ट्वेति ॥ अथ ततः स्वागतं पृष्ट्वा तस्मै अक्रूराय वरं श्रेष्ठमासनं निवेद्य समर्प्य यथाविधि पादौ प्रक्षाल्य मधुमर्कमेवार्हणं मधुपर्के उचितमर्हणं वाऽहरत् आनीय समर्पितवान् ॥ ३८ ॥ निवेद्येति ॥ ततश्च आद्दतः आदरयुक्तो विभुः रामः अतिथये तस्मै अक्रूराय गां समर्प्य गवोपस्थानमेको मङ्गलोपचार इति मधुपर्काङ्गभूतां गामाचारप्राप्तां गामाचारप्राप्तां दर्शयित्वा वा ततश्च अक्रूरेण उत्सृजत यत्तृणान्यत्तु इति तस्या उत्सर्जनेऽनुज्ञाते श्रान्तं तं संवाह्य पादसंवाहनादिना तच्छ्रममपनीय मेध्यं विशुद्धं द्वादशीपारणं विहितम्। "न रात्रौ पारणं कुर्यात्" इति नियमातिक्रमस्तु कृष्णगृहान्नप्राप्तिलोभात् बहुगुणोपेतं षड्रसयुक्तमन्नं श्रद्धयोपाहरत् समर्पयामास ॥ ३९ ॥ तस्मै इति ॥ भुक्तवते कृतभोजनाय तस्मै अक्रूराय परमधर्मतिथिपूजनादि वेत्ति स रामः प्रीत्या मुखवासैः कर्पूरताम्बूलादिभिः गन्धमाल्यैश्च पुनः परां निर्वृतिं तदागमनजन्यं सुखं मत्वा प्रीतिं व्यधात् उदपादयत् । इदं द्वादश्यां वृत्तम् । चतुर्दश्यां कंसमारणात् ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उपगुह्यालिङ्ग्य पाणी अञ्जलिकृतौ हस्तौ गृहीत्वा गृहमनयत् ॥ ३७ ॥ निवेद्य दत्त्वा मधुपर्कयुक्तमर्हणमाहरत दत्तवान ॥ ३८ ॥ गां सुन्दरां वाणीं निवेद्य अस्माकं सर्वं त्वदीयमस्तीत्युक्तः सर्वं ह्य तस्य पादमर्दनं कृत्वा उपाहरत् दत्तवान् ॥३९॥ पुनः प्रीतिव्यधात् कृतवान् ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

संकर्षण इति ॥ ततः संकर्षणश्च बलभद्रोऽपि, प्रणतं कृतप्रणाममक्रूरं, उपगुह्याश्लिष्य, महामनाः प्रीतमनाः प्रसन्नचेताः सन् इत्यर्थः । पाणिना स्वहस्तेन, पाणी अञ्जलिरूपेण संहतावेव हस्तौ, गृहीत्वा, सानुजः सन्नेव, तं गृहम् अनयत् ॥ ३७ ॥ पृष्ट्वेति ॥ अथ ततः, स्वागतं पृष्ट्वा, तस्मै अक्रूराय, प्रवरासनं श्रेष्ठमासनं निवेद्य समर्प्य, विधिवद्यथाविधि, पादौ प्रक्षाल्य, मधुपर्कं उपाहरत् आनीय समर्पितवान् । 'मधुपर्कं च सक्षौद्रं दधि प्रोक्तं मनीषिभिः' इति तान्त्रिकाः ॥ ३८ ॥ निवेद्येति ॥ ततः, आद्दतः आदरत इत्यर्थः । अतिथये अक्रूराय, गां धेनुं च, निवेद्य पयस्विनोयं गौर्भवन्तमेतद्दुग्धमाशयितुं तुभ्यं दत्तेत्युक्त्वेत्यर्थः । यद्वा। गां सुन्दरां वाचं निवेद्य, अस्माकं सर्वं भवदीयमस्तीत्युक्त्वेत्यर्थः । मार्गे रथक्षोभजातान्दोलनेनेति शेषः । श्रान्तं तं, संवाह्य पादसंवाहनादिकं कारयित्वा, मेध्यं शुद्धं, बहुगुणोपेतं षड्रसयुक्तं, अन्नं श्रद्धया, विभुः कृष्णः, उपाहरत् समर्पयामास ॥ ३९ ॥ तस्मा इति ॥ एवं भुक्तवते विहितान्नभोजनाय, तस्मै अक्रूराय, परमधर्मवित् रामः, प्रीत्या मुखवासैः कर्पूरताम्बूलादिभिः, गन्धमाल्यैश्च, पुनः परां प्रोतिं, व्यधात् उदपादयत् ॥ ४० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सङ्कर्षण इति : १०.३८.३७.

गोकुलान्तर्गृहसुखं योगादेवेति तत्क्षमम् । गृहप्रवेश-मुख्योपचारोऽस्मिन् रामकर्तृकः ॥ ६७ ॥

तस्मा इति : १०.३८.४०.

भक्त्या ह्यनन्यगतया यदि मां प्रपन्नस्तस्यातिगौरवमहं प्रविधाय साक्षात् ।
भोग्यं च भोगिविहित प्रवितीर्य संसृत्यध्वश्रमानपि हरे हरिणेत्यबोधि ॥ ६८ ॥

अस्मात्पूर्वमनेहसो मम सदृङ् नैवापरो दुर्भगो यन्नीतो निरयातिशायिनि गृहे कंसस्य कालो वशात् ।
अस्मादुत्तरमप्यनिन्द्यसमयान्नानो भवेद्भाग्यवान् मत्तुल्यो यदहं हरेरपि जगत्पूज्यस्य पूज्योऽभवम् ॥ ६९ ॥
इति सप्रेम सानन्दं कंसाज्ञास्मृतिविक्लवम् । तदह्नि गोकुले लोलमासीदक्रूरगोकुलम् ॥ ७० ॥ (युग्मम्)

कृष्णप्रिया

इसके बाद जब वे परम मनस्वी श्रीबलरामजी के सामने विनीत भाव से खड़े हो गये, तब उन्होंने उनको गले लगा लिया और उनका एक हाथ श्रीकृष्ण ने पकड़ा तथा दूसरा बलरामजी ने दोनों भाई उन्हें घर ले गये ॥ ३७ ॥ घर ले जाकर भगवान् ने उनका बड़ा स्वागत-सत्कार किया । कुशल मङ्गल पूछकर श्रेष्ठ आसन पर बैठाया और विधि पूर्वक उनके पाँव पखार-कर मधुपर्क (शहद् मिला हुआ दही) आदि पूजा की सामग्री भेंट की ॥ ३८ ॥ इसके बाद भगवान् ने अक्रूर जी को एक गाय दी और पैर दबाकर उनकी थकावट दूर की तथा बड़े आदर एवं श्रद्धा से उन्हें पवित्र और अनेक गुणों से युक्त अन्न का भोजन कराया ॥ ३९ ॥ जब वे भोजन कर चुके, तब धर्म के परम मर्मज्ञ भगवान् बलराम जी ने बड़े प्रेम से मुखवास (पान-इलायन आदि) और सुगन्धित माला आदि देकर उन्हें अत्यन्त आनन्दित किया ॥ ४० ॥

[1]पप्रच्छ सत्कृतं नन्दः कथं स्थ निरनुग्रहे । कंसे जीवति दाशार्ह सौनपाला इवावयः ॥ ४१ ॥
योऽवधीत् स्वस्वसुस्तोकान् क्रोशन्त्या असुतृप् खलः । किं नु स्वित्तत्प्रजानां वः कुशलं विमृशामहे ॥४२॥
इत्थं सूनृतया वाचा नन्देन सुसभाजितः । अक्रूरः परिपृष्टेन जहावध्वपरिश्रमम् ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे[2] दशमस्कन्धे[3] ऽक्रूरागमनं नामाष्टात्रिंशोऽध्यायः[4] ॥ ३८ ॥

कर्दमक्षमा

अन्वयः—नन्दः, सत्कृतमक्रूरमाह हे दाशार्ह ! निरनुग्रहे, कंसे, सौनपालाः, अवयः, इव, कथम्, स्थ ॥ ४१ ॥ यः, असुतृप्, खलः, क्रोशन्त्याः, स्वसुः, तोकान्, अवधीत्, तत्, प्रजानाम्, वः, किन्तु, कुशलम्, स्यात्, इति, विमृशामहे ॥ ४२ ॥ इत्थम्, नन्देन, सुनृतया, वाचा, परिपृष्टेन, सुसभाजितः, अक्रूरः, अध्वपरिश्रमम्, जहौ ॥ ४३ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायाः राजसप्रकरणस्य प्रमाणप्रकरणान्तर्गतस्य ३८ तमाध्यायस्यान्वयाः समाप्ताः ॥ ३८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सत्कृतं संमानितम् । निरनुग्रहे निर्दये कथं केन प्रकारेण स्थ जीवथेत्यर्थः । सौनः पशुघाती स एव पालको येषामवीनां मेषाणां त इव तत्तुल्या इत्यर्थः ॥ ४१ ॥ निरनुग्रहतामाह । योऽवधीदिति । तोकान् तोकानि । असुतृप् असूनेव तर्पयति यः अतः खलः । तस्य कंसस्य प्रजानाम् । हे अक्रूर येषां जीवनमात्रमपि दुर्लभं तेषां वः किं नु कुशलं विमृशामहे विचारयाम इति ॥ ४२ ॥ मधुरया वाचा इत्थं सत्कृतः । तथैव वाचा परिपृष्टेन प्रश्नेन । भावे क्तः । अध्वपरिश्रमं संसारश्रमम् ॥ ४३ ॥

इति श्रीमद्भागवते दशमस्कंधे पूर्वार्धे टीकायामष्टात्रिंशोऽध्यायः ॥ ३८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति—जीवनस्यैव सत्तापदार्थत्वात्प्राणधारणानुकूलो व्यापारः सत्तेति तल्लक्षणादिति तात्पर्यम् । सूनाऽयुताधिकपशुहननस्थानं, तत्र तिष्ठतीति सौनः । इत्यथ इति—सौनपाले जीवति यथा मेषजीवनं दुर्घटं तथा भवतामपीत्यर्थः । "अविर्नाथे रवौ मेषे शैले मूषिककम्बले" इति मेदिनी ॥ हे दाशार्हेति कंसस्य यदुकुलद्वेष्टृत्वेन तस्यापि ततो भयं सूचयति । सूनावृत्त्या चरतीति सौनः, सूना पशुमारणं जीवघातस्थानमिति यावत् । एतेन न जाने कस्मिंश्चिद्दिने युष्मानेव हनिष्यतीति भयं सूचितम् ॥ ४१ ॥ यः कंसः । स्वस्वसुर्देवक्याः । 'तोकं पुत्रे सुतायां च' इति मेदिनी । अतोऽसुतर्पकत्वात् । नु स्विदिति निपातद्वयं वितर्के ॥ तोकान् बालापत्यानि, तत्रापि स्वसुः, तत्रापि क्रोशन्त्या इति निर्दयत्वं महादुष्टत्वं चोक्तम् । तच्च केवलमात्मदेहरक्षार्थमेवेत्याह—असुतृबिति । तदपि तेषु मिथ्यादोषारोपादित्याह - खल इति । तस्य प्रजानामधीनानां किं कतमत्कुशलम् । कुशलाभावे निश्चितेऽपि कथं कुशलं पृच्छाम इति भावः ॥ ४२ ॥ 'अध्वा संसारमार्गयोः' इति धरणिः । भगवद्दर्शनमेव संसारपरिश्रमहानौ हेतुर्न तु नन्दप्रश्नादिः । इममेवाध्यायार्थं श्रुतिरप्याह-"देवानां दूतः पुरुधः प्रसूतो नागान्नो वोचतु सर्वतात" इत्यादिः । "सदासुगः पितु मां अस्तु पन्थाः" इति । "उद्रायो अस्था सदनं पुरुक्षोः" इत्यक्रूरमनोरथो वर्णितः । अक्रूरागमनमाह—देवानां कंसं हेतुकामानां वागाद्यभिमानिनामग्न्यादीनामहं दूतोऽस्मि कृष्णं प्रति गन्तुं प्रस्थितोऽस्मि । पुरुधः बहुप्रकारैः प्रसूतो निसृष्टः कंसेन

---

१. "पप्रच्छ" इत्यारभ्य त्रयः श्लोका अधिकाः–विज. । २. पारमहंस्यां संहितायां–प्रा. पा । ३. पूर्वार्द्धे–प्रा. पा. । ४. षट्त्रिंशोऽध्यायः–विज. ।

नोऽस्मान्प्रति अनागान् निष्पापान् सर्वताता सर्वस्य विस्तारकर्ता हरिः वोचतु वदतु। अस्माभिः सह संभाषणं करोतु। तथा पंथा अपि सदा सुगः सुगमः पितुमानन्नवानस्तु मार्गेऽप्यन्तरायो मा भूदित्यर्थः। पुरुक्षोर्बहूनां क्षयकर्तुः सदनं गृहमेश्या प्राश्रुयाम्। उद्राय उत्कटसंपद इति श्रुतिपदानामर्थः॥ अध्वनि मार्गे परितः श्रमः 'न मय्युपैष्यत्यरिबुद्धिमच्युतः' इति पूर्वोक्तरीत्या श्रीव्रजेश्वरादिमनःप्रसादे संदेहात्मको यो मनःखेदस्तमपि जहावित्यर्थः॥ ४३॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धेऽष्टात्रिंशोऽध्यायः॥ ३८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं ज्येष्ठपुत्रेण सत्कृतं सन्तं हे दाशार्हेति कंसस्य यदुकुलद्वेष्टृत्वेन तस्यापि ततो भयं सूचयति शूना हत्या तया चरतीति शौनः पश्वादिघाती॥ ४१॥ स्वस्य स्वसुरिति सम्बन्धस्य नैकट्यं भागिनेयं हननायोग्यत्वञ्च दर्शितं तत्रापि तोकान् बालापत्यानि तत्रापि क्रोशन्त्य इति निर्दयत्वं महादुष्टत्वञ्च तच्च केवलमात्मदेहरक्षार्थमेवेत्याह। असुतृविति। तदपि तेषु निरपराधेषु मिथ्या दोषारोपादित्याह। खल इति। तस्य प्रजानामधीनानामित्यर्थः। नु सम्बोधने स्वित् वितर्के किं कतमत् कुशलम्॥ ४२॥ इत्थमिति तैर्व्याख्यातं तत्राध्वशब्देन संसारवचनमध्वपरिश्रमाभावेन वर्णितत्वात्। यद्वाध्वनि परिश्रममिति न मय्युपैष्यत्यरिबुद्धिमच्युत इति पूर्वोक्तरीत्या श्रीव्रजेश्वरादिमनःप्रसादे तु सन्देहात्मको यो मनःखेद आसीत् तमपि जहावित्यर्थः॥ ४३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां अष्टात्रिंशोऽध्यायः॥ ३८॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं ज्येष्ठपुत्रेण सत्कृतं सन्तम्; हे दाशार्हेति कंसस्य यदुकुलद्वेष्टृत्वेन तस्यापि ततो भयं सूचयति; शौनपालत्वेन मेषाणां शौने जीवति सति यथावश्यमेव विनाशः, तथा कंसे राजनि जीवति युष्माकमपि जीवनरक्षा नास्ति। तत्र चापि दृष्टान्तेन यादवानां बलाद्यभावतो हननस्य सुकरताभिप्रेता। निरनुग्रह इत्यनेन च शौनादपि तस्य दुष्टता व्यर्थमेव, यदुवर्गद्रोहात्, अतोऽसौ हन्तुं योग्य एवेति भावः॥ ४१॥ स्वस्य स्वसुरिति सम्बन्धस्य नैकट्यं भागिनेयहननायोग्यत्वञ्च दर्शितम्, तत्रापि तोकान् बालापत्यानि। पुंस्त्वमार्षम्। तत्रापि क्रोशन्त्या इति निर्दयत्वं महादुष्टत्वञ्च, तच्च केवलमात्मदेहरक्षार्थमेवेत्याह—असुतृविति। तदपि तेषु निरपराधेषु मिथ्यादोषारोपादित्याह—खल इति। तस्य प्रजानामधीनानामित्यर्थः॥ ४२॥ स कंसपीडितबन्धुवर्गकः, श्रीभगवन्नयनार्थागमनापराधेनान्तर्भीतोऽपि वा। पाठान्तरे—सु शोभनं सभाजितः सम्मानितः सन् संसारपरिश्रममपि जहौ, किमुत वर्त्मपरिश्रान्तिमित्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, नन्दस्यैव विशेषणम्, परिपृष्टेनेति—अक्रूरेण कुशलं परिपृष्टो यस्तेनेत्यर्थः; अन्योऽन्यं साधूनां कुशलप्रश्नात्॥ ४३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील–सनातन–गोस्वामिपाद–कृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशम–टिप्पण्यामष्टात्रिंशोऽध्यायः॥ ३८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कथं स्थ तत्प्रजानां वः तद्विषयवासिनां वः॥ ४१–४३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये अष्टात्रिंशोऽध्यायः॥ ३८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो नन्दस्तं कुशलं पप्रच्छ प्रश्नमेवाह। कथमित्यादिना। विमृशामाह इत्यन्तेन निरनुग्रहे प्रत्युत क्रूरे च दाशार्हे कंसे जीवति सति कथङ्केन प्रकारेण स्थ जीवथेत्यर्थः। सौनाः पशुघातिनः पालका येषां ते अवयो मेषा इव तत्तुल्या यूयमित्यर्थः॥४१॥ निरनुग्रहतामेवाह। योऽवधीदिति। स्वसुर्भगिन्याः क्रोशन्त्याः सत्यास्तोकानपत्यानि अवधीत् असुतृप्असून् तर्पयतीति तथा अतः खलः तस्यैवं विधस्य कंसस्य प्रजानां वो युष्माकं कुशलं कीदृशमिति विमृशामहे येषां जीवनमात्रमपि दुर्लभं तेषां वः कुशलं किमिति विचारयामः इत्यर्थः॥ ४२॥ इत्थं नन्देन सूनृतया मधुरया वाचा परिपृष्टः सत्कृतश्चाक्रूरः अध्वश्रम जहौ॥ ४३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् अष्टात्रिंशोऽध्यायः॥ ३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कथं स्थ जीवथेत्यर्थः। शौनः पशुघाती स एव पालको येषां ते ते अवयः मेषा इवेति न जाने कस्मिंश्चन दिने युष्मान् हनिष्यतीत्येवेति भयमिति भावः॥ ४१॥ तोकान् तोकान्यपत्यानि किं कुशलमिति कुशलाभावे निश्चितेऽपि कथं कुशलं पृच्छाम इति भावः। हे इति सम्बोधने॥ ४२॥ सूनृतया मधुरया वाचा यत् परिपृष्टं प्रश्नस्तेन सभाजितः जहौ तत्याज॥ ४३॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। अष्टात्रिंशोऽत्र दशमे सङ्गतः सङ्गतः सताम्॥ ३८॥

गूढार्थदीपिनी

निरनुग्रहे महाक्रूरे। यूयं कथं स्थ जीवथ। सौनः पशुघाती स एव पालको येषां तादृशाः अवयः मेषाः। सूनावृत्या चरतीति सौनः। सूना पशुमारणं जीवघातस्थानमिति यावत्। हे दाशार्ह यदुवंशिन् ॥४१॥ तोकान् बालान् हे पृथक् पदम् ॥४२॥ सुसभाजितः सुसत्कृतः। परिपृष्टेन परिप्रश्नेन भावे क्तः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यामष्टत्रिंशोऽध्यायः ॥ ३८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ततो नन्दः सत्कृतं संमानितं पप्रच्छ प्रश्नमेव दर्शयति। निरनुग्रहे क्रूरे कंसे जीवति सति शौनः पशुघ्नः पालो येषां ते शौनपालाः अवयः मेषाः तत्तुल्या यूयं कथङ्केन प्रकारेण स्थ जीवथेत्यर्थः ॥ ४१ ॥ तोकान् तोकानि अपत्यानि तस्य कंसस्य प्रजानां वो युष्माकं किं नु कुशलं विचारयाम हे अक्रूर ! ॥ ४२ ॥ इत्थं सूनृतया वाचा नन्देन अक्रूरः सुसभाजितः सत्कृतः पृष्टश्च तेनैव सत्कारपूर्वकेन परिपृष्टेन अध्वपरिश्रमं जहौ ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टत्रिंशाध्यायार्थप्रकाशः ॥ ३८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो ग्रामप्रभुणा असम्मानितश्चेत् लौके बालकैः सम्मानितोऽपि न परितुष्टो भवेत् इति सम्भाषणात्मकं सम्मानं नन्दकृतमाह। पप्रच्छेति त्रिभिः। पूर्वमेव सत्कृत इति पूजामकृत्वैव केवलं पप्रच्छ प्रश्नमेवाह। निरनुग्रहे कंसे तस्य समीपे कथं स्थेति सम्भावितोपद्रवस्थानकुशलप्रश्नोऽयं कंसस्य न केऽपि गुणाः सन्तीति जीवनमेवोक्तम् अपकीर्त्या वा जीवति नहि मृतकस्थाने श्मशाने कश्चित्तिष्ठतीति भावः। दाशार्हेति सम्बोधनं स्वतो वंशतश्च महत्त्वेन स्तोत्रार्थं सर्वत्र स्थितौ दोषाः सन्तीति जन्मभूमित्वात् स्थीयत इति चेत्तत्राह। सौनपाला इति। सूनापरः सौनः नित्यशमिता मांसविक्रयी स एव पालो येषां ते च अवयः गतानुगतिकाः ते यथा अविचार्य तिष्ठन्ति तथा स्थयित इति स्थितिरनुचितेति भावः ॥४१॥ कंसस्य निर्दयत्वमाह। योऽवधीदिति। भागिनेयाः अतिमान्याः तत्रापि बालकाः तत्रापि क्रोशन्त्या कन्यया सह वा। ननु क्वचित् कर्मविशेषे पुत्रादयोऽपि हन्यन्त इति किमाश्चर्यं भागिनेयहनने तत्राह। असुतृप् केवलं प्राणपोषकः तेऽवमारितेषु स्वप्राणा गमिष्यन्तीति तदपि न सर्वसम्मतया नापि क्रियादिना किं तु खलः दुष्टः यत्रैतादृशः प्रभुः तत्र प्रजानां तदधीनानां वो युष्माकं कुशलं किं विमृशामहे किं विचारयामः। अतः सन्देहे प्रश्नः। अत्र तु विपरीतभाव एव भिन्नतया कुशलप्रश्ने बन्धुविरोधी दुष्टोऽयमक्रूर इत्युक्तं भवति अतः कुशलसम्भावनायामपि तथा नोक्तवान् ॥ ४२ ॥ एतादृशं नन्दवाक्यमुक्त्वा उपसंहरति। इत्थमिति। सूनृतया अत्यन्तं सत्यरूपया कोमलया सुखदया च वाचा नन्देन सुष्ठु सभाजितः पूजितः अक्रूरः कायिकवाचिकमानसश्रमान् जहौ सुतरां पृष्ट इति अन्याभिनिवेशेन स्मृत्या प्राप्तमपि अध्वपरिश्रमं जहावित्यर्थः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां
पञ्चत्रिंशाध्यायविवरणम् ॥ ३५-३८ ॥

श्रीसुबोधिनी-सारः

सत्कृतमक्रूरं नन्दः पप्रच्छ। निरनुग्रहे निर्दये कंसे जीवति सति कथं केन प्रकारेण यूयं स्थ जीवथो वर्त्तध्वं वा। हे दाशार्ह सौनः पशुघाती सूना प्रधानत्वात् स एव पालो रक्षको यासां ता अवय एडका इव ॥ ४१ ॥ क्रोशन्त्या विलपन्त्याः स्वस्य स्वसुर्भगिन्यास्तोकान् बालकान् असुतृप् प्राणपोषको यः खलः पापः कंसोऽवधीत् तस्य प्रजानां वो युष्माकं किं नु कुशलं मंगलं विचारयामः ॥ ४२ ॥ एवं सूनृतया वाचा नन्देन सुसत्कृतः परिपृष्टेन प्रश्नेनाक्रूरोऽध्वपरिश्रमं मार्गदुःखं तत्याज ॥ ४३ ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायामष्टत्रिंशोऽध्यायः ॥ ३८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततः सत्कृतमक्रूरं नन्दः पप्रच्छ। तत्प्रश्नमेवाह—'कथम्' इत्यादिपादोनाभ्यां-द्वाभ्याम्। वंशस्य प्रशस्तत्वात् तन्नाम्ना प्रशंसां द्योतयन् सम्बोधयति दाशार्हेति। निरनुग्रहे अतिक्रूरे कंसे जीवति सति यूयं कथं केन प्रकारेण स्थ जीवथेत्यर्थः। तत्र दृष्टान्तमाह—सौनपाला इवेति। सूना हिंसा तत्परः सौनः पशुघाती मांसविक्रयी स एव पालको येषामवीनां मेषाणां ते इव तत्तुल्या यूयमित्यर्थः। यथा तन्निकटे तेषां जीवनं दुर्घटं तथा कंसनिकटे युष्माकं जीवनमपि दुर्लभमित्याशयः ॥ ४१ ॥ ननु 'कुशलप्रश्नं विहाय कथं जीवनप्रकारप्रश्नः कृतः ?' इत्यपेक्षायां तस्य निरनुग्रहत्वमेव स्पष्टयन्नुत्तरमाह—य इति। यः खलः परोद्वेजकः कंसः क्रोशन्त्या रुदन्त्याः स्वस्य स्वसुर्भगिन्यास्तोकान् अपत्यानि अवधीत् तस्य प्रजानां वो युष्माकं तावज्जीवनमेव दुर्लभम्, कुशलं सुखं तु किं स्वित् विमृशामहे विचारयामेत्यन्वयः। खलत्वे हेतुमाह—असुतृप् इति। असून् प्राणानेव तर्पयतीति तथा सः ॥ ४२ ॥ प्रथमं कुशलं परिपृष्टेन नन्देनेत्थं सूनृतया मधुरया वाचा पृष्टः सुसभाजितः सत्कृतश्चाक्रूरः अध्वपरिश्रमं जहावित्यन्वय ॥ ४३ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येह भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने। अष्टत्रिंशा गतोऽक्रूरागमनादिनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

पप्रच्छेति ॥ सत्कृतमक्रूरं नन्दः पप्रच्छ । हे दाशार्ह ! निरनुग्रहे अतिक्रूरे कंसे जीवति सति सौनपालाः सौनः पशुघाती पालो येषां तादृशा अवयः मेषा इव यूयं कथं केन प्रकारेण स्थ जीवथ । यथा सौनसन्निधाववीनां जीवनं दुर्घटं तथा कंसनिकटे भवताम् । अतो न जाने कस्मिंश्चन दिने युष्मान् स हन्यात् इति भयम् ॥ ४१ ॥ य इति ॥ असुतृप् स्वप्राणमात्रतर्पकः यः खलः कंसः क्रोशन्त्या रुदत्याः स्वस्य स्वसुर्भगिन्यास्तोकान् तोकानि अपत्यानि अवधीत् । तस्य प्रजानां वो युष्माकं तावज्जीवनमेव दुर्लभं कुशलं सुखं तु किंस्विद्विमृशामहे विचारयामः । तङ्गार्षः हे इति संबोधने पृथक्पदं वा ॥ ४२ ॥ इत्थमिति ॥ प्रथमं कुशलं परिपृष्टेन नन्देनेत्थं सूनृतया मधुरया वाचा पृष्टः सुसभाजितः सत्कृतश्चाक्रूरः अध्वपरिश्रमं जहौ ॥ ४३ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमस्याष्टत्रिंशे व्यधादिमाम् ॥

इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायामष्टत्रिंशोऽध्यायः ॥ ३८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सत्कृतं सम्मानितं हे दाशार्ह अक्रूर निरनुग्रहे निर्दये कथं केन प्रकारेण यूयंस्थ जीवथेत्यर्थः यथासूनाहिंसातस्याः कर्त्ता-सौनः अत्रशेष इत्यनेनाणपशुनाशक इत्यर्थः स एव पालको येषां ते अवयो मेषास्तत्तुल्याः यूयं भवथः ॥ ४१ ॥ निर्दयत्वमाह-क्रोशत्याः स्वस्वसुःस्वभगिन्याः स्तोकान् अपत्यानि योऽवधीत् अतः असुतृप् अतः खलः तस्य कंसस्य प्रजानां वो युष्माकं किं कुशलं विमृशामहे विचारयामः ॥ ४२ ॥ सुसभाजितः संमानितः परिपृष्टेन प्रश्नेन मार्गश्रमं जहौतत्त्याज ॥ ४३ ॥

इति श्रीशुद्धकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धे व्याख्याने अक्रूरव्रजागमनामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पप्रच्छेति ॥ ततः नन्दः, सत्कृतं रामकृष्णाभ्यां सम्मानितमक्रूरं, पप्रच्छ । कुशलमिति शेषः । प्रश्नमेवाह कथमित्यादिना विमृशामह इत्यन्तेन । निरनुग्रहे क्रूरे, दाशार्हे कंसे, पाठान्तरे हे अक्रूर, जीवति सति, सौनाः पशुघातिनः पालाः पालका येषां ते, अवयः अजाः इव, तत्तुल्या यूयमित्यर्थः । कथं केन प्रकारेण, स्थ जीवथ ॥ ४१ ॥ निरनुग्रहतामेवाह । योऽवधीदिति । असून् प्राणान् तर्पयतीत्यसुतृप् तथा खलः, योऽयं कंसः, क्रोशन्त्याः करुणं यथा तथा रुदन्त्या अपि, स्वस्वसुः स्वभगिन्याः तोकानपत्यानि, अवधीत् । तस्य प्रजास्तासां, वो युष्माकं, कुशलं, किं नु स्वित् किं नु वा, विमृशामहे विचारयामः पृच्छाम इत्यर्थः । येषां जीवनमात्रमपि दुर्लभं तेषां वः कुशलं किमिति विचारयाम इत्यर्थः ॥ ४२ ॥ इत्यमिति । इत्थं, नन्देन सूनृतया मधुरया, वाचा सुसभाजितः पृष्टः सत्कृतश्चेत्यर्थः । अक्रूरः परिपृष्टेन नन्दविहितकुशलप्रश्नश्रवणमात्रेणेत्यर्थः । अध्वपरिश्रमं मार्गजोद्यातजश्रमं, जहौ ॥ ४३ ॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तम श्रीसहजानन्दस्वामिसुत श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे अक्रूरागमनं नाम अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पप्रच्छ सत्कृतं नन्द इति : १०.३८.४१.

लाभोऽक्रूर स एष एव नितरां प्राक्पुण्यपाकोऽप्यसावेतद्भाविसमीप्सितामलफलं चिह्नं प्रसादस्य च ।
यत्कंसेन दुरात्मना निजगृहे यूयं विपक्षाश्रिता अप्यद्यावधि संविधाय करुणां प्राणार्पणै रक्षिताः ॥ ७१ ॥

इत्थमिति : १०.३८.४३.

यस्मात् सनन्दकुशलप्रश्नादध्वश्रमं जहौ । तत्क्षेमप्रश्नसदृशं नान्यत् सुखकरं भुवि ॥ ७२ ॥
भगवद्गोकुले यस्य लग्नं गोकुलमादरात् । को नामाध्वश्रमस्तस्य सर्वतः सुखशालिनः ॥ ७३ ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

कृष्णप्रिया

इस प्रकार सत्कार हो चुकने पर उन्हें नन्दरायजी ने उनके पास आकर पूछा—‘अक्रूरजी’ ! आपलोग निर्दयी कंस के जीते-जी किस प्रकार अपने दिन काटते हैं ? अरे ! उसके रहते आपलोगों की वही दशा है, जो कसाई द्वारा पाली हुई भेड़ों की होती है ॥ ४१ ॥ जिस इन्द्रियाराम पापी ने अपनी बिलखती हुई बहन के नन्हें-नन्हें बच्चों को मार डाला। आपलोग उसकी प्रजा हैं । फिर आप सुखी हैं, यह अनुमान तो हम कर ही कैसे सकते हैं ॥ ४२ ॥ अक्रूरजी ने नन्द बाबा से पहले ही कुशल मङ्गल पूछ लिया था । जब इस प्रकार नन्द बाबा ने मधुर वाणी से अक्रूरजी से कुशल मङ्गल पूछा और उनका सम्मान किया तब अक्रूरजी के शरीर में रास्ता चलने की जो कुछ थकावट थी, वह सब दूर हो गयी ॥ ४३ ॥

श्रीमद्भागवत दशम स्कन्ध निरोधलीला के अन्तर्गत राजसलीला प्रमाणप्रकरण का ऐश्वर्य निरूपक ३८ वाँ अध्याय समाप्त ॥ ३८ ॥

* * *

अथैकोनचत्वारिंशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	वसंत	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं श्लो.	अ.
५७	४४	११	२	-	२०६३	२९	३७	२१२९	६६।।	१

श्रीशुक उवाच

सुखोपविष्टः पर्यङ्के रामकृष्णोरुमानितः[1] । लेभे मनोरथान् सर्वान् पथि यान् स चकार ह ॥ १ ॥
किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने । तथापि तत्परा राजन्न[2] हि वाञ्छन्ति किञ्चन ॥ २ ॥
सायन्तनाशनं कृत्वा भगवान् देवकीसुतः । सुहृत्सु वृत्तं[3] कंसस्य पप्रच्छान्यच्चिकीर्षितम् ॥ ३ ॥

श्रीभगवानुवाच

[4]तात सौम्यागतः कच्चित् स्वागतं भद्रमस्तु[5] वः । अपि स्वज्ञातिबन्धूनामनमीवमनामयम् ॥ ४ ॥

कर्वमक्षमा

अन्वयः—श्रीशुक उवाच—रामकृष्णोरुमानितः, पर्यङ्के, सुखोपविष्टः, सः (अक्रूरः) यान्, मनोरथान्, चकार, ह, (तान्) सर्वान्, मनोरथान्, लेभे ।। १ ।। श्रीनिकेतने, भगवति, प्रसन्ने, किम्, अलभ्यम्? राजन्? तथापि, तत्पराः, किञ्चन्, न, हि, वाञ्छन्ति ।।२।। देवकीसुतः, भगवान्, (कृष्णः) सायन्तनाशनम्, कृत्वा, कंसस्य, सुहृत्सु, अन्यत्, चिकीर्षितम्, वृत्तम्, पप्रच्छ ।। ३ ।। श्रीभगवान् उवाच—तात? सौम्य? आगतः? स्वागतम्, कच्चित्, वः, भद्रम्, अस्तु, स्वज्ञातिबन्धूनाम्, अपि? अनभीवम्, कच्चित्? अनामयम्, कच्चित् ।। ४ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

नवत्रिंशे पुरीं गच्छत्यच्युते गोपिकोक्तयः । अक्रूरेणाथ कालिंद्यां विष्णुलोकस्य दर्शनम् ।। १ ।।

भक्तानां मनोरथाः सत्या भवन्तीति द्योतयन्नाह । सुखोपविष्ट इति । रामकृष्णाभ्यामुरु अधिकं मानितः ।। १–३ ।। हे तात हे सौम्य स्वागतं यथा तथा आगताः । स्वज्ञातिबन्धूनां स्वे सुहृदः ज्ञातयः सपिण्डाः बन्धवोऽसपिण्डाः संबंधिनः तेषामपि कच्चित् किमनमीवमपापमदुःखं सुखमिति यावत् । अनामयमारोग्यम् ।। ४ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ गोपिकोक्तेरनन्तरम् । दर्शनं कृतमिति शेषः (१) । 'सत्यं मे भक्तर्चिंतितम्' इत्याह—भक्तानामिति । मनोरथान् 'गोचारणायानुचरद्वने' इत्यारभ्य 'किं चाग्रजो मावनतम्' इत्यन्तान् यान् । सोऽक्रूरः । चकार दध्यौ, कृञत्र ध्याने करणार्थत्वात् । तदुक्तं यादवेन—"करणं कारणे काले साधनेऽनुव्रतादिषु । स्पष्टाद्युच्चारणाभेदे ध्यानपद्मासनादिषु ।।" इति ।। लेभे मनोरथान्सर्वान् इति केषांचित्प्राप्तत्वेन वर्णितत्वात् । केषांचिदुपलक्षितत्वेन सूचितत्वात् । केषाञ्चित्प्राप्तव्यत्वेन निश्चिततत्वादिति ।। १ ।। ननु मुख्यमनोरथो मोक्षः स त्वनेन नो लब्धः संसाराऽनिवृत्तेरित्यत्राह—किमिति तत्परा मुख्यभागवतास्तत्प्रसादमन्तरेणान्यन्नाकांक्षन्तीति भावः । नन्वन्यान्साष्टर्यादीनमिति कथं न प्रार्थितवाँस्तत्राह—किमलभ्यमिति । तत्परास्तद्भक्त्येकनिष्ठाः किञ्चन भक्तिव्यतिरिक्तम् । राजन्निति—श्रीकृष्णभक्त्यां देदीप्यमानत्वात्तुभ्यमिदं श्रावयामीति भावः २ ।। सायन्तनाशनं रात्रिभोजनम् । "सायंप्रातर्द्विजातीनां भोजनं श्रुतिचोदितम्" इति याज्ञवल्क्योक्तेः । सुहृत्सु वसुदेवादिषु । वृत्तं वर्तनम् 'वृत्तं वर्तनच्छन्दसोः' इति धरणिः ।। सायंतनाशनं कृत्वेति द्वादश्यामपि द्विर्भोजनमुपनयनात्प्राग्न विरुद्धमिति धर्मशास्त्रात् । देवकीसुत इति—तद्भावमात्मनो व्यञ्जयन्नित्यर्थः । अत एव सुहृत्सु यादवेषु वृत्तिं वर्तमानां चेष्टां तथान्यच्चिकीर्षितमध्यवटीयमाना भाविनी चेष्टा तामपि पप्रच्छ—'वृत्तम्' इति पाठेऽतीतां चेष्टां, यद्वान्यत्तन्मारणलक्षणं चिकीर्षितं स्वयं कर्तुमिष्टमित्यर्थः ।। ३ ।। स्वागतं शुभागमनम् । सपिंडा । सप्तपुरुषावधयः । अनमीवमस्तीति शेषः ।। हे तातेति पितृव्यतया पितृतुल्यत्वम् । हे सौम्येति साधुतया तत्रापि गौरवातिशयो व्यञ्जितः । अत एवागता इति व इति च । क्वचिदेकवचनान्तपाठोऽपि । भद्रं क्षेममस्तु युष्माकमित्याशीः प्रश्ने सदा-

---

१. कृष्णानुमोदिताः–विज. । २. नेव–विज. । ३. वृत्ति–वीर. विज. । ४. तात सौम्यागतः–इतश्चत्वारोऽधिकाः विज. । ५. भद्रमस्तु ते–इति कस्यचित् ।

चारानुरोधात् । यद्वा—दैन्यमागतस्य तस्य समाश्वासनार्थम् । अनमीवमनामयमिति । द्वाभ्यां क्रमेण सामान्यविशेषदुःखाभावप्रश्नः । स्वागतमिति—किं सुखेनागतमन्यथा वेति संदेहव्याप्तप्रश्नस्तु अतर्किततदागमनादेव ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

या सद्यो लीळयेल्लीला लोकं शोकमहार्णवे । तद्व्यापारोऽपि यः स्वैरमीरयेन्मां स मे गतिः ॥

सुखेत्ययमर्थः ततः श्रीनन्दे तमानन्द्य नक्तं कृत्याय स्वान्तर्गृहं प्रविष्टे सति श्रीरामकृष्णनिदेशेन सेवकपर्यर्पितपर्यङ्के सुखमसङ्कोचमुपविष्टः पुनः श्रीरामकृष्णाभ्यां ताम्बूलगन्धपुष्पजलव्यजनसेवकादि समाधानेनोरुमानितश्च ततः सर्वान् मनोरथान् लेभे तयोरपि स्वान्तर्गृहं प्रविष्टयोः सम्भ्रमे गते सति क्रमेण तत्तत्प्राप्तिभावनया पूर्णमात्मानं मेने तेषामनवच्छेदं वारयति । पथीति ह स्फुटम् एकान्तभक्तियोग्यत्वेन प्रसिद्धं यथा स्यात्तथा इत्यर्थः । तदुक्तं देहं भृतामित्यादि तत्र दर्शनस्य सिद्धिः ददर्श कृष्णमित्यादिना दर्शिता नमस्कारस्य रथात्तूर्णमिति तत्रैव हस्तपङ्कजधारणस्य कृपेक्षणस्य च ज्ञेया कृष्णकर्तृकतदालिङ्गनस्य भगवांस्तदिति तत्कर्तृकतातेति सम्बोधनस्य त्वग्रे भाविताया निश्चितत्वात् श्रीसङ्कर्षणेन कंसकृते स्वबन्धुवर्गदुःखप्रश्नस्य च तेनाञ्जलिग्रहणपूर्वकगृहनयनाद्यातिथ्यकरणस्य तु सङ्कर्षणश्चेति ॥ १ ॥ नन्वन्यान् धर्मार्थादिमनोरथान् कथं न चकार तत्राह । किमिति । भगवत्त्वादेव श्रियः प्रेयसीरूपाया हृदि रेखारूपायाश्च निकेतने आश्रये किञ्चनेति पूर्वमुद्दिष्टं भगवत्प्रसादमयतत्तत्प्रकारं विना यत्किञ्चिदन्यदित्यर्थः । देहं भृतामियानर्थ इत्यादेः हे राजन्निति त्वयेदं ज्ञायत एवेति भावः ॥ २ ॥ सायन्तनाशनं कृत्वेति । द्वादश्यामपि द्विर्भोजनमुपानयात् पूर्वं सम्यग्धर्मनियम इति न मर्यादाविरुद्धम् । देवकीसुत इति । तद्भावमात्मनो व्यञ्जयन्नित्यर्थः । अत एव सुहृत्सु यादवेषु वृत्ति वर्तमानां चेष्टां वृत्तमिति पाठे त्वतीतां तथान्यद्यच्चिकीर्षितम अध्यवसीयमाना भाविनी चेष्टा तदपि पप्रच्छ । यद्वा पाठद्वयेऽपि चेष्टामात्रं यतोऽन्यत्तन्मारणलक्षं चिकीर्षितं स्वयं कर्त्तुमिष्टमित्यर्थः । ततश्च तद्दोषस्थापनायैव तत्प्रश्न इति भावः । अत्र यद्यपि तदग्रजकर्तृत्वेनैव तेन तत्प्रश्नः पूर्वम्भावितस्तथापि निजानुजाङ्गीकारापेक्षया क्षणं तूष्णीं स्थितस्याग्रजस्य प्रतिनिधीयमानानुजवचनमग्रजस्यैव प्रतिपन्नम् ।।३।। हे तातेति पितृव्यतया पितृतुल्यत्वं हे सौम्येति साधुतया तत्रापि गौरवातिशयो व्यञ्जितः । अत एवागता इति बहुत्वं व इति च आगत इत्येकवचनान्तपाठो बहुत्र भद्रं क्षेममस्तु युष्माकमित्याशीःप्रश्ने सदाचारानुसारात् किम्वा दैन्येनागतस्य तस्य समाश्वासनार्थम् अनमीव अनामयमिति द्वाभ्यां क्रमेण सामान्यविशेषदुःखाभावप्रश्नः अन्यत्तैः । यद्वा आगता इत्यसम्भाव्यस्य तत्र तदागमनस्य सिद्ध्या तदनुमोदनेन तं सन्तोषयति एतदेवाग्रेऽभव्यञ्जयिष्यति दिष्ट्येत्यत्र कच्चित् स्वागतं किं सुखेनागतमिति प्रश्नः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

या लीला मज्जयेत् सद्यो जगच्छोकार्णवेऽखिलम् । तद्व्याख्यानेऽपि योऽयं मां प्रेरयेत् सोऽत्र मे गतिः ॥

पर्य्यंके सुखमुपविष्ट इत्यातिथ्यपरिपूर्त्तिर्दर्शिता, तावत्पर्यन्तमेवातिथेः सम्मान्यत्वात्, रामकृष्णाभ्यामुरुमानितः सन् लेभ इति सर्व्वमनोरथलब्धेस्तद्द्वयकृतपरिरम्भणाद्युरुसम्माननरूपत्वात्, उरु-शब्देन कृतमनोरथेभ्योऽप्यधिकप्राप्तिरुक्ता, सा चोक्तैव (भा० १०।३८।३६)—'भगवांस्तमभिप्रेत्य' इत्यादिना, वक्ष्यते च (४र्थ-श्लो०) 'तात' इत्यादिना, तथा वाञ्छितस्य श्रीबलदेवप्रष्टव्यस्य श्रीभगवतैव स्वयं पृष्टत्वात् । यद्वा, सुखोपवेशानन्तरं पुनरप्यधिकं वस्त्रालङ्कारादिना सम्माननं ताभ्यां कृतमिति बोद्धव्यम्, अन्यत् समानम् । रामस्यादौ निर्देश आतिथ्येनोरुमानने तस्यैवात्र प्राधान्यात् । ह हर्षे, स्फुटं लेभे इति वा ॥ १ ॥ गोकुलाच्छ्रीकृष्णनयनार्थमागतस्याक्रूरस्य दुर्घटमनोरथानां परिपूर्त्त्या स्वस्य व्रजजनतयाभिमानात्तस्मिन् जातेन मात्सर्य्येणैवाह,- किमिति । श्रियोऽखिलविभूतीनामीश्वर्य्या महालक्ष्म्या निकेतने स्थान इति सर्व्वविभूतिनिलयत्वम्, सद्गुणगणमयत्वं चोक्तम्, तत्रापि भगवति निजाशेषैश्वर्य्यप्रकटके; तत्रापि प्रसन्ने सति किं कतमत् त्रैगुण्यविषयं सिद्ध्यादिकं तृतीयं वा मोक्षसुखं पञ्चमं भक्तिसुखं वा अलभ्यं भवति ? अपि तु सर्व्वमेव सुलभं स्यादित्यर्थः । अतो 'गृहं प्रवेश्याप्तसमस्तसत्कृतम्' इति यत्तेन वाञ्छितम्, तत्सिद्धौ किमाश्चर्य्यमिति भावः । तत्पराः श्रीभगवदेकनिष्ठाः किञ्चित्तादृशं भगवद्व्यतिरिक्तं नाभितो वाञ्छन्ति, सकामत्वेन तथा विविधेच्छया स्वातन्त्र्येण च तत्परत्वहानेः । अभि-शब्दस्यावाञ्छनसम्यक्त्वे तात्पर्य्यम् । यद्वा, 'अभि' अभयं यथा स्यात् तत्परताहानिभयान्नेव वाञ्छन्तीत्यर्थः । 'न हि' इति पाठे हि निश्चितम्, हे राजन्निति त्वयेदं ज्ञायत एवेति भावः । अथवा नन्वक्रूरेण यदुकुलद्रोग्धृसुदुष्टकंसहनने कथं मनोरथो न कृतः, सोऽपि तादानीमेव सिध्येदित्याशंक्याह—किमिति । श्रियो वक्षसा निकेतन इति परमं प्रियजनवश्यत्वमुक्तम् । अतो यद्यपि किञ्चिदप्यलभ्यं नास्ति, सोऽपि तत्प्रभावेण सद्य एव हतः स्यात्, तथाप्येकान्तिनः किञ्चिदन्यन्न वाञ्छन्ति, किन्तु तमेवाभिवाञ्छन्तीत्यर्थः । अतो भगवद्दर्शनादीनामपि तत्परतायामेव पर्य्यवसानात्तान्येव तेन वाञ्छितानि, न त्वन्यदिति भावः । यद्वा, अवाञ्छ्यमानमपि दुर्लभमपि परमार्थसुखं तत्परत्वाभिज्ञेन श्रीभगवतैव देयमित्यभिवाञ्छन्ति । यद्वा, ननु श्रीनन्दकिशोरालिंगनादिकं श्रियोऽपि सुदुर्लभं कथमक्रूरस्य सिद्धम् ? तत्राह – किमिति, श्रियः सर्व्वशोभायाः स्थाने, किंवा बहुलतप आदिना श्रिया लक्ष्म्याप्याश्रित इति परमसेव्यत्वमुक्तम् । तथापि प्रसन्ने सति, अतस्ततपरा

अपि तथा तेनोक्तेन प्रकारेण; किञ्च, किमपि न न वाञ्छन्ति, द्वयोर्नञोः प्रकृतयर्थगमकत्वाद्वाञ्छन्त्येवेत्यर्थः, तत्परत्वेनैव तादृशमनोरथानामुत्पत्तेः सम्पत्तेश्चेति भावः ॥ २ ॥ सायन्तनाशनं कृत्वेति, द्वादश्यामपि द्विर्भोजनं साक्षाद्भगवत्त्वेन तथा लौकिकव्यवहारापेक्षायामपि ब्रह्मचर्य्यानन्तरमेव धर्म्माचरणाधिकारेणोपवासस्याप्यभावात्; यच्चोक्तम्—'अष्टवर्षाधिको बालः' इत्यादि, तत्र सर्व्वधर्म्मे ब्राह्मणस्यैव प्राधान्येन तमधिकृत्यैव तस्य ह्यष्टमवर्ष एवोपनयनविधानात्। सुहृत्सु श्रीवसुदेवादियादववर्गेषु वृत्तिं वर्त्तनम्, कंसः कथं वर्त्ततेत्येवं पप्रच्छ, यतो देवकीसुतस्तद्गर्भाज्जातः, विशेषतो भगवान् भक्तवात्सल्यादिप्रकटनपर इत्यर्थः किञ्च, सुहृत्स्वेव सामान्यतो वा तस्य चिकीर्षितं सम्प्रति कर्त्तुमिष्टमन्यदपि पप्रच्छ, मातुः स्नेहेन भक्तवात्सल्येन च कंसजिघांसया तद्दोषख्यापनार्थं तत्तत्प्रश्न इति भावः। यद्वा, भगवान् सर्व्वज्ञोऽपि पप्रच्छ। कुतः? देवकीसुतः; मनुष्यलीलां दर्शयन्नित्यर्थः ॥३॥ हे तातेति पितृव्यतया गौरवेण सम्बोधनम्, तेन च ज्ञातित्वम्; हे सौम्येति च साधुत्वं बोधयति। इतोऽस्मन्नयनेऽक्रूरकर्म्मणि निमित्ते तवागमनमयुक्तमिति गूढो भावः। 'आगताः' इति तथा 'वः' इति च बहुत्वं गौरवादेव, भद्रं क्षेममस्तु वो युष्माकमित्याशीः, प्रश्ने सदाचारानुसारात् किंवा दैन्येनागतस्य तस्य समाश्वासनार्थम्। अनमीवमनामयमिति द्वाभ्यां क्रमेण बाह्यान्तरदुःखाभावप्रश्नः, अन्यत्तैर्व्याख्यातमेव। आगत इत्यसम्भाव्यस्य तत्र तदागमनस्य सिद्ध्या तदनुमोदनेन तं सन्तोषयति। एतदेवाग्रे व्यञ्जयिष्यति—दिष्ट्येति। अतएव कच्चित् स्वागतम्, किं सुखेनागतमिति प्रश्नः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उरुमानितः कृतबहुमानः ॥ १–३ ॥ अनमीवम् अशुभरहितम् ॥ ४–५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ समवाप्तमनोरथेनाक्रूरेण विज्ञापितकंसचिकीर्षस्य भगवतः प्रस्थानसमुद्योगसमवलोकनभविष्यद्भगवद्विश्लेषजतापतप्तगोपीजनमिथः सम्भाषणं मध्ये मार्गमक्रूराय स्वासाधारणदिव्यविग्रहप्रदर्शनप्रकारं चानुवर्णयत्येकोनचत्वारिंशेन। सुखोपविष्ट इत्यादिना। भक्तानां मनोरथाः सत्या भवन्तीति दर्शयन्नाह। सुखोपविष्ट इति। रामकृष्णाभ्यामुर्व्वधिकं सम्मानितः पर्यङ्के सुखं यथा तथोपविष्टोऽक्रूरः पथि यान् मनोरथान् चकार तान् सर्वान् लेभे प्राप ॥ १ ॥ तथाहि भगवति षाड्गुण्यपूर्णे श्रीनिकेतने श्रीनिवासे प्रसन्ने सति किमलभ्यं सर्वं सुलभमेवेत्यर्थः। तर्ह्यैश्वर्य्यकैवल्यभगवत्प्राप्त्याद्यन्यतमं स्वसमीहितं किमिति न वृण्वते इत्यत्राह तथापि यद्यपि सर्वसुलभमेव। तथापि हे राजन्! तत्परा भगवत्पराः किञ्चिदपि न वाञ्छन्ति हि तदनुभवापेक्षया सर्वस्य तुच्छत्वादिति भावः ॥ २ ॥ तदा भगवान् देवकीसुतः सायंकालगतभोजनं कृत्वा स्वसुहृत्सु वसुदेवादिषु कंसस्य वृत्तिमन्यच्च तस्य चिकीर्षितं पप्रच्छ ॥ ३ ॥ प्रश्नमेवाह। तातेत्यादिभिश्चतुर्भिः। हे तात हे सौम्य! आगतस्त्वं कच्चित् इदमस्मद्दिष्टं स्वागतं निर्विघ्नमागमनं जातं किल वो युष्माकं भद्रमस्तु सर्वत्र सर्वदा कुशलमेव भूयात् स्वेषामात्मीयानां ज्ञातीनां सपिण्डानां बन्धूनामसपिण्डानां सपिण्डानाञ्च अनमीवमशुभरहितम् अनामयमारोग्यमपि स्विदस्ति कच्चित् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गोचारणायेत्यारभ्य किञ्चाग्रज इत्यन्तेन ग्रन्थेन पथि यान्मनोरथान् चकार दध्यौ ताल्लेभे इत्यन्वयः "करणं कारणे काले साधनेऽनुव्रतादिषु। स्पष्टाद्युच्चारणे भेदे ध्यानपद्मासनादिष्वि"ति यादवः ॥ १ ॥ ननु मुख्यमनोरथो मोक्षः सोऽनेन न लब्धः संसारानिवृत्तेरित्यत्राह। किमलभ्यमिति। तत्परा मुख्यभागवतास्तत्प्रसादमन्तरेणान्यताकाङ्क्षन्त इति भावः ॥ २ ॥

सायन्तनाशनं रात्रिभोजनम्। सायं प्रातर्द्विजातीनां भोजनं श्रुतिचोदितमिति ॥

याज्ञवल्क्यः सुहृत्सु वसुदेवादिषु वृत्तिं वर्तनम् आजीवलक्षणं वृत्तिर्वर्थाजीवयोश्चेति च ॥ ३–७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

लेभे मनोरथान् सर्वानिति केषाञ्चित् प्राप्तत्वेन वर्णितत्वात् केषाञ्चिदुपलक्षितत्वेन सूचितत्वात् केषाञ्चित् प्राप्तव्यत्वेन निश्चितत्वादिति। नन्वन्यान् सार्ष्ट्यादीनपि कथं न प्रार्थितवान् तत्राह। किमलभ्यमिति। तत्परा तद्भक्त्येकनिष्ठाः किञ्चन भक्तिव्यतिरिक्तम् ॥ १–१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नवत्रिंशे पुरी याति प्रिये गोप्योऽतिविह्वलाः। विलेपुर्यमुनामग्नोऽक्रूरो वैकुण्ठमैक्षत ॥

ननु कथं क्रूरेण केवलं कृष्णदर्शनस्पर्शनादावेव मनोरथाः कृताः नतु पारमेष्ठ्यसायुज्यादौ तत्राह। किमलभ्यमिति ॥ १–३ ॥ स्वे सुहृदः ज्ञातयः सपिण्डाः बन्धवोऽसपिण्डास्तेषां किमनमीवं पापाभावः। अनामयमारोग्यं च ॥ ४ ॥

गूढार्थदीपिनी

नवत्रिंशे हरेर्याने श्रुत्वा गोप्योऽतिविह्वलाः । करुणाक्रन्दनं चक्रुरक्रूरायात्मदर्शनम् ॥ १ ॥

उरु बहु । हहर्ष ॥ १ ॥ किञ्चन भक्तव्यतिरिक्तम् । वृत्तं व्यवहारम् । अन्यदपि यत् तच्च ॥ ३ ॥ स्वे सुहृदः ज्ञातयः सपिण्डाः बन्धवोऽसपिण्डाः । अपि किम् अनमीवं कुशलम् अनामयम् आरोग्यं चास्ति ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एकोनचत्वारिंशे भगवदक्रूरसम्वादं भगवद्गमनसमुद्योगं भगद्विरहातुराणां गोपीनां मिथः सम्भाषणमक्रूरेण यमुनायां विष्णुलोकदर्शनं च वर्णयति । सुखोपविष्ट इति । नन्दसम्भाषणानन्तरं पर्यङ्के सुखोपविष्टः रामकृष्णाभ्यामुरुमानितः ॥ १–३ ॥ कच्चित्किं स्वागतं यथा तथा आगतः अपि च स्वज्ञातिबन्धूनां स्वेषां सुहृदां ज्ञातीनां सपिण्डानां बन्धूनामपिण्डानां सम्बन्धिनां च अनमीवमपापं पापकृत्संसर्गस्मरणादेव प्रश्नः अनामयमारोग्यं दुष्टसङ्गेन बहुचिन्ताकुलानां रोगसम्भावनया एवं प्रश्नः कृतः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ पर्यङ्के मञ्चे सुखं यथा तथोपविष्टो रामकृष्णाभ्यामनुमोदितः समीचीनमागमनमिति सत्कृतः सोऽक्रूरः मयि मार्गे यन्मनोरथान्कृष्णेन कर्तव्यत्वेनाकरोत्तान्सर्वाल्लेभे लब्ध्वा चकार दध्याविति वा । करणंकारणे काले साधनेऽनुव्रतादिषु । स्पष्टाद्युच्चारणाभेदे ध्यानपद्मासनादिष्विति यादव इति पूर्वे । रामकृष्णोरुमानितः इति पाठोऽप्युमानितः ॥ १ ॥ मध्ये तदुभयकथं कथमक्रूरचिन्तितं सर्वमभूदिति चेत्श्चित्रयन्तः परीक्षितं प्रति शुकोऽपि परवशः सन्नेदमाश्चर्यमिति वक्ति । किमिति । श्रीनिकतने श्रिय आश्रये भगवति प्रसन्ने सत्यलभ्यं दुर्लभं किं न किमपि । तथाऽपि तत्परा हर्यासक्ता राजन् किञ्चनापि न वाञ्छन्ति न काङ्क्षन्ति ॥२॥ पुनः कृष्णाक्रूरप्रवृत्तं वृत्तं कथयति सायन्तनेति । सायन्तनमशनं भोजनं कृत्वा रागतः प्राप्तेऽपि भोजने स्मृतिकारैर्नियमितत्वात् । तथा हि । सायं प्रातर्द्विजातीनामशनं स्मृतिचोदितमिति । इमां स्मृतिं स्मृतिपथमानेतुमशनमिति जगदे जगदेकगुरुणा । सुहृत्सु कंसस्य वृत्तिमन्यद्यच्चिचकीर्षितं कर्तुं वाञ्छितं तत्पप्रच्छाप्राक्षीत् ॥ ३ ॥ माधवो मधुकुलजोऽक्रूरो यदुषु वैरानुबन्धं वसेदेववधोद्यमं च वर्णयामास ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

षड्विंशे भक्तकृपया हरी रूपमदर्शयत् । अत्यासक्तिं पूर्वसिद्धां त्यक्त्वापीति निरूप्यते ॥
अक्रूरेण च सम्वादो गमनोद्यम एव च । गोपिकानां विलापश्च भगवद्रूपवर्णनम् ॥
मनोरथस्य सिध्यर्थमुद्यमस्य तथैव च । तत्रागत्यागत्यभावे स भिन्न इति संशयात् ॥
चत्वारोऽर्थाः क्रमादुक्ताः पुरुषार्था यतो व्रजे । सर्वे सिद्धा इति ज्ञाने भक्तो भूयात्तथापरः ॥

पूर्वाध्याये तस्य मनोरथा निरूपिताः ते वस्तुतोऽनभिप्रेता अपि भक्तिमार्गे भक्तेन कृता इति भगवता कृता इति वक्तुमाह सुखोपविष्ट इति । नन्दे गृहे गते पश्चात् सुखशय्यायामुपविष्टः भगवता बलभद्रेण च संमाननार्थमुपवेशितः यदि लोके स्वस्मादप्यधिकः मानो दत्तः तदा किं वक्तव्यं किञ्चित् साधयिष्यति न वेति अतो मनोरथान् सर्वानेव लेभे पुरुषस्य हि सहस्रं कामाः यत्तः काममय एवायं तेन सर्वे प्राप्ता इत्याशङ्क्य विशिनष्टि पथि यान् चकार हेति स सोऽक्रूरः पूर्वसिद्धः हेत्याश्चर्यं न हि मार्गे जातो मनोरथः कस्यचित् सिध्यतीति ॥ १ ॥ यद्येवं तर्हि सर्वैरेव भक्तैर्भगवत्समीपमेव गमने कामनैव कर्त्तव्या स्यात् कामनामेव प्रयच्छतीत्याशङ्क्य सकामा नोत्तमा इति शुका निष्कामः तं व्याजेन निन्दन्निवाह । किमलभ्यमिति । फल द्विविध नित्यमनित्य च नित्यं षड्गुणात्मकम् अनित्यं लक्ष्म्याधानङ्कृष्णत्तु भगवान् लक्ष्मीपतिश्च स चेत् प्रसन्नः तदधीनं किंवा अलभ्यं भवेत् प्रसादो हि प्रवृद्ध आत्मानमपि यच्छति परं प्रसाद एव दुर्ल्लभः न तु प्रसन्ने किञ्चित् अप्रसन्ने न किञ्चित् फलं भवति, अतः प्रसादहेतुं प्राप्यकामनां चेत् कुर्यात् तदा भ्रान्त एव स इति वक्तुं तथा भूता न कामयन्त इत्याह । तथापीति । यतस्तत्पराः न तु विषयपराः अयन्तु मध्ये संसर्गात् मध्यमाधिकारं प्राप्त इति कामनां कृतवान् नतु सर्वैरेवोत्तमैः काम्यते तथा सत्ययम्मार्गः नोत्तमा भवेत् राजन्निति स्नेहेनाप्रतारणार्थं सम्बोधनं यतस्तत्पराः अत एव किञ्चनापि न वाञ्छन्तीति युक्तमेव ॥ २ ॥ एवं भक्तानां कामनानिर्णयमुक्त्वा कामितशेष वक्ष्यमाणः सम्भावनयापि सिद्धवदुक्तं समर्थयन्नाह । सायन्तनाशनमिति । यावन्नन्देन सह वार्त्ता तस्मिन् शय्यायां सुप्ते वा पश्चाद्यशोदागृहे सायंकाळभोजनं कृत्वा कंसस्य वृत्तं पप्रच्छेति सबन्धः पश्चाद्भोजने बन्धनश्रवणानन्तरं प्रतीकारमुद्योग वा अकृत्वा भोजनमनुचितमिति भुक्त्वा पृष्टवान् । यशोदायाः सन्तोषार्थं वा तया भोजनार्थं सम्पादितमिति । यद्यपि भगवान् जानाति न वा तस्य लौकिके न किञ्चित्कार्यं तथा देवकीसुत इति भक्तार्थमेवाविर्भूत इति पश्चादेव पृष्टवान् देवकीपुत्रत्वादेव वसुदेवादयः तस्य कदाचित् सुहृत्सु दैत्यावेशाभावे वृत्तं समीचीनमेव श्रूयते । अतः सन्देहात् प्रश्नः अक्रूरस्य तथा ज्ञापनार्थं

मानुषभावं ज्ञात्वा कदाचिदन्यथापि वदेत् अतो गोपिका वदेवायं परीक्षणीय इति अन्यत् अन्यत्वेऽपि उदासीनेष्वपि चिकीर्षितं कृतं करिष्यमाण चेत्यर्थः । अन्यथा समागतः को वेद वक्तुं शङ्केतेति अर्थात्कृतं बन्धनादिकं चिकीर्षितं नयनमिति भक्तस्य तस्य स्वतः कथने दोष इति भक्तानां बुद्धिग्रहणार्थं शुकस्तथोक्तवान् ॥ ३ ॥ भगवतो वाक्यान्याह चतुर्भिः तस्य तत्सुहृदां च पश्चात्तापोऽनुमोदनम् आदौ कुशलं पृच्छति तातेति यः शब्दस्तेन मनोरथे निरुक्तः स एव भगवतोक्तः सौम्येति तव न कोऽपि दोष इति । दोषपरिहारार्थं संबोधनं स्वागतं यथा भवति तथा समागतः कच्चित् महोपद्रवे समागतः आहोस्वित् अनुपद्रव इति सन्देहात् क्रियाविशेषणम् अथान्यार्थमागत इति स्ववृत्तान्तं न कथयेदिति तस्य निर्भयत्वाय समाश्वासनमाह । भद्रमस्त्विति समागमनमात्रेणैव सर्वेषामेव भद्रं भविष्यतीति बहुवचनेनोक्तं लोकवत् पृच्छति । अपीति । स्वा भक्ताः ज्ञातयो गोत्रजाः बान्धवाः संबन्धिनः अक्रूर एव वा देहपुत्रादयः स्वशब्देनोच्यन्ते स्वकीया वा ये भवन्त इति प्रश्ने हेतुरुक्तः द्वयं पृच्छति । अनमीवमनामयमिति । कंसनिकटे स्थितानां ब्रह्महत्यादिपापानि प्रत्यहं सम्भवन्तीति अमीवानां पापानामभावः प्रष्टव्यः संसर्गमात्रेणापि चिरकालदुःखदाः आधिव्याधयो भवन्तीति आमयाभावोऽपि प्रष्टव्यः ॥ ४ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । पर्यंके शय्यायां सुखोपविष्टो रामकृष्णाभ्यामुरु बहु मानितः सत्कृतः सोक्रूरः पथि मार्गे यान् मनोरथान् चकार तान्सर्वान् लेभे प्राप । ह प्रसिद्धम् ॥ १ ॥ श्रीधामनि भगवति प्रसन्ने सति अलभ्यं दुर्लभं किं न किमपि तथापि सर्वप्राप्तिसिद्धेऽपि तत्परा भक्ताः किंचन किमपि नेच्छंति । हि युक्तम् ॥ २ ॥ सायन्तनं सायंकालीनमशनं भोजनं कृत्वा देवकीसुतो भगवान् सुहृत्सु वसुदेवादियादवेषु कंसस्य वृत्तं वर्त्तनं पप्रच्छ अन्यत्कर्त्तुमिष्टं च पप्रच्छ ॥ ३ ॥ हे तात हे सौम्य स्वागतं यथा भवति तथाऽऽगतः कच्चित्किम् । वो युष्माकं भद्रम् अस्तु कल्याणं भवतु इत्याशीर्वादः । स्वानां ज्ञातीनां बन्धूनां चानमीवमपापमदुःखमपि किम् अनामयमारोग्यं किम् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं नवत्रिंशेऽध्याये कंसवर्त्तन्ति प्रच्छन्नं गोपीकृतविलपनं च यमुनायामक्रूरस्य हरिलोकदर्शनं च निरूपयति पथिमार्गे ॥ १ ॥ तत्पराः हरिपरायणाः ॥ २ ॥ सायंतनं सायं नवम् अशनं भोजनं वृत्तंवर्त्तनं ॥ ३ ॥ हे तात हे सौम्य स्वागतं समीचीनं यथा तथा आगतः स्वे स्वकीयाः सुहृदो ज्ञातयः स पिंडाः बन्धवः असपिंडाः संबंधिनश्च तेषां अनमीवं अनघं अदुःखं वासुखमस्तीत्यर्थः । अनामयम् आरोग्यम् ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गच्छति मथुरां कृष्णे विलापो व्रजयोषिताम् । अक्रूरेण च वैकुण्ठदर्शनं विनिरूप्यते ॥ १ ॥

‘भगवद्भक्तानामेव मनोरथाः सत्या भवन्ति, नान्येषाम्’ इत्याशयेनाह—सुखेति । एवं पृष्ट्वा नन्दे गते सति रामकृष्णाभ्यामुरु अधिकं यथा तथा मानितः, अतएव सुखं यथा स्यात्तथोपविष्टः सोऽक्रूरो यान् मनोरथान् पथि चकार तान् सर्वांल्लेभे । ‘ह’ इति भगवत्प्रसादस्याश्चर्यं सूचयति ॥ १ ॥ श्रीनिकेतने लक्ष्मीपतौ । तत्पराः भगवद्भक्ताः । ‘तवाप्येतत् सम्मतम्’ इत्याशयेन सम्बोधयति—राजन्निति । स्पष्टमन्यत् ॥ २ ॥ तदा देवकीसुतो भगवान् कृष्णः सायंकालोचितं भोजनं कृत्वा स्वसुहृत्सु वसुदेवादिषु कंसस्य वृत्तं वर्तनप्रकारं अन्यच्च यच्चिकीर्षितं तत् पप्रच्छ ॥ ३ ॥ प्रश्नमेव दर्शयति—तातेति चतुर्भिः । पितृव्यत्वात् तन्महत्त्वं सूचयन् सम्बोधयति—तातेति । तत्रापि स्वप्रीतिं सूचयन् सम्बोधयति—सौम्येति । ‘कच्चित्’ इति परिप्रश्ने । स्वागतं निर्विघ्नमागमनं यथा भवति तथा त्वमागतः कच्चित् ? तदस्मद्दिष्टम् वो युष्माकं भद्रमस्तु सदा सर्वत्र कुशलमेव भूयात् । स्वीयानामात्मीयानां ज्ञातीनां सपिण्डानां बन्धूनामसपिण्डानां च अपि किमनमीवं दुष्टकंसादिनिकटवर्तित्वात् प्रत्यहं पापाचरणं सम्भवति तद्राहित्यं तथा अनामयमारोग्यमस्ति ॥ ४ ॥

अन्वितार्थप्रकाशिका

नवत्रिंशेऽरुदन् गोप्योऽथाक्रूरो यमुनाजले । ददर्श वैकुण्ठमत्र श्लोकाः सार्द्धा नगेषवः (५७॥) ॥
उवाचपञ्चक (५) सार्द्धाश्चतुःषष्टिरनुष्टुभः (६४॥) ॥ ३९ ॥

सुखेति । एवं पृष्ट्वा नन्देऽन्तर्गृहं गते सति रामकृष्णाभ्यामुरु अधिकं यथा तथा मानितः अत एव सुखं यथा स्यात्तथा पर्यङ्के उपविष्टः सोऽक्रूरो यान्मनोरथान् पथि चकार तान्सर्वान् लेभे ॥ १ ॥ किमिति । हे राजन् ! श्रीनिकेतने भगवति प्रसन्ने सति किमलभ्यं तथापि तत्पराः तद्भक्ताः किञ्च नापि न हि वाञ्छन्ति ॥ २ ॥ सायन्तनेति । देवकीसुतो भगवान् कृष्णः सायन्तनाशनं सायंकालोचितं भोजनं कृत्वा स्वसुहृत्सु वसुदेवादिषु कंसस्य वृत्तं वर्तनप्रकारम् । अन्यच्च यच्चिकीर्षितं तत्पप्रच्छ ॥ ३ ॥ तातेति । हे तात ! हे सौम्य ! कच्चिदिति परिप्रश्ने । स्वागतं निर्विघ्नमागमनं यथा तथा त्वमागतः कच्चित् तदस्मदिष्टं वो युष्माकं

भद्रमस्तु । सदा स्वीयानामात्मीयानां सुहृदां ज्ञातीनां सपिण्डानां बन्धूनामसपिण्डानां सम्बन्धिनां च अपि किमनमीवं दुष्टकंसकृतपापाचरणराहित्यं तथा अनामयमारोग्यमस्ति ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पुरीं याति नवत्रिंशे गोपीनामुक्तयो हरौ । श्वाफल्किनाथ कालिन्द्यां यद्विष्णोर्लोकदर्शनम् ॥ १ ॥

अथ समवाप्तस्वमनोरथेनाक्रूरेण विज्ञापितकंसचिकीर्षितस्य भगवतः प्रस्थानसमुद्योगं समवलोक्य तेन भविष्यद्भगवद्विश्लेषजतापतप्तगोपीजनमिथः संभाषणं मध्येमार्गमक्रूराय स्वासाधारणदिव्यविग्रहप्रदर्शनप्रकारं चानुवर्णयति सुखोपविष्ट इत्यादिना । तत्र भक्तानां मनोरथाः सत्या भवन्तीति दर्शयन्नाह । सुखोपविष्ट इति ॥ रामकृष्णाभ्यामुर्वधिकं यथा तथा मानितः, पर्यङ्के शय्यायां, सुखं यथा तथोपविष्टः, सोऽक्रूरः, पथि यान् मनोरथान् चकार, तान् सर्वान्, ह स्फुटं यथा तथा, लेभे ॥ १ ॥ किमलभ्यमिति ॥ तथा हि । भगवति षाड्गुण्यपूर्णे, श्रीनिकेतने श्रीनिवासे परमेश्वरे, प्रसन्ने सति, किमलभ्यं सर्वं सुलभमेवास्त्यथापि, हे राजन्, तत्परा भगवत्पराः भगवत एकान्तिका भक्ता जना इत्यर्थः । किंचन किंचिदपि, न वाञ्छन्ति हि । भगवदनुभवापेक्षया सर्वस्य तुच्छत्वादिति भावः ॥ २ ॥ सायमिति । ततः देवकीसुतः भगवान् श्रीकृष्णः, सायन्तनाशनं सायंविधेयभोजनं कृत्वा, सुहृत्सु वसुदेवादिस्वकीयसुहृज्जनेष्वित्यर्थः । कंसस्य वृत्तिं अन्यत् चिकीर्षितं कंसस्य यच्चिकीर्षितं तच्चेत्यर्थः । प्रपच्छ ॥ ३ ॥ तत्र प्रश्नमेवाह तातेत्यादिभिश्चतुर्भिः । तातेति । हे तात, हे सौम्य, भवान् स्वागतं यथा तथा, आगतः कच्चित् । वो युष्माकं, भद्रं मङ्गलं, अस्तु । स्वे सुहृदः ज्ञातयः सपिण्डाः बन्धवोऽसपिण्डाः सम्बन्धिनस्तेषां, अनमीवमपापं, अदुःखमिति यावत् । अपि किम् । अनामयमारोग्यं, किम् ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सुखोपविष्ट इति : १०.३९.१.

भवन्ति ये संसृतिवर्त्मसंभवा प्रायो मृषैवार्थमुदीरयन्ति । मनोरथास्तेऽपि हरिप्रसादतः सत्याः सतां स्युः श्रमहारिणश्च ॥ १ ॥

सायन्तनाशनमिति : १०.३९.३.

तदा तदज्ञानतमोविनाशनं प्रभुर्विधायैव स कंसचेष्टितम् । पप्रच्छ सायलायुक्तितस्विदं स्फुटं विभात्यस्य च माधवाह्वयात् ॥ २ ॥

अयमवितथमस्मै सर्वमेवास्मदीयं मुनिगदितमुदन्तं यद्वदेत्तर्हि तज्ज्ञः ।
अयमसुखमनाः स्यात्स्यान्न यानेऽनुकूलः क्वचिदिति तमपृच्छत्प्राय एकान्तः ईशः ॥ ३ ॥

तात सौम्येति : १०.३९.४.

यो जगत्ताततातोऽपि तातेत्यक्रूरमब्रवीत् । न तस्यैवास तच्चित्रकारि किन्तु विधेरपि ॥ ४ ॥
पूर्ववत् पुरतोऽप्यस्याऽस्मासूपेक्षा भवेत् किमु । इति तत्संशयोच्छित्त्यै सोऽब्रवीद्भद्रमस्तु वः ॥ ५ ॥

कृष्णप्रिया

श्रीकृष्ण-बलरामका मथुरागमन

श्रीशुकदेवजी कहते हैं—भगवान् श्रीकृष्ण और बलरामजी ने अक्रूरजी का भली-भाँति सम्मान किया वे आराम से पलंग पर बैठ गये। उन्होंने मार्ग में जो-जो अभिलाषायें की थीं, वे सब पूरी हो गयी ॥ १ ॥ परीक्षित्! लक्ष्मी के आश्रयस्थान भगवान् श्रीकृष्ण के प्रसन्न होने पर ऐसी कौन-सी वस्तु है, जा प्राप्त नहीं हो सकती? फिर भी भगवान् के परमप्रेमी भक्तजन किसी भी वस्तु की कामना नहीं करते ॥ २ ॥ देवकीनन्दन भगवान् श्रीकृष्ण ने सायङ्काल का भोजन करने के बाद अक्रूरजी के पास जाकर अपने स्वजन-सम्बन्धियों के साथ कंस के व्यवहार और उसके अगले कार्य-क्रम के सम्बन्ध में पूछा ॥ ३ ॥ भगवान् श्रीकृष्ण ने कहा—चाचाजी! आपका हृदय बड़ा शुद्ध है। आपको यात्रा में कोई कष्ट तो नहीं हुआ? स्वागत है। मैं आपकी मङ्गल कामना करता हूँ। मथुरा के हमारे आत्मीय सुहृद्, कुटुम्बी तथा अन्य सम्बन्धी सब सकुशल और स्वस्थ हैं न? ॥ ४ ॥

किं तु[1] नः कुशलं पृच्छे एधमाने कुलामये । कंसे मातुलनाम्न्यङ्ग स्वानां नस्तत्प्रजासु च[2] ॥ ५ ॥
अहो अस्मदभूद् भूरि पित्रोर्वृजिनमार्ययोः । यद्धेतोः पुत्रमरणं यद्धेतोर्बन्धनं तयोः ॥ ६ ॥
दिष्ट्याद्य दर्शनं स्वानां मह्यं वः सौम्य काङ्क्षितम् । [3]सञ्जातं वर्ण्यतां तात तवागमनकारणम् ॥ ७ ॥
पृष्टो भगवता सर्वं वर्णयामास माधवः । वैरानुबन्धं यदुषु वसुदेववधोद्यमम् ॥ ८ ॥

---

१. किं नु—श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. आदयः । २. वै—प्रा. पा. । ३. साम्प्रतं—प्रा. पा. ।

कर्दमक्षमा

अन्वयः—हे अङ्ग, किं तु नः, मातुलनाम्नि, कुलामये, कंसे, एधमाने, (सति), स्वानाम् , नः, च, तत् प्रजासु, कुशलम् , तु किम् , पृच्छे ॥ ५ ॥ अहो, अस्मत् , हेतोः, आर्ययोः, पित्रोः, भूरि, वृजिनम् , अभूत् , यद् , हेतोः, तयोः, बन्धनम् च, पुत्रमरणम् , अभूत् ॥ ६ ॥ हे । सौम्य ! स्वानाम् , वः, अद्य, दर्शनम् , सञ्जातम् तत् , दिष्ट्या, हे तात मह्यं तत् काङ्क्षितम् हे तात ? तव, आगमनकारणम् , वर्ण्यताम् ॥ ७ ॥ श्रीशुक उवाच, भगवता, पृष्टः, माधवः, (अक्रूरः) यदुषु, वैरानुबन्धम् , वसुदेववधोद्यमम् , सर्वम् , वर्णयामास ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं प्रश्नोऽपि मम नातीव संगत इत्याह । किं न्विति । अङ्ग हे अक्रूर पृच्छे पृच्छामि । नोऽस्माकं कुलस्यामये रोगे नो मातुल इति नाम यस्य तस्मिन् । नः स्वानां ज्ञातीनां तस्य प्रजासु च ॥ ५ ॥ अस्मदस्मन्निमित्तम् । वृजिनं दुःखम् । आर्ययोर्निरपराधयोः । यद्धेतोर्योऽहमेव हेतुस्तस्मात् ॥ ६ ॥ हे सौम्य स्वानां वो दर्शनमद्य मम संजातं तद्दिष्ट्या भद्रम् ॥ ७ ॥ माधवो मधोर्वंशजः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवं प्रश्नोऽनमीवादिप्रश्नः । तस्य कंसस्य । अनामयस्य विशेषतः प्रश्ने स्वतात्पर्यं दर्शयति – तदनुपहतिरेवानामयतया पृष्टेति भावः । नाममात्रेणैव मातुले वस्तुतस्त्वामये यतोऽसौ नागन्तुकः, न त्वेकस्य किन्तु सर्वस्यैव कुलस्येत्यतस्तन्नासनमवोचितम् । तथाप्येतावन्तं कालं मातुलनाम्नैवोपेक्षितमिति भावः ॥ ५ ॥ प्रश्नोत्तरमनुतप्तः सन्नाह– अस्मादिति । हेतौ पंचमी । 'वृजिनं दुःखपापयोः' इति विश्वः । "आर्यश्शिष्टे निरागसि । वर्णाश्रमोक्तधर्माग्र्ये श्रेष्ठे वणिक्संहतौ" इति धरणिः । तयोः पित्रोः ॥६॥ मह्यं मम । तदेवं सति यदद्य वो दर्शनं सम्यगैकांतिकं जातं तद्दिष्ट्या । कीदृशानां वः—स्वानां कंसस्य परजातत्वादस्निग्धत्वाच्च भोजराजत्वेऽपि ममैव ज्ञातीनां मदीयधनरूपाणां वेत्यर्थः । सर्वनामत्वाभावस्तु 'स्वोऽर्थज्ञात्यन्यवाच्यपि' इत्युक्तेः । कीदृशं दर्शनं—कांक्षितम् । ततस्तावत्प्रियत्वेनैव यद्येकस्याप्यात्मीयस्य तत्रत्यस्य दर्शनं भवेत्तदा तन्मारणयुक्तिः सिद्ध्येदित्यभिप्रायेणेति भावः । अत्रैतावती विवक्षा—अत्रत्या मातापित्रादयस्तत्रत्येभ्योऽपि परमस्निग्धा इति तदनुमतिं विना तत्र गन्तुं न शक्नोमि । तथाऽप्रकटेष्वपि तेषु महापराधेषूपेक्षितस्य मातुलनाम्नस्तस्य सहसा जिघांसयाभिगमने तमेव कारणीकर्तुमिच्छामि । तस्मादपि तादृशोऽपेक्षितः कश्चिदायाति ततस्तदनुरोधेन तेषामनुमतिं लेभे, तेन सह युक्त्वा च तस्यैव तत्कारणमुद्भावयामि, तदैव तन्मारणं नीतिपदवीमारोहतीति । अतो हे तात तवागमनकारणं तावद्वर्ण्यताम् । तस्मिञ्ज्ञाते सत्यायति चिन्तां करिष्याम इति भावः ॥ ७ ॥ माधवोऽक्रूरः । वैरस्य प्रकृतस्यानुबन्धमनुवर्तनं, वैरेणानुबन्धं सततदोषभावं वा "अनुबन्धो दोषभावे प्रकृत्यादिविनश्वरे । मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ॥" इति यादवः । भगवते भगवन्तं ज्ञापयितुमित्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कुलामय इति । अनामयस्य विशेषतः प्रश्ने स्वतात्पर्यं दर्शयति तदनुपहतिरेवानामयतया पृष्टेति भावः । नाममात्रेणैव मातुले वस्तुतस्त्वामये यतोऽसौ नागन्तुकः नत्वेकस्य किन्तु सर्वस्यैव कुलस्येत्यतस्तन्नाशनमेवोचितं तथाप्येतावन्तं कालं मातुलनाम्नैवासावुपेक्षित इति भावः । तस्य प्रजासु प्रजानाञ्च यद्वा तदनुजादिरूपासु चैधमानासु ॥ ५ ॥ अस्मदिति पञ्चमी हेतौ बहुत्वमेकत्वे "अस्मदो द्वयोश्चे"ति स्मरणात् यद्धेतोरिति पौनरुक्त्यमनुतापस्वभावेनात्मैकहेतुताविवक्षया च ॥ ६ ॥ तदेवं सति यदद्य वो दर्शनं सम्यगैकान्तिकं जातं तद्दिष्ट्या कीदृशानां स्वानां कंसस्य परजातत्वादस्निग्धत्वाच्च भोजराजत्वेऽपि ममैव ज्ञातीनामित्यर्थः । मदीयधनरूपाणामिति वा यद्वार्षं सर्वनामत्वं स्वेषामात्मीयानामित्यर्थो वा कीदृशं दर्शनं काङ्क्षितं ततस्तावत् प्रियत्वेनैव यदि तत्रत्यस्यैकस्यात्मीयस्य दर्शनं भवेत् तदा तन्मारणयुक्तिः सिद्ध्यतीत्यभिप्रायेणेति भावः । अत्रैतावती विवक्षा अत्रत्या मातापित्रादयस्तत्र तेभ्योऽपि परमस्निग्धा इति तदनुमतिं विना तत्र गन्तुं न शक्नोमि तथा प्रकटेष्वपि तेषु महापराधेषूपेक्षितस्य मातुलनाम्नस्तस्य सहसा जिघांसयाभिगमने तमेव कारणीकर्तुमिच्छामि तस्माद्यदि तादृशोऽपेक्षितः कश्चिदायाति ततस्तदनुरोधेन तेषामनुमतिं लेभे तेन सह युक्त्वा च तस्यैव तत्कारणत्वमुद्भावयामि तदैव तन्मारणं नीतिपदवीमारोहतीति अतो हे तात ! तवागमनकारणं तावद्वर्ण्यतां तस्मिन् ज्ञाते सत्यायतीं चिन्तां करिष्याम इति भावः ॥ ७ ॥ पृष्टः इति युग्मकम् । भगवत इति भगवन्तं ज्ञापयितुमित्यर्थः । तादर्थ्ये चतुर्थी । तन्मारणं तदभीष्टमिति तदर्थमेव वर्णयामास न स्वार्थमित्यर्थः । भगवतेति पाठः क्वचित् यतो मधुवंशजः स्वपक्षत्वादित्यर्थः । सर्वं किमित्यपेक्षायामाह । वैरेति सार्द्धेन वैरानुबन्धं तत्सातत्यम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कुलामये एधमान इति नित्यमेवान्तरबाह्यदुःखहेतुत्वमुक्तम् , नाममात्रेणैव मातुले, वस्तुतस्तु आमये, अतस्तद्वधोनानुचित इति । तथा एतावत्कालं मातुलनाम्नैवासावुपेक्षितोऽस्तीति च सूचयति । तस्य प्रजासु प्रजानाम् ; यद्वा, तदनुजादिषु च

एधमानेषु ॥ ५ ॥ स्वहेतुकं पित्रोर्दुःखमनुस्मृत्यानुतप्यमाह आह—अहो इति खेदे; अस्मदिति बहुत्वं श्रीबलरामापेक्षया, किंवा आत्मनो वृजिनहेतुतायां गौरवविवक्षया, वृजिनमेव निर्दिशति—यद्धेतोरिति। अस्य पुनरुक्तिरात्मैकहेतुताविवक्षया, अत एतस्मादित्युक्तेऽपि योऽहमिति तैर्व्याख्यातम्। एतच्च सर्वमक्रूराश्वासनार्थं श्रीमधुपुरीगमनहेतूत्थापनम् ॥ ६ ॥ ननु तर्हि कथं तयोर्दुःखं ज्ञात्वाप्येतावन्तं कालमुपेक्षसे ? विना कस्याप्यात्मीयतरस्य प्रेरणयेतो गन्तुं न शक्यत इत्याशयेनाह— दिष्ट्येति। काङ्क्षितं कंसवधाय तत्र गन्तुं चिरमभीष्टमिदं तदाश्वासनमात्रम्; 'वः' इति बहुत्वं गौरवेणैव। सौम्य! हे क्रूरेतरेति गौरवेण, साक्षादग्राह्यस्याक्रूरनाम्नः संकेतेन ग्रहणात्, साधुत्वविवक्षया वा तदभिप्रायः पुरोक्त एव। हे तातेति पुनरपि सम्बोधनम्। तव गौरवेण तत् साधयिष्यामीति भावः ॥ ७ ॥ इति श्रीभगवतः प्रश्नेनाशेषं वृत्तं सङ्क्षेपेणावर्णयदित्याह—द्वाभ्यां पृष्ट इति। अनेन तद्वर्णनेऽवसरोऽसंकोचश्च दर्शितः। किञ्च, भगवते भक्तवात्सल्यादि—निजाशेषगुणप्रकटनपरायेत्यर्थः। अत एकान्तभक्तयदुकुलहितार्थं तस्मिन् तत्तद्वर्णनम, तथा माधवो मधुवंशोद्भव इति तस्यापि तदुचितमेवेति भावः। श्लेषेण मधुसम्बन्धिभ्रमरो यथा सारग्राही, तथा सारतया किञ्चित् किञ्चिदकथयदित्यर्थः। तदेवाह—वैरेति सार्द्धेन। यदुषु सामान्यतो वैरस्यानुबन्धमारम्भं निर्बन्धेनाचरणं वा; वसुदेवस्य वधे कंसस्य उद्यमम्; तन्नामाग्रहणं दुष्टत्वेनाग्राह्यत्वात्; एवमग्रेऽपि ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अस्मत् अस्मत्तः वृजिनं पापम् ॥ ६-७ ॥ माधवः मधुकुलप्रभवः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं प्रश्नोऽपि मम नातीव सङ्गच्छत इत्याह। किन्विति। अङ्ग हे तात! मातुलनाम्नि नाममात्रेण मातुले न तु वृत्त्येति भावः। तथा चास्माकं कुलामये कुलस्य रोगतुल्ये कंसे वर्द्धमाने सति नोऽस्माकं स्वानां ज्ञातीनां तत्प्रजासु तदपत्येषु च कुशलं किन्तु किमिति पृच्छे ॥५॥ अहो अस्मत् अस्मत्तो निमित्तादार्ययोः पूज्ययोर्निरपराधयोर्वा मातापित्रोर्भूरि वृजिनं दुःखं प्राप्तं तदेव प्रपञ्चयति। यत् यतो यस्मादस्मत्तो हेतोर्निमित्तात् पुत्राणामस्मदग्रजानां मरणं यदस्मन्निमित्तात्तयोः पित्रोर्बन्धनञ्च प्राप्तम् ॥६॥ अस्तु तावत् हे सौम्य! चिरम्वाञ्छितं स्वानां वो युष्माकं दर्शनं त्वद्य सञ्जातमेतद्दिष्ट्या आनन्दजनकमस्माकं हे तात! तवागमनकारणं वर्ण्यतां कथ्यताम् ॥ ७ ॥ इतीत्थं भगवता पृष्टो माधवो मधुवंशप्रभवोऽक्रूरः सर्वं वर्णयामास सर्वशब्दविवक्षितमेव प्रपञ्चयति। वैरानुबन्धमिति सार्द्धेन यदुषु विषयभूतेषु कंसस्य वैरानुबन्धः वैरमप्रीतिस्तदनुबध्यते यदुषु इत्यनुबन्धः तत्कार्यक्लेशापादनञ्च तथा वासुदेवस्य वधोद्यमं वधार्थं यत्नम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

माधवः मधुकुलोद्भवः यस्य कंसस्य सन्देशो यस्य स तथा यस्य कंसस्यार्थे दूतः यत्प्रयोजनमुद्दिश्येति वा तस्य कंसस्य यदुषु वैरानुबन्धं वैरेण सन्ततदोषभावं प्रकृतस्य वैरस्यानुवर्तनं वा—

अनुबन्धो दोषभावे प्रकृत्यादौ विनश्वरे। मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ॥

इति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कुशलप्रश्नोऽपि नातिसङ्गच्छत इत्याह। किंन्विति। अङ्ग हे अक्रूर! पृच्छे पृच्छामि नः कुलामये अस्मत्कुलस्य रोगरूपे कंसे नः स्वानाम् अस्मज्ज्ञातीनाम् ॥ ५ ॥ अस्मत् अस्मत्तः मत्तः पुत्रात् वृजिनं दुःखं तदेव किं तत्राह। योऽहमेव हेतुस्तस्मात् ॥ ६ ॥ काङ्क्षितमिति। यदेव कारणीकृत्य तत्र गत्वा कंसं हनिष्यामिति भावः ॥ ७ ॥ माधवः मधुवंशभवः यः धनुर्मखच्छद्मा सन्देशो यस्य यदर्थं चाणुरादिभिर्घातनार्थम् ॥ ८-९ ॥

गूढार्थदीपिनी

अङ्ग हे अक्रूर। नोऽस्माकं कुलस्यामये वर्धमाने सति नः स्वानां ज्ञातीनां तस्य प्रजासु च किं नु कुशलं ॥५॥ अस्मद् अस्मीन्नभित्तम्। आर्ययोः निरपराधयोः मातापित्रोः वृजिनं दुःखम्। योऽहमेव हेतुः तस्मात् ॥ ६ ॥ मह्यं मम वः युष्माकं दर्शनं जातम् एतद् दिष्टया भद्रम् ॥ ७ ॥ माधवः मधुवंशजातत्वात् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु कुशलप्रश्नं विहाय किमेवं पृच्छसीत्यत आह। किन्नु न इति। हे अङ्ग हे तात! मातुल इति नाम यस्य ननु वृत्त्या मातुलः तस्मिन् नोऽस्माकं कुलस्य आमते रोगतुल्ये एधमाने नः स्वानां ज्ञातीनां तत्प्रजासु च किंनु कुशलं पृच्छे पृच्छामि ॥ ५ ॥ अहो अस्मत् अस्मत्तः निमित्तभूतात् आर्ययोः निरपराधयोः पित्रोर्भूरि महत् वृजिनं दुःखमभूत् यत् यस्मादस्मत्त एव हेतोः ॥ ६ ॥ हे सौम्य! स्वानां युष्माकं दर्शनं मह्यं काङ्क्षितं बहुकालतो वाञ्छितमद्यजातम् एतद्दिष्ट्या भद्रं ममानन्दक

मित्यर्थः ॥ ७ ॥ माधवः मधुवंशजः अक्रूरः यदुषुः कंसस्य वैरानुबन्धं वैरे हठं वसुदेववधोद्यमं च यः धनुर्मखच्छद्मा सन्देशो यस्य यदर्थं चाणुरादिभिर्घातनार्थं स्वयं दूतः प्रेषितः अस्य श्रीकृष्णस्य स्वजन्म श्रीकृष्णस्य जन्म आनकदुन्दुभेः सकाशात् तत्सर्वं वर्णयामास इति द्वयोरन्वयः ॥ ८–९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यस्य सन्देशो यस्य स यस्यार्थे प्रयोजन इति यदर्थे वा दूतः स्वयं प्रेषितः। आनकदुन्दुभेः सकाशात्स्वजन्मेति नारदेन यदुक्तं तदक्रूरवचः कृष्णो बलश्च श्रुत्वा। परवीरहेत्युभयविशेषणम्। प्रहस्य राजा कंसेनादिष्टं पितरं नन्दं प्रति विजिज्ञतुर्विज्ञापयामासतुः ॥ ६ ॥ सोऽपि नन्दोऽपि सर्वगोरसो गवां रसो गोरसः सर्वश्चासौ गोरसश्चगृह्यताम्। सर्वासां गोरस इति योग्यतया लापने गोरतद्धितलुकीति न टच्प्रसङ्गः। उपायनानि पूज्योपयुक्तानि वस्तूनि शकटान्यनांसि युज्यताम् ॥ ७ ॥ रसान्सुवर्णादिकरान्। रसो रागे विषे वीर्ये तिक्तादौ पारदे द्रवे। रेतस्यास्वादने हेम्नि निर्यासे रसशब्दयोरिति च। सुमहत्पर्व धनुरुत्सवं द्रक्ष्यामः। न केवलं वयमेवोद्युञ्जामहे किन्तु जानपदा देशस्था यान्ति किल। पक्षसन्धावुत्सवे च ग्रन्थौ पर्व विदुर्बुधा इति दत्तः। पर्व स्यादुत्सवे ग्रन्थौ प्रस्तावे लक्षणान्तरे। दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतीष्वपीति विश्वः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

कथं द्वयमेव पृच्छ्यते कुशलादिकं कथं न पृच्छ्यते इत्याशङ्क्य तत्र विपरीतनिश्चय एवेत्याह। किन्तु न इति। तु शब्दः कुशलपक्षं व्यावर्त्तयति नोऽस्माकं सर्वेषामेव बन्धुत्वख्यापनाय पित्रादीनात्मत्वेनैव निरूपितवान् सर्वतः अकुशले कुलस्यैवामयरूपे सर्वग्रासकमहाव्याधौ प्रत्यहमेधमाने सति प्रतीकारमकृत्वा किं कुशलं पृच्छे इत्यर्थः। रोगान्तरशङ्काव्यावृत्त्यर्थं नाम गृह्णाति। कंस इति। तर्हि कथमेतावत्कालं ज्ञात्वोपेक्षेति चेत् तत्राह। मातुल नाम्नीति। अमारणार्थं रोगे मातुलसंज्ञा जाता यथा शत्रुर्ब्राह्मण इति अङ्गेति सम्बोधनमप्रतारणार्थम् अतः स एव चेदुद्यमं कुर्यात तदा निवारणे न कोऽपि प्रयास इति सूचितं स्वानां नो बन्धूनां तत्प्रजासु च कुशलं चकारात् कंसप्रजासु ॥ ५ ॥ एवं सिद्धवत्कारेण बन्धूनामनिष्टं सम्भाव्य विशेषतः अप्रश्ने प्रश्ने च तस्य मनसि वैमनस्यं मत्वा कृतं वधादिकमनुशोचन्निवाह। अहो इति। अन्यथा देवकीवसुदेवयोः उपेक्षां करोतीति दुःखं स्यात् अन्यनिमित्तमन्यस्य दुःखं भवतीत्याश्चर्यं यतः अस्मन्निमित्तं पित्रोर्महद्वृजिनमभूत् तौ वस्तुत आर्यौ अपराधरहितौ अतोऽस्माभिरेव तेषामुपद्रवः कार्यत इत्युक्तं भवति तद्वृजिनं भूरिसम्भाव्यमानमल्पं भविष्यतीति गणयति। यद्धेतोः पुत्रमरणमिति। तयोरष्टमः पुत्रो मारयिष्यतीति मद्धर्मं श्रुत्वा निष्कारणमन्ये पुत्रा मारिताः तयोश्च बन्धनमहं पुत्र इति आदावन्ते च ॥ ६ ॥ एवमनुतापमुक्त्वा तस्यागमनाभिनन्दनपूर्वकमागमनप्रयोजनं पृच्छति। दिष्ट्येति। स्वानां यदद्य दर्शनमकस्माज्जातं तद्दिष्ट्या भाग्येन भक्तानां भगवद्दर्शनं भाग्येनेति लौकिकभाषा चैषा यतः हे सौम्य ! मह्यं ममैवोपकाराय मत्फलाय वा लोकोक्त्या ममैव चिरकाङ्क्षितं कदा वा दर्शनं भविष्यतीति सौम्येति सम्बोधनात् सत्तत्त्वमुभयत्र हेतुरुक्तः एवमभिनन्दनं कृत्वा पृच्छति। सञ्जातं वर्ण्यतामिति। यद्वृत्तं साम्प्रतं तद्वर्ण्यताम् तातेति सम्बोधनमभयत्वाय तवागमने किं कारणं तदपि वर्णय द्वयं पृष्टम् ॥ ७ ॥ तदा आमूलं सर्वमेवोक्तवानित्याह। पृष्ट इति। भगवता हि पृष्टमन्तर्यामित्वात् वक्तव्यमीश्वरत्वाद्वक्तव्यं सर्वज्ञत्वाद्वक्तव्यम् आत्मत्वाच्च वक्तव्यमिति यतोऽयं माधव इति मधुवंशोत्पन्नः भक्तत्वेनापि गोत्रत्वेनापि सर्वथा वक्तव्यमेवेति तदाह। वैरानुबन्धमिति। वैरमनुबध्यतेऽनेनेति दृढद्वैष्यत्वं ततो वसुदेवस्यापि वधार्थमुद्यमः ॥ ८ ॥

श्रीसुबोधिनी–सारः

मातुल इति वक्तव्ये नाम्नीत्युपादानं तस्यावास्तवत्वसूचनार्थम्। द्रुमिलदम्भेन तदुत्पत्तिरिति हरिवंशे। अतएव तद्धननमदोषः। कंसे नोऽस्माकं कुलस्यामये रोगे एधमाने सति नोऽस्माकं स्वानां ज्ञातीनां तस्य कंसस्य प्रजासु च किं नु कुशलमहं पृच्छामि ॥ ५ ॥ आत्मनो मन्दभाग्यतामाविष्करोति। लोकदृष्टया आर्ययोः श्रेष्ठयोः पित्रोर्देवकीवसुदेवयोरस्मत् हेतुतो भूरि बहु दुःखमभूत् तथाहि योऽहमेव हेतुस्तस्मात् पुत्राणां मरणं यद्धेतोस्तयोः पित्रोर्बंधनम् ॥ ६ ॥ हे सौम्य स्वानां वो युष्माकं कांछितं वांछितं दशनं मह्यं मम संजातं दिष्टया भद्रम्। हे तात तवागमने कारणं हेतुर्वर्ण्यताम् ॥ ७ ॥ शुकोक्तिः। भगवता कृष्णेन पृष्टो माधवो मधोर्वंशजो क्रूरः सर्वं वर्णयामास। तद्यथा। यदुषु वैरानुबन्धं वसुदेवस्य वधोद्यमं हननोद्योगं वर्णयामास ॥ ८ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

'एवं प्रश्नोऽपि मम नातीव सङ्गच्छते' इत्याह—किं न्विति। 'युष्मद्दुःखं मयि प्रतिफलति' इत्याशयेन सम्बोधयति—अङ्गेति। मातुलनाम्नि नाममात्रेण मातुले वस्तुतस्तु नोऽस्माकं कुलस्यामये रोगतुल्ये कंसे एधमाने सति नोऽस्माकं स्वानां ज्ञातीनां

तत्प्रजासु च किं नु कुशलं पृच्छे ॥ ५ ॥ 'अहो' इति स्वखेदं सूचयति। अस्मत् अस्मत्तो निमित्तात् आर्ययोः पूज्ययोः पित्रोर्मातापित्रोः भूरिवृजिनं दुःखमभूत्। एतदेव प्रपञ्चयति – यत् यस्मात् अस्मत्तो निमित्तात् तयोः पुत्राणां मरणं जातं यस्माच्च अस्मत्तो हेतोस्तयोर्बन्धनं प्राप्तमिति। किञ्च सौम्य हे प्रिय! मह्यं मम स्वानां स्वकीयानां वो युष्माकं दर्शनं तत्रत्यवृत्तपरिज्ञानार्थं बहुकालतः काङ्क्षितं तदद्य इदानीं सञ्जातमिति दिष्ट्या। महानानन्दो ममाभूत्, अतो हे तात! तवागमनस्य कारणं वर्ण्यतामिति ॥ ६-७ ॥ एवं भगवता पृष्टो माधवो मधुवंशप्रभवोऽक्रूरः सर्वं वर्णयामास। सर्वशब्दविवक्षितमेव प्रपञ्चयति-'वैरानुबन्धम्' इति सार्धेन। यदुषु विषयभूतेषु कंसस्य वैरानुबन्धं वैरमप्रीतिस्तामनुबध्यत इति वैरानुबन्धः, तत्कार्यं क्लेशापादनं तथा वसुदेववधस्योद्यमं प्रयत्नम् ॥ ८ ॥

अन्वितार्थप्रकाशिका

किं न्विति। अङ्ग हे अक्रूर! मातुलनाम्नि नाममात्रेण मातुले वस्तुतस्तु नोऽस्माकं कुलस्यामये रोगतुल्ये कंसे एधमाने सति नोऽस्माकं स्वानां ज्ञातीनां तत्प्रजासु च किं नु कुशलं पृच्छे। तङार्षः ॥ ५ ॥ अहो इति। अहो खेदे। अस्मत् अस्मत्तो निमित्तात् आर्ययोः निरपराधयोः पित्रोर्मातापित्रोः भूरि वृजिनं दुःखमभूत्। यत् यस्मात् अस्मत्तो हेतोः तयोः पुत्राणां मरणं जातं यस्माच्चास्मत्तो हेतोस्तयोर्बन्धनं प्राप्तम् ॥ ६ ॥ दिष्ट्येति। हे सौम्य! हे प्रिय! मह्यं मम स्वानां स्वकीयानां वो युष्माकं दर्शनं तत्रत्यवृत्तपरिज्ञानार्थं बहुकालतः कांक्षितं यदेव कारणीकृत्य तत्र गत्वा कंसं हनिष्यामि। तदद्य इदानीं सञ्जातमिति दिष्ट्या महानानन्दो ममाभूत् अन्यथा परमस्निग्धपित्रनुमतिं विना कंसहननाय गमनं न भवेत्। अतो हे तात! तवागमनस्य कारणं वर्ण्यतां तस्मिन् ज्ञाते आयति चिन्तां करिष्ये ॥ ७ ॥ पृष्ट इति ॥ एवं भगवता पृष्टो माधवो मधुवंशप्रभवोऽक्रूरः यदुषु विषयभूतेषु कंसस्य वैरानुबन्धं वैररीत्यनुवर्त्तनं तथा वसुदेववधस्य उद्यमं प्रयत्नं चेति सर्वं वर्णयामास ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एतादृशं प्रच्छनमपि ममनयोग्यमित्याह किमिति कुलस्यामये रोगभूतेनोऽस्माकं मातुलनाम्नि नः स्वानां ज्ञातीनां तस्य कंसस्य प्रजासु च किमहं कुशलं पृच्छे पृच्छामि ॥ ५ ॥ आर्ययोर्निष्पापयोः पित्रोः मममातुपित्रोः अस्मत् मद्धेतोः अस्मदो द्वयोश्चेत्येकत्वे बहुवचनम् भूरिवृजिनं दुःखम् अभूत् यद्धेतोः योऽहमेव हेतुः कारणं तस्मात् तयोः बन्धनं च ॥ ६ ॥ हे सौम्य स्वानां स्वकीयानां वो दर्शनं संजातम् ॥ ७ ॥ माधवः मधुकुलोत्पन्नः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं प्रश्नोऽपि मम नातीव संगच्छत इत्याह। किमिति। अङ्ग हे तात, मातुलनाम्नि नाममात्रेण मातुले न तु वृत्त्येति भावः। नोऽस्माकं, कुलामये कुलस्य रोगरूपे, कंसे एधमाने वर्द्धमाने सति, नोऽस्माकं, स्वानां ज्ञातीनां, तत्प्रजासु च, किं नु कुशलं, पृच्छे ॥ ५ ॥ अहो इति। अहो अस्मत् यस्मादस्मन्निमित्ततः, आर्ययोः पूज्ययोः निरपराधयोर्वा, पित्रोर्मातापित्रोः, भूर्यतिशयितं, वृजिनं दुःखं अभूत्, प्राप्तमिति शेषः। तदेव प्रपञ्चयति। यद्यस्मात् अस्मत्तो हेतोः, पुत्रमरणमस्मदग्रजानां मृत्युः, यद्यस्मादस्मन्निमित्तात्, तयोर्मातापित्रोः बन्धनं च, प्राप्तमभूत् ॥ ६ ॥ दिष्ट्येति। अस्तु तावत्तत्, हे सौम्य, काङ्क्षितं चिरं वाञ्छितं, स्वानामात्मीयानां, वो युष्माकं, दर्शनं तु मह्यं अद्य संजातम्। तच्च दिष्ट्या आनन्दजनकमस्माकं, हे तात, तव आगमनकारणं, वर्ण्यतां सम्यक्कथ्यताम् ॥ ७ ॥ पृष्ट इति। भगवता श्रीकृष्णेन, एवं पृष्टः माधवो मधोर्वंशजोऽक्रूरः, सर्वं वर्णयामास। सर्वशब्दविवक्षितमेव प्रपञ्चयति वैरानुबन्धमिति सार्द्धेन। यदुषु विषयभूतेषु, कंसस्य वैरानुबन्धं वैरमप्रीतिस्तदनुबद्ध्यते इति वैरानुबन्धः तं वैरकार्यक्लेशापादनमित्यर्थः। तथा वसुदेवस्य वधोद्यमं च, वसुदेववधार्थं तत्कृतं यत्नमित्यर्थः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

किं नु न इति : १०.३९.५.

प्रमातृसहजे तमोमयतनौ सदज्ञानितापदे सति भवामये हृदि सुहृत्सुखाशाहतिः।
स्फुटैव जगतीति किं समनुबोधयन् देवकीसुतः स्वयमवर्णयत् सुहृदि कंसदुश्चेष्टितम् ॥ ६ ॥
मा माया सैव तुला यस्येत्यर्थोच्च जीवसहवासात्। अज्ञानमेव मातुलप्रमातृसहजाभिधानतो ध्वनितम् ॥ ७ ॥

अहो अस्मदिति : १०.३९.६.

क्लेशोदयो मद्भक्तानां मत्कृतेऽत्रेति जानतः। वदतश्चेश ते तत्र यदुपेक्षा तदद्भुतम् ॥ ८ ॥

दिष्ट्येति : १०.३९.७.

पूर्णाप्तकामस्य ममास्तु कस्मात् त्वद्दर्शनेच्छेति वदेश न त्वम्। स्वीयेक्षणं काङ्क्षितमेव मह्यमेव त्वयैवोक्तमहं त्वदीयः ॥ ९ ॥

पृष्ट इति : १०.३९.८.

कंसारिणा कुमतिकंसमतानुगामी प्रेमप्रसादवचसाऽऽदरणीय एवम् ।
कस्यापि नात्र भविताऽनुमतिर्दयालो निर्व्याजसर्वमतिसाक्ष्यसि तत्त्वमेव ॥ १० ॥
अधुना यदि मामुरीकरोषि तदिहैवेश वसामि सर्वकालम् । अभयं भवतो न यावदाप्तं भयमेतस्य दुरात्मनस्तु तावत् ॥ ११ ॥
अकार्यमपि हिंस्रमप्यवकलय्य कर्माधुनाऽनवद्यवदुरीकृतं सदयं यन्मया निस्त्रपम् ।
न हेतुरपरोऽस्य तु स्फुटतमैव सार्वत्रिकी यदत्र परतन्त्रता निरयतोऽधिक त्रासदा ॥ १२ ॥
कंसं भावितदुर्नयं नृपमुपासीना भवन्तोऽधुना संदिष्टं क्षपयन्ति कृष्ण भवतः प्रश्नोक्तिरेवोत्तरम् ।
कंसस्यान्तकरं विहाय भगवंस्त्वां गोकुलक्षेत्रगं कंसस्यान्तकरं वजेयुरवने केदारपालाः सखे ॥ १३ ॥
नाप्तान् पश्यति नो सखीनपि न वा बन्धून्न सम्बन्धिनो वृद्धान्वा पितृसन्निभान्न पितरं साक्षान्नृशंसाग्रणीः ।
यत् केनाप्युपदिष्टमिष्टमपि तन्नाकर्णयत्यंहसां राशिः किन्त्वतुलस्मयामयमनाः स स्वैरमाचेष्टते ॥ १४ ॥
सर्वान् वः समजीययत् कथमसावेकः समं सङ्गतान् मा पृच्छ त्वमिदं यदत्र भगवंस्त्वत्पादमेक विना ।
त्रैलोक्यं युगपत्समागतमपि स्थातुं न तस्याग्रतः शक्तं का पुनरीश सौम्यजनुषामस्माकमस्मिन् गतिः ॥ १५ ॥
यः स्वस्मिन्मन् यमानो विरिपुरहमिति स्वैरवृत्तिप्रचारः प्रायो गोविप्रसाधूनसुरमतिरसौ द्वेष्टि देवान् मुनींश्च ।
दीनानस्मांस्तु नित्यं गणयति नितरां तार्णपर्णाग्रतुल्यान् हेतुस्तत्रैक एवाच्युत वयमखिलास्तवका इत्यगूढः ॥ १६ ॥
एक एव विशेषोऽस्ति तस्यास्माकं च संप्रति । स हि भीत्या वयं प्रीत्या पश्यामस्त्वामहर्निशम् ॥ १७ ॥
देव त्वदीयपादाब्ज - वीक्षामृत - जिघृक्षवः । सर्वेऽपि त्वां दिदृक्षामो जीवं जीवाः सुधाकरम् ॥ १८ ॥
तदौषधीश - वंशेन्द्र धन्वन्तरिकृतस्तुते । दृशैवामृतवर्षिण्या सर्वान्नः कुर्वनामयान् ॥ १९ ॥
हे श्रीकृष्ण यदूद्वहाच्युत विभो हे नाथ हे श्रीपते हेलालोडितपालिताऽसुरसुरप्राग्भार भूभारहृत् ।
हे दीनावनदीक्षितावनिपते लक्ष्मीपते संकटादस्मान्मोचय नस्त्वदेकशरणानित्येव भूयर्थना ॥ २० ॥
समग्रबिश्वासनविश्वनायक तदुत्स्मयायुश्वसनापहारतः । तथा दिशाश्वासनमद्य शाश्वतं निजं यथाऽऽश्वासनमाभजामहे ॥ २१ ॥
यच्चावश्यकमन्यथा न भवतीत्यादिष्टमीश त्वयैवास्मात्सागसि मय्यपीह सरुषं दृष्टिं वृथा मा कृथाः ।
किं चानन्तदुरन्त-दैत्यनिवह - प्राणप्रहाणोद्यतं त्वामन्यायविधानमेव रिपुगं चक्रे पुराऽग्रेऽपि च ॥ २२ ॥
त्वत्पादनीरजसुधासरिति प्रभोऽहं तद्द्रुह्वागनलतप्तहृदद्य मंक्तुम् ।
प्राप्तोऽस्मि तत्रभवतः कृपया तदेतत् संपादितं तदिति वृत्तमपि ॥ २३ ॥
यत्कृत्यं सदसाधु वा कृतमलं तत्सर्वतः सेवको यः स्वस्वामिपदे निवेदयति निर्व्याजं स राज्ञः प्रियः ।
स्यादेवेत्यखिलेशकृत्यमखिलं विज्ञापितं सन्मया त्वं वेत्स्यत्र न संशयो मम मनाक् सर्वज्ञ तत्पाहि माम् ॥ २४ ॥

कृष्णप्रिया

हमारा नाममात्र का मामा कंस तो हमारे कुल के लिये एक भयङ्कर व्याधि है। जबतक उसकी बढ़ती हो रही है, तबतक हम अपने वंशवालों और उनके बाल-बच्चों का कुशल-मङ्गल क्या पूछें ॥ ५॥ चाचीजी ! हमारे लिये यह बड़े खेद की बात है कि मेरे ही कारण मेरे निरपराध और सदाचारी माता-पिताको अनेको प्रकार की यातनायें झेलनी पड़ी—तरह-तरह के कष्ट उठाने पड़े। और तो क्या कहूँ, मेरे ही कारण उन्हें हथकड़ी-बेड़ी से जकड़ कर जेल में डाल दिया गया तथा मेरे ही कारण उनके बच्चे भी मार डाले गये ॥ ६ ॥ मैं बहुत दिनों से चाहता था कि आप लोगों में से किसी-न-किसी का दर्शन हो। यह बड़े सौभाग्य की बात है कि आज मेरी वह अभिलाषा पूरी हो गयी। सौम्य स्वभाव चाचाजी ! अब आप कृपा करके यह बतलाइये कि आपका शुभागमन किस निमित्त से हुआ ॥ ७ ॥ श्रीशुकदेवजी कहते हैं—परीक्षित् ! जब भगवान् श्रीकृष्ण ने अक्रूरजी से इस प्रकार प्रश्न किया, तब उन्होंने बतलाया कि 'कंस ने तो सभी यदुवंशियों से घोर वैर ठान रखा है। वह वसुदेवजी को मार डालने का भी उद्यम कर चुका है ॥ ८ ॥

यत्संदेशो [1]यदर्थं वा दूतः संप्रेषितः स्वयम् । यदुक्तं नारदेनास्य स्वजन्मानकदुन्दुभेः ॥ ९ ॥
श्रुत्वाक्रूरवचः कृष्णो बलश्च परवीरहा । प्रहस्य नन्दं पितरं राज्ञाऽऽदिष्टं विजज्ञतुः ॥ १० ॥
गोपान् समादिशत् सोऽपि गृह्यतां[2] सर्वगोरसः । उपायनानि गृह्णीध्वं युज्यन्तां शकटानि च ॥ ११ ॥
यास्यामः श्वो मधुपुरीं दास्यामो नृपते [3]रसम् ।
द्रक्ष्यामः[4] सुमहत् पर्व यान्ति जानपदाः किल । [5]एवमाघोषयत् क्षत्त्रा नन्दगोपः स्वगोकुले ॥ १२ ॥

---

१. यदर्थो–विज. । २. गृह्यन्तां–प्रा. पा. । ३. रसान्–श्रीधर. वंशी. जीव. वीर. विज. विश्व. आदयः । ४. मोऽत्र महत्सत्रं–वीर ; सुमहत्सत्रं–विज. । ५. श्रीशुक उवाच–म. पु. मु. ।

कर्दमक्षमा

अन्वयः—नारदेन, अस्य, (कंसस्य) आनकदुन्दुभेः, स्वजन्म, यद्, उक्तम्, यत्, संदेशः, यदर्थम, वा स्वयम्, दूतः प्रेषितः, (तत्, कथयामास) ॥ ९ ॥ कृष्णः, च, परवीरहा, बलः, अक्रूरवचः, प्रहस्य, राज्ञा (कंसेन) दिष्टम्, पितरम्, नन्दम्, व्यजिज्ञपत्, (विजज्ञातुः) ॥ १० ॥ सः, अपि, सर्वगोरसः, गृह्यताम्, उपायनानि गृह्णीध्वम्, च शकटानि, युञ्जन्ताम्, (इति) गोपान्, समादिशत् ॥ ११ ॥ श्वः, यदुपुरीम्, दास्यामः, नृपतेः, गोरसम्, दास्यामः, पर्व, द्रक्ष्यामः, जानपदाः, यान्ति, किल, इति, नन्दगोपः, स्वगोकुले, क्षत्रा, एवम्, आघोषयत् ॥ १२ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

यो धनुर्मखच्छद्मा संदेशो यस्य । यदर्थं चाणूरादिभिर्घातनार्थं स्वयं संप्रेषितः । अस्य कृष्णस्य पुरतो वर्णयामास । स्वजन्म कृष्णजन्म । आनकदुन्दुभेः सकाशात् ॥ ९ ॥ विजज्ञतुर्विशेषेण ज्ञापयामासतुः ॥ १० ॥ सोऽपि नन्दोऽपि गोपान्समादिशत् । तदेव दर्शयति गृह्यतामित्यादिना । गोरसः क्षीरादिः उपायनानि राज्ञे निवेदनी यान्युत्तमवस्तूनि ॥ ११ ॥ रसान्घृतादीन् । शब्दच्छलेनेद सूचयति । अचिकित्स्यस्य रोगस्य चिकित्सार्थं रसान्दास्याम इति । क्षत्त्रा व्रजरक्षाधिकृतेन । आघोपयत्सर्वतो घोषितवान् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वयम् अक्रूरः । प्रेषितः कंसेनेति शेषः । किं तदुक्तं तत्राह– स्वजन्मेति ॥ यत्संदेशः स्वयमात्मनाऽक्रूरो दूतस्तेन प्रेषितः यदर्थं वा तत्संदेशं तमर्थञ्च वर्णयामासेति योजना । सम्प्रति वैरसातत्यादौ हेतुः–यदुक्तमिति ॥९॥ परेषु शत्रुषु वीरः कंसस्तद्धंता, परश्चासौ वीरश्चेति वा ॥ वैशंपायनोक्तमपि वाक्यजातमत्रानुसंधेयम्—"मथुरां स्वपुरीं तात यास्यामः स्वसुखाय वै । गमिष्यन्ति व्रजाः सर्वे गोपालाः सपरिग्रहाः ॥ कंसाज्ञया समुचितं करमादाय वार्षिकम् । समृद्धस्तस्य कंसस्य भविष्यति धनुर्महः ॥ तद्द्रक्ष्यथः समृद्धं च स्वजनैश्च समेष्यथः । पितरं वसुदेवञ्च सततं दुःखभाजनम् ॥ दीनं पुत्रवधश्रान्तं युवामथ समेष्यथः । सततं पीड्यमानञ्च कसेनाश्रुतबुद्धिना ॥ देशान्ते शोषितं वृद्धं दुःखैः शिथिलतां गतम् । कंसस्य भयसंत्रस्तं भवद्भ्यां च विना कृतम् ॥ दह्यमानं दिवारात्रौ सोत्कण्ठेनान्तरात्मना । तां च द्रक्ष्यसि गोविंद पुत्रैरमृदितस्तनीम् ॥ देवकीं देवसंकाशां सीदन्ती विगतप्रभाम् । पुत्रशोकेन शुष्यन्ती त्वद्दर्शनपरायणाम् ॥ वियोगशोकसन्तप्तां विवत्सामिव सौरभीम् । उपप्लुतेक्षणां दीनां नित्यं मलिनवाससम् ॥ स्वर्भानुवदनग्रस्तां शशांकस्य प्रभामिव । त्वद्दशनपरां नित्यं तवागमनकांक्षिणीम् ॥ त्वत्प्रवृत्तेन शोकेन सीदन्ती वै तपस्विनीम् । त्वत्प्रभावेष्वकुशलां त्वया बाल्ये वियोजिताम् । अरूपज्ञां तव विभो वक्रस्यास्येन्दुवर्चसः ॥ यदि त्वां जनयित्वा सा देवकी परितप्यते । अपत्यार्थो नु कस्तस्या वरमेवानपत्यता ॥ त्वं तु शक्रसमो यस्याः पुत्रः स्वसदृशो गुणैः । परेषामप्यभयदो न सा शोचितुमर्हति ॥ वृद्धौ तवाद्य पितरौ परभृत्यत्वमागतौ । भर्त्स्येते त्वत्कृते तेन कंसेनाशुभबुद्धिना ॥ यदि ते देवकी मान्या पृथिवी वात्मधारिणी । तां शोकसलिले मग्नामुत्तारयितुमर्हसि ॥ तं च वृद्धं प्रियसुतं वसुदेवं सुखोचितम् । पुत्रयोगेन संयोज्य कृष्ण धर्ममवाप्स्यसि ॥ यथा नागः सुदुर्वृत्तो दमितो यमुनाह्रदे । विमूलश्च कृतः शैलो यथा वै भूधरस्त्वया ॥ दर्पोत्सिक्तश्च बलवानरिष्टोऽपि निपातितः । परप्राणहरः केशी दुष्टात्मा च हयो हतः ॥ एतेनैव प्रयत्नेन वृद्धावुद्धृत्य दुःखितौ । यथा धर्ममवाप्नोषि तत्कृष्ण परिचिंत्यताम् ॥ निर्भर्त्स्यमानो यैर्दृष्टः पिता ते कंससंसदि । ते सर्वे चक्षुरश्रुभिर्नेत्रैरभ्युत्थिता भृशम् ॥ गर्भावकृंतनादीनि दुःखानि च बहूनि च । माता ते देवकी कृष्ण कंसस्य सहते वशे ॥" इत्यादि । प्रहस्येति—स्वमृत्युमपि निमंत्र्य स्वान्तिकमानेतुमुपक्रमते युष्माकं राजेत्यर्थद्योतकोऽयं प्रहासः । राजादिष्टं धनुर्मखनिमन्त्रणं विज्ञापयामासतुर्न तु रहस्यम् । विज्ञापने हेतुः–परवीरहेति । पर उत्कृष्टो वीरः कंसस्तद्धननार्थमेवेति भावः ॥ १० ॥ सर्वे गोरसाः क्षीराज्यदध्यादिरूपा यत्र समूहे स तथा यद्वा—सर्वगः सर्वत्रगः रसः सुवर्णादिः "रसो रागे विषे वीर्ये तिक्तादौ पारदे द्रवे । रेतस्यास्वादने हेम्नि शृंगारादौ ध्वनावपि ॥" इति यादवः । यद्वा–सर्वगः सर्वव्यापी रसः कृष्णः "रसो वै सः" "स ह्येवायं लब्ध्वाऽऽनन्दीभवति" इति श्रुतेः कंसेन गृह्यतामस्मद्देशाऽधीशत्वाद्दुष्कर्मत्वेऽपि तस्य मोक्षो भवत्वित्यभिप्रायः । उत्तमवस्तूनि रत्नादिरूपाणि नवनीतादीनि वा ॥ सोऽपि स्वपुत्रपालनव्यग्रत्वेन प्रसिद्धः श्रीनन्दोऽपीत्यर्थः । इन्द्रमखभंगवत्तस्यैव विज्ञापनमोहनतया परवशीभूयेति भावः । एवं न कस्यापि तत्र विप्रतिपत्तिर्जातेति ज्ञेयम् ॥ ११ ॥ शब्दच्छलेन श्लेषेण । एकशब्दस्यानेकार्थताविशिष्टस्य प्रकृतभिन्नाभिन्नार्थसूचनं श्लेषः । अचिकित्स्यस्यानिवर्त्यस्य रोगस्य कंसस्य । तत्रैव भगवताण्यामयशब्दः प्रयुक्तः 'एधमाने कुलामये' इति । चिकित्सार्थं निवृत्त्यर्थम् । रसान् विषवन्मारकस्वभावाश्रीकृष्णबलदेवरूपान् । बहुत्वं पूजायाम् । पूर्वोत्सवम् "पक्षसंधावुत्सवे च ग्रथौ पर्व विदुर्बुधाः" इति दत्तः । जानपदा लोकाः 'भवेज्जनपदो जानपदोऽपि जनदेशयोः" इति मेदिनी । "क्षत्ता शूद्राक्षत्रियजे प्रतीहारे च सारथौ । भुजिष्यात नयेऽपि स्यान्नियुक्ते वेधसि पुमान् ॥" इति च ॥ जानपदा इति—सर्वजनपदवासिनो यान्तीत्यतोऽस्माकमेव तत्र का विप्रतिपत्तिरिति भावः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यत्सन्देशः स्वयमात्मनाऽक्रूरो दूतस्तेन सम्प्रेषितो यदर्थं वा तत्सन्देशं तमर्थञ्च वर्णयामास सम्प्रति वैरसातत्यादौ हेतुः यदुक्तमिति तच्चेति पूर्ववत् अन्यत्तैः तत्र सन्देशो हरिवंशानुसारेण वाच्यः नन्दगोपैरित्यादिकः पूर्वोक्त एव ज्ञेयः यदर्थमिति यश्चाणूरादिभिर्घातनमेवार्थो यत्र तादृशं यथा स्यात्तथा प्रेषित इति योज्यम् अन्यश्चाक्रूरस्य श्रीकृष्णावेदनवाक्यं श्रीवैशम्पायनेनोक्तं "स्वपुरीं मथुरां तात ! गमिष्यामः सुखाय वै । यास्यन्ति च व्रजाः सर्वे गोपालाः सपरिग्रहाः । कंसाज्ञया समुचितं करमादाय वार्षिकम् । समृद्धस्तस्य कंसस्य भविष्यति धनुर्महः । तद्द्रक्ष्यथः समृद्धञ्च स्वजनैश्च समेष्यथः । पितरं वसुदेवञ्च सततं दुःखभाजनम् । दीनं पुत्रवधश्रान्तं युवामथ समेष्यथः सततं पीड्यमानञ्च कंसेनाशुभबुद्धिना । देशान्ते शोषितं वृद्धं दुःखैः शिथिलताङ्गतम् । कंसस्य भयसंत्रस्तं भवद्भ्याञ्च विना कृतम् । दह्यमानं दिवारात्रौ सोत्कण्ठेनान्तरात्मना । ताञ्च द्रक्ष्यसि गोविन्द पुत्रैरमृदितस्तनीम् । देवकीं देवसङ्काशां सीदन्तीं विहतप्रभाम् । पुत्रशोकेन शुष्यन्तीं त्वद्दर्शनपरायणाम् । वियोगशोकसन्तप्तां विवत्सामिव सौरभीम् । उपप्लुतेक्षणां दीनां नित्यं मलिनवाससम् । स्वर्भानुवदनग्रस्तां शशाङ्कस्य प्रभामिव । त्वद्दर्शनपरां नित्यं तवागमनकाङ्क्षिणीम् । त्वत्प्रवृत्तेन शोकेन सीदन्तीं वै तपस्विनीम् । तत्प्रभावेष्वकुशलां त्वया बाल्ये वियोजिताम् । अरूपज्ञां तव विभो वक्त्रस्यास्येन्दुवर्चसः । यदि त्वां जनयित्वा सा देवकी परितप्यते । अपत्यार्थो नु कस्तस्या वरं ह्येवानपत्यता । किञ्च । त्वन्तु शक्रसमः पुत्रो यस्याः स्वसदृशो गुणैः । परेषामप्यभयदो न सा शोचितुमर्हति । वृद्धौ तवाद्य पितरौ परभृत्यत्वमागतौ । भर्त्स्येते त्वत्कृते तेन कंसेनाशुभबुद्धिना । यदि ते देवकी मान्या पृथिवीवात्मधारिणी । तां शोकसलिले मग्नामुत्तारयितुमर्हसि । तञ्च वृद्धं प्रियसुतं वसुदेवं सुखोचितम । पुत्रयोगेन संयोज्य कृष्ण ! धर्ममवाप्स्यसि यथा नागः सुदुर्वृत्तो दमितो यमुनाह्रदे । विमूलश्च कृतः शैलो यथा वै भूधरस्त्वया । दर्पोत्सिक्तश्च बलवानाविष्टोऽपि निपातितः । परप्राणहरः केशी दुष्टात्मा च हयो हतः । एतेनैव प्रयत्नेन वृद्धावुद्धृत्य दुःखितौ । यथा धर्ममवाप्नोति तत्कृष्ण ! परिचिन्त्यतां निर्भर्त्स्यमानो यैर्दृष्टः पिता ते कंससंसदि । ते सर्वे चक्षुरश्रूणि नेत्रैर्दुःखान्विता भृशम् । गर्भावकृन्तनादीनि दुःखानि च बहून्यपि । माता ते देवकी कृष्ण ! कंसस्य सहतेऽवशेत्यादि ॥ ९ ॥ श्रुत्वा प्रहस्येति प्रहस्य पितरं विजज्ञतुरिति चान्वयः पूर्वत्र स्वामीष्टलाभात् उत्तरत्रावज्ञाज्ञापनेन तच्छङ्कासङ्कोचनायेति ज्ञेयं यतः परः शत्रुर्यो वीरो महाविक्रमः तं हन्तीति तथा सः विज्ञापने हेतुः पितरमिति अत एव राज्ञादिष्टमेव नत्वक्रूरोक्तमन्यदपीत्यर्थः । किञ्च राज्ञेति राजाज्ञायास्तादृश्यास्तथैव वक्तुमुचितत्वात् । यद्वा उत्तरत्र प्रहस्येत्यत्र हेतुः पितरं स्नेहपरवशमित्यर्थः । विज्ञापने प्रयोजनं परवीरहेति कंसहननार्थमित्यर्थः । विजज्ञतुरित्यन्तर्भूतण्यर्थः विज्ञापनं पितृसन्निधानमागत्येति ज्ञेयम् ॥ १० ॥ सोऽपीति । स्वपुत्रपालनव्यग्रत्वेन प्रसिद्धः श्रीनन्दोऽपीत्यर्थः इन्द्रमखभङ्गवत् तस्यैव विज्ञापनमोहनतया परवशीभूयेति भावः । एवं सर्वेषामपि विप्रतिपत्तिर्न जातेति ज्ञेयं श्लेषेण श्रीवल्लवेन्द्रोऽपि वत तत्रासंमतो नाभूत् किन्तु समादिशदिति श्रीबादरायणेर्व्रजयोषिद्भावभयशोषव्यञ्जना ॥ ११ ॥ यास्याम इति पद्यस्यैवमित्यर्द्धेन श्रृङ्खला यान्ति जानपदा इत्यभयोक्तिः किल प्रसिद्धौ ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वयमक्रूरः, नन्वेतावन्तं कालमेवमकृत्वा कुतोऽधुना कर्त्तुमारभतेत्यपेक्षायामाह—यदुक्तमिति । अन्यत्तैर्व्याख्यातम् । यद्वा, यदर्थमिति गोकुलान्मधुपुर्यां भ्रातृ-पित्रादिसहितस्य तस्य नयनार्थमिति, अस्य कंसस्य तं प्रति यदुक्तमेतच्चाक्रूरवचनं परमार्त्तिहेतुत्वात् श्री वादरायणिना संक्षेपेणोक्तम्, श्रीवैशम्पायनेन च विस्तरेण वर्णितम्, तथा च श्रीहरिवंशे (वष्णु. प. २६।२-१३)—

> 'श्वः पुरीं मथुरां तात गमिष्यामः सुखायवै । यास्यन्ति च व्रजाः सर्वे गोपालः सपरिग्रहाः ॥
> कंशाज्ञया समुचितं करमादाय वार्षिकम् । समृद्धृस्तस्य कंसस्य भविष्यति धनुर्म्महः ॥
> तं द्रक्ष्यथः समृद्धञ्च त्वजनैश्च समेष्यथः । पितरं वसुदेवञ्च सततं दुःखभाजनम् ॥
> दीनं पुत्रवध-श्रान्तं युवामद्य समेष्यथः । सततं पीड्यमानञ्च कंसेनाशुभबुद्धिना ॥
> दशान्ते शोषितं वृद्धं दुःखैः शिथिलतां गतम् । कंसस्य भयसन्त्रस्तं भवद्भ्याञ्च विना कृतम् ॥
> दह्यमानं दिवारात्रौ सोत्कण्ठेनान्तरात्मना । ताञ्च द्रक्ष्यसि गोविन्द पुत्रैरमृदितस्तनीम् ॥
> देवकीं देवसंकाशां सीदन्तीं विहतप्रभाम् । पुत्रशोकेन शुष्यन्तीं त्वद्दर्शनपरायणाम् ॥
> वियोगशोकसन्तप्तां विवत्सामिव सौरभीम् । उपप्लुतेक्षणां दीनां नित्यं मलिनवाससम् ॥
> स्वर्भानुवदनग्रस्तां शशांकस्य प्रभामिव । त्वद्दर्शनपरां नित्यं तवागमनकाङ्क्षिणीम् ॥
> त्वत्प्रवृत्तेन शोकेन सीदन्तीं वै तपस्विनीम् । तत्प्रलापेष्वकुशलां त्वया बाल्ये वियोजिताम् ॥
> अरूपज्ञां तव विभोः वक्त्रस्यास्येन्दुवर्च्चसः ।
> यदि त्वां जनयित्वा सा देवकी परितप्यते । अपत्यार्थो नु कस्तस्या वरं ह्येवानपत्यता ॥'

किञ्च, (हरिवंशे विष्णुपर्व २६।१६–२३)—

'त्वन्तु शत्रुसमः पुत्रो यस्यास्त्वसदृशो गुणैः। परेषामप्यभयदो न सा शोचितुमर्हति ॥
वृद्धौ तवाद्य पितरौ परभृत्यत्वमागतौ। तर्ज्जितौ त्वत्कृते नित्यं कंसेनाशुभबुद्धिना ॥
यदि ते देवकीमान्या पृथिवी वात्मधारिणी। तां शोकसलिले मग्नामुत्तारयितुमर्हसि ॥
त्वञ्च वृद्धं प्रियसुतं वसुदेवं सुखोचितम्। पुत्रयोगेन संयोज्य कृष्ण धर्म्ममवाप्स्यसि ॥
यथा नागः सुदुर्वृत्तो दमितो यमुना-ह्रदे। विमूलश्च कृतः शैलो यथा वै भूधरस्त्वया ॥
दर्पोत्सिक्तश्च बलवानरिष्टो विनिपातितः। परप्राणहरः केशी दुष्टात्मा च हयो हतः ॥
एतेनैव प्रयत्नेन वृद्धावुद्धृत्य दुःखितौ। यथा धर्म्ममवाप्नोषि तत् कृष्णपरिचिन्त्यताम् ॥
निर्भर्त्स्यमानो यैर्दृष्टः पिता ते कंससंसदि। ते सर्व्वे चक्रुरश्रूणि नेत्रैर्दुःखान्विता भृशम् ॥
गर्भावकृन्तनादीनि दुःखानि सुवहून्यपि। माता ते देवकी कृष्ण कंसस्य सहते वश ॥' इत्यादि।
एतच्च सर्वं श्रीभगवतोऽत्यन्तानुकम्पाजननार्थं ज्ञेयम् ॥ ९ ॥

परः शत्रुर्यो वीरो महाविक्रमः, किंवा परेषु वीरस्तं हस्तीति तथा सः, अत एव प्रहस्य हेलयैव कंसहननसामर्थ्ये विराजमानेऽप्यक्रूरस्य सस्नेह-सभयदैन्यवचनात् कंसादिष्टमुत्सवार्थं पुर्य्यां सोपायनगमनमेव, न त्वक्रूरोक्तं पितृमातृदुःखं श्रीनारदोक्तादन्यत् किञ्चिदित्यर्थः। पितृदुःखहेतुत्वाद् विज्ञापने हेतुः – पितरमिति। किञ्च, राज्ञेति राजाज्ञायास्तादृश्यास्तदेव वक्तुमुचितत्वात्। यद्वा, क्रूरं दारुणं वचः श्रुत्वादि च श्रीनन्दाश्वासनार्थं प्रहस्य, यतः पितरं स्नेहपरवशमित्यर्थः। विज्ञापने प्रयोजनम्—परवीरहेति, कंसहननार्थमित्यर्थः ॥ १० ॥ सोऽपीति श्रीवल्लवेन्द्रस्तत्रासम्मतो नाभूत्, किन्तु समादिशदिति श्रीवादरायणेः शोकोक्तावपि-शब्दः ॥ ११ ॥ मधुपुरीमिति श्लेषेण तत्र सुखमेव, न तु किमपि दुःखमित्यादिकं गोपानामाश्वासनार्थम्, किलान्तस्तु प्रलोभनमात्रमित्यर्थः, नन्दश्चासौ गोपश्च गां पृथ्वीं व्रजलक्षणं पातीति राजेत्यर्थः, अयमाघोषणे हेतुः। श्लेषेण गोपायति रक्षतीति गोपः, सोऽपि यो गोकुलरक्षिता, स एव यदि तथा करोति स्म, तदा को वत तद्रक्षेदिति भावः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

यत्सन्देशेति। बहुव्रीहिः तं सन्देशं तत्प्रयोजनञ्च वर्णयामासेत्यन्वयः ॥ ९–११ ॥ पर्व उत्सवम् ॥ १२–१४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यः धनुर्यागच्छद्मा सन्देशो यस्य सः स्वयमात्मा दूतः दूतीकृतः यदर्थं सोपायं समानयनेन चाणुरादिभिर्घातनार्थं प्रषितः आनकदुन्दुभेः वसुदेवात् सकाशात् स्वजन्म कृष्णजन्म यन्नारदेनास्य कंसस्योक्तं तत्सर्वं वर्णयामासेति सम्बन्ध ॥ ९ ॥ इत्थं वर्णितमक्रूरस्य वच आकर्ण्य कृष्णः पराञ्छत्रून् वीरान्हन्तीति तथा बलो रामश्च प्रहस्य राज्ञा कंसेनादिष्टं सर्वं नन्द प्रति विजज्ञतुः विज्ञापयामासतुः ॥ १० ॥ सोऽपि नन्दोऽपि गोपान् समादिशत् आज्ञापयामास समादेशप्रकारमेवाह। गृह्यतामित्यादिना किलेत्यन्तेन। गोरसः क्षीरादिगृह्यतां तथोपायनानि उत्तमवस्तूनि गृह्णीध्वं शकटानि युज्यन्तां वृषभैरिति शेषः ॥ ११ ॥ श्वः समनन्तरेऽन्हि मधुपुरीं प्रति गमिष्यामः नृपतेः कंसस्य सम्प्रदानस्य शेषत्वविवक्षया षष्ठी रसान् क्षीरघृतादीन् दास्यामः अत्र मधुपुर्य्यां महासत्रं धनुर्यागं द्रक्ष्यामः जानपदा देशवासिनस्तत्र यान्ति किल तांश्च द्रक्ष्याम इत्यर्थः। इत्थं नन्दगोपः स्वगोकुलक्षत्रा सूतेन प्रयोज्यकर्त्रा अघोषयत् ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अस्य कंसस्य नारदेन यदुक्तं तदपि किन्तदुक्तं तत्राह। स्वजन्मेति ॥ ९ ॥ विजज्ञतुः विज्ञापयामासुः ॥ १०–११ ॥ रसानाज्यादीन् हेमानि वा—

रसो रागे विषे वीर्ये तिक्तादौ पारदे द्रवे। रेतस्यास्वादने हेम्नि निर्यासे रसशब्दयोरिति च ॥

पर्व उत्सवं "पक्षसन्धाधुत्सवे च ग्रन्थौ पर्व विदुर्बुधा" इति दत्तः क्षत्रा यन्त्रा ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सोऽपि स्वपुत्रपालनव्यग्रत्वेन प्रसिद्धः श्रीनन्दोऽपीत्यर्थः। इन्द्रमखभङ्गवत्तस्यैव विज्ञापनमोहनतया परवशीभूयेति भावः ॥ ११–२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रहस्येति। स्वमृत्युमपि निमन्त्र्य स्वान्तिकमानेतुमुपक्रमते युष्माकं राजेत्यर्थस्य द्योतकोऽयं प्रहासः राज्ञादिष्टं धनुर्मखोत्सवनिमन्त्रणं विज्ञावयामासतुर्नतु रहस्यम् ॥ १० ॥ सोऽपि नन्दः ॥ ११ ॥ रसान् घृतादीन् नृपतेः करान् जानपदा इति सर्वं जनपदवासिनश्च यान्तीत्यतोऽस्माकमत्र का विप्रतिपत्तिरिति भावः। क्षत्रा व्रजनगररक्षाधिकारिणा ॥ १२ ॥

गूढार्थदीपिनी

यः संदेशः धनुर्मखव्याजरूपो यस्य। यदर्थं मारणार्थम् स्वयम् अह दूतः प्रेषितः आनकदुन्दुभेः वसुदेवात् यत् कृष्णजन्म उक्तं तच्च वर्णयामासेत्यन्वयः। अस्य कृष्णस्य अग्रे॥ ९॥ विजज्ञतुः निवेदयामासतुः॥ १०॥ सोऽपि नन्दोऽपि। युज्यन्तां वृषभैरिति शेषः॥ ११॥ रसान् घृतादीन् श्लेषेण 'रसो वै सः' इति श्रुतेः कृष्णबलदेवरूपान्। बहुत्वमादरार्थे। नृपतेः कंसाय। क्षत्रा द्वारपालेन सर्वतो घोषितवान्॥ १२–१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

परान् स्वप्रतिकूलान् वीरान् हन्तीति तथा विजज्ञतुः विज्ञापयामासतुः॥ १०॥ गोरसः क्षीरादिः गृह्यताम् उपायनानि राज्ञे देयान्यन्यानि चोत्तमवस्तूनि गृह्णीध्वं शकटानि च युज्यन्तामिति गोपान् सोऽपि श्रीनन्दोऽपि समादिशत् आज्ञापयामास॥ ११॥ श्वोऽनागतेऽह्नि नृपतेः कंसाय रसान् क्षीरादीन् दास्यामः सम्प्रदानस्य शेषत्वविवक्षया षष्ठी क्षत्रा प्रतीहारेण नियोज्यकर्त्रा एवमाघोषयत् सर्वतः घोषितवान्—

क्षत्ता शूद्रात्क्षत्रियजे प्रतीहारे च सारथौ। भुजिष्यातनये क्षत्ता नियुक्ते च प्रजासृजीति विश्वः॥ १२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

क्षत्रा सूतेनैवं श्वो गन्तव्यमित्यघोषयत्। याः कृष्णसङ्गतास्ता गोप्यस्तद्धोपणमुपाश्रुत्य व्यथिताशया बभूवुः॥ ९॥ पुरीं मथुरां तत्कृताभ्यां गमनवार्ताश्रवणकृताभ्यां हृत्तापश्च श्वासश्च ताभ्यां म्लानं क्षीणहर्षं यन्मुखं तस्य श्रीरिति विपर्यासोक्तिर्यासां ता म्लाना मुखश्रीर्यासामिति वा स्रंसन्त्यो दुकूलवलयकेशग्रन्थ्यो ग्रन्थयो यासां ताः। काश्चन तस्य कृष्णस्यानुध्यानेन निवृत्ता अशेषा वृत्तयो यासां ताः॥ १०–११॥ इमं लोकं देहमात्मलोकं मोक्षं गता इव नाभ्यजानन्। शौरेरनुरागश्च स्मितं च ताभ्यामीरिताः॥ १२॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

स्वस्य प्रेरणे प्रकारश्च य एव सन्देशो यस्य व्याजेनानेय इति यदर्थं वा स्वयं दूतः तेनैव सम्प्रेषितः अनिष्टभावनया समाकारणार्थमिति एतस्य सर्वस्यापि मूलं नारदवाक्यमित्याह। यदुक्तमिति। नारदोक्तमेव वदति आनकदुन्दुभेः सकाशात् स्वस्य भगवतो जन्मेति अस्य भगवतः स्वस्य देहस्य वा आनकदुन्दुभिपदेन हेतुपूर्वकं सर्वमुक्तवानिति द्वयं सञ्जातं द्वयमागमनकारणं हेतुर्नारदवाक्यमिति॥ ९॥ श्रुत्वेति एवं पञ्च पदार्थान् श्रुत्वा कृष्णः कालात्मा बलश्च क्रियाशक्तियुक्तिः एतदर्थमेवातीर्णौ परस्य शत्रोर्वीराणां हन्ता आवेशी यदस्माभिः कर्त्तव्यं तदनेनैव कृतमिति प्रहस्य गोप्यं गोप्यमेव विधाय अन्यथा भीतो नन्दो गन्तुं न प्रयच्छेदिति पितृत्वं तस्मिन् स्थापयन्नेव राज्ञा आदिष्टं कौतुकदर्शनार्थमागन्तव्यमिति विजज्ञतुः ज्ञापयामासतुः॥ १०॥ भगवदिच्छया पूर्वं शङ्कितोऽपि कंसकृतोत्साहं द्रष्टुं सामग्रीं च सम्पादयितुं सोऽपि नन्दोऽपि गोपान् समादिशत् अस्ति कश्चिद्ग्रामे वाक्यवक्ता तद्द्वारा समादिशदित्यग्रिमवाक्यादवगन्तव्यं तस्याघोषवाक्यान्याह षट्। गृह्यतामित्यादि। सर्वोऽपि गोरसः दधिदुग्धात्मकः गृह्यतामिति नयनार्थं पृथक् क्रियतां यत्प्रथमतः कर्त्तव्यं तदुच्यते अन्यथा रात्रिशेषे दध्नो मन्थनं स्यात् दुग्धानां च यथेष्ट विनियोगः एते गोपालाः प्रत्येकं समर्थाः मण्डलाधिपतय इव महाराजाः न केवलं गोरसमात्रं ग्राह्यम् उपायनान्यपि गृह्णीध्वमभीष्टानि वस्त्राभरणानि यानि भगवदर्थं युज्यन्ते तान्येतद्द्वारा नीतानीति तदर्थमेतमुद्यतः एवं पदार्थसम्भृतिमुक्त्वा साधनसम्भृतिमाह। युज्यन्तां शकटानीति। यानि शकटानि गमनयोग्यानि स्वतः वाहनतश्च योजनं सज्जीकरणं चकारात् रथाश्वादिकं च॥ ११॥ एवं सम्भारस्य प्रयोजनमाह। यास्याम इति। श्व एव मथुरां यास्यामः तर्हि स्वभोजनपर्याप्तमेव गोरसादिकं ग्राह्यमित्याशङ्क्याह। दास्यामो नृपतेरसमिति। रक्षकाय ह्यवश्यं देयः षष्ठो भागस्तस्यैवेति अतो नृपतेरित्युक्तं पूर्वमसाध्यबुद्ध्या रसा न दत्ताः। अधुना तु क्रौर्यं परित्यज्य उत्तवार्थमाकारयतीति साध्यतापरिज्ञानं ननु निर्वन्धाभावात् शङ्कायास्त्वविद्यमानत्वात् किमिति गन्तव्यमिति चेत्तत्राह। द्रक्ष्यामः सुमहत्पर्वेति। इयं चदुर्दशी महत्पर्वभाद्रपदकृष्णाष्टम्यामेकादश वर्षा जाताः तत्र च धनुर्य्यागो जायत इत्यवश्यं गन्तव्यम्। अत्र कापट्यं नास्तीति प्रमाणमाह। यान्ति जानपदा इति। तत्रापि प्रमाणं किलेति प्रसिद्धिः इदं सप्तमं वाक्यं प्रमाणत्वाद्भिन्नमुक्तं प्रत्येकं गृहे यथेयं वार्त्ता श्रुता भवति तथा अघोषयदित्याह। एवमाघोषयदिति। क्षत्त्रा अन्तःपुराध्यक्षेण सहि रहस्यवेत्ता भवति अथवा गोपान् समीपे समागतानेवमादिशत् स्वगोकुले तु क्षत्त्रा समादिशदित एवं सर्वत्र श्वो भगवान् गमिष्यतीति प्रकारान्तरेण ज्ञापनमुक्तं सर्वेषां प्रीत्याधिक्याय॥ १२॥

श्रीसुबोधिनी–सारः

यो धनुर्यागकपटः संदेशो यस्य सः स्वयमक्रूरो यदर्थं तदानयनार्थं वा दूतः संप्रेषितः कंसस्य तदानयनापेक्षत्वान्न सर्ववर्णनेनाक्रूरे दोषकलङ्कः। अस्य कंसस्य नारदेनोक्तमानकदुन्दुभेर्वसुदेवात्स्वस्य तव जन्मेति तद्वर्णयामास॥ ९॥ अक्रूरस्य वचः श्रुत्वा कृष्णो बलश्च परवीरहा शत्रुघ्नः प्रहस्य राज्ञादिष्टं कंसेनाज्ञप्तम् अस्मदानयनादि पितरं नन्दं विशेषेण निवेदित-

वन्तौ ॥ १० ॥ सोऽपि नन्दो गोपान्समादिशत् आज्ञापयत् । सर्वगोरसो गृह्यतां संचीयताम् उपायनानि गृह्णीध्वं शकटानि युज्यंतां चेति ॥ ११ ॥ श्वः प्रभाते मथुरां गमिष्यामो वयम् । नृपतेः कंसस्य रसान् दास्यामः । सुमहत् पर्व धनुर्मखं द्रक्ष्यामः । जानपदा नानादेशीया जना यान्ति गच्छन्ति । नन्दगोपः स्वव्रजे क्षत्त्रा द्वारपेन हेतुनाऽश्रावयत् ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यः धनुर्यागच्छद्मा सन्देशो यस्य स तदर्थं चाणूरादिभिर्घातनार्थं सोपायनसमानयनार्थं स्वयं दूतः दूतीकृतः कंसेन व्रजे सम्प्रेषितश्च यश्चानकदुन्दुभेः सकाशात् स्वस्य कृष्णस्य जन्म नारदेनोक्तं तत्सर्वमस्य कृष्णस्याग्रे वर्णयामासेत्यन्वयः । अनेन यथार्थकथनेन भगवति तस्य निष्कपटत्वं दर्शितम् ॥ ९ ॥ इत्यक्रूरस्य वचः श्रुत्वा कृष्णो रामश्च प्रहस्य राज्ञादिष्टं स्ववधादि राज्ञोऽभिप्रेतं सङ्गोप्य 'धनुर्यागनिरीक्षणार्थं वयं राज्ञाहूता' इति नन्दंप्रति विजज्ञतुः विशेषेण ज्ञापयामासतुः । तत्र हेतुमाह—पितरमिति । अन्यथा स तत्र गमनं प्रति निरोधं कुर्यात्तौ गृहीत्वा पलायेतैवेत्याशयः । ननु 'कंसस्य वधोद्यमं श्रुत्वापि कथं तत्र गमने उत्सुकौ' इत्याशङ्क्याह—परवीरहेति । परान् शत्रुभूतान् वीरान् हन्तीति तथेति द्वयोर्विशेषणम्, अतो भयाभावादित्याशयः ॥ १० ॥ स नन्दोऽपि गोपान् समादिशत् आज्ञापयामास । 'आज्ञापयामास' इत्यत्र आज्ञापनमेवाह—गृह्यतामित्यादिना । गोरसः क्षीरादिः गृह्यताम्, तथोपायनानि राज्ञे दातुं योग्यानि उत्तमवस्तूनि गृह्णीध्वं, शकटानि च वृषभैर्युज्यन्ताम् ॥ ११ ॥ 'किमर्थमेतत् कर्तव्यम्' इत्यपेक्षायामाह—यास्याम इति । श्वः समनन्तरदिने मधुपुरीं प्रति गमिष्यामः, नृपतेः कंसस्य गोरसान् क्षीरघृतादीन् दास्यामः । 'किमर्थं तत्र गन्तव्यम् ?' इत्यपेक्षायामाह—द्रक्ष्याम इति । सुमहत्पर्व धनुर्यागमहोत्सवं द्रक्ष्यामः । 'न चेदानीं यागः समाप्तः, न चात्र कापट्यं किञ्चित्' इत्याशयेनाह—जानपदा इति । जानपदाः सर्वदेशनिवासिनो निमन्त्रिता यान्ति गच्छन्ति इति नात्र सन्देहः । 'प्रसिद्धमेतत्' इति सूचयन्नाह—किलेति । एवं नन्दगोपः क्षत्रा व्रजरक्षाधिकृतेन गोकुले अघोषयत् सर्वत्र अघोषितवान् ॥ १२ ॥

अन्वितार्थप्रकाशिका

यदिति । यः धनुर्यागच्छद्मा संदेशो यस्य स यदर्थं चाणूरादिभिर्घातनार्थं सोपायनसमानयनार्थं स्वयं दूतः दूतीकृतः कंसेन व्रजे सम्प्रेषितश्च यश्चानकदुन्दुभेः सकाशात् स्वस्य कृष्णस्य जन्म नारदेनोक्तं तत्सर्वमस्य कृष्णस्याग्रे वर्णयामासेत्यनुषङ्गः ॥ ९ ॥ श्रुत्वेति । इत्यक्रूरस्य वचः श्रुत्वा परवीरहा कृष्णो बलश्च प्रहस्य अहो स्वमृत्युमपि कंसो निमन्त्रयतीति प्रहासं कृत्वा राज्ञादिष्टं स्ववधादि राज्ञोऽभिप्रेतं संगोप्य धनुर्यागनिरीक्षणार्थं वयं राज्ञाऽऽहूता इति पितरं नन्दं प्रति तत्समीपं गत्वा विजज्ञतुः विशेषेण विज्ञापयामासतुः । अन्तर्भावितण्यर्थो ज्ञाधातुः ॥ १० ॥ गोपानिति । स नन्दोऽपि गोपान्समादिशत् आज्ञापयामास । गोरसः क्षीरादि गृह्यतां तथोपायनानि राज्ञ दातुं योग्यानि उत्तमवस्तूनि गृह्णीध्वं शकटानि च वृषभैर्युज्यन्ताम् ॥ ११ ॥ यास्याम इति । श्वः समनन्तरदिने मधुपुरीं प्रति यास्यामः गमिष्यामः । नृपतेः कंसस्य रसान् क्षीरघृतादीन् दास्यामः । अचिकित्स्यरोगस्य चिकित्सार्थं रसान् दास्याम इति ध्वननीयोऽर्थः । सुमहत्पर्व धनुर्यागं द्रक्ष्यामः । जानपदाः सर्वदेशनिवासिनो निमन्त्रिता यान्ति गच्छन्ति किल ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यत्संदेशः यो धनुर्यज्ञमिषः स देशो वाचिकं यस्य सः यदर्थं चाणूरादिभिः नाशनार्थं कंसेन स्वयं दूतो संप्रेषितः अस्य श्रीकृष्णस्य स्वजन्म आनकदुंदुभेः सकाशादस्तीति सर्वं वर्णयामास ॥९॥ परान् शत्रूनेव वीरान् शूरान् हन्तीति तथाभूतः विजज्ञतुः तौ ज्ञापयामासतुरित्यर्थः ॥ १० ॥ स नन्दोपि समादिशत् आज्ञापयामास तदेवाह गो रसो दुग्धादिः गृह्यतां उपायनानि श्रेष्ठपदार्थान् ॥ ११ ॥ सुमहत् धनुर्यागविशिष्टं पर्वपर्वणीं तत्र जानपदाः देशमनुष्यायांति ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यदिति । यः धनुर्यागच्छद्मा संदेशो यस्य सः, स्वयमात्मा, यदर्थं वा यदर्थमेव, दूतः संप्रेषितः, आनकदुन्दुभेः वसुदेवात् सकाशात् , स्वजन्म कृष्णजन्म, यत् नारदेन अस्य कंसस्याग्रे, उक्तं, तत् नारदेन अस्य कंसस्याग्रे, उक्तं तत सर्वं वर्णयामासेति सम्बन्धः ॥ ९ ॥ श्रुत्वेति । परान् शत्रुभूतान् वीरान् हन्तीति परवीरहा कृष्णः, बलो बलभद्रश्च, अक्रूरवचः श्रुत्वा, प्रहस्य पितरं नन्दं प्रति, राज्ञा कंसेन, आदिष्टं गोरसाद्युपादाय धनुर्मखनिरीक्षणार्थमागन्तव्यमित्यादिकं, विजज्ञतुः कथयामासतुः ॥ १० ॥ गोपानिति । सः नन्दः अपि, गोपान् समादिशदाज्ञापयामास । समादेशप्रकारमेवाह गृह्यतामित्यादिना किलेत्यन्तेन । हे गोपाः, सर्वगोरसः गृह्यताम् । तथा उपायनानि उत्तमवस्तूनि, गृह्णीध्वम् । शकटान्यनांसि च, युज्यताम् । वृषभैरिति शेषः ॥ ११ ॥ यास्याम इति । श्वः समनन्तरेऽह्नि, मधुपुरीं प्रति, यास्यास्मो गमिष्यामः । नृपतेः कंसाय, संप्रदानस्य शेषत्वविवक्षया षष्ठी । रसान् क्षीरघृतदींश्च, दास्यामः । तत्र मधुपुर्यामिति शेषः सुमहत् पर्व धनुर्यागादिकं, द्रक्ष्यामः । जानपदाः देशवासिनः, तत्र यान्ति किल । तांश्च द्रक्ष्यामः । एवं, नन्दगोपः, स्वगोकुले, क्षत्त्रा व्रजरक्षाधिकृतेन प्रयोज्यकर्त्रा, आघोषयत् सर्वतो घोषितवान् ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

श्रुत्वेति : १०.३९.१०.

श्रृण्वन्नेव - मशेषमुत्पथगतं तद्वृत्तमक्रूरतः क्रोधागाध - रसावलिप्तहृदयो - ऽप्यद्यानवद्ये व्रजे।
तद्व्यक्तीभवनं न चोचितमिति त्रैलोक्यनाथस्तदा स्वं रामोऽपि सहास्यमास्यमकरोत् सदिष्टदत्तेक्षणः ॥ २५ ॥
यो दुर्मतिर्द्विजान् द्वेष्टि देवान्साधूंश्च गा अपि। तत्पापमेव तं हन्तुमलमित्यकरोत् स्मितम् ॥ २६ ॥
अहो राज्यस्मयो नाम महादुरितकारणम्। प्रायश्चित्तं न तस्यास्ति यस्तद्वानिति सस्मितः ॥ २७ ॥
न यद्यपि सुहृच्छत्रू ममात्र समदर्शिनः। तथापि तौ ध्रुवं स्यातां यौ भक्तप्रियदुहृदौ ॥ २८ ॥
एवं प्रहसिताच्छ्रीशो व्यक्तीकुर्वन्निजाशयम्। सोत्साहमूचे पितरं श्रीशः स्वीयावनोत्सुकः ॥ २९ ॥ (युग्मम्)
प्रकृतोपयोगि किमपीह मयाऽस्मै व्रजनायकाय कथनीयमितीव। किमसौ प्रभुस्तदुदितार्थगशेषहृदयः सशेष इह प्रबभाषे ॥ ३० ॥
व्यजिज्ञपत्तदा राज्ञाऽऽदिष्टं सेवार्थमच्युतः। उपायनानि गृह्णीध्वमिति तद्वागतः क्षमा ॥ ३१ ॥
तावदज्ञाततत्त्वार्थो नन्दस्तत्र न संशयः। द्रक्ष्यामः सुमहत्पर्वेत्यन्यथैवं कथं वदेत् ॥ ३२ ॥
जानन्नेव विभुः स कंसचरितं जानन् स्वकीयस्थितिं जानन्नारदतोऽपि तात्त्विकमिहाक्रूरागतेः कारणम्।
श्रुत्वाऽक्रूरत एव तत्र पितरं नन्दं यदश्रावयत् तेनाज्ञानमलं व्यबोधि बहुधा तादृग् व्रजाधीशितुः ॥ ३३ ॥

गोपानिति : १०.३९.११

ज्ञात्वा तादृक्तदीयाशयमिह मनसा कारणे कार्ययोगं ज्ञात्वा चाज्ञानराजाङ्कितमखिलमिदं भोग्यमागोरसादि।
युक्तं सोत्साहवृत्तिर्व्रजपतिरखिलं घोषमुद्घोषशब्दैरन्वर्थं प्राग्विधाय प्रकटितमकरोज्ज्ञप्तये स्वाशयं सः ॥ ३४ ॥
यो जातोऽक्रूरयोगोऽसौ सपद्यज्ञानहार्यपि। सञ्जातः समयापेक्षी यदज्ञाननियोजितः ॥ ३५ ॥

कृष्णप्रिया

अक्रूर जी ने कंस का संदेश और जिस उद्देश्य से उसने स्वयं अक्रूर जी को दूत बनाकर भेजा था और नारद जी ने जिस प्रकार वसुदेव के घर श्रीकृष्ण के जन्म लेने का वृत्तान्त उसको बता दिया था, सो सब कुछ सुनाया ॥ ९ ॥ अक्रूरजी की यह बात सुनकर विपक्षी शत्रुओं का दमन करने वाले भगवान् श्रीकृष्ण और बलरामजी हँसने लगे और इसके बाद उन्होंने अपने पिता नन्दजी को कंस की आज्ञा सुना दी ॥ १० ॥ तब नन्दबाबा ने सब गोपों को आज्ञा दी कि 'सारा गोरस एकत्र करो। भेंट की सामग्री ले लो और छकड़े जोड़ो ॥ ११ ॥ कल प्रातःकाल ही हम सब मथुरा की यात्रा करेंगे और वहाँ चलकर राजा कंस को गो रस देंगे। वहाँ एक बहुत बड़ा उत्सव हो रहा है। उसे देखने के लिये देश की सारी प्रजा इकट्ठी हो रही है हम लोग भी उसे देखेंगे।' नन्दबाबा ने गाँव के कोतवाल के द्वारा यह घोषणा सारे व्रज में करवा दी ॥ १२ ॥

गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता[1] भृशम्। रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतम् ॥ १३ ॥
काश्चित्तत्कृत हृत्तापश्वासम्लानमुखश्रियः। स्रंसद्दुकूलवलयकेशग्रन्थ्यश्च[3] काश्चन ॥ १४ ॥
अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः। नाभ्यजानन्निमं लोकमात्मलोकं गता इव ॥ १५ ॥
स्मरन्त्यश्चापराः शौरेरनुराग[4]स्मितेरिताः। हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः ॥ १६ ॥

कवंमक्षमा

अन्वयः—गोप्यः, रामकृष्णौ, पुरीम्, नेतुम्, व्रजम्, आगतम्, उपश्रुत्य, ताः, तत् (हेतोः) भृशम्, व्यथिताः, बभूवुः ॥ १३ ॥ तत्, कृतहृत्तापश्वासम्लानमुखश्रियः, काश्चित्जाताः, स्रंसत् दुकुलवलयकेशग्रन्थ्यश्च काश्चन, जाताः ॥ १४ ॥ अन्याः, तदनुध्याननिवृत्ताशेषवृत्तयः, जाताः, च, अन्याः, आत्मलोकम्, गताः इव इमम्, लोकम्, न, अभ्यजानन् ॥ १५ ॥ अपराः, स्त्रियः, शौरेः, अनुरागस्मितेरिताः, हृदिस्पृशः, च, चित्रपदाः गिरः, स्मरन्त्यः, संमुमुहुः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ताः कृष्णैकजीवना गोप्यस्तत्तदाक्रूरमागतमुपश्रुत्येति ॥ १३ ॥ व्यथालिंगान्याह पंचभिः। काश्चिदिति। तेन श्रवणेन कृतो यो हृत्ताप स्तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां ता बभूवुरिति। दुकूलानि च वलयानि च केशग्रन्थयश्च स्रंसंतो दुकूलादयो यासां तथाभूताः काश्चन बभूवुरित्यर्थः ॥ १४ ॥ तस्य श्रीकृष्णस्यानुध्यानेन निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ता

---

१. व्यथिताशयाः–विज.। २. संतापाः–प्रा. पा.। ३. बन्धाश्च–इति कस्यचित्। ४. स्मितेक्षणाः–प्रा. पा.।

इमं लोकं देहमपि न जानन्ति स्म मुक्ता इवेति ॥ १५ ॥ अपराः स्त्रियः शौरेर्गिरः स्मरंत्यः संमुमुहुः। कथंभूताः। अनुरागेण यत्स्मितं तेनेरिताः। हृदि स्पृशंतीति हृदिस्पृशो मनोज्ञाः। चित्राणि पदानि यासु ताः ॥ १६–१७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

व्यथिता जातपीडाः ॥ उपश्रुत्य कस्यापि कुतश्चिन्मुखाच्छ्रुत्वा साक्षात्तासु कस्यापि कथनाशक्तेः। ताः स्वभावसिद्धप्रेयसीभावाः। तत् आघोषणमात्रं श्रुत्वा भृशं व्यथिताः। अन्यास्तु साधनसिद्धप्रेयसीभावास्तौ नेतुमागतमक्रूरमुपश्रुत्य भृशं व्यथिता इति योध्यम्। किन्तु—तासामपीयं व्यथा तद्विरहभीत्यैव जाता तत्र गतस्व तस्यानिष्टाशंकया तु न जाता 'तासां मुकुन्द—' इत्यादि वक्ष्यमाणात्। तद्गमने परमधीरश्रीमन्नंदोपनंदादिसर्ववृद्धवृन्दसंमतिरेव तत्र कारणमन्यथा सद्य एव तासामंतर्द्धानं स्यादिति लीलाशक्तिरेव तादृशस्फूर्तिमरीत्सीदिति ज्ञेयम्। विरहभीतिरपि न सार्वकालिकी तत्रासार्वकालिकस्थितिनिश्चयेन। नंदसूनुरिति—श्रीमन्नंदसूनुत्वेनैव निश्चेष्यमाणत्वात्। 'तासां मुकुन्द–' इत्यादिकस्याशंकामय मात्रत्वात्। अन्यथा तथापि प्रागुक्तमेव स्यात्। आशामात्राजीवातुत्वात्प्रोषितप्रेयसीनामेवमपि तादृश्यवस्था परमानुरागस्वभावेनैव ज्ञेया ॥१३॥ 'दुकूलं श्लक्ष्यवस्त्रे स्यात्क्षौमे च' इति मेदिनी ॥ तत्र रास दर्शितप्रेमतारतम्येनासामुत्तरोत्तरमवस्थावैशिष्ट्यमाह—काश्चिदिति त्रिभिः। यद्यप्यत्र पूर्वोक्ताया व्यथाया लिंगवर्णनमिति तदुपश्रुतिकृतत्वं स्वत एव लभ्यते तथापि तत्कृतेत्यधिकप्रयोगस्तदवस्थायाः तदुपश्रवणस्य स्वरूप मात्रेणैव न तु 'अन्याश्च तदनुध्याने' इत्याद्यर्थानुसंधानार्थकाललवविलबजाततदनुध्यानादिकार्यद्वारेति बोधयति। स्रं सदित्यर्धे तु कार्श्यादिनिर्देशात्तत्सहयोगाच्च तत्कृतेत्येवान्वितं गम्यम्। श्रवणमात्रजन्यत्वादत्र च तत्र चार्थसंधानानंतराण्यपि कैमुत्येन गम्यानीति। एवं सति प्रथमद्वयमुत्तमं प्रायो नित्यसिद्धं च, स्वाभाविकहार्दात्। उत्तरं कनिष्ठं प्रायः साधनसिद्ध च, तादृशत्वाभावात्। अत्र च प्रथमे द्वये उत्तरोत्तरं श्रेष्ठ्यमुत्तरे तु न्यूनत्वमिति ज्ञेयम्। अथ क्रमेण व्याख्यायते—तत्रैकासां भद्रादीनां सहसा श्वासवैवर्ण्य प्राह—काश्चिदित्यर्धेन। श्वासेन म्लानाः सद्यो विवर्णीभूता मुखश्रियस्तिलकादयोऽपि किं पुनर्वर्णा यासां ताः। तत्कृतहृत्तापादिपरपरत्रापि गम्यं पूर्वपूर्वावस्थाश्च। अथ कासांचिच्छ्यामलादीनां सहसा कार्श्यमप्याह स्रं सदिति ॥ १४ ॥ आत्मलोकं मोक्षम् ॥ चन्द्रावल्यादीनां प्रणयमप्याह—तस्यानुसंधानेन ध्यानधारया निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ताः। यद्वा—श्रीकृष्णस्य गमनेऽनुसंधानम्—कथमसौ यास्यति, कथं वा तत्र स्थास्यति, कथं च वयं जीवेम इत्यादिलक्षणा निरन्तराचिन्ता, तेन निवृत्ताशेष वृत्तयः। इमं लोकं देहदैहिकपदार्थं सर्वमेव आत्मलोकं परमात्मस्वरूपं प्राप्ता इवेति देहाद्यज्ञानमात्रे दृष्टान्तः, न त्वास्वादांशेऽपि, काचकाञ्चनयोरिव ब्रह्मास्वादप्रेमास्वादयोस्तुल्यत्वानौचित्यात् ॥ १५ ॥ ईरिताः वर्णिताः श्रीराधादीनां प्रणयातिशयमाह—स्मरन्त्य इति। शौरेरिति—संप्रति शूरापत्यताभिमता यो गन्तुकामस्तस्येति तासां पक्षपातिनः श्रीशुकस्य प्रणयेर्ष्योक्तिः। अनुरागव्यञ्जकं यत्स्मितं तेनेरिताः। चित्राणि विस्मयजनकानि पदानि यासु ता गिरः 'न पारयेऽहं निरवद्यसंयुजाम्' इत्यादि वाक्यानि स्मरन्त्यः सम्यगेव मुमुहुः। पूर्वास्तद्रूपस्यैव ध्यानधारयैव मुमुहुः, एतास्तु तद्वाचोऽपि स्मरणेनापि सम्यगेव मुमुहुरिति पूर्वतः प्रेमवैशिष्ट्यवत्यो ज्ञेया ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उपश्रुत्य कस्यापि कुतश्चित् कथयतो मुखाच्छ्रुत्वा साक्षात्तासु कस्यापि तत्कथनाशक्तेः भृशमत्यर्थं दुःखिताः परमदुःखात्मकमपि मरणं सुखं मेनिरे इत्यर्थः। अन्यत्तैः यद्वा ताः स्वभावसिद्धप्रेयसीभावाः तत् आघोषणमात्रं श्रुत्वा भृशं व्यथिताः अन्यास्तु साधनसिद्धप्रेयसीभावास्तौ नेतुमागतमक्रूरमुपश्रुत्य भृशं व्यथिता इति योध्यं किन्तु तासामपीयं व्यथा तद्विरहभीत्यैव जाता तत्र गतस्य तस्यानिष्टशङ्कया तु न जाता तासां मुकुन्द इत्यादि वक्ष्यमाणात् तद्गमेन परमधीरश्रीमन्नन्दोपनन्दादिसर्ववृद्धवृन्दसम्मतिरेव तत्र कारणम् अन्यथा सद्य एव तासामन्तर्द्धानं स्यादिति लीलाशक्तिरेव तादृशस्फूर्त्तिमरौत्सीदिति ज्ञेयं विरहभीतिरपि न सार्वकालिकी तत्रासार्वकालिकस्थितिनिश्चयेन नन्दसुनुरिति श्रीमन्नन्दनन्दनत्वेनैव निश्चेष्यमाणत्वात् तासां मुकुन्द इत्यादिकस्याशङ्कामयमात्रत्वात् अन्यथा तथापि प्रागुक्तमेव स्यात् आशामात्रजीवातुत्वात् प्रोषितप्रेयसीनाम् एवमपि तादृश्यवस्था परमानुरागस्वभावेनैव ज्ञेया ॥१३॥ तत्र रासदर्शितप्रेमतारतम्येनासामुत्तरोत्तरमवस्थावैशिष्ट्यमाह। काश्चिदिति त्रिभिः। यद्यप्यत्र पूर्वोक्ताया एव व्यथाया लिङ्गवर्णनमिति तदुपश्रुतिकृतत्वं स्वत एव लभ्यते तथापि तत्कृतेत्यधिकप्रयोगस्तदवस्थायां तदुपश्रवणस्य स्वरूपमात्रेणैव नत्वन्याश्च तदनुध्यानेत्यादि अर्थानुसन्धानार्थकाललवविलम्बजाततदनुध्यानादिकार्यद्वारेति बोधयति। स्रं सदित्यर्द्धे तु कार्श्यादिनिर्देशात् तत् सहयोगाच्च तत् कृतेत्येवान्वितं गम्यमिति श्रवणमात्रजन्यत्वादत्र च तत्र चार्थानुसन्धानानन्तराण्यपि कैमुत्येन गम्यानीनि एवं सति प्रथमद्वयमुत्तमं प्रायोनित्यसिद्धञ्च स्वाभाविकहार्दात् उत्तरं कनिष्ठं प्रायःसाधनसिद्धञ्च तादृशत्वाभावात् अत्र च प्रथमे द्वये उत्तरोत्तरं श्रैष्ठ्यमुत्तरे तु न्यूनत्वमिति ज्ञेयम् अथ क्रमेण व्याख्यायते तत्रैकासां भद्रादीनां सहसा श्वासवैवर्ण्ये आह काश्चिदित्यर्द्धेन श्वासेन म्लानाः सद्यो विवर्णीभूताः मुखश्रियस्तिलकादयोऽपि किं पुनर्वर्णा यासां ताः तत्कृतहृत्तापादिपरपरत्रापि गम्यं पूर्वपूर्वावस्थाश्च अथ कासाञ्चित् श्यामलादीनां सहसा कार्श्यमप्याह। स्रं सदिति ॥ १४ ॥ अथ चन्द्रावल्यादीनां कासाञ्चिदर्थानुसन्धाने विच्छेदभीत्या तदावेशानन्तरं प्रणयमाह। अन्याश्चेति। पूर्वासामप्यनुध्याने सद्य एतदुक्तं वैशिष्ट्या-

र्थमात्मलोकं स्वस्वरूपं प्राप्ता जीवन्मुक्ता इवेति देहाज्ञानमात्रे दृष्टान्तः अन्यत्तैः यद्वा तस्य श्रीकृष्णगमनस्यानुध्यानं कथमसौ यास्यति कथम्वा तत्र स्थास्यति कथञ्च वयं जीवेम इत्यादिलक्षणा निरन्तरचिन्ता तेन निवृत्ताशेषवृत्तयः इमं साक्षाद्वर्त्तमानमपि लोकं देहदैहिकं सर्वमेव ॥ १५ ॥ अथ श्रीराधादीनां प्रणयातिशयमप्याह। स्मरन्त्य इति। शौरेरिति च। सम्प्रति शूरापत्यतामभिमत्य यो गन्तुकामस्तस्येत्यर्थ इति तासां पक्षपातेन श्रीशुकस्य प्रणयेर्ष्योक्तिः अनुरागेण इत्यनुरागव्यञ्जकस्वरेण विलासेन च हृदिस्पृश इत्यर्थेन चित्रपदा इति शब्देन गिरां सौष्ठपमुक्तं चित्राणि यमकानुप्रासादिलक्षणानि अद्भुतानि पदानि यासु ताः इत्यमूभिः सह श्रीभगवतः प्रणयविशेषो दर्शितः अतएव संमुमुहुः महाघातादिनाप्यप्रतिकार्यत्वेनातिशयितं मोहं प्रापुः स्त्रिय इति तत्र स्वेन न सुतरामप्रतिकार्यत्वं दर्शितम् ॥ ६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उपश्रुत्य समीप एव श्रुत्वा आघोषणात् किंवा परस्परया श्रुत्वा साक्षात्तासु कस्यापि तत्कथनाशक्तेः, भृशमत्यर्थं व्यथिताः परमदुःखान्त्यकाष्ठायामपि मरणं मेनिर इत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, तदाघोषणं श्रुत्वा प्रथमं व्यथिताः, पश्चाद्रामकृष्णेत्यादिकं श्रुत्वा भृशं व्यथिता इति योज्यम् ॥ १३ ॥ तत्र वर्गभेदेन भावभेदादवस्थाभेदमाह—काश्चिदिति त्रिभिः। तत्कृतेत्यस्य समासान्तर्वर्त्तमानस्याप्यग्रे सर्वत्राकर्षः, तेनैव तत्तदवस्थोद्भुतेः यद्यपि पूर्वोक्तव्यथालिंगस्य वर्णनात्तदुपश्रुतिकृतत्त्वं स्वतः प्राप्यत एव, तथापि तत्कृतेत्यधिकप्रयोगस्तत्तदवस्थानां तदुपश्रवणमात्रैकहेतुताविवक्षया सहजमुखश्रियोर्म्लानिहेतुत्वेन हृत्तापस्यौत्कट्यं ध्वनितम्, दुकूलादीनां स्रंसश्च सद्य एव भाविविरहदुःखभरेण कार्श्यापत्तेः ॥ १४ ॥ आत्मलोकं स्वस्वरूपं प्राप्ता जीवन्मुक्ता इवेति देहाज्ञानमात्रे दृष्टान्तः, अभि-शब्देन तेभ्योऽपि विशेषः सूचितः। तेषु वाधितत्वेन तस्य स्फूर्त्तेः, आसु च सर्वथा विस्मरणात्। अन्यत्तैर्व्याख्यातमेव। यद्वा, तस्य गोकुलान्मधुपुर्यां श्रीकृष्णगमनस्यानुध्यानम्—'कथमसौ यास्यति, कथं तत्र स्थास्यति, कथञ्च वयं जीवेम' इत्यादिलक्षणा निरन्तरचिन्ता, तेन निवृत्ताशेष-वृत्तय इमं साक्षाद्वर्त्तमानमपि लोकं देहदैहिकादिकं सर्वमेव ॥ १५ ॥ शौरेरिति—निजभगवत्ताप्रकटनार्थं शूरवंशेऽवतीर्णस्येत्यर्थः शौरिरत्र व्रजेश्वरः, शूर-पितुः पौत्रत्वेन शूरस्य भ्रातुः पुत्रतया पुत्रतुल्यत्वात्, तथा हि श्रीमाध्वाचार्य्यैर्ब्रह्मवाक्यत्वेन लिखितम्—'तस्मै वरः स मया सन्निसृष्टः, स चास नन्दाख्य उतास्य भार्य्या नाम्ना यशोदा स च शूर-तात, सुतस्य वैश्या-प्रभवोऽथ गोपः ॥' इति, तेन च रूप-गुणलीलाविशेषमयत्वं सूचितम्, अत एव हृदिस्पृश इति मनसः सुखकारित्वम्। तत्र हेतुः—अनुरागेति। प्रेमरसार्द्रत्वेमार्थतः फलतश्च परमोत्कृष्टत्वात् श्रवणसुखकारित्वञ्च वदन् बन्धवर्णनादिनाप्युत्कर्षमाह—चित्राणि यमकानुप्रास–विन्यासादिलक्षणान्यद्भुतानि पदानि यासु ताः, 'सं' शब्देन मोहस्य दीर्घतान्त्यदशासदृशता वाभिप्रेता, स्त्रिय इति सहज-प्रेम कोमल-हृदयतया सद्यस्तादृशावस्थायोग्यताम्, किंवा तादृशदुःखायोग्यतां बोधयति—काश्चिदित्यादिना। वर्गशः पृथगुक्तानामासामवस्थातारतम्येन किञ्चित्तारतम्यं कल्प्यम्, ततश्च ताः काश्चित् कनिष्ठाः, काश्चिन्मध्यमाः, कश्चिदुत्तमाः, काचिदेका सा तु या सर्वोत्तमेति भेदेन, किंवा मुनिरूपा-श्रुतिरूपादेवीरूपा नित्य-प्रियाभेदेन चतुर्विधास्त्रिभिः पद्यैः क्रमेणोक्ताः, यद्वा, मौग्ध्यप्रौढ़ताभेदेन तत्रापि प्रत्येकं मार्दव-प्राखर्य्य-भेदेन चतुर्विधाः तत्र काश्चिदिति मृदुमुग्धाः स्रंसद्दुकूलेति प्रखरमुग्धाः तदनुध्यानेति मृदुप्रौढ़ाः, स्मरन्त्य इति प्रखर प्रौढ़ाः। यद्वा, काश्चिदविवाहिता बाला, किंवा विवाहिता अपि वाला एव, काश्चिद्विवाहिताः प्रौढ़ाः, काश्चिच्च श्रीभवदेकनिष्ठाः कृतकात्यायनीव्रताः, तासु च काश्चिदकृतविवाहा एव, काश्चिच्च हेतुना केनापि जातव्याजविवाहा इत्येवं चतुर्विधानां क्रमेण पूर्ववदवस्था ज्ञेयेति दिक् ॥१६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

वृत्तयः इन्द्रियवृत्तयः आत्मैव लोकः आत्मलोकनं तत् साक्षात्कारिण्यः योगारूढा इवेत्यर्थः ॥ १५–१८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे नृप! ता गोकुलस्था गोप्यस्तत्तदा अक्रूरं रामकृष्णावानेतुमागतमुपश्रुत्य व्यथिता बभूवुः ॥ १३ ॥ व्यथालिङ्गान्याह पञ्चभिः। काश्चिदिति। काश्चित् गोप्यः तेन श्रवणेन कृतो हृतापस्तेन यः श्वासः सोष्णो निश्वासमारुतस्तेन म्लाना मुखश्रीर्यासां ताः श्लथानि दुकूलानि वलयानि केशा ग्रन्थयश्च यासां तथा भूताः काश्चन बभुवुः ॥ १४ ॥ अन्यास्तु तस्य भगवताऽनुध्यानेन निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ता इमं लोकं देहमपि नाभ्यजानन् नानुसमदधुः आत्मैव लोकस्तं गता आत्मसाक्षात्कारिणः योगारूढा इवेत्यर्थः ॥ १५ ॥ अपराः स्त्रियः शौरेर्गिरः स्मरन्त्यः समुमुहुः कथंभूताः गिरः अनुरागेण यत्स्मित तेनेरिताः हृदिस्पृशन्तीति तथा मनज्ञाः विचित्राणि पदानि यासु ताः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

रामकृष्णौ पुरीं नेतुमागतमक्रूरं श्रुत्वा ज्ञात्वा गोपस्त्रिय एवमापन्नाः बभूवुरित्यन्वयः तत्कथमिति विविच्याह। काश्चिदिति। तस्य कृष्णस्य मधुपुरीगमनश्रवणकृताभ्यां हृत्तापश्वासाभ्यां म्लानां मुखश्रीर्यासां तास्तथा ॥ १३ ॥ स्रंसद्दुकूलेत्यादावपि

तत्कृतेति सम्बन्धयितव्यं यद्वा तत्कृते कृष्णाकृते तदनुध्यानेन निवृत्ताशेषेन्द्रियवृत्तयः ॥ १४ ॥ इमं लोकं देहमात्मलोकं मोक्षं हृदि स्पृशः हृदयङ्गमाः मनोहराः अनुरागस्मितपूर्वकमीरिताः ॥ १५–१६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

काश्चित् तत्कृतहृत्तापेत्यादि । काश्चित् कतिमत्यः तासां तद्विरहव्यथानुभूतेस्तथात्वम् । अथ काश्चिदिति याभिः सह विप्रलम्भलीला करणीयत्वेनाङ्गीकर्तव्येति भगवत इच्छाविशेषो जातः, ता इत्यर्थः । शृङ्गारस्य द्वैविध्ये विप्रलम्भस्यापि रसनीयत्वात् ॥ १४ ॥ अन्याश्चेत्यादि । अन्याः कुमारिकाः अथवा याभिः सह नित्यसंयोगलीला करणीयत्वेनाङ्गीकर्तव्येतीच्छाविशेषो जातस्ताः तद्वद्ध्यानं तत्स्फूर्तिः साक्षात्कार इति यावत् । तेन निवृत्ता अशेषा वृत्तिर्यासाम्, केवलं भगवत्साक्षात्कारमात्रवृत्तय इति यावत् । तावल्लोकं नाभ्यजानन् इमं लोकमिति वर्त्तमानलोकचरितम् । तत्र मधुरातः कंसप्रहितः कश्चनाक्रूरनामा श्रीकृष्णं नेतुमागतः, श्रीकृष्णः सभ्रातृ–बन्धुस्तत्र गमिष्यतीत्यादि । तदज्ञानानन्तरं किम्भूता बभूवुरित्याह—आत्मलोकं गता इव इव-शब्द एवार्थः, आत्मलोकं नित्यसिद्धं वृन्दावनमेव । निरन्तरं तत्र विराजमानेन श्रीकृष्णेन सहैव स्थिता इत्यर्थः । आभौमांशवृन्दावनं हि आत्मलोकः । स च तदानीं भौमेन सह समवेत आसीत् । यद्वा, आत्मा श्रीकृष्णो लोक्यते दृश्यते यस्मिन् तमात्मलोकं राजकन्याभावं गताः । गोपकन्याभावं विहाय राजकन्याभावं गता इवेत्यर्थः । अतो नाभ्यज्ञासन्निमं लोकम् । तथा च–शैशवे गोपकन्यास्ता यौवने राजकन्यकाः' इति पुराणान्तरम् । उभयमपि योगेश्वरेश्वरस्य भगवतस्तस्य न चित्रम् । तथाहि स्वयं वृन्दावनेऽपि गूढतया काभिश्चित् स्थितः मथुरायामपि काश्चिद् विहाय गतः, एवं स्वयं यथा मथुरायां गतः तथा काश्चित् कुत्रचित् राजगृहे प्रादुर्भावयामास, किमसङ्गतं तन्महिम्नः ॥ १५ ॥ स्मरन्त्यश्चापरा इति । अपरा विप्रलम्भलीलोचिताः पूर्वोक्तसजातीयाः । एतेन तदानीं तासां त्रैविध्यमेव ज्ञेयम् । काश्चिन्नित्यसिद्धे भौमे वृन्दावने एव तत् समेताः स्थिताः काश्चिद्राजकन्यात्वमेव गताः काश्चिद् विप्रलम्भदशापन्ना व्रज एव स्थिताः ॥ १७–४५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

काश्चिदिति पतिपुत्रादिमत्यः, यासां छायाभिः (भा० १०।३३।३७) "मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः" इति तास्तत्तद्गृहवर्त्तिन्योऽपि तत्तत् सम्बन्ध रहिता एवेति व्रजस्थिता एव । अन्याश्चेति कुमार्यो वृन्दावनवासिन्य एवेति तदनुध्यान-निवृत्ताशेषवृत्तयः सत्य इमं लोकं नाभ्यजानन्, इममिति मथुरातः कसप्रहितः कश्चिदक्रूराख्यः श्रीकृष्ण नेतुमागतः । श्रीकृष्णः सभ्रातृ-वन्धुस्तत्र गन्ता, मद्विधास्तद् विरहेण दूयमानास्तिष्ठाम इति वर्त्तमानं लोकं लोकव्यवहारं नाजानन् । तदज्ञानानन्तरं किम्भूता बभूवुरित्याह—आत्मलोकं गता इव इव-शब्दस्यायमेवार्थः आत्मलोकं नित्यसिद्ध श्रीवृन्दावनं निरन्तरं स्फुरता श्रीकृष्णेन सहैव ता नित्यसिद्धे श्रीवृन्दावने स्थिताः । बृहद्ध्यानादौ या अद्यापि ध्यायन्ते पूज्यन्ते च । अयन्तु भगवतो महिमा नैष तर्कादि-गोचरः ॥ १५ ॥ अपरास्तद्भिन्नास्त्वेवं चक्रुरित्याह—स्मरन्त्य इत्यादि ॥ १७–४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्तदा ताः प्रसिद्धाः कृष्णैकजीवना गोप्यः अक्रूरमागतमुपश्रुत्य ॥ १३ ॥ व्यथालिङ्गानि पञ्चभिर्वर्णयंस्तासु भद्रादीनां श्वासवैवर्ण्ये आह । काश्चिदिति । तेन श्रवणेन कृतो यः सन्तापस्तस्माच्च यः श्वासस्तेन म्लाना मुखश्रीर्यासां ताः श्यामलादीनां सहसा कार्श्यमप्याह । स्रंसदिति ॥ १४ ॥ चन्द्रावल्यादीनां प्रणयमप्याह । तस्यानुध्यानेन ध्यानधारया निवृता अशेषाश्चक्षुरादिवृत्तयो यासां ताः । इमं लोकं देहदैहिकपदार्थं सर्वमेव आत्मलोकं परमात्मस्वरूपं प्राप्ता इवेति देहाद्यज्ञानमात्रेण दृष्टान्तः । नत्वास्वादांशेऽपि । काचकाञ्चनयोरिव ब्रह्मास्वादप्रेमास्वादयोस्तुल्यत्वानौचित्यात् ॥ १५ ॥ राधादीनान्तु प्रणयातिशयमाह । स्मरन्त्य इति । शौरेरिति । सम्प्रति शूरापत्यत्वमभिमत्य यो गन्तुकामस्तस्येति तासां पक्षपातिनः श्रीशुकस्य प्रणयेर्ष्योक्तिः अनुरागव्यञ्जकं यत् स्मितं तेन ईरिताः चित्राणि विस्मयजनकानि पदानि यासु ता गिरः न पारयेऽहं निरवद्य संयुजामित्यादि वाक्यानि स्मरन्त्यः सम्यगेव मुमुहुः । पूर्वास्तद्रूपस्यैव ध्यानधारयैव मुमुहुः । एतास्तु तद्वाचोऽपि स्मरणेनापि सम्यगेव मुमुहुरिति पूर्वतः प्रेमवैशिष्ट्यवत्यो ज्ञेयाः ॥ १६ ॥

गूढार्थदीपिनी

तत्कृतेति श्रवणकृतहृतापेन तज्जन्यश्वासेन च मलिना मुखश्रीः यासां ताः । स्रंसंतः शिथिलीभवन्तः दुकूला । दयो यासां ताः ॥ १४ ॥ तस्य अनुध्यानं तेन निवृत्ताः अशेषाः चक्षुरादिवृत्तयो यासां ताः बाह्यज्ञानरहिता इत्यर्थः । इमं लोकं देहमपि नाभ्यजानन् स्वरूपं गता इव बभूवुः ॥ १५ ॥ अपरा शौरेः कृष्णस्य गिरः स्मरन्त्यः संमुमुहुरित्यन्वयः । ईरिताः प्रोक्ताः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यासां क्षणमपि कृष्णं विना युगशतमिव भवेत्ताः पूर्वोक्तस्वभावाः तत् तदा रामकृष्णौ पुरीं नेतुमक्रूरमास्मतमुपश्रुत्य भृशमत्यर्थं व्यथिता बभूवुः ॥ १३ ॥ व्यथाचिह्नानि वर्णयति । काश्चिदिति पञ्चभिः । काश्चित् गोप्यः तेन श्रवणेन कृतो यो हृत्तापस्तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां तथाभूताः बभूवुः काश्चन तु गोप्यः स्रंसन्तः दुकूलादयो यासां ताः तथाभूता बभूवुः ।१४। अन्यास्तु तस्य श्रीकृष्णस्य अनुध्यानेन निवृता अशेषाः सकलाश्चक्षुरादिवृत्तयो यासां लोक्यन्ते कर्मफलानि भुज्यन्ते अनेनेति लोको देहस्तमिमं देहं नाभ्यजानन् न जानन्ति स्म "एष ते आत्मान्तर्यामी"ति श्रुतिप्रसिद्ध आत्मैव लोकस्तं गताः तद्धयानरा इव आत्मनः परमात्मनः लोकं गताः त्यक्तप्राकृतदेहाः मुक्ता इवेति ॥ १५ ॥ अपरा स्त्रियस्तु शौरेः श्रीकृष्णस्य अनुरागयुक्तेन स्मितेन ईरिताः उच्चारिताः हृदि स्पृशन्तीति तथा मनोज्ञाः चित्राणि पदानि यासुताः तथाभूता गिरः स्मरन्त्यो मुमुहुः ॥ १६-१७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हृदिस्पृशो हृदयङ्गमाश्चित्राणि पदानि यासां ता गिरः स्मरन्त्यः स्त्रियः सम्मुमुहुः सुललितां गतिं सुललितां चेष्टां स्निग्धहासावलोकनं स्मरन्त्यः इत्यन्वयः ॥१३॥ शोकापहानि नर्माणि प्रोद्दामचरितानि च चिन्तयन्त्यो भीता अक्रूराद्विरहकातराः समेताः सङ्घशोऽच्युताशया अश्रुमुख्यः प्रोचुः । न च्युतो माधवध्यानादाशयो यासां ता इति वा ॥ १४-१५ ॥ विधिमधिक्षिपन्ति । अहो इति । हे विधातो धातस्तवः क्वचिदपि दया नेति न द्रवद्धृदयः । कुत एवं वचनमित्यत उदञ्चयन्ति । संयोज्येति । प्रणयेन स्नेहेन मैत्र्या मित्रतया देहिनः प्राणिनः संयोज्य योजयित्वा तान्संयुक्तानकृताथान्कृतः पर्याप्तोऽर्थो येषां ते कृतार्थास्ते न भवन्तीत्यकृतार्थास्तान् । कृतं युगे च पर्याप्ते विहिते हसिते फल इति विश्वः । आप्राप्तभोगानिति विवरणं संयुज्येत्युक्तिबाधितम् । वियुनंक्षि वियुक्तांस्तनुषे । मम तेन प्रयोजनं वियोजनेनेति न वदेति वदन्ति । अपार्थकं निरर्थकमिति । तत्र निदर्शनं यथार्भकचेष्टितं मार्तिकीं काञ्चन पुत्तलिकां कृत्वा स तां स्वयमेव मर्दयन्निर्दयो मृदं तनोति तथा ते क्रीडितं यतो हे अर्भक भगवद्बालक चतुर्मुख ते विधा प्रकार एवं ततोऽतस्तवन अतं गतं स्तवनं यस्य स तत्सम्बुद्धिः । ते चिवज्ञानं दया च क न ते उभे त्वयि वर्तेते इति भावः । ते चेष्टितं यथा सम्यग्विक्रीडितमित्यन्वयो वा । मैत्र्या संयोज्याप्रणयेनास्नेहेन हेतुना वियुनङ्क्षीत्यन्वयो वा । विक्रीडितं विक्रीडनं वियुनङ्क्षीत्यकृतार्थान्विधातः कुर्वन्नभूरिति ते यथा सम्यगर्भकचेष्टितमिति वा ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतस्तथैव गोपिकानां जातमित्याह । गोप्य इति । ताः पूर्वोक्ताः तद्भगवान् गमिष्यतीति यद्यपि लोकानां स्थाने न कोऽप्युक्तवान् तथापि लोकनामेव घोषात् श्रुतमित्याह । उपश्रुत्येति । श्रवणमात्रेणैव भृशं व्यथिता बभूवुः केवलं न निष्प्रपञ्चाः किन्तु भगवदर्थं तद्भगवति प्रचलितं स्वकृतं व्यर्थमिति युक्तमेवोक्तं बभूवुर्व्यथिता इति । यथा महत्यां पीडायां प्राणस्य क्लेशेषूपस्थितेषु मूर्च्छिता भवन्ति तथा जाता इत्यर्थः । कदाचित् कंसः व्याजेनाकारयतीति ज्ञात्वा व्यथिता भविष्यन्तीत्याशङ्क्य तत्परिहारार्थं निमित्तमनुवदति । रामकृष्णाविति । सर्वासामेवोपद्रवार्थमुभयोर्ग्रहणम् अन्यतरस्याप्यत्र स्थितौ भगवानागच्छेदित्युभयोर्ग्रहणं पुरीं गतस्य न शीघ्रमागमनमिति सत्यं न भविष्यतीत्याशङ्क्य हेतुमाह । अक्रूरं ब्रजमागतमिति । अक्रूर इति नाम्ना प्रवेशं प्राप्तवान् एकविधा तु मूर्च्छिता एव जाताः सर्वथा अनिवृता वा ॥ १३ ॥ अन्यासां वृत्तिमाह । काश्चिदिति । त्रिगुणा एताः गुणातीता ज्ञानप्रधाना भक्तिप्रधानाश्चेतिपञ्चविधास्तत्र राजस्यो व्यथां प्राप्तवत्यः सात्त्विक्यस्तु श्रवणकृतो योऽय हृत्तापः तेन सहितो योऽयं श्वासः तेन म्लाना मुखश्रीर्यासां यद्यपि पूर्णज्ञानाः तथापि सगुणत्वात् बलिष्ठोऽयं विषय इति हृत्ताप उत्पन्न एव तस्यावान्तरकार्यं श्वासः परमकार्यं म्लानतेति अन्याः पुनः श्रुत्वा क्षीणा एव जाताः महाभये शुष्कदेहाः अतः स्रंसद्दुकूला जाताः स्रंसद्वलयाश्च केशेषु ग्रन्थयोऽपि स्रंसन्तो जाताः एता अन्तर्भयेनैव शुष्काः सर्वाङ्गे न त्वेकदेश इति ता एता एव सात्त्विक्य इति केचित् ॥ १४ ॥ ज्ञाननिष्ठा अन्याश्चेति तस्य भगवतः अनुध्यानेन स्मरणानन्तरं प्राप्तेन ध्यानेन निवृत्ताः अशेषाणामिन्द्रियान्तःकरणदेहानां वृत्तयो यासां ततः सुषुप्ता इव इमं लोकं नाभ्यजानन् आत्मैव लोकः "अहरहर्ब्रह्मलोकं गच्छन्ती"ति श्रुतेः वस्तुतत्त्वेताः समाधिस्थिता इति असम्प्रज्ञातत्वं वक्तुं सुषुप्तिर्दृष्टान्कृता ॥ १५ ॥ भक्तास्तु मूर्च्छिता जाता इत्याह । स्मरन्त्य इति अपराः कदाचिदपि परभावं नापन्नाः सेवकीभूताः चकाराद्धृदये पश्यन्त्योऽपि अतएव अनुरागपूर्वकस्मितेन मन्दहासेन ईरिताः प्रेरिताः भक्तानां परमानन्दं दातुं महाननुरागः भेदेन रसग्रहणार्थं स्मितमिति तेन स्वस्थानाच्चालिताः भगवतः एता हृदि स्पृश इति तथाकरणे हेतुः गिरां वा विशेषण पूर्वं भगवता परमसौख्यार्थं या गिर ईरिताः ताः स्मरन्त्यः सम्मुमुहुरिति चित्राणि विचित्राणि पदानि यासु कदापि न त्यक्ष्यामि त्वं प्राण भूतेत्यादीनि पदान्येव न तु वाक्यानि वाक्यार्थाभावात् तदानीं पदार्थस्मारकत्वेन पदान्येव तानि गिरः स्मृत्वा सम्मुमुहुर्मूर्च्छिताः भगवान् गच्छतीति श्रुत्वा पुनश्च न गमिष्यतीति स्मृत्वा उभयोविरोधे निर्धारार्थं यतमानाः अनिश्चयान्मूर्च्छिताः एव जाता इत्यर्थः ॥ १६ ॥

श्रीसुबोधिनी-सारः

ताः प्रसिद्धा गोप्यस्तद् उपश्रुत्य भृशमत्यर्थं व्यथिता बभूवुः। रामकृष्णौ पुरीं मथुरां नेतुं प्रापयितुं व्रजमागतमक्रूरमुपश्रुत्य च ॥ १३ ॥ तेनोपश्रुतेन कृतो यः हृत्तापस्तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां ताः स्रंसंत्यो दुकूलवलयकेशग्रथयश्च यासां तास्तथाभूताः काश्चन ॥१४॥ तस्य श्रीकृष्णस्यानुध्यानेन निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ताः इमं लोकं स्वदेहमपि नाबुध्यन्। आत्मलोकं ब्रह्मभावं गता मुक्ता इव देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपमित्युक्तेः ॥ १५ ॥ चित्राणि पदानि यासु ताः अनुरागेण यत् स्मितं तेन ईरिता हृदिस्पृशो मनोज्ञाः शौरेः श्रीकृष्णस्य गिरो वाचः स्मरंत्योऽपराः स्त्रियो मोहमापुः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्तादा ताः कृष्णैकजीवना गोप्यो रामकृष्णौ पुरीं प्रति नेतुमक्रूरं व्रजमागत मुपश्रुत्य भृशमत्यतं व्यथिता बभूवुरित्यन्वयः ॥ १३ ॥ व्यथालिङ्गान्याह—पञ्चभिः। काश्चिद्गोप्यस्तेन श्रवणेन कृतो हृत्तापस्तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां ताः तथाभूता बभूवुः। काश्चन गोप्यस्तु दुकूलानि च वलयानि च केशग्रन्थयश्च स्रंसिताः दुकूलादयो यासां तास्तथाभूता बभूवुः ॥ १४ ॥ अन्यास्तु गोप्यस्तस्य भगवतोऽनुध्यानेन निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ता इमं लोकं स्वदेहमपि नाभ्यजानन्। तत्र दृष्टान्त माह—आत्मैव लोकस्तं गता आत्मसाक्षात्कारिण्यो योगारूढाश्च यथा देहानुसन्धानमपि न कुर्वन्ति तथेति ॥ १५ ॥ अपराश्च स्त्रियः अनुरागेण यत् स्मितं तेन ईरिताः, हृदि स्पृशन्तीति तथा मनोज्ञाः विचित्राणि पदानि यासु तथाभूताः, शौरेः कृष्णस्यः गिरः स्मरन्त्यो मुमुहुरित्यन्वयः ॥ १६ ॥

अन्वितार्थप्रकाशिका

एवमिति सार्द्धम् ॥ एवं नन्दगोपः क्षत्रा व्रजरक्षाधिकृतेन गोकुले आघोषयत् सर्वत्र घोषितवान्। गोप्य इति। तत्तदा ताः कृष्णैकजीवना गोप्यो रामकृष्णौ पुरीं प्रति नेतुमक्रूरं व्रजमागतमुपश्रुत्य भृशमत्यन्तं व्यथिता बभूवुः ॥ १३ ॥ काश्चिदिति ॥ काश्चिद्गोप्यस्तेन श्रवणेन कृतो यो हृत्तापस्तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां ताः तथाभूता बभूवुः। काश्चन गोप्यस्तु दुकूलानि च वलयानि च केशग्रन्थयश्च स्रंसिताः दुकूलादयो यासां तथाभूता बभूवुः। ग्रन्थ्य इत्यार्षम् ॥ १४ ॥ अन्या इति ॥ अन्यास्तु गोप्यस्तस्य भगवतोऽनुध्यानेन निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ता इमं लोकं स्वदेहमपि नाभ्यजानन्। तत्र दृष्टान्तमाह। आत्मैव लोकस्तं गता आत्मसाक्षात्कारिणो योगारूढाश्च यथा देहानुसन्धानमपि न कुर्वन्ति तथेति ॥ १५ ॥ स्मरन्त्य इति ॥ अपराः स्त्रियः अनुरागेण यत्स्मितं तेनेरिताः हृदि स्पृशन्तीति तथा मनोज्ञा विचित्राणि पदानि यासु तथाभूताः शौरेः कृष्णस्थ गिरः स्मरन्त्यो मुमुहुः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं नंदगोपश्च गोकुले नंदगोपः स्वगोकुले ईत्यपिपाठः क्षत्रा गोकुले रक्षणाधिकारिणा आघोषयत् कथयामास ताः कृष्णैकजीवनाः गोप्यः पुरीं नेतुं व्रजं प्रति आगतमक्रूरं तत्तदा उपश्रुत्य ॥ १३ ॥ व्यथाचिह्नान्याह पंचभिः काश्चिदिति तेन श्रवणेन कृतो हृदयतापः ततः श्वासश्च ते न म्लानाविवर्णीभूता मुखश्रीर्यासां ताः काश्चित् बभूवुः काश्चन स्रंसंतो दुकूलादयो यासां एवंभूताः बभूवुः ॥ १४ ॥ अन्या इति तस्य हरेर्ध्यानेन निवृत्ताः प्रतिलोम्यं गताः अशेषाः सर्वा इन्द्रियांतःकरणवृत्तयो यासां ताः। इमं देहं लोकं लोकव्यवहारं च नाभ्य जानन् के इव आत्मलोकं परमात्मस्थानम्। गतायोगिन इव तथा न विदुः ॥ १५ ॥ अनुरागेण यत् स्मितं तेनेरिताः हृदिस्पृशो मनोज्ञाः शौरेः कृष्णस्य चित्रपदा गिरो वचनानि स्मरंत्यः अपराः संमुमुहुः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गोप्य इति। हे नृप, ता गोकुलस्थाः श्रीकृष्णैकजीवनाः गोप्यः, तदा तत् क्षत्तुर्वचः उपश्रुत्य, रामकृष्णौ पुरीं मथुरां प्रति नेतुं, व्रजं आगतं अक्रूरं च उपश्रुत्य, भृशं व्यथिताः, बभूवुः॥१३॥व्यथालिङ्गान्याह पञ्चभिः काश्चिदिति काश्चिद्गोप्यः, तेन क्षत्तृवचः श्रवणेन कृत उद्भूतो यो हृत्तापस्तेन यः श्वासः सोष्णो निःश्वासमारुतस्तेन म्लाना मुखश्रीर्यासां ताः तथा भूताः, बभूवुः काश्चनः दुकूलानि च वलयानि च केशग्रन्थयश्च स्रंसन्तः दुकूलादयो यासां तथाभूताश्च, बभूवुः ॥ १४ ॥ अन्याश्चेति। अन्याश्च अपरास्तु, तस्य भगवतो यदनुध्यानं तेन निवृता अशेषा वृत्तयश्चक्षुरादिवृत्तयो यासां तास्तथाभूताः सत्यः, आत्मैव लोकस्तं गताः इव, आत्मसाक्षात्कारिणो योगारूढा इवेत्यर्थः। इमं लोकं देहमपि, नाभ्यजानन्नाध्यगच्छन्नानुसमदधतेति यावत् ॥ १५ ॥ स्मरन्त्त इति। अपराः स्त्रियः, शौरेः श्रीकृष्णस्य, अनुरागेण यत् स्मितं तेनेरिता उच्चारिताः, हृदि स्पृशन्तीति तथाभूताः, मनोज्ञा इत्यर्थः। चित्राणि पदानि यासु ताः, गिरो वाचः, स्मरन्त्यश्च स्मरन्त्यः सत्यः एव संमुमुहुः ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गोप्यस्ता इति : १०.३९.१३.

सगुणरूपनिरीक्षणतोषिता अभिलषन्त्यगुणं नहि वृत्तयः । स्फुटमिदं श्रुततद्गतयोऽप्यमूर्युवतयो जनितार्तिभरा यतः ॥ ३६ ॥
अज्ञाननाशादपरोक्षभाजामपि च्युतं स्यात् सगुणेक्षणं नः । इति स्मृतेशाङ्गसुखाः पुनस्ताः तदा तथासन् श्रुततत्प्रयाणाः॥ ३७ ॥
योऽक्रूरयोगोऽयमिह व्रजे स प्राक् क्रूरयोगोऽलमिवासुखाय । प्रायो भवेन्नेति विनिश्चितार्था अप्यार्तिभाजः स्मृततत्स्वभावाः ॥३८॥

स्रंसद्दुकूलेति : १०.३९.१४.

यस्याङ्गसङ्गस्पृहयालुना मया जघन्यवासोऽपि मनाङ्न लक्षितः ।
अस्मात् स चेद्गच्छति किं ततोऽनयेत्यासीत् श्लथं तद्वसनं तदा किमु ॥ ३९ ॥
यत्स्रंसनं रागिवरेण्यमान्यं कामर्धिकारीति पटः स तस्याः ।
आसीच्छ्लथो युक्तमिहाच्युतस्य भूयो व्रजावस्थितिकामवृद्ध्यै ॥ ४० ॥
यत्करार्पणतः श्रीमानहमासमिह ध्रुवम् । तद्वियोगे कथं स्यादित्यभून् सश्लथवृत्तिकः ॥ ४१ ॥
अनङ्गसङ्गोऽप्यतनुप्रसङ्गोऽप्यनेन साकं बहुधाऽनुभूतः । सुखेऽपि दुःखेऽपि च तुल्यवृत्त्येत्यभूत्तथा तद्विशदं विधातुम् ॥ ४२ ॥
यावदस्य व्रजे वासस्तावद् वासोऽपि नः शुभः । आलोच्यैवं तदा युक्तं वासः शिथिलवृत्त्यभूत् ॥ ४३ ॥
अक्रूरयोगेऽभ्युदिते न को वा वामाङ्गसङ्गे श्लथभावमीयात् ।
युक्तं तदा तद्वसनं तथाऽऽसीच्चित्रं त्वधोगं च सुहृत्पदार्हम् ॥ ४४ ॥
सबलयः किल तस्य दुरात्मनो विभुवियोगनियोजितचेतसः ।
द्रुतमहो भवितेति विबोधयन् सबलयः कृशतामगमत् करः ॥ ४५ ॥
कृष्णरूपजुषो नित्यं सुमनोऽधिकशालिनः । केशाभिख्याश्च हृद्ग्रन्थिस्तेषां श्लथ इति क्षमम् ॥ ४६ ॥

अन्याश्चेति : १०.३९.१५.

आपरोक्ष्यं परोक्षेऽपि येन तं मार्गमाश्रये । इत्युज्झितबहिस्तन्त्रा काऽप्यपश्यत् तमन्तरे ॥ ४७ ॥

स्मरन्त्यश्चेति : १०.३९.१६.

सम्बन्धिनोरेकतरापरोक्षे सिद्धा परस्याप्यपरोक्षतेति । अस्मासु रेका भगवद्गुणांस्तास्तद्गुण्यखण्डस्मृतये गुणज्ञाः ॥ ४८ ॥

कृष्णप्रिया

परीक्षित् ! जब गोपियों ने सुना कि हमारे मनमोहन श्यामसुन्दर और गौर सुन्दर बलरामजी को मथुरा ले जाने के लिये अक्रूरजी व्रज में आये हैं, तब उनके हृदय में बड़ी व्यथा हुई । वे व्याकुल हो गये ॥ १३ ॥ भगवान् श्रीकृष्ण के मथुरा जाने की बात सुनते ही बहुतों के हृदय में ऐसी जलन हुई कि गरम साँस चलने लगी, मुखकमल कुम्हला गया । और बहुतों की ऐसी दशा हुई—वे इस प्रकार अचेत हो गयी कि उन्हें खिसकी हुई ओढ़नी, गिरते हुये कंगन और ढीले हुए जूड़ों तक का पता न रहा ॥ १४ ॥ भगवान् के स्वरूप का ध्यान आते ही बहुत सी गोपियों की चित्तवृत्तियाँ सर्वथा निवृत हो गयी, मानो वे समाधिस्थ—आत्मा में स्थित हो गयी हों, और उन्हें अपने शरीर और संसार का कुछ ध्यान ही न रहा ॥ १५ ॥ बहुत-सी गोपियों के सामने भगवान् श्रीकृष्ण का प्रेम, उनकी मन्द-मन्द मुसकान और हृदय को स्पर्श करने वाली विचित्र पदों से युक्त मधुर वाणी नाचने लगी । वे उसमें तल्लीन हो गयी । मोहित हो गयी ॥ १६ ॥

गतिं सुललितां चेष्टां स्निग्धहासावलोकनम् । शोकापहानि [1]नर्माणि प्रोद्दामचरितानि च ॥ १७ ॥
चिन्तयन्त्यो मुकुन्दस्य भीता विरहकातराः । समेताः सङ्घशः प्रोचुरश्रुमुख्योऽच्युताशयाः[2] ॥ १८ ॥

गोप्य ऊचुः

अहो विधातस्तव न क्वचिद् दया संयोज्य मैत्र्या प्रणयेन देहिनः ।
तांश्चाकृतार्थान् वियुनङ्क्ष्यपार्थकं [3]विक्रीडितं तेऽर्भकचेष्टितं यथा ॥ १९ ॥
यस्त्वं प्रदर्श्यासितकुन्तलावृतं मुकुन्दवक्त्रं सुकपोलमुन्नसम् ।
शोकापनोदस्मितलेशसुन्दरं करोषि पारोक्ष्यमसाधु ते कृतम् ॥ २० ॥

---

१. कर्माणि—इति कस्यचित् । २. च्युताश्रयाः—प्रा. पा. । ३. विचेष्टितं—विज. ।

कर्वमक्षमा

अन्वयः—(सर्वाः, ताः) मुकुन्दस्य, सुललिताम् , गतिम् च चेष्टाम् , चिन्तयन्त्यः, स्निग्धहासावलोकनम् , चिन्तयन्त्यः, च, शोकापहानि, नर्माणि, चिन्तयन्त्यः, च, प्रोद्दामचरितानि, चिन्तयन्त्यः, भीताः, च, विरहकातराः, अश्रुमुख्यः, च, अच्युताशयाः, संघशः, समेताः, प्रोचुः ॥ १७-१८ ॥ गोप्यः उचुः—अहो ? विधातः, तव, कच्चित् , दया, न (विद्यते) देहिनः, मैत्र्या, च प्रणयेन, संयोज्य, च, अकृत्तार्थान् , तान् , अपार्थकम् , विनिर्युङ्क्षि, अहो, ते, विक्रीडितम् , यथा अर्भकचेष्टितम् , (तथा दृश्यते) ॥ १९ ॥ यः, त्वम् , असितकुन्तलावृतम् , सुकपोलम् , उन्नसम् , शोकापनोदस्मितलेशसुन्दरम् , मुकुन्दवक्त्रम् , प्रदर्श्य, पारोक्ष्यम् , करोषि, ते, कृतम् , असाधु ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विरहेण कातरा विह्वलाः । अच्युते आशयश्चित्तं यासां ताः ॥ १८ ॥ कृष्णसंगतिं विधाय विघट्टयतीति विधातारं प्रत्येकमाक्रोशंत्य आहुः । अहो इति । मैत्र्या हिताचरणेन प्रणयेन स्नेहेन च अकृतार्थानप्राप्तभोगानपि तान्वियुनंक्षि वियोजयसि तस्मान्न तव दया । बालिशोऽपि त्वमित्याहुः । अपार्थकमिति ॥ १९ ॥ विगर्हितं तवेदं कर्मेत्याहुः । यस्त्वमिति । शोकमपनुदतीति । शोकापनोदः स चासौ स्मितलेशश्च गूढहासस्तेन सुंदरं मुकुंदस्य वक्त्रं सकृत्प्रदर्श्य पुनस्तस्य पारोक्ष्यमदृश्यतां करिष्यतस्तवकृतं कर्मासाधु निंद्यमित्यर्थः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गतिं यात्राम् । चेष्टामंगादिचालनरूपाम् । नर्माणि हास्यवचांसि । एवं मूर्छादिसंचारिग्रस्ता एव रात्रिं गमयित्वा पुनः पुनः किं संजातमिति । शंकासंचारिसंस्कारप्राबल्येन लब्धबाह्यानुसंधानाः परमोत्कण्ठया प्रातर्व्रजराजपुरद्वार एवागता भाविविरहवत्त्वेन साम्यात्सर्वाः संहता विलेपुरित्याह—गतिमिति ॥ १७ ॥ संघशः संघीभूय । समेता युताः । निमेषविरहतोऽपि भीताः संप्रति भाविना महाविरहेण विह्वलाः संघशः समेता यूथैर्यूथैः संगता मिलिता ॥ १८ ॥ विघट्टयति वियोजयति । बालिशोऽज्ञो बालो वा 'बालिशश्च शिशौ मूर्खे' इति मेदिनी । अपार्थकं निष्फलम् । कथम्-यथेति । अर्भकचेष्टितं बालाङ्ग चालनादि । श्रीकृष्णस्य संगताविव विच्छेदेऽपि कमप्यन्यं हेतुमनालोचयन्त्यो विधातारमेव तत्र हेतुं मन्वानास्तमेवाक्रोशयन्त्य आहुः—अहो इति त्रिभिः । अहो खेदे । हे विधातरिति-त्वमेव सर्वं विदधासीति भावः । अतः सर्वेष्वपि जीवेषु दयां कर्तुमर्हस्यपि तव कस्मिंश्चिद्दया नास्ति, विधातृत्वमेव दर्शयन्त्यो निर्दयत्वं च दर्शयन्ति-संयोज्येत्यादिना । देहिनो देहाभिमानवशेनेतस्ततो वर्तमाना नपि जीवान् अकस्मादन्योऽन्यं मैत्र्यापि केवलं तथा प्रणयेन च संयोज्येति विधातृत्वं दर्शितम् । एवं श्रीकृष्णसंगतौ निजगुणादिराहित्यं सूचितम् । अप्यर्थे चकारः । संयोज्यापि अकृतार्थानेव वियोजयसि । विविधचेष्टितमपार्थकम् । अपगतावर्थौ हेतुप्रयोजने यस्येति । केन । हेतुना किमर्थं वा संयोजयसि, अकृतार्थानपि पश्चात्केन हेतुना किमर्थं वा वियोजयसीति नावगच्छामः इत्यर्थः । हेतौ प्रयोजने च सति संयोजितानामकस्माद्वियोजनमयुक्तमेवेति भावः । अपार्थकत्वे दृष्टान्तः—अर्भकेति । तच्चेष्टितं यथा हेतुं प्रयोजनं च विना केवलं मौढ्यादेव तद्वदित्यर्थः । अन्यत्तैः । तत्र हिताचरणेन तत्कृतप्रीत्या स्नेहेन संबन्धाधिकृतप्रीत्येत्यर्थः । यद्वा-स्वयं मैत्र्यावि लक्षितः सन्प्रणयेन मिथो विस्रब्धप्रेम्णा सह संयोज्येति योज्यम् ॥ १९ ॥ निंद्यत्वमाह—विगर्हितमिति । अदृश्यतां चक्षुरविषयताम् । इत्यर्थः इति-न ह्येतत्साध्वाचार इति भावः । भवतु वा सामान्यतस्तव तादृशं चरितम्, विशेषतस्त्विदं गर्हितमित्याहुः—यस्त्वमिति । प्रकर्षेण रसानुभवपूर्वकं दर्शयित्वाऽसितैः कुंतलैः कुटिलालकैरावृतं श्रीललाटोपरिभागे भ्रमरवान्निपातेन व्याप्तमितमूर्ध्वजागस्य शोभा, सुकपोलमिति पार्श्वद्वयस्य, उन्नसमिति मध्यस्य, शोकेति मधुरस्मितेन विकसदधरबिंबं तदारुण्यच्छुरितश्रीमद्दन्तपंक्तिमाधुर्याभ्यामंतर्भागस्यापि सूचिता । शोकश्चार्तानां सर्वेषाम् । तत ईदृशस्य तद्वक्त्रस्य परोक्षताचरणत्तव कर्मासाध्वेव । अत एव श्रीविष्णुपुराणे —"सारं समस्तगोष्ठस्य विधिना हरता हरिम् । प्रहृतं गोपयोषित्सु निर्घृणेन दुरात्मना ।" इति । अन्यत्तैः । यद्वा—मुकुन्दस्य सर्वदुःखमोचकत्वेन तन्नामधेयस्य वक्त्रं प्रकर्षेण दर्शयित्वा पारोक्ष्यमदृश्यत्वं करोषि नयसि, तस्य, ते तव कृतमसाध्वेव । चातुर्वर्ण्यादित्वात् ष्यञ् । आस्तां तावन्मैत्रीपूर्वकतदीयसंयोगस्य वियोजनं नाम तद्दर्शनमात्रस्यापि गर्हितं किमुत तत्प्रकृष्टदर्शनस्येत्यर्थः । प्रकर्षमेव दर्शयन्ति—असितेत्यादिविशेषणैः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुनश्च किं जातमिति शङ्कासंस्कारप्राबल्येन लब्धबाह्याः परमोत्कण्ठया श्रीव्रजेश्वरपुरद्वार एवागताः समानदुःखत्वेन सर्वाः संहत्य क्रन्दन्त्यो विलेपुरित्याह । गतिमिति द्वाभ्याम् । गतिं व्रजप्रवेशनिर्गमनादिसमयेषु स्वयमुत्कण्ठाभिमुहुर्दृष्टां तत्रैव चेष्टां सखिभिः सह नानाविलासरूपां तत्र चात्मनः प्रति निगूढ सस्नेहहासावलोकनं त्रयाणामेव विशेषणं सुललितामिति स्निग्धेत्यत्र तु लिङ्गव्यत्ययः । तत्र सुशब्दार्थस्य परां कोटिं ता ये ये जानन्तीति नासौ व्याख्यातुं शक्यते एवं लब्धेऽपि स्निग्धहासावलोकने तदङ्गसङ्गप्राप्तावविश्वस्तेषु स्वेषु तदनुतापहारीणि नर्म्माणि तत्प्राप्तिव्यञ्जकपरिहासभङ्गी ततो नर्मणैव सङ्केतिते कुञ्जादौ प्रोद्दाम-

चरितानि गाढानुरागोद्भटसौरतलीलाश्च ॥ १७ ॥ चिन्तयन्त्यो हन्त तत्तदस्माकं सम्प्रति विच्छिन्नमिति सानुतापं भावयन्त्यः। अत एवाश्रुभिर्लिप्तं मुखखण्डमेव तुण्डं यासां तद्विधाः सत्यः यतः स्वभावेनैव निमेषव्यवहितेऽपि भीता अधुनातूपसन्नेन महाविरहेण विह्वलाः तत्र सर्वत्र हेतुः। अच्युते स्थितः तन्मयत्वात् स एव वा आशयो यासां ताः। अच्युतेति तेनापि तदपरित्यागापेक्षया। सङ्घशः मिलनेऽप्यवान्तरसङ्घभेदात् प्रकर्षेण शोकप्रकर्षत्वेनोचुः। अत्र सर्वासामप्येकवचनस्फूर्त्तिस्तदानीमिति तदात्मकहृदयताप्राप्तेः। कदाचिदखिलमुख्या वाक्यं शृण्वतीनामन्यासां तन्मात्रस्यानुमोदनेनोपचारादनुकरणात् पूरणाच्च। एतच्च तासां परिदेवनं प्रादोषिकघोषणामारभ्य तत्प्रस्थानपर्य्यन्तं ज्ञेयम् ॥ १८ ॥ श्रीकृष्णसङ्गताविव विच्छेदेऽपि कमप्यन्यहेतुमनालोचयन्त्यो विधातारमेव तत्र हेतुं मन्वानास्तमेवाक्रोशन्त्य आहुः। अहो इति त्रिभिः। अहो खेदे हे विधातरिति सर्वं त्वमेव विदधासीति भावः। अतः सर्वेष्वपि जीवेषु दयां कर्त्तुमर्हस्यापि तव कस्मिंश्चिद्दया नास्ति विधातृत्वमेव दर्शयन्त्यो निर्दयत्वञ्च दर्शयन्ति। संयोज्येत्यादिना। देहितः देहाभिमानवशेनेतस्ततो वर्त्तमानानपि जीवान् अकस्मादन्योऽन्यं मैत्र्यापि केवलं तथा प्रणयेन च संयोज्येति विधातृत्वं दर्शितम् एवं श्रीकृष्णसङ्गतौ निजगुणादिराहित्यं सूचितम् अप्यर्थे चकारः संयोज्यापि अकृतार्थानपि वियोजयसि विविधचेष्टितम अपार्थकम अपगतौ अर्थौ हेतुप्रयोजने यस्येति केन हेतुना किमर्थं वा संयोजयसि अकृतार्थानपि पश्चात् केन हेतुना किमर्थम्वा वियोजयसीति नावगच्छाम इत्यर्थः। हेतौ प्रयोजने च सति संयोजितानामकस्माद्वियोजनमयुक्तमेवेति भावः। अपार्थकत्वे दृष्टान्तः अर्भके चेष्टितं यथा हेतुं प्रयोजनञ्च विना केवलं मौढ्यादेव तद्वदित्यर्थः अन्यत्तैः तत्र हिताचरणेन तत्कृतप्रीत्या स्नेहेन सम्बन्धादिकृतप्रीत्येत्यर्थः। यद्वा स्वयं मैत्र्योपलक्षितः सन् प्रणयेन मिथो विश्रब्धप्रेम्णा सह संयोज्येति योज्यम् । १९ ॥ भवतु वा सामान्यतस्तव तादृशं चरितं विशेषतस्त्विदं गर्हितमित्याहुः। यस्त्वमिति। प्रकर्षेण रसानुभवपूर्वं दर्शयित्वा असितैः कुन्तलैः कुटिलालकैरावृतं श्रीललाटोपरिभागे भ्रमरवन्निपातेन व्याप्तमित्यूर्ध्वभागस्य शोभा सुकपोलमिति पार्श्वद्वयस्य उन्नसमिति मध्यस्य शोभेति मधुरस्मितेन विकसदधरविम्बतदारुण्यच्छुरितश्रीमद्दन्तपङ्क्तिमाधुर्याभ्यामन्तर्भागस्यापि सूचिता शोकश्चार्त्तानां सर्वेषां तत ईदृशस्य तद्वक्त्रस्य परोक्षताचरणात्तव कर्मासाध्वेव अत एव श्रीविष्णुपुराणे "सारं समस्तगोष्ठस्य विधिना हरता हरिम्। प्रहृतं गोपयोषित्सु निर्घृणेन दुरात्मना" इति अन्यत्तैः यद्वा यस्त्वं मुकुन्दस्य सर्वदुःखमोचकत्वेन तन्नामधेयस्य वक्त्रं प्रकर्षेण दर्शयित्वा पारोक्ष्यं करोषि तस्य ते तव कृतमसाध्वेव चातुर्वर्ण्यमित्यातिवत् स्वार्थे ष्यञ् आस्तां तावन्मैत्रीप्रणयपूर्वकतदीयसंयागस्य वियोजनं नाम तद्दर्शनमात्रस्यापि गर्हितं किमुत तत्प्रकृष्टदर्शनस्येत्यर्थः प्रकर्षमेव दर्शयन्ति। असितेत्यादि विशेषणैः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना विरहसाम्येन सर्वाः संहत्य रुदत्यो विलेपुरित्याह—गतिमिति द्वाभ्याम्। सुललितां मत्तगजेन्द्रगमनादपि परमसुन्दरीम्, अस्य परेणाप्यन्वयः। उपलक्षणमेतदन्यस्या अपि देहचेष्टायाः, चेष्टां पूतनावधादिकर्म्म इति पराक्रमः अयमपि देहचेष्टाभेद एव। यद्वा, कारुण्यादिप्रकटनमिति गुणः, स्निग्धं सरसं हासयुक्तमवलोकनञ्चेति माधुर्य्यरूपम्, शोकः प्रेमस्वाभाविकातृप्त्यानुतापः, पत्यादिभयेन शोचनं वा, तमपघ्नन्ति दूरतो नाशयन्तीति तथा तानि नर्म्माणि परिहासवाक्यानि प्रोद्दामानि परमोद्भटानि चरितानि रासक्रीडादीनि, चकाराच्छोकापहानीत्यस्यात्रापि सम्बन्धः। एवं क्रमेण गुण-रूप-वाग्-लीलानां मधुरमहिमोक्तः; मुकुन्दस्य परमानन्दप्रदेस्यति गत्यादीनामपि तादृशत्वमभिप्रेतम् ॥ १७ ॥ स्वभावेनैव विरहतो भीताः, अधुना चोपसन्नेन तेन कातराः; सङ्घश इति पूर्व-वर्गशः स्वस्वस्थाने पृथक्-पृथक् स्थिता अप्यधुना सर्वाः समूहत्वेन मिलिताः सत्यः प्रकर्षेण काष्ठ-पाषाणादीनामपि भेदकतया करुणस्वरेणोचुः। अश्रूणि मुखेषु यासाम्, अत्यन्तं रुदत्य इत्यर्थः। किमर्थम्? अच्युते दीनावात्सल्यादिमाहात्म्याच्च्युति-रहितेश्रीकृष्णे आशयो यासाम्, अस्माकमार्त्तिरोदनेन दीनवात्सल्यात् कदाचिदसौ निवर्त्तत वेत्येतदर्थमित्यर्थः। यद्वा, ननु यात्रायां मंगलज्ञानमेवोचितम्, न च शोक-रोदनम्? तत्राह,—अच्युतहृतचित्तत्वेन विवेकाागमादित्यर्थः; यद्वा, चिन्तयन्त्य इति वर्त्तमाननिर्द्देशेन चिन्तनाविच्छिन्नतोक्ता; तत्र हेतुः—अच्युतो मुकुन्दात्तद्गत्यादिभ्यो वा न च्युतो न स्खलित आशयो यासां ताः; यद्वा, चिन्तनादौ सर्वत्रापि हेतुरयम ॥ १८ ॥ श्रीकृष्णस्य संगताविव विच्छेदेऽपि कमप्यन्यं हेतुमनालोचयन्त्यो जगत्कर्त्तारं श्रीब्रह्माणमेव च तत्र हेतुं मन्वानास्तमेवाक्रोशन्त्य आहुः—अहो इति त्रिभिः। अहो आर्त्ति-सम्बोधने खेद एव वा; हे विधातरिति सर्वस्वमेव विदधासीति भावः। अतः सर्वेष्वपि जीवेषु दयां कर्त्तमर्हस्यापि तब कस्मिंश्चिदपि दया नास्ति। विधातृत्वमेव दर्शयन् निर्द्दयत्वञ्च दर्शयति—संयोज्येत्यादिना; देहिनो देहाभिमानवशेनेतस्ततो वर्त्तमानानपि जीवानकस्मादन्योन्यं मैत्र्या प्रणयेन च संयोज्येति विधातृत्वं दर्शितम्। एवं श्रीकृष्णसंगतौ निजगुणादिराहित्यं सूचितम्, तत्र मैत्र्याः कदाचिदसिद्ध्या संयोगभंगः स्यादित्याशंक्य प्रणयेनेति कारणान्तरमुक्तम्, तत्र समुच्चयार्थचकारस्याप्रयोगः प्रणयस्य संयोगे प्राधान्यविवक्षया, अप्यर्थे चकारः, संयोज्यापि अकृतार्थानपि वियोजयसि, विविधचेष्टितमपार्थकं व्यर्थमेव; केन हेतुना किमर्थं वा संयोजयसि, अकृतार्थानपि पश्चात् केन हेतुना किमर्थं वा वियोजयसीति तत्तद्धेतुप्रयोजनयोरभावात्, हेतौ प्रयोजने च सति संयोजितानामकस्माद्वियोजनममुक्तमेवेति भावः। अपार्थकत्वे दृष्टान्तः—तच्चेष्टितं यथा हेतुं प्रयोजनञ्च विना केवलं मौढ्यादेव

तद्वदित्यर्थः। अन्यत्तैर्व्याख्यातमेव। यद्वा, दया नास्तीत्यत्र हेतुः—हे विधातरित्येव, सर्वत्रैव साम्यौचित्येपि उच्चनीचसुखिदुःख्यादिसृष्टेः। एवं निर्दयत्वमुक्त्वा मौढ्यमाहुः—संयोज्येति। अपार्तकमेव वियोजयसि, तेन च तव प्रयोजनाभावात् ॥ १९ ॥ अर्भकचेष्टित-दृष्टान्तेन मोढ्यमायातमेव, प्रकर्षेण साक्षाद्‌यथायथं तद्रसानुभवपूर्व्वकं दर्शयित्वा असितैः कुन्तलैरलकैरावृतं श्रीललाटोपरिभागे भ्रमरवन्निपातेन व्याप्तनित्यूर्द्धभागस्य शोभा; सुकपोलमिति पार्श्वद्वयस्य, उन्नसमिति मध्यस्य, शोकेति मधुरस्मितेन विकसदधरबिम्ब-तदारूण्यच्छुरितश्रीदन्तपङ्क्तिमाधुर्य्याभ्यामन्तर्भागस्यापि सूचितैव, सा च मुखे कुन्दानि यस्येति मुकुन्दपद-निरुक्त्याश्रीदन्तशोभासूचनेन समर्थिता; शोकश्चार्त्तानां सर्वेषाम्; किंवाऽतृत्यात्मनो दौर्भाग्यमननादस्वातन्त्र्याद्वा। यद्वा, 'मु' मुक्तिसुखमपि 'कु' कुत्सितं यस्मिन् तत् मोक्षसुखाधिकप्रेमसुखं ददादिति निरुक्त्या तद्वक्त्रस्यापि तादृशत्वमेवाभिप्रेतम्। अत ईदृशस्य तद्वक्त्रस्य परोक्षताचरणातव कर्म्मासाध्वेव; अतएव श्रीविष्णुपुराणे (५।१८।१६)—'सारं समस्तगोष्ठस्य विधिना हरता हरिम्। प्रहृतं गोपयोषित्सुनिर्घृणेन दुरात्मना।' इति। अन्यत्तैर्व्याख्यातम्। तद्वा, पूर्व्वश्लोके सामान्येवोक्त्वाधुना तदेव दर्शयन् निर्दयत्वादिकमेव प्रपञ्चयति—य इति। पारोक्ष्यं परोक्षवर्त्ति, अतस्तव कर्म्म असाध्वेव। अन्यत् समानम् ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्रणयेन विश्वासेन वियुनंक्षि। वियोजयसि। अपार्थकं प्रयोजनशून्यं पारोक्ष्यं मुखस्येति शेषः। दुःखानर्हत्वज्ञानशून्यवत् ॥ १९–२२ ॥

श्रीमद्‌वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

काश्चित्तु विरेहण भाविना कातरा विहुलाः मुकुन्दस्य सुन्दरतरां गतिं तथाभूतां चेष्टां रासक्रीडाद्यात्मिकां स्निग्धो यो हासस्तद्युक्तमवलोकनं च शोकमपघ्नन्तीति तथा तानि कर्माणि पूतनाशकटासुरादिवधात्मकानि कर्माणि च प्रोद्दामानि गम्भीराणि चरितानि शयनासनभोजनादीनि च ॥ १७ ॥ स्मरन्त्यः अच्युत एवाशयश्चित्तं यासां ताः अश्रूणि मुखेषु यासां ताः सङ्घशः समेत्य तत्र तत्र सङ्घशो भूत्वा प्रोचु ॥ १८ ॥ उक्तिमेवाह। अहो इत्यादिभिः तावत् श्रीकृष्णसङ्गतिं विधाय विघटयतीति विधातारं प्रत्येवाक्रोशन्त्य आहुः। अहो इति त्रिभिः। हे विधातस्तव क्वचिदपि दया नास्त्यहो तथा हि मैत्र्या हिताचरणेन प्रणयेन स्नेहेन विश्वासेन च देहिनो जनान् तावन्मिथः संयोज्य अकृतार्थानप्राप्तभोगानेव तान् वियुनंक्षि वियोजयसि तस्मात्तव दया नास्ति अतस्तव चेष्टितमपार्थकं प्रयोजनशून्यं यथा बालकचेष्टितं तद्वन्मूर्खस्त्वमिति भावः ॥ १९ ॥ विगर्हितं तव कर्मेत्याहुः। यस्त्वमिति। असितैः कुन्तलैरावृत शोभनौ कपोलौ यस्मिन् उन्नता नासिका यस्मिन् तत् शोकमपनुदतीति शोकापनोदः सचासौ स्मितलेशस्तेन सुन्दरं मुकुन्दस्य वक्त्रमस्माकं प्रदर्श्य यस्त्वं पुनस्तस्य पारोक्ष्यमदृश्यतां करोषि अतस्ते तव कृतं कर्म असाधु निन्द्यमित्यर्थः ॥२०॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

चित्राणि पदानि यासु तास्तथा गतिं यात्रां चेष्टाम् अङ्गविषयां स्निग्धहासेन सहितमवलोकनम् ॥ १७ ॥ अच्युताशयाः अच्युतबुद्धयः ॥ १८ ॥ हे विधातः तव क्वचिद्दया नास्ति कथं प्रणयेन देहिनः जन्तून् मैत्र्या मित्रभावेन संयोज्य एकीकृत्य पुनस्तान् देहिनः अकृतार्थान् अप्राप्तमनोरथानेव वियुनंक्षि वियुक्तदेहान् करोषि अहो इत्यन्वयः अतस्ते तव चेष्टितमपार्थकं निष्फलं कथमिति अर्भकचेष्टितं यथा तथेति ॥ १९ ॥ अत्र मया किमवद्यमकारीति तत्राह। यस्त्वमिति। यस्त्वं सुकपोलादिविशिष्टं मुकुन्दवक्त्रं प्रदर्श्य दर्शयित्वा पुनःपारोक्ष्यं परोक्षविषयं चक्षुरगोचरं करोषि यस्मात्त्वया कृतमसाध्वमङ्गलमित्यन्वयः शोकस्यापनोदो निरासो येन सः शोकापनोदः स्मितलेशः तथा तेन सुन्दरं मनोहरं स्मितस्य लेशः स्मितलेशः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवं मूर्च्छादिसञ्चारिग्रस्ता एव रात्रिं गमयित्वा पुनश्च किं जातमिति शङ्कासञ्चारिसंस्कारप्राबल्येन लब्धबाह्यानुसन्धानाः परमोत्कण्ठया प्रातर्व्रजराजपुरद्वार एव आगताः भाविविरहवत्त्वेन साम्यात् सर्वाः संहत्य विलेपुरित्याह। गतिमिति। निमेषविरहतोऽपि भीताः सम्प्रति तु भाविना महाविरहेण विह्वलाः सङ्घशः समेताः यूथैर्यूथैः सङ्गत्य मिलिताः ॥ १७–१८ ॥ कृष्णस्य सङ्गताविव विच्छेदेऽपि कमप्यन्यं हेतुमनालोचयन्त्यो विधातारमेव दूषयन्ति। अहो इति। हे विधातरहो आश्चर्यं तवाप्येवमन्याय इति भावः। कोऽसौ तव क्वचिदपि न दयेत्येष एव ननु कथमेवं निश्चिनुध्वे तत्राहुः। मैत्र्या सख्येन यः प्रकृष्टो नयः मनः प्राणबुद्ध्यादीनां परस्परप्रापणं तेन देहिनः संयोज्य तांश्च अकृतार्थान् अवाप्ततद्भोगानेव वियुनङ्क्षि वियोजयसि एवार्थे चकारः न च तद्वियोजनात्तव किञ्चित्प्रयोजनमस्तीत्याहुः। अपगतोऽर्थः फलं यतस्तत् अतस्तव चेष्टितमर्भकचेष्टितं यथेति त्वमतिबालिश एवेति भावः ॥ १९ ॥ सर्वपितामहस्य मम नार्भकतुल्यत्वमिति चेत्तर्हि त्वं लोकानामभद्रकारीत्याहुः। यो विधातापि भूत्वा त्वं मुकुन्दवक्त्रं शोकस्यापनोदो यस्मात्तेन स्मितलेशेन सुन्दरं प्रदर्श्य तस्य पारोक्ष्यम् अदृश्यत्वं करोष्यतस्तव कृतं कर्म असाधु अभद्रं निन्द्यमित्यर्थः ॥ २० ॥

गूढार्थदीपिनी

नर्माणि परिहासवाक्यानि प्रोद्दामानि दिव्यानि ॥ १७ ॥ संघशः संधीभूय प्राप्ताः । अच्युते आशयोऽन्तःकरणं यासां ताः ॥ १८ ॥ प्रणयेन प्रेम्णा च देहिनः संयोज्य अकृतार्थानेव तान् मध्ये वियुनक्षि वियोजयसि । अतो निर्दयस्त्वम् । ते विक्रीडितम् अपार्थं तं निष्प्रयोजनमेव यथेति योज्यम् ॥ १९ ॥ यस्त्वं वक्त्रं प्रदर्श्य पुनस्तत् पारोक्ष्यमदृश्यतां करोषि । चातुर्वर्ण्यादित्वात् ष्यञ् । अतस्ते कृत्यम् असाधु निन्द्यमित्यर्थः । शोकापनोदः शोकनिवारकः यः गूढहासः तेन सुन्दरम् । कुन्तलैः नीलकेशैः ॥२०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विरहेण भाविना कातराः व्याकुलाः अच्युते आशयश्चित्तं यासां ताः गृहात् समेत्य सङ्घशः तत्र तत्र सङ्घशो भूत्वा प्रोचुः ॥ १८ ॥ तासामुक्तिं प्रपञ्चयति । अहो इत्यादिद्वादशभिः तत्र तावत् श्रीकृष्णेन सहास्मान् संयोज्य वियोजयतीति विधातारं प्रत्याक्रोशन्त्य आहुः । अहो इति त्रिभिः अहो विधातः ! देहिनः निरपराधिनो जनान् अस्मान् मैत्र्या हिताचरणेन प्रणयेन स्नेहेन च मिथः संयोज्यतांश्चाकृतार्थान् अप्राप्तभोगान् वियुनंक्षि वियोजयसि अतो ज्ञायते क्वचिदपि तव दया नास्ति सर्वत्र निर्दयोऽसीत्यर्थः । न केवलं निर्दयः अपि तु वालिशोऽपि त्वमित्याहुः । यथा अर्भकचेष्टितमपार्थकं निरर्थकं भविता तथा ते चेष्टितं कर्मापार्थकमेव ॥ १९ ॥ किंच तव चेष्टितं न केवलं निरर्थकमात्रमपित्वनर्थकरमित्याहुः । यस्त्वमिति । असितैः कुन्तलैरावृतं शोभनौ कपोलौ यस्मिन् उन्नता नासिका यस्मिन् शोकमपनुदति दूरीकरोतीति तथा स चासौ स्मितलेशः मन्दहासः तेन सुन्दरं मनोहरं मुकुन्दस्य वक्त्रं सकृत्प्रदर्श्य पुनस्तस्य पारोक्ष्यमदृश्यताङ्करोषि । अतस्तव कृतं कर्म असाधु अस्माकमहितमित्यर्थः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

परेषां देहिनां संयोगवियोगदाने कोदरशूला कामिन्यो भवद्विषयो नानयो मयाऽचारि लोकवार्तया कुतः कृशीभवनं भवतीनामित्यतस्ते वयमेवेति कैश्चित् श्लोकैर्वदन्ति ॥ य इति । यस्त्वमसितकुन्तलावृतं सुकपोलमुन्नसमुन्नता नासिका यस्य तच्छोकस्यापनोदो येन स शोकापनोदः स्मितस्य लेशो यस्तेन सुन्दरं मुकुन्दवक्त्रं प्रदर्श्यापरोक्ष्यविषयं कारयित्वा पारोक्ष्यं करोषीति यत्त कृतं कर्मासाध्वमङ्गलं ते त्वयाऽसाधु कृतमिति वा । यद्वाऽन्तरङ्गत एका वदति ॥ असेति । असा धुता इकृतमिति छेदः । न सा असा सा मधुरा स्थिता इना कामेनेच्छयेति यावत् गतं कृतमिति । असा तद्भिन्नाऽहं धुतेत्यर्थः ॥ १७ ॥ हे विधात इदानीं क्रूरः कठिणो नेति त्वमन्वर्थनाम्ना पूव स्मृते गुणानुगुणेन येन चक्षुषा मधुद्विष एकदेशे एकैकदेशेखिलं सर्गसौष्टवं तव सृष्टिसौष्टव तर्हि तद्रचने चातुर्यं सम्मतं किमित्यत आहुः ॥ तदीयमिति । त्वयि स्थित्वा स एव कारयितेति भावः । वयमद्राक्ष्म तद्दत्तं चक्षुरञ्चवन्मन्दमिव मन्दमतिवद्धरसे हरसि । एतद्धरणफलं तवैवास्त्वति द्योतयितुमात्मनेपदप्रयोगः । स्वरितञितः कर्त्रभिप्राये क्रियाफल इति स्मृतिः । विस्तृतं चैतच्चक्रे शास्त्रमित्यनुव्याख्याव्याख्यासुधायां । बत खेदोऽतोऽक्रूरसमाख्ययाऽक्रूरनाम्ना क्रूरः स्मृतः स्मर्यसे । अखिलसर्गसौष्टवं निसर्गसुष्टुतां तदीयं तत्सम्बन्धे वाऽद्राक्ष्मेति वा ॥ १८ ॥ किमक्रूर एव शब्दः सखि सखाऽपि चञ्चलाक्षि बहुचञ्चल इति सुदती वददि ॥ न नन्दसूनुरिति । क्षणेन भङ्गो यस्य तत्सौहृदं यस्य स नन्दसूनुः कृष्णः स्वकृते स्वनिमित्तमातुराः क्लिष्टा गेहानि सन्ति येषां ता मोहात्स्वमनान्सुतान्पतीन्विहायाद्धाऽञ्जसा दास्यमुपगता नो न समीक्ष्यते न पश्यति । कुतः । नवप्रियो नूतनप्रियः । अनेन नगरनारीजनरन्तृतां कटाक्षयन्तीति ध्वन्यते । अयं नन्दसूनुर्न सखि किन्तु स हरिरित्यन्तरङ्गोऽर्थः । समीपसंस्थानस्मांश्च नेक्षत इति । सूनुरेतत्कुमारो मारश्च क्षणभङ्गसौहृदो ननन्द तुतोष एताः शरतो मारयामीति वा ॥ १९ ॥ नूतनवनिताप्रीतिमत्त्वान्निवारितोऽपि परिवारित एतैर्गच्छेदेव देवस्ततश्च ता एवं भवन्तीतीर्ष्यया वदन्ति ॥ सुखमिति । पुरयोषितां नगरनारीणामियं रजनी रात्रिः सुखं यथा तथा प्रभाता प्रभामरुणसम्बन्धिनीमततीति सा तथाऽऽशिषस्तदभिलाषाः सत्या बभूवुर्ध्रुवं निश्चयः । कुत इत्यत आह ॥ या इति । सम्प्रविष्टस्य पुरमिति शेषः । व्रजस्पतेर्व्रजनाथस्य । पारस्करादिः सुडार्षो वा । अपाङ्गोत्कलितस्मितासवमपाङ्गेन कटाक्षवीक्षणेनोत्कलितमुज्जृम्भितं च तस्मितं हसितं तदेवासवोऽमृतसमो रसो यस्मिंस्तन्मुखं पश्यन्तीति । अपाङ्गो ह्यनङ्ग उत्कलितश्छिन्नो येन तच्च स्मित तदेवासवमसुतर्पक यस्मिंस्तदिति वा । अस्मदवस्थैव शृणु सखीति काश्चित्कान्तां वदन्ति । या रमाया येन सुखं तदपाङ्गोत्कलितस्मितासवं मुखं याः पश्यन्ति तासां रजनी सुप्रभाता व्रजस्पतेः प्रभाता गतेति । न इत्यनुवर्तते । नो विषये यमाशिष एताः स्मरशरतो दारयित्वा नयामि संयमिनीमिति यमस्याभिलाषाः सत्या बभूवुर्ध्रुवमिति । रमणविरहतो भवेदेव मरणमिति तात्पर्यम् ॥ २० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अन्याः पुनः सर्वा मिलिताः जीवनार्थं विरहवाक्यान्युक्तवत्य इत्याह । गतिमिति द्वाभ्याम् । विषयक्रियाभ्यां स्वसमीपे समागच्छतो भगवतः गतिं चिन्तयन्त्यः ततः सुष्ठु ललितां चेष्टां समाश्लेषादिरूपां ततः स्निग्धो योऽयं हासपूर्वावलोकः कन्दर्पलीलायाम् एवं कृत्वा कियत्कालवियोगानन्तरं पुनरागतस्य पूर्वं विरहकृतः योऽयं शोकः तद्दूरीकरणसमर्थानि नर्माणि परिहासवाक्यानि ततो मत्तगजवत् प्रकर्षेण उद्दामानि गतशृङ्खलारूपाणि यानि चरितानि स्वच्छन्दलीलारूपाणि चकारादन्यान्यप्यवान्तर-

रूपाणि ॥ १७ ॥ नन्वेताः असत्य इव निषिद्धविषयपराः किमिति निरूप्यन्ते इत्याशङ्क्याह । मुकुन्दस्येति । मोक्षदातुः मोक्षसिध्यर्थमेता लीलाः ततः पूर्वावस्था सर्वस्वरूपा गतेति अस्यन्तं भीताः धैर्याद्यभावार्थमाह । विरहकातरा इति । अल्पविरहेऽप्यत्यन्त दीनाः शीतभीता इव ततः समानशीलव्यसनाः सर्वाः प्रत्येकं मिलिताः समूहभेदेन जाताः विंशतिभेदाः परमप्रेमयुक्ताः तद्भावाभिव्यञ्जकाश्रुमुचः कामव्याशचित्ता अपि तथा भवन्तीति तद्व्यावृत्त्यर्थमाह । अच्युताशयाः सत्यः प्रोचुः अन्योऽन्यजीवनार्थम् ॥ १८ ॥ एतद्वाक्यैरेव भगवच्चरित्रं स्पष्टमिति न पुनर्निरूप्यते निरोधान्ते युगलरूपा द्वादश निरूपिताः तथैवैता इति तासां द्वादशधा वचनान्युच्यन्ते अत्रोपालभ्याः प्रथमतो बाह्या यद्वाक्याद्भगवानागतः ततो भगवान् ततोऽक्रूरः साधारण्येन सर्वे ततो बान्धवाः ततः स्वात्मेति एवं षड्विधाः तत्र प्रथमं त्रिभिः उपालम्भमाहुः । अहो इति—

अविवेको दुरात्मत्वं दत्तापहरणं तथा । त्रिदोषं ब्रह्मणः प्राहुर्व्यवहाराद्यतः कृतम् ॥

आदावविवेकमाहुः । अहो इत्याऽश्चर्यं जगत्कर्तुर्वेदगर्भस्याप्यविवेक इति ननु मया संयोजनमेव कृतं वियोगकर्त्ता त्वन्य एवेति चेत् तत्राहुः । विधातरिति । सर्वं विदधातीति अविशेषाद्वियोजकोऽपि त्वमेव तर्हि युक्तमेवेति चेत्तत्राहुः । तव न क्वचिद्दयेति उत्पादितेषु स्वापत्यरूपेषुशिक्षार्थे दण्डक्ष्वपि क्वचिद्दयाभवति कश्चिच्छरीरमेव छिनत्ति कश्चित् द्रव्यं कश्चिदिह लोकपरलोकौ कश्चिद्विषयानिति अस्माकं तु भगवान् सर्वमेवेति केनाप्यशन दया चेत् तदंशस्थापनार्थं वा भगवन्तं स्थापयेत् दभावात् क्वचिदपि न दयेति । ननु भवदद्दृष्टादेव भगवान्मिलितः तदपगमे गच्छतीति चेत् तत्राहुः । संयोज्य मैत्र्येति । भगवता सह जीवानां योगेनादृष्टं कारणं वियोगजनितत्वात् सोऽन्तर्याम्यात्मा च तं प्रार्थयित्वा बहिराविर्भावयित्वा सहजसंबन्धव्यतिरेकेणैव मैत्र्या संयोज्य तान् पुनर्जीवान् भगवत्संयुक्तफलाभावात् अकृतार्थान् वियुनंक्षि वियोजयसि "स यदि पितृलोककामो भवती"त्यादिश्रुतौ सर्वकामनासिद्धिरुक्ता पुनरावृत्त्यभावश्च आनन्दमयमात्मानमुपशङ्क्रम्येत्यादावपि तथा अत्र तु न कोऽपि मनोरथोऽतः परं सेत्स्यति आवृत्तिश्च भविष्यतीति सर्वप्रकारेणाभिलषितभगवद्वियोगादकृतार्थान् एव जीवानस्मान्वियुनंक्षि वियोजयसि भवेदप्येतदेवं यदि वियोजने तव वा कश्चित् पुरुषार्थः सिध्येत् अतस्ते विक्रीडितं विशेषक्रीडारूपमेतत् अर्भकचेष्टितप्रायं जातम् अलौकिकमपि कृत्वा उत्तमामपि प्रतिमां मृदादिनिर्मितां क्षणादेव दूरीकुर्वन्तीति ब्रह्मणोऽप्यविवेकः ॥ १९ ॥ किं च नाविवेकमात्रं किं तु असमीचीनमेव करोतीत्याहुः यस्त्वमिति । त्वं ह्यस्मदुपकारार्थं शोकापनोदार्थं मोक्षार्थं वा भगवन्मुखारविन्दं प्रदर्शितवान् तदप्रदर्शनदशायामल्पमेव शोकादिकं स्थितं साम्प्रतं त्वधिकं जायत इति यदपि त्वया कृतं तदप्यसाध्वेव कृतं यथा मोहकः समीचीनमिव प्रदर्श्यासमीचीनं करोति तथात्वमुपपादयन्ति प्रथमतो मुकुन्दस्य मोक्षदातुर्वक्त्रं प्रधानभूतं यतो मोक्षो भवत्येव तदपि बहुभिरेव सर्वज्ञैरावृतं तदाह । असितैः कुन्तलैरावृतमिति नीलालकावृतत्वेन स्वस्यानाधिकारेऽपि तत्प्राप्तिः सूचिता कामरस एवायं परितो वेष्टितः तिष्ठतीति ततः सुकपोलं रसानुभवयोग्यमूर्ध्वा नासिका यस्मिन्निति पूर्णरसत्वेन प्रफुल्लरूपं शोकादिनिवृत्तिस्तु तद्धर्मलेशेनापि भवतीत्याहुः । शोकापनोदनं करोति स्मितस्य लेश एव तादृशोऽप्यत्र सौन्दर्य एवोपक्षीयते एतादृशं मुखं सर्वदा दर्शनयोग्यं पारोक्ष्यं करोषि परोक्षस्य धर्मयुक्तं करोषि न ह्यपारोक्ष्यैकस्वरूपं भगवन्मुखारविन्दं स्वतः परोक्षतामापद्यते त्वं पुनरव्यक्तमपि व्यक्तं करोषीतीदमपि विपरीतं करोषि तत्तु सर्वोपकारीति ते कृतं साधु भवति इदं त्वसाधु किं बहुना ते तवाप्यसाधु अनेन कर्मणा तवापि नेष्टं सेत्स्यतीति भावः अत एव भगवान् न ब्रह्मलोकमार्गेण गतः ॥ २० ॥

श्रीसुबोधिनी–सारः

सुललितां सुमनोहरां गतिं चेष्टां च प्रेमहासनिरीक्षणं शोकनाशकानि नर्माणि परिहासान् प्रोद्दामानि उत्कटानि चरितानि च ॥ १७ ॥ मुकुंदस्य चिंतयन्त्यो विरहेण कातराः अश्रूणि मुखे यासाम् अच्युते आशयश्चित्तभावना यासां ता गोप्यः समेताः संमिलिताः संघशो लीलाः प्रोचुः ॥ १८ ॥ अहो इत्याक्रोशः । हे विधातः देहिनः प्राणिनः मैत्र्या हिताचरणेन प्रणयेन स्नेहेन संयोज्य संमेल्याऽकृतार्थान् अप्राप्तमनोरथान् वियुनंक्षि वियोजयसि अतः क्वचित्क्वापि विषये तव दया कृपा नास्ति । सर्वेषां वियोगकरणात् ते विक्रीडितं चेष्टितमपार्थकं व्यर्थम् । बालकेहितमिव ॥ १९ ॥ असितैः कृष्णैः कुंतलैः केशैरावृतं मुकुंदस्य वक्त्र मुखं सुष्ठु कपोलौ यस्मिन् उदुच्चानासिका यस्मिन् शोकस्यापनोदो विनाशकरः स्मितस्य लेशस्तेन सुन्दरं प्रदर्श्य पारोक्ष्यम् अदृश्यतां त्वं करोषि ते त्वयाऽसाधुकृतं ते तव कृतं कर्माऽसाधु निंद्यमिति वा ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मुकुन्दस्य सुललितां सुन्दरतरां गतिं तथाभूतां चेष्टां रासक्रीडाद्यात्मिकां स्निग्धो यो हासस्तद्युक्तमवलोकनं च शोकमपघ्नन्तीति तथाभूतानि नर्माणि परिहासवाक्यानि प्रोद्दामानि अत्युन्नतानि गोवर्धनोद्धरणादीनि चरितानि च ॥ १७ ॥ चिन्तयन्त्यः । तत्र हेतुः—भीता इति । तत्रापि हेतुः–मुकुन्दस्य भाविना विरहेण कातरा विह्वलाः, अत एवाश्रूणि मुखेषु यासां ताः । व्याकुलतायां हेतुमाह—अच्युते श्रीकृष्णे एवाशयो यासां ताः गोप्यः सङ्घशः स्वस्वसमुदायेन समेताः मिलिताः सत्यः प्रोचुरिति द्वयोरन्वयः ॥१८॥ तदुक्तिमेव दर्शयति—'अहो' इत्यादिभिः । तत्र तावच्छ्रीकृष्णवियोगेहेत्वन्तरं अपश्यन्त्यो विधातारमेवोपालभन्ते—

अहो इति। 'सर्वाधिष्ठातृत्वात्तवैव तदाचरणं न युक्तम्, आश्चर्यकरं च' इति सूचितम्। हे विधातः स्तव क्वचित् क्वाप्यंशे दया नास्ति। 'कथम्' इत्यपेक्षायामाह—मैत्र्या हिताचरणेन प्रणयेन स्नेहेन देहिनो जनान् संयोज्य अकृतार्थान् अपूर्णमनोरथानेव तान् वियुनङ्क्षि वियोजयसि। चकार एवकारार्थः। 'नच तद्वियोजनात्तव किञ्चित्प्रयोजनमस्ति' इत्याह—अपार्थकं प्रयोजनशून्यमेव तवेदं विक्रीडितमिति। तत्र दृष्टान्तमाह—अर्भकस्य चेष्टितं यथा भवति तथेति ॥ १९ ॥ विगर्हितं च तवेदं कर्मेत्यर्थः य इति। असितैर्नीलैः कुन्तलैरावृतं शोभनौ कपोलौ यस्मिंस्तत् उन्नता नासिका यस्मिंस्तत् शोकमपदनुदति इति शोकापनोदस्तथाभूतो यः। स्मितलेशः गूढहासस्तेन सुन्दरं मुकुन्दस्य वक्त्रमस्माकं प्रदर्श्य यस्त्वं पुनस्तस्य पारोक्ष्यमदृश्यतां करोषि तस्य ते तव कृतं कर्म असाधु निन्द्यमित्यर्थः ॥ २० ॥

अन्वितार्थप्रकाशिका

एवं रात्रिं कथंचिद्गमयित्वा प्रातर्नन्दद्वार एवागता संहत्य विलेपुरित्याह—गतिमिति द्वयम् ॥ मुकुन्दस्य सुललितां सुन्दरतरां गतिं तथाभूतां चेष्टां रासक्रीडात्मिकां स्निग्धो यो हासस्तद्युक्तमवलोकनं च शोकमपघ्नन्तीति तथाभूतानि नर्माणि परिहासवाक्यानि प्रोद्दामानि अत्युन्नतानि गोवर्धनोद्धरणादीनि चरितानि च चिन्तयन्त्यः स्वभावतो निमेषविरहादपि भीताः अधुना तु भाविना विरहेण कातरा विह्वला अत एवाश्रूणि मुखेषु यासां ताः अच्युते श्रीकृष्ण एवाशयो यासां ताः गोप्यः सङ्घशः स्वस्वसमुदायेन समेताः मिलिताः सत्यः प्रोचुः। एतच्च तासां परिदेवनं प्रादोषिकघोषणादारभ्य तत्प्रस्थानपर्यन्तं ज्ञेयम् ॥१७–१८॥ अहो इति ॥ हे विधातः! तव कच्चित्क्वाप्यंशे दया नास्ति। यतः मैत्र्या हिताचरणेन प्रणयेन स्नेहेन च देहिनो जनान्संयोज्य अकृतार्थान् अपूर्णमनोरथानेव तान् वियुनङ्क्षि वियोजयसि। चकार एवार्थे। अतः अर्भकस्य चेष्टितं यथा भवति तथा तवेदं विक्रीडितम्। अपार्थकं प्रयोजनशून्यम् एव ॥ १९ ॥ य इति ॥ असितैर्नीलैः कुन्तलैरावृतं शोभनौ कपोलौ यस्मिंस्तत उन्नता नासिका यस्मिंस्तत् शोकमपनुदति इति शोकापनोदस्तथाभूतो यः स्मितलेशः गूढहासस्तेन सुन्दरं मुकुन्दस्य वक्त्रमस्माकं प्रदर्श्य यस्त्वं पुनस्तस्य पारोक्ष्यमदृश्यतां करोषि। यद्वा। पारोक्ष्यमिति स्वार्थे ष्यञ्। परोक्षं करोषीति तस्य ते तव कृतं कर्म असाधु निन्द्यम् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शोकाय हानि शोकनाशकानि नर्माणिमर्म वचनानि ॥ १७ ॥ मुकुन्दस्य गत्यादीनि चिन्तयन्त्यः विरहेणकातरा विह्वलाः अश्रूणिमुखेषु यासांताः प्रोचुः ॥ १८ ॥ इदानीं विधिंतिरस्कुर्वत्यः स्वदुःखं निवेदयन्त्यश्चाहुः अहो विधात इति अहो इति खेदे हे विधातः तव क्वचिद्दयानास्ति यतः मैत्र्याहिता चरितेन प्रणयेन प्रेम्णा च देहिनो जनान् संयोज्य पुनस्तान् अकृतार्थान् अप्राप्तमनोरथानपि वियुनंक्षि वियोजयसि निर्दयत्वेपिदृष्टान्तेनमूर्खत्वमाहुः अर्भकस्य बालकस्य चेष्टितं यथा अपार्थकं प्रयोजन शून्यं तथा ते इदं विक्रीडितं चेष्टितमस्ति ॥ १९ ॥ तदेव चेष्टितं स्फुटयन्त्य आहुः य इति ॥ उन्न समुन्नतानासिका यस्मिन् तत् शोकं अपनुदतीति शोकापनोदः स चासौस्मित लेशोगुप्तहासस्तेन सुन्दरं मुकुन्दस्य वक्त्रं प्रदर्श्यभूयस्तस्यपारोक्ष्यं दृष्टागोचरत्वं करोषि एतत्तवकृतं कर्म असाधुसज्जनैस्तिरस्करणीयमित्यर्थः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गतिमिति। चिन्तयन्त्य इति च। काश्चित्त्विति शेषः। विरहेण भाविना श्रीकृष्णवियोगेन कातरा विह्वलाः, मुकुन्दस्य श्रीकृष्णस्य, सुललितां सुन्दरतरां, गतिं चेष्टां रासक्रिडात्मिकां सुन्दरतरां चेष्टां, स्निग्धो यो हासस्तद्युक्तमवलोकनं च, शोकमपघ्नन्तीति तथाभूतानि कर्माणि पूतनाशकटासुरादिवधात्मकानि कर्माणि, प्रोद्दामानि गम्भीराणि च तानि चरितानि शयनासनभोजनादीनि लीलाः अन्या लीलाश्चापि, चिन्तयन्त्यः स्मरन्त्यः, अच्युते श्रीकृष्ण एव आशयश्चित्त यासां ताः, अश्रूणि मुखे यासां ताः, संघशः समेताः, समेत्य तत्र तत्र संघशः भूत्वा इत्यर्थः। भीताः सत्यः, प्रोचुः। इति द्वयोरेकान्वयः ॥ १७–१८ ॥ उक्तिमेवाह। तत्र तावच्छ्रीकृष्णसंगति विधाय विधातैव विघट्टयतीति तं प्रत्येवाक्रोशन्त्य आहुरहो इति त्रिभिः। अहो इति। हे विधातः, अहो चित्रमिदं, तव क्वचिदपि, दया न अस्ति। तथापि मैत्र्या हिताचरणेन, प्रणयेन स्नेहेन विश्वासेन वा, देहिनो जनान्, संयोज्य तावन्मिथः योजयित्वा, अकृतार्थानप्राप्तभोगानेव, तान् वियुनङ्क्षि वियोजयसि। चकारोऽवधारणार्थः। ते उक्तप्रकारेण निर्दयस्य तव, विक्रीडितं चेष्टितं, अर्भकचेष्टितं यथा, बालक्रीडनमिवेत्यर्थः। अपार्थकं प्रयोजनशून्यं, यथा प्रयोजनशून्यचेष्टिता बाला मूर्खास्त्वमपि तथाविधचेष्टावत्त्वान्मूर्ख एवेति भावः ॥ १९ ॥ किं बहुना तवेदं कर्म विगर्हितमेवेत्याहुः यस्त्वमिति। असिता मेचका ये कुन्तलाः केशास्तैरावृतं, सुशोभनौ कपोलौ यस्मिंस्तत्, उदुन्नता नासिका यस्मिंस्तत्, शोकपनुदतीति शोकापनोदः स चासौ स्मितलेशस्तेन सुन्दरं, मुकुन्दस्य श्रीकृष्णस्य, वक्त्रं मुखारविन्दं, यः त्वं, अस्माकं प्रदर्श्य, पुनः पारोक्ष्यं तस्यादृश्यतां करोषि, अतः ते तव, कृतं कर्म, असाधु निन्द्यमित्यर्थः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

समेता इति : १०.३९.१८.

अक्रूरयोगो हि कलिप्रधानः संदृश्यते तद्वयमेकचित्ताः । भवाम सख्यो बहुधार्थदक्षाः शक्तिः कलौ यद्गदिता समूहे ॥ ४९ ॥

अहो विधातरिति : १०.३९.१९.

धातस्त्वं चतुराननोऽसि चतुराम्नायार्थविद्यासि तत् चातुर्यं तव सर्जने हि जगतां यद्वर्ण्यमानं बुधैः ।
प्रायो भाति तदीदृगेव यदिह श्रीशेन नः सङ्गमं निर्माय द्रुतमस्य भञ्जनविधावप्यात्तयत्नोऽस्यहो ॥ ५० ॥
अस्माकमीशसुखसङ्गमनन्तरायमस्मिन्नवेक्ष्य सहसे न यदेतदत्र ।
श्रीमत्सरस्थितिनिवासितया प्रसिद्धो यस्तस्य ते हतविधे ननु युक्तमेव ॥ ५१ ॥
यदस्मासु श्रीशानवरततरतोत्साहमतिषु दयामेकां स्रष्टुं न खलु निपुणः कीदृशमपि ।
सृजाम्येतत्सर्वं जगदिति वृथैवेह वहसे प्रतिष्ठां हे स्रष्टः किमति वितथार्था त्रिभुवने ॥ ५२ ॥
बालोऽहं जगदीशितुर्भगवतो मत्वेति चित्ते विधे मैवापार्थविहारवान् भव तथा लोके यथा बालकः ।
युक्तं तत्र हिताहितैकविधुरे सर्वागमोद्भासिते त्वय्येतत्तु पितामहे त्रिजगतः स्यादेव हास्यास्पदम् ॥ ५३ ॥

यस्त्वमिति : १०.३९.२०.

परोक्षस्यापरोक्षाय यतन्ते सकला विधे । अपरोक्षेशपारोक्ष्यकृत् त्वमेवैक ईक्षितः ॥ ५४ ॥
अधिवससि सत्यलोकं सत्यमतो ब्रूहि सत्यवनविषये । अङ्गीकृतोग्रकर्मा भवसि विधे जगति समदृगपि कस्मात् ॥ ५५ ॥
त्यक्त्वा जडांशममृतग्रहणप्रवीणान् हंसान् विमानपदवीं नयतो विधेऽस्मिन् ।
संतस्थुषश्च जडजातपदे स्फुटं ते धीवैभवं सदसदर्थविवेचनायाम् ॥ ५६ ॥

कृष्णप्रिया

गोपियाँ मन-ही-मन भगवान की लटकीली चाल, भाव भङ्गी, प्रेम भरी मुसकान, चितवन, सारे शोकों को मिटा देने वाली ठिठोलियाँ तथा उदारता भरी लीलाओं का चिन्तन करने लगी और उनके विरह के भय से कातर हो गयी। उनका हृदय उनका जीवन सब शुछ भगवान के प्रति समपित था। उनकी आँखों से आँसू बह रहे थे। वे झुण्ड की झुण्ड इकट्ठी होकर इस प्रकार कहने लगी ॥ १७–१८ ॥ गोपियों ने कहा – धन्य हो विधाता ! तुम सब कुछ विधान तो करते हो, परन्तु तुम्हारे हृदय में दया का लेश की नहीं है। पहले तो तुम सौहार्द और प्रेम से जगत के प्राणियों को एक दुसरे के साथ जोड़ देते हो, उन्हें आपस में एक कर देते हो, मिला देते हो, परन्तु अभी उनकी आशा-अभिलाषाएँ पूरी भी नहीं हो पाती वे तृप्त भी नहीं हो पाते कि तुम उन्हें व्यर्थ ही अलग-अलग कर देते हो। सच है, तुम्हारा यह खिलबाड़ बच्चों के खेल की तरह व्यर्थ ही है ॥ १९ ॥ यह कितने दुःख की बात है ! विधाता ! तुमने पहले हमें प्रेम का वितरण करने वाले श्याम सुन्दर का मुख कमल दिखलाया। कितना सुन्दर है। वह काले-काले घुंघराले बाल कपोलों पर झलक रहे हैं। मरकतमणि से चिकने सुस्निग्ध कपोल और तोते की चोंच सी सुन्दर नासिका तथा अधरों पर मन्द-मन्द मुसकान की सुन्दर रेखा, जो सारे शोको को तत्क्षण भगा देती है। विधाता ! तुमने एक वार तो हमें वह परम सुन्दर मुख कमल दिखाया और अब उसे ही हमारी आँखों से ओझल कर रहे हो। सचमुच तुम्हारी यह करतूत बहुत ही अनुचित है ॥ २० ॥

क्रूरस्त्वमक्रूरसमाख्यया[1] स्म नश्चक्षुर्हि दत्तं हरसे वताज्ञवत्[2] ।
येनैकदेशेऽखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधुद्विषः ॥ २१ ॥
न नन्दसूनुः क्षणभङ्गसौहृदः [3]समीक्षते नः स्वकृतातुरा वत[4] ।
विहाय गेहान् स्वजनान् सुतान् पतीं[5]स्तद्दास्यमद्धोपगता नवप्रियः॥ २२ ॥
सुखं प्रभाता रजनीयमाशिषः सत्या वभूवुः पुरयोषितां ध्रुवम् ।
याः संप्रविष्टस्य मुखं व्रजस्पतेः पास्यन्त्यपाङ्गोत्कलितस्मितासवम् ॥ २३ ॥
तासां मुकुन्दो मधुमञ्जुभाषितैर्गृहीतचित्तः परवान् मनस्व्यपि ।
कथं पुनर्नः प्रतियास्यतेऽबला ग्राम्याः [6]सलज्जस्मितविभ्रमैर्भ्रमन् ॥ २४ ॥

---

१. ख्यला स्मृत–विज. । २. वतार्थवत्–प्रा. पा. । ३. समीक्षिता नः–वीर ; समीक्षसे–इति कस्यचित् कृ. म. पु. । ४. अपि–विज. । ५. स्व–विज. । ६. अलज्जाः स्मितविभ्रमत् भ्रुवः–विज ।

कर्दमक्षमा

अन्वयः—अहो विधातः ? अक्रूरसमाख्यया, (अक्रूरस्वरुपेण) त्वम्, क्रूरः (समागतः) येन, मधुद्विषः, एकदेशे, (श्रीकृष्णवपुषः एक एव भागे) त्वदीयम्, अखिलसर्गसौष्ठवम्, वयम्, अद्राक्ष्म, नः, दत्तम्, चक्षुः, हि, अज्ञवत्, बत, हरसे ॥२१॥ अहो ! क्षणभङ्गसौहृदः, नवप्रियः, नन्दसूनुः, गेहान्, स्वजनान्, सुतान, पतीन्, विहाय, स्व दास्यम्, उपगताः, स्वकृतासु सः, नः, बत, न, समीक्षते ॥ २२ ॥ ध्रुवम्, (अद्य) पुरयोषिताम्, इयं रजना सुखं प्रभाता, आशिषः, सत्या, बभूवुः, याः, (पुरम्) प्रविष्टस्य, व्रजस्पतेः, अपाङ्गोत्कलितस्मितासवम्, मुखम्, यास्यन्ति ॥२३॥ हे अवलाः ? (वय किल) हे ग्राम्याः ? मुकुन्दः, यद्यपि, मनस्वी, (तथापि) तासाम्, मधुमञ्जुभाषितैः, सलज्जस्मितविभ्रमैः, गृहीतचित्तः, (तासां मध्ये) भ्रमत्, परवान्, (भविष्यति) पुनः, नः, प्रतिकथम्, यास्यति ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च दत्तापहारित्वेनातिक्रूरत्वमित्याहुः । क्रूरस्त्वमिति । नन्वक्रूरो हरति नाहमिति चेदत आहुः । अक्रूरसमाख्ययेति । न ह्येवं कर्तुमन्यः प्रभवत्यतो नामांतरेण स्म ध्रुवं त्वमेवागतोऽसि । कृष्णं हरामि न युष्मच्चक्षुरिति चेन्न । येन त्वद्दत्तेन चक्षुषा मधुद्विष एकदेशे नेत्रवक्त्रादौ त्वदीयं समग्रं सृष्टिनैपुणमद्राक्ष्म दृष्टवत्यो वयं तच्चक्षुः । अयं भावः । मम सर्वं रहस्यमाभिज्ञातमित्यमर्षेणेव कृष्णं वियोजयन्नस्मानंधीकरोषीति ॥ २१ ॥ विधातारं विहाय परस्परमूचुः । न नंदसूनुरिति । बतेति खेदे । क्षणभंगमस्थिरं सौहृदं यस्य सः । गृहादीन्विहायाद्धा साक्षात्तस्यैव दास्यमुपगताः स्वकृतातुरास्तत्कृतेनैव स्मितादिना परवशा अपि नोऽस्मान्न समीक्षते । नवंनवं प्रियं यस्य सः । अत एनं निवारयाम इति भावः ॥ २२ ॥ सेर्ष्यमूचुः । सुखं प्रभातेति । व्रजस्पतेः श्रीकृष्णस्य मुखं पास्यंत्यादरेण द्रक्ष्यंति । कथं भूतम् । अपांगेन नेत्रप्रांतेनोत्कलितमुज्जृंभितं स्मितमेवासवो रसो यस्मिंस्तत् । यद्वा अपांगोत्कलितस्मितेनासवरूपं यन्मुखम् । ततश्च पानं मुख्यमेव संभावयंति ॥ २३ ॥ ननु द्वित्राणि दिनानि तथा भवतु नाम तथाप्यस्मत्स्नेहाकृष्टः पित्रादिभिश्च परावर्तित आगमिष्यतीत्याशंक्याहुः । हे अवलास्तासां मधुवन्मंजुभिर्भाषितैर्वशीकृतचित्तस्तथा तासां सलज्जस्मितैर्विभ्रमैर्भ्रमन्परवान्पित्रादिपरतंत्रोऽपि । यद्वा व्रजे परेऽन्ये बंधवः सन्ति यस्य तथा मनस्वी धीरोऽपि ग्राम्या अविदग्धा नः कथं प्रतियास्यते प्रत्येष्यति न कथंचिदित्यर्थः ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यत्ततोऽप्यधिकमाह —किञ्चेति । स्वस्य क्रूरतामपानुदन्नाशंकते—नन्विति । यतोऽन्योऽप्रभुरतो हेतोः । नामांतरेणाक्रूरनाम्ना । भंग्यन्तरेणाह—कृष्णमिति । तत्राहुर्नेति । अत्र ब्रह्मण आशयं प्रकटयन्त्य आहुः—अयं भावः । रहस्यं गुह्यं गोपीभिरभिज्ञातमित्यमर्षेण कोपेन । इवशब्देन वस्तुतः कोपाभावं बोधयति निजकल्पितत्वात् । "क्रूरो भयंकरे सौरे नृशंसे कठिनोष्णयोः" इति हलायुधः ॥ हि एव, त्वमेव करोषि । बत, खेदे । तथा श्रीविष्णुपुराणेऽपि—"अहो गोपीजनस्यास्य दर्शयित्वा महानिधिम् । उत्कृत्तान्यद्य नेत्राणि विधात्राऽकरुणात्मना ॥" इति । यथाऽज्ञः पापापापमजानञ्जनो दत्तमपि हरति तद्वदित्यर्थः । किन्तु त्वं सर्वज्ञोऽप्यज्ञायस इति परमदुःखदानमात्रतात्पर्यत्वेन ततोऽपि पाप वैशिष्ट्यमिति भावः । कथं चक्षुर्हृतं, तत्राह—येनेति । त्वदीयमखिलसर्गसौष्ठवं मधुद्विष एकदेशेऽद्राक्ष्मेति, तदीयनत्रेवक्त्रादिसौन्दर्यामृतार्णवकलांशांशांश एव पद्मचंद्रादिसौन्दर्यं पर्याप्तमपश्यामेत्यर्थः । अतोऽनभिरुचेरन्यत्राप्रवर्तमानस्य तन्मात्रविषयस्य चक्षुषस्तद्धरणेन चक्षुष एव हरणम् । तत्र मधुद्विष इति तदितरयोग्यपदोपादानम् । 'नारायणसमो गुणैः' इति वाक्यात्सर्वातिशयगुणशालित्वेनैव तत्पर्यायस्येत्यर्थः । यद्वा—मध्विव मधु तदितरसर्वप्राकृताऽप्राकृतव्यञ्जनीयं तस्मै द्वेष्टि तदीयानां तद्धरतीति तस्येति । यद्वा—मधुपुरीपतित्वात्तत्समशीलत्वाच्च कंस एव मधु तद्द्विष इति तं हत्वा तद्राज्ये लब्धे पुनरत्रागमनं दुर्लभमिति भावः ॥ २१ ॥ कृष्णं कटाक्षीकृत्यान्योऽन्यमाहुः—नेति । नंदसूनुरिति साभिप्रायोक्तिः । अतो नवप्रियत्वात् । इति भाव इति—नूतनस्त्रीसंगरसिकः पुनरस्मान्प्रागनुभूताः प्रति नागमिष्यतीत्याशयः ॥ उदासीनं विधातारं किं निंदामः, परम् आत्मीयोऽस्मज्जीवनैकहेतुः श्रीनंदसूनुरेव तथाविध इत्याहुः—नेति । नंदसूनुर्बल्लवेंद्रकुमारत्वेनास्मत्समीक्षणयोग्यः किं पुनरस्माभिस्तादृशप्रेमबंधेन सोऽपीत्यर्थः । न समीक्षते नापेक्षते अपृष्ट्वैव दूरप्रस्थानोद्यमात् । समीक्षिष्यते इति च व्याख्यानेऽपि संप्रत्यपेक्षाया दर्शनादिति भावः । अतो दृढसौहृदत्वेन ज्ञातत्वेऽपि क्षणभंगसौहृद एवासौ नः समीक्षायाम् । हेतुगर्भविशेषमाहुः—विहायेति । गेहादीनां यथोत्तरं श्रैष्ठ्यमूह्यम् । अद्धा साक्षात्स्वदेहार्पणादिना दासीत्वमुप सामीप्येन प्राप्ता इति दास्यविशेषः सूचितः । तदुपगतावेव हेतुः—स्वकृतातुरा इति । तैर्व्याख्यातम् । यद्वा—संप्रति समीक्षायां विशेषतो हेत्वन्तरमाहुः—स्वकृतेन त्यागेनातुरा रोगेणेव पीडिताः नः केवलं न समीक्षते, किञ्च नवप्रियोऽसौ सर्वान्व्रजजनान्विहायाक्रूरेण सममात्मीयतां व्यज्य गमनदर्शनान्नवप्रियोऽसौ संप्रति माथुरीभिरेव प्रीतिं विधास्यतीत्यर्थः ॥२२॥ सेर्ष्यंक्षान्तिरहितम् । व्रजस्पतेरिह पतिशब्दस्य छांदसः सुट् । मुखस्य पानासंभवादर्थान्तरमाह—यद्वेति । रूपकेण मुखमासवीक्रियते, ततश्च मुखस्यासवरूपत्वादासवस्य पानं संभवत्येव । "आसवोऽमृतमद्ययोः" इति धरणिः ॥ हंतहंत किमद्भुतमस्माकं दुरदृष्टं, मथुरांगनान

शुभादृष्टं युगपदेव फलति स्मेत्याहुः—सुखमिति। इयं रजनी पुरयोषितां सुप्रभाता, व्रजयोषितां तु दुष्प्रभाता, तासामाशिषः विप्रादिदत्ता दीर्घमनोरथा वा सत्याः सफलाः, अस्माकं तु नष्टा बभूवुः। व्रजस्पतेः कृष्णस्य। सुडार्षः। व्रजजनानामेव दृश्यमिति भावः। अपांगे नेत्रान्ते उत्कलितस्मितम् उत्कृष्टा—रसव्यञ्जकाः कलाः संजाता यस्य तदुत्कलितं स्मितमेव रहस्येंगितम् आसवो मादको रसो यत्र तन्मुखं पास्यन्ति स्वापाङ्गरसनाभिरास्वादयिष्यन्ति। कुलधर्मलज्जाभयादिकं सहसैव त्यक्त्वाऽस्येंगितमंगीकरिष्यन्तीत्यर्थः। ततश्च समुचितसमये सम्यक्प्रकारेणान्यजनालक्षिततया मुखमपि साक्षात्पास्यन्ति। तदुक्तं विष्णुपुराणे—“सुप्रभाताऽद्य रजनी मथुरावासियोषिताम्। पास्यन्त्यच्युतवक्त्राब्जं यासां वै नेत्रपंक्तयः॥” इति॥ २३॥ अन्योऽन्यमाशंक्य समादधत इत्याहुः—नन्विति। तथा भवतु पुरांगनानां सुप्रभाता रजनी भवतु। नामेति वाक्यालंकारे। पित्रादिभिर्नन्दाद्यैः। तासां मथुरांगनानाम्। मधुवत्पुष्परसवत्। मंजुभिः श्रुतिमनोहरैर्वाक्यैः। विभ्रमैर्विलासैः। ‘मनोज्ञं मंजुमंजुलम्’ इत्यमरः। न हि नंदादय एव तत्संबंधिनः किं त्वन्येऽपीत्याहुः—यद्वेति। अन्ये वसुदेवप्रभृतयः। ग्राम्या ग्रामभवाः। अविदग्धाश्चातुर्यहीनाः। “ग्राम्यं स्त्रीकरणे क्लीबेऽश्लीलप्राकृतयोस्त्रिषु” इति मेदिनी। इत्यर्थ इति—चतुरस्त्रीप्राप्तौ को मूढामाद्रियत इति भावः। “परवांस्तु पराधीनो निघ्नः परवशः स्मृतः” इति हलायुधः। यद्वा—अबलाः सुरतधाष्ट्र्यहीनाः। ग्राम्या अश्लीललीलाः। मथुराङ्गनास्त्वग्राम्या नित्यसुरतकर्मोपेताः। “समुद्रोर्मिवदुन्नम्यभ्रूविलासेन सुन्दरी। निद्रितं मदनं या तु बोधयेत्सा वरांगना॥” इति कामन्दकोक्तः॥ भ्रमन् सर्वं विस्मरन्। लोकधर्मयोर्वर्त्मादिसकलं विस्मरिष्यतीति भावः। परवान् गृहीतचित्तत्वादेव तत्पराधीनः सन्नित्यर्थः। तदुक्तं विष्णुपुराणे—“मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति। नागरस्त्रीकलालापमधु श्रोत्रेण पास्यति॥ विलासिवाक्यपानेषु नागरीणां कृतास्पदम्। चित्तमस्य कथं भूयो ग्राम्यगोपीषु यास्यति॥ भावगर्भस्मितं वाक्यं विलासललिता गतिः। नागरीणामतीवैतत्कटाक्षेक्षितमेव तु॥ ग्राम्यो हरिरयं तासां विलासनिगडैर्यतः। भवतीनां पुनः पार्श्वं कया युक्त्या समेष्यति॥” इति। अबलाः तादृशकला लावण्यबलहीनाः॥ २४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हि एव त्वमेव करोषि बत खेदे तथा श्रीविष्णुपुराणेऽपि “अहो गोपीजनस्यास्य दर्शयित्वा महानिधिम्। उत्कृत्तान्यद्य नेत्राणि विधात्राकरुणात्मने”ति यथाज्ञः पापापापमजानन् जनो दत्तमपि हरति तद्वदित्यर्थः। किन्तु त्वं सर्वज्ञोऽपि अज्ञायस इति परमदुःखदानमात्रतात्पर्यत्वेन ततोऽपि पापवैशिष्ट्यमिति भावः। कथं चक्षुर्हृतं तत्राहुर्येनेति त्वदीयमखिलसर्गसौष्ठवं मधुद्विष एकदेशेऽद्राक्ष्मेति तदीयनेत्रवक्त्रादिसौन्दर्यामृतार्णवकलांशांश एव पद्मचन्द्रादिसौन्दर्यं पर्याप्तमपश्यामत्यर्थः अतोऽनभिरुचेरन्यत्राप्रवर्त्तमानस्य तन्मात्रविषयस्य चक्षुषस्तद्धरणेन चक्षुष एव हरणं तत्र मधुद्विष इति योग्यपदोपादानं नारायणसमो गुणैरिति वाक्यात् सर्वातिशयिगुणशालित्वेनैव तत्पर्यायस्येत्यर्थः। यद्वा मध्विव मधु तदितरसर्वप्राकृताप्राकृतवाञ्छनीयं तस्मै द्वेष्टि तदीयानां तद्धरतीति तस्येति यद्वा मधुपुरीपतित्वात् तत्समशीलत्वाच्च कंस एव मधु तद्द्विष इति तं हत्वा तद्राज्ये लब्धे पुनरत्रागमनं दुर्ल्लभमिति भावः॥ २१॥ उदासीनं विधातारं किं निन्दामः परमात्मीयोऽस्मज्जीवनैकहेतुः श्रीनन्दसूनुरेव तथाविध इत्याहुर्नेति। नन्दसूनुर्वल्लवेन्द्रकुमारत्वेनाप्यस्मत्समीक्षणयोग्यः किं पुनरस्माभिस्तादृशप्रेमबन्धेन सोऽपीत्यर्थः। न समीक्षते नापेक्षते अपृष्ट्वैव दूरप्रस्थानोद्यमात् समीक्षिष्यत इति च व्याख्यानेऽपि संप्रत्यपेक्षाया अदर्शनादिति भावः। अतो दृढसौहृदत्वेन ज्ञातत्वेऽपि क्षणभङ्गसौहृद एवासौ न समीक्षायां हेतुविशेषमाहुर्विहायेति। गेहादीनां यथोत्तरं श्रेष्ठमूह्यम् अद्धा साक्षात् स्वदेहार्पणादिना दासीत्वमुप सामीप्येन प्राप्ताः इति दास्यविशेषः सूचितः तदुपगतावेव हेतुः स्वकृतातुरा इति तैर्व्याख्यातं यद्वा संप्रति समीक्षायां विशेषतो हेत्वन्तरमाहुः। स्वकृतेन परित्यागेनातुरा रोगेणैव पीडिताः न केवलं न समीक्षते किञ्च नवप्रियोऽसौ सर्वान् व्रजजनान् विहाय अक्रूरेण सममात्मीयतां व्यज्य गमनदर्शनान्नवप्रिय एवासौ संप्रति माधुरीभिरेव प्रीतिं विधास्यतीत्यर्थः॥ २२॥ अत एव सेर्ष्यमूचुः पञ्चभिः विप्राद्याशीर्वादाः दीर्घमनोरथा वा सत्याः सफलाः सम्यक् पर्यन्तः प्रविष्टस्य व्रजस्पतेरिति व्रजजनानामेव दृश्यमिति भावः। सुडत्रार्षः पास्यन्ति नेत्ररसनया स्वादयिष्यन्ति अत एव श्रीविष्णुपुराणे “सुप्रभाताद्य रजनी मथुरावासियोषिताम्। पास्यन्त्यच्युतवक्त्राब्जं यासां नेत्राणि पङ्क्तय” इति॥ २३॥ भ्रमन् सर्वं विस्मरन् अन्यत्तैः परवान् गृहीतचित्तत्वादेव तत्पराधीनः सन्नित्यर्थः। तथा च तत्रैव “मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति। नागरस्त्रीकलालापमधुश्रोत्रेण पास्यति। विलासिवाक्यपानेषु नागरीणां कृतास्पदम्। चित्तमस्य कथं भूयो ग्राम्यगोपीषु यास्यति। भावगर्भस्मितं वाक्यं विलासललिता गतिः। नागरीणामतीवैतत कटाक्षेक्षितमेव च। ग्राम्यो हरिरयं तासां विलासनिगडैर्यतः। भवतीनां पुनः पार्श्वं कया युक्त्या समेष्यती”ति॥२४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हि एव, त्वमेव हरसि, बत खेदे, तथा श्रीविष्णुपुराणेऽपि (५।१८।२८)—‘अहो गोपीजनस्यास्य दर्शयित्वा महानिधिम्। उत्कृत्तान्यद्य नेत्राणि विधात्राऽकरुणात्मना।’ इति। अज्ञवदिति विधातृत्वेन सर्व्वज्ञोऽपि त्वं दत्तापहारादज्ञतुल्य एवासीत्यर्थः। कथं चक्षुर्हृतम्? तदाहुः—येनेति। त्वदीयमखिलसर्गसौष्ठवमद्राक्ष्मेति। त्वदीय-सौन्दर्य्यामृतार्णवकणांशांशविभागप्राप्त्या कामदेवादीनां परमसौन्दर्य्यसम्पत्तेः, अतो विषयहरणेन चक्षुषोऽन्यत्राप्रवृत्तेरान्ध्यापत्त्या चक्षुष एव साक्षात् हरणं

सिद्धम्। मध्वादिदैत्यस्तं द्वेष्टि हन्तीति तथा तस्येति महाबलिष्ठतया दृप्तत्वेन सौन्दर्य्यविशेषः सूचितः। यद्वा, मध्विव मधु क्षुद्रविषयसुखम्, किंवा चतुर्वर्गसारभूतं मोक्षं द्वेष्टीति, तथा तस्य यदपेक्षया विषयसुखं मोक्षासुखं वा निरस्तं भवतीति परमानन्दघनमूर्त्तित्वम्, तेन च तदेकदेशस्यापि तादृशत्वमेवाभिप्रेतमिति ॥ २१ ॥ नन्व आदौ निर्द्देशो निषेधस्य गौरवेण; नन्दसुनुरिति वल्लवेन्द्रकुमारत्वेनास्मत्समीक्षणयोग्योऽपीत्यर्थः। न समीक्षते प्रयाणसमये नावलोकयिष्यत्यपि, किंवा पुर्य्यां गतः सन्नापेक्षिष्यत इत्यर्थः। तत्र हेतुः—क्षणभंगसौहृद इति। नन्वेवं तर्हि तत्रत्यानप्युपेक्ष्य चिरादस्मानपेक्षिष्यते, तत्राहुः—नवप्रिय इति। बहुशोऽनुभूतत्वेन पुरातन्यो वयमुपेक्षितव्या एवेति भावः। यद्वा, दुःखवृद्धिशंकया गोपीषु दृष्टिमनर्पयन्तं कृष्णं दृष्ट्वाहुः—नेति। विधातारं किं निन्दामः, नन्दसूनुरेवास्मान् न समीक्षते, न पश्यति, नन्दसुनुतया तत्स्वभावेनैव समीक्षायोग्यता सूचिता। अधुना निजभावेनापि तामाहुः—विहायेति। गेहादीनां यथोत्तरं श्रैष्ठ्यमूह्यम; अद्धा साक्षात् स्वदेहार्पणादिना च दासीत्वमुपसामीप्येन प्राप्ता इति दास्यविशेषः सूचितः। तदुपगतवेव हेतुः—स्वकृतातुरा इति। अन्यत्तैर्व्याख्यातम्। अथवा ननु युष्माकं प्रियतमोऽयं स्वयमेव प्रयाति, तत्र मम को दोष इत्याशंक्य विधातारमेवाहुः—नन्दसुनुरयं क्षणभंगसौहृदो न भवति। तत्र हेतुः—नन्दसूनुरेवेति। किञ्च, अनन्यगतिकत्वादस्माकमुपेक्षां नैव कुर्य्यादित्याहुः– वत रे विधातः! नोऽस्मानपेक्षत एव। तत्र हेतुः–स्वकृतातुरा इति। किञ्च, विहायेति तदनिर्व्वचनीयं दास्यम्, अन्यथा कृतज्ञतापत्तिरिति भावः। नवप्रियोऽपि। अन्यत् समानम् ॥ २२ ॥ आशिषो विप्राशीर्व्वादाः, दीर्घमनोरथा वा सत्याः सफलाः सम्यक् गोपवेशादिना पुर्य्यन्तः प्रविष्टस्य, व्रजस्पतेरिति व्रजजनानामेव दृश्वमिति भावः। अपांगेति सभावनिरीक्षणमधुरस्मितयुक्तत्वमुक्तम्। अन्यत्तैर्व्याख्यातम्। यद्वा, अपांगेति क्रियाविशेषणम्, तेन च तासां भावविशेषेण सौभाग्यमभिप्रेतम्। अतएव श्रीविष्णुपुराणे (५।१८।२४)—'सुप्रभाताद्य रजनी मथुरावासियोषिताम्। पास्यन्त्यच्युतवक्त्राब्जं यासां नेत्रालिपङ्क्तयः।' इति ॥ २३ ॥ मुकुन्दः परमानन्दं ददत् सन्नित्यर्थः। अवलास्तत्प्राप्तौ सर्व्वशक्तिहीना इति भावः। भ्रमणचापल्यं लभमानो भ्रान्तो भवन्निति वा। तथा च तत्रैव (वि० पु०–५।१८।१४।१८)—

'मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति। नागरस्त्रीकलालाप-मधु श्रोत्रेण पास्यति ॥
विलासिवाक्यपानेषु नागरीणां कृतास्पदम्। चित्तमस्य कथं भूयो ग्राम्यगोपीषु यास्यति ॥
भाव-गर्भास्मितं वाक्यं विलासललिता गतिः। नागरीणामतीवैतत् कटाक्षेक्षितमेव च ॥
ग्राम्योहरिरयं तासां-विलास-निगडैर्युतः। भवतीनां पुनः पार्श्वं कया युक्त्या समेष्यति ॥' इति।

अन्यत्तैर्व्याख्यातम्। यद्वा, परवान् गृहीतर्चित्तत्वादेव तत्पराधीनः सन्नित्यर्थः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

व्रजस्पतेः व्रजपतेः ॥ २३–२४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नन्वक्रूरस्तस्य पारोक्ष्यं करोति नत्वहमित्याशङ्क्याहुः क्रूरस्त्वमिति। येन त्वया नोऽस्मभ्यं चक्षुर्दत्तं तत्पुनस्त्वमेवाज्ञवत् दुःखानभिज्ञवन्मूर्खवदक्रूरसमाख्यया हरसे अक्रूर इति व्याजमात्रमेव न सः त्वत्तोऽन्यः नह्येवं कर्त्तुमन्यः प्रभवतीति अभिप्रायेणक्रूरसमाख्ययेत्युक्तम् अतो नामान्तरेण ध्रुवं त्वमेवागतो दत्तमपहरन् क्रूर इत्यर्थः। ननु कृष्णं हरामि नतु युष्मच्चक्षुरित्याशङ्क्याहुः। येन त्वदत्तेन चक्षुषा मधुद्विषः श्रीकृष्णस्यैकदेशे नेत्रवक्त्रादौ त्वदीयसमग्रसृष्टिनैपुण्यमद्राक्ष्म दृष्टवत्यो वयम् अयं भावः तव सर्वं रहस्यमस्माभिर्ज्ञातमित्यमर्षेण कृष्णं वियोजयन्नस्मानन्धीकरोषीति ॥ २१ ॥ विधातारं विहाय परस्परमाहुः। न नन्दसूनुरिति। वतेति खेदे क्षणभङ्गमस्थिरं सौहृदं यस्य स नन्दसूनुर्गेहादीन् विहाय अद्धा साक्षात्स्वस्य तस्यैव दास्यमुपगताः स्वकृतेनैव स्मितादिना आतुराः परवशा अपि नोऽस्मानपि न समीक्षिता न समीक्षिष्यते तत्र हेतुं सेर्ष्यमाहुः। नवप्रियः नवः पुरस्त्रीजनः प्रियो यस्य तथाभूतः अत एवैनं वारयाम इति भावः ॥ २२ ॥ पुनः सेर्ष्यमाहुः। सुखप्रभातेति। पुरयोषितां मधुपुरीस्थयोषिताम् इय रात्रिः सुखप्रभाता तथा तासामाशिषः कामाश्च सत्या बभूवुः तत्र हेतुं वदन्त्यस्ता विशिंषन्तिः। याः पुरयोषितः पुर्यां प्रविष्टस्य व्रजस्पतेः श्रीकृष्णस्य सुडागम आर्षः पारस्करादेराकृतिगणत्वाद्वा अपाङ्गेन नेत्रान्तेन उत्कलितमुज्जृम्भितं स्मितमेवासवो रसो यस्य तन्मुखं पास्यन्ति मुखकमलस्थस्मितासवं पास्यन्तीति भावः ॥ २३ ॥ मथुराङ्गतोऽपि पुनरायास्यतीत्युद्भावयन्तीः काश्चित्प्रत्याहुः। तासामिति : हे अवलाः! तासां पुरस्त्रीणां मधुवन्मञ्जुभिर्भाषितैः वशीकृतचित्तस्तथा तासां सलज्जितैर्विभ्रमैर्भ्रमन् मुकुन्दः स्वतो मनस्वी धीरोऽपि परवान् सन् परस्त्रीपरतन्त्रः ग्राम्या अविदग्धा नोऽस्मान् प्रति कथं यास्यते न कथञ्चिदित्यर्थः॥२४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हे विधातः त्वमक्रूरसमाख्यया अनृशंसोऽयमकठिनोऽयमिति गुणसमाननाम्ना स्मृतः पूर्वमधुना क्रूर इति स्मर्यसे कुत येन चक्षुषा मधुद्विष एकदेशे मुखाद्येकावयवे तदीयं तस्य तव विद्यमानम् अखिलस्य विश्वस्य सर्गे सृष्टौ यत्सौन्दर्यं तदद्राक्ष्म तत् त्वया हि एवं दत्तं चक्षुरज्ञवत्कृतघ्नवद्धरसे वत कष्टमित्यन्वयः—

क्रूरो भयङ्करे कन्धे नृशंसे कठिनोष्णयोरिति च ।

यद्वा तस्य मधुद्विषो विद्यमानमखिलं पूर्णं सर्गं स्वाभाविकमकृत्रिमं सौष्ठवमन्यत्समम ॥ २१ ॥ इदानीं कृष्णं कटाक्षीकृत्य वदन्ति । नेति । स्वकृते स्वात्मानं कृष्णमुद्दिश्यातुराः क्लिष्टा अपि नोऽस्मान्न समीक्षते न चिन्तयति यत्तस्मान्नन्दसूनुः क्षणभङ्गसौहृदः नवप्रियः नूतनप्रियश्च कीदृशीरस्मान् गेहादीन् विहाय स्वदास्यमद्धा प्रत्यक्षमुपागताः अद्धा सत्यं वा अद्धा प्रत्यक्षसत्ययोरिति च ॥ २२ ॥ सुखप्रभातत्वे निमित्तमाहुः । या इति । व्रजस्पतेः गोकुलनाथस्य सकारश्छान्दसः अपाङ्गेन कटाक्षनिरीक्षणेन उत्कलितमुत्पन्नमभीष्टवर्षकीकृतं वा स्मितमेवासवममृतं यस्मिंस्तथा ॥ २३ ॥ इदानीं कृष्णमवजानन्त्यो वदन्ति । मनस्वी महामनाः अपि मुकुन्दो मथुराङ्गतः पुनः नोऽस्मान् प्रति कथं प्रतियास्यते आगमिष्यते न केनापीत्यन्वयः । अनागमने निमित्तमाहुः । तासां मथुराङ्गनानां मधुतञ्जुभाषितैः मधुवत्पुष्परसवत् मञ्जुभिः श्रुतिमनोहरैर्वचनैः गृहीतचित्तो वशीकृतचेताः अत एव परवान् पराधीनः—

परवांस्तु पराधीनोनिघ्नः परवशः स्मृत इति हलायुधः ।

तासां मधुरवचनमेव कारणं न त्वन्यदित्याशयेनाहुः । अबलाः सुरतधाष्ट्र्यविधुराः किञ्च ग्राम्याः अश्लीललीला तदपि मुख्यं नेत्याहुः । अलज्जाः लज्जारहिताः भ्रूविलासोऽपि सुखसूचको नेत्याहुः । स्मितेन सह विभ्रमन्ती भ्रूर्यासां तास्तथा "समुद्रोर्मिवदुन्नम्यद्भ्रूविलासेन सुन्दरी । निद्रितं मदनं या तु बोधयेत्सावराङ्गने"ति कामन्दकः यद्वा हे अबलास्ता मथुराङ्गनाः ग्राम्याः नित्यसुरतकर्मोपेताः स्मिता स्फुटीकृता विभ्रमन्ती भ्रूर्यासां तास्तथा ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

न समीक्षते ॥ २२–२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नन्वक्रूरः कृष्णं पुरीं नयती नाहमिति चेत्तत्राहुः । क्रूरस्त्वं विपरीतलक्षणया अक्रूरस्य समाख्यया नाम्ना नह्येवं कर्तुमन्यः शक्नोतीति भावः । तथा दत्तापहारित्वेनापि क्रूरोऽपीत्याहुः । त्वयैव दत्तं चक्षुस्त्वमेव हरसे यथाऽज्ञः पुण्यपापे अजानन् दत्तमपि हरति तद्वत् कृष्णं हरामि न युष्मच्चक्षुरिति चेत्तत्र कृष्णहरणादेवास्माकमान्ध्याच्चक्षुर्हरणमित्याहुः । येन चक्षुषा मधुद्विषः कृष्णस्यैकदेशे वक्त्रनेत्रादौ त्वदीयमखिलसृष्टेः सौष्ठवमद्राक्ष्म तेन किमन्यत् पश्यामः अतोऽन्धा एव भविष्यामः ॥ २१ ॥ हन्त हन्तास्मत्प्रेमास्पदत्वादस्मज्जीवनैकहेतुः कृष्ण एवास्मानुपेक्षते विधातारं किमिति दूषयाम इत्याहुः । नेति । अतिप्रबलः प्रेमा कथमनेन छिन्न इत्यत आहुः । क्षणमात्रेणैव भङ्गो यस्य तथा भूतं सौहृदं यस्य सः सौहृदं नैवमन्यः कर्तुं शक्नोतीति भावः । हन्त हन्त स्वस्य कृते आतुराः प्राणान्तिमदशापन्ना अप्यस्मान् न सम्यगीक्षतेऽपि एता रुदित्वा म्रियन्तां नाम अहन्तु मथुरां गत्वा सुखं लभे इत्यस्य निश्चय इति भावः । वयं तु विहायेत्यादि यद्दास्यार्थं पत्यादीनप्यत्यजाम सोऽस्मांस्त्यजति तत्र हेतुः न वा एव प्रिया यस्य सः वयमधुना पुरातन्योऽभूम यतस्तस्मादिति भावः तस्माद्वयमनेनोभयलोकत एव भ्रंशिता इति ध्वनिः ॥ २२ ॥ हन्त हन्त किमद्भुतमिदमस्माकं दुरदृष्टं मथुराङ्गनानां शुभादृष्टं युगपदेव फलतिस्मेत्याहुः । सुखामिति । इयं रजनी पुरयोषितां सुप्रभाता व्रजयोषितां तु दुष्प्रभाता तासामाशिषो विप्रादिदत्ताः दीर्घतरमनोरथा वा सत्याः सफला अस्माकं तु नष्टा बभूवुः व्रजस्पतेः कृष्णस्य सुडार्षः अपाङ्गे नेत्रान्ते उत्कलितस्मितम् उत्कृष्टा रसव्यञ्जिकाः कलाः सञ्जाता यस्य तदुत्कलितं स्मितमेव रहस्येङ्गितमासवो मादको रसो यत्र तन् मुखं पास्यन्ति स्वापाङ्गरसनाभिरास्वादयिष्यन्ति कुलधर्मलज्जाभयादिकं सहसैव त्यक्त्वा अस्येङ्गितमङ्गीकरिष्यन्तीत्यर्थः ततश्च समुचितसमये सम्यक् प्रकारेणान्यजनालक्षिततया प्रविष्टस्य मुखमपि साक्षात् पास्यन्ति ॥ २३ ॥ ननु द्वित्राणि दिनानि तथा भवतु नाम तथाप्यस्मत्स्नेहाकृष्टः पित्रादिभिश्च परावर्तित आगमिष्यतीति चेद्धो मुग्धा न जानीथ तत्त्वं शृणुतेत्याहुः । तासां मधुतोऽपि मञ्जुभिरतिमधुरैर्भाषितैर्गृहीतचित्त आकृष्टमनाः अत एव परवांस्तदधीनः सन् मनस्वपि धीरोऽपि हे अबलाः ! तादृशकलालावण्यवलहीनाः कथं ग्राम्या अस्मान् प्रत्यायास्यति ननु तदपि पित्रादीन् लोकधर्मयोरपि वर्त्मानुस्मृत्य विवेकवलादायास्यत्येवेत्यतो विशिषन्ति ः तासां सलज्जस्मितैर्विभ्रमैर्मदनावेशसूचकचेष्टितैश्च भ्रमन् भ्रान्ति प्राप्नुवन् अयमहो सर्वं विस्मरिष्यत्येवेति भावः ॥ २४ ॥

गूढार्थदीपिनी

अक्रूरनाम्ना आगतस्त्वं दत्तमेव चक्षुः हरसे इति दत्तापहारिता महान् दोषः । येन त्वद्दत्तेन चक्षुषा मधुद्विषः एकस्मिन् प्रदेशे सकलसृष्टिसौन्दर्यम् अद्राक्ष्म । बत खेदे ॥ २१ ॥ स्वजनादीन् विहाय यस्य दास्यमुपगताः स नन्दसूनुरेव नोऽस्मान् न समीक्षते यतो नवप्रियः अतो वयमेव एनं निवारयामः इत्युत्तरेणान्वयः । स्वकृतेनैव प्रेम्णा आतुराः विवशाः न द्वितीयान्तम् ॥ २२ ॥ या व्रजस्पतेः मुखं पास्यन्ति तासां योषिताम् इयं रजनी सुप्रभाता भविष्यतीत्यन्वयः विप्रैः दत्ताः आशिषश्च

सत्याः। कथंभूतम् मुखम्। अपाङ्गेन उत्कलितं क्षरितं स्मितमेव आसवोऽमृतं मद्यं वा संसारविस्मारकत्वात् यस्मिन् तत्॥ २३ ॥ हे अबलाः। मनस्वी स्वतन्त्रोऽपि भगवान् तासां मधुवत् मधुरभाषणैः भाषितै परवान् परतन्त्रः सन् ग्राम्याः नः अस्मान् प्रति कथं प्रतियास्यते इत्यन्वयः। यतो विभ्रमैः स्मितविलासैः भ्रमन् सर्वं विस्मरन्॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नच तवैतत् कर्मैवासाधुत्वमपि रूपान्तरेणास्मदहिते प्रवृत्तो वञ्चकत्वदत्तापहारित्वादिदोषवत्त्वेनासाधुरसीत्याहुः। क्रूर इति। हे विधातः! त्वं क्रूरोऽसि "क्रूरस्तु कठिने नृशंसेऽप्यभिधेयवदि"ति विश्वः यतः मधुद्विषः मधुसंज्ञकमहासुरद्वेषिणः विख्यातकीर्तेर्विष्णोः विश्वमूर्ते एकदेशे मुखनेत्रादौ त्वदीयम् अखिलसर्गं सौष्ठवं समग्रं सृष्टिनैपुण्यमद्राक्ष्म दृष्टवत्यो वयम् अतः सर्वसृष्टिसौष्ठवदर्शनकरणभूतं मधुद्विडाख्यं येन त्वयैव दत्तं स त्वमेव नश्चक्षुः अज्ञवत् बालवत् अक्रूरसमाख्यया हरसे नान्यश्चैतत्कर्त्तुं शक्नोति अतो निरपराधिजनदुःखदत्वेन वञ्चकत्वेन दत्तापहारित्वेन बालिवेन च त्वमप्यसाधुरेवासीति भावः। स्मेति पादपूरणे॥ २१ ॥ तत्र काश्चिन्नन्दसूनुमेवाक्रोशन्त्योऽन्योऽन्यमूचुः। न नन्दसूनुरिति। वतेति खेदे क्षणभङ्गमस्थिर सौहृदं यस्य सः नवप्रियः नवं नवं प्रियं यस्य सः एवंभूतो नन्दसूनुः यस्मात् स्वकृतातुराः तत्कृतेनैव स्मितादिना आतुराः परवशाः गृहादीन् विहाय अद्धा साक्षात्तस्यैव दास्युपगताः अपि नोऽस्मान् न समीक्षते॥ काश्चित्तु इतो गतस्य भगवतो दर्शनादिकं प्राप्य तत्रत्याः कृतार्था भविष्यन्तीत्याशयेनाहुः। सुखमितित्रिभिः। पुरयोषितामियं प्रभाता प्रातः कालरूपा रजनी सुखं यथा तथा बभूव तथा आशिषः कामाः सत्या बभूवुः यतः याः पुरयोषितः व्रजस्पतेः श्रीकृष्णस्य अपाङ्गोत्कलितस्मितासवम् अपाङ्गेन नयनप्रान्तेनोत्कलितं विकसितं यत् स्मितं तेनासवरूपं रसरूपं मुखं पास्यन्ति॥ २३ ॥ ननु धनुर्यागोत्सवं दृष्ट्वा पुनरायास्यतीत्यत्र काश्चिदाहुः। तासामिति। हे अबलाः! परवान् पित्रादिपरतन्त्रोऽपि स्वतो मनस्वी धीरोऽपि मुकुन्दः तासां पुरयोषितां सलज्जस्मितैर्विभ्रमै विलासैर्भ्रमन् तासां मधुमञ्जुभाषितैः मधुरकोमलवचनैर्गृहीतचित्तः गृहीतं वशीकृतं चित्तं यस्य सः ग्राम्याः अविदग्धा नोऽस्मान् कथम्प्रतियास्यते प्रत्येष्यति न कथञ्चिदित्यर्थः॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मनस्वी सन्नपि तासां पुरतरुणीनां मधुमञ्जुभाषितैर्मधुनो मनोहरादपि मञ्जुनि मञ्जूलानि च तानि भाषणानि च तैर्गृहीतं चित्तं यस्य स परवान्। परवांस्तु पराधीनो निघ्नः परवशः स्मृतः इति हलः। परवशा ग्राम्या ग्रामीणा अलज्जाः स्मितविभ्रमद्भ्रुवः स्मितेन विभ्रमन्त्यो भ्रुवो यासां ता यास्तासामित्यन्वयः। पुनः कथं। नोऽबलाः प्रतियास्यते आगच्छति। ग्राम्या व्यवायधर्ममर्मज्ञा वाऽश्लीलशीला वा॥२१॥दाशार्हभोजान्धकवृष्णिसात्वतां दृशां नेत्राणां तत्र मधुरायामद्य महोत्सवो ध्रुवं भविता ये च जना अध्वनि मार्गे देवकीसुतं। स क इत्यतो वदन्ति। महोत्सवं तद्रूपं महानुत्सवस्तद्यस्मिंतमिति वा गुणानामास्पदं स्थानं। नित्यनपुंसकलिङ्ग आस्पदशब्दः। आस्पदं प्रतिष्ठायामिति निपातनात्। श्रीरमण रमापति द्रक्ष्यन्ति तेषां दृशां च महोत्सव इति सम्बन्धः॥ २२ ॥ यदा गतिरेतद्गतिदाऽस्माकं हेति तमक्रूरं निन्दन्ति। मेति। एतद्विधयषा विधा यस्य स एतद्विधस्तस्याकरुणस्य न विद्यते करुणा यस्य स तथा तस्य। अक्रूर इत्येतन्नाम मा च भूयोऽसावक्रूरः सुदुःखितं जनं गोपीजनं परमपुरुषाङ्गसङ्गभङ्गेऽस्माकमपि पुरुषप्रायतैवेति ध्वनयितु जनमिति वचनं। अनाश्वास्यासमाधाय प्रियात्प्रियं सर्वप्रीतिपात्रपदार्थात्प्रियमध्वनो मार्गस्य पारं दूरमस्मद्दृग्गोचरं देशं नयतीत्यतीवदारुणो बहुकठिनः॥ २३ ॥ स्वमनोरथसिद्धं च तमनो रथं निरीक्ष्य तत्रास्थितं गच्छन्तं कृष्णमपि च गोपनपि कोपादविवेकयन्ति। अनार्द्रधीरिति। एषः कृष्णोऽनार्द्रोऽद्रवन्ती धीर्यस्य सः। अनाश्वास्येत्याकृष्यात्रापि योज्यं। रथमास्थित इति तमनु चामी गोपा अनोभिस्त्वरयन्ति दुर्मदाः पूर्वोत्तरकार्यान्धताप्रापकमदयुताः स्थविरैरप्युप्रेक्षितं नोभयथाऽपि ते प्रोचुरिति। तेऽपि किं कुर्युः। अद्य नो दैवं भागधेयं प्रतिकूलं विरुद्धमीहते चेष्टते दैवेऽनुकूले सर्वमनुकूलं तस्मिंश्चैवं प्रतिकूले कं प्रति वदामः किं कुर्मो हेति ताः प्रलपन्तीति भावः॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नन्वक्रूर एव नयति भगवन्तं किमित्यहमुपालभ्ये इति चेत्तत्राहुः। न हि त्वया समानीतः त्वद्वाक्येन समागतः अक्रूरेण नेतुं शक्यः अतस्त्वमेव भगवन्नयनात् क्रूरात्मापि सन् अक्रूरोऽहमिति विपरीतं नाम धृत्वा भद्रामङ्गलवारवत् अन्यथा प्रवेशो न भविष्यतीति लोकापवादव्यावृत्त्यर्थं तेन रूपेण हरसे चक्षुषश्चक्षुरितिश्रुत्या भगवांश्चक्षुषश्चक्षुः युक्तश्चायमर्थः प्रामाणिकत्वात् इदं पुनश्चक्षुर्न सर्वजनीनं किं तु त्वयैवास्मभ्यं विशेषाकारेण दत्तं न हि दत्तं चक्षुः देवादिभिरपि ह्रियते अन्येनापहृतं परं प्रयच्छन्ति बतेति खेदे एतदभावे सुतरामन्धत्वमेव प्राकृतं चक्षुस्तु एतत्प्राप्त्या निवर्त्तितम् अतोऽत्यन्तमतकाररूपत्वान्न हर्त्तव्यमिति भावः। ननु ये यत्कर्तुंप्रवृत्तास्ते तत्करिष्यन्त्येवेत्युपालम्भानर्थक एवेति चेत्तत्राहुः। अज्ञवदिति। अत्रार्थे विमर्शकारित्वाभावाद्विवेको बोधनीय इत्युपालम्भ उचित इत्यर्थः। किञ्च तवाप्यनेन चक्षुषा महानुपकारः सिध्यतीत्याहुः। येनैकदेश इति। त्वया हि सौन्दर्यं सृष्टं क्वचित्प्रकाशनीयं तत्समुदायेन सर्वस्यापि भगवदवयवे एव भवति तन्मूलकत्वादेव तस्य सौन्दर्यस्य विष्टभ्याहमिदं कृत्स्नमिति

वाक्यात् एकांश एव जगत् तत्राप्येकदेशे सौन्दर्यमिति रूपग्रहणार्थमेव हि चक्षुषो निर्माणं रूपं त्वत्रैव व्यवहारस्त्वन्धानामपि सिध्यति अत एव येन चक्षुषश्चक्षुषा तवैवाखिलसर्गसौष्ठवं वयमद्राक्ष्म वयं च श्रुतिरूपाः अन्यथा त्वत्कृतमप्रामाणिकमेव स्यात् मधुद्विष इति तवाप्युपकारकर्त्ता भगवान् सोऽत्र रमते तत्प्रतिबन्धोऽपि तवानुचित इत्यर्थः ॥ २१ ॥ एवं ब्रह्मण उपालम्भमुक्त्वा स्वतन्त्रो भगवान् ब्रह्माणं न मन्यत इत्याशङ्क्य भगवत उपालम्भनमाहुः । न नन्दसूनुरिति चतुर्भिः । यद्यपि भगवान् मार्गान् विधाय स्वयमुदासीन एव तिष्ठति दूरे स्थित्वा च किञ्चित्करोति नतु सर्वथा तथापि प्रपत्तिमार्गे न किञ्चित् कृतवान् नापि शास्त्रं न वा साधनानि प्रमाणवाक्येऽपि "अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि" इति प्रमेयबलमेवोक्तवान् अत उपालभ्यो भवत्येव किंच नन्दसूनुः भक्तकृपया भक्तिमार्गेऽपि नन्दस्य पुत्रो जातः यत्रैतावद्भवति अप्रयोजके तत्रास्मासु मनोरथार्थमेव कथं न बिलम्बं करोतीति अत एव प्रायेणान्याभिनिवेशो जात इत्याहुः । क्षणभङ्गसौहृद इति । क्षणेनैव भङ्गो यस्य तादृशं सौहृदं यस्येति अन्यथा विचारयेद्वा अत एव न समीक्षते सम्यक् पश्यत्यपि न न हि गतसौहृदा दृश्यन्ते द्रष्टव्या इत्यत्र हेतुमाहुः । स्वकृतातुरा इति । स्वकृते भगवदर्थमेवातुरा दीनाः बतेति खेदे कर्ममार्गेऽपि लौकिकेऽपि स्वकृतातुरेषु समीक्षा क्रियते ज्ञानमार्गे तु आत्मत्वेनैव नित्यप्रकाश इति बहिराविर्भावात् सपक्षो भगवतैव त्यक्तः स्वेषां प्रपत्त्यधिकारित्वमाहुः । विहायेति । सर्वधर्मान् परित्यज्येत्यर्थः । गृहत्यागेन तद्धर्मत्याग उक्त एव बाह्याश्चत्वार आन्तराश्च तथा बाह्यानां परित्याग एव आन्तराणां तु दास्यार्थं स्थापनमिति बाह्यानि गणयन्ति । स्वजना बान्धवाः सुताः स्वस्मादुत्पन्नाः पतयो नियामकाः विशिष्टत्वाद्बाधकत्वात् स्वतन्त्रत्वात् स्वस्यैव भोक्तृत्वाभिमानाच्च आन्तरवम्नेषां दास्योपयोगः अतस्त्यक्तव्या एव स्वदास्यमित्येकशब्दार्थ उक्तः न तु देशादिसहितस्य तदप्यद्धा साक्षात् न नामादिद्वारा एवमुपगतानपि न समीक्षते विचारयत्यपि न अतः केवलं खेद एव कर्त्तुमुचितः असमीक्षायां हेतुं कल्पयन्ति । नवप्रिय इति । असमीचीनमपि नवमेव प्रियं मन्यते अयमप्येकः स्वभावः ॥ २२ ॥ नवप्रियत्वेन सूचितं भावं प्रकटीकुर्वन्ति त्रिभिः नूतनं त्रिविधं भवतीति । सुखं प्रभातेति । "राजसस्तामसश्चैव सात्त्विकश्चेत्यनुक्रमः" इयं रजनी अस्मत्प्रतिपक्षाणामेव सुखं प्रभाता रजनी न त्वस्माकम् आशिषश्च मनोरथाः ब्राह्मणैर्निरूपिता वा तासामेव सत्या बभुवुः यतस्ताः पुरयोषितः चतुराः अन्यथात्रैवागच्छेयुः अत एवास्माकं गमनमपि तत्र बाधितं सपत्नीनाममयवसर इति अस्मद्भोगकालापेक्षया तासामुत्तमो भविष्यति देशश्चोत्तमः अतः पुरवासिन्यः भाव्यर्थं परिज्ञाय स्थिरा जाताश्चतुरा एव अतः ध्रुवमेव महोत्सवो भविष्यति उत्सवमाहुः । याः सम्प्रविष्टस्येति । सम्यक् प्रविष्टस्य ब्रजस्पतेः गोकुलस्वामिनोगोविन्दस्य स्वस्थानं प्रविष्टस्य मुखं पास्यन्ति प्रभामुखे परकीये च महानानन्दो भवतीति तस्मिन्मुखे तासां मधुपानमपि भविष्यति न केवलं लावण्यामृतपानमिति विशेषमाहुः । अपाङ्गेन उत्कलितं यत् स्मितं तत्सहितमधुरामृतं तदेव देहादिविस्मारकम् अनेम तासां पूर्वदुःखस्मरणाभावात् साम्प्रतमानन्दानुभवाच्च तासामेव महद्भाग्य न त्वस्माकम् ॥ २३ ॥ नन्वस्तु तासामद्य श्वः परश्वो वा भगवानत्रायास्यतीति अस्माकमेव सुखं भविष्यतीत्याशङ्क्याहुः । तासामिति । स हि मोक्षदाता अस्माकं मुक्तिमेव दास्यति शास्त्रसिद्धां तासां वा मधु स्वादिष्टं मञ्जु मनोहरं ग्रहणे पर्यवसाने वोत्तमं यद्भाषितम् एकेनापि कार्यसिद्धौ बहूनि तानि अतो गृहीतचित्तः चित्ताधीनश्च पुरुषः ननु नन्दोऽस्ति सङ्गे भगवांस्तु जितेन्द्रियः पराधीनतयैव प्रवर्त्तते न तु स्वत इति चेत् सत्यं यद्यपि परवान् यद्यपि मनस्वी तथापि नः अस्मान् प्रति कथं प्रतियास्यति एकदा अयं रसो भुक्त इति उद्धृता इतिवद्यथा नन्दाधीनः तथान्याधीनोऽपि भविष्यति यथा वयं तथा अन्या अपीति अबला इति सबोधनं सम्मत्यर्थमुपायाभावार्थं च ग्राम्मा इति स्वेषु बाधको धर्मः यद्यपि ग्राम्यः प्राथमिको भवति रसः अतः सम्भावना तथापि नागरिकादीनां सर्वेषामेवोपभागे महानेव कालो भवतीति पुनरावृत्तिर्भवति न वेति कथमिति प्रकारप्रश्नः प्रथमप्रवृत्तौ लज्जा ततः स्मितं ततो विभ्रमाः तैस्तत्रैव भ्रमन् पुनस्तास्वेव मण्डलपरिभ्रमं कुर्वन् कथं प्रतियास्यति न हि भ्रमे उत्पन्ने गमनमार्गस्यापि विस्मृतत्वात् भ्रमणं युक्तमेव ॥ २४ ॥

श्रीसुबोधिनी–सारः

दत्त चक्षुस्त्वं हरसेऽधानस्मान् करोषि अज्ञवन्मूढ ईवात्तो दत्तापहरणात्त्वमेव क्रूरोसि । 'अक्रूरो हर्त्तुमागतः' इति समाख्यया कथनेन स्मेति प्रसिद्ध येन चक्षुषा त्वदीयमखिल सर्वं सर्गस्य सृष्टेः सौष्ठवं चातुर्यं मधुद्विषः कृष्णस्यैकदेशे एकस्थाने मुखादौ वयमद्राक्ष्म ॥ २१ ॥ "विधातुर्न हि दोषोत्र कृष्णश्छद्मी च कौतुकी" इत्याहुः । स्वेन कृतैः स्मितादिभिरातुराः परवशा यद्वा स्वकृत आत्मार्थ मातुराः दुःखिता गेहान् स्वजनान् मातृपितृसुहृद्बंधून् पुत्रान् पतींश्च विहाय त्यक्त्वाऽद्धा साक्षात्तस्य दास्यमुपगता दासीत्वं प्राप्ता नोऽस्मान् क्षणेन भंगं सौहृद यस्य स नवा प्रिया यस्य स नंदस्य सूनुः पुत्रो न समीक्षते न पश्यति । बतेति खेदे । कृतघ्नोऽयमिति भावः ॥ २२ ॥ परसुखं दुःखहेतुरिति सूचयन्त्य आहुः । मथुरां संप्रविष्टस्य व्रजस्पतेः । सुडार्षः । श्रीकृष्णस्यापांगेन नेत्रप्रांतेनोत्कलितमुज्जृंभितं स्मितमेवासवो रसो यस्मिंस्तन्मुखं याः पास्यन्ति सादरमवलोकयिष्यंति तासां पुरयोषिता माथुरीगोपीनाम् आशिषः कामाः सत्या बभूवुर्भविष्यंति । सुखं प्रभातो यस्यां सेयं रात्रिर्भविष्यति । ध्रुवं निश्चयेन ॥२३॥ तत्र गतस्य पुनरागमं दुर्लभमित्याहुः । तासां नागरीणां मधुभिः प्रियैर्मंजुभिः सुंदरैर्भाषितैः गृहीतं वशीकृतं चित्तं यस्य स मुकुंदः परवान् पराधीनो मनस्वी चतुरोऽपि ग्राम्या अबलाः स्त्रीनोंस्मान् कथं पुनः प्रत्यागमिष्यति न कथंचिदपि सलज्जैः स्मितविभ्रमैर्भ्रमन् मोहितः ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'किञ्च दत्तापहारित्वेनापि क्रूरस्त्वम्' इत्याहुः—क्रूरस्त्वमिति। हि यस्मात् स्वेनैव दत्तं नोऽस्माकं चक्षुस्त्वं हरसेऽतः क्रूर इत्यन्वयः। 'अज्ञानाद्धरणेऽपि कथं क्रूरता' इत्याशङ्क्याहुः—अज्ञवदिति। परदुःखानभिज्ञ मूर्खवद्धरसे, न तु त्वं तथा, सर्वाधिपतित्वेन चतुरत्वात्। ननु 'अक्रूरो हरति, नाहम्' इति चेत्तत्राहुः—आख्यरसमक्रूरेति। नह्येवं कर्तुमन्यः प्रभवत्यतो नामान्तरेण त्वमेवागतोसीत्यर्थः। 'स्म' इत्येवकारार्थे। 'बत' इति खेदे। सर्वाधिष्ठात्रा त्वया यद्येवं निन्द्यं क्रियते तर्हि अन्यः को वा न कुर्यादिति महत्कष्टमित्याशयः। ननु 'कृष्णमेव हरामि, नतु युष्मच्चक्षुः' इत्याशङ्क्याहुः—येनेति। येन त्वद्दत्तेन चक्षुषा मधुद्विषः श्रीकृष्णस्यैकदेशे नेत्रवक्त्रादौ त्वदीयं सर्वसृष्टिनैपुण्यं वयमद्राक्ष्म अत एतद्वियोगेऽन्यस्य दर्शनीयस्य अभावात् अस्मद्रहस्यमेताभिः सर्वं ज्ञातमित्यमर्षेण कृष्णं वियोजयन् अस्मानन्धीकरोष्येवेत्याशयः॥ २१॥ एवं विधातारमुपालम्भ्य तं विहाय परस्परमाहुः—न नन्दसूनुरिति। 'बत' इति खेदे। नन्दसूनुर्नोऽस्मान न समीक्ष्यते। 'अस्मदीक्षणं तस्योचितमेव' इत्याशयेनाहुः—स्वकृतातुरा इति। स्ववियोगेनैवव्याकुला इत्यर्थः। एवं व्याकुलतायां हेतुमाहुः—गेहादीन् विहाय अद्धा साक्षात् तस्यैव दास्यं गता इति। एवंभूतानामपि निरीक्षणाभावे हेतुं कल्पयन्ति—क्षणभङ्ग अस्थिरं सौहृदं प्रेम यस्य स इति। तत्रापि हेतुमाहुः—नवप्रिय इति। नवो नवः स्त्रीजनः प्रियो यस्य सः॥२२॥ सेर्ष्यमाहुः—सुखमिति। पुरयोषितां मथुरापुरस्थस्त्रीणामियं रजनी रात्रिः सुखंप्रभाता सुखसूचकानि शकुनानि प्रभातकाले यस्यास्तथा बभूव। तथा तासामाशिषः मनोरथाः सत्या बभूवुः। निश्चितत्वात् भाविवृत्तस्यापि भूतत्वेन निर्देशः। 'मनोरथानां कथं सत्यता?' इत्यपेक्षायामाहुः—या इति। याः पुरयोषितः पुर्यां प्रविष्टस्य व्रजस्पते सुडागमः आर्षः श्रीकृष्णस्य मुखं पास्यन्ति। 'मुखस्य पानं कथम्?' इत्यत आहुः—अपाङ्गेन नेत्रप्रान्तेन उत्कलितमुज्जृम्भितं स्मितमेव आसवो मादकत्वात् रसविशेषो यस्मिंस्तदिति। पानं चात्र सादरं दर्शनमेव॥ २३॥ ननु 'द्वित्राणि दिनानि भवन्त्वेवम्, तथाप्यस्मत्स्नेहाकृष्टः पित्रादिभिश्च परावर्तितः पुनरागमिष्यति इति, किं सन्तापेन?' इत्याशङ्क्याहुः—तासामिति। 'सावधानतया विचारणीयम्' इत्याशयेन सम्बोधयन्ति—हे अबला इति। स्वतो मनस्वी धीरोऽपि परवान् नन्दादिपरवशोऽपि मुकुन्दस्तासां पुरस्त्रीणां मधुवन्मनोहरैर्मञ्जुभिर्भाषितैर्वशीकृतचित्तस्तथा तासां सलज्जस्मितैर्विभ्रमै रम्यैश्च विलासैर्भ्रमन् तास्वेवासक्तिं कुर्वन् ग्राम्याः अविदग्धा नोऽस्मान् प्रति कथं पुनर्यास्यते? न कथञ्चिदित्यर्थः॥ २४॥

अन्वितार्थप्रकाशिका

नन्वक्रूरः कृष्णं नयति नाहमिति चेत्तत्राहुः—क्रूर इति। हि यस्मात् त्वयैव दत्तं नोऽस्माकं चक्षुः कर्म दत्तापहारित्वम् अज्ञवत् परदुःखानभिज्ञमूर्खवद्धरसि अतः क्रूरस्त्वमेव। विपरीतलक्षणया आक्रूरसमाख्यया अक्रूर इति नाम्ना आगतः न ह्येवमन्यः कर्तुं शक्नोति। स्म एवार्थे। ननु कृष्णं हरामि नतु चक्षुरित्याशङ्क्याहुः। बत खेदे। येन त्वद्दत्तेन चक्षुषा मधुद्विषः श्रीकृष्णस्यैकदेशे नेत्रवक्त्रादौ त्वदीयम् अखिलसर्गसौष्ठवं सर्वसृष्टिनैपुण्यं वयमद्राक्ष्म। अत एव तद्वियोगे अन्यस्य दर्शनीयस्याभावात् अस्मागन्धीकरोषीति मम सर्वरहस्यमाभिर्ज्ञातमित्यमर्षणेवेत्यर्थः॥ २१॥ नेति। बत खेदे। गेहान् स्वजनान् सुतान् पतींश्च विहाय अद्धा साक्षात् तस्यैव दास्यं गताः स्वकृतातुराः स्ववियोगेनैव व्याकुलाः तत्कृतेन रमितादिना वा परवशा अपि नोऽस्मान् क्षणभङ्गमस्थिरं सौहृदं यस्य सः नवः नवीनः स्त्रीजनः प्रियो यस्य सः वयं त्वधुना पुरातन्य इति भावः। नन्दसूनुरेव न समीक्षते अतस्तस्यैव दोषः। किं विधातुरुपालम्भेन॥ २२॥ सेर्ष्यमाहुः—सुखमिति। पुरयोषितां मथुरापुरस्थस्त्रीणामियं रजनी रात्रिः सुखं प्रभाता सुखसूचकानि शकुनानि प्रभातकाले यस्यास्तथा बभूव। व्रजाङ्गनानां तु दुष्प्रभाता इत्यर्थः। तथा तासामाशिषः मनोरथाः विप्रादिदत्ताः आशिषो वा सत्या बभूवुः निश्चितत्वात्। भाविवृत्तस्यापि सत्यत्वद्योतनार्थं भूतत्वेन निर्देशः। याः पुरयोषितः अपाङ्गेन नेत्रप्रान्तेन उत्कलितमुज्जृम्भितं स्मितमेव आसवो मादकत्वात् रसविशेषो यस्मिंस्तत् पुर्यां प्रविष्टस्य व्रजस्पतेः श्रीकृष्णस्य। सुडागमः आर्षः। मुखं पास्यन्ति। पानं चात्र सादरं दर्शनमेव। यद्वा। अपाङ्गोत्कलितस्मितेन आसवरूपं यन्मुखं ततश्च पानं मुख्यमेव सम्भावयन्ति॥ २३॥ तासामिति। हे अबलाः! स्वतो मनस्वी धीरोऽपि परवान् नन्दादिपरवशोऽपि मुकुन्दस्तासां पुरस्त्रीणां मधुवन्मनोहरैर्मञ्जुभिर्भाषितैर्गृहीतचित्तः वशीकृतचित्तस्तथा तासां सलज्जस्मितैर्विभमै रम्यैश्च विलासैर्भ्रमन् तास्वेवासक्तिं कुर्वन् ग्राम्याः अविदग्धा नोऽस्मान् कथं पुनः प्रतियास्यते प्रत्येष्यति न कथंचिदित्यर्थः। तङार्षः॥ २४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

किंच दानं दत्त्वा पुनर्ग्राहकस्याति क्रूरत्वमस्तीत्याहुः क्रूर इति हे विधातः क्रूरस्त्वं अक्रूरसमाख्यया क्रूराऽभिधानेन इह आगत्य। नोऽस्माकं दत्तं चक्षुर्नेत्रं अज्ञवं मूढं वत् हरसे बत इति खेदे नन्वहं तु श्रीकृष्णमेव हरामि न युष्मच्चक्षुरित्याशंक्याहुः येनत्वयादत्तेन नेत्रेण मधुद्विषः श्रीकृष्णस्यैकदेशे मुखनयनादौ त्वदीयं अखिलसर्गसौष्ठवं सर्वसृष्टिचातुर्यं अद्राक्ष्म प्रेक्षितवत्यो वयं भवामः अतोऽस्माकं चक्षूरूपस्यास्य श्रीकृष्णस्य हरणेन वयं अंधाः स्मः अतः अंधत्वकरणेन दत्तपदार्थापहारित्वेन च धर्मिष्ठस्य तव महादोषा पतिः स्यात्तस्मादेवं त्वया न कर्त्तव्यमितिभावः॥ २१॥ विधातारं त्यक्त्वाऽन्योऽन्यं प्रोचुः न नंदसूनुरिति क्षणभगं

चंचलं सौहृदं मैत्र्यं यस्य सः सर्वं त्यक्त्वा अद्धा साक्षात् तस्य श्रीकृष्णस्य दास्यं उपगताः स्वकृतेन कृष्णकृतेन हास्यादिना आतुराः परतंत्रा अपि नोस्मान्नम समीक्षते यतो नवप्रियः नवं नवीनं वस्तुप्रियं यस्य एवंभूतोस्ति अत एनं निषेधयाम इत्यभिप्रायः ॥२२॥ सांप्रतं माथुरीणां योषितां प्रशंसां कुर्वत्यः प्राहुः सुखमिति पुरयोषितां मधुपुरसुंदरीणां इयं रजनीसुखं यथा भवति तथा प्रभातः प्रातःकालो यस्याः सा प्रभाता भविष्यति अत्रार्श आद्यच् आशिषो विप्रादीनामाशीर्वादः तासां सत्या बभूवुः ध्रुवं मथुरां संप्रविष्टस्य व्रजस्पतेः व्रजपतेः व्रजसुन्दरीणां भोग्यस्य हरेः अत्र सुडागम आर्षः मुखं याः पश्यंति अत्यादरेण द्रक्ष्यंति तच्च कीदृश अपांगेन लोचनांतेनोत्कलितमुद्भूतं स्मितमेव आसवो रसो यस्मिन् तत् यद्वा अपांगोत्कलितस्मितेनासवमासवरूपं यन्मुखं तस्य पानं योग्यस्मतीति संभावना ज्ञेया ॥ २३ ॥ ननु त्रिचतुराणि दिनानि तत्र स्थित्वा पुनरत्रायास्यति कस्माद्विलापः क्रियते इत्याशंकायामाहुः तासामिति । हे अबलाः तासां मधुपुरवनितानां मधुवन्मंजुभिर्मिष्टभाषितैः गृहीतचित्तः मनस्वी धीरोपि पुनस्तासां सलज्जस्मितविभ्रमैः लज्जया सहितानि स लज्जानि तानि च तानि स्मितानि च विभ्रमाविलासाश्च तैर्भ्रमन् परवान् स्वपित्रादि परतंत्रो मुकुंदः ग्राम्याः अनिपुणाः नः अस्मान् प्रति कथं प्रतियास्य ते प्रत्यागमिष्यति ना यास्यतीत्यर्थः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वक्रूरः पारोक्ष्यं करोति न त्वहमित्याशङ्क्याहुः ॥ क्रूरस्त्वमिति ॥ हे विधातः, क्रूरः त्वं स्म त्वमेवेत्यर्थः । स्मेति ध्रुवमित्यर्थे वा । अक्रूरः इति समाख्या तया, युक्तः सन्, बतेति खेदे । अज्ञवत् मूर्खवत्, येन त्वया, नोऽस्मभ्यं, दत्तं चक्षुः, चक्षुःसमानं श्रीकृष्णमित्यर्थः । हरसे हि दत्तापहारित्वेन तव धर्मित्वख्यातिनिवृत्तिपूर्वं महती दोषापत्तिः जायते, तां न किं विचारयसि, यतो न विचारयसि ततस्त्वं क्रूर एवान्यथैवं कर्त्तुमन्यः कः प्रभवति ततो नामान्तरेण त्वमेवागतोऽसीति भावः । ननु नाहं युष्मच्चक्षुर्हरामि किं तु कृष्णं हरामीत्यत्राहुः । येन त्वद्दत्तेन चक्षुषा, मधुद्विषः श्रीकृष्णस्य, एकदेशे नेत्रवक्त्रादौ, त्वदीयं अखिलसर्गसौष्ठवं समग्रं सृष्टिनैपुण्यं, वयं अद्राक्ष्म दृष्टवत्यः । अतः श्रीकृष्णापहार एवास्मच्चक्षुषोऽपहारः । इन्द्रियविषयापहारस्यैवेन्द्रियापहारतुल्यत्वात् । अयं भावः । मम सर्वं रहस्यमाभिर्ज्ञातमित्यमर्षेणेव कृष्णं वियोजयन्नस्मानन्धीकरोषीति ॥ २१ ॥ विधातारं विहाय परस्परमूचुः ॥ न नन्दसूनुरिति ॥ बतेति खेदे । क्षणभङ्गमस्थिरं सौहृदं यस्य सः, नन्दसूनुः, गेहान् गृहाणि, स्वजनान्, सुतान्, पतीन्, विहाय, अद्धा साक्षात्, तद्दास्यं तस्य कृष्णस्यैव दासीभावं, उपगताः संप्राप्ताः, स्वकृतातुराः तत्कृतेनैव स्मितादिना परवशाः अपि, नोऽस्मान्, न समीक्षिता न समीक्षिष्यते । तत्र हेतुं, सेर्ष्यमाहुः । यतः नवप्रियः नवः नवीनः पुरस्त्रीजनः प्रियो यस्य तथाभूतः, अस्ति । अत एनं निवारयाम इति भावः ॥ २२ ॥ पुनः सेर्ष्यमाहुः ॥ सुखमिति ॥ पुरयोषितां मधुपुरस्थवनितानां, इयं रजनी रात्रिः, सुखं यथा तथा प्रभाता, तथा तासां आशिषः कामाश्च, सत्याः बभूवुः ध्रुवमेव तत्र हेतुं वदन्त्यस्ता विशिंषन्ति । याः पुरयोषितः, संप्रविष्टस्य पुर्यां कृतप्रवेशस्य, व्रजस्पतेः, कृष्णस्य, सुडागम आर्षः । पारस्करादेराकृतिगणत्वाद्वा । अपाङ्गेन नेत्रान्तेन उत्कलितमुज्जृम्भितं स्मितमेवासवो रसो यस्मिंस्तत्, मुखं पास्यन्ति । मुखकमलगतं स्मितासवं पास्यन्तीति भावः ॥ २३ ॥ ननु मथुराया अदृष्टत्वात्तां गत्वा निरीक्ष्य द्वित्राणि दिनानि तत्र निवस्य पुनरस्मस्स्नेहाकृष्टः पित्रादिभिः परावर्त्तितः संश्चायास्यतीति तत्र तावत्तद्गमनं भवतु नामेति वदन्तीः काश्चित् प्रति अन्या आहुः ॥ तासामिति हे अबलाः, तासां पुरस्त्रीणां, मधुवन्माक्षिकवन्मञ्जूनि मिष्टतोपेतानि यानि भाषितानि तैः, गृहीतचित्तः वशीकृतमानसः, तथा तासां, लज्जा च स्मितं च ताभ्यां सह वर्त्तमानाः सलज्जस्मिता ये विभ्रमा विलासास्तैः, भ्रमन् मुकुन्दः श्रीकृष्णः, मनस्वी स्वतो धीरः सन्नपि, परवान् परस्त्रीपरतन्त्रः सन्, ग्राम्या अविदग्धाः हावभावाद्यनभिज्ञा, नोऽस्मान् प्रति, पुनः कथं यास्यते । न कथंचिदस्मान् प्रति यास्यते इत्यर्थः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

क्रूरस्त्वामिति : १०.३९.२१.

दत्तापहृतिजो दोषः प्रायश्चित्तातिगो यतः । तद्युक्तं न स ते चित्ते हरतो दत्तमक्षिनः ॥ ५७ ॥
विधिरसाधुरसाधुतरा वयं भृशमसाधुतमोऽपिरमाधवः । इदमनार्यमयोग्यमसाधु चेत्यलमहो कतमोऽपि न पश्यति ॥ ५८ ॥

न नन्दसूनुरिति १०.३९.२२.

आभिर्मदर्थं संत्यक्ताः सुहृदाप्तजना इति । आलोचयन् स सङ्कोचादपि पश्यति नाच्युतः ॥ ५९ ॥

तासामिति १०.३९.२४.

नानाहाव विभाव-भावविभव व्यक्तस्वभावाः स्त्रियो दृष्ट्वा मोहितधीरसौ यदुपतिः कस्मादकस्मादपि ।
अस्मांस्तत्र सखि स्मरिष्यति पुनर्यानस्य वार्ता पुनर्दूरे वौत विचारतः किमधुना यद् ग्राम्यता न स्फुटा ॥ ६० ॥
आगोपाङ्गनमा च पण्डितमिति न्यायेन मूर्खज्ञयोः सीमाभूमिरबोधि तत्र हि वयं मूर्खत्पसीमाभुवः ।
एवं संविदऽताप्यनेन निजपद्दास्यं प्रति प्रापिताः लाभः सोऽयमलौकिकः सखि परित्यागस्तु सिद्धो हि नः ॥ ६१ ॥

कृष्णप्रिया

हम जानती है इसमें अक्रूर का दोष नहीं है, यह तो साफ तुम्हारी क्रूरता है। वास्तव में तुम्हीं अक्रूर के नाम से यहाँ आये हो और अपनी ही दी हुई आँखें तुम हमसे मूर्ख की भाँति छीन रहे हो। इनके द्वारा हम श्याम सुन्दर के एक-एक अङ्ग में तुम्हारी सृष्टि का सम्पूर्ण सौन्दर्य निहारती रहती थी। विधाता! तुम्हें ऐसा नहीं चाहिये ॥ २१ ॥ अहो! नन्द नन्दन श्याम सुन्दर को भी नये-नये लोगों से नेह लगने की चाह पड़ गयी है। देखो तो सही—इनका सौहार्द इनका प्रेम एक क्षण में ही कहाँ चला गया? हम तो अपने घर द्वार, स्वजन-सम्बन्धी, पति पुत्र आदि को छोड़कर इनकी दासी बनी और इन्हीं के लिये आज हमारा हृदय शोकातुर हो रहा है। परन्तु ये ऐसे हैं कि हमारी ओर देखते तक नहीं ॥ २२ ॥ आज की रात का प्रातःकाल मथुरा की स्त्रियों के लिये निश्चय ही बड़ा मङ्गलमय होगा। आज उनकी बहुत दिनों की अभिलाषाएँ अवश्य ही पूरी हो जायेंगी। जब हमारे ब्रजराज श्याम सुन्दर अपनी तिरछी चितवन और मन्द-मन्द मुसकान से युक्त मुखारविन्द का मादक मधु वितरण करते हुए मथुरा पुरी में प्रवेश करेंगे, तब वे उसका पान करके धन्य-धन्य हो जायँगी ॥ २३ ॥ यद्यपि हमारे श्यामसुन्दर धैर्यवान् होने के साथ ही नन्द बाबा आदि गुरूजनों की आज्ञा में रहते हैं। तथापि मथुरा की युवतियाँ अपने मधु के समान मधुर वचनों से इनका चित्त बरबस अपनी ओर खींच लेंगी और ये उनकी उनकी सलज्ज मुसकान तथा विलास पूर्ण भाव-भंगी से वही रम जायेंगी। फिर हम गँवार ग्वालिनों के पास ये लौटकर क्यों आने लगे ॥ २४ ॥

अद्य ध्रुवं तत्र दृशो [1]भविष्यते दाशार्हभोजान्धकवृष्णिसात्वताम् ।
महोत्सवः[2] श्रीरमणं गुणास्पदं द्रक्ष्यन्ति ये चाध्वनि देवकीसुतम् ॥ २५ ॥
[3]मैतद्विधस्याकरुणस्य नाम भूदक्रूर इत्येतदतीव दारुणः ।
योऽसावनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः ॥ २६ ॥
[4]अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयन्ति दुर्मदाः ।
गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोऽद्य प्रतिकूलमीहते ॥ २७ ॥
निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन् कुलवृद्धबान्धवाः ।
मुकुन्दसङ्गान्निमिषार्धदुस्त्यजाद् दैवेन [5]विध्वंसितदीनचेतसाम् ॥ २८ ॥

कर्दमक्षमा

अन्वयः—ध्रुवम्, अद्य, तत्र, दाशार्हभोजान्धकवृष्णिसात्वताम्, दृशः, महोत्सवः, भविष्यते, ये (पुरे) च अध्वनि, श्रीरमणम्, गुणास्पदम्, देवकी सुतम्, द्रक्ष्यन्ति ॥ २५ ॥ एतद् विधस्य, अक्रूरणस्य, "अक्रूरः" इति, एतत्, नाम, माभूत्, अयम्, अतीव, दारुण, यः, असौ, सुदुःखितम्, जनम्, अनाश्वस्य, प्रियम्, प्रियात्, अध्वनः, पारम्, नेष्यति ॥ २६ ॥ अहो, एषः, (श्रीकृष्णः) अनार्द्रधीः, रथम्, समास्थितः, दुर्मदा, अमी, गोपाः, अपि, तम्, अनु अनोभिः, त्वरयन्ति, स्थविरैः, अपि उपेक्षितम्, नः अद्य, दैवम्, च (कृष्णः) प्रतिकूलम्, ईहते ॥ २७ ॥ समुपेत्य (वयम्) माधवम्, निवारयामः, दुस्त्यजात्, मुकुन्दसङ्गात्, दैवेनविध्वंसितदीनचेतसाम्, कुलवृद्धबान्धवाः, नः, किम्, अकरिष्यन्? ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किञ्च। अस्मदुत्सवभाजोऽन्य एवाद्य भविष्यन्तीत्याहुः। अद्येति। तत्र पुरे दाशार्हादीनां दृशो दृष्टेर्महानुत्सवो भविष्यते भविष्यति। ये देवकीसुतं द्रक्ष्यंति तथा ये चाध्वनि गच्छंतं द्रक्ष्यन्ति तेषामपि दृशो भविष्यतीति। यद्वा दृश इति द्वितीया। तेषां दृशो नेत्राणि महोत्सवो भविष्यते प्राप्स्यति प्राप्त्यर्थस्य भवतेरात्मनेपदित्वात् ॥ २५ ॥ अक्रूरं शपंत्य आहुः मैतद्विधस्येति। एषा विधा विधानं कर्म यस्य अत एव निष्कृपस्याक्रूर इति शोभनं नाम मा भूत्। तत्र हेतुः। अतींवदारुण इत्यादि। प्रियात्प्राणादपि प्रियतरं कृष्णमध्वनः पारमस्मद्दृग्गोचरत्वादतिदूरं देशं नेष्यति ॥ २६ ॥ अहो धिगस्मज्जीवितमित्याहुः। अनार्द्रधीरिति। अनार्द्रा कठिना धीर्यस्य स तावदेष कृष्णो रथमधिरूढः। अस्याविनयमालक्ष्य स्थविरैश्चोपेक्षितम्। ते न निवारितवन्त इत्यर्थः। किं च दैवं चेति। अयं भावः। यदि दैवमस्माकमनुकूलं भवेत्तर्हि विघ्नैः कश्चिदेषां मध्ये प्रतिहन्येत अकस्माद्वज्रपातो वा भवेत्। अन्यद्वा किंचिदनिष्टं स्यान्न तु तत्किंचिदस्तीति ॥ २७ ॥ परस्परं संमंत्र्य साहसमधिरुह्याहुः। निवारयाम इति। अकरिष्यन्करिष्यन्ति। निमिषार्थदुस्त्यजान्मुकुंदसंगाद्विध्वंसितानि वियाजितान्यत एव दीनानि चेतांसि यासाम्। एवंभूतानामस्माकं न मृत्योरपि अयमित्यर्थः ॥ २८ ॥

---

१. दृशां महोत्सवो–विज. । २. महोत्सवं–विज. । ३. मैवं–वीर. । ४. अनार्यधी–प्रा. पा. । ५. विभ्रंशित विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वग्राह्यस्यान्यत्रगत्या शोचन्त्य आहुः—किञ्चेति। आर्षत्वाश्रयणेनात्मनेपदस्वीकारस्यागतिकत्वादाह-यद्वेति ॥ गुणानां गुणजातीनां सर्वासामास्पदमाश्रयः। यदाश्रयेणैव ते सिद्ध्यन्ति तमित्यर्थः। किं बहुना सर्वगुणसंपत्तिहेतुं विष्णुप्रियां श्रियं लक्ष्मीमपि रमयितुं जातरतिं कर्तुं शीलं यस्य तदिति प्रौढिवाक्यम्। देवकीसुतमिति—'प्रागयं वसुदेवस्य' इत्यादितत्पुरोहितवाक्येन। स च सा च तत्पुत्रत्वमेवाभिमंस्येते इति। हे चाध्वनि वर्तमानाः पथिकास्तद्वासिनोऽपि लोकाः। तदुक्तं वैष्णवे—"धन्यास्ते पथि ये कृष्णमितो यान्तमवारिताः। उद्वहिष्यन्ति पश्यन्तः स्वदेहं पुलकाञ्चितम् ॥ मथुरानागरीपौरनयनानां महोत्सवः। गोविन्दावयवर्दृष्टैरतीवाद्य भविष्यति ॥ को नु स्वप्नः सुभाग्याभिर्दृष्टस्ताभिरधोक्षजम्। विस्तारितांतनयना या द्रक्ष्यन्त्यनिवारिताः" ॥ २५ ॥ इदानीमक्रूरनामानर्थकमित्यभिप्रेत्याहुः—मेति। एषा प्रत्येक्षा। अत एव एतादृशकर्मकर्तृत्वादेव तत्र एतन्नामानंगीकारे। लोलिबराजेनापि हरिविलासे एतदभिप्रेत्यैवोक्तम—"अक्रूर ते नामनि निश्चयेन बली बहुव्रीहिसमास एव। अस्माकमात्मानममुं यतस्त्वं कृतान्तवन्नेतुमुपागतोऽसि ॥" इति ॥ इति शब्देनैव एतदित्यस्यार्थस्योक्तत्वात् 'इत्येतत्' इति तैर्न लिखितम्। यद्वा—इत्येवम्, इत्यादिप्रयोगदर्शनाद्गोबलीवर्दन्यायेन पौनरुक्त्याऽदोषो ज्ञेयः। अतीवदारुणः परमक्रूरः। कुतः-तदाहुः—य इति। असावितिदारुणत्वेनानिर्वचनीयत्वं सूचितम्। यद्वा—असावयमित्यर्थः। प्रत्यक्षस्थितोऽपि अनाश्वास्य पुनरेष मया समानीय युष्मासु समर्पणीय इति वचसापि। जनमिति सामान्येनोक्तेस्तन्मात्रस्याप्याश्वास उचितः, किमुताबलारूपस्येत्यर्थः। अतोऽचिरादस्मिन्स्त्रीवधो भावीति सुशब्दाभिप्रायः। अतोऽतीवक्रूर एव। तदुक्तं विष्णुपुराणे—"किं न वेत्ति नृशंसोऽयमनुरागपरं जनम्। येनायमक्ष्णोराह्लादं नयत्यन्यत्र नो हरिम् ॥" इति। अतः परमस्य क्रूरस्य क्रूर इत्येव नाम युक्तमिति भावः। यद्वा—अक्रूर इत्येव नाम मा भूदेव, इत्येवमेतत्प्रकारमन्यन्नामापि मा भूदिति। अतः परमस्य क्रूर एव नाम भाव्यम्। तन्नाम्नैवाभिधेय इति भावः। एतद्विधस्तैतादृशस्य ॥ २६ ॥ आत्मानं निन्दन्त्य आहुः—अहो इति। अस्य कृष्णस्य। अविनयं धाष्ट्यम्। स्थविरैः वृद्धैः। इत्यर्थ इति—वृद्धा अपि धृष्टसंबंधेन धृष्टा एव जाता इति भावः। न हि वृद्धानां दोष इत्याहुः—किञ्चेति, अयं भाव इति। एतेषां गोपानाम्। अन्यत् आमथादिरूपम्। तत् अनिष्टम्। किञ्चित्किमपि। सर्वमेतद्दैवप्रातिकूल्याज्जातम् "प्रतिकूले नृणां दैवे सरले वक्रता भवेत्" इत्युक्तेरिति भावः ॥ अहो अत्रागत्याऽक्रूरेण स्वक्रूरता सर्वत्रैव संचारिता, यतः परमकोमलचित्तः श्रीनंदनंदनोऽप्यस्मान्प्रति परमकठिनोऽभूदित्याहुः—एष कृष्णोऽप्यनार्द्रधीरस्मान्नुदतीर्दृष्ट्वापि यतो रथं सम्यगवस्थित उपरिनीडमारूढः। तं रथम्। अनुपश्चात्। अनोभिः शकटैः सहिता गोपाः। दुर्मदा इति—एषामहो दुष्टमत्ततैवाजनिष्ट अत्तानागमिष्यत कृष्णस्य विरहेण स्वयं यन्मरिष्यन्ति तदपि नानुसंदधत इति भावः स्थविरैर्वृद्धैरपि निषेधमकुर्वद्भिरुपेक्षितम्। स्वजीवितमिति शेषः। किञ्च, दैवञ्चेति, अयं भाव इति स्वामिचरणैरुक्तमेव। तस्मादायुरेव व्रजस्थानामतः परं नास्तीति निश्चिनुम इति सिद्धम् ॥ २७ ॥ साहसमुत्तरकालमनालोच्य कर्मकरणम्। अत एव विमुक्तत्वादेव। एवंभूतानां कृष्णवियुक्तानाम्। इत्यर्थ इति—मृत्युभयं हि जीवतां भवति तत्त्वस्माकमात्मभूतेन कृष्णेन रहितानां मृतप्रायाणां नास्तीति। अपि शब्दात्कुलसंबंधिनां तु तद्दूरापास्तमिति भावः ॥ सोऽयमस्माभिर्बाल्यमारभ्यानन्यवृत्तिना मनसा वृत इति, स चाप्यस्मांस्तथैवांगीकृतवानिति पतिरेव स्यात्। ततः संप्रत्यस्मान्परित्यज्य व्रजन्नसौ कथं निवारणीयः, कस्य वा तु संकोच इत्याशयेनाहुः—निवारयाम इति। सम्यग्लज्जादिकमपहाय साहसमवलम्ब्योप समीपे गत्वा श्रीहस्तधारणादिना माधवं निवारयामः शीघ्रमेव निवारयिष्यामः। ननु पित्राद्यनुमतिं विना कथं स्वातन्त्र्येण वृतोऽसौ तत्राप्याहुः—माधवमिति। नूनं लक्ष्म्यापि निगूढमयं वृतोऽस्तीति सदाचारप्रश्ने नायं दोष इति भावः। स्थापयिष्यते चेदम् 'एवं ब्रुवाणा' इत्यादौ। ननु कुलवृद्धादयस्त्विदमौद्धत्यं दृष्ट्वा शान्तिं करिष्यन्ति तत्राहुः—किन्न इति। कुलस्य वृद्धा धर्मप्रवर्तका बांधवाः स्नेहादिबद्धाः पत्यादयश्च धाष्ट्र्यदर्शनेन निश्चितरहस्यवृत्तान्ता अपि नोऽस्माकं किं करिष्यन्ति। यतो दैवेनापरिहार्येण निजाऽदृष्टेन हेतुना यो मुकुन्दसंगस्तत्प्रथमदर्शनादिस्तेनैव विध्वंसितानि देहगेहाद्यासक्तितो विच्यावितानि तथा यथामनोरथं तदप्राप्त्या दीनानि चेतांसि यासां तासाम्। नन्वतो दैवेन तद्वियोजनमधुना भद्रमेव कृतं तद्यधुनापि तत्संगाग्रहस्त्यज्यतां तत्र सभयमाहुः—निमिषेति। यद्वा—युष्माकं ते किञ्चिदपि न करिष्यन्ति तत्राहुः—मुकुन्देति। मुकुन्दस्य सानुरागेण कुलवृद्धा देव्यो मोचकत्वात्तन्नाम्नस्तस्य माधवस्य संगाद्दैवेन विध्वंसिता अत एव दीनचेतसो यास्तासामस्माकम्। कीदृशान्मुकुन्दसंगात् निमिषार्द्धोऽपि दुस्त्यजत्वेन पूर्वमस्माभिरनुभूतादित्यर्थः। अयं भावः—यद्यसौ निवृत्तः स्यात्, यदि तैस्त्यज्येमहि तदा वनदेव्य इव वृंदावनैकशरणा भूत्वा तं सुखमेव निषेवेमहि, यदि दण्ड्येमहि च तदापि तन्निवृत्तिं दृष्ट्वैव म्रियेमहि इति सुखमेव। यदि न निवृत्तः स्यात्त दोत्सर्गसिद्धमेव मरणमिति च न किमपि ते कुर्युस्ततो निवारयामैवेति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गुणानां गुणजातीनां सर्वास्पदमाश्रयं यदाश्रयेणैव ते सिद्ध्यन्ति तमित्यर्थः। किं बहुना सर्वगुणसम्पत्तिहेतुविष्णुप्रियां श्रियं लक्ष्मीमपि रमयितुं जातरतिं कर्त्तुं शीलं यस्य तमिति प्रौढिवाक्यं देवकीसुतमिति "प्रागयं वसुदेवस्य" इत्यादि तत्पुरोहितवाक्येन सच साच तत्पुत्रत्वमेवाभिमस्यत इति। यद्वा। देवकी श्रीयशोदेति पूर्वमेवोक्तं ये चाध्वनि वर्त्तमानाः पथिकास्तद्वासि-

नोऽपि लोकाः। तथा च "तत्रैव धन्यास्ते पथि ये कृष्णमितो यान्तमवारिताः। उद्वहिष्यन्ति पश्यन्तः स्वदेहं पुलकाञ्चितम्। मथुरानागरीपौरनयनानां महोत्सवः। गोविन्दावयवैर्दृष्टैरतीवाद्य भविष्यति। को नु स्वप्नः स्वभाग्याभिर्दृष्टस्ताभिरधोक्षजः। विस्तारितान्तनयना या द्रक्ष्यन्त्यनिवारिताः" ॥ २५ ॥ इति शब्देनैव एतदित्यस्यार्थस्योक्तत्वात् इत्येतदिति तैर्नलिखितं यद्वा। इत्येतत् इत्येवमित्यादिप्रयोगदर्शनाद्गोवलीवर्दन्यायेन पौनरुक्त्यदोषो ज्ञेयः। अतीव दारुणः परमक्रूरः कुतस्तदाहुर्य इति। असाविति दारुणत्वेनानिर्वचनीयत्वं सूचितं यद्वा। असावयमित्यर्थः। प्रत्यक्षस्थितोऽपीति अनाश्वास्य पुनरेष मया समानीय युष्मासु समर्पणीय इति वचसापि जनमिति सामान्येनोक्तेस्तन्मात्रस्याप्याश्वास उचितः किमुताबलारूपस्येत्यर्थः। अतोऽचिरादस्मिन् स्त्रीवधो भावीति सुशब्दाभिप्रायः। अतोऽतीव क्रूर एव। तथा च तत्रैव। "किं न वेत्ति नृशंसोऽयमनुरागपरं जनम्। येनायमक्ष्णोराह्लादं नयत्यन्यत्र नो हरि"मिति अतः परमस्य क्रूरस्य क्रूर इत्येव नाम युक्तमिति भावः। अन्यत्तैः यद्वा अक्रूर इति नाम मा भूदेव इत्येवमेतत्प्रकारमन्यन्नमापि माभूदित्यर्थः॥ २६ ॥ अहो कंसदूतोऽयं क्रूर एव परमकृपाकोमलचित्तः श्रीनन्दनन्दनोऽप्यस्मान् प्रति परमकठिनोऽभूदिति परमार्त्त्याहुरनार्द्रधीरिति। यतो रथं सम्यगवस्थित उपरि नीडमारूढः तं रथमनु पश्चात् किम्वा श्रीकृष्णमनुवर्त्तन्ते ये तेऽमी गोपाः श्रीदामादयः अनोभिः कृत्वा शीघ्रं शकटयोजनादिना यद्वा तैः सह वर्त्तमानास्तान्यारूढा इत्यर्थः। त्वरयन्ति गमने त्वरां कुर्वन्ति यद्वा तमेवानु अनुक्षणं गन्तुं त्वरयन्ति यतो दुर्मदाः महामत्ताः अन्यथा विचारसम्भवात्॥ २७ ॥ सोऽयमस्माभिर्बाल्यमारभ्यानन्यवृत्तिना मनसा वृत इति सचाप्यस्मांस्तथैवाङ्गीकृतवानिति पतिरेव स्यात् ततः संप्रत्यस्मान् परित्यज्य व्रजन्नसौ कथं निवारणीयः कस्य वा तु सङ्कोच इत्याशयेनाहुर्निवारयाम इति। सम्यक् लज्जादिकमपहाय साहसमालम्ब्य उप समीपे गत्वा श्रीहस्तधारणादिना माधवं निवारयामः शीघ्रमेव निवारयिष्यामः ननु पित्राद्यनुमतिं विना कथं स्वातन्त्र्येण वृतोऽसौ तत्राप्याहुः। माधवमिति। नूनं लक्ष्म्यापि निगूढमयं वृतोऽस्तीति सदाचारप्रश्नेनायं दोष इति भावः। स्थापयिष्यते चेदमेवं ब्रुवाणा इत्यादौ ननु कुलवृद्धादयस्त्विदमौद्धत्यं दृष्ट्वा शान्तिं करिष्यन्ति तत्राहुः। किन्न इति। कुलस्य वृद्धा धर्मप्रवर्त्तका बान्धवाः स्नेहादिबद्धाः पत्यादयश्च धाष्टर्यदर्शनेन निश्चितरहस्यवृत्तान्ता अपि नोऽस्माकं किं करिष्यन्ति यतो दैवेनापरिहार्येण निजादृष्टेन हेतुना यो मुकुन्दसङ्गस्तत्प्रथमदर्शनादिस्तेनैव विध्वंसितानि देहगेहाद्यासक्तितो विचालितानि तथा यथामनोरथं तदप्राप्त्या दीनानि च चेतांसि यासां तासां नन्वतो दैवेन तद्वियोजनमधुना भद्रमेव कृतं तर्ह्यधुनापि तत्सङ्गाग्रहस्त्यज्यतां तत्र सभयमाहुर्निमिषेति। यद्वा युष्माकं ते किञ्चिदपि न करिष्यन्ति तत्राहुर्मुकुन्देति। मुकुन्दस्य सानुरागेण कुलवृद्धा देव्यो मोचकत्वात्तन्नाम्नस्तस्य माधवस्य सङ्गादैवेन विध्वंसिता अतएव दीनचेतसः यास्तासामस्माकं कीदृशान् मुकुन्दसङ्गान्निमिषार्धेऽपि दुस्त्यजत्वेन पूर्वमस्माभिरनुभूतादित्यर्थः। अयं भावः यद्यसौ निवृत्तः स्यात्तस्य यदि स्तैरस्यज्येमहि तदा वनदेव्य इव वृन्दावनैकशरणा भूत्वा तं सुखमेव निषेधेमहि यदि दण्डयेमहि निरुध्येमहि च तदापि तन्निवृत्तिं दृष्ट्वैव म्रियेमहीति सुखमेव यदि न निवृत्तः स्यात्तदोत्सर्गसिद्धमेव मरणं स्यादिति न किमपि ते कुर्युस्ततो निवारयाम एवेति॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दाशार्हादयो यादवकुलभेदाः, यद्यपि तत्र कुकुरादयोऽन्येऽपि बहवः सन्ति, तथापि प्राधान्यापेक्षयैते निर्दिष्टाः, श्रियं लक्ष्मीं रमयति; यद्वा, श्रिया निजविचित्रशोभया जगद् रमयतीति तथा तमिति परमसौन्दर्य्यं वेषादिकं चोक्तम्। गुणास्पदमिति कृपावलोकमधुरलीलादिकम्, देवकीसुतमिति तत्तेन दाशार्हादीनां विशेषोत्पत्तेः। यद्वा, देवकी श्रीयशोदेति पूर्व्वमेवोक्तम्, तेन माधुर्य्यविशेषः सूचितः। ये चाध्वनि वर्त्तमानाः पथिकास्तद्वासिनोऽपि लोकाः; तथा च तत्रैव (वि० पु० ५।१८।२५.२७)—

'धन्यास्ते पथि ये कृष्णमितो मान्तमवारिताः। उद्वहिष्यन्ति पश्यन्तः स्वदेहं पुलकाञ्चितम्॥
मथुरानागरीपौरनयनानां महोत्सवः। गोविन्दावयवैर्दृष्टैरतीवाद्य भविष्यति॥
को नु स्वप्नः स्वभाग्याभिर्दिदृष्टस्ताभिरधोक्षजम्। विस्तारितान्तनयना या द्रक्ष्यन्त्यनिवारितम्॥' इति॥ २५॥

इति-शब्देनैव एवमित्यस्योक्तार्थत्वादित्येवमिति तैर्न लिखितम्, लेखकभ्रमो वा। अतीवदारुणः परमक्रूरः कुतः? तदाहुः—य इति। असाविति दूरवर्त्तित्वाद् दारुणत्वेऽनिर्व्वचनीयत्वाद्वा। यद्वा, असौ अयमित्यर्थः। इति नयनस्य तदात्वमुक्तम्। अनाश्वास्य पुनरेष मया समानीय युष्मासु समर्पणीय इति वचसापि किंवा श्रीकृष्णद्वारावधिदिननिर्णयादिनाऽसान्त्वयित्वा, अतोऽचिरादस्मिन् स्त्रीवधो भावीति सु-शब्दाभिप्रायः। जनमिति सामान्येनोक्तिरौद्धत्यपरिहाराय। किंवा, परमार्त्त्या निर्विण्णत्वादात्मनि परमौदासीन्येनेति, अतोऽतिक्रूर एव। तथा च तत्रैव (वि० पु० ५।१८।२०)—'किं न वेत्ति नृशंसोऽयमनुरागपरं जनम्। येनेममक्ष्णोराह्लादं नयत्यन्यत्र नो हरिम्॥' इति। अतः—परमस्य क्रूर इत्येव नाम युक्तमिति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, एवमनेन श्रीकृष्ण-नयनप्रकारेणातीवदारुणः। तदेवाह—य इति। यद्वा, एवमित्यस्य नेष्यतीत्यनेनान्वयः। अनेन सहसा कंसाज्ञया तन्निकटप्रापणादिप्रकारेणेति॥ २६॥ अहो कंसदूतोऽयं क्रूर एव, परमकृपाकोमलचित्तः श्रीव्रजेन्द्र-नन्दनोऽप्य-

ह्यस्मान् प्रति परमकठिनोऽभूदिति परमार्त्त्याहुः, —अनार्द्रधीरिति। यतो रथं सम्यगास्थितः, उपरि नीड़मारूढ़ः, तं रथमनु पश्चात् किंवा तं श्रीकृष्णमनुवर्त्तन्ते ये तेऽमी गोपा अनोभिःकृत्वा शीघ्रशकटयोजनादिना, यद्वा, तैः सह वर्त्तमानास्तान्यारूढ़ा इत्यर्थः। त्वयन्ति गमने त्वरां कुर्व्वन्ति; यद्वा, तमेव 'अनु' अनुक्षणं गन्तुं त्वरयन्ति; यतो दुर्म्मदा महामत्ताः, अन्यथा विचारः सम्भवेत्, एतत्तासां व्यथादिकं परिदेवनादिकञ्च प्रादोषिकघोषणाश्रवणादारभ्य प्रातः कृष्ण–प्रस्थानावधि ज्ञेयम् ॥ २७ ॥ सम्यग् लज्जादिकमपहाय साहसमवलम्ब्य 'उप' समीपे गत्वा नितरां श्रीहस्तवस्त्रधारणादिना निवारयामो वारयामेति; किंवा वारयामैव, माधवं मधुवंशोद्भवम् अतो यदुकुलरक्षार्थं प्रयान्तमपीति भावः। यद्वा, मधुना मधुररसेन क्रीड़ापरमिति परमसौन्दर्य्य-वैदग्ध्यादिसद्गुणगणनिलयत्वादिकमभिप्रेतम्। अयं निवारणे हेतुः—कुलस्य वृद्धा धर्म्मप्रवर्त्तका वान्धवाश्च स्नेहादिबद्धाः पत्यादयो नोऽस्माकं किं करिष्यन्ति ? अपि तु न किमपीत्यर्थः। ननु परित्यक्ष्यन्ति सास्तिं वा मयि करिष्यन्ति ? तत्राहुः— मुकुन्देति परमानन्दप्रदत्त्वं परमसौन्दर्यं वाभिप्रेतम्। निमिषार्द्धमत्यल्पकालमपि दुस्त्यजात् त्यक्तुमशक्यादित्यर्थः। दैवेनेति निजादृष्टेन विधातृकृतत्वेन वापरिहार्य्यत्वमभिप्रेतम्। चेतसां विध्वंसितत्वं पुनः प्राप्त्याशापगमात्, अतएव दीनेति। अन्यत्तैर्व्याख्यातमेव। यद्वा, विध्वंसिताश्च ताः, अतएव दीनचेतसश्चेति, तथा तासां निमिसार्द्धदुस्त्यजादिति, अन्यथा चिरविरहेण मरणात् कुलवृद्धादिभिः सह स्वत एव सम्बन्धो न स्थातैवेति जीवने च मुकुन्दसंगापेक्षया परमहेयैरतितुच्छैः किं नैरिति भावः। ननु वृद्धापनादरेणेहामुत्र च दुष्कीर्त्त्यादिभयम्; तत्राहु, — दैवेनेति। मुकुन्द-संगविध्वंसनेन यद्दैन्यं ततोऽधिकं तत्तुल्यं वा; न किमप्यन्यदिति तच्चिन्तयालमिति भावः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अध्वनि ये द्रक्ष्यन्ति तेषां च महोत्वः ॥ २५ ॥ अक्रूर इति नाम माभूदित्यन्वयः अध्वनः पारं दूरदेशम् ॥ २६–२९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्चास्मदुत्सवभाजोऽन्य एवाद्य भविष्यन्तीत्याहुः। अद्येति। तत्र पुरे दाशार्हादीनां दृशो दृष्टेरद्य महानुत्सवो भविष्यते भविष्यति आत्मनेपदमार्षं तथा च ये जना अध्वनि श्रीरमणं लक्ष्मीकान्तं गुणानां कल्याणानामाश्रयं देवकीसुतं द्रक्ष्यन्ति तेषाञ्च दृशः नूनमुत्सवो भविष्यति यद्वा दृश इति द्वितीयाबहुवचनान्तं तेषां दृशो नेत्राणि महोत्सवो भविष्यते प्राप्स्यते प्राप्स्यर्थस्य भवतेरात्मनेपदित्वात् ॥ २५ ॥ अक्रूराय शपन्त्य आहुः। मैवं विधस्येति। एवंविधा विधानं कर्म यस्य एतद्विधस्येति पाठे एषा विधा यस्य तस्यात एव निष्कृपस्याक्रूर इतीत्थं नाम माभूत् तत्र हेतुरतीव दारुण इत्यादि। दारुणः क्रूरः अतः क्रूर इत्येव व्यपदेष्टव्य इति भावः। योऽसावक्रूरः सुतरां दुःखितंजनमस्मत्समुदायात्मकमनाश्वास्य नास्मान सान्त्वायित्वा प्रियात्प्राणादपि प्रियं कृष्णामध्वनः पारं नेष्यन्ति अस्मदगोचरमतिदूरदेशं नेष्यतीत्यर्थः ॥ २६ ॥ इत्थं ब्रुवन्तीनां सतीनां प्रभाते रथारूढं श्रीकृष्णमालक्ष्य शपन्त्य आहुः। अनार्द्रधीरिति। अनार्द्राधीर्यस्य स एष कृष्णोरथमधिरूढः तमनुसृत्यामी दुर्मदा गोपाश्चानोभिः शकटैर्गमनसाधनैः स्थविरैर्वृद्धैरुपेक्षितं मूर्खत्वात्तैरप्युपेक्षितं ते न निवारितवन्त इति भावः। तं कृष्णं त्वरयन्ति किञ्च दैवमप्यद्य-नोऽस्माकं प्रतिकूलं यथा तथा ईहते चेष्टते अयभावः यदि दैवमस्माकमनुकूलं भवेद्विघ्नैरयं विहन्येत अकस्मादधुनैव व्रजे किञ्चिदरिष्टं वा स्यान्नतु तत्किंचिदस्त्यतो दैवमपि प्रतिकूलमिति ॥ २७ ॥ परस्परं सम्मन्त्र्य साहसमधिरुह्याहुः। निवारयाम इति। तं माधवमुपेत्य वयं निवारयेम व्रजे वृद्धा बान्धवाश्च नोऽस्माकं किमकरिष्यन् किञ्चिदपि न करिष्यन्ति तत्र हेतुं वदन्त्य आत्मनो विशिंषन्ति निमिषार्द्धमपि दुस्त्यजान्मुकुन्दस्य सङ्गाद्दैवेन विध्वंसितानि वियोजितानि अत एव दीनानि चेतांसि यासां तासां न इति सम्बन्धः एवम्भूतानामस्माकं न मृत्योरपि भयमस्तीत्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तत्र मथुरायां दाशार्हादीनां दृशां महोत्सवो भवितेति शेषः महानुत्सव आनन्दो यस्य स तथा तं ये दाशार्हादयः देवकीसुतं द्रक्ष्यन्तीति यत्तस्मात् ये चाध्वनि द्रक्ष्यन्ति तेषां दृशाञ्चेति ॥ २५ ॥ इदानीमक्रूरं शपन्ति। मैतदिति। एवंविधस्यातिदारुणे कर्मणि प्रवृत्तस्यैतद्विधस्यैतादृशस्य वा ॥ २६ ॥ कृष्णस्येश्वरत्वं सम्वदन्ते। अनार्द्रधीरिति। अनेन निःसङ्गत्वं हरेर्दर्शितं दुर्मदाः उत्तरकार्यान्धाः स्थविरैः कुलवृद्धैः ॥ २७ ॥ नः किमनिष्टमकरिष्यन् विभ्रंशितानामत एव दीनचेतसाम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

देवकीसुतमिति प्रागयं वसुदेवस्येत्यादि तत्पुरोहितवाक्येन स च सा च तस्मिन् पुत्रत्वमेवाभिमंस्यत इत्यभिप्रायेण ॥ २५–२७ ॥ माधवं लक्ष्म्या अपि पतिभावहेतुगुणवृन्दमित्यर्थः ॥ २८–३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च व्रजस्थानामानन्दं पुरस्थाः प्राप्स्यन्तीत्याहुः। अद्येति। दृश इति जात्यैकत्वं दाशार्हादीनां दृशां महोत्सवो भविष्यति येचाध्वनि द्रक्ष्यन्ति तेषामपि दृशामात्मनेपदमार्षं यद्वा दृश इति द्वितीया तेषां दृशो दृष्टीर्महोत्सवो भविष्यते प्राप्स्यति

प्राप्त्यर्थकोऽयं भवतिरात्मनेपदी ॥ २५ ॥ अक्रूरं शपन्त्य आहुः। एतद्विधस्य एतादृशस्य यद्वा एषा विधा विधानं कर्म यस्य अत एव निष्करुणस्य अक्रूर इत्येतन्नाम माभूत् न युज्यत इत्यर्थः। तत्र हेतुरतीवेति तस्मादतः परमयं क्रूर इति नाम्नाऽभिधेय इति भावः। पुनरेष मया समानीय युस्मासु समर्पणीय इति वचसापि जनं व्रजस्थमेकमपि जनमनाश्वास्य सुदुःखितमिति सुशब्देन मरिष्यतां व्रजजनानां वधपातकमयमेव प्राप्स्यतीति द्योतितम् प्रियात् प्राणादपि प्रियं कृष्णम् अध्वनोऽस्मद्गम्यस्य पारं दूरदेशमित्यर्थः ॥ २६ ॥ अहो अत्रागत्याक्रूरेण स्वक्रूरता सर्वत्रैव सञ्चारितेत्याहुः। अनार्द्रधीरस्मान् रुदतीर्दृष्ट्वापि एव कृष्णाः अनोभिः सहिता गोपा दुर्मदा इत्येषामहो दुष्टा मत्ततैवाजनिष्ट अत्रानागमिष्यतः कृष्णस्य विरहेण स्वयं यन्मरिष्यन्ति तदपि नानुसन्दधते इति भावः। स्थविरैर्वृद्धैरपि निषेधमकुर्वद्भिरुपेक्षितं स्वजीवितमिति शेषः किञ्च दैवतं चेति अयं भावः यदि दैवमस्माकमनुकूलमभविष्यत्तदा विघ्नैः किंचिदेषामुपद्रवमुदपादयिष्यतेति तस्मादायुरेव व्रजस्थानामतः परं नास्तीति निश्चिनुम इति भावः ॥ २७ ॥ परस्परं सम्मन्त्र्य साहसमधिरुह्याहुः। निवारयामः सम्यगुपेत्य वस्त्रहस्ताकर्षणादिना भोः प्राणैकवल्लभ रथादवतरावतर त्वं स्त्रीवधकोटीमागृहाणेति वाग्भिरपि निवर्तयामः ननु कुलवधूनामस्माकमेतावदतिधाष्ट्र्यं दृष्ट्वा लोका हसिष्यन्ति रहस्यमुद्घाटितमालक्ष्य बन्धवोऽपि त्यक्ष्यन्ति तत्राहुः किंनोऽकरिष्यन् करिष्यन्ति कीदृशानां निमिषार्द्धमपि व्याप्य त्यक्तुमशक्यात् मुकुन्दस्य सङ्गाद्दैवेन विध्वंसिता वियोजिता अत एव दीनचेतसश्च यास्तासावस्माकम् अयं भावः यद्यसौ निवृत्तः स्यात्तदा यदि बन्धुभिस्त्यज्येमहि तदा वनदेव्य इव वृन्दावने स्थास्याम इत्यभीष्टसिद्धिरेव यदि वा दण्डयेमहि रुध्येमहि वा तदाप्येकग्रामस्थितिज्ञानेन सखीजनचातुर्यप्रापितैतन्निर्माल्यमाल्यचर्वितादिना च सुखमेव जीवामः यदि चासौ नैव निवृत्तः स्यात्तदोत्सर्गसिद्धं मरणमस्माकमस्त्येवेति ॥ २८ ॥

गूढार्थदीपिनी

ये पथि द्रक्ष्यन्ति तेषांदृशो नेत्राणि महोत्सवः भविष्यते प्राप्स्यति। 'भू प्राप्तौ' इत्यस्मात्। दाशार्हाः यदूनामवान्तरभेदाः ॥ २५ ॥ एषा विधा विधानं क्रूरकर्म यस्य तस्य एतद्विधस्य। क्रूरस्य अक्रूर इति नाम मा भूत न युक्तम्। प्रियात् प्राणादपि प्रियं श्रीकृष्णमध्वनः पारं दूरदेशं नेष्यति ॥ २६ ॥ अनार्द्रधीः कठोरचित्तः एषः कृष्णः रथमास्थितः। तम् अनु दुर्मदा उन्मत्ता गोपाः अनोभिः शकटैः त्वरां कुर्वन्ति। स्थविरैः वृद्धैरपि उपेक्षितम्। दैवं च नोऽस्माकं प्रतिकूलं यथा स्यात्तथा ईहते चेष्टते। अनुकूलत्वे च म्रियेत कश्चित् येन यात्रा स्थगिता भवेदित्यर्थः ॥ २७ ॥ नोऽस्माकं बान्धवाः किम् अकरिष्यन् किं करिष्यन्ति। कथं भूतानाम्। मुकुन्दसङ्गात् वियोजितानि अत एव दीनानि चेतांसि यासां तासाम् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किञ्च तत्र पुरे अद्य ध्रुव महोत्सवः दाशार्हादीनां दृशः नेत्राणि भविष्यते प्राप्स्यते ये चान्येऽपि जना अध्वनि देवकीसुतं द्रक्ष्यन्ति तेषामपि दृशो महोत्सवो भविष्यते ॥ २५ ॥ काश्चिन्न विधाताऽक्रूरसमाख्यया श्रीकृष्णं हरत्यता न स दत्तापहारित्वादिदोषवान् नापि श्रीकृष्णः क्षणभङ्गसौहृदत्वादिदोषवान् किन्त्वक्रूर एव श्रीकृष्णं हरतीत्यक्रूरं शपन्त्य आहुः। मैतद्विधस्येति पादोनाभ्यां द्वाभ्याम्। एषा श्रीकृष्णहरणरूपा विधा विधानं कर्म यस्य अत एवाऽकरुणस्य अक्रूर इति शोभनं नाम माभूत् यतः योऽसौ अतीव दारुणः सुदुःखितं जनमस्मदादिरूपम् अनाश्वास्य असान्त्वयित्वा प्रियात्प्राणादपि प्रियं श्रीकृष्णम् अध्वनः पारं नेष्यति अस्मद्दृग्गोचरत्वाद्दूरं देशं नेष्यतीत्यर्थः ॥ २६ ॥ अनार्द्रा अस्निग्धा धीर्यस्य स एष अक्रूरः रथमास्थितः स्थविरैरुपनन्दादिभिरुपेक्षितं तमक्रूरं गोपाश्चापि त्वरयन्ति अन्यास्त्वक्रूरस्यापि दोषाभावं मन्वानाः स्वदैवप्रातिकूल्यं श्रीकृष्णवियोगे कारणमाहुः। दैवमिति ॥ २७ ॥ श्रीकृष्णवियोगे दैवं कारणमित्युक्तं तत्र काश्चित् तत्प्रतीकारं पौरुषेण करिष्याम इत्याहुः। निवारयाम इति। ननु दैवप्रतीकारार्थमेवं साहसे प्रवृत्ता अस्मान् कुलवृद्धबान्धवाः वारयिष्यन्त्यत आहुः। दैवेन निमिषार्द्धदुस्त्यजादपि मुकुन्दसङ्गात् विध्वसितानि वियोजितानि अत एव दीनानि चेतांसि यासामेवं भूतानां नोऽस्माकं कुलवृद्धाः अन्ये च बान्धवाः किमकरिष्यन् किङ्करिष्यन्ति पिष्टस्य पेषणासम्भवात् दैवताडितानां नः पुनस्ताडनासम्भवादिति भावः अतः माधवं निवारयाम एव ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इयमेकं पक्षमेका निश्चित्य तत्र प्रतिभातं दोषं स्वयमेव प्रमोषयन्ती भाषते ॥ निवारयाम इति। समुपेत्य गत्वा माधवं निवारयामः। वृद्धा व्यभिचारिण्य इति भवेयुरुदीर्णकोपा इत्यत आहुः। कुलवृद्धा बान्धवाश्च किमकरिष्यत्कुर्युः। किमनिष्टं मरणं शरणीकृतवतीनां किं तत्कृत्यमितोऽधिकमिति वदन्ति ॥ मुकुन्दसङ्गादिति। निमिषार्धदुस्त्यजाद्दैवेन तेनैव विभ्रंसितं विभ्रंशनं तेन दीनं चेतो यासां तासामस्माकमिति ॥ २५ ॥ स्वसाहसं न पारमियादिति मतिमत्यः काश्चित्प्रति वदन्ति ॥ यस्येति। अनुरागेण ललितं स्मितं वल्गुश्च मन्त्रो लीलावलोकश्च परिरम्भणं च यस्यां सा रासगोष्ठी तस्यां क्षणदा रात्रयः क्षणमिव नीता नोऽस्माभिस्तं विना दुरन्तमपारं तमो दुःखं कथं न्वतितरेमोपायन्तरापायात्। हे गोप्यस्ता एव क्षणदास्तमं ग्लानिमनन्तरमन्तं नाशमदुर्दत्तवत्यः

क्षणत्वेन नयनकोपतस्ता एव नो नाशयन्तीति तात्पर्यं वा ॥ २६ ॥ अन्हः क्षये सायंसमयेऽनन्तस्य बलस्य सखा स मुक्तसख इति स गोपैः परितो व्रजं विशन्खुररजसा छुरिताः सम्मिश्रा अलकाः स्रजो यस्य स वेणुं क्वणत्रणयन्स्मितं कटाक्षनिरीक्षणेन च न श्चित्तं क्षिणोति निवासयति। यस्तमृते विना। अम्बा गोप्य इति पूर्वमुदीरणादम्बेत्येकवचनं गात्रास्मृतेरिति मन्तव्यम्। कथं भवेम जीवेम। स्वयमेवोत्तरं वदन्ति ॥ अम्ब कथमिति। अम्बः कृष्णकर्तृकः शब्दस्तदनुसारिणी कथा यस्मिन्कर्मणि तद्यथा भवति तथा भवेमेत्यनेनान्वयः ॥२७॥ एवं ब्रुवाणा भृशं विरहेणातुरा व्रजस्त्रियः कृष्णनिषक्तमानसा लज्जां विसृज्य गोविन्द दामोदर माधवेति सुस्वरं रुरुदुः। हे धव मा व्रजेति रुरुदुः ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु भगवान् भक्तवत्सलः समायास्यतीति चेत् तत्राहुः। अद्येति। भक्ता अपि तत्र बहवः अतस्तेषां दाशार्हभोजान्धकवृष्णिसात्वतां पञ्चविधानां कुकुरादीनामपि संग्राहकाः तथापि सत्त्वप्रधाना एव गणिताः तेषां दृशो महोत्सवो भविता शोभा हि द्रष्टव्या लक्ष्म्यधीना च शोभा तस्या अपि रमण इति किं च ये च अध्वनि देवकीसुतत्वात् तद्धितार्थं गच्छन्तं ये मार्गं द्रक्ष्यन्ति तेषामपि दृशो भविष्यति महोत्सवः ननु दर्शनमात्रेण कथमिष्टसिद्धिरिति चेत् तत्राहुः। गुणास्पदमिति। अनन्तगुणानामास्पदत्वात् दर्शनानन्तरं गुणास्तत्रैव समायास्यन्ति अतो महानेवोत्सवः फलपर्यवसायी त्रिविधा अपि गणिताः ॥ २५ ॥ एवं चतुर्धा भगवन्तमुपालभ्य अक्रूरोपालम्भनमाहुः। मैतद्विधस्येति। संज्ञा ह्यन्वर्थोचिता क्रौर्यादयस्त्वन्तःकरणधर्माः अतः अविचार्यैव नामकरणं कृतमिति अक्रूर इत्येतन्नामास्य माभूत् यस्तु सर्वमारकः स कथमक्रूर इति यतोऽयमतीव दारुणः अत आक्रूर उचितः ननु कार्यार्थं सोऽपि समागतः किं कुर्यादिति चेत्तत्राहुः। अनाश्वास्येति। सुदुःखितं गोपीजनं तेषां सर्वस्वभूतंताननाश्वास्य नयतीति आश्वासनं हि भगवन्तमानीय केनचिद्रूपेण वा अत्र स्थापयित्वा समागमिष्यामीति वाग्बन्धं वा कारयित्वा पश्चान्नयनमुचितं न तु धनादिदानं यतो भगवान् प्रियात् प्राणादपि प्रियः आत्मनोऽपि नयनं च न गोचारणवत् किं त्वध्वनः पारं यत्र गतः तस्मिन् दिवसे नायाति ॥ २६ ॥ सर्वानेवोपालभन्ते। अनार्द्रधीरेष इति। गोपिकाव्यतिरिक्तानां सर्वेषामेव महानुत्साहः अतः सर्वे प्रातरेव भुक्त्वा अक्रूरव्यतीरिक्ता रथारूढा जाताः शकटारूढाश्च भगवानपि यशोदादिभिरभ्यनुज्ञातः सम्यगेवास्थितो रथम् अस्मिन्नपि समये अस्मद्विचारं न कृतवानिति अनार्द्रधीरेष कृष्णो दृश्यते न तु सोऽस्मान् पश्यति किं च तमनु यावन्तो गोपाः ते सर्वे दुर्मदाः विचाररहिताः परघातेऽपि क्लेशरहिताः अमी त्वरयन्ति यतस्तथैव दृश्यन्ते चकारादक्रूरोऽपि ते च शकटारूढा इति तेषां चलनक्लेशाभावश्च पश्चात् स्थितशकटानुरोधेन गन्तव्यं पततीति अनोभिः साधनैरित्यप्युक्तं तह्युपनन्दादयो वृद्धा वक्तव्या इति चेत्तत्राहुः। स्थविरैरुपेक्षितमिति। तेषां विचारेण तथा गोप्यस्तथा नागर्यस्तथैव वसुदेवादय इति नन्वदृष्टं प्रार्थयन्तु यथा विघ्नः कियत्कालप्रतिबन्धो वा भवेत् तत्राहुः। दैवं चेति। चकारात् कालादयः सर्वे एव प्रतिकूलमीहन्ते ॥ २७ ॥ स्वप्रवृत्तिबन्धकत्वेन बान्धवानुपालभन्त्यः तापवगणयन्ति निवारयाम इति। सर्वाभिः सम्भूय भगवान्निवारणीयः तथा सति बान्धवाः कोपं करिष्यन्तीति चेत्तत्राहुः। किन्नो करिष्यन्निति नोऽस्माकं किमकरिष्यन्निति किं पूर्वं कृतवन्तः करिष्यन्ति वा ते हि कुलस्यैव बान्धवाः कुलापेक्षायां सत्यां कुले स्थापयन्ति न त्वतिरिक्तं किञ्चित्कुर्वन्ति भगवतः कुलस्य च तारतम्ये विचार्यमाणे कुलं बन्धकं भगवान् मुकुन्दः किं च तस्य सङ्गः साक्षात् स तु निमिषार्धमपि दुस्त्यजः तस्माद्धेतोः दैवेनैव स्वादृष्टेनैव विध्वंसिताः अत एव दीनचेतसः तेषां कुलस्थैर्न्न किञ्चित् कर्त्तुं शक्यते यदि ते भगवते दद्युः तर्हि कुर्युरेव तत्तु न कुर्वन्तीति प्रतिबन्धकत्वाच्च न तैः किञ्चित्कार्यम् अपकारश्चेत् अस्माकं स्वत एव सिद्धः पिष्टपेषणं तैः किं कर्त्तव्यमिति ननु निवारणे किं भविष्यति यदि नागमिष्यति तत्राहुः। माधवमिति। स हि लक्ष्मीपतिः बलात् तया गृहीतस्तदीयो जातः एवमस्मदीयोऽपि भविष्यतीति यत्ने कृते तु नास्माकं बुद्धिदोषः अकृते तु पश्चात्तापो भविष्यतीति भावः। पश्चात्तापाभावार्थमेवमुद्यमः न तु कार्यं भविष्यतीति तथापि न सर्वासां संमतिरिति लौकिकालौकिकपरमार्थदृष्टियुक्ताभिरप्रवृत्तमिति ॥ २८ ॥

श्रीसुबोधिनी–सारः

अस्मत्सुखभागिन्योन्या इति समत्सरा ऊचुः। दाशार्हादीनां दृशो दृष्टेस्तत्र पुरि महोत्सवोऽत्यानंदो भविष्यति प्राप्त्यर्थस्यात्मनेपदित्वात् दृश इति कर्म वा। अद्याव्यवहितकाले एव श्रीरमण लक्ष्मीपतिं गुणाकरं देवकीसुतं येऽध्वनि मार्गे द्रक्ष्यन्ति ॥२५॥ जन्मांधस्तु दिवाकर इतिवन्नामदोषमाहुः। एषा विधा विधानं यस्य तस्याकरुणस्य निर्दयस्याऽक्रूरः सुसौम्यत्वाभावादिति निरर्थकं नाम माभूत् अयं त्वतीव दारुणो महाक्रूरः सुदुःखितं जनं योऽनाश्वास्याऽसंतोष्य नोस्माकं प्रियात् प्राणधनपतिपुत्रादेरपि प्रियं कृष्णम् अध्वनः पारं दूरं देशं प्रापयिष्यति ॥ २६ ॥ गंतुमुद्यतान् दृष्ट्वात्मभाग्यं निंदति। अनार्द्रधीः कठिनचित्त एष कृष्णो रथं समारूढः तमनु तस्य पृष्ठतो दुर्मदा अमी गोपाः त्वरयंति त्वरां कुर्वन्ति अनोभिः शकटैः स्थविरैर्वृद्धैरुपेक्षितं परित्यक्तम् अनिवारणात् अतोऽद्य इदानीं दैवं विपरीतं चेष्टते नोस्माकम् ॥ २७ ॥ साहसेन संमंत्र्याहुः। समुपेत्य समीपं गत्वा वयं माधवं श्रीकृष्ण निवारयामः निमिषार्द्धं दुस्त्यजात्त्यक्तुमशक्यान्मुकुंदस्य संगात् विध्वंसितानि नष्टप्रायाणि दीनानि चेतांसि यासां तासां नोस्माकं कुले वृद्धा बांधवाः किमकरिष्यन्करिष्यन्ति ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्च 'अस्मदुत्सवभाजोऽन्य एवाद्य भविष्यन्ति' इत्याहुः—अद्येति। तत्र पुरे अध्वनि मार्गे गच्छन्तं श्रीरमणं लक्ष्मीकान्तं गुणास्पदं सौन्दर्यमाधुर्यादिगुणानामाश्रयभूतं देवकीसुतं ये द्रक्ष्यन्ति तेषां दाशार्हाणां तत्प्रभृतीनां दृशो दृष्टेरद्य महानुत्सवो भविष्यति। आत्मनेपदमार्षम्। 'अत्र सन्देहो नास्ति' इत्याहुः—ध्रुवमिति। यद्वा दृश इति द्वितीयाबहुवचनम्। दृशो नेत्राणि प्रति महानुत्सवः प्राप्स्यते इत्यर्थः॥ प्राप्त्यर्थस्य भवतेरात्मनेपदत्वात्॥ २५॥ 'अक्रूरं शपन्त्य' इत्याहुः—मैतद्विधस्येति। एषा दुष्टा विधा विधानं कर्म यस्य तस्य अकरुणस्य कृपारहितस्य 'अक्रूर' इत्येतत् शोभनं नाम माभूत् न युक्तम्। 'कुत' इत्यत आहुः–अतीव दारुण इति। अतिभयंकरः अतः क्रूरः व्यपदेष्टव्य इत्याशयः। इत्यत भयंकरत्वमेव स्पष्टयन्ति—य इति। योसावक्रूरः सुतरां दुःखितं जनमस्मत्समुदायात्मकमनाश्वास्य असान्त्वयित्वा प्रियात् प्राणादपि प्रियं कृष्णमध्वनः पारं अस्मद्दृग्गोचरमतिदूरदेशं प्रति नेष्यतीत्यर्थः॥ २६॥ तदा च श्रीकृष्णमालक्ष्याहुः—अनार्द्रधीरिति। अनार्द्रा स्नेहरहिता धीर्यस्य स एष कृष्णो रथमास्थितः गन्तुं रथमधिरूढः, तमनुसृत्य अमी अनोभिः शकटैरुपलक्षिता गोपाः त्वरयन्ति 'शीघ्रं गन्तव्यम्' इति वदन्ति। यतो दुर्मदाः उत्साहितचित्ताः। 'तदुपनन्दादयो वृद्धाः कुतो न निवारयन्ति ?' तत्राहुः—स्थविरैरिति। एषामविनयमालक्ष्य वृद्धैरुपेक्षितं गमननिवारणं न कृतमित्यर्थः। किञ्च दैवमप्यद्य नोऽस्माकं प्रतिकूलं यथा स्यात्तथा ईहते चेष्टते, अन्यथा गमने कश्चिदपि विघ्नः स्यादिति भावः॥ २७॥ एवं परस्परं सम्मन्त्र्य साहसमधिरुह्याहुः—निवारयाम इति। माधवं लक्ष्मीपतिं कृष्णं सम्यक् विनयपूर्वकमुपेत्य गमनान्निवारयामः। ननु 'एवं लज्जात्यागेन तन्निवारणे वृद्धानां कोपः स्यात्' इत्याशङ्क्याहुः—किमिति। निमिषार्धमपि दुस्त्यजान्मुकुन्दस्य सङ्गाद्विध्वंसितानि वियोजितानि, अत एव दीनानि चेतांसि यासां तासां नोऽस्माकं मृत्युतोऽपि भयाभावात् कुलवृद्धा बान्धवाः अन्ये च सम्बन्धिनो किमकरिष्यन् किमनिष्टं करिष्यन्तीत्यर्थः॥ २८॥

अन्वितार्थप्रकाशिका

व्रजस्थानामानन्दं पुरस्थाः प्राप्स्यन्तीत्याहुः—अद्येति॥ तत्र पुरे अध्वनि मार्गे गच्छन्तं श्रीरमणं लक्ष्मीकान्तं गुणास्पदं सौन्दर्यमाधुर्यादिगुणानामाश्रयभूतं देवकीसुतं यशोदासूनुं ये द्रक्ष्यन्ति तेषां दाशार्हाणां तत्प्रभृतीनां दृशो दृष्टेरद्य महानुत्सवो भविष्यति। आत्मनेपदमार्षम्। अत्र संदेहो नास्तीत्याहुः ध्रुवमिति। यद्वा। दृश इति द्वितीयाबहुवचनम। दृशो नेत्राणि प्रति महानुत्सवः प्राप्स्यते इत्यर्थः। प्राप्त्यर्थस्य भवतेरात्मनेपदित्वात्॥ २५॥ मेति॥ एषा दुष्टा विधा विधानं कर्म यस्य तस्याकरुणस्य कृपारहितस्य अक्रूर इत्येतत् शोभनं नाम माभूत् न युक्तम्। यतोऽयमतीव दारुणः अस्ति। योऽसावक्रूरः सुतरां दुःखितं जनमस्मत्समुदायात्मकमनाश्वास्य असान्त्वयित्वा प्रियात् प्राणादपि प्रियं कृष्णमध्वनः पारम् अस्मद्दृग्गोचरमतिदूरदेशं प्रति नेष्यति॥ २६॥ अनार्द्रधीरिति॥ अनार्द्रा स्नेहरहिता धीर्यस्य स एष कृष्णो रथं समास्थितः गन्तुं रथमधिरूढः। तमनुसृत्य दुर्मदाः उत्साहयुक्ताः अनोभिः शकटैः उपलक्षिता अमी गोपाः त्वरयन्ति शीघ्रं गन्तव्यमिति वदन्ति। स्थविरैर्वृद्धैरपि उपेक्षितम् उपेक्षणं कृतम्। भावे निष्ठा। दैवमपि अद्य नोऽस्माकं प्रतिकूलं यथा स्यात्तथा ईहते चेष्टते। अन्यथा गमने कश्चिदपि विघ्नः स्यात्॥ २७॥ निवारयाम इति॥ माधवं कृष्णं सम्यक् विनयपूर्वकमुपेत्य हस्तग्रहादिना गमनान्निवारयामः। यतः निमिषार्द्धमपि दुस्त्यजात् मुकुन्दस्य सङ्गाद्दैवेन विध्वंसितानि वियोजितानि अत एव दीनानि चेतांसि यासां तासां नोऽस्माकं मृत्युतोऽपि भयाभावात्कुलवृद्धा बान्धवाः अन्ये च सबन्धिनोऽपि किमकरिष्यन् कमनिष्टं करिष्यन्ति। अयं भावः। यदि कृष्णो निवर्तेत तदा बान्धवैस्त्यक्ता अपि कृष्णमेव भजेम न चेन्मरणं सिद्धमेव। अतो निवारयामः॥ २८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्माकमिवान्येषामप्यद्योत्सवो भविष्यतीत्याहुः अद्येति तत्र मधुपुरेस्थितानां दाशार्हादीनां दृशो नेत्र निकरस्य महोत्सवः अद्य भविष्यते भविष्यति ये अन्ये जनाः गुणानां सत्यशौचादीनामेकोनचत्वारिंशत्परिमितानां आस्पदं नित्यं निवासस्थानं देवकीसुतं मार्गे द्रक्ष्यन्ति तेषां दृशोपि महोत्सवो भविष्यति यद्वा दृश्य इति द्वितीया तेषां दृशो नयनानि महोत्सवो भविष्यते प्राप्स्यति भूप्राप्ता वात्मनेपदीतिस्मरणात्॥ २५॥ अक्रूरं दृष्ट्वा प्राहुः मैतदिति एषाविधा विधानं चेष्टितं यस्य तस्या करुणस्य दयाहीनस्य अक्रूर इत्येतत् सुंदरं नाममाभूत् यतः अतीवदारुणोस्तियोऽसौऽअतिदुःखितं जनं अनाश्वास्य शांतिमकृत्वा प्रियात् असोरपि प्रियतरं हरिं अध्वनः पारं अस्मान्नेत्रा दृश्यत्वादति दूरस्थानं नेष्यति॥ २६॥ अहो एषां मध्ये कोप्यत्र विलम्ब न करोति सर्वेपि कठिनाजाता इत्याहुः अनार्द्रेति अनार्द्रो दयारहिततया शुष्काधीर्यस्य एष कृष्णोपि रथं संस्थितः अमी गोपा अपि शकटैः त्वरयन्ति शीघ्रं शकटनियोजनेन त्वरां कुर्वन्तीत्यर्थः स्थविरैः वृद्धैश्चापि उपेक्षितं तं च न निवारयंतीत्यर्थः बत केषांचिद्दोषो नास्ति किं तु अद्यनोऽस्माक दैवमदृष्ट प्रतिकूलं वक्रं यथा तथा ईहते चेष्टते यदि प्रतिकूलं न चेत्तर्ह्येषां मध्ये कश्चितु म्रियेत अन्यथापि विघ्नं भवेत्तदपि नस्तीतिभावः॥ २७॥ अतिशोकव्याकुलतया साहसकृतं प्रोचुः निवारयाम इति अकरिष्यन् करिष्यंति निमिष्यार्द्धदुस्तजात्क्षणमपि त्यक्तुमशक्यत् हरिसंगाद्दैवेन विध्वंसितानि पृथक्कृतानि अतएव दीनानि चेतांसि यासां एतादृशीनामस्माकं मरणभयमपि नास्तीत्यर्थः॥ २८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं चास्मदुत्सवभाजोऽन्या एवाद्य भविष्यन्तीत्याहुः । अद्येति । तत्र मथुरापुरे, दाशार्हाश्च भोजाश्च अन्धकाश्च वृष्णयश्च सात्त्वन्तश्च तेषां, दृशः दृष्टेः, अद्य महांश्चासावुत्सवश्च महोत्सवो महानन्दः, भविष्यते भविष्यति । आत्मनेपदमार्षम् । तथा च ये जनाः, अध्वनि मार्गे, श्रीरमणं लक्ष्मीकान्तं, गुणास्पदं कल्याणानां गुणानामेकाश्रयं, देवकीसुतं श्रीकृष्णमित्यर्थः । द्रक्ष्यन्ति । तेषां दृशोऽपि, ध्रुवं नूनं, महोत्सवः भविष्यति । यद्वा । दृश इति द्वितीयाबहुवचनम् । तेषां दृशो नेत्राणि, महोत्सवः भविष्यते प्राप्स्यते । प्राप्त्यर्थस्य भवतेरात्मनेपदित्वात् ॥ २५ ॥ अक्रूरं शपन्त्य आहुः । मैतद्विधस्येति । एषा विधा विधानं कर्म यस्य तस्य, अत एव अकरुणस्य निष्कृपस्य, अक्रूर इत्येतत् अक्रूर इत्येवंविधं शोभनमित्यर्थः । नामाभिधानं, मा भूत् । तत्र हेतुः । यतः, अतीव दारुणः अतीव क्रूरः, अतः अक्रूर इति संज्ञाप्रहाणपूर्वं क्रूर इत्येव व्यपदेष्टव्य इति भावः । यः असावक्रूरः, सुदुःखितं जनमस्मत्समुदायात्मकं, अनाश्वास्य अस्मानसान्त्वयित्वेत्यर्थः । प्रियात् प्रियं, प्राणादप्यतिप्रियमित्यर्थः । कृष्णं अध्वनः पारं, नेष्यति अस्मद्दृग्गोचरमतिदूरदेशं नेष्यतीत्यर्थः ॥ २६ ॥ गोपीनामित्थं ब्रुवन्तीनां सतीनां प्रभाते रथारूढं कृष्णमालक्ष्य तच्छपनविधानपूर्वमहो धिगस्मज्जीवितमित्याहुः । अनार्द्रधीरिति । अनार्द्रा धीर्यस्य सः, एषः कृष्णः, रथं समास्थितः । रथमधिरूढ इत्यर्थः । तं कृष्णं, अन्वनुसृत्य वर्त्तमानाः, दुर्मदा उत्तरकार्यान्धाः, अमी गोपाश्च, अनोभिः शकटैः, संयोजितवृषवृषभैर्गमनसाधनैः शकटैरित्यर्थः । त्वरयन्ति । स्थविरैरुपनन्दादिवृद्धैर्गोपैः, उपेक्षितं मूर्खत्वात्तेऽपि न निवारितवन्त इति भावः । किं च अद्य नोस्माऽकं दैवमपि प्रतिकूलं यथा तथा, ईहते चेष्टते । अयं भावः । यदि दैवमस्माकमनुकूलं भवेत्तर्हि विघ्नैरेषां मध्ये कश्चित् प्रतिहन्येत अकस्माद्वज्रपातो वा भवेत्, अन्यद्वा किंचिदनिष्टं स्यात् न तु तदन्यतमं किंचिदस्तीति ॥ २७ ॥ परस्परं संमन्त्र्य साहसमधिरुह्याहुः । निवारयाम इति । तं माधवं श्रीकृष्णमक्रूरं वा, उपेत्य समीपं गत्वा, वयं निवारयामः निवारयेम । गमनादिति शेषः । निमिषार्द्धमपि दुस्त्यजस्त्यक्तुमशक्यस्तस्मात्, मुकुन्दस्य श्रीकृष्णस्य सङ्गस्तस्मात्, दैवेन विध्वंसितानि वियोजितानि अत एव दीनानि चेतांसि यासां तासां, नोऽस्माकं, कुलवृद्धबान्धवाः किं अकरिष्यन् करिष्यन्ति । भगवद्वियोगजातदुःखानां नो मृत्योरपि भयं नास्तीति भावः ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मैतद्विधस्येति : १०.३९.२६.

प्रतारकः सम्प्रति विप्रतारकदं प्रतारणप्रेप्सुरिदं न चाद्भुतम् । प्रतारकास्मन्नयनप्रतारणामक्रूरनाम्ना कुरुतेऽयमित्यहो ॥ ६२ ॥
क्रूरकरादिह चक्षुःप्राप्तिर्दृष्टा श्रुता च युक्तमतः । सख्यक्रूरकरादिह प्रसज्जते चक्षुरपहरणम् ॥ ६३ ॥
क्रूरकरादक्रूरः क्रूरकरः सत्यमेव सखि यस्मात् । क्षणदाभिख्ये समये सोऽयमिव क्वापि नैव तापयति ॥ ६४ ॥
अक्रूरकृष्णयोगो भूर्यनुभूतः पुराङ्गतापघ्नः । कथमयमधुनाऽपूर्वः सखि दुःसहतापकृद् भवति ॥ ६५ ॥
अपूर्वत्वादपूर्वं तच्चेष्टितं स्फुटमेव यत् । नामद्वयमतो युक्तमक्रूरः क्रूर इत्यपि ॥ ६६ ॥
क्रूराक्रूरगुणौ दृष्टौ पूर्वाशायाः प्रसादकौ । तदन्योऽन्यं कुतः प्राप्तः पूर्वाशारुचिहारकः ॥ ६७ ॥
शस्तः स चाक्रूरगुणो जगत्यलमण्डमतापकृत् सत्सु सुमित्रणुले ।
प्रवेशतो यो हि ततोऽतिमञ्जुलं तेजः सुधासारमुपैति नापरः ॥ ६८ ॥
सदोषः सकलङ्कश्च प्रागक्रूरगुणस्त्वया । ज्ञात एवेति किं भूयस्तदाम्रेडितया गिरा ॥ ६९ ॥
क्रूरस्तत्पुरुषत्वतोऽयमवनौ निर्णीत एवेति किं सख्यस्मिंस्तव विस्मयावहमभूत् क्रूरत्वमुग्रक्रियम् ।
क्रूरः किञ्च तमस्थितिः स च जगच्चक्षुः पिधानं करोत्यत्रास्मल्लघुचक्षुषामपह्नतिर्नास्मिंस्तदप्यद्भुतम् ॥ ७० ॥
दोषोत्प्रभगुणकलनं करोत्यसाविह तमर्मयो यः स्यात् । सात्त्विकभावप्रसरा यद्वयमिह तत् त्यजाऽऽलि तद्वार्ताम् ॥ ७१ ॥

अनार्द्रधीरिति : १०.३९.२७.

त्यक्तः स्वाप्तजनो न जातुचिदपि त्यक्तोऽस्य सेवाक्रमो जातः पत्युरनादरः पुनरसौ जातो न पत्युः श्रियः ।
क्रान्तं वर्त्म कुलागतं यदुपतेः क्रान्तं न दृक्सूचनं सत्येवं स च वज्रसारहृदयो जातः कथं संप्रति ॥ ७२ ॥
भुवि वारिवहस्वरूप एष स्फुटमेवालि स चञ्चलान्तरोऽस्ति । नहि पूर्वमिदं मनागबोधीत्यनुतापस्य निदानमेतदेव ॥ ७३ ॥
अप्येष गच्छतु जनोऽप्यनुयातु चैनमस्मद्गतिर्भवतु वा भुवि याऽपि काऽपि ।
नात्रार्थये किमपि धार्तारदं तु याचे नैतद्विधं कुरु पुनः सदयाभिधानम् ॥ ७४ ॥
किमक्रूरो निन्द्यो नयति यदयं प्राणसुहृदं किमीशो वा वाच्यो यदिममनुगच्छत्यदयवत् ।
अवद्या वा गोपा यदिममनुकूलाश्च निखिला विधिर्वा नोऽवद्यो यदघटितनिर्यत्नघटकः ॥ ७५ ॥

यदक्रूरः क्रूरोऽजनि निजजनो निर्दयमनाः त्रुटिः कालः कल्पः कुलिशकठिनः श्रीपतिरपि ।
यदन्नं यत्पेयं निखिलमविशेषेण विषवन्न जानीमो हेतुं परमिह विनैकेन विधिना ॥ ७६ ॥
कं देवं परिपूजयामि विहितं किं वा चरामि व्रतं कं वा सद्ग्रहमर्चयामि नियमं कं वा दधामीष्टदम् ।
त्यक्तात्यक्तपदार्थयोर्विनिमयं कुर्यां कयोर्वा सखि येन स्यात् सततं रमेशविहृतिर्निर्विघ्नमस्मिन् व्रजे ॥ ७७ ॥

निवारयाम इति : १०.३९.२८.

यद्वारणं रिपुरपि प्रसभं विदध्यादग्रे विधाय निजवेश्मनि वारणं सः ।
तद्वारणं वयमिहैव बताऽद्य कुर्मः कः शक्नुयात्सखि निवारयितुं जनो नः ॥ ७८ ॥
वस्त्वप्राप्तमदुर्लभं यदि तदानन्दाय सञ्जायते दौर्लभ्ये च न खेदकारि भवति प्राप्तं तु यातं यदि ।
स्यादेवाद्भुततापकृत्त्रिजगतीत्यूचुस्तदा गोपिका धन्यास्तेऽश्रुतमाधवास्तनुभृतोऽधन्या वयं न्यायतः ॥ ७९ ॥
धन्याधन्यत्व-पर्याप्तिभूमिका गोपिका इह । श्रीशार्ङ्गसङ्गतः पूर्वं तद्वियोगादनन्तरम् ॥ ८० ॥

कृष्णप्रिया

धन्य है आज हमारे श्यामसुन्दर का दर्शन करके मथुरा के दाशार्ह, भोज, अन्धक और वृष्णिवंशी यादवोंके नेत्र अवश्य ही परमानन्द का साक्षात्कार करेंगे । आज उनके यहाँ महान् उत्सव होगा । साथ ही जो लोग यहाँ से मथुरा जाते हुए रमारमण गुणसागर नटनागर देवकीनन्दन श्यामसुन्दर का मार्ग में दर्शन करेंगे, वे भी निहाल हो जायँगे ॥ २५ ॥ देखो सखी ! यह अक्रूर कितना निठुर, कितना हृदयहीन है । इधर तो हम गोपियाँ इतनी दुःखित हो रही हैं और यह हमारे परम प्रियतम नन्ददुलारे श्यामसुन्दर को हमारी आँखों से ओझल करके बहुत दूर ले जाना चाहता है और दो बात कहकर हमें धीरज भी नहीं बँधाता, आश्वासन भी नहीं देता । सचमुच ऐसे अत्यन्त क्रूर पुरुष का 'अक्रूर' नाम नहीं होना चाहिये था ॥ २६ ॥ सखी ! हमारे ये श्यामसुन्दर भी तो कम निठुर नहीं हैं । देखो-देखो, वे भी रथपर बैठ गये । और मतवाले गोपगण छकड़ों द्वारा उनके साथ जाने के लिये कितनी जल्दी मचा रहे हैं । सचमुच ये मूर्ख हैं । और हमारे बड़े-बूढ़े ! उन्होंने तो इन लोगों की जल्दबाजी देखकर उपेक्षाकर दी है कि 'जाओ जो मन में आवे, करो ।' अब हम क्या करें ? आज विधाता सर्वथा हमारे प्रतिकूल चेष्टा कर रहा है ॥ २७ ॥ चलो, हम स्वयं ही चलकर अपने प्राणप्यारे श्यामसुन्दर को रोकेंगी; कुल के बड़े बूढ़े और बन्धुजन हमारा क्या कर लेंगे ? अरी सखी ! हम आधे क्षण के लिये भी प्राणवल्लभ नन्दनन्दन का सङ्ग छोड़ने में असमर्थ थीं । आज हमारे दुर्भाग्य ने हमारे सामने उनका वियोग उपस्थित करके हमारे चित्त को विनष्ट एवं व्याकुल कर दिया है ॥ २८ ॥

यस्यानुरागललितस्मितवल्गुमन्त्रलीलावलोकपरिरम्भणरासगोष्ठ्याम् ।
नीताः स्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरन्तम् ॥ २९ ॥
योऽह्नः क्षये व्रजमनन्तसखः परीतो गोपैर्विशन्[1] खुररजश्छुरितालकस्रक् ।
वेणुं क्वणन् स्मितकटाक्षनिरीक्षणेन चित्तं [2]क्षिणोत्यमुमृते नु कथं भवेम ॥ ३० ॥

श्रीशुक उवाच

एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तमानसाः ।
विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति ॥ ३१ ॥
स्त्रीणामेवं रुदन्तीनामुदिते सवितर्यथ । अक्रूरश्चोदयामास कृतमैत्रादिको रथम् ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—हे गोप्यः, यस्य, अनुरागललितस्मितवल्गुमन्त्रलीलावलोकपरिरम्भणरासगोष्ठ्याम्, नः, क्षणदाः, क्षणम्, इव, नीताःस्म, तम्, विना, दुरन्तरम्, तमः, कथं, तु, अतितरेम ॥ २९ ॥ अह्नःक्षये, विशन् खुररजःछुरितालकस्रक्, गोपैः, परीतः, यः, अनन्तसखः, वेणुम्, क्वणन्, स्मितकटाक्षनिरीक्षणेन, चित्तम्, क्षिणोति, अमुम्, ऋते, कथम्, भवेम ? न भवेम ॥ ३० ॥ श्रीशुक उवाच—कृष्णगृहीतमानसाः, विरहातुराः, व्रजस्त्रियः, एवम्, ब्रुवाणाः, लज्जाम्, विसृज्य, हे गोविन्द ! हे दामोदर ! हे माधव, इति, सुस्वरम्, भृशम्, रुरुदुः, स्म ॥ ३१ ॥ स्त्रीणाम्, एवम्, रुदन्तीनाम्, अथ, सवितरि, उदिते, कृतमैत्रादिकः, अक्रूरः, रथम्, चोदयामास ॥ ३२ ॥

---

१. गवां-विज. । २. क्षिणोति तमृते—प्रा. पा. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

इतोऽपि कारणादवश्यं साहसमेवावलंबनीयमित्याहुः । हे गोप्यो यस्य ललितं स्मितं च वल्गुमंत्रश्च लीलावलोकश्च परिरंभणं चानुरागेणैतानि यस्यां रासगोष्ठ्यां रासक्रीडासभायां नेऽस्माभिः क्षणदा रात्रयः क्षणमिव नीतास्तममुं कृष्णं विना दुरंतं तमो विरहदुःखं कथं नु अतितरेम । न कथंचिदित्यर्थः ॥ २९ ॥ किं च आस्तां तावत्तमोऽतितरणं जीवनमेव कथं स्यादित्याहुः । य इति । अह्नः क्षये दिनावसाने खुररजोभिश्छुरीता धूसरा अलकाः स्रजश्च यस्य स व्रजं विशन् स्मितेन यत्कटाक्षनिरीक्षणं तेन नश्चित्तं क्षिणोति हरति । अमुं कृष्णं विना तावत्कथं भवेम जीवेम ॥ ३० ॥ कृष्णे विषक्तानि मानसानि यासाम्। सुस्वरमुच्चैः ॥ ३१ ॥ क्रूरमक्रूरतः श्रुत्वा कंसं कंसनिषूदनः । गोपीमनोरथारामः सरामः स्वपुरं ययौ ॥ १ ॥ स्त्रीणामिति । ता अनादृत्य कृतमैत्रादिको मैत्रं मित्रदैवतं प्रातःसंध्योपासनं तदादि कर्म कृतं येन सः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतोऽपि वक्ष्यमाणादपि । क्षणं निद्रावसरं सुरतोत्सवं वा ददतीति क्षणदाः "क्षणः कालांशव्यापारपर्वोत्सवहानिषु" इति धरणिः । इत्यर्थ इति-प्रियविरहे क्षणमपि युगशतमिव तर्तुमशक्यं भवतीति भावः । अथ निवारणार्थमुद्यता अपि बहुविरुद्धसंघट्टे तस्मिन्स्वेषां प्रवेशमदृष्ट्वा सभयमाहुः—यस्येति । यस्यानुरागेणैव ललितस्मितादीनि, यस्यां सैव वल्गुमंत्रः रहस्यसंकेतवार्ता, रासगोष्ठ्यां रासोपलक्षितक्रीडामात्रसभायाम् । नोऽस्माभिः । तममुं विना दुरन्तमदृष्टपारं तमो विरहांधकारदुःखसमुद्रं कथं तरेमेति । यथास्य संगसुखेन बह्व्योऽपि रात्रयः क्षण इवाभूवंस्तथैव विरहःदुखेन क्षणोऽप्यस्माकं युगसहस्रं सदा भवत्येव, किन्तु बह्वी रात्रीरागामिनीर्गमयितुं कथं प्रभविष्याम इत्यर्थः ॥ २९ ॥ जीवनेऽपि ससंदेहा आहुः—किञ्चेत्यादि । आस्तां तिष्ठतु । छुरिता व्याप्ताः "छुरितं व्यापने छेदे" इति निरुक्तेः । न कथमपीत्यर्थः । अनन्तः संकर्षणतया तदेकनामत्वाच्छुभ्रवर्णत्वेन सारूप्यादनंतबलत्वाच्च । व्रजे कृष्णनामांतरवत्तथा गर्गोक्त्या प्रसिद्धो बलदेवस्तस्य सखा तत्सहित इत्यर्थः । गोपैर्वयस्यैः । परीतो वेष्टितः । स्मित मंदहासः । कटाक्षोपांगदर्शनम । निरीक्षणं वक्षोजादिनिभालनं तेन चित्तं संमोहयति । अद्य सायं तत्तद्यदि न भविष्यति तदा का खलु जीवितं धारयितुं पारयिष्यतीतिभावः ॥ ३० ॥ एवमुक्तरीत्या । गोविन्देत्यनेन दीनदयालुता । दामोदरेत्यनेन भक्तायत्तता । माधवेत्यनेन मधोः क्षत्रियत्वेन तद्वंश्यत्वात्क्रौर्यं वा स्त्रीषु कृपालुता च ध्वनितेति भावः । एवं विलप्य कृष्णं रथादवतारयितुं संहता एव यदा गंतुं प्रवृत्तास्तदोरुस्तभादिविघ्नवशादसामर्थ्ये सति केवलं रुरुदुरेवेत्याह—एवमिति । विरहपीडयाऽऽतुरा एकमपि पदं गंतुं स्पष्टाक्षरतया वक्तुं चासमर्थाः । हे गोविन्द इत्यनेनास्माकं गा मनश्चक्षुरादींद्रियवृत्तीर्गव्यः परःसहस्रा विन्द लभस्व, त्वत्संगे एव गच्छंतीरेताः कृपया गृहाण स्वीयमनोवृषभेन्द्रेण सह संगमय्य रक्षस्व, न तूपेक्षस्व। देहास्त्वस्माकं त्वत्संगायोग्यत्वाद्दुर्भगा अत्रैव पंचत्वं प्राप्स्यंति, यदि त्वं नागमिष्यसीति । किञ्च स्त्रीवधाञ्जिघृक्षसि चेद्गृहाण, यस्याः प्रेम्णा दामबंधनमपि स्वीकृतवानभूस्तां मातरं श्रीव्रजेश्वरीं मा जहि, यदि परश्वस्त्वं नायास्यसि तदा सा सर्वथा मरिष्यतीति मातृहत्यान्तु मा गृहाणेति हे दामोदरेति पदेन विज्ञापना । हे माधवेति-त्वमस्माकं मा खलु धवः किन्तु सखा भवसि, यदि धवोऽभविष्यस्तदास्मासु तव स्वत्वसंभवात्स्ववस्तूनां पालने त्वालने वा नैवाति दोषः प्राप्स्यत् । किन्तु वयं परद्रव्याणि भवामोऽतोऽस्मन्नाशनिवंधनं दोषं नांगीकुथा इति विज्ञापना द्योतितेति विश्वनाथः ॥ ३१ ॥ गोपीमनोरथानामवारामो निवासः सन् स्वपुरं मथुरां मथुरां मथुरायाः स्वीयावासत्वात् "मथुरा भगवान्यत्र नित्यं सन्निहितो हरिः" इत्युक्तेः स्वपुरत्वमिति (१) । अनाश्वासितास्ता रुरुदुरित्याह-स्त्रीणामिति । ताः साक्षाच्छ्रुतिरूपाः । नित्रदैवतं सूर्यरूपतयोपदिष्टं ब्रह्म यत्र गायत्रीमंत्रे तज्जपाग्र्यं कर्म । यद्वाकृतसूर्यमंडलाधिष्ठितनारायणोपासनः "ध्येय सदा सवृतिमंडलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः । केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ।" इति स्मृतेः, "यश्चासावादित्ये" इत्यादिश्रुतेश्च । आदिपदात्स्तव पाठादिग्रहः । एवमुक्तप्रकारेण रुदतीरपि स्त्रियोऽनादृत्येत्यक्रूरस्यापराधः सूचितः । स्वतः सर्वैरनुकंप्यानां तत्रापि तादृशप्रेम्णा यथा रुदतीनां व्रजस्त्रीणां कथमपि सान्त्वनपेक्ष्य प्रस्थानात् । भो मातरः क्षमध्वं पराधीनस्य राजसेवकस्य ममापराधमेषोऽहमेव कृष्णमानीय समर्पयिष्यामीत्यनाश्वासमेव तदनादरः । अत एव तदनादरफलमक्रूरस्य स्यमंतकप्रसंगे कृष्णविच्छेददुखं, द्वारकात्यागं, दुर्यशो, वाराणसीवासं च भावुकभक्तविशेषाः श्रीगोकुलमहिम्ना मन्यंते । अतस्ताभिरपि तदपराधं मत्वा प्रागुक्तम्—'योऽसावनाश्वास्य सुदुःखितम्' इत्यादिना । वैष्णवेऽपि—"अक्रूरः क्रूरहृदयः शीघ्रं प्रेरयते हयान् । एवमार्तासु गोपीषु घृणा कस्य न जायते ।" इति । सूर्यं उदिते एव सल्लग्नाद्यपेक्षयेति ज्ञेयम् । अत्र गोपीविलापाब्धिनिमग्नचेतस्त्वादेव मुनिना तात्कालिकव्रजेश्वरीविलापावर्णनमिति केचित् धनुर्मखोत्सव दर्शनोत्कण्ठमना बालकोऽयं स्वपित्रा सहैव याति, यथासमयं पित्रैव भोजयिष्यमाणः पितुरंक एव सुखं शयिष्यमाण एकदिनं तत्र स्थित्वा परश्वः पुनः स्वपित्रा सहैवायास्यति, कात्र चिंतेति पुरध्रीभिर्गोपैश्च नंदादिभिश्च मुहुराश्वासितायास्तस्यास्तदा नातिशोक इत्यन्ये प्राहुः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ निवारणार्थमुद्यता अपि बहुविरुद्धसङ्कट्टे तस्मिन् स्वेषां प्रवेशमदृष्ट्वा सभयमाहुर्यस्येति। रासोपलक्षणत्वेन लीलान्तरमपि ज्ञेयं वल्गुमन्त्रः मधुररहस्यसङ्केतवार्त्ता स्म विस्मये नु वितर्के तरणस्य दुष्करत्वेनातिशब्दः यथा रासक्रीडासुखेन वह्वयोऽपि रात्रयः क्षण इव भवन्ति स्म तथा तद्विरहदुःखेन क्षणोऽपि युगशतमिव स्यादतस्तत् सह्यं न स्यादिति भावः ॥ २९ ॥ अनन्तः सङ्कर्षणतया तदेकनामत्वात् शुभ्रवर्णत्वेन सारूप्यादनन्तबलत्वाच्च व्रजे कृष्णनामान्तरवत्तथा प्रसिद्धः श्रीबलदेवस्तस्य सखा तत्सहित इत्यर्थः। गोपैर्वयस्यैः परितो वेष्टितः स्मितं मन्दहासः कटाक्षेऽपाङ्गदर्शनं तत्प्रधानं निरीक्षणं वक्षोजादिनिभालनं तेन चित्तं क्षिणोति प्रेमोद्रेकेण सम्मोहयति नु आशङ्कायाम् अतोऽद्य स्वयमेवात्रत्या मरिष्याम इति भावः ॥ ३० ॥ अथ भृशं विरहातुरत्वेन विशेषविलापशक्त्या शोकोद्दीपकतन्नामविशेषैरेव विलेपुरित्याह। एवमीदृशं भृशं ब्रुवाणा इत्यन्यदपि तादृशमूचुरिति ज्ञेयं तत्र हेतुर्विरहेणातुरा विवशाः तत्रापि हेतुर्व्रजस्त्रियः सहजप्रेमरसमयत्वेन प्रसिद्धा इत्यर्थः अत एव कृष्णे विषक्तानि प्रेम्णा सक्तानि मानसानि यासां ताः अत एव लज्जां हित्वा सुस्वरं करुणोच्चस्वरेण रुरुदुः स्म पादपूरणे तच्च प्रेमार्त्तेरशक्त्या कथं रुरुदुः हे गोविन्द ! दामोदर माधवेत्येवम् अत्र गोविन्देति गोकुलेन्द्रस्मरणात्त्वां बिना गोकुलमिदं सर्वं क्षणादेव विनङ्क्ष्यतीति सूचयन्ति दामोदरेति नाम श्रीव्रजेश्वर्याः स्वकृतानुतापस्मारकं ततस्त्वां विना तस्यास्तस्य स्मरणेन सम्प्रति कीदृगवस्था भविष्यतीति व्यञ्जयन्ति माधवेति जयति तेऽधिकं जन्मना व्रज इत्यनेन सततमुरसि सौम्या श्रीर्वधूः साकमास्ते इत्यनेन च निजसम्भावनानुसारेण तया श्रीनारायणप्रियस्यापि गूढं वृत इति परमसन्नायकस्त्वं योग्यमेवास्मन्महानुरागविषयो जात इति स्मरणेन हन्त कथमस्माकमधुना कालक्षेपणं भविष्यतीति ज्ञापयन्ति मा नाम्नीं नारायणप्रियामपि धुनोति भावविशेषेण कम्पयतीति निरुक्तिश्चात्र प्रस्तुतोपयोगिनी ज्ञेया ईदृशस्यापि तव विच्छेदे वयं वा कथं जीवेम मरणे च हा पुनर्द्रष्टव्यो नासीदिति ध्वनयन्ति चकारोऽनुक्तानामन्येषामपि नाममयकरुणपरिदेवितानां समुच्चये ॥ ३१ ॥ एवमुक्तप्रकारेण रुदतीरपि स्त्रियोऽनादृत्येति अक्रूरस्यापराधो ध्वनितः स्वतः सर्वैरेवानुकम्प्यानां तत्रापि तादृशश्रीकृष्णप्रेम्णा तथा रुदतीनां व्रजस्त्रीणां कथमपि सान्त्वनमनपेक्ष्य प्रस्थानात् अतस्ताभिरपि तदपराधं मत्वा प्रागुक्तं योऽसावनाश्वास्येति श्रीविष्णुपुराणेऽपि "अक्रूरः क्रूरहृदयः शीघ्रं प्रेरयते हयान्। एवमार्त्तासु योषित्सु न घृणा तस्य जायते" इति अत एव श्रीगोकुलमहिम्नास्तु तदपराधस्य फलमक्रूरस्य वक्ष्यमाणे स्यमन्तकप्रसङ्गे मन्यन्ते सूर्य उदित एवेति सल्लग्नाद्यपेक्षया रथं भ्रातृभ्यां ताभ्यामिति शेषः ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यद्यप्यनुरागेणैव ललितस्मितादीनि प्रायो जायन्ते, तथापि अनुरागेति प्रयोगो रासक्रीडानां प्रेमाधिक्यविवक्षया तत्र वल्गुमन्त्रो मधुररहस्यसंकेतवार्त्ता, लीलावलोकः सविभ्रमकटाक्षमोक्षः, स्म निश्चये, नु खेदे। अतितरेमेति तमसः समुद्रत्वं व्यज्यते, तत्रापि, दुरन्तमिति परममहत्त्वम्, तत्रापि हे गोप्य इति प्रेमकोमलानां तासां परमदुस्तरत्वमभिप्रेतम्; अतएव तत्तरणस्य दुष्करत्वेनाति-शब्दः। अन्यत्तैर्व्याख्यातम्। पक्षान्तरे—ननु दैवकृतदुःखं धैर्य्यतो विचारेण सोढुमेव युज्यते, तत्राहुः—यस्येति; यथा रासक्रीडासुखेन वह्वयोऽपि रात्रयः क्षणा इव भवन्ति, तथा तद्विरहदुःखेन क्षणोऽपि युगशतमिव स्यादतस्तत् सह्यं न स्यादिति भावः। अनुरागकृतललितस्मितादीनां तत्संगत्या परमानन्दप्रदानामपि तद्विरहेण तत्तत्स्मारणविशेषेणार्त्तिभरोत्पादकत्वात्। अन्यत् समानम् ॥ २९ ॥ अनन्तः शुभवर्णः शेषावतारः श्रीबलदेवस्तस्य सखा तत्सहित इत्यर्थः। अतः स्नेहान्मिथः संलग्नताधिकशोभा च सूचिता। गोपैर्वयस्यैः परितो वेष्टितः, अह्नः क्षय इत्यादिकं स्वरूपकथनमपि शोभाविशेषं बोधयति, तत्र च कटाक्षोऽपांगदर्शन इत्यभिधानात् स्वतएव निरीक्षणप्राप्तावपि निरीक्षण-प्रयोगः प्रायो निरीक्षणस्य कटाक्षात्मताबोधनार्थम्। यद्वा, कटाक्षोऽपांगकूणनम्, निरीक्षणं स्तनाद्यवलोकनं चित्तं क्षिणोति, प्रेमोद्रेकेण सम्मोहयति, नु खेदे, पक्षान्तरे च; अतोऽद्य सायमेवात्रत्याः सर्व्वं वयं मरिष्याम इति भावः ॥ ३० ॥ एवमीदृशं भृशं ब्रुवाणा इत्यन्यदपि तादृशमूचुरिति ज्ञेयम्। तत्र हेतुः—विरहेणातुरा विवशाः, तत्रापि हेतुः–व्रजस्त्रियः सहजप्रेमरसमय्य इत्यर्थः। अतएव कृष्णे विषक्तानि प्रेम्णा सक्तानि मानसानि यासां ताः, अतएव लज्जां हित्वा सुस्वरं करुणोच्चस्वरेण रुरुदुः। स्म प्रसिद्धौ खेदे वा। कथं रुरुदुः ? हे गोविन्द ! हे दामोदर ! हे माधवेत्येवम् ! तत्र गोविन्देति गोकुलेन्द्रत्वस्मरणम्, त्वां विना गोकुलमिदं सर्व्वं क्षणादेव विनङ्क्ष्यतीति भावः। दामोदरेति भक्तवात्सल्यप्रदर्शकं मधुरलीलास्मरणं तादृशभक्तवात्सल्यमयस्यास्मत्परित्यागो नोचित इति भावः। माधवेति परमसौन्दर्य्यवैदग्ध्यादिस्मरणम्। ईदृशस्य तव विच्छेदे कथं जीवेम, मरणे च हा पुनर्न द्रष्टव्योऽसीत्येषा दिक्। चकारोऽनुक्तानामन्येषामपि करुणपरिदेवितानां समुच्चये। तथा रोदने हेतुः—कृष्णेत्यादि, तदासक्तचित्तत्वात्तन्नामव्यतिरिक्तोच्चारणाशक्तेः, स्वभावतश्च तथैव परिस्फूर्त्तेरिति भावः ॥३१॥ अथेत्यानन्तर्य्यं, अप्यर्थे वा। एवमुक्तप्रकारेण रुदतीरपि स्त्रियोऽनादृत्येति अक्रूरस्यापराधो ध्वनितः। स्वतः सर्व्वैरनुकम्प्यानां तत्रापि तादृश-श्रीकृष्णप्रेम्णा तथा रुदतीनां व्रजस्त्रीणां श्रीकृष्णद्वारा स्वयमेवानुनयं विना प्रस्थापनात्;

अतः प्रागप्युक्तम्—योऽसावनाश्वास्येति; श्रीविष्णुपुराणेऽपि (५।१८।३०)–'अक्रूरः क्रूरहृदयः शीघ्रं प्रेरयते हयान्। एवमार्त्तासु योषित्सु घृणा कस्य न जायते ।।' इति, अतएव भावविशेषपराः श्रीवैष्णवाः केचिदेतदपराधफलमक्रूरस्याग्रे वक्ष्यमाणस्यमन्तकप्रसंगे मन्यन्त इति, तच्च तत्रैव विस्तारयितव्यम्। सूर्य्ये उदित एवेति सल्लग्नाद्यपेक्षया, किंवा निशि नयनेन चौर्य्यापत्त्या भाविनो गोपीनामधिकतरशोकस्य परिहारार्थम्। यद्वा, विरहार्त्तिभरेण तासां रथाग्रे पतनसम्भावनया रक्षार्थम्, अन्यथा रात्रौ सम्यग्दर्शनाभावतो रथेन तासां निपातनादिति दिक्। कथं द्वाभ्यां भ्रातृभ्यां ताभ्यामारुढमिति (२७ श० श्लो०) 'अनाद्रधीरेष समास्थितो रथम्' इति पूर्वसूचनयाग्रे वक्ष्यमाणानुसारेण च बोद्धव्यम्। साक्षादत्र तदनुक्तिर्विरहार्त्तिविशेषस्योदयभयात्, तेनैव वा वाक्स्तम्भात् ।। ३२ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अनन्तसखः वलभद्रसखः क्वणन् क्वणयन् ।। ३०–३४ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतोऽप्यवश्यं साहसमेवावलम्बनीयमित्याहुः। यस्येति। हे गोप्यः यस्य अनुरागेण ललितं स्मितं च वल्गुमन्त्रः सुन्दरतररहः संलापश्च लीलावलोकश्च परिरम्भणञ्च एतानि यस्यां तस्यां रासगोष्ठ्यां रासक्रीडासभायां नोऽस्माभिः क्षणदा रात्रयः क्षणमिव नीताः क्रमितास्तममुं श्रीकृष्णं विना दुरन्तं तमो विरहजं दुःखं कथं त्वतितरेम न कथञ्चिदित्यर्थः ।। २९ ।। आस्तां तावत्तमोऽतितरणं जीवनमेव कथं स्यादित्याहुः। य इति। योऽनन्तस्य रामस्य सखा तत्सहित इत्यर्थः। गोपैश्च परिवृतः अह्नः क्षये दिनावसाने गवां खुररजोभिः छुरिता धूसरा अलकाः स्रजश्च यस्य सः व्रजं विशन् वेणुं वादयन् स्मितेन यत्कटाक्षेण वीक्षणं तेन नोऽस्माकं चित्तं क्षिणोति हरति तममुं श्रीकृष्णं विना कथं भवेम जीवेम ।। ३० ।। इतीत्थं ब्रुवाणाः भृशं नितरां कृष्णे विषक्तानि मानसानि यासां ता अत एव तद्विरहेण भाविना आतुरा व्रजस्त्रियः लज्जां विसृज्य सुस्वरमुच्चैर्हे गोविन्द ! हे दामोदर ! हे माधवेति च रुरुदुः स्म ।। ३१ ।। इत्थं स्त्रीणं रुदतीनां सतीनां सवितरि सूर्ये उदिते सत्यनन्तरमक्रूरः कृतं मैत्रं मित्रस्य कृत्यं तदादि यस्य तथेन सः गोपेषु प्रदर्शितसौहार्द इत्यर्थः। रथं चोदयामास गमयामास मैत्रं मित्रः सूर्यस्तद्दैवत्यं प्रातः संध्योपासनं तदादिकर्मकृतं येनेति वा ।। ३२ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हे गोप्यः ! क्षणदा निद्रावरसदाः सुरतोत्सवप्रदा वा रात्र्यां तमो दुःखम् ।। २९ ।। अह्नः क्षये सन्ध्यासमये तं कृष्णमृते विना कृष्णो दुरातिशयात् अम्बेति सखीसम्बोधनं भवेम तास्विति शेषः ।। ३०–३१ ।। कृतमैत्र्यादिकः कृतसूर्यमण्डलाधिष्ठितनारायणोपासनादिः क्रियः ।। ३२–३३ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इतोऽपि कारणान्निवारयाम एवेत्याहुः। यस्यानुरागेणैव ललितस्मितादीनि यस्यां तत्रैव वल्गुमन्त्रः रहस्यसङ्केतवार्ता। रासगोष्ठ्यां रासोपलक्षितक्रीडामात्रसभायां नोऽस्माभिः क्षणदा रात्रयः क्षणमिव नीताः तं कृष्णं विना दुरन्तमदृष्टपारं तमः विरहान्धकारदुःखसमुद्रं नु निश्चितं कथमतितरेम। यथास्य सङ्गसुखेन बह्व्योऽपि रात्रयः क्षण इवाभूवंस्तथैव विरहदुःखेन क्षणोऽप्यस्माकं युगसहस्रं सदा भवत्येव किन्तु बह्वी रात्रीरागामिनीर्गमयितुं कथं प्रभविष्याम इत्यर्थः ।। २९ ।। किञ्चाद्यैव सायं मरिष्याम इत्याहुर्य इति। अन्हः क्षये दिनावसाने अनन्तस्य रामस्य सखा व्रजं विशन् क्वणयन् निरीक्षण वक्षोजादिनिभालनं तेन चित्तं क्षिणोति सम्मोहयति। अमुं कृष्णमृते कथं भवेम जीवेमेति। अद्य सायं तत्तद्यदि न भविष्यति तदा का खलु जीवितं धारयितुं पारयिष्यतीति भावः ।। ३० ।। एवं विलप्य कृष्णं रथादवतारयितुं संहता एव यदा गन्तुं प्रवृत्तास्तदोरुस्तम्भादिविघ्नवशादसामर्थ्ये सति केवलं रुरुदुरेवेत्याह। एवमिति। विरहपीडया आतुराः एकमपि पदं गन्तुं स्पष्टाक्षरतया वक्तुञ्चासमर्थाः हे गोविन्द ! इत्यनेनास्माकं गा मनश्चक्षुरादीन्द्रियवृत्तिगवीः परःसहस्रा विन्द लभस्व त्वत्सङ्ग एव गच्छन्तीरेताः कृपया गृहाण स्वीयमनोवृषभेन्द्रेण सह सङ्गमय्यरक्ष नतूपेक्षस्व देहास्त्वस्माकं त्वत्सङ्गायोग्यत्वाद्दुर्भगा अत्रैव पञ्चत्वं प्राप्स्यन्ति यदि त्वं नागमिष्यसीति विज्ञापना किञ्च स्वावधान् जिघृक्षसि चेद्दहाण यस्याः प्रेम्णा दामबन्धनमपि स्वीकृतवानभूस्तां मातरं श्रीव्रजेश्वरीं मा जहि यदि परश्वस्त्वं नायास्यसि तदा सा सर्वथा मरिष्यतीति मातृहत्यान्तु मा गृहाणेति हे दामोदरेति पदेन विज्ञापना हे माधवेति त्वमस्माकं मा खलु धवः किन्तु सखा भवसि यदि धवोऽभविष्यस्तदा अस्मासु तव स्वत्त्वसम्भवात् स्ववस्तूनां पालने ज्वालने वा नैवातिदोषं प्राप्स्यः किन्तु वयं परद्रव्याणि भवामोऽतोऽस्मन्नाशनिबन्धनं दोषं माङ्गीकुथा इति विज्ञापना द्योतिता ।। ३१ ।। स्त्रीणामित्यनादरे षष्ठी भो मातरः ! क्षमध्वं पराधीनस्य राजसेवकस्य ममापराधमेषोऽहमेव कृष्णमानीय समर्पयिष्यामीत्याश्वासनाकरणमेवानादरः अत एतदनादरलक्षणापराधफलमक्रूरस्य स्यमन्तकप्रसङ्गे कृष्णविच्छेददुःखं द्वारकात्यागं दुर्यशो वाराणसीवासं च भावकभक्तविशेषाः केचिन्मन्यन्ते कृतं मैत्र मित्रदैवत्यं दैहिकं तदादिकं स्नानसन्ध्योपासनादिकं कर्म येन सः अत्र गोपीविलापाब्धिनिमग्न-

सम्पूर्णचेतस्त्वादेव मुनिना तात्कालिकव्रजेश्वरीविलापावर्णनमिति वैष्णवतोषिणी धनुर्महोत्सवदर्शनसोत्कण्ठमना बालकोऽयं स्वपित्रा सहैव याति यथासमयं पित्रैव भोजयिष्यमाणः पितुरङ्क एव सुखं शयिष्यमाण एकदिनं तत्र स्थित्वा परश्वः पुनः स्वपित्रा सहैवायास्यति कात्र चिन्तेति पुरन्ध्रीभिर्गोपैश्च नन्दादिभिश्च मुहुराश्वासितायास्तस्यास्तदानातिशोक इत्यन्ये प्राहुः ॥ ३२-३३ ॥

गूढार्थदीपिनी

अनुरागेण ललितस्मितादीनि यस्यां सा चासौ रासगोष्ठी तस्यां क्षणदा रात्रयः क्षणमिव व्यतीताः तं विना दुरन्तम् अपारं तमः विरहदुःखं कथं नु अतितरेमेत्यन्वयः। स्मेत्याश्चर्ये। वल्गुः मनोहरः मन्तः सुरतालापः कटाक्षपातः परिरम्भणम् आलिङ्गनं च। क्षणं सुरतानन्दं ददाति। क्षणं क्षणं द्यति खण्डयतीति वा क्षणदाशब्दार्थः ॥२९॥ यः अह्नः क्षये सायङ्काले व्रजं विशन् वेणुं क्वणन् वादयन् निरीक्षणेन चित्तं क्षिणोति अपहरति तम् अमुम् श्रीकृष्णम् ऋते विना कथं नु भवेम जीवेमेत्यन्वयः। खुर रजोभिः छुरिता व्याप्ताः अलकाः स्रजश्च यस्य 'छुरितं। व्यापने छेदे'। इति निरुक्तेः ॥ ३० ॥ सुस्वरम् उच्चः। स्मेति लोकाकर्षणे। माधवेति चेति चकारयुक्तः पाठः साधुः ॥ ३१ ॥ कृतं मैत्रं सूर्यदेवताकं सन्ध्योपासनादिकृत्यं येन सः ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्याः सुज्ञाः दैवं पौरुषेणान्यथा कर्तुं कः शक्नुयात् माधवश्च सत्यसङ्कल्पमावश्यके कार्ये प्रवृत्तमितरो निवारयितुं कः शक्नुयात् अतस्तद्गुणस्मरणातुराः तद्विरहदुःखाभिभूताः तद्वियोगानन्तरं कथं जीवेमेति परस्परमूचुः। यस्येति द्वाभ्याम्। श्रीकृष्णस्य अनुरागेण ललितं स्मितं तथा बल्गुमन्त्रश्च तथा लीलावलोकश्च परिरम्भणञ्च यस्यां रासगोष्ठ्यां रासक्रीडायां नोऽस्माभिः क्षणदाः रात्रयः क्षणमिव नीताः तं श्रीकृष्णं विना हे गोप्यः! दुरन्तं तमो विरहदुःखं कथं नु अतितरेम न कथञ्चिदित्यर्थ ॥ २९ ॥ अतस्तद्वियोगदुःखाभिभूतानां जीवनं कथं स्यादित्याहुः। य इति। यः अनन्ताः सखायो यस्य सः बलसखो वा यः श्रीकृष्णः अन्हः क्षये दिनान्ते खुररजोभिः छुरिता व्याप्ता अलकाः स्रजश्च यस्य सः गोपैः परीतः व्रजं विशन् स्मितेन यत्कटाक्षनिरीक्षणं तेन नोऽस्माकं चित्तं क्षिणोति हरति अमुं श्रीकृष्णं विना कथं भवेम कथं जीवेम न कथमपीत्यर्थः ॥ ३० ॥ विरहेण समासन्नेन श्रीकृष्णवियोगेन आतुराः कृष्णे विषक्तानि मानसानि यासां ताः सुस्वरमुच्चैः ॥ ३१ ॥ कृतं मैत्रादिकं मैत्रं मित्रदैवत्यं सन्ध्योपासनं तदादिकं कर्म येन सः ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्त्रीणामेवं रुदन्तीनां ता अनादृत्य सवितरि सूर्ये उदिते सत्यक्रूरः कृतः मैत्र्यमादिर्यस्य तद्यस्य स कृतसूर्योपस्त्यादिरथ रथं चोदयामास ।२९। तं रथमनु असज्जन्त सन्नद्धा अभवन्। तमक्रूरमन्विति वा भूरि महदुपायनं भूरि सुवर्णरूपमुपायनं वा गतम् ।।३०।। प्रत्यादेशं स्वाभिमुखीभूय तिष्ठताऽहमप्यल्पेनानेहसा गमिष्यामीत्येवमाज्ञारूपं वचनम्। प्रति प्रतिविधौ वीप्सालक्षणादौ प्रयोगतः। मात्रार्थे चाभिमुख्ये च प्रतिदानादिषु प्रतीति विश्वः। यद्वनितास्तथा तप्यतीर्वीक्ष्येति। अवतस्थिरे ॥ ३१ ॥ स्वप्रस्थाने स्वप्रयाणे प्रस्तुते तथा तप्यतीस्तापमुपाप्नुवाना यदूत्तमो वीक्ष्य रथारोहात्पश्चादभिमुखः सन्वीक्ष्य सम्प्रेष्यैः स्वतद्रहस्यविदस्त इति सम्प्रेष्यास्तैः। दौत्यपदार्थैकदेशदूतपदार्थान्वयि। सम्यक् प्रेष्यदूतसम्बन्धिभिर्वचनैरिति तदर्थः। दूत्यकैरित्यपि सुपठम्। आयास्येऽहमिति सान्त्वयामास। सप्रेमैरिति पाठोऽपि प्रमास्पदः। नान्तोऽप्ययं महिशब्दवदकारान्तः। दौत्यकैर्दूतसम्बन्धिभिः सम्प्रष्यैस्ताः प्रति प्रसणार्हैर्वचनैरिति वा ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो निराशा आत्मानमेवोपालभन्ते द्वयेन दुःखाभावं सुखं च स प्रयच्छतीति तदभावे कथं दुःखनिवृत्तिः कथं वा अनिवृत्तौ सत्या जीविष्यामः मरणे वा भगवन्तं न प्राप्स्याम इति किं वा भविष्यामः। यस्यानुरागेति। अनुरागादया भगवदीयाः अनुरागपूर्वकं यत्स्मितं तत्पूर्वका ये वल्गुमन्त्रा गुह्यभाषणानि तत्सहिता लीला तत्पूर्वकोऽयमवलोकः ततोऽधिकरसोद्गमार्थं परिरम्भो रासश्च एतेषां या गोष्ठी समूहः अवसरो देशकालसहितः तस्यां क्षणदा रात्रयः क्षणमिव नीताः नात्र विविच्य प्रमाणं वक्तव्यं स्मेति प्रसिद्धिः सर्वगोपिकानुभवसिद्धं या रात्रयः अन्येभ्यः क्षणं प्रयच्छन्ति अतस्ता बहुक्षणा भवन्ति ता अपि क्षणमिव नीताः अतः परं तं विना तदीयसर्वसामग्र्यपगमे चन्द्रादीनामप्यपगमात् तम एव निश्चलं स्थास्यति तत्कथं तरेमेति एकापि रात्रिर्न गमिष्यतीति भावः। वस्तुतः कृष्णत्रयोदशीयम् अतोऽन्धकारः सिद्धः आन्तरोऽपि ॥ २९ ॥ किञ्च अन्धकारेऽपि केचित् जीवन्ति अस्माकं तु जीवनमपि न भविष्यतीत्याहुः। योऽन्हः क्षय इति। अन्हः क्षये सन्ध्यायां क्षयशब्दप्रयोगोऽन्हो द्विष्टत्वज्ञापकः अनन्तो बलभद्रः अनेन कालस्यापि तदनुगुणत्वमुक्तं गोपैः परीत इति सर्वैः सहितोऽस्मत्कार्यमेव करोतीत्याहुः। किञ्च यदपि कृतं तदप्यस्मदर्थमेवेति वर्णयन्ति। विशन् खुररजश्छुरितालकस्रक् इति। व्रजं विशन्ति या गावः तासां खुररजसा छुरिता अलकाः स्रजश्च एके ज्ञानरूपाः अन्ये भक्तिरूपाः उभयत्रापि धर्मसंबन्धः सूच्यते उभयविधा एवं क्लेशेनाप्युद्ध्रियन्त इति ज्ञापयितुं ततो रसानुद्बो-

धयितुं वेणु क्वणन् तान् पुष्टीकरिष्यन स्मितपूर्वकं यत् कटाक्षनिरीक्षणं तेनास्माकं चित्तं क्षिणोति पीडयति काममुद्बोधयित्वापश्चाद्रमते एवं सर्वत्र सौख्यदातारं विना कथं भवेम कामवस्थां प्राप्स्यामः ॥ ३० ॥ एवमुपालभ्य पूर्वं रोदने प्रादुर्भूत इति रोदनं कृतवत्य इत्याह । एवमिति । अयमेकः प्रकारो निरूपितः एवमनन्तप्रकारेणजातविरहेण भावनया आतुराश्च जाताः यतो व्रजस्त्रियः सदा नन्दासक्तचित्ताः न विषयैः परितुष्यन्ति ततो लज्जां विसृज्य सुस्वरमुच्चै रुरुदुः शाश्वतो देवादिभिः कृतं भक्तिवशादस्माभिः कृत लोकतः स्वकृतं सर्वमेव भगवान् दूरीकरोतीति संबोधनत्रयं गोविन्दोऽभिषिक्तः दामोदरो वशीकृतः लक्ष्मीपतिश्च माधवः एते धर्माः प्रायेण भगवता विस्मृता इति दयासिध्यर्थं रोदनपूर्वकमुच्चारितवत्यः ॥ ३१ ॥ स्त्रीणामिति । स्त्रीणां रोदने न गमिष्यतीति अभिप्रेत्य सूर्योदये जाते कालातिक्रमं च ज्ञात्वा स्वयमक्रूरः वसुदेवादिकार्यसाधकः कंसस्यापि मित्रकार्यं करिष्यन् कृतमैत्रः कृतसन्ध्यावन्दनः कृतावश्यको वा तिष्ठेदासूर्यदर्शनादिति सूर्योदयपर्यन्तं कर्मैव कृतवानिति लक्ष्यते अग्निहोत्रादिसमयेषु वा न गन्तव्यमिति ज्ञापनार्थम् अथ भिन्नप्रक्रमेण गोकुलवासनां परित्यज्य भिन्नवासनायामभिनिविष्टचित्तः रथं प्रेरयामास ॥ ३२ ॥

श्रीसुबोधिनी–सारः

यस्यानुरागः स्नेहो ललितं मनोहरं स्मितं हसनं वल्गुर्मनोहरो मंत्रो लीलावलोकः परिरंभणमालिंगनं चैतानि यस्यां रासगोष्ठ्यां क्षणदा रात्रयो नोऽस्माभिः क्षणमिव नीताः तं श्रीकृष्णं विना दुरंतमनन्त तमो विरहदुःखं गोप्यो वयं कथं नु अतितरेम न कथमपि ॥ २९ ॥ जीवनमेव दुर्लभमित्याहुः । अह्नो दिनस्य क्षये नाशे संध्यायाम् । अनन्तः शेषावतारो रामः सखा यस्यानंताः सखायो मित्राणि वा यस्य स कृष्णो गोपैः परीतो युक्तः व्रजं विशन् खुररजोभिः छुरिता धूसरा अलकाः केशाः स्रजो माला यस्य स वेणुं क्वणन् वादयन् यः स्मितयुक्तेन कटाक्षनिरीक्षणेन चित्तं क्षिणोति हरति अमुं श्रीकृष्ण विना कथं जीवेम ॥३०॥ शुकोक्तिः। एवं भाषमाणा विरहेणातुराः पीडिता भृशमत्यर्थं कृष्णे विषक्तं मनो यासां ता व्रजस्त्रियो लज्जां विसृज्य त्यक्त्वा सुस्वरं यथा भवति तथा हे गोविन्द हे दामोदर हे माधवेति रुरुदुः स्म प्रसिद्धम् ॥ ३१ ॥ स्त्रीणामेवं रुदन्तीनां सतीनां सवितरि सूर्ये उदिते सति अक्रूरो रथं प्रेरयामास कृतं मैत्रं सूर्यदेवतात्मकं संध्यादिकर्म येन सः ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'इतोऽप्यवश्यं साहसमवलम्बनीयम्' इत्याहुः–यस्येति। 'युष्माकमप्येतत् सम्मतमेव' इत्याशयेन सम्बोधयति–गोप्य इति। ललितं सुन्दरं स्मितं च वल्गु मंत्रः मनोहररहः संलापश्च लीलावलोकः कटाक्षनिरीक्षणं च परिरम्भणं तानि यस्यानुरागेणैवैतानि यस्यां तस्यां रासगोष्ठ्यां रासक्रीडासभायां नोऽस्माभिः क्षणदा बह्व्यो रात्रयः क्षणमिव नीताः क्रमितास्तममुं कृष्णं विना दुरन्तं तमः दुःसहं विरहदुःखं कथं न्वतितरेम न कथञ्चिदपि तत्सोढुं शक्यमित्यर्थः ॥ २९ ॥ 'आस्तां तावद्दुःखविरहचिन्ता, जीवनमेव तावत् कथं स्यात्' इत्याहुः—य इति। अनन्तः शेषावतारो बलः सखा सहचरो यस्य सः गोपैश्च परिवृतः गवां खुररजोभिश्छुरिताः धूसरअलकाः स्रजश्च यस्य सः यः श्रीकृष्णः अह्नः क्षये दिनावसाने सायंकाले व्रजं विशन् वेणुं वादयन् सन् स्मितपूर्वककटाक्षनिरीक्षणेन अस्माकं चित्तं क्षिणोति अपहरति तममुं कृष्णमृते विना कथं नु भवेम जीवेम ? ॥३०॥ एवं परस्परं ब्रुवाणा भृशमत्यंतं कृष्णे विषक्तानि मानसानि यासां ताः, अत एव भावितद्विरहभयेनातुरा विवशा व्रजस्त्रियो लज्जां विसृज्य त्यक्त्वा सुस्वरमुच्चैः 'हे गोविन्द ! हे दामोदर ! हे माधव !' इति सम्बोधयन्त्यो रुरुदुः स्मेत्यन्वयः। 'स्म' इत्यनेन तत्सम्भवं द्योतयति। 'गोविन्द' इत्यनेनास्मदुपेक्षा तव न युक्ता' इति सूचितम्। 'दामोदर' इति भक्तवात्सल्यं सूचितम्। 'माधव' इति पतिविरहदुःसहत्वाभिज्ञत्वमिति सूचितम् ॥ ३१ ॥ एवं स्त्रीणां रुदन्तीनां सतीनां ता अनादृत्य कृतं मैत्रं मित्रदेवताकं सन्ध्योपासनादिकं कर्म येन सोऽक्रूरः सवितर्युदिते सति अथानन्तरं रथं चोदयामासेत्यन्वयः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

अथ निवारणोद्यता अपि जनसंमर्दे प्रवेष्टुमशक्ता आहुः—यस्येति। हे गोप्यः ! ललितं सुन्दरं स्मितं च वल्गु मन्त्रः मनोहररहः संलापश्च लीलावलोकः कटाक्षनिरीक्षणं च परिरम्भणं च यस्यानुरागेण ललितस्मितादीनि यस्यां तस्यां रासगोष्ठ्यां रासक्रीडासभायां नोऽस्माभिः क्षणदा बह्व्यो रात्रयः क्षणमिव नीतास्तममुं कृष्णं विना दुरन्तं तमः दुःसहं विरहदुःखं कथं न्वतितरेम न कथञ्चिदपि तत्सोढुं शक्यम् ॥ २९ ॥ य इति। अनन्तबलतयाऽनन्तो बलः तस्य सखा सहचरो गोपैश्च परीतः परिवृतः गवां खुररजोभिश्छुरिताः धूसरा अलकाः स्रजश्च यस्य सः यः श्रीकृष्णः अह्नः क्षये दिनावसाने सायंकाले व्रज विशन् वेणुं क्वणन् वादयन् सन् स्मितपूर्वककटाक्षनिरीक्षणेन नोऽस्माकं चित्तं क्षिणोति अपहरति। तममुं कृष्णमृते विना कथं नु भवेम जीवेम ॥३०॥ एवमिति। एवं परस्परं ब्रुवाणा भृशमत्यन्तं कृष्णे विषक्तानि मानसानि यासां ताः अत एव भावितद्विरहभयेनातुरा विवशाः पदमपि गन्तुं वक्तुं वा असमर्था व्रजस्त्रियो लज्जां विसृज्य त्यक्त्वा सुस्वरमुच्चैर्हे गोविन्द ! हे दामोदर ! हे माधवेति ! सम्बोधयन्त्यो रुरुदुः स्म ॥ ३१ ॥ स्त्रीणामिति। एवं स्त्रीणां रुदन्तीनां सतीनाम्। अनादरे षष्ठी नुमार्षः। कृतं मैत्रं मित्रदेवताकं सन्ध्योपासनादिकं कर्म येन सोऽक्रूरः सवितर्युदिते सति अथानन्तरं रथं चोदयामास ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ निवारणायोद्यता अपि बहुजनसमूहे प्रवेष्टुमशक्यत्वात्सभयं प्राहुःद्वाभ्यां यस्येति हे गोप्यः अनुरागेण युक्तानि ललितस्मितादीनि यस्यां सा चासौ रासगोष्ठिः रासरमणसमा च तस्यां नोस्माभिः क्षणदाः रजन्यः क्षणमिव नीताः स्म विस्मये तं कृष्णं विना दुरंतं तमोवियोगदुखं कथं तु अतितरेम न कथंचिदित्यर्थः ललितस्मितं सुंदरहास्यं च वल्गुमंत्रो मनोहर विचारश्च लीलायुक्तोवलोकश्च परीरंभणमालिंगनं च ॥ २९ ॥ दुखातरणं तु भवतु परंतु वयं कथं जीविष्याम इत्याहुः य इति अह्नः क्षये दिनस्यां ते खुररजोभिः छुरिताः व्याप्ताः अलकाः स्रजश्च यस्य सः गोपैः परितो वेष्ठितः स्मितेनयुक्तः कटाक्षस्तेन यदीक्षणं तेन यद्वास्मितं मंदहास्यं च कटाक्षः अपांगस्तद्युक्तं यदीक्षणं च तयोः समाहारस्तेन नः चित्तं क्षिणोति हरति अमुं श्रीकृष्णमृते कथं भवेम वयं जीवेमनु आशंकायां ॥ ३० ॥ हे गोविन्द इत्यादीनि संबोधनानि कृत्वा व्रजस्त्रियो भृशं रुरुदुः ॥३१॥ श्रीहरिकृष्णाय नमोनमः सवितरि सूर्ये उदिते सति ताः अनादृत्य अक्रूरः रामकृष्णाभ्यामधिरुढमिति शेषः रथं नोदयामास स च कीदृशः कृतमैत्रादिकः कृतं मैत्रं दैवतं संध्यावंदनं तदादिकर्म येन सः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतोऽप्यवश्यं साहसमेवावलम्बनीयमित्याहुः ॥ यस्येति ॥ हे गोप्यः, यस्य श्रीकृष्णस्य, अनुरागेण ललितं सुन्दरं यत् स्मितं तच्च वल्गुमन्त्रः सुन्दरतरो रहः संलापश्च लीलासहितो योऽवलोकः स च परिरम्भणमालिङ्गनं चैतानि यस्यां सा चासौ रासगोष्ठी रासक्रीडा सभा तस्यां, नोऽस्माभिः, क्षणदा रात्रयः, क्षणं क्षणमात्रकाल इव, नीताः क्रमिताः स्म । तं, अमुपेतं श्रीकृष्णं विना, दुरन्तं दुष्पारं, तमो विरहजं दुःखं, कथं नु केन प्रकारेण वा, अतितरेम न कथंचिदित्यर्थः ॥ २९ ॥ आस्तां तावत्तमोऽतितरणं प्रथमतस्तु जीवनमेव कथं स्यादित्याहुः ॥ य इति ॥ अनन्तो रामस्तस्य सखाऽनन्तसखः, रामसहित इत्यर्थः । गोपैः परीतः परिवृतः, अह्नः क्षये दिनावसाने, खुररजोभिः गवां खुररेणुभिः छुरिता धूसरा अलकाः शिरोरुहाः स्रजश्च यस्य सः, व्रजं विशन्, वेणुं क्वणन् वादयन्, यः कृष्णः, स्मितेन मन्दहासेन सहितं यत् कटाक्षनिरीक्षणं तेन, नोऽस्माकं चित्तं, क्षिणोति हरति । अमुं श्रीकृष्णं, ऋते विना, कथं नु भवेम कथं वा जीवेम ॥ ३० ॥ एवमिति ॥ एवमित्थं, ब्रुवाणाः व्यक्तं वदन्त्यः, भृशं नितरां कृष्णे निषक्तानि मानसानि यासां ताः, अत एव, विरहातुराः भाविना तद्वियोगेनात्यातुरतायुताः, व्रजस्त्रियः लज्जां विसृज्य, सुस्वरं यथा तथा, उच्चैरुच्चस्वरेण, हे गोविन्द, हे दामोदर, हे माधव, इति रुरुदुः स्म । ब्रुवन्त्य इति शेषः ॥ ३१ ॥ स्त्रीणामिति ॥ एवमित्थं, स्त्रीणां रुदन्तीनां सतीनां, ता अनादृत्येत्यर्थः । सवितरि सूर्ये, उदिते सति, अथानन्तरं कृतं मैत्रं मित्त्रदैवत्यं संध्योपासनादिकर्म येन सः, यद्वा । कृतं मित्त्रकृत्यं येन सः, गोपेषु प्रदर्शितसौहृद इत्यर्थः । अक्रूरः रथं, चोदयामास गमयामास ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यस्यानुरागेति : १०.३९.२९.

साकं येन निशाऽनिशं निमिषवन्नीता तथा वासरोप्युच्चैर्यन्मुखकञ्जमञ्जुमुरलीधीरस्वराकर्णनैः ।
तस्मिन् गच्छति गोकुलात्प्रियतमे किं वा पुरः कुर्महे भूरेषाऽपि निजान्तरं न दिशति प्रोद्बुद्धसापत्न्यधीः ॥ ८१ ॥

एवं ब्रुवाणा इति : १०.३९.३१.

रासेऽच्युताप्तिदमभूद्रुदितं पुरैवं संस्मृत्य ता रुरुदुरीशपदाप्तिकामाः ।
साध्वन्यथेष्टगमने निगमे निषिद्धं कुर्युः कथं रुदितमीप्सितकृष्णभव्याः ॥ ८२ ॥
रुदितं गमने निषिद्धमस्मिन्निति संचिन्त्य चिरन्तना हि गोपाः । पुनरत्र निवासमेव कुर्युर्भविता भूरि ततोऽस्मदिष्टमर्थात् ॥ ८३ ॥
श्रुत्वाऽपि रोदनमिमे हठतो गृहीत्वा श्रीशं गता यदि तदाऽपि न चास्त्वभव्यम् ।
इत्थं विचिन्त्य रुरुदुर्बहु सुस्वरं यच्छास्त्रे न्यषेधि तदसुस्वरमेव गर्ह्यम् ॥ ८४ ॥
याऽस्मत्प्रियेष्टसुखसङ्गमभङ्गकृत् स्यात् किं वा तयाऽऽत्मगतया निजजातिभाजा ।
इत्थं तदेकमतयो निखिला विचिन्त्य तत्तादृशीं जहुरिदं क्षममात्मलज्जाम् ॥ ८५ ॥
इन्द्रस्त्वं च गवामसीह स कथं सन्त्यज्य ता गच्छसि नन्दं तात इति ब्रुवंश्च सहसा जातः कथं माधवः ।
दाम्ना बद्ध इति प्रथामुपगतः सत्प्रेमबद्धः कथं गोविन्देति च माधवेति च तदा दामोदरेत्युज्जगुः ॥ ८६ ॥

स्त्रीणामिति : १०.३९.३२.

ब्रह्मेशदुर्लभानपि मनोरथार्थानपूरयद् यस्य । तद्रथमतुलदयालुः समारुरोहेति नाद्भुतं किञ्चित् ॥ ८७ ॥

कृष्णप्रिया

सखियों ! जिनकी प्रेमभरी मनोहर मुसकान, रहस्य की मीठी-मीठी बातें, बिलासपूर्ण चितवन और प्रेमालिङ्गन से हमने रासलीला की वे रात्रियाँ– जो बहुत विशाल थी—एक क्षण के समान बिता दी थीं । अब भला, उनके बिना हम उन्हीं की दी हुई अपार विरह व्यथा का पार कैसे पावेंगी ॥ २९ ॥ एक दिन की नहीं, प्रतिदिन की बात है, सायङ्काल ये प्रतिदिन वे ग्वालबालों से घिरे हुए बलरामजी के साथ वन से गौएँ चराकर लौटते हैं । उनकी काली-काली घुँघराली अलके और गले के पुष्पहार गौओं के खुर की रज से ढके रहते हैं । वे बाँसुरी वजाते हुए अपनी मन्द-मन्द मुसकान और तिरछी चितवन से देख-देखकर हमारे हृदय को बेध डालते हैं । उनके बिना भला, हम कैसे जी सकेंगी ? ॥ ३० ॥ श्रीशुकदेवजी कहते हैं—परीक्षित् ! गोपियाँ वाणी से तो इस प्रकार कह रह थीं; परन्तु उनका एक-एक मनोभाव भगवान् श्रीकृष्ण का स्पर्श, उनका आलिङ्गन कर रहा था । वे विरह की सम्भावना से अत्यन्त व्याकुल हो गयीं और लाज छोड़कर 'हे गोविन्द ! हे दामोदर ! हे माधव !'—इस प्रकार ऊँची आवाज से पुकार-पुकार कर सुललित स्वर से रोने लगीं ॥ ३१ ॥ गोपियाँ इस प्रकार रो रही थीं ! रोते-राते सारी रात बीत गयी, सूर्योदय हुआ । अक्रूरजी सन्ध्या-वन्दन आदि नित्य कर्मों से निवृत्त होकर रथ पर सवार हुए और उसे हाँक ले चले ॥ ३२ ॥

गोपास्तमन्वसज्जन्त नन्दाद्याः शकटैस्ततः । आदायोपायनं भूरि कुम्भान् गोरससम्भृतान् ॥ ३३ ॥
गोप्यश्च दयितं कृष्णमनुव्रज्यानुरञ्जिताः । प्रत्यादेशं भगवतः काङ्क्षन्त्यश्चावतस्थिरे ॥ ३४ ॥
तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः । सान्त्वयामास [1]संप्रेष्यैरायास्य इति दौत्यकैः ॥ ३५ ॥
यावदालक्ष्यते केतुर्यावद् रेणू रथस्य च । अनुप्रस्थापितात्मानो लेख्यानीवो[2]पलक्षिताः ॥ ३६ ॥

कदमक्षम।

अन्वयः—नन्दाद्याः, गोपाः, गोरससम्भृतान्, कुम्भान्, भूरि, उपायनम्, आदाय, ततः, तम्, अन्वसज्जन्तः ॥ ३३ ॥ अनुरञ्जिताः, गोप्यः, सूक्ष्माः, दयितम्, कृष्णम्, अनुव्रज्य, च (स्थूलरूपाः) भगवतः, प्रत्यादेशम्, काङ्क्षन्त्यः, च, अवतस्थिरे ॥ ३४ ॥ स्वप्रस्थाने, तथा, ताः, तप्यतीः, वीक्ष्य, यदूत्तमः, दौत्यकैः, सम्प्रेष्यैः, आयास्ये, इति, सान्त्वयामास ॥ ३५ ॥ यावत्, रथस्य, केतुः, आलक्ष्यते, च, रथस्य, रेणुः, यावत् आलक्ष्यते, तावत्, अनुप्रस्थितात्मानः, लेखानि, इव, उपलक्षितः॥३६॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

अन्वसज्जंतान्वगच्छन् ॥३३॥ अनुरंजिताः परावृत्य निरीक्षणा दिभिः किंचिदानंदिताः । प्रत्यादेशं प्रत्याख्यानम् ॥३४॥ तप्यतीः संतप्यमानाः । ताः आयास्ये शीघ्रमागमिष्यामीति दौत्यकैः दूतवाक्यैः ॥ ३५ ॥ कृष्णमनु प्रस्थापिता आत्मानश्चित्तानि याभिस्ताः लेख्यमयपुत्रिका इव निश्चलाः ॥ ३५–३७–३८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं श्रीकृष्णम् । ततो व्रजात् । तं रथम् । अन्वषज्जन्त पश्चादगच्छन्, नानाशंकाकुलचित्तत्वात् । आद्यपदेन सनंदादयः । तत इत्यनेन सूचिते विलम्बे हेतुः—उपायनं रत्नाद्युत्तमद्रव्यम् । कुंभांश्चेति यात्रामंगलमपि सूचितम् ॥ ३३ ॥ प्रत्याख्यानं–तिष्ठन्तु नायान्त्विति गमननिषेधरूपम् । अनुरञ्जिताः कृष्णेन रथस्थेनैव पश्चिमाभिमुखीभूय स्वप्रेयसीनां निर्गच्छतः प्राणानालक्ष्य–भोः प्राणैकवल्लभा मा खिद्यत एष्येऽहमेतान्वञ्चयित्वा युष्मत्सन्निधिमेष्यामीत्यर्थद्योतकेन निरीक्षणेन किञ्चिदानंदिताः । ततश्चोर्वादिजाड्यें निवृत्ते सति । गोप्यश्चेति यथा गोपा आनंदेन रथमनुव्रजन्ति स्म तथा गोप्यश्च दयितमनुव्रज्य प्रत्यादेशं दूतादिद्वाराऽवधिकरणार्थनिजविज्ञप्तिवाक्यस्य प्रतिवचनं काङ्क्षन्त्यः नयनकृतमाश्वासं यथा प्रापुस्तथा वचनकृतमपि तमभिलषंन्योऽवतस्थिरे । दूरतस्तद्दृष्टिविषये परमोच्चे देशे सावधानतया स्थिता इत्यर्थः ॥ ३४ ॥ ता गोपीः । स्तथोक्तप्रकारेण । पाठा० संप्रेष्यैः प्रेषितु योग्यैः–भवतीर्ध्यायन्नेव कञ्चित्कालं तत्र स्थास्य इत्येवंरूपैः । केचित्तु यदेवं व्याचक्षते दूतद्वारकसंदेशे स्वरूपैरायास्यामि न तु स्वयं–तदसत्, इतिशब्दस्य सर्वान्ते निदेशाभावात्तदप्रतिपत्तेः । संदेशमात्रागमने प्रत्युत तासां परमक्षोभापत्तेः । "आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः" इत्यनेन परमाप्तदूतस्य श्रीमदुद्धवस्य वाक्येन तदुच्छित्तेः । दौत्यकैर्गोप्यतया वारवारं बहुभिर्दूतवचनैः सप्रेमैर्विविधशपथपूर्वकं स्नेहमयैर्न तु सच्छलैरित्यर्थः । यदूत्तमः संप्रति तन्नामाभिमत्यैव तद्रक्षानिश्चयात् । गमने हेतुरायास्यत इति । "वर्तमानसमीपे वर्तमानवद्वा" इति लट्प्रयोगोऽपि । तच्च दंतवक्त्रवधानंतरं सिद्धमिति पाद्मोत्तरखंडमूलस्वारस्यं च तत्रैवोदाहरिष्यते ॥ ३५–३६ ॥

---

१. सप्रेमै–श्रीधर. वंशी. जीव. ; संप्रेष्यै–वीर. विज. ; वचनैः–इति कस्यचित् । २. नीवोपतस्थिरे–वीर. विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तं रथमन्वसज्जन्त पश्चादगच्छन् विविधशङ्काद्याकुलचित्तत्वात् आद्यशब्देन सन्नन्दादयश्च तत इत्यनेन सूचिते विलम्बे हेतुः उपायनं रत्नाद्युत्तमद्रव्यं कुम्भांश्च एवं यात्रामङ्गलमपि सूचितम् ।। ३३ ।। प्रत्यादेशं गमने वैमुख्येनाक्रूरवचनादिखण्डनं यद्वा दूतादिद्वाराऽवधिकरणार्थनिजविज्ञप्तिवाक्यस्य प्रतिवचनमित्यर्थः। अवतस्थिरे दूरतस्तद्दृष्टिविषये परमोच्चदेशे सावधानतया स्थिता इत्यर्थः ।। ३४ ।। केचित्तु यदेवं व्याचक्षते दूतद्वारकसन्देशस्वरूपैरायास्यामि नतु स्वयमिति तदसत् इतिशब्दस्य सर्वान्ते निर्देशाभावात् तदप्रतिपत्तेः सन्देशमात्रागमने प्रत्युत तासां परमक्षोभापत्तेः "आगमिष्यत्यदीर्घेण कालेन व्रजमच्युत" इत्यनेन परमाप्तदूतस्य श्रीमदुद्धवस्य वाक्येन तदुच्छित्तेः दौत्यकैर्गोप्यतया वारम्वारं बहुभिर्दूतवचनैः सप्रेमैर्विविधशपथादिपूर्वकं स्नेहमयैर्नतु सच्छलैरित्यर्थः। यदूत्तम इति। सम्प्रति तन्नामाभिमत्यैव तद्रक्षानिश्चयात् गमने हेतुः आयास्ये इति "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति तत्र लट्प्रयोगोऽपि तच्च दन्तवक्त्रवधानन्तरं सिद्धमिति पाद्मोत्तरखण्डं मूलस्वारस्यञ्च तत्रैवोदाहरिष्यते ।।३५।। अथापि तासां सद्यः प्राणरक्षैवाभूत् नतु शान्तिरित्याह। यावदिति। आलक्ष्यते किञ्चिल्लक्षणेनेषद्दृश्यते इत्यर्थः। तावत्तं रथं रेणुञ्चानु पश्चात् प्रस्थापितात्मानः उपलक्षिता लोकैः समीपे दृष्टाः ।। ३६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तं रथमन्वसज्जन्त, अत्यन्त संलग्नतया पश्चादन्वगच्छन्नित्यर्थः, विविधशंकाद्याकुलचित्तत्वात्। आद्य–शब्देन उपनन्दसन्नन्दादयो वृद्धमुख्याः श्रीदामादयश्च श्रीभगवत्सहचराः, ततोऽक्रूरेण रथचोदनानन्तरमिति। गोपीनामीदृशार्त्तिरोदनेन श्रीकृष्णः कदाचिदेव न प्रयायादिति प्रयाणे शिथिलचित्तानां श्रीदामादीनां तद्रथचोदनानन्तरमेव तत्प्रयाणे निश्चयादित्यर्थः। उपायनं रत्नाद्युत्तम–द्रव्यम्, गोरसैघृतादिभिः सम्यग्भूतान् पूरितान् कुम्भांश्च, यद्वा, भूर्य्युपायनमेव निर्दिशति—कुम्भानिति। शकटैरेवादाय दुष्टकंसस्य प्रीत्युत्पादनार्थम्। एवं वात्रामंगलमपि सूचितम्; घृतादिपूर्णघटदर्शनात् ।। ३३ ।। त्वर्थे चकारो भिन्नोपक्रमे, सह, गच्छतां गोपानां प्रसगतो विरहिणीनां तासां प्रसंगस्य पराभिन्नत्वात्। अनुव्रज्येत्यत्र हेतुः—दयितं प्राणेभ्योऽपि प्रियमित्यर्थः, अन्यथा प्राणाः स्वयमेव सद्यस्तमनुगच्छेयुरिति भावः। किञ्च, कृष्णं परमाकर्षकमनुरञ्जिता इति तैर्व्याख्यातमेव। तत्र महार्त्तिरोदनासहिष्णुतया सहसा रथादवप्लुत्यालिंगनादिना ता अनुरञ्जिताः। पुनश्च रथ आरूढ इति बोद्धव्यम्। प्रत्यादेशं प्रत्याख्यानं निवर्त्तध्वमिति स्वेषामनुगमननिवारणम्। यद्वा, गमने वैमुख्येनाक्रूरवचनादिखण्डनं निवर्त्तनमेवेति। यद्वा, दूतादिद्वारा अवधिकरणार्थं निजविज्ञप्तिवाक्यस्य प्रतिवचनमित्यर्थः ।। ३४ ।। तथापि स्वस्य भगवतः प्रस्थाने सति विषये वा तथा अनिर्वचनीयप्रकारेण तप्यतीस्तापं प्राप्नुवतीर्वीक्ष्य प्रेमसहितैर्विविधशपथादिपूर्वकैरित्यर्थः। यदुत्तमः—निजकारुण्याद्यशेषगुणविस्तारणार्थं यदुकुलेऽवतीर्ण इति तद्योग्यतां दर्शयति, यद्वा, यदुवंश्यश्रेष्ठत्वाम् यदूनां रक्षार्थमेव केवलं याभि, तत्सम्पादनानन्तरं चाहमागतप्राय इत्यादिरूपैरित्यर्थः। एतच्च दन्तवक्रं हत्वा श्रीभगवता गोकुले गतमिति स्ववचः सत्यताकरणं पाद्मोत्तरखण्डे कथितम् ।। ३५ ।। तथापि तासां सद्यः प्रायः प्राणरक्षैव केवलमभूत्, न च शान्तिर्वृत्तेत्याशयेनाह, यावदिति। यद्वा, तावदुपलक्षिता उपलक्षणमात्रत्वेन स्थिताः, न तु साक्षाज्जीवन्निजरूपेणेत्यर्थः। आलक्ष्यते किञ्चिल्लक्षणेनेषद्दृश्यत इत्यर्थः। विकल्पे चकारः। तावत्तं रथं रेणुं वा अनु पश्चात् प्रस्थापितात्मानः, अत एव निश्चेष्टतया लेख्यानीवोपलक्षिता लोकैः समीपे ।। ३६ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आयास्ये हृदि सन्निधाय यास्यामीत्यभिप्रायः ।। ३५–३८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गोरसपूर्णकुम्भादीन् भूरिप्रभृतमुपायनं चादाय ततो नन्दाद्या गोपाः शकटैस्तं रथमनुपृष्ठतः समसज्जन्त सङ्गताः ययुः ।। ३३ ।। तदा गोप्यः कृष्णमनुव्रज्य तेनानुरञ्जिता आश्वासिता भगवतः प्रत्यादेशं प्रत्युत्तरं काङ्क्षन्त्यस्तत्रैवावतस्थिरे ।। ३४ ।। तदा यदूत्तमो भगवान् स्वस्य प्रस्थाने निमित्ते तप्यतीस्तप्यमानास्ताः प्रत्यादेशं काङ्क्षिणीः गोपीः समवलोक्य शीघ्रमागमिष्यामीति दौत्यैः दूतद्वारा प्रेषितैर्वाक्यैः सान्त्वयामास ।। ३५ ।। तदा श्रीकृष्णमनुप्रस्थापिता आत्मानश्चित्तानि याभिस्ता गोप्यः यावत्केतुः पताका लक्ष्यते यावच्च रथस्य रेणुर्दृश्यते तावत्तत्रैव लेख्यानीव चित्रस्थप्रतिमा इव उपतस्थिरे ।। ३६ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रत्यादेशं प्रतिवचनं तिष्ठन्तु नायान्त्विति गमननिषेधपरं वचनं वा ।। ३४ ।। समीचीनतया प्रेषयितुं योग्यैः दौत्यकैः दूतसम्बन्धिभिः वाक्यैः ।। ३५ ।। केतुर्ध्वजः लेख्यानि चित्राणि ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रत्यादेशं प्रत्युत्तरम् ।। ३४–३६ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अनुरञ्जिताः कृष्णेन रथस्थेनैव पश्चिमाभिमुखीभूय स्वप्रेयसीनां निर्गच्छतः प्राणानालक्ष्य भोः प्राणैकवल्लभा माखिद्यत एषोऽहमेतान् वञ्चयित्वा युष्मत्सन्निधिमेष्यामीत्यर्थद्योतकेन निरीक्षणेन किञ्चिदानन्दिताः ततश्चोर्वीदिजाड्ये किञ्चिन्निवृत्ते सति गोप्यश्चेति । यथा गोपा आनन्देन रथमनुव्रजन्ति स्म तथा गोप्यश्च दयितमनुव्रज्य प्रत्यादेशं च काङ्क्षन्त्यः अवतस्थिरे नयनकृतमाश्वासं यथा प्रापुस्तथा वचनकृतमपि तमभिलषन्त्य इत्यर्थः ॥ ३४ ॥ तप्यतीः सन्तप्यमानाः यदूनां पालने प्रवृत्तमतित्वात् यदूत्तमः दौत्यकैर्दूतवाक्यैः कर्मणि ष्यञ् बहुवचनेन यथा तासां प्रबोधो भवति तथा बहुप्रकारैस्तद्विश्वासोत्पादकशपथशतसहितैरित्यर्थः । कप्रत्ययेनानुकम्पाव्यञ्जकैः सप्रेमैः सप्रमभिरिति यथा यूयं मां विना विभिन्नधैर्यास्तथैवाहमपि विदीर्णहृदय एव पराधीन एव भवतीनां स्मितमधुरकटाक्षमाध्वीकं त्रिजगदतिदुल्लभं स्वधीरसनया लिहन्नेव जीवन् पुरीं यामि यद्यह परश्वो नागमिष्यामि तदा यूयमहं च युगपदेव प्राणान् धर्त्तुं न प्रभविष्यामो यदि वा परमायुः प्राबल्यादाशाबन्धाच्च जीविष्यामस्तदपि तज्जीवनं मरणकोटितोऽप्यतिकष्टमित्यादिप्रेमामृतम्रक्षितैरित्यर्थः । आयास्ये आयास्यामि परश्व आगमनप्रकारस्तूपरिष्टाद्व्याख्यास्यते ॥ ३५ ॥ आलक्ष्यते किञ्चिल्लक्षणेनेषद्दृश्यते इत्यर्थः । गच्छन्तं कान्तमनु प्रस्थापिता आत्मानो मनांसि याभिस्ताः अत एव लेख्यानि चित्राणीव उप समीपेऽपि लक्षिता लोकैर्दृष्टाः ॥ ३६ ॥

गूढार्थदीपिनी

गोपाः तं श्रीकृष्णम् अन्वसज्जन्त अन्वगच्छन् ॥ ३३ ॥ तेन अनुरञ्जिताः सन्तोषिताः एष्यामीति कटाक्षसङ्केतेन । प्रत्यादेशं गमनप्रत्याख्यानम् ॥ ३४ ॥ पुनश्च दौत्यकैः दूतवचनैश्च । कर्मणि ष्यञ् अनुकम्पायां कन् ॥ ३५ ॥ लेख्यानि काष्ठपुत्तलिका इव निश्चेष्टाः सत्यः । आत्माचित्तम् ॥ ३६ ॥

श्रीमच्छुकदेवकृता सिद्धान्तप्रदीपः

ततो रथचोदनानन्तरं गोपाः तं रथमन्वसज्जन्त अनुययुः ॥ ३३ ॥ गोप्यश्च कृष्णमनुव्रज्य तेन च निरीक्षणादिभिरनुरञ्जिताः किञ्चिदानन्दिताः भगवतः प्रत्यादेशं प्रत्युत्तरं काङ्क्ष्यन्त्यः अवतस्थिरे ॥ ३४ ॥ यदूत्तमः श्रीकृष्णः स्वप्रस्थाने निमित्त ताः तप्यतीस्तप्यमानाः वीक्ष्य आयास्ये इति दौत्यकैः दूतद्वारकैर्वाक्यैः सान्त्वयामास आयास्ये इति "ज्ञातीन् वो द्रष्टुमेष्यामि विधाय सुहृदां सुख"मिति वक्ष्यमाण च वाक्यं भगवता प्रतिपालितमेवेति सूचितं प्रथमे "यर्ह्यम्बुजाक्षापससार भोभवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया । तत्राब्दकोटिप्रतिमः क्षणो भवेदिति" । हरिवंशे तु हंसडिम्भकवधानन्तरं श्रीगोवर्द्धने श्रीनन्दयशोदागोपीनां श्रीकृष्णादिसंयोगः प्रसिद्ध एव ॥ ३५ तदा गोप्यः श्रीकृष्णमनुप्रस्थापिताः आत्मानः चित्तानि याभिस्ताः यावत् रथस्य केतुर्लक्ष्यते यावद्रेणुश्च लक्ष्यते तावत् तत्रैव लेख्यानीव कुड्यादिषु लिखिताः प्रतिमा इवोपतस्थिरे स्थिता बभूवुः ॥ ३६–३८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यावत्केतुर्ध्वजो रथस्थ रेणुश्च यावदालक्ष्ये दृश्यतेऽनुप्रस्थापितात्मा मनो मनांसि याभिस्ता लेख्यानीव भित्तिचित्रितपुत्तलिका इवोपतस्थिरे । उपाच्चेत्यकर्मकात्तिष्ठतेरात्मनेपदता ॥ ३३ ॥ गोविन्दविनिवर्तने व्रजमाव्रज स्वामिन्निति निवर्तने निराशाः स्वयं निववृतुर्निववृतिरे । नारदेन कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभविति दिनद्वयव्यवहृतिः कंसहतेरुक्तेत्यहनी नारदगमनानन्तरं द्वे इत्येवमुक्तिः । अहनी इति वक्तव्ये दिनद्वयकालहरणं कर्तव्यमित्याभाणकानुसरणेनोक्तिर्वा । प्रियचेष्टितं गायन्त्यो विशोका निन्युर्गमयामासुः ॥ ३४ ॥ रामाक्रूरौ च सम्प्राप्ताविपत्यन्वेति ॥ ३५ ॥ मणेरिन्द्रनीलस्य प्रभा यस्य तद्वृक्षाणां खण्डं सङ्घमुपव्रज्य तद्युतमार्गेणोपव्रज्य सरामो रथमाविशत् ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो गमनोत्सवो जात इति वक्तुमाह । गोपा इति । तं भगवद्रथमनु असज्जन्त तत एव हेतोः ततो गोकुलाद्वा उपायनं गोरससम्भृतान् कुम्भांश्चादाय अवश्यगमने अत्यासक्तौ च तेषां हेतुरुक्तः भगवत्परिपालितानां रसो भगवतैव भोक्तव्य इति ॥३३॥ ततो गोपिकारोदने पूर्ववद्भगवानन्तः प्रकट इति विशेषमनुक्त्वा पूर्ववदेव सिद्धत्वात् अग्रिमवृत्तान्तमेवाह । गोप्यश्चेति चतुर्भिः । गोप्यश्च भगवत्सङ्गे गताः सूक्ष्मरूपाः स्थूलास्तु दयितं भर्त्तारं कृष्णं सदानन्दमनुव्रज्य कियद्दूरे सङ्गे गताः ततो भगवता अनुरञ्जिताः स्वरागेण रक्ताः मध्यप्रदेशे प्रत्युत्तरं भगवतः काङ्क्षन्त्यः किमस्माभिरागन्तव्यं स्वामिना वा आगन्तव्यमिति नान्यः प्रकारोऽस्ति निस्तार इति अवतस्थिरे तथैव स्थिताः ॥ ३४ ॥ ततो भगवता यत्कृतं तदाह । ता इति । याः स्थिताः याश्च नाविर्भूतस्वरूपाः तासामर्थे तथा सन्तापयुक्ता वीक्ष्य स्वप्नमेव निमित्तमिति यदुराजसिंहः यादवकार्यमपि कर्त्तव्यमिति सम्प्रेष्यैरुत्तमदूतैः अहमेवायास्य इति दौत्यकैर्दूतवाक्यैः सान्त्वयामास अत्र तासां वाक्ये भ्रमो जातः भगवांस्तु दूतवाक्यद्वारा शब्दार्थरूपः ज्ञानरूपो वा आगमिष्यामीत्याद्युक्तवान् दौत्यवाक्यैरायास्य इति ताः पुनः इदानीमेतदेव वचनं दूतकार्यमिति ज्ञातवत्यः इदं भगवच्चरित्रमेव

अन्यथा न वक्तव्यं स्यात् ॥ ३५ ॥ तास्तथोक्ता अपि भगवत्संबन्धदर्शनार्थं तथैव स्थिता इत्याह । बतेति शब्दादर्थो महानिति अर्थसम्बधार्थं तथा कथनं यावता कालेन केतुर्ध्वजः लक्ष्यतेऽपि सम्भावनयापि दृश्यते यावद्वा रथस्य वेणुरपि तावत्पर्यन्तं भगवत्सङ्गे अनुप्रस्थापितान्तःकरणाः आधिदैविकरूपाः जीवस्वरूपा वा शरीरमात्रेण लेख्यानीव उपलक्षिताः प्रतिमायां चलनं भवतीति तद्व्यावृत्त्यर्थमुक्तम् आकृतिमात्रं तत्र स्थितं स्वरूपं तु भगवता सह गतमिति वा ॥ ३६ ॥

श्रीसुबोधिनी-सारः

तमनु तस्य पृष्ठतः नंदाद्या गोपा अन्वगच्छन् शकटैः भूरि बहु उपायनं बलिमुपादाय गृहीत्वा गोरसैः संभृतान् पूर्णान् कुंभान् घटान् आदाय ॥ ३३ ॥ दयितं प्रियं कृष्णमनुव्रज्यानुरंजिताः स्निग्धाः गोप्यो भगवतः प्रत्यादेशं प्रतिवचनमिच्छंत्योऽवतस्थिरे ॥ ३४ ॥ स्वप्रस्थाने स्वयात्रानिमित्तं तथोक्तप्रकारेण तप्यतीः संतप्यमानास्ता गोपीर्वीक्ष्य दृष्ट्वा यदूत्तमः श्रीकृष्ण आयास्ये आगमिष्यामीति सप्रेमैर्दूतवाक्यैः सांत्वयामास ॥ ३५ ॥ रथस्य केतुः ध्वजो यावत् आलक्ष्यते रेणुश्च कृष्णमनुप्रस्थापिता आत्मानश्चित्तानि याभिस्ता लेख्यानि चित्रार्पितानीवोपलक्षिताः ॥ ३६ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

ततस्तदनन्तरं भूरि उपायनं देयमुत्तमं वस्तु तथा गोरससम्भृतान् कुम्भांश्चादाय नन्दाद्या गोपाः शकटैस्तं कृष्णरथमन्वसज्जन्त पृष्ठतो ययुरित्यन्वयः ॥ ३३ ॥ तदा गोप्यश्च दयितं प्रियं कृष्णमनुव्रज्य तेनानुरञ्जिताः परावृत्य दर्शनादिना किञ्चिदानन्दिताः भगवतः प्रत्यादेशं गमनप्रत्याख्यानं काङ्क्षन्त्य एव अवतस्थिरे स्थिताः ॥ ३४ ॥ तदा यदूत्तमो भगवान् कृष्णः स्वप्रस्थाने निमित्ते ता गोपीस्तथा तप्यतीस्तप्यमाना वीक्ष्य सप्रेमैः प्रेमसहितैः आयास्ये 'शीघ्रमागमिष्यामि' इति दौत्यकैर्दूतवाक्यैः सान्त्वयामास ॥ ३५ ॥ तदा च श्रीकृष्णमनुप्रस्थापिता आत्मानश्चित्तानि याभिस्ता गोप्यो यावद्रथस्य केतुरालक्ष्यते यावच्च रेणुरालक्ष्यते तावत्कालं लेख्यानीव चित्रलिखितप्रतिमा इव उपलक्षिता तत्रैवोपतस्थिरे ॥ ३६ ॥

अन्वितार्थप्रकाशिका

गोपा इति । ततः भूरि उपायनं देयमुत्तमं वस्तु तथा गोरससम्भृतान् कुम्भांश्चादाय नन्दाद्या गोपाः शकटैस्तं कृष्णरथमन्वसज्जन्त पृष्ठतो ययुः ॥ ३३ ॥ गोप्य इति । तदा गोप्यश्च दयितं प्रियं कृष्णमनुव्रज्य तेनानुरञ्जिताः परावृत्य दर्शनादिना किञ्चिदानन्दिताः भगवतः प्रत्यादेशं गमनप्रत्याख्यानं काङ्क्षन्त्य एवावतस्थिरे स्थिताः ॥ ३४ ॥ ता इति । तदा यदूत्तमो भगवान् कृष्णः स्वप्रस्थाने निमित्ते ता गोपीस्तथा तप्यतीर्दुःखिताः वीक्ष्य सप्रेमैः प्रेमसहितैः बहुप्रकारैः सशपथैः । अदन्तत्वमार्षम् । आयास्ये शीघ्रमागमिष्यामि । तङार्षः । इति दौत्यकैर्दूतवाक्यैः । कर्मणि ष्यञ् । अनुकम्पायां कन् । सान्त्वयामास । आगमनं चेदं दन्तवक्त्रवधानन्तरं भविष्यति तत्रैव भगवता स्थायिष्यते चेति न भक्तवञ्चकत्वं हरेः ॥ ३५ ॥ यावदिति । तदा च श्रीकृष्णमनुप्रस्थापिताः आत्मनश्चित्तानि याभिस्ता गोप्यो यावद्रथस्य केतुः आ ईषदपि लक्ष्यते यावच्च रेणुरालक्ष्यते तावत्कालं लेख्यानीव चित्रलिखितप्रतिमा इव तत्रत्यैः उपलक्षिताः तत्रैवोपतस्थिरे ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अन्वसज्जन्त अनुजग्मुः ॥ ३३ ॥ प्रत्यगीक्षणैन अनुरंजिताः किंचिदानंदिताः कृष्णमनुव्रज्य प्रत्यादेशं प्रतिवचनं कांक्ष्यंत्यः ॥३४॥ स्वस्य प्रस्थाने प्रयाणे तप्यतीः संतप्यमानास्ताः गोपीः वीक्ष्य अहं आयास्ये शीघ्रमागमिष्यामि सप्रेमैः स प्रेमभिः अदंतत्वमार्षंदौत्पकैर्दूतवचनैः सांत्वयामासः ॥ ३५ ॥ श्रीकृष्णमनुप्रस्थापिताः अनुगमिता आत्मानः अन्तःकरणानि याभिस्ताः लेख्यानीवलिखितपुत्रीका इव उपलक्षिताः उपतस्थिरे इत्यपिपाठः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गोपा इति ॥ गोरससंभृतान् संभृतगोरसपूर्णान्, भूरयश्च ते कुम्भाश्च तान्, उपायनं च, आदाय, ततः नन्दाद्याः गोपाः शकटैः तं रथं, अनुपृष्ठतः असज्जन्त संगता ययुः ॥ ३३ ॥ गोप्यश्चेति ॥ तदा गोप्यश्च गोप्योऽपि, दयितं प्राणप्रियं, कृष्णं अनुव्रज्य पृष्ठत आगत्य, विलोकयन्त्य इति शेषः । अत एव, अनुरञ्जिताः तेन कृष्णेन परावृत्त्य निरीक्षणादिभिः किंचिदानन्दिताः आश्वासिता इति यावत् । तथापि, भगवतः श्रीकृष्णस्य, प्रत्यादेशं प्रत्याख्यानं प्रत्युत्तरमित्यर्थः । काङ्क्षन्त्य इच्छन्त्यश्च सत्यः, तत्रैव तस्थिरे ॥ ३४ ॥ ता इति ॥ तदा, यदूत्तमः भगवान्, स्वप्रस्थाने निमित्ते, तप्यतीस्तप्यमानाः, ताः प्रत्यादेशकाङ्क्षिणीः गोपीः, वीक्ष्य समवलोक्य, आयास्ये शीघ्रमागमिष्यामि, इत्येवंविधैः सप्रेमैः, दौत्यकैः दूतद्वारा प्रेषितैर्वाक्यैः, सान्त्वयामास ॥ ३५ ॥ यावदिति ॥ ता अनु श्रीकृष्णस्य पश्चात् प्रस्थापिता आत्मानश्चित्तानि याभिस्ताः गोप्यः, यावत् केतुः रथपताका, आलक्ष्यते दृश्यते, यावच्च रथस्य रेणुः, आलक्ष्यते तावच्च तत्रैव, लेख्यानीव चित्रस्थप्रतिमा इव, उपतस्थिरे ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तास्तथेति : १०.३९.३५

आसां मद्विरहाग्नितप्तमनसां तापोपशान्तिस्तथा कार्या संप्रति मद्वचो नहि यथा स्यादप्रमाणं पुरः।
इत्यन्तर्विहिताशयोऽत्र च पुनर्दूतात्मनात्मागममायास्ये इति दौत्यकैरिति पदैरुचेऽच्युतः प्रायशः ॥ ८८ ॥
पुनरत्राहमायास्य इत्युक्तिरनुपेयुषः। श्रीपतेरन्यथा चिन्त्यप्रामाण्या स्यादितीक्ष्यताम् ॥ ८९ ॥ (युग्मम्)

यावदिति : १०.३९.३६

आरजोध्वजदृष्टिं तं पश्यन्तीभिः प्रदर्शितः। विश्वव्याप्तेशसद्रूपसाक्षात्कृतिविधिर्ध्रुवम् ॥ ९० ॥

कृष्णप्रिया

नन्दबाबा आदि गोपों ने भी दूध, दही, मक्खन, घी आदि से भरे मटके और भेंट की। बहुत-सी सामग्रियाँ ले लीं तथा वे छकड़ों पर चढ़कर उनके पीछे-पीछे चले ॥ ३३ ॥ इसी समय अनुराग के रंग में रंगी हुई गोपियाँ अपने-प्राणप्यारे श्रीकृष्ण के पास गयीं और उनकी चितवन, मुसकान आदि निरखकर कुछ-कुछ सुखी हुई। अब वे अपने प्रियतम श्यामसुन्दर से कुछ सन्देश पाने की आकाङ्क्षा से वहीं खड़ी हो गयीं ॥ ३४ ॥ यदुवंशशिरोमणि भगवान् श्रीकृष्ण ने देखा कि मेरे मथुरा जाने से गोपियों के हृदय में बड़ी जलन हो रही हैं, वे संतप्त हो रही हैं तब उन्होंने दूत के द्वारा 'मैं आऊँगा' यह प्रेम-सन्देश भेजकर उन्हें धीरज बँधाया ॥ ३५ ॥ गोपियों को जबतक रथ की ध्वजा और पहियों से उड़ती हुई धूल दीखती रही, तबतक उनके शरीर चित्रलिखित-से वहीं ज्यों-के त्यों खड़े रहे। परन्तु उन्होंने अपना चित्त तो मनमोहन प्राणवल्लभ श्रीकृष्ण के साथ ही भेज दिया था ॥ ३६ ॥

ता निराशा निववृतुर्गोविन्दविनिवर्तने। विशोका [1]अहनी निन्युर्गायन्त्यः प्रियचेष्टितम् ॥ ३७ ॥
भगवानपि सम्प्राप्तो [2]रामाक्रूरयुतो नृप। रथेन वायुवेगेन कालिन्दीमघनाशिनीम् ॥ ३८ ॥
तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभम्। [3]वृक्षखण्डमुपव्रज्य सरामो रथमाविशत् ॥ ३९ ॥
अक्रूरस्तावुपामन्त्र्य[4] निवेश्य च रथोपरि। कालिन्द्या [5]ह्रदमागत्य स्नानं विधिवदाचरत् ॥ ४० ॥

कर्दमक्षमा

अन्वयः—गोविन्दविनिवर्तने, निराशा, निववृतुः, (पुनः) प्रियचेष्टितम्, गायन्त्यः, विशोका, अहनी, निन्युः ॥३७॥ हे नृप ? रामाक्रूरयुतः, भगवान्, अपि, वायुवेगेन, रथेन, अघनाशिनीम्, कालिन्दीम्, सम्प्राप्तः ॥ ३८ ॥ तत्र, सरामः, (भगवान्) पानीयम्, उपस्पृश्य, मणिप्रभम्, मृष्टम्, पानीयम्, पीत्वा, वृक्षखण्डम्, उपस्पृश्य, रथम्, आविशत् ॥ ३८ ॥ अक्रूरः, तौ, रथोपरि, निवेश्य, च, तौ, उपामन्त्र्य कालिन्द्याः, ह्रदम्, आगत्य, विधिवत्, स्नानम्, आचरत् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वृक्षाणां षंडं समूहमुपव्रज्य ॥ ३९ ॥ शत्रुभ्यः शंकितः सन् रथोपरि निवेश्य ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रियचेष्टितं कृष्णलीलां प्रगायन्त्यो विशोकाः सत्यः। यद्वा–विशिष्टशोकाः। अतो गोविन्दस्य विशेषेण मथुरागमनोन्मुख्यं विनैव निवर्तने निराशाः। किन्तु तत आगमन एव साशाः सत्यो निवृत्ता इत्यर्थः। आयास्य इति तेनोक्तत्वात्तथैवाहप्रियस्य कृष्णस्य चेष्टितं तस्मान्मच्छरणं गोष्ठं' इत्यादिलक्षणं तत्तत्प्रतिपालकं चरितमायास्य इत्यस्य प्रमाणरूपं गायन्त्यो विशोका आशाच्छेदज्ञानेन मर्मपर्यन्तभेदकेन प्रियविच्छेदं जानन्त्यस्तद्दुखाशंकालक्षणेन शोकेन रहिताः सत्योऽहनी निन्युरदर्शनदुखातिशयं विषह्य गमयामासुरन्यथा क्षणमपि नागमिष्यन्नित्यर्थः। तथैव श्रीभगवता वक्ष्यते—"धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन। प्रत्यागमनसंदेशैर्बल्लव्यो मे मदात्मिकाः।" इति। श्रीमदुद्धवेन च—"गायन्ति ते विशदकर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च। गोप्यश्च" इत्यादि। अहनी रात्र्यहनी। तद्विशेषस्तु लीलास्तोत्रादौ वर्णितः ॥ ३७ ॥ अपिशब्देन गोपगणोऽपि। कालिन्दीं कलिन्दगिरिसंभूताम्। अथ तासामिव प्रियजनप्रेमार्द्रतास्वभावेन सकलश्रुतिस्मृतिगीतस्य श्रीकृष्णस्याप्यार्ति-

---

१. अहानि-वीर.। २. रामाक्रूरौ तथा नृप–विज.। ३. षण्ड–श्रीधर. वंशी. जीव. वीर. विश्व. शुकादयः। ४. तावथा–वीर.। ५. तीर–इति कस्यचित्।

र्जातैव, किन्तु गांभीर्येणैव गोपिता दौत्यकैरिति बहुवचनेन तदावेशसूचनात्। गमनं त्वावश्यककार्यविशेषार्थमेवेत्याह— भगवानपीति। सोऽपि तद्दुःखदर्शनाक्षमतया वायुवेगेन तद्वच्छीघ्रतया चालितेन रथेन कालिन्दीमनन्ततीर्थप्रदेशावच्छिन्नां सम्यक्प्राप्तः। अघानि दुःखव्यसनानि नाशयतीति ताम्। निजविरहतापनाशिनी सा भवेदिति बुद्ध्यैवेत्यर्थः। ननु तद्दुःखं न तत्र स्पष्ट दृष्ट तत्राह—रामेति। तत्संकोचान्निगूहितमिति भावः। ननु तर्हि व्याजेनापि कथं न निवृत्तस्तत्राप्याह—रामेति। कालिन्दीप्राप्तिश्चेयं मध्याह्ने। तथा च श्रीविष्णुपुराणे—“गच्छन्तो जीविनाश्वेन रथेन यमुनातटम्। प्राप्ता मध्याह्नसमये रामाक्रूरजनार्दनाः।” इति। अत एवान्ये तत्संगे गंतुं न शक्ताः। तत्र तदानीं नंदीश्वरगिरिसन्निहितः श्रीनंदनिलय इति प्रसिद्धावपि यद्यपि तादृशवेगस्य रथस्य तावान्विलम्बो न संभवति तथाप्यसौ मुहुर्दूत्यादिद्वारा श्रीगोपिकासान्त्वनबाहुल्येन वृक्षावृततया रथगमने कौटिल्येन च ज्ञेयः॥ ३८॥ तत्र कालिन्द्याम्। मृष्टमतिपूतम्। मणेर्दिनमणेः। प्रभवत्युद्भवतीति तथा। एकदेशन्यायोऽत्र बोध्यः, एकदेशस्त्वादिमोऽतिमो वातोऽत्रांत्यैकदेशो गृहीतः। ‘निशम्य भानुनंदिनी’ इतिवत्। यथा वृषभानुनंदिन्यां राधायां शिवेन भानुनंदिनीत्युक्तं तद्विदिहापि, श्याममणिसदृशं वा॥ ३९॥ तौ रामकृष्णौ। शत्रुभ्यः कंसानुयायिभ्यः। अधोगतौ मा गृह्णीयुरिति शंकितः। अहो श्रीव्रजदेवीमनःक्षोभात्किल तदाप्यक्रूरस्य तन्निजपरममधुरवैभवावगाहिता यथा ब्रह्मादेर्जाता तथा न जातेत्याह—अक्रूर इति त्रिभिः। तावुपामंत्र्य अनुज्ञाप्य। रथोपरीति सुखोपवेशार्थम्। कालिन्द्या ह्रदमनन्ततीर्थम्॥ ४०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अतो गोविन्दस्य विशेषेण मथुरागमनोन्मुख्यं विनैव निवर्त्तने निराशाः किन्तु ततः आगमन एव साशाः सद्यो निवृत्ता इत्यर्थः। आयास्य इति तेनोक्तत्वात् तथैवाह। प्रियस्य श्रीकृष्णस्य चेष्टितं तस्मान्मच्छरणं गोष्ठमित्यादिलक्षणं तत्तत्प्रतिपालकं चरितम् आयास्य इत्यस्य प्रमाणरूपं गायन्त्यो विशोका आशाच्छेदजातेन कर्मपर्यन्तभेदकेन प्रियविच्छेदं जानन्त्यस्तद्दुःखाशङ्कालक्षणेन शोकेन रहिताः सद्योऽहनी निन्युरदर्शनदुःखातिशयं विषह्य गमयामासुः अन्यथा क्षणमपि नागमिष्यन्नित्यर्थः। यथैव स्वयं श्रीभगवता वक्ष्यते “धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन। प्रत्यागमनसन्देशैर्वल्लव्यो मे मदात्मिका” इति श्रीमदुद्धवेन च “गायन्ति ते विशदकर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणञ्च। गोप्य”श्चेत्यादि अहनी रात्र्यहनी इत्यर्थः। तद्विशेषस्तु लीलास्तोत्रादौ वर्णितः॥ ३७॥ अथ तासामिव प्रियजनप्रेमार्द्रतास्वभावेन सकलश्रुतिस्मृतिगीतस्य श्रीकृष्णस्यापि आर्त्तिर्जातैव किन्तु गाम्भीर्येणैव गोपिता दौत्यकैरिति बहुवचनेन तदावेशसूचनात् गमनं त्वावश्यकार्यविशेषार्थमेवेत्याह। भगवानपीति। सोऽपि तद्दुःखदर्शनाक्षमतया वायुवेगेन तद्वत् शीघ्रतया चालितेन रथेन कालिन्दीमनन्तीर्थप्रदेशावच्छिन्नां सम्यक् प्राप्तः कीदृशीमघानि अङ्गोदुःखव्यसनानि नाशयतीति तां निजविरहतापनाशिनीं सा भवेदिति बुद्ध्येवेत्यर्थः। ननु तद्दुखं न तत्र स्पष्ट दृष्टं तत्राह। रामेति। तत्सङ्कोचान्निगूहितमिति भावः। ननु तर्हि व्याजेनापि कथं न निवृत्तस्तत्राप्याह। रामेति। श्रीवसुदेवादित्राणाग्राहिणा तद्युगलसङ्गेन तस्यापि तदावश्यककर्त्तव्यता भगवदुद्दीपनादिति भावः। कालिन्दी प्राप्तिश्चेयं मध्याह्न तथा च श्रीविष्णुपुराणे “गच्छन्तो जीविनाश्वेन रथेन यमुना तटम्। प्राप्ता मध्याह्नसमये रामाक्रूरजनार्दना” इति अत एवान्ये तत्सङ्गे न गन्तु न शक्ताः तत्र तदानीं नन्दीश्वरगिरिसन्निहितः श्रीनन्दनिलय इति प्रसिद्धावपि यद्यपि तादृशवेगस्य रथस्य तावान् विलम्बो न सम्भवति तथाप्यसौ मुहुर्दुतादिद्वारा श्रीगोपिकासान्त्वनबाहुल्येन वृक्षावृततया रथगमने कौटिल्येन च ज्ञेयः॥ ३८॥ उपस्पृश्य आचम्य आविशत् आरुरोह॥ ३९॥ अहो श्रीव्रजदेवीमनःक्षोभात् किल तदाप्यक्रूरस्य तन्निजपरममधुरवैभवावगाहिता यथा ब्रह्मादेर्जाता तथा न जातेत्याह। अक्रूर इति त्रिभिः। तावुपामन्त्र्य अनुज्ञाप्य रथोपरीति सुखोपवेशार्थं कालिन्द्या ह्रदमनन्ततीर्थं तीरमिति क्वचित् पाठः॥ ४०॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गोविन्दस्य गोकुलेन्द्रस्यापि विशेषेण गोकुलान्तःप्रवेशादिना निवर्त्तने परावृत्तौ निराशाः, प्रियजनपरवशस्य परदुःखासहिष्णोस्तस्य निवृत्तौ कृताशानामपि चिरं तस्यानिवृत्त्या तदानीं तदाशापगमात्। ननु कथं ताभिः प्राणाधारिताः? इत्यपेक्षायामाह—विशोका इति। प्रियस्य श्रीकृष्णस्य चेष्टितं पूतनावधादिकर्म्म; किंवा प्रियं चेष्टितं रासक्रीडादि गायन्त्यो विशोकाः, अपगतोत्तापा गतान्यशोचना वा, अहनी दिवा नक्तञ्च निन्युः, तच्चेष्टितगानस्य प्राणरक्षाहेतुत्वादित्यर्थः। यद्वा, विविधशोकाः सत्य एव; तत्र हेतुविशेषः—गायन्त्य इति, प्रियचेष्टितगानेन विरहतापस्य विशेषतो वर्द्धनात्। यद्वा, ताः सर्व्वा गायन्त्योऽपि विशोकाः सत्योऽहनी निन्युः। किंवा, काक्वा काश्चिच्च न निन्युरित्यर्थः। तत्र हेतुः—गोविन्दविनिवर्त्तने निराशा इत्येव। तद्विशेषस्तु श्रीबादरायणिना परमार्त्तिहेतुत्वादप्रकाशितोऽपि (दशमांके ३८-श-श्लोकानन्तरम्) ललितमाधवनाटकात् (४२४ तम-श्लो०) लीलास्तोत्रादपि विज्ञेयः। यद्वा, तच्चेष्टितगानेन तत्तल्लीलाविष्टत्वात् साक्षादिव प्रियस्यानुभवेन विशोकाः। नित्यलीलानुसारेण केचिद्वैष्णवा एवं व्याचक्षते,—ननु ‘गोगोपगोपिकासंगे यत्र क्रीडति कंसहा’ इत्यादिपाद्मपातालखण्डादिवचनेभ्यस्तथा कैश्चिन्महाभागवतैः श्रीविल्वमंगलादिभिरद्यापि श्रीवृन्दावने तत्तल्लीलादर्शनात्, कथं तस्य सर्व्वात्मना व्रजत्यागः सम्भवेत्? सत्यम्,

कृतासौ प्रकटलीलाया अनुसारेण सार्व्वत्रिकी व्याख्या। इयं लीला सर्व्वपुराणादिषु मुनिभिर्व्यक्ततया भण्यते। या खलु नित्यलीला सा परमनिगूढ़ा, तेनैषा श्रीभगवन्मतानुसारिभिर्मुनिभिः प्रायो निह्नूयते, किन्तु कैश्चिन्महाभागवतैः क्वचित् परोक्षवादेन क्वचिदतिसंक्षेपेणैव मनाक् सूच्यते, यथा दशमेऽत्रैवाग्रे (१०।४४।१३)—'पुण्या बत व्रजभुवो यदयं नृलिंग,-गूढ़ः पुराणपुरुषो वनचित्रमाल्यः। गाः पालयन् सहबलः क्वणयंश्च वेणुं, विक्रीडयाञ्चति' इत्यादौ वर्त्तमाननिर्द्देशात् पुरस्त्रीमुखेन सूचनम्। अत एकस्यैव भगवतः प्रकाशभेदेनेदमविरुद्धम्, तेनैकेन प्रकाशेन कृष्णः सदा वृन्दावने विहरत एव; तथा च रुद्रयामले—'द्विभुजः सर्व्वदा सोऽस्ति न कदाचिच्चतुर्भुजः। गोप्यैकया युतस्तत्र परिक्रीडति नित्यदा।' एकया मुख्यया गोप्या श्रीराधया, ललितादीनां सम्भवेऽपि प्राधान्याभिप्रायेण गोप्येत्युक्तम्, तत्र वृन्दावने नित्यदा नित्यमेव। तथा—'वृन्दावनं परित्यज्य स क्वचिन्नैव गच्छति' इति पूर्व्वमेव लिखितम्, तेन प्रकाशान्तरेण तु पुरीं प्रस्थित इति; अतः सर्व्व एव श्रीभगवत्प्रियजना व्रजवासिप्रभृतयोऽपि लीलाद्वये प्रकाशभेदेन द्विधा वर्त्तन्ते, यथा द्वारवत्यामेक एवोद्धवः श्रीनारदेनानेकत्र दृष्ट इति। ततश्चायमर्थः—प्रकटलीलानुसारिण्यो व्रजदेव्यो गोविन्दविनिवर्त्तने निराशाः सत्यो निववृतुर्निवृत्ताः; एताः प्रत्येव श्रीमदुद्धवेन श्रीकृष्णसन्देशो वक्ष्यते, ता एव प्रकाशान्तरेण नित्यलीलानुसारिण्यः; प्रियचेष्टितं प्रियं चेष्टितञ्च तदीयं रासक्रीडादौ साक्षादेव गायन्त्यो विशोकाः शोकानभिज्ञाः परमानन्दे निमग्ना इति यावत्, अहनी रात्रिन्दिनं निन्युरिति। पुनः प्रकटलीलामेव कथयन् (भा० १०।३२।२) 'तासाम्' इत्यादि ॥ ३७ ॥ तथा तासामिव श्रीकृष्णस्यापि परमार्त्तिर्जातेत्याह—भगवानपीति। यथा ताः तथा सोऽपीत्यपि-शब्दार्थः। तदेव बोधयति—रामेणाक्रूरेण च युत इति ताभ्यां विविधप्रबोधनादिना पार्श्वद्वय व्याजधारणादिना च संयुक्तावित्यर्थः। सम्यक् तत्क्षणादेवान्तःप्रवेशेन कालिन्दीं प्राप्तः। तत्र हेतुः—वायुनद्वेगो यस्य तेन रथेनेति सहजपरमजविनामपि अश्वानामक्रूरेण प्रयत्नतो मुहुः कशाघातैराशु प्रेरणात् कालिन्दीप्राप्तिश्च मध्याह्ने इति बोद्धव्यम्, (विष्णु० पु० ५।१८।३३)—'गच्छन्तो जीविनाश्वेन रथेन यमुनातटम्। प्राप्ता मध्याह्नसमये रामाक्रूरजनार्द्दनाः ॥' इति श्रीपराशरोक्तेः, यद्यपि श्रीनन्दगृहतः प्रसिद्धं श्रीयमुनातटाक्रूरतीर्थं क्रोशद्वादशमात्रान्तरे वर्तते, तथापि वायुवेगेन रथेन मध्याह्ने तत्संप्राप्तिः श्रीगोपीगणादीनां परिसान्त्वनेन, तथा मृतवत् पथि निपतितानां गोपीनां गवादीनाञ्च वञ्चनाय वक्रातिवक्रविविधपरिभ्रमगत्या रथनिःसारणेन च बहुलकालात्ययादिति। हे नृपेति परमशोकार्त्तं राजानं स्वस्थयति; यद्वा, स्वयमेव शोकार्त्या सम्बोधयति। अघमपराधं नाशयतीति तथा तामिति श्रीगोपीविषयकापराधभयेनाक्रूरस्य तच्छोधनार्थं स्नानाद्यभिप्रायेणोक्तम् ॥ ३८ ॥ तत्र तस्यां कालिन्द्याम्, उपस्पृश्य रथादवतीर्य्य भगवानादावाचमनं कृत्वा श्रीगोप्यादिविरहोद्गताश्रुलालाधारादिशोधनार्थम्, पीत्वेति वर्त्मश्रमात्, किंवा प्रियजनप्रेमवशतया तद्विरहतापेन सन्तापितस्य परिशोषितस्य चात्मनोऽनुसन्तर्पणार्थम्, मणिवत् प्रभा कान्तिर्यस्येति स्वच्छत्वं गाम्भीर्य्यं चोक्तम्, तेन शैत्यं सूचितम्। सराम इति तस्यापि सर्व्वं तादृशत्वं सूचितम्। रथमाविशत् पुनरारुह्य माध्याह्निकतापवञ्चनार्थं रथनीडान्तः प्रविवेशेत्यर्थः ॥ ३९ ॥ तावुपामन्त्र्य पृष्ट्वा अनुज्ञामादायेत्यर्थः। निवेश्य उपवेश्य, तदभिप्रायस्त्वर्व्यञ्जित एव। यद्वा, व्रजे गमनशंकया निवेश्य कालिन्द्या ह्रदगमनं तत्तीर्थमिति ख्यातम्, विधिर्यथा तथेत्यर्थः। विधिश्चादौ तीर्थप्रणामाचमनादिलक्षणः पद्मपुराणे यमुनामाहात्म्यादौ प्रसिद्धः, श्रीभगवद्भक्तिविलासे लिखित एव ॥ ४० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मृष्टमणिप्रभं शुद्धमरकतप्रभम् ॥ ३९–४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो गोविन्दस्य विनिर्त्तने दूरगमने सति निराशास्ता गोप्यो निववृतुः न्यवर्त्तन्त ततः प्रियस्य श्रीकृष्णस्यैव चेष्टितं गायन्त्यस्तेनैव विगतशोकाः अहानि निन्युः क्रमितवत्यः ॥ ३७ ॥ हे नृप! रामाक्रूराभ्यां युक्तो भगवानपि वायोरिव वेगो यस्य तेन रथेन साधनेनाघं नाशयतीति तथा तां कालिन्दीं कालिन्दीगतं तीर्थविशेषं प्राप्तः ॥ ३८ ॥ मृष्टस्य निघर्षणेन निर्मलीकृतस्य मणेरिन्द्रनीलस्येव प्रभायस्य तत्पानीयं जलं पीत्वा उपस्पृश्याचम्य च वृक्षाणां षण्डं समूहमुपव्रज्य सरामो रथमाविशत् आरूढवान् ॥ ३९ ॥ तदाक्रूरः शत्रुभ्यः शङ्कितः तौ रामकृष्णौ रथोपरि निवेश्यामन्त्र्य पृष्ट्वा माध्याह्निकार्थं कालिन्द्या ह्रदमागत्य तत्र यथाविधिस्नानमाचरत् कर्त्तुमारेभे ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गोविन्दविनिवर्तने कृष्णदर्शने ॥ ३७–३८ ॥ श्याममणिप्रभम् ॥ ३९–४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गोविन्दस्य विशेषेण मथुरागमनं विनैव वर्त्तने निराशाः किन्तु आगमन एव साशाः सत्यः निवृत्ता इत्यर्थः। अत एव विशोकाः पूर्वापेक्षया शोकरहिता अपि प्रियचेष्टितमेव गायन्त्योऽहनी निन्युरित्यर्थः ॥ ३७ ॥ अथ तासामिव लीलारसाविष्टस्य श्रीकृष्णस्यापि दुःखं जातमेव किन्तु गोपितं तथापि गमनमावश्यककार्य्यविशेषार्थमेवेत्याह। भगवानपीति। सोऽपि तद्दुःख-

दर्शनाक्षमः सन् वायुवेगेन तच्छीघ्रतया चालितेन रथेन कालिन्दीं सम्प्राप्तः अघसङ्घानि दुःखव्यसनानि नाशयतीति तां निजविरहतापनाशिनी सा भवेदिति बुद्धय्येत्यर्थः। तत्तद्दुःखं न तत्र स्पष्टं तत्राह। रामेति। ताभ्यां सङ्कोचान्निगृहितमिति भावः ॥ ३८–४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गोविन्दस्य विनिवर्त्तने निराशास्तास्ततः स्थानान्निववृतुः स्वयमेवासौ सर्वान् वञ्चयित्वा निवर्त्तिष्यत इति वा आशा आसीत् सा नष्टेत्यर्थः। विशिष्टशोकवत्य एव अहनी द्वेनिन्युः। अहनी इत्यार्षम्। अहानीत्यर्थ इत्येके ॥ ३७–३९ ॥ रथोपरि निवेश्येति सुखोपवेशार्थं शत्रुभ्यः शङ्कया वा ॥ ४०-४३ ॥

गूढार्थदीपिनी

अहनी रात्र्यहनी ॥ ३७ ॥ सम्प्राप्तः मध्याह्नसमये। प्राप्तो मध्याह्नसमये इति विष्णुपुराणोक्तेः। विलम्बस्तु मार्गविरोधतया ॥ ३८ ॥ मणिः नीलमणिः। मृष्टं निर्मलम् षण्डे समूहम् सरामः कृष्णः ॥ ३९ ॥ उपामन्त्र्य पृष्ट्वा ह्रदम् अनन्ततीर्थाख्यं तीरम् ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वृक्षषण्डं वृक्षसमूहम् ॥ ३९–४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्नानं मध्यान्हिकं ह्रदं ब्रह्मसंज्ञं ॥ ३७ ॥ तस्मिन्ह्रदोदके निमज्य सनातनमपौरुषेयतया नित्यं ब्रह्माघमर्षसूक्तं जपन्सनातनं ब्रह्म नारायणाख्यं जपन्निति वा समन्वितौ मिलितौ ॥ ३८ ॥ रथस्थौ तावानकदुन्दुभेः सुताविह ह्रदे कर्हिचित्स्यन्दने रथे न स्तः किमित्युन्मज्जनमुतमज्जनं कृत्वा वारुपरि मुखं कृत्वा सोऽक्रूरो व्यचष्टापश्यत् ॥ ३९ ॥ तत्रापि रथेऽपि यथापूर्वमासीनौ व्यचष्टेत्यन्वेति। निमज्य यत्तयोर्दर्शनं तन्मृषा किमिति मेने सन्दिग्धे ॥ ४० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततोऽपि दूरङ्गते निवृत्ता जाता इत्याह। ता निराशा इति। निवृत्ताशा जाताः केनचिन्निमित्तेनाद्यैव भगवान्निवर्त्तिष्यत इति ततः कथं जीवितवत्य इत्याशङ्क्याह। प्रियचेष्टितं गायन्त्यः भगवद्गुणा अपि भगवानेवेति तेनैव विशोकाः अहनी निन्युः रात्रिचरित्रगानेन रात्रिं दिवसचरित्रगानेन दिनमिति विशेषं वक्तुमहनी इति द्विवचनेन निर्देश उक्तः। अनेन भगवतः भक्तोपेक्षादोषोऽपि निवारितः भगवदनागमनेऽपि दोषाभावश्च अहनी इति जात्यभिप्रायः गानेनैकरात्रिरिव सर्वा रात्रयो गता इत्यपि ज्ञापयितुम् ॥ ३७ ॥ यदा ता विशोका जाताः तदा भगवान् गोकुलवृत्तान्तमविचार्य अग्रे गत इत्याह। भगवानपीति। यद्यप्यत्रैव स्थित्वा कंसंमारयितुं शक्तः गोपिकाश्च सङ्गे नेतुमेकेन रूपेण स्थित्वा रूपान्तरेण वा गन्तुं तथापि मथुरामेव गत इत्यपिशब्दः रामाक्रूराभ्यां सहित एकस्मिन् रथे स्थितः तयोरप्रधानत्वाय तथोक्तिः नृप! इति सम्बोधनं राजलीलेयमिति ज्ञापयितुं वायुवेगेन रथेनेति योजनत्रयं चतुष्टयं वा घटिकामात्रेण समागत इति सर्वे गोपाला नन्दादयः पश्चादेव स्थिताः किञ्चित्प्रदर्शयितुं परं भगवानेव समागतः अन्तर्वेद्यां गोकुलं वृन्दावनं गोवर्द्धन इति विमर्शः कल्याणौ तदीयभागाः सांप्रतमन्यत्र जाता इति न प्रत्यक्षविरोधः अन्या तु कल्पना न युक्ता सारस्वतकल्पानुसारिणी चेयं कथा एतावत् दूरमन्तर्वेद्यामेवागत्य मथुरानिकटे मथुरातः क्रोशद्वये सर्वत्रानिम्ना यमुनाह्रदेष्वेव गम्भीरेति अघनाशिनी तीर्थे समागत इति साधारण्येन सर्वत्र वा कालिन्द्या विशेषणम् अक्रूरस्य सर्वपापक्षये भगवत्स्वरूपदर्शनयोग्यतासिद्ध्यर्थम् ॥ ३८ ॥ ततः प्रातःकाले मुक्तमिति तत्रागत्य यत्कृतवांस्तदाह। तत्रोपस्पृश्येति तत्र कालिन्द्यां स्वयमुत्तीर्य लीलया उपस्पृश्य स्नात्वा पानीयं पीत्वा मृष्टमज्ज्वल विरजत्वात् स्वान्तः स्थितमप्यक्रूरं पापयित्वा अन्यानप्यपेक्षितान् मणिप्रभमिति इन्द्रनीलश्यामं सर्वप्रकाशकमन्तः प्रविष्टमिति तत्रत्यानां शुद्धिवत् ज्ञानमपि जनयतीति ज्ञापयितु ततो वृक्षखण्डं वृक्षसमूहं वैष्णवच्छायां समाश्रित्य बलभद्रसहितः पुनः रथारूढो जातः अग्रे किञ्चित् कर्त्तव्यमिति छायायां रथे उपविष्ट इत्यर्थः ॥ ३९ ॥ ततोऽक्रूरः प्रत्यहं नद्यामागन्तुमसमर्थः दुर्ल्लभत्वाद्यमुनायाः तत्र स्नात्वा गमिष्यामीति स्नानार्थं प्रवृत्त इत्याह तौ इति तौ रामकृष्णौ आमन्त्र्य स्नानार्थं गमिष्यामीति प्रार्थयित्वा बालकाविति इतस्ततः क्रीडन्तौ रथोपरि निवेश्य उपवेश्यैवात्र स्थातव्यमित्युक्त्वा कालिन्द्यास्तीरे पुनः समागत्य विधिवन्मृत्तिकास्नानं पुनः कर्तुं प्रवृत्तः प्रातः काले मृत्तिकास्नानस्य निषिद्धत्वात् ॥ ४० ॥

श्रीसुबोधिनी–सारः

गोविंदस्य विनिवर्त्तने निराशा निरुद्यमास्ता गोप्यो निववृतुः विशोकाः सानंदाः प्रियस्य कृष्णस्य चेष्टितं गायंत्योऽहनी रात्रिं दिनं निन्युः ॥ ३७ ॥ हे नृप रामाक्रूराभ्यां युतो भगवान् अपि वायुवद्वेगो गतिर्यस्य तेन रथेनाऽघनाशिनीं पापघ्नीं कालिंदीं

यमुनां संप्राप्तः ॥ ३८ ॥ तत्र यमुनायां पानीयं जलमुपस्पृश्याचम्य मणिप्रभमुज्ज्वलं मृष्टं पीत्वा वृक्षाणां षंडं समूहमुपव्रज्य सरामो रथमाविशत् ॥ ३९ ॥ रथोपरि तौ रामकृष्णौ निवेश्य संस्थाप्याज्ञाप्याक्रूरः कालिंद्या ह्रदमागत्य प्राप्य विधिवत्स्नानमकरोत् ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततो दूरगमने सति गोविन्दस्य विनिवर्तने निराशा सत्यस्ता गोप्यो निववृतुः न्यवर्तन्त । 'तासां भगवद्विरहेणातिदुखितानां दिनातिक्रमः कथम्' इत्यपेक्षायामाह—विशोका इति । प्रियस्य कृष्णस्य चेष्टितं गायन्त्यः विगतशोकाः सत्यः अहनी जात्यभिप्रायेण द्विवचनम्, रात्रिदिनानि निन्युः अतिक्रमितवत्यः ॥ ३७ ॥ हे नृप ! रामाक्रूराभ्यां युक्तो भगवान् कृष्णोऽपि वायोरिव वेगो यस्य तेन रथेन अघनाशिनीं कालिन्दीं प्राप्तः ॥ ३८ ॥ तत्र कालिन्द्यां मृष्टं निर्मलं मणिप्रभं इन्द्रनीलमणिवच्छ्यामं पानीयं जलमुपस्पृश्य तेन हस्तपादमुखानि प्रक्षाल्य पीत्वा च वृक्षाणां खण्डं समूहमुपव्रज्य सरामः कृष्णो रथमाविशत् ॥ ३९ ॥ तदा च शत्रुभ्यः शङ्कितोऽक्रूरस्तौ रामकृष्णौ रथोपरि निवेश्य उपामन्त्र्य पृष्ट्वा च माध्याह्निकार्थं कालिन्द्या ह्रदमागत्य तत्र यथाविधि स्नानमाचरत् कर्तुमारेभे ॥ ४० ॥

अन्वितार्थप्रकाशिका

ता इति ॥ ततो गोविन्दस्य विनिवर्त्तने निराशाः सत्यस्ता गोप्यो निववृतुः न्यवर्तन्त । प्रियस्य कृष्णस्य चेष्टितं गायन्त्यः आयास्य इति कृष्णवचसा विगतशोकाः सत्यः अहनी जात्यभिप्रायेण द्विवचनं रात्रिदिनानि निन्युः अतिक्रमितवत्यः । अहनी इति द्विवचनाभिप्रायो नन्दस्य मथुरातः प्रत्यागमनसमय प्रकरणव्याख्यायां स्फुटीभविष्यति ॥ ३७ ॥ भगवानिति ॥ हे नृप ! रामाक्रूराभ्यां युक्तो भगवान् कृष्णोऽपि तद्दुःखदर्शनाक्षमतया शीघ्रप्रेरणात् वायोरिव वेगो यस्य तेन रथेन अघनाशिनीं पापनाशिनीं कालिन्दीमनन्ताख्यतीर्थावच्छिन्नां मध्याह्ने प्राप्तः ॥ ३८ ॥ तत्रेति ॥ तत्र कालिन्द्यां मणिप्रभं इन्द्रनीलमणिमिव मृष्टं निर्मलं पानीयं जलमुपस्पृश्य तेन हस्तपादमुखानि प्रक्षाल्य पीत्वा च वृक्षाणां षण्डं समूहमुपव्रज्य सरामः कृष्णो रथमाविशत् ॥३९॥ अक्रूर इति ॥ तदा च अक्रूरस्तौ रामकृष्णौ शत्रुभ्यः शङ्कितः सन् इति स्वामिपादाः । रथोपरिनिवेश्यामन्त्र्य पृष्ट्वा च माध्याह्निकार्थं कालिन्द्या ह्रदमनन्ततीर्थाख्यं तीरमित्यपि पाठः । आगत्य तत्र यथाविधि स्नानमाचरत् कर्तुमारेभे ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अहनीरात्र्यहनी स्वस्त्रोरितिवत् रात्रिदिनयोर्ग्रहणात् ॥ ३७ ॥ अघनाशिनीं पापनिवर्त्तिकां ॥ ३८ ॥ उपस्पृश्य पाणिपादौ प्रक्षाल्य वृक्षाणां खंडं वृंदं उपव्रज्य ॥ ३९ ॥ अरिभ्यः संदिग्धः सन् तौ रथोपरिनिवेश्य उपामंत्र्य अनुज्ञाप्य च ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ता इति । ततः, गोविन्दविनिवर्त्तने श्रीकृष्णस्य प्रत्यावर्त्तने, निराशाः ता गोप्यः, निववृतुः न्यवर्त्तन्त । ततः प्रियस्य श्रीकृष्णस्यैव चेष्टितं गायन्त्यः, विशोकाः तेनैव विगतशोकाः सत्यः, अहनी रात्रिंदिवमित्यर्थः । निन्युः क्रमितवत्यः ॥ ३७ ॥ भगवानपीति । हे नृप, रामाक्रूराभ्यां युतो युक्तः, भगवानपि, वायोरिव वेगो यस्य स तेन, रथेन, अघं नाशयतीत्यघनाशिनी तां, कालिन्दीं कालिन्दीगततीर्थविशेषं, संप्राप्तः ॥ ३८ ॥ तत्रेति । तत्र कालिन्द्यां, उपस्पृश्याचम्य, मृष्टो निघर्षणेन निर्मलीकृतो यो मणिरिन्द्रनीलस्तस्येव प्रभा यस्य तत् , पानीयं जलं पीत्वा च वृक्षखण्डं वृक्षसमूहं उपव्रज्य, वाक्षं सुच्छायाप्रदेशं प्राप्येत्यर्थः । सरामो रामसहितः, रथं आविशदारूढवान् ॥ ३९ ॥ अक्रूर इति । तदा अक्रूरः, शत्रुभ्यः शङ्कितः सन्निति शेषः । तौ रामकृष्णौ, रथोपरि निवेश्य, उयामन्त्र्य पृष्ट्वा च, माध्याह्निकार्थमिति शेषः । कालिन्द्याः ह्रदं आगत्य, तत्र विधिवद्यथाविधि, स्नानं आचरत् कर्त्तुमारेभे ॥ ४० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ता निराशा इति : १०.३९.३७.

बाह्यान्तरैकवृत्त्या कलिता विकलाच्युतस्वरूपाणाम् । विरहो नाम तदासीत्तासां जनचर्मचक्षुरभिवर्ण्यः ॥ ५१ ॥
अक्रूरः स्वात्मयोगाद्रथगमधिपतिं सावधायाऽसुवेगाद् वृत्तानां गोष्ठभाजामविषयपदवीं प्रापयन् कौशलेन ।
कुर्वन्निष्पापवासं तदनु निजरथं याजयन् वृक्षखण्डे पीत्वा कृष्णामृतं श्रीपदृदगनुभवी स्यात्स सूर्यात्मजां ते ॥ ५२ ॥
ता यावच्छक्ति गत्वा तदविषयतया चित्रवन्निर्मनस्कास्तस्थुः श्रीशोऽपि तादृक्कृतगमनतया सूर्यजायामघघ्न्याम् ।
संयोज्य स्यन्दनं तं विहित-तदुदकप्राशनो वृक्षखण्डे तस्थावेतच्चरित्राद् ध्वनितमिदमिहेत्यूह्यतां योगिवर्यैः ॥ ५३ ॥
तत्र प्राग्वासनातो यदि भजति समुत्थानमीशं रथस्थं पश्यत्यामग्नभावे सति तु सविशदं पश्यतीदृक् स्वरूपम् ।
इत्थं सिद्धानुभूतिस्थितिरथ च विभोरीदृशी वैभवश्रीरित्यर्थं ज्ञापयित्रा निगदितमृषिणैवमीदृक् चरित्रात् ॥ ५४ ॥
(विशेषकम्)

कृष्णप्रिया

अभी उनके मन में आशा थी कि शायद श्रीकृष्ण कुछ दूर जाकर लौट आयें ! परन्तु जब नहीं लौटे, तब वे निराश हो गयी और अपने-अपने घर चली आयीं। परीक्षित् ! वे रात-दिन अपने प्यारे श्यामसुन्दर की लीलाओं का गान करती रहतीं और इस प्रकार अपने शोकसन्ताप को हल्का करतीं ॥ ३७ ॥ परीक्षित् ! इधर भगवान् श्रीकृष्ण भी बलरामजी और अक्रूरजी के साथ वायु के समान वेगवाले रथपर सवार होकर पापनाशिनी यमुनाजी के किनारे जा पहुँचे ॥ ३८ ॥ वहाँ उन लोगों ने हाथ मुँह धोकर यमुनाजी का मरकतमणि के समान नीला और अमृत के समान मीठा जल पीया। इसके बाद बलरामजी के साथ भगवान् वृक्षों के झुरमुट में खड़े रथपर सवार हो गये ॥ ३९ ॥ अक्रूरजी ने दोनों भाइयों को रथपर बैठाकर उनसे आज्ञा ली और यमुनाजी के कुण्ड (अनन्त-तीर्थ या ब्रह्मह्रद) पर आकर वे विधिपूर्वक स्नान करने लगे ॥ ४० ॥

निमज्ज्य तस्मिन् सलिले जपन् ब्रह्म सनातनम् । तावेव ददृशेऽक्रूरो रामकृष्णौ समन्वितौ ॥ ४१ ॥
तौ रथस्थौ कथमिह सुतावानकदुन्दुभेः । तर्हि स्वित् स्यन्दने न स्त इत्युन्मज्ज्य व्यचष्ट सः ॥ ४२ ॥
तत्रापि च यथापूर्वमासीनौ पुनरेव सः । न्यमज्जद्[1] दर्शनं [2]यन्मे मृषा किं सलिले तयोः ॥ ४३ ॥
भूयस्तत्रापि सोऽद्राक्षीत् स्तूयमानमहीश्वरम् । [3]सिद्धचारणगन्धर्वैरसुरैर्नतकन्धरैः ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—अक्रूरः, तस्मिन्, सलिले, निमज्ज्य, सनातनम्, ब्रह्म, जपन्, तौ, एव, समन्वितौ, रामकृष्णौ, ददृशे ॥४१॥ आनकदुन्दुभेः, रथस्थौ, तौ, सुतौ, इह, कथम् ? तर्हिः, स्वित्, स्यन्दन, न, स्तः, इति, उन्मज्ज्य, सः, व्यचष्ट ॥ ४२ ॥ तत्र, अपि, यथापूर्वम्, आसीनौ, ददृशे, पुनः एव, सः, न्यमज्जद्, यत्, मे, सलिले, तयोः, दर्शनम्, किम्, मृषा ? भवेत् ॥ ४३ ॥ भूयः, तत्र, अपि, सः, अक्रूरः, नतकन्धरैः, सिद्धचारणं गन्धर्वैः, च असुरैः, स्तूयमानम् ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ब्रह्म वेदं सावित्रीं जपन् । एवशब्दः प्रतिबिंबव्यावृत्त्यर्थः । क्वेमौ बालौ क्व तौ मल्लाविति शंकितचेतसे । अक्रूराय जले रूपमत्याश्चर्यं व्यदर्शयत् ॥ १-४१-४२-४३ ॥ सिद्धादिभिः स्तूयमानम् ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्मिन्कालिन्दी ह्रदे । ब्रह्म अघमर्षणसूक्तम्, तस्यैव निमज्ज्यजपविधेः वेदं वा । तौ रामकृष्णावेव । पद्यम्—इमौ रामकृष्णौ । तौ चाणूरमुष्टिकौ । यद्यप्यन्येऽपि तत्र मल्लाः संति तथापि तयोः प्रधानत्वात्तच्छब्देन तौ गृहीतौ, ताभ्यामेवादौ तयोर्युद्धस्य प्रवृत्तत्वाद्वा । अत्याश्चर्यमदृष्टपूर्वम् (१) । 'स्वमंत्रध्येयरूपादप्यद्भुतं रूपमीक्षितम् । व्रजेऽक्रूरेण तत्रैव निष्ठामप्याप चेतसः । तां च्यावयन्व्रजवधूमंत्रहेतोः पुरातनीम् । निष्ठामेवापयम्कृष्णो वैकुण्ठं तमदर्शयत् ।" ॥ ४१ ॥ सोऽक्रूरः । व्यचष्टाद्राक्षीत् । स्यंदने रथे । इह जले ॥ ४२ ॥ तत्रापि रथेऽपि । व्यचष्टेति क्रियापदमपि आकृष्यतेऽत्र । सोऽक्रूरः । पुनर्न्यमज्जत् । तयोः रामकृष्णयोः ॥ ४३ ॥ तत्रापि कालिन्दीजलेऽपि । भूयः पुनः । असुरैः असुषु प्राणेषु रतैर्यत्नपरैः । '—प्राणेष्विन्द्रियेषु च । असवः परिकीर्त्यन्ते—' इति । "रतं गुह्य प्रयत्ने च मैथुने क्रीडनेऽपि च" इति धरणिः । जितेन्द्रियैः प्राणायाम परैर्वा । बल्यादिभिर्वा । द्वितीये निमज्जने तु तं स्वांशं श्रीविष्णुं तन्मंत्रोपास्यदैवतं दर्शयंस्तत्रैव तन्मनोनिष्ठां धारयितुं तत्परिकरानन्तररूपमपि साक्षादनुभावयामास मदभीष्टदेवः श्रीवैकुण्ठनाथो वसुदेवगृहेऽवतीर्ण इति ज्ञापयामास च—भूय इति त्रयोदशभिः । तत्रैव ह्रदेऽहीश्वरमद्राक्षीन्न तु पूर्ववद्रामकृष्णौ । सिद्धैः स्वशिष्यैः सनकादिभिः । भुजंगपतयो विवृता वैष्णवे—"वृतं वासुकिरंभाद्यैर्महद्भिः पवनाशिभिः" इति । असुरैः प्रह्लादाद्यैः । नतमस्तकैरिति सर्वेषां विशेषणम् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सनातनमिति विशेषणं तत्र भक्तिविशेषे कारणं समन्वितौ पूर्ववदेकत्रैव वर्त्तमानौ ॥ ४१ ॥ ताविविति युग्मकम् । इह जले इतीति एतद्विचिन्त्येत्यर्थः । तत्रापि स्यन्दनेऽपि यथापूर्वमासीनौ व्यचष्टेति पूर्वेणान्वयः ॥ ४२ ॥ ततश्च पुनरेव पुनश्चाक्रूरो न्यमज्जत् तत्र हेतुर्दर्शनमिति मे मम कर्तृभूतस्य तयोः कर्मभूतयोः सलिले यद्दर्शनं तत् किं मृषेतीतिशब्देनान्वयः ॥ ४३ ॥ श्रीभगवांस्तु स्वीयं परममधुरंवभवमनवगाहमाहमानं तं प्रति निजांशलक्षणं श्रीविष्णुमेवानुभावितवानित्याह । भूय इत्यादि त्रिभिः अत्र भूय इति युग्मकम् । भूयस्तत्रापि तत्रैव ह्रदेऽहीश्वरमद्राक्षीत् नतु पूर्ववत् कृष्णरामौ सिद्धैः स्वशिष्यरूपैः सनकादिभिः भुजङ्गपतयो विवृता वैष्णवे "वृतं वासुकिरम्भाद्यैर्महद्भिः पवनाशिभि" रिति असुरैः प्रह्लादप्रभृतिभिः ननेति सर्वेषां विशेषणम ॥ ४४ ॥

---

१. निमज्य—विज. । २. मेने—विज. । ३. सिद्धैर्भुजङ्गपतिभिः ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

निमज्ज्य जलेऽवतीर्य्य, अघमर्षण इति केचित्। सनातनं नित्यमिति तज्जपस्याप्यावश्यकताभिप्रेता, अतएव जपन्; यद्वा, वेदमातृरूपाया गायत्र्याः सर्व्वाद्यत्वात्। यद्वा, सनातनो भगवान् श्रीनारायणस्तदुत्पन्नत्वेन तत्तुल्यत्वात् सनातनमिति। तथा चोक्तं षष्ठे (६।१।४०)—'वेदो नारायणः साक्षात् स्वयम्भुरिति शुश्रुम' इति। यद्वा, सनातनं ब्रह्म श्रीभगवन्तमेवेत्यर्थः। यावुपामन्त्रितौ रथोपरि निवेशितौ च, तावेव समन्वितौ एकत्रैव वर्त्तमानौ। यद्वा, आधाराधेयभावेनान्योऽन्यमिलितौ, तस्मिन् सलिल एव ददर्श ॥ ४१ ॥ इह जले कथं स्तः ? आनकदुन्दुभेर्वसुदेवस्य सुताविति, श्रीभगवत्परित्यागेन स्नानस्य बहुमतत्वादुत्पन्नेनापराधेन, ततश्चानकदुन्दुभिरिति मनुष्यतापेक्षया तन्नाममात्रग्रहणम्, अन्यथा वसुदेवस्येत्युक्तेऽपि नामसाम्याद्वासुदेवत्वेन भगवत्त्वस्पर्शः स्यात्; स्वित् किं न स्तः, न वर्त्तेते, उन्मज्ज्य जलादुत्तीर्य्य ॥४२॥ तत्र स्यन्दनेऽपि, च एव, यथापूर्व्वमासीनावेव, सोऽक्रूरो व्यचष्ट अपश्यदिति पूर्व्वेणैवान्वयः। एव अपि पुनरपि; सोऽक्रूरो न्यमज्जत्, जलेऽववतार। किमर्थम्? मे मां प्रति सलिले यत्तयोर्दर्शनं तत् किं मृषा, तत्तत्त्वज्ञानार्थमित्यर्थः। भूयो निमज्ज्येति शेषः, तत्रापि तस्मिन्नपि निमज्जने अहीश्वरमद्राक्षीत्, न तु कृष्णरामौ, पूर्व्वं यथा दृष्टौ तथेत्यर्थः। यद्वा, भूय इति पूर्व्वदर्शनमपि वक्ष्यमाणप्रकारेणैवेति बोधयति, ततश्च परमवैलक्षण्येऽपि तयोरानकदुन्दुभिसुतत्वेन ज्ञानं कथञ्चित् सादृश्यात्, किंवा भगवत्कृपया तथैव प्रत्यभिज्ञोत्पत्तेः। अतएवोक्तं श्रीपराशरेण (वि० पु० ५।१८।४३)—'बल-कृष्णौ तदाक्रूरः प्रत्यभिज्ञाय विस्मितः' इति ॥४३॥ अहीश्वरं शेषमिति महासर्पाकारं सेवकरूपैरहिगणैर्बहुधा परिचर्य्यमाणमिति बोधयति; तथा चोक्तं तेनैव (वि० पु० ५।१८।३७)—'वृतं वासुकिरम्भाद्यैर्महद्भिः पवनाशिभिः' इति; सिद्धैः सनत्कुमारादिभिः पातालवासिभिर्वा कपिलादिभिः, गन्धर्व्वपतिभिर्विश्वावसुप्रभृतिभिर्गानविद्याशिक्षणार्थं तच्छिष्यतां गतैः, किंवा तत्रत्यैरेव तत्सेवकैर्गानकुशलैर्गन्धर्वश्रेष्ठैः। भुजंग इति पाठः सुगम एव। असुरैरिति तेषां पातालवासित्वेन शेषाधीनत्वात्। नतकन्धरैरिति सर्व्वेषामेव विशेषणम्, तेन परमभक्तिः सूचित ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ब्रह्म प्रणवम् ॥ ४१-५२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्र जले सनातनं ब्रह्म नित्यब्रह्मस्वरूपोवेदकं प्रणवं जपन्निमज्ज्य समन्वितौ सहभूतौ तावेव रामकृष्णौ ददर्श ॥ ४१ ॥ एवं दृष्ट्वा सोऽक्रूरस्तावानकदुन्दुभेः सुतौ रथस्थौ कथमिह स्तः यदि रथादवरुह्यागतौ तर्हि रथे न स्त इति वितर्क्य उन्मज्ज्य ददर्श ॥ ४२ ॥ तत्रापि रथेऽपि पूर्ववदासीनौ दृष्ट्वा तयोः सलिले मम दर्शनं मत्कर्तृकं दर्शनं किं मृषा उत सत्यं यदि सत्यं तर्हि पुनर्द्रक्ष्यामीति चिन्तयन् पुनर्न्यमज्जत पुनर्निमग्नः ॥ ४३ ॥ तत्रापि जले तावदहीश्वरं शेषं ददर्श कथंभूतं नता कन्धरा ग्रीवा येषां तैः सिद्धादिभिः स्तूयमानम् ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ब्रह्म अघमर्षणसूक्तं ब्रह्म वेदस्तत्त्वमिति च ॥ ८१ ॥ स्यन्दने रथे न स्तः न विद्येते स्वित्किम् ॥ ४२ ॥ सलिले तयोः रामकृष्णयोः दर्शनं मृषा किमिति मेन इति शेषः ॥ ४३ ॥ असुरैरसुषुरतैः वशीकृतेन्द्रियैरित्यर्थः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वमन्त्रध्येयरूपादप्यद्भुतं रूपमीक्षितम्। ब्रजेऽक्रूरेण तत्रैव निष्ठामप्याप चेतसः ॥
तां च्यावयन् ब्रजवधूमन्त्रहेतोः पुरातनीम्। निष्ठामेवापयन् कृष्णो वैकुण्ठं तमदर्शयत् ॥

द्वितीयमज्जने तु तं स्वांशं श्रीविष्णुं तन्मन्त्रोपास्यदैवतं दर्शयंस्तत्रैव तन्मनोनिष्ठां धारयितुं तत्परिकरानानखशिखं तद्रूपमपि साक्षादनुभावयामास मदभिष्टदेवो वैकुण्ठनाथ एव वसुदेवगृहेऽवतीर्ण इति ज्ञापयामास च। भूय इति त्रयोदशभिः। तत्र द्वाभ्यां बलदेवांशं शेषं वर्णयति। सहस्रं फणा मौलयः किरीटानि च विद्यन्ते यस्य तं ब्रीह्यादित्वादिनिः शृङ्गैः शिखरैः श्वेतं कैलासमिव "ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात् पुरे"त्यत्र ब्रह्मणो लोकं वैकुण्ठमिति स्वामिव्याख्यानात् वैकुण्ठेऽपि यथा शेष इति भागवतामृतवाक्याच्च जलेऽक्रूरो वैकुण्ठमेवापश्यदिति प्राहुः ॥ ४४-४५ ॥

गूढार्थदीपिनी

ब्रह्म गायत्रीम् जपन् ॥ ४१ ॥ स्वित् वितर्के ॥ ४२ ॥ तत्रापि रथेऽपि ॥ ४३ ॥ तत्रापि जलेऽपि स्तूयमानम् अहीश्वरं श्रीशेषम् अद्राक्षीत् ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ब्रह्म प्रणवम् उक्तरीत्या भगवत्स्वरूपगुणादिज्ञानवते शत्रुमध्ये गमयित्रेऽक्रूराय स्वरूपं तादृशज्ञानदार्ढ्यार्थं जले दर्शयामास ॥ ४१–४३ ॥ अहीनामीश्वरं शेषम् ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भूयः प्रमाभ्रमताभ्रंशनाय सिद्धैर्भुजङ्गपतिभिर्नतकन्धरैरित्युभयान्वयि। असुरैः साधुभिः। असुरा अपि साधवः सन्तीति सुधाभिधानात्। असुरूप इत्याचार्योक्तेः सद्विकृताकृतियुतराक्षसादिभिर्वा ॥ ४१ ॥ सहस्रं शिरांसि यस्य तं सहस्रं च फणास्तेषु मौलयः किरीटान्यस्य सन्तीति स तम्। मौलिः किरीटे धम्मिल्ले केकलिद्रुमचूडयोरिति विश्वः। व्रीह्यादीनन्तः शब्दः। बिसवन्नालीकनालतन्तुवच्छ्वेतं नीलमम्बरं यस्य तं शृङ्गैः कूटैः श्वेतं तन्नामानमचलन्निव स्थितं ॥ ४२ ॥ तस्य शेषस्योत्सङ्गे उत्सङ्गवद्विद्यमानमण्डलीकृताङ्गे देवताविवक्षया तत्सङ्गो मुख्यः। एकादशश्लोकस्थविलोक्येत्यनेनान्वयः ॥ ४३ ॥ सुभ्रुवौ उन्नासिके च यस्य सुभ्रून्नसस्तं ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्राधमर्षणजपः जले निमज्ज्य कर्तव्यः हिरण्यशृङ्गमित्यादि जले निमज्ज्य तस्मिन् सलिले सनातनं वेदात्मकं ब्रह्म जपन् तेन शुद्धान्तःकरणः तावेव रामकृष्णौ ददृशे समन्वितौ मिलितौ यथा जलमध्यस्थाः पदार्थाः दृश्यन्ते तथा तावपि दृष्टवान् तस्मिन् स्थाने माया उद्घाटितेति सानुभावं भवति स्थानं भगवांश्च पुनः सर्वत्रैव वर्त्तते देशादिदोषाच्च न प्रतीयते प्रदर्शितवांश्च तस्य सन्देहव्यावृत्त्यर्थम् ॥ ४१ ॥ तत्र तौ दृष्ट्वा सन्देहात् विचारयति। तौ रथस्थाविति। भगवतः सर्वात्मत्वं भगवत्त्वं च विस्मृत्याह। आनकदुन्दुभेः सुतौ तौ मया रथस्थौ कृतौ कथमिह दृश्येते कथं वा समागताविति यदि केनचित्प्रकारेण मय्यन्यचित्ते समागतौ तर्हि स्यन्दने न भविष्यतः इति विचार्य उन्मज्ज्य व्यचष्ट दृष्टवान् द्रष्टा स एवेति अभिज्ञानार्थमाह ॥ ४२ ॥ ततोऽत्रापि दृष्टवानित्याह। तत्रापि चेति यथापूर्वं यथा स्थापितौ तथैव दृष्टवान् तस्य पुनरेव जिज्ञासा उत्पन्नेत्याह। पुनरेव स इति। निमज्ज्य मे सतः यत् भगवतो दर्शनं तत्किं मृषेति अर्थाद्विमर्शोऽयम् ॥ ४३ ॥ ततो भूयः निमज्ज्य दृष्टवानित्याह। भूय इति। प्रथमपर्याये भगवतो माहात्म्याज्ञानात् कल्पयित्वा शास्त्राप्रामाण्यं पुनरुन्मज्ज्य दृष्टवान् ततोऽनुभवात् प्रमाणमपि कृत्वा पुनर्द्रष्टुं प्रवृत्त इति नास्य लौकिकालौकिकप्रमाणेषु प्रतिष्ठेति भगवान् विचार्य तं बोधयितुं स्वमाहात्म्यं प्रकटितवानित्याह। भूयस्तत्रापीति। स एवाक्रूरः भूयो दृष्टवान् तत्रापीत्यपि शब्देन बहिर्जलमध्येऽपि अथवा तत्रापि दर्शने विशेषं दृष्टवान् यः सङ्कर्षणः तं शेषत्वेन दृष्टवान् भगवन्तं तु शेषशायिनं तस्य नारायणत्वेनैव ज्ञानं युक्तं भवतीति न तु पुरुषोत्तमत्वेन सन्देहनिवारणार्थमेवं प्रदर्शयत इति सिद्धादिभिः स्तूयमानं च दृष्टवान् सिद्धा सर्वे शेषाविष्टसङ्कर्षणसेवकाः तथा षष्ठे निरूपिताः भुजङ्गानां सर्पाणां ये पतयः वासुकिप्रमुखाः तैरपि असुराणामपि ये पतयः कालनेमिप्रभृतयः तैरपि सर्व एव संकर्षणस्य भक्ता इति सर्वे दैत्याः ससेवकाः अतस्तैः किं भयमिति प्रथमकक्षायामेव भयाभावो निरूपितः ॥ ४४ ॥

श्रीसुबोधिनी–सार

तस्मिन् सलिले निमज्ज्य सनातनं ब्रह्म जपन् समन्वितौ युक्तौ तौ रामकृष्णावेवाक्रूरो ददर्श। "क्वेमौ सुकोमलौ बालौ क मल्लौ वज्रसंमितौ। कृतं मया महत्पापमनयोर्निधने तमः। इति संदिग्धचित्ताय जले रूपनिदर्शनम्" ॥ ४१ ॥ आनकदुंदुभेर्वसुदेवस्य सुतौ तौरथस्थौ इव जले कथं तर्हि जले चेत् स्यंदने रथमंचे न स्त इति हेतोः सोऽक्रूर उन्मज्ज्य व्यपश्यत् स्विद्वितर्के ॥ ४२ ॥ तत्रापि रथेपि यथापूर्वमासीनौ स्थितौ च व्यचष्ट तयोः सलिले मे मह्यं दर्शनं यत् तन्मृषा मिथ्या किमिति स पुनरेव न्यमज्जत् ॥ ४३ ॥ भूयः पुनस्तत्रापि जले सिद्धादिभिः स्तूयमानम् अहीश्वरं शेषं सोक्रूरोऽद्राक्षीत् ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सनातनं ब्रह्म प्रणवं जपन् ॥ ४१ ॥ एवं दृष्ट्वा च सोऽक्रूरः 'तौ रथस्थौ आनकदुन्दुभेः सुताविह कथं स्तः ? यदि रथादवरुह्यात्रागतौ तर्हि रथे न स्तः' इति वितर्क्य उन्मज्ज्य व्यचष्ट ददर्श ॥ ४२ ॥ तत्रापि रथेऽपि यथापूर्वमासीनौ ददर्श। दृष्ट्वा च सलिलेयत्तयोर्मे मत्कर्तृकं दर्शनं तत्किं मृषा ? 'एवं चेत्तर्ह्यत्र दर्शनं न स्यात्' इत्याशयेन सोऽक्रूरः पुनः सलिले न्यमज्जत् ॥ ४३ ॥ तत्रापि जले भूयः पुनः अहीश्वरं शेषमद्राक्षीत्। तं शेषं वर्णयति–नता कन्धरा ग्रीवा येषां तैः सिद्धादिभिः स्तूयमानम् ॥ ४४ ॥

अन्वितार्थप्रकाशिका

निमज्ज्येति। निमज्ज्य स्नात्वा सनातनं ब्रह्म गायत्रीरूपं जपन् अक्रूरः तस्मिन् यमुनासलिले तावेव समन्वितौ सहितौ रामकृष्णौ ददृशे। तङार्षः। एवशब्दः प्रतिबिम्बव्यावृत्त्यर्थः। एतद्दर्शनं च कंसमल्लेभ्यस्तयोर्भयं नास्तीत्यक्रूराय दर्शयि-

तुम् ॥ ४१ ॥ ताविति । एवं दृष्ट्वा च सोऽक्रूरस्तौ रथस्थौ आनकन्दुन्दुभेः सुताविह कथं स्तो यदि रथादवरुह्यात्रागतौ तर्हि स्यन्दने रथे न स्त इति वितर्क्य उन्मज्ज्य व्यचष्ट ददर्श ॥ ४२ ॥ तत्रेति । तत्रापि रथेऽपि यथा पूर्वमासीनौ ददर्श । दृष्ट्वा च सलिले यत्तयोर्मे मत्कर्तृकं दर्शनं तत्किं मृषा एवं चेत्तर्ह्यत्र दर्शनं स्यादित्याशयेन सोऽक्रूरः पुनः सलिले न्यमज्जत् ॥ ४३ ॥ भूय इति । तत्रापि जले भूयः पुनः अहीश्वरं शेषमद्राक्षीत् तं शेषं वर्णयति । नता कन्धरा ग्रीवा येषां तैः सिद्धादिभिः स्तूयमानम् ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निमज्ज्य संप्लुत्य ब्रह्मवेदं गायत्र्याख्यं जपन् तस्मिन् जले रामकृष्णौ ददृशे ददर्श ॥ ४१ ॥ वसुदेवस्य सुतौ ईह जले कथं स्थितौ तर्हि स्यन्दने रथे न स्त इति विचिन्त्य जलनिमज्जनात् उन् मज्ज्यमुखं बहिर्निष्कास्य ॥ ४२ ॥ तत्रापि रथेऽपि यथा पूर्वमासीनौ व्यचष्टेति पूर्वेण संबंधः ॥ ४३ ॥ सिद्धादिभिः स्तूयमानं । ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निमज्ज्येति ॥ अक्रूरः, सनातनं नित्यं, ब्रह्म ब्रह्मस्वरूपावेदकं प्रणवं जपन्, तस्मिन् सलिले निमज्ज्य, समन्वितौ सहभूतौ, तावेव यौ स्वेन रथे समास्थापितौ तावेव, रामकृष्णौ ददृशे तत्र जले दृष्टवान् ॥ ४१ ॥ ताविति ॥ एवं जले दृष्ट्वा, सः अक्रूरः तौ रामकृष्णाख्यौ, आनकदुन्दुभेः वसुदेवस्य, सुतौ रथस्थौ सन्तौ, इह कथं स्तः । यदि रथादवरुह्यागतौ भवेतां तर्हि, स्यन्दने रथे न स्तः स्वित्, इत्येवं वितर्क्य, उन्मज्ज्य व्यचष्ट रथोपरि व्यलोकयत् ॥ ४२ ॥ तत्रापीति ॥ तत्रापि रथेऽपि, यथापूर्वं च पूर्ववदेव, आसीनौ दृष्ट्वा, तयोः सलिले, मे मम, यत् दर्शनं मत्कर्त्तृकं समीक्षणं तत्, मृषा किं उत, सत्यं यदि सत्यं तर्हि, पुनर्द्रक्ष्यामि इति चिन्तयन्, सोऽक्रूरः, पुनरेव पुनरपि, न्यमज्जत् निमग्नः ॥ ४३ ॥ भूय इति ॥ सोऽक्रूरः, तत्रापि जलेऽपि, भूयः तावत्, नता कंधरा ग्रीवा येषां तैः, सिद्धाश्च चारणाश्च गन्धर्वाश्च तैः, असुरैश्च स्तूयमानं अहीश्वरं शेषं, अद्राक्षीत् ददर्श ॥ ४४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

निमज्ज्येति : १०.३९.४१.

यथा शरीरे भुवनेऽपि तादृशस्वरूप एवास्म्यहमित्यधोक्षजः । प्रबोधयन् यद्रथगं स्वरूपकं तदेव तस्मै भुवनेऽप्यदर्शयत् ॥ ९५ ॥
उपाधिभेदादुपधेयभेदः प्रसिद्ध एवेति समञ्जसं तत् । रथे यथा तौ भुवने तथा तावेकावपीशौ यदपश्यदेषः ॥ ९६ ॥

भूयस्तत्रेति : १०.३९.४४.

योऽहं शरीरे भुवने च सोऽहं शेशे च सोऽहं भुवने च योऽहम् । यस्तत्र सोऽहं भुवि सर्वशक्तिरित्यच्युतस्तत्क्रमशो व्यतानीत् ॥९७॥

यः सर्वभावरहितः स हि निर्विशेषं तद्रूप-मश्रुतिवचोविषयं प्रवेत्ति ।
अक्रूर एष भुवनोदितधी रथस्थसद्वासनो ह्युचितमैक्षत सद्विशेषम् ॥ ९८ ॥
सव्यं पादं प्रसार्याखिलदुरितहरं दक्षिणं कुञ्चयित्वा जानुन्याधाय सव्येतरभुजमितरं नागभोगे निधाय ।
पाणिभ्यां तत्पराभ्यां प्रतिभटशमनायावहन् शङ्खचक्रे श्री-भू शुश्रूषिताङ्घ्रिर्निजविहितनुतिः शर्मदद्यान्मुकुन्दः ॥ ९९ ॥
एतदाकारकध्याने गोचरीभूय सौख्यदः । अक्रूरवृत्तः स्यामेवं भुवनेऽबोधि विष्णुना ॥ १०० ॥

कृष्णप्रिया

उस कुण्ड में स्नान करने के बाद वे जल में डुबकी लगाकर गायत्री का जप करने लगे । उसी समय जल के भीतर अक्रूरजी ने देखा कि श्रीकृष्ण और बलराम दोनों भाई एक साथ ही बैठे हुए हैं ॥ ४१ ॥ अब उनके मन में यह शङ्का हुई कि 'वसुदेवजी के पुत्रों को तो मैं रथपर बैठा आया हूँ, अब वे यहाँ जल में कैसे आ गये ? जब यहाँ हैं तो शायद रथपर नहीं होंगे ।' ऐसा सोचकर उन्होंने सिर बाहर निकालकर देखा ॥ ४२ ॥ वे उस रथपर भी पूर्ववत् बैठे हुए थे । उन्होंने यह सोचकर कि मैंने उन्हें जो जल में देखा था, वह भ्रम ही रहा होगा, फिर डुबकी लगायी ॥ ४३ ॥ परन्तु फिर उन्होंने वहाँ भी देखा कि साक्षात् अनन्तदेव श्री शेषजी विराजमान हैं और सिद्ध, चरण, गन्धर्व एवं असुर अपने-अपने सिर झुकाकर उनकी स्तुति कर रहे हैं ॥ ४४ ॥

सहस्रशिरसं देवं सहस्रफणमौलिनम् । नीलाम्बरं विसश्वेतं शृङ्गैः श्वेतमिव स्थितम् ॥ ४५ ॥
तस्योत्सङ्गे घनश्यामं पीतकौशेयवाससम् । पुरुषं चतुर्भुजं शान्तं [1]पद्मगर्भारुणेक्षणम् ॥ ४६ ॥
चारुप्रसन्नवदनं चारुहासनिरीक्षणम् । सुभ्रून्नसं चारुकर्णं सुकपोलारुणाधरम् ॥ ४७ ॥
प्रलम्बपीवरभुजं तुङ्गांसोरःस्थलश्रियम् । कम्बुकण्ठं निम्ननाभिं बलिमत्पल्लवोदरम् ॥ ४८ ॥

---

[1] पद्मपत्रारुणे–श्रीधर. वंशी. जीव. विज. विश्व.; पत्रायते–वीर. ।

कर्दमक्षम।

अन्वयः—सहस्रफणमौलिनम्, नीलाम्बरम्, विसश्वेतम्, सहस्रशिरसम्, अहीश्वरम्, देवम्; शृङ्गैः, स्थितम्, श्वेतम्, इव, अद्राक्षीत् ॥ ४५ ॥ तस्य उत्सङ्गे, पुरुषम्, घनश्यामम्, पीतकौशेयवाससम्, चतुर्भुजम्, शान्तम्, पद्मगर्भारुणेक्षणम् ॥ ४६ ॥ चारुप्रसन्नवदनम्, चारुहासनिरीक्षणम्, सुभ्रू, उन्नसम्, चारुकर्णम्, सुकपोलारुणाधरम् ॥ ४७ ॥ प्रलम्बपीवरभुजम्, तुङ्गांसोरः स्थलश्रियम्, कम्बुकण्ठम्, निम्ननाभिम्, वलिमत्पल्लवोदरम् ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सहस्रं शिरांसि यस्य तम्। सहस्रफणेषु मौलयः किरीटानि यस्य संतीति तथा तम्। नीले अम्बरे यस्य तम्। बिसवत्कमलनालवच्छ्वेतं शुभ्रम्। शृंगैः शिखरैः श्वेतं कैलासमिव स्थितम् ॥ ४५ ॥ तस्योत्संगे कुंडलीकृतदेहार्धे विलोकयेत्येकादशेन श्लोके नान्वयः ॥ ४६ ॥ शोभने भ्रुवौ यस्य उन्नता नासिका यस्य तं च तं च। शोभनौ कपोलौ यस्य अरुणावधरौ यस्य तं च तं च ॥ ४७ ॥ तुंगावंसौ यस्य उरः स्थले श्रीर्यस्य तं च तं च। वलिमत्पल्लवोदरं वलयस्तिर्यङ्निम्नरेखा यस्य संति तद्वलिमत्तच्च तत्पल्लववदश्वत्थदलसदृशमुदरं यस्य तम् ॥ ४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

देवं शेषम्। मौलनमिति व्रीह्यादित्वादिनिः। "ददृशुर्ब्रह्मणो लोकं यत्राऽक्रूरोऽध्यगात्पुरा" इत्यत्र ब्रह्मणो लोकं वैकुण्ठमिति स्वामिव्याख्यानात्। 'वैकुण्ठेऽपि यथा शेषः' इति भागवतामृतवाक्याच्च जलेऽक्रूरो वैकुण्ठमेवापश्यदिति प्राहुः ॥ ४५ ॥ तस्य शेषस्य। कृष्णस्यांशं नारायणं वर्णयति–तस्येति। पुरुषं ब्रह्माण्डान्तर्यामिणो रूपविशेषम्। स्पष्टयिष्यते च 'नतोऽस्म्हं त्वाम्' इत्यादिना। शान्तं घोरत्वाद्यभावेन मनोनयनानन्दकम् ॥ ४६ ॥ चारु रम्यं प्रसन्नं विशदं वदनं मुखं यस्य तम्। चारुहासेन युतं निरीक्षणं यस्य तम्। मध्यमपदलोपी समासः। चारुहासः स्मितम्। यद्वा–चारुणी हासनिरीक्षिते यस्येति। चारुसुशब्दयोर्मुहुरुक्तिस्तु तत्तदतिशयबोधनायैव ॥ ४७ ॥ पल्लव आकाशस्तद्वदुदरं यस्येति। "पल्लवोऽस्त्री किशलये विस्तृताकाशयोरपि" इति वैजयन्ती। अनंताण्डकोटिनिवेशनक्षम मुदरं यस्येति भावः। श्रीरत्र रेखारूपा। प्रेयसीतत्सखीरूपे त्वग्रे वक्ष्यते च ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषि०।

देवं जगत्पूज्यं मौलिनमिति व्रीह्यादित्वादिनिः सहस्रं फणा मौलयश्च किरीटानि विद्यन्ते यस्मिन् श्वेतं श्वेताद्रिं कैलासमित्यर्थः। टीकायां कमलकन्दस्य मृणाले तात्पर्यम् ॥ ४५ ॥ अथ द्वादशकम् तस्याहीश्वरस्योत्सङ्गे तदानीं लीलया सुखमासीनमिति ज्ञेयं "तस्योत्सङ्गे घनश्यामं श्रीवत्साच्छादितोरसम्। पीताम्बरधरं विष्णुं सूपविष्टं ददर्शह" इति श्रीवैशम्पायनेनोक्तेः अत एव कुण्डलीकृतेति तैर्व्याख्यातं पुरुषं ब्रह्माण्डान्तर्यामिणो रूपविशेषं स्पष्टयिष्यते च नतोऽस्म्यहं त्वामित्यादिना शान्तं घोरत्वाद्यभावेन मनोनयनानन्दकरमित्यर्थः। पद्मपत्रवत् प्रान्ते अरुणे ईक्षणे यस्य तम् ॥ ४६ ॥ चारु सुशब्दयोर्मुहुरुक्तिर्यदा यदृश्यत तदा तस्यैवातिशयस्तेनान्वभूयतेति बोधनाय ॥ ४७ ॥ श्रीरत्र रेखारूपा प्रेयसीतत्सखीरूपे त्वग्रे वक्ष्यते च कम्बुवत्त्रिरेखकण्ठम् ॥ ४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

देवं जगत्पूज्यमिति तमोऽधिष्ठातृत्वेन तामसैकसेव्यत्वं निरस्तम्। मौलिनमिति व्रीह्यादित्वादिन, सहस्रं फणा मौलयश्च किरीटानि शिरःसु यस्य, श्वेताद्रिमिवेति आकारस्य बृहत्त्वं ध्वनितम्। तत्र शिरः स्थानीयानि शृंगाणि तत्रत्यानि च रत्नानि मौलिस्थानीयानि ज्ञेयानि ॥ ४५ ॥ तस्याहीश्वरस्योत्संगे सुखासीनमिति ज्ञेयम्, 'तस्योत्संगे घनश्यामं श्रीवत्साच्छादितोरसम्। पीताम्बरधरं विष्णुं सूपविष्टं ददर्शह ॥' इति श्रीवैशम्पायनोक्तः, (हरिवंशे विष्णु प० २७।८) 'तद्रूपेण दर्शनञ्च', (भा० १०।३८।२२) 'प्रधानपुरुषावाद्यौ' इत्याद्युक्त्या पूर्वं द्वयोरपि साम्येन दृष्टयोरधुना कृपाविशेषेण गुणप्रधानताबोधनार्थम्। यद्वा, जगदादिकारणश्रीनारायणरूपत्वेन तस्मिन् माहात्म्यविशेष–प्रदर्शनार्थमिति, पुरुषं पुरुषाकारम्, शान्तं घोरत्वाद्यभावेन मनोनयनानन्दकरमित्यर्थः, पद्मपत्रवत् प्रान्तेऽरुणे ईक्षणे यस्य तम् ॥ ४६ ॥ चारु सुन्दर प्रसन्नञ्च वदनं यस्य तम्, प्रसन्नतामेव दर्शयति—चारुहासेन निरीक्षणम्, यद्वा, चारुणी हासनिरीक्षणे यस्य तम्, चारु-शब्दस्य सु-शब्दस्य च पुनपुनरुक्तिस्तत्ताद्विशेषस्यानिर्वाच्यत्वात् ॥ ४७ ॥ प्र-शब्देन भुजानां सुवृत्तत्वमपि सूचितमेव। श्रीर्लक्ष्मीः शोभा वा, कम्बुवत् त्रिरेखांकितः कण्ठो यस्य तम् ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सहस्रं शिरांसि फणा यस्य तं देवं देदीप्यमानं सहस्रेषु फणेषु मौलयः किरीटान्यस्य सन्तीति सहस्रफणमौलिनः पामादेराकृतिगणत्वात् मत्वर्थीयनप्रत्ययस्तं नीलमम्बरं यस्य तं विसतन्तुवत् श्वेतं हिरण्मयैः शृङ्गैः रजतगिरिमिव स्थितम् ॥ ४५ ॥

तस्याहीश्वरस्योत्सङ्गे फणप्रान्तभागे पुरुषमद्राक्षीत् क्वेमौ बालौ क्व मल्लावित्याशङ्कापजिहीर्षया प्रदर्शितमात्मानमद्राक्षीदिति भावः। कथम्भूतं नीलमेघवत् श्यामं पीते कौशेये वाससी यस्य चत्वारो भुजा यस्य तं शान्तं प्रसन्नं पद्मपत्रे इव ईक्षणे नेत्रे यस्य ॥ ४६ ॥ चारु सुन्दरं प्रसन्नं च वदनं यस्य चारुहासेन युक्तं निरीक्षणं यस्य शोभने भ्रुवौ यस्य उन्नता नासिका च यस्य चारुकर्णौ श्रोत्रे यस्य शोभनौ कपोलौ यस्य अरुणः अधरो यस्य सचासौ यस्य तम् ॥ ४७ ॥ प्रलम्बा आजानुलम्बिनः पीवराश्च भुजा यस्य तुङ्गावुन्नतौ अंसौ स्कन्धौ यस्य सचासौ उरसि श्रीर्यस्य स च तं कम्बुवत् शङ्खवद्रेखात्रयोपेतः नातिदीर्घो नातिह्रस्वश्च कण्ठो यस्य निम्ना नाभिर्यस्य वलिमद्वलित्रयोपेतमश्वत्थपल्लववदुदरं यस्य ॥ ४८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विसश्वेतं श्वेतपद्मनालतन्तुवद्धवलं शिखरैः सह श्वेतनामानं पर्वतम् ॥ ४५ ॥ उत्सङ्गे भोगे वपुरङ्गं तत्सङ्गहीनो जनार्दन इति च ॥ ४६ ॥ सुभ्रूश्च उन्नसश्च सुभ्रून्नसः तम् ॥ ४७ ॥ तुङ्गांसश्च उरःस्थलश्रीश्च तुङ्गांसोरः स्थलश्रीः तुङ्गावंसौ यस्य स तथा उरः स्थले श्रीर्यस्य स तथा तं वलिमच्च पल्लवश्चाकाशवच्च उदरं यस्य स तथा तं पल्लवश्च प्रकोष्ठे वापि विस्तृताविति वैजयन्तीमाला सुन्दररेखाङ्कितानन्ताण्डकोटिनिवेशनोदरमित्यर्थः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पुरुषं ब्रह्माण्डान्तर्यामिरूपम्। स्पष्टयिष्यते च। नतोऽस्म्यहं त्वामित्यादि। सत्त्वं धैर्य्यम् ॥ ४६—५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

श्रीनारायणोऽपि श्रीकृष्णस्य वैभवमिति विज्ञापयितु कालिन्दीह्रदे तदेवाक्रूराय दर्शयति—तस्योत्सङ्गे घनश्याममित्यादि बहुभिः। वस्तुत इदमेव श्रीनारायणरूपं यद्येनं दर्शयितुं शक्यते, तत्तस्य वैभवमिति दर्शयित्वा जले वपुरिति कृष्णस्यैव हेतुकर्तृत्वम् ॥ ४६-५७ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

वस्तुतस्तु श्रीकृष्णचन्द्रे गान्दिनेयस्य नारायणत्वेनैव ज्ञानम्, न तु तदतिरिक्तत्वेन, श्रीनारायणोऽपास्य वैभवमिति ज्ञापयितुं कालिन्दी ह्रदे स्ववैभवं दर्शयति—तस्योत्सङ्ग इत्यादि बहुभिः। विप्रतिपत्त्यभावान्न बहूद्यते ॥ ४७-५७ ॥

इत्येकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृष्णस्यांशं नारायणं वर्णयति। तस्य उत्सङ्गे कुण्डलीकृतदेहार्द्धे विलोक्येत्येकादशेन श्लोकेनान्वयः ॥ ४६-४७ ॥ तुङ्गांसमुरःस्थलश्रियञ्चेति द्वयोः कर्मधारयेणैकपदं वलयस्तिर्य्यङ्‌निम्ना रेखाः सन्ति यस्य तत् वलिमत् तच्च पल्लववत् अश्वत्थदलसदृशमुदरं यस्य तत् ॥ ४८ ॥

गूढार्थदीपिनी

तं वर्णयति। सहस्रफणेषु मौलयः किरीटानि यस्य सन्तीति। 'व्रीह्यादित्वादिनिः। विसवत् कमलनालवत् श्वेतं कैलासमिव स्थितम् ॥ ४५ ॥ तस्य शेषस्य उत्सङ्गे पुरुषं विलोक्य सात्त्वतः अक्रूरः अस्तौषीदित्येकादशेनान्वयः ॥ ४६ ॥ तं वर्णयति। हासेन युक्तम् निरीक्षणं यस्य। शोभने भ्रुवो उन्नता नासिका च यस्य ॥ ४७ ॥ तुङ्गौ अंसौ यस्य उरःस्थले श्री रेखारूपा यस्य। कम्बु शङ्ख तद्वत् रेखात्रयाङ्कितः कण्ठो यस्य। बलयः तिर्यक् रेखा। पल्लववत् अश्वत्वदलवत् उदरं यस्य ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कथम्भूतमहीश्वरम् सहस्रं शिरांसि यस्य तम् देवं दीप्यमानम् महस्रफणेषु मौलयः शिरोभूषणान्यस्य सन्तीति तथा तम् नीले अम्बरे यस्य तम् विशवत्कमलकन्दवत् श्वेतम् शृङ्गैर्नानामणियुक्तैः शिखरैरिति मौलियुक्तानां फणानामुपमा दर्शिता श्वेतं कैलाशमिव स्थितम् ॥ ४५ ॥ तस्याहीशस्योत्सङ्गे पुरुषं विलोक्य गिरा गद्गदयास्तौषीदिति द्वादशश्लोकानामन्वय ॥ ४६ ॥ चारु सुन्दरं प्रसन्न वदनं यस्य तम् शोभने भ्रुवौ यस्य उन्नता नासिका यस्य तञ्च तञ्च शोभनौ कपोलौ यस्य अरुणोऽधरो यस्य तञ्च तञ्च ॥ ४७ ॥ प्रलम्बाः आजानुलम्बिनः पीवराः पीनाश्च भुजा यस्य तम् तुङ्गावुन्नतौ अंसौ स्कन्धौ यस्य उरःस्थले श्रीर्यस्य तञ्च त च वलयस्तीर्य्यङ्‌निम्ना रेखा यस्य सन्ति तद्वलिमत् तच्च पल्लववत् अश्वत्थपल्लववदुदरं यस्य तम् ॥ ४८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पीवराः पुष्टास्तुङ्गावंसौ स्कन्धौ यस्य स चासावुरस्थले श्रीरमा यस्य तं वलिमत्त्रिबलिमत्पल्लवत्किसलयवत्कोमलमुदरं यस्य स बृहत्कटितटं तथा बृहती श्रोणी नितम्बौ यस्य तच्च तत्करभवत्करिशुण्डावत्कनिष्ठामूलवद्विद्यमानौ च तावूरू च तयोर्द्वयेनान्वितं ॥ ४५–४६ ॥ तुङ्गौ किञ्चिदुदञ्चितौ गुल्फावरुणनखाश्च तेषां व्रातः । क्रतुपुरुषकपोलगुल्फमेधाभिधानीति लिङ्गानुशासनसूत्रात्पुल्लिङ्गो गुल्फशब्दः । हस्तकुन्तान्तव्रातदूतधूर्तक्षतमुहूर्ताः पुंसीत्युक्तेर्व्रातशब्दश्च । सङ्गस्तस्य दीधितयः प्रकाशास्ताभिर्वृतं न वा नूतन्योऽङ्गुलयश्चाङ्गुष्ठौ च त एव दलानि तैः । कल्पभेदेन गङ्गाजनकत्वं द्वयोरस्तीति विशेषतो विशिष्याङ्गुष्ठेति ग्रहणमिति मन्तव्यं । वाराहे वामपादं तु तदन्येषु तु दक्षिणं । पादं कल्पेषु भगवानुज्जहार त्रिविक्रम इति पञ्चमतात्पर्योक्तेः । लक्षणशास्त्रे । गूढगुल्फो गूढजत्रुर्महापुरुष उच्यते । नीतिकृताऽपि । पादौ श्लिष्टाङ्गुली वेत्यारभ्य गूढगुल्फौ जङ्घे च । व्यासगद्ये च निगूढगुल्फायेति चेत्युक्तेः । कथं तुङ्गता गुल्फयोरिति चेन्न मध्यतुङ्गताया अक्षुण्णत्वात् । गुल्फैर्युक्ता अरुणाश्च ते नखाश्च तुङ्गाश्च ते गुल्फारुणनखा इति विग्रहे न तव दुराग्रहः कार्यकारी । उत्तुङ्गरक्तविलसन्नखचक्रवालेत्यादेः । तस्य तद्रूपस्वादिति । पङ्कजस्य युक्ता दलतेतीत्यर्थमुक्तिः ॥ ४७ ॥ महार्हैर्बहुमूल्यैर्मणिभिर्विभ्राजन्ति किरीटानि । किरीटमुकुटललाटेत्यादिलिङ्गानुशासनात् । कटकान्यङ्गदानि च गतं । यस्य स कटिसूत्रं काञ्ची ब्रह्मसूत्रं यज्ञोपवीतं हारनूपुरकुण्डलानि च तैर्भ्राजमानमित्यन्वयः ॥ ४८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सङ्कर्षणं वर्णयति । सहस्रशिरमिति । रूपान्तरे प्रतीतिर्दृढा न भवतीति स्वरूपमेव प्रकटितवान् सहस्रं शिरांसि यस्य दैत्यानां कामरूपे तथा भवतीति तद्व्यावृत्त्यर्थं देवमिति । सर्वत्र शिरसि फणाः मुकुटानि च एतादृशं शेषस्यैव रूपं भवति अन्यदपि ध्यानार्थमाह । नीलाम्बरमिति । तस्य ह्यावरणं कालरूपमिति पुनस्तम इति विसश्वेतता शीतलं चिक्कणं श्वेतं विसमिति अन्यधर्मार्थमेव श्वेतता निरूपिता वर्णनार्थं तु फणैः कृत्वा श्वेताद्रिं कैलासमिव शृङ्गैः सहितं दृष्टवान् स्थितमिति फणभागे उच्चत्वात् उत्थित इव दृष्टः ॥ ४५ ॥ ततो दृष्टं भगवन्तं वर्णयति । तस्योत्सङ्गे इति । सङ्ग उत्सङ्गे काये कोमलत्वात् समत्वात् क्रमेण वर्तुलत्वेन सूक्ष्मत्वात् सर्वस्यैव शरीरस्योत्सङ्गतुल्यता सुखशयनार्थं तथोक्तवान् अन्यथा सर्पे शयनं भयानकं भवतीति उत्सङ्गपदं घनश्याममिति । तप्तानां तापनाशकं यथा आकाशमेघः स्वाधार एव भवति तथा भगवानपि पीतं यत् कौशेयं पट्टाम्बरं तदेव वस्त्रं यस्य एतेषां स्वरूपं प्रयोजनं च पूर्वमुक्तं पुरुषं पुरुषाकारं चत्वारो भुजा यस्य शान्तं गुणातीतम् उत्पत्तिस्थितिलयानां तदंशैरेव सिद्धत्वात् पद्मगर्भवत् अरुणे ईक्षणे यस्य मेघतुल्यतया प्रयोजनं निरूपितं वासः प्रमाणं पुरुष इति मूलरूपता पूर्वमेवाहमिति हासमिति निरुक्त्या पुरुषार्थचतुष्टयं दातुं चतुर्भुजाभिव्यक्तिः अन्तःकरणादिदोषाभावाय शान्तिः दृष्टत्वैव तापहारित्वाय अरुणवर्णेक्षणत्वं कंसवधार्थं च गर्भपदेन व्याजेनैव मारयिष्यति न प्राकट्येनेति निरूपितम् एवं षडगुणा निरूपिताः ॥ ४६ ॥ चारु मनोहरं प्रसन्नं वदनं यस्य स्वरूपतः फलतश्च सर्वसुखदायिचारुः योऽयं हासः तत्पूर्वकं निरीक्षणं यस्य भक्तिज्ञानयोरुत्कर्षः सफलो निरूपितः । शोभने भ्रुवौ यस्य ऊर्ध्वा नासिका च कालासन्ययोः बहिरन्तः कार्यं निरूपिते सर्वं भगवत्यस्तीति ज्ञापयितुं निरूपयति चारू कर्णौ यस्य सर्वत्र भगवानुत्तम उक्तः सुष्ठु कपोलौ अरुणवर्णौ अधरौ यस्येति कामलोभावुत्तमौ निरूपितौ ॥ ४७ ॥ प्रकर्षेण प्रलम्बाः पीवराः स्थूला भुजा यस्य दूरस्थाः स्थूलदृष्टयोऽपि पुरुषार्थान् प्राप्स्यन्तीति ज्ञापयितुं तुङ्गावंसावुरःस्थलं च तत्र श्रीर्यस्य सर्वेषामेव सर्वं भारमूढ्वा सर्वं प्रयच्छतीति सर्वविद्यात्मकं त्रिवलीयुक्तं कण्ठस्थानमिति कम्बुवत् कण्ठो यस्य निम्ना नाभिर्यस्येति जगत्कर्तृत्वमस्य गूढमिति सुलक्षणत्वं च निरूपितं त्रिवली युक्तं पत्रवदश्वत्थपत्रवत् उदरं यस्य कोमलता किञ्चिदुन्नतत्वं च निरूपितं येन तद्वर्त्तिनः सर्वे सुस्था इति ॥ ४८ ॥

श्रीसुबोधिनी–सारः

तं विशिनष्टि । सहस्रं शिरांसि यस्य तं देवं सहस्रफणेषु मौलयो मुकुटानि यस्य संतीति तथा तं नीले अंबरे यस्य बिसं कमलनाल तद्वत् श्वेतं शृंगैः श्वेतं कैलासमिव स्थितम् ॥ ४५ ॥ तस्योत्संगेऽके घनश्यामं पीतपट्टांबरं चतुर्भुजं पुरुषं शांतं पद्मपत्रवदरुणे रक्ते ईक्षणे यस्य तम् ॥ ४६ ॥ चारु सुदरं प्रसन्नवदनं यस्यहासेन निरीक्षणं यस्य तं सुष्ठु भ्रुवौ यस्य उन्नता नासिका यस्य तं च तं च चारू कर्णौ यस्य सुष्ठु कपोलौ यस्यारुणोऽधरो यस्य तं च तं च ॥ ४७ ॥ प्रलंबाः पीवराः पुष्टा भुजा यस्य तं तुंगौ उच्चौ अंसौ स्कंधौ यस्य उरः स्थले श्रीर्यस्य तं च तं च कंबुः शंखस्तद्वत्त्रिरेखः कंठो यस्य निम्ना नाभिर्यस्य तं वलयस्तिर्यक् निम्ना रेखा यस्य संति तद्वालिमत्तदेव प्रल्लव तद्वदुदरं यस्य तम् ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सहस्रं शिरांसि फणा यस्य तम् , देवं देदीप्यमान् , सहस्रेषु फणेषु मौलयः यस्य सन्तीति तथा तम् , नीलमम्बरं यस्य तम् , बिसश्वेतं बिसवत् पद्मकन्दवत् श्वेतम् , तत्र दृष्टान्तमाह–शृङ्गैः हिरण्मयैः शिखरैः श्वेतं कैलासमिव स्थितम् ॥४५॥

तस्याहीश्वरस्योत्सङ्गे कुण्डलीकृतदेहार्धे पुरुषमद्राक्षीत। तं वर्णयति-नीलमेघवच्छ्यामम्, पीते कौशेये कीटरचितकोशजनिततन्तुनिर्मिते वाससी यस्य तम्, चत्वारो भुजा यस्य तम्, शान्तं प्रसन्नम्, पद्मपत्रे इवारुणे ईक्षणे यस्य तम् ॥ ४६ ॥ चारु सुन्दरं प्रसन्नं च वदनं यस्य तम्, चारुहासेन युक्तं निरीक्षणं यस्य तम्, शोभने भ्रुवौ उन्नता नासिका च यस्य तम्, चारू कर्णौ यस्य तम, शोभनौ कपोलौ यस्य अरुणः अधरः यस्य स चासौ स च तम् ॥ ४७ ॥ प्रलम्बा आजानुलम्बिनः पीवराश्च भुजा यस्य तम्, तुङ्गावुन्नतौ अंसौ स्कन्धौ यस्य स चासावुरसि श्रीर्यस्य तम्, कम्बुः शङ्खस्तद्वद्रेखात्रयोपेतो नातिदीर्घो नातिह्रस्वश्च कण्ठो यस्य तम्, निम्ना नाभिर्यस्य तम्, वलिमत्पल्लवोदरं वलयः तिर्यक् निम्ना रेखा यस्य सन्ति तद्वलिमत् तच्च तत् पल्लववत् अश्वत्थदलसदृशं च उदरं यस्य तम् ॥ ४८ ॥

अन्वितार्थप्रकाशिका

सहस्रेति। सहस्रं शिरांसि फणा यस्य तं देवं देदीप्यमानं सहस्रं फणा मौलयश्च यस्य सन्तीति तथा तम्। ब्रीह्यादित्वादिनिः। नीलमम्बरं यस्य तं तं बिसम्मृणालं तदिव श्वेतम। तत्र दृष्टान्तमाह। शृङ्गैः हिरण्मयैः शिखरैः श्वेतं कैलासमिव स्थितम् ॥ ४५ ॥ तस्येति। तस्याहीश्वरस्योत्सङ्गे कुण्डलीकृतदेहार्थे पुरुषमद्राक्षीत्। तं वर्णयति। घनमिव श्यामं पीते कौशेये कीटरचितकोशजनितकोशजनिततन्तुनिर्मिते वाससी यस्य तं शान्तं प्रसन्नं पद्मपत्रे इवारुणे ईक्षणे यस्य तम ॥ ४६ ॥ प्रसन्नेति। चारु सुन्दरं प्रसन्नं च वदनं यस्य तं चारुहासेन युक्तं निरीक्षणं यस्य तं शोभने भ्रुवौ उन्नता नासिका च यस्य तं चारू कर्णौ यस्य तं शोभनौ कपोलौ यस्य अरुणः अधरः यस्य स चासौ स च तम् ॥ ४७ ॥ प्रलम्बेति। प्रलम्बा आजानुलम्बिनः पीवराश्च भुजा यस्य तं तुङ्गावुन्नतौ अंसौ स्कन्धौ यस्य स चासावुरस्थले श्रीर्यस्य तं च तं द्वयोः कर्मधारयेणैकपद्यम्। कम्बुः शङ्खस्तद्वद्रेखात्रयोपेतो नातिदीर्घो नातिह्रस्वश्च कण्ठो यस्य तं निम्ना नाभिर्यस्य तं वलयः तिर्यक्निम्ना रेखा यस्य सन्ति तद्वलिमत् तच्च तत्पल्लवमिव अश्वत्थदलसदृशं च उदरं यस्य तम् ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सहस्रं शिरांसि यस्य तं सहस्रं फणा एव मौलयोऽस्यविद्यंते इति तथा तं नीले अंबरे वस्त्रे यस्य तं बिसवत् पद्मकंदवत् श्वेतं मृणालेतु विशंविसमिति द्विरूपकोशात्तालव्योपधोपिबि स शब्द शृंङ्गैः श्वेतं कैलास पर्वतमीव स्थितमद्राक्षीदितिपूर्वेणान्वयः ॥ ४५ ॥ तस्यो संगे कुंडलीकृत भोगार्द्धे पुरुषं विलोक्य भृशं प्रीत इत्येकादशेन श्लोकेनान्वय योजना ॥ ४६ ॥ सुभ्रून्नसंशोभमानेभ्रवौ यस्य उन्नता नासिका यस्य तं च तं च सुकपोलारुणाधरं शोभनौकपोलौ यस्य अरुणोऽधरो यस्य तं च तं च ॥ ४७ ॥ प्रलंबौपीवरौ पुष्टौभुजौ यस्य तं तुंगो उन्नतौ अंग सौ स्कंधौ यस्य उरः स्थले श्रीर्यस्य तं च तं च वलिमत्पल्लवोदर वलयस्तिर्यक् निम्नारेखा अस्य विद्यन्ते तत् वलिमत् तच्च तत् पल्लव वत् अश्वत्थ पत्र तुल्यं उदरं यस्य तम ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अहीश्वरं विशिनष्टि ॥ सहस्रेति ॥ सहस्रं शिरांसि फणा यस्य तं, देवं दीप्यमानं, सहस्रेषु फणेषु मौलयः, किरीटान्यस्य सन्तीति तं, पामादेराकृतिगणत्वान्मत्वर्थीय इन्प्रत्ययः। नीलमम्बरं यस्य तं, बिसवत्पद्मतन्तुवच्छ्वेतस्तं, शृङ्गैः हिरण्मयैः सानुभिः, श्वेतं रजतगिरिं इव, स्थितम् ॥ ४५ ॥ तस्येति ॥ तस्याहीश्वरस्य, उत्सङ्गे फणाप्रान्तभागे कुण्डलीकृतदेहार्द्धे इति यावत्। पुरुषं, अद्राक्षीदिति शेषः। क्वेमौ बालौ क्व मल्लावित्यक्रूराशङ्कापजिहीर्षया प्रदर्शितात्मस्वरूपं तमद्राक्षीदिति भावः। विलोक्येत्येकादशेन श्लोकेन नान्वयः। पुरुषं विशिनष्टि। घनवन्नीलमेघवत् श्यामस्तं, पीते कौशेये वाससी यस्य तं, चत्वारो भुजा यस्य तं, शान्तं प्रसन्नं, पद्मपत्रे इव अरुणे ईक्षणे नेत्रे यस्य तम् ॥ ४६ ॥ चार्विति ॥ चारु सुन्दरं प्रसन्नं च वदनं यस्य त, चारुणा हासेन युक्तं निरीक्षणं यस्य तं, शोभने भ्रुवावुन्नता नासिका च यस्य तं, चारू कर्णौ यस्य तं, सु शोभनौ कपोलौ यस्य अरुणोऽधरो यस्य स चासौ स च तम् ॥ ४७ ॥ प्रलम्बेति ॥ प्रलम्बा आजानुलम्बिनः पीवराः पुष्टाश्च भुजाश्चत्वारो बाहवो यस्य तं, तुङ्गावुन्नतावंसौ स्कन्धौ यस्य उरःस्थले श्रीर्यस्य स चासौ स च तं, कम्बुवच्छङ्खवद्रेखात्रयोपेतो नातिदीर्घो नातिह्रस्वश्च कण्ठो यस्य तं, निम्ना नाभिर्यस्य तं, वलयस्तिर्यङ्निम्ना रेखा अस्य सन्ति तद्वलिमत् तच्च पल्लववदश्वत्थदलसदृशमुदरं यस्य स चासौ स च तम् ॥ ४८ ॥

कृष्णप्रिया

शेषजी के हजार सिर हैं और प्रत्वेक फण पर मुकुट सुशोभित है। कमलनाल के समान उज्ज्वल शरीर पर नीलाम्बर धारण किये हुए हैं और उनकी ऐसी शोभा हो रही है, मानो सहस्र शिखरों से युक्त श्वेतगिरि कैलास शोभायमान हो ॥४५॥ अक्रूरजी ने देखा कि शेषजी की गोद में श्याम मेघ के समान घनश्याम विराजमान हो रहे हैं। वे रेशमी पीताम्बर पहने हुए हैं। बड़ी ही शान्त चतुर्भुज मूर्ति है और कमल के रक्तदल के समान रतनारे नेत्र हैं ॥ ४६ ॥ उनका वदन बड़ा ही मनोहर

और प्रसन्नता का सदन है। उनका मधुर हास्य और चारु चितवन चित्त को चुराये लेती है। भौंहें सुन्दर और नासिका तनिक ऊँची तथा बड़ी ही सुघड़ है। सुन्दर कान, कपोल और लाल-लाल अधरों की छटा निराली ही है॥ ४७॥ बाँहें घुटनों तक लंबी और हृष्टपुष्ट हैं। कंधे ऊँचे और वक्षःस्थल लक्ष्मीजी का आश्रयस्थान है। शङ्ख के समान उतार-चढ़ाववाला सुडौल गला, गहरी नाभि और त्रिवलीयुक्त उदर पीपल के पत्ते के समान शोभायमान है॥ ४८॥

बृहत्कटितटश्रोणिकरभोरुद्वयान्वितन् । चारुजानुयुगं [1]चारुजङ्घायुगलसंयुतम् ॥ ४९ ॥
तुङ्गगुल्फारुणनखव्रातदीधितिभिर्वृतम्[2] । नवाङ्गुल्यङ्गुष्ठदलैर्विलसत्पादपङ्कजम् ॥ ५० ॥
[3]सुमहार्हमणिव्रातकिरीटकटकाङ्गदैः । कटिसूत्रब्रह्मसूत्रहारनूपुरकुण्डलैः ॥ ५१ ॥
भ्राजमानं पद्मकरं शङ्खचक्रगदाधरम् । श्रीवत्सवक्षसंभ्राजत्कौस्तुभं वनमालिनम् ॥ ५२ ॥

कर्दमक्षमा

अन्वयः—बृहत्कटितटश्रोणिकरभोरुद्वयान्वितम्, चारुजानुयुगम्, चारुजङ्घायुगलसंयुतम्॥ ४९॥ तुङ्गगुल्फारुणनखव्रातदीधिभिः, वृतम्, नवाङ्गुल्यङ्गुष्ठदलैः, विलसत्पादपङ्कजम्॥ ५०॥ सुमहार्हमणिव्राज किरीट कटकाङ्गदैः, कटिसूत्र ब्रह्मसूत्र हारनूपुर, कुण्डलैः॥ ५१॥ भ्राजमानम्, पद्मकरम्, शंखचक्रगदाधरम्, श्रीवत्सवक्षसम्, भ्राजत्कौस्तुभम्, वनमालिनम्॥ ५२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कटितटं च श्रोणिश्च करभसदृशमूरुद्वयं च बृहच्च तत्कटितटश्रोणिकरभोरुद्वय च तेनान्वितम्। यद्वा बृहद्भ्यां कटितटश्रोणिभ्यां करभोरुद्वयेन चान्वितम्॥ ४९॥ तुंगावीषदुन्नतौ गुल्फाव रुणनखव्राताश्च तेषां दीधितिभिः। तथा नवाः कोमला अंगुल्योंगुष्ठौ च तान्येव दलानि तैश्च विलसच्छोभमानं पादपंकजं यस्य तम्॥ ५०॥ सुमहार्हा मणिव्राता येषु तैः किरीटादिभिः भ्राजमानम्॥ ५१–५२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

करभवन्निम्नोन्नतमरोमकं चारुद्वयम्। कटितटं काञ्चीपदम। पूर्वसमासे श्रोणिकटपदयोः स्थितेऽपि द्वित्वे सामान्याभिप्रायेणैकत्वमाश्रित्य कृतविग्रहत्वात्किञ्चिदस्वारस्यं मत्वा द्विवचनान्ताभ्यां विगृह्णाति–यद्वेति॥ कटिरेव तटं विस्तीर्णत्वात्, श्रोणिरत्र तदग्रभागस्तयोर्बृहत्त्वं स्थौल्यम्। "मणिबंधादाकनिष्ठं करस्य करभो बहिः" इत्यमरः। विश्वनाथस्तु—कटितटं नितम्बः। श्रोणिः ककुद्मती' इत्यमरः। ऊरुद्वयस्य करभसादृश्यं यथायथं स्थूलत्वेन क्रमनिम्नत्वेन च। अन्वितसंयुतादिपदं तत्सौन्दर्यातिशयव्यञ्जनायापूर्वमित्यर्थः॥ ४९॥ व्रातः समूहः। दीधितिभिः किरणैः॥ नवशब्देन सौकुमार्यं, तेन च नवदलवदारुण्यं लक्ष्यते। नवानि यान्यंगुल्यादिरूपाणि दलानि तैरिति वैपरीत्येन रूपकञ्चातिशयितार्थम्। अत्र कचिद्व्युत्क्रमेण वर्णनेन तद्दृष्टेस्तथैव भ्रमणं बोधयित्वा लोभाकुलता बोध्यते॥ ५०॥ सुमहार्ह्याः अमूल्याः। कटिसूत्रं काञ्ची। ब्रह्मसूत्रमुपवीतम्॥ अधुना भूषणादिकमाह—सुमहार्हेति। सुमहार्हं परमश्रेष्ठत्वं कटिसूत्रा दीनां ज्ञेयम्॥ ५१॥ पद्मः करे यस्य तम्॥ पद्मस्य पृथगुक्तिरनायुधत्वात्। करसंबंधेनोक्तिरन्यत्रांगेऽपि तद्धारणसंभवात्॥ ५२॥

श्रीमज्जीवगोस्वामिकृत वैष्णवतोषिणी

कटिरेव तटं विस्तीर्णत्वात् श्रोणिरत्र तदग्रभागः तयोर्बृहत्त्वं स्थौल्यं "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" उरुद्वयस्य तत् सादृश्यं यथायथं स्थूलत्वेन क्रमनिम्नत्वेन च अन्वितसंयुतादिपदं तत्सौन्दर्यातिशयव्यञ्जनायापूर्वमित्यर्थः। तत्तद्व्यञ्जयति॥ ४९॥ नवशब्देन सौकुमार्यं तेन च नवदलवदारुण्यं लक्ष्यते नवानि यान्यङ्गुल्यादिरूपाणि दलानि तैरिति वैपरीत्येन रूपकं चातिशयितार्थं तत्र कचिद्व्युत्क्रमेण वर्णनेन तद्दृष्टेस्तथैव भ्रमणं बोधयित्वा लोभाकुलता बोद्यते॥ ५०॥ अधुना भूषणादिकमाह। सुमहार्हेति द्वाभ्याम्। सुमहार्हशब्देन परमश्रेष्ठत्वं कटिसूत्रेत्यादीनामपि सुमहार्हत्वादिकत्वं ज्ञेयं तादृशकिरीटादिभिर्भ्राजमानं यद्वा तैस्तैर्विशिष्टं स्वभावतस्तु सूर्यकोटिवद्भ्राजमानं पद्मस्य पृथगुक्तिरनायुधत्वात् करसम्बन्धेनोक्तिरन्यत्राप्यङ्गे तद्धारणसम्भवात्॥ ५१॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कटिरेव तटं विस्तीर्णत्वात्, श्रोणिर्जघनम्, तयोर्बृहत्त्वं स्थौल्यं 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः। अन्वितमिति संयुतमित्यादि च सौन्दर्य्यातिशयाभिप्रायेणोक्तिपरिपाटीविशेषः, न त्वत्र समवायः संयोगश्च॥ ४९॥ हे नृपेति

---

१. दीर्घ–वीर. । २. नृप–वीर. । ३. महार्हमणिमियुक्त–वीर.; महार्हमणिकव्रात–प्रा. पा.।

भक्तजनजीवनधन-श्रीपादाब्जवर्णनेन प्रहर्षोदयात्तत्स्मरणविशेषाद्वा। नव-शब्देन सौकुमार्य्यं तले च नवदलवदारुण्यं ध्वन्यते। अतो नवेति दलविशेषणं वा। एवं श्रीमुखमारभ्य श्रीपादाब्जान्तं वर्णितम्, तत्रानुक्तान्यपि श्रीमदंगानि तत्र तत्रैवान्तर्भूतानि द्रष्टव्यानि; तत्र च वदनस्य चारुतया ललाटचिबुकादीनामपि चारुत्वम्, तथा हासस्य चारुतया दन्तानां कुन्दतोऽपि चारुत्वं सूचितमेव। भुजानां प्रलम्बतया करा अपि गृहीता एव, एवमन्यदप्यूह्यम्। तत्र चाधरानन्तरं भुजानामुरःस्थलानन्तरञ्च कण्ठस्येत्येवमुत्क्रमेण वर्णनम्, सौन्दर्य्यविशेषेणादौ तस्मिंस्तस्मिन्नेवांगे तस्य दृष्टिपाताभिप्रायेणेति। एवमग्रेऽप्यूह्यम् ॥ ५० ॥ अधुना भूषणादिकमाह, - सुमहार्हेति द्वाभ्याम्। सुमहार्हशब्देनामूल्यत्वं परमदिव्यत्वादिकमुक्तम्। ब्रह्मसूत्रं यज्ञोपवीतम्, कटिसूत्रादीनामपि सुमहार्हमणिव्रातमयत्वादिकं यथायथं द्रष्टव्यम्। तादृशकिरीटादिभिर्भ्राजमानं शोभमानम्; यद्वा, तैस्तैर्विशिष्टं स्वभावत एव सूर्य्यकोटिवद्विराजमानमित्यर्थः। पद्मं करे दक्षिणाधस्तले यस्य तम्, शङ्खादीन् धरतीति तथा तमिति तेषामायुधमुख्यत्वेन धारणे तात्पर्य्यात्, पद्मस्य च लीलार्थं गृहीतत्वेन धारणे तात्पर्य्याभावान्न तथोक्तम्। एवं दक्षिणाधः करक्रमेण वामगत्या चतुःकरेषु चतुरायुधानि ज्ञेयानि। तस्मिंश्चतुर्भुजत्वाभिव्यञ्जनाभिप्रायस्तैर्व्यञ्जित एव; यद्वा, साक्षाद्विद्योतमानं श्रीभगवन्तं तं परित्यज्य स्नानाद्यर्थं गतस्य तस्यान्याशेषोपेक्षया तस्मिन्नेवैकान्तितासम्पत्तय इति ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

बृहता कटितटेन श्रोण्या च करभसदृशोरुद्वयेन चान्वितं चारुजानुनोर्युगं यस्य दीर्घयोर्जङ्घयोर्युगलेन संयुतम् ॥ ४९ ॥ तुङ्गावीषदुन्नतौ गुल्फौ अरुणनखव्राताश्च तेषां दीधितिभिर्हे नृप! तथा नवा अङ्गुल्यः नवौ अङ्गुष्ठौ च तान्येव दलानि तैश्च शोभमाने पादपङ्कजे यस्य तं महार्हा मणिव्राता येषु तैः किरीटादिभिर्भ्राजमानम् ॥ ५०–५१ ॥ पद्मं करे दक्षिणे यस्य तमवशिष्टैस्त्रिभिः करैः शङ्खचक्रगदाः धरतीति तथा तं श्रीवत्सो वक्षसि यस्य तं भ्राजन् भ्राजमानः कौस्तुभो यस्य तं वनमाला अस्यास्तीति तथा तम् ॥ ५२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कनिष्ठिकामूलं करभः काञ्चीपदं कटितटञ्च श्रोणी च करभवद्रुचिरं मांसलमूरुद्वयञ्च तानि तैरन्वितम् ॥ ४९–५२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बृहद्भ्यां कटितटश्रोणिभ्यां करभसदृशोरुद्वये न च अन्वितं कटितटं नितम्बः श्रोणिः कटिः कटिः श्रोणिः ककुद्मती मणिबन्धादाकनिष्ठं करस्य करभो वहिरित्यमरः ॥ ४९ ॥ तुङ्गगुल्फेति गुल्फस्य तुङ्गता ईषम् मात्रैव व्याख्येया अतिसौकुमार्य्यात् नवा अङ्गुल्यः अङ्गुष्ठौ च त एव दलानि तैः शोभमाने पादपङ्कजे यस्य तं पृथग्भावैरिति पार्षदैः स्वामित्वेन सनकाद्यैर्ब्रह्मात्वेन ब्रह्माद्यैः परमेश्वरत्वेन मरीच्याद्यैः प्रजापतित्वेन प्रह्लादाद्यैरिष्टदैवतत्वेन तत्र वसुरुपरिचरः अत्र पार्षदाः पूर्वाद्यष्टस्वपि दिक्षु सनकाद्याः पश्चात् ब्रह्माद्या दक्षिणे भागे मरीच्याद्या वामे प्रह्लादाद्याः संमुखे नारदः संमुखार्द्धे एते च सर्व एव नित्याः प्रापञ्चिक ब्रह्माद्या एतद्ब्रह्मादिविभूतयो ज्ञेयाः यदुक्तं पाद्मोत्तरखण्डे "नित्याः सर्वे परे धाम्नि ये चान्ये च दिवौकसः। ते वै प्राकृतनाकेऽस्मिन्ननित्यास्त्रिदिवेश्वराः,, इति। श्रियेति श्र्यादयः स्वरूपभूताः तत्र श्रीरैश्वर्य्यं पुष्टिर्बलं गीर्ज्ञानं कान्तिः श्रीः कीर्त्तिर्यशः तुंष्टिर्वैराग्यमिति षड्भगशब्दवाच्याः शक्तयः इला भूशक्तिः संधिन्याख्या अन्तरङ्गा यस्या विभूतिः पृथ्वी ऊर्ज्जा लीला शक्तिरन्तरङ्गा यस्या विभूतिर्भूलोकस्था तुलसी विद्याविद्ये जीवानां मुक्तिसंसृतिहेतू वहिरङ्गे शक्तिर्महालक्ष्मील्र्हादिन्यन्तरङ्गा माया विद्याविद्ययोर्मूलभूता बहिरङ्गा चकारात्तदधीना जीवशक्तिस्तटस्था एताभिनितरां सेवितम् ॥ ५०–५७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। एकोनचत्वारिंशोऽयं दशमे ऽजनि सङ्गतः सङ्गतः सताम् ॥ ३९ ॥

गूढार्थदीपिनी

कटितटं नितम्बः श्रोणिः कटिः ताभ्यां हस्तिशुण्डासदृशेन ऊरुद्वयेन च युक्तम् ॥ ४९ ॥ तुङ्गौ ईषदुन्नतौ गुल्फौ अरुणनखानां व्रातः समूहश्च तेषां दीधितिभिः किरणैः वृतम्। नवाः कोमलाः अङ्गुलय अङ्गुष्ठौ च तान्येव दलानि तैः विलसन्ती पादपङ्कजे यस्य ॥ ५० ॥ सुमहार्हा अमूल्याः मणिसमूहाः येषु तैः किरीटादिभिः भ्राजमानम्। कटिसूत्रं काञ्ची तदादिभिश्च ॥ ५१–५२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

बृहता कटितटेन श्रोण्या च करभसदृशेनोरुद्वयेन च अन्वितम् ॥ ४९ ॥ तुङ्गावीषदुन्नतौ गुल्फौ अरुणा नखव्राताश्च तेषां दीधितिभिर्वृतम् नवाः अङ्गुल्यः अङ्गुष्ठौच तान्येव दलानि तैः विलसती शोभमाने पादपङ्कजे यस्य तम् ॥५०॥ सुमहार्हाणां मणीनां व्राताः येषु तैः किरीटादिभिः ॥ ५२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पद्मं करे यस्य तं ॥ ४९ ॥ नवभिर्द्विजोत्तमैर्मरीच्यादिभिः ॥ ५० ॥ वसवोऽष्टौ वोपरिचरो वा प्रह्लादश्च नारदश्च वसवश्च सुवश्च वा मुखं येषां ते तैः पृथङ्मार्गैर्वैदिकैस्तान्त्रिकैर्वचोभिरमलात्मभिर्निर्दोषमनस्कैः स्तूयमानं ॥ ५१ ॥ इलया भूम्याऽजया विद्यया । तमो हि दुर्गेत्यादेर्दुर्गारूपिण्या सर्वाण्यपि रमारूपाणि ॥ ५२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

बृहन् स्थूलः कटितटो यस्य श्रोणिरपि तथा ततोऽधो भागः स्त्रीणां नितम्बस्थानीयः ततोऽप्यधस्तात् करभवत् ऊरुद्वयेनान्वितमिति अनेकपादत्वं व्यावर्त्तयति भूमिः कटितटरूपेति आधारबाहुल्यं निरूपितं ततोऽधस्तात् सर्वाङ्गेषु सौन्दर्यं निरूपयन् तथा वर्णयति सर्वाङ्गेषु तस्य दृष्टिः पतितेति चारु जानुयुगं यस्य तथा जङ्घायुगेन च संयुतमेकस्यां जङ्घायामपरां संस्थाप्य तिष्ठतीति अन्यथा विश्लेषे भक्तानां मतिर्भिन्ना भवतीति ॥ ४९ ॥ तुङ्गौ गुल्फौ अरुणा नखास्तेषां व्रातः समूहः तस्य दीधितिभिः कान्तिभिर्वृतं नखकान्तयः सर्वाङ्गं व्याप्य तिष्ठन्तीति नवा अङ्गुलयः अङ्गुष्ठौ च कमलदलप्रायाः तैर्विलसत् शोभायुक्तं पादपङ्कजं यस्य सुसेव्यत्वाय चरणौ तथा निरूपितौ ॥ ५० ॥ एवं सर्वाङ्गवर्णनमुक्त्वा आभरणानां वर्णनमाह । कटिसूत्रेति । कटिसूत्रं काञ्चीदामरूपमर्यादानिमित्तं ब्रह्मसूत्रं यज्ञोपवीतं नाममर्यादानिमित्तं हारो मुक्तानां हृदये शोभाकरः मुक्तान् जीवान् हृदये स्थापयतीति ज्ञापयितुं नूपुरं पादे कुण्डले कर्णयोः ॥ ५१ ॥ भक्तिशास्त्रं योगज्ञाने च समलंकृते एतैर्भ्राजमानम् आयुधानि वर्णयति । पद्मकरमिति । एकस्मिन् करे पद्ममेतत् सर्वायुधसमम् अतः सर्वबुद्धिभ्रामकमिति ततः शङ्खः अपां तत्त्वं पृथ्वी पद्ममिति तेजश्चक्रङ्गदा आसन्यरूपेति एतानि बिभर्त्तीति तथा लक्षणान्तराण्याह । श्रीवत्सो दक्षिणावर्त्तरोमरेखा वक्षसि यस्य इदमसाधारणं लक्षणं भ्राजत् कौस्तुभरत्नं यस्य शुद्धा जीवाः कण्ठे स्थिता इति वनमालायुक्तमिति कीर्तियुक्तम् ॥ ५२ ॥

श्रीसुबोधिनी–सारः

बृहद्भ्यां कटितटश्रोणिभ्यां करभवत् ऊरुद्वयेन चान्वितं युक्तं चारुजान्वोर्युगं यस्य तं चारुणा जंघायुगलेन संयुतम्।४९। तुंगौ उच्चौ गुल्फौ अरुणनखानां व्रातः समूहस्तेषां दीधितिभिर्दीप्तिभिर्वृतं नवाः कोमला अंगुल्योंऽगुष्ठौ च तान्येव दलानि तैर्विलसच्छोभमानं पादपंकजं यस्य तम् ॥ ५० ॥ सुमहार्हा मणिव्राता येषु तैः किरीटादिभिः कटिसूत्रादिभिर्भ्राजमानम् ॥ ५१ ॥ पद्महस्तं शंखचक्रगदाधरं श्रीवत्सो वक्षसि यस्य तं भ्राजन् प्रकाशमानो मणिः कौस्तुभो यस्य तं वनमालिनम् ॥ ५२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

बृहद्भ्यां कटितटश्रोणिभ्यां करभसदृशेन हरिशुण्डासदृश्येन चारुणा ऊरुद्वयेन चान्वितम्, चारु जानुयुगं यस्य तम्, चारुजङ्घायुगलेन संयुतम् ॥ ४९ ॥ तुङ्गावीषदुन्नतौ गुल्फौ च अरुणनखानां व्रातः समूहश्च तेषां दीधितिभिर्वृतम्, नवा अङ्गुल्यः नवौ अङ्गुष्ठौ च तान्येव दलानि तैर्विलसती शोभमाने पादपङ्कजे यस्य तम् ॥ ५० ॥ सुमहार्हा बहुमूल्या उत्तमा मणिव्राताः येषु तैः किरीटादिभिर्भ्राजमानम् । ब्रह्मसूत्रं यज्ञोपवीतम् । स्पष्टमन्यत् ॥ ५१ ॥ पद्मं करे दक्षिणे यस्य तम्, अवशिष्टैस्त्रिभिः करैः शङ्खचक्रगदा धरतीति तथा तम्, श्रीवत्सो दक्षिणावर्तरोमरेखाविशेषो वक्षसि यस्य तम् ॥ ५२ ॥

अन्वितार्थप्रकाशिका

बृहदिति । बृहद्भ्यां कटितटश्रोणिभ्यां करभसदृशेन हस्तिषुण्डासदृशेन चारुणा ऊरुद्वयेन चान्वितं कटितटं नितम्बः श्रोणिः कटिः चारु जानुयुगं यस्य तं चारुजङ्घायुगलेन संयुतम् ॥ ४९ ॥ तुङ्गेति । तुङ्गावीषदुन्नतौ गुल्फौ च अरुणनखानां व्रातः समूहश्च तेषां दीधितिभिर्वृतं नवाः कोमलाः अङ्गुल्यः नवौ अङ्गुष्ठौ च तान्येव दलानि तैर्विलसन्ती शोभमाने पादपङ्कजे यस्य तम् । तुङ्ग त्यत्र लक्षणयौचित्येन गूढत्वं वा व्याख्येयम् । तथैव सामुद्रिकस्वारस्यात् ॥ ५० ॥ सुमहार्हेति । सुमहार्हा बहुमूल्या उत्तमा मणिव्राताः येषु तैः किरीटादिभिः कुण्डलान्तैः भ्राजमानं पद्मं करे दक्षिणे यस्य तम् । अवशिष्टैस्त्रिभिः करैः शङ्खचक्रगदा धरतीति तथा तं श्रीवत्सो दक्षिणावर्त्तरोमरेखाविशेषो वक्षसि यस्य तं भ्राजन् कौस्तुभो यस्य तम् । शता आर्षः । वनमालिनम् ॥ ५१–५२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कटितटं च श्रोणिः कटिपश्चाद्भागश्च करभतुल्यं ऊरुद्वयं च बृहच्च तत्कटितटश्रोणिकरभोरुद्वयं च तेनान्वितं यद्वा बृहद्भ्यां कटितटंश्रोणिभ्यां करभोरुयुगलेनवान्वितं ॥ ४९ ॥ तुंगौ इषदुन्नतौ गुल्फौ अरुणनखानां व्रतः कलापश्च तेषां दीधितिभिः कांतिभिः तथा नवाः कोमला अंगल्युः अंगुष्ठौ च तान्येव दलानितैश्च विलसत् शोभमानं पादपंकजं यस्य तं ॥ ५० ॥ महार्हामणिव्राता येषु तैः किरीटादिभिः भ्राजमानमित्युत्तरेणान्वयः ॥ ५१–५२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बृहदिति ॥ कटितटं च श्रोणिश्च करभसदृशमूरुद्वयं च बृहच्च तत् कटितटश्रोणिकरभोरुद्वयं च तेनान्वितस्तं, यद्वा बृहद्भ्यां कटितटश्रोणिभ्यां करभोरुद्वयेन चान्वितस्तम्। चारुजानुयुगं यस्य तं, चारुणी ये जङ्घायुगले ताभ्यां संयुतस्तम् ॥४९॥ तुङ्गेति ॥ तुङ्गावीषदुन्नतौ गुल्फौ अरुणनखव्राताश्च तेषां दीधितयस्ताभिः, वृतम्। तथा नवाः कोमलाः अङ्गुल्यः अङ्गुष्ठौ च तान्येव दलानि तैश्च, विलसती शोभमाने पादपङ्कजे यस्य तम् ॥ ५० ॥ सुमहार्हेति ॥ सुमहार्हा बहुमूल्या मणिव्राता नानाविधमणिसमूहा येषु तानि यानि किरीटकटकाङ्गदानि तैः, कटिसूत्रं च ब्रह्मसूत्र च हाराश्च नूपुरौ च कुण्डले च तैः ॥ ५१ ॥ भ्राजमानमिति ॥ भ्राजमानं, पद्मं करे दक्षिणपाणौ यस्य तं, अवशिष्टैः त्रिभिः करैः. शङ्खचक्रगदाधरं, श्रीवत्सो वक्षसि यस्य तं, भ्राजन् भ्राजमानः कौस्तुभो यस्य तं, वनमालाऽस्यास्तीति तं, इति द्वयोरेकसंबन्धः ॥ ५२ ॥

कृष्णप्रिया

स्थूलकटिप्रदेश और नितम्ब, हाथी की सूँड़ के समान जाँघें, सुन्दर घुटन एवं पिंडलियाँ हैं। एड़ी के ऊपर की गाँठें उभरी हुई हैं और लाल-लाल नखों से दिव्य ज्योतिर्मय किरणें फैल रही हैं। चरण-कमल की अंगुलियाँ और अंगूठे नयी और कोमल पँखुड़ियों के समान सुशोभित हैं ॥ ४९–५० ॥ अत्यन्त बहुमूल्य मणियों से जड़ा हुआ मुकुट, कड़े, बाजूबंद, करधनी, हार, नूपुर और कुण्डलों से तथा यज्ञोपवीत से वह दिव्य मूर्ति अलङ्कृत हो रही है। एक हाथ में पद्म शोभा पा रहा है और शेष तीन हाथों में शङ्ख, चक्र और गदा, वक्षःस्थल पर श्रीवत्स का चिह्न, गले में कौस्तुभमणि और वनमाला लटक रही हैं ॥ ५१–५२ ॥

सुनन्दनन्दप्रमुखैः पार्षदैः सनकादिभिः। सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च[1] द्विजोत्तमैः ॥ ५३ ॥
प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः। स्तूयमानं [2]पृथग्भावैर्वचोभिरमलात्मभिः ॥ ५४ ॥
श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या [3]तुष्ट्यैलयोर्जया। विद्ययाविद्यया शक्त्या मायया च निषेवितम् ॥५५॥
विलोक्य सुभृशं [4]प्रीतो भक्त्या परमया युतः। हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ॥ ५६ ॥
गिरा गद्गदयास्तौषीत् सत्त्वमालम्ब्य सात्वतः। प्रणम्य मूर्ध्नावहितः कृताञ्जलिपुटः शनैः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे[5] दशमस्कन्धे[6] [7]एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

कर्दमक्षमा

अन्वयः—सुनन्दनन्दप्रमुखैः, सनकादिभिः, पार्षदैः, ब्रह्मरुद्राद्यैः, सुरैः, च, नवभिः, द्विजोत्तमैः ॥ ५३ ॥ प्रह्लाद नारद, वसु, प्रमुखैः, भागवतोत्तमैः, पृथक् भावैः, अमलात्मभिः, वचोभिः, स्तूयमानम्, भगवन्तम्, विलोक्य ॥ ५४ ॥ श्रिया, कीर्त्या, गिरा, कान्त्या, कीर्त्या, तुष्ट्या, इलया उर्जया, विद्यया, अविद्यया, शक्त्या, च, मायया, निषेवितम्, श्रीकृष्णं विलोक्य ॥ ५५ ॥ सुभृशम्, पीतः, परमया, भक्त्या, युतः, हृष्यत्तनूरुहः, भावपरिक्लिन्नात्मलोचनः ॥ ५६ ॥ सत्त्वम्, आलम्ब्य, अवहितः, मूर्ध्ना, प्रणम्य, कृताञ्जलिपुटः, शनैः, गद्गदया, गिरा, अस्तौषीत् ॥ ५७ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायाः राजसप्रकरणस्य प्रमाणप्रकरणे एकोनचत्वारिंशत्तमाध्यायस्यान्वयाः समाप्ताः ॥ ३९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पृथक्पृथग् भावोऽभिप्रायो येषां तैः। तत्र पार्षदैः स्वामीति स्तूयमानम्। सनकादिभिर्ब्रह्मेति। ब्रह्माद्यैः सुरेश्वर इति। 'मरीचिरङ्ग्यंगिरसौ पुलस्त्यः पुलहः क्रतुः। भृगुर्वसिष्ठो दक्षश्च' इति नवभिर्द्विजोत्तमैः परः प्रजापतिरिति। वसुरुपरिचरः। प्रह्लादनारदवसवः प्रमुखा मुख्या येषां तैः परं दैवतमिति च। श्रेष्ठैर्वचोभिः पृथग्भावैर्वचोभिरिति वा ॥ ५३–५४ ॥ इला भूः ऊर्जा बलं विद्याविद्ये जीवानां मुक्तिसंसृतिहेतू माया तु तयोः कारणम्। शक्तिर्ह्लादिनी संवित् (ज्ञानम्) आभिरन्याभिश्च निषेवितम् ॥ ५५ ॥ विलोक्य सुभृशं प्रीतोऽस्मत्कृतोऽसावेवंभूतः परमेश्वर इति ज्ञात्वेति ॥ ५६–५७ ॥

इति श्रीमद्भागवते म० दशमे पूर्वार्धे टीकायामेकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

---

१. कविभिश्च–वीर. : २. मार्गे–विज. । ३. तुष्ट्येलयाऽजया–विज. । ४. शान्त–प्रा. पा. । ५. पारमहंस्यां संहितायां–प्रा. पा. ।
६. पूर्वार्द्धेक्रूर प्रतियाने–श्रीधर ; ऽक्रूरप्रतियानं नाम–प्रा. पा. । ७. सप्तत्रिंशो–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पार्षदैरनुचरैः नवभिर्नवसंख्याकैः। तत्र पार्षदैः सुनंदाद्यैः। संभवत्वाद्वचसामपि विशेषणम्। अत आह-वचोभिरिति, वेति। परिवारानाह-सुनंदेति। तत्र पार्षदाः सेवकत्वात्सर्वान्तरंगाः। सनकाद्या भक्तत्वेऽपि सेवांशराहित्येन ततो बहिरंगाः। निष्कामत्वेन भगवत्स्वरूपानुभवित्वेन चान्येऽभ्योऽन्तरंगाः। ब्रह्माद्येषु ब्रह्मरुद्रयोर्वस्तुतस्तु तद्गुणत्वेऽपि जगदधिकारांशाभिमानाभासद्भावेन ततो बहिरंगतादर्शकत्वम्। अन्ये तु बहिरंगा एव। "मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः। भृगुर्वसिष्ठो दक्षश्च" इति नवप्रजापतयो ब्रह्माद्यपेक्षया न्यूनज्ञानादित्वेन बहिरंगा एव। प्रह्लादादयस्तु तत्तन्महागुणत्वेऽपि सर्वेतत्तत्परिवारसहितस्य तस्य दैनोपासिकाभिमानितया बहिरेव प्रायस्तिष्ठन्तीति सर्वबहिर्गणिताः। एषां दिङ्नियमश्चागमानुसारात्। यथा पार्षदाः पूर्वाद्यष्टस्वपि दिक्षु, सनकाद्याः पश्चात्, ब्रह्माद्याः ऊर्ध्वादियथास्वदिक्षु, देवस्य दक्षिणे भागे वा। मरीच्याद्या वामे, प्रह्लादादयः संमुखे, नारदस्तु संमुखोऽद्धर्व इति। एते च नित्यावरणरूपत्वात्प्रापञ्चिकानामपीशा ज्ञेयाः। यथोक्तं पाद्मोत्तरखंडे-"नित्याः सर्वे परं धाम्नि ये चान्ये च दिवौकसः। ते वै प्राकृतनाकेऽस्मिन्ननित्यास्त्रिदशेश्वराः।" "तेह नाकं महिमानः सचन्ते" इति श्रुतिरिति। तत्र श्रेष्ठैरित्यमलात्मभिरित्यस्यार्थः। अविद्यमानं मलं दोषो यत्रेति। पृथग्भावैरिति वचोविशेषणमेव कृतं तथापि वक्तृष्वेव तात्पर्यम्। अमलात्मभिरिति परिवारस्य विशेषणम्। तेन च सर्वेषामभिप्रायाणां युक्ततमत्वं व्यक्तम्॥ ५३-५४॥ तयोर्विद्याविद्ययोः। आभिः श्र्यादिभिः। अन्याभिर्विमलोत्कर्षिणीज्ञानक्रियायोगाप्रह्वीसत्यानुग्रहेशानाभिश्च। आवरणरूपेण वर्तमानाः शक्तीराह—श्रियेति। तत्र श्रीरैश्वर्यम्। पुष्टिर्बलम्। गीर्ज्ञानम्। कान्तिः श्रीः। कीर्तिर्यशः। तुष्टिर्वैराग्यमिति षट् भगशब्दवाच्याः शक्तयः। इला भूशक्तिः संधिन्याख्या अंतरंगा, यस्या विभूतिः पृथ्वी। ऊर्जा लीलाशक्तिरन्तरंगा, यस्या विभूतिस्तु लोकस्था तुलसी। विद्याविद्ये जीवानां मुक्तिसंसृतिहेतू बहिरंगे, शक्तिर्महालक्ष्मीह्लादिन्यंतरंगा। माया विद्याविद्योमूलभूता बहिरंगा, चकारात्तदधीना जीवशक्तिस्तटस्था, एताभिर्नितरां सेवितम्॥ ५५॥ हृष्यन्ति प्रादुर्भूतानि तनूरुहाणि रोमाणि यस्य स तथा। भावेन परप्रेम्णा परिक्लिन्ने आनंदाश्रुजलस्नाते लोचने यस्य सः। परिक्लिन्नं द्रवीभूत आत्मा चित्तं लोचने च यस्येति वा॥ ५६॥ सात्वतोऽक्रूरः। सत्त्वं धैर्यं व्यवसायमिति यावत्, आत्मभावं वा। "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः। आत्मत्वे व्यवसायासुचित्तेष्वस्त्री तु जन्तुषु।" इति मेदिनी। सत्त्वं धैर्यम्। रुद्धकंठत्वेन शनैरेव अहो अक्रूरभाग्यमिति विमृशंस्तं नृपं प्रत्याह मुनीन्द्रः—हे भारतेति। भरतवंश्यैर्भवद्भिरपि बहुशोऽसावनुभूत एवेति भावः॥ ५७॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे एकोनचत्वारिंशोऽध्यायः॥ ३९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

परिवारानाह। सुनन्देति त्रिभिः। तत्र पार्षदाः सेवकत्वात् सर्वान्तरङ्गाः सनकाद्या भक्तत्वेऽपि सेवांशराहित्येन ततो बहिरङ्गा निष्कामत्वेन भगवत्स्वरूपानुभवित्वेन चान्येभ्योऽन्तरङ्गाः ब्रह्मादेषु ब्रह्मरुद्रयोर्दस्तुतस्तु तद्गुणत्वेऽपि जगदधिकारांशाभिमानाभाससद्भावेन ततो बहिरङ्गतादर्शकत्वम् अन्ये तु बहिरङ्गा एव मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुर्भृगुर्वशिष्ठो दक्षश्चेति नव प्रजापतयो ब्रह्माद्यपेक्षया न्यूनज्ञानादित्वेन बहिरङ्गा एव प्रह्लादादयस्तत्तन्महागुणत्वेऽपि सर्वतत्तत्परिवारसहितस्य तस्य दैन्येनोपासकाभिमानितया बहिरेव प्रायस्तिष्ठन्तीति सर्वबहिर्गणिताः एषां दिङ्नियमश्चागमानुसारात् यथा पार्षदाः पूर्वाद्यष्टस्वपि दिक्षु सनकाद्याः पश्चात् ब्रह्माद्याः ऊर्ध्वादियथास्वदंशदिक्षु देवस्य दक्षिणभागे वा मरीच्याद्या वामे प्रह्लादादयः सम्मुखे नारदस्तु सम्मुखोर्ध्व इति एते च नित्यावरणरूपत्वात् प्रापञ्चिकानामीशरूपा ज्ञेयाः। यथोक्तं पाद्मोत्तरखण्डे "नित्याः सर्वे परे धाम्नि ये चान्ये च दिवौकसः। ते वै प्राकृतनाकेऽस्मिन्ननित्यास्त्रिदशेश्वराः तेह नाकं महिमानः सचन्त इति वै श्रुति"रिति अन्यत्तैः तत्र श्रेष्ठैरित्यमलात्मभिरित्यस्यार्थः अविद्यमानं मलं दोषो यत्रेति पक्षे पृथग् भावैरिति वचोविशेषणमेव कृतं तथापि वक्तृष्वेव तात्पर्यम् अथामलात्मभिरिति परिवारस्य विशेषणं तेन च सर्वेषामेवाभिप्रायाणां युक्ततमत्व व्यक्तम्॥ ५३-५४॥ आवरणरूपेण च वर्त्तमानाः शक्तीराह। श्रियेति। तैर्व्याख्यातं तत्र ह्लादिनी स्वरूपानन्दानुभाविनी सम्वित् चिद्रूपा स्वरूपभूतमहाशक्तिः सैव हि शक्तिशब्दस्य प्रथमप्रवृत्तिहेतुर्मायातिरिक्ता च तया महालक्ष्म्याख्यया तदन्तरङ्गया निषेवितं तया तत्स्पर्शात् तदुक्त "ह्लादिन्या सम्विदाश्लिष्टः सच्चिदानन्द ईश्वर" इति सम्विदित्यस्यान्ते ज्ञानमित्यधिका टीका केनचिदबुद्ध्यैव कल्पितेति लक्ष्यते मायया च बहिरङ्गया निषेवितं चशब्देन गौणताव्यक्तेस्तया तदस्पर्शात् तदुक्तं श्रीविष्णुपुराणे "ह्लादनी सन्धिनी सम्वित्त्वय्येका सर्वसंस्थितौ। ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते" इति तथा द्वितीये च "विलज्जमानया यस्य स्थातुमीक्षापथेऽमुये"त्यादि अनयोरेव मूर्तिभेदाः श्र्यादयः प्रापञ्चिकाप्रापञ्चिकभेदेन द्विविधत्वात्तासां जात्या त्वेकत्वं विवक्षितं तत्र श्रीः सम्पदः सम्पादयित्री पुष्टिः शरीरस्य गीर्वाचः कान्तिः शोभायाः कीर्त्तिर्यशसः तुष्टिरन्तःकरणस्य इला भुवः ऊर्जा लीलायाः विद्या यथार्थज्ञानस्य अविद्या तदज्ञानस्य तच्च क्वचित्तत्प्रेम्णापि भवतीति ह्लादिनी वृत्तिरपि एतदुपलक्षणत्वेनान्या अपि ज्ञेयाः तदुक्तं पाद्मोत्तरखण्डे एव "एवं परं पदे नित्यैर्मुक्तैर्हरिपरायणैः। दिव्याभिर्महिषीभिश्च राजते विभुरीश्वर" इति॥ ५५॥ विलोक्येति। तैर्व्याख्यातं तत्राध्याहारेण व्याचष्टेऽस्म-

त्कृष्णोऽसावित्यादि यथोक्तं वैष्णवे "बलकृष्णौ तदाक्रूरः प्रत्यभिज्ञाय विस्मित" इति तस्यानुभव एतावानेव विचारस्त्वधिको भविष्यति अद्भुतानाह यावन्तीत्यादिद्वाभ्याम् ॥ ५६ ॥ सत्त्वं धैर्यं रुद्धकण्ठत्वेन शनैरेव ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना परिवारानाह—सुनन्देति त्रिभिः । तत्र पार्षदाः पुरतः सनकादयो मुनयः, पश्चात् ब्रह्मादयो देवश्रेष्ठाः, दक्षिणे 'मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः । भृगुर्वशिष्ठो दक्षश्च' इति नव प्रजापतयः, वामे नारदः, उपविष्टात् प्रह्लाद-वस्वादयः, श्रीपादाब्जद्वयान्तिक इत्येवमावरणरूपा ज्ञेयाः, प्रथमेन प्रमुखशब्देन श्रीगरुड़ादयः, द्वितीयेन च श्रीध्रुवाम्बरीषादयः, अन्ये च व्यक्तार्था एव । वचसां बहुत्वं बहुलवक्तृतया, किंवा बहुत्वाद्यपेक्षया, अमलो विशुद्ध आत्मा चित्तं येषां तैरिति सर्व्वेषामेव तेषामभिप्रायस्य युक्तत्वमुक्तम् । यद्वा, न तिष्ठति मलो भक्तिप्रत्यूहरूपो यस्मात् सः, अमलः श्रीकृष्णस्तस्मिन्नेवात्मा येषामिति तत्तच्छब्देन कृष्णस्यैवाभिधेयत्वात् सर्वं संगतमेवेति भावः अन्यत्तैर्व्याख्यातम् । तत्र पृथग्भावैरिति विशेषणं वचोभिरित्यस्य वैयर्थ्यपरिहारार्थमिति । अथवा कृष्णेति नारायणेत्यादिकीर्त्तनैः सर्वैरेव स्तूयते, केवलं तत्र तत्राभिप्राय एव पृथगित्यर्थः । तत्र कृष्णः सच्चिदानन्दघनमूर्तिर्भगवान् रमारमण इति पार्षदानाम्, परब्रह्मेति सनकादीनाम्, जगच्चित्ताकर्षकमाहात्म्यः परमेश्वर इति ब्रह्मादीनाम्, यज्ञादिपुण्यकृष्युत्पादको धर्म्ममूर्त्तिरिति द्विजोत्तमानाम्, श्यामसुन्दर इति श्रीप्रह्लादस्य, यादवेन्द्र इति श्रीनारदस्य, गोकुलोत्सव इति वसोः, एवमन्यदप्यूह्यम् । इत्थञ्च सामग्र्यतो वचसामुत्कर्षमुक्त्वा पदवर्णादिभिरप्याह—अमल आत्मा स्वरूपं येषां तैरिति ॥ ५४ ॥ आवरणरूपेण वर्त्तमानाः शक्तीराह—श्रियेति, लक्ष्मीरुरस्थले पूर्वमुक्तैव, इयं सर्वसम्पदधिष्ठात्री विभूतिमयी श्रीः, एवं पुष्ट्यादयोऽपि तत्तदधिष्ठात्र्यो ज्ञेयाः, तत्र पुष्टिः शारीरी, तुष्टिर्मानसी, गीः सामान्यवाक्, इला स्तुत्यादिविशेषात्मिका, ऊर्ज्जा इन्द्रियशक्तिः—एताः परिचारिका द्वादश, पूर्वादिचतुर्दिक्षुक्रमेण त्रिशोवर्त्तमाना ज्ञेयाः । अतो नितरां ताम्बुलार्पणचामरान्दोलनादिना सेवितं सेव्यमानम् ॥ ५५ ॥ सुष्ठु भृशमत्यर्थञ्च परमार्त्त्यर्थां वा । प्रीतः स्वामिनः परमैश्वर्य्यदर्शनेन भक्तानां हर्षविशेषोदयात्, यद्वा, स्वस्मिन्नैश्वर्य्यप्रकटनेन यदुकुलरक्षार्थमप्यैश्वर्य्यप्रकटनात्, भक्त्या गाढादरेण विशेषेण भावेन वा । परमभक्तियुतलक्षणमाह—हृष्यदित्यादिना । भावेन प्रेम्णा परितः क्लिन्न आर्द्रतां गत आत्मा मनः, अत एव लोचने च यस्य तम् । यद्यपि परमभक्तियुतत्वोक्त्या भावः स्वतः प्राप्त एव स्यात्, तथापि तत्प्रयोगः परिक्लिन्नतातिरेकाविच्छेदादिबोधनार्थम्, अत एव परिशब्दः, तथापि सत्त्वं धैर्य्यमालम्ब्यास्तौषीत्, यतः सात्वतो भक्तो यादव इति वा, तेन च भक्तश्रेष्ठता सूच्यते ॥ ५६ ॥ सत्त्वावलम्बनलक्षणमाह, प्रणम्येत्यादिना । अन्यथा प्रेमविवशस्तेन स्तुतेः प्रणामादेश्चासम्भवात्, अवहितस्तदेकाग्रचित्तः सन्, शनैरिति सत्त्वालम्बनस्वभावात् । यद्वा, प्रेमोद्रेकेण वाष्परूध्यमानकण्ठत्वात् ॥५७॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील–सनातन–गोस्वामिपाद–कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम–टिप्पण्यामेकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

नवभिः नव ब्रह्माण इति प्रसिद्धैः कश्यपादिभिः ॥ ५३–५५ ॥ भावप्रक्लिन्नात्मलोचनः स्नेहात्साश्रुलोचनः ॥५६–५७॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसुरिकृतशुकपक्षीये एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सुनन्दादिभिः पार्षदैः सनकादिभिश्च सुरश्रेष्ठैर्ब्रह्मरुद्रादिभिश्च नवभिर्द्विजोत्तमैर्मरीच्यादिभिश्च विशुद्धमानसैः क्रमेण सर्वशेषीति परं ब्रह्मेति सर्वकारणमिति प्रजापतिरित्येवं पृथक्-पृथग् अभिप्रायवद्भिर्वचोभिः स्तूयमानम् ॥ ५३–५४ ॥ श्र्यादिभिः मूर्त्तिविशिष्टैः शक्तिभिः द्वादशभिर्निषेवितम् ॥ ५५ ॥ एवंभूतं विलोक्य नितरां प्रीतः उत्कृष्टया भक्त्या च युक्तः अत एव हृष्यन्ति उदञ्चितानि तनूरुहाणि लोमानि यस्य भावेन प्रीत्यतिशयेन परिक्लिन्नः आर्द्र आत्मा चित्तं लोचने यस्य सः ॥ ५६ ॥ सात्वतोऽक्रूरः सत्त्वं धैर्यमवलम्ब्य मूर्ध्ना प्रणम्यावनतः प्रह्वः कृतमञ्जलिपुटं येन सः गद्गदया वाचा शनैस्तुष्टाव ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नवभिः द्विजोत्तमैः कश्यपादिभिः ॥ ५३ ॥ पृथङ्मार्गैः वैदिकतान्त्रिकमार्गविषयैः ॥५४–५५॥ भावेन तद्भक्तिस्वभावेन परिक्लिन्ने आनन्दाश्रुजलस्नाते आत्मलोचने यस्य स तथा ॥ ५६ ॥ सत्त्वं सत्त्वगुणमात्मभावं वा ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां सप्तत्रिंशोऽध्यायः ॥ ३७–३९ ॥

गूढार्थदीपिनी

नवभिः मरीच्यादिभिः स्तूयमानमुत्तरेणान्वेति ॥ ५३–५४ ॥ श्रीः सम्पत् तदादिभिः निषेवितम् । इला भूमिः ऊर्जा सामर्थ्यरूपा शक्तिः ॥ ५५ ॥ हृष्यन्ति प्रादुर्भूतानि तनूरुहाणि रोमाणि यस्य । भावेन परिक्लिन्नः द्रवीभूतः आत्मा लोचने च यस्य ॥ ५६ ॥ अवहितः सावधानश्च सन् अस्तावीदिति स्यात् ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यामेकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नवभिः मरीच्यादिभिः ॥ ५३ ॥ पृथक्पृथग्भावोऽभिप्रायो येषां तैर्वचोभिः ॥ ५४ ॥ श्र्यादिभिः मूर्तिमतीभिः शक्तिभिर्निषेवितम् तत्राविद्यया कर्म रूपया "अविद्या कर्मसंज्ञान्या तृतीया शक्ति" रिति वाक्यात् मायया त्रिगुणया ॥ ५५-५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकोनचत्वारिंशाध्यायार्थप्रकाशः ॥ ३९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विलोक्य सुभृशं प्रीतः परमया भक्त्या युतो भावेन सत्स्वभावेन । भावः स्वभावाभिप्रायेत्यादिविश्वः । परिक्लिन्नान्यात्मा मनश्च लोचने च यस्य सः ॥ ५३ ॥ सत्त्वं धैर्यं सात्वतो भक्तोगतं । सात्वच्छ्वफल्कजत्वात् । मूर्ध्ना प्रणम्यावहितः सावधान मनसः कृताञ्जलिपुटः शनैर्गद्गदया गिराऽस्तौषीत् ॥ ५४ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं लक्षणानि निरूप्य सेवकान् निरूपयति । सुनन्देति । सुनन्दनन्दादयः अष्टौ द्वाःस्थाश्च सनकादयः आधिदैविका भक्ताः सुरेशादयः इन्द्रप्रमुखाः अष्टौ लोकपालाः ब्रह्मा रुद्रश्च आद्यौ येषामेते उत्तमसेवकाः मनुष्यान् निरूप्य ऋषीन्निरूपयति । नवभिश्चेति मरीच्यादयो नव ब्राह्मणश्रेष्ठाः भगवत्कर्मपराः ॥ ५३ ॥ भगवद्भक्ता अप्याधिदैविकास्तत्र दृष्टा इत्याह । प्रह्लादेति दैत्येषु प्रह्लादः श्रेष्ठः नारदो देवेषु वसुः भीष्मो मानुषेषु त्रिविधा एव जीवाः तत्र भक्ता एव मुख्या इति एतत्प्रमुखैर्भागवतोत्तमैः स्तूयमानं दृष्टवान् तत्र स्तोत्रे सात्त्विकराजसतामसभावाः वक्तृनिष्ठा इति पृथग्भावैः स्तोत्राणि स्तोत्रमपि न तदानीमेव कल्पयित्वा कथनरूपं किन्तु वचोभिः पूर्वसिद्धैः गद्यपद्यादिरूपैः । ननु वैकुण्ठे भगवत्संनिधाने वा परमानन्दानुभवोऽस्तीति भोगं विहाय किमिति स्तोत्रं कुर्वन्तीत्याशङ्क्याह । अमलात्मभिरिति । निर्मलान्तःकरणास्ते भगवत्पराः नतु भोगपराः ॥ ५४ ॥ ततो भगवतः सर्वकार्यसाधिका द्वादशशक्तयः ता अपि दृष्टवानित्याह । श्रियेति । श्रीर्लक्ष्मीः श्र्यादिभिर्निषेवितं पुष्टिर्नाम यया सर्वे पुष्टा भवन्ति सा यत्र न प्रविशति ते बह्वाहारा अपि न पुष्टा भवन्ति एवं सर्वत्र गीः सरस्वती प्रसिद्धा कान्तिः काचित् प्रभा राज्याभिषेकादिषु प्रकटा जायते अलङ्करणानि तच्छेषाण्येव कीर्त्तिः प्रसिद्धा सा यत्र न प्रविशति तत्र समानकर्मणा न कीर्तिर्भवति तुष्टिः सन्तोषात्मिका यदभावे महाभावे महानपि तृणवद्भवति इला भूमिः ऊर्ज्जा सर्वसामर्थ्यरूपा विद्या ज्ञानरूपा मोक्षदायिनी अविद्या बन्धिका निद्रादयोऽपि तद्भेदा एव केचन मायाभेदा इत्याहुः । शक्तिरिच्छाशक्तिः एषा सर्वनियामिका माया सर्वभवनसामर्थ्यं व्यामोहिका चेति उभयविधापि परिगृहीता चकारेण अनेन सर्वत्र सर्वे भेदाः परिगृहीताः तेन मुख्या द्वादश अवान्तरभेदा असंख्याता एव भवन्तीति निरुक्तं भवति—

आधार एव रूपञ्च आकारोऽङ्गानि चैव हि ।
अलङ्करणचिह्नानि सेवका द्विविधा अपि । शक्तयश्चेति भगवान् सप्तधा विनिरूपितः ॥ इति ॥ ५५ ॥

एवं दृष्टवतो यज्जातं तदाह । विलोक्येति । आदौ तादृशं दुर्ल्लभं दृष्ट्वा सुभृशं प्रीतः ततः परमया भक्त्या युतः ततो हृष्यत्तनूरुहः—

अन्तस्तोषस्तथा भक्तिर्भक्तिचिह्नानि चैव हि । दृष्टे भगवति ह्यासन् भक्तस्येति निरूपितम् ॥

भावेन क्लिन्नमन्तःकरणं लोचने च यस्य प्रमोद्गमलक्षणमेतत् ततो वैकल्यमर्थादुक्त भवति ॥ ५६ ॥ ततो यत्कृतवांस्तदाह । गिरेति । गद्गदया वाण्या अस्तौषीत् सत्त्वमालम्ब्येति निर्गुणावस्थां दूरीकृत्य सत्त्वावस्थावलम्बनं कृतवान् यतः सात्त्वतः वैष्णवः ततः साष्टाङ्गम्प्रणम्य वैकुण्ठ एवाभिव्यक्त इति जलाद्यभावात् अवहितः सावधानो भूत्वा मनः सुस्थिरं विधाय कृताञ्जलिपुटो भूत्वा चिरकालं तूष्णीं स्थित्वा अल्पोद्गमसामर्थ्येऽपि स्तोत्र कृतवानिति वक्तुमाह । शनैरिति । स्तोत्रे हि कृते भगवता प्रदर्शितं तस्य हृदयारूढ जातमिति ज्ञायते नान्यथेति सर्वत्र स्तोत्रव्यवस्था ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां
षट्त्रिंशाध्यायविवरणम् ॥ ३६–३९ ॥

श्रीसुबोधिनी–सार

सुनन्दनन्दमुख्यैः पार्षदैः सनकादिभिः ब्रह्मरुद्राद्यैः सुरेशैः नवद्विजोत्तमैर्मरीच्यादिभिः ॥५३॥ प्रह्लादनारदोद्धवप्रधानैरमलात्मभिर्भागवतोत्तमैः पृथक् पृथक् भावोभिप्रायो येषां तैः वचोभिः करणैः स्तूयमानम् "स्वामीति पार्षदाः प्रोचुर्ब्रह्मेति सन-

कादयः। महेश्वरेति ब्रह्माद्या परमात्मेति ब्राह्मणाः" ॥ ५४ ॥ श्रिया इति स्पष्टं शक्तिभिर्निषेवितम् ॥ ५५ ॥ विलोक्य दृष्ट्वा सुभृशमत्यर्थं प्रीतः परमया भक्त्या युक्तः हृष्यन्ति तनूरुहाणि यस्य स भावेन प्रेम्णा परिक्लिन्न आर्द्रीभूत आत्मा चित्तं लोचने यस्य सः ॥ ५६ ॥ सात्त्वतोऽक्रूरः मूर्ध्ना शिरसा प्रणम्याऽवहितः सावधानः कृताञ्जलिपुटः सत्त्वं धैर्यमालम्ब्याश्रित्य गद्गदया गिरा वाचा शनैरस्तौषीत् आर्षं रूपम् अस्तावीत् ॥ ५७ ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायामेकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

सुनन्दादिभिः पृथग्भावोऽभिप्रायो येषां तैर्वचोभिः स्तूयमानम्। तत्र पार्षदैः स्वामीति, सनकादिभिर्ब्रह्मेति ब्रह्माद्यैर्महेश्वर इति, नवभिर्मरीच्यादिभिर्द्विजोत्तमैः प्रजापतिरिति च अभिप्रायभेदा ज्ञेयाः। भगवत्स्तुतौ तेषामधिकारं दर्शयन् विशिनष्टि–अमलात्मभिरिति। अमलो विषयवासनारहितः आत्मा अन्तःकरणं येषां तैः ॥ ५३–५४ ॥ श्रियादिभिर्द्वादशशक्तिभिर्निषेवितम्। श्रीर्लक्ष्मीः सर्वसम्पदधिष्ठात्री। पुष्टिर्यया स्वल्पाहारापि पुष्टा भवन्ति, तत्प्रवेशाभावे तु बह्वाहारापि न पुष्टा भवन्ति। एवमग्रेऽपि सर्वत्र ज्ञेयम्। गीः सरस्वती प्रसिद्धा। कान्तिः काचित् प्रभा राज्याभिषेकादिना प्रकटा भवति। कीर्तिः यशः। तुष्टिः सन्तोषः, यदभावे महानपि तृणवद्भवति। इला भूमिः। ऊर्जा सर्वसामर्थ्यरूपा। विद्या ज्ञानोपासनारूपा मोक्षोपकारिणी। अविद्या बन्धकरी अज्ञानम्, निद्रादयोपि तद्भेदा एव। शक्तिः सर्वप्रधानभूता इच्छारूपा। माया सर्वव्यामोहिका, चकारेण तदवान्तरभेदा असङ्ख्याता ज्ञेयाः ॥ ५५ ॥ एवंभूतं विलोक्य सुभृशमत्यन्तं प्रीतः परमया उत्कृष्टया च भक्त्या युत अतएव हृष्यन्तः उदञ्चितास्तनूरुहाः लोमानि यस्य सः भावेन प्रीत्यतिशयेन परिक्लिन्नः आर्द्रः आत्मा चित्तं लोचने च यस्य सः ॥ ५६ ॥ सात्वतः अक्रूरः शनैः सत्त्वं धैर्यमवलम्ब्य मूर्ध्ना भगवन्तं प्रणम्य कृताञ्जलिपुटः संयोजिताञ्जलिपुटः अवहितः सावधानश्च सन् गद्गदया स्खलिताक्षरया गिरा वाण्या अस्तौषीदिति द्वयोरन्वयः ॥ ५७ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने। नवत्रिंशो गतः कृष्ण–प्रयाणादिनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

सुनन्देति। अमलात्मभिः शुद्धचित्तैः सुनन्दादिभिः पृथक् पृथग्भावोऽभिप्रायो येषां तैः वचोभिः पार्षदविशेषणं वा स्तूयमानम्। तत्र पार्षदैः स्वामीति स्तूयमानं सनकादिभिः ब्रह्मेति ब्रह्मारुद्राद्यैः सुरेशैर्महेश्वर इति मरीच्याद्यैर्नवभिर्मरीच्यत्र्यङ्गिरःपुलस्त्यपुलहक्रतुभृगुवसिष्ठदक्षैर्द्विजोत्तमैः परः प्रजापतिरिति प्रह्लादनारदौ वसुरुपरिचरस्ते प्रमुखा मुख्या येषां तैः परं दैवतमिति च। अत्र पार्षदाः पूर्वाद्यष्टदिक्षु सनकाद्याः पश्चात् ब्रह्माद्या दक्षिणे भागे मरीच्याद्या वामे प्रह्लादाद्याः सम्मुखे इति आगमानुसारेण ज्ञेयम् ॥ ५३–५४ ॥ आवरणशक्तीः स्वरूपभूता आह—श्रियेति। श्रीपुष्ट्यादिभिर्द्वादशभिः शक्तिभिर्निषेवितं श्रीर्लक्ष्मीः सर्वसम्पदधिष्ठात्री पुष्टिर्यया स्वल्पाहारा अपि पुष्टा भवन्ति तत्प्रवेशाभावे तु बह्वादारा अपि न पुष्टा भवन्ति। एवमग्रेऽपि सर्वत्र ज्ञेयम्। गीः सरस्वती कान्तिः काचित्प्रभा राज्याभिषेकादिना प्रकटा भवति। कीर्त्तिः यशः तुष्टिः संतोषः यदभावे महानपि तृणवद्भवति। यद्वा। श्रीरैश्वर्यं पुष्टिर्बलं गीर्ज्ञानं कान्तिः श्रीः कीर्तिर्यशः तुष्टिर्वैराग्यमिति षड्भगशब्दवाच्याः। इला भूमिः ऊर्जा सर्वसामर्थ्यरूपा विद्या ज्ञानोपासनारूपा मोक्षोपकारिणी अविद्या बन्धकरी अज्ञानं निद्रादयोऽपि तद्भेदा एव। शक्तिः सर्वप्रधानभूता ह्लादिनी संविद् मायातोऽन्तरङ्गा चिच्छक्तिरिति व्यवह्रियते। इयमेव महालक्ष्मीरित्यन्ये। माया विद्याविद्ययोर्हेतुः चकारेण अन्याभिश्चाणिमादिभिर्निषेवितम् ॥ ५५ ॥ विलोक्येति द्वयम्। एवंभूतं विलोक्य अस्मत्कृष्णोऽसावेवंभूतः परमेश्वर इति ज्ञात्वा सुभृशमत्यन्तं प्रीतः परमया उत्कृष्टया च भक्त्या युक्तः एत एव हृष्यन्तः उदञ्चितास्तनूरुहाः लोमानि यस्य सः भावेन प्रीत्यतिशयेन परिक्लिन्नः आद्रः आत्मा चित्तं लोचने च यस्य सः ॥ ५६ ॥ सात्वतः अक्रूरः शनैः सत्त्वं धैर्यमवलम्ब्य मूर्ध्ना भगवन्तं प्रणम्य कृताञ्जलिपुटः अवहितः सावधानश्च सन् गद्गदया स्खलिताक्षरया गिरा वाण्या अस्तौषीत् अस्तावीत्। इडभाव आर्षः ॥५७॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्। गङ्गासहायो दशमोनचत्वारिंशकेव्यधात् ॥

इति दशमेऽन्वितार्थप्रकाशिकायामेकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सनकादिभिस्त्यागि ऋषिभिः द्विजोत्तमैः मरीच्यादि नवभिर्गृहस्थ ऋषिभिः ॥ ५३ ॥ पृथग्भावोऽभिप्रायो येषां तैः वचोभिः अमलात्मभिर्निर्मलान्तःकरणैः यद्वा निर्मलजीवात्मनिः प्रह्लादादिभिः वसुरुपरि चरवसुः ॥ ५४ ॥ श्रीःसंपदां संपादयित्री पुष्टिर्धर्मवैराग्यादि सद्गुणवृद्धि कर्त्री गीः सरस्वती कान्तिः शोभाधिष्टात्री कीर्त्तियशसामधिष्ठात्री तुष्टिः सज्जनमनसः संतोषकरी इलासूम्यधिष्टात्री उर्जालीलाऽधिष्टात्री विद्या आत्मपरमात्मज्ञानरूपा अविद्याविद्यायाः सकाशादमावेदोक्त कर्मरूपा च इत्यादिभिः

मायया लक्ष्मीरूपाया महाशक्त्या आभिरन्यारिरसंख्या ताभिश्च निषेवितं ।। ५५ ।। भावेन अयं कृष्णः परमेश्वर इत्यभिप्रायेण क्लिन्नानि आर्द्राणि आत्मा अंतःकरणं च लोचने च यस्य सः ।। ५६ ।। सत्वं धैर्यं अवहितः सावधानः ।। ५७ ।।

इति श्रीशुद्धैकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धव्याख्याने श्रीकृष्णप्रयाणो नाम एकोनचत्वारिंशोऽध्यायः ।। ३९ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सुनन्देति ।। सुनन्दश्च नन्दश्च तौ प्रमुखौ मुख्यौ येषां तैः, पार्षदैः सनकादिभिः, सुरेशैर्देवमुख्यैः, ब्रह्मरुद्राद्यैः नवभिः, द्विजोत्तमैर्मरीच्यादिभिश्च ।। ५३ ।। प्रह्लादेति ।। अमलात्मभिर्विशुद्धमानसैः प्रह्लादश्च नारदश्च वसुश्च ते प्रमुखा येषां तैः, भागवतोत्तमैः, क्रमेण सर्वशेषीति परं ब्रह्मेति सर्वकारणमिति प्रजापतिरित्येवं, पृथग्भावैः पृथगभिप्रायवद्भिः, वचोभिः स्तूयमानं, इति द्वयोरेकसम्बन्धः ।। ५४ ।। श्रियेति ।। श्रिया, पुष्ट्या, गिरा, कान्त्या, कीर्त्या, तुष्ट्या, ईलया, ऊर्जया, विद्यया, अविद्यया, शक्त्या, मायया च, एवं द्वादशभिः श्रीप्रभृतिभिः शक्तिभिर्निषेवितम् ।। ५५ ।। विलोक्येति ।। विलोक्योक्तविधं भगवन्तं दृष्ट्वा, सुभृशं नितरां प्रीतः, परमयोत्कृष्टया भक्त्या च युतः युक्तः । अत एव । हृष्यन्त उदञ्चितास्तनूरुहा लोमानि यस्य सः, भावेन प्रीत्यतिशयेन परिक्लिन्न आर्द्र आत्मा चित्त लोचने च यस्य सः ।।५६।। गिरेति ।। सात्त्वतोऽक्रूरः, सत्त्वं धैर्यं आलम्ब्यावलम्ब्य, मूर्ध्ना प्रणम्य, कृतोऽञ्जलिपुटो येन सः, अवहित एकाग्रचित्तः सन्, गद्गदया गिरा, शनैः अस्तौषीत् तुष्टाव । इति त्रयाणामेकसंबन्धः ।। ५७ ।।

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तम श्रीसहजानन्दस्वामिसुत श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे एकोनचत्वारिंशोऽध्यायः ।। ३९ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विलोक्येति : १०.३९.५६.

मायावितानपरिकल्पनशिल्पिनोऽस्य दृष्ट्वैमात्मसुखदं सदयस्वरूपम् ।
ताटस्थ्यमाप पलमेकमसौ कमग्नस्तद्रूपनिर्णयवितीर्ण-निजान्तरङ्गः ।। १०१ ।।
स वेद तच्छ्रीभगवत्स्वरूपं शुद्धं चिदानन्दरसावदातम् । यस्मिन्नकस्मादुदिते ह्यविद्या सद्यः समस्तप्रसराऽस्तमेति ।। १०२ ।।
तदाऽक्षितो बाष्पमिषेण निर्ययुर्बहिः परानन्दरसैकबिन्दवः ।
शरीरवृक्षोऽपि च माधवोदयात् सपल्लवो रोममिषादभूदलम् ।। १०३ ।।
तत्तादृशस्तस्य तदा पुरस्थं सद्रूपमालोक्य विशेषशोभि ।
अमेयमोदातिभरेण निम्नं मनस्तदाऽऽसीन्नमनानुकूलम् ।। १०४ ।।

गिरेति : १०.३९.५७.

भक्तानुग्रह-भक्तेष्टदानोत्कण्ठित-चेतसम् । भक्त्यानन्द-रसोद्रेक-रुद्धकण्ठः स तुष्टुवे ।। १०५ ।।

श्रीशकल्पतरुक्रीडा० ।

इति श्रीमन्नासिकनिवासि-कविवर-हरिसुरिविरचिते भक्तिरसायने एकोनचत्वारिंशोऽध्यायः ।। ३९ ।।

कृष्णप्रिया

नन्द-सुनन्द आदि पार्षद अपने 'स्वामी', सनकादि परमर्षि 'परब्रह्म', ब्रह्मा, महादेव आदि देवता 'सर्वेश्वर', मरीचि आदि नौ ब्राह्मण 'प्रजापति' और प्रह्लाद-नारद आदि भगवान् के परम प्रेमी भक्त तथा आठों वसु अपने परम प्रियतम 'भगवान्' समझकर भिन्न-भिन्न भावों के अनुसार निर्दोष वेदवाणी से भगवान् की स्तुति कर रहे हैं ।। ५३–५४ ।। साथ ही लक्ष्मी, पुष्टि, सरस्वती, कान्ति, कीर्ति और तुष्टि (अर्थात् ऐश्वर्य, बल, ज्ञान, श्री, यश और वैराग्य—ये षडैश्वर्यरूप शक्तियाँ), इला (सन्धिनीरूप पृथ्वी-शक्ति), ऊर्जा (लीलाशक्ति), विद्या-अविद्या (जीवों के मोक्ष और बन्धन में कारणरूपा बहिरङ्ग शक्ति) ह्लादिनी, संवित् (अन्तरङ्गा शक्ति) और माया आदि शक्तियाँ मूर्तिमान् होकर उनकी सेवा कर रही हैं ।। ५५ ।। भगवान् की यह झाँकी निरखकर अक्रूरजी का हृदय परमानन्द से लबालब भर गया । उन्हें परम भक्ति प्राप्त हो गयी । सारा शरीर हर्षावेश से पुलकित हो गया । प्रेमभाव का उद्रेक होने से उनके नेत्र आँसू से भर गये ।। ५६ ।। अब अक्रूरजी ने अपना साहस बटोरकर भगवान् के चरण में सिर रखकर प्रणाम किया और वे उसके बाद हाथ जोड़कर बड़ी सावधानी से धीरे-धीरे गद्गद स्वर से भगवान् की स्तुति करने लगे ।। ५७ ।।

श्रीमद्भागवत दशम स्कन्ध निरोधलीला के अन्तर्गत राजसलीला प्रमाणप्रकरण का ऐश्वर्य निरूपक ३९ वाँ अध्याय समाप्त ।। ३९ ।।

◆

अथ चत्वारिंशोऽध्यायः

श्लोकाः	अनु.	इ. व.	वसंत	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं श्लो.	अ.
३०	२२	१	१	६	१	१०८५	६	३८	११२६	३५।	१

[1]अक्रूर उवाच

मतोऽस्म्यहं त्वाखिलहेतुहेतु[2] नारायणं [3]पूरुषमाद्यमव्ययम् ।
यन्नाभिजातदरविन्दकोशद् ब्रह्माऽऽविरासीद् यत एष लोकः ॥ १ ॥

भूस्तीयमग्निः पवनः खमादिर्महानजादिर्मन इन्द्रियाणि ।
सर्वेन्द्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोऽङ्गभूताः ॥ २ ॥

नैते स्वरूपं विदुरात्मनस्ते ह्यजादयोऽनात्मतया[4] गृहीताः ।
अजोऽनुबद्धः स[5] गुणैरजाया गुणात् परं वेद न ते स्वरूपम् ॥ ३ ॥

त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम् । साध्यात्मं साधिभूतं च साधिदैवं च साधवः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—यन्नाभिजाताद्, अरविन्दकोशात्, ब्रह्मा, आविरासीत्, यतः, एषः, लोकः, आविरासीत्, त्वा, अखिलहेतुहेतुम्, नारायणम्, आद्यम्, अव्ययम्, पुरुषम्, त्वाम्, नतोऽस्मि ॥ १ ॥ भूः, तोयम्, अग्निः, पवनः, खम, आदि, महान्, अजा, आदिः, मनः, इन्द्रियाणि सर्वे, इन्द्रियार्थाः, च, सर्वे, ये, विबुधाः, ये, जगतः, हेतवः, ते, भवतः, अङ्गभूताः, सन्ति ॥ २ ॥ अनात्मतया, गृहीता, एते, अजादयः, हि, ते, आत्मनः स्वरूपम्, न, विदुः, अनोऽपि, अजायाः, गुणैः, अनुबद्धः, सः, गुणात्, परम्, ते, स्वरूपम्, न वेद, योगिनः, च साधवः, ईश्वरम्, महापुरुषम्, च साध्यात्मम्, साधिभूतम्, च साधिदैवम्, (ज्ञात्वा) त्वाम्, अद्धा, भजन्ति ४ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

चत्वारिंशे ततोऽक्रूरः कृष्णं मत्वेश्वरम् । प्रणम्य भक्त्या तुष्टाव सगुणागुणभेदतः ॥ १ ॥

श्रीकृष्णं प्रणमति । नतोऽस्मीति । हे कृष्ण त्वा त्वां नतोऽस्मि । त्वमस्मत्पितृव्यः कुतो मां बालं नतोऽसि तत्राह । आद्यं पुरुषमव्ययं चानादिनिधनमित्यर्थः । कुत एतत् । अखिलहेतूनां हेतुम् । स तु नारायणो नाहमिति चेत्तत्राह । नारायणं त्वां कि नारायण इति मां स्तौषि काऽत्र स्तुतिः सत्यमेवेत्याह । यन्नाभिजातादिति । यतो ब्रह्मणः एष लोक आविरासीत् । अनेन नारं जीवसमूहं तस्य अयनत्वात् नारायण इति सूचितम् ॥ ११ ॥ अखिलहेतुत्वं प्रपञ्चयति । भूरिति । खस्यादिरहंकारः । अजा माया तस्या आदिः पुरुषः । एते ये जगतो हेतवस्ते सर्वे तवांगभूता अंगाच्छ्रीमूर्त्तेर्भूताः जाताः । उपसर्जनभूता वा ॥ २ ॥ नन्वतिस्तुतिः कथं क्रियतेऽहमेवान्यत उत्पन्नस्तत्परतंत्रश्चेत्याशंक्य तवैषा माया त्वत्पारमार्थ्यं तु न कोऽपि वेदेत्याह । नैत इति । एते अज आदिर्येषां ते आत्मनस्ते स्वरूपं न विदुः । अनात्मतया जडत्वेन कारणेन । जडत्वे हेतुः । गृहीताः प्रत्यक्षादिभिर्दृष्टाः । न ह्यजडो दृग्गोचर इति भावः । ननु जडा मां मा जानन्तु जीवस्तु ज्ञास्यतीत्यत आह । अज इति । सोऽजो ब्रह्माऽप्यजाया गुणैरनुबद्ध आवृतो गुणातीतं ते तव स्वरूपं न वेदान्यः कुतो ज्ञास्यतीति । यद्वा प्रकृत्यादय आत्मनः स्वरूपं तव स्वरूपं च न विदुः । जडत्वादेव जीवस्तु तानात्मानं च वेत्ति न पुनस्त्वत्स्वरूपमिति । यथोक्तं हंसगुह्ये—"देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् । सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीढे ।" इति ॥ ३ ॥ ननु यदि केऽपि न जानंति कथं तर्हि संसारनिवृत्तिर्जीवानामित्याशंक्य साक्षादगोचरत्वेऽपि येन केनापि मार्गेण भजतां त्वं गम्योऽसीत्याह । त्वां योगिन इति हैरण्यगर्भादयोऽध्यात्माधिभूताधिदैवसाक्षिण महापुरुषं तदन्तर्यामिस्वरूपमीश्वरं नियन्तारं च यजंति ॥ ४ ॥

---

१. श्रीशुक उवाच—एवं दृष्ट्वा तमक्रूरः प्रसन्नहृदयेन्द्रियः । तुष्टाव पुण्डरीकाक्षं भक्त्यावनतकन्धरः ॥ मूले. ।

२. हेतुभूतं–विज. । ३. मादि–वीर. । ४. न्यान्मतया–वीर. विज. । ५. स्वगुणे–वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ईश्वरेश्वरं सर्वेश्वरम्। सगुणागुणभेदाभ्यामिति तृतीयार्थे तसिः (१)। तत्राक्षेपे। इत्यर्थ इति-उभयपदसंगृहीतोऽयमर्थ इत्याशयः। अत्र हेतुमाक्षिपति—कुत इति। एतद् अनादिनिधनत्वम्। 'सोऽखिलहेतुहेतुः' इत्युक्तेः। इति चेत् इत्युक्ते। तत्राक्षेपे उत्तरमाह—मां किं स्तौषीति, नारायणस्त्वम्। अत्र मन्नारायणत्वे। सत्यं यथार्थमेव। यस्य नारायणस्य नाभिजातात्। केचित्तु नारपदेन नराद्यखिलवस्त्ववकाशप्रदत्वेनायनत्वान्नारायण आकाश एव किं न स्यात्तद्वारणाय-पूरुषमिति। पुरुषाणामपि पितृपितामहादिवद्बीजपरम्परा स्यात्तद्वारणाय आदिमिति वदन्ति, तदत्राचारुवद्भातीति ॥ १ ॥ सर्वकारणत्वं विशदयति-'अनन्तस्य विधिर्वा प्रतिषेधे वा' इति न्यायेन खस्यादिरित्युक्तम्। एवमजादिरिहापि। इन्द्रियार्थाः शब्दादयः। विबुधा इन्द्रियाधिष्ठातारः। श्रीमूर्तेर्नारायणात्। "नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन्।", "श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत" इत्यादिश्रुतेः। यद्येत एव जगद्धेतवस्तर्हि किं मयेति चेदाह—उपसर्जनभूता न ह्याङ्गिनं प्रधानं विना गुणी भूतैरङ्गैः किञ्चित्कर्तुं शक्यत इति। श्रीमूर्तेर्जाता "वाचां वह्निर्मुखं क्षेत्रम्" इत्याद्युक्तेः ॥२॥ अत्राक्षिपति-नन्विति। तत्परतन्त्रोऽन्याधीनः। इति भाव इति-चेतनस्येन्द्रियाविषयत्वात्। "न हि ज्ञातारं वेद" इति श्रुतेः। ननु "वेदाहमेतं पुरुषं महान्तम्" इति श्रुतेर्ब्रह्मणस्तु ज्ञानमस्तीति प्रतीयतेऽतोऽर्थान्तरमाह—यद्वेति। यथोक्तमिति षष्ठे स्कन्धे हंसगुह्ये एतन्नामकस्तोत्रे दक्षेणोक्तम् ॥ ३ ॥ सर्वाज्ञत्वमाक्षिप्य समादधते—नन्विति। हैरण्यगर्भा हिरण्यगर्भोपासका योगिपदग्राह्याः। साधवो यथोचितानुष्ठाननिष्ठाः। केचिदत्राध्यात्मादिपदमन्यथा व्याख्यान्ति। तथाहि-आत्मानो जीवास्तैः सहाधिकत्वेन वर्तमानं साध्यात्मम्। भूतैराकाशादिभिः सह तद्विलक्षणत्वेन वर्तमानं साधिभूतम्। देवैर्ब्रह्मादिभिः। विशिष्टगुणत्वेन वर्तमानं साधिदैवं तत्तदुपासनार्थं तत्तदधिष्ठानेषु तत्तद्गुणप्रवर्तकत्वेन तत्तदुत्तमत्वेन वर्तमानं यजन्तीत्यर्थः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तं तावत् पुरुषत्वेन स्तौति। नतोऽस्मीति। तैर्व्याख्यातं तत्र साक्षाच्चतुर्भुजत्वादिनाविर्भावेऽपि त्वमस्मत्पितृव्य इत्यादिकं विनोदेन वदेदसावित्यभिप्रायेणाद्यमित्यादिकमाहेति भावः किमित्यादिः प्रश्नः नारायणत्वमारोप्य किल मां प्रोत्साहयसीत्यर्थः केत्यादिकमुत्तरम् अत्र न कापि स्तुतिः किन्तु सत्यमेवेदमित्यर्थः। अत्र तन्नाभीत्यादेर्हेतुत्वं च तर्जनीद्वयेन साक्षादरविन्दकोपदर्शनादिति ज्ञेयम् ॥ १ ॥ भूरिति तैर्व्याख्यातं तत्रादिशब्दस्य सापेक्षत्वान्निरन्तरवर्त्तमानस्य स्वस्यैवादितयाऽहङ्कारो लभ्यत इत्यभिप्रेत्याह। खस्येति खवदजेत्यपि पृथक् पदं पुरुषो जीवः तस्य मायात आदित्वं तदस्तीति तदंशत्वेन श्रीमूर्त्तेरति तस्या एव परमतत्त्वरूपत्वं साधितं जन्म चाचिन्त्यशक्त्या कारणस्य विकारित्वराहित्येनैव तद्भ्रमहानार्थमेव चोत्तरः पक्षः ॥ २ ॥ गुणात् परं तदनासक्तम् अन्यत्तैः तत्र तानात्मानं चेत्यर्थात्। यद्वा नन्वेतावन्तं कालं कथमेवं न ज्ञातवानसि तत्राह। न ते इति। तस्मादधुना कृपयाविर्भावादेव ज्ञायस इति भाव ॥ ३ ॥ ननु कोऽपि य जानाति चेत् कथं योगादिफलं सिद्ध्यति यतः "फलमत उपपत्तेः" इति न्यायेन बन्धको भवपाशेनेत्यादि प्रामाण्येन च तत एव सर्वं फलं स्यात् किमुत मुक्तिः तत्र शुभफलप्राप्तिश्च तस्य प्रसादेन प्रसादश्चोपासनयैव उपासना च ज्ञानेनैवेति उच्यते अन्तर्यामिणि तस्मिन्नेव सर्वोपासनावाक्यतात्पर्यपर्यवसानात् सर्वत्रैवोपास्यत्वभावस्तस्य स्यादिति तज्ज्ञानपूर्विकायामिव तदज्ञानपूर्विकायामप्युपासनायां तस्मादेव तत् सिद्ध्यति मिथ्यैव तु भावो यजमानदेवतान्तरयोरित्यभिप्रेत्य साधारण्येन तथा विज्ञापयति। यद्वा यथैवं कारणवाक्यानां त्वय्येव तात्पर्यं तथोपासनावाक्यानामपीत्याह। त्वामिति। अद्धा साक्षादिति महापुरुषरूपेणोपासनात् अत एव साधवः अन्येभ्यः श्रेष्ठाः अन्यतैः तत्र साक्षादगोचरत्वेऽपि भजनस्य साक्षाद्विषयत्वाभावेऽपीत्यर्थः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

शेषासन-श्रीनारायणरूपेण दर्शनादादौ तद्रूपवर्णनेनैव स्तुवन् प्रणमति—नतोऽस्मीति। पुरुषं परमेश्वरम्, अरविन्दस्य कोशादिति लौकिकपद्मवत् प्राक् मुकुलरूपेण जन्मत आविरासीदिति श्रीब्रह्मणः श्रीभगवद्गुणावतारतया नित्यत्वाभिप्रायेण। अवताराणां नित्यत्वं श्रीभागवतामृतोत्तरखण्डे विवृतमेव। यद्वा, जातो ब्रह्मणः समष्टिजीवरूपत्वादेव विविधवैचित्रीमयः सर्वो लोकप्रपञ्चः। अन्यत्तैर्व्याख्यातम्। तत्र हे श्रीकृष्णेति श्रीकृष्णतयैव तस्य प्रत्यभिज्ञानात्, अतएव ननु त्वमस्मत्पितृव्य इत्यादि व्याख्यातम्, अन्यथा साक्षाच्चतुर्भुजत्वादिना परमेश्वरतया दर्शने तादृशव्याख्यानुपपत्तिः, सत्यमेवेत्याहेति यन्नाभिजातादित्यादिस्वरूपमात्रकथनात् स्तुतिर्न स्यादेवेत्यभिप्रायेण वस्तुतश्च सर्वोत्कर्षमयस्य स्वरूपमात्रकथनमात्रेऽप्यन्यतो महाविशेषेण परमोत्कर्षसम्पत्त्या परमा स्तुतिः पर्यवस्यत्येव। यद्वा, तामेवेति लख्ये लेखकभ्रमात् सत्यमेवेति, अथवा अखिलस्य जगतो हेतूनामुत्पादकानां हेतुम्, अतएव नारस्य जीवसमूहस्य अयनमाश्रयम्, अतएव सर्वेषामादौ वर्त्तमानत्वाच्छ्रेष्ठत्वाद्वा, आद्यं पुरुषमीश्वरं, हेतुत्वेऽपि मृदादीनां घटाद्युत्पत्त्येव प्राप्तम्; व्ययं निरस्यति—अव्ययमिति, अखिलहेतुहेतुत्वादिकमेव दर्शयति,—यदिति। एष चतुर्दश-

भुवनात्मको लोकश्चराचरजीवजातं वा, अखिलजगत्स्रष्टृब्रह्मयोनि-कमलनाभत्वेनाखिलहेतुहेतुत्वादिकम्, तथा तावतापि पद्मजन्मना सरोवरस्येवाकिञ्चिद्व्ययत्वं स्वतःसिद्धमेवेति ॥१॥ भ्वादीनि महाभूतानि पञ्च; आदि-शब्दस्य सापेक्षत्वान्निरन्तरवर्त्तमानखस्यैवादितयाहङ्कारः; एवमग्रेऽपि। अजेति पृथक् पदम्; ततश्चाहंकारादिपुरुषान्ताश्चत्वारः, मनस्येव बुद्धिचित्तयोरन्तर्भावः, इन्द्रियाणि दश, इन्द्रियार्था विषयाः पञ्च, एवमेते पञ्चविंशतिः, विबुधाः श्रोत्राद्यधिष्ठातारो दिग्वाताद्या दश, मनआद्यन्तः करणचतुष्टयस्य चन्द्र-ब्रह्म-रुद्र-क्षेत्रज्ञाश्चत्वार इति चतुर्दश। ये चान्ये जगतो हेतवः काल-कर्म्म-स्वभावादयस्तत्तदधिष्ठातारस्ते सर्व्वे; अन्यत्तैर्व्याख्यातमेव। पक्षान्तरे च – नन्वादिकारणान्यन्यानि बहूनि सन्ति? सत्यम्, तान्यपि त्वत्त एवोत्पन्नानीत्याह—भूरिति। अङ्ग ब्रह्म तत्तेजोरूपविभूतित्वात्तस्मादुद्भूताः। यद्वा, अङ्ग हे भगवन्! ते त्वत्त एवम्भूताः प्रागुत्पन्नाः, अन्यत् समानम् ॥ २ ॥ अजा माया तदादयः, जीवस्य पृथग्वक्ष्यमाणत्वात्। अतएव तैर्व्याख्यातम् - अजा आदिर्येषामिति। स चिद्रूपोऽपि जीवः। यद्वा, चतुर्म्मुखोऽपि अनु निरन्तरं बद्धः, पक्षान्तरे ननु श्रीनारायणरूपमेव वर्णयन् स्तौषि, न च कथं साक्षाद्दृष्टं श्रीगोकुलोत्सवं द्विभुजं मम निजरूपमित्यपेक्षायामेतत्तव गोकुलोत्सवरूपं सर्व्वोत्कृष्टमिति गुणातीततां गताः परमभागवता एव ज्ञातुं शक्नुवन्ति, न त्वन्य इत्याह,—नेति। आत्मनः स्वयं साक्षाद्भूतस्यापि ते एते प्राकृता अजादयो जीवादयो न जानन्ति, किन्तु केवलं गोकुलवासिन एव जानन्तीत्यर्थः। नन्वेवं कस्याप्यन्यस्य तत्राशा नाम न तिष्ठेत्, सत्यम्, तादृशभक्त्या अन्योऽपि कश्चित् कदाचिज्जानीयादिति वदन् श्रीब्रह्मणस्तज्ज्ञानमाह—अज इति। स वृन्दावनं गतोऽजोब्रह्मा मायागुणैरनुबद्धोऽपि नते नमने त्वत्प्रणतौ सत्यां न इत्यनुवर्त्तत एव, तव स्वरूपं निजं रूपं वेद, (भा० १०।१४।१) –'नौमीड्य' इत्यादि-श्रुतेः ॥३॥ अद्धा साक्षादिति महापुरुषादिरूपेणोपासनात्, अतएव साधवः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आदिशब्देन पृथिव्यादीनां कारणभूतोऽहंकार उच्यते अजामूलप्रकृतिः सा कार्याणामादिभूता ये जगतो हेतवः ते तव अंशभूताः ॥ १–२ ॥ आत्मनः अन्तर्यामिभूतः सः अन्यात्मतया स्वनिष्ठात्मभ्रान्त्या अजः ब्रह्मा अजाया गुणैः प्रकृतिगुणैः सत्त्वादिभिः ॥ ३ ॥ साध्यात्मादिदेहावस्थितेन पञ्चभूतावस्थितेन आदित्यमण्डलावस्थितेन च रूपेण सहितम् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अस्तौषीदित्युक्तां स्तुतिमेव दर्शयति चत्वारिंशेन। नतोऽस्मीत्यादिना। तावत्सर्वजगत्कारणत्वसर्वान्तरत्वादिभिःस्तुवन्नमस्करोति नतोऽस्मीति द्वाभ्याम्। अखिलहेतुहेतुं त्वामहं नतोऽस्मि अखिलस्य व्यष्टिप्रपञ्चस्य ये हेतवो महदादयस्तेषामपि हेतुं कारणमित्यर्थः। नन्वखिलहेतुहेतुः सद्ब्रह्मात्माकाशप्राणादिष्वन्यतमो नत्वहमित्यत आह नारायणमिति। कृत्स्नकारणत्वस्यानेकनिष्ठत्वे "न तत्समश्चाभ्यधिकश्च दृश्यते" इत्युक्तरीत्या निस्समाभ्यधिकाद्वितीयवस्त्वसिद्ध्या तस्यैकनिष्ठत्वस्य वाच्यत्वात्सदादिसामान्यशब्दघटितकारणवाक्याभिप्रेतकारणवस्तुविशेषाकाङ्क्षाशामकेन विशेषशब्दात्मकनारायणपरघटितेन एको ह्वै नारायण आसीदितिवाक्येन नारायणेतरस्य निषेधपूर्वकं तस्यैव कारणत्वं श्रावयता कारणत्वेनावगतो नारायण एव स च त्वमेवेति भावः। नन्वस्त्वहं नारायण इति स एवाखिलहेतुरिति च तथापि ममापि कारणान्तरं स्यात्तत्राह पुरुषमादिम् आदिपुरुषं कारणत्वपराकाष्ठाभूतं स्वयं कारणान्तररहितमित्यर्थः एवमप्यव्ययं निर्विकारं विकाराणां शरीरभूतचिदचिद्गतत्वादिति भावः। अखिलहेतुहेतुत्वमेव प्रपञ्चयति। यन्नाभीति। एष परिदृश्यमानो व्यष्टिप्रपञ्चः यतो बभूव स ब्रह्मा चतुर्मुखः यस्य तव नाभेर्जातादरविन्दकोशात् आविरासीत् उदभवत् अनेन व्यष्टिसृष्टिश्चतुर्मुखद्वारिका समष्टिस्त्वद्वारिकेति दर्शितम् ॥ १ ॥ ननु किमिदमखिलहेतुत्वं निमित्तरूपमुतोपादानत्वरूपमित्याशङ्कायामुभयविधञ्चेत्यभिप्रेत्याह। भूरिति। पृथ्व्यादीत्याकाशान्तानि पञ्चभूतानि तेषामादिः कारणमहङ्कारः तथा तस्यापि कारणं महान् तस्याप्यादिकारणमजा मूलप्रकृतिः सा हि सर्वकार्य्याणामादिभूता तथा सात्त्विकाहङ्कारकार्य्यभूतानीन्द्रियाणि ज्ञानकर्मोभयेन्द्रियाणि मनश्च तेषामधिष्ठातारो विबुधधा देवाः दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रप्रजापतिचन्द्रमसः इन्द्रियाणामर्था विषयाः शब्दादयश्चेति ये जगतो हेतवस्ते सर्वे ते तवाङ्गभूताः शरीरभूताः अनेन मूलप्रकृतिविशिष्टो महदादिशरीरकतया तत्तद्रूपेण परिणत इत्युपादानत्वमुक्तम् मूलप्रकृतेर्महदादीनाञ्च शरीरत्वकथनेन नियन्तृनियाम्यभावसिद्धेर्निमित्तत्वमप्युक्तं जगतो ये हेतवः इति जगदन्तर्भूतज्ञानविकासात्मककार्य्यावस्थजीवकारणभूतज्ञानसङ्कोचरूपकारणावस्थजीवानामपि तदङ्गत्वप्रतीत्या जीवान् प्रत्युपादाननिमित्तत्वरूपोभयविधकारणत्वसिद्धिः ॥ २ ॥ ननु त्वमिव सर्वेऽप्येवंविधसर्वकारणं सर्वान्तरात्मानं सर्वशरीरकं च मां किं न जानीयुस्तत्राह। नैत इति। एतेत्वच्छरीरभूता अजादयः जीवादयः अन्तरात्मनस्तव स्वरूपं न विदुः अजादय इत्यत्रादिशब्दः प्रकृतितत्कार्य्यसंग्राहकः सच दृष्टान्तार्थः जडाः प्रकृत्यादयो यथा न तव स्वरूपं विदुः एवञ्जीवा अपि न विदुरित्यर्थः। ननु जडत्वात्प्रकृत्यादयो न विदुरिति युक्तम् अजडा जीवास्तु कुतो न विदुरित्यत्राह। अन्यात्मतया गृहीता इति। अन्यस्मिन् स्वस्माद्भिन्ने देहे आत्मतया आत्मभिमानेन तथा अन्यस्मिन् स्वतन्त्रात्त्वत्तोऽन्यस्मिन् स्वात्मनि आत्मतया स्वातन्त्र्याभिमानेन च गृहीताः ग्रस्ताः देहात्माभिमानस्वतन्त्राभिमानाभ्यां ग्रस्ताः स्वात्मान-

मेव देहविलक्षणमीश्वरपरतन्त्रञ्च न जानन्ति कथं नु त्वां विदुरित्यर्थः। इत्थमेव ब्रह्मापि न वेद किमुत तत्सृज्यास्तदर्वाचीना इति कैमुत्यन्यायेनाह। अज इति। अजो ब्रह्मापि स्वगुणैः स्वशरीरारम्भकसत्त्वरजस्तमोगुणैरनुबद्धस्तत्परवश इति यावत् अजायाः प्रकृतेर्गुणात् जातावेकवचनं गुणेभ्यः सत्त्वादिभ्यः परम्बिलक्षणं तन्नियन्तृ तव स्वरूपं न वेद किमुतान्ये न विदुरिति भावः। अनात्मतयेति पाठे जडत्वेन दृष्टाः अजादयः प्रकृत्यादयः यथा न विदुरेवमंभोऽपि ब्रह्मापि न वेद किमुतान्ये न विदुरिति योजनीयम् ॥ ३ ॥ ननु सर्वैरवेद्यं मत्स्वरूपं शशविषाणप्रायं स्यादित्याशङ्कायां देहात्माद्यभिमानिनां मांसचक्षुराद्यवेद्यमपि योगविशुद्धमनोवेद्यमित्यभिप्रयन् तदेव नानाविधब्रह्मविद्याभिर्ज्ञानयोगिनः कर्मयोगिनश्च यजन्तीत्याह। त्वामिति। योगिन इत्यस्य केचिदित्यादिः केचिद्योगिनः आनन्दवल्यादिविहितोपासननिष्ठाः महापुरुषं प्रकृतेस्तत्संसृष्टाच्चेतनान्मुक्तान्नित्याच्च विलक्षणमीश्वरं त्वामद्धात्वामेव अद्धेत्यवधारणे साक्षात्त्वामेव सत्यं ज्ञानमनन्तमित्याद्युक्तविधं यजन्ति आराधयन्ति उपासत इति यावत् केचित्साधवस्तु अन्तरादित्यप्रतर्दनादिविद्यानिष्ठास्तु साधिदैवम् आदित्यान्तस्थमिन्द्रादिदेवतान्तर्यामिणमिन्द्रादिशरीरकं त्वां यजन्ति उपासनां कुर्वन्तीत्यर्थः। केचित्तु साध्यात्ममात्मनि शरीरे अध्यात्मं तेन सहितं साध्यात्मं शरीरावयवाक्षिहृदयादिषु वसन्तं त्वां जयन्ति तथाहि छान्दोग्ये य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते इत्युपक्रम्य तस्य ऋक्साम गेष्णावित्यधिदैवतमथाध्यात्मं य एषोऽन्तरक्षिणि पुरुषो दृश्यते इत्युक्तम् अपरे तु योगिनः साधिभूतं सर्वभूतस्थं सर्वशरीरकं त्वां भजन्ति सर्वं खल्विदं ब्रह्म तज्जलानीत्युक्तविधामुपासनां कुर्वन्तीत्यर्थः। तदेवमुपासनानामद्वारकसद्वारकभेदेन द्वैविध्यं दर्शितम् ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अक्रूरस्तुतिव्यपदेशेन विद्वदधिकारयोग्यं भगवदुपासनाप्रकारं निरूपयत्यस्मिन्नध्याये। तत्राक्रूरो भगवन्तं दृष्ट्वोत्तरं किञ्चकारेति परीक्षितो मानसीं शङ्कां शुकः परिहरति। एवमिति ॥ नम्यस्यानम्ये वैशिष्ट्यस्य ज्ञापनाय व्यावर्तकलक्षणमाह। अखिलेति। कदाचिन्नेत्यन्यथा प्रतीतिं निवारयति। भूतमिति। यदेतन्निमित्तकारणत्वं तत्कदाचिन्नापगच्छतीत्यर्थः। अखिलहेतुहेतुमिति पाठे उपादानकारणानामपि कारणमित्यर्थः। किन्नामधेयोऽयमिति तत्राह। नारायणमिति। अरविरुद्धत्वान्नारा गुणास्तेषामयनं ननु तर्हि किमयं शब्दगुणाश्रयत्वेनाकाश इति चेत्तत्राह। पूरुषमिति पूर्णषड् गुणम् आकाशस्यैकगुणत्वान्महान्विशेषः नन्वाकाशो वैनामरूपयोर्निर्वहितेति श्रुतेरविनाशित्वेनाखिलहेतुत्वन्नरसमुदायो नारमिति नरसमुदायादिसर्वपदार्थस्थावकाशप्रदत्वेनाश्रयत्वेन नारायणशब्दवाच्यत्वमाकाशस्य किन्न स्यादित्यतो वाह। पूरुषमिति पूरुषस्यापि पितृपितामहादिवद् घटमृदादिवद्वा बीजपरम्परा स्यादिति तत्राह। आदिमिति। वैशेषिकपक्षे यथापरमाणोः कारणत्वं पर्याप्तम् एवमत्रापीत्यर्थः। एवंविधस्यापि सगर्भकर्कटवद्विनाशित्वं स्यात्किं नेत्याह। अव्ययमिति। न केवलं स्रष्टृत्वेनास्य कारणत्वं पर्याप्तमपितु संहर्तृत्वेनापीति भावेनाह। आदिमिति। अद भक्षण इति धातोः अत्तृत्वादादिमित्यर्थः। संहर्तृत्वमप्यस्मिन्पर्याप्तमिति प्रकटनायाणप्रत्ययप्रयोगः जीवो जीवस्य जीवनमितिन्यायेन अत्तुरस्याप्यन्योऽत्तास्तादित्यतो वाह। अव्ययमिति। सर्ववारणे विरिञ्चे जाग्रति पर्याप्तकारणत्वमस्य कथमिति तत्राह। यन्नाभीति। विरिञ्चस्य कारणत्वं तर्हि कथमिति तत्राह। यत इति। यतोविरिञ्चाल्लोको देवलोकोऽभूदिति शेषः ॥ १ ॥ आदित्वं स्पष्टयति। भूरिति। आत्मन आकाशः सम्भूत इति श्रुतिः आदिभूतादिरहङ्कारः अजा च आदिश्च अजादिः प्रकृत्याख्यकारणमित्यर्थः। न केवलमस्य समस्ताचेतनहेतुत्वं किन्तु चेतनराशेरित्याशयेन वाह। अजादिरिति। ब्रह्मादिचेतनसंघ अजादिः ये सर्वे अजादयो जगतो हेतवो यथायोग्यं कारणानि ते सर्वे तवाङ्गभूता अङ्गेभ्यो जाताः पद्भ्यां भूमिरितिश्रुतेः ॥ २ ॥ त्वदङ्गजाताद्यविज्ञातमाहात्म्यं मर्त्येन मया न ज्ञायत इति किं वक्तव्यमित्याशयेनाह अवेदने निमित्तमाह। अन्येति। अन्यात्मतया गृहीताः एते जीवात्मानो मत्तोऽन्ये इति भगवता गृहीताः ईश्वरो भ्रान्तत्वात्तथा गृह्णातीति चेन्न। अहं परो हि मद्भिन्ना जीवात्मानोऽल्पशक्तय इत्यादेः नहीश्वरस्य सर्वज्ञस्य भ्रान्तिरुपपद्यते नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इति श्रुतेः ये तवाङ्गेभ्यो जातास्त एव अजादयः आत्मनस्तव स्वरूपं विदुरित्यन्वयः। अजो ब्रह्मा आदिर्येषां रुद्रादीनां ते अजादय इति तद्गुणसंविज्ञानबहुव्रीहौ ब्रह्मणोऽप्यज्ञानमापद्यते वेदाहमेतं पुरुषमिति श्रुत्या तद्विज्ञानप्रतीतेरतो ब्रह्मकारणका रुद्रादयो न विदुरित्यर्थः। किन्नस्यादित्यत आह। अज इति। अजाया गुणैर्बद्ध इति हेतुगर्भं विशेषणं गुणात्परं दूरीभूतम् अजादय इत्यत्र अजाशब्देन चित्प्रकृतिरपि ग्राह्या तस्या अपि सर्वात्मना तद्विषयज्ञानाभावात् तदुक्तं यथा हरिः स्वमात्मानं वेद तद्वद्रमापि चेत्यादि अनेन दाहमित्यस्यापि गतिरुक्ता भवति अत ईश्वरस्य दुर्ज्ञेयत्वात्साधनानुष्ठानवैयर्थ्यमित्याशङ्का परास्ता तत्प्रसादेन यथायोग्यज्ञानसम्भवाद्यथाशक्तिस्वहितमनुष्ठेयम् ॥ ३ ॥ अत्र किम्प्रमाणमित्यतो वृद्धाचार एव प्रमाणमित्याह। त्वामिति अधिष्ठानविशेषमाह। साध्यात्ममिति। आत्मशब्दोक्तनरैः सहततोऽधिकत्वेन वर्तमानं भूतैराकाशादिभिः सह तदुत्तमत्वेन वर्तमानं दैवैर्ब्रह्मादिभिः सह ततोऽविशिष्टगुणत्वेन तिष्ठन्तं तत्तदुपासनार्थं तत्तदधिष्ठानेषु तत्तद्गुणप्रवर्तकत्वेन तत्तदुत्तमत्वेन वर्त्तमानमित्यर्थः। तदुक्तं स्थितो ब्रह्मादिदेवेषु खादिभूतेषु चेश्वर इत्यादि ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यथा कारणवाक्यानां त्वय्येव तात्पर्यं तथोपासनावाक्यानामपीत्याह। त्वामिति ॥ १-४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चत्वारिंशे स्वेष्टदेवं तुष्टाव विविधा ब्रुवन्। उपासना उपास्यांश्च गान्दिनीनन्दनो नमन् ॥

अखिलानां हेतुर्ब्रह्मा तस्यापि हेतुं पुरुषमिति पुरुषाकारत्वमेव सर्वहेतुहेतुत्वम् आद्यमव्ययमित्यनादिनिधनत्वं सर्वहेतुहेतुत्वं विवृणोति। यन्नाभीति ॥ १ ॥ किञ्च पृथिव्यादयः पदार्थास्तव पुरुषाकारस्यास्य चिदानन्दमयस्यैवाङ्गानां विभूतय इत्याह। भूरिति। आदिरहंकारः अजादिः प्रधानजीवकालकर्मादिवस्तुमात्रम् एते ये जगतो हेतवस्ते सर्वे तव अङ्गभूताः अङ्गात् श्रीमूर्तेर्भूता जाताः यदुक्तम् वाचां वह्नेर्मुखं क्षेत्रमित्यादि ॥ २ ॥ एते त्वत्तो जाता एव केवलं न तु त्वां जानन्तीत्याह। नैते इति। एते अजा आदिर्येषां ते आत्मनः परमात्मनस्ते स्वरूपं न विदुः कुतः जडत्वेन जाड्येन गृहीताः ग्रस्ता इत्यर्थः। ननु जडा मां न जानन्तु चेतनो जीवस्तु ज्ञास्यतीत्यत आह। अजो ब्रह्मापि भवन् जीवो न वेद कुतः अजया गुणैरनुबद्धः आवृतः गुणातीतं ते स्वरूपं न वेद ॥ ३ ॥ किञ्च यद्यपि त्वां न वेद तथापि सर्वफलप्रदात्त्वत एव फलप्राप्तिमन्तोऽपि नानोपास्यानुपासीना अपि लोका वस्तुतस्त्वामेवोपासते इति ब्रुवन् सांख्यमार्गं योगमार्गं च प्रथममाह। त्वां योगिन इति। अध्यात्माधिभूताधिदैवसाक्षिणं महापुरुषमन्तर्यामिस्वरूपमीश्वरं च यजन्ति ॥ ४ ॥

गूढार्थदीपिनी

चत्वारिंशेऽखिलाचार्यैर्नानामार्गैरुपासितम्। तुष्टाव श्रद्धयाऽक्रूरो निर्गुणं सगुणं हरिम् ॥

त्वा त्वाम्। अखिलस्य विश्वस्य हेतवो महदादयः तेषामपि हेतुम् ॥१॥ खम् आकाशम् तस्य आदिः कारणम् अहङ्कारः। महान् महत्तत्वम्। अजा माया तस्या आदिपुरुषः। अर्थाः शब्दादयः विबुधाः इन्द्रियाधिष्ठातारः। अङ्गात् श्रीमूर्तेः भूताः जाताः ॥२॥ आत्मनः परमात्मनः अजा प्रकृति। अनात्मतया जडत्वेन हेतुना। अजो ब्रह्मापि ॥३॥ अद्धा साक्षात्। साध्यात्मेति आत्मनि शरीरे भवमध्यात्मं तेन सहितं साध्यात्मं साकल्येऽव्ययीभावः। अनश्चेति टच्। देहावस्थितेन पञ्चभूतावस्थितेन आदित्यमण्डलावस्थितेन च रूपेण सहितमिति तेषां साक्षिणम् इति क्रमेणार्थाः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गिरा गद्गदयास्तौषिदिति निर्दिष्टाक्रूरकृता भगवत्स्तुतिश्चत्वारिंशे प्रपञ्च्यते। अक्रूर उवाचेति। तत्रादौ सर्वकारणकारणत्वादिना श्रीकृष्णं प्रणमति। नतोऽस्मीति। त्वा त्वां श्रीकृष्णमहं नतोऽस्मीति। नमनीयत्वे हेतुं दर्शयितुं तमेव विशिनष्टि। अखिलहेतूनां प्रकृतिपुरुषकालादीनां हेतुं निःसमानातिशयं सर्ववेदैकवेद्यं मुख्यं विश्वकारणमित्यर्थः। "प्रधानक्षेत्रज्ञपतिर्गुणेशः ज्ञः कालकालो गुणी सर्वविद्यः यः कारणं करणाधिपाधिपः कृष्ण एव परो देवः न तत्समश्चाभ्यधिकश्च दृश्यते सर्वे वेदा यत्पदमामनन्ति" इत्यादिश्रुतेः "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते। वेदैश्चसर्वैरहमेववेद्य" इति स्मृतेश्च। ननु सर्वकारणत्वे विकारित्वप्रसङ्ग इत्यत आह। अव्ययमिति। निर्विकारस्वरूपमित्यर्थः। त्वच्छक्तिविक्षेपतस्त्वत्परिणामः संसार इति भावः। महत्स्रष्टाण्डस्थः सर्वभूतस्थश्च त्वमेवासीत्याह। नारायणं पुरुषमाद्यमिति। नारायणमण्डस्थम् आद्यं महत्स्रष्टारम् पुरुषं सर्वभूतस्थम् व्यष्टिसृष्टिहेतोश्चतुर्मुखस्य हेतुरण्डस्थस्वमूर्तिद्वारा त्वमिति दर्शयति। यस्य नारायणस्य नाभिजादरविन्दकोशात् य एष व्यष्टिरूपो लोको जात इति शेषः स ब्रह्मा आविरासीत् अण्डस्थनारायणस्य श्रीकृष्णमूर्तित्वं "नारायणोऽङ्गं नरभूजलायना"दित्यत्रोपपादितमेव "स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि अग्रे गुणेभ्य" इत्यत्र श्रीकृष्णस्य सर्वपूर्वत्वं चोक्तमेव ॥ १ ॥ अथ समाष्टिसृष्टिहेतूनां हेतुस्त्वमिति दर्शयितुं भगवतः सर्वात्मत्वमाह। भूरिति। अजा प्रकृतिः शक्तिः आदिः नित्यस्वरूपः पुरुषो जीवः "प्रकृतिं पुरुषञ्चैव प्रविश्यात्मेच्छया हरिः। क्षोभयामास सम्प्राप्ते सर्गकालेव्ययाव्यया" विति स्मृतिप्रसिद्धौ प्रकृतिपुरुषौ तयोरनाद्यनन्तत्वे गुणक्षोभेण प्रकृतेः पुरुषस्य तु ज्ञानविकाशेन कार्यत्वम् तत्कार्यं महान् तत्कार्यमादिः भूतेन्द्रियादिमयसर्वहेतुरहङ्कारः तत्कार्यङ्खम् तत्कार्यं पवनः तत्कार्यमग्निः तत्कार्यं तोयम् तत्कार्यम्भूः सर्वेन्द्रियार्थाः खादिगुणाः शब्दादयः दशेन्द्रियाणि श्रोत्रादीनि राजसाहङ्कारकार्य्याणि मनो विबुधाश्च दिगादयः सात्त्विकाहङ्कारस्य कार्य्याणि एते सर्वे जगतो हेतवः येऽन्ये कालादयस्ते च सर्वे तव श्रीकृष्णस्य अङ्गभूताः त्वं सर्वेषामङ्गीत्यर्थः। प्रकृत्याद्यचेतनवर्गस्तव शक्तिः चेतनवर्गस्तवांशोऽतः सर्वात्मा त्वमसीति भावः ॥ २ ॥ एवं भोक्ता "भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेत" दिति श्रुतिप्रोक्तानां भोक्तृभोग्यनियन्तॄणां मध्ये नियन्तुर्ब्रह्मणः सर्वकारणत्वं सर्वात्मत्वं भोक्तृभोग्ययोस्तत्कार्यत्वम् तदात्मकत्वं चोक्तमथ भोग्यस्य जडत्वं परवेद्यत्वं भोक्तुश्चेतनत्वं गुणावृतत्वं कथञ्चित्स्ववेद्यत्वं परिच्छिन्नत्वं नियन्तृस्वरूपेयात्तनभिज्ञत्वं नियन्तुंश्च सर्वकारणकारणत्वसर्वज्ञत्वसर्वात्मत्वादिस्वाभाविकगुणनिधेः प्राकृतगुणवर्जितत्वमियत्तानवच्छिन्नत्वं वर्णयति। नैते इति। एते अजादयः प्रकृतिमहदहंकारादयः आत्मनः स्वस्य स्वरूपं न विदुः हि यतस्ते प्रकृत्यादयः अनात्मतया आत्मा चेतनस्तद्भिन्नोऽनात्मा अचेतनः पदार्थः तस्य भावस्तत्ता तया जडत्वेन गृहीताः नहि जडः स्वमन्यम्वा जानाति अजो ब्रह्मादिरूपो जीवः अजो ह्येको जुषमाणोऽनुशेते" इति श्रुतेः अजायाः प्रकृतेर्गुणैरनुबद्धः अर्थात्परिच्छिन्नस्वरूपः अनात्मतया गृहीता इत्यनेनैव जडविलक्षणः चेतन इत्यर्थः। अतः आत्मनं

भोक्तारमात्मात्मतया गृहीतं भोग्यवर्गञ्च जानाति ते तवापरिच्छिन्नस्य ब्रह्मणः स्वरूपं स्वकीयं स्वासाधारणस्वरूपं "हिरण्मयः पुरुषः हिरण्यकेश" इत्यादिश्रुतिप्रोक्तं विग्रहलक्षणम्वा कथम्भूतं गुणादिति जातावेकवचनं गुणेभ्यः परम्विलक्षणमनावृतम् न वेद एवं भूतं ते स्वासाधारणं रूपं ब्रह्मादयोऽपि न जानन्ति यदा तदाहङ्कुतो जानीया मतः केवलं नतोऽस्मीति त्रयाणां श्लोकानां फलितोऽर्थः। एवमेव "देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यञ्च विदुः परं यत्। सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे इत्युक्तं हंसगुह्ये ॥ ३ ॥ ननु तर्हि "ब्रह्मविदाप्नोति पर" मित्यादिवाक्यानि ज्ञानान्मुक्तिमाहुस्तदभावे कथम्मुक्तिः स्यान्मुमुक्षोरत्रेयत्ताज्ञानाभावेऽपि यथाशास्त्रं त्वां ज्ञात्वा भजतो मुक्तिः स्यादेवेत्याशयेन ब्रह्मोपासनां तदंशोपासनाञ्चाधिकारिबाहुल्यत आह। त्वां योगिन इत्यादिना। योगिनः कर्मज्ञानभक्तियोगयुक्ताः औपनिषदाः अद्धा स्फुटमेव महापुरुषमनल्पं पुरुषं "भूमा त्वेव विजिज्ञासितव्य" इत्येवं भूमविद्याप्रसिद्धं भूमानं त्वामेव यजन्ति उपासते तथा साधवो मुमुक्षवः तत्प्रकरणप्रसिद्धा औपनिषदा ईश्वरं नियन्तारम् "एष सर्वेश्वरः सर्वाधिपति"रित्यादिश्रुतिप्रसिद्धम् तथा "य एषोऽन्तरादित्येहिरण्यमयः पुरुषो दृश्यते" इत्याद्युपक्रम्य इत्यधिदैवतम् अथाध्यात्मं "य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इत्येवं छान्दोग्यादिषु प्रसिद्धं साधिदैवम् सूर्याधिष्ठितस्वरूपसहितम् साध्यात्मम् चक्षुरधिष्ठितस्वरूपसहितम् साधिभूतं तत्तद्भूतस्थस्वरूपसहितम् त्वामेव यजन्ति साहित्यमत्र तत्तत्स्थानगतस्वरूपद्वारा सर्वात्मानं सर्वस्वरूपं त्वामेवोपासते इत्यभिप्रायः उपलक्षणमेतदन्यासां वेदान्तोपासनानां तास्तु वेदान्तकौस्तुभादौ द्रष्टव्याः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ अक्रूरः स्तुतिव्याजतो व्याजभजकैरेवं देवोपासनं कर्तव्यमिति निरूप्यते। तत्रादौ दृष्ट्वा कृष्णं किं चकाराक्रूर इति किञ्चिच्चलच्चित्तं विदित्वा तदा त्वस्वयमेव शुक उक्त्या स्थिरयतीतीरयति ॥ श्री शुक इति। प्रसन्नं हृदयं प्रसन्नानीतराणि चेन्द्रियाणि यस्य सोऽवनता कन्धरा यस्य सः ॥ १ ॥ साक्षात्कृतोऽयं साक्षाल्लक्ष्म्यध्यक्ष इति तल्लक्षणान्युक्त्वा नमस्यति ॥ नतोऽस्मीति। अहं त्वा नतोऽस्मीत्यन्वयः। अखिलस्य हेतुभूताः कारणतया सदा संस्तम्। नावान्तरकारणमित्यप्याह। अखिलेति। खिलो दुर्बलो नेत्यखिलः स चासौ हेतुश्च तद्रूप इति तम्। पुरुषमादिमिति पदम्। पुरुषोऽक्षरपुरुषश्चासौ मा रमा च तस्या आदि उपजीव्यमुत्तममिति यावत्। द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः परमात्मेत्यादेः। पूरुषं पूर्णषड्गुणं सर्वशरीरशायिनं वा आदि अ न विद्यते आदिरुत्पादको यस्य स आ आदिः। अ निषेध इति विश्वः। निपात एकाजित्यादि त्वार्षतया नेति ज्ञेयम्। तर्हि प्राग्भाववर्जनिवृत्तिः किं न स्यादित्यत आह ॥ अव्ययमिति। नाशरहितम्। प्रातर्व्यातोऽप्ययमित्याह। अविं सूर्यमयते गच्छति स इति तदन्तर्गतमिति। अवयः शैलमेषार्का इत्यमरः। अविः शैले रवौ मेष इति विश्वः। ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायण इत्युक्तेर्नारायणमिति सुलग्नं चैतत्पक्षे। स्रष्टृत्वसंहर्तृत्वे नान्यगते इत्यप्याह ॥ आदिमव्ययमिति। आदिमः सर्वादिभवश्चासौ विशेषेणायोगतिर्निवृत्तिर्यस्मात्स चेति। पूरुषो गा रमा साक्षादादिमा यस्य जगतस्तस्य व्ययोऽत्यन्तसामीप्यरूपश्च यतयश्च यस्मात्स तथा तम्। विधातृविश्वविधायकताऽप्येवमित्याह ॥ यदिति। नाभिजातादरविन्दकोशाद्ब्रह्मा यतो धातुः सकाशादेषः मानप्रमित आसीत्सोऽप्याविरासीत्तं नारायणम्। एवमाद्यविरुद्धगुणाश्रयत्वात्तदभिधानमिति विभवादुक्तवक्ष्यमाणानि लक्षणानि ज्ञेयानि। तथाऽनेकवाक्यमूलानीति यत्र दैवाल्लब्धा सङ्गतिर्भवतु नान्यत्र मन आयासनीयम्। अखिलहेतुमिति पाठे कारणीभूतप्रकृत्यादिकारणमित्यर्थः ॥ २ ॥ भूस्तोयमग्निरिति श्लोके भूरादिविबुधान्तानामङ्गभूता इत्यङ्गतादात्म्यमुच्यत इति भ्रमं विग्रहं प्रदर्श्य भ्रंशयति ॥ तवाङ्गेभ्यो भूता इति। पद्भ्यां भूमिरित्यादेः। भूता जाताः ॥ ततश्चायं श्लोकार्थः ॥ भूः पद्भ्यां तं यमापो रेतसोऽम्भस्तु यद्रेत इत्यादेः। अग्निर्मुखात्पवनः प्राणात्खं नाभ्याम्। नाभ्या आसीदन्तरिक्षमित्यादेः। आदिर्भूतादिरहङ्कारः स्वस्यादिरहङ्कार इति वा महान्महत्तत्त्वम्। अजा चादिश्च प्रकृतिरूपं कारणमिति। मनः पञ्चवृत्तिमदिन्द्रियाणीतराणि सर्वे च ते इन्द्रियार्थाः शब्दाद्या विषया विबुधा एतदभिमानिमन्तो ब्रह्मादयो देवा ये जगतो हेतवो हेतुत्वेन सम्प्रतिपन्नास्ते सर्वे ते तवाङ्गभूता अङ्गेभ्यो जाता मुख्यहेतुत्वं तव तेषां त्ववान्तरकारणत्वमिति भावः। हा ई तव इति छेदः। या रमायास्तव प्रकाशो यस्मादिति तवस्तस्य सम्बुद्धिः। विस्तृतं च तवस्तरमिति व्याख्यावसरे ॥ ३ ॥ नैते स्वरूपं विदुरात्मन इति श्लोकेऽनन्यात्मतया गृहीता इति पदमप्रतीतार्थमिति तदनूद्य स्वयं व्याकृत्य तद्दृढिम्ने मानं चोदाहरति ॥ अन्यात्मतया गृहीता इति। अन्यपदं साकाङ्क्षितमिति विवक्षितं पूरयति ॥ मत्त इति। अन्ये च त आत्मानो जीवाश्च तेषां भावस्तत्ता। तत्त्वेन गृहीता इति मूलार्थं मनसि निधाय जीवात्मान एत इति भगवता गृहीता ज्ञाता इत्युक्तम्। अहं परोऽन्यो मदिति व्यस्तं समस्तं च जीवात्मनः। तत्र हेतुरल्पशक्तय इति। कदाचित्तथाऽन्यदा त्वन्यथेति नेत्याह ॥ सर्वदैवेति। इति ब्रह्मादीन्हरिर्मन्यत इति। हरिर्यथा स्वं वेद तथा रमाऽप्यात्मानं नो वेद ब्रह्मा च न वेदान्ये च कुत एव विद्युः। तथाऽपि तु योग्यतानुसारेण जानन्ति ॥ ततश्चायं श्लोकार्थः ॥ एतेऽजादयो ब्रह्मादय आत्मनो जगत्स्वामिनः स्वरूपं न विदुः। ते त्वया अन्यात्मतयाऽन्ये मत्त आत्मान इति गृहीता ज्ञाताः। अजो ब्रह्माऽपि सोऽजायाः प्रकृतेर्गुणैरनुबद्ध इति हेतुगर्भम्। ततो न वेदेति। तर्हि नैतद्बद्धेत्यजानाति जनार्दनं साकल्येन किमित्यतोऽप्याह ॥ अजायेति। ते स्वरूपं वा याऽजा साऽपि ते गुणात्परं

तदतीतं स्वरूपं न वेद । गुणात्परं यथा तथा सत्यपीत्यपि योजना । ज्ञानाभावः सर्वस्येत्युक्ते रमाऽपि साकल्येन न जानाति जानन्ति च यथा स्वयोग्यं ते सर्वेऽपीति तदर्थमुपासना सार्थकीति तात्पर्यम् । सनकादयो जानन्ति किमित्यतो नेत्यप्याह ॥ अजाया इति । न विद्यते जाया येषां तेऽजायाः । अनित्यत्वान्न निङ् । अर्शआद्यजन्तो वा ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सप्तत्रिंशे तु सन्तुष्टः स्तोत्रं चक्रे मनोहरम् । चतुर्द्धा ज्ञातमाहात्म्यसिद्धसिद्धान्त ईर्यते ॥
स्वरूपेण प्रमाणेन युक्त्या वस्तुस्वरूपतः । अवतारफलैश्चैव सर्वस्यैव विनिर्णयः ॥
राजसे स्तोत्रकर्त्तायं मध्यमो विनिरूप्यते । उत्तमे नारदो वक्ता वसुदेवादयस्तथा ॥
यस्य यस्य यथा भावस्तेन तादृङ् निरूप्यते । सर्वं युक्तं भगवति न सर्वः सर्व एव च ॥

तत्र प्रथमं स्वरूपं कीर्त्तयन् नमस्करोति । नतोऽस्म्यहमिति । त्वां साक्षादग्रे आविर्भूतं कनिष्ठशङ्का तु नास्त्येव यतोऽखिललोकस्यापि जगतस्त्वं हेतुः अखिलहेतुत्वे उपपत्ति प्रमाणं चाह नारायणमिति । आदौ ब्रह्माण्डे नारायणादेव सर्वं जातमिति सर्वलोकप्रसिद्ध श्रुतिश्च पुरुषो ह वै नारायणोऽकामयतेति तथापुरुषसूक्ते तदर्थमेव पुरुषमित्याह नैतावन्मात्रपरत्वमिति वक्तारं भर्त्तारं तस्यापि मूलभूतमिति वक्तुमप्ययमक्षररूपं निरूप्यते तादृशमेव रूपं प्रकटितमिति तत्रैवाद्यता व्यष्टयपेक्षया मूलरूप अविनाशित्वं च लोके कर्तृत्वमेव येन प्रकारेण तमाह । यन्नाभिजातादिति । यस्य भगवतो नाभेर्जातात् अरविन्दकोशात् कमलमुकुलात् पश्चाद्विकसितात् तत्र स्थितो भ्रमर इव आविरासीत् ब्रह्मा यतो ब्रह्मणः सकाशात् एष लोकः सर्वोऽपि प्रपञ्चः ॥ १ ॥ एवं जगत्कारणत्वमुपपाद्य कार्यकारणयोर्वैलक्षण्यसिद्ध्यर्थं भगवतो नित्यमुक्तत्वं जीवानां तत्कृपया तथात्वमिति वक्तुं कार्यभूतप्रपञ्चस्य स्वरूपमाह । भूस्तोयमिति । एतस्य वा मूलभूतत्वख्यापनाय तत्वान्येतस्मादेवोत्पन्नानीत्याह । भूस्तोयमिति । मूलभूतानि चेत् एवं परमिति ज्ञातव्यम् एवं क्रमस्तत्र न विवक्षितः प्रथमपक्षे तु विवक्षित इति गणनार्थं वा स्थूलात् सूक्ष्मे बुद्धिनिवेशनार्थं खान्तानि पञ्चभूतानि आदिरहङ्कारः महान् महत्तत्त्वम् अजा प्रकृतिः आदिः पुरुषः ततो मनः मनसा पुरुषः सर्वं करोतीत्याधिदैविकमनोविवक्षया व्युत्क्रमेणापि निरूपितं इन्द्रियाणि चकाराद्बुद्धिः प्राणश्च ततः सर्वेन्द्रियार्था गन्धादयः वागादयश्च चकारात् तदवान्तरभेदाः स्त्र्यादयश्च किं बहुना सर्व एव विषयाः घटादयः स्रगादयश्च चकारात्तज्जनितानि सुखादीनि एते हि सर्वे यद्यपि जगतो हेतवः तथापि ते अङ्गाज्जाताः अक्षरात् नस्यैवाङ्गत्वश्रुतेः ब्रह्म पुच्छमित्यादौ अतः कारणात् त्वमेव जगद्धेतुरिति स्वरूपेण महात्म्यमुक्तम् ॥ २ ॥ प्रमाणेन वक्तव्यमित्याकाङ्क्षायां वेदातिरिक्तं प्रमाणं नास्तीति वक्तुं ब्रह्मादीनामपीदमित्थतया ज्ञानाभावमाह । नैते स्वरूपमिति । अथवा एते तव पुत्राः पौत्रा वा कथं न मुक्ताः येद्येत एवामुक्ताः कथमन्यो मुक्तो भविष्यतीत्याशङ्क्य तेषाममुक्तौ अभिमानादज्ञानङ्कारणमित्यभिप्रायेणाह । नैते स्वरूपं विदुरिति । अवश्यं ज्ञातव्यमिति बोधनार्थमात्मन इति यद्यपि त्वमात्मा तथापि आत्मत्वेन त्वां न गृहीतवन्त इति अनात्मतया गृहीताः कर्त्तरि क्तः ते वा त्वया कृपया आत्मत्वेन न गृहीता इति अजादयः अक्षरादयः पुरुषादयो वा ते रूपं न विदुः ब्रह्मादयो हि प्रमाणपरा ज्ञास्यन्तीति विज्ञाय तेषामपि ज्ञानाभावमाह । अजोऽनुबद्ध इति । अजो ब्रह्मा अजायाः प्रकृतेः सृष्टिरूपायाः गुणैः कर्तृत्वादिधर्मैः सत्त्वादिभिर्वा अनुबद्धः स्वासक्त्या बद्धोऽपि भगवदिच्छया वा पुनस्तैरनुबद्धः अजो गुणात्परं पृथग्भूतं गुर्णानियामकं वा ते रूपं न वेद न हि गृहे बद्धः गृहादन्यत्र स्थितं परिपश्यति अतः परिच्छिन्नमेव मन्यते तस्मान्न मोक्ष इति यदि तेऽपि न जानन्ति कथमन्यो ज्ञास्यतीति अतो यः कश्चनैवं भविष्यति स न ज्ञास्यति यः पुनस्त्वत्कृपया ज्ञास्यति स एत्र कृतार्थो भविष्थतीति नालौकिकं किञ्चित् ॥ ३ ॥ तर्हि कथं ज्ञानोपाय इति चेत्तत्रोच्यते अज्ञात्वापि यथारुचि शास्त्रानुसारेण भगवान् सेव्यः ततो ज्ञापयिष्यतीत्यभिप्रेत्य सर्व एव त्वां स्वाधिकारानुसारेण तत्तद्रूपं सेवन्त इत्याह । त्वां योगिन इति षड्भिः सप्तभिर्वा । विशेषसामान्यप्रकारेण तत्रादौ योगिनः सर्वापेक्षिणः मोक्षपरा इति तान्गणयति यद्यपि योगे चित्तवृत्तिनिरोधे आत्मस्फूर्त्तिः फलमिति ध्यानार्थमेव भगवद्रूपमिति न ते भगवदुपासकाः तथाप्यसङ्गत्वेनेश्वरप्रणिधानमुक्तं शास्त्रं वा नापेक्षत इति विरुद्धांशोऽग्रे त्यक्तव्य इति योगिनोऽपि त्वामेव यजन्ति अद्धा साक्षात्त ह्यन्तरुपासकाः अतो देहादिभिर्न व्यवहिताः तेषां मते पुरुष ईश्वरः साकारः सर्वजीवविलक्षणः अस्तीति नास्त्यत्र सांख्ययोगयोरीश्वरस्य साकारत्वं निराकारत्वं च स्थापितं तदाह । महापुरुषमोश्वरमिति । अन्तर्बहिर्नियामकं च साधवः पुनः सदाचाराः स्मार्त्तधर्मपराः भगवन्तमाश्रयरूपं मन्यमानाः आध्यात्मिकादिभेदत्रयं तदधीनमेवेति त्रितयसहित एव भगवानित्याहुः । साध्यात्ममध्यात्मसहितमेवमधिदैवसहितमिति अन्यथा कर्मणा बन्ध एव स्यात् एवं सति कर्त्ता प्रेरकश्च भगवदधीन इति नापराधस्तस्य भवति ॥ ४ ॥

श्रीसुबोधिनी–सारः

अक्रूरोक्तिः । आद्यम् अव्ययं नित्यम् अखिलानां हेतूनां हेतुं सर्वकारणकारणं नारायणं पुरुषं त्वा त्वामहं नतोऽस्मि यस्य नारायणस्य नाभितो जातात् उत्पन्नात् अरविंदकोशात् पद्मात् ब्रह्माविरासीत् जातोऽभूत् यतो ब्रह्मण एष लोक आविरभूत् ॥ १ ॥ सर्वकारणकारत्वं स्पष्टयति । भूरादयः पञ्च भूतानि तेषामादिरहंकारो महान्महत्तत्त्वम् अजा माया तस्या

आदिः पुरुषः मन इन्द्रियाणि सर्वे इन्द्रियाणामर्था विषया विबुधा देवा जगतो हेतवः कारणभूता ये ते सर्वे ते तवाङ्गभूता अंगाज्जाता वा सन्ति ॥ २ ॥ अजा प्रकृतिरादिर्येषां ते आत्मनस्ते तव स्वरूपं न विदुः अनात्मतया जडत्वेन गृहीताः प्रत्यक्षादिभिर्दृष्टाः । ननु मा जानन्तु जडा जीवस्तु चेतनो बुध्यतात्तत्राह । योऽजो जीवः सोऽजाया मायाया गुणैरनुबद्ध आवृतोऽजो ब्रह्मापि वा गुणात्परं ते स्वरूपं न वेद ॥ ३ ॥ ननु "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुतेः कथं तज्ज्ञानं कथं संसारनिवृत्तिरज्ञानामित्याशंक्य येन केनापि मार्गेण भजतां त्वं गम्योऽसीत्याह । महापुरुषमीश्वरं त्वां योगिनोऽद्धा साक्षात् यजन्ति साधवः साध्यात्मादिभेदभिन्नं यजंति ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अक्रूरो वैभवं दृष्ट्वा कृष्णं मत्वेश्वरेश्वरम । चत्वारिंशे च तुष्टाव प्रणम्येति निरूप्यते ॥ १ ॥

'अस्तौषीत्' इत्युक्तां स्तुतिमेव दर्शयति—नतोऽस्मीति । त्वा त्वामहं नतोऽस्मीति । 'ननु त्वमस्मत् पितृव्यः; कुतो मां बालं नमस्करोषि' इत्याशङ्क्याह—अखिलेति । अखिलस्य प्रपञ्चस्य ये हेतवो महदादयस्तेषामपि हेतुं कारणमित्यर्थः । तस्यापि कारणान्तराशङ्कायामाह—आद्यमिति । तद्विनाशाशङ्कायामाह—अव्ययमिति । अनादिनिधनमित्यर्थः । परिच्छिन्नत्वाशङ्कायामाह—पूरुषमिति, पूर्णमित्यर्थः । ननु "एवंभूतो नारायणः 'एको ह वै नारायण आसीत्' इत्यादौ प्रसिद्धः, न त्वहम्" इत्याशङ्क्य 'त्वमेव नारायण' इत्याह—नारायणत्वमेव स्पष्टयति—यन्नाभीति । यस्य नाभेर्जातादरविन्दकोशाद्ब्रह्माऽऽविरासीत् । तं विशिनष्टि—यत इति । यतो ब्रह्मणः सकाशात् एष परिदृश्यमानो व्यष्ट्यात्मको लोकः प्राणिसमूहो जात इत्यर्थः ॥ १ ॥ अखिलहेतुत्वमेव प्रपञ्चयति—भूरिति । पृथ्व्यादीनि आकाशान्तानि पञ्चमहाभूतानि, तेषामादिः कारणमहङ्कारः, महान् महत्तत्त्वं, अजा मूलप्रकृतिः तदादिः पुरुषः, मनः, इन्द्रियाणि चक्षुरादीनि दश, सर्वेन्द्रियाणामर्थाः शब्दस्पर्शरूपरसगन्धाः, विबुधाश्च सर्वेन्द्रियाधिष्ठातारो दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रका इत्युक्ताः एते ये सर्वे जगतो हेतवस्ते तवाङ्गात् भूताः जाताः ॥ २ ॥ 'अत एव दुर्ज्ञेयस्त्वम्' इत्याह—नेति । एते अजा प्रकृतिः आदिर्येषां ते आत्मनः स्वस्य ते तव च स्वरूपं नैव विदुः । हि शब्दोऽवधारणे । अज्ञाने हेतुमाह—अनात्मतयेति । जडत्वेनेत्यर्थः । तत्र हेतुमाह—गृहीता इति । प्रत्यक्षादिभिर्दृष्टाः ॥ ननु 'जडा मां मा जानन्तु, जीवास्तु ज्ञास्यन्ति' इत्यत आह—अज इति । स अजो ब्रह्मापि अजाया गुणः रजआदिभिरनुबद्धः आवृतः । अतो गुणातीतं ते तव स्वरूपं न वेद, अर्वाचीनोऽन्यः कुतो ज्ञास्यतीति ॥ ३ ॥ ननु 'यदि कोऽपि न जानाति तर्हि कथं तस्य संसारनिवृत्तिः' इत्यपेक्षायां 'येन केनापि मार्गेण भजतस्तत्सम्भवति' इत्याशयेनाह—त्वामिति । योगिनस्त्वां महापुरुषचतुर्भुजादिविशिष्टरूपं परमेश्वरमद्धा साक्षादेव यजन्ति ध्यायन्ति । अन्ये च साधवः सदाचारनिष्ठाः केचित् साध्यात्ममात्मनि शरीरे भवमध्यात्मं तेन सहितं शरीरावयवाक्षिहृदयादिषु वसन्तं त्वां यजन्ति । तथाहि छान्दोग्ये—"अथाध्यात्मं य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इति । केचित्तु साधिभूतं सर्वभूतस्थं सर्वशरीरकं त्वां यजन्ति, 'सरित्समुद्रांश्च हरेः शरीरम्, इति वक्ष्यमाणत्वात् । केचित् पुनः साधिदैवं आदित्यादिदेवान्तस्थं त्वां यजन्ति । यथोक्तं छान्दोग्ये—"य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" इति ॥ ४ ॥

अन्वितार्थप्रकाशिका

चत्वारिंशे कृष्णमीशं मत्वाऽक्रूरः प्रणम्य च । सगुणं निर्गुणं चास्तौत्तत्र श्लोकाः खवह्नयः (३०) ॥
उवाचेत्येक (१) मङ्घ्रयूनाश्चतुस्त्रिंशदनुष्टुभः (३३ ॥) ॥ ४० ॥

नतोऽस्मीति । अखिलस्य प्रपञ्चस्य ये हेतवो महदादयस्तेषामपि हेतुं कारणं नारायणं पुरुषम् आद्यमव्ययं ज्ञात्वा त्वामहं नतोऽस्मि । यस्य नाभेर्जातादरविन्दकोशात् ब्रह्मा आविः आसीत् । यतो ब्रह्मणः सकाशात् एष परिदृश्यमानो व्यष्ट्यात्मको लोकः प्राणिसमूहो जातः ॥१॥ अखिलहेतुत्वं प्रपञ्चयति—भूरिति । भूः तोयम् अग्निः पवनः खम् आदिः खस्यापि कारणमहङ्कारः महान्महत्तत्वम् अजा मूलप्रकृतिः तथा आदिः वस्तुतस्तस्या अप्यादिभूतस्तदवच्छिन्नः पुरुषः मनः इन्द्रियाणि चक्षुरादीनि दश सर्वेन्द्रियाणामर्थाः शब्दस्पर्शरूपरसगन्धाः विबुधाश्च सर्वेन्द्रियाधिष्ठातारो "दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः" इत्युक्ताः । एते ये सर्वे जगतो हेतवस्ते तवाङ्गात् श्रीमूर्त्तेः भूता जाताः उपसर्जनभूता वा ॥ २ ॥ नेति अनात्मतया जडत्वेन हेतुना तथा गृहीताः प्रत्यक्षादिभिर्दृष्टा एते अजा प्रकृतिः आदिर्येषां ते आत्मनः स्वस्य ते तव स्वरूपं नैव विदुः । सः अजो जीवः ब्रह्मा भवन्नपि अजाया गुणैः रजआदिभिरनुबद्धः आवृतः अतो गुणात्परं गुणातीतं ते तव स्वरूपं न वेद । अर्वाचीनोऽन्यः कुतो ज्ञास्यतीति । यद्वा । प्रकृत्यादय आत्मनः स्वरूपं तव स्वरूपं च न विदुः जडत्वादेव । जीवस्तु तानात्मानं च वेत्ति न पुनस्त्वत्त्वरूपमिति । अयमेवार्थः षष्ठे स्कन्धे हंसगुह्यस्तोत्रे देहो स वोक्षा इति श्लोके उक्तः । यद्वा । अनात्मतया जाड्येन गृहीता व्याप्ताः ग्रस्ताः ॥ ३ ॥ त्वामिति । साधवः योगिनो हैरण्यगर्भादयः साध्यात्ममात्मनि शरीरे भवमध्यात्मं तेन सहितं साधिभूतं सर्वभूतस्थं सर्वशरीरकं साधिदैवम् आदित्यादिदेवसहितं तथा चाध्यात्माधिभूताधिदैवसाक्षिणं महापुरुषं तदन्तर्यामिणमीश्वरं नियन्तारं चेत्येवमादिरूपेण त्वामद्धा साक्षादेव यजन्ति ध्यायन्ति । इति सांख्ययोगावेकीकृत्योक्तम् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं चत्वारिंशेऽध्याये ऽक्रूरस्तुतिर्निगद्यते नतोऽस्मीति हे गोविन्द त्वां नतोऽस्मि ननु बालस्य मम नमनं वृद्धस्य तव न योगमिति चेत्तत्राह—आद्यं सर्वेषामादिभूतं पुरुषमनादिसिद्धपुरुषाकारं ननु साकारत्वेनाशित्वप्रसङ्गः स्यादिति चेन्न अव्ययं नाशशून्यं एवं कुतः अखिलानां ब्रह्माण्डानां ये हेतवः कालप्रकृतिपुरुषादयस्तेषामपि हेतुं कारणं अतएव नारायणं नारायणामसंख्यकोटिमुक्तपुरुषाणां समूहो नारंतस्मिन्नयनं निवासस्थानं यस्य तम् अक्षरधामनि स्थितेषु मुक्तकोटिषूपास्यत्वेन वसंतमित्यर्थः यस्य वैराजावतारस्य तव नाभिजातात् ॥१॥ जनानां प्रत्यक्षदर्शनायाखिलेषु ब्रह्माण्डेष्वेकस्य हेतुत्वं दर्शयन्नाह भूरिति । खमाकाशस्तस्यादिरहंकारः । अजा प्रकृतिस्तस्या आदिः पुरुषः इन्द्रियाणामर्थाः शब्दादयः विबुधा ब्रह्मादिदेवाश्च ये इमे सर्वे जगतो हेतवः ते च सर्वे ते तव अंगभूताः शरीराणि सर्वाणि चेतनाचेतनवृन्दानि तव शरीरभूतानीत्यर्थः ॥ २ ॥ भगवत्स्वरूपं दुर्बोधमाह न इति एते अजादयः प्रकृतादिभूम्यं तानि तत्वानि आत्मनः परमात्मनः ते तव स्वरूपं न विदुः कुतः हि यतः अनात्मतया अचेतनतया गृहीताश्चेतन वृंदैरवलंबिताः नन्वचेतनवर्गस्तु मत्स्वरूपं न वेत्तु चेतनवर्गस्तु जानीयादिति चेत्तत्राह स अजोबिधिः अजायाः प्रकृतेर्गुणैरनुबद्धः प्राकृतः गुणात् गुणत्रयात् परं ते स्वरूपं न वेद तर्ह्यन्येदेवास्तु कुतो जानीयुः ॥ ३ ॥ ननु यदि केऽपि त्वत्स्वरूपं न जानन्ति तर्हि जीवानां मोक्षः कथं भवेत्तत्राह त्वामिति अध्यात्मशब्देनेन्द्रियवर्गो बोध्यः आदिभूतं पृथिव्यादिभूतवृंदम् ॥ अधिदैवमिन्द्रियान्तःकरणाऽधिष्ठातृब्रह्मादिदेवव्रातश्च तैः सहित तेषां प्रवर्त्तकमित्यर्थः ईश्वरं सर्वनियामकं महापुरुषं पुरुषोत्तमं त्वां योगिनः सांख्ययोगौ भक्तिं च युञ्जानाः साधवः तव ज्ञानसाधकाः यजन्ति योगज्ञानजपादियज्ञैः पूजयन्ति तेन त्वां जानंतीति भावः अत्र योगोऽष्टांगयोगः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ततोऽक्रूरो हरिं मत्वा चत्वारिंशे महेश्वरम् । सगुणागुणभेदेन भक्त्याऽस्तौषीत्प्रणम्य च ॥ १ ॥

अस्तौषीदित्युक्तं तस्मात्तां स्तुतिमेवाह नतोऽस्मीत्यादिना । नतोऽस्मीति । अखिलस्य व्यष्टिप्रपञ्चस्य ये हेतवो महदादयस्तेषामपि हेतुं कारणभूतं, नारायणं नारायणशब्दाभिहितं, अव्ययं निर्विकारं, विकाराणां शरीरभूतचिदचिद्गतत्वाद्विकाररहितमित्यर्थः । ननु अस्त्वेवं तथापि जलाद्याविर्भावानन्तरं तत्र शयनतो नारायणत्वसिद्धेरपूर्वत्वं प्राप्तं तन्निवृत्त्यर्थमाह । आद्यं सृष्ट्याद्यसद्भाववेलायामपि सद्भाववन्तं, ननु सृष्टेरादौ कीदृशमित्यत्राह । पुरुषं पुरुषाकारं, भूयोऽप्यखिलहेतुत्वमेव प्रपञ्चयति । एषः परिदृश्यमानः, लोको व्यष्टिप्रपञ्चः, यतः आसीत् । यस्माद्ब्रह्मणो बभूवेत्यर्थः । ब्रह्मा स चतुर्मुखो विधिः, यस्य तव नाभिः ततो जातस्तस्मात्, अरविन्दकोशात्, आविरासीदुदभवत् । अनेन व्यष्टिसृष्टिश्चतुर्मुखद्वारिका समष्टिस्त्वद्वारिकेति च दर्शितम् । इत्थंभूतं त्वा त्वां अहमक्रूरः, नतः अस्मिः ॥ १ ॥ नन्विदमखिलहेतुहेतुत्वं किंनिमित्तत्वरूपमुतोपादानत्वरूपमित्याशङ्कायामुभयविधमेवेत्यभिप्रेत्याह । भूरिति । भूः पृथ्वी, तोयं जलं, अग्निस्तेजः, पवनो वायुः, खमाकाशं, भूराद्याकाशान्तानि पञ्च भूतानि । आदिस्तेषां कारणमहंकारः, महानहंकारस्यापि कारणं महत्तत्त्वं, आदिः तस्याप्यादिभूता, अजा प्रकृतिः, मनः अनेन मनआदीनि अन्तःकरणानि तदुपलक्षिताश्चन्द्रादयो देवाः, सर्वे विबुधाः, अनेन दिगादयो बाह्यकरणदेवताः, एते सर्वे सात्त्विकाहंकारकार्याणि, इन्द्रियाणि ज्ञानकर्मात्मकान्युभयविधेन्द्रियाणि, एतानि राजसाहंकारकार्याणि, सर्वेन्द्रियार्थाः शब्दादयो विषयाः च, एते तामसाहंकारकार्याणि । एवं ये एते जगतः हेतवः कारणभूताः, ते सर्वे, अङ्गभूताः तव शरीरभूताः, अनेन मूलप्रकृतिमहदादिशरीरकतया तत्तद्रूपेण परिणत इत्युपादानत्वमुक्तम् । मूलप्रकृतेर्महदादीनां च शरीरत्वकथनेन नियन्तृनियम्यभावसिद्धेर्निमित्तत्वमप्युक्तम् । जगतो ये हेतव इति जगदन्तर्भूततयाऽज्ञानस्वरूपा अज्ञानधर्मा जीवा अप्युक्ताः । ते च धर्मभूतज्ञानविकाशात्मकतया कार्यावस्थाः । धर्मभूतज्ञानसंकोचभाक्त्कावस्थायां कारणावस्थाश्च ज्ञेयाः । एवमुभयविधानामपि जीवानां 'यस्यात्मा शरीरं यस्य विज्ञानं शरीरम्' इत्यादिश्रुतीक्षया तदङ्गत्वप्रतीत्या जीवान् प्रत्यप्युपादानत्वनिमित्तत्वरूपोभयविधकारणत्वसिद्धिः । उभयेषां चिदचितामुभयविधकारणताभाक्त्वमेवेश्वरेश्वर इति ज्ञात्वा त्वामहं नतोऽस्मीति भावः । इति द्वयोरेकसम्बन्धः ॥ २ ॥ ननु त्वमिव सर्वेऽप्येत एवविधं सर्वकारणं सर्वान्तरात्मानं सर्वशरीरकं च मां किं न विजानीयुस्तत्राह । नैत इति । एते अजादयः त्वच्छरीरभूता ब्रह्मादयो जीवाः, आत्मनः सर्वान्तरात्मनः, ते तव, स्वरूपं न विदुः । अजादय इत्यत्रादिशब्दः प्रकृतितत्कार्यसंग्राहकः स च दृष्टान्तार्थः । तथा सत्ययमर्थः । जडाः प्रकृत्यादयोऽचिद्वर्गा यथा तव स्वरूपं न विदुरेवं ब्रह्मादयश्चिद्वर्गा जीवा अपि न विदुरिति । 'स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरञ्चितामेति' इत्यत्रैवोक्तेर्ब्रह्मणो जीवत्वं प्रसिद्धमेवास्ति, सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैः, इत्यादौ यदस्य भगवदवतारत्वं तत्तदावेशत एवेत्यस्य जीवत्वे ईश्वरत्वे च न बाधः । ननु जडत्वात् प्रकृत्यादयो न विदुरिति तु युक्तमजडा जीवाः कुतो न विदुरित्यत्राह । जीवाः अन्यस्मिन् स्वस्माद्भिन्ने देहे आत्माभिमानेन, यद्वा । अन्यस्मिन् स्वतन्त्रात्त्वत्तोऽन्यस्मिन् स्वात्मनि आत्मतया स्वातन्त्र्याभिमानेन, गृहीता ग्रस्ताः, देहात्माभिमानस्वतन्त्रात्माभिमानाभ्यां ग्रस्ताः सन्तः स्वात्मानमेव देहविलक्षणमीश्वरपरतन्त्रं च न जानन्ति तदा त्वां तु कथं नु विदुरित्यर्थः । ननु ब्रह्मांतरे मा जानन्तु ब्रह्मणो जीवत्वेऽपीश्वरकोटौ गणनान्मर्द्देनं युज्यते इत्यत्राह । अजो ब्रह्मापि, स्वगुणैः शरीरारम्भकरजआदिस्वगुणैः, अनुबद्धस्तत्परवशः, अस्ति । अतः,

प्रकृतेः, गुणात् जातावेकवचनम् । परं सत्त्वादिभ्यो गुणेभ्यो विलक्षणं तन्नियन्तृ चेत्यर्थः । ते तव, स्वरूपं, न वेद । यदायं न वेद तदा तत्सृज्यास्तदर्वाचीना अन्ये न विदुरित्यत्र किं वक्तव्यम् । अनात्मतया गृहीता इति पाठे अनात्मतया गृहीताजडत्वेन दृष्टाः । अजादयः प्रकृत्यादयः, यथा न विदुः एवं अजो ब्रह्माऽपि, न वेद । किमुतान्ये विदुरिति यथायथं योजनीयम् ॥ ३ ॥ ननु यदा मद्रूपं सर्वावेद्यं तर्हि शशविषाणप्रायतां प्राप्तमिति चेदेवं मा शङ्कीः, देहात्माभिमानिनां मांसचक्षुषां यद्यप्यवेद्यमस्त्यथापि योगविशुद्धमनसां वेद्यमस्त्येवेत्यभिप्रायंस्तदेव नानाविधब्रह्मविद्याभिज्ञानिनो योगिनः प्रदर्शयन्ते, ततस्ते ज्ञात्वा त्वां यजन्तीत्याह । योगिनः आनन्दवल्ल्याद्युपनिषद्विहितोपासनप्रकारनिष्ठाः केचन योगिजनाः, महापुरुषं प्रकृतेस्तत्संसृष्टाच्चेतनात् मुक्तात् नित्यमुक्ताच्च, विलक्षणं महापुरुषाख्यया प्रसिद्धमित्यर्थः । ईश्वरं त्वां एव, अद्धा साक्षात् यजन्ति । 'सत्यं ज्ञानमनन्तम्' इत्यादिश्रुत्युक्तविधया त्वामेवोपासते इति भावः । साधवः केचित् प्रतर्दनविद्यानिष्ठाः साधुजनास्तु, साधिदैवमादित्यान्तः स्थतयेन्द्रादिदेवतान्तर्यामितया चादित्येन्द्रादिशरीरकतया वर्त्तमानमित्यर्थः । त्वां यजन्ति । प्रतर्दनादिविद्योक्तविधया त्वदुपासनां कुर्वन्तीत्यर्थः । केचिच्च, आत्मनि शरीरे इत्यध्यात्मं तेन सहितमिति साध्यात्मं शरीरावयवभूताक्षिहृदयादिषु, वसन्तमित्यर्थः । त्वां, यजन्ति । अक्षिविद्यादहरविद्याद्युदितप्रकारेण त्वामेवाराधयन्तीत्यर्थः । अपरे योगिनश्च, साधिभूतं सर्वभूतस्थं सर्वशरीरकं चेत्यर्थः । त्वां यजन्ति । 'सर्वं खल्विदं ब्रह्म तज्जलान्' इति 'शान्त उपासीत' इति सर्वविद्योक्तविधया त्वदुपासनां कुर्वन्तीत्यर्थः । प्रतर्दनविद्यादयो विद्याभेदाश्छान्दोग्याद्युपनिषद्भ्यो बोध्याः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं यदा सावशताङ्गसंस्थितः केऽवस्थितं वैभवमैशमीदृशम् । समीक्षते योगविदुक्तयोगतः स्फुटं तदासीदघमर्षणेन के ॥ १ ॥

नतोऽस्मीति : १०.४०.१.

यतः सर्वलोकोऽखिलो भूतसङ्घः सुरा वाऽसुरा वेन्द्रियाद्यर्थजातम् ।
स यस्यास्ति धाता विभो लब्धपत्यं ततस्त्वां विनाऽऽद्यं कमन्यं प्रपद्ये ॥ २ ॥

त्वां योगिन इति : १०.४०.४.

केचित्त्वा मनसा यजन्ति जपतः केचित् त्रयीविद्यया वैतानैः कतिचित् कति क्रतुवरैरौपासनैः केचन ।
ज्ञानैः केऽपि च केचनाऽन्यविधितोऽनेकात्मनैकात्मना तादृक् संस्त्वमपीश पूरयसि तद्वाञ्छामहो वैभवम् ॥ ३ ॥

कृष्णप्रिया

निरोध लीला दशमस्कन्ध पूर्वार्द्ध का राजस प्रकरण का यह पांचवाँ अध्याय है और यह प्रमाण प्रकरण चल रहा है । ज्ञान ऐश्वर्य का इस अध्याय में निरूपण किया जा रहा है । इस अध्याय में ३० श्लोक है । पूर्वाध्याय में परमभागवत श्रीअक्रूर जी ने श्रीयमुनाजी में सन्ध्योपासन करते हुए भगवत्कृपा से भगवत्स्वरूप का दर्शन किया तब अक्रूरजी भावविभोर हो गए । पुनः कुछ स्वास्थ्य सम्पादन करते हुए भगवान् के यशोगान करने लगे । प्रथम एवं द्वितीय श्लोक में भगवान के दो स्वरूपों का गान, तीसरे श्लोक से ग्यारहवें श्लोक पर्यन्त नव श्लोकों में प्रमाण से प्रभु का निरूपण, पुनः बारहवें श्लोक से पन्द्रह श्लोक पर्यन्त चार श्लोकों में भगवान ही सर्वोत्तम है यह निरूपण करके नमस्कार और अन्त में सोलहवें श्लोक से ३० श्लाक पर्यन्त पन्द्रह श्लोकों में अवतारों का निरूपण एवं फल का निरूपण करेगें । श्रुति भगवती जब कहती है कि 'न तत्र वाक् गच्छति' भगवान् के स्वरूप श्रुति की गति नहीं वहाँ मनुष्यों की गति कैसे होगी ? फिर भी नारदादि देवर्षि वृन्द प्रति अनुरूप निरूपण करते हैं वैसे राजस भक्त श्री अक्रूरजी भी स्तुति करते हैं । "भगवान् ता सर्वश्रेष्ठ है" यह सिद्धान्त है इसलिए भगवान् सर्वरूप नहीं भी है और सर्वरूप है भी इस विमर्श को लेकर जो भी और जैसा भी स्तुति करेंगे वह स्तुति निर्दोष ही होगो अतः श्री अक्रूरजी की स्तुति निर्दोष है तो चलिए स्तुति रसायन का पान करें—

अब गद गद कण्ठ गोविन्द को गाते श्री अक्रूर जी कहते हैं कि हे नाथ ! हे श्रीकृष्ण । मैं आपके श्रीचरणों में दण्डवत् प्रणाम करता हूँ । आप सर्व कारणों के कारण, नारायण, पूर्ण पुरुष सर्व के आदि, अविनाशी, परब्रह्म है । प्रथम आपके नाभि प्रदेश से कलिकाकार कमल उत्पन्न हुआ । पुनः विकसित उस कमल से अन्तःस्थित भौंरे के तरह विश्वविधाता ब्रह्मा जी प्रकटे । आपकी अनुकम्पा से ब्रह्माजी ने समस्त लोकों का निर्माण किया ॥ १ ॥ भगवान् जो जगत्कारण बतलाकर भगवान् नित्यमुक्त हैं एवं जीव भगवदनुकम्पा से मुक्त होता है यह बतलाने के लिए कार्य रूप जगत् का निरूपण करते श्री अक्रूरजी दूसरे श्लोक से कहते हैं कि—पृथ्वी, जल, अग्नि, पवन, आकाश "आदि अहंकार" महत् तत्व, प्रकृति, "अज-पुरुष" मन, पांच कर्मेन्द्रिय और पांच ज्ञानेन्द्रिय उन इन्द्रियों के विषय एवं इन इन्द्रियों के अधिष्ठाता सूर्य चन्द्र बरुणादि देवता जो जगत के कारण माने

गए है वे सर्व आपके श्रीअङ्गों से प्रकट हुए ॥ २ ॥ हे नाथ ! आप सबके आत्मा है लेकिन आपको जो आत्म स्वरूप से नहीं जानते हैं अथवा आपने कृपा करके ये हमारे है ऐसा अनुग्रह से स्वीकार नहीं किया वे अजादि अथवा अक्षरादि आपके स्वरूप को नहीं जानते । यदि कहा जाय कि वेद परायण ब्रह्माजी आदि देवलोक तो आपके स्वरूप को अवश्य जानते होंगे तब कहते हैं कि—प्रकृति के सत्वादि गुणों से आवृत होने के कारण आपके गुणातीत स्वरूप को नहीं जान पाते ॥ ३ ॥ यद्यपि आपके स्वरूप को जानते नहीं है फिर भी योगी लोग वेदशास्त्र संमत योगमार्ग से एवं स्मार्त उपासक स्मृति निर्दिष्ट मार्ग से साक्षात् ईश्वर महापुरुष आपको अध्यात्म अधिभूत एवं अधिदेव का साक्षी जानकर अन्तर्यामी तथा नियन्ता कर भजते हैं ॥४॥

त्रय्या च विद्यया केचित् त्वां वै वैतानिका द्विजाः । यजन्ते [1]विततैर्यज्ञैर्नानारूपामराख्यया[2] ॥ ५ ॥
[3]एके त्वाखिलकर्माणि संन्यस्योपशमं गताः । ज्ञानिनो ज्ञानयज्ञेन यजन्ति ज्ञानविग्रहम् ॥ ६ ॥
अन्ये [4]च संस्कृतात्मानो विधिनाभिहितेन[5] ते । यजन्ति [6]तन्मयास्त्वां वै बहुमूर्त्येकमूर्तिकम् ॥ ७ ॥
त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् । बह्वाचार्यविभेदेन भगवन्[7] समुपासते ॥ ८ ॥

कर्वमक्षमा

अन्वयः—केचित्, वैतानिकाः, (याज्ञिकाः) द्विजाः, त्रय्या, च, विद्यया, नानारूपामराख्यया, विततैः, यज्ञैः, त्वाम्, वै, यजन्ते ॥ ५ ॥ एके, ज्ञानिनः, अखिलकर्माणि, सन्यस्य, उपशमम्, गताः, ज्ञानयज्ञेन, ज्ञानविग्रहम, त्वा, यजन्ति ॥ ६ ॥ संस्कृतात्मानः, तन्मयाः, अन्ये, अभिहितेन, विधिना, ते, बहुमूर्ति, एकमूर्तिकम, त्वाम्, वै, यजन्ति ॥ ७ ॥ हे भगवन् ? अन्ये, च, शिवोक्तेन, मार्गेण, शिवरूपिणम्, त्वाम्, एव, बह्वाचार्यविभेदेन, समुपासते ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवं सांख्ययोगावेकीकृत्योक्तौ । अथ त्रयीमार्गं कर्मज्ञानभेदेन दर्शयति त्रय्या चेति श्लोकद्वयेन । वैतानिकाः कर्मयोगिनस्त्वां वै त्वामेव यजन्ते । ननु ते इन्द्रवरुणवाय्वादीन्यजन्ते न तु मामित्यत आह । नाना वज्रहस्तादीनि रूपाणि येषां ते येऽमरास्तेषामाख्यया नाम्ना त्वामेव यजन्त इति । अयं भावः । ऐन्द्रवारुणादिसूक्तैरिन्द्रादयः सर्वैश्वर्येण प्रकाश्यन्ते न च सर्वेश्वरा बहवः संभवन्त्यतो नामभेदेन त्वामेव यजन्त इति । तथा च श्रुतिः "सप्रथमः सप्रकृतिर्विश्वकर्मा सप्रथमो मित्रावरुणोऽग्निः सप्रथमो बृहस्पतिश्चिकित्वांस्तमां इन्द्राय हविराजुहोति" इति ॥ ५ ॥ ज्ञानयज्ञेन समाधिना ॥ ६ ॥ सांख्ययोगत्रयीमार्गा उक्ता वैष्णवशैवमार्गावाहद्वयेन । अन्ये चेति संस्कृतात्मानो वैष्णवशैवदीक्षया दीक्षिताः संतस्ते त्वयाऽभिहितेन पंचरात्रादिविधिना त्वन्मयास्त्वन्मयत्वेनात्मानं चिंतयन्तस्त्वदेकप्रधाना इति वा । वासुदेवसंकर्षणप्रद्युम्नानिरुद्धभेदेन बहुमूर्तिं नारायणरूपेणैकमूर्तिकं च त्वामेव यजन्ति ॥ ७ ॥ बह्वाचार्यविभेदेनेति । नानाभेदशैवपाशुपतादिमार्गेण ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेवम् इत्थम् । सांख्ययोगाविति–सांख्यास्तु साध्यात्मादिरूपं, योगिनस्तु महापुरुषरूपमीश्वरं मन्यन्ते, तदुभावेकीकृत्य तत्तच्छास्त्रविषयावुक्तौ । त्रयी वेदत्रयी । वैतानिका याज्ञिकाः । "अस्त्रीवितानमुल्लोचे विस्ताराध्वरयोः क्षणे" इति हलायुधः । द्विजा जैमिन्यादयो ब्राह्मणाः । पुनराक्षिप्य समाधत्ते–नन्वित्यादिना । अत्राशयमाह–अयं भाव इति । सर्वैश्वर्येण परमैश्वर्येण यतो बहवः सर्वेश्वरा न सन्त्यतो हेतोः । अत्र प्रमाणमाह–तथा चेति । प्रथमेन कारणेन सह वर्तते सप्रथमः । प्रकृत्या मूलकारणेन सहेति सप्रकृतिः; विश्वकर्मादिरूपः सर्वो देवसमूहः कारणसहितः । यद्वा–प्रथमशब्देनोपादानकारणं ग्राह्यं, प्रकृतिशब्देन निमित्तकारणं च, वैपरीत्येन वा ज्ञेयम् । यद्वा–प्रथमः आदिर्विश्वकर्माऽऽदिर्मित्रावरुणादिः स एव । यद्वा–प्रकृत्या प्रधानेन सह विश्वकर्मापि स एवादिः । चिकित्सतीति चिकित्वान् । छान्दसः सलोपः । अश्विनीकुमाररूपः तस्मै सर्थदेवरूपायेन्द्राय भगवते । "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यत्रेंद्रशब्दो ब्रह्मवाचको दृष्ट इति । शुक्लयजुर्वेदे वाजसनेयिनस्तु—"सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः स प्रथमो बृहस्पतिश्चिकित्वांस्तस्मा इन्द्राय सुतमाजुहोत स्वाहा" इति पठन्ति । अस्यार्थः–सा संस्कृतिः सोमसंस्कारः । किंभूता संस्कृतिः–विश्ववारा । सर्वर्त्विगादिभिर्वरणीयेत्यर्थः । प्रथमा मुख्या । स प्रथमः परमेश्वरः वरुणः "आपो ज्योति रसोऽमृतम्" इति श्रुतिप्रतिपादितजलरूपः, मित्रः सूर्यरूपः, अग्निरग्निरूपः, स चिकित्वान् ज्ञानस्वरूपः, बृहस्पतिर्वेदस्य पतिः, प्रथमः सर्वेषामाद्यः । तस्मा इन्द्राय परमेश्वराय सुतं सोमं स्वाहाकारेणाजुहोत होमं कुरुतेत्यर्थः ॥ ५ ॥ प्रवृत्तिमार्गोपास्तिप्रकारमुक्त्वा निवृत्तिमार्गोपास्तिप्रकारमाह–संन्यस्य कर्मफलाऽऽसंगं त्यक्त्वा । उपशमं शान्तिम् । ज्ञानविग्रहं ज्ञानैकस्वरूपम् ॥ ६ ॥ तथात्मचिंतनं दुर्लभं मत्वाह– त्वदेकप्रधानाविति । यद्वा–त्वं मयः सर्वोत्तमो येषामिति त्वन्मयाः "मयः सर्वोत्तमो

---

१. विविधै–वीर. । २. पराख्यया–मूले । ३. केचित्–वीर. । ४. अन्ये तु–विज. । ५. विहितेन वै–विज. । ६. त्वन्मया–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ७. भगवन्तमु–प्रा. पा. ।

दैत्यशिल्पिन्युष्ट्रेऽपि कथ्यते" इति । अभिहितेन पञ्चधा कथितेन । विधिना कालेन 'विधी तु दैवकालौ च' इति यादवः । 'पञ्चकालपरायणैः' इत्युक्तेः । पंचरात्रस्य वक्ता तु भगवान्स्वयम्' इति स्मृतेस्तस्य परमप्राणाण्यमुक्तम् । त्वन्मयाः अन्तर्बहिस्त्वदीयस्फूर्तिमत्त्वात् । बहुमूर्त्येकमूर्तिकमिति—त्वन्मूर्तीनां चिन्मयीनां नानात्वेऽप्येकत्वमेवाभिप्रेतम् । "एको वशी सर्वगः कृष्ण ईड्यः । एकोऽपि सन्बहुधा योऽवभाति" इति श्रुतेः ॥ ७ ॥ बह्वाचार्यविभेदेन दधीच्यादिबह्वाचार्यभेदेन शैवपाशुपतादिमार्गेण । शैवमार्गमाह । त्वामेवेत्येवकारः पूर्वतो न्यूनतामाह । राजैव युवराज इतिवत् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्रय्येति तैर्व्याख्यातं यद्वा त्रय्या कर्मकाण्डमय्या "एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते" इत्यादेः चकारेण गौणत्वं व्यव्यात्रासाक्षात्त्वं व्यनक्ति विततैर्बहुधा विस्तारितैः ॥ ५ ॥ एके ततः श्रेष्ठाः ब्रह्मकाण्डविद उपशमं धैर्यं गताः अतो ज्ञानिनो निर्णीतपरमार्थाः सन्तः ज्ञानविग्रहं चिन्मात्राकारं ब्रह्माख्यं चिद्घनमूर्त्तिं भगवदाख्यं वा श्लोकद्वयेन वेदमार्ग उक्तः ॥६॥ अन्ये चेति । चकारात् पूर्वसाम्यं बोधयति । ते त्वयाभिहितेनोक्तेन इति पञ्चरात्रस्य परमप्रामाण्यं तेन सर्वतो मान्यत्वं चोक्तं तथैव दर्शयिष्यते मोक्षधर्मवाक्येन अत एव संस्कृतात्मानः शैवादिदीक्षितानतिक्रम्य गुणविशेषयुक्तचित्ताः अत एव त्वन्मयास्त्वत्प्रचुराः सदा बहिरन्तश्च त्वत्स्फूर्त्तिमन्त इत्यर्थः । बह्व्यो वासुदेवादयो मत्स्यादयश्च मूर्त्तयो यस्य एका परमव्योमाधिपमहानारायणरूपा मूर्त्तिर्यस्य तञ्च तं च यद्वा बहुमूर्त्तिकमप्येकमूर्त्तिकमिति तत्तन्मूर्त्तीनां नानात्वेऽप्येकत्वमभिप्रेतम् ॥ ७ ॥ त्वामेवेत्येवशब्देन पूर्वतो न्यूनत्वं बोधयति राजैवायं युवराज इति वत् अत्र भगवन्तमुपासत इति भगवान् समुपागत इति पाठद्वयम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

द्विजो इति तेषामेव त्रय्यामधिकारात्, विततैर्बहुधा विस्तारितैः ॥ ५ ॥ उपशमं चित्तस्थैर्य्यं गताः, अतो ज्ञानिनः समाधिपराः सन्तश्चिद्घनमूर्त्तिं त्वामेवोपासते, एवमध्यात्मविदः सन्न्यासिनः परिहृताः, तेषामात्मन एवोपासनात् ॥ ६ ॥ ते त्वयाभिहितेनोक्तेनेति परमप्रामाण्यम्, तेन सर्व्वतो मान्यत्वं चोक्तम् । अतएव त्वन्मयाः सदा बहिरन्तश्च त्वत्स्फूर्त्तिमन्तः सन्तः, इत्येषां सर्व्वतः श्रेष्ठ्यमभिप्रेतम् । बह्वो वासुदेवादयो मत्स्यादयश्च मूर्त्तयो यस्य, एका श्रीनारायणरूपा मूर्त्तिर्यस्य तञ्च तञ्च । यद्वा, बहुमूर्त्तिमप्येकमूर्त्तिकमिति वासुदेवादीनां नानात्वेऽप्यैक्यमभिप्रेतम् ॥ ७ ॥ एव-शब्दः श्रीभगवता सह श्रीशिवस्याभेदाभिप्रायेण, अतएव भगवन्तमिति ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

वैतानिकाः यज्ञपराः ॥ ५ ॥ अखिलकर्माणि काम्यानि यद्वा यज्ञादिकर्माणि संन्यस्य त्वयि समर्प्य संन्यासशब्दः समर्पणवाची नतु परित्यागवाची—

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥

इति प्रयोगात् नहि सर्वाणि कर्माणि हित्वा युध्यस्वेत्युच्यते ॥ ६ ॥ अन्ये भगवच्छास्त्रनिष्ठाः बहुमूर्त्येकमूर्त्तिकं व्यूहचतुष्टयवन्तं परवासुदेवं चेत्यर्थः ॥ ७ ॥ शिवरूपिणं शिवाख्यदेवतान्तर्यामिणं नतु शैवागमाभिप्रायकथनं तच्छास्त्रसिद्धप्रज्ञानानि वा ॥ ८-११ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ कर्मणामपि तदाराधनात्मकानां द्वैविध्यमभिप्रयन् तावत्सद्वारककर्माराध्यत्वमाह । त्रय्या चेति । केचिद्वैतानिकाः कर्मयोगिनो द्विजाः नानारूपामराः नानाविधत्वच्छरीरभूता इन्द्रादयो देवास्तेषामाख्या नामानि यस्यां तया त्रय्या विद्यया वेदपूर्वभागात्मिकया विद्यया बोधितैर्विविधैर्यज्ञैस्त्वां यजन्ते इन्द्रादिदेवतान्तरात्मानं तच्छारीरकं त्वामाराधयन्तीत्यर्थः । यद्वा नानाविधानि रूपाणि वज्रहस्तत्वादीनि येषां तेषामिन्द्रादीनामाख्यया अभिधेयमिति शेषः । आकृत्यधिकरणन्यायेन इन्द्राद्यन्तरात्मभूतत्वत्पर्यन्ताभिधायिभिरिन्द्रादिनामभिरभिध्येयं तत्तच्छरीरकं त्वां यजन्तीत्यर्थः । सिंहावलोकितन्यायेन पुनः साक्षाज्ज्ञानयोगविशेषाराध्यमाह । केचित्त्वेति केचित् त्वा इति च्छेदः त्वा त्वां यजन्तीति सम्बन्धः केचित्तु ज्ञानिनः भगवच्छेषतैकरसात्मयाथात्म्यज्ञानिनः भगवच्छेषतैकरसोऽहं तदायत्तस्वरूपस्थितिप्रवृत्तिश्च भगवांस्त्वसंख्येयः कल्याणगुणैः परतरः इत्येवं विधज्ञानवन्त इत्यर्थः । अखिलकर्माणि तदुक्तविधस्वरूपविरुद्धान्यहङ्कारममकारगर्भाणि काम्यकर्माणि त्यक्त्वा । यद्वा मयि सर्वाणि कर्माणीत्युक्तरीत्या क्रियमाणानां नित्यनैमित्तिकादीनां फलसाधनताकारपरित्यागपूर्वकं भगवदाराधनरूपतामनुसन्धायेत्यर्थः । इदमेव हि भगवति कर्मणां यत्कैङ्कर्यरूपत्वानुसन्धानमिति उपशमं शब्दादिविषयेषु भोग्यताबुद्धिराहित्यं गताः प्राप्ताः ज्ञानयज्ञेन प्राप्यं प्रापक चान्यदपि यन्मनोरथविषयभूतं तत्सर्वं परमपुरुष एवेत्येवं विधज्ञानयोगेन ज्ञानस्वरूपं त्वां यजन्ति । यद्वा ज्ञानविग्रहम् एतम्विधज्ञानेन यजतामनिष्टपरिहारेष्टप्रापणोपयुक्तज्ञानाश्रयं त्वां यजन्तीत्यर्थः ॥ ६ ॥ अथाद्वारककर्माराध्यमाह । अन्ये चेति । ते त्वयाभिहितेन विधिना पञ्चरात्रात्मकेन त्वदुक्तश्रीमत्पञ्चरात्रोक्तप्रकारेणेत्यर्थः । संस्कृतात्मानस्तापादिभिः पञ्चभिः संस्कारैः संस्कृता

आत्मानो देहा येषां तथाभूताः त्वन्मयास्त्वज्ज्ञानप्रचुरा अन्ये भगवच्छास्त्रनिष्ठाः साक्षात्त्वामेव व्यूहविभवरूपेण बहुमूर्त्तिकम् पररूपेणैकमूर्त्तिकम् च यजन्ति पाञ्चकालिकैर्धर्म्मैराराधयन्ति ।। ७ ।।

अथ—येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ।।

इत्युक्तरीत्यातत्तद्देवतामात्रपर्य्यन्तावसितबुद्धिमत्कृतयजनस्य तत्तद्देवता शरीरकतदन्तरात्मभूतपरमपुरुषाराधनरूपेणाकृततदाराधनतां वक्तुं तावत्प्रदर्शनार्थमाह । त्वामेवान्य इति । हे भगवन् बहूनामाचार्य्याणां कापालिककालामुखशैवपाशुपतादिरूपाणां भेदः आचारभेदो यस्मिन् तेन शिवोपदिष्टेन मार्गेण शैवाद्यागमोक्तप्रकारेण त्वामेव शिवरूपिणमुपासते उपासकानां तद्बुध्यभावेप्युपासना तत्रैव पर्य्यवस्यत्येव किन्तु तदुपासनमविधिपूर्वकमत एवान्तवत्फलसाधनमिति भावः ।। ८ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

योगिनो यजन्त्यद्धेति विशेषणात्केचिदन्यथा यजन्तीति ध्वनितमर्थमाह । त्रय्येति । त्रय्या विद्यया कर्मप्रधानप्रकाशिकया वैतानिकाः याज्ञिकाः यज्ञकर्मशीला इत्यर्थः—

अस्त्रीवितानमुल्लोचे विस्ताराध्वरयोः क्षणे । त्रिषु शून्ये च मन्दे च विषाण्युक्षेषु सुङ्गिष्विति ।।

उक्तविशेषणैरयमर्थो विज्ञायत इत्याह । विततैरिति । विस्तृतैः इन्द्रं यजाग्निं यजेत्यादि बहुदैवत्यकर्मणामेकविषयत्वं कथं सङ्गच्छत इत्यत्राह नाना रूपेति नानाविधानि शुक्लादिरूपाणि सौन्दर्याणि वा स्वभावा वा यशांसि वा येषां ते नानारूपाः ते चामरा देवाः नानारूपामराः तेषामाख्यया विशिष्टं विष्णुमिति शेषः । सर्वदेवेष्वपि हरिः सर्वदेवनियामक इत्यादिवचनबाहुल्यादुपगन्तव्यं विष्णोः सर्वनामत्वम् अमरेति विशेषणेन वेदस्य वाच्याभावेनाप्रामाण्यं स्यादिति शङ्का निरस्ता । इदञ्च विष्णावेव मुख्यमिति ।। ५ ।। प्रवृत्तिमार्गविहितोपासनाप्रकारमुक्त्वाऽधुना निवृत्तिमार्गविषयोपास्तिविधानमाह । एक इति । तु शब्देन एषां मुख्यत्वं दर्शयति । उपशमं भगवन्निष्ठाम् ।। ६ ।। वैदिकमतमुक्त्वा तान्त्रिकमतमाह । अन्ये त्विति । अन्ये पाञ्चरात्रिकाः तु शब्देन तत्रापि बाहुविध्यमस्तीति सूचयति संस्कृतात्मानः शिक्षितबुद्धयः सम्प्रदायागतप्रज्ञा वा शुद्धदेहा वा विहितेन विधिना पञ्चधा कथितेन कालेन वा पञ्चकालपरायणैरिति वचनात् विधा तु दैवकालोचेति च त्वमेव मयः सर्वोत्तम इति बुद्धिर्येषान्ते तथा बहुमूर्त्या वै बहुरूपेण च भक्तानुग्रहार्थं बहुत्वग्रहणं निजमेकमेवेत्याह । एकमूर्तिकमिति । अष्टया समष्ट्या च त्वामेव यजन्तीत्यर्थः ।। ७ ।। ननु शैवागमेषु शिवस्य यष्टव्यत्वेनोक्तत्वात्सर्वे त्वामेव यजन्तीति कथं युज्यत इति तत्राह । त्वामेवेति । शिवरूपिणं पुरुषार्थमूर्तिं शिवे रुद्रे रूपं नियामकमस्यास्तीति शिवान्तर्यामिणमित्यर्थः । दधीच्यादिबह्वाचार्यविभेदेन शैवपाशुपताद्युपदेष्टृभेदेन वा ।। ८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

त्रय्या कर्मकाण्डमय्या ।। ५ ।। एके ब्रह्मकाण्डविदः ज्ञानविग्रहं चिन्मात्राकारं ब्रह्माख्यं चिद्घनमूर्त्ति भगवदाख्यं वा श्लोकद्वयेन वेदमार्ग उक्तः ।। ६ ।। संस्कृतात्मानः पाञ्चरात्रिकदीक्षया पाशुपतादिदीक्षामतिक्रम्य गुणविशेषयुक्तचित्ता त्वामेवेत्येवकारेण न्यूनं बोधयति राजैव युवराज इतिवत् ।। ७-८ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अन्ये चेत्यादि । बहुमूर्त्त्येकमूर्त्तिकमिति बह्व्यो मूर्त्तयो यस्मात् स बहुमूर्तिः श्रीनारायणः; स एव एका प्रधाना मूर्त्तिर्यस्य सः तथा तं श्रीकृष्णमित्यर्थः ।। ७-३० ।।

इति श्रीदशमे स्कन्धे श्रीबृहत्क्रमसन्दर्भे चत्वारिंशोऽध्यायः ।। ४० ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

बहुमूर्त्त्येकमूर्त्तिकम् । बह्व्यो मूर्त्तयो यस्य यस्माद् वा स तथा श्रीनारायणः सोऽपि एका मूर्त्तिर्यस्य; यद्वा, ततोऽपि एका प्रधानभूता श्रीकृष्णरूपा मूर्त्तिर्यस्य (भा० १।३।५) "एतन्नानावताणां" इत्यादि पूर्वोक्तत्वात् श्रीनारायणस्य तयात्वे बहुमूर्त्तित्वम् ।। ७-२० ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कर्ममार्गमाह । त्रय्या चेति द्वाभ्याम् । वैतानिकाः कर्मयोगिनः त्वां वै त्वामेव यजन्ते । ननु ते इन्द्रवरुणादीन् यजन्ते नतु मामित्यत आह । नाना वज्रहस्तादीनि रूपाणि येषां ते ये अमरास्तेषामाख्यया नाम्ना त्वामेव यजन्ते अयं भावः ऐन्द्रवारुणादिसूक्तैरिन्द्रादयः सर्वैश्वर्येण प्रकाश्यन्ते नच सर्वेश्वरा बहवः सम्भवन्ति तस्मान्नामभेदेन त्वामेव यजन्त इति तथाच श्रुतिः "स प्रथमः स प्रकृतिः विश्वकर्मा प्रथमो मित्रावरुणोऽग्निः स प्रथमो बृहस्पतिश्चिकित्वांस्तस्मा इन्द्राय हविराजुहोती"ति ।। ५ ।। ज्ञानमार्गमाह ।

एके इति । ज्ञानयज्ञेन समाधिना ज्ञानविग्रहं ज्ञानस्वरूपं यद्वा ज्ञानस्यैव विशेषतो ग्रहो ग्रहणमास्वादनं यतस्तत् ब्रह्मेत्यर्थः ॥ ६ ॥ वैष्णवमार्गमाह । अन्ये इति । संस्कृतात्मान इत्येतदन्योपासका असंस्कृतमनस इति लभ्यते विधिना पञ्चरात्रदृष्टेन त्वयाभिहितेनेति "पञ्चरात्रस्य सर्वस्य वक्ता तु भगवान् स्वय"मिति स्मृतेस्तस्य परमप्रामाण्यात् सर्वतो मान्यत्वं द्योदितम् अन्तर्बहिस्त्वदीयस्फूर्त्तिमत्त्वात् त्वन्मयाः बहुमूर्त्तिकमप्येकमूर्त्तिकमिति तन्मूर्त्तीनां चिन्मयीनां नानात्वेऽप्यैक्यमभिप्रेतम् "एकोवशी सर्वगः कृष्ण ईड्यः एकोऽपि सन् बहुधा योऽवभाती"ति श्रुतेः ॥ ७ ॥ शैवमार्गमाह । त्वामेवेत्येवकारः पूर्वतो न्यूनत्वं बोधयति राजैवायं युवराज इनिवत् बह्वाचार्यविभेदेन शैवपाशुपतादिनानारूपेण भगवन्तमुपासते भगवान् समुपासते इति पाठद्वयम् ॥ ८ ॥

गूढार्थदीपिनी

त्रय्या वेदत्रय्या । वैतानिकाः याज्ञिकाः । नानारूपा ये अमरा इन्द्रादयः तेषां नाम्ना ॥ ५ ॥ एके योगिनः त्वा त्वां यजन्ति । संन्यस्य समर्प्य ज्ञानयज्ञेन समाधिना ॥ ६ ॥ संस्कृतात्मनः दीक्षिताः सन्तः । ते त्वया प्रोक्तेन पञ्चरात्रादिविधिना । बहुत्वं चतुर्व्यूहाभिप्रायेण ॥ ७ ॥ अन्ये शैवाः । भेदेन पाशुपतादिभेदेन समुपासते ॥ ८ ॥

श्रीमच्छुकदेवकृता सिद्धान्तप्रदीपः

एवं नानोपासनया वेदान्तिनस्त्वामेवाराधयन्तीत्युक्तमथ ब्रह्मांशोपासना दर्शयति । तत्र मीमांसका अपि गोपदगतगङ्गोदकन्यायेन तदंशभूतेन्द्रादियजनपराः इन्द्रादिद्वारा त्वामेवाराधयन्तीत्याह । त्रय्येति । वैतानिकाः इन्द्रादियजनरूपकर्मविज्ञानपराः त्वामेव यजन्ते "न ज्ञाज्ञौद्वावजावीशानीशौ" इत्यादि श्रुतिभ्यः इन्द्रादयोः जीवाः स्वरूपतो नामतश्चेश्वराद्भिन्ना एवातस्ते इन्द्रादियजनपराः मां कथं यजन्ते इत्यत आह । नानारूपामराख्यया । नानारूपाणां पृथक् पृथक् अल्पज्ञा स्वरूपाणां त्वदंशानाममराणामाख्यया नाम्ना त्वामेव यजन्ते यथा ओषधयः तत्तन्नामानि च पृथिवीमाश्रित्य वर्तन्ते तथा सर्वे इन्द्रादयः तत्तन्नामानि च त्वामाश्रित्य वर्तन्ते इत्यर्थः ॥ ५ ॥ अथानीश्वरसांख्यादयश्च ज्ञानयज्ञेन आत्मानात्मविवेकेन ज्ञानं जीवस्वरूपलक्षणं विग्रहोऽधिष्ठानं यस्य तमित्यर्थः । "यो विज्ञाने तिष्ठन्नि"तिश्रुतेः पुरुषान्तरात्मानं त्वां पुरुषद्वारा यजन्तीत्यर्थः ॥ ६ ॥ एव ब्रह्मोपासनां तदंशोपासनाञ्चोक्त्वा ब्रह्मोपासनामेव रहस्यभेदेन दर्शयति । अन्ये चेति । अन्ये सर्ववेदार्थभूतपञ्चरात्राद्यागमनिष्ठाः संस्कृतः चतुरायुधचिह्नादिपञ्चसंस्कारैः आत्मा देहो येषां ते तथा ते च संस्काराः श्रुत्या सूचिताः "धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुम्परं ध्यायति यो महात्मा । स्वरेण मन्त्रेण सदा हृदिस्थितं परात्परं यन्महतो महान्तम्" इति स्मृत्या च पञ्चसंस्काराः प्रदर्शिताः "तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः । अमी हि पञ्चसंस्काराः पारमैकान्त्यहेतवः" । इति तापशब्देन सुदर्शनादीनामग्नितप्तानां चिह्नं ज्ञेयम् तच्च द्वारवत्यामेव यथोक्तं पाद्मे रुक्माङ्गदं प्रति श्रीनारदेन "अग्नितप्तं सदा धार्य्यं द्वारवत्यां विचक्षणैः । नान्यस्थाने जातु राजन् ! सत्यमेतद्ब्रवीमि ते" इति तत्र च परमाचार्यः श्रीकृष्ण एव तत्रत्यपुरुषद्वारा तप्तमुद्राप्रदः तदुक्त बृहन्नारदीये "चतुर्थं द्वारकास्थानं मद्धाम सुरसेवितम् । तत्राहं हेतिना साध्वि ! तापयामि तनुं नृणा"मिति अन्यत्र तु गोपीचन्दनलिप्तैः सुदर्शनादिभिः पञ्चसंस्कारकाले शिष्यं संस्कुर्वन्ति भागवताः तदुक्तं वाराहे श्रीसनत्कुमारेण "कृष्णायुधाङ्कितो देहो गोपीचन्दनमृत्स्नया । प्रयागादिषु तीर्थेषु स गत्वा किङ्करिष्यति । किञ्चाग्निंविनापि सुदर्शनस्य स्वत एवाग्निरूपत्वञ्चोक्त सामवेदे मैत्रावरुणशाखायाम् "पवित्रमित्यग्निः अग्निर्वै सहस्रारः सहस्रारो नेमिः नेमिना तप्ततनुर्ब्रह्मणः सायुज्यं सलोकतामाप्नोती"ति अनेन सीतलमुद्राधारणमपि तप्तमुद्राधारणमेवेति सिद्धम् पुण्ड्रमूर्ध्व पुण्ड्रं नाम श्रीकृष्णदासादिः मन्त्रोऽष्टादशाक्षरादिः यागो भगवन्मूर्त्तिपूजनध्यानादिः इति पञ्चसंस्कारनिर्णयः विस्तरस्तु स्वधर्मामृतासन्धौ द्रष्टव्यः । कथम्भूताः त्वन्मयाः त्वत्प्रधानाः अंशत्वावच्छिन्नेन रूपेण भिन्नस्वरूपा अपि अंशिनिरपेक्षस्थितिप्रवृत्त्याद्यभावादभिन्ना इत्यर्थः । एवम्भूतास्ते त्वया अभिहितेन विधिना बहुमूर्त्यकमूर्तिकं व्यूहाङ्गिनं त्वामेव यजन्ति तथाह भगवानाद्याचार्य्यः "स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम् । व्यूहाङ्गिनं ब्रह्म परं वरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरि"मिति ॥७॥ अथांशोपासनाया अपि रहस्यविशेषं सूचयन् अन्यदवभक्तैस्तदुद्देशेन कृतोपासनापि सर्वात्मनि त्वय्येव पर्य्यवस्यतीत्याह द्वाभ्याम् । त्वामेवेति । शिवोक्तेन शिवोपदिष्टेन मार्गेण कथम्भूतेन बह्वाचार्यविभेदेन बहूनां कापालिककालामुखशैवादीनामाचार्य्याणां भेदः आचरणभेदो यस्मिन् तेन ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्वां योगिनो यजन्त्यद्धेति पद्येऽधिकेनात्मना सहितं तथाऽधिकेन भूतेन सहितमधिकेन दैवेन सहितमिति कृष्णस्य स्वोत्कृष्टात्मसहितता प्रतीयते तां निरसितुं मानेन तच्छब्दं निरुच्य हरिवाचकतां वर्णयति । स्थित इति । ब्रह्मादिदेवेषु स्वादिषु चात्मशब्दोदिताश्च तेषु च यस्मादीश्वरो जनार्दनः स्थितस्तस्मादधिकतया देवेषु विद्यमानं रूपमधिदैवं तेन सहित इति सर्वत्र विग्रहं ज्ञेयः । साधिभूत इति साध्यात्म इत्युच्यते । कसव्यत्ययस्त्युक्तिश्चैतत्त्रितयाधिष्ठातृरूपाणां विशेषाभावसूचनार्थेति ज्ञेयम् । पाठक्रमादर्थक्रमो गरीयानित्येवमुक्तिरिति परे । अपरे चोत्पत्तिक्रमसंहारक्रमविवक्षयोक्तिरित्युक्तवन्तः । अधिदैव इत्यधिदैवेति समस्तं पदम् । अतोऽधिदैव इति वक्तव्यमिति निरस्तम् । सन्बुध्यन्तं चेति केचित्केचिदविभक्तिको निर्देश इति व्याचक्रुः । अथ

मूलार्थः । साधवो योगिनो महापुरुषमीश्वरं साध्यात्ममधिकत्वेनात्मसु विद्यमानमध्यात्मं रूपं तेन सहित इति साध्यात्मस्तम् । एवमितरत्रापि ज्ञेयम् । साधिभूतं साधिदैवं चाद्धा यजन्ति । आत्मस्वध्यात्मम् । अनश्चेति टच् ॥ ५ ॥ त्रय्या च विद्यया केचित्त्वां वा इति श्लोके नानारूपामराणामाख्यया यजन्त इत्युच्यते । तत्र तदाख्या च नाभेदं विना मुख्यतः सम्भवतीति तदात्मकतैवाति प्रतीयत इति तामध्यात्मवचनेन निराकरोति । सर्वदेवेष्विति । सर्वेषु हरिः सर्वदेवनियामक इति सर्वदेवानां नामवान्यतरतत्तन्नामकस्ततः सर्वपूजां चासावत्ति भक्षयति । तदधीनत्वादर्थवत् । स्वातन्त्र्यं तद्गतत्वं च शब्दवृत्तेर्हि कारणम् । यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमुसत्यमाहुः । नामानि सर्वाणि । यो देवानां नामधा एक एवेत्यादेस्तत्तन्नाम्ना दत्ताहुतीस्वत्तंदन्तर्गतो मुख्यतो भगवानत्तीति भावः । ततश्चायं श्लोकार्थः । योगिन इत्युक्त्या तदितरेऽन्यथा यजन्तीति सूचितम् । तान्सकृत्यानाह । त्रय्येति । त्रय्या विद्यया वेदविद्यया कर्मप्रधानया वैमानिका बितानो यज्ञः । वितानो यज्ञविस्तारोल्लोचेषु क्रतुकर्मणि । वृत्तभेदावसरयोर्वितानं । तुच्छमन्दयोरिति विश्वः । तत्कृतो विवतैर्यज्ञैर्नानारूपामराख्यया नाना नानाविधानि रूपाणि चतुर्मुखव्यक्षत्वाद्याकारा येषां ते च तेऽमराश्च देवाश्च तेषां नानारूपाख्यास्तया यजन्ते पूजयन्ति । नानारूपेति योग्यतयाख्यापदेनोन्वेति । नानारूपेण सुवर्णादिसाधनेन वा । बहुरूपं च पुरुषमिति काठकभाष्योक्तेः । अत एव तुच्छं वितानं तत्कर्मसम्बन्धिन इति वैतानिकाः । त्रैविद्या मां सोमपाः पूतपापाः क्षीणे पुण्ये मर्त्यलोकं विशन्तीत्यादेः ॥ ६ ॥ प्रवृत्तिकर्ममार्गमुक्त्वा निवृत्तकर्मप्रवर्तनाप्रकारमीरयति । एक इति । एक एकान्तिनोऽखिलकर्माणि सन्न्यस्य त्वयि समर्प्योपशमं त्वन्निष्ठां गता ज्ञानिनो ज्ञानयज्ञेन ज्ञानविग्रहं यजन्ति ॥ ७ ॥ अन्ये तु सस्कृतात्मानो गुरुशिक्षितमनस्कातीर्थस्नानादिपवित्रदेहा विधिना कालेन । विधिर्विधाने नियतौ विधिः काले विधातरीति विश्वः । पञ्चधा प्रपञ्चितेन पञ्चकालपरायणैरितीरणात्त्वन्मयास्त्वं मयः प्रधानो येषां ते तथा बहुमूर्त्यैकमूर्तिकमिच्छागृहीतानेकाकारं तथैकमूर्तिकम् । पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इत्यादिः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमपेक्षिततमान्तरबाह्यधर्मपरान् स्मार्त्तान्निरूप्य श्रौतान्निरूपयति । त्रय्येति । श्रुतौ पक्षत्रयं काण्डत्रयभेदात् तत्र कर्ममार्गे त्रयीप्रधानम् उपनिषदो ज्ञानमार्गे उपासनायां तु प्रणवादिमन्त्राः तत् क्रमेण त्रयमाह सर्वेषामेव भगवज्ज्ञानोपयोग इत्यवोचाम मन्त्रभेदेन वेदानां त्रैविध्यम् ऋचः सामानि यजूंषीति तदुपयोगि ब्राह्मणं च बाह्यक्रिया वा यजुषा क्रियते आन्तरी साक्षाद्देवतायै द्रव्यसमर्पणारूपा ऋचा क्रियते ततो देवतायाः फलदानार्थं च साम्ना स्तूयते एवम्प्रकारेण वैतानिकाः यज्ञवितानपराः यज्ञस्वरूपं त्वां विस्तीर्णैः सहस्रसंवत्सरान्तैर्नानाविधैर्यज्ञैर्यजन्ते इति सर्वत्र सम्बन्धः चकारादङ्गोपाङ्गादिभिः सह ज्ञानेनापि सहेति केचित् । द्विजा इति जन्मकर्मावदाताः श्रोत्रियाः न तु सर्वेष. तत्राधिकार इति । ननु तत्रेन्द्रादय एवेज्यन्ते न तु भगवानित्याभप्रेत्याह । नानारूपेति । नानाविधानि रूपाणि येषाममराणामिन्द्रादीनां तेषामाख्यया आधिदैविकत्वात् भगवत एव नामेति वा तेषामेवाख्यया भगवानेवेज्यते वस्तुतस्तु अङ्गप्रायास्ते यथा राज्ञः मुकुटोष्णीषादिनिर्माता सेवक एव भवति यद्यपि शिरसि एव परिचर्यां करोति एवं कर्णादिष्वपि तथापि राजसेवक एवोच्यते न त्वङ्गसेवक इति तथा प्रकृतेऽपि इन्द्रादयो बाहव इत्यादिभिरङ्गत्वश्रुतेः अतो भगवानेवेज्यते ॥ ५ ॥ एकेति । अन्ये पुनः सर्वकर्माणि त्यक्त्वा उपशमं गताः चित्तस्य परमां शान्तिं प्राप्य ज्ञानिनो भूत्वा ब्रह्मात्मत्वस्फूर्त्तियुक्ताः आत्मयाजिनो भूत्वा ज्ञानरूपमेव यज्ञं कुर्वन्तः ज्ञानयज्ञो नाम आत्मानमेव चिपद्रूपं यज्ञरूपेण कल्पयित्वा भगवते समर्पयन्ति भगवत् प्रीतिसाधकत्वाज्ज्ञानमेव यज्ञशब्देनोच्यते अथवा जरामर्यादिप्रकाराः ज्ञानयज्ञास्तत्र इज्य पि ज्ञानरूप एवेत्याह । ज्ञानविग्रहमिति उडुलोमिवत् ॥ ६ ॥ उपासकानाह । अन्ये चेति । ते हि स्वात्मानं भगवन्तं च भिन्नमभिन्नं च मन्यन्ते नारुद्रो रुद्रमच्चर्चयेदित्यादिवाक्यैः अत आह अन्ये भिन्नाश्चकारा भिन्ना अपि संस्कृतात्मानः दीक्षादिभिः शोधितसङ्घाताः गुणा अभिहितेन मार्गेण ते प्रसिद्धाः तत्तत्प्रकारेणैव तत्तद्देवतामन्त्रोपासकाः ततस्तन्मया भूत्वा उपास्यदेवतया व्याप्तस्वरूपा भूत्वा त्वामेव वै निश्चयेन नात्र तिराहितमिव बहुमूर्त्योमत्स्यकूर्मादिरूपैः एकमूर्त्तिम् एकस्वरूपमेव यजन्ति सर्वे हि विष्णूपासका इति अत्र शैवादयोऽपि भगवन्निष्ठा एवेति ज्ञातव्याः उपासनायां हि मन्त्र एव प्रधानं स मन्त्ररूपः यज्ञवदेक एव इन्द्रादिवत्तत्तदभिमानिन्यो देवता इति ततः पञ्चविधैः अनेकविधैर्वा मन्त्रैः उपासनामार्गसिद्धो भगवानेक एवोपास्यते क्षुद्रोपासकांश्चाग्रे वक्ष्यते भिन्नप्रकारसिद्धांश्च ॥ ७ ॥ किं च शिवरूपोऽपि त्वमेवेति शैवा अपि त्वामेवोपासत इत्याह । त्वामेवेति । अन्य उपासकेभ्यो भिन्नाः शिवशास्त्रानुसारिणः तामसे कल्पे शिवरूपेण विष्णुः तिष्ठतीति शैवपञ्चरात्रे पाशुपतादौ च प्रसिद्धः तत्र शिवरूपी बिष्णुरेव केचिदावेशिनमाहुः । तत्र बह्वश्चाचार्या महापाशुपतपाशुपतादिभेदाभिन्नाः भगवन्निति सम्बोधनात् यदा वैराग्यगुणप्राधान्येन कार्यं करोषि तदा शिवरूपो भवसीति ज्ञापित सम्यगेवोपासत इति ॥ ८ ॥

श्रीसुबोधिनी-सारः

वैतानिताः कर्मयोगिनो द्विजाः केचित्त्वां त्रय्या विद्यया यजन्ते विस्तृतैर्यज्ञैर्नानारूपा येऽमरा देवास्तेषामाख्यया नाम्ना ॥ ५ ॥ एके ज्ञानिनः सर्वकर्माणि संन्यस्य त्यक्त्वोपशमं निवृत्तिं गता ज्ञानरूपिणं त्वा त्वां ज्ञानयज्ञेन यजन्ति ॥ ६ ॥

संस्कृतात्मानो वैष्णवशैवदीक्षया दीक्षिता अन्ये ते त्वया उक्तेन विधिना कर्तृपदं वा त्वद्रूपा वासुदेवादिरूपिणं नारायणरूपिणं वा त्वां यजन्ति ॥ ७ ॥ अन्ये शिवरूपिणं त्वां शिवोक्तेन मार्गेण बह्वाचार्यविभेदेन समुपासते हे भगवन् ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वेदस्य कर्मज्ञानोपासनाकाण्डभेदेन त्रिविधत्वात् प्रथमं कर्ममार्गेण भजनमाह—त्रय्येति । केचिद्वैतानिकाः कर्मयोगिनो द्विजाः त्रय्या ऋग्यजुः सामात्मकवेदत्रयरूपया विद्यया बोधितैर्विततैर्यज्ञैस्त्वां वै त्वामेव यजन्ते आराधयन्ते । ननु 'तच्चेन्द्रवरुणादीनामेवाराधनं प्रसिद्धम्' इत्याशङ्क्याह—नानेति । नाना वज्रहस्तादीनि रूपाणि येषां ते ये अमराः तेषामाख्यया नाम्ना ऐन्द्रवारुणादिसूक्तैरिन्द्रादयः सर्वैश्वर्येण प्रकाश्यन्ते, न च सर्वेश्वरा बहवः सम्भवन्त्यतो नामभेदेन त्वामेव यजन्ते इत्याशयः ॥ ५ ॥ ज्ञानमार्गेण भजनमाह—एके इति । एके मुख्याः ज्ञानिनः उपशमं विषयवैतृष्ण्यं गताः अतएवाखिलानि कर्माणि लौकिकवैदिकव्यापारान् संन्यस्य त्यक्त्वा ज्ञानयज्ञेन समाधिलक्षणेन ज्ञानविग्रहं सच्चिदानन्दमूर्तिं त्वां यजन्ति ध्यायन्ति ॥ ६ ॥ उपासनामार्गेण भजनमाह—अन्ये चेति । अन्ये च ते त्वयाऽभिहितेन विधिना पञ्चरात्राद्युक्तप्रकारेण संस्कृत आत्मा देहो येषां ते त्वन्मयाः त्वन्मयत्वेनात्मानं चिन्तयन्तो वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धभेदेन बहुमूर्तिकं नारायणरूपेणैकमूर्तिकं च त्वामेव यजन्ते ॥ ७ ॥ हे भगवन् ! अन्ये च शिवोक्तेन मार्गेण तत्रापि बहूनामाचार्याणां विभेदेन तत्तदाचार्योक्तावान्तरप्रकारभेदेन त्वामेव शिवरूपिणं समुपासते ॥ ८ ॥

अन्वितार्थप्रकाशिका

त्रय्येति ॥ केचिद्वैतानिकाः कर्मयोगिनो द्विजा त्रय्या ऋग्यजुःसामात्मकवेदत्रयरूपया विद्यया बोधितैर्विततैर्यज्ञैस्त्वां वै त्वामेव नानारूपा ये अमरा देवास्तेषामाख्यया नाम्ना यजन्ते । अयं भावः । ऐन्द्रादिसूक्तैरिन्द्रादयः सर्वेश्वरत्वेन प्रकाश्यन्ते । न च सर्वेश्वरा बहवः सम्भवन्ति अतो नामभेदेन त्वामेव यजन्ते । त्वमेवेन्द्रादिरूप इति भावः । तथा च श्रुतिः । "स प्रथमः स प्रकृतिर्विश्वकर्मा स प्रथमो मित्रावरुणोऽग्निः स प्रथमो बृहस्पतिश्चिकित्वान् । तस्मा इन्द्राय हविजुहोति" इति ॥ ५ ॥ एक इति ॥ एके मुख्याः ज्ञानिनः उपशमं विषयवैतृष्ण्यं गताः अत एवाखिलानि कर्माणि लौकिकवैदिकव्यापारान् संन्यस्य त्यक्त्वा ज्ञानयज्ञेन समाधिलक्षणेन ज्ञानविग्रहं चिन्मात्राकारं ब्रह्माख्यं चिद्धनमूर्तिं भगवदाख्यं वा यजन्ति ध्यायन्ति ॥ ६ ॥ अन्ये चेति ॥ अन्ये च ते त्वयाऽभिहितेन विधिना पञ्चरात्राद्युक्तप्रकारेण संस्कृत आत्मा देहो येषां ते त्वन्मयाः त्वन्मयत्वेनात्मानं चिन्तयन्तस्त्वदेकप्रधाना इति वा वासुदेवसंकर्षणप्रद्युम्नानिरुद्धादिमत्स्यादिभेदेन बहुमूर्तिकं महानारायणरूपेणैकमूर्तिकं च त्वामेव यजन्ति ॥ ७ ॥ त्वामेवेति ॥ हे भगवन् ! अन्ये च शिवोक्तेन मार्गेण तत्रापि बहूनामाचार्याणां विभेदेन तत्तदाचार्योक्तावान्तरप्रकारपाशुपतादिभेदेन त्वामेव शिवरूपिणं समुपासते । भगवन्तमुपासत इति वा पाठ ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वैतानिकाः वेदोक्तकर्मनिष्ठाः । नानारूपामराख्यया नानाविधानिवज्रकरादीनिरूपणि येषां तेषाममराणां देवानां आख्यया अभिधानेन स्थितं तदन्तर्यामित्वात्तन्नियामकत्वाच्च तत्कर्मफलप्रदातृत्वाच्च तत्तन्नाम्ना स्थितमित्यर्थः । त्वां सर्वात्मकं त्रय्यावेदत्रयीरूपयाविद्ययाकृत्वाचित्ततैः ॥ कर्मविस्तारं प्राप्तैः यज्ञैः सोमेन्द्रादियागैः यजन्ते ॥ ५ ॥ एक इति एके ततोऽन्ये ज्ञानिनः देहात्मनोः परमात्मनश्च यथावस्थितज्ञानयुक्ताः अखिलकर्माणि ब्राह्मणादिवर्णोचिता निगृहाऽऽश्रमोचितानि च समग्रकर्माणि संन्यस्य त्यक्त्वा उपशमं परमात्मसमाधिरूपत्यागिधर्मं गताः प्राप्ताः सन्तः व्रजन्ति तत्पारमहंस्यमंत्यं यस्मिन्न हिंसोपशमः स्वधर्म इति भागवतोक्तः ज्ञानयज्ञन आतमपरमात्मस्वरूपवेदनयज्ञेनज्ञानविग्रहं ज्ञानयनमूर्त्ति वासुदेवं यजन्ति ॥ ६ ॥ अन्यान्मार्गानाहरलोकद्वयेन अन्ये चेति ततोऽन्ये पंचरात्रादिषु अभिहितेन कथितेन विधिना दीक्षाविधिना संस्कृतदेहाः अत एव त्वन्मयाः त्वत्स्वरूपैकप्रधानाः सन्तः बहुमूर्त्त्या संकर्षणप्रद्युम्नाऽनिरुद्धमस्य कुर्मवराह्यनेकविग्रहेण एकमूर्त्तिकं त्वां वसुदेवपुत्रं यजन्ति ॥७॥ बह्वाचार्यैः विविधा भेदा यस्मिन् तेन शिवोक्तेन नानाविधपाश्वपतेन मार्गेण ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ कर्मणामपि तदाराधनात्मकतां प्रदर्शयन् यथाशास्त्रं कर्माचरणनिष्ठकर्मयोगिकृतकर्माराध्यकतामाह । त्रय्येति । केचित् वैतानिकाः द्विजाः, कर्मयोगिनो ब्राह्मणा इत्यर्थः । नानारूपा नानाविधाः अमरास्त्वच्छरीरभूता इन्द्रादयो देवास्तेषामाख्या नामानि यस्यां तया, त्रय्या विद्यया च, वेदपूर्वभागात्मिकया त्रयीविद्ययापीत्यर्थः । बोधितैरिति शेषः । विततैर्विविधतया विस्तारं प्राप्तैः, यज्ञैर्मखैः, त्वां वै त्वामेवेत्यर्थः । यजन्ते । इन्द्रादिदेवान्तरात्मानं तच्छरीरकं त्वामेवाराधयन्तीत्यर्थः । यद्वा । केचित् वैतानिकाः द्विजाः, त्रय्या विद्यया दर्शितैः, विततैः यज्ञैः, नाना नानाविधानि रूपाणि वज्रहस्तत्वादीनि येषां ते ये अमरा इन्द्रादयस्तेषामाख्या तया, अभिधेयमिति शेषः । त्वां वै यजन्ते इन्द्राद्यन्तरात्मभूतत्वत्पर्यन्तताभिधायिभिरिन्द्रादिनामभिरभिधेयं

तच्छरीरकं त्वामेव यजन्तीत्यर्थः ॥ ५ ॥ सिंहावलोकितन्यायेन पुनः साक्षाज्ज्ञानयोगेन विशेषाराध्यत्वमाह । एक इति । एके ज्ञानिनः, केचन जनितभगवच्छेषतैकरसात्मयाथात्म्यज्ञानिनः, भगवच्छेषतैकरसोऽहं तदायत्तस्थितिप्रवृत्तिश्च भगवांस्त्वसंख्येयैः कल्याणगुणैः परतर इत्येवंविधज्ञानवन्त इत्यर्थः । अखिलकर्माणि उक्तविधस्वरूपविरुद्धानि अहंकारममकारगर्भाणि सकलानि कर्माणि, सकलानि काम्यकर्माणि वा संन्यस्य त्यक्त्वा, यद्वा 'मयि सर्वाणि कर्माणि' इत्युक्तरीत्या क्रियमाणानां नित्यनैमित्तिकादीनां फलसाधनताकारपरित्यागपूर्वकं भगवदाराधनरूपतामनुसंधायेत्यर्थः । उपशमं गताः । उपशमो हि शब्दादिविषयेषु भोग्यताबुद्धिराहित्यं तं प्राप्ता इत्यर्थः । ज्ञानयज्ञेन प्राप्यं प्रापकमन्यदपि यन्मनोरथविषयभूतं तत् सर्वं मम परमपुरुष एवेत्येवंविधज्ञानयोगेनेत्यर्थः । ज्ञानविग्रहं ज्ञानस्वरूपं, यद्वा ज्ञानविग्रहं नामैवंविधज्ञानेन यजतामनिष्टपरिहारेष्टप्रापणोयुक्तज्ञानाश्रयमित्यर्थः । त्वा त्वां, यजन्ति ॥ ६ ॥ अन्ये चेति । ते त्वया, अभिहितेन विधिना पञ्चरात्रात्मकेन, त्वदुक्तश्रीमत्पञ्चरात्रोक्तप्रकारेणेत्यर्थः । संस्कृतात्मानः तप्तमुद्राधारणादिभिः पञ्चभिः संस्कारैः संस्कृतदेहा इत्यर्थः । त्वन्मयास्त्वज्ज्ञानप्रचुराः, अन्ये भगवच्छास्त्रनिष्ठाश्च, बहुमूर्त्येकमूर्त्तिकं त्वां, यजन्ति वै । पञ्चकालपूजाविधानादिधर्मैस्त्वामाराधयन्त्येवेत्यर्थः । तत्र व्यूहविभावादिरूपेण बहुमूर्त्तिकत्वं पररूपेणैकमूर्त्तिकत्वम् ॥ ७ ॥ अथ 'येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्' इत्युक्तरीत्या तत्तद्देवतारूपेण कृतस्य तत्तद्देवताशरीरकतत्तदन्तरात्मभूतपरमपुरुषाराधनरूपेणाकृतस्यापि यजनस्य तदाराधनतां वक्तुमाह । त्वामेवान्य इति । हे भगवन् , अन्ये बहूनामाचार्याणां कापालिककालमुखशैवपाशुपतादिरूपाणां विभेदः आचारभेदो यस्मिंस्तेन, शिवोक्तेन शिवोपदिष्टेन मार्गेण, शैवाद्यागमोक्तप्रकारेणेत्यर्थः । शिवरूपिणं त्वामेव, समुपासते ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

त्वामेवेति : १०.४०.८.

केचिच्छिवं गणपतिं सवितारमन्ये तत्तद्गृहीत-समुपासन-भूरिदीक्षाः ।
भक्त्या स्तुवन्त्युचितया वयमित्यहन्ता तेषामपीत्थमुचिता यदशेषगस्त्वम् ॥ ४ ॥

कृष्णप्रिया

पूर्व श्लोक स्मार्त एवं योगी लोगों के आराधन प्रकार का निरूपण करते हुए अब इस पाँचवें श्लोक में श्रौत उपासकों के सिद्धान्त को बताते हैं । कर्म ज्ञान उपासना के तीन काण्डों के भेद से श्रुति में तीन पक्ष बताए । कर्म-यागादि मार्ग में त्रयी-वेदत्रयी विद्या प्रमाण है, ज्ञानमार्ग में उपनिषद् प्रमाण है एवं उपासना मार्ग में प्रणणादि मंत्र प्रमाण है । यज्ञों में जो बाह्य-क्रिया की जाति है वह यजुर्वेद के मंत्रों से होती है । इन्द्रादि देवताओं के उद्देश से हुतद्रव्यों का समर्पणादि कार्य ऋग्वेद के मंत्रों से होती है । देवताओं को फल देने के लिए प्रार्थना की जाती है और हुतद्रव्यों के स्वीकार के लिए प्रार्थना-स्तुति सामवेद से की जाति है इस विषय को अब पांचवें श्लोक से स्पष्ट करते अक्रूरजी कहते हैं कि हे नाथ ? जो जन्मतः और अग्निहोत्रादि वैदिक कर्म से एक हजार वर्ष दीर्घ सत्र करने वाले जो वैतानिक-श्रोत्रिय याजक इन्द्र वरुण आदि देवताओं की भिन्न रूप एवं भिन्न नामों से आराधना करते हैं वे भी आपका ही आराधना करते हैं । उन देवताओं में आधिदेव स्वरूप से आप ही विराजमान है ॥ ५ ॥ श्रोत्रिय याजकों की आराधना, भगवदाराधना ही है यह समझाकर ज्ञाननिष्ठों की ज्ञानोपासना का निरूपण करते हैं कि—ज्ञानी उपासक है वे सर्व प्रकार के सकाम कर्म एवं योगादि मार्ग के अभ्यासों का त्याग करके केवल आत्मरत होकर शमपरायण बनकर ज्ञान स्वरूप आपको ज्ञान यज्ञ से आपकी आराधना करते है । ज्ञान योग का एक प्रकार है कि आत्मा ब्रह्म ही है (१) ज्ञानरूप आत्मा को ही यज्ञ रूप से भगवान को समर्पण करना (२) ज्ञान भगवान की प्रसन्नता को प्राप्त कराने का साधन है इसीलिए ज्ञान ही यज्ञ है इस ज्ञान यज्ञ से (३) अथवा जिस अनुष्ठान जरामर्यादि वृद्धावस्था एवं मृत्यु की प्राप्ति नहीं होती उस ज्ञान यज्ञ (४) से आपका ही आराधन करते हैं ॥ ६ ॥ अब सातवें श्लोक में विविध मतों के प्रकार से उपासना करने वालों का उपासनाक्रम प्रकार का बताते हैं कि "एक औडुलोमि नाम के ऋषि हुए उनका मन्तव्य है कि नारुद्रोरुद्रमर्चयेत् जो रुद्रमार्ग की दीक्षा वाला नहीं वह रुद्र की उपासना न करें क्योंकि विना दीक्षा उपासना नहीं फलती" ऐसे मन्तव्य वाले उपासक लोग दीक्षादि ग्रहण करके देह-अन्तःकरणादि को पवित्र बनाकर वैदिक मार्ग के सिद्धान्तानुसार तन्मय होकर, मत्स्य कूर्म आदि अनेक रूपों से बनने वाले लेकिन एक ही रूप वाले आपका ही यमन करते हैं ॥७। श्रौत, स्मार्त, उपनिषद आदि सिद्धान्तों से भजने वाले भगवान के ही उपासक है यह निरूपण किया, अब शैव तन्त्र के उपासकों के विषय में अक्रूरजी कहते हैं —हे भगवन् ? शिवरूप भी आप ही है शैव भक्त भी शैव तन्त्र पद्धति के अनुसार शैव तन्त्र पाशुपततन्त्र वगैरे विभिन्न-विभिन्न सम्प्रदायों द्वारा आपको हा यथा-योग्य रूप से उपासना करते हैं ॥ ८ ॥

सर्व एव [1]यजन्ति त्वां सर्वदेवमयेश्वरम् । [2]येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ॥ ९ ॥
यथाद्रिप्रभवा नद्यः पर्जन्यापूरिताः [3]प्रभो । विशन्ति सर्वतः सिन्धुं तद्वत्त्वां गतयोऽन्ततः ॥ १० ॥
सत्त्वं रजस्तम इति [4]भवतः प्रकृतेर्गुणाः । तेषु हि प्राकृताः प्रोता आब्रह्मस्थावरादयः ॥ ११ ॥
तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे ।
गुणप्रवाहोऽयमविद्यया[5] कृतः प्रवर्तते देवनृतिर्यगात्मसु ॥ १२ ॥

कर्दमक्षमा

अन्वयः—हे प्रभो ! यद्यपि, अन्यधियः, ये, अपि, अन्यदेवताभक्ताः, सर्वे, एव, सर्वदेवमयेश्वरम्, त्वाम्, एव, यजन्ति ॥ ९ ॥ हे प्रभो, यथा, अद्रिप्रभवाः, पर्जन्यपूरिताः, नद्यः, सर्वतः, सिन्धुम्, विशन्ति, तद्वत्, गतयः (फलानि) अन्ततः, त्वाम्, विशन्ति ॥ १० ॥ सत्वम्, रजः, तमः, इति, भवतः, प्रकृतेः, गुणाः, (एवम्) आब्रह्मस्थावरादयः, प्राकृताः, ते, तेषु, प्रोताः ॥ ११ ॥ अविषक्तदृष्टये, सर्वात्मने, सर्वधियां च, साक्षिणे, ते, तुभ्यम्, नमः, अस्तु, देवनृतिर्यगात्मसु, अविद्यया, कृतः, अयम्, गुणप्रवाहः, प्रवर्तते, ते, नमः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

येऽपि क्षुद्रदेवताभक्तास्तेऽपि त्वामेव यजन्तीत्याह । सर्व एवेति । हे सर्वदेवमय । नन्वेते परस्परदेवताधिक्षेपकलहव्याकुलचित्ताः कथमेकमेव यजन्तीत्युच्यते तत्राह । यद्यप्यन्यधिय इति । बुद्धिमात्रभेदो न वस्तुभेद इत्यर्थः ॥ ९ ॥ तस्मात्सर्वे मार्गास्त्वय्येव पर्यवस्यन्तीति सदृष्टान्तमाह । यथेति । अद्रेः सकाशात्सर्वतः प्रभवन्ति या नद्यस्ताः पुनः पर्जन्येनापूरिता बहुस्रो तसः सत्यः सर्वतः नानापथैः सिंधुमेव विशंति यथा तद्वदेता गतयो मार्गा ऋजुकुटिलाः अन्ततस्त्वामेव विशन्तीति ॥ १० ॥ अत्र हेतुमाह । सत्त्वमिति । भवतः शक्तिर्या प्रकृतिस्तस्याः सत्त्वादयो गुणा अतः प्राकृताः प्रकृतिकार्योपाधयो ब्रह्मपर्यंताः स्थावरादयो जीवाः स्वोपाधिद्वारा तेषु गुणेषु प्रोताः प्रविष्टास्ते च प्रकृतौ सा च त्वयीति । अतः क्रमेणोपाधिलयात्सर्वेऽपि त्वामेव विशन्तीति । यद्वा भवतः प्रकृतेर्गुणेषु प्रोता ब्रह्मादयो भवद्व्यतिरिक्ता न संत्यतस्त्वमेव सर्वदेवमय इति ॥ ११ ॥ ननु भवतः प्रकृतेरिति वन्दन्ममापि प्रकृतिसम्बन्धं ब्रवीषि ततश्च तेषां मम च को विशेषः स्यादित्याशंक्य विशेषमाह । तुभ्यमिति । अविषक्तदृष्टयेऽलिप्तबुद्धये । कुतः । सर्वात्मने । स्वव्यतिरिक्ताभावादविषक्तदृष्टित्वमित्यर्थः । किं च सर्वधियां साक्षिणे सर्वबुद्धिसाक्षित्वान्न क्वापि बुद्धिलेप इत्यर्थः । इतरे तु संसरन्तीत्याह । गुणप्रवाह इति । देवनृतिर्यंच आत्मानो देहा येषां तेषु देवादिशरीराभिमानिष्वित्यर्थः । त्वदविद्यया कृतोऽयं गुणप्रवाहः प्रवर्ततेऽतो महान्विशेष इत्यर्थः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

क्षुद्रदेवताः पञ्चदेवभिन्नाः । सर्वदेवमय ! "शैवाः सौराश्च गाणेशा वैष्णवाः शक्तिपूजकाः । मामेव प्राप्नुवन्तीह वर्षापः सागरं यथा ॥" इति पाद्मोक्तेः । किञ्च—'एकोऽहं पञ्चधा जातः क्रीडया नामभिः किल:" इति पञ्चधेत्युपलक्षणं सर्वदेवानाम् । किञ्च—"योयो यांयां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान्हितान् ।' इति गीतासूक्तेः परमेश्वर एव तत्तद्रूपेणोपास्यते, स एव तत्तद्देवतान्तर्यामिरूपेण फलं ददातीस्यर्थः । एवमुक्तलक्षणा योगिकर्मिप्रभृतय उपासकाः सर्वे । ननु केचित्पृष्टा वयं शिवमर्चयामः, वयं सूर्यं, वयं गणेशमित्याद्याचक्षते, तत्राह—येऽपीति । ननु ते कादाचित्कीमपि स्मृतिं मयि न कुर्वन्ति तत्राह—यद्यपीति ॥ ९ ॥ अद्रेर्गिरेः । पर्जन्येन गर्जन्मेघेनापूरिताः । गतयो मार्गाः,—पूजामार्गाः, पुरुषार्थसाधनानि शास्त्राणि वा प्रस्थानभेदेन भिन्नानि । अन्ततस्तात्पर्यवृत्त्या, अंततः पूजावसाने ब्रह्मार्पणबुद्ध्यावसिता वेत्यर्थः । अथ प्रस्थानभेदेन यथा सर्वशास्त्राणि सर्वे मार्गाश्च त्वयि पर्यवस्यन्ति तथा दर्शयति 'त्वां योगिनः' (४) इत्यारभ्य 'तद्वत्त्वां गतयोऽन्ततः' इत्यन्तसप्तश्लोकोक्तप्रकारेण । प्रथमं त्रयोशब्देन वेदत्रयवाचिना तदुपलक्षिता अष्टादश विद्या अप्यत्र विवक्षिताः । तत्रर्ग्यजुःसामाथर्वभेदेन वेदाश्चत्वारः "शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः । छन्दसां लक्षणञ्चैव षडंगो वेद उच्यते ॥" इति षडङ्गानि, पुराणन्यायमीमांशाधर्मशास्त्राणि चेति चत्वार्युपाङ्गानि । तत्रोपपुराणानामन्तर्भावः, वैशेशिषिकस्य न्यायनये, वेदान्तस्य मीमांसायां, महाभारतरामायणयोः सांख्यपातञ्जलपाशुपतवैष्णवादीनां च धर्मशास्त्रे, मिलित्वा चतुर्दश विद्याः । तथोक्तम्—"पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः ।

---

१. जयन्ति—मूले. । २. ये नाना देवताः-वीर. विज. । ३. विभो—विज. । ४. भवन्ति—विज. । ५. यदविद्ययाऽसकृत्--वीर. ; विद्ययाऽसकृत—विज. ।

वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।’ इति । एता एव चतुर्भिरुपवेदैः सहिता अष्टादश विद्या भवन्ति । ते च—आयुर्वेदो धनुर्वेदो गान्धर्ववेदोऽर्थशास्त्रञ्च । ता एता अष्टादश विद्यास्त्रयीसंज्ञादिनोपन्यस्ता अन्यथा न्यूनताप्रसंगात् । सर्वेषां चास्तिकानामेतावन्त्येव धर्मप्रस्थानानि, अन्येषामप्येकदेशिनामेष्वेवान्तर्भावात् । ननु नास्तिकानामपि प्रस्थानानि सन्ति तान्येतेष्वनतर्भावात्पृथग्गणितुमुचितानि । तथाहि—शून्यवादेनैकं प्रस्थानं माध्यमिकानाम् १, क्षणिकविज्ञानवादेनापरं योगाचाराणाम् , ज्ञानाकारानुमेयक्षणिकबाह्यार्थवादेनापरं सौत्रांतिकानाम् ३, प्रत्यक्षक्षणिकबाह्यार्थवादेनापरं वैभाषिकाणाम् ४, इति सौगतानां प्रस्थानचतुष्टयम् । तथा देहात्मवादेनकं प्रस्थानं चार्वाकाणाम् १, एवं देहातिरिक्तदेहपरिमाणात्मवादेन द्वितीयं प्रस्थानं दिगम्बराणाम् २ एवं मिलित्वा षट् प्रस्थानानि कस्मान्नोच्यन्ते । सत्यम् । वेदबाह्यत्वात्तेषां म्लेच्छादिप्रस्थानवत्परम्परयापि पुरुषार्थानुपयोगादुपेक्षणीयत्वमेव । इह च साक्षात्परंपरया वा परमार्थयोगिनां वेदोपकरणानामेव प्रस्थानानां भेदो दर्शितः, ततो न न्यूनत्वशंकावकाशः । अथ संक्षेपेणैषां प्रस्थानानां स्वरूपभेदहेतुः प्रयोजनभेद उच्यते बालानां व्युत्पत्तये । तत्र धर्मप्रतिपादकमपौरुषेयं वाक्यं वेदः । स च मन्त्रब्राह्मणात्मकः । तत्र मन्त्रा अनुष्ठानकारकभूतद्रव्यदेवताप्रकाशकाः । तेऽपि त्रिविधा ऋग्यजुः सामभेदेन । तत्र पादबद्धगायत्र्यादिच्छंदोविशिष्टा ऋचः “अग्निमीले पुरोहितम्” इत्यादिकाः । ता एव गीतिविशिष्टाः सामानि । तदुभयविलक्षणानि यजूंषि । “अग्निदग्नीन्विहरन्तु” इत्यादिसंबोधनरूपा निगदमन्त्रा अपि यजुरन्तर्गता एव । तदेवं निरूपिता मंत्राः । ब्राह्मणमपि त्रिविधं-विधिरूपमर्थवादरूपं तदुभयविलक्षणञ्च । तत्र ‘शाब्दीभावना विधिः’ इति भाट्टाः । ‘नियोगो विधिः’ इति प्राभाकरः । ‘इष्टसाधनता विधिः’ इति सर्वे तार्किकाः । विधिरपि चतुर्विधः, उत्पत्त्यधिकारविनियोगप्रयोगभेदात् । तत्र कर्मस्वरूपमात्रप्रतिपादको विधिरुत्पत्तिविधिः—“आग्नेयोऽष्टाकपालो भवति” इत्यादिः । सेतिकर्तव्यताकस्य करणस्य यागादेः फलं संबंधबोधको विधिरधिकारविधिः—“दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत” इत्यादिः । अंगसंबंधबोधको विधिर्नियोगविधिः—“व्रीहिभिर्यजेत, समिधो यजति” इत्यादिः । सांगप्रधानकर्मप्रयोगैक्यबोधकः पूर्वोक्तविधित्रय मेलनरूपः प्रयोगविधिः । स च श्रौत इत्येके । कल्प्य इत्यपरे । कर्मस्वरूपञ्च द्विविधं गुणकर्मार्थकर्मभेदात् । तत्र क्रतुकारकाण्याश्रित्य विहितं गुणकर्म । तदपि चतुर्विधम् , उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात् । तत्र “वसन्ते ब्राह्मणोऽग्नीनादधीत”, “यूपं तक्षति” इत्यादावाधानतक्षणादिना संस्कारविशेषविशिष्टाग्नियूपादेरुत्पत्तिः । “स्वाध्यायोऽध्येतव्यः”, “गां पयो दोग्धि” इत्यादावध्ययनदोहादिना विद्यमानस्यैव स्वाध्यायपयः प्रभृतेः प्राप्तिः । “सोममभिषुणोति”, “व्रीहीनवहन्ति”, “आज्यं विलापयति” इत्यादावभिषवाभिघातविलापनैः सोमदीनां विकारः । “व्रीहीन्प्रोक्षति, प्रत्यवेक्षते” इत्यादौ प्रोक्षणावेक्षणादिभिर्व्रीह्यादिद्रव्याणां संस्कार एव । एतच्चतुष्टयं चांगमेव । तथा क्रतुकारकाण्यनाश्रित्य विहितमर्थकर्म । तच्च द्विविधम्—अङ्गं प्रधानञ्च । तत्रान्यार्थमंगम् , अनन्यार्थं प्रधानम् । अंगमपि द्विविधं—सन्निपत्योपकारकमारादुपकारकं च । तत्र प्रधानस्वरूपनिर्वाहकं प्रथमं, फशोपकारकं द्वितीयमेव । सम्पूर्णांगसंपादको विधिः प्रकृतिः, विकलांगसंपादको विधिर्विकृतिः, तदुभयविलक्षणो विधिर्दर्विहोमः । एवमन्यदप्यूह्यम् । तदेवं निरूपितो विधि भागः । प्राशस्त्यविदान्यतरलक्षणया विधिशेषभूतं वाक्यमर्थवादः । स च त्रिविधः—गुणवादोऽनुवादो भूतार्थवादश्च । तत्र प्रमाणान्तरविरुद्धार्थबोधको गुणवादः—“आदित्यो यूपः” इत्यादिः । प्रमाणान्तरप्राप्तार्थबोधकोऽनुवादः—“अग्निर्हिमस्य भेषजम्” इत्यादिः । प्रमाणान्तरबाधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः—“इन्द्रो वृत्राय वज्रमुदयच्छत्” इत्यादिः । तदुक्तम्—“विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ।” इति । तत्र त्रिविधानामर्थवादानां विधिस्तुतिपरत्वे समानेऽपि भूतार्थवादानां स्वार्थेऽपि प्रामाण्यं देवताधिकरणन्यायात् । अबाधिताज्ञातज्ञापकत्वं हि प्रामाण्यम् , तच्च बाधितविषयत्वाज्ज्ञातज्ञापकत्वाच्च न गुणवादानुवादयोः । भूतार्थवादस्य तु स्वार्थतात्पर्यरहितस्याप्यौत्सर्गिकं प्रामाण्यं न विहन्यते । तदेवं निरूपितोऽर्थवादभागः । विध्यर्थवादोभयविलक्षणं तु वेदान्तवाक्यम् , तच्चाज्ञातज्ञापकत्वेऽप्यनुष्ठानाप्रतिपादकत्वान्न विधिः । स्वतः पुरुषार्थपरमानन्दज्ञानात्मके ब्रह्मणि स्वार्थे चोपक्रमोपसंहारादिषड्विधतात्पर्यलिंगवत्तया स्वतः प्रमाणभूतं सर्वानपि विधीनन्तःकरणशुद्धिद्वारा स्वशेषतामापादयन्परशेषत्वाभावाच्च नार्थवादः । तस्मादुभयविलक्षणमेव वेदान्तवाक्यम् , तच्च क्वचिदज्ञातज्ञापकत्वेन विधिरिति व्यपदिश्यते । विधिपदरहितप्रमाणवाक्यत्वेन क्वचिद्भूतार्थवाद इति व्यवह्रियत इति न दोषः । तदेव निरूपितं त्रिविधं ब्राह्मणम् । एवं च कर्मकाण्डगणकाण्डब्रह्मकाण्डात्मको वेदो धर्मार्थकाममोक्षहेतुः । स च प्रयोगत्रयेण निर्वाहार्थमृग्यजुःसामभेदेन भिन्नः । तत्र हौत्रप्रयोग ऋग्वेदेन आध्वर्यवप्रयोगो यजुर्वेदेन, औद्गात्रप्रयोगः सामवेदेन । ब्रह्मयजमानप्रयोगौ तन्त्रान्तर्भूतौ । अथर्ववेदस्तु—यज्ञानुपयुक्तः शांतिकपौष्टिकाभिचारिकादिकर्मप्रतिपादकत्वेनात्यन्तविलक्षण एव । एवं प्रवचनभेदात्प्रतिवेदं भिन्ना भूयस्यः शाखाः । एवं च कर्मकाण्डे व्यापारभेदेऽपि सर्वासां वेदशाखानामेकरूपत्वमेव । ‘ब्रह्मकाण्ड’ इत्यादिः चतुर्णां वेदानां प्रयोगभेदेन प्रयोजनभेद उक्तः । अथाङ्गानामुच्यते । तत्र शिक्षाया उदात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतादिविशिष्टस्वरव्यञ्जनात्मकवर्णोच्चारणविशेषज्ञानं प्रयोजनम् , तदभावे मंत्राणामनर्थफलत्वात् । तथा चोक्तम्—“मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।” इति । तत्र सर्ववेदसाधारणी शिक्षा ‘अथ शिक्षां प्रवक्ष्यामि’ इति पंचखंडात्मिका प्रकाशिता । प्रतिवेदशाखं च भिन्नाः प्रातिशाख्यसंज्ञिता अन्यैरेव मुनिभिः प्रदर्शिताः । एवं वैदिकपदसाधुत्व-

ज्ञानेनोहादिकं व्याकरणप्रयोजनम्। तच्च "वृद्धिरादैच्" इत्याद्यष्टाध्यायात्मकं महेश्वरप्रसादेन प्राणिनिनैव प्रकाशितम्, तत्र कात्यायनेन मुनिना पाणिनीयसूत्रेषु वार्तिकं विरचितम्, तद्वार्तिकोपरि च भगवता पतञ्जलिना महाभाष्यमारचितम्। तदेतत्त्रिमुनिव्याकरणं वेदांगं माहेश्वरमित्याख्यायते। कौमारादिव्याकरणानि तु न वेदांगानि, किन्तु लौकिप्रयोगमात्रज्ञानार्थानीत्यवगन्तव्यम्। एवं शिक्षाव्याकरणाभ्यां वर्णोच्चारणे पदसाधुत्वे च ज्ञाते वैदिकमन्त्रपदार्थज्ञानापेक्षायां तदर्थं भगवता यास्केन समाम्नातो व्याख्यातव्य इत्यादित्रयोदशाऽध्यायात्मकं निरुक्तमाचरितम्। तत्र च नामाख्यातनिपातोपसर्गभेदेन चतुर्विधं पदजातं निरूप्य वैदिकपदानामर्थः प्रदर्शितः। मन्त्राणां चानुष्ठेयार्थप्रकाशनद्वारेणैव करणत्वात्पदार्थज्ञानाधीनत्वाच्च वाक्यार्थज्ञानस्य मत्रस्थपदार्थज्ञानाय निरुक्तमप्यपेक्षणीयम्, अन्यथाऽनुष्ठानासंभवात्। 'सूल्येन जर्जरी जुर्फरीदूना' इत्यादीनामतिदुरूहत्वात्प्रकारांतरेणार्थज्ञानस्यासंभावनीयत्वाच्च। एवं निघण्टुकोशा वैदिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मका निरुक्तान्तर्भूता एव। तत्रापि निघंटुसंज्ञकः पञ्चाध्यायात्मको ग्रन्थो भगवता यास्केनैव कृतः। अन्येऽप्यमरहेमचन्द्रादिप्रणीताः कोशाः सर्वे निघंटुरूपत्वेन निरुक्तान्तर्भूता एव द्रष्टव्याः। एवमृग्मंत्राणां पादबद्धानुष्टुप्छंदोविशेषविशिष्टत्वात् तदज्ञाने च निंदाश्रवणे छंदोविशेषनिमित्तानुष्ठानविशेषविधानाच्च छंदोज्ञानाकांक्षायां तत्प्रकाशनाय 'धी श्री स्त्रीं म्' इत्यध्यायाष्टात्मिका छंदोविचितिर्भगवता पिंगलेनैव रचिता। तत्रापि 'अलौकिकम्' इत्यंतेनाध्यायत्रयेण गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीछंदांसि सप्तावांतरभेदानि निरूपितानि। 'अथ लौकिकम्' इत्यारभ्याध्यायपंचकेन पुराणेतिहासादावुपयोगीनि लौकिकानि छंदांसि प्रसंगान्निरूपितानि। व्याकरणे लौकिकपदनिरूपणवत्। एवं वैदिककर्मदर्शादिकालज्ञानाय ज्योतिष भगवतादित्येन गर्गादिभिश्च प्रणीतं बहुविधं गणितहोरासंहितादिरूपस्कंधत्रयात्मकमिति। एवं शाखांतरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमविशेषज्ञापनाय कल्पसूत्राणि। तानि च प्रयोगत्रयभेदात्त्रिविधानि। तत्र हौत्रप्रयोगप्रतिपादकान्याश्वलायनसांख्यायनादिप्रणीतानि, आध्वर्यवप्रयोगप्रतिपादकानि बौधायनापस्तंबकात्यायनादिप्रणीतानि, औद्गात्रप्रयोगप्रतिपादकानि तु शांडथायनत्रय्यारुण्यादिभिः प्रणीतानि। एव निरूपितः षण्णामंगानां प्रयोजनभेदः।

चतुर्णामुपांगानामधुनोच्यते। तत्र सर्गप्रतिसर्गमन्वंतरवंशानुचरितप्रतिपादकानि भगवता बादरायणेन प्रणीतानि पुराणानि। तानि च—"ब्राह्मं १, पाद्मं २, वैष्णवं ३, शैवं ४, भागवतं ५, नारदीयं ६, मार्कंडेयम् ७, आग्नेयं ८, भविष्यं ९, ब्रह्मवैवर्तं १०, लैंगं ११, वाराहं १२, स्कन्दं १३, वामनं १४, कौर्मं १५, मात्स्य १६, गारुडं १७, ब्रह्मांडं १८, चेत्यष्टादश। एवमुपपुराणान्यनेकप्रकाराणि द्रष्टव्यानि। न्याय आन्वीक्षिकीपञ्चाध्यायी गौतमेन प्रणीता, प्रमाणप्रमेयसंशयप्रोजनदृष्टांतसिद्धांतावयवतर्कविपर्ययवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां षोडशपदार्थानामुद्देशलक्षणपरीक्षादिभिस्तत्त्वज्ञानं तस्याः प्रयोजनम्। एवं दशाध्यायं वैशेषिकं शास्त्रं कणादेन प्रणीतम्, द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां भावपदार्थानामभावसप्तमानां साधर्म्यवैधर्म्याभ्यां व्युत्पादनं तस्य प्रयोजनं, तदपि न्यायपदेनोक्तम्।

एवं मीमांसापि द्विविधा—धर्ममीमांसा शारीरकमीमांसा च। तत्र द्वादशाध्यायी धर्ममीमांसा "अथातो धर्मजिज्ञासा" इत्यारभ्य अन्वाहार्ये च दर्शनात्" इत्यन्ता जैमिनिना प्रोक्ता। तत्र धर्मप्रमाणं धर्मभेदः शेषशेषिभावश्च क्रत्वर्थपुरुषार्थभेदेन प्रयुक्तिविशेषः श्रुत्यर्थपठनादिभेदः क्रमभेदोऽधिकारविशेषः सामान्यातिदेशो विशेषातिदेश ऊहो बाधस्तत्र प्रसंगश्चेति क्रमेण द्वादशानामध्यायानामर्थः। तथा संकर्षणकांडमध्यायचतुष्टयात्मकं जैमिनिना प्रणीतम्। तच्च देवताकाण्डसंज्ञया प्रसिद्धमप्युपासनादिकर्मप्रतिपादकत्वात्कर्मकांडांतर्गतमेव। तथा चतुरध्यायी शारीरकमीमांसा "अथातो ब्रह्मजिज्ञासा" इत्यादि "अनावृत्तिः शब्दात्" इत्यतो जीवब्रह्मैकत्वसाक्षात्कारहेतुश्रवणाख्यविचारप्रतिपादकान्न्यायानुपदर्शयन्ती भगवता बादरायणेन कृता। तत्र सर्वेषामेव वेदान्तवाक्यानां साक्षात्परम्परया वा प्रत्यगभिन्नाद्वितीये ब्रह्मणि तात्पर्यमिति समन्वयः प्रथमाऽध्यायेन दर्शितः। तत्र प्रथमपादे स्पष्टब्रह्मलिंगयुक्तानि वाक्यानि विचारितानि। द्वितीयपादे, अस्पष्टब्रह्मलिंगयुक्तान्युपास्यब्रह्मविषयाणि। तृतीयपादे, स्पष्टब्रह्मलिंगानि ज्ञेयब्रह्मविषयाणि। एवं पादत्रयेण वाक्यविचारः समापितः। चतुर्थपादे तु, प्रधानविषयत्वेन संदिह्यमानान्यव्यक्तादिपदानि चिन्तितानि १। एवं वेदान्तानामद्वये ब्रह्मणि सिद्धे समन्वये तत्र संभावितस्मृतितर्कादिविरोधमाशंक्य तत्परिहारः क्रियत इत्यविरोधो द्वितीयाध्यायेन दर्शितः। तत्राद्यपादे, सांख्ययोगकणादस्मृतिभिः सांख्यादिप्रयुक्तैश्च तर्कैर्विरोधो वेदान्तसमन्वयस्य परिहृतः। द्वितीयपादे, सांख्यादिमतानां दुष्टत्वं प्रतिपादितं, स्वपक्षस्थापनपरपक्षनिराकरणरूपपर्वद्वयात्मकत्वाद्विचारस्य। तृतीयपादे, महाभूतसृष्ट्यादिश्रुतीनां परस्परविरोधः पूर्वभागेन परिहृतः, उत्तरभागेन तु जीवविषयाणाम्। चतुर्थपादे, इन्द्रियविषयश्रुतीनां विरोधपरिहारः २। तृतीयाध्याये साधननिरूपणम्। तत्र प्रथमपादे, जीवस्य परलोकगमनागमनेन वैराग्यं निरूपितम्। द्वितीयपादे, पूर्वभागेन त्वं पदार्थो निरूपितः, उत्तरभागेन तत्पदार्थः। तृतीयपादे, निर्गुणे ब्रह्मणि नानाशाखापठितगुणोपसंहारः कृतः, प्रसंगात्सगुणविद्यासु शाखांतरीयगुणोपसंहारो निरूपितः। चतुर्थपादे, निर्गुणब्रह्मविद्याया बहिरंगसाधनान्याश्रमयज्ञादीन्यंतरंगसाधनानि शमदमनिदिध्यासनादीनि निरूपितानि ३। चतुर्थाध्याये सगुणनिर्गुणविद्ययोः फलनिर्णयः कृतः। तत्र प्रथमपादे, श्रवणाद्यावृत्त्या निर्गुणं ब्रह्म उपासनावृत्त्या सगुणं वा ब्रह्म साक्षात्कृत्य जीवतः पापपुण्यालेपलक्षणा जीवन्मुक्तिरभिहिता। द्वितीयपादे, म्रियमाणस्योत्क्रान्तिप्रकारश्चिंतितः। तृतीयपादे, सगुणब्रह्मविदो मृतस्योत्तरमार्गोऽभिहितः। चतुर्थपादे,

पूर्वभागेन निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिरुक्ता, उत्तरभागेन सगुणब्रह्मविदो ब्रह्मलोकगमनस्थितिरुक्ता ४। इदमेव शास्त्राणां मूर्धन्यं शास्त्रांतरं सर्वमस्यैव शेषीभूतमितीदमेव मुमुक्षुभिरादरणीयं श्रीशंकरभगवत्पादोदितप्रकारेणेति रहस्यम्। एवं धर्मशास्त्राणि—मनुयाज्ञवल्क्यविष्णुयमांगिरोवसिष्ठदक्षशातातपपराशरगोतमशंखलिखितहारीतापस्तंबोशनोव्यासकात्यायनबृहस्पतिदेवलनारदपैठीनसिप्रभृतिभिः कृतानि वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादकानि। एवं व्यासकृतं महाभारतं, वाल्मीकिकृतं रामायणं धर्मशास्त्र एवान्तर्भूतमितिहासत्वेन प्रसिद्धम्। एवं सर्वदेवसाधारणं मंत्रशास्त्रमपि धर्मशास्त्र एवांतर्भूतम्। सांख्यादीनां धर्मशास्त्रांतभावेऽपी स्वशब्देनैवोपादानात्पृथगेव संगतिर्वाच्या। अथ वेदचतुष्टयस्य क्रमेण चत्वार उपवेदाः। तत्रायुर्वेदस्याष्टौ स्थानानि भवन्ति—सूत्रं १, शारीरम् २, ऐन्द्रियं ३, चिकित्सा ४, निदानं ५, विमानं ६, कल्पः ७, प्रसिद्धि ८ श्चेति ब्रह्मप्रजापत्यश्विधन्वन्तरींद्रभरद्वाजात्रेयाग्निवेशादिभिरुपदिष्टश्चरकेण संक्षिप्तस्तत्रैव सुश्रुतेन पञ्चप्रस्थानात्मकं प्रस्थानांतरं कृतम्। एवं वाग्भटादिभिरपि बहुधेति न शास्त्रभेदः। कामशास्त्रमप्यायुर्वेदांतर्गतमेव सुश्रुतेन वाजीकरणाख्यकामशास्त्राभिधानात्। तत्र वात्स्यायनेन पञ्चाध्यायात्मकं काम शास्त्रं प्रणीतं, तस्य विषयवैराग्यमेव प्रयोजनम्। शास्त्रोद्दीपितमार्गेणापि विषयभोगे दुःखमात्रपर्यवसानात्। चिकित्साशास्त्रस्यच रोगतत्साधनरोगनिवृत्तितत्साधनज्ञानं प्रयोजनम्। एवं धनुर्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः तत्र-प्रथमा दीक्षापादः १, द्वितीयः संग्रहपादः २. तृतीयः सिद्धपादः ३, चतुर्थः प्रयोगपादः ४। तत्र प्रथमे पादे धनुर्लक्षणमधिकारिनिरूपण च कृतम्। तत्र धनुःशब्दश्चापे निरूढोऽपि चतुर्विधेष्वायुधेषु वर्तते। तच्चतुर्विधं—मुक्तममुक्तं मुक्तामुक्तं मन्त्रमुक्तं च। तत्र मुक्तं चक्रादि, अमुक्तं खड्गादि, मुक्तामुक्तं शल्यावांतरभेदादि, मंत्रमुक्तं शरादि तत्र मुक्तमस्त्रमुच्यते, तदमुक्तं शस्त्रमित्युच्यते, तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्याग्नेयादिभेदादनेकविधम्। एवं साधिदैवतेषु समंत्रेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनां च ते सर्वे चतुर्विधाः पदातिरथतुरगगजारूढाः, दीक्षाभिषेकसन्नहनमंगलकरणादिकं च-सर्वमपि प्रथमे पादे निश्चितम् १। सर्वेषां शास्त्रविशेषाणामाचार्यस्य च लक्षणपूर्वकसंग्रहप्रकारो दर्शितो द्वितीयपादे २। गुरुसंप्रदायसिद्धानां शस्त्रविशेषाणां पुनःपुनरभ्यासो मंत्रदेवतासिद्धिकरणमपि निरूपितं तृतीयपादे ३। एवं देवतार्चनाभ्यासादिभिः सिद्धानामस्त्रविशेषाणां प्रयोगश्चतुर्थपादे निरूपितः ४। क्षत्रियाणां स्वधर्माचरणं युद्धं, दुष्टदस्युचौरादिभ्यः प्रजापालनं च धनुर्वेदस्य प्रयोजनम्। एवं गान्धर्वशास्त्रं भरतेन प्रणीतम्। तत्र नृत्यगीतवाद्यभेदेन बहुविधोऽर्थः प्रपंचितः। देवताराधननिर्विकल्पकसमाध्यादिसिद्धिश्च गांधर्ववेदस्य प्रयोजनम्। एवमेव रसशास्त्रञ्च बहुविधं भरतेनैव प्रणीतं रसरीतिशब्दालंकारनायकनायिकादिवर्णनरूपम्। नीतिशास्त्रमश्वशास्त्रं गजशास्त्रं शिल्पिशास्त्र सूपकरणशास्त्रं चतुःषष्टिकलाशास्त्रञ्चेति नानामुनिभिः प्रणीतानि। तस्य च सर्वस्य लौकिकतत्तत्प्रयोजनभेदो द्रष्टव्यः। एवमष्टादशविद्यास्त्रयीशब्देनोक्ताः तथा सांख्यशास्त्रं भगवता कपिलेन प्रणीतम्। तत्र त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ इति षडध्यायम्। तत्र प्रथमेऽध्याये विषया निरूपिताः १। द्वितीयेऽध्याये प्रधानकार्याणि २। तृतीयेऽध्याये विषयेभ्यो वैराग्यम् ३ चतुर्थेऽध्याये विरक्तानां पिंगलाकुररादीनामाख्यायिका ४ पंचमेऽध्याये परपक्षनिर्जयः ५। षष्ठे सर्वार्थसंक्षेपः ६। प्रकृतिपुरुषविवेकज्ञानं सांख्यशास्त्रप्रयोजनम्। तथा योगशास्त्रं भगवता पतञ्जलिना प्रपञ्चितम्—"अथ योगाऽनुशासनम्" इत्यादिपादचतुष्टयात्मकम्। तत्र प्रथमपादे, चित्तवृत्तिनिरोधात्मकः समाधिः, अभ्यासवैराग्यरूपं च तत्साधनं निरूपितम् १। द्वितीयपादे, विक्षिप्तचित्तस्य समाधिसिद्ध्यर्थं यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टांगानि निरूपितानि २। तृतीयपादे, योगविभूतयः ३। चतुर्थपादे कैवल्यम् ४ इति तस्य विजातीयप्रत्ययस्यैव निरोधद्वारेण निदिध्यासनसिद्धिः प्रयोजनम्। तथा पाशुपतं शास्त्रं भगवता पशुपतिना पशुपाशविमोक्षणा—"अथातः पाशुपतं योगविधिं व्याख्यास्यामः" इत्यादिपंचाध्यायैर्विवेचितम्। तत्राध्यायपंचकेनापि कार्यरूपो जीवः पशुः, कारणं पशुपतिरीश्वरो, योगः पशुपतौ चित्त समाधानं, विधिर्भस्मना त्रिषवणस्नानादि निरूपितो, दुःखान्तसंज्ञको मोक्षश्च प्रयोजनम्। एत एव कार्यकारणयोगविधिदुःखांता इत्याख्यायन्ते। एवं वैष्णवं नारदादिभिः कृतं पञ्चरात्रम्। तत्र वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाश्चत्वारः पदार्था निरूपिताः। भगवान्वासुदेवः परमेश्वरः सर्वकारणं तस्मादुत्पद्यते, संकर्षणाख्यो जीवस्तस्मान्मनः प्रद्युम्नस्तस्मादनिरुद्धोऽहंकारः। सर्वे चैते भगवतो वासुदेवस्यांशभूतास्तदभिन्ना एवेति भगवतो वासुदेवस्य मनोवाक्कायवृत्तिभिरभिध्यानं कृत्वा कृतकृत्यो भवतीति निरूपितम्। एवं वैष्णवं मन्त्रशास्त्रमखिलमपि पंचरात्रांतर्गतमेव। वामागमस्तु शास्त्रबाह्य एव। तदेवं दर्शितः प्रस्थानभेदः। सर्वेषां संक्षेपेण त्रिविध एव प्रस्थानभेदः। तत्रारम्भवाद एकः १, परिणामवादो द्वितीयः २, विवर्तवादस्तृतीयः ३ पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणवो व्द्यणुकादिक्रमेण ब्रह्मांडपर्यन्तं जगदारभंतेऽसदेव कार्यं कारणव्यापारादुत्पद्यत इति तार्किकाणां प्रथमः। मीमांसकानां च सत्त्वरजस्तमोगुणात्मकं प्रधानमेव महदहंकारादिक्रमेण परिणमते, पूर्वमपि सूक्ष्मरूपेण सदेव कार्यं कारणव्यापारेणाभिव्यज्यते इति द्वितीयपक्षः सांख्ययोगपाशुपतानाम्। ब्रह्मणः परिणामो जगदिति वैष्णवाः। स्वप्रकाशपरमानंदाद्वितीयं ब्रह्म स्वमायावशान्मिथ्यैव जगदाकारेण कल्प्यत इति तृतीयपक्षो ब्रह्मवादिनां, सर्वेषां प्रस्थानकर्तृणां च। विवर्तवाद पर्यवसानेनाद्वितीये परमेश्वर एव वेदान्त प्रतिपाद्ये तात्पर्यं न हि ते मुनयो भ्रान्ताः सर्वज्ञत्वात्तेषाम्। किन्तु बहिर्विषय एव प्रवणानामापाततः परमपुरुषार्थे प्रवेशो न संभवतीति नास्तिक्यनिवारणाय तैः प्रस्थानभेदा दर्शिताः। तत्र तेषां तात्पर्यमबुद्ध्वा वेदविरुद्धेऽप्यर्थे तेषां तात्पर्यमुत्प्रेक्षमाणास्तत्तन्मतमेवोपादेयत्वेन गृह्णन्तो जना ऋजुकुटिलनानापथजुषो भवन्तीति न

सर्वेषामृजुमार्ग एव प्रवेशो न वा पर्यवसानेऽपि परमेश्वरप्राप्तिरन्तःकरणशुद्धिवशेन पश्चादृजुमार्गाश्रयणादेव तत्प्राप्तिः । ऋजुःमार्गस्तु भागवतधर्माश्रयणमेव “यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित् । धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ॥” इत्युक्ते तथा च सर्वेषां मार्गाणां साक्षात्परंपरया वा त्वमेव प्राप्यः । सरितामृजुकुटिलनानापथजुषां यथा सागर एव गम्यस्तद्वदिति भावः । ऋजुपथजुषां गंगानर्मदादीनां साक्षादेव समुद्रो गम्यः । कुटिलपथजुषां यमुनासरय्वादीनां गंगाद्वारा समुद्र एव गम्यः । एवं वेदान्तवाक्यश्रवणादिनिष्ठानां साक्षात्त्वं गम्योऽन्येषां तु सांख्यानुयायिनां तार्किकाणां च चतुर्विंशतितत्त्वद्रव्यादिसप्तपदार्थविविक्तात्मज्ञानेन । मीमांसाधर्मशास्त्रेतिहासपुराणानुयायिनां तु तत्तच्छास्त्रोदितकर्मानुष्ठायिनामन्तःकरणशुद्धिद्वारा कामशास्त्रानुयायिनां तु विषयानुभवविरक्तानां वैराग्यद्वारा । आयुर्वेदस्य तु तपोयज्ञार्चनादिष्वारोग्यस्यैव योग्यत्वेन तत्संपादनद्वारा । धनुर्वेदस्य तु तपोयज्ञार्चनादिष्वारोग्यस्यैव योग्यत्वेन तत्सम्पादनद्वारा । धनुर्वेदस्य निजधर्मत्वात्क्षत्रियाणामंतःकरणशोधनद्वारा । शिल्पनीत्यादिविद्यानुयायिनामपि यथाकथंचिदन्तःकरणशुद्धिद्वारैव । शैवशाक्तसौरगाणपत्यादीनां तु गीतोक्तद्वारा परंपरया वैष्णवानां तु नंदनंदनरूपे त्वयि परानुरागरूपाद्वैतनिष्ठानां साक्षादेव त्वं गम्योऽसि “तेऽपि मामेव कौन्तेय भजन्त्यविधिपूर्वकम्” इत्याद्युक्तेः । गांधर्ववेदाऽनुयायिनां तु स्वरब्रह्मनिष्ठानां त्वयि चेत एकीभावसंपादनद्वारा । साहित्यनिष्ठानामप्युज्ज्वलनीलमण्युक्तप्रकारेण त्वमेव गम्योऽसि । किं बहुना एतदभिप्रेत्यैव शिवरहस्ये महिम्नाख्यस्तवे पुष्पदंतेनोक्तम्—“त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च । रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥” इति ॥ अत्राद्रिस्थानीयो वेदः, पर्जन्यस्थानीया मुनयः । अन्तत इति दृष्टान्ते गमनस्य पर्यवसाने सति दार्ष्टान्तिके विचारस्येति व्याख्येयम् । तथा च मोक्षधर्मे नारायणीयोपाख्याने—“सांख्ययोगं पंचरात्रं वेदाः पाशुपतं तथा । ज्ञानान्येतानि राजर्षे विद्धि नाना मतानि वै ॥ सांख्यस्य वक्ता कपिलः परमर्षिः स उच्यते । हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः ॥ अपांतरतमाश्चैव वेदाचार्यः स उच्यते । प्राचीनगर्भं तमृषि प्रवदन्तीति केचन ॥ उमापतिर्भूतपतिः श्रीकंठो ब्रह्मणः सुतः । उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः ॥ पंचरात्रस्य कृत्स्नस्य वक्ता तु भगवान्स्वयम् । सर्वेष्वेव नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते ॥ यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः । न चैनमेवं जानन्ति तेऽमी भूता विशांपते ॥ तमेव शास्त्रकर्तारं प्रवदन्ति मनीषिणः । निष्ठां नारायणमृषिं नान्योऽस्तीति वचो मम ॥ निःसंशयेषु सर्वेषु नित्यं वसति वै हरिः । ससंशयाद्धेतुबलान्न ह्यावसति माधवः ॥ पंचरात्रविदो ये तु यथाक्रमपरा नृप । एकांत भावोपगतास्ते हरिं प्रविशन्ति वै ॥ सांख्यं च योगश्च सनातनोऽत्र वेदाश्च सर्वं निखिलोऽपि राजन् । सर्वैः समस्तैर्ऋषिभिर्निरुक्तो नारायणो विश्वमिदं पुराणम् ॥” इति । अपान्तरतमा इति श्रीकृष्णद्वैपायनस्यैव पूर्वजन्म नामेति तत्रैवोक्तम् । सर्वेष्वेवेति तत्र तत्र नारायणवत्परमोपादेयगुणत्वेनानुक्तेस्तेषां तदाकांक्षासंभवादिति भावः ॥ १० ॥ सर्वमार्गप्राप्यत्वे हेतुमाह-भवतस्तव । अतः प्रकृतिकार्यत्वात् । प्रकृतिकार्यं सत्त्वादि । स्वोपाधिद्वारा सत्त्वादिनिजनिजोपाधिद्वारा । तेषु सत्त्वादिषु सा प्रकृतिः । यत इत्थं क्रमोऽतो हेतोः । क्रमेण सांख्योक्तक्रमेण । सांख्यप्रक्रियाश्रयणे श्रमं वीक्ष्यर्जुं पन्थानमाह—यद्वेति । शक्तिशक्तिमतोरभेदोपचारादिति । यतस्त्वदव्यतिरिक्ता न सन्त्यतो हेतोः ॥ ननु तर्ह्येवं विविच्य सर्वे मामेव किन्नोपासते तत्राह—सत्त्वमिति । तेषु गुणेषु हि निश्चितं ब्रह्मपर्यन्ता जीवाः सर्वेऽपि मायया मोह्यन्ते तर्हि ते कथं त्वां भजन्तामिति भावः ॥ ११ ॥ प्राकृतपदार्थेष्ववस्थितस्य हरेस्ततो विशिष्टमहिमासंभवमालोच्याशंकते—नन्विति । ततः प्रकृतिसंबंधात् । तेषां प्राकृतानाम् । अलिप्तबुद्धित्वे हेतुमाशंकते—कुत इति । इत्यर्थ इति—दृष्टेरासङ्गो हि निजभिन्ने भवति न त्वभिन्ने इति भावः । न हि केवलमलिप्तबुद्धित्वमेव, किं त्वतोऽप्याधिक्यमित्याह—किञ्चेति । इत्यर्थ इति—न हि साक्षी साक्ष्यधर्मेण युज्यते पूर्ववदिति तात्पर्यम् । इतरे त्वद्विमुखाः । इत्यर्थ इति-अभिमान एव शरीरादिषु संसृति हेतुरित्यर्थः । त्वदविद्यया स्वात्मभूतस्य तवाज्ञानेन गुणानां रजआदीनां प्रवाह उत्पत्तिस्थित्यंतरूपः । यतस्त्वमविषक्तबुद्ध्यादिरत इतरेभ्यस्तव महान्भेद इत्यर्थः । इतरे त्वविद्यया संसृतिभाजिनः सदा निजज्ञानानंदवतस्तव कुतः संसृतिसंबंध इति भावः ॥ त्वन्तु तेषु पूर्ववदुदासीनन्तिष्ठसीति विचार्य स्वयं भीतः सम्प्रपद्यमान आह—तुभ्यमित्यर्धेन । त इत्यस्याविद्ययेत्यनेनान्वयः । अत एव तैर्व्याख्यातम्—त्वदविद्यया कृतोऽयमिति । यद्वा—यत्तुभ्यं नमो नमस्कारः तत्ते तुभ्यमिति त्वामेव प्रसादयितुमित्यर्थः “क्रियार्थोपपदस्य च कर्मणि स्थानिनः” इति विधानात् तु शब्दो भिन्नोपक्रमे प्राकृतेभ्योऽत्यन्तभेदात् । ‘अस्तु’ इति पाठे स्पष्ट एव द्वितीयोऽर्थः । अविषक्तदृष्टये दृष्ट्वापि तेष्वनासक्तायेत्यर्थः । तत्र हेतुः—सर्वात्मने सर्वभूत (मूल) स्वरूपत्वात्सर्वेषां सर्वप्रवर्तकस्य कथमन्यत्रादरः स्याद्येन विरक्तिः स्यादिति भावः । नन्वादराभावेऽपि द्रष्टारं दृश्य गुणस्य संक्रमः स्यादेव तत्राह—सर्वधियां सर्वसाक्षिणे साक्षिमात्रत्वान्न तव तेष्वासक्तिरिति भावः । ननु तेषां त्वय्येव पर्यवसानतो विचारे सति त्वदौदासीन्ये कथं सिद्धिः स्यात्तत्राप्याह—सर्वधियां चेति । तेषां तदा त्वदाभिमुख्ये जाते भक्तत्वं जातमिति तदभिज्ञस्त्वं न तेषूदासीनो भवसीति भावः । “समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥” इति श्रीभगवद्गीतात एवेति भावः । तादृशविचारात्पूर्वावस्थायां तेषां का वार्ता तत्राहार्धेन—गुणेति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किं तत्तद्विशेषनिर्देशेनेत्याह। सर्व इति। अत्र येऽप्यन्यदेवतेति स्वामिसम्मतः पाठः अन्यपदस्य क्षुद्रपदेन व्याख्यानात् नानेति क्वचित् पाठः अन्यस्मिन्निन्द्रादावेव नतु त्वयि धीर्येषां तथाभूता यद्यपि तथापि त्वय्येव पर्य्यवसानात् सर्व एव त्वां यजन्ति तत्र हेतुः सर्व एव देवा अधिष्ठानतया प्राचुर्येण विद्यन्ते यत्रेति सर्वदेवमय ईश्वरोऽन्तर्यामी तश्च अधिष्ठानपूजा अधिष्ठात्रादावेव पर्यवस्यति किन्त्वन्याधीनत्वेन तात्त्विकं फलं न स्यादिति भावः। तदुक्तं श्रीभगवद्गीतासु "येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः। तेऽपि मामेव कौन्तेय! यजन्त्यविधिपूर्वकम्। अहं सर्वस्य यज्ञस्य भोक्ता च प्रभुरेव च। नतु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते। देवान् देवयजो यान्ती"त्यादि ॥ ९ ॥ अत्राद्रिस्थानीयो वेदः पर्ज्जन्यस्थानीया मुनयो ज्ञेयाः अन्तत इति दृष्टान्ते गमनस्य पर्यवसाने सति दार्ष्टान्तिके विचारस्येति व्याख्येयं तथाच मोक्षधर्मे नारायणीयोपाख्याने "साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा। ज्ञानान्येतानि राजर्षे! विद्धि नानामतानि व। सांख्यस्य वक्ता कपिलः परमर्षिः स उच्यते। हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः। अपान्तरतमाश्चैव वेदाचार्यः स उच्यते। प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन। उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः। उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः। पञ्चरात्रस्य कृत्स्नस्य वक्ता तु भगवान् स्वयम्। सर्वेष्वेव नृपश्रेष्ठ! ज्ञानेष्वेतेषु दृश्यते। यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः। नचैनमेवं जानन्ति तमोभूता विशाम्पते!। तमेव शास्त्रकर्त्तारः प्रवदन्ति मनीषिणः। निष्ठां नारायणमृषिं नान्योऽस्तीति वचो मम। निःसंशयेषु सर्वेषु नित्यं वसति वै हरिः। ससंशयाद्धेतुबलान्नध्यावसति माधवः। पञ्चरात्रविदो ये तु यथाक्रमपरा नृप! एकान्तभवोपगतास्ते हरिं प्रविशन्ति वै। साङ्ख्यञ्च योगश्च सनातनोऽत्र वेदाश्च सर्वे निखिलेन राजन्!। सर्वैः समस्तैरृषिभिर्निरुक्तो नारायणो विश्वमिदं पुराण"मिति अपान्तरतमा इति श्रीकृष्णद्वैपायनस्यैव पूर्वजन्मनामेति तत्रैवोक्तं सर्वेष्वेवेति तत्र तत्र नारायणवत् परमोपादेयगुणत्वेनानुक्तेस्तेषां तदाकाङ्क्षासम्भवादिति भावः ॥ १० ॥ ननु विचारस्य पर्यवसाने सत्येव ते मार्गा मयि विशन्तीति कथमुक्तं कथम्वा प्रथमत एव न विशन्तीति तत्राह। सत्त्वमिति। तैर्व्याख्यातं तत्र पूर्वार्धे क्रमेण देवतापरित्यागो ज्ञेयः वैदिकमार्गस्य चित्तशोधकस्वभावत्वात् उत्तरार्धे ईश्वर इति योऽयं तदेवं मायामोहितत्वादेव साक्षात्त्वां न भजन्तीति भावः ॥ ११ ॥ त्वन्तु तेषु पूर्ववदुदासीनस्तिष्ठसीति विचार्य स्वयं भीतः सन् प्रपद्यमान आह। तुभ्यमित्यर्द्धेन। ते इत्यस्याविद्ययेत्यनेनान्वयः अत एव तैर्व्याख्यातं त्वदविद्याकृतोऽयमिति। यद्वा यत्तुभ्यं नमो नमस्कारः तत्ते तुभ्यमिति त्वामेव प्रसादयितुमित्यर्थः। क्रियार्थोपपदस्य च कर्मणि स्थानिन" इति विधानात् तुशब्दो भिन्नोपक्रमे प्राकृतेभ्योऽत्यन्तभेदात् अस्त्विति पाठे स्पष्ट एव द्वितीयोऽर्थः अविषक्तदृष्टये दृष्ट्वापि तेष्वनासक्तायेत्यर्थः। तत्र हेतुः सर्वात्मने सर्वमूलस्वरूपत्वात् सर्वेषां सर्वप्रवर्त्तकस्य कथमन्यत्रादरः स्यात् येन विरक्तिः स्यादिति भावः। नन्वादराभावेऽपि द्रष्टृदृश्यगुणस्य संक्रमः स्यादेव तत्राह। सर्वधियां सर्वसाक्षिणे साक्षिमात्रत्वान्न तव तेष्वासक्तिरिति भावः। ननु तेषां त्वय्येव पर्यवसानतो विचारे सति त्वदौदासीन्ये कथं सिद्धिः स्यात्तत्राप्याह। सर्वधियाञ्चेति। तेषां तदा त्वदाभिमुख्ये जाते भक्तत्वं जातमिति तदभिज्ञस्त्वं न तेपूदासीनो भवसीति भावः। "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः। ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यह"मिति श्रीभगवद्गीतात एवेति भावः। ननु तादृशविचारात् पूर्वावस्थायां तेषां का वार्त्ता तत्राह सार्द्धेन गुणेति ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ये क्षुद्रनानादेवताभक्तास्तेऽपि सर्व्वे त्वामेवोपासते। तत्र हेतुमाह,—हे सर्व्वदेवमयेति। किञ्च, ईश्वरं तत्तद्देवतानामपि प्रभुं सेवकसेवया तत्स्वामिनः स्वयः एव सेवासिद्धेः। यद्वा, सर्व्वदेवमयो य ईश्वरस्तमिति हिरण्यगर्भादिभ्यो विशेष उक्तः, तेषामीश्वरत्वेऽपि सर्व्वदेवमयत्वाभावात्। हे प्रभो इति तवैव सर्व्वैश्वर्य्ययुक्तत्वात्। एवं षड्विधा उक्ताः। तेष्वादौ योग-कर्म्म-ज्ञानभेदेन त्रिविधाः; अथ दीक्षाभेदेन च त्रिविधा वैष्णव-शैव-क्षौद्राः। अन्यत् सर्व्वं तैर्व्याख्यातम्। पक्षान्तरे त्वन्निजरूपाज्ञानादेव बहुविधरूपेण त्वां जीवा भजन्तीत्याह—त्वामित्यादि-पञ्चभिः। अर्थः स एव, तथापि त्वत्प्रभावेण तेषां तत्तदुपासनमपि त्वद्भावेव परम्परया पर्य्यवस्यतीत्याह—सर्व्व एवेति। नानादेवतानां बहुविधपूज्यानां भक्ता उपासका अपि। यद्वा, किं वक्तव्यं तेषां हिरण्यगर्भादिभजनं तद्भजने पर्य्यवस्यतीति। क्षुद्रदेवताभजनमपि पर्य्यवस्यतीत्याह—सर्व्वे एवेति। अन्यत् समानम् ॥ ९ ॥ अद्रिप्रभवत्वेनाद्रीणां बाहुल्याद्बाहुल्यम्, तारतम्यात्तारतम्यञ्च, तत्रापि पर्ज्जन्यापूरितत्वेन बहुस्रोतस्त्वया प्रत्येकं बाहुल्यादिकं चोक्तम्, तथापि सर्व्वतः सर्व्वदिक्षु सिन्धुमेवैकं विशन्ति। विभो! हे सर्व्वव्यापकेति सर्व्वगतीनां प्रवेशयोग्यता अन्ततः पर्य्यवसानतः काश्चित् साक्षात्, काश्चित्परम्परयेत्यर्थः, त्वदीयत्वेन यजनमपि त्वय्येव पर्य्यवसानात् ॥ १० ॥ सत्त्वादिक्रमेणोक्तिः पूर्व्वोक्तसात्त्विकाद्युपासकक्रमानुसारेण; यद्वा, देव-नृतिर्य्यगात्मस्विति वक्ष्यमाणसात्त्विकादिक्रमापेक्षया, हि एव तेषु गुणेष्वेव। प्रोता ग्रथिताः, यतः प्राकृताः प्रकृतिसम्बन्धिनः। तत्र ब्रह्मणोऽपि स्थावराणां चादिताप्राकृतत्वे तस्य गौणतया स्थावराणां च प्रधानताया विवक्षया; यद्यपि सृष्ट्यर्थं श्रीभगवान् ब्रह्मा सन् प्रकटो भवतीति श्रीविष्णुपुराणादिमतेन भगवदवतारविशेषो ब्रह्मा, तथापि प्राकृतेषु तस्योक्तिः स्कन्दपुराणादिदृष्ट्या क्वचिन्महाकल्पे गते जीवस्यापि कस्यचिद्ब्रह्मपदप्राप्तेरभि-

प्रायेणेति । अन्यत्तैर्व्याख्यातमेव । यद्वा, ननु तर्हि सर्व्वेऽपि साक्षान्मामेव कथं न सेवन्ते ? त्वन्मायामोहितत्वादित्याह—सत्त्वमिति । आब्रह्मस्थावरादय इत्युच्चनीचानां सर्व्वेषामपि मायामोहितत्वमुक्तम् ॥ ११ ॥ ते इत्यस्याविद्ययेत्यनेनान्वयः । अतएव तैर्व्याख्यातम् । त्वदविद्याकृतोऽयमिति, तुभ्यमित्यत्र 'तस्मै' इति पाठो वा । तु-शब्दोभिन्नोपक्रमे, प्राकृतेभ्योऽत्यन्तभेदात् । 'अस्तु' इति पाठे भक्त्या नमस्कारस्य स्थैर्य्यप्रार्थनम् । सर्व्वात्मता तदंशत्वेन जीवानामभेदात् । यद्वा, सर्व्वस्यात्मने चेतयित्रे इति तत्स्वभावतो जीवेभ्यो विशेष उक्तः । अधुना जीवस्वभादपि विशेषमाह—गुणप्रवाह इति । संसारः—अयं साक्षात् सर्वैरनुभूयमानः, असकृत् प्रवर्त्तते पुनः पुनरावृत्त्या आयाति । अन्यत्तैर्व्याख्यातम् । यद्वा, ननु कुतोऽहमेव भजनीयो न त्वन्यः ? इत्यपेक्षया माहात्म्यं वर्णयन् प्रणमति,—तुभ्यमिति । अविषक्ता भक्तापराधादवलग्ना दृष्टिर्यस्य, बहुशः कृतानामप्यपराधानां मर्षणात् सर्व्वस्यात्मने परमात्मने इति परमप्रियत्वं परमेश्वरत्वम् चोक्तम् । 'सर्व्वधियाञ्च साक्षिणे' इति कथञ्चिन्मनसि कृतं स्मरणमपि जानासीति कृतज्ञत्वम् सुसेव्यत्वादिकञ्च । परे च त्वदज्ञानेन नित्यदुःखिनो भजनयोग्या न भवन्तीत्याह—गुणेति । अर्थः स एव । ततश्च देव-शब्देन हिरण्यगर्भशिवव्यतिरिक्ता देवा ग्राह्याः, तयोर्भगवद्भक्तत्वात् । यद्वा, तव गुणप्रवाहः कारुण्यादिगुणपरम्परा, अविद्यया युक्तेष्वपि देवादिषु; अन्यत् समानम् । इति भजनीयतामुख्यकारणं कारुण्यादिकमुक्तम् ॥ १२ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

यदविद्यया यदीयया प्रकृत्या "मम माया दुरत्यये"ति वचनात् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कथमेतद्विषयकोपासनानां तत्पर्य्यवसानमित्यतः सदृष्टान्तं तदुपपादयति । सर्व एवेति द्वाभ्याम् । हे प्रभो ! ये नानादेवताभक्तास्ते यद्यप्यन्यधियः परमात्मेतरविषयकोपासनात्मकधीमन्तस्तथापि ते सर्वे त्वामेव यजन्ते तत्र हेतुं वदन् विशिनष्टि । सर्वदेवमयेश्वरं "स आत्मा अङ्गान्यन्या देवता" इत्युक्तरीत्या सर्वदेवताशरीरकत्वेन तत्प्रचुरत्वात्सर्वदेवमयः सचासौ तेषामीश्वरोऽन्तः प्रविश्य नियन्ता च तं सर्वदेवानां त्वदायत्तसत्तादिमत्त्वेन त्वदपृथक्सिद्धविशेषणत्वेन तत्त्वो व्यतिरेकाभावात् तद्विषयकोपासनास्त्वद्विषयिका एवेति भावः ॥ ९ ॥ त्वय्येव पर्य्यवस्यन्तीत्यत्र दृष्टान्तमाह । यथेति । अद्रेः सकाशात्प्रभवन्त्युत्पद्यन्ते इति तथा नद्यः पर्जन्येनापूरिताः बहुस्रोतसः सत्यः सर्वतः सिन्धुं समुद्रमेव विशन्ति तद्वत् गतयो बुद्धयोऽप्यन्ततः पर्य्यवसानतः त्वामेव विशेष्यभूतं विषयीकुर्वन्ति ॥ १० ॥ गतय इत्यनेन ज्ञानमात्रस्य विशेषणभूतप्रपञ्चविषयकस्य विशेष्यभूतपरमात्मपर्य्यन्तत्वं सूचितं तदेव व्यञ्जयितुं सर्वस्य चिदचिदात्मकप्रपञ्चस्य तद्विशेषणतामाह । स त्त्वमिति । भवतः प्रकृतेः त्वच्छरीरभूतप्रधानस्येत्यर्थः । "यस्याव्यक्तं शरीर" मिति श्रुतेः ये सत्त्वादयो गुणाः तेष्वेवाब्रह्मस्थावरान्ताः प्राकृताः प्रकृतिपरिणामात्मकाः तन्तुषु पटवत्प्रोताः प्रविष्टाः ब्रह्मादिक्षेत्रज्ञाधिष्ठिता देहास्त्वदपृथक्सिद्धविशेषणभूतगुणमयप्रकृतिकार्यतया त्वदायत्तसत्तादिमन्तः त्वद्विशेषणभूता इत्यर्थः ॥ ११ ॥ एवमचेतनप्रपञ्चस्य तद्विशेषणत्वमुक्तम् अथ ब्रह्मादिक्षेत्रज्ञानां तच्छरीरत्वेन तद्विशेषणत्वं तदायत्तबन्धमोक्षादिमत्त्वम् तस्य बन्धापादनाद्युपयुक्तसर्वज्ञत्वञ्च वदन्नमस्करोति । तुभ्यमिति । सर्वात्मने सर्वेषां ब्रह्मादिक्षेत्रज्ञानामात्मा अनेन क्षेत्रज्ञानां तच्छरीरत्वेन तद्विशेषत्वम् , फलितं यर्हि सर्वात्मा तर्हि जीववत्किंदेहात्माभिमानी नेत्याह । अविषक्तदृष्टये । अविषक्ता देहादिष्वनभिनिविष्टा दृष्टिर्यस्य तस्मै देहात्माद्यभिमानरहितायेत्यर्थः । तत्र हेतुः सर्वधियां साक्षिणे सर्वासां बुद्धीनां साक्षाद्द्रष्ट्रे सर्वबुद्धिसाक्षित्वात् न क्वापि देहात्माद्यभिमान इति भावः । किञ्च यदविद्यया यदीयया प्रकृत्या हेतुभूतया देवनृतिर्यञ्च आत्मानो देहा येषां तेषु क्षेत्रज्ञेषु अयं परिदृश्यमानो गुणप्रवाहः सत्त्वादिभिर्निमित्तभूतैः प्रवहते प्राप्नोतीति तथा संसारः असकृद्बहुकृत्वः प्रवहते तस्मै तुभ्यं ते नमः अस्तु यदविद्ययेत्यनेन "दैवी ह्येषा गुणमयी ममे"त्यादिवचनार्थोऽभिप्रेतः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उपसंहरति । सर्व एवेति । सर्वेषां देवानामीश्वराः इन्द्रादयः तेषामपीश्वरः सर्वदेवमहेश्वरः सर्व इति क इति तत्राह । य इति । ये इन्द्रादिनानादेवतानां भक्ताः अत एव तद्भक्तिपूर्त्यर्थमन्यधियः स्वातन्त्र्यबुद्धयो यद्यपि तथापि तव सर्वस्वामित्वं जानन्तो देवास्तद्दत्तबलिं त्वयि समर्प्य तत्फलार्थं स्वयं स्वीकुर्वन्त्यन्यथा पश्यतो हरत्वं तेषां स्यादतस्तन्न कुर्वन्ति किन्तु तत्फलमन्तवदेव तथा श्रुतत्वादिति भावः । यद्वा विष्णोरन्या विलक्षणा धीर्येषां ते तथा यद्यपि तथापि पूर्वादृष्टवशान्नानादेवताभक्ताः ये ते त्वत्सर्वोत्तमत्वज्ञानाभावात्तेषामित्यतः प्रभो इत्युक्तम् ॥ ९ ॥ एतदेव विशदयति । यथेति अद्रिभ्यः प्रभवः उत्पत्तिर्यासां ताः अद्रिप्रभवाः पर्जन्येन गर्जन्मेघेन आपूरिताः सिन्धुं समुद्रं त्वां गतयः पूजामार्गाः पुरुषार्थसाधनानि शास्त्राणि वा येऽन्ततः पूजावसाने ब्रह्मार्पणबुद्ध्यावसिता इत्यर्थः ॥ १० ॥ ननु पूजादिकं सर्वं भगवद्विषयञ्चेन्मतभेदः कथमुत्पद्यत इत्याशङ्क्य सत्त्वादिगुणोपरक्तत्वादाकृष्टबुद्धित्वेन तद्भेद इत्याशयेनाह । सत्वमिति । प्राकृताः प्रकृतिनिमित्तास्तेषु सत्वादिषु प्रोताः सम्यक् स्यूताः सम्वलिता इत्यर्थः । कार्यते ह्यवश इत्यादि हिशब्देन गृहीतम् ॥ ११ ॥ ननु प्राकृतपदार्थेष्ववस्थितस्य हरेस्ततो विशिष्टत्वमहिमासम्भवात् किं विशेषेण प्रणतिः प्रार्थ्यत इति तत्राह । तुभ्यमिति । तुभ्यं नमोऽस्तु यः सात्विकादिनानाजनकृतपूजाविषयत्वेनोक्तस्तस्मै त

भूयोऽपि नमोऽस्त्वित्यन्वादिश्यते प्रतिविशेषणमनुसंधेयमिति द्योततनाय वा अविषक्तदृष्टये अप्रतिहतज्ञानाय एकैकस्यैकैकप्रतिहतेदृष्टत्वादस्य कथमप्रतिहतज्ञानत्वमित्याशङ्क्य सर्वस्वामित्वेन स्वातन्त्र्यप्रतीतेर्ज्ञानप्रतिबन्धकाभवो युक्त इति भावेनाह । सर्वात्मन इति । सर्वेषां तत्तच्छक्तिमाकृष्य वशीकृत्य तिष्ठत इत्यर्थः । तदेव विशिनष्टि । सर्वेति । सहि सर्वमनोवृत्तिप्रेरकः समुदाहृत इत्यादेः । यद्वा अनेनासङ्गत्वं स्पष्टयत इति । अस्य सर्वस्वातन्त्र्यमस्तीति कथमवगन्तुं शक्यमित्याशङ्क्य संसारस्य हरीच्छाधनित्वज्ञानादित्याह । गुणप्रवाह इति । अस्य हरेर्विद्ययेच्छया अनिषेधे पुमान्विष्णावर्विचित्रे स्मरे पुमानिति च देवत्वोषाधिविशिष्ट आत्मनीति प्रत्येकमन्वेतव्यम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सर्व एव व्याख्या ॥ ९–११ ॥ तेऽविद्ययेत्वन्वयः । त्वद्विषयेणाज्ञानेनेत्यर्थः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवमुक्तलक्षणा योगिकर्मिप्रभृतय उपासकाः सर्व एव त्वां यजन्ति कुत इत्यत आह । सर्व इति । तवैव सर्वदेवमयत्वादीश्वरत्वाच्चेत्यर्थः । ननु केचित् पृष्टाः वयं शिवमर्च्चयामो वयन्तु सूर्यं गणेशमित्याचक्षते तत्राह । येऽपीति । ननु ते कादाचित्किमपि स्मृतिं मयि न दधते तत्राह । यद्यपीति । अन्येष्वेव देवेषु नतु त्वयि धीर्येषां ते ॥ ९ ॥ ननु यदि मामेवार्च्चयन्ति तर्हि तें मामेव प्राप्नुयुः मैवं तेषामर्च्चना एव त्वां प्राप्नुवन्ति नतु तें अर्च्चकाः यदुक्तं त्वयैव “येऽप्यन्यदेवता भक्ता यजन्तें श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय ! यजन्त्यविधिपूर्वकम् । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । नतु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति तें । यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि मा” मित्यतोऽहमपि दृष्टान्तेन तथैव वच्मीत्याह । यथेति । अद्रिभ्यः सकाशात् प्रकर्षेण भवन्तीति ताः अद्रिभिर्जनिता इत्यर्थः । पर्ज्जन्येन मेघेनापूरिता इति अद्रिषु पर्ज्जन्यवृष्टानि जलान्येवेतस्तत एकीभूय नद्यो भवन्ति ताश्च नद्यः सर्वतः प्रसृत्य अन्ततः सिन्धुं विशन्तीति अद्रिजनिता नद्य एव यथा सिन्धुं प्राप्नुवन्ति नतु नदीजनका अद्रयस्तथैव गतयो गम्यन्ते आभिरिति मार्गभूता अर्चना एव त्वां प्राप्नुवन्ति नत्वर्च्चकास्ते तवैव सर्वदेवाधिष्ठातृत्वात् अधिष्ठानपूजा अधिष्ठातर्येव पर्यवस्यतीति न्यायात् सर्वदेवपूजापि त्वत्पूजैवेति भावः । अत्र पर्ज्जन्यस्थानीयो वेदः पर्ज्जन्यो हि सिन्धुजलमयत्वात् सिन्धोरुद्भूतः वेदोऽपि त्वत्त उद्भूतस्तदुक्ता नानापूजनविधय एव जलानि तत्राधिकारिण एवाद्रयस्तत्कृता नानादेवेशपूजा एव नानादेशनद्यस्ता नद्यो यथा नानादेशेभ्यः निःसृत्य सिन्धुमेव गच्छन्ति तथैव पूजा अपि देवेभ्यो निःसृत्य विष्णुम् ॥ १० ॥ ननु तर्ह्येव विविच्य सर्वेऽपि किं मामेव नोपासतें तत्राह । सत्त्वमिति । तेषु गुणेषु हि निश्चितं प्राकृता जीवाः प्रोताः ग्रथिताः आब्रह्मेति ब्रह्मपर्यन्ता अपि जीवा यदि मायया मोह्यन्तें तर्हि सर्वे मनुजास्त्वां कथं भजन्तामिति भावः ॥ ११ ॥ ते त्वां प्राप्तुं तुभ्यं मम नमोऽस्तु तव तु स्वभक्तेभ्योऽन्येषूपासकेषु दृष्टिर्न रज्यतीत्याह । तुभ्यमिति । अविषक्त दृष्टये कथं तर्हि सर्वदेवपूजां त्वं प्राप्नोषीति ब्रूषे यो हि येभ्यः पूजां प्राप्नोति स तेष्वनुरज्यत्येवेत्यत आह । सर्वाधिष्ठातृत्वादेव तत्तत्पूजां प्राप्नोषि नतु तस्यां तव काचिदपेक्षास्ति तेऽपि त्वां न पूजयन्ति कुतस्तव तेष्वासक्तिरिति भावः । अतः साक्षिणे इति साक्षी त्वं सर्वत्रोदासीन एवेति भावः । ननु तर्हि ते देवा स्वस्वोपासकास्तानुद्धरन्तु तत्राह । गुणेति असकृत् निरन्तरं देवनृतिर्यञ्च आत्मानो येषां तेषु देवादिशरीराभिमानिष्वित्यर्थः । तत्तदुपास्या देवा अपि स्वयं गुणप्रवाहपतिताः कथं स्वोपासकांस्तानुद्धरन्त्विति भावः ॥ १२ ॥

गूढार्थदीपिनी

अन्यदेवताः क्षुद्रदेवताः ॥ ९ ॥ गतयः भजनमार्गाः त्वामेव ॥ १० ॥ प्राकृताः प्रकृतिकार्योपाधयः स्थावरादयो ब्रह्मपर्यन्ता जीवाः तेषु गुणेषु प्रोताः ॥ ११ ते त्वां प्राप्तुं तुभ्यं नमः । अविषक्ता निर्लिप्ता । गुणैः प्रोह्यते संचाल्यते संसारः । आत्मसु तत्तद्देहाभिमानिषु ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवमन्येऽपि येऽन्यदेवताभक्ताः यद्यप्यन्यधियः अन्येषु त्वदन्यतया अब्रह्मात्मकतया स्वस्वमनीषया अयमेवेश्वरः अयमेवेश्वर इत्येवं कल्पितेषु धीर्य्येषां ते तथाभूताः अपि वस्तुतस्तेषामब्रह्मात्मकत्वाभावात्तद्द्वारा तदुपासना ब्रह्मणि सर्वात्मनि श्रीकृष्णे त्वय्येव पर्य्यवसन्ना भवत्यतस्त्वामेव सर्वे यजन्तीत्यर्थः । तदुक्तं श्रीमुखेनैव । ये ऽप्यन्यदेवता भक्ताः यजन्तो श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय ! यजन्त्यविधिपूर्वक”मिति । यद्यप्यन्यधिय इति बुद्धिमात्रभेदो न वस्तुभेद इति तदयुक्तमेव । एवम्वस्तुस्वीकारे । उपास्योपासकबुद्धिबोद्धव्यादिभेदासम्भवात् ॥ ९ ॥ यतः सर्वे मार्गाः सर्वात्मनि त्वय्येव पर्य्यवस्यन्तीति सदृष्टान्तमाह । यथेति । प्रभवन्ति यस्मात्स प्रभवः अद्रिः प्रभवो यासां ताः । नद्यः स्वाभाविकाः पर्जन्येन पूरिताः क्षुद्रनद्यश्च सर्वतः सिन्धुं विशन्ति यथा तद्वद्वेदाद्रिप्रभवाः गतयः मार्गाः अन्यप्रवर्तिताश्च । अन्ततः सिद्धान्ततः त्वामेव विशन्ति ॥ १० ॥ ननु “सर्वे वेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्य” इति श्रुतिस्मृतिभ्यां वेदोक्ता गतिस्तु एकैव तत्र गतिबाहुल्ये किं निमित्तमित्यत्र

त्वन्मायागुणबद्धा जीवा एवेत्याह। सत्त्वमिति। तेषु प्रोताः अतः स्वस्वमनीषया वेदादेव केचित्सात्त्विकराजसतामसरूपाः गतीः प्रवर्तयन्ति केचित्तु वेदनैरपेक्ष्येण प्रवर्तयन्तीति भावः॥ ११॥ सर्वा गतयस्त्वां विशन्तीत्युक्तं तत्र सात्त्विकीगतिफलं देवभावं राजसीगतिफलं नृभावं तामसीगतिफलं तिर्य्यग्भावं त्वमेव ददासि। अहन्तु त्वद्दासः अतो मां स्वचरणसङ्गं देहीत्यभिप्रायेण नमस्करोति। तुभ्यं नमोऽस्तु। कथम्भूताय यस्माद्धेतुभूतात् ते त्वत्तः देवादयः आत्मानः स्वस्वकर्मफलभूताः देहा येषां तेषु जीवेषु विषयेष्वयं गुणप्रवाहः त्रिगुणकार्य्यभूतः संसारः अविद्यया गुणमय्या प्रकृत्याऽसकृत् पुनः पुनः प्रवर्तते तस्मै इत्यन्वयः। गुणप्रवाहप्रवर्तकत्वेन आसक्तिम्प्राप्ताम्वारयति। अविषक्तदृष्टये इति। तत्र हेतुं दर्शयितुं विशिनष्टि। सर्वात्मने इति। तत्तत्कर्मफलरूपदेवादिदेहप्रापणयोग्यतां दर्शयन् वेदमात्रविषयत्वं भगवतो दर्शयति। सर्वधियाञ्च साक्षिणे इति। साक्षिणे साक्षाद्द्रष्ट्रे धीप्रवर्तकायेत्यर्थः॥ १२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पाशुपताद्यागमा अन्यथाऽवगमयन्ति तत्कथं सर्वे त्वां यजन्तीति मन्दाशङ्कां परिहरति। त्वामिति। शिवोक्तेन मार्गेण मोहकसमयरूपेण शिवरूपं शिवान्तर्यामिणं बह्वाचार्यविभेदेन। त्वं च रुद्र महाबाहो मोहशास्त्राणि कारयेत्युक्तैर्दधीच्यादयो ये बहव आचार्यास्तत्कृतमतविभेदेन। दधीच्याद्यैश्च कारयेत्युक्तैः। तेऽधिकारिणस्त्वामेव समुपासते। नानारूपामराख्ययेत्युक्तं विशदयति। त्वामिति वा। नानारूपामराख्ययेत्युक्त्यनन्तरमतादृगाशङ्कानुन्मेयात्॥ ९॥ उपसंहरति। सर्व इति। हे प्रभो येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियोऽन्यस्मिंस्त्वद्भिन्ने देवे धीर्येषां तथा सर्वदेवमहेश्वरं सर्वेषां देवानां महेश्वरं परमस्वामिनं ते सर्वेऽपि त्वामेव भजन्ते। येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः। तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्। अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव। न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति त इति भगवद्वचनात्॥ १०॥ अद्रिप्रभवा अद्रिभ्यः प्रभवन्तीति तास्तथा नद्यः पर्जन्येन ध्वनद्धनेनापूरितास्तद्वृष्टजलैः पूर्णाः सर्वतः सिन्धुं समुद्रं विशन्ति। तद्वदन्ततः सर्वसुपर्वगतयोऽर्चनमार्गास्त्वमेव विशन्ति। आकाशात्पतितं तोयं यथा गच्छति सागरम्। सर्वदेवनमस्कारः केशवं प्रतिगच्छतीत्यादेः। गतयस्तत्तन्मतमूलश्रुतिसम्पादितज्ञानानि त्वामेव विशन्ति त्वद्रूपैकविषयिण्यो भवन्तीति यावत्। ॐ गतिसामान्यात् ॐ सर्वे वेदा युक्तयः सुप्रमाणा ब्राह्मं ज्ञानं परमं त्वेकमेव। प्रकाशयन्ते न विरोधः कुतश्चिद्वेदेषु सर्वेषु तथेतिहास इति श्रुतेर्गतेर्ज्ञानस्य साम्यमेवेत्यादेः॥ ११॥ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्। मोहितं नाभिजानाति मामेभ्यः परमव्ययम्। कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैरित्यादेः। बन्धो हि बुद्धयो मतभेदाल्लोकानामित्याह। सत्त्वं रज इति। भवतः प्रकृतेस्त्वदुत्तेजितशक्तिरिति त्वत्सम्बन्धिन्याः सत्त्वं रजस्तम इति नामानो गुणास्तेषु हि यतः स्थावरादय आब्रह्मपर्यन्तं प्रोताः सम्यक् स्यूतास्ततः अतो वैचित्र्यमुपपद्यत इति भावः॥ १२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं षड्विधाविरूप्य सामान्येन क्षुद्रोपासकानाह। सर्व एवेति किं बहुना क्षेत्रपालाद्युपासका अपि त्वामेवोपासते यतस्त्वं सर्वदेवमयः तेषामपीश्वरः "अहं हि सर्वयज्ञानां भोक्ता चे"ति वाक्यात् सर्वदेवमयश्चासावीश्वरश्चेति ननु बुद्धिस्तेषां न भगवत्परेति कथं सर्वेषां भगवदुपासकत्वमित्याशङ्क्याह। येऽप्यन्यदेवताभक्ता इति। वयमात्मव्यतिरिक्तस्य विष्णुव्यतिरिक्तस्य च देवतान्तरस्योपासका इति यद्यप्येषामन्यबुद्धिः तथापि उपास्यो महानिति मत्वा हि ते उपासते न त्वस्मदुपास्यो न किञ्चित्कर इति अन्यथा नोपासीरन् न हि कश्चिद्धीनमप्रयोजकं ज्ञात्वा कश्चनोपास्ते परं भ्रमादुपासना भवति भ्रमे तु भगवद्धर्मा एव तत्रारोपिता इति भगवानेव सेव्यते आरोपस्य तुल्यवात् अबुद्धिपूर्वकोऽयमिति विशेषः। योऽपि भ्रमाद्रजतं जानाति सोऽपि रजतं ज्ञातवानेव अन्यथा अनुव्यवसायोऽपि भ्रान्तः स्यात् यदुक्तं भगवता "न तु मामभिजानन्ती"ति तद्विधिपरत्वेन अविधिपूर्वकमिति वचनात् प्रतिमादावपि भगवानारोप्यते तद्धर्माश्च तथा तत्तदुपासका अपि स्वसेव्ये भगवत्त्वम् तत्धर्मांश्चारोपयन्ति परं विध्यभावात् न तस्य ज्ञानजनकत्वम् किं तूद्देश्यफलमेव अतो भगवदज्ञानात्तेषां संसार एव स्थितिरिति वदता भगवता विधिमार्गो मुख्यतया स्थापितः न त्वविहितो मार्गो निन्दितः अन्यथा "मामेव यजन्ति अहं हि सर्वज्ञानानां लभते च ततः कामान् मयैव विहितान् हितान्" इति न वदेदेव तस्माद्विधिस्तुतिपरमेवैतद्वाक्यम् अतः सुष्ठूक्तं येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः तथापि त्वामेवोपासते इति नन्वेवं भ्रमं भगवानुत्पाद्य किमिति एवं फलं प्रयच्छति कथं सर्वानेव नैकविधान् करोतीत्याशङ्क्याह प्रभो इति स हि सर्वप्रकारसमर्थः तथापि चकारादन्यथा च नानाप्रकारान्॥ ९॥ ननु तत्तदुपासकानां तत्तद्देवतासायुज्यस्योक्तत्वात् कथं प्रमेयबलविचारेण तेषां गत्यभाव इति चेत्तत्राह। यथाद्रिप्रभवा इति। साधनपरं चैतद्वाक्यम्—

आकाशात्पतितं तोयं यथा गच्छति सागरम्। सर्वदेवनमस्कारः केशवं प्रति गच्छति॥

इतिवाक्यात् प्रमेयबले च तेषां भगवत्सायुज्यमेव यदि निष्कामाः परम्पराकालविलम्बश्च भवति यथाभूतोपासकाः भूतसायुज्यं प्राप्नुवन्ति ततो भूतानि महादेवसायुज्यं महादेवो भगवत्सायुज्यमिति एवं विहितानामविहितानां वा साक्षात्परम्परया

वा भगवत्सायुज्यमेव फलमिति यथा सर्वासामेव पर्वतप्रभवानां नदीनां मेघैरापूर्यमाणानां सिन्धुरेव प्रवेशस्थानं चतुर्दिक्षु न त्वन्यः कश्चित्प्रवेशयोग्यो भवति तद्वदेव नदीप्राया जीवगणाः सहजेन पर्वतजलेनागन्तुकेन वा वृष्टिजलेन वा पूरिता भवन्ति तथा विधिनाविधिना च पूरिताः जीवा जन्मकोटिभिः भगवत्सायुज्यमेव प्राप्नुवन्ति तथाभूतानामपि फलं साधयतीति ज्ञापनार्थे प्रभो इति गतयः फलानि अन्ततः त्वय्येव विशन्ति ॥ १० ॥ किं च उत्पत्तिविचारेणापि त्वत्त एवोत्पन्नाः त्वय्येव विशन्ति त्वमेवेति कथं तेषां त्वत्सायुज्यं न भवेत् न ह्यन्यः कश्चिदस्ति तदाह । सत्त्वमिति त्वमेव प्रकृतिः अतो भवतः प्रकृतेस्त्वदीयाया वा सत्त्वं रजस्तम इति त्रयो गुणाः तेषु सर्व एव प्राकृताः प्रकृतिप्रकारेणोत्पादिताः तेषु गुणेषु प्रोताः ब्रह्मावधिस्थावरान्ताः अतः सर्वेषामेव गुणे लयः गुणाः प्रकृतौ प्रकृतिस्त्वयि त्वमेव वा ॥ ११ ॥ एवं सोपपत्तिकं प्रमाणं भगवद्विषयकं सफलं निरूप्य प्रमाणतः प्रेमतश्च महत्त्वं निरूप्य नमस्यति । तुभ्यमिति । अन्यथा महत्त्वं हृदयारूढं नेति शङ्का स्यात् तदर्थं माहात्म्यमुक्त्वा नमस्कर्त्तव्यं तुभ्यमेतादृशाय नमः ते तुभ्यं त्वदर्थमेव त्वमेव फलमित्यर्थः । एवं त्वन्नमस्कारे त्वमेव फलं भवसीति प्रार्थयति अस्त्विति । नन्ववतीर्णोऽहं तद्धर्मैर्व्याप्त इति किं मम नमस्कारेणेत्यत आह । अविषक्तदृष्टय इति । न विषक्ता दृष्टिर्यस्य क्वापि धर्मेषु भगवद्दृष्टिर्न विषज्जते तत्र हेतुः सर्वात्मन इति । अन्यस्मिन् हि आसक्तिर्भगवांस्तु सर्व एव आत्मासक्तिः कृत्रिमैव अनेन स्वापराधोऽपि परिहृतः प्रमाणं चाह । सर्वधियां च साक्षिण इति । सर्वबुद्धीनां द्रष्टा अन्तर्बहीरूपत्वं चोक्तं चकारादात्मनः प्राणादीनां च यो हि सर्वात्मा भवति तस्यान्याध्यासो न भवति यो वा सर्वसाक्षी स कर्त्ता न भवति यस्त्वेतादृशः स विषक्तदृष्टिर्न भवति क्वापि अतो भगवति नान्यधर्मसंम्बन्धः अत्यधर्माभावाच्च तर्हि कस्यापि न स्यादित्यशङ्क्य यस्याविद्या तस्य भगवतीत्याह । गुणप्रवाह इति । अयं गुणानां प्रवाहः अविद्ययैव देवनृतिर्यगात्मसु त्रिविधेषु सात्त्विकराजसतामसेष्वेव प्रवर्त्तते न तु गुणातीते ब्रह्मणि तेषां तु असकृदेव यावदविद्या न निवर्त्तत इति॥ १२ ॥

श्रीसुबोधिनी–सारः

येप्यन्यदेवताभक्ता यद्यपि अन्येषु देवेषु धीः श्रद्धारूपा बुद्धिर्येषां ते सर्वे एव सर्वदेवमहेश्वरं त्वां यजन्ति हे प्रभो ॥९॥ तत्र दृष्टान्तमाह । अद्रेः पर्वतात्प्रभवा उत्पन्ना नद्यः पर्जन्यैमेघैरापूरिताः सर्वतः प्रसरन्त्यः सिंधुं समुद्रं यथा विशन्ति तद्वत्तथा ता गतयो नानामार्गा अंततस्त्वामेव विशन्ति "सर्वे वेदा यत्पदमामनन्ति" इति श्रुतेः । हे प्रभो ॥ १० ॥ भवतस्तव प्रकृतेर्मायायाः सत्त्वं रजस्तम इति गुणाः तेषु गुणेषु ब्रह्मपर्यंतास्स्थावरादयः प्राकृताः प्रकृतिकार्योपाधयः प्रीताः सन्ति अतस्ते मायाविलसितत्वात्सर्वस्य सर्वात्मकत्वमिति भावः ॥ ११ ॥ अविषक्ताऽनासक्ता दृष्टिश्चिच्छक्तिर्ज्ञानं वा यस्य तस्मै सर्वात्मने सर्वधियां साक्षिणे ते तुभ्यं नमोस्तु अविद्ययाऽज्ञानेन कृतोऽयं गुणप्रवाहो देवमनुष्यपश्वादिशरीरेषु प्रवर्त्तते ॥ १२ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

हे प्रभो स्वामिन् ! येऽप्यन्यदेवताधियः तत्तद्देवताविषयकपरमेश्वरबुद्धिमन्तः तथापि ते सर्वे त्वामेव यजन्ति । 'कुत' इत्यपेक्षायामाह—परमेश्वरान्तरस्यासम्भवात् । 'त्वमेव सर्वदेवान्तर्यामी परमेश्वरः पूज्यश्च' इत्याशयेनाह—सर्वदेवमयेश्वरमिति ॥ ९ ॥ अत्र दृष्टान्तमाह—यथेति । अद्रेः सकाशात् प्रभवन्त्युत्पद्यन्ते इति तथाभूता नद्यः पर्जन्येनापूरिता बहुस्रोतसो यथा सर्वतः सर्वासु दिक्षु सिन्धुमेव दिक्षु सिन्धुमेव विशन्ति तद्वत् गतयो भजनमार्गा अपि त्वामेव विषयीकुर्वन्तीत्यन्वयः । न च 'तर्हि भगवद्भक्तानामन्यदेवताभक्तानां च को विशेष' इति शङ्क्यम्, 'भगवद्भक्तानां साक्षादेव तत्प्राप्तिर्देवतान्तरभक्तानां तु तत्तद्देवताप्राप्तिस्ततश्च तासां यदा अधिकारसमाप्तौ भगवत्प्राप्तिः तदा एतेषामपि तत्प्राप्तिरिति विशेष' इत्याशयेनाह—अन्तत इति । देवतान्तरस्यापि भगवत्प्राप्तौ सर्वकारणत्वं हेतुं सूचयन् सम्बोधयति—हे प्रभो इति ॥ १० ॥ सूचितं कारणत्वं स्पष्टयंस्तत्प्राप्तिप्रकारमाह—सत्त्वमिति । सत्त्वादयो भगवतः शक्तिरूपायाः प्रकृतेः गुणाः । तेषु हि प्राकृताः प्रकृतिपरिणामदेहाद्युपाधयो ब्रह्मपर्यन्ताः स्थावरादयो जीवाः स्वोपाधिद्वारा प्रोताः, प्रविष्टास्ते च प्रकृतौ, सा च त्वयीति, अतः क्रमेणोपाधिलयात् सर्वोऽपि त्वामेव प्रविशन्तीति ॥ ११ ॥ स्वयं तु भगवत्प्राप्तये तन्नमस्कारं प्रार्थयति–तुभ्यमिति । ते त्वत्प्राप्त्यर्थं तुभ्यं नमोस्तु । "एतदीशनमीशस्य प्रकृतिस्थोपि तद्गुणैः । न युज्यते इति" हि परमेश्वरलक्षणस्योक्तत्वादन्यान्विहाय तत्प्राप्तीष्टत्वे परमेश्वरत्वहेतुमभिप्रेत्य तल्लक्षणमाह—अविषक्तदृष्टये इति । 'अदृष्टेष्वासक्त्यसम्भवात्किमत्राश्चर्यम्' इत्याशङ्क्याह—सर्वधियां च साक्षिणे इति । चकारो बुद्धिव्यतिरिक्तसर्वपदार्थसङ्ग्रहार्थः । अविषक्तदृष्टित्वे च हेतुमाह—सर्वात्मन इति । 'इतरे तु स्वयमेव संसरन्तीति न ते भजनयोग्या' इत्याशयेनाह—गुणेति । गुणैः सत्त्वादिभिः प्रकर्षेणोह्यत इति गुणप्रवाहो जन्ममरणाद्यात्मकसंसारोऽयमसकृत् पुनः पुनरविद्यया स्वरूपावरक—त्वच्छक्त्या देवनृतिर्यक्त्वे आत्मानो येषां तेषु देवादिशरीराभिमानिषु प्रवर्तन्ते इत्यर्थः ॥ १२ ॥

अन्वितार्थप्रकाशिका

सर्व इति ॥ हे प्रभो स्वामिन् ! येऽप्यन्यक्षुद्रदेवताभक्तास्ते यद्यप्यन्यदेवतासु धीर्येषां ते तथापि ते सर्वे बुद्धिमात्रभेदेन वास्तवभेदाभावात् सर्वदेवमयमीश्वरं त्वामेव यजन्ति । सर्वदेवमयेति संबोधनं वा ॥ ९ ॥ यथेति ॥ हे प्रभो ! अद्रिभ्यः सकाशात्

सर्वतः प्रभवन्त्युत्पद्यन्ते इति नद्यः पुनः पर्जन्येनापूरिता अभिवृष्टाः बहुस्रोतसो भूत्वा यथा सर्वतः सर्वासु दिक्षु सिन्धुमेव विशन्ति तद्वत् बहुमुनिदृष्टविचारात् वेदेभ्य उद्भूताः पुनर्मुनिविचारोपबृंहिताः गतयो भजनमार्गा अपि अन्ततः विचारावसाने त्वामेव विशन्ति विषयीकुर्वन्ति ॥ १० ॥ सत्त्वमिति ॥ सत्त्वादयो भवतः शक्तिरूपायाः प्रकृतेः गुणाः तेषु हि प्राकृताः प्रकृतिपरिणामदेहाद्युपाधयो ब्रह्मपर्यन्ताः स्थावरादयो जीवाः स्वोपाधिद्वारा तेषु गुणेषु प्रोताः प्रविष्टास्ते च प्रकृतौ सा च त्वयीति अतः क्रमेणोपाधिलयात् सर्वेऽपि त्वामेव प्रविशन्तीति । यद्वा । भगवतः प्रकृतेर्गुणेषु प्रोताः ब्रह्मादयो भवतो भिन्ना न सन्त्यतस्त्वमेव सर्वदेवमयः ॥११॥ ननु भवतः प्रकृतेरिति ममापि प्रकृतेः सम्बन्धे जीवेभ्यो मम को विशेषः इत्याशंक्य विशेषमाह—तुभ्यमिति ॥ अविषक्ता अप्रतिहता दृष्टिर्यस्य तस्मै । तत्र हेतुः । सर्वेषामात्मने सर्वधियां साक्षिणे च तुभ्यं नमोऽस्तु । अतः प्रकृतिसम्बन्धेऽपि न जीवस्येव तव दृग्विषङ्गः त्वत्तः इतरे तु संसरन्तीत्याह । गुणैः सत्त्वादिभिः प्रकर्षेणोह्यत इति गुणप्रवाहो जन्ममरणाद्यात्मकः संसारो यमसकृत् पुनः पुनरविद्यया स्वरूपावरकत्वच्छक्त्या कृतः । देवनृतिर्यञ्च आत्मनो येषां तेषु देवादिशरीराभिमानिषु प्रवतते अतो महान् विशेषः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे सर्वदेवमय यद्वा सर्वदेवमयं सर्वान्तर्यामिणमिश्वरं ये अन्यदेवता भक्ताः यद्यपि अन्येषु त्वत्तोऽन्यदेवेषु धीःस्नेहयुक्ताबुद्धिर्येषां ते यजन्ति तद्यजनविधिफलमुक्तं गीतायां । येप्यन्यदेवता भक्ता यजंते श्रद्धयान्विताः तेपि मामेव कौंतेय यजत्यविधिपूर्वकं । अन्तवत्तु फल तेषां तद्भवत्यल्पमेधसां देवान्देव यजो यान्ति मद्भक्तायांति मामपीति तान्देवान्प्राप्य तत्स्थाने स्थिता भवन्ति ते देवा यदा मुक्ता भवन्ति तर्हि तेऽपि तैः सह मुच्यन्ते विघ्नबाहुल्यात् क्षीणे पुण्ये सति पुनस्ततः पततीतिभावः क्षीणे पुण्ये मृत्युलोकं विशन्तीत्युक्तेः ॥ ९ ॥ तमेव प्रसंगं सदृष्टान्तमाह यथेति अद्रेः प्रभवा उत्पन्नानद्यः पर्ज्जन्येन आपूरिताः सत्यः यथा सर्वतः सिंधुमेव विशंति तद्वत्तथा एता गतयः अन्यदेवोपासनमार्गाः तत्रास्थजना इत्यर्थः अततः स्वोपास्यदेवा गुणनाशावसाने त्वामेव विशंति प्राप्नुवंति ॥ १० ॥ ननु गुणवशात्पूर्वं ते हरीतरदेव भक्ता अन्ये जीवाश्च प्रलये सति कुत्र प्रवेक्ष्यतीति चेत्तत्राह सत्वमिति सत्त्वादयो भवतः प्रकृतेर्गुणाः तेषु विगुणेषु प्राकृताः प्राकृतभोगा सक्ताः आब्रह्मस्थावरादयः विधिपर्यंताः स्थावरादयः चेतनवर्गाः प्रोताः प्रविष्टाः अतो गुणत्रयनाशाभावात् प्रकृतावेवलीना भवन्तीत्यर्थः ॥ ११ ॥ त्वंत प्रकृतेः परोसितया चाबद्धस्तिष्ठसीत्याह तुभ्यमिति प्रकृतितत्कार्येषु अविषक्तदृष्टये अनासक्तबुद्धये कुतः सर्वात्मने सर्वेषां प्रकृतिपुरुषकालाक्षरब्रह्मणामक्षरस्था मुक्तकोटीनां वसमयामणामात्मने अन्तर्यामितया नियामकाय अतः सर्वधियां साक्षिणे सकलजनबुद्धीनां साक्षाद्दृष्ट्रे ते तुभ्यं नमः त्वदेकांतोपासनवर्जितेषु देवादिषु आत्मसु जीवेषु च अयमविद्याकृतो गुणप्रवाहः त्रिगुणकृतसंसारः प्रवर्त्तते ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कथमतद्विषयकोपासकानां त्वदुपासनत्वमित्याशङ्कानिवृत्तय आह । सर्व एवेति । हे प्रभो, ये अन्यदेवताभक्ताः नानाविधान्यदेवतोपासकाः, ते यद्यपि, अन्यधियः परमात्मेतरविषयकोपासनात्मकधीमन्तः, सन्ति, तथापि सर्वेऽपि ते, सर्वदेवमयश्चासावीश्वरश्च तं सर्वदेवमयेश्वरं, 'स आत्मा अङ्गान्यन्या देवताः' इति श्रुत्युक्तरीत्या तव सर्वदेवताशरीरकत्वेन तत्प्रचुरत्वात् सर्वदेवमयः अन्तः प्रविश्य नियन्तृत्वात्तेषामीश्वरस्त्वमेवातः सर्वदेवमयेश्वरं त्वां एव, यजन्ति । सर्वदेवतानां त्वदायत्तसत्तादिमत्त्वेन त्वदपृथक्सिद्धविशेषणत्वेन त्वत्तो व्यतिरेकाभावात्तद्विषयकोपासनास्त्वद्विषयका एवेति भावः ॥ ९ ॥ त्वय्येव पर्यवस्यन्तीत्यत्र दृष्टान्तमाह । यथेति । अद्रेः अर्वतात् सकाशात् प्रभवन्त्युत्पद्यन्ते इत्यद्रिप्रभवाः नद्यः, यथा पर्जन्येन मेघेन घनवृष्टजलेनापूरिताः, जलातिशयेन बहुस्रोतसो जाताः सत्य इत्यर्थः । सर्वतः सिन्धुं समुद्रमेव, विशन्ति । तद्वत् एताः गतयः पूजामार्गाः, पुरुषार्थसाधनानि शास्त्राणि वा बुद्धयो वा अन्ततः पर्यवसानतः, त्वामेव विशन्ति । यथा बहून्यपि विशेषणानि विशेष्य तथा सर्वे मार्गास्त्वामेव विषयीकुर्वन्तीति भावः ॥ १० ॥ चिदचिदात्मकप्रपञ्चस्य तद्विशेषणमाह । सत्त्वमिति । भवतः प्रकृतेः, त्वच्छरीरभूतप्रधानस्येत्यर्थः । 'यस्याव्यक्तं शरीरम्' इति श्रुतेः । सत्त्वं, रजः, तमः, इत्येते ये गुणाः सन्ति तेषु ब्रह्मादिस्थावरान्ततः आब्रह्मस्थावरान्ता इत्यर्थः । प्राकृताः प्रकृतिपरिणामात्मकाः, भावा इति शेषः । प्रोताः हि तन्तुषु पटवत् प्रविष्टाः एव । आब्रह्मस्थावरादय इति पाठे, स्थावरादयः आब्रह्म ब्रह्मपर्यन्ताः ब्रह्मादिक्षेत्रज्ञाधिष्ठिता देहास्त्वदपृथक्सिद्धभूतगुणमयप्रकृतिकार्यतया त्वदायत्तसत्तादिमन्तरत्वद्विशेषणभूता इत्यर्थः ॥ ११ ॥ एवमचेतनप्रपञ्चस्य तद्विशेषणत्वमुक्तमथ ब्रह्मादक्षेत्रज्ञानामापि तच्छरीरत्वेन तद्विशेषणत्वं तदायत्तबन्धमोक्षादिमत्त्वं च वदन्नमस्करोति । तुभ्यमिति । सर्वेषां ब्रह्मादिक्षेत्रज्ञानानामात्मा तस्मै सर्वात्मने, अनेन क्षेत्रज्ञानां तच्छरीरत्वेन तद्विशेषणत्वं फलितम् । यदि सर्वात्मा तर्हि जीववत् किं देवात्माभिमानी नेत्याह । अविषक्ता देहादिष्वनभिनिविष्टा दृष्टिर्यस्य तस्मै, देहात्माभिमानरहितायेत्यर्थः । तत्र हेतुः । सर्वासां धियां बुद्धीनां, साक्षिणे साक्षात् द्रष्ट्रे, सर्वबुद्धिसाक्षित्वान्न क्वापि देहात्माभिमानिने इत्यर्थः । किं च यदविद्यया यदीयया प्रकृत्या हेतुभूतया, देवाश्च नरश्च तिर्यञ्चश्च आत्मानो देहा येषां तेषु प्राणिषु, गुणैः सत्त्वादिभिः निमित्तभूतैः प्रवहते प्राप्नोतीति गुणप्रवाहः अयं परिदृश्यमानः संसारः, असकृद्बहुकृत्वः,

प्रवर्त्तते प्रवहते । एवंभूताय च, ते विख्याताय तुभ्यं, नमः अस्तु । यदविद्ययेत्यनेन 'दैवी ह्येषा गुणमयी मम' इत्यादिवचनार्थोऽभिप्रेतः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सत्त्वं रज इति : १०.४०.११

आब्रह्मस्थावरान्तानां स्वभावा यत्स्वभावतः । गुणे गुणत्वमपि यद्योगात् तस्मै नमोऽस्तु ते ॥ ५ ॥
आलस्यग्रस्तचेताः प्रतिपदमखिलान् भिन्नभिन्नाभिमानाद् ध्यातुं स्तोतुं प्रणन्तुं विधिशिवविबुधान् भूर्भुवःस्वर्निविष्टान् ।
त्वामेवानन्यबुद्ध्या सकलमयतनुं स्तौमि नम्रोऽर्चयामि तत्तद्रूपैः स्वरूपैरपि भव सकलाधीश तन्मे प्रसन्नः ॥ ६ ॥
ब्रह्मेन्द्र-रुद्र-चन्द्रार्क-मर्यादादर्शिने नमः । काल-कर्म-स्वभावैकसाक्षिणे ते नमो नमः ॥ ७ ॥
नमः श्रीवासुदेवाय पद्मनाभाय ते नमः । नमोऽखिलजगज्जात-तातताताय ते नमः ॥ ८ ॥

कृष्णप्रिया

हे प्रभो ! हे नाथ ! जो भक्तजन अनेक भिन्न संज्ञा वाले देवताओं के भक्त है एवं विविध देवताओं को विविध नामों से भजते हैं और भिन्न भिन्न स्वरूप वाले जानते हैं लेकिन वे आपका ही यजन करते हैं क्योंकि "सर्ववेदमयो विप्रः" जैसे विप्र सर्ववेदमय है वैसे सर्वदेवमयो हरिः भगवान् कृष्ण सर्वदेवमय हैं केवल उन भक्तों की उपासना में बुद्धि भेद है वस्तु तो भगवान् एक ही है और भजन की रुचिरता के लिए यह भेद भगवत्कृत है ॥ ९ ॥ हे प्रभो ! जैसे विविध गिरिवरों के उत्तुङ्ग शृङ्गों से निकली हुई सरितायें मेघजल से परिपूर्ण होकर चारों दिशाओं में फैलकर समुद्र में ही समाती है वैसे समस्त उपासकों की भी आप ही गति है, वे सब आपके सायुज्य को ही प्राप्त करेंगे ॥ १० ॥ भगवन् ! सत्व, रजस् एवं तमस् वे आपकी माया के तीन गुण है और ब्रह्माजी से लेकर तृण पर्यन्त समस्त जीव उन्हीं गुणों में ओत प्रोत है । भगवन् इस न्याय से ब्रह्मादि संज्ञाधारी समस्तदेव तीन गुणों में, तीन गुण प्रकृति में अन्ततोगत्वा प्रकृति आप में समाविष्ट है ॥ ११ ॥ तीसरे श्लोक से ग्यारहवें श्लोक पर्यन्त भगवान ही सर्वोत्तम यह निश्चय होने से माहात्म्य ज्ञान प्राप्त हुआ, पुनः भगवान ही सेव्य हैं और नमनीय है ऐसा निश्चय करते नाथ को इस श्लोक में नमस्कार करते हुए श्री अक्रूर जी अब कहते है कि—हे भगवन् ! आप की आत्मा है । एवं सर्व की बुद्धियाँ के साक्षी है, अविद्या से किया हुआ यह गुणों को प्रवाह–प्रभाव देव मनुष्य पशु पक्षियों की देह को धारण करने वाले सभी पर प्रवृत्त होता है आप तो गुणों से सर्वथा पर हैं इसलिये गुणों का प्रवाह-प्रभाव आप पर कभी संभवित नहीं, इसलिए आपका प्रकृति से सम्बन्ध होने पर भी आपकी दृष्टि किसी में आसक्त नहीं होती ऐसे भगवान् के चरणों में मेरे प्रणाम हो ॥ १२ ॥

अग्निर्मुखं तेऽवनिरङ्घ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः ।
द्यौः कं सुरेन्द्रास्तव बाहवोऽर्णवाः कुक्षिर्मरुत् प्राणबलं प्रकल्पितम् ॥ १३ ॥
रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेऽद्रयः ।
निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रस्तु[1] वृष्टिस्तव वीर्यमिष्यते ॥ १४ ॥
त्वय्यव्ययात्मन् पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसङ्कुलाः ।
यथा जले सञ्जिहते जलौकसोऽप्युदुम्बरे वा मशका मनोमये ॥ १५ ॥
यानि यानीह रूपाणि क्रीडनार्थं[2] बिभर्षि हि । तैरामृष्टशुचो लोका मुदा गायन्ति ते यशः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—अग्निः, ते, मुखम्, अवनिः, ते, अङ्घ्रिः, सूर्यः, ते, ईक्षणम्, नभः, ते, नाभिः, अथो, दिशः, ते श्रुतिः, द्यौः, ते, कम्, सुरेन्द्राः, तव, बाहवः, अर्णवाः, ते, कुक्षिः, मरुत्, प्राणबलम्, प्रकल्पितम् ॥ १३ ॥ वृक्षौषधयः, ते, रोमाणि, मेघाः, ते, शिरोरुहाः, परस्य, ते, अद्रयः, अस्थिनखानि, रात्र्यहनी, ते, निमेषणम्, प्रजापतिः, तु, ते, मेढ्रः, वृष्टिः, तव, वीर्यम्, इष्यते ॥ १४ ॥ हे, अव्ययात्मन्, यथा, जले, जलौकसः, सञ्जिहते, यथा, वा, उदुम्बरे, मशकाः, सञ्जिहते, यथा, मनोमये, बहुजीवसङ्कुलाः, तथा, त्वयि, पुरुषे, सपालाः, लोकाः, प्रकल्पिताः ॥ १५ ॥ इह, यानि, यानि, रूपाणि, क्रीडनार्थम्, हि, बिभर्षि, तैः, आमृष्टशुचः, लोकाः, मुदा, ते, यशः, गायन्ति ॥ १६ ॥

---

१. मेढ्रं तु–विज. । २. क्रीडार्थं त्वं बिभर्षि हि–वीर. ।

श्रीधरस्वामीविरचिता भावार्थदीपिका

सर्वात्मन इत्यनेनोक्तं सगुणं स्तौतिअग्निर्मुखमिति द्वाभ्याम्। अग्न्यादीननूद्येश्वरावयवता विधीयते योऽयमग्निः स तु तव मुखमित्यादिवचनव्यक्त्या। ईक्षणं चक्षुः। श्रुतिः श्रवणेंद्रियम्। कं मूर्द्धा। प्राणश्च बलं च तत्॥ १३॥ अद्रयः स्थूलसूक्ष्मगिरयः परस्य तेऽस्थिनखानि निमेषणं निमेषोन्मेषावित्यर्थः॥ १४॥ न केवलमेतावत्किन्तु सर्वोऽप्ययं प्रपंचस्त्वदवयवभूत एवेति वदन्नेवं सत्यपि प्रपंचस्य षड् जन्मादयो विकारास्त्वयि न प्रसज्जन्ते तस्य त्वयि कल्पितत्वादित्याह। त्वयीति। अव्ययात्मनि पुरुषे पूर्णे लोकादयः संजिहते प्रचरंति। हे अव्ययात्मन्निति वा। कथंभूते त्वयि। मनोमये मनःप्रधाने मनोवृत्तिव्यंग्ये "दृश्यते त्वग्र्यया बुद्ध्या। मनसैवानुद्रष्टव्य" इत्यदिश्रुतेः। जले यथा जलौकसः सूक्ष्मप्राण्यण्डराशयो यथा चोदुंबरांतःकेसरेषु मशकाः परस्परवार्तानभिज्ञा एवमनन्तानि ब्रह्मांडानि त्वयि संचरन्तीत्यर्थः॥ १५॥ तस्मादेवंभूतं तव स्वरूपं दुरवगाहमिति त्वदवतार कथामृतमेव संतः सेवन्त इत्याह। यानियानीति। आमृष्टा परिमार्जिता शक् येषां ते॥ १६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नानादेवतानामभिः कृतं यजनादि मद्विषयं कथं स्यादित्याक्षेपे सर्वेषां त्वदुद्भवत्वेन त्वदंशत्वादङ्गार्चनेऽङ्ग्यर्चनवत्स्यादिति हेतोर्हरेः सर्वात्मत्वं सगुणस्य स्फुटयति–अनूद्योच्चार्य। त्वन्मुखाज्जातोऽग्निस्तव मुखम्। "मुखादग्निरजायत" इत्यादिश्रुतेः। किञ्च वैराजरूपस्य तव तेते देवा अङ्गान्येवेत्यतोऽपि तत्तद्देवपूजा तवैव पूजेत्याह—अग्निरिति त्रिभिः। तत्राद्यं द्वयं युग्मम्। मुखं मुखशक्त्यंशाधिष्ठानमित्यर्थः। एवमन्यदपि॥ १३॥ परस्य तवेति योज्यम्। निमेषणं मुकुलीभावो रात्रिः, 'एकसंबंधिज्ञानमपरसंबंधिस्मारम्' इति न्यायेन निमेषणपदेनोन्मेषोऽपि स्मार्यते घटघटत्वयोरेकतरोच्चारणेऽपरस्य स्मरणं जायत एवेतिवत्। उन्मेष उत्फुल्लता, अहरित्यर्थः। प्रजापतिर्दक्षः। वीर्यं रेतः। अत एवाभेदेनाप्युपासनं विधीयते। परस्य तेभ्योऽन्यस्य निजरूपेण पृथग्वर्तमानस्येत्यभेदेनोक्तेभ्योऽपि भेदो दर्शितः॥ १४॥ सर्वात्मत्वमुपसंहरति— न केवलमिति। एवं सत्यपि प्रपंचावयववत्त्वेऽपि। तस्य प्रपंचस्य। न हि रज्जुकल्पिताहेर्विषं रज्जावायातीति भावः। अव्ययात्मन्निति 'परमे व्योमन्' इतिवल्लुप्तसप्तमीकम्। निर्व्यपाये इत्यर्थः। लोकादय इहादिना पालग्रहः। बहुभिरण्डजोद्भिज्जस्वेदजजरायुजैर्जीवैः संकुलाः व्याप्ताः। "ऋजुमार्गेण सिद्ध्यतोऽर्थस्य" इति न्यायमाश्रित्याह—हे अव्ययात्मन्निति वेति। अग्र्यया तपोयागादिकरणेन शुद्धया। मनस्त्वाप्युपासमया संस्कृतेन। जलोकसो वारिवासिनः। उदुंबरे जंतुफले "उदुम्बरो जंतुफलो यज्ञांगो हेमदुग्धकः" इत्यमरः। मशकाः पिपीलिकाविशेषाः। एवम् उदुम्बरस्थमशकवत्। इत्यर्थ इति – अनन्तांतर्गतानि ब्रह्माण्डान्यप्यनंतान्येवेत्यर्थः। तदेवं विराजरूपत्वेन स्तुत्वाऽनंतब्रह्मांडकारणमहाहिरण्यगर्भत्वेन स्तौति—त्वयीति। हे अव्ययात्मन् सर्वकारणत्वेऽप्यचिन्त्यशक्तित्वेन निर्विकारपुरुषे महाहिरण्यगर्भरूपे मनोमये मनआद्यन्तःकरणमयषोडशकले त्वयि लोकाः सपाला बहुजीवसंकुलाः चरन्तीति। तत्र लोका ब्रह्माण्डानि, सञ्चरन्ति यथाक्रमं सृष्टिप्रलययोर्बहिरन्तर्भवन्ति, पाला ब्रह्मादयोऽधिकारानधिकारयोरारोहन्ति पतन्ति च, अन्ये जीवा अत्रामुत्र गतागतं कुर्वन्तीत्यर्थः। तत्र ब्रह्मांडानां सञ्चरणे दृष्टान्तः— यथा जल इति, पालादीनामुदुम्बरे वेति। उदुम्बरमत्र ब्रह्माण्डस्थानीयम्॥ १५॥ यस्मात्त्वमनन्तस्तस्माद्धेतोः। एवंभूतं सर्वप्रपंचाधारम्। दुरवगाहं दुर्ज्ञेयम्। इति हेतोः। ते परिहृतदुःखा लोकाः। हीति प्राग्विद्यमानान्येव रूपाणि विभर्षि नाविद्यमानानीत्याह,—भूतान्येव बिभर्तीशो ह्यवतारतनुं सदा" इति पुराणान्तरात्। ननु तर्हि कानि मम स्वरूपभूतानि रूपाणि तत्राह—यानीति। क्रीडनानि अब्धिसंतरणमधुकैटभहननादीनि तदर्थं विभर्षि नित्यसिद्धान्येव गृह्णासि। गृहीत्वा लोकान्कृपया दर्शयसीत्यर्थः। अतस्तैरेवाराधितैरामृष्टाः परिमार्जिताः शुचः आविद्यकशोकमोहादयो मला यैस्ते। रूपाणि विभर्षीत्यवताराणां तदीयत्वाभिप्रायेण लोकाः सर्वे इत्यधिकारापेक्षा निरस्ता। मुदा गायन्तीति तद्गानस्य स्वतः पुरुषार्थताभिप्रेता। यद्वा—पूर्वं यदन्यसाधारण्येन वैष्णवानामुपासनत्वमुक्तं तत्र च 'बहुमूर्त्येकमूर्तिकम्' (श्लो० ७) इति यद्विशिष्य ता मूर्तयो नोक्तास्तत्र संतोषाभावात्प्रपञ्चयति—यानीति॥ १६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सर्वमयत्वेन सर्वमयेश्वरत्वं दर्शयति। अग्निरिति त्रिभिः। तत्राद्यं द्वयं युग्मकं मुखं मुखशक्त्यंशाधिष्ठानमित्यर्थः॥१३॥ एवमन्यदपि अतएवाभेदेनोपासनं विधीयते परस्य तेभ्योऽन्यस्य निजरूपेण पृथग्वर्त्तमानस्येति अभेदेनोक्तेभ्योऽपि भेदो दर्शितः॥ १४॥ तदेवं विराजरूपत्वेन स्तुत्वानन्तब्रह्माण्डकारणमहाहिरण्यगर्भत्वेन स्तौति। त्वयीति। हे अव्ययात्मन्! सर्वकारणत्वेऽप्यचिन्त्यशक्त्या निर्विकार! पुरुषे महाहिरण्यगर्भरूपे मनोमये मन आद्यन्तःकरणमयषोडशकले त्वयि लोकाः सपाला बहुजीवसङ्कुलाः सञ्चरन्तीति तत्र लोकाः ब्रह्माण्डानि सञ्चरन्ति यथाक्रमं सृष्टिप्रलयोर्बहिरन्तर्भवन्ति पाला ब्रह्मादयः अधिकारानधिकारयोरारोहन्ति पतन्ति च। अन्ये जीवा अत्रामुत्रागतागतं कुर्वन्तीत्यर्थः। तत्र ब्रह्माण्डानां सञ्चरणे दृष्टान्तः यथा जल इति पालादीनामुदुम्बरे वेति उदुम्बरमत्र ब्रह्माण्डस्थानीयम्॥ १५॥ एवम्भूतस्य तत्स्वरूपस्य ज्ञानं दुर्घटं तेन सुखविशेषोऽपि न दृश्यते तदवतारलीलानां दर्शनात्। श्रवणादावपि सर्वेषां सर्वशोकनिवृत्तिः परमानन्दश्च जायते ततस्ते ता एव गायन्तीत्याह। यानीति।

तथा च ब्रह्मणोक्तम्। ज्ञाने प्रयासमित्यादि। वीप्सायां सर्वेषामेव रूपाणां शोकमार्जनादिना परमसेव्यत्वमुक्तं रूपाणि बिभर्षीत्यवताराणां सर्वेषां तदीयत्वाभिप्रायेण। लोकाः सर्वे इत्यधिकारापेक्षा निरस्ता। मुदा गायन्तीति तद्गानस्य स्वतः पुरुषार्थताभिप्रेता। यद्वा। पूर्वं यदन्यसाधारण्येन वैष्णवानामुपासनत्वमुक्तम्। तत्र च बहुमूर्त्त्येकमूर्त्तिकमिति यद्विशिष्य ता मूर्त्तयो नोक्तास्तत्र सन्तोषाभावात् प्रपञ्चयति। यानीति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सर्व्वदेवमयेश्वरमित्युक्तम्। तत्र सर्व्वदेवमयत्वं दर्शयति—अग्निरिति द्वाभ्याम्। 'मुखादग्निरजायत' इत्यादिकं नित्यसर्व्वदेवमयताविवक्षया कार्य्यकारणयोरभेदोपचारात्। अतएवोक्तम्—कल्पितमिति। नभ आदीनां देवतात्वप्रसिद्ध्यभावेऽपि श्रीभगवदंगतया कल्पनेन तत्तदधिष्ठातृकारणदेवतात्वं सिद्धमेव ॥ १३ ॥ ननु कथमेवं सम्भवेत्? तत्राह—परस्येति; परमेश्वरत्वादित्यर्थः। यद्वा, परस्य तेभ्योऽन्यस्य निजरूपेण पृथग्वर्त्तमानस्येत्यभेदेनोक्तानामपि भेदो दर्शितः ॥ १४ ॥ मनोमय इति मनसैव विभाव्यत्वमुक्तम्, अन्यत्तैर्व्यञ्जितम्। यद्वा, अधुनेश्वरत्वमाह—त्वयीति। अव्ययात्मन् हे अक्षरस्वभावेति मीनादीनां सञ्चारणे जलादेरिव व्ययो निरस्तः, यतः पुरुषे पूर्णे लोकाश्चतुर्द्दशभुवनानि, पाला ब्रह्मादयस्तत्सहिताः। यद्वा, लोका बहुभिर्जीवैः संकुला व्याप्ताः प्रकल्पिताः; तन्मायया त्वयैव वा सृष्टाः, अतस्त्वय्येव सम्यग्जिहते परिभ्रमन्ति। संशब्देन तत्रासंकोचादिकमुक्तम्। सर्व्वस्मिन् जले सदा सर्व्वेषां जलौकसां सुखसञ्चाराभावमाशंक्य पक्षान्तरमाह,—मशका इति। मनोमये चिन्तामात्रेण मनस्याविर्भवतीति पूर्व्वोक्त—सुसेव्यत्वमेव दर्शितम्। यद्वा, मनोमयमूर्त्तिरूपेऽपि त्वयि तादृशरूपस्याप्यचिन्त्यप्रभावत्वात्, किं पुनः स्वयं साक्षान्निजरूप इत्यर्थः ॥ १५ ॥ एवम्भूतस्य त्वत्स्वरूपस्य ज्ञानं दुर्घटम्, तेन फलविशेषोऽपि न दृश्यते। त्वदवतारलीलागानाच्च सर्व्वशोकनिवृत्तिः परमानन्दलब्धिश्चेत्याह—यानीति। तथा च श्रीब्रह्मणोक्तम् (भा० १०।१४।३)—'ज्ञाने प्रयासम्' इत्यादि, वीप्सया सर्व्वेषामेव रूपाणां शोकमार्ज्जनादिना परमसेव्यत्वमुक्तम्। रूपाणि बिभर्षीत्यवताराणां सर्व्वेषां तदीयत्वाभिप्रायेण, लोकाः सर्व्वे जना इत्यधिकारापेक्षा निरस्ता। ते यश इत्यवतारित्वेन तैः सहाभेदात्तेषां यशसा तस्यैव यशःसिद्धेः। मुदा गायन्तीति तद्गानस्य स्वतः परमपुरुषार्थताभिप्रेता, संसारशोकापगमेऽपि तद्गानात्। यद्वा, (७ म० श्लो०) 'अन्यं च संस्कृतात्मानः' इत्यनेन यत् साधारण्येन वैष्णवानामुपासनमुक्तम्, तत्र सामान्येनोक्त्या सन्तोषाभावाद्विशेषतो वदन् तदेव प्रपञ्चयति—यानीति। अर्थः स एव ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अक्षिणी सूर्य इति चन्द्रस्याप्युपलक्षणं चक्षुषी चन्द्रसूर्याविति श्रुतेः कं शिरः ॥ १२-१४ ॥ मनोमये विशुद्धमनोग्राह्ये त्वयि कल्पिता इत्यन्वयः संजिहते सञ्चरन्ति ॥ १५-२३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तञ्चिदचिच्छरीरकत्वमेव प्रपञ्चयितुं विश्वरूपं स्तौति। अग्निरित्यादिना। अत्राग्न्याद्यनुवादेनेश्वरमुखाद्यवयवता विधीयते योऽयमग्निः स तव मुखमित्यादि अवनिस्तवाङ्घ्रिः अवनिशब्दः पातालप्रभृतिमहीतलपर्य्यन्तसङ्ग्राहकः पातालमेतस्य हि पादमूलमित्यादिस्थानप्रामाण्यात् सूर्य ईक्षणं दृष्टिः नभो नाभिः नभशब्दो भुवर्लोकप्रभृतितपोलोकपर्य्यन्तसङ्ग्राहकः नाभिशब्दस्तु तत्प्रभृतीनाम् उरोग्रीवावदनललाटानां दिशस्तव श्रुतिः श्रोत्रं द्यौः सत्यलोकस्तवः कं शिरः सुरेशा इन्द्रादयः तव बाहवः अर्णवाः समुद्रास्तव कुक्षिः मरुद्वायुस्तव प्राणश्च बलञ्च तयोः समाहारः तत्कल्पितं रचित त्वयेति शेषः। यद्वा उपासकैरिति शेषः। कल्पितं ध्यातमित्यर्थः ॥ १३ ॥ वृक्षा ओषधयश्च तव रोमाणि मेघास्तु शिरोरुहाः केशा अद्रयो गिरयः परस्य ते तवास्थीनि नखानि च रात्रिश्च अहश्च ते तव निमेषण प्रजापतिर्मेढ्रः वृष्टिस्तव वीर्य्यमिष्यते उपासनायामिति शेषः ॥ १४ ॥ न केवलमेतावदेव किन्तु सर्वोऽप्ययं प्रपञ्चस्त्वदवयवभूत एवेत्याह। त्वयीति। हे अव्ययात्मन्! अविकृतस्वरूप विश्वशरीरकत्वेऽपि तद्गतविकारैरस्पृष्टेति सम्बोधनाभिप्रायः बहुभिर्जीवैः सङ्कुला व्याप्ताः पालकैः सहिताः सर्वे लोका मनोमये विशुद्धमनोग्राह्ये परमपुरुषे त्वयि कल्पिताः सञ्जिहते चरन्ति जले यथा जलौकसः सूक्ष्मप्राणिराशयः यथा वा उदुम्बरान्तः केसरेषु मशकाः परस्परवार्त्तानभिज्ञा एवमनन्तानि ब्राह्माण्डानि त्वयि सञ्जिहते चरन्तीत्यर्थः ॥ १५ ॥ तस्मादेवं भूतं तव स्वरूपं दुरवगाहमिति त्वदवतारकथामृतमेव सेवन्त इत्याह। यानि यानीनि। त्वं क्रीडनार्थं यानि यानि रूपाणि बिभर्षि तैरनुसहितैरामृष्टा परिमार्जिता आध्यात्मिकादितापा येषां ते लोका रसज्ञा जना मुदा तव यशो गायन्ति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नानादेवताभक्तैः क्रियमाणं यजनादिकं त्वद्विषयं कथं स्यादित्याशङ्क्य तेषां त्वदंशोद्भूतत्वेन त्वत्सम्बन्धित्वादिति भावेन तेषां त्वदङ्गजन्यत्वमाह। अग्निर्मुखमिति। मुखाज्जातोऽग्निस्तव मुखमित्युच्यते मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायतेत्यादावितीदं त्वयैव च प्रकल्पितमहं पश्यामीत्येवं योजनीयं विष्णोरङ्गसमुद्भूता विष्णोरङ्गानि देवता इत्यादेः ईक्षणं नेत्रं कं शिरः

पुंसि कः कंशिरोऽम्बुनेरित्यमरः सुरेन्द्राः लोकपालाः अर्णवं वदन्तीति शेषः ॥ १३ ॥ निमेषणं निमेषोन्मेषौ निमिषो मुकुलीभावो रात्रिरुत्फुल्लता अहरुन्मेषः । प्रजापतिर्दक्षः वीर्यं रेतः ॥ १४ ॥ सञ्जिहते सञ्जायन्ते जलमेवाश्रित्य तिष्ठन्तीति जलौकसः मत्स्यादयः उदुम्बरे जन्तुफले मशकाः पिपीलिकाविशेषाः मनोमये ज्ञानस्वरूपे ॥ १५ ॥ पुरुषसूक्तोक्तभगवन्मूर्तिविशेषं स्तुत्वा मत्स्याद्यवतारान् स्तोतुमुपक्रमते । यानीति । आमृष्टशुचः मार्जितशोकाः परित्यक्तदुःखाः पूर्वम्विद्यमानान्येव रूपाणि बिभर्षि नाविद्यमानानीति इदमर्थं हि शब्दो वक्ति भूतामेव बिभर्तीशो ह्यवतारतनुं सदेंत्यादेश्च ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सर्वमयत्वेन सर्वदेवमयेश्वरत्वं दर्शयति । अग्निरिति त्रिभिः मुखं मुखशक्त्यंशाधिष्ठानमित्यर्थः । एवमन्यदपि ॥१३–१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च वैराजरूपस्य तव ते ते देवा अङ्गान्येवातोऽपि तत्तद्देवपूजा तवैव पूजेत्याह । अग्निरिति । कं शिरः ॥ १४ ॥ नन्वेवं चेत्तर्हि देवयाजिनोऽपि मद्याजिन एव यान्ति मद्याजिनोऽपि मामिति मदुक्तेः । कथं ते मां न प्राप्नुवन्ति तत्राह । त्वयि पुरुषे वैराजरूपे लोका भूरादयः प्रकल्पिताः पाला इन्द्रादिदेवास्तत्सहिताः संजिहते प्रचलन्ति वा इवार्थे यथा च उदुम्बरफले मशकाः सूक्ष्मकीटाः असङ्ख्याः त्वयि कीदृशे मनोमये मन आद्यखिलतत्त्वमये मायिकत्वान्नश्वरे इत्यर्थः । हे अव्ययात्मन् ! न व्येति न नश्यति आत्मा देहो यस्य हे सच्चिदानन्दविग्रहेत्यर्थः । तेनानश्वराणि सच्चिदानन्दमयानि रूपाण्येव तव स्वरूपाणि तानि यजन्त एव त्वद्याजिन उच्यन्ते वैराजरूपन्तु तव मायिकं रूपं नश्वरं नतु त्वत्स्वरूपमतस्तदङ्गभूत देवयाजिनो न त्वद्याजिनः अतः साधूक्तं यान्ति देवव्रता देवानित्यादीति द्योतितम् ॥ १७ ॥ ननु तर्हि कानि मम स्वरूपभूतानि रूपाणीत्यत आह । यानीति क्रीडनानि अब्धिसन्तरणमधुकैटभहननादीनि तदर्थं बिभर्षि नित्यसिद्धान्येव गृह्णासि गृहीत्वा लोकान् कृपया दर्शयसीत्यर्थः । अतस्तैराराधितैरामृष्टाः परिमार्जिताः शुचः आविद्यकशोकमोहादयो मला यैस्ते ॥ १६ ॥

गूढार्थदीपिनी

अवनिः पृथ्वी । ईक्षणं चक्षुः । द्यौः सत्यलोकः तव कं मूर्धा । मरुत् वायुः तव प्राणो बलं चेति ॥ १३ ॥ परस्य परमेश्वरस्य ते । निमेषणपदेन उन्मेषोऽपि स्मार्यते एकसम्बन्धिज्ञानस्य अपरसम्बन्धिस्मारकत्वनियमात् घटघटत्वयोरिति वत् तथा च निमेषो रात्रिः उन्मेषोऽहश्चेति प्रजापतिः दक्षो ब्रह्मा वा । वीर्यः रेतः ॥ १४ ॥ हे अव्ययात्मन् । न व्येति नश्यति आत्मा देहो यस्येति । बहुजीवैः जरायुजादिभिः संकुला व्याप्ता सर्वे लोकाः त्वय्येव कल्पिता यथा जलौकसः जलजन्तवः जले सञ्जिहते प्रचलन्ति यथा च उदुम्बरे मशकाः सूक्ष्मकीटाः एवं त्वयि कल्पिता इति योज्यम् । मनोमये मनोवृत्तिग्राह्ये त्वयि ॥ १५ ॥ तैः चिन्तितैः रूपैः आमृष्टशुचः निवारितशोकाः जनाः ॥ १६–१७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वात्मने नम इत्युक्तं तत्प्रपञ्चयति । अग्निरिति द्वाभ्याम् । ईक्षणं चक्षुः श्रुतिः श्रोत्रम् कं शिरः प्राणश्च बलञ्चेति समाहारे द्वन्द्वः अद्रयः अस्थिनखानि ते परस्य अप्राकृतविग्रहस्यापि उपासनाविशेषविवक्षया एवंभूतदेहावयवविधानमिति मनोरथप्रदा इति भावः ॥ १३–१४ ॥ ये हेतवस्ते जगतोऽङ्गभूताः इत्यत्र सर्वजडचेतनयोः शक्त्यंशभूतयोः विश्वकारणरूपयोरङ्गित्वेन सर्वात्मत्वमुक्तमग्निर्मुखमित्यत्र कार्यरूपयोरङ्गित्वेन सर्वात्मत्वमुक्तमथ जडचेतनात्मकस्य कार्यकारणरूपस्य कृत्स्नस्य जगतः आधारत्वं भगवतो वर्णयति । हे अव्ययात्मन् ! स्वरूपतस्तु जीवोऽपि अव्ययः भवांस्तु देहतोऽप्यव्यय इति सम्बोधनाभिप्रायः त्वयि पुरुषे पूर्णे मनोमये मनःप्रधाने शुद्धेन भक्तमनसा ग्राह्ये दृश्यते "त्वग्र्यया बुद्ध्या मनसैवानुद्रष्टव्य" इत्यादिश्रुतेः लोकाः सूक्ष्मस्थूलरूपाः प्रकल्पिताः सम्यक् स्थिताः यथा जले जलौकसः उदुम्बरे मशकाश्च पूर्वमनभिव्यक्ता एवाभिव्यक्ताः सन्तः सञ्जिहते प्रचलन्ति तद्वत् ॥ १५ ॥ तव येन केनाप्यवतारेण सेवितेन संसारशोकरहिताः निर्भयाः सन्तस्तव यशो गायन्तीत्याह । यानीति । तैर्हेतुभूतैः आमृष्टाः परिमार्जिताः शुचो येषां ते लोकाः साधुजनाः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तुभ्यमिति श्लोके गुणप्रवाहोऽयमविद्ययेत्याविद्यकता प्रपञ्चस्योच्य इति प्रतीतिं निवारयितुमविद्ययेत्यनूद्य महामायेत्यविद्येति नियतिर्मोहिनीति च । प्रकृतिर्वासनेत्येवं तवेच्छानन्त कथ्यत इत्यन्यत्र स्वयं मानमुदाहृतवन्त इति स्ववचनतो विवृण्वन्ति । अविद्यया भगवदिच्छयेति । अस्याकारवाच्यस्य विष्णोर्विद्ययेति केचित् । तन्न । प्रामाणिकक्रमानानुगुण्यात् । ननु तर्हि भगवत्पादोदितं भगवदिति निरवनिकमिति चेन्न । अध्याहृततच्छब्दसङ्गमनीययच्छब्दार्थत्वात् । मानिकव्यानतापददृष्ट्या भगवदिति रूढावेव नैर्भर्यात् । माने च तवेत्येतत् सरसान्वयीति दिगिति केचित् । ततश्च श्लोकव्याकृतिः । अयं गुणप्रवाहो यस्य भगवतोऽ

विद्ययोच्छया देवनृतिर्यगात्मसु देवाश्च नरश्च तिर्यञ्चश्चेत्येतदात्मसु जीवेष्वसकृत्प्रवाहतः प्रवर्तते । तुभ्यं तस्मै । अविषक्ता काव्यप्रतिबद्धा तथा शुभाशुभफलसम्बद्धा दृष्टिर्ज्ञानं यस्य तस्मै । कुतोऽयं विलुप्तावबोध इत्यत आह । सर्वात्मन इति । सर्वस्वाम्यादिगुणयुक्ताय सर्वधियां साक्षिणे च नमोऽस्तु । नैवमन्यस्मै कृता नतिरुन्नतिदेति तुभ्यं ते इव नमस्तुभ्यमस्तु नान्यस्मा इत्यन्वयस्तच्छब्देनेवार्थकेन द्योत्यते । गतम् । हे ते आनन्दमूर्त इति वा ॥ १३ ॥ अभिमुखं त इत्यादिश्लोकत्रिके लोकाः सपालाः प्रकल्पिता इति मिथ्याभूता आरोपिता इत्यन्यथाप्रतीतिं वारयितुं त्वयीत्यस्य तृतीयात्वमभ्युपेत्यान्वयं प्रदर्श्य मानेन तत्तात्पर्यमाह । त्वयैव प्रकल्पिता इति । प्रकर्षेणोत्पादिता यतो विष्णोरङ्गेभ्यः समुद्भूतास्ततो देवता विष्णोरङ्गान्युच्यन्ते । स्वरूपाद्भेदिनो भेदवन्तश्चेदपि सर्ववेदेषु ब्राह्मणोऽस्य मुखमासीदित्यादिषु । यस्माद्यज्जायते चाङ्गाल्लोकवेदादिकं हरेः । तन्नामवाच्यमङ्गं तद्यथा ब्रह्मादिकं मुखमित्यादेः । कार्यकारणशब्दसाङ्कर्याद्वा अङ्गानीत्यङ्गानि देवा इत्यप्यर्थः ॥ ततः श्लोकार्थः ॥ सर्वसपर्वसपर्या त्वय्येव पर्यवस्यतीत्येतत्स्थेम्ने प्रागुक्ताङ्गभूता इति विवृण्वन्नाह । अग्निर्मुखमिति । तेऽग्निर्मुखम् । मुखादिन्द्रश्चाग्निश्चेत्यादेः । अवनिर्भूस्तेऽङ्घ्रिः । पद्भ्यां भूमिरिति श्रुतिः । एकवचनं च परस्परं कार्यकरत्वादिति ज्ञेयम् । ईक्षणं सूर्यः । चक्षोः सूर्योऽजायत । नभो नाभिः । नाभ्या आसीदन्तरिक्षम् । श्रुतिर्दिशः श्रोत्रात् । एकवचनं चोक्तगतिकम् । एवं सजातीयें सर्वत्र ज्ञेयम् । कं द्यौः शीर्ष्णो द्यौः सुरेन्द्रा इन्द्राद्यास्तव बाहवः । बाहू राजन्यः कृतः । श्रुतेर्बाहुद्वितयमात्रार्थकत्वभ्रमं भ्रंशयितुं बाहव इति तद्विवरणं कृतमित्यवधेयम् । सत्यलोकपालो ब्रह्माऽग्निः कुबेरो निर्ऋतिश्चेतान्विहायेतरे बाहुजाः । अग्निर्मुखमिति पृथग्गृहीत इति वचनबाहुजः । यथोक्तम् । बाहवो लोकपालानां प्रायशः क्षमकर्मणामिति श्लोकतात्पर्ये द्वितीयस्कन्धे ब्राह्मणवैश्यादीन्वर्जयितुं प्रायश इतीति । सत्यादिलोकपालेषु ब्रह्माऽग्नी ब्राह्मणौ कुबेरो वैश्यो नैर्ऋतिः शूद्र एतेषां बाहुजत्वं परिहर्तुमिति यादुपत्योक्तविस्तरः क्वचिद्व्यत्यासश्च कल्पभेदसमाधेयश्च द्वितीयाज्ज्ञेयः । अर्णवं समुद्रः कुक्षिस्त्वदुदरभवस्तदाश्रितश्च । अर्णव इत्यपि पाठोऽस्ति सोऽक्लेशिष्ठार्थः । मरुत्प्राणः प्राणाद्वायुः प्राणेन सहितं बलं तत्र विद्यमानसामर्थ्यं च । एवमेव सर्वत्रापि पूर्वोक्तैरग्न्यादौ पाचनादिशक्तयो ग्राह्या इति ध्येयं परिवर्तनं वा । इत्येतत्सर्वं प्रकल्पितं त्वयैवोत्पादितं त्वयैव तदाश्रितत्वेन च प्रकृतमित्यर्थः । अर्णवमिति पाठोऽपि विना शेषमशेषहर्षविदः । तथा ह्युक्तमनुव्याख्यानसुधयोः । तस्माच्छास्त्रेण जिज्ञास्यमस्मदीयगुणार्णवम् । वासुदेवाख्यमद्वन्द्वं परं ब्रह्माखिलोत्तमम् । अर्ण इवाचरतीति क्विपि कृतेऽर्णवतेः पचाद्यचि कृतेऽर्णवशब्दः स्त्रीलिङ्गः साधुरिति ॥ १४ ॥ वृक्षाश्चौषधयश्च रोमाणि श्मश्र्वादीनि शिरोरुहाः केशा मेघास्ते परस्यास्थिनखान्यद्रयः । नखोऽस्त्री नखरोऽस्त्रियामित्यमरः । निमेषणं निमेषोन्मेषौ रात्र्यहनी प्रजापतिर्दक्षो मेढ्रं शिश्नो वृष्टिस्तव वीर्यं रेत इष्यते प्रामाणिकैः सर्वत्रान्वेति ॥ १५ ॥ हे अव्ययात्मन् तस्मिन्पुरुषे त्वयि त्वया बहुजीवसङ्कुलाः सपाला लोकाः कल्पिता उत्पादिता अङ्गेभ्यः । तत्रैव तिष्ठन्ति चेत्यत्र निदर्शने आह । यथा जल इति । जलौकसो मत्स्याद्यास्तत्र जले सञ्जिहते सञ्जायन्तो तदोकसश्च परस्परमज्ञातायां चोदुम्बरे जन्तुफले मशकाः कृमिविशेषास्तत्रैवोत्पाद्यन्तो परस्परमज्ञाश्च । तथा मनोमयें ज्ञानात्मकेऽहं प्रकल्पितं पश्यामीत्यन्वयः ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं निर्दोषत्वमुक्त्वा माहात्म्यं निरूप्य नमस्कृत्य अवयवानां स्वरूपमाह अग्निर्मुखमिति । सर्वदेवतात्मको भगवानिति वक्तुं सर्वे अवयवाः देवतात्वेन निरूप्यन्ते योऽग्निः स ते मुखं या अवनिर्भूमिः सा ते अङ्घ्रिः यः सूर्यः स ते ईक्षणं चक्षुः नभस्त्वाकाशः नाभिः एतानि महाभूतान्यपि भवन्तीति केवलं देवता एवाग्रे निरूप्यन्ते । अथो इति । दिशस्ते श्रुतिः श्रोत्रं द्यौः स्वर्गः ते कं शिरः सुरेन्द्राः ते बाहवः अर्णवाः समुद्राः ते कुक्षिः मरुद्वायुस्ते प्राणः स्थूलरूप एवायं सूक्ष्मरूप इति ज्ञात्वा तथा निरूपयति नतु पुरुषोत्तममेनं जानाति यत्किंचित् प्रकल्पितं लोके कृतिसाध्यं तत्ते बलम् ॥ १३ ॥ रोमाणीति । वृक्षौषधयस्ते रोमाणि मेघाः शिरोरुहाः ननु बाधितोऽयमर्थः कथमुच्यत इत्याशङ्क्य सर्वसमाधानार्थं च निरूपयति । परस्य त इति । त्वं परः स्वराट् परब्रह्म वा अद्रयः ते अस्थिनखानि च रात्र्यहनी तु प्रजापतेः संवत्सरात्मकस्य कालस्य ते निरीक्षणं निमीलनं रात्रिरुन्मीलनमहरिति । प्रजापतिस्ते मेढ्रं गुह्यमिन्द्रियं वृष्टिस्तु तव वीर्यं तु शब्दस्तु केशाम्बुत्वं व्यावर्त्तयति । ननु कथं साध्यसाधनयोर्विरुद्धरूपत्वमित्वाशङ्क्य प्रमाणमाह । इष्यत इति । प्रामाणिकानामियमिष्टिः दिवि चलन्तीति मेघानां कोशत्वं वृद्धिः सर्वोत्पत्तिसाधनमिति रेतस्त्वं तस्य चोच्यते ॥ १४ ॥ एवमवयवान् निरूप्य सर्वलोकाधारत्वं निरूपयति । त्वय्यव्ययात्मन्निति । एतेषामाधारत्वेन उपचयापचयायाशङ्क्य पुरुषरूपे त्वयि पातालमेपस्य हि पादमूलमिति न्योयन अव्ययात्मनि सर्वे लोकाः प्रकल्पिताः विशेषेण रचिताः भगवतो भारमाशङ्क्य दृष्टान्तमाह । यथा जले सञ्जिहते इति जले मत्स्यादिजीवास्तिष्ठन्तीति न तावतापि तस्य कश्चन भारो भवति एवं भगवत्यपि सर्वे लोकाः सञ्जिहते संहतास्तिष्ठन्ति अचेतनस्य दृष्टान्तो विषम इति चेतनमाह । उदुम्बरे वा यथा मशका इति । एकैकस्मिन् फले कोटिशो मशकाः तत्रैवोत्पन्नाः तत्र तिष्ठन्ति एकत्र बहवश्च भवति यथा जलौकसां जलमेव स्थानं तथौदुम्बर एव मशकानामपि एतदपि प्रत्यक्षसिद्धं न भवति को वेदोदुम्बरस्य मशकैः क्लेशोऽस्ति नवेति शरीरावयवेषु जीवानां स्थितौ तत्रोत्पन्नानामपि क्लेशो भवतीत्याशङ्क्य दृष्टान्तान्तरमाह । मनोमय इति । मनोरथे यथा जीवा विषयासक्तमानसः सुखदा एव भवन्ति नतु भारकल्पाः तथा भगवत्यपि सुखार्थमेव कल्पितास्ते लोकास्तिष्ठन्ति नतु भाररूपा भवन्ति ॥ १५ ॥

एवं भगवदवयवानां सर्वाधारत्वं सर्वदेवतारूपत्वं च निरूप्य तादृशस्य महतः लोके जुगुप्सितरूपेणावतरणं न युक्तमित्याशङ्क्य अवतारप्रयोजनमाह । यानि यानीति । हे भगवन्नानाविधक्रीडार्थं जले स्थले अरण्ये सर्वत्र क्रीडार्थं मत्स्यादिरूपाणि करोषि तावतापि न तेषां रूपाणां लोके निन्दा किन्तु यानि यानि रूपाणि त्वं विभर्षि क्रीडार्थं कृतत्वात्तव नातीवादरः तथापि तैः रूपैः आमृष्टशुचः सर्वतो नाशितशोकाः सर्व एव लोकाः ते यशो मुदा गायन्ति अतो लोकानां गानार्थं तव चरित्रं तेन च सर्वपुरुषार्थसिद्धिः सर्वेषां दुःखनाशार्थमवताराणि चेत्युक्तं मुदा गायन्तीत्यनेन चरित्राणां स्वतः पुरुषार्थता च निरूपिता ॥ १६ ॥

श्रीसुबोधिनी-सारः

अग्निस्ते तव मुखम् अवनिर्भूरंघ्रिः पादः सूर्य ईक्षणं नेत्रं नभः खं नाभिः दिशः श्रुतिः कर्णः द्यौः स्वर्गः कं शिरः सुरेन्द्रा इन्द्रादयस्ते बाहवः अर्णवाः समुद्राः कुक्षिः प्राणश्च बलं च तत् मरुत् वायुः प्रकल्पितम् ॥ १३ ॥ वृक्षौषधयो रोमाणि मेघाः शिरोरुहाः केशाः परस्य तेऽद्रयः पर्वता अस्थिनखानि रात्रिदिनं निमेषणं नेत्रोन्मीनलनिमीलनं प्रजापतिर्मेढ्रः वृष्टिर्वर्षणं तव वीर्यं रेत इष्यते ॥ १४ ॥ अव्ययात्मनि पुरुषे त्वयि सम्बोधनं वा सपालाः पालैः सहिता बहुभिर्जीवैः संकुला व्याप्ताः लोकाः प्रकल्पिता मनोमय इति विशेषणं शुद्धं तदयोगात् यथा जले जलौकसो जीवाः संजिहते प्रचलन्ति उदुम्बरे फले मशका वा ॥ १५ ॥ यानि रूपाणि क्रीडनार्थं त्वं विभर्षि तै रूपैरामृष्टा परिमार्जिता शुक् येषां ते लोका इह लोके ते यशो मुदा हर्षेण गायन्ति हि युक्तम् ॥१६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उक्तं सर्वात्मकत्वमेव स्पष्टयति—अग्निरित्यादिना । अत्राग्न्याद्यनुवादेनेश्वरमुखाद्यवयवता विधीयते । योऽयमग्निः स तव मुखमित्यादि । अवनिस्तवाङ्घ्रिः अवनिशब्दः पातालप्रभृतिमहीतलपर्यन्तसङ्ग्राहकः, अङ्घ्रिशब्दस्तु पादमूलप्रभृतिजघनपर्यन्तावयवसङ्ग्राहकः, 'पातालमेतस्य हि पादमूलम्' इत्युक्तत्वात् । सूर्य ईक्षणं चक्षुः सर्वत्रैकवचनं जात्यभिप्रायेण । नभो नाभिः अत्रापि नभःशब्दो भुवर्लोकप्रभृतितपोलोकपर्यन्तसङ्ग्राहकः, नाभिशब्दस्तु तत्प्रभृतीनामुरोग्रीवावदनललाटपर्यन्तानां सङ्ग्राहकः । अथ अपि च दिशः श्रुतिः श्रोत्रम् । द्यौः सत्यलोकस्तव कं मूर्धा । सुरेशाः इन्द्रादयस्तव बाहवः । अर्णवाः समुद्रास्तव कुक्षिः । मरुद्वायुस्तव प्राणः बलं च, तत् कल्पितमुपासकैर्ध्यानार्थमिति शेषः ॥१३॥ वृक्षा औषधयश्च तव रोमाणि । मेघास्तु तव शिरोरुहाः केशाः । अद्रयः पर्वताः परस्य परमेश्वरस्य तवास्थीनि नखानि च । रात्रिश्चाहश्च तव निमेषणम्, तत्र रात्रिर्निमीलनं अहश्चोन्मीलनम् । प्रजापतिर्ब्रह्मा तव मेढ्रः गुह्यमिन्द्रियम् । वृष्टिस्तु तव वीर्यं रेतः । तत्र प्रमाणमाह—ईष्यते प्रामाणिकैरुपासनायामिति शेषः ॥ १४ ॥ न केवलमेतावत् एव, किन्तु बहुभिर्जीवैः सङ्कुलाः व्याप्ताः सपालाः पालकैः सहिताः सर्वे लोकाः अनन्तानि ब्रह्माण्डानि त्वयि कल्पिताः रचिताः सन्तः संजिहते प्रचरन्ति । 'एवं सर्वात्मत्वे जन्मादिविकारित्वं स्यात्' इत्यत आह—अव्ययात्मन्निति । लुप्तसप्तम्यन्तं पदम् । अव्ययः सर्वविकाररहितः आत्मा स्वरूपं यस्य तस्मिन्नित्यर्थः । एकस्य कथं सर्वाधारत्वं तत्राह—पुरुष इति, पूर्ण इत्यर्थः । ननु 'एवंभूतस्य ज्ञानं कुतो न' इत्यपेक्षायामाह—मनोमय इति । विशुद्धमनोग्राह्य इत्यर्थः 'मनसैवानुद्रष्टव्यः' 'दृश्यते त्वग्रया बुद्ध्या' इत्यादिश्रुतेः । तत्र दृष्टान्तद्वयमाह—यथेति । जलौकसो मत्स्यादयः यथा सावकाशं जले सञ्जिहते प्रचरन्ति नहि तेन जलस्य कापि क्षतिस्तथेत्यर्थः । अथवा उदुम्बरे उदुम्बरवृक्षे मशकाः कीटविशेषाः । उदुम्बरवृक्षे हि असङ्ख्यातानि फलानि भवन्ति तेषु च प्रत्येकं परस्परवार्तानभिज्ञा मशकास्तिष्ठन्ति, एवमेकस्मिन्नेव त्वयि अनन्तानि ब्रह्माण्डानि निवसन्ति, तेषां लोकेषु तत्तत्स्थानेषु परस्परवार्तानभिज्ञा जीवा निवसन्तीत्यर्थः ॥ १५ ॥ तर्हि तेषां जीवानां निस्तारः कथं तत्राह—यानीति । इहलोके क्रीडनार्थं त्वं यानि यानि मत्स्यादिरूपाणि विभर्षि तैरनुचिन्तितरूपैरामृष्टाः परिमार्जिताः शुचः आध्यात्मिकादितापा येषां ते लोका जनाः मुदा तव यशो गायन्ति, तेन तेषां निस्तार इति शेषः ॥ १६ ॥

अन्वितार्थप्रकाशिका

अग्निरिति । योऽयमग्निः स ते मुखम् अवनिः ते अङ्घ्रिः सूर्यः ईक्षणं चक्षुः । सर्वत्रैकवचनं जात्यभिप्रायेण । नभः नाभिः अथ अपि च दिशः श्रुतिः श्रोत्रं द्यौः सत्यलोकस्तव कं मूर्धा सुरेशाः इन्द्रादयस्तव बाहवः अर्णवाः समुद्रास्तव कुक्षिः मरुद्वायुस्तव प्राणः बलं च तत् उपासकैर्ध्यानार्थं कल्पितम् ॥ १३ ॥ रोमाणीति । वृक्षा ओषधयश्च तव रोमाणि मेघास्तु तव शिरोरुहाः केशा अद्रयः पर्वताः परस्य परमेश्वरस्य तवास्थीनि नखानि च रात्रिश्चाहश्च तव निमेषणं तत्र रात्रिर्निमीलनम् अहश्चोन्मीलनं प्रजापतिर्ब्रह्मा तव मेढ्रः गुह्यमिन्द्रियं वृष्टिस्तु तव वीर्यं रेतः प्रामाणिकैः इष्यते ॥ १४ ॥ त्वयीति । हे अव्ययात्मन् ! लुप्तसप्तम्यन्तं वा । बहुभिर्जीवैः सङ्कुलाः व्याप्ताः पालकैः सहिताः सर्व लोकाः अनन्तानि ब्रह्माण्डानि पुरुषे पूर्णरूपे मनोमये मनःप्रधाने विशुद्धमनोवृत्तिग्राह्ये त्वयि कल्पिताः सन्तः यथा जले जलौकसः सूक्ष्मप्राण्यण्डराशयः यथा वा उदुम्बरे फले मशकास्तथा परस्परवार्त्तानभिज्ञा एव यथावकाशं संजिहते प्रचरन्ति । तत्र ब्रह्माण्डानि सृष्टिप्रलययोरन्तर्बहिर्भवन्ति सपाला ब्रह्मादयोऽप्य-

धिकाराधिकारयोरारोहन्ति पतन्ति च । बहवोऽन्ये जीवाश्च इहामुत्र गतागतं कुर्वन्ति इति न हि तैस्तव कोऽपि विकारः ॥ १५ ॥ यानीति । इह लोके क्रीडनार्थं त्वं यानि यानि मत्स्यादिरूपाणि बिभर्षि तैरनुचिन्तितै रूपैरामृष्टाः परिमार्जिताः शुचः शोकमोहादयो येषां ते लोका जनाः मुदा तव यशो गायन्ति ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इत्थं पुरुषोत्तमस्वरूपं स्तुत्वा इदानीं तस्य विराटरूपेण स्तुतिं करोति अग्निरिति श्लोकद्वयेन अग्निस्ते मुखं इक्षणं चक्षुः श्रोत्रं कं मस्तकं सुरेन्द्राः इन्द्रादयो लोकपालाः मरुत् वायुः प्राणबलं प्राणश्चबलं च तत् द्वन्द्वैक्य ॥ १३ ॥ शिरोरुहाः केशाः अद्रयः परस्य वैराजरूपस्य तेऽस्थिनखानिमेढ्र उपस्थः ॥ १४ ॥ हे अव्ययात्मन् मनोमये नमः संकल्पप्रधाने सूत्रात्मनि पुरुषे च बहुजीवैः संकुलाः संकीर्णाः यथा जलौकसो जलनिवासिनो जन्तवः जले संजिहते संगच्छंते यथा च उदुम्बरेमशकाः तत्फलेसूक्ष्म जन्तवः स्थिताः तद्वत् ॥ १५ ॥ एवं भूतस्त्वमिहावतारान् करोषीत्याह यानीति आमृष्टापरिमाजिता शुकशोकायेषा ते लोकाः साधवः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तं चिदचिच्छरीरकत्वमेव प्रपञ्चयितुं विश्वरूपतया स्तौति अग्निरित्यादिना । अग्निरिति तत्राग्न्याद्यनुवादेनेश्वरमुखाद्यवयवता विधीयते । अग्निर्योऽयं वह्निः, ते तव मुखं अस्ति अवनिर्येयं पृथ्वी, ते अङ्घ्रिश्चरणः, अत्रावनिशब्दः पातालप्रभृतिमहीतलसंग्राहकः, अङ्घ्रिशब्दस्तु पादमूलप्रभृतिजघनपर्यन्तावयवसंग्राहकः । 'पातालमेतस्य हि पादमूलम्' इत्यादिस्थानप्रामाण्यात् सूर्यः ईक्षणं दृष्टिः, नभः नाभिः, नभःशब्दः भूर्लोकप्रभृति तपोलोकपर्यन्तसंग्राहकः । नाभिशब्दस्तु तत्प्रभृतीनामुदरग्रीवावदनललाटानां संग्राहकः । अथो दिशः श्रुतिः तव श्रोत्रं, द्यौः सत्यलोकः कं तव शिरः, सुरेन्द्राः सुरेशाः इन्द्रादयो देवा इत्यर्थः । तव बाहवः, अर्णवाः समुद्राः तव कुक्षिः, मरुद्वायुः तव प्राणश्च बलं च तयोः समाहारः, प्रकल्पितं रचितम् । उपासकैरिति शेषः । कल्पितं ध्यातमिति वा ॥ १३ ॥ रोमाणीति । वृक्षाश्चौषधयश्च, तव रोमाणि, मेघाः शिरोरुहाः केशाः अद्रयो गिरयः, परस्य सर्वोत्तमस्य, ते तव, अस्थीनि च नखानि च, रात्र्यहनी रात्रिश्च अहश्च निमेषणं प्रजापति मेढ्रः, वृष्टिस्तु तव । न केवलमेतावदेव किं तु सर्वोऽप्ययं प्रपञ्चस्त्वदवयवभूत एवेत्याह । त्वयीति । हे अव्ययात्मन् अविकृतस्वरूप, बिश्वशरीरकत्वेऽपि तद्गतविकारैरस्पृष्टेत्यर्थः । बहवश्च ते जीवाश्च तैः संकुला व्याप्ताः, सपालाः पालकैः सहिताः, लोका ब्रह्माण्डानि, मनोमये विशुद्धमनोग्राह्ये पुरुषे त्वयि, परमपुरुषे भवतीत्यर्थः । प्रकल्पिताः सम्यक् स्थिताः सन्तः, संजिहते प्रचरन्ति । कथमिव । यथा जले जलौकसः सूक्ष्मप्राण्यण्डराशयः, संजिहते यथा उदुम्बरान्तः जन्तुफलान्तः केसरप्रदेशेऽपि, मशकाः परस्परवार्त्तानभिज्ञाः जन्तवः, संजिहते । एवमपरिमितानि ब्रह्माण्डानि त्वयि चरन्तीति भावः ॥ १५ ॥ तस्मादेवंभूतं त्वत्स्वरूपं दुरवगाहमिति त्वदवतारकथामृतमेव भवज्जनाः सेवन्ते इत्याहुः । यानि यानीति । हे कृष्ण, त्वं क्रीडनार्थं क्रीडां विधातुमित्यर्थः । यानि यानि रूपाणि मत्स्यकूर्माद्यवतारान् , इह लोके, बिभर्षि । तैः शरणीकृतैस्तैरवतारैः, आमृष्टाः अपगताः शुच आध्यात्मिकादितापोपभोगजाः शोकाः येषां ते तथाभूताः, लोकाः रसज्ञा जनाः, मुदा ते तव, यशः गायन्ति ॥ १६ ॥

कृष्णप्रिया

अब इस श्लोक से भगवान् सर्वरूप है यह समझ कर प्रणाम करते हैं कि—यह आपका मुख है पृथ्वी आपके चरण है, सूर्य आपकी चक्षु है, आकाश आपकी नाभि है पुनः सर्व दिशाएँ आपका श्रोत्र है, यह स्वर्ग आपका मस्तक है, इन्द्रादि देव आपकी भुजा है, समुद्र आपकी कोखें है, मरुत् आपके प्राण है, कर्म बल है ॥ १३ ॥ वृक्ष एवं औषधियाँ आपके रोमरोंगट है, मेघ आपके मस्तक के केश है, आप सर्व रूप होते हुए भी सर्व से पर भगवान् है ऐसे पुरुषोत्तम की हड्डियाँ और नख ये पर्वत है रात्री एवं दिवस आपकी पलकें हैं, पलकों का खुलना दिवस है और मूँदना रात्री है, और ये जो प्रजापति है वे आपकी गुह्येन्दिय है, और यह वृष्टि है वह आपका वीर्य है ॥ १४ ॥ यदि समस्त लोक भगवान् में रहते हैं तब भगवान् को श्रम-भार नहीं होगा इस संदेह का समाधान करने कहते हैं कि—जैसे जल में पैदा हुए अनन्त जलचर जन्तु एवं गूलर के फल में असंख्य मशक जन्तु और मनोरथ में रहे हुए अनन्त जी और विषय रहते हैं लेकिन बोझा मालुम नहीं होना वैसे ही अनन्त जीवों से भरे हुए सारे लोक, समस्त लोकपाल, निर्विकार आत्मस्वरूप भगवान् के श्री अङ्गों में रहने पर भी श्रम नहीं होता, लेकिन आनन्द ही होता है ॥ १५ ॥ पूर्व के चार श्लोकों से भगवान् के सर्व अवयव सबके आधार है एवं सर्व देवता मय यह निरूपण किया अब भगवान् के सर्वमङ्गल के लिए हैं यह निवेदन करते स्तुति करते हैं कि हे नाथ ? भूतल पर क्रीडा करने के लिए आप जिन जिन स्वरूपों का अङ्गीकार करते हैं उन अवतारों के लिए निश्चय है कि समस्त लोकों का कल्याण होता है । अवतारों से समस्त लोक शोक मुक्त होकर प्रसन्नता को पाते है और आनन्द मग्न होकर आवका उज्ज्वल यश को गाते है ॥ १६ ॥

नमः कारणमत्स्याय प्रलयाब्धिचराय च । हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥ १७ ॥
अकूपाराय बृहते नमो मन्दरधारिणे । क्षित्युद्धारविहाराय [1]नमः शूकरमूर्तये ॥ १८ ॥
नमस्तेऽद्भुतसिंहाय साधुलोकभयापह । वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ॥ १९ ॥
नमो भृगूणां पतये [2]दृप्तक्षत्रवनच्छिदे । नमस्ते रघुवर्याय रावणान्तकराय च ॥ २० ॥

कर्दमक्षमा

अन्वयः—प्रलयाब्धिचराय, कारणमत्स्याय, नमः, च, मधुकैटभमृत्यवे, हयशीर्ष्णे, तुभ्यम्, नमः ॥ १७ ॥ मन्दरधारिणे, अकूपाराय, बृहते, नमः, क्षित्युद्धारविहाराय, शूकरमूर्तये नमः ॥ १८ ॥ साधुलोकभयापह ? अद्भुत सिंहाय, नमः, च, क्रान्तत्रिभुवनाय, वामनाय, तुभ्यम्, नमः ॥ १९ ॥ दृप्तक्षत्रवनच्छिदे, भृगूणाम्, पतये, नमः, च रावणान्तकराय, रघुवर्याय, ते, नमः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतः स्वयमप्यवतारान्नमस्यति । नम इति । हयशीर्ष्णे हयग्रीवाय । मधुकैटभयोर्मृत्यवे निहन्त्रे ॥ १७ ॥ अकूपाराय कूर्माय । क्षित्युद्धारो विहारो यस्य तस्मै ॥ १८-१९ ॥ भृगूणां पतये परशुरामाय ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतः सर्वलोकगीतमवतारकथामृतमतो हेतोः । स्वयमक्रूरः । नमस्यति नमस्कारं करोतीत्यर्थः । कारणमत्स्याय मन्वाद्यवनं निमित्तीकृत्य मत्स्यवपुर्धृतवत इत्यर्थः । मदं दैत्यदर्पं स्यति नाशयतीति मत्स्य इत्यन्वर्थतामाह । मत्स्यानां जलजीवनत्वादाह—प्रलयेत्यादि । किञ्च—प्रलयाब्धिविदारणमप्यन्यस्याशक्यमितीश्वरतामप्याह—च । चेति वक्ष्यमाणसमुच्चये । कारणमत्स्याय सर्वकारणरूपमत्स्याय, तद्रूपस्य नित्यत्वादिकमभिप्रेतम् । यद्वा—कारणेन सत्यव्रतोपदेशादिना मत्स्यायेति कारणत्वमग्रेऽपि ज्ञेयम् ॥ १७ ॥ कुं भूमिं तदवयवभूतं गिरिं वा पिपर्ति बिभर्तीति कूपारः । पृषोदरादित्वात्पूर्वपदस्य दीर्घः धातूनामनेकार्थत्वाद्धरणेऽपि पृधातुरस्तीति । न कूपारो यस्मात्सोऽकूपारस्तस्मै 'अकूपारोऽब्धिकच्छपे' इति हलायुधः । अब्धिश्च कच्छपश्चेति समाहारद्वन्द्वः । बृहते नित्यवृद्धाय । शुभं सुखं वा करोति पृथ्व्युद्धृत्यसुरनाशाभ्यामिति शू (सू) करः पृषोदरादित्वात् । "तालव्या अपि दन्त्याश्च शम्बशम्बरशूकराः" इति द्विरूपकोशात् । "अकूपारः समुद्रे स्यात्कूर्मराजेऽपि कीर्तितः" इति विश्वः॥१८॥अद्भुतोऽदृष्टपूर्वः, सिंहो नरत्वविशिष्टमृगेन्द्रस्तद्रूपाय । साधुलोकस्य देवादिजनस्य भयमसुरनिमित्तकमपहन्तीति तथा । क्रान्तं पादैर्मितं भुवनत्रयं येन तस्मै ॥ १९ ॥ रघुषु तदपत्येषु वर्याय वरीतुमर्हाय । कुठारायुधत्वाद्वनरूपकम्, तेन तेषां तत्र किञ्चिदपि कर्तुमक्षमत्वं व्यञ्जितम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सर्वकारणरूपाय मत्स्यायेति तद्रूपस्य नित्यत्वादिकमभिप्रेतम् । एव कारणत्वमग्रेऽपि ज्ञेयं चकारात् सत्यव्रतोपदेशादिकारणेन । एवमन्येऽपि चकारा योज्याः । तुभ्यमित्यत्र च योज्यम् ॥ १७ ॥ "अकूपारः समुद्रे स्यात् कूर्मराजेऽपि कीर्तित" इति विश्वः । बृहत इति । योजनलक्षविस्तारात् । शूकरस्य मूर्त्तिरिव मूर्त्तिर्यस्येति प्राकृतशूकरत्वं निरस्तम् अप्राकृततदाकारत्वेनैव च तत्संज्ञत्वं विहितम् ॥ १८ ॥ तथा भूतत्वेऽपि हे साधुलोकभयापह ! ॥ १९ ॥ कुठारायुधत्वाद्वनरूपकं तेन तेषां तत्र किञ्चिदपि कर्तुमक्षमत्वं व्यञ्जितम् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कारणेन सत्यव्रतानुग्रहेण, यद्वा, कारणरूपाय मत्स्यायेति तद्रूपस्य नित्यत्वादिकमभिप्रेतम्, एवं समासान्तःप्रविष्टोऽप्ययं कारण-शब्दोऽग्रेऽप्यनुवर्त्यः, 'च' कारात् सत्यव्रतं प्रति तत्तदुपदेशादि, तुभ्यमेतयस्य पूर्वेण परेणाप्यन्वयः, एवमग्रेऽपि तत्तद्रूपेण तं प्रत्येव नमस्कारात् ॥ १७ ॥ 'अकुपारः समुद्रे स्यात् कूर्म्मराजेऽपि कीर्त्तित' इति विश्वः । 'बृहते' इति योजनलक्षविस्तारात्, क्षित्युद्धारेति लीलया तदुद्धार उक्तः । शूकरवन्मूर्त्तिराकृतिरेव यस्येति मत्स्यादिभ्योऽस्यैश्वर्य्यविशेषप्रकटनं सूचितम्, तच्च लीलया पृथ्वीसमुद्धार-निजभक्ति-श्रीमथुरामाहात्म्यादिकथन-विश्वक्षोभण महार्णव-क्रीडादिना वाराह-कालिका पुराणादौ प्रसिद्धमेव, एवमग्रेऽपि ॥ १८ ॥ अद्भुतः—अर्द्धनराकारत्वेनालौकिको यः सिंहस्तस्मै नृसिंहायेत्यर्थः । साधुलोकानां सर्व्वेषां शिष्टानामभयाय भयनिवर्त्तकाय, चकारादसाधुनाशनादि, भयापहेति पाठः स्पष्ट एव । क्रान्तानि त्रिभिः पदैराक्रान्तानि त्रिभुवनानि येन तस्मै; चकाराच्छ्रीबल्यनुग्रहाऽपि ॥ १९ ॥ भृगूणां पतये, भृगुकुलजातत्वात्, एवमग्रेऽपि । दृप्त दर्पणामर्यादं विप्रकुलातिक्रमाद्

---

[1] सुकर—श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [2] दुष्ट—पु. टि. ।

यत् क्षत्रं क्षत्रियजातिस्तदव वनं बहुलत्वात्तच्छिनत्तीति तथा तस्मै इति परश्वायुधत्वम्, दृष्टत्वेन सर्व्वेषां क्षत्रियाणां बहुशो हननञ्च सूचितम्। रावणस्यान्तकरत्वेन कुम्भकर्णादि-तदनुगानां बधोऽपि सूचित एव, च-कारादार्य्यधर्म्मप्रदर्शनादि ॥ २० ॥

श्रीमद्वीरराधवाचार्यकृता भागवतचन्द्रचन्द्रिका

कानि तानि रूपाणि यैरामृष्टशुच इत्यत्र कानिचिन्निदर्शयन्नमस्करोति। नम इत्यादिना। कारणमत्स्याय जगत्स्थिति-कारणभूताय मत्स्याय कारणपदेनावतारप्रयोजनं सूच्यते एवं मधुकैटभमृत्यवे इत्यनेन एवमुत्तरत्रापि द्रष्टव्यम् ॥ १७ ॥ अकूपाराय कूर्माय क्षित्युद्धार एव विहारो यस्य तस्मा इति प्रयोजनमुच्यते ॥ १८ ॥ हे साधुलोकभयापह! इति सम्बोधनं प्रयोजन-कथनाभिप्रायकं क्रान्तं त्रिभुवनं येन तस्मै इत्यवतारप्रयोजनमुच्यते ॥ १९ ॥ दृप्तं गर्बितं प्रभूतं वा क्षत्रकुलमेव वनं तस्य च्छेत्रे इति प्रयोजनं दुष्टक्षत्रेति च पाठः भृगूणां पतये परशुरामाय रावणस्यान्तं नाशं कृतवानिति तथा तस्मा इति प्रयोजनम् ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कारणमत्स्याय मन्वादिरक्षणं निमित्तीकृत्य मत्स्यवेषधारिण इत्यर्थः। असुरमदं स्यति नाशयतीति मत्स्यः "षोऽन्त-कर्मणीति" धातुः मत्स्यानामुदकमेव परं जीवनमिति सूचनाय प्रलयाब्धिचरायेति प्रलयाब्धिचरणमन्यस्य न शक्यमिति ईश्वरत्व-द्योतनाय वा चशब्दो वक्ष्यमाणसमुच्चये वर्तते मधुकैटभमृत्यवे केशवाय ॥ १७ ॥ अकूपाराय कूर्मरूपाय "कूर्मे चाब्धावकूपार" इति बृहते नित्यबृद्धाय किङ्कृत्यमित्यत उक्तं मन्दरेति ॥ १८ ॥ साधुलोकभयापह! देवजनस्य बल्यादेः प्राप्तभयमपहन्तीति क्रान्तत्रिभुवनाय त्रिविक्रमाय ॥ १९–२० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सर्वकारणरूपाय मत्स्याय ॥ १७–२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तान्येव कानीत्याकाङ्क्षायामाह। नम इति षड्भिः। सर्वकारणरूपायेति। तद्रूपस्य नित्यत्वादिकमभिप्रेतम्। एवं कारणत्वमग्रेऽपि ज्ञेयम्, प्रलयाब्धिचरायेति तत्रेतस्ततश्चलनमेव क्रीडनम्। एवमग्रे मधुकैटभहननादीन्येव क्रीडनानि ज्ञेयानि। अकूपाराय कूर्माय अकूपारः समुद्रे स्यात् कूर्मराजेऽपि कीर्त्तित" इति विश्वः ॥ १७–२१ ॥

गूढार्थदीपिनी

अकूपाराय कूर्माय ॥ १८–१९ ॥ दृप्तं क्षत्रं क्षत्रियकुलमेव वनं तच्छिनत्तीति तस्मै परशुरामाय ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अतः व्यूहाङ्गिवसुदेवसहितान् कांश्चिदवतारान्स्वयमपि नमस्यति। नम इति षड्भिः ॥ १७ ॥ अकूपाराय कूर्माय ॥ १८–२२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यानि यानीहेति पद्येऽवताराणां कादाचित्कता प्रतीयते। सा च मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रह इत्यवतारसन्तता-प्रतिपादकागमबाधितेति प्रमाणेन व्याकरोति॥ भृतामिति। सदा भृतामेवावतारतनुमीशो बिभर्ति। तथाऽप्यसुराणां मोहाय व्यक्त्यपेक्षया बिभर्तीत्युच्यत इति लडुपपद्यत इत्यर्थः। ततश्चायं श्लोकार्थः ॥ यानि यानि पदमेकं। क्रीडनार्थं बिभर्षि तैस्तैः। तैरिति द्वितीयस्य शेषः। विस्तृतं स्कन्धान्तरे तो तो पिबन्तु जिह्वयेस्येतद्भाष्यटीकाद्युदाहृत्य ततोऽनुसन्धेयं। आमृष्टा मार्जिताः शुचो येषां ते लोका मुदा ते यशो दिक्षु व्याप्तं कीर्तिविशेषं गायन्ति ॥ १७ ॥ यानि यानीह रूपाणीति साम्गुण्येनोक्तानीदानीमाविष्टानाविष्टरूपाणि किञ्चिच्चरितसहितानि सङ्गृह्य स्तौति॥ नम इति कारणमत्स्याय सत्यव्रतादिरक्षणं निमित्तीकृत्य मत्स्यरूपयुताय प्रलयोऽवान्तरस्कालिकोऽब्धिः समुद्रस्तत्र चरतीति स तथा तस्मै हयशीर्ष्णे तुभ्यं नमः। मधुकैटभावादिदैत्यौ तन्मृत्यवे मत्स्य-हयाननविशेषणं वा। स्वातन्त्र्येण केशवायेत्यव्याहृतविशेष्यपदेनान्वयो वा ॥ १८ ॥ अकूपाराय कूर्मराजाय। अकूपारः समुद्रे च कूर्मराजेऽपि कीर्तित इति विश्वः। बृहते पूर्णाय मन्दरगिरेः सूकरस्य मूर्तिर्यस्य सः। क्षित्युद्धारविहारायेति कृत्योक्तिः। अवतार-दशकमात्र वचननैर्भर्य्ये नेति द्योतयितुं समुद्रचरतास्मृतहयाननग्रहणमिति मन्तव्यं ॥ १९ ॥ अद्भुतत्वं च स्तम्भसम्भूतत्वेनेव द्वैरूप्येणापीति ज्ञेयं। साधुलोकाः प्रह्लादाद्यास्तद्भयापाह साधुलोका बल्याद्या इति वामनविशेषणं वा क्रान्तं त्रिभुवनं येन स तस्मै। नमस्तेऽद्भुतसिंहायेति छेदः। मस्तकावच्छेदनाद्भुतसिंहाय न सूकरमूर्तय इव ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यद्यप्यनन्तानि रूपाणि तथापि प्रसिद्धानि कानिचित् गणयन् महत्त्वख्यापनाय सर्वत्र नमस्यति। नमः कारणमत्स्यायेति। मत्स्याय ते तुभ्यं नमः ननु निन्दितो मत्स्यः किमिति भगवान् जातः इत्याशङ्क्याह। कारणेति। यदा मत्स्या जाताः

तदा बीजत्वेन कश्चिन्मत्स्यः पूर्वसिद्धः कारणत्वेनाङ्गीकर्त्तव्यः अन्यथा मत्स्यानामुत्पत्तिर्न स्यात् उदुम्बरादिषु मांसेषु वा जीवानामुत्पत्तौ कारणभूतरूपस्य तत्र स्थितिरवश्यमङ्गीकर्त्तव्या अन्यथा कारणरूपता भज्येत अनेन जगति यावन्ति रूपाणि भगवतः कारणरूपाणीति नहि भगवतः कस्मिंश्चिद्रूपे ग्रहीते विगानं भवति कारणार्थं वा प्रलये सत्यव्रतरक्षा वेदोद्धारश्च कार्यं तदर्थं मत्स्य इति तस्मै नमः तदपि रूपमुपास्यमिति प्रलयकालीनो योऽब्धिः तस्मिंश्चरतीति चरित्रं सत्यव्रतरक्षात्मकं वेदोद्धारः रूपद्वयेन कृत इति हयग्रीवरूपं च कृतवानित्याह हयशीर्ष्णे इति। हयस्य सिर एव शिरोभाग एव अङ्गं तु पुरुषमेव हयग्रीवावतारेण कृतं चरित्रमाह। मधुकैटभयोः मृत्युरिति। मधुकैटभौ तेन रूपेण हताविति मृत्युत्वात् स्वत एवोत्पन्नयोरपि वधे न कश्चिद्दोषः अत्युपकारत्वात् तस्मै ते तुभ्यं सर्वदा नमोऽस्त्विति प्रार्थयति ॥ १७ ॥ कूर्मं नमस्यति। अकूपारायेति। अकूपाः अनिम्ना आरा रेखा यस्येति कूर्मः योगप्राधान्यात् समुद्रवत् कूर्मस्यापि वाचकः अकूपारशब्दः समुद्रादप्यधिक इति जलचरत्वदोषपरिहारार्थमाह। बृहत इति। अतिस्थूलाय चरित्रमाह। मन्दधारिण इति। अमृतमथने मग्नं मन्दरं धृतवानिति क्षित्युद्धारार्थमेव विहारो यस्येति वराहरूपत्वेऽपि न काचित्क्षतिः अत एव रूपात् प्रथमतः चरित्रमुक्तं शूकररूपा मूर्तिर्यस्य ॥ १८ ॥ नमस्ते इति। अद्भुतसिंहोऽर्धसिंहः अर्द्धं च नरः वचनप्रामाण्यात् स्तम्भाद्वा निर्गमादद्भुतत्वं चरित्रमाह संबोधनेन साधुलोकानां प्रह्लादादीनां भयमपहन्तीति यद्यपि वामनोऽपि नावताररूपं किं तूपेन्द्र एव तथापि कार्यं तेन रूपेण कृतमिति वामनायेत्युक्तं क्रान्तानि त्रिभुवनानि पदक्रमैर्येन चेति बलिबन्धनादिकमपि कृतवान् ॥ १९ ॥ नम इति। भृगूणां पतये भार्गवोत्तमाय परशुरामाय चरित्रमाह। दृप्तं यत् क्षत्रं तदेव दैत्यत्वादतिप्रवृद्धं वनरूपं जापं तत् छिनत्तीति रघुवर्यः रघुवंशोत्पन्नेषु श्रेष्ठो रामचन्द्रः चरित्रमाह। रावणस्य अन्तकरायेति चकारादन्यदप्यनन्तमेव चरित्रं गृह्यते ॥ २० ॥

श्रीसुबोधिनी–सार

प्रपञ्चयति तानि प्रलयाब्धौ चरतीति तथा तस्मै कारणेन मत्स्याय नमः मधुकैटभयोर्मृत्यवे हन्त्रे हयशीर्ष्णेऽश्वग्रीवाय तुभ्यं नमः ॥ १७ ॥ मन्दरधारिणे बृहतेऽकूपाराय कूर्माय नमः क्षितेः पृथिव्या उद्धारो विहारः क्रीडा यस्य तस्मै वाराहमूर्तये नमः ॥ १८ ॥ हे साधुलोकभयापह अद्भुतसिंहाय ते नमः। क्रान्तं त्रिभुवनं येन तस्मै वामनाय तुभ्यं नमः ॥ १९ ॥ दृप्ता गर्विताः क्षत्राः क्षत्रियास्ते एव वनं तस्य छिदे छेत्रे भृगूणां पतये परशुरामाय नमः। रावणस्यान्तकराय नाशकाय रघुवर्याय रघूत्तमाय ते तुभ्यं नमः ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'कानि तानि रूपाणि' इत्यपेक्षायां तानि दर्शयन् भक्त्या स्वयं नमस्करोति—नम इति। सत्यव्रतरक्षावेदोद्धारादिकारणेन स्वीकृतमत्स्यरूपाय नमः। सत्यव्रतरक्षाद्यर्थमेव प्रलयाब्धौ चरतीति तथा तस्मै। हयग्रीवावतारप्रयोजनमाह—मधुकैटभयोर्मृत्यवे हन्त्रे ॥ १७ ॥ बृहते अकूपाराय कूर्माय नमः। तदवतारचरितमाह—मन्दरधारिण इति। क्षित्युद्धारणं विहारो यस्य तस्मै सूकरमूर्तये नमः ॥ १८ ॥ अद्भुतसिंहाय नरसिंहाय ते तुभ्यं नमः। अवतारप्रयोजनं सूचयन् सम्बोधयति – साधुलोकभयापहेति। साधुलोकस्य भयमपहन्तीति तथा तत्सम्बोधनम्। वामनाय तुभ्यं नमः। तदवतारप्रयोजनमाह—क्रान्तं त्रिभुवनं येन तस्मै नमः ॥ १९ ॥ भृगूणां पतये परशुरामाय नमः। तदवतारप्रयोजनमाह—दृप्तं गर्वितं क्षत्त्रकुलमेव वनं तच्छिनत्तीति तथा तस्मै नमः। रघुकुलेषु वर्याय श्रेष्ठाय श्रीरामाय ते तुभ्यं नमः। तदवतारप्रयोजनमाह—रावणस्य नाशं करोतीति तथा तस्मा इति ॥२०॥

अन्वितार्थप्रकाशिका

तानि रूपाणि कथयन्नमस्यति—नम इति ॥ वेदोद्धारादिकारणेन स्वीकृतमत्स्यरूपाय प्रलयाब्धौ चरति तथा तस्मै मधुकैटभयोर्मृत्यवे हन्त्रे हयशीर्ष्णे तुभ्यं नमः ॥ १७ ॥ अकूपारायेति ॥ मन्दरपर्वतधारिणे बृहते अकूपाराय कूर्मरूपाय नमः। "अकूपारः समुद्रे स्यात्कूर्मराजेऽपि कीर्तितः।" इति विश्वः। क्षित्युद्धारो विहारो यस्य तस्मै सूकरमूर्तये नमः ॥ १८ ॥ नम इति ॥ हे साधुलोकभयापह ! अद्भुतसिंहाय नरसिंहाय ते तुभ्यं नमः। क्रान्तं त्रिभुवनं येन तस्मै तुभ्यं वामनाय नमः ॥ १९ ॥ नम इति ॥ दृप्तं गर्वितं क्षत्रकुलमेव कुठारच्छेद्यत्वात् वनं तच्छिनत्ति तस्मै भृगूणां पतये परशुरामाय नमः। रावणस्यान्तं करोति तस्मै रघुकुले वर्याय श्रेष्ठाय श्रीरामाय ते नमः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हयशीर्ष्णे हयग्रीवायमधुकैटभयोर्मृत्यवेनाशकाय ॥१७॥ अकूपाराय कूर्माय क्षितेरुद्धार एव विहारो यस्यस्ततस्मै ॥१८॥ क्रांतानि उल्लंघितानि त्रिभुवनानि येन तस्मै ॥१९॥ भृगूणां भृगुकुलोत्पन्नानां पतये परशुरामायरघुवर्याय रघुकुलश्रेष्ठाय ॥२०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कानि तानि रूपाणि, यैरामृष्टशुचः जना इत्यत्र कानिचित्तानि दर्शयन् नमस्करोति। नम इत्यादिना ॥ नम इति ॥ प्रलयाब्धौ चरतीति तस्मै, कारणार्थं मत्स्यस्तस्मै, अपहृतविधिवेदासुरहननपूर्वं वेदमार्गप्रवृत्तिविधापनतो जगत्स्थित्यापादनात्मक-

कारणार्थं धृतमत्स्यावतारायेत्यर्थः। तुभ्यं, नमः। मधुकैटभमारणकारणार्थं धृतावतारायेत्यर्थः। हयशीर्ष्णे हयग्रीवमूर्त्तये च, तुभ्यं नमः ॥ १७ ॥ अकूपारायेति ॥ मन्दरधारिणे देवासुरारब्धामृतार्थकक्षीराब्धिमथनावसराब्ध्यन्तनिमज्जन्मन्दरधारणं कर्तुमित्यर्थः। बृहते अकूपाराय परिधृतमहाकूर्मरूपायेत्यर्थः। तुभ्यमिति शेषः। नमः। क्षित्युद्धार एव विहारो यस्य तस्मै, प्रलयकालजलनिमग्नभूम्युद्धारहेतुकजलक्रीडाकारिणे इत्यर्थः। सूकरमूर्त्तये धृतवराहावतारायेत्यर्थः। तुभ्यं नमः ॥ १८ ॥ नम इति ॥ साधुलोकाः भगवद्भक्ताः सन्तः स्वधर्मनिष्ठा जनाः तेषां भयमपहन्तीति तत् सम्बोधनम्। अनेन साधुजनभयोत्पादकहननमवतारधृतिप्रयोजनं सूचितम्। इदं संबोधनम् सदपि साधुलोकभयापहायेति विशेषणम्। एवंभूताय अद्भुतसिंहाय परिधृताश्चर्यकारकनृसिंहावताराय, ते तुभ्यं, नमः। क्रान्तं त्रिभुवनं येन तस्मै, अनेनावतारप्रयोजनं सूचितम्। वामनाय च तुभ्यं नमः। अदित्याः प्रियं विधातुं ततो वामनो भूत्वा बलिं प्राप्य ततस्त्रिपादमितभूयाचनव्याजेन त्रिविक्रमतया बालेयमिन्द्रपदं गृहीत्वा सुराधिपाय स्वर्गपदं दत्त्वोपेन्द्रतां प्राप्य वर्त्तमानाय तुभ्य नमस्करोमीत्यर्थः ॥ १९ ॥ नम इति ॥ दृप्तं गर्वितं प्रभूतं वा क्षत्त्रं क्षत्त्रकुलं तदेव वनं तस्य छित् छेत्ता तस्मै, इत्यवतारप्रयोजनं सूचितम्। भृगूणां पतये भृगुकुलैकनाथाय परशुरामाय, तुभ्यं नमः। रावणस्यान्तो नाशस्तं कृतवानिति रावणान्तकरस्तस्मै, अनेनावतारप्रयोजनं सूचितम्। रघुवर्याय रघुकुलश्रेष्ठाय श्रीरामाय च, ते तुभ्यं नमः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नमः कारणमत्स्यायेति : १०.४०.१७.

नमः सत्यव्रतोत्साहाऽऽदृतमीनादिवर्ष्मणे। आम्नायागम्यरम्यात्मस्थितये ते नमो नमः ॥ ९ ॥
नमो भक्तक्लेशहन्त्रे नमस्ते पुरुषोत्तम। विश्वम्भराखिलाधार श्रीगोविन्द नमोऽस्तु ते ॥ १० ॥
भक्तानामवनाय दुष्टदितिजध्वंसाय हंसात्मकोप्यादत्तेऽनुयुगं विचित्रविभवां क्रीडामकामोऽपि यः।
स त्वं तत्र न संशयो वरदयालावण्यदुग्धाम्बुधे तन्मां दीनमनाथमङ्घ्रिशरणं पाहि भ्रमाहेर्भयात् ॥ ११ ॥

कृष्णप्रिया

अक्रूरजी कहते हैं महाराज ? आपके अनन्त अवतार है कैसे गा सकूं लेकिन परिगणित अवतारों का गान कर कृतार्थ बनूँगा। नाथ ? आपने कारण वश मत्स्यावतार लिया अथवा वो आप बीजभूत कारण मत्स्य रूप लेकर प्रकट हुए, सत्यव्रत का उद्धार किया और प्रलय पर्यन्त समुद्र में विचरते रहे। पुनः आपने हयग्रीव अवतार लिया उस अवतार में शिरोभाग अश्व का था और सर्व विग्रह मनुष्य का था। आपने मधु एवं कैटभ नाम के दैत्यों का वध किया एवं वेदों का रक्षण किया। हे मत्स्यनारायण ! एवं हयग्रीव नाथ ! आपके चरणों में प्रणाम ॥ १८ ॥ अति विशाल कूर्म स्वरूप स्वीकार कर अपनी पीठ पर मन्दराचल को धारण करने वाले नाथ ? आपको नमस्कार। रसातल में रही हुई पृथ्वी का उद्धार करने के लिए वराह स्वरूप से विहार करने वाले हे वराह प्रभो आपके श्रीचरणों में मेरा प्रणाम हो ॥ १८ ॥ भक्तजनों के भय का नाश करने वाले प्रह्लादजी के संरक्षक अद्भुत नृसिंह स्वरूष को धारण करने वाले प्रभु के श्रीचरणों में प्रणाम। वामन स्वरूप स्वीकार कर तीन पैर से त्रिभुवन को नाप लेने वाले हे वामन स्वरूप नाथ ? आपके श्रीचरणों में मेरा प्रणाम ॥ १९ ॥ उच्छृंखल क्षत्रियों के गाठ वन का उच्छेदक भृगुकुल तिलक श्रीपरशुरामजी के श्रीचरणों में मेरा प्रणाम। राक्षसराज रावण के विनाशक एवं अनन्त दिव्य चरित्र करनेवाले रघुकुल तिलक श्रीराम श्री रामचन्द्र भगवान के चरणों में प्रणाम ॥ २० ॥

नमस्ते वासुदेवाय नमः संकर्षणाय च। प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ २१ ॥
नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने। म्लेच्छप्रायक्षत्रहन्त्रे नमस्ते कल्किरूपिणे ॥ २२ ॥
[1]भगवञ्जीवलोकोऽयं मोहितस्तव मायया। अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु ॥ २३ ॥
अहं चात्मात्मजागारदारार्थस्वजनादिषु। भ्रमामि स्वप्नकल्पेषु [2]मूढः सत्यधिया विभो ॥ २४ ॥

कर्दमक्षमा

अन्वयः—वासुदेवाय, ते, नमः, सङ्कर्षणाय, ते, नमः, प्रद्युम्नाय, नमः, अनिरुद्धाय, नमः, सात्वताम्, पतये, नमः ॥ २१ ॥ दैत्यदानवमोहिने, बुद्धाय, ते, शुद्धाय, नमः, क्षत्रहन्त्रे, म्लेच्छघ्नाय, कल्किरूपिणे, ते, नमः ॥२२॥ हे ! भगवन् ! अयम्, जीवलोकः, तव, मायया, मोहितः, अहम्, मम, इति, असद्ग्राहः, कर्मवर्त्मसु, भ्राम्यते ॥ २३ ॥ हे ! विभो ! अहम्, च, मूढः, स्वप्नकल्पेषु, आत्माआत्मजआगार दारार्थस्वजनादिषु, सत्यधिया, भ्रमामि ॥ २४ ॥

---

१. सर्वलोको–प्रा. पा. । २. सुख–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

चतुर्व्यूहरूपेण प्रणमति। नमस्ते वासुदेनायेति ॥ २१-२२ ॥ एवं स्तुत्वा बन्धमोक्षं प्रार्थयितुमाह। भगवन्निति। असति देहादौ ग्राह आग्रहो यस्य सः। असन् ग्राहो यस्येति वा ॥ २३ ॥ न केवलमय लोकोऽहमपि तथैवेत्याह। अहं चेति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रकृष्टं द्युम्नं बलं यस्य तस्मै। न निरुद्ध्यते भक्तिं विनेत्यनिरुद्धः। प्रद्युम्नानिरुद्धयोस्तदानामनीविभूं तयोरपि तापन्यादावेषां चतुर्व्यूहानां नित्यताश्रवणात्तयोश्चतुर्व्यूहान्तःपातित्वेन युक्तमेव प्रणमनमिति ॥ २१ ॥ शुद्धाय दैत्यच्छलनार्थं वेदविरुद्धवादित्वेऽप्यतः भिप्रायाय। कलिं कृन्तति छिनत्ति, कालयति वा कल्किः। पृषादरादित्वात्कलेः कलादेशो डिप्रत्ययः। शुद्धाय वेदविरुद्धशास्त्रप्रवर्तकत्वेऽपि निर्दोषाय। तत्र हेतुः—म्लेच्छेति। म्लेच्छा एव प्रायेण सादृश्येन क्षत्राणि क्षत्रिया राज्यकारित्वेन तत्तुल्या इत्यर्थः। तेषां हन्त्रे। कल्को दंभः सोऽस्यास्ति म्लेच्छवशित्वेन कल्कि तादृशं रूपमस्येति तस्मै। यद्वा—कलिं करितुं हिंसितुं शीलमस्येति कल्किः। औणादिको डिः कलेरिकारलोपश्च। स एव रूपं स्वरूपं यस्यास्ति तस्मै ॥ २२ ॥ एवमुक्तरीत्या। बन्धादविद्यालक्षणान्मोक्षं तन्निवृत्तिलक्षणम्। ग्राह आग्रहो हठः। व्यधिकरणसमासापेक्षया समानाधिकरणसमासस्य सुग्रहत्वादाह—असन्नित्यादि। असन्नहंताममतालक्षणो ग्राहो ग्रहः "ग्रहोनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे। सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः॥ ग्राहो ग्रहेऽवहारे च" इति मेदिनी। ग्राहशब्दो ग्रहपदवाच्योऽस्तीत्यर्थः॥ हे भगवन्निति सर्वं कर्तुं समर्थत्वान्मदभीष्टमपि संपादयेति द्योतनमेव संबुद्ध्यभिप्रायः। त्वया लोकोद्धारार्थमवतारेषु कृतेष्वपि ये महापराधसंस्कारवन्तस्ते त्वन्मायामोहितास्त्वद्भक्तिं विहायान्यत्र प्रवर्तंत इति शोचयन्नाह—भगवन्निति ॥ २३ ॥ लोकवृत्तं स्वस्मिन्नप्यारोप्याह-न केवलमित्यादिना। आत्मा देहः। अर्थो हिरण्यादिः। आदिना पश्वादिग्रहः। स्वप्नकल्पेषु स्वप्नतुल्येषु। प्रभो इति भ्रान्तिवारणे सामर्थ्यं सूचयन्नाह ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नमस्त इति। तैर्व्याख्यातं तत्र सङ्कर्षणमित्यादेरयमर्थः। क्रमप्राप्तस्तावदत्र श्रीबलराम इति सङ्कर्षणशब्देन स एवोच्यते स च श्रीकृष्णलक्षणवासुदेवादिचतुर्व्यूहान्तःपाती ततस्तदन्तः पातितयैव तं प्रणमन् तान् सर्वानेव प्रणमतीति तापन्यादावेषां नित्यत्वश्रवणात्तदानीमनाविभूं तयोरपि प्रद्युम्नादिकयोर्नमस्कारस्तां श्रुतिं प्रमाणयति। सात्वतां पतय इति। सर्वेषामेव विशेषणम् सद्वंश्यानामपि स्तुत्यर्थं तृतीयनमःशब्दः प्रद्युम्नेऽपि योज्यः ॥ २१ ॥ शुद्धाय वेदविरुद्धशास्त्रप्रवर्तकत्वेऽपि निर्दोषायैव। तत्र हेतुर्दैत्येति। म्लेच्छा एव प्रायेण सादृश्येन क्षत्राणि क्षत्रियाः। राज्यकारित्वात्तत्तुल्या इत्यर्थः। तेषां हन्त्रे कल्को दम्भः म्लेच्छवेशित्वेन सोऽस्यास्तीति तादृशं रूपं यस्य तन्नाम्ने ॥ २२ ॥ एवं त्वया लोकोद्धारार्थमवतारेषु कृतेष्वपि ये महापराधसंस्कारवन्तस्ते तु त्वन्मायया मोहितास्त्वद्भक्तिं विहायान्यत्र प्रवर्तन्ते इति शोचन्नाह। भगवन्निति। हे मायातिरस्कारषड्गुणैश्वर्य्य! इति निवेदने हेतुरयं कर्ममार्गेष्वेव भ्राम्यते मुहुर्वृराव्त्या प्रवर्त्यते ननु त्वद्भक्ताविर्त्यर्थः ॥ २३ ॥ तद्भक्तौ प्रवृत्तोऽहं नूनं तादृगपराधिसङ्गदोषात् पुनर्लब्धच्छिद्रया त्वन्माययावरणाद्गृहाद्यसक्तिं हातुं न शक्नोमीत्याह। अहञ्चेति। अप्यर्थं चकार आत्मा देहः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नमस्त इति; तैर्व्याख्यातमेव। तत्र श्रीकृष्णस्यावतारितया तमत्रानुक्त्वा श्रीबलदेवस्यैवावतारेषु गण्यत्वादत्र क्रमप्राप्ते तन्नमस्करणे श्रीवासुदेवादिचतुर्व्यूह-नमस्कारसमाधानार्थं संकर्षणं रामं चतुर्व्युहरूपेण प्रणमतीति लिखितम्। तत्र च संकर्षणमिति श्रीसंकर्षणरामयोरभेदात्, संकर्षणायेति रामस्यैवोक्तत्वादिति। अथवा यथाक्रममादौ श्रीबलदेवं ततो भक्त्या भाविनमपि श्रीकृष्णस्य पुत्रं श्रीप्रद्युम्नम्, पौत्रं चानिरुद्धं प्रणमति—नम इति। वसुदेवनन्दनाय संकर्षणाय नम इति चतुर्व्यूह-संकर्षणो व्यावर्त्तितः। नम इत्यस्य प्रद्युम्नायेत्यनेनान्वयः। किंवा श्रीकृष्णाग्रजत्वेन भक्त्या श्रीसंकर्षणाय नमो नम इत्येषां त्रयाणां मुख्यप्रयोजनमाह—सात्वतां सात्वतानां यादवानां सर्व्वभक्तानां वा पतये परिपालकाय, तेषां सुखार्थमेव तत्तद्रूपेण तत्तल्लीलाविस्तारणात्, अतएवोक्तं पाद्मे श्रीभगवतैव—'मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः' इति ॥ २१ ॥ शुद्धायेति वेदविरुद्धशास्त्रप्रवर्त्तकत्वेऽपि पवित्राय; यद्वा, अहिंसाप्रशंसनादिना परमशुद्धत्वात्, दैत्यादिति-सुताः, दानवाश्च दनुपुत्रास्तान् मोहयितुं शीलमस्येति तथा तस्मै, वैदिक यज्ञादिधर्म्मतः पाषण्डधर्म्मे तेषां प्रवर्त्तनादिति तदवतारप्रयोजनमुक्तम्। म्लेच्छाः परमान्त्यजजातिविशेषाः प्राया बहुला यस्मिन् तत् क्षत्रं क्षत्रियजातिः, सर्व्वे क्षत्रिया इत्यर्थः, तस्य हन्त्रे, कल्किनो दुष्टा म्लेच्छास्तेषामिव रूपं वेशस्तद्वते, कल्यन्ते विप्रादीनामपि सर्व्वेषां म्लेच्छरूपत्वात्। कल्किरूपिणे इति पाप-पापि-वर्गसंहारपूर्वक सत्ययुगादिप्रवर्त्तनेनैश्वर्य्यविशेषात्। एवमवताराणां प्रत्येकं रूप-लीले दर्शिते। यद्यपि श्रीकपिलर्षभादयोऽन्येऽपि बहवोऽवताराः सन्ति, तथापि

मुख्यत्वेन प्रसिद्धत्वादेते निर्दिष्टाः ॥ २२ ॥ एवं त्वया लोकोद्धारार्थमवतारेषु कृतेष्वपि त्वन्मायया सर्व्वे लोका मोहितास्त्वद्भक्तिं विहायान्यत्र प्रवर्त्तन्त इति शोचन्नाह—भगवन्निति। हे परमकृपालो, इति कृपां जनयति, यद्वा, हे दुर्वितर्क्यलीलेति तत्तद्रूपलीलाभिर्लोकोद्धारार्थं व्यग्रस्यापि लोकमोहकमायाप्रसारणाज्जीवलोकः सर्व्वोऽपि जीव इत्यर्थः। अयमिति मायामोहित्वादेः प्रत्यक्षतां दर्शयति—अहमिति देहे, ममेति पुत्रादौ, असन् दुष्टोऽविवेककृतत्वात् त्वद्भक्त्यनुकूलवैराग्यप्रतिकूलत्वाद्वा, ग्राह आग्रहो यस्य तथाभूतः सन्, कर्म्ममार्गेष्वेव भ्राम्यते मुहुरावृत्त्या प्रवर्त्तते, न तु त्वद्भक्तावित्यर्थः ॥ २३ ॥ त्वद्भक्तौ प्रवृत्तोऽप्यहं नूनं तादृगपराधिसंगदोषात् पुनर्लब्धच्छिद्रया त्वन्माययावरणाद्गृहाद्यासक्तिं हन्तुं न शक्नोमीत्याह—अहं चेति। अप्यर्थे चकारः। मायिकत्वात् स्वप्नतुल्येष्वपि सत्यधिया 'एते सत्याः' इति बुद्ध्या भ्रमामि, तेष्वेव पुनः पुनरासक्त्या प्रवर्त्ते, किंवा भ्रान्तो भवामीत्यर्थः। यतो मूढ़ो विवेकरहितः, आत्मा देहः, स्वजना ज्ञातयः सम्बन्धिनश्च, आदि-शब्दाद्दास-दासी पशु-क्षेत्रादयः, तच्च युक्तमेवेत्याह—विभो ! हे मायया जगद्व्यापकेति ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अहं चात्मेति। आत्मशब्दः शरीरवाची। स्वप्नकल्पेषु अनित्येषु निन्यबुद्ध्या आत्मतिरिक्तदेहादावात्मबुद्ध्या च विपर्यस्तमितिः ॥ २४–२७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

रामकृष्णौ विभवौ वासुदेवसङ्कर्षणौ व्यूहौ च तन्त्रेणाभिप्रेत्य नमस्करोति। नमस्ते वासुदेवायेत्यर्द्धेन। प्रद्युम्नानिरुद्धौ व्यूहौ नमस्करोति प्रद्युम्नायानिरुद्धायेति सर्वेषां प्रयोजनाभिप्रायेण विशिनष्टि। सात्वताम्पतये नमः साधुपरित्रात्रे इत्यर्थ। यद्वा वासुदेवायेत्यादिभिश्चतुर्भिर्व्यूहचतुष्टयं नमष्क्रियते सात्वताम्पतय इत्यनेन रामकृष्णनमस्कृतिः तेनैव प्रयोजनं चाभिप्रेतम् ॥२१॥ वेदाप्रामाण्याद्युपदेष्टृत्वेऽपि शुद्धाय विशुद्धकर्मणे तस्य दुष्कृन्निरसनार्थत्वादित्यभिप्रेत्य प्रयोजनञ्च वदन् विशिनष्टि। दैत्यदानवमोहिन इति। दैत्यान् दानवांश्च मोहयतीति तथा म्लेच्छप्रायं म्लेच्छतुल्यं यत्क्षत्रकुलं तस्य हन्त्रे इति प्रयोजनमुक्तम् ॥ २२ ॥ एवं स्तुत्वा बन्धमोक्षं प्रार्थयितुमाह। भगवन्निति। हे भगवन् सर्वोजनस्तव मायया मोहित अत एवानात्मन्यात्माभिमानरूपादस्वस्मिन् स्वत्वाभिमानरूपाच्चासतो दृष्टानर्थकराद्ग्राहाद्भ्रमात्मकज्ञानात्कर्मवर्त्मसु कर्ममार्गेषु शब्दादिविषयसाधनभूतेषु भ्राम्यते। यद्वा असद्ग्राह इति। अहं ममेत्यसति प्रकृतिपरिणामरूपे देहतदनुबन्ध्यादौ आग्रहः असदाग्रहः ग्राहः अभिनिवेशो यस्य तथाभूत इत्यर्थः ॥ २३ ॥ भ्राम्यत्वेवं लोकस्तव किं तत्राह। अहञ्चेति। अहमित्यादिभिश्चतुर्भिस्तावदात्मनः कार्प्यण्यमावेद्य सोऽहमित्येकेन प्रपद्य शरण्यगुणाविष्कारपूर्वकं गोप्ता भवेति प्रार्थयते यथा सर्वलोकस्तथा तदन्तर्गतोऽहमपि गेहापत्यादिषु स्वप्नवदर्थतुल्येषु अनित्येष्वित्यर्थः। सत्यधिया नित्यबुद्ध्या भ्रमामि अतोऽहं मूढः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

संकर्षणादिषु हरेः संनिधानविशेषात्तेषामवतारान्तर्भावं कृत्वा नमनं क्रियते नतु साक्षादधोक्षजावतारत्वेन तदुक्तम्-प्रद्युम्ने चानिरुद्धे च बलदेवे च केशव इत्यादौ ॥ २१ ॥ बुद्धवतारप्रयोजनं दैत्यमोहनमेव नान्यदिति द्योतयति। दैत्येत्यादिना ॥ २२–२३ ॥ आत्मा देहः आत्मजः पुत्रः अर्थो हिरण्यादिः स्वजनो बन्धुजनादिः भ्रमामि भ्रान्तिं करोमि ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

म्लेच्छा एव प्रायेण सादृश्येन क्षत्राणि क्षत्रियाः राज्यकारित्वात्तत्तुल्या इत्यर्थः तेषां हन्त्रे ॥ २२–२६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नमस्ते वासुदेवायेत्यादि तदभिन्नत्वेन स्तौति ॥ २१–३० ॥

इति चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शुद्धाय वेदविरुद्धशास्त्रपवर्त्तकत्वेऽपि निर्दोषाय ॥ २२ ॥ एवं स्तुत्वा दुःखं विज्ञापयति। भगवन्निति। भ्राम्यते माययैव ॥ २३–२४ ॥

गूढार्थदीपिनी

सात्त्वतां यदूनां भक्तानां वा ॥ २१–२२ ॥ असति देहादौ असन् मिथ्याभूतो वा ग्राहः आग्रहः अभिनिवेशो यस्य सः ॥ २३ ॥ आत्मा देहः स्वकल्पेषु स्वप्नतुल्येषु ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथानादिमायामोहितत्वात्संसारगर्ते पतितः स्वयमात्मविमोक्षणेऽसमर्थस्त्वच्चरणं शरणं गतोऽस्मीत्याह । भगवन्नितिषड्भिः । असतोरनित्ययोर्देहगेहयोरहमिति ममेति च ग्राह आग्रहो यस्य सः ।। २३ ।। तथैवाहं च स्वप्नकल्पेषु स्वप्नवदनित्येषु सत्यधिया नित्यबुद्धया ।। २४ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भृगूणां पतये षष्ठ्याऽलुक् । आक्रोशे आक्रोशश्च निरवध्यधिकस्य भार्गवमात्रपतित्वविषय इति ज्ञेयम् । दृप्तक्षत्रवनाच्छेद इत्यनेन कठोरकुठारायुधताऽपि ध्वन्यते । रावणान्तकराय रघुवर्याय ते नमः ।।२१।। नमस्ते वासुदेवायेति श्लोके वासुदेवसहपाठात्सङ्कर्षणादयोऽपि साक्षाद्विष्णुरूपा इति भ्रान्तिर्भवति तां निरसितुं मानमुदाहरति ।। प्रद्युम्ने चेति । नात्र तरतमभावक्रमविवक्षा । अनिरुद्धे तत्पुत्रे बलदेवे सङ्कर्षणे जगतां पतिः केशवो विशेषेण सन्निधानं करोति । तर्ह्य तत्सहोक्त्या वासुदेवोऽपि तथा किमित्यत आह ।। तत्रेति । परमानन्द एव लक्षणं व्यावृत्तिकृल्लक्षणं यस्य स पाराशर्यश्च वेदव्यासश्च । तत्रैवं सहपाठे सत्यपि तात्स्यात्ताच्छील्याल्लोकविलक्षणत्वाल्लोकवन्मुख्यता समायात इति तत्राह ।। तत्तद्गतस्यैवेति । तदन्येषां प्रद्युम्नानि नामानि । इति स्थितिरिति शब्दनिर्णयवचनादयमेवार्थः । पाराशर्यग्रहणं प्रसङ्गादिति ज्ञेयं । ननु सङ्कर्षणादीनामपि साक्षाद्रूपाणां सत्त्वात्तत्परतायां नानुपपत्तिरिति नाचार्यैः पराक्रमणीयमिति चेत् । सत्यं । नमस्ते वासुदेवायेत्यादावुक्त्वाऽन्ते च सात्वतां पतय इति सम्पुटीकरणात्तद्व्यूहो यदि नभ्यस्तर्हि पृथगेव वदेत् । न च तथोवाचेति सङ्कर्षणादिभ्रमः स्यादेवेति तं च्यावयितुमाचार्यैराचारविवरणमिति विद्धि । सात्वतां पतय इत्यव्यवधानेनाभिधानादुद्बुद्धस्य कृष्ण एवौचित्यात्सम्पुटता ।। ततश्च मूलार्थः ।। वासुदेवाय गतं । सङ्कर्षणाय शेषान्तर्गताय । अस्य सङ्कर्षणमात्रोपासकत्वान्निरन्तरं तन्मात्रदृष्टेस्तस्य च न साक्षादधोक्षजत्वमिति वक्तव्यमेवेति तत्सहपठितप्रद्युम्नाद्या अप्योत इति वक्तव्यत्वाद्वेति ज्ञेयम् । प्रद्युम्नाद्यन्तर्गताय सात्वतां यादवानां पतये नमः ।। २२ ।। बुद्धाय दैत्यदानवमोहिने । अनेन प्रत्यवेयादिति न तद्योग्यतानुसारेण बोधनान्न दोष इत्याह ।। शुद्धायेति म्लेच्छप्रायाणि क्षत्रियाणि तद्धन्त्रे ।।२३।। कंसारे संसार एतन्मूल इत्याह ।। भगवन्निति । जीवलोकोऽयं तव मायामोहितोऽसन्ग्राहोऽज्ञानं यस्य स कर्मवर्त्मसु तन्मार्गेषु भ्राम्यते तयेव ।। २४ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवांश्चतुर्मूर्त्तिरवतीर्ण इति भगवतः कृष्णस्यावतारे विशेषमाह । नमस्ते वासुदेवायेति । अत्रादिमध्यावसानेसु नमनं सङ्कर्षण आवेशमपि भगवान्करोतीति तदपि रूपं चकारेण परिगृहीतं चरित्रमाह । सात्वताम्पतय इति । समस्तभक्तानां पतये सर्वथा रक्षकाय प्रार्थनाव्यतिरेकेणापि स्वकीयानां सर्वपुरुषार्थामेवावतार इत्यर्थः ।। २१ ।। अग्रे जायमानमाह । नमो बुद्धायेति । आर्षज्ञानेन यथा यथा पश्यति तथा तथा निरूपयति भगवान् वा तं प्रति तथा तथा आत्मानं प्रदर्शयति बुद्धो वेदादिनिन्दया विसदृशो भविष्यति इत्याशक्याह । शुद्धायेति । सर्वदोषरहिताय तर्हि किमर्थं तथोक्तवानित्याशङ्कां परिहरन् चरित्रमाह । दैत्यान्दानवांश्च मोहयतीति दैत्यदानवानां यो मोहः सोऽस्य वर्त्तत इति अयं चेन्न प्रकटीकुर्यात् तदा मोहो न भवेदिति मत्वर्थीय इन् प्रत्ययः कल्किं नमस्यति । म्लेच्छक्षत्रेति क्षत्रं रक्षकत्वेन स्थितं हन्तीति क्षत्रघ्नः हत्रहन्ता तदा क्षत्रिया म्लेच्छरूपा इति म्लेच्छप्रायेत्युक्तं द्वयं भिन्नतया निरूपितवान् गुणदोषयोर्विपरीतत्वबोधनाय म्लेच्छा ये सहजदैत्याः ते गुणवन्तोऽपि हन्तव्याः क्षत्रियास्तु दोषवन्त एवेति एवं प्रमोजनमुक्त्वा पश्चात्स्वरूपमाह कल्कस्येव निष्पीडितरसस्य चतुर्युगात्मकस्य कालस्य स्वरूपमस्मिन् वर्त्तत इति कल्किनि केवलं तस्यैव रूपं स्वस्मिन्प्रतिविम्बितं प्रतीयते किं तु अस्यापि पृथग्रूपवत्वमुक्तम् ।। २२ ।। कियन्ति रूपाणि भगवतो नत्वा किञ्चित्प्रार्थयितुं सर्वेषामेव साधारणं दुःखं निवेदयति । भगवान्निति । एतादृशेऽपि त्वयि सर्वदा जागरूके लोकाः त्वन्मायया मोहिता इति दुःखं प्राप्तुवन्ति अन्यथा कथं स्यात् भगवन्निति सम्बोधनं सर्वसामर्थ्याय अयं सर्वोऽपि परिदृश्यमानो जीवलोकः तवैव मायया अनुल्लङ्घ्यया मोहितः अन्यथा अहं ममेति दुष्टे देहादौ ग्राहः आग्रहो यस्य तादृशः कथं भवेत् अत एव कर्ममार्गेषु उच्चावचेषु श्वयोन्यादिषु भ्राम्यते पुनः परिभ्रमति यदि मायया मोहितो न स्यात् तदा सकृत् क्लेशं प्राप्य पुनरहंममाभिमानं न कुर्यात् ।। २३ ।। तर्हि तव किमित्याकाङ्क्षायामाह । अहं चेति यथा अन्ये मोहिताः अहम् अहमपि मोहितः किं च मयि विशेषोऽप्यस्तीत्याह । आत्मात्मजेति । आत्मा देहः आत्मजाः पुत्राः अगारं गृहं दारास्त्रियः अर्थो धनं स्वजनाः बान्धवाः तेषुः सर्वेष्वेव सकृदवगतवैषम्योऽपि पुनर्भ्रमामि न वा एते स्वरूपतः सन्ति नापि कार्त्स्न्येनाभिव्यक्ताः अन्यथा तेषां कार्यम् आपाततोऽपि प्रकटं स्यात् यतोऽहं स्वप्नकल्पेष्वपि भ्रमामि न केवलमहन्तामतामात्रमपि अतो मूढः सर्वापेक्षयापि किंच न केवलं भ्रममात्रं किं तु तेषु सत्यबुद्धिरपि जायते येन विचारेऽपि अन्यथा बोधेऽपि भ्रमो निवर्त्तते प्रभो ! इति सम्बोधन त्वं सर्वसमर्थः एतादृशमप्यसाध्यं साधयिष्यसीति ।। २४ ।।

श्रीसुबोधिनी-सारः

चतुर्व्यूहरूपेण प्रणमति । नमस्ते इति स्पष्टं व्याख्यातं च ॥ २१ ॥ दैत्यदानवमोहिने शुद्धाय बुद्धाय नमः । म्लेच्छप्रायं यत् क्षत्त्रं तस्य हंत्रे कल्किरूपिणे ते नमः ॥ २२ ॥ हे भगवन् अयं जीवलोकः प्राणिवर्गः तव मायया मोहितः अहं ममेति असन् मिथ्याऽसति देहादौ आग्रहो यस्य स कर्ममार्गेषु भ्राम्यते ॥ २३ ॥ अहमपि तथैव तदंतः पतितत्वादित्याह । देहपुत्रगृहस्त्रीधनस्वजनादिषु स्वप्नतुल्येषु सत्यबुद्ध्या मूढोहं भ्रमामि हे विभो ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

चतुर्व्यूहरूपेणावतीर्णं श्रीकृष्णं नमस्करोति—नमस्ते वासुदेवायेति । तदवतारप्रयोजनमाह—सात्वतानां भक्तानां वतये पालकायेति ॥ २१ ॥ बुद्धाय नमः वेदाप्रामाण्याद्युपदेष्टृत्वाद्दोषमाशङ्क्याह—शुद्धायेति । 'वेदनिन्दकस्य कथं शुद्धता' इत्याशङ्क्य 'तन्निन्दाया दैत्यमोहनार्थत्वान्न वस्तुतस्तु तद्दोष' इत्याशयेनाह—दैत्यदानवमोहिने इति ॥ २२ ॥ एवं नमस्कृत्य स्वं बन्धविमोक्षं प्रार्थयितुं लोकवृत्तमाह—भगवन्निति । अयं सर्वोऽपि जीवलोकस्तव मायया मोहितः, अतः 'अहं मम' इत्यसति तुच्छे देहे तदनुबन्धिधनपुत्रादौ च ग्राहः अभिमानो यस्य सः कर्मवर्त्मसु शब्दादिविषयप्राप्त्युपायेषु भ्राम्यते इत्यन्वयः । "ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः" ॥ "यावतः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान् । तावन्तो निखनन्त्येव हृदये शोकशङ्कवः" इत्यादिवचनप्रामाण्याच्छब्दादिविषयाणां दुःखहेतुत्वमेव, तत्र सुखहेतुत्वबुद्ध्या तत्साधनेषु प्रवृत्तिर्भ्रान्तिमूलैवेत्याशयः ॥ २३ ॥ 'न केवलमयं लोक एव भ्राम्यति, किंतु तदन्तर्गतोऽहमपि तथैव' इत्याह—अहं चेति । तत्र अहमित्यादिचतुर्भिस्तावदात्मनः कार्पण्यमावेद्य सोहमित्येकेन शरणं प्रपद्य ततो द्वाभ्यां प्रणामपूर्वकं स्वरक्षां प्रार्थयते । 'त्वमेवैतादृशरक्षायां समर्थ' इत्याशयेन सम्बोधयति—विभो इति । अहं च सर्वलोकवत् स्वप्नतुल्येषु क्षणभङ्गुरतया स्वप्नतुल्यपदार्थेषु आत्मादिषु सत्यधिया नित्यबुद्ध्या भ्रमामि आसक्तिं करोमीत्यन्वयः । 'एवं जानन्नपि कुतस्तत्रासक्तः ?' तत्राह—मूढ इति । त्वन्मायया मोहित इत्यर्थः । अत्र आत्मा देहः । आत्मजाः पुत्राः । अगारं गृहम् । दाराः स्त्रियः । अर्थो धनम् । स्वजनाः बान्धवादयः ॥ २४ ॥

अन्वितार्थप्रकाशिका

नम इति । स्पष्टम् । अनाविर्भूतावपि प्रद्युम्नानिरुद्धौ तापिन्यादिश्रुतिप्रामाण्यान्नमस्कृतौ ॥ २१ ॥ नम इति । शुद्धाय वेदनिन्दातात्पर्यरहिताय दैत्यदानवानां मोहिने बुद्धाय नमः । म्लेच्छप्रायाणां क्षत्राणां क्षत्रियाणां म्लेच्छा एव प्रायेण राज्यकारित्वसाम्येन क्षत्रियास्तेषां वा हन्त्रे कल्किरूपिणे ते तुभ्यं नमः ॥ २२ ॥ भगवन्निति । हे भगवन् ! अयं सर्वोऽपि जीवलोकस्तव मायया मोहितः अतोऽहं ममेत्यसति तुच्छे देहे तदनुबन्धिधनपुत्रादौ च ग्राहः आग्रहः यस्य असन् ग्राहो यस्येति वा सः कर्मवर्त्मसु विषयावापेषु भ्राम्यते भ्रमति । तङार्षः । मायया भ्राम्यते वा । अत्र मित्त्वेपि ह्रस्वाभाव आर्षः ॥ २३ ॥ अहमिति । हे विभो ! मूढः अहं च स्वप्नतुल्येषु क्षणभङ्गुरेषु आत्मा देहः आत्मजाः अगारं द्वाराः अर्थो धनं स्वजनाश्चैतेषु सत्यधिया नित्यत्वबुद्ध्या भ्रमामि ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यदुकुलोत्पन्नं चतुर्व्युहं प्रणमति नम इति ॥ २१ ॥ दैत्यदानवमोहिने बुद्धाय बुद्धावताराय नमः शुद्धाय बुद्धावतारविलक्षणाय चतुष्पादशुद्धैकान्तिकधर्मप्रवर्त्तकाय परमपवित्राय धर्मतनयाय नाराय मुनये नमः । वामनाय नमस्तुभ्यं क्रांतत्रिभुवनायचेति यदुकुलोत्पन्नचतुर्व्यूहभिन्नाः पुरुषाकृतिवामनादिकल्क्यं तापे पुरुषोत्तमावतारास्ते विशेष्यविशेषणभावेन द्विद्वि नामभिरेवोक्ताः अतोऽत्र शुद्धायेति तृतीयं नामन विशेषणं किंतु नारायण मुनिनमनाभिप्रायपरं बोध्यं कुतः समाधिस्थाऽक्रूरस्यभविष्यावतार ज्ञानसंभवात् ॥२२॥ इति स्तुत्वा स्वसहितलोकानां बंधनं शोचन्नाह भगवन्नित्यदि सर्वलोकः पञ्चभिः सर्वजनः जीवलोक इति वा पाठः देहेऽहं दैहिकेषु ममेति असग्राहः असन् अनित्योग्राह आग्रहो यस्य सः यद्वा अहं ममेति असत्सुदेहदैहिकेषुग्नादो यस्य एवं भूतः सन् ॥ २३ ॥ लोकवदहमपिभ्रमामीत्याह आत्मा देहः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नम इति । वासुदेवाय ते तुभ्यं, नमः । संकर्षणाय च संकर्षणमूर्त्तयेऽपि, ते नमः । सात्त्वतां पतये प्रद्युम्नाय, अनिरुद्धाय च, ते नमः । तत्र वासुदेवसंकर्षणाख्यौ कृष्णरामौ विभू । प्रद्युम्नानिरुद्धौ व्यूहाविति केचित् । चत्वारोऽपि व्यूहा इत्यन्ये एतस्यात्राप्रसक्तत्वान्न प्रपञ्चितम् ॥ २१ ॥ नम इति दैत्याश्च दानवाश्च तान्माहयतीत्येवंशीलस्तस्मै, वेदाप्रामाण्याद्युपदिश्य दैत्यदानवमोहोत्पादकाय, अत्रेदमेतदवतारप्रयोजनं सूचितम् । शुद्धाय तन्मोहनं संपाद्य विशुद्धकर्ममार्गप्रवर्त्तकायेत्यर्थः । बुद्धाय बुद्धा-

वतारधृते, ते नमः । म्लेच्छप्रायं म्लेच्छतुल्यं यत् क्षत्त्रं क्षत्त्रकुलं तस्य हन्त्रे, एतदत्रावतारप्रयोजनं प्रदर्शितम् । कल्किरूपिणे धृतकल्किरूपाय, ते नमः । अत्र श्रीगोपालानन्दस्वामिचरणास्तु दैत्यदानवमोहिने बुद्धाय, नमः । दैत्यदानवमोहिने दैत्यांशदानवांशगुरुनृपसंमोहकाय, तेषां दुराचारप्रदर्शनपूर्वं मोहोत्पादकायेति यावत् । शुद्धाय चतुष्पादशुद्धैकान्तिकधर्मप्रवर्त्तकाय परमपवित्राय धर्मतनयाय श्रीहरये, नमः इति व्याचख्युः । अत्र केषुचित्प्राचीनपुस्तकेषु 'नमो बुद्धाय बोधेन दैत्यदानवमोहिने, 'नमस्ते हरिकृष्णाय शुद्धाय धर्मसूनवे म्लेच्छप्रायक्षत्त्रहन्त्रे नमस्ते कल्किरूपिणे' इति षाट्पदः श्लोकः दृश्यते । तद्व्याख्यानपि, बोधेन नास्तिकाऽवलम्बितार्थबोधनेन, दैत्यदानवमोहिने, बुद्धाय ते नमः । शुद्धायाऽहिंस्रयागप्रक्रियाप्रवर्त्तनपूर्वं विशुद्धमेकान्तिकधर्मं प्रवर्त्तयितुमित्यर्थः । धर्मसूवे धर्मपुत्रतां प्राप्ताय, हरिकृष्णाय श्रीहरिकृष्णनाम्ने । ते, नमः । म्लेच्छप्रायक्षत्त्रहन्त्रे कल्किरूपिणे, ते नमः । इति दृश्यते तत्र मध्यमार्द्धत्यागिनां कोऽभिप्राय इति न ज्ञायते ॥२२॥ इति स्तुत्वात्मना सहानादिकालतः संगतं प्राकृतबन्धनं जीवानां मोचयितुं तच्छोचन्नाह । भगवन्निति । हे भगवन्, अयं जीवलोकः सर्वलोक इत्यपि पाठः । तव मायया मोहितः, भवति । अत एव अहं ममेत्येवं रूपात्, असद्ग्रहात् कर्मवर्त्मसु शब्दादिविषयसाधनभूतेषु कर्ममार्गेषु, भ्राम्यते परिभ्रमति । पाठान्तरे अहं ममेति असति प्रकृतिपरिणामरूपदेहादौ तदनुबन्ध्यादौ ग्राह आग्रहो यस्य सः तथाभूतः, भ्राम्यते ॥ २३ ॥ भ्राम्यत्वेवं लोकस्तव किं तत्राहाहं चेति चतुर्भिस्तत्र तावदात्मनः कार्पण्यमावेदयन् सोऽहमित्येकेन प्रार्थयते । अहं चेति । हे विभो, अहं च यथा सर्वलोकस्तथा तदन्तर्गतोऽहमपि, स्वप्नकल्पेषु स्वाप्नपदार्थतुल्यत्वादनित्येष्वित्यर्थः । आत्मा देहश्च आत्मजाः पुत्राश्च अगारं गृहं च दाराः पत्नी च अर्थो धनं च स्वजनाः स्वसम्बन्धिजना आदयो येषां तेषु, सत्यधिया नित्यबुद्ध्या, भ्रमामि । अतः, अहं मूढः ॥ २४ ॥

कृष्णप्रिया

भक्तों के स्वामी एवं संरक्षक भगवान् वासुदेव श्रीकृष्णचन्द्र के चरणों में प्रणाम, श्री संकर्षण स्वरूप बलदाऊजी के चरणों में प्रणाम, प्रद्युम्नजी एवं अनिरुद्धजी के व्यूह से प्रकट हुए प्रभु को नमस्कार ॥ २१ ॥ दैत्य और दानवों को विलक्षण प्रकार का उपदेश सुनाकर मोह करने वाले शुद्ध एवं बुद्ध स्वरूप भगवान् को नमस्कार । आचार आदि से प्रायः म्लेच्छ बने हुए क्षत्रियों के विनाश के लिए भविष्य में कल्कि स्वरूप धारण करने वाले प्रभु के श्रीचरणों में नमस्कार ॥ २२ ॥ हे भगवन्! हे सर्वसमर्थ नाथ ! वह समस्त जीवलोक आप की माया से मोहित होकर मैं पिता हूँ, पुत्र हूँ, राजा हूँ और मेरा पुत्र है मित्र है घर है इत्यादि देहगेहादि दुःखद पदार्थों में दुराग्रह को रखते हुए कर्ममार्गों में निरन्तर भ्रमण करते हैं ॥ २३ ॥ विभो ! मेरी विषम स्थिति का निवेदन करता हूँ कि—सर्वथा जैसे नहीं फिर भी स्वप्न समान आत्मा-देह, आत्मज-पुत्र, गेह गृहिणी धन स्वजन, स्नेहीजन-कुटुम्बीजन आदि पदार्थों में, ये ही सुखस्वरूप है ऐसी भ्रान्तमति से भटक रहा हूँ हे नाथ मुझ मूढ को आप का दृढदास बनाईए ॥ २४ ॥

अनित्यानात्मदुःखेषु [1]विपर्ययमतिर्ह्यहम् । द्वन्द्वारामस्तमोविष्टो न जाने [2]त्वाऽऽत्मनःप्रियम् ॥ २५ ॥
यथाबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः । अभ्येति मृगतृष्णां वै [3]तद्वत्त्वाहं पराङ्मुखः ॥ २६ ॥
नोत्सहेऽहं कृपणधीः कामकर्महतं मनः । रोद्धुं प्रमाथिभि[4]श्चाक्षैर्ह्रियमाणमितस्ततः ॥ २७ ॥
सोऽहं तवाङ्घ्र्युपगतोऽस्म्यसतां दुरापं [5]तच्चाप्यहं भवदनुग्रह ईश मन्ये ।
पुंसो भवेद् यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् ॥ २८ ॥

कर्वमक्षमा

अन्वयः—अहम्, द्वन्द्वारामः, तमोविष्टः, अनित्यानात्मदुःखेषु, विपर्ययमतिः, आत्मनः, प्रियम्, त्वाम्, न, जाने ॥ २५ ॥ यथा, अबुधः, तदुद्भवैः, प्रतिच्छन्नम्, जलम्, हित्वा, वै मृगतृष्णाम्, अभ्येति, अहम् तद्वत्, त्वा, हित्वा, पराङ्मुखः, कृपणधीः, प्रमाथिभिः, अक्षैः, इतः, ततः, ह्रियमाणम्, च कामकर्महतम्, मनः, रोद्धुम्, न, उत्सहे ॥ २६–२७ ॥ हे, ईश ? असताम्, दुरापम्, तवाङ्घ्रिम्, सः अहम्, उपगतः, तत्, च, अपि, भगवनुग्रह, इति, मन्ये, हे अब्जनाभ ? पुंसः, यर्हि, संसरणापवर्गः, भवेत्, तर्हि, सदुपासनया, त्वयि, मतिः, स्यात् ॥ २८ ॥

श्रीवरस्वामिविरचिता भावार्थदीपिका

मूढत्वमेव प्रकटयति । विपर्ययमतिरिति । अनित्ये कर्मफले नित्यमित्यनात्मनि देहे आत्मेति दुःखरूपे गृहादौ सुखमिति विपरीतमतिरित्यर्थः । द्वन्द्वेषु सुखदुःखादिष्वारमति क्रीडतीति तथा सः । ननु दुःखे कुतो रतिस्तत्राह । तमोविष्टस्तमसा व्याप्तोऽत

---

१. बिपर्यास–वोर. । २. हि त्वां जगत्पते–विज. । ३. हि त्वाहं–वीर. ; हित्वाऽहं–विज. । ४. स्वाक्षो–विज. । ५. यच्चा–विज. ।

आत्मनः प्रियं प्रेमास्पदं त्वा त्वां न जान इत्यर्थः ॥ २५ ॥ तदेव सदृष्टान्तमाह । यथेति । तस्माज्जलादुद्भवंतीति तदुद्भवानि तृणादीनि तैः । तथा मायाच्छन्नं त्वा त्वामहं हित्वा पराङ्मुखो देहाभिमुखो वर्त इति ॥ २६ ॥ नन्वेवं जानतः कुतो विषयाभिमुखता तत्राह । नोत्सह इति । कृपणा विषयवासनायुक्ता धीर्यस्य सः । अत एव कामकर्मभ्यां हतं क्षुभितमिंद्रियैश्च बलिभिर्विषयसंयुक्तैरितस्तत आकृष्यमाणं मनो रोद्धुं नियन्तुं न शक्नोमीति ॥ २७ ॥ तदेवमस्वतन्त्रो यः सोऽहं तवांघ्रिमुपगतः शरणं प्राप्तः । नन्विन्द्रियपरतंत्रस्यैतदपि कुतस्तत्राह । तच्चापीति । हे ईश अंतर्यामिंस्त्वदंघ्र्युपगमनं चासतां दुरापमतो भवतोऽनुग्रह एवेत्यहं मन्ये । अनुग्रहे सतीति वा । ननु सतां सेवयेदं भवतीति किं मदनुग्रहेणेत्यत आह । पुंस इति । जीवस्य संसरणापवर्गः संसरणस्य संसारस्यापवर्गः समाप्तिर्यदा त्वत्कृपया भवेत्संभावनास्पदं भवति हे अब्जनाभ तदा सदुपासना संपद्यते तयैव त्वयि मतिर्भवेत् । त्वत्कृपां विना न सत्सेवा नतरां त्वन्मतिर्नतमां मुक्तिरित्यर्थः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति–विपरीतबुद्धीनृते नेत्थं भातीत्याशयः । द्वन्द्वेष्वेकैकस्य ग्राह्यत्वेन रतिस्संभवन्त्यपि न द्वितीयेष्वित्याशयेनाशंकते–नन्विति । तमसाऽज्ञानेन 'तमोऽज्ञानमिहोच्यते' इत्युक्तेः । अतस्तमोव्याप्तत्वात् । इत्यर्थ इति–तमोव्याप्तानां विना प्रकाशं वस्त्वलाभस्य प्रथितत्वादिति भावः । आत्मन एव साक्षात्प्रियं परमात्मत्वात्, न तु पुत्रादिवद्देहादिसंबंधेनेत्यर्थः । अतो देहादिभ्योऽपि प्रियतमत्वेन ज्ञानयोग्यतोक्ता तथापि न जाने नानुभवामि ॥ २५ ॥ अज्ञानाविष्टस्य वस्त्वज्ञानं तदेवपदार्थः । आदिना शैवालादिग्रहः । तथा जलवत् । मृग्यन्ते इति मृगा विषयास्तेषु तृष्णामभ्येमीत्यर्थः । देहादावभिमुखोऽभिनिविष्टः ॥ तदुद्भवैः सारसशैवालादिभिरिति सुज्ञेयत्वमपि सूचितम् । दार्ष्टान्तिकेऽपि तत्तत्प्रभावमाधुर्ययुक्तत्वेन स्वाज्ञानेन मायाच्छन्नत्वेन प्रतीतं त्वामिति ॥ २६ ॥ अज्ञानामेतदस्तु ज्ञस्य तवैतन्न संगच्छत इत्याशंकते—नन्विति । एवं जानतो विज्ञस्य । तत्राक्षेपे । अत एव कृपणबुद्धित्वादेव । कामो विषयाभिलाषः । कर्मादृष्टम् ॥ कामः पूर्ववासना तत्प्रेरितेन कर्मणा हतम् । प्रकर्षेण मंथद्भिरैहिकविषयसंयुक्तत्वादतिबलिष्ठैः रोद्धुं नोत्सहे तथा मे धियः कार्पण्यं यथा तादृशं मनो रोद्धुमुत्साहोऽपि न जायते इत्यर्थः ॥ २७ ॥ तदेवम् इत्थम् । अस्वतंत्र इन्द्रियादिपरतन्त्रः । अत्राशंकते—नन्विति । एतदपि मदंघ्र्युपगमनमपि । तत्राक्षेपे । असतामशास्त्राचाराणाम् । यतोऽसतां तवांघ्र्युपगमनं दुरापमतो हेतोः । संभवत्वात्सप्तम्यपीत्याह—अनुग्रहे सतीति । पुनरत्राशंकते—नन्विति । तया सदुपासनया । इत्यर्थ इति—परम्परया त्वत्कृपैव मोक्षहेतुरिति भावः । नतरां नतमामिह "किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे" इति तरप्तमबंतादामुः ॥ अस्मीति शरणागतस्य दार्ढ्यं नित्यत्वं चाभिप्रैति । हे ईश अन्तर्यामितयाऽधुना त्वयैव तत्र प्रेरणादित्यर्थः । असतामिन्द्रियपरतंत्राणाम् । अनुग्रहे हेतुः—अब्जनाभेति । लोकानुग्रहायैव लोकपद्मं निजनाभौ वहसीति भावः । अन्यत्तैः । तत्र तदुपासना तद्भक्तानां सेवा । संपद्यते साध्वी भवति । त्वन्मतिस्त्वज्ज्ञानम् । मुक्तिर्भक्तेरानुषंगिकी, सापि न तु सा किमुत स्वयं भक्तिरित्यर्थ इति ज्ञेयम् । यदा—तज्ज्ञानं तु मम दूरतममित्याह—पुंस इति । अंघ्रीत्यत्र "सुपां सुलुक्—" इत्यादिनाऽमो लुक् । तथाविधानां मादृशां दुरापं तवांघ्रि यदुपगतोऽस्मि समीपं प्राप्तवानस्मि । तच्चाप्यहमित्यादि पुनःपुनरहंशब्दः केचिन्निजभजनादिकं कारणं वदन्तु तदनुग्रहमेवेति व्यनक्ति । अहो अस्तु तावत्त्वदंघ्रिसमीपप्राप्तिरन्यथा त्वयि मतिरपि दुरापेत्याह—पुंस इति । यर्हि विचारणे सति उत्तमयोपासनया त्वदाराधनेन सतां चोपासनया संसारापवर्गस्तद्वासनाक्षयः स्यादेव तया त्वयि मतिर्भक्तिः स्यान्नान्यदेति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अनित्यादिषु विपरीतबुद्धिः सन् द्वन्द्वारामः हि निश्चितं त्वा त्वामात्मन एव साक्षात्प्रियं परमात्मत्वात् नतु पुत्रादिवद्देहादिसम्बन्धेनेत्यर्थः । इति देहादिभ्योऽपि प्रियतमत्वेन ज्ञानयोग्यतोक्ता तथापि न जाने नानुभवामि ॥ २५ ॥ अबुधः अविवेकी तदुद्भवैः सरसशैवालादिभिरिति सुज्ञेयत्वमपि सूचितं दार्ष्टांतिकेऽपि तत्तत्प्रभावमाधुर्ययुक्तत्वेन अभ्येति दूरतो याति वै प्रसिद्धौ हि त्वाहं त्वामित्येव पाठः तथेति टीकातः तद्वत्त्वाहमिति पाठे तु सिद्धे त्वा त्वां हित्वेत्यन्वयः तथेति टीका तु तद्वदित्यस्य मन्तव्या ॥ २६ ॥ कामः पूर्ववासना तत्प्रेरितेन कर्मणा हतं ततोऽप्यैहिकविषयाणां संयुक्तत्वात्प्रमाथिभिः ॥ २७ ॥ अस्मीति शरणागतत्वस्य दाढर्यं नित्यत्वं चाभिप्रैति असतामिन्द्रियपरतन्त्राणां हे ईशेति अन्तर्यामितयाधुना त्वयैव तत्र तत्प्रेरणादित्यर्थः । अयमनुग्रहे हेतुः अञ्जनाभेति लोकानुग्रहेणैव लोकपद्मं निजनाभौ वहसीति भावः । अन्यत्तैः तत्र सदुपासना तद्भक्तानां सेवा सम्पद्यते सञ्जीभवति त्वन्मतिस्त्वज्ज्ञानं मुक्तिर्भक्तेरानुषङ्गिकी सापि न तमां किमुत स्वयं भक्तिरित्यर्थ इति ज्ञयं यद्वा त्वज्ज्ञानं तु मम परमदूरतममित्याह । पुंस इति । अथवा स तथाविधोऽप्यहमङ्घ्रीत्यत्र सुपां सुलुगित्यादिना अमो लुक् असतां तथाविधानां मादृशां दुरापं तवाङ्घ्रिं यदुपगतोऽस्मि समीपे प्राप्तवानस्मि तच्चाप्यहमित्यादि । अत्र पुनरहंशब्दः केचिन्निजभजनादिकं कारणं वदन्तु अहं तु त्वदनुग्रहमेवेति व्यनक्ति अहो अस्तु तावत्त्वदङ्घ्रिसमीपप्राप्तिरन्यथा त्वयि मतिरपि दुरापेत्याह । पुंस इति । विचारेण यर्हि चिरेण सत्या उत्तमया उपासनया त्वदाराधनेन सतां चोपासनया संसारापवर्गस्तद्वासनाक्षयः स्यात्तदैव तया त्वयि मतिर्भक्तिः स्यान्नान्यदेति ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अनित्यादिषु विपरीतबुद्धिः सन् द्वन्द्वारामः, हि निश्चितम्, त्वा त्वामात्मन एव साक्षात् प्रियम्, न तु पुत्रादिवद्देहादिसम्बन्धेनेत्यर्थः। इति देहादिभ्योऽपि प्रियतमत्वेन ज्ञानयोग्यतोक्ता, तथा न जाने। अन्यत्तैर्व्याख्यातम्। यद्वा, तेन च परमानर्थः स्यादित्याह—अनित्येति; विशेषणत्रयस्य यथाक्रमं तत्र-तत्र हेतुता; आत्मनोऽपि सकाशात् प्रियमित्येवं त्वां न जाने, अन्यथा देहादिष्वासक्त्यसम्भवात् ॥ २५ ॥ अबुधोऽविवेकी, जलं समीपे वर्त्तमानमपि तदुद्भवैर्यवसशैवालादिभिरिति सुज्ञेयत्वमपि सूचितम्। द ष्टान्तिकेऽप्यहंकारादिप्रवर्त्तकत्वेन वृन्दावने पशुपालत्वेन वा श्रीभगवतः सुज्ञेयत्वमूह्यम्, अभ्येति दूरतो याति, वै प्रसिद्धौ, हरिणादिषु तथा दृष्टेः, हित्वाहं त्वामित्येव पाठः। तथेति तैर्व्याख्यानात्। पाठान्तरे तु सिद्धे त्वा त्वां हित्वेत्यन्वयः। तद्वदित्यस्य तथेति तेषां व्याख्या मन्तव्या। अन्यत्तैर्व्याख्यातम्। यद्वा, तादृशत्वदज्ञानेनैव विषयासक्तिः स्यादित्याशयेनाह—यथेति। पराङ्मुखो देहाद्यासक्तोऽस्मीत्यर्थः। अन्यत् समानम् ॥ २६ ॥ अहं त्वद्भक्तोऽपि यद्वा, एवं जानन्नहमपि; कामो भोगेच्छा, कर्म्म तत्कारणम्; इतस्ततः सर्व्वत्र रूप-रसादिषु ॥ २७ ॥ अस्मीति शरणागतत्वस्य दार्ढ्यं नित्यत्वं चाभिप्रैति। असतां देहाद्यासक्तानां विषयपराणां वा; ईशेत्यन्तर्य्यामितयाधुना त्वयैव तत्र प्रेरणादित्यर्थः। अयमनुग्रहे हेतुः। अब्जनाभेति शेषासनादि-नारायणरूपेण दृष्टत्वात्। यद्वा, संसारापवर्गहेतुत्वेन कृपालुत्वमुक्तम्, जगद्विधातृ-श्रीब्रह्मयोनिलोकपद्मद्वारा जीवानां हितार्थमेव जगत्सृष्टिप्रवर्त्तनाद्भवच्छब्दप्रयोगोऽनुग्रहगौरवाभिप्रायेण, भक्तिविशेषात्। यद्वा, तवेत्यनुवर्त्तत एव। भवन्नित्यं जायमानो वर्द्धमानो वा योऽनुग्रपस्तस्मिन्। अन्यत्तैर्व्याख्यातम्। तत्र नतमां मुक्तिरिति भक्तस्यापि तस्य मुक्तौ तात्पर्यं बोधयति, तत्त्च गृहे कंसादिसंगेनातिदुःखलब्ध्या निर्व्विण्णत्वेन, किंवा श्रीगोपीकृतावज्ञयैवेति ज्ञेयम्। तच्च लोकाना महदपराधपरिहारशिक्षार्थमेवेति, अथवा स विचित्रसंसार-दुःखाभिभूतोऽहं तन्निवृत्तये तवाङ्घ्रिमुपगतोऽस्मि। ईश हे परमस्वतन्त्र! भगदनुग्रहे च हेतुर्वानुसन्धेयः स्यादिति भावः। ननु मुक्तिमिच्छसि, न च कथं मयि प्रीतिम्? तत्राह—पुंस इति। यर्हि पुन्सो मुक्तिः स्यात्तदैव सतां त्वद्भक्तानां सेवया त्वयि मतिः प्रमहेतुर्मनोवृत्तिस्त्वद्भक्त्यादिमाहात्म्यज्ञानं वा भवेदित्यर्थः। यद्वा, स मनो रोद्धुमशक्तोऽहं तद्रोधनार्थं तवाङ्घ्रिमुपगतोऽस्मि। ननु तद्रोद्धुमेव कथं मदङ्घ्रिमुपगच्छसि, न च कथं मयि तदभिनिवेशायितुमित्यत आह—पुन्स इति। अर्थः स एव। संसाराकुलोऽहमधुना न तत्प्रार्थनायोग्योऽस्मीति भावः। यद्वा, तत्तु भवदनुग्रहे सत्येव मन्ये। किं तहाह—पुंस इति। मुक्तौ सत्यामेव सदुपासनया त्वयि मतिः स्यादिति यत्। अन्यत् समानम्। अतोऽधुना भवदनुग्रहाभावात्तथा प्रार्थयितुं नार्हयामीति भावः। यद्वा, नान्वत्थं दृश्यमानैतदादिनारायणरूपेणै स्तुत्वा शरणं यासि, न च कथं मम द्विभुजगोकुलोत्सवनिजरूपेण स्तुत्वेत्यत्राह—पुन्सो यदा संसारध्वंसः स्यात्, तदाब्जनाभस्य श्रीनारायणस्य सत्या उत्तमया उपासनया त्वयि श्रीगोकुत्सवे मतिर्भवेदिति यत्तदसतां मादृशां दुरापमपि भवतः श्रीनन्दनन्दनस्यानुग्रहे सत्येव भवतीति मन्ये, न त्वन्यथेति श्री नारायणस्य सदुपासनां विना त्वयि मतिर्न स्यात्, सा च सदुपासना, भवदनुग्रह विना न स्यात्, अतो नारायणोपासनां विना त्वयि मतिर्न स्यात्, अतो नारायणोपासनाया दुर्लभतोक्ता, अनयापि साधनभूतया साध्यायास्तन्मतेस्तु सुदुर्लभता दर्शितेति भवदनुग्रहाद्यभावात् कथं मया मन्निज रूपादिवर्णनेन श्रीब्रह्मवत् स्तोतुं न शक्नोमीतिभावः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

संसरणं संसारः संसारवासना हेतुभूता त्वयि त्वद्विषया मतिः न, यद्वा यदा मतिः स्यात् तदा संसारापवर्ग इत्यर्थ ॥२८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मूढत्वमेवाविष्करोति। अनित्येति। अहमनित्यानात्मदुःखेषु विपर्य्ययस्ता मतिर्यस्य सः अनित्येषु वस्तुषु नित्यमतिमान् अनात्मनि देहे आत्माभिमानवान् अन्ततो दुःखात्मकेषु शब्दादिविषयेषु सुखाभिमानी चेत्यर्थः। द्वन्द्वेषु सुखदुःखादिषु आरमामीति क्रीडतीति तथा सः वैषयिकसुखानुबन्धितया प्राप्तं दुःखमपि सुखवन्मन्यमान इत्यभिप्रायः तत्र हेतुः तमसा गुणेषु व्याप्तः आत्मनः प्रियं न जाने निरतिशयनित्यनिरुपाधिकप्रीतिविषयं त्वां न जानामीत्यर्थः ॥ २५ ॥ उक्तमेव सदृष्टान्तमाह। यथेति। तस्मात् जलादुद्भवन्तीति तथा तैस्तृणादिभिश्छन्न जलं हित्वा अत एवाबुधो मृगतृष्णां जलवदवभासानां मरीचिकामभ्येति तथाहमपि त्वां निरतिशयपुरुषार्थभूतं तत्साधनभूतञ्च त्वां त्यक्त्वा पराङ्मुखः देहाद्यभिमुखो वर्त्ते इत्यर्थः ॥ २६ ॥ नन्वेवं जानतः कुतस्तव विषयाभिमुख्यं तत्राह। कृपणा विषयवासनायुक्ता धीर्यस्य सः अत एवान्तः कामकर्मभ्यां हतं क्षुभितमिन्द्रियैः प्रमाथिभिर्विषयसंयुक्तैरितस्तत आकृष्यमाणं मनो रोद्धुं नियन्तुं नोत्सहे न शक्नोमि ॥ २७ ॥ तदेवं विषयपरवशः साधनान्तररहितोऽहमङ्घ्रिमुपगतः तवाङ्घ्र्युपगतः शरणं प्राप्तः कथम्भूतमङ्घ्रिम् असतां दुरापं दुष्प्राप सापेक्षस्याङ्घ्रिशब्दस्याप्यत्र समास आर्षः। नन्विन्द्रियपरवशस्यैतदपि कुतस्तत्राह। तच्चापीति। तदङ्घ्र्युपगमनं भवदनुग्रहं श्रीभगवदनुग्रं त्वदनुग्रहमूलकं मन्ये अन्तरात्मतया अनुजिघृक्षोस्तवानुग्रहकारितं मन्य इत्यभिप्रायेण सम्बोधयति अनेन शरणवरणे स्वस्वातन्त्र्यनिवृत्तिः सूचिता ननु प्रपित्सा सत्सेवामूलिका नतु मदनुग्रहमूलिकेत्यत्राह। यदा पुंसः संसरणस्यापवर्गः समाप्तिर्यस्मात्स अनुग्रह इति विशेष्याध्याहारः तथाभूत-

स्त्वदनुग्रहो भवेत्तदा हे अब्जनाभ ! सतामुपासनया त्वयि मतिः स्यात्प्रपित्सात्मिका मतिः स्यादित्यर्थः । ईश्वरस्य च सौहार्दं यदृच्छासुकृतं तदा विष्णोः कटाक्षः इत्याद्युक्तरीत्या सत्सङ्गादिप्रणाड्यामपि त्वदनुग्रह एव निदानमिति भावः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अनित्यानात्मदुःखेषु विपर्ययमतिः । अनित्येषु नित्यबुद्धिः अनात्मन्यात्मबुद्धिः ॥ २५ ॥ तदुद्भवैः जलोद्भवैः शैवालादिभिः अबुधः मृगतृष्णां मृग्यन् इति मृगा विषयास्तत्तृष्णाञ्च ॥ २६ ॥ मनो रोद्धुं नोत्सहे ॥ २७ ॥ तथापि प्रयत इत्याशयेनाह । सोऽहमिति । यः मनःसाधनकरणाशक्तः सोऽहं यच्च तवाङ्घ्र्युगमनञ्च अपि शब्द एवार्थे स्वपदप्राप्तौ निमित्तं ध्वनयति । पुंस इति । यर्हि यदा संसरणात्संसारादपवर्गो मोक्षो भवेत् कस्य पुंसस्तदाह । हे अब्जनाभ ! सतां पुरुषाणामुपासनया सेवया हेतुना त्वयि मतिः मननबुद्धिः अवतरतीत्यर्थः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कामेन भोगेच्छया कचित् कर्मणा केवलप्रारब्धाख्येनापि ॥ २७ ॥ सोऽहमिति । तथाविधकृपणधीरप्यहम् ननु सन्मतिं विना मदनुग्रहोऽपि कथं स्यात्तत्राह । पुंस इति । पुन्सः यर्हि संसाराणामपवर्गः स्यात् सर्वज्ञैर्भावित्वेन सम्भाव्यते तर्हि सदुपासनया त्वयि मतिः स्यादित्यर्थः । भवापवर्गो भ्रमतो यदा भवेदित्यादेः तस्मादत्र ममापि सदुपासनैव निदानमितिः भावः ॥२८–३०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अनित्ये कर्मफले नित्यमिति अनात्मनि देहे आत्मेति दुःखरूपे गृहादौ सुखमिति विपरीतमतिरित्यर्थः । द्वन्द्वेषु सुखदुःखेषु आरमतीति सः यतस्तमसाविष्टः व्याप्तः आत्मनः प्रियं प्रेमास्पदं त्वां न जाने ॥ २५ ॥ सदृष्टान्तमाह । यथेति । तस्माज्जलादुद्भवन्तीति तदुद्भवानि तृणादीनि तैः तथाज्ञानेन मायाच्छन्नत्वेन प्रतीतं त्वा त्वां हित्वा पराङ्मुखः देहाद्यभिमुखो वर्त्ते ॥ २६ ॥ प्रमाथिभिः प्रकर्षेण मथद्भिर्वलिष्ठैरक्षैरिन्द्रियैराकृष्यमाणं मनः रोद्धुं नोत्सहे इति तथा मे धियः कार्पण्यं यथा तादृशं मनः रोद्धुमुत्साहोऽपि न जायत इत्यर्थः ॥ २७ ॥ सोऽहं तथाभूतोऽप्यहं तवाङ्घ्रिम् उपगतः शरणं प्राप्तोऽस्मि तच्च त्वदङ्घ्र्युपगमनमसद्भिर्जनैर्दुरापं भगवदनुग्रह एव भगवदनुग्रहे सत्येव संभवेदित्यहं मन्ये जानामि मदनुग्रह एव कदा स्यात्तत्राह । हे अब्जनाभ ! सदुपासनया हेतुना यर्हि त्वयि मतिः स्यात् सदुपासनैव कदा स्यात्तत्राह । पुंसो यर्हि संसरणस्य संसारान्तकाल एव कदास्यादिति चेत् यदा यादृच्छिकी सत्कृपा स्यादिति ज्ञेयं तेनादौ यादृच्छिकी सत्कृपा ततः संसारनाशारम्भः ततः सदुपासना ततः कृष्णमतिरिति क्रमः शास्त्रारम्भ एव सत्यामित्यादिना प्राक्प्रदर्शित उक्तो भवति ॥ २८ ॥

गूढार्थदीपिनी

अनित्ये कर्मफले नित्यमिति अनात्मनि देहे आत्मेति दुःखरूपे गृहादौ सुखमिति । तमोऽज्ञानम् त्वा त्वाम् ॥ २५ ॥ तदुद्भवै जलोद्भवैः तृणशैवालादिभिः आच्छन्नं जलं हित्वा मृगतृष्णां मरीचिकां जलाभासरूपामनुधावति तद्वत् तथा त्वा हित्वा पराङ्मुखो वर्ते ॥ २६ ॥ प्रमाथिभिः अतिबलिष्ठैः इन्द्रियं आकृष्यमाणं मनो निरोद्धुं नोत्सहे न शक्नोमि ॥ २७ ॥ अङ्घ्रि अङ्घ्रिम् उपगतः । तच्चापि अङ्घ्र्युपगमनम् भवदनुग्रहः । यदि त्वयि मतिः तदैव संसारात् मोक्षः स्यात् नान्यथा ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अनित्ये गृहादौ नित्यमिति अनात्मनि देहादावहमिति दुःखे संस्पर्शजे भोगे सुखमिति विपर्ययमतिः द्वन्द्वेषु सुखदुःखादिषु आरमति क्रीडतीति तथा सः तमसि मायायां विष्टः प्रविष्टः मायावृतज्ञान इत्यर्थः । आत्मनः अंशभूतस्य जीवात्मनः प्रियं स्थितिप्रवृत्तिहेतुमंशिनं परमात्मानं त्वां न जाने ॥ २५ ॥ सर्वदान्तर्य्यामिण त्वत्कार्य्यभूतेषु अन्तर्वसन्तं परमानन्दं त्वामहं हित्वा पराङ्मुख आनन्दभ्रान्त्या कलत्रापत्याद्यभिमुखो वर्ते यथा अबुधो मूर्खः कश्चित्तदुद्भवैस्तृणादिभिः प्रतिच्छन्नं जलं हित्वा मृगतृष्णामभ्येति तद्वत् ॥ २६ ॥ एवञ्जानतोऽप्यात्मनः दैन्यमाह । नोत्सहे इति । कृपणा आत्मविमोक्षणे अकुशला धीर्यस्य सः अत एव कामोऽभिलाषस्तन्मूलकैः कर्मभिर्हत मोहितम् अक्षैरिन्द्रियैः प्रमाथिभिर्बलिभिरिन्द्रियैर्ह्रियमाणमभिभूयमानं मनः रोद्धुमात्मविमोक्षणोपाये प्रवर्तयितुं नोत्सहे न शक्नोमि ॥ २७ ॥ एवं दीनोऽहं तवाङ्घ्रिमुपतः शरणं प्राप्तोऽस्मि तच्चापि अङ्घ्र्युपगमनमपि असतामसाधूनां दुरापम् अतः हे ईश ! किञ्चित्साधुत्वं निमित्तीकृत्य भवतोऽनुग्रहे सति एवेत्यहं मन्ये उपगननप्रदस्यानुग्रहस्य निर्निमित्तत्वस्वीकारे सर्वषामुपगमनप्रसङ्गः स्यादिति भावः । तत्र साधुत्वं त्वयि मतिमत्त्वमित्याह । हे अब्जनाभ पुंसः संसारिणः यर्हि यदा सदुपासनया सतामुपासनया त्वयि मतिः स्यात्तदा संसरणस्य प्रवाहस्य अपवर्गः समाप्तिर्भवेत् सत्सेवया त्वयि मतिस्ततस्त्वदनुग्रहस्तत उपगमनं ततो मुक्तिरिति क्रमः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ते भवन्तु भ्रान्ता न भवांस्तथेति न वद देवेति वदति । अहं चेति । आत्मा देह आत्मजा पुत्रा दारा भार्या अर्थो द्रव्यं स्वजना आदयो येषां तेषु स्वप्नकल्पेष्वस्थिरतया तत्समेष्वत्रैव सुखमिति धीस्तया भ्रमामि । एतद्दृढमूलतां श्लथयितुं तवैव सामर्थ्यमिति तथा सम्बोधयति । विभविति ॥ २५ ॥ अनित्येषु नित्यतया अनात्मन्यात्मतया दुःखे सुखतया इति विपर्ययेण मतिर्यस्य स द्वन्द्वारामस्तमोनिष्ठोऽज्ञानवान् जगत्पते त्वां न जाने ॥ २६ ॥ यथाऽबुधोऽज्ञस्तदुद्भवैः शैवालादिभिश्छन्नं जलं नेति हित्वा मृगं तृष्णामभ्येति तथा त्वां हित्वाऽहं पराङ्मुखः ॥ २७ ॥ उपासनया तदसनं कुर्वक्रूरेत्यत आह । नेति । कृपणधीरहं कामकर्महतं मनः प्रमाथिभिः प्रमथनशीलैः स्वाक्षैः स्वेन्द्रियैरितस्ततो ह्रियमाणं रोद्धुं नोत्सहे न शक्नुयाम् । मनोवृत्तिवैचित्र्ययुतमिति स्वाक्षैर्ह्रियमाणमिति सम्भवति ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु शास्त्राद्विवेके उत्पन्ने संसारस्यासारतां ज्ञात्वा स्वयमेव सर्वं त्यक्ष्यसि किं मया कर्तव्यामित्याशङ्कायामाह । अनित्येति । शास्त्रमप्युल्लङ्घ्य मम बुद्धिर्विपरीता जाता अनित्ये सर्वत्र नित्यबुद्धिः देहे दैहिके च अनात्मनि आत्मबाधके आत्मबुद्धिः देहादावेव दुःखे विण्मूत्रपूयस्थितौ सुखबुद्धिः अतो ज्ञातमपि शास्त्रं नानुभावं बाधते अतो द्वन्द्वेष्वेव सुखदुःखादिषु रागद्वेषादिषु वा आरामो यस्य तादृशो जातः ननु कथमेवं भ्रमस्तत्राह । तमोविष्ट इति । तमो महामोहः अज्ञानमेव वा तद्यस्य निवृत्तिः कदेत्याशङ्कायां त्वयि ज्ञाते प्रकाशो भगवतीति निश्चित्य त्वज्ज्ञानमेव चक्षुषि विद्यमानतमसा न जायत इत्याह । न जान इति न हि स्वप्रकाशमपि सूर्यमन्धः पश्यति तथा त्वामपि आत्मनामपि प्रियं परमानन्ददातारं सुगममपि प्रत्यक्षसिद्धमपि तथात्वेन न जाने आत्मनः परमिति वा नियन्तारम् ॥ २५ ॥ ननु श्रुत्यनुभवौ परित्यज्य युक्तिमान् विवेकी कथं न जानातीत्याशङ्क्य दृष्टान्तेन स्पष्टयति । यथेति । अबुधो मूर्खः जलार्थी सन् जलाशयोपरि तिष्ठन् कमलपत्रादिभिः आच्छन्नं जलं कमलपत्रादिसमूहमेव ज्ञात्वा तददूरीकृत्य मध्यस्थितं जलमगृहीत्वा दूरे मरीचिकाजलं पश्यन् तदर्थमभिधावति तद्वदेवान्तः स्थितं भगवन्तम् अहङ्कारादिभिस्तदुद्भवैराच्छन्नं तददूरीकृत्य परमानन्दमननुभूय दुःखात्मके बहिर्विषये अभिधावति तद्वदहं त्वां हित्वा विषयसुखार्थं गच्छामि अत्र हेतुमाह । पराङ्मुख इति । पराक् बहिरेव मुखं यस्येति मुखमत्र प्रवृत्तिस्वभाव आत्मा तस्य प्रतिनिधिरूपमिदं मुखं यदभिमुखस्तदेव च करोति अत्र शास्त्रादिद्वारा यदा अन्तर्मुखो भवति तदैव निकटे भगवन्तं प्राप्नोति बहिर्जलप्राप्तिस्तु भगवदिच्छया प्रलय इव सर्वत्र भगवदभिव्यक्तौ ऽथैवायं प्रदर्शयति तथैव स मन्यत इति स्वयमपि तथैव तम्प्रत्यभिव्यक्त इति न काप्यनुपपत्तिः ॥ २६ ॥ ननु जाते विवेके कथं मोह इति चेत्तत्राह । नोत्सहेऽहमिति । मनो हि द्विः स्वभावं क्रियाशक्तियुक्तं ज्ञानशक्तियुक्तं च । यथा विवेकेन शास्त्रेण च ज्ञानशक्तिरुत्पाद्यते । एवं योगेन क्रियाशक्तिरपि चेदुत्पाद्येत तदैकमुखं मनो भवति अन्यथा बलिष्ठा क्रिया ज्ञानं बाधित्वा स्वकार्यमेव करोति । अत एव केचित् ज्ञानापेक्षयापि योगमेव प्रशंसन्ति ज्ञानिभ्योऽप्यधिको मत इति भगवानप्याह । ज्ञानेच्छाप्रयत्नानामुत्तोरात्तरप्राबल्यं तथैव मनोवाक्कायानामपि तत्र कामादयो बाधकाः तैः संसार एव मनः प्रवर्त्यते योगादयस्त्वशक्याः न ह्यन्धकारे महति वायौ वृष्टौ च दीपः स्थापयितुं शक्यते तदाह । कृपणधीरिति । कृपणा दीना बुद्धिर्यस्य मनसो हि नियामिका बुद्धिः सैवादौ कृपणादीनां विषयपरा न हि चौरेणान्यः सन्मार्गे स्थापयितुं शक्यः किं च मनः पुनः कामकर्मभ्यां हतमुत्कटेच्छा कामः तदनुगुणं च कर्म ज्ञानं तु दुर्बलमसहायं कामकर्मभ्यां च हतं न तु स्वस्थं तद्भयेन तदनुगुणमेव भवति न त्वात्मानुगुणमतो रोद्धुमुत्साहमपि न करोमि अशक्यज्ञाननिश्चयात् किं च प्रमाथिभिर्बलिष्ठैरिन्द्रियैः इतस्ततो ह्रियमाणम् अतः सर्वत्रैवाशक्तः केवलं शरणं गच्छामि बलिष्ठांस्तांश्च निवेदयामि स्वाशक्यत्वं च ॥ २७ ॥ एवं सति यत्कर्त्तव्यं भगवतैव तच्चेत् क्रियेत कृपया स्वव्रतविचारेण अस्मद्भाग्येन तस्यैव वा कार्यार्थं तदैव निस्तारो नान्यथेत्यभिप्रायेणाह । सोऽहं तवाङ्घ्र्युपगतोऽस्मीति । सर्वथा अशक्यसाधनः सोऽहं तवाङ्घ्रिमुपगतः दीनतया शरणं प्रविष्टः इदानीमस्मि एतदीप शरणगमअसतां दुरापं ये असन्तः पूर्वोक्ताः विवेकरहिता अपि विवेकेन त्वेतावत्सम्पाद्यत इति किं च भगवदनुग्रहमेव तन्मन्यो अन्यथा शरणागतो न भवेत् शरणागतो जात इति वा न भवेत् यदि सङ्घातमनुगुणं कुर्यात् त्याजयेद्वा तदा शरणागतिः सिद्धेति ज्ञातव्यम् अनुगुणपक्षस्तु ज्ञातुं सुगमः त्याजनपक्षस्तु दुर्ज्ञेयोऽपि अनुभावेन कृपाप्रकाशेन च ज्ञायते अतः स्वरूपतो निष्पत्त्या वा शरणागमनमेव भगवतोऽनुग्रहः सत्सेवानुग्रह इति स्वरूपसत्त्वमेव नियामकं तथैव ते उत्पादिताः इति मूलेच्छात्र नियामिका । ननु त्याजनमनुगुणं वा तस्यापि स्वार्थमात्रेऽप्यशक्ये भगवान्कथं करिष्यतीति चेत्तत्राह । ईश इति । हे सर्वसमर्थ अत्र ममानुभवः एव प्रमाणमित्याह । मन्य इति अनेन भगवानेव यदि करोति तदैव निस्तारो भवति इति ज्ञापितम नन्वेवं सति शास्त्रं व्यर्थं स्यात् ज्ञानस्याप्यनुपयोगादिति चेत्तत्राह । पुसो भवेदिति । यर्हि पुन्सः भगवदिच्छया संसरणापवर्गः स्यात् सृष्टिसमये हि भगवान् सर्वानेव विचारयति इममित्थं करिष्यामीति तत्र यं मोचयिष्यामीति मन्यते तत्र जन्मानि अवधिमन्ति करोति तथा सति यदैवान्तिमं भवति स संसरणापवर्ग उच्यते अग्रे संसरणाभावात् अत्रोपपत्तिरूपं किञ्चिदाह पुन्सो भवेदिति । अन्यथा तं पुरुषमेव न कुर्यात्

"तासां मे पौरुषी प्रियो" ति भगवद्वाक्यात् अतः पुन्सां मुक्तिरस्तीति सम्भाव्यते परं कालनियमे न प्रमाणं तदाह । यर्हीति । यर्ह्येवान्तिमं जन्म करिष्यतीत्यत्र नियामकमाह । अब्जनाभेति । अन्यथा स्वयमागत्य सृष्टिं नोत्पादयेत् अब्जं नाभौ यस्येति स्वयमाविर्भूय यतः सृष्टिं कृतवान् न तु सेवकद्वारा अतो ज्ञायते केषाञ्चिन्मुक्तिं तस्यां सृष्टौ दास्यतीति तस्मिन् जन्मनि भगवति मतिर्भवति "तमेव विदित्वातिमृत्युमेतीति" नियमात् "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तर" मिति भगवद्वाक्याच्च भगवज्ज्ञानमावश्यकं तत्र सता बोधकत्वेन उपदिश्यमानत्वेन च शास्त्रोपयोगः साधनेनैव सर्वं करोतीति एतावानर्थंस्तुल्य इति अशक्यो भगवानेव वर्त्तत इति त्याजनपक्षेऽपि न काप्यनुपपत्तिः अतः सत्सेवारुचिः भगवत्स्वरूपज्ञानेच्छा शास्त्रपरत्वं च अन्तिमजन्मज्ञापकम् ॥ २८ ॥

श्रीसुबोधिनी–सारः

तथाहि अनित्याऽनात्मदुःखेषु विपार्यया विपरीता मतिर्बुद्धिर्यस्य सोऽनित्ये कर्मफले देहादौ नित्यमिति अनात्मनि संघाते आत्मेऽति दुःखरूपे गृहादौ सुखमिति विपर्ययः द्वन्द्वेषु सुखदुःखेषु आरमतीति तमोविष्टः तमसा व्याप्तोहमात्मनः प्रियं न जाने न वेद्मि हि युक्तम् ॥ २५ ॥ तस्माज्जलादुद्भवैरुत्पन्नैः तृणादिभिः प्रतिच्छन्नम् आवृतं जलं हित्वा त्यक्त्वाऽबुधोऽज्ञो मृगतृष्णां मरीचिकाजलम् अभ्येति धावति यथा तद्वत्त्वा त्वां त्यक्त्वाऽहं पराङ्मुखो देहादिभागस्मि वै एव ॥ २६ ॥ ननु जानतस्तव कुतो विषयप्रवणत्वं तत्राह । प्रमाथिभिर्मथनकर्तृभिरक्षैरिंद्रियैरितस्ततो विषयादौ ह्रियमाणमाकृष्यमाणं कामकर्मभ्यां हतं क्षुभितं मनो रोद्धुं संयंतुं कृपणा वासनायुक्ता धीर्यस्य सोहं नोत्सहे न शक्नोमि ॥ २७ ॥ सोऽस्वतन्त्रोऽहं तवांघ्रिमुपगतः प्राप्तोऽस्मि असतां दुष्टानां तच्च त्वदंघ्र्युपगमनं दुरापं दुर्लभं भवतोऽनुग्रहोऽयमित्यहं मन्ये द्वितीयान्तं सप्तम्यन्तं वेत्येके । ततः किं तत्राह । हे अब्जनाभ पुंसो जीवस्य संसरणस्य संसारस्याऽपवर्गः समाप्तिर्मोक्षो यर्हि स्यात्तदा सतामुपासनया त्वयि मतिः स्यात् ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मोहमेव स्पष्टयति— अनित्येति । देहादिषु अनित्येषु नित्या इति, अनात्मसु आत्मान इति, दुःखेषु दुःखप्रदेषु सुखप्रदा इति, विपर्यया मतिर्यस्य सः । हि यस्मात् एवंभूतोऽहं तस्मात् द्वन्द्वेषु सुखदुःखादिषु आरमते क्रीडतीति द्वन्द्वारामः आत्मनः प्रियं आत्मत्वादुपकारित्वाच्च निरतिशयनिरुपाधिकप्रीतिविषयं त्वां न जाने । विपर्ययमतित्वे हेतुमाह— तमोविष्ट इति । अविद्याव्याप्त इत्यर्थः ॥ २५ ॥ तत्रैवाच्छादितहेत्वन्तरं दृष्टान्तेन स्पष्टयति— यथेति । अबुधः अज्ञो जनो यथा तदुद्भवैः तस्मात् जलादुद्भवन्तीति तथा तैस्तृणादिभिश्छन्नं जलं हित्वा मृगतृष्णां जलवदाभासमानां मरीचिकामभ्येति अनुधावति तद्वत्त्वामहं पराङ्मुखः । निरतिशयपुरुषार्थं परमानन्दस्वरूपं त्वां हित्वा मरीचिकातोयवद्विषयसुखेष्वासक्त इत्यर्थः ॥ २६ ॥ ननु 'तर्हि मनःसमाधानं कृत्वा विषयासक्तिस्त्याज्या' इत्याशङ्क्याह—नेति । अहं मनः रोद्धुं वशीकतु नात्सहे न शक्नोमि । तत्र हेतुमाह—कामकर्मभ्यां हतं क्षुभितं प्रमाथिभिः प्रबलैरक्षैरिन्द्रियैश्चेतस्ततो ह्रियमाणं विषयं प्रत्याकृष्यमाणमिति । 'विवेके सति किमशक्यम्' इत्याशङ्क्याह—कृपणधीरिति । कृपणा विवेके असमर्था धीर्यस्य सः ॥ २७ ॥ स इन्द्रियपरतन्त्रोऽहं तवाङ्घ्रिमुपगतः शरणं प्राप्तोऽस्मि भगवच्चरणस्य दुर्लभत्वमाह—असतां विषयाकृष्टमनसां दुरापमिति । तर्हि विषयाकृष्टस्त्वं कथं प्राप्तस्तत्राह— तच्चाप्यभ्युपगमनं भगवदनुग्रहभवदनुग्रहमूलकमहं मन्ये । 'तस्य मदनुग्रहमूलकत्वं कथं सम्भवति' इत्यपेक्षायां 'सर्वान्तर्यामित्वात्' इति हेतुं सूचयन् सम्बोधयति—ईशेति । त्वदनुग्रहात्कृतार्थोऽहम्' इत्याह – पुंस इति । यर्हि पुंसः संसारिणः संसरणस्यापवर्गः समाप्तिः सम्भाविता स्यात् तदा हे अब्जनाभ ! सतां त्वद्भक्तानामुपासनया तस्य त्वद्विषयिका मतिः स्याद्भवति । मम तु त्वद्दर्शनस्पर्शनादिकमपि जातम्, अतो मोक्षे कः सन्देह इत्याशयः ॥ २८ ॥

अन्वितार्थप्रकाशिका

मूढत्वं स्फुटयति—अनित्येति ॥ देहादिषु अनित्येषु नित्या इति अनात्मसु आत्मान इति दुःखेषु दुःखप्रदेषु सुखप्रदा इति विपर्यया मतिर्यस्य सः । हि यस्मात् एवंभूतोऽहं तस्मात् द्वन्द्वेषु सुखदुःखादिषु आरमति क्रीडतीति द्वन्द्वारामः तमोविष्टः अविद्याप्राप्तः अतः आत्मनः प्रियं निरुपाधिकप्रीतिविषयं त्वां न जाने ॥ २५ ॥ यथेति ॥ अबुधः अज्ञो जनो यथा तदुद्भवैः तस्मात् जलादुद्भवन्तीति तया तैस्तृणशैवालादिभिश्छन्नं जलं हित्वा मृगतृष्णां जलवदाभासमानां मरीचिकामभ्येति अनुधावति तद्वत् मायाच्छन्नं त्वा त्वामहं हित्वा पराङ्मुखः देहाद्यभिमुखो वर्त्ते ॥ २६ ॥ नेति ॥ कृपणा वासनायुक्ता धीर्यस्य अहं कामकर्मभ्यां हतं क्षुभितं प्रमाथिभिः प्रबलैरक्षैरिन्द्रियैश्चेतस्ततो ह्रियमाणं विषयं प्रत्याकृष्यमाणं मनः रोद्धुं वशीकर्त्तुं नोत्सहे न शक्नोमि ॥ २७ ॥ सोऽहमिति ॥ हे ईश ! सः इन्द्रियपरतन्त्रोऽहम् असतां विषयाकृष्टमनसां दुरापं तवाङ्घ्रिं "सुपां सुलुग्" इति छान्दसोऽमो लुक् । उपगतः शरणं प्राप्तोऽस्मि तच्चाप्युपगमनं भवदनुग्रह एवेत्यहं मन्ये । इतिशब्दाध्याहारेण कथञ्चित्प्रथमा समर्थनीया । अनुग्रहे सत्येवेति वा यतः यर्हि पुंसः संसारिणः संसरणस्यापवर्गः समाप्तिः संभाविता स्यात् । तदा हे अब्जनाभ ! सतां त्वद्भक्तानामुपासनया तस्य त्वद्विषयिका मतिः स्यात् भवति त्वत्कृपयैव सदुपासना तयैव त्वयि मतिर्भवेत् । त्वत्कृपां विना न

सत्सेवा नतरां त्वन्मतिः नतमां मुक्तिः तेन सत्कृपासंसारनाशारम्भः। सदुपासना कृष्णे मतिरिति क्रमोऽप्युक्तः। मम तु दर्शनादिलाभान्मोक्षे कः सन्देहः ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मूढत्वं दर्शनाह अनित्येति अनित्यानात्मदुःखेषु अनित्ये कर्मफलोत्पन्ने स्वर्गधनपुत्रादौ नित्यमिति अनात्मनि शरीरे अयमहमिति च दुःखे दुःखात्मके विषयः भोगे सुखमिति च विपर्ययमतिः विपरीतबुद्धिः द्वन्द्वारामः द्वन्द्वेषु प्राकृतसुखदुःखादिषु आरामः क्रीडा यस्य अतः तमसाविष्टो व्यासः तमो निष्ठेति वा पाठः आत्मनः स्वस्य प्रियं हितजनकं कृत्यं न जाने तु पादपूरणे यद्वा आत्मनः स्वस्य प्रियं त्वा त्वां न जाने ॥ २५ ॥ तदेव विपरीतकृत्यमाह यथेति। तदुद्भवैः जलोत्पन्नैः शैवालतृणादिभिः प्रतिच्छन्नं आच्छादितं अबुधोऽज्ञः मृगतृष्णां मरीचिकाजलं यथा अभ्येति तद्वत् त्वां मनुष्यसदृगाकृत्याछन्नं परमेश्वरं हित्वा पराङ्मुखः देहगेहोत्पन्नविषयसुखसन्मुखोऽहं वर्त्ते ॥ २६ ॥ नन्वेवं ज्ञातुस्तव कथं विषयसन्मुखत्वमिति चेत्तत्राह नेति कृपणा विषयासक्ता धीर्यस्य सः कामो विषयभोगोऽभिलाषश्च तदर्थकं कर्म च ताभ्यां हतं विक्षिप्तं प्रमाथिभिः बलवद्भिः विषयप्रवणैरिति यावत् अक्षैरिन्द्रियैः इतस्ततः प्राकृतविषयेषु आकृष्यमाणं मनः रोद्धुं वशीकर्त्तुं नोत्सहे न समर्थोऽस्मि ॥ २७ ॥ स इति सोऽहं तवांघ्र्युपगतः अंघ्र्योः पादयो उपगतः समीपं प्राप्तोऽस्मि हे ईश असतां असज्जनानां दुरापं यत्तव चरणसमीपगमनं तदपि मादृशां जातं भवतस्तव अनुग्रह एवास्तीत्यहं मन्ये पुंसः संसरणापवर्गः संसरणस्यापवर्गः सामाप्तिर्यर्हि भावेत्तर्हि हे अब्जनाभ सदुपासनया सत्पुरुषप्रसंगेन त्वयि मतिः अत्यासक्ता बुद्धिः स्यात्। यद्वा असतां यद्दुरापं तवांघ्रिम् अहं उपगतोऽस्मि सुपां सुलुगित्यादिना अमो लुक् मादृशां तदंघ्र्युपगमनं चापि त्वदनुग्रह एवास्तीति मन्ये शेषं पूर्ववत् ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मूढत्वमेवाविष्करोति। अनित्येति। हे हरे, अहं अनित्यं च अनात्मा च दुःखं च तेषु, विपर्यस्तां विपरीततां प्राप्ता मतिर्यस्य सः, पाठान्तरेऽप्ययमेवार्थः। अनित्येषु नित्यतामतिमान्, अनात्मनि देहादावात्माभिमान्, अन्ततो दुःखात्मकेषु शब्दादिविषयेषु सुखाभिमानवांश्चेत्यर्थः। द्वन्द्वेषु सुखदुःखादिषु आरमते क्रीडतीति द्वन्द्वारामः। वैषयिकसुखानुबन्धितया संप्राप्तं दुःखमपि सुखवन्मन्यमान इत्यर्थः। कुत एवं तत्र हेतुः। तमोविष्टः तमोगुणेन व्याप्तः सन्, आत्मनः प्रियं त्वा त्वां, न जाने हि। निरतिशयनित्यनिरुपाधिकप्रीतिविषयं त्वां न जानामीत्यर्थः ॥२५॥ उक्तमेव सदृष्टान्तमाह। यथेति। तस्माज्जलादुद्भवन्तीति। तथा तैः, तृणादिभिरिति शेषः। प्रतिच्छन्नमावृतिं प्राप्तं जलं हित्वा, अबुधः, मृगतृष्णां जलवदवभासमानां मरीचिकां, अभ्येति। तद्वत् अहं अपि, त्वा त्वां निरतिशयपुरुषार्थभूतं तत्साधनभूतं च भगवन्तमित्यर्थः। त्यक्त्वा, पराङ्मुखः। वै वर्ते इति शेषः ॥ २६ ॥ नन्वेवं जानतस्तव कुतो विषयाभिमुख्यं तत्राह। नोत्सह इति। कृपणा विषयवासनायुक्ता धीर्यस्य सः अहं, कामश्च कर्म च ताभ्यां हतं क्षुभितं, प्रमाथिभिर्बलातिशयवत्तयोपेतैः, अक्षैरिन्द्रियैः, इतस्ततः ह्रियमाणमाकृष्यमाणं, मनः रोद्धुं, न उत्सहे न शक्नोमीत्यर्थः चकारोऽवधारणार्थः ॥ २७ ॥ सोऽहमिति। सोऽहं विषयपरवशः साधनान्तररहितश्चेत्येवंभूतोऽहमित्यर्थः। तव अङ्घ्र्युपगतः अस्मि, तवाङ्घ्रिद्वयशरणं प्राप्तोऽस्मीत्यर्थः। अनेन शरणवरणेन स्वस्वातन्त्र्यनिवृत्तिः सूचिता। नन्विन्द्रियपरवशस्य तवैतदपि कुतस्तत्राह। असतां दुरापं दुष्प्रापं तच्चापि तद्भवदङ्घ्र्युपगमनमपि, अहं भवदनुग्रहं त्वदनुग्रहमूलकं मन्ये। अन्तरात्मतयाऽनुजिघृक्षोस्तवानुग्रहककारितं मन्यो इत्यर्थः। हे ईश, हे अब्जनाभ, यर्हि पुन्सः संसारिणो जनस्य, संसरखस्यापवर्गः समाप्तिर्यस्मात्सः, त्वदनुग्रहइति विशेष्याध्याहारः। भवेत्। तर्हि, सतामुपासना तया, त्वयि मतिः स्यात्। त्वत्प्राप्त्सात्मिका मतिर्भवेदित्यर्थः। भगवतस्तवानुजिघृक्षायाः सत्सेवामूलकत्वात् सत्सङ्गाचरणादिप्रणाल्या मयि त्वदनुग्रह इति भावः। एषोऽर्थ एकादशे 'सत्सङ्गेनैव दैतेया' इत्यादिना स्फुटीभविष्यति ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नोत्सहेऽहमिति : १०.४०.२७.

सकृदपि त्वयि चेन्निहितं मनः सदय तस्य वशो भवसि ध्रुवम्।
तदिदमेव परन्त्वतिदुर्घटं यदिह तत्पवनादपि दुर्ग्रहम् १२ ॥

यस्यान्तं न विधिर्मनाङ्‌ मुनिरपि प्रापाऽर्थतः शब्दतो यस्यांशे सकला व्यवस्थितिरियं वर्णाश्रमाणामपि।
वेदो निःश्वसितं स यस्य गदितं तस्याखिलेशस्य ते साक्षाद्रूपमनोऽवधारणकृते सर्वेश्वराऽहं कियान् ॥ १३ ॥

सोऽहमिति : १०.४०.२८.

वैरानुबन्ध्यनुमतागमनोऽपि गोपीखेदप्रदो निजनिकामसुखेन्दुराहुः।
अक्रूर ईदृगपि दिव्यदृगास यस्मात् सिद्धः प्रभो तव दयाविभवः स्वभावः ॥ १४ ॥

कर्ता भर्ता च धर्ता स्थिरचरजगतामार्तिहर्ता निजानां ध्वान्तस्तोमापहर्ताऽसति सति च दृशैवाऽपकर्तोपकर्ता ।
दाता त्राताऽवदातोल्लसदतुलगुणः सर्वतन्त्रस्वतन्त्रः श्रीगोविन्दैक एव त्वमसि तदधुना पाहि मामङ्घ्रिलग्नम् ॥ १५ ॥
विशेषरूपं भुवनोल्लसत्परं दृशा यदा यो भृशमन्तरङ्गया । पश्यत्यशेषापगताघसंहतेस्तस्येदृशी स्यात् स्थितिरित्यबोधि हि ॥ १६ ॥
ब्रह्माशयविहारा ये सदैवाक्रूरवृत्तयः । ऋचोऽघमर्षणीः सार्था भुवनेऽनुभवन्ति ते ॥ १७ ॥
कंसादस्य कथं भविष्यति नृशंसाद्भयादितीह भ्रमं दूरीकर्तुमनाः कृपालुरखिलज्ञोऽक्रूरचेतोगतम् ।
नैतादृग्भुवनेष्वतुल्यविभवः कोऽप्यन्य इत्यात्मधीद्वारेत्येवमदर्शयद्धि भुवने तत्त्वस्वरूपं तदा ॥ १८ ॥
श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने चत्वारिंशोऽध्यायः ॥ ४० ॥

कृष्णप्रिया

नाथ ! आप सर्वज्ञ है फिर भी मेरे समाधान के लिए मेरी परिस्थिति का निदर्शन करता हूँ कि—देह, गेह, देहज, पुत्रादि अनित्य पदार्थों में नित्यबुद्धि, जड पाञ्चभौतिक पदार्थों में आत्मबुद्धि, दुःखकर विषयभोगों में सुखबुद्धि, होने के कारण मैं विपरीत मति बना, और सुखदुःख, रागद्वेष आदि द्वन्द्वों में आनन्द मानने लगा, इससे सर्वथा तमोवृत्ति महामोह में डूबा हूँ । मेरी यह दशा है कि आप मेरी आत्मा है आनन्दमय है और परमप्रिय है वह नहीं जानता ॥ २५ ॥ भगवन् ! जैसे कोई अबोधजन, पानी में उत्पन्न हुए घास फूस अथवा काई आदि से आच्छन्न निर्मल सुपेय जल को छोड़कर, सूर्यकिरणों से वालुका में भासमान जल को वास्तविक जल समझकर दौड़ता है वैसे ही मैं विलक्षण माया के गुणों में छिपे हुए आत्मस्वरूप आप की सेवा शुश्रूषा को छोड़कर पुत्र पौत्रादि परिवार में आसक्त बन कर देहादि का लालन-पालन में ही मम बना हूँ और आप से विमुख बन गया हूँ ॥ २६ ॥ हे नाथ ! सबसे प्रथम तो मेरी मति विषयाकार बन चुकी है, मन भी काम्य कर्मों में सलग्न है । सारी इन्द्रियें उच्छृंखल बनकर मन को विषयों की ओर खींच रही है, नाथ ! न तो मैं बुद्धि को निश्चयात्मिका बना सकता हूँ, न मन पर संयम ला सकता हूँ और न इन्द्रियों पर प्रभुत्व जमा सकता हूँ । नाथ सर्वथा मैं हार गया हूँ ॥२७॥ हे ईश ! हे सर्वसमर्थनाथ ? आप के श्रीचरण सर्वथा विषयोपभोग रत दुर्जन जनों के लिए सर्वथा दुर्लभ है । आपकी उस अनुकम्पा की गाथा मैं किन शब्दों में कहूँ मुझसे अधम को आपके श्रीचरणों की प्राप्ति यह न तो साधनबल है या सुकृत फल है केवल आप की निरुपम कृपा का ही परिणाम है । हे कमलनाभ श्रीकृष्ण ? जब जीवों की जन्ममृत्यु की परम्परा का अन्त आता है तब ही सज्जनों की भगवदीयजनों की सेवा मिलती है और सत्सङ्ग प्राप्त होता है तब ही आपके श्रीचरणों में अनुराग और दृढमति बनेगी ॥ २८ ॥

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे । पुरुषेशप्रधानाय ब्रह्मणेऽनन्तशक्तये ॥ २९ ॥
नमस्ते वासुदेवाय सर्वभूतक्षयाय च । हृषीकेश [1]मनस्तुभ्यं प्रपन्नं पाहि मां प्रभो॥ ३० ॥
इति श्रीमद्भागवते महापुराणे[2] दशमस्कन्धे[3] [4]ऽक्रूरस्तुतिर्नाम [5]चत्वारिंशोऽध्यायः ॥ ४० ॥

कर्वमक्षमा

अन्वयः—हे नाथ ? विज्ञानमात्राय नमः, सर्वप्रत्ययहेतवे नमः, पुरुषेशप्रधानाय, नमः, ब्रह्मणे नमः, अनन्तशक्तये, नमः ॥ २९ ॥ वासुदेवाय ते, नमः, च, सर्वभूतक्षयाय च, नमः, हे हृषीकेश, तुभ्यम्, नमः, प्रभो ! प्रपन्नम्, माम्, पाहि ॥३०॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां राजसप्रकरणस्य प्रमाणप्रकरणे चत्वारिंशत्तमेऽध्यायेऽन्वयाः समाप्ताः ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पादयोः पतन्प्रार्थयते नम इति द्वयेन । विज्ञानमेव मात्रा मूर्तिर्यस्य तस्मै । अतएव सर्वप्रत्ययहेतवे समस्तज्ञानकारणाय । किं च पुरुषस्य ये ईशाः सुखदुःखादिप्रापकाः कालकर्म स्वभावादयस्तेषां प्रधानाय नियन्त्रे । कुतः ब्रह्मणे परिपूर्णाय । किञ्च अनंतशक्तये अनन्ताः शक्तयो यस्य । यद्वा अनन्ता मायाख्या शक्तिर्यस्य तस्मै । अथवा प्रधानं प्रकृतिः पुरुषस्तत्प्रवर्तक ईशः काल एतत्त्रितयात्मने ब्रह्मणे । वक्ष्यति च भगवान् "प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम् ।" इति ॥ २९ ॥ सर्वप्रत्ययहेतुत्वमभिव्यञ्जयन्स्तौति । नमस्त इति । वासुदेवाय चित्ताधिष्ठात्रे । सर्वभूतक्षयाय क्षय आश्रयः । अहंकारश्च प्राणिनामाश्रयः । ततश्चाहंकाराधिष्ठात्रे संकर्षणायेत्यर्थः । हृषीकेशेति । बुद्धिमनसोरधिष्ठात्रोः प्रद्युम्नानिरुद्धयोरेकीकृत्य ग्रहणम् । शरणागतं मां पाहीति प्रार्थना ॥ ३० ॥

इति श्रीमद्भागवते म० दशमे पूर्वार्धे टीकायां चत्वारिंशोऽध्यायः ॥ ४० ॥

---

[1]. नमस्तेऽस्तु—विज. । [2]. पारमहंस्यां संहितायां—प्रा. पा. । [3]. पूर्वार्द्धे—प्रा. पा. । [4]. अक्रूरयाने महापुरुष—प्रा. पा. । [5]. अष्टत्रिंशोऽध्यायः—विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

द्वयेन युग्मश्लोकेन। "मात्रा परिच्छदे देशे प्रवृत्तौ कर्णभूषणे। अक्षरावयवे माने मूर्तौ कालविशेषके।' इति अत एव विज्ञानमूर्तित्वादेव। अन्यदप्याह—किञ्चेति। तत्र हेतुमाशंकते-कुत इति। परिपूर्णस्य सर्वनियन्तृत्वं स्फुमेवेति न केवलं परिपूर्णरूप एवेत्याह— किञ्चेति। अनंता अमिताः। शक्तयः सामर्थ्यानि। बहुशक्तिकल्पनापेक्षया सर्वव्यवहारसाधिकैकशक्तिकल्पना वरीयसी वहुवनचरसिंहाश्रयणन्यायेनेत्याह—यद्वेति। अनंता ज्ञानमृते नान्तो यस्याः सानन्ता। पुरुषेशेत्यादिपदस्य पूर्वव्याख्याने क्लिष्टकल्पनामपेक्ष्य प्रसिद्धार्थमाह—अथ वेति। वक्ष्यति एकादशे भगवानुद्धवाय 'प्रकृतिः' इतीममर्थम्। पादयोः पतन्नात्मानं निवेदयति—नम इति। विज्ञानस्य मदनुभवस्य मात्रा परिमाणं यतस्तस्मै। यावन्तं स्वविषकमनुभवं ददासि तावदेव त्वामनुभवामीत्यर्थः। अन्यविषयकज्ञानानामपि त्वमेव हेतुरित्याह— सर्वेति। यतः पुरुषेति पुरुषोऽन्तर्यामी तद्रूपेण कर्मादिषु प्रेरयसि, ईश ईश्वरस्तद्रूपेण कर्मादिफलं ददासि, प्रधानं माया तद्रूपेण विषयेषु त्वमेव बध्नासि, ब्रह्मज्ञानैकस्वरूपं तद्रूपेण स्फुरितं सत्तस्माद्बंधान्मोचयसि च, अनंतशक्तिर्भगवाँस्तद्रूपेण स्वस्मिन्भक्तिं प्रदाय कृतार्थयसि च ॥ २९ ॥ अभिव्यञ्जयन्प्रकटयन् अहंकारमाश्रित्यैव सर्वे व्यवहरन्तीति प्रसिद्धम्। ततश्चाहंकारस्याश्रयत्वादेव। इत्यर्थ इति—अहमित्यभिमानलक्षणं संकर्ष इत्याचक्षत इत्युक्तेरयमर्थः। इयमक्रूर स्तुतिर्मरुद्रूपेण कृष्णस्य श्रुतौ प्रसिद्धा। तथा च श्रुतिः—"सप्तसप्त शाकित एकमेका शता ददुः यमुनायामधि श्रुतमुद्राधो गव्यं मृजेति राधो अश्वं मृजे" इति। एतदर्थस्तु—अघमर्षणकाले भगवन्तं दृष्ट्वाऽक्रूरस्तद्देवतां मरुतं स्तौति—सप्तसप्तैकोनपञ्चाशत् शाकिनः शक्नुवन्ति य इति, वा शक्नुवन्त्येतैरिति शाकिनः शक्तिमन्तः, शक्तिप्रदा वा मरुतः। एकमेका प्रत्येकम्। शता 'शतमैश्वर्यं भवति' इति यास्कः। ऐश्वर्याणि ददुः। यतो मया श्रुतम् 'एषास्य परमा संपत्' इति वेदशिरोभ्य आकर्णितम्। राधो धनं सूत्रान्तर्यामिरूपं यमुनायामधि मध्ये, मृजे मृगयामि पश्यामीत्यर्थः। तदेव राध उत् ऊर्द्ध्व गव्यं गोषु सूर्यरश्मिषु स्थितं मृजे तथाश्वमश्ववति रथे स्थितं तदेवातिमृजे अधो भूलोकेऽपि पश्यामीत्यर्थः। वासुदेवायेति। हे वसुदेवनन्दन भवानेव मम सेव्योऽस्तु न तु दुष्टभूपतिरिति भावः। सर्वभूतानां क्षयाय निवासाय। स्वस्मिन्मां वासय न तु गृहान्ध कूप इति भावः। हृषीकेशेति—मम मनआदींद्रियाणि भवानेव गृह्णातु न तु कलत्रपुत्रादिरिति भावः ॥ ३० ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एतदादिकं सर्वं स्वयं जानास्येव तत्तत् प्रतीकारेऽपि परमसमर्थोऽसीति किं विज्ञापयानीति सकाकु प्रणमन्नात्मानं समर्पयति। नम इति द्वाभ्याम् ॥ २९ ॥ वासुदेवाय सर्वकारणरूपाय सर्वभूतक्षयाय प्रलयाश्रयाय हे हृषीकेश! स्थितावपि सर्वान्तर्यामिन्नित्यर्थः ॥ ३० ॥

तस्मै चैतन्यदेवाय नमो भगवते मुहुः। बुधान् स्मारयितुं यो मां वाचलयति कौतुकी ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एतदादिकं सर्व्वं त्वं स्वयं जानास्येव, किमहं विज्ञापयानीति वदन् स्तोत्रमुपसंहरन् समर्पयंश्च प्रणमति—नम इति द्वाभ्याम्। विज्ञानमात्राय ज्ञानघनमूर्त्तये, पुरुषेति कालादिनियन्तृत्वेन पुरुषादित्रयरूपत्वेन वा, परमेश्वरत्वात् सर्व्वज्ञत्वं सिद्धमेव। अन्यत् स्पष्टमेव ॥ २९ ॥ वासुदेवत्वादिना चिताद्यधिष्ठातृत्वाद्यथा त्वया प्रवर्त्तितस्तथा। प्रवृत्तोऽस्मीति स्तोत्रादिसमर्पणञ्च वृत्तमेवेति, न च वक्तव्यं गृहस्थानां विषयासक्तानां संसारान्मनः क्षोभादपि वा रक्षणमशक्यमिति सर्व्वसामर्थ्यवत्त्वादित्याह—हे प्रभो इति। एवं यादवतया श्रीब्रह्मणोऽपि सकाशादनुग्रहविशेषपात्रेण परमभक्तेनाप्यनेन श्रीचतुर्मुखवद् व्रजजनादिमाहात्म्यवर्णनेनास्तवनं श्रीगोपीविषयकापराधेन भक्तिह्रासात्, किंवा तत्स्मारणेन श्रीभगवतः प्रियजनप्रेमपरवशस्य तद्विरहार्त्तस्यार्त्तिभरोदयभयाच्च ॥ ३० ॥

तस्मै चैतन्यदेवाय नमो भगवते मुहुः। जडं नर्त्तयते योऽयं हासयन् बहुधा बुधान् ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

ज्ञानमात्राय मात्रचा स्वरूपे क्वचिदपि जडत्वं नास्तीत्युच्यते सर्वप्रत्ययहेतवे सर्वेषां ज्ञानप्रदाय। पुरुषेशप्रधानायेति पाठे प्रधानभूतेन पुरुषेण रूपेण स्वेन रूपेणावस्थितायेत्यर्थः ॥ २९ ॥ सर्वभूतक्षयाय सर्वभूतनिवासाय ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

विज्ञानमात्राय अनुकूलात्मकज्ञानमात्रस्वरूपाय मात्रचा स्वरूपे कचिदपि जडत्वशङ्काव्युदासः सर्वप्रत्ययहेतवे सर्वेषां ज्ञानप्रदाय पुरुषो जीवस्तस्येशः सचासौ प्रधानश्च प्रधानशब्दस्तच्छरीरवाचकः प्रधानपुरुषेश्वरायेत्यर्थः। यद्वा पुरुषस्य ये ईशाः सुखदुःखादिप्रापकाः कालकर्मस्वभावादयः तेषां प्रधानाय नियन्त्रे यद्वा ईश्वरो हरिः प्रधानो यस्य पुरुषश्चासावीश्वरप्रधानश्च तस्मै हरिप्रधानभूतेन पुरुषेण स्वरूपेण चावस्थितायेत्यर्थः। ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयाय बृहते अनन्ताः शक्तयः जगत्सर्गाद्युपयुक्तसामर्थ्यविशेषा यस्य तस्मै ॥ २९ ॥ वासुदेवशब्दार्थमाह। सर्वभूतक्षयाय च सर्वभूतनिवासाय हे हृषीकेश ! तुभ्यं नमः अहं त्वच्छेषभूतः मे मम नाहं मच्छेषभूतः एवं प्रपन्नं मां पाहि त्रायस्व अत्र विज्ञानमात्रायेत्यनेन प्राप्यत्वोपयुक्तं निरतिशयानन्दस्वरूपत्वं विवक्षितं सर्वप्रत्ययहेतवे इत्यनेन प्रपित्साहेतुत्वं पुरुशेषप्रधानायेत्यनेन सर्वशेषित्वं ब्रह्मण इत्यनेन वात्सल्यशौशील्यसौलभ्यादिगुणपूर्णत्वम् अनन्तशक्तय इत्यनेन बन्धमोक्षाद्यापादनोपयुक्तसामर्थ्यवत्त्वं वासुदेवायेत्यनेन धारकत्वं हृषीकेशेत्यनेन नियन्तृत्वम् ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मनन विषयरूपमाह। नम इति। ज्ञानस्वरूपं नान्यत् "मात्रं कार्त्स्न्येऽवधारण" इति यादवः, यद्वा विज्ञानं मात्रा मानं प्रमाणं यस्मिन् स तथा तस्मै "मात्रापरिच्छदे देशे प्रवृत्तौ कर्णभूषणे। अक्षरावयवे मान" इति च "नैषा तर्केण मतिरापनेये"ति च श्रुतिः सर्वेषां ज्ञानानां हेतवे कारणाय विरिञ्चिशङ्करयोः प्रत्ययहेतुत्वम् औपचारिकमितिभावेनाह। पुरुषेति। पुरुषेश्वरयोर्विरिञ्चिशङ्करयोरप्युत्तमोत्तमाय एवं विधस्य किन्नामधेयमित्यत उक्तं ब्रह्मण इति "सत्यं ज्ञानमनन्तं ब्रह्मे"ति श्रुतेः विरिञ्च्याद्युत्तमत्वे को हेतुरित्यत उक्तमनन्तेति ॥२९॥ वासुदेवमूर्तमोहे तु क्षत्वमिति कृत्वा तं नमति। नम इति सर्वभूतक्षयाय सर्वभूतनिवासाय "शुद्धस्फटिकसङ्काशं वासुदेवं निरञ्जन"मित्यादेः हृषीकेश ! इन्द्रियेश प्रभो ! समय ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां अष्टत्रिंशोऽध्यायः ॥ ३८-४० ॥

गूढार्थदीपिनी

मात्रा स्वरूपम्। प्रत्ययो ज्ञानम्। पुरुषेति पुरुष-काल-प्रकृतिरूपाय ॥ २९ ॥ सर्वभूतानां क्षयो निवासो लयो वा यस्मिन् तस्मै ते नमः ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पादयोः पतन् आत्मानं निवेदयति द्वाभ्याम्। नम इति। विज्ञानस्य मदनुभवस्य मात्रा परिमाणं यतस्तस्मै यावन्तं स्वविषयकमनुभवं ददासि तावदेव त्वामनुभवामीत्यर्थः। अन्यविषयकज्ञानानामपि त्वमेव हेतुरित्याह। सर्वेति। यतः पुरुषेति पुरुषोऽन्तर्यामी तद्रूपेण कर्मादिषु प्रेरयसि ईश ! ईश्वरस्तद्रूपेण कर्मादिफलं ददासि प्रधानं माया तद्रूपेण विषयेषु त्वमेव बध्नासि ब्रह्म ज्ञानैकस्वरूपं तद्रूपेण स्फुरितं सत् तस्माद्बन्धान्मोचयसि च अनन्तशक्तिर्भगवान् तद्रूपेण स्वस्मिन् भक्तिं प्रदाय कृतार्थयसि च ॥ २९ ॥ वासुदेवायेति हे वसुदेवनन्दन ! भवानेव मम सेव्यो भवतु नतु दुष्टभूपतिरिति भावः। सर्वभूतानां क्षयाय निवासास्वस्मिन्नेव मां वासय नतु गृहान्धकूपे इति भावः। हृषीकेशेति मम मनआदीन्द्रियाणि भवानेव गृह्णातु नतु कलत्रपुत्रादिरिति भावः ॥ ३० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। चत्वारिंशोऽत्र दशमे सङ्गतः सङ्गतः सताम् ॥ ४० ॥

श्रीमच्छुकदेवकृता सिद्धान्तप्रदीपः

एवम्प्रपन्नो भूत्वा पादयोः पतन् मां पाहीत्याह। नम इति द्वाभ्याम्। "विज्ञानं यज्ञं तनुते" इति श्रुतौ विज्ञानशब्दो जीववाचकः विज्ञानं जीवः मात्रा अंशो यस्य तस्मै अत एव सर्वेषां स्वांशभूतानां प्रत्ययस्य ज्ञानस्य हेतवे जीवानां यथाधिकारं भुक्तिमुक्तिज्ञानप्रदायेत्यर्थः। अत एव पुरुषाणां जीवानां ये ईशाः पराभवकराः कालकर्मस्वभावादयस्तेषां प्रधानाय नियन्त्रे ॥२९॥ सर्वेषां भूतानां क्षयाय वासस्थानाय प्रपन्नं त्वदङ्घ्रि शरणं गतं मां पाहि संसारात्त्रायस्व ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चत्वारिंशाध्यायार्थप्रकाशः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रयत्नोऽपि न मद्यत्नसाध्यः सर्वोऽपि सर्वेश तवानुग्रहहेतुक इत्याह। सोऽहमिति। योऽशक्तः सोऽहमसतां दुरापं तैर्दुष्प्राप्यं तवाङ्घ्रिचरणावुपगतोऽङ्घ्री उपगतो यमिति येनेति वाऽङ्घ्र्युपगतोऽस्मीति तदुपगमनं मयीश भवदनुग्रहं तद्धेतुकं

मन्ये । हे अब्जनाभ यर्हि सदुपासनयाऽऽमतिः समीचीना बुद्धिः स्यात्तर्हि पुन्सोऽधिकारिवर्गस्य संसरणादपवर्गो भवेत् संसारनिवृत्तौ सन्निहितायां तत्साधनीभूतसदुपासनतः तद्बुद्धिरुदेतीति भावः ॥ २९ ॥ विज्ञानमात्राय विज्ञानात्मकाय सर्वेषां प्रत्ययो ज्ञानं तस्य हेतवे पुरुषो ब्रह्मा चेशश्च रुद्रश्च तयोः श्रेष्ठाय ब्रह्मणेऽनन्तशक्तये सर्वसम्भावकमिदं ॥ ३० ॥ सर्वभूतक्षयाय च प्रलयकाले वासुदेवाय ते नमः । हृषीकेश तुभ्यं नमः । किं पुनः पुनर्नमसि मनःस्थितं वदेत्यत आह । प्रपन्नं मां पाहीति । न तवान्ध्यमिदं कियदिति वक्ति । प्रभविति ॥ ३१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धेऽष्टत्रिंशोऽध्यायः ॥ १०-३८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं विज्ञाप्य विज्ञापनासिद्ध्यर्थं नमस्यति । नमो विज्ञानमात्रायेति । शास्त्रस्य सतां च तदैवोपयोगो भवति यदा भगवान् विशिष्टज्ञानमात्रमेव भवति अन्यथा ज्ञाने सामान्यसिद्धिः मननिदिध्यासादिना च सिद्धिरित्ययमर्थो नोपपद्येत ज्ञानस्याज्ञत्वं च न स्यात् शास्त्रेण हि ज्ञानमेवोत्पाद्यते न त्वन्यत् तच्चेद्विज्ञानमन्यदेव स्यात् किं भगवद्भजनेन शरणागमेन वा स्यात् । अतस्त्वं विज्ञानमात्ररूपः किं च यदि भगवान् आन्तरो न भवेत् आत्मा वा न भवेत् तदान्यत्र स्थितमन्यो न प्राप्नोति अन्यश्चान्यो न भवतीति मुक्तिरेव न स्यात् सर्वेषां प्रत्ययानां ज्ञानानां हेतुः कारणमन्तर्यामी आत्मा वा स भवानेव, ननु तस्य ज्ञानैकरूपस्यात्मनः कथं जगत्कारणत्वमित्याशङ्क्याह । पुरुषेशप्रधानायेति । पुरुषः प्रकृतिभर्त्ता ईशः कालः गुणक्षोभकः गुणात्मिका च प्रकृतिः हेतुत्रितयरूपः, नन्वेकस्य कथमनेकरूपता तत्राह । ब्रह्मण इति । बृहत्त्वात् बृंहणत्वात् सर्वभवनसमर्थं तदेव ब्रह्मशब्दस्तादृश एव वर्त्तत इति प्रकारान्तरेणापि सर्वरूपत्वमुपपादयति । अनन्तशक्तय इति । अनन्ताः शक्तयो यस्येति तत्तच्छक्त्या तथा भवतीति न काप्यनुपपत्तिः स्वरूपमेव वा तथेति पक्षद्वयमप्यविरुद्धम् ।।२९।। पुनर्विज्ञापनार्थं नमस्यति । नमस्ते वासुदेवायेति मोक्षदात्रे, ननु तथाप्येतावत्कालं त्वमन्यत्र स्थितः कृतापराधश्च ततः कथं मोक्षो देय इत्याशङ्कायामाह । सर्वभूतानां क्षयाय स्थानरूपायेति तेन त्वय्येवस्थिताः भूतेषु स्थितावपि त्वय्येव स्थिताः चकारात् सर्वभूतस्वरूपाय किं च यदपि कृतं तत्रापि त्वमेव हेतुः यतो हृषीकेशः इन्द्रियप्रेरकः अतः सर्वापराधशान्त्यर्थं तुभ्यं नमः विज्ञापनामाह । प्रपन्नं शरणागतं मां पाहि पालय यथा पुनः प्रवाहे न पतामीति प्रार्थना वाचनिकी शरणागमनं प्रथमतो मानसं पश्चात्कायिकमिति तदुपपादितं शरणागतिप्रकरणे ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां
सप्तत्रिंशाध्यायविवरणम् ॥ ३७-४० ॥

श्रीसुबोधिनी-सार

नमो विज्ञानरूपाय सर्वज्ञानकारणाय पुरुषस्य ये ईशाः सुखदुःखादिप्रापकाः कालकर्मस्वभावादयस्तेषां प्रधानाय नियन्त्रेऽनन्तशक्तये ब्रह्मणे नमः ॥ २९ ॥ वासुदेवाय ते तुभ्यं नमः सर्वभूतानां क्षयाय संहारकर्त्रे निवासाय वा नमः । हे हृषीकेश तुभ्यं नमः हे प्रभो प्रपन्न मां त्वं पाहि ॥ ३० ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायां चत्वारिंशोऽध्यायः ॥ ४० ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

एवमात्मनः कृतार्थतामाविष्कृत्यापि संसारस्य दुस्तरत्वमाशङ्क्य भगवन्तं नमस्यंस्ततो रक्षां प्रार्थयते—नम इति द्वयेन । विज्ञानं चैतन्यमेव मात्रा मूर्तिर्यस्य तस्मै तुभ्यं नमः । अत एव सर्वप्रत्ययहेतवे समस्तज्ञानकारणाय ब्रह्मणे नमः । तद्विशिनष्टि—पुरुषः प्रकृतिप्रवर्तकः, ईशः कालः, प्रधानं प्रकृतिः, एतच्चितयात्मने । तथा च भगवानेकादशे वक्ष्यति—"प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितं नत्वहम्" इति । अनन्ताः शक्तयो यस्य तस्मै ॥ २९ ॥ वासुदेवाय श्रीवसुदेवनन्दनाय । सर्वभूतक्षयाय सर्वभूतनिवासाय । हे प्रभो हे पालनसमर्थ ! तत्र हेतुं सूचयन् पुनः सम्बोधयति—हृषीकेशेति । हे सर्वेन्द्रियनियन्तः । प्रपन्नं शरणमागतं मां पाहि संसारभयाद्रक्षेत्यर्थः ॥ ३ ॥

इतिश्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने । चत्वारिंशो गतो वृत्ति पुरुषस्तवनात्मकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

नम इति ॥ विज्ञानं चैतन्यमेव मात्रा मूर्तिर्यस्य तस्मै तुभ्यं नमः । अत एव सर्वप्रत्ययहेतवे समस्तज्ञानकारणाय पुरुषस्येशाः दुःखसुखप्रापकाः कालकर्मादयस्तेषां प्रधानाय नियन्त्रे । यद्वा । पुरुषः प्रकृतिप्रवर्तकः ईशः कालः प्रधानं प्रकृतिरेषत्रितयात्मने वक्ष्यति भगवान् प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः इत्यादि अनन्ताः शक्तयो यस्य । यद्वा । अनन्ता मायाख्या

शक्तिर्यस्य तस्मै ब्रह्मणे नमः ॥ २९ ॥ नमस्त इति ॥ हे हृषीकेश ! हे प्रभो ! वासुदेवाय सर्वभूतानां क्षयो लयो निवासो वा यस्मिन् तस्मै ते नमः । प्रपन्नं मां पाहि । व्याख्यान्तरं क्लिष्टत्वात्त्यक्तम् ॥ ३० ॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां चत्वारिंशोऽध्यायः ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विज्ञानमयी मात्रामूर्त्तिर्यस्य यद्वा विशेषज्ञानं मात्राया देहे यस्य तस्मै अतः सर्वप्रत्ययहेतवे सर्वे क्षेत्रक्षेत्रज्ञौधर्मौकार्याकार्येन्यायान्यायौ सच्छास्त्रासच्छास्त्रेचेत्यादिरूपाः समग्राः ये पदार्थास्तेषां प्रत्यया ज्ञानानित्येषां हेतवे कारणाय, यद्वा सर्वेष्वक्षर पुरुषां हेतवे करणाय यद्वा सर्वेष्वक्षर पुरुषादिषु येत्ययाज्ञानानि तेषां हेतवेषांद्वा उक्तानां सर्वेषां प्रत्ययहेतवे ज्ञानदाने पुरुषाणां जीवानाम् ईशाः येऽक्षरपुरुषकालादयो नियामकास्तेषां प्रधानाय नियन्त्रे अतो ब्रह्मणे परब्रह्मणे नमः ॥ २९ ॥ वासुदेवाय वसुदेवपुत्राय सर्वभूतानां क्षय आश्रयोरक्षकत्वेनाधारस्तस्मै तुभ्यं नमः हे ऋषीकेश इन्द्रियनियामक ॥ ३० ॥

इति श्रीशुद्धकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने अक्रूरकृतस्तुति नामा चत्वारिंशोऽध्यायः ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नम इति । विज्ञानमात्रायाऽनुकूलस्वस्वरूपविज्ञानमात्रस्वरूपाय, अनेन भगवत्स्वरूपे क्वचिदपि जडत्वशङ्का नास्तीति सूचितम् । सर्वेषां प्रत्ययो ज्ञानं तस्य हेतुः सम्प्रदस्तस्मै, पुरुषो जीवस्तस्य ये ईशाः सुखदुखादिप्रापकाः कालकर्मस्वभावादयस्तेषां प्रधानो नियन्ता तस्मै, ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते; अनन्ताः शक्तयो जगत्सर्गाद्युपयुक्तसामर्थ्यविशेषा यस्य तस्मै तुभ्यं, नमः ॥ २९ ॥ नम इति । हे हृषीकेश, सर्वभूतक्षयाय सर्वभूतनिवासाय, वासुदेवाय च ते तुभ्यं, नमः हे प्रभो, तुभ्यं नमः प्रपन्नं मां पाहि त्रायस्व । विज्ञानमात्रायेत्यनेन प्राप्योपयुक्तनिरतिशयानन्दस्वरूपत्वं, सर्वप्रत्ययहेतवे इत्यनेन प्रपित्साहेतुत्वं, पुरुषेशप्रधानायेत्यनेन सर्वशेषित्वं, ब्रह्मण इत्यनेन सौशील्यवात्सल्यसौलभ्यादिगुणपूर्णत्वं, अनन्तशक्तय इत्यनेन बन्धमोक्षाद्यापादनयुक्तसामर्थ्यवत्त्वं, वासुदेवायेत्यनेन धारकत्वं, हृषीकेशेत्यनेन नियन्तृत्वं च विवक्षितमेवं श्लोकद्वयतात्पर्यं प्रदर्शितम् ॥ ३० ॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तम श्रीसहजानन्दस्वामिसुत श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे चत्वारिंशोऽध्यायः ॥ ४० ॥

कृष्णप्रिया

हे नाथ विज्ञान ही आपका अनुपम वैभव है । सर्व प्रकार के प्रत्यय-ज्ञानों के आप ही मूल कारण है आपही प्रकृति के भर्त्ता पुरुष है, आपही ईश काल हैं आपही त्रिगुणात्मिका प्रकृति हैं । आपकी शक्ति अनन्त है । आप पूर्ण ब्रह्म है आपके श्रीचरणों में प्रणाम ॥ २९ ॥ चित्त के अधिष्ठाता श्रीवासुदेव स्वरूप आपके चरणों में प्रणाम । सर्वभूतों के निवास स्थान जो अहंकार है उसके आप संकर्षण स्वरूप को नमस्कार । समस्त इन्द्रियों के प्रेरक हे श्रीहृषीकेश आपके श्रीचरणों में प्रणाम ! हे नाथ आपके चरणों में प्रपन्न मेरा आप संरक्षण करें ॥ ३० ॥

श्रीमद्भागवत दशम स्कन्ध पूर्वार्द्ध निरोधलीला राजसप्रकरण के प्रमाणप्रकरण में ज्ञान ऐश्वर्य
निरूपण करने वाला ४० वाँ अध्याय का भाषान्तर सम्पूर्ण ॥ ४० ॥

* * *

अथैकचत्वारिंशोऽध्यायः

श्लोकाः	अनु.	इ. वं.	वं.	वसंत	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं श्लो.	अक्ष.
५२	४३	१	१	१	६	५	१८१६	३१	४१	१८८६	५६।	१

श्रीशुक उवाच

स्तुवतस्तस्य भगवान् दर्शयित्वा जले वपुः । भूयः समाहरत् कृष्णो नटो नाट्यमिवात्मनः ॥ १ ॥
सोऽपि चान्तर्हितं वीक्ष्य जलादुन्मज्ज्य सत्वरः । कृत्वा चावश्यकं सर्वं विस्मितो [1]रथयागमत् ॥ २ ॥
तमपृच्छद्धृषीकेशः किं ते [2]दृष्टमिहाद्भुतम् । भूमौ वियति तोये वा तथा त्वां लक्षयामहे ॥ ३ ॥

अक्रूर उवाच

अद्भुतानीह यावन्ति भूमौ वियति वा जले । त्वयि विश्वात्मके [3]तानि किं मेऽदृष्टं विपश्यतः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—भगवान्, कृष्णः, स्तुवतः, तस्य, वपुः, दर्शयित्वा, भूयः, नटः, नाट्यम्, इव, आत्मनः, अद्भुतम्, नाट्यम्, समहरत् ॥ १ ॥ सः, अपि, अन्तर्हितम्, वीक्ष्य, जलात्, उन्मज्य, सत्वरः, सर्वम्, आवश्यकम्, कृत्वा, विस्मितः, रथम्, आगमत् ॥ २ ॥ हृषीकेशः, तम्, अपृच्छत्, ते, (त्वया) भूमौ, वियति, वा, तोये, किम्, (अपि) अद्भुतम् दृष्टम्, तथा, त्वाम्, लक्षयामहे ॥३॥ अक्रूरः, उवाच – इह भूमौ, वियति, वा, जले, यावन्ति, अद्भुतानि (सन्ति) विश्वात्मके, त्वयि, तानि, (निवसन्ति) मे, विपश्यतः, किम्, अदृष्टम् ? ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एकचत्वारिंशकेऽहन्रजकं प्रविशन्पुरीम् । ततो वरानदात्तुष्टः सुदाम्नो वायकस्य च ॥ १ ॥
सशंकमक्रूरमनः प्रमोद्य स्वधाम संदर्शनसत्कृपातः । स्वराजधानीं मथुरामपश्यदलंकृतानंतमहोत्सवाढ्याम् ॥ २ ॥

भूमौ वियति जले वा यावन्त्यद्भुतानि तानि त्वय्येव सन्ति तं च त्वां पश्यतो मे किमद्भुतमदृष्टम् अपि तु सर्वं दृष्टमित्यर्थः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

रजकं वस्त्रनिर्णेजकम् । ततो रजकहननोत्तरम् । सुदाम्नो मालाकारस्य । वायकस्य सौचिकस्य च (१) । सशंकं मारणार्थमेतावहं नेष्याम्यतोऽहं पापीयानस्मीति शंकाकुलम् । स्वधाम निजस्वरूपम् । तस्य संदर्शनमेव सती कृपा ततः । प्रमोद्य प्रतोष्य । अलंकृता चासावनन्तैर्महोत्सवैर्हस्तिमल्लादिशृंगारैर्यद्वा—अनन्तेन बलेन महेनातिपूज्यतमेन श्रीकृष्णेन चोत्सवो ययोर्देवकीवसुदेवयोस्ताभ्यामाढ्या युता ताम् (२) तस्याक्रूरस्यात्मनो वपुर्दर्शयित्वा । नाट्यं नटनविषयम्, गणेशाम्बिकादिरूपमिव । नटो रूपाभिनयकर्ता ॥ तस्येत्यनादरे षष्ठी । तमपृष्ट्वैवेत्यर्थः समाहरदन्तर्धापयामास । नाट्यमिवेत्युपसंहारे दृष्टान्तः । नटो नाट्यं यथोपसंहरति तथैव कृष्णो वैकुंठं वैकुंठीयञ्च सनातनं वस्तु तत्सर्वमुपसंजहारेत्यर्थः ॥ १ ॥ सोऽपि अक्रूरोऽपि । आवश्यकं नित्यं संध्यावन्दनादि ॥ २ ॥ तमक्रूरम् । ते त्वया । इव शब्देन सर्वाश्चर्यमये मय्येतन्नाद्भुतमित्युक्तम् । तयेति—यथा कश्चिदद्भुतदर्शी व्यापृतचित्तो भवति ॥ तथा त्वां लक्षयामाह इति – तव नेत्रे साखे प्रोत्फुल्ले एवात्र प्रमाणमिति भावः ॥ ३ ॥ इत्यर्थ इति—सर्वाद्भुताधिष्ठानदर्शने सर्वं दृष्टं हस्तिपदन्यायेनेति भावः ॥ पूर्वं तद्रूपं तदभेदेन ज्ञातवान्, इदानीं तु सद्यतत्प्रश्नप्रभावेण लब्धविशेषज्ञानस्तमेव सत्सर्वदर्शकं मत्वा तद्रूपमपि तद्वैभवमेव विमृश्याह—अद्भुतानीति । भूम्यादिषु यावंत्यद्भुतानि सन्ति तानि तावन्ति त्वय्येवेह सन्ति, तत्र हेतुः—विश्वात्मके विश्वस्य मूलरूपत्वात् । विश्वेन कार्येणाश्रित आत्मा यस्य तादृशे । मध्यपदलोपी बहुव्रीहिः । "यस्मिन्विज्ञाते सर्वं विज्ञातं स्यात्" इति श्रुतेः । तस्माद्विपश्यत इति विपश्यता मे मया भूम्यादिषु किमद्भुतं दृष्टं न किमपि, किन्तु यत्किमपि दृष्टं तत्त्वय्येव दृष्टमित्यर्थः । त्वद्रूपे दृष्ट एव तद्दर्शनादिति भावः ॥ ४ ॥

---

१. माविशत्–वीर. विज. । २. मिवा–श्रीधर. वंशी. जीव. विश्व. ; मिहा–वीर. विज. । ३. सन्ति–वीर. ; त्वानुपश्यतो ब्रह्मन् किमेऽदृष्टं–टि. ।

श्रीमज्जीवगोस्वामिकृत वैष्णवतोषिणी

तस्येत्यनादरे षष्ठी तमपृष्ट्वैवेत्यर्थः । समहरत् अन्तर्द्धापयामास नटो नाट्यमिवेति आकस्मिकत्वांशे दृष्टान्तः आत्मनो वपुरिति तद्वपुषः स्वभावसिद्धत्वं दर्शितम् ॥ १ ॥ अपिचशब्दः उक्तसमुच्चये अन्तर्हितं तमिति वीक्ष्य आलोच्य उन्मज्ज्य निःसृत्य सर्वम् आवश्यकं माध्याह्निकजलाधिष्ठानकभगवत्पूजादिकं तच्चाभिव्यञ्जितं श्रीपराशरेण "अर्च्चयामास सर्वेशं धूपपुष्पैर्मनोमयै" रिति अत्र जलेनैव तत्तत्कल्पनात् मनोमयत्वम् ॥ २ ॥ हृषीकेशः सर्वेन्द्रियप्रवर्त्तकः सर्वज्ञोऽपीत्यर्थः । कौतुकार्थमिति भावः । इह तीर्थे ननु कुतस्त्वया ज्ञातं तत्राह । यथा दृष्टाद्भुतत्वप्रकारेण त्वां लक्षयामहे दृष्टिवैलक्षण्यादिलक्षणैरवगच्छामः तथाच श्रीविष्णुपुराणे "नूनं ते दृष्टमाश्चर्यमक्रूर ! यमुना जले । विस्मयोत्फुल्लनयनो भवान् संलक्ष्यते यत" इति बहुत्वं न केवलमहमेव मेऽग्रजचरणाश्चेति तदपेक्षया ॥ ३ ॥ पूर्वं तद्रूपं तदभेदेन ज्ञातवान् इदानीन्तु सदयतत्प्रश्नप्रभावेण लब्धविशेषज्ञानस्तमेव तत्सर्वदर्शकं मत्वा तस्यापि रूपस्य तद्वैभवत्वमेव विचार्याह । अद्भुतानीति । भूम्यादिषु यावन्त्यद्भुतानि सन्ति तानि तावन्ति त्वय्येवेह सन्ति तत्र हेतुर्विश्वात्मके विश्वस्य मूलरूपत्वात् विश्वेन कार्येण आश्रित आत्मा यस्य तादृशे मध्यपदलोपी बहुव्रीहिः "यस्मिन् विज्ञाते सर्वं विज्ञातं भवती" ति श्रुतेः तस्माद्विपश्यत इति विपश्यता मे मया भूम्यादिषु किमद्भुतं दृष्टं न किमपि किन्तु यत् किमपि दृष्टं तत् त्वय्येव दृष्टमित्यर्थः । त्वद्रूपे दृष्ट एव तद्दर्शनादिति भावः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तस्याक्रूरस्य स्तुवतः सतः, भूयः पुनः, पश्चात् समाहरत् अन्तर्द्धापयामास । अनादरे षष्ठी । यद्वा, भूयोऽधिकं यथा स्यात्तथा आत्मनो वपुर्जले दर्शयित्वा, तत्र हेतुः—भगवान् सर्व्वनिजैश्वर्य्यप्रकटक इत्यनेन तदपि तस्यैश्वर्य्यमेकमित्यपि बोधितम् । संहरणे हेतुः—कृष्णः परमकौतुकशीलः, किंवा भक्तवात्सल्याकृष्टचित्त इत्यर्थः । अन्यथा तस्य निजमाधुरीविशेषानुभवानन्दासिद्धिरिति भावः । आत्मन इति प्रदर्शने सहरणे चानायासादिकं तथा तेन सहाभिन्नत्वं च बोधितम्, संशब्दार्थं दर्शयंस्तत्रानुरूपदृष्टान्तमाह—नरोऽभिनयपरो बहुलरूपदर्शीति तद्रूपस्य तदेकस्वरूपत्वं निरस्तम्, एतन्मूलकत्वं च ध्वनितम् ॥ १ ॥ अपि चशब्दः समुच्चितोऽप्यर्थ एव । यद्वा, चकारोऽनुक्तसमुच्चये, पुनर्दर्शनाग्रहमपि त्यक्त्वेत्यर्थः । अन्तर्हितं तदिति वीक्ष्यालोच्य उन्मज्य निःसृत्य सर्व्वमावश्यकमाध्याह्निकजलविषयक-भगवत्पूजादिकम्, तच्चाभिव्यञ्जितं श्रीपराशरेण (वि. पु. ५।२९।१) 'अर्च्चयामास सर्वेशं धूपपुष्पैर्मनोमयैः' इति विस्मितः, श्रीवसुदेवपुत्रस्य परमैश्वर्य्यदर्शनात्, किंवा तत्तदाश्वर्य्यसन्दर्शनात् ॥ २ ॥ हृषीकेशः सर्वेन्द्रियप्रवर्तकः सर्वज्ञोऽपीत्यर्थः, इह तीर्थे, ननु कुतस्त्वया ज्ञातम् ! तत्राह— तथा तादृशं दृष्टाद्भुतमिव लक्षयामहे दृष्टिवैलक्षण्वादिलक्षणैरवगच्छामः । तथा च श्रीविष्णुपुराणे (५।१९।५) 'नूनं ते दृष्टमाश्चर्य्यमक्रूरयमुनाजले । निस्मयोत्फुल्लनयनो भवान् संलक्ष्यते यतः ॥' इति बहुत्वं न केवलमहमेतेऽग्रजचरणाश्चेति; तदपेक्षया तथा प्रश्नः कौतुलार्थमेव ॥ ३ ॥ इह जगति, सर्वाद्भुतविषयत्वे हेतुः—विश्वात्मक इति । विपश्यतः साक्षात् पश्यतः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

समहरत् अन्तर्हितङ्कृतवान् ॥ १-५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं सम्प्रदर्शिताक्रूरसंस्तुतस्वासाधारणरूपो भगवान् रथप्राप्तश्रीमथुरोपवनोऽङ्गीकृताक्रूरप्रार्थनः प्रेषिताक्रूरश्च श्वः प्रविष्ट श्रीमथुरोनिगृहीतरजकस्तन्तुवायमालारौ परमभागवतावकरोदित्याहैकचत्वारिंशेन स्तुवत इत्यादिना । भगवान् कृष्णः आत्मनः स्वस्य वपुस्तुवतस्तस्याक्रूरस्य दर्शयित्वा स्वासाधारेणं रूपं पुनः समहरदन्तर्धापयामास यथा नटो नाट्यं नाट्याहं रूपं दर्शयित्वान्तर्धापयति तद्वत् ॥ १ ॥ साऽक्रुरोऽप्यन्तर्हितं वीक्ष्य ज्ञात्वा जलादुन्मज्ज्य त्वरया युक्तः आवश्यकं माध्याह्निकं नित्यकर्म सर्वं कृत्वा विस्मितः सन् रथमाविशत् ॥ २ ॥ तमाविष्टवन्तमक्रूरं कृष्णः पप्रच्छ प्रश्नमेवाह । किंत इत्यादिना इह रथे भूमौ वियत्याकाशे जले वा किमद्भुतं चित्रं त्वया दृष्टं न किमपि दृष्टमिति मावोच इत्यभिप्रेत्याह । तथा दृष्टाद्भुतं त्वां लक्षयामहे चिह्नैरनुमिनुमः ॥ ३ ॥ इत्थमापृष्टः प्राहाक्रूरः । अद्भुतानीति । भूम्यादिषु यावन्त्यद्भुतानि तानि विश्वशरीरके त्वय्येव सन्ति तत्र त्वां पश्यतो मे मया किं दृष्टं न किमप्यद्भुतं त्वय्यविद्यमानं दृष्टमिति काकभिप्रेतार्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तस्मिन्निजजन्मनि योग्यताया अभिभवो नास्ति किन्तु सर्वत्राद्भृतत्वमेव यत्तदेतेषु द्वित्राध्यायेषु व्यनक्ति । तत्रादावक्रूरदृष्टभगवद्रूपस्यान्तर्धानकारणं कृष्णाक्रूरयोः प्रश्नोत्तराभ्यां हरेः सर्वैरचिन्त्याद्भुतमाहात्म्यं च वक्ति । स्तुवत इति आत्मनो वपुः नटत्वेन दर्शितं नाट्यं नटनविषयं हनुमदादिरूपं यथा तिरोधत्ते तथा ॥ १ ॥ आवश्यकं नित्यकर्म ॥ २ ॥ दयालुः श्रीकृष्णः

आत्मनो माहात्म्यं तेन वादयितुमज्ञातवत् पृच्छति। तमिति। अद्भुतमदर्शि लक्षणैस्त्वां लक्षयामहे व्यावृत्तं पश्यामः ॥ ३ ॥ अक्रूरःपरिहरति। अद्भुतानीति। इह भूम्यादौ यावन्त्यद्भुतानि सन्ति विश्वात्मके विश्वरूपे त्वयि तानि विपश्यतो मे किमदृष्टं सर्वं दृष्टमेव तानि विश्वात्मके त्वयि सन्ति तस्मात्त्वां विपश्यतो मे किमदृष्टमिति वा ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नटो नाट्यमिवेत्याकस्मिकत्वांशे दृष्टान्तः आत्मनो वपुरिति तद्वपुषः स्वभावसिद्धत्वं दर्शितम् ॥ १-११ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

स्तुवत इत्यादि। वपुर्नारायणरूपं दर्शयित्वा भूयः समहरत्, कृष्णः श्रीनन्दकुमारो दर्शयितृस्वात्तिरोभावयितृत्वाच्च। तस्य तद्वपुषः सकाशात् प्राधान्यं स्वारसिकमेव ॥ २-२६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

दर्शयित्वा जले वपुरित्यादि। वपुर्नारायण-रूपम्, अतोऽस्य प्रधानत्वं ततोऽप्यायाताम्, दर्शयितृत्वात्, यो यस्य दर्शयित्वा भवति, स तस्याधीनो न भवति, भूयः संहृतवान् नटो नाट्यमिव नटसादृश्यादस्याविकृतत्वम् नटस्त्वविकृत एव ॥२-२६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एकचत्वारिंशकेऽगात् पुरीं स्त्रीर्मोहयन्नन्। रजकं वायकायादात् सुदाम्ने च वरान् हरिः ॥

तस्येत्यनादरे षष्ठी समहरदन्तर्द्धापयामास नाट्यमिवेत्युपसंहार एव दृष्टान्तः नटो नाट्यं यथोपसंहरति तथैव कृष्णो वैकुण्ठं वैकुण्ठीयञ्च सनातनं वस्तु तत्सर्वमुपसञ्जहारेत्यर्थः ॥ १-२ ॥ तथा त्वां लक्षयामहे इति। तव नेत्रे सास्रे प्रोत्फुल्ले एवात्र प्रमाणमिति भावः ॥ ३ ॥ अनेन कृष्णेनैव तत्सर्वं स्ववैभवमेवाहं दर्शित इति तादृशतत्प्रश्नादेव निश्चित्य सहर्षविवेकमाह। अद्भुतानि भूम्यादौ यावन्ति सन्ति तानि त्वय्येव सन्ति अतस्तत्वां त्वां विपश्यतो मे किमद्भुतमदृष्टमपि तु सर्वमेव दृष्टमित्यर्थः ॥ ४ ॥

गूढार्थदीपिनी

रजकं हृतवानेकचत्वारिंशे विशन् पुरीम्। वायकस्य सुदाम्नश्चानुग्रहं कृतवान् हरिः ॥ १ ॥

आत्मनो वपुः रूपम् भूयः। समाहरत् उपसंहृतवान् नाट्यं नटविषयकं रूपम् ॥ १ ॥ सोऽपि अक्रूरोऽपि। आवश्यकं सन्ध्यावन्दनादि ॥ २ ॥ ते त्वया। तथा त्वां दृष्टवन्तम् अनुमिनुमः ॥ ३ ॥ वियति आकाशे। तानि त्वयि सन्त्येव अतस्त्वां पश्यतः मे मम शेषे षष्ठी। किं न दृष्टं सर्वमपि दृष्टम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एकचत्वारिंशे पुर्यां भगवान् प्रविश्य रजकवधं भक्ते वायके मालाकारे चानुग्रहं कृतवानित्युच्यते ॥ १-२ ॥ भूम्यादौ इह रथे वा अद्भुतं चित्रम् ॥ ३ ॥ विश्वात्मके सर्वात्मनि त्वय्येव तानि सन्ति विपश्यतः त्वामिति शेषः मे किमदृष्टमपि तु सर्वं दृष्टमित्यर्थः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ अक्रूरविलोकितं लोकेशरूपमवर्तत तथैव किंवा न्यवर्तताथ चाक्रूरकृष्णयोः कथा काऽभूदिति भूपतिशङ्कां शुकः परिहरतीतीरयति ॥ श्रीशुक इति। स्तुवतस्तस्याक्रूरस्य जले वपुर्दर्शयित्वा भूयः पुनः कृष्णः समहरदुपसञ्जहार। तत्र निदर्शनमाह ॥ नट इति। नट आत्मनः स्वसम्बन्धि यन्नाट्यं वेषादिकं दर्शयित्वा तिरोधापयति तथेति ॥ १ ॥ सोऽप्यक्रूरोऽप्यन्तर्हितं भगवन्तमीक्ष्य जलादुन्मज्जनमत्र बहिर्निःसरणं सत्वर आवश्यकं नियमतः करणीयं कर्म कृत्वा विस्मितो दृष्टाकारस्मरणेन रथमाविशत् ॥ २ ॥ अये दानपते सकलनिदानपते कां वा चर्यां दृष्टवानिव भासि त्वमिति सर्वविदपि लोकमनुकुर्वन्दयया तं पृच्छतीति वदति ॥ तमिति। हृषीकेश इति सर्ववेदितृत्वहेतुः। ते त्वया किमद्भुतं दृष्टमिति सामान्यत उक्तं विशिनष्टि ॥ भूमाविति। लोकरीत्या विकल्पितपक्षद्वये रुचिस्तृतीयं कल्पं पृच्छति ॥ तोये चेति। तथाऽद्भुतावलोकलोकवद्वयं त्वां लक्षयामहे तर्कयामः ॥३॥ भूमौ वियति जले वा यावन्त्यद्भुतान्याश्चर्याणि सन्ति तानि विश्वात्मके जगद्वितते इह त्वय्येव सन्तीति त्वां विपश्यतोऽवलोकयितुर्मम किमदृष्टं सर्वं दृष्टमेवेत्यर्थः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अष्टत्रिंशे ज्ञाततत्त्वं श्वफल्कतनयं हरिः । विसृज्य मथुरामैक्षदुक्तो माहात्म्यबोधकः ॥
गोपनार्थं परीक्षोक्ता हृदयारूढबोधनम् । वाक्यैर्निरूपितं वर्ण्या प्रवेशे नगरी हरेः ॥
उत्सवेषु यथा रोधस्तथात्रापि चकार ह । माहात्म्यज्ञापनार्थाय रजकं हतवान् स्वयम् ॥
अनिष्टेष्टप्रदो लोके महानिति निरूप्यते । वायकस्य सुदाम्नश्च वरदानं यथेप्सितम् ॥
प्रपञ्चविस्मृतिः सर्वा कृतानेन हि राजसे । स्वासक्तिरग्रे वक्तव्या सामान्यं ते न सेत्स्यति ॥

पूर्वाध्याये स्तुतिरुक्ता तामुपसंहरन् अग्रे भगवत्कृतमाह । स्तुवतस्तस्येति । तस्याक्रूरस्य स्तुवत एव सतः न तु स्तोत्रसमाप्तौ तथा सति वरो देयः स्यात्, ननु कथमेवं सामि कार्यं कृतवानित्याह । भगवानिति । स्वच्छन्दात्मा तावतैव कार्यसिद्धिं मत्वा न हि ब्रह्मसाक्षात्कारः परमदुर्ल्लभो बहुकालं भवति नाप्ययं वैकुण्ठे नीतः किं तु जले स्ववपुर्ब्रह्माण्डात्मकं नारायणरूपं प्रदर्शितवान् यथाविर्भावः तथा तिरोभावोऽपि वक्तव्य इति भूयः समहरत् उपसंहृतवान् । अनेन भगवति स्थित एवायं प्रपञ्चः ब्रह्माण्डात्मकः हस्त इव प्रसार्य पुनरुपसंहृत इति निरूपितम् ननु तत्रत्यः मायाजवनिकादूरीकरणेन प्रदर्शित इति यतोऽयं कृष्णः एतदर्थमेव सदानन्दोऽवतीर्ण इति अन्तः स्थितमेव प्रदर्शितमित्यत्र दृष्टान्तमाह । नटो नाट्यमिवेति । यथा नटः नटविद्यामन्तः स्थितां बहिः प्रकटयत्यभिनयेन तथा भगवानप्येतादृश इति ज्ञापयितुं नारायणरूपं प्रदर्शितवानित्यर्थः । ननु नाट्यवैलक्षण्यं प्रतीयते न हि नाट्यमेतादृशमिति तत्राह । आत्मन इति । अद्भुतमेतन्नाट्यम् ॥ १ ॥ सोऽपि भगवतैव कृतमिति ज्ञात्वा ज्ञाततत्त्वोऽन्तरङ्गः भगवत्समीपमागत इत्याह । सोऽपीति । अन्तर्हितं स्वयमेव अथवा चकारेण वा अन्तर्हितं मध्ये हृदये तं वीक्ष्य बहिर्दृष्टमन्तः स्थापयित्वा युक्तश्चायमर्थः अन्यथा दर्शनं व्यर्थं स्यात् धर्मान्तरप्रवेशश्च स्यात् ततो भयं च निवर्त्येत अन्यथा बुद्धिश्च स्यात् अत एव जलादुन्मज्ज्य स्नानविधिं त्यक्त्वा पूर्णो भूत्वा भगवदपराधं सञ्चिन्त्य सत्वरः अत्यावश्यकं कर्म विधाय चकारादकृत्वापि कथमेवं दुर्लभं प्रदर्शितवानिति विस्मितः रथसमीपमागमत् ननु मन्त्रादिकं कृत्वा निवृत्तो जातः ॥ २ ॥ तदा भगवान् विस्मयांशोऽनुचित इति तन्निवृत्त्यर्थं किञ्चित् पृष्टवान् इत्याह । तमपृच्छदिति । यदि भगवत्पृष्टं वदेत् अन्यत्रापि न माहात्म्यं तस्य हृदयारूढं भगवतेऽपि यदि न वदति तदान्यस्मै कथनसम्भावनैव न भवति । हृषीकेश इति । स्वयमेव तथा प्रेरितवान् इच्छानिवर्त्तनार्थं परम्पृष्टवानिति । किं ते त्वया दृष्टमिति । इहास्मिन् जलाशये जलादिकं बह्वेव दृष्टमिति तद्व्यावृत्त्यर्थमाह । अद्भुतमिति । अलौकिकदृष्टपूर्वमद्भुतं दृष्टं वस्तु अन्याधारं जानाति न वेति तन्मनोविषयार्थं स्थानानि निर्दिशति । भूमौ वियति तोये वेति । दर्शनसमये भूमिरपि दृष्टा युक्त्या गन्धर्वनगरादिवद् आकाशेऽपि दर्शनं सम्भवति निमज्ज्य पश्यतीति जल एव भवति चेत्यनादरे यत्र क्वचित् अवश्यं दृष्टमिति अलौकिकं ज्ञानं गोपयितुमाह । तथा त्वां लक्षयामह इति । अद्भुतदर्शनमिव स ह्याश्चर्याभिनिविष्टः प्रपञ्चमग्रिमकार्यं च न स्मरतीति । प्रपन्नो ह्यन्यथादृष्टिरद्भुतार्थनिरीक्षकः तादृशं भगवान् दृष्ट्वा दर्शनं कल्पयेत्पुनः ॥ ३ ॥ अक्रूरस्तु ज्ञातमाहात्म्यः तन्न वक्तव्यमिति ईश्वरपृष्टं वक्तव्यमिति ज्ञात्वा सामान्यत उत्तरमाह । अद्भुतानीति । स्वरूपमाधारः भगवानेवेति प्रदेशान्तप्रश्नोऽनुपपन्नः सोऽपि वा प्रदेशः त्वय्येवास्तीति न त्वत्तोऽन्यत्राद्भुतमस्ति त्वद्दर्शनं तु अद्भुतमेवेति चिह्नमप्यव्यभिचारि इहास्मिन् समये देशे वा भूमौ वियति जले वायान्यद्भुतानि तानि त्वय्येव यतस्त्वं विश्वात्मकः विश्वस्मिन्नह्यद्भुतानि भवन्ति अतस्तानि किं मे मया न दृष्टानि यतस्त्वां विपश्यतः अदृष्टस्तु त्वं केनापि अन्यस्याद्भुतत्वमेव नास्ति केनचिददृष्टत्वात् भगवांस्तु सर्वादृष्टः तद्देशमदृष्टं भगवन्तं विपश्यतो मे किन्तानि न दृष्टानीत्यर्थात् तानीति पूर्वत्रैव वा अनुवादः सर्वाद्भुताधारे दृष्टे नादृष्टं किं चिदवशिष्यत इति आक्षेपो युक्तः ॥ ४ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । स्तुवतः तस्याक्रूरस्य जले वपुः मूर्त्तिमात्मनो दर्शयित्वा भगवान् कृष्णो भूयः पुनः समाहरत् नटो नाट्यमिव ॥ १ ॥ अन्तर्हितं तिरोभूतं वीक्ष्य सोप्यक्रूरः सत्वरो जलात् उन्मज्ज्य बहिर्निःसृत्य सर्वमावश्यकं नित्यं कर्म कृत्वा विस्मितो रथमागमत् ॥ २ ॥ तमक्रूरं हृषीकेशः श्रीकृष्णोऽपृच्छत् भूमौ वियति खे तोये वारि वाऽद्भुतमिव ते त्वया किं दृष्टं त्वां तथा दृष्टाद्भुतं वयं तर्कयामः ॥ ३ ॥ अक्रूरोक्तिः । भूमौ वियति जले वा यावन्तीहाद्भुतानि तानि विश्वात्मके त्वयि सन्ति त्वां पश्यतो मेऽदृष्टं किं सर्वं दृष्टमिति भावः ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एकचत्वारिंशके तु प्रविष्टस्य पुरीं हरेः ॥ दुष्टरजकघातादि चरितं विनिरूप्यते ॥ १ ॥

'एवं सम्प्रार्थितो भगवान् किं कृतवान् ?' तत्राह—स्तुवत इति । कृष्णो भगवानेवं जले आत्मनो वपुषः चतुर्भुजरूपं दर्शयित्वा तस्य अक्रूरस्य स्तुवत एव सतो भूयस्तद्रूपं समाहरत् उप संहृतवानित्यर्थः । तत्र दृष्टान्तमाह—नट इति । नटो यथा नाट्यं यथेष्टं रूपं दर्शयित्वोपसंहरति तथेत्यर्थः ॥ १ ॥ सोऽक्रूरोऽपि तमन्तर्हितं वीक्ष्य ज्ञात्वा जलादुन्मज्ज्य सत्वरः त्वरया

युक्तः आवश्यकं माध्याह्निकं सर्वं कृत्वा विस्मितः सन् रथं प्रत्यागमत् ॥ २ ॥ तमागतमक्रूरं हृषीकेशः सर्वेन्द्रियनियन्ता कृष्णोऽपृच्छत्। हृषीकेशपदेन सर्वज्ञता सूचिता, तद्विनैवं प्रश्नासम्भवात्। प्रश्नमेवाह—इह अस्मिन् काले भूमौ, वियति आकाशे, जले वा ते त्वया किमद्भुतमाश्चर्यं दृष्टम् ?। 'किञ्चिद्दृष्टमित्यत्र तु सन्देहो नास्ति' इत्याशयेनाह—तथा दृष्टाद्भुतं त्वां लक्षयामहे चिह्नैरनुमिनुमः ॥ ३ ॥ एवं पृष्टोऽक्रूर आह—इह भूम्यादिषु यावन्ति अद्भुतानि सन्ति तानि सर्वाणि त्वय्येव सन्ति। तत्र हेतुः—विश्वात्मक इति। अतस्त्वां विपश्यतो मे मम षष्ठी तृतीयार्थे, मया किमदृष्टं सर्वमेवाद्भुतं दृष्टम् ॥ ४ ॥

अन्वितार्थप्रकाशिका

रजकस्य वधः प्रीतिः सुदाम्नो वायकस्य च। एकचत्वारिंश एतत्त्र श्लोका द्विमार्गणाः (५२) ॥
पञ्चोवाचेति (५) पादोनाः सप्तबाणा (५६।।) अनुष्टुभः ॥ ४१ ॥

स्तुवत इति। कृष्णो भगवानेवं जले आत्मनो वपुः रूपं दर्शयित्वा तस्य अक्रूरस्य स्तुवत एव सतो भूयस्तद्रूपं समाहरत् उपसंहृतवान्। नटो यथा नाट्यं यथेष्टं रूपं दर्शयित्वोपसंहरति तथा ॥ १ ॥ सोऽपीति सोऽक्रूऽपि तमन्तर्हितं वीक्ष्य ज्ञात्वा जलादुन्मज्ज्य सत्वरः त्वरया युक्तः आवश्यकं माध्याह्निकं सर्वं कर्म कृत्वा विस्मितः सन् रथं प्रत्यागमत् ॥ २ ॥ तमिति। तमागतमक्रूरं हृषीकेशः अपृच्छत्। इह अस्मिन् काले भूमौ वियति आकाशे तोये जले वा ते त्वया किमद्भुतमाश्चर्यं दृष्टं तथा दृष्टाद्भुतं त्वां लक्षयामहे चिह्नैरनुमिनुमः। तव नेत्रे सास्रे प्रोत्फुल्ले एवात्र प्रमाणमित्यर्थः ॥ ३ ॥ अद्भुतानीति। इह भूमौ वियति जले वा यावन्ति अद्भुतानि सन्ति तानि सर्वाणि विश्वात्मके त्वय्येव सन्ति। अतः त्वां विशेषेण पश्यतः मे मम। शेषे षष्ठी। मया किमदृष्टं सर्वमेवाद्दुतं दृष्टम् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीमेकचत्वारिंशेऽध्याये मथुराप्रवेशनं रजकहननं च तन्तुवायमालाकारिणोः पूजाग्रहणं चैतानि कृष्णकर्माणि प्रोच्यन्ते आत्मनः स्वस्य नाट्यमिव यथा तथा कृष्णः पुनः स्वस्य जले दृष्टं वपुः समाहरत् ॥ १ ॥ आवश्यकं माध्याह्निकं जलमयोपचारैस्तीर्थे हरिपूजादिकं च कृत्वा ॥ २ ॥ ते त्वया अद्भुतं दृष्टमिव ॥ ३ ॥ त्वयि तानि सन्ति त्वां विपश्यतो विपश्यता मे मया किं अदृष्टं न दृष्टं सर्वं दृष्टमित्यर्थः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रविशन् रजकं त्वेकचत्वारिंशे पुरीमहन्। सुदाम्नो वायकस्याथ प्रादात्तुष्टो वरांस्ततः ॥ १ ॥
स्वधामसंदर्शनसत्कृपातः प्रमोद्य चाक्रूरमनः सशङ्कम्। महोत्सवाढ्यां मथुरामपश्यत् स्वराजधानीमतिशोभमानाम् ॥ २ ॥

वस्तुत इति ॥ भगवान् कृष्णः, आत्मनः स्वस्य, वस्तुतः वास्तवं वपुः, तस्याक्रूरस्य, जले दर्शयित्वा, नटः नाट्यं इव, नटो यथा नाट्यार्हं रूपं प्रेक्षकेभ्यो दर्शयित्वान्तर्द्धापयति, तद्वत् भूयः पुनः, समाहरदन्तर्द्धापयामास। क्वचित् स्तुवत इत्यपि पाठस्तत्पक्षे स्तुवत इति तस्येत्यस्य विशेषणम् ॥ १ ॥ सोऽपीति ॥ सः अक्रूरः अपि, अन्तर्हितं वीक्ष्य च, जलेक्षितमन्तर्द्धिं संप्राप्तं वीक्ष्यैवेत्यर्थः। जलात् उन्मज्ज्य, सत्वरस्त्वरायुक्तः सन्, आवश्यकं माध्याह्निकं नित्यकर्म, सर्वं सकलमपि, कृत्वा च, विस्मितः सन्, रथं आगमत् ॥ २ ॥ तमिति ॥ तं रथमाविष्टवन्तमक्रूरं, हृषीकेशः कृष्णः, अपृच्छत्पप्रच्छ। प्रश्नमेवाह किमित्यादिना। हे तात, इह रथे, भूमौ भुवि, वियत्याकाशे, तोये जले वा, किं अद्भुतं चित्रं, ते त्वया दृष्टं, न किमपि दृष्टमिति मा वोच इत्यभिप्रेत्याह। तथा दृष्टाद्भुतसदृशं त्वां, लक्षयामहे चिह्नैरनुमिनुमः ॥ २ ॥ इत्थं भगवदापृष्टः प्राहाक्रूरः ॥ अद्भुतानीति ॥ भूमौ, वियति, जले वा, यावन्ति यावत्संख्याकानि, अद्भुतानि सन्ति, तानि विश्वात्मके विश्वशरीरके, इहास्मिन् त्वयि एव, सन्ति। तं त्वामिति शेषः। विपश्यतः मे विपश्यता मयेत्यर्थः। किमदृष्टं, न किमप्यद्भुतं त्वय्यविद्यमानं मया दृष्टमिति काकभिप्रेतोऽर्थः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स्तुवत इति : १०.४१.१

यो मत्पदाम्बुजरतिः स मदिष्टरूपं पश्येज्जडेऽप्यपगता-खिलमोहजालः।
सत्प्रत्ययाय स जले किमु दर्शयित्वा तस्मै स्वरूपमथ तद्रथगस्तथाऽऽसीत् ॥ १ ॥
येन त्यक्तं गोकुले सन्ममत्वं वृत्तीनां चाकामताऽकारि भूयः।
स्यादेवास्य ब्रह्मदृष्टिर्जडेषु स्पष्टैवात्राऽक्रूरकृत्यं प्रमाणम् ॥ २ ॥
बालाविमाविह कठोरमतिः स कंसः तत्स्यात् पुरः कथमिति भ्रमितान्तरं तम्।
जानन् हरिः सकलसूक्ष्मदृगन्तरङ्गे चक्रे नटानुकरणं हरिजातरङ्गे ॥ ३ ॥

यद्रूपमस्य हि मया विशदीकृतं तद्बीजं भयभ्रमनिराकृतिरेव सा तु ।
जातेत्यवेक्ष्य नुतिमध्यकृतावहित्थोऽनुक्त्वा प्रसादवरदोक्तिमसौ तदाऽऽसीत् ॥ ४ ॥

सोऽपीति : १०.४१.२

अन्तर्हितं मदनुरूपमलोकदृष्टमन्तर्हितं क्षणत एव निरीक्ष्य सोऽस्मिन् ।
आवश्यकाऽऽहितमतिः क्षममेव भूयः कृत्वा मनोरथशतं रथमारुरोह ॥ ५ ॥
सद्योगिनापि हि सता जनसङ्ग्रहार्थमावश्यकं विधिगतं तु विधेयमेव ।
दृष्टेशवैभवपदोऽपि चकार यस्मादक्रूर एष विहितं किल नित्यकर्म ॥ ६ ॥
अकुर्वन् कुर्वते चात्र करिष्यन्त्यघमर्षणम् । अन्वर्थं तु तदेवेडय यदक्रूरकृतं जले ॥ ७ ॥
नित्यं श्रीपतिदर्शनसुखशाल्येको हि जगति साधुजनः । क्षणमेव तु योगविदो ह्युभयत्रापि प्रमाणमक्रूरः ॥ ८ ॥

तमपृच्छदिति : १०.४१.३.

यदा शताङ्गसङ्गतान्नरङ्गवृत्तिवर्तनस्तदा यदि प्रभोरुदासितं पदं हि विन्दति ।
स योग एव योगिभिर्गलन्मदैरुदीरितः स चास्य पूर्णतामगान्नवेत्यपृच्छदच्युतः ॥ ९ ॥

अद्भुतानीति : १०.४१.४

भुवनान्तर्हितं देहस्थितं चैकं प्रपश्यतः । किं वाच्यमद्भुतं नागेत्यूचेऽक्रूरः समञ्जसम् ॥ १० ॥
तत्त्वज्ञोऽपि विकल्पेन श्रीशोऽवोचत्स चोत्तरम् । पर्यायेणेति सुव्यक्तं हृद्यं हृद्येव धारयेत् ॥ ११ ॥

कृष्णप्रिया

दशम स्कन्ध पूर्वार्द्ध का यह ४१ वाँ अध्याय है । श्री सुबोधिनी के निरूपण के अनुरूप यह राजसप्रकरण के प्रमाण प्रकरण में छठा अध्याय है और भगवान् के वैराग्य धर्म का निरूपण किया गया है । भागवत श्री अक्रूर जी को विनय भाव से भी कृष्ण ने अपने गृह प्रस्थान का अनुरोध किया, पुनः प्रभु के स्वागत के लिए उत्कंठित मथुरापुरी का अवलोकन किया मथुरा देवी को दर्शनादि, विपरीत बुद्धि रजक का मोक्ष परम भक्त सुदामा माली का मङ्गल कुब्जा का कल्याण और धनुर्भङ्ग आदि विशिष्ट पराक्रम करेंगे । इस अध्याय में ५२ श्लोक है । अब श्रीकृष्ण कथामृत का पान करें—

श्री शुकाचार्य भगवान् ने कहा राजन् परीक्षित ! कृपानिधान भगवान् श्रीकृष्ण ने यशोगान करते हुए भक्तवर अक्रूर जी श्री यमुना जी जल के भीतर अपना दिव्य स्वरूप का दर्शन कराया, पुनः जैसे कोई निपुण वह प्रेक्षकों को अपना नाट्य बताकर सिमट ले वैसे नटवर प्रभु ने अपना नाट्य छिपा लिया सिमट लिया ॥ १ ॥ श्री अक्रूरजी भी भगवान् का दिव्यस्वरूप को श्री यमुना जल में न देखकर त्वरा से जल से बाहर आए पुनः सन्ध्या वन्दनादि नित्यकर्म निपटकर के विस्मित बनकर रथ पर पहुँच गए ॥ २ ॥ आश्चर्य चकित श्री अक्रूरजी को भगवान् श्रीकृष्ण ने पूछा काकाजी ? आपने भूमि में या जल में क्या कुछ अद्भुत दृश्य देखा ? आश्चर्य चकित आपके मुखमण्डल पर ऐसी आभा दीख पड़ती है कि आपने कोई विलक्षण दृश्य देखा ? देखिए यह तो मेरा अनुमान है ॥३॥ अक्रूरजी ने कहा नाथ ! आप तो सर्वज्ञ है आप से कौन सी बात छिपी है ! भूमि में आकाश में एवं जल में जितने अद्भुत रहे हैं वे सर्व आप में विद्यमान है । नाथ ! आप तो विश्वरूप है । विश्वात्मक आपके दिव्य स्वरूप का दर्शन करने पर कौन सी अद्भुत वस्तु नहीं देखी ! ॥ ४ ॥

यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले । तं त्वानुपश्यतो ब्रह्मन् किं मे दृष्टमिहाद्भुतम् ॥ ५ ॥
इत्युक्त्वा चोदयामास स्यन्दनं गान्दिनीसुतः । मथुरामनयद् रामं कृष्णं चैव दिनात्यये ॥ ६ ॥
मार्गे ग्रामजना राजंस्तत्र तत्रोपसङ्गताः । वसुदेवसुतौ वीक्ष्य[1] प्रीता दृष्टिं न चाददुः ॥ ७ ॥
तावद् व्रजौकसस्तत्र[2] नन्दगोपादयोऽग्रतः । पुरोपवनमासाद्य प्रतीक्षन्तोऽवतस्थिरे ॥ ८ ॥

कर्दमक्षमा

अन्वयः—हे, ब्रह्मन् ! भूमौ, वियति, (वा) जले, यत्र, वा, सर्वाणि, अद्भुतानि, (सन्ति) तम्, त्वाम्, अनुपश्यतः, इह, मे, अद्भुतम्, किम्, अदृष्टम् ? ॥ ५ ॥ गान्दिनीसुतः, इति, उक्त्वा, स्यन्दनम्, चोदयामास, रामम्, कृष्णम्, च, (नन्दादीन् सर्वान्), दिनात्यये, एव, (गोधूलिकाप्रवेशे) मथुराम्, अनयत् ॥ ६ ॥ राजन् !, तत्र, तत्र, मार्गे, उपसङ्गताः,

---

१. दृष्ट्वा–प्रा. पा. । २. स्वव्र–विज. ।

ग्रामजनाः, वसुदेवसुतौ, वीक्ष्य, प्रीताः, दृष्टिम्, न, च, आददुः ॥ ७ ॥ तावत्, तत्र, नन्दगोपादयः, व्रजौकसः, अग्रतः, पुरा, उपवनम्, आसाद्य, प्रतीक्षन्तः, अवतस्थिरे ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु मत्प्राप्तेः पूर्वमेव त्वं विस्मितमुखो लक्षितोऽस्यतो भूमौ वियति जले वा किमप्यद्भुतं दृष्टमेवेति चेदत आह। यत्राद्भुतानीति। यत्र त्वयि सर्वाण्यद्भुतानि सन्ति तं सर्वाद्भुताधिष्ठानं त्वामिह पश्यतो मे त्वत्तोऽन्यत्र भूम्यादौ किमद्भुतं दृष्टम्। त्वां विना न तत्र किंचिदद्भूतमित्यर्थः। ब्रह्मन् हे परमेश्वरेत्यर्थः। ब्रह्मेति वा पाठः ॥ ५ ॥ गन्दिनीसुतोऽक्रूरः ॥ ६ ॥ दृष्टिं नाददुः पश्यन्त एव स्थिता इत्यर्थः ॥ ७ ॥ रामकृष्णागमनं प्रतीक्षमाणाः स्थिताः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनराशंकते—नन्विति। यतो मत्संगात्पूर्वमेव विस्मितोऽतो हेतोः। अतोऽत्र। इह रथे। इत्यर्थ इति—"यस्मिन्दृष्टे सर्वं दृष्टं स्यात्" इति श्रुत्यर्थोऽप्यत्र सूचित इति भावः। संबुद्धिस्तु स्वयमेवोपस्थिता भवत्यतो ब्रह्मेति द्वितीयान्तं पदं, तथा च त्वां ब्रह्म परिपूर्णं पश्यत इति योज्यम्। नलोपे संबुद्धौ विशेषाभावात् ॥ त्वद्रूपेऽस्मिन्दृश्यमाने तु तानि सर्वाण्यप्यद्भुतत्वाय न कल्पन्ते किं तु त्वद्रूपमेवेदमित्याह—यत्रेति। भूम्यादिषु यान्यद्भुतान्यपि सर्वाणि यत्र त्वयि सन्ति तं त्वामनुपश्यत इति भाग्यतः, संप्रति निरन्तरं पश्यता मया किमन्यदद्भुतमिह दृष्टं किन्त्विदमेव त्वद्रूपं पूर्वतोऽप्यद्भुतं दृश्यत इत्यर्थः। तत्र हेतुगर्भं विशिनष्टि—ब्रह्मेति। अथ कस्मादुच्यते ब्रह्म "बृंहति बृंहयति च" इत्यादिश्रुतौ "बृहत्त्वाद् बृंहणत्वाच्च यद्ब्रह्म परमं विदुः" इति श्रीविष्णुपुराणे च त्वय्येव सर्वबृहत्तमत्त्वस्य दृष्टत्वात्। तत्रापि 'यन्मर्त्यलीलौपयिकम्' इत्यादौ 'विस्मापनं स्वस्य च सौभगर्द्धेः परं पदम्' इति प्रसिद्ध्या त्वद्रूपस्य परमतत्त्वादिति भावः। 'ब्रह्मन्' इति पाठेऽपि स एवार्थः। 'दृष्टमिव' इति पाठे त्विवशब्दस्तस्य दर्शनस्य न्यूनत्वमेव बोधयतीति दिक् ॥५॥ इति एवम्। दिनात्ययेऽपराह्णे ॥ अनयदित्यनेन श्रीमुनींद्रस्य गोकुलजनत्वाभिमानो बोध्यते। दिनात्ययेत्स्ययामे 'तथापराह्णे' इति वक्ष्यमाणात्, वक्ष्यमाणबहललीलाकालसमावेशाच्च, "तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान्" इति च वक्ष्यते। तथोक्तं श्रीपराशरेण—"संप्राप्तश्चापि सायाह्ने सोऽक्रूरो मथुरां पुरीम्" इति। अत्रान्तिमदशदण्डात्मकापराह्णस्यान्तिमषड्दंडात्मकसायाह्नस्य च प्रायिकत्वात्तन्मध्यवर्तिचतुर्थप्रहरत्वमेवोभयसमंजसमिति। तदुक्तं वैशंपायनेन—"विविशुस्ते पुरीं रम्यां काले रक्तदिवाकरे" इति सायाह्नस्यैकदेशचिह्नं मन्तव्यम्। अक्रूरतीर्थादतिनिकटवर्तिपुरोपवनस्य दिनात्यये प्राप्तिरक्रूरस्य तदाश्चर्यदर्शनाच्चिरं विलम्बात् ॥ ६ ॥ तत्र तत्र मार्गसव्यदक्षिणपार्श्वयोरित्यर्थः। यद्वा—वसुदेवसुतौ वीक्ष्य तत्र तत्र श्रीकृष्णे बलदेवे च लग्नां दृष्टिम्। इत्यर्थ इति—दृष्टिप्रत्यादाने विवशा बभूवुरित्यर्थः ॥ किञ्च पथि लोकानां प्रीत्यर्थं शनैरागमनादपीत्याशयेनाह—मार्ग इति। ग्रामाणां जना इति मूढत्वं सूचितं, तथापि प्रीता इति वस्तुस्वभावो दर्शितः। हे राजन्निति—तत्त्वया बुध्यत एवेति भावः। यद्वा—ग्रामे जनानामपि तादृशप्रीतिस्मरणात्प्रेमार्त्युदयेन शोचन्संबोधयति—अहो राज्ञां स्वभावं त्वं जानास्येवेति भावः ॥ ७ ॥ तावत्तदा। अग्रतोऽग्रे। तत्र मथुरोपकण्ठे ॥ यावत्ते आयान्ति तावत्प्रतीक्षमाणाः अवतस्थिरे। 'अनिष्टाशङ्कीनि बंधुहृदयानि' इति न्यायेन कर्म निरीक्षमाणा ऊद्ध्र्वावस्थित्याऽवर्तन्त, न तूपविष्टा इत्यर्थः। पूर्वं रथशैघ्र्येण गन्तुमशक्तास्ते स्ववर्त्माग्रे रथचिह्नमदृष्ट्वापि वक्रवर्त्मान्तरे तच्चिह्नात्तेनासौ गत इत्याशंकमाना शीघ्रं तन्मेलनायर्जुवर्त्मना चलन्त एवासन्, संप्रति त्वेकीभूतवर्त्मनि पुरसमीपे तमदृष्ट्वा परमोत्कण्ठया पश्चादेव निरीक्षमाणास्तस्थुरिति ज्ञेयम्। विलम्बस्त्वक्रूरनिमज्जनादेवेति तत्त्वम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्वद्रूपेऽस्मिन् दृश्यमाने तु तानि सर्वान्यणयद्भुताय न कल्प्यन्ते किन्तु तद्रूपमेवेदमित्याह। यत्रेति। भूम्यादिषु यान्यद्भुतान्यपि सर्वाणि यत्र त्वयि सन्ति तं त्वा त्वामनुपश्यत इति भाग्यतः सम्प्रति निरन्तरं पश्यता मया किमन्यदद्भुतमिह दृष्टं किं त्विदमेव त्वद्रूपं पूर्वतोऽप्यद्भुतं दृश्यत इत्यर्थः। तत्र हेतुगर्भं विशिनष्टि। ब्रह्मेति "अथ कस्मादुच्यते ब्रह्म बृंहति बृंहयति च" इत्यादि श्रुतौ "बृहत्वाद्बृंहणत्वाच्च यद्ब्रह्म परमं विदु"रिति श्रीविष्णुपुराणे च त्वय्येव सर्वबृहत्तमत्वस्य दृष्टत्वात्तत्रापि यन्मर्त्यलीलौपयिकमित्यादौ विस्मापनं स्वस्य च सौभगर्द्धेः परं पदमिति प्रसिद्ध्यात्त्वद्रूपस्यास्य परमतत्त्वत्वादिति भावः। ब्रह्मन्निति पाठे स एवार्थः दृष्टमिवेति पाठेत्विवशब्दस्तस्य दर्शनस्य न्यूनत्वमेव बोधयतीति दिक् ॥५॥ अनयदित्यनेन श्रीमुनीन्द्रस्य गोकुलजनत्वाभिमानो बोध्यते दिनात्ययेऽन्त्ययामे तथापराह्णे इति वक्ष्यमाणात् वक्ष्यमाणबहुललीलाकालसमावेशाच्च तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवानिति च वक्ष्यते तथोक्तं श्रीपराशरेण "संप्राप्तश्चापि सायाह्ने सोऽक्रूरो मथुरापुरीम्" इति अत्रान्तिमदशदण्डात्मिकापराह्णस्यान्तिमषड्दण्डात्मकसायाह्नस्य च प्रायिकत्वात्तन्मध्यवर्त्ति चतुर्थप्रहरत्वमेवोभयसमञ्जसमिति यदुक्तं वैशम्पायनेन "विविशुस्ते पुरीं रम्यां काले रक्तदिवाकरे" इति सायाह्नस्यैकदेशचिह्नं मन्तव्यम् अक्रूरतीर्थादतिनिकटवर्त्तिपुरोपवनस्य दिनात्यये प्राप्तिः अक्रूरस्य तदाश्चर्यदर्शनादिना चिरं विलम्बनात् ॥ ६ ॥ किञ्च पथि लोकानां प्रीत्यर्थं शनैरागमनादपीत्याशयेनाह

मार्गं इति । ग्रामाणां जना इति मूढत्वं सूचितं तथापि प्रीडा इति वस्तुस्वभावो दर्शितः हे राजन्निति तत्त्वया बुध्यते एवेति भावः। यद्वा ग्रामे जनानामपि तादृशप्रीतिस्मरणात् प्रेमार्त्त्युदयेन शोचन् सम्बोधयति ॥ ७ ॥ यावत्ते आयान्ति तावत् प्रतीक्षमाणा अवतस्थिरेऽनिष्टाशङ्कीनि बन्धुहृदयानीति न्यायेन वर्त्मनिरीक्षमाणा ऊर्ध्वावस्थित्या अवर्त्तन्त नतु प्रविष्टा इत्यर्थः । पूर्वं रथशैघ्र्येणानुगन्तुमशक्तास्ते स्ववर्त्माग्रे रथचिह्नमदृष्ट्वापि वक्रवर्त्मान्तरे तच्चिह्नात् तेनासौ गत इत्याशङ्कमानाः शीघ्रतन्मिलनाय ऋजुवर्त्मोना चलन्त एवासन् सम्प्रति त्वेकीभूतवर्त्मनि पुरसमीपेऽपि तद्दृष्ट्वा परमोत्कण्ठया पश्चादेव निरीक्षमाणास्तस्थुरिति ज्ञेयम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नु निश्चितम्, यद्वा, अनु वारं वारं पश्यतः; पूर्वस्मिन् श्लोके भूम्यादौ यावन्त्यद्भुतानीत्यन्वयः; अत्र च भूम्यादौ किं दृष्टमिति तत्रापि पूर्वस्मिन् अदृष्टामिति, अत्र च दृष्टमिति विशेषः । एवं श्रीस्वामिपादानां मते तथा श्रीचित्सुखव्यानाच्च । 'त्वानुपश्यतः' इत्येव पाठः; अन्यथा अत्रापश्यत इति, पूर्वत्र पश्यत इति पाठेऽन्वयव्यतिरेकाभ्यामाहेत्येव व्याख्यातं स्यात् । अतष्टीकायामपि 'तं त्वामिह पश्यतः' इत्येव पाठः संगत इति । एवं तदद्भुतमपि त्वयैव दर्शितम्; किंवा अहो तदद्भुतं त्वयैव दर्शयित्वाधुना अज्ञवदीदृशं पृच्छयत इति परमाद्भुतमयोऽसीति भावः ॥ ५ ॥ नित्यमेकस्या गोदानाख्यातेति गान्दिनीनामस्मारणेन तस्याः परमधर्म्ममयत्वं तेन च तत्सुतस्यापि तादृशत्वं सूचितम् । अतएव मथुरामनयदेव, 'मन्थ विलोड़ने' इत्यस्मान्मथुरामिति तयोश्चित्तं तया विलोड़ितं क्षोभितमिति । अतएव प्रियजनविच्छेदेऽपि तस्यां तत्तत् क्रीड़ादिकमिति च सूचितम्, दिनात्यये अन्त्ययामे (१९ श० श्लो०) 'अथापराह्णे' इति वक्ष्यमाणाद्वक्ष्यमाणबहुललीलाकालसमावेशाच्च; यच्चोक्तं श्रीपराशरेण (वि० पु० ५।१९।९)—'संप्राप्तश्चापि सायाह्ने सोऽक्रूरो मथुरापुरीम्' इति; श्रीवैशम्पायनेन च (हरिवंशे विष्णु प० २७।२)—'विविशुस्ते पुरीं रम्यां काले रक्तदिवाकरे' इति । तच्च कल्पभेदादिति मन्तव्यम् । तत्तन्मते च तत्तल्लीलाः प्रदोषे ज्ञेयाः, अत्र च (भा० १०।४२।२७) 'तयोर्विचरतोः' इत्यग्रे वक्ष्यमाणाद्दिन एवेति, अक्रूरतीर्थादतिनिकटवर्त्तिपुरोपवनस्य दिनात्यये प्राप्तिः, अक्रूरस्य तत्तदाश्चर्य्यदर्शनादिना चिरं विलम्बनात् ॥ ६ ॥ किञ्च, पथि लोकानां प्रीत्यर्थं शनैरागमनादपीत्याशयेनाह—'मार्गे' इति । ग्रामाणां जना इति श्रवणविशेषादिराहित्यं सूचितम्, तथापि प्रीता इति वस्पुस्वभावो दर्शितः । हे राजन्निति तत्त्वया बुध्यत एवेत्यर्थः । यद्वा, ग्रामजनानामपि तादृशप्रीत्या प्रेमार्त्त्युदयेन शोचन् सम्बोधयति । तत्र तत्र मार्गमध्ये स्थाने-स्थाने वसुदेवस्य सुताविति तदानीं तेषां तथा ज्ञानोत्पत्तेः । यद्वा, तत्सुतत्वे भगवत्ताप्रकटनेन सौन्दर्य्यविशेषाभिव्यक्तेः । यद्वा, वसुदेवो वसुश्रेष्ठः श्रीनन्द एवेति पूर्व्वमेवोक्तम् ॥ ७ ॥ यावत्ते आयान्ति, तावत् प्रतीक्षमाणा व्रजौकसः सर्व्वे व्रजवासिन इत्यर्थः । बालवृद्धादीनां सर्व्वेषामेव प्रायस्तत्संगत्या गमनात् । यद्वा, प्रतीक्षणे हेतुः – वन्यजनास्तैर्विना पुरीं प्रवेष्टुमशक्ता इत्यर्थः । यद्वा, श्रीकृष्णैकप्राणाः 'अनिष्टाशंकीनि बन्धुहृदयानि भवन्ति' इति न्यायेन विविधशंका–स्नेहभरस्वभावेनैवेति भावः । अतोऽवतस्थिरे वर्त्म निरीक्षमाणा ऊर्द्ध्वावस्थित्यावर्त्तन्त, न तूपरिष्टा इत्यर्थः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

गान्दिनी अक्रूरस्य माता ॥ ६–१३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दृष्टं वदेत्यत आह । यत्रेति । हे ब्रह्मन्! संबुद्धौ नपुंसकानां वेति विकल्पान्नलोपाभावः यत्र त्वयि सर्वाण्यद्भुतानि तं त्वामिह पश्यतो मे अन्यत्र भूम्यादौ किमद्भुतं दृष्टं त्वां विना न किंचिदद्भुतमित्यर्थः ॥ ५ ॥ इतीत्थमुक्त्वा गान्दिनीसुतः अक्रूरः स्यन्दनं रथं चोदयामास गमयामास ततो रामं कृष्णं च दिनात्यये दिनावसाने श्रीमथुरां प्रापयामास ॥ ६ ॥ तदा तत्र मार्गे ग्रामेषु जनाः वसुदेवस्य सुतो रामकृष्णावुपसंगताः सन्तः तौ दृष्ट्वा प्रीताः दृष्टिं नाददुः न प्रत्याजह्रुः पश्यन्त एव स्थिता इत्यर्थः ॥ ७ ॥ तावदिति । यावद्रामकृष्णौ मथुरामनयत् तावदेव ततः पूर्वमेव नन्दादयो गोपाः उपवनं प्राप्य श्रीरामकृष्णागमनं प्रतीक्षमाणाः स्थिताः ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

किं त्वयाद्भुतं दृष्टमिति प्रश्नस्य सर्वं दृष्टमेवेति परिहारः कथमागत इत्यत उक्तमेव स्फोरयति । यत्रेति । यत्र भूम्यादौ सन्ति सर्वाणि अद्भुतानि यत्र यस्मिन् त्वयि सन्ति तं त्वानुपश्यतो मे किमद्भुतमदृष्टं सर्वमद्भुतं दृष्टमित्यर्थः । ब्रह्मन् पूर्ण! ॥ ५ ॥ दिनात्यये अपराह्णे ॥ ६ ॥ तयोर्वसुदेवसुतयोः लग्नाः प्रीताः प्रसन्नाः दृष्टिं नाददुः प्रत्यादानं न चक्रुः ॥ ७ ॥ प्रतीक्षन्तः पश्यन्तः ॥ ८–९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च त्वद्रूपेऽस्मिन् दृश्यमाने सम्प्रति तु तानि सर्वाण्यद्भुतत्वाय न कल्प्यन्ते किन्तु त्वद्रूपमेवेदमित्याह । यत्र त्वयि सर्वाण्यद्भुतानि तं त्वा त्वाम् अनुपश्यतो निरन्तरमीक्षमाणस्य ममान्यत्र भूम्यादौ किमद्भुतं तद्दृष्टमपि तु न किमपि किंत्विदमेव त्वद्रूपं सर्वतोऽप्यद्भुतं दृश्यते इति जले सङ्कर्षणनारायणपार्षदान्वितं यद्वैकुण्ठस्थलमद्भुतं दृष्टं ततोऽपि परः सहस्राण्यद्भुतानि त्वद्रूपेऽस्मिन् वर्त्तन्त इति प्रत्येमीत्यर्थः । हे ब्रह्मन् ! ब्रह्म चेति पाठद्वयं त्वं महामहेश्वरः साक्षात् परब्रह्मैवासि त्वयि भ्रातुष्पुत्रत्वज्ञानरूपं मन्मौढ्यं सम्प्रति त्वत्कृपया निःशेषेणैवापक्षीणामिति भावः ॥ ५ ॥ गान्दिनीसुतोऽक्रूरः ॥ ६ ॥ नाददुः पश्यन्त एव निष्पन्दा बभूवुरित्यर्थः ॥ ७ ॥ प्रतीक्षन्तः रामकृष्णौ प्रतीक्षमाणाः स्थिता इति पूर्वं रथशैघ्र्येणानुगन्तुमसमर्थैं रथ वर्त्म परित्यज्य ऋजुमार्गेणैव तैरग्रे गमनादक्रूरनिमज्जननिबन्धनविलम्बाच्चेति भावः ॥ ८ ॥

गूढार्थदीपिनी

यत्र त्वयि अद्भुतानि सन्ति तं त्वाम् अद्भुताधिष्ठानं पश्यतो मे त्वत्तोऽन्यत् भूम्यादिषु किमद्भुतं न किमपीत्यर्थः ।५। गान्दिनी अक्रूरमाता । दिनात्यये उत्तरभागे अपराह्णे न तु सायङ्काले ॥ ६ ॥ उपसङ्गता मिलिता । तत्र तत्र कृष्णे रामे च लग्नां दृष्टिम् न आददुः न प्रत्याजह्रुः यावत् ते आयान्ति तावत् प्रतीक्षमाणाः सन्तः स्थिताः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एतदेवस्पष्टयति । यत्रेति । इह रथे तं त्वा त्वां नु निश्चितं पश्यतः किमदृष्टं सर्वं दृष्टमेव ॥ ५ ॥ गान्दिन्याः सुतोऽक्रूरः दिनात्ययेऽपराह्णे तस्मिन्नेवापराह्णे रजकवधादिकं ज्ञेयं कंसञ्च निहतं द्रक्ष्ये परश्वोऽहनीति देवर्षिवाक्यात् ॥ ६ ॥ दृष्टिं न आददुः न प्रत्याजहुः चित्रलिखिता इव तस्थुरित्यर्थः ॥ ७ ॥ यावदक्रूरः रामकृष्णौ मथुरामनयत्तावत् नन्दगोपादयोऽग्रतः पुरोपवनमासाद्य प्राप्य रामकृष्णागमनं प्रतीक्षन्तोऽवतस्थिरे इत्यन्वयः ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ननु मदुपास्तेः प्रागेव प्रसन्नाननोऽसि तदधुना किं प्रयुक्तमुक्त्या प्रकटयत्यतो वदति । यत्रेति । भूमौ वियति जले वा यान्यद्भुतानि सर्वाणि च यत्र तं त्वां दूरतोऽनुपश्यतो मम किमद्भुतं न दृष्टं । ब्रह्मन् ब्रह्मेति पाठौ युक्तौ । यत्र सर्वाण्यद्भुतानि तं त्वामनुपश्यतो मम भूमौ वियति जल इतीह किमद्भुतं दृष्टं स्यात् । आश्चार्याश्चर्यरूपे त्वयि दृष्टे कृष्णं न क्वाप्यन्यदाश्चर्यं भवेत् । ब्रह्मत्वस्य मुख्यपूर्णत्वस्याश्चर्यताप्रयोजकस्यान्यत्राभावान्नेतरदाश्चर्यकरमिति भावः ॥ ५ ॥ इत्युक्त्वा कृष्णं प्रति गान्दिनीसुतः स्यन्दनं चोदयामास । दिवात्ययेऽपराह्णे मधुरां रामकृष्णं चानयत् ॥ ६ ॥ मार्गे ग्रामजनास्तत्र तत्रोपसङ्गता वसुदेवसुतौ वीक्ष्य प्रीताः सन्तो दृष्टिं कृष्णार्पितां न चाददुर्न प्रत्यावर्तयन् ॥ ७ ॥ हे तात प्रकृतकृष्ण तातश्चासौ नन्दगोपश्च स आदिर्येषां ते तथेति वा । पुरोपवनमासाद्य प्रतीक्षन्तः प्रतीक्षमाणा एतदागमनमवतस्थिरेऽतिष्ठन् गतम् ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

कदाचिदयमुपचाराद्वदतीति पुनः प्रश्नशङ्कायामाह । यत्राद्भुतानीति । यत्र क्वचिदद्भुतानि लोके दृश्यन्ते तानि त्वय्येव वस्तुतस्तु अतो येन केनचिदपि त्वय्येव चेदद्भुत्तानि द्रष्टव्यानि तदा त्वां पश्यतो मे किं वा अद्भुतमदृष्टम् अनेन तत्रापि त्वमेवाद्भुतो दृष्टः त्वय्येव च दृष्टं त्वमेव सः त्वय्येव तदिति सर्वाधारस्त्वमेवेत्याधारप्रश्नोऽपि न कर्त्तव्य इति भगवन्तमाधारत्वेन निर्दिशति तं त्वेति ब्रह्मन्निति तत्समर्थनायोपपत्तिः ॥ ५ ॥ एवं परोक्षेणोत्तरमुक्त्वा भगवदिच्छां ज्ञात्वा रथं प्रेरितवानित्याह । इत्युक्त्वेति । भगवद्वाक्ये नावहेलेति उत्तरमुक्त्वा पश्चाद्रथं चोदयामास । ननु कस्योत्तालता तथा ज्ञात्वा भगवान्सम्यक्प्रसादनीयः किम्वा भगवतः कार्यं तुच्छं हि तत्तत्राह । गान्दिनीसुत इति । गोदानेन चोत्पन्ना गोरूपैव भवति तस्याश्च पुत्रः सौरभेय एव परं भगवन्तं मथुरां प्रापयत् रामो हि रतिकर्त्ता कृष्णश्च तत्फलं सदानन्दः स चेन्नगर्यां प्रतिष्ठितो भवति तदा तत्रत्यानां निरन्तरमेव सुखं भवतीति दिनात्यये संध्याकाले सा हि गोधूलिका प्रवेशे सुमुहूर्त्ता भवति चकारात् मध्ये स्थितान् सर्वानेव भगवदिच्छयैव संध्याकालोऽपि अपराह्णो भविष्यति यावता च कालेन कार्यं भविष्यति तावान् कालो ग्राह्यः अन्यथा दिनात्ययपदं वाधितं स्यात् अत्ययारम्भे वा मध्याह्नोपरि मध्याह्ने अतिक्रान्ते दिनमतिक्रान्तमेवेति मथुरास्थदिनानां वा दुःखदानात्यये स्वस्य वा ॥ ६ ॥ ततो भगवान् शनैर्गच्छन् सर्वानन्दकरो जात इत्याह । मार्ग इति । मध्ये ये ग्रामाः तदीया वा सर्वत्र मार्गे राजन्निति सम्बाधनं तथानुभवाय तत्र तत्रेति न देशाविशेषस्तेषां दर्शने अभिप्रेते अनभिप्रेते च देशे उपसंगताः निकटे समागताः वसुदेवसुतावेतो वीक्ष्यं सम्बन्धात् स्वरूपाच्च प्रीताः भगवते दत्तदृष्टयः चकारात् सर्वमपि दत्त्वा नाददुः न पुनर्गृहीतवन्तः सामान्येन मार्गस्थानां निरोध उक्तः दृष्टेरग्रहणे हेतुः पीता इति प्रीतिरेव दानफलं जातमिति पुनः कथं ग्रहणं भवेत् सुखार्थमिन्द्रियाणां परिग्रहः तस्मिन् जाते न प्रवर्त्तन्त एव तेषामधिका बुद्धिर्न जातेति वसुदेवतत्त्वोक्तिः ॥ ७ ॥ भगवद्गमनात् पूर्वमेव नन्दादयः मथुरोपवनपर्यन्तं गताः

अग्रे भगवति समागते गन्तव्यमिति प्रतीक्षयैव स्थिता इत्याह। तावदिति। यतस्ते व्रजौकसः अनावृत एव देशे स्थातुं योग्याः अत एवाग्रेऽपि गताः बह्वो बालकाः भगवन् मित्राणि सहैव स्थिताः नन्दगोपादय एव परं वृद्धाः पूर्वं गताः उपवनं नानाविधफलप्रधानं मथुरानिकटस्थम् अवतस्थिरे केवलं स्थिताः नतु तत् स्थितियोग्यं साधनमपि न संपादितवन्त इत्यर्थः। अनेन व्यवहारेऽपि भगवत एव प्राधान्यं सूचितम् ॥ ८ ॥

श्रीसुबोधिनी-सारः

यत्र त्वयि सर्वाणि अद्भुतानि तं त्वा त्वां भूमौ वियति जले वा पश्यतो मेऽद्भुतमाश्चर्यमिव दृष्टं किं न किमपि ॥ ५ ॥ इत्युक्त्वा श्रीकृष्णं गांदिन्याः प्रत्यहं गोदाननियमेन जातायाः काशिराजपुत्र्याः सुतोऽक्रूरः स्यन्दनं रथं प्रेरयामास। गांदिनीजन्म हरिवंशे स्पष्टम्। रामं कृष्णं च मथुरामनयत् दिनस्यात्ययेऽपराह्णे ॥ ६ ॥ हे राजन् मार्गे ग्रामजनाः तत्र तत्रोपसंगताः प्राप्ता वसुदेवस्य सुतौ वीक्ष्य प्रीता दृष्टिं नाददुः नाचकृषुः ॥ ७ ॥ तावत् व्रजौकसौ नन्दगोपादयोऽग्रतोऽग्रे पुरोपवनमाराममासाद्य प्राप्य तौ प्रतीक्षमाणाः संतस्थुः ॥ ८ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

ननु 'मत्प्राप्तेः पूर्वमेव त्वं विस्मितमुखो लक्षितोऽसि, अतः पूर्वमेव भूम्यादौ किञ्चिदद्भुतं त्वया दृष्टं तद्वद' इत्यत आह—यत्रेति। यत्र त्वयि सर्वाण्यद्भुतानि सन्ति तं त्वां इह पश्यतो मे अन्यत्र भूम्यादौ किमद्भुतं दृष्टं त्वां विना न तत्र किञ्चिदद्भुतं दृष्टम्। त्वमेवाद्भुतरूपो दृष्ट इत्यर्थः। सर्वाधारत्वं सूचयन् सम्बोधयति—ब्रह्मन्निति ॥ ५ ॥ गान्दिनीसुतः अक्रूरः इत्येवमुक्त्वा स्यन्दनं रथं चोदयामास। ततो दिनात्यये दिवसे किञ्चिदारूढे सति रामं कृष्णं च मथुरामनयत् ॥ ६ ॥ तत्र तत्र मार्गे ग्रामजना उपसङ्गता मिलिता वसुदेवसुतौ रामकृष्णौ दृष्ट्वा च प्रीताः सन्तो दृष्टिं नाददुः न प्रत्याजह्रुः। पश्यन्त एव स्थिता इत्यर्थः। 'राजदर्शने एतत् प्रसिद्धमेव' इत्याशयेन सम्बोधयति—राजन्निति ॥ ७ ॥ अक्रूरस्य स्नानादिक्रियया विलम्बो जातः, अतो यावद्रामकृष्णौ मथुरामनयत् तावत्ततः पूर्वमेव नन्दादयो गोपाः पुरोपवनमासाद्य आगत्य रामकृष्णागमनं प्रतीक्षमाणा अवतस्थिरे स्थिताः ॥ ८ ॥

अन्वितार्थप्रकाशिका

यत्रेति ॥ हे ब्रह्मन्! यत्र त्वयि सर्वाण्यद्भुतानि सन्ति तं त्वां पश्यतो मे इह भूम्यादौ किमद्भुतं दृष्टं त्वां विना न किंचिदद्भुतं दृष्टं त्वमेवाद्भुतरूपो दृष्टः। ब्रह्मेति पाठे ब्रह्मरूपं त्वाम् एतेन यान्यद्भुतानि पूर्वं दृष्टानि तानि त्वद्रूपे दृश्यमाने नाद्भुतत्वाय कल्पन्ते इति भावः ॥ ५ ॥ इतीति ॥ गान्दिनीसुतः अक्रूरः इत्येवमुक्त्वा स्यन्दनं रथं चोदयामास। ततो दिनात्यये दिनस्योत्तरभागे अथापराह्णे इति वक्ष्यमाणात् रामं कृष्णं चैव मथुरामनयत्। तत्रापराह्णस्त्रेधा विभक्तदिनान्त्यभागः। इत्थं च वक्ष्यमाणलीलानामवकाशलाभः अक्रूरतीर्थादतिनिकटपुरोपवनस्य दिनात्यये प्राप्तिरक्रूरस्याश्चर्यदर्शनादिना तत्रैव चिरं विलम्बात् ॥ ६ ॥ मार्गे इति ॥ हे राजन्! तत्र तत्र मार्गे ग्रामजना उपसङ्गता मिलिता वसुदेवसुतौ रामकृष्णौ वीक्ष्य च प्रीताः सन्तो दृष्टिं न आददुः न प्रत्याजह्रुः। पश्यन्त एव निष्पन्दाः स्थिताः। तङभाव आर्षः ॥ ७ ॥ तावदिति ॥ अक्रूरस्य स्नानादिक्रियया विलम्बो जातः नन्दादयश्च रथवर्त्म परित्यज्य ऋजुमार्गेणैवाग्रतो ययुः। अतो यावद्रामकृष्णौ अक्रूरः मथुरामनयत् तावत्ततः पूर्वमेव नन्दादये गोपाः पुरोपवनमासाद्य आगत्य रामकृष्णागमनं प्रतीक्षन्तः। शता आर्षः। अवतस्थिरे स्थिताः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भूम्यादिषु यानि अद्भुतानि सन्ति तानि सर्वाणि यत्र त्वय्येव सन्ति अनुपश्यतोऽनु पश्यता मे मया ॥ ५ ॥ गांदिनीश्वफल्कभार्या तस्याः अक्रूरः दिनात्ययेदिनस्यांतिममाये अथापराह्ण इति वक्षमाणानुरोधात् ॥ ६ ॥ दृष्टिं नाददुःप्रेक्षमाणा एव स्थिता इत्यर्थः ॥ ७ ॥ पुरोपवनं मथुरायाः समीपवाटिकां प्राप्य प्रतीक्षन्तो रामकृष्णागमनं प्रतीक्षमाणाः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दृष्टं वदेत्यत्राह। यत्रेति हे ब्रह्मन्, 'संबुद्धौ नपुंसकानां वा' इति विकल्पान्नलोपाभावः। यत्र यस्मिंस्त्वयि, सर्वाणि अद्भुतानि, सन्ति। तं त्वा त्वां इह, अनुपश्यतः मे, अन्यत्र भूमौ, वियति, जले वा, किं अद्भुतं दृष्टम्। त्वां विना न तत्र किंदिदद्भुतमित्यर्थः ॥ ५ ॥ इतीति। इतीत्थं उक्त्वा, गान्दिनीसुतः अक्रूरः, स्यन्दनं रथं, नोदयामास। रामं कृष्णं च, दिनात्यये एव, षट्घटिकावशेषात्मके सायाह्नकाले एव इत्यर्थः। यद्वा। दिनात्यये अपराह्णे। अथापराह्ण इति वक्ष्यमाणत्वात्। मथुरां अनयत् प्रापयामास ॥ ६ ॥ मार्गं इति। हे राजन्, तत्र तदा, तत्र मार्गे, ग्रामजनाः, मार्गागतग्रामेषु स्थिता जनाः, उपसंगताः सन्तः, वसुदेवसुतौ वसुदेवस्य पुत्रौ रामकृष्णौ वीक्ष्य, प्रीताः प्रसन्नतां प्राप्ताः सन्तश्च, दृष्टिं न आददुः प्रत्याजह्रुः पश्यन्त एव स्थिता इत्यर्थः ॥ ७ ॥ तावदिति। तावत् अक्रूरः रामकृष्णौ यावन्मथुरारामनयत्तावदेत्यर्थः। अग्रतः ततः पूर्वमेव, नन्दगोपादयः व्रजौकसौ गोपाः, पुरोपवनं आसाद्य प्राप्य, तत्र प्रतीक्षन्तः रामकृष्णागमनं प्रतीक्षमाणाः, अवतस्थिरे स्थिताः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मार्गे इति : १०.४१.७.

मार्गे प्रियानयनहारिणी संस्थिता ये दृष्ट्वा हरिं मदनसुन्दरमिन्दुवक्त्रम् ।
तेऽपि स्वदृष्टिमपहर्तुमलं न शेकुः के वा परे न सुदृशो वत तद्वशाः स्युः ॥ १२ ॥
मार्गगा अपि सन्नागा अपि ते हरिपञ्जुषः । अत्यद्भुतमिदं यद्वा युक्ता निर्वैरता तदा ॥ १३ ॥

कृष्णप्रिया

हे नाथ हे परब्रह्म ? भूमि में आकाश में जल में विद्यमान सर्व पदार्थ सर्व अद्भुत वस्तु के अधिष्ठान आप ही है सर्वाधार हे श्यामसुन्दर यदि आपका दर्शन आपकी कृपा से मैंने पाया तब दर्शनीय कोई पदार्थ अवशिष्ट रहा ही नहीं ॥ ५ ॥ श्री शुकाचार्य जी कहते हैं राजन् ? प्रभु के श्रीचरणों में निवेदन करते हुए श्री गान्दिनी जननी के सुपुत्र श्री अक्रूर जी ने रथ को मथुरा की ओर चलाया, पुनः सायंकाल होने के पूर्व अपराह्न काल में श्रीबलभद्र भैया एवं भगवान् श्रीकृष्ण को मथुरा पुरी की ओर लिवा आए ॥ ६ ॥ राजन् परीक्षित भगवान् श्रीकृष्ण एवं श्रीबलभद्रजी दोनों भैया मार्ग में मङ्गल पुरगान करते जिस गाँव के निकट पधारते थे उस नगर के नागरिकजन दोनों के समीप पहुँचकर दोनों भैया के अनुपम सुमङ्गल स्वरूप का दर्शन करते हुए एकटक नजरों से निहारते ही रह जाते थे, दोनों की कमनीय कान्ति एवं रमणीय वेष का दर्शन करते अघाते नहीं थे और दृष्टि को हटा नहीं सकते थे ॥ ७ ॥ राजन् ! प्रभु तो मार्ग में थे, श्रीनन्दराय एवं गोपगण-व्रजजन, ठाकुर जी के पधारने के पहले ही मथुरापुरी पहुँच गए थे । नाथ की अनुपस्थिति में नगरी में प्रवेश न करते उद्यान में ही ठहर कर भगवान् श्रीकृष्ण की और दाऊदयाल जी की प्रतीक्षा करने लगे ॥ ८ ॥

तान् समेत्याह भगवानक्रूरं जगदीश्वरः । गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ॥ ९ ॥
भवान् प्रविशतामग्रे सहयानः पुरीं [1]गृहम् । वयं त्विहावमुच्याथ [2]तावत् द्रक्ष्यामहे पुरीम् ॥ १० ॥

अक्रूर उवाच

नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां [3]प्रभो । त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सलः ॥ ११ ॥
आगच्छ याम गेहान् नः सनाथान् कुर्वधोक्षज । सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम[4] ॥ १२ ॥

कर्दमक्षमा

अन्वयः—जगदीश्वरः, भगवान्, तान्, समेत्य, प्रश्रितम्, अक्रूरम्, पाणिना, पाणिम्, गृहीत्वा, प्रहसन्, इव, आह ॥ ९ ॥ भवान्, सहयानः, अग्रे, पुरीम्, गृहम्, प्रविशताम्, अथ, वयम्, तु अवमुच्य, तावत्, पुरीम्, द्रक्ष्यामहे ॥१०॥ अक्रूर उवाच—प्रभो ? भवद्भ्याम्, रहितः, अहम्, मथुराम्, न, प्रवेक्ष्ये, हे नाथ ? हे भक्तवत्सल ? ते, भक्तम्, माम्, त्यक्तुम्, न, अर्हसि ॥ ११ ॥ हे, अधोक्षज ? हे सुहृत्तम ? (भवान्) अग्रजः, स गोपालैः, च, सुहृद्भिः, सह, नः, गेहान, आगच्छ, याम नः, सनाथान्, कुरु ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रश्रितं विनीतम् ॥ ९ ॥ स्वगृहं च प्रविशताम् । अवमुच्योत्तार्य विश्राम्येत्यर्थः ॥ १०–११ ॥ साग्रजः सह गोपालैरित्यर्थः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तान् नन्दादीन् । इवेन पितृव्येण हास्यानौचित्यमुक्तम् । यद्वा—तेषु कंसकृतदौर्जन्यमालक्ष्य हसन्निवेत्युक्तम् । जगदीश्वरोऽपि निजपाणिना तत्पाणिं गृहीत्वा, यतो भगवान् भक्तवात्सल्याद्यशेषगुणप्रकटनपर इत्यर्थः । प्रहसन्निवेति—तदानन्दनार्थमेव न तु वस्तुतः प्रहसन्मथुरादर्शनेन व्रजनगरत्यागस्मृत्यान्तर्विषादोदयात् ॥ ९ ॥ इहोपवने । इत्यर्थ इति—धातूनामानेकार्थत्वाभिप्रायेण विश्रामेऽपि मुचिः । यद्वा-अवोपसर्गवशादप्यर्थान्तरम् । त्वत्प्रवेशानन्तरमेव पुरीं द्रक्ष्यामहे । तातेति तत्संतोषार्थमादरोक्तिः । एवमवमोचनं पुरीदर्शनञ्च कार्यमस्माकमस्तीति विलम्बात्सहैव गमने न स्यादिति व्यञ्जितम् । तत्राऽसंकोचेन तद्दर्शनार्थम् ॥१०॥

---

१. व्रज–विज. । २. प्रातः–वीर. ; ततो–श्रीधर. वंशी. जीव. विज. विश्व. । ३. मथुरापुरीं–वीर. । ४. सुरोत्तम–वीर. ; सुहृत्तमः–विज. ।

सम्बुद्धित्रयेण स्वत्यागानौचित्यं द्योतयति । न हि प्रपन्नत्यागः प्रभ्वादीनामुचित इति भावः । परमार्त्या बहुधा संबोधयन्प्रार्थथते—प्रभो इत्यादिना । नाहमित्यादौ हेतुः'—हे प्रभो सर्वोपकारिप्रभवनशीलत्वेन सर्वाश्रयः । ननु तदाऽपि मदाज्ञया प्रविशत तत्राह—त्यक्तुमिति । तत्र हेतुः—हे नायेति । नाथयति याचयति ददाति सर्वभ्यः सर्वान्कामानिति हे तथाभूत । ननूदासीनस्त्यज्यत एव तत्राह—भक्तं ते तव । अनन्यगतिमित्यर्थः । ननु सत्यं कदापि न त्याज्य एव किन्तु स्वच्छन्देन पुरीविहाद्यर्थमिममल्पकालं स्वगृहं प्रस्थाप्यसे तत्राह—हे भक्तवत्सलेति । क्षणमपि भक्तत्यागो न युक्तस्तवेति भावः ॥ ११ ॥ नो गेहान् नोऽस्मान्वा । इत्यर्थ इति—"बहुलं छन्दसि" इति व्यवहितयोरपि ससहशब्दयोः पूर्वोत्तरभावेनान्वय इति तात्पर्यम् । अधोक्षजेतीन्द्रियज्ञानाऽविषयत्वेऽपि सुहृत्तमत्त्वात्तद्विषयो जात इति संबुद्धिद्वयाभिप्रायः 'गृहं गेहं च पुंभूम्नि' इति त्रिकाण्डकोशात् । तर्हि किं कार्यं तत्राह—आगच्छेति । नन्वस्मदागमनविज्ञापनाय त्वं कंसं यास्यसि इत्याशंक्य तदैश्वर्यानुभवेन कंसान्निर्भयतया नेत्याह—याम इति । अहं यूयञ्च सर्व एव प्रथमतो गृहाण्येव गमिष्यामः । तथापि संमतिमालक्ष्य सदैन्यं प्रार्थयते—नोऽस्मान्सनाथान्कुरु । बहुत्वं निजबन्धुवर्गापेक्षया । हे अधोक्षज इन्द्रियज्ञानागोचर इत्येवंभूतस्य तव साक्षाद्गमनेनैव सनाथत्वं सिद्ध्यतीति भावः । यद्वा—नोऽस्मत्संबंधिनो गेहान्याम तानेव सनाथान्कुरु दासस्य तेषु स्वामित्वाभावात् । त्वद्गमनेनैव सनाथत्वसिद्धेरिति भावः । अत एव नैकाकी चागच्छेरित्याह—सहेति । तैर्व्याख्यातम् । तत्र छान्दसत्वाद्विपर्ययेण पाठ इति भावः । यद्वा—सुहृद्भिः पित्रादिभिः । तैश्च कीदृशैः—सगोपालैः शाकटबलीवर्दरक्षकैरपि सह । साकल्येऽव्ययीभावः । "तृतीयासप्तम्योर्बहुलम्" इत्यादेशविकल्पः । ननु सद्य एव कथं घटतां तत्राह—सुहृन्निरुपाधिकृपाकरः साधुः, सुहृत्तरस्त्वद्भक्तः साधुः, सुहृत्तमस्त्वं भगवानिति तथाभूतत्वन्माहात्म्येन घटते न तु मद्योग्यतयेत्यर्थः । विश्वनाथोऽपि—याम इति-एते त्वमहञ्चास्माकं गेहान्याम इति कंसमावेदयितुं प्रथमं तत्समीपमहं न यास्यामि श्वो मरिष्यन्स तु किं कर्तुं शक्नुयात् नाहं तस्मात्किञ्चिदपि बिभेमि त्वदैश्वर्यस्य दृष्टत्वादिति भावः । न च मद्गृहे कस्यापि वस्तुनः संकोचस्तस्मात्सर्वेऽपि यूयमागच्छतेत्याह—सहाग्रज इति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जगदीश्वरोऽपि निजपाणिना तत्पाणिं गृहीत्वा यतो भगवान् भक्तवात्सल्याद्यशेषगुणप्रकटनपर इत्यर्थः । प्रहसन्निवेत्य पञ्चनां सूचयितुमिति भावः ॥ ९ ॥ अथ त्वत् प्रवेशानन्तरमेव पुरीं द्रक्ष्यामः हे तातेति तत् सन्तोषार्थमादरोक्तिः एवमेव मोचनं पुरीदर्शनञ्च कार्यमस्माकमस्तीति विलम्बात् सहैव गमनं न सम्भवेदिति व्यञ्जितं तच्चासङ्कोचेन तद्दर्शनार्थम् ॥ १० ॥ परमार्त्या बहुधा सम्बोधयन् प्रार्थयते । प्रभो इत्यादिना । तत्र नाहमित्यादौ हेतुः हे प्रभो ! सर्वोपरि प्रभवनशीलत्वेन सर्वाश्रय ! ननु तथापि मदाज्ञया प्रविशत तत्राह । त्यक्तुमिति । तत्र हेतुः नाथ इति नाथयति याचयति ददाति सर्वेभ्यः सर्वान् कामानिति हे तथाभूत ! ननूदासीनस्त्यज्यत एवेति चेत्तत्राह । ते तव भक्तम् अनन्यगतिमित्यर्थः । ननु सत्यं कदापि न त्याज्य एव किन्तु स्वच्छन्देन पुरीविहाराद्यर्थमिममल्पकालं स्वगृहं प्रस्थाप्यसे तत्राह । हे भक्तवत्सल ! इति क्षणमपि भक्तत्यागो न तव युक्त इति भावः ॥ ११ ॥ तर्हि किं कार्यं तत्राह । आगच्छेति । नन्वस्मदागमनविज्ञापनाय त्वं कंसं यास्यसि इत्याशङ्क्य त्वदैश्वर्यानुभवेन कंसान्निर्भयतया नेत्याह । याम इति । अहं यूयञ्च सर्व एव प्रथमतो गृहाण्येव गमिष्यामः तथापि सम्मतिमालक्ष्य सदैन्यं प्रार्थयते नोऽस्मान् सनाथान् कुरु बहुत्वं निजबन्धुवर्गापेक्षया हे अधोक्षज ! इन्द्रियज्ञानागोचर इत्येवम्भूतस्य तव साक्षाद्गमनेनैव सनाथत्वं सिद्ध्यतीति भावः । यद्वा नोऽस्मत्सम्बन्धिनो गेहान् यामः तानेव सनाथान् कुरु दास्यस्य ते तु स्वामित्वाभावात् त्वद्गमनेनैव सनाथत्वसिद्धेरिति भावः । अत एव नैकाकी चागच्छेरित्याह । सहेति । तैर्व्याख्यातं तत्र छान्दसत्वाद्विपर्ययेण पाठ इति भावः । यद्वा सुहृद्भिः पित्रादिभिः तैश्च कीदृशैः सगोपालैः शाकटबलीवर्दरक्षकैरपि सह साकल्येऽव्ययीभावः । "तृतीयासप्तम्योर्बहुल" मित्यमादेशविकल्पः । ननु सद्य एव कथं घटतां तत्राह । सुहृत् निरुपाधिकृपाकरः साधुः सुहृत्तमस्तद्भक्तः साधुः सुहृत्तमस्त्वं भगवानिति तथाभूतत्वन्माहात्म्येन घटते नतु मद्योग्यतयेत्यर्थः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तान् श्रीनन्दादीन् समेत्य तैः सह संगत्येति निजक्रीडासुखार्थं प्रियतमजन-प्राप्त्यान्यत्यागो युक्त एवेति भावः । जगदीश्वरोऽपि निजपाणिना तत्पाणिं गृहीत्वा, यतो भगवान् भक्तवात्सल्याद्यशेषगुणप्रकटनपर इत्यर्थः । प्रहसन्निवेति स्वभावतः श्रीमुखप्रसत्तिर्द्योत्यते; इत्यवञ्चना सूचिता । यद्वा, इवेति तत्त्वतः प्रकृष्टहासाभावं बोधयति, श्रीगोप्यादिविरहेणान्तस्तापात् ॥ ९ ॥ इह पुरोपवने, यावत् पुरीं प्रविशसि तावदिति, अवमोचनं पुरीदर्शनं चास्माकं कृत्यमस्तीति विलम्बः सूचितः अतः सहगमनं न सम्भवेदिति भावः; यद्वा, तावदिति वाक्यालंकारमात्रे । अथ त्वत्प्रवेशानन्तरमिति तेन सह पूर्यन्तर्गमनतद्दर्शनादिकं निरस्तम्, स्वेच्छयाऽसंकोचेन तद्दर्शनार्थम् ॥ १० ॥ मधुरां श्लेषेण विचित्रमाधुर्य-मनोहरामपीत्यर्थः । परमार्त्यार्बहुधा सम्बोधयन् प्रार्थयते—प्रभो इत्यादिना । प्रभो हे ईश्वर ! नाथ हे स्वामिन् ! अथवा न प्रवेक्ष्यामीत्यत्र हेतुः - प्रभो इति । स्वामिनं विनादौ दासस्य स्वगृहप्रवेशेऽनौचित्यादिति भावः । ननु मदाज्ञया न दोषः, तत्राह—त्यक्तुमिति । हे नाथेति, यतः स्वामिनो दासत्यागो

नैव युक्त इति भावः। ननु, उदासीनस्त्यज्यत एवेति चेत्तर्हि ते तव भक्तमनन्यगतिमित्यर्थः। ननु सत्यम्, कदापि न त्याज्य एव किन्तु स्वच्छन्देन पुरीविहारार्थमिममल्पकालं स्वगृहं प्रस्थाप्यसे? तत्राह—हे भक्तवत्सलेति; क्षणमपि भक्तत्यागो न तव युक्त इति भावः॥ ११॥ तर्हि किं कार्य्यम्? तदाह—आगच्छेति। नन्वस्मदागमनविज्ञापनाय त्वं कंसं यास्यसि, नेत्याह—यामेति। अहं यूयञ्च सर्व्व एव गमिष्यामः; यद्वा, आशिषि पञ्चमी; तथापि सम्मतिमनालक्ष्य सदैन्यं प्रार्थयते—नोऽस्मान् सनाथान् कुरु, बहुत्वं तस्य गृहगमनेनात्मनो बहुमानात्, किंवा निजबन्धुवर्गापेक्षया। हे अधोक्षज! इन्द्रियज्ञानागोचरेति, एवम्भूतस्य तव साक्षाद्गमनेनैव सनाथत्वं सिध्यतीति भावः। यद्वा, नोऽस्मत्सम्बन्धितो गेहान् याम, तानेव सनाथान् कुरु, दासस्य तेषु स्वामित्वाभावात्त्वद्गमनेनैव सनाथत्वसिद्धिरिति भावः। ननु तर्हि त्वया सहाहमेकाकी यायाम्, नेत्याह—सहेति' सुहृद्भिरन्यैश्चात्रत्यैर्य्यादवादिभिः सह। यद्वा, गोपालानां साहित्ये हेतुतया तेषामेव विशेषणम्; सुहृद्भिस्तव मम च बन्धुभिरिति हे सुहृत्तमेति बन्धुवर्गश्रेष्ठस्य बन्धुसम्माननं योग्यमेवेति भावः। अथवा ननु सद्य एवेदृशं कथं घटताम्? तत्राह—सुहृत् निरुपाधिकृपाकरः, साधुः सुहृत्तरः, भगवान् त्वञ्च भगवद्भासारप्रकटनात् सुहृत्तम इति तत्सम्बोधनं त्वन्माहात्म्येन घटते, न तु मद्योग्यतयेत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, स पुर्य्यागमादिना मयि महानुग्रहविस्तारकस्त्वं गोपालैश्च सह। अन्यत् समानम्॥ १२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तान्नन्दादीन् समेत्य जगदीश्वरो भगवान् स्वपाणिना विनीतमक्रूरं पाणिं गृहीत्वा प्रहसन् वक्ष्यमाणमुवाच इवशब्देन हास्ये ईषत्त्वं द्योत्यते॥ ९॥ उक्तमेवाह। भवानिति। भवान् सहयानः सरथः पुरीं तत्र स्वगृहमग्रे विशतां वयं त्विहोपवने अवमुच्य उत्तार्य्य विश्राम्येत्यर्थः। अथ प्रातः वो युष्माकं पुरीं मथुरां द्रक्ष्यामः॥ १०॥ एवमुक्तः प्राहाक्रूरः। नाहमिति षड्भिः। हे विभो! भवद्भ्यां रहितो वियुक्तोऽहं पुरीं न प्रवेक्ष्ये। हे नाथ! भक्तं मां त्युक्तुं नार्हसि तत्र हेतुं वदन् सम्बोधयति हे भक्तवत्सलेति॥ ११॥ त्यक्ष्य इति ग्राम्यजन एवाग्निकुण्डं तत्कथं वेक्ष्ये प्रवेक्ष्ये दुरन्तं दुर्वचं ग्राम्यवचः ग्राम्यस्येव वचो रामकृष्णावानीतावित्येवं विध वाक्यं कथं वक्ष्ये कंसं प्रति इति शेषः। हे जगत्पते! कथंभिन्नतया द्रक्ष्ये त्वच्छरीरभूतत्वेन त्वदपृथक्सिद्धान् कंसादीन् त्वत्तः पृथक्सिद्धतया शत्रुभावेन कथं द्रक्ष्ये इत्यर्थः। क्वचिदयं श्लोको न दृश्यते अतो हे अधोक्षज! त्वमागच्छ यामः त्वयैव सहवयं गमिष्यामः नोऽस्मान् सनाथान् सेश्वरान् कुरु अग्रजः सरामः गोपालैश्च सुहृद्भिश्च सह हे सुरोत्तम॥ १२॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भवानग्रे प्रविशतां पश्चात्त्वं गृहं व्रज अवमुच्य स्कन्धावरोहं कृत्वा॥ १०–१३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सुहृद्भिः पित्रादिभिः सगोपालैः सकटवलीवर्दरक्षकैरपि सहेति शेषः॥ १२–३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रश्रितं विनीतं प्रहसन्निवेति तदानन्दनार्थमेव नतु वस्तुतः प्रहसन् मथुरानगरदर्शनेन व्रजनगरत्यागस्मृत्यान्तर्विषादोदयात्॥ ९॥ गृहं स्ववासं च अवमुच्य विश्राम्य॥ १०–११॥ याम एते त्वञ्चाहं चास्माकं गेहान् याम इति कंसमावेदयितुं तत्समीपं प्रथमं न यास्यामि श्वो मरिष्यन् समे किङ्कुं शक्नुयात् नाहं तस्मात् किञ्चिदपि बिभेमि त्वदैश्वर्यस्य दृष्टत्वादिति भावः। नच मद्गृहे कस्यापि वस्तुनः सङ्कोचस्तस्मात्सर्वेऽपि यूयं गच्छतेत्याह। सहाग्रज इति॥ १२॥

गूढार्थदीपिनी

तान् नन्दादीन्। प्रश्रितं विनीतम् अक्रूरमाह॥ ९॥ पुरीं ततः स्वगृहं च। वयं तु अवमुच्य वस्तूनि उत्तार्य विश्रम्य च। ततोऽथ त्वत्प्रवेशान्तरम्॥ १०–११॥ स अग्रज इत्यत्र सह गोपालैरित्यत्र चान्वेति 'बहुलं छन्दसि' इति नियमात् व्यवहितयोरपि स सहशब्दयोः पूर्वोत्तरयोगेनान्वयः कार्यः। तथा च स, अग्रजस्त्वं गोपालैः सह आगच्छ। सर्वे वयं सहैव याम गमिष्यामः। एवं गमनेन नोऽस्मान् गेहांश्च सनाथान् कुरु इत्यन्वयः। यद्वा। सगोपालैरित्यत्र साकल्येऽव्ययीभावः। 'तृतीयासप्तम्योर्बहुलम्' इत्यादेशविकल्प इति वंशीधरी। सुहृद्भिः पित्रादिभिः॥ १२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तान् नन्दादीन् समेत्य प्रश्रितं विनीतमक्रूरमाह॥ ९॥ सहयानः सहरथः पुरीं तत्र स्वगृहमग्रे प्रविशताम् वयन्तु इह उपवने अवमुच्य उत्तार्य्य विश्राम्येत्यर्थः। हे तात! ततः पुरीं द्रक्ष्यामः॥ १९–१२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तान्नन्दादीन्समेत्य भगवाञ्जगदीश्वरः पाणिना पाणिं गृहीत्वा प्रश्रितमक्रूरं प्रति प्रहसन्निवाह ।। ९ ।। भवानग्रे पुरीं प्रविशताम् । यानं स्थापयित्वा किमित्यत आह ।। सहयानो व्रज गच्छेति । पुरी प्रविशतामस्मदादीनामग्र इति वा वयं हि त्ववमुच्य शकटतो वृषभान्विमोच्य तावदस्तमयपर्यन्तं पुरीं द्रक्ष्यामहे ।। १० ।। पुरीं पुरा विशेतीशेनोक्तोऽक्रूरः प्रतिवक्ति ।। नेति भवद्भ्यां रहितो वर्जितो मथुरां न प्रवेक्ष्ये हें भक्तवत्सल नाथ ते भक्तं मां त्यक्तुं नार्हसि ।। ११ ।। हे अधोक्षज नो गेहानवान्तरागाराणि येषां सन्ति ते गेहा निलयास्तान्यामागच्छ । अस्मान्वा गेहानेव वा सनाथान्नाथोपेवान्कुरु । गेहेऽन्नं रात्रिभोक्तव्यमन्नं यस्य सः सन्सनाथानस्मान्कुर्विति वा । न केवलमेकल एवेति वदति । गोपालैः सह साग्रज इतरैः सुहृद्भिश्च सहेति ।। १२ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततोऽक्रूरविसर्ज्जनमाह । तान् समेत्येति । अक्रूरे स्थिते लोकव्यवहारे पितृव्य इति स्वच्छन्दलीना नोचितेति व्यवहारेऽपि निर्बन्धेन नागत इति ख्यापयितुं तान्नन्दादीन् समेत्य अक्रूरं प्रत्याह । भगवानिति । निःशङ्कःबहिः स्थिते कंसः कदाचिदुपद्रवं कुर्यादिति शङ्काया अभावायाह । जगदीश्वर इति । स एव हि जगतो नियन्ता स्वामी ऐश्वर्यं गुप्तं कृत्वा सख्यबन्धुत्वादिप्रकटनार्थं पाणिना पाणिं गृहीत्वा तेन नम्रं प्रहसन् व्यामोहयन् पूर्वावस्थां तस्य सम्पादयन् वक्ष्यमाणमब्रवीत् ।। ९ ।। भगवद्वाक्ये चित्तदाढ्यार्थं पृथङ्निरूपणं वचनमेवाह । भवानिति । असम्बन्धख्यापनार्थं भवानिति अस्मत्प्रवेशात्पूर्वमेव अन्यथा तव कार्यं कृतमपि उपद्रवादकृतं मन्येत कंसः ततो गृहेऽपि त्वया गन्तव्यम् अन्यथा कंसः अस्मन्निषेधार्थं प्रेरयेत् तच्चानुचितं यथा तवापराधो न भवति तदर्थं वयमिहैव प्रतिमुच्य शिविरं कृत्वा अथ भिन्नप्रक्रमेण यावत्कंसः आकारयिष्यति तावत्पुरीं द्रक्ष्यामः अनेन पुरी सम्यक् स्थापिता न वेति ।। १० ।। भगवान् मध्ये उदासीनमिवोक्तवानिति तदसहमानः किञ्चित्प्रार्थयति । नाहमिति षड्भिः सर्वे हि भगवद्गुणास्तेन वर्णनीया इति स ह्येवं ज्ञातवान् यथा कंसादयस्तथायमिति ज्ञात्वा भगवान्मां दूरीकरोतीति एवं सति भगवान् स्वछन्दलीलां करोतु नाम मयाप्यत्रैव स्थातव्यं कचिन्नतु भगवद्रहितं पुरं गृहं वा प्रवेष्टव्यम् अत एव वैराग्यविधिः भगवदभावे गृहादिकं त्यक्तव्यमिति अतो भवद्भ्यां रहितः शब्दब्रह्मपरब्रह्मभ्यां मधुदैत्ययुक्तां तत्सम्बन्धि मथुरां न प्रवेक्ष्ये "नैतमृषि विदित्वा नगरं प्रविशेद्यदि प्राविशेन्मिथो चरित्वा प्रविशे" दिति श्रुतेः शङ्का तु तव नास्तीत्याह । प्रभो ! इति । अतः परमनागमने मत्त्यागो हेतुः तन्न कर्तव्यमिति प्रार्थयति । त्युक्तुं नार्हसीति । नाथे त्यक्ते न कापि पाल्यानां गतिर्भवतीति तत्रापि भक्तं तत्रापि ते अतवतारलीला विशेषभक्तं कार्यार्थं त्याग इति चेत्तत्राह । भक्तवत्सलेति । भक्तवात्सल्यं तिष्ठतीति न कदाचिदपि भक्तास्त्यक्तव्याः ।। ११ ।। नगरे स्थानं नास्तीति चेत्तत्राह । आगच्छेति । सर्वैः सहागच्छामः गृहं तुल्यमिति ख्यापयितुं याम इति सर्वेषां गमनं तुल्यं निरूपितं नो गेहानिति बह्वयो वयं भ्रातरः एकैकस्य गृहा अपि बहवः अतो न स्थलसंकोचः । ननु विशेषाभावादत्रैव स्थातव्यमिति चेत्तत्राह । सनाथान्कुर्विति । यो हि प्रभुर्भवति स स्वगृहे तिष्ठति न त्वन्यगृह यद्यस्मद्गृहे त्वया न स्थितं स्यात् तदा अस्मन्नाथो न भवेः । तदा वयमनाथाः अतः सनाथान् कुरु अस्मत्संबन्धेन तवापराधो भविष्यतीति चेत् तत्राह । अधोक्षजेति । ज्ञानविषय एव त्वं न भवसि कुतस्तरां क्रियाविषयो भविष्यसीति अनेन भगवतो ज्ञानशक्तिर्निरूपिता "यस्या मतं तस्य मत" मिति तर्ह्येकाकी समागमिष्यामीत्याशङ्कायामाह । सहाग्रज इति । तवाप्यग्रजस्य सुतरामेव न भयं मान्यश्च गोरक्षणधर्मात् अचातुर्यत्वाच्च गोपालानां भयशङ्कैव नास्ति त्वयि सति केषामपि न भयमिति वक्तुं सुहृद्भिः सहेति गोपाला एव सुहृदः नन्दादयो वा बान्धवाः चकारात् सर्वे सेवकाः अनांसि वृषभादयश्च । ननु कथमेतावद्भिः सह गन्तव्यमिति चेत्तत्राह । सुहृद्भिश्च सुहृत्तमेति । स्वामी भवानत्यन्तं सुहृत् भवत्सम्बन्धिनः सुहृत्तराः अन्ये सेवकादयः सुहृदः अतः सर्वैरेवागन्तव्यम् ।। १२ ।।

श्रीसुबोधिनी–सार

तान्समेत्य जगदीश्वरो भगवानक्रूरमाह पाणिना करेण पाणि गृहीत्वा प्रश्रितं विनीतम् अक्रूरविशेषणं क्रियाविशेषणं वा प्रहसन्निव ।। ९ ।। सह यानः सरथो भवानग्र पुरीं मथुरां गृहं वा भवान्प्रविशतां वयं तु इहारामेऽवमुच्यावतीर्य ततोऽनन्तरं पुरीं द्रक्ष्यामः ।। १० ।। अक्रूरोक्तिः । हें प्रभो भवद्भ्यां रहित एकाकी अहं मथुरां न प्रवेक्ष्यामि हे नाथ हें भक्तवत्सल ते तव भक्त मां त्यक्तुं त्वं नार्हसि ।। ११ ।। आगच्छ त्वं गेहान् वयं याम व्रजाम सनाथान् नोऽस्मान् त्वं कुरु हें अधोक्षज ! सहाग्रजः सरामः सगोपालैः सुहृद्भिः सह सुहृत्तमः ।। १२ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तान् नन्दादीन् समेत्य भगवान् कृष्णः स्वपाणिनाक्रूरपाणिं गृहीत्वा प्रहसन् प्रश्रितं विनितमक्रूरमाह—इवशब्दो हास्ये ईषत्त्वद्योतनार्थः । आज्ञापने स्वातन्त्र्यं द्योतयन्नाह । जगदीश्वर इति ।। ९ ।। उक्तमेवाह—भवानिति । अग्रे मत्प्रवेशात्पूर्वमेव कंसं प्रत्यस्मदानयनविज्ञापनार्थं सहयानो रथसहितो भवान् पुरीं प्रविशताम्, मत्प्रवेशे पुर्यामुपद्रवस्यावश्यंभावित्वादित्याशयः।

'अत एव कंसनिकटेऽपि त्वया न स्थेयम्' इत्याशयेनाह—गृहं प्रविशतामिति। वयं त्विहोपवने अवमुच्य वस्तून्युत्तार्य विश्रम्य ततोऽथ तदनन्तरं पुरीं द्रक्ष्यामः ॥ १० ॥ एवमुक्तः अक्रूर आह—नेति। 'कंसभयं तु तव नास्त्येव' इत्याशयेन सम्बोधयति—प्रभो इति। हे प्रभो! भवद्भ्यां रामकृष्णाभ्यां रहितो वियुक्तोऽहं मथुरां पुरीं न प्रवेक्ष्ये। हे नाथ स्वामिन्! मां त्यक्तुं नार्हसि। तत्र हेतुमाह—भक्तमिति। 'भक्तवत्सलस्य तव भक्तत्यागो न युक्त' इत्याशयेन सम्बोधयति—भक्तवत्सलेति ॥ ११ ॥ 'त्वत्कृपां विना त्वत्प्राप्तिर्दुर्लभा, अतीन्द्रियत्वात्, अतोऽहं त्वां त्यक्तुं नोत्सहे' इत्याशयेन सम्बोधयति-अधोक्षजेति। परमोपकारित्वाच्चेति तत्रैव हेत्वन्तरं सूचयन् सम्बोधयति—सुहृत्तमेति। सहाग्रजः सुहृद्भिर्गोपालैश्च सह आगच्छ, यामः सर्वे वयं सहैव गमिष्यामः। गमनेन नोऽस्मान् गेहांश्च सनाथान् कुरु स्वकीयत्वेनाङ्गीकुर्वित्यर्थः बहुवचनेन तत्र सर्वेषामवकाशोस्तीति सूचितम् ॥ १२ ।

अन्वितार्थप्रकाशिका

तानिति ॥ तान्नन्दादीन् समेत्य जगदीश्वरो भगवान् कृष्णः स्वपाणिनाऽक्रूरपाणिं गृहीत्वा प्रहसन् प्रश्रितं विनीतमक्रूरमाह स्म। इव शब्दो हास्ये ईषत्त्वार्थः ॥ ९ ॥ भवानिति अग्रे ॥ मत्प्रवेशात्पूर्वमेव कंसं प्रत्यस्मदानयनविज्ञापनार्थं सहयानो रथसहितो भवान् पुरीं प्रविशतां ततो गृहं च प्रविशताम्। तङार्षः। वयं तु इह उपवने अवमुच्य वस्तून्युत्तार्य विश्रम्य ततोऽथ तदनन्तरं पुरीं द्रक्ष्यामहें। तङार्षः ॥ १० ॥ नाहमिति ॥ हे प्रभो! हे नाथ! हे भक्तवत्सल! अहं भवद्भ्यां रहितः मथुरां न प्रवेक्ष्ये! तङार्षः अतः ते भक्तं मां त्यक्तुं नार्हसि ॥ ११ ॥ आगच्छेति ॥ हे अधोक्षज! हे सुहृत्तम! साग्रजः सुहृद्भिर्गोपालश्च सह आगच्छ याम सर्वे वयं सहैव गमिष्यामः। गमनेन नोऽस्मान् गेहांश्च सनाथान् कुरु स्वकीयत्वेनाङ्गीकुरु। कसमावेदयितुं प्रथमं तत्समीपगमनमपि नावश्यकम्। श्वो मरिष्यन्स मे किं करिष्यतीति ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रश्रितं सविनयं ॥ ९ ॥ अग्रेप्रथमं भवान् पुरीप्रविशतां अवमुच्य विश्रम्येत्यर्थः ॥ १०-११ ॥ अग्यजेन सहितो गोपालैश्च सहितस्त्वमागच्छ नोऽस्माकं गेहान् प्रतिवयं सर्वे याम गच्छामः सलोप आर्ष ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तानिति। तान्नन्दादीन् समेत्य, जगदीश्वरः भगवान् श्रीकृष्णः, प्रश्रितं विनीतं, अक्रूरं पाणिना स्वहस्तेन, पाणिं गृहीत्वा, प्रहसन् इव, आह वक्ष्यमाणमुवाच। इवशब्देन हास्ये ईषत्त्वं द्योत्यते ॥ ९ ॥ उक्तमेवाह। भवानिति। हे तात, भवान् सहयानः रथसहितः, पुरीं तत्रापि, गृहं स्वगेहं, अग्रे प्रविशताम्। वयं तु इहोपवने, अवमुच्य उत्तार्य विश्राम्येत्यर्थः। अथ पुरीं, द्रक्ष्यामहे मथुरां द्रक्ष्यामः ॥ १० ॥ एवं भगवतोक्तोऽक्रूरः प्राह नाहमिति षड्भिः। नाहमिति। हे प्रभो, अहं भवद्भ्यां रहितो वियुक्तः, मथुरां न प्रवेक्ष्ये। हे नाथ, हे भक्तवत्सल, ते तव भक्तं मां त्यक्तुं, न अर्हसि ॥ ११ ॥ आगच्छेति। अतः हे अधोऽक्षज, हे सुहृद्भिः गोपालैश्च सह, आगच्छ। याम भवदादिभिः सर्वैः सह गमिष्यामः। नोऽस्माकं, गेहान् सनाथान्, कुरु ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तान् समेत्येति : १०.४१.९.

यः सतामपरित्यागस्तद्देवाऽऽत्मव्रतं हरिः। दर्शयन् पाणिना पाणिग्रहाद्दिव्यमहो व्यधात् ॥ १४ ॥
नृशंसकंसमतभागसाविति रुषैष माम्। त्यजतीति भ्रमोच्छेदायैवोवाच हसन्निव ॥ १५ ॥

भगान् प्रविशतामिति : १०.४१.१०.

साक्रूरवृत्तिरहमत्र विशामि चेत्तन्न स्याद्धतिः खलमतेरिति चिन्तयानः।
क्रूरत्वमल्पसमयं परतो व्यगृह्णात् तत्प्रेषणेन किमु भक्तदयालुरीशः ॥ १६ ॥
अस्मदानयनकार्यकारिणोऽक्रूरसंनियतमेव भूपतेः। दर्शनं कृतनिवेदनं च ते तत्र नास्मदुपयोग इत्यलम् ॥ १७ ॥
अत्र स्थितेऽस्मिन् भृशमेष कंसो मन्येत सर्वं मम कृत्यजातम्।
एतत्प्रयोज्यं तदनीतियुक्तमित्यब्रवीत्तं पुरतो व्रजेति ॥ १८ ॥
अक्रूरवृत्तिरहमस्मि निसर्गतोऽस्मिन् कंसोऽप्यसौ यदि भवेत्तदितः शिवं स्यात्।
नाद्यापि किञ्चिदपयातमितीड्यनीतिस्तत्प्रेषणात् स्फुटमबोधि सुसामपूर्वा ॥ १९ ॥

नाहमिति : १०.४१.११.

सामान्योऽपि न सामान्यविरहं सहते पुमान्। सोऽक्रूरः श्रीशविरहासहिष्णुर्युक्तमेव तत् ॥ २० ॥

कृष्णप्रिया

जगन्नाथ श्रीमथुराधीश प्रभु, प्रतीक्षा करते हुए पितृचरणों को एवं व्रजजनों को मिलाकर भक्तवर पितृकल्प श्रीअक्रूर जी का कर कमल को अपने करसरोज में लेकर स्नेहार्द्र नम्र भाव से स्मित हास्य करते हुए कहने लगे ।। ९ । भगवान् श्रीकृष्ण ने कहा तातपाद ! आप रथलेकर प्रथम श्रीमथुरा नगर प्रवेश करें और अपने भवन में निवास करें । हम सब स्वल्प समय के लिए उद्यान में विश्राम लेकर पुनः मथुरापुरी की शोभा का अवलोकन करेंगे ।। १० ।। श्री अक्रूरजी ने कहा हे प्रभो ! हे कृपा-सिन्धो ! हे भक्तवत्सल ! मैं आपका अकिंचन किंकर हूँ आपको यहाँ छोड़कर अकेला नगर में जाना नहीं चाहता, दीनबन्धो मैं आपके साथ नगर में प्रवेश करने की अभिलाषा रखता हूँ । मुझे यहाँ छोड़ नहीं दीजिए ।। ११ ।। हे अधोक्षज ! हे अन्तरङ्ग हे प्रभो ! हे सुहृद शिरोमणि ! श्री ज्येष्ठबन्धु दाउजी, गोपवृन्द, सुहृद्वृन्द एवं पितृचरण श्री नन्दबाबा जी के साथ इस दास को कुटीर में पधार कर हम सबको सनाथ करें ।। १२ ।।

पुनीहि पादरजसा गृहान् नो गृहमेधिनाम् । यच्छौचेनानुतृप्यन्ति पितरः साग्नयः सुराः ।। १३ ।।
अवनिज्याङ्घ्रियुगलमासीच्छ्लोक्यो[1] बलिर्महान्[2] । ऐश्वर्यमतुलं लेभे गतिं चैकान्तिनां तु या ।। १४ ।।
आपस्तेऽङ्घ्र्यवने[3] निज्यस्त्रीँल्लोकाञ्छुचयोऽपुनन् । शिरसाधत्त याः शर्वः स्वर्याताः सगरात्मजाः ।। १५ ।।
देवदेव जगन्नाथ पुण्यश्रवणकीर्तन । यदूत्तमोत्तमश्लोक नारायण नमोऽस्तु ते ।। १६ ।।

कर्दमक्षमा

अन्वयः—(हे नाथ !) गृहमेधिनाम्, नः, गृहान्, पादरजसा, पुनीहि, यत्, शौचेन, पितरः, साग्नयः, सुराः, अनुतृप्यन्ति ।। १३ ।। बलिः, अङ्घ्रियुगलम्, प्रक्षाल्य, महान्, श्लोक्यः, आसीत्, (सः) एकयान्तिनाम्, या, (गतिः) ताम् गतिम्, च, अतुलम्, ऐश्वर्यम्, लेभे ।। १४ ।। ते, (त्रिविक्रमस्य) अङ्घ्री, अवनेज्य, आपः, त्रीन्, लोकान्, अपुनन्, शुचयः, अगृह्णन्, शर्वः, याः, शिरसा, आधत्त, सगरात्मजाः, (यद्धृत्वा) स्वर्याताः ।। १५ ।। हे देवदेव ? हे जगन्नाथ ? हे पुण्यश्रवण-कीर्तन ? हे यदुत्तमोत्तमश्लोक ? हे नारायण ? ते, नमः, अस्तु ।। १६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

यच्छौचेन यस्य पादरजसः क्षालनोदकेन गृहांगणस्थितेन देवाः पितरश्च तुष्टा भवन्ति ।। १३ ।। श्लोक्यः पुण्यकीर्त्यर्हः। एकान्तभक्तानां या गतिस्तां गतिं च लेभे ।। १४ ।। अपुनन्पवित्रितवत्यः । याभिरद्भिः स्वः स्वर्गं प्राप्ताः ।। १५ ।। प्रार्थयमानो नमस्करोति । देवदेवेति । अतः परमन्यच्छ्रेयो नास्तीति मत्वा बहुधा संबोधयति ।। १६ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गृहमेधिनां पञ्चसूनाजातहिंसावताम् । पितरो दिव्या अग्निष्वात्तादयो वंशप्रवर्तका वा । अग्नयो गार्हपत्यादयः । सुरा इन्द्रादयः ।। ननु पित्रग्निसुरादीनां पूजादिना सदा त्वद्गृहाणां सनाथता भात्येव तत्राह—पुनीहि । गृहमेधिनां नित्यं गृहेषु पञ्चसूनातत्पराणाम् । अनुशब्देन सकृल्लब्धेनापि निरन्तरं तृप्यन्तीति ध्वन्यते । पितर इति—पित्रादीनामनुतृप्त्या गार्हस्थ्यकृत्य-समाप्त्या गृहस्थानां स्वत एव सुखं कृतार्थता च स्यादिति भावः ।। १३ ।। अवनिज्य प्रक्षाल्य । गतिः सालोक्यादिरूपा ।। न चेयं स्तुतिर्दृष्टफलत्वात् । यद्वा—ननु तर्हि रजस्तच्छौचजलं वा तत्र नीयतामित्याशङ्क्य श्रीबलिवत्तत्र साक्षात्प्रक्षालयितुमिच्छामीत्या-शयेनाह—अवनिज्येति । महाञ्छ्लोक्यः पुण्यकीर्तिमत्सु श्रेष्ठ इत्यर्थः, श्रीव्यासादिभिरपि प्रशस्तत्वात् । अतुलमिन्द्रादीनामपि दुर्लभत्वात् । गतिं प्राप्यं ताञ्च लेभे इहैव द्वारपालत्वेन साक्षाच्छ्रीभगवतः प्राप्तत्वात् ।। १४ ।। अंघ्र्योरवनेजनं शौचोऽस्ति यासां तास्तथा, चरणप्रक्षालनच्युताः । शर्वः शिवः ।। अहो आस्तां तावत्त्वदवनेजनजलानां माहात्म्यं परम्परयाऽपि तत्स्पृष्टानां माहात्म्यं परमाश्चर्यमित्याह—आप इति । शुचय इति-महापातकिपावनेनान्यतीर्थानामिवाशुचित्वं निरस्तम् । न केवलं त्रींल्लोकानेवापुनन्, लोकपालमुख्यं सर्ववंद्य श्रीशिवमपीत्याह—शिरसेति । तदुक्त प्रथमस्कन्धे—'सेश पुनाति' इति । बहिःश्मशानादिसंबन्ध तिरस्करा-तीत्यर्थः । इति तासां परमपुरुषार्थरूपत्वमुक्तम् । अहो साक्षात्तत्स्पर्शन पावनत्व किं वक्तव्यं, महापराधिनां चिरं स्वकृतपापेनैव दग्धानामपि दाहस्थानस्पर्शमात्रेणैव परमशोधनं ब्रह्मलोकप्रापणञ्चाह—स्वर्याता इति । स्वरिति—त्रिलोकीपक्षे ब्रह्मलोकपर्यन्तस्य स्वर्गत्वाद्ब्रह्मलोकमित्यर्थः । तत्तु नवमे व्यक्तम् । एवमादौ पावनत्वं, ततः परमवंद्यत्वं, ततश्च सुदुस्तरमहदपराधादपि निस्तारकत्वं, परमपदप्रापकत्वञ्च क्रमेणोक्तम् ।। १५ ।। अतः श्रीहरिकीर्तनात् । देवदेवेत्युक्तैरिन्द्रवारणायाह—जगद्भिर्नाथ्यते प्राथ्यंत इति जगन्नाथ दुष्टदमन । तादृशा राजानोऽपि सन्ति तद्वारणायाह—पुण्यं श्रवणं नाम येषां रुद्रादीनां ते पुण्यश्रवणास्तैः कीर्त्यंत इति

---

१. श्लाघ्यो-विज. । २. मंखे-विज. । ३. वनेजन्यः-श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

तथा। यदूत्तमेत्युक्त यादवांतरवारणायाह्—उत्तमश्लोकेति। तादृशा अनेके युधिष्ठिरादयः सन्ति तद्वारणायाह्—नारायणेति ॥ हे देवदेवेति। तत्र त्वद्गमनेन ध्रुवं महापुण्यं स्यादेवेति भावः। यद्वा—देवानां ब्रह्मादीनां पूज्येति। यद्यपि स्व एव सेवकास्त्वदनुग्राह्यास्तथापि जगन्नाथत्वेन मामप्यनुग्रहीतुमर्हसीति भावः। ननु पुण्यवत एवानुगृह्णामि तत्राह—पुण्येति। तव श्रवणादिनाहमपि पुण्यवानेव। यद्वा—यस्य श्रवणकीर्तनाभ्यामपि पुण्यं स्यात्तस्य दर्शनादिना ममापि महापुण्यं जातमेवेति भावः। किञ्च—यदूत्तमेति—यदुकुलावतीर्णेन तच्छ्रेष्ठेन त्वया तत्कुलजातोऽहमनुग्रहीतुं योग्य एवेति भावः। ननु तथापि कंससंगी त्वं श्रीगोकुले जातापराधश्च कथमनुग्राह्य इत्याशंक्याह—उत्तमश्लोकेति। पूतनादीनामपि तादृशगतिदानेन सर्वोत्कृष्टनिजकीर्त्यपेक्षयेत्यर्थः। नन्वीश्वरस्य मम तादृशीच्छा क्वचिद्भवेत्क्वचिन्न भवेदित्याशंक्याह—नारं जीवसमूहस्तस्यायनमाश्रयेति। भवतु मा वा तथापि जीवमात्रस्य त्वमेव गतिरिति भावः। परमवैयग्र्येण सपादग्रहं प्रणमति—नम इति। एवं श्रीकृष्णमेकं प्रत्येव प्रार्थनादिकम्। अन्योऽन्यं महास्निग्धतया श्रीबलदेवेन सह तस्याभेदात्तस्मात्प्राधान्याच्चेति। विश्वनाथस्तु—हे देवदेव त्वं देवेषु दीव्यसि, अद्य मद्गृहे दीव्य। त्वं जगतां नाथः, अद्य मद्गृहस्य नाथो भव। हे पुण्यश्रवणकीर्तन अद्य मद्गृहमपि पुण्यं कुरु। हे यदूत्तम यदोर्मम गृहमागच्छ। हे उत्तमश्लोक पतितपावनत्वयशः प्रकाशयन्पतितस्य मम गृहं पुनीहि ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु पित्रग्निसुरादीनां पूजादिना सदा त्वद्गृहाणां सनाथता भात्येव तत्राह। पुनीहि गृहमेधिनां नित्यं गृहेषु पञ्चसूनापराणाम् अनुशब्देन सकृल्लब्धेनापि निरन्तरं तृप्यन्तीति ध्वन्यते पितर इति। पित्रादीनामनुतृप्त्या गार्हस्थ्यकृत्यसमाप्त्या गृहस्थानां स्वत एव सुखं कृतार्थता च स्यादिति भावः ॥ १३ ॥ नचेयं स्तुतिर्दृष्टफलत्वात्, यद्वा ननु तर्हि रजस्तच्छौचजलं वा तत्र नीयतामित्याशङ्क्य श्रीवलिवत्तत्र साक्षात् प्रक्षालयितुमिच्छामीत्याशयेनाह। अवनिज्येति। महान् श्लोक्यः पुण्यकीर्तिमत्सु श्रेष्ठ इत्यर्थः। श्रीव्यासादिभिरपि प्रशस्तत्वात् अतुलमिन्द्रादीनामपि दुर्ल्लभत्वात् गतिं प्राप्यं ताञ्च लेभे इहैव द्वारपालत्वेन श्रीभगवतः साक्षात् प्राप्तत्वात् ॥ १४ ॥ अहो आस्तां तावात् त्वत्तदवनेजनजलानां माहात्म्यं परम्परयापि तत्स्पृष्टानां माहात्म्यं परमाश्चर्यमित्याह। आप इति। शुचय इति। महापातकिपावनेनान्यतीर्थानामिवाशुचित्वं निरस्तं न केवलं त्रीन् लोकानेवापुनन् लोकपालमुख्यं सर्ववन्द्यं श्रीशिवमपीत्याह। शिरसेति। तथा चोक्तं प्रथमस्कन्धे शेषं पुनातीति बहिः श्मशानादिसम्बन्धं तिरस्करोतीत्यर्थः। इति तासां परमपुरुषार्थरूपत्वमुक्तम् अहो साक्षात्तत्स्पर्शेन पावनत्वं किं वक्तव्यं महापराधिनां चिरं स्वकृतपापेनैव दग्धानामपि दाहस्थानस्पर्शमात्रेणैव परमशोधनं ब्रह्मलोकप्रापणञ्चाह। स्वर्गता इति। स्वरिति त्रिलोकीपक्षे ब्रह्मलोकपर्यन्तस्य स्वर्गत्वाद्ब्रह्मलोकमित्यर्थः। तत्त नवमे व्यक्तमेवमादौ पावनत्वं ततः परमवन्द्यत्वं ततश्च सुदुस्तरमहदपराधादपि निस्तारकत्वं परमपदप्रापकत्वञ्च क्रमेणोक्तम् ॥ १५ ॥ हे देवदेवेति। तत्र त्वद्गमनेन ध्रुवं महापुण्यं स्यादेवेति भावः। यद्वा देवानां ब्रह्मादीनां देव पूज्येति यद्यपि त एव सेवकास्त्वदनुग्राह्यास्तथापि जगन्नाथत्वेन मामप्यनुग्रहीतुमर्हसीति भावः। ननु पुण्यवत एवानुगृह्णामि तत्राह। पुण्येति। तव श्रवणादिनाहमपि पुण्यवानेव। यद्वा यस्य श्रवणकीर्त्तनाभ्यामपि पुण्यं स्यात्तस्य दर्शनादिना ममापि महापुण्यं जातमेवेति भावः। किञ्च यदूत्तमेति। यदुकुलावतीर्णेन तच्छ्रेष्ठेन त्वया तत्कुलजोऽहमनुग्रहीतुं योग्य इति भावः। ननु तथापि कंससङ्गी त्वं श्रीगोकुले जातापराधश्च कथमनुग्राह्य इत्याशङ्क्याह। उत्तमःश्लोकेति। पूतनादीनामपि तादृशगतिदानेन सर्वोत्कृष्टनिजकीर्त्त्यपेक्षयेत्यर्थः। नन्वीश्वरस्य मम तादृशीच्छा क्वचिद्भवेत् क्वचिन्न भवेदित्याशङ्क्याह। नारं जीवसमूहस्तस्यानमाश्रयेति भवतु मा वा तथापि जीवमात्रस्य त्वमेव गतिरिति भावः। परमवैयग्र्येण सपादग्रहं प्रणमति। नम इति। एवं श्रीकृष्णमेकं प्रत्येव प्रार्थनादिकम् अन्योऽन्यं महास्निग्धतया श्रीबलदेवेन सह तस्याभेदात् तस्मात् प्राधान्याच्च ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु मत्पूजादिना सदा त्वद्गृहाणां सनाथता भात्येव, तत्राह—पुनीहीति। गृहमेधिनां गृहेषु नित्यं पञ्चसूनापराणाम्, अनु-शब्देन सकृल्लब्धेनापि निरन्तरं तृप्यस्तीति ध्वन्यते। पितर इति पित्रादीनामनुतृप्त्या गार्हस्थ्यकृत्य समाप्त्या गृहस्थानां स्वत सुखं कृतार्थता स्यादिति भावः ॥ १३ ॥ न चेयं स्तुतिः, साक्षात्फलत्वात्। यद्वा, ननु तर्हि रजस्तच्छौचोदकं वा तत्र नीयतामित्याशंक्य श्रीवलिवत्तत्र साक्षात् प्रक्षालयितुमिच्छामीत्याशयेनाह—अवनिज्येति। महान् श्लोक्यः पुण्यकीर्तिमत्सु श्रेष्ठ इत्यर्थः। अतुलं ब्रह्मादीनामपि दुर्लभत्वात्, गतिर्निष्ठा प्राप्यं वा ताञ्च लेभे, द्वारपालत्वेन भगवतः सदा सन्दर्शनादिसम्पत्तेः। अन्यत्तैर्व्याख्यातम्। यद्वा, श्लोकैः पद्यैः श्रीव्यासादिकविवर्गेण वर्णयितुं योग्यः श्लोक्यः, श्लोक्यत्वमेवाह—ऐश्वर्य्यमित्यादिना ॥ १४ ॥ अहो आस्तां तावत् साक्षात्तदवनेजनजलानां माहात्म्यम्, ततश्चिरं निःसृतानामपि माहात्म्यं परमाश्चर्य्यमित्याह–आप इति। शुचय इति महापातकिपावनेनान्यतीर्थानामिवाशुचित्वं निरस्तम्। न केवलं त्रीन् लोकानेवापुनम्, लोकपालमुख्यं ब्रह्मादिवन्द्यं श्रीशिवमपीत्याशयेनाह—शिरसेति। तथा चोक्तं प्रथमे (१।१८।२१) 'सेशं पुनाति' इति, इति तासां पुरुषार्थरूपत्वमुक्तम्, अहो साक्षात्स्पर्शेन पावनत्वं किं वक्तव्यम्, महापराधिनां चिरं स्वकृतपापेनैव दग्धानामपि दाहः स्यात्। स्पर्शमात्रेणैव परमशोधनं ब्रह्मलोकप्रापणं

चाह—स्वर्याता इति । स्वरिति त्रिलोकीपक्षे ब्रह्मलोकपर्य्यन्तस्य स्वर्गत्वाद्ब्रह्मलोकमित्यर्थः । तदाख्यानं च नवमस्कन्धादौ व्यक्तमेव यद्वा, आदौ पावनत्वं ततः परमवन्द्यत्वम्, ततश्च सुदुस्तरमहदपराधादपि निस्तारणं परमपदप्रापकत्वञ्च क्रमेणोक्तम् ॥ १५ ॥ हे देवदेवेति । तत्र त्वद्गमनेन सर्वे देवाः स्वयमेवागताः सन्तुष्टाश्च स्युरिति भावः । न केवलं देवा एव, किन्तु सर्व्वेऽपि जीवा इत्याह—जगन्नाथेति । पुण्ये श्रवणकीर्त्तने अपि यस्येति साक्षात्तव गमनेन ध्रुवं महापुण्यं स्यादेवेति भावः । यद्वा, देवानां ब्रह्मादीनां देव पूज्येति, यद्यपि त एव सेवकास्त्वदनुग्राह्यास्तथापि जगन्नाथत्वेन मामप्यनुग्रहीतुमर्हसीति भावः । ननु पुण्यवत एवानुगृह्णामि, तत्राह–पुण्येति; तव श्रवणादिनाहमपि पुण्यवानेव, यस्य श्रवणकीर्त्तनाभ्यामपि पुण्यं स्यात्तस्य दर्शनादिना ममापि महापुण्यं जातमेवेति भावः । किञ्च, यदुत्तमेति यदुकुलावतीर्णेन तच्छ्रेष्ठेन त्वया तत्कुलजातोऽहमनुग्रहीतुं योग्य इति भावः । ननु श्रीगोपीषु जातापराधत्वं कथमनुग्राह्यः ? तत्राह–उत्तमश्लोकेति, सर्व्वोत्कृष्ट-निजमाहात्म्यापेक्षयेति भावः । ननु महदपराधोभोगेन तत्क्षमयैव वा नश्येत्, न त्वन्यथा, तत्राह–नारं जीवसमूहस्तस्यायन आश्रयेति । तथापि त्वमेव गतिरिति भावः । परमवैयग्र्येण सपादग्रहं प्रणमति—नम इति । एवं श्रीकृष्णमेकं प्रत्येव प्रार्थनादिकमन्योऽन्यं महास्निग्धतया श्रीबलदेवेन सह तस्याभेदात्। यद्वा पूर्वं (भा० १०।३८।३२) 'प्रधानपुरुषौ' इत्यादि-प्रकारेण द्वयोः साम्येन दर्शनेऽपि वृत्तेऽधुना अनन्ततीर्थे श्रीकृष्णस्यैव प्राधान्यसन्दर्शनेन श्रेष्ठ्यमननादिति ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

श्लोकेन वलिः महावलिः महानासीदित्यन्वयः । लेभे त्वत्सङ्कल्पादतुलमैश्वर्यमित्यर्थः ॥ १४ ॥ अवनेजनं क्षालनं स्वर्याताः ताभिरिति शेषः ॥ १५–२४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पादरजसा गृहमेधिनामस्माकं गृहं पुनीहि पवित्रीकुरु यस्य पादरजशोचेन क्षालनादकेन पीतेन गृहाङ्गणस्थितेन शिरसि धृतेन चास्माकं पितरोऽग्नयः सुराश्च तृप्यन्ति तृप्ता भवन्ति तेन पादरजसेत्यन्वयः ॥ १३ ॥ किञ्च तवाङ्घ्रियुगलमवनिज्य प्रक्षाल्य बलिर्वैरोचनिर्बृहच्छ्लोक्यः विपुलकीर्त्यर्हः महान् गुणैरिति शेषः । आसीद्बभूव त्वत्सङ्कल्पाल्लब्धप्रायमैश्वर्य्यं लेभे प्राप्तवान् तथैकान्तिनामनन्यप्रयोजनानां प्रपन्नानां या गतिस्त्वत्प्राप्तिरूपा ताञ्च लेभे लब्धवत्प्रायो बभूव ॥ १४ ॥ किञ्च तवाङ्घ्र्योरवनेजन्यः क्षालिन्य आपः गाङ्गाः शुचयः पवित्राः लींल्लोकानपुनन् पवित्रितवत्यः किञ्च या आपः शर्वो रूद्रः शिरसा धृतवान् किञ्च याभिरद्भिः सगरात्मजा स्वर्गं गता बभूवुः एवं विधमहामहिमशालिपवित्रतमगङ्गादिरूपतीर्थाश्रयपादरजसा पुनीहि इत्यन्वयः ॥ १५ ॥ एवं प्रार्थयमानोऽमितरसाधारणधर्मयुक्तं सम्बोधयन्नमस्करोति देवदेवेति । देवानां ब्रह्मादीनामपि देव जगतो नाथ पुण्यं शृण्वतां वदताञ्च पुण्याह यस्य श्रवणं कीर्त्तनञ्च तद्यस्य स पुण्यश्रवणकीर्त्तनः तस्य सम्बोधनम् उत्तमैर्ब्रह्मादिभिः श्लोक्यते ईड्यते इति तथा उत्तमः श्लोको यशो यस्येति वा ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अवनिज्य प्रक्षाल्य एकान्तिनां भक्तमुख्यानां या गतिःक्लृप्ता ताम् ॥ १४ ॥ अपुनन् शुद्धांश्चक्रुः ॥ १५–१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यच्छोचेन यत्पादरजःक्षालनोदकेन ॥ १३ ॥ श्लोक्या महायशोऽर्हः गतिं च लेभे या एकान्तिनामेव गतिश्चेत्यापपाठः ॥ १४ ॥ आपो गङ्गाभिधानाः शुचयो ऽप्राकृत्यः स्वर्याता इति यत इति शेषः ॥ १५ ॥ हे देवदेव ! त्वं देवेषु दीव्यसि मद्गृहेऽपि अद्य दीव्य त्वं जगतां नाथः अद्य मद्गृहनाथो भव हे पुण्यश्रवणकीर्तन ! अद्य मद्गृहमपि पुण्यं कुरु हे यदूत्तम ! यदोर्मम गेहमागच्छ हे उत्तमश्लोक ! पतितपावनत्वयशः प्रकाशयन् पतितं मद्गृहं पुनीहि ॥ १६ ॥

गूढार्थदीपिनी

यच्छौचेन पादप्रक्षालितजलेन ॥ १३ ॥ अवनिज्य प्रक्षाल्य । श्लोक्यः प्रशंसनीयः । एकान्तिनाम् अनन्यभक्तानां या गतिः मुक्तिः तां च लेभे ॥ १४ ॥ अङ्घ्र्यवनेजन्यः पादप्रक्षालनकर्त्र्यः आपः लोकान् लोकस्थान् अपुनन् । या अपः शिवोऽधत्त स्वर्यताः याभिरिति शेषः ॥ १५ ॥ पुण्ये पुण्यप्रापके श्रवणकीर्तने यस्य ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यत् यस्य पादरजसः शौचेन क्षालनोदकेन गृहाङ्गणस्थितेन ॥ १३ ॥ बलिः तवाङ्घ्रियुगलमवनिज्य प्रक्षाल्य श्लोक्य ! पुण्यकीर्त्यर्हः महांश्चासीत् ऐश्वर्य्यम् एकान्तिनां भागवतानां या गतिस्तां लेभे च ॥ १४ ॥ किञ्च ते अङ्घ्र्योः अवनेजन्यः शौचभूता आपः शुचयः पवित्राः त्रीन् लोकान् अपुनन् पवित्रितवत्यः सगरात्मजा ब्रह्मदण्डहताः स्वः स्वर्गं याताः याभिरिति शेषः।

किम्बहुना याः सर्वः शिवः शिरसाऽधत्त मस्तकेन तवान् ॥ १५ ॥ हे देवदेव ! ब्रह्मशिवादिपूज्य हे जगन्नाथ ! पुण्ये श्रवणकीर्तने यस्य स तथा हे यदूत्तम । यदुश्रेष्ठ ! हे उत्तमश्लोकः पुण्यकीर्ते हे नारायण अखिलनरसमूहनिवासस्थान ते ! नमोऽस्तु पादरजसा पुनीहीति प्रार्थना ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गृहमेधिनां गृहस्थानां नोऽस्माकं तत्पादरजसा गृहान् । गृहाः पुंसि च भूम्न्येवेत्यमरः । पुनीहि पवित्रय यच्छौचेन यदवनेजनेन पितरः साग्नयः सुराश्च तृप्यन्ति ॥ १३ ॥ न केऽपि तद्धृतवन्तः किं त्वं काङ्क्षसीत्यत आह अवनिज्येति । बलिमंखेऽङ्घ्रियुगलमवनिज्य प्रक्षाल्य श्लाघ्य इह स्तुत्य आसीत् । अतुलं सुतले मन्वन्तरान्तस्वैश्वर्यं लेभे । एकान्तिनामेकान्तभक्तानां या क्लृप्ता गतिस्तामपि लेभ इत्यन्वयः ॥१४॥ तवावनेजिन्यो अवनेजनिसम्बन्धिन्य आपो ब्रह्मकमण्डलुगताः शुचयः साङ्घ्रिस्पर्शा इति शुद्धास्त्रिलोकान् । विशेषणसमासः । अपुनन्नशोधयन्याः शर्वः शिरसाऽधत्त सगरात्मजा भस्मीभूताः स्वः स्वर्गं क्रमान्मुक्तिं च याताः । स्वर्गसुपुष्टेरित्यस्य मुक्तेरपि समायात इति छान्दोग्यभाष्योक्तेः ॥ १५ ॥ इयन्महीयस्त्वं तव साक्षान्नारायणत्वादेवेति परवान्वदति । देवदेवेत्यादिना ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यशोरूपं भगवन्तं निरूपयति । पुनीहीति । अनेन सनाथत्वमात्रत्वं चेत् वचनेनापि सनाथत्वं संपद्यत इति किमागमनेनेत्याशङ्का परिहृता यतो गृहपावित्र्यमधिकं कर्तव्यमिति पावित्र्योपायमाह । पादरजसेति । चरणरजो हि भगवदीयत्वं संपादयतीति परमशुद्ध्यर्थं व तथात्वं भवतीति पादरजसा गृहाणां पावनं कर्त्तव्यं तत्रेतो नयने अल्पमेव रजो भवेत् तत्र गमने तु सर्वैव भूः चरणरजो भवतीति सर्वेषामेव गृहाणां पावनं भवति ननु भगवदीया भवन्तः गृहाश्च तथा सति का पावनापेक्षा इति चेत्तत्राह । गृहमेधिनामिति । गृहे मेधा हि सा नित्यमुत्पद्यते तथा सति य एव गृहस्थो भवति ज्ञाननिष्ठो भक्तो वा स एव लिप्यते कालगुणैरिव ते चेद्गृहाः अपहतपाप्मानो भवन्ति तदैव निस्तार इति । कि च न केवलं जीवतामेव भगवदागमेन उपकारः किन्तु सर्वेषामेव पित्रादीनां परमा तृप्तिरित्याह । यच्छौचेनेति । यस्य भगवतः शौचेन चरणोदकेन पितरः अग्नयो देवाश्च अनुतृप्ता भवन्ति । यतो ब्रह्मदण्डहता अपि मुच्यन्ते । अतस्तव चरणोदकं पितॄणां परमानन्दहेतुर्भवति । तेषां कव्यं गृहीत्वा प्रयच्छत्यग्निरिति तेषां च तृप्तिरपेक्ष्यते । तत्र प्रविष्टा एव पितरो जाता इति च तथा तदधिष्ठात्र्यो देवताः यज्ञो देवाः पितरश्च तृप्ता भवन्तीत्युक्तं भवति ॥ १३ ॥ श्रियं निरूपयन् चरणोदकस्य माहात्म्यमाह । अवनिज्याङ्घ्रियुगलमिति । चरणोदकनिर्माणेन प्रक्षालनक्रियया बलेस्त्रयं जातं कीर्त्तिः ऐश्वर्यं भक्तिर्मोक्षो वा श्लोक्योऽपि जातः महानपि जातः महत्त्वं सर्वलोकप्रसिद्धिः सत्यं शौचमित्यादि गुणवत्त्वं प्रार्थ्यो महत्त्वमिच्छद्भिरिति वाक्यात् ऐश्वर्यमिन्द्रत्वमतुलं ततोऽप्यधिकं भगवान् वश इति । एकान्तिनां भक्तानां या गतिः स्वतन्त्रा भक्तिः सायुज्यं वा येति सर्वलोकप्रसिद्धा "अनिच्छतो गतिमण्वीं प्रयुङ्क्त" इत्यादिवाक्यसिद्धा ॥ १४ ॥ धर्मं निरूपयन् वीर्यं वा चरणोदकमेव स्तौति । आप इति । ते त्रिविक्रमस्य अङ्घ्र्यवनेजन्यः आपः चरणक्षालनोदकानि त्रीन् लोकान् मन्दाकिन्यादिभेद्रेन अपुनन् यतः यः स्वयं शुचयः शुद्धाः नखोदकस्याशुद्धत्वमाशाङ्क्य तथोक्तवान् न केवलं पवित्रत्वजकत्वं किन्तु आधिदैविकत्वसम्पादकत्वमपीत्याह । शिरसाधत्त याः शर्व इति । शर्वो महादेवः "शिवः शिवो भू" दित्यत्रफलं विस्तरेण निरूपितं ततो भूमिङ्गतापि ब्रह्मदण्डहतानपि पावयामासेत्याह । स्वर्याता इति । सगरस्य पुत्राः दुरात्मत्वेन प्रसिद्धाः स्वर्गं गताः इन्द्रेण नाशार्थं कृतयत्ना अपि चरणोदकेनेन्द्रसमानाः कृता इत्यर्थः ॥ १५ ॥ भगवत ऐश्वर्यं कीर्त्तयन् नमस्यति । ऐश्वर्यं षड्विधम् उपास्यत्वेन प्रभुत्वेन दोषनिवारकत्वेन गुणाधायकत्वेन उत्तमस्तुल्यत्वेन जगत्कारणत्वेन च । देवदेव इति । तत्र भगवान् देवानामपि देवः उपास्यानामप्युपास्यः जगत एव नाथः नत्वेकदेशस्य पुण्ये पापनिवारके श्रवणकीर्त्तने यस्य यथा श्रवणं तथैव कीर्तनं पापनाशकम् । यदूत्तमेति । यदोरपि गुणाधायकः "अकर्तोचरितं पितु" रिति न्यायेन पितुः प्रतिकूलत्वात् न कस्यापि साध्यः तस्यापि गुणान् धत्त इति उत्तमैरपि व्यासादिभिः श्लोक्यत इति नारायणो जगत्कर्त्ता इति एवं षड्गुणपूर्णं नमस्यति । नमोऽस्तुत इति । नमस्कारप्रार्थनया नित्यं नमस्कार उक्तः ॥ १६ ॥

श्रीसुबोधिनी-सारः

गृहमेधिनां गृहस्थानां नोऽस्माकं गृहान् पादरजसा त्वं पुनीहि ययोश्चरणयोः शौचेन प्रक्षालनेन पितरः साग्नयः सुरा देवा अनुतृप्यन्ति ॥ १३ ॥ तत्र संमतिमाह । अंघ्रेर्युगलमवनिज्य प्रक्षाल्य महान् पूज्यः श्लोक्यः पुण्यकीर्त्यर्हः प्रशस्यतमो बलिरासीत् अतुलमैश्वर्यं लेभे एकांतिनां भक्तानां या गतिस्तां च लेभे ॥ १४ ॥ ते तवांघ्र्यवनेजन्यः चरणधाविन्यो जलानि शुचयः पवित्राः त्रीन् लोकान् अपुनन् या अपः शर्वः शिवः शिरसाऽधत्त याभिः सगरपुत्राः षष्टिसहस्राणि स्वर्गं प्राप्ताः ॥ १५ ॥ हे देवदेव हे जगन्नाथ हे पुण्यश्रवणकीर्त्तन हे उत्तमश्लोक हे नारायण नमोस्तु ते तुभ्यम् ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वपादरजसा नोऽस्माकं गृहमेधिनां गृहान् पुनीहि । 'कुतो मत्पादरजसा गृहाः पवित्राः स्युः ?' तत्राह—यस्य तव पादस्य शौचेन प्रक्षालनोदकेन गङ्गारूपेण तर्पिताः पितरः साग्नयः सुराश्चानुक्षणं तृप्यन्ति, अतस्तद्रजसा गृहपावित्र्ये कः सन्देहः ? ॥ १३ ॥ किञ्च तवाङ्घ्रियुगलमवनिज्य प्रक्षाल्य वलिः श्लोक्यो विपुलकीर्त्यर्हः गुणैः महांश्चासीत्, अतुलं पूर्वेन्द्रापेक्षयाधिकमैश्वर्यं भूतले भाविन्यैन्द्रपदे च लेभे, तथा एकान्तिनां निष्कामभक्तानां या त्वत्प्राप्तिरूपा गतिस्तां च लेभे । तुशब्दोऽन्यविलक्षणत्वद्योतकः । तत्प्राप्तौ सन्देहाभावाद्भावित्वेऽपि भूतत्वनिर्देशः ॥ १४ ॥ किञ्च तवाङ्घ्र्योरवनेजन्यः क्षालनाच्छुचयः पवित्रा आपः गङ्गा त्रीन् लोकान् त्रिलोकस्थजनान् अपुनन् पवित्रितवत्यः । तत्पावित्र्ये किं वक्तव्यं या आपः ईश्वरोऽपि शर्वः शिरसा धृतवान्, अस्थिभिर्यत्स्पर्शमात्रेण सगरात्मजाः स्वर्याताः स्वर्गं गताः ॥ १५ ॥ एवं प्रार्थ्यमानो बहुधा सम्बोधयन् नमस्करोति—देवानां ब्रह्मादीनामपि देव पूज्य, जगतो नाथ स्वामिन्, पुण्यं पुण्यजनकं श्रवणं कीर्तनं च यस्य तथाभूत, यदुषु उत्तम, उत्तमः श्लोको यशो यस्य तथाभूत, हे नारायण ! ते तुभ्यं नमोस्तु ॥ १६ ॥

अन्वितार्थप्रकाशिका

पुनीहिति ॥ स्वपादरजसा नोऽस्माकं गृहमेधिनां गृहान् पुनीहि ॥ यस्य तव पादस्य शौचेन गृहाङ्गणस्थितेन पादक्षालनोदकेन गङ्गारूपेण वा तर्पिताः पितरः साग्नयः सुराश्चानुक्षणं तृप्यन्ति । अतस्तद्रजसा गृहपावित्र्ये कः संदेहः ॥ १३ ॥ अवनिज्येति ॥ तवाङ्घ्रियुगलमवनिज्य प्रक्षाल्य बलिः श्लोक्यो विपुलकीर्त्यर्हः गुणैः महांश्चासीत् । स च अतुल पूर्वेन्द्रापेक्षयाऽधिकमैश्वर्यं भूतले भाविन्यैन्द्रपदं च लेभे तथा एकान्तिनां निष्कामभक्तानां या त्वत्प्राप्तिरूपा गतिस्तां च लेभे ॥ १४ ॥ आप इति ॥ तवाङ्घ्र्योरवनेजन्यः क्षालनाच्छुचयः पवित्रा आपः गङ्गा त्रीन् लोकान् त्रिलोकस्थजनान् अपुनन् पवित्रितवत्यः तत्पावित्र्ये किं वक्तव्यं या आपः ईश्वरोऽपि शर्वः शिरसा धृतवान् । अस्थिभिर्यत्स्पर्शमात्रेण सगरात्मजाः स्वर्याताः स्वर्गं ब्रह्मलोकं गताः ॥ १५ ॥ देवेति ॥ हे देवदेव ! हे जगन्नाथ ! पुण्यं पुण्यजननं श्रवणं कीर्तनं च यस्य तथाभूतयदुषु उत्तम उत्तमः श्लोको यशो यस्य तथाभूत हे नारायण ! ते तुभ्यं नमोऽस्तु ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यच्छौचेन यस्य पादरजः प्रक्षालनजलेन पित्रादयोऽनुतृप्यन्ति ॥१३॥ तवांघ्रियुगलं अवनिज्य प्रक्षाल्य बलिः श्लोक्यः पवित्रकीर्त्तियोग्यः एकांतिनां एकांतिकभक्तानां या गतिस्तां च लेभे ॥ १४ ॥ अंघ्रवनेजन्यः तवपादप्रक्षालनरूपाः शुचयः पवित्राः आपोजलानि त्रीन् लोकान् अपुनन् पवित्रीकृतवत्यः शर्वः शिवः या आपस्तवपादजलानि शिरसा आधतदधारयाभिरद्भिः स्वः स्वर्गं याताः प्राताः ॥ १५ ॥ अथ संबोधयन्नमस्करोति देवेति हे यदूत्तम उत्तम श्लोके ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तुनीहीति ॥ यच्छौचेन रजसा सहितेन यस्य तव क्षालितपादोदकेन, पितरः साग्नयः सुरा देवाः, अनुतृप्यन्ति तथाविधेन, पादरजसा गृहमेधिनां नोऽस्माकं, गृहान् पुनीहि ॥ १३ ॥ अवनिज्येति ॥ किं च अङ्घ्रियुगलं अवनिज्य, तव चरणकमलद्वयं प्रक्षाल्य, बलिर्वैरोचनिः, महान् बृहत्त्वोपेतः, गुणैः महानिति वा । श्लोक्यः विपुलकीर्त्यर्हः, आसीद्बभूव । त्वत्संकल्पाल्लब्धप्रायमिति शेषः । अतुलं ऐश्वर्यं, लेभे प्राप्तवान् । एकान्तिनां, त्वदनन्यप्रयोजनानां त्वां प्रपन्नानामेकान्तिकभक्तजनानामित्यर्थः । या तु गतिः सर्वथा त्वत्प्राप्तिरूपा, तां चापि, लेभे लब्धप्रायो बभूवेत्यर्थः ॥१४॥ आप इति ॥ किं च ते तव अङ्घ्र्यवनेजन्यः चरणकमलक्षालनाः, आपः गङ्गारूपाः शुचयस्त्वच्चरणसंबन्धेन पवित्रतां प्राप्ताः सत्यः, त्रीन् लोकान्, अपुनन् पवित्रितवत्यः । किं च या अपः शर्वो रुद्रः शिरसा आधत्त धृतवान् किं च याभिरद्भिरिति शेषः । सगरात्मजाः, स्वः स्वर्गं, याताः प्राप्ताः । बभूवुरिति शेषः । एवं विधमहामहिमशाली पवित्रितगङ्गोदकस्त्वं तीर्थाश्रयपादरजसा नो गृहान् पुनीहि इत्यन्वयः ॥ १५ ॥ एवं प्रार्थयमानोऽनितरसाधारणधर्मयुक्तं कृष्णं संबोधयन्नमस्करोति ॥ देवदेवेति ॥ देवानां ब्रह्मादीनां देवस्तत् संबोधनम् । जगतां नाथस्तत्संबोधनम् । पुण्यं शृण्वतां वदतां च पुण्यावहं श्रवणं कीर्त्तनं च यस्य तत्संबोधनम् । यदुपूत्तमस्तत् संबोधनम् । उत्तमैर्ब्रह्मादिभिः श्लोक्यते ईड्यते इत्युत्तमश्लोकः, उत्तमः श्लोको यशो यस्येति वा तत्संबोधनम । हे नारायण, ते तुभ्यं, नमः अस्तु ॥ १६ ॥

कृष्णप्रिया

हे नाथ हम तो गृहस्थाश्रमी हैं, हमारे यहाँ नित्य चूल्ली, बुहारी मार्जनी आदि से पांच प्रकार के अपराध होते हैं वैश्वदेवादि सत्कर्मो से एवं भगवतादारविन्द रज से एवं अतिथियों के पद रज से निवृत्त होते हैं अतः हे नाथ हे कृपानाथ ! आपके श्रीचरणों के पुण्य पराग पुञ्जों से हमारे घरों को पवित्र करें । आपके पुनीत मादोदक से अग्निगण, देवगण एवं पितृगण

तृप्त होते हैं ॥ १३ ॥ हे नाथ ! आपके श्रीचरण सरोज युगल का मधुपर्कादि विधि से प्रक्षालन एवं अर्चन करे महाराज बलि परम पवित्र एवं यशस्वी बना । राजा बली ने अतुल ऐश्वर्य पाया, और परम भागवतों की परमागति को प्राप्त किया ॥ १४ ॥ हे नाथ ? प्रायः नख धोवन का जल अपवित्र माना है लेकिन आप तो नखशिखान्त सच्चिदानन्दमय है आपके चरणसरोज-युगलों का प्रक्षालन जल तो स्वर्गादिलोकों में स्वधुनी रूप से भूतल को भागरथी रूप से एवं पातालों को भोगवती रूप से पवित्र करता है । सर्व का शर्म्म-कल्याण करने वाले भगवान शर्व-शिवजी श्रीमस्तक की जटाओं में धारण करते हैं और पापदग्ध सगर महाराज के साठ हजार सागर नामके पुत्र इस जल की महिमा से स्वर्ग लोक की ओर चले गये ॥ १५ ॥ श्रीअक्रूरजी भगवान् के श्रीचरणों में निवेदन करने के पश्चात् षडैश्वर्य सम्पन्न नाथ को नमस्कार करते हैं हे देवदेव ? हे समस्त ब्रह्माण्डों के नाथ ! हे कीर्तन ! हे उत्तम श्लोक । हे यदुवर ! हे नारायण ! आपके श्रीचरणों में नमस्कार हो ॥ १६ ॥

श्रीभगवानुवाच

आयास्ये भवतो गेहमहमार्यसमन्वितः । [1]यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियम् ॥ १७ ॥

श्रीशुक उवाच

एवमुक्तो भगवता सोऽक्रूरो विमना इव । पुरीं प्रविष्टः कंसाय कर्मावेद्य गृहं ययौ ॥ १८ ॥
[2]अथापराह्ने भगवान् कृष्णः संकर्षणान्वितः । मथुरां प्राविशद् गोपैर्दिदृक्षुः परिवारितः ॥ १९ ॥
ददर्श तां स्फाटिकतुङ्गोपर[3]द्वारां बृहद्धेमकपाटतोरणाम् ।
ताम्रारकोष्ठां[4] परिखादुरासदामुद्यानरम्योपव[5]नोपशोभिताम् ॥ २० ॥

कर्दमक्षमा

अन्वयः—श्रीभगवान् उवाच-(हे तात !) यदुचक्रद्रुहम्, हत्वा, आर्यसमन्वितः, अहम् , भवतः, गेहम्, आयास्ये, सुहृत्प्रियम्, वितरिष्ये ॥ १७ ॥ श्रीशुक उवाच-भगवता, एवम्, उक्तः, अक्रूरः विमना, इव, पुरीम्, प्रविष्टः कंसाय, कर्म-आवेद्य, गृहम्, ययौ ॥ १८ ॥ अथअपराह्ने-संकर्षण समन्वितः, भगवान् , कृष्णः, गोपैः, परिवारितः मथुराम् , दिदृक्षुः, प्राविशत ॥ १९ ॥ स्फाटिक तुङ्ग गोपुर द्वाराम्-बृहत् हेमकपाट तोरणाम् , आम्रारकोष्ठाम् , परिखादुरासदाम् , उद्यान रम्योपवन उपशोभिताम् , ताम् , (कृष्णः) ददर्श ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आदौ तावद्यदुचक्राय द्रुह्यतीति यदुचक्रध्रुक् तं कंसं हत्वा सुहृदां प्रियं वितरिष्ये दास्यामि ॥ १७ ॥ रामकृष्णावानीताविति स्वकृतं कर्मावेद्य समर्प्येति ॥ १८ ॥ गोपैः परिवारितः प्राविशत् ॥ १९ ॥ श्रीकृष्णदृष्टां पुरीमनुवर्णयति चतुर्भिः । ददर्श तामिति । स्फाटिकानि तुङ्गानि गोपुराणि पुरद्वाराणि गृहद्वाद्वाणि च यस्यां ताम् । बृहंति हेममयानि कपाटानि तोरणानि च यस्यां ताम् । ताम्रं चारः आरकूटश्च तन्मयाः कोष्ठा धान्यागाराश्वशालादयो यस्यां ताम् । परिखाः परितः खातगर्तास्ताभिर्दुरासदां दुर्गमाम् । उद्यानानि इह दूरस्थानानि कृत्रिमवनानि रम्याण्युपवनानि च निकटानि तैरुपशोभिताम् ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आर्यो बलदेवः । वितरिष्ये 'विपूर्वस्तरतिर्दाने' इति व्याडिः । आर्येण श्रीरामेण सम्यगन्वित इति गोपैः साहित्यं निरस्तम् , तेषां चिरं तत्रानवस्थानात् । कदेत्यपेक्षायामाह—यदुचक्रेति । यदेति शेषः । संकेतेनैव तदुक्तिः, मन्त्रभगभयाद्दुष्टत्वाद्वा । सुहृदां यादवादीनां श्रीवसुदेवमोचनादिना प्रियं प्रीति—पितरौ बद्धौ सर्वे यादवाश्च दुःखिता अतोऽत्रागतस्य मम त्वद्गृहगमनादिर्नातिथ्यसुखं न योग्यमिति भावः । विश्वनाथस्तु—सत्यं भो मां यदूत्तमं ब्रूषे तर्हि यदुचक्रद्रुहं हत्वैव त्वद्गृहमायास्ये ॥ १७ ॥ एवमुक्तरीत्या । भगवता सहागमनाभावाद्विमना इवेति कंसदौर्जन्याद्वा । स परमोत्सुकः । श्रीभगवदानयने परमहृष्टोऽपि । इवेति वाक्यालंकारे । यद्वा—आयास्य इति तदङ्गीकारेण कंसहननप्रतिज्ञादिना चात्यन्तवैमनस्याभावात् । प्रायः श्वः कंसं मारयित्वा श्रीभगवानागमिष्यतीति विभाव्य बहुधा निजगेहमुपस्कर्तुमिति ज्ञेयम् । अत एव तदासक्त्या तत्र तस्य श्रीभगवदागमनपर्यंतमन्यत्कर्मादिकं किमप्यग्रं कुत्रापि न श्रूयते ॥ १८ ॥ अथाक्रूरप्रेषणोत्तरम् ॥ १९ ॥ अथ मथुरावर्णनम् । तां मथुराम् । तोरणानि द्वारबहिर्भागाः । 'तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः । 'आरकूटश्च पित्तलम्' इत्यभिधानचिन्तामणिः । आरपदेनारकूटग्रहस्त्वेकदेशन्यानेन बोध्यः । उपवनानि प्रमदवनादि वा । कोष्ठानि दुर्गप्रकारा इत्यपि केचित् ॥ २० ॥

---

१. वर्ग–विज. । २. ततोप–विज. । ३. गोपुरां बृहत्स्फुरद्धेम–विज. । ४. कोष्ठा वरिखा–विज. । ५. पनालि–विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आर्येण श्रीरामेण सम्यगन्वित इति गोपैः साहित्यं निरस्तं तेषां चिरं तत्रानवस्थानात् कदेत्यपेक्षायामाह । यदुचक्रेति । यदेति शेषः सङ्केतेनैव तदुक्तिः मन्त्रभङ्गभयात् दुष्टत्वाद्वा सुहृदां यादवानां श्रीवसुदेवमोचनादिना प्रियं प्रीतिं पितरौ बद्धौ सर्वे यादवाश्चात्र दुःखिताः अतोऽत्रागतस्य मम त्वद्गृहगमनादिनातिथ्यसुखं न योग्यमिति भावः ॥ १७ ॥ स परमोत्सुकः श्रीभगवदानयने परमहृष्टोऽपि च श्वेति वाक्यालङ्कारे, यद्वा आयास्य इति तदङ्गीकारेण कंसहननप्रतिज्ञादिना चात्यन्तवैमनस्याभावात् गृहं ययाविति प्रायः श्वः कंसं मारयित्वा श्रीभगवानागमिष्यतीति विभाव्य बहुधा निजगृहमुपस्कर्त्तुमिति ज्ञेयम् । अत एव तदासक्त्या तत्र तस्य श्रीभगवदागमनपर्यन्तमन्यत् कर्मादिकं किमप्यग्रे कुत्रापि न श्रूयते ॥ १८ ॥ गोपैर्वयस्यैः ॥ १९ ॥ चतुष्केण पुरीं वर्णयन्नादौ तस्याः स्वाभाविकीं शोभां वर्णयति । ददर्शेति सार्द्धद्वयेन । आर आरकूटः पित्तलं परिखाः पार्श्वद्वये ज्ञेयाः पूर्वोत्तरयोः प्रायः श्रीयमुनाया एव परिखारूपेण वर्त्तमानत्वात् उद्यानं फलप्रधानम् उपवनं पुष्पप्रधानं पूर्वमुक्त शकटावरणस्थानोपवनकृत्रिमं बाह्यञ्च उपवनस्य सौन्दर्यादिविशेषेण रम्येति विशेषणम् अन्यत्तैः, यद्वा कोष्ठानि दुर्गप्राकाराः उद्यानरम्या चासावुपवनोपशोभिता चेति तां प्रत्येकं विशेषणमाधिक्यापेक्षया क्रमस्त्वेवम् उद्यानानि उपवनानि परिखाः कोष्ठानि तत्र गोपुराणि अन्यद्वाराणि द्वार्षु हेमकपाटानि ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आदौ हनने हेतुः—यदुचक्राय सर्व्वपादववर्गाय द्रुह्यतीति तथा तम्; एवं साक्षात्तन्नामाग्रहणम्, केवलं सकेतेनैव तदुक्तिर्मन्त्रभंगभयाद्दुष्टत्वाद्वा, सुहृदां श्रीवसुदेवादीनां प्रियं बन्धनमोचनादिना प्रीतिम् । पितरौ बद्धा, सर्व्वे यादवाश्चात्र दुःखिनः, अतोऽत्रागतस्य मम त्वद्गृहगमनादिनातिथ्यसुखं न योग्यमिति भावः । वस्तुतस्तुगोपीविषयक–तदपराधेन गोपानामसम्मत्या अधुना तत्र न गत इति ज्ञेयम् ॥ १७ ॥ स परमोत्सुकः श्रीभगवदानयनेन परमहृष्टोऽपि वा; इवेति लोकोक्तिरीत्यानधिकार्थम् । यद्वा, आयास्य इति तदंगीकारेण कंसहनन-प्रतिज्ञादिना चान्तरत्यन्तवैमनस्याभावात्; गृहं ययाविति श्रीभगवदर्थं बहुधा निजगृहोपस्कारार्थमिति ज्ञेयम् । अतएव तदासक्त्या तस्य तत्र श्रीभगवदागमनपर्य्यन्तमन्यत् कर्म्मादिकं किमप्यग्रे कुत्रापि न श्रूयते ॥ १८ ॥ अथाक्रूरस्य पुरीप्रवेशानन्तरं भगवान् निजैश्वर्य्यप्रकटनपरः कृष्णः सर्व्वचित्ताकर्षक इति पौरजनान् प्रति वक्ष्यमाणानुग्रहे तेषां मनोहरणे च हेतुरुक्तः, सम्यक् कर्षत्याकर्षति भावविशेषेण श्रीकृष्णस्य, अतएव तत्प्रियजनानामपि चित्तमिति, यद्वा, श्रीकृष्णेनापृथग्भावात् संकर्षणस्तेनान्वित इति पुरीदर्शनादादौ सुखविशेषः सूचितः । किञ्च, गोपैर्वयस्यैः श्रीदामादिभिः परिवारितस्ताम्बूलार्पकादिपरिवारतया सेवित इत्यर्थः । यद्वा, परितो वारितः परमस्निग्धेन श्रीबलदेवेन पूर्व्वं श्रीवल्लवेन्द्रणैव वा विविधशंकयावरणरूपेण वेष्टनं कारितम् ॥ १९ ॥ पुरीं चतुर्भिर्वर्णयन्नादौ तस्याः स्वाभाविकीं शोभां वर्णयति—ददर्शेति सार्द्धद्वयेन । 'आरम्' आरकूटः पित्तलम्, परिखाः पार्श्वद्वये ज्ञेयाः, पूर्व्वोत्तरयोः प्रायः श्रीयमुनाया एव परिखारूपेण वर्त्तमानत्वात्, किंवा तदानीं दूरतो यमुनावस्थितया पुर्य्यन्तश्चतुर्दिक्षु परिखाश्चतस्र एव । उद्यानं फलप्रधानम्, उपवनं पुष्पप्रधानम्, पूर्व्वमुक्तमुक्तारस्थानोपवनं बाह्यम्, अएतवास्य सौन्दर्य्यादिविशेषेण रम्येति विशेषणम् । यद्वा, उद्यानरम्या चासावुपवनोपशोभिता च ताम् । एवं क्रमेण दर्शनमूह्यम् । आदौ गोपुरम्, ततोऽन्यद्वाराणि, ततस्तत्कपाटादि, ततस्ताम्रादिरचिताश्वशालादि-तदन्तःपरिखा तदभ्यन्तरे उद्यानादि, एवमग्रेऽपि ॥ २० ॥

श्रीमद्वीरराधवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं प्रार्थितः प्राह भगवान् । आयास्य इति । यदुचक्राय यदुवंशजसमूहाय दुह्यतीति यदुचक्रध्रुक् तं यदुचक्रद्रुहं कंसं हत्वा तातोऽग्रजसमन्वितोऽहं भवतो गेहम्प्रत्यायास्ये आगमिष्यामि तथान्येषां च सुहृदां प्रियं वितरिष्ये करिष्यामि ॥ १७ ॥ इत्थं भगवतोक्तोऽक्रूरः विमना इव किञ्चिदसन्तुष्टमना इव भूत्वा पुरीं प्रविष्टः कर्म रामकृष्णावानीताविति स्वकृतं कर्मावेद्य स्वगृहं ययौ ॥ १८ ॥ अथ श्वोऽपराह्ण भगवान् कृष्णः सङ्कर्षणेनान्वितो पोषैः परिवृतो द्रष्टुमिच्छुः श्रीमथुरां प्राविशत् ॥ १९ ॥ तां मथुरां ददर्श कथम्भूतां स्फाटिकमयानि तुङ्गान्युच्छ्रतानि गोपुराणि पुरद्वाराणि अन्यानि च द्वाराणि यस्यां ताभ्रम् आरम् आरकूटश्च तन्मयाः प्रकाष्ठकाः धान्यादिशालादयो यस्यां तां परिखाभिः परितः खाताभिः दुर्गमाम् उद्यानानि दूरस्थानि रम्याराद्युपवनानि च निकटानि तैरुपशोभिताम् ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यदुवर्गद्रुहं कंसम् ॥ १७ ॥ स्वयोक्तं कर्म मया कृतमिति ॥ १८–१९ ॥ स्फाटिकानि स्फटिकरत्ननिर्मितानि तुङ्गानि च गोपुराणि पुरद्वाराणि यस्यां सा तथा बृहन्ति विशालानि स्फुरन्ति शोभमानानि हेम्ना निर्मितानि कपाटानि तोरणानि च यस्यां सा यथा ताम्रैरारैरारकूटैर्लोहविशेषैर्निर्मितानि कोष्ठान्यन्तर्भवनानि यस्यां सा तथा आराण्यारकूटमित्यभिधानं यद्वा ताम्रेण

विरचिते आरकोष्ठे अट्टालावयववप्रे यस्यां सा, यद्वा ताम्रकृतानि अराणि दलानि यस्मिंस्तथा ताम्रारं कोष्ठं यस्यां सा तथा सा च आसीमा परिखा खातनदी यस्यां सा तथा ताम्रारकोष्ठापरिखाम् अत एव दुरासदां दुष्प्रवेशां ताम्रारकोष्ठां परिखादुरासदामितिपठन्ति उद्यानैः सर्वसाधारणवनैः रम्या रमणीया च उपवनानामारामाणां प्रमदावनानामालिः पङ्क्तिस्तया शोभिताम् उद्यानरम्योपवनालिशोभिताम् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सत्यं भो मां यदूत्तमं ब्रूषे तर्हि यदुचक्रद्रुहं हत्वैव भवतो गेहमायास्ये ॥ १७-१८ ॥ गोपैः परिवारितो युक्तः ॥ १९ ॥ पुरीं वर्णयति चतुर्भिः । स्फाटिकानि तुङ्गानि गोपुराणि पुरद्वाराणि द्वाराणि अन्यानि च यस्यां तां बृहन्ति हेममयानि कवाटानि तोरणानि बहिर्द्वाराणि च यस्यां तां ताम्रं च आरः पित्तलं च तन्मयाः कोष्ठाः धान्याद्यागारा यस्यां तां परिखाः परितः खाता गर्त्तास्ताभिर्दुरासदां सौवर्णाः शृङ्गाटकयश्चतुष्पथाः हर्म्याणि धनिगृहाणि निष्कुटा गृहारामास्तैः श्रेणीनाम् एकरूपशिल्पोपजीविनां सभभिरुपवेशस्थानैरन्यैश्च भवनैरलंकृतां वैडुर्य्यादिरत्नैर्जुष्टेषु बलभ्यादिषु आविष्टैरुपविष्टैरासक्तैर्वा पारावतैर्वर्हिभिश्च नादितां तत्तत्प्रतिध्वनिमत्त्वेन तैरेव कारितनादामित्यर्थः । तत्र बलभी गृहचूडेति क्षीरस्वामी आच्छादनं स्याद्वलभी गृहाणामिति हलायुधः बलभीचन्द्रशालिकेति त्रिकाण्डशेषः सा च सर्वगृहोपरिवर्तिनी ज्ञेया । वेदिगृहाग्रे इष्टकादिबद्धा विश्रान्तिभूः । जालामुखरन्ध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिवद्धभूमयः । रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गा अवान्तरवर्त्मानि चत्वराण्यङ्गणानि आपूर्णैः कुम्भैः दधिचन्दनेत्यादिषड्विशेषणविशिष्टैः स्वलंकृतानि द्वाराणि येषां ते गृहा यस्यान्तां वृन्दं फलसंहतिः रम्भाः कदल्यः क्रमुकाः केतवो ध्वजः सपताकाः पट्टिका वितस्तिविस्तरपट्टवस्त्रखण्डानि अत्रेयं रीतिः द्वारेषूभयतस्तण्डुलानामुपरि कुम्भाः तत्परितः प्रसूनावलयः कुम्भानाङ्कण्ठे पट्टिकामुखेषु चूतादिपल्लवाः तदुपरि स्वर्णपात्रे दीपावलयः कुम्भानां पार्श्वद्वये रम्भावृक्षद्वयम् अग्रे पश्चाच्च क्रमुकवृक्षद्वयम् केतवः कुम्भालम्बाः ॥ २०-२३ ॥

गूढार्थदीपिनी

चक्रं कुलम् द्रुहं कंसं वितरिष्ये दास्यामि । विपूर्वस्तरतिर्दाने इति व्याडिः ॥ १७-१८ ॥ अथ अक्रूरप्रेषणोत्तरम् गोपैः परिवारितः इत्यत्रान्वेति ॥१९॥ गोपुराणि पुरद्वाराणि गृहद्वाराणि च यस्याम् । एकदेशन्यायेन आरपदेन आरकूटः पित्तलम् ॥२०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं प्रार्थितो भगवानाह । आयास्य इति । यदुचक्राय द्रुह्यतीति यदुचक्रध्रुक् तं कंसं हत्वा भवतो गेहमायास्ये तथान्येषामपि सुहृदां प्रियं वितरिष्ये ॥ १७ ॥ यदर्थं प्रेषितोऽस्मि तन्मया संपादितमिति स्वकृतं कर्मावेद्य गृहं ययौ ॥ १८ ॥ भगवान् सर्वं कर्तुं कुशलोऽपि सबलः गोपैः परिवारितः अथाक्रूरगमनानन्तरम् अपराह्णे तद्दिनशेषे मथुरां प्राविशत् ॥ १९ ॥ मथुरां वर्णयति । ददर्शेति चतुर्भिः । तां मथुरां ददर्श भगवानिति शेषः । कथंभूताम् स्फाटिकानि स्फटिकमयानि तुङ्गान्युन्नतानि गोपुराणि पुरद्वाराणि अन्यानि च द्वाराणि यस्यां तां बृहन्ति हेममयानि कपाटानि तोरणानि च यस्याम् ताम्रं च यस्याम् ताम्रं च आरः आरकूटश्च तन्मयाः कोष्ठाः यस्यां ताम् परिखाभिर्दुरासदाम् दुर्गमाम् उद्यानैर्दुरस्थैर्वनैरम्या उपवनैः समीपस्थैर्वनैरुपशोभिता सा च सा च ताम् ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवमुक्तः किमुक्तवान्देव इत्यतो भगवान्वक्तीक्ति वक्ति ॥ श्रीभगवानिति । अहमार्यसमन्वितः सबलो यदुवर्गद्रुह यदुवर्गाय द्रुह्यतीति स तथा तं हत्वा भवतो गेहमायास्ये हृत्प्रियं च वितरिष्ये दास्ये ॥ १७ ॥ भगवतेत्याज्ञानवज्ञाने हेतूक्तिः । कर्म कृष्णागमनादिकमवेद्य निवेद्य गृहं स्वं ॥ १८ ॥ गोपैः परिवारितो मधुरां दिदृक्षुर्मधुरां प्राविशत् ॥ कृष्णः स्फाटिकतुङ्गगोपुरां स्फटिकात्मोच्चपुरद्वारयुक्तां बृहन्ति महान्ति स्फुरन्ति प्रकाशमानानि हेम्ना कृतानि कपाटानि यस्मिंस्तत्तोरणं । तोरणोऽस्त्री बहिर्द्वारं तु गोपुरमित्यमराद्बहिर्द्वारं यस्याः सा तां बृहत्स्फुरद्धेमकपाटस्तेभ्यो निर्मित्तोभ्योऽराणां वैरिविरचितरणानर्हामिति वा ताम्रैरारैर्लोहविशेषैर्निर्मिताः कोष्टा धान्यादिधामानि । पुंसि कोष्टोऽन्तर्जठरं कुसूलोऽन्तर्गृहं तथेत्यमरः । तथा परिखास्तदात्मका यस्यां सा दुरासदां दुष्प्रवेशामुद्यानानि दूरस्थवनानि रम्याणि रमणीयान्युपवनानि समीपवर्तिवनानि तेषामालयः पङ्क्तयस्ताभिः शोभितां । उद्याना ऊर्ध्वं यानं येषां ते रम्योपवनेष्वलया भ्रमराश्च तैः शोभितामिति वा दुरासदा च साऽऽमुदा यानं येषां तेऽलिनस्तैः शोभिता च तामिति पदमेकं वा । पुरीं ददर्शेत्यन्वयः ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदा भगवान् नित्यकार्यकर्त्तेति भगवत्कृतस्य विघाताभावाच्च तावत् पुरीं द्रक्ष्यामह इति वाक्यात् आगमनस्य प्रार्थितत्वात् कालान्तरे समागन्तव्यमित्याह । आयास्य इति । उदासीनवचनाभावाय स्वाभिप्रेतं चाह । आगमिष्यामि परमार्यसमन्वितः इदानीं विद्यमानानां मध्ये बलभद्रसहितः प्रार्थितानां पूरणार्थमुद्धवः समागमिष्यतीति भावः । तर्हि द्वाभ्यामेव गन्तव्यामिदानी-

मेवेति चेत्तत्राह । यदूचक्रद्रुहं हत्वेति । सर्वेषामेव यादवानां चक्रस्य यो द्रोहकर्त्ता तं कंसं हत्वा सिद्धवत्कारेण कथनात् सन्देहोऽपि अप्रार्थितोऽप्यायास्ये समागमने प्रयोजनं सूचयति । वितरिष्य इति । सुहृदामत्रत्यानां पाण्डवानां च प्रियं वितरिष्य इति अनेन तेषां सुखार्थं त्वां प्रेषयिष्यामि तदर्थमागमिष्यामीति सूचितम् ॥ १७ ॥ एवमागमनं निर्द्धार्य भगवदाज्ञया गृहे गत इत्याह । एवमुक्त इति । भगवता अप्रतिहतसामर्थ्येन एवमाज्ञप्तः इदानीमेव नेष्टं सिद्धमिति विमनाः अग्रे कार्यमपि करिष्यतीति इव स्वयं प्रथमतः एव पुरीं प्रविष्टः कंसाय भगवानानीत इति स्वकृतं कर्मावेद्य गृहं ययौ शीघ्रमेव स्वगृहङ्गतः ॥ १८ ॥ एवं पूर्वसम्बधिनां निरोधमुक्त्वा वार्त्तयैव पूर्वमपि निरोधं सम्पाद्य स्वरूपेणापि सम्पादयितुं स्वयं मथुरां दृष्टवानित्याह । अथेति । अथ भिन्नक्रमेण मित्रभूतैरेव गोपालैः सहापराह्णे तृतीये भागे भगवान् आविष्कृतसर्वधर्मा कृष्णः एतदर्थमेवावतीर्णः कंसमारणार्थं यत्नः कर्त्तव्य इति सङ्कर्षणसमन्वितः अन्यथा उभयोरवतारो न स्यात् । गोपैः परिवृत इति । एतैः सह एतावत्कालं क्रीडा कृतेति ज्ञापनार्थं शोभार्थं मनसि शङ्काभावार्थं तेभ्यः माहात्म्यप्रदर्शनार्थं च मथुरां स्वनगरीं प्रकर्षेणाविशत् सामीप्ये सप्तमी पुरद्वारनिकटे गत इत्यर्थः ॥ १९ ॥ ततो भगवान् दृष्टवानित्याह । ददर्शेति । भगवद्दृष्टां पुरीं वर्णयति चतुर्भिः । पुरुषार्थचतुष्टयपूर्णां स्वरूपतो द्रव्यतश्च वैचित्र्येणाप्यनुत्तमाम् अलंकृतां सांप्रतं तु भगवद्दर्शनार्थिभिः तां मथुरां दृष्ट्वैव सन्तोषं प्रापितवान् स्फाटिकानि तुङ्गानि गोपुराणि पुरद्वाराणि च यस्यां द्वारादिषु बृहन्ति सुवर्णकपाटानि तोरणानि च यस्यां ताम्रमयाः आराः कोष्ठानि च प्रकाराः यस्याः, केचित्तु आरशब्देन आरकूटमामाहुः ताम्रमयान्यारकूटमयानि च कोष्ठानि यस्याः परिखा परितो गर्त्तः तया कृत्वा दुरासदां यमुना तु दूर इति परिखाया न वाधः उद्यानानि पुष्पप्रधानवाटिकाः तै रम्याम् उपवनैश्च फलप्रधानैः उपसमीपे शोभितां द्वारप्राकारपरिखा फलपुष्पैः सुशोभिता । पञ्चचा नगरी रम्या सालंकारा च रूपिता ॥ २० ॥

श्रीसुबोधिनी–सारः

कृष्णोक्तिः । आर्येण रामेण समन्वितो युक्तोऽहं भवतस्तव गेहान् आयास्ये यदुमण्डलाय द्रुह्यतीति तं कंसं हत्वा सुहृदां प्रियं सुखं विस्तारयिष्यामि ॥ १७ ॥ भगवता एवमुक्तः सोऽक्रूरो विमनाः खिन्न इव पुरीं प्रविष्टः कंसाय कर्मानयनरूपम् आवेद्य संश्राव्य गृहं प्राप ॥ १८ ॥ अथानन्तरमपराह्णे भगवान् कृष्णः संकर्षणान्वितः गोपैः परिवेष्टितो दिदृक्षुर्मथुरां प्राविशत् ॥ १९ ॥ तां मथुरां कृष्णो ददर्श तां विशिनष्टि । स्फाटिकमयानि तुंगानि उच्चानि गोपुराणि नगरीद्वाराणि द्वाराणि गृहद्वाराणि यस्यां तां बृहन्ति हेममयानि स्वर्णमयानि कपाटानि तोरणानि च यस्यां तां ताम्रम् आरो लोहकूटश्च तन्मयाः कोष्ठा धन्यागाराश्वशालादयो यस्यां तां परिखाभिर्दुरासदां दुर्गमाम् उद्यानानि प्रसिद्धवनानि रम्याण्युपवनानि कृत्रिमवनानि तैरुपशोभिताम् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सम्प्रार्थितो भगवानाह—आयास्य इति । यदुचक्राय यदुवंशसमूहाय द्रुह्यतीति तथा तं कंसं हत्वा आर्यसमन्वितः बलभद्रसहितोऽहं भवतो गेहमायास्ये आगमिष्यामि । अन्येषामपि सुहृदां प्रियं वितरिष्ये करिष्यामि, तव तत्करणे कः सन्देह इत्याशयः ॥ १७ ॥ एवं भगवता उक्तः सोक्रूरो विमना इव 'भगवदाज्ञाया अनुलङ्घ्यत्वात् तद्वियोगस्य च दुःसहत्वात् तथाप्यायास्ये इत्याश्वासनात् किञ्चिद्विमनाः सन्' पुरीं प्रविष्टः । कंसाय रामकृष्णानयनरूपं स्वकृतं कर्मावेद्य स्वगृहं ययौ ॥ १८ ॥ अथाक्रूरगमनानन्तरं पुरीं दिदृक्षुः गोपैः परिवारितः सङ्कर्षणान्वितश्च भगवान् कृष्णः अपराह्णे मथुरां प्राविशदित्यन्वयः ॥ १९ ॥ तां मथुरां ददर्श । तां पुरीं वर्णयति—स्फाटिकानि स्फटिकमयानि तुङ्गान्युच्छ्रुतानि गोपुराणि पुरद्वाराणि अन्यानि च द्वाराणि यस्यां ताम् गोपुरेषु बृहन्ति हेममयानि कपाटानि तोरणानि च यस्यां ताम् । ताम्रं च आरः आरकूटः तन्मयाः कोष्ठा धान्यागाराः अश्व शालादयो यस्यां ताम् । परिखाः परितः खातागर्तास्ताभिर्दुरासदां दुर्गमाम् , उद्यानानि दूरस्थानि वनानि रम्याण्युपवनानि तु निकटानि तैरुपशोभिताम् ॥ २० ॥

अन्वितार्थप्रकाशिका

आयास्य इति ॥ यदुचक्राय यदुवंशसमूहाय द्रुह्यतीति तथा तं कंसं हत्वा आयसमन्वितः बलभद्रसहितोऽहं भवतो गेहमायास्ये आगमिष्यामि । तद्भावः । अन्येषामपि सुहृदां प्रियं वितरिष्ये करिष्यामि । तद्भावः । अत्र कंसं हत्वेत्युक्तिः संकेतेनैव मन्त्रभङ्गभयादिति ज्ञेयम् ॥ १७ ॥ एवमिति ॥ एवं भगवता उक्तः सोऽक्रूरो विमना इव आयास्ये इति स्वीकारेऽपि संप्रति अनागमेन किंचिद्विमनाः सन् पुरीं प्रविष्टः कंसाय रामकृष्णानयनरूपं स्वकृतं कर्मावेद्य स्वगृहं ययौ ॥ १८ ॥ अथेति ॥ अथ पुरीं दिदृक्षुः गोपैः परिवारितः सङ्कर्षणान्वितश्च भगवान् कृष्णः अपराह्णे मथुरां प्राविशत् ॥ १९ ॥ ददर्शेति ॥ स्फाटिकानि स्फटिकमयानि तुङ्गान्युच्छ्रितानि गोपुराणि पुरद्वाराणि अन्यानि च गृहादिद्वाराणि यस्यां तां गोपुरद्वारेषु बृहन्ति हेममयानि कपाटानि तोरणानि बहिर्द्वाराणि च यस्यां सा । ताम्रं च आरः आरकूटः पित्तलाख्यः तन्मयानि कोष्ठानि धान्यागाराश्वशालादयो यस्यां तां परिखाः परितः खाता गर्तास्ताभिर्दुरासदां दुर्गमामुद्यानानि दूरस्थानि वनानि रम्याण्युपवनानि तु निकटानि तैरुपशोभितां तां पुरीं भगवान् ददर्श ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आदौ यदुचक्राय द्रुह्यतीति यदुचक्रध्रुक् तं कंसं हत्वा वितरिष्ये दास्यमि करिष्यामित्यर्थः ॥ १७ ॥ कंसाय स्वकृतं कर्म श्रीकृष्णागमनरूपमावेद्य समर्प्य ॥१८॥ गोपैः परिवारितः अपराह्णे दिनस्यांतिमे यामे मथुरां प्राविशत् ॥ १९ ॥ अद्य चतुर्भिः श्लोकैः पुरीं वर्णायन्नाह ददर्शेति तां मथुरापुरीं हरिः ददर्श तां कथंभूतां स्फाटिकानि स्फटिकै रचितानि तुंगानि गोपुराणि पुरद्वाराणि द्वाराणि गृहद्वाराणि च यस्यां तां बृहन्ति हे मम यानि सुवर्णमयानि कपाटानि तोराणानि च यस्यां तां ताम्रारकोष्ठां ताम्रं च आरम् आरकुटः पित्तलं च ताभ्यां रचिताः कोष्टाः धान्यगृहाः दुर्गप्राकाराः वा यत्र तां परितः खनिताः परिखाः गर्त्तास्ताभिः दुरासदां दुर्गमां उद्यानैः फलप्रधानदूरवाटिकाभीरम्या चासावुपवनैः पुष्पप्रधानसमीपवाटिकाभिरुपशोभिता च ताम् ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमक्रूरसंप्रार्थितो भगवानाह । आयास्य इति । यदुचक्राय यदुवंशजसमूहाय द्रुह्यतीति तं कंसं हत्वा निपात्य, ततः अहं, आर्यसमन्वितः अग्रजेन सहितः सन्, भवतः गेहं प्रति, आयास्ये । आगमिष्यामि । सुहृदां प्रियं वितरिष्ये । अन्येषां सुहृदां प्रियमपि करिष्यामीत्यर्थः ॥१७॥ एवमिति ॥ एवमित्थं, भगवता उक्तः सः । अक्रूरः, बिमनाः इव, किंचिदसंतुष्टमना इवेत्यर्थः । भूत्वेति शेषः । पुरीं प्रविष्टः सन्, कर्म रामकृष्णावानीताविति स्वकृतं कर्म, कंसाय आवेद्य समर्प्य, तयोरानयनं श्रावयित्वेत्यर्थः । गृहं स्वभवनं, ययौ ॥१८॥ अथेति । अथाक्रूरगमनानन्तरं, दिदृक्षुः मथुरां द्रष्टुमिच्छन् भगवान्, कृष्णः अपराह्णे पराह्णकाले, संकर्षणसमन्वितः । गोपैः परिवारितः सन्, मथुरां प्राविशत् ॥ १९ ॥ श्रीकृष्णदृष्टां पुरीमनुवर्णयति चतुर्भिः । ददर्शेति कृष्णः । तां यादवराजधानीत्वेन प्रसिद्धां मथुरां, ददर्श । कथंभूतां, स्फाटिकानि स्फटिकमणिमयानि तुङ्गान्यत्युच्छ्रितानि गोपुराणि पुरद्वाराणि द्वाराणि अन्यानि सर्वजनगृहद्वाराणि च यस्यां तां, 'गोपुरं तु पुरद्वारे' इति विश्वः । बृहन्ति हेममयानि कपाटानि तोरणानि च यस्यां तां, ताम्रं शुल्बं च आरः आरकूटश्च तन्मयाः कोष्ठा धान्यागाराश्वशालादयो यस्यां तां, परिखाः परितः खातगर्त्तास्ताभिर्दुरासदा दुर्गमा तां, उद्यानानि दूरस्थानि वनानि रम्याण्युपवनानि निकटानि वनानि च तैरुपशोभिता ताम् ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

आयास्य इति : १० ४१.१७

भक्तत्राणं खलध्वंसः कार्यमेतद् द्वयं मम । अन्त्यं विना न चाद्यं स्यादित्यूचे युक्तमच्युतः ॥ २१ ॥

एवमुक्त इति : १०.४१.१८.

श्रीशन्यस्तमनाः सनातनपदद्रष्टा तदानीमसावक्रूरो विमना इवेति वदतस्त्वेवं मुनेराशयः ।
आज्ञप्तं नृप यद्यथा हि भवता सम्पादितं तन्मयेतीदृग्वृत्तिविवर्त एव स ययौ सद्यो नृपस्यालयम् ॥ २२ ॥

अथेति : १०.४१.१९.

आसीत्कालो वैरिणोऽद्यावधीष्टो जातः कामं सोऽधुनेष्टो ममेति ।
ज्योतिश्चक्षुर्लक्षयन् वारिजाक्षः सन्मित्राढ्यः प्राविशत्तां तदानीम् ॥ २३ ॥
अनेकरत्नद्युतिचित्रतोरणां पुरीं हिरण्यप्रचुरां सुशोभनाम् । मुदान्विता गोपगणा मुहुर्मुहुर्निरीक्ष्य हर्षादभितोऽन्ववर्णयन् ॥ २४ ॥
अम्बरं च मनुजा न केवलं स्वीयपुर्युपरि चापि पश्यत । व्यापकत्वमविवादमस्य तद् बोधयन्स्पृशति स ध्वजोऽम्बरम् ॥ २५ ॥
स्फुटा यौतप्रोतस्थितिरिह गुणानामियमहं न चान्यद्रूपं मे जगदपि तथा ब्रह्म विततम् ।
जनानेवं सत्यापयितुमबुधान् स ध्वजपटः स्पृशत्यद्धाऽनन्तं पदमपि च विष्णोः प्रतिदिनम् ॥ २६ ॥
देहाहङ्कृतिनक्रभाजि विचलद्दुष्टाक्षमीनोत्करे वेलोद्यद्विषयोदके प्रतिपदं दुःखैकशैवालके ।
मग्नान् संसृतिसागरेऽखिलजनानाकारयत्यन्तिके पूरूर्ध्वध्वजपाणिभिर्द्रुतमिहायातेति मन्यामहे ॥ २७ ॥
केचिच्छुक्लगुणावलम्बनपराः केचित् त्रिदण्डान्विताः काषायाम्बरधारिणोऽपि कति वा मुक्तालियुक्तश्रियः ।
यद्वासेन जडा अपि ध्वजापटा नित्योल्लसद्वृत्तयो विष्णोर्भ्रान्तिपदे जगत्यनुपमां तामाढ्यभूमिं नुमः ॥ २८ ॥
यस्यां सन्ततमहिताऽऽकलितानुभवाध्वजस्थितिश्चित्रम् । दर्शनतो मनुजानां फलितानुभवाध्वजश्रमं हरति ॥ २९ ॥
एकः स्वरिन्दुः स क्षीणश्चित्रमत्र सुधामृतः । पूर्णश्रियो विराजन्ते चन्द्रशाला गृहे गृहे ॥ ३० ॥
चमत्कृतिरियं त्वन्या न दृष्टा जातु न श्रुता । यत्रोल्लसन्तो दृश्यन्ते निर्जले कामकेतवः ॥ ३१ ॥
स जनश्च ससत्यश्च सतपस्को महस्थितिः । युक्तं सौख्यप्रदो नित्यं विहारोऽपि हरेस्तथा ॥ ३२ ॥
प्राकारो गोगणो वाप्यो गृही च वनिताजनः । सर्वोऽप्ययं लसद्वारश्चित्रमेकपदान्वितः ॥ ३३ ॥
प्रथितरिपुनित्रासाऽप्यत्र सैव प्रशंस्या भवति सकलभव्योद्गेय सौभाग्ययोग्या ।
लसितहरिपदा स्याद्या पुरी देहरूपा स्फुटमिह मथुरैषा तादृगर्थे प्रमाणम् ॥ ३४ ॥

ददर्शेति : १०.४१.२०.

पश्यन्नेवमगाधनीरपरिखान् द्राधिष्ठगाढोन्नतान् प्राकारानथ गोपुराणि विपणी रथ्याश्च रथ्यान्विताः ।
हर्म्याण्युन्नतिभाञ्जि हेमखचितप्रासादसौधान्यपि गोपैरुद्गतकौतुकैः स सबलस्तामाविवेशाऽच्युतः ॥ ३५ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण ने कहा—हे तातपाद ! यदुवंश का नित्य वैरी कंस का विनाश करके आपके द्वार ज्येष्ठ बन्धु श्रीबलभद्र जी के साथ अवश्य आऊँगा और सुहृदजनों का अवश्य अभीष्ट करूँगा ॥ १७ ॥ श्रीशुकदेव जी ने कहा राजन् परीक्षित् ! भगवान् के श्रीमुख के विश्वास पूर्ण वाकयों को सुनकर प्रभु विलम्ब से पधारेंगे इस व्यथा से कुछ उदास चित्त से मथुरापुरी में प्रवेश किया और कंस के भवन गए वहाँ भगवान् कृष्ण बलभद्रजी एवं नन्दराय प्रभृति गोपवृन्द मथुराजी आ गए हैं यह–वृत्तान्त सुनाकर अपने निवास की ओर श्री अक्रूरजी चले गए ॥ १८ ॥ षडैश्वर्य सम्पन्न भगवान् श्रीकृष्ण श्रीबलभद्र भैयाजू एवं समस्त गोपजनों के साथ मथुरा नगरी को देखने अपराह्न काल में पधारे ॥ १९ ॥ "चतुर्विध पुरुषकारों सम्पन्न श्री मथुरा नगरी में प्यारे मथुराधीश प्रभु पधार रहे हैं' इसका निरूपण श्रीशुकाचार्य जी महाराज चार श्लोकों में कर रहे हैं- दृढ दरवाजों से, परकोटों से, खाईयाँ से पुष्पों से और फलों से समलङ्कृत मथुरा नाथ निजपुरी में पधार रहे हैं-श्री मथुरा नगरी के गोपुर द्वार अति उन्नत एवं स्फटिक मणि के बने थे, सुवर्ण के समुज्ज्वल उन्नत किवाड और तोरण थे, अनादि भरने के लिए ताम्र के एवं पीतल के कोष्ठ कोठार बनाए थे, चारों ओर गहरी खाई के कारण शत्रुओं को प्रवेश करना आसान नहीं था, नगरी के चारों ओर उपवन उद्यान थे नगरी के भीतर स्थान स्थान पर बगीचे एवं तरुवर राजि विलसित थी ॥ २० ॥

सौवर्णशृङ्गाटकहर्म्यनिष्कुटैः¹ श्रेणीसभाभिर्भवनैरुपस्कृताम् ।
वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु ॥ २१ ॥
जुष्टेषु जालामुखरन्ध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादिताम् ।
संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्याङ्कुरलाजतण्डुलाम् ॥ २२ ॥
आपूर्णकुम्भैर्दधिचन्दनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः ।
²सवृन्दरम्भाक्रमुकैः सकेतुभिः स्वलंकृतद्वारगृहां ³सपट्टिकैः ॥ २३ ॥
तां सम्प्रविष्टौ वसुदेवनन्दनौ वृतौ वयस्यैर्नरदेववर्त्मना ।
द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—सौवर्ण, शृङ्गाटक, हर्म्य, निष्कुटैः, श्रेणीसभाभिः भवनैः, उपस्कृताम् , बलभीषु, वेदिषु, वैडूर्यव्रज, अमल, नील विद्रुमैः, मुक्ता हरिद्भिः, उपस्कृतम् , ददर्श ॥ २१ ॥ जुष्टेषु, जालामुख, रन्ध्राकुट्टिमेषु, आविष्ट, पारापत, बर्हिनादिताम्, संसिक्त, रथ्यापणमार्ग, चत्वराम् , प्रकीर्णमाल्याङ्कुर, लाजतण्डुलाम् , मथुराम् , ददर्श ॥ २२ ॥ दधि, चन्दनोक्षितैः, आपूर्णकुम्भैः, सपल्लवैः, प्रसूनदीपावलिभिः, सवृन्दरम्भाक्रमुकैः, सकेतुभिः, सपट्टिकैः, स्वलङ्कृत द्वारगृहाम् मथुराम् , ददर्श ॥ २३ ॥ हे नृप ! वयस्यैः, वृतौ, नरदेववर्त्मना, ताम् , सम्प्रविष्टौ, वसुदेवनन्दनौ, दृष्टुम् , उत्सुकाः, त्वरिताः, एव पुरस्त्रियः, समीयुः, च, हर्म्याणि, आरुरुहुः ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सौवर्णाः "शृङ्गाटकाश्चतुष्पथा हर्म्याणि धनिनां गृहाणि च निष्कुटा गृहोचिता आरामाश्च तैः । श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिरुपवेशस्थानैरन्यैश्च भवनैर्गृहैरुपस्कृतामलंकृताम् । अमलाः स्फटिकाः । हरितो मरकताः । वैदूर्यादिरत्नैर्जुष्टेषु वलभ्यादिष्वाविष्टैरुपविष्टैः पारावतैर्बर्हिभिश्च नादिताम् । तत्र वलभ्यो गृहपुरोभागेषु वक्रदारुच्छादनानि वेदयो वलभीनामधोदेशे विरचिता अवष्टम्भवेदिकाः जालामुरंध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिबद्धा भमयस्तेष्विति । रथ्या राजमार्गाः आपणाः पण्यवीथयः । मार्गा अन्ये च । चत्वराण्यंगणानि । संसिक्तानि रथ्यादीनि यस्यां ताम् । प्रकीर्णा माल्यादयो यस्यां ताम् ॥ २१–२२ ॥ तथा स्वलंकृतानि द्वाराणि येषां ते गृहा यस्यां ताम् । कैः । आपूर्णैः कुम्भैर्दध्ना चन्दनेन चोक्षितैः सिक्तैः प्रसूनानां दीपानां चावलयो येषु तैः । वृन्तैः फलगुच्छैरुपलक्षिता रम्भाः क्रमुकाश्च तत्सहितैः । सकेतुभिः केतवो ध्वजास्तत्सहितैः ।

---

१. निष्कुट श्रेणी–विज. । २. सवृन्त–वीर. विज. । ३. सपट्टिकां–विज. ।

पट्टिका वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैः। तत्रेयं रीतिः। द्वारेषूभयतस्तंडुलानामुपरि पूर्णकुम्भास्तत्परितः प्रसूनावलयः कण्ठे पट्टिका मुखे चूतादिपल्लवास्तदुपरि पात्रांतरे दीपावलयस्तत्सन्निधौ सवृंतरंभाः क्रमुकस्तम्भाः केतवस्तोरणानि चेति ॥ २३ ॥ नरदेववर्त्मना राजमार्गेण तां पुरीं संप्रविष्टाविति द्वितीयान्तम् ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"शृङ्गाटकं भवेद्वारिकण्टके च चतुष्पथे" इति मेदिनी। 'हर्म्यं तु धनिनां गृहम्' इति शाश्वतः। "निष्कुटस्तु गृहोद्याने स्यात्केदारकपाटयोः" इति मेदिनी। "श्रेणिः स्त्रीपुंसयोः पंक्तौ समानशिल्पिसंहतौ" इति च। "सभा समाजके गोष्ठ्यां द्यूतमंदिरयोरपि" इति च। 'भवनं स्याद्गृहे भावे' इति च। उपस्कृतामलंकृताम्। वलभीष्वाच्छादनवक्रदारुषु। वेदिषु परिष्कृतभूमिषु। वलभी। पटलाधारो वंशपञ्जरस्तस्य चूडा वेति क्षीरस्वामी। "आच्छादनं स्याद्वलभी गृहाणाम्" इति हलायुधः। 'छाजा' इति भाषायामपि मध्यदेशीयानाम्। सा चेष्टकादिनिर्मितगृहप्रान्तैः पाषाणादिनिर्मितच्छादनश्रेणी 'वलभी चन्द्रशालिका' इति त्रिकाण्डशेषः। सा च गृहोपरि गृहम्। तथा च माघकाव्ये—"यस्यामसेवन्त नमद्वलीकाः समं वधूभिर्वलभीर्युवानः" इति। वेदिर्गृहाग्र इष्टकादिबद्धा विश्रान्तिभूः॥ (२१)॥ नादितां कारितनादाम्। तत्प्रतिध्वनियुक्तान्तर्गृहामित्यर्थः॥ २१-२२॥ तत्र कुम्भाद्यलंकारे। क्रमुकः पूगः "क्रमुकस्तु पुमान्भद्रमुस्तके ब्रह्मदारुणि। फले कार्पासिकायाश्च पट्टिकालोध्रपूगयोः" इति मेदिनी। रंभाः कदली वृक्षाः "रंभा कदल्यप्सरसोर्ना वेणौ वारणान्तरे" इति च॥ २३॥ वसुदेवनन्दनावित्युक्तेर्मथुरागमनसमये नन्दनन्दनवपुषो निःसृत्य वसुदेवनन्दनो बलदेवेन साकं गोपैश्च मथुरां ययौ। नंदनंदनस्तु प्रकटलीलामन्तर्धाप्य बृन्दावन एव तस्यावन्तर्धाय निजवपुरिति। अत एव "बृन्दावनं परित्यज्य न याति नंदनंदनः। सदैव तत्र रमते प्रकटोऽप्रकटः क्वचित्" इति पाद्मादिषु स्फुटम्। उत्सुका जातोत्कंठाः॥ २४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सौवर्णेति तैर्व्याख्यातम् तत्र वलभी पटलाधारो वंश्यपञ्जरःतस्य चूडा वा इति क्षीरस्वामी आच्छादनं स्याद्वलभी गृहाणामिति हलायुधः। तत्र छाजेति भाषा मध्यदेशीयानां सा चेष्टकादिनिर्मितगृहप्रान्ते पाषाणादिनिर्मितच्छादनश्रेणी बलभीश्चन्द्रशालिकेति त्रिकाण्ड शेषः। सा च गृहोपरि गृहं तथा च माघकाव्ये "यस्यामसेवन्त नमद्वलीकाः समं वधूभिर्वलभीर्युवान" इति वेदिर्गृहाग्रे इष्टकादिबद्धा विश्रान्तिभूः वलभ्यादिषु आविष्टा उपविष्टाः किम्वा तेषु वर्त्तमाना ये आविष्टा मत्ताः पारावतादयस्तैर्नादितां कारितनादां तत् प्रतिध्वनियुक्तान्तर्गृहामित्यर्थः॥ २१॥ अधुना लोकेषु धनुर्महख्यापनार्थं कंसेन कृतां, यद्वा नित्योत्सवमय्यास्तत्पुर्याः स्वभावतः पौरैर्नित्यक्रियमाणामलङ्कारादिशोभां श्रीकृष्णप्रवेशमङ्गलसूचनीं वर्णयति। संसिक्तेति सार्द्धेन। संशब्देन सम्यग्रजानाशनपूर्वकं सुगन्धिजलादिभिः सेको बोध्यते अङ्कुरा नवोद्भिन्नयवादयः एषां सर्वत्र सर्वसम्भवानुक्रमो ज्ञेयः एवमग्रेऽपि॥ २२॥ आ शब्देन पवित्रोत्तमजलादिना सम्यक् पूरणं बोध्यते अलङ्कृतेति सुशब्दसूचितं दर्शयति। दधीत्यादिभिः। अन्यत्तैः तत्र तोरणानि चेति कपाटतोरणमित्यस्मादाकृष्टम्॥ २३॥ तामिति त्रिकम्। संप्रविष्टावित्युक्तं सम्यक् प्रवेशमेव दर्शयति। वृतावित्यादिना। समीयुः सम्यक् नैकट्येन किम्वा सङ्घशः प्राप्ता एव हर्म्याणि चारुरुहुरेव निवारिता अपि न निवृत्ता बभूवुरित्यर्थः। स्वयमप्यौत्सुक्यात् सम्बोधयति नृपेति अत्र टीकायां द्वितीयान्तमित्यर्थः॥ २४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बलभ्यश्चन्द्रशालिका गृहोपरिगृहाणीति यावत्, बलभ्यादिषु आविष्टा उपविष्टाः, किंवा तेषु वर्त्तमाना ये आविष्टामत्ताः पारावतादयस्तैर्नादितामधुना लोकेषु धनुर्महख्यापनार्थं कंसेन कृताम्। यद्वा, नित्योत्सवमय्यास्तत्पूर्य्याः स्वभावतः पौरैर्नित्यक्रियमाणामलंकारादिशोभां श्रीकृष्णयात्रामंगलसूचनीं वर्णयति-संसिक्तेति सार्द्धेन। संशब्देन सम्यग्रजोनाशनपूर्वकं सुगन्धिजलाभिषेको बोध्यते, अंकुरा नवोद्भिन्नमुद्गादयः, संसेकादीनां बाह्यान्तरप्रदेश-विशेषकतापेक्षया, किंवा दर्शनक्रमानुसारेण तत्तत्क्रमेणोक्तिर्ज्ञेया। आ शब्देन पवित्रोत्तम-जलादिना सम्यक् पूरणं बोध्यते। स्वलंकृतेति सु-शब्दसूचितं दर्शयति—दधीत्यादिभिः अन्यत्तैर्व्याख्यातम्। तत्र तोरणानि चेति मूले तदनुक्तावपि सद्रीत्यपेक्षया लिखितम्॥ २१-२३॥ संप्रविष्टावित्युक्तम्, सम्यक् प्रवेशमेव दर्शयति—वृतावित्यादिना. समीयुः सम्यङ् नैकट्येन किंवा सङ्घशः प्राप्ताः, एव अपि हर्म्याण्यारुरुहुरपि, चकारादुच्चप्राचीरादि च, यत उत्सुका लालसाक्रान्तचिताः, स्वयमप्यौत्सुक्यात् सम्बोधयति—नृपेति, वसुदेवनन्दनाविति पूर्वोक्तवसुदेवसुतावितिवत्॥ २४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सौवर्णाः शृङ्गाटकाश्चतुष्पथाः हर्म्याणि धनिनां गृहाणि च तेषु निष्कुटाः गृहोचिता आरामास्तैः श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिरुपवेशस्थानैरन्यैश्च भवनैर्गृहैरुपस्कृतामलंकृताम् अमलस्फटिकाः हरितमरकताः वैडूर्यादिरत्नैर्जुष्टेषु संयुक्तेषु

बलभ्यादिषु आविष्टैः पारावतैः मयूरैश्च नादितां तत्र वलभ्यः गृहपुरोभागस्तम्भविहिताच्छादनोपष्टम्भवक्रदारूणि वेदयः वलभीनामधोदेशे विरचिता अवष्टम्भवेदिकाः ॥ २१ ॥ जालामुखरन्ध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिभूमयः रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गाः अन्ये चत्वराण्यङ्गणानि संसिक्तानि रथ्यादीनि यस्यां विकीर्णास्तत्र तत्राकीर्णा माल्यादयो यस्यां तत्र माल्यानि मालार्हाणि पुष्पाणि ॥ २२ ॥ आपूर्णकुम्भैः दध्ना चन्दनेनोक्षितैः सिक्तैः प्रसूनानां दीपानाञ्चावलयो येषु तैः सवृन्दाः फलगुच्छैः सहिताः रम्भाः कदल्यः क्रमुकाश्च तैः केतुभिश्च सहितैः पट्टिकाः वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैश्च स्वलंकृतानि द्वाराणि येषां ते गृहा यस्यां तां तत्रेयं रीतिः द्वारभूम्युभयतः तण्डुलानामुपरि कुम्भाः तत्परितः प्रसूनावलयः कण्ठपट्टिकाः मुखे चूतादिपल्लवाः तदुपरि पात्रान्तरे दीपावलयः तत्संनिधौ रम्भाः क्रमुकाः केतवस्तोरणानि चेति ॥ २३ ॥ तामेवंभूतां पुरीं वयस्यैः सखिभिः सहितौ नरदेवानां वर्त्मना राजमार्गेण प्रविष्टौ वसुदेवनन्दनौ द्रष्टुं पुरस्त्रियस्त्वरिताः समीयुः तत्र तत्र समुदिता बभूबुः तथा हे नृप ! उत्सुकाः सत्या हर्म्याणि चारुरुहुः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सौवर्णैः सुवर्णबद्धैः शृङ्गाटकैश्चतुष्पथैः हर्म्यैः धनिनां निवासैः निष्कुटैः पथिकावासैः गृहवाटीभिर्वा श्रेणीसभाभिः गृहपङ्क्त्यन्तरालक्लृप्तसभाभिः श्रेणी वेश्या गृहपङ्क्तिः तत्पुरतः कृतसभाभिर्वा भवनैः प्रशस्तैः गृहैरुपस्कृताम् अलङ्कृतां वेदिषु परिष्कृतभूमिषु वलभीषु आच्छादनवक्रदारुषु प्रोतचित्रभलकेषु मुक्ताहरिद्भिः मुक्तावलिरश्मिमिश्रितैः वैदूर्यादिभिः ॥ २१ ॥ जुष्टेषु न्युप्तेषु जालानां गवाक्षाणामामुखरन्ध्रं मुखच्छिद्रपर्यन्तेषु विद्यमानेषु कुट्टिमेषु बद्धभूमिकेषु स्थलेषु आविष्टैरुपविष्टैः पारापतैः कपोतैः बर्हिभिर्मयूरैश्च नादित। शब्दितां चन्दनादिजलैः संसिक्ता आर्द्रीकृता रथ्या रथमार्गः आपणः विषद्यामार्गः पण्यवीथिकामार्गः प्रतिगृहं पन्थाः चत्वरश्चतुष्पथः विस्तृतमार्गः यस्यां सा तथा तां प्रकीर्णानि व्याप्तानि माल्याङ्कुरलाजतण्डुलानि यस्यां सा तथा ॥ २२ ॥ आपूर्णकुम्भैः स्वलङ्कृतानि द्वाराणि येषां ते तथा स्वलंकृतद्वारा गृहा यस्यां सा तथा तां कटिशैरापूर्णकुम्भैः दधिचन्दनरसेन चौक्षितैः सिक्तैः प्रसूनानां दीपानामावलयो येषु ते तथा तैः सपल्लवैः किसलयसहितमुखैः वृन्तेन प्रसवबन्धनेन सहितः सवृन्ता रम्भा कदली सवृन्तरम्भा तथा क्रमुकाः पूगाः तैः पट्टिकाय उपर्याततवितानवस्त्रेण सहिता सपट्टिका ताम् ॥ २३ ॥ या पूर्वं कर्णाकर्णिसौन्दर्या तां नरदेववर्त्मना राजमार्गेण ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नरदेववर्त्मना राजमार्गेण पुरीं प्रविष्टौ रामकृष्णौ द्रष्टुं पुरस्त्रियः समीयुः संहत्य जग्मुः। हर्म्याणि च काश्चिदारुरुहुः ॥ २४ ॥

गूढार्थदीपिनी

निष्कुटो गृहोद्यानम् बृहन्ति हेममयानि कपाटादीनि यस्याम् कृष्णः तां मथुरां ददर्शेत्यन्वयः। कीदृशीम् सुवर्णमयश्रृङ्गाटकादिभिः उपस्कृताम् अलङ्कृताम्। पुनश्च वैदूर्यादिरत्नैः जुष्टेषु बलभ्यादिषु आविष्टैः उपविष्टैः कपोतैः बर्हिभिः मयूरैश्च नादिताम्। पुनश्च। संसिक्तानि रथ्यादीनि यस्याम्। पुनश्च प्रकीर्णाः माल्यादयो यस्यां तां तथोक्तम्। सौवर्णेति द्वयम्। श्रृङ्गाटकं चतुष्पथं हर्म्यं धनिकगृहम्। श्रेण्यः एकशिल्पोपजीविनः कुट्टिमं मणिनद्धभूमिः। वज्रं हीरकः अमलः स्फटिकः। जालेति गवाक्षछिद्राणि। वलभी चन्द्रशालिका छज्जा इति। वेदयोऽत्र गुहाग्रे विश्रामभूमयः (चबूतरा) इति ॥ २१–२२ ॥ पुनश्च कीदृशीम्। स्वलङ्कृतद्वारा गृहाः यस्यां ताम्। कैः। आपूर्णकुम्भादिभिः। वृन्तं पुष्पादिगुच्छः। क्रमुकः पुनः इति। पट्टिका (झण्डी) इति ॥ २३ ॥ तां मथुरां सम्प्रविष्टौ तौ द्रष्टुं याः साधारण्यः स्त्रियः ताः समीयुः सम्मुखमाजग्मुः याश्च कुलाङ्गनाः ताश्च हर्म्याणि आरुरुहुरिति योज्यम्। हे नृप ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सौवर्णश्रृङ्गाटकैः सुवर्णमयचतुष्पथैर्हर्म्यैर्धनिनां गृहैश्च "निष्कुटैर्निष्कुटस्तु गृहोद्याने" इति कोशप्रसिद्धैर्गृहोचितैरारामैश्च श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिरुपवेशस्थानैरन्यैश्च भवनैरुपस्कृतामलंकृताम् वैडूर्य्यादिभिः मुक्ताहरिद्भिश्च जुष्टेषु यथायथं संयुक्तेषु वलभीषु गृहपुरोभागस्थवक्रदारुच्छादनेषु तथा वेदिषु वलभीनामधोदेशे विरचितासु अवष्टम्भभेदिकासु च जालामुखेषु गवाक्षच्छिद्रेषु च कुट्टिमेषु मणिवद्धासु भूमिषु च आविष्टैरुपविष्टैः पारावतैर्बर्हिभिश्च नादिताम् ॥ २१ ॥ संसिक्तानि रथ्यादीनि यस्यां तां तत्र रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गाः अन्ये चत्वराणि अङ्गणानि प्रकीर्णा माल्यादयो यस्यां ताम् ॥ २२ ॥ आपूर्णकुम्भैः दध्ना चन्दनेन च उक्षितैः सिक्तैःप्रसूनानां च आवलयो येषु तैः सपल्लवैः पल्लवसहितैः वृन्दैः फलगुच्छैरुपलक्षिताः रम्भाः कदल्यः क्रमुकाश्च तत्सहितैः सकेतुभिः केतवो ध्वजास्तत्सहितैः पट्टिका वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैः स्वलंकृतानि सुष्ठुभूषितानि द्वाराणि येषां ते गृहा यस्यां ताम् तत्रायं क्रमः द्वारेषूभयतस्तण्डुलानामुपरि पूर्णकुम्भाः

तत्परितः प्रसूनवलयः कण्ठे पट्टिका मुखे चूतादिपल्लवाः तदुपरि पात्रान्तरे दीपावलयस्तत्समीपे रम्भाः क्रमुकाः केतवस्तोरणानि चेति ॥ २३ ॥ नरदेववर्त्मना राजमार्गेण प्रविष्टौ वसुदेवनन्दनौ द्रष्टुं समुत्सुकाः पुरस्त्रियः समीयुः हर्म्याणि चारुरुहुरित्यन्वयः ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सौवर्णानि सुवर्णविकृतानि शृङ्गाटकानि चतुष्पथानि हर्म्याणि धनिकगृहाणि निष्कुटा गृहारामास्तेषां श्रेणयः पङ्क्तयः सभाश्च ताभिः । शृङ्गाटकचतुष्पथे हर्म्यादिर्धनिनां वासो गृहारामस्तु निष्कुटः श्रेणी रेखास्तु राजय इति सर्वतश्चामरः । भवनैरुपसंस्कृतामलङ्कृतां गतम् । वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिन्मणिभिरुपस्कृतामित्यन्वयः । जुष्टाः जुष्टाश्च जुष्टाः पुमांस्त्रियेत्येकशेषेण जुष्टेष्वित्यन्वयो वा । वलभीष्वाच्छादकमकन्दातेषु वेदिषु वेदिकासु ॥ २१ ॥ जुष्टेषु व्युप्तेषु जालानां गवाक्षाणामामुखरन्ध्रं तन्मुखछिद्रमभिव्याप्य विद्यमानाः कुटिमा निबद्धभूमयस्तेष्वाविष्टाः पारावता बर्हिणश्च तैर्नादितां संसिक्ताश्चन्दननीरदिभी रथ्या रथमार्गा आपणमार्गः पण्यवीथिकामार्गश्चत्वराणि चतुष्पथा यासां तां । चत्वरं च पथाश्लेषे स्थण्डिलाजिरयोरपीति हैमः । चत्वरं चाङ्गणेऽजिर इत्यमरादङ्गणानीति वा । प्रकीर्णा माल्यानि पुष्पाण्यङ्कुरा लाजा भ्रष्टव्रीहयस्तण्डुलाश्च यस्यां सा तां ॥ २२ ॥ दधिचन्दनोक्षितैरापूर्णकुम्भैः प्रसूनदीपावलिभिः सपल्लवैः सकिसलयैर्वृन्तैः प्रसवबन्धनैः सहिता रम्भाः क्रमुकास्तैः सकेतुभिर्ध्वजसहितैः स्वलङ्कृतद्वाराणि गृहाणि यस्यां सा तां पट्टिकाभिरुल्लोचैः सहिता तां ॥ २३ ॥ तां मथुरां वसुदेवनन्दनो वयस्यैर्वृतौ नरदेववर्त्मनैव प्रविष्टौ द्रष्टुं त्वरिताः पुरस्त्रियो हर्म्याण्युत्सुका आरुरुहुः ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

बाह्यतः शोभामुक्त्वा आन्तरशोभामाह । सौवर्णेति । सुवर्णमयाः शृङ्गाटकादयः तैरुपस्कृतामिति । शृङ्गाटकं पुरमध्यचतुर्मार्गं विश्रामस्थानमीरितं हर्म्याणि धनिनां गृहाः निष्कुटं कुट्टिमा भूमिः एकशिल्पोपजीविनां क्रयविक्रयस्थानं श्रेणिः सभानराणामुपवेशस्थानानि भवनानि सर्वेषामेव गृहाः सर्व एव सुवर्णमया इति न काप्यशोभा वैडूर्यादयो मणयः तैरप्युपस्कृतां वज्रो हीरकममलः स्फाटिकाः नीलो नीलमणिः विद्रुमः प्रवालः मुक्ताश्च हरिन्मणयश्च एभिर्निर्मिताः । पूर्वोक्ता बलभ्यादयश्च बलभ्यो द्वाराग्रे वक्रदारुनिर्मिताः उपवेशनार्थं वेदयः उपवेशनोच्चस्थानानि तेषु वैडूर्यादिभिरुपस्कृतामिति सम्बन्धः ॥२१॥ अग्रेऽपि तैर्जुष्टेषु योजितेषु जालामुखरन्ध्रकुट्टिमेषु गवाक्षरन्ध्रमध्यभूमिषु आविष्टा ये पारावताः बर्हिणश्च तेषां नादयुक्ताम् एवमुपरि सौभाग्यमुक्त्वा मार्गादिसौभाग्यमाह । सम्यक् सिक्ता रथ्यादयो यस्यां रथ्या राजमार्गाः आपणयः पण्यवीथी मार्गाः अन्ये चत्वराण्यङ्गणानि प्रकीर्णानि सर्वत्र माल्यानि पुष्पाणि अङ्कुराः यवाङ्कुराः लाजाः भ्रष्टधान्यानि तण्डुलाश्च मङ्गलार्थमेतेषां विकरणम् भगवानायास्यतीति ॥ २२ ॥ आ समन्तात् पूर्णकुम्भैः दध्ना चन्दनेन च उक्षितैः दध्ना सहितैश्चन्दनैः उक्षितैः पूर्णकुम्भैः सहितामिति प्रसूनानि दीपावलयः आरात्रिकाणि पल्लवसहिताश्चैते सवृन्दाः फलसहितारम्भाः कदल्यः क्रमुकाश्च पूगपोताः ध्वजसहिताः तैः सुष्ठु अलङ्कृताः द्वाराणि गृहाश्च यस्यां सपट्टिका रम्भादयः अत्रैवं प्रक्रिया द्वारस्योभयपार्श्वे कुम्भद्वयं तदुपरि दधिपूर्णपात्रं तत्र निकटे दीपाः रम्भाः क्रमुकाश्च ध्वजः पताका च चन्द्रवर्णाश्चन्द्राकारा आदर्शाश्च महोत्सवे सर्वत्र क्रियन्त इति ॥ २३ ॥ एवं पुरीं वर्णयित्वा तस्यां प्रविष्टावित्याह । तां सम्प्रविष्टाविति । सर्वेषां भगवद्दर्शनार्थमेव तथा निर्माणमिति येषां बहिरागत्य दर्शनं संभवति ताननुक्त्वा यासां न सम्भवति तासामुद्योगाधिक्यमाह । द्रष्टुं समीयुरिति । नगरीं प्रविष्टौ वसुदेवस्य पुत्रौ गोपालैर्वृतौ नरदेववर्त्मना राजमार्गेण संयुक्तौ गच्छन्तौ द्रष्टुं पुरुस्त्रियः समीयुः सम्यगाभिमुख्येन समागताः याः साधारण्यः पुरस्त्रियः दूरस्थाश्च बहिर्निर्गमनासमर्थाश्च हर्म्याणि उच्चगृहाम् आरुरुहुः । चकारात् यत्रैव स्थिताः द्रष्टुं शक्तुवन्ति तमेवारुरुहुरिति नृपेति सम्बोधनं राज्ञो गमनेऽप्येवं कुर्वन्तीति ज्ञापनार्थं भगवति तु विशेषः उत्सुका इति ॥ २४ ॥

श्रीसुबोधिनी-सारः

सौवर्णाः शृङ्गाटकाश्चतुष्पथाः हर्म्याणि धनिनां गृहाणि निष्कुटा गृहोचिता आरामास्तैः श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिर्भवनैरन्यगृहैरुपस्कृतामलङ्कृतां वैदूर्यहीरकस्फटिकनीलप्रवालैर्मुक्ताहरिद्भिः रत्नविशेषैर्जुष्टेषु वलभीषु उपरितनालंकारच्छादनभूमिषु वेदिषु तदधोवर्त्तिदेशेषु जाला मुखरन्ध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिबद्धा भूमयस्तेषु आविष्टैः स्थितैः पारावतैः कपोतैर्बर्हिभिर्मयूरैर्नादितां संसिक्तानि राजमार्गपण्यवीथिकामार्गचत्वराणि यस्यां तां प्रकीर्णानि माल्यानि पुष्पाणि अंकुराणि लाजास्तण्डुलाश्च यस्यां ताम् ॥ २१-२२ ॥ सुष्ठु अलंकृतानि द्वाराणि यस्यां तां कैः आपूर्णैः कुंभैर्घटैः दध्ना चंदनेनोक्षितैः सिक्तैः प्रसूनानां पुष्पाणां दीपानां चावलयो येषु तैः वृन्तैः फलगुच्छैः सहितै रम्भाक्रमुकैः सपल्लवैः सकेतुभिः सपट्टिकैः ॥ २३ ॥ तां पुरीं संप्रविष्टौ वसुदेवस्य नंदनौ रामकृष्णौ वयस्यैर्गोपैर्वृतौ केन नरदेवस्य राज्ञो वर्त्मना मार्गेण द्रष्टुं पुरस्त्रियः त्वरिताः समीयुः समाजग्मुः । हे नृप उत्सुका हर्म्याणि आरुरुहुः ॥ २४ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

सौवर्णाः शृङ्गाटकाश्चतुष्पथाः हर्म्याणि धनिनां गृहाश्च निष्कुटा गृहोचिता आरामाश्च तैः श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिरुपवेशनस्थानैश्च भवनैर्गृहैरुपस्कृतां अङ्कृलताम्। अमलः स्फटिकः हरितो मरकतः वैदूर्यादिरत्नैर्जुष्टेषु संयुक्तेषु वलभ्यादिषु आविष्टैः पारावतैर्बर्हिभिर्मयूरैश्च नादितामित्युत्तरेणान्वयः। तत्र वलभ्यो गृहपुरोभागे वक्रदारुनिर्मिताः उपवेशनोच्चस्थानानि, वेदयो गृहाग्रे इष्टकादिबद्धा विश्रामभूमयः॥ २१॥ जालामुखरन्ध्राणि गवाक्षच्छिद्राणि, कुट्टिमानि मणिबद्धभूमयः। संसिक्तानि रथ्यादीनि यस्यां ताम्। रथ्या राजमार्गाः, आपणाः पण्यवीथयः, मार्गाः प्रसिद्धाः, चत्वराणि अङ्गणानि। प्रकीर्णमाल्यादयो यस्यां ताम्। माल्यानि पुष्पाणि, अङ्कुराः यवाङ्कुराः, लाजाः भ्रष्टधान्यानि॥ २२॥ दध्ना चन्दनेन उक्षितैः सिक्तैः प्रसूनानां दीपानां चावलयो येषु तैः सपल्लवैर्वृन्दैः फलगुच्छैरुपलक्षिताः रम्भाः क्रमुकाश्च तत्सहितैः सकेतुभिः केतवो ध्वजास्तत्सहितैः पट्टिका वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैः जलेनापूर्णैः कुम्भैः स्वलङ्कृतानि द्वाराणि येषां ते गृहा यस्यां ताम्। तत्रेयं रीतिः—द्वारेषूभयतस्तण्डुलानामुपरि कुम्भाः, तत्परितः प्रसूनावलयः, कण्ठे पट्टिका, मुखे चूतादिपल्लवाः, तदुपरि पात्रान्तरे दीपावलयः, तत्सन्निधौ रम्भाः क्रमुकाः केतवश्चेति॥ २३॥ तामेवम्भूतां पुरीं वयस्यैः सखिभिर्वृतौ नरदेववर्त्मना राजमार्गेण सम्प्रविष्टौ वसुदेवनन्दनौ द्रष्टुमुत्सुकाः उत्साहयुक्तास्त्वरिताः त्वरायुक्ताश्च पुरस्त्रियः याः काश्चित् साधारण्यस्ताः समीयुर्गृहान्निःसृत्य सन्मुखमाजग्मुः, याश्च न बहिर्निर्गमनयोग्याः कुलस्त्रियस्ताश्च हर्म्याण्यारुरुहुरिति विवेकः। 'राज्ञामागमनेऽप्येवमेव भवति' इति सूचयन् सम्बोधयति—नृपेति॥ २४॥

अन्वितार्थप्रकाशिका

सौवर्णेति द्वयम्॥ सौवर्णानि सुवर्णरचितवस्तुसमूहशोभितानि शृङ्गाटकानि चतुष्पथानि हर्म्याणि धनिनां गृहाश्च निष्कुटा गृहोचिता आरामाश्च तैः श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिरुपवेशनस्थानैस्तथाऽन्यैश्च भवनैर्गृहैरुपस्कृताम् अलंकृतां वैदूर्यवज्रामलनीलविद्रुमैस्तथा मुक्ताहरिद्भिश्च जुष्टेषु इति वलभ्यादिकुट्टिमान्तविशेषणम्। "नपुंसकमनपुंसके नैकवच्चास्यान्यतरस्याम्" वलभीषु वेदिषु जालामुखरन्ध्रकुट्टिमेषु च आविष्टैः उपविष्टैः पारावतैर्बर्हिभिर्मयूरैश्च नादितामित्यन्वयः। तत्र अमलः स्फटिकः हरितो मरकताः वलभ्यो गृहपुरोभागवक्रदारुच्छादनानि उपवेशनोच्चस्थानानि वा। उपरितनगृहाणि वा गृहचूडेति स्वामी "आच्छादनं स्याद्वलभी गृहाणाम्" इति हलायुधः। "वलभी चन्द्रशालिका" इति त्रिकाण्डशेषः। वेदयो गृहाग्रे इष्टकादिबद्धा विश्रामभूमयः। जालेषु गवाक्षेषु आ समन्तात् मुखानीव रन्ध्राणि जालामुखरन्ध्राणि गवाक्षच्छिद्राणि। "जालं तु गवाक्षे क्षारके गुणे" इति हैमः। कुट्टिमानि मणिबद्धभूमयः संसिक्तानि रथ्यादीनि यस्यां तां रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गाः प्रसिद्धाः। चत्वराणि अङ्गणानि प्रकीर्णानि माल्यानि पुष्पाणि अङ्कुराः यवाङ्कुराः लाजाः भ्राष्ट्रधान्यानि तण्डुलाश्च यस्यां तां पुरीं ददर्शेत्यनुषङ्गः॥ २१–२२॥ आपूर्णेति॥ दध्ना चन्दनेन च उक्षितैः सिक्तैः प्रसूनानां दीपानां चावलयो येषु तैः सपल्लवैर्वृन्दैः फलगुच्छैरुपलक्षिताः रम्भाः क्रमुकाश्च तत्सहितैः सकेतुभिः केतवो ध्वजास्तत्सहितैः पट्टिका वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैः जलेनापूर्णैः कुम्भैः स्वलंकृतानि द्वाराणि येषां ते गृहा यस्यां ताम्। तत्रेयं रीतिः। द्वारेषूभयतस्तण्डुलानामुपरि कुम्भास्तत्परितः प्रसूनावलयः कण्ठे पट्टिका मुखे चूतादिपल्लवाः तदुपरि पात्रान्तरे दीपावलयः तत्सन्निधौ रम्भाः क्रमुकाः केतवस्तोरणानि चेति॥ २३॥ तामिति॥ हे नृप! तामेवं भूतां पुरीं वयस्यैः सखिभिर्वृतौ नरदेववर्त्मना राजमार्गेण संप्रविष्टौ वसुदेवनन्दनौ कर्मभूतौ द्रष्टुमुत्सुकाः उत्साहयुक्तास्त्वरिताः त्वरायुक्ताश्च पुरस्त्रियः याः काश्चित्साधारण्यस्ताः समीयुर्गृहान्निःसृत्य सम्मुखामाजग्मुः। याश्च न बहिर्निगमनयोग्याः कुलस्त्रियस्ताश्च हर्म्याण्यारुरुहुरिति विवेकः॥ २४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सौवर्णाः सुवर्णरचिताः शृङ्गाटकाश्चतुष्पथाश्च हर्म्याणि यानि गेहानि च निःकुटाः गेहसमीपवाटिकास्थहर्म्याणि च तैः श्रेणीनां शिल्पोपजीविनां सभाभिश्च एकरूपशिल्पोपजीवनामेकशोपसंवेशनस्थानैरित्यर्थः भवनैरन्यगेहैः उपस्कृतां भूषितां वैदूर्यारक्तश्चवज्रं हीरकश्च अमलः स्फाटिकश्च नीलःश्यामश्च विद्रुमश्च तैः मुक्ताश्च हरितो मरकताश्च तैः जुष्टेषु वलभीषु वलभ्यो गेहाग्रभागेषु वक्रकाष्ठच्छादनानि तासु वेदिषु वेदयो वलभीनामधः प्रदेशे विरचिता अवष्टम्भवेदिकास्तासु विदूराञ्ञ्य इति पाणिनि सूत्रानुरोधात् वैदूर्यशब्दो दन्त्यमधो न तु मूर्धन्यमध्यः॥ २१॥ जालामुखरं प्राणिगवाक्षछिद्राणि च कुट्टिमानि मणिबद्धा भूमिकाश्च तेषु वलभ्यादिषु आविष्टैः प्रविश्य स्थितैः पारावतैः बर्हिभिर्मयूरैश्च नादितां सुगधिजलादिभिः संसिक्ताः रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गा अन्ये पन्थानश्च चत्वराणि अङ्गणानि च यत्र तां प्रकीर्णाः विकीर्णाः माल्यादयो यत्र तां अंकुराः नवाङ्कुराः॥ २२॥ दधिचंदनसिक्तैः प्रसूनानां दीपानां च वलयो येषु तैः पल्लवसहितैः वृंदानि फलगुच्छास्तद्युक्तारंभाः कदल्यः क्रपुकाः पुगीवृक्षाश्च तत्सहितैः स केतुभिध्वजसहितैः सपट्टिकैः कण्ठबन्धनवस्त्रसहितैः एवंभूतैर्जलपूर्णकुंभैः स्वलंकृतानि द्वाराणि येषां एवंभूताः गृहा यत्र तां अत्रेत्थं रीतिः प्रतिद्वारं उभयतः स्थापितानां तंडुलानामुपरिकुंभास्ततपरितः पुष्पपंक्तयः कंठे पट्टिकाः

मुखे आम्रपल्लवास्तेषामुपरिस्थापितपात्रांतरेषु दीपपंक्तयस्तत्समीपे रंभाः क्रमुकाश्च द्वारो परितोरणानि च मंडपतोरणानि चेति विवेकः ॥ २३ ॥ तामिति नरदेववर्त्मना राजपथेन तां पुरीं प्रविष्टौ वसुदेवनंदनौ द्रष्टुमिति संबंधः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सौवर्णेति । जुष्टेति च सौवर्णाः सुपर्णनिर्मिताः शृङ्गाटकाश्चतुष्पथाः हर्म्याणि धनिनां गृहाणि च तेषु निष्कुटा गृहोचिता आरामास्तैः, श्रेणीनामेकरूपशिल्पोपजीविनां सभा उपवेशनस्थानानि ताभिः भवनैरन्यैर्गृहैः, उपस्कृतामलंकृतां, वैडूर्याणि च वज्राणि, च अमलाः स्फटिकाश्च नीला नीलमणयश्च विद्रुमा रक्तमणयश्च तैः, जुष्टेषु संयुक्तेषु, वेदिषु परिष्कृतभूमिषु वलभीषु आच्छादनवक्रदारुषु जाला मुखरन्ध्राणि गवाक्षच्छिद्राणि च कुट्टिमानि मणिबद्धभूमयस्तेषु च, आविष्टा निविष्टा ये पारावताः बर्हिणो मयूराश्च तैर्नादिता तां, अत्र केचन गृहपुरोभागस्तम्भविहिताच्छादनेनावष्टम्भवक्रदारूणि वलभ्य इत्याहुः । रथ्या राजमार्गाश्च आपणाः पण्यवीथयश्च मार्गा अन्ये मार्गाश्च चत्वराण्यङ्गणानि च संसिक्तानि रथ्यादीनि यस्यां सा तां, प्रकीर्णाः माल्याङ्कुरलाजतण्डुला यस्यां तां, तत्र माल्यानि मालार्हपुष्पाणि, अङ्कुरा नवयवदलानि, लाजा भ्रष्टव्रीहयः, तण्डुला अभग्नव्रीहिकणाः, इति द्वयोरेकान्वयः ॥ २१-२२ ॥ आपूर्णेति । दध्ना चन्दनेन च उक्षितैः सिक्तैः, प्रसूनानां दीपानां चावलयो येषु तैः सपल्लवैः पञ्चपल्लवसहितैः, वृन्दैः फलगुच्छैरुपलक्षिताः रम्भाः कदल्यः क्रमुकाश्च तत्सहितैः सकेतुभिः केतुसहितैः, सपट्टिकैः वितस्तिविस्तारपट्टवस्त्रसहितैः, आपूर्णकुम्भैर्जलभृतकलशैः, स्वलंकृतानि द्वाराणि येषां ते गृहा गेहानि यस्यां तां, तत्रेयं रीतिः द्वारेषूभयतः कुङ्कुमरञ्जिततण्डुलस्वस्तिकानामुपरि कुम्भास्तत्परितः प्रसूनावलयः कुम्भकण्ठे पट्टिकाः कुम्भमुखे चूतादिपल्लवाः तदुपरि पात्रान्तरे दीपावलयः, तत्संनिधौ रम्भाः क्रमुकाः केतवः तोरणानि चेति ॥ २३ ॥ तामिति । तामेवंभूतां, पुरीं, नरदेववर्त्मना राजमार्गेण, संप्रविष्टौ वयस्यैः सखिभिः, वृतो परिवृतौ सहितावित्यर्थः । वसुदेवनन्दनौ द्वितीयाद्विवचनम् । द्रष्टुं, पुरस्त्रियः त्वरितास्त्वरायुक्ताः सत्यः, समीयुः । तथा हे नृप, उत्सुका दर्शनोत्साहयुक्ताः सत्यः, हर्म्याणि गृहाणि च, आरुरुहुः एव ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

आपूर्णकुम्भैरिति : १०.४१.२३.

पुरीप्रवेशावसरे हि याऽऽसीदनन्त-माङ्गल्यपदार्थवीक्षा । तयोस्तु सैवाऽभवदिष्टमृद्धे-र्निदानमव्याहतमिष्टसिद्धेः ॥ ३६ ॥
अहो स्वधनवात्सल्यं श्रीपतेः सदयात्मनः । तत्र तत्र चरन् पद्भ्यामात्मानं तानदर्शयत् ॥ ३७ ॥

तां सम्प्रविष्टाविति : १०.४१.२४

नरवद्वपुर्दधानौ देववदद्भुतकृती प्रविष्टौ तौ । नरदेववर्त्मना तामित्युक्तं युक्तमेव तन्मुनिना ॥ ३८ ॥
साधारणस्य यदि वृत्तिरिहाजनीश दृक् सापि तर्हि मुदिता भवतीति युक्तम् ।
निःसीम-हार्दसुहृदां मथुराजनानां यत्तादृशः समभवन्ननु वृत्तयस्ताः ॥ ३९ ॥

कृष्णप्रिया

अब श्रीमथुरा का आन्तःसौन्दर्य का वर्णन करते हैं—शृङ्गाटक नगर के भीतर के चौराहों में विश्राम स्थान, "हर्म्य" श्रन्द्रीओं की हवेलियाँ, "निष्कुट"-हवेलियाँ के भीतर के फर्शों की भूमि बगैरे सुवर्ण मण्डित थी, "श्रेणी-राजमार्ग और चवर में आई हुई सुनार लुहार झेवर आदि कारीगरों की दुकानें सभा स्थान, एवं 'भवनं'-जन समाज के निवास स्थान सुवर्णमय थे। भवनों के छज्जों के नीचे की वेदियाँ, झरोंखों, सारे भवन के सब मझलों के फर्शों की भूमि में वैदूर्य, हीरा, उज्ज्वलमणि, नीलमणि, प्रवाल, मौक्तिक पीतमणि आदि रत्नों से मण्डित होने से जगमगा रहे थे ॥ २१ ॥ भवनों के दिवारों के भीतर के गवाक्ष-जालियों के छिद्रों में बैठे हुए कबूतरों और मोरों की आवाज से गुंजती मथुरापुरी में प्रवेश करते हुए भगवान का मथुरा मधुरशब्दों से सत्कारती मालुम पड़ती थी। 'रथ्या'-विशाल राजमार्ग, छोटी गलियाँ, हाट, बाट, चत्वारों एवं द्वारों के सामने आए हुए सर्वमार्ग में सुवासित जल छिड़काव-सिंचन किया गया था। भगवान् पधार रहे हैं इसलिए राजमार्गों में द्वारों में एवं ठिकाने-ठिकाने पर अनुराग से भक्तजन पुष्प मालायें, कुन्दादि कुसुमों कलियाँ, लाजा, नवाङ्कुर अक्षत आदि से बधावा कर रहे थे। भक्तवृन्द में सत्कार प्राप्त करते हुए श्रीकृष्णचन्द्र प्रभु ने पुरी में प्रवेश किया ॥ २२ ॥ दही एवं जल से सने हुए, चन्दन से चर्चित नवाङ्कुर, दूर्वा, नवपल्लवों से मण्डित पूर्णकलशों से समलङ्कृत; पुष्पमाला और दीपमाला से सुमण्डित; परिपक्व फल से लचे हुए कदलीवृक्षों से सुशोभित, सुपारी के वृक्षों से सुमाङ्गलिक, ध्वजाओं, नन्हीं-नन्हीं झण्डियाँ तोरण पुष्पमालाओं से सजे धजे द्वारों से एवं भवनों से रमणीय मथुरा नगरी का श्रीमथुरानाथ ने दर्शन किया ॥ २३ ॥ राजन् परीक्षित्! वसुदेव नन्दन श्रीबलभद्र भैया एवं भगवान् श्रीकृष्ण अपने अन्तरङ्ग मित्रों से गोपजनों के साथ राजपथ से मथुरापुरी में पधार रहे हैं यह मङ्गल बधाई मिलते ही प्रभुदर्शन के लिए अत्यन्त उत्कण्ठित नगर की नारियाँ मार्ग पर आ गई और जो बाहर आने में असमर्थ थी वे महिलायें त्वरितगति से जैसे प्रभु का दर्शन हो हवेलियों भवनों और छज्जों पर पहुँच गई ॥२४॥

काश्चिद् विपर्यग्धृत[1] वस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः ।
कृतैकपत्रश्रवणैकनूपुरा नाङ्क्त्वा द्वितीयं त्वपरास्वलोचनम् ॥ २५ ॥
अश्नन्त्य एकास्तदपास्य [2]सोत्सवा अभ्यज्यमाना अकृतोपमज्जनाः ।
स्वपन्त्य उत्थाय निशम्य निःस्वनं [4]प्रपाययन्त्योऽर्भमपोह्य मातरः ॥ २६ ॥
मनांसि तासामरविन्दलोचनः प्रगल्भलीलाहसितावलोकनैः ।
जहार मत्तद्विरदेन्द्रविक्रमो दृशां ददच्छ्रीर[5]मणात्मनोत्सवम् ॥ २७ ॥
दृष्ट्वा मुहुःश्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मि[6]तसुधोक्षणलब्धमानाः ।
आनन्दमूर्तिमुपगुह्य दृशाऽऽत्मलब्धं हृष्यत्त्वचो जहुरनन्तमरिन्दमाधिम् ॥ २८ ॥

कर्दमक्षमा

अन्वयः—काश्चित्, विपर्यक्धृत वस्त्रभूषणा, अथ, अपरा युगलेषु एवम्, विस्मृत्य, च (एकं धृत्वा) अपराः, कृतैक पत्रश्रवणैकनुपुराः, अपराः तु, स्वलोचनम्, अङ्क्त्वा, द्वितीयम्, न अङ्क्त्वा समीयुः ॥ २५ ॥ एका, अश्नन्त्यः, तत्, अपास्य, सोत्सवाः, समीयुः, अपरा, अभ्यज्यमानाः, अकृतोपमज्जनाः, समीयुः, निःस्वनम, निशम्य, स्वपन्त्यः, उत्थाय, समीयुः, प्रपाययन्त्यः, मातरः, अर्भम्, अपोह्य, समीयुः ॥ २६ ॥ मत्तद्विरदेन्द्रविक्रमः, अरविन्दलोचनः, प्रगल्भलीलाहसितावलोकनैः, च, श्रीरमणात्मना (अलौकिकस्वरूपेण) तासाम्, दृणाम्, उत्सवम्, ददत्, मनांसि, जहार ॥ २७ ॥ हे अरिन्दम ? मुहुः (वारंवारम्) श्रुतम्, तम्, दृष्ट्वा, अनुद्रुतचेतसः तत्प्रेक्षणोत्स्मित तत्प्रेक्षणोत्स्मित सुधोक्षणलब्धयानाः दृशा आत्मलब्धम्, आनन्दमूर्तिम्, अनन्तम, तम् उपगुह्य, हृष्यत् त्वचः आधिम्, जहुः ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

औत्सुक्यमेवाह द्वयेन । काश्चिदिति । विपर्यक् विपरीतं धृतानि वस्त्राणि भूषणानि च याभिस्ताः युगलेषु धार्येषु कुंडलकंकणादिष्वेकं विस्मृत्य एकमेव धृत्वा अपराः समीयुः । तदेवोदाहरति । कृतमेकमेव पत्रं ययोस्ते श्रवणे यासामेकमेव नूपुरं चरणाभरणं यासां ताश्च ताश्च नाङ्क्त्वा अनङ्क्त्वा एकस्मिन्नेव लोचने अञ्जनं विधायैव ॥ २५ ॥ तद्भोजनं अपास्य त्यक्त्वा । अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यंगाः । अकृतोपमज्जना अकृतस्नानाः । अर्भं बालकं अपोह्य निरस्य ॥ २६ ॥ प्रगल्भा या लीलास्ताभिर्हसितानि अवलोकनानीक्षणानि च तैः श्रियं रमयतीति श्रीरमणस्तेनात्मना वपुषा तासां दृशामुत्सवं ददत् मनांसि जहार ॥ २७ ॥ मुहुः श्रुतत्वात्तद्द्रुतचेतसः सद्यस्तं दृष्ट्वा तस्य प्रेक्षणं चोत्स्मितं च तदेव सुधा तयोक्षणं सेचनं तेन लब्धो मानो याभिस्ताः । दृशोद्घाटितेन नेत्रद्वारेणात्मनि मनसि लब्धं प्राप्तं परिष्वज्य तदप्राप्तिजनितमनन्तमाधिं मानसीं व्यथां जहुः । हे अरिन्दम निर्जितकामेति संबोधनम् । शृङ्गाररसे निमग्नो मा भूरिति ॥ २८ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

काश्चित्पुरस्त्रियः । "पत्रं तु वाहने पर्णं स्यात्पक्षे शरपक्षिणोः" इति मेदिनी ॥ २५ ॥ अर्भं बालकम् ॥ २६ ॥ तासां पुराङ्गनानाम् । ईक्षणानि कटाक्षपातान् । उत्सवमानन्दम् । "उत्सवो मह उत्सेके इच्छाप्रसवकोपयोः" इति मेदिनी ॥ श्रिया स्वांगलक्ष्म्यैव मथुरांगना रमयति क्रीडयति तेन दृशामुत्सवं ददत्तासां मनांसि जहार । चाक्षुषसंभोगदानेन ता विह्वलीकृत्यालक्षितमेव मनो रत्नानि चोरयामासेत्यर्थः ॥ २७ ॥ तद्गतचेतसः कृष्णगतचेतसः । तं श्रीकृष्णम् । तस्य कृष्णस्य । उत्स्मितमुत्कृष्टस्मितम् । तदेवोत्स्मितमेव । तया सुधया । तेन सेचनेन । ता गोप्यः । तस्य कृष्णस्याप्राप्त्या जनितम् । एकदापि कृष्णो न दृष्टोऽस्माभिरित्येवमाधिं मनःपीडाम् । 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । हृष्यन्ती त्वग्यासां ताः, रोमाञ्चिताङ्गा इत्यर्थः । हे अरिन्दमेति-एतादृशभगवच्चरितश्रवणमननादिनैव त्वया कामादयोऽरयो विजिता इति भावः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

काश्चिदिति । निः स्वनं निशम्येति द्वितीयश्लोकस्थेन सर्वेषामेवान्वयः । तयोः सन्दर्शनेन पौरजनानां हर्षकोलाहलं श्रुत्वेत्यर्थः । युगलेष्वित्यत्र चकारान्वयः एकमिति जातावेकत्वं काश्चिद्विपर्यगित्यादिलक्षणाः सद्यो युग्मतया धार्येष्वप्येकमेकं विस्मृत्य समीयुरित्यर्थः । अथेत्यर्थान्तरारम्भे अपरा एकपत्रैकनूपुरमात्राभरणीकृताङ्ग्यः सत्यो लोचनमङ्क्तुमारब्धवत्योऽप्येकमप्यनङ्क्त्वा समीयुः अपरास्तु तथाभूता द्वितीयं लोचनमनङ्क्त्वा समीयुरित्यर्थः । च शब्दोऽनुक्तसमुच्चये तेनान्यदपि ज्ञेयं

---

१. क्कृत-विज. । २. पराश्च-श्रीधर. वंशी. जीव. विश्व. ; पराः स्व-वीरः विज. । ३. भोजनम्-प्रा. पा. । ४. निपा-वीर. विज. । ५. दधच्छ्रीरमणो महोत्सवम्-वीर. विज. । ६. तत्प्रेक्षणस्मित-वीर. ; तत्प्रेक्षितोत्स्मित-विज. ।

स्वलोचनमिति तु पाठो बहुत्र स्वशब्देनावेशातिशयः सूचितस्तथापीत्यर्थः ॥ २५ ॥ तदपास्येति सर्वत्राप्यन्वयः तत्र प्रथमतः तद्भोजनं त्यक्त्वा आचमनञ्चाकृत्वेति बोद्धव्यम् एकाः सोत्सवा विहारादिकर्मपरा विवाह्यमानादयश्च तत्तदपास्य, यद्वा सर्वत्रैव हेतुः सोत्सवा हर्षभराक्रान्तचित्ता इति स्वपन्त्यः स्वपत्य उत्थाय तदपास्येति निद्राजाड्यं त्यक्त्वा इत्यर्थः । अर्भं निजनवबालकं स्तन्यं निपाययन्त्यस्तदपास्य तन्निपायनं त्यक्त्वा पश्चात्तमप्यपोह्य इत्यर्थः । मातर इति स्नेहविशेषः सूचितस्तथापि आसामेवमनुक्रमोक्तिः स्वगमनानुक्रमेण ज्ञेया ॥ २६ ॥ दूरतस्तावत् श्रियोऽपि रतिजनकेन वपुषैव दृशामुत्सवं ददत् तत्रापि मत्तद्विरदेन्द्रविक्रमत्वेन दृश्यमानो दृशां तं ददत् नैकट्ये तु सति तत्राप्यरविन्दलोचनतया दृश्यमानो दृशां तं ददत् तत्रापि प्रगल्भलीलाहसितावलोकैर्दृशां तं ददत् तासां मनांसि जहारेत्यर्थः । प्रगल्भाः मनोहरणसमर्थाः कैशोरत्वेन वैदग्धीपराकाष्ठां प्राप्ता वा या लीलाः भ्रूनर्त्तनादयः हसितानि च तत्तद्भावसूचकस्मितभेदाः तद्युक्तैरवलोकनैरिति मत्तद्विरदस्येव विक्रमः पराक्रमविशिष्टचरणन्यासो यस्येति च विग्रहः जात्यपेक्षया एकत्वेनाप्यर्थसिद्धौ मनांसीति व्यक्त्यपेक्षया बहुवचनं ह्रियमाणबाहुल्यस्य स्पष्टीभावनैवार्थचमत्कारः स्यादिति जहारेति मनसां निधित्वोत्प्रेक्षा व्यञ्जिता तेन तल्लोभ्यत्वञ्च युक्तञ्च तत् सप्रेमत्वात्तेषाम् उत्सवं ददत् जहारेति श्लेषेण हरणचातुरी दर्शिता अन्योऽपि चतुरलुब्धो महोत्सवादिभिर्जनान् प्रलोभ्य तद्धानि गृह्णातीति इयं दर्शनक्रमेण व्याख्या पाठक्रमेण त्वेवम् अरविन्दलोचन एव सन् जहार किमुत सर्वाविलासोपरि चरता दृशावलोकनैः तादृशविक्रम एव जहार किमुत तादृश तदधिकाधिकानन्तलीलाश्रयतातादृशखण्डवपुषेति अत एव साधकतमत्वविवक्षया उत्तरोत्तरत्र तृतीया ॥ २७ ॥ अनुद्रुतं वेगेन पश्चात् संलग्नं किम्वा निरन्तरं प्रेम्णा द्रवीभूतं चेतो यासां ताः एतच्च श्रवणेनैव सुतरां तु दर्शनेन अयमुपगूहने हेतुः किञ्च तदिति उत् उत्कृष्टं स्मितं, यद्वा तासां श्रीकृष्णप्रेक्षणेन तस्य यदुद्गतं स्मितं मानः सम्मानः अनन्तमपि जहुः । तत्र हेतुः आनन्दघनविग्रहं तमुपगुह्येति तत् कथमात्मलब्धं मनोलब्धत्वेन मनसैवेत्यर्थः । तदपि कथं दृशेति दृशा स्वलब्धमिति तस्यां दृशि वाष्पेण वा लज्जया वा मोहेन वा मुद्रितायां सत्यां मनसि साक्षादिव परिस्फूर्त्त्या तत्र नितरां साक्षादिवालिङ्गनसम्पत्तेरिति भावः । उपगूहनलक्षणं हृष्यत्त्वचः महापुलकाचितसर्वाङ्ग्य इत्यर्थः । एतादृशः श्रीकृष्णविषयकप्रेमरसविशेषे विघ्नः प्राकृतशृङ्गारादिरसः नातिविचारस्तस्मिन्नपि दृष्टिरेव वा अरिः हे तद्दमनेति तद्दमनत्वेनैव त्वां प्रति रसविशेषोऽयं वर्ण्यते अन्यथा नवर्णयिष्यत्येवेति भावः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अपराश्च, अथ अपि युगलेष्वप्यवश्यं युग्मतया धार्य्येष्वपि; अपरा इत्यग्रेऽप्यनुवर्त्तते; एवमग्रे एका इति च, चशब्दोऽनुक्तसमुच्चये । तेन नीवी-विस्मरणेन स्खलत्परिधानवस्त्रधारणं तादृशमन्यच्च ज्ञेयम् ; तदपास्येति भोजनं त्यक्त्वा, आचमनं चाकृत्वेति बोद्धव्यम् । एकाः सोत्सवा विवाहादिकर्म्मपरास्तदपास्य । यद्वा, सर्व्वत्रैव हेतुः–सोत्सवा हर्ष-भराक्रान्तचित्ता इति तथाप्यस्यात्रैवोक्तिः, अवश्यकृत्याशनादित्यागगौरवात्, निःस्वनं तयोः सन्दर्शनेन पौरजनानां हर्षकोलाहलशब्दम्, अर्भं निज-नवबालकम्, मातर इति स्नेहविशेषः सूचितः, तथाप्येवं यथोत्तरमासामुत्सुकत्वे श्रैष्ठ्यमूह्यम् । तत्र विपर्य्यग्धृतवस्त्रभूषणानामनुसन्धानाभावेऽपि पूर्व्वाभ्यासवशेन वस्त्रादिधारणं कृतमेव, युगलेषु विस्मृतैकानाञ्च विस्मरणेन तदधारणात् पूर्व्वाभ्यासलोपतः पूर्व्वाभ्यः श्रैष्ठ्यम्, कृतैकपत्रश्रवणैकनूपुराणाञ्च द्वितीयनूपुराद्यनपेक्षया, ताभ्योऽप्यपराणाञ्च द्वितीयनेत्रानञ्जनेन परमवैरूप्यादावनपेक्षया, ताभ्योऽपि एकासामवश्यकृत्यकृत्यभोजनादित्यागेन, ताभ्योऽपि सोत्सवानां यथाकालकृत्योत्सवकर्म्मत्यागात्ताभ्योऽप्यभज्यमानानामभ्यंगानन्तरावश्य-कृत्यस्नान-त्यागेन दोषाद्यनपेक्षया, ताभ्योऽपि निद्रितानां निद्रान्तस्तच्छब्दश्रवणमात्रेणोत्थानात्ताभ्योऽपि मातॄणाञ्च नूतनबालक-स्नेहत्यागेन, ताभ्योऽपि स्पष्टमित्येषा दिक् । अन्यथा तत्तत्क्रमेणोक्तेर्वैयर्थ्यापत्तिः; किंवा आगमनक्रमेण तासां तथोक्तम् ॥ २५–२६ ॥ अरविन्दलोचन इति सहजपरमसौन्दर्य्यमुक्तम्, तस्य स्वाभाविकत्वेऽपि विशेषतोऽत्रोक्तिः सौन्दर्य्यविशेषप्राकट्यविवक्षया, इदं मनोहरणे साधनमाद्यम्, किञ्च, प्रगल्भेति प्रगल्भा प्रौढ़ा तासां मनोहरणसमर्था या लीला भ्रूनर्त्तनादिविदग्धचेष्टा मत्तगजेन्द्रादपि विक्रमः पराक्रमः, किंवा विशिष्टः क्रमो गतिर्यस्येति, सदा तादृशत्वेऽपि तासां मनोहरणाय शनैर्मन्दगत्या विशेषतोऽत्र तदुक्तिः, अतएव तत्तदभिप्रायेण तयोरेतयोर्विशेषणतया निर्द्देशः । श्रीरमणात्मनेत्यनेनानुक्तमन्यदप्यशेषसौन्दर्य्य-माधुर्य्यादिकं संगृहीतम्, अन्यत्तैर्व्याख्यातम् । तत्र ताभिरिति प्रगल्भा या लीलास्ताभिर्यानि हसितादीनीत्येवं बहुत्वापेक्षया तथा व्याख्यानं युक्तम् । यद्वा, प्रगल्भलीला भ्रूनर्त्तनादिश्च हसितञ्चावलोकनमपांगेक्षणञ्च तैः, यद्वा प्रगल्भया किंवा प्रगल्भः प्रौढस्तद्वल्लीलया यानि हसितादीनि तैः । एतानि तस्य सहजान्येव, तेषु दृश्यमानेषु तासां मनोहरणम्, किञ्च, श्रीरमणात्मनेति । एवं दृगुत्सवदानस्य साधनान्युक्तानि । अनुद्रुतं वेगेन पश्चात् संलग्नम्, किंवा निरन्तरं प्रेम्णा द्रवीभूतं चेतो यासां ताः । एतच्च श्रवणेन पूर्व्वमेव, अधुना दर्शनेनैव वा; अयमुपगूहने हेतुः । किञ्च, तदिति उत् उत्कृष्टं स्मितम्; यद्वा, तासां श्रीकृष्णप्रेक्षणेन तस्य यदुद्गतो मानः सम्मानः, अनन्तमपि जहुः । तत्र हेतुः—आनन्दघनविग्रहम् । तमुपगुह्येति, तत् कथमात्मलब्धं मनसैवेत्यर्थः । तदपि कथं दृशेति, साक्षाद्दृष्टया मनसि साक्षादिव परिस्फूर्त्त्या तत्र नितरां साक्षादिवालिगन-सम्पत्तेरित्यर्थः । उपगूहनलक्षणम्—हृष्यत्त्वचो महापुलकाञ्चितसर्व्वाङ्ग्य इत्यर्थः । भक्तिविघ्नः शुष्कतर्कादिरेवारिस्तद्दमनेनैव त्वां प्रति रसविशेषोऽयं वर्ण्यत इति भावः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विपर्यक् विपरीतं युगलेषु पाणिपादादियुगलेषु ॥ २५-४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

त्वरामौत्सुक्यं चाह द्वयेन । काश्चिदिति । विपर्यक् विपरीतम् अयथायथं भूतानि वस्त्राणि भूषणानि च याभिस्ताः काश्चिदेवं भूताः अपरास्तु युगलेषु धार्येषु कुण्डलकङ्कणादिषु एकम्विस्मृत्य समीयुरित्यनुषङ्गः अन्यास्तु कृतं निहितमेकमेव पत्रं ताटङ्कः ययोस्ते श्रवणे श्रोत्रे यासां ताः एकमेव नूपुरं चरणाभरणं यासां तास्ताश्च स्वकीयमेकं लोचनं नाङ्क्त्वा एकस्मिन्नेव लोचने कज्जलं निधायेत्यर्थः ॥ २५ ॥ एकास्तु अश्नन्त्यः तद्भोजनं विहाय काश्चित्तु अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यङ्गाः अकृतस्नाना एव काश्चित्तु स्वपन्त्यो निःस्वनं निशम्योत्थाय अपरास्तु मातरः अर्भकं पाययन्त्यः स्तन्यमिति शेषः । तमर्भकं विहाय समीयुरिति सर्वत्र सम्बन्धः ॥ २६ ॥ मत्तगजेन्द्रस्येव विक्रमः पादविक्षेपो यस्य सः श्रियः कान्तो भगवान् प्रगल्भाः या लीलास्तार्हसितानीक्षणानि च तैस्तासां पुरस्त्रीणां दृशामुत्सवं महाहर्षं विदधानः तासां मनांसि चित्तान्यपहृतवान् ॥ २७ ॥ मुहुः श्रुतत्वात्तद्रुतचेतसस्तं दृष्ट्वा हे अरिन्दम ! तस्य प्रेक्षणञ्च स्मितञ्च तदेव सुधा तयोक्षणं सेचनं तेन लब्धो मानो याभिस्ताः दृशा उद्घाटितनेत्रद्वारा आत्मनि मनसि लब्धं प्राप्तमानन्दमूर्त्ति परिष्वज्य पुलकितत्वचः तद्प्राप्तिजमनन्तमधिकमाधिम् व्यथां जहुः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

विपर्ययकृतानि व्यत्यस्तत्वेनालंकृतानि वस्त्राणि भूषणानि यासां ताः वस्त्रस्थाने भूषणानि भूषणस्थाने वस्त्राणीति युगलेषु मध्ये एकं विस्मृत्य एतदेव स्फारयति । कृतैकेति । वस्त्रं परिधानमात्रं एकं श्रवणभूषणम् एकं नूपुरञ्च यासां ताः एकमङ्क्त्वा एकं लोचनं नाङ्क्त्वा अञ्जितं मषीकृतमकृत्वा ॥ २५ ॥ अभ्यज्यमानास्तैललेपनं कुर्वाणाः अकृतोपमज्जनाः अकृतजलस्नानाः अर्भं बालम् अपोह्य तिर्यक् कृत्वा ॥ २६ ॥ प्रागल्भ्येन धाष्टर्येन लीलासहितहसितेनावलोकनेन कटाक्षनिरीक्षणेन । २७ ॥ श्रुतं कृष्णरूपसौन्दर्यं स्त्रियः एकदापि न दृष्टोऽयमित्याधिं मनः पीडां तद्दर्शनेन जहुरित्यन्वयः । तस्य कृष्णस्य प्रेक्षितमुत्कृष्टं स्मितं च तत्प्रेक्षितोत्स्मिते ते सुधा प्रेक्षितोत्स्मित सुधा तस्या उक्षणेन लब्धो मानो यासां तास्तथा आत्मनि मनसि लब्धं स्थितं हृष्यत्त्वचः रोमाञ्चाञ्चिताः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

मनांसि तासामित्यादि । दृशामुत्सवं दधत्तासां मनांसि जहार, नतु बलात्कारेण हृतवान् । द्रव्यान्तरेण विनिमयं कृत्वा द्रव्यस्वीकारो न्याय्य एव, प्रथमपुरप्रवेशे बलात्कारोऽनुचित एवेति ददिदित्यस्य भावः ॥ २७ ॥ दृष्ट्वा मुहुः श्रुतमित्यादि । आनन्दमूर्त्तिः मूर्त्तानन्दमित्यर्थः । तथा चोक्तम्—'आनन्दो द्विविधः प्रोक्तो मूर्त्तामूर्त्तप्रभेदतः । अमूर्त्तस्याश्रयो मूर्त्तो मूर्त्तानन्दोऽच्युतोमतः ॥' इति दिशात्मनि हृदये लब्धं दृशा समाप्य आत्मनि लब्धमित्यर्थः । आधिं चिरोत्कण्ठाकृतां मानसीं व्यथाम् ॥ २८-३० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मनांसि तासामरविन्दलोचन इत्यादि । दृशामुत्सवं ददत् मनो जहार, न तु बलात्कारेणाहृतवान् । द्रष्टव्यान्तरेण विनिमयं त्यक्त्वा स्वीकारस्तु न्याय एव । प्रथम-पुरप्रवेशेऽन्यो योऽनुचितः परस्परावलोकनरूपोऽयं श्रृङ्गारः तेन श्रृङ्गाररसभक्ताः पुरयोषितः ॥ २७ ॥ ताश्च मनसा आनन्दमूर्त्तिमुपगुह्य आधिं संसारपीडां जहुः । तनैव कृतार्थाश्च बभूवुः ॥ २८-३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

औत्सुक्यं विवृणोति द्वाभ्याम् । कारिचदिति । विपर्य्यक् विपरीतं यथा स्यात्तथा धृतानि वस्त्राणि भूषणानि च याभिस्ताः युगलेषु धार्य्येषु कुण्डलकङ्कणादिषु मध्ये एकमेकं विस्मृत्य समीयुः । कृतमेकैकमेव पत्रं श्रवणेषु याभिः । एकैकमेव नूपुरं यासां ताश्च ताश्च ताः । द्वितीयं स्वलोचनं न अङ्क्त्वा किं त्वेकं वाममेव कज्जलेनाङ्क्त्वेत्यर्थः । तत् अशनं सोत्सवा इति विवाहादिकर्म परास्तत्कर्म त्यक्त्वा परिणीयमानाः कन्याश्च पतिपरिक्रमणमसमाप्यैवेत्यर्थः । सखीभिरभ्यज्यमाना एव ताः सखीस्तिरस्कृत्य अभ्यङ्गमप्यसमाप्येत्यर्थः । न कृतमुप आधिक्येन मज्जनं याभिस्ताः स्नानमप्यसमाप्य क्लिन्नगात्र्य एवेत्यर्थः । नितरामतियत्नेन पाययन्त्य इति स्वयं पातुमजानन्तं सद्यः प्रसूतमर्भमप्यपोह्य त्यर्थः ॥ २५-२६ ॥ श्रिया स्वशोभयैव रमयति मथुराङ्गनाः क्रीडयतीति श्रीरमणः तेनात्मना देहेन दृशामुत्सवं ददत् मनांसि तासां जहारेति चाक्षुषसम्भोगदानेन ता विह्वलीकृत्यालक्षितमेव मनोरत्नानि चोरयामासेत्यर्थः ॥ २७ ॥ अनुद्रुतानि दर्शनं लक्ष्यीकृत्यैव द्रवीभूतानि चेतांसि यासां ताः तत्कर्तृकं प्रेक्षणम् उत्कृष्टं स्मितं च सुधा तया यदुक्षणं सेचनं ते लब्धो मान आदरो याभिस्ताः दृशा एकस्यैव नेत्रस्यापाङ्गद्वारेण उद्घाटितेन आत्मनि मनसि लब्धं प्राप्तं यच्छब्देनेवोपगुह्य तद्प्राप्तिजनितमनन्तमाधिञ्जहुः हे अरिन्दमेति एतादृशभगवच्चरित्रश्रवणमननादिनैव त्वया कामादयः शत्रवो जिता इति भावः ॥ २८ ॥

गूढार्थदीपिनी

युग्मम् विपर्यक् विपरीतं यथा स्यात्तथा धृतानि वस्त्रादीनियाभिः। युगलेषु धार्यमाणेषु कुण्डलादिषु एकं विस्मृत्य एकमेव धृत्वा समीयुरित्यनुषङ्गः। कथंभूताः—एकमेव पत्रं ययोस्ते श्रवणे यासाम् एकमेव नूपुरं यासां ताश्च ताश्च। नाङ्क्त्वा अञ्जनरहितं कृत्वा। एका काश्चित् निःस्वनं निशम्य तत् भोजनम् अपास्य त्यक्त्वा समीयुः। अभ्यज्यमाना उद्वर्तनं कुर्वाणाः। अर्भं बालम् अपोह्य अपास्य ॥ २५–२६ ॥ भगवान् कृष्णः प्रगल्भैः उत्कटैः मन्दस्मितैः कटाक्षपातैश्च तासां मनांसि जहारेत्यन्वयः। किं कुर्वन् श्रियं रमयतीति श्रीरमणः तेन आत्मना वपुषा दिव्यविग्रहेण तासां दृशाम् उत्सवं ददत् हर्षं जनयन् सन्। द्विरदेन्द्रः मत्तगजः तद्वत् विक्रमः गतिर्यस्य सः ॥ २७ ॥ मुहुः श्रुतं तं श्रीकृष्णं दृष्ट्वा अनुद्रुतचेतसः प्रमदाः सद्यः झटिति दृशा नेत्रद्वारेण आत्मनि लब्धम् उपगुह्य अनन्तम् आधिं जहुरित्यन्वयः। कथंभूतास्ता। तत्प्रेक्षणपूर्वकं स्मितमेव अमृतसेचनं तेन लब्धः सम्मानो याभिस्ताः ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तासामौत्सुक्यमाह। काश्चिदिति। विपर्य्यक् स्थानतः स्वरूपतश्च विपरीतं धृतानि वस्त्राणि भूषणानि च याभिस्ताः समीयुरित्यनुषङ्गः एवमग्रेऽपि युगलेषु धार्य्येषु कङ्कणादिषु एकं विस्मृत्य कृतमेकमेव पत्रं ययोस्ते श्रवणे याषामेकमेव नूपुरं चरणाभरणं यासां ताश्च ताश्च ताः द्वितीयं स्वलोचनं नाङ्क्त्वा अनङ्क्त्वा एकस्मिन्नेव लोचने अञ्जनं निधायेत्यर्थः ॥ २५ ॥ एकाः अश्नन्त्यस्तद्भोजनं विहाय अन्याः अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यङ्गा अकृतस्नानाः काश्चिन्मातरः निपाययन्त्यः अर्भं बालम् अपोह्य निरस्य ॥ २६ ॥ अरविन्दे इव लोचने यस्य सः मत्तगजेन्द्रस्येव विक्रमश्चरणविन्यासो यस्य सः प्रगल्भा याः लीलास्ताभिर्हसितानीक्षणानि तैः श्रियं देवीं रमयतीति श्रीरमणस्तेनात्मना नित्यानन्दाप्राकृतविग्रहणः तासां दृशामुत्सवं ददत् मनांसि जहारेत्यन्वयः ॥ २७ ॥ हे अरिन्दम ! श्रीकृष्ण भजनविरोधिदमनकर्त्तः मुहुः श्रुतमनन्तं त्रिविधपारच्छेदशून्यं श्रीकृष्णएवानुद्रुतचेतसस्तद्गतचेतसः साक्षाद् दृष्ट्वा तस्य प्रेक्षणं च उत्स्मितं च तदेव सुधा तयोक्षणं प्रोक्षणं तेन लब्धमानाः दृशा नेत्रद्वारेण आत्मनि मनसि लब्धं प्राप्तमानन्दमूर्तिमप्राकृतपरमानन्दविग्रहं परिरभ्य परिष्वज्य हृष्यत्त्वचः पुलकितत्वचः तदप्राप्तिजमाधिं व्यथां जहुः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

काश्चिद्योषितो विपर्यग्धृतवस्त्रभूषणा विपर्यन्वितं धृतानि वस्त्राणि भूषणानि याभिस्ता युगलेषु प्रावरणौत्तरीयकर्णाभरणवलयकङ्कणमञ्जीरादियुग्मेषु। एकं विस्मृत्य कृतैकवस्त्रश्रवणैकनूपुरा एकं वस्त्रमेकं कर्णाभरणमेकं नुपुरं च यासां ता द्वितीयं स्वलोचनं नाङ्क्त्वाऽसंसांज्जितकाज्जलं कृत्वा ॥ २५ ॥ अश्नन्त्यः काश्चिद्भोजनमपास्य निरस्य सोत्सवा उत्सवसहिता अभ्यज्यमानास्तैललेपनं कुर्वन्त्योऽकृतोपमज्जना अकृतनीरस्नानाः। बहुचिरन्तनकोशेऽकृतापमज्जना इति पाठो दृश्यते सोऽपि दृश्यः। अपां समूहो ह्यापं तेन मज्जनमापमज्जनमकृतमापमज्जनं याभिस्ता अकृतापमज्जना इति तत्रार्थः। काश्चित्स्वपन्त्यो निःस्वनं निशम्योत्थायाययुः। काश्चिन्मातरोऽर्भं बालं निपाययन्त्यः स्तनक्षीरमपोह्य तिरस्कृत्यायगुः। यमुनायाः पारे पुर्याः सत्त्वात्सत्वाच्च कृष्णस्यान्तर्मातरस्तरपण्यं मा मास्त्वित्यायाता इति वा दमाधिं दमेनेन्द्रियग्रहेणाधिर्दमाधिस्तत्प्रयोजको य आधिर्मनोव्यथा तमरिं तद्रूपारिं प्रकृतकार्यप्रतिबन्धकत्वात्। तं जहुः। यथेच्छं विहृतवत्य इत्यर्थः ॥ २६ ॥ अरविन्दलोचनः कृष्णः प्रागल्भ्येन धाष्टर्येन लीलाहसितेन तदवलोकनेन चेत्येतैस्तासां मनांसि जहार स्वविषयाणि चकार श्रीरमणो मत्तद्विरदेन्द्रविक्रमो दृशां नेत्राणामुत्सवं दधत्सन् ॥ २७ ॥ मुहुः श्रुतं तमनुद्रुतचेतसस्तं दृष्ट्वा तस्य प्रेक्षितं प्रेक्षणमुत्स्मितं मन्दहासस्त एव सुधामृतं तया यदुक्षणं सेचनं तेन प्रतिलब्धो मानो याभिस्ता दृशा दृष्टयाऽऽत्मलब्धमात्मनि मनसि लब्धं ध्यानाङ्कुरितमानन्दमूर्तिमुपगुह्यालिङ्ग्य हृष्यद्वचो रोमाञ्चनाञ्चिताः। हे अरिन्दम राजन् अनन्तमेतदितरापारमाधिं तद्दर्शनाभावजनितव्यथां जहुस्तत्यजुः ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तासामौत्सुक्यं वर्णयन् वस्त्राभरणानां विपर्यासमाह भगवति भावो विशेषः अन्यथा लौकिक्येव भाषा भवति काश्चित् स्त्रियः विपर्यक् विपरीततया धृतानि वस्त्राणि भूषणानि च याभिः पादयोराभरणं हस्ते वस्त्राण्युपरि एवं सर्वत्र किञ्च न केवलं विपर्यासः अपि तु युगलेषु एकं विस्मृत्य च एकमेवाभरणं धृत्वागताः अथ विपर्यग्धृतेभ्यः अपराः अन्याः तत्र पूर्वापेक्षयाप्येता उत्तमा इति युगलाभरणेषु हस्तकटकादिषु एकस्यापि धारणं भवति यत्र पुनः द्वयोरेव धारणं नैकस्य एकधारणं सर्वथा विगीतं तादृशमपि कृतवत्य इत्याह। कृतैकपत्रश्रवणैकनूपुरा इति। कृतं स्थापितमेव पत्रं ताटङ्कं श्रवणे याभिः एकमेव च नूपुरं श्रवणे पादे वा कृतं याभिः ताश्च ताश्च अन्याः पुनः द्वितीयं लोचनं न अङ्क्त्वा द्रष्टुं समीयुरिति सम्बन्धः तु शब्दोऽन्यार्थः स्वलोचनमिति अर्थादन्यलोचनमपि अन्यस्य कज्जलं प्रयच्छन्ती मध्ये ॥ २५ ॥ तथैव गतिक्रियाशक्त्यभावमाह। अश्नन्त्य एका इति।

तद्दर्शनकर्म अन्नं वा अन्यथापि त्यागो भवतीति तद्व्यावृत्त्यत्यर्थमाह । सोत्सवा इति । उल्लाससहिताः अन्याः पुनरभ्यज्यमानाः सर्वाङ्गे दत्ततैलाः शिरसि धृत्वा वा अकृतोपमज्जनाः स्नानमकृत्वैव ययुः अन्याः पुनः स्वपन्त्यः उत्थाय भगवानागत इति कोलाहलं निशम्य तथैवाचर्चितदेहाः समीयुः अन्याः पुनः मातरः धात्रीव्यतिरिक्ताः साक्षात्स्वप्रसूतानपि बालकान् प्रपायन्त्यः अर्भवत्यश्च बालकमपि विसृज्यापोह्य त्वरिता ययुः इति सम्बन्धः ॥ २६ ॥ एवं सर्वासां भगवद्दर्शनार्थं प्रपञ्चविस्मृतिं निरूप्य ततो निष्प्रञ्चासु स्वसक्त्यर्थं भगवच्चरितमाह । मनांसि तासामिति । तासां पूर्वोक्तानां मनश्चेद्भगवदीयं जातं तदा स्वासक्तिः सिद्धैव मनोमूलकत्वात् संसारस्य मनसो हि वशीकरणं द्वेधा भवति वस्तुसामर्थ्यात् मन एव वशे भवति तथोत्कृष्टविषये स्वधर्मैश्च मोहकै-र्भवति यथा मन्त्रादिभिः तत्रारविन्दलोचनः कमलनयन इति स्वरूपसौन्दर्यं सर्वतापनाशकत्वेनोपकारित्वं च निरूपितं धर्मान्मोह-कानाह । प्रगल्भा या लीलाः तत्सूचकं यद्धसितं तत्पूर्वकमवलोकनैरिति अतिकामुकस्य तादृशचेष्टासूचकं हास्यं भवति अवलोकनं च पुरस्त्रीत्वात्तासां तत्परिज्ञानं तेनैव ता व्यामुग्धा भवन्तीति हसितं मन्त्रात्मकं दृष्टिः पाशात्मिकेति यस्याः मनः येनैव प्रकारेणा-याति तादृशमेव प्रेक्षितं हसितं चेति ज्ञापयितुं बहुवचनं तत्र वाधिकां बुद्धिं दूरीकर्तुमाह । मत्तद्विरदेन्द्रविक्रम इति । भयं बाधकं लौकिकं तासां वैदिके अधिकाराभावात् विचारे दोषाभावाच्च तत्रायं यथा मत्तो द्विरदेन्द्रः स्वार्थं सर्वानविचार्य लौकिकालौकिक-साधनयुक्तो यथा मत्तगजः सजातीयानामप्यतिक्रमार्थम् इन्द्रपदं तस्यापि सर्वथा कर्त्तव्यत्वेन धर्मः अत्यधिको भवतीति विक्रमपदं तस्मादस्य एतत्प्रपत्तौ तासां च सर्वथा भयाभावश्च सूचितः । ननु दृष्टिद्वारा हि मनोग्राह्यमन्तः स्थितम् इन्द्रियान्तरव्यापारस्य तदानीमभावात् दृष्टिः पुनः चञ्चला अन्यत्र गच्छेद्यदि तदा तद्द्वारा ग्रहणं सर्वथा न सम्भवतीतिकथमेकान्ततो ग्रहणमीत चेत्तत्राह । तासां दृशां श्रीरमणात्मना लक्ष्मीरमणरूपेण उत्सवं ददिति उत्सवासक्तो हि नान्यत् किञ्चन वेद सर्वस्वापहारोऽपि चञ्चलानां मध्ये लक्ष्मीः परमकाष्ठामापन्ना ताश्चेद्रमयति अनन्यासक्तान्करोति कथमन्यां न कुर्यात् अतो निष्प्रत्यूहं तासां मनोहरण-मुपपद्यते आत्मपदेन चावश्यकत्वं तत्परत्वे सूचयति ॥ २७ ॥ ननु भगवानक्लिष्टकर्मा तासां मनः कथं गृहीतवानित्यशङ्क्याह । दृष्ट्वेति । आत्मानं सकार्यं ताभ्यो दत्त्वा तासां मनोगृहीतवान् भगवत्स्वरूपग्रहणे तासां प्रकारमाह । दृष्ट्वेति । मुहुः पूर्वं बारं वारं श्रुतो यो भगवान् स इदानीं पृष्टः ततः प्रथमं चक्षुः प्रीतिरुक्ता श्रवणव्यतिरेकेण प्रीत्तिर्न भवतीति अन्यथाद्भुतरस एवोत्पद्यते तत्प्रीतिः सर्वेभ्योऽभ्यधिकप्रीतिसिद्धयर्थं मुहुः श्रवणमपेक्ष्यते ततस्तासां चित्तासंगमाह । अनुद्रुतचेतस इति । दर्शनमनुद्रुतं चित्तं यासामत एव ध्रियमाणमपि स्वभावादिभिन्नं स्थितं तमिति हृतमनसं तेन चित्तप्रतिवन्धकं मनोऽपि नास्ति प्रत्युतानुगुणमेवेति इति पुरस्कारमाह । तस्य प्रेक्षणपूर्वकं यदुत्स्मितमूर्ध्वस्मितं सर्वप्रपञ्चात् अधिकरसं तद्विस्मारकं च सैव सुधामिष्टत्वाय स्मितम् अलौकिकभावाय प्रेक्षणमिति द्वयं मिलितममृतं तुल्यं भवति । आभासैरप्युपमीयते प्रकृतोपयोगाय तथा यदुक्षण सेचनं तेन लब्धो मानो याभिः लताप्रायास्ताः अमृतासिक्ताः भगवतोऽप्यानन्दरूपं फलं फलिष्यन्तीति ततः संमाननां प्राप्य आनन्दानुभवे योग्याः सत्यः भावलक्षणं वा मानं प्राप्य तदपनोदनार्थमिव समागतं भगवन्तं स्वतः पुरुषार्थरूपमानन्दरूपा मूर्तिर्यस्येति उपगुह्य अन्त-रात्मना चित्तन च समालिङ्ग्यान्तः पूर्णा जाता भगवत्प्रविष्टमार्गमाह । दृशा आत्मलब्धमिति । दृष्टिद्वारा ज्ञानद्वारा च आत्म-न्यात्मत्वेन वा लब्धं ततोऽन्तः पूर्णानन्दः बहिरपि तं प्रकटितवत्य इत्याह । हृष्यत्त्वच इति । सर्वाङ्गेषु रोमाञ्चयुक्ताः ततः पूर्ण-मनोरथा जाता इत्याह । अनन्तमाधिं जहुरिति । भगवानस्माभिर्न प्राप्त इति पूर्वं मनःपीडा स्थिता प्राप्तेऽपि भगवति यावन्नित्य-प्राप्तो भगवान्न ज्ञायते यावद्वा नान्तः प्रविश्य स्थिरो भवति तावद्भूतभविष्यत्कालयोःभगवत्संबन्धा भावचिन्ता न गच्छतीति अधुनान्तः प्रविष्टे भगवति तेनैव पूर्णाः मनःपीडायाः स्थानाभावात्तां जहुः अन्यथा नित्यमनोरथः क्षणमात्रदृष्टेन सिध्येत् अरिन्दमेति सम्बोधनं लौकिकालौकिकतुल्यतया स्त्रीपुंसप्रसङ्ग इति लौकिकभावेन कामादिभिर्भवेदिति तन्निवृत्त्यर्थं अरीन् कामादीन् दमयतीति ॥ २८ ॥

श्रीसुबोधिनी-सार

तदाह द्वाभ्याम् । विपर्यक् विपरीतं धृतानि वस्त्राणि भूषणानि च याभिस्ताः काश्चित् युगलेषु कुण्डलादिषु एकं विस्मृत्याऽपराः कृतमेकमेव पत्रं ययोस्ते श्रवणे यासाम् एकं नूपुरं यासां ताश्च ताश्च द्वितीयं लोचनं नांक्त्वांजनेनासत्कृत्याऽपराः समीयुः ॥ २५ ॥ उत्सवैः सहिता एका अश्नन्त्यो भोजनं कुर्वत्यस्तत् भोजनमपास्य त्यक्त्वा अभ्यज्यमाना दासीभिः क्रियमाणैलाभ्यंगा अकृतोपमज्जना अकृतस्नानाः निःस्वनं निशम्य रामकृष्णावागताविति शब्दं श्रुत्वा स्वपन्त्य उत्थाय स्तनं प्रपाययन्त्यो मातरोऽर्भं बालकमपोह्य त्यक्त्वा समीयुः ॥ २६ ॥ मत्तगजेंन्द्रलीलः श्रीरमणेनात्मना मूर्त्या दृशां नेत्राणामुत्सवं ददरविंदलोचनः कृष्णः प्रगल्भा उत्कृष्टा लीलास्ताभिर्हसितानि निरीक्षणानि च तैः तासां स्त्रीणां मनांसि जहार ॥ २७ ॥ मुहुरसकृत् श्रुतं तं श्रीकृष्णं दृष्ट्वाऽनुद्रुतमनुगतं चेतो यासां ताः तस्य प्रेक्षणम् उत्स्मितं च तदेव सुधातयोक्षणं सेचनं तेन लब्धो मानो याभिस्ताः स्त्रियो दृशा नेत्रद्वारेणात्मनि लब्धं प्राप्तम् आनन्दमूर्त्तिं कृष्णमुपगुह्यालिंग्य हृष्यत्त्वचः सरोमांचिता अनंतमाधिं व्यथां जहुः तत्यजुः हे अरिंदम ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तासां त्वरामौत्सुक्यं च तत्कार्यद्वारा स्पष्टयति–काश्चिदिति । विपर्यक् 'पादाभरणं हस्ते हस्ताभरणं च पादे, तथाधोधार्यं वस्त्रमुपरि उपरिधार्यं वस्त्रं चाध' इत्येवं विपरीतं यथा भवति तथा धृतानि वस्त्राणि भूषणानि च याभिस्तथाभूताः काश्चित् समीयुरिति पूर्वस्यैवानुषङ्गः श्लोकद्वये सर्वत्र । अथ तथा अपरास्तु युगलेषु धार्येषु कुण्डलकङ्कणादिषु एकं विस्मृत्यैकमेव धृत्वा समीयुः । अन्यास्तु कृतं निहितं एकमेव पत्रं ताटङ्कं ययोस्ते श्रवणे कर्णौ यासां एकमेव नूपुरं चरणाभरणं यासां ताश्च ताश्च समीयुः । अपरास्तु द्वितीयं स्वलोचनं नाक्त्वा एकस्मिन्नेव लोचने कज्जलं निधाय समीयुः ॥ २५ ॥ काश्चित्तु अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यङ्गा अकृतस्नाना एव समीयुः । काश्चित्तु स्वपन्त्यः निःस्वनं भगवदागमनान्मार्गजनकृतं कोलाहलशब्दं निशम्य श्रुत्वोत्थाय समीयुः । एवं सर्वासां गमने हेतुमाह—सोत्सवा इति ॥ २६ ॥ अरविन्दवल्लोचने यस्य सः तथा द्विरदेन्द्रो मत्तगजस्तद्वद्विक्रमो गतिर्यस्य स भगवान् प्रगल्भा उत्कटा लीला हसितानि ईक्षणानि च तैः तथा श्रियं लक्ष्मीं रमयतीति श्रीरमणस्तेनात्मना वपुषा च तासां स्त्रीणां दृशामुत्सवं हर्षं ददत् मनांसि हे अरिन्दम निर्जितकामादिशत्रो ! मुहुः श्रुतत्वात्तमनुद्रुतचेतसस्तं दृष्ट्वा तस्य प्रेक्षणपूर्वकं यदुत्स्मितं तदेव सुधा तयोक्षणं सेवनं तेन लब्धो मानः सत्कारो याभिस्ताः दृशा उद्घाटितनेत्रद्वारा आत्मनि अन्तःकरणे लब्धं प्राप्तं आनन्दमूर्ति श्रीकृष्णमुपगुह्य आलिङ्ग्य हृष्यत्त्वचस्तद्प्राप्तिजमन्तसमाधिं मनोऽव्यथां जहुः ॥२८॥

अन्वितार्थप्रकाशिका

काश्चिदिति ॥ निस्वनं भगवदागमे लोकैः कृतं कोलाहलं निशम्य सोत्सवाः भगवद्दर्शनोत्कण्ठिताः काश्चित् इति सर्वत्र सम्बध्यते । विपर्यक् पादाभरणं हस्ते हस्ताभरणं च पादे तथाधोधार्यं वस्त्रमुपरि उपरिधार्यं वस्त्रं चाध इत्येवं विपरीतं यथा भवति तथा धृतानि वस्त्राणि भूषणानि च याभिस्तथाभूताः काश्चित्समीयुरिति पूर्वस्यैवानुषङ्गः श्लोकद्वये सर्वत्र । अथ तथा अपरास्तु युगलेषु धार्येषु कुण्डलकङ्कणादिषु एकं विस्मृत्यैकमेव धृत्वा समीयुः । अन्यास्तु कृतं निहितं एकमेव पत्रं ताटङ्कं ययोस्ते श्रवणे कर्णौ यासां एकमेव नूपुरं चरणाभरणं यासां ताश्च ताश्च समीयुः । अपरास्तु द्वितीयं स्वलोचनं नाङ्क्त्वा अनङ्क्त्वा एकस्मिन्नेव वामे लोचने कज्जलं निधाय समीयुः । एकाः काश्चित्तु अश्नन्त्यः भुञ्जानाः । नुमार्षः । तत् भोजनमपास्य समीयुः । एकास्तु अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यङ्गाः अभ्यङ्गमपास्य समीयुः । काश्चित् स्नान्त्यः अकृतोपमज्जनाः अकृतस्नानाः क्लिन्नगात्र्य एव समीयुः । काश्चित्तु स्वपन्त्यः शयानाः । नुमार्षः । उत्थाय समीयुः तथा काश्चित् बालानां मातरः अर्भं बालं स्तनं प्रपाययन्त्यः अपोह्य बालं निरस्य समीयुः । केचित्तु सोत्सवा इत्यत्र विवाहादिकर्मपरास्तत्तत्कर्म त्यक्त्वा परिणीयमानाः कन्याश्च पतिपरिक्रमणमसमाप्य समीयुरित्याहुः ॥ २५–२६ ॥ मनांसीति ॥ मत्तद्विरदेन्द्रो मत्तगजस्तद्वद्विक्रमो गतिर्यस्य सः अरविन्दलोचनः भगवान् प्रगल्भा उत्कटा लीलास्ताभिः हसितानि अवलोकनानि च तैः तथा श्रियं लक्ष्मीं रमयतीति श्रीरमणस्तेनात्मना वपुषा च तासां स्त्रीणां दृशामुत्सवं हर्षं ददत् मनांसि जहार अपहृतवान् ॥ २७ ॥ दृष्ट्वेति ॥ हे अरिन्दम ! मुहुः श्रुतत्वात्तमनुद्रुतचेतसस्तास्तं दृष्ट्वा तस्य प्रेक्षणपूर्वकं यदुत्स्मितं तदेव सुधा तयोक्षणं सेचनं तेन लब्धो मानः सत्कारो याभिस्ताः दृशा उद्घाटतनेत्रद्वारा आत्मनि अन्तःकरणे लब्धं प्राप्तम् आनन्दमूर्तिं श्रीकृष्णमुपगुह्य आलिङ्ग्य हृष्यत्त्वचस्तदप्राप्तिजमनन्तमाधिं मनोऽव्यथा जहुः ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

औत्सुक्यं निरूपयति श्लोकद्वयेन काश्चिदिति विपर्यक् विपरीतं यथातो धृतानि वस्त्राभरणानि याभिस्ताः युगलेषु धारणीयेषु कंकणकुंडलादिषु मध्ये एकं विस्मृत्य दर्शनवेगेन समीयुरिति सर्वत्र योज्यं कृतं धृतमेकमेवपत्रं ययोस्तथा भूते श्रवणेकर्णौ मासां एकमेव नुपुरं पादाभरणं यासां ताश्च अपरास्तुनांक्ता एकलोचने कज्जलं धृत्वा द्वितीयलोचनमनंक्त्वैव समीयुः ॥२५॥ या मद्भोजनमपास्यत्यक्त्वा इति सर्वत्र योज्यं सोत्सवाः हर्यभराक्रान्तचिताः अभ्यज्यमानाः सखीभिः क्रियमाणतैलमर्दना अपि अकृतस्नानः समीयुः निःस्वनं कृष्णागनशब्दं अर्भबालकमपोह्य त्यक्ता ॥ २६ ॥ कमलनेत्रः प्रगल्भाः मनोहरणसमर्थाश्च ता लीलाः भ्रूनर्तनादमश्चताभिः सह हसितानि च तान्यवलोकनानि च तैः श्रियं लक्ष्मीरयतीति श्रीरमणस्तेन आत्मना विग्रहेण तासां पोषितां दृशामुसवं आनन्दं ददत् सिमना जहार ॥२७॥ दृष्ट्वेति मुहुः पुनः पुनः श्रुतं लोकोक्त्या कर्णगोचरीकृतं श्रीकृष्णमनुद्रुतं अनुगतं चेतो या सा ताः तं दृष्ट्वा तस्य प्रेक्षणं च उत्स्मितं उत्कृष्ट हास्यं च ते एव सुधा तया उक्षणं सेवनं तेन लब्धो मानो याभिस्ताः दृशा दृष्टिद्वारा आत्मनि मनसि लब्धं प्राप्तं आनंद मूर्त्तिपरमानंद मयविग्रह हरिमुपगुह्य आलिंग्य रुष्पत्त्वचः सत्यः अनंतमाधिं व्यथां जहुः । हे अरिंदमकामादिशत्रुदमन एवं भूतेनैव त्वया एतच्चरित्रं श्रोतव्यमिति भावः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तासां त्वरामौत्सुक्यं चाह द्वाभ्याम् । काश्चिदिति । काश्चित्, विपर्यग्विपरीतमयथातथं धृतानि वस्त्राणि भूषणानि च याभिस्ताः, एवंभूताः सत्य इत्यर्थः । अथ अपराः काश्चन तु, युगलेषु धार्येषु कुण्डलकङ्कणादिषु, एकं विस्मृत्य, समीयुरित्य-

नुषञ्जनीयम् । अन्याः काश्चन तु, कृतं निहितमेकमेव पत्त्रं ताटङ्कं ययोस्ते श्रवणे श्रोत्रे यासां ताः, एकमेव नूपुरं चरणाभरणं यासां ताः ताश्च, ताश्च, केचित्तु कृतैकपत्त्रश्रवणाः, एकनूपुराः इति पृथक् कृत्वा संधिश्छान्दस इत्याहुः । अपरे चार्षइत्याहुः । काश्चन अपराः तु, स्वलोचनं लोचनद्वयमध्ये एकं स्वनेत्रमित्यर्थः । न अङ्क्त्वा, एकस्मिन्नेव लोचने कज्जलं निधायेत्यर्थः । समीयुः ॥ २५ ॥ अश्नन्त्य इति । एकाः काश्चन स्त्रियस्तु अश्नन्त्य ओदनाद्यशनं कुर्वन्त्यः, तदन्नभोजनं अपास्य विहाय, काश्चित्तु अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यङ्गाः अपि, यतः सोत्सवाः कृष्णदर्शनोत्साहयुक्ताः, अत एव अकृत न विहितं उपमज्जनं स्नानं याभिस्तथाभूताः, जलेन स्नानक्रियामपास्येति भावः । स्वपन्त्यः विहितमहापर्यङ्कशयनाः सत्योऽपि, निःस्वनं कृष्णः प्रयातीति शब्दं निशम्य, उत्थाय पर्यङ्कादुत्थानं कृत्वा, अपरास्तु मातरः अर्भकजनन्यः, अत एव प्रपायन्त्यः अर्भकेभ्यः स्तनपानं कारयन्त्यः सत्योऽपि, अर्भमर्भकं, अपोह्य स्तनन्धयं तदपत्यं विहायेत्यर्थः समीयुरिति सर्वत्रसंबन्धः ॥ २६ ॥ मनांसीति । मत्तश्चासौ द्विरदेन्द्रश्च तस्येव विक्रमः पादविक्षेपो यस्य सः, श्रियो लक्ष्म्याः रमणः कान्तः, अरविन्दलोचनः श्रीकृष्णो भगवान्, प्रगल्भा या लीलास्ताभिः हसितानि चात्रलोकनानि च तैः, तासां पुरस्त्रीणां, दृशां महोत्सवं ददत् हर्षं विदधत् सन्नित्यर्थः । मनांसि तासामिति शेषः । जहार । तासां चित्तान्यपहृतवानित्यर्थः । श्रीरमणात्मनोत्सवमिति पाठे श्रियं रमयतीति श्रीरमणस्तेनात्मना तासां दृशामुत्सवं ददिति योजना ॥ २७ ॥ दृष्ट्वेति । मुहुः श्रुतं, तं दृष्ट्वा, अनु तत्पश्चात् द्रुतानि गतानि चेतांसि चित्तानि यासां ताः, हे अरिन्दम, तस्य प्रेक्षणं चोत्स्मितं च तदेव सुधा तया उक्षणं सेचनं तेन लब्धो मानो याभिस्ताः, स्त्रियः दृशा, आत्मलब्धमुद्घाटितनेत्रद्वारात्मनि मनसि लब्धं प्राप्तं, आनन्दमूर्त्तिं श्रीकृष्णं, उपगुह्य परिष्वज्य, हृष्यत्त्वचः पुलकितत्वचः सत्यः, अनन्तमपारं आधिं जहुः । भगवद्प्राप्तिजामनवधिकां व्यथां विजह्रुरित्यर्थः ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मनांसीति : १०.४१.२७.

गोपीवद्वनिताभिरपि चेन्मत्प्राप्तिकामात्मकः सङ्कल्पो विहितस्तदा तु मदितस्तत्पूरणं दुर्घटम् ।
आलोच्यैवमथाच्युतश्चतुरधीः सङ्कल्पशून्यां स्थितिं तासां कर्तुमुपाजह्वार सहसा तद्धेतुभूतं मनः ॥ ४० ॥

कृष्णप्रिया

नाथ दर्शन की आतुरता में त्वरा से दौड़ती कई नारियाँ नेता उलटे सुलटे वस्त्र पहन लिए । तब कई नारियाँ तो जो जोड़ी के स्वरूप में धारण किए जाते कुण्डल, कङ्कण नूपुर आदि आभूषणों में एक ही पहना था और चल पड़ी तब कई नारियाँ केवल एक ही नयन में काजल लगाया था और दौड़ पड़ी ॥ २५ ॥ राजन्! भक्तों की अनासक्ति और प्रियतम कृष्ण में अनन्य भक्ति का दर्शन करे—जो नारियाँ भोजन करती थी, उन्होंने थाली में कोल को रख दिया और उत्कण्ठित होकर दौड़ गई! कई महिलायें केवल उपटन लगाया था स्नान करने जा रही थी स्नान को छोड़ा और चल पड़ी । जो नारियाँ निद्रित थी वे कोलाहल से जगकर दर्शन लालसा से दौड़ पड़ी तब जो मातायें बालकों को दूध पिलाती थी वे भी दूध पिलाना छोड़कर प्रभु दर्शन के लिए दौड़ गई ॥ २६ ॥ राजन्! भगवान् श्रीकृष्णचन्द्र तो अति चंचल श्रीलक्ष्मीजी को भी अपने स्वरूप से अविचल और आनन्द विभोर करते हैं वैसे कमल नयन मदमत्त गजराज के समान नन्दनन्दन, श्रीश्याम मनोहर श्री कृष्ण ने, स्वच्छन्द लीला विलास हृदयङ्गम हास, मोहक कटाक्ष एवं रमणीय स्वरूप से पुर नारियों के आनन्द देते हुए उनके हृदयों को हर लिया ॥ २७ ॥ हे शत्रुञ्जय राजन्! पुर नारियों ने बार-बार भगवान् श्रीकृष्ण की दिव्यलीलाओं का श्रवण किया था, भगवान् के मङ्गलमय चरितों का श्रवण किया था, अनुराग तो लीला श्रवण से ही उमड़ रहा था, दर्शन की उत्कट लालसा थी, आज सुन्दर वर नटवर श्याम मनोहरजी का दर्शन पाया, उनके चित्त जल प्रवाह की तरह प्रवाहित बनकर प्रभु की ओर बह गया । जब श्रीठाकुरजी का दर्शन किया तब दयानिधि प्रभु ने कृपा सभर दृष्टि से माथुर वनिताओं को देखकर और मन्दस्मित मय मधुर सुधा पिलाकर उनके अन्तःकरण आनन्द से भर दिये, स्नेह नजरों से उनका आदर किया । दृष्टि द्वारा हृदय में विराजमान आनन्द स्वरूप भगवान का समालिङ्गन करके सहज ही रोमोद्गम हुआ, अब भगवान् का कभी विरह नहीं होगा इस भाव से अनन्त आदि से मुक्त हो गई ॥ २८ ॥

प्रासादशिखरारूढाः प्रीत्युत्फुल्ल[1] दृशोऽबलाः । अभ्यवर्षन् सौमनस्यैः प्रमदा बलकेशवौ ॥ २९ ॥
दध्यक्षतैः सोदपात्रैः स्रग्गन्धैरभ्युपायनैः । तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ॥ ३० ॥
[2]ऊचुः पौरा अहो गोप्यस्तपः किमचरन् महत् । या ह्येतावनुपश्यन्ति नरलोकमहोत्सवौ ॥ ३१ ॥
रजकं कञ्चिदायान्तं रङ्गकारं गदाग्रजः । दृष्ट्वायाचत वासांसि धौतान्यत्युत्तमानि च ॥ ३२ ॥

---

१. मुखाम्बुजाः—श्रीधर. वंशी. जीव. वीर. विज. विश्व. । २. ''ऊचुः'' अयं श्लोकोऽधिकः—विज. ।

कर्वमक्षमा

अन्वयः—प्रासादशिखरारूढाः, प्रीत्या, उत्फुल्लदृशः, अबलाः, प्रमदाः, बलकेशवौ, सौमनस्यैः, अभ्यवर्षन् ॥ २९ ॥ तत्र, तत्र, द्विजातयः, दध्यक्षतैः, सोदपात्रैः, स्रग्गन्धैः, अभ्युपायनैः, प्रमुदिताः, तौ, आनर्चुः ॥ ३० ॥ पौराः, ऊचुः, अहो, गोप्यः, किम्, महत्, तपः अचरन्, नरलोकमहोत्सवौ, एतौ, हि, अनुपश्यन्ति ॥ ३१ ॥ गदाग्रजः, आयान्तम्, कञ्चित्, रङ्गकारम्, रजकम्, दृष्ट्वा, अयाचत, धौतानि, च (रञ्जितानि) उत्तमानि, वासांसि, अयाचत ॥ ३२ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

सौमनस्यः कुसुमसमूहैः शोभनमनोभावैर्वा ॥ २९-३० ॥ पौराः पुरस्त्रियः ॥ ३१ ॥ रजको वस्त्रनिर्णेजकः स एव वस्त्रीणां रंगमपि कुर्वन रंगकारस्तम् ॥ ३२-३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कुसुमवृष्टेरपि सुमनस्त्वं हरेरानन्दजनकमिति मत्वाह—शोभनमनोभावैरिति ॥२९॥ तौ बलकृष्णौ । तत्रतत्र स्थलेस्थले । उदपात्रं पाद्याद्यर्थम् । उपायनैरुपवीतफलाद्यैः ॥ ३० ॥ या गोप्यः । एतौ बलकृष्णौ । प्रेक्षणेनैवातीवानन्दजनकत्वान्नरो लोक्यते निजानन्दप्रदत्वेन येन स नरलोकः । यद्वा—नरैर्लोक्यते निजानन्दप्रदत्वेन यः स नरलोकः स्त्रीजनस्तस्य महान् कथनस्याप्यगोचर उत्सवो याभ्यां तौ तथा ॥ पौराः पौर्यः, केवलगोपीनां श्लाघनात् । ङीबभावस्त्वार्षः । यद्वा – एवं स्त्रीपुंसानां सर्वेषामेव प्रमोदमुक्त्वा तत्र च प्रायो रूपदर्शनमेव कारणमिति बोधयंस्तन्माहात्म्यं तात्पर्येणाह—ऊचुरिति । पुरौकसः सर्वेऽपि किमूचुस्तदाह—अहो इति । तत्र गोप्य इत्युपलक्षणं नरलोको भूर्लोकस्तत्रावतीर्णत्वेन तत्प्राधान्यात् । यद्वा—नराणामित्युक्त्वा सतोषाभावादाहुः—लोकानां चतुर्दशभुवनानामपि । यद्वा—नरलोको जीवलोकस्तेषां सर्वेषामपि महानुत्सवो याभ्यां तौ महोत्सवरूपाविति वा । अनु निरन्तरं पश्यन्तीति वर्तमाननिर्देशः पुनस्तत्र गमनसंभावनात् ॥ ३१ ॥ अथ श्रुतिविहितरजकवधमालाकारकुब्जाद्यनुग्रहमाह—रजकमिति । तथाह श्रुतिः—"युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रामन्तवो ह सर्गाः" इति । अर्थस्तु युवं युवाम् । पीवसा बलेन रजकं हत्वेत्यर्थः । वस्त्राणि वसाथे । युवोर्युवयोः । मन्तवो मानयितारः—मालाकारकुब्जाप्रभृतयः । सर्गाः सृजन्ति माल्यानुलेपनादिकं ये ते सर्गाः । अच्छिद्रा नीचत्वकुब्जत्वदोषहीना भवन्तीति ॥ एवं शिष्टानां परमानन्देन तत्संमाननमुक्त्वा दुष्टानां तद्वैपरीत्यं दर्शयन्नादौ रजकवधमाह—षड्भिः । किञ्चिद्दैत्यस्वभावं कंसानुगमित्यर्थः । अत उक्तं वैष्णवे—'कृष्णस्तस्य दुरात्मनः' इति । रंगकारमित्यनेन तस्य विक्रेतव्यान्यपि कतिचिद्वस्त्राण्यासन् । वञ्चनार्थमेव तु राजवस्त्राणीति वक्ष्यतीति भावः । वस्त्रधावनस्थानात्पुर्यन्तरागच्छन्तमिति, तदपि मंगलमेकमिति सूचितम् । 'धौताम्बरश्च रजकोऽपि शुभाय दृष्टः' इत्युक्तेः । गदाग्रज इत्यनुप्रासरक्षार्थं, रजरङ्गेति वारद्वयश्रवणात् । यद्वा—गदोऽपि तादृशत्वेन प्रसिद्धः किमुत तदग्रजः स्वयं भगवानिति ज्ञापनार्थम् । एवं यदुकुललीलारम्भे गुणतः श्रीरामकृष्णेतरसर्वभ्रातृगणमुख्यस्य गदस्यापि जन्म सूचितम् । गदौ च द्वौ । 'बलं गदं सारणञ्च' इति रौहिणेयः । "देवरक्षितया लब्धा नव चात्र गदादयः" इति । दैवरक्षितेयश्चेति । तत्र रौहिणेयस्य जन्माभावादन्यतर एव गृह्यतेऽत्र । स चानन्तरकनिष्ठः, श्रीकृष्णश्चानन्तरज्येष्ठः । श्रीरामवदेव सहविहारी भविष्यतीति सूचितम् । अत एव 'कच्चिद्गदाग्रजः सौम्य' इति श्रीगोपीभिः, 'मम गदाग्रज एत्य पाणिम्' इति श्रीरुक्मिण्या च वक्ष्यत इति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आधित्यागलक्षणमाह । प्रासादेति । पूर्वं हर्म्याण्यारुरुहुरित्युक्तम् । इदानीञ्च प्रासादाग्रमारूढा इत्यौत्सुक्याधिक्यं दर्शितं बलं केशवं चाभितो वर्षन् एकत्र स्थितत्वात् । यद्वा श्रीकृष्णाग्रजत्वेन तस्मिन्नोपभुक्तेः प्रमदाः श्रीकृष्णेन प्रकृष्टमदा इत्येव तात्पर्यम् अयमभिवर्षणे हेतुः कंसादभये च बलकेशवाविति बलाधिक्यकेशिहन्तृत्वस्फूर्त्तेः सर्वेषां तदा तद्विषयकमपि भयं न जातमिति भावः । बलस्यादौ निर्द्देशः श्रेष्ठत्वेनाग्रे गमनात् ॥ २९ ॥ इत्थं प्रायो मृदुलतमहृदयतया भावविशेषयुक्ताभिः स्त्रीभिरादौ श्रीभगवत्संमानमुक्त्वा ब्राह्मणैः कृतमाह । दधीति । उदकपूर्णघटसहितैर्दध्यादिभिः उपायनैरप्यन्यैर्मङ्गलायनफलादिभिः नन्वेतेऽपि कथं कंसाद्भयं नाकुर्वन् तत्राह । प्रकर्षेण मुदिताः अहो सोऽयं भगवानिति परमानन्देन तद्भयापगमादिति भावः । अत्र द्विजा विप्रा एवाग्रे वैश्यानामुक्तेः ॥ ३० ॥ पौराः पौर्यः केवलगोपीनां श्लाघनात् । ङीप् प्रत्ययाभाव आर्षः, यद्वा एवं स्त्रीपुंसानां सर्वेषामेव प्रमोदमुक्त्वा तत्र च प्रायो रूपदर्शनमेव कारणमिति बोधयन् तन्माहात्म्यं तात्पर्येणाह ऊचुरिति । पुरौकसः सर्वेऽपि किमूचुस्तदाह अहो इति । तत्र गोप्य इत्युपलक्षणम् । नरलोको भूर्लोकः तत्रावतीर्णत्वेन तत्प्राधान्यात् । यद्वा । नराणामित्युक्त्वा सन्तोषाभावादाहुः लोकानां चतुर्द्दशभुवनानामपि । यद्वा । नरलोका जीवलोका स्तेषां सर्वेषामपि महानुत्सवो याभ्यां तौ महोत्सवरूपाविति वा । अनु निरन्तरं पश्यन्तीति वर्त्तमाननिर्द्देशः पुनस्तत्र गमनसम्भावनात् ॥ ३१ ॥ एवं शिष्टानां परमानन्देन तत्सम्माननमुक्त्वा दुष्टानां तद्वैपरीत्यं दर्शयन्नादौ रजकमिति षड्भिः । कञ्चिद्दैत्यस्वभावं कंसानुगममित्यर्थः । अत उक्तं वैष्णवे "कृष्णस्तस्यदुरात्मन" इति । रङ्गकारमित्यनेन तस्य विक्रेतव्यान्यपि कतिचित् वस्त्राण्यासन् । वञ्चनार्थमेव तु राजवस्त्राणीति वक्ष्यतीति भावः ।

वस्त्रधवनस्थानात् पुर्यन्तरागच्छन्तम् इति तदपि मङ्गलमेकमिति सूचितं "सधौतवस्त्रो रधकस्त्वधन्य" इत्युक्तः गदाग्रज इत्यानुप्रासरक्षार्थं रङ्गरङ्गेति वारद्वयश्रवणात्। यद्वा। गदोऽपि तादृशत्वेन प्रसिद्धः किमुत तदग्रजः स्वयं भगवानिति ज्ञापनार्थम् एवं यदुकुललीलारम्भे गुणतः श्रीरामकृष्णेतरसर्वभ्रातृगणमुख्यस्य गदस्यापि जन्म सूचितं गदौ च द्वौ। बलं गदं सारणञ्चेति रौहिणेयः देवरक्षितया लब्धा नव चात्र गदादय इति देवरक्षितेयश्चेति। तत्र रौहिणेयस्य जन्माभावात्। अन्यतर एवात्र गृह्यते। स चान्तरकनिष्ठः श्रीकृष्णस्यानन्तरज्येष्ठः श्रीरामवदेव सहविहारी भविष्यतीति सूचितम्। अत एव कच्चिद्गदाग्रजः सौम्येति श्रीगोपीभिर्मम गदाग्रज एत्य पाणिमिति रुक्मिण्या च वक्ष्यते इति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आधित्यागलक्षणमाह—प्रासादेति। पूर्वं हर्म्म्याण्यारुरुहुरित्युक्तमिदानीञ्च प्रासादानां शिखराण्यग्रभागानारूढा इत्यौत्सुक्यविवृद्धयात्युच्चैः स्थितिः सम्यग्दर्शनार्थम्; बलं केशवञ्चाभितोऽवर्षन्, एकत्रैव वर्त्तमानत्वात्। यद्वा, श्रीकृष्णाग्रजत्वेन तस्मिन्नपि भक्तेः। प्रमदाः श्रीकृष्णभावेन प्रकृष्टो मदो मत्तता यासामिति भावः। अयमभिवर्षणे हेतुः। ननु कंसात्ताः कुतो न बिभ्यति स्म? तयोः प्रभावादित्याशयेनाह—बलाधिक्याद्बलः, हेलया महाबलिष्ठकेशिहननात् केशवस्तावित; यद्वा, केशोः परमोत्तमाः सन्त्यस्येति केशव इति परमसौन्दर्य्यम्, तत्र च बलसाहित्येन शोभाधिक्यं चोक्तम्। इदमभिवर्षणे हेत्वन्तरम्। कंसाद्भयञ्च प्रमदात्वेन परिहृतमेव स्यात्। बलस्यादौ निर्देशः ज्येष्ठत्वेनाग्रे गमनात् ॥ २९ ॥ इत्थं प्रायो मृदुलतरहृदयतया भावविशेषयुक्ताभिः स्त्रीभिरादौ श्रीभगवत्सम्माननमुक्त्वाधुना ब्राह्मणैः कृतमाह—दधीति। उदकपात्र—सहितैर्दध्यादिभिः पात्राणां मुक्तिर्जलस्य पानसुशैत्याद्यर्थम्, तद्ग्रहणादुपायनैरप्यन्यैर्घृत-पक्वताम्बूलाद्युत्तमद्रव्यैः। नन्वेतेऽपि कथं कंसाद्भयं नाकुर्व्वन्? तत्राह—प्रकर्षेण मुदिताः परमानन्देन तद्भयापगमादित्यर्थः। अनेनार्च्चनविधौ भक्तिश्रद्धासम्यक्त्वादिकमपि सूचितम्। यद्यपि द्विजाति-शब्देन त्रैवर्णिका गृह्यन्ते, तथाप्यत्र विप्रा एव ज्ञेयाः, अग्रे वाणिज्यवृत्तीनां वैश्यानामुक्ते ॥ ३० ॥ एवं स्त्रीपुरुषाणां सर्व्वेषां प्रमोदमुक्त्वा तत्र प्रायो रूपदर्शनमेव कारणमिति बोधयन् तन्माहात्म्यं तात्पर्य्यमाह—ऊचुरिति। ई प्रत्ययाभाव आर्षः, पौराः पौर्य्य इत्यर्थः। अन्यथा केवलं श्रीगोपीनामेव तपःश्लाघानुपपत्तिः। यद्वा, पुरवासिनः सर्व्वेऽपि जनाः ततश्च गोप्य इति तासामेव सर्व्वचमत्कारकरेण भावविशेषेण प्रसिद्धत्वात्। किम्? तदाह—अहो इत्याश्चर्य्ये। गोप्या वन्यास्त्रियो महत् सर्व्वोत्कृष्टं तपः पुण्यं किं कतरच्चक्रुः? हि निश्चितम्। नरलोको भूर्लोकः। यद्वा, आदौ नराणामित्युक्त्या सन्तोषाभावादाहुः—लोकाना चतुर्द्दशभुवनानामपि, यद्वा, नरा जीवास्तेषां लोको दृष्टिस्तस्य महानुत्सवो याभ्यां तौ महोत्सवरूपाविति वा। अनु निरन्तरं पश्यन्तीति वर्त्तमाननिर्द्देशः, पुनस्तत्र गमन-मननात् ॥ ३१ ॥ एकं शिष्टानां परमानन्देन तत्सम्माननमुक्त्वा दुष्टानां तद्वैपरीत्यं दर्शयन्नादौ रजकवधमाह—रजकमिति षड्भिः। कञ्चित दुष्टदैत्यस्वभावं कंसानुगमित्यर्थः। अतएवोक्तं श्रीपराशरेण (वि० पु० ५।१९।१६)—'कृष्णस्तस्य दुरात्मनः' इति, रंगकारमित्यनेन तस्य तद्वस्त्रस्वामित्वमपि ध्वनितम्। केवलं बञ्चनार्थं राजवस्त्राणीति मृषा वक्ष्यति, वस्त्रधावनस्थानात् पूर्य्यन्तरागच्छन्तम्। गदाग्रज इत्यशेष—भगवताप्रकटनेन महारसिकता सूचिता। किञ्च, तथा यदुकुलत्वेन तद्रजकसम्मान्यता च, तदग्रजतया तादृशपोरवस्त्राण्यर्हत्येवेत्ययाचत, धौतानि प्रक्षालित-नूतन-कार्पासिकादीन्यत्युतमान्यभिनवसुरञ्जितदिव्यपट्टवस्त्रादीनि च ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

प्रीत्योत्फुल्लानि मुखाम्बुजानि यासां ताः प्रमदाः स्त्रियः सौमनस्यैः कुसुमसमूहै रामकृष्णावभ्यवर्षन ॥२९॥ द्विजातयो ब्राह्मण्यस्तत्र तत्र प्रमुदिताः सत्यः दध्यादिभिस्तौ रामकृष्णावानर्चुः ॥ ३० ॥ पौराः स्त्रियः परस्परमुचुः उक्तिमेवाह। अहो इत्यादिना गोप्यः किं महत्तपश्चक्रुः अन्यथैतन्न सम्भाव्यत इत्यभिप्रेत्याहुः। या गोप्यः नरलोकस्य महानुत्सवो याभ्यां तौ रामकृष्णावनुपश्यन्ति ॥ ३१ ॥ इत्थं तासु कथयन्तीषु सतीषु तदा गदाग्रजो भगवान् कञ्चिदायान्तं रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रङ्गमपि कुर्वन् रङ्गकारस्तं दृष्ट्वा धौतानि निर्णिक्तानि अद्भुतानि वस्त्राणि अयाचत ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सौमनस्यैः सुमनसां पुष्पाणां राशिभिः ॥ २९ ॥ आनर्चुः पूजयामासुः ॥ ३० ॥ रङ्गकारं वर्णकारकम् ॥ ३२-३४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ऊचुः पौरा इत्यादि। पौराः पुरजनस्त्रियः पुरुषाश्च। गोप्य इति सत्सु सर्वेषु व्रजजनेषु तासां दर्शनातिशयानुरागभाक्त्वात् प्रधानतया निर्देशः ॥ ३१-४५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पौराः प्रवयसः स्त्रियश्च पुत्रभावेन। गोप्यो यशोदादिप्रवयसः ॥ ३१-४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सुमनसां तासां कर्माणि भावोङ्गितानि सौमनस्यानि तैर्हेतुभिरभ्यवर्षन् कुसुमानि स्मितानि वेति शेषः ॥ २९–३० ॥ पौराः पुरवासिस्त्रीजनाः ॥ ३१ ॥ रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रङ्गमपि कुर्वन् रङ्गकारस्तम् ॥ ३२–३४ ॥

गूढार्थदीपिनी

सोमनस्यैः कुसुमसमूहैः अभ्यवर्षन् । प्रीत्या उत्फुल्लानि विकसितानि मुखाम्बुजानि यासां ताः ॥ २९ ॥ अभ्युपायनैः मिष्टान्नफलादिभिः आनर्चुः । उदपात्रं पादप्रक्षालनार्थम् ॥ ३० ॥ पौराः नागरिकाः स्त्रीजना वा सर्वेऽपि ऊचुः ॥ ३१–३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रीत्या उत्फुल्लानि मुखाम्बुजानि यासां ताः सौमनस्यैः कुसुमकलापैः ॥ २९ ॥ द्विजातयस्त्रैवर्णिकाः ॥ ३० ॥ पौराः पुरस्त्रियः नरलोकस्य महानुत्सवो याभ्यां तौ ॥ ३१ ॥ रजकं वस्त्रनिरर्णेजकम् रङ्गकारं वस्त्राणां रङ्गं करोतीति तम् ॥ ३२–३३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सौमनस्यैः पुष्पराशिभिः सुमनसां भावा सौमनस्यानि तैश्च ॥ २९ ॥ दधिभिरक्षतैश्च सोदपात्रैर्मध्य आचमनाद्यर्थं सजलैः पात्रैः स्रजश्च गन्धाश्च तैरभ्युपायनैः सम्मुखाभिगमनैरितरैः पूजासाधनैर्वा तत्र तत्र द्विजातयो ब्राह्मणा आनर्चुरपूजयन् ॥ ३० ॥ गदाग्रजः किञ्चिद्रङ्गकारं रङ्गं वर्णं करोति स तथा तं रजकं चायान्तं दृष्ट्वा धौतान्यत्युत्तमानि वासांस्ययाचत ययाचे । चशब्दाद्यभावेऽपि रङ्गकारोऽयमन्य इति चशब्दमध्याहृत्यान्वेतव्यम् ततस्तु वापकः प्रीत इत्युत्तरग्रन्थानुकूल्यमन्यथा न स्यादिति ज्ञेयम् ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः पूर्णमनोरथानां कृत्यमाह । प्रासादशिखरारूढा इति । देवानां कृत्यं पुष्पवृष्टिः एतास्तु देवरूपा जाताः अन्तःपूर्णामृतत्वात् बहिरपि देवतुल्यत्वं जातमित्याह । प्रासादशिखरेषु समारूढाः विमानेष्विव स्थिताः । अनिमिषत्वसिध्यर्थमाह । प्रीत्युत्फुल्लदृश इति । स्नेहेन कृत्वा निर्निमेषाः विकसितनयना एव स्थिताः अबलाः स्वभावतः सौन्दर्ययुक्ताः अतः सर्वथा देवतुल्याः सौमनस्यैः पुष्पैरुत्तमैरभ्यवर्षन्, ननु निकटे स्थिताः बहुपुष्पैर्वर्षणे अति क्रमशङ्कया कथं न भीता जाता इति चेत्तत्राह । प्रमदा इति । प्रकृष्टो मदः कामात्मको यासु तदा आविर्भूतकामाः विचाररहिता जाता इत्यर्थः । किञ्च पुष्पवृष्ट्या न भगवतः काचित् अनुपपत्तिरिति नामविशेषमाह । वलो बलभद्रः बलाधिक्यादेव केशवस्तु ब्रह्मेशयोः सुखदातेति सर्वदा पुष्पवृष्टिमनुभवति मत्वर्थीये च वप्रत्यये पुष्पाणां केशेषु स्थापनं सर्वदेति नातिक्रमशङ्का ॥ २९ ॥ एवं स्त्रीणां संमाननं निरूप्य ब्राह्मणानां सम्बन्धिसंमानमाह । दध्यक्षतैरिति । लोके स्त्रियः अलौकिके द्विजा इति द्वयमेव जगद्रत्नं तेन भूषितो भगवान्निरूप्यते देशाचारात् तिलकार्थम् दधि अक्षताश्च तैः प्रथमतः अर्चनं ततः पादप्रक्षालनाद्यर्थम् उदपात्राणि बहुवचनमनेकधा जलोपयोग इति नानाविधजलानि निरूपयति ततः उत्तमाः स्रजः ततो गन्धश्चदनकृतो धूपकृतश्च ततः अभ्युपायनानि मिष्टान्नादीनि फलादीनि वा एवं चतुर्विधैः साधनैः तौ रामकृष्णौ आनर्चुः ततः प्रमुदिता अपि जाताः द्विजातीनां पर्यवसानेऽपि क्वचिदेव सुखं भवतीति पश्चात्प्रमोद उक्तः तत्र तत्रेति ब्राह्मणानां संमर्दो निवारितः क्रमपूजा चोक्ता द्विजातय इति सर्वे साधारण्येन पूजार्थे प्रवृत्ता इति तेषामपि निरोध उक्तः ॥ ३० ॥ एवं कायिकं मानसिकं संमानमुक्त्वा वाचनिकमाह । ऊचुरितिसर्व एव पुरवासिनः सकृद्भगवन्तं दृष्ट्वा अमितानन्दमनुभूय विचारितवन्तः ये सर्वदैवभगवन्तं पश्यन्ति तेषां महद्भाग्यं तद्भाग्यं स्मृत्वा आश्चर्याविष्टा आहुः । अहो इति । गोप्यः तपः किमचरन्निति । भगवन्तं द्रष्टुं स्त्रिय एव जानन्तीति तासां प्रशंसा तपसैव सर्वं सिध्यतीति ज्ञातेऽस्माभिरपि तत्कर्त्तव्यमिति यत्र साधनेऽपि तत्रत्यानामिच्छा तत्र फले किं वक्तव्यमिति भावः । भगवद्दर्शनस्योकृष्टत्वायाह । नरलोकमहोत्सवाविति । उत्सवः कदाचिदेव भवति महोत्सवस्तु ततोऽपि दुर्ल्लभः तत्रापि सर्वेषामुत्सवोऽतिदुर्ल्लभः ॥ ३१ ॥ एताविति प्रदर्शनेनाद्भुतत्वे प्रमाणमुक्तम् एवं कायवाङ्मनोभिः संमाननं निरूप्य ये संमाननं न कुर्वन्ति ये वा कुर्वन्ति उभयो फलं दर्शयितुं हीनजातीयानामतिक्रमे नाशो निरूप्यते रजकमिति सप्तभिः । हीनः भगवन्तं न मन्यत इति ज्ञापयितुमेवं कथा अन्यथा भगवान् हीनं न कुर्यात् अन्त्यजेषु मुख्यो रजकः रजकश्चर्मकारश्चेत्यादि वाक्यात् अत एव रामावतारे रजकस्याधिक्षेपवाक्यम् अत एव इयं जातिरेव दुष्टा सवा अयं किं चिदिति महान्तं साभरणमुत्तमवस्त्रयुक्तमायान्तं स्वसंमुखं रजका द्विविधाः केवलमलशोधकाः रञ्जकाश्च तत्रायं रञ्जक इत्याह । रङ्गकारमिति । ननु भगवान् राजवस्त्राणि किमिति प्रार्थयति तत्राह । गदाग्रज इति । गदो रोहिणीपुत्रो द्वितीयः सोऽग्रे भविता तस्मादग्रे आतो भगान् सचोत्पादनीयः तत्कंसवधाभावे न भवतीति कंसे मारिते तानि वस्त्राणि स्वस्यैव याचनं तु तं मेलयितुं यथा पुरवासिनः तथा तद्भृत्या अपि चेन् न मारणीया इति केचित्तु गदोऽयं भविष्यतीति मारणार्थं तथोक्तवानित्याहुः । कृपा दृष्टिस्तस्मिन् पतितेति तदुद्धारार्थं याचितवान् तदाह । दृष्ट्वायाचतेति । ननु विद्यमानेषु वस्त्रेषु किमिति याचितवांस्तत्राह । धौतानीति । सांप्रतमेव प्रक्षालितानि स्वरूपतोऽप्युत्तमानि चकारात् नानाविधानि ॥ ३२ ॥

श्रीसुबोधिनी-सारः

मंदिरशिखरारूढाः प्रीतिविकसितमुखपद्माः प्रमदाः स्त्रियः सौमनस्यैः पुष्पैः बलकेशवौ अभ्यवर्षन् ॥ २९ ॥ तत्र तत्र प्रदेशे दध्यक्षतैः सजलपात्रैः स्रग्गन्धैरभ्युपायनैः प्रमुदिता द्विजातयस्तौ रामकृष्णौ आनर्चुः ॥ ३० ॥ पौराः पुरजना ऊचुः । गोप्यः किं महत्तपोऽचरन् अहो नरलोकस्य महानुत्सवो याभ्यां तौ या अनुपश्यन्ति हि युक्तम् ॥३१॥ आयान्तं कञ्चित् रजकं वस्त्रनिर्णेजकं रंगकरणाद्रंगकारं दृष्ट्वा गदोऽग्रजो ज्येष्ठो यस्य स कृष्णोऽत्युत्तमानि धौतानि वासांसि अयाचत ॥ ३२ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

प्रासादशिखरारूढाः प्रीत्या उत्फुल्लानि मुखाम्बुजानि यासां ताः प्रमदाः सौमनस्यैः पुष्पसमूहैः बलकेशवावभ्यवर्षन् आच्छादितवत्यः ॥ २९ ॥ एवं स्त्रीकृतं सन्मानं निरूप्य ब्राह्मणादिकृतं तदाह—दध्यक्षतैरिति । तत्र तत्र मिलिता द्विजातयो दध्यादिभिस्तौ रामकृष्णौ आनर्चुरित्यन्वयः । तत्र हेतुमाह—प्रमुदिता इति । तत्र दधि अक्षताश्च तिलकार्थं शुभसूचकाः, उदकपात्रं पादप्रक्षालनाद्यर्थं, स्रक् पुष्पमाला, गन्धः चन्दनं, अभ्युपायनानि मिष्टान्नफलादीनि ॥३०॥ पौराः पुरवासिन ऊचुश्च । किं तदाह—अहो आश्चर्यम्, गोप्यः किं महत्तपश्चक्रुः ? 'अन्यथैतन्न सम्भाव्यत' इत्यभिप्रेत्याहुः—या गोप्यो नरलोकस्य महानुत्सवो याभ्यां तौ रामकृष्णावनुक्षणं पश्यन्ति ॥ ३१ ॥ एवं जनेषु वदत्सु सत्सु तदा गदाग्रजो भगवान् आयान्तं कञ्चिद्रजकं रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रङ्गमपि कुर्वन् रङ्गकारस्तं दृष्ट्वा धौतानि निर्णिक्तानि अत्युत्तमानि च वासांसि अयाचत ॥३२॥

अन्वितार्थप्रकाशिका

प्रासादेति ॥ प्रासादशिखरारूढाः प्रीत्या उत्फुल्लानि मुखाम्बुजानि यासां ताः प्रमदाः सौमनस्यैः पुष्पसमूहैः । यद्वा । सुमनसां तासां कर्माणि भावेङ्गितानि सौमनस्यानि तैर्हेतुभिः बलकेशवावभ्यवर्षन् पुष्पाणि स्मितानि चेति शेषः ॥ २९ ॥ दध्यक्षतैरिति ॥ तत्र तत्र मिलिताः प्रमुदिताः द्विजातयो दध्यादिभिस्तौ रामकृष्णौ आनर्चुः । तत्र दधि अक्षताश्च तिलकार्थं शुभसूचका उदकपात्रं पादप्रक्षालनार्थं स्रक् पुष्पमाला गन्धः चन्दनम् अभ्युपायनानि मिष्टान्नफलादीनि ॥३०॥ ऊचुरिति ॥ पौराः पुरवासिनः स्त्रीजनाः एतादृशवचसः स्त्रीष्वौचित्यात् ऊचुश्च । किं तदाह । अहो आश्चर्यं गोप्यः किं महत्तपः अचरंश्चक्रुः । या गोप्यो नरलोकस्य महानुत्सवो याभ्यां तौ रामकृष्णावनुक्षणं पश्यन्ति ॥ ३१ ॥ रजकमिति ॥ गदाग्रजो भगवान् वस्त्ररञ्जनस्थानात् पुरस्यान्तः आयातं कञ्चित् दैत्यस्वभावं कंसभृत्यं रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रङ्गमपि कुर्वन् रंगकारस्तं दृष्ट्वा धौतानि निर्णिक्तानि अत्युत्तमानि च वासांसि अयाचत । गदाग्रज इति श्रीकृष्णसापत्नभ्रातृगणमुख्यस्य गदनाम्नो जन्म भगवति व्रजं गते कंसमोचितवसुदेवाज्जातमिति सूचनाय । "देवरक्षितया लब्धा नव चात्र गदादयः" इत्युक्तो देवरक्षिते योऽयं गदः नतु रौहिणेयः बलानुजस्य तस्य भाविजननत्वात् ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सौमनस्यैः पुष्पसमूहैः समीचिनमोनोऽभिप्रायैर्वा ॥ २९ ॥ तौ रामकृष्णौ आनर्चुः पूजयामासुः ॥ ३० ॥ पौराः मथुरापुरस्त्रियः क्लीबभाव आर्षः याः गोप्यः एतौ रामकृष्णौ ॥ ३१ ॥ रजकं वस्त्ररजो निवर्त्तकं रङ्गकारं वस्त्राणां रङ्गकर्त्तारं सापत्नभ्रातृगण मुख्यस्य गदस्यादस्याग्रजः देवरक्षितया लब्धा नव चात्र गदादय इत्युक्तः देवरक्षितायाः पुत्रो गदः न तु रोहिणेयोऽत्रबोध्यः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रासादेति । प्रासादा देवभूभुजां गृहास्तेषां शिखराणि तेष्वारूढाः, प्रीत्या उत्फुल्लानि मुखाम्बुजानि यासां ताः, प्रमदाः स्त्रियः, बलो बलभद्रश्च केशवः श्रीकृष्णश्च तौ, सौमनस्यैः शोभनकुसुमसमूहैः, अभ्यवर्षन् । रामकृष्णयोरुपरि शोभनसुमनांस्यवाकिरन्नित्यर्थः ॥ २९ ॥ दधीति । द्विजातयो ब्राह्मण्यः, प्रमुदिताः सत्यः, तत्र तत्र दध्यक्षतैर्दधियुक्तैरक्षतैः, सोदपात्रैः सजलभाजनैः, स्रग्गन्धैः सस्रग्भिश्चन्दनैः, अभ्युपायनैः पुरोनिहितबलिभिः तौ रामकृष्णौ, आनर्चुः ॥ ३० ॥ ऊचुरिति । अहो गोप्यः, महत् किं तपः अचरन् । हि यस्मात् , या गोप्यः, नरलोकस्य महानुत्सवो याभ्यां तौ, एतौ, रामकृष्णौ, अनुपश्यन्ति । इत्येवं पौराः पुरस्त्रियः, ऊचुः परस्परं कथयांचक्रुः ॥ ३१ ॥ रजकमिति । इत्थं पुरस्त्रीषु कथयन्तीषु सतीषु तदेति शेषः । गदाग्रजो भगवान् , आयान्तं, कंचित् रजकं रङ्गकारं दृष्ट्वा, वस्त्रनिर्णेजनक्रियाकुशलत्वाद्रजकः सन्नपि वस्त्राणां रङ्गकारश्चेत्येवमुभयक्रियाकुशलं पुरुषं संवीक्ष्येत्यर्थः । धौतानि अतिउत्तमानि च, वासांसि अयाचत ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दृष्ट्वेति, प्रासादेति : १०.४१.२८.२९.

श्रौतं वस्त्वपरोक्षतां यदि गतं सर्वत्र सिद्धस्तदाऽऽनन्दो दुःखविनाशनं च मनसः पूर्णा रसावस्थितिः ।
प्रोद्यत्सन्महसा मतः सुमनसां तन्मुख्यशोभाजुषां युक्तः सत्सुमनःसमर्पणविधिर्युक्तं च हार्दार्चनम् ॥ ४१ ॥

रजकमिति : १०.४१.३२.

तदा तत्पुरवास्यन्तरङ्गरङ्ग-कृदीक्षणः। श्रीरङ्गो रङ्गकारं यदपश्यद्युक्तमच्युतः ॥ ४२ ॥
राजकार्यमुदितार्थतरङ्गं यस्तु पश्यति सुराट्पथवृत्तिः। सिद्ध एव भुवि तस्य जयोऽग्रे श्रीश इत्यकृत राजकवीक्षाम् ॥ ४३ ॥
कुचेलमित्रः समयाचताम्बराण्परं स्वतो रङ्गकृतं यदच्युतः। क्षमं तदेतन्महतामपि स्फुटं सुदुर्लभं वस्तुनि सस्पृहं मनः ॥ ४४ ॥
पीताम्बरं दधानः कृष्णो नीलाम्बरोल्लसितः। अनुरक्ताम्बरहृदयो यदयाचत धौतमेव तद्युक्तम् ४५ ॥
सत्त्वगुणोत्तमवासो मत्प्रीतिकृदेतदर्थ्यहं च भृशम्। इति बोधयन्ननन्त-स्तादृशतत्प्रार्थनां पुरश्चक्रे ॥ ४६ ॥

कृष्णप्रिया

दिव्य भवनवनों के छज्जो में झरूखों में चढी हुई नागरिक नारियों के नयन कमल श्रीकृष्णचन्द्र एवं बलदेव भैयाजू के दर्शन में प्रसन्न एवं प्रफुल्लित बने और दोनों बन्धुवरों पर कुसुम वर्षा करने लगी ॥ २९ ॥ मथुरा पुरी के विप्रवर आदि नागरिक जन स्थान स्थान पर राजपथ से पधारते हुए दोनों देववरों का दही, दूध, पुष्प, नवाङ्कुर, मङ्गल कलश, माला, गन्धाक्षत आदि पुण्य सामग्रियों से सादर और भक्ति भाव से अर्चन करने लगे ॥ ३० ॥ श्रीकृष्ण और बलभद्रजी का एक बार दर्शन करने से नर नारियों को भगवत्स्वरूप का अभिज्ञान हो गया और आनन्द विभोर होकर पौरुजन परस्पर कहने लगे कि—अहो ! गोप गोपियों ने पूर्व जन्म में कृच्छ्र चान्द्रायणादि कौन सा भारी तप किया कि इस भूतल भूमि में परमानन्द स्वरूप इन दोनों भैयाओं का निरन्तर दर्शन करते रहते हैं ॥ ३१ ॥ राजन् ! भगवान् गदाग्रज श्रीकृष्ण राजपथ पर प्रस्थान करते जब आगे बढ़े तब उन्होंने एक धोबी को राजमार्ग से आते देखा। वह धोबी भी था और रङ्गकार भी था। कंस राजा के वस्त्रों को धोने वाला था। भगवान् ने उसको देखकर उस रङ्गकार से नये धुले हुए एवं कौशयादि उस प्रकार वस्त्र माँगे। भगवान् का यहाँ गदाग्रज नाम से उल्लेख इसलिए किया कि गद भविष्य में रोहिणी माता जी के यहाँ जन्मवाले थे। जब तक कंस की मृत्यु न हो तब तक गद का जन्म असंभवित था। यहाँ गदाग्रज पद से कंस मृत्यु का सूचन किया ॥ ३२ ॥

देह्यावयोः समुचितान्यङ्ग वासांसि चार्हतोः। भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ॥ ३३ ॥
स याचितो भगवता परिपूर्णेन सर्वतः। साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः[1] ॥ ३४ ॥
ईदृशान्येव वासांसि नित्यं गिरिवनेचराः। परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ॥ ३५ ॥
याताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा। बध्नन्ति घ्नन्ति लुम्पन्ति दृप्तं राजकुलानि वै ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—हे अङ्ग ! अर्हतोः, आवयोः, समुचितानि, वासांसि, देहि, दातुः, ते, परम्, श्रेयः, भविष्यन्ति अत्र, संशयः, न ॥ ३३ ॥ सर्वतः, परिपूर्णेन, भगवता, याचितः, राज्ञः, सुदुर्मदः भृत्यः रुषितः, सः, साक्षेपम् प्राह ॥ ३४ ॥ गिरिवनेचराः, ईदृशानि, एव, वासांसि, नित्यम्, किम्, परिधत्त ? हे, उद्वृत्ताः ! राजद्रव्याणि, अभीप्सथ ? ॥ ३५ ॥ बालिशाः ? यदि, जिजीविषा, एवम्, मा, प्रार्थ्यम्, आशु, यात, राजकुलानि, दृप्तम्, वै, बध्नन्ति, घ्नन्ति, लुम्पन्ति ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रुषितः कुपितः ॥ ३४ ॥ हे उद्वृत्ताः गिरौ वने चरथ ये नित्यं ते यूयं पूर्वं किं परिधत्तेति संभावनायां लोट्। अभीप्सथ प्रार्थयध्वम् ॥ ३५ ॥ राजकुलानि राजकीयाः लुम्पन्ति निःस्वं कुर्वन्ति ॥ ३६-३७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अर्हतोरित्युक्त्या भगवता स्वस्य नरेशकंसभागिनेयत्वेन सर्वपूजापूज्यत्वं द्योतितम्। समुचितानि अस्मद्धृतियोग्यानि, प्रमाणतो वर्णतो वा। परं श्रेयस्तु तेऽदातुरपि भविष्यति किं पुनर्दातुरित्यसंशयमेवेति। कथमयाचत तदाह—देहीति। समुचितानि परिधानयोग्यानि। अंग हे रजक। न वक्तव्यमेतद्वस्त्रयोग्यौ युवां न भवथ इत्याह–अर्हतोरिति। ननु मूल्यं विना कथं देयानीति चेत्तत्राह–भविष्यतीति। परमुत्तमं श्रेयो मंगलमैहिकामुष्मिकञ्च, किञ्चिद्विलम्बेन मूल्यमधिकं देयं पुण्यञ्च परमं भावीत्यर्थः। दुष्टं प्रत्यपीदृशं मधुरवाक्यं निजसौशील्येनायत्यां भक्तजनासह्यनिजकीर्तिपरिहारेच्छया, श्लेषादकारप्रश्लेषेणाऽदातुश्च, परलोके भक्तिसुखमयं वैकुण्ठप्राप्तिलक्षणं परं श्रेयो न भावि किन्तु तद्बाह्यं केवलं कैवल्यमेव। अत्र च संशयो जीवने संदेहः, मरणमेवेत्यर्थः ॥ ३३ ॥ स रजकः। सर्वतः परिपूर्णस्य याचनमपि तदनुग्रहार्थमेवेति भावः। साक्षेपं भर्त्सनां कुर्वन् "आक्षेपो भर्त्सनाकृष्टि-

---

[1] दुर्मुखः–प्रा. पा.।

काव्यालंकृतिषु स्मृतः'' इति मेदिनी। सुदुर्मदः प्राप्ताल्पभूतित्वात्। नृपाप्तविशेषभूतिको राजपुरुषः क्षमी, तदितरो विपरीत इति प्रत्यक्षं लोके इति। सर्वतः परिपूर्णेन कौतुकादेवेति भावः। सुदुर्मदत्वं तूक्तं वैष्णवे—''कंसस्य रजकः सोऽथ प्रसादारूढविस्मयः'' इति। 'मुदुमुखः' इति पाठे परमदुर्वचनः ''प्राप्ताविष्टाय मूर्खाय सृजते वाङ्मयं विषम्'' इति हरिवंशोक्तेः ॥ ३४ ॥ साक्षेपवाक्यं विवृणोति—ईदृशानीति। ''उद्वृत्तमुत्तमाचारे तथैवोच्छृङ्खलेऽनृजौ'' इति धरणिः। गिरिवनेचरोक्तैर्नेदृग्वस्त्राहा यूयं वनौकसः पक्ष्यादिवदिति भावः। किमत्र निषेधे वा वितर्के ''कुत्सायां किं वितर्के च निषेधप्रश्नयोरपि'' इति मेदिनी। हे उद्वृत्ता राजतो निःशंकचेष्टा यतो गिरिवनेचराः तादृशा यूयमीदृशान्येव वासांसि परिधत्त तर्हि किं कथं राजद्रव्याण्यभीप्सथ, अत्र नाधिकलाभः प्रत्युतेदानीं राजपुरागतानां वो राजापराधतो भयं च भविष्यतीति भावः। अत्र यद्यपि परिधत्तेति सोपहासमेव तत्र च हेतुर्गिरिवनेचरा इति, तथापि वंचनार्थं सत्यमुद्रया वाऽवददिति किमभीप्सथेत्युक्तम्। यद्वा–ईदृशान्येव वासांसि किं परिधत्त, येनोद्वृत्ता सन्तो राजद्रव्याण्यभीप्सथ, वस्तुतो न परिधत्त न तदभीप्सा च योग्या किन्तूद्वृत्तत्वमेव युष्माकमवशिष्यत इति भावः। अत्र यद्यपि 'परिपूर्णेन सर्वतः' इति, श्यामं हिरण्यपरिधिम्' इत्याद्युक्तानुसारेण तद्वस्त्रं तु सर्वोत्कृष्टमेव। तदुक्तं वृन्दावनविहारे पराशरेणापि—''सुवर्णाञ्जनचूर्णाभ्यां तौ तदा भूषिताम्बरौ'' इति, भूषिताम्बरौ'' इति, तथाप्यासुरदृष्ट्या तत्सौन्दर्यं न च दृश्यत इति तथोक्तम्। सरस्वती तु यथार्थमाह–हे उत्कृष्टवृत्ता नित्यमेव श्रीगोवर्धनवनविहारिणो यूयं किमीदृशान्येव वासांसि परिधत्त, अपि तु परमदिव्यान्येव राजद्रव्याणि अपवित्राणि लीलयापि किमभीप्सथ अपि तु नैवेत्यर्थः। तस्माद्व्याजमात्रमेवेदं याचनमिति भावः। अत्र चक्रवर्ती - वृत्तात्सौशील्यादुद्गताः हे दुःशीला इत्यर्थः। परिधत्तेति संभावनायां लोट्। 'वृत्तं पद्यं चरित्रे च त्रिषु' इत्यमरः ॥ ३५ ॥ जिजीविषा जीषितुमिच्छा। ''कुलं जनपदे गोत्रे सजातीयगणेष्वपि। भवने च तनौ भृत्ये'' इति शाश्वतः। निःस्वं रङ्कम्। हे बालिशा आशु यात, पलायध्वमित्यर्थः। मैवं प्रार्थ्यं पुनः कदापि प्रार्थनमीदृशं न कार्यम्। घ्नन्ति प्रहरन्ति। लुम्पन्ति छिन्दन्ति। हि यतः संम्प्रति त्वस्माभिर्बालिशत्वादेव क्षान्तमिति भावः। सरस्वती त्वाह–हे याताशुबालिशाः यातः प्राप्तः आशुश्चपलो बालिशो मुर्खश्चायं रजकलक्षणो यैस्तथाभूताः। यदि जिजीविषा जीवनधारणेच्छा तत्प्रकटनेच्छा तदा मैवं प्रार्थ्यम्। ननु शूरे रजकेऽपि कथं बलं वर्णनीयं तत्राह–हि यतः राजकुलानि राजवंश्या भवद्विधा दृप्तं जनं बध्नन्तीत्यादि। 'जीवबलप्राणधारणयोः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कथमयाचत तदाह। देहीति। समुचितानि परिधानयोग्यानि स्वस्ववर्णाकारयोग्यानि अङ्ग हे रजक! न वक्तव्यम् एतद्वस्त्रयोग्यौ युवां न भवथ इत्याह। अर्हतोरिति। ननु मूल्यं विना कथं देयानीति चेत्तत्राह। भविष्यतीति। परमुत्तमं श्रेयो मङ्गलमैहिकमामुष्मिकञ्च कियद्विलम्बेन मूल्यमधिकं देयं पुण्यञ्च परमं भावीत्यर्थः। दुष्ट प्रत्यपीदृशं मधुरवाक्यं निजसौशील्येनायत्यां भक्तजनासह्यनिजाकीर्तिपरिहारेच्छया च श्लेषादकारप्रश्लेषेणादातुस्ते परलोके भक्तिसुखमयं वैकुण्ठप्राप्तिलक्षणं परं श्रेयो न भावि किन्तु तद्वहिर्मुखं केवलं कैवल्यमेव अत्र न संशयः जीवने सन्देहः मरणमेवेत्यर्थः ॥ ३३ ।. सर्वतः परिपूर्णेनेति कौतुकादेवेति भावः। सुदुर्मदत्वमुक्तं वैष्णवे। ''कंसस्य रजकः सोऽथ प्रासादारूढविस्मय'' इति। सुदुमुख इति पाठे परमदुर्वचनः। तदुक्तं श्रीहरिवंशे। ''प्राप्ताविष्टाय मूर्खाय सृजते वाङ्मयं विषमिति ॥ ३४ ॥ हे उद्वृत्ताः! राजतो निःशङ्कचेष्टाः यतो गिरिवनेचराः तादृशा यूयम् ईदृशान्येव वासांसि परिधत्त तर्हि किं कथं राजद्रव्याण्यभीप्सथ अत्र नाधिकलाभः प्रत्युतेदानीं राजपुरागतानां वो राजापराधतो भयञ्च भविष्यतीति भावः। अत्र यद्यपि परिधत्तेति सोपहासमेव तत्र च हेतुर्गिरिवनेचरा इति तथापि वञ्चनार्थं सत्यमुद्रयैवावददिति किममीप्सथेत्युक्तं यद्वा। ईदृशान्येव वासांसि किं परिधत्त येनोद्वृत्ताः सन्तो राजद्रव्याण्यभीप्सथ। वस्तुतो न परिधत्त नच तदभीप्सा योग्या किन्तूद्वृत्तत्वमेव युष्माकमशिष्यत इति भावः। अत्र यद्यपि परिपूर्णेन सर्वत इति श्यामं हिरण्यपरिधिमित्याद्युक्तानुसारेण तद्वस्त्रन्तु सर्वोत्कृष्टमेव। तथोक्तं वृन्दावनविहारे पराशरेणापि ''सुवर्णाञ्जनचूर्णाभ्यां तौ तदा भूषिताम्बरा''विति तथाप्यासुरदृष्ट्या तत्सौन्दर्यं नच दृश्यत इति तथोक्तं सरस्वती तु यथार्थमाह हे उत्कृष्टवृत्ता नित्यमेव श्रीगोवर्द्धनवनविहारिणो यूयं किमीदृशान्येव वासांसि परिधत्त अपि तु परमदिव्यान्येव राजद्रव्याणि च किमभीप्सथ अपि तु नैवेत्यर्थः। तस्माद्व्याजमात्रमेवेदं याचनमिति भावः ॥ ३५ ॥ हे वालिशा! आशु यात पलायध्वमित्यर्थः। मैवं प्रार्थ्यं पुनः कदापि प्रार्थनमीदृशं न कार्यं घ्नन्ति प्रहरन्ति लुम्पन्ति छिन्दन्ति हि यतः सम्प्रति त्वस्माभिर्वालिशत्वादेव क्षान्तमिति भावः। सरस्वती त्वाह हे याताशुवालिशाः यातः प्राप्त आशुश्चपलो वालिशो मूर्खश्चायं रजकलक्षणो यैः तथाभूताः। यदि जिजीविषा जीवनधारणेच्छा तदा मैवं प्रार्थ्यं ननु शूरे रजकेऽपि कथं बलं वर्णनीयं तत्राह। हि यतः राजकुलानि राजवंश्या भवद्विधाः दृप्तं दर्पयुक्तं जनं वध्नन्तीत्यादि। जीव बलप्राणधारणयोः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कथमयाचत? तदाह—देहीति। समुचितानि परिधानयोग्यान्यङ्गस्य वासांसि देहवर्णाकारानुरूपाण्येव वस्त्राणि; अंग हे रजकेति वा, न च वक्तव्यम्, एतद्वस्त्रयोग्यौ युवां न भवथ इत्याह—अर्हतोरिति। ननु मूल्यं विना कथं देयानीति चेत्तत्राह—

भविष्यतीति । परमुत्तमः श्रेयो मंगलमैहिकमामुष्मिकञ्च, कियद्विलम्बेन मूल्यमधिकं देयम्, पुण्यञ्च परमं भावीत्यर्थः । अवश्यवध्यं प्रत्यपीदृशं मधुरवाक्यं लोके निजदोष-परिहाराय, श्लेषेण च अकारप्रश्लेषात्—अदातुस्ते परलोके वैकुण्ठप्राप्तिलक्षणं परं श्रेयो न भावि, किन्तु केवलं शुष्कमुक्तिरेव । अत्र च संशयः—जीवने सन्देहः, मरणमेवेत्यर्थः ॥ ३३ ॥ सर्व्वतः परिपूर्णेनेति तद्वस्त्रादौ निरपेक्षत्वम्, तादृशतदुत्तमानन्तवस्त्राणां सद्यः सम्पादनसामर्थ्यामृतसमुद्रलाभात्, तथापि याचितः । किमर्थम्? भगवता भू-भारहरणार्थमवतीर्णेन साक्षादीश्वरेणेत्यर्थः । सद्यस्तद्वधस्य कारणोत्थापणार्थमिति भावः । यद्वा, परिपूर्णेनेत्यत्र हेतुः—भगवता सर्व्वैश्वर्य्ययुक्तेनेति, प्रकर्षेण विस्तरेणाह । साक्षेप-प्रोक्तौ हेतुः—कंसस्य भृत्यः, अतएव सुदुर्मदः परमदुष्टाभिमानः, तथोक्तं श्रीपराशरेण (वि० पु० ५।१९।१५)—'कंसस्य रजकः सोऽथ प्रमादारूढविस्मयः । बहून्याक्षेपवाक्यानि प्राहोच्चैः रामकेशवौ ॥' इति । 'सुदुर्मुखः' इति पाठे परमदुर्वचनः, तदुक्तं श्रीवैशम्पायनेन (हरिवंशे विष्णु० प० २७।१५)—'प्राप्तारिष्टाय मूर्खाय सृजते वाङ्मयं विषम्' इति, किंवा सदैव सर्व्वलोकान् प्रति दुरुक्त्या सुदुर्मुख इतिनामत्वात् ॥ ३४ ॥ असद्वृत्ता उच्छृङ्खला वा, उद्वृताः परिधत्तेत्युपहासः, राजकुलेभ्य उर्व्वरिताः, तत्त्वतस्तु महाप्रलयेऽप्यवशिष्टा इति किं कथमभीप्सथ? एतान्यभीप्सितुं नार्हथेत्यर्थः । यद्वा, किमिति साक्षेपप्रश्ने, बहुत्वं गोपवर्गसंग्रहार्थम् । अन्यत्तैर्व्याख्यातमेव । यद्वा, नित्यं किं परिधत्त? अर्थः स एव । यद्वा, किमुद्वृत्ताःस्थेति ॥ ३५ ॥ वालिशाः! हे अज्ञाः! वस्तुतश्च बालकवन्निरभिमानत्वात्, किंवा बालका एव, – असञ्जातयौवनत्वात् । आशु यात, इतो निःसरत, पलायध्वमित्यर्थः । मैवं प्रार्थ्यम्, पुनः कदापि प्रार्थनमीदृशं न कार्य्यम्, घ्नन्ति प्रहरन्ति, लुम्पन्ति छिन्दन्ति, हि यतो निश्चितमिति वा ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

याच्ञाप्रकारमेवाह । देहीति । अङ्ग हे रजक! योग्ययोरावयोः समुचितानि वासांसि देहि दातुस्तव परममुत्कृष्टं श्रेयो भविष्यति नास्मिन्नर्थे संशयोऽस्ति ॥ ३३ ॥ इत्थं भगवता सर्वतः परिपूर्णेन पूर्णकामेन याचितः स रजकः राज्ञः कंसस्य भृत्यः दुर्मदश्च हेतुगर्भमिदं विशेषणद्वयम् अतो रुषितः क्रुद्धः सापेक्षम् आटोपगर्भं यथा तथा प्राह ॥ ३४ ॥ उक्तिमेवाह । ईदृशानीति द्वाभ्याम् । हे उद्वृत्ताः! गिरौ वने च चरथ ये ते यूयम् ईदृशान्येव वासांसि परिधत्त किं सम्भावनायां लोट् राजद्रव्याणि अभीप्सथ स्वाधिकारमनालोच्यमिति शेषः ॥ ३५ ॥ हे वालिशाः! आशु यात यर्हि जीवितुमिच्छा तर्हि मैवं प्रार्थनीयं यद्येवं प्रार्थ्यते तर्हि राजकुलानि राजकीयाः दुष्टान् युष्मान् बध्नन्ति हन्ति लुम्पन्ति निःस्वं कुर्य्युः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

साक्षेपवाक्यं विवृणोति ईदृशानीति । परिधत्थ परिधानं कुरुथ ॥३५॥ जिजीविषा जीवितुमिच्छा लुम्पन्ति अवच्छेदं कुर्वन्ति राजकुलानि राज्ञां समूहाः ॥ ३६-३७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ईदृशानीति । तदिदमासुरदृष्ट्या श्रीविष्णुपुराणे लौकिकदृष्ट्यापि "सुवर्णाञ्जनचूर्णाभ्यां तौ तदा रुषिताविव"वेत्युत्तमत्वावगमात् मूलेऽपि श्यामं हिरण्यपरिधिमिति दृश्यते ॥ ३५-३९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वृत्तात् सौशील्यात् उद्गताः हे दुःशीला इत्यर्थः । परिधत्तेति सम्भावनायां लोट् । सरस्वतीत्याह हे उत्कृष्टचरित्रा गोवर्द्धनगिरिचरा यूयं किम् ईदृशानि प्राकृतानि परिधत्त अपितु नैवेत्यर्थः । तस्माल्लीलयापि किं राजद्रव्याण्यपवित्राण्यभीप्सथ वृत्तं पद्ये चरित्रे त्रिष्वित्यमरः ॥ ३५ ॥ यातेति स्पष्टं पक्षे हे वालिशा! वलिं श्यन्ति त्रिपादभूमिं प्रार्थ्य तनू कुर्वन्तीति वालिशाः स्वार्थेऽण् वालिशा हे परमेश्वराः यदि मे जिजीविषास्ति तर्हि मैवं प्रार्थ्यं वलिरिव तुभ्यं यदि वासांसि ददामि तर्ह्यद्य मे जीवनं न न स्थास्यतीत्यर्थः । कुत इत्यत आह । बध्नन्तीति । राजकुलानि अत्रत्याः राजकीयाः पुरुषा दृप्तं कंसराजान्निःशङ्कं जनं प्रथमं बध्नन्ति ततो राजानं विज्ञाप्य घ्नन्ति ततो लुम्पन्ति तद्गृहं लुठन्ति ॥ ३६-३७ ॥

गूढार्थदीपिनी

अकारप्रश्लेशेन अदातुस्तु मरणमित्यर्थः । अर्हतोः योग्ययोः । अङ्ग हे रजक ॥ ३३ ॥ रुषितः कुपितः सन् ॥ ३४ ॥ हे उद्वृता उच्छृङ्खलाः वस्तुतस्तु हे उत्तमाचाराः यूयम् ये ईदृशान्येव अपि तु दिव्यानि । किमभीप्सथ नैव प्रहसनमात्रमेव ॥२५॥ हे बालिशाः अज्ञाःशीघ्रं यात गच्छत । दृप्तमुद्दण्डं युष्मद्विधं राजकुलानि राजदूताः लुम्पन्ति निर्धनं कुर्वन्ति तद्गृहं लुण्ठन्ति च । भारतीपक्षे तु यातः प्राप्तः आशुः चपलो मादृशो मूर्खो यैस्तथाभूताः । यदि जिजीविषा बलप्रकटनेच्छा तर्हि मैवं प्रार्थ्यं बलात् ग्राह्याणि ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रुषितः कुपितः साक्षेपं यथा तथा प्राह ॥ ३४ ॥ हे गिरिवनेचराः ! गिरौ वने चरथ यूयम् ईदृशान्येव वासांसि परिधत्त किं सम्भावनायां लोट्। राजद्रव्याणि अभीप्सथ प्रार्थयध्वम् ॥ ३५ ॥ हि यतः राजकुलानि राजकीयाः बध्नन्ति निर्व्यापारं कुर्वन्ति घ्नन्ति निर्जीवितं कुर्वन्ति लुण्ठन्ति निःस्वं कुर्वन्ति अत आशु यात यदि जीवितुमिच्छा तर्हि मैवं प्रार्थ्यम् एवम्प्रार्थना न कर्तव्येति फलितोऽर्थ ॥ ३६-३७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अङ्ग रजक आवयोः समुचितानि वासांसि देहि। दातुस्ते परं श्रेयो मङ्गलम्। न लाभो जीवनात्पर इत्युक्तेस्तल्लाभात्मकं श्रेय इति भविष्यति। अत्र संशयो न नास्ति। राजार्हाणि वासांसि कथं देयानीति न वदेति वदति। अर्हतोरिति। मातुलस्यैतानीत्यर्हतोर्योग्ययोस्तद्भागिनेययोरित्यन्तर्बहिरङ्गतस्तु वासांसि धार्याणि केनचिदर्हतोरिति। तत्राप्येतन्मृतावर्हतोरिति चार्थो ज्ञेयः। अदातुस्तेनादाननिमित्तेन संशयः सम्यक् शयो हस्तो भविष्यति ताढ्यामिति यावत् ॥ ३३ ॥ सर्वतः सर्वप्रकारेणापि परिपूर्णेन भगवता याचितः ससाक्षेपं सतिरस्कारं रुषितो रुष्टो राज्ञो भृत्यः सुदुर्मदो राजा यथा तथा भृत्य इति प्राह ॥ ३४ ॥ नित्यं गिरिवनेचरा यूयमीदृशान्येव वासांसि परिधत्त किमिति सम्भावनायां लोट्। उद्वृत्ता अतिक्रान्तमर्यादा राजद्रव्याण्यभीप्सथ प्रार्थयध्वे। गिरि वाच्युद्वृत्ता इदं द्रष्टव्यं न प्रष्टव्यमिदमिति विमर्यादा इति वा ॥ ३५ ॥ यदि युष्माकं जिजीविषा जीवनेच्छा तर्हि हे बालिशा मूर्खा आशु यात। कुत इत्यत इत इत्याह। राजकुलानि राजसमूहा बध्नन्ति घ्नन्ति ताडयन्ति लुम्पन्ति लुटयन्ति। तत्र हेतुर्दृप्तमिति। यर्हि यतोऽत आशु यात। राजानश्च कुलानि तत्सजातीयाश्चेति वा। कुलं जनपदे गेहे सजातीयगणे गोत्र इति विश्वः ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

याचनमाह। देह्यावयोरिति। गोपालेभ्यः पश्चाद्देयमिति संकोचादावयोरेवेत्युक्तं समुचितानि मह्यं पीतप्रधानानि बलभद्राय नीलप्रधानानि अङ्गेति सम्बोधनं तस्मिन् स्नेहसूचकमतिक्रमाभावार्थं च वासांसि परिधानयोग्यानि चकाराद्यदि तवाभरणानि भवन्ति गोपालेभ्योऽपि वा न ज्ञायत इति चेत्तत्राह। अर्हतोरिति आवामुत्तमवस्त्राण्यर्हन्तौ दाने किं स्यादत आह। भविष्यति परं श्रेय इति। अन्येभ्यो दानापेक्षयापि मह्यं दाने परमधिकमेवं श्रेयो भविष्यति परं दातुरेव तेन त्वद्दाने अन्यथा भगवद्वाक्यमन्यथा स्यात् दानपक्षे पश्चाद्राजत्वे वृत्तोऽपि दोषान्तरशङ्कया श्रेयो न भवेदिति शङ्कां वारयति। नात्र संशय इति ॥३३॥ एवं व्यवहारसिद्धत्वात्तदुपकारार्थं याचनेऽपि कृते दुष्टो नाङ्गीकृतवानित्याह। स याचित इति। अविद्यमानत्वाद्याचनं व्यावर्त्तयति। भगवतेति। सर्वसमर्थस्यापि कदाचिन्न भवेदिति तदर्थमाह। परिपूर्णेन सर्वत इति। सर्वदेशेषु सर्वकालेषु च परितः सर्वद्रव्याणि सर्वफलानि सर्वतः पूर्णानि ततश्च तादृशाय वचनेनापि हितं वक्तव्यमिति तन्नोक्तवानित्याह। साक्षेपमिति। आक्षेपपूर्वकं रुषितः प्राह अन्तर्बहिः तस्य दोषौ निरूपितौ रोषः आन्तरः साक्षेपं यथा भवतीति बाह्यं तस्य तथात्वे हेतुमाह। भृत्यो राज्ञ इति। कंसस्य भृत्यः स्वभावतोऽपि दुष्ट इत्याह। सुदुर्मद इति। सुतरां दुष्टो मदो यस्येति ॥ ३४ ॥ आक्षेपमाह। ईदृशान्येवेति। यो समीचीनवस्त्राणि परिधत्तो स कदाचिदभावे याचयित्वापि परिधत्तो द्रव्यं दत्त्वा वा तथा किं भवन्तः ईदृशान्येवात्युज्ज्वलानि नित्यं परिधत्त तथैवेत्यत्शङ्कायामाह। गिरिवनेचरा इति। गिरौ वने च चरन्ति ते विद्यमानवस्त्रा अपि कुचैला एव भवन्ति नित्यं ये गिरिवनेचराः तेषामुत्तमवस्त्रपरिग्रहो व्यर्थ एव। नन्वपरिहितान्यपि औत्सुक्यात् याच्यन्त इति चेत्तत्राह। किमुद्वृत्ता इति। औत्सुक्ययाचने न राजकीयानि याच्यन्ते किं तु साधारणानि। नन्वसाधारणान्यपि याच्यन्ते का मर्यादेति चेत्तत्राह। तर्हि किं भवन्त उद्वृत्ता इति। उद्गतं वृत्तं मर्यादारूपं येभ्यः एतादृशोद्वृत्तता किमर्थं क्रियत। इति वा येन राजद्रव्याण्यभीप्सथ यस्तु मूर्द्धाभिषिक्तः तन्मात्रोपभोग्यानि मत्प्रक्षालितानि वस्त्राणि तान्यपि यतोऽभीप्सथ ॥ ३५ ॥ अज्ञात्वा याचितमिति चेत्तत्राह। याताश्विति। इतः शीघ्रमेव यात ग्रामान्तरं गच्छत यतोऽत्रत्यवृत्तान्तो न ज्ञायते भवद्भिः हितमाह। मैवं प्रार्थ्यमिति। बाधकमाह। यदि जिजीविषेति। यतः प्रार्थयितारं राजकुलानि मर्यादार्थं युक्ता राजभटाः अल्पापराधे बध्नन्ति महत्यपराधे गृहस्थासंमते तमेव घ्नन्ति अन्यथा लुठन्ति सर्वस्वलुण्ठनं कुर्वन्ति तथाकरणे दोषमाह। दृप्तमिति। अतो यावत् दृप्ततां न जानन्ति तावदन्यत्र यातेति रोषवाक्यम् एवं सर्वसाधारण भगवन्तं ज्ञात्वा बहुवचनेन सर्वान् प्रत्युक्तवान् ॥ ३६ ॥

श्रीसुबोधिनी-सारः

हे अंग अर्हतोरावयोर्योग्याभ्यामावाभ्यां समुचितानि योग्यानि वासांसि त्वं देहि दातुस्ते तव पर श्रेयो मंगलं भविष्यति नात्र संदेहः ॥ ३३ ॥ सर्वतः परिपूर्णेन भगवता याचितः स रजको रुषितः कुपितः राज्ञः कंसस्य भृत्यः सुदुर्मदः साक्षेप वचः प्राह ॥ ३४ ॥ ईदृशानि वासांसि गिरिवनेचरा यूयं नित्यं परिधत्त किं किमर्थं राजद्रव्याणि अभीप्सथ वांछथ उद्वृत्ता उद्धताः

सन्तः ॥ ३५ ॥ यदि जीवनेच्छा तर्हि एवं मा प्राथ्यं नो याच्यम् आशु शीघ्रं बालिशा मूर्खा यूयं यात पलायत राजकुलानि राजकीया दृप्तं गर्वितं बध्नन्ति घ्नन्ति लुम्पन्ति ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

याच्ञाप्रकारमेवाह—देहीति । प्रथमं स्नेहं सूचयन् सम्बोधयति—अङ्गेति । आवयोः अर्हतोः दानपात्रतया योग्ययोः समुचितानि योग्यानि वासांसि देहि । दातुस्ते तव परमुत्कृष्टं श्रेयो भविष्यति, अत्र सन्देहो नास्ति ॥ ३३ ॥ जीवाः कैश्चित्पदार्थैः पूर्णाः कैश्चित्पदार्थैः रिक्ताः, तत्रापि कदाचित् पूर्णाः कदाचिदपूर्णाः, कस्मिंश्चिद्देशे पूर्णाः कस्मिंश्चिद्देशे रिक्ता भवन्ति । कृष्णस्तु भगवत्त्वात् सर्वतः देशकालवस्तुपरिच्छेदं विनैव परिपूर्णः । तेन याचितश्चेद्द्यात् तर्हि सोऽपि परिपूर्ण एव स्यात् । स रजकस्तु रुषितः सन् साक्षेपं आक्षेपगर्भं यथा स्यात्तथा प्राह । एवं कथने कंसस्य दोषे हेतुं सूचयन्नाह–राज्ञो भृत्य इति । तस्यापि दुष्टत्वम् । तथाकथने हेतुमाह —सुदुर्मद इति । अन्यथाऽक्रूरवत् सोऽपि भगवदनुसार्येव स्यादित्याशयः ॥ ३४ ॥ तदुक्तिमेवाह–ईदृशानीति द्वाभ्याम् । उद्गतं वृत्तं सदाचारलक्षणं येभ्यस्ते तथा तांस्तथा मत्वा सम्बोधयति—हे उद्धृत्ता इति । ये यूयं राज्ञे द्रव्याणि वस्त्राण्यभीप्सथ ते किमीदृशानि उत्तमान्येव वासांसि परिधत्तेत्यन्वयः । 'तद्धारणे किमाश्चर्यम्' इत्याशङ्क्याह—नित्यं गिरिवनेचरा इति । पशुपालानां वनचराणां नित्यं कुचैलत्वादीदृग्वस्त्रधारणमसम्भावितमित्याशय एवेत्यर्थः ॥ ३५ ॥ 'अज्ञात्वा याचितम्' इति चेत्तत्राह–यातेति । बालिशाः हे अज्ञाः । इतः स्थानादाशु यात शीघ्रं स्थानान्तरं गच्छत । तत्रापि यदि जिजीविषा जीवितुमिच्छा तर्ह्येवं नैव प्रार्थनीयम् । प्रार्थने दोषमाह—हि यस्माद्राजकुलानि राजकीयाः पुरुषाः युष्मद्विधं दृप्तमुद्धतं जनं बध्नन्ति, घ्नन्ति, लुम्पन्ति निःस्वं कुर्वन्ति ॥ ३६ ॥

अन्वितार्थप्रकाशिका

देहीति । अङ्ग हे रजक ! आवयोः अर्हतोः दानपात्रतया योग्ययोः समुचितानि योग्यानि वासांसि देहि । दातुस्ते तव परमुत्कृष्टं श्रेयो भविष्यति अत्र संदेहो नास्ति । अदातुस्तु मरणमित्तर्थः ॥ ३३ ॥ स इति । राज्ञः कंसस्य भृत्यः सुदुर्मदः स रजकः सर्वतः परिपूर्णेन भगवता याचितः सन् साक्षेपम् आक्षेपगर्भं यथा स्यात्तथा प्राह स्म ॥ ३४ ॥ ईदृशानीति । हे उद्वृत्ताः उत्सृष्टं त्यक्तं वृत्तं सदाचारो यैः ते गिरेर्गोवर्द्धनस्य वनेचराः ! "तत्पुरुषे कृति" इत्यलुक् । ये यूयं राज्ञो द्रव्याणि वस्त्राण्यभीप्सथ ते यूयं किमीदृशानि उत्तमान्येव वासांसि परिधत्त । सम्भावनायां लोट् । यद्यपि भगवता परिहितं स्वीयं वस्त्रमप्युत्तममेवाभूत् तथाप्यासुरैस्तैस्तदुत्तमतया न दृष्टम् । भारतीपक्षे हे उद्वृत्ताः ! उत्कृष्टचरिताः "वृत्तं पद्ये चरित्रे च" इत्यमरः । नित्यमेव गोवर्धनवनविहारिणः किमीदृशान्येव तुच्छानि परिधत्त अपि तु परमदिव्यानि राजद्रव्याणि चाभीप्सथ कि नैवेत्यर्थः । व्याजमात्रमिदं याचनमिति भावः ॥ ३५ ॥ यातेति । हे बालिशाः ! हे अज्ञाः ! इतः स्थानादाशु यात शीघ्रं स्थानान्तरं गच्छत यदि जिजीविषा जीवितुमिच्छा तर्ह्येवं नैव प्रार्थनीयम् हि यस्माद्राजकुलानि राजकीयाः पुरुषाः युष्मद्विधं दृप्तमुद्धतं जनं बध्नन्ति घ्नन्ति लुम्पन्ति निःस्वं कुर्वन्ति । पक्षे यातः प्राप्तः आशुश्चपालो मादृशो बालिशो मूर्खो यैस्ते इति तत्संबुद्धिः यदि जिजीविषा बलप्रकटनेच्छा । "जीव बलप्राणनयोः" । तर्हि नैवं प्राथ्यं बलाद्वस्त्राणि ग्राह्यानि । हि यस्मात् राजकुलानि राजवंशजा भवादृशाः दृप्तं मादृशं जनं बध्नन्ति घ्नन्ति लुम्पन्ति च ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे अंग अर्हतोः योग्ययोः वासांसि देहि वस्त्रदातुस्तवश्रेयः अत्र संशयो नास्ति ॥ ३३ ॥ रुषितः क्रुधितः ॥ ३४ ॥ हे उद्वृत्ताः निःशंकचेष्टाः गिरौ वनेचराः गतिं कुर्वाणाः यूयं नित्यं ईदृश्यान्येव वासांसि किं परिधत्त यतः राजद्रव्याण्यभीप्सथ यूयं प्रार्थयध्वं ॥ ३५ ॥ हे बालिशाः आशुयात पलायध्वं हि यतः भवद्विधं दृप्त जनं राजकुलानि राजवंश्याः लुम्पति निर्धनी कुर्वति ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

याच्ञाप्रकारमेवाह । देहीति । अङ्गेति संबोधने हे रजक, अर्हतोरेवंविधवस्त्रयोग्ययोः, आवयोः समुचितानि योग्यानि, वासांसि देहि । दातुरावाभ्यां वस्त्रप्रदानकर्त्तुः, ते तव, परमत्युत्कृष्ट श्रेयः चापि, भविष्यति । अत्रार्थे संशयः संदेहः, न नास्ति ॥ ३३ ॥ स इति । इत्थं सर्वतः परिपूर्णेन पूर्णकामेन, भगवता श्रीकृष्णेन, याचितः स रजकः, यतः राज्ञः कंसस्य, भृत्यः, अतः सुदुर्मदः सुतरां दुष्टेन मदेन युक्तः, रुषितः क्रोधयुक्तः सन् , साक्षेपं किंचित्तिरस्कृतिसहितं यथा तथा, प्राह ॥ ३४ ॥ उक्तिमेवाहेदृशानीति । द्वाभ्याम् । ईदृशानीति । हे उद्वृत्ता उद्धताः, गोपसाहित्यकृतं बहुवचनम् । गिरिश्च वनं च तत्समाहारे चरन्तीति तथाभूता यूयं, ईदृशान्येव वासांसि नित्यं परिधत्त किम् । संभावनायां लोट् । यतः राजद्रव्याणि राजार्हवस्त्राणि, अभीप्सथ प्रार्थयथ । स्वाधिकारमनालोच्येति शेषः ॥ ३५ ॥ यातेति । हे बालिशा मूर्खाः, जिजीविषा जीवितुमिच्छा स्यात् , तर्हि, इतः आशु

यात पलायत । पुनः एवं मा प्रार्थ्यम् । भूयः प्रार्थ्यते तदा किं स्यात्तत्राह । भूय एवं प्रार्थ्यते तर्हि, राजकुलानि राजकीयाः पुरुषाः, दृप्तं दुष्टान् युष्मानित्यर्थः । बध्नंति, लुम्पन्ति, घ्नन्ति च हि । आदौ बद्ध्वा ततो निःस्वं कृत्वा पश्चात् घ्नन्तीत्यर्थः ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

देह्यावयोरिति : १०.४१.३३.

निःशेषवासोऽर्पणवासना चेद् देह्यादरेणाऽहमुरीकरोमि । नो चेत्सशेषान्मुदितस्ततः स्यामित्यावयोरुक्तित इत्यबोधि ॥ ४७ ॥
त्वमसि यदि तथागतः प्रबुद्धः खलु तदवेहि सदर्हतः सदा नः । इति बत न तदा तु युक्तमस्यार्पणमधुनेति विबोधितं तथोक्त्या ॥४८॥
अर्थिनि मय्यसुरेशः प्राप श्रेयः कुदानतोऽप्यतुलम् । तव तद्भवितेत्याथिकमकलुषभुवनोज्ज्वलार्पणादवनौ ॥ ४९ ॥
निष्कमस्त्येव मे कण्ठे त्वं पटार्पणमाचर । त्वत्स्वामिनं ततो निष्कपटवृत्त्योद्धराम्यलम् ॥ ५० ॥
गुणवत्स्थितिर्न युक्ता दुर्जनकरगेति निजकराकलिताम् । कर्तुं तथा तमूचेऽन्यथा किमूनं सदा रमाभर्तुः ॥ ५१ ॥

स याचित इति : १० ४१.३४.

श्रुत्वैवं वाचमैशीं प्रकुपितहृदयः श्वाससंफुल्लघोणोऽवोचत् काप्रार्थनेयं सुमतिभिरभितः प्रोच्यते नष्टशङ्कम् ।
देयादेयव्यवस्था निवसति नहि किं राजकोक्तौ प्रसिद्धा यद्वा सिद्धोऽस्ति लोकेष्वनुचितवचनं पाकबुद्धेर्विपाकः ॥ ५२ ॥

कान्ता निजाऽपि वत केनचिदर्थ्यमाना देयेति भाति भवतो मतमत्र यद्वा ।
अज्ञातराज्यपदवी-रमणीसुखस्य भ्रान्तस्य गह्वरगतेर्ननु युक्तमीदृक् ॥ ५३ ॥
विलसद्गुणवासो हि राजकेष्वेव राजते । कथं त्वयाऽर्थ्यते नित्यं कम्बलाम्बरधारिणा ॥ ५४ ॥
अधिकपटरङ्गकारोऽप्यच्युतरूपं न वेद चित्रमिदम् । अथवोचितं तदस्मिन् वेद्यं तस्यैव यो धृतविरागः ॥ ५५ ॥

वासोऽन्तरङ्गभुवि यस्य तपस्विवर्यैः संप्रार्थ्यते जगति तेन बतार्थितेऽपि ।
नादायि यत्र रजकेन तदात्मवासः तन्मूर्खधीविलसितं किमितोऽपि वाच्यम् ॥ ५६ ॥

तद्वागभ्रविमर्द-निह्नुतकृपा-पूर्णेन्दुरूचे प्रभुस्तं पश्यन् प्रदहन्निवातिपरुषाऽमर्षार्चिषा चक्षुषा ।
रे रे मूर्खनिरर्गलप्रलपनप्रागल्भ्यधाष्टर्याधम मामुद्दिश्य किमात्थ रे त्वमधुना सद्राजकार्याश्रितम् ॥ ५७ ॥
रे रे राजकनीतिशास्त्रनिपुणप्रज्ञाभिमानिन् वद त्वं तावत्कुमते मया निजकृते किं रे भवान् याचितः ।
श्रयोऽदस्तव रोचते यदि तदा कुर्वे तदित्थं मया प्रोक्तंऽप्येतदरुन्तुदं यदवदः स स्वामिजरते स्मयः ॥ ५८ ॥
सोल्लुण्ठं त्वपभाषणं यदवदस्त्वं कामिनीदानमित्यत्राप्यज्ञ तवैव सिद्ध्यति महत्यज्ञानिता जाल्मता ।
यद् दारैर्विहितार्पणैरपि धनैरात्माऽवनं चेद् बुधैः कार्यं सन्ततमित्ययं त्रिभुवने जागर्ति घण्टाध्वनिः ॥ ५९ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण ने प्रेम से कहा हे अङ्ग ! हे भैया ! मेरे भैयाजू एवं सखाओं के अङ्गों के लिए योग्य-अनुरूप हो वैसे वस्त्र हम सबको दे दो । तेरे पास जो वस्त्र है वे हमारे ही पहनने योग्य है । हम सबको वस्त्र देने में अवश्य ही तेरा परम कल्याण होगा यह सुनिश्चित बात है ॥ ३३ ॥ शुकदेवजी कहते हैं राजन् ! भगवान् श्रीकृष्ण तो सर्व देश-काल-वस्तुओं से परिपूर्ण है फिर भी रङ्गकार का कल्याण चाहते थे इस लिए पूर्ण पुरुषोत्तम के माँगने पर भी उस उद्दण्ड एवं अभिमानी धोबी ने वस्त्र न दिए और वह खल राजसेवक क्रोध से कहने लगा ॥ ३४ ॥ अब उच्छृङ्खल धोबी बोला ! जंगलों में और पर्वतों में निरन्तर घूमने वाले हे गिरिवनचर ! क्या तुम लोग निरन्तर ऐसे लोग उत्तम वस्त्र धारण करते हो ! तुम धृष्ट हो ! तुम उद्धत हो जो मूर्धाभिषिक्त राजा को धारण करने योग्य वस्त्रों को माँगते हो ॥ ३५ ॥ तुम बालिश हो अकलमन्द हो, यदि जीवित रहना चाहते हो तब बिना विलम्ब यहाँ से जाओ । तुम्हें पता नहीं, कि तुम जैसे उच्छृङ्खल उद्धत लोगों को राजभट बाँधते हैं, जेल में पूरते हैं और उनका सर्वस्व छीन लेते हैं ॥ ३६ ॥

एवं विकत्थमानस्य कुपितो देवकीसुतः । रजकस्य कराग्रेण शिरः [1]कायादपातयत् ॥ ३७ ॥
तस्यानुजीविनः सर्वे वासःकोशान् विसृज्य वै । दुद्रुवुः सर्वतो [2]मार्गं वासांसि जगृहेऽच्युतः ॥ ३८ ॥
वसित्वाऽऽत्मप्रिये वस्त्रे कृष्णः संकर्षणस्तथा । शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ॥३९॥
ततस्तु वायकः प्रीतस्तयोर्वेषमकल्पयत् । [3]विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ॥ ४० ॥

---

१. दुर्मुखः–प्रा. पा. । २. दुष्टान्–वीर. । ३. दपाहरत–विज. ।

कर्दमक्षम।

अन्वयः—कुपितः, देवकीसुतः, एवम्, विकत्थमानस्य, रजकस्य, शिरः, कराग्रेण, कायात्, अपातयत् ॥ ३७ ॥ तस्य, अनुजीविनः, सर्वे, वासः, कोशान्, विसृज्य, सर्वतः, मार्गम्, वै, दुद्रुवुः, अच्युतः, वासांसि, जगृहे ॥ ३८ ॥ कृष्णः, तथा, सङ्कर्षणः, आत्मप्रिये, वस्त्रे, वसित्वा, कानिचित्, भुवि विसृज्य, शेषाणि, गोपेभ्यः, आदत्त ॥ ३९ ॥ ततः, तु, प्रीतः, वायकः, विचित्रवर्णैः, आकल्पैः चैलेयैः, अनुरूपतः, तयोः, वेषम्, अकल्पयत् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वासः कोशान्वस्त्रपुटकान् ॥ ३८–३९ ॥ वायकस्तन्तुवायविशेषः। वेषमलंकारम्। चैलयैर्वस्त्रमयैरनुरूपैराकल्पैर्भूषणैः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमित्थम्। विकत्थमानस्याविमृश्य भाषिणः। कराग्रेण चपेटप्रदानेन। करस्याग्र्यं सामग्र्यं तेन "अग्रं पुरस्तादुपरि परिमाणे पलस्य च। आलम्बने समूहे च प्रान्ते सामस्त्यमुख्ययोः। अधिके प्रथमे ज्ञाने गमने प्रापणेऽपि च।" इति निरुक्तिः। कायाद्देहात्। अपाहरत् पृथक्चकार। विकत्थमानस्य विरुद्धमात्मश्लापूर्वकमुच्चैर्जल्पतः। अत्रात्मश्लाघा च एवंभूतमहाशिल्पिराजात्मीयसेवकोऽहमिति व्यंजनया। सा च स्पष्टं दर्शिता वैशंपायनेन—"अहं कंसस्य वासांसि नानादेशोद्भवानि वै। कामरागाणि शतशो रञ्जयामि विशेषतः।" इत्यादौ। कुपितः कंसपक्षपातात्, विशेषतश्च बहुवचनेन तत्साक्षादग्रजादीन् प्रति दुरुक्तिस्पर्शात्। अत एव खड्गानुकारिणा कराग्रेणैकेनैव, तिष्ठत एव तस्य शिरः कायादपाहरत्, छित्त्वा दूरे चिक्षेपेत्यर्थः। देवकीसुत इत्यत्र कंसेन क्रियमाणया देवक्या यातनया कदर्थितः सोऽयं तदीयानां जनानामौद्धत्यं कथं सहतामिति भावः। यद्वा–दुष्टसंघारार्थं तस्यां जात इत्यर्थः ॥ ३७ ॥ तस्य रजकस्यानुजीविनः पुत्रादयः। "कोशोऽस्त्री कुड्मले दिव्ये पात्रे खड्गपिधानके। जातिकोषेऽर्थसंघाते पेश्यां शब्दादिसंगहे। गृहे तनौ च पुटके पिटकायामपि" इति हलायुधः। वै इति–'च' इति पाठोऽनुक्तसमुच्चायकः–ते गर्दभादयोऽपि सर्वत इतस्ततो मार्गं दुद्रुवुः। यद्वा—मार्गस्य सर्वा शिशो दुद्रुवुः अकारप्रश्लेषेऽमार्गमिति वा। मार्गं हित्वा तदितरस्थानं प्रति दुद्रुवुरित्यर्थः। अच्युत इति–तत्स्थानस्थितिमपि व्यञ्जयति ॥ ३८ ॥ वसित्वा परिधाय। वस्त्रे इति द्वित्वेन दुकूलोत्तरीये उक्ते। यद्वा–कंचुकप्रावाररूपे। कानिचिद्धारणाऽयोग्यानीत्यर्थः। आत्मप्रिये पीतनीलवर्णे। वस्त्रे परिधानीयोत्तरीये। आदत्त आ सम्यक् तत्तदिच्छानुसारेण वस्त्रं दत्तवान्, तदर्थं गृहीतवानिति वा। कानिचिद्योग्यानि अधिकानि च। अत्रायमपि श्रीभगवताऽभि प्रायः–नूनं कंसेन महोत्सवे स्वपरिकरशोभार्थमेतान्यपूर्वाणि वस्त्राणि धारयितुं दत्तानि, तस्मात्तच्छोभां नाशयंस्तैरहमेव स्वपरिकरशोभां कुर्वन्प्रथमतस्तदुत्साहं नाशयामीति। वस्तुतस्त्वेतानि वस्त्राणि नरकहृतकुमारीवत्तदीयान्येव लीलासौष्ठवाय लीलाशक्त्या तद्द्वारैव मिलितानीति ज्ञेयम् ॥ ३९ ॥ ततो वस्त्रस्वीकारोत्तरम्। 'आकल्पो वेषभूषणे' इति हैमः। इत्थं शिष्टहर्षार्थं दुष्टनिग्रहं कृत्वा शिष्टाननुजग्राहेति वदन्नादौ वायकानुग्रहमाह–ततस्त्विति। ततस्तद्वधाद्वस्त्रपरिधानाच्च। वायकः प्रीतो विष्णुभक्तत्वात्। चैलेयैरेवाकल्पैः कटककुण्डलादिभिस्तयोर्वेषं रचितवान्। आकल्पत्वमेव स्थापयति–विचित्रवर्णैर्मणिजटितसुवर्णाकल्पवद्विरच्य स्वगृहादानीतैरित्यर्थः। ननु कुतस्तौ मणिमयनिजालंकारौ त्यक्तवंतौ कुतो वा सोऽपि चैलेयमेवालंकारं दत्तवांस्तत्राह–अनुरूपतः, मल्ललीलायां गात्रतोदकत्वेन तस्यैवानुरूप्यादित्यर्थः। अनेन तयोः स्वस्वानुरूत्यमपि ज्ञेयम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विकत्थमानस्य विरुद्धमात्मश्लाघापूर्वकमुच्चैर्जल्पतः अत्रात्मश्लाघा च एवम्भूतमहाशिविपराजात्मीयसेवकोऽहमिति व्यञ्जनया स्पष्टं दर्शिता श्रीवैशम्पायनेन। "अहं कंसस्य वासांसि नानादेशोद्भवानि वै। कामरागाणि शतशो रञ्जयामि विशेषत" इत्यादौ। कुपितः कंसपक्षपाताद्विशेषतश्च बहुवचनेन तत्साक्षादग्रजादीन् प्रति दुरुक्तिस्पर्शात्। अत एव खड्गानुकारिणा कराग्रेणैकेनैव तिष्ठत एव तस्य शिरः कायादहरत् छित्त्वा दूरे चिक्षेपेत्यर्थः। देवकीसुत इत्यत्र कंसेन क्रियमाणया देवक्या यातनया कदर्थितः सोऽयं तदीयानां जनानां कथमौद्धत्यं सहतामिति भावः। यद्वा यतो दुष्टसंहारार्थं तस्यां जात इत्यर्थः ॥ ३७ ॥ वै एव चेति पाठेऽनुक्तमसमुच्चयः ते गर्दभादीन्यपि सर्वत इतस्ततो मार्गं दुद्रुवुः। यद्वा। मार्गस्य सर्वा दिशो दुद्रुवुः। अकारप्रश्लेषेण अमार्गमिति वा। मार्गं हित्वा तदितरस्थानं प्रति दुद्रुवुरित्यर्थः। अच्युत इति। तत्स्थानस्थितिमपि व्यञ्जयति ॥ ३८ ॥ आत्मप्रिये पीतनीलवर्णे वस्त्रे परिधानीयोत्तरीये आदत्त आ सम्यक् तत्तदिच्छाद्यनुरूपं वस्त्रं दत्तवान् तदर्थं गृहीतवानिति। कानिचिद्योग्यानि अधिकानि च। अत्रायमपि श्रीभगवतोऽभिप्रायः नूनं कंसेन महोत्सवे स्वपरिकरसुशोभार्थमेतान्यपूर्वाणि वस्त्राणि धावयितुं दत्तानि तस्मात्तच्छोभां नाशयंस्तैरहमेव स्वपरिकरसुशोभां कुर्वन् प्रथमतस्तदुत्सादयामीति वस्तुतस्त्वेतानि वस्त्राणि नरककृतकुमारीवत्तदीयान्येव लीलासौष्ठवाय लीलाशक्त्या तद्द्वारैव तु मिलितानीति ज्ञेयम् ॥ ३९ ॥ इत्थं शिष्टहर्षार्थमेव दुष्टनिग्रहं कृत्वा

शिष्टाननुजग्राहेति वदन्नादौ वायकानुग्रहमाह। ततस्त्विति। ततस्तद्वधाद्वस्त्रपरिधानाच्च वायकः प्रीतः सन् चैलेयैरेवाकल्पैः कटककुण्डलादिभिस्तयोर्वेशं रचितवान् आकल्पत्वमेव स्थापयति। विचित्रवर्णैर्मणिजटितसुवर्णकल्पवत् विरच्य स्वगृहादानीतैरित्यर्थः। ननु कुतस्तौ निजमणिमयालङ्कारं त्यक्तवन्तौ कुतो वा सोऽपि चैलेयमेवालङ्कारं दत्तवान् तत्राह। अनुरूपतः मल्ललीलायां गात्रतोदकत्वेन तस्यैवानुरूप्यादित्यर्थः। अनेन तयोः स्वस्वानुरूप्यमपि ज्ञेयम् ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमुक्तप्रकारेण, ईदृशं वेति, परमपि दुरक्षरमुक्तमिति सूचयति—विकत्थमानस्य विरुद्धमात्मश्लाघापूर्व्वकमुच्चैर्ज्जल्पतः; तदुक्तं श्रीवैशम्पायनेन (विष्णु० प० २७।१२)—'अहं कंसस्य वासांसि नानादेशोद्भवानि वै। कामरागाणि शतशो रञ्जयामि विशेषतः।' इत्यादि। कुपितो विकत्थनाद्विशेषतश्च बहुवचनेन तत्साक्षादग्रजादीन् प्रति दुरुक्तिस्पर्शात्। अतएव कराग्रेण वज्रतुल्येन तिष्ठत एव तस्य कायादपाहरत्, छित्त्वा दूरे चिक्षेपेत्यर्थः। देवकीसुत इति, यतो दुष्टसंहारार्थं तस्यां जात इत्यर्थः ॥ ३८ ॥ अनुजीविनो भार्य्यापुत्रादयः, वै एव, चेति पाठेऽनुक्तसमुच्चयः। तेन गर्द्दभादीन्यपि विभ्यति, सर्व्वतः इतस्ततो मार्गं दुद्रुवुः, मार्गेऽधावन्नित्यर्थः। यद्वा, मार्गस्य सर्व्वतः सर्व्वतो मार्गं दुद्रुवुः, वेगेन पलायन्त, अकारप्रश्लेषेणामार्गमिति वा, मार्गं हित्वा तदितरस्थानं प्रति दुद्रुवुरित्यर्थः। अच्युत इति तत्स्थान एव स्थितः। एवं तद्वस्त्रयाचनं तद्दुरुक्तिनिःसारणाय, तच्च तद्वधाय, स च कंसानुगत्वान्निजानां हर्षार्थञ्च, अतएवोक्तम्—गदाग्रज इति। देवकीसुत इति चेत्तत्र तत्त्वम् ॥ ३८ ॥ आत्मप्रिये पीत-नीलवर्णे वस्त्रे परिधानोत्तरीये। चार्थे तथा-शब्दः। यद्वा, तादृशानि तत्तत्प्रियाणीत्यर्थः। कानिचिदधिकान्ययोग्यानि वा ॥ ३९ ॥ इत्थं शिष्टहर्षार्थमेव दुष्टनिग्रहं कृत्वाथ शिष्टाननुजग्राहेति वदन्नादौ वायकानुग्रहमाह—ततस्त्विति। तद्वधाद्वायकस्तु प्रीतः सन्। यद्वा, वस्त्रपरिधानानन्तरं तदानीमेव वस्त्रमयनेपथ्यापेक्षत्वात् प्रीतः, प्रीत्यैव, न तु भयेनेत्यर्थः। आकल्पैर्मुकुटादिभूषणैः, अनुरूपतस्तयोर्वर्णोकाराद्यनुसारेण, गोपानां तदकरणं कालविलम्बापत्तेः, किंवा स्वयमेव तैरन्योऽन्यं तदकारणादिति ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं रजकस्य विकत्थमानस्य सतः भगवान् मुकुन्दः कराग्रेण तस्य शिरः कायादपाहरत् ॥ ३७ ॥ ततस्तस्य रजकस्यानुजीविनः सर्वे वासःकोशान् वस्त्रपुटकान् विसृज्य सर्वतो मार्गान् प्रति द्रुद्रुवुः पलायितवन्तः ततो भगवान् वासांस्यादत्त ॥ ३८ ॥ तदा सङ्कर्षणः श्रीकृष्णश्चात्मप्रिये स्वाभीष्टे वस्त्रे वसित्वा परिधाय शेषाणि गोपेभ्यः आदत्त अदात् कानिचिद्वासांसि भुवि विसृज्य त्यक्त्वा अगादिति शेषः ॥३९॥ ततः कश्चिद्वायकः तन्तुवायकः प्रीतः प्रीतियुक्तः विचित्रवर्णैश्चैलेयैर्वस्त्रमयैराकल्पैर्भूषणैर्यथानुरूपं तयो रामकृष्णयोर्वेषमलङ्कारमकल्पयत् विदधे ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वासःकोशान् वस्त्राद्ययराशीन् कोशोऽस्त्रीकुड्मले दिव्ये शास्त्रेऽथाघे गृहे तनाविति च वस्त्रकरण्डकान् वा ॥ ३८ ॥ वस्त्रे परिधानोत्तरीये ॥ ३९ ॥ वायकः तन्तुवायकः वेषमद्भुतालङ्कारमेतदेव विशदयति। विचित्रेति। विचित्रा नानाविधा वर्णाः नीलरक्तादयो येषां ते तथा तैः शैलेयैः धातुभिः आकल्पैः आभरणैः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

चैलेयैरेवाकल्पैः कटककुण्डलादिभिः रत्ननिर्मितवत् विचित्रवर्णैः तद्वेशे हेतुः। आनुरूप्यतः मल्ललीलायां गात्रतोदकत्वेन तस्यैवानुरूप्यादित्यर्थः ॥ ४०–४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वासःकोशान् वस्त्रसंपुटान् ॥ ३८–३९ ॥ वायकः वैणवसौचिकः आकल्पैःकटककुण्डलकेयूरादिभिश्चैलेयैः कोमलचेलखण्डनिर्मितैः विचित्रवर्णैर्मणिजटितस्वर्णतुल्यवर्णैः अनुरूपतः मल्ललीलायां गात्रतोदकत्वेन चैलेयालङ्काराणामेवौचित्येनानुरूप्यात् तयोर्वर्णानुरूप्याच्च ॥ ४० ॥

गूढार्थदीपिनी

विकत्थमानस्य असम्बद्धं ब्रुवतः। विशिष्टं श्लाघमानस्य। कराग्रेण खड्गानुकारिणा शिरः अपातयत् पृथक् कृतवान् ॥ ३७ ॥ वासःकोशान् वस्त्रपुटकान्। अकारप्रश्लेषे मार्गं हित्वा इतरस्थानं प्रति ॥ ३८ ॥ वसित्वा परिधाय। अदत्तेति पाठः। आत्मप्रिये पीतनीलवर्णे ॥ ३९ ॥ चैलेयैः वस्त्रखण्डनिर्मितैः आकल्पैः भूषणैः वेषमकल्पयत् ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वासःकोशान् वस्त्रपुटकान् मार्गं राजमार्गञ्च विसृज्य सर्वतः दुद्रुवुः ॥ ३८ ॥ कृष्णस्तथा सङ्कर्षणः आत्मप्रिये वस्त्रे वसित्वा परिधाय गोपेभ्य कानिचित् तत्प्रियाणि वस्त्राण्यादत्त अदात् शेषाणि भुवि विसृज्य अगादिति शेषः ॥ ३९ ॥ ततस्तदनन्तरं वायकस्तन्तुवायकः प्रीतः प्रीतियुक्तः विचित्रवर्णैः चैलेयैर्वस्त्रमयैराकल्पैर्भूषणैः । तयोर्वेषमलङ्कारमकल्पयत् विदधे ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इत्थं विकत्थमानस्यासम्बद्धभाषिणो देवकीसुतो राजानुबन्धमविगम्योक्तवानिति विकत्थनतामनेन द्योतयति । कराग्रेण कायाद्विशिष्टाच्छरीराच्छिरोऽपाहरत् । येन दुर्व्यवहरणं हरणं तस्यैव न्याय्यम् । कोऽनुबन्धः कबन्धेनेति विहाय कायं जहार हरिः शिरस्तस्येत्यौत्प्रेक्षिकाः प्रेक्षावन्तो वदन्ति । तथा सर्वज्ञत्वेन भाविरजकविरोधं मनसि निधाय सर्वदा तज्जननिर्णेजनमस्मद्वसनयोर्मेति पतिवारणक एको नीलाम्बरोऽनुदिवेति चोत्प्रेक्षयन्ति ॥ ३७ ॥ तस्यानुजीविनो भार्या भृत्याद्याः । यथोक्तं हरिवंशे । तं हतं पतिदेवत्यो भार्यास्तस्य विचुकुशुः । त्वरितं मुक्तकेश्यश्च जग्मुः कंसनिवेशनमिति । वासःकोशान्वस्त्ररूपार्थौघान् । कोशोऽस्त्री कुड्मले दिव्यशास्त्रेऽर्थौघे गृहे तनाविति यादवः । सर्वतो मार्गं दुद्रुवुः । अच्युतो वासांसि जगृहे ॥ ३८ ॥ आत्मप्रिये स्वयोग्ये वस्त्रे कृष्णः सङ्कर्षणश्च वसित्वा शेषाणि गोपेभ्योऽदत्त । कानिचिद्दुर्चरितानि भुवि विसृज्य वितत्य पादन्यासं कुर्वन्ती गताविति भावः । शिष्टान्यास्तीर्य तत्र पदं प्रणिधाय चागादित्याचार्योक्तेः । प्रायेण प्राहुणिकाः प्राप्तनूतनप्राहुणिकानां पादस्थापनार्थं स्थापयन्ति वासांसि कंसस्तु स्वयं न वेदितेति वयमेव कुर्म इति प्रचयार्थं चेमां कृतिमकृत देव इति ज्ञेयम् ॥ ३९ ॥ रजकेन सह रङ्गकारो दृष्टः कृष्णेनेत्युक्तम् । तत्र स कः किंकर्मा कां सेवां देवस्याकरोदथवा दुरात्मा चेत्किमतनोत्तं भगवानित्यतः स संस्तत्सेवा चेयं देवोऽप्येवं दयां ततान तदुपरीति परिकीर्तयति ॥ तत इति । वापको नापिता ततः स्वेन सह दृष्टरजकभञ्जनानन्तरं वायकश्चैलेयैरिति पठित्वा वायकस्तन्तुवायविशेषः । चैलेयैर्वस्त्रमयैरिति व्याख्या । रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रङ्गमपि कुर्वन्रङ्गकार इत्याकारया व्याख्यया न सख्यं भजते । किञ्च रजक एव रञ्जकश्चेन्मूले कृष्णदृष्टवतस्ततस्त्विति नानुवादः सम्भवति । अपि च न तान्तुवायिकव्यापारः स इत्युपेक्ष्या । उक्तं च । ग्राह्यापहेयरहितैकचिदात्मसान्द्रस्वानन्दपूर्णवपुरप्ययशोषहीनः । लोकान्विडम्ब्य नरवत्समलक्तकाद्यैर्वप्त्रा विभूषित इवाभवदप्रमेय इति । तयो रामकृष्णयोर्वेषमकल्यात् । प्रीत इति भक्ततोपोद्बलकम् । विचित्रवर्णैः शैलेयैर्गिरिभवैर्गैरिकादिभिराकल्पैर्भूषणैश्चानुरूपतः स्वतदुचिततया ॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्र वलभद्राक्षेपमसहमानः अग्रे कार्यमपि कर्त्तव्यमिति तं मारितवानित्याह । एवमिति । विशेषेण कत्थमानस्य असम्बद्धभाषिणः भगवन्माहात्म्यमज्ञात्वा स्वोत्कर्षमेव वदतीति अत एव कुपितः । किञ्च । देवकीसुत इति । देवकी तु बद्धा तस्यां कृपया कंसो मारणीय इति तं मारितवान् अथवा मातुलेयो न मारणीय इति तं ज्ञापयितुं स्वस्य पौरुषप्राकट्यार्थं रजकं मारितवान् कराग्रेण चपेटेन नखेन वा केचित् अदृष्टं सुदर्शनं कल्पयन्ति तस्य मुखस्यैव दोष इति शिरः कायात् दूरीकृतवान् उभयोः सम्बन्धो न युक्त इति ॥ ३७ ॥ तत्प्रक्षालितानि हि भगवता परिधेयानीति ततोऽन्ये अहन्यमाना अपि पलायिता इत्याह । तस्यानुजीविन इति । तस्य मुख्यरजकस्य अनुजीविनः सेवकाः सर्व एव रजकाः अतस्ते वासः कोशान् वस्त्रभारान् भण्डाररूपान् विसृज्य नै निश्चयेन पुनः प्राप्तिप्रत्याशां दूरीकृत्य यथा कथंचित् दुद्रुवुः सर्वत एव मार्गो यथा भवति तथा भीतपलायने सर्वत्रैव मार्गो भवतीति ततो भगवान् अप्रतिहतः स्वयं वासांसि जगृहे क्षात्रयाणामयं धर्मः हतस्य शत्रोः पदार्थाः स्वस्यैवेति च्युतिराहित्यमत्र कोलाहलादिना भयशङ्काव्यावृत्त्यर्थम् ॥ ३८ ॥ अत एव निर्भयव्यवहारमाह । वसित्वात्मप्रिये वस्त्रे इति । आत्मप्रिये सिते संकर्षणोऽपि तथा तथा शेषाणि पुनर्वस्त्राणि गोपेभ्यः आधत्त भगवान् संकर्षणश्च तेषां स्वतो ग्रहणमनुचितमिति भारे उपरि यदि अनभिप्रेतं भवेत् तानि भुवि विसृज्य उत्तमान्येव दत्तवान् । प्रायेण बहून्येव गृहीतानि त्यक्तानि तु बहूनि वस्त्रे इति द्विवचनं जात्यभिप्रायमुभयोर्वे जात्येन वस्त्रजातीयाः प्रिया इति न तु वस्त्रद्वयमेव एतदर्थमेवावतीर्ण इति कृष्णस्योचितं परिधानं सम्यक् कर्षतीति द्रष्टृदृश्ययोर्मेलक इति संकर्षणस्यापि परिधानमुचितम् ॥ ३९ ॥ ततो यथा कथञ्चिद्वन्धनार्थं प्रवृत्तौ ज्ञाततत्त्वावपि मुग्धभावेन वायकपरितोपार्थं तदा संतुष्टो वायकः वस्त्रपरिधानकारयिता यः प्रभुभ्योऽपि सम्यक् परिधानं कारयति स मम कार्यमेतदिति स्वकार्ये प्राप्ते सर्वोऽपि प्रीतो भवति तत्राप्युत्कर्षे तयोः कृष्णरामयोः यो वेष उचितः स्वयं पूर्वं ध्यातो वा तमकल्पयत् स्वयं विचार्य नानाविधवस्त्राणि कोशेभ्यः भगवतैव वा पूर्वं गृहीतानि । विचित्रो वर्णो येषामिति यस्मिन् भागे यादृशो वर्ण उचितः चैलेयैरुत्तमवस्त्रैराकल्पैराभरणरूपैः अनुरूपत इति । यथा श्यामे यथा शुक्ले वेश उचितो भवति एकत्रैव एकविषय एव हिताहितसिद्धिरिति ज्ञापयितुं वायकनिरूपणम् ॥ ४० ॥

श्रीसुबोधिनी–सार

एवं विकत्थमानस्यावाच्यं वदतो रजकस्य कराग्रेण नखेन कायात् शिरोऽपातयत् कुपितो देवकीसुतः ॥ ३७ ॥ तस्यानुजीविनोऽनुचराः सर्वे वाससां कोशान् पुटकान् विसृज्य त्यक्त्वा सर्वतो मार्गं दुद्रुवुः यथारुचि सर्वतो दिशं ययुः अच्युतः कृष्णो वासांसि जगृहे ॥ ३८ ॥ आत्मनः प्रिये इष्टे वस्त्रे द्वे कृष्णो वसित्वा परिधाय संकर्षणस्तथा वसित्वा शेषाणि वस्त्राणि गोपेभ्य आदत्तायच्छत् कानिचित् भुवि पृथिव्यां विसृज्य त्यक्त्वा विकीर्येति यावत् ॥ ३९ ॥ ततोऽनन्तरं वायकः प्रीतः तयो रामकृष्णयोर्वेषमकल्पयत् । विचित्रवर्णैः चैलेयैर्वस्त्रमयैराकल्पैर्भूषणैरनुयोग्यतः ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं विकत्थमानस्य असम्बद्धभाषणस्य रजकस्य शिरः कुपितो देवकीसुतः कराग्रेण नखेनैव कायादपातयत् पृथक्कृत्य पातितवान् इत्यन्वयः ॥ ३७ । ततस्तस्य रजकस्यानुजीविनः सर्वे वासःकोशान् वस्त्रपुटकान् विसृज्य त्यक्त्वा सर्वतो मार्गं प्रति दुद्रुवुः पलायितवन्तः । ततो वासांसि अच्युतः कृष्णः जगृहे आदत्त गोपेभ्यः च ॥ ३८ ॥ दानप्रकारमेवाह—कृष्णः सङ्कर्षणश्चात्मनः प्रिये पीतनीले स्वाभीष्टे वस्त्रे वसित्वा परिधाय शेषाणि गोपेभ्यः आदत्त दत्तवान् । कानिचित्तु शेषाण्यनभिप्रेतानि वासांसि भुवि विसृज्य त्यक्त्वा ततोऽगादिति शेषः ॥ ३९ ॥ ततस्तु वायकः तन्तुवायकः प्रीतियुक्तः विचित्रवर्णैश्चैलेयैर्वस्त्रमयैराकल्पैर्भूषणैर्यथानुरूपं तयो रामकृष्णयोर्वेषमलङ्कारमकल्पयत् विदधे ॥ ४० ॥

अन्वितार्थप्रकाशिका

एवमिति । एवं विकत्थमानस्य असम्बद्धं भाषमाणस्य रजकस्य शिरः कुपितो देवकीसुतः कराग्रेण नखेनैव कायादपातयत् ॥ ३७ ॥ तस्येति । ततस्तस्य रजकस्यानुजीविनः सर्वे वासःकोशान् वस्त्रपुटकान् विसृज्य त्यक्त्वा मार्गं सर्वतो मार्गस्य सर्वा दिशः । "उभसर्वतसोः" इति द्वितीया । दुद्रुवुः पलायितवन्तः । ततो वासांसि अच्युतः कृष्णः जगृहे आदत्त । इदं च मखोत्सवाय रञ्जितानां वाससां लुण्ठनं मखोत्सवविघ्नाय ॥ ३८ ॥ वसित्वेति । कृष्णः संकर्षणश्चात्मनः प्रिये पीतनीले स्वाभीष्टे वस्त्रे वसित्वा वरिधाय शेषाणि गोपेभ्यः अदत्त दत्तवान् । कानिचित्तु शेषाण्यनभिप्रेतानि वासांसि भुवि विसृज्य त्यक्त्वा ततोऽगात् ॥ ३९ ॥ तत इति । ततस्तु वायकः तन्तुवायकः प्रीतियुक्तः विचित्रवर्णैश्चैलेयैर्वस्त्रमयैराकल्पैर्भूषणैर्वलयादिभिर्यथानुरूपं तयो रामकृष्णयोर्वेषमकरोत् अलङ्कारमकल्पयत् । मल्ललीलायां गात्रातोदकत्वेन चैलजानामानुरूप्यात् ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विकत्थमानस्य श्लाघा पूर्वकमुच्चैर्जल्पतस्तिष्ठत एव तस्य रजकस्य शिरः ॥ ३७ ॥ वासः कोशान् वसनपुटकान् मार्गं सर्वतो मार्गस्य सर्वादिशो दुद्रुवः ॥ ३८-३९ ॥ वायकस्तन्तुवायः चौलेयैर्वस्त्ररूपैः आकल्पैरामरणैः वेषमलङ्कारम् ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति । एवमित्थं, रजकस्य विकत्थमानस्य सतः, कुपितः देवकीसुतः, शिरस्तन्मस्तकं, कराग्रेण कायाद्देहात्, अपाहरत् ॥ ३७ ॥ तस्येति ॥ ततः तस्य रजकस्य, सर्वे अनुजीविनः वासःकोशान् वासःपुटकान् विसृज्य, सर्वतः मार्गं, दुद्रुवुः पलायितवन्तः वैः । ततः अच्युतः वासांसि जगृहे आदत्त ॥ ३९ ॥ वसित्वेति । तदा संकर्षणः, तथा कृष्णः, आत्मप्रिये स्वाभीष्टे, वस्त्रे परिधानीयोत्तरीयवसने, वसित्वा स्वाङ्गे परिधाय, शेषाणि गोपेभ्यः, आदत्त अदात् । कानिचित् वासांसि, भुवि विसृज्य, त्यक्त्वा, अगादिति शेषः ॥ ३९ ॥ तत इति । ततः वायकः दैवात्तत्रागतः कश्चित् सौचिकस्तु, प्रीतस्तद्गुणरूपप्रतापादि समीक्ष्य प्रसन्नतां प्राप्तः सन्, विचित्रो वर्णो रक्तपीतादिर्येषां तैः, चौलेयैर्वस्त्रमयैः, आकल्पैर्विभूषणैः, अनुरूपतः यथानुरूपं, तयोः रामकृष्णयोः, वेषमलंकारं, अकल्पयत् सम्यग्विदधे ॥ ४० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवमिति : १०.४१.३७.

तत्तादृगश्राव्यपदाक्षराणामुत्पत्तिमूलं गलमेव मुख्यम् । निश्चित्य चित्त सरुषा तदेशो व्यखण्डयत्कण्ठतलं किमस्य ॥ ६० ॥
मदक्षरं मुख्यमनेन नीतं जघन्यभावं तरसा स्वनाम्नि । रुषेति तत्कं हि कराग्रमेवाऽऽजहार चक्रे च तदा रजःस्थम् ॥ ६१ ॥
मद्वाचक-पदस्थान-कण्ठस्यानेन दुर्हृदा । माऽस्तु संसर्ग इत्याराद् द्वैधीभावं निनाय किम् ॥ ६२ ॥
अन्तस्थोष्मोद्धारं विना न संस्थां लभेत मत्तोऽयम् । इति तच्छिर एवारं जहार हित्वाऽन्यहत्युपायविधिम् ॥ ६३ ॥
अरिणाऽरिशिरोभङ्गो युक्तोऽपि न तथा कृतः । नायं सुदर्शनस्पर्शमर्हतीति ततोऽध्वनि ॥ ६४ ॥
देह एव सुखरूपभाग् जनेष्वित्यसद्ग्रहममुष्य दुर्हृदः । त्रोटयन्निव स माधवो व्यधात् कं पृथक्कं रजकस्य कायतः ॥ ६५ ॥

विना नयं राज्यगमङ्गजातं निरर्थकं स्यान्नृपतेर्यथैव। अङ्गानि सर्वाणि विनोत्तमाङ्गं व्यर्थानि तत्रैवमुदाजहार ॥ ६६ ॥
मलिनान् गुणिनो विधाय शुद्धान् भुवने रञ्जयतीति भूरि पुण्यम्। तदद्दष्टगतं विभाव्य कृष्णः स्वकरेणास्य शिरोऽस्पृशत् क्षमं तत् ॥
भव्यामोदनिदानमाश्रयकृतां दृष्ट्वा सुवाचाम्बरं को नामाम्बरमर्पयेन्न मनुजो निर्णिक्तनेत्रस्थितिः।
जाल्मोऽसौ रजकस्तु योऽम्बरमुपाश्रित्यापि कंसाम्बरं न प्रादादिति युक्तमेव हृतवानीशः स कंसाम्बरम् ॥ ६८ ॥

कंसाद्यनेक-रिपुशासन-लक्षितार्थं स्वाभीप्सितेष्टदतया जनगीयमानम्।
श्लोकं स्वकं सुरसभावगतं मनस्वीव्याख्यातुमाद्यमहरत् किमु तत्प्रतीकम् ॥ ६९ ॥
गोविप्रानलदेवताऽतिथिजनान् यो नित्यमुद्वेजयत्यार्तत्राणपराङ्मुखे नरपतौ तस्मिन् भृशं सत्यपि।
तद्वाराजकमेव राज्यमवनौ मन्तव्यमित्याशयं व्यक्तीकर्तुमसावराजकमधात् तं राजमार्गं प्रभुः ॥ ७० ॥
आलोच्यैव निजं हितं मतिमता यत्किञ्चिदप्यादराद् दत्तं चेन्मम तोषकारि सफलं स्यादन्था त्वीदृशम्।
व्यक्तीकर्तुमना वितीर्णवसना गोपीः पुराऽतोषयन्नाऽदादेष कुधीरतोऽस्य हृतवान्प्राणान्स वस्त्राणि च ॥ ७१ ॥
यान्त्यर्थिनैवाऽफलवाञ्छितेन सहासवो दातुरिति प्रसिद्धिः। स्मृत्यर्थसारानुमतेति कृष्णो निमित्तमासीत्तदसुप्रयाणे। ७२॥
गुणिनो यो रञ्जयति हि भुवि सोऽरञ्जयति सकलगुणवस्तु। नायं तथेति कृष्णो रञ्जयति स्म क्रुधा स्वरागेण ॥ ७३ ॥
युष्मन्निपातनकृते रचितो हि तेन कंसेन रङ्ग इति सङ्गतिरत्र मास्तु।
युष्माकमेव-मबलेरित-दत्तचित्तस्तद्धीहृतेः स हृतवान् किमु रङ्गकारम् ॥ ७४ ॥

तस्यानुजीविन इति : १०.४१.३८.

भ्रष्टे प्रधाने ह्यङ्गानां वैफल्यमनुजीविनाम्। सिद्धमेवेति तद्युक्तं यत्ते सर्वेऽपि दुद्रुवुः ॥ ७५ ॥
मच्चिन्तनादहरहः विशुद्धभावः कंसस्तदावरण-माहरणीयमाशु।
आलोचयन्निति दयालुरनर्घ्यवासो व्याजात् तदावरणमेव किमाजहार ॥ ७६ ॥
अप्रार्थितान्यपि मया जनताभिराभिर्नेत्राणि रक्त-सित-कृष्णमयानि मह्यम्।
स्वान्यर्पितान्यलमसावभियाचितोऽपि नादादिति प्रभुतया जगृहे स तानि ॥ ७७ ॥
वासो नादायि येनेह वासस्तस्य कथं भवेत्। तद्धत्या वस्त्रहृत्या च निर्वासश्रीः कृतस्ततः ॥ ७८ ॥

वसित्वेति : १०.४१.३९.

भूमौ चेद् गुणिनः पुरातनमलादुन्मत्तहस्तं गताः सद्भिस्तर्हि निहत्य तं द्रुतममूनादाय भूयोदरात्।
स्थाप्याः स्वप्रियभूषणेष्विति विभुः सम्बोधयंस्तत्क्षणे हत्वा तं रजकं ततः पटचयानादाय चाभूषयत् ॥ ७९ ॥
अराजकमिदं पुरं प्रथममाशु कृत्वा ततः सुराजक-विचारणोल्लसितमुग्रसेनाश्रितम्।
करोमि कुतुकादिति प्रभुरबोधयत् प्रायशः प्रसह्य रजकाहतेरथ च शिष्टनेत्रार्पणात् ॥ ८० ॥
दुर्जनकरस्थिता अपि ये रञ्जनमेवमापु-रतुलगुणम्। ते वन्द्या गुणिन इति ध्रुवमादधुरात्मशिरसि ते निखिलाः ॥ ८१ ॥
ईदृग्गुणकं मायावरणं मयि कल्पयन्त्यनल्पदृशः। इति दर्शयन् परात्मा प्रावरणावृतमहो व्यधादङ्गन् ॥ ८२ ॥
इदानीमहं गोपवेषोऽस्मि तस्माद् विशेषत्वमेभ्यो न मय्यच्युतेऽपि।
इति श्रीपतिश्चिन्तयन्नम्बराणि दधाराविशेषं सम शेषगोपैः ॥ ८३ ॥
प्रातिकृच्छत्रुवासोऽपि यदासीन्मित्रवासिनः। व्यक्तीकृता ततः स्वस्मिन् शत्रुमित्रैकनेत्रता ॥ ८४ ॥

ततस्तु वायकः प्रीत इति : १०.४१.४०.

गुणघटनाचणधीर्यः स एव गुणिसत्कृतौ मुदं वहति। युक्तं स तन्तुवायः पटयोजनमुचितमादृतोऽरचयत् ॥ ८५ ॥
ये यत्नेन मया कृताः सुगुणिनस्तानेष निर्णजको भूयो मज्जनपूर्वकं हि लगुडाघातेन जीर्यद्गुणान्।
कृत्वोवाच जनेषु निस्त्रपमलं शुद्धा मयेमे कृता नाशस्तस्य कृतोऽमुनेति समभूत् प्रीतः स किं वायकः ॥ ८६ ॥

कृष्णप्रिया

राजन ! इस प्रकार पागल की तरह प्रलाप करने वाले धोबी पर भगवान् कुछ कुपित हुए और एक ही ऐसा तमाचा लगाया कि जिससे उसका सर धड़ से जमीन पर गिरा ॥ ३७ ॥ धोबी के सर को भूमि पर गिरते देखकर और जो धोबी का आजीविका वाले उनके अनुचर धोबी थे वे वहाँ ही वस्त्रों की गहरियों को छोड़कर अपने प्राणों की रक्षा के लिए चारों ओर जहाँ रास्ता मिला भाग गए पुनः अच्युत प्रभु ने उन सारे वस्त्रों को ले लिया ॥ ३८ ॥ भगवान् श्रीकृष्ण एवं संकर्षण प्रभु ने उन वस्त्रों में से मनमाने उत्तम वस्त्र धारण कर लिये पुनः अपने मित्रों को भी उत्तमोत्तम वस्त्र बाँट दिये और जो अवशिष्ट रहे

उनको वहाँ ही पृथ्वी पर पटक कर आगे चल पड़े ॥ ३९ ॥ जब भगवान् श्रीबलभद्रजी के आगे पधार रहे थे तब मार्ग में एक दर्जी मिला। दोनों भैयाओं के रूपगुण से वह प्रभु का भक्त हो गया था। प्रभु के दर्शन से वह अत्यन्त प्रसन्न हुआ। उसकी भगवत्सेवा करने की भावना हुई। दोनों भैयाओं के श्रीअङ्गों के अनुरूप उत्तम रङ्ग दोरङ्गी कोशेय वस्त्रों को काँट-छाँट कर उत्तम वेष बनाया और भक्ति भाव से दोनों भैयाओं को अङ्गीकार कराया ॥ ४० ॥

नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः। [1]स्वलङ्कृतौ बालगजौ पर्वणीव सितेतरौ ॥ ४१ ॥
तस्य प्रसन्नो भगवान् प्रादात् सारूप्यमात्मनः। श्रियं च परमां लोके बलैश्वर्यस्मृतीन्द्रियम्[2] ॥४२॥
ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः। तौ दृष्ट्वा स [3]समुत्थाय ननाम शिरसा भुवि ॥ ४३ ॥
तयोरासनमानीय पाद्यं [4]चाथार्हणादिभिः। पूजां सानुगयोश्चक्रे स्रक्ताम्बूलानुलेपनैः ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—पर्वणि, स्वलङ्कृतौ, सितेतरौ, बालगजौ, इव, सितेतरौ, रामकृष्णौ, नानालक्षण, वेषाभ्याम्, विरेजतुः ॥ ४१ ॥ तस्य, प्रसन्नः, भगवान्, आत्मनः, सारूप्यम्, लोके, परमाम्, श्रियम्, बलैश्वर्य, स्मृति, इन्द्रियम् प्रादात् ॥४२॥ ततः, सुदाम्नः, मालाकारस्य, भवनम्, जग्मतुः, सः, तौ, दृष्ट्वा, समुत्थाय, शिरसा, भुवि, ननाम ॥ ४३ ॥ तयोः, आसनम्, आनीय, अथ, पाद्यम्, च, स्रक्ताम्बूलानुलेपनैः, च, अर्हणादिभिः, सानुगयोः, तयोः, पूजाम् चक्रे ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पर्वण्युत्सवे सितेतरौ श्वेतकृष्णौ गजशावाविव ॥ ४१ ॥ इह लोके परमां श्रियं च बलं चैश्वर्यं च स्मृतिं चेन्द्रियं तत्पाटवं च प्रादात् ॥ ४२–४५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

लक्षणं मुद्रा। 'पर्व स्यादुत्सवे ग्रन्थौ' इति कोशात्। सितेतरौ श्वेतश्यामौ ॥ नाना बहुविधं लक्षणं प्रकारो ययोस्ताभ्यां वेषाभ्यां छन्दाभ्याम्। द्वित्वं तदनुरूपत्वेन द्विधाभेदात्। विरेजतुरित्यत्र भक्तसेवास्वीकारादिति तत्त्वम्। सितेतरौ श्वेतकृष्णौ। दार्ष्टान्तिकवर्णव्यतिक्रमेण दृष्टान्तवर्णोक्तिः। केवलमलंकारकृतशोभायां तात्पर्येण पूर्वापरतानपेक्षणात् ॥ ४१ ॥ तस्य वायकस्य। बलं शारीरं रूपसौन्दर्यं वा। ऐश्वर्यमणिमादि। स्मृतिर्निजस्मरणम्। "बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः। पुमान्हलायुधे दैत्यप्रभेदे वायसेऽपि च ॥ बलयुक्तेऽन्यलिंगः स्याद्वाट्यालके तु योषिति।" इति मेदिनी ॥ तस्य तस्मै। प्रकर्षेणादात्। पूर्वत एव तस्य तद्भक्त्या सारूप्यादीनां तत्स्वामित्वबोधनार्थम्। लोके इति—अत्रैव लोके, किमुत परत्रेत्यर्थः। यद्वा—लोके पश्यत्येवेत्यर्थः। प्रशब्दार्थं व्यञ्जयति—आत्मनः श्रीगोपालरूपस्येति। परमां ब्रह्मादिदुर्लभाम्। श्रियं द्रव्यादिसंपदम्। परमामिति लिंगादिव्यत्ययेनाग्रेऽपि योज्यम्। चकारादैश्वर्यं प्रभुत्वं दानं च त्रिवक्रावत्तत्कालमेव ज्ञेयम्। तत्संभावनार्थमाह—भगवानिति ॥ ४२ ॥ ततो वायकवरदानोत्तरम्। तौ रामकृष्णौ। सुदाम्न इत्यन्वर्थनामवतः। आराद्दूरात् ॥ ततस्तदनन्तरमिति, चैलेयाकल्यानन्तरं पुष्पमालानामपेक्ष्यत्वादित्यर्थः। यद्वा—वायकानुग्रहानन्तर वायकादपि मालाकारं प्रत्यधिकानुग्रहार्थमित्यर्थः। सर्वलोकवत्तस्य पूर्वं स्वयं श्रीकृष्णनिकटप्रयाण तु तदुपायनार्थापूर्वमालारचनाभिनिवेशेनेति ज्ञेयम्। अग्रे च व्यक्तं भावि। सम्यक् ससम्भ्रममासनत्यागादिप्रकारेणोत्थाय भुवि ननाम शिरसा। तदुक्तं वैष्णवे—"भुवं विष्टभ्य हस्ताभ्यां पस्पर्श शिरसा महीम्" इति। श्रीभगवद्दर्शनार्थं निष्क्रान्तपरिकरस्य तन्मालानिविष्टदृष्टेस्तस्य कृपया सहसान्तिकसमागमनेन प्रणामस्थानसंकोचापत्तेः, सम्भ्रमेण तादृक्स्मरणाद्वा ॥ ४३ ॥ तयोः रामकृष्णयोः। अर्घार्थमुदकमर्घ्यं, तदितरमर्हणमनुधूपादीनि तैः। सानुगयोः सगोपयोः ॥ अर्घ्यं गधादिद्रव्याष्टकम्, अर्हण चान्यत्पूजोपकरण धूपदीपनैवेद्यादि। आदिशब्दाच्चामरवीजननीराजनादीनि। अर्हणशब्दादिशब्दाभ्या गृहीतानामपि स्रगादीनां पृथगुक्तिस्तत्प्राचुर्यस्य पुनः पूजनस्य चाभिप्रायेण ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नाना बहुविधं लक्षणं प्रकारा ययोस्ताभ्यां वेशाभ्यां छन्दाभ्यां द्वित्वं तत्तदनुरूपत्वेन द्विधाभेदात् विरेजतुरित्यत्र भक्तसेवास्वीकारादिति तत्त्व सितेतरौ शुक्लकृष्णौ बालगजाविव दार्ष्टान्तिकवर्णव्यतिक्रमेण दृष्टान्तवर्णोक्तिः केवलमलङ्कारकृतशोभाया तात्पर्येण पूर्वापरताऽनपेक्षणात् ॥ ४१ ॥ तस्य तस्मै प्रकर्षेणादात् षष्ठी पूर्वत एव तस्य तद्भक्त्या सारूप्यादीनां तत्स्वामित्वबोधनार्थं लोक इत्यत्रैव लोके किमुत परत्रेत्यर्थः। यद्वा लोके पश्यत्येवेत्यर्थः। प्रशब्दार्थमभिव्यञ्जयति। आत्मनः श्रीगोपालरूपस्येति

---

[1] अलङ्कृतौ–विज.। [2] न्द्रियाम्–विज.। [3] सहसोत्थाय–वीर.। [4] र्घ्या–श्रीधर, वंशी. जीव. वीर. विज. विश्व.।

परमां ब्रह्मादिदुर्ल्लभां श्रियं द्रव्यादिसम्पदं परमामिति लिङ्गादिव्यत्ययेनाग्रेऽपि योज्यं चकारादैश्वर्यं प्रभुत्वं दानञ्च त्रिवक्रावत्तत्कालमेव ज्ञेयं तत्सम्भावनार्थमाह । भगवानिति ॥ ४२ ॥ ततस्तदनन्तरमिति चैलेयाकल्पानन्तरं पुष्पमालानामपेक्षत्वादित्यर्थः । यद्वा । वायकानुग्रहानन्तरं वायकादपि मालाकारं प्रत्यधिकस्तुग्रहार्थामित्यर्थः । सर्वलोकवत्तस्य पूर्वं स्वयं श्रीकृष्णनिकटाप्रयाणं तु तदुपायनार्थापूर्वमालारचनाभिनिवेशेनेति ज्ञेयं अग्रे च व्यक्तं भावि सम्यक् ससंभ्रममासनत्यागादिप्रकारेणोत्थाय शिरसा भुवि ननाम । यथोक्तं वैष्णवे । "भुवं विष्टभ्य हस्ताभ्यां परपर्श शिरसा मही" मिति । श्रीभगवद्दर्शनार्थं निष्क्रान्तपरिकरस्य तन्मालानिविष्टदृष्टेस्तस्य कृपया सहसान्तिकसमागमनेन प्रणामस्थानसंकोचापत्तेः सम्भ्रमेण तद्विस्मरणाद्वा ॥ ४३ ॥ अर्घ्यं गन्धादिद्रव्याष्टकम् अर्हणञ्चान्यत् पूजोपकरणं धूपदीपनेवेद्यादि । आदिशब्दाच्चामरवीजननीराजनादीनि । अर्हणशब्देनादिशब्देन च गृहीतानामपि स्रगादीनां पृथगुक्तिस्तत्प्राचुर्यस्य पुनः पूजनस्य चाभिप्रायेण ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नाना बहुविधं लक्षणं प्रकारो ययोस्ताभ्यां वेशाभ्यां भूषणाभ्यां परिच्छदाभ्यां वा, द्वित्वं तत्तदनुरूपत्वेन द्विधा भेदात् विशेषेण रेजतुः शुशुभाते, भक्तसेवास्वीकारादिति, तत्र तत्त्वम्—सितेतरौ शुक्लकृष्णौ वालगजाविव दार्ष्टान्तिकवर्णव्यतिक्रमेण दृष्टान्तवर्णोक्तिः, केवलमलंकारकृतशोभायां तात्पर्य्येण पूर्वापरतानपेक्षणात् ॥ ४१ ॥ भगवान् निजैश्वर्य्यप्रकटक इत्यर्थः । तस्य तस्मै प्रकर्षेणादात् । षष्ठी पूर्वंत एव, तस्य तद्भक्त्या सारूप्या सारूप्यादीनां तत्स्वामित्वबोधनार्थं प्र–शब्दार्थमभिव्यञ्जयति—आत्मानः श्रीगोपालरूपस्येति । परमां ब्रह्मादिदुर्लभां श्रियं सम्पदम्, परमामिति लिङ्गव्यत्ययेनाग्रेऽपि योज्यम् चकारात् ॥ ४२ ॥ ततस्तदनन्तरमिति चौत्रेयाकल्पानन्तरं पुष्पमालानामपेक्ष्यत्वादित्यर्थः । यद्वा, वायकानुग्रहानन्तरं वायकादपि मालाकारं प्रत्यधिकानुग्रहार्थमित्यर्थः । 'सु' शोभनानि दामानि पुष्पमाला यस्य, यद्वा, शोभनानां भक्तिलक्षणानां दाम पङ्क्तिर्यस्मिन्नित्यन्वर्थसंज्ञत्वं ज्ञेयम् । अयं तस्य गृह–गमने हेतुः । सम्यक् ससम्भ्रमासनपरित्यागादिप्रकारेणोत्थाय, शिरसा भुवि ननाम, मूर्ध्ना भुवं स्पृष्ट्वा नमदित्यर्थः, तथा चोक्तं श्रीपराशरेण (वि० पु० ५।१९।२०) 'भुवं विष्टभ्य हस्ताभ्यां सस्पर्श शिरसा महीम्' इति कृपया सहसा द्रुतमन्तिके समागमनेन दण्डवत्प्रणामे स्थानसंकोचापत्तेः, सम्भ्रमेण तद्विस्मरणाद्वा ॥ ४३ ॥ अर्घ्यं गन्धादिकद्रव्याष्टकम्, अर्हणञ्च, अन्यत् पूजोपकरणं धूप-दीप-नैवेद्यादि, आदि-शब्दाच्चामरवीजन-नीराजनादीनि, सानुगयोः गोपवर्गसहितयोः, अर्हण–शब्देनादि शब्देन च गृहीतानामपि स्रगादीनां पृथगुक्तिस्तत्प्राचुर्य्यस्य पुनः पूजनस्य चाभिप्रायेण ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सितेतरौ सितश्च तदितरश्च असितः श्वेतकृष्णवर्णौ गजाविव ॥ ४१—५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसुरिकृतशुकपक्षीये एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा तौ रामकृष्णौ नानाविधवेषाभ्यां विरेजतुः यथा पर्वण्युत्सवे स्वलंकृतौ सितेतरौ श्वेतवर्णकृष्णवर्णौ बालगजौ रेजतुस्तद्वत् ॥ ४१ ॥ ततो भगवान् प्रसन्नस्तस्य वायकस्य स्वसारूप्यं स्वसाधर्म्यं मुक्तिमिति यावत् प्रादात् देहावसाने दास्यामीति सङ्कल्पितवानित्यर्थः । श्रियमित्यादि अस्य जीवद्दशायामितिशेषः । इह लोके परमां श्रियं बलं चैश्वर्यञ्च स्वविषयकस्मृतिञ्चेन्द्रियं तत्पाटवञ्चादात् ॥ ४२ ॥ ततः सुदाम्नः सुदामाख्यस्य मालाकारस्य गृहं जग्मतुः गतवन्तौ स च तौ रामकृष्णौ दूरादेव दृष्ट्वोत्थायाभ्येत्य शिरसा भुवि ननाम नमश्चक्रे ॥ ४३ ॥ तयोरासनमानीयादाय समर्प्य पाद्यं च समर्प्येति शेषः अर्घ्यार्हणादिभिः स्रगादिभिश्च सानुगयोस्तयोः पूजां चक्रे अर्हणशब्द उपात्तेतरपूजासाधनसंग्रहार्थः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

लक्षणं मुद्रा पर्वणीव पौर्णमास्यमावास्ये इव सितेतरौ श्वेतश्यामौ ॥ ४१ ॥ बलञ्च ऐश्वर्यञ्च स्मृतिश्च इन्द्रियञ्च बलैश्वर्यस्मृतीन्द्रियाणि तानि बलं शरीरशक्तिः रूपं सौन्दर्यं वा ऐश्वर्यमणिमादि स्मृतिर्भगवत्स्मरणम् इन्द्रियं ज्ञानेन्द्रियम् ॥ ४२–४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नानाविधं लक्षणे ययोस्ताभ्यां द्वित्वं तत्तदनुरूपत्वेन द्विधा भेदात् पर्वणि उत्सवे सितेतरौ सितश्यामौ ॥ ४१ ॥ इन्द्रियमिन्द्रियपाटवम् ॥ ४२ ॥ वस्त्रालङ्कारपरिधानानन्तरं माला अपेक्ष्यन्त इत्यत आह । तत इति ॥ ४३–४६ ॥

गूढार्थदीपिनी

पर्वणि उत्सवे । सितेतरौ श्वेतकृष्णौ ॥ ४१ ॥ स्मृतिः आत्मस्मरणम् । इन्द्रियपाटवं च ॥ ४२ ॥ अर्ह्यतेऽनेनेति अर्हणं पूजनद्रव्यम् ॥ ४३–४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पर्वणि उत्सवे सितेतरौ शुक्लकृष्णौ ॥ ४१ ॥ सारूप्यं साधर्म्यलक्षणं मोक्षम् प्रादात् इह लोके लीलादर्शनार्थं यावद्वासस्तावत्कालं श्रियं बलं च ऐश्वर्य्यं च स्मृतिञ्च इन्द्रियमिन्द्रियपाटवञ्च कंसादिभ्यः सर्वशः श्रैष्ठ्यं प्रादादित्यर्थः ॥ ४२ ॥ सः सुदामा ॥ ४३-४५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नानालक्षणं नानावेषश्च ताभ्यां यथा सितेतरौ सितश्वेतश्चेतरः प्रस्तुतेतरोऽसितश्च तौ बालगजावलङ्कृतौ गैरिकभूषितौ पर्वण्युत्सवविशेषे विरेजाते तथा रामकृष्णौ विरेजतुः। दृष्टान्तद्वयं वा बालगजौ। सितेतराविव सितो रामोऽसितः कृष्णश्चेति तादृशगजाविव। यथा पर्वणी वेति छेदः। पौर्णिमामावास्येव इव ते यथा सितेतरे शुक्लकृष्णौ रेजाते तथा रेजतुरिति ॥ ४१ ॥ तस्य वप्तुर्भगवान्प्रसन्नो लोके श्रियं च परमां बलैश्वर्यस्मृतीन्द्रिय वल चौश्वर्यं च स्मृतिं चेन्द्रियं तत्पाटवं च। एकवद्भावः। अन्ते चात्मनः सारूप्यं तद्रूपं मोक्षम् ॥ ४२ ॥ ततो वेषभूषणादिसम्पत्त्यनन्तरं सुदाम्नस्तन्नाम्नो मालां करोतीति मालाकारस्तस्य भवनं जग्मतुः। स सुदामा ॥ ४३ ॥ पाद्यं चानीयेत्यन्वयः। अर्हणादिभिरुपचारैः स्रक्ताम्बूलानुलेपनैः पूजाश्चक्रे ॥ ४४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्परिधापनेन भगवतः शोभमाह। अन्यथा तस्मै वरदानं सारूप्यलक्षणमयुक्तं स्यात् अतस्तत्क्रियया शोभा जातेत्याह। नानालक्षणेति। नानालक्षणानि वेषाः वेषाकृतौ तस्य वैयग्र्याभावाच्च सदानन्दत्वं रतिजनत्वं चोक्तं विशेषेण पूर्वापेक्षयापि रेजतुः यतः स्वलंकृतौ भगवतोऽतिमहतः स्वरूपेणोत्कृष्टस्यालंकारेण कौतुकमेव भवतीति ज्ञापयितुं दृष्टान्तमाह। बालगजौ अतिसुन्दरौ यथा पर्वणि नवम्यादावुत्सवे अलंकृतौ भवतस्तथातिचपलाविव अतिसुन्दरौ सर्वैर्दृष्टावित्यर्थः ॥ ४१ ॥ तदा सर्वषामधिकसन्तोषे फलं देयमिति। सन्तुष्टो भगवान् फलं दत्तवानित्याह। तस्य प्रसन्न इति। मनसि रूपं भावयित्वा रूपं कृतवानिति सारूप्यमेव दत्तवान् सामर्थ्यार्थं भगवानिति मुक्तिः प्रसन्न एव भवतीति प्रसन्न इत्याह। आत्मनः सारूप्यं व्यापिवैकुण्ठवासिनः। एतद्देहावसाने भविष्यतीति तदानीमनभिप्रेतमिति। फलान्तरमप्याह। बलैश्वर्य्येति। बलं देहस्य ऐश्वर्यवाचकम् आज्ञासामर्थ्यमिति यावत्। स्मृतिर्मानसी भगवदनुसंधानरूपा आत्मानुसन्धानरूपा इन्द्रियमपि सर्वेन्द्रियसामर्थ्यं दत्तवान् एवमन्तश्चत्तुर्द्धा ऐहिकं पारलौकिकं चेति षट् फलानि दत्तानि। धर्म एव तेन सम्पादित इति न स्वरूपदानम् ॥ ४२ ॥ भक्त्या सह स्वरूपदानार्थमुपाख्यानान्तरमाह। ततः। सुदाम्न इति। यो हि दाता स पूर्वं यद्देयं तद्दत्त्वैव दुर्ल्लभं प्रयच्छति अतस्तदनन्तरम् उत्तममालाकर्त्तु भवनं गतौ प्रायेण तस्य भवनं न राजमार्गे अन्यथा प्रासङ्गिकमेव स्यात्। विक्रयस्थाने तु नोत्तमाः पदार्था भवन्तीति भवनमेव जग्मतुः सुदामपदं रूढं वा भवेदिति विशेषमाह। मालाकारस्येति। साधारण्येन मालाकर्त्तुः नन्वक्लिष्टकर्मा भगवान् किमित्यल्पार्थे परगृहं गत इति शङ्काव्युदासाय तस्य भक्त्यादिकं निरूपयति। तौ दृष्ट्वेति सार्धैः षड्भिः। षड्गुणेभ्योऽधिकं देयमिति भक्तिरर्द्धमिति। स ह्युत्तमां मालां विधाय किं कर्त्तव्यमिति तिष्ठति तदैवागतौ रामकृष्णौ दृष्ट्वा प्रसिद्धः पूर्वमपि भगवद्भक्तः समुत्थाय भुवि शिरसा साष्टाङ्गं ननाम लौकिक्येषा भाषेति यथाकृतमुक्तवान् निरोधार्हो भवतीति ज्ञापयितुं वा प्राकृतत्वाभावाय भक्तत्वाभावाय च मध्यभावं निरूपयन्निरूपयति ॥ ४३ ॥ एतावन्महत्युदासीनेनापि क्रियत इति विशेषतः पूजामाह। तयोरासनमानीयेति। स्वगृहे तादृशं योग्यं प्रायो नास्तीति यदेवोत्तमं तदेवानीय दत्तवान्। अव्यवहार्यं वा तथा पाद्यं च चकारादन्येऽप्युपचारास्तथैव कृताः अर्हणादिभिश्चन्दनादिभिः पाद्यान्ते उपचारे कृते सान्निध्यात् जातस्नेहः भक्त्युत्तरं कृतवानिति ज्ञापयितुमथ शब्दः। अतः सानुगयोः पूजां चक्रे। इयं पूजा आकस्मिकीति लोकसाधारणीमाह। स्रक्ताम्बूलानुलेपनैरिति। आदौ चन्दनानुलेपनम्। ततस्ताम्बूलं ततो मालेति तथापि स्वधर्मो मालेति व्युत्क्रमेण निरूपितवान्। भक्तिवशाद्वा यदैव यत्सपन्नं तदेवाग्रे कृतवानिति ॥ ४४ ॥

श्रीसुबोधिनी-सारः

नानालक्षणं ययोस्ताभ्यां वेषाभ्यां स्वलङ्कृतौ कृष्णरामौ विरेजतुः असितेतरौ कृष्णश्वेतवर्णौ गजौ इव पर्वणि उत्सवे ॥ ४१ ॥ तस्योपरि प्रसन्नो भगवान् आत्मनः सारूप्य मुक्तिमदाद्देहान्ते इह लोके परमां श्रियं लक्ष्मीं बलमैश्वर्यं स्मृतिमिन्द्रियं करणपाटवं चाऽदात् ॥ ४२ ॥ ततोऽनन्तरं मालाकारस्य सुदाम्नो भवनं गृहं जग्मतुः। तौ रामकृष्णौ दृष्ट्वा स सुदामा समुत्थाय भुवि भूमौ शिरसा ननाम ॥४३॥ अथासवं पाद्यं चानीयाऽर्हणादिभिः सानुगयोः सगापयोः तयोर्द्वयोः स्रगादिभिः पूजां चक्रे ॥४४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा यथा पर्वणि उत्सवे स्वलङ्कृतौ सितेतरौ गौरश्यामौ बालगजौ राजेते तथा नानाविधचैलेयै रचितौ यौ वेषौ अलङ्कारौ ताभ्यां रामकृष्णौ विरेजतुः ॥ ४१ ॥ ततः प्रसन्नो भगवान् तस्य वायकस्य देहावासने आत्मनः स्वस्य सारूप्यं समानरूपतां प्रादात् सङ्कल्पितवान्। तथास्मिन् लोके जीवदशायामपि परमामुत्कृष्टां श्रियं सम्पदं, बलं शरीरं, ऐश्वर्यं भावं, स्वविषयिकां

स्मृतिं, इन्द्रियं तत्पाटवं चादात् ॥ ४२ ॥ ततश्च तौ सुदामाख्यस्य मालाकारस्य भवनं जग्मतुः। ननु 'पूर्णौ तौ मालार्थं किमिति तद्गेहं गतां' इति शङ्कां वारयंस्तस्य भक्त्यतिरेकमाह—ताविरयादिना ॥ ४३ ॥ तयोरासनमानीय समर्प्य स्रगादिभिः अर्हणादिभिरन्यैश्च पूजासाधनैः पूजां चक्रे। स्पष्टमन्यत् ॥ ४४ ॥

अन्वितार्थप्रकाशिका

नानेति ॥ तदा पर्वणि उत्सवे स्वलंकृतौ सितेतरौ गौरश्यामौ बालगजौ यथा राजेते तथा नानाविधलक्षणैः चैलेयैः रचितौ यौ वेषौ अलङ्कारौ ताभ्यां रामकृष्णौ विरेजतुः ॥४१॥ तस्येति ॥ ततः प्रसन्नो भगवान् तस्य वायकस्य देहावसाने आत्मनः स्वस्य सारूप्यं समानरूपतां प्रादात्संकल्पितवान् तथाऽस्मिन् लोके जीवदशायामपि परमामुत्कृष्टां श्रियं सम्पदं बलं शारीरम् ऐश्वर्यं भावं स्वविषयिकां स्मृतिम् इन्द्रियं तत्पाटवं चादात् ॥ ४२ ॥ तत इति ॥ ततश्च तौ सुदामाख्यस्य मालाकारस्य भवनं जग्मतुः। सः तौ दृष्ट्वा समुत्थाय भुवि शिरसा ननाम ॥ ४३ ॥ तयोरिति ॥ सानुगयोर्गोपैः सहितयोः तयोः आसनं पाद्यं च समर्प्य स्रक्ताम्बूलानुलेपनैः अर्हणादिभिरन्यैश्च पूजासाधनैः पूजां चक्रे ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पर्वणि दीपोत्सवादौ इव सितेतरौ श्वेतश्यामौ ॥ ४१ ॥ तस्य वायकस्य इहलोके परमां श्रियं च बलं देहसामर्थ्यं च ऐश्वर्यमिन्द्रियजयसामर्थ्यं च स्मृतिं कृत्यानुसंधानम् इन्द्रियं तत् पाटवं च प्रादात् ॥ ४२ ॥ भवनं गेहं ॥ ४३ ॥ सानुगयोः अनुगैर्गोपालैः सहितयोः ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नानेति। तदा पर्वण्युत्सवे, स्वलंकृतौ सितेतरौ श्वेतकृष्णवर्णौ, बालगजौ कलभौ इव, नानालक्षणवेषाभ्यां स्वलंकृतौ सितेतरौ, कृष्णरामौ, विरेजतुः ॥ ४१ ॥ तस्येति। ततः प्रसन्नः तदीयां देशकालानुरूपां सेवां विलोक्य बहुप्रसन्नतां प्राप्तः, भगवान् श्रीकृष्णः, तस्य तस्मै इत्यर्थः। आत्मनः सारूप्यं स्वसाधर्म्यात्मिकां मुक्तिं, प्रादात् एतद्देहावसाने प्रदेयां संकल्पितवान् लोके इह लोके, परमां श्रियं, बलं च ऐश्वर्यं च स्मृतिः स्वविषयका स्मृतिश्च इन्द्रियमिन्द्रियपाटवं च तत्समाहारं च, प्रादात् ॥ ४२ ॥ तत इति। ततः सुदाम्नः सुदामाख्यस्य, मालाकारस्य, भवनं गृहं प्रति, जग्मतुः। स मालाकारः, तौ रामकृष्णौ, आरात् दूरादेव दृष्ट्वा, उत्थाय अभेत्य, शिरसा भुवि, ननाम नमश्चक्रे ॥ ४३ ॥ तयोरिति। ततः तयोः, आसनं आनीय दत्त्वा, पाद्यं पादप्रक्षालनार्थकमुदकं च समर्प्य, अथ अर्हणादिभिः अर्घ्याचमनीयाद्यर्पणादिभिः, स्रक्ताम्बूलानुलेपनैश्च, सानुगयोः ससहचरयोः, तयोः रामकृष्णयोः, पूजां चक्रे। अत्रार्हणशब्द उपारेतरपूजासाधनसंग्रहार्थः ॥ ४४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नानालक्षणवेषाभ्यामिति : १०.४१.४१.

अरूपमम्बरं पादः सरूपं त्वङ्गभूषणम्। इति लक्षणवेषाभ्यां युक्तमीशोऽभिशोभितः ॥ ८७ ॥
अनेकगुणवान् श्रीशः पटोऽपीति समत्वतः। युक्तमेवापतुस्तत्र शोभामत्युज्ज्वलां मिथः ॥ ८८ ॥
अशेषं भगवद्रूपमलङ्कर्तुं च वीक्षितुम्। नेशः कोऽपीत्यसौ श्रीशे सशेषे नेत्रमादधे ॥ ८९ ॥
स्वयं हि षड्गुणः पत्नी त्रिगुणेति किमच्युतः। अत्युज्ज्वलं नवगुणं पटं स्कन्धे तदाऽऽदधे ॥ ९० ॥
ओतप्रोतस्थितिर्मे जगति भवपटे वर्ण्यते सिद्धवर्यैरार्यैरन्यैश्च मय्यप्यनुघटकतया वर्ण्यते स प्रपञ्चः।
तत्त्वार्थस्त्वेष यो मामभिलषति यथा तद्दृशा तादृशोऽस्मि नो भूषा नाप्यभूषा मम किमपि परा सच्चिदानन्दभूम्नः ॥९१॥
स्वदृक्प्रियं तयोर्वेषमकल्पयदसौ तदा। स्पष्टमेतेन समभूत् प्रागुत्तरसमानता ॥ ९२ ॥ (युग्मम्)
सदैव मधुरावन्यामहं गुणवदाश्रितः। यथार्थयोजकस्तत्र कश्चिदेवेति बोधितम् ॥ ९३ ॥
शक्तिश्चेत्स्वयमर्पणीयमखिलालङ्कारवस्त्रादिकं श्रीकृष्णाय सदर्पितादरकृते स्याच्चेदशक्तस्तदा।
कुर्यादाभरणाम्बरैः स्वकरतस्तद्गात्रगैरेव तत् पूजां भक्तिभरात्ततोऽपि भगवत्तुष्टिः समिष्टं ततः ॥ ९४ ॥
सिद्ध्यत्यविकलं तत्र सर्वशङ्कापनोदकम्। प्रमाणमभवत् ता दृग्वायकाचरणं जने ॥ ९५ ॥ (युग्मम्)

तस्य प्रसन्न इति : १०.४१.४२.

गात्रं मदीयममुना निजनेत्रदानपूर्वं व्यभूषि वसनैरविशेषमेभिः।
इत्यात्मसंभृतमुदा हरिणा तदानीं सोऽपि स्वनेत्रयुगुलाकलितो व्यधायि ॥ ९६ ॥
गलितविपदं कुविन्दं कृत्वा सुमनःपदे समावेश्य। युक्ता सरूपताऽपि स्वीया दत्ताऽमुना मुकुन्देन ॥ ९७ ॥
गुणगुणिसत्कृतिकृद्यो यत्कृतिरपि सत्प्रपञ्चविशदात्मा। भगवत्प्रसादपात्रं स च भुवि भवतीत्यगूढमेवैतत् ॥ ९८ ॥

यद्दुर्लभं जगपि योगिमुनीश्वराणामाकल्पमात्ममनसः किल वेधसोऽपि ।
सारूप्यमाप स हरेस्तदहो कुविन्दो भक्तैरलभ्यमिह वस्तु न किञ्चिदस्ति ॥ ९९ ॥

ततः सुदाम्न इति : १०.४१.४३.

अनन्तगुणभूषितो भवति वासुदेवो यदा निजावनकृते तदा व्रजति नाम दामस्थितिम् ।
स्फुटं त्विदमभूद्यतो धृतपटः सुदाम्ना गृहोन्मुखोऽभवदिहाच्युतः ससुमनः समीक्षोत्सुकः ॥ १०० ॥
यत्राऽम्लानतया स्थितिः सुमनसामस्ति प्रशस्ताकृतिर्यो वाऽहर्निशमुत्सुकस्तदवने तद्योजने सद्गुणैः ।
तत्रावश्यमहं व्रजाम्यनलसः श्रेयः श्रियं दुर्लभामप्यस्मै प्रदिशामि काममिति तद्गेहं ययौ बोधयन् ॥ १०१ ॥
यः सदा सुमनःसेवातत्परः सुमनोहरः । तदागारमगादाशु वनमालीति साधु तत ॥ १०२ ॥
सन्ध्यातोऽपि समर्थितो बहुसमाहूतोऽपि गीतोऽपि यश्चित्तेऽपि प्रतिमात्मना न विशति प्रायो मुनीनामपि ।
स श्रीशः स्वयमेव गेहमगमत् स्वैरं सुदाम्नस्तदा तत्सत्यं यदचिन्त्यवैभवमहो पुंभाग्यमेतद्वचः ॥ १०३ ॥
सुमनः श्रेष्ठसंप्राप्ति-रनेकसुमनोजुषः । युक्ता सापि मिथो योग्यैवासीत् सत्सु मनोहरा ॥ १०४ ॥
उल्लसत्सुमनो वक्त्रामोदाभरण-भूषितः । सदारामप्रियः श्रीशः सोऽपि मैत्र्यमतः क्षमम् ॥ १०५ ॥
यस्य यज्जीवनं तस्मिंल्लब्धे तस्योत्सवोऽर्थतः । युक्तं तदा सुदामाऽऽसीन्माधवप्रेक्षणोत्सुकः ॥ १०६ ॥
गत्वा तत्सविधे प्रमोदहृदयः कृत्वाऽऽदरात्सन्नतिं धृत्वा तत्करपल्लवं सविनयं साभ्यर्थनं सोत्सवम् ।
शंसन्नभ्युदयं विधेरनुपदं स्वीयैरनेकैर्वृतः साऽऽनन्दं सखिभिस्तमन्तरमिवाऽनिन्ये स सद्मान्तरम् ॥ १०७ ॥

तयोरासनमिति : १०.४१.४४.

विन्यस्य धीमान्भृशमासने प्रभुं विधाय पूजां विधिबोधिताध्वना ।
सामोदमादाय पदाम्बुजोदकं निजे परेषां च सिषेच मूर्धनि ॥ १०८ ॥
विधाय पुरतः स्थितिं विनयनम्रकायस्तदा तथाऽऽह विहिताञ्जलिः कृततदङ्घ्रिपद्मेक्षणः ।
प्रसादसुमुखो भवेत् प्रभुरगाधमोदप्रदो यथा च निजसेवकस्थितिरपि प्रकामं स्फुटा ॥ १०९ ॥

कृष्णप्रिया

जब भक्तवर दर्जी ने रङ्ग-विरङ्ग वस्त्रों को काट-छाट कर उत्तम वेष से श्रीरामकृष्ण दोनों भैयाओं का उत्तम वेष बनाया तब कौस्तुभादि रत्न के अलंकारों से समलङ्कृत दोनों ऐसे सुहावने लगे कि जैसे नवमी दशमी चतुर्दशी आदि पर्वों के दिन गेरु आदि विविध धातुओं से सिंगार हुए श्याम श्वेत दो बाल गजराज की शोभा को हरते हो ॥ ४१ ॥ उस भक्तवर दर्जी की सेवासे प्रसन्न भगवान् श्रीकृष्ण ने उसको अपने व्यापि वैकुण्ठ लोक में अपने समान स्वरूप, अखण्ड श्रीदिव्य बल, ऐश्वर्य-आज्ञा शक्ति, स्मृति-भगवान् का अविस्मरण, और इन्द्रियों का सामर्थ्य प्रदान किया ॥ ४२ ॥ दोनों ठाकुर राजमार्ग से प्रस्थान करते हुए अब सुदामा वाम के ख्यात नाम भक्तवर माली के प्राङ्गण पधारे । श्रीवलभद्रजो एवं श्रीश्यामसुन्दरजी का दर्शन होते ही माली सुदामा उठकर दौड़कर वेग से धरणी पर धरणीधर एवं श्रीधर प्रभु के श्रीचरणों में शिर रखकर साष्टाङ्ग किया ॥४३॥ दण्डवत् प्रणाम कर माली त्वरित दिव्यासन ले आया । दोनों नाथ को आसन पर पधार कर पुनः पाथ अर्घ्यसामग्री, माल्य, वनमाला, चन्दन, अक्षत, ताम्बूल आदि श्रेष्ठ सामग्री से समर्चन किया, और भगवाम् के सखाओं का उतने ही उत्साह से अर्चन किया ॥ ४४ ॥

प्राह नः सार्थकं जन्म पावितं च कुलं [1]प्रभो । पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वाम् ॥ ४५ ॥
भवन्तौ किल विश्वस्य जगतः कारणं परम् । अवतीर्णाविहांशेन क्षेमाय च भवाय च ॥ ४६ ॥
नहि वां विषमा दृष्टिः सुहृदोर्जगदात्मनोः । समयोः सर्वभूतेषु भजन्तं भजतोरपि ॥ ४७ ॥
[3]तावाज्ञापयतं भृत्यं किमहं करवाणि वाम् । [4]पुंसोऽस्त्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—सुदामा, प्राह, प्रभो, वाम्, आगमनेन, नः, जन्म, सार्थकम्, कुलम्, च पावितम्, मह्यम्, पितृदेवर्षयः, हि तुष्टाः ॥ ४५ ॥ भवन्तौ, विश्वस्य, जगतः, किल, परम्, कारणम्, इह, अंशेन, क्रियाशक्त्या क्षेमाय, च (अक्षेभनिवृत्त्यर्थम्) भवाय, च, मोक्षाय, भक्त्यै अवतीर्णौ ॥ ४६ ॥ भजन्तम्, भजतोः, सुहृदोः, जगदात्मनोः, सर्वभूतेषु, समयोः, हि, वाम्, विषमा, दृष्टिः, न, हि (वर्तते) ॥ ४७ ॥ तौ, भृत्यम्, आज्ञापयताम्, वाम्, अहम्, किम्, करवाणि, भवद्भिः, यत्, नियुज्यते, हि, पुंसः, एषः, अनुग्रहः ॥ ४८ ॥

---

१. विभो–प्रा. पा. २. साध्वा–वीर.; शाध्या–विज. । ३. ज्ञापय मां–विज.; साक्षाज्ज्ञापय–प्रा. पा. । ४. पुंसः स्व प्रा. पा. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

क्षेमायाभयाय भवायोद्भवाय ॥ ४६ ॥ रजकवधेन वायकानुग्रहेण च युवयोर्विषमदृष्टितयाऽनीश्वरता नाशंकनीयेत्याहः । न हि वामिति । अत्र हेतुः समयोरिति । अत्रापि हेतुद्वयम् । सुहृदोरिति जगदात्मनोरिति च । कथं तर्हि वैषम्यं दृश्यते तत्राह । भजन्तमिति । कल्पतरोरिवेत्यर्थः ॥ ४७-४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सार्थकं सफलम् । मह्यं मम । वां युवयोः ॥ अथ भक्त्या स्तुतिश्च कृतेत्याह—आहेति । प्रेमगद्गदाद्युत्तमप्रकारेणावदत् । न इति बहुत्वं तद्गमनेनात्मनो बहुमानात्, निजपरिकराद्यपेक्षया वा । आगमनेनेति—कृपया वास्तुस्पर्शमात्रेण किमुत साक्षाद्दर्शनदानेनेति भावः । अहो किं वक्तव्यं युष्मदागमनसौभाग्यवतां युवामेव साक्षात्पश्यतामस्माकं जन्म सार्थकमिति । अनेनैव पूर्वपुरुषाः सम्बंधिनश्च सर्वे भूतभविष्या निस्तीर्णा इत्याह—पावितश्चेति । नित्यपूज्याना पित्रादीनां प्रीत्युत्पत्त्या समाप्त कृत्यता च वृत्तेत्याशयेनाह—पितृदेवेति । हीति प्रमाणं दर्शयति ॥ ४५ ॥ विश्वस्य सर्वस्य । अंशेन प्रकृतिपुरुषादिरूपेण । परं केवलं कारणम् । इह मथुरायाम् । एकोऽत्र च शब्दः समुच्चये, तेन जगतः क्षेमायेति योज्यम् ॥ तथा चाक्रूरेण वक्ष्यते—'अद्येश वसतये' इत्यादि । तत्र सर्वत्रैव हेतुः—हे विभो परमेश्वरेति । ननु नन्दगोपसुतावावां, कथमीदृशी स्तुतिः क्रियते तत्राह—भवन्ताविति । किल शास्त्रादिप्रसिद्धौ । विश्वस्य सर्वस्य जगतोऽस्थिरस्य महदादेः कारणं पुरुषरूपेण कारणावस्थातः परञ्च स्वयं भगवद्रूपेण इह मथुरायामंशेनेति जातावेकत्वम् । अंशैर्गोपयादवादिभिः सहेत्यर्थः । यद्वा—अंशेन जगतः कारणमित्यन्वयः । तथा च वक्ष्यते—"यस्यांशांशशांशभागेन विश्वस्थित्यप्ययोद्भवाः" इति । चकाराभ्यां द्वयोरपि प्राधान्यं बोध्यते । तत्र क्षेममिहामुत्र चाभयम् । भव उद्भवो वृद्धिर्वा ॥ ४६ ॥ ईश्वरतां तयोराह—रजकेत्यादिना । अत्राविषमदृष्टित्वे । अत्रापि समत्वेऽपि ॥ ज्ञानक्रियाशक्तिदातृत्वेनोपकारात् सुहृदोः, अर्थात्सर्वेषां चेतनानां मूलकारणत्वेन जगतः कृत्स्नस्य चेतनाचेतनस्य चात्मनोः । यद्वा—जगत्कृत्स्नं व्याप्य सुहृदोरात्मनोश्च । अपिरुक्तसमुच्चये । भजन्तं ब्राह्मणचाण्डालादीनामेकतरमाश्रयमाणमात्रम् । भजतोः स्वयमाश्रयतोश्च । अतः समयोर्युवयोर्न विषमा दृष्टिः, किं वा सुहृदोर्जगदात्मनोश्च तावन्न विषमा दृष्टिः । तथा भजन्तमेव भजतोः कृपयतोरपि न सा, यतः समयोः प्राकृते दुःखे सुखे च तुल्ययोः । सूर्ये तमस इव पेचकचक्षुर्ज्योतिष इव च तच्चेतसि तस्य तस्य स्पर्शासंभवात् । स्वरूपभूताह्लादिनीशक्तिविलासविशेषरूपाया भक्तेरेव स्पर्शादिति भावः । तदुक्तं गीतासु—"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥" इति । नवमे च—"साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यं ते न जानन्ति नाहं तेभ्यो मनागपि ॥" इति । उभयत्र भक्त्यैव न त्वन्येन तच्चित्तं लिप्तं भवतीत्यर्थः । अन्यत्तैः । यद्वा—ईश्वरोर्युवयोर्भक्तिहीनाधमगृह-आगमनं सर्वत्र समतयैवेति दैन्यमात्रादाह—न हीति । अयमनुग्राह्योऽयं नेति विषमा दृष्टिर्नास्ति, यतः सुहृदोर्निरुपाधि कृपाकरयोः । किञ्च—जगदेवात्मा प्रियः ययोः, कुतः भजन्तं भजतोरपि सर्वभूतेषूत्तमाधमेष्वपि समयोर्जगन्नाथत्वादीनवात्सल्याच्चेत्यर्थः । न तव जात्यादिवैषम्यं यतोऽत्रत्येष्वपि मध्ये भजन्तं वायकं मालाकारं माञ्च कृतार्थयसीति भावः ॥४७॥ तावत्र भवन्तौ । भृत्यं माम् एतत्कुर्विति यन्नियुज्यते प्रेर्यत एष इत्यर्थः ॥ तौ विषमदृष्टिरहितावपि । ननु मदाज्ञा वेदरूपास्त्येव तत्राह—किमिति । साक्षादागतयोर्युवयोरधुना किं कार्यं तदित्यर्थः । नन्वाज्ञां विनापि पूर्वमातिथ्येन स्वयं तत्कृतमेव तत्राह—पुंस इति । हि यस्माद्भवद्भिर्यन्नियुज्यते हि एव एष एव पुंसो जीवस्य निजजनस्य वाऽनुग्रहः परमानुग्राह्यत्वमिति । भवद्भिरिति बहुत्वं तदीयापेक्षया । अहो अधुना भवदाज्ञया किं चिकीर्षामीति भावः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ भक्त्या स्तुतिश्च कृतेत्याह । प्राहेति । प्रेमगद्गदिकाद्युत्तमप्रकारेणावदत् । न इति बहुत्वं तदागमनेनात्मनो बहुमानात् निजपरिवाराद्यपेक्षया वा । आगमनेलेति कृपया वास्तुस्पर्शमात्रेण किमुत साक्षाद्दर्शनदानेनेति भावः । अहो किं वक्तव्यं युष्मदागमनसौभाग्यवतां युवामेव साक्षात् पश्यतामस्माकं जन्म सार्थकमिति अनेनैव पूर्वपुरुषाः सम्बन्धिनश्च सर्व भूतभविष्या निस्तीर्णा इत्याह । पावितश्चेति । नित्यपूज्यानां पित्रादीनां प्रीत्युत्पत्त्या समाप्तकृत्यता च वृत्तेत्याशयेनाह । पितृदेवेति । हीति प्रमाणं दर्शयति । तथा चाक्रूरेण वक्ष्यते । अद्येश नो वसतय इत्यादि । तत्र सर्वत्रैव हेतुः हे विभो ! परमेश्वरेति ॥ ४५ ॥ ननु नन्दगोपसुतौ आवां कथमीदृशी स्तुतिः क्रियते तत्राह । भवन्ताविति । किल शास्त्रादिप्रसिद्धौ विश्वस्य सर्वस्य जगतोऽस्थिरस्य महदादेः कारणं पुरुषरूपेण कारणावस्थातः परञ्च स्वयं भगवद्रूपत्वेनदह मथुरायां अंशेनेति । जातावेकत्वम् अंशैर्गोपयादवादिभिः सहेत्यर्थः । यद्वांऽशेन जगतः कारणमित्यन्वयः । तथाच वक्ष्यते "यस्यांशांशांशभागेन विश्वस्थित्यप्ययोद्भवा" इति । चकाराभ्यां द्वयोरपि प्राधान्यं बोध्यते । तत्र क्षेम इहामुत्र चाभयं भव उद्भवो वृद्धिर्वा ॥ ४६ ॥ ज्ञानक्रियाशक्तिदाधृत्वेनोपकारात् सुहृदोरर्थात् सर्वेषां चेतनानां मूलकारणत्वेन जगतः कृत्स्नस्य चेतनस्याचेनतस्य चात्मनोः । यद्वा जगत् कृत्स्नं व्याप्य सुहृदोः आत्मनोश्च ।

अपिरुक्तसमुच्चये । विशेषतो भजन्तं ब्राह्मणचण्डालादीनामेकतरमाश्रयमाणमात्रं भजतोः स्वयमाश्रयतोश्च । अतः समयोर्युवयोर्न विषमा दृष्टिः । किम्वा सुहृदोर्जगदात्मनोश्च तावन्न विषया दृष्टिः । तथा भजन्तमेव भजतोः कृपयतोरपि न सा । यतः समयोः प्राकृते दुःखे सुखे च तुल्ययोः । सूर्ये तमस इव पेचकचक्षुर्ज्योतिष इव च तच्चेतसि तस्य तस्य स्पर्शासम्भवात् स्वरूपभूताह्लादिनीशक्तिविलासविशेषरूपाया भक्तेरेव स्पर्शादिति भावः । तदुक्तं श्रीगीतासु । "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यह" मिति । नवमे च । "साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी"ति उभयत्र भक्त्यैव नत्वन्येन तच्चित्तं लिप्तं भवतीत्यर्थः । अन्यत्तैः । अथवा ईश्वरयोर्युवयोर्भक्तिहीनाधमगृह आगमनं सर्वत्र समतवैवेति दैन्यमात्रादाह । नहीति । अयमनुग्राह्यः अयञ्च नेति विषमा दृष्टिर्नास्ति यतः सुहृदोर्निरुपाधिकृपाकरयोः । किञ्च जगदेवात्मा प्रियं ययोः कुतः भजन्तं भजतोरपि सर्वभूतेषूत्तमाधमेष्व समयोर्जगन्नाथत्वाद्दीनवात्सल्याच्चेत्यर्थ ॥ ४७ ॥ तौ विषमदृष्टिरहितावपि । ननु मदाज्ञा वेदरूपास्त्येव तत्राह । किमिति साक्षादागतयोर्युवयोरधुना किं कार्यं तदित्यर्थः । नन्वाज्ञां विनाप पूर्वमातिथ्येन स्वयं तत्कृतमेव तत्राह । पुंस इति यस्माद्भवद्भिर्यन्नियुज्यते हि एव एष एव पुंसो जीवस्य निजजनस्य वा अनुग्रहः । परमानुग्राह्यत्वमिति पुंसस्त्विति पाठे अनुग्रहस्त्वेष इत्यन्वयः । भवद्भिरिति बहुत्वं तदीयापेक्षया । अतोऽधुना भवदाज्ञया किंचिच्चकीर्षामीति भावः ॥ ४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भक्त्या स्तुतिश्च कृतेत्याह–प्राहेति । प्रेमगद्गदाद्युतमप्रकारेणावदत् । 'नः' इति बहुत्वं तदागमनेनात्मनो बहुमानान्निजपरिवाराद्यपेक्षया वा । अहो किं वक्तव्यम्, जीवतां त्वां साक्षात् पश्यतामस्माकं जन्मसार्थकत्वम् ? पूर्वपुरुषाः सम्बन्धिनश्च सर्वेऽपि भूत-भविष्या निस्तीर्णा इत्याह—पावितं चेति । नित्यपूज्यानां पित्रादीनां प्रीत्युत्पत्त्या समाप्तकृत्यता च वृत्तेत्याशयेनाह—पितृदेवेति । हीति प्रमाणं दर्शयति (भा० १०।४८।२५)—'अद्येश नो वसतयः' इत्याद्यक्रूरोक्तः, अग्रे तद्व्यक्तं भावि । युवयोरागमनेनेति स्वयमेव गृहागमनेन जन्मसार्थकतादिविशेषविवक्षया । तत्र सर्वत्रैव हेतुः—विभो ! हे परमेश्वरेति; यद्वा सर्वव्यापकेति तदागमनं दुर्घटमुक्तम्, तथापि कृपयात्रागमनेन, एकत्वं द्वयोरैक्याभिप्रायेण, प्राधान्याच्छ्रीकृष्णसम्बोधनेन वा ॥ ४५ ॥ ननु वसुदेवसुतौ यादवानां प्रति कथमीदृशी स्तुतिः क्रियते ? तत्राह—भवन्ताविति । किलेति शास्त्रादिप्रसिद्धिं प्रमाणयति—बिश्वस्य सर्वस्य परं कारणम्, इह—श्रीमथुरायाम्, अंशेनेति जातावेकत्वम्, अंशैर्गोपयादवादिभिः सहेत्यर्थः, यद्वा, अंशेन जगतः कारणमित्यन्वयः । तथा चोक्तम् (भा० १।३।५) 'यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः' इति च-काराभ्यां द्वयोरपि प्राधान्यं बोध्यते । तत्र क्षेममिहामुत्र चाभयम्, भव उद्भवो वृद्धिर्वा, स च धर्म्मादीनां भक्तेर्वा ज्ञेया ॥ ४६ ॥ भजन्तमेव भजतोरपि न विषमा दृष्टिरित्येतत् पूर्वमक्रूरोक्तौ सुरद्रुमदृष्टान्तेन साधितमेव, सुहृदोः स्वभावत एव सर्वसखत्वाज्जगत आत्मनोरन्तर्यामिनोरधीश्वरयोरित्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, ईदृशयोर्युवयोर्भक्तिहीनाधमगृहे आगमनं सर्वत्र समतयैवेत्याशयेन दैन्यादाह—न हीति । 'अयमनुग्राह्योऽयञ्च न' इति विषमा दृष्टिर्नास्ति, यतः सुहृदोर्निरुपाधिकृपाकरयोः, किञ्च, जगदेव 'आत्मा' प्रियं ययोः, कुतः ? भजन्तं भजतोरपि सर्वभूतेषु उत्तमाधमेष्वपि समयोः, जगन्नाथत्वाद्दीनवात्सल्याच्चेति भावः । द्वौ प्रत्येव साम्येन स्तुतिरन्योऽन्यं स्नेहादैक्याभिप्रायेण, भक्तवत्सलत्वादिगुणप्रकटक-श्रीकृष्णप्रीत्यपेक्षया वा ॥ ४७ ॥ तौ विषमदृष्टिरहितावपि विशेषतश्च भृत्यं माम् । ननु मदाज्ञारूपवेदशास्त्रद्वारा प्रसिद्धमेव कृत्यम् ? तत्राह—वामिति । साक्षादत्रागतयोर्युवयोरधुना किं कार्य्यं तदित्यर्थः । नन्वाज्ञां विनापि पूर्वमातिथ्येन स्वयं तत् कृतमेव, तत्राह—पुंस इति । हि एव, एष एव, पुंसो जीवस्य निजजनस्य वा, तं प्रति हि यतोऽनुग्रहः, को भवद्भिर्नियुज्यते आज्ञाप्यत इति यत्, यो भवद्भिरिति बहुत्वं तदीयापेक्षया, अतोऽधुना भवदाज्ञया काञ्चित् सेवां चिकीर्षामीति भावः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततस्तौ प्राह उक्तिमेवाह । नः सार्थकमित्यादिना इत्यभिप्रेत्येत्यतः प्राक्तनेन वां युवयोः आगमनेन नोऽस्माकं जन्मसार्थकं जातं नः कुलञ्च पावितं पवित्रीकृतं पित्रादयश्च मह्यं तुष्टा बभूवुः ॥ ४५ ॥ कथं यादवयोरावयोरागमनमात्रेण सर्वमेतत्सम्पन्नं तत्राह । भवन्ताविति । विश्वस्य कृत्स्नस्य जगतो भवन्तौ परं कारणं मूलकारणभूतावित्यर्थः । कथमेवं विधयोः कर्मकृतं जन्मेत्यत आह । अवतीर्णाविति । अंशेन सङ्कल्परूपज्ञानेन नतु कर्मणेति भावः । इह लोके अवतीर्णौ जन्मनः सुखदुःखानुभवार्थत्वं वारयन् प्रयोजनमाह । क्षेमाय साधूनामिति शेषः । क्षेमः प्राप्तश्रियः पालनं भवो लब्धसुखप्रापणम् ॥ ४६ ॥ ननु कञ्चिदनुगृह्णन्तौ कञ्चिच्चातिगृह्णन्ता वा वां नेश्वरौ किन्तु प्राकृतौ जीवावित्यत आह । नहीति । जगत आत्मनोः अतएव सुहृदोः नहि स्वशरीरे कस्यचिदप्यसौहार्दं दृष्टमिति भावः । युवयोर्विषमा दृष्टिर्न विद्यते तत्र हेतुं वदन् विशिनष्टि भजन्तं भजतोरनुगृह्णतोरपि समयोः नहि भक्तेष्वनुग्रहो वैषम्यमूलकः नह्यप्रार्थितार्थदस्य सुरद्रुमस्य वैषम्यमस्ति नैषम्यपरिहारार्थं भजनात्मकं व्याजमपेक्षते इति भावः ॥४७॥ स्वस्मिन्नत्यन्तपारतन्त्र्यमावेदयितुं कैङ्कर्यानुशासनं प्रार्थयते । साध्विति । वां युवयोरहं किङ्करवाणि कि करोम्मीत्यर्थः अतो भृत्यं

साधु यथा तथा आज्ञापयतम् । एतावतैवाहमनुगृहीतो भविष्यामीत्यभिप्रेत्याह । पुंसस्त्विति । भवद्भिर्नियुज्यते अनुशिष्यते इत्येष एव पुंसो जीस्यानुग्रहस्त्वत्कृतानुग्रह इतीत्थं विज्ञापयन्निति शेषः ॥ ४८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सार्थकं सप्रयोजनं पावितं शुद्धीकृतम् ॥ ४५-४७ ॥ शाधि शिक्षस्व कर्तव्यमनुजानीहीति वा एतत्कुर्विति नियुज्यते प्रेर्यत इति यदेषः ॥ ४८-५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां एकोनचत्वारिंशोऽध्यायः ॥ ३९-४१ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मह्यं मां प्रति ॥ ४५-४६ ॥ सुहृदोर्जगदात्मनोश्च तावन्न विषमा दृष्टिः । तथा भजन्तं भवतोः कृपयतोरपि न सा । यतः समयोः प्राकृते दुःखे सुखे च तुल्ययोः ॥ ४७-४८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

भवन्तावित्यादि । इह आंशेन अंशसमूहेन कृष्णश्च सर्वांशेन बलदेवोऽपि तथेत्यर्थः । अतएवाह—जगतः क्षेमाय श्रवण-स्मरणार्ह लीलाकरणेनानन्दाय, भवाय सम्परेत्त्य च ॥ ४६-५२ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अवतीर्णाविति । इह भुवि अंशानां समूह आंशस्तेन आंशेन भुव एव मङ्गलरूपेणावतीर्णौ, अतएव क्षेमाय जगतो विमुक्तये भवाय वृद्धये च, अथवा क्षेमाय स्मरणार्ह-लीला करणेन जगतां प्रेमानन्दाय ॥ ४६-५२ ॥

इत्येकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भजन्तं भजतोरपीति । समोऽहं सर्वभूतेष्वित्यत्र ये भजन्ति च मां भक्त्या मयि ते तेषु चाप्यहमिति तदुक्तेः वस्तुतस्तु विप्रश्वपचादिषु सत्कर्मकुकर्मवत्स्वपि मध्ये यः कोऽपि त्वां भजति तमेव त्वं भजसीति । न तव धात्यादिवैषम्यं यतोऽत्रत्येष्वपि मध्ये भजन्तं वायकं मालाकारं च मां कृतार्थयसीति भावः ॥ ४७-४८ ॥

गूढार्थदीपिनी

सार्थकं सफलम् । मह्यं मम । वां युवयोः ॥४५॥ विश्वस्य सर्वस्य । अंशेन कारणमित्यत्रान्वयेति । भवाय वृद्धये ॥४६॥ वां युवयोः ॥ ४७ ॥ तौ भवन्तौ ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अंशेन स्वसङ्कल्पेन क्षेमाय मोक्षाय भवायोद्भवाय भोगाय मुमुक्षुभ्यो मोक्षप्रदानाय बुभुक्षुभ्यो भोगप्रदानायेत्यर्थः ॥ ४६ ॥ रजकवायकादिनिग्रहानुग्रहकर्तृत्वं युवयोस्तत्तत्कर्मसापेक्षत्वादित्याह । नहीति ॥ ४७ ॥ नियुज्यते एवं कुरु इत्येवमनुष्यते इत्येष पुंसः अनुशिष्टस्य महान् त्वत्कृतोऽनुग्रहः ॥ ४८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वां युवयोरागमनेन नो जन्म सार्थकं कुलं च पावितं पितरश्च देवाश्च ऋषयश्च मह्यं मदुपरि तुष्टाः । प्रभो इत्युक्तवक्ष्यमाणगुणा मुख्याः कृष्ण एव बले तूपचार इति ध्वनयति ॥ ४५ ॥ भवन्तौ युवां वर्तमानकाल इत्यप्यर्थः । भवन्ति वर्तमानकाल इति कौमुदी । क्षेमाय भवाय मङ्गलाय चावतीर्णा ॥ ४६ ॥ समयोस्तत्तद्योग्यतामनुसृत्य समयोर्वा न हि विषमा दृष्टिर्जगदात्मनोर्जगत्स्वामिनोः सुहृदोर्बन्ध्वोः सुमनसोर्वा भजन्तं भजतोः फलदानेन ॥ ४७ ॥ शाधीत्येक प्रत्याज्ञापयेतीति नैकतरवैय्यर्थ्यं वा सामान्यविशेषकल्पनं वेति ज्ञेयम् । भवद्भिर्भवदादिभिर्नियुज्यत इति यद्येष नियोगोऽस्त्यनुग्रहस्तद्रूपः पुंस इत्यधिकारिणः ॥४८॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं कायिकमुक्त्वा तत्कृतां वाचनिकीं पूजामाह । त्रिभिः प्राहेति । स्वकृतार्थत्वं भगवत्कृतस्य फलत्वाय भगवतो निर्दोषपूर्णगुणत्वं च निरूपयति आदौ भक्तोद्धारको भगवानिति स्वकृतकृत्यमाह । नः सार्थकं जन्मेति । पुरुषार्थपर्यवसायि जन्म सार्थकं न इति गृहस्थानां सर्वेषामेव । ये वा भगवतैवं कृताः श्लाघायां वा यद्यपि जन्मकाल एव तादृशं फलं भविष्यतीति सर्वदैव सार्थकं तथापि फलोन्मुखता अद्येति ज्ञानं वेति प्रतिदिनं देहाद्युत्पत्तवाद्येत्युक्तं प्राहेति पाठे तु न सदेहः । न केवलं मम जन्म किंतु मत्सम्बन्धिनां सर्वेषामेवेत्याह । पावितं च कुलमिति । चकारात् कुलस्थाः सर्वे च तथात्वे सामर्थ्यं प्रभो इति सर्वस्यापि

स्वकृतस्य जन्मकोटिभिः संपादितस्य विनियोगोऽत्रैवेति वक्तुं पूर्वं स्वाराधितदेवादीनां प्रसादफलमेवेत्याह। पितृदेवर्षय इति युवयोरागमनेन पितृदेवर्षयो मह्यं तुष्टा इति केचित्। वस्तुतस्तु पितृदेवर्षयो मह्यं तुष्टाः युक्तश्चायमर्थः। युवयोरागमनेनेति फलकीर्त्तनं करणता त्वग्रिमफलार्थम्। अथवा नातः परं पित्राद्याराधनं कर्त्तव्यं यतस्त्वदागमनेनैव ते सन्तुष्टः। मह्यमिति तदर्थं फलं दातुं मम वा अनेन त्वय्येव पूजिते सुतरां ते तुष्टा भवन्तीति किं वक्तव्यमित्युक्तम् ॥ ४५ ॥ महत्यारोपन्यायेन स्तुतिरेवंविधा संभवतीति तद्व्यावृत्त्यर्थं स्वस्य भगवत्स्वरूपज्ञानमाविष्करोति भवन्ताविति। विश्वस्य सम्बन्धिनौ भवन्तौ किल प्रसिद्धौ विश्वस्मिन् भवन्तौ प्रसिद्धावित्यर्थः। अनेन जगति यावन्तो महद्धर्माः ते सर्वे निरूपिताः कारणत्वं च निरूपयन्नाह। जगतः कारणं परमिति। जगद्यज्जायते तस्य मूलकारणं भवानेव विश्वशब्दो वा सर्वशब्दवत् सामान्यविशेषवाची उत्पादकत्वेन महत्त्वेन च उत्पत्त्या चोपपत्त्या च माहात्म्यं निरूपितं नतूत्पत्तिस्थितिलयैर्येन न्यूनता स्यात्। सर्वनिधानत्वेनैव वा सर्वप्रकारेण स्तुत्यता निरूपिता साधारणकारणत्वं कालस्यापि वर्त्तत इति परमिति। अनन्तमूर्त्तिर्भगवानिति द्विवचनं न दोषाय रूपद्वयेन चाविर्भूत इति माहात्म्यं परमुच्यते तादृशयोरवतारे प्रयोजनमाह। अवतीर्णाविहांशेनेति। इह प्रपञ्चे अंशेन क्रियाशक्त्या अवतीर्णौ ज्ञानांशेनान्य एव सृष्टा इति। पूर्ववदेव देशेन वा। एकवचनं तु तदेवान्यत्राविष्टमित्येकावताराभिप्रायम् अत एव प्रियाप्रयोजनमाह। क्षेमाय च भवायचेति। स्थितस्य परिपालनार्थं चकारादक्षेमव्यावृत्त्यर्थं भवायोद्भवाय आधिक्यार्थं चकारान्मोक्षाय च। आधिक्यमत्र भक्तिः अतः कार्यचतुष्टयार्थं भगदवतार इत्युक्तं सर्वदुष्टनिराकरणार्थं सतां रक्षणार्थं मोक्षार्थं भक्त्यर्थं च ॥ ४६ ॥ नन्वेवं क्रियमाणे अब्रह्मत्वं स्यात् विषमकरणादित्याशङ्क्य सर्वदोषान् परिहरति। न हि वां विषमा दृष्टिरिति। मूलकारण एव हि नैघृण्यमपि प्रसिद्धं भवति अवतीर्णेषु वैषम्यमेव प्रसिद्धमिति तदेव निराक्रियते वां युवयोर्न विषमा दृष्टिः कश्चिन्मारणीयः कश्चित्स्थाप्य इति तत्र हेतुत्रयं वदति सुहृदोः जगदात्मनोः समयोरिति युक्त्या प्रमाणेन च पदार्थे निर्णीते प्रातीतिको दोषः भ्रमप्रतीतिरपि अन्यथा वा व्याख्येयेति न काप्यनुपपत्तिः युक्तचायमर्थ इति सर्वत्रैवं निर्णय इति हिशब्दः न हि किंचित्पुत्रं मारयन् कंचिदभिनन्दन् पिता विषमो भवति शिक्षार्थमेव तथा करणात् न हि हस्तेन पादं प्रक्षालयन् शिरश्चाप्रक्षालयन् विषमो भवति क्वचिदेव वा अलङ्कुर्वन् कालमुखे प्रविष्टानां जीवानामुद्धारार्थमागतः कालं वञ्चयित्वा नयन् वञ्चनार्थं सुहृदेव अन्तर्यामित्वात् सखित्वात्कृपालुत्वाच्च प्रदर्शनार्थं विषममपि कुर्वन्न विषमो भवति तदाह। सुहृदोरिति। यथैव सौहार्दं सिध्यति तथैव कुरुतः जगत एवात्मानौ कथमेकस्यैव विषमौ भविष्यतः अनेन स्वात्मानं यथासुखं करोतीति नैघृण्यमपि परिहृतं ज्ञातव्यम्। सर्वभूतेषु समत्वं कारणत्वादेव सिद्धं भूतपदेन च रोगादिवत् ये निवर्तनीया एव सहजासुराः ते व्यावर्तिता इति केचित्। वस्तुतस्तु जाताभिप्रायम् अन्यथा आत्मैवेति नात्मनः समा भवति साम्यस्य भेदसहिष्णुत्वात्। नन्वेतच्छिक्षार्थं मारणे गतिरुक्ता वरदानादेः का गतिरिति चेत्तत्राह। भजन्तं भजतोरपीति। "ये यथा मां प्रपद्यन्त" इति वाक्यात् कल्पतरुस्वभावत्वाच्च प्रार्थितायैव प्रयच्छतीति सर्वेभ्यः अदानेऽपि न विषमत्वम् ॥ ४७ ॥ एवं स्तुत्वा स्वस्य मानसं निवेदयति। तावाज्ञापयर्यमिति। अयं हि मनसा भगते सर्वं निवेद्य दासो जातः स चेद्भगवता दासत्वेन क्रियते तदा दासः सम्पद्यते। तस्य चाभिज्ञापकमाज्ञापनम् अतस्तौ स्वामिनौ भृत्यं मामाज्ञापयत। ननु वेदे सर्व एव जीवाः भृत्या आज्ञप्ताः तथा भवानपीति चेत्तत्राह। किमहं करवाणि वामिति। युवयोरर्थे किं विशेषेण करवाणि अन्यथा विशेषतो दासभावप्राप्तेः कः पुरुषार्थः स्यात्। ननु पूर्णकामावावां नास्मभ्यं किञ्चित् कर्तव्यमिति चेत्तत्राह। पुन्सोऽत्यनुग्रह इति। न ह्ययं नियोगः भवदुपकाराय किं त्वस्मदुपकाराय यथा वरदानं वरापेक्षयाप्ययमत्यनुग्रहः यत्सेवकत्वेन स्वीकृत्य नियुज्यते युक्तियुक्तश्चायमर्थः वरः परिच्छिन्नः अपरिच्छिन्नं च दासत्वमिति तस्य हि सर्वं कार्यं स्वामिनैव कर्तव्यमिति। भवद्भिरिति बहुवचनं ससेवकाभिप्रायम् एष इति भक्त्या भगवदाज्ञापनं तस्य पुरः स्फूर्तिकमिति उक्तम्। अत एवाग्रे अनुक्तोऽपि मालां दास्यति अनेन भगवत्प्रपत्तः स्वतः सामर्थ्यं द्योतितम् ॥ ४८ ॥

श्रीसुबोधिनी-सारः

प्राह नोस्माकं जन्म सार्थकं सफलं कुलं पावितं च वां युवयोरागमनेन पितृदेवर्षयो मह्यं तुष्टाः ममोपरि प्रसन्ना हि युक्तम् ॥ ४५ ॥ विश्वस्य जगतः परं कारणं भवन्तौ इहांशेनावतीर्णौ किल निश्चये क्षेमाय मगलाय भवाय समृद्धये च ॥ ४६ ॥ रजकवधवायकानुग्रहतः प्राप्तमात्मनि वैषम्य परिहरन्नाह। सुहृदोः सर्वोपकारकयोरेतेन रजकस्यापि मोक्षः सूचित इति हरिवंशश्रीकृष्णजन्मखण्डादितो बोध्यं जगदात्मनोः सर्वभूतेषु समयोः तुल्ययोः भजन्त भजतोर्वा युवयोर्विषमा दृष्टिर्न हि ॥ ४७ ॥ तौ युवां भृत्यं मामाज्ञापयतं वा युवयोः किमहं करवाणि भवद्भिर्यत् नियुज्यते एष पुंसोऽत्यनुग्रहो हि ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च तौ प्राह। तदुक्तिमेवाह—न इति। मुख्यत्वादेकं कृष्णमेव सम्बोधयति-प्रभो इति। हि यस्मात् वां युवयोरागमनेन मह्यं मदर्थं पित्रादयस्तुष्टास्तेषामृणाद्वयं विमुक्ताः, नोऽस्माकं कुलं च पावितं उद्धृतम्, अतोऽस्माकं जन्म सार्थकं सफलं जातमित्यन्वयः ॥ ४५ ॥ ननु 'कथमावयोरागमनमात्रेण तव पित्रादीनां ऋणाद्विमुक्तिः, भवन्ताविति। 'किल' इत्यवधारणे।

विश्वस्य कृत्स्नस्य जगतो भवन्तावेव कारणम्। 'जगत्कारणस्यापि कारणान्तरं स्यात्' इत्याशङ्क्याह—परमिति। मूलकारणं स्वकारणान्तररहितमित्यर्थः। 'एवंभूतस्यावतारे किं प्रयोजनम्' इत्याकाङ्क्षायामाह—साधूनां क्षेमाय पालनाय भवाय उद्भवाय च अंशेन स्वसङ्कल्पेन मूर्तिभेदेनेह भूलोकेऽवतीर्णाविति ॥ ४६ ॥ ननु "सर्वमूलत्वं चेत्तर्हि समत्वमेव स्यात्, न वैषम्यम्, प्रसिद्धं च रजकवधेन वायकप्रसादेन च वैषम्यम्, अतः कथं सर्वमूलत्वम्" इत्याशङ्क्याह—नहीति। जगत आत्मनोरुपादानभूतयोः भजन्तं भजतोरपि सुरतरुवद्वां युवयोः सर्वभूतेषु विषमा दृष्टिर्नैवास्ति इत्यन्वयः। ननु 'भजतो भजतोरन्यानभजतोरपि सुरतरुवद्वैषम्यमुक्तम्, दुष्टनिग्रहं कुर्वतोस्तु कथं न वैषम्यं स्यात्' इत्याशङ्क्याह—'दुष्टनिग्रहस्यापि तद्भावनानुरूपश्रेयः पर्यवसायित्वात् तत्रापि न वैषम्यम्' इत्याशयेनाह—सुहृदोरिति, सर्वमित्रयोरीत्यर्थः ॥ ४७ ॥ तौ जगदीश्वरौ भवन्तौ भृत्यं मामाज्ञापयतम्। वां युवयोः किं दास्यमहं करवाणि। 'पूर्णत्वान्नावयोः किञ्चिदपेक्षितमस्ति' इति चेत् तथापि 'अस्मदनुग्रहार्थमवश्यं वक्तव्यं' इत्यशयेनाह—पुंस इति। यत् भवद्भिः स्वकीयत्वेनाङ्गीकृत्य कार्येषु नियुज्यते तदेष एव पुंसोऽत्यनुग्रहः। हिशब्दोऽवधारणे। बहुवचनं तद्भक्ताभिप्रायेण ॥ ४८ ॥

अन्वितार्थप्रकाशिका

प्राहेति ॥ सः प्राह स्म हे प्रभो! हि यस्मात् वां युवयोरागमनेन मह्यं मां प्रति मदर्थं पित्रादयस्तुष्टास्तेषामृणाद्वयं विमुक्ताः नोऽस्माकं कुलं च पावितम् उद्धृतमतोऽस्माकं जन्म सार्थकं सफलं जातम् ॥ ४५ ॥ भवन्ताविति ॥ किलेत्यवधारणे। विश्वस्य कृत्स्नस्य जगतो भवन्तावेव परं कारणं साधूनां क्षेमाय पालनाय भवाय उद्भवाय च अंशेन स्वसंकल्पेन मूर्तिभेदेनेह भूलोकेऽवतीर्णौ ॥ ४६ ॥ न हीति ॥ सुहृदोः सर्वमित्रयोः समयोः जगत आत्मनोरुपादानभूतयोर्भजन्तं भजतोरपि सुरतरुवद्वां युवयोः रजकवधवायकानुग्रहाभ्यां कल्प्यमाना सर्वभूतेषु विषमा दृष्टिरनीश्वरत्वद्योतिका नैवास्ति ॥४७॥ ताविति ॥ तौ जगदीश्वरौ भवन्तौ भृत्यं मा माज्ञापयतम् वां युवयोः किं दास्यमहं करवाणि। यत् भवद्भिः स्वकीयत्वेनाङ्गीकृत्य कार्येषु नियुज्यते तदेष हि एष नियोग एव पुंसोऽत्यनुग्रहः ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सार्थकंस प्रयोजनं सफलमित्यर्थः ॥ ४५ ॥ अंशेन पुरुषेण जगतः कारणं विश्वस्य क्षेमाय भयनिवर्त्तनाय भवाय वृद्धये ॥ ४६ ॥ रजकवधे वायकानुग्रहेऽपि च न युवयोर्वैषम्यमित्याह न हीति। भजन्तं भजतोरपि वांयुवयोः विषमाद्दृष्टिर्न कुतः हेतुत्रयाद्धेतोः ॥ ४७ ॥ भृत्यं मां तौ भवन्तौ आज्ञापयतां भवद्भिः यत् कार्यं प्रतिजनाति युज्यते स एष एव अत्यनुग्रहोऽस्ति ॥४८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्राहेति ॥ प्राह ततस्तौ प्रत्युवाचेत्यर्थः। उक्तिमाह। हे प्रभो, वां युवयोः, आगमनेन, नोऽस्माकं, जन्म सार्थकं जातं कुलं च, पावितं पवित्रतां प्राप्तं, मह्यं मम, पितरश्च देवाश्च ऋषयश्च, तुष्टाः बभूवुः हि ॥ ४५ ॥ तत्र कथं यादवयोरावयोरागमनमात्रेण सर्वमेतत् संपन्नमित्यत्राह ॥ भवन्ताविति ॥ विश्वस्य कृत्स्नस्य, जगतः भवन्तौ, परं कारणं मूलकारणभूतावित्यर्थः। एवं विधयोरावयोः कथं कर्म कृतं प्राकृतं जन्मेत्यत आह। अवतीर्णाविति। हे रामकृष्णौ, युवां अंशेन स्वसंकल्परूपज्ञानेन, न तु कर्मणेति भावः। इह लोके, साधूनां क्षेमाय संप्राप्तश्रेयः पालनाय, भवायालब्धसुखप्रापणाय च, अवतीर्णौ चोऽवधारणे। भवतोरिह जन्मा सुखदुःखानुभवभाक्त्वं न कदाप्यस्तीति भावः ॥ ४६ ॥ ननु सर्वजनप्रत्यक्षेक्षितरजकवधेन वायकानुग्रहेण च कञ्चिन्निगृह्णन्तौ कञ्चिदनुगृह्णन्तौ आवां नेश्वरौ किं तु प्राकृतौ जीवावित्यत आह ॥ न हीति ॥ जगदात्मनोः सकलजगतामात्मभूतयोः, सुहृदोः भजन्तं भजतोः सर्वथानुगृह्णतोः अपि, सर्वभूतेषु समयोः, वां युवयोः, विषमा कारणं विना निग्रहादिविधानरूपा दृष्टिः, न हि नैव विद्यते सुरद्रुमस्येव भवतोर्भक्तेष्वनुग्रहो न वैषम्यमापादयतीति भावः ॥ ४७ ॥ स्वस्मिन्नत्यन्तं पारतन्त्र्यमावेदयितुं कैङ्कर्यं प्रार्थयते ॥ साध्विति ॥ हे भगवन्तौ, अह वां युवयोः, कि करवाणि अहं किंकरः सन् वां किं करोमीत्यर्थः अतः, भृत्यं मां साधु यथा तथा आज्ञापयताम्। एतावतैवाहमनुगृहीतो भविष्यामीत्यभिप्रेत्याह पुंस इति। भवद्भिः नियुज्यते अनुशिष्यते यत् एषः हि अयमेवेत्यर्थः। पुंसा जीवस्य, अत्यनुग्रहः ॥ ४८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

प्राहेति : १०.४१.४५.

दासीकृताष्टसिद्ध-वितीर्णनिखिलार्थ-पूर्णकामस्य। मत्पुण्यपाकतोऽन्यन्नाह जानेऽहं तवागतिनिदानम् ॥ ११० ॥
गार्हस्थ्यं मम धन्यमद्य फलिताः सद्ब्राह्मणोक्ताशिषः पित्राः सेवनमप्यदम्भविहितं निर्णीतमुद्यत्फलम्।
मन्ये चाद्य कुलादिमं गतमलं स्वं चापि पुण्यास्पदं यच्छ्रीशाहमनुग्रहोत्सुकधिया सम्भावितः श्रीमता ॥ १११ ॥

शुद्धं दानमदाय्यकारि सुतपः प्राजापि मन्त्रो वरः साधोर्नित्यमसेवि पादकमलं वेदोऽप्यपाठ्यर्थतः।
एतत्सर्वमकारि जन्मनि पुरा भूयो मयेति ध्रुवं सौलभ्यान्निरणायि पादरजसो देवाद्यलभ्यस्य ते ॥ ११२॥

प्रमादं सत्सु गार्हस्थ्ये गाढान्धतमसं बुधाः। तत्र सूर्योदयं प्राहुः साधोरागमनं गृहे ॥ ११३ ॥

भयं द्वितीयादिति वेदडिण्डिमे विप्रैः प्रसिद्धिं गमितेऽपि निर्भयाः।
वयं चरामो यदिह प्रवर्तते भयापहारी किल साधु-सङ्गमः ॥ ११४ ॥

स्त्री चेत् स्यान्न मनोरमा यदि तथा पुत्रो न चेन्नानुगस्तादृक् चेद् द्वितयं धनं न यदि तत् तच्चिन्तनव्यापृतिः।
इत्थं क्लेशमये विवेचनधिया दृष्टे गृहस्थाश्रमे को रज्येन्ननु वर्णयेदपि न चेत् साध्वङ्घ्रिपद्मागमः ॥ ११५ ॥

तावाज्ञापयतमिति : १०.४१.४८.

निजागमनतः स्वामिन् सुकृतार्थः कृतो यथा। यया कयापि कर्तव्यस्तथाऽयमधुनाऽऽज्ञया ॥ ११६ ॥

एवं मनोज्ञतरवर्णपदार्थमालामाश्रुत्य तस्य गिरमुज्ज्वलभक्तिभाजः।
श्रेयांसमात्मनि विदंश्च गुणावलम्ब साधुस्रजं स चकमे सुगुणावलम्बाम् ॥ ११७ ॥

कृतार्थ एवासि सखे निसर्गतस्त्वमत्र काऽऽज्ञा च तथाप्यदः शृणु।
वनीपकानां बत नः सदामता सुखप्रदैका हि समाप्तिरुत्तरा ॥ ११८ ॥

यस्योदये सुमनसां भवति प्रकृष्टामोदो यतश्च भुवि पुष्पवदात्मशोभा।
नानागमप्रसृतिकार्येऽपि माधवोऽसौ पुष्पस्रजं स्वयमयाचत चित्रमेतत् ॥ ११९ ॥

कृष्णप्रिया

कृतकृत्य माली प्रभु के श्रीचरणों दैन्य पूर्वक निवेदन करता है कि नाथ ! आपके श्रीबलभद्र भैयाजी के साथ इस दास के घर पधारने से आज मेरा जन्म सफल हुआ। मेरा कुल कुल वंशज पूर्वज आदि सब पवित्र एवं सफल जन्म हुए। मेरे पितृगण एवं ऋषिजन इस दास पर सन्तुष्ट हो गए ॥ ४५ ॥ हे नाथ ! आप समस्त विश्व के उपादान एवं निमित्त कारण है। आप परब्रह्म है। समस्त ब्रह्माण्ड ऐहिक उत्कर्ष एवं पारमार्थिक कल्याण के लिए क्रियाशक्ति एवं ज्ञानशक्ति से अंशदेश में माया का आवरण को निवृत्त करके अवतरण किया है ॥ ४६ ॥ नाथ ? आपकी सेवा करने वालों का पालन-पोषणादि करना वह स्वाभाविक होते हुए भी आपकी किसी भी प्राणी के विषम दृष्टि नहीं होती। आप दोनों विश्व के सुहृद् हैं समदर्शी है विषमता से पर है और समस्त विश्व की आत्मा है प्राणी मात्र के लिए आप सम्पन्न है ॥ ४७ ॥ हे नाथ ! मैं तो आप दोनों का आज्ञांकित किङ्कर हूँ। मैं आपकी सेवा कर कृतार्थ बनना चाहता हूँ। यदि निजजन आपकी सेवा करने का सौभाग्य प्राप्त करता है एवं आज्ञा पालने का अवसर पाता है तब उस पर आपकी अपार कृपा मानी जाएगी ॥ ४८ ॥

इत्यभिप्रेत्य राजेन्द्र सुदामा प्रीतिमानसः। शस्तैः सुगन्धैः कुसुमैर्माला [1]विरचिता ददौ ॥ ४९ ॥
ताभिः स्वलङ्कृतौ प्रीतौ कृष्णरामौ सहानुगौ। प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ॥ ५० ॥
सोऽपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि। तद्भक्तेषु च सौहार्दं भूतेषु च दयां पराम् ॥ ५१ ॥
इति तस्मै वरं दत्त्वा श्रियं चान्वयवर्धिनीम्। बलमायुर्यशः कान्तिं निर्जगाम सहाग्रजः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे[2] दशमस्कन्धे[3] पुरप्रवेशो नाम [4]एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

कर्दमक्षमा

अन्वयः—राजेन्द्र ! प्रीतिमानसः, सुदामा, इति, अभिप्रेत्य, शस्तैः, सुगन्धैः, कुसुमैः, विरचिताम्, मालाम्, ददौ ॥ ४९ ॥ ताभिः, सहानुगौ, स्वलङ्कृतौ, प्रीतौ, रामकृष्णौ, वरदौ, प्रणताय, प्रपन्नाय, वरान्, ददतुः ॥ ५० ॥ सः, अपि, अखिलात्मनि, तस्मिन्, एव, अचलाम्, भक्तिम्, तद्, भक्तेषु, सौहार्दम्, च, (भवदीयव्यतिरिक्तेष्वौदासीन्यम्) भूतेषु, च (दीनेषु) परमाम्, दयाम्, वव्रे ॥ ५१ ॥ इति, तस्मै, वरम्, अन्वयवर्धिनीम्, श्रियम्, बलम्, आयुः, यशः, कान्तिम्, च, दत्त्वा, सहाग्रजः, निर्जगाम ॥ ५२ ॥

इति श्रीमद्भागवतस्य दशमस्कन्धस्य पूर्वार्द्धं निरोधलीलायां राजसलीलायाः प्रमाणप्रकरणे एकचत्वारिंशत्तमोऽध्यायः ॥ ४१ ॥

---

[1] मालां विरचितां–विज. । [2] पारमहंस्यां संहितायां–प्रा. पा. । [3] पूर्वार्द्धे–गो. । [4] एकोनचत्वारिंशोऽध्यायः–विज. ।

श्रीधरस्वामीविरचिता भावार्थदीपिका

इत्यभिप्रेत्य इत्येवं विज्ञापयन्नभिप्रेत्य मन्मत ज्ञात्वा मालाः कृष्णरामादिभ्यो ददौ ॥ ४९–५१ ॥ अन्वयवर्धिनीं अन्वये वंशे वृद्धिमतीमित्यर्थः । अप्रार्थितं श्रीप्रभृतिकं च दत्त्वा ततो निर्जगामेति ॥ ५२ ॥

स्वैरं चरन्मधुपुरे रजकं निकृत्य कृष्णः प्रदाय च वरानथ वायकाय ।
मालाकृतं समनुकंप्य चकार कुब्जामृज्वीं धनुश्च सह सोन्नमयन्बभञ्ज ॥ १ ॥

इति श्रीमद्भागवते दशमस्कंधे पूर्वार्धे टीकायामेकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतोऽनन्तरं तावानर्चेत्याह—इत्यभिप्रेत्येति । तन्मतं भगवन्मतम् एता माला अस्मभ्यं ददात्वयमित्येवंरूपम् । अभिप्रेत्येति–लज्जादिना ताभ्यां साक्षादनुक्तमपि मालाकारस्य स्वस्य गृहागमनेन मालाविशेषविषयदृष्ट्या च संभाव्येत्यर्थः । हे राजेन्द्रेति महाराजस्यापि ता दुर्लभा इति सूचयति । यद्वा – तद्भाग्यविशेषं बोधयति, न संबोधयति । शस्तैः सद्वर्णसौ कुमर्यादिगुणैर्मंगलकरत्वान्मंगलैरिति वा । विरचिता इति– यासु निजकुटुम्बैः सह स्वयं विशेषेण रच्यमानासु तौ सहसैवानुगतौ, ता विरचिताः सतीर्ददावित्यर्थः । पूजायां तु शैघ्र्येण पूर्वसिद्धा राजादियोग्या एव ददाविति भावः । अन्यथा विरचिता इति व्यर्थम् । प्रीतमानसत्वेन दानप्रकारस्तु श्रीपराशरेणोक्तः—“ततः प्रहृष्टवदनस्तयोः पुष्पाणि कामतः । चारूण्येतानि चैतानि प्रददौ स विलोभयन् । इति । ‘मालाम्’ इत्येकवचनान्तपाठे भ्रातृभ्यां तुल्यतयैव दीयमानास्वपि मालासु मध्य एवालक्षितं श्रीकृष्णाय सर्वश्रेष्ठामेकां मालां ददावित्यर्थः ॥ ४९ ॥ ताभिर्मालाभि । प्रणताय मालादानानन्तरं कृताष्टांगप्रणामाय । प्रपन्नाय रक्षरक्षेत्यादिप्रकारेण शरणागताय । यद्वा—प्रथमत एव भक्ताय ॥ ५० ॥ सोऽपि सुदामापि । तस्मिञ्छ्रीकृष्ण एव । तद्भक्तेषु हरिभक्तेषु । भूतेषु स्थावरजङ्गमेषु । ननु के ते वराः, तांश्च परमैकान्ती सुदामा स्वयं वृतवान्न वा तत्राह—सोऽपीति । तस्मिन् कृष्ण एव । ननु कथ पूर्वभक्तिरीत्या संकर्षणेऽपि न वृतवांस्तत्राह—अखिलानां श्रीसंर्षणादीनां स्वांशानामात्मनि मूलस्वरूपेंशिनीत्यर्थः । तेन सा च सिद्ध्येदिति विविक्तपुरुषार्थतयेति भावः । पूर्वं तु समयुग्मतावर्णनं, तदग्रजतया तस्यापि गौरवलीलासारादेकमेव द्विधा प्रकाशमानं तत्त्वमेकपरमैश्वर्यस्याश्रययोग्यं भवत्येवेति प्रशंसातात्पर्येणेति भावः । परां श्रेष्ठां निरुपाधिदयाम् । आद्यश्चकारस्त्वर्थे, द्वितीय उक्तसमुच्चये ॥ ५१ ॥ इतीत्थं प्रार्थितः । तस्मै सुदाम्ने । इत्यर्थ इति—यावद्वंशस्तावद्वृद्धिमतीं न तु वंशं वर्द्धयतीत्येवंरूपां सदावंशसद्भावपक्तोरित्याशयः । भक्तवात्सल्यमाह— अप्रार्थितमिति । ततो मालाकारगृहात् । (५२) अध्यायार्थं वर्णयन्नग्रिमाध्यार्थं सूचयति – स्वैरमिति निकृत्य छित्त्वा ‘कृती–छेदने’ । ऋज्वीं सरलाम् । बभञ्ज तुत्रोट । इति—एतदप्रार्थितान् । ननु कथं वदान्यशिरोमणिरसौ स्वयमन्यान्वरान्न ददौ तत्राह—श्रियञ्चेत्वादि,—द्वितीयचकारोक्तं समुच्चिनोति । अन्यत्तैः । अन्वयवर्धिनीमितीन्नन्तपाठ एव तेषां संमतः । मतुपा व्याख्यात् । वर्धनं वर्धः अन्वयवर्धोऽस्यामस्तीति । तत्र वंश इति सप्तम्यन्तासमस्तपाठे तद्वंशेऽनवच्छिन्नां श्रियमित्यर्थः । समस्तपाठे वंशवृद्धिश्चेत्यर्थः । तदुक्तं श्रीपराशरेण– “बलहानिर्न ते सौम्य धनहानिरथापि वा । यावद्दिनानि तावच्च न विनङ्क्ष्यति संततिः । भुक्त्वा च विपुलान्भोगांस्त्वमन्ते मत्प्रसादतः । ममानुस्मरणं प्राप्य दिव्यलोकमवाप्स्यसि । धर्मे मनश्च ते भद्र सर्वकालं भविष्यति । युष्मत्संततिजातानामायुर्दीर्घं भविष्यति । नोपसर्गादिकं दोषं युष्मत्संततिसंभवः । अवाप्स्यति महाभाग यावत्सूर्यो भविष्यति ।” इति । ‘बलमायुः’ इति पाठे च तत्तत्सर्वं श्रयाद्यन्तभूतमेव ज्ञेयम् । अग्रजेन सह वरान्दत्त्वा तेनैव सह निर्जगामेत्यर्थः । विश्वनाथस्तु– श्रीबलादीनां तस्य ग्रहीतुमनपेक्षत्वेऽपि स्वस्य दातुमपेक्षणाद्भक्तवात्सल्येन ददाविति ज्ञेयम् ॥ ५२ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अभिप्रेत्येति लज्जादिना ताभ्यां साक्षादनुक्तमपि मालाकारस्य स्वस्य गृहागमनेन मालाविशेषविषयदृष्ट्या च सम्भाव्येत्यर्थः । हे राजेन्द्रेति महाराजस्यापि ता दुर्लभा इति सूचयति । यद्वा । तद्भाग्यविशेषं बोधयति न सम्बोधयति । शस्तैः सद्वर्णसौकुमार्य्यादिगुणैर्मङ्गलकरत्वान्मङ्गलैरिति वा । विरचिता इति । यासु निजकुटुम्बैः सह स्वयं विशेषेण रच्यमानासु तौ सहसैवानुगतौ ता विरचिताः सतीर्ददावित्यर्थः । पूजायान्तु शैघ्र्येण पूर्वम् । सिद्धा राजादियोग्या एव ददाविति भावः । अन्यथा विरचिता इति व्यर्थं प्रीतमानसत्वेन दानप्रकारस्तु श्रीपराशरेणोक्तः । “ततः प्रहृष्टवदनस्तयोः पुष्पाणि कामतः । चारूण्येतानि चैतानि प्रददौ स विलोभय”न्निति ॥ ४९ ॥ प्रणताय मालादानानन्तरं कृताष्टाङ्गप्रणामाय प्रपन्नाय रक्ष रक्षेत्यादि प्रकारेण शरणागताय । यद्वा प्रथमत एव भक्ताय ॥ ५० ॥ ननु के ते वराः तांश्च परमैकान्ती सुदामा स्वयं वृतवान् न वा तत्राह । सोऽपीति । तस्मिन् श्रीकृष्ण एव । ननु कथं पूर्वभक्तिरीत्या श्रीसङ्कर्षणेऽपि न वृतवान् तत्राह । अखिलानां सङ्कर्षणादीनां स्वांशानामात्मनि मूलस्वरूपेऽशिनीत्यर्थः । तेन सा च सिध्येदिति विविक्तपुरुषार्थतयेति भावः । पूर्वन्तु समयुग्मतावर्णनं तदग्रजतया तस्यापि गौरवलीला-

सारादेकमेव द्विधा प्रकाशमानं तत्तत्त्वमेकपरमैश्वर्य्यस्याश्रययोग्यं भवत्येवेति प्रशंसातात्पर्य्येणेति भावः। परां श्रेष्ठां निरुपाधिदयाम्। आद्यश्चकारस्त्वर्थे द्वितीय उक्तसमुच्चये ॥ ५१ ॥ इति एतदप्रार्थितान्। ननु कथं वदान्यशिरोमणिरसौ स्वयमन्यान् वरान् न ददौ तत्राह। श्रियञ्चेत्यादि। द्वितीयचकारोक्तं समुच्चिनोति। अन्यत्तैः। अन्वयवर्द्धिनीमितीन्नन्तपाठ एव तेषां सम्मतः। मतुपा व्याख्यातत्वात्। वर्द्धनं वर्द्धः अन्वयवर्धोऽस्तीति तत्र वंश इति सप्तम्यन्तासमस्तपाठे तद्वंशेऽनवच्छिन्नां श्रियमित्यर्थः। समस्तपाठे वंशवृद्धिश्चेत्यर्थः। तदुक्तं श्रीपराशरेण "वलहानिर्नते सौम्य! धनहातिरथापि वा। यावद्दिनानि तावच्च न विनङ्क्ष्यति सन्ततिः। भुक्त्वा च विपुलान् भोगांस्त्वमन्ते मत्प्रसादतः। ममानुस्मरणं प्राप्य दिव्यलोकमवाप्स्यसि। धर्म्मे मनश्च ते भद्र! सर्वकालं भविष्यति। युष्मत्सन्ततिजातानामायुर्दीर्घं भविष्यति। नोपसर्गादिकं दोषं युष्मत्सन्ततिसम्भवम्। अवाप्स्यति महाभाग! यावत् सूर्य्यो भविष्यती"ति। बलमायुरिति पाठे च तत्तत्सर्वं श्रयाद्यन्तर्भूतमेव ज्ञेयम्। अग्रजेन सह वरान् दत्त्वा तेनैव सह निर्जगामेत्यर्थः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अभिप्रेत्येति लज्जादिना ताभ्यां साक्षादनुक्तमपि मालाकारस्य स्वस्य गृहागमनेन मात्राविषयकदृष्ट्या वेत्याद्यभिप्रायेण ज्ञात्वा; हे राजेन्द्रेति—महाराजस्यापि दुर्लभा इति सूचयति; यद्वा, तद्भाग्यविशेषं बोधयन् सम्बोधयति, शस्तैः—अम्लानत्वसद्वर्णसौकुमार्य्यादिनोत्तमैर्मंगलकरत्वान्मंगलैरिति वा, विविधप्रकारादि-विशेषेण रचिताः सतीः, किंवा पुरैव विरचिता वह्वीर्मालां ददौ ॥ ४९ ॥ एवं पूर्वपूजायां दत्ता एव, किन्तु नेदृश्या न च बह्व्यः, अधुना च विचित्राः परमोत्तमा बहुला प्रत्याभिप्रायज्ञानाद्विशेषः प्रीतमानसत्वेन दानप्रकारस्तु श्रीपराशरेणोक्तः (वि० पु० ५।१९।२२)—'ततः प्रहृष्टवदनस्तयोः पुष्पाणि कामतः चारुण्येतानि चैतानि प्रददौ स विलोभयन् ॥' इति प्रणताय—मालादानानन्तरं कृताष्टांगप्रणामाय, प्रपन्नाय रक्ष रक्षेत्यादि-प्रकारेण शरणं गताय, यद्वा, प्रथमत एव भक्ताय वशान् ददतुः, वरेच्छां कारितवन्तावित्यर्थः ॥ ५० ॥ एवं वरदानार्थं द्वयोरप्युद्यतयोस्तयोः श्रीकृष्णमेव भक्तिविशेषेण प्रार्थयामासेत्याह—सोऽपीति। अपि-शब्देन तस्यापि निजेष्टवरेषु कामः सूच्यते, तस्मिन् श्रीकृष्ण एव ननु साम्येनाधुनैव श्रीबलदेवोऽपि तेन स्तुतः पूजितश्च तस्मिन्नपि कथं सा न वृता? तत्राह—अखिलानां श्रीबलदेवादीनामात्मनि, अवतारित्वेन व्यापके प्रिये वा, तद्भक्त्या तस्यापि स्वतो भक्तिसिद्धेरिति भावः। यद्वा, अखिलात्मनि जगदीश्वर इत्यर्थः। तस्य चाद्वैतत्वादेकस्मिन्नेव तस्मिन् तत्प्रार्थनं युक्तमेवेति भावः। अन्यथा चानर्थापत्तिरित्युक्तमेव (भा० ५।१८।२०)—'स वै पतिः स्यात्' इत्यादिना श्रीबलदेवस्य तु भक्तेष्वन्तर्भाव एव, पूर्वञ्च श्रीभगवत्प्रीत्यर्थमेव द्वयोः साम्येन स्तुत्यादिकमित्युह्यमेव। अत एव एवकारेणैकान्तिताभिप्रेतेति। परां श्रेष्ठां निरुपाधिं दयां प्रीति विशेषलक्षणाम्, सा चोच्चनीचादिषु यथायथमूह्या। आद्यश्चकारस्त्वर्थे, द्वितीय उक्तसमुच्चये ॥ ५१ ॥ इत्येवानुप्रार्थितान्, द्वितीयचकारोऽनुक्तं समुच्चिनोति तदुक्तं श्रीपराशरेण (वि० पु० ५।१९।२५-२८)—

'बलहानिर्न ते सौम्य धनहानिरथापि वा। यावद्दिनानि तावच्च न विनङ्क्ष्यति सन्ततिः ॥
भुक्त्वा च विपुलान् भोगांस्त्वमन्ते मत्प्रसादतः। ममानुस्मरणं प्राप्य दिव्यलोकमवाप्स्यसि ॥
धर्म्मे मनश्च ते भद्र सर्वकालं भविष्यति। युष्मत्सन्ततिजातानामायुर्दीर्घं भविष्यति ॥
नोपसर्गादिकं दोषं युष्मत्सन्ततिसम्भवः। अवाप्स्यति महाभाग यावत् सूर्य्यो भविष्यति ॥' इति।

'बलमायुः' इति पाठे तत्तत् सर्वं आयुरन्तर्भूतमेव ज्ञेयम्। सहाग्रजः श्रीबलदेवेन सहित इति तत्तद्वरदाने तस्यानुमोदनात्; यद्वा, सुदाम्नो भक्त्या निर्जिगमिषायामपि केवलमग्रेच्छयैव निर्गमात्, गोपानाञ्च तदेकानुगत्वात् स्वत एव तेन सह निर्गमनासिद्ध्या पृथङ् निर्गमो नोक्त इति ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यामेकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीत्थं विज्ञापयन्निति शेषः हे राजेन्द्र! अभिप्रेत्य तयोरभिमतं ज्ञात्वा प्रीतमानसः सुदामा प्रशस्तैः सुगन्धिभिश्च कुसुमैर्विरचिता मालास्ताभ्यां ददौ ॥४९॥ ताभिर्मालाभिरलङ्कृतौ वरदौ तस्मै प्रपन्नाय शरणागताय वरानिष्टार्थान् ददतुः ॥ ५० ॥ के ते वरास्तेन वृता यान् ददतुरित्यत आह। सोऽपीति। अखिलस्य चिदचिदात्मकस्य जगतः आत्मनि तस्मिन् भगवत्यचलां भक्तिं भागवतेषु सौहार्दम् आनुकूल्यं भूतेपु भगवच्छरीरभूतचेतनात्मकेपु दयां स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वरूपां वृतवान् ॥५१॥ इतीत्थं यथावृत्तं तस्मै वरं दत्त्वा तेनावृतामन्वयवर्द्धिनीं वंशवृद्धिमतीं श्रियं तथा बलादींश्च दत्त्वा सहाग्रजस्ततो निर्जगाम तत्र बलं देहधारणसामर्थ्यम् ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

विरचिता इति । तदागमनं श्रुत्वा तदर्थं निजकुटुम्बैः सह स्वयं रच्यमानायां यस्यां तौ सहसैवागतौ तां विरचितां सतीं ददावित्यर्थः । पूजायां तु शैघ्र्येणान्या इति भावः । ताभिरित्येकशेषत्वात् तया अन्याभिश्चेत्यर्थः ।। ४९-५२ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकचत्वारिंशोऽध्यायः ।। ४१ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भो सुदामन् ! यस्तवाभिप्रायस्तमेव कुर्वित्येषैवावयोराज्ञेति चेत् भद्रं भद्रमित्याह । इत्यभिप्रेत्येति । एवं स्वाभिप्रेतं कृत्यं प्राप्येत्यर्थः । तर्हि माला दीयन्तामित्यभिप्रायेणैवाज्ञां ज्ञात्वेति भावः । सौरभ्यसौरूप्यसौकुमार्यशैत्यातिशयवद्भिः मालामित्येकवचनेन भ्रातृभ्यां तुल्यतयैव दीयमानास्वपि मालासु मध्ये एवालक्षितं कृष्णाय सर्वश्रेष्ठामेकां मालां ददावित्यर्थः ।। ४९-५१ ।। श्रियं चेति श्रीबलादीनां तस्य ग्रहीतुमनपेक्ष्यत्वेऽपि स्वस्य दातुमपेक्ष्यत्वाददाविति तस्य भक्तवात्सल्यमेवं सर्वत्रैव प्राय इति ज्ञेयम् ।। ५२ ।।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । एकचत्वारिंशकोऽयं दशमेऽजनि सङ्गतः ।। ४१ ।।

गूढार्थदीपिनी

शस्तैः प्रशस्तैः ।। ४९-५२ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यामेकचत्वारिंशोऽध्यायः ।। ४१ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अभिप्रेत्य तयोरभिमतं ज्ञात्वा ।। ४९ ।। ताभिर्मालाभिः ।। ५० ।। स इति—

स भक्तिं केवलां वव्रे भक्तसौहार्दसंयुताम् । सर्वभूतदयायुक्तां श्रेष्ठां तामुत्तरोत्तराम् ।। ५१ ।।

इति तत्प्रार्थितं वरं दत्त्वा तेनाप्रार्थितामन्वयवर्द्धिनीं वंशवृद्धिमतीं श्रियं तथा बलादिकञ्च दत्त्वा ततो निर्जगाम ।' ५२ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकचत्वारिंशाध्यायार्थप्रकाशः ।। ४१ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गन्धो येषामस्तीति गन्धानि सुशोभनानि च तानि गन्धानि च तैः । अतो न गन्धस्येदुत्पूतिसु सुरभिभ्य इतीत्त्वप्रसक्तिः । कुसुमैर्विरचिता माला ददौ । एकवचनान्तपाठो दुर्लेखमूलः । ताभिर्मालाभिरित्युक्तेः ।। ४९ ।। प्रणताय प्रपन्नाय शरणागताय ।। ५० ।। तस्मिन्नेवाखिलात्मन्यचलां भक्तिं वव्रे । तद्भक्तेषूत्तमेषु सौहार्दं भूतेषु स्वाधनेषु दयां चेति वव्रे ।। ५१ ।। अन्वयवर्धिनीं वंशपरम्परातो वृद्धिमतीं बलं यशः कान्तिं च तद्रूपं वरं दत्वाऽऽयुर्नित्यायुर्मोक्षं च दत्वा सहाग्रजो निर्जगाम तद्धामतो माला अवाप्य च सुदामत आत्मतन्त्रस्तावक्षयोऽनुजगृहे निजपार्षदो हि । पूर्वं विकुण्ठसदनाद्धरिसेवनाय प्राप्तौ भुवं मृजिनपुष्पकरौ पुराऽपीत्याचार्योक्तेः ।। ५२ ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे एकोनचत्वारिंशोऽध्यायः ।। १०-४१ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यथात्रालौकिकद्रष्टृत्वं भगवद्धर्मेणैवाज्ञा बोधितेति वाक्यापेक्षाभावात् न किंचिदुक्तवन्तौ स्वयमेव ज्ञात्वा यत्कृतवांस्तदाह । इत्यभिप्रेत्येति । राजेन्द्रेति संबोधनं केचन सेवकाः अभिप्रेतार्थमपि जानन्तीति नाश्चर्यमेतदिति ज्ञापनार्थं तादृशाः सेवकाः सार्वभौमे एव भवन्तीतीन्द्रपदं पदार्थे निश्चिते प्रीतमानसो जातः । आज्ञा प्राप्तेति ततः शस्तैः शास्त्रतः स्तुतैः स्वरूपतश्च मल्लिकादिभिः कुसुमैर्विरचितामेकामेव मालां ददौ माला विरचिता इति वा पाठः । एकवचने तु भगवति दत्तो भगवानाविष्ट इति तत्रापि बलभद्रेऽपि स्फुरति प्रतिबिम्बवत् । अन्यथा अपि माला दत्तवान् इति ज्ञातव्यम् ।। ४९ ।। ततो भगवान् वरं दत्तवानिति वक्ष्यन् तत्कृतं शोभातिशयमाह । ताभिः स्वलंकृताविति । उत्कृष्टमालाभिः सुष्ठु अलंकृतौ ततः प्रीतौ जातौ सदानन्दरमणकर्तारौ फलसाधनरूपौ सर्वसेवकैः सह प्रीतौ निर्विवादौ प्रणताय नम्राय विनीताय कर्मज्ञानमार्गयोरपि फलदानयोग्याय प्रपन्नाय शरणागताय भक्तिमार्गेऽपि फलदानयोग्याय यतो वरदौ अतो वरान् ददतुः वरदेश्वरत्वं नाविर्भावितं किं तु वरदत्वमेव वरान् दास्यावः प्रार्थयेत्युक्तवन्तावित्यर्थः ।। ५० ।। अथवा स्वयं वरान् दत्तवन्तावेव सोऽपि पृथग्याचितवानिति तदाह । सोऽपि वव्र इति । भगवता दत्तवरोऽपि कृतार्थोऽपि अचलां भक्तिं वव्रे विषये वैलक्षण्याभावाय तस्मिन्नित्येकवचनं ज्ञानापरपर्यायरूपा सा भक्तिरिति ज्ञापयितुमाह । अखिलात्मनीति । अनेन सर्वत्र विषमा दृष्टिरपि परिहृता तथापि भक्तेर्वैशिष्ट्यं वक्तुं भेदसहिष्णुत्वाय सर्वोत्तमत्वं

स्थापयितुमन्यद्वरद्वयमाह । तद्भक्तेषु च सौहार्दमिति । चकाराद्भगवदीयव्यतिरिक्तेष्वौदासीन्यं भूतेषु दीनेषु सर्वेषु च परामुत्कृष्टां दयां लोकोत्तरां यया ते कृतार्था भवन्ति चकारात्प्रश्रयादिकमपि स्वोत्कृष्टेषु प्रार्थितं भवति ॥ ५१ ॥ प्रार्थितं च दत्तवानित्याह। इतीति । एवंप्रकारेण प्रार्थितं वरं तस्मै दत्त्वा स्वयं पुनः वंशं तद्वृद्धिं तत्र सर्वत्र श्रियः अविच्छेदं श्रियं च दत्तवान् । एतद्बाह्यन्। आभ्यन्तरं च दत्तवानित्याह । बलमिति । बलं देहसामर्थ्यम् आयुः यशः कान्ति सौन्दर्यं चेति एवं दत्त्वा ततो भक्तगृहान् निर्जगाम । अत्र दाने भगवानेव कर्ता बलभद्रः सहभावमात्रमिति निर्गमने वा प्राधान्येन निर्गत इति । बलभद्रसहितः एतदर्थमेवावतीर्णाविति गमनावश्यकत्वं सूचितम् ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां
अष्टत्रिंशाध्यायविवरणम् ॥ ३८–४१ ॥

श्रीसुबोधिनी–सारः

इत्यभिप्रेत्य ज्ञात्वा प्रीतमानसः सुदामा सुगन्धैः शस्तैः श्रेष्ठैः कुसुमैर्विरचितां मालां ददौ । हे राजेन्द्र ॥ ४९ ॥ ताभिर्मालाभिः स्वलङ्कृतौ प्रीतौ रामकृष्णौ सहानुगौ वरदौ प्रणताय प्रपन्नाय शरणं गताय वरान् ददतुः ॥५०॥ अखिलात्मनि तस्मिन्नेव श्रीकृष्णेऽचलां भक्तिं सोपि वव्रे मालाकारः तस्य हरेर्भक्तेषु सौहार्दं भूतेषु परां दयां वव्रे ॥ ५१ ॥ इति तस्मै वरं दत्त्वाऽन्वये वंशे वर्द्धिनीं वृद्धिमतीं श्रियं बलमायुर्यशः कांतिं च दत्त्वा सहाग्रजः सरामो निर्जगाम तद्गृहात् ॥ ५२ ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायामेकचत्वारिंशोऽध्यायः ॥ ४१ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

'केचित् भृत्याः राज्ञोप्यभिप्रायं जानन्तीति स्ववृत्तान्तेन ज्ञेयम् इति सूचयन् सन्बोधयति – राजेन्द्रेति । इति एवं विज्ञापयन् अभिप्रेत्य भगवदभिप्रायं ज्ञात्वा प्रीतमानसः सुदामा प्रशस्तैः सुगन्धिभिः कुसुमैर्विरचितां मालां ताभ्यां ददौ ॥ ४९ ॥ अनुगैर्गोपैः सह ताभिर्मालाभिः स्वलङ्कृतौ, अत एव प्रीतौ कृष्णरामौ प्रणताय प्रपन्नाय शरणागताय तस्मै वरान् ददतुः 'वरान् वृणीष्व' इत्युक्तवन्तौ । तत्र हेतुमाह—वरदाविति, यथेष्टवरदाने समर्थावित्यर्थः ॥ ५० ॥ स सुदामापि अखिलात्मनि तस्मिन् श्रीकृष्ण एवामलां भक्तिं तद्भक्तेषु च सौहार्दं मित्रतां अन्येषु च भूतेषु प्राणिमात्रेषु परां दयां स्वार्थनिरपेक्ष्यपरदुःखप्रहारेच्छारूपां वव्रे वृतवान् । एवकारोऽन्यभक्तिनिरासार्थः ॥ ५१ ॥ इत्येवं तद्याचितं वरं तस्मै दत्त्वा तथा तदयाचितमपि श्र्यादिकं स्वयमेव भक्तवात्सल्येन दत्त्वा सहानुगः कृष्णस्ततो निर्जगामेत्यन्वयः । अन्वयवर्धिनीं वंशेवृद्धिमतीम् । बलं शरीरसामर्थ्यम् । आयुः प्रसिद्धम् । यशः सुकीर्तिम् । कान्ति तेजः ॥ ५२ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने । एकचत्वारिंशकोऽगाद्रजकवधबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

इतीति । हे राजेन्द्र ! इति एवं विज्ञापयन् अभिप्रेत्य भगवदभिप्रायं ज्ञात्वा प्रीतमानसः सुदामा प्रशस्तैः सुगन्धिभिः कुसुमैर्विरचितां मालां जात्यैकतया मालाः ददौ ॥ ४९ ॥ ताभिरिति ।। अनुगैर्गोपैः सह ताभिर्मालाभिः स्वलंकृतौ अत एव प्रीतौ वरदौ कृष्णरामौ प्रणताय प्रपन्नाय शरणागताय तस्मै वरान् ददतुः वरान् वृणीष्वेत्युक्तवन्तौ ॥ ५० ॥ सोऽपीति ॥ स सुदामाऽपि अखिलात्मनि तस्मिन् श्रीकृष्ण एवामलां भक्तिं तद्भक्तेषु च सौहार्दं मित्रताम् अन्येषु च भूतेषु प्राणिमात्रेषु परां दयां स्वार्थनिरपेक्षपरदुःखप्रहाणेच्छारूपां वव्रे वृतवान् ॥ ५१ ॥ इतीति ॥ इत्येवं तद्याचितं वरं तस्मै दत्त्वा अन्वयवर्द्धिनीं वंशे वृद्धिमतीं श्रियं बलं शरीरसामर्थ्यमायुः प्रसिद्धं यशः सुकान्ति तेजः स्वयमेव भक्तवात्सल्येन दत्त्वा सहानुगः कृष्णस्ततो निर्जगाम ॥ ५२ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमोनचत्वारिंशकेव्यधात् ॥
इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायामेकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शस्तै र्विख्यातैः सुगन्धैः सुगन्धिभिः बह्वीः ददौ ॥ ४९ ॥ गतपद्ये मालामिति पावेताभिरित्यत्र सा चान्याश्रता इत्येकशेषेणानिर्वाह्यं ॥ ५०–५१ ॥ अन्वयवर्द्धनीवशे वृद्धिगामिनीं श्रियं तदादीनि च दत्त्वा ततो निर्जगाम ॥ ५२ ॥

इति श्रीशुद्धकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने पुरप्रवेशोनाम एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ।। हे राजेन्द्र, इत्युक्त्वा, अभिप्रेत्य तयोरभिमतं ज्ञात्वा, प्रीतमानसः, शस्तैः प्रशस्तैः सुगन्धैः शोभनगन्धवद्भिः, कुसुमैः स्थलकमलकुन्दादिपुष्पैः, विरचिताः मालाः, ताभ्यां ददौ ।। ४९ ।। ताभिरिति ।। ताभिर्मालाभिः, स्वलंकृतौ वरदौ कृष्णरामौ, प्रीतौ प्रसन्नतां प्राप्तौ सन्तौ, अनुगैः सह, प्रपन्नाय शरणागताय, प्रणताय विहितप्रणामाय, तस्मै वरानिष्टार्थान्, ददतुः ।।५०।। के ते वरास्तेन वृतां यांस्तौ ददतुरित्यत आह ।। सोऽपीति ।। अखिलस्य चिदचिदात्मकस्य जगतः आत्मा तस्मिन्नखिलात्मनि, तस्मिन् प्रत्यक्षे भगवत्येव, अचलां भक्तिं, तद्भक्तेषु प्रत्यक्षभगवदुपासकभक्तजनेषु, सौहार्दं सुहृद्भावं च, आनुकूल्यमित्यर्थः । भूतेषु भगवच्छरीरभूतचेतनाचेतनात्मकेषु भूतेषु, परां दयां स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वरूपां कारुणां च, स सुदामापि, वव्रे वृतवान् ।। ५१ ।। इतीति ।। इतींत्थं यथा वृतमित्यर्थः । तस्मै सुदाम्ने वरं दत्त्वा, तेन वृतामिति शेषः । अन्वयवर्द्धिनीं वंशवृद्धिमतीमित्यर्थः । श्रियं तथा बलं आयुः यशः कीर्तिं च दत्त्वा, सहाग्रजः बलभद्रसहितः, निर्जगाम ततश्चचाल । तत्र बलं धारणसामर्थ्यम् ।। ५२ ।।

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तम श्रीसहजानन्दस्वामिसुत श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे एकचत्वारिंशोऽध्यायः ।। ४१ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

इत्यभिप्रेत्येति : १०.४१.४९.

मत्सारूप्ये स्वजनस्येव भूयस्तत्सारूप्येऽप्यस्ति मे संस्पृहेति ।
व्यक्तीकुर्वन् मालिकामर्थितां तामादायाऽभूत् पुष्पमाली किमीशः ।। १२० ।।
परमस्वादिमदान्तरमवेक्ष्य नाम च वचश्च तस्येशः ।
प्रथममधुन्निजकण्ठे श्रुत्यन्ते परमितीह योग्यतमम् ।। १२१ ।।

इति तस्मै इति : १०.४१.५२.

नान्यत्तथा प्रियमनल्पमपि प्रदत्तं मह्यं यथा तु सुमनोऽर्पणमित्यनन्तः ।
सम्बोधयन्प्रभुरदादभिवाञ्छितार्थं तस्मै तदात्तसुमनाः सुमनःप्रदात्रे ।। १२२ ।।
दामोदरः सुदामोदरमनघं वीक्ष्य निजमिवाऽऽत्मानम् ।
समपूरयत् तदीप्सितमविकलमखिलं तदेति युक्तमिदम् ।। १२३ ।।
विदात्मनाऽनेन दरिद्रशालिनाप्यकारि मह्यं सुगुणं सुभार्पणम् ।
कथं मया तन्न विधेयमीश्वरेणापीति चक्रेऽन्वयसंपदाश्रितम् ।। १२४ ।।
अयं सुदामा दिदिशे मुदा निजाभिख्यां सदाकारसुभार्पणेन मे ।
आलोचयन्नेवमकुञ्चितां मुदाभिख्यां मुकुन्दोऽपि ददौ निजां तदा ।। १२५
या पुष्पिताऽऽगमगता मम वागतन्वी सोद्यत्फला न भुवि किं त्वफलार्थवादा ।
इत्थं मतेरतनुमोहमपाकरिष्णुस्तां तत्र विष्णुरकरोत् स्फुटसत्फलांसः ।। १२६ ।।

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने एकचत्वारिंशोऽध्यायः ।। ४१ ।।

कृष्णप्रिया

राजवर्य परीक्षित ! सुदामा माली वड़भागी बना । प्रभु दर्शन से प्रसन्नचित्त सुदामा माली ने विनम्र भाव से निवेदन करके श्रीबलभद्रजी एवं भगवान् श्रीकृष्णचन्द्र के श्री चरणों में दैन्य पूर्वक प्रणाम किया और श्रेष्ठ एवं सुवासित पुष्पों की मालायें बनाकर भक्ति भाव से पहनाई ।। ४९ ।। निज गोपजनों के साथ भगवान् श्रीकृष्ण को और श्री बलभद्र जी को सुदामा माली ने मालायें पहनाई पुनः प्रभु के पुनीत श्री चरणों में बार बार प्रणाम करने लगा । वरदानी दयालु दोनों भैयाओं ने शरणागत एवं प्रणाम करते हुए प्रसन्न सुदामा माली को अभीष्ट वरदान दिए ।। ५० ।। अति प्रसन्न भगवान् श्रीकृष्ण ने स्वयं वरदान दिये और परम भक्त सुदामा ने भी प्रियतम सर्वात्मा भगवान् के श्रीचरणों में अविचल भक्ति, प्रभु के अनन्य भक्तों में स्नेह एवं सौहार्द संसाररतजनों में अनासक्ति, दीनजनों में और प्राणीमात्र में उत्तम दया के वरदान माँगें ।। ५१ ।। श्रीसुदामा माली को वरदान देने पर भी भगवान् को सन्तोष न हुआ, पुनः दयानिधि प्रभु ने विशेष रूप में वंश की वृद्धि करने वाली श्री, वल, आयुष्य, यशः, क्रान्ति आदि वरों का दान करके निज ज्येष्ठ भाई के साथ पधार गए ।। ५२ ।।

श्रीमद्भागवत दशम स्कन्ध पूर्वार्द्ध निरोधलीला राजसप्रकरण के प्रमाणप्रकरण में ज्ञान ऐश्वर्य
निरूपण करने वाला ४१ वां अध्याय का भाषान्तर सम्पूर्ण ।। ४१ ।।

* * *

अथ द्विचत्वारिंशोऽध्यायः

श्लोकाः	अनु.	इ. वं.	मि. उ.	वसंत	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं श्लो.	अक्ष.
३८	३३	१	३	१	२	१२०४	११	४४	१३५६	४२।	७

श्रीशुक[1] उवाच

अथ व्रजन् राजपथेन माधवः स्त्रियं गृहीताङ्गविलेपभाजनाम् ।
विलोक्य कुब्जां युवतीं वराननां पप्रच्छ[2] यान्तीं प्रहसन् रसप्रदः ॥ १ ॥
का त्वं वरोर्वेतदु[3] हानुलेपनं कस्याङ्गने वा कथयस्व साधु नः ।
देह्यावयोरङ्गविलेपमुत्तमं श्रेयस्ततस्ते नचिराद् भविष्यति ॥ २ ॥

सैरन्ध्र्युवाच

दास्यस्म्यहं सुन्दर[4] वर्य सम्मता त्रिवक्रनामा[5] ह्यनुलेपकर्मणि ।
मद्भावितं भोजपतेरतिप्रियं विना युवां कोऽन्यतमस्तदर्हति ॥ ३ ॥
रूपपेशलमाधुर्यहसितालापवीक्षितैः[5]। घर्षितात्मा ददौ सान्द्रमुभयोरनुलेपनम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—अथ, वाजपथेन, व्रजन्, रसप्रदः, प्रहसन्, माधवः, गृहीताङ्ग विलेपभाजनाम्, यान्तीम्, वराननाम्, कुब्जाम्, युवतीम्, विलोक्य, पप्रच्छ ॥ १ ॥ हे वरोरु ? त्वम्, कासि ! एतद्, उह अनुलेपनम् कस्य ! हे अङ्गने, त्वम्, वा कस्य ! नः, साधु, कथय, आवयोः, अनुलोपनम्, देहि, ततः, ते, नचिरात्, श्रेयः, भविष्यति ॥ २ ॥ सैरन्ध्री-उवाच, हे सुन्दरवर्य ! अनुलेपकर्मणि, सम्मता, त्रिवक्रनामा अहम्, दासी, अस्मि, भोजपतेः, मद्भावितम्, अतिप्रियम्, युवाम्, विना, अन्यतमः, कः, तद्, अर्हति ॥ ३ ॥ श्रीशुक उवाच-रूपपेशल माधुर्य हसितालाप वीक्षितैः, घर्षितात्मा, उभयोः, सान्द्रम् अनुलेपनम् ददौ ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

द्विचत्वारिंशके कुब्जोन्नमनं धनुषो भिदा । वधस्तद्रक्षिणां कंसारिष्टं रंगोत्सवादि च ॥ १ ॥

अङ्गविलेपाश्चन्दनादयः गृहीतान्यङ्गविलेपानां भाजनानि यया ताम् । रसप्रदः सुखप्रदः ॥ १ ॥ हे अंगने हे वरोरु इति सोपहासं सम्बोध्यापृच्छति त्वं का एतदनुलेपनं कस्य वा उ ह इति निपातौ भ्रूविक्षेपयुक्ते वितर्के। अस्मत्सेवा सद्यः फलत्येवेत्याह । न चिरादिति ॥ २ ॥ तिस्रो ग्रीवोरःकट्यो वक्रा इति त्रिवक्रेति नाम यस्याः सा अनुलेपनसाधनक्रियायां कंसस्य बहुमता दास्यस्मि ॥ ३ ॥ रूपं चांगसौष्ठवं पेशलं च सौकुमार्यं माधुर्यं च रसिकतां हसितं चालापाश्च वीक्षितं च तैर्धर्षि तात्मा मोहितचित्ता सा ददौ । सान्द्रं घनन् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कुब्जाया उन्नमनमृज्वीकरणम् । भिदा भेदनम् । तद्रक्षिणां धनूरक्षकाणाम् । कंसस्य अरिष्टं मरणचिह्नावलोकनम् "अरिष्टमशुभे तक्र सूतिकागार आसवे । शुभे मरणचिह्ने च" इति मेदिनी । स्वामिचरणैररिष्टपदं लक्षणया तद्दर्शनपरं प्रयुक्तम्। आदिना श्रीकृष्णस्य पुरान्निर्गमो ग्राह्यः (१)। अथ मालाकारगृहान्निर्गमोत्तरम् । माधव इत्युक्त्या तस्या मांशत्वं सूचितम्। युवतीं तरुणीम् । वराननामिति पृच्छायोग्यतामाह । रसं कुब्जायाः शृङ्गारं, सहचरेषु हास्यं सर्वत्राद्भुतं प्रददातीति सः । इयं स्वरूपभूतायाः साक्षाद्भूशक्तेः सत्यभामायाः अम्बभूता अस्या एव विभूतिः पृथिवी प्रसिद्धा । अतस्तया सहैक्येनेयं परः सहस्रदुष्टासुरभारभुग्नत्वं स्वकुब्जत्वेन दर्शयन्ती स्वीयं गन्धगुणं चंदनादिमिषेणोपहरन्ती पृथिव्येव परमभक्ता प्रीत्या पथि संगताऽभूत्। भगवांश्च सानन्दमेव गंधं गृहीत्वा स्वीयं माधुर्यमेव रसं ददानो-भो मद्भक्ते पृथिवि संप्रत्येव कंसादिस्वभावान्मयापहृतानेव

---

१. बादरायणि-प्रा. पा. । २. धात्रीं वचसा-विज. । ३. दिह्यानु-वीर. विज. । ४. कस-श्रीधर. वंशी. जीव वीर. विश्व.; रम्यहं ते सुखर्य-विज. ।

विद्धि, तदधुनैव त्वं स्वस्था भवेति तामाश्वासयन्नानंदमग्नामृज्वीं चक्रे इत्येवैतत्प्रकरणतत्त्वमिति केचिदाहुः। तोषिणी तु-राजपथेनेति तस्मिँल्लोकसुखदातृत्वं दर्शयति। युवतीमिति, वराननामिति पदद्वयेनान्यत्सौष्ठवं त्वस्तीति बोधितम्। यान्तीं कंसगृहं गच्छतीम्। तथा च तस्या एवोक्तिः श्रीहरिवंशे-'राज्ञः स्नानगृहं यामि' इति। प्रकर्षेण साकूततया हसन्। स्वभावत एव रसप्रद इति ॥ १ ॥ साधु निष्कपटम्। ततोऽङ्गविलेपदानात्। साधु सभ्यं, वा लज्जया यदुक्तिवैकल्यं तद्विनैव, वा यदि स्यादङ्गविलेपनमस्मद्गात्रयोग्यम्। तथा च तत्रैव—"तामुवाच हसन्तीं तु कृष्णः कुब्जामवस्थिताम्। उभयोर्गात्रसदृशं दीयतामनुलेपनम्।" इति। किञ्च—"वयं विदेशातिथयो मल्लाः प्राप्ता वरानने। द्रष्टुं दिव्यं धनुर्गेहं राष्ट्रं चैव महर्द्धिमत्।" इति। संबोधनमुपहासेन-वरावूरू यस्या इति। न तावेव केवलं तादृशावपि त्वङ्ग मूर्तिरेव प्रशस्तं यस्या अस्तीति सर्वे गुणाः सन्त्येव, तच्चैकमेवात्र, बहुत्वं दोष इत्यभिप्रायात् ॥ २ ॥ "चतुःषष्टिकलाभिज्ञा शीलरूपादिसेविनी। प्रसाधनोपचारज्ञा सैरंध्रीत्यभिधीयते।" इति कात्यः। अमरस्तु—"सैरन्ध्री परवेशमस्था स्ववशा शिल्पकारिका" इत्याह। दासी परिचारिका। मद्भावितं मन्निष्पादितं-चन्दनादि। भोजपतेः कंसस्य। अन्यतमोऽन्येष्वपि कः श्रेष्ठः, न कोऽपीत्यर्थः। त्रिवक्रनामेति पुंवद्भाव आर्षः। हि प्रसिद्धौ। तथा च तत्रैव—"कुतश्चागम्यते सौम्य यन्मां त्वं नावबुद्ध्यसे। महाराजस्य दयितां नियुक्तामनुलेपने।" इति। मया भावितं साधितम्। तत् अनुलेपनम्। युवामिति सामान्योक्त्या श्रीरामेऽपि तदर्हताप्राप्तिस्तत्संबधेनैवाभिप्रेयते। हे सुन्दरेति-तस्यैव सम्बोधनेन तदेकतात्पर्यात्। युवां विनान्येषु बहुषु श्रेष्ठो यः सोऽपि कोऽर्हति। यद्वा—अन्यतमः युवाभ्यामत्यन्तभिन्नः, इति युष्मदीयाः सखायोऽप्यर्हन्तीति। अन्यत्तैः। यद्वा-तवाहं दास्यस्मीति भावविषेषेणादावुक्त्वा पश्चात्तत्प्रेम्णोंतरमाह ॥ ३ ॥ उभयोः रामकृष्णयोः। 'सान्द्रं वने घने मृदौ' इति मेदिनी। माधुर्यं स्वभावतो मनोहरत्वम् "किमेतदद्भुतमिव वासुदेवेऽखिलात्मनि" इत्यादि। तच्च रूपं पेशलं सौंदर्यसौष्ठवयुक्तम् 'वाचः पेशैः' इतिवत्। तथा तत्रैव हसितेनालापेन वीक्षणेन च विशेषत इत्यर्थः। रूपादिभिरिति-श्रीकृष्णस्यैवेति ज्ञेयम्। तत्रैव भावस्य स्वयमभिव्यञ्ज्ययिष्यमाणत्वात्। उभयोरपि योग्यं तदिच्छया ददौ समर्पितवती। तथा श्रीविष्णुपुराणे—"श्रुत्वा तमाह सा कृष्णं गृह्यतामिति सादरम्। अनुलेपञ्च प्रददौ गात्रयोग्यमथोभयोः।" इति। अत्र दानं हस्ते समर्पणं, गात्रे लेपनं वा। पूर्वत्र सांद्रमिति तत्संज्ञकम्। ततः स्ववहनयोग्येन स्वल्पेनापि सहचरवृन्दसहितयोः पर्याप्तिरभूदिति बोध्यते। उत्तरत्र सर्वांगव्याप्तमित्यर्थः। उभयत्र मालाकल्पानुपघातपूर्वकानुलेपनं ज्ञेयम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

राजपथेनेति। तस्मिन् लोकसुखदातृत्वं दर्शयति। युवतीमिति। कामिनामिति पदद्वये नान्यत् सौष्ठवं त्वस्तीति बोधितं यान्तीं कंसगृहं गच्छन्तीं तथा च तस्या एवोक्तिः। श्रीहरिवंशे। राज्ञः स्नानगृहं यामीति प्रकर्षेण साकूततया हसन् स्वभावत एव रसप्रदः। अत्र तु रसः कुब्जायां शृङ्गारः सहचरेषु हास्यः सर्वत्र त्वद्भुतश्च तं तं प्रदातुमित्यर्थः ॥ १ ॥ साधु सत्यं वा लज्जया यदुक्तिवैकल्यं तद्विनैव वा यदि स्यात्। अङ्गविलेपनम् अस्मद्गात्रयोग्यं तथा च तत्रैव। "तामुवाच हसन्तीं तु कृष्णः कुब्जामवस्थिताम्। उभयोर्गात्रसदृशं दीयतामनुलेपन"मिति। किञ्च। "वयं विदेशातिथयो मल्लाः प्राप्ता वरानने!। द्रष्टुं धनुर्महं दिव्यं राष्ट्रञ्चैव महर्द्धिमत्" इति। सम्बोधनद्वयमुपहासेन। वरौ ऊरू यस्या इति न केवलं तावेव तादृशौ अपि त्वङ्ग मूर्तिरेव प्रशस्तं यस्या अस्तीति सर्वे गुणाः सन्त्येव तत्रैकमेवात्र बहुत्वं दोष इत्यभिप्रायात् ॥ २ ॥ त्रिवक्रनामेति पुंवद्भाव आर्षः। हि प्रसिद्धौ। तथा च तत्रैव "कुतश्चागम्यते सौम्य! यन्मां त्वं नावबुध्यसे। महाराजस्य दयितां नियुक्तामनुलेपने" इति। मया भावितं साधितं तदनुलेपनं युवामिति सामान्योक्त्या श्रीरामेऽपि तदर्हता प्राप्तिस्तत्सम्बन्धेनैवाभिप्रेयते। हे सुन्दरेति। तस्यैव सम्बोधनेन तदेकतात्पर्यत्वात्। युवां विनाऽन्येषु बहुषु श्रेष्ठो यः सोऽपि कोऽर्हति। यद्वा। अन्यतमः युवाभ्यामत्यन्तभिन्न इति युष्मदीयाः सखायोऽप्यर्हन्तीति अन्यत्तैः। यद्वा। तवाहं दास्यस्मीति भावविशेषेणादावुक्त्वा पश्चात् तत्प्रश्नोत्तरमाह। कसेत्यादिना ॥ ३ ॥ रूपेति तैर्व्याख्यातं यद्वा। माधुर्यं स्वभावतो मनोहरत्वं तदुक्तं किमेतदद्भुतमिव वासुदेवेऽखिलात्मनीत्यादि तच्च रूपं पेशलं सौन्दर्यसौष्ठवयुक्त वाचः पेशैरितिवत् तथा तत्रैव। हसितेनालापेन वीक्षणेन च विशेषत इत्यर्थः। रूपादिभिरिति श्रीकृष्णस्यैवेति ज्ञेयं तत्रैव भावस्य स्वयमभिव्यञ्जयिष्यमाणत्वात्। उभयोरपि योग्यं तदिच्छया ददौ समर्पितवती। तथा च श्रीविष्णुपुराणे "श्रुत्वा तमाह सा कृष्णं गृह्यतामिति सादरम्। अनुलेपञ्च प्रददौ गात्रयोग्यमथोभयो"रिति। अत्र दानं हस्ते समर्पणं गात्रे लेपनं वा। पूर्वत्र सान्द्रमिति तत्संज्ञकं ततः स्ववहनयोग्येन स्वल्पेनापि सहचरवृन्दसहितयोः पर्याप्तिरभूदिति बोध्यते उत्तरत्र सर्वाङ्गव्याप्तमित्यर्थः। उभयत्र मालाकल्पानुपघातपूर्वकानुलेपनं ज्ञेयम् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथेति मांगल्ये, श्रीगोपीस्मारकरसविशेषादयात्, अतएव तत्कथनभंग्या दीर्घच्छन्दः। राजपथेनेति बहुललोकसम्मर्दं सूचयति, तेन व्रजनं च पुरीशोभाविशेषदर्शनार्थं धनुर्भञ्जनार्थं कंसगृहान्तिके गमनाय च। माधवो लक्ष्मीकान्त इति परमवैदग्ध्यादिकं बोधयति। यद्वा, मधुवंशोद्भवः, मधुना प्रीत्यै प्रवृत्तः, अगविलेपा घृष्टचन्दनादिगन्धद्रव्याणि, कुब्जां स्थानत्रये

वक्रतया तन्नाम्नैव प्रसिद्धाम्, अन्यत्र च परमसुन्दरीमित्याशयेन तां विशिनष्टि—युवतीमिति पद-द्वयेन। अनेन सर्व्वसौन्दर्य्यमेवोपलक्षितम्। यान्तीं मार्गे प्रयान्तीं कंसगृहं वा गच्छन्तीम्; तथा च तस्या एवोक्तिः श्रीहरिवंशे (विष्णु० प० २७।२८)—'राज्ञः स्नानगृहं यामि' इति प्रकर्षेण हसन् हासविशेषं कुर्व्वन्। रसः सुखं रागो वा तद्विस्तारक इत्यर्थः॥ १॥ अनुलेपनं साधितगन्धद्रव्यम्, साधु यथा स्यात्तथेति भावविशेषेणोक्तिः; यद्वा, अनुलेपनविशेषणम, अङ्गविलेपमस्मद्गोत्रयोग्यानुलेपनम्; तथा च तत्रैव (हरिवंशे विष्णु० प० २७।३१)—'तामुवाच हसन्तीं तु कृष्णः कुब्जामवस्थिताम्। उभयोर्गात्रसदृशं दीयतामनुलेपनम्॥' इति, किञ्च, (हरिवंशे विष्णु० प० २७।३२)—'वयं हि देशातिथयो मल्लाः प्राप्ता वरानने। द्रष्टुं धनुर्म्महं दिव्यं राष्ट्रञ्चैव महद्धिमत्॥' इति ततोऽङ्गविलेपदानात्, सम्बोधनद्वयमुपहासेन किंवा तदीयसौन्दर्य्यापेक्षयैव, न चिरादिति श्लेषेण चिरादपि न भविष्यतीति नर्म्म॥२॥ हे सुन्दरेति भावविशेषोदयात्, अतस्त्वमेवैतद्योग्यो न तु कंस इति भावः। हीति प्रसिद्धिं द्योतयति, तथा च तत्रैव (विष्णु० प० २७।३०)—'कुतश्चागम्यते सौम्य यन्मां त्वं नावबुध्यसे। महाराजस्य दयितां नियुक्तामनुलेपने॥' इति, मया भावितं साधितं तदनुलेपनम्, भोजपतेरिति श्लेषेण परमभोगपरस्येत्यनुलेपनद्रव्यस्य तस्य परमोत्तमत्वं ध्वनितम्, अन्यतमो युवाभ्यामत्यन्तभिन्न इति युष्मदीया गोपा अप्येतेऽर्हन्तीति भावः अन्यत्तैर्व्याख्यातम्। यद्वा, तवाहं दास्यस्मीति भावविशेषेणादावुक्त्वा पश्चात्तत्प्रश्नात्तोरमाह—कंसेत्यादिना॥ ३॥ श्रीकृष्णस्य रूपादिभिः, उभयोर्योग्यम्, तथा च विष्णुपुराणे (५।२०।७)—'श्रुत्वा तमाह सा कृष्णं गृह्यतामिति सादरम्। अनुलेपनञ्च प्रददौ गात्रयोग्यमथोभयोः॥' इति, यद्वा, 'उभयोः' उभाभ्यामपीत्यर्थः, तथैव श्रीकृष्णप्रार्थनात् षष्ठी, भक्त्या तत्र तयोः स्वामित्वाभिप्रायेण। ताभ्या सान्द्रं ददौ, गोपेभ्यश्चान्यत् ददाविति ज्ञेयम्, सान्द्रस्य बाहुल्याभावादिना॥ ४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ त्रिवक्रासमर्पितानुलिप्ताङ्गरागः ऋज्वीकृतत्रिवक्रो निर्भिन्नचापश्चापशकलघातिततत्पालकः समुत्पादितकंसभयः पुनः स्वनिकेतनमाविवेशेत्याह द्विचत्वारिंशेन। अथेत्यादिना। अथ मालाकारानुग्रहानन्तरं राजमार्गेण व्रजन् गृहीतान्यङ्गविलेपनानां सुगन्धिचन्दनानां भाजनानि पात्राणि यया वरं सुन्दरमाननं यस्यास्तां कुब्जां विलोक्य सुखप्रदो भगवान् प्रहसन् तां युवतीं पप्रच्छ॥ १॥ प्रश्नप्रकारमेवाह। का त्वमिति। हे अङ्गने! हे वरोरु इति सोपहाससंबोधनं त्वं का इहास्यां पुर्य्यामेतदनुलेपनं कस्य वा कस्मै नयसीत्यर्थः। साधु यथार्थं नोऽस्मभ्यं कथयस्व कस्मैचिद्भवतु किन्तूत्तममिदमनुलेपनमावयोरावाभ्यां देहि ततोऽनुलेपनदानेन हेतुना तवाचिरादेव श्रेयो भविष्यति॥ २॥ इत्थमापृष्टा याचिता च सा प्राह। दासीति। हे सुन्दरवराहं कंसस्य सम्मता तस्य दासी त्रिवक्रनाम्नी नित्यमनुलेपनकर्मणि तेन नियुक्तास्मि तिस्रो ग्रीवोरुकट्यः वक्रा यस्याः सा त्रिवक्रेत्यन्वर्थं नाम कंससम्मतत्वे हेतुमाह। मद्भावितं मया साधितमनुलेपनं भोजपतेः कंसस्यातीव प्रियमतोऽहं तत्संमतेति भावः अतस्तद्राज्ञः प्रियमनुलेपनं वां भवन्तौ विना अन्यः को वा पुमान् तदर्हति युवामेवार्हावित्यर्थः॥३॥ रूपेति। भगवत इत्यादि भगवतः रूपादिभिः मोहित आत्मा चित्तं यस्याः सा सान्द्रं तदनुलेपनमुभयोर्ददौ तत्र रूपमङ्गसौष्ठवं पेशलं सौकुमार्य्यं माधुर्य्यं रसिकत्वम्॥ ४॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अथ निर्गमनानन्तरं धात्रीं सैरन्ध्रीं दृष्ट्वा पप्रच्छेत्यन्वयः गृहीताङ्गविलेपभाजनां गृहीतचन्दनपात्रां कुब्जां वक्रशरीरां वयसा युवतीं तरुणीं वचसा रसप्रदः आनन्दप्रदः कामरागप्रदो वा॥ १॥ हे वरोरु! साधु सत्यं निर्दोषे पेशले सत्ये साधुशब्दं प्रयुञ्जत इति॥ २॥ यच्छास्त्रविहितं ननु तदेव दासी अनुलेपकर्मणि चन्दनसौरभ्यकर्मणि सम्मता अविप्रतिपन्ना अन्यतमः अन्येष्वपि श्रेष्ठतमः॥ ३॥ धर्षितात्मा अस्ववशमनाः वशीकृतमना वा॥ ४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

युवामिति। त्वत्सम्बन्धेन श्रीरामोऽप्यर्हतीति भावः॥ १-३॥ माधुर्य्यं स्वभावतो मनोहरत्वं तच्च रूपपेशलं सौन्दर्य्यसौष्ठवयुक्तं तथा तत्रैव हसितादिना विशेषत इत्यर्थः। रूपादिभिरिति श्रीकृष्णस्यैव ज्ञेयम्। उभयोरपि योग्यं तदिच्छया ददौ तथा च वैष्णवे "श्रुत्वा तमाह सा कृष्णं गृह्यतामिति सादरम्। अनुलेपनं प्रददौ गात्रयोग्यमथोभयोरिति"॥ ४-३८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे द्विचत्वारिंशोऽध्यायः॥ ४२॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

का त्वमित्यादि। (१-श्लो०) "अथ व्रजन् राजपथेन" इत्यादिना पूर्वश्लोकेन कुब्जां पप्रच्छेत्यस्य प्रश्नः। न चिराद्चिरादेवेति प्रासादातिशयो बोद्धव्यः। इयं तु कुब्जा वस्तुतः पृथिव्येव असुरभावेन भुग्नतया कुब्जा। गन्धगुणा स्वभावादेव कृष्णायात्मसमर्पणं चिकीर्षती स्ववैरूप्यञ्च दर्शयन्ती उपस्थितेति ज्ञेयम्॥ १-२॥ का त्वमित्यस्योत्तरमाह—दास्यस्मीत्यादि। भो अज! भो पते! दास्यस्मि, अर्थात् तवैव। अथवा, भो अजय! ब्रह्मणोऽपि पालक! ते तव दास्यस्मि। विसर्गलोपे सन्धिरार्षः सैष दाशरथिरितिवत्। यद्वा, भोः पते! जप मनसि स्मर, अहं ते दास्यस्मि। जप मानसे चेति भुवो अंशत्वात्तवाहं दासी।

ननु मम दासी चेत् तदा कथं कंसानुवर्तिनीत्याह—अनुलेपकर्मणि कंससम्मता । गन्धयुक्तिकलायामेव तत्सम्मताहम् , न तु स्पर्शादौ पृथिव्यंशे नैवमेतत् सम्बन्धः पृथिवीपतित्वात् , न तु मूर्त्तो अंशेनेति यावत् । कुब्जत्वाङ्गीकारान्न कस्यापि सम्बन्धो मयीति भावः । अतो हि श्रीकृष्णं प्रत्युपास्यत्वज्ञानेयं तत्र भक्तिमती । भृङ्गाररसभक्तवियमेवोदाहृता । अतो मद्भावितं ते तव रतिप्रियम् मद्भावस्तव रतिप्रिय एवेत्यर्थः । ते इत्यावर्तनीयम् । भावितमिति भाव इत्यर्थे स्वार्थिकः क्तः । तस्मात्तदनुलेपनं युवां विना कोऽन्यतमोऽर्हति ? अनुलेपनं तु युवयोरेवोचितम् । भावस्तु मम तवैवेति कृष्णं प्रति ज्ञेयं रतिप्रिय इति ॥ ३–५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

न चिरादचिरादेव भविष्यतीति प्रसादातिशयोक्तिः । इयन्तु कुब्जाख्या गन्धगुणा पृथिवी असुरभारभरेण भुग्ना श्रीकृष्णायात्मार्पणं चिकीर्षन्ती; अथवा मथुरापुरश्रीरेवतादृशी ॥ १–२ ॥ हे सुन्दर ! मां न जानासि दास्यस्मि अर्थात् तवैव, ननु मद्दासी चेत्तदा कथं परपुरुषपरायणासीरित्याशङ्क्याह—अनुलेपन्–कर्मण्येव कंस सम्मता, न तु स्पर्शादौ; कुब्जत्वाङ्गीकारेण कस्याप्यहं नोपभुक्तेत्यर्थः । अतः श्रीकृष्णं प्रत्युपास्यत्वज्ञानेनेयं भक्तिमती शृङ्गाररसभक्तोदाहरणेऽप्युदाहृतेयमस्माभिः (भा० ११।१२।८ म श्लोक-टीका द्रष्टव्य) ॥ ३–५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

द्विचत्वारिंशके कुब्जा हास्योन्नमनचापभित् । कंससेनावधारिष्टक्षणरङ्गोत्सवाद्यभूत् ॥

अङ्गविलेपाश्चन्दनाद्यः रसं कुब्जायाः शृङ्गारं स्वसहचरेषु हास्यं सर्वत्र त्वद्भुतं प्रददातीति सः इयं स्वरूपभूतायाः साक्षाद्भूशक्तेः सत्यभामाया अंशभूता अस्या एव विभूतिः पृथिवी प्रसिद्धा अतस्तया सहैक्येनेयं परस्सहस्रदुष्टासुरभारभुग्नत्वं स्वकुब्जेन दर्शयन्ती स्वयं गन्धगुणं चन्दनादिमिषेणोपहरन्ती पृथिव्येव परमभक्ता प्रीत्यापथि सङ्गताभूत् भगवांश्च सानन्दमेव गन्धं गृहीत्वा स्वीयं माधुर्यमेव रसं ददानो भो मद्भक्ते पृथ्वि ! सम्प्रत्येव कसादिस्वभावान् मयापहृतानेव विद्धि तदधुनैव त्वं सुस्था भवेति तामाश्वासयन्नानन्दमग्नाम् ऋज्वीं चक्रे इत्येवैतत् प्रकरणतत्त्वमिति केचिदाहुः ॥ १ ॥ हे अङ्गने हे वरोर्विति सोपहासं सान्तःस्पृहं च सम्बोध्य पृच्छति । का त्वङ्कस्य वा एतदनुलेपनम् ॥ २ ॥ दास्यस्मीत्यन्यस्य सम्बन्धिपदस्यानुपादानात् प्रत्यासत्त्या तवेति द्योतनं तवेत्युक्ते अनृतं भावव्यक्तिश्च स्यादिति तन्न प्रयुक्तं सुन्दरत्यैकवचनेनैकस्मिन् कृष्ण एव स्पृहा युवामिति द्विवचने स्वीयभावस्यावहित्था च द्योतिता तिस्रो ग्रीवोरःकट्यो वक्रा यस्याः सा नाम यस्याः सा पुंवद्भाव आर्षः हि एवार्थे अनुलेपनकर्मण्येवाहं कंससम्मता न त्वन्यत्र कुब्जदोषादिति स्वशुद्धिर्ज्ञापिता ॥ ३ ॥ रूपेण सौन्दर्येण पेशलैः सम्मोहनकर्मणि दक्षैर्माधुर्याद्यैर्धर्षितचित्ता "दक्षे तु चतुरपेशलपटव,, इत्यमरः ॥ ४ ॥

गूढार्थदीपिनी

द्विचत्वारिंशके कुब्जाऽवक्रत्वं चापभञ्जनम् । दुर्निमित्तानि कंसस्य मल्लभूमेरयोत्सव ॥ १ ॥

अङ्गविलेपः चन्दनादिः । रसप्रद. सुखप्रदः ॥ १ ॥ हे वरोरु । हे अङ्गने । उह इति भ्रूविक्षेपे ॥ २ ॥ त्रिवक्रत्वं ग्रीवारःकटिषु । त्रिवक्रेति पुवद्भाव आर्षः इति तोषिणी । मया भावितं घृष्टम् भोजपतेः कंसस्य ॥ ३ ॥ पेशलं सौकुमार्यम् । धर्षितात्मा मोहितचित्ता सती सान्द्रं घनीभूतम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

द्विचत्वारिंशे कुब्जोन्नमनधनुर्भञ्जनतत्पालवधादिकं भगवत्कर्म वर्णयति । अथेति । गृहीतान्यङ्गविलपानां चन्दनादीनां भाजनानि यया ताम् रसप्रदः भक्तिरसप्रदः ॥ १ ॥ भावि उर्वादिसौन्दर्य्यं सिद्धवदालक्ष्य सम्बोधयति । हे वरोरु त्वं का एतदनुलेपनं कस्य वा साधु यथार्थं नोऽस्मभ्यं कथयस्व ततः अङ्गविलेपार्पणेन ते श्रेयः न चिरात् सद्य एव भविष्यति ॥ २ ॥ हे सुन्दरवर्य्य ! तिस्रो ग्रीवोरःकट्यो वक्रा इति त्रिवक्रेति नाम यस्याः सा भोजपतेर्दासी अहमस्मि भोजपतेरिति सर्वत्र युज्यते अनुलेपनकर्मणि भोजपतेः संमता मद्भावितं मया भावितं वासितं संस्कृतमनुलेपनं "भावितं वासिते प्राप्ते" इति हैमः भोजपतेः अतिप्रियम् तद्राज्ययोग्यमनुलेपनं युवां विना अन्यतमः कोऽर्हति न कोऽपि युवां तु अर्हथेत्यर्थः ॥ ३ ॥ रूपादिभिर्धर्षितो मोहितः आत्मा चित्तं यस्याः सा सान्द्रं घनम् तत्र पेशलं दक्षत्वं "चारौ दक्षे च पशेल" इत्यमरः माधुर्य्यं रसिकत्वम् ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ।। अथ मालालाभानन्तरं राज्ञः पन्था राजपथस्तेन व्रजन्माधवो गृहीतमङ्गविलेपस्य गन्धस्य भाजनं पात्र यया तां स्त्रियं कुब्जां त्रिवक्रां युवतीं तरुणीं वराननां धात्रीं सैरन्ध्रीं विलोक्य प्रहसन्रसप्रद आनन्ददः सुरतरसप्रदो वा पप्रच्छ ॥१॥ हे अङ्गने वरोरु सोल्लण्ठवचनमुत्तमोत्सङ्गे त्वं का । एतदनुलेपनं कस्य । कंसमुद्दिश्य नयसि साधु सत्यं यथा तथा कथयस्व । निर्दोषे पेशले सभ्ये साधु शब्दं प्रयुज्यत इत्युक्तः । उत्तममङ्गविलेपनमावयोर्देहि ततो दानात्तेन चिराच्छीघ्रं श्रेयो भविष्यति॥२॥

कृष्णपृष्टा सैरन्ध्री परवेशमस्था शिल्पकृत्स्ववशा स्त्रियामिति विश्वात्सोवाचेत्याह ॥ सैरन्ध्रीति । हे सुन्दरवर्य अहं दास्यस्मि । अनुलेपकर्मणि गन्धलेपनक्रियायां सम्मता किञ्चित्प्रसिद्धा । त्रिवक्रेति नाम यस्याः सा त्रिवक्रनाम्नी मद्भावितं विलेपनं भोजपतेः कंसस्यातिप्रियं सुरतरतिप्रियमिति वा । युवां विनाऽन्यतमोऽन्योऽन्यतमा मुकुन्दात्को नाम लोक इति वस्त्वार्थे तमप्प्रत्ययः । कोऽर्हति योग्यो भवति । अन्येषु प्रसक्तेष्वेकोऽन्यतमः कोऽर्हतीत्यपि वर्णयन्ति ॥ ३ ॥ रूपमाकारसौष्ठवं पेशलं सुकुमारता माधुर्यं सरसता हसितं हास आलाप उक्तिर्वीक्षितं कटाक्षविक्षेपस्तैर्धर्षितात्मा घर्षित आत्मा मनो यस्याः सा गतम् । मोहितचित्तोभयोः सान्द्रं घनीभूतमनुलेपनं ददौ ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एकोनचत्वारिंशे तु हरेरद्भुतकर्मणः । स्वासक्तयर्थं राजसानि वीर्यं तस्य निरूप्यते ॥
अलौकिकं लौकिकं हि प्रसन्नः कुरुते फलम् । नान्यस्तत्र फलं दातुं शक्नोति हि यतः कथा ॥
लौकिकालौकिकत्वेन सामर्थ्यं लक्षणं पुनः । निरूप्यते स्वदोषस्य निवृत्त्यै स तथापि हि ॥
न निवर्त्तत इत्युक्त्वा मल्लरङ्गकथापरा । एतावता क्लिष्टकर्मा हरिरत्र निरूपितः ॥
प्रमाणानां फलं ह्यं तत् कार्यं चापि निरूपितम् । कुब्जाप्यत्र धनूरूपा वायुना तु तथा कृता ॥
आध्यात्मिको रुद्ररूपः शिष्टौ धनुषि संस्थितौ । यत्पालकं तस्य खण्डौ साधनं नाशने मतम् ॥
कालोऽपि विपरीतोऽभूद्दुर्निमित्तैः पतिद्विषाम् । बुद्धिर्हि न हिता तस्य प्रतिकूलेऽखिलं हरौ ॥

पूर्वाध्यायान्ते सुदाम्नो भवनान्निर्गत इत्युक्तं तत्र पुनरन्यस्य गृहे गमनं संभवतीति तद्व्यावृत्त्यर्थं भिन्नप्रक्रमेण स्वपूर्वलीलयैव भगवान्प्रचलित इत्याह । अथेति । राजमार्गेणैव व्रजन् स्त्रियं ददर्शेति । स्त्रियो हि भगवतः कृपापात्रमिति तत्र भगवतो नात्यन्तप्रयासः कालेनैव ताः भगवदीयाः क्रियन्ते "तत्प्रियार्थं संभवन्तु सुरस्त्रिय" इत्यादिवाक्यात् । अतः कुब्जा मध्ये मिलिता अलौकिकं तत्समीकरणमिति अलौकिकसामर्थ्यज्ञापनाय चतुष्पथ एव तथा करणम् । माधव इति । लक्ष्मीपतित्वात्तदंशभूता सेति तस्या उद्धारः कर्त्तव्यः तस्या नामाप्रसिद्धमिति जात्यादिकमेव निरूपितम् । स्त्रियमिति । विशिष्टं भोगयोग्यं गृहीतमङ्गविलेपभाजनं यया सा हि स्वगृहे अङ्गविलेपनं सज्जीकृत्य कंसार्थं नयति भगवति च प्रविष्टे ततो राजधर्मा निवृत्ताः भगवत्येव समागताः । अत एव वस्त्राणि चन्दनं माला राजभोग्याः भगवतैव गृहीताः तां कुब्जां निर्गतपृष्ठभागां युवतीं वयसोत्तमां दर्शनेऽप्युत्तमामाह । वराननामिति । भोगे परमयोग्या मुख्ये उत्ताने अदृष्टसामर्थ्यात् अतोऽर्धफलां तां मध्ये मार्गं दृष्ट्वा पप्रच्छयान्तीमेव न तु सा भगवन्तं दृष्ट्वा स्थिरीभूता भोगाभावनिश्चयाद्भक्तिज्ञानादावनधिकारात् दर्शने मनोभवपीडासम्भवात् गच्छन्तीव सा जाता । प्रहसन्निति । तस्याःसर्वमेव विवेकं दूरीकुर्वन् परिभाषणं कृतवान् । यथा सा पश्यति कृपापात्रे भगवान् स्वयमप्याकार्यं स्वस्मिन् प्रवर्त्तयतीति ज्ञापयितुमाभाषणं कृतवान् कुब्जेयमपूर्वा गच्छतीति लोकरीत्या प्रहसनम् । ननु गच्छन्ती किमित्याकारितवान् तत्राह । रसप्रद इति । रसमात्मस्वरूपं कामरसं प्रकर्षेण ददातीति ॥ १ ॥ प्रश्नमाह । का त्वमिति । वरोर्विति संबोधनं भोगयोग्यतां सूचयति । उ ह अपि च । एतदनुलपेनं कस्य त्वं वा कस्येति अङ्गनेति पुनः प्रीत्या संबोधनं तव विशेषप्रीत्या भोगयोग्यतां संपादयिष्यामीति ज्ञापनार्थं वेत्यनादरे नोऽस्माकं संबन्धिपरिज्ञाने न किंचित् प्रयोजनमिति । साधु यथा भवति तथा नोऽस्मभ्यं कथयस्व । किं च । आवयोरेतदनुलेपनमुत्तमं प्रतीयत इति देहि । अङ्गविलेपने दत्ते अङ्गमेव दास्यामीति भगवदभिप्रायः तदेवाह । श्रेय इति । ततस्ते अचिरादेव श्रेयो भविष्यति । यद्यपि दानफलं देशादीनां प्रशस्तत्वाभावात् शीघ्रं न भविष्यति तथापि दर्शनमपि दाने शीघ्रं सफलं भविष्यतीति तथोक्तिः ॥ २ ॥ सा तु सैरन्ध्री अन्तःपुरदासिका बहिस्तिष्ठति अभर्तृका च सा स्वस्वरूपं निरूपयति । दास्यस्मीति स्वभावतो जात्यैव दासी सुन्दरवर्येति सम्बोधनात् त्वं चेत् कृपां करिष्यसि तदैव भविष्यामीति राजदास्योऽपि वेश्याप्रायाः गुप्ताः परम् अनुलेपकर्मणि चतुःसमनिर्माणे सम्मता सर्वषामेव अस्मिन्नर्थे अनुलेपभोक्ता राजा प्रमाणमिति तस्यापि सम्मतिमाह । मद्भावितमिति । मया भावितं भागशो निर्मितमङ्गविलेपनं भोजपतेः कंसस्यातिप्रियम् अतः युवां भवन्तौ विना अन्यतमः को वा अर्हति भोजपतेः प्रियमेव न तु भोजपतिरर्हति ॥ ३ ॥ यद्यपि राजकीयं तत् ततो जीवति राज्ञि अर्हतु वा मा वा तथापि नान्यस्मै दातुमुचितं तथापि कामेन भगवद्वशा भूत्वा दत्तवतीत्याह । रूपेति । रूपं भगवतो नीलमेघश्यामं तस्य पेशलं कोमलता अङ्गनानां भोगयोग्यता माधुर्यं तस्यैव कोमलताया अयमधिकोः गुणः माधुर्ययुक्तं च हसितं हसितपूर्वकमालापश्च । वीक्षितानि च रूपं हसितं भाषितं वीक्षणमिति देहेन्द्रियान्तःकरणात्मनां वशीकरणसाधनान्येतानीति तैर्धर्षितात्मा स्वरूपाच्यावितदेहेन्द्रियादिरूपा सान्द्रं गाढम् अन्तः स्थितमुभयोरनुलेपनं ददौ उभयत्रापि मनःप्रीतिरिति भगवतापि तथैव याचितमिति ॥ ४ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । अथानन्तरं राजमार्गेण व्रजन् गच्छन्माधवः कृष्णः गृहीतानि अङ्गविलेपानां भाजनानि पात्राणि यया तां कुब्जां स्त्रियं युवतीं तरुणीं वराननां सुमुखीं यान्तीं गच्छन्तीं विलोक्य दृष्ट्वा प्रहसन् रसप्रदः पप्रच्छ ॥ १ ॥ हे वरोरु त्वं का एतदनु-

लेपनं कस्य वा। उहेति वितर्के। हे अङ्गने नोऽस्मान् साधु यथा स्यात्तथा त्वं कथयस्व ब्रूहि उत्तममंगविलेपनम् आवयोरावाभ्यां त्वं देहि ततो दानात्ते तव श्रेयो न चिरात् शीघ्रं भविष्यति ॥ २ ॥ सैरं ध्र्युक्तिः "चतुःषष्टिकलाभिज्ञा शीलरूपादिसेविनी ॥ प्रसाधनोपचारज्ञा सैरंध्री सा प्रकीर्त्तिता" इति तल्लक्षणम्। अहं दास्यस्मि हे सुन्दर कंसस्य संमता मान्या ग्रीवोरः कट्यो वक्राः स्युस्त्रिवक्रा इति नामतः इत्युक्तत्रिवक्राभिधाऽनुलेपक्रियायां मया भावितं सुसाधितम् अनुलेपादि भोजपतेः कंसस्यातिप्रियं भवति तदर्हणं युवाभ्यां विनाऽन्यतमः कोऽर्हति न कोपि ॥ ३ ॥ रूपसौकुमार्यादिभिः धर्षितात्मा मोहितचित्ता कुब्जा सांद्रं घन मनुलेपनम् उभयोरुभाभ्यां ददौ ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

द्विचत्वारिंशके चापि कृष्णस्याद्भुतकर्मणः। कुब्जासुरूपदानादि चरितं विनिरूप्यते ॥ १ ॥

अथ मालाकारानुग्रहानन्तरं राजमार्गेण व्रजन् माधवः गृहीतानि अङ्गविलेपानां चन्दनादीनां भाजनानि पात्राणि यया तां, वरं सुन्दरं आननं यस्यास्तां कुब्जां युवतीं तरुणीं स्त्रियं यान्तीं गच्छन्तीं विलोक्य प्रहसन् पप्रच्छ। तत्र हेतुमाह-रसप्रद इति। 'वरप्रद' इति पाठान्तरम्। स्वभक्तानां सुखप्रद इत्यर्थः चन्दनादि गृहीत्वा तस्याऽपि सुखसम्पादनार्थमिति भावः ॥ १ ॥ तत्प्रश्नमेवाह—का त्वमिति। सोपहासं सम्बोधयति—हे अङ्गने इति, हे वरोरु इति च। 'उ ह' इति निपातौ भ्रूविक्षेपयुक्ते वितर्के, अस्यां पुर्यां त्वं का एतदनुलेपनं कस्य कस्मै नयसीत्यर्थः। साधु यथार्थं नोऽस्मान् प्रत्येतत् कथयस्व। 'कस्मैचिद्भवतु, युष्माकं किम्?' तत्राह—उत्तममिदमङ्गविलेपनं आवयोर्देहि, तेनानुलेपनदानेन हेतुना ते तवाचिरादेव श्रेयः उत्तमं फलं भविष्यति ॥ २ ॥ एवमापृष्टा याचिता च साप्याह—दासीति। स्वमोहं सूचयन्ती सम्बोधयति—सुन्दरेति। तिस्रो ग्रीवोरःकटयो वक्रा यस्याः सा त्रिवक्रेति अन्वर्थं नाम यस्याः साऽहं हि प्रसिद्धा अनुलेपनसाधनक्रियायां कंसस्य सम्मता दास्यस्मि। सम्मतत्वे हेतुमाह—मद्भावितं मया साधितमनुलेपनं भोजपतेः कंसस्यातिप्रियं भवति, कुब्जतया बलाभावेन शनैर्घर्षितस्य चन्दनादेरति सूक्ष्मत्वादित्याशयः। एवं का त्वं कस्यासीति प्रश्नयस्योत्तरमुक्त्वा देह्यावयोरित्यस्योत्तरमाह—युवांविनाऽन्यतमस्तदनुलेपनं स्वीकर्तुं कोऽर्हतीति ॥ ३ ॥ एवमुक्त्वा भगवतो रूपादिभिर्धर्षितः मोहितः आत्मा चित्तं यस्याः सा सान्द्रं घनं अनुलेपनं उभयो रामकृष्णयोर्ददावित्यन्वयः। रूपं चाङ्गसौष्ठवं, पेशलं च सौकुमार्यं, माधुर्यं च रसिकता, हसितं च, आलापश्च भाषणं च, वीक्षितं च, तैः ॥ ४ ॥

अन्वितार्थप्रकाशिका

द्विचत्वारिंशके कुब्जजुत्वं चापस्य भेदनम्। रक्षिनाशः कंसभीश्च श्लोकास्तत्राष्टवह्नयः (३८) ॥
द्वे (२) उवाचेति पादोनाश्चन्द्रवेदा (४०॥।) अनुष्टुभः ॥ ४२ ॥

अथेति ॥ राजपथेन राजमार्गेण व्रजन् रसप्रदः सुखप्रदः यद्वा रसं कुब्जायां शृङ्गारं स्वसखेषु हास्यं सर्वत्राद्भुतं च प्रददाति स माधवः गृहीतानि अङ्गविलेपानां चन्दनादीनां भाजनानि पात्राणि यया तां वरं सुन्दरम् आननं यस्यास्तां कुब्जां युवतीं स्त्रियं यान्तीं गच्छन्तीं विलोक्य प्रहसन् पप्रच्छ। इयं भूमिशक्तिरूपायाः सत्यभामाया अंशभूता अत एव भूम्या सहैक्येनेयं परः सहस्रदुष्टस्सुरभारभुग्नत्वं स्वकुब्जेन दर्शयन्ती स्वीयं गन्धगुणं चन्दनादिमिषेणोपहरन्ती भूमिरेव पथि सङ्गताऽभूत्। भगवांश्च भारापनयनं ज्ञापयन् भुग्नतानिवृत्तिमेव ऋजुत्वं चकारेति प्रकरणार्थः ॥ १ ॥ का त्वमिति ॥ हे वरोरु! हे अङ्गने चेति सोपहाससन्बोधनम्। उ हेति भ्रूक्षेपयुक्ते वितर्के। अस्यां पुर्यां त्वं का एतदनुलेपनं कस्मै नयसीत्यर्थः। साधु यथार्थं नोऽस्मान्प्रत्येतत्कथयस्व। उत्तममिदमङ्गविलेपनम् आवयोर्देहि। तेनानुलेपनदानेन हेतुना ते तव नचिरादेव श्रेयः उत्तमं फलं भविष्यति ॥ २ ॥ दासीति ॥ हे सुन्दर! तिस्रो ग्रीवोरः कट्यो वक्रा यस्याः सा त्रिवक्रेति अन्वर्थं नाम यस्याः साऽहम्। पुंवद्भाव आर्ष इति तोषिण्यादयः। हि प्रसिद्धा अनुलेपसाधनक्रियायां कंसस्य सम्मता दास्यस्मि। मद्भावितं मया साधितमनुलेपनं भोजपतेः कंसस्यातिप्रियं भवति। युवां विनान्यतमस्तदनुलेपनं स्वीकर्तुं कोऽर्हतीति ॥ ३ ॥ रूपेति ॥ एवमुक्त्वा भगवतो रूपं पेशलं सौकुमार्यं माधुर्यं च रसिकता च हसितं च आलापश्च भाषणं च वीक्षितं च तैः घर्षितः मोहित आत्मा चित्तं यस्याः सा सान्द्रं घनम् अनुलेपनम् उभयो रामकृष्णयोर्ददौ ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं द्विचत्वारिंशेऽध्याये कुब्जा चंदनग्रहणं धनुर्भंजनं च कंस दुःस्वप्नवर्णनं च मल्लरमणाय रंगकरणं च निरूप्यते गृहीतानि अंगवीलेपाना चंदनादीनां भाजनानि पात्राणि ययातां कंसगृहं यांतीं ॥ १ ॥ हे अंगनेदेव रोरु इति परिहासवाक्येन संबोधयन् पृच्छति त्वं कासिकस्यैतदनुलेपनं वा उह इत्यव्ययं वितर्के ॥ २ ॥ त्रिषु कंठोरः कटिस्थानेषु वक्रत्वात्त्रिवक्रा इति नाम यस्याः पुंवद्भाव आर्षः अनुलेपकर्मणि अनुलेपसंपादनक्रियायां कंसेन सम्यक्मता तस्य दास्य ह मस्मि ॥ ३ ॥ रूपं देहसौन्दर्यं च पेशलं सुकुमारत्वं च माधुर्यं स्वभावसौन्दर्यं च हसितं च आलापा मधुरवाणी विलासाश्च वीक्षितं मनोहरदृष्टिप्रसारश्च तैः धर्षितात्मा मोहितमानसा सांद्रं घनं ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्राक्कुब्जोन्नमनं भङ्गो धनुषोरक्षिणां वधः । द्विचत्वारिंशकेऽरिष्टं कांसं रङ्गोत्सवादि च ॥ १ ॥

अथ त्रिवक्रा समर्पितचन्दनकृताङ्गरागः ऋज्वीकृतत्रिवक्रः निर्भिन्नचापः चापशकलघातिततत्पालकः समुत्पादितकंसभयः पुनः स्वनिकेतमाविवेशेत्याहाथेत्यादिना । अथेति । अथ मालाकारानुग्रहानन्तरं राजपथेन राजमार्गेण, व्रजन् रसप्रदः माधवः श्रीकृष्णः, गृहीतानि अङ्गविलेपनानां सुगन्धिचन्दनानां भाजनानि पात्राणि यया तां, वरमुत्तममाननं मुखं यस्यास्तां, युवतीं तारुण्यभाजं, यान्तीं राजमार्गे व्रजन्तीं, कुब्जां स्त्रियं विलोक्य प्रहसन् सन् तां पप्रच्छ ॥१॥ प्रश्नप्रकारमेवाह । का त्वमिति । हे अङ्गने हे वरोरु, सोपहासं संबोधनम् । त्वं का इहास्यां पुर्यां, एतत् अनुलेपनं कस्य वा कस्मै नु नयसीत्यर्थः । पाठान्तरे उ ह इति निपातौ भ्रूविक्षेपयुक्ते वितर्के । नोऽस्मभ्यं, साधु यथार्थं यथा तथा, कथयस्व । भवतु यस्य कस्याप्यर्थं किं तु उत्तमं, इदं अङ्गविलेपमङ्गविलेपनार्थकं चन्दनं, आवयोरावाभ्यामित्यर्थः देहि । ततोऽनुलेपनदानेन हेतुना, ते तव, श्रेयः मङ्गलं, नचिरादविलम्बेन, भविष्यति ॥ २ ॥ इत्थं भगवता पृष्टा याचिता च सा प्राह । दासीति । हे सुन्दरवर्य, अहं भोजपतेः, कंसस्य, अनुलेपकर्मणि संमता अभिमता, तिस्रो ग्रीवोरःकट्यो वक्रा यस्याः त्रिवक्रा इत्यन्वर्थं नाम यस्याः सा, त्रिवक्रनामा दासी, अस्मि । हि, मद्भावितं मया साधितमनुलेपनं, भोजपतेः अत्यतीव, प्रियं भवति । तत् राज्ञः प्रियमिदमनुलेपनं, युवां विनां, अन्यतमः कः अर्हति । युवामेवार्हथ इत्यर्थः ॥ ३ ॥ रूपेति । रूपमङ्गसोष्ठवं च पेशलं सौकुमार्यं च माधुर्यं रसिकत्वं च हसितं हासाचरणं च आलापः संभाषणं च वीक्षणं भ्रूक्षेपयुतं निरीक्षणं च तैः, भगवतो रूपादिभिरित्यर्थः । धर्षितो मोहित आत्मा चित्तं यस्याः सा कुब्जा, उभयोः रामकृष्णाभ्यामित्यर्थः । सान्द्रं अनुलेपनं चन्दनं, ददौ ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अथ व्रजन्निति : १०.४२.१.

यो नानागुणसंभवावरणभृद्राजद्रजोन्तर्गुणां वाक्पुष्पस्रजमाश्रितो मधुरसां पूर्मध्यवृत्तिः पुमान् ।
तस्यावश्यमविद्यया सह रतिर्दत्ताङ्गरागश्रिया स्यादेतद् ध्वनितं तदध्वनि तथा कुब्जेशयोर्वर्तनात् ॥ १ ॥
व्रजन्नृपपथे प्रजाभृतिजनैर्निजैराश्रितो द्विषत्पुरगतोऽप्यरि-प्रकृतिदत्तचित्तोऽप्यसौ ।
न चालमतिलङ्घने कुटिलचेटिकाया अपीत्यभूदिह ततो न किं स्फुटमलङ्घ्यदुर्गं स्त्रियः ॥ २ ॥
वामनोऽहमियं कुब्जा योगोऽयमधुनाऽऽवयोः । सर्वलोकाद्भुतकरः स्यादिति प्राहसद्धरिः ॥ ३ ॥
श्लाघ्यमप्सरसां रूपं गात्रं तु कुटिलाकृति । अहो विधातृचातुर्यमीदृगित्यहसद्धरिः ॥ ४ ॥
यन्नो विहाय रमसेऽङ्गनया यथाऽसौ सौन्दर्यभू-रखिललोक-विलक्षणैव ।
प्रायो भवेदिति तु गोपसुतानुयोगे हास्यं तदुत्तरमिति प्रभुणा व्यबोधि ॥ ५ ॥
सदा महानन्दरसप्रदस्य यन्ममापि पाटीररसार्थनोदिता ।
अहो विचित्रा समयानुसारितेत्यधोक्षजो विस्मयतो जहास किम् ॥ ६ ॥
या स्त्री सहासपरिहासमपि प्रकामं श्रुत्वा वचो न कुपिता हृदये यदि स्यात् ।
वश्या भवत्यचिरमध्वनि सेति कृष्णस्तन्निर्णयाय किमु तामवदत् तथैव ॥ ७ ॥
नादत्तमध्यवनि सिद्ध्यति किञ्चनेति निश्चित्य चान्दनरसं भृशमाजिघृक्षुः ।
हासच्छलाद् रसमसावनुरागपूर्वं प्रादात्तदा किमु मुदा निजमुख्यमस्यै ॥ ८ ॥
दृष्टाः स्त्रियोऽनुभूताश्चा-ऽप्यङ्गभोगमनोरमाः । अनङ्गभोगयोग्यासावेकैवैक्षीति विस्मितः ॥ ९ ॥
अनर्घ्य-ललनारत्न-राशिरञ्जित-चेतसः । नाहमर्हेति यान्तीं स्वप्रीतिं हासाददर्शयत् ॥ १० ॥
अङ्गरागकराऽप्येषाऽनङ्गरागकरा भवेत् । यथाऽचिरं तथा कार्यमित्युज्ज्वलमधात् स्मितम् ॥ ११ ॥

का त्वं बरोविति : १०.४२.२.

का त्वं सुन्दरि सुन्दरोऽयमपि वा कस्याङ्गरागः कृते प्रश्नोक्ताविति यत्तदाऽखिलविदाऽप्यज्ञानिताऽङ्गीकृता ।
तेन स्पष्टमभूदिदं यदबला विद्वांसमाकर्षयत्यज्ञानं समुदेति तस्य य इह स्यादङ्गरागेक्षणः ॥ १२ ॥
न श्रद्धा वर्धते लोके सत्फलश्रवणं विना । श्रेयस्ते न चिराद्भावीत्यूचे युक्तमधोक्षजः ॥ १३ ॥
गन्धार्पणफलं विप्रैः सौमङ्गल्यमुदीरितम् । युक्तमूचे तव श्रेयः स्यादितीशो हि तन्मुखः ॥ १४ ॥

दास्यस्मीति : १०.४२.३.

यस्या दास्यमहर्निशं विधि-शिव-स्वर्गाधिपाद्याः सुराः कुर्वन्त्यद्भुतवैभवाप्तिमनसो दैत्याः सदैत्यार्जवम् ।
साऽपि श्रीरलमार्जवं विदधती यस्याङ्घ्रिदासी सती तस्यास्मिन् जगदीश ते त्रिभुवने कुब्जा न दासी कथम् ॥ १५ ॥

गात्रं विधातृकृतमेतदिति त्रिवक्रं नामापि मे तदनुसारि भुवि प्रसिद्धम् ।
चित्तं त्ववक्रमिह चक्रधरेत्यवेहि प्रायोऽन्तरङ्गसरलाः सुदृशो भवन्ति ॥ १६ ॥
कौटिल्यमन्तरगतं न बहिः पुराऽऽसीदस्मिंस्तु वर्ष्मणि बहिष्कृतमेव नान्तः ।
इत्थं द्विजन्मकलिताऽऽचरणावगत्यै नामैव वक्रमिति साऽकथयत् किमीशम् ॥ १७ ॥
त्वद्रिपोर्नैव दास्यस्मि किन्तु वंशक्रमागता । नातोऽवमानयेत्यूचे दासी भोजपतेरहम् ॥ १८ ॥
कृष्णातिवक्रगतयो भुवि गोपबाला बाला अपीह समनुज्झित-वक्रभावाः ।
संलालिताः शिरसि येन विहाय तं त्वां वक्राऽहमन्यमिह कं जनमर्चयामि ॥ १९ ॥
युवामेवाङ्गरागानुलेपनार्हौ मतौ मम । परस्तु दासी भावेनैवेत्यन्यतमतः स्फुटम् ॥ २० ॥

कृष्णप्रिया

अब इस अध्याय में धर्मी भगवान का निरूपण है फिर भी वीर्य का निरूपण विशेष रूप में हो रहा है । इस अध्याय में धनुर्भङ्ग, कुब्जा पर अनुग्रह कंस को अनिष्ट स्वप्न दर्शन, मल्लों के अखाड़े का वर्णन आदि प्रसङ्गो का वर्णन किया जाएगा । कुब्जा को स्वरूपदान अलौकिक फल एवं पुरवासियों को और व्यापारियों को लौकिक फल दान का भी निरूपण किया जाएगा ।

श्रीशुकदेव महाराज कहने लगे राजन् परीक्षित् अब श्रीपति श्रीकृष्ण प्रभु श्रीमथुराजी के राजपथ से प्रस्थान करते थे तब रसदान दक्ष रसराज को राजमार्ग में सुमङ्गल मुखी युवती सुन्दरी त्रिवक्रा कुब्जा मिली । उसके हाथ में मङ्गल सूचक श्रीअङ्गो में विलेपन योग्य केसरान्वित सुगन्धित चन्दन था । वह मार्ग में जा रही थी तब स्मितवदन श्रीहरि ने स्नेह से पूछा ॥ १ ॥ हे वरोरु ! हे सुन्दर जघने सुन्दरी ! तुम कौन हो ! किसकी अङ्गना हो ! तुम्हारे कर सरोज में यह सुवासित अङ्गराग चन्दन आदि अनुलेपन पात्र है वह किसके लिए ले जा रही हो । तुम्हें कहने में संकोच न हो तो हमें सत्य बात कहो । मनमाने तो यह चन्दन हमारे ही लिए योग्य है । देने में क्षोभ न हो तो हमें दीजिए । हमें देने में शीघ्र तुम्हारा अवश्य कल्याण ही होगा ॥ २ ॥ प्रभु के प्रश्नों से प्रसन्न सैरन्ध्री बोली हे सुन्दर वर मैं सैरिन्ध्री हूँ अविवाहिता हूँ अन्तःपुर में जाने वाली सेविका हूँ । मैं तीन अङ्गों में कुबड़ी होने के कारण लोग मुझे त्रिवक्रा कुब्जा कहकर बुलाते हैं । वैसे तो मैं कंस की दासी हूँ । राजा के अङ्ग में चन्दन अङ्गराग लगाना मेरा कार्य है । मैं अपने कार्य में सर्वथा निपुण हूँ इसलिए मेरे बनाए हुए चन्दन अङ्गराग आदि पदार्थों पर कंस का अधिक अनुराग है । नाथ ! आप तो पूर्ण पुरुषोत्तम है इस सुवासित चन्दनादि लेपन के लिए आपके बिना अन्य और कौन योग्य है ॥ ३ ॥ श्रीशुकदेवजी महाराज ने कहा—राजन् परीक्षित् ! श्रीश्याम सुन्दर श्रीकृष्ण के स्वरूप-सुकुमारता मधुरता, मधुर स्मितहास्य मधुर वार्तालाप एवं स्नेहावलोकन ने सैरन्ध्री के चित्त को चुरा लिया । वह प्रसन्न हो गई भगवान् श्रीकृष्ण एवं श्रीवलदेवजी को वह बना चन्दन एवं अनुलेपन समर्पित किया ॥ ४ ॥

ततस्तावङ्गरागेण [1]स्ववर्णेतरशोभिना । सम्प्राप्तपरभागेन[2] शुशुभातेऽनुरञ्जितौ ॥ ५ ॥
प्रसन्नो भगवान् कुब्जां त्रिवक्रां रुचिराननाम् । ऋज्वीं[3] कर्तुं मनश्चक्रे दर्शयन् दर्शने फलम् ॥ ६ ॥
पद्भ्यामाक्रम्य प्रपदे[4] द्व्यङ्गुल्युत्तानपाणिना । प्रगृह्य चुबुकेऽध्या[5]त्ममुदनीनमदच्युतः ॥ ७ ॥
सा तदर्जुसमानाङ्गी बृहच्छ्रोणिपयोधरा । मुकुन्दस्पर्शनात् सद्यो बभूव प्रमदोत्तमा ॥ ८ ॥

कवमक्षम।

अन्वयः—ततः, स्ववर्णेतरशोभिना, अङ्गरागेण, सम्प्राप्तपरभागेन, अनुरञ्जितौ, तौ, शुशुभाते ॥ ५ ॥ ततः, प्रसन्न, भगवान्, दर्शने, फलम्, रुचिराननाम्, त्रिवक्राम्, कुब्जाम्, ऋज्वीम्, कर्तुम्, मनः, चक्रे ॥ ६ ॥ अच्युतः, पद्भ्याम्, प्रपदे, आक्रम्य, द्वि, अङ्गुल्युत्तानपाणिना, चिवुके, प्रगृह्य, अध्यात्मम्, उदनीनमत् ॥ ७ ॥ मुकुन्दस्पर्शनात्, सा, तदा, अर्जुनसमानाङ्गी, बृहच्छ्रोणी पयोधरा सद्यः प्रमदोत्तमा बभूव ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्ववर्णेतरशोभिना रामकृष्णयोर्वर्णाभ्यामितरः पीतादिवर्णस्तेन शोभितं शीलं यस्य तेन । संप्राप्तपरभागेन सम्प्राप्तः परो नाभेरुपरितनो भागो येन सः । संप्राप्तः परभागः शोभातिशयो येनेति वा । तेनानुरंजितौ ॥ ५ ॥ स्वदर्शने सद्यः फलं दर्शयन् ॥ ६ ॥ तस्याः प्रपदे पादाग्रद्वयं पद्भ्यामापीडय्य द्वे अंगुल्यावुत्ताने उन्नते यस्मिन्पाणौ तेन चिबुके मुखस्याधोभागे धृत्वाऽध्यात्मं देहमुन्नमयामास ॥ तदैव ऋजु समानमगं यस्याः । बृहत्यौ श्रोणी पयोधरौ च यस्याः सा । मुकुन्दस्पर्शनादिति मुख्यं कारणम् ॥ ८–११ ॥

---

१. स्ववर्णेतर–विज. । २. सम्प्राप्ता–विज. । ३. ऋज्वीकर्तुं–प्रा पा. । ४. द्व्यङ्गुलो–विज. । ५. ह्यास्य–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततोऽनुलेपेन । तृतीयार्थे तसिः । तौ रामकृष्णौ । प्रसिद्धार्थत्यागे कारणाभावमालक्ष्याह–परभागः शोभातिशयः "परभागोऽतिसौंदर्येऽन्यांशे भक्ते महेश्वरे" इति धरणिनिरुक्तौ । अनुरञ्जितौ स्वकांत्यनुकूलशोभां प्राप्तौ । अनुरञ्जितौ पत्त्रभंगरचनाविधिना श्रीगंडवक्षोभुजादिष्वनुलिप्तौ सखिभिस्तथैव स्वयम् ।।५।। दर्शयन् भावि कंसहनने निजशक्तिप्रकटनेन लोकान्प्रत्याययन्निति भावः । कुब्जामत एव त्रिवक्रां तत्संज्ञकाम् । ऋज्वीं कर्तुमिति–अनृज्वीम् ऋज्वीं कर्तुमित्यर्थः । ऋज्वीकरणे हेत्वंतरम्— रुचिराननामिति । सद्यः फलमापातफलं विशेषफलस्य तयैव 'एहि' इत्यादिना प्रार्थयिष्यमाणत्वात् ।। ६ ।। तस्याः कुब्जायाः । उन्नमयामास ऊर्ध्वमाकृष्टवानित्यर्थः । 'पादाग्रं प्रपदम्' इत्यमरः । 'अधस्ताच्चिबुकम्' इत्यपि । अधरोष्ठयोरधस्तादित्यर्थः । सद्यः फलं तु मल्ललीलोचितग्रहणप्रावीण्यपूर्वकमेवेत्याह–द्वे अंगुल्यौ मध्यमातर्जन्यौ उत्ताने उपरिकृताग्रभागे यत्र तेन पाणिना दक्षिणेन, वामेन पृष्ठावस्तंभनं ज्ञेयम् । आत्मानं जीवमधिकृत्य वर्तमान मध्यात्मं देहम् । इति जीवभागपर्यंतं तद्देहस्य प्रारब्धवशेनापरिहार्यं कुब्जत्वमिति सूचितम् । अच्युतो निजलीलाविशेषादच्युत इति । अत एव तथा ग्रहणमन्यथेच्छामात्रेणैव तत्तत्सम्भवात् ।। ७ ।। सा कुब्जा । तदैवोन्नमनक्षण एव । श्रोणिशब्दो यद्यपि 'कटिः श्रोणिः ककुद्मती' इत्यमरोक्तेः कटिवाचकस्तथापि नितंबं लक्षयतीह । 'स्तनमेघौ पयोधरो' इति हैमः । मुकुंदस्पर्शने नैतदसंभावितमित्याह—मुकुन्देति । ऋजूनि वक्रतापगमात् । अत एव कुब्जतया वक्षोभागादेः स्वल्पत्वादिना पूर्वमसमामानानि अधुना तु समानं योग्यं मानं परिमाणं येषां तथाभूतान्यंयानि यस्याः । तदेव दर्शयति—बृहदिति । न केवलमेतावदेव, प्रमदानां मध्ये उत्तमा च बभूव । भगवदंगसंगानुरूपोत्कर्षमपि लेभ इत्यर्थः । अतोऽत्र मुकुंदस्पर्शनमेव मुख्यं कारणं, ग्रहणादिपरिपाटी तु विनोदमात्रत्वाद्गौणमिति भावः । मुकुन्देति कैमुत्यमेव हेतुगर्भम्–यो निजांशेनापि, तेन च चिंत्यमानमात्रेणाप्यशेषसंसारदोषदूरीकिरणपूर्वकं सारूप्यादिमुक्तिमपि ददाति, तस्य साक्षाद्भूतस्य कियदिदमिति भावः ।। ८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अनुरञ्जितौ पत्रभङ्गीरचनाविधिना श्रीगण्डवक्षोभुजादिष्वनुलिप्तौ सखिभिस्तयैव स्वयम् ।। ५ ।। कुब्जामत एव त्रिवक्रां तत्संज्ञकाम् ऋज्वीं कर्तुमिति । अनृज्वीमृज्वीं कर्तुमित्यर्थः ऋजुकरणे हेत्वन्तरं रुचिराननामिति । अन्यत्तैः । तत्र सद्यः फलमापातफलमिति ।। ६ ।। तच्च मल्लाललोचितग्रहणप्रावीण्यपूर्वकमेवेत्याह । पद्भ्यामिति द्वे अङ्गुल्यौ मध्यमातर्जन्यौ उत्ताने उपरिकृताङ्गभागे यत्र तेन पाणिना दक्षिणेन वामेन तु पृष्ठावष्टम्भनं ज्ञेयम् । आत्मानं जीव मधिकृत्य वर्त्तमानमध्यात्मं देहम् इति जीवत्यागपर्यन्तं तद्देहस्य प्रारब्धवशेनापरिहार्यं तत्कुब्जत्वं सूचितम् । अच्युतः निजलीलाविशेषादच्युत इति अत एव तथा प्रग्रहणम्ः अन्यथेच्छामात्रेणैव तत्तत् सम्भवात् ।। ७ ।। ऋजूनि वक्रतापगमात् अत एव कुब्जतया वक्षोभागादेः स्वल्पत्वादिना पूर्वमसमानानि अधुना तु समानं योग्यं मानं परिमाणं येषां तथा भूतान्यङ्गानि यस्याः तदेव दर्शयति । बृहदिति । न केवलमेतावदेव प्रमदानां मध्ये उत्तमा च बभूव । भगवदङ्गसङ्गानुरूपोत्कर्षमपि लेभे इत्यर्थः । अतोऽत्र मुकुन्दस्पर्शनमेव मुख्यं कारणं ग्रहणादिपरिपाटी तु विनोदमात्रत्वाद्गौणमि त भावः । मुकुन्देति कैमुत्येन हेतुगर्भ यो निजांशेनापि तेन च चिन्त्यमानमात्रेणाप्यशेषसंहारदोषदूरीकरणपूर्वकं सारूप्यादिमुक्तिमपि ददाति तस्य साक्षाद्भूतस्य कियदिदमिति भावः ।। ८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अनुरञ्जितौ पत्रभंगीरचनाविधिना श्रीगण्डवक्षोभुजादिषु स्वयमेवान्योऽन्यं वा गोपैर्वा तयैव वानुलिप्तौ ।। ५ ।। भगवान् लीलाविशेषं प्रकटयन्नित्यर्थः । कुब्जां कुब्जेति प्रसिद्धां त्रिवक्रां तत्संज्ञकां किंवां त्रीण्यंगानि वक्राणि यस्यास्ताम् , ऋजुकरणे हेत्वन्तरं रुचिराननामिति ।। ६ ।। द्वे अंगुल्योमध्यमातर्ज्जन्यौ प्रकर्षेण लीलया चिबुकाधस्तद्विन्यासेन गृहीत्वा । आत्मानं जीवमधिकृत्य वर्त्तमानमध्यात्मं देहामिति जीवत्यागपर्य्यन्तं तद्देहस्य प्रारब्धवशेनापरिहार्य्यं तत् कुब्जत्वं सूचितम् । अच्युतः कथमपि निजैश्वर्य्याच्च्युतिरहित इति प्रारब्धक्षपणसामर्थ्यञ्च ध्वनितम् । श्लेषेण निजलीलाविशेषादच्युत इति; अतएव तथा प्रग्रहणम् , अन्यथेच्छामात्रेणैव तत्सम्भवात् ।। ७ ।। तदा तस्यिन्नेव क्षणे ऋजु, वक्रतापगमात् , अतएव समानञ्च देहाद्यनुरूपम् ; यद्वा, कुब्जतया वक्षोभागादेः स्वल्पत्वादिना पूर्व्वं विषमधुना वयोरूपाद्यनुसारेण समतां नीतमंगं यस्याः; तदेव दर्शयति—बृहदिति । एतदुपलक्षणम् , सर्व्वाण्यंगानि परमसुन्दराणि बभूवुरिति ज्ञेयम् । तदेवाह—प्रमदोत्तमेति । 'मु' मुक्तिसुखम् , 'कु' कुत्सितं यस्मात् स भक्तिलक्षणः परमानन्दस्तं ददातीति, तस्य स्पर्शनाद्दैहिकं श्रेयः कतरदिति भावः । यद्वा, 'मु' मुख्यं सुखं पारमार्थिकम् , 'कु' पृथ्वी च, लौकिकं सुखमित्यर्थः, तद्द्वयमेव ददातीति तथा, तस्य स्पर्शनादतस्तस्मिन् भावविशेषोऽपि तस्या जाता दैहिकश्रेयश्च सम्पन्नम् ; उन्नयनेऽपि पीड़ादिकं न वृत्तमिति भावः ।। ८ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

स्ववर्णेतरशोभिना स्वदेहवर्णविरुद्धवर्णशोभिना ।। ५–६ ।। अध्यात्मं शरीरम् उदनीनमत् उन्नमयामास ।। ७ ।। ऋजुसमानाङ्गी समानशब्दो रूपपरः ।। ८–१८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत इति । स्ववर्णेतरशोभिना स्वस्याङ्गरागस्य यो वर्णः वरा हरुधिरवल्लोहितवर्णः तस्मादितरौ यौ वर्णौ तयोः शरीरगतौ विशुद्धौ सितासितवर्णौ ताभ्यां शोभिना अत एव प्राप्तः परभागो महातिशयो येन तेनानुरञ्जितौ तौ रामकृष्णौ शुशुभाते यद्वा तौ रामकृष्णौ स्वदेहगतविशुद्धसितासितवर्णाभ्यामितरेणेतरवर्णेनात एव शोभिनात एव च सम्प्राप्तमहातिशयेन यद्वा सम्प्राप्तः पर उत्कृष्टः भागः शरीरैकदेशो येन तेनानुरञ्जिताविल्यर्थः ॥ ५ ॥ श्रेयस्ततस्ते न चिराद्भविष्यतीत्युक्तं श्रेयश्चकारेत्याह । प्रसन्न इति । स्वदर्शनफलं तस्याः दर्शयन् तां त्रिवक्राम् ऋज्वीं कर्तुमवक्रां कर्तुं मनश्चक्रे मनश्चकार मनस्कारपूर्वकमृज्वीं चकारेत्यर्थः ॥ ६ ॥ तत्प्रकारमेवाह । पद्भ्यामिति तस्याः प्रपदे पादाग्रद्वयं स्वपद्भ्यामापीड्य आक्रमणेनावष्टभ्य द्वे अङ्गुली उत्ताने उन्नते यस्मिन् तथाभूतेन पाणिना तस्याश्चिबुके मुखस्याधोभागे गृहीत्वा अध्यात्मं देहम् उदनीनमत् उन्नमयामास ॥ ७ ॥ सा तदैव ऋजु समानमनुरूपञ्चाङ्गं यस्याः वृहत्यौ श्रोणी पयोधरौ च यस्याः तथाभूता मुकुन्दस्पर्शनान्निदानात् सद्य एव प्रमदोत्तमा बभूव ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सुवर्णादितरद्रजतं तेन कर्पूरो लक्ष्यते कर्पूरसम्पर्केण शोभापरिमलातिशयलक्षणास्यास्तीति सुवर्णेतरशोभिना भगवच्छरीरकान्तिमपेक्ष्य सम्प्राप्तः अपरभागो गुणोत्कर्षराहित्यं येन स तथा तेन ईषद्गुणोत्कर्षं प्राप्तेन वा भगवदङ्गसङ्गेन सम्यगुत्कर्षं प्राप्तेन वा अनुरञ्जितौ स्वकान्त्यनुकूलरागशोभां प्राप्तौ ॥ ५ ॥ ऋज्वीं कर्तुम् समीकर्तुम् आत्मानो दर्शने यत्फलं तद्दर्शयन् एष्यत्कंसहननं लोकान्प्रत्याययन्निति भावः ॥ ६ ॥ कुब्जायाः प्रपदे पादाग्रे स्वपादाभ्यामाक्रम्यावष्टभ्य द्वे अङ्गुल्यौ उत्ताने यस्मिन्पाणौ तेन द्व्यङ्गुलोत्तानपाणित चुबुके मुखाधः प्रदेशे आस्यं प्रगृह्य उदनीनमत् उन्नमयांचकार ऊर्ध्वमाकृष्टवानित्यर्थः ॥७–८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

प्रसन्न इत्यादि । भगवानखण्डसर्वैश्वर्यः प्रसन्नः सन् तां कुब्जां ऋज्वीं कर्त्तुं मनश्चक्रे, असुरक्षयात् पूर्वमेव ऋजुं करिष्यतीत्यर्थः । मन इच्छाम् । कुतः ? इत्याह—दर्शयन्नित्यादि । दर्शने फलं दर्शयन् मद्दर्शनानन्तरं मदुक्तस्य वैरूप्यं न स्थातुमर्हति, तत् किं विलम्बेन सम्प्रत्येवामुं ऋजुं करिष्य इति मनश्चक्रे । कारणे सत्यपि कार्यमेवाग्रे नाशयामासेत्यर्थः ॥ ७ ॥ सा तदेत्यादि । मुकुन्दस्य स्पर्शनात् सद्यः प्रमदोत्तमा लक्ष्मीस्वरूपा बभूव केवलं कुब्जत्वैव गतेति न, अपि तु भगवदुपभोग्ययोग्यता च बभूवेत्यर्थः ॥ ८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

दर्शयन् दर्शने फलमिति—वस्तुतस्तु कैर्न दृष्टोऽयम्, तत् किमिदमुच्यते ? तर्हि सतात्पर्यकमिदम् । इयं मद्भक्ता मद्दर्शनं यावद् विरूपैवासीत्, इदानीं विरूपत्वमस्या न योग्येति स्वदर्शने फलं दर्शयन् न केवलं वैरूप्य-निरासः फलम्, फलन्तु भोग्यत्वेन स्वीकारः, अतस्तद् योग्यता हेतुक ऋजुकरणमिति ॥ ६–८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्ववर्णेतरेण कृष्णरामयोवर्णाभ्वामितरेण पीतवर्णेन श्यामवर्णन च शोभितुं शीलं यस्य तेन संप्राप्तः परभागः भूषण-भूषणाङ्गमिति न्यायेन परमोत्कर्षो येन तेन ॥ ५–६ ॥ तस्या प्रपदेः पादाग्रद्वयं पाद्भ्ययापीड्य द्वे अङ्गुल्यावुत्ताने उन्नते यस्मिन् तेन पाणिना चिबुके मुखस्याधोभागे धृत्वा अध्यात्मं देहमुन्नमयामास ॥ ७ ॥ तदैव ऋजु समानमङ्गं यस्याः सा ॥८–९॥

गूढार्थदीपिनी

ततः तेन । तृतीयार्थे तसिः । रामकृष्णवर्णाभ्यामितरः पीतादिवर्णः । परभागः नाभेरुपरितनोः भागः । नु इति पृथक् छेदः । अन्यथा सन्धिरार्षः ॥ ५ ॥ ऋज्वीम् अवक्राम् ॥ ६ ॥ प्रपदे पदाग्रद्वयन् । द्वे अङ्गुल्यौ उन्नते यस्मिन् तेन । पाणिना आत्मानं जीवमधिकृत्य वर्तमानम् अध्यात्मं देहम् उदनीनमत् उर्ध्वमाकृष्टवान् ॥ ७ ॥ ऋजु अवक्रम् अतएव समानमङ्गं यस्याः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्ववर्णाभ्यां सितासिताभ्यामितरेतरवणन शोभितुं शीलं यस्य तेन सम्प्राप्तः परः सर्वतः उत्कृष्टः भागः रामकृष्णविग्रहरूप आश्रयो येन तेन अङ्गरागेणानुरञ्जितौ शुशुभाते ॥ ५–६ ॥ अच्युतः श्रीकृष्णः स्वपद्भ्यां कुब्जायाः प्रपदे पादाग्रे आक्रम्य द्वे अङ्गुल्यौ उत्ताने उन्नते यस्मिन् तेन पाणिना चिबुके प्रगृह्य अध्यात्मं शरीरम् उदनीनमत् उन्नमयामास ॥ ७ ॥ तदा मुकुन्दस्य स्पर्शनात् सा ऋजुसमानमङ्गं यस्या सा बृहत्यौ श्रोणी पयोधरौ च यस्याः सा सद्यः प्रमदोत्तमा बभूव ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ततस्तौ रामकृष्णौ सुवर्णेतरशोभिना सुवर्णादितरद्रजतं तद्वच्छोभाऽस्यास्तीति तदतिशुभ्रेणेत्यर्थः। स्ववर्णेतरशोभिनेति पाठे स्ववर्णौ सितासितवर्णौ ताभ्यामितरेण पीतेन केशरकुङ्कुमादिमिश्रेण शोभाऽस्यास्तीति व्याकुर्वन्ति। सम्प्राप्तापरभागेन सम्प्राप्तः परभागो यस्य कल्पस्तद्भिन्नो भागोऽपरभागो येन तेन। सम्प्राप्तपरभागेनेति पाठे सम्प्राप्तः परो नाभेदूर्ध्वतनो भागो येन तेनेत्यर्थः। अनुरञ्जितौ शुशुभाते। सम्प्राप्तापरभागेनेत्यत्र मध्ये विद्यमाननञः पूर्वमन्वयः। तथा चासम्प्राप्तपरभागेनेति पद सम्पत्तिः। असम्प्राप्तः परस्य कंसस्य भागो येन स इति वा ॥ ५ ॥ दर्शने स्वस्य दर्शयंस्त्रिवक्रां ग्रीवोरःकटितटानि वक्राणि यस्याः सेति त्रिवक्रा रुचिराननाम्। इदं च ऋज्वीकरणकारणम्। ऋज्वीं कर्तुं मनश्चक्रे ॥६॥ पद्भ्यां स्वपदाभ्यां तस्याः प्रपदे आक्रम्य। प्रह्वे इति पिङ्गलनागसूत्रात्प्रे परतः सतिभ्यो न गुरुरिति न छन्दोभङ्गः। द्व्यङ्गुलं गतम्। उत्तानमूर्ध्वीकृतं यस्य स पाणिस्तेन चुबुके हनुप्रदेशे प्रगृह्यास्यमुदनीनयदुन्नमयामास ॥ ७ ॥ सा तदैव ऋजु समानमङ्गं यस्याः सा बृहन्त्यौ चेति बृहन्तः श्रोणी च पयोधरौ च ते यस्याः सा मुकुन्दस्पर्शात्सद्यः प्रमदोत्तमा बभूव ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो भगवतः त्रिविधोऽप्यलङ्कारो ज्ञात इत्याह। ततस्ताविति। स्ववर्णात् शुक्लनीलात् इतरो यः पीतो वर्णः तेन शोभायुक्तेन अङ्गरागेण तावुभावपि शुशुभाते स्वरूपतः शोभाकर्तृत्वं वारयति। सम्प्राप्तपरभागेनेति। सम्यक्प्राप्तः परो नाभेरूर्ध्वभागो येनाङ्गरागेण नाभेरूर्ध्वं सर्थत्रैव कण्ठपर्यन्तं व्याप्तमनुलेपनं यथा वस्त्राणां मालादीनां वा शोभा नापगता भवति तथा प्राप्तिः सम्यक् प्राप्तिः ननु वस्त्रादिघर्षणेन स्वतो वा तदपगमे कथं शोभा प्रतिष्ठिता स्यादत आह। अनुरञ्जिताविति। माञ्जिष्ठादिना वस्त्रमिव तेन रागयुक्तौ चातौ प्रीतौ वा ॥५॥ ततो भगवान् वाक्यं कृतमिति किञ्चित्फलं तदानीमेवाग्रिमफलसाधकं कर्त्तुमारब्धवानित्याह। प्रसन्न इति। तस्याः कृतं शोभातिशयं ज्ञात्वा प्रसन्नो जातः भगवांश्च सर्वफलदानसमर्थः तथाप्यादौ दोषो दूरीकर्तव्य इति दोषमेव दूरीकृतवान् तदर्थमाह। कुब्जामिति। न केवलं कुब्जत्वमात्रं किं तु त्रिवक्रां ग्रीवापादौ मध्यमिति मुखे वक्रतन्माशङ्क्य तद्व्यावृत्त्यर्थमाह। रुचिरमाननं यस्याः ऋज्वीं कुब्जतां वक्रत्वं च दूरीकरिष्यामीति मनश्चक्रे ब्रह्मसृष्टौ सा तथाभूतेवेति मूलेच्छाया अभावात् नूतनं मनः कर्तव्यं राजसा ह्यतिकठिना इति तेषामर्थे नूतनमपि करोतीति ज्ञापयति। नन्वेतदङ्गरागदानफलं तथा सति शास्त्रविरुद्धमित्याशङ्क्याह। दर्शने फलं दर्शयन्निति ॥ ६ ॥ आक्रम्येति। तस्याः पादाग्रद्वयं स्वस्य पद्भ्यामाक्रम्य पृष्ठभोग हस्तं दत्त्वा द्व्यङ्गुलोत्तानपाणिना कनिष्ठानामिके सङ्कोच्य मध्य मादेशिनीद्वयमुत्तानं विधाय चिबुकाधो गृहीत्वा अध्यात्मं तस्य शरीरमुदनीनमत् ऊर्ध्वं नीतवान् ननु स्त्रीस्पर्शे भावान्तरोत्पत्तेरावश्यकत्वात् कथमव्यग्र एवं कृतवानित्याह। अच्युत इति। अच्युतत्वादेव तामपि नावयवशश्च्युतां कृतवान् किं त्वपेक्षितप्रकारेणैव समां चक्रे भगवान् प्रकारान्तरेणापि ऋज्वीं करोति तथा सा यान्ती स्थितेति तस्यै काममोक्षावेव दातुं द्वे एवाङ्गुल्यौ उत्ताने कृते अङ्गुष्ठस्य तु सर्वसमत्वात् न योजनम् ॥ ७ ॥ एवं कौतुकमिव वस्त्रपुत्तलिकावत्सऋजींचकारभगवत्स्पर्शपर्यन्तमेव तथात्वमिति स्थितिस्थापक संस्कारेण पूर्ववदेव माभवत्त्विति भगवता परित्यक्ता परित्यक्तामपि तां वर्णयति। सा तदेति। सा त्रिवक्रापि तदैव ऋजु समानं चाङ्गं यस्यास्तदृशी जाता ननु कुब्जभोगे ये अवयवाः सहवः स्थिताः ते चेत्तदुदरे प्रविशन्ति तदा कृशोदरीत्वं भज्येत अथापगच्छेयुः तदेकदेशनाशात् अच्युतस्पर्शः न युक्तो भवतीत्याशङ्क्याह। बृहच्छ्रोणिपयोधरेति। श्रोण्योः पयोधरयोश्च ते भागाः प्रविष्टा अतो भोगोपकारायैव जाताः किं च मुकुन्दो मोक्षदाता सर्वेषामेव सर्वावस्थां त्याजयित्वा स्वानन्दं प्रापयति। तथा तस्या अपि पूर्वावस्थां दूरीकृत्य लक्ष्मीसमानावस्थां प्रापितवान् यदाह। मुकुन्दस्पर्शनात्सद्य एव प्रमदोत्तमा जाता ॥ ८ ॥

श्रीसुबोधिनी-सार

ततोऽनंतरं स्ववर्णाभ्यां कृष्णश्वेताभ्यामितरः पीतवर्णस्तेन शोभिनांऽगरागेण परभाग नाभेरुपरितनप्रदेशं प्राप्त इति प्राप्तपरभागस्तेनानुरंजितौ द्वौ रेजतुः ॥ ५ ॥ भगवान् प्रसन्नः सुमुखो त्रिवक्रां कुब्जां ऋज्वीं सरलां कर्त्तुं मनो दधौ स्वदर्शने फलं दर्शयन् ॥ ६ ॥ तस्याः प्रपदेः पादाग्रभागे पद्भ्यामाक्रम्य द्वे अगुल्यौ उत्ताने उन्नते यस्मिंस्तेन पाणिना चुबुके मुखस्याधोभागे प्रगृह्य धृत्वाच्युतः श्रीकृष्णोऽध्यात्मं देहं सरलमकृत ॥ ८ ॥ तदा तत्क्षणम् ऋजु अवक्रं समानमंगं यस्याः सा वृहत्यौ श्रोणी पयोधरौ स्तनौ च यस्या सा मुकुन्दस्य स्पर्शनात्सद्यः प्रमदोत्तमा स्त्रीवरा बभूव ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च स्ववर्णेतरशोभिना रामकृष्णयोः सितासितवर्णाभ्यां इतरौ रक्तपीतौ वर्णौ ताभ्यां शोभितुं शीलमस्य तेन सम्प्राप्तपरभागेन सम्प्राप्तः परो नाभेरुपरितनो भागो येन तेन अङ्गरागेणानुरञ्जितौ तौ रामकृष्णौ शुशुभाते ॥ ५ ॥ स्वदर्शने फलं लोकस्य दर्शयन् अङ्गरागार्पणभक्त्या प्रसन्नो भगवांस्तां त्रिवक्रां कुब्जामृज्वीमवक्रां कर्तुं मनश्चक्रे। तस्या योग्यतां

सूचयन्नाह—रुचिराननामिति ॥ ६ ॥ ऋजुकरणप्रकारमाह—पद्भ्यामिति । तस्याः प्रपदे पादाग्रद्वयं निजपद्भ्यामाक्रम्य आक्रमणेनावष्टभ्य द्वे अङ्गुली उत्ताने उन्नते यस्मिंस्तेन पाणिना तस्याश्चुबुके मुखस्याधोभागे अच्युतः कृष्णः प्रगृह्य अध्यात्मं देहं उदनीनमत् उन्नमयामास ॥ ७ ॥ सा कुब्जा मुकुन्दस्पर्शनादेव हेतोस्तदा सद्य एव ऋजु समानं योग्यावयवमङ्गं यस्या सा बृहत्यौ श्रोणी पयोधरौ च यस्यास्तथाभूता प्रमदोत्तमा बभूव ॥ ८ ॥

अन्वितार्थप्रकाशिका

तत इति । ततश्च स्ववर्णेतरशोभिना रामकृष्णयोः सितासितवर्णाभ्याम् इतरौ श्यामपीतौ वर्णौ ताभ्यां शोभितुं शीलमस्य तेन सम्प्राप्तपरभागेन सम्प्राप्तः परो नाभेरुपरितनो भागो येन सम्प्राप्तः परभागः शोभातिशयो येनेति वा तेन अङ्गरागेणानुरञ्जितौ तौ रामकृष्णौ शुशुभाते । सन्धिरार्षः । नु इति च्छेदो वा । रञ्जितौ नु वस्तुतस्तु स्वत एव शुशुभाते इत्यर्थः ॥ ५ ॥ प्रसन्न इति । स्वदर्शने सद्यः फलं लोकस्य दर्शयन् अङ्गरागार्पणभक्त्या प्रसन्नो भगवान् रुचिराननां त्रिवक्रां कुब्जामृज्वीमवक्रां कर्तुं मनश्चक्रे ॥ ६ ॥ पद्भ्यामिति । अच्युतः कृष्णः तस्या प्रपदे पादाग्रद्वयं निजपद्भ्यामाक्रम्य आक्रमणेनावष्टभ्य द्वे अङ्गुली उत्ताने उन्नते यस्मिंस्तेन पाणिना तस्याश्चिबुके मुखस्याधोभागे प्रगृह्य अध्यात्मं देहम् उदनीनमत् उन्नमयामास ॥ ७ ॥ सेति । सा कुब्जा मुकुन्दस्पर्शनादेव हेतोः चिबुकग्रहणादि तु विनोदमात्रम् । तदा सद्य एव ऋजु समानं योग्यावयवमङ्गं यस्याः सा बृहत्यौ श्रोणी पयोधरो च यस्यास्तथाभूता प्रमदोत्तमा बभूव ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्ववर्णेतर शोभिना स्वयोर्बलगोविंदयोर्वर्णाभ्याश्वेत शामाभ्यामितरो नीलपीतादिवर्णस्तेन शोभितुं शीलं यस्य तेन संप्राप्तः परोनाभ्यु परिष्टो भागो येन तेन अंगरागेण चंदन लेपेन अनुरंजितावनुलिप्तौ शुशुभातेऽनुरंजिताविति संधिरार्षः ॥ ५ ॥ स्वदर्शने सद्यः फलं दर्शयन् ॥ ६ ॥ तस्याः प्रपदे पादाग्र द्वयं पद्भयां स्वपादाग्राभ्यामाक्रम्य आपीड्य द्वे अंगुल्यौ मध्यमा तर्जनौ उत्तान् ॥ उन्नते यस्मिन् तेन पाणिना चिबुके वक्रस्याधः प्रदेशे प्रगृह्य अध्यात्मं शरारीमुदनीनमत् उन्नमयां चकार ॥ ७ ॥ तदैवरुज्जुसमानं च अंग यस्याः सावृहत्पौश्रोणिपयोधरौ च यस्याः सा श्रोणीकटिपश्चाद्भागौ ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः, स्वयो रामकृष्णयोर्वर्णाभ्यामितरः पीतादिर्वर्णः तेन शोभितुं शीलं यस्य तेन, यद्वा स्वस्याङ्गरागस्य यो वर्णः लोहितवर्णस्तस्मादितरौ यौ वर्णौ सितकृष्णौ ताभ्यां शोभी तेन, अत एव संप्राप्तः परभागः शोभातिशयो येन तेन, अङ्गरागेण, अनुरञ्जितौ, तौ रामकृष्णौ, शुशुभाते ॥ ५ ॥ प्रसन्न इति ॥ दर्शने स्वदर्शने, फलं तस्याः दर्शयन्, प्रसन्नः भगवान्, रुचिराननां सुन्दरास्यां, त्रिवक्रां कुब्जां ऋज्वीं कर्त्तुं अवक्रां विधातुमित्यर्थः । मनः चक्रे ॥ ६ ॥ ऋजुकरणप्रकारमाह ॥ पद्भ्यामिति ॥ अच्युतः श्रीकृष्णः, तस्याः कुब्जायाः, प्रपदे पादाग्रद्वयं, पद्भ्यां स्वपादाभ्यां, आक्रम्य आपीड्य, आक्रमणेनावष्टभ्येत्यर्थः । द्वे अङ्गुली उत्ताने उन्नते यस्मिंस्तथाभूतो यः पाणिः स्वहस्तस्तेन, चिबुके मुखस्याधोभागे, हन्वधःप्रदेशे इत्यर्थः । प्रगृह्य गृहीत्वा, अध्यात्मं तस्या देहं, उदनीनमत्, उन्नमयामास ॥ ७ ॥ सेति ॥ मुकुन्दस्पर्शनात् सा कुब्जा तदा तस्मिन् क्षणे एव, ऋजु सरलं समानमनुरूपं चाङ्गं यस्याः साः, बृहन्त्यौ श्रोणीपयोधरौ च यस्याः सा, प्रमदोत्तमा सद्यः एव, बभूव ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततस्ताविति : १०.४२.५.

व्यक्तसत्त्वगुणश्रीको यदेशः स्याद्भवाध्वनि । वीक्षणार्हः प्रसन्नास्यः शुभदृक् साध्विदं तदा ॥ २१ ॥

प्रसन्न इति : १०.४२.६.

सत्यङ्गरागाकलने परात्मा करोति सङ्कल्पमिति श्रुतं तत् ।
युक्तं ततस्तां सरलां विधातुं सक्ताङ्गरागश्चकमे मुकुन्दः ॥ २२ ॥
नेशस्यास्ति निसर्गतः किमपि वा रागादिकं जीववत् किन्तु स्वीयजनावनाय भवति स्वीयेच्छयेच्छाश्रितः ।
एतत्स्पष्टमभूद्यदत्र पथि तद्व्रव्यप्रदस्तत्करात् स्वीकुर्वन् रुचिराङ्गरागमकरोत् कर्तुं तथा तां मनः ॥ २२ ॥
तदङ्गरागभागपि प्रकाममीश्वरोऽप्यहं न चेत्करोमि सुन्दरं त्वदङ्गमङ्गनोचितम् ।
तदत्र शर्म लब्ध ये न कोऽपि रागमर्पयेन्ममापि किं महत्त्वमित्यरं तथेहते स्म सः । २४ ॥
सकलार्थदोऽपि हरिरेष यदैषीत्कुटिलाङ्गमेव सरलं प्रविधातुम् ।
स्फुटमेव तेन समभूदिह भक्तलषितेष्टपूर्तिकरणं व्रतमैशम् ॥ २५ ॥
भवतिप्रधानपद शुद्धिरनर्घ्या न विनाङ्गशुद्धिमिति बुद्धिमदीड्यः ।
उचितं तदङ्गमृजुकर्तुमिहैषीत् सकल प्रधानपद कामविशुद्ध्यै ॥ २६ ॥

पद्भ्यामाक्रम्येति : १०.४२.७.

पादसंपीडनं शूद्रधर्म इत्याकलय्य सः । तदा तत्प्रपदे पद्भ्यां माधवः किमपीडयत् ॥ २७ ॥
ज्ञात्वा कामस्थितिं तस्याः प्रपदे तद्दिने प्रभुः । तदुद्बोधाय विज्ञातानङ्गस्थिति रमर्दयत् ॥ २८ ॥
वीरोऽस्मि वीरवन्द्योऽस्मि शूरवंशोद्भवोऽपि तत् । योग्यश्चरणसंमर्दो मत्पदेतमिति व्यधात् ॥ २९ ॥
यदनया कृतमङ्गविलेपनं सकलभूमिसमर्पणमस्य मे । फलतया प्रतिमूल्यमिवोचितं प्रभुरधादिति पादयुगार्पणम् ॥ ३० ॥
तस्याः पादद्वये स्वीयपादद्वयसमर्पणात् । सम्पूर्णाङ्गीं ध्रुवमिमां करोमीति विबोधितम् ॥ ३१ ॥
अधोगतेरर्दनमेव पद्भ्यामनुग्रहं चोर्ध्वगतेः करेण । करोमिं भूमाविति बोधयन्स द्वाभ्यां द्वयं तत्किमधात्सलीलम् ॥ ३२ ॥
नैतन्ममोपकृतितुल्यमतो ग्रहीष्ये नेदं ऋजूभवनमित्यनुचिन्त्य चेतः ।
नैवं कुरुष्व कुटिलं त्विति सूचयन्किं वक्रत्वभङ्गकृदसौ चिबुकं दधार ॥ ३३ ॥
कंसस्यैव तदम्बराणि रजकोढान्यङ्गरागोऽप्ययं तुल्यौ तत्परिचारकावपि युवां तुल्योऽहमर्थी द्वयो ।
तत्रासीत् सुदुरुक्तिरत्रभवती सर्वाङ्गरागप्रदा सारल्यं त्वयि सिद्धमेव चिबुकोद्धृत्या शशंसाच्युतः ॥ ३४ ॥
त्वद्रूपमोहितधिया हि मयाऽङ्गरागस्तुभ्यं ह्यदायि निखिलोऽपि तदेतदागः ।
ज्ञात्वा करिष्यति नृपः किमु वेति भीतिं नैवावहेत्यभयदश्चिबुकं दधौ किम् ॥ ३५ ॥
द्विषत्पुरगतां पुरा प्रियतमामवापं क्षणादहं हनुमदाश्रयादिति किमु स्मरन् श्रीपतिः ।
जिघृक्षुरचिराच्छ्रियं रिपुपुरस्थितामादधात् तदा हनुमदाश्रयं तदधिकाननप्रेक्षकः ॥ ३६ ॥
वासः स्रगाभरणचन्दन-धारणेन कीदृङ् नवीनमतिसौष्ठवमागतं मे ।
द्रष्टुं तदास्यमुकुरे विमलेऽब्जशोभे तन्मूलदण्डचिबुकं करतो दधौ किम् ॥ ३७ ॥
मुख्याङ्गसेवनमृते परमङ्गजातं स्वां वक्रतां त्यजति नेति विभाव्य नीतिम् ।
कर्तुं तदङ्गमखिलं सरलं परात्मा तन्मुख्यमङ्गमभजच्चिबुकं करेण ॥ ३८ ॥
यत्प्राक् चकार भवती वनवासदानं मह्यं मयापि गणितं भृशमिष्टकृत्तत् ।
प्राग्भुक्तवन्यवसतेर्न ममाऽधुना तु देयं मुधेति सदयं चिबुकं दधार ॥ ३९ ॥
रसापहरणं पुरा कृतमनागसोऽस्य प्रभोर्मया कुटिलया फलं तदुपभुज्यतेऽस्य स्फुटम् ।
विधाय सुरसार्पणं पुनरनामया स्यामिति हृदि स्थितमवेदि ते चिबुकमेतदर्थं दधे ॥ ४० ॥
कराम्बुजं येन पुराऽवलम्बितं श्रियो गजेन्द्रस्य च सोऽयमुज्ज्वलः ।
मुखाम्बुजं काङ्क्षति ते समुत्सुकः करो मयेत्याशयतस्तथा दधे ॥ ४१ ॥
मह्यं प्राग् बलिना रसार्पणमिह प्राकारि जातः करस्तेनार्द्रो न शरीरमत्र तु रसस्पर्शेन सार्द्रं वपुः ।
तद्दातृत्वगुणा त्वमेवमहमप्यर्थी च सत्यस्तवैवेति द्व्यङ्गुलचिह्नितं विशदयन्नुत्तानपाणिं व्यधात् ॥ ४२ ॥
एकत्र कोटौ ता गोप्यस्त्वमेकाऽन्यत्र तत्समा । सूचयन्निति तत्किं वा दध्रे द्व्यङ्गुलपाणिना ॥ ४३ ॥

सा तदर्ज्विति १०.४२.८.

मत्पादभाजां न सतामपीह संदर्शनं भुव्यफलं क्वचित् स्यात् ।
तत्स्वामिनो मे सकलर्धिभाजः कथं तथा स्यादिति तत्तथाऽधात् ॥ ४४ ॥
पुत्रेण यत्कृतमसाधु तदस्ततन्द्रः कुर्यात् पिता भुवि यथा भविताऽनवद्यम् ।
युक्तं विरञ्चिरचितं कुटिलाङ्गमस्याश्चक्रे ऋजु स्वकरतः स हि पद्मनाभः ॥ ४५ ॥
यन्नामस्मृतिरप्यस्मिन्मनोवाग्वक्रताऽपहृत् । किमत्र चित्रं तद्गात्रमवक्रं तत्करादभूत् ॥ ४६ ॥
मृदुभाषणाङ्गरागार्पणनिजकरतद्विलेपनत्रितयात् । तुष्टः श्रीशोऽप्यादात्तत्प्रतिनिधिवत्त्रिवक्रतापहृतिम् ॥ ४७ ॥
सदसदपि फलं वाऽऽप्नोत्यलं स्वस्वभावाज्जगति ननु जनुष्मान्नात्र हेतुः परेशः ।
स्फुटमिह रजको यद्वर्ष्मनाशं स्ववृत्त्या समलभत तथा सा दिव्यदेहं तु कुब्जा ॥ ४८ ॥

कृष्णप्रिया

उत्तम वस्त्र श्रेष्ठ मालायें एवं दिव्य गन्धलेपन राजाधिराज भगवान् के लिए योग्य है विषयी खल कंस के लिए योग्य नहीं इससे श्रीमथुरा में प्रवेश के साथ, ये तीनों श्रेष्ठ सामग्री को भगवान् को समर्पित किया, अब सर्वथा सुयोग्य श्याम वर्ण श्रीकृष्ण श्वेतवर्ण वलदेवजी को कुब्जाने कोमल कर कमलों से पीत एवं श्याम वर्ण का अङ्गराग एवं अनुलेपन लगाया, इससे विश्वको सौन्दर्य देने वाले भगवान की शोभा और बढ़ गई ॥ ५ ॥ कुब्जा की की हुई सेवा से प्रसन्न भगवान् श्रीकृष्ण चन्द्र ने अपनी प्रसन्नता एवं दर्शन का फल दिखाने के लिए गर्दन, छाती एवं कमर तीनों भागों से टेढ़ी मनोहर मुखवाली उस त्रिवक्रा

सैरन्ध्री को सरलांगी बनाने का विचार किया ॥ ६ ॥ राजन् परीक्षित् ! सर्वथा निर्विकार श्रीअच्युत भगवान् ने कुब्जा के दोनों पैरों के अग्रभाग को अपने दोनों चरणों से दबाकर उसके पृष्ठ भाग पर अपना श्रीहस्त रखकर, अपने दूसरे श्रीहस्त की दो अंगुलियों को सिकोड़ कर मध्यम अंगुलियों को पसार कर कुब्जा की ठोडी को नीचे पकड़कर एक झटका लगाया ॥ ७ ॥ राजन् परीक्षित् मोक्ष दाता भगवान् मुकुन्द के मंगल स्पर्श से तत्क्षण सैरन्ध्री कुब्जा के सारे अंग अर्जुन वृक्ष के सीधे हो गए । कुब्जा स्थूल नितम्बा उन्नत पयोधरा सुन्दरी बन गई ॥ ८ ॥

ततो रूपगुणौदार्यसम्पन्ना प्राह केशवम् । उत्तरीयान्तमाकृष्य[1] स्मयन्ती जातहृच्छया ॥ ९ ॥
एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्सहे । त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ ॥ १० ॥
एवं स्त्रिया याच्यमानः कृष्णो रामस्य पश्यतः । मुखं वीक्ष्यानुगानां[2] च प्रहसंस्तामुवाचह ॥ ११ ॥
एष्यामि ते गृहं सुभ्रू: पुंसामाधिविकर्षणम्[3] । साधितार्थोऽगृहाणां नः पान्थानां त्वं परायणम् ॥ १२ ॥

कर्दमक्षमा

अन्वयः—ततः, रूपगुणौदार्य सम्पन्ना, जातहृच्छया, स्मयन्ती, उत्तरीयान्तम् , आकृष्य, केशवम् , प्राह ॥ ९ ॥ हे वीर ! एहि, गृहम्, यामः, इह, त्वाम् , त्यक्तुम् , न, उत्सहे, हे पुरुषर्षभ ? त्वया, उन्मथितचित्तायाः प्रसीद ॥ १० ॥ एवम् स्त्रिया, याचमानः, कृष्णः, पश्यतः, रामस्य, च, अनुगानाम् , मुखम् , वीक्ष्य, प्रहसन् , ह, ताम् , उवाच ॥ ११ ॥ हे सुभ्रु ! साधितार्थः, अहम् , पुंसाम् , आधिविकर्षणम् , ते, गृहम् , एष्यामि, अगृहाणाम पान्थानाम् , नः, त्वम् , परायणम् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आधिविकर्शनं मनःपीडाशमनम् । कंसवधेन स्वयं साथितोर्थः सुहृदा प्रयोजनं येन सः । अगृहाणामकृतदाराणां पांथानां प्रवासिनां परमयनमाश्रयस्त्वम् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः प्रमदोत्तमाभावानन्तरम् । उत्तरीयांतं दुकूलप्रान्तम् । स्मयन्ती ईषद्धसन्ती । जातहृच्छयोद्दीप्तकामा । ततस्तत्संस्पर्शनादेव रूपगुणयोरौदार्यं महत्त्वं, तेन सम्पन्ना सतीति प्रमदोत्तमात्वमेव दर्शितमतो योग्यताप्राप्त्या जातहृच्छयाविर्भूतकामा । स्मयो मदः स्मितं वा, तत्सहितं यथा स्यात्तथा । 'स्मयन्ती' इति पाठे स्मयस्माना । प्रकर्षेण कटाक्षवीक्षणादिना आह । तदुक्तं श्रीपराशरेण—“विलासललितं प्राह प्रेमगर्भभरालसम्” इति ॥ ९ ॥ वीरेति रतियुद्धशूर । इहाधुना । त्वया कारणेन उन्मथितं विलोडितं चित्तं यस्याः । पुरुषेषु श्रेष्ठत्वात्त्वां विनाऽन्यो न मे रोचत इति सम्बुद्ध्यभिप्रायः । वीरेति— गिजाभावोद्दीपनगुणविशेषविशिष्टतया सम्बोधयति श्लेषेण, हे अभीष्टपूरणसमर्थ मम गृहं त्वमेहि । ननु निजसंगिन इमान्विहाय कथमेकाकी आयायामिति चेत्तत्राह—त्वमेतेऽहं च सर्वे यामः । ननु दिनांतरे आगमिष्यामस्तत्राह—नेति । इह राजमार्गे त्युक्तुं न शक्नोमि वासस्थानानिश्चयेन पुनर्दुष्प्रापत्वात् । अतो गृहमेव नेष्यामीत्यर्थः । यद्वा-तर्हि ज्येष्ठोऽयं सखीनामेको वा नीयतां तत्राह—नेति । त्वय्येव मदपेक्षा न त्वस्मिन्निति भावः । नन्वीदृशमत्र ते धाष्ट्यं न योग्यं तत्राह – त्वयेति । अतो मम न कोऽपि दोष इति भावः । अत एव प्रसीद स्वयमेवानुग्रहं कुरु । त्वत्प्रसादे सति धाष्ट्यर्यादपि न बिभेमीति भावः । तत्र हेतुमाह—पुरुषर्षभ हे पुरुषोत्तमेति । किञ्च-निजपुरुषर्षभत्वापेक्षया त्वयापि नाहं त्यक्तुं योग्येति भावः ॥ १० ॥ एवमित्थम् । अनुगानां गोपानाम् । ह स्फुटम् । तां कुब्जाम् । रामस्य पश्यतः, अनुगानां च पश्यतां तत्तत्साक्षात्स्त्रिया कामिन्या याच्यमानः रहस्यं किमपि प्रार्थ्यमानः, अत एव च तस्य तेषाञ्च मुखं वीक्ष्य प्रहसन्कौतुकेनोच्चैर्हसन् । तथा चोक्तं श्रीवैशंपायनेन—“तौ जातहर्षावन्योऽन्यं सतामाक्षेपमध्ययौ । वीक्ष्यमाणौ प्रहसितौ कुब्जायाः श्रुतविस्तरौ ।” इति । ह स्फुटमेवोवाच । तथा तच्च श्रीरामादीन्प्रति एतां वञ्चयामीति व्यंजनाय, तां प्रति तु प्रतिजानाम्येवैतदिति बोधनायेति भावः । ॥ ११ ॥ पुंसां तरुणानाम् । किञ्चिदत्यावश्यकं झटिति करणीयं मेऽस्तीत्याह—कंसवधेनेति । त्वं तु सर्वथाऽत्याज्येत्याह—अगृहाणां वनवासिनाम् । पांथानां मार्गत आगतानाम् । नोऽस्माकम् । अनेनासंगानामीश्वराणामस्माकं भक्ता एव पूजादिनाऽऽश्रयीभूता इति दर्शितम् । कुब्जां प्रति प्रियोऽयं मां स्वीकरोतीति, रामदीन्प्रति तु ग्राम्यां स्त्रियमिवायं कृष्णो वञ्चयतीति द्योतयन्नाह—एष्यामीति । पुंसामिति बहुवचनेन तां प्रति परिहासः । साधितार्थ इति कंसवधाद्यावश्यककृत्यं कृत्वा निश्चिंतो भूत्वेति समयसंकेतश्च व्यञ्जितः । अगृहाणाम् “न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते” इति न्यायेनाकृतदाराणाम् । नोऽस्माकमिति राजपुत्रत्वादात्मन आदरेण खल्वेकत्वेऽपि सा बहुवचनं मन्यते स्म । पांथानामिति—गोकुले स्वनगरे मम गोप्योऽनुरागिण्यो वर्तते तथाऽत्र पुर्यामपरिचितायां न काश्चन, केवलं त्वमेकैवानुरागिणी प्राप्तेति

---

[1] सस्मयं–विज. । [2] नुगानां च–वीर. विज.; गोपानां–मूले–श्रीधर. । [3] कर्शनम–श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

तां प्रत्यनुरागश्च व्यञ्जितः। रामादींस्तु बहुवचनेनाधिपदेन च प्रयुक्तेन कृष्ण एनामस्वीकुर्वन्सामान्यवनितालक्षणगालिप्रदानेनैनामनभिज्ञां तिरस्करोतीति प्रत्याययामास ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तत्स्पर्शनादेव रूपगुणयोरौदार्य्यं महत्त्वं तेन सम्पन्ना सती इति प्रमदोत्तमात्वमेव दर्शितम अतो योग्यताप्राप्त्या जाताहृच्छया प्रकटीभूतकामा स्मयो मदः स्मितं वा तत्सहितं यथा स्यात्तथा स्मयन्तीति पाठे स्मयमाना प्रकर्षेण कटाक्षवीक्षणादिना आह। तदुक्तं श्रीपराशरेण "विलासललितं प्राह प्रेमगर्भभरालस"मिति ॥ ९ ॥ वीरेति निजभावोद्दीपनगुणविशेषविशिष्टतया सम्बोधयति श्लेषेण हे अभीष्टपूरणसमर्थ! मम गृहं त्वमेहि। ननु निजसङ्गिन इमान् विहाय कथमेकाकी यायामिति चेत्तत्राह त्वमेतिऽहञ्च सर्वे यामः। ननु दिनान्तरे गमिष्यामः तत्राह। नेति। इह राजमार्गे त्यक्तुं न शक्नोमि वासस्थानानिश्चयेन पुनर्दुष्प्रपत्वात्। अतो गृहमेव नेष्यामीत्यर्थः। यद्वा तर्हि ज्येष्ठोऽयंसखीनामेको वा नीयतां तत्राह। नेति। त्वय्येव मदपेक्षा नत्वन्यस्मिन्निति भावः। नन्वीदृशमत्र ते धाष्टर्यं न योग्यं तत्राह त्वयेति। अतो मम न कोऽपि दोष इति भावः। अतएव प्रसीद स्वयमेवानुग्रहं कुरु। त्वत्प्रसादे सति धाष्टर्यादपि न बिभेमीति भावः। तत्र हेतुमाह। पुरुषर्षभ! हे पुरुषोत्तमेति। किञ्च। निजपुरुषर्षभतापेक्षया त्वयापि नाहं त्यक्तुं योग्येति भावः ॥ १० ॥ रामस्य पश्यतः अनुगानाञ्च पश्यतां तत्तत् साक्षात् स्त्रिया कामिन्या याच्यमानः रहस्यं किमपि प्रार्थ्यमानः अतएव तस्य तेषाञ्च मुखं वीक्ष्य प्रहसन् कौतुकेनोच्चैर्हसन। तथाचोक्तम्। श्रीवैशम्पायनेन "तौ जातहर्षावन्योऽन्यं सतामाक्षेपमव्ययौ। वीक्ष्यमाणौ प्रहसितौ कुब्जायाः श्रुतविस्तरा"विति। ह स्फुटमेवोवाच। तथा तच श्रीरामादीन् प्रति एतां वञ्चयामीति व्यञ्जनाय तां प्रति तु प्रतिजानाम्येवैतदिति बोधनायेति भावः ॥ ११ ॥ तथैव तद्विषयकस्वकाममपि सूचयति। एष्यामीति। अगृहाणामित्यादौ च बहुवचनादिना स्वस्य साधारण्यानन्याश्रयत्वाभ्यां पूर्ववदेव व्यञ्जना ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततस्तत्स्पर्शनादेव रूप-गुणयोरौदार्य्यं महत्त्वम्; यद्वा, रूपगुणौ ओदार्य्यञ्च दाक्षिण्यं तैः सम्पन्ना सती, इति प्रमदोत्तमात्वमेव दर्शितम्। तत्र तदनन्तरं प्राहेति वान्वयः। तादृशप्रग्रहणं प्रमदोत्तमात्वञ्च विना। वक्तुमयोग्यत्वात्। प्रकर्षेण कटाक्षवीक्षणादिना आह; तदुक्तं श्रीपराशरेण (वि० पु० ५।२०।११)—'विलास-ललितं प्राह प्रेमगर्भभरालसम्' इति। स्मयो मदः स्मितं वा तेन सहितं यथा स्यात्; 'स्मयन्ती' इति पाठे स्मयमाना; यतो जातः प्रकटतां प्राप्तो हृच्छयश्चिरं हृदि सुप्तवन्निश्चतलया वर्त्तमानः कामो यस्याः सा; एवं पूर्वंत एव तस्याः कामो वर्त्तत इति कामुकी त्वं ज्ञेयम् ॥९॥ वीर! हे अभीष्टपूरणसमर्थ! मम गृहं त्वमेहि। ननु निजसंगिन इमान् विहाय कथमेकाकी यायामिति चेत्तत्राह—त्वमेतेऽहञ्च सर्वे यामः। ननु दिनान्तरे गमिष्यामः, तत्राह—नेति। इह पुर्य्यां वर्त्तमानम्; यद्वा, अस्मिन्, राजमार्गे त्यक्तुं न शक्नोमि, वासस्थानानिश्चयेन पुनर्दुष्प्रापत्वात्, अतो गृहमेव नेष्यामीत्यर्थः। यद्वा, तर्हि ज्येष्ठोऽयं सखीनामेको वा नीयताम्? तत्राह—नेति। त्वय्येव मदपेक्षा, न त्वन्यस्मिन्निति भावः ननु, ईदृशमत्र ते धाष्टर्यं न योग्यम्, तत्राह त्वयेति। उच्चैर्मथितं विलोडितं समन्तात् क्षोभितं चित्तं यस्यास्तस्याः, अतोऽत्र मम न कोऽपि दोष इति भावः। अतएव प्रसीद, स्वयमेवानुग्रहं कुरु, त्वत्प्रसादे सति धाष्टर्यादेरपि न बिभेमीति भावः। तत्र हेतुमाह—पुरुषर्षभ! हे पुरुषोत्तमेति। निजपुरुषर्षभतापेक्षया त्वयामपि नाहं त्यक्तुं योग्येति भावः। यद्वा, पुरुषर्षभत्वात्तव योग्या योषिच्छ्रेष्ठैव, न त्वहं मध्यमा, तथापि त्वयैवोन्मथितचित्तत्वान्मे प्रसीदेति ॥ १० ॥ रामस्य पश्यतः, अनुगानाञ्च पश्यतां तत्तत्साक्षात् स्त्रिया कामिन्या याच्यमानो रहस्यं किमपि स्फुटं प्रार्थ्यमानः, अतएव तस्य तेषाञ्च मुखं वीक्ष्य प्रहसन् कौतुकेनोच्चैर्हसन्; तथा चोक्तं श्रीवैशम्पायनेन (हरिवंशे विष्णु प० २७।३८)—'तौ जातहर्षावन्योऽन्यं सतालाक्षेपमव्ययौ। वीक्ष्यमाणौ प्रहसितौ कुब्जायाः श्रुतविस्तरौ ॥' इति; ह स्फुटमेवोवाच ॥ ११ ॥ सुभ्रूवति; सौन्दर्य्याभिव्यञ्जकसम्बोधनेन तद्विषयकस्वकाममपि सूचयति—अगृहाणां तत्रापि पान्थानाम्, बहुत्वं श्रीबलरामाद्यपेक्षया, सा च लज्जया साधारण्येन निजभावाद्याच्छादनाय। अन्यतैर्व्याख्यातम्। यद्वा, अगृहाणां त्यक्तनिजगृहाणाम्, अतः पान्थानामतोऽत्र चिरं स्थास्यतामस्माकं त्वमेव परमाश्रय इत्यर्थः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च रूपादिसम्पन्ना सती जातः हृच्छयः कामो यस्याः सा अतएव स्मयन्ती मुकुन्दमुत्तरीयाग्रमाकृष्य प्राह तत्र रूपं सौन्दर्यं गुणा यौवनादयः औदार्यं गत्यवलोकनादि श्रैष्ठ्यम् ॥ ९ ॥ उक्तिमेवाह। एहीति। हे वीर! अस्मद्गृहं प्रत्यागच्छ यामः गच्छामः इह त्वां त्यक्तुं नोत्सहे न शक्नोमि त्वयोन्मथितं क्षोभितं चित्तं यस्यास्तस्या मम प्रसीद हे पुरुषर्षभ! ॥ १० ॥ इत्थं तया स्त्रिया रामस्य पश्यतः सतः याच्यमानोऽपि भगवान् अनुगानां गोपानाञ्च चशब्दाद्रामस्य मुखमवलोक्य प्रहसन् तामुवाच ॥ ११ ॥ उक्तिमेवाह। एष्यामीति। हे सुभ्रु! साधितः कंसवधरूपोऽर्थः प्रयोजनं येन तथाभूतः पुंसामाधिविकर्षणं

कामप्रयुक्तमनःपीडाशमनं तव गृहं प्रत्यागमिष्यामि अगृहाणां न विद्यन्ते गृहाः अस्यां पुर्यां येषां तेषां पान्थानामस्माकं त्वमेव परायणमुपभोग्येत्यर्थः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उत्तरीयान्तमुत्तरीयवस्त्राञ्चलं सस्मयं समदं हृच्छयः कामः ॥ ९ ॥ त्वया कारणेन उन्मथितचित्तायाः विलोलितमनसः ॥ १० ॥ हेत्यनेनायमितिहासो लोके प्रवर्ततामिति सूचयंस्तामाहेति ज्ञाप्यत इति ॥ ११ ॥ तरुणानां पुंसामाधिविकर्शनं मनःपीडापरिहारनिमित्तं गृहमागमिष्यामि किन्तु किञ्चित्कार्यमस्तीत्याह। साधितार्थ इति। अर्थः कंसवधलक्षणः त्वं सर्वथा परिहारार्थो नेत्याह। अगृहाणामिति। अगृहाणां गृहरहितानां वनवासिनामित्यर्थः। पान्थानां पथिकानां नोऽस्माकं त्वं परायणमुत्तमाश्रयः अनेनासङ्गानामीश्वराणामस्माकं भक्ता एव पूजादिनाश्रयभूता इति दर्शितम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तदेव स्पष्टयति—ततो रूपगुणौदार्येत्यादि। रूपेण गुणैश्च औदार्येण सम्पन्ना। उत्तरीयान्ताकर्षणेन स्वसौभाग्यातिशयप्रकटनम्। जातहृच्छया जातमनोरथा ॥ ९ ॥ जातहृच्छयत्वं दर्शयति—एहीत्यादि। न त्वां त्यक्तुमुत्सहे न। त्वया परमकारुणिकेन परमप्रेमास्पदेनोन्मथितं चेतो यस्यास्तस्या मे प्रसीद। माऽत्र वाम्यं कृथाः। हे पुरुषर्षभ ! पुरुषोत्तम ॥ ११ ॥ भगवानपि तथैवाङ्गीकुर्वन्नाह - एष्यामीत्यादि। न इति स्वस्य गौरवापेक्षया बहुवचनम्। एष्यामीति प्रतिज्ञायामेकवचनात्। नः कीदृशानाम् अगृहानां गृहं शरीरं मानुष्यम्, तदुचितानां सच्चिदानन्दविग्रहाणां पुंसामन्तर्यामिणाम्—(भा० १०।३३।३५) "योऽन्तश्चरति सोऽध्यक्षः" इति प्रागुक्तः। अन्तर्यामिणामंशेनैव त्वमेवं प्रेरितासि, तदुचितमेवैष्यामि। आधिविकर्शनमिति क्रियाविशेषणम्। भक्त-विरह जन्यमानस पीड़ा खण्डनं भक्तायास्तव गृहगमनं ममेश्वरस्य नानुचितमित्यर्थः ॥ १२–३८ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

जातहृच्छया—जातमनोरथा ॥ ९ ॥ जातमनोरथत्वं दर्शयति—त्वयोन्मथित-चित्ताया इति त्वया न तु कामेन ॥ ११ ॥ 'नः' इति स्वस्य गौरवेण बहुत्वम्। अगृहं गृहं मानुष्यं शरीरम् तत्र हितानां सच्चिदानन्दविग्रहाणां पुंसामित्यत्रापि तथा अन्तर्यामिणामस्माकमित्यर्थः। आधि-विकर्शन भक्त विरहजन्या मानसी पीडा आधिस्तस्य कर्षणम् ॥ १२–३८ ॥

इति द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हे वीरेति। अन्ये धर्मवीराद्या भवन्ति त्वं तु स्त्रीजनधर्मध्वंसवीरो भवसीति भावः। ननु त्वमेहीत्यादिना भोजनार्थमेव मां निमन्त्रयसि किं तत्राह। न त्वां त्यक्तुमित्यादि। त्वदुक्त्या तु लोका इह राजमार्गे हसन्तः अन्यथा संभावयन्ति तस्मादेवं मावादीस्तत्राह। त्वयोन्मथितेति। तर्हि त्वया मच्चित्तं कथमुत्कर्षेण मथितमिति तवैवायं स्पर्शदोषो न ममेति भावः। सप्तम्यर्थे षष्ठी ॥ १० ॥ मुखं वीक्ष्येति। भो आर्य्य ! भोः सखायश्च किमधुनापि युष्माकं मुखानि हास्यार्णवे न विप्लुतानि पश्यत नेयं स्त्रीमूर्तिः किं तु हास्यरस एव युष्मान् कौतुकिनो ज्ञात्वा मिलितुमुपक्रमते मथुरापुर्या हास्यवैदग्धीयं वा स्व परिचाययतीति भावः ॥ ११ ॥ कुब्जां प्रति प्रियोऽयं मां स्वीकरोतीति रामादीन् प्रति तु ग्राम्यां स्त्रियमिमामयं कृष्णो वञ्चयतीति द्योतयन्नाह। एष्यामीति पुंसामिति। बहुवचनेन तां प्रति परिहासः। साधितार्थ इति। कंसवधाद्यावश्यककृत्यं कृत्वा निश्चिन्तो भूत्वेति समयसंकेतश्च व्यञ्जितः अगृहाणां "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" इति न्यायेनाकृतदाराणां नोऽस्माकमिति राजपुत्रत्वादात्मन आदरेण खल्वेकत्वेऽपि बहुवचनं सा मन्यते स्म पान्थानामिति गोकुले स्वनगरे मम गोप्योऽनुरागिण्यो वर्तन्ते तथात्र पुर्यामपरिचितायां न काश्चन केवलं त्वमेवैकानुरागिणी प्राप्तेति तां प्रत्यनुरागश्च व्यञ्जितः रामादींस्तु बहुवचनेन आधिपदेन पान्थिपदेन च प्रयुक्तेन कृष्ण एतामस्वीकुर्वन् सामान्यवनितात्वलक्षणगालिप्रदानेनैनामनभिज्ञां तिरस्करोतीति प्रत्याययामास ॥ १२ ॥

गूढार्थदीपिनी

हृच्छयः कामः। स्मयन्ती ईषद्धसन्ती ॥ ९–१० ॥ ह हर्षेण ॥ ११ ॥ साधितार्थः कृतकार्यः सन्। आधिः मानसी व्यथा तस्य निवर्तकम्। अगृहाणां स्थानरहितानां त्वमेवाश्रयः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ततस्तदनन्तरं रूपेण गुणैर्मधुरभाषणादिभिः औदार्य्येण च संपन्ना जातो हृच्छयः श्रीकृष्णेन सह विहर्तुं कामो यस्याः सा ॥ ९ ॥ गृहं मदीयं यामः ॥ १०–११ ॥ पुंसां प्रविशताम् आधिविकर्षणं मनः पीडाशमनम्। ते गृहमेष्यामि। पान्थानां

प्रवासिनां कंसभयाद्देशान्तरे वर्तमानानामगृहाणां त्यक्तगृहाणां सुहृदां कंसवधेन साधितोऽर्थः प्रयोजनं येन सः हे सुभ्रु ! त्वं नः परायणं मनोवासस्थानं त्वयि अस्माकं मनो वर्तत इत्यर्थः । यद्वा त्वं नोऽसि अतस्ते गृहं परायणमेष्यामीति ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ततो रूपं गुणानामौदर्यं च ताभ्यां सम्पन्नोत्तरीयान्तं चैलाचलमाकृष्य सस्मायं सगर्वं जातो हृच्छयो मन्मथो यस्याः सा केशवं प्राह ॥ ९ ॥ हे वीर एहि गृहं यामस्त्वां त्यक्तुं नोत्सहे त्वयोन्मथितं चित्तं यस्या सा तस्या हे पुरुषर्षभ प्रसीद ॥१०॥ एवं स्त्रिया याच्यमानः कृष्णो रामस्यार्यस्य पश्यतस्ततोऽनुगानां च मुखं वीक्ष्य । अनेनैकान्तिकं कार्यं नार्यादिसन्निधाने कार्यमियं च मन्मथमथितचित्तेति न जानमाना तत्कालं समाधेयेति कृत्वा वदति । प्रहसन्निति ॥ ११ ॥ हे सुभ्रु पुसामाधिविकर्शनं ते गृहम् । पुंसामाधिविकर्शनेमिति पदमेकम् । पुंसां आधिविकर्शनं येन तदिति वा । साधितोऽर्थः कंसहिंसाद्यात्मा येन स सन् एष्यामि । अपदेशेनोपदिशति । अगृहाणां स्वकीयत्वेन गृहरहितानां पान्थानां पथिकानां नस्त्वं परायणं मुख्याश्रय इति । आन्तरङ्गिको हरिभावस्त्वगृहाणामसहानीतवनितानां पान्थानां त्वं तत्त्वेन परायणमिति ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो भगवान् स्वार्थमेव कृतवानिति भगवन्तमेव गृहीतवतीत्याह । तत इति । ततः तस्याः रूपं सन्पन्नं गुणाश्च पद्मगन्धादयः पूर्णो रसः तस्य च दानार्थमौदार्यं च सम्पन्नम् औदार्ये च सर्वे गुणा इति आन्तराः सत्यादयः सर्वे निरुक्ताः एवं सर्वगुणसम्पन्ना सती केशव ब्रह्मादिभ्योऽपि सुखदातारं प्राह सा दासीति प्रमदा जातेति भगवदङ्गस्पर्शोऽपि वृत्त इति निर्भया सती विटमिव कामरसिकमिव उत्तरीयान्तं भगवत आकृष्य तदानीमेव जातभावा स्वहृदयं बोधयन्तीव स्मयन्ती वक्ष्यमाणमाह । ननु कथं सभायां चतुष्पथे तथा कृतवतीत्याह । जातो हृच्छयो यस्या इति ॥ ९ ॥ तस्या वाक्यमाह । एहीति । स्त्रीणां रसान्तरं न राचत इति गोपिकावद्देषापि काममेव पुरुषार्थं मन्यते तं दातुं समर्थ इति वीरेति सम्बोधनं गृहं रमणयोग्यमिति आत्मानं भगवन्त च इति आत्मतया सम्भाव्य याम इत्याह । सर्वेषां कार्यमस्ति चेत् त्वयावश्यमागन्तव्यमित्यभिप्रायेणाह । न त्वां त्यक्तुमिहोत्सह इति । अकृतकार्यत्वात् सम्भृतिरेव सम्पादिता न तु भोजितेति त्यागो दूरे तदर्थमुत्साहमपि न करोमि । नन्वेवं निबन्धे को हेतुस्तत्राह । त्वयोन्मथितचित्ताया इति । त्वया हि चित्तं मदीयमुन्मथितं येन चेतना गता मथनं कृत्वा हि तत्फलं नवनीतमिव भोक्तव्यम् अतो भोगार्थं निर्बन्ध इत्यर्थः । नन्वीश्वरे कथमेव धाष्टर्यमिति शङ्कायामाह । प्रसीदेति । प्रसीदेति प्रसन्नो भव स्वामिन् ! त्वयि प्रसन्ने एव सर्वं भवतीति तर्हि निष्कामां करिष्यामीति चेत्तत्राह । पुरुषर्षभेति । हे पुरुषश्रेष्ठ ! न हि पुरुषः स्त्रियं निष्कामां करोति अपि तु कामपूर्णामेव सुतरामेव पुरुषर्षभः ॥ १० ॥ एवं कामपीडितायां तस्यां प्रार्थयमानायां सत्यां तदुल्लङ्घनमनुचितमिति भगवान् किं कृतवानित्याशङ्कायामाह । एवमिति । एवं निर्बन्धप्रकारेण स्त्रिया याच्यमानः कृष्ण तेषामेवार्थे अवतीर्णः तथापि रामस्यापि बालाः कौतुकचेतसः बलभद्रो युद्धाभिलाषी इयं च कामपरा एवं च सति सर्वानुरोधः कर्त्तव्य इति प्रहसन् प्रकर्षेण तां मोहयन् उवाच हेत्याश्चर्ये नहि स्त्रीभिः प्रार्थितः कृष्णो विलम्बकरोतीति । अथवा पूर्णानन्दः कथमेवमाह । अहमागमिष्यामिति ॥ ११ ॥ भगवद्वाक्यमाह । एष्यामि ते गृहमिति । सुभ्रु इति सम्बोधनं प्रार्थनार्थमिवेति सूचयति परिहासार्थं यथा तस्या अयं रसो गुप्तो भवति तदर्थमुपहासवदाह । पुंसामाधिविकर्षणामिति । ये केचन पुरुषाः तेषां मनःपीडागुप्तार्थां तां त्वद्गृहमेव त्याजयति अतः आधिविकर्षणं परमारब्धं समाप्य कर्तव्यमिति विलम्बः कर्त्तव्यइत्याह । साधितार्थ इति । कंसं हत्वेत्यर्थः । ननु पश्चादागमिष्यसीत्यत्र किं प्रमाणमित्याशङ्क्याह । अगृहाणां नः पान्थानां त्वमेव परायणमिति परिहासोक्तिरेषा स्वार्थमेवागमिष्याम इति नात्र सन्देहः कर्त्तव्यः । पान्थानामिति । गृहार्थमप्यागमनं क्वचित् स्थातव्यमिति यदि कश्चित् प्रार्थयेत्तदा तत्र स्थितौ कः सन्देह इत्यर्थः । किञ्च त्वमेव परमयनमिति । अस्माकं सुतरां स्वार्थमुत्पादिता परायणं भवत्येव ॥ १२ ॥

श्रीसुबोधिनी–सारः

ततोऽनन्तरं रूपादियुक्ता उत्तरीयस्य वस्त्रस्यांतमाकृष्य स्मयन्ती हसन्ती सती जातो हृच्छयः कामो यस्याः सा केशवं प्राह ॥ ९ ॥ हे वीर त्वमेहि आगच्छ गृहं वयं याम गच्छाम त्वां त्यक्तुं नोत्सहे न शक्नोमि इह लोके जन्मनि वा त्वया उन्मथितचित्ताया ममोपरि त्वं प्रसीद हे पुरुषंभ ॥ १० ॥ एवं स्त्रिया याच्यमानः कृष्णो रामस्य पश्यतां सतां तस्या एव मुखं वीक्ष्येत्येके । वस्तुतः पश्यतो रामस्यानुगानां मुखं च वीक्ष्य दृष्ट्वा प्रहसंस्तामुवाच ह ॥ ११ ॥ पुंसाम् आधिविकर्शनं कामपीडानिवारकं ते गृहमहमेष्यामि साधितोर्थो येन स कृतार्थः सन् अगृहाणामकृतविवाहानां प्रवासिना वा पांथानां नोऽस्माकं त्वमेव परायणं परमाश्रयः हे सुभ्रूः ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च सा स्मयन्ती तस्योत्तरीयान्तमाकृष्य तं केशवं प्राहेत्यन्वयः । तत्र हेतुमाह—जातो हृच्छयः कामो यस्याः सेति । केशवं ब्रह्मरुद्रयो रपि वं सुखं यस्मात्तमित्यनेन कामोत्पतौ हेतुः सूचितोपि हेत्वन्तरमपि सूचयन्नाह – रूपादिभिः सम्पन्नेति ।

तत्र रूपं सौन्दर्यम् , गुणाः सौशील्यादयः, औदार्यपदेन दक्षत्वम् ।। ९ ।। तदुक्तिमाह—एहीति । 'त्वदनुग्रहं विना न कामनिवृत्तिः' इति सूचयति, सम्बोधयति च—वीरेति । एहि अस्मद्गृहं प्रत्यागच्छ यामः त्वया सहैव गृहं गच्छामः । इह स्थाने त्वां त्यक्तुं नोत्सहे न शक्नोमि । 'त्वयि प्रार्थनैव युक्ता, न बलात्कारः, पुरुषोत्तमत्वात्' इत्याशयेन सम्बोधयति—पुरुषर्षभेति । त्वया निमित्तन उन्मथितं कामक्षोभितं चित्तं यस्यास्तस्या मम प्रसीद ।। १० ।। रामस्य पश्यतः सत इति तस्य सङ्कोचं सूचयति । स्त्रिया एवं याच्यमानः कृष्णोऽनुगानां गोपानां चकाराद्बलस्य च मुखं विलोक्य प्रहसन् हर्षेण तामुवाचेत्यन्वयः ।। ११ ।। उक्तिमेवाह—एष्यामीति । स्नेहं सूचयन् सम्बोधयति सुभ्रु इति । इदानीं कार्यान्तरस्य विद्यमानत्वात् उद्वेगोस्तीति । साधितः कंसवधादिरूपोर्थः प्रयोजनं येन तथाभूतः संस्ते गृहं प्रत्यागमिष्यामि । तद्विश्वासार्थं गृहं तां च विशिनष्टि—पुंसामाधिविकर्शनं कामप्रयुक्तमनःपीडाशमनं गृहम् । अगृहाणां न विद्यन्ते अस्यां पुर्यां गृहा येषाम् , तत्र हेतुमाह—पन्थानामिति । अस्माकं त्वमेव परायणमाश्रय इति ।। १२ ।।

अन्वितार्थप्रकाशिका

तत इति । ततः रूपं गुणाः औदार्यं दक्षत्वं तैः सम्पन्ना रूपगुणयोरौदार्येण महत्त्वेन सम्पन्ना वा जातो हृच्छयः कामो यस्याः सा कुब्जा स्मयन्ती हसन्ती । शता आर्षः । तस्योत्तरीयान्तमाकृष्य तं केशवं प्राह स्म ।। ९ ।। एहीति । हे वीर ! एहि अस्मद्गृहं प्रत्यागच्छामः त्वया सहैव गृहं गच्छामः इह स्थाने त्वां त्यक्तुं नोत्सहे न शक्नोमि । हे पुरुषर्षभ ! त्वया निमित्तेन उन्मथितं कामक्षोभितं चित्तं यस्यास्तस्या मम प्रसीद ।। १० ।। एवमिति । रामस्य पश्यतः सतः स्त्रिया एवं याच्यमानः कृष्णोऽनुगानां गोपानां चकाराद्बलस्य च मुखं विलोक्य एतच्च रामादीन्प्रति एतां वञ्चयामीति वञ्चनाय प्रहसन्हर्षेण तामुवाच ।। ११ ।। एष्यामीति । हे सुभ्रूः ! साधितः कंसादिवधरूपोऽर्थो येन तथाभूतः सन् । पुंसामाधिविकर्षणं मनोदुःखनिवर्तकं ते गृहम् एष्यामि । यतः अगृहाणां दाररहितानां निवासरहितानां वा पन्थानां नोऽस्माकं त्वमेव परायणमाश्रयः । अत्र कुब्जां प्रति प्रियोऽयं मां स्वीकरोतीति गोपान् प्रति तु सामान्यवनितेयं ग्राम्या वा इमां कृष्णो वञ्चयतीति द्योतितम् ।। १२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उत्तरीयांतं कंधधृतवस्त्रांतं ।। ९ ।। वयं सर्वे मम गृहं यामोगच्छामः ।। १० ।। रहस्यं वाच्यमानः ह स्फुटं ।। ११ ।। आधिविकर्षणं मनोज व्यथाशमनं कंस हननेन साधितः अर्थः संबंधिनां प्रयोजनं येन सः अगृहाणां स्त्रीहीनानां पांथानां प्रवासिनां परं अयनमाश्रयस्त्वमसि ।। १२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ।। ततः, रूपं सौन्दर्यं च गुणा यौवनादयश्च औदार्यं गत्यवलोकनादिकं च तैः संपन्ना, जातः हृच्छयः कामोदयो यस्याः सा, अत एव स्मयन्ती सती, उत्तरीयान्तं आकृष्य, केशवं मुकुन्दं, प्राह ।। ९ ।। उक्तिमेवाह ।। एहीति ।। हे वीर, गृहं अस्मद्गृहं प्रतीत्यर्थः । एहि समागच्छ । यामो गच्छामः, इह त्वां त्यक्तुं न उत्सहे । न शक्नोमीत्यर्थः । त्वमा उन्मथितं क्षोभितं चित्तं यस्यास्तस्याः मम, हे पुरुषर्षभ, प्रसीद ।। १० ।। एवमिति एवमित्थं, स्त्रिया तया कुब्जया, रामस्य पश्यतः सतः, याच्यमानः कृष्णः अपि, अनुगानां, गोपानां, चकाराद्रामस्य च, मुखं वीक्ष्य, प्रहसन् , तां कुब्जां प्रति, ह स्फुटं यथा तथा, उवाच ।। ११ ।। उक्तिमेवाह ।। एष्यामीति । हे सुभ्रु, अहं साधितः संसिद्धतां नीतः अर्थः प्रयोजनविशेषो येन तथाभूतः सन् , पुंसां आधिविकर्शनं कामप्रयुक्तमनःपीडाशमनं, ते तव गृहं एष्यामि त्वद्गृहं प्रत्यागमिष्यामि । न विद्यन्ते गृहा अस्यां पुर्यां दारा येषां, तेषां पान्थानां पथिकानां, नोऽस्माकं, त्वं एव, परायणं परममयनमुपभोग्येत्यर्थः ।। १२ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततो रूपेति १०.४२.९.

सर्वेश्वरार्पितमनोज्ञतराङ्गरागादाकण्ठमाप्रपद - मुज्झितवक्रभावः ।
यस्तस्य सिद्धमवनौ सुरतानुरागि चेतस्ततः किमु विचित्रमभूत्तथाऽस्याः ।। ४९ ।।
यत्पदाब्जेक्षणक्षुभ्यत्कामा भवति सा रमा । स्पृष्टाखिलतदङ्गा सानङ्गेति किमद्भुतम् ।। ५० ।।
ययाऽङ्गरागो निखिलाऽर्पितस्तदा सानङ्गरागाकलिताऽभवत् क्षमम् ।
सर्वोऽपि तादृग् यदि तादृशो भवत्यर्थे तु भेदः किल वासनावशात् ।। ५१ ।।
मदङ्गरागाखर्वश्री-स्त्वमप्यसि पटेशवत् । तत्साहाय्यं कुरुष्वास्मिन् पर्वणीत्याचकर्ष तम् ।। ५२ ।।
परस्परवशीकृतावधिकृतः प्रशस्तो जनः सकामनिगमे भवेद्य इह भिन्नलिङ्गाश्रितः ।
तदत्र भगवद्वशीकरणकामुका सा तदा चकार घटकं प्रभो रुचितमुत्तरीयाम्बरम् ।। ५३ ।।
स्वनेत्रपात्रं गात्रं मे कृत्वाऽपि किमुपेक्षसे । इति साशयगं चक्रे तन्नेत्रं तन्मिषादलम् ।। ५४ ।।

एहि वीरेति १०.४२.१०

प्रागङ्गरागमादायानङ्गरागा कृता यतः । अङ्गान्निष्क्रम्य मे वक्रभावोऽनङ्गाश्रितोऽजनि ॥ ५५ ॥
ये त्वां भजन्ति भगवन्भुवनेऽङ्गरागैस्तेषामनङ्गरस - मासुलभीकरोषि ।
श्रौतो मया श्रुत इहैवमनन्तथोषस्तत्प्रार्थनीयमिदमार्थिकमेव सार्थम् ॥ ५६ ॥
शृङ्गारवीरयोर्वैरमज्ञात्वा यदयाचत । कामं काममतः स्पष्टं जातोन्मथितमानसा ॥ ५७ ॥

एवं स्त्रियेति १०.४२.११.

दिव्यानि वासांसि मनोभिरामाः स्रजोऽपि निर्यत्नमिहोपलब्धाः ।
तथाङ्गरागोऽप्यधुनेति दिष्टानुकूल्यमालोक्य जहास किं वा ॥ ५८ ॥
यदद्वितीयं रसमुज्ज्वलं बलादियं ग्रहीतुं ह्यबलाऽपि काङ्क्षति ।
निजं वितीर्याऽऽश्वधरोचितं रसं वीक्ष्येति तत्कौशलमाजहास किम् ॥ ५९ ॥
वक्रतापहृतिरत्र चक्रिणो दुष्करेति वयमत्र तादृशाः ।
वीक्ष्य चक्रिचरितं तथाविधं सेर्ष्यमीशमुखदृक् स चाऽभवत् ॥ ६० ॥

वक्रे गौरवमेवमेव सरले यल्लाघवं चेति सद्वृत्तादीरितपद्धति-र्भगवता-ऽकार्यन्यथाऽस्या कथम् ।
आश्चर्यादिति पश्यतो हि हलिनो निःसंशयायेयमुद्वृत्ताऽस्यां लघुता ह्यनङ्गवचसा स्पष्टाऽजनीतीक्ष्यताम् ॥ ६१ ॥

गोप्यः प्रसह्य भगवन् भवतोपभुक्ता इत्युक्तिरात्तशपथं यदवारि मे वः ।
तत्पश्यतेयमिह मां वशयत्यहं वै तामेव निर्णयविधेर्विशदः प्रसङ्गः ॥ ६२ ॥

इत्याशयं विशदयन् कृष्णो रामस्य पश्यतः । दृष्ट्वाऽऽस्यमनुगानां च हसंस्तामिदमुक्तवान् ॥ ६३ ॥ (विशेषकम्)

एष्यामीति : १०.४२.१२.

समधिककुब्जानिगदितमवश्यमहमाचरामि सर्वमपि । इति कृतसन्धस्य ममाऽनयाऽलमधुनाङ्गने त्वदर्थनया ॥ ६४ ॥
मुदाऽङ्गरागं निखिलं गृहीत्वाऽप्यनङ्गरागी यदहं भवामि । कृतघ्नताभास इह प्रसज्जेदित्यच्युतस्तां मधुवाचमूचे ॥६५॥

यदा मदङ्गरागिणी त्वमङ्गरागलेपनं करेण चाकरोस्तदा मदङ्गसङ्गमोऽजनि ।
स्फुटाऽधुना त्वनङ्गसङ्गतिस्तदर्थ्यते किमु नवीनमेवमच्युतो विनोदवाचमूचिवान् ॥ ६६ ॥

अवक्रभावाकलिताखिलाङ्गो यो यस्य मत्प्रीतिकृतेऽङ्गरागः । यदाकदाप्यस्य तु सिद्ध एवानङ्गो रसः सत्सुरतोदयश्च ॥ ६७ ॥
अविद्यैवेत्वरी संसृत्यध्वगानां परायणम् । समाधेश्चार्जितार्थानां हारिणीत्यच्युताशयः ॥ ६८ ॥

कृष्णप्रिया

राजन् ! भगवत् कृपा से सुन्दररूप पद्मगन्धादि दिव्यगुण सत्यदयादि औदार्य धर्म सम्पन्न सुन्दरी वा मन सुन्दर वर श्यामसुन्दर में अनुरक्त बनी और हास्य मुखी, ब्रह्मादि देवों को आनन्द देने वाले भगवान् केशव का दुपट्टे का छोर ग्रहण करती हुई निवेदन करने लगी ॥ ९ ॥ नम्रता एवं अनुराग से प्रार्थना करने लगी, वीर ! मनोरथ पूरक प्रभो ! चलिए अब आपके ही गेह पधारे । आपको यहाँ छोड़कर मैं अकेली घर जाने में असमर्थ हूँ । आपने मेरे मन को मथ डाला है, हे पुरुष श्रेष्ठ मुझे तृतीय पुरुषार्थ का ही प्रसन्न होकर दान करें ॥ १० ॥ राजन् ! बलभद्र भैया के सम्मुख प्रार्थना करती हुई सुन्दरी का अभिलाष को सुनकर ज्येष्ठ बन्धु बलभद्र जी का एवं अपने साथी गोपजनों का मुख के सामने देखते हुए भगवान मन्दस्मित से कहने लगे ॥ ११ ॥ दयालु देव ने कहा हे सुनयने हे सुभ्रू ! अब हम सब मल्लोत्सव आदि महत्व के सब कार्यों से निपटकर पथिकों के आश्रय देने वाले एवं जीवों के मानसिक तापों का शमन करने वाले तुम्हारे घर अवश्य आयेंगे ! हे सुभ्रू बेघर यात्रियों के लिए तुम्हारा घर ही आश्रय माना गया है ॥ १२ ॥

विसृज्य माध्व्या वाण्या तां व्रजन् मार्गे बणिक्जनैः[1] । नानोपायनताम्बूलस्रग्गन्धैः[2] साग्रजोऽर्चितः ॥१३॥
[3]तद्दर्शनस्मरक्षोभादात्मानं नाविदन्[4] स्त्रियः । विस्रस्तवासःकवरवलयालेख्यमूर्तयः ॥१४॥
ततः पौरान् पृच्छमानो धनुषः स्थानमच्युतः । तस्मिन् प्रविष्टो ददृशे धनुरैन्द्रमिवाद्भुतम् ॥१५॥
पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत् । वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे ॥१६॥

---

१. बणिक्पथैः–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । २. ताम्बूलैः–वीर. । ३. तद्दर्शन–अयमधिकः विज. । ४. नाविदुः–प्रा. पा. ।

कर्दमक्षमा

अन्वयः -माध्व्या, वाण्या, ताम्, विसृज्य, साग्रजः, मार्गे, व्रजन्, नानोपायनताम्बूल, स्रग्गन्धैः, वणिग्जनैः, अर्चितः ॥ १३ ॥ तद्दर्शनस्मर, क्षोभात्, विस्रस्तवासः, कवरवलयालेख्यमूर्तयः, स्त्रियः, आत्मानम्, न, अविन्दन् ॥१४॥ ततः, अच्युतः, धनुषः, स्थानम्, पृच्छमानः, तस्मिन्, प्रविष्टः, ऐन्द्रम्, इव, अद्भुतम्, धनुः, ददृशे ॥ १५ ॥ बहुभिः, पुरुषैः, गुप्तम्, अर्चितम्, परमर्द्धिमत्, धनुः, नृभिः, वार्यमाणः, कृष्णः, प्रसह्य, आददे ॥ १६ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

मधुरया गिरा तां प्रस्थाप्य व्रजन्वणिक्पथैर्वणिग्भिरने कोपायनादिभिः पथि अर्चितः ॥ १३ ॥ लेख्याश्चित्रन्यस्ता इव मूर्तयो यासां ताः ॥ १४ ॥ धनुषः स्थानं धनुर्मखशालां पृच्छमानः पृच्छन् ॥ १५ ॥ प्रसह्य बलात् ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तां कुब्जाम् । वणिक् वाणिज्या पंथाः परंपरागतमार्गो येषां ते तथा । "वणिक स्त्रियां वणिज्यायां वैश्ये च कारणान्तरे" इति धरणिः ॥ नानाविधैरुपायनरूपैस्तांबूलादिभिश्च उपायनगृहीतानामपि ताम्बूलादीनां पृथग्निर्देशस्तदानीमुपादेयानां तेषां प्राचुर्यविवक्षया, स्रजो रत्नमुक्तादिमालाः गंधः सुगंधिचंदनादिपंकोऽगुर्वादिसाधितद्रवविशेषः, विचित्रवर्णचूर्णादयश्च । साग्रज इत्युपलक्षणं सानुगोऽपि । श्रीयमुनांतिके पुर्यन्ते वर्तमानत्वादादौ विप्रैः कृतमधुना चांतर्वर्तमानैर्वैश्यैरर्चनमुक्तं, क्षत्रियाश्च प्रायो मध्ये वसन्तीति तत्कृतं नोक्तमिति ज्ञेयम् । विश्वनाथ—वणिक्पथैर्वैष्णवैर्वणिजां वर्त्मवर्तिभिर्नानाजातीयैरित्याह ॥ १३ ॥ तस्य तयोर्वा दर्शनेन यः स्मरक्षोभः कामोत्थानं तस्माद्विस्रस्तानि स्खलितानि वस्त्रकेशपाशकटकानि यासां ताः ॥ वणिक्पथेष्वपि स्त्रीणां तु कोमलस्वभावत्वादधिको भावो जात इत्याह – तदिति । स्त्रियो वणिग्योषितः । तस्य दर्शनेन यः स्मरः स्मरणमात्रेणापि जायमानः प्रेमविलासरूपः कामस्तेन क्षोभो धैर्यक्षयो मोहो वा तस्माद्धेतोरात्मानं देहं देहिनं वा नाविदन् । का वयं क्व वर्तामह इत्यनुसंधातुं न शक्ता इत्यर्थः । अत एव विशेषेण स्रस्तानि वासआदीनि यासां ताः । तत्र वासोवलयविस्रंसः स्मरवेगेन सद्य एव कार्श्योद्यापत्तेः, केशविस्रंसस्तु गात्रमोटनकंपाद्यामर्दात् । किञ्च—लेख्यवन्मूर्तयो, बभूवुरिति शेषः ॥ १४ ॥ ततः स्त्रीभ्यो दर्शनदानं त्तरम् तस्मिन् धनुःस्थाने । ऐन्द्रमिवानेकवर्णम् ॥ तत इति सार्धकम् । भक्तजनानुग्रहानन्तरं ज्ञानाद्यैश्वर्यात्सर्वथा च्युतिरहितोऽपि लीलाकौतुकावेशेन धनुःस्थानं पृच्छन्निति योज्यम् । इन्द्रं धनुरिवेति रत्नादिजटितत्वेन विचित्रवर्णत्वाद् बृहत्तरत्वाच्च, अत एवाद्भुतम् तथा च हरिवंशे –"स तयोर्दर्शयामास तद्धनुः स्तम्भसन्निभम् । अनारोप्यमसंभेद्यं देवैरपि सवासवैः ॥ इति । पुरुषैः कंसभृत्यैः । अर्चितत्वादेव परमर्द्धिर्भूषणादिमहाधनसंपत्तिस्तद्वत् ॥ १५ ॥ परमर्द्धिमद्बहुभारम् "समृद्धौषधिभारेषु वृद्धावृद्धिः प्रकीर्तिता" इति निरुक्तिः ॥ वार्येत्यर्द्धकम् । नृभिस्तद्रक्षिभिः क्रोधात्, तथा सर्वैरपि कंसभीत्या स्नेहाद्वार्यमाणोऽपि ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नानाविधैरुपायनरूपैस्ताम्बूलादिभिश्च उपायनगृहीतानामपि ताम्बूलादीनां पृथक् निर्द्देशस्तदानीमुपादेयानां तेषां प्राचुर्यविवक्षया । स्रजः रत्नमुक्तादिमालाः । गन्धः सुगन्धिश्चन्दनादिभिः पङ्कः अगुर्वादिसाधिद्रवविशेषः विचित्रवर्णचूर्णादयश्च । साग्रज इत्युपलक्षणं सानुगोऽपि श्रीयमुनान्तिके पुर्यन्ते वर्त्तमानत्वादादौ विप्रैः कृतमधुनाचान्तर्वर्त्तमानैर्वैश्यैरर्च्चनमुक्त क्षत्रियाश्च प्रायो मध्ये वसन्तीति तत्कृतं नोक्तमिति ज्ञेयम् ॥ १३ ॥ वणिक्पथेष्वपि स्त्रीणान्तु कोमलस्वभावत्वादधिको भावो जात इत्याह । तदिति । स्त्रियः वणिग्योषितः । तस्य दर्शनेन यः स्मरः स्मरणमात्रेणापि जायमानः प्रेमविलासरूपः कामस्तेन क्षोभो धैर्यक्षयः मोहो वा तस्माद्धेतोः आत्मानं देहं देहिनं नाविदन् का वयं क्व वर्त्तामहे इत्यनुसन्धातुं न शक्ता इत्यर्थः अतएव विशेषेण स्रस्तानि वासआदीनि यासां ताः तत्र वासो वलयविस्रंसः स्मरवेगेन सद्य एव कार्श्याद्यापत्तेः केसविस्रंसस्तु गात्रमोटनकम्पाद्यामर्दात् किञ्च लेख्यवन्मूर्त्तयो बभूवुरिति शेषः ॥ १४ ॥ तत इति । सार्द्धकं भक्तजनानुग्रहानन्तरं ज्ञानाद्यैश्वर्यतः सर्वथाच्युतिरहितोऽपि लीलाकौतुकावेशेन धनुःस्थानं पृच्छन्नित्यादि योज्यम् ऐन्द्रं धनुरिवेति रत्नादिजटितत्वेन विचित्रवर्णत्वात् बृहत्तरत्वाच्च अतएवाद्भुतं तथाच हरिवंशे । "स तयोर्द्दर्शयामास तद्धनुः स्तम्भसन्निभम् । अनारोप्यमसम्भेद्यं देवैरपि सवासवै"रिति । पुरुषैः कंसभृत्यैरर्चितत्वादेव परमर्द्धिर्भूषणादिमहाधनसम्पत्तिस्तद्वत् ॥ १५ ॥ वार्येत्यर्द्धकम् । नृभिस्तद्रक्षिभिः क्रोधात्तथा सर्वैरपि कंसभीत्यास्नेहाद्वार्यमाणोऽपि ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

माध्व्या उक्तया (१२ श० श्लो०) 'एष्यामि' इत्यादिरूपया, किंवा त्वं मदेकनिष्ठभावा त्वद्वश्योऽहं त्वदर्थमेवात्रागतोऽस्मीत्यादिहासलक्षणयान्यया च व्रजन् पुर्यन्तर्गच्छन् मार्गे राजपथे पार्श्वद्वयवर्त्तमानैर्नानाविधैरुपायनरूपैस्ताम्बूलादिभिरुपायनत्वेन तेषामुत्कृष्टत्वं वणिजाञ्च भक्तिनम्रत्वं सूचितम्, यद्वा, उपायनैर्विचित्रदुकूलभूषणमोदकपानक फलादिभिस्तम्बूलादिभिश्च, उपायन गृहीतानामपि ताम्बूलादीनां पृथग्निर्द्देशस्तदानीमुपादेयानां तेषां प्राचुर्य्यविवक्षया । स्रजो रत्नमुक्तादिमालाः

गन्धः सुगन्धिश्चन्दनादिपंकोऽगुर्वादिसाधितद्रवविशेषः विचित्रवर्णचूर्णादयश्च, अर्चितो भक्त्या सम्मानितः साग्रजः श्रीबलदेवसहितः। गोपानामनुक्तिस्तयोरर्च्चनेन तेषां तदीयत्वेन स्वत एव तत्सम्पत्तेः। श्रीयमुनान्तिके पुर्य्यन्ते वर्त्तमानत्वादादौ विप्रैः कृतम्, अधुना चान्तर्वर्त्तमानैर्वैश्यैरर्च्चनमुक्तम्, क्षत्रियाश्च प्रायो मध्ये वसन्तीति तत्कृतं नोक्तमिति ॥ १३ ॥ एवं यद्यपि सर्वेषामेव तस्मिन् भक्तिर्वृत्ता, तथापि स्त्रीणां कोमलस्वभावत्वादधिको भावो जात इत्याह—तदिति। स्त्रियो वणिग्योषितः सर्वा एव वा पौर्य्यस्तस्य दर्शनेन नः स्मरः स्मरणमात्रेणापि जायमानः प्रेमविलासरूपः कामस्तेन क्षोभो धैर्य्यक्षयो मोहो वा तस्माद्धेतोरात्मानं देहिनं वा नाविदन्। 'का वयम्, क्व वर्त्तामहे' इत्याद्यनुसन्धातुं न शक्ता इत्यर्थः। अत एव विशेषेण सुस्तानि वास आदीनि यासां ताः, तत्र वलयविस्रंसः स्मरवेगेन सद्य एव कार्श्याद्यापत्तेः। किञ्च, लेख्यमूर्त्तयश्चित्रप्रतिमा इव बभूवुरिति शेषः। इव शब्दाद्यप्रयोगो निर्निमेषत्वाचलत्वादिना भेदाभावविवक्षया। यद्वा, स्मरक्षोभादेव विस्रस्तवास आदयः सत्यः ॥ १४॥ ततो भक्तजनानुग्रहानन्तरम्, अच्युतः—ज्ञानाद्यैश्वर्य्यतः सर्वथा च्युतिरहितोऽपि धनुः स्थानं पृच्छन्निति धनूरक्षिणां कंसभृत्यानां मोहनार्थं पौराणां वा भक्तिविवर्द्धनार्थं मौग्ध्यलीलेयम्, ऐन्द्रं धनुरिवेति विचित्रवर्णानुलेपनालंकारादिभिरर्च्चितत्वाद्बृहत्तरत्वाच्च, अत एवाद्भुतं विस्मयावहम्, तथा च श्रीहरिवंशे (विष्णु० प० २७।४४) 'स तयोर्दर्शयामास तद्धनुः स्तम्भसन्निभम्। अनारोप्यमसम्भेद्यं देवैरपि सवासवैः ॥' इति, यद्वा, ततोऽपि महाविशेषादाह—अद्भुतमिति ॥ १५ ॥ पुरुषैः कंसभृत्यैरर्च्चितत्वादेव परमर्द्धिभूषणादिमहाधनादिसम्पत्तिस्तद्वत्; यद्वा, स्वभावादेव परमर्द्धिमन्महारत्नादिनिर्म्मितत्वात्; नृभिस्तद्रक्षिभिस्तैरेव, यद्वा, कंसभीत्या स्नेहात् सर्वैरपि जनैर्वार्य्यमाणोऽपि कृष्ण इति बलादाकृष्य धनुर्ग्रहणात् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवंविधया माध्व्या मधुरया वाण्या तां विसृज्य उत्तरीयान्तं त्याजयित्वेति भावः। ततो मार्गं व्रजन् ततो वणिक्पथे प्रविष्टः तत्र नानाविधैरुपायनैः श्रेष्ठवस्तुभिः ताम्बूलादिभिश्च सरामः समर्चितो बभूव ॥ १३ ॥ तदा तस्य भगवतो दर्शनेन यः स्मरक्षोभस्तेन स्त्रियः आत्मानं देहं नाविदन् नानुसमदधत वेदनाभावमेव दर्शयन् विशिनष्टि। विस्रस्ताः वासःप्रभृतयो यासां ताः लेख्यवल्लिखितप्रतिमावान्निश्चलाः मूर्त्तयो तासां ताः ॥ १४ ॥ ततो धनुषः स्थानं धनुर्मखशालां पौरान्प्रति पृच्छमानोऽच्युतस्तस्मिन् धनुषः स्थाने प्रविष्टः ऐन्द्रं धनुरिवाद्भुतम् ॥ १५ ॥ बहुभिः पुरुषैर्गुप्तमर्चितं परमा ऋद्धिः सुवर्णालङ्कारादिसम्पत्तिरस्यास्तीति तथा तद्धनुर्दृष्टवान् तदा तत्रस्थैः पालकैः बहुधा वार्य्यमाणोऽपि कृष्णः प्रसह्य बलात् तद्धनुराददे ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

माध्व्या मधुरया वणिजां पन्थानो येषां ते तथा तैः दर्शनार्थमागतैः पण्यवीथिकास्थितैः वैश्यैश्चार्चितः नानाविधोपायनं ताम्बूलादिकं येषां ते तथा तैः ॥ १३ ॥ पृच्छमानः पृच्छन् ॥ १५–१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

माध्व्या मधुरया वणिक्पथैर्वैष्णवैर्वाणिज्यवर्त्मवर्तिभिर्नानाजातिभिरित्यर्थः ॥ १३ ॥ तेषां स्त्रियस्तु परमभक्ताः "चक्षूरागः प्रथमं चित्तासङ्गस्ततोऽथ संकल्पः। निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः। उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्यु"रिति कालक्रमोद्धविष्णुरपि स्मरदशाः सद्य एव प्रापुरित्याह। तद्दर्शनेति। आत्मानं नाविदन्निति। का वयं क्व वर्त्तामहे किं कुर्महे इत्यनुसंधातुमक्षमा इति त्रपानाशपर्य्यन्ता दशा उक्ताः विस्रस्तेति वाससां वलयानां च विस्रंसः स्मरवेगजनितकार्श्यातिशयात् कवरविस्रंसस्तु महाकम्पगात्रमोटनभूतललोटनाद्यामर्दात् एष एव उन्मादोऽष्टमः ततश्च लेख्याश्चित्रन्यस्ता मूर्तयो यासां ता इति मूर्च्छा नवमी दशमी त्वमङ्गलत्वात् प्रेमवतीनां प्रायो न भवतीति प्राञ्च ॥ १४–१५ ॥ प्रसह्य बलात् ॥ १६ ॥

गूढार्थदीपिनी

वणिक्पथैः वणिग्जनः ॥ १३ ॥ विस्रस्तानि शिथिलीभूतानि वास आदीनि यासां ताः। लेख्याः चित्रन्यस्ता इव मूर्तयां यासां ताः ॥ १४–१५ ॥ परमर्द्धिमत् बहुभारम् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वणिक्पथैः वणिग्भिः ॥ १३ ॥ तस्य भगवतः दर्शनेन यः स्मरक्षोभस्तस्मात्। कुड्यादौ लिखिता इव मूर्तयो यासां ताः आत्मानं नाविदन् कुतो लोकमिति भावः ॥ १४ ॥ तस्मिन् पौरैः सूचिते धनुषः स्थाने ॥ १५ ॥ नृभिस्तद्रक्षिभिः वार्यमाणोऽपि प्रसह्य आददे गृहीतवान् ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

माध्व्या मधुरया वाण्या तां त्रिवक्रां विसृज्य वणिजां पन्थानो येषां ते तैर्जनैर्नानोपायनानि वक्ष्यमाणविलक्षणानि च ताम्बूलस्रग्गन्धैः करणैः। माध्व्या वाण्याऽप्यत्रान्वेति। मधुरया वाण्या च साग्रजः सबलोऽर्चितोऽभूत् ॥ १३ ॥ ततस्तं पुरो

गच्छन्तं कञ्चिद्द्रोपमच्युतो धनुषः स्थानं पृच्छ नो माऽऽलस्यमिति शेषः। राक्षसैः गतम्। अब्रवीत्। तस्मिन्पृच्छन्तं प्रति लोकावेदिते स्थाने प्रष्टा पृच्छमानः पृच्छन्। व्यत्ययेन सर्ववेदितुरियं लीलेति ध्वनयति। ऐन्द्रं धनुरिवाद्भुतं धनुर्ददृशे ॥ १४ ॥ बहुभिरनेकैः पुरुषैर्गुप्तं रक्षितं तैरर्चितं च परमा च ऋद्धिश्च सम्पच्च साऽस्यास्तीति तत्। अनृभिरनोऽस्मच्छकटादिकं मा पृच्छ। तद्रक्षकैर्वार्यमाणो निवार्यमाणः प्रसह्य बलात्कृत्य धनुराददे न तु शक्यमित्यविदित्वा झटिति भगवान्कुतोऽकरोद्धरणमिति नेत्यप्याह। प्रसह्य धनुः स्वेन सोढुं शक्यं प्रकर्षेणेति ते च तद्धनुश्चेति ॥ १५ ॥ करेणोद्धृत्य प्राग्व्यतनुत च गुणावेदनमसौ प्रभुः पादाघातं तदनु विरचय्याश्व्यनमयत्। अथो लीलाबालः करधृतधनुर्भग्नमकरोद्बलान्नम्रीभूते किमिह करुणा शुष्कहृदये। सद्वंशजातोऽपि गुणान्वितोऽपि शिक्षानुरूपोऽपि स तेन चापः। भग्नः शनैर्वक्रहृदो हि लोके को वा गुणः कोविदमानयोग्य इत्यभिप्रेत्याह ॥ करेणेति। वामेन करेण सलीलमिति तदलभ्यतया हेलनं ध्वनयति। उद्धृतं सज्जं ज्यया गुणेन सहितं चात्कृत्वा निमिषेण क्षणार्धकालेनानिमिषेण निमिषौ निमीलनोन्मीलने न स्तो यस्य तेन चक्षुषा नृणां पश्यतामिति वा यथा मदकरीक्षुदण्डं मदवद्धस्ती तथोरुक्रमः कृष्णो मध्यतो मध्ये प्रबभञ्ज ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमुक्त्वा प्रकृतार्थमेव प्रवृत्त इत्याह। विसृज्येति। बाणी तु माध्वी अर्थस्तु बिलम्बसाधकत्वान्न मधुरः तामिति सा एका स्त्री कृतोपकारा च एते तु तद्विपरीता इति एतेषां मनोरथसिद्ध्यर्थं मार्ग एव ब्रजन् राजमार्गे गच्छन् तत्रत्यैर्वणिग्जनैः नानविधान्युपायनानि रिक्तहस्तपरिहाराय ताम्बूलस्रग्गन्धाः पूजासाधनानि बलभद्रसहितः पूजितः ॥ १३ ॥ एवं साधारणपुरुषाणां विनियोगमुक्त्वा साधारणस्त्रीणामाह। तद्दर्शनेति। तस्य भगवतो दर्शनात् यः स्मरस्य क्षोभः तेन आत्मानं देहं नाविदन् दृढा प्रपञ्चविस्मृतिरुक्ता भगवद्दर्शनं हि स्मरं जनयति नूतनं पूर्वमप्येकः स्मरः सहजः उभौ मिलितौ लुब्धौ जातौ मुख्यतया द्रष्टव्या जातः काम इति स एव क्षाभेक उक्तः यत्र देहस्याप्यस्मरणं तत्रान्यस्मरण दूरादपास्तमिति अत्यन्तविस्मरण ज्ञापयितुमाह। विस्रस्तेति। सर्वाभरणभूषिता भगवद्दर्शनार्थमागताः तत्र भगवद्दर्शनेन क्षोभे जाते आभरणानि स्वत एव विशकलितानि जातानि उभयोरप्युपयोगाभावात् विशेषेण स्रस्तानि अधः पतितानि वासांसि कबरः केशपाशः बलयाः कङ्कणाद्याभरणानि किञ्च सर्वा क्रियापि निवृत्तेत्याह। आलेख्यं चित्रमिव मूर्तिर्यासामिति पूर्वापेक्षयाप्येतासां सर्वक्रियाराहित्यमधिकमुक्तम् ॥ १४ ॥ एवमधिभूतरूपाणां प्रपञ्चविस्मृतिमुक्त्वा आधिदैविकानामपि तथा प्रेरणाभावाय भयं वा प्रपञ्चविस्मृतिं वा जनयन् धनुर्भङ्गार्थं प्रवृत्त इत्याह। ततः पौरान् पृच्छमान इति। सन्ति तत्र द्रष्टुमप्यागता जानपदाः तद्व्यावृत्त्यर्थं पौरा विशेषं जानन्तीति पृच्छमानः कुत्र धनुर्यागो जायत इति। ननु धनुर्यागे कथं गच्छति भयस्थानत्वादित्याशङ्क्याह। अच्युत इति। तैरुक्त इत्युक्तसिद्धत्वान्नोक्तम् अथवा लोकानां भ्रमसिद्ध्यर्थमेव प्रश्नः गुप्ततयैव हि सर्वं कर्तव्यमिति। एवं पृच्छमान एव तस्मिन् यागस्थाने प्रविष्टः धनुर्ददृशे प्रायेणेदं धनुः उपास्यदेवतया स्थापितं यावदिदं धनुः स्थास्यति तावन्न तव पराजय इति। अन्यथा भगवान् तद्भङ्गं न कुर्यात्। सोऽपि मरणसंशये तदाराधनं न कुर्यात् यथा ऐन्द्रं धनुर्विचित्रं भवति महच्च तथैवैतदपि ततोऽप्यद्भुतं तदेकविधमेव भवति। इदमनेकविधमिति तत्तस्य प्राणभूतमिति ॥ १५ ॥ पुरुषैर्बहुभिर्गुप्तं तद्रक्षकाः शस्त्रपाणयः तद्देवताश्च दैत्यहितैषिएयस्तदाह। बहुभिरिति। किंच तदर्चितं वस्त्रादिभिः अनेन देवतासान्निध्यमुक्तम्। अनुभावमप्याह। परमर्द्धियुक्तमिति। ततो दर्शनार्थं गतो भगवान् अदृश्यः अतः प्रविष्टः सन् तद्धनुर्गृहीतवानित्याह। वार्यमाणो नृभिरिति। सर्वैरेव नृभिः ग्रहणे वार्यमाणः कृष्णः तदर्थमेवावतीर्णः प्रसह्य बलात् तान् दूरीकृत्य धनुराददे पूजास्थानं पद्भ्यामाक्रम्य धनुर्गृहीतवान् ॥ १६ ॥

श्रीसुबोधिनी–सारः

माध्व्याऽतिमिष्टया वाण्या तां कुब्जां विसृज्य निवर्त्य मार्गे ब्रजन् वणिक्पथैर्व्यवहर्तृभिर्नानोपहरणैः साग्रजः सबलोऽर्चितः पूजितः ॥ १३ ॥ तस्य कृष्णस्य दर्शनेन स्मरस्य कामस्य क्षोभस्तस्मात् स्त्रिय आत्मानं नाविंदन् नाविदुः विस्रस्तानि वासः कबरवलयानि यासां ताः लेख्याश्चित्रार्पिता इव मूर्त्तयो यासां ताः ॥ १४ ॥ ततोऽनन्तरम् अच्युतः कृष्णः पौरान् माथुरीणान् धनुषः स्थानं पृच्छमानः तस्मिन् धनुर्यागमंडले प्रविष्ट ऐंद्रमिवाद्भुतं धनुर्ददर्श ॥ १५ ॥ बहुभिः पुरुषैर्गुप्तं परमर्द्धिमत् बहुसम्पदाढ्यम् अर्चितं पूजितं धनुर्नृभिर्वार्यमाणः कृष्णः प्रसह्य बलात् आददे जग्राह ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवंविधया माध्व्या मधुरया वाण्या तां विसृज्य तत उत्तरीयान्तं त्याजयित्वा प्रस्थाप्य मार्गे ब्रजन् साग्रजो रामेण सहितः कृष्णः वणिग्जनैः नानाविधैरुपायनैः श्रेष्ठवस्तुभिरताम्बूलादिभिश्चार्चितो बभूव ॥१३॥ तस्य भगवतो दर्शनेन यः स्मरस्य क्षोभस्तेन स्त्रिय आत्मानं देहं नाविदन्। तत्र लिङ्गमाह—विस्रस्ताः स्थानात् प्रचलिताः वासःप्रभृतयो यासां ता इति। 'सर्वक्रियानिवृत्तिरपि जाता' इत्याह—लेख्यवल्लिखितप्रतिमावन्निश्चला मूर्तयो यासां ता इति ॥ १४ ॥ ततश्च पारान् प्रति धनुषः स्थानं धनुर्मखशालां

पृच्छमानः अच्युतः कृष्णः तस्मिन् धनुषः स्थाने प्रविष्टः सन्नैन्द्रधनुरिवाद्भुतं महत्त्वेन पूजितत्वेन च सत्कृतं धनुर्ददर्श ॥१५॥ तदेव स्वष्टयति—बहुभिः पुरुषैर्गुप्तं रक्षितं अर्चितं च परमा ऋद्धिः स्वर्णालङ्कारादिसमृद्धिरस्यास्तीरिति तथा तद्धनुर्दृष्ट्वा नृभिश्च तद्रक्षकैर्बहुधा वीर्यमाणोपि कृष्णः प्रसह्य बलात् धनुराददे गृहीतवान् ॥ १६ ॥

अन्वितार्थप्रकाशिका

विसृज्येति ॥ एवंविधया माध्व्या मधुरया "ऋत्व्यवास्त्व्यवास्त्व०" इत्यादिना छान्दसो निपातः । वाण्या तां विसृज्य तत उत्तरीयान्तं त्याजयित्वा प्रस्थाप्य मार्गे व्रजन् साग्रजो रामेण सहितः कृष्णः वणिग्जनैः वणिक्पथैरिति पाठे वाणिज्यमार्गवर्तिभिर्नानाजातिभिरित्यर्थः । नानाविधैरुपायनैः श्रेष्ठवस्तुभिस्ताम्बूलस्रग्गन्धश्चाचितो बभूव ॥ १३ ॥ तद्दर्शनेति । तस्य भगवतो दर्शनेन यः स्मरस्य क्षोभस्तस्माद्धेतोः स्त्रिय आत्मानं देहं नाविदन् । का वयं क्व वर्त्तामहे किं कुर्मह इत्यनुसंधातुमक्षमा अभूवन् । ततश्च विस्रस्ताः स्थानात्प्रचलिता वासःकबरवलया यासां ता लेख्याः लिखितप्रतिमा इव निश्चला मूर्तयो यासां तादृश्यो बभूवुः ॥ १४ ॥ तत इति ॥ ततश्च पौरान्प्रति धनुषः स्थानं धनुर्मखशालां पृच्छमानः । शानजार्षः । अच्युतः कृष्णः तस्मिन् धनुषः स्थाने प्रविष्टः सन्नैन्द्रं धनुरिवाद्भुतं महत्त्वेन पूजितत्वेन च सत्कृतं धनुर्ददर्श ॥ १५ ॥ पुरुषैरिति ॥ बहुभिः पुरुषैर्गुप्तं रक्षितम् अर्चितं च परमा ऋद्धिः स्वर्णालंकारादिसमृद्धिरस्यास्तीति तथा तद्धनुर्दृष्ट्वा नृभिश्च तद्रक्षकैर्बहुधा वार्यमाणोऽपि कृष्णः प्रसह्य बलाद्धनुराददे गृहीतवान् ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वणिक्पथैर्वणिग्भिः पूजिः ॥ १३ ॥ तस्य श्रीकृष्णस्य दर्शनेन जातो यः स्मरस्तेन क्षोभस्तस्मादात्मानं देहं लेख्याश्चित्रतुल्या मूर्त्तयो यासां ताः ॥ १४ ॥ धनुषः स्थानं धनुर्यज्ञस्थानं पृच्छमानः पृच्छन् ॥ १५ ॥ अर्चितं धनुः प्रसह्यहठात् ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विसृज्येति ॥ एवं विधयेति शेषः माध्व्या मधुरया, वाण्या, तां प्रसन्नीकृत्येति शेषः । विसृज्य, मार्गे व्रजन् वणिक्पथैर्वणिग्भिः, साग्रजो बलभद्रसहितः कृष्णः, नानाविधान्युपायनानि च ताम्बूलानि च स्रजश्च गन्धाश्च तैः, अर्चितः बभूव । पाठान्तरे प्रविष्ट इति वणिग्भिरिति च शेष ॥ १३ ॥ तदिति ॥ तदा तस्य भगवतः दर्शनेन यः स्मरक्षोभस्तस्मात्, विस्रतानि वासांसि च कवराः केशपाशाश्च वलयानि कङ्कणानि च यासां ताः, लेख्याश्चित्रन्यस्ता इव मूर्त्तयो यासां ताः, स्त्रियः आत्मानं न अविदन् । स्वदेहानुसंधानमपि विसस्मरुदित्यर्थः ॥ १४ ॥ तत इति ॥ ततः, अच्युतः श्रीकृष्णः, पौरान् पुरवासिनो जनान् प्रति, धनुषः स्थानं धनुर्मखशालामित्यर्थः । पृच्छमानः, तस्मिन् लोकैः प्रदर्शिते धनुःस्थाने, प्रविष्टः सन्, अद्भुतं एन्द्रं धनुरिव, स्थितं तद्धनुः, ददृशे ॥ १५ ॥ पुरुषैरिति ॥ तदा बहुभिः पुरुषैः, गुप्तं संरक्षितं, अर्चितं सम्यक् पूजितं, परमा सर्वोत्तमा ऋद्धिः स्वर्णालंकारादिसंपत्तिरस्यास्तीति परमर्द्धिमत्, धनुस्तच्छरासनं, नृभिस्तद्रक्षकजनैः, वार्यमाणः अपि, कृष्णः प्रसह्य बलात्, आददे॥१६॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सिसृज्येति : १०.४२.१३.

दिदृक्षुर्धर्मसंस्थां यः सुराजपथवर्तनः । इत्वर्यनादरो युक्तस्तस्येतीशेन बोधितम् ॥ ६९ ॥
पराङ्मुख्यमविद्याया माध्व्या संपाद्य विद्यया । यो व्रजेत्पथि सोऽर्च्यः स्यात्सत्पथस्थैरिति स्फुटम् ॥ ७० ॥

तद्दर्शनेति : १०.४२.१४

श्रीशेऽध्यक्षे युक्तमेव निस्तुलानन्दचेतसः । चित्रं तु सुदृशस्तत्र नात्मानमविदन् स्त्रियः ॥ ७१ ॥

ततः पौरानिति : १०.४२ १५.

यत्कृतेऽहमिहाऽऽनीतः शत्रुणोपागतोऽप्यहम् । तत्कार्यं कार्यमित्यार्यानपृच्छत्तद्धनुः स्थलम् ॥ ७२ ॥
धर्मस्थितिमविज्ञाय धर्मवार्तां ब्रुवन्त्यमी । विज्ञाय वेति विज्ञातुमपृच्छत् तन्मिषात्स तान् ॥ ७३ ॥
सर्वत्र धर्मत्रैगुण्यं तारतम्येन वर्तते । इति व्यक्तमभूदैन्द्रधनुस्तौल्योपपादनात् ॥ ७४ ॥

कृष्णप्रिया

राजन् मधुर वाणी से सैरन्ध्री को समझाकर मधुसूदन भगवान् राजपथ से अब आगे प्रस्थान करने लगे तब राजमार्ग के दुकानदार महाजन लोगों ने विविध प्रकार की भेंटें, मालायें, ताम्बूल पान, सुगन्ध, चन्दन, इत्र फूलेल, पुष्प, फल आदि सामग्री से दोनो भैयाओं का सानुराग सत्कार किया ॥ १३ ॥ राजपथ से प्रस्थान सुन्दर वर दोनों भाईयों के दर्शन करने वाली नगरनारियों के चित्त मनसिज काम आवेग से विचलित हो उठे । भावावेश से पुरनारियों की वेणियों के बन्धन शिथिल हो गए उनके दुकूल वस्त्र करसरोज के कंगन खिसकने लगे, देहानुसन्धान न रहा । मालूम हो रहा था की ये भगवान के दर्शन करने

वाली नारियों का चित्र है, अन्यथा ऐसी स्थिरता कहाँ से होगी ? उन वनिताओं को अपने अङ्ग प्रत्यङ्गों की सुधबुध ही नहीं रही ॥ १४ ॥ अब पौरजनों को धनुष्य का स्थान कहाँ है यह पूछा तब उन नागरिकों ने धनुष्य स्थान का मार्ग बताया अच्युत भगवान् उस स्थान में पधारे, वहाँ इन्द्र धनुष्य के समान अद्भुत एवं विशाल धनुष को देखा ॥ १५ ॥ धनुष्य कंस प्राणरूप था अनेक राजसेवकों से सुरक्षित समृद्धिशाली एवं वस्त्रालंकारादि अर्चित था। शिव दैवत उस दिव्य धनुष के रक्षकों के रोकने पर भी सबको हटाकर लीलामात्र में भगवान श्रीकृष्ण ने यह धनुष को उठाया ॥ १६ ॥

करेण वामेन सलीलमुद्धृतं सज्यं च कृत्वा निमिषेण पश्यताम् ।
नृणां विकृष्य प्रबभञ्ज मध्यतो यथेक्षुदण्डं मदकर्युरुक्रमः ॥ १७ ॥
धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः । पूरयामास [1]यं श्रुत्वा कंसस्त्रासमुपागमत् ॥ १८ ॥
तद्रक्षिणः सानुचराः कुपिता[2]आततायिनः । ग्रहीतुकामा आवव्रुर्गृह्यतां बध्यतामिति ॥ १९ ॥
अथ तान् दुरभिप्रायान् विलोक्य बलकेशवौ । क्रुद्धौ[1]धन्वन आदाय शकले तांश्च जघ्नतुः ॥ २० ॥

कर्दमक्षमा

अन्वयः—उरुक्रमः, (श्रीकृष्णः) वामेन, करेण, सलीलम्, उद्धृतम्, सज्जम्, कृत्वा च, विकृष्य, नृणाम् पश्यताम्, (उरुक्रमः) मदकरी, इक्षुदण्डम्, यथा, (तथा) मध्यतः, निमिषेण, (अनिमिषेण वा) बभञ्ज ॥ १७ ॥ भज्यमानसः, धनुषः, शब्दः, खम्, दिशः, रोदसी, पूरयामास, यम् श्रुत्वा, कंसः, त्रासम्, उपागमत् ॥ १८ ॥ तद्रक्षिणः, कुपिताः, सानुचराः, आततायिनः (शस्त्रपाणयः) गृहितुकामाः, गृह्यताम्, बध्यताम्, इति, आवव्रुः ॥ १९ ॥ अथ, बलकेशवौ, दुरभिप्रायान्, तान्, विलोक्य, क्रुद्धौ, धन्वनः, शकले, आदाय, तान्, च, अन्यान् दुष्टानपि जघ्नतुः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

निमिषेणातिशीघ्रम् । मदकरी मत्तहस्ती ॥ १७–१८ ॥ गृह्यतां बध्यतामिति वदंतो जिघृक्षव आवृतवंतः ॥ १९ ॥ न केवलं क्रुद्धौ किं तु भग्नस्य धनुषः शकले गृहीत्वा जघ्नतुश्चेति ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ज्यया मौर्व्या सहितं सज्यम् । अनिमिषेण निश्चलपक्ष्मणेत्यर्थः । 'ज्या मातरि वसुधायां मौर्व्याम्' इति मेदिनी । सलीलं सावहेलं, चकारादस्य सर्वैरप्यन्वयः । तथा निमिषेणेत्यस्यापि । उद्धृतमुत्थापितम् । पश्यताम् नृणां तत्र रक्षिणां क्रुद्धानामन्येषां च यथासंभवं मल्लानामिति ज्ञेयम् । अनादरे षष्ठी । अकारप्रश्लेषेणानिमिषेण निर्निमेषतया पश्यतामिति वा ॥ १७ ॥ यं शब्दम् । न च तन्मृदुलं मंतव्यं किन्तु वज्रसारतोऽपि परमतिकठिनमित्याशयेनाह–धनुष इति । प्राक् खमंतरिक्षं पूरयामास शब्दस्याकाशगतत्वात् । ततो रोदसी द्यावाभूमी महत्तरत्वेनोर्द्ध्वाऽधोगामित्वात् । ततश्च दिशः सर्वाः, एवं सर्वानपि लोकानपूरयदित्यर्थः । कंसो जगद्भीषणोऽपि उपाधिक्येन त्रासं प्राप्तः, निर्घातकोटिनिष्ठुरतच्छब्दादेव, विचारतश्च तस्मात्सद्यो मृत्युप्राप्तिमननात् ॥ १८ ॥ तद्रक्षिणो धनूरक्षिणः । आततायिनः आयुधान्यातत्याऽऽगच्छंतः । सानुचरं श्रीरामादिसहितम् । आततायिनो गृहीतायुधाः । गृह्यतां राज्ञे समर्पणाय जीवन्नेव ध्रियतां, पश्चाद्बध्यतां पाशैर्यन्त्र्यतामिति, एषा महामदेन बहलोक्तिः । वाग्देवीमते तु-अस्मद्विधो जनो गृह्यतां बध्यतामिति ज्ञेयम् ॥ १९ ॥ अथ निजाऽऽवरणोत्तरम् । तान् धनूरक्षकान् । दुरभिप्रायान् दुष्टभावान् । धन्वनो धनुषः । शकले खण्डे द्वे । तान्विलोक्य क्रुद्धौ, जघ्नतुश्चेति वाक्यभेदात्तानित्यस्यापुनरुक्तता ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सलीलं सावहेलं चकारादस्य सर्वैरप्यन्वयः । तथा निमिषेणेत्यस्यापि उद्धृतमुत्थापितं पश्यतां नृणां तत्र रक्षिणां क्रुद्धानामन्येषाञ्चासम्भवं मल्लानामिति ज्ञेयम् अनादरे षष्ठी । अकारप्रश्लेषेणानिमिषेण निर्निमेषतया पश्यतामिति ॥ १७ ॥ न च तन्मृदुलं मन्तव्यं किन्तु वज्रसारतोऽपि परमतिकठिनमित्याशयेनाह । धनुष इति । प्राक् खमन्तरीक्षं पूरयामास शब्दस्याकाशगतत्वात् ततः रोदसी द्यावाभूमी महच्चरत्वेनोर्ध्वाधो गामित्वात् । ततश्च दिशः सर्वाः । एवं सर्वानपि लोकान् अपूरयदित्यर्थः । कंसो जगद्भीषणोऽपि उप आधिक्येन त्रासं प्राप्त निर्घातकोटनिष्ठुरतच्छब्दादेव । विचारतश्च तस्मात् सद्यो मृत्युप्राप्तिमननात् ॥ १८ ॥ सानुचरं श्रीरामादिसहितम् आततायिनः गृहीतायुधाः गृह्यतां राज्ञे समर्पणाय जीवन्नेव ध्रियतां पश्चाद्बध्यता पाशैर्यन्त्र्यतामिति एषा महामदेनावहेलोक्तिः । वाग्देवीमते तु अस्मद्विधो गृह्यतां बध्यतामिति ज्ञेयम् ॥ १९ ॥ दुरभिप्रायान् दुष्टभावान् धन्वनो धनुषः तान् विलोक्य क्रुद्धौ जघ्नतुश्चेति वाक्यभेदात्तानित्यस्यापुनरुक्तता ॥ २० ॥

---

१. तं–प्रा. पा. । २. रुषिताः–वीर. । १९. धनुष–वीर ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सलीलं भंगीविशेषेणावहेलया वेत्यर्थः। चकारादस्य सर्व्वैरप्यन्वयस्तथा निमिषेणेत्यस्यापि उद्धृतमुत्थापितमुच्चैर्धृतं वा सत् पश्यतां नृणां तेषामेव रक्षणाम्; यद्वा, सर्व्वेषामपि तत्रत्यानां जनानाम्, अनादरे षष्ठी, यद्वा, परमाश्चर्य्येण पश्यत्स्वित्यर्थः। ततश्चाकारप्रश्लेषेण—अनिमेषेण निर्निमेषतया पश्यतामित्येवमत्रैव वास्यान्वयः। मध्ये प्रकर्षेणात्यन्तभिन्नत्वेन द्विखण्डतया बभञ्ज, यत उरुक्रमो महापराक्रमः, तथा च हरिवंशे (विष्णु० प० २७।४७)—'आनम्यमानं कृष्णेन प्रकर्षादुरगोपमम्। द्विधाभूतमभून्मध्ये धनुरायोगभूषितम् ॥' इति, अस्यार्थः—आयोग आयोजनकं रत्नादि तेन, यद्वा, आ समन्ताद् योज्यते आरोप्यते येन स आयोगो गुणस्तेन भूषितम्। एवं गुणस्यापि द्विधाभूतत्वं ज्ञेयम्। यद्वा, आयोगः कंसस्यैव समायोगो ग्रहणौचित्यम्, तथा च तत्रैव—'आयोगभूतं कंसस्य' इति मदविशिष्टः करी मत्तहस्ती इक्षुदण्डं यथेति लीलया प्रभञ्जने दृष्टान्तः ॥१७॥ न च तन्मृदुलं मन्तव्यम्, किन्तु वज्रसारतोऽपि परमकठिनमित्याशयेनाह—धनुष इति। प्राक् खमन्तरीक्षं पूरयामास, शब्दस्याकाशजत्वात्, ततो रोदसी द्यावाभूमी, महत्तरत्वेनोर्द्ध्वाधोगामित्वात्। ततश्च दिशः सर्व्वाः। एवं सर्व्वानपि लोकानपूरयदित्यर्थः। कंसो जगद्भीषणोऽपि 'उप' सामीप्येनाधिक्येन वा त्रासं प्राप्तो नितरां भयव्याप्तोऽभूदित्यर्थः। निर्घातकोनिष्ठर—तच्छब्दादेव किंबा सद्यो मृत्युप्राप्ति-मननात्। एवं शब्दस्य परममुच्चत्वादिकं धनुषोऽपि काठिन्यादिकं दर्शितम् ॥ १८ ॥ तस्य धनुषो रक्षिणोऽनुचराः, श्रीबलदेवो गोपाश्च तैः सहितमाततायिनो हननोद्यता गृहीतायुधा वा, वस्तुतस्तु निजवधोद्यता एव गृहीतुमशक्यं मन्वाना आहुः—वध्यातां पाशैर्यन्त्र्यतामिति, एषा च महामदेनावहेतोक्तिः ॥ १९ ॥ अथ आवरणानन्तरमिति तस्मादतिदुष्टताभिव्यक्तेः; यद्वा, अथ अस्माद्धेतोर्दुरभिप्रायान् दुष्टभावान् विलोक्य साक्षाद्दृष्ट्वा; बलकेशवाविति पूर्व्वलिखितनिरुक्त्या पराक्रमभरः सूचितः। द्वे खण्डे द्वौ पृथग् गृहीता क्रुद्धौ जघ्नतुश्चेति वाक्यभेदत्तानित्यस्यापुनरुक्तता ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

आततायिनः जिघांसया शस्त्रपाणयः ॥ १९–२२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उरुक्रमो भगवान् सलीलं यथा तथा वामेन करेणोद्धृतं धनुः सज्यं समारोपितज्याकं कृत्वा निमेषेणाशु नृणां पश्यतां सतां विकृष्य मध्यतो बभञ्ज भग्नमकरोत् यथा मतङ्गजः इक्षुदण्डं तद्वत् ॥ १७ ॥ तथा भज्यमानस्य धनुषो ध्वनिः खमाकाशं रोदसी द्यावापृथिव्यौ दिशश्च पूरयामास यं शब्दं श्रुत्वा कंसः त्रासं भयं प्राप्तवान् ॥ १८ ॥ तस्य धनुषो रक्षिणः पालकाः सानुचराः आततायिनः जिघांसया गृहीतशस्त्राः जिघृक्षवः गृह्यतां वध्यतामिति ब्रुवाणाः आवव्रुः आवृतवन्तः ॥१९॥ तानागतान् दुरभिप्रायान् जिघांसूनवलोक्य रामकृष्णौ धनुषः शकले आदाय ताभ्यां तान् जघ्नतुः ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ज्यया मौर्व्या सहितं सज्यं निमिषपरिमितेन कालेन अनिमिषेण निमेषणरहितेन वा स्तिमितपक्ष्मणा नेत्रेणेत्यर्थः। मदकरी नित्यमदजलस्रावी गजः मदयुक्तो गजो वा ॥ १७ ॥ रोदसी द्यावापृथिव्यौ ॥ १८ ॥ आततायिनः आयुधान्याततत्य विस्तृत्यागच्छन्तः ॥ १९ ॥ धनुषः द्वे शकले खण्डे आदाय ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नृणां पश्यतां प्रबभञ्जेति हंहो लोकाः श्रुतचरमहिमद्रढिमकमेतदेव धनुः पूज्यते युष्माकं राज्ञा इदं तु मत्पाणिस्पर्शमात्रेणैव विदीर्णं घुणजीर्णमेवोपलब्धमिति प्रोवाचेति ज्ञेयम् ॥ १७–१८ ॥ सानुचरं कृष्णं ग्रहीतुकामाः वध्यतामिति ब्रुवाणा आवव्रुः वाग्देवीमते तु अस्मद्विधो जनो वध्यतामिति ॥ १९ ॥ धन्वतो धनुषः शकले द्वे खण्डे गृहीत्वा ॥ २०–२१ ॥

गूढार्थदीपिनी

मदेन युक्तः करी मदकरी मत्तहस्ती। मध्यमपदलोपी समासः। स यथा इक्षुदण्डं भनक्ति तथा मध्यतो बभञ्जेत्यन्वयः। उरुक्रमः महापराक्रमः। उद्धृतम् उत्थापितम् ॥ १७ ॥ रोदसी द्यावाभूमी ॥ १८ ॥ आवव्रुः समन्तादावृतवन्तः ॥१९॥ तान् विलोक्य क्रुद्धौ बभूवतुः पुनश्च तान् जघ्नतुः इति वाक्यान्तरत्वात् तानित्यस्य न पुनरुक्तिः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निमिषेणात्यल्पेन कालेन मदकरीमत्तहस्ती इक्षुदण्डमिव सलीलं यथा तथा विकृष्य बभञ्ज द्विधाऽकरोत् ॥ १७–१८ ॥ आततायिनः शस्त्रपाणयः तस्य धनुषो रक्षिणः गृह्यतां वध्यतामित्येवं जल्पन्तो ग्रहीतुकामाः आवव्रुः आवृतवन्तः ॥ १९–२० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भग्नश्चापः स्वभर्तुः प्रतिभयनिनदैर्धैर्यचौर्यं ततान व्यग्रस्वान्तान्स्वपालान्दृढतरशकलद्वन्द्वघातैर्जघान । भङ्गेनैवोग्रमल्लप्रकरहृदि भयं भल्लकल्पं चस्वात द्वैधीभावं विपक्षे विरचयति बत स्वीय एव स्वशत्रुरिति भगवद्भग्नधनुर्ध्वनित इवदापदुपयातेत्याह । धनुष इति । भज्यमानस्य धनुषः शब्दो ध्वनि स्वं रोदसी द्यावापृथिव्यौ दिशः पूरयामास यं शब्दं श्रुत्वा कंसः स्वयं त्रासं भयमुपागमज्जगाम ॥ १७ ॥ तद्रक्षिणो धनूरक्षकाः सानुचरः स्वस्वभृत्याः कुपिता आततायिन आयुधेश्चायुधदरा गृहीतकामा हन्तुकामाश्च गृह्यतां वध्यतामित्यावव्रुराव‍ृण्वन् ॥ १८ ॥ दुर्दुष्टो भावो येषां तान्विलोक्य धनुषः शकले आदाय ताभ्यामेव तांच जघ्नतुः ॥ १९ ॥ कंसप्रहितं बलं सेनाम् । सेना नाम्ना चेत्स्वयं भवति भिन्ना विद्रुत्वा द्रुतं न तथेदमित्यप्याह । प्रहितमिति । प्रकर्षेण हितमेव यस्मात्तदिति शालामुखाद्धनुर्गृहद्वारात् । शाले गृहे मुखं निःसरण इति विश्वौ । निष्कम्य पुरसम्पदो निरीक्ष्य हृष्टौ विचेरतुः ॥ २० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ग्रहणे प्रकारं वदन् भङ्गमाह । करेणेति । धनुर्हि वामकरे एव स्थाप्यते दक्षिणेनापि गृहीत्वा अवहेलया । दैत्यांशत्वाच्च वामेनैव ग्रहणं महतोऽपि ग्रहणं लीलयेति । तेषां युद्धार्थं प्रवृत्त्यभावाय । एवमपि पश्यन् यदि युद्धार्थं प्रवर्तेत तदा भगवतो न कोऽपि दोष इति ज्ञापयितुं सलीलमुद्धृतं सज्जं च कृत्वा निमिषेण निमेष—मात्रेण स्थित्वैव प्रत्यञ्चाभङ्गभयाभावात् अग्रे नामितवान् । तथा करणमल्पेनापि कालेन भवति । अनिमिषेण वा पश्यतां सतां ततो मध्ये धृत्वा विकृष्य प्रबभञ्ज मध्य एव । यथा योजितं न भवति दृढमुष्टिं बद्ध्वा गाढमाकृष्य पश्चान्मुष्टिमध्यशैथिल्ये धनुषो भङ्गो भवति । अतस्तथा विकृष्य मध्यतः प्रबभञ्ज प्रकर्षेण भङ्गः नावयवशः किंतु खण्डद्वयप्रकारेण आयासाभावाय दृष्टान्तमाह । यथेक्षुदण्डमिति । दण्डपदेन शुष्कताप्युक्ता । यद्युक्तश्च करी जानात्यपि न । ननु दृष्टान्तमात्रेण न साध्यं सिध्यति किंतु दार्ष्टान्तिकयुक्तेन तत्कथं बालेन धनुषो भङ्गोऽनायासेनेति चेत् तत्राह । उरुक्रम इति ॥ १७ ॥ तर्हि दैवगत्यैव तद्भग्नं भविष्यतीत्याशङ्क्य भङ्गस्य शब्दमाह । धनुषो भज्यमानस्येति । शिथिलभङ्गे महान् उत्तिष्ठति । ननु स शब्दः अल्पहेतुक एव तदानीं जातो भविष्यतीति तत्परिहारार्थमाह । भज्यमानस्येति । वर्तमानप्रयोगेण ततः शब्दोत्पत्तिरुक्ता । तेन सर्व एव स्वाश्रयः पूरित इति वक्तुं खं ब्रह्माण्डमध्यं रोदसीद्यावापृथिव्यौ चतस्रो दिशश्च पूरयामास । धनुर्भङ्गशब्द एव सर्वत्र श्रूयते नान्यशब्द इति । एतदल्पकालेनैव कृतमिति तेषां निवारणसामर्थ्यं न वृत्तं पश्चात् शब्देनैव कियत्कालं व्यापृताः अतो धतुर्भङ्गः निष्प्रत्यूहो जातः । अस्य च प्रयोजनं कंसभयजननमिति तज्जातमित्याह यं नादं श्रुत्वा कंसस्त्रासं महाभयमुपागमत् निकट एव फलं प्राप्स्यामीति संत्रस्तो जातः ॥ १८ ॥ उभयतः प्रतीकारार्थं प्रवृत्तानां निराकरणमाह । तद्रक्षिण इति त्रिभिः । प्रथमं धनुःस्थानं एव धनूरक्षकाः स्थिताः ते भगवन्तं बलभद्रं गोपांश्च ग्रहीतुकामाः कुपिताः सन्तः अन्यायः कृत इति मूर्खाः आततायिनः शस्त्रपाणयो जाताः ततः आवव्रुः वेष्टितवन्तः तेषां मानसङ्कायिकं च व्यापारमुक्त्वा वाचनिकमाह । गृह्यतां बध्यतामिति । ये गृहीतास्तेषां बन्धनमादिशन्ति ॥ १९ ॥ ततो भगवन्तौ तेषामतिक्रमं ज्ञात्वा नैतावतापित्यक्ष्यन्तीति तेषां दुष्टमभिप्रायं ज्ञात्वा भिन्नप्रकर्मेण लीलां परित्यज्य आविष्कृतपौरुषौ गोपानां रक्षार्थं कंसं च ज्ञापयितुं प्रवृत्तावित्याह । अथ तानिति । बलो बलभद्रः ब्रह्मरुद्रयोरपि सेव्यः ततो महान् केशवः भक्तातिक्रमं ज्ञात्वा क्रुद्धौ जातौ ततः साधनेनैव मारणीया इति तेऽपि शस्त्रपाणय इति यदेवैतावत्कालं पालितवन्तः तदेव तन्मारकं जातमिति ज्ञापयितुं धन्वनः शकले आदाय तान् चकारादन्यानपि दुष्टान् जघ्नतुः आधिदैविकदेवान् वा धन्वन्शब्दोऽपि धनुर्वाचकः धन्वनागा धन्वनाजिजयेमेति प्रयोगात् देशमपि वक्ति धन्वन्निव प्रपा असीति ॥ २० ॥

श्रीसुबोधिनी–सारः

सलीलं यथा भवति तथा वामेन करेणोद्धृतं धनुर्निमिषेण सज्यं कृत्वा विकृष्य मध्यतो बभंज तुत्रोट । नृणां पश्यतां सताम् उरुक्रमो महाबलो मदेन युक्तः करी हस्ती इक्षुदंडं यथा ॥ १७ ॥ भज्यमानस्य त्रुटतो धनुषः शब्दः खमाकाशं रोदसी द्यावाभूमी दिशः पूरयामास यं शब्दं श्रुत्वा कंसः त्रासमुद्वेगमापत् ॥ १८ ॥ तस्य धनुषो रक्षिणा जनाः सानुचराः सभृत्या आततायिनः कुपिताः रामकृष्णौ ग्रहीतुकामा आवव्रुः वेष्टनं चक्रुः गृह्यतां वध्यतामिति हेतोः ॥ १९ ॥ अथानंतरं दुर्दुष्टोऽभिप्रायो येषां ते तान् विलोक्य दृष्ट्वा रामकृष्णौ क्रुद्धौ धन्वनो धनुष आर्षत्वात् शकले खंडे आदाय गृहीत्वा तान् जघ्नतुः ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च उरुक्रमो महाबलपराक्रमो भगवान् सलीलं यथा भवति तथाऽनायासेनैव वामेन करेणोद्धृतं धनुः सज्यं समारोपितज्याकं कृत्वा नृणां पश्यतामेव सतां निमिषमात्रेणैव कालेन विकृष्य मध्यतो बभञ्ज भग्नमकरोत् । अनायासेन भञ्जने दृष्टान्तमाह—यथा मदकरी हस्ती इक्षुदण्डं मध्यतो भञ्जयति तद्वदिति ॥ १७ ॥ तदा भज्यमानस्य धनुषः ध्वनिः खमाकाशं रोदसी

द्यावापृथिव्यौ दिशश्च पूरयामास सर्वत्र व्याप्तो जातः। यं शब्दं श्रुत्वा कंसस्त्रासं भयं प्राप्तवान् ॥१८॥ तस्य धनुषो रक्षिणः सानुचराः आततायिनः जिघांसया गृहीतशस्त्राः ग्रहीतुकामाः जिघृक्षवः गृह्यतां बध्यतामिति वदन्तः आवव्रुः तावावृतवन्तः ॥ १९ ॥ अथानन्तरमेव तान् दुरभिप्रायान् जिघांसून् विलोक्य क्रुद्धौ रामकृष्णौ धनुषः शकले आदाय ताभ्यां तान् जघ्नतुः ॥ २० ॥

अन्वितार्थप्रकाशिका

करेणेति। उरुक्रमो महाबलपराक्रमो भगवान् सलीलं यथा भवति तथाऽनायासेनैव वामेन करेणोद्धृतं धनुः सज्यं समारोपितज्याकं कृत्वा नृणां पश्यतामेव सतां निमिषमात्रेणैव कालेन विकृष्य यथा मदकरी मत्तहस्ती इक्षुदण्डं मध्यतो भनक्ति तद्वत् मध्यतो बभञ्ज ॥ १७ ॥ धनुष इति। तदा भज्यमानस्य धनुषो ध्वनिः खमाकाशं रोदसी द्यावापृथिव्यौ दिशश्च पूरयामास सर्वत्र व्याप्तो जातः। यं शब्दं श्रुत्वा कंसस्त्रासं भयमुपागमत् ॥ १८ ॥ तद्रक्षिण इति। तस्य धनुषो रक्षिणः सानुचराः आततायिनः जिघांसया गृहीतशस्त्राः जिघृक्षवः जीवन्नेव गृह्यतां ततो राज्ञा बध्यतामिति वदन्तः। भारतीपक्षे त्वनयोरपकर्ता मादृशो जनो गृह्यतां बध्यतामिति वदन्तः आवव्रुः तावावृतवन्तः ॥ १९ ॥ अथेति। अथानन्तरमेव तान् दुरभिप्रायान् जिघांसून् विलोक्य क्रुद्धौ बभूवतुः। ततश्च धनुषः शकले आदाय ताभ्यां तान् जघ्नतुः। वाक्यभेदात्तानिति पुनरुक्तिर्न दोषः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निमेषेण अतिशीघ्रं बभंजमदकरीमत्तगजः ॥ १७–१८ ॥ तद्रक्षिणः धनुरक्षकाः आततायिन उद्यतशस्त्राः राज्ञेसमर्पणाय गृह्यतामित्यादि शब्दान कुर्वंतः आवव्रुरावृतवंतः ॥ १९ ॥ धनुषः शकलेद्वौविभागौ आदायतांश्चजघ्नतुः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

करणेति। उरुक्रमः श्रीकृष्णो भगवान्, सलीलं यथा तथा, वामेन करेण, उद्धृतं धनुः, सज्यं समारोपितज्याकं, कृत्वा अनिमेषेण आशु, नृणां रक्षकजनानां पश्यतां सतां, पश्यतस्ताननादृत्येत्यर्थः। मदकरी मदोन्मत्तः हस्ती, इक्षुदण्डं यथा तथा, विकृष्य च, मध्यतः प्रबभञ्ज ॥ १७ ॥ धनुष इति। तदा भज्यमानस्य धनुषः, शब्दो ध्वनिः, खमाकाशं, रोदसी द्यावापृथिव्यौ, दिशश्च पूरयामास। यं भज्यमानधनुःशब्दं श्रुत्वा, कंसः त्रासं भयं, उपागमत् ॥ १८ ॥ तद्रक्षिण इति। तद्रक्षिणः तस्य धनुषः पालकाः कुपिताः अत एव सानुचरा अनुचरैः सहिताः, ग्रहीतुं कामो येषां ते, अत एव गृह्यतां बध्यतामिति ब्रुवाणाः, आततायिनः जिघांसया गृहीतशस्त्राःसन्तः, आवव्ररावृतवन्तः ॥ १९ ॥ अथेति। अथानन्तरं, बलकेशवौ रामकृष्णौ, दुरभिप्रायान् जिघांसून्, तानागच्छतो धनुष्पालकान् विलोक्य, क्रुद्धौ सन्तौ, धन्वनो धनुषः शकले, आदाय एकैकं धनुःशकलं गृहीत्वेत्यर्थः। तांश्च सर्वास्तानपीत्यर्थः। जघ्नतुः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

करेण वामेनेति : १०.४२.१७.

दक्षिणकरेण धर्मं भक्तोत्थितमादरेण गृह्णामि। वामेन चासुराणामबोध्यदस्तत्करेण तद्धता ॥ ७५ ॥

यद्द्रव्यमध्वरविधौ भवति प्रधानं तच्चेद् विनष्टमुत यातमिहारिहस्ते।
तत्तत्फलं निगदितं यजमाननाशस्तस्माद् बभञ्ज किमु तद्धनुरध्वरार्हम् ॥ ७६ ॥

गुणवानपि चेन्मार्गणविमुखस्तत्तद्गुणं समाकृष्य। भग्नोदरं करोमीत्याशयमीशो व्यदर्शयद्धनुषिः ॥ ७७ ॥

कुब्जाऽङ्गरागगुणतः सरला बभूव जातं धनुस्तु सरलं गुणतोऽतिवक्रम्।
आद्यादवाप पदमैशमसौ तदन्त्यान्नाशं परस्य विनियोजनमत्र बीजम् ॥ ७८ ॥
येनाऽयमुज्झितनयो विगणय्य देवान् सम्पीडयत्यनुदिनं भुवि भूमिदेवान्।
तत्पुण्यमस्य निखिलं शकलीकरोमीत्याधात् प्रभुर्विशदयन्किमुधर्मभङ्गम् ॥ ७९ ॥

धनुर्भङ्गं विधायैव पुरा लब्धा मया प्रिया। श्रियमत्र स्थितां तद्वल्लभेयेति तथाऽकरोत् ॥ ८० ॥

जित्वा काममनार्यमुख्यम बलां कृत्वाऽप्यविद्यां वशां योऽस्मिन् स्वैरमनुव्रजत्यनुपदं स्वाज्ञाननाशेच्छया।
ज्ञात्वा दुष्कृतनाशवच्च सुकृतध्वंसोऽपि तत्साधकः कार्यः शीघ्रमिति व्यबोधि धनुषो भङ्गेन कंसारिणा ॥ ८१ ॥
मद्राश्यष्टमगामिदुर्ग्रहततिर्मामत्रगं घातये दित्यालोच्य धनुर्न्ययोजि बहुशः कंसेन यागच्छलात्।
इत्याचिन्त्य तदाऽच्युतः सबलतां स्वां सर्वतो निर्भयः कुर्वन् व्यक्तपदां श्रितैः सह धनुः किं तद्बभञ्जाऽञ्जसा ॥ ८२ ॥
अनेकपर्वघटितो रसगर्भोऽक्षतृप्तिकृत्। धर्मोऽत्रेत्यभवत् स्पष्टमिक्षुदण्डोपमानतः ॥ ८३ ॥
करतस्तद्धनुर्भङ्गमकरोत् करिवद्धरिः। चित्रमन्यत्ततोऽप्यासीन् मधुरैकरसाश्रितः ॥ ८४ ॥

त्रासमुपागमदिति : १०.४२.१८.

यद्बलाद्बलवानासीद् भृशं कंसो नृशंसधीः । तद्धर्मभङ्गमाश्रुत्य त्रस्तोऽभूदिति नाद्भुतम् ॥ ८५ ॥

अथ तानिति : १०.४२.२०.

वक्रः स्वभावगुणतो भग्नोऽप्यपरापकारकार्येव । भवतीति स्पष्टमभूद् भग्नेनान्यापकारिणा धनुषा ॥ ८६ ॥
तद्धनुःशकलेनैव ताञ्जघान दुराशयान् । तेन स्वात्मन्यलिप्तत्वं श्रौतमाविष्कृतं ध्रुवम् ॥ ८७ ॥
धर्मः कीदृगपीह वाऽस्तु तमहं व्याभोगयोगान्वितं दाक्षिण्येन विधाय भक्तिपदवीं नीत्वा च तद् द्वारतः ।
धर्मोऽस्मत्कलितोऽस्मदीय इति च व्यर्थाभिमानग्रहान् दुर्वृत्तान्ननु शिक्षयामि चरितादस्मादिदं ध्वन्यते ॥ ८८ ॥

कृष्णप्रिया

सब लोग देख रहे थे, भगवान ने अनायास वामकर कमल से धनुष को उठाया, आसानी से सज्ज किया, खींचा और एक ही पलक में मध्य भाग से जैसे कोई मदमत्त पराक्रमी गजराज गन्ना के दण्ड का टुकड़ा कर दे वैसे दो टुकड़े कर दिए॥ १७ ॥ टूटते हुए धनुष का भयानक शब्द सारे आकाश को और दशों दिशाओं को भर दिया । धनुष टूटने का भयानक शब्द को सुनकर राजा कंस हृदय त्रास से काँप उठा । १८ ॥ धनुष टूटने की आवाज को सुनकर धनुष रक्षा के लिए नियुक्त किए गए राज सैनिक कुपित होकर अपने सैनिकों के साथ शस्त्रों को उठाकर भगवान् कृष्ण को पकड़ने के लिए पकड़लो-पकड़लो बध कर डालो-बध कर डालो ऐसे चिल्लाते हुए चारों ओर से भगवान को घेर लिए॥ १९ ॥ उन रक्षकों के दुष्ट अभिप्राय को जानकर और अपने को घेरते हुए देखकर भगवान् श्रीकृष्ण एवं श्रीबलदेवजी को बड़ा रोष आया और उस धनुष के दोनों टुकड़े हाथ में लेकर उस टुकड़े से सब सैनिकों को मारने लगे ॥ २० ॥

बलं च कंसप्रहितं हत्वा शालामुखात्ततः । निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसम्पदः ॥ २१ ॥
तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान् । कृष्णरामौ वृतौ गोपैः पुराच्छकटमीयतुः ॥ २२ ॥
तयोस्तदद्भुतं वीर्यं निशाम्य पुरवासिनः । तेजः प्रागल्भ्यं[1] रूपं च मेनिरे विबुधोत्तमौ ॥ २३ ॥
[2]गोप्यो मुकुन्दविगमे विरहातुरा या आशासताशिष ऋता मधुपुर्यभूवन् ।
सम्पश्यतां पुरुषभूषणगात्रलक्ष्मीं हित्वेतरान्[3] नु भजतश्चकमेऽयनं [4]श्रीः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—बलम्, (चतुरङ्गिणीम् सेनाम्) च, (देवान्, वरान्) हत्वा, ततः, शालामुखात्, निष्क्रम्य, पुरसम्पदः, निरीक्ष्य, हृष्टौ, चेरतुः ॥ २१ ॥ स्वैरम्, विचरतोः, तयोः, आदित्यः, अस्तम्, उपेयिवान, गोपैः, वृतौ, कृष्णरामौ, पुरात, शकटम्, ईयतुः ॥ २२ ॥ पुरवासिनः, तयोः, अद्भुतम्, तद्, वीर्यम्, निशाम्य, तेजः, प्रागल्भ्यम्, रूपम्, च, (दृष्ट्वा, श्रुत्वा) विबुधोत्तमौ, मेनिरे ॥ २३ ॥ मुकुन्दविगमे, विरहातुराः, गोप्यः, याः, आशिषः, आशासत, (ताः) पुरुषभूषणलक्ष्मीम्, सम्पश्यताम्, (जनाम्, कृते) मधुपुरी, सत्याः, अभूवन्, हि, श्रीः, नु, भजतः, इतरान्, हित्वा, अयनम्, चकमे ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

परतः प्रातरेव गंतव्यमिति शालामुखादेव पुनर्निष्क्रम्य ॥ २१ ॥ तेजः प्रभावम् । प्रागल्भ्यं धृष्टताम् ॥ २२ ॥ शकटं शकटावमोचनस्थानम् ॥ २३ ॥ मुकुंदस्य विगमे व्रजान्निर्गमनसमये या आशिष आशासत 'सुखं प्रभाता रजनीयम् । 'अद्य ध्रुवं तत्र दृशो भविष्यते' इत्यादि यदुक्तवत्यस्ता ऋताः सत्या बभूवुः । केषाम् । मधुपुरि मथुरायां पुरुषभूषणस्य श्रीकृष्णस्य गात्रस्य देहस्य लक्ष्मीं शोभां संपश्यताम् । कथंभूतस्य गात्रस्य । नु अहो इतरान्ब्रह्मादीन् हित्वा यदयनमाश्रयं श्रीः कामयामास । यां गात्रलक्ष्मीमिति वा ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परतोऽग्रे । इति हेतोः । शालामुखाद्धनुर्गृहद्वारात् । बलं चेति पूर्वान्वयि । पुरसंपदो हर्म्यादिशोभाः ॥ कंसेन प्रहितं प्रेषितं बलं सैन्यम्, श्लेषेण कंसस्य सामर्थ्यमिवेति । ततस्तस्मादेवेति शालामुखविशेषणम् । पुरसंपदो निरीक्ष्य हृष्टौ सन्तौ पुनरपि चेरतुः लीलया पुर्यन्तर्वव्रमतुः ॥ २१ ॥ तयोः रामकृष्णयोः । तत् धनुर्भंगबलहननरूपम् । रूपं सौंदर्यम् 'रूपं स्वभावे सौंदर्ये'

---

१. प्रागल्भ्यरूपं—वीर. विज. । २. ''गोप्यो'' अयमधिकः—विज. । ३. तरांस्तु—वीर. । ४. नु यच्छ्रीः—वीर. ।

इति मेदिनी ।। एवं दुष्टदमनादिना शिष्टानामानंदो नितरां जात इत्याह—तयोरिति । तत् तत्रत्यम् । वीर्यं धनुर्ग्रहणादौ पराक्रमम् । तेजः सर्वाभिभवनस्वभावम् , प्रागल्भ्यमकुंठत्वम् , रूपं सौंदर्यं च । तेजआदीनां द्वंद्वैक्यम् । विबुधोत्तमौ शिवविष्णू , ततोऽप्युत्तमौ संकर्षणवासुदेवौ वा ।। २२ ।। तयोः रामकृष्णयोः । अस्तमस्ताचलम् । शकटाः सन्ति अत्रेति शकटम् । अर्शआदित्वादच् । एतदभिप्रेत्यैव स्वामिभिर्व्याख्यातं शकटावमोचनस्थानमिति ।। विशेषतो बहुव्रता तया चरतोः । आदित्योऽस्तमिति तदानीमाविष्कृततत्प्रतापासहनादेवेति भावः ।।२३।। पुरुषभूषणं पुरुषश्रेष्ठम् । "श्रेष्ठे चालंकृतौ प्रोक्तं भूषणं भूनिवासके" इति निरुक्तिः । किंभूताः-यदित्यध्याहारापेक्षया सरलपंथानमाह-यां पुरुषभूषणगात्रलक्ष्मीमिति वेति । अयनमित्यनेन व्यधिकरणेनाप्यजहल्लिंगत्वात्संबंधः ।। अथ श्रीगोपीनां पुरजनानां च प्रेमवर्णनमुपसंहरति—गोप्य इति । अयमर्थः —मुकुंदस्य विगमे व्रजं परित्यज्य मथुराप्रस्थाने गोप्यो विरहातुराः सत्यो या आशिषः "सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवम्" इति रीत्या पुरयोषितां कामिनीनां यानर्थानाशासताऽवश्यप्राप्यत्वेनेष्टवत्यः स्वयमभिप्रेतवत्य इत्यर्थः । 'आङः-शासु-इच्छायाम्' । ता आशिषो मधुपुरि मधुपुरे पुरुषभूषणस्य मुकुंदस्य सम्यक्पश्यतामन्येषामपि जनानामव्यभिचारिण्यो बभूवुः । तदुत्कर्षार्थं तद्गात्रलक्ष्मीमेव विशिनष्टि—हित्वेति । 'श्रीर्यत्पदांबुजरजश्चकमे तुलस्याः' इत्यादिरीत्या, 'यद्वांच्छया श्रीः' इत्यादिरीत्या च । भजतः स्वसंपत्तिकामनया समुपासीनानपीतरान् हित्वा तन्मयनिजांतरवैभवमनादृत्य यामेवायनमाश्रयं कामयामास, तदेवं परमयोग्यानां तासां विरहमनभिनंदन्परमयोग्यत्वादेव पर्यवसानेन तु न स्थास्यत्येव विरह इति ध्वनयति । वक्ष्यते च स्वयं भगवता—"मय्यावेश्य मनः कृष्णे विमुक्ताशेषवृत्तयः । अनुस्मरंत्यो मां नित्यमचिरान्मामुपैष्यथ ।।" इति ।। २४ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कंसेन प्रहितं वलं सैन्यं श्लेषेण कंसस्य सामर्थ्यमिवेति ततस्तस्मादेवेति शालामुखविशेषणं पुरसम्पदो निरीक्ष्य हृष्टा सन्तौ पुनरपि चेरतुः । लीलया पुर्यन्तर्बभ्रमतुः ।। २१ एवं दुष्टदमनादिना शिष्टानामानन्दो नितरां जात इत्याह । तयोरिति । तत् तत्रत्यं वीर्यं धनुर्ग्रहणादौ पराक्रमं तेजः सर्वाभिभवनस्वभावः प्रागल्भ्यमकुण्ठत्वं रूपं सौन्दर्यञ्च । तेजआदीनां द्वन्द्वैक्यं विबुधोत्तमौ शिवविष्णु ततोऽप्युत्तमौ श्रीसङ्कर्षणवासुदेवौ वा ।। २२ ।। विशेषतो बहुत्रत्यतया चरतोः आदित्योऽस्तमिति तदानीमाविष्कृततत्प्रतापासहनत्वादेवेति भावः ।। २३ ।। अथ श्रीगोपीनां पुरजनानाञ्च प्रेमवर्णनमुपसंहरति । गोप्य इति । अयमर्थः । मुकुन्दस्य विगमे व्रजं वरित्यज्य मथुराप्रस्थाने गोप्यो विरहातुराः सत्यो या आशिषः सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवम् । इति रीत्या पुरयोषितां कामिनीनां यान् अर्थान् आशासत अवश्यप्राप्यत्वेनेष्टवत्यः स्वयमभिप्रेतवत्य इत्यर्थः । आङ् शासु इच्छायां ता आषिषो मधुपुरि मधुपुरे पुरुषभूषणस्य मुकुन्दस्य सम्यक् पश्यतामन्येषामपि जनानामव्यभिचारिण्यो बभूवुः । तदुत्कर्षार्थं तद्गात्रलक्ष्मीमेव विशिनष्टि । हित्वेति । श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या इत्यादिरीत्यायद्वाञ्छया श्रीरित्यादिरीत्या च भजतः स्वमम्पत्तिकामनया समुपासीनानपि इतरान् हित्वा तन्मयनिजान्तरवैभवमनादृत्य यामेवायनमाश्रयं कामयामास। तदेवं परमयौग्यानां तासां विरहमनभिनन्दन् परमयोग्यत्वादेव पयवसानेन तु न स्थानस्यत्येव विरह इति ध्वनयति । वक्ष्यते च स्वयं भगवता । मय्या वेश्य मनः कृष्णे विमुक्ताशेषवृत्ति यत् । अनुस्मरन्त्यो मां नित्यमचिरान्मामुपैष्यथेति ।। २४ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततो रक्षिगण-हननानन्तरं कंसेन प्रहितं नियुक्तं वलं सैन्यम् , श्लेषेण कंसस्य सामर्थ्यमेवेति, ततस्तस्मादेवेति शालामुखविशेषणं वा, पुरसम्पदो निरीक्ष्य साक्षादनुभूयैव हृष्टौ सन्तौ पुनरपि चेरतुर्लीलया पुर्य्यन्तर्वभ्रमतुः ।। २१ ।। एवं दुष्टदमनादिना शिष्टानामानन्दो नितरां जात इत्याह—तयोरिति । बल—केशवयोस्तत् हेलया धनुर्भञ्जनरक्षिवर्गादिवधतोऽभिव्यक्तं वीर्य्यं पराक्रममद्भुतं लोकातीतं, चकारादस्य तेज आदिनाप्यन्वयः । पुरवासिन इति वैदग्ध्यादिना तेषां तन्मननयोग्यतोक्ता । तत्रत्याश्च सर्वेऽपि गृहीताः, तेजः प्रागल्भ्येतैर्व्याख्याते एव । तत्र प्रभावः सामर्थ्यमैश्वर्य्यं वा, धृष्टता लीलाभ्रमणादावलज्जता निरपेक्षतावेति, यद्वा, तेजो द्युतिर्विश्वाभिभवशक्तिर्वाः प्रागल्भ्यं निर्भयत्वं स्वातन्त्र्यं प्रचण्डता वा रूपं सौन्दर्य्यम् , तेषां द्वन्द्वैक्यम् यद्वा, तेजसो लोकानुग्रहादिसर्वशक्तेः, प्रागल्भ्यं प्रौढत्वम् , तान् प्रति परमकृपादिगुणः, अन्यत् समानम् । एवं क्रमेण कर्म्मगुणरूपाणि त्रीण्युक्तानि विबुधोत्तमौ श्रीशिव-विष्णु मेनिरे ज्ञातवन्तः ।। २२ ।। स्वर स्वच्छन्दं यथा स्यात्तथा विशेषेण चरतो पुनरपि पुर्य्यंतरितस्ततो भ्रमतोः सतोः, स्लेहभरेण गोपैः कृतावरणे श्रीकृष्णस्य प्राधान्यविवक्षयादौ निर्देशः ।। २३ ।। एवं श्रीभगतः स्वैरविचरणेन तत्रत्याः परमानन्दिता बभूवुरिति तेषां महाभाग्यं वर्णयति—गोप्य इति आशिषो मंगलवाक्यानि, केषामृता बभूवुस्तानाह—सम्यक् पश्यतां जनानां स्वैरं विचरणेनातिनिकट एव प्रियसखवर्गैः सहितस्य गोपवेषस्य तस्य प्राप्तेर्दर्शनसम्यक्त्वमित्यपश्यन्तः कंस-तदनुगा व्यवच्छिन्नाः, यद्वा, तत्सन्दर्शनानन्दभरोदयाभिप्रायेण स्वरूपमात्रनिर्देशः । अत एव ताभिरपि पूर्वमुक्तम्, (भा० १०।३५।२५)—'द्रक्ष्यन्ति ये च' इत्यादि, मधुपुरीति पुरा मधुनामदैत्यसम्बन्धात् । किंवा मधु परमानन्दरसस्तत्प्रकटनात् किंवा मधवो यादवा एव, तद्वासात् । एवं तस्यां तद्योग्य तोक्ता । सत्यतायां हेतुः—गोप्यस्तत्रापि विरहातुरास्तत्रापि मुकुन्दस्य

सदा परमानन्दप्रदस्य विगमे इति विरहाधिक्यमुक्तम्—परमार्त्यो महत्तममुखोद्गतानां वाचां सद्यः फलत्वात् । यद्वा, मुकुन्देत्यादिकं तत्समयस्मारणमात्रं भजत आदरेण बहुधा सेवमानानपि चकम् इति तस्या अपि न तत्सम्यक् प्राप्तिरिति बोधयति । अतः किं तेषां भाग्यं वर्ण्यमिति भावः ।। २४ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

शकटं नन्दादीनां विश्रमस्थानम् ।। २३ ।। पुरुषभूषण भूषणभूतः कृष्णस्तस्य गात्रलक्ष्मीं सम्पश्येताम् आशिषः ऋताः सत्या अभूवन् इत्यर्थः ।। २४-२९ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा कंसेन प्रेषितं सैन्यं हत्वा ततः शालाद्वारान्निर्गत्य तत्र तत्र पुरसम्पदो निरीक्ष्य हृष्टौ चेरतुः ।।२१।। तयोरामकृष्णयोस्तद्धनुर्भञ्जनाद्यात्मकं कर्म निशाम्य दृष्ट्वा श्रुत्वा च तेजः पराभिभवनसामर्थ्यं प्रागल्भ्यं धृष्टतारूपञ्च तेषां समाहारस्तेनातितरसाधारणेन तौ देवोत्तमौ मेनिरेऽमन्यन्त ।।२२।। स्वैरं यथा तथा तयोर्विचरतोः सतोः सूर्योऽस्तमाप्तः ततस्तौ गोपैः सह पुरात् शकटं शकटावमोचनस्थानं नन्दादीनां विश्रमस्थानमिति यावत् ईयतुः आजग्मतुः ।। २३ ।। मुकुन्दस्य विगमे व्रजान्निर्गमनवेलायां विरहेणातुरा गोप्यः या याः आशिषः आशासत सुखं प्रभाता रजनीयम् अद्य ध्रुवं तत्र दृशो भविष्यत इत्यादिकमुक्तवत्यः ताः सर्वा आशिषो मधुपुर्यां पुरुषभूषणस्य गात्रलक्ष्मीं पश्यतां जनानामृताः सत्या बभूवुः कथम्भूतस्य गात्रस्य भजतः सेवमानानितरान् ब्रह्मादीन् हित्वा श्रीर्महालक्ष्मीर्यद्गात्रमाश्रयं चकमे अचीकयत यामिति पाठे यां गात्रलक्ष्मीमित्यर्थः । यमिति पाठे यं पुरुषभूषणमित्यर्थः ।। २४ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

शालामुखाद्धनुर्गृहद्वारात् ।। २१ ।। वीर्यं पराक्रमं तेजः बलं प्रभावम्वा प्रागल्भ्यं धाष्ट्र्यं रूपं सौन्दर्यम् एकवद्भावादेकवचनं तेजः प्रागल्भ्ययोरूपं चक्षुर्ग्राह्यामिव स्थितमित्यर्थः ।। २२ ।। अस्तम् अस्तगिरिं शकटमुपशल्यं स्वावस्थानम् ।। २३-२४ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वीर्य्यं बलं तेजः प्रभावः विवुधोत्तमौ विष्णुरुद्रौ वासुदेवसंकर्षणौ वा ।। २२ ।। शकटं शकटावमोचानाभिधं मथुराप्रान्तस्थं नन्दावासम् ।। २३ ।। व्रजसुन्दरीभावभावितत्वादकस्मात्तद्विरहस्मृतिजनितविषादो—मुनीन्द्रः परीक्षितं पूर्वकथां स्मारयति । गोप्य इति । मुकुन्दस्य विगमे व्रजान्निर्गमनसमये या आशिषः भविष्यन्तीः सुखसम्पत्तीः आसासत अस्माकमाशिषोऽद्य पुरस्थाः प्राप्स्यन्तीत्यभाषन्त सुखं प्रभाता रजनीयमिति अद्य ध्रुवं तत्र दृशो भविष्यत इत्यादिकास्ता मधुपुर्य्यां कृष्णगात्रशोभां पश्यताम् ऋताः सत्या यथार्था एवाभूवन् कथं तादृशीनां विलापोक्तिरप्यन्यथा भवेदिति भावः । श्रीस्त्रैलोक्यवर्तिन्यपि शोभा सर्वशोभाधिष्ठात्री देवता इतरान् भजतः स्वं कामयमानानपि पुंसस्त्यक्त्वा यां गात्रशोभां चकमे भूषणभूषणाङ्गमितिवत् स्वं शोभयितुमिति भावः । गात्रलक्ष्मीं विशिनष्टि । अयनं प्राकृताप्राकृतसर्वशोभानामाश्रयणीयमित्यर्थः ।।

गूढार्थदीपिनी

शाला धनुर्मखशालातद्द्वारात् बहिः । बलं सैन्यम् ।। २१ ।। प्रागल्भ्यं धृष्टताम् रूपं सौन्दर्यम् ।।२२।। स्वैरं यथेच्छम् । शकटाः सन्ति अत्रेति शकटम् । मत्वर्थीयोऽच् । शकटावमोचनस्थानम् (डेराइति) ।। २३ ।। गोप्य या आशिषः आशासत ऐच्छन् ताः सत्या अभूवन् । केषाम् । मधुपुरि मथुरायाम् कृष्णस्य गात्रलक्ष्मीं शोभां सम्पश्यताम् । नु अहो यां लक्ष्मीं श्रीः अयनं स्वाश्रयं चकमे । इतरान् ब्रह्मादीन् हित्वा ।। २४ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुरसम्पदो निरीक्ष्य चेरतुः ।। २१ ।। तेजः पराभिभवनसामर्थ्यं प्रागल्भ्यं धृष्टत्वम् ।। २२ ।। शकटं शकटावमोचनस्थानम् ईयतुः आजग्मतुः ।। २३ ।। गोप्यः मुकुन्दस्य विगमे व्रजान्निर्गमने सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः अद्य ध्रुवं तत्र दृशो भजिष्यते इत्यादि या आशिषः आशासत उक्तवत्यः ताः सर्वाः पुरुषभूषणगात्रस्य श्रीकृष्णगात्रस्य लक्ष्मीं पश्यताम् ऋताः सत्याः बभूवुः उ अहो श्रीः भजतो ब्रह्मादीन् हित्वा यद्गात्रमयनमाश्रयं चकमे कामयामास ।। २४ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वीर्यं पराक्रमं तेजः कायकान्तिं प्रागल्यं धार्ष्ण्यं रूपमाकारम् । एकवद्भावः । प्रागल्भ्येन सहितं च तद्रूपं चेति वा पुरवासिनो निशम्य तौ विवुधोत्तमौ देववरौ मेनिरे व्यजानन् ।। २१ ।। स्वैरं मरणभीत्या केऽपि न न्यवारयान्निति यथेच्छम् । आदित्योऽस्तमुपेयिवान् । सोमवंशसम्भूतप्राभवावलोकनविलम्बमवलम्ब इति कंसायुरद्य वर्तत इति वाऽस्तं गत उत देवानां

वातामाख्यातुं वेति ध्वनिः। नावपि स्वमूलपुरुषद्विषामहनीयोऽहन्यस्मन्महिम्नेति गोपैर्वृतौ रामकृष्णौ पुराच्छकटमर्धचन्द्रीकृतशकटस्थानमीयतुः ॥ २२ ॥ अङ्घ्रियुगलं पादद्वन्द्वमवनिज्य प्रक्षाल्य क्षीरोपसेचनं क्षीरान्नं रात्रौ दधिनिषेधात्। कंसचि कीर्षितं कंसचिकीर्षितं कंसालोचितस्वहिंसादिकं ज्ञात्वाऽपि तां रात्रिं सुखं यथा तथोषतुः। सुखमिति श्रुतैतद्वृत्तयोरपि तदलभ्यतां सूचयति ॥२३॥ रक्षिणां धनुषस्तया धनुश्च भङ्ग स्वबलस्य च वधं निशम्य परं केवलं रामकृष्णयोर्विक्रीडितं तल्लीलारूपम् ॥ २४॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं रक्षकान् देवान् नरांश्च हत्वा गमनार्थमुद्युक्तौ तावता कोलाहले जाते कंसो बलं च प्रेषितवान् एकहेलया तं च हत्वा निर्गतावित्याह। बलञ्चेति। हस्त्यश्वरथपदात्यात्मकं बलं सेनां हत्वा शालामुखान्निष्क्रम्य क्रुद्धावेश परित्यज्य क्षणान्मनोहररूपावेव जातौ अतः हृष्टौ सन्तौ पुरसम्पदो निरीक्ष्य चेरतुः यथैताभ्यां धनुर्वार्त्तापि न ज्ञायत इति लोकप्रतीतिर्भवति तत्र पूर्ववदेव स्त्रीणां पुरुषाणां च व्यवहारो जात इति न विशेष उक्तः एवं तयोर्महत्यानन्दे अग्रिमानन्दसिध्यर्थं तयोर्विचरतोरेव सतोः सूर्योऽस्त गत इत्याह। स्वैरं यथासुखम् अनेनामर्यादापि लीला निरूपिता ये दैत्यांशाः ते मारिताः लुण्ठिताश्च कंसहितैषिणः स्त्रियश्चात्यन्तकामपीडिताः सन्तोषं प्रापिताः एवमनुग्रह – निग्रहात्मकं तु कुर्वाणौ विचेरतुरिति ॥२१॥ तदा आदित्योऽस्तं गतः भीत इति केचित् भगवानपि निवृत्त इत्याह। कृष्णरामाविति। अत्र मध्ये क्वचिदेकः श्लोकः अविसीत एव श्रूयते यदा बल हत्वा निर्गतौ तदा लोकानां भगवदासक्त्यर्थं माहात्म्यज्ञानमपि वृत्तमित्याह। तयोस्तदद्भुतं वीर्यमिति। तद्धनुर्भङ्गक्षणं पराक्रमं यत्रैव भगवन्तं पश्यन्ति तत्रैव पृष्ठतः प्रवृत्ता लोकाः एताभ्यां धनुर्भङ्गादिकं कृतमिति सर्वत्रैवाहुः ततो निशम्य सर्व एव पुरवासिनः तयोः तेजः शरीरकान्तिः प्रागल्भ्यं प्रागल्भतारूपं च कोटिकन्दर्पलावण्यं रूपं च दृष्ट्वा श्रुत्वा च तौ विबुधोत्तमौ मेनिरे यथा नन्दादयः प्रथमप्रकरणे गोपवृद्धाश्च गोप्यश्चेत्यत्र तामसास्तृतीये तज्ज्ञातवन्तः राजसास्तु द्वितीये ज्ञातु युक्ताः प्रथमे निरूप्यन्त इति विगीतमित्यपि केचित् गोकुलचरित्रमपि श्रुतमित्यर्थादेतदपि द्वितीयं द्वितीये च वक्ष्यति मन्ये कृष्णं च रामं चेति स्वापेक्षया देवा उत्तमाः तेभ्योऽप्येतावुत्तमाविति ब्रह्माण्डे सर्वोत्तमत्वमुक्तं भवति गोपैः सहितौ कृष्णरामौ पुरदर्शनं परित्यज्य शकटं शंकटस्थानं यत्र नन्दादयस्तिष्ठन्ति तदीयतुः ॥ २२–२३ ॥ एवं भगवच्चरित्रमुक्त्वा प्रमाणप्रकरणत्वात् तत्र प्रमाणमतिदिशन् माहात्म्यमाह। गोप्य इति। मथुरायां तावदेव जातं यावद्गोपीभिरुक्तं युद्धादिकं तु दोषनिवर्त्तकमिति न तन्निष्पन्नत्वेनोच्यते अनेन गोपिकाः परित्यज्य तासु क्लिष्टासु कथमन्यत् कृतवान् इत्यपि दूषणं निराकृतं यतस्ता एव याः आशिषः आशासत ता एव सत्याः कर्त्तव्या इति भगवांस्तथा कृतवान् तासामेव वचनप्रमाणार्थं यतो भगवान् मुकुन्दः असत्यवचने मोक्षोऽपि दातुमशक्य इति तत्रापि मुकुन्दस्य विगमे वियोगे उपस्थिते विरहातुराः सत्यः भगवता निरुद्धा इति द्वेषादिकमकृत्वा आशिष एवाशासत ताभ्यो हितमपि कर्त्तव्यं तदभावे वाक्यं वा कर्त्तव्यमिति अतस्ता एवाशिषः मधुपुरि मथुरायां सत्या जाताः तदपि भगवता कर्त्तव्यमिति न कृतं किन्तु अनुषङ्गादेव जातमित्याह। सम्पश्यतामिति। पुरुषाणां भूषणरूपस्य मुकुटमणेर्भगवतः गात्रलक्ष्मीं सम्पश्यतामिति। ननु कथं स्त्रीणामेवं वचनं सत्यत्वेन निरूप्यते नान्येषामित्याशङ्क्याह। हित्वेति। आदौ वाक् स्त्री स्त्रीणां मूलभूतया लक्ष्म्या च भगवान् परिगृहीतः अतः परिग्रहदार्ढ्यात् ता एवात्र प्रमाणं श्रीरितरान् ब्रह्मादीन् न निश्चयेन भजतोऽपि सेवार्थमागतानपि हित्वा स्वस्यायनं स्थानभूतं चकमे अयमेव मम स्थानं भवत्विति सैव सर्वा गोप्यः तासां स्ववाक्यमत्र सिद्धं नत्वतिरिक्त किंचित् ॥ २४ ॥

श्रीसुबोधिनी–सारः

कंसेन प्रहितं प्रेषितं बलं सैन्यं च हत्वा शालाया मुखात् निर्गत्य पुरस्य संपदः शोभा निरीक्ष्य दृष्ट्वा हृष्टौ ततश्चेरतुः॥२१॥ तयोः रामकृष्णयोस्तदद्भुतं वीर्यं निशाम्य श्रुत्वा तेजःप्रभावं प्रागल्भ्यं धृष्टतां च निशाम्य पुरवासिनो देवोत्तमो मेनिरे ॥ २२॥ तयोर्विचरतोः सतोरादित्यः सूर्योस्त प्राप्तः स्वैरं स्वेच्छया कृष्णरामौ गोपैर्वृतौ युक्तौ पुरात् शकटमनोऽवमोचनस्थानमाजग्मतुः ॥ २३ ॥ मुकुंदस्य विगमे व्रजात् निर्गमनसमये विरहातुरा गोप्यो या आशिष आशासत ऐच्छन् "सुखप्रभाता रजनी" इति ताः ऋताः सत्या अभूवन् पुरुषभूषणस्य श्रीकृष्णस्य गात्रस्व देहस्य लक्ष्मीं शोभां संपश्यतां जनानां मधुपुरि मथुरायां भजत इतरान् ब्रह्मादीन् हित्वा त्यक्त्वा श्रीर्लक्ष्मीरयनं गृहं चकमे आश्रयं स्थानं वा नु अहो ॥ २४ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

तदा कंसेन प्रेषितं बलं सैन्यं च हत्वा ततस्तस्मात् शालामुखात् बहिर्निष्क्रम्य तत्र तत्र पुरसम्पदो निरीक्ष्य हृष्टौ चेरतुः ॥ २१ ॥ तयो रामकृष्णयोस्तद्धनुर्भञ्जनादिलक्षणमद्भुतं वीर्यं कर्म निशम्य श्रुत्वा तेजः पराभिभवनसामर्थ्यं, प्रागल्भ्यं धृष्टतां, रूपं सौन्दर्यं च दृष्ट्वा पुरवासिनस्तौ विबुधेषु उत्तमौ मेनिरे अमन्यन्त ॥ २२ ॥ स्वैरं यथेष्टं यथा तथा तयोर्विचरतोः सतोः सूर्यो स्तंगिरिमुपेयिवान् प्राप्तवान्, ततश्च गोपैर्वृतौ रामकृष्णौ पुरात् शकटावमोचनस्थानं नन्दादिसमीपमीयतुः आजग्मतुः ॥२३॥ मुकुन्दस्य विगमे व्रजान्निर्गमनवेलायां तद्विरहणातुरा विवशा गोप्यः या आशिषः आशासत 'सुखं प्रभाता रजनीयम्' इत्यादिना पुरयोषितामाशिषः सत्या भविष्यन्तीति उक्तवत्यस्ताः सर्वा मधुपुरीं पुरुषभूषणस्य पुरुषोत्तमस्य कृष्णस्य गात्रलक्ष्मीं देहशोभां

पश्यतां जनानां ऋताः सत्या बभूवुः । तद्गात्रशोभातिशयं सूचयन्नाह—भजतः सेवमानान् इतरान् ब्रह्मादीन् हित्वा श्रीर्महालक्ष्मीर्यत् गात्रमयनं चकमे स्वाश्रयतया स्वीकृतवती ॥ २४ ॥

अन्वितार्थप्रकाशिका

बलमिति ॥ तदा कंसेन प्रहितं बलं सैन्यं च हत्वा ततस्तस्मात् शालामुखात् बहिर्निष्क्रम्य तत्र तत्र पुरसम्पदो निरीक्ष्य हृष्टौ चेरतुः ॥ २१ ॥ तयोरिति ॥ तयोः रामकृष्णयोस्तद्धनुर्भञ्जनादिलक्षणमद्भुतं वीर्यं कर्म निशम्य श्रुत्वा तेजः पराभिभवनसामर्थ्यं प्रागल्भ्यं धृष्टतां रूपं सौन्दर्यं च दृष्ट्वा पुरवासिनस्तौ विवुधेषु उत्तमौ शिवविष्णू वासुदेवसंकर्षणौ वा मेनिरे अमन्यन्त २२ तयोरिति ॥ स्वैरं यथेष्टं यथा तथा तयोर्विचरतोः सतोः सूर्योऽस्तंगिरिमुपेयिवान् । ततश्च गोपैर्वृतौ रामकृष्णौ पुरात् शकटं शकटावमोचनस्थानं नन्दादिसपमीयतुः आजग्मतुः ॥ २३ ॥ गोप्य इति ॥ मुकुन्दस्य विगमे व्रजान्निर्गमनवेलायां तद्विरहेणातुरा विवशा गोप्यः या आशिषः आशासत सुखं प्रभाता रजनीयमित्यादिना पुरयोषितामाशिषः सत्या भविष्यन्तीति उक्तवत्यस्ताः सर्वा मधुपुरि मथुरायाम् । समासान्ताभाव आर्षः । पुरुषभूषणस्य कृष्णस्य गात्रलक्ष्मीं देहशोभां पश्यतां जनानाम् ऋताः सत्या बभूवुः । भजतः सेवमानान् इतरान् ब्रह्मादीन् हित्वा श्रीर्महालक्ष्मीः सर्वशोभाऽधिष्ठात्री वा यत् गात्रमयनं चकने स्वाक्षयतया स्वीकृतवती यां गात्रलक्ष्मीमिति वा ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ततस्तेषां हननानंतरं बलं सैन्यं च हत्वा शालामुखात् निःक्रम्यः ॥२१॥ तेजः प्रभावातिशयं च प्रागल्भ्यं परैरपराभवनीयसामर्थ्यं च रूपं स्वरूपसौंदर्यं चात्र द्वंद्वैक्यम् ॥ २२ ॥ शकटं शकटावमोचन स्थानं ॥ २३ ॥ गोप्य इति मुकुंदस्य विगमे गोष्ठान्मथुरामनकाले विरहातुराः गोप्यः या आशिषः सुखं प्रभाता रजनीयमिति अद्य ध्रुवं तत्र दृशो भविष्यते इत्यादिकानुक्तानाशीर्वादान् आशासत कथयामासुताः सर्वा आशिषः पुरुषभूषणस्य हरेः गात्रलक्ष्मीं शरीरसौन्दर्यं संपश्यतो मधुपुरि मथुरायां स्थितानां जनानां ऋताः सत्याः अभूवन् बभूवुः नु इत्याश्चर्यं भजत इतरान् लाकपालान् हित्वा यस्मिन् श्रीकृष्णगात्रे अयनं निवासं श्रीःलक्ष्मीः चकमे इति स्म ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बलमिति ॥ तथा कंसप्रहितं कंसेन प्रेषितं, बलं सैन्यं हत्वा, च ततस्तस्मात्, शालामुखात् निष्क्रम्य निर्गत्य, तत्र तत्र, पुरसंपदः निरीक्ष्य, हृष्टौ सन्तौ, चेरतुः ॥ २१ ॥ तयोरिति ॥ पुरवासिनः पत्तनस्था जनाः, तयो रामकृष्णयोः तद्धनुर्भञ्जनाद्यात्मकं, अद्भुतमाश्चर्यरूप, वीर्यं कर्म, निशम्य दृष्ट्वा श्रुत्वा च, तेजः पराभिभवनसामर्थ्यं च प्रागल्भ्यं धृष्टता च रूपं सौन्दर्यं च, तेषां समाहारं च निशम्य अनितरसाधारणैस्तैरिति शेषः । तौ विबुधोत्तमौ देवप्रवरौ, मेनिरे अमन्यन्त ॥ २२ ॥ तयोरिति ॥ स्वैरं यथा तथा, तयोः रामकृष्णयोः, विचरतोः सतोः, आदित्यः सूर्यः, अस्तमस्ताचलं, उपेयिवान प्राप्तः । ततः कृष्णरामौ, गोपैः वृतौ सन्तौ । पुरात शकटं शकटावमोचनस्थानं नन्दादीनां विश्रामस्थानमिति यावत् । ईयतुराजग्मतुः ॥२३॥ गोप्य इति ॥ मुकुन्दविगमे कृष्णस्य व्रजान्निर्गमनवेलायां, विरहातुराः गोप्यः, याः आशिषः आशासत 'सुखं प्रभाता रजनी' इति 'अद्य ध्रुवं तत्र' इति इत्यादि यदुक्तवत्यः ताः सर्वा आशिषः, मधुपुरि मधुपुर्यां मथुरायामिति यावत् । पुरुषभूषणगात्रलक्ष्मीं पुरुषेषु भूषणभूतस्य श्रीकृष्णस्य शरीरसंबन्धिनीं सुषमां संपश्यतां जनानां, ऋताः सत्याः, अभूवन् बभूवुः । कथंभूतस्य कृष्णगात्रस्येत्यत्राह । भजतः स्वं सेवमानान्, इतरान् ब्रह्मादीन् हित्वा परित्यज्य, श्रीर्महालक्ष्मीः, यद्भगवद्गात्रं, अयनमाश्रयं चकमे अचीकमत । नु निश्चितमेव ॥२४॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

बलं चेति : १०.४२.२१.

धर्मबलं सैन्यबलं भङ्क्त्वा कंसस्य मुख्यबलमपि च । विजितप्रायो रिपुरिति युक्तं सानन्दमास निजसुखदः ॥ ८९ ॥
धर्मस्थानमिह श्रुतिश्रुतमसौ पृच्छन् दिदृक्षुः परान् पौरान् भूरि च शोधयन् स्वयमपि प्रायो व्रजेदध्वनि ।
दृष्टे तत्र निरीक्ष्य धर्ममलघुं तद्वायपु रक्षितं लोकैश्वर्यद मात्तलील मनुसन्धायाथ तस्याऽऽदरम् ॥ ९० ॥
दाक्षिण्येन विधाय तं दृढगुणोल्लासि द्विदेशं ततः सर्वेषामनुपश्यतां फलभुजां नेयो विभक्तेः पदम् ।
धर्मोऽधर्म उभावपि प्रविलयं नीत्वा दिशैवं ततो ह्यज्ञानं विगताश्रयं गतबलं जेयं स्वजिज्ञासुना ॥ ९१ ॥
धर्मोऽनेन हि खण्डितोऽस्मदतुलश्रेयस्कृदित्याशयात् प्राप्ताश्चेन्निजभञ्जनाय सरुषस्तद्रक्षिणस्तर्हि तान् ।
जीयात्तत्र विभज्यमानसुकृतांशेनैव सर्वांस्ततः सानन्दं पुरसंपदीक्षणपरः कुर्याद्विहारं विभीः ॥ ९२ ॥
एवं सत्कृत-दुष्कृतांशराहतः स्वच्छन्दमानन्दतः क्रीडत्यह्नि च निश्यपि स्थितिमवाप्यानन्दमुख्यां सुधीः ।
मूलाज्ञाननिराकरिष्णुमनसः पुंसोऽवगत्यै निजात् तत्तादृक् चरितादबोधयदिदं श्रीशस्तदीक्ष्यं बुधैः ॥ ९३ ॥

(कलापकम्)

तयोरिति : १०.४२.२३.

विना कर्म न तत्साक्ष्युपयोग इति साम्प्रतम् । तत्क्रीडनादुपरते श्रीशेऽर्कोऽस्तमुपेयिवान् ॥ ९४ ॥

गोप्य इति : १०.४२.२४.

आवश्यकाहितधियो निखिलं विनिन्युर्गोप्यो दिनं ननु दिशा तु यया कयाऽपि ।
रात्रौ तु तत्कृतरतिस्मृतयो यदार्ता आसंस्तदीयविरहोक्तिरतान्तरङ्गाः ॥ ९५ ॥

कृष्णप्रिया

धनुष टूटने का एवं सैनिकों का वध का समाचार सुनकर राजा कंस ने श्रीकृष्ण एवं बलदेवजी को पकड़ने के लिए बिशाल सैन्य भेजा । दाऊजी एवं श्रीकृष्णजी ने सारी सेना का नाश कर दिया । पुनः दोनों भैया धनुष शाला से बाहर पधारे । अत्यंत प्रसन्न दोनों भैया विविध प्रकार की मथुरा पुरी की शोभा एवं ऐश्वर्य को देखते हुए सर्वत्र विचरने लगे ॥२१॥ दोनों भैया स्वेच्छानुसार पुरविहार करते रहे इतने में भगवान् सूर्यनारायण ने अस्ताचल की ओर प्रस्थान किया संध्यावंदन का समय जानकर भगवान् श्रीकृष्ण एवं बलभद्रजी अपने गोप वृन्द के साथ मथुरापुरी से निकलकर अपने डेरे पर पधारे ॥२२॥ भगवान् श्रीकृष्ण एवं बलभद्रजी का धनुष तोड़ने का अद्भुत पराक्रम, सुनकर श्रीअङ्ग की दिव्यकान्ति, प्रगल्भता ढिठाई एवं कोटि कन्दर्प लावण्य पूर्ण रूप को देखकर नगर निवासियों ने निश्चय किया कि ये दोनों कोई देववर्य ही है ॥ २३ ॥ श्रीमुकुन्द भगवान के मथुरा प्रस्थान के अवसर पर विरहिनी व्रजनारियों ने मथुरापुरवासियों के लिए जो सौभाग्य यशः गाया था वे सारे आशिषें सत्य ही हुई । कारण यह था कि परा श्रीभगवती लक्ष्मीजी के कृपा कटाक्षों की प्राप्ति के लिए अनेक विध तप उपासना करने वाली बड़े-बड़े देवों के सामने नजर भी न करने वाली, भगवान् श्रीकृष्ण के पद रज की सेवा करती है वैसे पुरुष मुकुट मणि भगवान् मुकुन्द के श्रीअङ्गो का सौन्दर्य लावण्य का पान किया ॥ २४ ॥

[1]अवनिक्ताङ्घ्रियुगलौ भुक्त्वा क्षीरोपसेचनम् । ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितम् ॥२५॥
कंसस्तु धनुषो भङ्गं रक्षिणां स्वबलस्य च । वधं निशम्य गोविन्दरामविक्रीडितं परम् ॥२६॥
दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः । बहून्यचष्टोभयथा मृत्योर्दौत्यकराणि च ॥२७॥
अदर्शनं स्वशिरसः [2]प्रतिरूपे च सत्यपि । असत्यपि द्वितीये च द्वैरूप्यं ज्योतिषां[3] तथा ॥२८॥

कवमक्षमा

अन्वयः—अवनिक्ताङ्घ्रियुगलौ, क्षीरोपसेचनम्, भुक्त्वा, कंसचिकीर्षितम्, ज्ञात्वा, ताम्, रात्रिम्, सुखम्, ऊषतुः ॥ २५ ॥ दुर्मतिः, कंसः, धनुषः, भङ्गम्, रक्षिणाम्, स्वबलस्य, च (दुष्टानाम्) वधम्, निशम्य, परमम्, गोविन्द रामविक्रमम्, निशम्य, भीतः दीर्घप्रजागरः, मृत्योः, दौत्यकराणि, च (स्वतोभयानिकानि) उभयथा, (स्वप्नजागरितानि) बहूनि, निमित्तानि, अचष्ट ॥ २६-२७ ॥ प्रतिरूपे (जले दर्पणेवा प्रतिबिम्बे) च (प्रत्यक्षेऽपि) सति, अपि (शिरसि) स्वशिरसः, अदर्शनम्, द्वितीये असति, ज्योतिषाम्, च (दीपे, सूर्य-चन्दादौ) तथा (मनुष्यादौ) द्वैरूप्यम्, अचष्ट ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अवनिक्तं क्षालितमंघ्रियुगलं ययोस्तौ क्षीरमिश्रमन्नं भुक्त्वा तां रात्रिं सुखं न्यवसताम् ॥ २५ ॥ परं केवलं गोविंदरामयोर्विक्रीडितं तन्न तु पराक्रमः कश्चित् ॥ २६ ॥ उभयथा स्वप्नजागरितभेदेन प्रत्येकं मृत्योर्दौत्यकराणि च । तथा च मन्त्रः । "इत्थादुलूकश्चापप्तन हिरण्याक्षो अयोमुखः । रक्षसां दूत आगतः ।" इत्यादिः । तथा "यदेतद्भूतान्यन्वाविश्य दैवीं वाचं वदसि" इत्यादिश्च ॥ २७ ॥ तानि दर्शयति श्लोकत्रयेण । जलादौ प्रतिरूपे दृश्यमानेऽपि स्वशिरसस्तत्रादर्शनम् । असत्यपि द्वितीये चक्षुषोंतर्धानेंगुल्यादौ ज्योतिषां चन्द्रादीनां द्वित्वम् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

क्षीरस्योपसेचनमुपसेको यस्मिन्नन्ने तत्तथा । यस्यां मथुरां गतास्ताम् । कंसचिकीर्षितं हस्तिमल्लादिद्वारा निजमारणलक्षणम् । अवनिक्तं दासैः क्षालितमंघ्रियुग्मं ययोस्तौ । क्षीरेण व्रजस्थकृष्णप्रियवयस्किनीदुग्धेन शकटोपरिष्टाग्निधान्यां व्रजेश्वर्यैवार्पितभांडस्थेनोपसिच्यमानमोदनं भुक्त्वा कंसस्य चिकीर्षितं परेद्यवि स्वहिंस नव्यवसायं ज्ञात्वापि निर्भयत्वात्सुखं

---

१. अवनिज्याङ्घ्रियुगल–विज. । २. रूपेषु सत्स्वपि–विज. । ३. ज्योतिषामपि–वीर. ।

स्वापाधिक्येनोषतुः। भोः पुत्रौ अद्य किं कृतं मुग्धाभ्यां युवाभ्यां, हंतहंत कथमर्चितं धनुर्भग्नं, कथं वा तद्रक्षिणो हताः, न जाने क्रुध्यन्कंसः श्वः किं करोति हाहा कथं मया गाष्ठाद्यु वामानीतावित्यादिभीतस्य सर्वां रात्रिमनिद्राणस्य पितुर्नंदस्य वाक्यं स्वापाधिक्यादेव तौ न श्रुतवंताविति ज्ञेयम् ।। २५ ।। धनुष इति देहलीदीपकन्यायेन भंगपदेन रक्षिणामित्यनेन च संबध्यते। परं केवलम्। कंसस्त्विति युग्मकम्। कंसस्तु धनुर्भंगादिकं निशम्य ततं परं केवलं रामकृष्णयोः विचित्र क्रीडारूपं न तु युद्धरूपं निशम्य भीतो दुर्निमित्तान्याचष्टे ।। २६ ।। उभयथा दैह्यानि बाह्यानि वा। तथा च मृत्युदौत्ये मंत्रः श्रुतिः। इत्था इत्थम्। उलूकः पक्षिविशेषः। आपद्नन् शुभमिति शेषः। हिरण्याक्षः पीतनेत्रः। अयोमुखः लोहचञ्चुः। रक्षसां रक्षवन्निर्दयानाम्। बहुत्वं पूजापेक्षम्। यमराजस्य मृत्योरित्यर्थः। तथाऽन्यो मंत्रः—भूतानि पक्ष्यादीनि। यत् यां वाचम्। दैवीं देवद्योतिकां वदसीति। तदेषा वाक् मृत्योर्दूतरूपेति भावः। दुर्मतिः तदानीमपि भगवद्भागवतद्रोहानिवृत्तेः। अयं सर्वत्रैव हेतुः। बहूनि राज्यभंगादिहेतूनि तावद्ददर्श। मृत्योर्दौत्यमिव कुर्वन्तीति तत्कराणि तत्सूचकानि च ददर्शेत्यर्थः ।। २७ ।। तानि दुर्निमित्तानि। प्रतिरूपे प्रतिबिंबे। तत्र प्रतिबिंबे। द्वितीये रूपे। द्वित्वं द्विरूपत्वम्। द्वैरूप्यं द्वित्वभानम्। चकारद्वयं दर्शनादर्शनयोर्द्वयोरपि प्राधान्यबोधनार्थम्। एवं तथेत्यस्य परेणान्वयः ।। २८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अवनिक्त इति तैर्व्याख्यातं तत्र ययोरिति षष्ठ्या तत्तदङ्गसेवककर्तृकत्वं बोध्यते। क्षीरमिश्रमिति श्रीव्रजेश्वर्या सायमशनार्थं शकटस्थापिताग्निधानीस्थितभाण्डवृन्दनिक्षिप्तमिति ज्ञेयं क्षीरेणोपसिच्यते इति कर्मणि ल्युट्विधानात्। कंसस्य चिकीर्षितं प्रातर्मञ्चारूढमहाजनसमागममध्ये रङ्गभूमौ मल्लयुद्धादिविधापनेच्छां ज्ञात्वा लोकमुखात् श्रुत्वा सुखं तद्वधार्थमायासं विना स्वस्थं यथा स्यात्तथा। यत् खल्वत्र रजकादिकं हत्वा पादावनेजनमात्रं कृत्वा नतु स्नात्वा भुक्तं तत्रेदं मन्यामहे पापिनां वधः खलु परमधर्म एव तथा "प्रत्यङ्गुलन्तु तीर्थानि प्रतिहस्तं सुरालया" इति मथुरामाहात्म्ये वचनादरः कर्त्तव्य एव ततस्तदनन्तरं स्नानं युक्तमिति ।। २५ ।। कंसस्त्विति युग्मकम्। कंसस्तु धनुर्भङ्गादिकं निशम्य तच्च परं केवलं रामकृष्णयोर्विचित्रक्रीडारूपं नतु युद्धरूपं निशम्य भीतो दुर्निमित्तान्यचष्ट ।। २६ ।। दुर्मतिस्तदानीमपि श्रीभगवद्भागवतद्रोहानिवृत्तेः। अयं सर्वत्रैव हेतुः। बहूनि राज्यभङ्गादिहेतूनि तावद्ददर्श। तथा मृत्योर्दौत्यमिव कुर्वन्तीति तत्कराणि तत्सूचकानि च ददर्शेत्यर्थः ।। २७ ।। अदर्शनमिति त्रिकम्। द्वितीयेति तैर्व्याख्यातम्। तत्र चक्षुषः अन्तर्द्धानं तद्धेतुर्यदङ्गुल्यादि तस्मिन्नसत्यपीत्यर्थः। आदिग्रहणात् तत्र मुख्यत्वेन मृत्युसूचकानि जागरदुर्निमित्तानि विशेषाद्दर्शयति काचकामलादयः। द्वैरूप्यं द्वित्वभानं चकारद्वयमदर्शनदर्शनयोर्द्वयोरपि प्राधान्यबोधनार्थम्। एवं तथेत्यस्य परेणान्वयः ।। २८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कंसस्य चिकीर्षितं दुश्चेष्टेच्छां ज्ञात्वापि सुखमेवोषतुर्निर्भयत्वात् पुरीसम्पन्निरीक्षणाच्च। यद्वा, प्रातर्मञ्चारूढजनसमाजमध्ये रंगभूमौ मल्लयुद्धादिविधापनेच्छामत एव सुखमूषतुः, स्वत एव सुखतस्तद्वधोपायासत्तेः, तथा गोपक्रीडातुल्ये मल्लयुद्धे निजप्रीतेश्च, तथा च वक्ष्यते (भा० १०।४ ।३६)—'नियुद्धमात्मनोऽभीष्टम्' इति ।। २५ ।। गोविन्दः श्रीगोवर्द्धनधारणादिना गोकुलेन्द्रः श्रीकृष्णः, प्रलम्बवधादिना गोपादिनरमणाद्रामश्चेति महाविक्रमवत्त्वं सूचितम्। तयोर्विक्रीडितरूपं धनुर्भंगादिकं निशम्य भीतो दुर्निमित्तान्यचष्टेति द्वाभ्यामन्वयः। वि शब्देन तस्य क्रीडामात्रतैव बोध्यते, न तु कश्चिद् विशेषः, अत एवोक्तम्—परं केवलमिति ।। २६ ।। दीर्घः—अविच्छिन्नश्चिरावस्थायी वा, प्रकृष्टो दृग्निमीलनमात्रेणापि रहितो जागरो यस्येति श्रीनारदोक्तश्रवणात् प्रथमत एव निद्राबाहुल्यनिवृत्तः, किंवा तद्रात्र्यामेव प्रायो निद्रापगमात्, दुर्म्मतिः तदानीमपि श्रीभगवद्भागवतद्रोहानिवृत्तेः। अयं सर्वत्रैव हेतुः। दौत्यकराणि सूचकानि, च कारोऽनुक्तसमुच्चये, अत्यन्ताभावसूचकानि च मोक्षस्य भावित्वात् ।।२७।। जागरितदुर्निमित्तान्याह—अदर्शनामिति द्वाभ्याम् द्वितीय इति तैर्व्याख्यातम्। तत्र चक्षुषः केनचित् किञ्चिदाच्छादने सति ज्योतिषां द्वित्व दृश्यत इति अन्तर्द्धानं यदंगुल्यादि तस्मिन्नित्यर्थ इति। यद्वा, द्वितीये तिमिरादिदोषे, किंवा चन्द्रादीनां द्वित्वे तत्त्वतोऽसत्यपि द्वैरूप्य द्वित्वदर्शनमित्यर्थः। चकार-द्वयमदर्शनदर्शनयोर्द्वयोरपि प्रधान्यबोधनार्थम्, एव तथेत्यस्य परेणाप्यन्वयः ।।२८।।

श्रीमद्वीरराधवाचार्यकृता भागवतचन्द्रचन्द्रिका

अवनिक्तं क्षालितमङ्घ्रियुग्मं ययोस्तौ क्षीरमुपसेचनं यस्य तदन्नं क्षीरमिश्रान्नमित्यर्थः। भुक्त्वा परेद्युः कंसचिकीर्षितं ज्ञात्वा तौ च सुखं यथा तथा तां रात्रिमूषतुः उषितवन्तौ ।। २५ ।। कंसस्तु रामकृष्णयोः केवलं क्रीडारूपं धनुर्भङ्गं तद्रक्षिणां स्वबलस्य च वध निशम्याकर्ण्य भीतो दीर्घप्रजागरः अलब्धनिद्रः दुःखितो बहूनि उभयथा स्वप्नजागरितभेदेन स्वाप्नानि जागरितानि च मृत्योर्दौत्यकराणि दुष्टानिनिमित्तानि अचष्ट ददर्श ।। २६–२७ ।। तान्येव कानि चिदाह त्रिभिः। तावज्जागरितानि तान्याह। अदर्शनमिति द्वाभ्याम्। वियज्जलादौ प्रतिरूपे दृश्यमाने सति स्वशिरसस्तत्रादर्शनम् असत्यपि द्वितीये ज्योतिषां चन्द्रादीनां द्वित्वम् ।। २८ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

क्षीरोपसेचनं क्षीरोपसेचकभूयिष्ठमन्नम् । धनूरक्षिणां वधं प्रेषितस्वबलस्य वधञ्च किङ्कृतमिति तत्राह । गोविन्देति। गोविन्दरामाभ्यां विक्रीडितम् ॥ २६ ॥ दीर्घः प्रजागरः निद्राराहित्यं यस्य स तथा **अचष्ट** अपश्यत् उभयथा दैहिकानि बाह्यानि च यद्वा जाग्रति स्वप्ने च दौत्यकराणि सूचकानि ॥ २७ ॥ तान्येव व्यनक्ति । अदर्शनमित्यादिना । प्रतिरूपेषु छायालक्षणेषु सत्स्वपि स्वशिरसोऽदर्शनं द्वितीये चन्द्रादावसति अविद्यमानेऽपि ज्योतिषां चन्द्रादीनां द्वैरूप्यं द्विमूर्तित्वं द्वौ चन्द्रावित्यादि बहुवचनेन दिपादयो ग्राह्याः द्विशिखात्वमित्यादिना ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अवनिक्तं दासैः क्षालितमङ्घ्रियुगलं ययोस्तौ क्षीरोपसेचनं क्षीरेण व्रजस्थकृष्णप्रियवयस्कयणीदुग्धेन शकटोपरिस्थाग्निधान्यां व्रजेश्वर्य्यैवार्पितभाण्डस्थेन उपसिच्यमानमोदनं भुक्त्वा कंसस्य चिकीर्षितं परेद्यवि स्वहिंसनव्यवसायं ज्ञात्वापि सुखस्वापाधिक्येन ऊषतुः भोः पुत्रौ अद्य किं कृतं मुग्धाभ्यां युवाभ्यां हन्त हन्त कथमर्चितं धनुर्भग्नं कथं वा तद्रक्षिणो हताः न जाने क्रुध्यन् कंसः श्वः किं करिष्यति हा हा कथं मया गोष्ठात् युवामानीतावित्यादिभीतस्य सर्वां रात्रिमनिद्राणस्य पितुर्नन्दस्य वाक्यं स्वापाधिक्यादेव तौ न श्रुतवन्ताविति ज्ञेयम् ॥ २५ ॥ तं च वधं केवलं रामकृष्णयोर्विक्रीडितं न तु पराक्रमं निशम्य ॥ २६ ॥ उभयथा स्वप्नजागरप्रकारेण मृत्योर्दौत्यमिव कुर्वन्तीति तानि ॥ २७ ॥ तानि दर्शयति त्रिभिर्दर्पणादौ प्रतिरूपे दृश्यमानेऽपि स्वशिरसस्तत्रादर्शनं वितीये द्वैरूप्यहेतुभूते चक्षुरन्तर्धानकारिण्यङ्गुल्यादौ असत्यपि ज्योतिषां चन्द्रादीनां द्वित्वम् ॥ २८ ॥

गूढार्थदीपिनी

अवनिक्तं क्षालितम् अङ्घ्रयुगलं ययोस्तौ । क्षीरेण उपसिच्यते यत् तत् पायसम् । कर्मणि ल्युट् । ऊषतुः न्यवसताम् ॥ २५ ॥ कंस इति युग्मम् । परं केवलम् बलस्य सैन्यस्य । उभयथा स्वप्नजागरितभेदेन बहूनि दुर्निमित्तानि अपशकुनानि **अचष्ट** ददर्शेत्यन्वयः दौत्यकराणि आगमनसूचकानि ॥ २६–२७ ॥ प्रतिरूपे दर्पणादौ । द्वितीये चन्द्रादौ । ज्योतिषां चन्द्रादीनां द्विरूपत्वम् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अवनिक्ताङ्घ्रियुगलौ क्षालिताङ्घ्रियुगलौ क्षीरोपसेचनं दुग्धमिश्रमन्नम् ॥ २५ ॥ कंसस्तु धनुर्भङ्गादिकं गोविन्दरामयोः परं केवलं विक्रीडितं निशम्याकर्ण्य भीतः दीर्घप्रजागरः । अलब्धनिद्रः उभयथा स्वप्नजागरितभेदेन मृत्योर्दौत्यकराणि दुर्निमित्तानि **अचष्ट** ददर्श ॥ २६–२८ ॥ तान्येव दर्शयति । अदर्शनमितित्रिभिः । प्रतिरूपे जलादौ सत्यपि तस्मिन् स्वशिरसोऽदर्शनम् द्वितीये असत्यपि ज्योतिषां चन्द्रादीनां द्वैरूप्यम् ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दीर्घं प्रजागरो जागरणं यस्य सोऽलब्धनिद्रः कदाचित्तत्प्राप्तौ दुर्मतिर्दुर्निमित्तान्युभयथा दैहिकबाह्यभेदेन भीतो बहून्यचष्टापश्यत् । कीदृशानीत्यत ईदृशानीत्याह ॥ मृत्योर्दूतकराणि शीघ्रं मरणसूचकानीति ॥ २५ ॥ तान्येव वितत्य वक्ति ॥ अदर्शनमिति । प्रतिरूपेषु छायालक्षणप्रतिबिम्बेषु सत्स्वपि स्वशिरसोऽदर्शनं । द्वितीये चन्द्रेऽसत्यपि वस्तुतद्द्वैरूप्यं चन्द्रयोः । तथा ज्योतिषां श्रवणादिद्वयदर्शनं । छायायां सुपिरप्रतीति । प्राणघोषस्य कराभ्यां कर्णयोः पिधाने वायुकृतप्रणवनादानुपश्रुतिरश्रवणं । तस्यैषा श्रुतिर्यत्रैतत्कर्णावपि गृह्यनिनदमिवेत्यादि । तद्भाष्ये च । प्राणसंस्थः स वै विष्णुः प्राणाग्नौ संव्यवस्थितः । स्पर्शेन दृश्यते चाग्निस्तद्दृष्टिरिव सा ततः । स प्राणः स्तौति तं विष्णुं सा श्रुतिः श्रूयते सदा । कर्णौ पिधाय तद्विद्वान्दिव्यचक्षुः सुकीर्तिमान् । मुक्तो भूत्वा भवेद्यस्मादुपासतिवं सततमिति सत्तत्त्व इत्युक्तैर्मृतिरासन्ना चेदयं न श्रूयत इति प्राणघोषानुपश्रुतिरिति । वृक्षेषु स्वर्णप्रतीतिस्तद्वर्णप्रतिभानं । रजस्वलायामपि भूमौ स्वपदानां तल्लाञ्छनानामदर्शनं ॥ २७ ॥ जागरित ईरयित्वा स्वप्नेऽप्याह ॥ स्वप्न इति । प्रेतपरिष्वङ्गः शवालिङ्गनं खरयानं खरोपर्युपविश्य गमनं विसादनं कमलबीजभक्षणं नलदमाली पद्मविशेषसंज्ञा पद्ममालां शिरः कृत्वा यो गच्छेद्दक्षिणामुखः । एवं पश्यन्निशि स्वप्ने तत्क्षणान्मृत्युमेष्यतीति स्वप्ननिदर्शन इति । तदमृणालं चाभयं जलदं सेव्यममृणालं जलाशयमित्यमरः । अथवा जपाकुसुममालावात्रक्तकरवीरं नलदमित्यपरे । तैलस्याभ्यङ्गं यस्य स तथा । दिगम्बरश्च यायावेदपशकुनमित्यर्थः ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अवमोचनं गतस्य भगवतश्चरित्रमाह । अवनिक्तमङ्घ्रियुगलं याभ्यां क्षीरमुपसिच्यते अस्मिन्निति क्षीरोपसेचनं पायसं वा पृथुका वा पक्वान्नविशेषो वा क्षीरस्योपसेचनं यथा भवति तथा वा प्रथमतो नगरगमने क्षीरोदनभोजनं मुख्यमिति यथा गमने दध्योदनभोजनं लघुपाकार्थं वेति केचित् तस्तां रात्रिं सुखमूषतुः अन्यत्रासुखं वक्तुं भगवति विद्यमान सुखस्यानुवाद उक्तः ननु

पितरौ बद्धौ अमोचयित्वा कथं सुखमूषतुस्तत्राह । ज्ञात्वा कंसचिकीर्षितमिति । कंसस्य चिकीर्षितं ज्ञात्वा कंस एव तत् करिष्यति किमित्यस्माभिः क्लिष्टं कर्त्तव्यमिति यथैतावान् कालः वसुदेवपुत्रत्वं सङ्गोप्य नीत एवमियमपि रात्रिः सङ्गोप्या अन्यथा नन्दादीनां क्लेशो भवेत् व्यवहारेऽपि शत्रुं हत्वैव परिगृहीतं ग्राह्यम् अन्यथा चौर्यं स्यात् अतः स्ववधार्थं कंस एव यत्नं करिष्यतीति निश्चित्य सुखमूषतुः ॥ २५ ॥ एवं भगवच्चरित्रमुक्त्वा अग्रिमं चरित्रं सिध्यर्थं कंसवृत्तान्तमाह । कंसस्त्विति । कंसस्य रात्रौ महती अनिर्वृत्तिर्जाता आदौ निद्राभावः निद्रायामपि दुःस्वप्नादिकमिति एवं मरणं निश्चयाकमपि ज्ञात्वा पुनर्मरणार्थमेव प्रवृत्त इति भगवतोऽक्लिष्टकर्मत्वार्थमिदमुपाख्यानमुक्तवान् । आदौ निद्राभावे हेतुमाह । तुशब्दः सुखात्मकतां व्यावर्त्तयति । अग्रे कंसस्य दुःखमेवेति ज्ञापयितुं धन्वनो धनुषो भङ्गं श्रुत्वा रक्षिणां स्वबलस्य च वधं श्रुत्वा एतदपि गोविन्दस्य रामस्य च विक्रीडितत्वमात्रं श्रुत्वा दीर्घप्रजागरो जातः प्रकृष्टो जागरः बहिर्विक्षेपसहितः परमुत्कृष्टं विक्रीडितं परमित्यर्थः । विषये वा न केवलं प्रजागरणमात्रं किं तु भीतोऽपि जातः । अन्तःकरणमेव तस्यादौ मरणं सूचयति । एवमपि न भगवन्तं प्रपद्यत इति । दुर्मतित्वात् दुर्निमित्तानि दुष्टनिमित्तानि अवश्यं भाविमरणसूचकानि बहून्येव व्यचष्ट अनेन द्वेषेणापि भगवन्तं चिन्तयन् कथं दुर्निमित्तानि दृष्टवानिति परिहृतं यतो दुर्मतिः भगवत्यनिष्टं भावयति तच्चात्मने फलतीति बहूनि बहुविधानि प्रकारबहुत्वमत्र विवक्षितम् उभयथा यो मृत्युः स्वस्वकीयविषयः ऐहिकपारलौकिकविषयो वा परलोकोऽपि न भविष्यतीति भयोत्पादनार्थं तथा दृष्टानि उभयथा स्वप्नजागरितानीति वा नन्वेतानि किमिति दृश्यन्ते तत्राह । मृत्योर्दौत्यकराणीति । मृत्युरत्रायास्यतीति दूतवदवबोधयन्ति चकारात् स्वतोऽपि भयानकानि ॥ २६-२७ ॥ जागरितान्याह । अदर्शनमिति सप्तविधानि । मृत्युरपि भगवानिति । प्रतिबिम्बे दर्पणादौ स्वसिरसः अदर्शनं ग्रीवापर्यन्तमेव प्रतिरूपं दृश्यते । चकारात्प्रत्यक्षेऽपि नासिकादिमुखाभावो दृश्यते सोऽपि न दृश्यत इति तर्ह्येतस्यैवाभाव इति चेत्तत्राह । सत्यपीति । स्पर्शादिना बहिर्ज्ञायते अन्यश्च प्रतिबिम्बो दृश्यते इति । चक्षुर्हि ज्ञानात्मकं तत् आत्मानमेव गृह्णाति स्वप्रकाशत्वात् विषयदोषसंभवाच्च । तथा सति भगवानेव दृश्यते सर्वत्र यत्र पुनः येनांशेन तिरोधत्ते तत् क्रियया सदपि ज्ञानविषयत्वेन न सद्भवति । तत्र देहे ग्रीवान्तं क्रियाप्रधानं ज्ञानांशेनैव तिरोहितः । न तु सदंशेन अग्रे क्रियाया कर्त्तव्यत्वात् । अनेन मरणं निर्द्धारितं न तु कृतमिति बोधितम् । द्वितीयमाह । असत्यपि द्वितीये च द्वैरूप्यमिति । भगवानेक एव सर्वत्र यदा प्राणी कालाभिमुखो भवति तदा द्वितीयः कालो भासते । तदत्र सूचयति द्वितीयः समागत इति । तृतीयमाह । ज्योतिषां तथेतिषां तथेति । ज्योतिषामपि द्वैरूप्यं दृष्यते दीपचन्द्रनक्षत्रादीनामेकस्मिन् दीपे अक्षिनिकोचनादिव्यतिरेकेणापि दीपद्वयप्रतीतिः ज्योतिर्ह्याधिदैविकं रक्षकं तदपि कालव्याप्तं जातमिति ज्ञापितम् ॥ २८ ॥

श्रीसुबोधिनी-सार

अवनिक्तं प्रक्षालितमंघ्रियुगलं याभ्यां तौ क्षीरमिश्रमन्नं भुक्त्वा कंसस्य चिकीर्षितं कर्त्तुमिष्टं ज्ञात्वा तां रात्रिं सुखमूषतुः ॥ २५ ॥ धनुषो भंगं रक्षिणां धनुर्गृहपालकानां स्वबलस्य च वधं मृत्युं निशम्य श्रुत्वा परं केवलं गोविंदरामयोर्विक्रीडितं तत् निशम्य कंसः ॥ २६ ॥ दीर्घो महान्प्रजागरो जागरणं यस्य स भीतो दुर्बुद्धिरुभयथा स्वप्रजागरितभेदेन मृत्योर्दौत्यकराणि बहूनि दुर्निमित्तानि दुःस्वप्नानि आचष्टापश्यत् ॥ २७ ॥ तथाहि प्रतिरूपे जलादर्शादौ सत्यपि स्वशिरसोऽदर्शनं द्वितीयेऽसत्यपि ज्योतिषां चंद्रादीनां द्वैरूप्यम् ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अवनिक्तं क्षालितं अङ्घ्रियुगुलं ययोस्तौ क्षीरोपसेचनं क्षीरमिश्रमन्नं भुक्त्वा कंसचिकीर्षितं परेद्युः क्रियमाणं स्ववधोद्योगं च ज्ञात्वा तां रात्रिं सुखं यथा स्यात्तथा ऊषतु। ॥ २५ ॥ गोविन्दरामयोः परं केवलं विक्रीडितं अनायासेनैवं कृतं धनुर्भङ्गादिकं निशम्य कंसः ॥ २६ ॥ भीतः अत एव प्रजागरः अलब्धनिद्रः उभयतः स्वप्नानि जागरितानि च मृत्योर्दौत्यकराणि आगमनसूचकानि चकारात् लोके दुष्कीर्तिसूचकानि च बहूनि दुर्निमित्तानि अपशकुनान्यचष्ट ददर्श । 'तद्दर्शनात् तत्समयेऽपि भगवच्चरणागमनमुचितम्, तन्नाकरोद्दुर्बुद्धित्वात्' इत्याशयेनाह—दुर्मतिरिति ॥ २७ ॥ तान्येव कानिचिदाह—त्रिभिः । तत्र तावज्जागरितान्याह—अदर्शनमिति द्वाभ्याम् । दर्पणजलादौ प्रतिरूपे सत्यपि दृश्यमानेऽपि तत्र स्वशिरसः अदर्शनं, तथा द्वितीये असत्यपि अक्षिनिकोचनादिद्वित्वदर्शननिमित्ताभावेऽपि ज्योतिषां चन्द्रादीनां द्वैरूप्यं द्वित्वं च ददर्श ॥ २८ ॥

अन्वितार्थप्रकाशिका

अवनिक्तेति ॥ अवनिक्तं क्षालितमंघ्रियुगलं ययोस्तौ रामकृष्णौ क्षीरोपसेचनं क्षीरेण उपसिच्यते तत् क्षीरमिश्रमन्नं भुक्त्वा तच्च सायमाशाय मात्रा शकटस्थाग्निधानीस्थितभाण्डवृन्दे निक्षिप्तम् । कंसचिकीर्षितं परेद्युः कर्त्तुमिष्टं स्ववधोद्योगं च ज्ञात्वा तां रात्रिं सुखं यथा स्यात्तथा ऊषतुः ॥ २५ ॥ कंस इति द्वयम् ॥ धनुषो भङ्गं रक्षिणां वधं स्वबलस्य च वधं निशम्य तच्च गोविन्दरामयोः परं केवलं विक्रीडितम् अनायासेनैवं कृतं नतु पराक्रमरूपम् । इति च निशम्य दुर्मतिः कंसः भीतः अतएव दीर्घप्रजागरः अलब्धनिद्रः उभयथा स्वप्नजागरितप्रकारेण मृत्योर्दौत्यकराणि आगमनसूचकानि चकारात् लोके दुष्कीतिसूचकानि च

बहूनि दुर्निमित्तानि अपशकुनान्यचष्ट ददर्श ।। २६-२७ ।। जागरजान्याह – अदर्शनमिति ।। दर्पणजलादौ प्रतिरूपे सत्यपि दृश्यमानेऽपि तत्र स्वशिरस अदर्शनं तथा द्वितीये असत्यपि अक्षिनिकोचनादिद्वित्वदर्शननिमित्ताभावेऽपि ज्योतिषां चन्द्रादीनां द्वैरूप्यं द्वित्वं च ददर्श ।। २८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अवनिक्तं गोपैः प्रक्षालितं अंघ्रियुगलं ययोस्तौ क्षीरयुक्तमन्नं भुक्त्वा सुखं यथा तथा तां रात्रिं ऊषतुर्न्यवसतां ।। २५ ।। गोविंदारामयोः विक्रीडितं पर केवलं क्रीडामात्रं न तु तत्सामर्थ्यमिति निशम्य ।। २६ ।। अचष्टपश्यर्शितिरम कथंभूतानि उभयथा-स्वप्नजागरितभेदेन द्विविधानि मृत्योः दौत्यकराणि दैत्यं दूतत्वं कुर्वन्तीति तथा भूतानि ।। २७ ।। श्लोकत्रयेण तान्यूमय विधानि दुर्निमितानि विवृणोति तत्रादौ जागरितानि निदर्शयन्नाह अदर्शनमिति प्रतिरूपे सत्यपि जलादिषु स्वच्छायायां सत्यमपि तत्र स्वमस्तकस्यादर्शनं बभूव ज्योतिषां चंद्र शुक्रदीनां द्वितीये रूपे असत्यपि द्वै रूप तेषां द्विरूपत्वं अपश्यत् ।। २८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अवनिक्तेति ।। अवनिक्तं क्षालितमङ्घ्रियुगलं ययोस्तौ रामकृष्णौ, क्षीरं दुग्धमुपसेचनं यस्य तदन्नं, क्षीरमिश्रमन्नमित्यर्थः । भुक्त्वा, कंसचिकीर्षितं ज्ञात्वा, तां रात्रिं सुखं यथा तथा, ऊषतुः उषितवन्तौ ।।२५।। कंस इति ।। दुर्मतिः कंसस्तु, धनुषः भङ्गं रक्षिणां धनुष्पालकानां, स्वबलस्य सैन्यस्य च, वधं परं केवलं, गोविन्दरामविक्रीडित रामकृष्णयोः क्रीडामात्ररूप इत्यर्थ निशम्य आकर्ण्य ।। २६ ।। दीर्घ इति ।। भीतः भयं प्राप्तः, अत एव दीर्घप्रजागरोऽलब्धनिद्रः सन्, उभयथा स्वप्नजागरितभेदेन द्विप्रकाराणि, मृत्योः दौत्यकराणि, बहूनि दुर्निमित्तानि दुष्टानि निमित्तानि च, अचष्ट ददर्श । इति द्वयोरेकान्वयः ।। २७ ।। तान्येव कानिचिदाह त्रिभिः । तत्रापि जागरितान्याह ।। अदर्शनमिति ।। अदर्शनमिति द्वाभ्याम् प्रतिरूषे दर्पणजलादौ स्वप्रतिबिम्बे सत्यपि, दृश्यमाने तत्र स्वशिरसः अदर्शनं, तथा ज्योतिषां चन्द्रादीनां, द्वितीये द्विरूपत्वे असति अविद्यमानत्वे सत्यपि, द्वैरूप्यं तेषां द्विरूपत्वेन समीक्षणमित्यर्थः । चकारद्वयमुक्तार्थसत्यतावगमकम् ।। २८ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अवनिक्ताङ्घ्रीति : १०.४२.२५.

दुर्जनस्पृष्ट-भूभागरजःस्पर्शोऽद्य मत्पदे । नाहं इत्यच्युतः स्वाङ्घ्री क्षालयामास साधु तत् ।। ९६ ।।
सुकृत-दुष्कृत निष्कृतिकृद्रजो ह्यनलसो निखिलं परिमार्जयन् । विमलसत्त्वभुगस्तमितश्रमः किमवशिष्टमितस्त्विति चिन्तयन् ।।९७।।
तिष्ठेत् सुखं निशायामप्येवमज्ञानजित् पुमान् । तत्तादृगात्मचरितादिति श्रीशो व्यबोधयत् ।। ९८ ।। (युग्मम्)

कंसस्त्विति : १०.४२.२६.

श्रुत्वाऽऽचारमुखेन सेवकजनक्लेशं धनुर्भञ्जनं स्वामात्यं मतिमन्तमन्तिकगतं कंसः स सातङ्कधीः ।
प्रोवाचेयमुपस्थिता रिपुकृतिः प्रत्यक्षमेतत्कथं किं वाग्रे च विधेयमित्यपगतालस्यं हि पश्याधुना ।। ९९ ।।
मन्त्री मन्त्रविदां वरः सुमतिमान् सप्रश्रयः साञ्जलिभव्यज्ञोऽज्ञपतिं व्यजिज्ञपदनु प्रेक्ष्याऽनुतापोदयम् ।
राजन्नेवमिदं तदत्र भवता स्वान्तर्द्विषद्रोधने भाव्यं यत्नवता मया पुरमिदं संरक्ष्यते बाह्यतः ।। १०० ।।

दीर्घप्रजागर इति : १०.४२.२७.

अज्ञानप्रसरो रात्रावेव भूरितरो यतः । तद्युक्तमज्ञकंसस्य विचारः स्वप्नदृक् च सा ।। १०१ ।।
मूलाज्ञानमिहोज्झिताखिलबलं ह्यस्तोन्मुखं स्याद्यदा पश्यत्यात्मनि कल्पितं बहुविधं प्राग्वासनावासितम् ।
नश्यद्दीप इव द्युतिं च विपुलां संदर्शयत्यर्थतो दुःस्वप्नेक्षणतोऽस्य मञ्चरचनोद्योगाच्च भातीदृशम् ।। १०२ ।।

कृष्णप्रिया

भगवान् कृष्ण एवं वलभद्र जी दोनों भैया अपने डेरे पर पधारे पुनः हस्तचरण प्रक्षालन करके सन्ध्यादि से निपटकर दूध मिश्रित मिष्टान्न का रात्रि भोजन किया । लोक सिद्ध प्रथा है कि प्रस्थान के समय दही मिश्रित भोजन करें और पहुँचकर दूध मिश्रित भोजन करे इसलिए भगवान् ने पय मिश्रित भोजन किया । पुनः कंस क्या करना चाहता है यह भी जान लिया और वसुदेव जी के पुत्र स्वरूप को व्यक्त न करते हुए सुख पूर्वक रात्री पसार की ।। २५ ।। राजन् परीक्षित् ! राजा कंस ने भगवान् गोविन्द ने धनुष का भङ्ग किया धनुष भङ्ग एवं दोनों भाईयों ने किया हुआ रक्षकों का एवं सेना का वध का समाचार जाना तब वह अधिक भयभीत बना । यदि वह सज्जन होता तब तो प्रसन्न होता लेकिन कुमति के कारण उलटे प्रयत्न करने लगा ।। २६ ।। अब कुमति कंस अमङ्गल स्वप्नादि चिह्न देख रहा है—उसको अब रात्री में नींद नहीं आई । अब तो रात में और दिन में

मृत्यु के सूचक अनेक अमङ्गल अशकुन को देखने लगा ॥ २७ ॥ अब जागते हुए कंस ने दर्पण एवं जल आदि में अपने प्रतिबिम्ब परछाई को तो देख रहा है लेकिन प्रतिबिम्ब में मस्तक नहीं दिख पड़ता। नेत्र के अङ्गुलि आदि का आवरण न होने पर भी दीपक, सूर्य एवं चन्द्र में दो शिखा एवं सूर्य चन्द्र के दो दो रूप दिख पड़ते हैं ॥ २८ ॥

छिद्रप्रतीतिश्छायायां प्राणघोषानुपश्रुतिः। स्वर्णप्रतीतिर्वृक्षेषु स्वपदानामदर्शनम् ॥ २९ ॥
स्वप्ने प्रेतपरिष्वङ्गः खरयानं विषादनम्[1]। यायान्नलदमाल्येकस्तैलाभ्यक्तो दिगम्बरः ॥ ३० ॥
अन्यानि चेत्थंभूतानि स्वप्नजागरितानि च। पश्यन् मरणसन्त्रस्तो निद्रां लेभे न चिन्तया ॥ ३१ ॥
व्युष्टायां निशि कौरव्य सूर्ये[2]चाद्भ्यः समुत्थिते। कारयामास वै कंसो मल्लक्रीडामहोत्सवम् ॥ ३२ ॥

१. विसादनम्–वीर. विज. २. चाभि–विज., चाब्धि–प्रा. पा.।

कर्दमक्षमा

अन्वयः—छायायाम्, छिद्रप्रतीतिः, प्राणघोषाऽनुपश्रुतिः, वृक्षेषु, सुवर्णप्रतीतिः, स्वपदानाम्, अदर्शनम्, (अचष्ट) ॥२९॥ स्वप्ने, प्रेतपरिष्वङ्गः, खरयानम्, विषादनम्, नलदमाली, एकः, यायात्, तैलाभ्यक्तः, दिगम्बरः, यायात्, आत्मानम्, अचष्ट ॥३०॥ इत्थंभूतानि, च, (स्वप्नेऽपि) स्वप्नजागरितानि, च (स्वदुष्टकार्याणि) पश्यन्, मरणसन्त्रस्तः, चिन्तया, निद्राम्, न, लेभे ॥ ३१ ॥ हे कौरव्य ! निशि, व्युष्टायाम्, अद्भ्यः, सूर्ये, समुत्थिते, च, (लोकेषु अपि उत्थितेषु) कंसः, मल्लक्रीडामहोत्सवम्, वै, कारयामास ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

छायायां प्रतिबिंबे छिद्रप्रतीतिः। पिहितकर्णपुटस्य योऽन्तःश्रूयमाणो ध्वनिः स प्राणघोषस्तस्यानुपश्रुतिरश्रवणम्। वृक्षेषु स्वर्णवर्णप्रतीतिः। रजःकर्दमादिषु स्वपदा नामदर्शनम्। एतानि जागरितानि दुर्निमित्तानि ॥ २९ ॥ स्वप्नान्याह। स्वप्न इति। प्रेतैर्मृतैः परिष्वंगः। खरमारुह्य यानम्। विषभक्षणम्। नलदमाली जपाकुसुममाली यायादिति यत्तदप्येकं दुर्निमित्तमिति ॥ ३०-३१ ॥ कष्टेन कथंचित्प्रभातायां पुनः सूर्ये चाद्भ्यः समुत्थित इति। तथा च श्रुतिः। "अद्भ्यो वा एष प्रातरुदेति अपः सायं प्रविशति" इति। "य उदगान्महतोर्णवाद् विभ्राजमानः सलिलस्य मध्यात्। स मा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु।" इति च ॥ ३२-३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

जागरितानि जागरे जातानि। स्वपदाना स्वपादलाञ्छनानाम्। छिद्रप्रतीतिः सच्छिद्रतादर्शनम् ॥ २९ ॥ स्वाप्नानि स्वप्नभवानि। परिष्वङ्ग आलिंगनम्। 'विसादनम्' इति पाठे पद्मकंदभक्षणमित्यर्थः। "नलदमाली दक्षिणामुखो व्राजयति" इति श्रुतेः। "पद्मालां शिरः कृत्वा यो गच्छेद्दक्षिणामुखः। एवं पश्यन्निशि स्वप्ने तत्क्षणे मृत्युमृच्छति ॥' इति स्वप्ननिदर्शने। यद्वा—नलदं वक्ररक्तपुष्पं मृणालशून्यं वर्षासु जायमानं तन्मालाधारी। 'अभयं नलदं सेव्यममृणालं जलाशयम्" इत्यमरः। तैलाभ्यक्तः कृततैलाभ्यंगः। दिगंबरो नग्नः ॥३०॥ इत्थंभूतानि अन्यानि कर्दममज्जनादीनि त्वक्स्फुरणादीनि च स्वप्नजा गरजानि। मरणसंत्रस्तो मृत्युभीतः। सञ्जातो जागरो येषु तानि जागरितानि, जागरसम्बन्धनीत्यर्थः ॥ ३१ ॥ व्युष्टायामित्यस्य कष्टेनेत्यादिरर्थः। "अद्भ्यो वा" इति श्रुतिर्व्याख्यातचरा। अथापरा श्रुतिः–यः सूर्यः। उदगादुदयं प्राप। अर्णवादर्णवस्य संबंधिनः सलिलस्य जलस्य मध्याद्विभ्राजमानो देदीप्यमानः। स ऋषभश्रेष्ठः। विपश्चित्सर्वज्ञो मां पुनात्वित्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वच्छायायां छिद्रप्रतीतिः सच्छिद्रतादर्शनमित्यर्थः टीकायां जागरितानीति संजातो जागरो येषु तानि जागरसम्बन्धीनीत्यर्थः ॥ २९ ॥ दीर्घप्रजागरत्वेऽपि कदाचिच्चिन्तयैव तन्द्रा स्यादिति स्वप्न इत्युक्तम् ॥ ३० ॥ स्वप्नजागरितानि तत्तत्सम्बन्धीनि ॥ ३१ ॥ व्युष्टायामिति अरुणोदयो विवक्षितः। तर्हि कथमन्धकारांश एव नेत्याह। सूर्ये चेति। समुद्रतीरस्थैः सूर्यो यदा तत एवोत्तिष्ठन्नदृश्यत तदैवात्रत्योदयसन्निधावित्यर्थः। इति त्वरा तदनुरूपकालता च दर्शिता। मल्लक्रीडात्मकं महोत्सवं कारयामास आरेभ इत्यर्थः। एवमात्मबधोपायः स्वयमेव कृत इति तद्दुर्बुद्ध्याश्चर्येण सम्बोधयति। कौरव्येति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

छिद्रप्रतीतिः सच्छिद्रतादर्शनमित्यर्थः ॥ २९ ॥ यद्यपि दीर्घप्रजागर इत्याद्युक्त्या स्वप्नो न घटेत, तथापि कदाचिद्दीर्घतन्द्री स्यात्तस्यामेव तद्दर्शनमिति स्वप्न इत्युक्तम्। एकमिति तैर्व्याख्यातमेव। यद्वा, एकं कञ्चित् प्रदेशं यायादिति ॥ ३० ॥

अप्यर्थे 'च'कारः, अन्यान्यपि, इत्थम्भूतानि उक्तसदृशानि दुर्निमित्तानि, च कारादन्यप्रकाराण्यपि, तानि च सन्निमित्तानीति पूर्ववद्बोद्धव्यम् । स्वप्नजागर सम्बन्धिनी, स्वप्नजागरितानि स्वाप्नेति वा पाठः । मरणात् सम्यक् त्रस्तः सन्, अतो विविधकृत्य-चिन्तया मनोऽव्याकुलतया वा ।। ३१ ।। सूर्येऽद्भ्यः सम्यगुन्मीलिते चेति दिवाभागस्य तत्र प्राशस्त्यात् चिन्तावेशेन कालविलम्बाद्वा मल्लक्रीडैव महोत्सवः शत्रुवधोपायत्वात्तम्; यद्वा, मल्लक्रीडार्थं महोत्सवम्, वै प्रसिद्धौ । एवमात्मवधार्थं स्वयमेवोपायः कृत इति तद्दुबुद्ध्याश्चर्येण सम्बोधयति—कौरव्येति । यथा दुर्योधनादिकुरव इति श्लेषार्थः ।। ३२ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

नलदमाली मस्तककृतपद्मकुसुम इत्याहुः ।। ३०-३८ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये द्विचत्वारिंशोऽध्यायः ।। ४२ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

छायायां छिद्रप्रतीतिः रन्ध्रदर्शनं कर्णरन्ध्रयोः पिहितयोः सतोरन्तःश्रूयमाणो यो ध्वनिः स प्राणघोषः तस्याश्रवणं वृक्षेषु स्वर्णवर्णप्रतीतिः रजःकर्दमादिषु स्वपदानामदर्शनमित्येतानि जागरितानि दुर्निमित्तानि ।। २९ ।। अथ स्वाप्नान्याह । स्वप्न इति । प्रेतैः मृतैः परिष्वङ्गः आलिङ्गनं खरमारुह्य यानं विषभक्षणं नलदमाली जपाकुसुममाली तैलेनाभ्यक्तः दिगम्बरश्चैकः ।। ३० ।। अथानान्यपोत्थं भूतानि स्वप्नानि जागरितानि च दुष्टानि निमित्तानि पश्यन् तत्सूचितमरणादतीव भीतश्चिन्तया निद्रां न लेभे न प्राप्तवान् ।। ३१ ।। हे कौरव्य ! कथञ्चिन्निशि व्युष्टायां प्रभावायां सत्याम् अद्भ्यः सकाशात्सूर्ये समुत्थिते सति "य उदगात् महतोऽर्णवाद्विभ्राजमानः सलिलस्य मध्यात्समा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनात्विति" श्रौतीं प्रसिद्धिमुपजीव्याद्भ्यः सूर्ये समुत्थित इत्युक्तम् मल्लानां क्रीडैव महानुत्सवः तं यद्वा मल्लानां क्रीडार्थं यस्तेषामुत्सवः मङ्गलस्नानादिरूपस्तं कंसः कारयामास ।। ३२ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

छायायां छिद्रप्रतीतिः सुषिरदर्शनं कर्णे प्रतिरुद्धे करेण प्राणघोषस्य शरीरवायोः प्रणवमुच्चरतो मन्द्रध्वनेरनुपश्रुतिरश्रवणं वृक्षेषु स्वर्णच्छायादर्शनं पृथिव्यां स्वपदानां पादलाञ्छनानामदर्शनम् ।। २९ ।। प्रेतपरिष्वङ्गः मृतालिङ्गनं स्वप्ने विसादनं पद्मकन्दभक्षणलक्षणं नलदमाली दक्षिणामुखो व्राजयतीति श्रुतिः—

पद्ममाशां शिरः कृत्वा यो गच्छेद्दक्षिणामुखः । एवं पश्यन्निशि स्वप्ने तत्क्षणान्मृत्युमेष्यतीति ।।
स्वप्ननिदर्शन इति यद्वा चक्ररक्तपुष्पं मृणालशून्यम् । वर्षासु जायमानं नलदं तत्कृतमालाधारी ।।

अभयं नलदं सेव्यममृणालं जलाशयमित्यमरः ।।३०।। अन्यानि "वनभूकर्णसप्तानां पञ्चनेत्रं विनासिका । एक जिह्वेति पञ्चत्वलक्षणं विबुधाविदु"रित्यादीनि ।। ३१ ।। निशि व्युष्टायाम् निवृत्तायाम् अभिसमुत्थिते उदयपर्वतादिति शेषः ।। ३२ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

छायायां स्वप्रतिबिम्बं छिद्रप्रतीतिः पिहितकर्णपुटस्य योऽन्तः श्रूयमाणो ध्वनिः स प्राणघोषस्तस्याश्रवण वृक्षेषु स्वर्णवर्णप्रतीतिः रजःकर्दमादिषु स्वपदानामदर्शनम् एतानि जागरणदुर्निमित्तानि प्रेतैर्मृतैर्भ्रातृबन्धुभिः सहपरिष्वङ्गः खरयानं गर्द्धभारोहणं बिषादनं विषभक्षणं नलदमाली जपाकुसुममालावान् यायाद्गच्छेदिति यत्तदप्येकं दुर्निमित्तम् ।। २९-३० ।। स्वप्नजागरितानि तत्सम्बन्धीनि ।। ३१ ।। व्युष्टायां प्रभातायां सूर्ये चाद्भ्य इति । तथा च श्रुतिः "य उदगान् महतोऽर्णवात् विभ्राजमानः सलिलस्य मध्यात् समा वृषभो लोहिताक्षः सूर्य्यो विपश्चिन् मनसा पुनात्विति" ।। ३२ ।।

गूढार्थदीपिनी

पादचिह्नानाम् अदर्शनं रजः कर्दमादिषु ।। २९ ।। नलदं जपापुष्पम् तन्मालाधारी । यायात् गच्छेत् । अदनं भक्षणम् ।। ३०-३१ ।। व्युष्टायाम् आसन्नप्रभातायाम् रङ्गं मल्लक्रीडास्थानम् ।। ३२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वपदानां रजःकर्दमादिष्वदर्शनम् ।। २९ ।। प्रेतैः मृतैः परिष्वङ्गः आलिङ्गनम् खरेण यानं खरमारुह्य गमनम् विषस्य अदनं भक्षणम् नलदमाली जपाकुसुममाली यायादिति यत्तदेकं दुर्निमित्तम् । तैलाभ्यक्तः दिगम्बरो नग्नो यायादिति चैकं दुर्निमित्तम् ।। ३०-३१ ।। व्युष्टायां प्रभातायाम् सूर्य्ये चाद्भ्यः समुत्थिते सति मल्लक्रीडारूपं महोत्सवं कारयामास "श्रूयते हि कयाचिद्विवक्षया सूर्य्यस्याद्भ्यः समुत्थानम् । य उदगान्महतोऽर्णवाद्विभ्राजमानः सलिलस्य मध्यात्समा वृषभो लोहिताक्षः सूर्य्यो विपश्चिन्मनसा पुना"त्विति ।। ३२-३३ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इत्थम्भूतान्येतत्सजातीयानि मरणसूचकानि स्वाप्नजागरितानि च पश्यन्मरणात्त्वरया भविष्यतः सन्त्रस्तो भीतश्चिन्तयैवं सञ्चिन्तया निद्रां न लेभे। तत्रोभयथा जागरितस्वप्नविभेदत उभयेत्यप्यर्थः सम्भवतीति ज्ञेयम् ॥ २९ ॥ निशि व्युष्टायां तत्प्रान्तरादिभागे चेत्यर्थः। सूर्ये चाद्भ्यः समुत्थित इति पाठे य उद्गान्महतोऽर्णवाद्विभ्राजमानः सलिलस्य मध्यात्। समावृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनात्विति श्रुतेरद्भ्यः समुत्थितत्वं सूर्यस्य ज्ञेयम्। अभिसमुत्थित इति पाठेऽप्युदयपर्वतादित्यप्यर्थः ॥३० ॥ तूर्येण सहिता भैर्यो भेरीर्जघ्निरे। चैलतोरणैर्वस्त्रकृततोरणैरलङ्कृताः ॥ ३१ ॥ ब्रह्माणि ब्राह्मणाः क्षत्राणि तज्जातय एतानि पुरोपगमानि येषां ते पौरा जानपदाश्च यथोपजोषं ययेच्छं यथासुखं वा गतं। विविशुः कृतासना राजान इतरे पूर्वं कृतमासनं कंसेनयेषां त एतद्युत्सवदर्शनार्थे कृतान्यासनानि येषां त इति वा ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनो

अतिदेशेन तत्राप्येकदेशाप्रतीतिरपि चतुर्थमाह। छिद्रप्रतीतिरिति। छायामध्ये छिद्रं प्रतीयत इति पुरुषोऽयं भगवानिति ज्ञापयितुं प्रतिच्छाया भवति पुरुषाकृतिं तं केचित् तेजोऽभावमाहुः सर्वत्र विद्यमानं पुरुषव्यवधानात् तावद्दूरे न दृश्यत इति तथा सच्चिदानन्दोऽपि तिरोहित इति प्रपञ्च एव तत्तदाकारेण भासत इति वस्तुतस्तु छाया पुरुषो भिन्नो भगवद्रूपस्तत्र जीवश्चेन्निष्काशयेत् तदान्यत्रापि निर्गतो भविष्यति जीव इति ज्ञानवत् छायापुरुषेऽप्यर्धतिरोधानं जीवांशस्यैव आध्यात्मिकी व्यवस्थैषात्र आधिभौतिकी पूर्वं निरूपिता तत्रेयं तामसी प्राणघोषो राजसः पीतप्रतीतिश्चाक्षुषी सात्त्विकीति प्राणस्य क्रियैव प्रधानमिति तस्याः कार्यं निवर्त्तितम् इतो भगवान् क्रमशो निवृत्तव्यापारो भविष्यतीति ज्ञापनार्थं सामि कार्याणि निरूप्यन्ते प्राणघोषस्य कर्णपिधानेऽपि अनुपश्रुतिः वृक्षेषु सर्वत्र स्वर्णप्रतीतिः वृक्षा हि दारुरूपाः अग्नेश्च रेतः सुवर्णं तेषु यद्यग्निः तदा सर्वात्मभावः अग्नेः रेत एव तेषु दृष्टमित्यर्द्धनाश एव बोधितः। आधिदैविकमाह। स्वपदानामदर्शनमिति। स्वस्य पदानां भूमौ स्थापितानामदर्शनं भूमिदेवता तं त्यक्तवतीति तत्पदानि भूमौ नाभिव्यक्तानि भवन्ति ॥ २९ ॥ एवं जागरितानि निरूप्य अवस्थान्तरेऽपि दुर्न्निमित्तानि निरूपयति अन्यथा मृतप्रायो व्याधितो वा जीवेत् तान्यपि सप्तविधानि प्रेतस्य परिष्वङ्गः श्मशाने पतितः शवः कंसे गते तदालिङ्गनं करोति तस्य मित्रमयमपि भविष्यतीति। प्रेतानां वा मृतानां समालिङ्गनं साधु समागतोऽसीति। खरयानमिति। गर्दभारूढमात्मानं पश्यति वाक्यात् विषभक्षणम् आधिभौतिकमेतत् त्रयं सत्त्वरजस्तमोरूपं प्रेतानामालिङ्गनमेव नतु प्रेतत्वं गर्दभेन गमनमात्रं न तु यमपुरीप्रवेशः विषस्य भक्षणमेव मरणमिति सामिकार्याणि पुनस्त्रिविधान्युक्त्वा धर्मिणमपि चतुर्थमाह। यायादिति नलदमालायुक्तमात्मानं दृष्टवान् महाराजोऽप्येकाकी यायादिति। आशंसितमेतदिति ज्ञापनार्थं लिङ्प्रयोगः तैलाभ्यक्तं चात्मानं पश्यति एकत्वं तामसमिति दिगम्बर इत्याधिदैविकं सर्वदेवतामयेन वाससा त्यक्त इति "सर्वदैवत्यं वास" इति श्रुतेः क्रिया पुनर्यान्ते निरूपिता सा तस्य वामननिर्द्धारं कारयति ॥ ३० ॥ एवं कानिचित् निरूप्य अन्यान्यपि कालेन सूचितानि दृष्टवानित्याह। अन्यानि चेति। चकारात्स्वप्नेऽपि विशेषतः अनुक्तौ हेतुमाह। इत्थंभूतानीति। चकारादेतान्यपि पुनः पुनर्दृष्टानीत्याह। स्वप्नजागरितानीति। चकारात् स्वप्ने यः स्वप्नः तत्र तदुपयोग्यानि दृष्टानीति न केवलमेतानि दृष्टानि किंतु स्वकार्यमपि चक्रुरित्याह। पश्यन्मरणसंत्रस्त इति। मरणात् संत्रस्तः मरणं निश्चित्य त्रासं प्राप्तवानित्यर्थः। एतदर्द्धरात्रसमये ततः प्रभृतिचिन्तया निद्रां न लेभे ॥ ३१ ॥ एवमपि न निवृत्त इत्याह। व्युष्टायामिति। कौरव्येति विश्वासार्थं सम्बोधनं निशि व्युष्टायां प्रभातयां सत्यां दोषे अपगते गुणेऽपि जाते सूर्ये चाद्भ्यः समुत्थित इति "अद्भ्यः प्रातरुदेत्यपः सायं प्रविशति य उद्गान् महतोऽर्णवा"दित्यादि श्रुतेः चकाराल्लोकेष्वप्युत्थितेषु त्रैवर्णिकानामावश्यककर्मानन्तरं च मल्लक्रीडामहोत्सवं कारयामासेति मल्लक्रीडाप्रधानोऽयं महोत्सवः यस्मिन्महोत्सवे मल्लाः क्रीडन्ति लोकवञ्चनार्थं तमेकं परिकल्पितवान् ॥ ३२ ॥

श्रीसुबोधिनी-सार

छायायां छिद्रप्रतीतिः। प्राण घोषस्य पिहितकर्णपुटैंतः श्रूयमाणशब्दस्यानुपश्रुतिश्रवणम्। वृक्षेषु स्वर्णप्रतीतिः सुवर्णप्रतीतिः। स्वस्य पदानां कर्दमादिष्वदर्शनम् ॥ २९ ॥ स्वप्ने प्रेतैः सह परिष्वंगः आश्लेषः खरेण यानं गमनं विषस्याऽदनं भक्षणं नलदमाली जपाकुसुममाली एको यायाद्गच्छेत् तैलेनाभ्यक्तो दिगम्बरो नग्नः ॥ ३० ॥ इत्थंभूतानि एवंप्रकारेण अन्यानि स्वप्नजागरितानि च पश्यम् मरणात्संत्रस्तो भीतो निद्रां न लेभे चिंतया ॥ ३१ ॥ निशि रात्र्यां व्युष्टायां गतायां सत्यां प्रभातायामित्यर्थः अद्भ्योऽर्णवजलात् समुदिते सूर्ये कंसो मल्लक्रीडाया महोत्सवं कारयामास ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वच्छायायां छिद्रप्रतीतिः कर्णरन्ध्रयोः पिहितयोः सतोरेन्तःश्रूयमाणो यो ध्वनिः स प्राणघोषः तस्यानुपश्रुतिः अश्रवणं, वृक्षेषु स्वर्णवर्णप्रतीतिः, रजःकर्दमादिषु स्वपदानामदर्शनम् ॥ २९ ॥ स्वाप्नानि दुर्निमित्तान्याह—स्वप्न इति। प्रेतैः परिष्वङ्गः आलिङ्गनं, खरमारुह्य यानं, विषभक्षणं, नलदमाली जपाकुसुममालावान् तैलेनाभ्यक्तः दिगम्बरो नग्नश्चैको यायात् गच्छेत् इति

यत्तदपि एकं दुर्निमित्तं, तथाभूतमप्यात्मानं ददर्शेत्याशयः ।। ३० ।। इत्थंभूतानि मृत्युसूचकानि स्वाप्नानि जागरितानि चान्यान्यपि दुर्निमित्तानि पश्यन् मरणात् सन्त्रस्तः कंसश्चिन्तया निद्रां न लेभ इत्यन्वयः ।। ३१ ।। 'कंसस्य कुमतित्वमनुसन्धेयम्' इत्याशयेन सम्बोधयति—कौरव्येति । निशि व्युष्टायां प्रभातायां सत्यां सूर्ये चाद्भ्यः समुत्थिते सति "अद्भ्यः प्रातरुदेत्यपः सायं प्रविशति य उदगान्महतोर्णवाद्विभ्राजमानः सलिलस्य मध्यात् समावृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु" इत्यादिश्रुतेः कंसः मल्लानां क्रीडारूपं महोत्सवमेव कारयामास ।। ३२ ।।

अन्वितार्थप्रकाशिका

छिद्रेति । स्वच्छायां छिद्रप्रतीतिः कर्णरन्ध्रयोः पिहितयोः सतोरन्तः श्रूयमाणो यो ध्वनिः स प्राणघोषः तस्यानुपश्रुतिः अश्रवणं वृक्षेषु स्वर्णवर्णप्रतीतिः रजःकर्दमादिषु स्वपदानामदर्शनम् ।। २९ ।। स्वप्नजान्याह—स्वप्न इति । प्रेतैः मृतैः भ्रातृबन्धुभिः स्वप्ने परिष्वङ्गः आलिङ्गनं खरमारुह्य यानं विषस्यादनं भक्षणं नलदमाली जपाकुसुममालावान् तैलेनाभ्यक्तः दिगम्बरो नग्नश्चैको यायात् गच्छेत् इति यत्तदपि एकं दुर्निमित्तं ददर्शेत्याषयः ।। ३० ।। अन्यानीति । इत्थंभूतानि मृत्युसूचकानि स्वप्नजागरितानि तत्संबन्धीनि चान्यान्यपि दुर्निमित्तानि पश्यन् मरणात्सन्त्रस्तः कंसश्चिन्तया निद्रां न लेभे ।। ३१ ।। व्युष्टायामिति । हे कौरव्य ! निशि व्युष्टायां प्रभातायां सत्यां सूर्ये चाद्भ्यः समुस्थिते सति "अद्भ्यः प्रातरुदेत्यपः सायं प्रविशति" इत्यादिश्रुतेः । कंसः मल्लानां क्रीडारूपं महोत्सवं कारयामासः ।। ३२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वछायायां छिद्रप्रतीतिः रंध्रदर्शनं पिहितं कर्णेऽतः श्रुयमाणो यः शब्दः स प्राणघोषस्तस्यानुपश्रुतिरश्रवणंप्राणघोषानुपश्रुतिः वृक्षेषु स्वर्णप्रतीतिः स्वर्णाकारदर्शनं वालुका पंकादिषु स्वदानाम दर्शनं एतानि जागरितानि अचष्ट ।। २९ ।। इदानीं स्वप्नानिदुर्निमितान्याह स्वप्न इति स्वप्नेप्रेतैर्मृतैः सहपरिष्वंग आलिगनं खरयानं खरारोहेण गमनमित्यर्थः विषभक्षणं च नलदमाली जपाकुसुममालावान् यायात् इत्यादीनि दुर्निमितान्यचष्टेति पूर्वेणान्वयः ।। ३०–३१ ।। निशिव्युष्टायांगतायां सत्यां अद्भ्योजलेभ्यः सूर्ये च समुपस्थिते तथा च श्रुतिः अद्भ्यो वा इति य उदगात्महतोर्णवाद्विभ्राजमानः सलिलस्य मध्यात्समामृषभो लोहिताक्षः सूर्योविपश्चिन्मनसापुनात्स्विति ।। ३२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

छिद्रेति । छायायां स्वप्रतिबिम्बे, छिद्रप्रतीतिः सच्छिद्रतया तद्दर्शनं, कर्णरन्ध्रयोः पिहितयोः सतोरन्तः श्रूयमाणो यो ध्वनिः सः प्राणघोषः तस्य अनुपश्रुतिः, छिद्ररोधेऽङ्गुल्यादिना कृतेऽपि तदश्रवणम् । वृक्षेषु स्वर्णप्रतीतिः स्वर्णवर्णता प्रतीतिः, स्वपदानां स्वकीयपादाङ्कानां, रजःकर्दमादिष्विति शेषः । अदर्शनं, एतानि जागरितानि दुर्निमित्तानि ।। २९ ।। अथ स्वाप्नान्याह । स्वप्ने इति । स्वप्नावस्थायां, प्रेतैर्मृतैः परिष्वङ्गः आलिङ्गनं, खरयानं खरमारुह्य प्रयाणं, विषादनं विषभक्षणं, नलदमाली जपाकुसुममाली, तैलाभ्यक्तस्तैलेनाभ्यक्तशरीरः, दिगम्बरः, एकः यायात् इति यत्तदप्येकं दुर्निमित्तम् ।। अन्यानीति । इत्थंभूतानि स्वप्नजागरितानि स्वप्नजाग्रत्सम्भूतानि, अन्यानि चापि, दुर्निमित्तानि पश्यन् मरणसंत्रस्तश्च सन् , चिन्तया निद्रां न लेभे ।।३१।। व्युष्टायामिति । निशि निशायां, व्युष्टायां गतायां सत्यां, प्रभातायामिति यावत् सूर्ये अद्भ्यः सकाशात् समुत्थिते सति च, 'अद्भ्यो वा एष प्रातरुदेति' इत्यादिश्रुतेः, हे कौरव्य, कंसः मल्लक्रीडामहोत्सवं, कारयामास वै ।। ३२ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

व्युष्टायां निशीति : १०.४२.३२.

यस्मिन्नह्नि स दुर्जनो व्यरचयन् मल्लप्रधानोत्सवं दुःखध्वान्तहतिस्तदादि समभूत्तेजःप्रसारोऽपि च ।
कारागार - विहारवारिजलधेरुन्मज्जनं च स्फुटं शूराणामिति सूर्यतादृगुदयाल्लेखादिहोन्नीयते ।। १०३ ।।
मल्लरङ्गाऽर्यमिति वागासीत् सर्वसभासदाम् । ह्यनुग्राहकत्वेन साऽन्वर्था तु सतामभूत् ।। १०४ ।।

कृष्णप्रिया

राजा कंस को अपनी परछाई में छिद्र दिखाई दे रहे थे । दोनों कानों में अङ्गुलियों को डालने पर जो घोष सुनाई पड़ता है वह भी नहीं सुनाई पड़ा । जब पेड़ों को देखता है तो सारे वृक्ष सुवर्ण के मालुम हो रहे । जब वह चलता है तब मार्ग के कादों में एव धूल में पैरों के चिह्न नहीं दिखाई देते हैं ।। २९ ।। सात प्रकार के जाग्रत दशा के अशकुनों का निरूपण करने के बाद अब नींद के समय के अमङ्गलो का बताते हैं कि कंस अपने को स्वप्न में प्रेत-शव आदि के आलिङ्गन को देख रहा है । गधे पर वस्त्र विहीन सवार हो रहा था । पाँव से सर पर्यन्त तेल से नहाया मालुम हो रहा था । अपने को विष खाते हुए और दुपहरिया की माला को पहने देखा और वस्त्र विहीन देखा ।। ३० ।। ऐसे नींद के और जानते समय के अशकुनों

को देखने के पश्चात् भी और भिन्न-भिन्न प्रकार के भयानक और समीप मृत्यु के सूचक बुरे-बुरे बहुतेरे अशकुनों को देखने से कंस को चिन्ता ने घेर लिया। भारी चिन्ता और मृत्यु के त्रास की कल्पना से कंस को रात भर नींद नहीं आई ॥ ३१ ॥ शुकाचार्य ने जाना कि राजा कुछ अस्वस्थ है इस लिए सम्बोधन किया कि कुरु वंशविभूषण राजन्! रात्री पसार हुई उजाला हो गया, भगवान् सूर्य नारायण क्षितिज से ऊपर पधारे। इधर राजा कंस ने उठकर मल्लक्रीडा के महान् उत्सव के प्रारम्भ के लिए सेवकों को आदेश देने लगा ॥ ३२ ॥

आनर्चुः पुरुषा रङ्गं तूर्यभेर्यश्च जघ्निरे। मञ्चाः [1]स्वलङ्कृताः स्रग्भिः पताकाचैलतोरणैः ॥ ३३ ॥
तेषु पौरा जानपदा ब्रह्मक्षत्रपुरोगमाः। यथोपजोषं विविशू राजानश्च कृतासनाः ॥ ३४ ॥
कंसः[2] परिवृतोऽमात्यै राजमञ्च[3]मुपाविशत्। मण्डलेश्वरमध्यस्था हृदयेन विदूयता ॥ ३५ ॥
वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च। मल्लाः स्वलङ्कृता दृप्ताः सोपाध्यायाः [4]समाविशन् ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—पुरुषाः, रङ्गम्, आनर्चुः, शङ्खभेर्यः, च, (वाजित्राणि) जघ्निरे, पताका चैलतोरणैः, मञ्चाः, च, (द्वाराणि) स्रग्भिः, स्वलङ्कृताः ॥ ३३ ॥ तेषु, ब्रह्मक्षत्र पुरोगमाः, पौराः, जानपदाः, राजानः, च आमन्त्रिता विशिष्टजनाः) कृतासनाः, यथोपजोषम्, विविशुः ॥ ३४ ॥ कंसः, अमात्यैः, परिवृत्तः मण्डलेश्वरमध्यस्थः, विदूयता, हृदयेम, राजमञ्चम्, उपाविशत् ॥ ३५ ॥ तूर्येषु, वाद्यमानेषु, मल्लतारोत्तरेषु, च (सर्वेषु समागतेषु) दृप्ताः, सोपाध्यायाः, स्वलङ्कृताः मल्लाः, समासत ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यथोपजोषं यथासुखम् ॥३४–३५॥ मल्लताल उत्तर उपरि उच्चैः श्रूयते येषु तेषु तूर्येषु। उपाध्याया मल्लाचार्या ॥३६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

जघ्निरे वादयाञ्चक्रिरे, वादकैः। कर्मणि लिट्। चैलमत्रानेकवर्णवस्त्रम्। सहोत्सवमाह–रंगं मल्लक्रीडास्थानम्। पुरुषाः कंसभृत्याः। आनर्चुर्मंगलकलशस्थापनाऽऽदिनाऽलंचक्रुः। तथा च हरिवंशे कंसादेशः–"श्वः सचित्राः समालाश्च सपताकास्तथैव च। सुवासिता वपुष्मंत उपनीतोत्तरच्छदाः। क्रियंतां मञ्चवाटयश्च वलभ्यो वीथयस्तथा" इत्यादि ॥ ३३ ॥ तेषु मञ्चेषु। जानपदा देशांतरीया जना। यथोपजोषमित्यत्र विशेषः। श्रीविष्णुपुराणे—"राजमञ्चेषु चारूढाः सह भृत्यैर्महीभृतः। अन्तःपुराणां मञ्चाश्च तथाऽन्ये परिकल्पिताः। अन्ये च वारमुख्यानामन्ये नगरयोषिताम्। अक्रूरवसुदेवौ च मञ्चमध्ये व्यवस्थितौ। नगरीयोषितां मध्ये देवकी पुत्रगर्धिनी।" इति। हरिवंशे च–"मंचागारैः सुनिर्मुक्तैर्युद्धाय सुविभूषितैः समाजवाटः शुशुभे समेघौघ इवार्णवः। श्रेणीनाञ्च गणानाञ्च मंचा भान्त्यचलोपमाः। अंतःपुरगणानां च प्रेक्षागाराण्यदूरतः। रेजुः काञ्चनचित्राणि रत्नमाला कुलानि च। गणिकानां पृथग्मञ्चाः शुभैरास्तरणाम्बरैः। शोभिता वारमुख्याभिर्विमानप्रतिमौजसः। अन्ये च मञ्चा बहवः काष्ठसंचयबंधनाः। रेजुः सास्तरणास्तत्र शतशोऽथ सहस्रशः।" इति। देवक्या नागरीमध्यप्रवेशे हेतुः–पुत्रगर्धिनीति। कंसेनानादृतत्वादंतः पुरमञ्चाऽप्रवेशादिति भावः। विविशुरुपाविशन्। कृतं तिर्माय न्यस्तमासनं तत्तद्योग्यपीठादिकं येषां ते ॥ ३४ ॥ राजमञ्च ऽत्युच्चमञ्च। विदूयता परितप्यमानेन। राजमञ्चश्चोक्तस्तत्रैव—"प्राङ्मुखश्चात्र निर्मुक्तो मेरुशृङ्गसमप्रभः। रुक्मयन्त्रनिभस्तंभश्चित्रनिर्योगशोभनः। प्रेक्षागारः स कंसस्य चकाशेऽप्यधिकं श्रिया। शोभितो माल्यदामाद्यैर्निवासकृतलक्षणः।" इति। "स दृष्ट्वा सर्वनिर्मुक्तिप्रेक्षागारं नृपोत्तमः। श्रेणीनां दृढसंयुक्तैर्मञ्चवाटैर्निरंतरम्। सोत्तारणाय युक्ताभिर्वलभीभिर्विभूषितम्। काञ्चनीभिः प्रवृद्धाभिरेकस्तंभैश्च शोभितम्। सर्वतः सारनिर्यूहं स्वायतं सुप्रतिष्ठितम्। उदकप्लवेन सुश्लिष्ट मंचारोहणमुत्तमम्। छन्नं तद्वोदकाभिश्च मानवौघभवक्षयम्।" इति। तत्र मंचप्रेक्षागारयोः स्वल्पबहुलपरिच्छदादीनां भेदो ज्ञेयः। मंडलेश्वराः खंडमंडलपतयस्तेषां मध्यस्थः कंससेवकत्वेन तेषां तन्मञ्च एव स्थितेः। राजानश्चान्ये तन्मित्रनृपा इति भेदः। यद्वा–पृथग्मञ्चोपविष्टानां तेषामेव मञ्चवर्गमध्ये कंसमंचस्य वृत्तेः। विशेषेण दूयता दूयमानेन हृदयेनोपलक्षित इति स्वभावतो नित्यभीतत्वाद्विशेषतश्च दुर्निमित्तदर्शनात् ॥ ३५ ॥ तालस्ताडः, स च भुजयोस्ताडनरूपः। डलयोरैक्यम्। "ताडस्तु ताडने घोषे मुष्टिमेयतृणादिषुः। ताडी पत्रद्रुमे" इति मेदिनी। न केवलं स्वयमेव वाद्यमानेषु अपि तु मल्लानां तालश्च स्वबाहुमूलघातः स उत्तर-

---

[1] श्चा–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [2] कंसस्तु संवृतो–प्रा. पा. । [3] उपाविशत्–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [4] समासत–मूले ।

स्तदधिकतया श्रूयमाणो येषु तादृशेषु चेति । तद्वाद्यादप्यधिकशब्दोऽयमिति मल्लानां महाबलिष्ठतोक्ता । यद्वा—बहिः साधारणेषु तूर्येषु वाद्यमानेषु, अन्तस्तु मल्लोचिततालप्रधानेषु वाद्यमानेष्विति । यतो दृप्ताः सगर्वाः अत एव सम्यगसंकोचेन सर्वतोऽविशन्प्रविविशुः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महोत्सवत्वमेवाह । आनर्चुरिति । रङ्गं मल्लक्रीडास्थानं पुरुषाः कंसभृत्याः आनर्चुर्मङ्गलकलसस्थापनादिना अलञ्चक्रुः । तथा च हरिवंशे कंसादेशः । "श्वः सचित्राः समालाश्च सपताकास्तथैव च । सुवासिता वपुष्मन्तः उपनीतोत्तरच्छदाः । क्रियन्तां मञ्चवाटाश्च बलभ्यो वीथयस्तथा । अक्षवाटे करीषस्य कल्प्यन्तां राशयोऽव्ययाः । घण्टाभरणशोभाश्च वलयश्चानुरूपतः । स्थाप्यन्तां सुनिखाताश्च पानकुम्भा यथाक्रमम् । उद्भारवहाः सर्वे सकाञ्चनघटोत्तमाः । बलयश्चोपकल्प्यन्तां कषायाश्चैव कुम्भशः" इति । पताकाभिश्चैलानि वस्त्रनिर्मितानि तोरणानि तैश्च ॥ ३३ ॥ यथोपजोषमित्यत्र विशेषः श्रीविष्णुपुराणे । "राजमञ्चेषु चारूढाः सह भृत्यैर्महीभृतः । अन्तःपुराणां मञ्चाश्च तथान्ये परिकल्पिताः । अन्ये च वारमुख्यानामन्ये नगरयोषिताम् । अक्रूर वसुदेवौ च मञ्चमध्ये व्यवस्थितौ । नगरीयोषितां मध्ये देवकी पुत्रगर्द्धिनी"ति । हरिवंशे । "मञ्चागारैः सुनिर्मुक्तैर्युद्धाय सुविभूषितैः । समाजवाटः शुशुभे समेघौघ इवार्णवः । श्रेणीनाञ्च गणानाञ्च मञ्चा भान्त्यचलोपमाः । अन्तःपुरगणानाञ्च प्रेक्षागाराण्यदूरतः । रेजुः काञ्चनचित्राणि रत्नजालाकुलानि च । गणिकानां पृथङ् मञ्चा शुभैरास्तरणाम्बरैः । शोभिता वारमुख्याभिर्विमानप्रतिमौजसः । अन्ये च मञ्चा बहवः काष्ठसञ्चयबन्धनाः रेजुः प्रस्तरणास्तत्र शतशोऽथ सहस्रश" इत्यादि । अत्र पूर्वत्र मञ्चप्रान्त इति राज्ञ एवेति ज्ञेयम् । मुख्यत्वेन तस्यैव प्राप्तेः । ताभ्यां या देवकी भावविकृतिशङ्कया कंसेन तथाचरितत्वाच्च नागरीमञ्चे देवकीप्रवेशे हेतुः पुत्रगर्द्धिनीति कंसेनानादृतत्वेनान्तः पुरमञ्चाप्रवेशादिति भावः । विविशुरुपाविशन् कृतं निर्माय न्यस्तमासनं तत्तद्योग्यपीठादिकं येषां ते ॥ ३४ ॥ राजमञ्चश्चोक्तस्तत्रैव । "प्राङ्मुखश्चात्र निर्मुक्तो मेरुशृङ्गसमप्रभः रुक्मयन्त्रनिभस्तम्भश्चित्रनिर्योगशोभितः । प्रेक्षागारः स कंसस्य चकाशेऽप्यधिकं श्रिया । शोभितो माल्यदामाद्यैर्निवासकृतलक्षण" इति । "स दृष्ट्वा सर्वनिर्मुक्तं प्रेक्षागारं नृपोत्तमः । श्रेणीना दृढसंयुक्तैर्मञ्चवाटैर्निरन्तरम् । सोत्तरणाय युक्ताभिर्वलभीभिर्विभूषितम् । काञ्चनीभिः प्रवृद्धाभिरेकस्तम्भैश्च शोभितम् । सर्वतः सारनिर्यूहं स्वायतं सुप्रतिष्ठितम् । उदकप्लवनसुश्लिष्टं मञ्चारोहणमुत्तमम् । नृपासनपरिक्षिप्तं सञ्चार पथसङ्कुलम् । छन्नं तद्वोदकाभिश्च मानवौघभवक्षय"मिति । तत्र मञ्चप्रेक्षागारयोः स्वल्पबहुलपरिच्छदादीनां भेदो ज्ञेयः । मण्डलेश्वराः खण्डमण्डलपतयः तेषां मध्यस्थः । कंससेवकत्वेन तेषां तन्मञ्च एवस्थितेः । राजानश्चान्ये तन्मित्रनृपा इति भेदः । यद्वा । पृथङ्मञ्चोपविष्टानां तेषामेव मञ्चवर्गमध्ये कसमञ्चस्य वृत्तेः । विशेषेण दूयता दूयमानेन हृदयेनोपलक्षित इति । स्वभावतो नित्यभीतत्वाद्विशेषतश्च दुर्निमित्तादिदर्शनात् ॥ ३५ ॥ न केवलं स्वयमेव वाद्यमानेषु अपितु मल्लानां तालश्च स्वबाहुमूलघातः । स उत्तरस्तदधिकतया श्रूयमाणो येषु तादृशेषु चेति तद्वाद्यादप्यधिकशब्दोऽयं मल्लानां महाबलिष्ठतोक्ता । यद्वा । बहिः साधारणेषु तूर्येषु वाद्यमानेषु अन्तस्तु मल्लोचिततालप्रधानेषु वाद्यमानेष्विति । यतो दृप्ताः सगर्वाः । अतएव सम्यगसङ्कोचेनासर्वतोऽविशन् प्रविविशुः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

महोत्सबत्वमेवाह—आनर्चुरिति । रंगं मल्लक्रीडास्थलम्, पुरुषाः कंसभृत्या आनर्चुर्मंगलकलसस्थापनादिनालञ्चक्रुः तथा च हरिवंशे कंसादेशः (विष्णुपर्व २८।१०–१४)—

'श्वः सचित्राः समाल्याश्च सपताकास्तथैव च । सुवासिता वपुष्मन्त उपनीतोचरच्छदाः ॥
क्रियन्तां मञ्चवाटाश्च वलभ्यो वीथयस्तथा । रंगवाटे करीषस्य कल्प्यन्तां राशयोऽव्ययाः ॥
घण्टाभरणशोभाश्च वलयश्चानुरूपतः । स्थाप्यन्तां सुनिखाताश्च पानुकुम्भा यथाक्रमम् ॥
उद्भारसहाः सर्व्वे सकाञ्चनघटोत्तमाः । वलयश्चोपकल्प्यन्तां कषायाश्चैव कुम्भशः ॥' इति ।

पताकाभिश्चैलानि वस्त्रनिर्म्मितानि तोरणानि, तैश्च, यद्वा, चैलैः स्थाने स्थाने बद्धविचित्रवस्त्रसमूहैस्तोरणैश्च ॥ ३३ ॥ यथोपजोषमित्यत्र विशेषः श्रीविष्णुपुराणे (५।२०।२४,२६,२७,२८)—

'राजमञ्चेषु चारुढाः सह भृत्यैर्महीभृतः ॥
अन्तःपुराणां मञ्चाश्च तथान्ये परिकल्पिताः । अन्ये च वारमुख्यानामन्ये नगरयोषिताम् ॥
अक्रूर-वसुदेवौ च मञ्चप्रान्ते व्यवस्थितौ । नागरीयोषितां मध्ये देवकी पुत्रगर्द्धिनी' ॥ इति;

श्रीहरिवंशे च विष्णुपर्वे (२९।४,५;६,९,१२)—

'मञ्चागारैः सुनिर्मुक्तैर्युद्धाय सुविभूषितैः । समाजवाटः शुशुभे समेघौघ इवार्णवः ॥

श्रेणीनां च गणानाञ्च मञ्चा भान्त्यचलोपमाः ॥
अन्तः पुरगतानाञ्च प्रेक्षागाराण्यदूरतः । रेजुः काञ्चनचित्राणि रत्नजालाकुलानि च ॥
गणिकानां पृथग्मञ्चाः शुभैरास्तरणान्वरैः । शोभिता वारमुख्याभिर्विमानप्रतिमौजसः ॥
अन्ये च मञ्चा बहवः काष्ठसञ्चयबन्धनाः । रेजुः प्रस्तरणास्तत्र शतशोऽथ सहस्रशः' ॥ इत्यादि ।

विविशुरुपाविशन्, कृतं निर्माय न्यस्तमासनं तत्तद्योग्यपीठादिकं येषां ते, राजमञ्चश्चोक्तस्तत्रैव (हरिवंशे विष्णु-प० २९।१४-१५)

'प्राङ्मुखश्चात्र निर्मुक्तो मेरुशृंगसमप्रभः । रुक्मयन्त्रनिभस्तम्भश्चित्रनिर्य्योगशोभितः ॥
प्रेक्षागारः स कंसस्य चाकाशेऽप्यधिकं श्रिया । शोभितो माल्यदामौघैर्निवासकृतलक्षणः ॥' इति,

किञ्च,

'स दृष्ट्वा सर्वनिर्म्मुक्तं प्रेक्षागारं नृपोत्तमः । श्रेणीनां दृढसंयुक्तैर्मञ्चवाटैर्निरन्तरम् ॥
सोत्तरागारयुक्ताभिर्वडभीभिर्विभूषितम् । काञ्चनीभिः प्रवृद्धाभिरेकस्तम्भैश्च भूषितम् ॥
सर्वतः सारनिर्व्यूहं स्वायतं सुप्रतिष्ठितम् । उदक्प्लवनसुश्लिष्टं मञ्चारोहणमुत्तमम् ॥
नृपासनपरिक्षिप्तं सञ्चारपथ संकुलम् । छन्नं तद्वेदिकाभिश्च मानवोघभवक्षयम् ॥' इति ।

तत्र मञ्चप्रेक्षागारयोः स्वल्पबहुलपरिच्छदादिना भेदो ज्ञेयः ॥ ३४ ॥ मण्डलेश्वराः खण्डमण्डलपतयस्तेषां मध्यस्थ, कंससेवकत्वेन तेषां तन्मञ्च एव स्थितेः, राजानश्चान्ये तन्मित्रनृपा इति भेदः । यद्वा, पृथग्मञ्चोपविष्टानां तेषामेव मञ्चवर्गमध्ये कंसमञ्चस्य वृत्तेः, विशेषेण दूयता दूयमानेन हृदयेनेति स्वभावतो नित्यभीतत्वात्, विशेषतश्च दुर्निमित्तादिदर्शनात् ॥ ३५ ॥ मल्लतालोत्तरेष्विति मल्लतालस्य बहुलतूर्य्यवाद्यदप्यधिक शब्देन मल्लानां महाबलिष्ठतोक्ता । तामेव दर्शयति—दृप्ता बलिनः, यद्वा, सगर्वा अत एव सम्यगसंकोचेन आ सर्वतोऽविशन् प्रविविशुः । तत्र च चाणुरादयो महामल्लाश्चारुवाद्यैः प्रकर्षेण हर्षिताः सन्तः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पुरुषा भृत्या रङ्गं मल्लक्रीडास्थानमानर्चुः मार्जनचन्दनाम्भः सेचनादिभिरिति शेषः । तूर्याणि भेर्यो भेरीश्च जघ्निरे वादितवन्तः स्रग्भिः पताकाभिश्चैलैश्चित्रपटैस्तोरणैश्च मञ्चाः दिदृक्षूणामुपवेशस्थानानि उच्चानि स्वलंकृताः ॥ ३३ ॥ ततस्तेषु मञ्चेषु ब्राह्मणक्षत्रियादयः पौराः पुरवासिनो जानपदा देशवासिनश्च प्रजाः यथोपवेशं राजाज्ञामनतिक्रम्य यथोपजोषमितिपाठे यथासुखं विविशुः तथा राजानः देशान्तरेभ्यः समाहूतास्ते राजानः कृतानि परिगृहीतानि आसनानि सिंहासनानि यैस्तथाभूताः ॥ ३४ ॥ कंसस्तु मण्डलेश्वरमध्यस्थो विदूयता उपतप्यमानेन हृदयेन सहित इति शेषः अमात्यैर्मन्त्रिभिः परिवृतो राजमञ्चमखण्डमण्डलेश्वरोपवेशयोग्यं मञ्चमुपाविशत् ॥ ३५ ॥ तदा मल्लानां तालैः करतलैः भुजास्फालनमुत्तरमुच्चैः श्रूयमाणं येषु तेषु तूर्येषु वाद्यमानेषु सत्सु उपाध्यायाः मल्लाचार्य्याः तैः सहिताः सर्वे मल्लाः स्वलंकृताः समाविशन् ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पणवगोमुखादितूर्यम् ॥ ३३ ॥ ब्रह्माणः ब्राह्मणाः क्षत्रा मण्डलेश्वराः पुरोगमा मुख्या येषां ते तथा यथोपजोषं यथासुखं राज्ञो विशिनष्टि । राजान इति ॥ ३४ ॥ विदूयता तप्यमानेन ॥ ३५ ॥ मल्लानां तालशब्दोत्तरेषु उच्चैः श्राविततालशब्देष्वित्यर्थः उपाध्यायाः मल्लशिक्षाचार्याः तैः सहिताः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुरुषाः कंसस्य कर्मचारिणः आनर्चुः मङ्गलकलसस्थापनादिना अलं चक्रुः जघ्निरे वादनार्थं काष्ठिकाभिरताड्यन्त ।३३। यथोपजोषं यथासुखम् ॥ ३४ ॥ विदूयता दूयमानेन हृदा उपलक्षितः ॥ ३५ ॥ मल्लतालोत्तरेषु मल्लोचिततालप्रधानेषु ॥ ३६ ॥

गूढार्थदीपिनी

जघ्निरे वादयाञ्चक्रिरे वादकैः । कर्मणि लिट् ॥ ३३ ॥ यथोपजोषं यथासुखम् ॥ ३४ ॥ विदूयता परितप्यमानेन हृदयेन । दूङ् परितापे धातुः ॥ ३५ ॥ दृप्ता गर्विताः । मल्लतालः उत्तरः उच्चैः श्रूयमाणः येषु तेषु ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यथोपजोषं यथासुखम् ॥ ३४–३५ ॥ मल्लतालः उत्तर उपरि उपरि प्रतीयमानो येषु ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

राजमञ्चं राज्ञोऽयमिति क्लृप्तो मञ्चो राजमञ्चस्तस्मिन्नुपाविशत्। मण्डलेश्वराः खण्डाधीशास्तेषां मध्यस्थो विदूयता तप्यमानेन हृदयेन ॥ ३३ ॥ मल्लानां तालाः करास्फाला एवोत्तरा येषां तानि तूर्याणि तालः करतलेऽङ्गुष्ठमध्यमाभ्यां च सम्मिते। गीतकालक्रियामाने तालः खड्गादिमुष्टिषु। द्रुमभेदे करास्फाले तालं तु हरितालक इति विश्व। मल्लानां तालो गीतकालक्रियामानं स एवोतरो तेषामिति वा स्वोपाध्यायाः स्वस्वाचार्यसहिताः स्वलङ्कृता दृप्ताः समाविशन् ॥ ३४ ॥ कोसलस्तोसलो वा न नामकरणकालिका वयमिति नायठ्ययौ। वल्गुवाद्यप्रहर्षिताः सरोमाञ्चा उपस्थानं रङ्गसमीपस्थलमासेदुः प्रापुः ॥ ३५ ॥ कंसेन समाहूता विवृतेनैतैः पश्यन्त्विति प्राक् स्वोक्तरक्षणार्थमेवाह्वानं दुरात्मन* इति ज्ञेयम्। निवेदितान्युपायनानि स्वानिव राजदृष्टिविषयवस्तूनि यैस्ते एकस्मिन्मञ्चेऽविशन्। अनेन नातिप्रसिद्धो नन्दः पुरेति द्योत्यते ॥ ३६ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे चत्वारिंशोऽध्यायः ॥ १०–४० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्र संभारानाह। आनचुरिति। पुरुषा अधिकारिणः रङ्गं रङ्गप्रदेशम् आनचुर्लेपादिना पूजितवन्तः तद्धि भूम्यन्तरिक्षाकाशात्मकं तत्र भूमिप्रदेशस्य पूजोक्ता मध्यप्रदेशस्याह। तूर्यं तूर्य्यो वा मङ्गलवाद्यानि भेर्यश्च उत्सवसूचकानि चकारा दन्यानि जघ्निरे शब्दिताः भेरीणां हननाभावात् टोल्लकापरपर्यायो वा भेरीशब्दः विसर्गलोपः तूर्यशब्दो वा तूर्याणि भेर्यश्चेति उपरि श्रृङ्गारमाह। मञ्चाः स्वलङ्कृता इति। सर्वत्र मालाभिः स्वलङ्कृताः पताकादिभिश्च वस्त्रमयानि च तोरणानि वस्त्रैस्तोरणैश्चेति वा ॥ ३३ ॥ एवमलङ्कृतस्य रङ्गस्थानस्य उपयोगमाह। तेषु पौरा इति। आदावुपरि विनियोगः तेषु मञ्चेषु पौराः पुरवासिनो जानपदा देशवासिनश्च ब्रह्मक्षत्रौ पुरोगमावग्रे उपविष्टौ येषां मञ्चानां बहुत्वसूचनायाह। यथोपजीषमिति। ये समाहुताः खण्डमण्डलाधिपतयो राजानः ते कृतासनाः दत्तासनाः संमाननार्थं युद्धार्थं चकाराद्रजकायाश्च कृतमासनं येभ्य इति ॥ ३४ ॥ कंसोऽप्युपविष्ट इत्याह। कंस इति। अमात्यैः परिवृतः राजमञ्चमध्ये श्रेष्ठत्वेन विनिर्मितमुपाविशत् तत्र मण्डलेश्वरा अप्युपवेशिता इत्याह। मण्डलेश्वरमध्यस्थ इति। मण्डलेश्वराणां मध्ये तिष्ठतीति बहिः शोभा निरूपिता हृदयेन विदूयता उपलक्षितः सहितो वा तेनान्तःशोभाभाव उक्तः ॥ ३५ ॥ वाद्यानां निमित्तत्वेन मध्यस्थानामुपयोगमाह। वाद्यमानेष्विति। तूर्याणां वाद्ये मङ्गलप्रतीत्या सर्वे मल्लाः समागताः तत्र च मल्लानां तलशशब्दाः आस्फोटनरूपाः उत्तराणि येषां तूर्यैराकारिता मल्ला आस्फोटनतलशब्दान् कृत्वा आगता एव वयमित्युत्तरमुक्तवन्तः। एवमाकारणं प्रतिवचनं च सत्यवाक्यानामागमननिमित्तमुक्तं ततस्ते समागता इत्याह। मल्लाः स्वलंकृता इति। अद्य विद्याप्राकट्यमिति मल्लरीत्या अलंकृताः। अथवा कटकादिभिरेव यतो दृप्ताः केवलं शोभार्थं गच्छामः न तु कश्चिदस्माकं प्रतिपक्षोऽस्तीति। अथवा भगवतो माहात्म्यं श्रुत्वा अभीताः कथमागता इत्याशङ्क्याह। दृप्ता इति। विद्यावलमपि तेषां नास्तीति सूचयितुमुपाध्यायसहिता आगता इत्युक्तं बुद्धिदोषाभावं ज्ञापयितुं वा भगवता तथा कृताः सम्यगेव पुरस्कारपूर्वकं रङ्गस्थानमाविशन् ॥ ३६ ॥

श्रीसुबोधिनी–सारः

पुरुषाः कंसभृत्या रंगमानर्चुः तूर्यभेर्यो ववादिरे मालाभिः पताकाभिः चैलैर्ध्वजैः तोरणैरलंकृता मंचा बभूवुः ॥ ३३ ॥ तेषु मंचेषु पौरा नागरिका जानपदा नानादेशीया ब्राह्मणादयो यथोपजोषं यथासुखं विविशुः राजानश्च कृतासनाः ॥ ३४ ॥ अमात्यैर्मंत्रिभिः संवृतः परिवेष्टितः कंसो राज मंचे उपाविशत् मंडलेश्वराणां राज्ञां मध्ये तिष्ठतीति तथा विदूयता कंपमानेन ॥ ३५ ॥ हृदयेन मल्लानां ताल उत्तर उपरिचरो येषु तेषु तूर्येषु वाद्य मानेषु सत्सु सुष्ठु अलंकृता दृप्ता गर्विता दिग्विजयात् सोपाध्यायाः सगुरवो मल्लाः समाययुः ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्प्रकारं स्पष्टयति—पुरुषाः कंसभृत्याः रङ्गं मल्लक्रीडास्थानं आनर्चुः मार्जनचन्दनाम्भःसेचनमालादिभिलङ्कृतवन्तः, तूर्याणि भेर्यश्च जघ्निरे शब्दिता जाताः। मञ्चाः दिदृक्षूणामुपवेशनार्थमुच्चानि स्थानानि स्रगादिभिः स्वलङ्कृता जाताः ॥ ३३ ॥ तेषु मञ्चेषु पौराः पुरवासिनो जानपदा बहिर्देशवासिनश्च ब्राह्मणक्षत्रियादयो जनाः, तथा कृतानि मञ्चोपरिस्थापितानि आसनानि सिंहासनानि येषां ते राजानश्च यथोपजोषं यथासुखं विविशुः उपविष्टाः ॥ ३४ ॥ कंसस्तु अमात्यैर्मन्त्रिभिः परिवृतः मण्डलेश्वरा ये राजानस्तन्मध्यस्थः दुर्निमित्तदर्शनादिना विदूयता प्रकम्पमानेन हृदयेन युक्तो राजोचितं मञ्चमुपाविशत् ॥ ३५ ॥ तदा मल्लानां तालः करतलैर्भुजताडनशब्दः उत्तरः उच्चैः श्रूयमाणो येषु तेषु तूर्येषु वाद्यमानेषु सत्सु मल्ला रङ्गभूमिं समाविशन् समागताः। 'तेषामागमनं हर्षेण' इति सूचयन्नाह—स्वलङ्कृता इति। 'भगवता सह युद्धार्थमेवागता' इत्याशयेनाह—सोपाध्याया इति। उपाध्याया मल्लाचार्या इति, तैः सहिता इत्यर्थः। ननु 'धनुर्भङ्गादि तत्कृतं कर्म श्रुत्वापि कुतो न भीताः ?' तत्राह—दृप्ता इति, गर्विताः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

आनर्चुरिति ॥ पुरुषाः कंसभृत्याः रङ्गमल्लक्रीडास्थानम् आनर्चुः । मार्जनचन्दनाम्भःसेचनमालादिभिरलंकृतवन्तः तूर्याणि भेर्यश्च जघ्निरे अवाद्यन्त । मञ्चाः दिदृक्षूणामुपवेशनार्थमुच्चानि स्थानानि स्रगादिभिः स्वलंकृता जाताः ॥ ३३ ॥ तेष्विति तेषु मञ्चेषु पौराः पुरवासिनो जानपदा वहिर्देशवासिनश्च ब्राह्मणक्षत्रियादयो जनाः तथाकृतानि मञ्चोपरि स्थापितानि आसनानि सिंहासनानि येषां ते राजानश्च यथोपजोषं यथासुखं विविशुः उपविष्टवन्तः ॥ ३४ ॥ कंस इति ॥ कंसस्तु अमात्यैमन्त्रिभिः परिवृतः मण्डलेश्वरा ये राजानस्तन्मध्यस्थः दुर्निमित्तदर्शनादिना विदूयता उपतप्यमानेन । शता आर्षः । हृदयेन युक्तो राजोचितं मञ्चमुपाविशत् ॥ ३५ ॥ वाद्यमानेष्विति ॥ तदा मल्लानां तालः करतलैर्भुजताडनशब्दः उत्तरः उच्चैः श्रूयमाणो येषु तेषु तूर्येषु वाद्यमानेषु सत्सु स्वलंकृता दृप्ताः सोपाध्यायाः मल्लाचार्यैः सहिताः मल्ला रङ्गभूमिं समाविशन् समागताः ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

रंगं मल्लक्रीडास्थानमानर्चुः । भूषयां चक्रुः ॥ ३३ ॥ यथोपजोषं यथा प्रसन्नत्वं ॥ ३४ ॥ विदूयतादुःखयुक्तेन ॥३५॥ मल्लतालो मल्लानां तालो बाहुताडन ध्वनिः उत्तरउपरिनुच्चैः श्रूयते येषु तेषु तूर्येषु उपाध्यायैः मल्लाचार्यै सहिताः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आनर्चुरिति । पुरुषा भृत्याः, रङ्गं मल्लक्रीडास्थानं, आनर्चुः मार्जनचन्दनाम्भः सेचनादिभिः संस्कृतं चक्रुः । तुर्यभेर्यश्च तूर्याणि भेर्यश्चेत्यर्थः । जघ्निरे सुतरां वादितवन्तः । मञ्चाः दिदृक्षूणामुपवेशनस्थानानि, स्रग्भिः पताकाश्च चैलानि च तोरणानि च तैः, अलंकृताश्च ॥ ३३ ॥ तेष्विति । ततः तेषु मञ्चेषु, ब्रह्मक्षत्त्रपुरोगमाः ब्राह्मणक्षत्त्रियादयः, पौराः पुरवासिनः, जानपदा देशवासिनः जनाः, यथोपदेशं राजाज्ञामनतिक्रम्येत्यर्थः । विवशुः । यथोपजोषमिति पाठे यथासुखं, विविशुः । तथा राजानश्च देशान्तरेभ्यः समाहूता नृपतयोऽपि, कृतानि परिगृहीतान्यासनानि सिंहासनानि यैस्तथाभूताः सन्तः, विविशुः ॥ ३४ ॥ कंस इति । मण्डलेश्वरमध्यस्थः कंसः तु, विदूयतोपतप्यमानेन, हृदयेन सहित इति शेषः । अमात्यैर्मन्त्रिभिः संवृतः परिवृतः सन्, राजमञ्चमखण्डमण्डलेश्वरोपवेशयोग्यं मञ्चं, उपाविशत् ॥ ३५ ॥ वाद्यमानेष्विति मल्लानांतालः करतलैर्भुजास्फालनमुत्तरमुच्चैः श्रूयमाणं येषु तेषु, तूर्येषु वाद्यमानेषु सत्सु, उपाध्याया मल्लाचार्यास्तैः सहिताः सोपाध्यायाः, स्वलंकृताः दृप्ता गर्विष्ठाश्च, सर्वे मल्लाः समागताः ॥ ३६ ॥

कृष्णप्रिया

मल्लक्रीडा के उत्सवाधिकारियों ने लीपने पोतने आदि क्रिया से रङ्गभूमि को विशुद्ध बनाया । अन्तरिक्ष की पवित्रता के लिए तुरही, भेरियाँ, नगाड़े आदि वाद्ययन्त्र बजाने लगे । ध्वजा पताका एवं झण्डियों से मञ्च सुशोभित किए गए । मञ्चों के फाटकों को खम्भे को पुष्प पत्र वस्त्र कागज आदि की पताकाओं से समलङ्कृत किए ॥ ३३ ॥ राजन् अब इन समलङ्कृत मञ्चो पर विप्रवर, क्षत्रिय आदि पौर, महापौर, महाजन, प्रान्त के अधिकारी प्रतिष्ठित राजा महाराज नगरश्रेष्ठी, आदि सब लोग अपने-अपने अधिकार योग्य स्थान पर विराजमान हुए ॥ ३४ ॥ अब राजा कंस अपने मन्त्रियों के साथ अपने लिए बनाये हुए सर्वोत्तम एवं सर्वोच्च मंच पर आकर माण्डलिक राजाओं और सामन्तों के मध्य में बैठा लेकिन भय एवं चिन्ता से अत्यन्त खिन्न हृदय था ॥ ३५ ॥ तुरही भेरी आदि नगाड़े बज रहे थे, बीच बीच में मल्लों के ताल ठोकने की ध्वनि सुनाई पड़ती थी । उनके प्रति मल्लों के प्रत्युत्तर के ताल शब्द सुने जाते थे । इस अवसर पर अपने उस्तादों के साथ उत्तम वस्त्र एवं आभूषणों से विभूषित मातेले मल्लों ने रङ्गभूमि में प्रवेश किया ॥ ३६ ॥

चाणूरो मुष्टिकः कूटः शलस्तोशल एव च । त[1] आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ॥ ३७ ॥
नन्दगोपादयो गोपा भोजराजसमाहुताः । निवेदितोपायनास्ते एकस्मिन् मञ्च आविशन् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे[2] दशमस्कन्धे[3] मल्लरङ्गोपवर्णनं [4]नाम [5]द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

कर्दमक्षमा

अन्वयः—चाणूरः, मुष्टिकः, कूटः, शलः, तोशलः, च (तत्सेवकाः) एव (पञ्चैवमुख्याः) वल्गुवाद्य प्रहर्षिताः, उपस्थानम्; आसेदुः ॥ ३७ ॥ भोजराज समाहूताः, नन्दगोपादयः, गोपाः, निवेदितोपायनाः, ते, एकस्मिन्, मञ्चे आविशन् ॥ ३८ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्द्धे निरोधलीलायां राजसलीलायां प्रथमे प्रमाणप्रकरणे द्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥

---

१. तदासेदु–वीर. २. पारम–हंस्यां संहितायां–प्रा. पा. । ३. पूर्वार्द्धे–प्रा. पा. । ४. "नाम" नास्ति–प्रा. पा. । ५. चत्वारिंशः–विज.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

उपस्थानं मल्लरंगमासेदुरागताः ॥ ३७ ॥ भोजराजेन कंसेन समाहुताः समाहूताः । निवेदितान्युपायनानि यैस्ते ॥३८॥

इति श्रीमद्भागवते दशमस्कंधे पूर्वार्धे टीकायां द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कांश्चिन्मल्लान्नामतो निर्दिशति—चाणूर इति । ते चाणूराद्याः । उपतिष्ठन्त्याराधयन्ति कंसं यत्र तदुपस्थानं मल्लरंगोचितस्थलमासेदुः प्राप्तवन्तः । एवकारेण चाणूरादय एवासेदुः, किमुतान्ये तच्छिष्या इत्यर्थः । चकारात्प्राश्निकवर्गश्च । तथा च श्रीविष्णुपुराणे—"मल्लाः प्राश्निकवर्गश्च रंगमध्ये समीपगः । कृतकंसेन" इति । अस्यार्थः—मल्ला बाहुयोधिनः । प्राश्निकाश्चानुमोदनादिना तदुत्साहनादिपरास्तेषां वर्ग इति ॥ ३७ ॥ समाहुताः ह्रस्वत्वमार्षम् । ये समाहूतास्त इति योज्यम् । निवेदितोपायना दत्तप्रभूताः "प्रभूतमुद्गते प्राज्ये उपढौकनकेऽपि च" इति कोशात् ॥ भोजराजेन कंसेन सम्यक्सादरं साश्वासं चाहूता इत्यर्थः । अत्राश्वासश्च—भो व्रजराज त्वं मे मंडलेश्वरमुख्योऽसि, गोष्ठादागतोऽपि किं भीत्यैव मां न संगतोऽभूः, धनुर्भंगं खलु पुत्रयोर्दौरात्म्यं मा संस्थास्ताभ्यां ह्यः स्वबलपरीक्षैव मह्यं दत्ता, तौ बलिष्ठौ श्रुत्वैव द्रष्टुमाहूतौ, तद्यूयं शीघ्रमागच्छत, मा भैष्टेत्यादिकः । अत एव राजाज्ञागौरवादेव । क्वापि प्रातरेव गतौ स्वपुत्रौ तत्रापश्यन्नपि तदागमनमनपेक्ष्यैव परमाप्तबुद्धितो गोपानेव तयोरर्थं शीलशिक्षणार्थञ्च नियुज्य हितोपदेशवाक्यं संदिश्य च द्रुतं नंद आजगाम । उपनंदादयश्च द्रुतमायाताः कंसाय निवेदितदधिघृतवस्त्रस्वर्णमुद्राद्युपायना राजमञ्चे उपवेशस्थानाऽदर्शनाद्राज्ञ आज्ञयैवान्यस्मिन्नेकस्मिन्मंचे उपविविशुः । अत्राश्वासनं श्रीरामकृष्णयोर्मल्लयुद्धं प्रवर्तनाद्यर्थमेवेति ज्ञेयम् । श्रीकृष्णप्रियाणामपि तेषामादौ गमनं हि कुवलयापीडवधपूर्वकस्वच्छंदेन रंगांतः प्रवेष्टुं श्रीकृष्णेच्छयैवेति ध्येयमिति तोषिणीकाराः ॥ ३८ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उपतिष्ठन्ति आराधयन्ति कंसं यत्र तदुपस्थानं मल्लरङ्गोचितस्थलम् आसेदुःप्राप्तवन्तः एव कारेण चाणूरादय एवासेदुः किमुतान्ये तच्छिष्या इत्यर्थः । चकारात् प्राश्निकवर्गश्च । तथा श्रीविष्णुपुराणे । "मल्लाः प्राश्निकवर्गश्च रङ्गमध्ये समीपगः । कृतः कंसेनेति । अस्यार्थः । मल्ला बाहुयोधिनः प्राश्निकाश्चानुमोदनादिना तदुत् साहनादिपरास्तेषां वर्ग इति ॥ ३७ ॥ भोजराजेन कंसेन सम्यक् नूनमक्रूरज्ञातिभोजवर्गप्रस्थापनेन वृद्धगोपाः सादरमाहूताः सन्तः अतो धनुर्भङ्गादि शङ्कया स्वयमप्रविष्टा इति ज्ञेयम् । समाह्वानमाश्वासनाय । तच्च श्रीकृष्णरामयोर्मल्लयुद्धे प्रवर्त्तनाद्यर्थमिति ज्ञेयम् । ते श्रीकृष्णैकप्रिया अपि कुवलयापीडवधपूर्वकं स्वच्छन्देन रङ्गान्तः प्रवेष्टुं श्रीकृष्णेच्छयैव तेषामादौ तत्र गमनमित्यूह्यम् अत एवैकस्मिन्नेव नतु पृथक् पृथक् मञ्चे उपविष्टाः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणो

उपस्थानं रंग–स्थलमध्यमासेदुः प्रविविशुः, उपाविशन् बाहुयुद्धार्थं कंसेन नियुक्तानां तेषां तत्रैव स्थेयत्वात् । एव अपि, तोशलोऽपि, चकारात्तत्सहायः प्राश्निकवर्गश्च; तथा च विष्णुपुराणे (५।२०।२५)—'मल्लः प्राश्निकवर्गश्च रंगमध्यसमीपगः। कृतः कंसेन' इति । अस्यार्थः—मल्ला बाहुयोधिनः, प्राश्निकाश्चानुमोदनादिना तदुत्साहनादिपरास्तेषां वर्ग इति ॥ ३७ ॥ भोज-राजेन कंसेन सम्यगक्रूरज्ञातिभोजवर्गप्रस्थापनेन सादरमाहूताः सन्तः समाह्वानमाश्वासनाय, तच्च श्रीकृष्णरामयोर्मल्लयुद्धे प्रवर्त्तनाद्यर्थमिति ज्ञेयम् । ते श्रीकृष्णैकप्रिया अपि कुवलयापीडवधपूर्वकं स्वच्छन्देन रंगान्तः प्रवेष्टुं श्रीकृष्णेच्छयैव तेषामादौ तत्र गमनमित्यूह्यम् । अतएवैकस्मिन्नैव मञ्चे उपविष्टाः । श्रीवसुदेवश्च तन्मञ्चप्रान्त एव स्थितो ज्ञेयः, तत्र तदनन्तरमेव तदुक्तेः । गोपाश्च श्रीभगवत्सहचरव्यतिरिक्ताः ज्ञेयाः, तत्सहचराणां तेनैव सह गमनात्; तथा च वक्ष्यते (भा० १०।४३।१६)—'वृतौ गोपैः कतिपयैः' इति ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील–सनातन–गोस्वामिपाद–कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम–टिप्पण्यां द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तथा चाणूरादयो मल्ला वल्गुवाद्यैर्मधुरवाद्यैः प्रहर्षितास्तदुपस्थानं मल्लरङ्गमासेदुराजग्मुः ॥ ३७ ॥ तथा नन्दादयो गोपाश्च भोजराजेन कंसेनाहूताः निवेदितान्युपायनानि यैस्ते एकस्मिन्मञ्चे आविविशुः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

काँश्चिन्मल्लान्नाम्ना निर्दिशति । चाणूर इति । ये चाणूरप्रभृतयः त एव मल्लेषु प्रधानाः त एवमुपस्थानं रङ्गसमीपम् ३७ भोजराजेन समाहूता ये नन्दादिगोपास्ते किमकुर्वन्निति तत्राह । नन्दगोपादय इति । निवेदितोपायनाः दत्तप्रभूताः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां द्विचत्वारिंशोऽध्यायः ॥ ४०–४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उपस्थानं मल्लरङ्गभूमिम् ॥ ३७ ॥ समाहुताः सम्यक् सादरं साश्वासं चाहूता इत्यर्थः । तत्राश्वासश्च भो व्रजराज ! त्वं मे मण्डलेश्वरमुख्योऽसि गोष्ठादागतोऽपि किं भीत्यैव मां न सङ्गतोऽभूः धनुर्भङ्गं खलु पुत्रयोर्दौरात्म्यं मामंस्थाः ताभ्यां ह्यः स्वबलपरीक्षैव मह्यं दत्ता तौ बलिष्ठौ श्रुत्वैव द्रष्टुमाहूतौ तत् यूयं शीघ्रमागच्छत माभैष्टेत्यादिकः अत एव राजगौरवादेव क्वापि प्रातरेव गतौ स्वपुत्रौ तत्रापश्यन्नपि तदागमनमनपेक्ष्यैव परमाप्तबुद्धिमतो गोपानेव तयो रक्षार्थं शीलशिक्षणार्थं च नियुज्य हितोपदेशवाक्यं सन्दिश्य च द्रुतं नन्द आजगाम उपनन्दादयश्च द्रुतमायाताः कंसाय निवेदितदधिघृतवस्त्रस्वर्णमुद्राद्युपायनाः राजमञ्चे उपवेशस्थलादर्शनाद्राज्ञ आज्ञयैवान्यस्मिन्नेकस्मिन् मञ्चे उपविविशुः ॥ ३८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । द्विचत्वारिंशकः साधु दशमेऽजनि सङ्गतः ॥ ४२ ॥

गूढार्थदीपिनी

उपस्थानं मल्लभूमिम् आजग्मुः । वल्गुं मनोहरम् ॥ ३७ ॥ ये समाहूताः ते आविशन् उपविविशुः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उपस्थानं मल्लरङ्गं चाणूरादय आसेदुः ॥ ३७ ॥ समाहुताः समाहूताः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्विचत्वारिंशाध्यायार्थप्रकाशः ॥ ४२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः सर्वेष्वागतेषु चाणूरादयो युद्धभूमिं युद्धवेषेण समागता इत्याह । चाणूर इति । पञ्चैते दैत्यप्राणरूपाः पञ्चैव उपस्थानमागताः उपसमीपे स्थीयते अस्मिन्निति यद्युद्धस्थानं चकारात् तत्सेवका अपि आसेदुः आगतानामुत्साहमाह । वल्गुवाद्येन प्रहर्षिता इति ॥ ३७ ॥ एवं सर्वसामग्रीसम्पत्तौ समाहूता नन्दादयः समागता इत्याह । नन्दगोपादय इति । बालकास्तु भगवन् मित्राणि भगवतैव सहागमिष्यन्ति । नन्दगोपादि सदृशा ये ते भोजराजेन अप्रतिहतप्रतापेन समाहुताः समानीताः उपायनानि निवेद्य यतो गृहादेवोपायनानि गृहीतवन्तः तदाह । त इति । सर्वदा वा तदधीना प्रसिद्धा वा प्रसिद्धैरुपायनं देयमिति विजातीयैः सह कलहशङ्कया दुर्बलाः एकस्मिन्नेव मञ्चे आविशन् अनेन मञ्चानां स्थूलता निरूपिता ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां एकोनचत्वारिंशाध्यायविवरणम् ॥ ३९–४२ ॥

श्रीसुबोधिनी–सारः

तत्र गुरूनाह । चाणूर इति । ते प्रसिद्धाः पंच वल्गुभिर्मनोहरैर्वाद्यैः प्रहर्षिता उपस्थानं मल्लरंगमासेदुरुपविविशुः ।३७। नंदगोपादयो गोपा भोजराजेन कंसेन समाहुताः ह्रस्व आर्षः । निवेदितम् उपायनं यैस्ते दत्तबलय एकस्मिन्मंचे आविशन् ॥ ३८ ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायां द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

एवं साधारणानां मल्लानां साधारणेनागमनं निरूप्य मुख्यानामागमनमाह—चाणूरेति । वल्गुवाद्यैः मनोहरतूर्यादिघोषैः प्रहर्षितास्ते प्रसिद्धाश्चाणूरादयो मल्ला उपस्थानं स्वक्रीडास्थानमासेदुः आजग्मुः ॥ ३७ ॥ तथा भोजराजेन कंसेन समाहूताः निवेदितानि समर्पितान्युपायनानि यैस्ते नन्दादयो गोपाश्चैकस्मिन् मञ्चे आविविशुः ॥ ३८ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येव भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने । द्विचत्वारिंशकोऽगच्छत् कुब्जासुरूपबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

चाणूर इति ॥ वल्गुवाद्यैः मनोहरतूर्यादिघोषैः प्रहर्षिताश्चाणूरादयो मल्ला उपस्थानं स्वक्रीडास्थानं मल्लरङ्गमासेदुः आजग्मुः ॥ ३७ ॥ नन्देति ॥ पूर्वं धनुर्भङ्गादिकृष्णापराधभयाद्रङ्गमप्रविष्टाः ततश्च वञ्चनाय भोजराजेन कंसेन समाहुताः समाहूताः

ह्रस्वमार्षम्। निवेदितानि समर्पितान्युपायनानि यैस्ते नन्दश्चासौ गोपो राजा च तदादयो गोपाश्चैकस्मिन्मञ्चे आविशन्। ते च गजवधानन्तरं प्रवेष्टुमिच्छता कृष्णेनाग्रे प्रेषिता इति ज्ञेयम् ॥ ३८ ॥

इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायां द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशिका

उपतिष्ठेत्याराधयंती कंसं यत्र तदुपस्थानं मल्लरंग ॥ ३७ ॥ समाहुताः समाहूताः निवेदितानि समर्पितानि उपायनानि सत्कृतिविधायकवस्तूनि यैस्ते ॥ ३८ ॥

इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धव्याख्याने मल्लरंगवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं सामान्यत उक्तेषु तेषु कांश्चिन्नाम्ना दर्शयति ॥ चाणूर इति ॥ चाणूरः तथा मुष्टिकः, कूटः, शलः, तोशलश्च। ते एते मल्लाः, वल्गुवाद्यै मधुरवाद्यैः प्रहर्षिता हर्षं प्राप्ताः सन्तः, उपस्थानं मल्लरङ्गं, आसेदुराजग्मुः एव ॥ ३७ ॥ नन्द इति ॥ तथा नन्दगोपादयः गोपाः, भोजराजसमाहुताः कंसेनाहूताः, निवेदितान्युपायनानि यैस्ते, एवं भूताः सन्तः, एकस्मिन्, मञ्चे, आविशन् आविविशुः ॥ ३८ ॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तम श्रीसहजानन्दस्वामिसुत श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

श्रीहरिसूरिविरचितं भक्तिरसायनम्

चाणूर इति : १०.३२.३७.

अहङ्कारमग्रे विधायान्तरङ्गे निजाज्ञानराजा - वनारब्धयत्नाः।
द्विषन्तो भवन्तीत्यभूद् व्यक्तमेतद् यदेते तथाऽऽसन् पुरस्कृत्य नागम् ॥ १०५ ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

कृष्णप्रिया

इन मल्लों में चाणूर, मुष्टिक, कूट, शल, तोशल, आदि मल्लों के पञ्चप्राण समान प्रसिद्ध पञ्च मल्ल और उपप्राण समान अन्य मल्ल भी अखाड़े के स्थान में आ पहुँचे और अखाड़े के अगल बगल स्थान में बैठ गए एवं कर्णप्रिय मधुर मधुर वाद्ययन्त्रो की ध्वनि सुनकर प्रहर्षित होने लगे ॥ ३७ ॥ सभा स्वरूप वनने के बाद भोजराज कंस से निमंत्रित नन्दराज आदि प्रसिद्ध गोप सभा मण्डप में पधारे और उन्होंने अपने अपने राज्यों से लाए हुए विविध प्रकार के भेट पदार्थ समर्पित किए। राजा कंस ने निमन्त्रित जनों का अच्छी तरह सत्कार एवं समादर किया। नन्दादि गोपराज भी अपने मञ्च पर विराजमान हो गए ॥ ३८ ॥

श्रीमद्भागवत दशम स्कन्ध पूर्वार्द्ध निरोधलीला राजसप्रकरण के प्रमाणप्रकरण में ज्ञान ऐश्वर्य निरूपण करने वाला ४२ वां अध्याय का भाषान्तर सम्पूर्ण ॥ ४२ ॥

◆ ◆

[1]अथ प्रमेयप्रकरणम्

अथ त्रिचत्वारिंशोऽध्यायः

श्लोकाः	अनु.	शार्दूल	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४०	३७	१	२	२	१३७२	१२	५३	१४३७	४४।।	५

[2]श्रीशुक उवाच

अथ कृष्णश्च रामश्च कृतशौचौ [3]परन्तप । मल्लदुन्दुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ।। १ ।।
रङ्गद्वारं समासाद्य तस्मिन् [4]गजमवस्थितम् । अपश्यत्[5] कुवलयापीडं कृष्णाऽम्बष्ठप्रचोदितम् ।२।
बद्ध्वा परिकरं शौरिः समुह्य कुटिलालकान् । उवाच हस्तिपं वाचा मेघनादगभीरया ।। ३ ।।
अम्बष्ठाम्बष्ठ मार्गं नौ देह्यपक्रम माचिरम् । नो चेत् सकुञ्जरं त्वाद्य नयामि यमसादनम् ।। ४ ।।

कर्दमक्षमा

अन्वयः—अथ हे परंतप कृतशौचौ रामश्च कृष्णश्च मल्लदुन्दुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ।। १ ।। कृष्णः रंगद्वारं समासाद्य तस्मिन् अम्बष्ठप्रचोदितं कुवलयापीडं गजमवस्थितं अपश्यत् ।।२।। परिकरं बद्ध्वा शौरिः कुटिलालकान् समुह्य मेघनाद गंभीरया वाचा हस्तिपं उवाच ।। ३ ।। हे अम्बष्ठ ! अम्बष्ठ ! नौ मार्गं देहि अपक्रम माचिरं नो चेत् अद्य सकुञ्जरं त्वां यमसादनं नयामि ।। ४ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्रिचत्वारिंशके हत्वा गजेंद्रं रामकृष्णयोः ।। रंगप्रवेशसौभाग्यं चाणूरेण च भाषणम् ।। १ ।।

पूर्वद्युरेव कृतं शौचं शुद्धत्वं निरपराधत्वं याभ्यां तौ । एतदुक्तं भवति । धनुर्भंगादिनाऽऽवाभ्यां निजैश्वर्ये सूचितेऽपि पितरौ न मुंचत्यावां च पुनर्जिघांसत्यतोऽस्य मातुलस्यापि वधे नावयोर्दोष इत्येवं कृतापराध परिहाराविति । मल्लानां दुंदुभीनां च निर्घोषं मल्लतालदुंदुभिनिघोषं वा ।। १ ।। कुवलयापीडसंज्ञकं नागं हस्तिनम् अंवष्ठो हस्तिपकस्तेन चोदितम् ।। २ ।। परिकरं बद्ध्वा युद्धोचितपरिधानं कृत्वा । समुह्य निबध्य ।। ३-४ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सौभाग्यमत्र रसकदंबमूर्तिप्रदर्शनरूपम् (१) । शौचमभिनीय प्रदर्शयति—एतदुक्तमित्यादिना । द्वितीयोऽर्थ उत्तान एव दुंदुभिध्वनिना मल्लघोषस्याभिभवमाशंक्यार्थान्तरमाह—मल्लताल एव दुंदुभिनिर्घोषस्तम् । तत्र तस्यैव प्राधान्यादित्यर्थः ।। अथेति पित्रादीन्पृष्ट्वैव सर्वलक्षितौ सवयस्यौ यमुनातीरं रामकृष्णौ गतौ, तत्रैव कृतदन्तधावनादिकौ भो भो वयस्या मल्लतालमयो दुंदुभिर्घोषोऽयं श्रूयते तदित एव प्रविशाम इति द्रष्टुं द्रुतमीयतुः ।। १ ।। तस्मिन् रंगद्वारे । नागंगजम् “नागः पन्नगमातंगक्रूराचारिषु तोयदे । नागकेसरपुन्नागनागदंतकमुस्तके ।।” इति मेदिनी । “अंबष्ठस्तु महामात्रे रागद्रव्ये विलोमजे” इति धरणिः ।। हिंसार्थमेवांबष्ठप्रेरितमैक्षत ।। २ ।। “भवेत्परिकरः संघेपर्यंकपरिवारयोः । प्रगाढगात्रिकाबंधे समाचारविवेकयोः ।।” इति मेदिन्युक्तेर्युद्धाचितपरिधानं गाढगात्रबंधं, कटिबंधमिति यावत् ।। शौरिरिति तद्वंश्यानामानंदार्थमिति भावः । परिकरं बद्ध्वा कंचुकं विसृज्य परिधानीयवस्त्रं मध्यबन्धनघटीपटेन वेष्टयित्वा प्रालम्बमालादिकं वैकक्षादित्वे निधायेत्यर्थः । ‘विचित्रवेषाभरणस्रगम्बरौ’ (१९) इति वक्ष्यमाणत्वात् । कुटिलान् स्वभावत एव वक्रान्, अत एव पूर्वं कंकतिकया लसदुष्णीषेषु दीर्घकेशेषु प्रवेशितानपि, यद्वोष्णीषबंधकालेंगुल्या केशान्तःप्रवेशितानपि युद्धकाले विक्षेपशंकयाऽलकांश्चूर्णकुन्तलान्समूह्योत्तरीयेणापि गाढ बद्ध्वेत्यर्थः । समूह्येह दीर्घत्वमार्षम् । श्लेषेण दुष्टवधे मुखावरणादिना विघ्नापादनात्कुटिलानां स्वीयानामपि सम्यग्बंधनं युक्तमेवेति ध्वनितम् ।। ३ ।। अपक्रम दूरीभव । नो चेन्मार्गदानाभावे । यमसादनं यमगृहम् ।। वीप्सा दृढावधानार्थं क्रोधादेव वा । मार्गरोधनं किल महापातकमित्याशयेनाह—मा चिरं द्रुतमपक्रम मार्गादपसर । सदनमेव सादनम् । स्वार्थेऽण् । वस्तुतस्तु यमेन मनोनिरोधेनासाद्यते प्राप्यत इति यमसादनं मोक्षम् । नयामि प्रेषयामि । सामीप्ये वर्तमानत्वम् । अद्येति एतावंतं कालमुद्वृत्तो वर्तसे तस्मादद्य त्वां यमस्य सादनम् । अग्रे पूर्ववत् ।। ४ ।।

---

[1] श्रीधरा-दिषु नास्ति । [2] बादरायणि-प्रा. पा. । [3] परंतपौ-विज. । [4] नाग-श्रीधर. वंशी. जीव. वीर. विश्व. ; गज-विज.
[5] अपश्यन्-इति कस्यचित् ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

द्रष्टुमिति। दिदृक्षाव्याजेनेत्यर्थः। अम्बष्ठादिवञ्चनार्थं परिधानीयोत्तरीयपरिधानेन मल्लवेशास्वीकारात्। अन्यथा वक्ष्यमाणपरिकरबन्धवैयर्थ्यं स्यात् उपेयत् रङ्गस्थलान्तिकं ययतुः। परन्तप ! हे शत्रुनाशनेति तादृशदुष्टद्वेषो भवादृशां शीलमेवेति भावः। अन्यत्तैः। यद्वा कृतशौचाविति नरचेष्टानुकरणमात्रम् एतन्मिषेणैव वृद्धगोपेभ्यः पूर्वमेव विच्छिन्नाविति ज्ञेयम्॥ १॥ अवधानेन स्थितमपश्यत् एतच्चाम्बष्ठप्रणोदितमपश्यदित्यर्थः॥ २॥ शौरिरिति। तद्वंश्यानामानन्दार्थमिति भावः। परिकरं बद्ध्वा कञ्चुकं विसृज्य परिधानीयं मध्यबन्धघटीपटेन वेष्टयित्वा प्रालम्बमालादिकं वैकक्षादित्वेन विधायेत्यर्थः। विचित्रवेशाभरणस्रग्धराविति वक्ष्यमाणात्। कुटिलान् स्वभावतो वक्रान् अत एव पूर्वं कङ्कतिकया लषदुष्णीषेषु दीर्घकेशेषु प्रवेशितानपि युद्धकाले विक्षेपशङ्कया अलकान् चूर्णकुन्तलान् समुह्योत्तरीयेणापि गाढं बद्ध्वेत्यर्थः। समूह्येति पाठे दीर्घत्वमार्षं श्लेषेण दुष्टवधे मुखावरणादिना विघ्नापादनात् कुटिलानां स्वीयानामपि सम्यग्बन्धनं युक्तमेवेति ध्वनितम्। अन्यत्तैः तत्र परिकरमित्यनन्तरं बद्ध्वेति पतितमिव यद्वा बद्ध्वेत्यस्यैव टीका कृत्वेति॥ ३॥ वीप्सा दृढावधानार्थं क्रोधादेव वा मार्गरोधनं किल महापातकमित्याशयेनाह। माचिरं द्रुतम् अपक्राम मार्गादपसर नयामि प्रेषयादि सामीप्ये वर्त्तमानवत्त्वम्। अद्येति एतावन्तं कालमुद्वृत्तो वर्त्तसे तस्मादद्य त्वामित्यर्थम् यमस्य सदनमेव सादनं स्वार्थेऽण् वस्तुतस्तु यमेन मनोनिरोधेन साद्यते आसाद्यते यत्तन्मोक्षलक्षणं वस्त्वित्यर्थः॥४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथेति मांगल्ये, दुष्टवधादिप्रसंगापत्तेः। यद्वा, श्रीनन्दादिसमाह्वानानन्तरं स्निग्धतरजनैः सह द्वेष्ट्रिनिकटे गमनायोग्यत्वात्, किंवा तेषां गमनेन त्वरयावश्यं तत्र गमनोपपत्तेः। दुष्टवधेच्छया निजजनचिताकर्षणात् कृष्णस्तया स्वबन्धुवर्गरमणाद्राम इति, चकाराभ्यां द्वयोरपि प्राधान्यं बोध्यते। यद्यपि सर्वत्र श्रीकृष्णस्यैव प्राधान्यमत एवात्राप्यादौ तस्य निर्देशः, तथापि दुष्टवधार्थं श्रीबलदेवस्यापि तादृशोद्यमात्, तथानुजस्नेहेन सहैव गमनात्तन्मत्यनुसाराच्च कृतशौचत्वादौ प्राधान्यमूह्यम्। मल्लानां युद्धसम्बन्धिनं दुन्दुभीनां निर्घोषं महानादं श्रुत्वा, अत एव मल्लयुद्धं द्रष्टुमित्यम्बष्ठादिवञ्चनार्थं मल्लयुद्धवेषादिराहित्येन सौम्यतयोपयानादुपेयतुः, रंगस्थलान्तिकं ययतुः, तत् सर्वं द्वियतो दुष्टस्य सगणस्य वधार्थं युक्तमेवेत्याशयेन सम्बोधयति— परन्तप हे शत्रुनाशकेति। तद्भवादृशां शीलमेवेति भावः॥ १॥ सम्यग साद्य प्राप्य, अतिनिकटे गत्वेत्यर्थः। अवधानेन स्थितम्, यतोऽम्बष्ठेन महामात्रेण स्कन्धोपर्य्युपविष्टेन प्रकर्षेणां कुशप्रहारादिना हिंसार्थं चोदितं कृष्णोऽपश्यदिति तद्वधार्थं तस्याग्रेऽभिसरणात् सावधानत्वाच्च, अत एव सर्वचिताकर्षकगुणत्वात् कृष्ण इति॥ २॥ शौरिः शूरवंशार्णवचन्द्र इति तद्वंश्यानामानन्दार्थमिति भावः। श्लेषेण शूरतया परमविक्रमो ध्वनितः। कुटिलान् स्वभावतो वक्रान् अत एव सम्वरणाय बन्धयोग्यानलकान् चूर्णकुन्तलान् केशानेव वा समुह्य संवृत्य, पाठान्तरे दीर्घत्वमार्षम्। श्लेषेण दुष्टवधे मुखावरणादिना विघ्नापादनात्। कुटिलानां स्वीयानामपि सम्यग् बन्धनं युक्तमेवेति ध्वनितम्। वस्तुतस्तु शोभाविशेष एव, मेघगर्ज्जितादपि गम्भीरयेति महापुरुषलक्षणत्वेन वाचस्तादृशत्वात्॥ ३॥ वीप्सा दृढावधानार्थम्, क्रोधादेव वा, मार्गरोधनं किल महापातकमित्याशयेनाह— मा चिरं द्रुतमपक्रम मार्गादपसर, नो चेत्, यदि तापक्रामसि, कुं पृथ्वीं जरयति दन्ताभ्यां भारेण च चूर्णयतीति कुञ्जरस्तमिति महाबलत्वमुक्तम्। अद्य अस्मिन्नेव क्षणे, नयाभि प्रेषयामीत्यर्थः, वर्त्तमानातत्कालतार्थम्॥ ४॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अम्बष्ठप्रचोदितं हस्तिपप्रचोदितम्॥ १-६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितम् इत्युक्तम् अथ किम्परेद्युः कंसचिकीर्षितं किंवा तावकुरुतामित्यत्राह। अथेत्यादिना हे परन्तप ! परेद्युः प्रातः रामः कृष्णश्च कृतशौचौ कृतं शौचं स्नानादिकमं याभ्यां तौ मल्लानां दुन्दुभीनां च निर्घोषं श्रुत्वा द्रष्टुमाजग्मतुः॥ १॥ रङ्गस्य मल्लक्रीडास्थानस्य द्वारमासाद्य तस्मिन् द्वारेऽवस्थितेन हस्तिपेन प्रचोदित कुवलयापीडाख्यं गजं भगवानपश्यत्॥ २॥ परिकरं परिधानं यथोचितं बद्ध्वा कुटिलालकान् समूह्य निबध्य गर्जितवद्गम्भीरया वाचा हस्तिपमुवाच॥ ३॥ उक्तिमेवाह। अम्बष्ठाम्बष्ठेति। अपक्रम मार्गं परित्यज माचिरं विलम्बं माकार्षीः नोचेन्मार्गं न दास्यसि चेदद्य सकुञ्जरं त्वां यमलोकं प्रापयामि॥ ४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कृष्णरामाभ्यां नन्दादिभिः सह स्थितमुत पृथगिति संशयनिरासार्थं तत्कर्म कथयति। अथेति। कृतशौचौ मुखप्रक्षालनादिना प्राप्तशुद्धी यद्वा कृतं पर्याप्तं पूर्णं शौचं शुचेरग्नेः सर्वदहनत्वं ययोस्तौ अग्निवत्सर्वदाहकावित्यर्थः। अत्रापि विशेषोऽ-

स्तीत्याह । परन्तपाविति । शत्रूणामेव तापकौ न सर्वेषामित्यर्थः । मल्लदुन्दुभिनिर्घोषं मल्लयुद्धोचितदुन्दुभिध्वनिं मल्लयुद्धं द्रष्टुं तत्समीपमाजग्मतुः ॥ १-२ ॥ परिकरं कक्षाख्यमुदरबन्धं काञ्चीम्वा कुटिलालकान् समुह्य एकीकृत्य बद्ध्वा ॥ ३ ॥ अपक्राम अपसर यमसादनं यमगृहम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मल्लानामशनिरित्यादि ॥ १—४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्रिचत्वारिंशके हत्वा हस्तीन्द्रं रङ्गभूगतः । माधुर्य्यैश्वर्य्यवर्षी स चाणूरं प्रत्यभाषत ॥

अथेति । उषसि पित्रादीनपृष्ट्वैव सर्वैरलक्षितौ सवयस्यौ यमुनातीरं रामकृष्णौ गतौ तत्रैव कृतदन्तधावनादिकौ भो भो वयस्याः! मल्लतालमयो दुन्दुभिघोषोऽयं श्रूयते तदित एव प्रविशाव इति द्रष्टुं द्रुतमीयतुः ॥ १ ॥ अम्बष्ठो हस्तिपस्तेन स्वं प्रति हिंसार्थं प्रेरितम् ॥ २ ॥ परिकरं बद्ध्वा कञ्चुकं विसृज्य परिधानीयवस्त्रं मध्यबन्धनघटीपटेन वेष्टयित्वा प्रालम्बमालादिकं वैकक्षकादित्वेन निधायेत्यर्थः । कुटिलालकान् उष्णीषबन्धनकाले अङ्गुल्या केशान्तःप्रवेशितानपि युद्धकाले विक्षेपशङ्कया समुह्य उत्तरीयेणापि गाढं बद्ध्वेत्यर्थः । समूह्येति पाठे दीर्घत्वमार्षम् ॥ ३ ॥ यमस्य सादनं सदनं वस्तुतस्तु यमेन मनोनिरोधेनासाद्यते प्राप्यते इति यमसादनं मोक्षम् ॥ ४ ॥

गूढार्थदीपिनी

त्रिचत्वारिंशके द्वारि हस्तिहस्तिपमर्दनम् । रङ्गभूमौ प्रवेशश्च चाणूरेणास्य भाषणम् ॥ १ ॥

शौचं दन्तधावनादि । यद्वा । कृतं शौचं कंसमारणेऽपि निर्दोषत्वं याभ्यां तौ ॥ १ ॥ अम्बष्ठः हस्तिपकः ॥ २ ॥ शौरिः कृष्णः । परिकरं युद्धवेषम् । समुह्य निबध्य ॥ ३ ॥ अम्बष्टेति द्विरुक्तिः कोपावेशात् नौ आवयोः । अपक्रम मार्गादपसर । सादनं स्वार्थेऽण् । यमलोकं वस्तुतः यमेन मनोनिरोधेन आसाद्यते यत् तत् मोक्षम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

त्रिचत्वारिंशे कुवलयापीडवधरङ्गप्रवेशादिकं भगवच्चरितं वर्णयति । अथेति । कृतं शौचं स्नानादिकं याभ्यां तौ ॥ १ ॥ अम्बष्ठेन हस्तिपेन प्रचोदितम् ॥ २ ॥ समुह्य निबध्य ॥ ३-४ ।,

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ । रामकृष्णौ किं नन्दादिभिः सहितौ मञ्चमुपयातौ किंवा लोकविलोककौ किंवा पृथक्पन्थानमाश्रित्य तस्यतुरित्यतस्तत्कर्म श्रावयति श्रीशुक इति वदति । श्रीशुक इति । अथ सूर्योदयानन्तरं रामकृष्णश्चेत्येतौ कृतशौचौ मुखप्रक्षालनमज्जनादिना गताङ्गशुद्धी लोकदृष्ट्या । मल्लदुन्दुभिनिर्घोषं श्रुत्वा द्रष्टुमुत्सवं समुपेयतुः ॥ १ ॥ रङ्गद्वारं समासाद्य तस्मिन्द्वार्यंबष्ठप्रचोदितं कुवलयापीडं तज्जामकं गजमपश्यत् । रङ्गतां गच्छतां वारं समूहं च दृष्टवेत्यर्थः । रङ्गगेत्यर्थः ॥ २ ॥ परिकरमुत्पलवनाद्युतकूलबन्धं । भेर्यङ्कपरिवारयोः प्रगाधे गात्रिकाबन्धे विप्रभारम्भयोरपीति विश्वः । कुटिलालकान्समूह्य समूहीकृत्य बद्ध्वा च । अनेन स्वकीयोऽपि कुटिलश्चेच्छिक्षणीय इति ध्वनयति । मेघ नादगभीरया वाचा हस्तिपमुवाच ॥ ३ ॥ अम्बष्ठाम्बष्ठेति द्विर्वचनमाक्रोशसूचकं । नो मार्गं देहि मा चिरं । अपक्राम अपगच्छ । नो चेन्न गच्छसि चेद्यं असादनमावसादनममृत्युमिति यावत् मनुषे तेन कुञ्जरेण सहितमिति सकुञ्जरं त्वा त्वामद्य यमसादनं यमसदनं नमामीत्युक्तावपि मया भीत्यावृत्त्याऽन्वयः ॥४॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

शब्दस्य हि बलं पूर्णं सप्तभिर्विनिरूपितम् । अर्थस्यापि बलं रोधे तावद्भिर्विनिरूप्यते ॥
प्रपञ्चो विस्मृतः सर्वैरुत्सवाद्यैरनेकधा । माहात्म्यस्य परिज्ञानात्तदासक्तिर्निरूप्यते ॥
द्रष्टॄणां च तथा पित्रोः सर्वेषामेव चैव हि । पूर्वोक्तानां तथान्येषां द्वाभ्यां द्वाभ्यामुदीर्यते ॥
एवमासीक्तशुद्धौ हि तदेकपरता पुनः । वक्तव्येति ततो हेतोः फलं चापि निरूप्यते ॥
चत्वारिंशक्रमेऽध्याये कृष्णासक्तिर्निरूप्यते । दृष्ट्वा सामर्थ्यमतुलं विस्मितानामनेकधा ॥

पूर्वाध्याये भगवतो दोषाभावाय विशेषचेष्टाफलं साधारण चेष्टारूपस्य कालस्य च दुर्निमित्तप्रदर्शनलक्षणं निरूपितं तथाप्यनिवृत्तौ भक्तोपेक्षादोषो भगवतोऽपि भविष्यतीति । अनाहूतयोरपि रामकृष्णयोर्दर्शनार्थं प्रवृत्तिर्निरूप्यते तत्र प्रथमं रङ्गदर्शनार्थं प्रवृत्तावित्याह । अथ कृष्णश्च रामश्चेति । चकारद्वयं समुच्चयार्थं ससाधनंफलं च तत्र गच्छतीति निरोधे न कोऽपि सन्देह

इति भावः । अथेति प्रक्रियानन्तरं प्रमेयबलमारभ्यत इति कृतशौचौ कृतावश्यकाविति केचित् पूर्वदिन एव कृतं शौचं स्वशुद्धता याभ्यां परन्तपेति सम्बोधनं गूढार्थपरिज्ञानाय ब्रह्मधर्माह्यते तपसा ज्ञातव्या इति तदा मल्लानां दुन्दुभीनां च नितरां घोषं श्रुत्वा सर्वसामग्री सिद्धेति स्वयमपि द्रष्टुमुपेयतुः ।। १ ।। प्रमेयनिरोधे दृष्टं माहात्म्यं प्रयोजकमिति वक्तुं प्रथमं कुवलयापीडवधो निरूप्यते । रङ्गद्वारमिति त्रयोदशभिः । कालजयो हि पौरुषमिति स त्रयोदशात्मा संवत्सरो निरूपितः कुवलयं भूमण्डलं तस्यापीडं मुकुटस्थानीयमासमन्तात् पीडा वा यस्मात् द्विपश्रेष्ठं हन्तुमुद्यत इत्याह । रङ्गद्वारमिति । रङ्ग उत्सवस्थानं तस्यापि शोभार्थं द्वारादिनिर्माणं तावत्पर्यन्तं सम्यगेव गत्वा तस्मिन् द्वारमध्ये गजमवस्थितपश्यत् तदैव ह्युत्सवः सम्पद्यते यदि कालो निवृत्तो भवति तदोत्सवदर्शनमिति मृत्युर्हि गजरूपः पञ्चमे निरूपितः अवस्थितमचलं दृष्ट्यैव हननार्थमपश्यत् सर्वथा हनने हेतुः कुवलयापीडमिति । सर्वेषामेव दुखदं तत्रापि अम्बष्ठेन सङ्करोद्भवेन जातिहीनेन प्रकर्षेण प्रेरितं स्वसंमुखमागच्छन्तम् अनेन भगवतोऽक्लिष्टकर्मत्वं निरूपितं कदाचित् साधारणोऽयं भवेत् अतस्तच्छङ्कापरिहारार्थं कृष्ण इति ।। २ ।। कालात्मानं दृष्ट्वापि तेन वलक्षये जातेऽपि पुनः प्रबोधं कृतवानित्याह । वद्ध्वेति । परिकरमुत्तरीयवस्त्रं कटिसम्बद्धं कृत्वा कुटिलालकांश्च हस्तद्वयेन चूडाकारेण बद्ध्वा कालमुभयतो निरुध्य भ्रमनिवृत्त्यर्थं वाचा निर्भत्सनं कृतवान् इत्याह । उवाचेति । हस्ती चेत् दुष्टः हस्तिपेन वारणीयः हस्तिपश्चेत् स एव मारणीयः अन्यथा उभावपि मारणीयाविति तदधीनो हस्तीति तस्य निर्भर्त्सने यथा भयमुत्पद्यते तथा सिंहसमानस्य मेघस्येव नादं कृतवानित्याह । मेघनादगभीरया वाचेति । मेघनादापेक्षया गम्भीरा अनेनान्तःस्थितानां तप्तानां वसुदेवादीनां तापोऽपि निवारितः ।। ३ ।। निर्भर्त्सनमाह । अम्बष्ठाम्बष्ठेति । निन्दायां वीप्सा प्रतिलोमजोऽम्बष्ठ इति तस्य सहजदोषकीर्त्तनेनैव तिरस्कारो भवति अनवहितस्य श्रवणार्थं वा द्विरुक्तिः नो मार्गं देहीति । अयमस्माकमेव मार्गः उत्सवोऽस्मदर्थमेव कृत इति अस्मभ्यं मार्गं देहीति च कथं देय इति चेत्तत्राह । अपक्रमेति । इतो ऽन्यत्र गच्छ चिरं मा अन्यथाज्ञोल्लङ्घने मदीयः कालोऽधिकारीमारयिष्यतीति । किं च यदि केनापि प्रकारेण मार्गं न दास्यसि तत उभयोर्दोषे कुञ्जरसहितं त्वामद्यैव यमसादनं नयामि प्रापयिष्यामि मध्ये न त्यक्ष्यामीति मृत्युरेव यमगृहम् अन्यथा मल्लेभकङ्कयवना इति गणना विरुध्येत कदाचिद्धस्तीमम युद्धसाधनमिति न मन्तव्यमित्यभिप्रायेणाह । स कुञ्जरमिति । अद्यैवेति तव मारणेऽपि विलम्बो न भविष्यतीत्यर्थः । अद्येति वर्त्तमानकालवाचकं न तु दिनवाचकम् ।। ४ ।।

श्रीसुबोधिनी–सार

शुकोक्तिः । अथेति मंगले । हे परंतप कृष्णो रामश्च कृतशौचौ शुद्धौ मल्लानां दुंदुभीनां च निर्घोषं शब्दं श्रुत्वा द्रष्टुमुपाय यतुः ।। १ ।। रंगस्य द्वारं समासाद्य प्राप्य तस्मिन् द्वारेऽवस्थितं नागं कुवलयापीडम् अंबष्ठेन प्रचोदितं कृष्णोऽपश्यत् ।।२।। शौरिः श्रीकृष्णः परिकरं बद्ध्वा कुटिलान् वक्रान् अलकान् केशान्समुह्य बद्ध्वा मेघनादगभीरया वाचा हस्तिपम् उवाच ।। ३ ।। हे अंबष्ठ हे अम्बष्ठ नौ आवाभ्यां मार्गं त्वं देहि मा चिरं शीघ्रमपक्रम दूरमपसर नो चेत् तर्हि सकुंजरं सगजं त्वा त्वां यमस्य सादनं पदम् अद्य इदानीमहं नयामि ।। ४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्रिचत्वारिंशके हस्ति–हननं रङ्गवेशनम् । चाणूरेण च संवादः कृष्णस्य विनिरूप्यते ।। १ ।।

अथ नन्दादिगमनानन्तरं हे परंतप ! कृतं शौचं दन्तधावनस्नानादिकं याभ्यां तौ रामकृष्णौ मल्लतालानां दुन्दुभीनां च निर्घोषं श्रुत्वा तदुत्सवं द्रष्टुमुपेयतुः आजग्मतुः ।। १ ।। कृष्णो रङ्गस्य मल्लक्रीडास्थानस्य द्वारमासाद्य आगत्य तस्मिन् द्वारे अम्बष्ठेन हस्तिपेन प्रचोदितं कुवलयापीडं नागं गजमवस्थितमपश्यत् ।। २ ।। ततश्च शौरिः कृष्णः परिकरं बद्ध्वा युद्धोचितं दृढं परिधानं कृत्वा कुटिलान् वक्रान् विकीर्णान् अलकान् समुह्य निबध्य मेघनादवद्गभीरया पूर्णाक्षरया वाचा हस्तिपमुवाचेत्यन्वयः ।३। तदुक्तिमेवाह—अम्बष्ठाम्बष्ठेति । अम्बष्ठाम्बष्ठेति द्विरुक्तिः क्रोधासूचनार्था, नौ आवयोर्मार्गं देहि, अपक्रम मार्गं परित्यज, मा चिरं विलम्बं मा कार्षीः । नो चेत् मार्गं न दास्यसि चेत् अद्यैव सकुञ्जरं त्वां यमस्य सादनं लोकं नयामि ।। ४ ।।

अन्वितार्थप्रकाशिका

त्रिचत्वारिंशके नागघातो रङ्गप्रवेशनम् । चाणूरभाषणं तत्र श्लोकाः सार्द्धाः खसिन्धवः (४०।।) ।।
उवाचद्वितयं (२) तत्र वह्निवेदा (४३) अनुष्टुभः ।। ४३ ।।

अथेति ।। अथ हे परन्तप ! कृतं शौचं दन्तधावनादि याभ्यां तौ । यद्वा । पूर्वेद्युरेव कृतं शौचं शुद्धत्वं निरपराधत्वं याभ्याम् । अयं भावः । धनुर्भङ्गादिना आवाभ्यां निजैश्वर्ये सूचितेऽपि पितरौ न मुञ्चति आवां च पुनर्जिघांसति अतोऽत्र मातुलस्याप्यस्य वधे नावयोर्दोष इति कृतलोकापवादपरिहारौ रामः कृष्णश्च तौ मल्लतालानां दुन्दुभीनां च निर्घोषं श्रुत्वा तदुत्सवं द्रष्टुमुपेयतुः आजग्मतुः । अत्र प्रातः पितरमपृष्ट्वैवालक्षितौ सवयस्यौ रामकृष्णौ उत्सवं द्रष्टुमागताविति ज्ञेयम् ।। १ ।।

रङ्गेति ॥ कृष्णो रङ्गस्य मल्लक्रीडास्थानस्य द्वारमासाद्य आगत्य तस्मिन् द्वारे अम्बष्ठेन हस्तिपेन प्रचोदितं कुवलयापीडं नागं गजमवस्थितमपश्यत् ॥ २ ॥ बद्ध्वेति ॥ शौरिः कृष्णः परिकरं बद्ध्वा युद्धोचितं दृढं परिधानं कृत्वा कुटिलान् वक्रान् विकीर्णान् अलकान् समुह्य निबध्य । समूह्येति दीर्घपाठश्चेदार्षः । मेघनादतुल्यगम्भीरया पूर्णाक्षरया वाचा हस्तिपमुवाच ॥ ३ ॥ अम्बष्ठेति हे अम्बष्ठ ! हे अम्बष्ठ ! द्विरुक्तिः क्रोधात् । नौ आवयोः मार्गं देहि अपक्रम अपक्राम मार्गं त्यज । दीर्घाभाव आर्षः । मा चिरं विलम्बं मा कार्षीः । नो चेत् मार्गं न दास्यसि चेत् अद्यैव सकुञ्जरं त्वां यमस्य सादनं सदनम् । स्वार्थेऽण् । नयामि नेष्यामि । वस्तुतः यमेन मनोरोधेन साद्यते प्राप्यते तं मोक्षं नयामि ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं त्रिचत्वारिंशेऽध्याये कुवलयापीडनागहननं रामकृष्णयोरंग प्रवेशनं चाणूरेण सहभाषणं च पुरराष्ट्राजनोक्तिश्च निगद्यते मल्लानां दुंदुभीनां च निर्घोषं ॥ १ ॥ रंगद्वारं मल्लरमण समागोपुरं अंबष्ठेन हस्तिरक्षकेन महामात्रेणेति यावत् प्रेरितं नागं गजं ॥ २ ॥ परिकरं बद्ध्वावस्त्रेण कटिमावध्येत्यर्थः समुह्य समूहतया बद्ध्वा ॥ ३ ॥ हे अंबष्ठ हे अंबष्ठ हे हस्तिपहे हस्तिप अपक्रामगजं दूरीकुरु सकुंजरं हस्तीसहितं यमस्य सादनं स्थानं ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विनिपात्य गजं रामकृष्णयो रङ्गवेशनम । त्रिचत्वारिंशके प्रोक्तं चाणूरेण च भाषणम् ॥ १ ॥

'ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितम्' इत्युक्तमथ परेद्युः किं वा तौ कर्तारावित्यत्राहाथेत्यादिना । अथेति । अथ, हे परंतप राजन्, परेद्युः प्रातरिति शेषः । रामश्च कृष्णश्च तौ, कृतं शौचं स्नानादिकर्म याभ्यां तौ तथाभूतौ सन्तौ, मल्लानां दुन्दुभीनां च निर्घोषस्तं श्रुत्वा, द्रष्टुं उपेयतुः । केचित्तु पूर्वेद्युरेव कृतं शौचं शुद्धत्वं निरपराधत्वं याभ्यां तौ, एतदुक्तं भवति । धनुर्भङ्गादिनावाभ्यां निजैश्वर्ये सूचितेऽपि पितरौ न मुञ्चति, आवां च पुनर्जिघांसति, अतोऽस्य मातुलस्यापि वधे नावयोर्दोष इत्येवं कृतापराधपरिहारौ तौ मल्लानां तालं दुन्दुभीनां निर्घोषं च श्रुत्वा द्रष्टुं जग्मतुरिति प्राहुः ॥ रङ्गेति । रङ्गस्य मल्लक्रीडास्थानस्य द्वारं तत्, समासाद्य तस्मिन् द्वारे अवस्थितं, अम्बष्ठेन हस्तिपेन प्रचोदितं, कुवलयापीडं कुवलयापीडाख्यं, नागं गजं कृष्णः, अपश्यत् ॥ २ ॥ बद्ध्वेति । शौरिः श्रीकृष्णः, परिकरं मल्लयुद्धोचितपरिधानं, बद्ध्वा कृत्वा, कुटिलालकान्, समुह्य निबद्ध्य मेघनादगभीरया वाचा, हस्तिपं महामात्रं उवाच ॥ ३ ॥ उक्तिमेवाह । अम्बष्ठेति । हे अम्बष्ठ, हे अम्बष्ठ नौ आवयोः, मार्गं, देहि । अपक्रम अपसर मार्गं परित्यज्य दूरे तिष्ठ । चिरं मा विलम्बं मा कार्षीः, नोचेन्मार्गं न दास्यसि चेत्, अद्य सकुञ्जरं हस्तिसहितं त्वा त्वां, यमसदनं यमलोकं, नयामि, प्रापयामि ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अथ कृष्ण इति : १०.४३.१.

आनीय व्रजतोऽपि मामिह समाहूताखिलोऽसौ खलो भूयो ह्यस्तनमस्मदीयचरितं श्रुत्वाऽद्य नाह्वास्यति ।
सापेक्षं च मयि स्थिते न भविता प्राक्चिन्तितोऽर्थो मनागित्यालोच्य स दुन्दुभिध्वनिमनाहूतोऽपि रङ्गं ययौ ॥ १ ॥
अनाहूतोऽध्वरं गच्छेदिति वा स्वयमुत्सवम् । द्रष्टुमभ्याययौ तत्र स्वेष्टदृष्टिरधोक्षजः ॥ २ ॥
त्यक्त्वा धर्मबलस्पृहां बहिरहङ्कारं च कृत्वा रिपूनप्यास्थाप्य सुशब्दघोषरुचिरे भूर्यन्तरङ्गे सुधीः ।
यः स्याज्ज्ञानशितासिकासितशयो घोषैकलक्ष्यः स्थितः पर्यङ्के भृश मुत्तमाङ्क इह स्वात्माऽपरोक्षोत्सुकः ॥ ३ ॥
तस्यावश्यतयाऽध्यक्षोऽस्म्यहं विशदयन्निति । कंसं तादृशमालोच्य योगीशस्तादृशोऽभ्यगात् ॥ ४ ॥

(युग्मम्)

रङ्गद्वारमिति : १०.४३.२.

एकोऽहङ्कार एवाम्यो ह्यन्तरङ्गे द्विषज्जुषि । द्वारपाल इति व्यक्तं तत्र तादृगिभेक्षणात् ॥ ५ ॥

बद्ध्वा परिकरमिति : १०.४३.३.

जितौ धर्माधर्मौ विषमविशिखश्चाद्भुतबला तथा नेयाऽहंता दृढपरिकरेण क्षयपदम् ।
इतीशो जिज्ञासूनलमुपदिशन्नेव करिणं स हन्तुं सङ्कल्पं कृतपरिकरः किंस्विदकरोत् ॥ ६ ॥
देहात्मवादक - तमोभृदहङ्कृतीनां पुंसां पराजयकृते भुवि साधुनं तु ।
तद्बन्धनं दृढमिति प्रभुणाऽन्वबोधि तन्मध्यबन्धनकृता परितः करेण ॥ ७ ॥
युद्धादन्यत्र करिणो वधः शूरविगर्हितः । युक्तं शौरिस्तदर्थं स पुरः परिकरं व्यधात् ॥ ८ ॥

क्षोणीक्षोदविचक्षणोऽरिनिवहो नेयः क्षयं मङ्क्षिवति साकाङ्क्षेक्षणमर्थितः सुरवरैर्ब्रह्मादिभिः प्रागहम् ।
तत्तेष्वेष महत्तमः कुवलयापीडेति नाम्ना विदच्छौरिरतद्धतये स किं परिकरं बद्ध्वाऽस्ततन्द्रोऽभवत् ॥ ९ ॥
निजत्राणप्रेम्णा कुटिलगति - शिक्षाव्रत-विधौ मयेतः सम्बद्धो दृढपरिकरो भूमिवलये ।
इतीव स्वं भावं विशदयितुमीशोऽतिकुशलः शयेन स्वेनाधात् कुटिलगतिकेशावकलनम् ॥ १० ॥
मद्रूपधारणकृतां मम कुञ्जराणां नैवास्तु सङ्गतिरिहाऽधमकुञ्जरेण ।
इत्याशयेन किमु केशचयान् स्वकीयानेकीचकार करपुष्करतो रमेशः ॥ ११ ॥
आहुः संसृतिमञ्जुरङ्गभवनं भूयोऽन्तरङ्गं ततोऽहङ्कारः पुर एव पुष्करबलोत्कर्षोऽतितर्षभ्रमः ।
तिष्ठत्युन्मदवारणेन्द्रवदसावल्पा निवार्योऽप्यलं नेयः संक्षयमीदृगित्यनुकृतिं चक्रे स्वविक्रान्तितः ॥ १२ ॥

अम्बष्ठाम्बष्ठेति : १०.४३.४.

अहं कुवलयापीडोऽयं गजोऽपीति तुल्यताम् । मानयन्नयविन् मान्यः साम्नोवाच किमच्युतः ॥ १३ ॥
सन्तं वाऽसन्तं वा न चोग्रवाचा वदेद्विना मन्तुम् । इत्यच्युतः स सत्पथदर्शी पूर्वं तथाऽवदद्युक्तम् ॥ १४ ॥
प्रायेणाऽस्मिन्नहङ्कारः सर्वत्रास्ति तथाप्यलम् । व्यक्तः सङ्करजातावित्यम्बष्ठ - पदतः स्फुटम् ॥ १५ ॥
नृशंसो नित्यमातङ्गाकलितावस्थितिश्च यः । तस्य दण्डस्तादृगेवेत्यूचे युक्तं तदा विभुः ॥ १६ ॥

कृष्णप्रिया

कुवलयापीड का उद्धार और अखाड़े में प्रवेश

श्रीशुकदेवजी कहते हैं—काम-क्रोधादि शत्रुओं को पराजित करने वाले परीक्षित् ! अब श्रीकृष्ण और बलराम भी स्नानादि नित्यकर्म से निवृत्त हो दंगल के अनुरूप नगाड़े की ध्वनि सुनकर रङ्गभूमि देखने के लिये चल पड़े ॥ १ ॥ भगवान् श्रीकृष्ण ने रंगभूमि के दरवाजे पर पहुँचकर देखा कि वहाँ महावती की प्रेरणा से कुवलयापीड नाम का हाथी खड़ा है ॥ २ ॥ तब भगवान् श्रीकृष्ण ने अपनी कमर कस ली और घुँघराली अलकें समेट लीं तथा मेघ के समान गम्भीर वाणी से महावत को ललकार कर कहा ॥ ३ ॥ 'महावत, ओ महावत ! हम दोनों को रास्ता दे दे । हमारे मार्ग से हट जा । अरे सुनता नहीं ? देर मत कर । नहीं तो मैं हाथी के साथ अभी तुझे यमराज के घर पहुँचाता हूँ' ॥ ४ ॥

एवं निर्भर्त्सितोऽम्बष्ठः कुपितः कोपितं[१] गजम् । चोदयामास कृष्णाय कालान्तकयमोपमम् ॥ ५ ॥
करीन्द्रस्तमभिद्रुत्य करेण तरसाग्रहीत् । कराद् विगलितः सोऽमुं निहत्याङ्घ्रिष्वलीयत ॥ ६ ॥
संक्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवम् । परामृशत् पुष्करेण स प्रसह्य विनिर्गतः ॥ ७ ॥
पुच्छे प्रगृह्यातिबलं धनुषः पञ्चविंशतिम् । विचकर्ष यथा नागं सुपर्ण इव लीलया ॥ ८ ॥

कर्दमक्षमा

अन्वयः—एवं निर्भर्षितः कुपितः अम्बष्ठः कोपितं गजं कालान्तकयमोपमं कृष्णाय चोदयामास ॥ ५ ॥ करीन्द्रः तरसा अभिद्रुत्यतं अग्रहीत् सः, अमुं निहत्य करात् विगलितः, अंघ्रिषु अलीयत ॥ ६ ॥ संक्रुद्धः घ्राण दृष्टिः सः केशवं पुष्करेण परामृशत् । सः प्रसह्य विनिर्गतः ॥ ७ ॥ अतिबलं तं पुच्छे प्रगृह्य नागं सुपर्ण इव धनुषः पञ्चविंशति लीलया यथा विचकर्ष ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अंतको मृत्युः कालस्तन्निमित्तं यमस्तन्नियंता तैरुपमा यस्य तम् ॥ ५ ॥ विगलितो विच्युतः मुष्टिना निहत्य चरणेष्वलीयतादृश्यो बभूव ॥ ६ ॥ अचक्षाणोऽपश्यन् । घ्राणमवघ्राणं तेन दृष्टिर्दर्शनं यस्य सः । लोचनागोचरमपि हि पशवो घ्राणेन जानंतीति प्रसिद्धम् । परामृशद् धृतवान् । पुष्करेण शुडाग्रेण । स कृष्णः । प्रसह्य बलेन ॥ ७ ॥ धनुषो धनुषां पञ्चविंशतिं हस्तशतं यावत्तावंतं देशं विचकर्ष आकृष्य नीतवान् । कं क इव विचकर्ष । यथा नागं सर्पवद्वर्तमानं गजं सुपर्ण इव स्वयमित्यर्थः। 'आविरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः' इतिवत् प्राचीदिगिव वर्तमानायां देवक्यां इन्दुरिव वर्तमानः कृष्णः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमित्थम् । निर्भर्त्सितो वाचा ताडितः । कृष्णाय कृष्णमुद्दिश्य । तन्निमित्तं मृत्युकारणम् । तन्नियन्ता मृत्युप्रेरकः। यद्वा—बलादाकर्षणो कालो मृत्युर्वा "कालो मृत्यौ यमे कृष्णे समये चालकेऽपि च" इति धरणिः । संहारेंतको रुद्र इव "रुद्रोन्तकः"

---

[१] कोपयन्—इति कस्यचित् ।

इति श्रुतेः। क्लेशजनने यम इव तम्। कृष्णाय कृष्णं ग्रहीतुम्। कालेनांतः आयुशेषो येषां तेषां मनुष्यादीनाम्। यो यमः प्रसिद्धस्तेनोपमा यस्य तम्। तेन कृष्णस्यासौ किमपि कर्तुं न प्रभविष्यतीति भीतं राजानं प्रत्याश्वासो ध्वनितः॥ ५॥ अभिद्रुत्य झटिति प्राप्य। तं कृष्णम्। करेण शुंडादण्डेन। "करो वर्षोपले रश्मौ पाणौ च बलिशुंडयोः" इति मेदिनी। अमुं गजम्। स कृष्णः। तं निर्भयत्वेनैव स्थितं कृष्णं करेण शुण्डेन मध्यदेशेऽग्रहीत्। ततश्च स कृष्णोऽमुं कुञ्जरं निहत्य वाममुष्ट्या शुंडे प्रहृत्य तत्प्रहारविवशाच्छुंडाद्विगलितः सन्नंघ्रिषु तस्य महास्थूलपदेष्वलीयतादृश्यो बभूव। अंघ्रिष्विति बहुवचनेनैवं व्याख्येयम्—प्रथममेकस्मिन्पादपृष्ठेऽलीयत तदा घ्राणदृष्टौ कुञ्जरे तत्रैव धर्तुमुद्यते सति अन्यस्मिन्पादेऽलीयत तत्रापि धर्तुमुद्यतेऽन्यस्मिन्नित्येवं सहासमुखांबुजो महाकौतुकी स कुञ्जरं बहुशो वंचयन्स्वखेलमिव महाद्भुतां लोकान्दर्शयामासेति भावः॥ ६॥ स गजः। तं कृष्णं "पुष्करं खेंबुपद्मयोः। तूर्यवक्त्रे खङ्गफले हस्तिहस्ताग्रकांडयोः। कुष्ठौषधे द्वीपतीर्थभेदयोर्दुर्लभेऽपि च।" इति बहवः। द्वितीयः स शब्दः कृष्णपरामर्शी। अचक्षाणोऽपश्यन्। पशुत्वात् घ्राणदृष्टिः गंधेनैव जानन्। पुष्करेण शुंडाग्रेण। परामृशत् तं जग्राहेति। स्वीयखेलांतरं लोकान्दर्शयिष्यन् कृष्णः स्वमेकवार तदुत्साहवर्धनार्थं ग्राहयामासेति भावः। ततश्च कुञ्जरे तस्मिन्कृतार्थमन्ये सति स कृष्णः प्रसह्य बलात्कारेणैव—किमरे बलं दर्शयसीत्युक्त्वा स्वं मोचयित्वा बाहिर्निर्गतोऽभूत्। तोषिण्यां तु—पुष्करेण श्लेषाच्छ्रीमदंगे कमलवत्कोमलतां गतेनेति ध्वन्यते॥ ७॥ पंचविंशतिधनुर्मितदेशं शतहस्तमित्यर्थः। 'धनुर्हस्तचतुष्टयम्' इति नाममाला। इतिवदिति—यथाविरासीद्यथेत्यत्र यथाशब्द इव शब्दश्चान्वितौ, प्राच्यां यथा प्राचीवद्वर्तमानायां देवक्यामिंदुरिव वर्त्तमानः स्वयं हरिराविरासीदिति तद्वदत्रापीति भावः। 'धनुर्हस्तचतुष्टयम्' इति कोशाच्छतहस्तप्रमाणं देशं व्याप्य। यथेति यथावदेव विचकर्ष। स कुञ्जरस्तदा किमपि धैर्यं कर्तुं न शशाकेति भावः॥ ८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्णाय कृष्णं ग्रहीतुम्॥ ५॥ अग्रहीत् धृतवानेव महाकौतुकितया तस्य सर्वसंभवात् एवमग्रेऽप्यूह्यम्। अत एव वक्ष्यते लीलयेति क्रीडयेति च। विशेषेण गलितो निष्क्रान्तः सन् विशब्देन वस्त्रमालादीनामपि निराकुलता बोध्यते। एवमग्रेऽपि अङ्घ्रिषु अलीयत पदचतुष्टयमध्यगः सन् तेनादृश्योऽभूत्॥ ६॥ पुष्करेणेति श्लेषात्तस्य श्रीमदङ्गे कमलवत् कोमलताङ्गतेनेति ध्वन्यते॥७॥ यथेति तैर्व्याख्यातम्। यद्वा यथा यथावत् विचकर्ष तन्मध्ये तेन क्वचिदपि स्थैर्यांशस्याप्यशक्यत्वात्॥ ८॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कोपितं श्रीभगवदुक्त्या, अम्बष्ठेनैव वा; तत्प्रकारज्ञेन कृष्णाय कालरूपेण सर्व्वाकर्षकायापि कालेत्यादिनात्यन्तमारकत्वमभिप्रेतम्,—एकदैव तत्तत्संयोगात्॥ ५॥ करीन्द्रो महाबलिष्ठत्वादिना हस्तिवर्गश्रेष्ठः, अभिद्रुत्य—अभिमुखं धावन् गत्वा तरसा वेगेनेत्यस्य यथायोग्यं सर्व्वत्रैवान्वयः। अग्रहीत् धृतवानेव, महाकौतुकितया तस्य सर्व्वसम्भवात्; एवमग्रेऽप्यूह्यम्। अतएव वक्ष्यते (८ म० श्लो०)—'लीलया' इति, (११ श० श्लो०) 'क्रीडया' इति च विशेषेण गलितो निष्क्रान्तः सन्, वि-शब्देन वस्त्रमालादिपरिच्छदानामपि निराकुलता बोध्यते, एवमग्रेऽपि, अमुं करं करीन्द्रं वा निहत्य श्रीहस्तनिधानमात्रतया तलेन प्रहृत्य अङ्घ्रिष्वलीयत चतुःपादमध्यगः सन्नदृश्योऽभूत्॥ ६॥ निहननादेन सम्यक् क्रुद्धः सन् केशवं केशिनिसूदनमिति संक्रुद्धत्वे हेत्वन्तरम्। पुष्करेणेति श्लेषेण तस्य श्रीमदंगे कमलवत् कोमलतां गतेनेति ध्वन्यते। विनिर्गतः—पुष्कराद्विशेषेण निश्चक्राम, यद्वा, विनिष्क्रान्तः सन् विचकर्षेति परेणान्वयः॥ ७॥ अतिबलं महाबलमपि पुच्छप्रग्रहणेन लीलया विकर्षणे दृष्टान्तः—यथेति। तैर्व्याख्यातमेव। यद्वा, यथा यथावद्विचकर्ष, मध्ये किञ्चित्स्थैर्य्यशक्त्यसद्भावात्॥ ८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

घ्राणदृष्टिः हस्ताग्रे दृष्टिर्यस्य स तथोक्तः॥ ७-१६॥

श्रीमद्वीरराधवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं निर्भत्सितो हस्तिपः क्रुद्धः कोपितं कोपं प्रापितमन्तको मृत्यु कालः तन्निमित्तं यमस्तु नियन्ता तैरुपमा यस्य तं गजं कृष्णाय चोदयामास कृष्णं प्रति द्रावयामासेत्यर्थः॥५॥ करीन्द्रस्तं कृष्णमभिद्रुत्य बलात्कारेणाग्रहीत्स कृष्णः कराद्विगलितः विच्युतः अमुं करीन्द्रं निहत्य मुष्टिना प्रताड्य तस्याङ्घ्रिषु चरणानां मध्येऽलीयत तस्माददृश्यो बभूवेत्यर्थः॥ ६॥ तं कृष्णमचक्षाणोऽपश्यन्नत एव संक्रुद्धः स करीन्द्रः घ्राणदृष्टिः हस्ताग्रे दृष्टिर्यस्य तथाभूतः सन् केशवं पुष्करेण तुण्डाग्रेण परामृशदन्वेषयामास स कृष्णः प्रसह्य बलात्कारेणाङ्घ्रिमध्याद्विनिर्गतः॥ ७॥ तमतिबलं पुच्छे प्रगृह्य धनुषः पञ्चविंशतिर्यावत्त देशं विचकर्षाकृष्टवान् यथा सुपर्णो गरुडः लीलया नागं सर्पं विकर्षति तद्वत्॥ ८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

बलादाकर्षणे "कालः मृत्युर्वा कालो मृत्यौ यमे चैवे"ति संहारेऽन्तको रुद्र इव रुद्रो माविशान्तक इति श्रुतिः क्लेशजनने यम इव स्थितः कालान्तकयमोपमः तम्॥ ५॥ करींद्रकराद्विगलितः विश्लथितः स कृष्णः अमुं करीन्द्रं निहत्य मुष्टिनाप-

हत्य करीन्द्रस्याङ्घ्रिषु पादेष्वलीयत निलीनोऽभूत् ॥ ६ ॥ अचक्षाणः अपश्यन् घ्राणदृष्टिर्यस्य स तथा गजो घ्राणेन पादमध्ये निलीनं केशवं ज्ञात्वा पुष्करेण शुण्डाग्रेण तं कृष्णं परामृशत् आकृष्टवान् स कृष्णः पुष्करग्रहणात् प्रसह्य सहसा विनिर्गतः ॥ ७ ॥ विनिर्गत्य किञ्चकारेति तत्राह । पुच्छ इति । पञ्चविंशति धनुः परिमितस्थलपर्यन्तं नागं सर्पम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृष्णाय कृष्णं ग्रहीतुं कालेन अन्तः आयुः शेषो येषां तेष मनुष्यादीनां यो यमः प्रसिद्धस्तेनोपमा यस्य तं तेन कृष्णस्यासौ किमपि कर्तुं न प्रभविष्यतीति भीतं राजानं प्रत्याश्वासा ध्वनितः ॥ ५ ॥ तं निर्भयत्वेनैव स्थितं कृष्णं करेण शुण्डेन मध्यदेशे अग्रहीत् ततश्च स कृष्णः अमुं कुञ्जरं निहत्य वाममुष्ट्या शुण्डे प्रहृत्य तत्प्रहारविवशात् शुण्डाद्विगलितः सन् अङ्घ्रिषु तस्य महास्थूलपादेषु अलीयत अतः अदृश्यो बभूव अत्र अङ्घ्रिष्विति बहुवचनेनैवं व्याख्येयं प्रथममेकस्मिन् पादपृष्टे अलीयत तदा घ्राणदृष्टौ कुञ्जरे तत्रैव धर्तुमुद्यते सति अन्यस्मिन् पादे अलीयत तत्रापि धर्तुमुद्यते अपरस्मिन्नित्येव सहासमुखाम्बुजो महाकौतुकी स कुञ्जरं बहुशो वञ्चयन् स्वखेलामेवाद्भुतां लोकान् दर्शयामासेति भावः ॥ ६ ॥ अचक्षाणोऽपश्यन् पशुत्वाद्घ्राणदृष्टिः गन्धेनैव जानन् पुष्करेण शुण्डाग्रेण परामृशत् तं जग्राहेति स्वीयखेलान्तरं लोकान् दर्शयिष्यन् कृष्णः स्वमेकवार तदुत्साहवर्धनार्थं ग्राहयामासेति भावः ततश्च कुञ्जरे तस्मिन् कृतार्थंमन्ये सति स कृष्णः प्रसह्य बलात्कारेणैव किमरे बलं दर्शयसीत्युक्त्वा स्वं मोचयित्वा बहिर्निर्गतोऽभूत् ॥ ७ ॥ धनुषः धनुषां पञ्चविंशतिं शतहस्तप्रमाणदेशं व्याप्य यथेति यथावदेव विचकार्ष कुञ्जरः स तदा यत् किञ्चिदपि स्थैर्य्यं धर्तुं न शशाकेति भावः ॥ ८ ॥

गूढार्थदीपिनी

अन्तको मृत्युः स च कालो निमित्तं यमो नियन्ता च द्वयोरधीनः अत एतत् त्रित्वमुक्तम् तैरुपमा यस्य तम् ॥ ५ ॥ करेण शुण्डादण्डेन । तरसा वेगेन । अलीयत तिरोहितोऽभूत ॥ ६ ॥ अचक्षाणः अपश्यन् । परामृशत् जग्राह ॥ ७ ॥ पञ्चविंशति शतहस्तपरिमितम् । धनुर्हस्तचतुष्टम् । यथा यथावत् नागं सर्पं सुपर्णः गरुड इव ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वयं कुपितः कोपितं कोपं प्रापितं मृत्युः प्राणवियोजको देवताविशेषः । कालस्तन्निमित्तभूतः यतो नियन्ता तैरुपमा यस्य सः तं कृष्णाय कृष्ण प्रति चोदयामास ॥५॥ त श्रीकृष्णम् करेण अग्रहीत् सः श्रीकृष्णः करात् विगलितः प्रच्युतः मुष्टिना निहत्य प्रताड्य अङ्घ्रिषु करचरणानां मध्ये अलीयत करिणोऽदृश्यो बभूव ॥ ६ ॥ स करीन्द्रः तं केशवम् अचक्षाणः लोचनेन अपश्यन् अपि घ्राणेन दृष्टिर्दर्शनं यस्य सः अवघ्राणेन प्रत्यक्षीकृत्य पुष्करेण शुण्डाग्रेण परामृशत् गृहीतवान् सः श्रीकृष्णः प्रसह्य बलात् विनिर्गतः ॥ ७ ॥ केशवः अतिबलं करीन्द्रं पुच्छे यथा यथावत् सुदृढमित्यर्थः प्रगृह्य धनुषः पञ्चविंशतिं धनुषाम्यञ्चविंशतिर्यावत् तावन्तं देशं लीलया विचकर्ष आकृष्य नीतवान् सुपर्णो गरुत्मान् नागं सर्पमिव ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं निर्भर्त्सितोऽम्बष्ठः कुपितं कोपितं कालान्तकयमोपमं कालेन कल्प्तेनान्तकेन रुद्रेण । सोऽन्तकः स रुद्र इत्यादेः । यमेन चोपमा यस्य कालान्तको यो यमस्तेनोपमा यस्य स कृष्णाय चोदयामास प्रेरयामास ॥५॥ करेण शुण्डया कराद्विगलितः स कृष्णोऽमुं निहत्याङ्घ्रिष्वलीयत लीनोऽभूत् ॥ ८ ॥ सङ् क्रुद्धो घ्राणेन पूर्वमवघ्राणनेनान्तरं पदार्थस्य दृष्टिर्दर्शनं यस्य त तथा तं केशवमचक्षाणोऽपश्यन्पुष्करेण स्वकरेण । अष्टमे गतं । परामृशत्पस्पर्श । स कृष्णः प्रसह्य बलान्निर्गतो बहिः ॥ ७ ॥ अतिबलं तं गजं पुच्छे प्रगृह्य धनुष पञ्चविंसति पञ्चविंशति यावत्तावन्तं देशं यथा सम्यग्विचकर्ष सुपर्णो गरुडो लीलया नागं सर्पमिव ॥८॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो यज्जातं तदाह । एवं निर्भर्त्सित इति । एवमित्यसह्यं निर्भर्त्सनं नितरां भर्त्सितः अम्बष्ठो हीनः अत एव हितवाक्येऽपि कुपितः हस्ती पूर्वमेव तेन कोपितः कृतोऽस्ति अतस्तत्कर्मनिपुणः मूर्खः कृष्णाय सदानन्दाय कालाय वा प्रेरयामास ननूपद्रवार्थं प्रेरणम् उपद्रवो हि कालो निमित्तमन्यथा साधनानि विपरीतानि भवेयुः अन्तको मृत्युः स चेत् कुतश्चित् जायेत ततोऽनिष्टं भवेत् अधिकारी यमो वा यद्याज्ञां दद्यात् एवमङ्ग श्रुतिपुराणशास्त्रभेदेन तेष्वसंगतेषु प्रयोजनाभावात् किं प्रेरणयेत्याशङ्क्याह । कालान्तकयमोपममिति । त्रितयप्रतिरूपोऽयं यत्रैतदभावः तत्र तेषामपेक्षा न त्वस्मिन् विद्यमाने ॥ ५ ॥ यद्यम्बष्ठप्रेरितः हस्ती विशेषतो नापकुर्यात् तदा न मारयेदिति तस्य विशेषापकारमाह । करीन्द्रस्तममिन्द्रुत्येति । ननु भगवत्समीपागमने देवैः कथं न निरुद्ध इत्याशङ्क्याह । इन्द्र इति । क्रियाशक्तिप्रधानः करी क्रियायामधिपतिश्चेन्द्रः अतो निष्प्रत्यूहं त भगवन्तमभिप्रत्य तरसा शीघ्रमेव करेण शुण्डादण्डेन भगवन्तमग्रहीत् । क्रिययापि भगवान् व्याप्तो भविष्यतीति,बुद्ध्या तथा कृतवान् भगवांस्तु भक्तवश्य इति कराद्विगलितो जात इत्याह । विशेषेण गलितः करो हि धर्तुमेवाशक्तो जातः स्थूलवद्बुध्या धृतः सूक्ष्मो जातः यतः स प्रसिद्धः सर्वशक्तिः ततः अमुं हस्तिनं निहत्य तस्याज्ञानार्थं अङ्घ्रिष्वलीयत तस्यैव पादचतुष्टमध्ये गुप्तो जातः अनेन दैवाद्विमोकः पलायनं

च व्यावर्तितं तस्यान्तर्दृष्टयर्थं च जिज्ञासायामेव प्राप्यत इति ज्ञापनार्थम् ॥ ६ ॥ ततो यज्जातं तदाह । संक्रुद्ध इति । ताडनेन सुतरां क्रुद्धः दृष्ट्वा हि प्रयत्न कर्तव्य इति दर्शनार्थं यतमानोऽपि नापश्यदित्याह । तमचक्षाण इति । भगवन्तमपश्यन् पशुत्वात् घ्राणदृष्टिर्जातः घ्राणेन हि ते जानन्ति । यतः स प्रसिद्धः युद्धादौ समर्थः केशवं परामृशत् स हि ब्रह्मादीनां सुखार्थमवतीर्ण इति तेनापि धृतो जातः तत्रापि पुष्करेण पुष्करं हस्तमुखं तदा भगवान् स्थूलो भूत्वा प्रसह्य बलात् पुष्कराद्विनिर्गतो जातः नहि पुष्करनाभः पुष्करेण ग्रहीतुं शक्यः ॥ ७ ॥ ततो भगवान् विशेषाकारेण कोपमुत्पादयितुं पश्चाद्गत्वा पुच्छं गृहीतवानित्याह । पुच्छे प्रगृह्येति । प्रकर्षेण हस्तद्वयेन गृहीत्वा धनुषो मानेन चतुर्हस्तेन पञ्चविंशतिसंख्या यावता भवति तावद्दूरं विचकर्ष धनुषः पञ्चविंशतिर्यत्रेत्यलुक् समासः ननु गजो महान् सूक्ष्मश्च भगवान् कथमाकर्षणं कृतवान् इत्याह । यथा नागमिति । सुपर्णो हि महान्तमपि नागमाकर्षति भक्ष्यो हि निःसत्त्वः कर्तव्यः अन्यथा भक्षणे प्रतिबन्धको भवेत् । तथा भगवानपि मारणार्थं तस्य बलनाशं करोति पञ्चविंशतितत्त्वानि तस्मिन् सन्ति तेषामनुरोधात् धनुश्च रक्षकमिति तेन मिता भूमिः तदर्थमाकृष्टा । तावता मार्गो भवति शतहस्तं तु करिणमिति तावद्दूरे गते मार्गस्थानां नापकाराय भवतीति धनुर्हस्तचतुष्टयम् । एतदपि लीलया अनेन तस्य स्वबलमपि ज्ञापितवान् ॥ ८ ॥

श्रीसुबोधिनी–सारः

एवं निर्भर्त्सितः तिरस्कृतोंबष्ठः कुपितः कोपितं कालमृत्युयमैरुपमा यस्य तं गजं हस्तिनं कृष्णाय कृष्णं हंतुं प्रेरयामास ॥ ५ ॥ करींद्रो गजराजोभिद्रुत्य करेण शुंडया तं कृष्णमग्रहीत् तरसा वेगेन स कृष्णः करात् शुंडाया विगलितो निःसृतो अमुं हस्तिनं निहत्य मुष्टिनांघ्रिषु पादेषु अलीयतादृश्योऽभूत् ॥ ६ ॥ तं कृष्णमचक्षाणोऽपश्यन् संक्रुद्धो घ्राणमवघ्राणं तेन दृष्टिर्दर्शनं यस्य स गजः पुष्करेण शुंडामुखेन केशवं परामृशत् धृतवान् स कृष्णः प्रसह्य बलेन च निःसृतः ॥ ७ ॥ पुच्छे प्रगृह्य धनुषो धनुषां संबंधि पंचविंशति यावत् अतिबलं नागं विचकर्ष यथा यथावत् सुपर्णो गरुडो लीलया नागं सर्पमिव ॥ ८ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

एवं निर्भर्सितः, अतएव पुपितोऽम्बष्ठः अङ्कुशादिना कोपितमतः अन्तको मृत्युः, कालस्तन्निमित्तं, यमस्तु मृत्युनियन्ता, तैरुपमा यस्य तमतिभयंकरं गजं कृष्णाय कृष्णं हन्तुं चोदयामास ॥ ५ ॥ करीन्द्रो हस्ती तरसा वेगेनाभिद्रुत्य सम्मुखमागत्य शुण्डया तं कृष्णमग्रहीत् । 'तदा' स कृष्णोऽपि तस्य करात् शुण्डाग्रतो विगलितो विच्युतः सन्नमुं हस्तिनं निहत्य तस्याङ्घ्रिषु चरणानां मध्ये अलीयत अदृश्यो बभूवेत्यर्थः ॥ ६ ॥ ततश्च सङ्कुद्धः स गजस्तं केशवं श्रीकृष्णमचक्षाणः अपश्यन् पुष्करेण शुण्डाग्रेण परामृशन् अन्वेषणं कृत्वा तं धृतवानित्यर्थः । पुष्करेणान्वेषणे हेतुमाह— घ्राणदृष्टिरिति । घ्राणमवघ्राणम् , तेन दृष्टिर्दर्शनं यस्य सः । पशवो हि लोचनागोचरमपि घ्राणेन जानन्तीति प्रसिद्धम् । स च कृष्णः प्रसह्य बलात्पुनस्तद्ग्रहणाद्विनिर्गतः ॥ ७ ॥ ततश्च तमतिबलं गजं पुच्छे प्रगृह्य यावद्धनुषः धनुषां पञ्चविंशतिस्तावन्तं देशं लीलया अनायासेनैव विचकर्ष, धनुषः प्रमाणं हि हस्तचतुष्टयम , तेन हस्तशतपर्यन्तं विचकर्ष आकृष्य नीतवानित्यर्थः । ननु 'स च महान् , भगवांश्च सूक्ष्मः, अतः कथं तेन तस्याकर्षणं सम्भवति ? किं वा तत्प्रयोजनम् ?' इत्यपेक्षायां दृष्टान्तमाह—नागं सर्पमिव वर्तमानं गजं सुपर्णः गरुडश्च स्वयं कृष्ण इति । यथा स्वभक्ष्यं सर्पं गृहीत्वा तं मारयितुं तद्बलविनाशाय विकर्षेत्तथा तद्बलविनाशाय भगवांस्तं विकर्षितवानित्यर्थः ॥ ८ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ एवं निर्भर्त्सितोऽत एव कुपितोम्बष्ठोऽङ्कुशादिना कोपितमतः अन्तको मृत्युः कालस्तन्निमित्त यमस्तु मृत्युनियन्ता तैरुपमा यस्य । यद्वा । कालेन अन्त आयुः शेषो येषां तेषां मनुष्यादीनां यो यमः प्रसिद्धः तेनोपमा यस्य तमतिभयङ्करं गजं कृष्णाय कृष्णं हन्तुं चोदयामास । यद्वा । कालेन अन्तो नाशो येषां तेषां मनुष्यादीनामुपमा यस्य तम् । एतेन कृष्णे तत्पराक्रमप्राप्त्यभावः सूचितः ॥ ५ ॥ करीन्द्र इति ॥ करीन्द्रो हस्ती तरसा वेगेनाभिद्रुत्य सम्मुखमागत्य तं कृष्णमग्रहीत् तदा । स कृष्णोऽपि अमुं हस्तिनं मुष्टिना निहत्य मुष्टिप्रहारशिथिलात् तस्य करात् शुण्डाग्रतो विगलितो विच्युतः सन् तस्य गजस्य अङ्घ्रिषु चरणानां मध्ये अलीयत अदृश्यो बभूवेत्यर्थः । अङ्घ्रिष्विति बहुवचनेन एकस्मिन् पादे प्राक् कृष्णोऽलीयत । तत्र गजे ग्रहीतुमुद्यते द्वितीयपादेऽलीयतेत्याद्यपि सूचितम् ॥ ६ ॥ संक्रुद्ध इति ॥ संक्रुद्धः घ्राणदृष्टिरिति घ्राणमवघ्राण तेन दृष्टिर्दर्शनं यस्य स पशवो हि लोचनागोचरमपि घ्राणेन जानन्तीति प्रसिद्धम् । स गजः तं केशवं श्रीकृष्णमचक्षाणः अपश्यन् पुष्करेण शुण्डाग्रेण परामृशत् अन्वेषण कृत्वा तं धृतवान् इत्यर्थः । स च कृष्णः प्रसह्य बलात्पुनस्तद्ग्रहणाद्विनिर्गतः ॥ ७ ॥ पुच्छे इति ॥ तमतिबलं गजं पुच्छे प्रगृह्य नागं सर्पं सुपर्ण इव यावद्धनुषः धनुषां पञ्चविंशतिस्तावन्तं देशं लीलया अनायासेनैव यथा यथावत् अविच्छेदेन विचकर्ष । धनुषः प्रमाणं हि हस्तचतुष्टयं तेन हस्तशतपर्यन्तं आकृष्य नीतवान् । स्वामिपादास्तु यथा नागं सर्पवद्वर्त्तमानं गजं सुपर्ण इव स्वयमिति इत्याहुः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कालो मृत्युसमयः अंतको मृत्युः यमस्तन्नियामकः तैरुपमायस्य तं निर्भर्त्सितस्तरस्कृतः कृष्णाय कृष्णं ग्रहीतुं ॥ ५ ॥ तं श्रीकृष्णं करेण शुडया विगलितो निष्क्रांतः अमुं गजं मुष्टिनानिहत्य पादेषु अलीयत अदृश्योऽभूत् ॥६॥ अचक्षाणः अनीरीक्षमाणः घ्राणं आघ्राणं तेन दृष्टिर्दर्शनं यस्य सः नेत्रागोचरमपि घ्राणेन गवादि पशवो विदंति गावः प्रश्यतिगंधे नेत्युक्तेः पुष्कारेण कराग्रेण परामृशत् गृहीतवान् प्रसह्य हठात् ॥ ७ ॥ अतिबलं गजं धनुषो धनुषां पंचविंशतिं तत्प्रमाणदेशं यथा नागं क्रुद्धसर्ववद्वर्त्तमानं हस्तिनं सुपर्णो गरुड इव ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति । एवमित्थं, निर्भर्त्सितः कृष्णेन भर्त्सनां गमितः, अत एव कुपितः, अम्बष्ठो हस्तिपः, कोपितं कोपं प्रापितं, कालो मृत्योर्निमित्तं च अन्तको मृत्युश्च यमस्तन्नियन्ता च तैरुपमा यस्य तं गजं, कृष्णाय कृष्णं हन्तुं, कृष्णं प्रति वा, चोदयामास प्रद्रावयामासेत्यर्थः ॥ ५ ॥ करीन्द्र इति । करीन्द्रः कुवलयापीडो गजः, तं कृष्णं, अभिद्रुत्य करेण तरसा बलात्कारेण, अग्रहीत् । सः कृष्णः, कराद्धस्तिहस्तात्, विगलितः विच्युतः सन्, अमुं करीन्द्रं, निहत्य मुष्टिना प्रताडय्य, अङ्घ्रिषु तच्चरणानां मध्ये, अलीयत तददृश्यो बभूवेत्यर्थः ॥ ६ ॥ संक्रुद्ध इति । तं कृष्णं, अचक्षाणः अपश्यन्, अत एव संक्रुद्धः स करीन्द्रः घ्राणेन अवघ्राणेन दृष्टिर्ज्ञानं यस्य तथाभूतः सन्, केशवं श्रीकृष्णं, पुष्करेण तुण्डाग्रेण, परामृशदन्वेषयामास । स कृष्णः, प्रसह्य बलात्कारेण, विनिर्गतः अङ्घ्रिमध्यान्निर्गतः ॥ ७ ॥ पुच्छ इति । अतिबलमतिबलवन्तं गजं, पुच्छे प्रगृह्य, धनुषः पञ्चविंशतिं, यावत् शतहस्तमितप्रदेशपर्यन्तमित्यर्थः । 'चतुर्हस्तं धनुः प्रोक्तं द्विहस्त इषुरुच्यते' इति वाक्याच्चतुर्हस्तमितस्य धनुरिति संज्ञाश्रवणात् । सुपर्णो गरुडः, लीलया नागं सर्पं इव तद्वत्, यथा यथार्थमेव, विचकर्ष आकृष्टवान् ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं निर्भर्त्सित इति : १०.४३.५.

आसत्यलोक-पददायिनि वासुदेवे साक्षात्सुमार्गमभियाचति धीरवाचा ।
नादादपश्यदपि न स्वहितं तदस्य बीजं स्फुटं यदतिमन्दगतेः प्रसङ्गः ॥ १७ ॥
हरिरसावहमस्मि करिश्रितस्तदिह मद्बलमस्य पुरः कियत् । अनवलोकनमेतदहङ्कृतिस्थितिफलं कलिपुंस्यपि तत्स्फुटम् ॥ १८ ॥
नीचः स्वभावतस्तत्र मदाऽहङ्कार-सम्भृतः । क्रोधान्धकारसंपृक्तोऽप्यकार्यं तस्य किं भवेत् ॥ १९ ॥

करीन्द्र इति : १०.४३.६.

अत्यल्पपुष्पमिह भक्तसमर्पितं चेन् मौलौ वहामि बृहदप्यसताऽर्पितं चेत् ।
दूरं क्षिपेयमिति बोधयितुं तदाप्तं सत्पुष्करं तदिभमाक्षिपदच्युतः किम् ॥ २० ॥
कर्तृत्वेनाकर्षति येन हि भवपथग-नरमहङ्कारः । यस्तद्गलितः सोऽमुं निहत्य बुद्धिस्थितिं याति ॥ २१ ॥

संक्रुद्ध इति : १०.४३.७.

यातो न केवलमिहाफलतां प्रयत्नः किं त्वं ततोऽपकृतिकार्यपि भूरि तस्मात् ।
नेषत् तथाप्युपरतिस्त्वधिकाभ्यसूया जातेत्यभूत् स्फुटमहङ्कृतिशालि चिह्नम् ॥ २२ ॥
स्वल्पदृष्टिरहङ्कारः परोक्षाङ्घ्रिस्थितं प्रभुम् । यतते गोचरीकर्तुं युक्तं पुष्करदर्शनः ॥ २३ ॥

पुच्छे प्रगृह्येति : १०.४३.८.

कृत्स्नतत्त्वैरनास्पृष्टं पुच्छं यत्तत्र मत्स्थितिः । श्रुतिगम्या घ्राणदृश्या नेत्यधाच्चरितात् स्फुटम् ॥ २४ ॥
चतुर्विंशतितत्त्वेभ्यो बहिरेनं करोम्यहम् । अधुनैवेति कंसावगत्यै तादृक् चकर्ष तम् ॥ २५ ॥
अगोद्धरणशीलेन कृष्टो नागः सलीलया । सुपर्णेनेव कृष्णेन युक्तेयमुपमा ततः ॥ २६ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण ने महावत को जब इस प्रकार धमकाया, तब वह क्रोध से तिलमिला उठा और उसने काल मृत्यु तथा यमराज के समान अत्यन्त भयंकर कुवलयापीड़ को अंकुश की मार से क्रुद्ध करके श्रीकृष्ण की ओर बढ़ाया ॥ ५ ॥ कुवलयापीड़ ने भगवान् की ओर झपटकर उन्हें बड़ी तेजी से सूँड़ में लपेट लिया; परन्तु भगवान् सूँड़ से बाहर सरक आये और उसे एक घूँसा जमाकर उसके पैरों के बीच में जा छिपे ॥ ६ ॥ उन्हें अपने सामने न देखकर कुवलयापीड़ को बड़ा क्रोध हुआ । उसने सूँघकर भगवान् को अपनी सूँढ़ से टटोल लिया और पकड़ा भी; परन्तु उन्होंने बलपूर्वक अपने को उससे छुड़ा लिया ॥ ७ ॥ इसके बाद भगवान् उस बलवान् हाथी को पूँछ पकड़कर खेल-खेल में ही उसे सौ हाथ तक पीछे घसीट लाये; जैसे गरुड़ साँप को घसीट लाते हैं ॥ ८ ॥

स पर्यावर्तमानेन सव्यदक्षिणतोऽच्युतः । बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः ॥ ९ ॥
ततोऽभिमुखमभ्येत्य पाणिनाऽऽहत्य वारणम् । प्राद्रवन् पातयामास स्पृश्यमानः पदे पदे ॥१० ॥
स धावन् क्रीडया भूमौ [1]पतित्वा सहसोत्थितः । तं मत्वा पतितं क्रुद्धो दन्ताभ्यां सोऽहनद्भुवम् ॥११ ॥
स्वविक्रमे प्रतिहते कुञ्जरेन्द्रोऽत्यमर्षणः[2] । चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद् रुषा ॥१२ ॥

कर्दमक्षमा

अन्वयः—सः अच्युतः सव्य दक्षिणतः पर्यावर्तमानेन भ्राम्यमाणेन गोवत्सेन बालक इव बभ्राम ॥ ९ ॥ ततः, अभिमुख्यमपेत्य पाणिना वारणम् आहत्य पदे पदे स्पृश्यमानः प्रा द्रवन् तं पातयामास ॥ १० ॥ सः भगवान् धावन् क्रीडया भूमौ पतित्वा सहसा उत्थित स गजः तं पतितं मत्वा क्रुद्धसन् दन्ताभ्यां क्षितिम् अहनत् ॥ ११ ॥ स्व विक्रमे प्रतिहते कुञ्जरेन्द्रः, अत्यमर्षितः महामात्रैः चोद्यमानः रूषा कृष्णम् , अभयद्रवत् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स पर्यावर्तमानेनेति । पुच्छग्राहिणं श्रीकृष्णं ग्रहीतुं यदि दक्षिणतः परिवर्तते गजस्तर्हि सव्यतो भ्रामयति तं कृष्णः । यदा सव्यतः परिवर्तते गजः तदा दक्षिणतो भ्रामयन् भ्राम्यमाणेन तेन सह स बभ्राम । गोवत्सेन भ्राम्यमाणेन बालकः स एव कृष्णो यथान्यो वा बालक इवेति ॥ ९ ॥ वारणं गजं प्राद्रवन्प्रकर्षेणासमंततो धावन्पातयामास । यथा पतति तथा तं वंचयन्प्राद्रवदित्यर्थः ॥ १० ॥ किं च स धावन्निति । अहनदहन् ॥ ११–१४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सोऽच्युतः । तेन गजेन । अन्यः प्राकृतः । ततश्च कुंजरस्य किञ्चिदुत्साहप्रापणार्थमाकर्षणवेगं भगवान् किञ्चिच्छिथिलीचक्रे इत्याह—स अच्युतः कदाचिदपि तदा तत्पुच्छग्रहणाच्च्युतिराहित्याभिप्रायेण । यद्वा—द्रुतगतिविशेषेण सव्ये दक्षिणे चालातचक्रवद्वर्तमानत्वात् ॥ ९ ॥ ततो भ्रामणोत्तरम् । "वारणं प्रतिषेधे स्याद्वारणस्तु मतंगजे" इति मेदिनी । तं गजम् । इत्यर्थ इति - अतिस्थूलशरीरवत इतस्ततो भ्रमणे स्वयमेव पतनं भवेदिति भावः । अथान्यां खेलां दर्शयन्पुच्छं तत्याजेत्याह—तत इति । पाणिनाऽऽहत्येषदेव प्रहृत्य, यथावत्प्रहारे सद्य एव मरणात्प्रारभ्य माणखेला न निष्पद्यत इति भावः । प्राद्रवन्सन्निति प्रकर्षेण द्रवन् आ ईषदेव भ्रमँस्तदुत्साहवर्धनार्थं स्वस्य प्रद्रवणं दर्शयामास तम् । वस्तुतस्तु स्वस्य तदीषदेव द्रवणमित्यर्थः । अत एव पदेपदे तेन स्पृश्यमानः स स्तं पातयामास इति तं पातयितुमेव स्वयं मुहुर्मुहुर्द्रवणासमर्थ इव स्खलति स्मेत्यर्थः ॥ १० ॥ अन्यं वंचनाविधिं चकारेत्याह—किञ्चेति । स कृष्णः । क्रीडया लीलया । सहसा झटित्येव । तं कृष्णम् । स गजः । ततश्च कठोरशिलामय्यां भूमौ तमत्याघातं पातयितुं स्वस्य पतनमेव तं दर्शयामास, न तु लाघवोत्थानमित्याह—स इति । तं पतितं मत्वा तमेव हंतुमुद्यतोऽपि क्षितिमेवाहन् । जानुभ्यां पतित्वा चखानेत्यर्थः । तस्य दंतक्षेपकाल एवातिसूक्ष्मेण रूपेण कृष्णस्योत्थायान्यत्र गमनात् , अत एव 'अतर्कितेतिसहसा' इत्यभिधानात्सहसोत्थित इति प्रयुक्तम् ॥ ११ ॥ महामात्रैर्हस्तिपाधिपैः "महामात्रः समृद्धे चामाने हस्तिपकाधिपे" इति मेदिनी । अभ्यद्रवत्संमुखमाजगाम । स्वत एवात्यमर्षितः संजातपरमामर्षः, पुनश्च महामात्रैः प्रेर्यमाणो रुषा तद्वैशिष्ट्य नाभ्यद्रवत् ॥ १२ ॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणो

अच्युत इति । कदाचिदपि तदा तत्पुच्छग्रहणाच्युतिराहित्याभिप्रायेण । यद्वा द्रुतगतिविशेषेण सव्ये दक्षिणे चालातचक्रवद्वर्त्तमानत्वात् ॥ ९ ॥ ततो भ्रामणलीलानन्तरम् आगत्य ईषत् प्रहृत्य अन्यथा सद्य एव मरणात् व्यथादावपि तदनुधावनाशक्तः वारणेन स्पृश्यमानः अन्यथा निरुत्साहतया तस्य वैमुख्यसम्भवात् कौतुकविशेषासम्पत्तेश्च ॥ १० ॥ स इति तैर्व्याख्यातं तत्र किञ्चेति । पूर्वोक्तपातने युक्तिश्चेत्यर्थः । मूले सहसेति अतिद्रुतमुत्थानेनामुना तदतर्कणात् । अत एव क्षितिमहनत् जानुभ्यां पतित्वा चखानेत्यर्थः तथा च श्रीहरिवंशे । पपात भूमिं जानुभ्यां दर्शनाभ्यां तुतोद चेति ॥ ११ ॥ स्वत एवात्यमर्षितः संजातपरमामर्षः पुनश्च महामात्रैः प्रेर्यमाणो रुषा तद्वैशिष्ट्य नाभ्यद्रवत् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणो

अच्युत इति कदाचिदपि तदा तत्पुच्छग्रहणाच्च्युतिराहित्याभिप्रायेण । यद्वा, द्रुतगतिविशेयेण सव्ये दक्षिणे चालातचक्रवद्वर्त्तमानत्वात् ॥ ९ ॥ ततो भ्रामणलीलानन्तरम् , आहत्य—ईषत् प्रहृत्य, अन्यथा सद्य एव मरणात् , वारणेन तेन स्पृश्य-

---

१. पतितः-प्रा. पा. २. क्षितिज–श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

मानः, अन्यथा निरुत्साहतया तस्य वैमुख्यसम्भवात्, कौतुकविशेषासम्पत्तेश्च ॥ १० ॥ सहसेति– अतिद्रुतमुत्थानेनामुना तदतर्कणात्, अतएव क्षितिमहनत् चखान; तथा च श्रीहरिवंशे (विष्णु० प० २९।३२)—'पपात भूमिं जानुभ्यां दशनाभ्यां तुतोद च' इति ॥ ११ ॥ प्रतिहते व्यर्थे; यद्वा, प्रतिक्षणं श्रीभगवता चातुर्य्या नाशिते सति स्वभावादेवात्यमर्षितः परमासहनः पुनश्च महामात्रैः प्रेर्य्यमाणः सन् रुषाभाद्रवत्। बहुत्वं तत्पादादि-रक्षिणां तदानीं सर्व्वेषामेव समवेतत्वेन बाहुल्यात्, कृष्णमिति वेगेन तदाकर्षणाभिप्रायेण ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स इति स भगवान् पुच्छग्राहिणमात्मानं ग्रहीतुं यदि गजः दक्षिणतः परिवर्तते तर्हि सव्यतो भ्रामयन् यदापसव्यं परिवर्त्तते तदा दक्षिणतो भ्रामयन् एवं पर्याववर्त्तमानेन करिणा सह स्वयं बभ्राम यथा बालो भ्राम्यमाणेन गोवत्सेन सह भ्राम्यति तद्वत् अत्र बालकः श्रीकृष्ण एव बाल्यदशावस्थो दृष्टान्ततया विवक्षितः ॥ ९ ॥ ततो वारणं गजमभिमुखमपेत्य पाणिना आहत्य प्राद्रवन् धावन्पदे पदे वारणेन स्पृश्यमानः पातयामास स यथा पतन्निव तथा तं वञ्चयन्प्राद्रवदित्यर्थः ॥ १० ॥ यदा च गजः पतति तदा स भगवानपि क्रीडया धावन् भूमौ पतति पतितं दृष्ट्वा स यदाभिधावति तदा भगवानुत्थितो धावति गजस्तु पतितं स्थितमेव मत्वा क्रुद्धः केवलं दन्ताभ्यां क्षितिमाहन्तीति ॥ ११ ॥ एवं स्वस्य गजस्य विक्रमे प्रतिहते क्षीयमाणे सति कुञ्जरेन्द्रः केवलमत्यन्तक्रोधमात्रयुक्तः हस्तिपैर्वलाच्चोद्यमानः प्रेर्यमाणः कृष्णं रुषाभ्यद्रवदभ्यधावत् ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सोऽच्युतः सव्यदक्षिणतो बभ्राम पुच्छङ्गृहीत्वेति शेषः परित आवर्तमानेन पुनः पुनः सव्यतो दक्षिणतश्च भ्रमता गजेन गृह्यत इति कथमिव बालको भ्राम्यमाणेन गोपुच्छेन गृहीतेन भ्रमति यथा तथेति ॥ ९ ॥ ततः किमनया लीलयेति मत्वा पुच्छं मुक्त्वा करीन्द्रस्याभिमुखं गत्वा पाणिना वारणम् आहत्य प्राद्रवदित्यन्वयः ततः किमभूदिति तत्राह । यापयामासेति प्राद्रवन्कृष्णः करीन्द्रं यापयामास स्वपृष्ठत आगमयायास गजोऽपि तमन्वाद्रवदित्यर्थः ॥ १०–१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च कुञ्जरस्य किञ्चिदुत्साहप्रापणार्थमाकर्षणवेगं भगवान् किञ्चित् शिथिलीचक्रे इत्याह । स अच्युतः पर्य्यावर्त्तमानेन कुञ्जरेण सह सव्यदक्षिणतो बभ्रामेति किंचिदुत्साहं प्राप्य पुच्छग्राहिणं कृष्णं ग्रहीतुं यदि दक्षिणतः परिवर्त्तते कुञ्जरस्तदा तं सव्यतो भ्रामयन् स्वयं भ्रमति यदि च सव्यतस्तदा दक्षिणत इत्येवं स बभ्राम भ्राम्यमाणेन गोवत्सेन सह बलवान् बालक इवेति ॥ ९ ॥ अथान्यां खेलां दर्शयन् पुच्छं तत्याजेत्याह । तत इति । पाणिना आहत्य ईषदेव प्रहृत्य यथावत्प्रहारे सद्योमरणात् प्रारभ्यमाणखेला न निष्पद्येत इति भावः । प्राद्रवन् सन्निति प्रकर्षेण द्रवन्नपि आ ईषदेव द्रवन तदुत्साहवर्द्धनार्थं स्वस्य प्रद्रवणं दर्शयामास तं वस्तुतस्तु स्वस्य तदीषदेव द्रवणमित्यर्थः । अत एव पदे पदे तेन स्पृश्यमानः सन् तं पातयामासेति तं पातयितुमेव स्वयं मुहुर्मुहुर्द्रवणासमर्थ इव स्खलतिस्मेत्यर्थः ॥ १० ॥ ततश्च कठोरतरशिलामय्यां भूमौ तमत्याघातं प्रापयितुं स्वस्य पतनमेव तं दर्शयामास न तु लाघवादुत्थानमित्याह । स इति । तं पतितं मत्वा तमेव हन्तुमुद्यतोऽपि क्षितिमेवाहन् जानुभ्यां पतित्वा चखानेत्यर्थः । तस्य दन्तक्षेपकाले एवाति सूक्ष्मे कृष्णस्योत्थायान्यत्र गमनात् अत एव अतर्कितेति सहसेत्यभिधानात् सहसोत्थित इति प्रयुक्तम् ॥ ११–१२ ॥

गूढार्थदीपिनी

पुच्छग्राहिणं श्रीकृष्णं ग्रहीतुं वामदक्षिणतः परिवर्तमानेन तेन सह अच्युतः बभ्रामेत्यन्वयः ॥ ९ ॥ ततः पुच्छं त्यक्त्वा प्रकर्षेण आसमन्तात् द्रवन् धावन् अत एव तेन स्पृश्यमानः कृष्णः पदे पदे तं पातयामास ॥ १० ॥ स कृष्णः स गजः ॥ ११ ॥ अभ्यद्रवत् अधावत् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

लीलया विचकर्षेत्युक्तं तां लीलां दर्शयति । सः अच्युतः श्रीकृष्णः पुच्छग्राहिणमात्मानं ग्रहीतुं यदि दक्षिणतः परिवर्तते गजस्तर्हि सव्यतो यदि सव्यतः परिवर्तते तदा दक्षिणतश्च भ्रामयन् इत्थं सव्यदक्षिणतः पर्यावर्तमानेन भ्राम्यमाणेन गजेन्द्रेण सह बभ्राम भ्राम्यमाणेन गोवत्सेन बालक इव ॥ ९ ॥ ततस्तदनन्तरं स अच्युतः पुच्छं हित्वा अभिमुखमभ्येत्य वारणं गजं पाणिना आहत्य वारणेन पदे पदे स्पृश्यमानः प्राद्रवन् पातयामास कष्टेन समं ततो धावनेन मोहयित्वा पातयामासेत्यर्थः ॥ १० ॥ किञ्च सः श्रीकृष्णः तमुत्थितं दृष्ट्वा धावन् पुनः प्राद्रवन् क्रीडया भूमौ पतित्वा सहसोत्थितः यदा तदा तं श्रीकृष्ण पतितं मत्वा सः क्षितिमहनत् अहन् ॥ ११–१४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सव्यदक्षिणतः पार्श्वद्वयेन पर्यावर्तमानेन सह भ्राम्यमाणेन गोवत्सेन बालक इव बभ्राम ॥ ९ ॥ ततोऽभिमुखं करिमुखं करिपुरोभागमभ्येत्य वारिणं पारिणं पाणिनाऽऽहत्य प्राद्रवदुद्राव । पदे पदे स्पृश्यमान इति धरिष्यामीत इममित्याशां जनयिष्यंस्तं पृष्ठतो यापयामास गमयामास ॥ १० ॥ स कृष्णो धावन्क्रीडयापतित्वा सहमोत्थितस्तं कृष्णं पतितं मत्वा क्रुद्धो गजो दन्ताभ्यां क्षितिमहनदहन् । अस्मन्नाशायेशं सम्प्रार्थ्यानीतवती त्वमस्मन्मूलपुरुषोद्धृतापीत्यनीतिसतीति क्षितिक्षतिमकृतकरीत्युत्प्रेक्षयन्ति प्रेक्षावन्तः ॥ ११ ॥ कुञ्जरेन्द्रः स्वविक्रमे प्रतिहते नष्टे सति स्वयमत्यमर्षितोऽत्यसहिष्णुः सन्माहामात्रैरम्बष्ठश्रेष्ठैश्चोद्यमानो रुषा कृष्णमभ्यद्रवत् ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः स मोचयितुं समर्थः स्थिरीभवितुं च परावृत्या भगवान् धर्त्तव्य इति यत्नं कृतवानित्याह । स पर्यावर्तमानेनेति । सव्यदक्षिणतः वामेन दक्षिणेन च भागेन परिवर्तमानेन कृत्वा स प्रसिद्धो येनाकृष्टः भयाभावायाह । अच्युत इति । श्रोतुः शङ्कानिवृत्त्यर्थं सर्वत्रैव तथोक्तवान् । स्वयमपि भगवान् बभ्राम । स हि भगवदर्थं प्रयत्नं करोतीति । किं च भगवतैव स भ्राम्यमाणो जातः । अतो भ्रामयन् स्वयं बभ्राम । ननु भगवान् सर्वसमर्थः किमिति बभ्राम तत्राह । गोपुच्छेनेव बालक इति । बालको हि लीलया परिभ्रमति तथा लीलाप्रदर्शनार्थं तथा कृतवान् ॥ ९ ॥ लीलार्थमेव तथा करणमिति पश्चाल्लीलां त्यक्त्वा प्रौढलीलाप्रदर्शनार्थं सम्मुखमागत्य युद्धं कृतवानित्याह । तत इति । ततः पुच्छं विसृज्य अभिमुखमभ्येत्य हस्तिसम्मुखे गत्वा सजातीयबालकसम्मुखमिव पौरुषख्यापनार्थं पाणिना मुखे आहत्य प्राद्रवत् स हि हस्ती वारणः सर्वानेव निवारयितुं शक्नोति तादृशोऽप्यप्रयोजको जात इति वक्तुं तथोक्तवान् किं च तथैव प्राद्रवत् यथा पदे स्पृश्यमानो भवति । तथा भवनस्य प्रयोजनमाह । पातयामासेति । सूक्ष्मो भगवान् महानुच्चैः स्पृष्ट्वा धर्तव्य इति नीचो भवन् पतति एवमनुलोमप्रतिलोमाभ्यां क्रीडां कृतवान् ॥ १० ॥ ततो वञ्चनेन दैत्यांशः स इति सोऽपि प्रकारो ज्ञायत इति ज्ञापयितुं लीलां कृतवानित्याह । स धावन्निति । क्रीडया धावन् अनवहित इव भूमौ पतितः पतनपर्यन्तमेव स दृष्टवान् । भगवांस्तु पतित्वा सहसैवोत्थितः ततस्तस्य भ्रमकार्यमाह । तं मत्वेति । भगवन्तं तथा मत्वा पूर्वमपकृतः क्रुद्धः सन् भुवं दन्ताभ्यां पतितस्थानमहनत् ततोऽतिव्यथां प्राप्तवान् साधनत्रयमपि तस्यैवं पराहतं जातम् ॥ ११ ॥ ततः क्रुद्धो यत्कृतवांस्तदाह । स्वविक्रम इति । स हि साधनबले क्षीणे सम्पूर्णेनव शरीरेण तदुपरि पतिष्यामीति बुद्धया प्रवृत्तः यतः कुञ्जरेन्द्रः स्वरूपतो महान् अतः साधने क्षीणेऽपि न निवृत्तः किं तु साधनक्षयः रोप एव हेतुर्जात इत्याह । अत्यमर्षण इति । अधिकं मर्षणं क्रोधो यस्य तादृशो जातः तत्रापि महामात्रैः उपरि पृष्ठतः परितश्च चोद्यमानः कृष्णं सर्वमारकं सुतरां साम्प्रतं दैत्यपक्षस्य शुद्धभावेन चेद्गच्छेत् कृतार्थो वा भवेत् किं तु रुषा अभ्यद्रवत् ॥ १२ ॥

श्रीसुबोधिनी-सारः

सव्यदक्षिणतो वामतो दक्षिणतश्च कृष्णग्रहणाय पर्यावर्त्तमानेन परिभ्रममाणेन हस्तिना सोऽच्युतः कृष्णोपि बभ्राम गोवत्सेन भ्राम्यमाणेन बालकः पंचहायन इव ॥ ९ ॥ ततोऽनंतरमभिमुखं सम्मुखमभ्येत्य आगत्य वारणं गजं पाणिनाऽऽहत्य हस्तेन ताडयित्वा स्वयं प्राद्रवन् सन् पदेपदे प्रतिपदं स्पृश्यमानः पातयामास ॥ १० ॥ किं च स कृष्णो धावन् भूमौ पृथिव्यां क्रीडया खेलया पतित्वा सहसोत्थितोऽभूत् तं पतितं मत्वा स हस्ती क्रुद्धो दंताभ्यां क्षितिं कुम् अहनत् अहन् ॥ ११ ॥ स्वस्य विक्रमे पराक्रमे प्रतिहते सति कुंजरेंद्रो गजराज अत्यमर्षितोऽतिरुष्टो महामात्रैरंबष्ठैः चोद्यमानो रुषा कृष्ण मभ्यपतत् ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सः अच्युतः अक्षीणबलपराक्रमः श्रीकृष्णः पुच्छग्राहिणमात्मानं ग्रहीतुं यदि स गजः दक्षिणतः परिवर्तते तर्हि तं सव्यतो भ्रामयति, यदा च सव्यतः परिवर्तते तदा तं बलाद्दक्षिणतो भ्रामयति, एवं पर्यावर्तमानेन करिणा सह बभ्राम । 'एव भ्रमणे च तस्याभ्यामोऽप्यस्ति' इत्यनायासत्वं द्योतयन् दृष्टांतमाह—बालो यथा गृहीतपुच्छेन भ्राम्यमाणगोवत्सेन सह भ्राम्यति तद्वदिति ॥ ९ ॥ ततश्च तौ बाललीलां त्यक्त्वा प्रौढलीलाप्रदर्शनार्थं पुच्छं त्यक्त्वा अभिमुखमभ्येत्य समागत्य स्वपाणिना वारणं गजमाहत्य तेन पदे पदे स्पृश्यमानः स यथा पतेत्तथा प्रकर्षेण आ सर्वतो वञ्चयन् द्रवन् धावंस्तं पातयामासेत्यन्वयः ॥ १० ॥ पुनश्च स भगवान् धावन् क्रीडयैव तं गजं वञ्चनार्थमेव भूमौ पतित्वा सहसा झटिति तदलक्षित एवोत्थितः उत्थायान्यत्र स्थितः, स च गजः तं कृष्णं पतितं मत्वा क्रुद्धः सन् दन्ताभ्यां क्षितिमहनत् अहन् । यदैव तद्धननाय प्रवृत्तस्तदैव झटिति तत उत्थायान्यत्र गमनात्तद्दन्तसम्बन्धो भूमावेव जातस्ततोपि तस्यैव दन्तव्यथा जाता, न काचिद्भगवतः क्षतिरिति ज्ञेयम् ॥ ११ ॥ एवं पर्यावर्तनादिना स्वविक्रमे पराक्रमे प्रतिहते क्षीयमाणे सति कुञ्जरेन्द्रोऽत्यमर्षितः कृष्णपराक्रममसहमानः महामात्रैः हस्तिपैश्च चोद्यमानः रुषा क्रोधेन कृष्णं हन्तुमभ्यद्रवत् वेगेनसन्मुखमधावत् ॥ १२ ॥

अन्वितार्थप्रकाशिका

स इति ।। स अच्युतः सव्यदक्षिणतः पर्यावर्तमानेन परिवर्त्तमानेन करिणा सह बभ्राम । अयं भावः । पुच्छग्राहिणमात्मानं ग्रहीतुं यदि स गजः दक्षिणतः परिवर्तते तर्हि तं सव्यतो भ्रमयति । यदा च सव्यतः परिवर्तते तदा तं बलाद्दक्षिणतो भ्रमयति । मितोऽपि ह्रस्वाभाव आर्षः । तत्र दृष्टान्तः बलवान् बालो यथा गृहीतपुच्छेन भ्राम्यमाणेन गोवत्सेन सह भ्राम्यति तद्वदिति ।। ९ ।। तत इति ।। ततः पुच्छं त्यक्त्वा अभिमुखमभ्येत्य समागत्य स्वपाणिना वारणं तमाहत्य ईषदेव सन्ताड्य तेन पदे पदे स्पृश्यमानः स यथा पतेत्तथा वञ्चयन् प्रकर्षेण आ सर्वतो द्रवन् धावंस्तं गजं पातयामास । गजपातनार्थमेव धावनेन वञ्चनम् ।। १० ।। स इति ।। स भगवान् धावन् क्रीडयैव गजवञ्चनार्थमेव भूमौ पतित्वा सहसा झटिति तदलक्षित एवोत्थितः उत्थायान्यत्र स्थितः स गजः तं कृष्णं पतितं मत्वा क्रुद्धः सन् दन्ताभ्यां क्षितिमहनत् अहन् । शब्लुगभाव आर्षः । कृष्णः पतनं दर्शयित्वैवापक्रान्तः तमेवोद्दिश्य प्रहरतो गजस्य तमप्राप्यातिवेगवैवश्यात् कृष्णपतनस्थलशिलायामेव दन्तौ पतितौ तेनापि गजस्यैव व्यथाऽभूत् ।। ११ ।। स्वेति ।। एवं स्वविक्रमे प्रतिहते क्षीयमाणे सति कुञ्जरेन्द्रोत्यमर्षितः कृष्णपराक्रममसहमानः महामात्रैः हस्तिपैश्च चोद्यमानः रुषा क्रोधेन कृष्णं हन्तुमभ्यद्रवत् वेगेन सम्मुखमधावत् ।। १२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सोच्युतः सव्यदक्षिणतः पर्यावर्त्तमानेन गजेन सह बभ्राम क इव बालको भ्राम्यमाणेन गोवत्सेनेव तद्वत् पुच्छ ग्राहिणं तं कृष्णं गृहीतुं मदागजो दक्षिणतः परिवर्त्तते तद सव्यतो भ्रामयति यदा च सव्यतस्तु परिवर्त्तते तदा स दक्षिणतो भ्रामयंस्तेन सह बभ्राम गोवत्सेन बाल इवेत्यर्थः ।। ९ ।। वारणं गजं आहत्य प्राद्रवत् प्रकर्षेणा समं ततो धावत् पातयामास सहस्ती आपतति यथा तथा तं वंचयित्वा प्राद्रवन्नित्यर्थः ।। १० ।। कथं तं पातयामास तत्राह स इति क्षितिं अहनन् अहत् ।। ११ ।। स्वस्य विक्रमे पराक्रमे महामात्रैर्गजनियामकैः ।। १२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति । अच्युतः स कृष्णः, तत्पुच्छग्राहिणमात्मानं ग्रहीतुं, सव्यदक्षिणतः, पर्यावर्त्तमानेन करिणा सह, भ्राम्यमाणेन गोवत्सेन, बालकः इव, बभ्राम । अयं भावः । कृष्णः, पुच्छग्राहिणं स्वं गजः यदि दक्षिणतः परिवर्त्तेत तर्हि सव्यतः भ्रामयन् यदा अपसव्यः परिवर्त्तते तदा दक्षिणतः भ्रामयन् सन्, करिणा सह स्वयं बभ्रामेति । अत्र बालकः श्रीकृष्ण एव बालदशावस्थो दृष्टान्ततया विवक्षितोऽन्यो वा ।। ९ ।। तत इति । ततः वारणं गजं, अभिमुखं अपेत्य, पाणिना आहत्य, प्राद्रवत् धावन्, पदे पदे, स्पृश्यमानः सन्, वारणेनेति शेषः । पातयामास । स यथा पतति, तथा तं वञ्चयन् सन् प्राद्रवदित्यर्थः ।।१०।। स इति । धावन् स कृष्णः, क्रीडया भूमौ पतित्वा, सहसा उत्थितः भवति, क्रुद्धोऽतीव कोपं प्राप्तः, स गजस्तु, तं कृष्णं तत्र पतितं मत्वा, दन्ताभ्यां, क्षितिं अहनत् । अयं भावः । यदा च गजः कृष्णं पतितं मत्वा दन्ताभ्यां हन्तुं पतति तदा भगवांस्तत उत्थाय क्रीडया धावन् ततः किंचिद्दूरप्रदेशे पतति पुनः पतितं दृष्ट्वा स यदा अभिधावति तदा भगवानुत्थितो धावति गजस्तु पतितं सत्यं मत्वा क्रुद्धः केवलं दन्ताभ्यां क्षितिमाहन्तीत्येवं तद्बलक्षीणतां चकारेति ।। ११ ।। स्वविक्रम इति एवं स्वविक्रमे प्रतिहते सति, अत्यमर्षितः कुञ्जरेन्द्रः, महामात्रैः चोद्यमानः सन्, रुषा कृष्णं अभ्यपतदभ्यद्रवत् ।। १२ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततोऽभिमुखमिति : १०.४३.१०.

अहमक्षररूपेणा - ऽहङ्काराभिमुखस्थितिम् । कृत्वा तत्क्षोभकर्ता स्यां तत्स्पृष्टः स्यां यथा पदे ।। २७ ।।
तुल्यमेवायुधं द्वन्द्वयुद्धे शस्तमिति प्रभुः । अताडयत्तमुन्मत्तं श्रीशो हस्तेन हस्तिनम् ।। २८ ।।

स धावन्निति : १०.४३.११.

दर्शयित्वा स्वनिम्नत्वाभासं मङ्क्षु जिगीषुणा । जय्योऽरिरुत्थितेनेति नीतिदृक् स तथा व्यधात् ।। २९ ।।
एतद् दुष्टपदाघातदुखं मा गणय क्षमे । अलं त्वां सुखिनीं कुर्यामिति तत्कृतितोऽध्वनि ।। ३० ।।
ज्ञात्राऽपि बालपञ्चचेष्टाजुषा तत्त्वपरीप्सया । वर्तितव्यं क्वचिन्मूर्खच्छन्देनापीति बोधितम् ।। ३१ ।।

दन्ताभ्यां सोऽहनदिति : १०.४३.१२.

द्विजैकसाध्यो भगवान् जानन्नित्यग्रगद्विजः । तद्द्वारैव तमाप्तुं स व्यधाद् दन्तपुरस्कृतिम् ।। ३२ ।।

कृष्णप्रिया

जिस प्रकार घूमते हुए बछड़े के साथ बालक घूमता है अथवा स्वयं भगवान् श्रीकृष्ण जिस प्रकार बछड़ों से खेलते थे वैसे ही वे उसकी पूँछ पकड़कर उसे घुमाने और खेलने लगे । जब वह दायें से घूमकर उनको पकड़ना चाहता, तब वे बायें आ जाते और जब वह बायें की ओर घूमता, तब वे दायें घूम जाते ।। ९ ।। इसके बाद हाथी के सामने आकर उन्होंने उसे

एक घूँसा जमाया और वे उसे गिराने के लिये इस प्रकार उसके सामने से भागने लगे, मानो वह अब छू लेता है, तब छू लेता है ॥ १० ॥ भगवान् श्रीकृष्णने दौड़ते-दौड़ते एक बार खेल-खेल में ही पृथ्वी पर गिरने का अभिनय किया और झट वहाँ से उठकर भाग खड़े हुए। उस समय वह हाथी क्रोध से जल-भुन रहा था। उसने समझा कि वे गिर पड़े और बड़े जोर से अपने दोनों दाँत धरती पर मारे ॥ ११ ॥ जब कुवलयापीड़ का यह आक्रमण व्यर्थ हो गया, तब वह और भी चिढ़ गया। महावतों की प्रेरणा से वह क्रुद्ध होकर भगवान् श्रीकृष्ण पर टूट पड़ा ॥ १२ ॥

तमापतन्तमासाद्य भगवान् मधुसूदनः। [1]निगृह्य पाणिना हस्तं पातयामास भूतले ॥ १३ ॥
[2]पतितं तं पदाऽऽक्रम्य मृगेन्द्र इव लीलया। दन्तमुत्पाट्य [3]तेनेव [4]हस्तिपांश्चाहनद्धरिः ॥ १४ ॥
मृतकं द्विपमुत्सृज्य दन्तपाणिः[5] समाविशत्[6]।
[7]अंसन्यस्तविषाणोऽसृङ्मदबिन्दुभिरङ्कितः[8]। विरूढस्वेदकणिकावदनाम्बुरुहो बभौ ॥ १५ ॥
वृतौ गोपैः कतिपयैर्बलदेवजनार्दनौ। रङ्गं विविशतू राजन् गजदन्तवरायुधौ ॥ १६ ॥

कवमक्षम।

अन्वयः—स मधुसूदनः भगवान् तं आपतन्तम् आसाद्य हस्तं पाणिना निगृह्य भूतले पातयामास ॥ १३ ॥ हरिः पदाक्रम्य मृगेन्द्रः इव पतितस्य लीलया दन्तम् उत्पाट्य तेन इभं हस्तिपं च अहनत् ॥ १४ ॥ हरिः मृतकं द्विपम् उत्सृज्य दन्तपाणिः अंशन्यस्त विषाणः सृङ्मदबिन्दुभिः अंकितः सन् रंगं समाविशत् ॥ १५ ॥ हे राजन्! गजदन्त वरायुधौ कतिपयैर्गोपैः वृतौ बलदेवजनार्दनौ रंगं विविशतू ॥ १६ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

रंगं समाविशत्तदा वीरश्रिया बभौ। कथंभूतः। अंसे न्यस्तं विषाणं गजदंतो येन सः। असृजो रक्तस्य मदस्य च बिंदुभिः परितोऽकितः ॥ विरूढा उद्गताः स्वेदकणिकास्ताभिरुपलक्षितं वदनांबुरुहं यस्य सः ॥ १५ ॥ न केवलं स एकः समाविशत्किं तु वृतौ गोपैरिति। १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं गजम्। हस्तं शुंडादण्डम् "हस्तः करे करिकरे सप्रकोष्ठकरेऽपि च" इति मेदिनी ॥ ततश्चकालाधिक्यमालक्ष्य तेन सह खेलां समापयामासेत्याह—तमिति। स्वयं भगवानप्यंशेन च तादृशमधोः सूदनोऽपि श्रीमन्नराकारोचितमल्ललीलारसानुसारेणैव पाणिना एकेनैवावहेलया वामेनैवेत्यर्थः। हस्तं शुडां प्रगृह्येत्यर्थः ॥ १३ ॥ पतितस्य दंतमुद्धृत्य। तेन दंतेन। इभं गजम् ॥ पतितं सन्तं तं श्रीचरणेन शिर आक्रम्य। पाठान्तरे पतितस्य स्वतस्तस्य दंतमुत्पाट्य। हरिरिति सिंहवत्तत्प्राणहरणाद्धस्तिहनेन सिंहरूपत्वाच्च ॥ १४ ॥ तदा रंगप्रवेशावसरे। अंसे स्कंधे। 'अंसो भुजशिरोव्याध्यो इति धरणिः। "विषाणी क्षीरकाकोल्यामजशृंग्याञ्च योषिति। कुष्ठनामौषधे क्लीबं त्रिषु शृंगेभदंतयोः ॥" इति मेदिनी। "असृक् स्याद्योगभेदे ना रक्तेऽपि स्यान्नपुंसकम्" इति च ॥ मृतकमित्यर्धकम्। दंतयुक्तवामपाणिः। द्वितीयदन्तोऽस्य श्रीबलदेवेनोत्पाट्य गृहीत इति ज्ञेयम्। 'गजदन्तवरायुधौ' (१६) इति वक्ष्यमाणत्वात्। सम्यक् मत्तगजेन्द्रगत्या शोभा विशेषेण च, आ ईषद्द्वारान्तः प्राविशत् प्रविवेश। शोभाविशेषमाह—अंसो वामस्कंधः। अङ्कितः विचित्रैरिव भूषितः। विशेषेण विचित्रतया वा रूढाः प्रादुर्भूताः, रुहेः प्रादुर्भावार्थकत्वात्, सच्चिदानंदविग्रहे विकारासंभवात्। अंतर्भूतानंततादृशविलासधर्माणां लीलानुरूप्येण केवलाविर्भावतिरोभावसंप्रतिपत्तेश्च। अंबुरुहरूपेण तस्यापि जलबिन्दुभिर्यथा शोभा स्यात्तथेति ध्वन्यते। मूर्तया वीररसश्रियैव बभौ ॥१५॥ कतिपयैरल्पसंख्यैः ॥ प्रवेशे पूर्वतो विशेषविवक्षयोक्तशेषन्यायेनाह—वृत्ताविति। कतिपयैरिति—वृद्धाना श्रीव्रजेन्द्रेण सह गमनात्। सवयसामप्यत्यासन्नानामेव श्रीगोकुलतः संगमनात्। बलदेव इति अनुजस्नेहेन दुष्टवधार्थं बलविशेषप्रकटनात्। जनार्दन इति—जनैर्निजभक्तैः श्रीनारदादिभिरर्द्यते कंसवधार्थं याच्यते यः स तथा। राजन्निति हर्षेण संबोधयति। गजस्य दंतावेव तन्मारणसाधनतया कंसादौ भयदत्वेनांसे गृहीततया च वरे आयुधे ययोः। यद्वा—गजदंत श्रेष्ठावायुधे ययोस्तौ ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वयं भगवानप्यंशेन च तादृशमधोः सूदनोऽपि श्रीमन्नराकारोचितमल्ललीलारसानुरूप्येणैव पाणिना हस्तं शुण्डां प्रगृह्येत्यर्थः ॥ १३ ॥ पतितं सन्तं तं श्रीचरणेन शिर आक्रम्य पाठान्तरे पतितस्य स्वतः तस्य दन्तमुत्पाट्य हरिरिति सिंहवत्तत्प्राण-

---

१. प्र–वीर. विज.। २. पतितस्य–श्रीधर. वंशी. जीव. वीर. विज. विश्व.। ३. तेनेभ–श्रीधर. वंशी. जीव. विश्व.; तेनेव–वीर. विज.। ४. हस्तिपान–वीर. विज.। ५. पाणी–विज.। ६. विरेजतुः–विज.। ७. विषाणासृ–विज.। ८. रङ्कितौ–विज.।

हरणात् हस्तिहननेन सिंहरूपत्वाच्च ।। १४ ।। मृतकमित्यर्द्धकं दन्तयुक्तवामपाणिः । द्वितीयदन्तोऽस्य श्रीबलदेवेनोत्पाट्य गृहीत इति ज्ञेयं गजदन्तवरायुधाविति वक्ष्यमाणत्वात् । सम्यक् मत्तगजेन्द्रगत्या शोभाविशेषेण च आ ईषद्द्वारान्तः आविशत् प्रविवेश शोभाविशेषमाह । अंसो वामस्कन्धः अङ्कितः विचित्रैरिव भूषितः विशेषेण विचित्रतया वा रूढाः प्रादुर्भूताः । रुहेः प्रादुर्भावार्थत्वात् सच्चिदानन्दविग्रहे विकारासम्भवात् अन्तर्भूतानन्तताद‍ृशविलासधर्माणां लीलानुरूप्येण केवलाविर्भावतिरोभावसम्प्रतिपत्तेश्च । अम्बुरुहरूपकेण तस्यापि जलविन्दुभिर्यथा शोभा स्यात्तथा इति ध्वन्यते ।। १५ ।। प्रवेशे पूर्वतो विशेषविवक्षयोक्तपोषन्यायेनाह । वृताविति । कतिपयैरिति । वृद्धानां श्रीव्रजेन्द्रेण सह गमनात् सवयसामप्यत्यासन्नानामेव श्रीगोकुलतः सङ्गमनात् बलदेव इत्यनुजस्नेहेन दुष्टवधार्थं तदानीं बलविशेषप्रकटनात् । जनार्द्दन इति जनैर्निजभक्तैः श्रीनारदादिभिरर्द्द्यते कंसवधार्थं याच्यते यः स तथा राजन्निति हर्षेण सम्बोधयति गजस्य दन्तावेव तन्मारणसाधनतया कंसादौ भयदत्वेनांसगृहीततया च वरे आयुधे ययोः यद्वा गजदन्तश्रेष्ठौ आयुधे ययोस्तौ ।। १६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

'मधुः' आदिदैत्यस्तत्सूदन इति महाबलिष्ठत्वादिकं सूचितम् । अतो निजेच्छयैतद्गजपातनादिकं कियतस्य कर्म्मेति भावः । तथाप्यत्र माधुरीविशेषेण परमाद्भुततया वर्ण्यते इत्याशयेनाह—भगवान् चारुयुद्धलीलाविशेषेण निजभगवताविशेषप्रकटक इति । तदेवाह– प्रगृह्येति । यद्वा, मधुसूदनस्तत्रापि भगवान् , अतएव श्रीहस्तेन तस्य शुण्डां नितरां गृहीत्वा निग्रहतया धृत्वा वा तं पातयामासेति मधुमहादैत्यतोऽप्यस्य महत्त्वं सूचितम् ।। १३ ।। पतितं सन्तं श्रीचरणेन शिरस्याक्रम्य; पाठान्तरे पतितस्य स्वतस्तस्य दन्तमुत्पाट्य । हरिरिति तत्प्राणहरणात् , हस्तिहनेन सिंहरूपत्वाच्च दन्तयुक्तवामपाणिः, द्वितीयदन्तोऽस्य श्रीबलदेवेनोत्पाट्य गृहीत इति ज्ञेयम् । (१६ श० श्लो०) 'गजदन्तवरायुधौ' इति वक्ष्यमाणत्वात् सम्यक् मत्तगजेन्द्रगत्या शोभाविशेषेण च 'आ' ईषत् , द्वारान्त आविशत् प्रविशेश ।। १४ ।। शोभाविशेषमेवाह– अंसेति । अंसो वामस्कन्धः, अंकितश्चित्रैरिव भूषितो विशेषेण विचित्रतया वा रूढ़ाः प्रादुर्भूता इति स्वेदकणिकानामपि श्रीमुखभूषणतया केवलमाविर्भाव-तिरोभावमात्रत्वेनानन्दरूपत्वं बोधयति । अम्बुरुहरूपकेण कमलस्यापि जलसम्पर्काल्लग्नैर्जलबिन्दुभिर्यथा शोभा स्यात्तथेति ध्वन्यते ।। १५।। प्रवेशे पूर्व्वतो विशेषविवक्षयोक्तपोषण्यायेनाह—वृताविति । कतिपयैरिति श्रीनन्दादिवृद्धवर्ग्गव्यतिरिक्तत्वेनासाकल्यात् । यद्वा, दुष्टगजयुद्धे श्रीकृष्णस्य श्रमादिकं स्नेहभरेण द्रष्टुमशक्यतां विविधशंकां प्राप्स्यतां च केषाञ्चित् सखीनां श्रीभगवतैवाग्रे श्रीनन्दादिसंगत्या रंगे प्रस्थापनात् रंगस्थलं प्राविशताम् । बलदेव इत्यनुजस्नेहेन दुष्टवधार्थं तदानीं बलविशेषप्रकटनात् । जनार्द्दन इति—जनान् दुष्टदैत्यादीनर्द्दयति हन्तीति कर्त्तव्यकंसादिवधाभिप्रायेण; यद्वा, जनं जननं नाशयतीति तन्मोक्षदानाभिप्रायेण; यद्वा, जनैर्निजसेवकैः श्रीनारदादिभिरर्द्यते कंसवधाद्यर्थं याच्यत इति श्रीबलदेवस्यादावुक्तिः, ज्येष्ठक्रमेण प्रवेशात् स्नेहेनाग्रे गमनाद्वा । राजन्निति दुष्टवधपूर्व्वक-शोभाविशेषेण रंगमध्ये श्रीभगवतः प्रवेशश्रवणादन्तः सन्तोषेण विद्योतमानं श्रीपरीक्षितं दृष्ट्वा स्वयमपि प्रहर्षेण सम्बोधयति—गजस्य दन्तावेव वरे असाधारणत्वाच्छ्रेष्ठे आयुधे, शस्त्रवदंसे ग्रहणात् । यद्वा, तद्गजस्य श्रेष्ठत्वेन तद्दन्तावपि सर्व्वगजदन्तश्रेष्ठौ आयुधे ययोस्तौ ।। १६ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा भगवानापतन्तं गजमासाद्य स्वपाणिना हस्तं तस्य शुण्डं प्रगृह्य भूतले पातयामास ।। १३ ।। पतितं गजेन्द्रं यदा पादेनाक्रम्यावष्टभ्य सिंह इव दन्तमुत्पाट्य तेनैव दन्तेनव हस्तिपानहनत् ।। १४ ।। मृतं गजमुत्सृज्य दन्तः पाणौ यस्य तथाभूतः ततोंऽसे न्यस्तः निहितो विषाणो गजदन्तो येन सः असृजः रुधिरस्य मदोदकस्य च विन्दुभिरङ्कितः विरूढा उद्गताः स्वेदकणिका यस्मिस्तद्वदनाम्बुरुहं यस्य तथाभूतो बभौ ।। १५ ।। रामकृष्णौ कतिपयैर्गोपैः परिवृतौ गजदन्तौ एव वरे श्रेष्ठे आयुधे ययोस्तौ हे राजन् ! रङ्गं मल्लक्रीडास्थनं विविशतुः ।। १६ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तेन दन्तेन हस्तिपान् महामात्रान् । १४ ।। द्विपं गजं विषाणोपरक्तेन असृजा रुधिरेण मदजलविन्युभिश्च विरूढा विस्तृता स्वेदजलकणिका यस्मिंस्तद्विरूढस्वेदकांणकताद‍ृशं वदनाम्बुरुहं ययोस्तौ तथा ।। १५–१६ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च समयाधिक्यमालक्ष्य तेन सह खेलां समापयामासेत्याह । तमिति । पाणिना एकेनैव अवहेलया वामेनैवेत्यर्थः हस्तं शुण्डं नितरां गृहीत्वा ।। १३–१४ ।। अंसन्यस्तविषाणः स्कन्धार्पितगजदन्तः असृजो रक्तस्य मदस्य च बिन्दुभिः परितोऽङ्कितः विरूढा उद्गताः प्रस्वेदकणिकास्ताभिर्नीहारकणिकाभिरिवोपलक्षितं वदनाम्बुरुह यस्य स मूर्तया वीररसश्रियेव बभौ ।। १५–१६ ।।

गूढार्थदीपिनी

हस्तं शुण्डादण्डम् ॥ १३ ॥ पतितस्य दन्तमित्यत्रान्वेति । तं यदा आक्रम्य तेन दन्तेन इभं गजमहन् ॥ १४ ॥ मृतमिति सार्द्धम् । अंसे वामस्कन्धे न्यस्तः स्थापितो विषाणो गजदन्तः येन । द्वितीय रामेण उद्गतस्वेदकणिकायुक्तं मुखाम्बुजं यस्य सः । असृजः रक्तस्य मदस्य च बिन्दुभिः अङ्कितः ॥ १५-१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

समाविशत् रङ्गमितिशेषः असृजो रक्तस्य च बिन्दुभिः परितः सर्वतोऽङ्कितः विरूढा उद्गताः स्वेकदणिकास्ताभिरुपलक्षितं वदनाम्बुरुहं यस्य सः इत्थम्भूतया वीरश्रिया बभौ ॥ १५ ॥ प्राधान्यविवक्षया रङ्गे भगवत्प्रवेशमुक्त्वा अथ बलादिसहितस्य प्रवेश माह । वृताविति ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तं स्वोपर्यापतन्तमासाद्य पूर्वमेव स्वयं प्राप्य पाणिना हस्तं प्रगृह्य भूतले पातयामास । कुवलयस्यापीडा येन स इति नामान्वर्थं व्यतानीत् ॥ १३ ॥ पतितस्य गजस्य पदाऽऽक्रम्य मृगेन्द्र इव सिंह इव लीलया दन्तं तद्युगं विषाणयुग्ममुत्कृष्येत्याचार्योक्तेरुत्पाट्योत्कृत्य तेन दन्तेनैव हरिर्हस्तिपानहन् ॥ १४ ॥ मृतकं द्विपमुत्सृज्य दन्तपाणी उभौ विरेजतुः । असंयोः स्कन्धयोर्न्यस्ते विषाणे दन्तौ तयोरसृग्रक्तं च मदोदानोदकं तयोर्बिन्दुभिरङ्किताविति निरङ्कः पाठः । बिन्दुभिरञ्जिताविति पाठे बिन्दुभिरञ्जितौ अक्ताविर्त्यर्थः । विरूढा व्याप्य स्थिताः स्वेदस्य कणिका बिन्दवो यस्मिंस्तद्वदनाम्बुरुहं ययोस्तौ ॥ १५ ॥ गजदन्तावेव वरे आयुधे ययोस्ते ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदा भगवान् सर्वात्मना समायातीति मारितवानित्याह । तमापतन्तमिति । उपरि पतन्तमासाद्य स्वयमग्रे गत्वा मारणप्रकाराभिज्ञः भगवान् शङ्का वा अमारणं वा न सम्भावितमिति ज्ञापयितुमाह । मधुसूदन इति । यो हि मधुकैटभौ मारितवान् तस्यास्य सत्त्वस्यास्य हनने कः प्रयास इति किं तु स्वपाणिना तस्य हस्तं प्रसार्यमाणं निगृह्य नितरां लकुटवत् गृहीत्वा शाखामिव भूतले पातयामास स्थूलशरीरस्य पातनेनैव मूर्च्छा सम्पन्ना ॥ १३ ॥ ततो यत्कृतवांस्तदाह । पतितं तं पदाक्रम्येति । प्रथमव्यापारेणैव पतितः तादृशं मस्तके पादं दत्त्वा दन्तमुत्पाट्य तेनैव दन्तेनाहनत् उत्पाटने प्रकारमाह । मृगेन्द्र इति । स हि कुम्भस्थलं विदार्य तत्र दन्तमूलं बन्धनेभ्यः पृथक्कृत्य पश्चाद्दन्तमेवोत्पाटयति । परं महता प्रयासेन भगवांस्तु लीलयेति विशेषः ततस्तेनैव दन्तेन सर्वानेव महामात्रान् यैर्यैः प्रेरितः तानहनत् चकारात् हस्तिनं ननु गजः किमिति हन्तः अर्धमृत एव त्यक्तुमुचित इति चेत्तत्राह । हरिरिति सिंहोहि मारयत्येव शाश्वतिको विरोध इति भगवांश्च हरिः सर्वदुःखहर्ता अर्धमृतस्य जीवने महान् क्लेश इति वसुदेवादीनामपि दुःखं दूरीकर्तव्यमिति ॥ १४ ॥ एवं हस्तिनं हत्वा प्रतिबन्धकापगमे तन्निवृत्तिं सूचयन् अन्तः प्रविष्ट इत्याह । मृतकमिति । स हि पूर्वमेवासमर्थः अप्रयोजको जीवः यतः यानेऽप्युभयसापेक्षः अतस्तं विसृज्य दन्तपाणिर्भूत्वा सम्यगेवाग्र आविशत् तदा प्रविष्टस्य भगवतः स्वरूपं वर्णयति । असन्यस्तविषाण इति । लोकानां प्रतीत्यर्थं दन्तोऽयं महाभार इति अंसे स्थापितवान् साप्येका लीला ततः असृङ्मदयोः बिन्दुभिरङ्कितोऽपि जातः सर्वाङ्गे समाकर्षणेन दन्तस्य तत्र स्थितः मदः रुधिरं च कणशो भगवति सम्बद्धः यथा पूर्वदिवसे मालया चन्दनेन शुशुभे एवमिदानीमपि दन्तेन मदबिन्दुभिश्च शुशुभे विषाणमिति कदाचिद्वाद्यविषाणं गोपालाः स्कन्धेऽपि बिभ्रति नापूर्वमिति ख्यापयितु कुवलयापीडं च बलीवर्दं ज्ञापयितु किं च विशेषेण रूढा याः स्वेदकणिकाः ता वदनाम्बुरुहे यस्य भक्तार्थं भगवानेवं प्रयासं करोतीति ज्ञापयितुं कणिकोद्भेदः एतादृशोऽपि बभौ सर्वोत्कृष्टकान्तियुक्तो जात इत्यर्थः ॥ १५ ॥ एवं भगवन्तं वर्णयित्वा सर्वेषां सुखेन रङ्गप्रवेशमाह । वृताविति । केचन गोपाला इतस्ततः पलायिताः केचनान्तः प्रविष्टाः केचनैव स्थिताः अतः कतिपयैरेव गोपैर्वृतौ बलभद्रेणापि द्वितीयो दन्तो गृहीतः हस्तिनः सर्वस्वंतदिति शत्रोर्धनं ग्राह्यमिति अग्रे साधनस्याप्यपेक्षितत्वात् तत्र प्रवेशे दैत्यवधार्थं सामर्थ्यं सहजद्वेषं सूचयितुं बलदेव इत्युक्तवान् जनार्दनः अविद्यामपि मारयतीति । किं तस्य तद्गृहीतमारणे प्रयास इति रङ्गमिति तादृशौ रङ्गं रङ्गप्रदेशं गजदन्तावेव वरे उत्कृष्टे आयुधे ययोः तादृशौ इदानीमेव मारयिष्याव इति बोधयन्ताविव निर्विविशतुः निःशङ्कतया प्रविष्टौ ॥ १६ ॥

श्रीसुबोधिनी-सार

आपतंतं तं गजम् आसाद्य मधुसूदनो भगवान् हस्तं शुंडां पाणिना निगृह्य धृत्वा भूतले पातयामास ॥ १३ ॥ पदा पादेनाक्रम्य मृगेन्द्रः सिंह इव लीलया पतितस्य गजस्य दंतमुत्पाट्य तेन दंतेन इभं कुवलयापीडं हस्तिपांश्च हरिरहन् ॥ १४ ॥ मृतकं द्विपं हस्तिनम् उत्सृज्य त्यक्त्वा दंतहस्तो रंगं समाविशत् अंसे स्कन्धोपरि न्यस्तं विषाणं गजदन्तो येन सोऽसृजो रुधिरस्य मदस्य च बिन्दुभिरंकितः ॥ १५ ॥ विरूढाभिरुद्गाताभिः स्वेदकणिकाभिरुपलक्षितं बदनांबुरुहं मुखपद्मं यस्य स बभौ कतिपयैर्गोपैर्वृतौ बलदेवजनार्दनौ गजस्य दंतौ वरौ श्रेष्ठौ आयुधौ ययोस्तौ रंगं विविशतुः हे राजन् ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स च भगवान् तं गजमापतन्तं वेगेनागच्छन्तमासाद्य तस्य हस्तं शुण्डां पाणिना निगृह्य भूतले पातयामास । 'न च कृष्णेन तत्पातनमसम्भावितम्, यो हि ब्रह्मादीनामपि भयंकरं मधुं हतवांस्तस्याग्रेऽयं को वराक' इत्याशयेनाह—मधुसूदन इति॥१३॥ हरिः श्रीकृष्णः पतितं गजेन्द्रं पदाऽऽक्रम्य पादाक्रान्तं कृत्वा मृगेन्द्रः सिंह इव लीलया अनायासेनैव तस्य दन्तमुत्पाट्य तेन दन्तेनैवं हस्तिनं हस्तिपांश्चाहनत् अहन् ।। १४ ।। ततश्च मृतं द्विपं गजमुत्सृज्य त्यक्त्वा दन्तपाणिः कृष्णो रङ्गं समाविशत् तत्र च वीरादिश्रिया बभौ । तमेव विशिनष्टि—अंसे स्कन्धे न्यस्तो निहतो विषाणो गजदन्तो येन सः, असृजः रुधिरस्य मदस्य च बिन्दुभिः अङ्कितः, विरूढाः उद्गताः स्वेदकणिका यस्मिंस्तद्वदनाम्बुरुहं यस्य सः ।। १५ ।। एवं कृष्णं वर्णयित्वा गोपैः सहितयो, रामकृष्णयोरुभयोरपि शोभातिशयमाह—वृताविति । 'अनेकरसयुक्ततया वक्ष्यमाणत्वात् सावधानतया श्रोतव्यम्' इत्याशयेन सम्बोधयति-राजन्निति । गजदन्तावेव वरे श्रेष्ठे आयुधे ययोस्तौ कतिपयैर्गोपैर्वृतौ बलदेवजनार्दनौ रङ्गं मल्लक्रीडास्थानं विविशतुः ।। १६ ।।

अन्वितार्थप्रकाशिका

तमिति ।। स च मधुसूदनो भगवान् तं गजमापतन्तं वेगेनागच्छन्तमासाद्य तस्य हस्तं शुण्डां पाणिनां निगृह्य भूतले पातयामास ।। १३ ।। पतितस्येति ।। हरिः गजेन्द्रं पदाक्रम्य पादाक्रान्तं कृत्वा मृगेन्द्रः सिंह इव पतितस्य तस्य लीलया अनायासेनैव दन्तमुत्पाट्य तेन दन्तेनैव इभं हस्तिनं हस्तिपांश्चाहनत् अहन् । शब्लुगभाव आर्षः ।।१४।। मृतकमिति सार्द्धम् ।। हरिः मृतकं द्विपमुत्सृज्य दन्तपाणिः सन् रङ्गं समाविशत् । द्वितीयो दन्तो रामेण गृहीत इति ज्ञेयम् । अंसेति । असे स्कन्धे न्यस्तो निहतो विषाणो गजदन्तो येन सः असृजः रुधिरस्य मदस्य च बिन्दुभिः अङ्कितः नीहारकणाङ्कितवत् निरूढाः उद्गताः स्वेदकणिका यस्मिंस्तद्वदनाम्बुरुहं यस्य सः कृष्णो मूर्तया वीररसश्रियेव वभौ शुशुभे ।। १५ ।। वृताविति ।। हे राजन् ! गजदन्तावेव वरे श्रेष्ठ आयुधे ययोस्तौ कतिपयैः सवयोभिरेव गोपैर्वृतौ बलदेवजनार्दनौ रङ्गमल्लक्रीडास्थानं विविशतुः ।। १६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हस्तं शुंडां ।। १३ ।। सिंहवत्प्राणहरणाद्धरिः ।। १४ ।। रंगसमविशत् अंसे स्कंन्धेन्यस्तं विषाणां कुंजरदंतोयेन असृक् रुधिरं च मदश्चतयोर्विंदुभिरंकितः विरूढा उद्भूताः स्वेदकणिकाः वदनकमले यस्य सः अन्य दंतोरामेण गृहीत इति ज्ञातवं अग्रवक्ष्यमाणत्वात् ।। १५ ।। ननु रंगद्वारे कथं प्रविष्ट इति चेत्तत्राह वृताविति गजदंतौवरे आयुधे ययोस्तौ ।। १६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति । मधुसूदनः भवगान् कृष्णः, आपतन्तं, तं गजं, आसाद्य पाणिना हस्तं निगृह्य, भूतले पातयामास ।। १३ ।। पतितस्येति । हरिः श्रीकृष्णः, पतितस्य गजस्य, पदा आक्रम्य, पतितं गजेन्द्रं पादेनावष्टभ्येत्यर्थः । मृगेन्द्रः सिंह, इव, लीलया दन्तं, उत्पाट्य, तेन दन्तेन एव इभं हस्तिनं, हस्तिपांश्च, अहनत् ।। १४ ।। मृतकमिति । मृतकं मृतं, द्विपं गजं, उत्सृज्य दन्तः पाणौ यस्य सः, समाविशन् रङ्गं प्रवेष्टुमिच्छन्भगवानित्यर्थः अंसे न्यस्तः विषाणोदन्तो येन, असृजो रुधिरस्य मदस्य मदोदकस्य च ये बिन्दवस्तैः, अङ्कितः, विरूढा उद्गताः स्वेदकणिका यस्मिंस्तथाविधं वदनाम्बुरुहं यस्य तथाभूतः सन्, वभौ अशोभत ।।१५।। वृताविति । हे राजन्, कतिपयैः गोपैः परिवृतौ, गजदन्तावेव वरे श्रेष्ठे आयुधे ययोस्तौ, बलदेवजनार्दनौ, रङ्गं मल्लक्रीडास्थानं, विविशतुः ।। १४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तमापतन्तमिति १०.४३.१३.

कृष्णो भ्रान्तकरं दृष्ट्वा मातङ्गकुलमण्डनम् । सुदर्शनकरो युक्तं तमधोऽपातयद्गजम् ।। ३३ ।।
येनानग्रहमापितो गजवरः पाणिं तमेवाच्युतो दुर्वृत्तोन्मदनागनिग्रहकृते सद्यः समायोजयन् ।
आद्यं वान्त्यमुपैति जन्तुरिह यन्मत्पाणितः कारणं तद्वृत्तिर्नहि जातिरित्यविकलं स्पष्टीचकाराशयः ।। ३४ ।।
मधुलब्धप्रभावोऽसावस्म्यहं मधुसूदनः । तदेतद्धतिरल्पैव ममेत्यासीदभीः पुरः ।। ३५ ।।

पतितस्य पदाऽऽक्रम्येति : १०.४३.१४.

स्वापत्यद्वेषिणं हन्तुं तत्पिता निर्घृणो यथा । नान्यस्तथेति भूहेतुं स्वाङ्घ्रिं तत्र न्ययोजयत् ।। ३६ ।।
गजाऽहङ्कारनिर्मूलऽनाशनाया लमंकुशः । इत्यङ्कुशपदेनेभं युक्तमाक्रमदच्युतः ।। ३७ ।।
अयं गजः परेशस्तु नृसिंहो भक्तभव्यदः । तेन तद्धननं सिद्धमित्यवाचि मृगेन्द्रवत् ।। ३८ ।।
अवतारमुख्यहेतुं स्मरन् विलोक्येभमुन्मदं पुरतः । दन्तोत्पाटनमकरोद्युक्तं श्रीशः स दन्तवक्त्ररिपुः ।।३९।।

मयि कुवलयबन्धोरन्वये जाग्रतीशे जगति कुवलयस्य क्लेशदः कोऽयमल्पः।
इति किमु जगदीशः सद्य एवातिरुष्टो विशद - तदभिधानं तं गजं सञ्जघान ॥ ४० ॥
दुष्टमुख्याश्रयादेव कार्या दुष्टहतिर्जवात्। नीतिमत्पुरुषेणेति दन्ततद्धननात् स्फुटम् ॥ ४१ ॥
हन्यात्तुण्डे कदाचित्क्वचिदपि पदगः क्वापि पुच्छापकर्षी क्वाप्यारात्तं भ्रमन्तं द्रुततरगमनं क्वापि कुर्यात्कदाचित्।
स्याद्वा तद्दन्तभङ्गो भुवि झटिति तथा स्वात्मपातं विदध्यात् क्वाप्युत्तिष्ठेत्प्रयत्नोन्मुखामथ समये तादृशेऽरिं निहन्यात् ।४२।
ईदृक्कृतौ कृती यस्तु स रिपुं जयति ध्रुवम्। हस्तिध्वस्तिकृताऽबोधि श्रीशेन रणकौशलम् ॥ ४३ ॥ (युग्मम्)
पुच्छं कृत्वा करान्तर्लसदमलकवज्जीवतः कर्षणीयोऽहङ्कारस्तत्त्वयुक्तो विपुलभवपथे भ्रान्तिकृत्पुष्करश्रीः।
तत्कर्तृत्वं निगृह्याथ च भुवि विदुषा लीनवृत्तिर्विधेयो हेयश्चादाय तस्माद् गलदखिलमदान्मुख्यसत्त्वांशसारम् ॥ ४४ ॥
धृत्वा पुच्छमिभस्य प्रमदस्याकृष्टिमथ च मुक्तिमपि। परिकुर्वताऽच्युतेन व्यबोधि तन्मुख्यदन्तभाजेदम् ॥ ४५ ॥
(युग्मम्)

द्विजद्वारैव कर्तव्यो मातङ्गसहवासिनाम्। दण्ड इत्यच्युतो गोपस्तेन तद्धतिमादधे ॥ ४६ ॥
मद्धस्ताद्ध्वस्तिमापन्नस्याऽस्येभस्य सदन्तता। सिद्धैवेत्यच्युतो दन्तमेकमेव जहार सः ॥ ४७ ॥
कथंभूतोऽप्ययं नागो नागराजस्त्वहं ततः। ममैतद्धतिरश्लाघ्येत्येनं न हतवान् बलः ॥ ४८ ॥
शास्त्रसिद्धमदन्तत्वं गजस्येति विदन्बलः। तदुत्पाटनतश्चक्रे तादृशं तमिति क्षमम् ॥ ४९ ॥
विलोक्य प्रभुणेभस्य दन्तमेकमुरीकृतम्। शेषांशोऽहमिति प्रीत्या स स्वयं जगृहे ततः ॥ ५० ॥
कनीयानयं ज्येष्ठ एवाहमेवं प्रथा मे पृथिव्यां स नाथप्रसादः।
जगत्स्वाम्ययं तत्त्वतस्तत्प्रशोऽहमिति व्यक्तयेऽसौ तदुच्छिष्टमादात् ॥ ५१ ॥
उभयोरवतारचारिताथ्यं भवतूच्चैः सदृगेव सम्प्रतीति। ध्वनितं प्रभुणैकदन्तधृत्या कलयन्नेव तमन्यमग्रहीत् ॥ ५२ ॥
अंसन्यस्तविषाण इति : १०.४३.१५.
भुवि निजजयबोधनाय वीरो वपुषि दधात्यरिवस्तु मुख्यमेवम्। विहितगजहतिस्तदीयमुख्यं प्रभुरकरोत्किमु दन्तमंसभागम् ॥५३॥

कृष्णप्रिया

भगवान् मधुसूदन ने जब उसे अपनी ओर झपटते देखा, तब उसके पास चले गये और अपने एक ही हाथ से उसकी सूँड़ पकड़कर उसे धरती पर पटक दिया ॥ १३ ॥ उसके गिर जाने पर भगवान् ने सिंह के समान खेल-ही-खेल में उसे पैरों से दबाकर उसके दाँत उखाड़ लिये और उन्हींसे हाथी और महावतों का काम तमाम कर दिया ॥ १४ ॥ परीक्षित् ! मरे हुए हाथी को छोड़कर भगवान् श्रीकृष्ण ने हाथ में उसके दाँत लिये लिये ही रंगभूमि में प्रवेश किया। उस समय उनकी शोभा देखने ही योग्य थी। उनके कंधे पर हाथी का दाँत रक्खा हुआ था, शरीर रक्त और मद की बूँदों से सुशोभित था। और मुखकमल पर पसीने की बूँदें झलक रही थी ॥ १५ ॥ परीक्षित् भगवान् श्रीकृष्ण और बलराम दोनों के ही हाथों में कुवलयापीड के बड़े बड़े दाँत शस्त्र के रूप में सुशोभित हो रहे थे और कुछ ग्वालबाल उनके साथ-साथ चल रहे थे। इस प्रकार उन्होंने रंगभूमि में प्रवेश किया ॥ १६ ॥

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरोमूर्तिमान्
गोपानां स्वजनोऽसतां [1]क्षितिभुजां शास्ता स्वपित्रोः शिशुः।
मृत्युर्भोजपतेर्विराड[2]विदुषां तत्त्वं परं योगिनां
वृष्णीनां [3]परदेवतेति विदितो रङ्गं गतः साग्रजः ॥ १७ ॥
हतं कुवलयापीडं दृष्ट्वा [4]तावपि दुर्जयौ। कंसो मनस्व्यपि तदा भृशमुद्विविजे नृप ॥ १८ ॥
तौ रेजतू रङ्गगतौ महाभुजौ विचित्रवेषाभरणस्रगम्बरौ।
यथा नटावुत्तमवेषधारिणौ मनः क्षिपन्तौ प्रभया निरीक्षताम् ॥ १९ ॥
निरीक्ष्य तावुत्तमपूरुषौ जना मञ्चस्थिता नागरराष्ट्रका नृप।
प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननम् ॥ २० ॥

---

[1] भृतां–विज.। [2] विधातृविहितस्तत्त्वं–विज.। [3] वृष्णीनां च पति सदैव शुशुभे रङ्गेच्युतः–विज.। [4] तावतिदुर्जयौ–वीर।

कर्दमक्षमा

अन्वयः—मल्लानामशनिः नृणां नरवरः स्त्रीणां मूर्तिमान् स्मरः गोपानांस्वजनः असतां क्षितिभुजां शास्ता भोजपतेः मृत्युः, अविदुषां विराट् योगिनां परं तत्वं वृष्णीनां परदेवता स्वपित्रोः शिशुः इति विदितः साग्रजो हरिः रङ्गं गतः ॥ १७ ॥ हे नृप तदा कुवलयापीडं हतं श्रुत्वा तावपि दुर्जयौ दृष्ट्वा मनस्वी, अपि भृशम्, उद्विविजे ॥ १८ ॥ महाभुजौ विचित्रवेषाचरणस्रगम्बरौ तौ रङ्गगतौ प्रभया निरीक्षताम् मनः क्षिपन्तौ उत्तम वेषधारिणौ नटौ यथा रेजतू ॥ १९ ॥ हे नृप ! मञ्चे स्थिताः नागराः राष्ट्रका जना तौ, उत्तमपुरुषौ निरीक्ष्य प्रहर्षवेगोत्कलितानि ईक्षणानि, माननानि च येषां तथा भूताः नयनैः तयोराननं पपुः परन्तु न तृप्ताः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र च शृङ्गारादिसर्वरसकदंबकमूर्तिर्भगवांस्तत्तदभिप्रायानुसारेण तत्तद्रूपो बभौ न तु साकल्येन सर्वेषामित्याह। मल्लानामिति। मल्लादीनामज्ञानां द्रष्टृणामशन्यादिरूपेण दशधा विदितः सन्साग्रजो रंगं गत इत्यन्वयः। मल्लादिष्वभिव्यक्ता रसाः क्रमेण श्लोकेन निबध्यंते। "रौद्रोऽद्भुतश्च शृङ्गारो हास्यं वीरो दया तथा। भयानकश्च बीभत्सः शांतः सप्रेमभक्तिकः ॥" अविदुषां विराट् विकलः अपर्याप्तो राजत इति तथा। अनेन बीभत्सरस उक्तः। विकलत्वं च 'क वज्रसारसर्वांगौ' इत्यादिना वक्ष्यते ॥ १७ उद्विविजे भीतो बभूव ॥ १८ ॥ यथा नटाविति निर्भयत्वं दर्शितम् ॥ १९ ॥ प्रहर्षवेगेनोत्कलितान्युज्जृंभितानीक्षणान्याननानि च येषां ते। तयोराननं पपुः परं न तृप्ताः। निराकांक्षा न बभूवुरित्यर्थः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र च प्रवेशसमये। कदंबकं समुदायः "कदंबं निकुरंबे स्यान्नीपसिद्धार्थयोः पुमान्" इति मेदिनी। निकुरंबं समूहः। तत्तदभिप्रायानुसारेण मल्लाद्यभिप्रायानुरोधेन। साकल्येन रससमूहमूर्तित्वेन। प्रेमभक्त्या तन्नामकरसेन सह वर्तत इति सप्रेमभक्तिकः। अनेन विकलत्वकथनेन। उक्तो द्योतितो न तु भगवति बीभत्सत्वं संगच्छतेऽतीव रम्यत्वादिति भावः ॥ मल्लानामिति तैर्व्याख्यातम्। तत्र सर्वरसकदंबमूर्तिरिति कार्यकारणभेदात् "रसो वै सः, रसं ह्येवायं लब्धाऽऽनंदी भवति" इति श्रुतेः। विशेषश्चैवं—मल्लानां परमशूरंमन्यतया गवतानामवज्ञातचरस्याप्य शनितुल्यांगत्वेन हरेः स्फुरणादशनिवद्विरोधिनमवगणय्य प्रवेशाच्च मल्लानां क्रोधस्थायिभावमयो रौद्रः १। नृणां तद्द्वेषितदीयमन्यव्यतिरिक्तानां पौरादीनां लोकोत्तरविलासादिदर्शनेन विस्मयस्थाय्यद्भुतः २। स्त्रीणां मात्रादिव्यतिरिक्तानां स्मरत्वेन प्रियभावमयी रतिर्व्यक्ता, ततः स्थायी शृङ्गारः ३। गोपानां श्रीदामादीनां स्वजनो वयस्यस्ततोऽसंकुचितचित्ततया गजरक्तमदबिंदुदंतादिजातविलक्षणवेशदर्शनेन तेषां हासस्थायिभावो हास्यः ४। असतां राज्ञां शास्तेति तद्वीर्यातिशयदर्शनेन युद्धोत्साहस्थायी वीररसः ५। पित्रोः श्रीदेवकीवसुदेवयोः श्रीनंदवसुदेवयोर्वा, तदुपलक्षणत्वेन तत्समवासनानामन्येषामपि शिशुत्वस्फूर्तेस्तदीयमार्दवज्ञानेन मल्लादिदौरात्म्यशंकया शोकस्थायी करुणः ६, (एष एव दयाशब्देन लक्षितः)। कंसस्य मृत्युस्तद्धेतुस्तेन भयस्थायी भयानकः ७। अविदुषां सच्चिदानंदविग्रहत्वेन विद्वद्गुणसंमतेऽपि तस्मिन्विकलत्वमननेन भौतिकनिर्णयाज्जुगुप्सास्थायी बीभत्सः ८। योगिनां ज्ञानिभक्तानां परं तत्त्वं परब्रह्मविग्रहः, तेन शांतिस्थायी शान्तः ९। 'शमो मन्निष्ठता बुद्धेः' इति शान्तिशब्दस्य तन्निष्ठावाचित्वेन तन्निष्ठायाश्च तत्प्रीतिमात्रजन्यत्वेन दास्यसख्यादिभावविशेषानिर्देशेन चाखिलान्यवासनाशान्तिपूर्वकस्तत्स्वरूपैकालम्बनः प्रीतिविशेष एव शान्तिरित्युच्यते सोऽस्याऽस्तीति अर्शआदित्वादच्। वृष्णीनां परमाराध्य इति सप्रेमभक्तिकः भक्तिराराध्यतया ज्ञानं प्रेमात्मिका भक्तिः प्रेमभक्तिस्तया स्थायिरूपया सह वर्तत इति। अतोऽयं रससंग्रहश्लोकः। "रौद्रोऽद्भुतः शुचिरथो धृतसख्यहास्ये वीरोऽथ वत्सलयुतः करुणो भयांधः। बीभत्ससंज्ञ उदितोऽथ तथैव शान्तः सप्रेमभक्तिरिति ते द्व्यधिका दश स्युः ॥" इति। अत्र क्रमं विना निर्देशस्तत्रोच्चावचजनानां दृष्टिपातस्तथैव जात इति विवक्षया। अथ वा—ये तत्र प्रतिकूलज्ञाना अज्ञानाः सज्ञाना अनुकूलज्ञानाश्चेति सामान्यतश्चतुर्विधास्तदवांतरभेदेन विशेषतो दशविधा द्रष्टारः सन्ति तेषामसौ यथायोग्यं पृथक्पृथक्तत्तद्धर्मप्रकटनेनाविर्बभाविति तादृङ्मधुरविलासे परमैश्वर्यमपि दर्शयति—मल्लानामिति। तत्र मल्लाः कंसपक्षीयाः। सक्षितिभुजश्च कंसश्च प्रतिकूलज्ञानाः परमसुखविग्रहे तस्मिंस्तथातथा दुःखदत्वायोग्यत्वात्। किन्तु तमोदूषितदृष्टयस्तस्मिन्विपरीतमेव धर्मं प्रतियन्ति खंडे पित्तदूषितजिह्वायास्तिक्तत्वमिव, तत्र मल्लानां स्वांगस्पर्शातिकर्कशत्वादिना सर्वयादवादिसाधुगणस्य तथा तस्यापि पराभवं भावयतां ततोऽप्यतिकर्कशत्वादित्वं प्रकटितमित्यशनिः। असतां साधूनामेव शान्तिं कुर्वतां तत एवानधिकारिणामपि बलादेव क्षितिभुजां तदुपभोगकर्तृणां श्लेषेण तानभ्यवहरतामिव शास्ता दंडकर्ता, भोजपतेश्च राक्षसदैत्यादिनिजगणद्वारा स्वयं चानेकसाधूनां मृत्युहेतुत्वेन स्वमात्रादौ स्वस्मिंश्च तथोद्यमकारित्वेन प्रसिद्धस्य, अतः सर्वंगिलायां श्रेष्ठस्येत्यर्थः। तस्य मृत्युर्यम इव। अथ न द्वेषिणो न च सज्ञाना न चानुकूलज्ञाना याज्ञिकब्राह्मणा इव केचिदविद्वांसस्तादृशतत्स्वरूपानुभूते सुखोदयाभावायोगान्न जानन्त्येव किन्तु तादृशत्वावभावकतच्छक्तिविशेषप्रसादालाभेन यत्किञ्चिन्नृबालकत्वेनैवानुभवन्ति तेषां विराट् विराडंशनृनालकविग्रहः। अथ

सज्ञाना आकाशस्थितयोगिनः सनकादयस्ते तु सर्वाश्रयभूततया जानन्तीत्यनुकूल्यांशस्य नातिसंभवात्केवलतज्ज्ञानमात्रास्तेषां परं तत्त्वम्। अखंडस्वरूप तल्लक्षणं गुणानां पिण्डरूपश्रीभगवदाकारत्वेन केवलस्वरूपमात्राविर्भावब्रह्मोद्धारतोऽपि श्रेष्ठं वास्तववस्त्वित्यर्थः। अथ नरः स्त्रियो वृष्णयः पितरौ गोपाश्चानुकूलज्ञानाः तथातथा ज्ञानस्यानुकूल्यमयत्वात्तेषां तत्तद्रूप इति स्वाभाविकानंतमाधुरीप्रभाववृंदस्य तस्य तांस्तान्प्रति तत्तदुल्लासाद्यद्यदंशांशाभासलाभेन जीवा अपि तथातथाः रोचन्ते, तत्र नृणामितरानुकूलचतुष्टयव्यतिरिक्तानां साधारणानाम् "निरीक्ष्य तावुत्तमपूरुषौजनाः" (२०) इत्यादिवक्ष्यमाणानां मध्ये केषाञ्चित्पुरुषाणाम् 'महानयं वताधर्मः' (अ० ४४, श्लो० ७) इत्यादिवक्ष्यमाणवचनानां मध्ये कासाञ्चित्स्त्रीणाञ्चेत्यर्थः। तेषां नरवरो नरश्रेष्ठः। एषां ज्ञानित्वं प्रभावमाधुर्यांशज्ञानेनैव तच्छ्रेष्ठत्वावगमात्, आनुकूल्यं च तथातथा वचनात्। एवमुत्तरोत्तरत्रापि तारतम्येन तत्त्वं ज्ञेयम्। स्त्रीणां तादृशवाक्यानां मध्ये 'गोप्यस्तपः किमचरन्' (अ० ४४, श्लो० १४) इत्यादिवचनानां कासाञ्चित्स्मरस्तद्धेतुमाधुरीविशेषप्रकाशनेन श्रीकृष्णावतारिते चेतसि प्राकृतस्मरदेवताया अधिकारसामर्थ्येन च स्वयमेतद्रूपोऽत एवाह–मूर्तिमानिति। मृत्युत्वेन त्विदं न विशेक्ष्यतेऽयथावत्त्व त्। परतत्त्वेऽपि न तेन सह मूर्तेरभेदात्। वृष्णीनां तत्प्रधानानां यादवानां परदेवता पारमैश्वर्यस्फुरणेन संबंधस्फुरणस्यावृतप्रायत्वात्। परा सर्वतः श्रेष्ठा या देवता स्वयं भगवत्त्वेन निजाराध्या सैव स्वयम्। अतः पित्रोर्यदुकुललीलायां पितृत्वेन प्रसिद्धयोः श्रीवसुदेवदेवक्योर्वृष्णिश्रेष्ठत्वेन तज्जन्मलक्षणमारभ्य तादृशस्तुत्यादिश्रवणेनैश्वर्यज्ञानावृतवात्सल्ययोरपि शिशुरिति तदानीं तादृशसंकटसमये श्रीनंदादिसंगेनैव शुद्धवात्सल्यस्योल्लासादिति ज्ञेयम्। स्वशब्दोऽत्र वृष्णिभ्योंतरंगत्वव्यञ्जनाय।

'स्वपित्रोः' इति क्वचित्पाठः, तत्र विशेष्यपदं नाध्याहार्यम्। गोपानां श्रीनंदादीनां श्रीदामादीनां च स्वजनः पुत्रादिरूपो मित्रादिरूपश्चेति तेषां स्वभाव उक्तः। तथा तथैव श्रीगोकुल लीलायां श्रीमुनींद्रादिभिस्तेषामसकृत्प्रशस्तत्वात्तदपेक्षयाऽन्येषां कनिष्ठीकृतत्वाच्च। अत्र चैवं ज्ञेयम्–भक्त्यभावास्तावत्त्रिविधाः–प्रतिकूलज्ञानानां प्रीतिविरोधिनः, अज्ञानानां प्रीत्युदासीनाः, अन्योभयेषां प्रीत्यात्मका इति। तत्राद्यानामशनित्वशास्तृत्वमृत्युत्वभानाद्भयप्राया एव लक्ष्यन्ते। तच्च तेषां भयं रसतां न प्राप्नोति। प्राकृतरसशास्त्रविदः श्रव्यकाव्यदर्शनीयेषु दृश्यकाव्यानुकार्येषु च नलदमयन्त्यादिषु रसोत्पत्तिं न रसं प्रतिपद्यन्ते, किन्तु तत्तकाव्यानुभवितृष्वेव तेष्वपि तत्सवासनेष्वेव संप्रतिपद्यन्ते, मल्लादिसवासनास्तु न भगवत्काव्याधिकारेण इति। श्रीभागवतरसविदस्तु तादृशं भावं द्वेष्यत्वेनैव मन्यन्ते। वस्तुतश्च दुःखरूप एवासाविति न सुखस्वरूपरसतामर्हति। तथाज्ञानामवज्ञतैव सापि रसतां न प्राप्नोति। अथान्योभयेषां प्रीत्यात्मकत्वेनैक्येऽपि तत्तद्विशेषात्पञ्च भेदाः। योगिनां ज्ञानिभक्तस्य परपर्याया शान्तिः, वृष्णीनां तदुपलक्षितभक्तिमतां प्रेमपर्याया भक्तिः, मित्राणां सख्यं, पित्रादीनां शिशुत्वपुत्रत्वभावनामयप्रीतिमतां वात्सल्यं, स्त्रीविशेषाणां प्रियताभावनामयीरतिरिति। यत्र तु वैशिष्ट्यं न जातं तत्र शुद्धैव प्रीतिः, तथा नृणामिति षट्। एष च प्रीत्यात्मकः सर्वोऽपि भावो रसतां प्राप्नोत्येव, ब्रह्मानन्दतोऽपि स्वत एव परमानन्दरूपत्वात्, प्राकृतरसशास्त्राणामपि यत्किञ्चिदानन्दरूपत्वेनैव प्रीत्यादीनां रसतासम्प्रतिपत्तेः।

विभावादिसद्भावश्चात्र स्वत एव परमालौकिकः, अतः प्राकृतरसवत्कविकृत्रिमालौकिकत्वमपि नापेक्षते। अतोऽत्र वर्णनीयानुकार्ययोरेव मुख्यरसोत्पत्तिः। एष एव भागवतरसो नाम कौमुदीकारादिभिर्दर्शितः। मूलेऽपि—'पिवत भागवतं रसमालयम्' इत्यादौ। तत्रोदाहरञ्च—"स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरिं हरिम्। भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम्॥", "क्वचिद्रुदन्त्यच्युतचिंतया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः। नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः॥" इति च। अत्र हरिरालम्बनो विभावः, स्मरणमुद्दीपनो विभावः। विशेषेण भावयति रसमिति विभावशब्दस्यार्थः। स्मरणादिक उद्धास्वरोत्थोऽनुभावः, पुलकः सात्त्विकाख्यः। अनुभावयति ज्ञापयति रसमिति तच्छब्दार्थः। चिन्तादयः सञ्चारिभावाः। रसे सम्यक् चरन्तीति। संजातया भक्त्येति स्थायी भावः, सर्वाश्रयत्थातुं शीलमस्येति। 'भवन्ति तूष्णीं परमेत्य निर्वृताः' इति तत्संवलनम्। परं परमरसात्मकं वस्त्वित्यर्थः। एवम्—"भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः। पुलकाञ्चितांग औत्कंठ्यात्स्वाख्यानेऽपि हि नाशकत्॥" इत्यादि। एवं प्रीतेरैक्येन तन्मयरसस्याप्यैक्यम्। तद्भावानां षोढा भेदेन रसा अपि षोढा।

यथा—शान्तिस्थायी शान्तः १, प्रेमभक्तिस्थायी सप्रेमभक्तिकः २, सख्यस्थायी सख्यमयः ३, वात्सल्यस्थायी वत्सलः ४, रतिस्थायी शृङ्गारः ५, अवशिष्टप्रीतिस्थायी तु प्रीतिमय ६ एव। अथ येऽन्येऽद्भुतादयो भागवताः सप्त रसास्तेऽपि तेषु भगवत्प्रियजनेषु भगवत्प्रीतेरेवाविर्भवन्ति, तत्रैव च तिरो भवन्तीति तत्तद्रससंचारिभावप्राया गौणत्वान्नात्र गण्यन्ते, तद्विरोधितदुदासीनभावौ तु तज्ज्ञानायैष दर्शिताविति। एते च भावरसाः प्रायः संज्ञान्तरेण परिभाष्य रसामृतसिंधौ श्रीमद्भ्रातृशुभाशयैर्विस्तरतः करतल इव दर्शिताः। संक्षेपतस्तदर्थसंग्रहश्लोकाश्चैते—"स्थायीभावो विभावानुभावैः संचारिभिस्तथा। स्वादुत्वं नीयमानोऽसौ रस इत्यभिधीयते॥ कारणान्यथ कार्याणि सहकारीणि यानि च। तान्येव व्यपदिश्यन्ते विभावाद्याख्यया रसे। आलंबनोद्दीपनाख्ये विभावस्य भिदे उभे। आलम्बनो च द्विविधौ विषयाश्रयभेदतः। रसस्य विषयः कृष्णस्तस्यानुभविताश्रयः। स चानुभविता प्रेम्णो यः श्रेष्ठोऽन्यस्पृहाकरः। उद्दीपनास्तु सम्बंधिपदार्थाः कंसवैरिणः। अनुभावाः सात्त्विकाः स्युरांगिकाश्चेति ते द्विधा। स्तंभः स्वेदोऽथ रोमांचः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः। नृत्यं विलुंठितं गानं श्वासहासादयोऽपि च।

आंगिका अनुभावास्ते यथायथमुदीरिताः। निर्वेदश्च विषादश्च दैन्यं ग्लानिस्तमो मदः। गर्वः शंकात्रासवेगा उन्मादापस्मृती तथा। व्याधिर्मोहो मृतिश्चैव आलस्यं जाड्यमित्यपि। व्रीडाऽवहित्था स्मरणं वितर्कश्चिन्तनं मतिः। हिंसौत्सुक्यत्वौग्र्यमर्षासूयाश्च धृतिचापले। निद्रा च सुप्तिरालस्यमितीमे व्यभिचारिणः। निर्वदाद्यास्त्रयस्त्रिशद्भावाः स्युर्व्यभिचारिणः। स्थायिनं वर्धयन्त्येते प्रादुष्षन्ति तिरोऽपि च॥ आनुकूल्यात्मिकायां चेल्लिप्सोल्लाससधर्मिका। स स्थायी तारतम्येन रतिप्रेमादिनामभाक्। रतिः प्रेमा तथा स्नेहः प्रणयो मानरागकौ। अनुरागमहाभावावेते भावक्रमा मताः शान्तिः प्रीतिस्तथा सख्यं वात्सल्यं प्रियता तथा। ज्ञानादरस्वतुल्यत्वकृपावल्लभतारतः। शान्तः प्रीतस्तथा प्रेयान् वत्सलो मधुरो रसाः। सामान्याद्भक्तिशब्दोक्तः स्थायी भक्तिरसो मतः विस्मयो हास्य उत्साहक्रोधभीतघृणाशुचः। ये चैते स्थायिनो भक्तेर्जातास्ते तत्र गौणकाः अद्भुते हास्यवीरौ च रौद्रस्तद्वद्भयानकः। बीभत्सः करुणश्चैव तेषु गौणरसाः क्रमात्। श्रीकृष्णविषयत्वं तु भक्तिद्वाराऽत्र संमतम्। क्वचित्स्वतोऽपि येन स्यात्स्थायिनो न हि दूषणम्।" इति॥ १७॥ तौ रामकृष्णौ। मनस्वी शूरः "मनस्वी स्थिरचित्तो स्याच्छूरे योगविदि" इति धरणिः। हतं दृष्ट्वेति महोष्वमञ्चोपर्युपवेशात्। अतिदुर्जयत्वदर्शनं कुवलयापीडहननात्, तेजं विशेषाभिव्यंजनाद्वा। मनस्वी महाशूरोऽपि। तदेति ततः प्राक्तादृग्भयाभावात्। कंसस्य तादृशोद्वेगात्प्रहर्षेणाह—हे नृपेति। त्वं तु नृपालकत्वादासन्नमृत्युरपि न बिभेषीति भावः। तस्य त्वादृशत्वं नास्ति परद्रोहित्वात् 'द्रोग्धुर्हि परतो भयम्' इत्युक्तेः। स एव भूतो न तु त्वमिति भावान्तरम्॥ १८॥ तौ रामकृष्णौ। महाभुजौ शूरौ। प्रभया देहकान्त्या। क्षिपंतावाकर्षन्तौ। विचित्राणि विविधानि अद्भुतानि वा वेषादीनि ययोस्तौ। तत्र वेषस्तिलकादिः, आभरणं तिलकमेव, कटककुंडलादिक्(धृ) तोऽपि महायुद्धे तेषामम्लानत्वादिव्यंजनया कौशलविशेषो व्यञ्जितः। निरीक्षमाणानां मल्लादिदशविधजनानां प्रभयाऽशनित्वादिरूपया स्वतेजसा मनः क्षिपन्तौ यथायथं विक्षिपंतौ। उत्तमवेषधारिणाविति नटविशेषणम्। उत्तमास्तथा प्रत्यायनसमर्था ये वेषा नानानेपथ्यानि तद्धारिणावित्येकस्य नानात्वं, प्रकाशमात्रेण तु कालाभेदेन दृष्टान्तः। यद्वा–इन्द्रजालिकनट एवात्र दृष्टान्तः। स च स्वांगेन्द्रजालाभ्यां सत्यासत्यधर्मान्युगपद्दर्शयतीति॥ १९॥ तावुक्तार्थौ। इत्यर्थ इति-रम्यवस्त्वालोकतः कस्यचिदपि चेतो न निवर्तत इति भावः। ये तु प्रतिकूलज्ञानव्यतिरिक्तास्तेषु तु साधारणानामपि परमप्रेमैव जातः किमुतासाधारणानामित्याह–निरीक्ष्येति। उत्तमपूरुषावित्यखिलसौंदर्यवैदग्ध्यादिकं सूचितम्। मंचस्थिता इति निरीक्षणं सम्यगुक्तम्। नागराः पौराः। राष्ट्रिका जानपदा लोकाः सर्वेऽपीत्यर्थः। उत्कलितत्वं विकाशितत्वम्। पपुरित्यनेन नयनानां चमत्कृतत्वम्, आननस्य सौन्दर्याऽमृतनिधानपात्रत्वम्। आननं पपुरिति सौन्दर्यप्राचुर्योक्त्तेनाभेदोत्प्रेक्षया। केवलाननिर्देशो दर्शनैतत्प्राधान्यात्॥ २०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मल्लानामिति तैर्व्याख्यातम्। तत्र सर्वरसकदम्बमूर्त्तिरिति कार्यकारणाभेदात्। "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवती"ति श्रुतेः। विशेषश्चैवं मल्लानां परमशूरम्मन्यतया गर्वितानामवज्ञातचरस्याप्यशनितुल्याङ्गत्वेन हरेः स्फुरणादशनिवद्विरोधिजनमवगणय्य प्रवेशाच्च मल्लानां क्रोधस्थायिभावमयो रौद्रः। नृणां तद्द्वेषितदीयम्मन्यव्यतिरिक्तानां पौरादीनां लोकोत्तरविलासादिदर्शनेन विस्मयस्थाय्यद्भुतः। स्त्रीणां मान्यादिव्यतिरिक्तानां स्मरत्वेन प्रियभावमयी रतिर्व्यक्ता ततस्तत् स्थायी शृङ्गारः गोपानां श्रीदामादीनां स्वजनो वयस्यः ततोऽसङ्कुचितचित्ततया गजरक्तमदबिन्दुदन्तादिजातविलक्षणवेशदर्शनेन तेषां हासस्थायिभावो हास्यः। असतां राज्ञां शास्तेति तद्वीर्यातिशयदर्शनेन युद्धोत्साहस्थायी वीररसः। पित्रोः श्रीदेवकीवसुदेवयोः श्रीनन्दवसुदेवयोर्वा तदुपलक्षणत्वेन तत्समवासनानामन्येषामपि शिशुत्वस्फूर्त्तेस्तदीयमार्दवज्ञानेन मल्लादिदौरात्म्यशङ्कया शोकस्थायी करुणः एष एव दयाशब्देन लक्षितः कंसस्य मृत्युस्तद्धेतुः तेन भयस्थायी भयानकः अविदुषां सच्चिदानन्दविग्रहत्वेन विद्वद्गणसंमतेऽपि तस्मिन् विकलत्वमननेन भौतिकनिर्णयाज्जुगुप्सा स्थायी वीभत्सः। योगिनां ज्ञानिभक्तानां परं तत्त्वं परब्रह्मविग्रहः तेन शान्तिस्थायी शान्तः। शमो मन्निष्ठता बुद्धेरिति शान्तिशब्दस्य तन्निष्ठावाचित्वेन तन्निष्ठायाश्च तत्प्रीतिमात्रजन्यत्वेन दास्यसख्यादिभावविशेषानिर्देशेन चाखिलान्यवासना शान्तिपूर्वकस्तत्स्वरूपैकालम्बनः प्रीतिविशेष एव शान्तिरित्युक्यते साऽस्यास्तीति अर्शआदित्वादच्। वृष्णीनां परमाराध्य इति सप्रेमभक्तिकः भक्तिराराध्यतया ज्ञानम् प्रेमात्मिका भक्तिः प्रेमभक्तिः। तया स्थायिरूपया सह वर्त्तत इत्यतोऽयं रससंग्रहश्लोकः "रौद्रोऽद्भुतः शुचिरथो धृतिसख्यहासो वीरोऽथ वत्सलयुतः करुणो भयाङ्कः। वीभत्ससंज्ञ उदितोऽथ तथैव शान्तः सप्रेमभक्तिरिति ते द्व्यधिका दश स्युः" इति अत्र क्रमं विना निर्देशस्तत्रोच्चावचजनानां दृष्टिपातस्तथैव जात इति विवक्षया। अथवा अथ ये तत्र प्रतिकूलज्ञानाः अज्ञाना सज्ञाना अनुकूलज्ञानाश्चेति सामान्यतश्चतुर्विधास्तदवान्तरभेदेन विशेषतो दशविधा द्रष्टारः सन्ति तेषामसौ यथायोग्यं पृथक् पृथक् तत्तद्धर्मप्रकटनेनाविर्बभाविति तादृङ् मधुरविलासे परमैश्वर्यमपि दर्शयति। मल्लानामिति। तत्र मल्लाः कंसपक्षीयाः सक्षितिभुजः कंसश्च प्रतिकूलज्ञानाः परमसुखविग्रहे तस्मिन् तथा तथा दुःखदत्वायोगात्। किन्तु तमोदूषितदृष्टयः तस्मिन् विपरीतमेव धर्मं प्रतियन्ति। खण्डे पित्तदूषितजिह्वायास्तिक्तत्वमिव तत्र मल्लानां स्वाङ्गस्पर्शातिकर्कशत्वादिना सर्वयादवादिसाधुगणस्य तथा तस्यापि पराभवं भावयतां ततोऽप्यतिकर्कशत्वादित्वं प्रकटितमित्यशनिः। असतां साधूनामेव शास्ति कुर्वतां तत एवानधिकारिणामपि बलादेव क्षितिभुजां तदुपभोगकर्तॄणां

श्लेषेण तामभ्यवहरतामिव शास्ता दण्डकर्त्ता। भोजपतेश्च राक्षसदैत्यादिनिजगणद्वारा स्वयञ्चानेकसाधूनां मृत्युहेतुत्वेन स्वमात्रादौ स्वस्मिंश्च तथोद्यमकारित्वेन प्रसिद्धस्य अतः श्लेषेण सर्वङ्गिलानां श्रेष्ठस्येत्यर्थः। तस्य मृत्युर्यम इव अथ न द्वेषिणो नच सज्ञाना नचानुकूलज्ञाना याज्ञिक ब्राह्मणा इव केचिदविद्वांसः तादृशतत्स्वरूपानुभूते सुखोदयाभावायोगान्न जानन्त्येव किं तु तादृशत्वानुभावकतच्छक्तिविशेषप्रसादालाभेन यत्किञ्चिन्नृबालकत्वेनैवानुभवन्ति तेषां विराट् विराडंशनृबालकविग्रहः अथ सज्ञाना आकाशस्थितयोगिनः सनकादयः ते तु सर्वाश्रयभूततया जानन्तीत्यानुकूल्यांशस्य नातिसम्भवात् केवलतज्ज्ञानमात्राः तेषां परं तत्त्वम् अखण्डस्वरूपतल्लक्षणं गुणानां पिण्डरूपश्रीभगवदाकारत्वेन केवलस्वरूपमात्राविर्भावब्रह्माकारतोऽपि श्रेष्ठं वास्तववस्त्वित्यर्थः। अथ नरवरः स्त्रियो वृष्णयः पितरो गोपाश्चानुकूलज्ञानाः। तथा तथा ज्ञानस्यानुकूल्यमयत्वात्तेषां तत्तद्रूप इति स्वाभाविकानन्तमाधुरीप्रभाववृन्दस्य तस्य तांस्तान् प्रति तत्तदुल्लासात् यद्यदंशांशाभासलाभेन जीवा अपि तथा तथा रोचन्ते। तत्र नृणामितरानुकूलचतुष्टयव्यतिरिक्तानां साधारणानां निरीक्ष्य तावुत्तमपूरुषौ जना इत्यादि वक्ष्यमाणानां मध्ये केषाञ्चित् पुरुषाणां महानयं इत्यादि वक्ष्यमाणवचनानां मध्ये कासाञ्चित् स्त्रीणाञ्चेत्यर्थः। तेषां नरवरः नरश्रेष्ठः एषां ज्ञानित्वं प्रभावमाधुर्यांशज्ञानेनैव तच्छ्रेष्ठत्वावगमात् आनुकूल्यत्वञ्च तथा तथा वचनात्। एवमुत्तरोत्तरत्रापि तारतम्येन तत्त्वे ज्ञेये। स्त्रीणां तादृशवाक्यानां मध्ये गोप्यस्तपः किमचरन्नित्यादि वचनानां कासाञ्चित् स्मरस्तद्धेतुमाधुरीविशेषप्रकाशनेन श्रीकृष्णावभासिते चेतसि प्राकृतस्मरवेषतया अधिकारसामर्थ्येन च स्वयमेतद्रूपः। अत एवाह मूर्त्तिमानिति। मृत्युत्येन त्विदं न विशेष्यतेऽयथावत्त्वात्। परतत्त्वेऽपि न तेन सह मूर्त्तेरभेदात्। वृष्णीनां तत् प्रधानानां यादवानां परदेवतापारमैश्वर्यस्फुरणेन सम्बन्धस्फुरणस्यावृतप्रायत्वात्। परा सर्वतः प्रेष्ठा या देवता स्वयं भगवत्त्वेन निजाराध्या सैव स्वयम्। अतः पित्रोः यदुकुललीलायां पितृत्वेन प्रसिद्धयोः श्रीवसुदेवदेवक्योर्वृष्णिश्रेष्ठत्वेन तज्जन्मलक्षणमारभ्य तादृशस्तुत्यादिश्रवणेनैश्वर्यज्ञानाच्चावृतवात्सल्ययोरपि शिशुरिति तदानीं तादृशसङ्कटसमये श्रीनन्दादिसङ्गेनव शुद्धवात्सल्यस्योल्लासादिति ज्ञेयम्। स्वशब्दोऽत्र वृष्णिभ्योऽन्तरङ्गत्वव्यञ्जनाय स्वपित्रोरिति क्वचित् पाठः। अत्र विशेष्यपदं नाध्याहार्यं गोपानां श्रीनन्दादीनां श्रीदामादीनाञ्च स्वजनः पुत्रादिरूपो मित्रादिरूपश्चेति तेषां स्वभाव एवोक्तः। तथा तथैवं श्रीगोकुललीलायां श्रीमुनीन्द्रादिभिस्तेषामसकृत् प्रशस्तत्वात्तदपेक्षयान्येषां कनिष्ठीकृतत्वाच्च अत्र चैवं ज्ञेयम् उक्ता भावास्तावत्त्रिविधाः प्रतिकूलज्ञानानां प्रीतिविरोधिनः अज्ञानां प्रीत्युदासीनाः। अन्योभयेषां प्रीत्यात्मका इति। तत्राद्यानामशनित्वशास्तृत्वमृत्युत्वभानाद्भयप्राया एव लक्ष्यन्ते तच्च तेषां भयं रसतां न प्राप्नोति। प्राकृतरसशास्त्रविदः श्रव्यकाव्यदर्शनो येषु दृश्यकाव्यानुकार्येषु च नलदमयन्त्यादिषु रसोत्पत्ति न रसं प्रतिपद्यन्ते किन्तु तत्तत्काव्यानुभवितृष्वेव तेष्वपि तत्सवासनेष्वेव सम्प्रति पद्यन्ते मल्लादि सवासनास्तु न भगवत्काव्याधिकारेण इति श्रीभागवतरसविदस्तु तादृशं भावं द्वेष्यत्वेनैव मन्यन्ते। वस्तुतश्च दुःखरूप एवासाविति न सुखस्वरूपरसतामर्हति। अथाज्ञानामवज्ञैव सापि रसतां न प्राप्नोति। अथान्योभयेषां प्रीत्यात्मकत्वेनैक्येऽपि तत्तद्विशेषात् पञ्च भेदाः। योगिनां ज्ञानभक्तस्य परपर्याया शान्तः। वृष्णीनां तदुपलक्षितभक्तिमतां प्रेमपर्याया भक्तिः मित्राणां सख्यं पित्रादीनां शिशुत्वपुत्रत्वभावनामयप्रीतिमतां वात्सल्यं स्त्रीविशेषाणां प्रियता भावनामयीरतिति। यत्र तु वैशिष्ट्यं न जातं तत्र शुद्धैव प्रीतिः तथा नृणामिति षट। एष च प्रीत्यात्मकः सर्वोऽपि भावो रसतां प्राप्नोत्येव ब्रह्मानन्दतोऽपि स्वत एव परमानन्दरूपत्वात्। प्राकृत रसशास्त्रज्ञानामपि यत्किञ्चिदानन्दरूपत्वेनैव प्रीत्यादीनां रसता सम्प्रतिपत्तेः। विभावादिविभावादिसद्भावश्चात्र स्वत एव परमालौकिकः। अतः प्राकृतरसवत् कविकृत्रिमालौकिकत्वमपि नापेक्ष्यते। अतोऽत्र वर्णनीयानुकार्ययोरेव मुख्या रसोत्पत्तिः। एष एव भागवतरसो नाम कौमुदीकारादिभिर्दर्शितः। मूलेऽपि पिबत भागवतं रसमालयमित्यादौ। तत्रोदाहरणञ्च। “स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम्। भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम्। क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दति वदन्त्यलौकिकाः। नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृता” इति। अत्र हरिरालम्बनो विभावः स्मरणमुद्दीपनो विभावः विशेषेण भावयति रसमिति विभावशब्दस्यार्थः। स्मरणादिक उद्भास्वराख्योऽनुभावः। पुलकः सात्त्विकाख्यः अनुभगवयति ज्ञापयति रसमिति तच्छब्दार्थः चिन्तादयः सञ्चारिभावाः रसे सम्यक् चरन्तीति सञ्जातया भक्त्येति स्थायी भावः सर्वाश्रयत्वात् स्थातुं शीलमस्येति। भवन्ति तूष्णीं परमेत्य निर्वृता इति तत्सम्बलनं परं परमरसात्मकं वस्त्वित्यर्थः। एवं “भगवद्दर्शनाह्लादवाष्पपर्याकुलेक्षणः। पुलकाञ्चिताङ्ग औत्कण्ठ्यात् स्वाख्यानेऽपि हि नाशकद्”इत्यादि एवं प्रीतेरैक्येन तन्मयरसस्याप्यैक्यं तद्भावानां षोढाभेदेन रसा अपि षोढाः। यथा शान्तिस्थायी शान्तः प्रेमभक्तिस्थायी सप्रेमभक्तिकः। सख्यस्थायी सख्यमयः। वात्सल्यस्थायी वत्सलः। रतिस्थायी शृङ्गारः। अवशिष्टप्रीतिस्थायी तु प्रीतिमय एव। अथ येऽन्येद्भुतादयो भागवताः सप्त रसास्तेऽपि तेषु भगवत्प्रियजनेषु भगवत्प्रीतैरेवाविर्भवन्ति तत्रैव च तिरोभवन्तीति तत्तद्रससञ्चारिभावप्राया गौणत्वान्नात्र गण्यन्ते। तद्विराधितदुदासीनभावो तु तज्ज्ञानायैव दर्शिताविति। एते च भावरसाः प्रायः संज्ञान्तरेण परिभाष्य रसामृतसिन्धौ श्रीमद्भ्रातृशुभाशयैर्विस्तरतः करतल इव दर्शिताः। सङ्क्षेपतस्तदर्थसङ्ग्रहश्लोकाश्चैते। “स्थायी भावो बिभावानुभावैः सञ्चारिभिस्तथा। स्वाद्यत्वं नीयमानोऽसौ रस इत्यभिधीयते। कारणान्यथ कार्याणि सहकारीणि यानि च। तान्येव व्यपदिश्यन्ते विभावाद्याख्यया रसे। आलम्बनोद्दीपनाख्ये विभावस्य भिदे उभे। आलम्बनौ च द्विविधौ विषयाश्रयभेदतः। रसस्य विषयः कृष्णस्तस्यानुभविताश्रयः। सचानुभविता प्रेम्णा यः श्रेष्ठोऽन्यस्पृहाकरः। उद्दीपनास्तु सम्बन्धि-

पदार्थाः कंसवैरिणः। अनुभावाः सात्त्विकाः स्युराङ्गिकाश्चेति ते द्विधा। स्तम्भः स्वेदोऽथ रोमाञ्च स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः। नृत्यं विलुठितं गानं श्वासहासादयोऽपि च आङ्गिका अनुभावास्ते यथायथमुदीरिताः। निर्वेदश्च विषादश्च दैन्यं ग्लानिस्तमो मदः। गर्वः शङ्का त्रासवेगा उन्मादापस्मृती तथा। व्याधिर्मोहो मृतिश्चैव आलस्यं जाड्यमित्यपि। व्रीडा वहित्था स्मरणं वितर्कश्चिन्तनं मतिः। हिंसौत्सुक्यत्वौग्र्यमर्षासूयाश्च धृतिचापले। निद्रा च सुप्तिरालस्यमितीमे व्यभिचारिणः। निर्वेदाद्यास्त्रयस्त्रिंशद्भावाः स्युर्व्यभिचारिणः। स्थायिनं वर्द्धयन्तो ये प्रादुःषन्ति तिरोऽपि च। आनुकूल्यात्मका याचिर्लिप्सोल्लासमधर्मिका। स स्थायी तारतम्येन रतिःप्रेमादिनामभाक्। रतिःप्रेमतथास्नेहः प्रणयो मानरागकौ। अनुरागमहाभावावेते भावक्रमा मताः। शान्तिः प्रीतिस्तथा सख्यं वात्सल्यं प्रियता च सः। ज्ञानादरस्वतुल्यत्वकृपावल्लभभावतः। शान्तः प्रीतस्तथा प्रेयान् वत्सलो मधुरो रसाः। सामान्याद्भक्तिशब्दोक्तः स्थायी भक्तिरसो मतः। विस्मयो हास्य उत्साहक्रोधभीतघृणाशुचः। ये चैते स्थायिनो भक्तेर्जातास्ते तत्र गौणकाः। अद्भुते हास्य वीरौ च रौद्रस्तद्वद्भयानकः। बीभत्सः करुणश्चैव तेषु गौणरसाः क्रमात्। श्रीकृष्णविषयत्वन्तु भक्तिद्वारात्र सम्मतम। क्वचित् स्वतोऽपि येन स्यात् स्थायिनो नहि दूषण"मिति ॥ १७ ॥ हतं दृष्ट्वेति। महोत्तमञ्चोपर्युपवेशात्। अतिदुर्जयत्वदर्शनं कुवलयापीडहननात् तेजोविशेषाभिव्यञ्जनाद्वा। मनस्वी महाशूरोऽपि तदेति ततः प्राक् तादृशभयाभावात् नृपेति कंसस्य तादृशोद्वेगात् प्रहर्षेण सम्बोधनम् ॥ १८ ॥ विचित्राणि विविधानि अद्भुतानि च वेशादीनि ययोस्तौ तत्र वेशस्तिलकादिः आभरणं तिलकमेव कटककुण्डलादि कृतोऽपि महायुद्धे तेषामम्लानत्वादि व्यञ्जनया कौशलविशेषो व्यञ्जितः। निरीक्षमाणानां मल्लादिदशदिधजनानां प्रभया अशनित्वादिरूपया स्वतेजसा मनःक्षिपन्तौ यथायथं विक्षिपन्तौ उत्तमवेशधारिणाविति नटविशेषणम् उत्तमास्तथा तथा प्रत्यापनसमर्था ये वेशा नानानेपथ्यानि तद्धारिणावित्येकस्य नानात्व प्रकाशमात्रेण तु कालभेदे दृष्टान्तः। यद्वा ऐन्द्रजालिकनट एवात्र दृष्टान्तः सच स्वाङ्गेन्द्रजालाभ्यं सत्यासत्यधर्मान् युगपद्दर्शयतीति ॥ १९ ॥ ये तु प्रतिकूलज्ञानव्यतिरिक्तास्तेषु तु साधारणानामपि परमप्रेमैव जातः किमुतासाधारणानामित्याह। निरीक्ष्येति। उत्तम पूरुषावित्यखिलसौन्दर्यवैदग्ध्यादिकं सूचितं मञ्चस्थिता इति निरीक्षणसम्यक्त्वं नागराः पौराः राष्ट्रिकाश्च जानपदा लोकाः सर्वेऽपीत्यर्थः। उत्कलितत्वं विकाशितत्वं पपुरित्यनेन नयनानां चसकत्वम् आननस्य च सौन्दर्यामृतनिधानपात्रत्वम्। आननं पपुरिति सौन्दर्यप्राचुर्यात्तेनाभेदोत्प्रेक्षया केवलाननांनिर्द्देशो दर्शने तत्प्राधान्यात् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मल्लानामिति तैर्व्याख्यातम्। दया करुण इत्यर्थः, सप्रेमभक्तिकः प्रीत्याख्यो रसः। तत्र मल्लानां परमशूरम्मन्यतया गर्व्वितानामशनितुल्यांगत्वेन हरेः परिज्ञानाद्विस्पर्द्धमानानां तदीयसलीलप्रवेशेनावज्ञातमिवात्मानं मन्यमानानां चाणुरादीनां 'क्रोधः', नृणां द्वेषिव्यतिरिक्तानां पौरादीनां लोकोत्तररूपविलासादिदर्शनेन 'विस्मयः'; स्त्रीणां 'प्रयताख्या' रतिर्व्यक्तैव; गोपानां श्रीदामादीनां स्वजनो वयस्यः, ततो गजरक्तमदबिन्दुदन्तादिजातेन विलक्षणवेशेन महाविक्रमभाजोऽपि श्रमाभिव्यञ्जकेन स्वेदेन च तेषां 'हासः'; असतां राज्ञां तस्य शास्तृत्वज्ञानाद्वीर्य्यातिशयदर्शनेन 'युद्धोत्साहः'; पित्रोर्देवकी–वसुदेवयोः श्रीगोपेन्द्र–वसुदेवयोर्वा मल्लादिदौरात्म्यज्ञानेन शिशुत्वात्तदीयमार्द्दवादिज्ञानेन च 'शोकः'; कंसस्य मूर्त्तो मृत्युर्मृत्युहेतुर्वा, तेन 'भयं' व्यक्तमेव; अविदुषामन्यनभिज्ञानां विकलत्वज्ञानेन 'जुगुप्सा', यद्वा, अविदुषां—सच्चिदानन्दविग्रहं तमजानतां प्राणाद्युपासकानां केषाञ्चिन्मुनिप्रायाणां विराट ब्रह्माण्डरूपम्, तेन विकारिपाञ्चभौतिकत्वमात्रदृष्ट्या 'जुगुप्सा', यद्वा, अविदुषामासुरप्रकृतीनां पवित्रम्मन्यानां केषाञ्चित् विराट विपरीता राजते स्वेदमदरक्ताद्यंकितत्वादशस्ततयेव दुष्टसत्त्वेषु प्रतिभानात् 'जुगुप्सा', योगिनामभेददृष्टीनां केवलज्ञानवतां परं तत्त्वं ब्रह्म; यद्वा, भेदाभेददृष्टीनां ज्ञानभक्तानां तत्त्वं ब्रह्म, परतत्त्वं परंब्रह्म चिदानन्दघनविग्रहस्तेन 'शान्तिः', वृष्णीनामुद्धवाक्रूरादीनां परमाराध्यस्तेन 'प्रीतिः' इति; अथवा—'रौद्रोऽद्भुतः शुचिरथ प्रिययुक्तहास्यो, वीरोऽथ वत्सलयुतः करुणो भयांकः। बीभत्ससंज्ञ उदितोऽथ तथैव शान्तः, प्रीतस्तथा दशरसाद्वियुताः क्रमेण ॥' अत्र शुचिः शृङ्गारः, प्रियेण प्रेयोनाम्ना रसेन युक्तो हास्यः, भयांको भयानकः। तत्र रसलक्षणम्—

'स्थायिभावो विभावानुभावैश्च व्यभिचारिभिः। स्वाद्यत्वं नीयमानोऽसौ रस इत्यभिधीयते ॥
कारणान्यथ कार्य्याणि सहकारीणि यानि च। तान्येव व्यपदिश्यन्ते विभावादिपदै रसे ॥
आलम्बनोद्दीपनाख्ये विभावस्य भिदे उभे। आलम्बनोऽपि द्विविधो विषयाश्रयभेदतः ॥
रसस्य विषयः कृष्णस्तस्यानुभविताश्रयः। उद्दीपनो बहुविधः प्रागल्भ्यं विक्रमो हरेः ॥
सौन्दर्य्य-गुण-सौरभ्य-नूपुर-स्वनितादिकः। अनुभावाः सात्त्विकाः स्युरांगिकाद्याश्च ते द्विधा ॥
स्तम्भः स्वेदाऽथ रोमाञ्चः स्वरभेदश्च वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥
भ्रूभंगः कुटिलेक्षा च भुजास्फालन-नर्त्तनम्। वक्रोक्तिश्वासभूमाद्याः कथिता आंगिकादयः ॥
निर्व्वेदाद्यास्त्रयस्त्रिंशत् कथ्यन्ते व्यभिचारिणः। स्थायिनं वर्द्धयन्तो ये प्रादुरन्तर्भवन्ति च ॥
क्रुद्विस्मयो रतिर्हासोत्साहौ शुग्भीजुगुप्सितम्। स्थायिनोऽमी रसेष्वष्टौ ज्ञेया रौद्राद्भुतादिषु ॥

प्रियता-सख्य-वात्सल्य-शान्ति-प्रीतय इत्यतः । पाञ्चविध्यादिह रतेः स्थायिनो द्वादशोदिताः ॥
शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् । रुचिभिश्चित्तमासृण्यकृदसौ रतिरुच्यते ॥
स मुख्यगौणभेदेन कथितो द्विविधो रसः । शृङ्गारोऽत्र तथा प्रेयान् वत्सलः शान्त इत्यसौ ॥
प्रीतश्च पञ्चधा मुख्यो रतेः श्रेष्ठ्येन मुख्यता ।
रौद्रोऽद्भुतस्तथा हास्यो वीरः करुण-भीषणैः । बीभत्सः सप्त गौणाः स्युः क्रोधादेर्यदिहोन्नतिः ॥’

अथ श्लोकोक्तक्रमेण रसाः संक्षेपेण लिख्यन्ते । तत्र रौद्रे वज्रतुल्यांगत्वात् परमोज्ज्वलतया विदितो हरिः क्रोधस्य विषयः, बाढमवज्ञातम्मन्या मल्ला आश्रयः, परावज्ञादिभिश्चित्तोज्ज्वलनं ‘क्रोधः’, सोऽत्र स्थायी भावः; अद्भुते लोकोत्तर—रूपलीलाद्यास्पदतया विदितो हरिर्विस्मयस्य विषयः; प्रायेणानुकूलाः पौरादयो नरा आश्रयः, लोकोत्तराश्चर्यदर्शनादिनाचित्तस्य विस्तारो ‘विस्मयः’, सोऽत्र स्थायी; शृङ्गारे कन्दर्पकोटिविलासवत्तया विदितोऽयं प्रियतााया विषयः, युवत्य आश्रयः; रतिरेव सम्भोगहेतुतां गता । ‘प्रियता’, मात्र स्थायी भावः । हास्ये स्वजनतया विदितः करिमदरक्तदन्तैर्विलक्षणवेशचेष्टितोऽयं हासस्य विषयः, श्रीदामादय आश्रयः; तादृग्वेषादिदर्शनाच्चित्तस्योत्फुल्लता हासः, सोऽत्र स्थायी । प्रेयसि स्वजनतया वयोवेषादिभिः साम्येन विदितोऽयं सख्यस्य विषयः, श्रीदामाद्याः सखाय आश्रयः; सम्भ्रमानुग्रहाभ्यां शून्या विस्रम्भरूपा रतिः ‘सख्यम्’, तदत्र स्थायी, तेन गोपानां हास्यः प्रेयांश्चेति रसद्वयम् , वीरे सर्व्वशास्तृत्वान्महाविक्रमशालित्वेन विदितोऽयमुत्साहस्य विषयः, कंससखा असन्तः क्षितिभुज आश्रयः, शौर्य्यादिदर्शनेन परमोत्कटयुद्धेच्छा ‘उत्साहः’, सोऽत्र स्थायी । करुणेशिशुत्वात् परमानिष्टप्राप्तेः पदतया विदितोऽयं शोकस्य विषयः, तद्वेदिता पित्रादिराश्रयः, तादृशत्वज्ञानेन चित्तक्लेशभरः ‘शोकः’, सोऽत्र स्थायी । वत्सले पुत्रबुद्धया विदितोऽयं वात्सल्यस्य विषयः, पित्रादिराश्रयः, रतिरेवानुग्रहमयी, ‘वात्सल्यम्’, तदत्र स्थायी, तेन पित्रोश्च करुणो वत्सलश्चेति रसद्वयम् । भयानके मृत्युरूपत्वान्महाघोरतया विदितोऽयं भयस्य विषयः, सापराधो भीरुस्वभावः कंसादय्याश्रयः, घोरदर्शनापरादिना जातं चित्तस्य चाञ्चल्यं ‘भयम्’, तरत्र स्थायी । बीभत्से स्वेद, मद-रक्ताद्याञ्चितत्वेन कुत्सितास्पदतया विदितोऽयं जुगुप्साया विषयः, अविद्वांसोऽत्रासुरसत्त्वाज्जुगुप्साया आश्रयः, भक्तैः परमशोभास्पदत्वे ज्ञायमानेऽपि तथाभूते हरौ तादृशी बुद्धिरासुरसत्त्वानामेवाहृद्याद्यनुभवादिना चित्तस्य निमीलनं जुगुप्सा, सात्र स्थायी । शान्ते परमात्मतया विदितः सच्चिदानन्दघनविग्रहो भगवान् शान्तेर्विषयः, योगिन आश्रयः, रामात्मिका रतिरेव ‘शान्तिः’, सात्र स्थायी । प्रीतेः परमदेवतात्वात् प्रभुत्वेन विदितोऽयं प्रीतेर्विषयः श्रीमदुद्धवाक्रूरादय आश्रयः, सम्भ्रमगौरवादिमयी रतिरेव ‘प्रीतिः’, सात्र स्थायी, प्रतिरसमुद्दीपनानुभावादयो विस्तरभयान्न प्रपञ्चिताः । किञ्च, गोपानां प्रेयान् रसस्तथा पित्रोर्वत्सलोरसश्चात्र व्यक्तोऽपि स्वामिपादैः प्रत्येकमेकैकरसाश्रयकथनप्रस्तावान्नोद्दिष्टः, तस्मिन्नवसरे हि हास्य-करुणयोरेव योग्यत्वात् , प्रेयोवत्सलयोर्विरलप्रचारत्वाच्च । केचित्तु ब्रह्मादीनामपि ध्यानागोचरचरणनखमयूखः श्रीभगवान् ‘गोपानां स्वजनः’ इति श्रोतृणामेव हास्यरसः, तथा लोकोत्तरमहाशक्तिवृन्दपूर्णोऽप्यत्यज्ञानां विकल इति श्रोतृणामेव बीभत्सरस इति प्राहुः । तत्तु न समञ्जसम् । किञ्च, रौद्र-वीर-भयानक-बीभत्साख्या रसा रतिसम्बन्धाभावामिह रसाभासा एवेति । रसानां प्रपञ्चस्तु रसामृत सिन्धौ सुव्यक्तः ॥ १७ ॥ हतं दृष्ट्वेति महोच्चमञ्चोपर्य्युपवेशात्तौ चातिदुर्ज्जयो दृष्ट्वा, अतिदुर्ज्जयत्वं कुवलयापीडहननात् स्वभावादेव वा, मनस्वी महाशूरोऽपि भृशमत्यर्थम् । तदेति ततः प्राक् , तादृशभयाभावात् , नृपेति कंसस्य तादृशोद्वेगेन प्रहर्षात् सम्बोधनम् ॥ १८ ॥ रंगस्थालान्तः प्राप्तौ रेजतुः शुशुभाते, महाभुजाविति सर्व्वांगसौष्ठवमुपलक्षयति, तेन सौन्दर्य्यं बलिष्ठत्वं चोक्तम् ; विचित्राणि विविधानि अद्भुतानि वा वेषादीनि ययोस्तौ, तत्र वेषच्छन्दः, मनोहरस्रगादीनि वेषसाधनानि, निरीक्षमाणानां जनानां सर्व्वेषां प्रभया महाकान्त्या मनःक्षिपन्तौ हरन्ताविति परमगोपने पथ्यं वा, आभरणान्यलंकाराः, उत्तमवेषधारिणाविति नटविशेषणम् , अन्यथा सहजतटवेशाभयोरुत्तमवेशत्वेन तदुपमानत्वासंगति ॥ १९ ॥ उत्तमपुरुषावित्यखिलसौन्दर्य्य-माधुर्य्य-वैदग्ध्यादिकं सूचितम् । मञ्चास्थिता इति निरीक्षणसम्यक्त्वम् , नागराः पौरा राष्ट्रिकाश्च जानपदा लोकाः सर्व्वेऽपीत्यर्थः, इति सर्व्वेषामेवाविशेषेण तादृशत्वसम्पत्तेः, अनेरौष्ण्यवत्तस्य सौन्दर्य्यादीनां सहजत्वम् । उत्कलितानि विकसितानीति प्रहर्षवेगलक्षणमतएव न तृप्ताः । पपुरित्यनेन नयनानां चषकत्वं भृङ्गत्वं वा, आननस्य वामृतमयत्वं पद्मत्वं वा ध्वनितम् । तेन दर्शने परमासक्तिः न तृप्ता इत्यनेनामृतादप्युत्कर्षः सिद्ध एव । यद्यपि श्रीमदंगानां सर्व्वेषामेव महासौन्दर्य्यम् , तथाप्याननं पपुरिति स्वभावेनादौ तस्मिन्नेव दृष्टिनिपातात् किंवा तस्य सौन्दर्य्यविशेषात् ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विराट् देहमात्रबुद्धिविषयः ॥ १७–२४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्र शृङ्गारादिरसकदम्बैकमूर्त्तिर्भगवांस्तत्तदभिप्रायानुसारेण बभौ न साकल्येन सर्वेषामित्याह । मल्लानामिति । मल्लादीनां दशानां द्रष्टृणामशन्यादिरूपेण दशधा विदितः सन् साग्रजो रङ्गं रङ्गस्थानं गत इत्यन्वयः अशनिवद्रौद्रः स्त्रीणां

मूर्त्तिमान्स्मरः विदितः असतां दुष्टानां क्षितिभृतां शास्ता स्वपित्रोः शिशुरनेन करुणो रसः प्रदर्शितो भवति भोजपतेः कंसस्य मृत्युरनेन भयानकरसः अविदुषां देहात्माभिमानिनां विराट् देहमात्रबुद्धिविषयः योगिनां परमात्मोपासनात्मकयोगनिष्ठानां परं तत्त्वमिति विदितः स्वोपास्यवस्तुत्वेन विदित इत्यर्थः ।। १७ ।। हतमिति । हतं कुवलयापीडे दृष्ट्वा ततस्तौ रामकृष्णावतिदुर्जयौविति ज्ञात्वा मनस्वी धीरोऽपि कंसः हे नृप ! नितरामुद्विविजे भीतो बभूव ।। १८ ।। ताविति विचित्रो वेषः तथा आभरणानि स्रजश्च ययोस्तौ रामकृष्णौ स्वकान्त्या पश्यतां जनानां मनःक्षिपन्तावपहरन्तौ क्षोभयन्तौ वा रेजतुः यथोत्तमवेषधारिणौ नटौ तद्वत् ।।१९।। निरीक्ष्येति । हे नृप ! पौरा जानपदाश्च जनाः तावुत्तमपूरुषौ निरीस्यावस्थिता निश्चलाः प्रहर्षवेगेन उत्कलितान्युज्जृम्भितानीक्षणान्याननानि च येषां ते नयनैर्लावण्यपानपात्रभूतैस्तयोराननं पपुराननगतलावण्यरसं पीतवन्त इत्यर्थः । परन्तु न तृप्ता निराकाङ्क्षा न बभूवुरित्यर्थः ।। २० ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मल्लानामशनिरिव भासमानः उपर्यप्येवं योगिनां परंतत्त्वं ब्रह्म ब्रह्म वेदस्तपस्तत्त्वमिति च भोजपतेः कंसस्य मृत्युरिव नित्यमेवेति योज्यम् ।। १७ ।। मनस्वी शूरोऽपि उद्विविजे ओ विजी भयचलनयोरिति धातुः भीतोऽभूत् ।। १८ ।। देहप्रभया निरीक्षतां मनः क्षिपन्तौ आकर्षन्तौ ।। १९ ।। नागराः नगरवासिनः राष्ट्राः जनपदवासिनः प्रहर्षवेगेन उत्कलितमुत्फुल्लमीक्षणमाननञ्च येषां ते तथा ।। २०–२१ ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

मल्लानामित्यादि । अविदुषां तन्महिमानभिज्ञानाम्, विराट् राजनं राट् दीप्तिः, विगता राट् यस्य स तथा, भीत इति यावत् । एतेन वीभत्सरसो बोद्धव्यः । श्रीकृष्णं प्रति यस्य भीतत्व ज्ञानं स एव जुगुप्साविषयः—जुगुप्साख्यस्य स्थायिन एकनिष्ठत्वात् । स एव तथा न तु श्रीकृष्णः । यद्वा, अविदुषां श्रीकृष्णमाधुर्यमजानताम् , केवलं पुरुष विग्रहत्वेनैव ज्ञानतां विराडिति। विदितः । तथाभूते परमप्रेमास्पदे विराड्भावनं जुगुप्साविषयत्वाद वीभत्सरसो भवतीति दशविधरससिद्धिः ।। १७–२२ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मल्लानामिति । अविदुषां तन्महिमाविज्ञानां विराट् राजमानं राट् दीप्तिः, विगता राट् यस्य स तथा भीत इति यावत्, अनेन वीभत्सरसो बोद्धव्यः । श्रीकृष्णं प्रति भीतत्वज्ञानमेव जुगुप्साविषयः । यद्वा, अविदुषां श्रीकृष्णतत्त्वमजानतां केवलं विराडिति विराड्रूप एवायमिति विदितः । तथाभूते परमप्रेमास्पदे विराड् भावं जुगुप्सा विषयत्वाद् वीभत्सरसो भवितुमर्हतीति दश-रस सिद्धौ स्वाभिमत-सङ्गतिः ।। १७-२२ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथ तत्र रङ्गभूमौ स्थितेषु नानाविधजनसमुदायेषु श्रुतिप्रथितमहारसस्वरूपः स्वयं भगवानयमन्तः करणानुरूपमेव स्फुरति स्मेति वदन्नयमेव सर्वोपनिषत्सारार्थो मूर्त इति साक्षादिव दर्शयति । मल्लानां पर्वतोपशरीराणां चाणूरादीनामशनिरिव विदितोऽभूदित्येवमेव सर्वत्रान्वयः क्वचित् तृतीयार्थे क्वचित् सम्बन्धे च षष्ठ्यः अतिसुकुमारसुशीतलसुमधुराङ्गोऽपि स पर्वतैर्महाकठोरसुसंतापककटुतराङ्गो वज्र इव मल्लैर्द्वेषदुष्टान्तकरणैरनुभूतः पित्तदूषितरसनैर्मत्स्यण्डिकापिण्ड इवातितिक्त इति तैस्तत्सवासनैस्तत्रत्यैः सभ्यैरपि दृष्ट्वापि भगवतः स्वरूपं नास्वादितमिति तेषु रसाभास एव न तु रसः नृणां माथुराणां द्वेषादिराहित्यादुत्पत्त्यैव प्रेमसामान्यवतां नरवरः नरेष्वसाधारणैरतिचमत्कारकरूपगुणलीलादिभिः श्रेष्ठ इति तैः शुद्धसत्त्वमयान्तःकरणैस्तस्य नरवरत्वं स्वरूपमेवास्वादितमिति तेषु विस्मयरसः स्त्रीणां जनन्यादिव्यतिरिक्तानां युवतीनां स्मर इति कृष्णविशयककामस्य प्राकृतत्वाभावात् तासां माथुरत्वेन प्रेमवत्त्वात् ताभिस्तस्य साक्षान्मन्मथमन्मथत्वं स्वरूपमेवास्वादितमिति तासूज्ज्वलो रसः अत्रैव मूर्तिमानिति विशेषणोपन्यासेनास्यैव स्वरूपस्याङ्गित्वं ध्वनितं गोपानां स्वजन इति तैरपि स्वरूपमास्वादितं यतो गोपमित्रत्वं खलु तस्य स्वरूपमेवेति तेषु सख्यरसो हास्यरसश्च असतामसाधूनां क्षितिभुजां श्लेषेण सज्जनवतीं पृथ्वीं ग्रसतामिव भक्तापराधिनां तेषां शास्ता अन्तकः इत्यन्तकत्वं सर्वसुहृदः सर्वानन्दकन्दस्य कृष्णस्य न स्वरूपमतस्तैर्मल्लैरिव तन्नास्वादितमिति तेषु रौद्ररसाभास एव स्वपित्रोर्नन्दवसुदेवयोर्वसुदेवदेवक्योर्वा शिशुरिति ताभ्यां च स्वरूपमास्वादितं यतो नन्दात्मजत्वं वसुदेवात्मजत्वं च तस्य स्वरूपमेवेति तत्र वात्सल्यरसो विजिघांसुलोकदर्शनात् करुणरसश्च भोजपतेः कंसस्य मृत्युरिति मृत्युत्वं माधुर्य्यसुधावपुषस्य कृष्णस्य न स्वरूपमतस्तेन तस्यतन्नास्वादितमिति तस्मिन् भयानकरसाभासः अविदुषां कंसपुरोहितादीनामपराधिनां विराट् व्यष्टिः प्राकृतो मनुष्यः हंहो अयमेव किं परमेश्वर इत्युच्यते भ्रान्तैरयन्तु पारदारिकत्वेन गवादिघातित्वेन च श्रुतचरः संप्रति प्राण्यस्थिरक्तकलिलगात्रो मनुष्येष्वप्यनाचारो घृणास्पदी भवत्यस्मन्नेत्राणामिति व्याहरत्सु महापापिष्ठेष्वावेशाभावात् कंसादिभ्योऽप्यधर्मेषु मन्दभाग्येषु तेषु वीभत्सरसाभासः योगिनां सनकादीनां परं तत्त्वं मूर्तं परं ब्रह्मेति तस्य स्वरूपम् तैरास्वादितमिति तेषु शान्तरसः वृष्णीनां परदेवता पास्यपरमेश्वर इति तत्स्वरूपं तैरास्वादितमिति तेषु दास्यरस इत्येवं तत्र दशविधेषु जनसमुदायेपु

चतुर्णां विमुखत्वेन तद्रसास्वादनासामर्थ्यात् षड्भिरष्टौ रसाः स्वादिता इत्यतो "रसो वै सः रसं ह्येवायं लब्ध्वानन्दो भवती"ति वै निश्चितमेव सः श्रीभागवतीयदशमस्कन्धदर्शितायां माथुरङ्गभूमौ प्रसिद्धः कृष्ण एव रसः तं रसं कृष्णमेवायमानन्दमयोऽपि लब्ध्वानन्दी आनन्दभूमवान् भवतीति रसश्रुतिरेवं व्याख्येया ।। १७ ।। मनस्वी महाशूरोऽपि यद्वा पूर्वत एव चिन्ताकुलोऽपि तदानीमतिचिन्ताकातरो बभूव ।। १८ ।। मनः स्पृशन्तौ आश्लिष्य मनसि लग्नीभूय तिष्ठन्तावित्यर्थः ।। १९ ।। प्रहर्षवेगेन सूर्योदयशैघ्र्येणेव उत्कलितानि विकसितानि ईक्षणानि आननानि च कमलानि येषां ते तदाननमाधुर्य्यं पपुः ।। २० ।।

गूढार्थदीपिनी

रङ्गं मल्लभूमिं गतः प्राप्तः सन् श्रीकृष्णः दशधा विदितः प्रतीतो बभूवेत्यन्वयः । मति बुद्धीति वर्तमाने क्तः अतः कर्तरि षष्ठी शेषे वा । विकलः अपर्याप्तो राजते इति विराट् । अत्र क्रमेण एकस्मिन्नेव नवरसानामभिव्यक्तिः ।। १७ ।। मनस्वी धीरोऽपि कंसः । उद्विविजे भयकम्पितोऽभूत् ।। १८ ।। विचित्रवेषः आभरणादीनि च ययोस्तौ । प्रभया देहकान्त्या मनः क्षिपन्तौ आकर्षन्तौ ।। १९ ।। प्रहर्षवेगेन उत्कलितानि विकसितानि ईक्षणानि आननानि येषां ते राष्ट्रिका अन्यदेशीयाः सर्वेऽपि । इकारघटितः पाठः ।। २० ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रङ्गं गते भगवति मल्लादीनां स्वस्वबुद्ध्यनुसारतो नानाप्रतीतयो जाता इत्याह मल्लानामशनिरिति । विदितः नृणां नरवर इति विदितः स्त्रीणां मूर्तिमान् स्मर इति विदितः गोपानां स्वजन इति विदितः असतां शास्तेति विदितः स्वपित्रोः शिशुरिति विदितः भोजपतेः मृत्युरिति विदितः अविदुषां देहात्माभिमानिनां विराट् देहात्माभिमानीति विदितः योगिनां ज्ञानभक्त्यादियोगवतां तत्त्वज्ञानां परं सर्ववेदैकवेद्यं तत्त्वमिति विदितः वृष्णीनां परदेवता अस्मद्रक्षणाय परदेवतास्मत्सु बन्धुरूपेण वर्तते इति विदितः सन् साग्रजो रङ्गगतोऽभूदित्यर्थः । एवं श्रीकृष्णे अन्या अपि प्रतीतयः मनुष्यत्वजारत्वदेवत्वनारायणां शत्वादिकाः उक्ताः वक्ष्यमाणाश्चातत्त्वज्ञानां सन्तीति ज्ञेयम् ।। १७ ।। विशेषतः कंसस्तु तौ रामकृष्णौ दुर्जयौ दृष्ट्वा भृशमुद्विविजे भीतो बभूव ।। १८–१९ ।। तयोराननं नयनैः पपुः तथापि न तृप्ताः ।। २० ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कौतुक एतत्तल इति कौतुकतोऽवलोककलोकानामेवं देवः सतामसतां च रौद्रोऽद्भुतश्च शृगारो हास्यं वीरो दया तथा भयानकश्च बीभत्सः शान्तः सप्रेमभक्तिक इत्युक्तनवरसरुचिरोऽभादिति भाषते । मल्लानामिति । मल्लानां चाणूरप्रमुखानामशनिर्वज्रो वा निर्घातो वा तथा भासमानो ये मल्ला नाम तेषां शनिः शनैश्चरएवद्भासमानः । मल्लानामशनिरित्येकं पदं । मल्लेषु ये नामा अनम्रास्तेषां शनिरिति वा । वज्राशन्यादिकं शक्यं परिहर्तुं विनाराधनेन न न बाधा शनेर्गच्छेदिति शनिरिवेति वा । आशन्यादिरपि शन्यादिदुर्ग्रहहेतुकः । तथा प्रपञ्चितं पञ्चमे । तत्र उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिंशन्मासान्विलम्बमानः सर्वानेवानुपुर्व्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकर इत्यादिना । नृणां नरवरः स्त्रीणां मूर्तिमान्स्वानङ्गतां त्यक्त्वाकारं भृत्वायातः स्मर इवायताक्षीणां गोपानां स्वजनो बन्धुरसतां क्षितिमृतां शास्ता । उणादेरनिट्कस्वात् । शासिता स्वपित्रोर्देवकीवसुदेवयोर्यशोदानन्दयोर्वा शिशुर्बालो भोजपतेः कंसस्य मृत्युर्विधातृविवितो ब्रह्मणा सम्प्रार्थ्याभिव्यक्तीकृतो योगिनां नारदादीनां सदैव परं तत्त्वं साक्षान्नारायणो वृष्णीनां च पतिः प्रभुः साग्रजोऽच्युतो रङ्गे शुशुभेऽशोभत ।। १७ ।। मनस्यपि स्थिरः प्रशस्तचित्तोऽपि तदा भृशमुद्विविजे भीतोऽभूत् ।। १८ ।। निरीक्षतां निरीक्षमाणानां प्रभया मनः क्षिपन्तौ कर्षयन्तौ ।। १९ ।। नागरा नगरागाराश्च राष्ट्रका जनपदस्थाश्च प्रहर्षवेगेन सन्तोषातिशयेनोत्कलितानि विकसितानीक्षणानि नयनानि तथाऽऽननानि येषां ते नयनैस्तदाननं न तृप्ता ययुस्तथाऽपि न तृप्ता इत्यन्वयो ता ।। २० ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तादृशवेषेण प्रवेशस्य प्रयोजनं वदन् भगवतः स्वरूपं बलभद्रसहितं सर्वैर्दृष्टं यथाधिकारं नानाभावान् जनयंतीत्याह । मल्लानामशनिरिति । "प्रमेयेण निरोधोऽत्र कर्त्तव्यो हरिणा भृशम् । लोकाश्च दशधा भिन्नास्ततो दशविधोऽभवत् । यस्य भावो यथा लोके तस्यानुसरणे कृते । निरोधो जायते सम्यक् अन्यथा बन्धनं भवेत् गुणा नवविधाः प्रोक्तास्तदभावस्तथापरः । शृङ्गारादिरसाश्चैव तेषामेव निरूपकाः । राजसास्त्रिविधाः पूर्वं तामसाश्च ततः पराः आध्यत्मिकास्तथा पूर्वं दैविकास्तु ततःपरम् । रौद्रोऽद्भुतश्च शृङ्गारो हास्यं वीरो दया तथा । भयानकोऽपि बीभत्सः शान्तो भक्तिरसस्तथा । एतान् दर्शयितुं भावान् हरिरेवं बभौ महान् । अतस्तस्मिन् गुणा एव सर्वे भावा न चान्यथा" आदौ मल्लाः प्रतियोगिनमन्वेषमाणाः भगवान्न प्रतियोगी किं तु विसदृश इति सोऽपि सर्वथा मारक एवेति ज्ञातवन्त इत्याह । मल्लानामशनिरिति । विदितः साग्रजो बलभद्रसहितः रङ्गं गत इति यत्र हि विद्युत्पतति वृष्टिश्च तत्र न समीचीनमिति ज्ञात्वा विद्युतोऽतिवेगात् पलायनेऽप्यशक्ता जाता इत्यर्थः । तेन मल्लस्वभावा निरुद्धाः

ये रौद्रप्रकृतयः ततोऽन्ये साधारणाः राजसाः भगवन्तमद्भुतं ज्ञातवन्त इत्याह। नृणां नरवर इति। अद्भुतो नरः नरश्रेष्ठ इति भगवन्तं दृष्ट्वा अद्भुतदर्शनामिति अद्भुतरस एवोत्पन्नः साधारणा स्त्वद्भुतरसेनैव वशे भवन्तीति सर्वत्रेति विदितो रङ्गं गत इति सम्बध्यते तादृशावस्थायामपि स्त्रीणां तामससात्त्विकीनां भगवान्स्वफलस्वरूप एव प्रतिभाव इत्याह। स्त्रीणामिति। द्रष्टुमागतानां ताः कामपूतनाः कदापि स्वस्वामिनं न दृष्टवत्यः स्मरो हि स्मर्त्तव्यात्मा स इदानीं मूर्तिश्चेज्जातस्तदा सनाथा जाताः अतः परं सर्वैरेवोन्द्रियैः शरीरेणान्तः करणेन च सेव्यो जात इति एवमेकंविधास्त्रयो निरूपिताः सर्वाधमाः मल्ला उत्तमाः स्त्रिय इति पुष्टिमार्गे क्रम उक्तः आधिभौतिकाभिमानिनामेषा रीतिरिति एवं सामर्थ्यप्रकटनेऽपि गोपानां राजसतामसानां स्वजनः अस्मदीय एवायं बन्धुः परमुत्कर्षापन्नः अतो भगवता यो वेषः कृतो विलक्षणः स हास्यरसजनको जातः यथा स्वकीये वेषे कृते आध्यात्मिके एते देहस्वरूपाः इन्द्रियरूपास्त्वग्रिमाः आत्मरूपास्तत इति दम्यत्वेन इन्द्रियतुल्यता राज्ञांभगवन्तं दृष्ट्वा तेषां वीररस उत्पन्न इत्याह। असता क्षितिभुजां शास्तेति। सन्तो ये ते वृष्णित्वेन वक्तव्याः भक्त्यधिकारिणः ये च लौकिकाः असन्तस्ते पामरा एव बीभत्सरसे वक्तव्याः ये पुनः राजसराजसाः ते राजसभावसिद्ध्यर्थं क्षितिभुजउच्यन्ते वीररसस्तेषामेव भगवन्तं दृष्ट्वा युद्धार्थं बुद्धिस्तेषामुत्पन्ना परमयं शास्तेति तेषां न प्रवृत्तिः वीररसस्तूत्पद्यत एवेति रसोत्तमत्वार्थमेवमुक्तं यथा हीनस्यापि पुरुषस्य महाराजावरोधे दृष्टे शृङ्गाररस उत्पद्यत एव परं तासां नोत्पद्यते अधमबुद्धेर्बाधकत्वात् स्वस्मात्तत्रोत्कर्षबुद्धिः सर्वत्र रसपोषिका अतो वीराणामसतां विचाररहितानां दृप्तानां शास्तृत्वप्रतीतावपि वीररसो युक्त एव यथा स्त्रीणां स्नेहो भगवति तथैव ततोऽप्यधिको वसुदेवदेवक्योः स्नेहः परं तमः अज्ञानात्मकमिति कामस्तत्र प्रयोजकः अत्र तु मोह इति मोहांशे राजसत्वं स्नेहांशस्तु सर्वत्र सात्त्विक एव लौकिकत्वाद्राजसत्वं निषिद्धत्वात्तामसत्वं विहितत्वात्सात्त्विकत्वं चेति स्नेहे त्रयो भेदाः तत्तदधिकारिणां तथैव निरोध उक्तः स्वपित्रोर्वसुदेवदेवक्योः शिशुर्बालक एव करुणापरपर्यायो दयारस उत्पन्नः स हि स्नेहस्यान्तरङ्गं भवति सा दया करुणारूपा स्नेहधर्मात् बालक एवेति तेषा शिशुरेव प्रतिभातः सात्त्वकान् गणयति ये हि मुक्त्यधिकारिणः अलौकिकाः ते भयबीभत्सशान्तरसेष्वधिक्रियन्ते तत्रानुपदमेवमुक्तिर्भविष्यतीति दुष्टकर्मकर्तेति कंसः तामससात्त्विकः देहाधिष्ठातृदेवतेव प्राज्ञ इव निरूप्यते। मृत्युर्भोजपतेरिति। मृत्युर्भयात्मकः न हि ततोऽधिकं भयमस्ति लोकन्यायेन नरकापेक्षयापि मृत्युरेव महान् भोजानां पतिरिति महत्त्वं सात्त्विकत्वार्थमुक्तम्। विराडविदुषामिति। ये हि भगवत्स्वरूपनिष्ठा भक्ताः राजससात्त्विकास्तेषां स्नेहात् रुधिरमदविन्दुभिः कृत्वा बीभत्सरस उत्पद्यते यथा स्वपुत्रादौ असद्द्रव्यसम्बद्धे विचिकित्सा भवति अन्यथा तद्दूरीकरणार्थं प्रवृत्तिर्न स्यात् निन्दा तु भगवल्लीलाऽपरिज्ञानात् उत्कृत्योत्कृत्य क्षितिमित्यादिकमपि महतामेव बीभत्सरसजनकं न तु प्राकृतानाम् अन्यथा निरोधे ते न वक्तव्याः स्युः न ह्यतिप्राकृताः त्यक्तव्या एव भगवानिति बुद्धियुक्ताः निरोधाधिकारिणो भवन्तिः विराट्शब्दः शोभाभाववाचकः विगतराजनरूपः न तु प्रसिद्धः अदृष्टत्वादसंमतत्वाच्च न हि तत्स्वरूपज्ञा अविदुषो भवन्ति परं योगिनो हि सात्त्विकसात्त्विकाः प्रवृत्तिस्वभावत्वान्न गुणातीताः तेषां स्वेष्टसिद्ध्यर्थमात्मत्वेन च स्थुरणात्प्रकारद्वयेन च स्नेहः अतो योगिनां परमेव तत्त्वं पुरुषोत्तमरूपं तेषां सर्वं तत्त्वात्मकमित्यात्मापि तत्त्वरूपो भवति योगसांख्ययोरेयैषा व्यवस्था परत्वं परमकाष्ठापन्नत्वं वृष्णयो हि यादवा भगवदीया गुणातीताः येषां सात्त्विकं तेषां परमनिरोधोवक्तव्यः शय्यासनाटनालापेति तेषां भगवति परत्व स्वामित्वं देवतात्वं च विदितं जातं दासस्य हि स्वामी नियामकः स लौकिकोऽपि भवतीति तद्व्यावृत्त्यर्थं देवतापदं स्वस्मिन् अलौकिक बुद्धौ हीनत्वाभावात् दृढा भक्तिर्न भविष्यतीति स्वस्मिन प्राकृतत्वबुद्धिरेव अतः परे देवतात्वं भगवति युक्तं भगवांस्तु यादृशस्तादृश एव सर्वविलक्षणः सर्वरूपश्चेति अत उक्तमिति विदित इति रङ्गस्थानं गतः यत्र सर्वेषामेव रसः पुष्टो भवति यद्यपि शान्तरसस्य न विशेषाभिनयः तथापि तथोपवेशनेन सामान्याभिनयोऽस्त्येव अष्टौ नाट्ये रसा इति विशेषाभिप्रायं भक्तिरसोऽपि रसवृष्टिवत् निपुणैरभिनेय इति सर्वेषामेवार्थे रङ्गं गतः साग्रजो बलभद्रसहितः समानतया सर्वत्र निरूपयन् अत्र गौणत्वार्थं सहभावमेवोक्तवान् अन्यथा द्विवचनेनैव वदेत् वेदसहभावोऽपि भगवति वक्तव्यः अलौकिकत्वाय तत्रापि सर्वरससबन्धे पित्रोरित्यादि न सामञ्जस्येन युक्तं भवेत् गोपानामपि लीलाया अकृतत्वात् न हास्यरसत्वं तस्मादसर्वत्वात् सहभाव एवोक्तः ॥ १७ ॥ रसोत्पत्तौ तत्तद्बुद्धिर्योग्यत्वेन निरूपिता फलमुखत्वाय प्रधानक्रमेण कंसस्यादौ भयमाह। हतं कुवलयापीडमिति। स हि ज्ञातवान् वञ्चयित्वा समायास्यतीति तत्र मारयित्वा समागत इति यद्यपि महाशूरः राजापि तथापि भृशमुद्विविजे यदि गजो हतः अशस्त्रेण तर्ह्यन्यानपि मारयिष्यतीति युक्तिः प्रमाणमाह। दृष्ट्वा तावपि दुर्ज्जयाविति। मनसा दृष्ट्या च एतौ दुर्ज्जयाविति प्रतिभाति मया च यत्नः कर्त्तव्यः कृतश्च भूयान्अपकृतश्च पित्रादिवन्धनेन अतो मारयिष्यत्येव नान्यथेति भृशमुद्वेगः दुःखेन जयो ययोरिति नात्र योगो वक्तव्यः किं तु अजेयावित्येव रूढोऽर्थः नृपेति सम्बोधनं शत्रोस्तथात्वदर्शनात् विश्वासार्थम्॥ १८॥ एवं प्रधानस्य रसाविर्भावमुक्त्वा मल्लानामतिकठिनानां भगवतो गुणश्रवणमपि अधिकमपेक्ष्यत इति तान् परित्यज्य शिष्टानां रसाविर्भावो जात इत्याह। तौ रेजतुरिति। निरीक्षतां प्रभया मनः क्षिपन्तौ रेजतुरिति। मनो हि प्रतिबन्धकं क्षणेन रसान्तरमप्युत्पादयेत् अतस्तस्याक्षेपो वक्तव्यः यथा नोत्पादयेदिति प्रतिबन्धकनिवृत्त्यर्थं प्रथमतो भगवच्छोभावर्णनं शोभायामुभयोस्तुल्यता यथा नीलमुक्तामणी नटवदेव भगवन्तौ रूपान्तरं गृहीतवन्तौ तौ चेद्रङ्गगतौ भवतः वेषः सार्थको भवतीति परमार्थतः लोकेऽपि रङ्गस्थान एव नटोत्तमता नान्यत्र अतो रङ्गगतौ रेजतुः पूर्वापेक्षयापि नन्वयं रङ्गः कृत्रिमः कथमत्र रमणमिति चेत्तत्राह। महाभुजाविति। तथापि भुजाभ्यामेव सर्वं

निराकर्त्तव्या इति युक्तैव शोभा ननु तथापि ये रसानभिज्ञाः प्राकृताः शुद्धस्वाङ्गरसं न जानन्ति तेषां कथं रसोत्पत्तिरियतः आह । विचित्रवेषाभरणस्रगम्बराविति । विचित्रो वेषो यथा भवति तथा आभरणानि स्रजः अम्बराणि च ययोः त्रिविधायथाभरणानि वैचित्र्यं जनयन्तीति अन्येषामपि रसयोग्यता नन्वेतयोः नटवद्रूपान्तरग्रहणमिति हि महतां प्रतीति : न सर्वेषां तत्कथं नटबुद्ध्यभावात् रसोत्पत्तिरिति चेत्तत्राह । यथा नटाविति । नटवदेव तदानीमभिनय कुरुतः अतः सर्वेषामेव नटप्रतीतिः न तु स्व भाविकाविव अपूर्वदर्शनात्तुत्तयोः कथं न भवेदित्याशङ्क्याह । उत्तमवेषधारिणाविति । उत्तमवेषं धारयन्तौ इति नटाभिनयो न स्वाभाविकोऽतः सर्वेषामेव स्वप्रभया मनोहरणं युक्तम् ।। १९ ।। ततस्तेषां रस आविर्भूत इति वक्तुं भगवति प्रेमपूर्वकमवलोकनमाह । निरीक्ष्येति । पुरुषमात्रमपि सुन्दरं दृष्ट्वा प्रमोदो भवेदेतौ तु पुरुषोत्तमौ उत्तमः पुरुषः परमात्मेति आत्मनोऽपि नियामकौ जनाः सर्व एव प्राणिनः साधारणाः ततो विशिष्टाः मञ्चस्थिताः दर्शनयोग्यत्वाय वा मञ्चस्थितत्वं नागरराष्ट्रकाः नगरवासिनो देशवासिनश्च नगरवासिनो रसाभिज्ञाः देशवासिनोबहुज्ञाः अत उभये विशिष्टा गणिताः ततोऽपि नृपास्त्रिविधाश्चतुर्विधा वा सर्वेषामपि नियन्तारं दृष्ट्वा मुदिता जाताः न केवलं हर्षमात्रं किं तु प्रहर्षस्य यो वेगः तेनोत्कलितं विकाशाभिमुखमाननं येषां प्रथमदर्शन एवैतत् अग्रे वाक्यै विकाशं वक्ष्यति अतस्तदाननं पपुस्तेन मार्गेणान्तः प्रवेशितवन्तः नयनैरिति नयनरूपाण्येव तानि अतो मुखमीप नीतवन्ति । इयमेव तदाशक्तिः यदन्तर्बहिः स एव दृश्यते ।। २० ।।

श्रीसुबोधिनी–सारः

सर्वश्रृङ्गारादिरसाभिव्यंजकत्वात्तस्य यथेच्छारूपं वर्णयति । मल्लानाशशनिर्वज्ररूपीति विदित इति सर्वत्रान्वेति नृणां वरवरो राजेति स्त्रीणां मूर्त्तिमान्स्मरः कामः इति गोपानां स्वजनः सखेति असतां दुष्टानां क्षितिभुजां राज्ञां शास्ता दण्डदातेति स्वपित्रोः शिशुः भोजपतेः कंसस्य मृत्युरिति अविदुषामज्ञानां विराट् विकलः राजतो निर्गत इति व्युत्पत्त्या योगिनां परं तत्त्वम् इति वृष्णीनां परदेवतेति साग्रजः सबलो रंगं गतः कृष्णः ।। १७ ।। कुवलयापीडं हतं दृष्ट्वा दुर्जयौ अजेयौ तौ द्वौ अपि दृष्ट्वा मनस्वी सुधीरोपि कंसस्तदा भृशमत्यर्थम् उद्विविजे तत्रास ।। १८ ।। महाभुजौ विचित्राणि वेषाभरणस्रगंबराणि ययोस्तौ निरीक्षतां पुंसां प्रभया मनः क्षिपन्तौ हरन्तौ रंगं गतौ तौ द्वौ रेजतुः उत्तमवेषधारिणौ नटाविव ।। १९ ।। उत्तमपूरुषौ तौ रामकृष्णौ निरीक्ष्य दृष्ट्वा मंचस्थिता नागराष्ट्रका जना नृपाः प्रहर्षस्य वेगेनोत्कलितानि उज्जृंभितानीक्षणानि येषां ते नयनैर्नेत्रै तदाननं तयोर्मुखं पपुः न तृप्ता बभूवुः ।। २० ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र च "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति स्ववाक्यानुरोधात् 'रौद्रादिरसकदम्बमूर्तिर्भगवांस्तत्तदभिप्रायानुसारेण तथा तथा वभौ' इत्याह—मल्लानामिति । मल्लादीनां द्रष्टृणामशन्यादिरूपेण दशधा विदितः सन् साग्रजो बलदेवसहितः कृष्णो रङ्गं गत इत्यन्वयः । तत्र दशविधानां रसानां सङ्ग्रहश्लोकः—रौद्रोऽद्भुतश्च शृङ्गारो हास्यं वीरो दया तथा । भयानकश्च बीभत्सः शान्तः सप्रेमभक्तिक" इति । अशनिः अशनिवद्रौद्रः । नरवरः अद्भुतरूपः स्मरः । शृङ्गाररसविशिष्टः स्वजनः यथा सर्वदा सह क्रीडति तथा हास्यरसविशिष्टः । असतां क्षितिभुजां राज्ञां शास्ता शिक्षको वीररसविशिष्टः । पित्रोर्देवकीवसुदेवयोः शिशुः करुणारसविशिष्टः । भोजपतेः कंसस्य मृत्युर्भयानकः । अविदुषां तत्प्रभावानभिज्ञानां विराट् विकलः अपर्याप्तो राजत इति तथा बीभत्सः, विकलत्वं च 'क वज्रसारसर्वाङ्गौ' इत्यादिना वक्ष्यते । योगिनां परं तत्त्वं परमात्मेति शान्तः । वृष्णीनां यादवादिभक्तानां परदेवतेति भक्तिरसः ।। १७ ।। 'बलिष्ठे निहते राज्ञोऽपि भयं भवत्येव, अत्र तु तवापि न सन्देहः, नृपत्वेनानुभूतत्वात्' इति सूचयन् सम्बोधयति—नृपेति । कुवलयापीडाख्यं गजं हतं श्रुत्वा तौ रामकृष्णावपि दुर्जयौ दृष्ट्वा मनस्वी धीरोऽपि भृशमत्यन्तं तदा उद्विविजे भीतो बभूव ।। १८ ।। विचित्रो वेष आभरणानि स्रजश्चाम्बरं च ययोस्तौ रङ्गगतौ रामकृष्णौ प्रभया स्वकान्त्या निरीक्षतां जनानां मनः क्षिपन्तौ क्षोभयन्तौ रेजतुरित्यन्वयः । 'तत्र तदापि तयोर्भयं नास्ति, क्रियाशक्त्यतिशयत्वात्' इत्याशयेनाह—महाभुजाविति । तत्र दृष्टान्तमाह—उत्तमवेषधारिणौ नटौ यथा तथेति ।। १९ ।। हे नृप ! मञ्चे स्थिताः नागराः पौराः, राष्ट्रका जानपदाश्च जनास्तावुत्तमपूरुषौ निरीक्ष्य प्रहर्षवेगेनोत्कलितानि उज्जृम्भितानि ईक्षणानि आननानि च येषां तथाभूता नयनैर्लावण्यपानपात्रैस्तयोराननं पपुः आननगतं लावण्यरसं पीतवन्तः, परन्तु न तृप्ताः । निराकाङ्क्षा न बभूवुरित्यर्थः ।। २० ।।

अन्वितार्थप्रकाशिका

मल्लानामिति । मल्लानां द्रष्टृणामशनिर्वज्र इति विदितः ज्ञायमानः सन् साग्रजो हरिः रङ्गं गतः इत्यादिरन्वयः । यद्वा । साग्रजो रङ्गं गतो हरिर्मल्लानां गिरिसमानशरीराणामशनिरिति विदितोऽभूत् इत्यादि । "मतिबुद्धी०" इति वर्तमाने क्तः । अतः कर्तरि षष्ठी शेषे वा । अत्र रौद्रादयो रसा ज्ञेयाः । तत्र मल्लानामशनिरिति क्रोधोदयात् रौद्रो रसः । एवं नृणां पौरादीनां

नरवरः। अत्र विलासादिदर्शनेनाद्भुतः स्त्रीणां पूज्यः व्यतिरिक्तानां मूर्तिमान् स्मरः इति शृङ्गारः। गोपानां स्वजनः इति सख्यरसो मदबिन्द्वादिदर्शनात् हास्यरसश्च। असतां क्षितिभुजां राज्ञां वस्तुतस्तु पृथिवीमेव भक्षयतां राज्ञां शास्ता इति वीररसः। स्वपित्रोः देवकीवसुदेवयोः शिशुः तेन च वात्सल्यं मल्लादिशङ्कया च शोकस्फुरणात्करुणश्च। भोजपतेः कंसस्य मृत्युरिति भयानकरसः। अविदुषां कंसपुरोहितादीनां विराट् प्राकृतो मनुष्यो गजरुधिराक्ततया बीभत्सरसः। योगिनां ज्ञानिनां भक्तानां च परं तत्त्वमिति शान्तरसः। वृष्णीनां परदेवता उपास्यः इति सप्रेमभक्तिरसः। संग्रहपद्यं च। "रौद्रोऽद्भुतः शुचिः सखिहास्यं वीरः सवत्सलः करुणः। प्रभयानकबीभत्सौ शान्तः सप्रेमभक्तिकश्च रसः।" इति तोषिणी। अयं रससङ्करः इत्याहुः। रसानां विगलितवेद्यान्तरस्फूर्तिरूपत्वाद्भावसंकर एवायमिति साहित्यतत्त्वविदः। इदं च नाट्यादिरूपकावलोकिषु सहृदयेषु सामाजिकेष्वेव रस इति साहित्यसिद्धान्तानुसारेण। अत्र तु नाट्याभावेऽपि सकलमाधुर्यादिगुणनिधावलोकिकचमत्कारात्मनि भगवति रङ्गते तत्रत्यानामपि प्रतिव्यक्तितत्तद्रसास्वादेऽपि न किंचिद् बाधकम्। अत्र चक्रवर्तिमते मल्लानामशनिरित्यत्र वीरः। क्षितिभुजां शास्तेति रौद्रः। स्वपित्रोः शिशुरिति भयानकः। अत्र वीररौद्रभयानकबीभत्साः। रसाभासाः अनौचित्या प्रवृत्तत्वात् रसप्रक्रिया चैवम्। रत्यादिः स्थायीभावः विभावानुभावसात्त्विकसञ्चारिभावैरुत्कर्षं नीतो रसः तत्र विभावाः कारणानि द्विधा। आलम्बना उद्दीपनाश्च। आद्या द्विधा। यथा भक्तिरसे विषयतया कृष्ण आश्रयतया भक्ताः उद्दीपनाश्च श्रीकृष्णस्मरणदर्शनादयः रसस्य ज्ञापकाः अनुभावाः। ते सात्त्विका आङ्गिकाश्चेति द्विधा। स्तम्भस्वेदादयः सात्त्विकाः नृत्यगानादय आङ्गिकाः स्थायिनां पोषकाः निर्वेदचिन्तादयः संचारिभावाः। तत्र भक्तिरस उदाहरणं स्मरन्तः स्मारयन्तश्चेत्यारभ्य परमेत्य निर्वृता इति पद्यद्वयम। अत्र हरिर्विषयालम्बनं स्मरणमुद्दीपनः पुलकः सात्त्विकः नृत्यादिकमाङ्गिकम्। चिन्तादयः सञ्चारिः प्रेमभक्तिः स्थायिभावः इत्यादिः। प्रकृते तु सर्वरसालम्बनं कृष्णः तत्तदभिप्रायानुरूपाः विलासा उद्दीपना मल्लादिषु चानुभावाः सञ्चारिणश्च तत्तदनुगुणा ऊह्या इति संक्षेपः। शेषं साहित्येषु ज्ञेयम्॥ १७॥ हतमिति। हे नृप! तदा कुवलयापीडाख्यं गजं हतं श्रुत्वा तौ रामकृष्णावपि दुर्जयौ दृष्ट्वा मनस्वी धीरोऽपि कंसो भृशमत्यन्तम् उद्विविजे भीतो बभूव॥ १८॥ ताविति। महाभुजौ विचित्रो वेष आभरणानि स्रजश्चाम्बरं च ययोस्तौ रङ्गगतौ रामकृष्णौ प्रभया स्वकान्त्या निरीक्षतां जनानाम्। शता आर्षः। मल्लादीनां प्रभया अशनित्वादिरूपेण स्वतेजसा मनः क्षिपन्तौ क्षोभयन्तौ उत्तमवेषधारिणौ नटौ यथा तथा रेजतुः। एतेन निर्भयत्वं दर्शितम्॥ १९॥ निरीक्ष्येति। हे नृप! मञ्चे स्थिता नागराः पौराः राष्ट्रका जानपदाश्च जनास्तावुत्तमपूरुषौ निरीक्ष्य प्रहर्षवेगेनोत्कलितानि ईक्षणानि आननानि च येषां तथाभूताः नयनैर्लावण्यपानत्रैस्तयोराननं पपुः। आननगतं लावण्यरसं पीतवन्तः परन्तुः न तृप्ता निराकाङ्क्षा न बभूवुः॥ २०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र तत्रत्यानां पृथक् पृथक् रुच्यनुसारेण शृङ्गारादि सर्वरसमयविग्रहं दर्शयन् श्रीकृष्णः शुशुभे इत्याह मल्लानामिति मल्लानां मल्लैः अशनिर्वज्रतुल्यो विदितो ज्ञातः अत्र मल्लादिषु शब्देषु या षष्ठी सा तु कर्त्तरिज्ञेया आर्षत्वात् नरवरो नरश्रेष्ठः असतां दुष्टानां राज्ञां शास्ता शिक्षकः अविदुषां अज्ञानां विराट् उद्धत विकल इति केचित् परंतत्वं परं ब्रह्म वृष्णीनां यादवानां भक्तानां च परदेवतेति एवं प्रकारेण मल्लादिभिः सर्वैः पृथक् पृथक् विदितः सन् साग्रजो रंगं गतः मल्लादिभिश्च श्रीकृष्णे ये रसाः दृष्टास्ते उच्यंते मल्लैः रौद्ररसमयोदृष्टः नरैश्च अद्भुतरसमयोदृष्टः स्त्रीभिश्शृङ्गाररसमयोदृष्टः गोपैश्च हास्यरसमयोदृष्टः राजभिश्च वीररसमयोदृष्टः पितृभ्यां च करुणरसमयोदृष्टः कंसेन च भयानकरसमयोदृष्टः अज्ञैश्च बीभत्सरसमयोदृष्टः योगिभिश्च शांतरसमयोदृष्टः वृष्णिभिश्च प्रेमरसमयोदृष्टः इति विराजते अपरिपूर्णः शोभते इति विराट्॥ १७॥ मनस्वी शूरोऽपि उद्विविजे भयुक्तोऽभवत्॥ १८॥ यथा नटाविति भयहीनं त्वदर्शितं॥१९॥ प्रहर्षवेगेनोत्कलितानि प्रफुल्लानि ईक्षणानि नेत्राणि चाननानि मुखानि च येषां ते तयोराननं पपुस्तथापि ते तृप्ताः न बभूवुः॥ २०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्र शृङ्गारादिरसकदम्बैकमूर्त्तिर्भगवान् तत्तदभिप्रायानुसारेण बभौ न साकल्येन सर्वेषामित्याह मल्लानामिति। मल्लानां चाणूरादीनां, अशनिः अशनिवद्रौद्रः, नृणां प्रेक्षणमात्रसक्तमनुजानां, नरवरो नरोत्तमवदद्भुतकृत्, स्त्रीणां तं प्रेक्षमाणानामङ्गनानां, मूर्त्तिमान् स्मरः मूर्त्तशृङ्गारवत् प्रतीयमानः, गोपानां स्वजनः स्वजनवद्धास्यास्पदीभूतः, असतां दुष्टानां, क्षितिभुजां, महीभृतां शास्तां वीरभावेन शासनकरः, स्वपित्रोर्वसुदेवदेवक्योः, शिशुः स्वबालवत् करुणाधारः, भोजपतेः कंसस्य, मृत्युः मूर्त्तमृत्युवद्भयानकः, अविदुषामेतत्स्वरूपानभिज्ञानां देहात्माभिमानिनां विराट् बीभत्सवद्विकलः, योगिनां परमात्मोपासनात्मकयोगनिष्ठानां, परं तत्त्वं, शान्तप्रकृतिकपरमतत्त्वया प्रतीतः, स्वोपास्यवस्तुरूप इत्यर्थः। वृष्णीनां वृष्णिकुलोत्पन्नानामुद्धवादीनां, परदेवता सप्रेमभक्त्याश्रयः, इत्येवं विदितो मल्लादिभिरशन्यादिरूपेण दशधा विदितः सन्, साग्रजो बलभद्रसहितः कृष्णः, रङ्गं गतः। मल्लादिषु प्रदर्शिता रसाः स्फुटबोधाय श्लोकेन प्रदर्श्यते 'रौद्रोऽद्भुतश्च शृङ्गारो हास्यं वीरो दया तथा। भयानकश्च बीभत्सः शान्तः सप्रेमभक्तिकः' इति। विकलत्वं च 'क वज्रसारसर्वाङ्गौ' इत्यादिना वक्ष्यते॥ १७॥ हतमिति। कुवलयापीडं हतं दृष्ट्वा, तौ

रामकृष्णौ, अतिदुर्जयौ दृष्ट्वा, हे नृप; मनस्वी धीरोऽपि, कंसः तदा, भृशं उद्विविजे भीतो बभूव ॥ ८॥ ताविति। विचित्राणि वेषश्च आभरणानि च स्रजश्च अम्बराणि वस्त्राणि च ययोस्तौ, महान्तावाजानुलम्बिनौ भुजौ ययोस्तौ, प्रभया स्वकीयशरीरसम्बधिन्या कान्त्या, निरीक्षतां निरीक्षमाणानां जनानां, मनः क्षिपन्तौ स्वस्मिन्नाकृष्टवन्तौ, रङ्गगतौ मल्लक्रीडास्थानं प्राप्तौ, तौ रामकृष्णौ, उत्तमवेषधारिणौ नटौ यथा नटौ इव, रेजतुः ॥ १९ ॥ निरीक्ष्येति। हे नृप नागरराष्ट्रकाः पौराः जानपदाश्च, जनाः, मञ्चस्थिताः नृपाश्च, तौ उत्तमपुरुषौ निरीक्ष्य, प्रहर्षस्य वेगस्तेन उत्कलितान्युज्जृम्भितानि ईक्षणानि आननानि च येषां तथाभूताः नयनैर्लावण्यपानपात्रभूतैश्चक्षुर्भिः, तदाननं तयोः श्रीमदास्यं, पपुः, सादरमवलोकयांचक्रुः। आननगतं लावण्यरसं पीतवन्त इत्यर्थः। परं तु न तृप्ताः पानाकाङ्क्षारहिताः न बभूवुरित्यर्थः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मल्लानामिति : १०.४३.१७.

यदा रजस्तमःसत्त्वालङ्कृतो भवति प्रभुः। युक्तमस्य तदा भानमेकस्याऽनेकरूपतः ॥ ५४ ॥
विभिन्नद्रष्टृदृग्भेदाद् भिन्नो भाति जगत्प्रभुः। न वस्तुतः स्पष्टमभूदेतद्रङ्गजनेक्षणात् ॥ ५५ ॥
श्रीरङ्गमे वर्तते शोभमाना श्रीरङ्गस्थाप्ययस्मि सद्रङ्गशाली।
तत्सद्वेषं रङ्गमेनं त्वपूर्वं पश्याम्यारादित्यगात् तादृगीशः ॥ ५६ ॥

हतमिति : १०.४३.१८.

निजबलशिरोधिभूषणमपहृतमेतेन कुवलयापीडम्। दृष्ट्वाऽतिखिन्नचेताः कंसो युक्तं तदाऽऽसेति ॥ ५७ ॥
अहङ्कारो हि सर्वत्र पौरुषोत्कर्षकारणम्। तस्मिल्लीनेऽर्थसिद्धैव निर्विण्णात्मतया स्थितिः ॥ ५८ ॥

तौ रेजतुरिति : १०.४३.१९.

सामान्योऽपि नटो नानारूपो रङ्गसमाश्रयात्। किं पुनर्विश्वनाट्यश्रीः श्रीशो रङ्गरसाश्रितः ॥ ५९ ॥
कुर्वन् समग्रमनघः सदसत्प्रकारं संदर्शयन्नभिनिवेशमपीह तत्र।
प्राणीव सक्तहृदयो न भवत्यलिप्तः श्रीमानिति स्फुटमभून्नटवद्विहारात् ॥ ६० ॥

निरीक्ष्य ताविति : १०.४३.२०.

न दिव्यदृष्टयोऽप्यापुर्यं दृष्ट्वा तृप्तिमच्युतम्। किं चित्रमत्र तद्वीक्षाविवशास्तेऽभवन्निति ॥ ६१ ॥

कृष्णप्रिया

जिस समय भगवान् श्रीकृष्ण बलरामजी के साथ रंगभूमि में पधारे, उस समय वे पहलवानों को वज्रकठोर शरीर, साधारण मनुष्यों को नर-रत्न, स्त्रियों को मूर्तिमान् कामदेव, गोपों को स्वजन, दुष्ट राजाओं को दण्ड देनेवाले शासक, माता-पिता के समान बड़े-बूढ़ों को शिशु, कंस को मृत्यु, अज्ञानियों को विराट्, योगियों को परम तत्त्व और भक्तशिरोमणि वृष्णिवंशियों को अपने इष्टदेव जान पड़े (सबने अपने-अपने भावानुरूप क्रमशः रौद्र, अद्भुत, शृङ्गार, हास्य, वीर, वात्सल्य, भयानक, बीभत्स, शान्त और प्रेमभक्तिरस का अनुभव किया) ॥ १७ ॥ राजन्! वैसे तो कंस बड़ा धीर-वीर था; फिर भी जब उसने देखा कि इन दोनों ने कुवलयापीड को मार डाला, तब उसकी समझ में यह बात आयी कि इनको जीतना तो बहुत कठिन है। उस समय वह बहुत घबड़ा गया ॥ १८ ॥ श्रीकृष्ण और बलराम की बाँहें बड़ी लम्बी लम्बी थीं। पुष्पों के हार, वस्त्र और आभूषण आदि से उनका वेष विचित्र हो रहा था; ऐसा जान पड़ता था, मानो उत्तम वेष धारण करके दो नट अभिनय करने के लिये आये हों। जिनके नेत्र, एक बार उनपर पड़ जाते, बस, लग ही जाते। यही नहीं, वे अपनी कान्ति से उनका मन भी चुरा लेते। इस प्रकार दोनों रंगभूमि में शोभायमान हुए ॥ १९ ॥ परीक्षित्! मञ्चोंपर जितने लोग बैठे थे—वे मथुरा के नागरिक और राष्ट्र के जन समुदाय पुरुषोत्तम भगवान् श्रीकृष्ण और बलरामजी को देखकर इतने प्रसन्न हुए कि उनके नेत्र और मुखकमल खिल उठे, उत्कण्ठा से भर गये। वे नेत्रों के द्वारा उनकी मुखमाधुरी का पान करते-करते तृप्त ही नहीं होते थे ॥ २० ॥

पिबन्त इव चक्षुर्भ्यां लिहन्त इव जिह्वया। जिघ्रन्त इव नासाभ्यां श्लिष्यन्त इव बाहुभिः ॥ २१ ॥
ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतम्। तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव ॥ २२ ॥
एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि। अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥ २३ ॥
[1]एष वै किल देवक्यां जातो नीतश्च गोकुलम्[2]। कालमेतं वसन् गूढो ववृधे नन्दवेश्मनि ॥ २४ ॥

---

१. स एष किल—प्रा. पा.। २. गोकुले—विज.।

कर्दमक्षमा

अन्वयः—चक्षुर्भ्यां पिबन्त इव जिह्वया लिहन्त इव नासाभ्यां जिघ्रन्त इव बाहुभिः श्लिष्यन्त इव लक्षिताः ॥ २१ ॥ तद्रूपगुणमाधुर्य प्रागल्भ्य स्मारिता इव यथादृष्टं, यथाश्रुतं ते वै परस्परमूचुः ॥ २२ ॥ एतौ रामकृष्णौ साक्षात् भगवतः हरेः नारायणस्य अंशेन इह वसुदेवस्य वेश्मनि हि अवतीर्णौ ॥ २३ ॥ एषः श्रीकृष्णः किल देवक्यां जात तेन वसुदेवेन च गोकुलं नीत वै एतम् कालं ननू वेश्मनि गूढवसन् ववृधे ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवाह। पिबंत इवेति। श्लिष्यंत इव परिष्वंगं कुर्वंत इव लक्षिता इत्यर्थः ॥ २१ ॥ यथादृष्टं धनुर्भंगादि यथाश्रुतं गोवर्धनोद्धरणादि तत्तदनतिक्रम्य तदनुरूपमित्यर्थः। प्रत्यक्षं च तयो रूपं गजदंतादियुक्तं गुणाः शौर्यादयो माधुर्यं हसितालापादि प्रागभ्यं धाष्टर्यं तैः स्मारिता इव स्मरणं प्रापिता इवेत्यर्थः ॥ २२ ॥ विस्मितानां वाक्यान्याह अष्टभिरेतावित्यादिभिः ॥ २३ ॥ किलेति सर्वत्रान्वेति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेवाऽनैराकांक्ष्यमेव। पिबन्तः सादरमवलोकयन्तः। लिहन्त आस्वादयन्तः। इत्यर्थ इति— तत्रत्यजनैरिति शेषः। लक्षिता दृष्टाः। सर्वेन्द्रियैस्तमभजन्निति भावः॥ पिबन्त इति युग्मकम्। ताविति शेषः। इवेत्युत्प्रेक्षायाम्। नेत्रविस्तारणलिंगेन ताभ्यां तयोः पानमिव कुर्वन्त इत्यर्थः। प्रत्येकापेक्षया द्वित्वाऽद्वित्वादि। एवं जिह्वाद्वारा तन्माधुरीवर्णनलिंगेन तया तयोर्लेहनमिव कुर्वन्त इत्यर्थः। तथा हर्षवशात्तदतिसांमुख्यपूर्वकनासाफुल्लत्वससंभ्रमश्वासोत्तोलनादिलिंगेनाविच्छिदुरतत्सौरभ्यलाभलालसया तावेव नासयोः प्रवेशयितुमिव प्रवृत्ता इत्यर्थः। तद्वदेव च परस्पररूपदर्शनार्थं करचालनलिंगेन बाहुभिस्तदालिंगनमिव कुर्वन्तः। अत एव चालनलाघवेन बहव इव दृश्यन्त इत्यभिप्रायेण। अत्र तु बहुत्वं केषांचित्तत्तद्योग्यानां तत्तदिच्छाप्यस्ति, ततः किञ्चिदनुकरणमपि संभवतीत्यपि पिबन्त इवेत्यादिकमुक्तम् ॥ २१ ॥ इत्यर्थ इति। न त्वदृष्टाश्रुतचरं जगदुरिति भावः। 'प्रगल्भो निपुणे धृष्टे' इति धरणिः। प्रागल्भ्यं नैपुण्यं च ॥ ऊचुरिति तैर्व्याख्यातम्। तत्र यथादृष्टमित्यादावेवं विवेचनीयम्—समासोऽयमव्ययीभावः। स च "अव्ययं विभक्ति –" इत्यादिना सूत्रेण, "यथासादृश्ये" इत्यादि च वर्ण्यते। तत्र प्रथमेन यथार्थत्वे प्रवर्तमानस्यैवं विवेकः—यथार्थाश्चत्वारः,-योग्यता, वीप्सा, पदार्थानतिवृत्तिः, सादृश्यञ्चेति। अत्र पदार्थानतिवृतिस्तदनतिक्रमः। तत्रोदाहरणम्-यथाबलमधीते, बलमनतिक्रम्येत्यर्थः। योग्यतायामुदाहरणम्— अनुरूपस्य दानं यथादानमिति, योग्यमित्यर्थः। अत्र यथाशब्देन प्रयुज्यते न त्वन्यशब्दैः। एवं सवीणं ध्वनतीत्यत्र सादृश्यार्थ सहशब्दवत्। तस्माद्यथादृष्टमित्यादौ दृष्टं यद्धनुर्भंगादि तदनतिक्रम्य। श्रुतं यद्गोवर्धनोद्धारणादि तत्तदनतिक्रम्येति विभज्यैव योज्यम्। तदनुरूपमित्यर्थ इति अत्र योग्यतायामेवाव्ययीभावो गम्यते, अनुरूपमस्य दानमितिवत्। तत्तश्च तत्तद्योग्यमित्यर्थः। पदार्थानतिवृत्तियोग्यतयोरव्ययीभावयोर्भिन्नार्थत्वेऽपि योग्यतार्थे यत्पर्यवसानं कृतं, तत्खलु तत्रैव तात्पर्यमित्यपेक्षया गम्यते। "यथाऽसादृश्ये" इत्यसादृश्ये प्रवर्तमानस्य द्वितीयसूत्रस्योदाहरणम्—यथावृद्धं प्रविशंतु, येये वृद्धास्त इत्यर्थः। प्रत्यक्षमित्यनेन तच्छब्दो व्याख्यात इति। यद्वा-यथेति योग्यतार्थे एव, दृष्टं यद्धनुर्भंगादि तदनुरूपमेव। श्रुतं यन्नारायणांशवत्त्वादि तदनुरूपमेव. नाधिकमित्यर्थः। अत एव वक्ष्यते—'अंशेन' (२३) इति, तत्तदपि तेषां संदिग्धमि वासीत्सप्रति तद्दर्शनेनैव निश्चितं जातमित्याह—तद्रूपेति। तस्य रूपं भगवल्लक्षणाकारम्, गुणा असमोर्द्धवसौन्दर्यादयः, माधुर्यं कदाचिदाच्छातेष्वपि रूपगुणेषु तत्स्वभावत एव मनोहरत्वम्, प्रागल्भ्यं सर्वत्राकुण्ठितत्व, तैः स्मारिता इव। इवेत्युत्प्रेक्षायाम्। वस्तुतस्त्वसंभावनाविपरीतभावनाभ्यां संदिग्धत्वमेव न तु श्रुत्वापि दृष्ट्वापि विस्मृतत्वमिति तैः प्रतीतिं प्रापिता यत्यर्थः। यद्वा—ततत्तु तेषां सदा स्मर्यमाणमपि तदानीं तद्रूपादिदर्श नेनातीव चमत्कृतत्वमासीदिति। नूतनस्मरणविषयतामिव प्राप्तमित्याह-तद्रूपेति। अत एवोत्तरत्र 'विस्मितानां वाक्यमाह' इति तैर्व्याख्यास्यते ॥ २२ ॥ एतौ रामकृष्णौ। नारायणस्य साक्षादंशेनैश्वर्येण। यद्वा-अंशानां समूह आंशं स्वाभाविकस्वरूपं, नारायण एवावतीर्णावित्यर्थः। षष्ठी त्वत्राभेद एव राहोः शिर इतिवत्। यद्वा-इं काम हन्तीतीहः शिव, सोंशोऽवयवोद्भवो यस्य स इहांशो नारायणः। "नारायणाद्रुद्रोऽजायत" इति श्रुतेः। स इनः स्वामी यस्य स इहांशेनः परोक्षित्तत्संबुद्धौ तथा। एतेन 'कृष्णस्तु भगान्स्वयम्' इत्युक्तिसामंजस्यमुक्तम्। यदूचुस्तदेवाऽऽहाष्टभिः—भगवतः स्वाभाविकसमोद्र्ध्ववनि खिलैश्वर्ययुक्तस्य हरेः सर्वदुःखहर्तुरभोष्टदानादिना मनोहरस्य च यतो नारायणस्य सर्वजीवाश्रयस्य तस्य साक्षादंशेन न तु शक्त्यावेशादिना। इत्येतौ सर्वाभीष्टप्रदौ भविष्यत इति दर्शितम्। इह मथुरायाम्, तत्रापि श्रीवसुदेवस्य वेश्मनीति स्वेषु चातिशयेन पक्षपातो दर्शितः। वेश्मनीति साक्षाद्भगवदंशत्येन विकारासंभवात्। गोर्देवीत्वित्याह-अंशेन तच्छक्तिमयत्वात्तदंशोपलक्षितो यो वसुदेवस्तस्य वेश्मनीत्यर्थः ॥ २३ ॥ एष कृष्णः। किल प्रसिद्धम्। किल नीतः किल ववृध इत्येवं किलाव्ययं सर्वत्रान्वेतीतर्थः। एतम् एतावन्तम्। एतच्छब्दो मत्वर्थ लाक्षणिकोऽर्थानुपपत्तेः। एवं सामन्येन द्वावप्युक्त्वा भगवदवतारत्वमेव स्पष्टयितुं तच्चरितानि वक्ष्यन्तः प्राधान्येन श्रीकृष्णस्यादाहुः—एष इति षड्भिः। वै प्रसिद्धौ। यो जातः प्रादुर्भूतः स एवैषः अंगुल्या निर्देशादेष इति। किल निश्चये। एतमेतावन्तम्। आर्षत्वात्तद्धितलुक् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पिबन्त इति युग्मकम् । ताविति शेषः । इवेत्युत्प्रेक्षायां नेत्रविस्तारणलिङ्गेन ताभ्यां तयोः पानमिव कुर्वन्त इत्यर्थः । प्रत्येकापेक्षया द्वित्वादि एवं जिह्वाद्वारा तन्माधुर्यवर्णनलिङ्गेन तया तयोर्लेहनमिव कुर्वन्त इत्यर्थः । तथा हर्षवशात् तदतिसाम्मुख्यपूर्वकनासाफुल्लत्वसंभ्रमश्वासोत्तोलनादिलिङ्गेनाविच्छिदुरतत्सौरभ्यलाभलालसया तावेव नासयोः प्रवेशयितुमिव प्रवृत्ता इत्यर्थः । तद्वदेव च परस्पररूपदशनार्थं करचालनलिङ्गेन बाहुस्तियोरालिङ्गनमिव कुर्वन्तः अत एव चालनलाघवे बहुव इव दृश्यन्त इत्यभिप्रायेणात्र तु बहुत्वं केषाञ्चित्तत्तद्योग्यानां तत्तदिच्छाप्यस्ति ततः किञ्चिदनुकरणमपि सम्भवतीत्यपि पिबन्त इवेत्यादिकमुक्तम् ऊचुरिति तैर्व्याख्यातम् । तत्र यथादृष्टमित्यादावेवं विवेचनीयम् । समासोऽयमव्ययीभावः सचा "अव्ययं विभक्ती,,-त्यादिना सूत्रेण "यथासादृश्य,, इत्यादिना च वर्ण्यते तत्र प्रथमेन यथर्थत्वे प्रवर्त्तमानस्यैवं विवेकः यथार्थाश्चत्वारः योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यञ्चेति । अत्र पदार्थानतिवृत्तिस्तदनतिक्रमः । तत्रोदाहरणं यथाबलमध्येति बलमनतिक्रम्येत्यर्थः । योग्यतायामुदापरणम् अनुरूपस्य दानं यथादानमिति योग्यमित्यर्थः अत्र तु यथाशब्देन प्रयुज्यते नन्वन्यशब्दैः एवं सवीणं ध्वनतीत्यत्र सादृश्यार्थे सहशब्दवत् । तस्माद्यथा दृष्टमित्यादौ दृष्टं यद्धनुर्भङ्गादि तदनतिक्रम्य यथाश्रुत श्रुतं यद्गोवर्द्धनोद्धरणादि तत्तदनतिक्रम्येति विभज्यैव योज्यं तदनुरूपमित्यर्थः इत्यत्र तु योग्यतायामेवाव्ययीभावो गम्यते अनुरूपमस्य दानमितिवत् ततश्च तत्तद्योग्यमित्यर्थः । पदार्थानतिवृत्तियोग्यतयोरव्ययीभावयोर्भिन्नार्थत्वेऽपि योग्यतार्थे यत् पर्यवसानं कृतं तत् खलु तत्रैव तात्पर्यमित्यपेक्षयागम्यते । "यथासादृश्य,, इत्यशादृश्ये प्रवर्त्तमानस्य द्वितीयसूत्रस्योदाहरणं यथावृद्धं प्रविशन्तु ये ये वृद्धास्त इत्यर्थः । प्रत्यक्षमित्यनेन तच्छब्दो व्याख्यात इति । यद्वा । यथेति योग्यतार्थ एव दृष्टं यद्धनुर्भङ्गादि तदनुरूवमेव श्रुतं यन्नारायणांशवत्त्वदि तदनुरूपमेव नाधिकमित्यर्थः । अतएव वक्ष्यतेऽशेनेति । तत्तदपि तेषां संदिग्धमिवासीत् सम्प्रति तद्दर्शनेनैव निश्चितं जातमित्याह । तद्रूपेति । तस्य रूपं भगवल्लक्षणाकारः गुणा असमोर्ध्वसौन्दर्यशौर्यादयः माधुर्यं क्वचिदाच्छादिष्वपि रूपगुणेषु तत्स्वभावत एव मनोहरत्वं प्रागल्भ्यं सर्वत्राकुण्ठत्वं तैः स्मारिता इव इवेत्युत्प्रेक्षायां वस्तुतस्त्वसम्भावनाविपरीतभावनाभ्यां संदिग्धत्वमेव नतु श्रुत्वापि दृष्ट्वापि विस्मृतत्वमिति तैः प्रतीतिं प्रापिता इत्यर्थः । यद्वा तत्तत्तु तेषां सदा स्मर्यमाणमपि तदानी तद्रूपादिदर्शनेनातीव चमत्कृतमासीदिति नूतनस्मरणविषयमिव प्राप्तमित्याह तद्रूपगुणेति । अतएवोत्तरत्र विस्मितानां वाक्यमाहेति तैर्व्याख्यास्यते ॥ २१-२२ ॥ यदूचुस्तदेवाह अष्टभिः भगवतः स्वाभाविकासमोर्ध्वनिखिलैश्वर्ययुक्तस्यहरेः सर्व दुःखहर्त्तुरभीष्टदानादिना मनोहरस्य च यतो नारायणस्यसर्वजीवाश्रयस्य तरय साक्षादंशेन नतु शक्त्यावेशादिना इत्येतौ सवभिष्टप्रदा भावष्यत इति दर्शितम् इह श्रीमथुरायां तत्रापि श्रीवसुदेवस्य वेश्मनीति स्वेषु चातिशयेन पक्षपातो दर्शितः । वेश्मनीति साक्षाद्भगवदंशत्वेन विकारासम्भवात् गोर्देवीत्वित्याह अशेन तच्छक्तिमयत्वात्तदंशोपलक्षितो यो वसुदेवस्तस्य वेश्मनीत्यर्थः ॥ २३ ॥ एवं सामान्येन द्वावप्युक्त्वा भगवदवतारत्वमेव स्पष्टयितुं तच्चरितानि वक्ष्यन्तः प्राधान्येन श्रीकृष्णस्यादावाहुः । एष इति षड्भिः । वै प्रसिद्धौ यो जातः प्रादुर्भूतः स एवैषः एष इत्यङ्गुल्या निर्देशात् किल निश्चये एतमेतावन्तम् ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पिबन्तः पानं कुर्वन्तः, एवमग्रेऽपि, दर्शनाद्यभिनिवेशमात्रे तात्पर्य्येण कर्म्मानपेक्षा । यद्वा, ताविति शेषः । इवेत्युत्प्रेक्षायाम्, तत्वतः पानाद्यसम्भवात्, लिहन्तश्चुम्बनादिना स्वादयन्तो जिह्वाभिरभिमृशन्तो वा । बाहुभिरिति बहुत्वं वस्तुतस्तेषां माथुरत्वेन चतुर्भुजत्वात्, जनानां बाहुल्याभिप्रायेण वा । यद्वा, आश्लेषदार्ढ्येविवक्षया । इत्थं तस्मिन् ज्ञानेन्द्रियाणामभिनिवेशेन परमप्रीतिरुक्ता, तत्र क्रमेण दृग्रसनघ्राणत्वचां पुरोदृश्यत्वेन श्रवणस्य न तादृक् प्रयोजनमिति तस्य नोक्तम् । यद्वा, ऊचुरित्यनेन कीर्त्तनद्वारा तस्यापि फलिष्यत्येव, उक्तानां यद्वा, ऊचुरित्यनेन कीर्त्तन द्वारा तस्यापि फलिष्यत्येव, उक्तानां पानादीनां चतुर्णां यथोत्तरं श्रैष्ठ्यम् । तत्र लेहनादपि घ्राणस्य, घ्राणेनैकदैव स्वतः सर्व्वांगमालादितत्परिकरामोदानुभवात्, अन्यत् स्पष्टम् ॥ २१ ॥ वै प्रसिद्धम्, व्यक्तमिति वा, कंसभयादिना चिरं विस्मृतमपि तयो रूपादिभिस्तन्माहात्म्यादिकं स्मारिताः रूपं सौन्दर्य्यम्, रूपगुणान्तर्गतयोरपि माधुर्य्यप्रागल्भ्ययोःपृथगुक्तिर्विशेषापेक्षया । इवेति माधुर्त्वेन तेषां कदाचिदपि तत्त्वतस्तत्स्मरणानपगमात्, केवलं तदानीमेव तथोक्त्या स्मारणसादृश्यात् । अन्यत्तैर्व्याख्यातम् । यद्वा, 'माधुर्य्यं प्रागल्भ्यां निर्भयत्वं सर्वप्रावीण्यं वा, एवं क्रमेण-रूपा-गुण, कौशल माहात्म्यान्युक्तानि ॥ २२ ॥ भगवतो निजाशेषैश्वर्य्यं प्रकटयत इत्यर्थः । हरेः सर्वदुःखहर्तुः, अभीष्टप्रदानादिना मनोहरस्य च, यतो, नारायणस्य सर्वजीवाश्रयस्य परमेश्वरस्यांशेन निजसारभागेन, न तु मायादिसम्बन्धेन । यद्वा, जातावेकत्वम्, अंशैर्देवादिभिः सहेत्यर्थः । अंशेन भोगतावतीर्णौ किन्तु पूर्णस्वरूपेऽवतीर्णावित्यर्थः । इह मथुरायाम्, हि निश्चितम्, शास्त्रादिप्रामाण्याद्वसुदेवस्य वेश्मनीति साक्षाद्भगवत्त्वेन प्राकृतपुत्रत् तत्पुत्रत्वाद्यसम्भवात् तन्महाभाग्येन तत्रैवावतरणयोग्यत्वाच्च । अत्र श्रीस्वामि-टीकायां स्मारितानामिति लेख्ये विस्मितानामिति लेखकभ्रमात्, मूले टीकायां वा पूर्वं विस्मितत्वादृष्टेः, तादृशोक्त्या तेषां विस्मयबोधनाद्वा, तथा व्याख्या तु तथाप्युह्यार्थगौरवापत्त्या तत्र सम्यगिति ॥ २३ ॥ एवं सामान्येन द्वावप्युक्त्वा भगवत्वमेव प्रमाणयितुं तच्चरितानि वक्ष्यन्तः प्राधान्येन श्रीकृष्णस्यादावाहुः—स

एष इति षड्भिः । किल निश्चये, प्रसिद्धौ वा, स्मारणे वा, यो जातः प्रादुर्भूतः स एवैष । 'एष वै' इति पाठे 'वै' एव, एतमेतावन्तम्, गूढा गोकुलेन श्लोकेष्वनभिव्यक्तैश्वर्य्यात् पुरीपरित्यागेन वनान्तर्वासाद्वा ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह । पिवन्त इवेति । श्लिष्यन्तः परिष्वङ्गं कुर्वन्त इव इत्थं लक्षिता इत्यर्थः ॥ २१ ॥ ऊचुरिति । यथादृष्टं धनुर्भङ्गादि यथाश्रुतं गोवर्द्धनोद्धरणादि तदनतिक्रम्य तदनुरूपमित्यर्थः । ते नागरराष्ट्रकाः परस्परमूचुः कथम्भूताः तयोरूपं गजदन्तादियुक्तं गुणाः शौर्यादयः माधुर्यं हसितालापादिगतं प्रागल्भ्यं धाष्टर्यं तैः स्मारिता इव स्मरणं प्रापिता इवानितरसाधारणरूपगुणादि याथात्म्यबोदन इव इवशब्दोऽततिरिक्तद्योतकः ॥ २२ ॥ तदेव दर्शयंस्तेषामुक्तिमाह । एतावित्यष्टभिः । एतौ रामकृष्णौ नारायणसंशेनावतौ नारायण एव स्वसङ्कल्परूपेणांशेन रामकृष्णरूपेणावतीर्ण इत्यर्थः । यद्वा छत्रिन्यायेनांशेनावतीर्णौ इत्युक्तं श्रीकृष्णस्य साक्षान्नारायणावतारत्वेन रामस्य तदंशभूतसङ्कर्षणावतारत्वात् ॥ २३ ॥ तत्र श्रीकृष्णचरित्रं जन्मत आरभ्य सङ्गृह्णन्ति । स एष इति । देवक्याज्ञातः वसुदेवादित्यध्याहारः गोकुलं प्रतिनीतः वसुदेवेनेति शेषः किलेत्याश्चर्ये प्रसिद्धौ वा एतमेवावन्तं कालम् अत्यन्तसंयोगे द्वितीया नन्दगृहे गूढः इतरैरविज्ञातो वसन् ववृधे एधाञ्चक्रे ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तयोः कृष्णरामयोः रूपगुणः शब्दगुणः माधुर्यञ्च तेन यद्वा रूपगुणेन कान्तिगुणेन कीर्तिगुणेन वा माधुर्येण वा वाच इति शेषः प्रागल्भ्येन वैशारद्येन च स्मारिताः स्मृतिं कारिताः रूपं शब्दे पशौ श्लोक इत्यादेः ॥ २२-२३ ॥ एतं कालम् एतावन्तं कालम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

एतौ भगवत इत्यादि । अतो इहावतीर्णौ एनयोर्मध्ये एको हरेर्नारायणस्यांशेन, अन्यः साक्षात् स्वयं भगवानित्यर्थः, साक्षादंशेनेति पदाभ्यां द्वयोर्विशेषाख्यायामप्येकयोक्त्यावतीर्णावित्येकमेव पदम् ॥ २३ ॥ यः साक्षादवतीर्णः, स एव क इत्याह—स एष किलेत्यादि । स एष इत्येकवचननिर्देशात् पृथगुभयोर्विविच्य कथनम् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पिवन्त इवेत्यादीनि नयनविस्ताररसानाकलनप्रफुल्लनासाश्वासग्रहणबाहुप्रसारणलिङ्गज्ञापितानीत्यर्थः । दृष्टं धनुर्भङ्गादि श्रुतं गोवर्द्धनोद्धरणादि तत्तदनतिक्रम्य ऊचुः रूपाणि श्यामत्वरक्तदन्तपाणित्वादीनि गुणाः शौर्य्यादयः माधुर्य्याणि हसितापाङ्गार्पणादीनि प्रागल्भ्यानि धनुर्भङ्गादिष्वकुण्ठानि तैस्तत्प्रभावादीन् श्रुतान् स्मारिता इवेत्यनधिकारार्थन् ॥ २१-२२ ॥ अशेनेति तेषां तथैव प्रतीतेः ॥ २३-२४ ॥

गूढार्थदीपिनी

पिवन्त इति युग्मकम् । तद्रूपादिभिः अयं साक्षात् भगवानिति स्मरणं प्रापिता इव ते परस्परम् ऊचुरित्यन्वयः । प्रागल्भ्यं नैपुण्यम् ॥२१-२२॥ अंशेनेति तेषामल्पज्ञानत्वादेवमुक्तिः । यद्वा । नारायणस्य अंशेन जातस्य वसुदेवस्येति योज्यम् । २३-२४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इदेव दर्शयति । पिबन्त इति । श्लिष्यन्त इव परिष्वङ्गं कुर्वन्त इव एवं लक्षिता इत्यर्थः ॥ २१ ॥ तयोः रूपादिभिः स्मारिता इव स्मरणं प्रापिता इव यथादृष्टं भनुर्भङ्गादि यथाश्रुतं पूतनावधादि वैशब्देन यथामति च ऊचुः ॥ २२ ॥ ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतमित्येतत्प्रपञ्चयति । एतावित्याद्यष्टभिः । हरेर्नारायणस्यांशेनेत्युक्तिः वक्तृमत्यनुरूपा यद्वा छात्रन्यायेन रामस्यांशत्वात् श्रीकृष्णस्य परब्रह्मनारायणत्वात् ॥ २३-२४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नासाभ्यां तत्पुटीभ्यां ॥ २१ ॥ तयो रूपं गुणा दृष्टं सौन्दर्यं रूपैः कान्त्यादयो वहिष्ठा गुणाः श्रुताश्चोत्तरत्र वक्ष्यमाणा माधुर्यं वाचिप्रागभ्यं धृस्णुता । एतैः स्मारिता स्मृतिमन्तः कारित इव परस्परमूचुः ॥ २२ ॥ साक्षान्नारायणस्यांशेनावतीर्णौ ॥ २३ ॥ नीतो वसुदेवेनैनमेतावन्तं कालं नन्दवेश्मनि गूढस्सन्ववृधे ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

न केवलं योगिवदन्तः स्थापयित्वा चरितार्था जाताः किं तु तु भक्ता इव परमाकाङ्क्षायुक्ता इव मुग्धा इव क्षुधिता इव प्रोष्यागता इव परमस्निग्धा इव जाता इत्याह । पिबन्त इवेति । चक्षुभ्यर्यां पिबन्त इव जाताः प्रत्येकं चक्षुर्द्वयेनान्तः दुःसहतापशान्त्यर्थम् अन्तर्निवेशितवन्तः यथा पानसमये जलमन्तर्बहिर्व्याप्तं तिष्ठति तथा भगवान् जात इत्यर्थः यथा गौर्वत्से जाते

जिह्वया प्रेमतूर्त्यर्थं लेहनं करोति तथा ज्ञानानन्तरं भावमाविष्कृतवन्तः यथा पिता तदर्थमेव सम्पादितपदार्थः प्रोष्यागतः मूर्धि जिघ्रति जातं वा तथा भगवति सर्वे जाताः ज्ञानप्रेमानन्तरं बहिरात्मत्वेन व्यवहृतवन्त इत्यर्थः। यथा वा मित्राणि स्त्रियो वा चिरागतमालिङ्गन्ति तथा भगवति सर्व एव जातभावा जाताः ज्ञानप्रेमात्मव्यवहारेषु सिद्धेषु सख्यान्तमात्मसमर्पणान्तं वा भक्तिसाधनानि क्रियन्ते तथा कृतवन्तः एवं ज्ञानक्रियाशक्तिर्विनियोगेन अन्तःकरणशरीरयोर्भगवति विनिवेशनमुक्त लेहनाघ्राणाभ्यामिन्द्रियप्राणयोरपि ॥ २१ ॥ एवं चतुर्द्धा ज्ञानक्रियाशक्ती निरूपिते अनेन तदासक्तिः सिद्धैव तथापि स्थूणाखननन्यायेन यदि न स्थिरीक्रियते रसस्तदा रूढो न भगवतीति भगवति वाचनिकमाह। ऊचुरिति। यद्यपि सर्वे जानन्ति तथापि वक्तारः श्रोतारश्च सर्व एव जाताः दार्ढ्यं करणकयैव प्रयोकजत्वात् अतः परस्परमेवोचुः यतस्ते प्रसिद्धाः निरुद्धाः सर्व एव तथा जाता इति वक्तुं निश्चयमाह तत्र भगवन्माहात्म्यं जात्वा वक्तव्यमिति ज्ञापनार्थं दर्शनं श्रवणं चाह। यथादृष्टं यथाश्रुतमिति। न तु कल्पनया श्रुतं कीर्त्यत इति सिद्धं दृष्टमसम्भावनादिनिराकरणाय ननु कः प्रसङ्गोऽत्र भगवद्गुणनिरूपणे तत्राह। तद्रूपेति। तस्य रूपं गुणाः माधुर्यं कोमलता च प्रागल्भ्यं सामर्थ्यं तैर्दृष्टश्रुतं स्मारितं येषु तेन संस्कारोद्बोधात् संयोगापेक्षया संस्कारस्य बलवत्त्वात् ऊचुरेव अन्यथा प्रत्यक्षविषये परिदृश्यमाने अन्यचित्तता न स्यात् वस्तुतस्तु भगवद्गुणाः स्वरूपं च भगवत्कृपया तेष्वाविर्भूतमेव तथापि स्मृता इव वदन्तीतीवेत्युक्तम् ॥ २२ ॥ तेषां वाक्यान्याह। एतावित्यष्टभिः। अष्टैश्वर्याणि वक्तव्यानीति गुणैः सह भगवान् प्रमाणं चेति वा जन्मावधि सर्वमाहुः तत्रोभयोरुत्पत्तौ तुल्यतामाहुः। एतौ रामकृष्णौ भगवतः पुरुषोत्तमस्य साक्षात्स्वयमागत्य सर्वदुःखनिवारकस्य स एव स्वस्मिन् मानानीय स्वकीयान् देहादीन् तेषु सम्पाद्योद्धारं कुर्वन् समायत इत्याहुः। नारायणस्येति। अनेन भूतलमध्यब्रह्माण्डभावा निरूपिताः तस्यैतावान् समारम्भः सर्वमुक्त्यर्थः स भगवदवतारव्यतिरेकेण न सम्भवतीति युक्त एव तस्यावतार इति हिशब्दः अवतारो हि ये उद्धर्त्तव्याः तेषां मध्ये अवतरण कूपे पतितो हि गुणैः स्वयमागत्य चोद्ध्रियते तत्राज्ञेषु स्वागमनमेवोचितमिति अवतीर्णौ इह प्रपञ्चे यावतांशेन एते उद्धृता भवन्ति तावन्तमेवांशं व्यापृतवानित्याहुः। अंशेनेति। अंशत्वं स्वरूपत्वं च सर्वत्र पूर्णके आनन्दमात्रकरपादमुखोदरादावनन्तमूर्त्तौ पूर्णेन विरुध्यते सर्वप्रसिद्धमेतदिति वदता वसुदेवस्य वेश्मनि गृहे भार्यायां चेत्युक्तम् अतो द्वयमपि समर्थितं गृहे ह्याविर्भाव एवेति यथाश्रुतमिति वाक्यात् तावदेव तैः श्रुतमिति ॥ २३ ॥ एवमुभयोः सामान्यरूपमुक्त्वा भगवति विशेषरूपमाह। एष इति। एष कृष्णः वै निश्चयेन किलेति प्रसिद्धौ देवक्यां जातः गोकुलं च नीतो वसुदेवेन चकारात्तत्प्रतिनिधित्वेन कन्यात्यानीता नारदवाक्यादेषा प्रसिद्धिः ततः एतावत्कालम् एकादशवर्षपर्यन्तं तत्रैव वसन् नन्दवेश्मनि ववृधे तर्हि कथं सर्वैर्न व्यहृत इति चेत्तत्राह। गूढ इति। गुप्तत्वेन वा न व्यवहृत इत्यर्थः। वृद्धिर्जननवत्प्रातीतिकी ॥ २४ ॥

श्रीसुबोधिनी–सारः

चक्षुर्भ्यां पिबन्त इव जिह्वया लिहंत आस्वादयंत इव नासाभ्यां जिघ्रन्त आघ्राणं कुर्वंत इव बाहुभिः श्लिष्यंत इवोपलक्षिताः ॥ २१ ॥ परस्परं ते जना ऊचुः दृष्टं धनुर्भंगादि श्रुतं पूतनावधादि तत्तदनतिक्रम्य तयो रूपं गुणाः शौर्यादयो माधुर्यं हसितालापादि प्रागल्भ्यं धाष्ट्र्यं तैः स्मारिताः स्मरणं प्रापिता इव ॥ २२ ॥ भगवतः साक्षाद्धरेरंशेन एतौ रामकृष्णौ वसुदेवस्य वेश्मनि गृहेऽवतीर्णौ इह भूमौ ॥ २३ ॥ एष कृष्णो देवक्यां जातो गोकुलं नीतः प्रापितः एतं कालं यावत् गूढो निलीनो नन्दस्य वेश्मनि वसन् ववृधे ॥ २४ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

एतदेव स्पष्टयति—पिबन्त इवेति चक्षुरादिभिस्तयोरन्तःप्रवेशनादि कुर्वन्त एव स्थिता इत्यर्थः ॥ २१ ॥ तयो रूपं गजदन्तायुधादियुक्तं, गुणाः शौर्यादयः, माधुर्यं हसितालापादिगतं, प्रागल्भ्यं धाष्ट्र्यं, तः स्मारिताः स्मरणं प्रापिता इव यथादृष्टं धनुर्भङ्गादि यथाश्रुतमवतारादि तदनतिक्रम्य ते जना वै प्रसिद्धतया परस्परमूचुरित्यन्वयः ॥ २२ ॥ तेषामुक्तिमेवाह—एतावित्यादिभिरष्टभिः। एतौ रामकृष्णौ सूक्ष्माद्भगवत ऐश्वर्यादिगुणपूर्णस्यैवांशेनैव इह लोके तत्रापि वसुदेवस्य वेश्मन्यवतीर्णावित्यन्वयः। हि शब्दोऽवधारणे। 'कोऽसौ भगवान्?' तत्राहुः—नारायणस्येति। औपचारिकभगवत्त्ववारणायाहुः—साक्षादिति। 'किमर्थमवतीर्णौ' इत्यपेक्षायां 'दुःखहरणशीलत्वाद्भक्तदुःखनिरासार्थम्' इत्याशयेनाहुः हरेरिति। अंशेनेति रामस्यांशावतारत्वादजहत्स्वार्थया लक्षणया छत्रिणो गच्छन्तीतिवत्प्रयोगः, अन्यथा 'कृष्णस्तु भगवान्स्वयम्' इत्युक्तिविरोधापत्तेः ॥ २३ ॥ तत्र जन्मन आरभ्य श्रीकृष्णचरित्रं सङ्ग्रहेणाहुः—एष इति। एष श्रीकृष्णो वसुदेवाद्देवक्यां जातः, तेन च बिभ्यता गोकुलं नीतः, एतं एतावन्तं कालं नन्दगृहे गूढः इतैरज्ञातो वसन् ववृधे एधाञ्चक्रे। 'अस्मदुक्तौ सन्देहो न कर्तव्य' इत्याशयेनाहुः—वै इति। प्रसिद्धत्वादिति। तत्र हेतुं सूचयन्त आहुः—किलेति ॥ २४ ॥

अन्वितार्थप्रकाशिका

तदेवाह—पिबन्त इवेति ॥ चक्षुर्भ्यां पिबन्त इव जिह्वया लिहन्त इव नासाभ्यां जिघ्रन्त इव बाहुभिः श्लिष्यन्त इव बाहुभिः श्लिष्यन्त इव लक्षिताः चक्षुर्भ्यां नासाभ्यामित्यत्र जातौ द्वित्वम्। लोकेऽप्येवं तथा च माघः। "प्रकाशकार्कश्यगुणौ

दधानास्तनौ तरुण्यः परिवव्रुरेनम् ।" इति ॥ २१ ॥ ऊचुरिति ॥ तयो रूपं गजदन्तायुधादियुक्तं गुणाः शौर्यादयः माधुर्यं हसितालापादिगतं प्रागल्भ्यं धाष्टर्यं तैः स्मारिताः स्मरणं प्रापिता इव यथादृष्ट धनुर्भङ्गादि यथाश्रुतं गोवर्द्धनोद्धरणादि तदनतिक्रम्य तदनुरूपमित्यर्थः । ते जना वै प्रसिद्धतया परस्परमूचुः ॥ २२ ॥ एतौ इति ॥ एतौ रामकृष्णौ साक्षाद्भगवतः हरेः नारायणस्य अंशेन इह लोके वसुदेवस्य वेश्मन्ययतीर्णौ बलस्यांशत्वाच्छत्रिन्यायेन उभयोरंशावतारत्वाच्छत्रिन्यायेन उभयोरंशत्वं कथितम् । तेषां तथैव प्रतीत्या वा तदुक्तिः ॥ २३ ॥ एष इति ॥ एव श्रीकृष्णो वसुदेवाद्देवक्यां जातः तेन च बिभ्यता गोकुल नीतः । किलेति सर्वत्रान्वयः । एतम् एतावन्तं कालं नन्दगृहे गूढः इतरैरज्ञातौ वसन्ववृधे एधांचक्रे ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तामतृप्तिमेवाह पिबंत इति श्लिष्यंत इव आलिंगनं कुर्वंत इव ॥ २१ ॥ यथा दृष्टं चापभंगादि यथाश्रुतं गिरिधारणादि तत्तदनतिक्रम्य यथा योग्यमित्यर्थः दृष्टिगोचरं तयोरूपं भगवच्चिह्नयुक्ताकारः गुणाः सत्यशौचशौर्यधैर्यादयश्च माधुर्यं स्वभावसौंदर्यं च प्रागल्भ्यं अपराभवनीयत्वं च तैः स्मारिताः स्मरण प्रापिता इव ॥२२॥ साश्चर्याणां तेषां वचनान्याह अष्टभिः एताविति वेश्मनि गेहे ॥ २३ ॥ किलेति सर्वत्र योज्यं ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह पिबन्त इवेति ॥ ते जनाः, चक्षुर्भ्यां पिबन्तः इव, जिह्वया लिहन्तः इव, नासाभ्यां नासिकाभ्यां, जिघ्रन्तः इव, बाहुभिः श्लिष्यन्तः परिष्वङ्गं कुर्वन्तः इव, अभूवन् ॥ २१ ॥ ऊचुरिति ॥ ते जनाः, तयोः रूपं गजदन्तादियुक्तं च गुणाः शौर्यादयश्च माधुर्यं हसितालापादिगता मधुरता च प्रागल्भ्यं धाष्टर्यं च तैः स्मारिताः स्मरणं प्रापिताः इव, अनितरसाधारणतद्रूपगुणादियाथात्म्यवेदिनः इव, यथा दृष्टं धनुर्भङ्गादि, यथा श्रुतं गोवर्द्धनोद्धरणादि तदनतिक्रम्य, तदनुरूपमित्यर्थः । परस्परं, ऊचुः वै ॥ २२ ॥ तेषामुक्तिमाह । एतावित्यष्टभिः । एताविति । एतौ रामकृष्णौ, साक्षात् भगवतः नारायणस्य हरेः, अंशेन इहास्मिन्, वसुदेवस्य वेश्मनि, अवतीर्णौ हि ॥२३॥ तत्र श्रीकृष्णस्य चरित्रं जन्मन आरभ्य संगृह्णन्ति । एष इति । एषः देवक्यां, वसुदेवादिति शेषः । जातः किल । किं च गोकुलं नीतः, वसुदेवेनेति शेषः । वै एतदपि सत्यमेव । एतं कालं, एतावत्कालपर्यन्तमित्यर्थः । नन्दवेश्मनि गूढः वसन्, ववृधे ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ऊचुरिति : १०.४३ २२.

कीर्तिर्दिव्यति गोपतेरविरता यद्यप्यघघ्नी तथाप्यस्मिंस्तत्स्मृतिकृद्भवत्यविकलं तन्मूर्तिसंदर्शनम् ।
जानन्तोऽपि जनाः पुरापि यदुपं दृष्टैव यत्प्रास्तुवं तस्मात्तत्प्रतिमावलोकनमहोरात्रं विधेयं वुधैः ॥ ६२ ॥

कृष्णप्रिया

मानो वे उन्हें नेत्रों से पी रहे हों, जिह्वा से चाट रहे हों, नासिका से सूँघ रहे हों और भुजाओं से पकड़कर हृदय से सटा रहे हों ॥ २१ ॥ उनके सौन्दर्य, गुण, माधुर्य और निर्भयता ने मानो दर्शकों को उनकी लीलाओं का स्मरण करा दिया और वे लोग आपस में उनके सम्बन्ध की देखी-सुनी बातें कहने-सुनने लगे ॥ २२ ॥ 'ये दोनों साक्षात् भगवान् नारायण के अंश हैं । इस पृथ्वी पर वसुदेवजी के घर में अवतीर्ण हुए हैं ॥ २३ ॥ [अँगुली से दिखाकर] ये साँवले-सलोने कुमार देवकी के गर्भ से उत्पन्न हुए थे । जनमते ही वसुदेव जी ने इन्हें गोकुल पहुँचा दिया था । इतने दिनों तक ये वहाँ छिपकर रहे और नन्दजी के घर में ही पलकर इतने बड़े हुए ॥ २४ ॥

पूतनानेन नीतान्तं[1] चक्रवातश्च दानवः । अर्जुनौ गुह्यकः केशी धेनुकोऽन्ये च तद्विधाः ॥ २५ ॥
गावः सपाला एतेन दावाग्नेः परिमोचिताः । कालियो दमितः सर्प[2] इन्द्रश्च विमदः कृतः ॥ २६ ॥
सप्ताहमेकहस्तेन [3]कृतोऽद्रिप्रवरोऽमुना । वर्षवाताशनिभ्यश्च परित्रातं च गोकुलम् ॥ २७ ॥
[4]गोप्योऽस्य नित्यमुदितहसित[5]प्रेक्षितं मुखम् । पश्यन्त्यो विविधांस्तापांस्तरन्ति[6]स्माश्रमं मुदा ॥२८॥

---

१. निहता–वीर. । २. शत्रुश्च–विज. । ३. धृतोश्च श्रीधर. वंशो. जोव. वीर विज. विश्व. । ४. गोप्यश्च–विज. । ५. प्रक्षणं–श्रीधर' वंशी. जीव. वीर. बिज. विश्व. । ६. स्म श्रमं–विज. ।

कर्दमक्षमा

अन्वयः—अनेन पूतना अन्तं नीता चक्रवात दानवः च अन्तं नीतः, अर्जुनौ च पातितौ धेनुकः केशी गुह्यकः तद्विधा अन्ये चान्तं नीता ॥ २५ ॥ एतेन सपाला गाव दावाग्नेः परिमोचिता कालियः सर्पः दमितः इन्द्रश्च विमदः कृतः ॥ २६ ॥ अद्रिप्रवरः अमुना श्रीकृष्णेन सप्ताहमेकहस्तेन धृतः वर्षवाताशनिभ्यो गोकुलं च परित्रातम् ॥ २७ ॥ नित्यमुदितं हसितप्रेक्षणं च यस्मिन् तदस्य मुखं मुदा पश्यन्त्यः गोप्यः विविधान् तापान् श्रमं विना तरन्ति स्म ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गुह्यकः शंखचूडः अन्ये चाघासुरादयः ॥२५-२७॥ आश्रममीषच्छ्रमयुक्तं मुखम् । अश्रमं श्रमरहितं मुखमिति वा । यद्वा अश्रमं यथा भवति तथा तापांस्तरंति स्मेति ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अनेन कृष्णेन । अन्तं नाशम् । चक्रवातस्तृणावर्तः । अर्जुनौ ककुब्वृक्षौ । तद्विधास्तैस्तुल्याः, छलिन इत्यर्थः ॥ अन्तं विनाशम् ॥ २५ ॥ एतेन श्रीकृष्णेन ॥ सर्पतीतस्ततः प्रसरतीति सर्पः । शिरस्सु नृत्येन तद्गमनमशक्यमिति । कालिय इति तन्नामप्रसिद्ध्यैव महाविषत्वादिकं सूचितम् । २६ ॥ अमुना कृष्णेन । अद्रिप्रवरो गोवर्धनः । अशनिर्वज्रपातः ॥ मिमदकरणप्रकारमाह सप्ताहमिति । प्रथमः च उक्तसमुच्चये, द्वितीयोऽनुक्तस्य । तेन श्रीगोविंदाभिषेकोऽपि गृहीतः ॥ २७ ॥ अस्य कृष्णस्य । नित्यं सदा मुदिते हर्षयुते हसितप्रेक्षणे यस्मिंस्तथा । भगवति श्रमारोपेणानीशत्वमाशंक्याह—आश्रमं श्रमरहितमिति वा । मुखे तु श्रमचिह्नं भवति न तु श्रमस्तस्यान्यांगविषयत्वात्प्राय इत्यरुच्चाह—यद्वेति । विविधानाध्यात्मिकादीन् ॥ तत्रैव भावविशेषवतीनां कासाञ्चित्स्त्रीणां वाक्यमाह—गोप्य इति । नित्यं मुनितं हर्षेण प्रसन्नञ्च, तन हसिते प्रेक्षणमवलोकनं यत्मिस्तच्च । यद्वा—नित्यं मुदितं तत्, अत एव हसितं हास्ययुक्तं च प्रकृष्टं कटाक्षादिना सुन्दरमीक्षणं यस्मिंस्तत्र । यद्वा—उदितं हसितयुक्तं प्रेक्षणं यस्मिंस्तन्नित्यं मुदा पश्यन्त्यः, अत एवाश्रममनायासेन तरन्तिस्मा अतरन् । ता एव तेरुर्नास्मद्विधमंदभाग्या इति दैन्येनातीतत्वम् । यद्वा— स्म प्रसिद्धावेव नातीते । अतो वर्तमानप्रयोगस्तस्य व्रजगमने संभावनानपगमात् । विविधान् गुरुपत्यादिकृतनिन्दा तर्जनादिना विरहादिभेदेन वा । एवं रासादिलीलापि सूचिता ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अन्तं विनाशम् ॥ २५ ॥ सर्पति इतस्ततः प्रसरतीति सर्प इति शिरसुः नृत्येन तद्गमनशक्यमिति । तथा कालिय इति तन्नामप्रसिद्ध्यैव महाविषयमत्वादिकं सूचितम् ॥ २६ ॥ विमदकरणप्रकारमेवाह । सप्ताहमिति । प्रथमश्चकारः उक्तस्य समुच्चये । द्वितीयोऽनुक्तस्य । तेन श्रीगोविन्दाभिषेकमपि गृहीतम् ॥ २७ ॥ तत्रैव भावविशेषवतीनां कासाञ्चित् स्त्रीणां वाक्यमाह । गोप्य इति । नित्यं मुदितं हर्षेण प्रसन्नञ्च तत् हसितेन प्रेक्षणमिव लोकनं यस्मिन् तच्च । यद्वा । नित्यं मुदितञ्च तत् अत एव हसितं हासयुक्तञ्च प्रकृष्टं कटाक्षादिना सुन्दरमीक्षणं यस्मिन् तच्च । यद्वा । उदितं हसितयुक्तं प्रेक्षणं यस्मिन् तन्नित्यं मुदा पश्यन्त्यः । अतएवाश्रमन् अनायासेन तरन्तिस्म अतरन् । ता एव तेरुर्नास्मद्विधमन्दभाग्या इति दैन्येनातीतत्वं यद्वा स्म प्रसिद्धावेव नातीते । अतो वर्त्तमानप्रयागेस्तस्य व्रजगमने सम्भावनानपगमात् विविधान् गुरुपत्यादिकृतनिन्दातर्जनादिना विरहादिभेदेन वा एवं रासादिलीलापि सूचिता ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अन्तं विनाशम्, अर्जुनौ यमलार्जुनौ, तद्विधाः पूतनादिसदृशा दुष्टदानवाः ॥ २५ ॥ सर्पति – इतस्ततः प्रसरतीति सर्प इति, शिरःसु नृत्येन तद्‍गमनमशक्यमिति, तथा 'कालियः' इति तन्नामप्रसिद्ध्यैव महाविषमयत्वादिकञ्च सूचितम् ॥ २६ ॥ विमदकरणप्रकारमेवाह – सप्ताहमिति । अद्रिषु प्रवरः परमगौरवादिना श्रेष्ठतमः श्रीगोवर्द्धनः । अमुनेति साक्षादपि परोक्षोक्तिः । निजमाहात्म्यश्रवणेन किल लज्जया श्रीवलपृष्ठे लीनत्वात् । यद्वा, एतेनेत्यर्थः । गोकुलं गवां कुलं प्रायस्तन्नाशार्थमेव महाइष्टया-रम्भात् । यद्वा, व्रजस्तत्रत्याः सर्व्वेऽपीत्यर्थः । परितस्त्रातं सर्व्वदुःखतः सम्यग्रक्षितम् । प्रथमश्चकार उक्तस्य समुच्चये, द्वितीयोऽनुक्तस्य, तेन श्रीगोविन्दाभिषेकादिकमन्यत् सर्व्वं गृहीतम् । लीलयं प्रकर्षविशेषाद्विस्तार्योक्ता; एवमग्रेऽपि ॥ २७ ॥ रासक्रीडां सूचयन्ति—गोप्य इति । नित्यं मुदितं हर्षेण प्रसन्नं च तत् हसितेन प्रेक्षणमवलोकनं यस्मिन् तच्च । यद्वा, नित्यं मुदितञ्च तत्, अतएव हसितं हासयुक्तञ्च प्रकृष्टं कटाक्षादिना सुन्दरमीक्षणं यस्मिन् तच्च; यद्वा, उदितं हसितयुक्तं प्रेक्षणं यस्मिन् तन्नित्यं मुदा पश्यन्त्यः, अतएव अश्रममनायासेन तरन्ति स्म—अतरन्, ता एव तेरुर्नास्मद्विधा मन्दभाग्या इति दैन्येनातीतत्वम् । यद्वा, स्म प्रसिद्धौ, वर्त्तमानाप्रयोगस्तस्य व्रजगमने सम्भावमानपगमात् । विविधान् गुरुपत्यादि-कृत-निन्दाः, तत्तर्जनादिना विरहजादिभेदेन वा तत्क्रीडाविशेषो लज्जया नोक्तः । एवं गोकुललीलानां यथोत्तरं श्रेष्ठ्यापेक्षया क्रमोऽतिक्रान्तः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

चक्रवातः तृणावर्त्तः ॥ २५-२८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अनेन श्रीकृष्णेन पूतना निहता तथा चक्रवातः तृणावर्तश्च दानवो निहतः अर्जुनौ पातिताविति शेषः अनेनेत्यनुषङ्गः धेनुकादयश्च तथाविधा अन्ने चाघासुरादयो निहताः तत्र गुह्यकः शङ्खचूडः ॥ २५ ॥ एतेनैव गोपालैः सहिता गावश्चाग्नेः सकासात्परिमोचिताः कालियाख्यः सर्पश्च अनेनैव दमितः विगतो मदो यस्य तथाभूतः इन्द्रश्च कृतः ॥ २६ ॥ अद्रिप्रवरो गोवर्द्धनोऽनेन श्रीकृष्णेन कर्त्रा हस्तेन धृतः वर्षधाराभ्योऽशनिभ्यश्च गोकुलं परित्रातं रक्षितम् ॥ २७ ॥ नित्यप्रमुदितं हसितमीक्षणञ्च यस्मिंस्तदस्य मुखं पश्यन्त्यः यद्वा नित्यविकसितं हसितेनेक्षणाभ्याञ्च युक्तमस्य मुखं मुदा पश्यत्यः विविधान् तापानाध्यात्मिकादीन् अश्रमं न श्रमो विद्यते यस्मिन्कर्मणि तद्यथा भवति तथा तरन्ति स्मातिवर्त्तन्ते स्म ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अन्तं नाशं नीता गुह्यकः शङ्खचूडः ॥ २५-२८ ॥ श्रमञ्च तरन्ति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ननु तथापि द्वयोरेव देवकीपुत्रत्वाद्गोकुलनीतत्वान्नन्दवेशमनि वृद्धिमत्वाच्च कथं स एष इति तदेतद्भ्यां श्रीकृष्ण एवोच्यत इत्याशङ्क्याह—पूतनानेनेत्यादि। अनेन येन पूतनादयोऽन्तं नीताः, स एव साक्षाद्भगवान् अपरस्त्वंश इति पूर्वोक्तविवृत्तिः ॥ २५-२९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गुह्यकः शङ्खचूडः ॥ २५—२७ ॥ अस्य कृष्णस्य विविधान् पतिश्वचादितर्जननिरोधादीन् अश्रमं यथा स्यात्तथेति तत्र तासां दुःखगन्धोऽपि न भवेदित्यर्थः ॥ २८ ॥

गूढार्थदीपिनी

पूतना अन्तं मृत्युम् नीता तद्विधाः तत्सदृशपराक्रमाः ये अन्ये तेऽपि अन्तं नीता इत्यन्वयः। गुह्यकः शंखचूडः चक्रवातः तृणावर्तः अर्जुनौ वृक्षौ पातितौ ॥ २५-२६ ॥ एकेन वामेन ॥ २७ ॥ नित्यमुनिते हर्षप्रदे हसितप्रेक्षणे यस्मिन् तत्। आश्रमम् ईषच्छ्रमयुक्तम्। अश्रमं वा श्रमरहितम् अनायासेन वा ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गुह्यकः शङ्खचूडः अन्ये चाघासुरादयः ॥ २५-२७ ॥ अश्रमं यथा भवति तथा विविधान् तापान् तरन्ति स्म ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अन्तं नाशमेका सती सतीत्वं तं मोक्षं नीता गतं। चक्रवातो दानवस्तृणावर्तासुरोऽर्जुनावन्तं नीतौ धेन्वाः कं यस्यासौ धेनुको वत्सासुरः। यद्वा मुख्यो हन्ता कृष्ण एवेति धेनुकोक्तिः। उत्तरत्र तु बलोद्धारमिति धेनुकादय इत्युक्तिरिति न विरोधः। गुह्यकः शङ्खचूडस्तद्विधा अन्ये चान्तं नीता इति विपरितमन्वेति ॥ २५ ॥ सपालाः ससंरक्षका विपदो हता हन्तः ॥ २६ ॥ सप्ताहं गतं। वर्षवाताशनिभ्य इन्द्रमुक्तेभ्य ॥ २७ ॥ नित्यमुदिते हसितप्रेक्षणे यस्य तन्नित्यमुदितं हासितेन सहितं प्रेक्षण यस्य तन्मुखमिति वा स्वयं विविधांस्तापांस्तरन्ति स्मातरन्। श्रमं चातरन् ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

न केवलं तूष्णीं वृद्धिं गतः किं तु चरित्राण्यपि कृतवानित्याहुः। पूतनेत्यादिपञ्चभिः। दुष्टनिग्रहः शिष्टदुःखदूरीकरणं तेभ्यः फलदानं चेति तत्र दुःखं त्रिविधम् आधिभौतिकमाधिदैविकमाध्यात्मिकमिति ततश्चरित्रं पञ्चविधं तत्र प्रथममाह। अनेन पूतना अन्तं नीता प्रथमं ततश्चक्रवातस्तृणावर्त्तः अन्तं नीतः स च दानवो महान् ततऽर्ज्जुनौ यमलौ वृक्षौ ततो धेनुकः ततः साम्प्रतं केशी गुह्यकः शङ्खचूडः अन्ये चारिष्टादयः तद्विधा पूर्वोक्तसमानाः "षडेते प्रतिपक्षास्तु इन्द्रियाणीव रूपिताः। अतिदिष्टास्तथा चान्ये सर्वतुल्या यतः परे" ॥ २५ ॥ आधिभौतिकोपद्रवपरिहारमाह। गावः सपाला इति। एतेन भगवता सपाला गावः दावाग्नेः सकाशात् परितो मोचिताः अचेतनबाधानिराकरणमुक्तं सचेतननिराकरणमाह। कालीयः सर्पो दमितः आधिदैविकोऽपि भूततुल्यो जात इति वक्तुं सह कीर्त्तनम् इन्द्रश्च विमदः कृत इति चकाराद्ब्राह्मणाः वरुणादयश्च ॥ २६ ॥ आधिदैविकोपद्रवनिराकरणमाह। सप्ताहमिति। एकहस्तेनाद्रिप्रवरो गोवर्द्धनः धृतः धारितः अनायासार्थमेकहस्तेन धृत इत्युक्तं सर्वत्राप्रयोजकत्व्यावृत्त्यर्थमुक्तिविशेषः यथा कालीयः सर्प इति सर्पो हि दमने दुःसाध्य इति अमुना भगवतेति बालकत्वं प्रदर्शितवन्तः किं धारणेन कृतमित्याशङ्कायामाह। वर्षवाताशनिभ्यश्चेति। अशनिप्रायाः पाषाणाः यदि वा क्षणं तिष्ठेयुस्तदाशनयोऽपि पतेयुरिति निर्द्धारितत्वादुक्तम् ॥ २७ ॥

आध्यात्मिकपीडापरिहारमाह । गोप्य इति । अशनिभ्यश्चेति चकारात् इन्द्रयागादपि उपधर्मात् परिपालिता इति गोप्यो हि अस्य मुखं पश्यन्त्यः विविधांस्तापान् जहुः नित्यमुदितं च तत् हसितपूर्वकं प्रेक्षितं यत्र तादृशं च नित्यमुदितत्वेन नत्र न किञ्चित्कर्तव्यं दृष्टिश्च स्वतः प्रवृत्ता भवति विवेकेन ये क्लेशाः ये वा अज्ञानेन ते उभये हसितप्रेक्षिताभ्यां निराकृताः मुखं हि परमानन्दरूपं विविधास्ताः कामादयः अज्ञानादयः विषयाद्यनुरोधादयश्च तरणे प्रसिद्धिरेव प्रमाणम् अश्रममिति कर्मज्ञानभक्तिमार्गेषु श्रमोऽप्यस्त्यन्ततः अत्र तु श्रमाभावः किं च नौकीनद्यादितरणे श्रमाभावोऽस्ति अत्र तु मुदेत्यधिकम् ॥ २८ ॥

श्रीसुबोधिनी-सारः

अनेन पूतनाऽतं नाशं नीता चक्रवातस्तृणावर्त्तो दानवः अर्जुनौ वृक्षौ गुह्यकः शंखचूडः केशी धेनुकोऽन्ये च तद्विधा अघादयश्चांतं नीताः ॥ २५ ॥ सपाला गावो दावाग्नेः सकाशादेतेन परिमोचिताः कालियः सर्पः सुदर्शनः दमितः इन्द्रो विमदो गर्वहीनः कृतः ॥ २६ ॥ एकहस्तेनाद्रिप्रवरो गोवर्द्धनोऽमुना कृष्णेन सप्ताहं यावत् धृतः वर्षवायुवज्रपातेभ्यो गोकुलं परित्रातं रक्षितं च ॥ २७ ॥ नित्यं मुदितं हसितं प्रेक्षणं यस्मिन् तत् अश्रमं विखेदमस्य मुखं पश्यंतो विविधान् तापान् तरंति मुदा हर्षेण ॥ २८ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

अनेनैव कृष्णेन पूतना अन्तं मृत्युं नीता प्रापिता, चक्रवातस्तृणार्तः दानवश्चातं नीतः । अर्जुनवृक्षौ च पातिताविति शेषः । धेनुकादयस्तथाविधा महाबलपराक्रमवन्तोऽन्ये बकासुरादयश्चातं नीताः । तत्र गुह्यकः शङ्खचूडः ॥ २५ ॥ एतेनैव गोपालैः सहिता गावश्च दावाग्नेः सकाशात् परिमोचिताः । कालियाख्यः सर्पश्चानेनैत्र दमितः वशीकृत्य निष्कासितः । इन्द्रश्च विगतो मदो यस्मात्तथाभूतः कृतः ॥ २६ ॥ अद्रिप्रवरो गोवर्धनोऽमुना कृष्णेन कर्त्रा सप्ताहं सप्तदिनपर्यन्तमेकहस्तेन धृतः, तेन वर्षादिभ्यो गोकुलं च परित्रातम ॥ २७ ॥ नित्यप्रमुदितं हसितमीक्षणं च यस्मिंस्तदस्य मुखं मुदा पश्यन्त्यो गोप्यो विविधान् आध्यात्मिकाधिदैविकभेदभिन्नांस्तापान् दुःखानि अश्रमं यथा भवति तथा श्रमं विनैव तरन्ति स्म अतिवर्तन्ते स्म ॥ २८ ॥

अन्वितार्थप्रकाशिका

पूतनेति ॥ अनेनैव कृष्णेन पूतना अन्तं मृत्युं नीता प्रापिता चक्रवातस्तृणावर्तः दानवश्चान्तं नीतः अर्जुनवृक्षौ च पातिताविति शेषः । धेनुकः केशी गुह्यकः शङ्खचूडः तथाविधाः महाबलपराक्रमवन्तोऽन्ये बकाघासुरादयश्चान्तं नीताः ॥ २५ ॥ गाव इति ॥ एतेनैव गोपालैः सहिता गावश्च दावाग्नेः सकाशात्परिमोचिताः कालियाख्यः सर्पश्चानेनैव दमितो वशीकृत्य निष्कासितः इन्द्रश्च विगतो मदो यस्य तथाभूतः कृतः ॥ २६ ॥ सप्ताहमिति ॥ अद्रिप्रवरो गोवर्धनोऽमुना कृष्णेन कर्त्रा सप्ताहं सप्तदिनपर्यन्तमेकहस्तेन धृतः वर्षवाताशनिभ्यो गोकुलं च परित्रातम् ॥ २७ ॥ गोप्य इति ॥ नित्यप्रमुदितं हसितमीक्षणं च यस्मिंस्तदस्य मुखं मुदा पश्यन्त्यो गोप्यो विविधान् तापान् दैत्यादिकृतदुःखसंबन्धजान् कामादीन् वा । पतिश्वश्रूतर्जनादीनिति तु चक्रवर्ती । दुःखानि अश्रमं यथा भवति तथा श्रमं विनैव तरन्ति स्म अतिवर्तन्ते स्म । आश्रममिति वा छेदः । ईषच्छ्रमयुक्तं मुखम् अश्रमं मुखमिति वा ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गुह्यकः शंखचूडः अन्ये चाद्य प्रभृतयः ॥ २५-२७ ॥ मुदितं आनंद युक्तं हसितं हासयुक्तं च प्रेक्षणं यस्मिन् तत् मुखं अश्रमं श्रम रहितं यथा भवति तथा तरन्ति स्म ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पूतनेति ॥ पूतना, अनेन एव निहता । चक्रवातः, दानवश्चापि, अनेन हतः । अर्जुनौ द्रुमौ, अनेन पातिताविति शेषः । गुह्यकः शङ्खचूडः, केशीदानवः, धेनुकः, तद्विधाः अन्ये अघासुरादयश्च, अनेनैव निहताः ॥ २५ ॥ गाव इति ॥ एतेन कृष्णेन, सपाला गोपालैः सहिताः, गावः दावाग्नेः सकाशात्, परिमोचिताः, कालियः सर्पः, एतेन दमितः इन्द्रश्चेन्द्रोऽपि एतेन विमदो विगतत्रिलोकेशतामदः, कृतः ॥ २६ ॥ सप्ताहमिति ॥ अमुना कृष्णेनैव, अद्रिप्रवरो गोवर्द्धनाचलः, सप्ताहं सप्तदिनपर्यन्तं, एकहस्तेन, धृतः । वर्षो जलप्रवर्षणं च वातास्तीव्रा वायवश्च अशनयो वैद्युतानलाश्च, तेभ्यश्च, गोकुलं च स्वगोकुलमपि, परित्रातं संरक्षितम् ॥ २७ ॥ गोप्य इति ॥ नित्यमुदिते निरन्तरं विकसिते हसितप्रेक्षणे यस्मिंस्तथाविधं, अस्य मुखं मुदा पश्यन्त्यः गोप्यः, विविधान् तापान्, आध्यात्मिकादिपरितापानित्यर्थः । न विद्यते श्रमो यस्मिन् कर्मणि तद्यथा तथेत्यश्रमम् । तरन्ति स्म अतिवर्त्तन्ते स्म ॥ २८ ॥

कृष्णप्रिया

इन्होंने ही पूतना, तृष्णावर्त, शङ्खचूड, केशी और धेनुक आदि का तथा और भी दुष्ट दैत्यों का वध तथा यमलार्जुन का उद्धार किया है ॥ २५ ॥ इन्होंने ही गौ और ग्वालों को दावानल की ज्वाला से बचाया था । कालिय नाग का दमन

और इन्द्र का मान-मर्दन भी इन्होंने ही किया था ॥ २६ ॥ इन्होंने सात दिनों तक एक ही हाथ पर गिरिराज गोवर्धन को उठाये रक्खा और उसके द्वारा आँधी-पानी तथा वज्रपात से गोकुल को बचा लिया ॥ २७ ॥ गोपियाँ इनकी मन्द-मन्द मुसकान, मधुर चितवन और सर्वदा एक रस प्रसन्न रहने वाले मुखार विन्द के दर्शन से आनन्दित रहती थी और अनायास ही सब प्रकार के तापों से मुक्त हो जाती थी ॥ २८ ॥

वदन्त्यनेन वंशोऽयं यदोः सुबहुविश्रुतः । श्रियं यशो महत्त्वं च लप्स्यते परिरक्षितः ॥ २९ ॥
अयं चास्याग्रजः श्रीमान् रामः कमललोचनः । प्रलम्बो निहतो[1] येन वत्सको ये बकादयः ॥ ३० ॥
जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च । कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ॥ ३१ ॥
हे नन्दसूनो हे राम भवन्तौ [2]वीरसंमतौ । नियुद्धकुशलौ [3]श्रुत्वा राज्ञाऽऽहूतौ दिदृक्षुणा ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—अनेन परिरक्षित अयं यदोर्वंशः बहुविश्रुतः श्रियं यशः महत्वं च लप्स्यते ॥२९॥ अयं कमललोचनः श्रीमान् रामश्च अस्य अग्रजः येन प्रलम्बः वत्सकः निहतः ये च वकादयः ते च निहताः ॥ ३० ॥ जनेषु एवं ब्रुवाणेषु तूर्येषु निनदत्सु च चाणूरः रामकृष्णौ समाभाष्य वाक्यमब्रवीत् ॥ ३१ ॥ ही नन्दसूनो कृष्ण ! हे राम ! भवन्तौ वीरसंमतौ नियुद्धे कुशलौ श्रुत्वा दिदृक्षुणा राज्ञा आहूतौ ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनेन परिरक्षितः यदोर्वंशः सुबहुविश्रुतः सन्छ्रयादि लप्स्यत इति वदंतीति ॥ २९ ॥ धेनुकवकवत्सासुरेषु विपर्ययोक्तिर्जनवादेष्वनिश्चयात् ॥ ३० ॥ जनेष्वेवं ब्रुवाणेषु सत्सु तदसहमानश्चाणरोऽब्रवीदिति ॥ ३१–३४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अनेन कृष्णेन । अथ श्रीमथुरादौ करिष्यमाणां लीलामुद्दिशति–वदन्तीति, शास्त्रज्ञाः कथयन्ति । महत्त्वं सर्वत उत्कर्षम् ॥ २९ ॥ अयं रामः । अस्य कृष्णस्य । येन रामेण । एवं श्रीबलदेवस्याप्याहुः—अयमिति । अप्यर्थे चकारः । अग्रजत्वेन श्रीमान् तदनुरूपं सर्वशोभायुक्तः । तत्रापि नेत्रशोभया लोभयन्ति— कमलेति । वत्सको वत्सप्रतिरूप एव न तु वत्सः । "इवे प्रतिकृतौ" इति कन् । इति तद्वधे दोषः प्रत्याख्यातः । आदिशब्दाद्धेनुकजातयः । विपर्ययोक्तिस्तैर्योजिता । अत्र 'यथादृष्टं यथाश्रुतम्' (२२) इत्युक्तेस्तत्त्वज्ञानाभाव एवोपजीव्यः ॥ ३० ॥ तत् जनवादरूपं तन्महत्त्वम् एवमेतत्प्रकारम् । ब्रुवाणेष्विति प्रहर्षेण तेषामुक्त्यसमाप्तिरुक्ता । जनेष्विति बाहुल्यात्तेषाम निवार्यत्वं ज्ञापितं, तदुक्तेरप्रमाणं च खण्डितम् । एवं तेषां मात्सर्योदयः । तूर्येषु नितरां नदत्स्वित्यनेन युद्धोत्साहश्च दर्शितः । अत एवाब्रवीत्समाभाष्याहूय संबोध्य वा, वाक्यमिति पौनरुक्त्यं विशेषणाविशेष्येऽत्र देय इत्यभिप्रायेण । स च निष्ठुर इति गम्यः । यद्वाऽकारप्रश्लेषेण वक्तुमयोग्यमित्यर्थः ॥ ३१ ॥ लोकप्रसिद्धत्वादाह–हे नन्दसूनो इति । वीर्येण पराक्रमेण । संमतौ सम्यक्ख्यातौ । नियुद्धं बाहुयुद्धम् ॥ समाभाषणप्रकार मेवाह–हे इति । नन्दसुनुत्वेन सम्बोधनं तदीयसत्पुत्रत्वस्य व्यञ्जनाय, रामेति सकललोकरतिहेतुत्वस्य । तत्तच्च युद्धाय प्रोत्साहनम् । श्लेषेण तु गोपपुत्रत्वेनामहत्त्वं, तद्वत्पितृसम्बन्धानुल्लेखेनाज्ञातापितृकत्वं सूचयति । तत्तूपहासेन तेजोग्लापनार्थमिति ज्ञेयम् । वीर्येण बलेन । सम्मतौ लोकानामादृतौ तत्रापि नियुद्धे बाहुयुद्धे । कुशलौ दक्षौ श्रुत्वाऽत एव दिदृक्षया भवन्तौ नियुद्धं वा द्रष्टुमिच्छया । राज्ञेति तद्योग्यतोक्ता । अहो अत्र मल्लयुद्धेन क्रीडतामिति भावः । अत्रापि विरोधिलक्षणयोपहास एव तात्पर्यम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ श्रीमथुरादौ करिष्यमाणां लीलामुद्दिशन्ति । वदन्तीति । शास्त्रज्ञाः कथयन्तिः महत्त्वं सर्वत उत्कर्षम् ॥ २९ ॥ एवं श्रीवलदेवस्याप्याहुः । अयमिति । अप्यर्थे चकारः । अग्रजत्वेन श्रीमान् तदनुरूपसर्वशोभायुक्तः तत्रापि नेत्रशोभया लोभयन्ति । कमलेति । वत्सको वत्सप्रतिरूप एव नतु वत्सः "इवे प्रतिकृता"विति कन् इति तद्वधदोषः प्रत्याख्यातः । आदिशब्दाद्धेनुकज्ञातयः विपर्ययोक्तिस्तैर्योजिता । अत्र यथादृष्टं यथाश्रुतमित्युक्तेस्तत्त्वज्ञानाभाव एवोपजीव्यः ॥ ३० ॥ एवमेतत्प्रकारं ब्रुवाणेष्विति प्रहर्षेण तेषामुक्त्यसमाप्तिरुक्ता जनेष्विति बाहुल्यात्तेषामनिवार्यत्वं ज्ञापितं तदुक्तेरप्रमाणत्वञ्च खण्डितम् एवं तेषां मात्सर्योदयः तूर्येषु नितरां नदत्स्वित्यनेन युद्धोत्साहश्च दर्शितः । अत एवाब्रवीत् । समाभाष्य आहूय सम्बोध्य वा वक्यमिति पौनरुक्त्यं विशेषण विशेषोऽत्र देय इत्यभिप्रायेण सच निष्ठुरमिति गम्यः । यद्वा । अकारप्रश्लेषेण वक्तुमयोग्यमित्यर्थः ॥ ३१ ॥ समाभाषणप्रकारमेवाह । हे इति । नन्दसूनुत्वेन सम्बोधनं तदीयसत्पुत्रत्वस्य व्यञ्जनाय । रामेति सकललोकरतिहेतुत्वस्य तत्तच्च युद्धाय प्रोत्साहनं

---

१. प्रलम्बो निहतोऽनेन बहवो धेनुकादयः–विज. । २. वीर्यं–विज. ; वीर्यसंमतौ–प्रा. पा. । ३. ज्ञात्वा–प्रा. पा. ।

श्लेषेण तु गोपपुत्रत्वेनामहत्त्वं तद्वत् पितृसम्बन्धानुल्लेखेनाज्ञातपितृकत्वञ्च सूचयति तत्तूपहासेन तेजोग्लापनार्थमिति ज्ञेयं वीर्य्येण बलेन सम्मतौ लोकानामादृतौ तत्रापि नियुद्धे बाहुयुद्धे कुशलौ दक्षौ श्रुत्वा अत एव दिदृक्षुणा भवन्तौ नियुद्धं वा द्रष्टुमिच्छता राज्ञेति तद्योग्यतोक्ता। अहो अत्र मल्लयुद्धेन क्रीडतमिति भावः। अत्रापि विरोधिलक्षणयोपहास एव तात्पर्यम् ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना श्रीमथुरापुर्य्यादौ कार्य्यलीलामुद्दिषन्ति— वदन्तीति, शास्त्रज्ञाः कथयन्ति, महत्त्वं सर्व्वत उत्कर्षम् ॥ २९ ॥ एवं श्रीकृष्णस्य माहात्म्यमुक्त्वा श्रीबलदेवस्याप्याहुः—अयमिति। अप्यर्थे चकारः। अयमपि तदग्रजत्वादेव श्रीमान् सर्व्वशोभायुक्तः, कमललोचन इति सौन्दर्य्यमुक्तम्, संज्ञायां क इति। तद्वधदोषो निरस्तः। आदिशब्दाद्धेनुकजातयः, धेनुकवत्सादिवधे तयोरन्योऽन्यं साहाय्यात् स्नेहाच्चाभेदाभिप्रायेण वैपरीत्योक्तिः ॥ ३० ॥ एकमीदृशं ब्रुवाणेष्विति प्रहर्षेण तेषामुक्त्यसमाप्तिरुक्ता। जनेष्विति बाहुल्यात्तेषामनिवार्य्यत्वं तदुक्तेः सत्यत्वञ्च सूचितम्। अनेन मात्सर्य्यम्। तूर्य्येषु नितरां नदत्स्वित्यनेन च युद्धोत्साहः, अतएवाब्रवीत्, 'समाभाष्य' आहूय सम्बोध्य वा। वाक्यं निष्ठुरमिति शेषः; यद्वा, अकारप्रश्लेषेण वक्तुमयोग्यमित्यर्थः ॥ ३१ ॥ समाभाषणप्रकारमेवाह—'हे' इति। नन्दसूनुत्वेन सम्बोधनम्। गोपपुत्रत्वस्याल्पतामननात्। हे रामेति संज्ञामात्रस्य; किंवा वने वन्यैः सह रतेरपेक्षया, श्लेषेण गोपैः सह क्रीडितुमेव वेत्सि, न तु मल्लैः सह नियोद्धुमिति। यद्वा, नन्दसूनो इति, तथा लोकरमणाद्—रामेति, तत्तत्प्रीत्यर्थं सुसम्बोधनम्। तथा भवन्तावित्यादि-सगौरवप्रशंसोक्तिश्च महामदेनात्मना सह तयोर्युद्धे प्रवृत्त्यमननात्तत्र प्रवर्त्तनार्थम्; वीर्य्ये वीरत्वे; यद्वा, वीर्य्येण बलेन सम्मतौ लोकानामादृतौ, तत्रापि नियुद्धे बाहुयुद्धे कुशलौ दक्षौ श्रुत्वा, अतएव दिदृक्षुणा—भवन्तौ नियुद्धं वा द्रष्टुमिच्छता। राज्ञेति तद्योग्यतोक्ता; अतोऽत्र मल्लयुद्धेन क्रीड़तामिति भावः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अनेन परिरक्षितो वंश इत्यन्वयः ॥ २९–३७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अनेन परिरक्षितो यदोर्वंशः सुबहुविस्तरः सन् विश्रुत इति पाठे प्रसिद्धः सन् श्रियं कीर्त्तिं महतां पूज्यतां च लप्स्यते ॥२९॥ अथ रामस्य गुणान् सङ्ग्रहेण आहुः अयञ्चेति। अस्य श्रीकृष्णस्याग्रजोऽयं रामः कमललोचन श्रीमान्कल्याणगुणसमृद्धिमाननेन प्रलम्बादयो निहताश्च ॥ ३० ॥ इतीत्थं जनेषु ब्रुवाणेषु तूर्येषु वाद्यमानेषु च सत्सु चाणूरः कृष्णरामौ समाभाष्य सम्बोध्य वाक्यमुवाच ॥ ३१ ॥ हे नन्दसूनो इति चतुर्भिः भवन्तौ वीराणां संमतो मल्लयुद्धे प्रवीणाविति च श्रुत्वा दिदृक्षुणा युद्धदर्शनेच्छुना राज्ञा आहूतौ ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इति वदन्ति अनेन कृष्णेन ॥२९–३१॥ वीर्येण पराक्रमेण संमतौ सम्यक् प्रख्यातौ नियुद्धं वायुयुद्धं मल्लयुद्धमिति यावत् तस्मिन् कुशलौ निपुणौ ॥ ३२–३३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं पूर्णत्वेन श्रीकृष्णं निरूप्य नारायणस्य हरेरंशेनावतीर्ण इति यः कथितस्तं रामं निर्वर्णयन्ति—अयञ्चास्याग्रज इति। अयञ्चांशभूतोऽप्ययम्, अस्य साक्षाद् भगवतोऽग्रजः अग्रे जातः। अनेन प्रलम्बोनिहतः। वत्सको ये वकादय इति यथाश्रुतमेव निर्दिशन्ति। वस्तुतस्तुकृष्णेनैव वत्सक-वकौ निहतौ। यद्वा, (२५ श-श्लो०) "अन्ये च तद्विधाः" इति पूर्वश्लोकोक्तेरेव शेषोऽयम्, मध्ये वाक्यान्तरप्रवेशः ॥ ३०–४० ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवं श्रीकृष्णं निर्वर्ण्य पश्चाद्रामं निर्वर्णयति अयं चास्याग्रज इत्यादि। वत्सको ये वकादय इति यथाश्रुतमेव वर्णयन्ति ॥ ३१–४० ॥

इति त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अनेन रक्षितो यदोर्वंशः श्रयादिकं लप्स्यते इति वदन्ति ॥ २० ॥ धेनुकवत्सकादिषु विपर्य्ययोक्तिर्जनवादेष्वनिश्चयात् ॥ ३०–३१ ॥ नियुद्धं बाहुयुद्धम् ॥ ३२–३३ ॥

गूढार्थदीपिनी

अनेन श्रीकृष्णेन ।। २९ ।। वत्सकः वत्सप्रतिरूपः एव न तु वत्सः । इवे प्रतिकृतौ इत्यनुशासनात् कन् । एतेन तद्वधे दोषो निराकृतः । ये वकादयः तेऽपि निहताः ।। ३० ।। समाभाष्य सम्बोध्य ।। ३१-३३ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यदोर्वंशः अनेन श्रीकृष्णेन परिरक्षितः अत एव सुबहुविश्रुतः सन् श्रयादिलप्स्यते इत्यन्वयः ।। २९ ।। वत्सको ये वकादयः ते रामेण निहता इत्युक्तिरपि तन्मत्यनुरूपा अत एव ऊचुः परस्परं ते वै यथादृष्टं यथश्रुतमित्यत्र यथामतीत्यपि योजनीयम् ।। ३० ।। चाणूरः प्राक्कंसानुशिष्टः जनवादं चासहमानोऽब्रवीत् ।। ३१ ।। तदेवं चाणूरस्य वयमिव रामकृष्णावपि राज्ञः प्रजान्तर्गतावित्येवं मन्वानस्य वाक्यं दर्शयति । हे नन्दसूनो इति चतुर्भिः ।। ३२-३४ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अनेन श्रीकृष्णेन परिरक्षितो यदोर्वंशः श्रियं यशोः महत्वं पूज्यत्वं लप्स्यत इति वदन्ति दन्तः ।। २९ ।। येन स बहवो धेनुकादयश्च निहिता इत्यष्वेति ।। ३० ।। संसदि समासीनेषु जनेष्वेवं ब्रुवाणेषु सत्सु तूर्येषु निनदत्सु च कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ।। ३१ ।। हे नन्दसूनो । अनेन तव पित्रा वसुदेवेनेतो नीतस्तत्र स्थापित इति निकृतिषु युष्मासु निकृतिमाचरतो मदीश्वरस्य नापराध इति मर्म ध्वन्यते । हे राम भवन्तौ वीर्यसम्मतौ वार्येण पराक्रमेण सम्मतौ सुख्यातौ नियुद्धे द्वन्द्वयुद्धे कुशलौ शिक्षिताविति श्रुत्वा दिदृक्षुणा राज्ञाऽऽहूतौ ।। ३२ ।।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं दुःखाभावमुक्त्वा सत्सु सर्वसुखप्रदानं भविष्यदाहुः । वदन्त्यनेन वंशोऽयमिति । अनेन भगवता कृत्वा यदोर्वंशः विगीतोऽपि सुबहुश्रुतो भविष्यति दुष्टो हि न श्रूयते दोषनिराकरणे तु स श्रूयते ततोऽपि गुणाधाने विश्रुतो भवति । अलौकिके तु गुणे बहुविश्रुतो भवति । मोक्षदानार्थं भगवति समागते तु सुबहुविश्रुतो भवति । किं च श्रियं च लप्स्यते पूर्वस्मादधिकं यशश्च श्रियो हि सांसिद्धिको दोषो लोभ इति तन्निवृत्यर्थं यशसो निरूपणं बहिः शोभैषा अन्तः शोभार्थमाह । महत्त्वं चेति । महत्त्वेन सत्यादयः सर्वे गुणा उक्ताः चकारान्मोक्षं च प्राप्स्यति । अनेनैव परिरक्षितश्च भविष्यति न तु सन्निपातेन म्रियमाणः यथा गङ्गया मुक्तः क्रियते तथा सति न सर्वोत्कर्षो भगवति समायाति ।। २९ ।। एवं भगवच्चरित्रमुक्त्वा प्रमाणवलमिव निरूयन् बलभद्रचरित्रमाह । अयं चेति । यथा भगवान् षड्गुणैश्वर्य्य सम्पन्न एवमयमपीति चकारादतिदिश्यते अनेन तुल्यत्वनिरूपणेष्वपि उपदेशातिदेशकृतवैलक्षण्यमुक्तं भवति अस्य भगवतः अग्रजो ज्येष्ठभ्राता तस्य ज्येष्ठत्वे च हेतुमाह । श्रीमानिति । शोभातिशयवान् अधिकश्च दृश्यते राम इति प्रसिद्धः अनेन साधनरूपता तस्योक्ता कमललोचन इति दृष्टयैव सर्वतापनाशक इति अस्य पौरुषं तथा न प्रसिद्धमिति रूपमेव बहु वर्णितं पौरुषमप्याहुः । प्रलंबो निहतोऽनेनेति न वक्तव्यः लोके बलभद्रेण हत इति प्रसिद्धत्वाद्गणितः। धेनुकादय इति । तत्संबन्धिनः तालाश्च भगवतापि धेनुको हत इति प्रसिद्धिः अतः पूर्वमुक्तं ये बकादय इति वा पाठः अप्रसिद्धत्वात् दुर्दुरादय आदिशब्देन ग्राह्याः ।। ३० ।। एवं सर्वे भगवद्गुणतत्पराः कायवाङ्मनोभिर्भगवत्प्रपन्ना जाताः ततो गुणश्रवणेन मल्लानामपि रस आविर्भूत इत्याह । जनेष्विति । अन्यथा भयात् रौद्ररस उत्पन्नोऽपि प्रतिबद्धः स्थितः भीता एव रौद्ररसेन जाताः गुणश्रवणे तु रौद्रता गतेति इदानीं सम्भाषणार्थं प्रवृत्ताः एवं सर्वेष्वेव जनेषु प्रकर्षेण गृणत्सु तूर्याणि च निरन्तरं वाद्यमानानि जातानि चकारात् मल्लविस्फोटनानि ।। ३१ ।। एवं मङ्गले सम्पन्ने स्वस्य जयमाशङ्क्य कृष्णरामौ समाभाष्य सम्यगाभाषणं कृत्वा कुशलप्रश्नादिकं विधाय ततः प्रसन्नौ ज्ञात्वा चाणूरो वाक्यमब्रवीत् मुख्यत्वात् पदार्थास्तदीया बाधितार्थाः युद्ध कर्तव्यमिति वाक्यार्थः परमबाधितः अतो वाक्यमित्युक्तं स हि चतुरः गोप्यं गोप्यैतैव निरूपयन्नाह । हे नन्दसूतो ! इति । वस्तुतो जानात्येव नायं नन्दसूनुरिति तथा सति भ्रातरमिव भागिनेयमपि युद्धे न युञ्ज्यात् कंसः रामेति वचनं नाममात्रेण सन्तोषार्थम् उत्कर्षवाचकत्वात् बलभद्रेति नोक्तं सङ्कर्षणत्वं च गाप्यमेव नामग्रहणानन्तर तयास्तुतिमाह । भवन्तौ वीर्य सम्मताविति । पराक्रमे विषये सर्वैः स्तुतौ न काऽपि युवयोः पराक्रमे विप्रतिपद्यत इति । अतः राज्ञा आहूतौ किं च नियुद्धकुशलौ मल्लानामिव बाहुयुद्धे समर्थौ राज्ञा श्रुतं प्रामाणिकमेव भवति अतो दिदृक्षुणा अर्थात् बाहुयुद्ध राज्ञा आहूतौ ।। ३२ ।।

श्रीसुबोधिनी-सार

वदंति यदोरयं वंशोऽनेन श्रीकृष्णेन सुबहु यथा स्यात्तथा विश्रुतो विख्यातः । अनेन परिरक्षितः श्रियं यशो महत्त्वं च लप्स्यते प्राप्स्यति ।। २९ ।। अस्य श्रीकृष्णस्याग्रजो ज्येष्ठभ्राताऽयं कमलनेत्रः श्रीमान् रामोस्ति येन रामेण प्रलंबो निहतो वत्सको निहतो ये बकादयस्ते निहता धेनुकबकवत्सेषु विपर्ययोक्तिरौत्सुक्यतो जनवादेष्वनिश्चयाच्च ।। ३० ।। जनेष्वेवं वदत्सु सत्सु तूर्येषु वाद्येषु निनदत्सु वाद्यमानेषु च कृष्णरामौ समाभाष्य संबोध्य चाणूरो वाक्यमब्रवीत् ।। ३१ ।। हे नंदसूनो हे राम भवंतौ वीरेषु संमतौ नियुद्धे बाहुयुद्धे कुशलौ श्रुत्वा दिदृक्षुणा द्रष्टुमिच्छया राज्ञा कंसेनाहूतौ ।। ३२ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अनेन परिरक्षितोऽयं यदोर्वंशः सुबहुविश्रुतः प्रसिद्धः श्रियं सम्पदं, यशः कीर्ति, महत्त्वं पूज्यत्वं च लप्स्यत इति प्रामाणिका वदन्तीत्यन्वयः ।। २९ ।। अथ रामस्य गुणान् सम्रहेणाहुः—अयमिति । अयं च कमललोचनः श्रीमान् सौन्दर्यातिशययुक्तो रामोऽस्य कृष्णस्याग्रजः, येन प्रलम्बादयो निहताः । धेनुके द्विरुक्तिर्वत्से विपर्ययोक्तिश्च जनवादेष्वनिश्चयात् ।। ३० ।। जनेष्वेवं ब्रुवाणेषु तदुत्कर्षमसहनानश्चाणूरः कृष्णरामौ सम्बोध्य वाक्यमब्रवीत् ।। ३१ ।। तदुक्तिमाह—हे नन्दसूनो कृष्ण ! हे राम ! भवन्तौ वीर्यवत्त्वेन सर्वसम्मतौ, अतो नियुद्धे मल्लयुद्धे कुशलौ श्रुत्वा तन्नियुद्धं दिदृक्षुणा राज्ञा आहूतौ ।। ३२ ।।

अन्वितार्थप्रकाशिका

वदन्तीति अनेन परिरक्षितोऽयं यदोर्वंशः सुबहुविश्रुतः प्रसिद्धः श्रियं सम्पदं यशः कीर्तिं महत्त्वं च लप्स्यते इति प्रामाणिका वदन्ति । २९ ।। अयमिति । अयं च कमललोचनः श्रीमान् रामोऽस्य कृष्णस्याग्रजो येन प्रलम्बः वत्सकः वत्सप्रतिकृतिः । "इवे प्रतिकृतौ" इति कन् । तद्वधे दोषाभावाय निहतः ये च बकादयः ते च निहताः । अत्र बकवत्सयोर्बलदेवकर्तृकवधोक्तिर्जनवादेष्वनिश्चयात् ।। ३० ।। जनेष्विति । जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु ध्वनत्सु जनोक्तं रामकृष्णोत्कर्षमसहमानश्चाणूरः कृष्णरामौ समाभाष्य संबोध्य वाक्यमब्रवीत् । यद्वा । अवाक्यं धर्मापेतं वाक्यम् ।। ३१ ।। हे नन्देति । हे नन्दसूनो कृष्ण ! हे राम ! हे राम ! भवन्तौ वीयवत्त्वेन सर्वसम्मतौ अतो नियुद्धे मल्लयुद्धे कुशलौ श्रुत्वा तन्नियुद्धं दिदृक्षुणा राज्ञा आहूतौ ।। ३२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनेन परिरक्षितो यदोर्वंशः सुबहुविश्रुतः अतिविख्यातः सन् आदीन् लप्स्यते इति जनावदंति ।। २९ ।। वक वत्सादिषु श्रीकृष्ण हतेष्वपि विपर्यय वचनं तु लोकोक्तावनिश्चयात् ।। ३० ।। समाभाष्यसंबोध्य ।। ३१-३४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वदन्तीति ।। अनेन परिरक्षितः, यदोः वंशः, सुबहुविस्तरः सन्, विश्रुत इति पाठे प्रसिद्धः सन्, श्रियं लक्ष्मीं, यशः कीर्त्ति, महत्त्वं पूज्यतां च, लप्स्यते इति वदन्ति ।। २९ ।। अथ रामस्य गुणान् संग्रहेणाहुः ।। अयं चेति ।। अस्य श्रीकृष्णस्य, अग्रजः कमललोचनः अयं रामः, श्रीमान् कल्याणगुणसमृद्धिमानेव, भवति । येन रामेण, प्रलम्बः निहतः, वत्सकः निहतः, ये बकादयश्च निहताः बकवत्सासुरहननं श्रीकृष्णेन कृतं भवत्यथापि रामचरित्रे तद्धननोक्तिर्धेनुकासुरहननं बलेन कृतं तथापि कृष्णचरित्रे तद्धननोक्तिश्च जनवादेष्वनिश्चयाद्बोध्या ।। ३० ।। जनेष्विति ।। एवमित्थं, जनेषु ब्रुवाणेषु, तूर्येषु निनदत्सु सत्सु च, कृष्णरामौ समाभाष्य संबोध्य, चाणूरः वाक्यं, अब्रवीत् ।। ३१ ।। यदब्रवीत्तदाह हे नन्दसूनो इति चतुर्भिः ।। हे नन्दसूनो इति ।। हे नन्दसूनो कृष्ण, हे राम, भवन्तौ वीरसंमतौ वीराणां संमतौ माननीयौ, नियुद्धकुशलौ मल्लयुद्धे प्रवीणौ, स्तः । इति ज्ञात्वा, दिदृक्षुणा मल्लयुद्धदर्शनेप्सुना, राज्ञा आहूतौ स्तः ।। ३२ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नियुद्धकुशलाविति : १०.४३.३२.

हतास्तृणबकादयोऽप्यवर्गि कौणपाः कर्यपि सहस्रकरिसारभृत् सपदि येन तस्याग्रतः ।
कियन्मम बलं लघोरिति विवेकमूढोऽब्रवीत् नियुद्धगिरमन्ततस्तदियमेव मोहात्मता ।। ६३ ।।

कृष्णप्रिया

कहते हैं कि ये यदुवंश की रक्षा करेंगे । यह विख्यात वंश इनके द्वारा महान् समृद्धि, यश और गौरव प्राप्त करेगा ।। २९ ।। ये दूसरे इन्हीं श्यामसुन्दर के बड़े भाई कमलनयन श्रीबलरामजी हैं । हमने किसी-किसी के मुँह से ऐसा सुना है कि इन्होंने ही प्रलम्बासुर, वत्सासुर और बकासुर आदि को मारा है ।। ३० ।। जिस समय दर्शकों में यह चर्चा हो रही थी और अखाड़े में तुरही आदि बाजे बज रहे थे, उस समय चाणूर ने भगवान् श्रीकृष्ण और बलराम को सम्बोधन करके यह बात कही—।। ३१ ।। 'नन्दनन्दन श्रीकृष्ण और बलरामजी ! तुम दोनों वीरों के आदरणीय हो । हमारे महाराज ने यह सुनकर कि तुम लोग कुश्ती लड़ने में बड़े निपुण हो, तुम्हारा कौशल देखने के लिये तुम्हें यहाँ बुलवाया है ।। ३२ ।।

प्रियं राज्ञः प्रकुर्वन्त्यः श्रेयो विन्दन्ति वै प्रजाः । मनसा कर्मणा वाचा विपरीतमतोऽन्यथा ॥ ३३ ॥
[1]नित्यं प्रमुदिता गोपा वत्सपाला[2] यथा स्फुटम् । वनेषु मल्लयुद्धेन क्रीडन्तश्चारयन्ति गाः ॥ ३४ ॥
तस्माद् राज्ञः प्रियं यूयं वयं च करवामहे । भूतानि नः प्रसीदन्ति सर्वभूतमयो नृपः ॥ ३५ ॥
तन्निशम्याब्रवीत् कृष्णा देशकालोचितं वचः । नियुद्धमात्मनोऽभीष्टं मन्यमानोऽभिनन्द्य च ॥ ३६ ॥

कर्दमक्षमा

अन्वयः – मनसा कर्मणावाचा च राज्ञः प्रियं प्रकुर्वन्त्यः प्रजा वै श्रेयः विन्दन्ति अत अन्यथा विपरीतं दण्डादिकं॥३३॥ वत्सपाला गोपाः प्रमुदिताः वनेषु नित्यं मल्लयुद्धेन क्रीडन्तश्च गाश्चारयन्ति ॥ ३४ ॥ तस्मात् यूयं वयं च राज्ञः प्रियं नियुद्धं करवामहे एवं सति नः भूतानि प्रसीदन्ति यतः सर्वभूतमयोनृपः ॥ ३५ ॥ तं निशम्य नियुद्धमात्मनोऽभीष्टं मन्यमानः कृष्णः, अभिनन्द्य देशकालोचितं च वचः अब्रवीत् ॥ ३६ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

हे कृष्ण प्रियं करवामेति । राज्ञि प्रीते भूतानि च प्रसीदेयुः ॥ ३५–३७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अतोऽन्यथा राज्ञः प्रियानाचरणेन । विपरीतमश्रेयः ॥ तत्र वैमुख्यं न युक्तं, तथा च स्मृतिरित्याह—प्रियमिति। प्रकुर्वन्त्य इत्यार्षो नुम् । एतच्च भगवतोः श्रेयोऽर्थमेवेति भावः ॥ ३३ ॥ राज्ञा कथमवगतमेतौ नियुद्धकुशलाविति चेत्तत्राह—नित्यमिति । नियुद्धक्रीडया गोपा गोवत्सांश्चारयन्तीति किंवदन्त्यावगतमित्यर्थः ॥ न च वक्तव्यं गोपैरस्माभिस्तन्न सम्यग्ज्ञायते इति यतो नित्यमिति । गोपाः गवां रक्षकाः । समुच्चयेऽप्यर्थे वा तथा शब्दः । वत्सपाला अपि, गाः गोजातीः स्फुटं व्यक्तं प्रसिद्धमेवेत्यर्थः । इदमपि निगूढावहासयुक्तम् । एवमुत्तरत्रापि ॥ ३४ ॥ यतो नित्यं भवतामेषा क्रीडा तस्माद्धेतोः । यूयं वयं च करवाम इत्यत्र 'युगपत्प्राप्तौ परः' इत्युत्तमपुरुषप्रयोगः । नियुद्धस्य कलहरूपत्वात्तत्र किं फलं तत्राह—भूतानीति । कथं सर्वभूतप्रसादस्तत्राह—सर्वभूतेति ॥ तर्हि गोपैः सह तत्क्रीडा कार्येति चेत्तत्राह-तस्मादिति । राज्ञः प्रियार्थमेवाऽस्माभिः सह कार्येति भावः। भूतानि जीवाः । नृपस्य सर्वभूतमयत्वं सर्वभूतस्य तदुपजीवनत्वात् । तस्मान्निजप्रजारूपयोर्भवतोरनेन रक्षैव कार्येति मा च भैषीस्त्वमिति भावः । अन्यत्तैः । तत्रेतिशब्दस्य प्रकारार्थस्य राज्ञीत्यादिनान्वयः ॥ ३५ ॥ तत् चाणूरवाक्यम् । अभिनंद्य कारवमेत्युक्त्वा च ॥ तन्निशम्याभिनंद्य च देशकालोचितं तदानीं तादृशमेव वक्तुं योग्यं वचोमात्रमब्रवीत् । वस्तुतोऽभिप्रायस्त्वन्य एवेति भावः । तादृशवचने हेतुः –नियुद्धमित्यादि । तत्र हेतुः—कृष्णः, तादृशलीलाकौतुकितया प्रसिद्ध इत्यर्थः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र च वैमुख्यं न युक्तं तथा स्मृतिरित्याह । प्रियमिति । प्रकुर्वन्त्य इत्यार्षोनुम् एतच्च भवतोः श्रेयोऽर्थमिति भावः ॥३३॥ न वक्तव्यं गोपैरस्माभिस्तन्न सम्यक् ज्ञायत इति यतो नित्यमिति । गोपा गोपजातयो वा सपालाः वत्सपालत्वमारभ्य तथा तेन प्रकारेण वनेषु मल्लयुद्धेन क्रीडन्तो गाश्चारयन्तीत्यर्थः तदेतद्विधान्यस्य ग्राम्यस्य बाक्यानि कष्टान्वयानि यथावदेव मुनीन्द्रेणोपहासार्थमनुदितानीति ज्ञेयं गोपा गवां रक्षकाः समुच्चयेऽप्यर्थे वा तथाशब्दः वत्सपाला अपि गा गोजातीः स्फुटं व्यक्तं प्रसिद्धमेवेत्यर्थः । इदममि निगूढोपहासयुक्तम् एवमुत्तरत्रापि यथेति पाठे यथावदित्यर्थः ॥ ३४ ॥ तर्हि गोपैः सह तत्क्रीडा कार्य्येति चेत्तत्राह । तस्मादिति । राज्ञः प्रियार्थमस्माभिः सह कार्य्येति भावः । भूतानि जीवाः नृपस्य सर्वभूतमयत्वं सर्वभूतस्य तदुपजीवनत्वात् तस्मान्निजप्रजारूपयोर्भवतोरनेन रक्षैव कार्य्येति माच भैष्टमिति भावः । अन्यत्तैः तत्रेति शब्दस्य प्रकारार्थस्य राज्ञीत्यादिनान्वयः ॥ ३५ ॥ तन्निशम्याभिनन्द्य च देश कालोचितं तदानीं तादृशमेव वक्तुं योग्यं वचोमात्रमब्रवीत् वस्तुतोऽभिप्रायस्त्वन्य एवेति भावः । तादृशवचने हेतुः नियुद्धमित्यादि । तत्र हेतुः कृष्णः तादृशलीलाकैतुकितया प्रसिद्ध इत्यर्थः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र च वैमुख्यं न योग्यमित्याह—प्रियमिति । मन आदिना प्रकर्षेण सम्यक्तया कुर्वत्यः श्रेय उत्तमफलम्, प्रजा इति राज प्रियाचरणावश्यकतोक्ता, वै प्रसिद्धौ । यद्वा, हेतौ यस्मादित्यर्थः । भवन्तो श्रेयोऽर्थमेवाहूतनविति भावः । अतोऽस्मादन्यथा । व्यतिरेकेण सम्यक् प्रियाचरणं विनेत्यर्थः । विपरीतमश्रेयः ॥ ३३ ॥ न च वक्तव्यं गोपैरस्माभिस्तन्न सम्यग् ज्ञायत इत्याह—नित्यमिति । गोपा गवां रक्षकाः स्फुटं क्रीडन्तः, समुच्चयेऽप्यर्थ वा, तथा वत्सपाला अपि क्रीडन्तो वत्सांश्चारयन्तीत्यर्थः

---

१. निश्य–विज. । २. पालास्तथा–वीर. विज. ।

यद्वा, गा गोजातीरित्यर्थः, अथवा गोपा गोप-जातयः, वत्सपालाः सन्तः, वत्सपालनमारभ्येत्यर्थः । तथा तेनानिर्वचनीयप्रकारेण क्रीडन्तः । एतच्च स्फुटमेव ॥ ३४ ॥ तर्हि गोपैः सह तत्क्रीडा कार्य्येति चेत्तत्राह—तस्मादिति । राज्ञः प्रियार्थमस्माभिः सह कार्य्येति भावः । भूतानि जीवाः, नृप इति निजप्रजारूपयोर्भवतोरनेन रक्षैव कार्य्येति, मा भैष्टमिति भावः ॥ ३५ ॥ देशकालोचितमिति—वाक्कौशलं तद्योग्यत्वं चोक्तम् । यद्वा, तदानीं तत्र तादृशमेव वाच्यमिति तदब्रवीत्, न तु तत्त्वत इति । नियुद्धमेव किं वा तत् चाणुरोक्तमेवाभिनन्द्य साध्विति प्रशस्य च । तच्च प्रत्युत्तरचातुर्य्यस्वभावादेव, किंवा नियुद्धदाढर्य्यार्थमिति ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मनः प्रभृतिकरणत्रयेण राज्ञः प्रियं कुर्वन्त्यः प्रजाः श्रेयः सुखं लभन्ते अतोऽन्यथाप्रियं कुर्वन्त्यस्तु विपरीतमश्रेयो दुःखं विन्दन्ति ॥३३॥ नावां नियुद्धे कुशलावित्यत आह नित्यमिति । वत्सानां पाला वत्सपाला वत्सपालनयोग्यवयसः आरभ्येतिभावः । गोपाः यावद्गोपालनयोग्यवयसः भवन्तः वनेषु मल्लयुद्धेन क्रीडन्त एव गाश्चारयन्ति अतो नियुद्धकुशलावेवेतिभावः ॥ ३४ ॥ तस्माद्यूयं वयञ्च राज्ञः कंसस्य प्रियं करवामहे एवं राज्ञि प्रीते सति सर्वाणि भूतानि नोऽस्माकं प्रसीदन्ति कुतः यतो राजा सर्वभूतात्मकः ॥३५॥ तच्चाणूरवाक्यं निशम्याकर्ण्य भगवान्नियुद्धं स्वस्याभिमतमेव मन्यमानोऽत एव तद्वचोऽभिनन्द्य देशकालोचितं वचोऽब्रवीत् ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तत्कथमवगतमिति तत्राह । नित्येति । नियुद्धेन कीडन्तः गोपाला वत्सपालाश्च गोवत्सांश्च चारयन्तीति किंवदन्त्यावगतमित्यर्थः ३४ ॥ किं कलहेन फलमिति तत्राह—भूतानीनि ॥ ३५-३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नियुद्धकुशलत्वं कथमावयोरित्यत आह । नित्यमिति ॥ ३३-३७ ॥

गूढार्थदीपिनी

अतः अन्यथा प्रियानाचरणे विपरीतम् अश्रेयः ॥ ३३ ॥ यथा चारयन्ति तथा स्फुटं लोके प्रसिद्धमेव ॥ ३४ ॥ एवं राज्ञि प्रीते सति भूतानि प्रसीदन्ति । यतः ॥ ३५-३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यस्मात्सर्वभूतमयः नृपः तस्माद्वयं यूयं च राज्ञः प्रियं करवाम एवं राशि प्रीते सति हे कृष्ण ! नोऽस्माकं सर्वभूतानि प्रसीदन्ति प्रसीदेयुरित्यर्थः ॥ ३५-३७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

राज्ञः प्रियं कुर्वत्यः प्रजाः श्रेयो विन्दन्ति प्राप्नुवन्ति । मनसा कर्मणा वाचेति त एतस्मादन्यथा चेद्विपरीतं श्रेयो न विन्दन्ति ॥ ३३ ॥ अस्मन्नियुद्धसन्नद्धता युष्मद्राजेनेव युष्माभिः कथमवगतेत्यत आह ॥ नित्यप्रमुदिता इति । मल्लयुद्धेन क्रीडन्तो गाश्चारयन्ति स्वभावस्तेषामित्येवमूहयाम इति भावः ॥ ३४ ॥ यस्मात्सर्वभूतमयो नृपो भूतानि नः प्रसीदन्ति तस्माद्राज्ञः प्रियं यूयं वयं च करवामहे ॥ ३५ ॥ नियुद्धमात्मन इष्टं मन्यमानोऽभिनन्द्य मनसाऽनुमोद्य तद्वचनं निशम्य देशकालोचितं वचोऽब्रवीत् ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु राज्ञो दर्शने सुखं भवति अस्माकं कः पुरुषार्थ इति चेत्तत्राह । प्रियं राज्ञ इति । राज्ञः प्रियं प्रकर्षेण कुर्वन्त्यः तदधीनाः प्रजाः श्रेय उत्तमफल धनादिकं विन्दन्ति परं कापट्ये फलं न भवतीत्यभिप्रायेणाह । मनसा कर्मणा वाचेति । ये हि कायवाङ्मनोभिः प्रियं कुर्वन्ति ते श्रेयो वै निश्चयेन विन्दन्ति । न केवलं प्रिये कृते श्रेयः प्राप्यते अन्यथा नेत्येतावदेव किं तु विपरीतं यः प्रियं न करोति कायवाङ्मनोभिः सः अतः अस्माद्धेतोः अन्यथा अश्रेयो मारणादिकं च प्राप्नोति यतः प्रजानामयं स्वधर्म इति ॥ ३३ ॥ नन्वस्माभिर्बालैर्वनस्थैः क्व मल्लयुद्धं शिक्षितमिति चेत्तत्राह । नित्यं प्रमुदिता इति । एके हि जीवितार्थं शिक्षन्ति अन्ये तु बलार्थं पुष्टाः सन्तः शिक्षकाः परंपरया प्राप्ताः परं ते लौकिका भवन्ति अतः शास्त्रीयेभ्यः फलतो हीना अपि स्वरूपतः पुष्टा भवन्ति तदाह । नित्यमेव प्रमुदिता गोपा बाल्येऽपि वत्सपालाः स्फुटमेव वनेषु मल्लयुद्धेन क्रीडन्तः गाश्चारयन्ति गोचारणे हि श्रमे दुग्धपानं स्वतः सिद्धं वृषभाणां निग्रहश्च बलिष्ठैरेव भवति अतः सर्वथा श्रुतं सत्यम् ॥ ३४ ॥ तस्माद्राज्ञः प्रियंकर्त्तव्यमित्याह । तस्मादिति । राजा हि सर्वाराध्यः अतो यूयं लौकिका वयं च शास्त्रीयाः चकारात् एवमन्ये विद्यावन्तोऽपि प्रियं करवामहे सर्वानेकीकृत्य वदति एकमार्गप्रवृत्तानां हि मुख्यानुसरणं युक्तमिति अस्मभिश्चेत्कर्त्तव्यं भवद्भिरपि कर्त्तव्यमेवेति ततः

किमत आह। भूतानि नः प्रसीदन्ति इति। सर्वभूतमयः प्राणी अतस्तेषां हितं कर्त्तव्यम् अन्यथात्वे शापप्रसादे कृतघ्नता भवेत् फलदानार्थं यतः सर्वभूतमयो नृपः भूतान्यत्र देवतारूपाणि तस्य विवक्षितानि वस्तुतस्तु पाञ्चभौतिक एव ॥ ३५ ॥ ततो भगवान् युक्तियुक्तं ग्राह्यमिति लौकिकमपि न बाधनीयमित्यक्लिष्टकर्मा उत्तरमाहेत्याह। तन्निशम्येति। तद्युक्तियुक्तं वचः कृष्णस्तदर्थमेवावतीर्णः समागतश्च तथापि देशकालयोर्यदुचितं तदाह। लौकिकत्वात् प्रश्नस्य शस्त्रादियुद्धापेक्षया नियुद्धमात्मनोऽभीष्टं क्षत्रियाणां हि शस्त्रग्रहणं षोडशे वर्षे उपनयनानंन्तरं च शिक्षा अत इदानीं बाहुयुद्धमेवात्मनोऽभीष्टं मन्यमानः देशकालावस्थानामनुगुणत्ववचनात्तं चाणूरमभिनन्द्य चकारात् राजानं च उवाच ॥ ३६ ॥

श्रीसुबोधिनी-सार

मनसा कर्मणा वाचा राज्ञः प्रियं कुर्वंत्यः प्रजाः श्रेयो मंगलं विदंति प्राप्नुवंति अत उक्तान् अन्यथा प्रकारांतरेण विपरीतं दंडं विंदते ॥ ३३ ॥ नित्यं प्रमुदिताः तुष्टा वत्सपाला भवंतो वनेषु मल्लयुद्धेन यथा स्फुटं क्रीडंतो गाश्चारयंति ॥ ३४ ॥ तस्मात् राज्ञः प्रियं यूयं कुरुत वयं करवाम हे कृष्ण नोस्माकं भूतानि प्रीणंति सर्वप्राणिमयो राजास्ति ॥ ३५ ॥ तत् चाणूरोक्तं निशम्य श्रुत्वाऽऽत्मनोभीष्टं वांछितं नियुद्धं मन्यमानोऽभिनंद्य प्रशस्य कृष्णो देशकालोचितं वचोऽब्रवीत् ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'राज्ञो दर्शनेन सुखं भवति, तेनास्माकं कः पुरुषार्थः सिद्ध्येत्' इत्याशङ्क्याह—प्रियमिति। वै प्रसिद्धमेतत्। राज्ञः प्रियं प्रकर्षेण कुर्वत्यः प्रजाः श्रेय उत्तमं फलं धनादिकं विन्दन्ति। प्रशब्दसूचितं निष्कापट्यं स्पष्टयति—मनसा हितचिन्तनेन, कर्मणा हिताचरणेन, वाचा यथार्थप्रियभाषणेनेति। अतः प्रियाचरणादन्यथा अप्रियं कुर्वत्यस्तु विपरीतं बन्धनमारणभर्त्सनादिकं प्राप्नुवन्ति ॥ ३३ ॥ 'न आवां नियुद्धे कुशलौ' इत्यत आह—नित्यमिति। वत्सपाला गोपाः प्रमुदिताः वनेषु नित्यं मल्लयुद्धेन क्रीडन्त एव गाश्चारयन्तीति यथा तथा स्फुटं लोके प्रसिद्धमेव। अतो युवां नियुद्धकुशलावेवेति भावः ॥ ३४ ॥ यस्माद्राज्ञः प्रियाचरणात् प्रजाः श्रेयो विन्दन्ति तस्माद्यूयं वयं च राज्ञः प्रियं नियुद्धं करवामहे। एवं राज्ञि प्रीते सति सर्वाणि भूतानि नोऽस्माकं प्रसीदन्ति प्रसादयेयुः। कुतो यतो नृपः सर्वभूतमय इति ॥ ३५ ॥ तच्चाणूरवाक्यं निशम्य श्रुत्वा नियुद्धमात्मनोऽभिमतं मन्यमानः कृष्णस्तद्वचोऽभिनन्द्य तस्मिन् देशे काले च यदुचितं तदब्रवीत् ॥ ३६ ॥

अन्वितार्थप्रकाशिका

प्रियमिति ॥ वै प्रसिद्धौ। मनसा कर्मणा वाचा च राज्ञः प्रियं प्रकर्षेण कुर्वंत्यः प्रजाः श्रेय उत्तमं फलं धनादिकं विन्दन्ति। अतः प्रियाचरणादन्यथा अप्रियं कुर्वत्यस्तु विपरीतं दण्डादिकं प्राप्नुवन्ति ॥ ३३ ॥ नित्यमिति ॥ वत्सपाला गोपाः प्रमुदिता वनेषु नित्यं मल्लयुद्धेन क्रीडन्त एव गाश्चारयन्तीति यथा तथा स्फुटं लोके प्रसिद्धमेव ॥ ३४ ॥ तस्मादिति । तस्मात् यूयं वयं च राज्ञः प्रियं नियुद्धं करवामहे। एवं राज्ञि प्रीते सर्वाणि भूतानि नोऽस्माकं प्रसीदन्ति प्रसीदेयुः। कुतो यतो नृपः सर्वभूतमयः ॥ ३५ ॥ तदिति तच्चाणूरवाक्यं निशम्य श्रुत्वा नियुद्धमात्मनोऽभीष्टमभिमतं मन्यमानः कृष्णस्तद्वचोऽभिनन्द्य तस्मिन्देशे काले च यदुचितं तदब्रवीत्। आशयस्त्वन्य एवेति भावः ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे कृष्ण यूयं वयं च सर्वे राज्ञः प्रियं करवाम तेन च राज्ञि प्रीते सति नोऽस्मान्प्रति भूतानि प्रसीदं निप्रसीदेयुः यतः नृपः सर्वभूतमयः ॥ ३५ ॥ तच्चाणूरवचनं निशम्य श्रुत्वा पुनस्तदभिनंद्य प्रशंस्य आत्मनः स्वस्य युद्धमभीष्टं मन्यमानो वचः अब्रवीत् ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रियमिति ॥ मनसा, कर्मणा, वाचा, मनःप्रभृतिकरणत्रयेणेत्यर्थः। राज्ञः प्रियं प्रकुर्वन्त्यः प्रजाः, श्रेयः सुखं, विन्दन्ति लभन्ते वै, अतः, अन्यथा अप्रियं कुर्वन्त्यः सत्यस्तु, विपरीतमश्रेयः दुःखमिति यावत्। विन्दन्ति ॥ ३३ ॥ नावां नियुद्धे कुशलावित्यत आह ॥ नित्यमिति ॥ वत्सपालाः वत्सपालनयोग्यवयस आरभ्येति भावः। गोपाः यावद्गोपालनयोग्यवयसः अभवन् तावत्पर्यन्तमित्यर्थः। भवन्त इति शेषः। प्रमुदिताः सन्तः, नित्यं वनेषु मल्लयुद्धेन, स्फुटं यथा स्फुटतयैवेत्यर्थः। क्रीडन्तः मल्लयुद्धेन खेलन्तः सन्त एव, गाः चारयन्ति। अतो युवां नियुद्धकुशलावेवेति भावः ॥ ३४ ॥ तस्मादिति ॥ तस्मात्, यूयं वयं च, राज्ञः कंसस्य, प्रियं करवामहे एवं कृत्वा राज्ञि प्रीते सति, भूतानि, सर्वाणि भूतानि, नोऽस्माकं, प्रसीदन्ति। कुतः। यतः नृपः सर्वभूतमयः सर्वभूतात्मकः, भवति ॥ ३५ ॥ तदिति ॥ तच्चाणूरवाक्यं निशम्याकर्ण्य, कृष्णः भगवान्, नियुद्धं मल्लयुद्धं, आत्मनः स्वस्य, अभीष्टमभिमतमेव, मन्यमानः अत एव, अभिनन्द्य तद्वाक्यं प्रशंस्य च, देशकालोचितं वचः, अब्रवीत् ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तन्निशम्येति : १०.४३.३६.

करिष्यमाणारियुद्धसंत्यागस्य ममोचितम् । नियुद्धमात्मनोऽभीष्टमित्यमन्यत माधवः ॥ ६४ ॥
नाम्नाऽर्थतो मेऽच्युतरूपभाजः कथञ्चनापि च्युतिसंभवो न ।
तथापि वाच्यं प्रकृतोपयोगीत्यालोच्य कृष्णः स तथा तमूचे ॥ ६५ ॥

कृष्णप्रिया

देखो भाई ! जो प्रजा मन, वचन और कर्म से राजा का प्रिय कार्य करती है, उसका भला होता है और जो राजा की इच्छा के विपरीत काम करती है, उसे हानि उठानी पड़ती है ॥ ३३ ॥ यह सभी जानते हैं कि गाय और बछड़े चरानेवाले ग्वालिये प्रतिदिन आनन्द से जंगलों में कुश्ती लड़-लड़कर खेलते रहते हैं और गायें चराते रहते हैं ॥ ३४ ॥ इसलिये आओ, हम और तुम मिलकर महाराज को प्रसन्न करने के लिये कुश्ती लड़ें। ऐसा करने से हम पर सभी प्राणी प्रसन्न होंगे, क्योंकि राजा सारी प्रजा का प्रतीक है' ॥ ३५ ॥ परीक्षित् ! भगवान् श्रीकृष्ण तो चाहते ही थे कि इनसे दो-दो हाथ करें। इसलिये उन्होंने चाणूर की बात सुनकर उसका अनुमोदन किया और देश-काल के अनुसार यह बात कही—॥ ३६ ॥

प्रजा भोजपतेरस्य[1] वयं चापि वनेचराः । करवाम प्रियं नित्यं तन्नः परमनुग्रहः ॥ ३७ ॥
बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितम् । भवेन्नियुद्धं माधर्मः[2] स्पृशेन्मल्ल सभासदः ॥ ३८ ॥

चाणूर उवाच

न बालो न किशोरस्त्वं बलश्च बलिनां वरः । लीलयेभो हतो येन सहस्रद्विपसत्त्वभृत् ॥ ३९ ॥
तस्माद् भवद्भ्यां बलिभिर्योद्धव्यं नानयोऽत्र वै । [3]मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे[5] कुवलयापीडवधो नाम [6]त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

कर्दमक्षमा

अन्वयः—अस्य भोजपतेः वनेचराः वयं चापि प्रजाअत तत् प्रियं नित्यं करवाम नः तत्कृतः परम अनुग्रहः ॥ ३७ ॥ हे मल्ल ! वयं बालाः तुल्यबलैः सह क्रीडिष्यामः, यथा नियुद्धम् उचितं भवेत् तथा सभासदः अधर्मो । मा स्पृशेत् ॥ ३८ ॥ त्वं न बालः न किशोरः बल्लश्च बलिनां वरः येन त्वया बलेन च सहस्रद्विपसत्व भृत् इभः लीलयाः हतः ॥ ३९ ॥ तस्मात् भवद्भ्यां बलिभिः सह योद्धव्यम् अत्र वै अनयः नास्ति । अतः हे वार्ष्णेय त्वं मयि विक्रम बलेन सह मुष्टिकी विक्रमतु ॥४०॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्द्धे निरोधलीलायां राजसलीलायां प्रथमे प्रमाणप्रकरणे त्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यथोचितं नियुद्धं बाहुयुद्धं भवेत् । मल्लसभासदो मल्लसभाधिकृताञ्जनानधर्मो मा स्पृशेन्न स्पृशेदित्यर्थः । हे मल्लेति वा ॥ ३८ ॥ सहस्रद्विपाना सत्त्वं बलं बिभर्तीति तथा ॥ ३९ ॥ बलिभिर्मादृशैः सह भवद्भ्यां बलिभ्याम् । अत्र युद्धे नानयो नाधर्मः । विक्रम पराक्रमं कुरु । मुष्टिको विक्रमतादित्यनुषंगः ॥ ४० ॥

इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अस्य कंसस्य । प्रजा यूयम् । तथात्वेऽपि वयं वनेचरा एतेन वनेचराणां मुख्यप्रजात्वं नास्तीत्युक्तं, तथापि यद्वयं प्रियं नृपप्रियं नियुद्धं नित्यं करवाम तत्परं केवलमनुग्रह एवेशस्येति शेषः । वस्तुतस्तु वयं नित्यं प्रियं मोक्षं यदस्य करवाम करिष्याम, तन्नोऽस्माकमनुग्रह एव । न हि मदनुग्रहं विना मोक्षो भवतीति सूचितम् । अभिनन्दनमेवाह–प्रजा इति । भोजपतेरिति गौरवात् । तत्राप्यस्य न तूग्रसेनस्यापीत्यर्थः । वयञ्च प्रजाः कीदृशा अपि वनेचरा अपि । चकाराद्भवन्तस्तावत्पुरवासिनः सुतरामेवेत्यर्थः । तस्माद्वयमपि राज्ञः प्रियमाज्ञापालनादिकं करवामैव, नोऽस्मभ्यं भोजपतेरनुग्रह एव वयमत्र प्रवृत्ता भवामेति भावः । वस्तुतस्त्वस्येत्यनादरे षष्ठी । वयं चापि वयमपि प्रजाः, अपि तु नैवेत्यर्थः । तत्र हेतुर्वनगोचराः, नित्यवृंदावनविहारिण इत्यर्थः । अयमाधुनिक इति भावः । तस्माद्वयं राज्ञः स्वस्य श्रीगोपराजस्यैव प्रियं करवाम कर्तुमिच्छामः न तु भोजपतेः । नन्वीश्वरस्य तवान्यत्र राजत्वादिमननमाज्ञापालनादिकञ्चासभवमित्याशंक्याह—नोऽस्माकमनुग्रहः—प्रेमविशेषकर्तृजनविषयश्चेतोद्रवविशेष

---

[1] पतेर्यू यं । [2] मल्लसदः क्वचित्–प्रा. पा. । [3] मया–वीर. । [4] पारमहंस्यां संहितायां–प्रा. पा. । [5] पूर्वार्द्धे मल्लक्रीडाया–प्रा. पा. । [6] एकचत्वारिंशो ।

एव, येन तादृशीमपि वश्यतां प्रतिपद्येमहीति भावः ।। ३७ ।। इत्यर्थ इति–माऽत्र निषेध एवेति ध्येयम् । न हि मल्लानां सभा सा तु राज्ञ एवेत्यस्वारस्यादाह–हे मल्लेति वा । वस्तुतस्तु वयं बाला बलानां शक्तीनां समूहो बालं तद्विद्यते येषु ते बालाः । मत्वर्थोयोऽच् । सर्वशक्तिमंत ईश्वराः । तुल्यबलैः स्वसदृशर्वशक्तिमद्भिः । अन्यथा निर्बलसबलयोर्युद्धेक्षणात्सभ्याः पापिनो भवन्तीति तात्पर्यम् । एतेन यूयं नास्मत्तुल्यबला इति बलैकदेशवतां सर्वबलवद्भिर्नियुद्धमनुचितमेवेति ध्वनितम् । बाला बाल्यत्वेनाल्पबला इत्यर्थः । बहुत्वमन्येषामपि बालानां स्वकोटौ प्रवेशश्च दृष्टान्तव्यञ्जनाय, संसर्गिगोपवर्गापेक्षया वा । तुल्यबलैरिति—बालेष्वपि ये न्यूनबला अधिकबलाश्च तैर्नेत्यर्थः । क्रीडिष्याम इति—तत्रापि क्रीडायामेव ममेच्छेति भावः । अन्यत्तैः वस्तुतस्तु हे बाला अज्ञास्तुल्यबलैर्गोपैः सखिभिरेव सह क्रीडिष्यामो न त्वल्पबलैर्युष्माभिरित्यर्थः । गोपैर्समानंतबल शीलवयोविलासवेशैश्च ‘मूर्छितकलं वरवेणुवाणवीणैः’ इति प्रसिद्धे । ‘मल्लानामशनिः’ इति च । तत्रापि भवादृशामाग्रहात्तत्र प्रवर्तामहे, ततोऽशनिस्वभावमदंगस्य स्पर्शने भवतां वधे तु नास्माकं दोष इति भावः । श्रीहरिवंशे विष्णुपर्वणि कंसवधेऽष्टाशीतितमेऽध्याये नियुद्धे निपातनानंतरमवध्यस्यापि मल्लस्य तस्य वधे कार्ये स्वदोषपरिहारार्थं स्पष्टमेव भगवद्वचनम्– “अहं बालो महानंध्रो वपुषा पर्वतोपमः । युद्धं मनानेन सह रोचते बाहु शालिना । युद्धव्यतिक्रमः कश्चिन्न भविष्यति मत्कृतः । न ह्यहं बाहुयोधानां दूषयिष्यामि यन्मतम् । योऽयं करीषधर्मश्च तोयधर्मश्च रंगजः । कषायस्य च संसर्गः समयो ह्येष कल्पितः संयमः स्थिरता शौर्यं व्मायामः सत्क्रिया बलम् । रंगे च नियता सिद्धिरेतद्युद्धविदां मतम् । यदयं बाहुयुद्धं वै सवैरं कर्तुमुद्यतः । अत्र वै निग्रहः कार्यस्तोषयिष्याम्यहं जगत् । करूषेषु प्रसूतोऽयं चाणूरा नाम नामतः । बाहुयोधी शरीरेण कर्मभिश्चात्र चिन्त्यताम् । एतेन बहवो मल्ला निपातानन्तर हताः । रंगप्रतापकामेन मल्लमार्गश्च दूषितः । शस्त्रसिद्धिस्तु योधानां संग्रामे शस्त्रयोधिनाम् । रंगे सिद्धिश्च मल्लानां प्रतिमल्लनिपातजा । रणे विजयमानस्य कीर्तिर्भवति शाश्वती । हतस्यापि रणे शस्त्रैर्नाकपृष्ठं विधीयते । रणे ह्युभयतः सिद्धिर्हतस्येह घ्नतोऽपि वा । सा हि प्राणान्तिकी यात्रा महद्भिः साधुपूजिता । अयं तु मार्गो बलतः क्रियातश्च विनिस्सृतः । मृतस्य रंगे कः स्वर्गो जयतां वा कुतो रतिः । ये तु केचित्स्वदोषेण राज्ञः पण्डितमानिन । प्रतापार्थे हता मल्ला मल्लहंतुर्वधो हि सः ।” इति ।। ३८ ।। तथैवाह सः—न बाल इति । बलिनामेकैकशक्तिमतां ब्रह्मादीनां वरः । तदेवाह–येन त्वया सहस्रेति । किशोरश्च न भवसि तस्यापि बालसादृश्येनाल्पबलत्वात् । किन्तु बलिनां मध्ये वरः श्रेष्ठः । वरत्वमेव दर्शयति—लीलयेति । येनेति येनयेनेत्यर्थः । द्वयोरपि स्कंधे गजदंतस्य गृष्टत्वादनुमाय तदिदं प्रोक्तमिति ज्ञेयम् ।। ३९ ।। यस्माद्युवां बलिनां वरौ लोकदृष्ट्या । बलिभिरस्माभिः सह । अत्र नियुद्धे । बलिभिरिति बहुत्वं सर्वेषामेव मल्लानां क्रमेण नियुद्धेच्छया । यद्वा—बलिभिर्बहुभिरप्येकदा योद्धव्यं तथापि नानयः । कथं तर्हि भवता योद्धव्यमित्याशंक्य पुनः स्वाभिमानमाह—मयि तु विक्रम, यावन्तं स्वविक्रमं दर्शयेत्यर्थः । अहं तु न दर्शयामीति भावः । ननु गोपा वयं राजसभायां न क्रीडायोग्या इत्यत्राह—हे वार्ष्णेय । तदिदमपि वयं जानीम इति भावः । न त्वं गोपः किन्तु वृष्णिवशोद्भूतत्वाद्राजवंशीय एवेति तत्त्वम् । विश्वनास्तु—बलिभिर्मादृशैः सह, न चात्र तैर्बालैस्तेषां त्वत्तुल्यबलत्वाभावादिति भावः ।। ४० ।।

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे त्रिचत्वारिंशोऽध्यायः ।। ४३ ।।

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषणी

अभिनन्दनमेवाह । प्रजा इति । भोजपतेरिति गौरवात् तत्राप्यस्येति नतूग्रसेनस्यापीत्यर्थः । वयं च प्रजाः कीदृशा अपि वनेचरा अपि चकाराद्भवन्तस्तावत्तत्पुरवासिनः सुतरामेवेत्यर्थः । तस्माद्वयमपि राज्ञः प्रियमाज्ञाप्रतिपालनादिकं करवामैव तच्च नोऽस्मभ्यं भोजपतेरनुग्रह एव यत एव वयमत्र प्रवृता भवामेति भावः । वस्तुतस्तु अस्येत्यनादरे वयं चापि वयमपि प्रजाः अपितु नैवेत्यर्थः । तत्र हेतुः वनेचराः नित्यं वृन्दावनविहारिण इत्यर्थः । अयन्त्वाधुनिक इति भावः । तस्माद्वयं राज्ञः स्वस्य श्रीगोपराजस्यैव प्रियङ्करवाम कर्तुमिच्छामः नतु भोजपतेः । नन्वीश्वरस्य तवान्यत्र राजत्वादिमननमाज्ञाप्रतिपालनादिकं चासम्भवमित्याशङ्क्याह । तच्च नाऽस्माकमनुग्रहः प्रेमविशेषकर्तृजनविषयश्चेतोद्रवविशेष एव येन तादृशीमपि वश्यतां प्रतिपद्येमहीति भावः ।। ३७ ।। बाला बालत्वेनाल्पबला इत्यर्थः । बहुत्वमन्येषामपि बालानां स्वकोटौ प्रवेश्य दृष्टान्तत्वव्यञ्जनाय सांसर्गिगोपवर्गापेक्षया वा तुल्यबलैरिति बालेष्वपि ये न्यूनबला अधिकबला वा तैरपि नेत्यर्थः । क्रीडिष्याम इति । तत्रापि क्रीडायामेव ममेच्छेति भावः । अन्यत्तैः वस्तुतश्च हे बाला ! अज्ञाः तुल्यबलैः गोपैः सखिभिरेव सह क्रीडिष्यामः नत्वल्पबलैर्युष्माभिरित्यर्थः । “गोपैः समानगुणशीलवयोविलासवेषैश्च मूर्च्छितकलस्वनवेणुवीणै”रिति प्रसिद्धेः मल्लानामशनिरिति च तथापि भवादृशामाग्रहात्तत्र प्रवर्तामहे ततोऽशनिस्वभावमदङ्गस्पर्शन भवतां वधे तु नास्माकं दोष इति भावः—

श्रीहरिवंशे विष्णुपर्वणि कंसवधे अष्टाशीतितमाध्याये । नियुद्धे निपातनानन्तरमवध्यस्यापि मल्लस्य ।।

तस्य वधे कार्ये स्वदोषपरिहारार्थं—

स्पष्टमेव श्रीभगवद्वचनम् ।।

अहं बालो महानन्ध्रो वपुषा पर्वतोपमः । युद्धं ममानेन सह रोचते बाहुशालिना ।।

युद्धव्यतिक्रमः कश्चिन्न भविष्यति मत्कृतः । न ह्यहं बाहुयोधानां दूषयिष्यामि यन्मतम् ॥
योऽयं करीषधर्मश्च तोयधर्मश्च रङ्गजः । कषायस्य च संसर्गः समयो ह्येष कल्पितः ॥
संयमः स्थिरता शौर्यं व्यायामः सत्क्रिया बलम् । रङ्गे च नियता सिद्धिरेतद्युद्धविदां मतम् ॥
यदयं बाहूयुद्धं वै सवैरं कर्त्तुमुद्यतः । अत्र वै निग्रहः कार्यस्तोषयिष्याम्यहं जगत् ॥
करूषेषु प्रसूतोऽयं चाणूरो नाम नामतः । बाहूयोधी शरीरेण कर्मभिश्चात्र चिन्त्यताम् ॥
एतेन बहवो मल्ला निपातानन्तरं हताः । रङ्गप्रतापकामेन मल्लमार्गश्च दूषितः ॥
शस्त्रसिद्धिस्तु योधानां सङ्ग्रामे शस्त्रयोधिनाम् । रङ्गे सिद्धिस्तु मल्लानां प्रतिमल्लनिपातजा ॥
रणे विजयमानस्य कीर्त्तिर्भवति शाश्वती । हतस्यापि रणे शस्त्रैर्नाकपृष्ठं विधीयते ॥
रणे ह्युभयतः सिद्धिर्हतस्येह घ्नतोऽपि वा । साहि प्राणान्तिकी यात्रा महद्भिः साधु पूजिता ॥
अयन्तु मार्गो बलतः क्रियातश्च विनिःसृतः । भृतस्य रङ्गे कः स्वर्गो जयतो वा कुतो रतिः ॥
ये तु केचित् स्वदोषेण राज्ञः पण्डितमानिनः । प्रतापार्थे हता मल्ला मल्लहन्तुर्वधो हि सः ॥ इति ॥ ३८ ॥

किशोरश्च न भवसि तस्यापि बाल्यसादृश्येनाल्पबलत्वात् किन्तु बलिनां मध्ये वरः श्रेष्ठः वरत्वमेव दर्शयति । लीलयेति । येनेति । येन येनेत्यर्थः । द्वयोरपि स्कन्धे गजदन्तस्य दृष्टत्वादनुमाय तदिदं प्रोक्तमिति ज्ञेयम् ॥३९॥ बलिभिरिति बहुत्वं सर्वेषामेव मल्लानां क्रमेण नियुद्धेच्छया यद्वा बलिभिर्बहुभिरप्येकदा योद्धव्यं तथापि नानयः कथं तर्हि भवता योद्धव्यमित्याशङ्क्य पुनः साभिमानमाह । मयि तु विक्रम यान्तवं स्वविक्रम दर्शयेत्यर्थः । अहं तु न दर्शयिष्यामीति भावः ननु गोपा वयं राजसभायां न क्रीडायोग्या इत्यत्राह । हे वार्ष्णेय ! तदिदमपि वयं जानीम इति भावः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अभिनन्दनमेवाह — प्रजा इति । अस्य प्रजा-हिंसकस्य ज्ञातिद्रोहिणोऽपि वनेचरा अपि, अप्यर्थे च-शब्दः । भोजपतिमात्रत्वेनास्माकञ्च वनेचरत्वेन यद्यपि प्रजात्वं नैव संगच्छते, भवतु, तथापि यूयमिव वयमपि प्रजा भवेमेत्यर्थः । तदस्माभिर्नित्यं तस्य प्रियाचरणं नोऽस्मान् प्रति तस्यानुग्रहः साक्षात् कारुण्यमेवेत्यर्थः । परं केवलमिति तत्रास्माकं कापि योग्यता नास्तीत्यर्थः । अतएव तदकारणताविवक्षया कार्य्यकारणाभेदात्तदनुग्रह इत्युक्तम् । श्लेषार्थश्चायम्—सर्व्वप्रजापालनाभावात् स्वज्ञातिद्रोहाच्चास्य राजत्वमस्माकं प्रजात्वं न सिध्यत्येव, तथाप्यस्य प्रियं करवाम, यदि तस्मिन्नस्माकमनुग्रहो भवेदतोऽयं हन्तव्य इति ॥ ३७ ॥ बाला अल्पबला इत्यर्थः । साक्षात्तथानुक्तिर्महाबलत्वेन वाचो मिथ्यात्वापत्तेः, बालत्वस्य च साक्षात् प्रकटनात् सत्यत्वमेव । यद्यपि तदानीं कैशोरम्, तथापि सुप्रसिद्धबाल्य-तारुण्याद्यवस्थात्रयमृते तद्बाल्यान्तरेव प्रविशति; बहुत्वं साधारणकथनरीत्या संगिगोपवर्गापेक्षया वा तुल्यबलैरल्पबलैरित्यर्थः । यद्वा, तुल्यबलैर्बालैः सहेत्यर्थः । तुल्यबलैरिति बालेष्वपि ये न्यूनबला अधिकबला वा तैरपि नेति भावः । क्रीडिष्याम इति क्रीडैवोक्ता; वधश्च परिहृतः, नियुद्धौचित्यापेक्षया, ततश्च यथोचितम् । अन्यत्तैर्व्याख्यातम् । श्लेषेण युष्माभिरल्पबलैः सहास्माकं नियुद्धं नोचितं किन्तु गोपैरेव स्यात्, तथापि भवादृशामाग्रहात्तत्र प्रवर्त्तामहे, नात्रास्माकं दोष इति । एवं कार्य्ये तद्वधे दोषः परिहृतः, तथा नियुद्धे निपातनानन्तरमवध्यस्यापि मल्लस्य तस्य वधे कार्य्यदोषपरिहारार्थं श्रीहरिवंशे (विष्णु० प० ३०।१९-३०) श्रीभगवद्वाक्यम्—

'अहं बालो महानन्ध्रो वपुषा पर्व्वतोपमः । युद्धं ममानेन सह रोचते बाहुशालिना ॥
युद्धव्यतिक्रमः कश्चिन्न भविष्यति मत्कृतः । न ह्यहं बाहुयोद्धानां दूषयिष्यामि यन्मतम् ॥
योऽयं करीषधर्म्मश्च तोयधर्म्मश्च रंगजः । कषायस्य च संसर्गः समयो ह्येष कल्पितः ॥
संयमः स्थिरता शौर्य्यं व्यायामः सत्क्रिया बलम् । रंगे च नियता सिद्धिरेतद्युद्धविदां मतम् ॥
यदयं बाहुयुद्धं वै सवैरं कर्त्तुमुद्यतः । अत्र वै निग्रहः कार्य्यस्तोषयिष्याम्यहं जगत् ॥
करूषेषु प्रसूतोऽयं चाणुरो नाम नामतः । बाहुयोधी शरीरेण कर्म्मभिश्चानुचिन्त्यताम् ॥
एतेन बहवो मल्ला निपातानन्तरं हताः । रंगप्रतापकामेन मल्लमार्गश्च दूषितः ॥
शस्त्रसिद्धिस्तु योधानां संग्रामे शस्त्रयोधिनाम् । रंगसिद्धिस्तु मल्लानां प्रतिमल्लनिपातजा ॥
रणे विजयमानस्य कीर्त्तिर्भवति शाश्वती । हतस्यापि रणे शस्त्रैर्नाकपृष्ठं विधीयते ॥
रणे ह्युभयतः सिद्धिर्हतस्येह घ्नतोऽपि वा । सा हि प्राणान्तिकी यात्रा महद्भिः साधु पूजिता ॥
अयन्तु मार्गो बलतः क्रियातश्च विनिसृतः । मृतस्य रंगे कः स्वर्गो जयतो वा कुतो रतिः ॥
ये तु केचित् स्वदोषेण राज्ञः पण्डितमानिनः । प्रतापार्थे हता मल्ला मल्लहन्तुर्वधो हि सः ॥' इति ॥ ३८ ॥

किशोरश्च न भवसि, तस्य बाल्यसादृश्येनाल्पबलत्वात्, किन्तु बलिनां मध्ये वरः श्रेष्ठः। वरत्वमेव दर्शयति—लीलयेति ॥ ३९ ॥ बलिभिरिति बहुत्वं सर्वेषां मल्लानां क्रमेण नियुद्धेच्छया; अत्र बालबलियुद्धे। वै प्रसिद्धौ। यद्वा, बलिभिर्बहुभिरप्येकदा योद्धव्यं तथापि नानयः। मया सह त्वं पराक्रमं कुर्विति मद्विक्रमन्त्वया सोढुं न शक्य इति मया सह न कार्य्यः, किन्तु त्वयैव क्रियतामित्यर्थः। वार्ष्णेय! हे वृष्णिवंशोद्भूतेति विक्रमणयोग्यतोक्ता। तत्त्व नियुद्धे प्रवर्त्तनार्थं पूर्व्ववत् गोत्साहनम्, किंवा वृष्णिवंशत्वेन राज्ञोऽस्य भागिनेयत्वात्तव बलिष्ठता सम्भाव्यत एवेति, यद्वा, निजाभिष्टं मा शंकस्वेति तद्भागिनेयेति साक्षादनुक्तिर्महामदात्, किंवा भागिनेयांनिष्टचिन्तया लोके महादोषविख्याति-भयात् ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

बालशब्दो ऽत्यन्तशैशवपरः ॥ ३८-४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसुरिकृतशुकपक्षीये त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह। प्रजा इति द्वाभ्याम्। अस्य भोजपतेः कंसस्य वनेचरा वयमपि प्रजा एव तद्देशवनोपजीवित्वाद्वयमपि कथञ्चित्प्रजा एवेत्यर्थः। ननु युष्मद्विधा इति भावः। अतस्तस्य प्रियङ्करवाम परं केवलं तत्कथं चित्प्रीतिरित्येतन्नोऽस्माकमस्मद्विषयोऽनुग्रहः ॥ ३७ ॥ वयन्तु बाला अतस्तुल्यबलैः सह क्रीडिष्यामः नत्वधिकबलैर्भवद्भिरिति भावः। यथोचितं नियुद्धं भवेन्मल्लसभासदः मल्लसभाधिकृतानधर्मो मास्पृशतु हे मल्लेति वा ॥ ३८ ॥ एवमुक्तः प्राह चाणूरः। न बाल इति। बालशब्दोऽत्यन्तशैशवपरः तत्र दृष्टान्तार्थं यथा नात्यन्तशिशुस्तथा न किशोरोऽपि किं तु युवेति भावः। अथापि बलहीन इत्यत आह। बलिनांवरः। यादृशस्त्वं तादृश एव रामोऽपीत्याह। बलश्चेति। बलिनांवरत्वे लिङ्गं वदन् विशिनष्टि। येन त्वया लीलयैव सहस्रद्विपानां सत्त्वं बलं बिभर्तीति तथा इभो गजः कुवलयापीडो हतः ॥ ३९ ॥ तस्माद्बलिभ्यामावाभ्यां सह बलवद्भिर्युष्माभिर्योद्धव्यम् अत्र युद्धे अनयोऽधर्मो न विद्यते वै नूनं हे वार्ष्णेय! मया सह त्वं विक्रम पराक्रमं कुरु युद्धयस्वेति यावत् बलेन रामेण सह तु मुष्टिको विक्रमिष्यते ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यूयं भोजपतेः प्रजाः वयं चापि विशेषोऽस्ति वयं वनेचराः यूयं तत्समीपचराः अतो विशेषप्रियाश्च तथापि वयं तस्य नित्यं प्रियं करवामो नाप्रियमिति यत्तस्मान्नः परमनुग्रह एव ॥ ३७ ॥ तत्रापि किञ्चित्कर्तव्यमस्तीत्याह। बाला इति। वयं बाला इति यदतस्तुल्यबलैः मल्लैः समं नियुद्धमित्ययं धर्मः अधर्मो मास्पृशेन्न स्पृशतु ॥३८॥ चाणूरः कृष्णोक्तं परिहरति। नेति ॥३९॥ अनयोऽन्यायलक्षणः अधर्मः विक्रम विक्रमस्व मुष्टिका बलेन रामेण सह विक्रमं करोत्विति ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां एकचत्वारिंशोऽध्यायः ॥ ४१-४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मल्लसभासदो मल्लसभाधिकृतान् अधर्मो मा स्पृशेदित्यतो बालैरेव सहक्रीडिष्यामोऽन्यथा त्वधर्मः स्पृशेदेवेति भावः ॥ ३८-३९ ॥ बलिभिर्मद्विधैरेव सह न चात्रत्यैर्बालैस्तेषां त्वत्तुल्यबलत्वाभावादिति भावः ॥ ४० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। दशमस्य त्रयश्चत्वारिंशोऽप्यजनि सङ्गतः ॥ ४३ ॥

गूढार्थदीपिनी

वयं चात् यूयं च ॥ ३७ ॥ बालाः वस्तुतस्तु बलानां शक्तीनां समूहो बालं तद्विद्यते येषु ते बालाः मत्वर्थीयोऽच्प्रत्ययः सर्वशक्तिमन्तः ईश्वराः वयम्। मल्लेति सम्बुद्धिर्वा ॥ ३८ ॥ सत्त्वं बलम् ॥ ३९ ॥ अत्र युद्धे। हे वार्ष्णेय वृष्णिवंशज कृष्ण। त्वं मयि विक्रम पराक्रमं कुरु। बलेन सह मुष्टिकः विक्रामतु ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं चेत्तर्हि राज्ञः मल्लसभाधिकृतजनद्वारा अधार्मिकत्वं यथा न स्यात्तथा क्रीडिष्याम इत्याह। बाला इति। तुल्यबलैः सह क्रीडिष्यामः नतु बलिभिर्भवद्भिः सहेति यथोचितं नियुद्धं भवेत् मल्लसभासदः मल्लसभाधिकृतान् जनान अधर्मः सद्यो

नाशहेतुर्मास्पृशेत् ।। ३८ ।। सहस्रद्विपानां हस्तिनां सत्त्वं बलं बिभर्तीति तथा ।। ३९ ।। अनयोऽधर्मो नास्ति हे वार्ष्णेय ! त्वं मयि विक्रम पराक्रमं कुरु रामेण सह मुष्टिकः विक्रमताम् ।। ४० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्रिचत्वारिंशाध्यायार्थप्रकाशः ।। ४३ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भोजपतेः प्रजा यूयं वयं चेति सत्यमुक्तं तस्य प्रियमतो नित्यं करवाम तत्तेन नः परमनुग्रहो राजप्रसादः सम्पादितप्रायो भवेत् । भगवदन्तरङ्गिको भावस्तु तत्तस्माद्युद्धकरणात्परस्यारेः कंसस्य मनुर्मन्त्र आलोचनं तस्य ग्रहो निग्रहो ज्ञानं वा भवति ।३७। तथाऽपि बालबलवद्युद्धमनुमन्तृराज्ञो बालिशता तथा सभासदामधर्मश्च तदनुवर्तिनां स्यादिति वदति । बाला इति । वयं तुल्यबलैस्तुल्यं बलं येषां ते तैर्यथोचितं यथायोग्यं क्रीडिष्यामो नियूद्धं च तादृशैर्भवेत् । हे मल्ल सभासदोऽधर्मो मा स्पृशेन्न स्पृशतु ।। ३८ ।। चाणूर आरादागतभृतिरिति परिहरति । नेति । त्वं बालोऽपि न किशोरोऽपि न त्वं बलिनां वरो बलोऽपि तथैव । बलिबलीयस्त्वं मम त्वया कथं निरणायीत्यत इत इत्याह । लीलयेति । सहस्रद्विपानां सत्त्वं बलं बिभर्ति स तथा । इभो लीलया येन हत इति बलिनां वरो हस्रै मुखैरम्बष्ठैः सहितः सहस्रः सत्त्वभृच्चासौ द्विपश्च द्विपसत्त्वभृत् । परनिपातः । स चासौ रायेति वा ।। ३९ ।। तस्माद्भवद्भ्यां बलिभिः सहैव योद्धव्यमत्रानयोऽन्यायो न न विद्यते वार्ष्णेय कृष्ण त्वं मयि विक्रम विक्रमस्व मुष्टिको बलेन सह विक्रमं करोतु ।। ४० ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे एकचत्वारिंशोऽध्यायः ।। १०-४१ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

राज्ञः प्रियं प्रकर्त्तव्यमेव परं त्वया सह नियुद्धं न कर्त्तव्यम् अतुल्यबलत्वादिति तदाह द्वयेन । प्रजा इति । अस्य भोजपतेः कंसस्य प्रदर्शनेन तिरस्कृत इव वयमिति प्रदर्शनेन कथं वा प्रजात्वमित्युपहसितः वयं चकाराद्यूयं च वस्तुतस्तु यूयमेव चस्त्वर्थे वयं तु वनेचरा इति नास्माकं राज्ञा कृत्यं तथापि नित्यं करवाम फलं तु नापेक्ष्यत इत्याह । तन्नः परमनुग्रह इति । मातुलो हि राजा स चेद्भागिनेयगुणान् पश्येत् तदा अनुगृह्णीयादेवेति युक्तत्वादभिनन्दनम् ।। ३७ ।। एतावानर्थः साधारणः विशेषमाह । बाला वयमिति । प्रदर्शनमेव ह्यत्र प्रयोजनं न त्वन्यत् चेत्तदा बाहुयुद्धं शास्त्रानुसारेण कर्त्तव्यमिति तथैव करिष्याम इत्याह । बाला वयमिति । नियुद्धशास्त्रे हि समानवयस्कैरेव समानबलदेहैर्युद्धं कर्त्तव्यमिति हि स्थितिः अतः बालैः समानवयस्कैः तुल्यबलैरेतैर्गोपैः सह क्रीडिष्यामः तथा सत्युचितं भवति तदाह । यथोचितमिति । नन्वाज्ञा प्रमाणं कार्यमितीत्याशङ्क्याह । भवेन्नियुद्धमिति । समानैः क्रियमाणमे तस्मिन् युद्धेऽधर्म्मोमा भवेत् ततो द्रष्टृणां मल्लसभासदां दोषोऽपि न भवेदित्याह । मल्लसभासदः । मा स्पृशेदिति । चाणूरोक्ते हि लौकिको धर्मः तदविरुद्धोऽयं शास्त्रीयो धर्म इति युक्तमुक्तं भगवानपि चाणूरादयो दैत्या इति छलेनैवोक्तवान् बलसंबन्धिना वयं बालाः तुल्यबलाः प्रातीतिकाः सखित्वाद्गोपा बलभद्रो वा भवांस्तु न तुल्यबलः किं तु हीनबल इति अभिप्रायेण प्रत्युक्तम् ।। ३८ ।। चाणूरस्तु विपरीतं ज्ञात्वा अनिष्टफलार्थं विपरीतत्वं सम्पाद्ययुद्धार्थं प्रवर्त्तयते । न बाल इति द्वाभ्याम् । उपपत्त्या बलं साधयति न वा त्वं बालः बालाभिप्रायेण सूक्ष्मत्वमाशङ्क्य इष्टसिद्धिं मत्वा अङ्गीकारे तत्परिहारार्थमाह न किशोर इति । वयस्तु बलादिनियामकं न भवतीत्यभिप्रायः । वस्तुतोऽपि तथा बलश्चेति चकारात् सोऽपि न बालो न किशोरः किं तु बलिनां वरः सोऽपि भवांश्च उभयोर्बलमपि प्रतिज्ञाय अन्यतरबलसाधनदृष्टान्तेनैतत् साधयितु सहस्रद्विपानां सत्त्वं विभर्त्ति इति तादृशरूपः कुवलयापीडः द्विपस्य बलं शास्त्रप्रसिद्धं पुरुषाच्छतगुणं बलमिति भारं वहति पुरुषः शतभारं वहति गज इति तादृशोऽपि लीलयैव हतः न ह्यसाधनेन ससाधन इभः पुरुषेण बालेन वा हन्तुं शक्यः अतोऽतिपुरुषकारस्त्वयि वर्त्तत इति भवान् पुरुषैस्तुल्यः ।।३९।। एवं बलभद्रोऽपि ततः किमेतस्मादिति भवद्भयां सह गजादपि बलिष्ठैर्योद्धव्यम् एवं युद्धे नानयः शत्रुभिर्योद्धव्यमेव न्यायविरोधोऽपि नास्ति वै निश्चयेन तर्हि गोपालास्तथाविधाः सन्ति तैः सह युद्धं कर्त्तव्यमिति चेत्तत्राह । मया विक्रमेति वार्ष्णेयेति सम्बोधनं छलं दूरीकरोति कपटं परित्यज्य स्पष्टं मया सह युद्धं तु कुरु त्वं कंसस्य भागिनेयोऽततः किमिति छलवादः क्रियते छलं परित्यज्य मया सह द्वषिणा स्पष्टं युद्धं कर्त्तव्यं तदाह । विक्रमेति । पराक्रमं कुरु बलेन सह च मुष्टिकः पराक्रमं करोतु अनेन मुष्टिको हीनबलः प्रबलस्त्वम् अहं महाबलस्त्वत्तोऽपीति निरूपितवान् अत एव भगवता चाणूरो हतः अन्यथा अक्लिष्टकर्मा न हन्यात् हननस्याप्रतिज्ञातत्वात् एवं वाग्बन्धावधि सर्वेषां द्रष्टृणां भगवत्यासक्तिनिरूपिता ।। ४० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां चत्वारिंशाध्यायविवरणम् ।। ४०-४३ ।।

श्रीसुबोधिनी-सारः

अस्य भोजपतेः कंसस्य प्रजा वनेचरा वयमपि नित्यं प्रियं करवाम तदेव नोस्माकं परमोऽनुग्रहः ।। ३७ ।। तुल्यबलैः समानवीर्यैः सह बाला वयं क्रीडिष्यामो विहरिष्यामो यथोचितं नियुद्धं भवेत् मल्लानां सभासु सीदन्ति तिष्ठन्तीति ते तथा तान्

अधर्मः पापं मास्पृशेत् ।। ३८ ।। चाणूरोक्तिः त्वं बालो न किशोर एकादशवर्षो न किं तु बलिनां वरः श्रेष्ठो बलो बलमस्यास्तीत्यर्श आद्यच् तथा हि सहस्रं द्विपा गजास्तेषां सत्त्वं बिभर्त्तीति तथा इभः कुलवलयापीडो येन त्वया लीलया हतः ।। ३९ ।। तस्माद्धेतोः वलिभिरस्माभिः सह भवद्भ्यां कर्तृभ्यां योद्धव्यं वै एवात्र युद्धेऽनयोऽन्याय्यं न हे वार्ष्णेय मयि विक्रमं पराक्रम त्वं कुरु बलेन सह मुष्टिको विक्रमतु ।। ४० ।।

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायां त्रिचत्वारिंशोऽध्यायः ।। ४३ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अस्य भोजपतेः कंसस्य वयं चकाराद्यूयं च प्रजाः, अतस्तस्य प्रियं नित्यं करवाम, ततश्च नोऽस्माकं तत्कृतः परमानुग्रहः महाननुग्रहो भविष्यति, अत्र न सन्देहः । अपिशब्देन स्वेषु वस्तुतस्तत्प्रजात्वाभाव सूचयति । तत्र हेतुं सूचयन्नाह—वनेचरा इति ।। ३७ ।। यद्यपि राज्ञः प्रियं कर्तव्यं तथापि वयं बालाः, अतस्तुल्यबलैः सह क्रीडिष्यामः, न त्वधिकबलैर्भवद्भिः । तत्र हेतुमाह—यथा नियुद्धमुचितं भवेत् । विपक्षे दोषं सूचयन्नाह—मल्लसभासदः मल्लसभाधिकृतानधर्मो यथा न स्पृशेदिति ।।३८।। एवमुक्तश्चाणूर आह—नेति । त्वं न बालो न किशोरः, किंतु युवैव इत्याशयः । 'यादृशस्त्वं तादृश एव रामोऽपि' इत्याह—बलश्चेति । 'अथापि बलहीनोऽहम्' इत्याशङ्क्याह—बलिनां वर इति । अत्र लिङ्गं वदन् विशिनष्टि—येन त्वया सहस्रद्विपानां सत्त्वं बलं बिभर्तीति तथाभूत इभो गजो लीलया अनायासेनैव हतः ।। ३९ ।। तस्माद्बलवत्त्वाद्भवद्भ्यां सहबलिभिरस्माभिर्योद्धव्यम् । अत्र युद्धे अनयः अधर्मो नास्त्येव । "त्वं च कंसस्य भागिनेयो वैरी च कापट्येन नन्दपुत्रतया स्थितस्तत्तव कापट्यमिदानीं ज्ञातमेव, अतः कापट्यं परित्यज्य प्रसिद्धशत्रुवद्युध्यस्व" इति सूचयन् सम्बोधयति—वार्ष्णेयेति । मयि विक्रम, मद्धननेन पराक्रमं कुर्वित्यर्थः । तथा बलेन रामेण सह मुष्टिको विक्रमतु ।। ४० ।।

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ।। १ ।।
श्रीमद्गिरिधराख्येव भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ।। २ ।।
रचिता दशमे तत्र राजसरोधवर्णने । त्रिचत्वारिंशको रङ्गप्रवेशस्य निरूपकः ।। ३ ।।

अन्वितार्थप्रकाशिका

प्रजा इति । अस्य भोजपतेः कंसस्य वनेचरा वयं चाद्यूयं च प्रजाः अतस्तस्य प्रियं नित्यं करवाम । ततश्च नोऽस्माकं तत्कृतः परमः अनुग्रहः महाननुग्रहो भविष्यत्यत्र न संदेहः ।। ३७ ।। बाला इति । तथापि वयं बालाः अतस्तुल्यबलैर्बालैः सह क्रीडिष्यामो न त्वधिकबलैर्भवद्भिः । यथा नियुद्धमुचितं भवेत् तथा मल्लसभासदः मल्लसभाधिकृतान् अधर्मो यथा न स्पृशेत् । मल्लेति संबुद्धिर्वा ।। ३८ ।। नेति । त्वं न बालः नापि किशोरः येन त्वया बलेन च सहस्रसंख्यद्विपानां सत्त्वं बलं बिभर्तीति तथाभूत इभो गजो लीलया अनायासेनैव हतः । द्वयोः स्कन्धे गजदन्तदर्शनाद्द्वाभ्यां हत इत्यनुमानेनैव मुक्तिः ।। ३९ ।। तस्मादिति तस्माद्बलवत्त्वात् भवद्भ्यां सह बलिभिरस्माभिर्योद्धव्यम् । अत्र युद्धे अनयः अधर्मो नास्त्येव । अतः हे वार्ष्णेय कृष्ण ! त्वं मयि विक्रमं मद्धनने पराक्रमं कुरु तथा बलेन रामेण सह मुष्टिको विक्रमतु । दीर्घाभाव आर्षः ।। ४० ।।

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां त्रिचत्वारिंशोऽध्यायः ।। ४३ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशिका

ततः नोऽस्माकं परमनुग्रहः ।। ३७ ।। ततो यथोचितं नियुद्धं बाहुसंग्रामो भवेत् एवं च सति हे मल्लासभासदः सभास्थितान्जनान् अधर्मः मा स्पृशेत् मल्लसभासद इति वा ।। ३९ ।। चाणूरोवाक्य माहनेति सहस्रहस्तिनां स त्वं बलं विभर्तीति तथाभूतः ।। ३९ ।। बलिभिर्मत्तुल्यैः सहभवद्भ्यां योद्धव्यं अत्र अनयोऽन्वायोनास्ति हे वार्ष्णेय कृष्णमयासह त्वं विक्रम सर्वस्व पराक्रमं दर्शय बलेन सह मुष्टीको युद्धं करोतु ।। ४० ।।

इति श्रीशुद्धैकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धव्याख्याने कुवलयापीडवधो नाम त्रिचत्वारिंशोऽध्यायः ।। ४३ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यदब्रवीत्तदाह द्वाभ्याम् ।। प्रजा इति ।। भोजपतेरस्य कंसस्य, यूयं, वनेचराः वयं चापि, प्रजाः एव । तद्देशवनोपजीवित्वाद्वयमपि कथंचित्प्रजा एवेत्यर्थः न तु युष्मद्विधा इति भावः । अतः तस्य, प्रियं करवाम । परं केवलं, तत् तस्य कथं चित् प्रीतिरित्येतदेव । नोऽस्माकं अनुग्रहः ।। ३७ ।। बाला इति ।। वयं तु बालाः, अतः तुल्यबलैः सह, क्रीडिष्यामः । न त्वधिकैर्भवद्भिरिति भावः । एवं सति, यथोचितं, नियुद्धं, भवेत् मल्लसभासदः मल्लसभाधिकृतान् , अधर्मः मा स्पृशेत् । न स्पृशत्वित्यर्थः

हे मल्ल वा ॥ ३८ ॥ एवमुक्तः प्राह चाणूरः ॥ न बाल इति ॥ हे कृष्ण, बलिनां वरः त्वं, बलश्च बालः, न, किशोरः न । येन त्वया, लीलया एव, सहस्रद्विपानां सत्त्वं बलं बिभर्त्तीति तथाभूतः इभः, हतः ॥ ३९ ॥ तस्मादिति '। तस्मात् बलिभिरस्माभिः सह, भवद्भ्यां योद्धव्यम् । अत्र अनयः न, वै । ततः, हे वार्ष्णेय वृष्णिकुलोत्पन्न कृष्ण, त्वं मयि विक्रम युद्धपराक्रमं कुरु । बलेन रामेण सह, मुष्टिकः विक्रमिष्यते ॥ ४० ॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तम श्रीसहजानन्दस्वामिसुत श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां
भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीहरिसूरिविरचितं भक्तिरसायनम्

प्रजा इति : १०.४३.३७.

नृपे नृपत्वं यस्मिन्स्यात् सर्भभूतमयो हि सः । नृशंसेऽस्मिंस्तथा त्वं तु श्रोतव्यं देशतोऽधुना ॥ ६६ ॥
यतो भूतमयो राजा यतो यूयं च तत्प्रजाः । अभूतपूर्वो युद्धोपक्रमोऽतः साधुगर्हितः ॥ ६७ ॥
यद्यपि स्मो वयं यूयं भूयो रङ्गोपजीविनः । तारतम्यं तथाप्यस्ति स्फुटं भिन्नपदाश्रयात् ॥ ६८ ॥

बाला वयमिति : १०.४३.३८.

पितामह-पितामहो निखिल-लोकपालाधिपो बलाधिकबलोर्जितः प्रमदानवोन्मर्दकः ।
सदास्मि यदपीह तत्प्रकटनस्य सम्प्रत्यलं न चैष समयस्त्विति क्षममुवाच बालोऽस्म्यहम् ॥ ६९ ॥
लघुत्वस्वीकृतिः प्रायः परिणामसुखावहा । विशेषात्त्वरिदेशे स्यादितीशस्तादृगब्रवीत् ॥ ७० ॥
यद्यत्र भविता युद्धमधर्मेण तदैव मे । जय इत्यवदद् युक्तं मा धर्मः स्पृशतामिह ॥ ७१ ॥

तस्मादिति : १०.४३.४०.

नास्माज्जयो मम मनागपि नाशितेभादित्याकलय्य नृपशासनदत्तचित्तः ।
साकं मया कुरु निरुद्धमिमि ह्यनुक्त्वा प्रोवाच विक्रममयीत्युचितं वचस्तत् ॥ ७२ ॥
लब्ध्वाऽपि स्वसुखस्थितिं वितरणे यो बद्धमुष्टिर्भवत्यत्यन्तं कृपणः स एव गदितो लोभीच तस्योरगः ।
सम्प्राप्तस्वसुखैकवृद्ध्यतिशयस्थायीति लोकप्रथाऽन्वर्थासीन्ननु मुष्टिकासु रचिते युद्धे बलेनाश्रिते ॥ ७३ ॥
पायाद्वः स हरिः शताध्वरमुखप्रख्यात लेखोत्कराजस्त्रोरीकृत-पादसेवनविधिः श्रीनायकः सन्नपि ।
भक्तक्लेशविमोचनोत्सुकमनाः स्थित्वाऽरिवेश्मन्यपि कर्माण्यातनुते स्म रङ्गरसिक-स्तद्रङ्गदासाग्र्यवत् ॥ ७४ ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

कृष्णप्रिया

'चाणूर ! हम भी इन भोजराज कंस की वनवासी प्रजा हैं। हमें इनको प्रसन्न करने का प्रयत्न अवश्य करना चाहिये। इसीमें हमारा कल्याण है ॥ ३७ ॥ किन्तु चाणूर ! हमलोग अभी बालक हैं। इसलिये हम अपने समान बलवाले बालकों के साथ ही कुश्ती लड़ने का खेल करेंगे। कुश्ती समान बल वालों के साथ ही होनी चाहिये, जिससे देखनेवाले सभासदों को अन्याय के समर्थक होने का पाप न लगे ॥ ३८ ॥ चाणूर ने कहा—अजी ! तुम और बलराम न बालक हो और न तो किशोर। तुम दोनों बलवानों में श्रेष्ठ हो, तुमने अभी-अभी हजार हाथियों का बल रखनेवाले कुवलयापीड को खेल-ही-खेल में मैं मार डाला ॥ ३९ ॥ इसलिये तुम दोनों को हम-जैसे बलवानों के साथ ही लड़ना चाहिये। इसमें अन्याय की कोई बात नहीं है। इसलिये श्रीकृष्ण ! तुम मुझ पर अपना जोर अजमाओ और बलराम के साथ मुष्टिक लड़ेगा ॥ ४० ॥

श्रीमद्भागवत दशम स्कन्ध पूर्वार्द्ध निरोधलीला राजसप्रकरण के प्रमाणप्रकरण में कुवलयापीडवधो
निरूपण करने वाला ४३ वां अध्याय का भाषान्तर सम्पूर्ण ॥ ४३ ॥

◆ ◆

अथ चतुश्चत्वारिंशोऽध्यायः

श्लोकाः	अनु.	वसंत	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
५१	४३	४	४	२	१७८०	१२	४०	१८३४	५७।	२

श्रीशुक उवाच

एवं [1]चर्चितसङ्कल्पो भगवान् मधुसूदनः । आससादाथ[2] चाणूरं मुष्टिकं रोहिणीसुतः ॥ १ ॥
[3]हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः । विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया ॥ २ ॥
अरत्नी द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी । शिरः शीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः ॥ ३ ॥
परिभ्रामणविक्षेपपरिरम्भावपातनैः । उत्सर्पणाप[4]सर्पणैश्चान्योन्यं [5]प्रत्यरुन्धताम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—एवं, चर्चितसंकल्पः, मधुसूदनः, भगवान्, चाणूरम्, अथ, रोहिणीसुतः, मुष्टिकम्, आससाद ॥ १ ॥ हस्ताभ्याम्, हस्तयोः, बद्ध्वा, पद्भ्याम्, च, पादयोः, एव, विजिगीषयाः, प्रसह्य, अन्योन्यम्, विचकर्षतुः ॥२॥ अरत्निभ्याम्, द्वे, अरत्नी, जानुभ्याम्, च, जानुनी, एव, शीर्ष्णोः, शिरः, उरसा, उरः, अन्योन्यम्, अभिजघ्नतुः ॥ ३ ॥ परिभ्रामणविक्षेपपरिरम्भावपातनैः, उत्सर्पणापसर्पणैः, अन्योन्यम्, प्रत्यरुन्धताम् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चतुश्चत्वारिंशके तु मल्लकंसादिमर्दनम् । कंसयोषित्समाश्वासस्ताभ्यां पित्रोश्च दर्शनम् ॥ १ ॥

चर्चितो निश्चित एव संकल्पो यस्य सः । आससाद जग्राहेत्यर्थः ॥ १-२ ॥ बाहुमध्यात्कनिष्ठांगुलिव्यतिरेकेण कृतमुष्टिर्हस्तोऽरत्निः ॥ ३ ॥ परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनं विक्षेपो नोदनं परिरंभो बाहुभ्यां निष्पीडनम् अवपातनमधःक्षेपः उत्सर्पणमुत्सृज्य पुरतो गमनम् अपसर्पणं पृष्ठतो गमनम् एतैः अन्योऽन्यं प्रत्यरुंधतां प्रत्यावृतवन्तौ ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आदिपदेन मातापित्रोः शोकमर्दनग्रहः । ताभ्यां रामकृष्णाभ्याम् (१) । श्रुत्युक्तमल्लादिमर्दनमाह—एवमिति । तथा च श्रुतिः--"अवातिरतमनृतानि विश्वऋतेन मित्रावरुणा सचेथे" इति । अर्थस्तु--तत्रायादवोऽपि कंसो यदूनामाधिपत्यमिच्छन्ननृतः, तेन प्रयुक्तानि मल्लादीनि बहुत्वमाद्यर्थम्, आदिना हस्त्यनुक्ताद्यादीनां ग्रहः । अनृतानि विश्वसर्वाणि तानि अवातिरतं तिरस्कृतवन्तौ । ऋतेन सत्येनैव यादवत्वेन गोपत्वाच्छादितया प्रागप्रसिद्धेन मित्रावरुणौ सूत्रान्तर्यामिणौ रामकृष्णौ सचेथे संगच्छेथे युवाम् । तत्र कंसस्यानृतत्वमत्र हरिवंशस्थमहामात्रकथया बोध्यम् । 'चर्चितौ निश्चितार्चितौ' इति निरुक्तिकारः । एवं चाणूरोक्तप्रकारेण । भगवानशेषैश्वर्यसम्पन्न इति सद्य एवेच्छामात्रेण तद्वधसामर्थ्यं सूचितम् । तथापि चाणूरमाससाद क्षणंक्षणं मल्लयुद्धकौतुकार्थमन्तिके गतः । यतो मधुसूदनः । यथा सद्यो हंतुं शक्तोऽपि चिरं बाहुयुद्धक्रीडां कृत्वा मधुं हतवाँस्तद्वदित्यर्थः। लोकवत्तु लीलाकैवल्याम्, इति न्यायेनेति भावः । अथ तदनन्तरं मुष्टिकमित्यादि ॥ १ ॥ मल्लयुद्धरीतिमाह--हस्ताभ्यामिति। बद्ध्वा गृहीत्वा । क्रीडामेवाह--हस्ताभ्यामित्यादिचतुर्भिः । चकार उक्तसमुच्चये । एवशब्दस्य हस्ताभ्यामित्यनेनाप्यन्वयः, अन्येनान्यस्य मिश्रणे वैषम्यापत्त्या मल्लक्रीडापाटवहानेः । एवमग्रेऽपि । अन्योऽन्यं विजिगीषयेति । श्रीभगवतोऽपि नरलीलाव्यवसायत्वेन विजयेच्छासंभवात् । चर्चितश्चाणूरमहं हन्यामिति विचारितः संकल्पोऽभिप्रायो येनेति सः ॥ २ ॥ तौ कृष्णचाणूरौ । अभिजघ्नतुः संयोजितवन्तौ । द्वे प्रत्येकं पृथगित्यर्थः । तौ श्रीभगवच्चाणूरौ । तावि त्यस्य पूर्वेण परेणाप्यन्वयः। अभितो जघ्नतुः प्रहृतवन्तौ । अरत्निशब्दस्तैर्व्याख्यातः । अत्र प्रमाणवाचकः खल्वयं, ततस्तेन युद्धं न संभवति, कथंचित्तद्व्यञ्जका-

---

१. चिन्तित विज. । २. आससाद ह–प्रा. पा. ।

३. आस्फोटय हस्तौ हस्ताभ्यामूरू चैव पुनः पुनः । विसृज्य भूयः सङ्गृह्य परिक्रम्य परस्परम् ॥
अधिकं मूले ।

४. सर्पैश्च ह्य–विज. । ५. प्रत्ययुद्ध्यताम्–विज. ।

कारांगवाचकत्वेऽपि निस्सृतकनिष्ठांगुलितया प्रहारसौकर्यं न संभवति, नापि मल्लेषु तादृशं युद्धं प्रसिद्धं, तस्मान्मुष्ट्योपलक्षितत्वेन कथंचिन्मुष्टिरेव वाच्या । व्याख्यास्यते च भगयद्गात्राणामरत्निजान्वादीनामिति । यद्वा—"अरत्निः कफणौ हस्ते सप्रकोष्ठे तदंगुलौ" इति विश्वप्रकाशात्कफोणि रेवोच्यते । 'कफोणिः कफणिस्तथा' इति द्विरूपकोशात् । एतैर्नियुद्धप्रकारैः । प्रत्यरुद्धतामिति—लुङि श्नम्प्रत्यय आर्षः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भगवानशेषैश्वर्यसम्पन्न इति सद्य एव इच्छामात्रेण तद्वधसामर्थ्यं सूचितं तथापि चाणूरमाससाद क्षणं मल्लयुद्धकौतुकार्थमन्तिके गतः यतो मधुसूदनः यथा सद्यो हन्तुं शक्तोऽपि चिरं बाहुयुद्धक्रीडां कृत्वा मधुं हतवान् तद्वदित्यर्थः । "लोकवत्तु लीलाकैवल्यम्" इति न्यायेनेति भावः । अथ तदनन्तरं मुष्टिकमित्यादि । आससाद इति क्वचित् पाठः ॥ १ ॥ क्रीडामेवाह । हस्ताभ्यामित्यादि चतुर्भिः । चकार उक्तसमुच्चये एवशब्दस्य हस्ताभ्यामित्यनेनाप्यन्वयः । अन्येनान्यस्य मिश्रणे वैषम्यापत्त्या मल्लक्रीडापाटवहानेः । एवमग्रेऽपि । अन्योऽन्यं विजिगीषयेति श्रीभगवतोऽपि नरलीलायुद्धव्यवसायत्वेन जयेच्छासम्भवात् ॥२॥ द्वे इति प्रत्येकं पृथगित्यर्थः । तौ श्रीभगवच्चाणूरौ तावित्यस्य पूर्वेण परेणाप्यन्वयः । अभितो जघ्नतुः प्रहृतवन्तौ । अरत्निशब्दस्तैर्व्याख्यातः । अत्र प्रमाणवाचकः खल्वयं ततस्तेन युद्धं न सम्भवति कथञ्चित्तद्व्यञ्जकाकाराङ्गवाचकत्वेऽपि निःसृतकनिष्ठाङ्गुलितया प्रहारसौकर्यं न सम्भवति नापि मल्लेन तादृशं युद्धं प्रसिद्धं तस्मान्मुष्ट्युपलक्षितत्वेन कथञ्चिन्मुष्टिरेव वाच्या व्याख्यास्यते च भगवद्गात्राणामरत्निजान्वादीनामिति । यद्वा । अरत्निः कफणौ हस्ते सप्रकोष्ठं तदङ्गुलाविति विश्वप्रकाशात् कफोणिरेवोच्यते । कफोणिः कफणिस्तथेति द्विरूपकोषादिति ॥ ३ ॥ उत्सर्पणमग्रे गमनम् अपसर्पणं पश्चाद्गमनं प्रत्यरुन्धतामित्यस्य स्थाने लुङ्प्रयोगे श्नम्प्रत्यय आर्षः । परस्परं मुहुः स्थगितोद्यमं चक्रतुरित्यर्थः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवानशेषैश्वर्य्यसम्पूर्ण इति सद्य एवेच्छामात्रेण तद्वधसामर्थ्यं सूचितम् । तथापि चाणूरमाससाद, क्षणं मल्लयूद्धकौतुकार्थमन्तिके गतः स्वीचकार वा, यतो मधुसूदनः—यथा सद्यो हन्तुं शक्तोऽपि चिरं बहुधा यूद्धक्रीडां कृत्वा मधुं हतवान् तद्वदित्यर्थः । अथ तदनन्तरं सदा श्रीभगवदनुवर्त्तित्वात् रोहिणीसुत इति रोहिण्यास्तद्बन्धूनाञ्च सन्तोषणार्थमित्यर्थः । यद्वा, देवक्यामवतीर्णोऽपि यथा श्रीभगवता सह गोकुलेसुखक्रीड़ार्थं रोहिणीसुतत्वं गतस्तथाधुनापि तदिच्छानुसारेण मल्लक्रीडार्थमिति भावः ॥ १ ॥ क्रीड़ामेवाह—हस्ताभ्यामिति चतुर्भिः । चकार उक्तसमुच्चये, अत एव-शब्दस्य हस्ताभ्यामित्यनेनाप्यन्वयः; तयोः कैवल्य-ज्ञापनाय, अन्यथा वैषम्यापत्त्या मल्लक्रीड़ापाटवहानिः, एवमग्रेऽपि । अन्योऽन्यं विजिगीषयेति क्रीड़ासौष्ठवाय श्रीभगवतोऽपि चाणूरादिवद्विजेच्छानुकरणात् ॥ २ ॥ 'द्वे' इति प्रत्येकं पृथगित्यर्थः । तौ श्रीभगवच्चाणूरौ, तावित्यस्य पूर्व्वेण पराभ्यामप्यन्वयः । अभितोजघ्नतुः प्रहृतवन्तौ ॥ ३ ॥ प्रतिपदं प्रतिपक्षतया वा अरुन्धताम् , युयुधाते इत्यर्थः । अपसर्पणादीनां बहुत्वं तेषां पौनःपुन्येन बाहुल्यात् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ चाणूरमुष्टिककूटशलकंसवधात्मकं कर्मानुवर्णयति चतुश्चत्वारिंशेन । एवञ्चर्चितो निश्चितः स्वसङ्कल्प एव यस्य सः चाणूरमाससादाभ्यपद्यत तथा रोहिणीसुतो रामो मुष्टिकमाससाद ॥ १ ॥ तदा तौ कृष्णचाणूरौ राममुष्टिकौ च हस्तयोर्हस्ताभ्यां पादयोः पादाभ्यां च बद्ध्वा परस्परं जेतुमिच्छयाऽन्योऽन्यं विचकर्षतुविकृष्टवन्तौ ॥ २ ॥ कनिष्ठां विना कृतमुष्टिहस्तोऽरत्निः अरत्निभ्यां द्वे जानुनीमिथोऽभिजघ्नतुः तथा जानुभ्यां जानुनी शिरसा शिरः उरसोरश्चाभिजघ्नतुः ॥ ३ ॥ परिभ्रमणं हस्तादिषु गृहीत्वा परितश्चालनं विक्षेपो नोदनं परिरम्भो बाहुभ्यां पीडनम् अवपातनमधः पातनम् उत्सर्पणम् उत्सृज्य पुरतो गमनम् अपसर्पणं पृष्ठतो गमनमेतैस्तौ कृष्णचाणूरौ राममुष्टिकौ चान्योऽन्यं प्रत्यरुन्धतां प्रत्यावृतवन्तौ ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एवञ्चाणूरोक्तप्रकारेण चिन्तितः सङ्कल्पो मनोरथो येन स तथा हेति युद्धप्रारम्भे प्रत्यारम्भे प्रसिद्धौ हेति च ॥ १ ॥ तत्र मल्लयुद्धकरणप्रकारं कथयति । हस्ताभ्यामिति ।

आस्फोट्य हस्तौ हस्ताभ्यामूरूचैव परस्परम् । विसृज्य भूयः सङ्गृह्य परिक्रम्य परस्परम् ॥

इत्येकश्लोकमादित्वेन केचित्पठन्ति ॥ २–३ ॥ विक्षेप आकृष्य मोचनम् अवपातनमधोमुखेन पातनम् उत्सर्पणमुत्क्षेपः अपसर्पः पृष्ठतो गमनम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अरत्निः कफोणिः । अरत्निः कफणौ हस्ते सप्रकोष्ठतलाङ्गुलाविति विश्वप्रकाशात् । कफोणिः कफणिस्तथेति द्विरूपकोशात् ॥ १–४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चतुश्चत्वारिंशकेऽत्र मल्लकंसा हताः स्त्रियः । आश्वासिताश्च भ्रातृभ्यामभूत् पित्रोश्च दर्शनम् ॥

चर्चितश्चाणूरमहं हन्यामिति विचारितः संकल्पो येन सः ॥ १-२ ॥ कनिष्ठाङ्गुलिव्यतिरेकेण कृतमुष्टिर्हस्तोऽरत्निः यद्यपि ताभ्यां मल्लयुद्धं दुष्करत्वादप्रसिद्धं प्रसिद्धं तु समुष्टिहस्ताभ्यामेव तथापि वेणुवाद्य उरुधा निजशिक्षा इति वद्भगवता निष्कनिष्ठमुष्टिहस्तेनैवारब्धे नियुद्धे चाणूरेणापि कष्टं प्राप्तेनापि वीराभिमानिना तथा कृतमिति ज्ञेयम् ॥ ३ ॥ परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनं विक्षेपो नोदनं परिरम्भो बाहुभ्यां निष्पीडनमवपातनमधःक्षेपः उत्सर्पणमुत्सृज्य पुरतो गमनम् अपसर्पणं पृष्ठतो गमनम् एतैः प्रत्यरुन्धतां प्रत्यावृतवन्तौ लुङि श्नम् प्रत्यय आर्षः ॥ ४ ॥

गूढार्थदीपिनी

मल्लयुद्धे चतुश्चत्वारिंशे मल्लविमर्दनम् । कंसघातोऽवलाश्वासो बन्धात् पित्रोश्च मोचनम् ॥ १ ॥

चर्चितः निश्चितः । आससाद जग्राह ॥ १ ॥ बद्ध्वा गृहीत्वा ॥ २ ॥ बद्धमुष्टिर्हस्तोऽरत्निः । अभितो जघ्नतुः प्रहृतवन्तौ ॥ ३ ॥ परिरम्भो बाहुभ्यां निष्पीडनम् । अवपातोऽध क्षेपः । उत्सर्पणं पुरतो गमनम् अर्पणं पृष्ठतः । अन्योन्यं रुरुधतुः॥४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

चतुश्चत्वारिंशे मल्लकंसवधादिकं भगवत्कर्म वर्णयति । एवमिति । एवं चर्चितो निश्चितः संकल्प एव यस्य सः ॥ १ ॥ कृष्णचाणूरौ राममुष्टिकौ च विजिगीषया अन्योऽन्यं जेतुमिच्छया विचकर्षतुः ॥ २ ॥ अरत्न्यादिकमरत्न्यादिभिरन्योऽन्यमजघ्नतुः तत्र बद्धमुष्टिर्बाहुमध्यात्कनिष्ठाङ्गुलिमूलपर्य्यन्तो हस्तोऽरत्निशब्दार्थः ॥ ३ ॥ किञ्च परिभ्रामणादिभिरन्योऽन्यं प्रत्यरुन्धतां प्रत्यावृतवन्ता तत्र हस्तादिषु गृहीवा परितश्चालनं परिभ्रामणम् नोदनं विक्षेपः बाहुभ्यां निष्पीडनं परिरम्भः अधः क्षेपोऽवपातनम् उत्सृज्य पुरतो गमनमुत्सर्पणं पृष्ठतो गमनमपसर्पणम् ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ चिन्तितस्य स्वमन आलोचितस्य सङ्कल्पः सङ्क्लृप्तिः सिद्धिरिति यावत् यस्य स चिन्तितं चाणूरमरणं कल्पयति समर्थयतीति स तथा वा हेत्यवधारणे ॥ १ ॥ हस्तौ हस्ताभ्यामास्फोट्योरू ऊरूभ्यां चास्फोट्य पुनः पुनर्हस्तादि द्वयान्वयि । विसृज्य त्यक्त्वा भूयः सङ्गम्य परस्परं परिक्रम्य हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यां पादयोर्बद्ध्वा प्रसह्य बलाद्विजिगीषया जेतुमिच्छयाऽन्योन्यं विचकर्षतुः ॥ २ ॥ अरत्नी । अरत्निः कफणौ हस्ते सप्रकोष्ठतताङ्गुलाविति विश्वः । विहाय कनिष्ठाङ्गुलिं कृतमुष्टिः करो रत्निरित्यर्थः । जानुभ्यां जानुनी च शीर्ष्णा च शिर उरसोरश्चान्योन्यमभिजघ्नतुः ॥ ३ ॥ परिभ्रामण चक्रवद्विक्षेपो दूरत उत्प्लवनं परिरम्भ आश्लेषोऽवपातनमधः पातनमुत्सर्पणं पुरतोऽतर्कितः पातोऽपसर्पैस्तथैव पश्चाद्गमनैर्मल्लयुद्धरीतिरियम् ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एकचत्वारिंशत्तमे बधः कंसस्य रूप्यते । तदीयैः सह तस्माद्धि पित्रो रोधश्च दीनयोः ॥
बलक्षयाय लीलापि वाक्यान्यासक्तिबोधने । भक्तार्थं मारणं चास्य कंसस्यापि तथैव च ॥
प्रतिबन्धनिवृत्त्यर्थमेतावद्भगवत्कृतम् । निरुद्धास्तेऽपि मुक्ता हि पूर्वस्माच्च विशिष्टता ॥
बोधिता ज्ञानकथनात् आसक्तिश्च स्थितैव हि । त्रिविधाः सर्व एवैते गुणातीतोऽपि सात्त्विकः ॥
अथावतिः पुनर्वाच्यास्तत्रैके मोचिताः स्वतः । निरुद्धाः सफलाः प्रोक्ताः पितरौ पूर्वतोऽधिकौ ॥

पूर्वाध्याये युद्धार्थं चाणूराकरणमुक्तम् आहूतो न निवर्तेतेति शास्त्रात् हीनबलेनापि युद्धार्थं प्रवृत्तावित्याह । एवमिति । चर्चितो विचारितः सङ्कल्पो येन यस्य वा चर्चा हि विचारात्मिका अविचार्य चेत् दुर्बलेन सह युद्धं कुर्यात्तदा दोषो भवेत् किं च भगवान् तद्धृदयमपि जानाति युद्धाभावे न निवर्त्तत इति शङ्का तु नास्तीत्याह । मधुसूदन इति । यो मधुमपि हन्ति तत्रायं को वराक इति अत एवाससाद निकटे सम्बद्धो जातः अथेति प्रथमं चाणूरस्य यश्चाणूरः स्वस्मिन् योजितः भिन्नपक्षे मारितो दूरीकृतो वा अथ तदनन्तरं चाणूरमाससाद मुष्टिकं तु रोहिणीसुत इति मुष्टिको ह्यप्रयोजकः बिभेति च स्वतः स्वयं च नोक्तवान् तथापि चाणूरे संलग्ने तद्वाक्यात् स्वयमपि सलग्नः तदनुचितमिति रोहिणीसुत इत्युक्तम् ॥ १ ॥ मल्लयुद्धप्रकारेण प्रवृत्तावितिं तदाह चतुर्भिः—

बलं शिक्षा च माया च प्रसादश्च गुरोस्तथा । चत्वारोऽपि निराकार्यास्ततः श्लोकचतुष्टयम् ॥

हस्ताभ्यामिति । हस्ताग्रे हस्ताग्रं धृत्वा पादाग्रे च पादाग्रं विचकर्षतुः प्रथमं समत्वायाह । अन्योऽन्यं प्रसह्य विजिगीषया आकर्षणं कृतवन्तौ येनैवाकृष्टोपरः आकृष्टो भवति स पराजितो भवति इति अङ्गुलिनां बन्धनं परस्परमुभयोः अत्रैव जये

महावलत्वम् ॥ २ ॥ ततः साक्षात्सर्वाङ्गेषु संयोगेन युद्धमाह । अरत्नी द्वे इति । हस्तमध्ये उभयत्रापि हस्तसम्बन्धः अरत्निवाच्यो भवति तथा जानुद्वयमपि अधोभागसहितजानुद्वयेन संवेष्टितं भवति क्रमेणैतच्चतुष्टयं बोद्धव्यं शिरः शीर्ष्णा उरसा उरः एवं तौ अन्योन्यमाभिमुख्येन जघ्नतुः ॥ ३ ॥ बलशिक्षे निरूपिते मायया शास्त्रीयप्रकारमाह । परिभ्रामणेति । परितो भ्रामणमेकस्यैकेन ततो दूरे विक्षेपः ततः पुनरागतयोः परिरम्भः गाढालिङ्गनं ततो मिलितेनैव भूमाववपातनम् एवं चत्वारः एकक्रमेण ततो विश्लिष्टयोः उत्सर्पणमूर्ध्वं प्रक्षेपः अपसर्पणं हत्वा पश्चात्सर्पणमधः सर्पणं वा पतितो मल्लः ऊर्ध्वं सर्पणेनापि उपरितनं जयति उपरितनो वा अधस्तनम् एवमन्योऽन्य प्रत्यरुन्धताम् अन्याऽन्यस्य बलं यथा प्रतिरुद्धं भवति ॥ ४ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । एवं चर्चितो निश्चितः संकल्पो यस्य स मधुसूदनो भगवान् चाणूरम् आससाद प्राप रोहिणीसुतो रामो मुष्टिकं प्राप ॥१॥ हस्ताभ्यां हस्तयोः पाण्योर्बद्ध्वा पद्भ्यां पादाभ्यां पादयोर्बद्ध्वाऽन्योन्यं मिथः प्रसह्य बलेन जेतुमिच्छया विचकर्षतुः कृष्णचाणूरौ ॥ २ ॥ "बद्ध मुष्टिकरो रत्निः सोऽरत्निः प्रसृतांगुलिः" इत्यमरोक्तेः । अरत्निभ्यां प्रसृतकनिष्ठिकाभ्यां द्वे अरत्नी जानुभ्यां जानुनी शीर्ष्णा शिरसा शिरः उरसा उरोऽन्योन्यं तौ द्वौ जिहिंसतुः ॥ ३ ॥ हस्ते गृहीत्वा परितश्चालनं परिभ्रामणं विक्षेप उच्चालनं परिरंभो बाहुपीडनम् आश्लेषो वाऽवपातनं न्युब्जीकरणम् उत्सृत्य पुरतः प्रसर्पणम् अपसर्पणं पृष्ठतो गमनं तैरन्योन्यं युयुधतुः ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

चतुश्चत्वारिंशके तु कृष्णेनाक्लिष्टकारिणा । कुपितेन वधस्तस्य कंसस्य विनिरूप्यते ॥ १ ॥

'एवं चाणूरेणोक्तो भगवान् किं कृतवान्' इत्यपेक्षायामाह—एवमिति । एवमुक्ते चर्चितः निश्चयेन कृतश्चाणूरादिवधविषयकः सङ्कल्पो येन स भगवान् कृष्णः अथानन्तरमेव चाणूरमाससाद योद्धुमाजगाम । ततश्च स्वभयशङ्का तु नास्त्येव । तत्र हेतुं सूचयन्नाह—मधुसूदन इति । तथा मुष्टिकं रोहिणीसुतो राम आससाद ॥ १ ॥ तदा कृष्णचाणूरौ राममुष्टिकौ च हस्तयोर्हस्ताभ्यां पादयोः पादाभ्यां बद्ध्वा जेतुमिच्छया प्रसह्य बलादन्योन्यं विचकर्षतुराकृष्टवन्तौ ॥ २ ॥ कनिष्ठाङ्गुलिव्यतिरेकेण कृतमुष्टिहस्तोऽरत्निः । अरत्निभ्यां द्वे अरत्नी, जानुभ्यां जानुनी, शिरसा शिरः, उरसा उरश्चाभिजघ्नतुः ॥ ३ ॥ परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनम् , विक्षेपो नोदनम् , परिरम्भो बाहुभ्यां निष्पीडनम् , अवपातनं अधःक्षेपः, उत्सर्पणमुत्सृज्य पुरतो गमनम् , अपसर्पणं पृष्ठतो गमनम् , एतैस्तौ कृष्णचाणूरौ राममुष्टिकौ चान्योन्यं प्रत्यरुन्धतां प्रत्यावृतवन्तौ ॥ ४ ॥

अन्वितार्थप्रकाशिका

चतुश्चत्वारिंशके तु मल्लकंसादिमर्दनम् । पित्रोश्च दर्शनं तत्र श्लोकाः प्रोक्ता महीषवः (५१) ॥

उवाचेति द्वयं (२) सार्द्धाः पञ्चबाणा (५५॥) अनुष्टुभः ॥ ४४ ॥

एवमिति ॥ एवमुक्ते चर्चितः विचारेण निश्चितश्चाणूरादिवधविषयकः संकल्पो येन "चर्चा संख्या विचारणा" इत्यमरः । भगवान् मधुसूदनः अथानन्तरमेव चाणूरमाससाद योद्धुमाजगाम । तथा मुष्टिकं रोहिणीसुत आससाद ॥ १ ॥ हस्ताभ्यामिति ॥ तदा कृष्णचाणूरौ राममुष्टिकौ च हस्तयोर्हस्ताभ्यां पादयोः पादाभ्यां बद्ध्वा विजिगीषया विजेतुमिच्छया प्रसह्य बलादन्योन्यं विचकर्षतुराकृष्टवन्तौ । गुण आर्षः ॥ २ ॥ अरत्नी इति ॥ अरत्निभ्यां कूर्पराभ्यां द्वे अरत्नी कूर्परौ जानुभ्यां जानुनी शीर्ष्णा शिरसा आर्षः शीर्षन् शिरः उरसा उरश्चाभिजघ्नतुः । "अरत्निः कफणौ हस्ते" इत्यादि विश्वः । निष्कनिष्ठमुष्टिहस्तपरत्वेनारत्निशब्दं परे व्याचक्षते । तदपि कलानिधौ भगवति नासमञ्जसम् ॥ ३ ॥ परिभ्रामणेति ॥ परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनम् । मितो ह्रस्वाभाव आर्षः । विक्षेपो नोदनं दूरे प्रक्षेपो वा । परिरम्भो बाहुभ्यां निष्पीडनम् अवपातनम् अधःक्षेपः उत्सर्पणं पुरतोऽपि कर्षणम् अपसर्पणं पश्चात्सारणम् एतैस्तौ कृष्णचाणूरौ राममुष्टिकौ चान्योन्यं प्रत्यरुन्धतां स्थगितोद्यमतां चक्रतुः । लुङि श्नमार्षः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ चतुश्चत्वारिंशेऽध्याये समल्लकंसादिमर्दनं कंसवनिता सांत्वनं च स्वपित्रोर्बंधमोचनं च निरूप्यते चर्चितः कृतः संकल्पो येन आससाद प्राप ॥१॥ प्रसह्यबलेन ॥२॥ बाहुमध्यात्कनिष्ठांगुली व्यतिरिक्तस्यांगुली समूहस्य कृतमुष्टिर्हस्तोऽरत्निः ॥३॥ परिभ्रामणं करादिषु गृहीत्वा सर्वतश्चालनं विक्षेपो दूरे क्षेपणं परिरंभो बाहुभ्यां निष्पीडनं अवपातनं अधःपातनं च तैः उत्सर्प्पणं पुरतोगमनं अपसर्पणं पृष्ठतोगमनं च एतैर्मल्लचेष्टनैः अन्योन्यं प्रत्यरुंधतां युद्धं च क्रतुः रुधेर्लुङि सति श्रन् आर्षः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मर्दनं मल्लकंसादेराश्वासः कंसयोषिताम् । चतुश्चत्वारिंश उक्तं ताभ्यां पित्रोर्हि दर्शनम् ॥ १ ॥

एवमिति । एवं चाणूरोक्तप्रकारेण, चर्चितो निश्चितः कृतो वा संकल्पो येन सः, मधुसूदनः भगवान् कृष्णः, चाणूरं आससाद । अथ रोहिणीसुतः रामः, मुष्टिकं आससाद ॥१॥ हस्ताभ्यामिति ॥ तदा तौ कृष्णचाणूरौ राममुष्टिकाविति शेषः । हस्तयोः हस्ताभ्यां, एव; पादयोः पद्भ्यां च बद्ध्वा । अन्योन्यं परस्परं, विजिगीषया विजेतुमिच्छया, प्रसह्य विचकर्षतुः विकृष्टवन्तौ ॥ २ ॥ अरत्नी इति ॥ तौ कनिष्ठिकां विना कृतमुष्टिर्हस्तोऽरत्निः । अरत्निभ्यां द्वे अरत्नी अन्योन्यं, अभिजघ्नतुः । जानुभ्यां च जानुनी एव, अभिजघ्नतुः । शीर्ष्णा शिरः, उरसा उरश्च, अन्योन्यं अभिजघ्नतुः ॥ ३ ॥ परीति ॥ परिभ्रामणं च विक्षेपश्च परिरम्भश्च अवपातनं च तैः, उत्सर्पणानि च अपसर्पणानि च तैश्च, अन्योन्यं, प्रत्यरुन्धताम् । तत्र परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनं, विक्षेपो नोदनं, परिरम्भो बाहुभ्यां निष्पीडनं, अवपातनमधः प्रक्षेपः, उत्सर्पणमुत्सृज्य पुरतो गमनं, अपसर्पणं पृष्ठतो गमनं, एतैः पञ्चभिर्योगैः प्रत्यावृतवन्तावित्यर्थः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवमिति : १०.४४.१.

दुर्मार्गाचरण-प्रगल्भमतयो ये तेषु पापिष्वपि वर्तिष्ये न निजेच्छया किमुत मत्प्राणप्रिये सज्जने ।
भक्ताधीनमना जनानिति निजान् सम्बोधयन्माधवः तत्सङ्कल्पितकल्पमेवमुररीचक्रे च चक्रे तथा ॥ १ ॥

हस्ताभ्यामिति : १०.४४.२.

तथा तथा तौ निजकौशलं तदा प्रदर्शयन्तौ रणरङ्गसीमनि ।
यथाऽतिखेदाकुलितं मनो भवेत् खलस्य साधोश्च सुखानुभूतिमत्॥ २ ॥

कृष्णप्रिया

चाणूर, मुष्टिक आदि पहलवानों का तथा कंस का उद्धार

श्रीशुकदेवजी कहते हैं—परीक्षित् भगवान् श्रीकृष्ण ने चाणूर आदि के वध का निश्चित संकल्प कर लिया । जोड़ बद दिये जाने पर श्रीकृष्ण चाणूर से और बलराम जी मुष्टिक से जा भिड़े ॥१॥ वे लोग एक दूसरे को जीत लेने की इच्छा से हाथ से हाथ बाँधकर और पैरों में पैर अड़ाकर बलपूर्वक अपनी-अपनी ओर खींचने लगे ॥२॥ वे पंजों से पंजे घुटनों से घुटने माथे से माथा और छाती से छाती भिड़ाकर एक दूसरे पर चोट करने लगे ॥ ३ ॥ इस प्रकार दाँव-पेच करते-करते अपने-अपने जोड़ीदार को पकड़कर इधर-उधर घुमाते, दूर ढकेल देते, जोर से जकड़ लेते, लिपट जाते, उठाकर पटक देते, छूटकर निकल भागते और कभी छोड़कर पीछे हट जाते थे । इस प्रकार एक दूसरे को रोकते, प्रहार करते और अपने जोड़ीदार को पछाड़ देने की चेष्टा करते । कभी कोई नीचे गिर जाता, तो दूसरा उसे घुटनों और पैरों में दबाकर उठा लेना । हाथों से पकड़कर ऊपर ले जाता । गले में लिपट जाने पर ढकेल देता और आवश्यकता होने पर हाथ-पाँव इकट्ठे करके गाँठ बाँध देता ॥ ४–५ ॥

उत्थापनैरुन्नय[1]नैश्चालनैः स्थापनैरपि । परस्परं जिगीषन्तावप[2]चक्रतुरात्मनः ॥ ५ ॥
तद्[3]बलाबलवद्युद्धं समेताः सर्वयोषितः । ऊचुः परस्परं राजन्[4] तानुकम्पा[5] वरूथशः ॥ ६ ॥
महानयं बताधर्म एषां राजसभासदाम् । [6]ये बलाबलवद्युद्धं राज्ञोऽन्विच्छन्ति पश्यतः ॥ ७ ॥
क्व वज्रसारसर्वाङ्गौ मल्लौ शैलेन्द्रसन्निभौ[7] । क्व चातिसुकुमाराङ्गौ किशोरौ नाप्तयौवनौ ॥ ८ ॥

कर्दमक्षमा

अन्वयः—जिगीषन्तौ, उत्थापनैः, उन्नयनैः, चालनैः, स्थापनैः, अपि, परस्परम्, आत्मनः, अपचक्रतुः ॥ ५ ॥ राजन्!, वरुथशः, समेताः, सानुकम्पाः, सर्वयोषितः, तद्बलाबलवत्, युद्धम्, परस्परम्, ऊचुः ॥६॥ बत, ये, राज्ञः, पश्यतः, बलाबलवद्, युद्धम्, अन्विच्छन्ति, एषाम्, राजसभासदाम्, अयम्, महान्, अधर्मः ॥ ७ ॥ वज्रसारसर्वाङ्गौ, शैलेन्द्रसन्निभौ, मल्लौ, क्व, अतिसुकुमाराङ्गौ, नाप्तयौवनौ, किशोरौ, च, क्व ॥ ८ ॥

---

[1] उन्नमने–विज. । [2] अन्योन्यमभिचक्रतुः- विज. । [3] तद्बालबलवद्–विज. ; ये बालबलवद्–प्रा. पा. । [4] प्रेक्ष्य–विज. । [5] क्रोशाः–प्रा. पा. । [6] ये बालबलवद्–वीर. विज. ; बलयोर्यु–प्रा. पा. । [7] शैलेन्द्रसंमितो–प्रा. पा. ।

श्रीधरस्वामीविरचिता भावार्थदीपिका

उत्थापनं जानुनी पादौ च पिंडीकृत्य पतितस्योच्चाटनम्। उन्नयनं हस्ताभ्यामुद्धृत्य नयनम्। चालनं कंठादिलग्नस्य निःसारणम्। स्थापनं पाणिपादादिपिंडीकरणम्। एवं परस्परमात्मनो देहस्यापचक्रतुरपकारं कृतवन्तौ ॥ ५ ॥ तद्युद्धं बलाबलवदेकतो बलमन्यतोऽबलम् तद्युक्तं बलाबलवत् विषममित्यूचुरित्यर्थः। वरूथशः समेताः संघशो मिलिताः। यद्वा तद्बलाबलवतोर्युद्धं दृष्ट्वा महानयमधर्म इत्यूचुरित्यन्वयः। अत्र दृष्ट्वेत्यध्याहार्यम् ॥ ६ ॥ तदेव दर्शयति। महानिति। बालयोर्बलवतोश्च युद्धं राजा चेत्पश्येत्स्वयं वारणीयः। एते तु राज्ञः पश्यतः स्वयमन्विच्छंत्यनुमन्यंत इति बतायं महानधर्म इत्यर्थः ॥ ७ ॥ बलाबलवद्युद्धतां प्रपंचयति पंचभिः। क्वेति। वज्रसाराणि वज्रवत्कठिनानि सर्वाण्यंगानि ययोस्तौ ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उच्चाटनमुच्चैःकरणम्। एवमुक्तरीत्या। "मल्लयुद्धं नियुद्धज्ञा विंशभेदं प्रचक्षते। द्वात्रिंशद्भेदमपरे चत्वारिंशद्विधं परे ॥" इति संग्रामविजयवचनात्। सर्वनियुद्धविधिदर्शनार्थं भगवतैवं क्रीडितम्। तत्तद्विधायासाभावादयमेवार्थ उपर्यपि। "तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ। युयुधाते" इत्यादिना सूच्यते। आत्मनोपचक्रतुरिति भगवतस्तदभावेऽपि द्रष्टृलोकाभिप्रायानृत्यात्तथोक्तम् ॥ ५ ॥ इत्यर्थ इति—कृष्णचाणूरयोः साम्याभावाद्बलाबलवतोर्विषममेव युद्धमिति भावः। वरूथशः संघशः "वरूथो रथगुप्तौ संघे क्लीबं चर्मवेश्मनोः" इति कोशात्। विषमपदाध्याहारस्यागतिकगतिकत्वादाह—यद्वेति। अग्रिमश्लोकपादेनान्वयोऽत्रेति ॥ सानुकंपा इति—स्नेहस्य स्वभाव एवायं यत्स्वविषयस्य बलाधिक्यं न प्रत्याययेदिति। वरूथशः स्वस्ववर्गभेदेन ॥ ६ ॥ तदेव अधर्मत्वम्। स्वयं युद्धकर्तृभिरिति। एते युद्धकर्तारः अनुमन्यन्ते अनुकूलं मन्वते। राजसभायां सीदंत्युपविशन्तीति राजसभासदस्तेषां तथा। इत्यर्थ इति—सत्यप्यधर्मवारके पुनस्तद्वारणे महानेवाधर्म उभयोरिति भावः ॥ तासामुक्तिं दशभिराह—बालाभ्यां सह बलवतोर्युद्धं राजा चेत्पश्येत्सोऽपि वारणीयः। एते तु राज्ञः पश्यतोऽनु पश्चात्स्वयमपि पश्यन्ति, इच्छतस्तस्यानु स्वयमपीच्छन्तीति शत्रंतस्य दृशेराक्षेपात्तिङन्तोऽपि दृशिर्लभ्यते। तथैव तिङन्तस्येच्छतेराक्षेपात्सोऽपि शत्रन्तो लभ्यते ॥ ७ ॥ "सारो बले स्थिरांशे च पुमान्न्याये वरेऽन्यवत्" इति यादवः शैलेन्द्रो मेरुस्तद्वद्दृढांगौ। नाप्तयौवनावप्राप्तयुवधर्मौ। बलवत्त्वाबलवत्त्वे तर्जनीभिर्दर्शयन्ति—क्वेति। क्व अत्यन्तबाधके धर्मे, तथा क्वात्यन्त बाध्यधर्मे वर्तत इत्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आत्मनोऽपचक्रतुरिति श्रीभगवतो वस्तुतस्तदभावेऽपि चाणूराभिप्रायानुसारतः ॥ ५ ॥ तद्युद्धं बलाबलवदूचुरित्यन्वयः। सानुकम्पा इति तेषां शुद्धप्रेम्णः प्रशंसा वरूथशः स्वस्ववर्गभेदेन ॥ ६ ॥ किमूचुस्तदाह। महानिति दशभिः। राजसभ्यत्वेन धर्मज्ञत्वादियोग्यतोक्ता। राज्ञि पश्यतीत्यर्थः। वत खेदे ॥ ७ ॥ क्व अत्यन्तवाधकेऽधर्मे तथा क्व अत्यन्तवाध्ये धर्मे वर्त्तते इत्यर्थः। सम्मिलिताविति वा पाठः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आत्मनोऽपचक्रतुरिति बहुलरिश्रमविस्तारणात्। श्रीभगवतो वस्तुतस्तदभावेऽपि तदुक्तिश्चाणूराभिप्रायानुसारतः, श्रीवादरायणेः प्रेमशोकाद्वा; यद्वा, आत्मत्वेन कलितस्य चाणूरदेहस्य श्रीभगवता सह युद्धेन स्वयं तेनापि स्वदेहस्यापकारः कृत एव ॥ ५ ॥ तद्दृष्ट्वेति शेषः। तत्प्रति वा श्रीमाथुरत्वेन तदज्ञानामपि तथोक्तौ हेतुः; सानुकम्पा इति सहजस्नेहविशेषार्द्रचित्तत्वेन तत्त्वाननुसन्धानादित्यर्थः। राजन्निति प्रेमभरेण राजता भवता तद्विज्ञायत एवेति भावः। वरूथशः स्व-स्ववर्गभेदेन, इति प्रेम्णा सर्व्वासामेवैकमन्येनोक्तेर्यथार्थता मनोहरता चाभिप्रेता ॥ ६ ॥ किमूचुः? तदाह—महानिति दशभिः। वत खेदे। राज्ञः कंसस्य ये सभासदस्तेषामित्यन्यत्रत्या व्यवच्छिन्नाः, किंवा राजसभ्यत्वेन धर्म्मज्ञत्वादियोग्यतोक्ता ॥ ७ ॥ शैलेन्द्रो मेरुर्हिमालयो विन्ध्यो वा; तत्तुल्यावित्याकारबृहत्त्वं सुरूपत्वादिकञ्च सूचितम्। 'क्व'—द्वयं विरोधे; शैलेन्द्रत्वेन विरुद्धतादृशकिशोरत्वम्। ननु प्रायः पञ्चदशवर्षपूर्त्त्यां कथं किशोरौ? तत्राहुः—नाप्तयौवनौ तथाप्यप्राप्ततारुण्यत्वात् किशोरावेवेत्यर्थः। एवं वयः सन्ध्युक्त्या श्रीमदाकारस्यानतिबृहत्त्वं परमसौन्दर्यं चोक्तम्; तथा च श्रीविष्णुपुराणे (५।२०।४८) —'क्व यौवनोन्मुखीभूत सुकुमारतनुर्हरिः। क्व वज्रकठिनाभोगिशरीरोऽयं महासुरः ॥' इति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उत्थापनं पादौ जानुनी च पिण्डीकृत्य पतितस्योत्थापनम् उन्नयनं हस्ताभ्यामुद्धृत्य नयनं चालनं कण्ठादिलग्नस्य निःसारणं स्थापनं पाणिपादादेः पिण्डीकरणम् एभिः परस्परमात्मनो देहस्यापचक्रतुरपकृतवन्तौ ॥ ५ ॥ तदा हे राजन्! सर्वाः योषितः सङ्घशः समेत्य सहिताः सानुकम्पा रामकृष्णविषकानुकम्पायुक्ता अत एव परस्परं बलाबलवद्युद्धमूचुः एकतो बलमन्य-

तोऽबलं तद्युक्तं विषममित्यूचुरित्यर्थः ॥ ६ ॥ तदेव दर्शयितुं तासामुक्तिमाह । महानिति दशभिः । एषां राजसभासदां राजसमाधिकृतानामयं महानधर्मः बतेति खेदे कोऽसावधर्म इत्यत्र विशेषणमुखेनाहुः । य इति । ये राजसभासदः बलयोश्चाबलवतोश्च युद्धमन्विच्छन्ति राजा चेत्पश्येत्स्वयं वारणीयः एते तु राज्ञः पश्यतः स्वयमप्यन्विच्छन्त्यनुमन्यन्त इत्ययं महानधर्म इत्यर्थः ॥ ७ ॥ बलाबलवद्युद्धमेव दर्शयति पञ्चभिः । क्वेति । वज्रवत्कठिनानि सर्वाङ्गानि ययोस्तौ शैलेन्द्रतुल्यौ मल्लौ क्व अतिसुकुमाराण्यङ्गानि ययोरनाप्तमप्राप्तं यौवनं याभ्यां तावेतौ किशोरौ क्व ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उन्नमनमुत्तानीकरणम् अभिचक्रतुः मुख्यनियुद्धं कृतवन्तौ

मल्लयुद्धं नियुद्धज्ञा विंशद्भेदं प्रचक्षते । द्वात्रिंशद्भेदमपरे चत्वारिंशद्विधं तथेति ॥

सङ्ग्रामविजयवचनात् सर्वनियुद्धविधिदर्शनार्थं भगवतैवं क्रीडितं तत्तद्विधायासाभावादयमेवार्थ उपरि तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ युयुधात इत्यादिना सूच्यते च ॥५॥ बालबलवतोः कृष्णचाणूरयोः युद्धं तत्प्रेक्ष्य वरूथशः सङ्घशः ॥ ६ ॥ राजसभायां सीदन्त्युपविशन्तीति राजसभासदः तेषां कोऽयमधर्म इत्याहुः । य इति । बालस्य बलवता सह युद्धमन्विच्छन्ति अनुकूलं मन्वते राज्ञः पश्यतः सत इत्यनेन उभयेषामप्यधर्मः प्राप्त इति ज्ञायते ॥ ७ ॥ कथमधर्म आसीदिति तत्राहुः । क्वेति । वज्रवत्साराणि बलाढ्यानि सर्वाणि अङ्गानि करचरणादीनि ययोस्तौ तथा—सारो बले स्थिरांशेऽर्थे पुमान्न्याय्ये वरे ऽर्थवद् । इति च ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आत्मनोऽपचक्रतुरिति भीभगवतस्तदभावेऽपि चाणूराभिप्रायानुसारात् ॥ ५—९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उत्थापनं पादौ जानुनी च पिण्डीकृत्य पतितस्योच्चाटनं उन्नयनं हस्ताभ्यामुद्धृत्य नयनं चालनं कण्ठादिलग्नस्य निःसारणं स्थापनं पाणिपादादिपिण्डीकरणम् एवं परस्परमात्मनो देहस्यापचक्रतुः भगवतस्तदभावेऽपि द्रष्टृलोकाभिप्रायमनुसृत्य तथोक्तम् ॥ ५ ॥ तद्युद्धं बलाबलवत् ऊचुरित्यन्वयः एकतो बलम् अन्यतश्चाबलं तद्वत् तद्युक्तमतो विषममित्यर्थः । तत्र हेतुः सानुकम्पा इति । स्नेहस्य स्वभाव एवायं यत् स्वविषयस्य बलाधिक्यं न प्रत्याययेदिति ॥ ६ ॥ तासामुक्तिमाह । महानिति दशभिः । बालाभ्यां सह बलवतोर्युद्धं राजा चेत् पश्येत् सोऽपि वारणीयः एते तु राज्ञः पश्यतोऽनुपश्चात् स्वयमपि पश्यन्ति इच्छतस्तस्यानु स्वयमपीच्छन्तीति शत्रन्तस्य दृशेराक्षेपात् तिङन्तोऽपि दृशिर्लभ्यते तथैव तिङन्तस्येच्छतेराक्षेपात् सोऽपि शत्रन्तो लभ्यते ॥ ७ ॥ बलवत्त्वाबलवत्त्वे तर्जनीभिर्दर्शयन्ति । क्वेति ॥ ८ ॥

गूढार्थदीपिनी

उत्थापनं पतितस्य । चालनम् इतस्ततः । स्थापनं पिण्डीकृत्य भूमौ । आत्मनो देहस्य अपचक्रतुः अपकारं चक्रतुः ॥५-६॥ बलवतोऽबलवतोश्च युद्धम् अनुमन्यन्ते ये तेषामयं महानधर्मः । बत खेदे ॥ ७ ॥ वज्रसाराणि वज्रवत्कठिनानि अङ्गानि ययोस्तौ सन्निभौ सदृशौ पर्वताकारौ ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किंच जिगीषन्तौ जेतुमिच्छन्तौ उत्थापनादिभिरात्मनो देहस्य परमपचक्रतुरपकारं कृतवन्तौ तत्रोत्थापनं पादौ जानुनी च पिण्डीकृत्य पतितस्योच्चाटनम् उन्नयनं हस्ताभ्यामुद्धृत्य नयनम् चालनं कण्ठादिलग्नस्य निःसारणं स्थापनं पाणिपादादिपिण्डीकरणम् ॥ ५ ॥ ततस्तस्मिन्समये सानुकम्पाः रामकृष्णविषयकदयायुक्ताः सर्वयोषितः बलाबलवतोः कृष्णचाणूरयोः राममुष्टिकयोर्युद्धं दृष्ट्वा परस्परमूचुः रामकृष्णावबलवन्तौ चाणूरमुष्टिकौ बलवन्तावतस्तद्युद्धमयुक्तमिति स्वबुद्ध्यनुसारेण ज्ञात्वोचुरित्यर्थः ।६। तासामुक्तिं दर्शयति । महानित्यादिना । राज्ञः कंसस्य पश्यतो निरीक्षतः अर्थात्तदाज्ञयैव बलाबलवद्युद्धमन्विच्छन्ति मन्वते ये तेषां सराजकानां महान् सद्योनाशहेतुरयमधर्मः बतेति खेदे ॥ ७ ॥ वज्रवत्साराणि कठिनानि सर्वाण्यङ्गानि ययोस्तौ क्व अतिसुकुमाराणि अतिकोमलान्यङ्गानि ययोस्तौ च क्व ॥ ८–९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उत्थापनैरुन्नमनैरुत्तानीकरणैश्चालनैः पुनः स्थापनैः परस्परं जिगीषन्तावभिचक्रतुः । मल्लयुद्धं नियुद्धज्ञा विंशद्भेदं प्रचक्षते । द्वात्रिंशद्भेदमपरे चत्वारिंशद्विधं तथेति सङ्ग्रामविजयवचनात्तद्भेदोऽध्यवसेयः ॥ ५ ॥ बालस्य कृष्णस्य बलवतश्चाणूरस्येत्येतयोर्युद्धं समवेता उत्सवावलोकनमिलिता योषितः सानुकम्पाः सघृणा वरूथशः सङ्घशः परस्परमूचुः ॥ ६ ॥ राज्ञः पश्यतः

सतः। अनेन स त्वधर्मिष्ठ इत्यारेभ इति ध्वनयति। ये बालबलवद्युद्धमन्विच्छन्ति येषां तेषां राजसभासदामयं महानधर्मो बत खेदे ॥ ७ ॥ अबलास्तद्बलवत्तामिवैतद्बलवत्तां च विशदयति ॥ क्वेति। वज्रवत्साराणि स्थिरांशोपेतानि सर्वाण्यङ्गानि ययोस्तौ शैलेन्द्रसन्निभौ मल्लौ क्व। अतिसुकुमाराङ्गौ किशोरौ तथाऽनाप्तयौवनौ। नसमासो वा। नाप्तयौवनाविति पदे वेति ज्ञेयम् ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः प्रसादेनापि प्राप्तैः प्रकारैर्युद्धमाह। उत्थापनैरिति। उपविष्टं स्थिरं प्रतिज्ञाय उत्थापनं करोति स जयति यस्तूर्ध्वं तिष्ठति तं य उन्नमयति सोऽपि जयति तथा यः स्थिरो भवति तं च यश्चालयति प्रतिज्ञया सोऽपि तथा यश्चलतीतस्ततस्तं यः स्थिरीकरोति सोऽपि एवमेतेऽपि चत्वारः प्रकाराः तैः जिवीषन्तौ मल्लौ आत्मनः अपचक्रतुः देवस्यापकारं कृतवन्तौ अत्र सङ्घातः प्रत्यक्षः स्थूलः कार्पास इव चाणूरादेः सूक्ष्मोऽतिनिष्ठुरः वज्रस्येव भगवतः ॥ ५ ॥ एवं फलतः भगवज्जयेऽपि प्रतीत्या विपरीत इति ये पूर्वं स्वासक्ताः कृताः तत्रापि स्त्रियो मुग्धाः तास्त्वसहमानाः स्वहृदयस्थं भावं प्रकाशितवत्य इत्याह। तदिति एकादशभिः। तत्र सप्तभिर्दृष्टवर्णनं भगवच्चरित्रत्वाय चतुर्भिः स्वनिन्दार्थं गोपिकास्तोत्रमिति तत्र प्रथमं युद्धं दृष्ट्वा खिन्नानामाक्रोशार्थं प्रवृत्तिमाह तद्युद्धं बलाबलवत् अतः परस्परं योषितः समेताः सानुकम्पाः स्वस्वदेशग्रामभेदेन वरूथशः समेताः वक्ष्यमाणमूचुरिति संबन्धः तत्प्रसिद्धं वा बलाबलवद्युद्धमेवोचुः एतद्बलाबलयुक्तमिति ततस्तस्य दोषानप्यग्रे ऊचुरिति केचित्तद्युद्धमालक्ष्य वा समेताः बलाबलवतोर्युद्धं बलं चाबलं च मतुबुभयत्र सम्बध्यते तयोः बलाबलयुक्तं यथा भवति तथा वा युद्धं सर्वयोषित इति। निरोध एव नियामको न सम्बन्धादिरित्युक्तं परस्परमिति। समानशीलव्यसनता सर्वेषामुक्ता राजन्निति स्नेहात्सम्बोधनमवधानाय स्त्रीणां वचनमिति कदाचिदुपेक्षां कुर्यादिति स्निग्धे स्नेहस्यायं गुणः यत्समर्थेऽप्यसमर्थबुद्धिरिति समूहबाहुल्ये हि सम्यक् श्रवणं भवतीति दशविधा बाललीलया सगुणा नवविधा एकविधा निर्गुणा इति एवं दशप्रकारसमूहाः ॥ ६ ॥ तत्रैकाः न्यायाभिनिविष्टाः अन्यायमसहमाना आहुः। महानयमिति। बतेति खेदे कथमेवमकस्मात् अनर्थः प्रवृत्त इति अयं महानेवाधर्मः एषां राजसभासदां भविष्यति यद्यपि राजसम्बन्ध एवाधर्मः तत्रापि सभासम्बन्धः तत्राप्यधिकारः सर्वापेक्षयापि अयं महानेवाधर्मः तमेवाह निमित्त वा ये बालबलवद्युद्धमिति। एको बालः अपरो बलवानिति तयोर्युद्धं शास्त्रविरुद्धमिति तत्रापि राज्ञः पश्यतः राजा हि धर्ममूर्तिः तस्य दर्शने सुतरामधिकृतैरन्यायो न कर्त्तव्य इति अतः राज्ञः पश्यतोऽपि सतः अन्विच्छन्तीति। अनेन राजाप्येवं ज्ञास्यति एते सर्वत्रैवंभूता दुष्टा इति ततो दृष्टस्यापकारोऽपि भविष्यतीति तासामाशयः ॥ ७ ॥ ननु भगवानपि सबलो बलिष्ठः अतो नाधर्मो भविष्यतीति चेत्तत्राहुः। क्व वज्रसारसर्वाङ्गाविति। नहि बाधितमर्थं वेदोऽपि बोधयति भगवतोऽङ्गानि कोमलानीत्यनुभवसिद्धं मल्लानामप्यङ्गान्यतिकठिनानि इत्यपि लोकप्रसिद्धिः किञ्च तावुभौ एतौ च सूक्ष्मौ यत्र कृतिस्तत्र गुणा इति। न्यायविरोधोऽत्र प्रदर्शितः तदाहुः। वज्रादपि सारभूतानि सर्वाङ्गानि ययोः सुतरां मल्लौ मल्लविद्यायां निपुणौ तत्रापि शैलेन्द्रसन्निभौ महामेरुतुल्यौ क्व एतौ बालकौ वा अतिसुकुमारौ क्व अत्यन्तसुकुमाराण्यङ्गानि ययोः वयसा तु किशोरौ लोके किशोरावपि देहवशाद्बीजादिवशाद्वा प्राप्तयौवनाविव भवतः तदपि नास्तीत्याहुः। न प्राप्तं यौवनं याभ्यमिति न समासः स्पष्टतया प्रदर्शनार्थः ॥ ८ ॥

श्रीसुबोधिनी–सार

उत्थापनं पिंडीकृत्योच्चाटनम् ऊर्ध्वीकरणमुन्नयनं कंठाधो लग्नस्य निःसारणं चालनं स्थापनमधः पतितस्य पिंडीकरणम् तैरपि परस्परं जिगीषंतौ तौ आत्मनो देहस्यापकारं कृतवंतौ ॥ ५ ॥ बलाबलवत् तद्युद्धं दृष्ट्वा समेताः संघीभूताः सर्वयोषितः स्त्रियः सानुकंपाः सदया अवरूथशः परस्परम् ऊचुः ॥ ६ ॥ राजसभास्थितानामेषां महानयमधर्मः बत खेदे राज्ञः पश्यतः सतो बालयोर्बलवतोर्युद्धं येन्विच्छंति ॥ ७ ॥ शैलेंद्रसन्निभौ पर्वतराजतुल्यौ वज्रवत्साराणि कठिनानि सर्वाण्यंगानि ययोः वज्रसाराणीवेति वा मल्लौ क्व अतिसुकुमारांगौ किशोरौ नाप्तं न प्राप्तं यौवनं याभ्यां तौ एतौ क्व ॥ ८ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

उत्थापनं पादौ जानुनी च पिण्डीकृत्योत्थानम्; उन्नयनं हस्ताभ्यामुद्धृत्य नयनम्, चालनं कण्ठादिलग्नस्य निःसारणम् स्थापनं पाणिपादादेः पिण्डीकरणम्, एभिः परस्परमात्मनो देहस्यापचक्रतुः अपकृतवन्तौ। तत्र हेतुमाह—जिगीषन्ताविति ॥ ५ ॥ राज्यस्यानर्थहेतुत्वं कंसदृष्टान्तेन सूचयन् सम्बोधयति—राजन्निति। वरूथशः सङ्घशः समेताः सानुकम्पाः कृष्णविषयकानुकम्पायुक्ताः सर्वयोषितस्तद्बलाबलवत् एकतो बलमन्यतः अबलं तद्युक्तं विषमं युद्धं पश्यन्त्यः परस्परमूचुरित्यन्वयः ॥६॥ तदुक्तिमेवाह—महानिति। एषां राजसभासदामयं महानधर्मः। 'यदि धर्मरक्षकराजसभायामेवाधर्मस्तदान्यत्र तु भविष्यत्येव स इति महान् खेद' इति द्योतयन्ति—बतेति। 'कोऽसौ अधर्म' इत्यत आह–य इति। बलाबलवद्युद्धं राजा चेत् पश्येत्तर्हि स एतैर्वारणीयः, एते तु राज्ञः पश्यतः स्वयमपि तद्दर्शनमन्विच्छन्ति अनुमन्यन्तेऽयं महानधर्मः। यद्यप्यत्र भगवत एव बलवत्त्वं, चाणूरस्य तु ततो दुर्बलत्वमेव, तथापि तत्प्रभावज्ञानाभावाद्वैपरीत्योक्तिः ॥ ७ ॥ बलाबलवद्युद्धमेव दर्शयति—क्वेति। वज्रसाराणि वज्रवत्

कठिनानि सर्वाङ्गानि करचरणादीनि ययोस्तौ शैलेन्द्रो मेरुस्तत्सन्निभौ तत्सदृशौ मल्लौ क ? क च अतिसुकुमाराण्यङ्गानि ययोस्तौ नाप्तं यौवनं याभ्यां तौ किशोरौ ? ॥ ८ ॥

अन्वितार्थप्रकाशिका

उत्थापनैरिति ॥ जिगीषन्तौ जेतुमिच्छन्तौ तौ उत्थापनं पादौ जानुनी च पिण्डीकृत्योत्थापनम् उन्नयनं हस्ताभ्यामुद्धृत्य उर्ध्वं नयनं चालनं कण्ठादिलग्नस्य विश्लेषणं स्थापनं पाणिपादादेः पिण्डीकरणम् एभिः परम्परमात्मनो देहस्यापचक्रतुः अपकृतवन्तौ ॥ ५ ॥ तदिति ॥ हे राजन् ! वरूथशः सङ्घशः समेताः सानुकम्पाः कृष्णविषयकानुकम्पायुक्ताः सर्वयोषितस्तद् बलाबलवत् एकतो बलवन्तौ अन्यतः अबलवन्तौ तद्युक्तं विषमं युद्धं पश्यन्त्यः परस्परमूचुः । यद्वा । ता इदं युद्धं बलाबलवत् विषममित्यूचुः ।६। महानिति ॥ बालयोर्बलवतोश्च युद्धं राजापि चेत्पश्येत् तदा सभासद्भिः स्वयं वारणीयः । बत खेदे । ये सभासदः राज्ञः पश्यतः सतः स्वयं बलाबलवद्युद्धं तद्दर्शनमन्विच्छन्ति अनुमन्यन्ते तत् एषां राजसभासदामयं महान् अधर्मः ॥ ७ ॥ क्वेति ॥ वज्रसाराणि वज्रतुल्यकठिनानि सर्वाङ्गानि करचरणादीनि ययोस्तौ शैलेन्द्रो मेरुस्तत्सन्निभौ तत्सदृशौ मल्लौ क्व क्व च अतिसुकुमाराण्यङ्गानि ययोस्तौ नाप्तं यौवनं याभ्यां तौ किशोरौ ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उत्थापनैः उत्थापनानिपादौजानुनी पिंडीकृत्यपतितानामुच्चाटनानि तैः उन्नयनानि पाणिभ्यामूर्द्ध्वं कृत्वानयनानितैः चालनानि कंठादि संलग्नानां विश्लेषणानि तैः स्थापनानि पादादिपिंडीकरणानि तैरपि एवं परस्परं आत्मनः शरीरस्यापचक्रतुः अनादरं कृतवन्तौ ॥ ५ ॥ तद्युद्धं एकस्मिन् बलं सामर्थ्यं अन्यस्मिन् अबलं हीनत्वं च विद्यते यस्मिन् तत् बलाबलवद्विषमतिति वरूथशोयूथशः सानुकंपाः सदयः ऊचुः ॥६॥ तदेव दर्शयति महानिति दशभिः यतः बालयोर्बलत्वतोश्च युद्धं बलाबलवद्युद्धमिति पाठे बलवांश्चाऽबलावांश्चतयोर्युद्धं पश्यतोवीक्षमाणस्य राज्ञः ये सभासदः स्वयमन्विछति अनुमन्यंते ते तं न निवारयन्तीत्यर्थः तेषामुभयेषामयं महानधर्म इति ता ऊचुः बत खेदे ॥ ७ ॥ तदेवबलाबलवद्युद्धत्वमाह क्वेति वज्रसाराणि वज्रमिवसाराणि कठिनानि सर्वाणि अङ्गानि ययोस्तौ ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उत्थापनैरिति ॥ उत्थापनैः, उन्नयनैः, चालनैः, स्थापनैः अपि, एवं परस्परं जिगीषन्तौ सन्तौ, आत्मनो देहस्य, अपचक्रतुरपकारं कृतवन्तौ । तत्र उत्थापनं जानुनी पादौ च पिण्डीकृत्य पतितस्योच्चाटनं, उन्नयनं हस्ताभ्यामुद्धृत्य नयनं, चालनं कण्ठादिलग्नस्य निःसारणं, स्थापनं पाणिपादादिपिण्डीकरणं, 'मल्लयुद्धं नियुद्धज्ञा विंशद्भेदं प्रचक्षते । द्वात्रिंशद्भेदमपरे चत्वारिंशद्विधं तथा' इति संग्रामविजयवचनात् । स्वकीयतद्वेदितावोधायैवमाचरितमन्यथा क्षणान्निपातयेदिति रहस्यम् ॥ ५ ॥ तदिति ॥ तत् युद्धं, बलश्च अबलश्च स्तो यत्रेति बलाबलवत् दृष्ट्वा, विषमं विलोकयेत्यर्थः । सर्वयोषितः वरूथशः संघशः समेताः सानुकम्पाः सत्यः, हे राजन्, परस्परम् ऊचुः ॥ ६ ॥ तदेव दर्शयितुं तासामुक्तिमाह दशभिः ॥ महानिति ॥ राज्ञः पश्यतः सतः, ये सभासदः, बलाबलवत् युद्धं, अन्विच्छन्ति, ते सभासदः न, स राजापि नेति शेषः । अतः एषां राजसभासदां, बतेति खेदे । अयं महान् अधर्मः । अयं भावः । बलाबलवद्युद्धं राजा चेत्पश्येत्तदा स सभासद्भिर्वारणीयः, सभासदः पश्येयुश्चेत्तदा ते राज्ञा वारणीयाः, एवं स्मार्त्ते नये सत्यपि एते विपरीततया वर्त्तन्ते ततोऽयं महानधर्म इति ॥ ७ ॥ बलाबलवद्युद्धमेव दर्शयति ॥ क्वेति ॥ वज्रसाराणि वज्रवत् कठिनानि सर्वाण्यङ्गानि ययोस्तौ, शैलेन्द्रसंनिभौ गिरीन्द्रसदृशौ, मल्लौ क, अतिसुकुमाराण्यङ्गानि ययोस्तौ, किशोरौ किशोरावस्थौ, नाप्तमप्राप्तं यौवनं याभ्यां तौ, एतौ रामकृष्णौ, क च । नाभ्यामनयोर्नियुद्धयोग्यतेति भावः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तद् बलाबलवदिति : १०.४४.६.

सर्वशोऽयमनन्तशक्तिरपरामृष्टप्रभावः प्रभुर्लीलाविग्रहवानिति प्रतिपदं सङ्कीर्तयन्त्यो भृशम् ।
शृण्वन्त्योऽपि मुहुर्व्रजस्थितकृतिं विद्वन्मुखाद्यत्तदा खेदं प्रापुरवेक्ष्य युद्धमबलास्तन्मोहपाशो दृढः ॥ ३ ॥

महानिति : १०.४४.७.

भूपं तत्र परे निनिन्दुरपरे रङ्गं च धिक्चक्रिरे मल्लान् केऽपि च मेनिरेऽश्महृदयान्दुष्टं विधिं चोचिरे ।
इत्थं तत्र समग्रनागरजना रङ्गं गताः सङ्गरं द्वन्द्वायोग्यमवेक्ष्य तत्रसुरलं श्रीशाच्युताशीर्गिरः ॥ ४ ॥

कृष्णप्रिया

परीक्षित् ! इस दंगल को देखने के लिये नगर की बहुत-सी महिलाएँ भी आयी हुई थी । उन्होंने जब देखा कि बड़े-बड़े पहलवानों के साथ ये छोटे-छोटे बलहीन बालक लड़ाये जा रहे हैं, तब वे अलग-अलग टोलियाँ बनाकर करुणावश

आपस में बातचीत करने लगीं ॥ ६ ॥ 'यहाँ राजा कंस के सभासद बड़ा अन्याय और अधर्म कर रहे हैं। कितने खेद की बात है कि राजा के सामने ही ये बली पहलवानों और निर्बल बालकों के युद्ध का अनुमोदन करते हैं ॥ ७ ॥ बहिन! देखो, इन पहलवानों का एक-एक अङ्ग वज्र के समान कठोर है। ये देखने में बड़े भारी पर्वत-से मालूम होते हैं। परन्तु श्रीकृष्ण और बलराम अभी जवान भी नहीं हुए हैं। इनकी किशोर अवस्था है। इनका एक-एक अङ्ग अत्यन्त सुकुमार है। कहाँ ये और कहाँ वे ?॥ ८ ॥

धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत्। यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥ ९ ॥
न सभां प्रविशेत् प्राज्ञः सभ्यदोषाननुस्मरन्। अब्रुवन् विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥
वल्गतः शत्रुमभितः कृष्णस्य वदनाम्बुजम्। वीक्ष्यतां [1]श्रमवार्युप्तं पद्मकोशमिवाम्बुभिः ॥ ११ ॥
किं न पश्यत रामस्य मुखमाताम्रलोचनम्। मुष्टिकं प्रति [2]सामर्षं हाससंरम्भशोभितम्[3] ॥ १२ ॥

करवमक्षमा

अन्वयः—अस्य, समाजस्य, धर्मः, व्यतिक्रमः, हि, ध्रुवं भवेत्, यत्र, धर्मः, समुत्तिष्ठेत्, तत्र कर्हिचित्, न स्थेयम् ॥९॥ सभ्यदोषाननुस्मरन्, प्राज्ञः, सभां, न, प्रविशेत्, यतः, अब्रुवन्, अज्ञः, विब्रुवन्, नरः, किल्बिषम्, अश्नुते ।१०। शत्रुमभितः, वल्गतः, पद्मकोशमिवाम्बुभिः, श्रमवारिभिरुप्तं, कृष्णस्य, वदनाम्बुजं वीक्षताम् ॥ ११ ॥ आताम्रलोचनं, मुष्टिकं, प्रति, सामर्षं, हाससंरम्भशोभितं, रामस्य, मुखं, किं, न पश्यत ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

समाजस्य सभायाः ॥ ९ ॥ अपरा ऊचुः। न सभामिति। अब्रुवन् ज्ञात्वाऽपि तूष्णीं तिष्ठन्। विब्रुवन्विपरीतं ब्रुवन्। अज्ञो न जानामीति ब्रुवन्। अतः प्राज्ञो न सभां प्रविशेदिति ॥ १० ॥ वल्गतः शत्रुमभित इति शत्रोः सर्वतो धावतः कृष्णस्य श्रमवारिणा उप्तं व्याप्तं मुखांबुजं दृश्यताम् ॥ ११ ॥ अन्या ऊचुः। किं न पश्यतेति। सामर्षं सक्रोधम्। हासेन संरंभ आवेशस्तेन शोभितम् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

व्यतिक्रमो हानिः। अस्य कंसकृतस्य। यत्र स्थाने। विदुषा न स्थेयमित्यर्थः। कर्हिचिदिति लाभेऽपीत्यर्थः ॥ समुत्तिष्ठेत्सम्यगुद्भवेत्। तस्मादत्र वयं स्थातुं न योग्या इति भावः ॥ ९ ॥ अतः किल्बिषावाप्तेः "आत्मसर्वांगसबद्धमलं किल्बिषमुच्यते" इति। अनपायिमलं किल्बिषमित्यर्थः ॥ तथाप्यत्र यत्प्रविष्टास्तन्महापराधा जाता एवेत्याशयेनाहुः—नेति। प्राज्ञः युक्तवचनायुक्तवचनयोर्दोषज्ञः। तर्हि तत्र तस्य सावधानत्वे को दोषस्तत्राहुः—सभ्यानां कथं चित्कस्यचिद्दोषः स्यात्। एवं स्वस्यापि भ्रमादिना सभ्यानां संसर्गजं स्वस्यापि भ्रमारिष्टं विचारयन्नित्यर्थः। दोषानेवाह—अब्रुवन्निति। विज्ञोऽपि मौनमपलापं वा कुर्वंस्तथा स्वयमज्ञोऽपि विरुद्धं ब्रुवन्, किमुत विज्ञोऽपीत्यर्थः ॥ १० ॥ पद्मकोश पद्ममुकुलम्। अंबुभिर्जलबिंदुभिः। वल्ग—प्लुतगतौ' नन्वेतयोः श्रमाऽदृष्ट्या बलवत्त्वानुमानान्न कोऽपि दोषप्रसंग इत्याशंक्य श्रीकृष्णस्य तावच्छ्रमं दर्शयन्ति—वल्गत इति। श्रमश्चायं तादृशस्निग्धानेव प्रतिभासते न तु सर्वानिति ज्ञेयम् 'मल्लानामशनिः' इत्याद्युक्तः। रूपकेण तत्तद्धर्मं साधयित्वापि पद्मेति पुनरुपमानादिदं बोधयति—आकृष्टांबुजगणसौन्दर्यात्तन्मुखमेवांबुजम्, तथा श्रमवार्यव तच्छोभाहेतुत्वेन तदुपयुक्तं वारीति स्वानुभवव्यञ्जनाय रूपकं कृतम, यथा कथंचित्साधारणजनानुभवायैव तु पुनरुपमा कृतेति। श्रमवारीत्यत्र भिसो लुक्छांदसः। तदेवांबुभिरित्युपमानेन योगः स्यादिति कोशपदोपादानेन मुखस्यापि स्मितेनेषद्विकाशित्वं ज्ञापितमत एव बिशेषेणेक्षताम्। चक्रवर्ती तु—वदनांबुज मुखचन्द्रो दृश्यताम्। 'अब्जौ शङ्खशशांकौ च' इत्यमरः। अत्र लक्षितलक्षणयांबुजपदेन चन्द्रो लक्षितः। क्लीबत्वं चार्षम् ॥ ११ ॥ किं वितर्के। आताम्रे ईषद्रक्ते लोचने यस्य तम् ॥ अथ तद्वत्सुकुमारस्यापि श्रीरामस्य तच्छ्रमदर्शनेन स्वश्रममभिभूय जातं क्रोधं तेजः पश्यतेति तदेव स्थापयन्ति—किं पश्यतेति। हासेनावज्ञा च दर्शिता। हासकर्तृको य आवेशोऽविच्छिन्नोदयस्तेन शोभितम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्यगुत्तिष्ठेन उद्भवेत् तस्माद्वयमत्र स्थातुं न योग्या इति भावः ॥ ९ ॥ तथाप्यत्र यत् प्रविष्टास्तन्महापराधा जाता एवेत्याशयेनाहुः। नेति। प्राज्ञः दुष्टवचनायुक्तवचनयोर्दोषज्ञः। तर्हि तत्र तस्य सावधानत्वे को दोषस्तत्राहुः। सभ्यानां कथञ्चित्

---

१. श्रमपर्याप्तं-विज. । २. सामर्षहास-विज. । ३. शोभनम्-वीर. विज. ।

कस्यचिद्दोषः स्यात् एवं स्वस्यापि भ्रमादिनेति सभ्यानां संसर्गजं स्वस्यापि भ्रमादिजं दोषं विचारयन्नित्यर्थः। दोषामेवाहुः। अब्रुवन्निति। विज्ञोऽपि मौनमपलापं वा कुर्वन् तथा स्वयमज्ञोऽपि विरुद्धं ब्रुवन् किमुत विज्ञोऽपीत्यर्थः॥ १०॥ नन्वेतयोः श्रमादृष्टया बलवत्त्वानुमानान्न कोऽपि दोषप्रसङ्ग इत्याशङ्क्य श्रीकृष्णस्य तावत् श्रमं दर्शयन्ति। वलगत इति। श्रमश्चायं तादृशस्निग्धानेव प्रतिभासते नतु सर्वानिति ज्ञेयम्। मल्लानामशनिरित्याद्युक्तेः। रूपकेण तत्तद्धर्मं साधयित्वापि पद्मेति पुनरुपमानादिदं बोधयन्ति आकृष्टाम्बुजगणसौन्दर्यात्तन्मुखमेवाम्बुजं तथा श्रमवार्येव तच्छोभाहेतुत्वेन तदुपयुक्तं वारीति स्वानुभवव्यञ्जनाय रूपकं कृतं यथा कथञ्चित् साधारणजनानुभवायैव तु पुनरुपमा कृतेति। श्रमवारीत्यत्र भिसोलुक् छान्दसः। तत एवाम्बुभिरित्युपमानेन योगः स्यादिति कोषपदोपादानेन मुखस्यापि स्मितेनेषद्विकाशित्वं ज्ञापितम् अतएव विशेषेणेक्ष्यताम्॥ ११॥ अथ तद्वत् सुकुमारस्यापि श्रीरामस्य तच्छ्रमदर्शनेन स्वश्रममभिभूय जातं क्रोधतेजः पश्यतेति तदेव स्थापयन्ति। किं न पश्यतेति। हासेनावज्ञा च दर्शिता। हासकर्तृको य आवेशः अविच्छिन्नोदयस्तेन शोभितम्। अन्यत्तैः यद्वा। हासेन संरम्भ आटोपस्तेन॥ १२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हि एव, धर्म्मस्य विशेषेणातिक्रमो लङ्घनमेव। अस्य कंससम्बन्धिनः, यत्र समाजे सम्यक् उत्तिष्ठेदुद्भवेत् कर्हिचित् कदाचिदपि न स्थेयम्, प्राज्ञैः कैश्चिदपि वादौ न स्थेयमिति। ततश्च न प्रविशेदित्याद्यर्थभेदात्। अन्या ऊचुरित्याद्यवतरण्यं तैर्व्याख्यातमेव। एकवाक्यतया संगमय्यापि सर्वं व्याख्यातं स्यात्, तथाहि किं वक्तव्यं न स्थेयमिति॥ ९॥ तत्र पूर्व्वमेव न प्रवेष्टव्यमित्याहुः—नेति। अनुस्मरन् सदा चिन्तयन्; दोषानेवाहुः—अब्रुवन्निति; किल्विषं पापमश्नुते प्राप्नोति नर इति सर्व्वधर्म्माध्यक्षताद्यधिकारी जनो ज्ञेयः, अन्यथानुक्त्यादिनानधिकारिणोऽपि सर्व्वानेव सभास्थितान् प्रति दोषप्रसक्तिः, अतोऽधिकारिण एते सभासदोऽत्र स्थिता दुष्टा एवेति भावः॥ १०॥ ननु, एतयोः श्रमादृष्ट्या बलवत्तानुमानान्न कोऽपि दोषप्रसंग इत्याशंक्य श्रमं दर्शयन्ति—वल्गत इति। कृष्णस्य श्यामसुन्दरस्य उप्त व्याप्तमित्युक्त श्रमाधिक्यं दृष्टान्तेनाभिव्यञ्जयन्ति-अम्बुभिः पद्मकोशमिवेति। जलजत्वेन तस्मिन् बहुलजलसम्पर्कात्; अतएव बिन्द्वादिशब्दाप्रयोगः। यद्वा, तदभावेऽपि ‘मुक्तेव पंकजदले’ इत्यादिन्यायेन पद्मकोशेऽपि जलबिन्दव एवोह्याः। कोश-शब्देन वदनाम्बुजस्य संकोचादिविशेषेण श्रम एव ध्वनितः, ततश्च बहुलैः श्रमवारिकणैः श्रीमुखस्य शोभातिशयोऽपि सूचितः; अतएव विशेषेणेद्यताम्॥ ११॥ रामस्य मल्लयुद्धेन रममाणस्येत्यर्थः। आताम्रे अतिरिक्ते लोचने यस्मिन्निति सामर्षः धर्म्मयुक्तत्वात्। पूर्व्वं श्यामसुन्दरश्रीमुखे मुक्तापङ्क्तिसदृशश्रमवारिणा शोभाविशेषाभिप्रायेणाम्बुजरूपकम्, अत्र च शुक्लवर्णे तेन तादृशत्वाभावात् केवलं मुखमित्युक्तम्। हासोऽवज्ञया अमर्षेणैव वा संरम्भ आटोपः। शोभितमित्यनेन सौन्दर्य्यविशेषोऽप्युक्तः। श्रीकृष्णस्य हासस्तु पंकजरूपकेण सुप्रसन्नतोक्त्या सूचित एव, किन्तु तस्मिन् भावविशेषेण श्रमस्यैवावकलनात् साक्षादसौ नोक्तः॥ १२॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

विब्रुवन् विपरीतं ब्रुवन्॥ १०–१२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अतोऽस्य समाजस्य सभाया महान् धर्मव्यतिक्रमः धर्मव्यत्यासः धर्मविपर्ययोऽधर्मो भवेत् किं विधेयमित्यत्र काभिश्चिदुक्ते काश्चिदाहुः। यत्राधर्म इति। समुत्तिष्ठत् प्रवर्त्तते तत्र कर्हिचित् क्षणमपि न स्थेयमिति॥ ९॥ अपरा आहुः। न सभामिति। सभ्यानां दोषाननुस्मरन्प्राज्ञश्चेत्तां सभां न प्रविशेत् अब्रुवन् ज्ञात्वापि तूष्णीं तिष्ठन् विब्रुवन् विपरीतं ब्रुवन्नज्ञ इव तिष्ठन् ज्ञात्वापि न जानामीति ब्रुवन्नित्यर्थः। एवं विधो यो नरः स किल्विषमश्नुते प्राप्नोति॥ १०॥ अन्यास्त्वाहुः। वलगत इति। शत्रुमभितः शत्रोः सर्वतः वल्गता धावतः कृष्णस्याम्बुकणैः पद्मकोशमिव श्रमवारिणा उप्तम् व्याप्तं वदनाम्बुजं दृश्यताम्॥ ११॥ अन्या ऊचुः। कि नात। आ ईषत्समन्ताद्वा ताम्रे लोचने यस्मिंस्तत् मुष्टिकं प्रति सामर्षं सक्रोधं हासेन संरम्भ आवेशस्तेन शोभनं रामस्यापि मुख किं न पश्यतेत्यर्थः॥ १२॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

समाजस्य सभ्यसमूहस्य अर्थतो मन्वादिवाक्यं प्रतीक्षयन्ति यत्रेति॥ ९॥ किमित्यप्रवेश इति तत्राहुः। अब्रुवन्निति विब्रुवन् विपरीत ब्रुवन् “आत्मसर्वाङ्गसम्बन्धमलाङ्किल्बिषमुच्यत” इति च अनपायिमलं किल्विषमित्यर्थः॥ १०॥ श्रमपर्याप्तं श्रमवारिव्याप्तं पद्मकोश पद्ममुकुलम्॥ ११॥ हे सख्यः! रामस्य मुखं न पश्यत किम्पश्यतेत्यन्वयः अमर्षेण सहितो हासः सामर्षहासः तेन संरम्भणे च शोभनं चारुतरम्॥ १२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्राज्ञो निवृत्ति मार्गज्ञः॥ १०–४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

धर्मव्यतिक्रमोऽधर्मः समाजस्य सभायाः न स्थेयमित्यतोऽस्माभिरित उत्थाय गम्यतामिति भावः ॥ ९ ॥ अस्माभिरत्रागत्यैवापराद्धमित्यपराः शास्त्रशासनमाहुः। न सभामिति। सभायामधर्मे उत्पद्यमाने सति धर्मं ज्ञात्वापि तम् अब्रुवन् तूष्णीं तिष्ठन्नित्यर्थः। विब्रुवन् विधर्ममेव ब्रुवन् वा अज्ञः ज्ञात्वापि न जानामीति ब्रुवन् वा किल्विषं प्राप्नोत्यतः सभां न प्रविशेदिति सभाप्रवेशनिषेधो व्यवहारसापेक्षस्यैव प्राज्ञस्य नतु व्यवहारनिरपेक्षस्य प्राज्ञस्य यथा सभापर्वणि द्यूते द्रौपदीविपदि व्यवहारसापेक्षाः प्राज्ञाः भीष्मादयो ऽब्रुवाणा एव तस्थुः व्यवहारनिरपेक्षः प्राज्ञो विदुरस्तु धर्मं ब्रूतेस्मैवेति रङ्गभूमौ तु सर्व एव प्राज्ञाः कंसाद्भीताः व्यवहारसापेक्षा एवेति ॥ १० ॥ ननु तयोः श्रमादृष्ट्या बलवत्त्वानुमानान्न कोऽपि दोषप्रसङ्ग इत्याशङ्क्य कृष्णस्य तावत् श्रमं दर्शयन्ति। बल्गतः शत्रुमभित इति। शत्रोः सर्वतो धावतः कृष्णस्य श्रमवारिणा उप्तं व्याप्तं वदनाम्बुजं मुखचन्द्रो दृश्यताम् अब्जौ शङ्खशशाङ्कौ चेत्यमरः क्लीबत्वमार्षम् ॥ ११ ॥ सामर्षं सक्रोधमिति क्रोधस्य कारणं मुष्टिकप्रहारजनितः श्रम एव बुद्ध्यतामिति भावः। कोपोत्थेन हासेन सह संरम्भो युद्धावेशस्तेन शोभितम् ॥ १२ ॥

गूढार्थदीपिनी

व्यतिक्रमो हानिः। समुत्तिष्ठत् प्रवर्तेत। कर्हिचित् लाभेऽपि ॥९॥ अब्रुवन् ज्ञात्वाऽपि तूष्णीं तिष्ठन्। विब्रुवन् विपरीतं ब्रुवन्। अज्ञो न जानामिति ब्रुवन् ॥ १० ॥ शत्रुमभितः सर्वतः बल्गतः उत्प्लुत्य उत्प्लुत्य गच्छतः उप्तं व्याप्तं वीक्ष्यतां दृश्यताम्। कर्मणि लोट् यद्वा। वदनाम्बुजं मुखचन्द्रो वा ॥११॥ आताम्रे ईषद्रक्ते लोचने यस्मिन्। सामर्षं सक्रोधम्। संरम्भः आवेशः ॥१२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अज्ञानतो ह्यधार्मिकसमाजप्रवेशे सति तत्र न स्थेयमित्युक्तम् ज्ञानपूर्वकन्तु तस्मिन् प्रवेशमपि न कुर्यादित्याहुः। नेति। अब्रुवन् ज्ञात्वापि तूष्णीं तिष्ठन् विब्रुवन् विपरीतं ब्रुवन् अज्ञोऽस्मि न जानामीति ब्रुवन् किल्विषमश्नुतेऽतः प्राज्ञः सभ्यदोषाननुस्मरन् सभां न प्रविशेत् ॥ १० ॥ प्रस्तुतमाहुः। शत्रुमभितः चाणूरस्य परितः बल्गतः श्रमवारिणा उप्तं व्याप्तं कृष्णस्य वदनाम्बुजं वीक्ष्यताम् दृश्यताम् ॥ ११ ॥ अन्या आहुः। किं नेति। ईषत्ताम्रे लोचने यस्मिन् तत् सामर्षं सक्रोधं हासेन संरम्भः आवेशस्तेन शोभितं रामस्य मुखं किं न पश्यत ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

समाजस्य सभ्यसमूहस्य ध्रुवं भवेद्भवतु तेषामधर्मो युष्माकं किमित्यत आहुः ॥ यत्रेति। यत्राधर्मः समुत्तिष्ठेत्तत्र कर्हिचित्केनचिदपि न स्थेयं यत्राधर्मस्तत्र कोऽपि समुन्मुदा सहितो न तिष्ठेदिति वा। इतरदुक्तार्थः ॥ ९ ॥ अर्थतो मन्वादिसम्मतिमेतदर्थे दर्शयति ॥ नेति सभ्यदोषाननुस्मरन्प्राज्ञस्तां सभां न प्रविशेत्। अब्रुवन्किमप्यवदन्विब्रुवन्विपरीतं ब्रुवन्। अतोऽज्ञवन्नरः किल्विषं पापमश्नुते प्राप्नोति ॥ १० ॥ शत्रुमत्र विरोधमात्रवाची शत्रुशब्दः। अभितः परितः। अभितः परित इति तद्योगे द्वितीया। बल्गतो भ्रमतः कृष्णस्य श्रमवारिभिः श्रमजनितस्वेदोदबिन्दुभिः पद्मकोशं कमलकोरकमम्बुभिरुदकैरिवोप्तं व्याप्तं वीक्ष्य तां सख्यो भवद्भिः ॥ ११ ॥ आताम्रे समुद्रिक्तरक्तवर्णे लोचने यस्य तदमर्षेण सहितो यो हाससंरम्भः कोपाटोपस्तेन च शोभनं मनोहरं रामस्य मुखं सख्यः किं न पश्यतेत्यन्वयः ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमधर्मे हेतुभूतं न्यायविरोधं निरूप्य न केवलमधर्मः एषां भविष्यति किन्तु यस्य प्रभावेण ऐश्वर्यादिकं भुञ्जते तस्याप्यतिक्रमो भविष्यतीत्याहुः। धर्मव्यतिक्रम इति। अस्य समाजस्य ध्रुवं धर्मव्यतिक्रमो भवेत् शुभफलं धर्मादेवेति तदतिक्रमे तादृश एव ततः पूर्वं विषमनियोगेनाधर्मः अन्येऽपि सहजाः अधर्माः सन्त्येव वस्तुतोऽपि धर्मस्य प्रभुरच्युत इति प्रभोरन्यथा विनियोगे लीलादर्शने वा धर्मसेवकानां भवत्येवातिक्रमः सोऽप्यधर्मः धर्मं नातिक्रमेदिति निषेधात् एवमधर्मः अस्मिन् समाजे सर्वत एवोद्गतः अतो यत्र सम्यगधर्मः उत्तिष्ठेत् तत्र दुःखस्यावश्यम्भावात् कदाचिदपि न स्थेयं यद्यपि दुःखसम्भावना नास्ति तथापि कारणोत्पत्तेर्विद्यमानत्वात् सर्पनिकटशयनवत् न स्थेयमेव ॥ ९ ॥ नन्वेवं सति सर्वेषामेवाधर्मः को विशेषः समाजस्येति चेत्तत्राहुः। न सभां प्रविशेदिति। अथवा किमित्युच्यते निर्गन्तव्यं वा तूष्णीं स्थातव्यमित्याशङ्क्य स्वार्थमित्याहुः। न सभामिति। सभास्थैरवश्यं वा वक्तव्यम् अथासामर्थ्यं चेत् प्रथमत एव प्राज्ञः आग्रमार्थं सर्वं जानन् सभामेव न प्रविशेत् –

सभायां न प्रवेष्टव्यं न वदेद्वासमञ्जसम्।

अब्रुवन् विब्रुवन् वापि नरो भवति किल्विषी। इति मनुवाक्यात् एते हि सभ्यदोषा। इत्याहुः अब्रुवन्निति। सभायां उपविष्टेनावश्यं वक्तव्यं पृष्टः अपृष्टो वा यथोचितं न वदेत् तथापि नरकभागी स्यात् यदि वा विरुद्धं वदेत् अन्यायं पृष्टः अपृष्टोवा

पृष्टश्चेदजानन्नपि नाहं जाने इति वदेत् सोऽज्ञ इत्युच्यते एवं त्रिविधा अप्येते नरकभाजो भवन्ति सभायां प्रविशन् सभास्मरणे तद्गतगुणदोषाणामपि स्मरणमावश्यकमिति तथोक्तं किल्विषमावश्यकं नरकम् ॥ १० ॥ ननु भगवतोऽपि बलमवश्यमस्ति कुवलयापीडवधात्तत्राहुः । बल्गतः शत्रुमभित इति । शत्रुं चाणूरमभितः वल्गतः मल्लशब्दान् कुर्वतः कृष्णस्य सदानन्दस्य अस्माकं सर्वस्य वा वदनाम्बुजम्प्रस्वेदजलैः व्याप्तं च पश्यत यद्यधिकबलः समबलो वा स्यात् तदा शत्रोरिवास्यापि श्रमो न स्यात् शब्दश्वासमर्थस्येवेति लोकप्रसिद्धिः श्रमवारिभिर्व्याप्तं न तु कर्णैः अनेनान्तः श्रमाधिक्यं द्योतितं ननु भवत्येव कर्मणा श्रमः को दोष इति चेत्तत्राहुः । पद्मकोशमिवाम्बुभिरिति । पद्मकोशो हि जलादुद्गतो भवति कदापि जलं न स्पृशति यथाजलं वर्धते तथा तन्नालमपि वर्द्धत इति तस्य जलव्याप्तिरसम्भाविता । तथा भगवतोऽपि श्रमजलसम्बन्धोऽसम्भावित इत्यर्थः । तासामासक्तिसिद्ध्यर्थं भगवता तथा प्रदर्शितम् अन्यासक्ता मा भवेयुरिति कंसादीनां च प्रथमतः सुखार्थम् ॥ ११ ॥ एतत्सर्वेषां न प्रकटमिति चक्षुरपि कदाचिद्दर्शनाभावात् बलभद्रे सर्वजनीनं तदिति साक्षेपमाहुः । किं न पश्यतेति । रामस्य मुखमासमन्तात्ताम्रलोचनं किं न पश्यत भ्राता ज्येष्ठोऽयमस्य श्रमः सर्वजनीनः अन्यथा क्रोधाविर्भावं न कुर्यात् अशक्तस्यैव तथा करणात् ननु स्वभावतोऽपि ताम्रो भवेदित्याशङ्क्याह । मुष्टिकं प्रति सामर्षमिति । मुष्टिको मारणीय इति क्रोधमाविर्भावयति स्वतो ह्यसमर्थानां कामादयः प्रवर्त्तका भवन्ति । नन्वेतदपि सहजमिति चेत्तत्राहुः । हाससंरम्भशोभितमिति । हासेन यः संरम्भः क्रोधः तेन शोभितम् अथवा पूर्वं हाससंरम्भेण हासपूर्वकः कामलीलया शोभितं पूर्ववचने अस्मान् खिन्नान्वा दृष्ट्वा हास्यसंरम्भाभ्यां शोभितम् एता अस्मान्न जानन्तीति हास्यं दुःखं प्राप्नुवन्तीति शीघ्रं मारणीय इति संरम्भमपि करोति उभाभ्यां चातिशोभितम् अतो न सहजं किमपीत्यर्थः ॥ १२ ॥

श्रीसुबोधिनी–सारः

अस्य समाजस्य सभाया धर्मव्यतिक्रमो धर्मोल्लंघनं ध्रुवं निश्चितं भवेत् यत्र स्थानेऽधर्मः संजायेत तत्र कर्हिचित् कदापि न स्थेयम् ॥ ९ ॥ प्राज्ञो विवेकी सभ्यानां दोषाननुस्मरन् सन् सभां न प्रविशेत् नेयात् अब्रुवन् ज्ञानी अभाषमाणो विब्रुवन् विपरीतं वदन् अज्ञो नरः किल्बिषं पापमश्नुते भुंक्ते ॥ १० ॥ शत्रुं चाणूरम् अभितः सर्वतो वल्गतो गर्जतः कृष्णस्य श्रमवारिणा स्वेदबिंदुनोप्तं व्याप्तं वदनांबुजं मुखपद्मं वीक्ष्यतां दृश्यताम् अंबुभिः पद्मकोशमिव ॥ ११ ॥ अन्या ऊचुः । मुष्टिकं प्रति सामर्षं सक्रोधं हासेन संरंभः कोपावेशस्तेन शोभितमा ईषत् ताम्रल्लोचनं यस्मिन् तत् रामस्य मुखं किं न पश्यत ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

न केवलमधर्मोत्पत्तिरेव, किंतु अस्य समाजस्य सभाया धर्मव्यतिक्रमः पूर्वसिद्धस्य धर्मस्य विनाशोऽपि ध्रुवं भवेत्। हिशब्देनास्यार्थस्य शास्त्रसिद्धत्वं सूचयन्ति । अतो यत्राधर्मः समुत्तिष्ठेत् प्रवर्तेत तत्र कर्हिचिदपि न स्थेयम् ॥ ९ ॥ सभ्यानां दोषाननुस्मरन् प्राज्ञो बुद्धिमान् सभां न प्रविशेत् । 'तत्र प्रवेशे को दोष' इत्यपेक्षायां 'तत्र प्रविष्टस्य त्रिधैव गतिः, तत्र सर्वत्रैव दोष' इत्याह—अब्रुवन् दोषं ज्ञात्वापि तूष्णीं तिष्ठन्, विब्रुवन् तेषां प्रीत्यर्थं धर्मपक्षा द्विपरीतं ब्रुवन्, तथा पृष्टोऽप्यज्ञोऽप्यहं न जानामीति च ब्रुवन्नरः किल्बिषमश्नुते पापं प्राप्नोति ॥ १० ॥ अपरा आहुः—शत्रुमभितः शत्रोः सर्वतो वल्गतो धावतः कृष्णस्य श्रमवारिभिरुप्तं व्याप्तं मुखं वीक्ष्यतामिति । तत्र दृष्टान्तमाहुः—अम्बुभिरुप्त पद्मकोशमिवेति ॥ ११ ॥ अन्या आहुः—आताम्रे ईषद्रक्ते लोचने यस्मिंस्तत् । तत्र हेतुमाहुः—मुष्टिकं प्रति सामर्षं सक्रोधं हाससंरम्भेण हासावेशेन शोभितं रामस्य मुखं किं न पश्यतेत्यन्वयः ॥ १२ ॥

अन्वितार्थप्रकाशिका

धर्मेति ॥ अस्य समाजस्य सभायाः धर्मव्यतिक्रमः पूर्वसिद्धस्य धर्मस्य विनाशोऽपि ध्रुव भवेत् । अतो यत्राधर्मः समुत्तिष्ठेत् उद्भवेत् प्रवर्तेत तत्र कर्हिचिदपि न स्थेयम् । अतोऽस्माभिर्गन्तव्यमिति भावः ॥ ९ ॥ नेति ॥ सभ्यानां दोषाननुस्मरन् प्राज्ञो बुद्धिमान् सभां न प्रविशेत् । यतः अब्रुवन् दोषं ज्ञात्वापि तूष्णीं तिष्ठन् विब्रुवन् तेषां प्रीत्यर्थं धर्मपक्षाद्विपरीतं ब्रुवन् तथा अज्ञः पृष्टा जानन्नप्यहं न जानामीति च ब्रुवन्नरः किल्बिषमश्नुते पापं प्राप्नोति ॥ १० ॥ ननु रामकृष्णौ बलवन्तावेव श्रमादर्शनादतो नोक्तदोष इत्याशङ्क्य श्रमं दर्शयति—वल्गत इति ॥ शत्रुमभितः शत्रोः सर्वतो वल्गतो धावतः कृष्णस्य श्रमवारिभिरुप्तं व्याप्त वदनाम्बुजम् अम्बुभिरुप्त पद्मकोशमिव वीक्ष्यताम् । कर्मणि लोट् । "दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ।" इतिवत् प्रयोगः । चक्रवर्ती तु वदनाम्बुजं मुखचन्द्रः । क्लीबत्वमार्षमित्याह ॥ ११ ॥ किमिति ॥ आताम्रे ईषद्रक्ते लोचने यस्मिन् तत् मुष्टिकं प्रति सामर्षं सक्रोधं हाससरम्भेण हासावेशेन शोभितं रामस्य मुखं किं न पश्यत ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

समाजस्य सभास्थितजनसमुदायस्य धर्मस्य व्यतिक्रम उल्लंघनं यत्र स्थाने समुत्तिष्ठेत् उद्भवेत् ॥ ९ ॥ अन्या आहुः नेति ज्ञात्वापि अब्रुवन् तूष्णीं तिष्ठन् विब्रुवन् विपरीतं वदन् अज्ञो न वेद्मीति वदन् नरः किल्विषं पापमश्नुते अतः एतान् सभ्यानां

सभासदां दोषान् अनुस्मरन् विचारयन् प्राज्ञः सभां न प्रविशेत् ॥ १० ॥ शत्रुमभितः शत्रोः परीतः वल्गतो धावतः कृष्णस्य श्रमस्य वारिभिः स्वेदबिंदुकणैः उप्तं व्याप्तं वदनांबुजं अवलोकयताम् ॥ ११ ॥ अपरा आहुः किमिति सामर्षं समन्युं हासस्य संरंभ आवेशस्तेन शोभितम् ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

धर्मेति । अतः अस्य समाजस्य, अस्याः सभाया इत्यर्थः । धर्मव्यतिक्रमः महान् धर्मविपर्ययः अधर्म इति यावत् । ध्रुवं हि निश्चितमेवेत्यर्थः । भवेत् । एवं सति किं विधेयमिति काभिश्चिदुक्ते काश्चिदाहुः । यत्र अधर्मः, समुत्तिष्ठेत् प्रवर्त्तेत, तत्र कर्हिचित् क्षणमात्रमपि, न स्थेयम् ॥ ९ ॥ अपरा आहुः । न सभामिति सभ्यानां ये दोषास्तान्, अनुस्मरन्, प्राज्ञः सभां, न प्रविशेत् । यदि प्रविष्टः स्यात्, तर्हि तत्र अब्रुवन् ज्ञात्वापि तूष्णीं तिष्ठन्, विब्रुवन् विपरीतं ब्रुवन्, अज्ञः ज्ञात्वापि न जानामीति ब्रुवन् इत्यर्थः । एवंविधः नरः, किल्बिषं कश्मलं, अश्नुते प्राप्नोति ॥ १० ॥ अन्यास्त्वाहुः वल्गत इति । शत्रुं अभितः, शत्रोः सर्वत इत्यर्थः । वल्गतः धावतः, कृष्णस्य । अम्बुभिरम्बुकणैः, व्याप्तं पद्मकोशं इव, श्रमवार्युप्तं श्रमोदकव्याप्तं, वदनाम्बुजं वीक्ष्यतां दृश्यताम् ॥ ११ ॥ अन्या ऊचुः । किं नेति । आ ईषत् समन्ताद्वा ताम्रे लोचने यस्मिंस्तत्, मुष्टिकं प्रति, सामर्षं सक्रोधं, हासो हसनं च संरम्भो युद्धावेशश्च ताभ्यां शोभितं, रामस्य मुखं, किं न पश्यत । पश्यतेत्यर्थः ॥ १२ ॥

कृष्णप्रिया

जितने लोग यहाँ इकट्ठे हुए हैं, देख रहे हैं, उन्हें अवश्य-अवश्य धर्मोल्लङ्घन का पाप लगेगा । सखी ! अब हमें भी यहाँ से चल देना चाहिये । जहाँ अधर्म की प्रधानता हो, वहाँ कभी न रहे; यही शास्त्र का नियम है ॥ ९ ॥ देखो, शास्त्र कहता है कि बुद्धिमान् पुरुष को सभासदों के दोषों को जानते हुए, सभा में जाना ठीक नहीं है । क्योंकि वहाँ जाकर उन अवगुणों को कहना चुप रह जाना अथवा मैं नहीं जानता ऐसा कह देना—ये तीनों ही बातें मनुष्य को दोषभागी बनती हैं ॥ १० ॥ देखो, देखो, श्रीकृष्ण शत्रु के चारों ओर पैतरा बदल रहे हैं । उनके मुख पर पसीने की बूँदें ठीक वैसे ही शोभा दे रही हैं, जैसे कमलकोश पर जल की बूँदें ॥ ११ ॥ सखियों ! क्या तुम नहीं देख रही हो कि बलराम जी का मुख मुष्टिक के प्रति क्रोध के कारण कुछ-कुछ लाल लोचनों से युक्त हो रहा है ! फिर भी हास्य का अनिरुद्ध आवेग कितना सुन्दर लग रहा है ॥ १२ ॥

पुण्या बत व्रजभुवो यदयं नृलिङ्गगूढः पुराणपुरुषो वनचित्रमाल्यः ।
गाः[1] पालयन् सहबलः क्वणयंश्च वेणुं विक्रीडयाञ्चति [2]गिरित्ररमार्चिताङ्घ्रिः ॥ १३ ॥
गोप्यस्तपः किमचरन् यदमुष्य रूपं लावण्यसारम[3]समोर्ध्वमनन्यसिद्धम् ।
दृग्भिः पिबन्त्यनुस[4]वाभिनवं दुरापमेकान्तधाम यशसः श्रिय [5]ऐश्वरस्य ॥ १४ ॥
या दोहनेऽवहनने[6] मथनोपलेप[7]प्रेङ्खेङ्खनार्भरुदितोक्षणमार्जनादौ[8] ।
गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यो धन्या [9]व्रजस्त्रिय उरुक्रमचित्तयानाः[10] ॥ १५ ॥
प्रातर्व्रजाद् व्रजत आविशतश्च सायं गोभिः समं क्वणयतोऽस्य निशम्य वेणुम् ।
निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः पश्यन्ति सस्मितमुखं सदयावलोकम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—व्रजभुवः, पुण्याः, यत्, नृलिङ्गगूढः, गिरित्ररमार्चिताङ्घ्रि, वनचित्रमाल्यः, सहबलः, अयं, पुराणपुरुषः, गाः, पालयन्, वेणुं, क्वणयन्, विक्रीडया, अञ्चति ॥ १३ ॥ गोप्यः, किं, तपः, समाचरन्, लावण्यसारं, असमोर्ध्वम्, अनन्यसिद्धम्, दुरापम्, एकान्तधाम, यशसः, श्रियः, ऐश्वरस्य, अनुसवाभिनवं, अमुष्यरूपं, दृग्भिः, पिबन्ति ॥ १४ ॥ उरुक्रमचित्तयानाः या, अनुरक्तधियः, अश्रुकण्ठ्यः, व्रजस्त्रियः, दोहने, अवहनने, मथनोपलेपप्रेङ्खेङ्खनार्भरुदितोक्षणमार्जनादौ, एनं, गायन्ति, ताः, (व्रजस्त्रियः) धन्याः ॥ १५ ॥ या, भूरिपुण्याः, अबलाः, गोभिः, समं, प्रातर्व्रजाद्, व्रजतः, सायम्, आविशतश्च, वेणुं, क्वणयतः, अस्य, निशम्य, तूर्णं, निर्गम्य, पथि, सदयावलोकं, सस्मितं, मुखं, पश्यन्ति ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अन्या ऊचुः । पुण्या बतेति । नृलिंगेन मनुष्यदेहेन गूढः । वनस्थानि चित्राणि माल्यानि यस्य सः । गिरित्रः शिवो रमा च ताभ्यामर्चितावंघ्री यस्य सः । अयं भावः । धिगिमां सभां यस्यामयं पराभूयते तास्तु व्रजभुवोऽपि पुण्याः

---

१. श्चारयन्–विज. २. गिरावमरा–विज. । ३. मथनोत्थ–विज. । ४. ह्यनुनवाभि–वीर. । ५. ईश्वरस्य–वीर. विज. । ६. दोहनेऽवहने–वीर. । ७. नोपजल्प–विज. । ८. यज्जनादौ–पिज. । ९. पुण्या–विज. । १०. यामाः–विज. ।

यद्यास्वयं कृष्णो विविधक्रीडया नानाविधविदारेणांचति गच्छतीति ॥ १३ ॥ अहो कष्टमल्पपुण्या वयं यतोऽस्माभिरनवसरे दृष्टोऽयम् । गोप्यस्तु बहुपुण्या इत्याहुस्त्रिभिः । गोप्य इति । अमुष्य श्रीकृष्णस्य रूपमंगं लावण्येन सार श्रेष्ठम् । किं च असमोर्ध्वं न विद्यते सममूर्ध्वमधिकं च यस्य तत् तदपि नान्येनाभरणादिना सिद्धं किं तु स्वत एव ऐश्वरस्यैश्वर्यस्य चैकांतधामाव्यभिचारिस्थानम् । पाठांतरे अमुष्य ईश्वरस्येत्यन्वयः । एवंभूतं नित्यं नवीनं रूपं या नेत्रैः पश्यन्तीति ॥ १४ ॥ किं च या दोहनादिष्वेनं गायन्ति ता व्रजस्त्रियो धन्याः । प्रेंखेखनं दोलां दोलनम् । उक्षणं सेचनम् । कथंभूताः । उरुक्रमे चित्तमुरुक्रमच्चित्तं तेनैव यानं सर्वविषयप्राप्तिर्यासां ताः । पाटान्तरे उरुक्रमं चिंतयन्त्य इत्यर्थः । कुतः । अनुरक्तधियः । तत्र लिंगमश्रुकंठ्यः ॥ १५ ॥ प्रातरिति । या अबलाः क्वणयतो वादयतो वेणुं निशम्य गृहात्तूर्णं निर्गम्य पथि सस्मितमुखं पश्यन्ति ता भूरिपुण्या इति ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बत हर्षे । वने यानि चित्राणीति सप्तम्या अधिकरणार्थकत्वाद्वनस्थानीत्युक्तं स्वामिचरणैः । गिरिं कैलासं, गिरीन् पूज्यानर्थाद्विप्राँस्त्रातीति वा गिरित्रः 'तद्ब्राह्मणान्परमसर्वविपत्सु पाति' इति दक्षेप्राख्यानोक्तेः । "गिरिर्ना नेत्ररुग्भिदि । अद्रौ गैरेयके योषिद्गीर्णे पूज्ये पुनस्त्रिषु" इति मेदिनी । अत्र तात्पर्यमाहुः—अयं भाव इति । अयं श्रीकृष्णः । ताः प्रसिद्धाः । पुण्या इति तैर्व्याख्यातम् । तत्रायं भावः—इत्यस्यदन्तं विवक्षितमित्यर्थः । यद्वा—अथ काश्चिद्वि दग्धा यज्ञपत्नीप्रायास्यो ऐश्वर्यज्ञानमिश्रपरप्रेमवत्यस्तत्समा वैगुण्येन मधुपुरीमप्यबहुमन्वानास्तत्रत्यानां साद्गुण्ये श्रीव्रजभुवमेव प्रशंसन्ति—पुण्या इति चतुर्भिः । बत विस्मये । व्रजभुवः व्रजसम्बन्धिन्यो भूमय एव पुण्याः परमधन्या न त्वियं महापुर्यपि । बहुत्वनिर्देशेन तासां वहूनामपि यादृशपुण्यत्वं न त्वेकस्या अपि तादृशत्वमित्यर्थः । यत् यासु अयं श्रीकृष्णाख्यः पुराणपुरुषोऽपि नवः नित्यनूतनो यः, य एव पुरुषस्तन्मुख्यत्वेन तच्छब्दः प्रथमोऽभिधेयः सोऽहं चेति । भ्रमति वर्तमानप्रयोगस्तत्सामीप्यात्, पुनस्तत्र गमनाभिप्रायाच्च । वस्तुतस्तु यथार्थभारतीनिःसृतिरियम् । तत्र तदीयनित्यलीलायाः स्थापयिष्यमाणत्वात् । अन्यत्र परममहतामप्यसो दुर्लभ इत्याह—गिरित्रेण रमयापि हृदयेऽर्चितावागमोक्तमार्गेणोद्दिश्यैवाराधितौ न तु व्रजवासिजनवत्साक्षात्सेवितावंघ्री यस्य तादृश इत्यर्थः । ननु सम्प्रत्यत्राप्ययमञ्चति तत्राह—विक्रीडयेति । अत्र प्रतिकूलैः पराभवितुमिष्यते विविधोदासीनलोकैः संकीर्य्यते चेति नानाभीष्टचिक्रीडिषोदयान्नात्र विशिष्टा क्रीडा । तत्र तु सर्वस्याप्यनुकूलत्वेन कान्तत्वेन च परमाभीष्टचिक्रीडिषोदयाद्विशिष्टैवेति कुतः साम्यमेवेति भावः । सर्वानुकूल्यं वैशिष्ट्यञ्च दर्शयन्ति—वनेत्यादिना । वने सर्वाभीष्टपुष्पादिनिधाने परमैकान्ते श्रीवृन्दावने चित्राणि विशिष्टक्रीडाकौतुकितया सखिभिर्मिलित्वा विविधाश्चर्यत्वेन यावदभीष्टं रचितानि माल्यानि यस्य तादृशः । उपलक्षणं चैतद्वेशान्त राणाम् । तथा गाः पालयन् स्वयं निजपरमस्नेहपात्राणां गवां तत्तन्निजाभीष्टक्रीडास्वैरतासहायं पालनं विश्वमोहनं मधुराह्वानादिना कुर्वन् । किञ्च सहबलः तत्रतत्र बलसहाय इति स्वयमभीष्टतत्तत्क्रीडने श्रीबलेन पुष्टतत्क्रीड इत्यर्थः । अहो किमपरं वक्तव्यं शक्रशर्वपरमेष्ठिमोहनं तरूणामपि पुलककारकं वेणुञ्च क्वणयंस्तद्वाद्यमाधुरीं मुहुरुल्लासयन्निति । अत्र विश्वनाथोऽपीत्थमेव व्याचख्यौ ॥ १३ ॥ निजभाग्यं निंदन्त्यो गोपीभाग्यं च श्लाघयंत्य आहुः—अहो कष्टमित्यादिना । रूपं द्रव्याश्रयलक्षणं गुणम् । तच्च "अंगान्यभूषितान्येव प्रेक्षणीयैर्विभूषणैः । येन भूषितवद्भान्ति तद्रूपं प्रोच्यते बुधैः ॥" इत्युक्तं भरतेन । न केवलं लावण्यसारमेव किं त्वन्यत्राविद्यमानमित्याहुः—किञ्चेति । तदपि असमोर्ध्वमपि । पाठान्तरे 'ईश्वरस्य' इति पाठे । अनुसवं प्रतिक्षणम् । अभिनवं नूतनम् । तथा चोक्तं स्वामिभिः—नित्यनवीनमिति । दुरापं विना ज्ञानमित्यर्थः । गोप्य इत्यत्र तेषामवतारिकायां दृष्टोऽयमितिपर्य्यन्तः पूर्वपद्याभिप्रायः । गोप्य इत्युत्तरत्रयस्य ज्ञेयम् । असमोर्द्धवम् अनन्ततदाविर्भावेष्वपि न विद्यते समं किमुतोर्द्ध्व यस्य तदित्यर्थः । पिबन्तीति तृषार्ता इवामृतमिति भावः । अनुसवाभिनवं प्रतिक्षणमधिकाविर्भावप्रेमतत्स्फूर्त्योः परस्परं वर्धमानत्वादिति भावः । दुरापं लक्ष्म्यादिभिर्दुर्लभमपि । श्रियः सर्वशोभायाः । 'ईश्वरस्य' इति पाठे परमेश्वरस्यापि परमालंबनरूपमित्यर्थः । अन्यत्तैः । तत्र सौन्दर्यमिति लेख्येऽप्यसंगतमिति, नूनं प्रथमलेखकभ्रमात् । अन्यथा किञ्चेत्यस्य तदपीत्यादेश्चासंगतिरिति । यद्वा—व्रजभुवां धन्यत्वेन तद्वासिमात्रधन्यत्वं व्यञ्जितम् । तत्रापि श्रीगोपीनां किं वक्तव्यमिति परमविदग्धाः काश्चिच्छ्रीशुकेनाप्यनुमोद्यमानेष्वमीषु बाढमनुमोद्यमानवाक्यमाहुः—गोप्य इति । तपो भगवदाराधनलक्षणम् । किं कतमदाचरितवत्यः, ईदृशफलस्य वाङ्मनसातीतत्वात् । तदपि तादृशमित्यर्थः । यदि जानीथ तदा वयमपि तत्रोद्यमं करवामेति भावः । यद्वा—किं तपोऽचरन्नपि तु नैवाचरन्निति तपोमात्रस्येच्छाफलदानाशक्तेस्तदीयनित्यप्रेयसीसमुचित एवायमुदय इति भावः । तथात्वे हेतुं परमाह—यद्यस्मादमुष्य साक्षाद्भावेऽपि निर्देष्टुमशक्यस्ये त्यर्थः । रूपं परमं शोभनप्रमाणांगप्रत्यंगवत्त्वम् । दृग्भिः पिबन्तीति नैरंतर्येऽपि तस्याऽक्षयिष्णुत्वं तासामतृप्तिञ्च सूचयित्वा रूपस्य सुधासमुद्रत्वमुत्प्रेक्षते । किञ्च—दर्शनमात्रस्य तादृशत्वं दर्शयित्वालिंगनादेः कैमुत्यमानयन्ते । कीदृशं तत्—लावण्यस्य कान्तिकंदलीचाकचिक्यस्य सारः श्रेष्ठांशो यत्र तादृशं तत्, प्राचुर्यात्तद्रूपमेव वा । नन्वनन्ता एव तत्प्रादुर्भावा इति तत्रतत्रापि तादृशत्वं संभवति तत्राहुः—असमोर्द्धवम् । नन्वन्यत्र नास्ति चेत्कुतो लब्धं तत्राहुः—अनन्यसिद्धं, स्वाभाविकमेवेति नित्यत्वञ्च दर्शितम् । अत एव यशआद्युपलक्षितानां षण्णां भगानामतिशयितं धाम नित्याश्रयम् । पाठान्तरेऽपि ईश्वरवस्येत्येवार्थः । नन्वेवं सदैकरूपत्वेन पश्यन्ति चेत्तदा

नासकृच्चमत्कारः स्यात्तत्राहुः—अनुसरेति। नन्वीदृशं रूपं तत्रास्ति चेत्तदाऽन्येऽपि पश्येयुस्तत्राहुः—दुरापमिति। स्वतस्तादृशप्रेम्णोऽसंभवादन्येषां तादृशत्वं तासामेव दृढावधानेन स्फुरति, अन्यथा तु न स्फुरतीत्यर्थः ॥ १४ ॥ पुनर्व्रजांगनाभाग्यमभिनन्दन्त्य आहुः—किञ्चेति। अवहनने व्रीहिताडनावसरे। मथने दधिमन्थने, उपलेपे गोमयादिना स्थललेपनसमये, अर्भरुदिते बालरोदने, मार्जने धूलिशोधनकाले, आदिपदात्स्नादिग्रहः। पाठान्तरे, 'चिन्तयाना' इति पाठे। इत्यर्थ इति—'चिति-स्मृत्याम्' स्मरन्त्य इति भावः। अत्र हेतुमाशंकन्ते–कुत इति। अनुरक्तधिय इति हेतुगर्भविशेषणम्। अनुरक्तधीत्वादित्यर्थः। तत्रानुरक्तबुद्धौ। लिंगंहेतुः। अश्रुवति—न ह्यनुरागं विनाऽश्रुद्गमो भवतीत्यर्थः। किञ्च—तासां गृहकर्माण्यपि नैतन्माधुर्यपानप्रतिबन्धकानीत्याहुः–या दोहनादिष्वेनं गायन्ति। दोहनेऽवहनने इति पदे अन्तर्भूतण्यर्थे। अवहननं तुषापकरणम्। चकारात्क्वापि पश्यन्ति चेत्येतन्माधुर्यं रसनाभिरपि दृग्भिरपि पिबन्तीति पानाविच्छेद उक्तः। उरुक्रमचित्तमेव यानं वाहनं यासां ताः। यत्रयत्र तच्चित्तं याति तत्रतत्रैव तस्मिंस्ता एव स्फुरन्तीति भावः। यद्वा—उरुक्रमस्य चित्तं वाहनं यासां ताः। अयमुरुक्रमोऽपि ब्रह्माद्यैः स्वचित्तेषूह्यमानोऽपि याः स्वयं स्वचित्ते वहतीति तास्वपि कृष्णोऽयमनुरक्तधीरिति तासां सौभाग्यभरो दर्शितः ॥ १५ ॥ पुनराहुः—प्रातरिति। अस्य श्रीकृष्णस्य। प्रातर्व्रजाद्वनं व्रजतः, सायं वनाद्व्रजं प्रविशतोऽस्य कृष्णस्य वेणुं निशम्य गृहेभ्यो निर्गत्य पथि गवानयनमार्गसमीपोपवनादौ पश्यन्ति। सदयः स्वविरहखिन्नाङ्गीस्ता दृष्ट्वा तदभीष्टवितरणव्यञ्जकानुकम्पासहितोऽवलोको यस्य तम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुण्या इति तैर्व्याख्यातं तत्रायं भाव इत्यस्येदन्तु विवक्षितमित्यर्थः। यद्वा। अथ काश्चिद्विदग्धा यज्ञपत्नीप्राया ऐश्वर्यज्ञानमिश्रपरमप्रेमवत्यस्तत्सभावैगुण्येन मधुपुरीमप्यबहुमन्वानाः तत्रत्यानां सादुगुण्ये श्रीव्रजभुवमेव प्रशंसन्ति। पुण्या इति चतुर्भिः वत विस्मये। व्रजभुवः व्रजसम्बन्धिन्यो भूमय एव पुण्याः परमधन्याः। न त्वियं महापुर्यपि। बहुत्वनिर्देशेन तासां बहूनामपि यादृशपुण्यत्वं न त्वेकस्या अपि तादृशत्वमित्यर्थः। यत् यासु अयं श्रीकृष्णाख्यः पुराणपुरुषोऽपि नवो नित्यनूतनो यः य एव च पुरुषः तन्मुख्यत्वेन तच्छब्दः। प्रथमोऽभिधेयः सोऽञ्चति भ्रमति। वर्त्तमानप्रयोगस्तत्सामीप्यात् पुनस्तत्र गमनाभिप्रायाच्च। वस्तुतस्तु यथार्थभारतीनिःसृतिरियं तत्र तदीयनित्यलीलायाः स्थापयिष्यमाणत्वात्। अन्यत्र परममहतामप्यसौ दुर्ल्लभ इत्याह। गिरित्रेण रमयापि हृदयेनार्च्चितौ आगमोक्ताच्चर्नमात्रेण उद्दिश्यैवाराधितौ नतु व्रजवासिवत् साक्षात् सेवितौ अङ्घ्री यस्य तादृश इत्यर्थः। ननु सम्प्रत्यत्राप्ययमञ्चति तत्राहुर्विक्रीडयेति। अत्र प्रतिकूलैः पराभवितुमिष्यते विविधोदासीनलोकैः सङ्कीर्यते चेति नात्यभीष्टचिक्रीडिषोदयन्नात्र विशिष्टा क्रीडा। तत्र तु सर्वस्याप्यनुकूलत्वेनैव कान्तत्वेन च परमाभीष्टचिक्रीडिषोदयाद्विशिष्टेति कुतः साम्यमेवेति भावः। सर्वानुकूल्यं वैशिष्ट्यञ्च दर्शयन्ति। वनेत्यादिना। वने सर्वाभीष्टपुष्पादिनिधाने परमैकान्ते श्रीवृन्दावने चित्राणि विशिष्टक्रीडाकौतुकितया सखिभिर्मिलित्वा विविधाश्चर्यत्वेन यावदभीष्ट रचितानि माल्यानि यस्य तादृशः। उपलक्षणञ्चैतत् वेशान्तराणां तथा गाः पालयन् स्वयं निजपरमस्नेहपात्राणां गवां तत्तन्निजाभीष्टक्रीडास्वैरता सहायं पालनं विश्वमोहनं मधुराह्वानादिना कुर्वन्। किञ्च। सहबलः तत्र तत्र बलसहाय इति स्वयमभीष्टतत्तत्क्रीडेन श्रीबलेन पुष्टतत्तत्क्रीड इत्यर्थः। अहो किमपरं वक्तव्यं शक्रशर्वपरमेष्ठिमोहनः तरूणामपि पुलककारकं वेणुञ्च क्वणयन् तद्वाद्यमाधुरीं मुहुरुल्लासयन्निति ॥ १३ ॥ गोप्य इत्यत्र तेषामवतारिकायां दृष्टोऽयमिति पर्यन्तः पूर्वपद्याभिप्रायः। गोप्यस्त्वित्युत्तरत्रयस्य ज्ञेयः। असमोर्ध्वम् अनन्ततदाविर्भावेष्वपि न विद्यते समं किमुतोर्ध्वं यस्य तदित्यर्थः। पिबन्तीति तृषार्त्ता इवामृतमिति भावः। अनुसवाभिनवं प्रतिक्षणमधिकाविर्भाविप्रेमतत्स्फूर्त्त्योः परस्परवर्द्धनत्वादिति भावः। दुरापं लक्ष्म्यादिभिर्दुर्ल्लभमपि श्रियः सर्वशोभायाः। ईश्वरस्येति पाठे परमेश्वरस्यापि परमालम्बनरूपमित्यर्थः। अन्यत्तैः। तत्र सौन्दर्यमिति लेख्येऽप्यसङ्गमिति नूनं प्रथमलेखकभ्रमात् अन्यथा किञ्चित् इत्यस्य तदपीत्यादेश्चासङ्गातरिति। यद्वा। व्रजभुवां धन्यत्वेन तद्वासिमात्रधन्यत्वं व्यञ्जितं तत्रापि श्रीगोपीनां किं वक्तव्यमिति परमविदग्धाः काश्चित् श्रीशुकेनाप्यनुमोद्यमानेष्वमीषु वाक्येषु वाढमनुमोद्यमानं वाक्यमाहुः। गोप्य इति। तपो भगवदाराधनलक्षणं किं कतमत् आचारतवत्यः ईदृशफलस्य वाङ्मनसातीतत्वात् तदपि तादृशमित्यर्थः। यदि जानीथ तदा वयमपि तत्रोद्यमं करवामेति भावः। यद्वा। किन्तपोऽचरन् अपि तु नैवाचरन् तपोमात्रस्येदृशफलदानाशक्तेः तदीयनित्यप्रेयसीसमुचित एवायमुदय इति भावः। तथात्वे हेतु परमेवाहुः। यत् यस्मात् अमुष्य साक्षात् भावेऽपि निर्द्देष्टुमशक्यस्येत्यर्थः। रूपं परमशोभनप्रमाणाङ्गप्रत्यङ्गवत्त्वं दृग्भिः पिबन्तीति नैरन्तर्येऽपि तस्याक्षयिष्णुत्वं तासामतृप्तिञ्च सूचयित्वा रूपस्य सुधासमुद्रत्वमुत्प्रेक्षन्ते किञ्च दर्शनमात्रस्य तादृशत्वं दर्शयित्वा आलिङ्गनादेः कैमुत्यमानयन्ते कीदृशं तत् लावण्यस्य कान्तिकन्दलीचाकचिक्यस्य सारः श्रेष्ठांशो यत्र तादृशं तत् प्राचुर्यात्तद्रूपमेव वा। नन्वनस्ता एव तत्प्रादुर्भावा इति तत्र तत्रापि तादृशत्वं सम्भवति तत्राहुरसमोर्ध्वम्। नन्वन्यत्र नास्ति चेत् कुतो लब्धं तत्राहुः। अनन्यसिद्धं स्वभाविकमेवेत्यर्थः। इति नित्यत्वञ्च दर्शितम्। अत एव यशआद्युपलक्षितानां षण्णां भगानामतिशयितं धाम नित्याश्रयं पाठान्तरेऽपि ईश्वरत्वस्येत्येवार्थः। नन्वेवं सदैकरूपत्वेन पश्यन्ति चेत्तदापि नासकृत् चमत्कारः स्यात्तत्राहुरनुसवेति। नन्वीदृशं रूपं तत्रास्ति चेत्तदान्येऽपि पश्येयुस्तत्राहुर्दुरापमिति। स्वतस्तादृश-

प्रेम्णोऽसम्भवादन्येषां तादृशत्वं तासामेव दृढावधानेन स्फुरति अन्यथा तु न स्फुरतीत्यर्थः ॥ १४ ॥ एवं दर्शनवदर्शनेऽपि तद्रूपं तथैव तासां स्फुरतीत्याहुर्या इति। दोहनावहनने अन्तर्भूतण्यर्थपदे ज्ञेये अवहननं तुषापकरणं चकार उक्तसमुच्चये। कदाचित् पश्यन्ति कदाचिद्गायन्ति चेत्यर्थः। एवं पूर्वोक्तरूपं यदा न पश्यन्ति तदापि तद्रूपं स्फुरतीति भावः। एवं तादृशगानाभावाद्वयमधन्या एवेति तात्पर्यम्। अन्यत्तैः। यद्वा। अश्रुकण्ठ्यः रोदनपराश्च भवन्ति यतोऽनुरक्तधियः अतः उरुक्रमचित्तमेव यानं गमनसाधनं आसां ताः। यत्र यत्र तच्चित्तं याति तत्र तत्रैव तस्मिंस्ता एव स्फुरन्तीत्यर्थः। चिन्तयाना इति पाठेऽपि चिन्तनं चिन्ता तदेव यानं यासामिति समानोऽर्थश्च ॥ १५ ॥ दृगभिः पानमेव वर्णयन्ति। प्रातरिति। व्रजतः श्रीवृन्दावनं गच्छतः गोभिरित्युपलक्षणं गोपवर्गैश्च समं वेणुमित्यस्योभयत्राप्यन्वयः। वेणुं क्वणयतः अत एव वेणुं तद्वाद्यद्वारा निशम्य श्रवणकरणकज्ञानं विधायेत्यर्थः। अयं तूर्णनिर्गमे हेतुः वेणुसम्बन्धात् श्रीमुखस्य शोभाविशेषोऽपि सूचितः। "तन्मुखं कथमिवाम्बुजतुल्यरुक्षं वाचामवाचि ऋतु पर्वणि पर्वणीन्दोः। तत् किं ब्रुवे किमपरं भुवनैककान्तः वेणुं त्वदाननमनेन समं नु यत् स्या"दिति श्रीलीलाशुकोक्तिः। अबला वेणुनादेन सततप्रेमभरेणैव वा दोहादिसामर्थ्यहीनत्वात्तन्नाम्नेव वाच्या इत्यर्थः। अत इतस्ततः प्रस्खलन्त्य इति भावः। यद्वा। अन्यसङ्गे गन्तुमशक्यत्वादस्य वर्त्मन्येव ता इति। सुस्मितेत्यादिविशेषणद्वयं तत्राप्यतिशयद्योतकं तथा सायं आ सम्यक् वन्यवेशादिना उत्तमप्रकारेण व्रजं प्रविशतश्च तत्रापि गोभिः सममित्यादिकं सर्वं योज्यम् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वत विस्मये खेदे वा। व्रजभुवो व्रजसम्बन्धिन्यो भूमय एव पुण्याः परमधन्याः। न त्वियं महापुर्य्यपि बहुत्वं बहुमानाद्वृहत्त्वाद्वा, पुराणः—अनादिः पुरुषोऽन्तर्य्यामी स चासौ स च, यद्वा, पुराणपुरुष आदिनारायणोऽपि, अत एव श्रीशिवमहालक्ष्मीभ्यां भक्त्या सेविताङ्घ्रिरपि नृलिंगेन नराकारेण गूढोऽलक्षितः सन्, यद्वा, नुरिव लिंगं यस्य स चासौ गूढश्च कंसवञ्चनाद्यर्थमप्रकटितवैभवः सन्, किंवा क्रीडाविशेषेण निकुञ्जादावन्तर्हितः सन् तथा वनसम्बन्धीनि चित्राण्यद्भुतानि विविधानि वा माल्यानि यस्य तथाभूतः सन्, सहबलः सदा श्रीबलदेवेन सहितः, एवं मुष्टिकेन सह युद्धे श्रमादिमननात्तस्यापि तत्रापि च सुखक्रीडाभिप्रेता, यद्वा, बलं सैन्यम्, गोपवर्गसहित इत्यर्थः। विक्रीडा विविधगोपक्रीडा विचित्ररासादिर्वा, स्पष्टतया तदनुक्तिर्लज्जया प्रेममोहशंकया वा, तया कृत्वा अञ्चतीति वर्त्तमाननिर्देशः, तत्र पुनः प्रयाणसम्भावनया, यद्वा, कदापि तत्त्वतस्तदपरित्यागादिति व्रजे नित्यलीला सूचिता। एवमग्रेऽप्यूह्यम्, अन्यत्तैर्व्याख्यातम्। अथवा व्रजे भवन्ति जायन्त इति व्रजभुवे गोप्य एव पुण्याः, न तु वयं नागर्य्योऽपि, यत्तया अञ्चति सम्मानयति, यद्वा, गच्छति उपभुङ्क्ते, विक्रीडया विचित्रकामकरणैरित्यर्थः। यद्वा, व्रजभुवः सर्वे तत्रत्या वन्या अपि चराचराः, न त्वत्रत्या यादवादय इत्यर्थः। अयं भावः—शास्त्रपराणामेषां क्षत्रियादीनां पुराणपुरुषत्वादिज्ञानेन भयगौरवाद्युत्पत्त्या न तादृशी प्रेमसम्पत्तिर्घटते। तत्रात्यानान्तु श्रीनन्दनन्दनत्वाज्ञानेन नराकारत्वादिदृष्ट्या विशुद्धभावोदय एव पश्चाद्वास्यात्र निवासेनैषामपि विशुद्धभावो घटताम्, तथापि तादृशभावविशेषसम्पादकं वनचित्रमाल्यत्वमत्रास्य कथमस्तु, कुतो वा गोपालनं गोपकुमारकुलसाहित्यं वेणुवादनं रासादिक्रीडा च, अतस्त एव पुण्या न चैत इति। यद्वा, गिरेः श्रीगोवर्द्धनात्त्रायते तद्धारणसमये प्रेमकटाक्षादिना परिश्रमाच्छ्रीकृष्णं रक्षतीति गिरित्रा, सा चासौ रमा च राधा, लक्ष्म्यवतारत्वात्, किंवा गिरिणा तेनैव व्रजं त्रायत इति गिरित्रः श्रीकृष्णस्तद्रमणाद्रमा श्रीराधैवेत्यर्थः। तया प्रेम्णा सेविताङ्घ्रिरिति तादृशत्वं चात्र कथं सम्भवेत् ॥ १३ ॥ तपो भाग्यं पुण्यविशेषं वा, किं कतरत्,—प्रसिद्धतपसस्तादृशफलासिद्धया तत्त्वाज्ञानात्। अमुष्येति साक्षात्त्वेऽपि परोक्षवदुक्तिः, तत्रास्य पूर्वस्थितिस्मरणात्, यद्वा, एतस्येत्यर्थः। असमोदूर्ध्वम्-असममवतारेषु अनूदूर्ध्वञ्च,—अवतारिण्यपि तादृशत्वाभावात्। पिबन्ति परमप्रीत्या साक्षात् पश्यन्ति लक्ष्म्यादिभिर्दुर्लभमपि। श्रियः सर्व्वशोभायाः, त्रयाणामेषां यथोत्तरं श्रेष्ठ्यम्। ईश्वरस्येति पाठे परमेश्वरतया तस्य दुर्लभत्वमुक्तम्, यद्वा, निजाशेषैश्वर्य्यप्रकटनपरस्येति तत्र तत्रायं हेतुर्द्रष्टव्यः। एवं लोकनिन्द्यत्वादुर्भगत्वास्वातन्त्र्यादयः स्त्रीणां वैराग्यहेतवो दोषा निरस्ताः गुणादिभिश्च परमोत्तमातोक्ता, अन्यत्तैर्व्याख्यातम्। तत्र सौन्दर्य्यमिति लेख्यऽप्यंगमिति लेखकभ्रमात्, अन्यथा किं चेत्यस्य तदपीत्यादिश्चासंगतिरिति। यद्वा, न विद्यतेऽवतारावतार्य्यादिषु समं यस्य, तच्च तत्, अत एवोदूर्ध्वञ्च सर्व्वतोऽधिकं परमश्रेष्ठ्यान्त्यकाष्ठाप्राप्तमित्यर्थः। अत एव नान्यस्मिन् कस्मिंश्चित् पुरुषे काले वा सिद्धम्। अत एवोक्तं श्रीमदुद्धवेन (भा० ३।२।१२) 'विस्मापनं स्वस्य च' इति। यद्वा, आस्तामनेन सह सम्भोगवार्त्ता, व्रजेऽस्य दर्शनमात्रेणापि परमधन्यतेत्याशयेनाहुः। गोप्य इति। वन्या अपि, अन्यत् समानम् ॥ १४ ॥ अवहननं तुषापकरणम्, उपलेपो गृहादिलेपनं कुंकुमादिना सांगानुलेपनं वा, प्रेङ्खेङ्खनं स्वस्यारोहणे अर्भकस्य वा, मार्ज्जनं रज आदिशोधनम्, आदि-शब्दात् पचनचित्रणादीनीति देहदैहिकार्थकर्म्माण्युक्तानि। चकार उक्तसमुच्चये, तत्र तत्र पश्यन्त्यपीत्यर्थः। एतानि च कर्म्माणि तासां प्रायस्तद्गानार्थमेवेति गानस्य सम्यक् सिद्धिरभिप्रेता। यद्यप्यन्योऽन्यं तद्वार्त्तादिकमपि कुर्वन्ति, तथापि गायन्तीति भगवत्परितोषणे विरहार्त्तिनिस्तारणे च गानस्यैव प्राधान्यात्, तच्च गानं परमप्रेम्णैवेत्याहुः अन्वित्यादिना। व्रजस्यापि स्त्रियः, वन्या अपीत्यर्थः। वस्तुतस्तु व्रजस्त्रीत्वेनैव परमधन्यत्वयोग्यता सूचिता, उरुक्रमो महाचित्ताक्रमको भगवान्, तादृशगानासम्भवाद्वयमधन्या एवेति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, ननु ईदृशगानासक्त्या

तत्तत्कर्म्मासिद्धया तासां श्रीभगवत्परितोषणदेहाद्युपभोगः कथं नाम सिध्यतु ? तत्राहुः—उरुक्रमे महासामर्थ्यवति श्रीभगवति यच्चित्तं तेनैव यानं सर्व्वभोगप्राप्तिर्यासामिति । अन्यत् समानम् । यद्वा, अश्रुकण्ठ्यो रोदनपराश्च भवन्ति, कुतः ? अनुरक्तधियः, उरुक्रमेण महावेगेन चित्तस्य यानं श्रीभगवति प्रयाणं यासाम्, पाठान्तरेऽपि स एवार्थः ॥ १५ ॥ ननु कंसवधानन्तरमत्रास्य प्रभुत्वेनास्माकमप्यचिरात्तादृशगानादिकं सम्भवेदिति चेत्तत्राहुः—प्रातरिति । व्रजतः श्रीवृन्दावनं गच्छतः, गोभिरित्युपलक्षणम्, गोपवर्गैश्च गमम्, वेणुमित्यस्योभयत्राप्यन्वयः, वेणुं क्वणयतो वादयतः, अत एव वेणुं तन्नादं निशम्य, अयं तूर्ण-निर्गमे हेतुः । वेणुसम्बन्धाच्छ्रीमुखस्य शोभाविशेषोऽपि सूचितः । यद्वा, क्वणयतो नूपुरादिशब्दं कुर्व्वतः, वेणुं निशम्येति वेणुवादनमुक्तमेव, अबला वेणुनादेन सततप्रेमभरेणैव वा देहादिसामर्थ्यहीनाः, अत इतस्ततः प्रस्खलन्त्य इति भावः । यद्वा, अस्य संगे गन्तुमशक्ताः अतोऽस्य बर्त्मनि स्थिताः, भूरि पुण्यं भाग्यं यासां ताः । सस्मितेत्यादि बिशेषणद्वयं स्वरूपनिर्द्देशमात्रम्, न तु व्यवच्छेदात्मक कदाचिदपि तद्राहित्याभावात् । यद्वा, तदानीं मल्लयुद्धे क्रोधाभिव्यञ्जनेन तदव्यक्तेः, यद्वा, दैन्येन पश्चादप्यात्मनि वदसम्भावनया एवं व्रजनाद्विच्छेदे चित्तावेशेन प्रेमभरोदयाद्दर्शनस्य परमोत्कण्ठापूर्वकत्वात् सम्यक्त्वमुक्तम् । ननु वनव्रजनेन दर्शनालाभात् किं नाम भूरिपुण्यत्वमित्यत आहुः—सायं 'आ' सम्यग् वन्यवेशादिनोत्तमप्रकारेण व्रजं प्रविशतश्चेति, अत्रापि गोभिः सममित्यादिकं सर्वं योज्यम्, यद्यप्यन्यदापि तत् सन्दर्शनं सम्पद्यत एव, तथापि तन्निर्गमप्रवेशयोरनुव्रजनाभिगमनच्छलेन लोकानामग्रेऽप्यसंकोचेन तत् सिध्यतीति तथा विरहागमोपशमयोरत्यन्तासक्त्या विशेषतस्तं स्यादिति तदानीन्तनं तदुक्तम् । ईदृशमत्रास्य दर्शनमस्माकं न कथमपि सम्भवेदित्यल्पतरपुण्या एव वयमिति भावः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

नृलिङ्गगूढः नरशरीरगूढः गिरित्रो रुद्रः अञ्चति गच्छति ॥ १३ ॥ अनन्यसिद्धं स्वाभाविकम् अनुसवेति अनुसन्ध्यं प्रतिक्षणमित्यर्थः ॥ १४ ॥ प्रेङ्खोलने डोलाविहारे ॥ १५—१७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अपराश्चाहुः । पुण्या इति । स्वयं पुराणपुरुषः श्रीमन्नारायणः सन्नृलिङ्गेन मनुष्यस्येव शरीरेण गूढः तिरोधापितस्वस्वरूपगुणः वन्यानि विचित्राणि माल्यानि यस्य सः गिरित्ररमाभ्यां रुद्रमहालक्ष्मीभ्यामर्चितावङ्घ्री यस्य सः गिरित्रग्रहणं चतुर्मुखादीनामप्युपलक्षणं सहबलः बलरामेण सहितः वेणुं वादयन् गाश्चपालयन् विक्रीडयाञ्चति अटति अयम्भावः धिगिमां सभां यस्यामयं परिभूयते तास्तु व्रजभुवा धन्या यतो यास्वयं श्रीकृष्णो विविधक्रीडया चरतीति ॥ १३ ॥ अहो अल्पपुण्या वयं यतोऽस्माभिरनवसरे अयं दृष्टः गोप्यस्तु बहुपुण्या इत्याहुस्त्रिभिः । गोप्य इति । गोप्यः किन्तपः समाचरन् ताभिराचरितं तपोऽनिर्वचनीयमित्यर्थः । कुतः यद्यस्मादमुष्य श्रीकृष्णस्य रूपमङ्गप्रत्यङ्गलावण्येन सह सारं श्रेष्ठं किञ्चासमोर्ध्वं न सममूर्ध्वमधिकञ्च यस्य तन्निः समाभ्याधिकमित्यर्थः । तदपि नान्येन नाभरणादिना सिद्धं किन्तु स्वत एवाकर्मायत्तं वा किञ्च यशसः श्रियो लक्ष्म्याः ईश्वरस्य भावप्रधानोऽयं निर्देशः ऐश्वर्यस्य च एकान्तधामाव्यभिचारिस्थानं सदाभिनवं दुरापमकृतपुण्यानां चक्षुषापि प्राप्तुमशक्यम् एवंभूतं रूपं याः नेत्रैरनुपिबन्ति पश्यन्तीति ॥ १४ ॥ किञ्च या दोहनादिष्वेनं गायन्ति ता व्रजस्त्रियो धन्याः कथम्भूताः उरुक्रमे चित्तमुरुक्रमचित्तं तदेव यानं सर्वपुरुषार्थप्राप्तिसाधनं यासां ताः पाठान्तरे उरुक्रमं चिन्तयमाना इवेत्यर्थः । कुतोऽनुरक्तधियः तत्र लिङ्गमश्रुकण्ठयः आनन्दाश्रुनिरुद्धकण्ठयः तत्र गोदोहनं गवां दोहनम् अवहननमुलूखलादौ धान्यादिसंस्कारः वहनं जलाद्यानयनं मत्थनं दध्नः उपलेपो गृहाणां लेपनं प्रेङ्खेखङ्नं दोलान्दोलनमर्भरुदितं रुददर्भकसान्त्वनम् उक्षणं सेचनं मार्जनं गृहसंमार्जनम् ॥ १५ ॥ अपि च प्रातरिति । या अबलाःगोभिः सह प्रातर्व्रजान्निर्गच्छतः ततः सायमाविशतश्च वेणुं क्वणयतस्तस्य वेणुरवमाकर्ण्य गृहात्तूर्णंनिर्गत्य पथि तस्य सदयोऽवलोको यस्मिंस्तद्युक्तं मुखं पश्यन्ति ता भूरिपुण्याः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नृणां लिङ्गेन लक्षणेन गूढः छन्नः अयं कृष्णनामा पुराणपुरुषः यद्यासु व्रजभूमिषु विक्रीडया क्रीडेच्छया अञ्चति गच्छति पादाभ्यामिति शेषः । गाश्चारयन् गिरावञ्चति च ता व्रजभुवः स गिरिश्च पुण्याः पावनाः बत आश्चर्यावधेः स्थितिः किम्विशिष्टः विद्यमानानि विचित्राणि नानावर्णानि माल्यानि पुष्पाणि यस्य स तथा गिरावमरैर्देवैरर्चिताङ्घ्रिः व्रजभुवि अमरैरमलैः शुद्धान्तः करणैर्गोपालैरर्चितश्रीचरणः ॥ १३ ॥ अमुष्येश्वरस्य यल्लावण्यसारमथनोत्थ शृङ्गाररसमथनादुत्पन्नं नचेदं कृत्रिममित्याह । अनन्यसिद्धमिति । अन्यस्मात्प्रकृतेर्जातं न भवतीति अन्येषामविद्यमानं वा अनुसव प्रतिक्षणम् अभिनवं नूतन ज्ञानमन्तरेण दुष्प्रापं श्रियो यशसश्चैकान्तधाम यतस्थानरूपं द्रव्याश्रयलक्षणगुणं तद्याः दृग्भिः पिबन्ति ता गोप्यः किन्तपः अचरन् चक्रुरित्यन्वयः ॥ १४ ॥ या गोप्यो गोदोहनादावेनं कृष्णं गायन्ति ता गोकुलस्त्रियः पुण्या इत्यन्वयः । अवहनने व्रीहिताडनकाले दधिमन्थनवेलायाम् उत्थजल्पे मिथःसम्भाषणसमये उपलेप इतिकेचित्पठन्ति गोमयादिना स्थललेपनकाले प्रेङ्खेङ्खने दोला-

चलनकाले अर्भरुदिते बालरोदनकाले उक्षणे प्राङ्गणसेचनसमये मज्जने स्नानकाले मार्जन इति केचित् आदिशब्देन स्खलनपतनादिकं गृह्यते उरुक्रमचित्ते यामः कालविशेषो यासां तास्तथा उरुक्रमचित्तेन गतो यामो यासां ता इति वा ॥ १५ ॥ वेणुरवं निशम्य व्रजान्निर्गत्य पथि स्थित्वा ॥ १६—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथ काश्चित् यज्ञपत्नीसवासनास्ता एव वा तदवाप्तिसन्तापस्फुरिततदैश्वर्यज्ञानाः महाप्रेमवत्यो दृश्यमानां तामनीतिमसहमाना व्रजभुवस्तत्रत्यजनांश्च स्तुवाना मथुरायास्तद्वासिनां च निन्दामभिव्यञ्जयन्ति। पुण्या इति। वत विस्मये यत् यासु नृलिङ्गेन स्वस्वरूपलक्षणेनापि बहिरङ्गजनैर्ज्ञातुमशक्यत्वात् गूढः विविधया स्वमनोरथोत्थया क्रीडया अञ्चति भ्रमति तेन धिगिमां मथुरापुरीं यतोऽस्यामस्यैतादृशो दुखातिशयस्तं चात्रत्या जनाः पश्यन्ति तास्तु वनभूमयोऽपि धन्या एव यास्वस्य वेणुवादनादिविविधक्रीडानन्दः तं च तत्रत्याः सानन्दं पश्यन्तीति द्योतितम् अत्राञ्चतीति वर्तमानप्रयोगस्तासां तत्रैव पुनः कृष्णगमनाभिप्रायात् वस्तुतस्तु यथार्थैव भारतीयं तन्मुखेभ्यो निःसृता लीलानां नित्यत्वस्य स्थापितत्वात् स्थापयिष्यमाणत्वाच्च ॥ १३ ॥ हन्त हन्त महासुकृतिन एव व्रजभूमिषूत्पद्यन्ते तेष्वपि गोपीजनाः अतिश्रेष्ठा इत्याहुः। गोप्य इति। किमचरन्निति। भोः सख्यः तत् तपः यदि यूयं सर्वज्ञस्य कस्यचिन्मुखात् जानीथ तदा ब्रूत यथा तदेवास्मिन् जन्मनि कृत्वा व्रजभूमौ गोप्यो भवेम यत् यतस्ता अमुष्य रूपं सौन्दर्य्यामृतं पिबन्ति वयं तु मथुरास्था अस्य पराभवविषं पीत्वा आनखशिखं ज्वलाम इति भावः। तासां दृग्भिः पानस्यैव तादृशतपःफलत्वमुक्त्वा स्वाङ्गैरालिङ्गनादेस्त्वनिर्वाच्यहेतुकत्वं ज्ञापितं किं चास्यरूपे लावण्यमधिकं वर्त्तत इत्यत उपादीयते इति न वाच्यं किं तु लावण्यसारं लावण्यस्यापि यः सारस्तत्स्वरूपमेवैतत् ननु स्वर्लोकादिभ्योऽपि न्यूने भूर्लोकेऽस्मिंश्चेदेवं रूपं दृश्यते तर्हि सर्वतः श्रेष्ठे महावैकुण्ठलोके इतोऽप्यधिमकधुरं श्रीनारायणस्य रूपं भवेदिति तत्राहुः। असमोर्ध्वम् एतद्रूपस्य सममेव रूपं क्वापि नास्ति किमुताधिकमिति भावः। ननु तर्हि कृष्णेनैतद्रूपं कुतः सकाशात् प्राप्तं तत्राहुः। अनन्यसिद्धमस्मिन्नेतत् स्वाभाविकमित्यर्थः। नन्वेवमप्येतद्रूपं ताः सदैकरूपत्वेन पश्यन्ति चेत्तदापि तासां नासकृच्चमत्कारः स्यात्तत्राहुः। अनुसवाभिनवं प्रतिक्षणे नूतनम् एवं चेत्तर्हि तत्रैव गत्वा अन्यदेशीयाभिरपि स्त्रीभिः सुखेनायं दृश्यतामित्यत आहुर्दुरापं लक्ष्म्यापि दुर्ल्लभं ननु भवतु नामास्य सौन्दर्य्योपाधिक एव सर्वोत्कर्षः श्रीनारायणादौ तु भगशब्दवाच्यषडैश्वर्य्यमधिकं वर्त्तते तत्राहुः। एकान्तेति। एकान्तेति। यशआद्युपलक्षितानां षण्णाममेव भगानाम् एकान्तधाम अतिशयितमास्पदं ऐश्वरस्य ऐश्वर्य्यस्य ईश्वरस्येत्यपि पाठः ॥ १४ ॥ किं च तासां गृहकर्माण्यपि नैतन्माधुर्य्यपानप्रतिबन्धकानीत्याहुः। या दोहनादिषु एनं गायन्ति चकारात् क्वापि पश्यन्ति चेत्येतन्माधुर्य्यं रसनाभिरपि दृग्भिरपि पिबन्तीति पानाविच्छेद उक्त प्रेङ्खेङ्खनं दोलान्दोलनम् उक्षणं सेचनम् उरुक्रमस्य चित्तं यानं वाहनं यासां ता इत्ययमुरुक्रमोऽपि ब्रह्मादिभिः स्वचित्तेषूह्यमानोऽपि वा स्वयं स्वचित्ते वहतीति तास्वपि कृष्णोऽयमनुरक्तधीरिति तासां सौभाग्यभरो दर्शितः। चिन्तयाना इति पाठे उरुक्रमं चिन्तयन्त्य इत्यर्थः ॥ १५ ॥ प्रातर्व्रजाद्वनं व्रजतः सायं वनाद्व्रजमाविशतः प्रविशतोऽस्य कृष्णस्य वेणुं निशम्य गृहेभ्यो निर्गम्य पथि गवानयनमार्गसमीपोपवनादौ पश्यन्ति सदयः स्वविरहस्विन्नाङ्गीस्ता दृष्ट्वा तदभीष्टवितरणव्यञ्जकानुकम्पासहितोऽवलोको यस्य तम् ॥ १६ ॥

गूढार्थदीपिनी

यत् यासु भूमिषु स बलः अयं श्रीकृष्णः विविधक्रीडया अञ्चति अटतीत्यन्वयः। वर्तमानसामीप्ये भूते लट् किं कुर्वन्। गाः पालयन् वेणुं क्वणयन् वादयन् सन्। वनस्थानि मालाभवानि पुष्पाणि यस्य। गिरित्रः शिवः। नृलिङ्गेन मनुष्यदेहेन। बत हर्षे ॥ १३ ॥ यत् यस्मात् गोप्यः अमुष्य श्रीकृष्णस्य दुर्लभं रूपं दृग्भिः पिबन्तीत्यन्वयः कथंभूतम्। नास्ति समम् ऊर्ध्वमधिकं च यस्मात् तत् असमोर्ध्वम् अनुसवं प्रतिक्षणं नवीनम् यश आदीनां मुख्यं धाम ॥ १४ ॥ या दोहनादिषु एनं श्रीकृष्णं गायन्ति ता धन्या इत्यन्वयः। कथंभूताः। उरुक्रमे यत् चित्तं तेनैव यानं सर्वविषयप्राप्तिः यासां ताः। अवहननं धान्यकुट्टनम्। प्रेङ्खेङ्खनं दोलान्दोलनम्। उक्षण सेचनम् ॥ १५ ॥ या अबला क्वणयतो वादयतः अस्य वेणुरवं निशम्य गृहात् तूर्णं निष्क्रम्य पथि तस्य सस्मित मुख पश्यन्ति ताः भूरिपुण्याः इत्यन्वयः। समं सह ॥ १६–१७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सुज्ञाततत्त्वा आहुः। पुण्या इति चतुर्भिः। नृलिङ्गगूढः नृणां ब्रह्मादिमत्कुणपर्य्यन्तानां लिङ्गेषु देहेषु गूढः सर्वव्यापक इत्यर्थः। यत्तु नृलिङ्गेन मनुष्यदेहेन गूढ इति तन्न असमोर्ध्वमनन्यसिद्धम् एकान्तधाम यशसः श्रिय ईश्वरस्य अत्मानमप्युचयापचयौ न यस्येत्यादि वक्ष्यमाणवचनविरोधात् एवम्भूतः पुरापि नवश्चासौ पुरुषश्च सोऽयं कृष्णः वनानि वन्यानि चित्राणि नानाविधानि माल्यानि यस्य सः गिरित्ररमाभ्यामर्चितावङ्घ्री यस्य सः यासु विक्रीडया हेतुभूतया अञ्चति गच्छति ताः व्रजभुवो धन्याः अत्रत्यास्त्वेनङ्कोपयित्वा सराजकाः चाणूरादयो परिष्यन्ति न रामकृष्णयोः किञ्चिदप्यकारं करिष्यन्तीति भावः ॥ १३ ॥ अतएव व्रजगताः गोप्यः सुकृतिन्य इत्याहुः। गोप्य इत्यादित्रिभिः। अहो गोप्यः किमद्भुतं तपः आचरन् यत्

येन तपः आचरणेन अमुष्य श्रीकृष्णस्येश्वरस्य सर्वनियन्तुः रूपं श्रीमन्मङ्गलविग्रहं लावण्येन सह सारं श्रेष्ठम् असमोर्ध्वम् निःसमानाधिकम् अनन्यसिद्धम् अन्यसिद्धं कर्मजन्यं प्राकृतरूपं तद्भिन्नमनन्यसिद्धमप्राकृतमित्यर्थः। तत एव अनुसवाभिनवं सर्वदा नूतनम् अतएव यशसः श्रियः महालक्ष्म्याश्च एकान्तधाम अव्यभिचारिस्थानम् दृग्भिः पिबन्ति ॥ १४ ॥ किञ्च अनुरक्तधियः श्रीकृष्णासक्तबुद्धयः अतएव उरुक्रमचिन्तयानाः उरुक्रमं चिन्तयन्त्यः अतएवाश्रुमुख्यः याः दोहनादिषु एनं श्रीकृष्णं गायन्ति प्रेङ्खेङ्खनं दोलान्दोलनम् उक्षणं सेचनम् ॥ १५ ॥ क्वणयतः वादयतः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वनितास्ता एवमलवं लवल्लव्योऽनयन्निति धन्या इति श्रुततत्कथाऽनुवदन्त्य आदौ मेदिन्यादिमहिमामाहुः ॥ पुण्या इति। व्रजभुवो गोकुलभूमयो धन्या। तत्र निमित्तमाहुः ॥ यदिति। नृलिङ्गगूढो नृणानि लिङ्गानि लक्षणानि तैर्गूढश्छन्नोऽप्रकाशितलक्षणोऽयं साक्षान्नारायणात्मा वनचित्रमाल्यः सहबलो वेणुं क्वणयंश्च यासु भूषु विक्रीड्य स्वलीलयाऽञ्चति गच्छति तथा गिरौ पर्वते चेति त एते धन्याः। किं तन्महत्त्वमित्यत आहुः ॥ अमरैर्देवैरर्चितावङ्घ्री यस्य सोऽपीति। बताश्चर्यं। अयं तच्छुभदैवं निमित्तीकृत्यैवाञ्चतीति वा। वनचित्रमाल्य इत्यत्र चित्रं वनमाल्यं यस्येति योग्यतयाऽन्वयः। गाश्चारयन्निति जातिस्वभावोक्तिः। वेदवाणीश्चारयंस्त्वविषये प्रवर्तयन्नपीत्वन्तरार्थः। भुवः पुण्याः किमधिकोक्त्या त्वं व्रजेत्येकामुद्दिश्य वदन्तीति वा ॥ १३ ॥ गोप्योऽभीरनार्यो यद्यतो लावण्यसारमथनोत्थं सौन्दर्यरसमथनेनोत्थमाविर्भूतं तर्हि केन कृतमित्यतः स्वापराधोपरोधं तन्वङ्ग्यस्तन्वन्ति ॥ अनन्यसिद्धमिति। सहजं। अनेन सञ्चीय सौन्दर्यरसान्समग्रानमुं विधाता व्यधितेति मिथ्या। हे सख्यः सोत्प्रेक्षा न प्रेक्षापूर्वोक्तिरिति दध्वनुः। यशसः श्रियश्चैकान्तधाम मुख्याश्रयमीश्वरस्य रूपमनुसवाभिनवं तद्गतश्रीविवक्षया मुख्यम्। नवनवसु विशेषोपलम्भेत्यादेः। अमुख्यं चैतद्विवक्षयेति ज्ञेयम्। दृग्भिः पिबन्ति। ततः किमेतत्सम्पत्प्रापकं तपः पूर्वमाचरंश्चक्रुः ॥ १४ ॥ या दोहने क्षीरक्षारणकालेऽवहनने व्रीह्याद्यकुट्टने मथनं दध्नः। उपलेपेति पाठे गन्धलेपनमुपलेपो गोमयतो गृहलेपनं। उपजल्पेति जल्पने। उपजल्पः परस्परसंवादः प्रेङ्खाया डोलाया इङ्खनं तत इतश्चालनं बालानां तथाऽर्भाणामर्भकाणां रुदितं तत्समाधानमुक्षणमङ्गणजलसेचनं मज्जनं स्नानं चेत्यादिर्यत्सर्वत्रकालो ग्राह्यः। तत्समयेऽनुरक्तधिय आसक्तमतयोऽश्रुकण्ठ्य आनन्दजलकलिलकण्ठ्य उरुक्रमे भगवति चित्तस्य यामो गमनं यासां ता उरुक्रमचित्तेनैव यामः कालो यासां ता इति वा। एनं गायन्तीति व्रजस्त्रियः पुण्यास्तद्वत्यः। आदिशब्देन तत्सर्ववृत्तयो ग्राह्याः। प्रेङ्खा डोला च गमनमिति वचनात्। प्रेङ्खा पर्यटने नृत्ये भवेदश्वगतावपीति विश्वात्प्रेङ्खा नटनमिङ्खनं गतिरिति वा। यादसा जलजन्तुना हने नन्दनयने तत्समये इति वा। उरुर्महान्क्रमः पादविक्षेपो द्रुतगमनमिति यावत् तस्मिंश्चित्तं येषां ते उरुक्रमचिता यामा यमसम्बन्धिनो दूता यासां ता उरु ता उरुक्रमचित्तयामा अत एव पुण्याः ॥ १५ ॥ प्रातर्व्रजाद्व्रजतः सायं गोभिः समं चाद्व्रजतः क्वणयतोऽस्य वेणुं निशम्य चाबलास्तूर्णं सत्त्वरं निर्गत्य पथि मार्गे सस्मितं मुखं दयावलोकसहितं पश्यन्ति यास्ता भूरिपुण्याः। हे सदय स्वामिन् लोकमवेति भावगर्भं पश्यन्ति यास्ता इति वा सत्समीचीनमयावलोकम्। अये शुभावहे देवे सति। अवलोको यस्य तदिति वा ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं स्नेहवशादश्रान्तेऽपि भगवति श्रमं मत्वा अनवसरे भगवानस्माभिर्दृष्ट इति स्वभाग्यं विगर्हयन्त्यः गोकुलवासिनां भाग्यमभिनन्दन्ति। पुण्या बत इति चतुर्भिः। आदौ भूमिमभिनन्दन्ति पश्चात् स्त्रियः आदौ व्रजभुव एव धन्याः यदयं नृलिङ्गेन कपटमानुषवेषेण गूढः सन् स्वयं पुराणपुरुषोऽपि वनचित्रमालायुक्तश्च तत्रत्याः गाः पालयन् ससहायोऽपि तत्परः बलभद्रसहितः विक्रीडयैव विशेषेण क्रीडार्थमेव अञ्चति व्रजभुवं गच्छति वा स्वयं तु गिरित्रेण रमया च अर्चितौ अङ्घ्री यस्य भूमिः स्वभावतः पुण्या भवति यद्यपि मथुरापि तथा गणिता तथापि मथुरामण्डले व्रजभुव एव पुण्याः पुण्यं हि सुखफलं भवति निरन्तरं तत्रत्यानां सुखानुभवात् अत्र तु तद्विपरीता इति बतेति हर्षे एतादृशमपि लोके स्थानं भवतीति गोप्यस्य हि क्रीडासुखदायिनी अतो भगवतोऽपि गुप्तक्रीडासाधनत्वात् सुखदा भूमिः। पुराणपुरुष इति। तासां स्वरूपज्ञानं दृढमिति ज्ञापितं तथापि श्रमाविर्भावात् स्थलान्तरप्रशंसैव गुप्तश्च सर्वैश्वर्यवहतुं शक्यते तथात्वेन नियामकमप्याहुः। वनस्थानामपि चित्रमाल्यानां धारक इति। गाः पालयन्निति सुतरां गौणभावाश्रयणात् स्वच्छन्दलीला संपद्यते बाधकनिराकरणार्थं ससहायोऽपि रसोद्बोधनार्थं रक्षकदेवोद्बोधनार्थं वा दिनेऽपि परमानन्दानुभवार्थं च वेणुक्वणनं चकारात् नानाविधां च लीलां कुर्वन् भूमेः पूजने तत्रत्यानपि पूजयन्तीति स्वच्छन्दलीलायामतिक्रमेऽपि नापराधो भवति अन्यत्र गुप्ताभावे स्वस्य नेष्टं गुप्तत्वे तु चाणूरादीनामतिक्रम इति उभयथाप्यत्र दुःखं न च गोकुले स्वरूपप्रच्युत एव तिष्ठतीति शङ्कनीयं यतस्तत्र स्थितमपि महादेवो लक्ष्मीश्च पूजयति स हि पशुपतिः तदीयानां पशूनां पालानां भगवान् रक्षक इति स्वमपराधी च पूजनया स्वापराधं दूरीकरोति महांश्चेत् स्वकार्यं करोति तदा हीनो लज्जते अतः पूजयति अन्यथा गोवर्द्धनोद्धरणे इन्द्रस्यापकारं कुर्यात् गोवर्द्धनं वा विशकलितं स हि यथास्थितान् पर्वतान् पालयति सुदर्शनस्यापि मोक्षं नाङ्गीकुर्यात् अतः सेवकत्वेनैव तस्य व्यवहारो दृश्यन्ते लक्ष्मीः पुनः सर्वस्त्रीमूलप्रकृतिः तद्वैभवरूपा गोप्यः तासामपि कृपां

करोतीति अथवा महादेवो भगवति पशुपालने क्रियमाणे तस्य पालनं गमिष्यतीति रमा च गोपिकासु स्थितासु आदरो गमिष्यतीति ॥ १३ ॥ एवं भूमिमभिनन्द्य गोपिकाभिनन्दनमाहुः त्रिभिः । गोप्यस्तपः किमचरन्निति । भगवतो रूपं यादृशं ध्येयं तादृशं यतः पश्यन्ति भगवन्तमेव च गायन्ति तदासक्ताश्च तिष्ठन्तीति न ह्येतत्त्रयं स्वल्पतपसा प्रसिद्धतपसा वा भवति अन्यथा अन्येषामपि स्यात् अतो न ज्ञायते किं वा तपस्ताभिः कृतमिति यद्यप्यस्माभिरपि 'भगवद्रूपं दृश्यते तथापि अमुष्यैतद्रूपं लावण्यमेव सारभूतं यत्र केवलं लावण्यमेव तत्र प्रकाशते लावण्यस्यापि वा सारम् इदानीं तु क्रोधाद्याविर्भावात् अवस्थया तिरोहितमिव प्रतिभाति किं च असमोर्ध्वं न सममूर्ध्वं च यस्मात् तासां हि दृष्टौ भगवानेक एव प्रतिभाति अत्र तु दुष्टः सम्बन्धी चाणूरादिरपि दृश्यते ऊर्ध्वता च कंसादेः मञ्चस्थितत्वात् प्रतीयते किं च अनन्यसिद्धं स लावण्यरसः केवलं भगवत्येव सिद्धः अन्यथा भुञ्यन्येऽपि भाग्ययुक्ता भवेयुः अतस्तादृशामृतपानं तपसा विना न भवतीति अवश्यं तपस्ताभिः कृतमिति सिद्धम् । किं च दृग्भिः पिबन्ति दूरादपि पातुं शक्यते दृशा तत्रापि न नाविधैः अलसवलितादिभिः पानमनेन सर्वोऽपि रमणप्रकारस्तासां सूचितः चर्वितचर्वणत्वव्यावृत्त्यर्थमाहुः । अनुसवाभिनवमिति । अनुसवं प्रतिक्षणं नूतनमेव भवति पूर्वानुभूतरसादुत्कृष्टं नापि तत्सर्वसुलभमित्याहुः । दुरापमिति । सर्वेषामेव दुःखेनापि प्राप्तुमशक्यं तासां त्वयत्नसिद्धं जातमिति । ननु केवलं भोग एव भगवता सिद्ध इति कथं सर्वोत्कृष्टता यद्वि सर्वमेव फलं साधयति तत्सर्वोत्तममिति चेत्तत्राहुः । एकान्तधामेति भोगस्त्वैहिकपारलौकिकः सर्वोत्कृष्ट इति वीर्यस्य न पृथगुपयोगः ज्ञानवैराग्ययोश्च अतस्त्रयमेवावशिष्यते यशः श्रीः ऐश्वर्यं चेति तेषामेकान्ततः भगवल्लावण्यामृतमेव धाम तस्मिन् प्राप्ते ऐश्वर्यादिकं सर्वं सिध्यतीति न भोगमात्रपरत्वम् दृश्वर्यमिति भावे अत्र चकारादपेक्षितानामपि ज्ञानवैराग्यादीनां ग्रहणम् ॥ १४ ॥ ननु सर्वोत्तमा भगवद्भक्तिः तासां तु कामः प्रधानमिति का स्तुतिरिति चेत्तत्राहुः । या दोहन इति । दोहनं सायं प्रभातं वा ततः अवहननं ततो मथनं दध्नः प्रातरवलेपनं च एतच्चतुष्टयं गृहकार्यं व्रजस्त्रीणां सहजं सर्वासां ततः प्रेङ्खेङ्खनं दोलयान्दोलनं विद्यमानबालकानामर्भरुदितं बालकरोदनम् उक्षणं सेचनं वृक्षादिषु सूक्ष्मेषु तुलस्यादिषु वा मार्ज्जनं प्राङ्गणादेः एतेषु एनं भगवन्तं गायन्ति चकारात् स्मरन्ति भावयन्ति तदर्थमेव च कुर्वन्ति धर्मपरा अपि तत्कुर्वन्ति इति तद्व्यावृत्त्यर्थमाहुः । अनुरक्तधिय इति । अनुरक्ता धीर्यासाम् अनुरागमात्रेण न भक्तिर्भवति उत्कटभावाभावात् लौकिकप्रेमवतां धर्ममार्गेऽपि तथात्वादित्यत आहुः । अश्रुकण्ठ्य इति । अश्रूणि नेत्रयोः गद्गदकण्ठता च तदुभयं निर्दिष्टम् अथवा नेत्रयोः श्रवणाभावात् अन्तर्दृष्टीनामश्रूणि कण्ठ एव समागतानीति तथोक्तवत्यः अतः सर्वभावेन प्रपन्नाः फलं च प्राप्नुवन्तीति व्रजस्त्रियो धन्याः किं च उरुक्रमचिन्तयानाः न केवलं यदा कदाचिदेव तासामेवं भावः किं तु सर्वदेति वक्तुं सर्वदैवोरुक्रमं चिन्तयानाः उपक्रमं चिन्तयन्ति ॥ १५ ॥ किं च एतादृश्योऽपि न केवलं योगिवत् साक्षात्काररहिताः किं तु तपस्विन इव वरदानार्थमागतं भगवन्तं सर्वदैव पश्यन्तीत्याहुः । प्रातर्व्रजाद्व्रजत इति । गूढास्तु लीलाः ताभिर्न ज्ञायन्त इति भगवद्दर्शनं सायं प्रातरेवेत्याहुः । प्रातः काले गाः नीत्वा व्रजाद्व्रजतः सायं काले च व्रजमाविशतः चकारादन्यदपि यदृच्छया आगच्छतः अन्याश्च दर्शनावस्थाः सर्वा एव सङ्गृहीताः गोभिः सममिति पालयमानानामानयनमावश्यकमिति निर्भयार्थं च न हि वेदबोधिते पदार्थे कस्यचिदपि शङ्का भवति किं च वेणुं क्वणयत इति । यथाचित्तमपहृतं भवति तथा वेणुनादं करोति तेन सद्भावाः सर्वे भगवद्विषयका आविर्भवन्ति अन्ये तु तिरोभवन्ति अतस्तस्य वेणुनादं निशम्य तूर्णं गृहान्निर्गताः पथि मार्ग एव भगवन्तं पश्यन्ति योगिनो हि समागते भगवति पश्यन्ति । एतास्तु अर्द्धसमागत एवेति विशेषः । अतो भूरिपुण्याः अबला इति तासां दोषाभावो भूरिपुण्यत्वे हेतुरुक्तः किं च सस्मितं मुखं पश्यन्ति अन्तरानन्दभाविर्भावयत् तेन यथा भक्तिप्रतिबन्धकमुत्पन्नमपि ज्ञानं निवृत्तं भवति तादृशे प्रेमानन्दमेव प्रयच्छतीति मोक्षादप्यधिकफलमुक्तं कि च सदयावलोकमिति । दयापूर्वकमवलोकनं यस्मिन् न च वक्तव्यं संसारो न निवर्त्तिष्यत इति यतो भगवान् दयया पश्यति कृतार्था एताः कर्त्तव्या इति दयया दोषनिवृत्तिः अवलोकनेन सर्वस्वदानमिति द्वयमुक्तम् अतः स्त्रीणां तादृशभगवल्लीलायां महानेव प्रयास उक्तः ॥ १६ ॥

श्रीसुबोधिनी–सारः

अन्या आहुः । बत हर्ष व्रजभुवः पुण्याः यत् यासु मनुष्यवेषच्छन्नः पुराणपुरुषो हरिः वने चित्राणि माल्यानि यस्य स सहबलो वेणुं क्वणयन् वादयन् गाः पालयन् विविधक्रीडयाऽञ्चति गच्छति गिरित्रः शिवो रमा लक्ष्मीस्ताभ्यां अर्चितौ पूजितावङ्घ्री पादौ यस्य सः ॥ १३ ॥ लावण्येन सारं श्रेष्ठं लावण्यस्य सारो यस्मिन् इति वा न समं तुल्यमूर्ध्वमधिक च यस्य तत् नाऽन्येनाभरणादिना सिद्धं स्वतः सिद्धं यशसः श्रिय ऐश्वरस्यैकान्तं धामाव्यभिचारि गृहं दुराप दुर्लभम् अमुष्य श्रीकृष्णस्य यद्रूपम् अनुसवाभिनवं नित्यनूतनं या दृग्भिः पिबन्ति सादरमवलोकयन्ति ता गोप्यः किं तपोऽकुर्वन् ॥ १४ ॥ दोहने गवाम् अवहनने तण्डुलादेराघाते दध्नो मथने गृहस्योपलेपे प्रेंखेखने दोलांदोलनेऽर्भानां बालानां रुदिते उक्षणे सेचने मार्जने आदिना सभाषणादौ या एनं कृष्णं गायन्ति अनुरक्ता धियो यासां ता अश्रुकंठ्यः उरुक्रमे श्रीकृष्णे चित्तेन यानं प्राप्तिर्यासां ता व्रजस्त्रियो धन्याः ॥१५॥ प्रातः व्रजात् व्रजतो गच्छतः गोभिः समं सह सायं संध्यायामाविशत आगच्छतो वेणुं क्वणयतोऽस्य वेणुं निशम्य वेणुशब्दं श्रुत्वा "विधिनिषेधौ हि सति विशेष्ये बाधे विशेषणमुपसंक्रामते" इति न्यायात् स्वर्गी ध्वस्त इत्यादिवत् तूर्णं शीघ्रं गृहान्निर्गम्य पथि मार्गे स्मितेन सहितं मुखं सदयोऽवलोको यस्मिंस्तत् पश्यंति ता अबलाः स्त्रियो भूरिपुण्या अहो भाग्याः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्या आहुः—पुण्या इति। धिगिमां सभाम् यस्यामयं परिभूयते। व्रजभुवः पुण्याः, यत् यासु अयं श्रीकृष्णः सहबलः बलरामेण सहितः वनसम्बन्धीनि चित्राणि माल्यानि यस्य सः गाः पालयन् चारयन् हर्षेण वेणुं क्वणयन् वादयन् विक्रीडया अञ्चति अटति। 'एतत्पर्यटनेन कथं भूमेरुत्कर्षः?' तत्राहुः—गिरित्ररमाभ्यां महादेवलक्ष्मीभ्यामभ्यर्चिताङ्घ्री यस्य स इति। गिरित्रपदं ब्रह्मादीनामप्युपलक्षणम्। तथाभूतत्वे हेतुमाहः पुराणपुरुष इति। सर्वकारणभूतः पुरुषोत्तम इत्यर्थः। 'तर्हि कथमस्मदादिवत्प्रीयते?' तत्राहुः—नृलिङ्गेन मनुष्यनाट्येन गूढः आच्छादितैश्वर्य इत्यर्थः। 'तामसानामाभीराणामावासत्वे व्रजस्योत्कर्षः, राजसाद्यावासत्वेऽपि मथुराया अपकर्षः' इत्याश्चर्यं द्योतयन्ति—बतेति ॥ १३ ॥ "अहो अल्पपुण्या वयम्, यतोऽस्माभिरनवसरेऽभिभूयमानो दृष्टः गोप्यस्तु बहुपुण्या। गोप्य इति।" गोप्यः किं तपः समाचरन्? ताभिराचरितं तपोऽनिर्वचनीयमित्यर्थः। कुतः यस्मात् अमुष्य श्रीकृष्णस्य रूपं दृग्भिर्नेत्रैः पिबन्ति अत्यासक्त्या पश्यतीन्त्यन्यः। 'एतद्रूपदर्शनेन कथं तासां तपोऽनुमानम्?' इत्यपेक्षायां तदनुमापकत्वे रूपस्यालौकिकत्वं हेतुं दर्शयन् विशिनष्टि—दुरापं अकृतपुण्यानां द्रष्टुमपि दुर्लभमित्यर्थः। तत्र हेतुः—असमोर्ध्वमिति। नास्ति सममूर्ध्वमधिकं च यस्य तत्। तत्रापि अनुसवं सर्वदा अभिनवम्। यशसः श्रियः लक्ष्म्या ईश्वरस्येति भावप्रधानो निर्देशः ऐश्वर्यस्य च एकान्तधाम अव्यभिचारिस्थानम्। किं बहुना? लावण्यस्य सौन्दर्यस्य सारम्। तत्र हेतुः—अनन्यसिद्धं स्वेच्छया गृहीतम् नतु कर्माधीनमिति ॥ १४ ॥ किञ्च या दोहनादिष्वेनं कृष्णं गायन्ति ता व्रजस्त्रियो धन्याः कृतार्था इत्यन्वयः। तत्र तद्गाने हेतुमाहुः—उरुक्रमे बहुलीलाविशिष्टेऽस्मिन् चित्तं उरुक्रमचित्तं तेन सहैव यानं क्षेमादिषु प्रवृत्तिर्यासां ताः। 'उरुक्रमं चिन्तयाना' इति पाठान्तरम्। तत्र हेतुमाहुः—अनुरक्तधिय इति। तत्र लिङ्गमाहुः—अश्रुकण्ठ्य इति, आनन्दाश्रुनिरुद्धकण्ठ्यः। तत्र दोहनं गवाम्, अवहननं व्रीह्यादेः, मथनं नवनीतादेः, उपलेपो गृहाणाम्, प्रेङ्खेङ्खनं दोलान्दोलनम्, अर्भरुदितं रुदद‍र्भकसान्त्वनम्, उक्षणं सेचनं, गृहसम्मार्जनम् ॥ १५ ॥ अपि च प्रातरिति। या अबलाः गोभिः सह प्रातर्व्रजान्निर्गच्छतः सायं व्रजमाविशतश्च वेणुं क्वणयतोऽस्य वेणुं रवमाकर्ण्य गृहात्तूर्णं निर्गत्य पथि तस्य सदयावलोको यस्मिंस्तत्स्मितयुक्तं मुखं षश्वन्ति ता भूरिपुण्या इत्यन्वयः ॥ १६ ॥

अन्वितार्थप्रकाशिका

पुण्या इति ॥ वत आश्चर्य। व्रजभुवः पुण्याः यत् तासु नृलिङ्गेन मनुष्यनाट्येन गूढः आच्छादितैश्वर्यः पुराणपुरुषः गिरित्ररमाभ्यां शिवलक्ष्मीभ्यामर्चिताङ्घ्री यस्य सोऽयं श्रीकृष्णः सहबलः रामेण सहितः वनसंबन्धीनि चित्राणि माल्यानि यस्य सः गाः पालयन् चारयन् हर्षेण वेणुं क्वणयन्वादयन। क्वणेर्मित्त्वमार्षम्। विक्रीडया अञ्चति अटति। अतो धिगिमां सभां यस्यामयं पराभूयते व्रजभुवस्तु धन्याः। अञ्चतोति वर्तमानसामीप्ये भूते लट्। लीलानां नित्यत्वद्योतनार्थं वा ॥ १३ ॥ गोप्य इति ॥ गोप्यः किं तपः समचरन् समाचरन् ताभिराचरितं तपोऽतिशयितमेवास्ति। यस्मात् लावण्यस्य सारम् असमोर्ध्वम् इति नास्ति सममूर्ध्वमधिकं च यस्य तत् अनन्यसिद्धम्। अन्येन आभरणादिना न सिद्धं किन्तु स्वत एव अनुसवं सर्वदा अभिनवं दुरापं दुर्लभं च यशसः श्रियः लक्ष्म्या ऐश्वरस्य ईश्वरसंबन्धिगुणस्य ऐश्वर्यस्य च। ईश्वरस्येति पाठे अमुष्येश्वरस्येत्यन्वयः। एकान्तधाम अव्यभिचारि स्थानम्। अमुष्य कृष्णस्य रूपं दृग्भिर्नेत्रैः पिबन्ति अत्यासक्त्या पश्यन्ति। वयन्त्वल्पपुण्या यदस्माभिरनवसरे दृष्टोऽयम् ॥ १४ ॥ या इति ॥ उरुक्रमे यच्चित्तं तेनैव यानं सर्वविषयप्रवृत्तिर्यासां ताः अनुरक्तधियः अश्रुकण्ठ्यश्च या व्रजस्त्रियः दोहनं गवाम् अवहननं व्रीह्यादेः मथनं नवनीतादेः उपलेपो गृहाणां प्रेङ्खनं दोलान्दोलनम् अर्भरुदितं रुदद‍र्भकसान्त्वनम् उक्षणं सेचनं गृहसंमाजनं तदादिषु कार्येषु एनं कृष्णं गायन्ति ता व्रजस्त्रियो धन्याः कृतार्थाः। उरुक्रमचिन्तयाना इति पाठे उरुक्रमं चिन्तयन्त्यः। समासो मुमभावश्चार्षः ॥ १५ ॥ प्रातरिति ॥ या अबलाः गोभिः सह प्रातर्व्रजान्निर्गच्छतः सायं व्रजमाविशतश्च वेणुं क्वणयतोऽस्य वेणुरवमाकर्ण्य गृहात्तूर्णं निर्गत्य पथि तस्य सदयोऽवलोको यस्मिन् तत्स्मितयुक्तं मुखं पश्यन्ति ता भूरिपुण्याः। क्वणेर्मित्त्वमार्षम् ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अपराः प्राहुः पुण्या इति बत अहो व्रजभुवः पुण्याः धन्याः यत् यासु भूमिषु नृलिंगेन मनुष्यसदृशाकारेण गूढो गुप्तः वने वृन्दावने चित्राणि आश्चर्यजनकानि माल्यानि पंचरंगयुक्तपुष्पाणां मालावृन्दानि यस्य पालयन् चारयन् गिरित्रेण शिवेन रमया चार्चिताङ्घ्री यस्य सः अयं पुराणपुरुषः क्रीडया अंचति गच्छति तस्य दुःखप्रेक्षकां इमां सभां धिगिति भावः एवं श्लोकत्रयेपि योज्यम् ॥ १३ ॥ अहो महद्दुःखमल्पपुण्यानामस्माकमसमये श्रीकृष्णदर्शनं जातं गोप्यस्तु महाभाग्यशालिन्य इत्यूचुः गोप्य इति त्रिभिः लावण्यस्य कांतिसमूहस्य सारभूतं असमोद्ध्र्वं नास्ति समं ऊद्ध्र्वं श्रेष्ठं च यस्य तत् नान्यैरलंकारादिभिः सिद्धं निष्पन्नं किंतु स्वतः सिद्धमेवास्ति ऐश्वरस्यैश्वर्यस्य यशसः श्रियस्तदुपलक्षितानां षण्णां भगानां एकांतधाम अव्यभिचारिपदं ब्रह्मादीनां दुरापं यत् अमुष्य श्रीकृष्णस्य रूपं स्वरूपं अनुसवाभिनवं त्रिकालनूतनं यथा भगवति तथा या दृग्भिः पिबंति ता गोप्यः किं तपः

आचरन् ईश्वरस्येति पाठे तु अमुष्येश्वरस्येत्यन्वयः ॥ १४ ॥ उरुक्रमचिंतयानाः ऊरुक्रमचिंतयांत्य इत्यर्थः अत एव अनुरक्तधियः अश्रुकंठ्यः नेत्रेषु प्राप्तैः प्रेमांशुभिः रुद्धकंठ्य इत्यर्थः याः दोहनादिषु रामकृष्णं गायन्ति ता व्रजयो धन्याः तत्र अवहननं शाल्याः खंडनं प्रेंखस्य इंखनं दोलाया आदोलनं उक्षणं सेचनं मार्जनं स्नपनादि ॥ १५ ॥ गोभिः समं सायंव्रजे आविशतोऽस्य कृष्णस्य वेणुं निशम्य श्रुत्वा या अबलाः गोप्यः तूर्णं शीघ्रं गृहाद्बहिः निर्गम्य पथि सदयावलोकं सस्मितं मुखं पश्यन्ति ताः भूरिपुण्याः धन्या इत्यर्थः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अपराश्चाहुः । पुण्या इति । पुराणपुरुषः स्वयं श्रीनारायणः, नृलिङ्गेन मनुष्यस्येव शरीरप्रदर्शनेन गूढस्तिरोधापितस्वस्वरूपगुणः, वनानि बनजातानि चित्राणि विचित्रवर्णानि माल्यानि पुष्पमाला यस्य सः, गिरित्रः शिवश्च रमा महालक्ष्मीश्च ताभ्यामर्चितौ पूजितावङ्घ्री चरणकमले यस्य सः, गिरित्रग्रहणं ब्रह्मादीनामप्युपलक्षणम् । सहबलो बलरामेण सहितः, वेणुं क्वणयन् वादयन् सन् च विक्रीडया यतः अञ्चत्यटति, अतः व्रजभुवः पुण्याः । अयं भावः । धिगिमां सभां यस्यामयं परिभूयते तास्तु व्रजभुवो धन्याः यतो यासु अयं श्रीकृष्णो विचित्रक्रीडयाचरदिति ॥ १३ ॥ अहो अल्पपुण्या वयं यतोऽस्माभिरनवसरे दृष्टः गोप्यस्तु बहुपुण्याः इत्याहुस्त्रिभिः । गोप्य इति । गोप्यः, किं तपः, अचरन् । ताभिराचरितं तपोऽनिर्वचनीयमित्यर्थः । कुतः । यद्यस्मात् अमुष्य श्रीकृष्णस्य, लावण्यसारं लावण्यस्य सारभूतं, श्रेष्ठमित्यर्थः । न सममूर्द्धमधिकं च यस्य तत्, निःसमाभ्यधिकमित्यर्थः । तदपि, अनन्यसिद्धमन्येनाभरणादिना सिद्धं शोभनं न, किं तु स्वत एव शोभमानं, यद्वा । अनन्यसिद्धं स्वत एवाकर्मायत्तं, किं च यशसः कीर्त्तेः, श्रियो लक्ष्म्याः, ईश्वरस्य भावप्रधानो निर्देशः । ऐश्वर्यस्य चेत्यर्थः । एकान्तधामाऽव्यभिचारिस्थानं, सदा अभिनवं, दुरापमकृतपुण्यानामचक्षुर्विषयं, एवंभूतं, रूपं या गोप्यः, दृग्भिः नेत्रैः, अनु भूयोभूयः, पिबन्ति पश्यन्ति ॥ १४ ॥ या इति । किं च या व्रजस्त्रियो गोप्यः, दोहने गवां दोहनसमये, अम्बुवहने जलानयने, अवहनने इति पाठे व्रीह्यादीनां कण्डनकर्मणि, मथनं च उपलेपश्च प्रेङ्खेङ्खनं च अर्भरुदितानि च उक्षणं च मार्जनं च तान्यादीनि यस्य कर्मणस्तस्मिन्, तत्र मथनं दध्नो मन्थनं उपलेपो गृहाणामुपलेपनं, प्रेङ्खेङ्खनं दोलान्दोलनं, अर्भरुदितं रुदद‍र्भकसान्त्वनं, उक्षणं सेचनं, मार्जनं गृहसंमार्जनक्रिया, आदिशब्देन पचनादिकर्म । अनुरक्तधियः कृष्णैकानुरक्तबुद्धयः, अश्रुकण्ठ्यः आनन्दाश्रुनिरुद्धकण्ठाः, उरुक्रमे चित्तानुरुक्रमचित्तं तदेव यानं पुरुषार्थप्राप्तिसाधनं यासां ताः, चिन्तयाना इति पाठान्तरे उरुक्रमं चिन्तयन्त्य इत्यर्थः । एवंभूताः सत्यः, एनं च कृष्णमेव, गायन्ति । ताः व्रजस्त्रियः, धन्याः सर्वथा कृतकृत्याः ॥ १५ ॥ पुनरपि ताः प्रशंसन्त्य आहुः । प्रातरिति । याः अबला व्रजस्त्रियः, गोभिः धेनुभिः समं सह, प्रातः व्रजात् व्रजतो निर्गच्छतः सायं, आविशतः व्रजं प्रविशतश्च, वेणुं वंशीं, क्वणयतो वादयतः, अस्य श्रीकृष्णस्य, निशम्याकर्ण्य, वेणुरवमिति शेषः । तूर्णं शीघ्रमेव, निर्गम्य निष्क्रम्य, गृहादिति शेषः । पथि, अस्य सदयो दयासहितोऽवलोको यस्मिंस्तत्, सस्मितमुखंस्मितयुक्तं मुखपद्मं, पश्यन्ति अतस्ताः, भूरिपुण्याः ॥१६॥

कृष्णप्रिया

सखी ! सच पूछो तो व्रजभूमि ही परम पवित्र और धन्य है । क्योंकि वहाँ ये पुरुषोत्तम मनुष्य के वेष में छिपकर रहते हैं । स्वयं भगवान् शङ्कर और लक्ष्मीजी जिनके चरणों की पूजा करती हैं, वे ही प्रभु वहाँ रंग-बिरगे जंगली पुष्पों की माला धारण कर लेते हैं तथा बलराम जी के साथ बाँसुरी बजाते, गौएँ चराते और तरह-तरह के खेल खेलते हुए आनन्द से विचरते हैं ॥ १३ ॥ सखी ! पता नहीं, गोपीयों ने कौन-सी तपस्या की थी, जो नेत्रों के दोनों से नित्य-निरन्तर इनकी रूप-माधुरी को पान करती रहती हैं । इनका रूप क्या है, लावण्य का सार ! संसार में या उससे परे किसी का भी रूप इनके रूप के समान नहीं है, फिर बढ़कर होने की तो बात ही क्या है ! सो भी किसी के सँवारने-सजाने से नहीं गहने कपड़े से भी नहीं, बल्कि स्वयं सिद्ध है । इस रूप को देखते-देखते तृप्ति नहीं होती । क्योंकि यह प्रतिक्षण नया होता जाता है, नित्य नूतन है । समग्र यश, सौन्दर्य और ऐश्वर्य इसी के आश्रित हैं । सखियों ! परन्तु इसका दर्शन तो औरों के लिए बड़ा ही दुर्लभ है । यह तो गोपियों के ही भाग्य में बदा है ॥ १४ ॥ सखी ! व्रज की गोपियाँ धन्य हैं । निरन्तर श्रीकृष्ण में ही चित्त लगा रहने के कारण प्रेमभरे हृदय से आँसुओं के कारण गदगद कण्ठ से वे इन्हीं की लीलाओं का गहन करती रहती हैं । वे दूध दुहते, दही मथते, धान कूटते, घर लीपते, बालकों को झूला झुलाते, रोते हुए बालकों को चुप कराते, उन्हें नहलाते-धुलाते, घरों को झाड़ते-बुहारते—कहाँ तक कहें, सारे काम-काज करते समय श्रीकृष्ण के गुणों के गान में ही मस्त रहती हैं ॥ १५ ॥ ये श्रीकृष्ण जब प्रातःकाल गौओं को चराने के लिये व्रज से वन में जाते हैं और सायङ्काल उन्हें लेकर व्रज में लौटते हैं, तब बड़े मधुर स्वर से बाँसुरी बजाते हैं । उसकी टेर सुनकर गोपियाँ घर का सारा कामकाज छोड़कर रास्ते में दौड़ आती हैं और श्रीकृष्ण का मन्द-मन्द मुसकान एवं दयाभरी चितवन से युक्त मुखकमल निहार-निहार कर निहाल होती है । सचमुच गोपियाँ ही परम पुण्यवती हैं' ॥ १६ ॥

एवं[1] सम्भाषमाणासु स्त्रीषु योगेश्वरो हरिः । शत्रुं हन्तुं मनश्चक्रे भगवान् भरतर्षभ ॥ १७ ॥
उपश्रुत्य गिरस्तासां पुत्रस्नेहशुचाऽऽतुरौ[2] । पितरावन्वतप्येतां [4]पुत्रयोरबुधौ बलम् ॥ १८ ॥
तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ[4] । युयुधाते [5]यथान्योन्यं तथैव बलमुष्टिकौ ॥ १९ ॥
भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः । चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह ॥ २० ॥

कर्दमक्षमा

अन्वयः—हे भरतर्षभ ! एवं, स्त्रीषु, सम्भाषमाणासु, योगेश्वरः, हरिः, शत्रुं, हन्तुं, मनश्चक्रे ॥ १७ ॥ पितरौ, पुत्रयोः, बलम्, अबुधौ, तासां, गिरः, उपश्रुत्य, पुत्रस्नेहशुचातुरौ, अन्वतप्येताम् ॥ १८ ॥ यथा, अच्युतेतरौ, विविधैः, तैस्तैः, नियुद्धविधिभिः, युयुधाते, तथैव, बलमुष्टिकौ, अपि, युयुधाते, ॥ १९ ॥ वज्रनिष्पेष, निष्ठुरैः, भगवद्गात्रनिष्पातैः, भज्यमानाङ्गः, चाणूरः, मुहुः, ह, ग्लानिम्, अवाप ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं सभयं ब्रुवाणासु स्त्रीषु तासां भयनिवृत्तये कृष्णः शत्रुं हंतुं मनश्चक्रे ॥ १७ ॥ सभयाः स्त्रीणां गिरः श्रुत्वा पुत्रयोः स्नेहेन या शुक् तया आतुरौ विह्वलौ पुत्रयोर्बलमजानन्तौ पितरावनुतापं प्राप्ताविति ॥ १८–१९ ॥ तदा भगवतो गात्राणामरत्निजान्वादीनां निष्पातैः प्रहारैर्वज्रस्य निष्पेषस्तीव्रप्रपातस्तद्वन्निष्ठुरैः । भज्यमानांगः श्लथद्गात्रः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

योगेश्वर इति पराभिप्रायज्ञत्वादित्याह—शत्रुं हन्तुमिति ॥ यद्यप्यन्यदपि तद्दर्शनं संपद्यते तथापि तन्निर्गमनावेशयोरनुव्रज्याभिगमनच्छलाल्लोकानामग्रेऽप्यसंकोचेन तत्सिद्ध्यतीति । तथा चेदृशमात्रस्य दर्शनमस्माकं न संभवेदित्यत एवा पुण्या एव वयमिति भावः । एवमीदृशं प्रकर्षेण प्रेमार्त्या सभयं भाषमाणासु सतीष्विति तादृशभाषणात्तासामनिवृत्तिरुक्ता । "अर्हानर्हयोश्च" इत्यर्हार्थे सप्तमी । तदा तद्विधानं योग्यमेवेत्यर्थः । योगेश्वर इति स्वेच्छया स्वशक्तिप्रकाशनाप्रकाशनयोर्हेतुः । हरति भूभारमिति हरिः, तद्वधप्रवृत्तावौत्सर्गिकश्चास्ति हेतुरिति भावः । शत्रुमिति मत्सरिद्वेषित्वात् । भगवानिति स्वरूपनिर्देशः सर्वत्रैव हेतुगर्भः । हे भरतर्षभेति—चिरं युद्धक्रीडया तद्वधविलम्बादप्रसन्नचित्तं राजानमुल्लासयति, भरतवंश्यत्वात्त्वमपि भारतयुद्धादावीदृशीं लीलां जानासीत्यभिप्रायेण ॥ १७ ॥ पितरौ संमुखस्थौ देवकी वसुदेवौ ॥ उपाधिक्येन सामीप्येन वा श्रुत्वा पितरौ देवकीवसुदेवौ वसुदेवनन्दौ वाऽन्वतप्येताम्—हंतहंत व्रजे गमिष्यन्नक्रूर एव कथं तथा न शिक्षितो यथेतौ नानयिष्यत्स इति, हंतहंत "कथमनायि पुरे मयकासुतः कथमसौ न निगृह्य गृहे धृतः" इत्यादिकं पश्चात्तापं प्रकुर्वन्तौ । बलमबुधावजानन्तौ । इह षष्ठ्यभावस्तु तस्याः षष्ठ्या अनित्यत्वात् । तदुक्तम्—"कर्तृकर्मणोः कृति" इत्यत्र भाष्यवृत्तौ विहित "तदर्हम्" इतिनिर्देशेनानित्यज्ञापनात्, 'धार्यैरामोदमुत्तमम्' इति भट्टेश्च । तद्धितप्रत्ययः खलु सूत्रे प्रथमनिर्दिष्टविभक्त्यन्तादेव नियमितः । यथा "तस्यापत्यम्" इत्यत्र उपगोरपत्यमौपगवः, धनमर्हति धन्य इति ॥ १८ ॥ तैस्तैरुक्तैरनुक्तैर्वा । इतरश्चाणूरः । तथैव कृष्णचाणूरवत् ॥ पुनर्युद्धवर्णनमवतारयति—तैरिति, पूर्वदर्शितदिङ्मात्रैः । वीप्सा तेषां वैचित्र्याद्यपेक्षया । ते च मल्लशास्त्र उक्ताः विधयः—कृतप्रतिकृतसुसंकटबाहुसन्निपातावधूतप्रमाथोन्मथनक्षेपणमुष्टिवराहोद्धूतनिस्वनतलप्रसृष्टाशलाकानखपातपादोद्धूतजानुशिरोऽवघट्टनप्रकर्षणाकर्षणाभ्याकर्षविकर्षणादिभेदान्नियुद्धं बहुभेदमस्ति । कृतादिस्वरूपमाह—"क्वचिद्देशे निपीडंतु कृतं तस्य तु मोचनम् । मल्लशास्त्रविशेषज्ञैः प्रतिकृतमुदाहृतम् ॥ मुष्टिग्रहणवश्यौ तु बाहू सुसंकटौ मतौ । सन्निपातोऽङ्गसंघट्टोऽवधूतं तन्निराकृतिः ॥ निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते । यत्तूत्थायांगमथनं तदुन्मथनमुच्यते ॥ क्षेपणं कथ्यते यत्तु स्थानात्प्रच्यावनं हठात् । उभयोर्भुजयोर्मुष्टिरुरोमध्ये निपात्यते । मुष्टिरित्युच्यते सुज्ञैर्मल्लविद्याविशारदैः ॥ अवाङ्मुखस्कंधगतं भ्रामयित्वा तथैव यः । क्षिप्तस्य शब्दः स भवेद्वराहोद्धूतनिःस्वनः ॥ चेपटो वज्रपातेन तुल्यस्तल उदीरितः । अंगुल्यः प्रसृता यास्तु प्रसृष्टास्ता उदीरिताः ॥ ऋज्वी दृढा रुषा क्षिप्ता शलाका सांगुली स्मृता । तस्या यस्तु नखोत्पातः शलाकानखपातकः ॥ जानुभिश्च शिरोभिश्चावघट्टनबहुध्वनिः । तदुक्तं जानुशिरसोरवघट्टनमत्र वै ॥ आकृष्य क्रोडीकरणं प्रकर्षणमुदाहृतम् । आकर्षणं लीलयैव संमुखीकरणं स्मृतम् ॥ पुरः पश्चात्पार्श्वयोश्चाभ्याकर्षो भ्रमणं मतम् । पश्चात्प्रपातनं वेगाद्विकर्षणमुदाहृतम् ॥" एवमन्येऽपि नियुद्धभेदा बहवः सन्ति ग्रन्थविस्तरभिया न लिखिता इति ज्ञेयम् । उभाविति—चाणूरस्यापि तत्र नैपुण्यं बोधयति । अन्यथाऽनर्हतया लीलासौष्ठवं न स्यात्तच्च लीलाशक्ति-

---

[1] प्रभाष—श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [2] सभयाः स्त्रीगिरः श्रुत्वा—श्रीधर. वंशी. जीव. विज. विश्व.; उपश्रुत्य गिरः स्त्रीणां—वीर.; "उपश्रुत्त"अयमधिकम्—विज. । [3] शुगातुरौ—वीर. । [4] मज्यानन्तौ तयोर्बलम्—वीर. । [5] उभौ चाणूरकेशवौ—इति कस्यचित् ।

संपादितमिति भावः। 'विविधैरच्युतेतरौ' इति पाठे इतरश्चाणूरः ॥१९॥ तदा युद्धावसरे। ग्लानिं प्राणसंदेहक्लेशम् ॥ अचिन्त्यशक्तिवाचको भगवच्छब्दोऽत्र, मल्लेषु तादृशस्फूर्तौ हेतुः। वज्रनिष्पेषस्तत्करणकसंचूर्णनं, तद्वन्निष्ठुरैः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यद्यप्यन्यदापि तत् सन्दर्शनं सम्पद्यते तथापि तन्निर्गमनाप्रवेशयोरनुव्रजाभिगमनच्छलाल्लोकातामग्रेऽप्यसङ्कोचेन तत् सिद्धयतीति तथा विरहापगमापगमयोरत्यन्ताशक्त्या विशेषतस्तत् स्यादितितदानीन्तनमेव तदुक्तम्। ईदृशमात्रस्य दर्शनमस्माकं न कथमपि सम्भवेदित्यत एवापुण्या एव वयमिति भावः। एवमीदृशं प्रकर्षेण प्रेमार्त्त्या सभयं भाषमाणासु सतीष्विति तादृशभाषणात्तासामनिवृत्तिरुक्ता। अर्हानर्हयोश्चेत्यनेन सप्तमी चार्हार्थे तदा तद्विधानं योग्यमेवेत्यर्थः। योगेश्वर इति। स्वेच्छया स्वशक्तिप्रकाशनाप्रकाशनयोर्हेतुः हरति भूभारं हरिरिति तद्वधप्रवृत्तावौत्सर्गिकश्चास्ति हेतुरिति भावः। शत्रुमिति सद्विद्वेषित्वात्। भगवानिति स्वरूपनिर्देशः सर्वत्रैव हेतुगर्भः। हे भारतवर्षभेति चिरं युद्धक्रीडया तद्वधविलम्बादप्रसन्नचित्तं राजानमुल्लासयति भरतवंश्यत्वात्त्वमपि भारतयुद्धादावीदृशीं तल्लीलां जानासीत्यभिप्रायेण ॥ १७ ॥ स्त्रीणां तथाविधगिरः उप सामीप्येनाधिक्येन वा श्रुत्वा पितरतौदानीं तादृशाभिमानमेवासृताविति पुत्रेत्यादौ हेतुः। आतुरत्वादेव बलं वाप्यनयोः अवुधौ अजानन्तौ सन्तौ तदनुसन्धातुमशक्ताविति र्थः। अन्वतप्येतां कथं व्रजे गमिष्यन्नक्रूर एव प्रथमतस्तथा न शिक्षितः यथा नैतावानेष्यदित्यादिकं पश्चात्तापमकुर्वताम् अत्र बलमबुधावित्यत्र षष्ठ्यभाव- स्तस्याः षष्ठ्या अनित्यत्वात्। यदुक्तं। "कर्तृकर्मणोः कृती" त्यत्र भाष्यवृत्तौ विहिततदर्हमिति सूत्रनिर्देशेनानित्यताज्ञापनात्। धार्यैरामोदमुत्तममिति भट्टिरिति। तद्धितप्रत्ययः खलु सूत्रप्रथमनिर्दिष्टविभक्त्यन्तादेव नियमितः। यथा तस्यापत्यमित्यत्र उपगोरपत्यमौपगवः यथाचात्र धनमर्हति धन्य इति ॥ १८ ॥ पुनर्युद्धवर्णनमवत्तारयति। तैरिति पूर्वदर्शितदिङ्मात्रैः। वीप्सा तेषां वैचित्र्याद्यपेक्षया। उभाविति चाणूरस्यापि तत्र नैपुण्यं बोधयति अन्यथानर्हतया लीलासौष्ठवं न स्यात्तच्च लीलाशक्तिसम्पादितमिति भावः। विविधैरच्युतेतराविति पाठे इतरश्चाणूरः ॥ १९ ॥ अचिन्त्यशक्तित्ववाचको भगवच्छब्दोऽत्र मल्लेषु तादृशस्फूर्तौ हेतुः। वज्रनिष्पेषस्तत्करणचूर्णनं तस्मादपि निष्ठुरैः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमीदृशं प्रकर्षेण प्रेमार्त्त्या समयं भाषमाणासु सतीष्विति तादृशभाषणात्तासामनिवृत्तिः परमकृपापात्रता चोक्ता। योगेश्वरः सर्वज्ञशिरोमणिरिति तासां शीघ्रदुष्टवधेच्छां बुद्ध्वेति भावः। अतः शत्रुःस्वस्य सतां तासामेव वा द्वेष्टारं हन्तुमैच्छत्, यतो हरिः स्वभावतो निजजनार्त्तिहरः, विशेषतश्च भगवान् कारुण्याद्यशेषगुणप्रकटनपर इत्यर्थः। हे भरतवर्षभेति चिरं युद्धक्रीडया तद्वधविलम्बाद्दीनचित्तं श्रीपरीक्षितमाश्वासयति। यथा भारतयुद्धे स्वयमिच्छामात्रेण सर्वान्निहन्तुं शक्तोऽपि विविधाद्भुतलीलाश्चक्रे, तद्वत्, भरतवंशश्रेष्ठत्वाद्भवता ज्ञायत एव, तथेदमपीति विभाव्य स्वस्थो भवेति ॥ १७ ॥ उपश्रुत्य समीप एव श्रुत्वा, 'सभयाः' इत्यत्र शुग्धेतुत्वेन, तैर्व्याख्यातम्, पाठान्तरं तु चिन्त्यम्, आतुरत्वादेव बलमबुधौ अननुसन्दधानावित्यर्थः॥१८॥ पुनर्युद्धवर्णनमवतारयति—तैरिति पूर्वोक्तैः, वीप्सा तेषां वैचित्र्याद्यपेक्षया, यद्वा, परमानिर्वचनीयैरन्यैरपीत्यर्थः। उभाविति चाणूरस्यापि तत्र नैपुण्यं बोधयति, अन्यथा वैषम्येण श्रीभगवतो नियुद्धक्रीडासुखासम्पत्तेः, केशवशब्देन केशिवधकृत-कौतुकवदत्रापि युद्धकौतुकम्। एवकारेणाभेदो बोध्यते, तयोस्तत्तन्मतैकानुसारित्वात् ॥ १९ ॥ भगवच्छब्देन बीलनलिनदलादपि सहजसुकोमलानां श्रीमदंगानां क्वचिद्वज्रसारादपि काठिन्यमैश्वर्यविशेषाद्बोध्यते, ह स्फुटम् ॥ २० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पितरौ देवकीवसुदेवौ ॥ १८ ॥ अच्युतेतरौ अच्युतचाणूरौ ॥ १९–२३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं स्त्रीषु प्रभाषमाणासु सतीषु हे भरतर्षभ ! योगेश्वरो भगवान् हरिः श्रीकृष्णः शत्रुं हन्तुं मनश्चक्रे ॥ १७ ॥ तथा पितरौ देवकीवसुदेवौ नन्दवसुदेवौ वा पुत्रयोः रामकृष्णयोर्बलमजानन्तौ केवलं स्त्रीणामुक्तरीत्या भाषमाणानां गिरो वचांस्याकर्ण्यान्वतप्येतामनुतप्तवन्तौ ॥ १८ ॥ अच्युतेतरौ कृष्णचाणूरौ चान्योऽन्यं नानाविधैस्तैस्तैर्नियुद्धविधिभिः पूर्वोक्तपरिभ्रमणविक्षेपादिभिर्यथा युयुधाते तथैव बलमुष्टिकौ राममुष्टिकौ च युयुधाते ॥ १९ ॥ तदा भगवतो गात्रनिष्पातैररत्निजान्वादिप्रहारैर्वज्रस्य निष्पेशस्तीव्रप्रहारस्तद्वन्निष्ठुरैर्भज्यमानाङ्गः चाणूरो मुहुर्ग्लानिमवापावाप्तवान् ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

इतरश्चाणूरः ॥ १९ ॥ ग्लानिं प्राणसन्देहक्लेशम् ॥ २०–२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

योगेश्वर इति । तत्रत्यानुकूलप्रतिकूललोकानां स्वगता अपि वाचः शृण्वन्नित्यर्थः । हन्तुं मनश्चक्र इत्यलमेता अनुरागिणीर्दुःखयित्वेति भावः ॥ १७ ॥ पितरौ देवकीवसुदेवौ वसुदेवनन्दौ वा अन्वतप्येतां हन्त हन्त व्रजे गमिष्यन्नक्रूर एव कथं तथा न शिक्षितो यथा नैतावानेष्यत् स इति हन्त हन्त कथमनार्य्यपुरे मयका सुतः कथमसौ न निगह्य गृहे धृत इत्यादिकं पश्चात्तापमकुर्वतां बलमबुधौ अजानन्तौ षष्ठ्या अभावः "तदर्हम्" इति निर्देशेन तस्या अनित्यत्वज्ञापनाम् ॥ १८ ॥ अच्युतश्च इतश्चाणूरश्च तौ ॥ १९ ॥ निष्पातैः प्रहारैः निष्पेषः सञ्चूर्णनं तद्वद्भिरैः ॥ २० ॥

गूढार्थदीपिनी

पुत्र स्नेहेन या शुक् शोकः तया व्याकुलौ । बलम् अबुधौ अजानन्तौ । तदर्हमिति निर्देशात् षष्ठ्यभावः ॥ १८ ॥ इतरः चाणूरः ॥ १९ ॥ वज्रनिष्पेषो वज्रपातः तद्वत् कठोरैः गात्राणां जान्वादीनां निष्पातैः प्रहारैः । भज्यमानं जर्जरीभवत् अङ्गं यस्य । ह हेतौ ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं सभयं निर्भयञ्च प्रभाषमाणासु योगेश्वरः सर्वचित्ताभिज्ञः ॥ १७–१८ ॥ अच्युतेतरौ श्रीकृष्णबलदेवौ ॥ १९ ॥ भगवतो गात्राणामरत्न्यादीनां निष्पातैः प्रहारैः वज्रस्य निष्पेषस्तीव्रः प्रपातस्तद्वन्निष्ठुरैर्दुःसहैः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं स्त्रीषु मधुरावधूषु भाषमाणासु सतीषु योगेश्वरो हरिः शत्रुं चाणूरं हन्तुं मनश्चक्रे । इयत्कालमयमाचरिता मया लीला तद्बलिष्ठतास्पष्टनार्थमिति द्योतयत्यनेन । चाणूरेण चिरं कालं क्रीडित्वा देवकीसुत इति हरिवंशोक्तेः ॥ १७ ॥ तैस्तैर्नियुद्धविधिभिः कृतप्रतिकृतैश्चित्रैर्बहुभिश्च सकण्टकैरित्यादिभिर्हरिवंशशंसितैरच्युतश्चेतरश्चाणूरश्च तैस्तथा मल्लरीत्या युयुधाते तथा बलमुष्टिकावप्यन्योन्यं युयुधाते ॥ १८ ॥ वज्रनिष्पेषवन्निष्ठुरैस्ततोऽपि क्रूरैर्भगवद्गात्रनिष्पातैर्भज्यमानान्यङ्गान्यवयवानि यस्य स चाणूरो मुहुः पुनः पुनर्ग्लानिं हर्षापकर्षमवाप ॥ १९ ॥ स तादृशोऽपि श्येनवद्वेगो यस्य स उत्पत्योभौ करौ मुष्टीकृत्य भगवन्तं वासुदेवम् । ननु हरिवंशे चाणूरमारणात्पूर्वं न्यवादयन्त तूर्याणि कंसः सव्येन पाणिना । प्रतिषिद्धेषु तूर्येषु मृदङ्गादिषु तेन वै । दिवं गतान्यवाद्यन्त देवतूर्याण्यनेकशः । युद्ध्यमाने हृषीकेशे पुण्डरीकनिभेक्षणे । स्वयमेव प्रवाद्यन्त तूर्यघोषा अनेकशः । अन्तर्धानगता देवा विमानैः कामरूपिभिः । चेरुर्विद्याधरैस्सार्धं कृष्णस्य जयकाङ्क्षिणः । जयस्व कृष्ण चाणूरं दानवं मल्लरूपिणम् । इति सप्तर्षयः सर्वे ऊचुश्चैव नभोगताः । चाणूरेण चिरं कालं क्रीडित्वा देवकीसुतः । बलमाहरयामास कंसस्याभावदर्शिवान् । ततश्चचाल वसुधा मञ्चाश्चैव जुघूर्णिरे । मुकुटाच्चैव कंसस्य पपात मणिरुत्तम इत्यादिना तूर्यनिवारणावगतेरत्र तु चाणूरमारणानन्तरं तदुक्तिस्तु कथमिति चेन्न । तेषां तु मल्लीयत्वान्निवारणं तत्रोक्तमत्र स्वेषामिति तदैककण्ठ्यसम्भवात् । यद्वक्ष्यति स्वतूर्याणीति प्रस्थानभेदेन देवतावाद्यवादनं मुन्यभिवादनपूर्वकं याचनं कंसशिरामुकुटमणिपात इत्यादेरुक्तस्याप्यत्रानुक्तिर्न दोषायैव । तत्रैतदाद्यनुक्तिरपीति । तत्रैतदत्र तदप्यनुसन्धेयमिति न विरोधः ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो भगवांस्तदसहमानः यत्कृतवांस्तदाह । एवं संभाषामाणास्विति । स्त्रीष्वेवं सम्यग्भाषमाणासु अन्येन सहासक्तोऽपि सर्वात्मत्वात् शृणोत्येव योगेश्वरत्वादपि दूरश्रवणदर्शनादेस्तद्धर्मत्वात् दूरादेव श्रुत्वा हरिस्तासां सर्वदुःखहर्त्ता शत्रुं कंसमेव हन्तुं चाणूरं तासां विषादं वा मनश्चक्रे स ह्यक्लिष्टकर्मा न मारयेत् संध्यापर्यन्त युद्ध च कुर्यात् ततः सम्यक्ताडिताः न प्रातरागच्छेयुः तथापि मारणार्थमेव नूतनं मनः कृतवान् । ननु कथमेवं नूतनं पूर्वसिद्धादधिक करोतीति चेत्तत्राह । भगवानिति । विश्वासार्थं भरतर्षभेति सम्बोधनम् ॥ १७ ॥ ननु तथापि स्त्रीणां वाक्यात् सर्वात्मा कथं तान् मारयितुं प्रवृत्त इति चेत्तत्राह । उपश्रुत्येति । तासां वाक्यात् देवकीवसुदेवयोर्महानेव क्लेशो जातः यदि शीघ्रं भगवान्न मारयेत्तयोरपि क्लेशः अधिकः अनुवर्तेत अतः पित्रोरप्यर्थे हन्तुं मनश्चक्रे इति स्त्रीणा गिर उपश्रुत्य तावपि तत्र समानीताविति निकटे च गिरा जाता इति अन्वतप्येतां तासां वचने भगवतः असामर्थ्यमिव प्रतिभातम् अतः पूर्व सामर्थ्यं जानतोरपि वाक्यश्रवणेनानुतापो जातः । ननु माहात्म्यज्ञानस्य जातत्वात् कथं ताप इति चेत्तत्राह । पुत्रयोरबुधौ बलमिति । माहात्म्यं तु जानीतः परं न बल ततः क्लेशं प्राप्नुतीति तयोरनुतापः ॥ १८ ॥ एवं प्रासङ्गिकमुक्त्वा प्रस्तुतं वदन् यत्पूर्वं कृष्णचाणूरयोः प्रकारचतुष्टयं निरूपितं तद्रामसुष्टिकयोरप्यतिदिशति । तैस्तैरिति । नियुद्धविधिभिः बाहुयुद्धप्रकारैस्तैस्तैः प्रसिद्धैः पूर्वोक्तैर्वा ततोऽपि विविधैरनेकप्रकारैः यथाऽच्युतेतरौ अन्योऽयं युयुधाने तथैव बलमुष्टिकावपि तेनैव प्रकारेण युयुधाते अन्योऽन्यमिति द्वन्द्वयुद्धता अनुपदेशश्चोक्तः ॥ १९ ॥ अग्रे चाणूरमारणं वक्तु पूर्वकृतयुद्धस्य वैयर्थ्यं उत्तरत्रापि तथैव भविष्यतीति पूर्वकृतस्य फलमाह । भगवद्गात्रेति । भगवतो गात्राण्यवयवाः तेषां निपातैः उपरि

पातैः वज्रनिष्पेषात् वज्रेण पेषणादपि पुनः पुनर्धर्षणादपि निष्ठुरैः अतिदुःसहैः चाणूरोभज्यमानाङ्गः मुहुर्वारंवारं ग्लानिमवाप हेत्याश्चर्यं स हि पूर्वमिन्द्रेण सह युद्धे वज्रे प्रक्षिप्ते वक्षः स्पर्शे च तं वज्रं दूरीकृतवान् ॥ २० ॥

श्रीसुबोधिनी–सारः

स्त्रीषु एवं प्रभाषमाणासु सतीषु योगेश्वरेश्वरो हरिर्भगवान् शत्रुं हन्तुं मनश्चक्रे हे भरतर्षभ ॥ १७ ॥ सभयाः स्त्रीगिरः श्रुत्वा पुत्रयोर्बलमबुधौ अजानन्तौ पुत्रयोः स्नेहेन या शुक् तयाऽऽतुरौ पीडितौ पितरौ वसुदेवदेवकीरूपौ अनुतप्तावभूताम् ॥ १८ ॥ विविधैः तैः तैः प्रसिद्धैर्नियुद्धविधिभिरच्युतः कृष्ण इतरश्चाणूरो युयुधाते यथान्यायं यथामार्गं बलमुष्टिकौ तथैव युयुधाते ॥ १९ ॥ वज्रस्य निष्पेषः प्रपातस्तद्वन्निष्ठुरैः कर्कशैः भगवतो गात्राणां निष्पातैः प्रहारैर्भज्यमानानि मर्द्यमानान्यङ्गानि यस्य च चाणूरो मुहुरसकृत् ग्लानिमवाप ह ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे भरतर्षभ ! एवं स्त्रीषु प्रभाषमाणासु सतीषु योगेश्वरो हरिः भक्तदुःखहर्ता भगवान् कृष्णः शत्रुं हन्तुं मनश्चक्र इत्यन्वयः ॥ १७ ॥ तदा पितरौ देवकीवसुदेवौ नन्दवसुदेवौ वा पुत्रयो रामकृष्णयोर्बलमजानन्तौ सभयाः स्त्रीणां गिरः श्रुत्वा पुत्रयो स्नेहेन या शुक् तया आकुलौ आतुरौ अनुतप्येताम् ॥ १८ ॥ एवं यथा अच्युतेतरौ कृष्णचाणूरौ नानाविधैः परिभ्रामणादिभिस्तैस्तैर्नियुद्धविधिभिर्युयुधाते, तथैव बलमुष्टिकावपि युयुधाते ॥ १९ ॥ वज्रस्य निष्पेषस्तीव्रप्रहारस्तद्वन्निष्ठुरैर्भगवतो गात्राणामरग्निजान्वादीनां निष्पातैः प्रहारैर्भज्यमत्नाङ्गश्चाणूरो मुहुर्ग्लानिमवाप । 'भक्तानां कोमलाङ्गत्वेन प्रतीयमानस्यापि स्वविमुखान्प्रति वज्राङ्गत्वम्' इत्याश्चर्यं सूचयति—हेति ॥ २० ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ हे भरतर्षभ ! एवं स्त्रीषु सभयं प्रभाषमाणासु सतीषु योगेश्वरो हरिः भक्तदुःखहर्ता भगवान् कृष्णः तासां भयनिवृत्तये शत्रुं हन्तुं मनश्चक्रे ॥ १७ ॥ सभया इति ॥ तदा पितरौ देवकीवसुदेवौ नन्दवसुदेवौ वा । पुत्रयो रामकृष्णयोबलमबुधौ अजानन्तौ । द्वितीया तदर्हमिति निर्देशात् आर्षत्वाद्वा । सभयाः स्त्रीणां गिरः श्रुत्वा पुत्रयोः स्नेहेन या शुक् तया आकुलौ आतुरौ अन्वतप्येताम् । कथं व्रजे गमिष्यन्नक्रूर एव प्रथमं न शिक्षितो यथा नैवानेष्यदित्याद्यनुतापं कृतवन्तौ ॥ १८ ॥ तैरिति ॥ एवं यथा अच्युतेतरौ कृष्णचाणूरौ नानाविधैः परिभ्रमणादिभिस्तैस्तैर्नियुद्धविधिभिर्युयुधाते तथैव बलमुष्टिकावपि अन्योन्यं युयुधाते ॥ १९ ॥ भगवदिति ॥ वज्रस्य निष्पेषः तीव्रप्रहारस्तद्वन्निष्ठुरैर्भगवतो गात्राणामरत्निजान्वादीनां निष्पातैः प्रहारैर्भज्यमानाङ्गः श्लथद्गात्रश्चाणूरः मुहुर्ग्लानिमवाप ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

योगेश्वरः सर्वैश्वर्य्यैः संपन्नः ॥ १७ ॥ पुत्रयोः स्नेहेनया शुकशोकस्तया आतुरौ व्याकुलौ ॥ १८ ॥ अच्युतश्च इतरश्चाणुरश्च तौयर्हि युयुधाते ॥ १९ ॥ तर्हि वज्रस्यनिष्पेषस्तीक्ष्णघातस्तद्वन्निष्ठुरैः कठिनैः भगवतोगात्राणां हस्तादीनां निष्पातैः प्रहरणैः भज्यमानांगः शिथिलगात्रः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति । एवमित्थं, स्त्रीषु पुराङ्गनासु प्रभाषमाणासु सतीषु, हे भरतर्षभ, योगेश्वरः भगवान् हरिः, शत्रु चाणूरं हन्तु मनः चक्र ॥ १७ ॥ सभया इति । सभया भयसहिताः, स्त्रीणां वाचः, श्रुत्वा, तथा पुत्रयोः बल अबधो अजानन्तौ, अतएव पुत्रस्नेहशुचा, आतुरौ पितरौ देवकीवसुदेवौ, नन्दवसुदेवौ वा, अन्वतप्येतां अनुतापयुक्तौ अभूताम् ॥ १८ ॥ तस्तैरिति । तदा अच्युतेतरौ कृष्णचाणूरौ, तथैव बलमुष्टिकौ, अन्योन्यं विविधैर्नानाविधैः तैः तैः, नियुद्धविधिभिः, यथा यथार्थतः, युयुधाते स्म । तदेति पाठे यथार्थस्याप्रयोजनं यथेतिपाठे तदेत्यध्याहार्यम् ॥ १९ ॥ भगवदिति । तदा वज्रस्य निष्पेषस्तीव्रप्रहारस्तद्वन्निष्ठुरैः कठिनैः, भगवतो गात्राणामरत्निजान्वादीनां निष्पाताः प्रहारास्तैः, भज्यमानान्यङ्गानि यस्य सः, चाणूरः मुहुः, ह स्फुटं यथा तथा, ग्लानिं म्लानतां, अवाप प्राप्तवान् ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवं प्रभाषमाणास्विति : १०.४४.१७.

मिथ्याभूतोऽपि नैवास्तु क्लेशो मत्प्रेमचेतसाम् । इति हन्तुं स चाणूरमैषीच्छ्रुततदुक्तगीः ॥ ५ ॥

कृष्णप्रिया

भरतवंशशिरोमणे ! जिस समय पुरवासिनी स्त्रियाँ इस प्रकार बातें कर रही थी, उसी समय योगेश्वर भगवान् श्रीकृष्ण ने मन ही मन शत्रु को मार डालने का निश्चय किया ।। १७ ।। स्त्रियों की ये भयपूर्ण बातें माता-पिता देवकी-वसुदेव भी सुन रहे थे। वे पुत्रस्नेहवश शोक से विह्वल हो गये। उनके हृदय में बड़ी जलन, बड़ी पीड़ा होने लगी। क्योंकि वे अपने पुत्रों के बल-वीर्य को नहीं जानते थे ।। १८ ।। भगवान् श्रीकृष्ण और उनसे भिड़ने वाला चाणूर दोनों ही भिन्न-भिन्न प्रकार के दाँव पेच का प्रयोग करते हुए परस्पर जिस प्रकार लड़ रहे थे, वैसे ही बलराम जी और मुष्टिक भी भिड़े हुए थे ।। १९ ।। भगवान् के अङ्ग-प्रत्यङ्ग वज्र से भी कठोर हो रहे थे। उनकी रगड़ से चाणूर की रग-रग ढीली पड़ गई। बार-बार उसे ऐसा मालूम हो रहा था मानो उसके शरीर के सारे बन्धन टूट रहे हैं। उसे बड़ी ग्लानि, बड़ी व्यथा हुई ।। २० ।।

स श्येनवेग उत्पत्य [१]मुष्टीकृत्य करावुभौ । भगवन्तं वासुदेवं क्रुद्धो [२]वक्षस्यबाधत ॥ २१ ॥
नाचलत्तत्प्रहारेण [३]मालाहत इव द्विपः । बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन् हरिः ॥ २२ ॥
भूपृष्ठे पोथयामास तरसा [४]क्षीणजीवितम् । विस्रस्ताकल्पकेशस्रगिन्द्रध्वज इवापतत् ॥ २३ ॥
तथैव मुष्टिकः पूर्वं [५]स्वमुष्ट्याभिहतेन वै । बलभद्रेण बलिना तलेनाभिहतो भृशम् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—श्येनवेगः, सः, उभौ, करौ, मुष्टीकृत्य, उत्पत्य, भगवन्तं, वासुदेवं, वक्षसि, अबाधत ।। २१ ।। एवं कृतेऽपि, मालाहतः, द्विपः, इव, तत्प्रहारेण, हरिः, नाचलत्, क्षीणजीवितं, चाणूरं, बाह्वोर्निगृह्य, बहुशो भ्रामयन्, तरसा, भूपृष्ठे, पोथयामास ।। २२ ।। (तेन पातितः सः चाणूरः) विस्रस्तानि, आकल्पानि, केशाः, स्रजश्च, यस्य, तथाभूतः, विस्रस्ता, कल्पकेशस्रग्, इन्द्रध्वजः, इव, अपतत् ।। २३ ।। तथैव, मुष्टिकः, पूर्वं, स्वमुष्ट्या, अभिहतेन, बलिना, बलभद्रेण, तलेन, अभिहतः, अर्दितः, प्रवेपितः, सः, मुखतः, रुधिरम्, उद्वमन्, व्यसुः, वातेन, आहतः, जंघ्रिय, इव, व्युपस्थे, भयात ।। २४–२५ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्येनस्येव वेगो चाणूरः यस्य अबाधत।ताडयत् ।। २१–२२ ।। **भूपृष्ठे** भुव उपरि । पोथयामासास्फालयत् । इन्द्रध्वजो वज्रम् । यद्वा इन्द्रध्वजो नाम गौडेषु प्रसिद्धः कस्मिंश्चिदुत्सवे महान्स्तंभो ध्वजपताकाद्यलंकृतः पुरुषाकृतिरुच्छ्रीयते स यथा पतति तद्वदपतदिति ।। २३–२४ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

श्येनः कपोताराातिः पक्षिविशेषः । उत्पत्य उत्प्लुत्य ।। श्येनवेग इति पूर्वं ग्लानिं प्राप्य दूरगमनं बोधितम् । उभावित्येकदैव मुष्टिकृताभ्यां द्वाभ्यामेव प्रहारात् । महाबलिष्ठत्वान्नियुद्धकौशलत्वं च दर्शितम् । भगवन्तं वासुदेवमिति तन्मूढत्वदौरात्म्यव्यञ्जकं तत्तन्निरुक्तः ।। २१ ।। तत्प्रहारेण चाणूरोभयमुष्टिप्रहारेण । मालाहतः पुष्पैस्ताडितः ।। श्रीभगवानपि तद्दर्शनिजजनहर्षणाय तस्य तत्तदेव व्यञ्जितवान्न तु स्वविनोदाय, स्वस्य क्षोभलेशमप्यकृतवानित्याह—नेत्यर्द्धेन । स्रग्भिरित्यनेन सुखमपि तस्य तस्य सूचितम् । बहुत्वस्य यदि बह्वीभिरपि ताभिर्हतः स्यात्तदपि तस्य न किञ्चिदपि यथा स्यात्तथास्य बलबाहुल्येनापीति भावः । अथ श्रीहरिवंशवचनानि—"यदयं बाहुयुद्धं वै सवैरं कर्तुमुद्यतः । तत्र वै निग्रहः कार्यस्तोषयिष्याम्यहं जगत् ।। करूषेषु प्रसूतोऽयं चाणूरो नाम नामतः । बाहुयोधी शरीरेण कर्मभिश्चानुचिन्त्यताम् । एतेन बहवो मल्ला निपातानन्तर हताः । रगप्रतापकामेन मल्लमार्गाश्च दूषिताः ।। ये तु केचित्स्वदोषेण राज्ञः पडितमानिनः । प्रतापार्थे हता मल्ला मल्लहत्तुवधो हि सः ।।" बहुशो बहुवारान्बहुधा चेत्यर्थः ।। २२ ।। आस्फालयत्क्षिप । वज्रेन्द्रध्वजपदाऽप्रसिद्धिं मत्वाह—यद्वेति । विस्रस्ता विश्लया आकल्पकेशस्रजो यस्य स । उच्छ्रीयते ऊर्ध्वं स्थाप्यते । स इन्द्रध्वजः ।। तरसा भ्रामणवेगेनैव । क्षीणजीवितमाकाश एव मृतम् । तथा च विष्णुपुराणे—"भ्रामयित्वा शतगुणं दैत्यमल्लममित्रजित् । भूमावा स्फोटयामास गगने गतजीवितम् ।।" इति । अत एवाहो मृत एवायमित्युक्त्वा परित्यागमिषेणैव पोथयामासेति ज्ञेयम् । अपतत्—स चेति शेषः । इन्द्रध्वजोपमया तद्देहस्य बृहत्तरत्वमप्युक्तम् तदुक्तं श्रीहरि वंशे – 'देहेन तस्य मल्लस्य चाणूरस्य गतायुषः । सन्निरुद्धो महारंगः स शैलेनेव लक्ष्यते ।।" इति ।। २३ ।। तथैव चाणूरवदपतदित्यन्वयः । तलेन चपेटेन "तलश्चपेटे तालद्रौ तलं ज्याघातवारणे" इति मेदिनी ।। अभिमुखं हतेन प्रहृतेन 'बलभद्रं बलोच्छ्रयात्' इति स्वभावत एव महाबलिष्ठेन । तत्रापि बलिना प्रकटितबलेनेत्यर्थः । तलेन चपेटेन ।। २४ ।।

---

१. कृत–पीर. । २. पक्षस्यताडयत्–वीर. विज. । ३. स्रग्भिर्हत–वीर.स्र; जा–विज. । ४. त्यक्त–वीर. । ५. समुष्ट्या–मूले ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्येनवेग इति । पूर्वं ग्लानिं प्राप्य दूरे गमनं बोधितम् । उभावित्येकदैव मुष्टीकृताभ्यां द्वाभ्यामेव प्रहारात् महावलिष्ठत्वं नियुद्धकुशलत्वञ्च दर्शितं भगवन्तं वासुदेवमिति । तन्मूढत्वदौरात्म्यव्यञ्जकं तत्तन्निरुक्तेः ॥ २१ ॥ श्रीभगवानपि तादृशनिजजनहर्षणाय तस्य तत्तदेव व्यञ्जितवान् नतु स्वविनोदाय स्वस्य क्षोभलेशमप्यनुकृतवानित्याह । नेत्यर्द्धेन । स्रग्भिरित्यनेन सुखमपि तस्य सूचितम् । बहुत्वस्य यदि बह्वीभिरपि ताभिर्हतः स्यात्तदपि तस्य यथा न किञ्चिदपि स्यात्तथास्य बलबाहुल्येनापीति भावः। अथ श्रीहरिवंशवचनानि ज्ञेयानि । "यदयं बाहुयुद्धं वै सदैवं कर्त्तुमुद्यतः । तत्र वै विग्रहः कार्यस्तोषयिष्याम्यहं जगत्। करुषेषु प्रसूतोऽयं चाणूरो नाम नामतः । बाहुयोधी शरीरेण कर्मभिश्चानुचिन्त्यताम् । एतेन बहवो मल्ला निपातानन्तरं हताः। रङ्गप्रतापकामेन मल्लमार्गाश्च दूषिताः । ये तु केचित् स्वदोषेण राज्ञः पण्डितमानिनः । प्रतापार्थे हता मल्ला मल्लहन्तुर्वधो हि स इति । बहुशः बहुवारान् बहुधा चेत्यर्थः । तरसा भ्रमणवेगेनैव क्षीणजीविनमाकाश एव मृतं तथाच श्रीविष्णुपुराणे । "भ्रामयित्वा शतगुणं दैत्यमल्लममित्रजित् । भूमावास्फोटयामास गगने गतजीवित" मिति । अतएव अहो मृत एवायमित्युक्त्वा परित्यागमिषेणैव पोथयामासेति ज्ञेयम् ॥ २२ ॥ अपतत् स चेति शेषः । इन्द्रध्वजोपमया तद्देहस्य बृहत्तरत्वमपि ध्वनितं यथोक्तं श्रीहरिवंशे। "देहेन तस्य मल्लस्य चाणूरस्य गतायुषः । सन्निरुद्धो महारङ्ग सशैलेनेव लक्ष्यत इति ।। २३ ॥ अभिमुखं हतेन प्रहृतेन । बलभद्रं बलोच्छ्र्वादिति स्वभावत एव महाबलिष्ठेन तत्रापि बलिना प्रकटितबलेनेत्यर्थः । तलेन चपेटेन ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्येनवेग इति सर्व्वजनालक्षितत्वं बोधयति, अन्यथा गोपादिभिः प्रसह्य सद्यो निरोध्यत्वात्; उभाविति एकदैव मुष्टिकृताभ्यां द्वाभ्यामेव प्रहारान्महाबलिष्ठत्वं नियुद्धकौशलञ्च दर्शितम् । ननु सर्व्वशक्तिमत्त्वात् कुतस्तत्प्रहारं महाबलं स्वीचक्रे? तत्राह—भगवन्तमशेषैश्वर्य्ययुक्तमपि वासुदेवम्; निजेच्छया बहुधा क्रीडितु वसुदेवादवतीर्णमिति नियुद्धक्रीडानिष्ठार्थं किंवा चाणूरस्य निर्बलताबोधनार्थम् ॥ २१ ॥ ननु तथापि तेन तदीयानां हन्त महार्त्तिः स्यादेव ? तत्राह—नेति । यत्र यथास्थितस्तत्र तथैवातिष्ठदिति प्रहारस्याकिञ्चित्करतोक्ता; तत्रानुरूपो दृष्टान्तः–स्रग्भिरिति; अनेन सुखमपि तस्य सूचितम् । अतस्तदीयैः सोढ़मिति भावः । स्रग्भिरिति बहुत्वं तत्प्रहारप्राचुर्य्यस्याप्यकिञ्चित्करताद्यभिप्रायेण । यद्वा, भगवन्तं परमेश्वरं सहजसुकुमाराङ्गं तत्रापि वासुदेवं निजाशेषरूपगुणादिप्रकटनशील तत्रापि तद्वक्षसि तेन प्रकारेण प्राहरदिति श्रीबादरायणेः शोकोक्तिः । अन्यत् समानम् ॥ २२ ॥ बहुशो बहुवारान् बहुधा चेत्यर्थः । हरिरिति तत्प्राणहरणात् । तरसा शीघ्रमेव क्षीणजीवितं भ्रमणेनैवाकाशे मृतम्; तथा च श्रीविष्णुपुराणे (५।२०।६२)—'भ्रामयित्वा शतगुणं दैत्यमल्लममित्रजित् । भूमावास्फोटयामास गगने गतजीवितम् ॥' इति । यद्वा, तरसा वेगेनापतत् । इन्द्रध्वजोपमया तद्देहस्य बृहत्तरत्वमपि ध्वनितम् । यथोक्तं श्रीवैशम्पायनेन (हरिवंशे विष्णु० प० ३०।४७)—'देहेन तस्य मल्लस्य चाणूरस्य गतायुषः । संनिरुद्धो महारंगः सशैलेनेव लक्षितः ।' इति ॥ २३ ॥ अभिमुखं हतेन प्रहृतेन, वै प्रसिद्धौ । बलभद्रेणेति (भा० १०।२।१३) 'बलभद्रं बलोच्छ्रयात्' इति स्वभावत एव महाबलिष्ठेन तत्रापि बलिना प्रकटितबलेनेत्यर्थः। अतो भृशमत्यर्थमभितो हतः सन्, भृशमित्यस्य परेण वान्वयः। तथाभिहत इति क्रियापदं वा ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स चाणूरः श्येनस्येव वेगो यस्य स उपप्लुत्य क्रुद्धः उभौ मुष्टीकृतौ करौ वासुदेवं वक्षस्यताडयन्मुष्टीकृतकराभ्यां वासुदेवस्य वक्षस्यताडयदित्यर्थः । मुष्टीकृत्येति पाठे उभौ करौ मुष्टीकृत्य ॥ २१ ॥ भगवांस्तत्प्रहारेण नाचलत् यथास्रग्भिर्हतः ताडितो द्विपोगजो न चलति तद्वत् किन्तु तरसा चाणूरं बाह्वोर्गृहीत्वा बहुकृत्वो भ्रामयंस्तेनैव त्यक्तं जीवितं यस्य तं गतप्राणं भूपृष्ठेपोथयामास आस्फोटयत् तेनैवं पातितश्चाणूरः विस्रस्ता विक्षिप्तकेशाः आकल्पा आभरणानि स्रजश्च यस्य तथाभूतो नपतत्यथेन्द्रध्वजस्तद्वत् ॥ २२–२३ ॥ तथा मुष्टिकोऽपि तावत्स्वमुष्टिताडितेन रामेण कत्र्त्रा भृशकरतलेनाभिताडितः प्रवेपितः कम्पितः अर्दितः पीडितः मुखतेरुधिरमुद्वन्नुद्गिरन गतप्राणो वा तेन चण्डमारुतेनाहत उन्मूलितमूलोऽङ्घ्रिपो वृक्ष इव उव्र्युपस्थे भूपृष्ठे पपात ॥ २४-२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अबाधत अताडत् ॥ २१–२२ ॥ इन्द्रध्वजः प्राच्येषु प्रसिद्धः ॥ २३ ॥ तलेन पाणितलेन ॥ २४ ॥

गूढार्थदीपिनी

अबाधत अताडयत् ॥ २१ ॥ नेति सार्द्धम् । न आचलन् ईषदपि नाकम्पत । पृष्ठे उपरि । पोथयामास पातयामास। तरसा वेगेन ॥ २२ ॥ विस्रस्तेत्यर्द्धम् । इन्द्रध्वजः पुरुषाकृतिः स्तम्भः स यथा पतति तथा । कथंभूतः । विस्रस्ताः विच्युता आकल्पादयो यस्य । आकल्पो भूषणम् ॥ २३ ॥ तथेति द्वयम् । तलेन चपेटेन ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स चाणूरः श्येनस्येव वेगो यस्य सः अवाधत अताडयत् ॥ २१–२२ ॥ ध्वजपताकाद्यलङ्कृतः प्रतिसम्वत्सरमुच्छ्रीयते य इन्द्रध्वजः अद्यप्रभृति यश्चैवं करिष्यति नरेश्वरः । आरोग्यञ्च सुभिक्षञ्च तस्य राष्ट्रे भविष्यति इत्यादिपुराणान्तरप्रसिद्धस्तद्वदित्यर्थः ॥ २३–२४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्रजा मालया हतो द्विप इव तत्प्रहारेण चाणूरताडनेन नाचालन्न चचाल बाह्वोः स्वबाहुभ्याम् । अथवा तद्बाहोर्निगृह्य । न च द्वितीयया भवितव्यमेतत्पक्षेऽत एव शृङ्गे कर्णे वा गृहीत्वेति तत्त्वनिर्णयटिप्पणे शृङ्गे कर्णे इति द्वितीयाद्विवचनमित्युक्तिरिति वाच्यम् । सप्तम्या अप्यधिकरणबोधनद्वारा चाणूररूपमुख्यकर्मसमर्पकत्वस्य मध्याभाष्ये वृद्ध्याह्निके संयोगोज्ञाय कश्चिद्गां सक्थिनि कर्णे वा गृहीत्वोपदिशतीत्युक्तियुक्तत्वात्तदनावश्यकता ध्रौव्याद्युपपद्यते सप्तमी बहुशः । हरिर्भ्रामयंस्तरसा क्षीणजीवितं भूपृष्ठे पोथयामासापोथयत् । विस्रस्ता विगलिता आकल्पाः केशाः स्रजश्च यस्य स इन्द्रध्वज इवापतत् ॥ २१–२२ ॥ पूर्वं स्वमुष्टिना मुष्ट्याऽभिहतेन ताडितेन । गोमणियष्टिपाटलिवस्ति शाल्मलित्रुटिमसिमरीचय इति लिङ्गानुशासनाद्द्विलिङ्गो मुष्टिशब्दः स्त्रीपुंसयोरित्यधिकृतेः । बलिना बलभद्रेणातलेन तलभिन्नेन तलसदृशेन मुष्टिनेत्यर्थः । भृशमभिहतस्तथा च मुष्टिः के यस्य स इति व्युत्पत्त्या तन्नामान्वर्थकतया मासबल इति तात्पर्यं ज्ञेयमिति सूचितं भवति । तद्बलस्य दृढमुष्टिनिपिष्टमूर्धा भ्रष्टस्तदेव निपपात स मुष्टिकोऽपीत्याचार्योक्तेः ॥ २३ ॥ प्रवेपितः कम्पमानो मुखतो रुधिरमुद्वमन्नुद्गिरन् । उद्वहन्निति पाठे प्रवाहयन्नित्यर्थः । विगता असवो यस्मात्स सन् उर्व्युपस्थे भूपृष्ठे वाताहतोऽङ्घ्रिपः पादप इव पपात ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तादृशो हि चाणूरः कथं मूर्च्छामवापेति ततो मारणं वक्तुं भगवानक्लिष्टकर्मेति प्रथमं तस्यापराधमाह । स श्येनवेग इति श्येनादप्यधिको वेगो यस्य श्येनो हि भ्रातृव्यं निपात्याद्त्ते श्येनात्सर्वे सपक्षा बिभ्यति अतस्तस्त उत्पत्य उभावपि करौ मुष्टीकृत्य गदावदेकीकृत्य पृथग्वा मुष्टिद्वयं संयोज्य सर्वेश्वरमगणयन्तं वासुदेवं मोक्षदातारमन्यथा भुजाधिष्ठातेन्द्रो न प्रवर्त्तयेत् मोक्षं दास्यतीति भगवदिच्छया अन्यथा कर्त्तुमशक्ताः कालादयस्तूष्णीं स्थिताः नन्वन्तर्यामी कथमेवं प्रेरितवांस्तदाह । क्रुद्ध इति । क्रोधेन व्याप्तस्तथा कृतवान्न बुद्धिपूर्वकं प्रेरितो वा राज्याद्यर्थे लक्ष्मीनिवासभूतमिति सन्तुष्टात् कंसाल्लक्ष्मीं प्राप्स्यामीति वक्षःस्पर्शमात्रं कृतवान् ॥ २१ ॥ सोऽपि स्पर्शस्तस्य व्यर्थो ज्ञात इत्याह । नाचलदिति । तस्य प्रहारेण ईषदपि चलनं स्यन्दनमपि न प्राप्तवान् दूरे स्यन्दनं ज्ञातवानपि नेति वक्तुं दृष्टातमाह । मालाहत इवेति । हस्ती हि अङ्कुशप्रहारमपि न मन्यते का वार्त्ता मालाप्रहारस्य ततो भगवांस्तं मारितवानित्याह । बाह्वोर्निगृह्येति । यौ बाहू मुष्टीकृत्य भगवति प्रक्षिप्तवान् तावेकहस्तेन गृहीत्वा यथा न मोचयति तथा गृहीत्वा बहुशो बहुवारमभ्रामयत् ॥ २२ ॥ तस्य पुनरुत्थानाभावायाह । तरसा क्षीणजीवितमिति । शीघ्रमेव भ्रामणसमय एव क्षीणं जीवितं यस्य भगवान् हि दूरादेव प्रक्षिप्तवान् न त्वेकं भागं धृत्वा भूमौ ताडितवान् अतस्तस्य भगवद्धस्ताद्विमुक्तस्य भूमौ पतने प्रकारमाह । विस्रस्तालपकेशस्रगिति । विस्रस्ताः इतस्ततः प्रक्षिप्ताः आकल्पाः आभरणानि केशाः लक्ष्मीस्तस्य विमुखेति तत्सम्बन्धिनः पदार्थाः विशेषेण स्रस्ताः ततः इन्द्रध्वज इव पूर्वमिन्द्रगर्वनाशो भगवता कृत इति तद्वदस्यापि जातमिति ज्ञापयितुं पूर्वदेशप्रसिद्धः इन्द्रध्वज उच्चैः स्तम्भः परितो रज्जूनामाकर्षणेनोत्थापितः रज्जूनां शैथिल्ये गलितवस्त्राद्याभरणानि पातन्ति तथा कालादृष्टकर्मादीनां विशकलितत्वेन रक्षकाभावात् शरीरं स्तम्भयितुममशक्तः भूमावपत् मल्ला हि पतन्तोऽपि स्वं शरीरं धारणावशाद्धारयन्ति तदत्र नाभूदिति ज्ञापयितुं दृष्टान्तकथनम् ॥ २३ ॥ यथैतस्य भगवता मारणं कृतमेवं मुष्टिकस्यापि बलभद्रेणकृतमिति वक्तुमाह । तथैवेति । बलभद्रस्याप्यक्लिष्टकर्मत्वं बोधयितुं पूर्वंमुष्टिकस्यातिक्रम उच्यते तथेत्यनेन स्त्रीणां वचनानन्तरं तद्दुःखदूरीकरणाय शत्रुहननेच्छन्तथैव गात्रस्पर्शैः शत्रोः सर्वाङ्गव्यथा ततो मारणमिति सर्वमतिदिष्टं मारणे प्रकारं वक्तुं पुनर्निरूपणमाह । स्वमुष्ट्या अभिहतेन बलेन तलेन चपेटेनाभिहतः भृशं मुखाद्रुधिरमुद्वमन् अत्यन्तमर्दितः व्यसुः सन् पपात असावधानत्वाय दृष्टान्तः वाताहत इवेति । चतेटताडनेनैव क्रियाशक्तिस्तस्यापगता बलवता सजातीयेनोपहतेति स्वमुष्ट्येति मुष्टिकनाम्ना तस्य मुष्टिरेव प्रसिद्धा अतएव तेनाभितो हतः आभिमुख्येन वा प्रथमपक्षे मुष्टिभिः सर्वाङ्गेषु हननं द्वितीये तु मुखे वक्षसि वा सकृदेव हननमिति । ननु चपेटमात्रेण कथं हननमित्याशङ्क्याह । बलिनेति । अनेन कर्णप्रान्ते मर्मस्थानमिति दैवगत्या हत इति वक्षो व्यावर्त्तितः ॥ २४ ॥

श्रीसुबोधिनी–सार

श्येनस्येव वेगो यस्य स चाणूर उभौ करौ हस्तौ मुष्टीकृत्य क्रुद्धो भगवन्तं वासुदेवं वक्षसि अहन् ॥ २१ ॥ तस्य प्रहारेण कृष्णो नाकम्पत । मालया हतो द्विपो हस्तीव बाह्वोर्गृहीत्वा चाणूरं बहुशो भ्रामयन् हरिः ॥ २२ ॥ भूपृष्ठे पातयामास तरसा वेगेन क्षीणजीवितं यथा भवति तथा विस्रस्ता आकल्पा आभूषणाः केशाः स्रक् माला यस्य सोऽपतत् इन्द्रस्य ध्वज इव ॥ २३ ॥ तथैव तद्वत् पूर्वं प्रथमं स्वमुष्ट्याऽभिहतेन ताडितेन बलिना बलभद्रेण कर्त्रा तलेनाभिहतो मुष्टिको भृशमत्यर्थम् ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्येनस्येव वेगो यस्य स क्रुद्धश्चाणूर उभौ करौ मुष्टीकृत्य उत्पत्य उत्प्लुत्य भगवन्तमपि वासुदेवं वसुदेवनन्दनं मत्वा वक्ष्यस्यबाधत अताडयदित्यर्थः ॥ २१ एवं तेन ताडने कृतेऽपि तत्प्रहारेण भगवान्नाचलत् ईषदपि नाकम्पत। तत्र दृष्टान्तमाह-यथा मालया हतो द्विपो हस्ती न प्रचलति तथेति। किंतु तरसा झटिति चाणूरं बाह्वोर्निगृह्य गृहीत्वा बहुशो भ्रामयन् हरिः ॥ २२॥ तरसा भ्रामणवेगेनैव क्षीणं जीवितं यस्य तं भूपृष्ठे पोथयामास वेगेन पातयामास। स च तेन पातितश्चाणूरो विस्रस्ता विक्षिप्ताः आकल्पानि आभरणानि केशा स्रजश्च यस्य तथाभूतः सन्नपतत्। तत्र दृष्टान्तमाह—इन्द्रध्वज इवेति। इन्द्रध्वजो नाम गौडेषु प्रसिद्धः कस्मिंश्चिदुत्सवे महान् स्तम्भो ध्वजादिभिरलङ्कृतः पुरुषाकृती रज्ज्वाकृष्ट उच्छ्रीयते स यथा रज्जुशैथिल्येन पतति तथा कर्मबन्धक्षयात्सोऽपि पतित इत्यर्थः ॥ २३ ॥ तथैव मुष्टिकोऽपि तावत् पूर्वं स्वमुष्टिनाऽभिहतेन ताडितेन बलिना बलभद्रेण कर्त्रा तलेनैव साधनेनाभिहतः, अतो भृशमत्यन्तं अर्दितः पीडितः, अतः प्रवेपितः कम्पितः मुखतो रुधिरमुद्वमन्नुद्गिरन् व्यसुः गतप्राणो वातेन प्रचण्डवातेन मारुतेन आहत उन्मूलितोऽङ्घ्रिपो वृक्ष इवउर्व्युपस्थे भूपृष्ठे पपातेति द्वयोरन्वयः ॥ २४–२५ ॥

अन्वितार्थप्रकाशिका

स इति ॥ श्येनस्येव वेगो यस्य स क्रुद्धश्चाणूर उभौ करौ मुष्टीकृत्य उत्पत्य उत्प्लुत्य भगवन्तं वासुदेवं वक्षस्यबाधत अताडयत् ॥ २१ ॥ नेति सार्द्धम् ॥ एवं ताडने कृतेऽपि यथा मालया हतो द्विपो न चलति तथा तत्प्रहारेण भगवान्नाचलत् ईषदपि नाकम्पत। बाह्वोरिति। तरसा झटिति चाणूर बाह्वोर्निगृह्य गृहीत्वा बहुशो भ्रामयन्। ह्रस्वाभाव आर्षः। हरिः तरसा भ्रामणवेगेनैव क्षीण जीवितं यस्य तम् आकाश एव मृतं भूपृष्ठे पोथयामास वेगेन पातयामास ॥ २२ ॥ विस्रस्तेत्यर्द्धम् ॥ स च तेन पातितश्चाणूरो विस्रस्तानि निक्षिप्तानि आकल्पानि आभरणानि केशाः स्रजश्च यस्य तथाभूतः सन् इन्द्रध्वजो वज्रम् इवापतत्। यद्वा। इन्द्रध्वजो नाम गौडेषु प्रसिद्धः कस्मिंश्चिदुत्सवे महान्स्तम्भो ध्वजादिभिरलङ्कृतः पुरुषाकृती रज्ज्वाकृष्ट उच्छ्रीयते उत्सवान्ते च रज्जुशैथिल्येन पतति ॥ २३ ॥ तथेति द्वयम् ॥ तथैव मुष्टिकोऽपि तावत्स्वमुष्टिनाऽभिहतेन ताडितेन बलिना बलभद्रेण कर्त्रा तलेनैव साधनेनाभिहतः अतो भृशमत्यन्तम् अर्दितः पीडितः अतः प्रवेपितः कम्पितः मुखतो रुधिरमुद्वमन्नुद्गिरन् व्यसुः गतप्राणो वातेन प्रचण्डमारुतेन आहत उन्मूलितोऽङ्घ्रिपो वृक्ष इवोर्व्युपस्थे भूपृष्ठे पपात। श्लेषेण गालिप्रदानं चेति चक्रवर्ती हसति ।२४-२५

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्येनस्य वेग इव वेगो यस्य सः चाणूरः उत्पत्य उत्प्लुत्य वक्षसि हृदये अबाधत तताड ॥ २१ ॥ भूपृष्ठे भूमितले पोथयामास आस्फालयाञ्चकारतरसाक्षीणजीवितं भ्रामणवेगेनैव आकाशे मृतम् ॥ २२ ॥ विस्रस्ताः स्वस्थानतोभ्रष्टाः आकल्पा आभरणानि केशाः स्रजश्च यस्य सः इन्द्रध्वज इव वज्रमिव पपात ॥ २३ ॥ अर्द्दितो व्यथितः उर्व्युपस्थे क्षितितले व्यसुः सन् पपात ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति ॥ स चाणूरः अपि, उभौ करौ, मुष्टीकृत्य, श्येनस्येव वेगो यस्य तथाभूतः सन्, उत्पत्य उत्प्लुत्य, क्रुद्धः सन्, वासुदेवं भगवन्तं वक्षसि अबाधत अताडयत् ॥ २१ ॥ नाचलदिति ॥ भूपृष्ठ इति ॥ हरिः श्रीकृष्णो भगवान्, मालाहतः पुष्पमालाताडितः, द्विपो हस्ती इव, तत् प्रहारेण चाणूरकृतमुष्टिप्रहारेण, न अचलत्। प्रत्युत तरसा चाणूरं बाह्वोः निगृह्य गृहीत्वा, बहुशः बहुकृत्वः, भ्रामयन् सन्, क्षीणजीवितं भ्रामणेनैव त्यक्तजीवितं, भूपृष्ठे पोथयामास पातयामास, एवं कृष्णेन भूपृष्ठे पातितश्चाणूरः, विस्रस्ता विक्षिप्ताः आकल्पा आभरणानि केशा मूर्द्धजाः स्रजो मालाश्च यस्य तथाभूतः सन, इन्द्रध्वजः इव, अपतत्। तत्र इन्द्रध्वजो गौडेषु प्रसिद्धः कस्मिंश्चिदुत्सवे महान् स्तम्भो ध्वजपताकाद्यलंकृतः पुरुषाकृतिः उच्छ्रीयते स यथा पतति तद्वदपतत्। इति द्वयोरेकान्वयः ॥ २२–२३ ॥ तथैवेति ॥ प्रवेपित इति च ॥ तथैव सः मुष्टिकः, पूर्वं स्वमुष्ट्या अभिहतेन ताडितेन, बलिना बलभद्रेण, भृशं वै अतिशयेनैवेत्यर्थः। तलेन करतलेन, अभिहतस्ताडितः अत एव, प्रवेपितः कम्पितः, अर्दितः पीडितः, मुखतः रुधिरं उद्वमन्नुद्गिरन्, व्यसुर्गतप्राणः, वातेन चण्डमारुतेनाहतः उन्मूलितः, अङ्घ्रिपो वृक्षः एव, उर्व्युपस्थे भूपृष्ठे, पपात ॥ २४–२५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स वासुदेवमिति : १०.४४.२१.

मत्कृतक्लेशभागेष न स्याच्चेन्मा भवत्विह। पितरं तु करोमीति वासुदेवमताडयत् ॥ ६ ॥
कृष्णवक्षःस्थितां कंसासुरासुहरणे स्पृहाम्। भङ्क्तुमिच्छन् स चाणूरो वक्षस्येव जघान किम् ॥७॥
स्वामिसेवकभावो हि यद्वशाद्भुवि तां श्रियम्। हन्मीत्यच्युतहृद्देशमताडयत किं रुषा ॥ ८ ॥

बाह्वोर्निगृह्येति : १०.४४.२२.

यद्बलाद् बलवानेष दुष्टस्तन्निग्रहादिदम् । निहन्मीति क्रुधा कृष्णः परिजग्राह तद्भुजौ ॥ ९ ॥
योऽखिलभ्रान्तिकृन्मोहस्तस्यापि भ्रमदोऽस्म्यहम् । इति किं व्यञ्जयन्नीशोऽभ्रमयत्तं मुहुर्मुहुः ॥१०॥

भूपृष्ठ इति : १०.४४.२३.

कंसचारेष्वयं चारस्त्वन्तरेणूचितः खलु । आलोच्येति तदा श्रीशो भूपृष्ठे तमपोथयत् ॥ ११ ॥

तथैवेति : १०.४४.२४

लोभस्वभावमसुरो निजमुष्टिबन्धाद् व्यक्तीचकार किल मुष्टिक एवमेषः ।
स्वौदार्यभावमतुलं तलताडनेन रामोऽपि युक्तमुभयोररिता हि नित्या ॥ १२ ॥

कृष्णप्रिया

अब वह अत्यन्त क्रोधित होकर बाज की तरह झपटा और दोनों हाथों घूँसे बाँधकर उसने भगवान् श्रीकृष्ण की छाती पर प्रहार किया ॥ २१ ॥ परन्तु उसके प्रहार से भगवान् तनिक भी विचलित न हुए, जैसे फूलों के गजरे की मार से गजराज। उन्होंने चाणूर की दोनों भुजायें पकड़ ली और उसे अन्तरिक्ष में बड़े वेग से कई बार घुमाकर धरती पर दे मारा। परीक्षित्! चाणूर के प्राण तो घुमाने के समय ही निकल गये थे। उसकी वेष-भूषा अस्त-व्यस्त हो गयी, केश और मालायें बिखर गयी, वह इन्द्रध्वज (इन्द्र की पूजा के लिए खड़े किये गये बड़े झण्डे) के समान गिर पड़ा ॥ २२–२३ ॥ इसी प्रकार मुष्टिक ने भी पहले बलरामजी को एक घूँसा मारा। इस पर बली बलरामजी ने उसे बड़े जोर से एक तमाचा धर दिया ॥२४॥

प्रवेपितः स रुधिरमुद्वमन् मुखतोऽर्दितः । व्यसुः पपातोर्व्युपस्थे वाताहत इवाङ्घ्रिपः ॥ २५ ॥
ततः कूटमनुप्राप्तं रामः प्रहरतां वरः । अवधील्लीलया राजन् सावज्ञं वाममुष्टिना ॥ २६ ॥
तर्ह्येव[1] हि शलः [2]कृष्णपादापहतशीर्षकः । द्विधा विदीर्णस्तोशलक उभावपि निपेततुः ॥ २७ ॥
चाणूरे मुष्टिके कूटे शले तोशलके हते । शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः[3] ॥ २८ ॥

कर्दमक्षमा

अन्वयः—हे राजन्! ततः अनुप्राप्तः प्रहरतां वरः रामः कूटं सावज्ञं लीलया वाममुष्टिना अवधीत् ॥ २६ ॥ तर्हि एव हि शलः कृष्णपादापदतशीर्षकः, तोशलकः अपि द्विधा विदीर्णः उभौ अपि निपेततुः ॥ २७ ॥ चाणूरे मुष्टिके कूटे शले तोशलके हते शेषाः सर्वे मल्लाः प्राणपरोप्सवः प्रदुद्रुवुः ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अर्दितः पीडितः । उर्व्युपस्थे भूतले ॥ २५–२८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स मुष्टिकः । प्रवेपितोऽतिकम्पयुतः ॥ पूर्वमिन्द्रध्वजदृष्टान्त ऊर्ध्वात्पतनेऽत्र तु वृक्षदृष्टान्तो भूमेरेवेति ॥ २५ ॥ ततो मुष्टिकवधोत्तरम् । सावज्ञमनायासं भर्त्सनपूर्वकं वा । 'अवज्ञा भर्त्सने श्रमे' इति तीर्थः ॥ लीलयाऽप्रयासचेष्टया, यतो वाममुष्ट्या, तत्रापि सावज्ञं हेलयैवेत्यर्थः ॥ २६ ॥ तर्ह्येव हि मुष्टिकपातसमकालमेव । द्विधा द्वाभ्यामेकेन वोभयोर्विदीर्णो विदारितः ॥ शलस्तोशलकश्च मल्लन्यायमतिक्रम्य भयान्मिलित्वैवालक्षितयुगपत्पादद्वयाकर्षणाय नीचितमस्तकः सन्निति ज्ञेयम् ॥ २७ ॥ शेषा उक्तेभ्योऽन्ये ॥ युद्धे श्रीकृष्णतो युद्धे । कंसतः प्राणरक्षां कर्तुमिच्छन्त इत्यर्थः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पूर्वमिन्द्रध्वजदृष्टान्तः ऊर्ध्वात् पतनेऽत्र वृक्षदृष्टान्तो भूमेरेवेति ॥ २५ ॥ लीलया अप्रयासचेष्टया । यतो वाममुष्ट्या तत्रापि सावज्ञं हेलयैवेत्यर्थः ॥ २६ ॥ शलस्तोशलकश्च मल्लन्यायमतिक्रम्य भयान्मिलित्वैवालक्षितयुगपत्तत्पादद्वयाकर्षणाय नीचितमस्तकः सन्निति ज्ञेयम् ॥ २७ ॥ युद्धे श्रीकृष्णतः अयुद्धेतु कंसतः प्राणरक्षां कर्त्तुमिच्छव इत्यर्थः ॥ २८ ॥

---

१. तदेव–वीर. विज. । २. पदा–श्रीधर. वंशी. जीव. विज विश्व. ; प्रपदा–वीर. । ३. परीप्सया–वीर. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्च प्रवेपित उत्कम्पमानः स मुष्टिको मुखेन रक्तमुच्चैर्वमन् वातेनाहत उन्मूलितो वृक्ष इवेति दृष्टान्तेन महावेगशब्दादिना पातस्तद्देहस्य बृहत्तरत्वमपि ध्वन्यते, किन्त्विन्द्रध्वजोपमया चाणूरदेहस्यास्मादपि बृहत्त्वं ज्ञेयम् ।। २५ ।। ततो मुष्टिकपातादनु पश्चात् प्राप्तमागतम्, यद्वा, भीत्या पृष्ठतो गतम्, रामो निजबन्धुरमणात्, लीलया—अप्रयासेनैवेत्यर्थः, यतो वाममुष्टिना तत्रापि सावज्ञं हेलयैवेत्यर्थः, यतः प्रहरतां मध्ये श्रेष्ठः । राजन्निति प्रहर्षेण विद्योतमानं राजानं दृष्ट्वा हर्षात् सम्बोधयति, यद्वा, लीलया राजमानः ।। २६ ।। हि समुच्चये । शलस्तोशलकश्चानुप्राप्तः सन् श्रीकृष्णस्य बलविशेषदृष्टया तदन्तिकेनाजिगमिषतोरपि तयोः श्रीबलरामान्तिके कूटस्यास्यागमनानन्तरं कंसभयादिना द्वयोरप्येकदैवागमनात् । यद्वा, कूटवद्युद्धार्थमप्राप्तयोरपि तयोर्युयुत्सया तत्रैवातिनिकटे स्थितयोः कंसानुगत्वाद्वधो ज्ञेयः । ततश्च हि निश्चये । कृष्णस्य पदेन श्रीचरणेन वामेनापहतं दूरात् पातितं शीर्षं यस्य सः, बहुव्रीहौ कः । यद्वा, शीर्षमेव कः सूर्य्यः, किरीटादिना देदीप्यमानत्वात् । 'को ब्रह्मात्मानिलार्केषु' इति विश्वः । कृष्णेति दूरत एव पादप्रहारेण तन्मस्तकाकर्षणात् नितरां गतप्राणत्वादिना पेततुः ।। २७ ।। शेषा अवशिष्टाः प्रदुद्रुवुर्वेगेनापलायन्त । ननु यशः कंसाद्भयञ्च ते कथं तत्यजुः ? तत्राह—प्राणेति, प्राणान् सर्व्वतो गतप्रायान् परितः प्राप्तुमिच्छन्तः सद्यो मृत्युपरिजिहीर्षया तत्तदनपेक्षणादिति भावः ।। २८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो रामः तमनु समनन्तरं प्राप्तं कूटाख्यं मल्लं सावज्ञं सावहेलनं यथा तथा लीलया वाममुष्टिनाऽवधीत् ।। २६ ।। तदैव कृष्णस्य प्रपदा पादाग्रेण ताडिताशिराः शलाख्यो मल्लः तोशलस्तु द्विधा विदीर्णः विदारितः उभौ तावेतौ शलतोशलकौ निपेततुः ।। २७ ।। इत्थं चाणूरादिषु हतेष्ववशिष्टाः सर्वे प्राणपरीप्सया प्राणानाप्तुमिच्छया जीवितुमिच्छयेति यावत्प्रदुद्रुवुः पलायितवन्तः प्राणपरीप्सव इति पाठे जीवितुमिच्छव इत्यर्थः ।। २८ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उर्व्युपस्थे भूमिपृष्ठे ।। २५ ।। सावज्ञम् अनायासम् ।। २६–२८ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अर्व्युपस्थे भूतले श्लेषद्योतितं गालिप्रदानं च ।। २५–२८ ।।

गूढार्थदीपिनी

व्यसुः विगतप्राणः सन् । उर्व्युपस्थे भूतले । अर्दितः पीडितः ।। २५–२६ ।। प्रपदं पदाग्रम् ।। २७–२८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उर्व्युपस्थे भूतले ।। २५–२८ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कूटं तन्नामकं मल्लं लीलया मल्ललीलापदेशेन सावज्ञं सतिरस्कारं तमलक्षयित्वेति यावत् रामो वाममुष्टिनाऽवधीज्जसद्बुद्धौ दुर्बुद्धिमेवं कुतः कृतवान्बल इत्यतोऽप्याह कूटं यथा तथा । नुप्राप्तमिति क्रियाविशेषणमेतत् । कूटस्य कंसस्य मतुना मन्त्रेण प्राप्तमिति वा ।। शलस्तन्नामा तोसलको गतम् ।। २६–२७ ।। प्राणपरीप्सवः ।। २८ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अभितो हत इत्यनेनापि यतो बलमस्य भद्रमेव उपकार्येवेति आहननमात्रेण कथं प्राणोद्गम इति आशङ्क्य प्रकारमाह । प्रवेपित इति । प्रकर्षेण वेपित इति मूर्च्छया परितः कम्पितो जातः ततोऽन्तःक्षोभात् आघातेन सर्वाङ्गे तु रुधिरमेकीभूतं मुखान्निर्गतं ततः पीडितो जातः यथा प्राणापगमो भवति ततः स्तम्भकस्याभावात् पतितः बलक्रियापतनपर्यन्तमपि व्याप्तेति ज्ञापयितुं दृष्टान्त उक्तः नावयववियोगे परमकारणनाशात् पतितः किं तु बलमूलकारणयोरेव सामर्थ्यादिति ।। २५ ।। तस्मिन् हते कूटो नाम बहुकपटाभिज्ञः युद्धे कूटवत् स्थिरोऽपि बलभद्रं ताडितवान् ततो बलेन लीलयैव हत इत्याह । अत्र न बलव्यापारः किं तु मल्लरसस्योद्गमनार्थं रमणात्मक इति रसोद्गमार्थमेव प्रहरताम्बर इति लीलयेति च पुरुषकारोऽपि निरूपितः राजन्निति विश्वासार्थं सम्बोधनमलौकिकत्वात् क्रियाशक्तिप्रधानः राम इति बलनामवतः रामनाम्नोऽपि सामर्थ्यप्रतिपादकत्वं वक्तुमिदमुक्तम् ।। २६ ।। एवमुभयोर्वधो बलान्निरूपितः अवशिष्टयोर्वधं भगवतः सकाशादाह । तर्ह्येवेति । ननु बलभद्रव्यापारानन्तरं शलतोशलैऽहतौ किं तु यदैव कूटो हतः तर्ह्येव शलोऽपि चतुर्थः कृष्णपस्यदायहतशीर्षको जातः स हि पादं धर्तुमागतः क्षिपता पादेन हतः तस्मिन्नेव समये तोशलकोऽपि समागतः स तु द्विधा विदीर्णः यदैव उभयोरपि पदव्यापारः साक्षाद्भगवता हतविति वक्तुमेवं वचनमुचितं

एवं प्रकारान्तरादपि सम्भवति कृष्णपदाहतं दूरं प्रक्षिप्तं शिरो यस्य तादृशः शलो जातः तेन द्विधा विदीर्णः तस्य शिरसा तोशलको द्विधा विदीर्णः प्रहरवत् न तु भगवत्पदा हत इति अर्थद्वयेऽपि उभावपि निपेततुः सकृदेव एको विदीर्णः एकस्तिर्यक् द्विधा जात इति विशेषः ॥ २७ ॥ एवं भगवतोऽक्लिष्टकर्मत्वं निरूपितम् । चाणूर इति गणना हतानामभिज्ञानार्था पञ्चानां मध्ये एकस्मिन्नपि प्राणे स्थिते यथा देहो नापगच्छति तथा शिष्टा मल्ला नापगच्छन्नीति ततः सर्वे स्वप्राणरक्षकाः धनप्राप्त्याशां दूरीकृत्य प्रकर्षेण दुद्रुवुः अयुद्धे कंसाद्भयं युद्धे तु भगवत इति पलायनमेव शरणम् अन्येषां वीराणामपि पलायनं मा भवत्विति मल्लग्रहणं स विशेषे शिष्टानां युद्धं कर्त्तव्यमिति सर्वग्रहणं ननु सर्णैरेव स्वपौरुषं प्रदर्शनीयं कथमतिक्रम इति चेत्तत्राह । सर्वे प्राणपरीप्सव इति । यदि चाणूरादीन्न हन्यात्तदा अन्येऽपि युध्येरन् न हिं वीरा इव मल्लाः प्राणनिरपेक्षं यतन्ते परिपालयितुमीप्सवः ॥ २८ ॥

श्रीसुबोधिनी-सारः

प्रवेपितः कंपितः मुखतो रुधिरम् उद्वमन् सोऽर्दितः पीडितो व्यसुः प्राणहीन उर्व्या उपस्थे भूतले पपात वातेनाहतोंघ्रिप इव ॥ २५ ॥ ततोऽनन्तरं कूटमनुप्राप्तं प्रहरतां वरो रामः सावज्ञम् यथा भवति तथाऽवधीत् । वामेन मुष्टिना ॥ २६ ॥ तर्हि एव समये कृष्णस्य पदाऽपहतं स्फुटितं शीर्षकं यस्य स शलः द्विधा विदीर्णः तोशलक उभौ निपेततुः ॥ २७ ॥ चाणूरादिके हते सति शेषाः सर्वे मल्लाः जीवनेच्छवो प्रदुद्रुवुः ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततः अनु अनन्तरमेव प्रहरतां योद्घृणां वरः श्रेष्ठः बलवान् रामः कूटाख्यं मल्लं सावज्ञं सावहेलनं यथा स्यात्तथा लीलयाऽनायासेनैव वाममुष्टिनाऽवधीत् ॥ २६ ॥ तर्ह्येव हि प्रसिद्धतया शलः कृष्णस्य प्रपदां पादाग्रेण हतशीर्षको जातः, तोशलकश्च द्विधा विदीर्णो जातः, एवमुभावपि मृतौ भूमौ निपेततुः ॥ २७ ॥ एवं चाणूरादिषु हतेषु सत्सु प्राणपरीप्सवः जीवितुमिच्छवः शेषाः अवशिष्टाः सर्वे मल्लाः प्रदुद्रुवुः पलायितवन्तः ॥ २८ ॥

अन्वितार्थप्रकाशिका

तत इति ॥ हे राजन् ! ततः अनु अनन्तरमेव प्राप्तः प्रहरतां योद्घृणां वरः श्रेष्ठः बलवान् रामः कूटाख्यं मल्लं सावज्ञं सावहेलनं यथा स्यात्तथा लीलयाऽनायासेनैव वाममुष्टिनाऽवधीत् ॥ २६ ॥ तर्हीति ॥ तर्ह्येव हि प्रसिद्धतया शलः कृष्णस्य प्रपदेन पादाग्रेण हतशीर्षको जातः तोशलकश्च द्विधा विदीर्णो जातः एवमुभावपि मृतौ भूमौ निपेततुः ॥ २७ ॥ चाणूर इति ॥ एवं चाणूरे मुष्टिके कूटे शले तोशलके च हते सति प्राणपरीप्सवः जीवितुमिच्छवः शेषाः अवशिष्टाः सर्वे मल्लाः प्रदुद्रुवः पलायितवन्तः ॥२८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वज्रमुष्टिना वाममुष्टिना इत्यपिपाठः ॥ २५ ॥ तोशलकः द्विधाविदीर्णो द्विदलीकृतः ॥ २६-२७ ॥ वलान्तौ नृत्याकुर्वंतौ ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः प्रहरतां वरः रामः, अनु मुष्टिकमरणानन्तरमेव प्राप्तं कूटं कूटनामानं मल्लं, हे राजन्, लीलया सावज्ञं अवज्ञया सहितं यथा तथा, वाममुष्टिना अवधीत् ॥ २६ ॥ तर्हीति ॥ तर्ह्येव तदैव, शलः कृष्णं प्राप्तः 'शलाख्यो मल्लः, तोशलकः कृष्णं प्राप्तस्तोशलकनामा मल्लश्च, कृष्णप्रपदेन श्रीकृष्णस्य पादाग्रेणाऽऽहतशीर्षकः ताडितशिराः, द्विधा विदीर्णः एवं उभौ अपि, निपेततुः ॥ २७ ॥ चाणूर इति ॥ इत्थं चाणूरे, मुष्टिके, कूटे, शले, तोशलके च हते, शेषाः सर्वे मल्लाः, प्राणपरीप्सया प्राणानाप्तुमभीच्छया जीवितुमिच्छयेति यावत् । प्रदुद्रुवुः पलायितवन्तः । पाठान्तरे प्राणपरीप्सवः इति जीवितुमिच्छव इत्यर्थः ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ततः कूटमिति : १०.४४.२६.

अलक्ष्य एवैष ममेति कूटं जघान रामो निजवाममुष्ट्या ।
ख्यातोऽथवा तद्धननं व्यधाद्यत् स्फुटं सकूटावधमस्त्रियो हि ॥ १३ ॥

तर्ह्येवेति : १०.४४.२७.

शल एवमदः पदाहतः स तदा चूर्णशिरा परात्मना । स्फुटमेवमबोधि शौरिणा स्वपदद्वेषकृदेष एव हि ॥ १४ ॥
इयं श्रीरस्माकं न खल तव हे दुर्नयनिधे ममेदं राज्यं श्रीरियमपि ममेत्याग्रहविधिः ।
मृषवेति स्पष्टं तदवगतये तोशलमिषात्कृतो द्वेधा मानः पदत इह पद्माधिपतिना ॥ १५ ॥
तोशलकव्यपदेशे माने भृशमस्तभावमुपगमिते । तुल्याऽलघुलघुतोर्ध्वाघस्थितिरपि चेत्यभूत्स्फुटं चरितात् ॥ १६ ॥

कृष्णप्रिया

तमाचा लगने से वह काँप उठा और आँधी से उखड़े हुए वृक्ष के समान अत्यन्त व्यथित और अन्त में प्राणहीन होकर खून उगलता हुआ पृथ्वीपर गिर पड़ा ॥ २५ ॥ हे राजन् ! इसके बाद योद्धाओं में श्रेष्ठ भगवान् बलरामजीने अपने सामने आते ही कूट नामक पहलवान को खेल-खेल में ही बायें हाथ के घूँसे से उपेक्षापूर्वक मार डाला ॥ २६ ॥ उसी समय भगवान् श्रीकृष्ण ने पैर की ठोकर से शल का सिर धड़ से अलग कर दिया और तोशल को तिनके की तरह चीरकर दो टुकड़े कर दिया । इस प्रकार दोनों धराशायी हो गये ॥ २७ ॥ जब चाणूर, मुष्टिक, कूट, शल और तोशल – ये पाँचो पहलवान मर चुके, तब जो बच रहे थे, वे अपने प्राण बचाने के लिये स्वयं वहाँ से भाग खड़े हुए ॥ २८ ॥

गोपान् वयस्यानाकृष्य तैः संसृज्य विजह्रतुः । वाद्यमानेषु तूर्येषु वल्गन्तौ [1]रुतनूपुरौ ॥ २९ ॥
जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः । ऋते कंसं विप्रमुख्याः साधवः साधुसाध्विति ॥ ३० ॥
हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् । न्यवारयत् स्वतूर्याणि वाक्यं चेदमुवाच ह ॥ ३१ ॥
निःसारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् । धनं हरत गोपानां नन्दं बध्नीत दुर्मतिम् ॥ ३२ ॥

कर्वमक्षमा

अन्वयः—वयस्यान् गोपान् आकृष्य तैः संसृत्य तूर्येषु वाद्यमानेषु रुतनूपुरौ वल्गन्तौ विजह्रतुः ॥ २९ ॥ कंसं ऋते विप्रमुख्याः सर्वे साधवः साधु-साधु इति (वदन्तः) रामकृष्णयोः कर्मणा प्रजहृषुः ॥ ३० ॥ मल्लवर्येषु हतेषु विद्रुतेषु च भोजराट् स्वतूर्याणि न्यवारयत्, इदं वाक्यं च ह उवाच ॥ ३१ ॥ दुर्वृत्तौ वसुदेवात्मजौ पुरात् निःसारयत । गोपानां धनं हरत । दुर्मतिम् नन्दं बध्नीत ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वल्गंतौ नृत्यादि कुर्वन्तौ ॥ २९ ॥ साधु साधु इति वदन्तः ॥ ३०–३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तौ रामकृष्णौ । संसृज्य संगम्य । रुतौ शब्दायमानौ नूपुरौ तुला कोटी ययोस्तौ 'तुलाकोटिस्तु नूपुरे' इति यादवः ॥ गोपानित्यतः प्राक् ततश्च विहस्येति ज्ञेयम् । आकृष्य आपातप्रवृत्तौ लज्जया स्वयमनागच्छतोऽपि बलाद्गृहीत्वा संनह्य मल्लरीत्या मिथो गृहीत्वा वल्गन्तौ मल्लगतिं कुर्वन्तौ । तदानीं चैलेयालंकारत्वेऽपि रत्ननूपुराविति चरणे प्रतिमल्लविमर्दाभावाद्गात्रनोदकत्वेन बल्गनपोषकशब्दत्वेन च तदपरित्यागात् । एतद्द्वयस्योत्कर्षणादिकं कौतुकार्थम् । तच्च कंसक्रोधविवर्धनमपि ज्ञेयम् ॥ २९ ॥ जना रंगस्थाः । प्रजहृषुस्तुतुषुः । ऋते विना । विप्रेषु मुख्याः साधवश्च ये ते तु तन्महिमज्ञानबलेनाकुतोभयत्वात्साधुसाध्विति स्पष्टमेव वदन्तः प्रजहृषुः ॥ ३० ॥ विद्रुतेषु पलायितेषु । इदं वक्ष्यमाणम् ॥ स्वस्यैव तूर्याणि न्यवारयन्न तु देवानां निवारयितुं शक्तस्तदानीं हततेजस्कत्वात् । न च यानि स्वयमवाद्यन्त तानि वाऽशक्यत्वादिति भावः । 'सः' इति पाठेऽपि स एवार्थः । श्रीविष्णुपुराणे तु पूर्वमेव न्यवारयदिति प्रोक्तम्—"बलक्षयं विवृद्धिं च दृष्ट्वा चाणूरकृष्णयोः । वारयामास तूर्याणि कंसः कोपपरायणः ॥ मृदंगादिषु वाद्यषु प्रतिषिद्धेषु तत्क्षणात् । खे संगतान्यवाद्यन्त देवतूर्याण्यनेकशः ॥ जय गोविंद चाणूरं जहि केशव दानवम् । इत्यतर्द्धिगता देवास्तमूचुरतिहर्षिताः ॥" इति श्रीहरिवंशे च – "ततः प्रस्विन्नवदनः कृष्णप्रणिहितेक्षणः । न्यवारयत तूर्याणि कंसः सव्येन पाणिना ॥ प्रतिषिद्धेषु तूर्येषु मृदगादिषु तेषु वै । खे संगतानि" इत्यादि । किञ्च—"स्वयमेव प्रावाद्यन्त तूर्यघोषाश्च सर्वशः" इति । अत्रैकवाक्यता वादकैः पुनः प्रवर्तितत्वाज्ज्ञेया । निवारणच्छल दर्शयति—वाक्यञ्चेति । ह स्फुटम् । निजादेशश्रवणार्थमिवेति भावः । भोजैर्यादवभेदैः कतिपयैरेव राजत इति तथा स इति सर्वेषामपि तदनादरः सूचितः ॥ ३१ ॥ निःसारयत निष्कासयत । बध्नीत निगडयुतं कुरुत ॥ नियुद्धक्रीडायां मल्लहननाद्दुर्वृत्तौ, युद्ध चानयोस्तदित्याह—यतो वसुदेवात्मजौ । पुरान्निःसारयतेत्यपकर्तुमशक्यत्वात् । निःसारणशक्यत्वञ्चानयोः प्रायो वनवासिनोर्वनाभिरुचेः स्यादिति गूढोऽभिप्रायः । प्रकटस्तु भागिनेयावेताविति दुर्मतिं वसुदेवेन सह सौहृद्यात्, तथाप्यज्ञानादेव मच्छत्रुपालनं कुरुत इति बध्नीतैव न तु हन्यादिति । सरस्वती तु—दुर्गमं वृत्तं चरितं ययास्तौ । पुरात् पुरमध्यास्य । निश्शेषेण सारं श्रेष्ठं कुरुत । गापानां धनं श्रीकृष्णं हरत अत्रैव रक्षत । नन्दं बध्नीत प्रेमरसनयेति शेषः । तेन सहातिप्रीतिं कुरुतेत्यर्थः । दुर्गमा मतिर्यस्य तम् ॥ ३२ ॥

---

[1] चारु–वीर. ; नुत–विज. ।

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

गोपानित्येत् प्राक् ततश्च विहस्येति ज्ञेयम्। आकृष्य आपात प्रवृत्तौ लज्जया स्वयमनागच्छतोऽपि बलाद् गृहीत्वा संसृज्य मल्लरीत्या मिथो गृहीत्वा वल्गन्तौमल्लगतिं कुर्वन्तौ तदानीं चैलेयालङ्कारत्वेऽपि रत्ननूपुराविति चरणे प्रतिमल्लविमर्दाभावात् गात्रातोदकत्वेन वल्गनपोषकशब्दत्वेनच तदपरित्यागात्। एतद्वयस्याकर्षणादिकं कौतुकार्थं तच्च कंसक्रोधविवर्द्धनमपि ज्ञेयम्॥ २९॥ विप्रेषु मुख्याः साधवश्च ये ते तु तन्महिमज्ञानबलेनाकुतोभयत्वात् साधु साधु साध्विति स्पष्टमेव वदन्तः प्रजहृषुः॥ ३०॥ स्वस्यैव तूर्याणि न्यवारयदिति नतु देवानां निवारयितुं शक्तः तदानीं हततेजस्कत्वात्। नच यानि स्वयमवाद्यन्त तानि वा अशक्यत्वादिति भावः। स इति पाठेऽपि स एवार्थः। श्रीविष्णु पुराणे तु पूर्वमेव न्यवारयदित्युक्तं "बलक्षयं विवृद्धिञ्च दृष्ट्वा चाणूरकृष्णयोः। वारयामास तूर्याणि कंसः कोपपरायणः। मृदङ्गादिषु वाद्येषु प्रतिषिद्धेषु तत्क्षणात्। खे सङ्गतान्यवाद्यन्त देवतूर्याण्यनेकशः। जय गोविन्द! चाणूरं जहि केशव दानवम्। इत्यन्तर्द्धि गता देवास्तदोचुरतिहर्षिता "इति। श्रीहरिवंशे च। ततः प्रस्विन्नवदनः कृष्णप्रणिहितेक्षणः। न्यवारयत तूर्याणि कंसः सव्येन पाणिना। प्रतिषिद्धेषु तूर्येषु मृदङ्गादिषु तेषु वै। खे सङ्गतानी" त्यादि। किञ्च। स्वयमेव अवाद्यन्त तूर्यघोषाश्च सर्वश इति। अत्रैकवाक्यतावादकैः पुनः प्रवर्त्तितत्वाज्ज्ञेया निवारणे छलं दर्शयति। वाक्यञ्चेति ह स्फुटं निजादेशश्रवणार्थमिवेति भावः। भोजैर्यादवभेदैः कतिपयैरेव राजत इति तथा सः इति तथा सः इति तदानीं सर्वेषामपि तदनादरः सूचितः॥ ३१॥ नियुद्धक्रीडायां मल्लहननाद्दुर्वृत्तौ। युद्धं चानयोस्तदित्याहयतो वसुदेवात्मजौ पुरान्निःसारयतेत्यपकर्तुमशक्यत्वात् निःसारणशक्यत्वञ्चानयोः प्रायो वनवासिनोर्वनाभिरुचेः स्यादिति गूढोऽभिप्रायः प्रकटस्तु भागिनेयावेताविति दुर्मतिं वसुदेवेन सह सौहृद्यात् तथाप्यज्ञानादेव मच्छत्रुपालनं कुरुत इति बध्नीतैव नतु हन्यातेत्यर्थः॥ ३२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आकृष्य कंसभयेन लोकलज्जादिना वा स्वयमनागच्छतोऽपि बलाद् गृहीत्वा संसृज्य प्रीत्यासक्तिं कृत्वा मिलित्वेत्यर्थः। यतो वयस्यान् विजहतुर्नियुद्धक्रीडाञ्चक्रतुः, अतएव वल्गन्तौ इतस्ततो गतिविशेषेण चलन्तौ, अतएव रुतानि कृतशब्दानि नूपुराणि ययोस्तौ। एतच्च सर्व्वं नियुद्धक्रीडाशोभायास्तथा चाणूरादीनां गोपेभ्यः सर्व्वथा निकृष्टतायाः प्रदर्शनार्थं तथा सद्यः कंसस्य वधाय तत्क्रोधविवर्द्धनार्थं तथा गोपैः सह पर्य्यन्तमहारंगे नियुद्धक्रीडासुखार्थं तथा तैः सह क्रीडान्ते तेषामात्मनश्च भाविशोकसमाधानाद्यर्थं चेति। वाद्यमानेष्वित्यत्र विशेषः श्रीविष्णुपुराणे (५।२०।५८-६०)—

'बलक्षयं विवृद्धिञ्च दृष्ट्वा चाणूर-कृष्णयोः। वारयामास तूर्य्याणि कंसः कोपपरायणः॥
मृदंगादिषु वाद्येषु प्रतिषिद्धेषु तत्क्षणात्। खे संगतान्यवाद्यन्त देवतूर्य्याण्यनेकशः॥
जयगोविन्द चाणूरं जहि केशव दानवम्। इत्यन्तर्द्धिगता देवास्तदोचुरतिहर्षिताः॥ इति;

श्रीहरिवंशे (विष्णु० प० ३०।३७-३८,३९) च—'ततः प्रस्विन्नवदनः कृष्ण-प्रणिहितेक्षणः। न्यवारयत तूर्य्याणि कंसः सव्येन पाणिना॥ प्रतिषिद्धेषु तूर्य्येषु मृदंगादिषु तेषु वै। खे संगतानि' इत्यादि; किञ्च, 'स्वयमेव प्रवाद्यन्त तूर्य्यघोषाश्च सर्व्वशः' इति॥ २९॥ प्रजहृषुः—अत्यर्थं हृष्टा बभूवुः। लोकरमणाद्रामः सर्व्वचित्ताकर्षणात् परमानन्दप्रदत्वाद्वा कृष्णस्तयोः कर्म्मणा शत्रुदुष्टवधादिना, रामस्यादावुक्तिर्ज्येष्ठत्वापेक्षया। विप्रमुख्या विप्रा मुख्या येषु ते क्षत्रियवैश्यादयः साधवः संजगुः; यद्वा, विप्रश्रेष्ठाः साधवश्चान्ये वैष्णवाः, मुख्य-शब्देन कंसाद्भीता अविश्वस्ताः, अतएव न्यूना व्यवच्छिन्नाः॥ ३०॥ मल्लवर्य्येषु चाणूरादिषु हतेषु अन्येषु च विद्रुतेषु भयोद्वेगेन दूरमपगतेषु स्वस्य तूर्य्याणीति श्रीविष्णुपुराणाद्युक्तादिव्यवाद्यनिवारणाशक्तः, निवारणञ्च श्रीहरिवंशोक्तानां स्वयं वाद्यमानानां तूर्य्याणां ज्ञेयम्, तच्च प्रयोजनविशेषादेव। स इति पाठेऽपि स एवार्थः। यद्वा, श्रीवादरायणमतेऽत्र कंसादत्यन्तभयव्याप्तानां देवानां वाद्यादिकं नास्त्येव, केवलं जयाशया मल्लगणप्रोत्साहनाय तावत् कंसस्य तूर्य्याण्यवाद्यन्त एव। अधुनैवाशाभंगात्तन्निवारणं तत्र छलञ्च दर्शयति—वाक्यञ्चेति। ह स्फुटम्, निजादेशश्रवणार्थमितिभावः। वस्तुतश्चान्तर्दुःखेनैवेत्यवारयदिति। भोजैर्यादवभेदैः कतिपयै राजत इति तथा स इति निजानुवर्त्तिनो भोजानाज्ञापयामासेत्यर्थः॥३१॥ पुरादस्मान्निःसारयत, यतो दुर्वृतौ नियुद्धक्रीडायां मल्लहननात्, तच्च युक्तमेवेत्याह—यतो वसुदेवात्मजौ, यादृशो दुर्वृत्तः पिता तादृशावित्यर्थः। दुष्टेष्वपि वृत्तं कृपया सद्व्यवहारो ययोः, यतो वसुदेवात्मजाविति वास्तवोऽर्थः। गोपानां धनं गवादिकं हरत बलाद्गृह्णीतेति बलिनां बहूनामेकदा महानिष्टाशक्तेः। बध्नीत श्रृङ्खलयास्य बन्धनं कुरुत, यतो दुर्म्मतिर्निभृत मच्छत्रुपरिपालनाद्दुष्टेष्वप्यनुकम्पा मतिर्यस्येति वास्तवोऽर्थः। तथा च श्रीहरिवंशे (विष्णु० प० ३०।६७)—'नन्दगोपश्च दुर्म्मेधा पापेष्वभिरतो मम। आयसैर्निगडाकारैर्लोहपाशैर्निगृह्यताम्॥' इति; श्रीविष्णुपुराणेऽपि (५।२०।७०)—'नन्दोऽपि गृह्यतां पापो निगडैरायसैरिह' इति। तं प्रति तस्य तादृशमात्रादेशो गोपेभ्यो भयात्; यद्वा, स्वभावतः परमसाधुशिरोमणेर्महानिष्टकरणाय दुष्टमुखादपि दुर्व्वागनिर्गमात्॥ ३२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो रामकृष्णौ वयस्यान् सखीन् गोपानाकृष्याहूय तैः संसृत्य सङ्गम्य तूर्येषु वाद्यमानेषु सत्सु चारुणी नूपुरे ययोस्तौ वल्गन्तौ नृत्यादि कुर्वन्तौ ॥ २९ ॥ तदा कंसं विना सर्वे जनाः रामकृष्णयोः कर्मणा युद्धात्मकेन नितरां हृष्टवन्तः तथा साधवो विप्रश्रेष्ठाश्च साधु साध्वित्यूचुः ॥ ३० ॥ इत्थं मल्लवर्येषु चाणूरादिपु हतेष्ववशिष्टेषु पलायमानेषु च सत्सु स भोजराट् कंसः तूर्याणि न्यवारयदिदं वक्ष्यमाणं वाक्यमुवाच ह ॥ ३१ ॥ तदेवाह । निःसारयतेतिद्वाभ्याम् । दुर्वृत्तौ वसुदेवस्यात्मजौ द्वितीयान्तमिदं पुरान्निःसारयत निर्वासयत स्वभृत्यान् प्रतीयमुक्तिः गोपानां धनं हरत गृह्णीत तथा दुष्टा बुद्धिर्यस्य तं नन्दं बध्नीत युद्धं कुरुत ॥३२॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

संसृज्य सङ्गम्य वल्गन्तौ नृत्यन्तौ तौ वीक्ष्य नुतनूपुरौ स्तुततुलाकेटी नुतनूपुराविति केचित् तुलाकोटिस्तु नूपुर इति ॥ २९-३१ ॥ निःसारयत निर्गमयत ॥ ३२-३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वल्गन्तौ नृत्यादि कुर्वन्तौ ॥ २९ ॥ विप्रेषु ये मुख्याः साधवो ये ते साधु साध्वित्यूचुः विप्राधमाः कंसपुरोहितास्तु हाहेत्यूचुरिति भावः ॥ ३०-३१ ॥ निःसारयतेत्यादौ सरस्वतीमतेतु दुर्गमं वृत्तं चरित्रं ययोस्तौ पुरात् पुरमभ्यास्य निःशेषेण सारं श्रेष्ठं कुरुत गोपानां धनं श्रीकृष्णं हरत अत्रैव रक्षत नन्दं बध्नीत प्रेमरसनयेति शेषः तेन सहाति प्रीतिं कुरुतेत्यर्थः । दुर्गमा मतिर्यस्य तम् ॥ ३२ ॥

गूढार्थदीपिनी

संसृज्य सङ्गम्य ॥ २९ ॥ इति वदन्तः सर्वे प्रजहृषुः ॥ ३० ॥ विद्रुतेषु पलायितेषु । भोजराट् कंसः । ह कोपे । ३१ ॥ दुर्गमं वृत्तं चरित्रं ययोस्तौ । निःशेषेण सारं श्रेष्ठं कुरुत । धनं कृष्णं हरत अत्रैव रक्षत । दुर्गममतिं बध्नीत प्रेमरशनया । दुर्मेधा दुर्गमबुद्धिः । असत्तमः सर्वोत्तमः । हन्यतां गम्यताम् आश्रीयताम् । इति वागर्थे । परः परमेश्वरः तस्य पक्षं गच्छतीति ॥३२-३३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वल्गन्तौ निःशङ्कं धावमानौ ॥ २९ ॥ साधुसाध्विति वदन्तः ॥ ३०-३३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अवध्यानेनैव ध्यानां प्रस्तुतं समाप्तत्वान्न तूष्णीं स्थातव्यमिति वयस्यान्गोपानुपविष्टानाकृष्य तैः संसृज्य सङ्गम्य विजह्रतुः तूर्येषु याद्यमानेषु वलानौ स्वयं तथा नटन्तौ तत्तालतुलतया रुतनूपुरौ च ॥ २९ ॥ ऋतमेकं सन्तम सस्तं विना सर्वे जना रामकृष्णयोः कर्मणा विप्रमुख्याः साधवो मरीच्याद्याः साधु सम्यगिति जहृषुः ॥ ३० ॥ मल्लवर्षेष्वत्रोक्तेषु । तथा हरिवंशादिषु । संकर्षणस्तु सुचिरं योधयित्वा महाबलः । आन्ध्रं मल्लं महामल्लो मण्डलानि व्यदर्शयत् । मुष्टिनैकेन तेजस्वी साशनिस्तनयित्नुना । शिरस्यभ्यहनद्वीरो वज्रेणेव महागिरिम् । स निष्पतितमस्तिष्को विस्रस्तनयनाननः । निहतस्तेन ततो नादो महानभूदित्युक्तान्ध्रादिषु केषु विद्रुतेषु च । भोजराट् स्वतूर्याणि न्यवारयत्स्ववचः श्रवणार्थमिदं वाक्यं चोवाच ॥ ३१ ॥ वसुदेवात्मजौ दुर्वृत्तौ पुरान्निःसारयत गोपानां धनं हरत दुर्मतिं नन्दं बध्नीत । इति विंशत्यक्षौहिणी सेनाः प्रति । यथोक्तमाचार्यैः । अक्षौहिणीगणितमस्य बलं च विंशदासीदसह्यमुरुवीर्यमनन्यबध्यं शम्भोर्वरादपीति ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो भगवांस्तुल्यवलैः क्रीडिष्याम इति पूर्वमेव प्रतिज्ञानात् तेषु गतेष्वपि राजप्रीतेश्चिकीर्षितत्वाद्गोपैः सह मल्लयुद्धं कृतवानित्याह । गोपान् वयस्यानिति । वयस्याः समानवयसा प्रतीत्या कालकृततुल्यकलाः तेऽपि किञ्चिद्भीता इत्यालक्ष्य स्वयंहस्तेन धृत्वा समाकृष्य विजह्रतुः ननु भगवान्न विहरणार्थं प्रवृत्तः नापि कंसस्यैतदभिप्रेतमिति किमिति विजह्रतुः प्रतिज्ञा तु पूर्वं तैः सह युद्धनिषेधार्था न तु बालैः सह युद्धार्थाऽपि उभयत्र तात्पर्य वाक्यभेदप्रसङ्गात् प्रकरणं नियामकमिति निषेधो तत्कव्य एवेति चेत्तत्राह । वाद्यमानेषु तूर्येष्विति । तेषु हतेष्वपि मल्लानां रसजनकानि तूर्याणि वाद्यमानान्येव जातानीति निमित्तस्य विद्यमानत्वात् लोकप्रतीत्यर्थं लीलया कस्यापि सन्तोषो न जात इति लोकानां प्रीत्यर्थं तथा कृतवन्तौ किंच वल्गन्तौ शब्दं कुरुतः मल्लानां जयख्यापकं किञ्च रुतनूपुरौ च जातौ नूपुरयोरपि जयख्यापकत्वं लोकसिद्धम् ॥ २९ ॥ एतद्यदर्थं कृतं तज्जातमित्याह । जनाः प्रजहृषुरिति । जनाः प्रकर्षेण जहृषुः हर्षं प्राप्ताः सर्व इति अष्टविधाः मल्लकंसव्यतिरिक्ताः रूपेण तथा जाता भविष्यन्तीत्याशङ्क्याह । कर्मणेतिरामकृष्णयोरपि मल्लवधलक्षणेनालौकिकेन कर्मणा सांप्रतबालैः सह मल्लयुद्धलक्षणेन वा । पूर्वकर्मतूद्वेजकमिति न रसोत्पादकं कंसस्यापि सुखमाशङ्क्याह । ऋते कंसमिति । तत्रापि ये विप्रमुख्याः ये वा साधवः भगवत्पराः साधु साध्विति

वदन्तो जहृषुः कायिकव्यापारो दर्शनमेव हर्षो मानसः वाचनिकी प्रशंसेति सर्वथा तेषां हर्षो निरूपितः हीनानां प्रशंसा करणमयुक्तमिति विप्रश्रेष्ठाः साधवश्च गणिताः ॥ ३० ॥ मध्ये कियत्कालं यावता गोपैः सह युद्धं तावच्चिन्ताकुलो विचारमूढः स्थितः पश्चात्पुनरत्यावेशेन बहिर्मुखो जात इति निवारणादिकं कृतवानित्याह । हतेष्विति । केचन हताः केचन विद्रुताः तथापि प्रसिद्धतयैव अपकारः कर्त्तव्य इति विचारितवान् यतो भोजराट् आदौ निमित्तं दूरीकृतवानित्याह । निवारयत्स्वतूर्याणीति । न्यवारयदिति वा इदमग्रे वक्ष्यमाणं वाक्यं चोवाच चकाराद्युद्धार्थं सावधानोऽपि जातः कपटलीला स्वेनैव निराकृता ईश्वरत्वं चाविष्कृतवान् तथा सति यदि तयोर्वैरं दद्यात्तूष्णीं वा अन्तर्गच्छेत् तदा न काचिच्चिन्ता स्यात् अक्लिष्टकर्मा हि भगवान् वसुदेवं मोचयित्वा नयेत् स्थापयेद्वा भक्तद्रोहे वधः स्मृत इति भगवत्प्रतिज्ञेति अक्लिष्टतासिध्यर्थं वक्ष्यमाणमुक्तवान् हेत्याश्चर्यं एतावदपि दृष्ट्वा पुनर्निर्लज्ज आज्ञापयतीति ॥ ३१ ॥ तस्यायुक्तवचनान्याह । निःसारयतेति द्वाभ्याम् । भगवति तत्सम्बन्धे च लोके दोषप्रतीतिव्यावृत्त्यर्थं कपटेन वदति यतो दुर्वृत्तौ बालौ च नहि मारणमुचितं युद्धदर्शनार्थमेव परमाकारितौ वसुदेवस्यैवैतौ अतो भागिनेयाविति निःसारणमेव कुर्वन्तु गोपानां च धनं हरत धनेन तैः पोषिताविति नन्दः अस्मदीयोऽपि भिन्नपक्षो जात इति बध्नीत । ननु कोऽपराधो नन्दस्य स हि स्वपुत्रत्वेन जानाति नत्वन्यथेति चेत्तत्राह । दुर्मेधा इति । दुर्बुद्धिरयं विलक्षणं पुत्रं दृष्ट्वा स्वस्माज्जातः कथमेवं भविष्यतीत्याशङ्कायां राज्ञे खलु निवेदनीयं विचारकाणां चतुराणामेषा रीतिरिति तदकरणात् दुर्मतिः अतस्तस्य बन्धनमेव दण्डः ॥ ३२ ॥

श्रीसुबोधिनी-सार

वयस्यान् सखीन् आकृष्य तैर्गोपैः संसृज्य परिष्वज्य चिक्रीडतुः तूर्येषु वाद्यमानेषु सत्सु रुते नूपुरे ययोस्तौ वल्गन्तौ नृत्यादि कुर्वन्तौ ॥ २९ ॥ रामकृष्णयोः कर्मणा मल्लपातनरूपेण सर्वे जनाः प्रजहृषुः कंसम् ऋते विना ब्राह्मणाद्याः साधवः साधुसाध्विति वदन्तः ॥ ३० ॥ मल्लश्रेष्ठेषु हतेषु सत्सु चादन्येषु विद्रुतेषु पलायितेषु सत्सु भोजराट् कंसः स्वतूर्याणि मंगलवाद्यानि न्यवारयत् । इदं वाक्यमुवाच ॥ ३१ ॥ दुर्वृत्तौ वसुदेवस्यात्मजौ पुरात् निःसारयत यूयं गोपानां धनं हरत । दुर्बुद्धिं नन्दं बध्नीत ॥ ३२ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

ततश्च रामकृष्णौ वयस्यान् सखीन् गोपान् हस्ते गृहीत्वा आकृष्य तैः सह संसृत्य सङ्गम्य वल्गन्तौ आलिङ्गनादि कुर्वन्तौ विजह्रतुः युद्धादि कृतवन्तौ । 'ननु मल्लानां निहतत्वात्तैः सह युद्धस्य किं प्रयोजनम्' इत्याकाङ्क्षायां 'युद्धोत्साहजनकवाद्यविशेषाणां विद्यमानत्वात्तत्रत्यानां द्रष्टृजनानां प्रहर्षार्थम्' इत्याशयेनाह – तूर्येषु वाद्यमानेषु सत्सु रुते शब्दयुक्ते नूपुरे ययोस्ताविति ॥ २९ ॥ तदा च कंसं विना विप्रप्रमुखाः सर्वे साधुजनाः साधु साध्विति वदन्तः रामकृष्णयं युद्धात्मकेन कर्मणा प्रजहृषुरित्यन्वयः ॥ ३० ॥ एव मल्लवर्येषु चाणूरादिषु हतेषु अवशिष्टेषु विद्रुतेषु पलायमानेषु च सत्सु भोजराट् कंसः स्वतूर्याणि स्वेनाज्ञप्तानि तूर्यादिवाद्यानि न्यवारयत् । भृत्यान् प्रति इदं वक्ष्यमाणं वाक्यं च ह स्फुटमुवाच ॥ ३१ ॥ तदुक्तिमाह—निःसारयतेति । यद्यपि दुर्वृत्तत्वादेतौ वधयोग्यौ, तथापि वसुदेवात्मजत्वेन भागिनेयत्वाज्जीवन्तावेव पुरतः निःसारयत । गोपानां धनं हरत । नन्दाधीनत्वान्नन्दं बध्नीत । तत्र हेतुमाह—दुर्मतिमिति । 'मम वैरिणोरेतयोः सङ्गोप्य स्वगृहस्थापनाद्दुर्मतित्वम्' इति ज्ञेयम् ॥ ३२ ॥

अन्वितार्थप्रकाशिका

गोपानिति ॥ ततः तूर्येषु वाद्यमानेषु सत्सु रुते शब्दयुक्ते नूपुरे ययोस्तौ रामकृष्णौ प्रेक्षकजनहर्षाय कंसक्रोधाय च वयस्यान् सखीन् गोपान् हस्ते गृहीत्वा आकृष्य तैः सह संसृत्य संगम्य वल्गन्तौ नृत्यादि कुर्वन्तौ विजह्रतुः युद्धादि कृतवन्तौ॥२९॥ जना इति ॥ तदा कंसं विना तत्पुरोहितादीन् विना च विप्रमुख्याः सर्वे साधुजनाः साधु साध्विति वदन्तः रामकृष्णयोर्युद्धात्मकेन कर्मणा प्रजहृषुः ॥ ३० ॥ हतेष्विति । एवं मल्लवर्येषु चाणूरादिषु हतेषु अवशिष्टेषु विद्रुतेषु पलायितेषु च सत्सु भोजराट् कंसः स्वतूर्याणि स्वेनाज्ञप्तानि तूर्यादिवाद्यानि न्यवारयत् । निवारणे छलं दर्शयति भृत्यान् प्रति इदं वक्ष्यमाणं वाक्यं चाह स्म स्फुटमुवाच । तथा च स्वाज्ञाश्रावणार्थमिव वाद्यानि न्यवारयत् ॥ ३१ ॥ निःसारयतेति ॥ विनोदयुद्धं मल्लहननात् दुर्वृत्तौ वसुदेवात्मजौ वध्यावपि भागिनेयत्वाज्जीवन्तावेव पुरात् निःसारयत गोपानां च धनं हरत । रामकृष्णयोर्गुप्ततया पालनात् दुर्मतिं नन्दं बध्नीत । भारतीपक्षे दुर्गमं वृत्तं चरितं ययोस्तौ पुरात् पुरमध्यास्य निःशेषेण सारं श्रेष्ठं कुरुत । "तत्करोति०" इति णिजन्तः । गोपानां धनं श्रीकृष्णं हरत अत्रैव रक्षत । दुर्गमा मतिर्यस्य तं नन्दं प्रेमरशनया बध्नीत अतिप्रसन्नं कुरुत ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

साधुसाध्विति स्पष्टमेवगदन्तः ॥ २९ ॥ दुर्वृत्तौ उच्छृंखलौ ॥ ३१-३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गोपानिति ॥ ततः रामकृष्णाविति शेषः। वयस्यान् स्वसमानवयस्कान् गोपान्, आकृष्य आहूय, तैर्गोपैः, संसृज्य संगम्य, वल्गन्तौ नृत्यादि कुर्वन्तौ, रुतौ शब्दायमानौ नूपुरौ ययोस्तौ, एवंभूतौ सन्तौ, तूर्येषु वाद्यमानेषु सत्सु, विजह्रतुः विहृतवन्तौ ॥ २९ ॥ जना इति ॥ तदा रामकृष्णयोः कर्मणा, कंसं ऋते, केवलं कंसं विनेत्यर्थः। विप्रमुख्या ब्राह्मणप्रभृतयः सर्वे जनाः, प्रजहृषुः नितरां हृष्टवन्तः। तथा साधवः भगवन्निष्ठाः सन्तो जनाः, साधु साधु, इति ऊचुः ॥ ३० ॥ हतेष्विति ॥ इत्थं मल्लवर्येषु चाणूरादिषु हतेषु, अवशिष्टेषु मल्लेषु विद्रुतेषु पलायमानेषु सत्सु च, भोजराट् कंसः, स्वतूर्याणि न्यवारयत् तूर्यवादनं न्यषेधदित्यर्थः। इदं वक्ष्यमाणप्रकारं, वाक्यं च ह स्फुटमेव, उवाच ॥ ३१ ॥ तदेवाह निःसारयतेति द्वाभ्याम् ॥ निःसारयतेति ॥ दुर्वृत्तौ वसुदेवात्मजौ द्वितीयान्तमिदम्। पुरात् निःसारयत निर्वासयत। स्वभृत्यान्प्रतीयमुक्तिः। गोपानां धनं हरत गृह्णीत। तथा दुष्टा मतिर्यस्य तं, नन्दं, बध्नीत बद्धं कुरुत ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

गोपानिति : १०.४४.२९.

इच्छेज्जेतुमनल्पगर्वकलितो यो मां स्वसङ्कल्पतः स स्याद्गह्यपदस्थितोऽधरगतिर्धूलिप्रकीर्णाननः।
मत्सङ्कल्पत एव यश्च विहरत्याढ्यः स शक्त्या भवत्याद्यं मल्लमुदाजहार चरमे श्रीवल्लभो बल्लवान् ॥ १७ ॥
एवं षड्रिपुविजयः कार्यो ह्यज्ञानविजयकामेन। करिचाणूरमुखानां षण्णां हननादबोधि विभुनाऽत्र ॥ १८ ॥
एवं स कृष्णोऽरिजने पराक्रमं प्रदर्शयन् स्वैरविहारलालसः।
चचार हर्यश्व इवेभसंहतो वृको यथा वाऽजकुले विनष्टभीः ॥ १९ ॥
कल्पितो योऽरिनाशाय नृपेण स्वं रिरक्षुणा। चित्रं विधिवशात् सोऽभूद्रङ्गोऽरिविजयप्रदः ॥ २० ॥

हतेष्विति : १०.४४.३१.

नृपस्तदुग्रचेष्टिताशनिप्रहारविस्फुटन्निसर्गधैर्यपर्वतः स सर्वतोऽप्यनिर्वृतः।
विचित्रचित्रचित्रिताकृतिर्विमूढमानसः पदं तदा ह्यमंस्त तत्प्रलीनपञ्चचामरम् ॥ २१ ॥
प्रत्यक्षेऽपि जगन्नाथे सदानन्दसुखप्रदे। यदभूत् क्लेशभाक् कंसस्तदज्ञानविजृम्भितम् ॥ २२ ॥

निःसारयतेति : १०.४४.३२.

बाहुवीर्यं हि वीराणामशक्तानां वचो बलम्। युक्तमेवाबलः कंसो यद्वाग्जल्पं तदाऽकरोत् ॥ २३ ॥

कृष्णप्रिया

उनके भाग जाने पर भगवान् श्रीकृष्ण और बलराम जी अपने समवयस्क ग्वालबालों को खींच-खींचकर उनके साथ भिड़ने और नाच-नाचकर भेरीध्वनि के साथ अपने नूपुरों की झनकार को मिलाकर मल्लक्रीडा—कुश्ती के खेल करने लगे ॥ २९ ॥ भगवान् श्रीकृष्ण और बलराम की इस अद्भुत लीला को देखकर सभी दर्शकों को बड़ा आनन्द हुआ। श्रेष्ठ ब्राह्मण और साधु पुरुष 'धन्य है, धन्य है'—इस प्रकार कहकर प्रशंसा करने लगे। परन्तु कंस को इससे बड़ा दुःख हुआ। वह और भी चिढ़ गया ॥ ३० ॥ जब उसके प्रधान पहलवान मार डाले गये और बचे हुए सब के सब भाग गये, तब भोजराज कंस ने अपने बाजे-गाजे बंद करा दिये और अपने सेवकों को यह आज्ञा दी ॥ ३१ ॥ 'अरे, वसुदेव के इन दुश्चरित्र लड़कों को नगर से बाहर निकाल दो। गोपों का सारा धन छीन लो और दुर्बुद्धि नन्द को कैद कर लो ॥ ३२ ॥

वसुदेवस्तु[1] दुर्मेधा हन्यतामाश्वसत्तमः। उग्रसेनः पिता चापि सानुगः परपक्षगः ॥ ३३ ॥
एवं बिकत्थमाने बै कंसे प्रकुपितोऽव्ययः। लघिम्नोत्पत्य तरसा मञ्चमुत्तुङ्गमारुहत् ॥ ३४ ॥
[2]तमापतन्तमालोक्य मृत्युमात्मन आसनात्। मनस्वी सहसोत्थाय जगृहे सोऽसिचर्मणी ॥ ३५ ॥
तं खड्गपाणिं विचरन्तमाशु श्येनं यथा दक्षिणसव्यमम्बरे।
समग्रहीद् दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ॥ ३६ ॥

---

१. सुदुर्मेधाः—प्रा. पा.। २. तमापतन्त—वीर. विज.; तमाविशान्त—श्रीधर. वंशी. जीव. विश्व.।

कर्दमक्षमा

अन्वयः—असत्तमः वसुदेवः तु दुर्मेधा हन्यताम्। सानुगः परपक्षगः पिता उग्रसेनः अपि हन्यताम् ॥ ३३ ॥ एवं विकत्थमाने कंसे प्रकुपितः अव्ययः लघिमोत्पद्य तरसा उत्तुङ्गं मञ्चम् आरुहत् ॥ ३४ ॥ तम् आविशन्तम् आत्मनः मृत्युम् आलोक्य स मनस्वी आसनात् सहसा उत्थाय असिचर्मणी जगृहे ॥ ३५ ॥ दुर्विषहोग्रतेजा तं खड्गपाणि दक्षिणसव्यम् अम्बरे श्येनं यथा विचरन्तं आशु तार्क्ष्यसुतः यथा उरगं प्रसह्य (गृह्णाति तद्वद्) समग्रहीत् ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अव्ययोऽश्रमः। लघिम्ना लाघवेन ॥ ३४-३५ ॥ दुर्विषह्मविषह्यमुग्रं तेजो यस्य स श्रीकृष्णः ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

असत्तमोऽतीवकपटः। उग्रसेनोऽपि हन्यताम्। परपक्षगो वसुदेवपक्षपाती। सुदुर्मेधाः पुत्रपरिवर्तनादिकौटिल्येन। अतोऽसत्तमः स्वपुत्रार्पणप्रतिज्ञाखण्डनात्। 'वसुदेवस्तु' इति पाठः क्वाचित्कः। चकार एव समुच्चयेऽत्र। अपिशब्दात्पितापि। तथापि परपक्षगो वसुदेवानुगः। सरस्वती तु-दुर्गमबुद्धिर्वसुदेवो हन्यतां गम्यतां, सर्वैराश्रियतामित्यर्थः। न विद्यते सत्तमो यस्मात्सः। तथोग्रसेनोऽप्याश्रियतां, यतः परः परमेश्वरस्तस्य पक्षं गच्छतीति तथा ॥ ३३ ॥ एवमित्थम्। विकत्थमानेऽयुक्तं भाषमाणे। अव्ययो न केनापि हन्तुमर्हः। तरसा शीघ्रम्। उत्तुङ्गमत्युच्चम्। विकत्थमान इति तथा तर्जनस्याप्यात्मश्लाघायां तात्पर्यात्। अव्ययः श्रीकृष्णः। तन्नामत्वेन प्रसिद्धत्वादश्रम एव सन्नित्यर्थः। स्वभक्तद्रोहश्रवणात्प्रकुपितः। लघिम्ना शैघ्र्यातिशयेनालक्षिततयेत्यर्थः। तरसा वेगेन। आरुहत् आरोहदित्यर्थः ॥ ३४ ॥ तं श्रीकृष्णम्। मनस्वी धीरः। आविशन्तं वेगेन मञ्चान्तः प्रविशन्तम्। आत्मनो मृत्युं मृत्युमिव। साक्षाद्भीत्या मृत्युत्वेन प्रतीयमानमित्यर्थः। मनस्वीति निन्दार्थे विन् 'भूमनिन्दाप्रसंसासु' इत्यादिस्मरणात्। निंदितमना भीत इत्यर्थः। अत एव कंसोऽशस्त्रेऽपि तस्मिन्नसिचर्मणी जग्राह ॥ ३५ ॥ तं कंसम्। दुर्विषहे उग्रे च बलार्चिषी यस्य स तथा। "तेजो दीप्तौ प्रभावे च स्यात्पराक्रमरेतसोः" इति मेदिनी। दक्षिणं वामं च भागं व्याप्य गतिकौशलेनाशुवेगेन विविधं चरन्तं भ्रमन्तम्। अत्रानुरूपो दृष्टान्तः-यथाकाशे श्येनमिति। अनेन दुर्ग्रहत्वमुक्तम्। तथापि प्रसह्य बलात्समग्रहीत्। कुतः-दुर्विषहमुग्रं न तु साधारणोग्रं तेजः पराक्रमो यस्य स इति। तार्क्ष्यसुतोऽपि दुर्विषान्सर्पान्हन्तीति दुर्विषहा, अत एवोग्रतेजाश्च। तद्दृष्टान्तेन त्वसाधारणोग्रः, लीलया ग्रहणमपि सूचितम् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सुदुर्मेधाः पुत्रपरिवर्त्तनादिकौटिल्येन अतोऽसत्तमः स्वपुत्रार्पणप्रतिज्ञाखण्डनात्। वसुदेवस्त्वित्यपि पाठः क्वचित् चकार उक्तसमुच्चये। अपिशब्दात् यद्यपि पिता तथापीत्यर्थः। परपक्षगो वसुदेवाद्यनुगः। वाग् देवी तु यथार्थमाह। दुःदुर्गमं वृत्तं चरित्रं ययोरिति प्रपतितो वर्गः प्रवर्ग इतिवत् कृदन्तपदलोपात्। पुराङ्गिःसारयत मथुरापुरीमधिकृत्य व्यञ्जयत प्रकाशयतेत्यर्थः। गोपानां धनं श्रीकृष्णं हरत अत्रैव रक्षत। ननु श्रीनन्दो नैनं त्यक्ष्यति तत्राह। दुःखितमतिं नन्दं बध्नीत कृष्णद्वारैव समयं विधाय प्रतिबद्धं प्रतिष्टब्धं कुरुत ततः सुदुर्गमबुद्धिर्वसुदेवो हन्यतां गम्यतां सर्वैराश्रियतामित्यर्थः। न विद्यते सत्तमो यस्मात् सः। तथोग्रसेनोऽप्याश्रियतां परः परमेश्वरस्तत्पक्षग इति ॥ ३३ ॥ विकत्थमान इति। तथा तर्ज्जनस्याप्यात्मश्लाघायां तात्पर्यात् अव्ययः श्रीकृष्णः तन्नामत्वेन प्रसिद्धत्वादश्रम एव सन्नित्यर्थः। लघिम्ना शैघ्र्यातिशयेनालक्षिततयेत्यर्थः। तरसा वेगेनारुहत् आरोहदित्यर्थः ॥ ३४ ॥ आविशन्तं वेगेन मञ्चान्तः प्रविशन्तम् आत्मनो मृत्युं मृत्युमिव अत्यन्तभीत्या साक्षात् मृत्युत्वेन प्रतीयमानमित्यर्थः। मनस्वीति निन्दार्थे विन् "भूमनिन्दाप्रशंसास्वि"त्यादि स्मरणात् निन्दितमना भीत इत्यर्थः। अतएव कंसोऽशस्त्रोऽपि तस्मिन्नसिधर्मणी द्वे अपि जग्राह ॥ ३५ ॥ दक्षिणं वामञ्च भागं व्याप्य गतिकौशलेन आशु वेगेन विविधं चरन्त भ्रमन्तं तत्रानुरूपो दृष्टान्तः यथाकाशे श्येनमिति अनेन दुर्ग्रहत्वमुक्तं तथापि प्रसह्य बलात् समग्रहीत्। कुतः दुर्विषतोग्रः नतु साधारणोग्रः पराक्रमो यस्य स इति। तार्क्ष्यसुतोऽपि दुर्विषान् सर्पान् हन्तीति दुर्विषहा अतएवोग्रतेजाश्च तद्दृष्टान्तेन तु साधारणोग्रः लीलया ग्रहणमपि सूचितम् ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुदुर्म्मेधाः पुत्रपरिवर्त्तनादिकौटिल्येन; अतोऽसत्तमः स्वपुत्रार्पणप्रतिज्ञाखण्डनात्; 'सु' शोभना दुष्टेष्वपि मेधा सस्नेहा स्थिरा बुद्धिर्यस्य, न विद्यते सत्तमोऽन्यो यस्मादिति वास्तवोऽर्थः। च-कार उक्तसमुच्चये। पितापि हन्यताम्, यतः परपक्षगः, मच्छत्रुपक्षपाती वसुदेवाद्यनुगो वा, पितृत्वञ्च तत्क्षेत्रजत्वात; किंवा श्रीहरिवंशोक्तस्य द्रुमिलाख्य-दानवाज्जन्मनः श्रीशुकदेवमतेनाज्ञानात् ॥ ३३ ॥ वै निश्चये, विरुद्धकल्पमानगर्व्वेणातिदिशति—प्रकुपितोऽतिक्रुद्धः सन्, उत्तरोत्तरं दुरुक्तेराधिक्यात्।

लघिम्नातिशीघ्रमित्यर्थः। उत्तुंगमत्युच्चमपि तरसा वेगेनारुहत्, आरुरोहेत्यर्थः ॥ ३४ ॥ आविशन्तं वेगेन मञ्चान्तः प्रविशन्तम्, आत्मनो मृत्युं मूर्त्तं मृत्युमिवात्यन्तभीत्या साक्षान्मृत्युत्वेन प्रतीयमानमित्यर्थः। मनस्वी शूरः, अतएव स कंसः सहसा सद्योऽसिचर्म्मणी द्वे जग्राह ॥ ३५ ॥ दक्षिणं वामञ्च भागं व्याप्य गतिकौशलेनाकाशे आशु वेगेन विविधं चरन्तं भ्रमन्तम; यद्वा, दक्षिणं सत्यञ्च यथा स्यात्। तत्रानुरूपो दृष्टान्तः—यथा श्येनमिति, अनेन दुर्ग्रहत्वमुक्तम्, तथापि प्रसह्य बलात् सम्यगग्रहीत्। कुतः? असह्यतीव्रपराक्रमः, तार्क्ष्यसुतोऽपि दुर्विषान् सर्पान् हन्तीति दुर्विषहा, अत उग्रतेजाश्च, तद्दृष्टान्तेन लीलयानायासेन ग्रहणमपि सूचितम ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

लघिम्ना लाघवेन ॥ ३४–३५ ॥ तार्क्ष्यसुतः कश्यपपुत्रो गरुडः ॥ ३६–४६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

असत्तमो दुरात्मा वसुदेवः आशु शीघ्रं हन्यतां तथा नोऽस्माकं पिता उग्रसेनश्च परपक्षगः शत्रुपक्षपाती हेतुगर्भमिदं तत्त्वात्सानुगो हन्यताम् ॥ ३३ ॥ इत्येवं कंसे विकत्थमाने विरुद्धं यथा तथा कथयति सति अव्ययो भगवान् प्रकुपितो लघिम्ना लाघवेन उत्पत्य तरसा बलेनोत्तुङ्गमुन्नतं मञ्चं कंसाधिष्ठितं पीठमारुरोह ॥ ३४ ॥ तदा तत्कालिककर्तव्याभिज्ञः कंसः स्वमृत्युमिवापतन्तं कृष्णमालोक्य सहसा त्वरया आसनादुत्थाय खड्गखेटौ जगृहे ॥ ३५ ॥ अधिसह्यमुग्रं तेजो यस्य स भगवान् खड्गः पाणौ यस्य तं दक्षिणवामतोऽम्बरे ऊर्ध्वं च श्येनमिव च चरन्तं कंसं समग्रहीत् यथा तार्क्ष्यसुतः कश्यपपुत्रो गरुडः प्रसह्य बलादुरगं सर्पं गृह्णाति तद्वत् ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

लघिम्ना पक्षिवत् लाघवेन। अव्ययः योगवित् प्रधानपुरुषेश्वर इत्यर्थः ॥ ३४ ॥ मनस्वी धीरः ॥ ३५ ॥ दुर्विषहे च उग्रे च तेजसी बलार्चिषी यस्य स तथेति ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दुर्गमबुद्धिर्वसुदेवो हन्यतां गम्यतां सर्वैराश्रीयतामित्यर्थः। न विद्यते सत्तमो यस्मात् सः परस्य परमेश्वरस्य पक्षं गच्छतीति सः ॥ ३३ ॥ स्वभक्तद्रोहश्रवणात् प्रकुपितः प्रकृष्टकोपेनापि जीवानामिव नास्ति व्ययो यस्य सः लघिम्ना सर्वदृष्ट्यालक्षितमिति भावः ॥ ३४-३६ ॥

गूढार्थदीपिनी

विकत्थमाने विरुद्धं भाषमाणे बाह्यदृष्ट्या। लघिम्ना अतिशैघ्र्येण ॥ ३४–३५ ॥ तार्क्ष्यसुतः गरुडः यथा उरगं गृह्णाति तथेत्यन्वयः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

लघिम्ना लाघवेन ॥ ३४–३५ ॥ दुर्विषहमविसह्यं तेजो यस्य सः श्रीकृष्णः ॥ ३६—३९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दुर्मेधा वसुदेव आशु हन्यतामसत्तमो मम पिता परपक्षग उग्रसेनश्च हन्यताम् ॥ ३३ ॥ एवं निर्नामाव्यादीन्प्रति कंसे कत्थमाने सत्यव्ययो निर्नाशो नन्दवसुदेवादिव्यथां दृष्ट्वा। यथोक्तं हरिवंशे। ये च सम्प्रेक्षका गोपा नन्दगोपपुरोगमाः। भयक्षोभितसर्वाङ्गाः सर्वे तत्रावतस्थिरे। हर्षजं वारि नेत्राभ्यां वर्तमाना प्रवेपती। प्रस्रवोत्पीडिता कृष्णं देवकी समुदैक्षत। वसुदेवो जरां त्यक्त्वा स्नेहेन तरुणायित इत्यादिना। लघिम्ना लाघवेन तरसोत्पत्य मञ्चमारुहत् ॥ ३४ ॥ आत्मनो मृत्युं तद्रूपमापतन्तं कृष्णमालोक्यासनात्सहसोत्थाय मनस्वी स कंसोऽसिचर्मणी जगृहे ॥ ३५ ॥ अम्बरे दक्षिणसव्यम्। सर्वो द्वन्द्व इत्येकवद्भावे वोत्तरपदलोपे समासे वा बोध्यम्। विचरन्तं श्येनमिव विद्यमानं खड्गपाणिमसिहस्तं दुर्विषहोग्रतेजा दुर्विषहमुग्रं वैरितीक्ष्णं तेजो वीर्यं यस्य स तार्क्ष्यसुतो गरुडः प्रसह्य ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

वसुदेवस्तु मुख्योऽपराधी अतोऽस्माद्विशेषमाह। वसुदेवेति। तुशब्देन बन्धनपक्षं व्यावर्त्तयति। दुर्मेधा इति। स्वयमष्टमो मया आनेय इति प्रतिज्ञायापि नानीतवान् कंस एव मारणीय इति च कपटं कृत्वान्यत्र स्थापितवान् अतो हन्यतामाश्रित्यविचारेण सतां बन्धूनां हननं निषिद्धमिति चेत्तत्राह। असत्तम इति। सर्वोपास्यराजहननार्थं कृतप्रयत्न इति। नन्वेवं सति यादवाः वा मारयेयुरिति चेत्तत्राह। उग्रसेन इति। यद्यपि पिता तथाप्युग्रसेनो हन्तव्यः सानुगो देवकसहितः स एव परपक्षग इति अन्ये

अराजकभयात्साधारणत्वाद्वा नापकरिष्यन्तीति भावः। स्वाधिकबलानां हननं दृष्ट्वापि दुर्बुद्धिः ॥ ३३ ॥ अनुनय परित्यज्य विपरीतं वदति अतो मारणीय इति तस्य दोषं त्याजयितुं मारणार्थं प्रवृत्त इत्याह। एवं विकत्थमान इति। रजकतुल्योऽयं कंस इति कं प्रति कंसः न कमपीति एवं वदतीति अधिक्षेपविषयत्वादव्ययः स्वतो भयाभावात् प्रकुपितः भक्तानामपकारश्रवणात् लघिम्ना मल्लविद्यायामिवोत्पतनप्रकारेण उत्तुङ्गं स्थूलं मञ्चमारुहत् यत्र कंसस्तिष्ठति। अयं हि ततोऽधःपातनीयः उच्चस्थानोपवेशनाद्यतो वल्गति ॥ ३४ ॥ ततो याञ्जतं तदाह। तमापतन्तमिति। उपर्यागत्य पतन्तं तदानीमपि यदि प्रपन्नो भवेत्तदापि न मारयेदिति सूचयितुं तत्रापि तस्यातिक्रम उच्यते। स हि पूर्वमेव तथात्मनो मृत्युत्वेन श्रुतवन् तथापि मनस्वी शूरः शूराणामन्तकाले शौर्यमाविर्भवतीति तदा आसनात्सहसोत्थाय आसने उपवेशनमयुक्तमित्याशङ्क्य स्वधर्मविध्यर्थं युद्धे च मरण क्षत्रियस्योक्तमिति स्वधर्ममिव खड्गचर्मणी जगृहे निकटे तयोरेवोपयोगात् ॥ ३५ ॥ ततो युद्धार्थे यतमानं तं विलोक्य अन्तरिक्षे च युद्धं न युक्तमिति भूमावुत्पन्नत्वात् तं भूमौ पातयितुं गृहीतवानित्याह। तं खड्गपाणिमिति। तस्य महत्त्वाय युद्धकौशलमाह। आशु विचरन्तं श्येनमिव अलौकिकी शिक्षा तदीयोक्ता सद्य उपरि पतन्नेव दृष्टः अम्बरे च अम्बर एव तं गृहीतवान्। ननु प्रहारात्कथं न भयं तत्राह। दुःसहः दुःखेनापि विशिष्टं सहो यस्य असह्यमुग्रं तेजो यस्य अग्रे वा सर्वापेक्षया तेजो यस्य प्रभावसामर्थ्ययोर्विद्यमानत्वात् न भयम् अत एव तेजः सामर्थ्यात् न शस्त्रप्रक्षेपः ग्रहणसिद्धिश्च कालात्मा भगवान् तं मारणार्थमेव गृहीतवानिति दृष्टान्तमाह। यथोरगं तार्क्ष्यसुत इति। प्रसह्य बलादनेन तस्य शरीरव्यापारः प्रतिकूलः सूचितः तथापि गृहीत इति तस्याग्रेऽपि विनयार्थं सामर्थ्यं प्रदर्शितवान् ॥ ३६ ॥

श्रीसुबोधिनी-सारः

असत्तमोऽतिनीचो वसुदेवः सुदुर्मेधा अतिमंदबुद्धिराशु शीघ्रं हन्यताम्। सानुगः सभृत्यः परपक्षे गच्छतीति तथाभूतः पिताप्युग्रसेनश्च हन्यताम् ॥ ३३ ॥ एवं कंसे विकत्थमाने त्रिदोषग्रस्त इवासंबद्धं भाषमाणे सति प्रकुपितोऽव्ययः श्रीकृष्णः तरसा वेगेन लघिम्ना लाघवेनोत्पत्त्योत्प्लुत्य उत्तुंगम् अत्युच्चं मञ्चमारुहत् ॥ ३४ ॥ आविशन्तं तं कृष्णमात्मनो मृत्युम् आलोक्य दृष्ट्वा मनस्वी स कंसः सहसोत्थायाऽसिचर्मणी खड्गं चर्म चाददे ॥ ३५ ॥ खड्गहस्तं दक्षिणसव्यं यथा भवति तथा विचरंतमम्बरे खे श्येनं यथा दुर्विषहमविषह्यमुग्रं तेजो यस्य स कृष्णः प्रसह्य बलात्समग्रहीत् तार्क्ष्यसुतो गरुड उरगं सर्पमिव ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वसुदेवश्च हन्यताम्। तत्र हेतुमाह—असत्तमः तास्कर्येण पुत्रयोरन्यत्र स्थापनात् दुष्ट इत्यर्थः ॥ ननु 'एवं राजविरोधं कथं कृतबान् ?' तत्राह—दुर्मेधा इति। दुर्बुद्धित्वादित्यर्थः। सानुगः सभृत्यादिवर्गः उग्रसेनश्च हन्यताम्। 'पितृत्वेनापि सङ्कोचो न कार्य' इत्याह—नः पिताऽपीति। तत्र हेतुमाह—परेषां शत्रूणां पक्षं गच्छतीति तथा स इति ॥ ३३ ॥ एवं कंसे विकत्थमाने सत्येव प्रकुपितः सन्नव्ययः अप्रक्षीणबलः श्रीकृष्णो लघिम्ना सिद्धया उपत्य तरसा झटिति उत्तुङ्गमपि कंसमञ्चमारुहत् ॥ ३४ ॥ तमाविशन्तं स्वमञ्चमारुहन्तं श्रीकृष्णमात्मनो मृत्युमालोक्य मनस्वी धीरः कंसः सहसा त्वरया आसनादुत्थाय तं हन्तुमसिचर्मणी जगृहे ॥ ३५ ॥ दुर्विषहं अविषह्यं उग्रं तेजो यस्य स भगवान् खड्गः पाणौ यस्य तं दक्षिणतो वामतश्च अम्बरे ऊर्ध्वं च श्येनमिव विचरन्तं कंसमाशु झटिति समग्रहीत्। तत्र दृष्टान्तमाह—तार्क्ष्यसुतो गरुडः प्रसह्य बलादुरगं सर्पं यथा गृह्णाति तद्वदिति ॥३६॥

अन्वितार्थप्रकाशिका

वसुदेव इति। दुर्मधाः प्रतिज्ञाभङ्गेन पुत्रयोरन्यत्र स्थापनात् असत्तमः बसुदेवस्तु आशु हन्यताम्। परपक्षगः अस्मच्छत्रुपक्षं प्राप्तः पिता उग्रसेनः सानुगः भृत्यादिसहितः हन्यताम्। भारतीपक्षे दुर्मेधा दुर्गमबुद्धिः नास्ति सत्तमो यस्मात् स परस्येश्वरस्य पक्षं गच्छन्ति सः वसुदेवः हन्यतां गम्यतां सर्वैराश्रीयताम् ॥ ३३ ॥ एवमिति। एवं कंसे विकत्थमाने सगर्वं वदति सत्येव प्रकुपितः सन्नव्ययः अप्रक्षीणबलः श्रीकृष्णो लघिम्ना लाघवेन उत्पत्य तरसा झटिति उत्तुङ्गमपि कंसमञ्चमारुहत्। "कृमृदरुहिभ्यः" इति छान्दसश्च्लेरङ् ॥ ३४ ॥ तमिति। तमाविशन्तं स्वमञ्चमारोहन्तं श्रीकृष्णमात्मनो मृत्युमालोक्य मनस्वी धीरः कंसः सहसा त्वरया आसनादुत्थाय तं हन्तुमसिचर्मणी जगृहे ॥ ३५ ॥ तमिति। दुर्विषहम् अविवह्यम् उग्रं तेजो यस्य स भगवान् खड्गः पाणौ यस्य तं दक्षिणतो वामतश्च अम्बरे उर्ध्वं च श्येनमिव विचरन्तं कंसमाशु झटिति समग्रहीत्। तत्र दृष्टान्तमाह। तार्क्ष्यस्य कश्यपस्य सुतो गरुडः प्रसह्य बलादुरगं सर्पं यथा गृह्णाति तद्वदिति ॥ ३६ ॥

श्रीगोपालानन्दमुनिबिरचितं निगूढार्थप्रकाशव्याख्यानम्

अव्ययत्वादश्रमः लघिम्नास्व देहलाघवेन उत्पत्य समुत्पत्य सा वेगेन उत्तुङ्गमञ्चं आरुरोह ॥ ३३-३४ ॥ दक्षिणसव्यं विचरन्तं तं कंसमम्बरे गगने चरन्तं श्येनं पक्षिणं यथा गरुडो दुर्विषान् सर्पान् हन्तीति स तथा भूतश्चासावुग्रतेजाश्च उरगं यथा च तथा दुर्विषहमविषह्यमुग्रं तेजो यस्य सः श्रीकृष्णः आशुशीघ्रं समग्रहीत् ॥ ३५ ॥ चलत्किरीटं कंसं केशेषु प्रगृह्य तुंगमचात्

रंगोपरिनिपात्यविश्वाश्रयः अब्जनाभो वैराज पुरुष इव गरीयान् श्रीकृष्णः तस्योपरिष्टादुपरिस्वयं पपात यतः आत्मतन्त्रः स्वाधीनः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वसुदेव इति ॥ असत्तमो दुरात्मा, दुर्मेधा दुर्बुद्धिः । वसुदेवः तु, आशु शीघ्रं, हन्यताम् । तथा नोऽस्माकं, पिता उग्रसेनश्चापि, यतः परपक्षगः शत्रुपक्षपाती, हेतुगर्भमिदम् । तस्मात् सानुगः हन्यताम् ॥ ३३ ॥ एवमिति ॥ एवमित्थं कंसे विकत्थमाने वै । विकत्थमाने सत्येव, प्रकुपितः, अव्ययः श्रीकृष्णः, लघिम्ना पक्षिवल्लाघवेन, तरसा उत्पत्य उत्तुङ्गं, मञ्चं, आरुहत् ॥ ३४ ॥ तमिति ॥ आत्मनः मृत्युं प्रत्यक्षमृत्युरूपं आविशन्तं, तं कृष्णं आलोक्य, मनस्वी धीरः, सः कंसः, सहसा त्वरया, आसनात् उत्थाय, असिचर्मणी खड्गखेटौ, जगृहे ॥ ३५ ॥ तमिति ॥ दुर्विषह्मविषह्यं उग्रं तीव्रं तेजो यस्य स भगवान् खड्गं पाणौ यस्य तं, दक्षिणसव्यं दक्षिणवामतः, अम्बरे ऊर्ध्वं, श्येनं यथा श्येनं इव, विचरन्तं, तं कंसं, तार्क्ष्यसुतः कश्यपपुत्रो गरुडः, प्रसह्य बलात्, उरगं सर्पं, यथा तथा, आशु समग्रहीत् ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवमिति : १०.४४.३४.

क्वचिल्लघुत्वं क च वा गुरुत्वं यथा प्रसङ्गं सुधियाऽरिजेत्रा । प्रदर्शनीयं त्विति युक्तमाधादीशो लघुत्वं पुरतो गुरुत्वम् २४॥

अन्यायवृत्त्यवनिपस्य गुरुत्वतोऽपि सन्न्यायवृत्त्युपगता लघुतैव पूज्या ।
आवेदयन्निति स शूरविभूतिरङ्गीचक्रे धरास्थितिमलं लघिमानमीशः ॥ २५ ॥

कथमस्य सहेय चाज्ञबुद्धेः परमञ्चोच्छ्रयमित्यधोक्षजोरम् । किमु तत्परमं च संश्रितं स्वं ह्यकरोदेष निपातनाय शत्रोः ॥ २६ ॥

तमाविशन्तमिति : १०.४४.३५.

मण्डलानि करोत्युच्चैरच्युतोऽग्रे ममेति किम् । तादूप्याप्त्यै स कंसोऽपि मण्डलाग्रकरोऽभवत् ॥ २७ ॥
अहं कोशविनिर्मुक्तः कृतः श्रीश तवारिणा । तथा कुरु त्वमप्येनमित्यबोध्यसिना तदा ॥ २८ ॥

तं खड्गपाणिमिति : १०.४४.३६.

करोल्लसद्गीकरमण्डलाग्रं तन्मञ्चभूरीकृतमण्डलाग्रम् । निरीक्ष्य कृष्णोऽप्यरिमण्डलाग्रगण्यं विधातुं तमधस्थमैषीत् ॥ २९ ॥

कृष्णप्रिया

बसुदेव भी बड़ा कुबुद्धि और दुष्ट है । उसे शीघ्र मार डालो । और उग्रसेन मेरा पिता होने पर भी अपने अनुयायियों के साथ शत्रुओं से मिला हुआ है । इसलिये उसे भी जीन्दा मत छोड़ो ॥ ३३ ॥ कंस इस प्रकार बढ़-चढ़कर बकवाद कर रहा था कि अविनाशी श्रीकृष्ण कुपित होकर फुर्ती से वेगपूर्वक उछलकर लीला से ही उसके ऊँचे मञ्च पर जा चढ़े ॥ ३४ ॥ जब मनस्वी कंस ने देखा कि मेरे मृत्युरूप भगवान् श्रीकृष्ण सामने आ गये, तब वह सहसा अपने सिंहासन से उठ खड़ा हुआ और हाथ में ढाल तथा तलवार उठा ली ॥ ३५ ॥ हाथ में तलवार लेकर वह चोट करने का अवसर ढूँढ़ता हुआ पैतरा बदलने लगा । आकाश में उड़ते हुए बाज के समान वह कभी दायीं ओर जाता तो कभी वायीं ओर । परन्तु भगवान् का प्रचण्ड तेज अत्यन्त दुस्सह है । जैसे गरुड़ साँप को पकड़ लेते हैं, वैसे ही भगवान् ने बलपूर्वक उसे पकड़ लिया ॥ ३६ ॥

[1]प्रगृह्य केशेषु चलत्किरीटं निपात्य रङ्गोपरि तुङ्गमञ्चात् ।
तस्योपरिष्टात् स्वयमब्जनाभः पपात विश्वाश्रय आत्मतन्त्रः ॥ ३७ ॥[2]
तं[3] सम्परेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः ।
हाहेति शब्दः सुमहांस्तदाभूदुदीरितः सर्वजनैर्नरेन्द्र ॥ ३८ ॥
स नित्यदोद्विग्नधिया तमीश्वरं पिबन्[4] वदन् वा विचरन् स्वपञ्छ्वसन् ।
ददर्श चक्रायुधमग्रतो[5] यत् तदेव रूपं दुरवापमाप ॥ ३९ ॥
तस्यानुजा[6] भ्रातरोऽष्टौ कङ्कन्यग्रोधकादयः । अभ्यधावन्नभिक्रुद्धा[7] भ्रातुर्निर्वेशकारिणः ॥ ४० ॥

---

१. नि–विज. ।

२. कंसोपि कृष्णेन जगत्त्रयैकनिवासभूतेन निपात्य सोऽधः ।
तेनात्मतंत्रेण च पीडितोऽसुं तत्याज राजन्निमिषान्तरेण ॥ विज. ।

३. कंसं–वीर. विज. । ४. पिबन्न–विज. । ५. मच्युतं यत्तदेव–विज. ; यतः–प्रा. पा. । ६. नुगा–वीर. । ७. न्नति–वीर. विज. ।

कर्दमक्षमा

अन्वयः—केशेषु प्रगृह्य चलत्किरीटं तुङ्गमञ्चात् रङ्गोपरि निपात्य तस्योपरिष्टात् उपरि विश्वाश्रयः आत्मतन्त्रः अब्जनाभः स्वयं पपात ॥ ३७ ॥ संपरेतं तं हरिः भूमौ विचकर्ष, इभं हरिः इव । जगतः विपश्यतः हे नरेन्द्र ? तदा सर्वजनैः उदीरितः, हा हा इति सुमहान् शब्दः अभूत् ॥ ३८ ॥ स नित्यदा उद्विग्नधिया चक्रायुधं तम् ईश्वरं पिवज् वदन् विचरन् स्वयन श्वयन् वा ददर्श । यतः तदेवरूपं दुरवापमाप ॥ ३९ ॥ तस्य कङ्कन्यग्रोधकादयः अष्टौ भ्रातरः भ्रातुः निर्वेशकारिणः अभिक्रुद्धाः अभ्यधावन्त ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गरिष्ठत्वाय विश्वाश्रयत्वमुक्तम् । तत्र हेतुः । अब्जनाभः । कुतस्तस्योपर्येव पपात । यत आत्मतंत्रः स्वतंत्रः ॥ ३७–३९ ॥ निर्वेशो निष्कृतिरानृण्यमित्यर्थः । तत्कारिणः सन्तस्तेऽभ्यधावन् ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य कंसस्य । गरिष्ठत्वाय दुर्भरत्वाय तत्र विश्वाश्रयत्वे । उपरिपतनमाक्षिपति–कुत इति । आत्मतन्त्रः अपराधीनत्वाद्यथेच्छं पपातेति भावः । सम्यग्ग्रहणमेव व्यञ्जयति–केशेषु प्रकर्षेण दृढं गृहीत्वेति । ननु मुकुटबद्धकेशेषु द्रुतं ग्रहणं कथं स्यात्तत्राह–चलत् ग्रहणोद्यम एव सवैयग्र्यमस्तकचालनेन । विगलत्किरीटं यस्य तम् । तथा च श्रीविष्णुपुराणे—'केशेष्वाकृष्य विगलत्किरीटम्—' इति । हरिवंशे च—"मुकुटश्चापतत्तस्य कांचनो वज्रभूषितः । शिरसस्तस्य कृष्णस्य परामृष्टेन पाणिना ।" इति । अन्यत्तौः । यद्वा—आत्मतन्त्रे हेतुः—विश्वाश्रयः । तत्र कैमुत्येन हेतुः—अब्जनाभः, गर्भोदशायिरूपेणांशेनापि भुवनकोषपद्मनाभ इत्यर्थः ॥ ३७ ॥ परेतं मृतम् । हरिः सिंहः । तदा कंसपतनाऽवसरे । कृष्णलीलाश्रवणरता एव नरेन्द्रा अन्ये तु नरा अपि न सन्ति "कृष्णभक्ता नरेन्द्राः स्युरन्ये तु पशवो नराः" इति पुराणान्तरात् । "परेतो वाच्यलिंगः स्यान्मृते भूतान्तरे पुमान्" इति मेदिनी । उपरि श्रीभगवत्पातादेव सम्यक्परेतं मृतम् । जगतो विश्वस्येति न केनापि निवारितं सर्वेषां च सुखमिति च सूचितम् । हाहेति शब्दोऽत्र विस्मये । महापुरुषस्याप्यवज्ञया वधात् । तथा च विष्णुपुराणे—"ततो हाहाकृतं सर्वमासीत्तद्रंगमण्डलम् । अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वरम् ।" इति । नरेन्द्रेति—त हृष्टं दृष्ट्वा स्वयमतिहृष्टः सम्बोधयति । नरेन्द्रा अपि अपि त्वादृशा दुष्टान्मारयन्ति किमुतेन्द्रेन्द्रः श्रीकृष्ण इति नाश्चर्यमिति भावः ॥ ३८ ॥ स कंसः । उद्विग्नधिया भीयबुद्ध्या तं कृष्णरूपम् । नित्यदा सदा । यतो हेतोश्चक्रायुधं सुदर्शनधरं ददर्शातो हेतोस्तदेवरूप चक्रायुधरूपं दुरवापं ज्ञानमृते साधनान्तरानवाप्यम् "तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय" इतिः श्रुतेः । सर्वदा ज्ञानरूपभक्तेर्देहान्ते जात ज्ञानत्वात्तदेवापेति भावः । ज्ञानस्य मुक्तौ पाके वह्नेर्ज्वालावद्भक्त्यवांतरव्यापारवत्त्वादित्यन्यत्र बहुधा निरूपितमिति । प्रसंगात्कंसस्य मोक्षमाह—स इति । नित्यदा नित्यमेवोच्चैर्भीतया भयेनाकृष्टया धिया ददर्श । तस्य यद्रूपं नित्यं दृष्टं तदेवाऽधुनापि स्फुरितं सत्प्रापेत्यर्थः । "यं यं चापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तंतमेवैति कौन्तेय सदा तद्भावभावितः ।" इति भगवद्गीतातः पेशस्कारिकीटवदितिः भावः । दुरवापमाप—ननु कालनेमिजन्मनि श्रीमदजितेन हतस्याप्यप्राप्तमोक्षस्य तादृशदुष्टस्य तत्कथं घटेत तत्राह—तं निजाशेषैश्वर्यप्रकटनपरमीश्वरमिति । विश्वनाथस्तु—स्वस्य भूतलाघाताभावार्थं तस्योपरिष्टादेव पपात । विश्वाश्रय इति स्वभावेनैव तं मारयितुमिति भावः । किञ्च—कंसो मृत इति कोऽपि यदा न प्रतीयाय किन्तु मूर्छितोऽयमिति मन्यते स्म तदा तं विचकर्ष । तन्मृत्युं सर्वान्प्रत्याययितुमिति भावः । कंसस्य भयहेतुको भगवदावेश एव सर्वापराध हानिपूर्वकमोक्षहेतुरासीदिति–स इति ॥३९॥ तस्य कंसस्य । इत्यर्थ इति—"निर्वेशस्तु पुमान्भागे वेतने मूर्छनेऽपि च" इति मेदिनी । 'वेतनं भृतिरानृण्यम्' इति कोशान्तरात् । तत् आनृण्यम् । ते कंसानुजाः । निर्वेशो निष्कृतिरानृण्यमिति यावत् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्यक ग्रहणमेव व्यञ्जयति । केशेषु प्रकर्षेण दृढ गृहीत्वेति । ननु मुकुटबद्धकेशानां द्रुतं ग्रहणं कथं स्यात्तत्राह । चलत् ग्रहणोद्यम एव सवैयग्र्यमस्तकचालनेन विगलत्किरीटं यस्य तं तथा च श्रीविष्णुपुराणे । "केशेष्वाकृष्य विगलत् किरी"टमिति श्रीहरिवंशे च । "मुकुटश्चापतत् तस्य काञ्चनो वज्रभूषितः । शिरसस्तस्य कृष्णेन परामृष्टस्य पाणिने"ति । अन्यत्तैः । यद्वा । आत्मतन्त्रत्वे हेतुः विश्वाश्रयः तत्र कैमुत्येन हेतुः अब्जनाभः गर्भोदशायिरूपेणांशेनापि भुवनकोषपद्मनाभ इत्यर्थः ॥ ३७ ॥ उपरि श्रीभगवत्पातादेव सम्यक् परेतं सन्तं जगतोविपश्यत इति । केनापि न निवारितमिति सर्वेषामेव सुखमिति च सूचितम् । हाहेति शब्दोऽत्र विस्मये महाशूरस्याप्यस्यावज्ञया वधात् । तथा श्रीविष्णुपुराणे । "ततो हाहा कृतं सर्वमासीत्तद्रङ्गमण्डलम् । अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वर"मिति । नरेन्द्रेति तं हृष्टं दृष्ट्वा स्वयमतिहृष्टः सम्बोधयति ॥ ३८ ॥ प्रसङ्गात् कंसस्य मोक्षमाह । स इति । नित्यदा नित्यमेवोच्चैर्भीतया भयेनाकृष्टया धिया ददर्श । तस्य यद्रूपं नित्यं दृष्टं तदेवाधुनापि स्फुरितं सत् प्रापेत्यर्थः ।

“यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय ! सदा तद्भावभावितः “इति श्रीभगवद्गीतातः पेशस्कारिकीटवदिति भावः । दुरवापमाप । ननु कालनेमिजन्मनि श्रीमदजितेन हतस्याप्यप्राप्तमोक्षस्य तादृशदुष्टस्य तत् कथं घटेत तत्राह । तं निजाशेषैश्वर्यप्रकटनपरमीश्वरमिति ॥ ३९ ॥ अनुजा अनुगा इति वा पाठः तत्तुल्या एवेत्यर्थः ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

समग्रहीदिति यदुक्तं तदेवाभिव्यञ्जयति—केशेषु प्रकर्षेण दृढं गृहीत्वेति । ननु मुकुटान्तर्वर्त्तिकेशानां ग्रहणं कथं स्यात् ? तत्राह—चलत्किरीटं यस्य तमिति मस्तकपरिभ्रमणात् ; यद्वा, चलत्केशग्रहणार्थं मस्तकस्पर्शनादेव विगतं किरीटं यस्य तम् ; तथा च श्रीविष्णुपुराणे (५।२०।७३)—‘केशेष्वाकृष्य विगलत्किरीटम्’ इति; श्रीहरिवंशे च (विष्णु० प० ३०।७७)—‘मुकुटश्चापतत्तस्य काञ्चनो वज्रभूषितः । शिरसस्तत्र कृष्णेन परामृष्टस्य पाणिना ॥’ इति । अन्यत्तैर्व्याख्यातम् । यद्वा, अब्जनाभ इत्यादिविशेषणाभ्यां सहजमहागौरवमुक्तम् । ननु तर्हि कथं व्रजे श्रीयशोदोत्संगवर्त्तित्वादिकम्, कथञ्च श्रीवृन्दावननीपवृक्षाद्यारोपणम्, कथं वाधुनैव मल्लक्रीडायां परिभ्रामणादिकमपि ? तत्राह—आत्मतन्त्रः स्वेच्छया निजक्रीडानुसारेण कदाचिद्गरिष्ठः कदाचिल्लघीयांश्च स्यादित्यर्थः ॥ ३७ ॥ उपरि श्रीभगवत्पातादेव सम्यक् परेतं मृतं सन्तम्, भूमौ विकर्षणं श्रीवसुदेवादीनां सन्तोषणार्थमिति तैर्लिखितमेव । तेन च महापरिखा जातेति ज्ञेयम् । तथा च श्रीविष्णुपुराणे (५।२०।७६)—‘गौरवेणातिमहता परिखा तेन कृष्यता । कृता कंसस्य देहेन वेगेनेव महाम्भसः ॥’ इति । स च श्रीमधुपुर्य्यां कंसखातमिति कंसनदीति च प्रसिद्धा, श्रीविश्रान्तितीर्थवरसंगताद्यापि साक्षाद्वर्त्तत एवेति कंसदेहस्य परमस्थौल्यकाठिन्यादिकमपि ज्ञेयम् । सिंहो गजं यथेति दृष्टान्तेन लीलयावहेलयैव क्रोधेन च विकर्षणं ध्वनितम् । जगतो विपश्यतः साक्षान्निरीक्षमाणस्येति कंसस्य परमदुष्टतया केनापि तन्निवारणं न कृतमित्यादिकम्, तथा सर्व्वेषामेव तेन सुखमभूदिति च सूचितम् । हाहेति शब्दस्तु महाशूरस्याप्यवज्ञया वधात् ; तथा च श्रीविष्णुपुराणे (५।२०।७८)—‘ततो हाहाकृतं सर्व्वमासीत्तद्रंगमण्डलम् । अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वरम् ॥’’ इति । नरेन्द्रेति दुष्टवधेन हृष्टं परीक्षितं दृष्ट्वा स्वयमपि हृष्टः सम्बोधयति । यद्वा, लोकानां तादृशः स्वभावो नरश्रेष्ठत्वाद्भवता ज्ञायत एवेति भावः ॥ ३८ ॥ प्रसंगात् कंसस्य मोक्षमाह —स इति । नित्यदा नित्यमेवास्य यथायोग्यमन्यैरप्यन्वयः । यद्वा, नित्यं वस्तु मोक्षाख्यं ददातीति तथाभूतया उद्विग्नया महावैरेणोच्चैर्भीतया धिया विशिष्टः, श्लेषेण नित्यं पदं वैकुण्ठाख्यं द्यति अवखण्डयतीति तथाभूतयेति ईश्वरभावेन भयं व्यवच्छिन्नम्, अतएव तं श्रीकृष्णं चक्रायुधं मारणाय सदोद्यत–सुदर्शनम् । पानादि कुर्व्वन् ; यतोऽग्रतो वर्तमानं ददर्शेत्युक्तमतस्तत्प्रसिद्धं दैत्येभ्यो देयं रूपं ब्रह्मात्मकमेव, न तु तस्य निजं पार्षदप्राप्यं योगिभिर्दुर्लभमपि प्राप्तः । वा समुच्चये । विचरन् पर्य्यटन् श्वसन्नित्यनेनानुक्तान्यशेषदशा गृहीता इति पूर्व्वोक्तेन आसीनः पर्य्यटन्नित्यादिनैकवाक्यता द्रष्टव्या । ननु तादृशदुष्टस्य तदपि कथं घटेत ? तत्राह—ईश्वरम्, तत्स्मरणप्रभावेणेत्यर्थः; यद्वा, तं निजाशेषैश्वर्य्यप्रकटनपरमीश्वरमिति पूर्व्वं कालनेमि जन्मनि श्रीविष्णुना साक्षाद्धतस्याप्यप्राप्तमोक्षस्याधुना मोक्षे हेतुरयं ज्ञेयः ॥ ३९ ॥ अनुगा इति तेषामपि तादृशदुःशीलत्वादिकमुक्तम् । ‘अनुजा’ इति पाठेऽपि स एवार्थः । अभिमुखमभितो वा । यद्वा, ‘अभि’ अभयं यथा स्यात्तथा धावन् वेगेनागच्छन् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः केशेषु प्रगृह्य दृढं गृहीत्वा चलद्विक्षिप्तं किरीटं यस्य तं कंसमुत्तुङ्गमञ्चाद्रङ्गोपरि निपात्य तस्य कंसस्य उपरिष्टात्स्वयमब्जनाभो भगवान् पपात कथम्भूतः विश्वाधारः अनेन गरिष्ठत्वमुक्तम् आत्मतन्त्रः संहारकर्तेत्यर्थः ॥ ३७ ॥ ततो जगतो जनस्य पश्यतः सतः परेतं मृतं कंसं भूमौ विचकर्ष यथा हरिः सिंहः इभं मृतं तद्वत् तदा हे नरेन्द्र ! सर्वैर्जनैः सुमहानत्युच्चैर्हाहेतिशब्दः उदीरित उद्घोषितोऽभूत् ॥ ३८ ॥ यतः सदोद्विग्नया भीतया धिया तमीश्वरं कृष्णमेव पानभोजनाद्यवस्थास्वग्रतश्चक्रायुधं ददर्श ततः स कंसो दुरापमपि तदेव रूपं प्राप्तवान् तत्सारूप्यलक्षणां मुक्तिमत्रापेत्यर्थः ॥ ३९ ॥ ततस्तस्य कसस्य भ्रातरः कङ्कादयोऽष्टौ भ्रातुर्निर्वेशं निष्कृतान्तमानुष्यं तत्कारिणोऽतिक्रुद्धा अभ्यधावन् ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उत्तुङ्गमञ्चादवपतनादङ्गभङ्गः कथं नाभूत्तत्राह । विश्वाश्रय इति । विश्वमाश्रयो यस्येति विग्रहे उक्तचोद्यानिस्तार इत्यत उक्तमात्मतन्त्र इति अपराधीनत्वात् ॥ ३७—३८ ॥ स कंसः चीर्णपुण्यफलादानार्थं कंसे स्थितो वायुः संसारावस्थायां तदुद्विग्नबुद्ध्या भीतबुद्ध्या अन्यत्र मरणादुद्विग्नबुद्ध्या तमीश्वरं ध्यायन्नित्यदाप्थनादौ पुनः दैत्यस्य मृत्युसमये मञ्चेऽग्रतः स्थितं यदच्युतमविनाशि नित्यं चक्रं सुदर्शनमायुधं यस्य स तथा ददर्श हरे रूपमाप आविष्ट इत्यर्थः । अन्यस्त्वच्युतं चक्रं छद्मैवायुधं यस्यास्तमोदेवतायास्तच्चक्रायुधमन्यथाज्ञानसाध्यं यद्ददर्श तदेव तमोदेवतायाः रूपं नित्यदुःखलक्षणमाप दुरवापमित्युभयत्र समम्—

चक्रं सैन्ये जलावर्ते रथाङ्गे चक्राह्वयोः । सञ्चारे मण्डले वृत्ते छद्मभेदार्थदम्भयोरिति च ॥ ३९ ॥

भ्रातुर्निवशो निष्कृतिरानृण्यं तत्कारिणः सिंहव्याघ्रौ मृगाधिपाविति च ॥ ४०—४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कंसो मृत इति यदा कोऽपि न प्रतीयाय किं तु मूर्च्छितोऽयमिति मन्यते स्म तदा तं विचकर्ष तन्मृत्युं सर्वान् प्रत्यायायतुमिति भावः । हाहेति शब्दोऽत्र विस्मये महाशूरस्याध्यज्ञया वधात् यदुक्तं वैष्णवे "ततो हाहाकृतं सर्वमासीत्तद्रङ्गमण्डलम् । अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वर"मिति ॥ ३७-३८ ॥ कंसस्य भयहेतुको भगवदावेश एव सर्वापराधक्षयपूर्वकमोक्षहेतुरासीदित्याह । स इति ॥ ३९ ॥ निर्वेशो निष्कृतिरानृण्यमित्यर्थः ॥ ४०-४३ ॥

गूढार्थदीपिनी

तार्क्ष्यसुतः गरुडः यथा उरगं गृह्णाति तथेत्यन्वयः ॥ ३६ ॥ चलत् विगलत् किरीटं यस्य तम् कंसम् ॥ ३७ ॥ सम्परेतं मृतम् । हरिः सिंहो यथा इभं गजम् ॥ ३८ ॥ आप प्राप्तवान् ॥ ३९ ॥ निर्वेशः आनृण्यम् ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निर्वेशो निष्कृतिरानृण्यं तत्कारिणः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

बलादुरगं यथा केशेषु निगृह्य चलत्किरीटं मुकुटं यस्य तं तुङ्गमञ्चाद्रङ्गोपरि निपात्य तस्य कंसस्योपरि स्वयमब्जनाभः पपात । तनुतरतनुमतः पीतस्य पाते किं स्यादित्यत आह । विश्वाश्रयो विश्वम्भर इति । तदसम्भावना पराकृत्या आत्मतन्त्र इति । तदेव विशदयति । कंसोऽपीति । जगत्त्रयेकानिवासभूतेन कृष्णेनाधो निपात्यात्मतन्त्रेण च पीडितो निमिषान्तरेणासुं तत्याज । पुंसि भूम्न्यसवः प्राणा इति तु प्रायिकाभिप्रायम् । अयं श्लोकस्तु प्रक्षिप्त इति बहवः ॥ ३७ ॥ परेतं कंसं विचकर्षेत्यस्योत्तरं कंसं परेतं विचकर्षतीत्यपि योजयन्ति । हरिः सिंह इभं यथा हरिः कृष्ण इभं कुवलयापीडं यथा तथेति सर्वा हिंसिता ये तेषां जनाः स्वकीयास्तैर्हाहेति सुमहाञ्शब्दस्तदोदीरितोऽभूत् । अर्वपर्वहिंसायामिति स्मरणात् ॥ ३८ ॥ भयात्कंस इति शंसिततदवस्थामाह । त इति शंसिततदवस्थामाह । स इति । उद्विग्नधिया भीतियुक्तमत्या तमीश्वरं विबञ्चलं कलशं वाऽदन्फलादिकमन्नकवलं वा विचरन्स्वपन्नात्रौ दिवा वाश्वसन्नेवं नित्यदा यतश्चक्रायुधमच्युतं ददर्श ततस्तदेव देवरूपमन्यैः केवलदानवैर्दुरवापमाप । तदाविष्टो भृगुर्भगवदन्तनिविष्टोऽसुरस्तु क्रमात्तमो गच्छति । अतः समसमराकरणादनायुधघातान्न वीरस्वर्गस्तस्ये मन्तव्यम् । यथोक्तं हरिवंशे । असङ्ग्रामहतः कंसः स बाणैरपरिक्षतः । कण्ठग्राहान्निरस्तासुः स्वर्गमार्गान्निराकृत इति ॥ ३९ ॥ तस्य कंसस्यानुजा भ्रातरः परस्परं कङ्कन्यग्रोधकावेवादी येषां ते भ्रातृनिर्वेशकारिणो भ्रातुः कंसस्य निर्वेशो निष्कुतिरानृण्यमिति यावत् कर्तुं शीलमेषामस्तीति ते तथाऽतिक्रुद्धा अभ्यधावत् ॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तथाप्यविनीतं पातितवानित्याह । प्रगृह्येति । स हि भगवता स्पृष्टोऽपि न किन्तु केशेषु गृहीतः वैयर्थ्यसूचनायाह । चलत् किरीटं यथा भवतीति । ततः सर्वथा सज्जीकृतं रङ्गस्थानमिति स्वपदेन पवित्रमिति भगवदीयरूपसिध्यर्थं तुङ्गमञ्चाद्रङ्गोपरि निपात्य स्वयमपि तदुपरि पतितः यथा अनवहितौ ततः पतितौ भवतः तथा लोकप्रतीतिर्जनिता तत्क्रियायां स्वयमपि व्यापृत इति न क्लिष्टकर्मत्वम् । नन्वेवं कथं पातलक्षणमपूर्वं साधनं कृतवान् न हि शत्रुमारणे स्वयमात्मा साधनत्वेन युज्यते तत्राह । अब्जनाभ इति । स हि कमलनाभो मूलकारणं स्वात्मानमेव सर्वत्र नियुङ्क्ते तथात्रापि अनेनालौकिकपक्षकरणदोषोऽपि निवारितः सर्वेषां च पितृत्वेनोद्धारोऽपि कर्त्तव्य इति तथा कृतवानित्यर्थः । विश्वाश्रय इति । तस्य भारेणैव मारणं कृतमिति केचित् । वस्तुतस्तु तस्यापि भगवानाश्रय इति तस्मै स्वात्मानं दत्तवान् आत्मतन्त्र इति । स्वस्य शङ्काभावाय स हि स्वतन्त्रः उभयत्रापि हेतुरपीडायाम् अनधिकारिणं स्वात्मानं प्रयच्छतीत्यत्रापि ततस्तस्मै स्वात्मदानेन कृतार्थं तं लोलप्रतीत्यर्थं कपटं कृत्वातिष्ठतीति ॥ ३७ ॥ भ्रान्तानां प्रतीतिसिध्यर्थं च सम्परेतमपि तं विचकर्षेत्याह । तं सम्परेतमिति । सम्यक् परः इतः प्राप्तो येन भगवद्धस्ते वा सम्यक् मृत इति नास्य प्राणा ह्युत्क्रान्ताः किन्तु मूर्च्छया अन्तर्दृष्टौ अन्तर्बहिः यद्रूपं भगवदीयं सर्वदालपते तस्मिन् स्वयं प्रविशन् प्राणानपि प्रवेशितवानिति सारूप्यपक्षे भवति । सायुज्ये तु अस्मिन्नेव शरीरे आत्मनि वा प्राणानां लयः इहैव समवलीयन्ते इति मृत्युर्यस्योपसेचनमिति च श्रुतौ । ततस्तादृशस्य भगवदीयशरीरोत्पत्त्यर्थं विचकर्ष यत्र यत्राङ्घ्रिरेणवः तत्र सम्बद्ध कृतवान् अत एव भूमावित्युक्तम् । लोकप्रतीतौ तस्य निकृष्टत्वख्यापनाय विकर्षणं विशीर्णावयवं च विकर्षणेन कृतवानिति ज्ञापयितुं दृष्टान्तमाह । हरिर्यथेममिति । अल्पमूर्तिः सिंहः स्थूलमपि गजं हत्वा दैवादेवायं मृत इति शङ्का भविष्यतीति विशीर्णावयवं यथा भवति तया कर्षणं करोति तथा दैवगत्या कदाचिन्मृता भवेदिति शङ्कापरिहारार्थम् । वस्तुतस्तु हरिः सर्वदुःखहर्त्ता यथा गजेन्द्रमुपरि नीतवान् तथात्र कंसं भूमौ विशेषेण चकर्षेति विशेषः । अधिकः प्रयत्नो न कृत इति माहात्म्यार्थमक्लिष्टकर्मत्वख्यापनार्थं च प्रमाणमाह । जगतो विपश्यत इति । पितरौ क्लेशिताविति तयोः सन्तोषार्थं विकर्षणमिति केचित् तत्र दृष्टान्तादिकं न सङ्गच्छते स यमुनां प्रापित इति

पुराणान्तरं तत्र च विश्रान्त इति किञ्च सर्वेषामेव स मारित इति प्रतीतिर्ज्जातेत्याह । हा हेति शब्दः सुमहानभूदिति । अयुक्तं तथा शब्दः पित्रोर्हितार्थे तथा करणे सर्वजनानां हा हेति शब्दो नोपपद्येत राजत्वाद्वा अकस्मात्तथा वचनं नरेन्द्रेति सम्बोधनं लोकपीडकेषु रक्षकाणां तथा भवतीति ज्ञापनार्थम् ॥ ३८ ॥ एवं सर्वजनीने तस्य मारणे प्रवृत्ते प्रमेयबलमाश्रित्य तस्य परलोके किं जातमित्याकाङ्क्षायां सारूप्यं वा सायुज्यं वा जातमित्याह । सनित्यदोद्विग्नधियेति । सर्वदैवभयेनोद्विग्नबुद्ध्या तमेव भगवन्तं भयप्रत्यासत्या प्रदर्शितेश्वरस्वरूपं चक्रायुधं शङ्खचक्रगदापद्मधरं सर्वावस्थासु पश्यन् तदेव रूपमवाप सदा तद्भावभावितः अन्ते तु तं दृष्टतानेव याने हि दुःखनिवृत्या सुखेन च विषयप्राबल्यात् सर्वविस्मरणं सिद्धं तथा भोजने विशेषेण चरणे आखेटकादावपि स्वपन् निद्रायां स्वसन्मूर्च्छायामपि यत्र पञ्चस्ववस्थासु दर्शनं तत्रोपवेशनादौ न संदेह एव किंच न केवलं स्मरणमात्रं किंत्वग्रतश्चक्रायुधं ददर्श सर्वदेवभयजनको भगवानिति तस्य न भयं निवृत्तम् अतोऽन्तेऽपि सुतरां भगवान्मारयितुं प्रवृत्त इति भयजननात् तदेव रूपं प्रकटीभूतम् अन्तरेवेति विमर्शः बहिः पक्षे उत्क्रान्तिरप्यपेक्षते यद्यपि कालरूपसायुज्यं युक्तं योधानामिव तथापि भावनाया बलिष्ठत्वात् सर्वदा साक्षात् कृतं सदेव रूपमवाप तद्वस्तुतः सर्वेषामेव दुराषम् ॥ ३९ ॥ एवं तस्व भगवदिच्छया तथा त्वमापन्नस्य स्वतो दोषाभावात् गुणस्य च विद्यमानत्वात् सायुज्यमुक्त्वा व्यवहारे शिष्टं कृत्यं वदन् तद्भ्रातॄणां वधमाह । तस्यानुजा इति । तस्य कंसस्य भ्रातरः अष्टौ भ्रातरः कङ्कन्यग्रोध इति सपक्षता महत्त्वनिरूपणार्थं नामद्वयं निरूप्य तदादि भूता निरूपिताः कंसे निहते भ्रातरि जीवति भ्राता परैर्न हन्तव्य इति हते पुनः जिघांसन्तं जिसांसीयादिति न्यायात् भातुनिर्वेशनं निष्कृति कुर्वन्तीति अतिक्रुद्धाः सन्तः अभ्यधावन् कपटेनाकस्मान्मारितवानित्यतिक्रोधः एकः कथञ्चिन्मारितः वयमष्टावेकश्च मारक इति क्रुद्धबुद्धयः आभिमुख्येनैव धावनं कृतवन्तः निर्वेशो ऋणशोधनं हन्यात् हतो वा भवेत् अन्यथा न निर्वेशः स्यादिति अत्रापि भ्रातैव ॥ ४० ॥

श्रीसुबोधिनी–सारः

केशेषु प्रगृह्य गृहीत्वा चलत्किरीटं यस्य तं कंसं तुङ्गमञ्चात् रंगोपरि निपात्य तस्योपरिष्टादुपरि विश्वाश्रयो जगदाधार आत्मतन्त्रः स्वाश्रयोऽब्जनाभः पद्मनाभः श्रीकृष्णः स्वयं पपात ॥ ३७ ॥ सम्परेतं मृतं तं कंसं हरिर्भूमौ विचकर्ष । इभं गजं हरिः सिंह इव । जगतोऽभिपश्यतः सतः हे नरेन्द्र तदा तस्मिन्काले सर्वजनैरुदीरित उच्चारितो हाहा महाकष्टमिति सुमहान् शब्दोऽभूत् ॥ ३८ ॥ नित्यदा सदा उद्विग्नबुद्ध्या तमीश्वरं चक्रायुधम् अग्रतो ददर्श । पानादि कुर्वन् कंसः यतोऽन्यैर्दुरवापं दुर्लभं तदेव रूपमाप ॥ ३९ ॥ तस्य कंसस्यानुजाः कनिष्ठाः कंकन्यग्रोधकादयोऽष्टौ भ्रातरो भ्रातुर्निर्वेशकारिण आनृण्यमिच्छंतोऽभिक्रुद्धा अभ्यापतन् ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततो ग्रहणादेव चलत् विक्षिप्तं किरीटं यस्य तं कंसं केशेषु प्रगृह्य दृढं गृहीत्वा मञ्चाद्रङ्गोपरि रङ्गभूमौ निपात्य तस्योपरि स्वयं पपातेत्यन्वयः । ‘किमर्थं तदुपरि पपात ?’ इत्यपेक्षायां ‘विश्वाश्रयत्वेन गुरुतरत्वात्तन्मारणार्थम्’ इति सूचयन्नाह—विश्वाश्रय इति । विश्वाश्रयत्वमेव स्पष्टयति—अब्जनाभ इति । विश्वात्मकमब्जं नाभौ यस्य सः । ननु ‘मारणं तु शस्त्रादिना प्रसिद्धम्, तद्धित्वा भगवान् किमित्यमुमुपायं कल्पितवान् ?’ तत्राह—आत्मतन्त्र इति ॥ ३७ ॥ ततो जगतः प्राणिसमूहस्य पश्यतः सतः स्वभक्तद्रोहस्य फलं प्रदर्शयंस्तं सम्परेतं मृतमपि कंसं भूमौ विचकर्ष । तत्रायासमाशङ्क्य दृष्टान्तेन वारयति–हरिः सिंहो यथा मृतमिभं हस्तिनं विकर्षेत्तथेति । ‘राज्ञो मरणात्तत्परिकरभूतानां रोदनं तव विदितमेव’ इति सूचयन् सम्वोधयति—हे नरेन्द्रेति। तदा तत्रत्यै राजकीयैः सर्वजनैरुदीरित उच्चारितः सुमहान् हाहेति शब्दोऽभूत् ॥ ३८ ॥ यतः स कंसो नित्यदा उद्विग्नया भीतया धिया चक्रायुधं तमीश्वरं श्रीकृष्णमेव पानभोजनाद्यवस्थास्वप्यग्रतः ददर्श, ततो योगिभिरपि दुरवापं तदेव रूपमवाप । सारूप्यलक्षणां मुक्तिं प्राप्तवानित्यर्थः ॥ ३९ ॥ ततस्तस्य कंसस्य भ्रातरः कङ्कादयोऽष्टौ भ्रातुर्मृतस्य कंसस्य निर्वेशमानृण्यं तत्कारिणः तत्कर्तुमतिक्रुद्धाः सन्तः अभ्यधावन् हन्तुं सम्मुखमागताः ॥ ४० ॥

अन्वितार्थप्रकाशिका

प्रगृह्येति । विश्वस्याश्रयः आत्मतन्त्रश्च अब्जनाभः ततो ग्रहणादेव चलत् विक्षिप्तं किरीटं यस्य तं कंसं केशेषु प्रगृह्य दृढं गृहीत्वा तुङ्गात् मञ्चाद्रङ्गोपरि रङ्गभूमौ निपात्य तस्योपरि स्वस्य भूतलाघाताभावार्थं स्वयं पपात । विश्वाश्रय इति भाराधिक्येन प्राणहरणार्थम् ॥ ३७ ॥ तमिति । जगतः प्राणिसमूहस्य पश्यतः सतः स्वभक्तद्रोहस्य फलं प्रदर्शयंस्तं सम्परेतं मृतमपि कंसं लोकानां मूर्छितभ्रान्तिनिवृत्तये कंसेन पूर्वं पीडितानां सन्तोषाय च भूमौ विचकर्ष । हरिः सिंहो यथा मृतमिभं हस्तिनं विकर्षति तथेति। हे नरेन्द्र ! तदा तत्रत्यै राजकीयैः सर्वजनैरुदीरित उच्चारितः सुमहान् हा हेति शब्दोऽभूत् । यद्वा । हा हेति विस्मये । महाशूरस्याप्यवज्ञया वधात् ॥ ३८ ॥ स इति । यतः स कंसो नित्यदा । दा आर्षः । उद्विग्नया भीतया धिया चक्रायुधं तमीश्वरं श्रीकृष्णमेव पिबन् वदन्नित्यादिपानभोजनाद्यवस्थास्वप्यग्रतो ददर्श । ततो योगिभिरपि दुरवापः तदेव रूपमवाप सारूप्यलक्षणां मुक्तिं प्राप।

इयं माघकृष्णचतुर्दशी भगवतश्च द्वादशोऽब्दः ।। ३९ ।। तस्येति । तस्य कंसस्य भ्रातरः कङ्कादयोऽष्टौ भ्रातुर्मृतस्य कंसस्य निर्वेशमानृण्यं तत्कारिणः तत्कर्तुमतिक्रुद्धाः सन्तः अभ्यधावन् हन्तुं संमुखमागताः ।। ४० ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उदीरित उच्चारितः ।। ३७ ।। तमीश्वरं पानादिक्रियां कुर्वन् सन् अग्रतः अग्रे यतो ददर्श ततः अन्यैर्दुरवापं यद्रूपं तदेव प्राप ।। ३८ ।। भ्रातुर्निर्वेशो निःकृतिरानृण्यमिति यावत् तत्कारिणः कंसस्य वैरग्रहणं कुर्वाणम् इत्यर्थः सन्तस्ते तमभ्यधावत् ।।३९।। तथा एवंभूतः अतिरभसो वेगो येषां तान् संयतान् सोद्यमान् ।। ४० ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रगृह्येति ।। ततः, केशेषु प्रगृह्य सुदृढं गृहीत्वा, चलद्विक्षिप्तं किरीटं यस्य तं कंसं, तुङ्गमञ्चादुच्चमञ्चात्, रङ्गोपरि निपात्य, तस्य कंसस्य उपरिष्टात्, स्वयं अब्जनाभः, विश्वाश्रयः विश्वाधारः, अनेन गरिष्ठत्वमुक्तम् । आत्मतन्त्रः स्वतन्त्रः, संहारकर्त्तेत्यर्थः । एवंभूतः कृष्णः, पपात ।। ३७ ।। कंसमिति ।। कृष्णः, जगतः जनस्य, विपश्यतः सतः, पश्यन्तं जनमनालोक्येत्यर्थः । परेतं मृतं, कंसं, हरिः सिंहः, इभं गजं यथा तथा, भूमौ विचकर्ष । तदा हे नरेन्द्र, सर्वजनैः सुमहानत्युच्चैः, हा हा इति शब्दः, उदीरितः उद्घोषितः, अभूद् बभूव ।। ३८ ।। स इति ।। यतः सः कंसः, नित्यदा सदा, उद्विग्नधिया भीतया धिया, ईश्वरं परमेश्वरं चक्रायुधं, तं श्रीकृष्णं, पिबन् जलपानं कुर्वन्, अदन् भोजनं कुर्वन्, विचरन् गतिं कुर्वन्, स्वपन् शयनं कुर्वन्, श्वसन् श्वासान् विमुञ्चन्, सर्वावस्थास्विति शेषः । अग्रतः ददर्श । ततः, दुरवापं दुःखेनाप्यवाप्तुमशक्यं अपि, तदेव रूपं, आप तत्सारूप्यलक्षणां मुक्तिमवापेत्यर्थः ।। ३९ ।। तस्येति ।। ततः तस्य कंसस्य, कङ्कश्च न्यग्रोधकश्च तावदी येषां ते, अष्टौ अनुजाः कंसापेक्षया कनिष्ठाः भ्रातरः, अतिक्रुद्धाः, भ्रातुः कंसस्य, निर्वेशकारिणः आनृण्यकारिणः सन्तः, अभ्यधावन् ।। ४० ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

प्रगृह्य केशेष्विति : १०.४४.३७.

प्रधानाङ्गजातापकृष्टिं विना न क्वचिद्ध्वस्तगो जायते शत्रुरित्थम् ।
विचिन्त्यैव चित्तेऽच्युतः किं तदानीं स्वचातुर्यतस्तत्कचानाचकर्ष ।। ३० ।।
ये भक्तिमन्तः सुस्निग्धा उत्तमाङ्गविभूतयः । अनुगृह्णामि तान् हस्तेनेत्यबोधि कचग्रहात् ।। ३१ ।।
मध्ये मनोज्ञांश्च सदाशुकादीन् शान्तान् समुज्जृम्भितमत्स्वरूपान् ।
मूर्धाभिषिक्तान् स्वकरेण चानुगृह्णामि केशान् दधत्यबोधि ।। ३२ ।।
सत्युग्रसेने पृथिवीपतौ कथं निर्लज्जमेभिर्मुकुटं समुद्धृतम् ।
कचान्निगृह्याशु तदाशयेन किं ततः पृथक् श्रीपतिनाऽथवा कृतम् ।। ३३ ।।
सजातीयान् रिपुगतानालम्ब्यैव जयेद्रिपुम् । तत्केशग्रहणात् कृष्णो युक्तं कंसमपातयत् ।। ३४ ।।
शत्रुप्राणेषु पञ्चत्वं सिद्धमेवेति चिन्तयन् । अताडयत् प्रभुः शत्रुमपातयदधःस्थले ।। ३५ ।।
मन्मातुलोऽयमिति मे गुरुरेव साक्षात् तत्सर्वलोक-गुरुरप्यहमस्य शिष्यः ।
जानन्निदं नयविदेष विभुः किमस्मिन् स्वां सर्वलोकगुरुतां निदधे स्वभारात् ।। ३६ ।।
यदाद्यपतने हेतुगुरुत्वं तार्किकैरितम् । कंसे गर्वगुरौ विश्वगुरौ कृष्णेऽपि तत्क्षमम् ।। ३७ ।।
अहो विचित्रं भुवि कंसहिंसनं चकार लोकातिग-मच्युतस्तदा । बहिर्दृशोऽधःपतनं जगुर्जना निरञ्जना ऊर्ध्वमिदं तु मेनिरे ।। ३८ ।।

तं संपरेतं विचकर्षेति : १०.४४.३८.

स्वकर्मणाऽधो निलये निपातिनं कंसमेनं यदिहोद्धराम्यहम् । मदीक्षणस्पर्शनचिन्तनादिकं तदा मुधा स्यादिति तं चकर्ष सः ।। ३९ ।।
प्रारब्धं लघु वा बृहद्भुवि विना भोगं न याति क्षयं सिद्धान्तोऽस्ति तथापि मत्स्मृतिमतामत्यल्पकालाश्रितम् ।
स्याद्यस्मादवलोक्य तादृशमहं तत्कालमेवोद्धराम्यद्धा तं करतस्त्विति प्रभुरधात् कंसापकर्षात् स्फुटम् ।। ४० ।।
यदर्थमवतारो मे यद्योगाच्च यशांस्यपि । प्रसूतानीति साध्वीशस्तत्कंसमनयत् क्षयम् ।। ४१ ।।

कृष्णप्रिया

इसी समय कंस का मुकुट गिर गया और भगवान् ने उसके केश पकड़कर उसे भी उस ऊँचे मञ्च से रंङ्गभूमि में गिरा दिया । फिर परम स्वतन्त्र और सारे विश्व के आश्रय भगवान् श्रीकृष्ण उसके ऊपर स्वयं कूद पड़े ।। ३७ ।। उनके कूदते

ही कंस की मृत्यु हो गयी। सबके देखते-देखते भगवान् श्रीकृष्ण कंस की लाश को धरती पर उसी प्रकार घसीटने लगे, जैसे सिंह हाथी को घसीटे। नरेन्द्र! उस समय सबके मुँह से 'हाय! हाय! की बड़ी ऊँची आवाज सुनायी पड़ी ॥३८॥ कंस नित्य-निरन्तर बड़ी घबड़ाहट के साथ श्रीकृष्ण का ही चिन्तन करता रहता वह खाते-पीते, सोते-चलते, बोलते और साँस लेते-सब समय अपने सामने चक्र हाथ में लिये भगवान् श्रीकृष्ण को ही देखता रहता था। इस नित्य चिन्तन के फलस्वरूप--वह चाहे द्वेषभाव से ही क्यों न किया गया हो--उसे भगवान् के उसी रूप की प्राप्ति हुई, सारूप्यमुक्ति हुई, जिसकी प्राप्ति बड़े-बड़े तपस्वी योगियों के लिये भी कठिन है ॥ ३९ ॥ कंस के कङ्क और न्यग्रोध आदि आठ छोटे भाई थे। वे अपने बड़े भाई का बदला लेने के लिये क्रोध से आग बबूले होकर भगवान् श्रीकृष्ण और बलराम की ओर दौड़े ॥ ४० ॥

[१]तथातिरभसांस्तांस्तु संयत्तान् रोहिणीसुतः। अहन् परिघमुद्यम्य पशूनिव मृगाधिपः ॥ ४१ ॥
नेदुर्दुन्दुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः। पुष्पैः किरन्तस्तं[२] प्रीताः शशंसुर्ननृतुः स्त्रियः ॥ ४२ ॥
तेषां स्त्रियो महाराज सुहृन्मरणदुःखिताः। तत्राभीयुर्विनिघ्नन्त्यः[३] शीर्षाण्यश्रुविलोचनाः ॥ ४३ ॥
शयानान् वीरशय्यायां पतीनालिङ्ग्य शोचतीः। विलपुः सुस्वरं नार्यो विसृजन्त्यो मुहुःशुचः ॥ ४४ ॥

कर्वमक्षमा

अन्वयः—अतिरभसान्, संयत्तान्, तान्, तु, रोहिणीसुतः, परिघम्, उद्यम्य, तथा, अहन्, मृगाधिपः, पशून्, इव ॥४१॥ व्योम्नि, दुन्दुभयः, नेदुः, ब्रह्मेशाद्याः, विभूतयः, पुष्पैः, किरन्तः, प्रीताः, तं, शशंसुः, स्त्रियः, ननृतुः ॥ ४२ ॥ महाराज! तेषां स्त्रियः, सुहृन्मरणदुःखिताः, शीर्षाणि, विनिघ्नन्त्यः, अश्रुविलोचनाः, तत्र, अभीयुः ॥ ४३ ॥ वीरशय्यायां, शयानान्, पतीन्, आलिङ्ग्य, शोचतीः, मुहुः शुचः, विसृजन्त्यः नार्यः, सुस्वरं विलपुः ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तथा तादृगतिरभसो वेगो येषां तान्। संयत्तानुद्युक्तान् ॥ ४१–४३ ॥ शोचन्त्यो विलापांश्चक्रुः। शुचः अश्रूणि ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"परिघो योगभेदेऽस्त्रविशेषेऽर्गलघातयोः" इति मेदिनी। पशून्मृगादीन् "पशुर्मृगादिदेवाजे नाऽव्ययं पशुदर्शने" इति। 'सिंहव्याघ्रौ मृगाधिपौ' इति हलायुधः ॥ परिघं तत्रैव दैवतः प्राप्तम्। यद्वा—परिघाकारं गजदन्तमेव ॥ ४१ ॥ तं कृष्णम्। विभूतयः अंशाः "विभूतिर्भस्ममांसेषु संपत्तौ भवनेऽपि च" इति धरणिः ॥ विभूतयस्तद्दत्तैश्वर्यास्तत्सेवका इत्यर्थः। स्त्रियोऽप्सरसः ॥ ४२ ॥ तेषां कंसादीनाम्। तत्र रंगभूमौ ॥ ४३ ॥ वीरशय्यायां रणभूमौ। वीराणां शय्या शयनं यस्यां सा तस्याम्। विसृजन्त्यस्त्यजन्त्यः ॥ वीराणां शय्या रणभूः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथेति तैर्व्याख्यातं। तत्र तादृगिति। कंसरभससदृश इत्यर्थः। यद्वा। तेनातिक्रोधादिप्रकारेणेति। परिघं तत्रैव दैवतः प्राप्तं यद्वा। परिघाकारं गजदन्तमेव ॥ ४१ ॥ विभूतयस्तद्दत्तैश्वर्यास्तत्सेवका इत्यर्थः। स्त्रियोऽप्सरसः ॥ ४२ ॥ सुहृदः पत्यादयः ॥ ४३ ॥ वीराणां शय्या युद्धे मरणभूमिः तस्यां शयानान् सुप्तवत् पतितान् ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तथेति तैर्व्याख्यातम्। तत्र तादृगिति कंससदृशोऽनिर्वचनीयो वेत्यर्थः। अथवा तेनातिक्रोधादिना प्रकारेणातिरभसानत्यन्तवेगान्, परिघं निजमुषलाकारमस्त्रविशेषं राजकीयं तत्रैव स्थितमुद्यम्य उच्चयित्वा जघान, यतो रोहिणीसुतः श्रीकृष्णक्रीड़ानुसारेण तत्प्रीतिकारीति पूर्ववद्बोद्धव्यम्; यद्वा, रोहिणीसुतत्वेन श्रीवसुदेवदेवक्यादीनां प्रीत्यर्थमिति भावः। मृगाधिपः सिंहः पशून् मृगानिवेति दृष्टान्तेन पशुतुल्यतया तेषामकिञ्चित्करत्वमप्रयासेन हननञ्च ध्वनितम् ॥ ४१ ॥ ततश्च देवादयोऽपि सर्व्वे परमनिर्वृता जाता इत्याह—नेदुरिति। स्वयमेवावाद्यन्त, दिव्यत्वात् सन्निमित्तबलाद्वा; ब्रह्मेशाद्या देवाः। आद्य-शब्दादिन्द्रादयो विभूतयो वैभवरूपाः सेवका इत्यर्थः। अतः प्रीता हृष्टाः सन्तः पुष्पैस्तं श्रीकृष्णं किरन्तो व्यापयन्तः शशंसुस्तुष्टुवुः, साधु साध्विति प्रशशंसुरिति वा। स्त्रियश्चाप्सरसो नृत्यं चक्रुः ॥ ४२ ॥ तेषां कंसादीनां स्त्रियः पत्न्यादयः, सुहृदः पत्यादयः, तत्र रंगमध्ये तत्तन्मृतदेहान्तिकेऽभित ईयुः। यद्वा, 'अभि' अभयं यथा स्यात्। शीर्षाणि विशेषेण केशोल्लुञ्चनादिना नितरां घ्नन्त्यः प्रहरन्त्यः, अश्रुविशिष्ट–विलोचनाः प्ररुदन्त्य इत्यर्थः। हे महाराजेति प्रहर्षात् सम्बोधनम्; यद्वा, महाराजो यः सुहृत् कंसस्तस्य मरणेन

---

१. तदा—वीर. । २. न्तस्सं—वीर. । ३. स्वशीर्षाण्यश्रुलो—विज. ।

दुःखिताः; अन्येषां मरणादपि सर्व्वपालकस्य कंसस्य मरणेनातिदुःखात् ॥ ४३ ॥ वीराणां शूराणां शय्या युद्धसम्बन्धिमरणभूमिस्तस्यां शयनान् सुप्तवन्निश्चेष्टतया पतितान् पतीन् स्वस्वभर्तॄनालिंग्य सुस्वरमुच्चैरार्त्त-करुण-स्वरेणेत्यर्थः। मुहुर्विसृजन्त्योऽत्यतं मुञ्चन्त्यः, मुहुरित्यस्यान्यैरपि यथापेक्षमन्वयः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदातिरभसो वेगो येषां तानुद्युक्तान् रामः परिघमुद्धृत्याहन् जघान मृगाधिपः सिंहः पशूनिव ॥ ४१ ॥ तदा स्वविभूतिभूता ब्रह्मरुद्रादयः पुष्पैः किरन्तः शशंसुस्तुष्टुवुः स्त्रियोऽप्सरसो ननृतुः ॥ ४२ ॥ ततः हे महाराज ! तेषां कंसादीनां स्त्रियः पत्न्यः भर्तृमरणेन हेतुना दुःखिताः स्वशिरांसि विनिघ्नन्त्यः अश्रूणि लोचनयार्यासां तास्तत्र भर्तृसंनिधावाजग्मुः ॥ ४३ ॥ वीरशय्यायां युद्धभूमौ शयानान् स्वभर्तॄनालिङ्ग्य शोचन्त्यः मुहुः शुचोऽश्रूणि विसृजन्त्यः सुस्वरं यथा तथा विलेपुर्विलापं चक्रुः ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विभूतयः हरिविशेषसन्निधानपात्राणि ॥ ४२-४३ ॥ वीरशय्यायां रणभूमौ विलेपु विप्रलापं चक्रुः विसृजन्त्यः ददत्यः त्यागो विहापितं दानमुत्सर्जनविसर्जने। इति हलायुधः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शोचतीः शोचन्त्यः ॥ ४४ ॥

गूढार्थदीपिनी

रभसो वेगः। परिघं लोहदण्डं दैवतः प्राप्तम्। गजदन्तमिति तोषिणी ॥४१॥ किरन्तः वर्षन्तः ॥४२॥ तेषां कंसादीनाम्। सुहृदः पतयः ॥ ४३ ॥ शय्यायां भूमौ शोचतीः शोचन्त्यः। सुस्वरम् उच्चैः। शुचः शोकाश्रूणि ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तथा तादृशः अतिरभसो वेगो येषां तान् ॥४१-४३॥ शोचतीः शोचन्त्यः विलेपुः विलापांश्चक्रुः शुचः अश्रूणि॥४४-४७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अतिरभसान्बहुवेगिनः परिघं तद्वद्विद्यमानं बाहुं सह नानीतो न वापि स उत्तरत्रैव स्मृतं श्चेति परितो हन्तीति परिघो वा बाहुस्तमुद्यम्य। उक्तं च तत्रैव। बलदेवोऽपि धर्मात्मा कंसभ्रातरमोजसा। बाहुभ्यामेव तरसा सुनामानमपोथयदिति। निदर्शनं चैवं सुदर्शनं मृगाधिपः पशूनिवेति ॥ ४१ ॥ विभूतयो विशेषसन्निधाननिधानानि गतं च। स्त्रियो गान्धर्व्यः ॥ ४२ ॥ तेषां कंसादीनाम् ॥ ४३ ॥ हे वीरपरीक्षित् शय्यायां नित्यं यथा तथा शयानान्पतीनालिङ्ग्य शोचयतीः शोचन्त्यो नार्यो मुहुर्मुहुः शुचः पश्यतां विसृजन्त्यो ददत्यस्त्यागो विहापितं दानमुत्सर्जनविसर्जने इति हलः। शुचो बहिर्विसृजन्त्य उपर्युपर्युत्पादयन्त्यः सुस्वरं विलेपुः ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अष्टानामनुकल्प एक एव तान् मारितवानित्याह। तथातिरभसानिति। यथा कंसः अतिवेगवान् एवं ते सर्व एव अतिशीघ्रमागतास्तान् प्रसिद्धान् तु इति भगवन्मारणपक्षं व्यावर्त्तयति नाप्युपेक्षाः यतः संयत्ताः शस्त्रपाणयः। ननु भगवानेव मारयेत् किमिति बलभद्रेण हतास्तत्राह। रोहिणी सुत इति। देवकी भ्रातरस्ते अतो मातुला भगवता न हन्तव्या इति कंसस्तु अन्येन वध नार्हतीति कथंञ्चिद्धतः अविमृश्यकारित्वात् अत एव स शस्त्रान् स्वयमपि परिघप्रायं दन्तमेव गृहीत्वा अन्यद्वा तत्र विद्यमानमायुधमर्गलामेव वा तेन अहन् मारितवान् पशूनिवेत्यत्रापि सबध्यते यथा लकुटेन पशवो हन्यन्ते तथा सर्वे मारिताः तेषां छेदन न भविष्यतीत्याशङ्क्य दृष्टान्तमाह। मृगाधिप इवेति। सिंहो हि क्षुधितः भक्षणार्थमेव मारयतीति तथा सर्वे विशीर्णावयवाः कृता इत्यर्थः। अनायासेन मारणे सन्देहाभावे वा दृष्टान्तः ॥ ४१ ॥ एवं सभ्रातरि हते देवानामपि परमानन्दो जात इति दैवविपक्षवधेन भगवतो धर्मस्थापनमेव जातमिति मातुलदोषपरिहारार्थं देवकृतं पुष्पवृष्ट्यादिकमाह। नेदुर्दुन्दुभय इति। ब्रह्मा ईश्वरश्च आदौ येषां विष्णुभगवानेवेति द्वावेवावशिष्टावति द्वयोर्गणना प्रमेयप्रमाणभूतौ वा तं भगवन्त प्रीताः सन्तः पुष्पैः किरन्तः शशंसु दुन्दुभीनां नादनं स्वतन्त्रं तत्प्रेरणायां जातमिति तत्कायिकं भिन्नकर्तृकमपि ब्रह्मादीनां मानसं भवति पुष्पवृष्टिः कायिकी शंसनं वाचानक तेषां तु स्त्रियः पुरुषधर्मैस्तुल्या अपि एकशेषेणोक्ताः भगवति स्नेहविशेषात् ननृतुः ननु। ब्रह्मणः सर्वतुल्यत्वान्महादेवस्य च कंसो भक्त इति कथ सर्वेषामनुमोदनमिति चेत्तत्राह। विभूतयः इति भगवतो विभूतिप्रायाः विभूतिमान् भगवान् अतः स्वामिकृतं तेषामभिनन्द्यमेव ॥ ४२ ॥ भगवान् स्त्रीणां सुखार्थं अवतीर्ण इति कथं तेषां स्त्रीणां सुतरां मातुलानीनां वैधव्यं संपादितवानित्याशङ्क्य तासामति दुःखं न जातं भर्तृदोषस्मरणात् अन्यथा निर्वाहाभावात् भगवत्यादरातिशयाच्चेति वक्तुं तेषां स्त्रीणामुपाख्यान-

माह । तेषां स्त्रिय इति । मल्लादीनां कंसादिनवानां च महाराजेति सम्बोधनं नाश्चर्यमेतदिति ज्ञापनार्थं प्रोत्साहनार्थं वा लौकिकमिति कदाचिन्न शृणुयात् सुहृदां भर्तृणां मारणेन अतिदुःखिताः अन्यायित्वेन पतितत्वात् भर्तृत्वमनुक्त्वासित्रत्वमेवाह । पत्ना हि सर्वस्य मित्रमिति श्रुतेः मरणेनैव दुःखिताः यदि भगवांस्तान् वन्दीकुर्यात् तदा दुःखमपि न भवेत् अतः शीर्षाणि विनिघ्नन्त्यः तत्राभीयुः अश्रूणि लोचनयोर्यासाम् अश्रूण्यन्तः करणधर्मो हननमिन्द्रियाणामभिगमनं कायिकं शोककार्यं त्रयमपि कुलस्त्रीणां सभास्वागमनं नान्यदा ॥ ४३ ॥ आगत्य यादृक् दृष्टवत्यस्तदाह । शयानानिति । वीरशय्यायामिति । रणाङ्गणे शय्यायामेव शयने स्त्रीणामाधिकार इति । पतीनालिङ्ग्येति स्नेहोद्गम उक्तः ततः शोचन्त्यो जाताः विलेपुः सुस्वरं यतो नार्यः अन्तःकरणपूर्वकत्वायाह मुहुः शुचो विसृजन्त्य इति । लौकिक्येका भाषा यथा देवक्यादयः पुत्राद्यपाये रोदनं कृतवत्यः तथा तासामपि जातमिति भगवान् भक्तकृपया तथा कृतवानिति वक्तुमेवं निरूप्यते ॥ ४४ ॥

श्रीसुबोधिनी-सारः

तथोक्तप्रकारेणातिरभसान् अतिकोपाविष्टान् संयत्तान् उद्युक्तान् तान् परिघमुद्यम्य गृहीत्वा रोहिणीसुतोऽहन् । मृगाधिपः सिंहः पशूनिव ॥ ४१ ॥ व्योम्नि स्वर्गे दुन्दुभयो नेदुः । ब्रह्मशिवाद्या विभूतयः पुष्पैः तं श्रीकृष्णं किरन्त आच्छादयन्तः प्रीत्या शशंसुः । स्त्रियोऽप्सरसो ननृतुः ॥ ४२ ॥ तेषां कंसादीनां स्त्रियो राज्ञः सुहृदां पतीनां मरणेन दुःखिताः अश्रूणि विलोचनेषु यासां ताः शीर्षाणि शिरांसि विनिघ्नन्त्यः ताडयन्त्यस्तत्र रंगभूमौ अभीयुराजग्मुः । हे महाराज ॥ ४३ ॥ वीरशय्यायां शयानान् पतीनालिंग्याश्लिष्य शोचतीः शोचन्त्यो नार्यो मुहुर्वारं वारं शुचोऽश्रूणि विसृजन्त्यः त्यजंत्यो रुदंत्य इत्यर्थः । सुस्वरं यथा भवति तथा विलेपुः ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अतिरभसो वेगो येषां तान संयत्तान् उद्युक्तान् रोहिणीसुतः रामः परिघमुद्धृत्य तथैवानायासेन अहन् जघान । तत्र दृष्टान्तमाह–मृगाधिपः सिंहः पशूनिवेति ॥ ४१ ॥ तदा व्योम्नि देवैर्वादिता दुन्दुभयो नेदुः । प्रीता ब्रह्मरुद्रादयो भगवद्विभूतयः पुष्पैः किरन्त शशंसुः तुष्टुवुः । स्त्रियो अप्सरसश्च ननृतुः ॥ ४२ ॥ हे महाराज ! तेषां कंसकङ्कादीनां स्त्रियः सुहृदां स्वभर्तृणां मरणेन हेतुना दुखितः अतः स्वशिरांसि विनिघ्नन्त्यः अश्रूणि लोचनयोर्यासां तास्तत्र भर्तृसन्निधौ अभीयुः आजग्मुः ॥ ४३ ॥ वीरशय्यायां युद्धभूमौ शयानान् स्वभर्तॄनालिङ्ग्य शोचतीः शोचन्त्यो मुहुः शुचोऽश्रूणि विसृजन्त्यश्च ता नार्यः सुस्वरं यथा भवति तथा विलेपुः ॥ ४४ ॥

अन्वितार्थप्रकाशिका

तथेति । अतिरभसो वेगो येषां तान् संयत्तान् उद्युक्तान् रोहिणीसुतः रामः परिघमुद्यम्य तथैवानायासेन अहन् जघान । तत्र दृष्टान्तमाह । मृगाधिपः सिंहः पशूनिवेति परिघं तदाकारं गजदन्तमिति तोषिणी ॥ ४१ ॥ नेदुरिति । व्योम्नि देवैर्वादिता दुन्दुभयो नेदुः । ब्रह्मरुद्रादयो भगवद्विभूतयः पुष्पैः किरन्तः शशंसुः तुष्टुवुः । स्त्रियोऽप्सरश्च ननृतुः ॥ ४२ ॥ तेषामिति । हे महाराज ! तेषां कंसकङ्कादीनां स्त्रियः सुहृदां तेषां स्वभर्तृणां मरणेन हेतुना दुःखिताः अतः स्वशीर्षाणि विनिघ्नन्त्यः । नुमार्षः । अश्रूणि विलोचनेषु यासां तास्तत्र भर्तृसन्निधौ ईयुः आजग्मुः ॥ ४३ ॥ शयानानिति । वीरशय्यायां युद्धभूमौ शयानान् स्वभर्तॄनालिङ्ग्य शोचतीः शोचन्त्यः । पूर्वसवर्णदीर्घो नुमभावश्चार्षः । मुहुः शुचोऽश्रूणि विसृजन्त्यश्च तानार्यः सुस्वरं यथा भवति तथा विलेपुः ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

किरन्तोवर्षन्तः ॥ ४१-४२ ॥ शोचतीः शोचन्त्यः विलेपुः विलापांश्चक्रुः शुचोनेत्रविंदून् ॥ ४३ ॥ हे धर्मज्ञेत्याद्याः स बिलापाः सस्नेहाः संबुधयो भवन्ति ते तत्वदीयावयं ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तथेति ॥ तथा तदा, अत्यतिशयितो रभसो वेगो येषां तान्, सयत्तानुद्युक्तान्, तान् कङ्कादीन् कंसभ्रातॄंस्तु, रोहिणीसुतो बलभद्रः, परिघं उद्यम्य, मृगाधिपः सिंहः, पशून् इव, अहन् जघान ॥ ४१ ॥ नेदुरिति ॥ तदा व्योम्नि आकाशे, दुन्दुभयः, नेदुः । देवदुन्दुभिनादा बभूवुरित्यर्थः । विभूतयः हरेर्विशेषतः संनिधानपात्रभूताः, ब्रह्मशाद्या ब्रह्मशिवादयः, प्रीताः सन्तः, तं श्रीकृष्ण, पुष्पैः किरन्तः सन्तश्च, शशंसुः । स्त्रियः स्वर्गाङ्गनाः, अप्सरस इत्यर्थः । ननृतुः ॥ ४२ ॥ तेषामिति ॥ ततः, हे महाराज, तेषां कंसादीनां, स्त्रियः । सुहृन्मरणदुःखिताः भर्तृमरणेन हेतुना संजातदुःखाः, अश्रूणि विलोचनयोर्यासां ताः, शीर्षाणि स्वस्वमस्तकानि, विनिघ्नन्त्यः सत्यः, तत्र भर्तृसंनिधौ, अभीयुराजग्मुः ॥ ४३ ॥ शयानानिति ॥ वीरशय्यायां युद्धभूमौ, शयानान् पतीन् स्वस्वभर्तॄन्, आलिङ्ग्य, शोचतीः शोचन्त्यः, मुहुः शुचोऽश्रूणि, विसृजन्त्यः नार्यः, सुस्वरं यथा तथा, विलेपुर्विलापं चक्रुः ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तथेति : १०.४४.४१.

रामः शिष्टारिसेनाब्धिं जग्रसे वाडवाग्निवत् । समुपेत्य स्वयं कैश्चित्तत्र वा शलभायितम् ॥ ४२ ॥
मूलाज्ञाने लयमुपगते लीनवृत्तीनि तूलाज्ञानानि स्युः क्वचिदपि यदि प्रोद्गतानि प्रसह्य ।
सद्यो नेयान्युपशमगतिं योगदृष्ट्या तदेति व्यक्तं कंसानुजहतिकृतो योगवेत्तुश्चरित्रात् ॥ ४३ ॥

नेदुर्दुन्दुभय इति : १०.४४.४२.

ततः सः विजयी रमापतिरभूदनेकध्वनत् - प्रचण्डरव-दुन्दुभिप्रमुख-वाद्यहृष्यन्मनाः ।
अनेकविधमागधोल्लसित - वर्तमानार्थकप्रशस्तगुणगौरवो लसदनकीर्तिध्वजः ॥ ४४ ॥
शत्रुक्लेशभयोन्मुक्तं यत्प्रसादभून्मनः । युक्तं ब्रह्मादिदेवानां तदेशे सुमनार्पणम् ॥ ४५ ॥
स्वभावो दुस्त्यजोऽन्तेऽपीत्येतच्छास्त्रमभूत् स्फुटम् । यत्कंसस्य तदाप्यासीच्छरीरं प्रमदावृतम् ॥ ४६ ॥

कृष्णप्रिया

जब भगवान् बलरामजी ने देखा कि वे बड़े बेग से युद्ध के लिये तैयार दौड़े आ रहे हैं, तब उन्होंने परिघ उठाकर उन्हें वैसे ही मार डाला, जैसे सिंह पशुओं को मार डालता है ॥ उस समय दुन्दुभियाँ बजने लगीं । भगवान् के विभूतिस्वरूप ब्रह्मा, शङ्कर आदि देवता बड़े आनन्द से पुष्पों की वर्षा करते हुए उनकी स्तुति करने लगे । अप्सरायें नाचने लगीं ॥ ४२ ॥ महाराज ! कंस और उसके भाइयों की स्त्रियाँ अपने आत्मीय स्वजनों की मृत्यु से अत्यन्त दुःखित हुई । वे अपने सिर पीटती हुई आँखों में आँसू भरे वहाँ आयी ॥ ४३ ॥ वीरशय्या पर सोये हुए अपने पतियों से लिपटकर वे शोकग्रस्त हो गयीं और बार-बार आँसू बहाती हुई ऊँचे स्वर से विलाप करने लगी ॥ ४४ ॥

हा नाथ प्रिय धर्मज्ञ करुणानाथवत्सल । त्वया हतेन निहता वयं ते सगृहप्रजाः ॥ ४५ ॥
त्वया विरहिता पत्या पुरीयं पुरुषर्षभ । न शोभते वयमिव निवृत्तोत्सवमङ्गला ॥ ४६ ॥
अनागसां त्वं भूतानां कृतवान् द्रोहमुल्बणम् । तेनेमां भो दशां नीतो भूतध्रुक् को लभेत शम् ॥ ४७ ॥
सर्वेषामिह[1] भूतानामेष हि प्रभवाप्ययः । गोप्ता च तदवध्यायी[2] न क्वचित् सुखमेधते ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—हा नाथ !, प्रिय !, सर्वज्ञ !, करुणानाथवत्सल !, त्वया, हतेन, सगृहप्रजाः, ते वयम्, निहताः ॥ ४५ ॥ पुरुषर्षभ !, पत्या, त्वया, विरहिता, निवृत्तोत्सवमङ्गला, इयं, पुरी, वयम्, इव, न, शोभते ॥४६॥ भो !, अनागसाम्, भूतानाम्, त्वम्, उल्बणम्, द्रोहम्, कृतवान्, तेन, इमाम्, दशाम्, नीतः, भूतध्रुक्, कः, शम्, लभेत ॥ ४७ ॥ हि, एषः, सर्वेषाम्, भूतानाम्, प्रभवः, अप्ययः, गोप्ता, च, तदवध्यायी क्वचिद्, सुखम्, न एधते ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे धर्मज्ञ, हे करुण हे दीनवत्सलेति विलापे प्रेमसंबोधनानि । ते त्वदीया वयम् ॥ ४५ ॥ त्वया पत्या विरहिता पुरीयं न शोभत इति स्वदृष्ट्याभिधानम् ॥ ४६ ॥ अनागसामिति तु परमार्थाभिधानम् ॥ ४७ ॥ एष कृष्णः प्रभवंत्यस्मादिति प्रभवः अपियन्ति प्रलीयन्तेस्मिन्नित्यप्ययः स च स च । तदवध्यानं कृष्णस्य अवज्ञा तत्कर्तुं शीलं यस्य सः ॥ ४८–४९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अनाथा प्रिया वत्सला यस्य स तथा । करुणया नाथन्ते प्रार्थयन्त इति करुणानाथा दीनस्तेषु वत्सल स्निग्ध 'वत्सलः स्निग्धपुत्रयोः' इति कोशात् । हा नाथेत्याद्येकत्वं प्रत्येकं पृथग्विलापात् । मुख्यत्वेन कंसस्त्रीणामेव तद्वर्णनाद्वा । करुणादयालो आ ईषत्प्रहतेऽपि निहताः किं पुनर्मारिते । 'त्वया हतेन' इति पाठः क्वचित् । त्वया हतेनैव कर्त्रेति दुःखोक्तिः । गृहैः प्रजाभिश्चापत्यादिभिः सहिता । गीर्देवी तु निन्दति—अनाथेत्यकारप्रश्लेषेणैकपद्यात् ॥ ४५ ॥ निवृत्ते उत्सवमंगले यस्यां सा । उत्सवो होलिकादिरूपो, मङ्गल विवाहादि । विशेषेणाऽपुनर्योगतया रहिताः । निवृत्त उत्सवो गीतवाद्यादि मंगलानि च शुभसूचमानि यस्याः सा । न चान्यतरतत्संभवेदित्याहुः–पुरुषर्षभेति । गीर्देवी तु–पुरुषर्षभ बलीवर्द । काका न शोभते किमिति "ऋषभः स्वरभेदे

---

[1] मेव–विज. । [2] वज्ञाय न वृथा–विज. ।

स्यादष्टवर्गौषधे वृषे । श्रेष्ठार्थे च" इति विश्वप्रकाशात् ॥ ४६ ॥ तेन भूतद्रोहेण । इमां मृत्युरूपाम् । भूतध्रुक् प्राणिद्रोही "एतस्य महतो भूतस्य" इत्यादिश्रुतौ भूतशब्द ईशपरस्तथा चेशद्रोही कः शं लभेत, न कोऽपीत्यर्थः । दैहिकव्यवहारमात्रेण ताभिः सह शोचन्त्यः काश्चित्परमार्थदर्शिन्य आहुः–अनागसामिति द्वाभ्याम् । उल्बणमुत्कटं बहुधा दुर्मारणात् ॥ ४७ ॥ एष प्रत्यक्षस्थितः । "प्रभवाप्ययौ हि भूतानाम्" इति श्रुतेः । सुखं यथा स्यात्तथा न वर्धते । किञ्च–सर्वेषामिति तदवध्यायी तदवज्ञातापि, किं पुनर्द्रोहीत्यर्थः । सुखं यथा स्यात्तथा नैधते स सदा दुःखेन क्षीयत इत्यर्थः । क्वचिदिह परत्र चेत्यर्थः । इदं तत्स्वभावनिन्दापेक्षयैवोक्तं न तु तादृशानामपि सुखपर्यवसायक भगवत्स्वभावदृष्ट्येति ज्ञेयम् । एष श्रीकृष्णः । प्रभवत्यस्मादिति प्रभवः, अपियंत्यस्मिन्नित्यप्ययः, स च स चेति विश्वनाथः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हा नाथेत्याद्यैकत्वं प्रत्येकं पृथग्विलापात् मुख्यत्वेन कंसस्त्रीणामेव तद्वर्णनाद्वा । करुण दयालो ! आ ईषत् प्रहृतेऽपि निहताः किं पुनर्मारिते त्वया हतेनेति पाठः क्वचित् । त्वया हतेनैव कर्त्रेति दुःखोक्तिः । गृहैः प्रजाभिश्चापत्यदिभिः सहिताः ॥४५॥ विशेषेणापुनर्योगतया रहिता निवृत्त उत्सवः गीतवाद्यादिमङ्गलानि च शुभसूचकानि यस्याः सा । नचान्यतस्तत् सर्व सम्भवेदित्याहुः । पुरुषर्षभेति । गीर्देवी तु निन्दन्ती अनाथेत्याकारविश्लेषेणैकपद्यान् । तथैवाह पुरुषर्षभ बलीवर्द काका न शोभते किमिति श्लेषाच्च ऋषभः स्वरभेदे स्यादष्टवर्गौषधे वृषे श्रेष्ठार्थे चेति विश्वप्रकाशात् ॥ ४६ ॥ दैहिकव्यवहारमात्रेण ताभिः सह शोचन्त्यः काश्चित् परमार्थदर्शिन्य आहुरनागसामिति द्वाभ्याम् । उल्वणमुत्कटं बहुधा दुर्मारणात् ॥ ४७ ॥ किञ्च सर्वेषामिति तदवध्यायी तदवज्ञातापि किं पुनर्द्रोहीत्यर्थः । सुखं यथा स्यात्तथा नैधते स सदा दुःखेन क्षीयत इत्यर्थः । क्वचिदिह परत्र चेत्यर्थः । इदं तत्स्वभावनिन्दापेक्षयैवोक्तं नतु तादृशानामपि सुखपर्यवसायकभगवत्स्वभावदृष्ट्येति ज्ञेयम् ॥ ४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हा नाथेत्याद्यैकत्वं स्वस्वपतिं प्रति पृथक् सम्बोधनादिना सर्व्वासामेव प्रत्येकं विलापात्; यद्वा, मुख्यत्वेन कंसस्त्रीणामेव तदुक्तेः । हा कष्टसम्बोधने । नाथ हे स्वामिन् ! करुणाया नाथ ईश्वर हे परमदयालो इत्यर्थः । वत्सल । हे परमस्निग्ध ! यद्वा, करुण ! दयालो ! अनाथेषु वत्सल इत्येषां सम्बोधनानां यथोत्तरश्रैष्ठ्येन तस्य माहात्म्यमुक्तम्, आ सम्यक् हते मारिते; यद्वा, ईषत् प्रहृतेऽपि नितरां हताः, किं पुनर्मारिते, गृहैः प्रजाभिश्चापत्यादिभिः सहिताः ॥ ४५ ॥ विशेषेण मरणादपुनर्योगतया रहिता; निवृत्त उत्सवो गीतवाद्यादिर्मंगलञ्च सुखं सत्कर्म वा यस्याः सा; न चान्यतस्तत्सर्व्वं सम्भवेदित्याशयेन सम्बोधयन्ति—पुरुषर्षभेति ॥ ४६ ॥ ननु पुरुषर्षभश्चेत्तर्हि कथनकाले दुर्मरणम् ? तत्राहुः—अनागसामिति । द्रोहं हिंसाम्, उल्वणमुत्कटम्, बहुधा दुर्मारणात् । भो दैत्यराज ! ननु ज्ञानपराणामसुराणां मादृशां तेन न दोषः, नेत्याहुः—भूतेति । शं सुखं मंगलं वा ॥ ४७ ॥ ननु निजसुखार्थं राज्ञां शत्रु-तत्पक्षवर्गद्रोहो युक्त एव, तत्राहुः—सर्व्वेषामिति । हि निश्चितमेव वा, एष एव प्रभवाप्यय इति स्रष्टृत्वं संहारकत्वञ्च, गोप्ता चेति बालकत्वम्, तैः परमेश्वरत्वमुक्तम्, गोप्तृत्वस्य पश्चादुक्तिः, सम्प्रति पालनार्थमेवावतीर्णत्वादित जगत्पालकस्य तस्य तत्परिपाल्य-जनानाञ्च द्रोहेण महादोषः सूचितः । तदवध्यायी कथञ्चित्तदवज्ञाकार्य्येऽपि, किं पुनर्द्रोही, तत्र च सकृदवध्यानेनापि न सुखमेधते, किं पुनस्तत्स्वभावक इति ताच्छील्ये णिनिप्रत्ययार्थः । सुखं यथा स्यात्तथा नैधते न वर्द्धते । सदा दुःखेन क्षीयत इत्यर्थः । क्वचिदिति जीवने सदा भयादिना न कदापि सुखम्, मरणेऽपि मुक्त्यां नैवेत्यर्थः, मोक्षस्य दुःखाभावैकमात्रत्वात् ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भूतध्रुक् भूतद्रोही शं सुखम् ॥ ४७ ॥ अवध्यायी अवज्ञाकारी ॥ ४८-५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

विलापनप्रकारमेवाह । हा नाथेति । नाथेत्यादीनि विलापे प्रेमसम्बोधनानि हतेन त्वया सहैव ते त्वदीयाः सगृहासप्रजाश्च वयमपि निहतप्रायाः ॥ ४५ ॥ पत्या प्रभुणा त्वया विरहितेयं पुरी हे पुरुषर्षभ ! यथा वयं तद्वन्निवृत्त उत्सवा मङ्गलानि सुखानि च यस्यां सा तथाभूत पूर्ववन्न शोभते इति स्वदृष्ट्योचुः ॥ ४६ ॥ अथ परमार्थदृष्ट्योचुः । अनागसामिति । त्वं निरपराधानां भूतानां दुःसहं द्रोहं कृतवान् तेन कारणेन भो भर्तः ! इमां दशामवस्थां प्राप्तः भूतेभ्यो द्रुह्यतीति तथा सः को वा शं सुखं लभते किं तु दुःखमेवेति भावः ॥ ४७ ॥ किं चैष कृष्णः सर्वेषां भूतानां प्रभवः प्रभवन्त्यस्मादिति प्रभवः स्रष्टेत्यर्थः । अपियन्ति लीयन्तेऽस्मिन्नित्यप्ययः संहर्तेत्यर्थः । गोप्ता रक्षिता चातस्तदवध्यायी तस्मिन् विषयेऽध्वयानमवज्ञातत्कर्तुं शीलं यस्य सः क्वाचिदपि सुखं यथा तथा नैधते न वर्द्धते किं तु दुःखमेवाश्नुवन्नश्यतीत्यर्थः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

करुणया नाथस्ते प्रार्थयन्ते इति करुणानाथास्तेषु वत्सल स्निग्ध ! ते तव विद्यमानाः ये पुरासनाथास्ते वयमिति वा ॥ ४५-४७ ॥ प्रभव उत्पादकः अव्ययः संहारहेतुः प्रभवाप्ययौ हि भूतानामिति श्रुतिः यथा सुखं भवति तथा नैधते न वर्धते ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

दैहिकव्यवहारमात्रेण ताभिः सह शोचन्त्यः काश्चित् परमार्थदर्शिन्य आहुरनागसामिति द्वाभ्याम् ॥ ४७-५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्र सुभगा जरासन्धकन्याद्या आहुः । हा नाथेति द्वाभ्याम् स गृहप्रजाः गृहैः प्रजाभिश्च सह वर्त्तमानाः ॥ ४५-४६ । दुर्भगाः शुद्धान्तः करणा आहुः । अनागसामिति द्वाभ्याम् ॥ ४७ ॥ एष श्रीकृष्णः प्रभवन्त्यस्मादिति प्रभवः अपियन्त्यस्मिन्नित्यप्ययः स च स च अवध्यानमवज्ञा तत्कर्तुं शीलं यस्य स ॥ ४८ ॥

गूढार्थदीपिनी

ते त्वदीया वयम् ॥ वाग्देवी तु अकारप्रश्लेषेण अनाथेत्येकपदं कृत्वा न शोभते किमिति अपि तु शोभते एवेति काक्वा व्याचष्टे । हे पुरुषर्भ हे बलीवर्द ॥ ४६ ॥ अनागसां निरपराधानाम् । उल्बणम् उत्कटम् ॥ ४७ ॥ एष कृष्णः प्रभवः स्रष्टा । अप्ययः संहर्ता । तदवध्यायी तदपमानकर्ता ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एष कृष्णः प्रभवत्यस्मादिति प्रभवः उत्पत्तिस्थानम् अपियन्त्यस्मिन्नित्यप्ययः प्रवेशस्थानं स च स च तथा तदवध्यानं कर्तुं शीलमस्यास्तीति तदवध्यायी ॥ ४८-५० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

करुणयतीति करुणस्तत्सम्बुद्धिः । अनाथवत्सल तत्प्रीतिमन् । हतेन त्वया वयं सगृहप्रजास्सहिता निहतास्त्वन्मूलकत्वादस्मद्गृहादेः ॥ ४५ ॥ त्वया पत्या नाथेन राज्ञा वयमिव निवृत्तोत्सवमङ्गला इयं पुरी मथुरा न शोभते ॥ ४६ ॥ अनागसां निरपराधानां प्राणिनामुल्बणं द्रोहमृत्युत्कटफलदं भो पते इमां दशां नीतः । सामान्यार्थान्तरं न्यस्यन्ति । कः भूतध्रुक् भूतेभ्यो द्रोग्धा शं सुखं लभतेति ॥ यादृशतादृशभूतद्रोह एवं महिमा महामहिमद्रोहे तु किं वक्तव्यमिति वदन्ति । सर्वेषामिति । हि यतः सर्वेषां भूतानामेषः प्रकर्षेण भव उत्पत्तिरप्ययो नाशश्च यस्मात्स तथा गोप्ता रक्षिता च तदवध्यायी तदवज्ञाता क्वचिदपि सुखं यथा तथा नैधते ॥ ४८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

चतुर्भिर्विलापमाह । हा नाथेति । आदौ तान् शोचन्ति ततः पुरीं ततस्तेषां दुर्दशां तत ईश्वरापराधेन परलोकेऽपि न सुखमिति । प्रथममात्मानं शोचन्ति हेति । महादुःखे संबोधनानि स्वस्य धर्मादिभक्त्यान्तं पञ्चपुरुषार्थसाधकत्वेन । नाथत्वात् धर्मस्तस्य सेवया सिध्यति प्रियत्वादर्थं साधयति धर्मज्ञत्वात्कामं स्त्रीणां व्रतमनुस्मरन्निव करुणोति तत्कृपया मोक्षो भवतीति । अनाथवत्सलेति । दीना वयं त्वच्छरणं गता इति भक्तिरपि सिध्यति । इदानीं तु त्वया हतेन ते वयं त्वदीयाः सगृहप्रजाः निहताः त्वया निहतेन कयाचित्क्रियया व्याप्तो भवतु यथा कथञ्चिन्मरणहेतुः मारक एव भवति । शरीरेण गृहेण पुत्रैर्वा धर्मः सेत्स्यतीति पक्षो निराकृतः यतो वयं सर्वे हता एव ॥ ४५ ॥ ननु मथुरेयं तीर्थभूता अत्र जीवता मृतेन वा मोक्षः साधनीय इति किं भर्त्रपगमे शोकः क्रियत इति चेत्राहुः त्वया विरहितेति । त्वया पत्या विरहिता इयं पुरी स्वयमेव न शोभते किमन्येषामुपकारं करिष्यतीति भावः । यतो निवृत्तानि उत्सवाः मङ्गलानि च यस्यां तस्मिन्विद्यमान एव उत्सवो मङ्गलानि च प्रवृत्तानि । ननु निवृत्ते तासां दृष्ट्या अमङ्गलमिव प्रतिभातीति वाद्यानां निवृत्तत्वादुत्सवो निवृत्त इति तथोक्तम् । अत एव न शोभते क्षणान्तरे शोभिष्यत इत्याशङ्क्याहुः । वयमिवेति । यथा वयमतः परमशोभायुक्ता एव तथा पुर्यपीति तासां प्रतिभा यतः त्वया पत्या विरहिता । यद्यपि पुर्याः पतिर्भविष्यति यः कश्चित्तथापि त्यक्तो भविष्यतीति जीर्ण पट इव शोभाकरो भविष्यतीति भगवांस्तु पतिर्न भविष्यतीति तासां वचनं सत्यमेव त्यक्तव्या च ततः परं तदाहुः । हे पुरुषर्षभेति ॥ ४६ ॥ ननु स्त्रीणां भाग्ये अवैधव्ये विद्यमाने कथमेवं भवेत् अतो भवतीनामेव दुर्भाग्यान्मृत इति किमिति विलापः क्रियते इति चेत्तत्राहुः । अनागसामिति । निरपराधानां प्राणिनां त्वमुल्बणं पुत्रादिमारणरूपं द्रोहं कृतवान् तेनैवं दुर्मृत्युरूपां दशां नीतः । ननु धर्मोऽपि भूयान् कृत इति । यथा धर्मफलं न जातं तथैतदपि

न भवेदित्याशङ्क्य द्रोहस्य विशेषमाहुः। भूतध्रुगिति। अत्यन्तधर्मकर्तोऽपि भूतद्रोहं चेत् कुर्यात् तदा शं न लभेतैव सर्वं धर्मं बाधित्वा द्रोहः स्वफलमेव प्रयच्छतीति ॥ ४७॥ ननु राज्ञां द्रोहः स्वाभाविक एव भवतीति कथमन्यरीत्या फलमिति चेत्तत्र विशेषमाहुः। सर्वेषामिह भूतानामिति। राज्ञोऽपि सर्वथा सर्वभूतद्रोहे भवत्येवानिष्टं ततोऽपि तव प्रकारान्तरेण महज्जातमिति तत्फलं तथा यतः सर्वेषामेव भूतानामेष भगवान् प्रभव उत्पत्तिस्थानमप्ययो नाशश्च तेन मध्येऽपि स एव युक्तश्चायमर्थः यतो ब्रह्मा भगवान् कारणत्वेनोक्तः अतस्तदवध्याने भूतसाध्यं सुखमिति न क्वचिदपि सुखं भवेत् भूतानां हि भगवानाराध्यः मारकत्वाद्भयजनकश्च गोप्ता च रक्षकः अतस्तद्विरोधे तदात्मकमेव सर्वमिति न क्वचित् सुखं तस्मात्स्वदोषेणैव तवेयमवस्थेति ॥ ४८॥

श्रीसुबोधिनी–सारः

तथाहि हा कष्टं हे नाथ हे प्रिय हे धर्मज्ञ हे करुणानाथ हे वत्सल त्वया हतेन हेतुना ते तव सगृहप्रजा गृहपुत्रसहिता वयं निहताः स्मः ॥ ४५॥ हे पुरुषर्षभ पत्या त्वया विरहिता शून्या इयं पुरी मथुरा निवृत्तान्युत्सवमंगलानि यस्यां सा न शोभते वयमिव ॥ ४६॥ अनागसां निरपराधानां भूतानाम् उल्बणं द्रोहं त्वं कृतवान् तेन परद्रोहेण इमां दशां त्वं नीतः प्रापितोऽसि भो। पते युक्तमित्याहुः। भूतध्रक् कः पुमान् शं सुखं लभेत ॥ ४७॥ सर्वेषां भूतानां प्रभवन्त्यस्मादिति प्रभवः अपियन्त्यस्मिन्निति अप्ययः स च स चैव श्रीकृष्णो हि गोप्ता रक्षकोस्ति तस्याऽवध्यायी तिरस्कारकर्त्ता क्वचित्क्वापि विषये स्थाने सुखं नैधते न वृद्धिमेति ॥ ४८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तासां विलापमेव दर्शयति—हा नाथेति। आत्मानं शोचन्ति—हेति नाथेतीत्यादीनि विलापे प्रेमसम्बोधनानि। धर्मज्ञेत्यादीनि तु सुखप्रदत्वेन स्वभ्रान्त्यैव वैपरीत्येनोक्तानि। निहतेन त्वया सहैव सगृहाः प्रजाश्च ते त्वदीया वयमपि निहता निहतप्रायाः ॥ ४५॥ हे पुरुषर्षभ! पत्या स्वामिना त्वया विरहितेयं पुरी वयमिव न शोभते। तत्र हेतुमाहुः—निवृत्ता उत्सवाः प्राणिनां हासादिरूपा मङ्गलानि सुखानि च यस्यां तथाभूता। इदमपि स्वभ्रान्त्यैवोक्तम् ॥ ४६॥ अथ परमार्थदृष्ट्याऽऽहुः— अनागसामिति। तुशब्दः अप्यर्थे। भो भर्तः! अनागसां निरपराधानामपि भूतानामुल्बणं दुःसहं द्रोहं त्वं कृतवान्, तेन कारणेनेमां दशां नीतो मृत्युं प्राप्तः। 'तन्नाश्चर्यम्' इत्याहुः–भूतानि द्रुह्यतीति तथा स को वा शं सुखं लभेत? किंतु तस्य दुःखमेव युक्तमित्याशयः! ॥४७॥ किञ्च एष श्रीकृष्ण एव सर्वेषां भूतानां प्रभवः प्रभवन्त्यस्मादिति प्रभवः स्रष्टा, तथा अपियन्ति लीयतेऽस्मिन्नित्यप्ययः संहर्ता, स च स च तथा गोप्ता रक्षिता च, अतः तदवध्यायी तस्मिन् विषये अवध्यानमपमानं कर्तुं शीलं यस्य स क्वचिदपि देशे काले च सुखं यथा स्यात्तथा नैधते न वर्धते, किंतु दुःखमेवानुभवन्नश्यति। तथाच युष्माकं तदपमानकर्तृत्वान्मरणादि जातं तन्नाश्चर्यमित्याशयः ॥ ४८॥

अन्वितार्थप्रकाशिका

तत्र सुभगा आहुः—हा इति। हा नाथ प्रियधर्मज्ञ करुणादयायुक्त अनाथवत्सल! निहतेन त्वया सहैव सगृहाः प्रजाश्च ते त्वदीया वयमपि निहता निहतप्रायाः धर्मज्ञेत्यादीनि विलापे प्रलापे प्रेमसम्बोधनानि ॥ ४५॥ त्वयेति। हे पुरुषर्षभ! पत्या स्वामिना त्वया विरहिता अतः निवृत्ताः उत्सवाः प्राणिनां हासादिरूपा मङ्गलानि सुखानि च यस्यां तथाभूता इयं पुरी वयमिव न शोभते। इति स्वदृष्ट्याभिधानम्। यद्वा। शोभते काक्वा शोभत एव। वयमेव केवलं न शोभामहे ॥ ४६॥ दुर्भगा आहुः—अनागसामिति। तुशब्दोऽप्यर्थे। भो भर्त्तः! अनागसां निरपराधानामपि भूतानामुल्बणं दुःसहं द्रोहं त्वं कृतवांस्तेन कारणेनेमां दशां नीतो मृत्युं प्राप्तः। यतः भूतध्रुक् प्राणिद्रोहकर्ता को नाम शं सुखं लभेत ॥ ४७॥ सर्वेषामिति। एषः श्रीकृष्णः सर्वेषां भूतानां प्रभवः प्रभवन्त्यस्मादिति प्रभवः स्रष्टा तथा अपियन्ति लीयन्तेऽस्मिन्नित्यप्ययः संहर्ता तथा गोप्ता रक्षिता च अतः तदवध्यायी तस्मिन् विषये अवध्यानमपमानं कर्तुं शीलं यस्य स क्वचिदपि देशे काले च सुखं यथा स्यात्तथा नैधते न वर्धते किंतु दुःखमेवानुभवन्नश्यति ॥ ४८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निवृत्तानि उत्सवमंगलानि यस्यां सा ॥ ४५॥ अनागसां निरपराधानां उल्बणमत्यन्तं भो स्वामिन् ॥ ४६॥ प्रभव उत्पत्तिः अप्ययः प्रलयश्च यस्मात्सः तदवध्यायी तस्यावध्यानं अवज्ञा तत्कर्त्तुं शीलं यस्य सः क्वचित्कुत्रापि ॥ ४७॥ लौकिकीं संस्थां दहनादिक्रियाम् ॥ ४८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विलापनप्रकारमेवाह ॥ हा नाथेति ॥ हेति खेदे। हे नाथ, हे प्रिय, हे धर्मज्ञ, हे करुणानाथ, हे वत्सल, विलापे पञ्चापि प्रेमसन्बोधनानि। हतेन त्वया सहैव, ते त्वदीयाः, सगृहप्रजाः सगृहाः सप्रजाश्च, वयं अपि, निहताः हतप्राया

एव जाताः ॥ ४५ ॥ त्वयेति । हे पुरुषर्षभ, पत्या प्रभुणा त्वया विरहिता, इयम् पुरी, वयं इव, निवृत्ता उत्सवा मङ्गलानि सुखानि च यस्यां तथाभूता सती, न शोभते पूर्ववन्नाशोभतेति स्वदृष्ट्या प्रोचुः ॥ ४६ ॥ अथ परमार्थदृष्ट्योचुः ॥ अनागसामिति ॥ भो स्वामिन्, त्वं, अनागसां निरपराधानां, भूतानां प्राणिनां, उल्बणं दुःसहं; द्रोहं कृतवान्, तेन कारणेन, इमां दशामवस्थां, नीतः प्राप्तः दैवेन प्रापितो वा । भूतानि द्रुह्यतीति भूतध्रुक्, कः शं सुखं, लभेत । भूतद्रोहकर्त्ता कश्चनापि सुखं न प्राप्नुयादित्यर्थः ॥४७॥ सर्वेषामिति ॥ किं च एषः कृष्णः, सर्वेषां भूतानां, प्रभवत्यस्मादिति प्रभवः स्रष्टा, अपियन्ति लीयन्तेऽस्मिन्नित्यप्ययः संहर्त्तेत्यर्थः । स च स च, गोप्ता च स्थितिकर्त्तेत्यर्थः । अतः, तस्मिन् विषयेऽवध्यानमवज्ञा तत्कर्त्तुं शीलमस्येति तदवध्यायी, क्वचित् सुखं यथा तथा, न एधते न वर्द्धते । किं तु दुःखमश्नुवन्नेव नश्यतीत्यर्थः ॥ ४८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

हा नाथेति : १०.४४.४५.

यस्मिन्ममत्वं यस्यासौ कीदृगप्यस्य सम्मतः । भातीति युक्तं तद्योषास्तमूचुस्तादृशोक्तिभिः ॥ ४७ ॥

अनागसामिति : १०.४४.४७.

कंसो दुरध्वविनिविष्टमतिः स्वभावात् प्राप स्वभावफलमेतदिति स्त्रियस्ताः ।
प्रोचुः प्रभुः क्रतुभुजः सकलाश्च लोका भिन्नाशयोदितधियोऽतनुसौख्यलक्ष्म्याः ॥ ४८ ॥

कृष्णप्रिया

स्त्रियाँ करती हैं, अपने पाँचों पदार्थ के सिद्ध करने वाले पति को समझ कर कहती हैं। हमारे सेवा धर्म को सिद्ध करने हा नाथ ! हमारे प्रिय करके अर्थ को सिद्ध करने वाले हा प्रिय ! हमारे मनोरथों को सिद्ध करके हमारे कामपूरक हा धर्मज्ञ ! आपकी मुक्ति में ही करुणा से हमारी मुक्ति है इसलिए मुक्ति साधक हा करुण ! हम तो आपके जाने से दीन बन गएँ है अनाथ बन चुके हैं भक्ति का स्वभाव है कि अनाथों का रक्षण करना इसलिए कहा अनाथवत्सल ! आपके परलोक सिधारने से हम घर परिवार के साथ मर गई ही है ॥ ४५ ॥ हे पुरुषवर ! आप मथुरानाथ थे आपके जाने से हम एवं मथुरा पति विरहित बने, शृङ्गार सौभाग्य तिलक एवं उत्सव तथा मङ्गलादि सब अब हमारे और मथुरा पुरी के नष्ट हो गए इसलिए न हमारी और मथुरा की शोभा रही ॥ ४६ ॥ मथुरापति कंस की नारीएँ खुद न्याय करती हुई कह रही है कि—नाथ आपने निर्दोष एवं निरपराधी जीवों का भयंकर द्रोह किया, इसलिए आपकी यह दुर्दशा हुई इसमें किसको दोष दिया जाय ! यह बात निश्चित ही है कि जो भूतों का द्रोह करता वह कभी सुखी नहीं हो सकता ॥ ४७ ॥ कंस की पत्नियाँ एक विशेष विधान कर रही है कि हे नाथ ! भूतल पर पधारे हुए यह श्रीकृष्ण भगवान् प्राणीमात्र को जन्म देने वाले और संहार भी करने वाले है इनका अनादर, तिरस्कार, द्रोह, विरोध कर कोई भी कहीं भी क्या सुख प्राप्त कर सकता है तात्पर्य कि भगवद्विरोधी दुःखी ही होगा ॥ ४८ ॥

श्रीशुक उवाच

राजयोषित आश्वास्य भगवाँल्लोकभावनः । यामाहुर्लौकिकीं संस्थां हतानां [1]समकारयत् ॥ ४९ ॥
मातरं पितरं चैव मोचयित्वाथ बन्धनात् । कृष्णरामौ ववन्दाते शिरसाऽऽस्पृश्य पादयोः ॥ ५० ॥
देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ । कृतसंवन्दनौ पुत्रौ सस्वजाते [2]न शङ्कितौ ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] कंसवधो नाम [5]चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुकः उवाच—लोकभावनः, भगवान्, राजयोषितः, आश्वास्य, हतानाम्, याम्, लौकिकीम्, संस्थाम्, आहुः, समकारयत् ॥ ४९ ॥ मातरम्, पितरम्, एव, च, (सेवकान्) अथ, बन्धनात्, मोचयित्वा, कृष्णरामौ, पादयोः, शिरसा, आस्पृश्य, ववन्दाते ॥ ५० ॥ देवकी, वसुदेवः, च, (अन्ये सर्वे) पुत्रौ, जगदीश्वरौ, विज्ञाय, कृतसंवन्दनौ, पुत्रौ, शङ्कितौ, न, सस्वजाते ॥ ५१ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्द्धे राजसप्रमेयप्रकरणे चतुश्चत्वारिंशत्तमेऽध्यायेऽन्वयाः सम्पूर्णाः ॥ ४४ ॥

---

[1] ताम–वीर. । [2] अ–प्रा. पा. । [3] पारमहंस्यां संहितायां–प्रा. पा. । [4] पूर्वार्द्धे–प्रा. पा. । [5] द्विच–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

आस्पृश्य ईषत्स्पृष्ट्वा ॥ ५० ॥ पुत्रभ्रान्तिं विहाय जगदीश्वराविति ज्ञात्वा शङ्कितौ न सस्वजाते नालिङ्गितवन्तौ। किन्तु बद्धाञ्जली तस्थतुरित्यर्थः ॥ ५१ ॥

प्रसह्य हत्वा हस्तीन्द्रं मल्लेन्द्रान्मल्ललीलया। बीभत्सचरितं कंसं स बीभत्समामारयत् ॥ १ ॥

इति श्रीमद्भागवते म० दशमस्कन्धे पूर्वार्धे टीकायां चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आश्वास्य सर्वतदीयवृत्तश्रावणेन सांत्वय्य। संस्थां मृतसंस्कारम्। आश्वास्येत्यत्र हेतुः—लोकभावनः, स्वाभाविक्या दयया सर्वलोकपालक इति। अतएव श्रीविष्णुपुराणे--"बहुप्रकारमाश्वस्तः पश्चात्तापातुरो हरिः। ताः समाश्वासयामास स्वयमस्राविलेक्षणः।" इति। श्रीहरिवंशे च--"कंसनारी विलापांश्च श्रुत्वा स-करुणान्बहून्। गर्हमाणस्तथात्मानं तस्मिन्यादवसंसदि। अहो मयातिबाल्येन नवरोषातिवर्तिना। वैधव्यं स्त्रीहसहस्राणां कंसस्यास्य कृते कृतम्।" इत्यादि। संस्थामन्त्यकृत्यम्। सा च 'स नीतो यमुनातीरमुत्तरम्–' इत्यादिश्रीहरिवंशानुसारेण परिज्ञेया। तच्च तासां महाशोकदर्शनपरिहारार्थं तीर्थानामनाविलतार्थं चेति गम्यते। आश्वास्य मयि पालवितरि का युष्माकं चिन्तेति बोधयित्वेति विश्वनाथः ॥ ४९ ॥ अथ कंससंस्थोत्तरम्। अथ तदनन्तरमिति परदुःखासहिष्णुतयादौ कंसस्त्रीणां पतिदेहेन सह प्रेषणाय व्यग्रत्वात्सर्वेषु स्वस्वस्थानं गतेषु कोलाहलशान्तिश्च। आस्पृश्य सम्यक् स्पृष्ट्वा ॥ ५० ॥ सस्वजात इति "द्वयोर्नाम्नोर्बहूनां वा यत्र वाक्ये समुच्चयः। नामत्रयाश्रिता संख्या कृत्तिबायोर्विशेषणम्।" इति हरिभर्त्रनुशासनाद्देवकीवसुदेवयोर्द्वित्वमादाय सस्वजात इत्युक्तम्। अन्यथा सस्वज इत्यस्य द्विरुपादानं स्यात्। इत्यर्थ इति–शंकाकुलत्वान्नालिंगितवन्तौ। शंका च–कथमावामीश्वरे पुत्रत्वबुद्धिं कुर्व इत्येवंरूपा ज्ञेया ॥ (५१)॥ "यादृशो यक्षस्तादृशो बलिः" इति न्यायेन सबीभत्सं केशग्रहपूर्वकभूमिविलोडनसहितम्। अयमर्थः श्रुत्याप्यनूद्यते–"अहश्च कृष्णमहरर्जुनं च विवर्तेते रजसी वेद्याभिः वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि" इति श्रुतिः। अस्या अर्थः–अहः युद्धयज्ञः कृष्णम् अनु एकः विवर्तते विशेषेण जायते। तथार्जुनम् अनु अहर्विवर्तते। एकश्चकारोऽन्वाचयेऽपरः समुच्चये। तेन कृष्णार्जुनाभ्यां विभज्य समुच्चित्य वा क्रियमाणौ द्वौ युद्धयज्ञौ वर्तेते इत्यर्थः। उभे अप्यहनी रजसी रजोगुणकार्ये वेद्याभिर्लब्धुं योग्याभिः, श्रीभिर्हेतुभूताभिः। लक्ष्म्यर्थं युद्धानि जायन्त इत्यर्थः। ताभ्याञ्च सहायाभ्यां वैश्वानरो विश्वेषां नृणाम् इष्टफलप्रापको धर्मः स्वयमदृष्टरूपोऽपि जायमान आविर्भवन्। वाशब्द इवार्थे। राजा जायमानः सन् तमांसि अधर्मरूपाणि अवातिरत् तिरस्कृतवान्। केन–अग्निज्योतिषेत्यर्थः। खण्डवदाहेऽग्निना दत्तो चक्रगाण्डीवे तद्रूपेण ज्योतिषेति भावः। अनेन मन्त्रेण सर्वे कृष्णकृतयुद्धाऽर्जुनयुद्धाश्च लक्ष्यन्त इत्यवधेयम्। विज्ञाय विशेषतो ज्ञात्वा सांप्रताद्भुतकर्मदर्शनादिना स्मृततज्जन्मवृत्तान्तत्वेन पुनरैश्वर्यज्ञानोद्बोधात्कृतसभक्तिवन्दनावपि पुत्रावपि जगदीशबुद्ध्या भीतो सन्तौ। यद्वा–न सस्वजाते किन्तु प्रणतौ भवन्तौ च स्थितावित्यर्थः। तथा श्रीविष्णुपुराणे–"उत्थाय वसुदेवस्तु देवकी च जनार्दनम्। स्मृतजन्मोक्तवचनौ तावेव प्रणतौ।" इति स्तुतिस्तुदीर्घा तत्रास्ति ॥ ५१ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आश्वास्येत्यत्र हेतुः लोकभावनः स्वाभाविक्या दयया सर्वलोकपालक इति। अत एव श्रीविष्णुपुराणे। "बहुप्रकारमस्वस्थः पश्चात्तापातुरो हरिः। ताः समाश्वासयामास स्वयमस्राविलेक्षणः" इति। श्रीहरिवंशे "कंसनारी विलापांश्च श्रुत्वा सकरुणान् बहून्। गर्हमाणस्तथात्मानं तस्मिन् यादवसंसदि। अहो मयातिबाल्येन नवरोषातिवर्त्तिना। वैधव्यं स्त्रीसहस्राणां कंसस्यास्य कृते कृत"मित्यादि। संस्थाम् अन्त्यकृत्यं सा च। स नीतो यमुनातीरमुत्तरमित्यादि श्रीहरिवंशानुसारेण परिज्ञेया। तच्च तासां महाशोकदर्शनपरिहारार्थं तीर्थानामनाविलतार्थं चेति गम्यते ॥ ४९ ॥ अथ तदनन्तरमिति परदुःखासहिष्णुतया आदौ कंसस्त्रीणां पतिदेहेन सह प्रेषणाय व्यग्रत्वात्। सर्वेषु स्वस्वस्थानं गतेषु कोलाहलशान्तिश्च आस्पृश्य सम्यक् स्पृष्ट्वा ॥ ५० ॥ विशेषतो ज्ञात्वेति सम्प्रत्यद्भुतकर्मदर्शनादिना स्मृततज्जन्मवृत्तान्तत्वेन पुनरैश्वर्यज्ञानोद्बोधात् कृतसभक्तिवन्दनावपि पुत्रावपि जगदीशबुद्ध्या भीतौ सन्तौ अन्यत्तैः। यद्वा। न सस्वजाते किन्तु प्रणतौ स्तुवन्तौ च स्थितावित्यर्थः। तथा च श्रीविष्णुपुराणे। "उत्थाप्य वसुदेवस्तु देवकी च जनार्दनम्। स्मृतजन्मोक्तवचनौ तावेव प्रणतौ स्थिता"विति। स्तुतिश्च दीर्घा तत्र विद्यते ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आश्वास्य सान्त्वयित्वेत्यत्र हेतुः—भगवान् दीनवात्सल्यादिगुणप्रकटक इति। अतएव श्रीविष्णुपुराणे (५।२१।८)—'बहुप्रकारमस्वस्थः पश्चात्तापातुरो हरिः। ताः समाश्वासयामास स्वयमस्राविलेक्षणः॥' इति; श्रीहरिवंशे च (विष्णु. प. ३२।३-४)-

'कंसनारौ विलापांश्च श्रुत्वा सकरुणान् बहून् । गर्हमाणस्तथात्मानं तस्मिन् यादव-संसदि ॥
अहो मयातिबाल्येन-नवरोषानुवर्त्तिना । वैधव्यं स्त्रीसहस्राणां कंसस्यास्य कृते कृतम् ॥' इत्यादि ।

हतानां या संस्था अन्त्यकृत्यमाहुः शास्त्रज्ञाः, ताः सम्यग् यथाविधि दाहादिनाऽकारवत् कर्त्तुमादिदेशेत्यर्थः, यतो लोकभावनः शास्त्रोक्त-धर्म्मप्रवर्त्तनेन जगत्पालनपरः, तच्च 'स नीतो यमुनातीरमुत्तरम्' इत्यादि-श्रीहरिवंशोक्तानुसारेण यमुनापरपारे ज्ञेयम् । तदपि कंसपत्नीनां पतिदेहदाहसाक्षाद्दर्शन-महादुःखपरिहारार्थं परदुःखासह-श्रीभगवदाज्ञयेति लौकिकीमिति तत्त्वतो मुख्यप्राप्त्या पारलौकिककृत्यसमाप्तेः ॥ ४९ ॥ अथ तदनन्तरमिति परदुःखासहिष्णुतयादौ कंसस्त्रीणां पतिदेहेन सह प्रेषणाय व्यग्रत्वात् श्रीवसुदेवप्रीत्यपेक्षया निजस्नेहविशेषाच्चादौ मातरं ततः पितरं श्रीवसुदेवं मोचयित्वैवेति तद्बन्धनासहिष्णुत्वात् । शिरसा पादयोरास्पृश्येति भक्तिविशेषो दर्शितः । कृष्णस्यादौ निर्देशः,—कारुण्यादिसद्गुणभरेण प्राक् तत्र प्रवृत्तेः, विशेषतश्च श्रीबलदेवस्य सदा तच्चेष्टानुवर्त्तित्वात् ॥ ५० ॥ विशेषतो ज्ञात्वेति पूर्वं दिव्यरूपदर्शनादिना, अधुना चाद्भुतकर्म्मश्रवणदर्शनादिना जगदीशत्वानुभवात्; यद्वा, मातृतास्वभावजेन वात्सल्यविशेषेण जगदीशत्वविज्ञानस्य गौणत्वात् प्रेम्णः प्राधान्येन तस्याः श्रेष्ठ्यात् । अन्यत्तैर्व्याख्यातम् । यद्वा, किन्तु प्रणमन्तौ स्तुवन्तौ च स्थिताविति स्तुतिश्च दीर्घा तत्र भात्येव । यद्वा, विज्ञायापि न शंकितौ बभूवतुः, किन्तु सस्वजाते, यतः पुत्रौ पुत्रतां प्राप्तौ । किञ्च, कृतसम्वन्दनौ, आलिंगने स्नेहभरेण देवक्याः प्राधान्यादादौ निर्देशः । अग्रे त्वीश्वरज्ञानसम्यगाच्छादनार्थमेव कृपाभरेण स्वमायाविस्तारणात् स्नेहविशेषोदयेन ताभ्यामंकारोपणादिकं ज्ञेयम् ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशम-टिप्पण्यां चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं शोचतीः राजयोषितः सान्त्वयित्वा लोकभावनः लोकं भावयति श्रेयो युक्तं करोतीति तथा तत्त्वात् हतानां यां लौकिकीं संस्थां दाहादिक्रियामाहुर्मनुयाज्ञवल्क्यादयः तामकारयत् ॥ ४९ ॥ ततो रामकृष्णौ मातरं देवकीं पितरं वसुदेवं च बन्धनान्मोचयित्वा तयोः पादयोः शिरसा ईषत्स्पृष्ट्वा ववन्दाते नमस्कृतवन्तौ ॥ ५० ॥ कृतं सम्वन्दनं याभ्यां तौ पुत्रौ जगदीश्वरौ विज्ञाय न शङ्कितौ कंसभयशङ्कारहितौ सस्वजाते आलिङ्गितवन्तौ ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

संस्थां मृतसंस्कारम् ॥ ४९-५० ॥ न सस्वजाते आलिङ्गनं न कुर्वाते । किन्तु बद्धाञ्जली तस्थतुरित्यर्थः ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां द्विचत्वारिंशोऽध्यायः ॥ ४२-४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

राजयोषितो दुर्भगा एवं मयि बालयितरि का युष्माकं चिन्तेत्याश्वास्य ॥ ४९ ॥ आस्पृश्य सम्यक् स्पृष्ट्वा ॥ ५० ॥ विज्ञायेति । जन्मसमयस्मृत्या कंसवधाद्यैश्वर्यदृष्ट्या च परमार्थदृष्टिमग्नौ न सस्वजाते लोकव्यवहारदृष्टिमग्नौ च नापि नमश्चक्राते किन्तु शङ्कितौ स्तब्धावेव स्थितौ ॥ ५१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमस्य चतुश्चत्वारिंशोऽप्यजनि सङ्गतः ॥ ४४ ॥

गूढार्थदीपिनी

संस्थां मृतसंस्कारम् ॥ ४९ ॥ आस्पृश्य सम्यक् स्पृष्ट्वा ॥ ५० ॥ न सस्वजाते नालिङ्गितवन्तौ किन्तु बद्धाञ्जली तस्थतुः इति विष्णुपुराणात् ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

न सस्वजाते नालिङ्गितवन्तौ ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुचत्वारिंशाध्यायार्थप्रकाशः ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

लोकभावनो लोकोत्पादकस्तत्सत्ताप्रदो वा राजयोषितो राजराजीवाक्षीराश्वास्य हतानां या लौकिकी लोकैः क्रियमाणेत्येव लौकिकी तां श्रौतीं स्मार्तीं संस्थां चरमकृतिमाहुः शिष्टास्तामकारयत्कारयामास ॥ ४५ ॥ आस्पृश्य ॥ ५० ॥ देवकीवसुदेवश्च जगदीश्वरौ कृतपादाभिवन्दनौ विज्ञाय न शङ्कितौ शङ्काशून्यौ सस्वजाते पुत्रौ जगदीश्वरौ विज्ञाय शङ्कितौ न सस्वजात इति ॥ ५१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे द्विचत्वारिंशोऽध्यायः ॥ १०-४२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं तासां सत्यवचनं श्रुत्वा ताः आश्वास्य भगवान् समर्थः आश्वासनेनैव तासां परमानन्दो जात इति अलौकिकं सामर्थ्यं भगवच्छब्दादवगम्यते लोकभावन इति न तस्य शत्रुमित्रोदासीनत्वम् अतः शत्रुस्त्रीणामपि कृत एव भगवतोपकारः तासु कृपयैव परलोकक्रियां कारितवानित्याह । यामाहुर्लौकिकीं संस्थामिति । दाहादिरूपाम् हतानामिति न तासां सहगमनं भगवता आश्वासनस्य कृतत्वात् । यद्यपि अस्ति प्राप्ती दुष्टे तथाप्यग्रे लीलायाः कर्त्तव्यत्वात् नानुमरणे बुद्धिर्दत्ता सम्यगकारयत् तथा शब्दतो नियोगं कृतवान् ॥ ४९ ॥ एवं दुष्टमारणं तत्रातिसंनिहितप्रतिक्रियां च कृत्वा यदर्थमेतावत्कृतं तयोः पित्रोर्लौकिकनिरोधं त्याजयित्वा स्वनिरोधं कृतवान् इत्याह । मातरं पितरमिति द्वाभ्याम् । मुख्यं दुःखं मातुरेव अतः प्रथमं निरूपिता यद्यपि बहव एव बद्धा उग्रसेनादयः तथापि प्रथममेतावेव मोचितौ चकारादेतन्निकटे सेवकाश्च आदौ निरोधात् दूरीकृतवन्तौ अथ बन्धनात् प्रथमं मानसो विमोकः द्वितीयः कायिकः तयोर्वैलक्षण्यप्रतिपादनाय अथेति नियोगानन्तरं वा कृतकार्यत्वेनाव्यग्रत्वाय ततः कृष्णरामौ फलसाधनभूतौ ववन्दाते अभिवादनं कृतवन्तौ । तथैव तौ निरुद्धौ भवत इति शिरसा पादयोरास्पृश्य सत्यलोकादुपरि तौ नीतौ फलं च तयोर्देयं नतु दुःखनिवृत्तिमात्रं यत्र पुत्रस्य सत्यलोकप्रापणं तत्र पित्रोस्ततोऽधिकस्थानप्रापणं युक्तमेव । आसमन्तात्स्पर्शनं तु सत्यमाक्रम्य यथागच्छतः तथोपायं कृतवन्तौ ॥ ५० ॥ एवमुत्कृष्टफलदानलक्षणस्वगृहनयनेन निषिद्धौ तौ अनधिकारिणौ माभवत इति लोक ज्ञापनार्थं तयोरधिकारमाह । देवकीवसुदेवश्चेति । चकारस्तूक्तसमुच्चयार्थः अन्यतरस्यापि गौणत्वाभावाय कंसादिकमारणेन वैकुण्ठप्रापणेन च प्रत्यक्षतोऽनुभावं दृष्ट्वा जगदीश्वरावेताविति विज्ञाय कृतसम्वन्दनौ कृतनमस्कारौ भगवन्तौ न सस्वजाते नालिङ्गितवन्तौ यतः शङ्कितौ ईश्वरे हि सम्बन्धिनामपि शङ्का भवत्येव प्रपञ्चः कसेनैव निराकृतः आसक्तिः स्थितैव फलं साधनं च परं कर्त्तव्यं तत्र फलं वैकुण्ठप्राप्तिः साधनं ज्ञानमिति तयोः पूर्णनिरोधो निरूपितः ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां एकचत्वारिंशाध्यायविवरणम् ॥ ४१-४४ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । लोकान् भावयतीति तथा भगवान् राज्ञो योषितः स्त्रीराश्वास्य "विष्णुः कालवशे नूनं ब्रह्मा वा पार्वतीपतिः। सर्वं कालवशं चेदं जीवन् भद्राणि पश्यति" इति लौकिकीं लोकप्रसिद्धां संस्थां मरणशय्यादिकृत्यं हतानां मृतानां यामाहुः तां समकारयत् कृष्णः ॥ ४९ ॥ अथानन्तरं मातरं पितरं च बन्धनात् मोचयित्वा पादयोः शिरसाऽऽस्पृश्य कृष्णरामौ ववन्दाते प्रणेमतुः ॥५०॥ देवकी वसुदेवश्च जगदीश्वरौ तौ विज्ञाय बुद्धा कृतं सम्वन्दनं याभ्यां तौ पुत्रौ रामकृष्णौ प्रति न सस्वजाते नालिंगितवन्तौ । तत्र हेतुः शङ्कितौ ॥ ५१ ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायां चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

इत्थं शोचतीस्ता राजयोषितो भगवान् सान्त्वयित्वा हतानां लौकिकीं परलोकसम्बन्धिनीं संस्थां दाहादिक्रियां यां मन्वादय आहुस्तां समकारयन् । तत्र हेतुमाह—लोकभावनः लोकमर्यादापालक इति ॥ ४९ ॥ मातरं देवकीं, पितरं वसुदेवं च। स्पष्टमन्यत् ॥ ५० ॥ लोकमर्यादासंरक्षणार्थं कृतं सम्बन्दनं याभ्यां तौ पुत्रौ कंसवधादिप्रभावेण जगदीश्वरौ विज्ञाय 'ईश्वरालिङ्गनं कथं कर्तव्यम्' इति शङ्कितौ न सस्वजाते इत्यन्वयः ॥ ५१ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने । चतुश्चत्वारिंशकोऽगात कंसघातनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

राजेति । इत्थं शोचन्तीस्ता राजयोषितो लोकभावनः भगवान्सान्त्वयित्वा हतानां लौकिकीं परलोकसंबन्धिनीं संस्थां दाहादिक्रियां यां मन्वादय आहुस्तां समकारयन् ॥ ४९ ॥ मातरमिति । अथ कृष्णरामौ मातरं देवकीं पितरं वसुदेवं च बन्धनात् मोचयित्वा शिरसा पादयोः आस्पृश्य सर्वतः स्पृष्ट्वा ववन्दाते । अत्र तोषिणी । बन्धनात् बन्धनागारं नयद्भ्यः कंसदूतेभ्य इत्यर्थः। एतच्च रङ्गभूमावेव योषिद्विलापसमाश्वासौ तु एतदनन्तरं पुनराकृष्य नीतस्य कंसस्यान्तिके विश्रान्ततीर्थे इति ॥ ५० ॥ देवकीति। देवकी वसुदेवश्च लोकमर्यादासंरक्षणार्थं कृतं संवन्दनं याभ्यां तौ पुत्रौ कंसवधादिप्रभावेण भगदीश्वरौ विज्ञाय ईश्वरालिङ्गनं कथं कर्तव्यमिति शङ्कितौ न सस्वजाते लोकव्यवहारदृष्टिमग्नतया न नमश्चक्रतुः किन्तु तूष्णीं स्तब्धावेव स्थितौ ॥ ५१ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायोऽत्र चतुश्चत्वारिंशे व्यधादिमाम् ॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशिका

आस्पृश्य सम्यक्स्पृष्ट्वा॥४९॥कृतसम्बन्दनौ । स्वपुत्रौ जगदीश्वरौ विज्ञाय शंकितौ मातापितरौ न सस्वजातेतयोरालिंगनं न चक्रतुरित्यर्थः ॥ ५० ॥

इति श्रीशुद्धैकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धव्याख्याने कंसवधो नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

राजयोषित इति । इत्थं शोचतीरिति शेषः । राजयोषितः, आश्वास्य सान्त्वयित्वा, लोकं भावयति श्रेयोयुक्तं करोतीति लोकभावनः, भगवान् , हतानां कंसादीना, यां लौकिकीं संस्थां दाहादिक्रियां, आहुर्मनुयाज्ञवल्क्यादयः अवदन् , तां समकारयत् तथैव व्यधापयत् ॥ ४९ ॥ मातरमिति । अथ ततः, कृष्णरामौ मातरं देवकीं, पितरं वसुदेवं च, बन्धनात् मोचयित्वा एव, पादयोस्तयोश्चरणयोः, शिरसा आस्पृश्य ईषत् समन्ताद्वा स्पृष्ट्वा, ववन्दाते नमस्कृतौ ॥ ५० ॥ देवकीति । देवकी वसुदेवश्च, कृतं संवन्दनं याभ्यां तौ, पुत्रौ जगदीश्वरौ जगदेकनाथौ, विज्ञाय, शङ्कितौ सन्तौ, न सस्वजाते । यद्वा । न शङ्कितौ कंसभयशङ्कारहितौ सन्तौ, सस्वजाते आलिङ्गितवन्तौ ॥ ५१ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे चतुश्चत्वारिंशोऽध्याय. ॥ ४४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

राजयोषित इति : १०.४४.४९.

कंसं नृशंसचरितं त्वरितं निहत्य नेष्यत्यहो कथमिमं भृशमात्मलोकम् ।
सन्देहमेनमपहर्तुमना जनानां सन्देहमेनमचिराद्विदधे त्र्यधीशः ॥ ४९ ॥

मातरमिति : १०.४४.५०.

तत्त्वज्ञानेनापरोक्षे सिद्धे बन्धमयच्युतिः । सिद्धैवेत्यभवत् स्पष्टं तादृक् पितृनिदर्शनात् ॥ ५० ॥
आकल्पमस्मिन् कविगीयमानं कर्तुं यशः स प्रभुरिन्दिरायाः ।
ऊरीचकाराऽऽखिललोकरीतिं मन्येऽन्यथा नास्य किमप्यशक्यम् ॥ ५१ ॥
एतावद् भृशमास दुःखमिति न स्मर्तव्यमाभ्यामितो भूमावेव सुखं विशेषत इह स्वर्लोकलोकेडितम् ।
अस्मत्तः सुलभं भवेदधिभवं वां बोधयन्ताविति पित्रोः पस्पृशतुः स्वरात्मशिरसा पादौ तदा तौ मुदा ॥ ५२ ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

कृष्णप्रिया

श्रीशुकदेवजी कह रहे हैं कि राजन् लोकों का मङ्गल करने वाले एवं पालक भगवान् श्रीकृष्ण ने राजा की स्त्रियों को आश्वासन दिया पुनः दयालु वासुदेव ने शास्त्ररीति के अनुसार सर्व मृतात्माओं की सत्क्रिया करवाई ॥ ४९ ॥ पुनः मातृ पितृ चरण को निगड बन्धन से मुक्तकर श्रीबलभद्रजी एवं श्रीकृष्ण दोनों भाई माता-पिता के श्रीचरणों में सिर रखकर चरण कमलों का स्पर्श कर बार-बार दण्डवत् करने लगे ॥ ५० ॥ देवकीजी ने और वसुदेवजी ने दोनों पुत्रों को साक्षात् जगदीश्वर समझकर वन्दन करते दोनों पुत्रों को प्रणाम करने लगे किन्तु आलिङ्गन नहीं किया । मनमें ऐसा भाव था उर में सन्देह था कि ये तो जगदीश्वर हैं, उनको प्रणाम करना उचित है आलिङ्गन कैसे किया जाय ॥ ५१ ॥

श्रीमद्भागतजी के दशमस्कन्ध पूर्वार्द्ध के भाषानुवाद में ४४ वाँ अध्याय समाप्त ॥

* * *

अथ पञ्चचत्वारिंशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
५०	४८	२	५	१६४८	३०	४५	१७२३	५३॥।	३

श्रीशुक [1]उवाच

पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः । मा भूदिति निजां मायां ततान जनमोहिनीम् ॥ १ ॥
उवाच पितरावेत्य साग्रजः सात्वतर्षभः । प्रश्रयावनतः प्रीणन्नम्ब तातेति सादरम् ॥ २ ॥
नास्मत्तो युवयोस्तात नित्योत्कण्ठितयोरपि । बाल्यपौगण्डकैशोराः पुत्राभ्यामभवन् क्वचित् ॥ ३ ॥
न लब्धो दैवहतयोर्वासो नौ भवदन्तिके । [3]यां बालाः पितृगेहस्था विन्दन्ते लालिता मुदम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—पुरुषोत्तमः, पितरौ, उपलब्धार्थौ, विदित्वा, "इति, माभूत्" इति, जनमोहिनीम्, निजाम्, मायाम्, व्यतनोत् ॥ १ ॥ सात्वतर्षभः, साग्रजः, पितरौ, एत्य, प्रश्रयावनतः, प्रीणन्, हे अम्ब ! हे तात ! इति, सादरम्, उवाच ॥ २ ॥ श्रीकृष्ण उवाच—हे तात ! नित्योत्कण्ठितयोः, अपि, युवयोः, अस्मत्तः, बाल्य, पौगण्ड, कैशोराः, पुत्राभ्याम्, न, क्वचित्, न, अभवन् ॥ ३ ॥ दैवहतयोः, नौ, भवदन्तिके, वासः, न, लब्धः, पितृगेहस्थाः, लालिताः, बालाः, याम्, मुदम्, विन्दन्ते ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पंचचत्वारिंशकेऽथ पितृनन्दादिसान्त्वनम् । उग्रसेनाभिषेकश्च गुरौ वासात्पुरागमः ॥ १ ॥

उपलब्धार्थौ विदित्वेति । अयमर्थः । उप समीपे आवयोः पुत्रबुद्ध्या यः सांसारिकपरमसुखभोगात्पूर्वमेव लब्धार्थावावामीश्वराविति लब्धः प्राप्तः परमज्ञानरूपोऽर्थो याभ्यां तथाभूतौ तौ ज्ञात्वा मयि प्रसन्ने सत्यनयोर्ज्ञानं नाम किं दुर्लभं स्यात् दुर्लभं तु मयि पुत्रतया प्रेम तत्प्रेम यथा पुत्रतया न तथा ईश्वरत्वेन अत इदानीमेव तज्ज्ञानम् नाभूदिति । निजां स्वाधीनां मायां तयोः प्रसारितवानिति ॥ १ ॥ तदेव दर्शयति उवाचेत्यादिभिरष्टभिः । प्रीणन्प्रीणयन्सादरमुवाच ॥ २ ॥ अस्मत्तोऽस्मन्निमित्तं नित्यमुत्कण्ठितयोरपि युवयोः पुत्राभ्यामावाभ्यां कृत्वा बाल्यपौगण्डकैशोरास्तत्तदवस्थानुभवसुखानीत्यर्थः । तानि नाभवन्निति अस्मत्तः पुत्राभ्यामिति सामानाधिकरण्यं वा ॥ ३ ॥ किं च आवामेव दैवहीनावित्याह । न लब्ध इति । पितृगेहस्था बाला यां मुदं विन्दन्ते लभन्ते सा च न लब्धेति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ कंसमृतेरनन्तरम् । गुरौ गुरुसमीपे उज्जयिन्याम् (१)। उपलब्धार्थावित्यस्याशयमाह—अयमर्थ इति । अतः पुत्रप्रेम्णो दुर्लभत्वात् । तज्ज्ञानमेतावीश्वरावित्येवंरूपम् । तयोर्देवकीवसुदेवयोः ॥ अहो भगवतो नौमि बलात्सर्वं प्रवर्तनम् । प्राहिणोद्यः स्वशून्येऽपि श्रीनन्दादीनपि व्रजे ॥ १ ॥ अत्र 'त संपरेतं विचकर्ष भूमौ' (अ० ४४, श्लो० ३८) इत्यारभ्य 'उवाच पितरावेत्य' (२) इत्येतत्पर्यन्तस्य प्रकरणस्य लीलाक्रमघटनार्थमित्याद्यर्थिक एव क्रमो गृह्यते । तथाहि—प्रथमं तावत्कंसस्य मृत्युप्रत्ययनार्थं रंगभूमावेव यत्किञ्चिद्विकर्षणम्, ततः कंसभ्रातृणां हननम्, ततः श्रीवसुदेवदेवकीमोचनम्, तत्रैव ताभ्यां वन्द्यमानयोस्तयोः संकोचवचनम्, ततः पर्वतकायस्य कंसस्य यमुनातीरं प्रति नयनासंभवाच्छ्रीकृष्णेन पुनः कर्षणम्, तेन च परिखा जातेति श्रीविष्णुपुराणे प्रसिद्धम् । यथा—"गौरवेणातिमहता परिखा तेन कृष्यता । कृता कंसस्य देहेन वेगेनेव महाम्भसः ॥" इति । सा चाद्यापि विश्रान्तितीर्थपर्यन्तसंगता कंसस्य खातं, कंसनदीति च प्रसिद्धा दृश्यते । एवं कंसदेहस्य काठिन्यस्थौल्येऽपि व्यक्त, ततः कंसादिस्त्रीणां तत्रैव गमनं विलापाद्यश्च, ततश्च 'पितरावुपलब्धार्थौ' इत्यादि । अथ तदिदं प्रकरणं व्याख्यायते—उपलब्धार्थाविति । उपोत्र हीने, पुत्रभावमयप्रेमतो हीनतया लब्धोऽर्थः पारमैश्वर्यज्ञानं याभ्यां तादृशौ । तन्मोचनानन्तरवन्दनसमये ज्ञात्वा तत्तु मा भूदिति विचार्य जनमोहिनी या माया पुत्राद्या सक्तिरूपा, निजां तां स्वविषयकां ततान "या प्रीतिरविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतः सा मे हृदयान्नापसर्पतु ॥" इतिवत् । यद्वा—स्वीयामसाधारणीं कृपां, किं वा स्वविषयकां पितृभावमयीं

---

१. बादरायणि—प्रा. पा. । २. भगमन्—विज. । ३. ये—विज. ।

कृपां वात्सल्यम्। तामभिव्यञ्जयति-जनानां स्वभक्तानां मोहिनीं, यद्दर्शनेन तदानींतना यच्छ्रवणेनेदानींतनाश्च भक्ताः प्रेममोहं प्राप्नुवन्तीत्यर्थः। एतेन तादृशभावस्य परमपुरुषार्थत्वं ध्वनितम्। श्रीशुकादीनामपि तादृशभक्तगणान्तःपातात्। यद्वा—तां मायां पुनः कीदृशीम्-अंशेन जनमोहिनीञ्च, किञ्चिदन्यथ वचनत्वेन पुरतः प्रतीयमानत्वात्। तच्च तां प्रति युक्तमेव "स्त्रीषु नर्मविवाहेषु वृत्त्यर्थे प्राणसंकटे" इत्यादिन्यायात्' पुत्रभाव एवानयोः पितृत्वेन स्वीकृतयोर्वृत्तिरिति। वक्ष्यते च—'इति माया' इत्यादौ 'परिरभ्यापतुर्मुदम्, (१०) इति। तदेव मायाप्रसारणमेव। प्रश्रयाय प्रकृष्टं सेवां कर्तुमवनतः। प्रीणन्निति णिजाद्यभाव आर्षः॥ तदेव विवृणोति-उवाचेति। 'उवाच पितरावेत्य' इति पूर्वं मोचयित्वा गृहमेव प्रस्थापितौ तावेत्येत्यर्थः। कंसादिसंस्कारार्थमन्यान्नियोक्ष्येति भावः। सात्वतर्षभ इति-स्ववंश्यत्वेनानुगृहीतेषु यादवेषु च कृपां विस्तारयितुमुचितोऽयमिति तद्दर्शनया तेष्वपि तां विस्तारयितुमिति भावः। तथा च विष्णुपुराणे—"मोहाय यदुचक्रस्य विततान स वैष्णवीम्" इति। साग्रजत्वं तत्साहित्येन तयोरधिकविश्वासार्थम्। यद्वा—हे अम्ब, हे तातेत्येवं सम्बोधनेन प्रीणन् तौ प्रीणयन्। किं वा स्वयमेव हृष्यन्सादरमुवाच॥ २॥ इत्यर्थ इति—लक्षणयाऽवस्थाशब्दास्तत्तदवस्थासुखपरा बोध्याः। ते बाल्यादयः। नैमित्तिकाधारसप्तमीकल्पनापेक्षया तृतीया कल्पना प्रथमातिक्रमे कारणाभावाद्वरेति मत्वाह—अस्मत्त इति। आवाभ्यामित्यर्थः। तसिरत्र सप्तमीतृतीययोः पूर्वापरव्याख्यानयोर्ज्ञेयः॥ हे तातेति प्राधान्यात्। किं वा ज्ञानपरस्य तस्य स्नेहौत्कट्यमसंभाव्य मातृवत्स्नेहोदयाय। क्वचिदेकांशेऽपि तदिदं कैशोरस्य पूर्वपूर्वावस्थैवोच्यते। तथात्र वर्षक्रमो विचार्यते—"क्व सप्तहायनो बालः क्व महाद्रिविधारणम्" इति श्रीव्रजवासिवचनेन तद्धारणसमये सप्तहायनत्वं श्रूयते। तद्धारणञ्च तत्पूजासमयकार्तिकशुक्लप्रतिपदानन्तरं तृतीयायामेव गम्यते। वर्षपूरणसमयस्तु गौणभाद्रकृष्णाष्टम्यामेव मासद्वयदिनदशकाधिकेऽपि वात्सल्यात्सप्तवर्षमात्रतां प्रोक्तवन्तस्तस्मात्तन्मर्यादया पूर्वपूर्वपर्यालोचनया च तदभ्यन्तरं लीलावर्षाणि गण्यन्ते। तत्र 'कालेनाल्पेन राजर्षे' इत्यादिदृष्ट्या राजकुमारादिषु दृष्टत्वेन कैमुत्यप्राप्त्या च नासंभावना कार्या। तत्र सति वर्षे पूर्णे तृणावर्तवधः, तृतीयवर्षारम्भकार्तिके दामोदरलीला, ततः कतिचिद्दिनान्ते वृन्दावनप्रवेशः, प्रविष्टे च वृन्दावने द्वित्रिमासानन्तरं वत्सचारणारम्भः, तत्र वत्सबकव्योमवधस्तदेवं तृतीये चतुर्थारम्भे शरदि बालवत्सहरणम्, तत्र पौगण्डस्य प्रवेशेऽपि "यत्कौमारे हरिकृतं जगुः पौगण्डकेऽर्भकाः" इति वचनात्तद्धारणहेतोरनुल्लासे स्तम्भः, पञ्चमारम्भे पौगण्डप्रकाशः, तत्र कार्तिकशुक्लाष्टम्यां गोचारणारम्भः, पंचमस्य निदाघे कालियमर्दनं, षष्ठे गोचारणकौतुकमात्रं, सप्तमारम्भे कैशोरप्रवेशः, तत्रैव पक्वतालावसरे धेनुकवधः, तत्संध्यायां 'पीत्वा मुकुन्दमुखसारघम्' इत्यादिरीत्या प्रथमतादृशभावाभिव्यक्तिः, कालियदमनधेनुकवधयोर्विपर्ययः प्रतिपन्न एव, सप्तमस्य निदाघे प्रलम्बवधः, अष्टमस्याश्विने वेणुगीतं, कार्तिके गोवर्धनोद्धारणमिति 'क्व सप्तहायनो बालः' इति वचनमनुस्मृत्य स्थापितम्॥ तथा "एकादश समास्तत्र गूढार्चिः सबलोऽवसत्" इत्यनुसृत्य निरूप्यते—अष्टमारम्भ एव कार्तिकशुक्लैकादश्यां गोविन्दाभिषेकः, द्वादश्याञ्च वरुणलोकगमनम्, तत्पूर्णिमायां ब्रह्महृदावगाहनं श्रीवराहदेवेन तस्यां तन्महिमकथनात्, हेमन्ते वस्त्रहरणं, निदाघे यज्ञपत्नीप्रसादः, नवमस्य शरदि रासलीला, शिवरात्रिचतुर्दश्यामम्बिकावनयात्रा, फाल्गुन्यां शंखचूडवधः, दशमे स्वैरलीला, एकादशे चैत्रपौर्णमास्यामरिष्टवधः, द्वादशस्य गौणफाल्गुनद्वादश्यां केशिवधः, तच्चतुर्दश्यां कंसवध इति द्वादशस्तत्र न पूर्ण इत्येकादश समा इत्युक्तम्। किन्तु नवमान्त एव पूर्णकिशोरता, सा च न व्यवच्छिद्यते "कृष्णं मत्वा स्त्रियो ह्रीता निलिल्युस्तत्रतत्र हि" इति प्रद्युम्नस्यागमनेऽपि तत्साम्यावगमादिति प्रस्तुतमनुसरामः॥३॥ इह चावयोरेव महती हानिर्नात्रभवतोर्युवयोरित्याह—किञ्चेति। दैवहीनौ मन्दभाग्यौ। नौ आवयोः। तृतीयार्थे षष्ठी। आवाभ्यामित्यर्थः। यां लालनरूपाम्। सा मुद्॥ नेति तैरवतारितम्। तत्र किञ्चेत्यस्य न केवलं युवयोरेव हानिः किं त्वावयोरपीत्यर्थः। अत एव कारणेन नौ व्यावर्तेतां किन्त्वस्य पुत्रजातीया एवेति ज्ञेयम्। यद्वा—मादृशयोरप्रयोजनकयोः पुत्रयोस्तेनापि युष्मत्सुखदत्वं न स्यादेव किं तु आवयोरेव सर्वसुखहानिर्जातेत्याह—नेति। कर्तरि सम्बन्धविवक्षया षष्ठी। अकारप्रश्लेषेणादैवहतयोः कर्माधीनतारहितयोरिति तत्त्वार्थः। पितृगेहस्थत्वादेव पितृभ्यां लालिताः सन्तः। यद्वा—पितृगेहस्था एव स्वभावतो यां मुदं विन्दन्ति विशेषतस्ताभ्यां लालिता इति॥ ४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो भगवतो नौमि बलात् सर्वप्रवर्त्तनम्। प्राहिणोद्यः स्वशून्येऽपि श्रीनन्दादीनपि व्रजे॥

अथ तं सम्परेतं विचकष भूमावित्यारभ्य उवाच पितरावित्येतत्पर्यन्तस्य प्रकरणस्य लीलाक्रमघटनार्थं पच्यन्तां विविधाः पाका इति वदार्थिक एव क्रमो गृह्यते। तथाहि। प्रथमं तावत् कंसस्य मृत्युप्रत्यायनार्थं रङ्गभूमावेव यत् किञ्चिद्विकर्षणं ततः कंसभ्रातॄणां हननं ततः श्रीवसुदेवदेवकीमोचनं तत्रैव ताभ्यां वन्दमानयोस्तयोः सङ्कोचवचनं ततः पर्वतकायस्य कंसस्य यमुनातीरं प्रति नयनासम्भवात् श्रीकृष्णेन स्वयमेव पुनर्विकर्षणं तेन च परिखा जातेति श्रीविष्णुपुराणे प्रसिद्धम्। यथा "गौरवेणातिमहता परिखा तेन कृष्यता। कृता कंसस्य देहेन वेगेनेव महाम्भस" इति। सा चाद्यापि विश्रान्तितीर्थपर्यन्तसङ्गता कंसस्य खातमिति कंसनदीति च प्रसिद्धा दृश्यते। एवं कंसदेहस्य स्थौल्यकाठिन्येऽपि व्यक्ते। ततः कंसादिस्त्रीणां तत्रैव गमनं विलापाद्यञ्च। ततश्च पितरावुपलब्धार्थावित्यादि। अथ तदिदं प्रकरणं व्याख्यायते। उपलब्धार्थाविति उपोऽत्र हीने। पुत्रभावमयप्रेमतो हीनतया लब्धोऽर्थः

पारमैश्वर्यज्ञानं याभ्यां तादृशौ तन्मोचनानन्तरं वन्दनसमये ज्ञात्वा तत्तु मा भूदिति विचार्य जनमोहिनी या माया पुत्राद्यासक्तिरूपा निजां तां स्वविषयिकां ततान । "या प्रीतिरविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतः सा मे हृदयान्नाप सर्पत्विति" वत् अन्यत्तैः । यद्वा । स्वीयामसाधारणीं कृपां किम्वा स्वविषयिकां पितृभावमयीं कृपां वात्सल्यं तामभिव्यञ्जयति जनानां स्वभक्तानां मोहिनीं यद्दर्शनेन तदानीन्तना यच्छ्रवणेनेदानीन्तनाश्च भक्ताः प्रेममोहं प्राप्नुवन्तीत्यर्थः । एतेन तादृशभावस्य परमपुरुषार्थत्वं ध्वनितं श्रीशुकादीनामपि तादृशभक्तगणान्तःपातात् । यद्वा । तां मायां पुनः कीदृशीं अंशेन जनमोहिनीञ्च किञ्चिदन्यथा वचनत्वेन पुरतः प्रणीयमानत्वात् तत्तामू प्रति युक्तमेव । स्त्रीषु नर्म विवाहे च वृत्त्यर्थे प्राणसङ्कटे इत्यादिन्यायात् पुत्रभाव एवानया पितृत्वेन स्वीकृतयोर्वृत्तिरिति । वक्ष्यते चेति मायेत्यादौ परिरभ्यापतुमुदमिति ॥ १ ॥ तदेव विवृणोति । उवाचेति । उवाच पितरावेत्येति पूर्वं मोचयित्वा गृहमेव प्रस्थापितौ तावागत्येत्यर्थः । कंसादिसंस्कारार्थमन्यान्नियोज्येति भावः । सात्वतर्षभ इति स्ववंश्यत्वेनानुगृहीतेषु यादवेषु च कृपां विस्तारयितुमुचितोऽयमिति तद्दर्शनयातेष्वपि तां विस्तारितवानिति भावः । तथा च विष्णुपुराणे । मोहाय यदुचक्रस्य विततान स वैष्णवीमिति । साग्रजत्वं तत्साहित्येन तयोरधिकविश्वासाद्यर्थम् । अन्यत्तैः । यद्वा । हे अम्बतातेत्येवं सम्बोधनेन प्रीणन्तौ प्रीणयन् किम्वा स्वयमेव हृष्यन् सादरमुवाच ॥ २ ॥ हे तातेति प्राधान्यात् । किम्वा ज्ञानपरस्य तस्य स्नेहौत्कटयमसम्भाव्य पितृवत् मातृवत् स्नेहनिष्ठोदयाय क्वचिदेकांशेऽपि तदिदं कैशोरस्य पूर्वपूर्वावस्थैवोच्यते । अथात्र वर्षक्रमो विचार्यते । क सप्तहायनो बालः क महाद्रिविधारणमिति श्रीव्रजवासिवचनेन तद्धारणसमये सप्तहायनत्वं श्रूयते । तद्धारणञ्च तत्पूजासमयकार्त्तिकशुक्लप्रतिपदानन्तरतृतीयायामेव गम्यते वर्षपूरणसमयस्तु गौणभाद्रकृष्णाष्टम्यामिति मासद्वयदिनदशकाधिकेऽपि वात्सल्यात् सप्तवर्षमात्रतां ते प्रोक्तवन्तः तस्मात्तन्मर्यादया पूर्वपूर्वपर्यालोचनया च तदभ्यन्तरलीलावर्षाणि गण्यन्ते । तत्र कालेनाल्पेन राजर्षे इत्यादिदृष्ट्या राजकुमारादिषु दृष्टत्वेन कैमुत्यप्राप्त्या च नासम्भावना कार्या । तत्र सति वर्षे पूर्णे तृणावर्त्तवधः तृतीयवर्षारम्भे कार्त्तिके दामोदरलीला ततः कतिचिद्दिनान्ते वृन्दावनप्रवेशः । प्रविष्टे च वृन्दावने द्वित्रिमासानन्तरं वत्सचारणारम्भः तत्र वत्सबकव्योमवधः । तदेवं तृतीये पूर्णे चतुर्थारम्भे शरदि बालवत्सहरणं तत्र पौगण्डस्य प्रवेशेऽपि यत्कौमारे हरिकृतं पौगण्डे परिकीर्त्तितमिति वचनात्तद्धरणहेतोरनुल्लासेन स्तम्भः पञ्चमारम्भे पौगण्डप्रकाशः तत्र कार्त्तिकशुक्लाष्टम्यां गोचारणारम्भः पञ्चमस्य निदाघे कालियदमनं षष्ठे गोचारणकौतुकमात्रं सप्तमारम्भे कौशोरप्रवेशः तत्रैव पक्वतालावसरे धेनुकवधः । तत्सन्ध्यायां पीत्वा मुकुन्दमुखसारघमित्यादि रीत्या प्रथमतादृशभावाभिव्यक्तिः । कालियदमनधेनुकवधयोर्विपर्ययः प्रतिपन्न एव सप्तमस्य निदाघे प्रलम्बवधः । अष्टमस्याश्विने वेणुगीतं कार्त्तिके गोवर्द्धनोद्धरणमिति क सप्त हायनो बाल इति वचनमनुस्मृत्य स्थापितम् । अथैकादशसमास्तत्र गूढार्च्चिः सबलोऽवसदित्यन् सूत्य निरूप्यते अष्टमारम्भे एव कार्त्तिकशुक्लैकादश्यां गोविन्दाभिषेकः द्वादश्याञ्च वरुणलोकगमनं तत्पूर्णिमायां ब्रह्महृदावगाहनं श्रीवराहदेवेन तस्यां तन्महिमकथनात् हेमन्ते वस्त्रहरणं निदाघे यज्ञपत्नीप्रसादः नवमस्य शरदि रासलीला शिवरात्रिचतुर्दश्यामम्बिकावनयात्रा फाल्गुन्यां शङ्खचूडवधः । दशमे स्वैरलीला एकादशस्य चैत्रपौर्णमास्यामरिष्टवधः द्वादशस्य गौणफाल्गुनद्वादश्यां केशिवधः । तच्चतुर्दश्यां कंसवध इति द्वादशस्तत्र न पूर्ण इत्येवोक्तम् । किन्तु नवमान्त एव पूर्णकिशोरता । सा च न ह्यवच्छिद्यते कृष्णं मत्वा स्त्रियो ह्रीता निलिल्युस्तत्र तत्र हेति प्रद्युम्नस्यागमनेऽपि तत्साम्यावगमादिति प्रस्तुतमनुसरामः ॥ ३ ॥ नेति तैरवतारितम् । तत्र किञ्चित्यस्य न केवलं युवयोरेव हानिः किन्त्वावयोरपीत्यर्थः । अत एव कारणेन व्यावर्त्तेतां किन्त्वस्य पुत्रजातीया एवेति ज्ञेयम् । यद्वा मादृशयोरप्रयोजनकयोः पुत्रयोस्तेनापि युष्मत् सुखदत्वं न स्यादेव किन्त्वावयोरेव सर्वसुखहानिजातेत्याह । नेति । कर्त्तरि सम्बन्धविवक्षया षष्ठी । अकारप्रश्लेषेणादैवहतयोः कर्माधीनतारहितयोरिति तत्त्वार्थः । पितृगेहस्थत्वादेव पितृभ्यां लालिताः सन्तः । यद्वा । पितृगेहस्था एव स्वभावतो यां मुदं विन्दन्ते विशेषतस्ताभ्यां लालिता इति ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो भगवतो नौमि बलाब्जीवप्रवर्त्तनम् । यद्वा कुर्य्याद् व्रजेन्द्रस्य प्रस्थापनमपि व्रजे ॥

पुरुषोत्तम इति (गी० १५।२८)—'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः, अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥' इति श्रीभगवदुक्त्यनुसारेण साक्षात् परमेश्वरतया सर्व्वज्ञत्वं कारुण्याद्यशेष-सद्गुणनिधित्वादिकञ्च सूचितम् । अतएव विदित्वा निजां सच्चिदानन्दात्मिकां शक्तिम्; किंवा, असाधारणीं कृपां विस्तारयामास; तामभिव्यञ्जयति—जनानां स्वभक्तानां मोहिनीं निजपादाब्जविषयकममतालक्षणमोहजननीमिति ॥ १ ॥ एत्येति जगदीश्वरज्ञानेन भक्त्या पश्चाद्दूरतः पक्षान्तरे च स्वयमालिंगनादिना संगत्येत्यर्थः । यतः सात्वतर्षभो भक्तवर्गपरिपालक इत्यर्थः । यद्वा, भक्तवात्सल्याद्यशेषगुणप्रकटनार्थं यदुकुलश्रेष्ठतां गत इति पित्रोः कृपाविस्तारणेन यादवेषु च सर्व्वेषु कृपां व्यतनोदिति भावः । तथा च श्रीविष्णुपुराणे—'मोहाय यदुचक्रस्य विततान स वैष्णवीम्' इति । साग्रज इति तत्साहित्येन, स्वोक्तौ तयोर्विश्वासाद्यर्थं निजैश्वर्य्याच्छादनार्थञ्च । अन्यत्तैर्व्याख्यातम् । यद्वा, हे अम्ब ! हे तातेत्येवं सम्बोधनेन तौ प्रीणन् प्रीणयन् किंवा स्वयमेव हृष्यन् सादरमुवाच ॥ २ ॥ हे तातेति प्राधान्यात्; किंवा, ज्ञानपरस्य बहुपुत्रस्य तस्य स्नेहोत्कटयमसम्भाव्य मातृवत् स्नेहनिष्ठोदयाय क्वचिदपीति तदानीं

कैशोरशेषसीमाप्त्या तत्रापि तदभावात् ॥ ३ ॥ अहो वतैतादृशोरप्रयोजनयोः पुत्रयोः स्नेहाभावान्मास्तु वा पुवयोस्तत्तत्सुखापेक्षा, आवयोस्तु सर्व्वसुखहानिर्जातैवेत्याह – नेति । दैवहतयोर्दौभाग्यपीडितयोः; कर्त्तरि षष्ठी । यद्यपि सद्गुणरत्नाकरस्य तस्य विनयादिनोक्तिरीदृश्यपि घटते, तथाप्यकारप्रश्लेषेण कर्म्माधीनतारहितयोरिति तत्त्वार्थः, साक्षाद्भगवत्त्वात् । पितृगेहस्थत्वादेव पितृभ्यां लालिताः सन्तः, किंवा, अकारप्रश्लेषेणाहु–अलालिता अपि ॥ ४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उपलब्धार्थौ उपलब्धतत्त्वार्थौ ॥ १–२ ॥ पुत्राभ्यामावाभ्यामावयोः अन्यत्र इत्यतीतकालो गत इत्यर्थः ॥ ३–२९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ पितृसान्त्वनोग्रसेनराज्याभिषेचनोपनयनगुर्वभिगमनविद्याग्रहणगुरुदक्षिणाप्रकारात्मकं चरित्रमुपवर्णयति पञ्चचत्वारिंशेन । विज्ञाय जगदीश्वरौ इत्युक्तं तत्र भगवान्मयि पुत्रे सत्यनयोर्मद्विषयकं ज्ञानं न दुर्लभं किं तु मद्याथात्म्यानुभवादपि मयि पुत्रप्रेमजानन्दोऽतिरिच्यत इत्यालोच्य स्वविषयकयाथात्म्यज्ञानतिरोधापिनीं मायामाततानेत्याह । पितराविति । उपलब्धो विज्ञातः अर्थः निरतिशयपुरुषार्थरूप आत्मा याभ्यां तथाभूतौ पितरौ दिदित्वा पुरुषोत्तमः भगवान्माभूदित्यविच्छिन्नं स्वयाथात्म्यज्ञानं माभूदिति जनमोहिनीं निजां मायां ततान विस्तृतवान् आच्छादितवानित्यर्थः ॥ १ ॥ ततः साग्रजः सरामः सात्वतर्षभः भगवान्निजमाययात्मानं केवलं पुत्रमेव मन्वानौ पितरावुपेत्य प्रश्रयेण विनयेनावनतो नम्रः सादरं यथा तथा हे अम्ब ! हे तातेति सम्बोधयन्प्रीतिं जनयन्नुवाच ॥ २ ॥ उक्तिमेवाह । नेति सप्तभिः । हे तात ! अस्मत्तोऽस्मन्निमित्तं नित्यमुत्कण्ठितयोरपि युवयोः पुत्राभ्यां पुत्रयोरावयोर्बाल्याद्यवस्थाः क्वचिद्भवदन्तिके नाभवन् अन्यत्रेयान्कालो गतः नतु युष्मदन्तिक इत्यर्थः ॥ ३ ॥ तदेवाह । न लब्ध इति । दैवेन हतयोर्हतभाग्ययोर्नावावयोर्भवदन्तिके वासो न लब्धः आवामेव भाग्यहीनौ इत्यर्थः । पितृगेहस्था बाला यां मुदम्विदन्ति सा च न लब्धेति ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मुरारेर्भगवतो बन्धनशक्तेः प्रकारः प्रतिपाद्यतेऽस्मिन्नध्याये तत्र शुकः कंसवधानन्तरं श्रीकृष्णेन किमकारीति राज्ञोमानसं प्रश्नं परिहरति । पितराविति । उपलब्धः सम्यग्ज्ञातोऽर्थः वस्तु नित्याप्रतिहतं भगवत्स्वरूपम् अस्मत्सुतौ नेति याभ्यां तौ तथा विधौ ज्ञात्वा माभूज्ज्ञातमत्स्वरूपौ माभूतामिति निरूप्य निजां मायां बन्धकशक्तिं ततान विस्तृतवान् ॥ १ ॥ प्रीणयन्प्रीतिमुत्पादयन् प्रश्रये प्रकृष्टसेवायामवनतो मग्नः ॥ २ ॥ अस्मन्निमित्तं नित्योत्कण्ठितयोर्युवयोः पुत्राभ्यामावाभ्यां बाल्यपौगण्डकैशोरा वयोऽवस्थाः पित्रोरानन्दहेतवो नागमन् युष्मत्पुरता बाल्याद्युचिता लीला न प्राप्ता इत्यर्थः ॥ ३ ॥ अप्राप्तौ निमित्तमाह । नेति । दैवहतयोर्भाग्यहीनयोः नौ आवयोः भवत्समीपे वासो न लब्ध इति यस्मात् ये बालास्ते पित्रोर्गृहे स्थिता यां मुदं विन्दन्ते सापि न लब्धेत्यन्वयः विन्दते इतिछान्दसः "अभयं प्रतिष्ठां विन्दत" इति श्रुतिः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

उपलब्धार्थाविति उपोऽत्र हीने पुत्रप्रेम्णा प्रेक्ष्य दीनतया लब्धोऽर्थः मत्पारमैश्वर्य्यज्ञानं याभ्यां तादृशौ ज्ञात्वा तच्च मा भूदिति विचार्य्य मायां स्वविषयिकां कृपां वात्सल्यं ततान । तदुक्तं नन्दः किमकरोद्ब्रह्मन्नित्यादौ नेमं विरिञ्चो न भव इत्यादौ च पुनः कीदृशीम् अंशेन जनमोहिनीं च किञ्चिदन्यथा वचनत्वेन पुरतः प्रतीयमानत्वात् ॥ १–५ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

न लब्धो दैवहतयोरित्यादि । दैवं प्रारब्धम् , तस्यापि हतं हननं याभ्याम् , भावेक्तः प्रारब्धक्षयकारिणोरित्यर्थः । तथाभूताभ्यामपि न लब्ध इति यत् तत् प्रारब्धाधीनं न भवति किन्तु ममैवेच्छाविलसितमिदमिति भावः ॥ (१–१३)

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

दैवहतयोरिति । दैवस्य प्रारब्धस्यापि हतं हननं याभ्यामिति सरस्वती रहस्यम् ॥ १–१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वपित्रोः सान्त्वनं कंसताते राज्यं व्रजेशितुः । समाधिं पञ्चचत्वारिंशे स वासं गुरौ व्यधात् ॥

उपलब्धोऽर्थः अस्मदैश्वर्य्यज्ञानरूपं धनं याभ्यां तथाभूतौ पितरौ ज्ञात्वा माभूदिति स चार्थोऽनयोर्मास्तु किं तु तदावरको वात्सल्यप्रेमैव संप्रत्यस्तु मम चानयोश्च तेनैव परमानन्दलाभादिति मनसि विमृश्य निजामन्तरङ्गां मायां स्वैश्वर्य्यज्ञानमावरीतुं योगमायां ततान जनमोहिनीं "दीयमानं न गृह्णन्ति विना मत्सेवनं जना" इत्यत्र जनशब्देन भक्ता एवोक्तास्तान्मोहयितुं

शीलं यस्यास्तां, यद्वा जनयत इति जनौ जननीजनकौ तयोर्मोहिनीं श्रीस्वामिचरणाश्चात्र मयि प्रसन्ने सत्यनयोर्ज्ञानं नाम किं दुर्लभं स्यात् दुर्लभं तु मयि पुत्रतया प्रेमेति भगवदभिप्रायमाहुरत एव पितरौ वात्सल्यरसं ग्राहयितुमग्रिमश्लोकेषु तयोः कपटाभक्तिरपि न दोषायेति ज्ञेयम् ॥ १-२ ॥ अस्मत्तः अस्मद्धेतोर्नित्यमुत्कण्ठितयोरपि युवयोः पुत्राभ्यमावाभ्यां कृत्वा वाल्यपौगण्डकैशोरास्तत्तदवस्थानुभवलालनादिसुखानि पुंस्त्वमार्षं ननु क्व चातिसुकुमाराङ्गौ किशोरो नाप्तयौवनाविति पुरश्रीणामुक्तेः कथं कैशोरस्यातीतत्वमुच्यते "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । कैशोरमापञ्चदशात् यौवनं तु ततः पर" मितिवचनात् पञ्चदशवर्षपर्य्यन्तमेव कैशोरं कृष्णस्त्वेकादशवर्षवया एव कंसं जघान "एकादशसमास्तत्र गूढोऽर्चिः सबलोऽवस"दित्युद्धवोक्तेर्व्रजभूमावुपनयनाभावाच्चेत्यतस्तदानीं तयोः कैशोरस्यारम्भ एव न तु शेषोऽपीति सत्यं यद्यपि सामान्यतो वयोगणना ईदृश्येव तथापि "कालेनाल्पेन राजर्षे रामः कृष्णश्च गोव्रजे । अघृष्टजानुभिः पद्भिर्विचक्रमतुरञ्जसे"त्युक्तें राजकुमारादावपि क्वचित् क्वचिदतिसुखिनि पौगण्डवयस्यपि शरीरवृद्धिमतिकैशोरचेष्टादर्शनात् कृष्णे तु कैमुत्यप्राप्तेर्वैष्णवतोषणी भक्तिरसाभृतानन्दवृन्दावनादिमतमनुसृत्यैवं व्यवस्थेयं मासचतुष्टयाधिकवर्षत्रयस्यैव कृष्णे पञ्चवर्षीयमाणत्वात् तत्प्रमाणं प्रथमं वय एव कौमारं तत्र कृष्णस्य महावने स्थितिः ततः परमष्टमासाधिकषड्वर्षपर्य्यन्तं कैशोरं तत्र नन्दीश्वरे स्थितिः ततः सप्तमे मासि चैत्रे कृष्णत्रयोदश्यां मथुरागमनं चतुर्दश्यां कंसवध इति तत्र दशमवर्षं तु शेषकैशोरं तत्र च नित्यस्थितेरतस्तदनन्तरं सर्वकालमेव तस्य कैशोरमेव ज्ञेयं कृष्णं मत्वा स्त्रियो ह्रीणा निलिल्युस्तत्र तत्र हेति किशोरस्य प्रद्युम्नस्यागमने तत्साम्यावगमात् सन्तं वयसि कैशोर इति सामान्योक्तेश्च आगमादिष्वपि विंशाक्षरादिमन्त्राणां द्वारकाली लामयध्यानेष्वपि तथा दृष्टेश्च तस्मात् कंसवधदिने तस्य कैशोरापगमः कैशोरानपगमश्चेति कृष्णस्य पुरस्त्रीणां च वाक्यं संगच्छते स्म ॥ ३ ॥ किं चावामेव भाग्यहीनावित्याह । नेति । दैवहतयोर्हतभाग्ययोर्भाग्येन प्राप्तयोरिति वास्तवोऽर्थः । तृतीयार्थे षष्ठी बाला यां मुदं विन्दन्ते सा च न लब्धेति शेषः ॥ ४ ॥

गूढार्थदीपिनी

नन्दादेः सान्त्वनां पञ्चचत्वारिंशे प्रदाय सः । राज्यं दत्त्वोग्रसेनाय गुरोर्विद्यामवाप्तवान् ॥

उपलब्धः प्राप्तः अर्थः इश्पराविमौ इति ज्ञानं याभ्यां तौ । जनयतः इति जनौ जननीजनकौ तयोः मोहिनीम् प्रीणयन् प्रीतिमुत्पादयन् ॥ २ ॥ अस्मत्तः अस्मन्निमित्तम् । युवयोः आवाभ्यां पुत्राभ्यां बाल्याद्यवस्थासुखानि ॥ ३ ॥ दैवहतयोः लीलामग्नयोः नौ आवयोः । तृतीयार्थे षष्ठी । आवाभ्याम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ पञ्चचत्वारिंशेऽध्याये वसुदेवनन्दादिसान्त्वनोग्रसेनराज्याभिषेचनोपनयनगुरुगृहवासतत्परिचर्यादिरूपं भगवच्चेष्टितं वर्णयति पितराविति । उपलब्धः सर्वजनकः श्रीकृष्णो नास्मत्पुत्र इत्येवं कोधरूपोऽर्थो याभ्यां तौ तथाभूतौ विदित्वा पुत्रभावेनातिदुर्लभेन मां भजमानयोरनयोस्तादृशबोधरूपोऽर्थो माभूदिति निजां मायां तयोस्ततान ॥ १ ॥ तदनन्तरमुवाच प्रीणन् प्रीणयन् हे अम्ब ! हे तातेति सादरं सम्बोधयन् ॥ २ ॥ किमुवाचेत्याकाङ्क्षायामाह । नास्मत्त इत्यादि । हे तात ! अस्मत्तः अस्मन्निमित्तं नित्योत्कण्ठितयोरपि युवयोः आवाभ्यां पुत्राभ्यां कृत्वा बाल्यपौगणकैशोराः तत्तदवस्थानुभवविनोदाः क्वचित्कास्माश्चन्निमित्ते सति नाभवन् ।। ३ ॥ किञ्च । दैवहतयोरिव नौ आवयोर्भवदन्तिके वासो न लब्ध । यां पितृगेहस्था बालाविन्दन्ते सा च न लब्धेत्यन्वयः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ । पितरावुपलब्धार्थावित्यारभ्येति मायामनुष्यस्थेत्यन्तैर्दशभिः श्लोकैर्लोकेशस्य वसुदेवाद्यवरत्वं परतन्त्रता चोच्यत इति प्रतीयतेऽतस्तत्तात्पर्यमाचार्यवर्यो मानेनानयति । सर्वोत्तमोऽपीति । भगवान् जनार्दनः सर्वोत्तमोऽपि सन्गुणभावमप्राधान्यं वसुदेवादेः सकाशात्तथाऽऽत्मनः स्वस्माद्वरतां तेषां दर्शयेत् । अज्ञाशक्त्यादिकमज्ञेति मुक्तोपसृप्येत्यादिवद्भावप्रधानम् । नञ्पूर्वाज्जानातेर्धञर्थे कविधानमिति भावेऽज्ञमज्ञानमिति वा । अशक्तिश्चेत्यादी यस्य स स्वभावो न विद्यते शक्त्यादिर्यस्य सोऽज्ञश्च स चेत्यज्ञाशक्त्यादिस्तस्य भाव इति वा तस्याखिलेशितुः कुतो भवेत् । एतदादेर्दोषमूलकत्वात्तदभावादेवाभाव इत्याह । कुतो दोषा इति । सर्वगुणपूर्णस्यानन्दवारिधेः सुखसमुद्रस्य । सर्वोपेता तद्दर्शनात् । अथातो ब्रह्मजिज्ञासा । आनन्दमयोऽभ्यासादित्याद्युपयुक्तसूत्रोक्तानुवादरूपत्वान्न पौनरुक्त्यमिति मन्तव्यम् । अथ मूलार्थः । यथा खलाचरितः शृङ्खलाबन्धो व्यमोचि भगवता तथा संसारबन्धनमपि मोचयति हरिरिति सूचयत्यनेनाध्यायेन । तत्रादौ कंसहिंसानन्तरमनन्तः किं ततानेति क्षितिपतिशङ्कां मानसीं परिहरति । पितराविति । पुरुषोत्तम उपलब्धोऽर्थो नित्यं प्राप्योऽस्मिति ज्ञानविषयो हरिः स्वयं ययोस्तौ ज्ञातस्वरूपाविति यावत् विदित्वा ज्ञात्वा तयोरेवं ज्ञानमिदानी मा भूदिति जनमोहिनी मायां निजां स्वबन्धकशक्ति ततान व्यतनोत तया वृतवानिति यावत् ॥ १ ॥ साग्रजः सबलः सात्वतर्षभः कृष्णः पितरौ गृहोपविष्टावेत्य प्राप्य । यथोक्त हरिवंशे । तं हत्वा पुण्डरीकाक्षः प्रहर्षाद्विगुणप्रभः । ववन्दे वसुदेवस्य पादौ निहतकण्टकः । मातुश्च शिरसा पादावित्याद्युदीर्य । ता जितारी जितक्रधौ चिरविप्रोपितौ । व्रजे ।

स्वपितृभवनं वीरौ जग्मतुर्हृष्टमानसाविति । प्रश्रयेणावनतः प्रिणन्स्वयं प्रीतियुतः प्रीणयन्वा । हे अम्ब हे तातेति सादरमुवाच । इदमेव मायाबीजमिति ज्ञेयम् ॥२॥ अस्मत्तोऽस्मन्निमित्तं नित्यमुत्कण्ठितयोरुत्कण्ठयुतयोर्युवयोः पुरत इति शेषः । बाल्यपौगण्डकैशोरा इत्यवस्थाः । गतं । पुत्राभ्यामावाभ्यां नागमन्न गमिता इति तच्चित्तज्ज्ञानं युवयोः क्व कथं भवेन्न भवेत् ॥ ३ ॥ अस्मद्युदैंवती युष्मतो बिवासनमिति न तल्लींला युष्मत्परो जातेति तात्पर्यं लोकविलोकनतो बहिः प्रकाशयन्नाह । न लब्ध इति । दैवहतयोनौं भवदन्तिके युष्मत्समीपे वासो न लब्धः । यन्नाभूद्दैवं तद्दैवं क्व फलप्रदं दृष्टमित्यत आह । ये बाला इति । पितृगेहस्था ये बाला लालिता मुदं विन्दन्ते सा याभ्यां न प्राप्तेति ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

साधारण्येन सर्वेषां निरूपोऽपि निरूप्यते । द्विचत्वारिंशेऽह्यध्याये निरोधः सर्वसम्मतः ॥
पित्रोराज्ञस्तथान्येषां स्वस्यापि च निरूप्यते । द्विरूपे मध्यमे रोधे यादवत्वं प्रयोजकम् ॥
स्वस्य शब्दात्मके रोधः स्वाज्ञायां निखिलस्य च । देवे दैत्ये च सर्वत्र कालादिष्वपि सर्वतः ॥

पूर्वाध्याये विशेषतो निरोध उक्तः पित्रोः स चासौ लौकिकः लौकिकोऽपि कर्त्तव्य इति तयोर्बोधनेन तमाह । पितराविति एकादशभिः । मध्यमत्वाद्गुणैर्ज्ञानभक्तिभ्यां चेति अन्यथा पूर्वस्मादपकर्षः स्यात् लौकिको निरोधः अलौकिके बोधे विद्यमाने न भविष्यतीति तदाच्छादनार्थं मायां विस्तारितवानित्याह । उपलब्धार्थौ पितरौ विदित्वा उपलब्धार्थता मा भवत्विति जनमोहिनी निजां मायां ततान प्रयच्छत्येव सर्वं निरोधे । किं बहुना व्यापिवैकुण्ठमपि दत्तवान् तथापि वेषेण क्रीडतीति ज्ञानं न लीलौपयिकम् अतो बाधकत्वात् स माभवत्विति मायाच्छादनं ननु को दोषः स्यात्तत्राह । पुरुषोत्तम इति । मूलभूतः यदि कश्चिदंशः समागच्छेत् तस्य लोके ज्ञानं नात्यन्तं लज्जाकरं महतस्तु मूलभूतस्य भवत्येव । तत्फलं च भविष्यत्येव भक्तिः परमानन्दस्य तुल्यत्वात् । ननु मायया मोहे ततोऽप्यपकर्षो भवेत्तत्राह । निजामिति । सा हि स्वकीया यथा युक्तमेव कार्यं करिष्यतीति । ननु भगवदतिक्रमे दोषः स्यात्ततोऽनिष्टसाधकत्वं मामाया इत्याशङ्क्याह । जनानेव मोहयति नतु भगवदीयान् जनेषु च मोहयति न तु भगवति तत्र हेतुर्वा स्वेति तस्याः कार्यनिदर्शनार्थं जनमोहिनीत्वमुक्तम् ॥ १ ॥ अतः अलौकिकमुपायं विधाय लोकन्यायेन सापराधावेताविति एतस्मिन् कृते वसुदेवो दुःखं प्राप्नोतीति नालिङ्गनं कृतवानिति प्रतीतिमुत्पाद्य तद्दोषपरिहाराय तादृशानि वचनान्याह । उवाचेति । नमस्कारं परित्यज्य एत्य निकटे समागत्य वलभद्रस्तथा वक्तुं न जानातीति तस्यापि दोषः परिहर्त्तव्य इति तत्सहितः सात्वतामृषमः स्वामी भगवद्भक्तानां शिक्षकः सन्मर्यादां शिक्षयन् प्रश्रयेण विनयेन नम्रो बाल इव प्रीणन् प्रीतिमुत्पत्रयन् आदरपूर्वकमम्ब तातेति सम्बोधनमुवाच लज्जा सापराधत्वञ्च लोकदृष्टौ सम्भवतः तत्र प्रथमं लज्जा निवारणीया पुत्रः स्वात्मैवेति न तेन कृते मोचने लज्जा भवति अतः पुत्रत्वं ज्ञापयन् अम्बतातेति सम्बोधनं कृतवान् उपचारव्यावृत्त्यर्थं सादरं कपट एवोपचारप्रयोगः तथापि तद्धृदये पूर्वस्मृतिनाशेऽपि विपरीता बुद्धिः कथमुत्पद्येत तत्राह । प्रीणन्निति । यथा प्रीतिर्भवति तथा मुखचेष्टां कुर्वन् अवगणनया पुत्रत्वेऽपि बोधिते प्रीतिर्गोत्पद्यते इति विनयप्रकाशनम् ॥ २ ॥ एवं लज्जां दूरीकृत्य अपराधनिराकरणे नास्माभिरपराधः कृत इति वक्तुं तत्साधनाय तयोरपेक्षितत्वं ज्ञापयति । नास्मत्त इति । नित्योत्कण्ठितयोरपि सर्वदा पुत्रयोर्बाल्यपौगण्डकैशोरा द्रष्टव्या इत्याकाङ्क्षा बाल्यादयो मुद इति सन्तोषे हि सर्वस्याकाङ्क्षा भवति पुत्राभ्यामिति पञ्चमी आवाभ्यां पुत्राभ्यां हेतुभूताभ्याम् आवयोः सम्बधिनः बाल्यादयः अन्येषां च कीर्तिमत्प्रभृतीनां न जाता भगवानुत्पत्स्यत इति श्रवणाल्लोकोपद्रव इति स्वस्यैव निमित्तता । स्वस्यापि बाल्याद्यदर्शने अक्लिष्टकर्मत्वाय स्वमेवोक्तवान् मां गोकुले नयेति अतः स्वयमेव निमित्त समर्थावुपेक्षां कृतवन्तावित्यपि स्वधर्मपरिपालनं हि गोप्यता अक्लिष्टकर्मता स्वस्यैव रक्षणीया पित्रोस्तु बाधिकैव अतः स्वनिमित्तमेव बाल्यादीनामननुभवः ॥ ३ ॥ यद्यपि भवतां सुखाभावः तथाप्यस्माकं भूयान् क्लेशो भवतामल्प इति निरूपयति । न लब्ध इति । दैवहतयोः दैय हतं याभ्याम् अर्थाद्भवदीय ब्रह्मणो हि नादृष्टं दैवप्रेरितयोर्वा तथाप्यन्यथा प्रत्यायकः शब्दः मोहिकया मायया जानते इति न भगवद्वाक्य वाधितार्थत्वविरोधः परीक्षता तु व्याख्यातैव लौकिकीयं भाषा अतो भगवान् गोप्य एव सर्वथा विज्ञैरपीति फलिष्यति । भगवतापि बाल्यमाविष्कृतमिति तद्यादृशं लोके प्रशस्त भवति तादृशं प्रकटीकर्तव्यम् इदं त्वस्मिन्वंशे विकलमिति श्रुत्वा यथार्थतापि भवति आत्मत्वेन तद्धर्माः परिगृहीता इति एकयानिरूपणमिति न दोषाय स्वबाल्यस्य लोकप्रसिद्धत्वात् कथं विकलेत्याशङ्क्याहः । यां बाला इति । लोकानां सन्तोषहेतुर्बाल्यं यद्यप्यस्मदयि तथाप्यस्मत्संतोषहेतुर्न भवति नन्दादिषु तथा हृदयं न प्रकटीकृतमिति सहजा धर्म्मस्तेषु नोत्पन्नः कृत्रिमो हि न सुखदायी अन्यथा बन्धनं न कुर्यात् मारे वा भूमौ न स्थापयेत् तस्मात् सुष्टूक्तं पितृगेहस्था एव बालाः पितृभ्यां लालिताः मुदं विन्दन्तीति । मुदमित्येकवचनं सर्वेपां बालानां तुल्यत्वाय तेनान्ये उत्कर्षहेतवो धर्माः स्थिता अथ प्रयोजका इति निरूपितम् ॥ ४ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । उपलब्धोऽर्थो वाञ्छितो मोचनरूपो याभ्यां तौ पितरौ विदित्वा ज्ञात्वा पुरुषोत्तमः श्रीकृष्णः तज्ज्ञानं माभूदिति हेतोर्जनमोहिनीं निजां मायां ततान विस्तारितवान् ॥ १ ॥ साग्रजः सबलः सात्त्वतर्षभः कृष्ण एत्य प्राप्य प्रश्रयेणावनतः

हे अम्ब हे तात इति प्रीणन् सादरं यथा भवति तथा पितरावुवाच ॥२॥ हे तात नित्योत्कण्ठितयोरपि युवयोः पित्रोरस्मत्त आवाभ्या पुत्राभ्यां कृत्वा बाल्यपौगण्डकैशोरास्तत्तदवस्था सुखानि क्वचिन्नाभवन् अस्मन्निमित्तमित्येके ॥ ३ ॥ दैवेन हतयोर्मंदभाग्याभ्यां नौ आवाभ्यां भवतोरन्तिके समीपे वासो न लब्धो न प्राप्तः पितृगेहस्था बाला लालिता यां मुदं हर्षं विन्दन्ते प्राप्नुवन्ति सा च न लब्धा ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पञ्चचत्वारिंशकेऽथ कृष्णेन साग्रजेन वै । देवकीवसुदेवादिसान्त्वनं विनिरूप्यते ॥ १ ॥

उपलब्धः विज्ञातः अर्थः निरतिशयपुरुषार्थः स्वयाथात्म्यं याभ्यां तथाभूतौ पितरौ विदित्वा पुरुषोत्तमः श्रीकृष्णः मा भूत् "मयि प्रसन्ने सति मद्विषयकं ज्ञानं न दुर्लभम्, किन्तु मयि पुत्रबुद्ध्या मल्लीलानुभवानन्द एव । मज्ज्ञाने स्थिरे सति तु मनुष्यनाट्यलीलापि न सिद्ध्येत्, अत इदानीमेव ज्ञानं मा भूत्" इति विचारं कृत्वा निजानन्दमोहिनीं मायां ततान तयोरुपरि मोहनार्थं प्रसारितवानित्यर्थः ॥ १ ॥ ततश्च साग्रजः रामेण सहितः सात्वतर्षभो यादवश्रेष्ठो भगवान् कृष्णः मोहितौ पितरौ प्रत्येत्य आगत्य प्रश्रयेण विनयेनावनतः नम्रः सादरं यथा स्यात्तथा हे तात ! हे अम्बेति सम्बोधनेन प्रीणयन् प्रीतिं जनयन्नुवाच ॥ २ ॥ तदुक्तिमेव दर्शयति—नास्मत्त इति सप्तभिः । 'पितृत्वादेतन्नासम्भावितम्' इति सूचयन् सम्बोधयति—तातेति । नित्यमुत्कण्ठतयोस्तदनुभवाकाङ्क्षावतोरपि युवयोरस्मत्त आवयोः पुत्राभ्यां पुत्रयोर्बाल्यादयो बाल्याद्यवस्थानुभवसुखानि क्वचिन् कदाचिदपि नाभवन् ॥ ३ ॥ 'न केवलं युवयोरेव सुखहानिः, किन्त्वावयोरपि' इत्याह—नेति । पितृगेहस्थाः पितृभ्यां लालिता बाला यां मुदं विन्दन्ते सा भवद्भ्यां सकाशादावाभ्यां न लब्धेति शेषः । तत्र हेतुमाह—नौ आवाभ्यां भवदन्तिके वासो न लब्ध इति । तत्रापि हेतुमाह—दैवहतयोरिति । प्रारब्धहीनाभ्यामित्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

पञ्चचत्वारिंशके तु पितृनन्दादिसान्त्वनम् । गुरुभ्यः शिक्षा वरोत्र श्लोकाः सार्द्धा नभःशराः (५०॥) ॥
उवाचपञ्चकं (५) सार्द्धा भूमिबाणा (५१॥) अनुष्टुभः ॥ ४५ ॥

पितराविति ॥ उपलब्धो विज्ञातः अर्थः स्वयाथात्म्यम् ईश्वरं याभ्यां तथाभूतौ पितरौ विदित्वा पुरुषोत्तमः श्रीकृष्णः माभूत् मयि प्रसन्ने सति मद्विषयकं ज्ञानं न दुर्लभं किंतु मयि पुत्रबुद्ध्या मल्लीलानुभवानन्द एव दुर्लभः मज्ज्ञाने स्थिरे सति तु मनुष्यनाट्यलीलाऽपि न सिध्येत् । अत इदानीमेव ज्ञानं माभूदिति कृत्वा निजानन्दमोहिनीं मायां ततान तयोरुपरि मोहनार्थं प्रसारितवान् ॥ १ ॥ उवाचेति ॥ साग्रजः सात्वतर्षभो भगवान् मोहितौ पितरौ प्रति एत्य पूर्वं मोचयित्वा रङ्गभूमित एव गृहं प्रस्थापितौ तौ प्रति आगत्येत्यर्थः । कंसादिसंस्कारार्थमन्यान्नियुज्येति भावः । प्रश्रयेण वियेनावनतः नम्रः सादरं यथा स्यात्तथा हे तात हे अम्बेति सम्बोधनेन प्रीणयन् प्रीतिं जनयन्नुवाच ॥ २ ॥ नेति ॥ हे तात ! अस्मत्तः अस्मन्निमित्त नित्यमुत्कण्ठितयोस्तदनु भवाकाङ्क्षावतोरपि युवयोः पुत्राभ्यामावाभ्यां कृत्वा बाल्यपौगण्डकैशोरा बाल्याद्यवस्थानुभवसुखानि क्वचित्कदाचिदपि नाभवन् अस्मत्तः पुत्राणामिति सामानाधिकरण्यं वा । कैशोरा इति पुंस्त्वमार्षम् । ननु किशोरावस्थायः पञ्चदशवर्षावधित्वात् गतैकादशवर्षस्य किशोरावस्थातिक्रमः कथमुक्तः । "एकादशसमास्तत्र गूढार्चिः सबलाऽवसत् ।" इत्युद्धवोक्तेः इति चेत् "कालेनाल्पेन राजर्षे रामः कृष्णश्च गोव्रजे ॥ अघृष्टजानुभिः पद्भिर्विचक्रमतुरञ्जसा ॥" इत्युक्त राजकुमारादावपि क्वचित् क्वचिदतिसुखिनि पौगण्डवयस्यपि शरीरवृद्धिमतिकैशोरचेष्टादर्शनात् । कृष्णे तु कैमुत्यप्राप्तेर्वैष्णवतोषिणीभक्तिरामृतानन्दवृन्दावनादिमतमनुसृत्यैवं व्यवस्थापनीयम् । मासचतुष्टयाधिकवर्षत्रयस्यैव कृष्णे पञ्चवर्षीयप्रमाणत्वात् तत्प्रमाणं प्रथमं वय एव कौमारं तत्र कृष्णस्य महावने स्थितिः । ततः परमाष्टमासाधिकषड्वर्षपर्य्यन्तं वयः पौगण्डं तत्र वृन्दावने स्थितिः । ततः परमेकादशवर्षपर्य्यन्तं कैशोरं तत्र नन्दीश्वरे स्थितिः । ततः सप्तमे मासि माघे फाल्गुने कृष्णत्रयोदश्यां मथुरागमनं चतुर्दश्यां कंसवध इति । तत्रैकादशवर्षं तु शेषकैशोरं तत्रैव नित्यस्थितेरस्तदनन्तरं सर्वकालमेव तस्य कैशोरमेव ज्ञेयम् । "कृष्णं मत्वा स्त्रिया ह्रीणा निलिल्युस्तत्र तत्र ह ।" किशोरस्य प्रद्युम्नस्यागमने तत्साम्यावगमात् "सन्तं वयसि कैशोरे" इति सामान्योक्तेश्च । आगमादिष्वपि विंशत्यक्षरादिमन्त्राणां द्वारकालीलामध्यानेष्वपि तथादृष्टेश्च तस्मात् कंसवधदिने तस्य कैशोरापगमः । कैशोरापगमश्चेति नास्मत्त इति कृष्णस्य वाक्यं "किशोरौ नाप्तयौवनौ" इति पुरस्त्रीणां च वाकय संगच्छते । परे तु चैत्रं मास मन्यन्ते एकादशमेव वर्षं च ॥ ३ ॥ नेति ॥ दैवहतयाः नौ इति तृतीयार्थे षष्ठ्यौ । प्रारब्धहीनाभ्यामावाभ्यामित्यर्थः । भवतोरन्तिके समीते वासो न लब्धः अतः पितृगेहस्थाः पितृभ्यां लालता बाला यां मुद विन्दन्ते सा भवद्भ्यां सकाशादावाभ्यां न लब्धेति शेषः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अधुना पंचचत्वारिंशकेऽध्याये वसुदेवदेवकी सान्त्वनं नन्दादिसांत्वनं त्वोग्रसेनस्य राज्याऽभिषेचनं रामकृष्ण योरुपवीत-संस्कारकरणं चाध्ययनार्थं तयोर्गुरुगेहनिवसनं च गुरुदक्षणायां तत्पुत्राऽऽनयनं च प्रनर्मथुरागमनं चोच्यते उपलब्धार्थावित्यत्र-

उपोपसर्गः हीनार्थे पुत्रत्वस्नेहहीनतया लब्धोऽर्थः श्रीकृष्णे परमेश्वरत्यज्ञानरूपः पदार्थोयाभ्यां तौ पितरौ विदित्वा एवं ज्ञानेस्थिरे सति पुत्रत्वपितृत्वमातृत्वादि व्यवहारः कथं स्यादिति विचार्य पुरुषोत्तमत्वात्करणीयं च कर्त्तुमन्यथा कर्त्तं च समर्थः श्रीकृष्णः इत्थं भूतं स्थिरं ज्ञानं तयोर्माभूदिति संकल्पजनमोहिनी मायां ततान ॥ १ ॥ तथा हि उवाचेत्पृष्ठः निःप्रश्रयेण विनयेनाऽवनतोऽति नम्नः सन् प्रीणयन् प्रसन्नौ कुर्वन्नित्यर्थः सदारं यथा तथा उवाच अस्मत्तोऽस्मत्प्राप्त्यर्थं नित्यमुत्कंवितयोरतिस्निग्धयोरपि युवयोः पुत्राभ्यामावाभ्यां कृत्वा अस्मद्बाल्पाद्यवस्थोत्पन्नं सुखानिनाभवन् ॥ ३ ॥ दैवहतयोर्दैवाऽधीनयोः नौ आवयो एवाभ्यामपिभवत्समीपे वासो न लब्धः नाविति कर्त्तरिष्टष्टीयां मुदं विदन्ते सा च न प्राप्ता ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सान्त्वनं पितृनन्दादेरुग्रसेनाभिषेचनम् । पञ्चचत्वारिंशकेऽथ गुरौ वासात्पुरागमः ॥ १ ॥

अथ पितृसान्त्वन—उग्रसेनराज्याभिषेचन-उपनयन-गुर्वभिगमन-विद्याग्रहण-गुरुदक्षिणाप्रकारात्मकं चरित्रमुपवर्णयति तत्रादौ यत् 'विज्ञाय जगदीश्वरौ' इत्युक्तं तत्र भगवान्, मयि पुत्रे सत्यनयोर्मद्विषयकज्ञानं न दुर्लभं, किन्तु मद्याथात्म्यानुभवादपि मयि पुत्रप्रेमजानन्दोऽतिरिच्य स्वविषयकयाथात्म्यज्ञानतिरोधायिनीं मायामाततानेत्याह ॥ पितराविति ॥ उपलब्धो विज्ञातोऽर्थः स्वयाथात्म्यज्ञानरूपो याभ्यां तौ तथाभूतौ, पितरौ विदित्वा, पुरुषोत्तमः श्रीकृष्णो भगवान्, मा भूत् इति, अविच्छिन्नं मद्याथात्म्यज्ञानं साम्प्रतं मा भूदिति विचिन्त्येत्यर्थः । जनमोहिनीं, निजां मायां, ततान विस्तृतवान् आच्छादितवानित्यर्थः ॥ १ ॥ उवाचेति ॥ ततः साग्रजः सरामः, सात्त्वतकुलश्रेष्ठः श्रीकृष्णो भगवान्, पितरौ निजमाययाऽऽत्मानं केवलं पुत्रनेव मन्यमानौ मातरपितरावित्यर्थः । एत्य प्रश्रयावनतो विनयेनावनम्रः सन्, सादरं यथा तथा, हे अम्ब मातः, हे तात पितः, इति संबोधयन्, प्रीणन् प्रीतिं जनयन् संश्च, उवाच ॥ २ ॥ उक्तिमेवाह नेति सप्तभिः ॥ नेति ॥ हे तात, अस्मत्तोऽस्मन्निमित्तं नित्यं उत्कण्ठितयोः युवयोः, पुत्राभ्यामावाभ्यां कृत्वा, बाल्यपौगण्डकैशोरास्तदवस्थाजनितसुखानुभावाः, क्वचित् अपि, न अभवन् युवाभ्यामास्माकीना बालाद्युचिता लीला न प्राप्ता इत्यर्थः । अन्यत्रेयान् कालो गतो न तु युष्मदन्तिके इति भावः ॥ ३ ॥ तदेव पुनः स्फुटमाह ॥ न लब्ध इति ॥ दैवहतयोर्हतभाग्ययोः, नावावयोः, हतभाग्याभ्यामावाभ्यामित्यर्थः । भवदन्तिके वासः, न लब्धः । आवामेव भाग्यहीनावित्यर्थः । पितृगेहस्थाः बालाः, लालिताः सन्तः, यां मुदं विन्दन्ते, सा च, न लब्धा ॥ ४ ॥

श्रीहरिसूरिविरचितं भक्तिरसायनम्

पितराविति : १०.४५.१.

कार्यं भूरि विधेयमस्ति पुरतः सद्भव्यमव्याहतं सौख्यं संसृतिजं च देयमनयोर्मज्जन्मतः क्लिश्यतोः ।
तन्न स्याद् द्वयमप्यनामयमिहाभ्यां तत्त्वतो मय्यभिज्ञाते जात्विति दीनबन्धुरकरोत् सौख्याय तौ मोहितौ ॥ १ ॥

नास्मत्त इति : १०.४५.३.

आबाल्यादि-वयोविशेषरचित-क्रीडाभिरस्मिन् भवे ये जाता नहि मोदयन्ति पितरौ धिग्जन्म तेषामिति ।
वक्ताऽद्धा भगवंस्त्वमेव पितरौ मां चेत्तथार्थं भवासक्तोऽसीति पुनर्ब्रवीषि तदहो नेयः क वाऽयं नयः ॥ २ ॥

न लब्ध इति : १०.४५.४.

पितृप्रभृत्याप्तजनात् सुखाप्तौ निदानमेकं शिशुदैवमेव ।
स्वातन्त्र्ययोगान्नहि तत्प्रसक्तिरिति स्फुटं तादृगुवाच कृष्णः॥ ३ ॥

कृष्णप्रिया

राजस प्रमेय प्रकरण का यह यशोधर्मनिरूपण करने वाला तीसरा अध्याय है। इस अध्याय में भगवान् और भक्तों का निरोध का निरूपण किया जाता है। विशेषरूप से माता-पिता और नृपति का निरोध कहा जाता है इस निरोध में यादवत्व प्रयोजक है। इस अध्याय में ५० श्लोक है। इस अध्याय में माता-पिता का वात्सल्य नन्दरायजी की विदाई दोनों भाईओं का यज्ञोपवीत संस्कार गुरुकुल निवास गुरु चरणों की आशिष दक्षिणा समर्पण आदि प्रसङ्ग का वर्णन होगा।

श्रीशुकदेवजी कहते हैं कि राजन्? पुरुषोत्तम श्रीकृष्ण को समझ लिया कि पिताजी और माताजी को यह अवबोध हो गया है कि मैं जगदीश्वर हूँ इससे माता पिता का वात्सल्य भाव चला जायगा और भगवान मानकर स्तुति ही करते रहें मैं इसलिए ज्ञाननिरोध न करने के लिए जनमोहिनी अपनी विलक्षण माया को फैला दी ॥ १ ॥ समर्पित भक्तों के स्वामी भगवान् श्रीकृष्ण अपने अग्रज भाई श्रीबलभद्रजी के साथ माता पिता के समीप आकर विनय विवेक से विनम्र होकर माता पिता को प्रसन्न करते हुए आदरपूर्वक कह रहे हैं कि हे अम्ब! हे तात आपके चरणों में आप के बालकों के बार बार प्रणाम ॥ २ ॥

दयानिधान नाथ श्रीकृष्ण कहते हैं कि हे पिताजी हे माताजी हम अपराधी हैं हे तात ? आप तो नित्य हमारे लिये लालायित रहते थे। हम संयोगवश समीप नहीं आ सके, हमारी बाल्यावस्था, पौगण्डावस्था किशोरावस्था एवं अभिनव युवावस्था हमारे वियोग में वैसे ही चली गई। हमारा ज्येष्ठ भाई कीर्तिमान् तो पांचवर्ष तक सुख दे सका। मैं और दाऊजी तो एक दिन भी सुख न दे सके और हम दोनों से आप दोनों की स्वल्प भी सेवा हो सकी हे तात ! हे मात ! हमको क्षमा करें ॥ ३ ॥ पिताजी ! हत भागी हम दोनों भाईओं को आपके छत्र में निवास भी नहीं मिला। तात मात के समीप घर में रहने से बाल्यावस्था में जो लालन पालन पोषण प्रीणन आदि जो बालकों को आनन्द मिलते हैं उन सुखों से भी हम सदा वञ्चित ही रहें ॥ ४ ॥

सर्वार्थसम्भवो[1] देहो जनितः पोषितो [2]यतः । न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥ ५ ॥
यस्तयोरात्मजः कल्प आत्मना च धनेन च । वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयन्ति हि ॥ ६ ॥
मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुम् । गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन् मृतः ॥ ७ ॥
तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः । मोघमेते व्यतिक्रान्ता दिवसा वामनर्चतोः ॥ ८ ॥

कर्वमक्षमा

अन्वयः— सर्वार्थसम्भवः, देहः, यतः, जनितः पोषितः, तयोः, पित्रोः, मर्त्यः, शतायुषा, निर्वेशम, न, याति ॥ ५॥ तयोः, आत्मजः, यः, आत्मना, च (देहेन) धनेन, च (परिवारेण) कल्पः, वृत्तिम् , न, दधात्, प्रेत्य, तम् , स्वमांसम्, खादयन्ति, हि ॥ ६ ॥ मातरम् , पितरम् , वृद्धम् , साध्वाम् , भार्याम् , शिशुम् , सुतम् , गुरुम् , विप्रम् , प्रपन्नम् , च, (दीनम्) कल्पः, अपि, अविभ्रत् , श्वसन् , मृतः ॥७॥ तत् , अकल्पयोः, कंसात् , नित्यम् , उद्विग्नचेतसोः, वाम् , अनर्चतोः, नौ एते दिवसः मोघम् , व्यत्तिक्रान्ताः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं तावच्छ्लोकद्वयेन युवयोरावयोश्च कामहानिर्जातेत्युक्तमावयोः पुनर्युष्मत्परिचर्यालोपेन धर्महानिरपि जातेत्याह। सर्वार्थसंभव इति। सर्वेषां धर्माद्यर्थानां संभवो यस्मिन्स देहो यतो याभ्यां जनितः पोषितश्च तयोः पित्रोर्निर्वेशं निष्कृतिमानृण्यं मर्त्यः शतसंवत्सरमात्रेणायुषा न प्राप्नोति ॥ ५ ॥ तन्मध्ये पितुरपेक्षया यः पुत्रः कल्पः समर्थः सन्नपि देहेन धनेन च पित्रोर्वृत्तिं जीविकां न सम्पादयेत्तं प्रेत्य लोकान्तरे यमदूताः स्वस्यैव मांसं खादयन्ति हि ॥ ६ ॥ किं च मात्रादिशुश्रूषामकुर्वन्विफलजीवितश्च भवतीत्याह। मातरमिति। प्रपन्नमापन्नमित्यर्थः। अबिभ्रदपुष्णन् श्वसन्नपि मृततुल्य एवेति ॥ ७ ॥ तत्तस्मान्नौ आवयोः मोघं व्यर्थम् । अनर्चतोरपूजयतोः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यद्वा—शतशब्दोऽनन्तार्थकस्तेन सहस्रादिवर्षायुषापि न, किं वक्तव्यमल्पायुषाम्। तयोर्मातापित्रोः ॥ ५ ॥ तन्मध्ये तयोर्मातापित्रोर्मध्ये। पितुः सकाशाद्यः कल्पः स्त्रीणामस्वातन्त्र्यात्सामर्थ्याभावाच्च पितुरित्युक्तं स्वामिभिः। देहेन निजदेहेनैव न तु भृत्यादिना। धनेनालंबुद्धयुत्पादकवसुना। तयोरित्युभयत्रान्वेति काकाक्षिगोलकन्यायेन। तयोर्मातापित्रोः, तं मातृपिताजीविकामददतम्। हीति 'वृद्धौ च मातापितरौ' इत्यादिकां स्मृतिं सूचयति। यस्तयोरित्यत्र टीकायां तन्मध्येऽपि त्वित्येव पाठो न तु पितुरिति। स्वस्य तस्यैवेत्यर्थः। कल्पः शास्त्रविधिनादातुं योग्यः। कर्मणि स्थित इति यावत् ॥ ६ ॥ न केवलं पारत्रिकक्लेश इहापि तेऽयोग्या एवेत्याह—किञ्चेति। स्मृतिमर्थतः पठति—मातरं सर्वावस्थासु मानार्हाम्। साध्वीमक्षताचाराम्। शिशुं स्वजीविकाकृत्यायोग्यम्। गुरुं ज्ञानोपदेष्टारम्। तच्च विप्रमेव तस्यैव ज्ञानोपदेशाधिकारात् "मुखजा उपदेष्टारो बाहुजा रक्षकाः स्मृताः। वर्णानामाश्रमाणाञ्च मुख्योऽभूद्ब्राह्मणो गुरुः।" इत्युक्तेः, "विप्रस्यैवाधिकारोऽस्ति धर्मज्ञानोपदेशने" इति संहितोक्तेश्च। यद्वा—गुरुं ज्ञानवृद्धं विप्रञ्चेति पृथगेव। तत्र विप्रं जातिमात्रम्। 'ब्राह्मणो जन्मना श्रेयान्' इत्युक्तेश्च। प्रपन्नं शरणमागतं यं कं वापि। वृद्धं कुलवृद्धम् ॥ ७ ॥ नन्वस्त्वेतत् प्रकृते किमायातं तत्राह-तन्नाविति। यत एवं शास्त्रार्थस्तत्तस्माद्धेतोः। कंसात् 'कसि-गतिशासनयोः' इति धातोः सर्वहिंसाधिकारणत्वेन तन्नाम्नो राज्ञः। नित्यमहोरात्रम्। उद्विग्नचेतसोः त्रस्तमनसोः। अकल्पयोः शक्तिसामग्रीहीनयोः। एते इतः पूर्वं दिवसा मोघम् "मोघा स्त्री पाटलायां स्याद्धीननिष्फलयोस्त्रिषु" इति मेदिन्युक्तेः निष्फलं यथा स्यात्तथा क्रियाव्ययविशेषणानां क्लीबत्वमेकवचनञ्चेति। अत्राकल्पशब्दः केवलासमर्थस्यैव वाचकः। अकल्पत्वे हेतुः-कंसादिति। मोघमिति दोषोक्तिः। न विद्यते कल्पो याभ्यां तयोः, कंसात्कंससामान्ययुद्धोत्साहवशात्, नित्यमुदारेत एव विग्नचेतसोः पुरीं प्रति चलितचेतसोः 'ओविजी—भयचलनयोः' मोघमित्यादिकाकूक्तिरिति वास्तवोऽर्थः ॥ ८ ॥

---

१. प्रभवो—विज. । २. पोषितः पुनः- विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जननपोषणे पृथगेव कारणे विवक्षिते ताभ्यां पोषणाभावात् ॥ ५ ॥ यस्तयोरित्यत्र टीकायां तन्मध्येऽपि त्वित्येव पाठः नतु पितुरिति स्वस्य तस्यैव मांसं तं खादयन्ति ॥ ६ ॥ वृद्धं कुलवृद्धं कल्पः समर्थोऽपि श्वसन्मृत एव अकल्पस्तु सुतरामित्यर्थः ॥७॥ तदेवात्मनो निर्दिशति । तदिति । अकल्पत्वे हेतुः कंसादिति । वां युवाम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पोषित इति सामान्यतः पित्रोः स्वभावापेक्षया, तत्त्वतस्तु श्रीनन्दयशोदाकृतपोषणाभिप्रायेण, यतो मर्त्त्यो मरणधर्म्मा, तत्रापि शतवर्षमात्रायुषा विशिष्टः ॥ ५ ॥ चकाराभ्यां द्वयोरपि प्राधान्यं द्योत्यते । स्वस्य तस्यैव मांसम् ; हि निश्चितम् ; कल्प इति रोगादिनाऽसमर्थो व्यवर्त्तितः ॥ ६ ॥ कुलवृद्धं किंवा पितुर्विशेषणम, तादृशस्य तस्यावश्यपोष्यत्वात् ; एवमग्रेऽप्यूह्यम् । साध्वीं पतिव्रताम्, गुर्वादीनाञ्च सदा सर्व्वथा पोष्यत्वात्तादृशं विशेषणं नोक्तम् । भार्य्यादयोऽत्र दृष्टान्ततया प्रसङ्गसंगत्या चोक्ताः । कल्प इति पुनरुक्त्या शक्तस्यैव तत्तद्पोषणदोषः, न त्वशक्तस्येति द्रढयति । इति स्वस्व-श्रीदेवक्याद्यपालनदोषः परिहृतः ॥ ७ ॥ तदेवाभिव्यञ्जयति—तदिति । अकल्पयोरित्यत्र हेतुः—कंसादिति, अतो युवामनर्च्चयतोः, अतएव एते कैशोरादिसम्बन्धिनः, मोघं यथा स्यात्तथा विशेषतोऽतिक्रान्ता अतीताः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं युवयोरावयोश्च कामहानिर्जातेत्युक्तम् अथावयोः पुनर्युष्मत्परिचर्यालोपेन धर्महानिरपि जातेत्याह । सर्वार्थसम्भव इति । सर्वेषां पुरुषार्थानां धर्मादीनां सम्भवो यस्मिन् स देहो यतो याभ्यां जनितः पोषितश्च तयोः पित्रोर्निर्वेशं निष्कृतिमानृण्यं मर्त्यः शतवर्षमात्रेणाप्यायुषा नैति नाप्नोति ॥ ५ ॥ तन्मध्ये पितुर्यः पुत्रः कल्पः समर्थः सन्नात्मना देहेन धनेन च पित्रोर्वृत्तिं जीविकां न दद्यान्न कल्पयेत्तं प्रेत्य लोकान्तरे यमदूताः स्वस्यैव मांसं खादयन्ति हि ॥ ६ ॥ किञ्च समर्थोऽपि मात्रादीन् यथोचितमबिभ्रन्न पुष्णाति सः श्वसन्मृतः जीवन्नपि मृतप्रायः ॥ ७ ॥ तत्तस्मान्नित्यं कंसादुद्विग्नं भीतं चेतो ययोस्तयोर्वां युवयोरनर्चतोरपूजयतोः वामिति कर्मणः सम्बन्धविवक्षया षष्ठी असमर्थयोर्नावावयोर्मोघं वृथा बहव एते दिवसाः व्यतिक्रान्ताः । यद्वा वामिति द्वितीया युवामनर्चतोस्तत्र हेतुरकल्पयोस्तत्रापि हेतुर्नित्यं कंसादुद्विग्नचेतसोर्नावावयोर्मोघमेते व्यतिक्रान्ता इत्यन्वयः कंसादुद्विग्नचेतसोरित्यनैश्वर्यमभिनयतोरुक्तिः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सर्वेषामर्थानां मोक्षादिपुरुषार्थानां सम्भव उत्पत्तिर्यस्मात्सर्वार्थसम्भवो देहो याभ्यां जनितः पुनः पोषितश्च तयोः पित्रोः शतायुषा वर्षसहस्रेणापि निर्वेशं निष्कृतिं न याति मर्त्यः अल्पायुः ॥ ५ ॥ अल्पायुश्चेत्कथं निष्करोतीत्यतो यावदायुः पितृपरिचर्या कार्या अन्यथाऽनर्थः स्यादिति वक्ति । यस्तयोरिति । यस्तयोः पित्रोः आत्मना प्रेषितपुरुषमन्तरेण स्वयमेव धनेनालम्बुद्धिजनकेन च द्रव्येण च वृत्तिं जीवनं न दद्यात् तं प्रेत्य यमलोके स्वमांसं खादयन्ति यमभटा इति शेषः आत्मज औरसोऽपि निर्धनश्चेत्किं कुर्यादित्यत आह । कल्प इति । देहेन धनेन च कर्तुं समर्थ इत्यर्थः । हिनाऽत्र वृद्धौ च मातापितराविति स्मृतिं प्रमाणयति ॥ ६ ॥ सूचितस्मृतिमर्थतः प्रतीकयति । मातरमिति । मातरं सर्वावस्थासु मानयोग्या पितरं वृद्धं जरसा ग्रस्तं भार्यां भरणयोग्यामपि साध्वीमक्षतव्रतां सुतं शिशुं स्वजीवनप्रवृत्तावसमर्थं गुरुं ज्ञानोपदेष्टारं विप्रं ज्ञानपूर्णं प्रपन्नं शरणागतं च एतानबिभ्रद्भरणमकुर्वन्सः श्वसन्नपि जीवन्नपि मृतः मृतकल्प इत्यर्थः । कञ्चन वृद्धं काञ्चन साध्वीं कञ्चन शिशुं प्रेङ्खायां शयानं कञ्चन विप्रमिति पृथग्वान्वेतव्यमिति ॥ ७ ॥ नन्वेवमस्तु प्रकृते किमिति तत्राह । तन्नाविति । यत एवं शास्त्रार्थस्तस्मात्कंसात् कसि हिंसायामिति धातोः सर्वहिंसाधिकरणत्वेन तन्नाम्नो भोजपतेर्नित्यमहोरात्रमुद्विग्नचित्तयोः अत एव वामनर्चतोः परिचर्यामकुर्वतोः अकल्पयोः शक्तिसामग्रीहीनयोः नौ आवयोः एते इतः पूर्वं दिवसाः मोघं व्यतिक्रान्ता इत्यन्वयः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कल्पः सर्वेन्द्रियपाटवयुक्तोऽपि श्वसन्मृत एव । अकल्पस्तु सुतरामेवेत्यर्थः ॥ ६-७ ॥ तदेवमात्मनो निर्दिशति अकल्पत्वे हेतुः कंसादिति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सर्वेषां धर्माद्यर्थानां संभवो यस्मिन् स देहो यतो याभ्यां निर्वेशम् आनृण्यम् ॥ ५ ॥ यस्तु कल्पः समर्थः शास्त्रविधिना दातुं योग्यः कर्मवर्त्मनि स्थितः इति यावत् वृत्तिं जीविकां तं प्रेत्य मृत्वा वर्त्तमानं यमदूताः स्वस्य तस्यैव मांसं बलात् तं खादयन्ति ॥६॥ अबिभ्रत् अपुष्णन् ॥ ७ ॥ तत् तस्मात् नौ आवयोः अकल्पयोः अत्राकल्पशब्दः केवलासमर्थस्यैव वाचकः तत्र हेतुः

कंसादिति अत एव मोघमिति दोषोक्तिः न विद्यते कल्पो याभ्यां तयोः कंसात् कंसमाकर्ण्य युद्धोत्साहवशात् नित्यमुदीरत एव विग्नचेतसोः पुरीप्रतिचलितचेतसोः ओविजी भयचलनयोः मोघमित्यादि काकूक्तिरिति वास्तवोऽर्थः ॥ ८ ॥

गूढार्थदीपिनी

अर्थः चतुर्विधपुरुषार्थः। यतः याभ्यां जनितः तयोः पित्रोः। निर्वेशम् आनृण्यन् ॥ ५ ॥ कल्पः समर्थः आत्मजः आत्मना देहेन तयोः वृत्तिम्। प्रेत्य यमलोकं गत्वा। यमदूता इति शेषः ॥ ६ ॥ कल्पश्चेत् अविभ्रत् अपुष्णन् भवति स श्वसन् मृतः जीवन्मृतकः। प्रपन्नं शरणागतम् ॥ ७ ॥ न विद्यते कल्पो याभ्यां तयोः सर्वसमर्थयोः। कंसात् कंसमाकर्ण्य तेन सह युद्धार्थं नित्यमुदोः अत एव पुरीं प्रति विग्नचेतसाः चलितचेतसोश्च वां युवामनर्चतोः नौ आवयोः किं मोघं व्यतीता नैवेति काका व्याख्येयम ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यतो याभ्यां जनितः पोषितश्च तयोर्निर्वेशं निष्कृतिमानृण्यं शतायुषा गतसम्बत्सरात्मकेनायुषापि मर्त्यो न याति ॥५॥ कल्पः समर्थः स्वमांसं खादयन्ति यमदूता इति शेषः ॥ ६–७ ॥ नौ आवयोः अकल्पयोः बालयोर्वामनर्चतोः अपूजयतोः मोघं व्यर्थम् ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

युष्मदुपकारस्य वयं न प्रत्युपकर्तुमीशा इतीशः शंसति। सर्वार्येति। सर्वार्थानां सम्भवो घटनाय यस्मात्सो मोक्षादिसकलपुरुषार्थसाधनं याभ्यां जनितोऽनन्तरं पोषितश्च तयोः पित्रोर्निर्वेशं मर्त्योऽपत्यं शतायुषा शतसंवत्सरात्मनाऽप्यायुषा न याति। मर्त्य इत्यानुकूल्याय शतायुर्वै पुरुष इति श्रुतेः शतायुषेति ॥ ५ ॥ यस्तयोरात्मजः सन्नात्मना तज्जन्येन देहेन धनेन तदपेक्षितधनेन वृत्तिं जीवनोपायं न दद्यान्न कुर्याच्चेत्पादसंवाहनाद्यात्मकमात्मकन्नादिकं धनसाध्यं च न कुर्यात्तं प्रेत्य संयमित्यां स्थितम्। लक्ष्मणः प्रेत्य सुग्रीवमित्यादेः। स्वं मांसं खादयन्ति यमभटा हि यतोऽतस्तत्सेवायां प्रयतितव्यं। अनिर्वाहपक्ष आह। कल्प इति समर्थश्चेदित्यसमर्थश्चेन्नैवं प्रत्यवेयादिति भावः ॥ ६ ॥ वृद्धौ च मातापितराविति मानमर्थतोऽनुकुर्वन्नाह। मातरमिति। वृद्धमिति तावद्वार्धक्यं न मातुरिति ध्वनयितुमिति ज्ञेयं। अन्यथा विपरिमामसाम्यपूर्वोक्तमातृविवक्षया वक्तव्यं वृद्धमिति स्यात्। साध्वीं स्वैकशरणां भार्यां शिशुं। अन्यथा स्वोदरभरणासुशकं सुतं गुरुं शास्त्रोपदेशकं विप्रं मेधाविनमन्यं। विप्रा मेधाविनस्तन्नामसु पाठादित्युग्भाष्यटीकाद्युक्तेः प्रपन्नं शरणागतं कल्प एतदादिरक्षणदक्षोऽप्यविभ्रदपोषयिता यः सः श्वसन्नेव मृतो मृतप्रतीकः। कञ्चन वृद्धं काञ्चन साध्वीं कञ्चन शिशुं गुरुं विप्रमिति व्यातन्वते ॥ ७ ॥ लौकिकी रीतिरेवं भवतु भवन्तौ क्व निवेश्यावित्यतोऽधुनाऽप्यनुदञ्चितमधुमथनव्यतिरिक्ततामती वञ्चयन्तौ वदतः। तदिति। अकल्पयोरसमर्थयोः कंसान्नित्यमुद्विग्नं भीतं चेतो ययोस्तौ तयोर्वामनर्चतोर्दिवसा वासरा मोघं वृथा यथा तथा व्यतिक्रान्ताः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

उपेक्षाशङ्का तु न कर्त्तव्यैव लोकतः स्वार्थमेवापेक्षितत्वात् वेदे तु तस्य बाधकत्वात्तदाह। सर्वार्थसंभव इति। सर्वे अर्था धर्मादयः अस्मिन्नेव मानुषशरीरे सम्भवान्तं तथा लीला अपि सामान्योक्तेः नात्यन्तं भगवत्परता वक्तव्या जनितः पित्रा पोषितो मात्रा आवश्यकपोषो हि तयेव भवति अथवा उभाभ्यां जनितः पोषितश्च भवति यथापयोगं यतो याभ्यां यस्माद्वा तयोर्निर्वेशं निष्कृतिं प्रत्युपकारं शतायुषापि न भवति। मर्त्य इति मरणधर्मा स हि कालेनोपद्रुतः स्वयमेवासमर्थः जीवनेऽपि तयोः कमुपकारं करिष्यति अथवा नायमनृणः यतो मर्त्यो म्रियते न हि दोषाभावे म्रियते वर्षाणां शतेनाप्यानृण्यं न भवतीति। पूर्णमायुर्भुक्त्वापि म्रियते अन्यथा अग्रेऽपि जीवेत् पापेन हि दुःखमेव अन्यथा पुण्यपापोपभोगः सर्वत्रैव नियत इति एतच्छरीरत्याजनेन पुण्यपापयोः कः उपकारः स्यात् आनृण्ये तु तावत्कालं प्रतीक्ष्य तदधिकारिणः स्वसन्तानान् तं दूरीकुर्वन्ति तस्मान्मर्त्यता युक्ता भवति। शतायुषेति—परमावधिः कालस्य शतांवृत्तावप्यनुपयोगे अग्रे नोपयोग एवेति तन्निवृत्तिः तत्रत्यानां देवानां पूर्वमेवाकाङ्क्षानिवृत्तौ शीघ्रं मरणम् अन्यथा तु ततोऽप्यधिकं जीवनमिति शतसंख्या उपलक्षिकृता ॥५॥ तत्र विशेषमाह। यस्तयोरात्मज इति। तयोः पित्रोः शरीराज्जातो न करोत्येव तयोर्निष्कृतिं बुद्धिपूर्वकं तिष्ठत्वन्यत् यो वृत्तिं जीविकां न दद्यात् तं प्रेत्य परलोके मृत्वा स्थित्वा प्रकर्षेण एत्यागत्य वा स्वमांसं तस्यैव मांसं खादयन्ति युक्तश्चायमर्थः तदुद्भवेन शारीरेणोत्पादितं तदीयमेव भवति यथा दासकृतं स्वक्षेत्रोद्भवं वा तच्चेत् स्वार्थमेव नियोगं कुर्यात् शरीरं पोषयेत् परलोकं वा साधयेत् तदा अविशेषात् शरीरेणापि तदुद्भवेन तत्साधयतु मुख्यत्वाच्च तस्मादयमेव दण्डो विहितः। निष्कृतिश्च भवति तदीयमनेन भक्षितमिति परस्वभक्षक एव भवेत्। ननु तेन किञ्चित् अतो देवास्तदुपकारार्थं वृद्ध्यभावाय निष्कृतेश्च सम्भावना नास्तीति तन्मांसमेव तं खादयन्ति। यो हि वृत्तिमेव न दधाति स किमन्यत्करिष्यतीति। एवं सामान्यविशेषप्रकारेण पितृविषयकं दैविकबाधकमुक्त्वा प्रसङ्गात्सामान्यतः तेषां पोषणाभावे जन्मैव निष्फलमिति मृत एवेति मृतवत् तादृश उपेक्षणीय एव स्वस्य जन्मवैयर्थ्यभयात् बुद्धिमांश्च नोपेक्षां करिष्यतीति ॥६॥

अपालने जन्मवैफल्यमाह । मातरं पितरमिति । पितृविशेषणं वृद्धमिति । अन्यथा स एव समर्थः माता त्वग्रिमविशेषणरहितापि पोषणीया साध्वीति भार्या विशेषणं शिशुमिति सुतस्य उपनीतः पश्चाद्भिक्षादिना स्वयमेव स्ववृत्तिं संपादयिष्यति । गुरुं विप्रं पुरोहितमिति यावत् अयं धर्मः क्षत्रियाणां तथैव प्रपन्नं च शरणागतं पृथगुपदेशात् शरणसाहचर्याच्च विप्रपदमुभयत्र सम्बध्यते कल्पः अबिभ्रत् श्वसन्नेव मृतो भवति श्वासमात्रं तस्य परं न तु जीवनोपयोगोऽन्यः कश्चन अतो दोषत्रयेण स्वस्यैवायमपराधः ।।७।। तेन चाकार्यं न तु भवतां काचित्क्षतिरिति निरूपयति । तन्नावकल्पयोरिति । तत्तस्मात्कारणाद्बाधकस्य ज्ञानस्य विद्यमानत्वात् नौ आवयोरेकल्पयोरेव बाधकान्तराभावात् एते दिवसा मोघं व्यतिक्रान्ताः पुरुषार्थसाधका न जाताः तत्र हेतुः वामनर्चतोरिति । युवयोरर्चामकुर्वतोः असामर्थ्यं लोकरीत्या देशान्तरे स्थितः असमर्थो भवत्येव बालत्वाच्च यद्यपि लीलयैवार्चा भवति तथापि कंसान्नित्यमुद्वेग इति न तत्सम्पन्नमित्याह । कंसादिति । स हि नित्यं पूतनादिदैत्यान् प्रेषयति तत उद्वेगः वस्तुतस्तु युवयोर्न्निमित्तं स हि कदा वा भवत्स्वरूपं ज्ञात्वा उपद्रवं कारयिष्यतीति अत एवान्ते तथैव जातम् अत एवैते दिवसा भवदुपयोगाभावात् मोघा जाताः वां युवामनर्चतोः नमस्कारादिना महत्त्वात् पूजादिना च ।। ८ ।।

श्रीसुबोधिनी–सारः

पुत्रतः पितृप्रत्युपकारो नास्तीत्याह यतो याभ्यां सर्वेषां धर्माद्यर्थानां संभवो जन्म यस्मिन् स देहो जनितः पोषितश्चान्ना-दिना तयोः पित्रोः शतायुषा शतवर्षमात्रेणापि मर्त्त्यः पुत्रो निर्वेशं निष्कृतिमानृण्यं न याति ।। ५ ।। आस्तां निवेशाविधिस्तयोर-सेवकस्य नरकपात इत्याह । धिक जीवनं च कल्पः समर्थः य आत्मजः पुत्रः आत्मना देहेन धनेन च तयोर्वृत्तिं जीविकां न दद्यात्तम् अदातारं पुत्रं प्रेत्य यमलोके स्वस्यैव मांसं खादयन्ति दूता हि निश्चितम् ।। ६ ।। मातरं वृद्धं पितरं साध्वीं सतीं भार्यां शिशुं बालं सुतं गुरुं ब्राह्मणं प्रपन्नं शरणागतं च यः कल्पः शक्तोऽबिभ्रत् न धारयति स जीवन्मृत एव पापादिनापि तद्भरण-स्यादोषकरत्वात् "अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्" इत्युक्तेस्तदर्थं यतितव्यमिति भावः ।। ७ ।। स्वापराधं क्षमापयतोऽ-शक्तस्य तद्दोषाभावत् इत्याह । तत्तस्मात् कंसात् नित्यं कंपित चेतसोः अकल्पयोरसमर्थयोः वां युवामनर्चतोरपूजयतोः नौ आव-योरेते दिवसा मोघं व्यर्थं व्यतीताः ।। ८ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं युवयोरावयोश्च सुखहानिर्जातेत्युक्तम् । अथ 'आवयोस्तु युष्मत्परिचर्यालोपेन धर्महानिरपि जाता' इत्याह–सर्वार्थ-सम्भव इति । सर्वेषां धर्मादीनां पुरुषार्थानां सम्भवो यस्मिन् स देहो यतः याभ्यां जनितः पोषितश्च तयोः पित्रोर्निर्वेशं निष्कृति-मानृण्यं मर्त्यः शतवर्षेणापि आयुषा तावत्पर्यन्तनिरन्तरपरिचर्ययापि न याति ।। ५ ।। तन्मध्ये तु यः आत्मजः पुत्रः कल्पः समर्थः सन् आत्मना देहेन धनेन च तयोः पित्रोर्वृत्तिं अन्नवस्त्रादिजीविकां न दद्यात् न कल्पयेत् तं प्रेत्य यमलोके यमदूताः स्वस्य तस्यैव मांसं खादयन्ति । हीति । नात्र सन्देहः कार्य इत्यर्थः ।। ६ ।। किञ्च यदि कल्पः समर्थः सन् मात्रादीन् यथोचितमबिभ्रत् न पुष्णाति स श्वसन् जीवन्नपि मृतप्राय एव ।। ७ ।। यस्मादेवं तस्माद्वां युवयोरनर्चतोरपूजयतोर्नौ आवयोरेते एकादशवर्षात्मका दिवसाः मोघं व्यर्थमेवातिक्रान्ता गताः । 'तत्रापि न ज्ञानपूर्विकोपेक्षा, किन्तु सामर्थ्याभाव एव हेतुः' इत्याह अकल्पयोरिति । तत्रापि हेतुमाह–कंसान्नित्यमुद्विग्नं भीतं चेतो ययोस्तयोरिति ।। ८ ।।

अन्वितार्थप्रकाशिका

युष्मत्सेवालोपादावयोर्द्धर्मोऽपि लुप्त इत्याहतुः—सर्वेति ।। सर्वेषां धर्मादीनां पुरुषार्थानां संभवो यस्मिन्स देहो यतः याभ्यां जनितः पोषितश्च तयोः पित्रोर्निर्वेशं निष्कृतिमानृण्यं मर्त्यः शतवर्षेणाप्यायुषा तावत्पर्यन्तं निरन्तरपरिचर्ययापि न याति ।। ५ ।। य इति ।। यः आत्मजः पुत्रः पितुरपेक्षया कल्पः समर्थः सन् अपि आत्मना देहेन धनेन च तयोः पित्रोर्वृत्तिमन्न-वस्त्रादिजीविकां न दद्यात् न कल्पयेत् । तं प्रेत्य यमलोके यमदूताः स्वस्य तस्यैव मांसं तमेव खादयन्ति ।। ६ ।। मातरमिति ।। कल्पः सन् मातरं पितरं वृद्धं साध्वीं भार्यां शिशुं सुतं गुरुं विप्रं प्रपन्नं शरणागतं च यथोचितम् अबिभ्रत् अपुष्णन् भवति । स श्वसन्नपि मृतप्राय एव निष्फलजीवन इति ।। ७ ।। तदिति ।। तत् ततो हेतोः अकल्पयोः असमर्थयोः कंसान्नित्यमुद्विग्नं भीतं चेतो ययोस्तयोः वां युवामनर्चतोर्नौ आवयोरेते एकादशवर्षात्मका दिवसाः मोघं व्यर्थमेवातिक्रान्ता गताः । वास्तवोऽर्थस्तु न विद्यते कल्पो याभ्यां तयोः कंसात् कंसमाकर्ण्य युद्धोत्साहवशात् नित्यं मुद् ययोस्तयोः नित्यमुदोः अत एव विग्नं पुरीं प्रति चलितं चेतो ययोः "ओविजी भयचलनयोः" मोघमित्यादि काकूक्तिः ।। ८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इत्थं द्वाभ्यां कामहानिमुक्त्वा इदानीं युष्मच्छुश्रूषालोपा जनितः पोषितश्च तयोर्जननीजनकयोः निर्वेशं प्रत्युपकारं मर्त्यो जनः शतवर्षपर्य्यन्तेनायुषापि न याति ।। ५ ।। कल्पः शक्तः आत्मना देहेन वृत्तिमाजीविकां प्रेत्यपरलोके गतं तं यमकिं

कराः स्वस्य तस्यैव मांसं भक्ष्यन्ति हि ॥ ६ ॥ तौ धर्मलोपोप्यजनीत्याह सर्वेति ॥ सर्वेषां चतुःपुरुषार्थानां संभवो येन स देहो यतो याभ्यां ॥ प्रपन्नं शरणागतं कल्पः समर्थः सन् अबिभ्रत् यो न पुष्णाति सः श्वसन् जीवनपि मृतोज्ञेयः ॥ ७ ॥ तदेव स्वविषये दर्शयन्नाह तत्रास्माद्धेतोः असमर्थयोः अतो युवां अनर्चतोः सेवाम् कुर्वतो नौ आवयोः एते दिवसाः मोघं व्यर्थं गताः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं युवयोरावयोश्च कामहानिर्जातेत्युक्तमथावयोः पुनर्युष्मत्परिचर्यालोपेन धर्महानिरपि जातेत्याह ॥ सर्वार्थसंभव इति ॥ सर्वेषां धर्मादीनां पुरुषार्थानां संभवो यस्मिन् सः देहः, यतो याभ्यां जनितः, पोषितश्च, तयोः पित्रोः, निर्वेशं निष्कृतिमानृण्यमिति यावत् । मर्त्यः, शतायुषा शतवर्षपरिमितपुरुषायुर्मात्रेणापि, न याति न प्राप्नोति ॥ ५ ॥ य इति ॥ यः आत्मजः पुत्रः, कल्पः समर्थः सन्, आत्मना देहेन, धनेन च, चाद्वा चापि, तयोः पित्रोः, जीविकां, न दद्यान्न कल्पयेदित्यर्थः । तमेवं विधं पुत्रं, प्रेत्य लोकान्तरे इत्यर्थः । यमदूताः, स्वमांसं तन्मांसमेव खादयन्ति हि ॥ ६ ॥ मातरमिति ॥ किं च यः पुरुषः, मातरं पितरं वृद्धं वृद्धतोपेतं पितामहादिं, साध्वीं स्वधर्मनिष्ठां, भार्यां, शिशुं सुतं मृतमातरं बालापत्यं, गुरुं, विप्रतिपन्नं विपदुपेतं यं कमपि जनं, कल्पः स्वयं पोषणसमर्थः सन्, अबिभ्रत् न पुष्णातीत्यर्थः । सः श्वसन् च जीवन्नपि, मृतो मृतप्राय एव ॥ ७ ॥ तदिति ॥ तत्तस्मात्, नित्यं कंसात्, उद्विग्नं भीतं चेतो ययोस्तयोः, अकल्पयोरसमर्थयोः, वां युवां, अनर्चतोः नावावयोः, एते दिवसाः, मोघं वृथैव, व्यतिक्रान्ताः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सर्वार्थेति : १०.४५.५.
सर्वार्थप्रभवं शरीरमभवद्याभ्यां पितः पोषितं पित्रोर्जातु शतायुषाऽपि न तयोर्निर्वेशकृत् स्यात्सुतः ।
शास्त्रार्थं वितरं त्वमेवमवदोऽशक्तं च मां वेत्सि तत् कां नामोपकृतिं करोमि किमु वा तात त्वमाकाङ्क्षसि ॥ ४ ॥

यस्तयोरिति : १०.४५.६.
नाल्पां कल्पतमोऽपि कल्पयति यो वृत्तिं स्वपित्रोरसौ पुत्रो गर्ह्यतमो यथा निगदितस्तत्तुल्यविन्न्यायतः ।
तादृक् चेज्जनिता तथैव भवितेत्यर्थोऽर्थतः सिद्ध्यतीत्यालोच्येश निजोक्तिमात्मजमिमं संरक्ष कल्पोऽसि यत् ॥ ५ ॥

मातरमिति : १०.४५.७.
प्रपन्नप्राणभृत्त्राणं प्रोक्तमीश त्वयैव यत् । तदालस्यं परित्यज्य प्रपन्नं पाहि मां प्रभो ॥ ६ ॥

कृष्णप्रिया

हे तात ! जिस काया से वेदविहित धर्मादि चार पुरुषार्थ प्राप्त किए जाते हैं वैसी देव दुर्लभ नर तनु जिन माता पिता से मिली एवं पाली गई, उन माता पिता के ऋण से उपकारों से, यद्यपि संतान शत वर्ष की आयु से सेवा करे, भक्तिभाव से सेवा करे फिर भी वे ऋण नहीं चुका सकते, न तो ऋणमुक्त हो सकते हैं ॥ ५ ॥ हे तात ! जो पुत्र सर्व प्रकार से सेवाक्षम है और भक्तिभावपूर्वक तन-मन-धन से माता-पिता की शुश्रूषा नहीं करता और उत्तरावस्था में माता पिता का पालन एवं पोषण नहीं करता है वैसे ऋणीपुत्र को परलोक में देवता लोग उसका मांस ही खिलाते हैं ॥ ६ ॥ जो मनुष्य अपने वृद्ध माता, पिता, पतिव्रता पत्नी, उपनयन संस्कार नहीं पाया वैसा बालक पुत्र, उपवीत दीक्षा देने वाले गुरु वेदवेत्ता-वेदरक्षक विप्र, शरणागत आदि का स्वयं समर्थ होते हुए भी जो मनुष्य पालन रक्षण आदि नहीं करता है वही जीवन्मृत ही है । ७ ॥ हे पिताजी ! हम बालक थे, परतन्त्र थे, पूतनादि के कारणों से नित्य उद्विग्न थे, विशेष तो मन में यह सतत विचारधारा चलती थी कि मथुरा जाकर माता पिता का दर्शन सेवा आदि करें लेकिन कंस को ध्यान में बात आ गई कि हम आपके पुत्र हैं एवं भगवदवतार हैं तब तो वह आप को अधिक कष्ट पहुँचायेगा इसलिए समीप में न आते और रहने से वास्तविक उद्वेग था। पिताजी ऐसे अनेक कारणों से आप की सेवा न कर पाए अतः हमारे इतने दिन निष्फल गए ॥ ८ ॥

तत् क्षन्तुमर्हथस्तात[1] मातर्नौ परतन्त्रयोः । अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा[2] भृशम् ॥ ९ ॥

श्रीशुक उवाच

इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा । मोहितावङ्कमारोप्य परिष्वज्यापतुर्मुदम् ॥ १० ॥
सिञ्चन्तावश्रुधाराभिः स्नेहपाशेन [3]चावृतौ । न [4]किञ्चिदूचतू राजन् बाष्पकण्ठौ विमोहितौ ॥ ११ ॥
एवमाश्वास्य पितरौ भगवान् देवकीसुतः । मातामहं तूग्रसेनं यदूनामकरोन्नृपम् ॥ १२ ॥

---

१. स्तन–वीर. । २. दो–वीर. विज. । ३. सं–वीर. विज. । ४. क्षमोक्तु–प्रा. पा. ।

कर्दमक्षमा

अन्वयः—हे तात ! हे मातः, परतन्त्रयोः, दुर्हृदा, भृशम्, क्लिष्टयोः, वाम्, शुश्रूषाम्, अकुर्वतोः, सत्, क्षन्तुम् अर्हथ ॥ ९ ॥ इति मायामनुष्यस्य, विश्वात्मनः, हरेः, गिरा, मोहितौ, अङ्कम्, आरोप्य, परिष्वज्य, मुदम्, आपतुः ॥ १० ॥ राजन्, विमोहितौ, वाष्पकण्ठौ अश्रुधाराभिः सिञ्चन्तौ, स्नेहपाशेन न, आवृतौ, न किंचित्, ऊचतुः ॥११॥ देवकीसुतः, भगवान, एवम्, पितरौ, आश्वास्य, उग्रसेनम्, मातामहम्, यदूनाम्, नृपम् अकरोत् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दुर्हृदा शत्रुना कंसेन कृत्वा ॥ ९-११ ॥ आश्वास्य सान्त्वयित्वा ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतदेव स्फुटयति—तदिति । यत आवामकल्पौ तत्तस्माद्धेतोः । दुर्हृदाऽशोभनमनसा 'दुरशोभनदुःखयोः' इति यादवः परतंत्रयोरिति मनुष्यनाट्यानुकरणम् । नौ आवयोः ॥ तदर्चनम् । हे तात, मातरिति पुनः संबोधनं स्नेहभरजननार्थम् । तातमातृत्वादेव शुश्रूषामकुर्वतोरपि नौ क्षन्तुमर्हथः । किञ्च—परतंत्रयोर्निह्नुतवासेनास्वाधीनयोरतो दुर्हृदा कंसेन क्लिष्टयोरावयोरसामर्थ्याच्चेति भावः । तत्र श्रीकृष्ण उवाचेति क्वचिदस्ति ॥ ९ ॥ इत्युक्तरीत्या । मायया कृपया गृहीतनरवपुषः । विश्वात्मनः सर्वान्तर्यामिणः । मोहितौ विस्मारितवात्सल्यव्यतिरिक्तसर्वौ । तत्र हेतवः—मायामनुष्यस्य कृपाप्रधानेन नराकृतिपरब्रह्मणः, हरेरसमोदूर्ध्वमाधुर्येण सर्वमनोहरस्य, विश्वात्मनः परमात्मत्वेन विश्वस्यापि निरुपाधिपरमप्रेमास्पदस्येति । अङ्कमारोप्य ताविति शेषः विश्वनाथस्तु—इति एवं माया कपटं मनुष्येषु यस्येत्याह ॥१०॥ वाष्पकण्ठौ गद्गदवाचौ । चकार उक्तसमुच्चये । स्नेहपाशेनावृतौ सन्तौ पाशात्ववदपरिहार्येण च प्रेम्णा बहिरन्तर्व्याप्यमानौ अत एव विमोहितौ न किंचिदप्यनुसंधातु समर्थौ बाष्परुद्धकण्ठौ च सन्तौ न किमप्यूचतुश्च, किन्तु केवलमश्रुधाराभिः सिञ्चन्तौ तयोरभिषेकमिव कुर्वन्तौ स्थिताविव्यर्थः । हे राजन्निति स्नेहभरस्वभावो भवतागम्य इवेति भावः । तदिदं वृत्तं श्रीनन्दादीनामगोचर एव ज्ञेयम्, उभयत्रैव भगवता पितृत्वव्यञ्जनात् ॥ ११ ॥ यदूनां नृपं रायदुजस्वे स्थापयामास ॥ मातामहमित्यवश्यमान्यत्वेन पितृभ्यां सह सम्बन्धविशेषेण तत्संमतत्वेन च यदुराजयोग्यतोक्ता । अत एव तु शब्दः । तद्विधाने मुख्यं प्रयोजनं स्वस्य गोकुलगमनेच्छयैव ज्ञेयम् । तथा च श्रीहरिवंशे तं प्रति श्रीभगवद्वाक्यम्—"अहं स एव गोमध्ये गोपैः सह वनेचरः । प्रीतिमान्विचरिष्यामि कामचारी यथा गजः ॥ एतावच्छतशोऽप्येवं सत्येनैव ब्रवीमि ते । न मे कार्यं नृपत्वेन विज्ञाप्यं क्रियतामिदम् । भवान्राजा तु मान्यो मे यदूनामग्रणीः प्रभुः । विजयायाभिषिञ्चस्व स्वराज्ये राजसत्तम ॥" इति । नृपं राजानमकरोन्न तु पूर्ववदधिपं, यतो भगवान् कर्तुमकर्तुमन्यथा कर्तुं समर्थत्वाद्भक्तवात्सल्येन ययातिशापमपि नापेक्षितवानिति भावः । अतः पूर्वेषां राजत्वं तु स्वकपोलकल्पितमित्यायातम् । अस्य राजत्वविधानं वंधनान्मोचयित्वेति । ज्ञेयम्, प्रथमाध्यायान्ते निगृह्य त्युक्तेः । अत एव श्रीविष्णुपुराणेऽपि—"उग्रसेनं ततो बन्धान्मुमोच मधुसूदनः । अभ्यषिञ्चत्तथैवैनं निजराज्ये हतात्मजम् ॥" इति । श्रीहरिवंशे तु—यदुग्रसेनस्य कंसशोकादिकं तत्तु लोकव्यवहारमात्रेणाकृतमिति श्रीशुकेन नादृतम् । यच्च तस्य वसुदेवादेरपि कंसेनानिग्रहणं तादृशमन्यच्च कल्पभेदेन व्यवस्थेयम् । विश्वनाथस्तु—'एवमाश्वास्य' इत्यादिकं श्रीनन्दस्य परोक्षमेव, मत्पुत्रं युद्धश्रान्तमेते परमानंदमत्ताः स्नेहेन भोजयितुमन्तःपुरं नयन्ति, नयन्तु, अहन्तु संप्रति पुत्रार्थे गतभीः स्वावास एवाह्निकं कृत्यं करवै इत्युक्त्वा तेन तत्रैव गतत्वात् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदनर्चनं हे तात ! मातरिति पुनः सम्बोधनं स्नेहभरजननार्थं तात मातृत्वादेव शुश्रूवामकुर्वतोरपि नौ क्षन्तुमर्हथः । किञ्च परतन्त्रयोः निह्नुतवासेनास्वाधीनयोरतो दुर्हृदा कंसेन क्लिष्टयोरावयोरसामर्थ्याच्चेति भावः ॥ ९ ॥ तत्र श्रीशुक उवाचेति क्वचिदस्ति मोहितौ विस्मारितवात्सल्यव्यतिरिक्तसर्वौ तत्र हेतवः मायामनुष्यस्येति कृपाप्रधानेन नराकृतिपरब्रह्मणः । हरेरसमोदूर्ध्वमाधुर्येण सर्वमनोहरस्य विश्वात्मनः परमात्मत्वेन विश्वस्यापि निरुपाधिपरमप्रेमास्पदस्येति अङ्कमारोप्य ताविति शेषः ॥१०॥ चकार उक्तसमुच्चये । स्नेहपाशेनावृतौ सन्तौ पाशात्ववदपरिहार्येण दीर्घेण च प्रेम्णा बहिरन्तर्व्याप्यमानौ अतएव विमोहितौ न किञ्चिदप्यनुसन्धातुं वाप्यरुद्धकण्ठौ च सन्तौ न किञ्चिदप्यूचतुश्च किन्तु केवलमश्रुधाराभिः सिञ्चन्तौ तयोरभिषेकमिव कुर्वन्तौ स्थिताविव्यर्थः । हे राजन्निति स्नेहभरस्वभावो भवता गम्य एवेति भावः । तदिदं वृत्तं श्रीनन्दादीनामगोचर एव ज्ञेयम् उभयत्रैव भगवता पितृत्वव्यञ्जनात् ॥ ११ ॥ मातामहमित्यवश्यमान्यत्वेन पितृभ्यां सह सम्बन्धविशेषेण तत्सम्मतत्वेन च यदुराजयोग्यतोक्ता । अतएव तुशब्दस्तद्विधाने मुख्यं प्रयोजनं स्वस्य गोकुलगमनेच्छयैव ज्ञेयं च तथाच श्रीहरिवंशे तं प्रति श्रीभगवद्वाक्यम् "अहं स एव गोमध्ये गोपैः सह वनेचरः । प्रीतिमान् विचरिष्यामि कामचारी यथा गजः । एतावच्छतशोऽप्येवं सत्येनैव ब्रवीमि ते । न मे कार्यं नृपत्वेन विज्ञाप्यं क्रियतामिदम् । भवान् राजा तु मान्यो मे यदूनामग्रणीः प्रभुः । विजयायाभिषिच्यस्व स्वराज्ये

राजसत्तमे''ति। नृपं राजानमकरोन्नतु पूर्ववदधिपं यतो भगवान् कर्तुमकर्तुमन्यथा कर्त्तुं समर्थत्वात्। भक्तवात्सल्येन ययातिशापमपि नापेक्षितवानिति भावः। अतः पूर्वेषां राजत्वन्तु स्वकपोलकल्पितमिस्यायातम्। अस्य राजत्वविधानं बन्धनान्मोचयित्वा इति ज्ञेयम्। प्रथमाध्यायान्ते निगृह्य त्युक्तेः। अतएव श्रीविष्णुपुराणेऽपि। ''उग्रसेनं ततो बन्धान्मुमोच मधुसूदनः। अभ्यषिञ्चत्तथैवैनं निजराज्ये हतात्मज''मिति। हरिवंशे तु यदुग्रसेनस्य कंसशोकादिकं तत्त् लोकव्यवहारमात्रेणानुकृतमिति श्रीशुकेनानादृतं यच्च तस्य वसुदेवादेरपि कंसेनानिग्रहणं तादृशमन्यच्च कल्पभेदेन व्यवस्थितम्॥ १२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे तात! हे मातरिति पुनः सम्बोधनं स्नेहभरजननार्थम्, शुश्रुषामकुर्व्वतोरपि नौ क्षन्तुमर्हथः, अस्मदपराधं क्षन्तुं योग्यौ भवथः, पुत्रापराधस्य पितृभ्यां स्नेहेन क्षम्यत्वात्। किञ्च, परतन्त्रयोर्निह्नुतवासेनास्वाधीनयोः, अतो दुर्हृदा कंसेन हेतुना क्लिष्टयोः, असामर्थ्याच्चेति भावः॥ ९ विश्वस्यात्मान्तर्य्याम्यपि मायया कृपया मनुष्यः, अतएव हरिर्जगन्मनोहरो यो भगवान् तस्य; यद्वा, यथोत्तरं हेतुहेतुमत्ता। ततश्च विश्वस्यात्मा परमप्रिय इत्यर्थः। तस्य गिरा मोहितौ आकृष्टचित्तौ, अङ्कमारोप्य साग्रजं हरिमेव वा, तस्मिन्नेव स्नेहाधिक्यात्॥ १०॥ 'च' अपि, किञ्चिदपि, नोचतुर्वक्तुं न शेकतुः। कुतः? वाष्परुद्धकण्ठौ; किञ्च, विशेषेण मोहितौ किञ्चिदप्यन्यदनुसन्धातुमशक्तावित्यर्थः। अतः केवलमश्रूणां धाराभिः सिञ्चन्तौ तं स्नपयन्तौ; तत्र हेतुः स्नेहेति। आवृतौ सर्व्वं वेष्टितौ, पाशरूपेण स्नेहस्य परमं दार्ढ्यं दैर्घ्यादिकञ्च ध्वनितम्। हे राजन्निति स्नेहभरस्वभावो भवतावगम्यत एवेति भावः॥ ११॥ मातामहमिति सर्व्वसान्यत्वेन पितृभ्यां सह सम्बन्धविशेषेण तत्सम्मतत्वेन च यदुराजयोग्यतोक्ता, अतएव तु-शब्दः; तथा च श्रीहरिवंशे तं प्रति श्रीभगवद्वाक्यम् (विष्णु० प० ३२।५२)—'भवान् राजास्तु मान्यो मे यदुनामग्रणी प्रभुः। विजयायाभिषिच्यस्व स्वराज्ये राजसत्तम।' इति। नृपं राजानमकरोत्, न तु पूर्व्ववदधिपम्, यतो भगवान् भक्तवात्सल्यादिगुणप्रकटनपरः, अतो भक्तवात्सल्यत्वेन यदुशापो नाशित इति भावः; तच्च बन्धनान्मोचयित्वेति ज्ञेयम्, प्रथमाध्यायान्ते निगृह्य त्युक्तेः। अतएव श्रीविष्णुपुराणेऽपि—'उग्रसेनं ततो बन्धान्मुमोच मधुसूदनः। अभ्यसिञ्चत्तथैवैनं निजराज्ये हतात्मजम्। इति हरिवंशे च यदुग्रसेनस्य कंसशोकादिकं तथा तस्य वसुदेवादेरपि कंसेनानिग्रहणं तादृशमन्यच्च कल्पभेद-व्यवस्थया परिहार्य्यम्। पूर्व्वं साग्रज इत्युक्तेऽप्यधुना देवकीसुत इति केशवस्य तस्यैवोक्तिः, पित्रोस्तादृशाश्वासने तथोग्रसेनराजत्व-यदुकुलसन्तर्पणादौ तद्गुण-माधुर्य्यस्यैव शक्तेः॥ १२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे मातः! परतन्त्रयोरावयोस्तत् युष्मदनर्चायां निमित्तभूतायां तदागोऽपराधं तत् क्षन्तुमर्हथः कथं भूतयोः भृशं नितरां क्लिष्टयोर्वा युवयोः शुश्रूषामकुर्वतोरत एव दुर्हृदोर्दुरात्मनोः॥ ९॥ इतीत्थं विश्वात्मनो मायया स्वसङ्कल्पेन न मनुष्यस्य हरेर्गिरा मोहितौ देवकीवसुदेवौ पुत्रावङ्कमारोप्य परिष्वज्य च मुद प्रापतुः॥१०॥ हे राजन्! विमोहितावत एव पाशेन यन्त्रितौ बद्धावश्रूणां धाराभिः पुत्रौ सिञ्चन्तौ वाष्पं कण्ठयोर्ययो स्तो किञ्चिदपि नोचतुः॥११॥ इत्थं भगवान् देवकीसुतः पितरावाश्वस्य सान्त्वयित्वा-मातामहमुग्रसेनं यदूनां नृपमधिपतिमकरोत्॥ १२॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

एतदेव विशिनष्टि। तत्क्षन्तुमिति। दुर्हृदोः दुःखयुक्तमनसोः दुरशोभनदुःखयोरिति यादवः॥ ९॥ विश्वात्मनः सर्वान्तर्यामिणः॥ १०-१२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मोहितौ विस्मारितवात्सल्यातिरिक्ताखिलौ। तत्र हेतवः। माया मनुष्यस्य कृपाप्रधाननराकृतिपरब्रह्मणः हरेः असमभोर्ध्वमाधुर्येण सर्वमनोहरस्य विश्वात्मनः परमात्मत्वेन विश्वस्याऽपि निरुपाधि परमप्रेमास्पदस्येति॥९-११॥ नृपं राजानमकरोत् नतु पूर्ववदधिपम्। यतो भगवान् कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वाद्भक्तत्वात्वात्सल्येन ययातिशापमपि नापेक्षितवानित्यर्थः॥ १२-१८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नौ आवयोर्द्वितीयार्थे षष्ठी पक्षे परतन्त्रयोरिति दुर्हृदा कंसेन क्लिष्टयोरिति वामित्यस्य विशेषणे ज्ञेये॥ ९॥ इति एवं माया कपटं मनुष्येषु यस्येति गड्वादिः॥ १०-११॥ एवमाश्वास्येत्यादिकं श्रीनन्दस्य परोक्षमेव। मत्पुत्रं युद्धश्रान्तमेते परमानन्दमत्ताः स्नेहेन भोजयितुमन्तःपुरं नयन्ति तन्नयन्तु अहन्तु सम्पति पुत्रार्थे गतभीः स्वावासे एवाह्निकं कृत्यं करवै इत्युक्त्वा तेन तत्रैव गतत्वात्॥ १२॥

गूढार्थदीपिनी

नौ आवयोः तत् अपराधाचरणम् । दुर्हृदा कंसेन । परेति क्लिष्टेति लोकव्यवहाराय ॥९॥ मापया कृपया ॥१०-१२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

दुर्हृदा दुरात्मना कंसेन भृशं क्लिष्टयोः अतएव वां युवयोः शुश्रूषामकुर्वतोः तत्तस्मात् क्षन्तुमर्हथः ॥ ९ ॥ मायया दुष्टजनविशेषविवोहिन्या मनुष्यवत्प्रतीयमानस्य मायाश्रितानां नरदारकेणेत्युक्तेः ॥ १०-१२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तात हे मातः पूर्वं पूर्वं मात्रुक्तिरत्र तु तातेति पुरा पित्रुक्तिश्च माता पूर्वरूपं तत्पूर्वोऽपि पितेति युक्ते । परतन्त्रयोर्वा शुश्रूषां सेवामकुर्वतोः क्लिष्टयोः क्लेशभागिनोर्दुर्हृदोर्मनः शुद्धिरहितयोरिषत्समयपर्यन्तं कृतं तदागः क्षन्तुमर्हथः । एवं क्लिष्टवौमिति वाऽन्वयः ॥ ९ ॥ विश्वात्मनः सर्वान्तर्नियामकस्य मायामनुष्यस्य हरेगिरा मोहितौ तौ मातापितरौ परिष्वज्य मुदमापतुः । अस्माभिरेतत्स्वारस्यवश्यतयाऽध्यायान्स्वश्लोके शङ्कितौ न सस्वजाते इत्यर्थापितं श्लिष्टतरमिति मन्तव्यं ॥ १० । अश्रूणामानन्दजानां धारास्ताभिर्न किञ्चिद्बाष्पेणोष्मणा प्रतिरुद्धकण्ठत्वात् ॥ ११ ॥ उग्रसेनं मातामहं यदूनां नृपं राजानम् ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु सामर्थ्यस्य विद्यमानत्वात्तदैवसमागत्य कथं कंसो न हत इति चेत्तत्राह । तत्क्षन्तुमर्हथ इति । स त्वपराधोऽस्ति परमद्धं स्वयमेकाकिना आलौकिकेन प्रकारेण समागत्य हन्तुमुचितो भवति तथा सति अवतारवैयर्थ्यं हन्तुं च न शक्यते अलौकिकात्तस्य वधो वरान्निषिद्ध इति तथापोरश्वरत्वात् पित्रोरनुरोधेन मारणीयो भवेत् तन्न कृतमित्यपराधः क्षन्तव्यः क्षमायां तात मातरिति मातृत्वं पितृत्वं—च प्रयोजकं नौ आवयोरिति उभयोरयं दोषः समानः किंच नैकान्ततोऽस्मद्दोषः यतः परतन्त्रावावां नन्दाधीनौ तथाहि बुद्धिरुत्पादिता तस्यातिक्रमे प्राणानेव त्यजेत् अतएव कालीयावसरे परीक्षितः तेन सहागमने परराष्ट्रवत् युद्धेन मारणं प्रसज्येत तत्तस्यैवाननभिप्रेतम् एतच्च परीक्षितमिन्द्रयागभङ्गोपदेशेन अलौकिकत्वात्तैरङ्गीकृतमपि एतत्तु प्रजात्वादङ्गीकारमपि नार्हति अतः परतन्त्रयोरशक्या सेवा अपरामाह । अकुर्वतोर्वां शुश्रूषामिति । कंसादिमारणेन लोकेऽपि सामर्थ्यं प्रतीतमिति सेवायोग्यता स्वार्थं हि सर्वमिति पुत्रादपि सेवा मन्यत एव दुर्हृदेति तस्य क्लेशदाने न कश्चित्पुरुषार्थः सिद्धः किं तु हृदयदोषात् केवल क्लेषितः तत्रापि भवदादिबन्धेन सुरतरामेव क्लेशं प्रयच्छतीति भृशमित्युक्तम् ॥ ९ ॥ नन्वीश्वरः कथमेवमनीश्वरवद्वदतीतिचेत्तत्राह । इतीति । मायया मनुष्यो यथा कायिकं चेन्मायिकं वाचनिकमपि तथैव कर्तव्यमिति मनुष्यत्वमात्रं प्रदर्शितं मायिकमिति न भगवति काचित्क्षतिः मायिकेषु तु सर्वमेव मायिकं ननु कंसादिवधार्थं तथा कृतवान् अत्र प्रयोजनभावात् जातं ज्ञानं किमिति नाशयतीत्याह । हरेरिति । अन्यथा तौ पूर्वमपि क्लिष्टौ ज्ञानं च क्लेशात्मकं साधनमेव परं तत्पुरुषार्थस्य चिन्ताद्यपगमात् तदानीमपि सुखमिव प्रतिभाति अतो ज्ञानेन दुःखं प्राप्स्यतीति । नन्वत्यन्तोपकारी फलाव्यभिचारिमार्गेण यतमानं किमिति व्यावर्तयति नानान्तरीयकञ्च दुःखं नात्यन्तं द्वेष्यमत आह । विश्वात्मन इति । स हि परमदयालुः सर्वास्यात्मा यथासुखं सर्वान् प्रेरयतीति भक्त्यैव स कृतार्थः कर्तव्य इति युवां मां पुत्रभावेनेति मुक्तेः सिद्धत्वात् सिद्धसाधनं ज्ञानमिति ज्ञाननिराकरणार्थं वाचा मोहनमुचितमेव ततो मोहितौ तदानीमेवपरिष्वज्य मुदमापतुः अन्यथा देहावसान एव सुखं स्यात् ॥ १० ॥ ततो लौकिकं सुखं महदेव जातमित्याह । सिञ्चन्तावितिअश्रुधाराभिः पुत्रौ कर्म सिञ्चन्तौ जातौ अश्रूणां धाराभिः बहुकालवियोगस्मरणात् स्नेहपाशेन च आवृतौ पाशपदेनैव लौकिकत्वं पुत्रत्वं चोक्तं ततः न किंचिदुक्तवन्तौ इदमप्येकं मोहकार्यं निर्भरतया पुत्रस्नेहपरत्वम् अन्यथा स्तुतौ अवश्यं गुणा वक्तव्या इति पुनरपि ज्ञानमुद्बोधितं स्यात् राजन्निति सम्बोधनं श्रवणार्थम् अवचने दृष्टं हेतुमाह । वाष्पकण्ठाविति । सर्वथा भगवत्स्पर्शेऽपि मोहोऽनुवृत्त इति अद्य तयोर्दृढं मोहमुत्पाद्य निश्चिन्तो जात इति वक्तुमाह । विमोहिता विति ! अन्ते पुनर्विशेषेण मोहितौ यथा न कदाचिदपि आत्मज्ञानं भगवज्ज्ञानं वा तयोरुदेति ततः प्रस्यापत्ति वक्ष्यति ज्ञानाध्याये अन्यथा भगवानिष्टकर्ता स्यात् अतो निरोधे समाप्ते पश्चात् निरूपणम् ॥ ११ ॥ एवं पित्रोर्निरोधमुक्त्वा सर्वयादवानां निरोधं वदन् प्रथमतो राज्ञ उग्रसेनस्य निरोधमाह । एवमिति । पितरावाश्वास्य मातामहं यदूनां नृपमकरोत् मातामहत्वं स्पष्टयति । देवकीसुत इति । भाक्तहितकारित्वाय यतोऽवतारः पितरि श्वशुरे च राजनि दुहितुर्जामातुश्च चिन्तारहितो महान् भोगो भवतीत्यनुसिद्धम् अतो न वसुदेवं राज्येऽभिषिक्तवान् स च क्लिष्टो भवेत् पुत्रा हता इति एवं च सति उग्रसेनार्थमेव कंसो हत इति तेन गृहीतं राज्यं तस्मै दत्तमिति । तुशब्दः स्वपक्षं स्वसंबन्धिपक्षं च व्यावर्तयति नाम्ना तस्य सामर्थ्यमाह । उग्रसेनमिति । पूर्वं तु तस्य देशाधिपत्यं स्थितं यादवास्तु न मन्यन्ते आधुना तु यदूनां नृपमकरोत् यदूनामाधिदैविकरूप इति तदधीनाः सर्वे भगवत्कृतं मन्यन्ते ॥ १२ ॥

श्रीसुबोधिनी-सारः

हे तात हे मातः पराधीनयोर्वां युवयोः शुश्रूषां सेवामकुर्वतोः दुर्हृदा कंसेन पापचेतसा भृशं क्लिष्टयोर्दुःखितयोर्नौ आवयोरुपरि क्षन्तुं युवामर्हथः ॥ ९ ॥ इत्येवं जगदात्मनो मायामनुष्यस्य हरेर्गिरा वाचा मोहितौ अंकमारोप्यालिंग्य हर्षमापतुः ॥ १० ॥ अश्रूणां धाराभिः सिञ्चन्तौ स्नेहपाशेन बद्धौ रुद्धकण्ठौ विमोहितौ न किंचित् ऊचतुः हे राजन् ॥ ११ ॥ एवं पितरावाश्वास्य सान्त्वयित्वा देवकीसुतो भगवान् मातामहमुग्रसेनं यदूनां नृपं राजानम् अकरोत् तु शब्दः शापनिवृत्तिपरः ॥१२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'यद्यपि पारवश्येनावयोरत्यन्तापराधो नास्ति, तथापि भवत्प्रसादेनैवावयोर्भद्रम्' इति सूचयन् क्षमापयति—तदिति। हे तात! हे मातः! दुर्हृदा दुर्बुद्धिना कंसेन क्लिष्टयोः परतन्त्रयोर्बन्दिगृहेष्ववरुद्धयोर्वां युवयोः शुश्रूषावसरेऽपि शुश्रूषामकुर्वतोर्नौ आवयोस्तत् तं शुश्रूषाभावप्रयुक्तापराधं पितृत्वात् क्षन्तुमर्हथ इत्यन्वयः ॥ ९ ॥ इत्येवं भूतया हरेर्गिरा मोहितौ देवकीवसुदेवौ अत एव तौ पुत्रौ मत्वा अङ्कमारोप्य परिष्वज्य च मुदं प्रापतुः। तद्गिर आवश्यमोहकत्वे हेतुमाह–विश्वात्मन इति। सर्वान्तर्यामिण इत्यर्थः। 'तस्यान्तर्यामित्वे कथं मनुष्यत्वप्रतीतिः?' तत्राह—मायामनुष्यस्येति। स्वेच्छयैव मनुष्यनाट्यमङ्गीकृतवत इत्यर्थः ॥ १० ॥ 'जातज्ञानयोरपि पुनर्मोहनम्' इति भगवच्चरितस्याद्भुतत्वं सूचयन् सम्बोधयति—राजन्निति। अश्रुधाराभिस्तौ सिञ्चन्तौ किञ्चिदपि नोचतुः। तत्र हेतुमाह बाष्पकण्ठाविति। अश्रुनिरुद्धकण्ठावित्यर्थः ॥ तत्रापि हेतुमाह—स्नेह एव पाशस्तेनावृताविति। चकारो ममतासङ्ग्रहार्थः। स्नेहबन्धनेऽपि हेतुमाह—तन्मायया विमोहिताविति ॥ ११ ॥ भगवान् कृष्णः पितरावेवमाश्वास्य सान्त्वयित्वा मातामहमुग्रसेनं तु यदूनां नृपमधिपतिमकरोत्। एवं करणे हेतुमाह—देवकीसुन इति ॥ १२ ॥

अन्वितार्थप्रकाशिका

तदिति ॥ हे तात! हे मातः! दुर्हृदा दुर्बुद्धिना कंसेन भृशं क्लिष्टयोः परतन्त्रयोर्वन्दिगृहेष्ववरुद्धयोर्वां युवयोः शुश्रूषावसरेऽपि शुश्रूषामकुर्वतोः नौ आवयोः तत् तं शुश्रूषाभावप्रयुक्तापराध पितृत्वात्क्षन्तुमर्हथ। परतन्त्रयोरिति नौ इत्यस्यापि विशेषणम् ॥ ९ ॥ इतीति ॥ मायया मनुष्यस्य विश्वात्मनो हरेः इत्येवंभूतया गिरा मोहितौ देवकीवसुदेवौ अत एव तौ पुत्रौ मत्त्वाऽङ्कमारोप्य परिष्वज्य च मुदं आपतुः ॥ १० ॥ सिञ्चन्ताविति ॥ हे राजन्! अश्रुधाराभिः सिञ्चन्तौ स्नेहपाशेन आवृतौ बाष्पकण्ठौ विमोहितौ तौ मातापितरौ किंचन न ऊचतुः ॥ ११ ॥ एवमिति ॥ भगवान् देवकीसुतः पितरावेवमाश्वास्य सान्त्वयित्वा मातामहमुग्रसेनं तु यदूनां पतिं नृपमधिपतिमकरोत्। एवमाश्वास्येत्यादिकं नन्दस्य परोक्षमेव। नन्दस्तु मत्पुत्रं युद्धश्रान्तमेते परमानन्दमत्ताः भोजयितुं काममन्तःपुरं नयन्तु। अहं पुत्रार्थे गतभीः स्वावतरणस्थानं यामीत्युक्त्वा पूर्वमेव गतवान् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दुर्हृदा कंसेन कृत्वा क्लिष्टयोः क्लेशयुक्तयोः ॥ ९ ॥ अङ्कमारोप्य पुत्रद्वयमिति शेषः ॥ १० ॥ बाष्पकण्ठौ प्रेम्णा रुद्धस्वरौ ॥ ११ ॥ मातामहं मातृपितुर्भ्रातरं उग्रसेनं यद्वा मातुः पितरं देवकं उग्रसेनं च ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति ॥ हे मातः, हे तात, परतन्त्रयोः पराधीनयोः, दुर्हृदा दुष्टेन कंसेन, भृशं क्लिष्टयोः पीडितयोः, वां युवयोः, शुश्रूषां सेवां, अकुर्वतोः नावावयोः, तत् भवत्सेवनानाचरणरूपमपराधाचरणं, क्षन्तुं अर्हथः ॥ ९ ॥ इतीति ॥ इतीत्थंभूतया, विश्वात्मनो जगदात्मनः, मायामनुष्यस्य, हरेः गिरा, मोहितौ वसुदेवदेवक्यौ, अङ्कमुत्सङ्गं आरोप्य, परिष्वज्य च, मुदं, आपतुः ॥ १० ॥ सिञ्चन्ताविति ॥ हे राजन्, विमोहितौ भगवतो गिरः श्रवणमात्रतो विशेषतो मोहं प्राप्तौ, अत एव, स्नेह एव पाशस्तेन, आवृतौ बाष्पकण्ठौ च, अश्रुधाराभिः, सिञ्चन्तौ वसुदेवदेवक्यौ, किंचित् न ऊचतुः ॥ ११ ॥ एवमिति ॥ देवकीसुतः भगवान् श्रीकृष्णः, एवं इत्थं, पितरौ आश्वास्य सान्त्वयित्वा, मातामहं उग्रसेनं तु, यदूनां नृपं, अकरोत् ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तत्क्षन्तुमर्हथ इति : १०.४५.९.

जातो मंतुस्तं क्षमस्वेति विष्णो मद्वाग्वर्णाकर्णने का स्पृहा ते।
पित्रोरग्रे प्रोक्तमेवं मयाऽपि प्रागित्यन्तः संस्मरन् पालयेथाः ॥ ७ ॥

इति मायेति : १०.४५.१०.

साधारणात्मजसुभाषिततोषितात्मा मोदं प्रयाति गलिताखिलदुःखजालः।
आनन्दकन्द - निजपुत्रपवित्रवाग्भिस्तौ तादृशाविति न विस्मयनीयमस्मिन् ॥ ८ ॥

एवमिति : १० ४५.१२.

यः पुण्यात्मजनिः प्रतिष्ठितपदं कुर्यात् स्ववंशद्वयं स स्याद्धर्मगुणानुजन्यविजयश्रीरित्थमावेदयन् ।
लोकेशं कृतवान् पितामहमिव श्रीशः स मातामहप्रेप्सुर्धर्मवृकोदरार्जुनसमुच्छ्रायं स भूयः श्रियम् ॥ ९ ॥
अस्मिन् पितामहमखर्वसुखं करोति मातामहो निजमुखे च दधाति चैवम् ।
जानन् पितामहमिवाऽखिललोकनाथो मातामहं व्यधित तं किमु राजमानम् ॥ १० ॥
सत्सौख्यस्थितिमेवं बहुधा मातामहं करोमीति । बोधयितुं प्रभुणा किं न्यधायि मातामहो राज्ये ॥ ११ ॥
राज्यापहारधिषणा विनिधाय चित्ते स्वाप्तं नृशंस इव कंसमसौ जघान ।
इत्यल्पजल्पन - निराकरणाय चक्रे तत्तातमेव नृपतिं स्वयमस्पृहः सन् ॥ १२ ॥
सदसद - लघुनाना - कार्यपर्याप्ति - भूमौ धरणिपतिपदेऽसौ यन्न्यथादुग्रसेनम् ।
उचितमिदमवैमो यत् सदैवानुकम्पी सुजनविहितमन्तु - क्षान्तिशान्तान्तरङ्गः ॥ १३ ॥
पराजयो जरासन्धस्योग्रसेनाश्रयं विना । स्यान्नेति किं तदा चक्रे तन्मिषात्तत्समाश्रयम् ॥ १४ ॥
त्रैलोक्याधिपतौ न मय्यभिनवा भूमात्रराज्येशतामत्तातश्च ययातिशापत इमेऽप्यर्हा न वा वृष्णयः ।
नान्यः कश्चन तादृगस्ति निखिलान् यः पालयेन्न्यायतस्तस्मादेष तदर्ह इत्यनुविचिन्त्येशो व्यधात्तं नृपम् ॥ १५ ॥

कृष्णप्रिया

हे तात ! हे माता ! हम दोनों भाई नन्द बाबा के आधीन थे और खल कंस के कष्टों से क्लिष्ट थे, इसलिए आपकी सेवा न कर सकें । हमारे इन अपराधों को आप कृपया क्षमा करें ॥ ९ ॥ श्रीशुकदेवजी कह रहे हैं कि राजन् ! भगवान् भूतल पर मनुष्य देह लेकर पधारे थे इसलिए मनुष्य धर्म की व्यवस्था का माया से अवलम्बन लेकर कह रहे थे, इसलिए भगवद् वाणी से मुग्ध हुए माता पिता ने अपने उत्सव में दोनों पुत्रों को लेकर आलिङ्गन करते हुए परमानन्द को पाये ॥ १० ॥ राजन् ! भगवान् श्रीकृष्ण की हृदयहारिणी स्नेहभीनी वाणी का श्रवणकर अश्रुओं की धाराओं से दोनों वत्सों को सिञ्चन करते हुए वात्सल्य स्नेह पाश से बँधे हुए ऐसे भावविभोर हो गए कि माता-पिता कुछ न बोल पाये । राजन् वाला ही अश्रुओं से गद्गद् हो गया ॥ ११ ॥ भगवान् श्रीकृष्ण ने श्रीदेवकी नन्दनजी ने भक्तिसमर वचनों से माता और पिता को धैर्य एवं आश्वासन दिया, पिताजी के राजा न बनाते मातामह उग्रसेनजी को राज्यपद दिया । उनका राज्य था पुत्रों के मरण से सन्तप्त थे इसलिए उग्रसेन को ही राज्य दिया ॥ १२ ॥

आह चास्मान् महाराज[1] [2]प्रजास्त्वाज्ञप्तुमर्हसि । ययातिशापाद् यदुभिर्नासितव्यं नृपासने ॥ १३ ॥
मयि भृत्य उपासीने भवतो विबुधादयः । बलिं हरन्त्यवनताः किमुतान्ये [3]नराधिपाः ॥ १४ ॥
[4]सर्वान् [5]स्वाञ्ज्ञातिसम्बन्धान् दिग्भ्यः [6]कंसभयाद्गतान् । यदुवृष्ण्यन्धकमधुदाशार्हकुकुरादिकान् ॥ १५ ॥
सभाजितान् समाश्वास्य विदेशावासकर्शितान् । न्यवासयत् स्वगेहेषु वित्तैः सतर्प्य विश्वकृत्[7] ॥ १६ ॥

कर्दमक्षमा

अन्वयः—हे महाराज ? वयम्, त्वा, प्रजाः, च, अस्मात्, आज्ञप्तुम्, अर्हसि, पुनः, आह ययातिशापात्, यदुभिः, नृपासने, न, असितव्यम् ॥ १३ ॥ मयि भृत्ये, उपासीने, अवनताः, विबुधादयः, भवतः, बलिम्, हरन्ति, अन्ये, नराधिपाः, उत किम् ॥१४॥ विदेशावासकर्शितात्, कंसभयाकुलान्, स्वान्, ज्ञातिसम्बन्धिनः, यदु, वृष्णि, अन्धकमधु-दाशार्ह-कुकुरादिकान्, सर्वान्, दिग्भ्यः, सभाजितान्, समाश्वास्य, वित्तैः, संतर्प्य, विश्वकृत्, (श्रीकृष्णः) स्वगेहेषु, न्यवासयत् ॥ १५-१६ ॥

श्रीवरस्वामिविरचिता भावार्थदीपिका

त्वमेवाज्ञापयेति मा वदेत्याह । ययातिशापादिति । तव तु यादवत्वेऽपि मदाज्ञया न दोष इति भावः ॥ १३ ॥ मम तादृशी शक्तिर्नास्तीति चेत्तत्राह । मयीति । मत्प्रसादेन सर्वं सिद्धं भविष्यतीत्यर्थः ॥१४॥ स्वान्ज्ञातीन्संबंधांश्च दिग्भ्य आनाय्येति शेषः ॥ १५-१६ ॥

---

१. भाग—वीर. । २. स्वा—श्रीधर. वंशी. जीव. वीर. विश्व.; स्वा—बिज. । ३. नृपादयः—प्रा. पा. ।

४. इत्युक्त्वाहूय पवनमुग्रसेनाय भूभुजे । सुधर्माख्यां सभां शक्रादाहरेत्याह केशवः ॥ १ ॥
मारुतश्च तथाहेन्द्रं वासुदेवस्य शासनात् । प्रायच्छद्देवराजोऽपि सभां कृष्णानुभाववित् ॥ २ ॥
टि० कुत्रचित् ।

५. स्व-वीर., स्वजाति-विज. ६. भयाकुलान्—मूले; भयार्दितान्—प्रा. पा.; भयाद्गतान्—वीर. विज. ७. दृक्—वीर., सृक्—विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदाज्ञामाक्षिपति—त्वमेवेति । इति भाव इति–'प्रभोराज्ञा गरीयसी' इत्युक्तेर्मदाज्ञयाऽकर्तव्यमपि कर्तव्यं स्यादित्यर्थः। अस्मान्यादवान्। ननु भवद्विधाज्ञापने मम का योग्यता तत्राह–प्रजा इति। त्वदधीनानित्यर्थः। तुशब्दो निर्धारणे। हे महाराजेति यदुराजत्वेन साम्राज्यमप्यभिप्रेतम्। किन्तु यद्यपि भवतामपि यदुत्वमेव तथापि भवतां भोजानां प्रायः परस्परराज्यप्राप्तेरस्माकं वृष्णीनां तु प्रायस्तदप्राप्तेर्भवतामेव राज्यं योग्यमिति विशेषतो भावः ॥१३॥ तदाशंकामपनुदतीत्याह—ममेत्यादिना। भवतस्तव। आदिपदाद्दैत्यगन्धर्वादीनां ग्रहः। इत्यर्थ इति–मय्यनुकूले सर्वमनुकूलं स्यात्, "सुप्रसन्ने जगन्नाथे प्रतीपं सरलं भवेत्" इत्युक्तः॥ तदेव दर्शयति—अवनता भक्त्या नम्राः सन्तो बलिं हरन्त्वित्याज्ञा। तथा च श्रीविष्णुपुराणे—"ययातिशापाद्वंशोऽयमराज्यार्होऽपि साम्प्रतम्। मयि भृत्ये स्थिते देवानाज्ञापयतु किं नृपैः ॥" इति। 'हरन्ति' इति पाठे हरिष्यन्तीत्यर्थः। अन्ये इतरेभ्यो न्यूना इत्यर्थः। नराधिपा अप्यन्य इति वा ॥ १४ ॥ कंसभयेनोद्वतान्निःसृतान्। विश्वकृत्सर्वकृतिकुशलः ॥ सर्वानिति युग्मकम्। स्वे आत्मीयाः, सम्बन्धाश्च कृत वैवाहिकादिसम्बन्धाः। दिग्भ्य आनाय्येति शेषः। दिग्भ्य इति कर्मणि चतुर्थी वा, गतावित्यनेनान्वयात्। यद्विति—यदुभेदा भोजादय इत्यर्थः। आदिशब्देन सात्वतादयः। भोजाश्चाक्रूरेण सह तत्रैवासन्। इत्येते यादवानामष्टौ भेदा मुख्यतमा ज्ञेयाः। सभाजितान्सतः शीघ्रयानप्रस्थापनादिमानेनेत्यर्थः। अतः सम्यक्सुखं शीघ्रञ्चानाय्य विदेशावासेन कृशतां प्राप्तानतो बहुलधनेन संतर्प्य नितरां गृहाद्युपस्करपरिच्छदवृत्ति प्रदानादिना समहोत्सवमवासयत्। नन्वसंख्यानां कथं तथानिवासनं द्रुतमेव संभवेत्तत्राह—विश्वकृदिति। अतस्तद्वैभवस्येंद्रादिदुर्लभत्वमपि सूचितम्। तत्र श्रीरोहिणीमपि व्रजादानेष्यतीति ज्ञेयम् ॥ १५-१६ ॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

अस्मान् यादवान् ननु भवद्विधाज्ञापने मम का योग्यता तत्राह। प्रजा इति। त्वदधीनानित्यर्थः। तुशब्दो निर्द्धारणे हे महाराजेति यदुराजत्वेन साम्राज्यमभिप्रेतम्। अन्यत्तैः। किन्तु यद्यपि भवतामपि यदुत्वमेव तथापि भवतां भोजानां प्रायः परम्पराराज्यप्राप्तेरस्माकं वृष्णीनां तु प्रायस्तदप्राप्तेर्भवतामेव राज्यं योग्यमिति विशेषतो भावः॥ १३ ॥ तदेव दर्शयति। मयीति। अवनता भक्त्या नम्राः सन्तः बलिं हरन्त्वित्याज्ञा। तथाच श्रीविष्णुपुराणे। ययातिशापाद्वंशोऽयमराज्यार्होऽपि साम्प्रतम् मयि भृत्ये स्थिते देवानाज्ञापयतु किं नृपैरिति। हरन्तीति पाठः हरिष्यन्तीत्यर्थः। अन्ये इतरेभ्यो न्यूना इत्यर्थः। नराधिपा अप्यन्ये इति वा ॥ १४ ॥ सर्वानिति युग्माकं स्वे आत्मीयाः सम्बन्धाश्च कृतवैवाहिकादिसम्बन्धाः दिग्भ्य आनाय्येति शेषः। दिग्भ्य इति कर्मणि चतुर्थी वा गतावित्यनेनान्वयात। यद्विति यदुभेदाः भोजादयः इत्यर्थः। आदिशब्देन सात्वतादयः भोजाश्च प्रायोऽक्रूरेण सह तत्रवासन् इत्येते यादवानामष्टौ भेदाः मुख्यतमा ज्ञेयाः ॥ १५ ॥ समाजितान् सतः शीघ्रं वानप्रस्थापनादिमानेनेत्यर्थः। अतः सम्यक्सुखं शीघ्रं चानाय्य विदेशावासेन कर्षितान् कृशतां प्रपितान् अतो बहुलधनेन सन्तर्प्य नितरां गृहाद्युपस्कारपरिच्छदवृत्तिप्रदानादिना समहोत्सवमवासयत्। नन्वसङ्ख्यानां कथं तथा निवासनं द्रुतमेव सम्भवेत्तत्राह। विश्वकृदिति। अतस्तद्वैभवस्येन्द्रादिदुर्ल्लभत्वमपि सूचितम्। तत्र श्रीरोहिणीमपिव्रजादानेष्यतीति ज्ञेयम् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अस्मानिति यादवान् सर्वान् संगृह्णाति। ननु सर्व्वेऽप्येते महान्तः स्वतन्त्राः, एतान् प्रत्याज्ञापने मम का योग्यतेत्याशंक्याह—प्रजा इति त्वदधीनानित्यर्थः। तु शब्देन नप्तृत्वादिना प्रजात्वमेव साधितम्। हे महाराजेति यदुरात्वेन साम्राज्यमप्यभिप्रेतम्, किन्तु पूर्वमेव व तव राजत्वं वर्त्तते, विशेषतश्च नप्तृत्वादिना वयं ते परिपाल्या इति सर्व्वथा त्वमेव राज्यार्होऽसीति भावः। इति राजत्वमात्रस्यात्यन्ततुच्छतया तदीयराज्यत्वादनौचित्येन च पुनर्व्रजजिगमिषया चात्मनो राजत्वं परिहृतमेव। तथा च श्रीहरिवंशे पुत्रापराधेन भीत्या सदैन्यं राज्यादि समर्पयन्तं तं प्रति श्रीभगवद्वाक्यम् (विष्णुः प० ३२।४८-५०)—

'न हि राज्येन मे कार्य्यं नाप्यहं राज्यलालसः। न चापि राज्यलोभेन मया कंसो निपातितः ॥
किन्तु लोकहितार्थाय कीर्त्त्यर्थञ्च सुतस्तव। व्यंगभूतः कुलस्यास्य सानुजो विनिपातितः ॥
अहं स एव गोमध्ये गोपैः सह वनेचरः। प्रीतिमान् विचरिष्यामि कामचारी यथा गजः ॥' इति।

एवमुक्तिचातुर्य्या सर्व्वानेव यदुस्तद्वशीचकारेति ज्ञेयम्। अन्यत्तैर्व्याख्यातम्। यद्वा, ननु स्वकुलार्य्य–ययाति–शापापेक्षया पूर्व्ववदाधिपत्यमेवास्ताम्, न तु राजत्वमित्याशंक्य परिहरति— आह चेति। यद्यपि नृपासने नासितव्यं राज्ञा न भाव्यम् तथापि महाराजत्वेनास्मानाज्ञप्तुमर्हसि, मत्प्रभावादिति शेषः, लज्जादिना साक्षादवाच्यत्वात् ॥ १३ ॥ भृत्य उपासीने भृत्यतया सदा समीपे वर्त्तमाने सेवमाने वेत्यर्थः। आदि-शब्दात् सिद्धादयः, अवनता भक्त्या विनम्राः कृतप्रणामा वा सन्तो बलिं हरन्तु। तथा च श्रीविष्णुपुराणे (५।२१।२२)–'ययाति–शापाद्वंशोऽयमराज्यार्होऽपि साम्प्रतम्। मयि भृत्ये स्थिते देवानाज्ञापयतु किं नृपैः ॥' इति। हरन्तीति पाठे सामीप्ये वर्त्तमाना, हरिष्यन्तीत्यर्थः। अन्य इति विबुधादिभ्यो नराधिपानामतिन्यूनत्वं बोधयति।

अत एवोक्तम्—किमुतेति ॥ १४ ॥ दिग्भ्य इति मथुरां त्यक्त्वा कुरु–पाञ्चालादिषु प्रयाणेनाष्टदिक्षु वासात्। आदि-शब्देन सात्वतादयः, भोजाश्च प्रायोऽक्रूरेण सह कंसमनुवर्त्तमानास्तत्रैवावसन्। एते यादवानामष्टभेदा मुख्यतमाः ॥ १५ ॥ सभाजितान् सतः शीघ्रग-यानप्रस्थापनादिना सम्मान्येत्यर्थः। अतः सम्यक् सुखमाश्वानाय्य, यतो विदेशावासेन कर्शितान् चिरं दुःखितानित्यर्थः। अत एव वित्तैर्बाहुलधनेन सन्तर्प्य स्वस्वगृहेषु नितरां गृहाद्युपस्कारवस्त्रालंकारादिपरिच्छदोपहार-निज-निज-वृत्तिप्रदानादिना सुस्थिरतया समहोत्सवं युगपदविलम्बमवासयत्। ननु बहुताराणां कथं तथा निवासनं सम्भवेत्? तत्राह—विश्वकृदिति अत इन्द्रादिदुर्लभमपि तेषां विचित्रवैभवं साधयामासेति च सूचितम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तमुवाच च उक्तिमेवाह। अस्मानित्यादिना। नराधिपा इत्यन्तेन हे महाभाग! त्वमस्मान् त्वत्प्रजाभूताञ्ज्ञप्तुं मर्हसि विधेयान्कर्तुमर्हसि अधिपतिर्भवितुमर्हसीत्यर्थः। ननु समर्थस्त्वमेव राजा भवितुमर्हसीत्यत आह। ययातिशापादिति नृपासेन नासितव्यं नोपवष्टव्यं तव तु यादवत्वेऽपि ममाभिमततया न दोष इति भावः ॥ १३ ॥ नन्वहमसमर्थः कथमधिपतिर्भवितुमर्हामीत्यत आह। मयीति। त्वद्भृत्ये मयि त्वां सेवमाने सति विबुधश्रेष्ठाः अत्युपनताः सन्तो भवते बलिं हरन्ति समर्पयन्ति किमुतान्ये नराधिपाः अर्पयन्तीति मत्प्रभावात्सर्वं भविष्यतीत्यर्थः ॥ १४ ॥ ततो विश्वदृग्भगवान्सर्वान् स्वज्ञातीन स्वसम्बान्धिश्च यादवादीन् भयात्पलायिनात् दिग्भ्य आनाय्य तान्सान्त्वयित्वा सभाजितान्संमाजितान्कृत्वा परदेशावासेन कृशीभूतान् वित्तैः सन्तर्प्य स्वस्वगेहेषु न्यवासयत ॥ १५–१६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वाः प्रजाः अस्मान् ज्ञप्तुमाज्ञप्तुं यद्वा प्रजास्वासु कांश्चिदस्मानिति ययातिशपात् नृपासने यदुभिर्नासितव्यं न स्थातव्यमिति शङ्कां त्यजेति शेषः ॥ १३ ॥ शङ्का त्यागे कैमुत्येन निमित्तमाह। उपासीने सेवमाने सति ॥ १४ ॥ विश्वं सर्वं सृजति ददातीति विश्वसृक् दिग्भ्य आनीय ॥ १५–१६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

मयि भृत्य उपासीन इत्यादि। उपासीने उपासके जने भृत्य इव मयि वर्तमान इत्यर्थः,—(भा० ९।४।६३) "अहं भक्तपराधीनः" इत्युक्तेः। अतो भक्तस्य तवाहमपि भक्तः न तु राजेति कृत्वा ॥ (१५–२२)

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मयिभृत्य उपासीन इति उपासीने उपासके जने मयि भृत्य इव सतीति भावः। त्वन्तु मदुपासक एवासि ॥ (१५–२२)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भगवंस्त्वमेव नृपो भव त्वमेवास्मानाज्ञापयेति मा वदेत्याह। ययातिशापादिति। तव तु यादवत्वेऽपि मदाज्ञया नास्ति दोष इति भावः ॥ १३ ॥ मम तादृशी शक्तिर्नास्तीति चेत्तत्राह। मयि भृत्ये तत्राप्युपासीने त्वदुपासनां कुर्वति सति ॥ १४–१८ ॥

गूढार्थदीपिनी

तव तु यादवत्वेऽपि भोजवंशित्वेन किञ्चिद्वैलक्षण्यात् मदाज्ञया राज्यपालने न कश्चिद् दोषः ॥ १३ ॥ हरन्ति समर्पयिष्यन्ति ॥ १४ ॥ सर्वानितिद्वयम्। दिग्भ्यः समानाय्य सन्तर्प्य च स्वस्वगृहेषु न्यवासयत् इत्यन्वयः। स भाजितान् सम्मानितान् ॥ १५–१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु त्वमेव राजा भवितुमर्हसीत्यत आह। ययातिशापाद्यदुभिर्नृपासने नासितव्यम् भवतो यादवत्वेऽपि भोजत्वेन किञ्चिद्वैलक्षण्यानून दोष इति भावः ॥ १४ ॥ कंसभयाद्दिक्षु गतान् ताभ्यो दिग्भ्यः स्वान् ज्ञातीन् सम्बन्धांश्च आनाय्येति शेषः स्वगेहेषु न्यव सयदिति द्वयोरन्वयः ॥ १५–१६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे महाराज अस्मान्प्रजास्वाज्ञातुं समीचीनतया शिक्षापूर्वकमिति यावत् आज्ञप्तुमाज्ञां कर्तुमर्हसि। त्वमेव भगवन्नवन्यवनकर्तेत्यत आह ॥ ययातीति। अनेन वसुदेवकुलोग्रसेनकुलयोर्यादवत्वायादवत्वे ध्वन्येते। एवमनङ्गीकारे वैवाहिकी क्रियाऽपि परस्परमनुपपन्ना स्यात्। ययातेः शापात्। यदुभिः साक्षात्तदीयः प्रवर्तकैरस्मदादिभिर्नृपासने नासितव्यं नोपवेष्टव्यं। त्वंत्वमुख्य इति यादवत्वेऽपि तव चिन्ता नास्तीति वा। पुत्रीपुत्रत्वादिमतामपि तत्त्वेन व्यवहारो दृष्टचरो लोक इति विवाहादिरुपपन्न इति

भावः । अवोचच्च मातामहं तूग्रसेनमिति । यद्वक्ष्यति सर्वांत्स्वज्ञातिसम्बन्धानिति । आचार्यो गोत्रेण राजन्यो वृणीतेति प्रयोगकारोक्तेर्यादवत्वेऽपि गोत्रभेदेन विवाहादिसम्भव इति वा ।। १३ ।। वृद्धोऽहं न नृपासन उपविश्य शासने समर्थ इत्यत आह ।। मयीति । भृत्ये मय्युपासीने सति विबुधादयो देवादयो बलिं भवतो हरन्ति । अवनताः प्रवणा अन्ये नराधिपा हरेयुर्बलिमिति किं वक्तव्यमिति भावः ।। १४ ।। स्वज्ञातीन्स्वसम्बन्धीनिति सर्वान्कंसभयाद्दिग्भ्यो गतान्यदुवृष्ण्यन्धकमधुकुकुरार्हकान् । एवं विशेषाद्विशेषो बोध्यः ।। १५ ।। विदेशावासकर्शितान्सभाजितान्सत्कृतान्समाश्वास्य वित्तैः सन्तर्प्य तर्पयित्वा स्वगेहेपूत्सृष्टेषु न्यवासयद्वासयामास । अपेक्षितसर्ववितरितुरीश्वरस्य कियदियद्दीनदीनारदानमित्याह ।। विश्वसृगिति । विश्वं समस्तं सृजत्यत्ति सृजतीति स तथा । क एते कश्च स्वयं कोऽनुबन्ध इत्यतो वाऽऽह ।। विश्वसृगिति । स्वप्रजारक्षणं पितुर्विहितमिति ।। १६ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतएव विश्वासार्थं कृत्यधिकं वाक्यमत्युक्तवानित्याह । आह चेति । चकारान्मनसापि तं राज्ये स्थापितवान् यादवानां विधेयत्वार्थमाह । हे महाराज ! अस्मान्प्रजा आज्ञाप्तुमर्हसीति । वयमेव प्रजाः तुशब्देन सन्ततिरूपां प्रजां वारयति तह्यहमपि यादव इति प्रजास्वेवान्तर्भाव इति चेत्तत्राह । महाराजेति । खण्डमण्डलाधिपतित्वं पूर्वमपि स्थितमिति यादृशी पूर्वमाज्ञापना तादृशी भवतीत्याशङ्क्य महत्त्वमुक्तं राज्ञा ह्यवश्यमाज्ञापनीया इति विधिवशादेवाज्ञापनं बोध्यते न त्वाज्ञाप्यत इत्यर्थः । ननु किं स्वगृहीतं राज्यं दीयते आहोस्वित् पूर्वसिद्धमेव परिपाल्यते आद्ये स्वयमादौ राज्यं गृहीत्वा पश्चाद्देयम् अतस्त्वमादौ सिंहासने उपविश द्वितीयः पक्षस्तु कंसेन त्वया च निराकृतः महाराजत्वं चाधिकं कंसस्थं प्रायेण स तु तद्घातक एव भवति नैकटय एव तद्धर्म्मस्तस्मिन् प्रविशति । अतस्त्वयैव सिंहासने उपवेष्टव्यमित्याशङ्कायामाह । ययातिशापादिति । यदुभिर्नृपासने नासितव्यं यदुर्हि ज्येष्ठ एवासीत् स चेत्पित्रा निवारितः ततः प्रभृति न मर्यादाराज्यम् अर्जुनादयस्तु पुष्ट्यासार्वभौमा जाताः अत एव हताः कंसोऽपि भगवता तु तन्न कर्त्तव्यं मर्यादार्थमवतीर्ण इति ईश्वरत्वं ज्ञापयितुं कदाचित्परं पुष्टिमवलम्बते राज्यं तु सर्व पुष्टिहेतुर्भवति यो हि यद्वेषं करोति स तस्य सहजानेव धर्मान् गृह्णाति नतु केनचित्कदाचिदन्यथा कृतम् अतोऽस्माभिः मुख्यशाखायामागतैः नासितव्यमेव भोजत्वादयश्च प्रान्तशाखाः अत एव विवाह उपपद्यते भगवान् सर्वेश्वर इति चरणाधिपत्यं कस्मैचिद्दद्यादपि नतु स्वयं गृह्णीयात् वैयर्थ्यादनीश्वरत्वापत्तेः सिद्धत्वाच्च ।। १३ ।। तर्हि मया कथं ग्राह्यं शापादीनां तुल्यत्वात् सामर्थ्याभावाच्चेति चेत्तत्राह । मयि भृत्य उपासीन इति । अवश्वयं हि साधारणत्वं भजता कश्चित्प्रभुः स्वीकर्त्तव्यः स च कंसः स्थितः तस्य पुत्राभावात् पितापुत्रयोरैक्यात् अग्रे अनुवृत्त्यभावात् पितरि समागतः अतः स्थित एवानूद्यते अतो ग्रहणदानापेक्षिते क्रौर्याभावनाङ्गीकरिष्यन्तीति चेत्तत्राह । मयि भृत्ये उपसमीपे आसीने सति भवतः भवते विबुधादयोऽपि बलिं हरिष्यन्ति ये मेर्वादिभूसम्बन्धेन भोगं प्राप्नुवति अन्ये नराधिपाः ये केवलभूसम्बन्धिभोक्तारः ते कि वक्तव्याः । अवनता इति । नम्राः न तु प्रसादरूपेण प्रसन्नाः सन्तः नरास्तु भूमिष्ठा एव स्थूलसङ्घाताभिमानिनः देवास्तु सूक्ष्मेन्द्रियाद्यधिकारिणः भगवान् "भर्त्ता सन् भ्रियमाण" इति श्रुतेः भरणीयोऽपि भवति साधारणयादवत्वस्य क्रीडायां स्वीकृतत्वात् राजनि भृत्यत्वमुपपद्यते । यतः पुत्रत्वं वसुदेवे लौकिक्येषा भाषा सर्वथा भगवान्गोप्य इति फलिष्यति । मन्निमित्तं वा यो भृत्यः मदभिप्रेते स्थाने उपासीनो भवति तस्मै तुभ्यं विबुधादयोऽपि हरन्तीति वास्तवोऽर्थः एवं स निरुद्ध एव अन्यथा अतिविरक्तः कदाचिज्ज्ञानार्थं वा प्रयत्नं कुर्यात् अतो भगवान् स्वार्थमेव तं स्थापितवानिति भगवदर्थमेवेति निरोधः सिद्धः ।। १४ ।। सर्वेषां साधारणं निरोधमाह । सर्वानिति पञ्चभिः । स्वा भक्ताः ज्ञातयः गोत्रिणः सबन्धिनो विवाह्याः स्वशब्देन भ्रातरो वा बहव एव वसुदेवपुत्राः पित्रादयश्च । ते त्रिविधाः सात्त्विकादयः दिग्भ्यः समाहूय स्वगेहेषु न्यवासयदित्युत्तरेण सम्बन्धः दिक्षु वा कंसभयाद्गतान् दिग्भ्य इति चतुर्थी वा भयेन दिश एवोद्देश्याः अनेन पुनरागमनाभाव उक्तः तत्र हेतुः कंसभयाद्गतानिति । कंसो ह्यतिक्रूरात्मा तथैव लोके प्रसिद्धः, अत एव नन्द आह योऽवधीत्स्वस्वसुस्तोकानिति सर्वेषामेव भयं षड्विधा यादवा अपि गणितः यदुवृष्ण्यन्वकेति आदिशब्देनान्येऽपि बहवस्तद्भेदाः सन्तीति ज्ञापितम् ।। १५ ।। तत्सम्बन्धिनो वा न केवलमाकारणमात्रेण पूर्वसिद्धदानं किन्तु अधिकमपि दत्तवानित्याह । सभाजितानिति । सभाजिताः सत्कारं प्रापिताः अयं तेषां मानसो ह्यधिकः ततः समाश्वासनं वाचनिकं ततः कायिकं वक्तुं तेषां श्रममाह । विदेशावासेन परदेशस्थित्या कर्शितान् दुर्बलान् धनाद्यभावेन दीनान्वाकेवलं गृहे स्थित्यापि सुखं न भविष्यतीत्याशङ्क्य परदेशस्थित्या गतं धनादिकं ततोऽप्यधिकं सर्वेभ्यो दत्तवानित्याह । वित्तैः सन्तर्प्येति । ननु राज्यस्थितं सर्वमेव द्रव्यं भक्षितं नाशितमिति कुत एतावद्दत्तवानित्याशङ्क्याह । विश्वकृदिति । स विश्वमेव कर्तुं समर्थः किं तेभ्योऽल्पदाने वक्तव्यमित्यर्थः ।। १६ ।।

श्रीसुबोधिनी-सारः

आह च अस्मान् प्रजाश्चाज्ञप्तुं त्वमर्हसि हे महाराज त्वमेवाज्ञापयेति मा वदेत्याह । ययातेः शापात् नृपासने यदुभिर्न स्थातव्यं तव तु यादवत्वेऽपि मदाज्ञया भोजत्वेन विशेषाद्वा न दोषः ।। १३ ।। मयि भृत्ये उपासीने सेवां कुर्वत्यपि विबुधादयो देवादयोऽप्यवनताः प्रणता भवतो बलिं हरन्ति तुभ्यं बलिं ददति अन्ये नराधिपा राजानो बलिं हरन्तीति किमुत वक्तव्यम् ।। १४ ।।

दिग्भ्यः सर्वान् स्वान् ज्ञातीन् संबन्धान् कंसस्य भयेनाकुलान् व्याप्तान् यदुप्रभृतीन् समाश्वास्य सान्त्वयित्वा विदेशेष्वावासेन स्थित्या कर्शितान् सभाजितान् सत्कृतान् वित्तैर्धनादिभिः संतर्प्य प्रसाद्य स्वगेहेषु न्यवासयत् विश्वकृत् श्रीकृष्णः ।। १५–१६ ।।

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

तमाह च । तदुक्तिनेवाह—हे महाराज ! अस्मान् भृत्यादीन् प्रजाश्च आज्ञप्तुमर्हसीत्यर्थः । ननु 'त्वमेव राजा भवितुमर्हसि परमेश्वरत्वात्, न अस्माभिः साधारणैर्यदुभिः ययातिना राज्यान्निराकृतत्वात्, अत एव कंसो राज्याद्विनष्ट' इत्याशङ्क्याह ययातीति । यद्यपि ययातिशापाद्यदुभिर्नृपासने नासितव्यं; तथापि ममाज्ञया राज्यस्थितौ तव न कश्चिद्दोषः ।। १३ ।। ननु 'तथाप्यहमसमर्थः कथमधिपतिर्भवितुमर्हामि ?' इत्यत आह—मयीति । मयि भृत्ये उपासीने त्वां सेवमाने सति विबुधादयोऽप्यवनताः सन्तो भवतो बलिं हरन्ति समर्पयिष्यन्ति । भविष्यतोऽपि सन्देहाभावाद्वर्तमानतया निर्देशः । तर्हि अन्ये नराधिपा बलिमर्पयिष्यन्तीति किमुत वक्तव्यम् ? मत्प्रभावात् सर्वं भविष्यतीत्यर्थः ।। १४ ।। ततश्च कंसभयाद्गतान् पलायितान् यादवादीन् सर्वान् स्वान् स्वकीयान् ज्ञातीन्, सम्नधन् सम्बन्धिनाश्च दिग्भ्यः समानाय्येति शेषः ।। १५ ।। विदेशावासेन कर्शितान् समाश्वास्य सान्त्वयित्वा सभाजितान् सम्मानितान् वित्तैः सन्तर्प्य स्वगृहेषु न्यवासयदिति द्वयोरन्वयः । ननु 'तृप्तिस्तु यथेष्टबहुधनलाभादेव सम्भवति, तदसङ्ख्यातानां तेषां कथं सन्तर्पणं कर्तुं शक्यम्' इत्याशङ्क्याह—विश्वकृदिति । यो हि सङ्कल्पमात्रेणैव विश्वं करोति तस्यैतत्करणं किमशक्यमित्याशयः ।। १६ ।।

अन्वितार्थप्रकाशिका

आह चेति ।। तमुग्रसेनमाह स्म च । हे महाराज ! अस्मान् भृत्यादीन्प्रजाश्च आज्ञप्तुमर्हसि । मम तु राज्यं न योग्यमित्याह ययातिशापाद्यदुभिर्नृपासने नासितव्यं तव तु यादवत्वेऽपि ममाज्ञया राज्यस्थितौ न कश्चिद्दोष इति भावः । किञ्च । भवतां भोजयदूनां राज्यं परम्पराप्राप्तं नास्माकं वृष्णियादवानामित्यतोऽपि भवानेव राजा योग्यः ।। १३ ।। मयीति ।। मयि भृत्ये उपासीने त्वां सेवमाने सति विबुधादयोऽप्यवमताः सन्तो भवतो बलिं हरन्ति प्रापयिष्यन्ति । तर्हि अन्ये नराधिपाः बलिमर्पयिष्यन्तीति किमुत वक्तव्यम् ।। १४ ।। सर्वानिति द्वयम् ।। विश्वकृत् भगवान् कंसभयाद्गतान् पलायितान्यदुभेदान् वृष्ण्यन्धकादीन् सर्वान् स्वान् स्वकीयान् ज्ञातीन् सम्बन्धान् सम्बन्धिनश्च दिग्भ्यः समानाय्येति शेषः । विदेशावासेन कर्शितान् समाश्वास्य सान्त्वयित्वा सभाजितान् सम्मानितान् वित्तैः संतर्प्य स्वगृहेषु न्यवासयन् । नन्दगमनोत्तरं रोहिणीं व्रजादानेष्यतीति ज्ञेयम् ।। १५–१६ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यदुभिरस्माभिर्नासितव्य नोपष्ठव्यं अतस्त्वयैव स्थातव्यमिति भावः ।। १३–१४ ।। स्वान् स्वकीयान् ज्ञातयश्च सम्बन्धाः सम्बन्धीजनाश्च तान् दिग्भ्य आनाय्येति शेषः ।। १५ ।। सभाजितान् कृतान् ।। १६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आहेति ।। हे महाभाग, त्वं अस्मान् प्रजाश्च, आज्ञप्तु विधेयान् कर्त्तुं, अर्हसि । माथुरान् शूरसेनान् विषयान् यादवानस्मांश्च अनुशासन् सर्वाधिपतिर्भवितुमर्हसीत्यर्थः । इति आह च । ननु समर्थस्त्वमेव राजा भवितुमर्हसि इत्यत्राह । ययातिशापात्, यदुभिः नृपासने, न आसितव्यम् । तव तु यादवत्वेऽपि ममाज्ञया न दोष इति भावः । यदुं प्रति ययातिशापो यथा महाभारते आदिपर्वणि ययात्युपाख्याने चतुरशीतितमेऽध्याये । 'यत्त्वं मे हृदयाज्जातो वयः त्वं न प्रयच्छसि । तस्मादराज्यभाक् तात प्रजा तव भविष्यति' इति । एवं गुरुं विनाऽन्येषां त्रयाणामपि शापास्तत्र त एव बोध्याः ।। १३ ।। ननु असमर्थोऽहं कथ त्वधिपतिर्भवितुमर्हामीत्यत आह ।। मयीति ।। भृत्ये त्वद्भृत्यभावं स्वीकृत्य वर्त्तमाने, भवतः उप आसीने त्वदन्तिके स्थित्वा त्वा सेवमाने, मयि सति, विबुधादयः सर्वे देवादयोऽपि, अवनताः सन्तः, बलिं हरन्ति । भवते इति पाठान्तरे, तुभ्यं बलिं कर, हरन्ति हरिष्यन्ति । अर्पयिष्यन्तीति यावत् । अन्ये नराधिपाः, किमुत । मत्प्रभावात् सर्वेऽपि त्वद्वशवर्त्तिनो भविष्यन्तीत्यर्थः ।। १४ ।। सर्वानिति ।। सभाजितानिति च ।। ततः विश्वकृत् भगवान्, कंसभयात् गतान् देशान्तरेष्विति शेषः । सर्वान् स्वज्ञातिसम्बन्धान्; स्वज्ञातीन् स्वसंबान्धनश्चेत्यर्थः । यदुवृष्ण्यन्धकमधुदाशार्हकुकुरादिकान्, दिग्भ्यः समानाय्य, विदेशावासकर्शितान्, तान् सभाजितान् संमानितान् कृत्वा, वित्तैर्धनैः, संतर्प्य, स्वगेहेषु स्वस्वभवनेषु, न्यवासयत् ।। १५–१६ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

ययातिशापेति : १०.४५.१३.

शापो वाऽनुग्रहो वाऽपि खद्योत इव यत्पुरः । हरेः का शापभीस्तत्र बीजं वेलानुपालनम् ।। १६ ।।
भक्तेष्टवस्तुवितरण - गृहीतदीक्षा - विभङ्गभीरुरयम् । राज्यानधिकृतिशापो वर इति मनसा दयालुरनुमेने ।। १७ ।।

मयि भृत्य इति : १०.४५.१४.

अव्याजभक्तिगुण - संग्रथितोऽस्मि येन तत्सेवने मनसि मे नहि तारतम्यम् ।
सम्बोधयन्निति जनान् भुवनाधिनाथो भृत्योऽहमित्यवद - दच्छलमुग्रसेनम् ॥ १८ ॥
मातामहोत्सव - विलोकन - लोलदृष्टिर्लोकोऽखिलोऽप्यभवदेष मुदेत्यवेक्ष्य ।
युक्तं तदाऽऽस महसा रचितप्रमोदा मातामहोत्सववती मथुराऽखिलाऽपि ॥ १९ ॥

सर्वानिति : १०.४५.१५.

विहितारिपराभवस्य पुंसः स्वजनाश्वासनमर्थतः प्रसक्तम् । यदि दीनजनावनोत्सुकाधीस्तदिहेशाच्छयशोभवेदसीमम् ॥ २० ॥

कृष्णप्रिया

उग्रसेनजी को नरेशपद देने के बाद प्रभु ने कहा हे महाराज हम तो आपके प्रजाजन हैं । विना संकोच हमें आज्ञा प्रदान करें । ययाति के कारण यदु के वंशजों को राज्यासन पर नहीं बैठना चाहिए । भगवान तो सर्वेश्वर हैं फिर भी भूमिपति पद ग्रहण क्यों करें ? ॥ १३ ॥ उग्रसेनजी वे मैं भी यादव हूँ एवं समर्थ भी नहीं हूँ तो राज्यपद कैसे ग्रहण करें । तब भगवान हूँ आपको राज्य दे रहा हूँ ब्रह्माण्ड के स्वामी के नाते राज्यगद्दी पर बैठा सकता हूँ । आप सामर्थ्य की चिन्ता न करें मेरे उपस्थित होने से देवता लोग भी नम्र बनकर आपको वर प्रदान करेंगे तब दूसरे राजाओं के लिए कहना ही क्या ? ॥ १४ ॥ राजन् कंस राजा के त्रास से भगवान् के भक्त, ज्ञातिजन, सम्बन्धिस्वजन, यादवगण, कृष्णजन, अन्धक मधु, दाशार्ह, कुकुर आदि कुलों के वंशज विभिन्न दिशाओं से विखर गए थे उन सबको बुला बुलाकर अपने-अपने स्थानों में मथुराजी में बसाए ॥ १५॥ राजन् ? इन सबको बुलाकर उनके स्थान ही दिये किन्तु सबका समादर किया, धन दौलत दिया, सबको प्रसन्न किए, निर्भय रहने को कहा विश्वास पूर्वक अपने अपने स्थानों में निवासों में निवास कराया ॥ १६ ॥

कृष्णसंकर्षणभुजैर्गुप्ता लब्धमनोरथाः । गृहेषु रेमिरे सिद्धाः कृष्णरामा[1]गतज्वराः ॥ १७ ॥
वीक्षन्तोऽहरहः प्रीता मुकुन्दवदनाम्बुजम् । नित्यं [2]प्रमुदितं श्रीमत् सदयस्मितवीक्षणम् ॥ १८ ॥
तत्र प्रवयसोऽप्यासन् युवानोऽतिबलौजसः । पिबन्तोऽक्षैर्मुकुन्दस्य मुखाम्बुजसुधां मुहुः ॥ १९ ॥
अथ नन्दं समासाद्य भगवान् देवकीसुतः । सकर्षणश्च राजेन्द्र परिष्वज्येदमूचतुः ॥ २० ॥

कर्दमक्षमा

अन्वयः—कृष्णसंकर्षणभुजैः, गुप्ताः, लब्धमनोरथाः, कृष्णरामागतज्वराः, सिद्धाः, गृहेषु, रेमिरे ॥ १७ ॥ अहरहः, सदयस्मितवीक्षणम् , नित्यम् , प्रमुदितम् , श्रीमत् , मुकुन्दवदनाम्बुजम् , वीक्षन्तः, प्रीताः ॥१८॥ तत्र, प्रवयसः, अपि, मुकुन्दस्य, मुखाम्बुजसुधाम् , अक्षैः, मुहुः, पिबन्तः, युवानः, अतिबलौजसः, आसन् ॥ १९ ॥ हे राजेन्द्र ? अथ देवकीसुतः, भगवान् , च, संकर्षणः, नन्दम् , समाश्वास्य, च, परिष्वज्य, इदम् , ऊचतुः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सिद्धा पूर्णाः । कृष्णरामाभ्यां गतो निवृत्तो ज्वरस्तापो येषां ते ॥ १७ ॥ सदयस्मितं वीक्षणं यस्मिंस्तत् ॥ १८ ॥ प्रवयसो वृद्धाः अप्यतिशयितं बलमोजश्च येषां ते ॥ १९–२० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यद्वा–सिद्धा इवेति लुप्तोपमा । जीवन्मुक्ता यथा कृष्णे परब्रह्मणि रामेण रमणेन रत्या वा गताध्यात्मिकादितापत्रया भवन्ति तथा रेमिरे "सिद्धिः स्त्री योगनिष्पत्तिपादुकान्तर्द्धिवृद्धिषु । मुक्तौ योगविशेषे च तद्वान्सिद्धः प्रकीर्तितः ॥" इति निरुक्तिकारः । अथ तेषां सर्वोत्तमां स्थितिमाह–त्रिभिः । तत्र कृष्णेति युग्मकम् । प्रथमं तावत्कंसादिवधेन गतज्वराः, ततश्च पुनर्वासादिना लब्धमनोरथाः, तदनन्तरं श्रीकृष्णसंकर्षणभुजैर्गुप्ताः कंसभयादितो रक्षिताः, ततस्तैरेव लब्धमनोरथास्तदर्पितस्वाश्रमभावसहिततादृशमथुरावासादिना पूर्णकामाः सन्तो रेमिरे ताभ्यां क्रीडां चक्रुः । तेनैव सिद्धाः कृतकृत्या बभूवुः । तत्र च कृष्णरामाभ्यामन्यनिरपेक्षया तत्स्वरूपमात्राभ्यां गतज्वरा बभूवुः । ताभ्यां व्यतिरिक्ते तापः सुखं तु तयोरेव येषां तथा बभूवुरित्यर्थः । तत्तदर्थयोग्यतत्तन्नामनिरुक्तिस्तून्नेया ॥ १७ ॥ अहरहः प्रतिदिनम् । पूर्वेणैव सम्बन्धः । सुखमेव विवृणोति—वीक्षन्त इति । विशेषेण सन्निकृष्टत्वादिना तन्मुखमीक्षमाणाः । तत्राप्यहरहर्वीक्षमाणाः प्रीता बभूवुरिति दर्शनसौख्यं नित्यमेवाधिकं दर्शितम् , तेनातृप्ति-

---

१. म–श्रीधर. वशी. जीव. वीर. विज. विश्व. शुक. । २. नित्यप्र–विज. ।

रपि दर्शिता । तत्र हेतवः–नित्यप्रमुदितं क्षणक्षणमेव प्रकर्षेण हृष्यत् , अतो नित्येति सर्वत्रैव व्यंग्यम् । क्षणक्षणमेव श्रीमत्प्रशस्तशोभं तथा सदयेत्यादिना च ॥ १८ ॥ तत्र मथुरायां तदा वा । युवत्वे किमौषधमिति चेत्तत्राह—पिबन्त इति । अक्षैर्नेत्रै "अक्षो नेत्रे च शकटे चक्रे रावणजेन्द्रिये" इति धरणिः । तत्र भगवत्पार्षदत्वमेव तदावरणपूजादेवतानां श्रीमदुद्धवादीनां, प्रवयस्त्वं न स्यादेव ये केचिदंधकादयो प्राचीनवृद्धास्तेऽपीत्यपिशब्दार्थः । अतः "स कथं सेवया तस्य कालेन जरसं गत" इति श्रीमदुद्धवमुद्दिश्य विदुरवाक्यन्तु प्राकट्यावसरप्रमाणचरमकक्षां गत इत्येवाभिदधाति–अलौकिकगुणस्वादशालित्वात्सुधेव सुधासौन्दर्यं मुखाम्बुजस्य सुधामिति तथाप्यलौकिकत्वं तामक्षैरक्षिभिः पिबन्त इति तेनैव तादृशं कमलमिति च पुनस्तयोः परमालौकिकत्वं व्यञ्जितम् । मुहुः प्रतिक्षणं पिबन्तः प्रतिक्षणमतिशयेन युवानः शरीरेन्द्रियबलयुक्ताश्चासन् । उपलक्षणं चैतत्सहादीनामिति ॥ १९ ॥ अथ यादवाश्वासनानन्तरम् । देवकीसुत इति–देवकीत्युपलक्षणं मातापित्रोः, जातस्नेहः स एव नन्दात्मजस्य तु तत्रानगतत्वात् । मथुरागमनावसरे ततः पृथग्भूय तत्रैवान्तर्हितो नित्यलीलारतोऽभूदिति तत्त्वम् । अथ श्रीव्रजराजस्य प्रस्थापनं प्रक्रममाणः भगवत्तायां देवकीसुतायाः प्रस्तावे च परीक्षितः समुल्लसन्मुखतामवेक्ष्य राजेन्द्रेति सम्बोधनम् । तन्मुखमवलोक्य तदीप्सिततानुरूपं वदन्नपि श्रीकृष्णस्यैव वचनपरिपाटीभिर्निजाभीप्सितं स्थापयिष्यन्नाह—अथेति । अथ यादवानां तथाभावादनन्तरमिति । अद्य सायमस्माभिः प्रस्थापितव्यं सायञ्च सति प्रातरित्येवं यदुकुलाश्वासनपौरसम्माननाद्यवश्यकृत्याद्यपेक्षया कतिपयादीनविलम्बविधानात् । यद्यहं सहसैव गोकुले गच्छामि तदा जरासन्धादिसंमर्दस्तत्र स्यादत्रत्यानामरक्षा चेत्यंगीकृतनरलीलाघटितया शंकया तदसमाप्तौ तु कदाचिदेकान्ते सम्यगासाद्य पुत्रोचितनमस्कारादिमव्यवहारेणोपेत्य केवलबालोचितभावाविष्कारेण परिष्वज्य चेदं श्लोकत्रयेण वक्ष्यमाणं केवलतत्पुत्रोचितमब्रवीत् । कोऽसौ-भगवान् पूर्णसर्वैश्वर्येण निरपेक्षः । यश्च देवकीसुतः देवक्यां प्रकटितजन्मा स एव, तथा संकर्षणश्च तत्तन्निरुक्त्या यो वसुदेवात्मजत्वं प्राप्तस्तदनुसंगेन स चैव ऊचतुरिति भवद्भिर्यथार्थमेव मन्तव्यम् , न च श्रीवसुदेवदेवक्योरिव यत्किञ्चिदन्यथा कर्तुम् , तत्र सिद्धान्तस्य प्रायो विरुद्धन्तस्य प्रायो विरुद्धत्वात् , तत्र तु 'नन्दस्त्वात्मज—' इत्यादौ सिद्धान्तस्य दर्शितत्वात् । तथा तत्र 'मायां ततान जनमोहिनीम्' इतिवदत्र श्लेषेणाप्यनुक्तत्वाच्छ्रीनन्दप्रभृतीनां भावस्य श्रीब्रह्मशुकोद्धवादिभिः स्वाभाविकत्वेन सर्वदुर्लभत्वेन स्तुतत्वाच्च । 'अहोभाग्यम्' इत्यादिभिः, 'नेमं 'नेमं विरिञ्च—' इत्यादिभिः, 'युवां श्लाघ्यतमौ' इत्यादिभिश्च । तत्र राजेन्द्रेति राजेन्द्राणां भवतां महाराजकन्यायाः प्रपितामह्याः सम्बन्धेन तत्रैव निष्ठा युक्ता, भिक्षुकाणामस्माकं तु यथारुच्येवेति भावः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ तेषां सर्वोत्तमां स्थितिमाह त्रिभिः । तत्र कृष्णेति युग्मकम् । प्रथमं तावत् कंसादिवधेन गतज्वराः ततश्च पुनर्वासादिना लब्धमनोरथाः तदनन्तरं श्रीकृष्णसङ्कर्षणभुजैर्गुप्ताः कंसभयादितो रक्षितास्ततस्तैरेव लब्धमनोरथाः तदर्पितस्वाविर्भावसहिततादृशमथुरावासादिना पूर्णकामाः सन्तो रेमिरे ताभ्यां क्रीडां चक्रुः तेनैव सिद्धाः कृतकृत्याश्च बभूवुः । तत्र च कृष्णरामाभ्यामन्यनिरपेक्षतया तत्स्वरूपमात्राभ्यां गतज्वरा बभूवुः । ताभ्यां व्यतिरिक्ते सर्वत्रैव तापः सुखन्तु तयोरेव येषां तथा बभूवुरित्यर्थः । तत्तदर्थयोग्यतत्तन्नामनिरुक्तिस्तून्नेया ॥ १७ ॥ सुखमेव विवृणोति । वीक्षन्त इति । विशेषेण सन्निकृष्टत्वादिना मुखमीक्षमाणाः तत्राप्यहरहर्वीक्षमाणाः प्रीता बभूवुः इति दर्शनसौख्यं नित्यमेवाधिकं दर्शितं तेनातृप्तिरपि दर्शिता । तत्र हेतवः । नित्यप्रमुदितं क्षणक्षणमेव प्रकर्षेण हृष्यत् । अतो नित्येति सर्वत्रैव व्यङ्ग्यं क्षणक्षणमेव श्रीमत् प्रशस्तशोभं तथा सदयेत्यादिना ॥ १८ ॥ तत्र भगवत्पार्षदत्वमेव तदावरणपूज्यदेवतानां श्रीमदुद्धवादीनामिति प्रवयस्त्वं न स्यादेव । ये केचिदन्धकादयो वा प्राचीनवृद्धास्तेऽपीत्यपि शब्दार्थः । अतः स कथं सेवया तस्य कालनजरसङ्गत इति श्रीमदुद्धमुद्दिश्य श्रीविदुरवाक्यन्तु प्राकट्यावसरप्रमाणचरमकक्षां गत इत्येवाभिदधाति अलौकिकगुणास्वादशालित्वात् सुधेव सुधा सौन्दर्यं मुखाम्बुजस्य सुधामिति तथाप्यलौकिकत्वं तामक्षैरक्षिभिः पिबन्त इति तेनैव तादृश कमलमिति च पुनस्तयोः परमालौकिकत्वं व्यञ्जितम् । मुहुः प्रतिक्षणं पिबन्तः प्रतिक्षणमतिशयेन युवानः शरीरेन्द्रियबलयुक्ताश्चासन् उपलक्षणञ्चैतत् सह आदीनामिति ॥ १९ ॥ अथ श्रीमद्व्रजराजस्य प्रस्थापन प्रक्रममाणः श्रीकृष्णस्य भगवत्तायां देवकीसुततायाः प्रस्तावे च परीक्षितः समुल्लसन्मुखतामवेक्ष्य राजेन्द्रेति सम्बोधनेन तन्मुखमवलोक्य तदीप्सिततानुरूपं वदन्नपि श्रीकृष्णस्यैव वचनपरिपाटीभिर्निजाभीप्सितं स्थापयिष्यन्नाह । अथेति । अथ यादवानां तथा भावादनन्तरमिति अद्य सायमस्माभिः प्रस्थापितव्यं सायञ्च सति प्रातरित्येवं यदुकुलाश्वासनपौरसमाननाद्यावश्यकृत्याद्यपेक्षया दिनकतिपयाविलम्बविधानात् । यद्यहं सहसैव गोकुले गच्छामि तदा जरासन्धादिसम्मर्दस्तत्र स्यादत्रत्यानामरक्षा चेत्यङ्गीकृतनरलीलाघटितया शङ्कया तदसमाप्तौ तु कदाचिदेकान्ते सम्यगासाद्य पुत्रोचितनमस्कारादिसद्व्यवहारेणोपेत्य केवलबाल्योचितभावाविष्कारेण परिष्वज्य च । इदं श्लोकत्रयेण वक्ष्यमाणं केवलतत्पुत्रोचितमब्रवीत् । कोऽसौ भगवान् पूर्णसर्वैश्वर्येण निरपेक्षः । यश्च देवकीसुतः देवक्या प्रकटितजन्मा स एव । तथा सङ्कर्षणश्च । तत्तन्निरुक्त्या यो वसुदेवात्मजत्वं प्राप्तस्तदनुषङ्गेन स चैवोचतुरिति भवद्भिर्यथार्थमेव मन्तव्यम् । न च श्रीवसुदेवदेवक्योरिव यत् किञ्चिदन्यथाकर्त्तुं तत्र सिद्धान्तस्य प्रायो विरुद्धत्वादत्र तु नन्दस्त्वात्मज इत्यादौ सिद्धान्तस्य दर्शितत्वात् । तथा तत्र मायां सन्तानजनमोहिनीमितिवदत्र श्लेषेणाप्यनुक्तत्वात् श्रीनन्द-

प्रभृतीनां भावस्य श्रीब्रह्मशुकोद्धवादिभिः स्वाभाविकत्वेन सर्वदुर्ल्लभत्वेन स्तुतत्वाच्च। अहो भाग्यमित्यादिभिर्नेमं विरिञ्च इत्यादिभिर्युवां श्लाघ्यतमावित्यादिभिश्चेति। तत्र राजेन्द्रेति राजेन्द्राणां भवतां महाराजकन्यायाः प्रपितामह्याः सम्बन्धेन तत्रैव निष्ठा युक्ता भिक्षुकाणामस्माकं तु यथारुच्येवेति भावः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुनेन्द्रादिभ्योऽपि तेषामुत्कर्षं दर्शयन् सदा सर्व्वदुःखराहित्यं परमसुखत्वञ्चाह—कृष्णेति द्वाभ्याम्। कृष्णः साक्षाद्भगवान् संकर्षणश्च तद्द्वितीयव्यूहः, किंवा तत्पार्षदप्रवरशेषावतारो यदुकुलैकीकरणपरः श्रीबलदेवः, तयोर्भुजैर्बहुत्वं द्वयोः प्रत्येकं द्वाविति तच्चतुष्टयत्वात् किंवा भक्तवात्सल्येन कदाचिद्बहुलभुजाविष्काराभिप्रायेण गुप्ताः सर्व्वापत्सु रक्षिताः सन्तः; भुजैरिति गोपने परमतात्पर्य्यादिकं बोधयति। किञ्च, तैरेव लब्धमनोरथाः, तद्बलेनैव सदा सर्व्वकामपरिपूर्त्तेः; अतएव गृहेष्वपि सिद्धा जीवन्मुक्ताः, किंवा सिद्धसर्व्वार्थाः सन्तो गृहेषु रेमिरे चिक्रीडुः। अहो गृहिणोऽपि ते कथञ्चित् संसारदुःखं किमपि नैवाविन्दन्नित्याह—कृष्णेति, कर्षति सर्व्वतापं हरतीति कृष्णः, रमयतीति रामः, अतस्ताभ्यां गतज्वराः ॥ १७ ॥ परमानन्दञ्च प्राप्ता इत्याह—वीक्षन्त इति, विशेषेण सन्निकृष्टत्वादिना मुखमीक्षमाणाः, वर्त्तमानतया तद्गुणानुसन्धानादिकं निरस्तम्, वीक्षणस्य च नैरन्तर्य्यं बोधितम्। ततश्च नित्यनूतनतया प्रीतिं प्राप्ता इत्यर्थः। अहरहो नित्यम्, अस्य पूर्व्वेणान्वय इति भाग्यविशेष उक्तः। यद्वा, 'रेमिरे' इति पूर्व्वेणान्वयः। किंवा, 'प्रीताः' इत्यस्यैव क्रियापदत्वेन वाक्यसमाप्तिः। मुकुन्देत्यादिकं पूर्व्वं बहुशो व्याख्यातमेव, नित्यं प्रकर्षेण मुदितम्,—अपराधाग्रहणादिना सदान्तःसुप्रसन्नत्वात्; अतएव सदयेति ॥ १८ ॥ अहो तेषां देहोऽपि सच्चिदानन्दमयोऽभूदित्याशयेनाह—तत्रेति। तेषु मध्ये प्रायो भगवत्पार्षदानामवतारत्वेन प्रवयसो न सन्त्येव, ये वा केचिदन्धकादयः प्राचीनास्तेऽपीत्यापि-शब्दार्थः। आसन् नित्यस्थिरतया बभूवुः। बलं देहशक्तिः; ओजः—इन्द्रियपाटवं तेजो वा; अक्षैरक्षिभिः सुधा मधुरमधुरसौन्दर्य्यमित्यर्थः। सुधारूपकेणाक्ष्णां चषकत्वं तथा परमानन्दास्वादनं सर्व्वानर्थविध्वंसनञ्च ध्वन्यते। मुहुरिति सदा समीपवर्त्ति तया स्वभावमात्रकथनम्, किंवा, अस्य पूर्व्वेणान्वयः। सदा नूत्नतया युवानोऽतिबलौजसश्चासन्नित्यर्थः ॥ १९ ॥ अथ पश्चादिति अद्य सायं प्रस्थातव्यम्, सायञ्च सति श्वः प्रातरित्येवं यदुकुलाश्वासनपौरसम्माननाद्यवश्यकृत्यापेक्षया पुर्य्यां दिनकतिपयविलम्बात् सम्यगासाद्य श्रीवसुदेवादिभिः सह तदीयशकटावमोचनस्थाने गत्वा; किंवा श्रीवसुदेवगृहेऽभ्यागतमुत्तमावसरे स्वस्थचित्ततया प्राप्य, यच्चाग्रे श्रीमदुद्धवेन वक्ष्यते (भा० १०।४६।३५)—'हत्वा कंसं रंगमध्ये प्रतीपं सर्व्वसात्वताम्। यदाह वः समागत्य' इत्यादि। तत्र रंगमध्ये कंसं हत्वेति यथावस्थितमेव सुसम्बन्धः, न तु रंगमध्ये समागत्येति; समासाद्येत्यादौ हेतुः,—भगवान् कृतज्ञत्वादिसर्व्वसद्गुणयुक्तः, यतो देवकीसुतः साक्षादवतारीत्यर्थः। यद्वा, तत्रापि देवकीसुतस्तत्तद्गुण-परमान्त्यकाष्ठाप्रकटनपर इत्यर्थः; यद्वा, देवकीसुतोऽपीति तदानीं श्रीदेवक्याद्यपेक्षा न स्थितेत्यर्थः; यतो भगवान्। उक्तार्थमेव; संकर्षण इति (भा० १०।८।१२)—'यदुनामपृथग्भावात्' इत्याद्युक्त्यनुसारेण श्रीवसुदेवसुतत्वेऽपि तस्य कदाचिदपि श्रीनन्दे भेदबुद्ध्यभावात्। हे राजेन्द्रेति राजश्रेष्ठत्वाद्भवता बन्धुषु व्यवहारो ज्ञायत एवेति भावः। परिष्वज्येति नित्यस्नेहस्वभावतो विशेषतश्चाधुना सान्त्वनार्थम्। इदमिति वक्ष्यमाणार्थस्यातिदुःखप्रदत्वेन सद्यस्तद्विशेषस्यानिरूप्यत्वात् क्षण वाक्स्तम्भं बोधयति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः कृष्णरामाभ्यां गतो निवृतो ज्वरस्तापो येषां येषां लब्धः मनोरथो यैस्ते सिद्धाः पूर्णकामाः कृष्णसङ्कर्षणयोर्भुजैर्गुप्ताः पालिताः गृहेषु रेमिरे ॥ १७ ॥ दयास्मिताभ्यां सहिते वीक्षणे यस्मिंस्तच्छ्रीमत्सौन्दर्यवन्नित्यं प्रमुदितं विकसितं मुकुन्दस्य वदनाम्बुजमहरहः पश्यन्तो रेमिरे इत्यनुषङ्गः ॥ १८ ॥ तत्र तदा प्रवयसो वृद्धा अपि मुहुर्मुकुन्दस्य मुखाम्बुजसुधां नेत्रैः पिबन्तो युवानो नितरां बलीयसश्चासन् अति बलौजस इति पाठे अतिशयितं बलमोजश्च येषां ते आसन् ॥ १९ ॥ अथेति नन्दं समासाद्य समीपमेत्य हे राजेन्द्र ! तमालिङ्ग्येदं वक्ष्यमाणमूचतुः ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सिद्धा इति लुप्तोपमा मुक्ता इव कृष्णरामाभ्यां गतज्वराः नष्टसन्तापाः कृष्णे रामेण रमणेन रत्या वा ॥ १७-१८ ॥ तत्र मथुरायां प्रवयसो वृद्धा अपि युवानः आसन् तत्र किमौषधमिति तत्राह। पिबन्त इति ॥ १९-२० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रीमदुद्धवादीनां तदावरणपूज्यदेवतात्वेन नित्यपार्षदत्वात् प्रवयस्त्वं न स्यादेव ये केचिदन्धकादयः प्राचीनवृद्धास्तेऽपि इत्यपिशब्दार्थः ॥ १९ ॥ इदं श्लोकत्रयं वक्ष्यमाणं केवलं पुत्रोचितमूचतुः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रवयसो वृद्धा अपि ।।१९।। बहुदिवसीयकथां कथयित्वा कंसवधदिवसस्य परेद्यवि कस्याश्चिदतिमुख्याया दुरधिगमार्थायाः कथायाः कथनारम्भबोधनायाथशब्दः नन्दं सम्यगासाद्येति तत्पुत्रत्वाभिमानवत्त्वेनैवेत्यर्थः । देवकीसुत इति । देवकीसुतत्वाभिमानमपि गूहन्नित्यर्थः । भगवानित्युभयोः समाधात्रीं स्वीयामैश्वर्यशक्तिमेवाश्रित्येति भावः । संकर्षणश्चेति यदूनामपृथग्भावात् संकर्षणमुशन्त्यपीति स्वनाम्नो व्युत्पत्तिं दर्शयन्निति भावः । परिष्वज्येति प्रणामेऽवसराप्राप्तेरिति भावः । तदवसरप्राप्त्यभावश्च तयोर्दर्शनमात्रेणैवार्गलोपमाभ्यां भुजाभ्यां श्रीनन्देनानन्दसमुद्रनिमग्नेन युगपदेवोद्धृत्यातिविस्तीर्णे स्ववक्षसि तयोर्द्वयोरेव धारणात् अतस्तयोरत्र परिष्वङ्गकर्मत्वेनेव परिष्वङ्गकर्तृत्वमभूदिति बुद्ध्यते ऊचतुरिति तदनन्तरमुपविष्टे व्रजराजे तदासनमध्यास्य तद्भुजाश्लिष्टावेव तौ संप्रश्नोत्तरवृत्तबहुवृत्तान्तकथनानन्तरमिदं सविनयं सान्तः संकोचं यादवजनतोपरोधज्ञापनपूर्वकं साश्वासं ससान्त्वनमूचतुः ।। २० ।।

गूढार्थदीपिनी

सिद्धाः कृतार्थाः सन्तः । ज्वरः सन्तापः ।। १७ ।। मुखं वीक्षन्तो रेमिरे इति योज्यम् ।। १८ । तत्र मथुरायाम् । प्रवयसः वृद्धा अपि ।। १९ ।। अथ यादवाश्वासानन्तरम् ।। २० ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णरामाभ्यां गतस्त्रिविधतापलक्षणो ज्वरो येषां ते ।। १७ ।। सदयस्मितं वीक्षणं यस्मिन् तत् ।। १८ ।। अतिशयितं बलमोजश्च येषां ते ।। १९-२० ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सिद्धा मुक्ता इवेति लुप्तोपमा । पूर्णा इति वा । कृष्णरामाभ्यां गतो ज्वर उपतापो येषां ते तथा ।। १७ ।। वीक्षन्तो वीक्षमाणा नित्यं प्रमुदितं श्रीमस्कान्तिमत्सदयं तत्स्मितवीक्षणं यस्य तत् ।। १८ ।। प्रवयसो गतवयस्का युवानोऽतिबलौजसोऽप्यासन्नित्यन्वयः । तत्र तन्त्रमाह । अक्षैः सामान्यशब्दोऽत्राक्षिरूपरूपग्राहकग्राहकः । नेत्रैर्भृङ्गैरिति योजयन्ति ।। १९ ।। देवकीसुतः परिष्वज्येत्यनेनानास्था ध्वन्यते । अन्यथा प्रणम्येति वाऽवक्ष्यत् ।। २० ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं भगवत्कृतं दुःखाभावसुखभेदेन द्वयं निरूपितमधुना तेषां प्रपञ्चविस्मृतिर्भगवदासक्तिश्च वक्तव्या यतः स्वरूपे समागताः स्वस्था हि सर्वे सर्वत्राधिकृता भवन्ति एते गृहा भगवद्दत्ता इति पूर्व एव सम्बन्धस्त्याज्यः स तु चिन्तात्मक इति पूर्वं तदभावो निरूप्यते राजसा हि विषयैरेव तदासक्ता भवन्ति अतः प्रथमं तेषां भगवद्दत्तो विषयभोगो निरूप्यते । इयमेव प्रपञ्चविस्मृतिस्तथात्वं निरूपयता भगदासक्तिस्ततो निरूप्यते । तस्य च फलं कालातिक्रम इति राजसत्वात् फलमपि निरूप्यते परमैहिकं तत्र प्रथममाह । कृष्णसङ्कर्षणभुजैरिति । कृष्णसङ्कर्षणयोर्भुजाः एकः फलात्मा अन्यो जीवं ब्रह्मणि सम्यगाकर्षति इति साधनतयोः क्रियाशक्तयः सर्वपुरुषार्थसाधकाः ता हि नियतफलाः अतस्ते सर्वे गुप्ता लब्धमनोरथाश्च जाताः दुःखाभावपूर्वकं सुखं प्राप्नवन्तः अग्रेऽपि भयाभावाय गोपनम् अन्यथा अनुभूतभयाः कंससम्बन्धिनां जरासन्धादीनां विद्यमानत्वात् अतो निश्चिन्ता अन्तर्बहिः खेदरहिताः गृहेषु रेमिरे इदं रमणं मुक्त्युत्तरकालीनमिव तदाह । सिद्धा इति । तत्तत्कामनया पीडितास्तथा रमणं कृतवन्त इति पक्षो निवारितः चिन्ताभावायाह । कृष्णरामाभ्यां सर्वतो विगतज्वराः आध्यात्मिकादितापा मुक्तानामपि भवन्तीति तदर्थमुक्तं सिद्धानां तपाभावलक्षणं कृष्णरामौ फलसाधनभूतौ अथवा तेषां संसारे भगवद्दत्ते आपाततो रमणमुक्त्वा निषेधति निरोधार्थं कृष्णरामाभ्यां कृत्वा आगताः आगतो वा ज्वरो येषां गोपिकावत्सर्व एवैते विरहातुराः सर्वदा भवन्तीति तासां तु गुणैरपि रमणं भवति एतेषां तु तदपि नास्तीत्युभयोर्ग्रहणम् ।। १७ ।। एतदेव साधयितुं भगवदासक्तिमाह । वीक्षन्त इति । अहरहः प्रतिदिनं मुकुन्दवदनाम्बुजं वीक्षन्तः प्रमुदिता जाताः प्रतिक्षणमपूर्वैव प्रीतिः अतः परमार्थज्ञानाभावेऽपि वस्तुसामर्थ्यादेव भगवन्मुखारविन्ददर्शनं नित्यप्रमुदितं प्रीतिमुत्पादयति नित्यनूतनं वस्तुतस्तु रसस्यैवायं स्वभावः आदौ प्रीतिस्तु आकाङ्क्षावशादिति वस्तुरससंभूतमेव विषयबलाज्जायमाना प्रीतिः सर्वदैव जायते, अत एव लौकिकोपाख्याने सूपकारविद्यायां तथा रसः प्रसिद्धः "रसो वै स रसं ह्येवायं लब्ध्वानन्दी भवती"ति श्रुतेश्च हीति युक्तता लोकवेदसिद्धा अन्यथा आनन्दमेव प्राप्यानन्दी भवतीति वक्तव्यं स्यात् अत एव कामशास्त्रोपयोगश्च सहजश्च काम इन्द्रियवदाकाङ्क्षारूपः न पुरुषार्थं साधयति ननु विषयत्वेनासक्तौ बन्धः स्यात् इत्याशङ्क्याह । मुकुन्द इति । तस्य रसरूपस्य मुखारविन्दस्य कदाचित्तिरोभावे प्रीता न न भविष्यन्तीत्याशङ्क्य नित्यप्रमुदितत्वमाह । तर्हि रसपुरः सरमेवानन्दं जनयतीति । रूपाद्यपेक्षार्थमन्यासक्तिः स्यात् यद्यपि विषया दत्तास्तथापि कामः समुद्र इति "समुद्र इव हि कामः नैव हि कामस्यान्तोऽस्ति न समुद्रस्येवे"ति श्रुतेः । अत आह श्रीमदिति । तल्लक्ष्मीयुक्तं सर्वविषयरूपं तथापि

सर्वलौकिकसिद्धावपि धर्मार्थं भक्त्यर्थं च अन्यासक्तिरवश्यमपेक्षितेत्याशङ्क्याह। सदयस्मितवीक्षणमिति। दयाधर्मस्थानीया तदात्मको धर्म इति स्मितं भक्तिस्थानीयं वीक्षितं ज्ञानरूपं त्रितयमपि मुखारविन्दे वर्तत इति काण्डत्रयार्थमपि अन्यापेक्षा न युक्तेत्यर्थः ॥ १८ ॥ एवं निरुद्धानां कालातिक्रममाह। तत्र प्रवयस इति। अग्रे कालातिक्रमो न भविष्यतीति न वक्तव्यमेव योऽपि विषयः कालेन भक्षितः सोऽपि तस्य मुखात् निष्कास्यते तदाह। ये प्रवयसः स्थिताः वृद्धा वार्द्धक्ये बहिः शरीरकान्तिः अन्तर्बलं च गच्छति तदुभयमाह। युवानोऽपि जाताः अतिबलीयसश्चेति अलौकिकसामर्थ्यात् तथात्वमाशङ्क्याह। पिबन्तोऽक्षैरिति। मुखाम्बुजसुधां पिबन्त एव तथा जाताः। ननु सुधाया अपि न तथा साधकत्वं यतस्त्रिदशाः कालेन च ग्रासं प्राप्नुवन्ति अत आह। मोक्षदातुर्मुकुन्दस्येति यो ह्यात्मस्वरूपं प्रयच्छति स कालातिक्रमं कारयत्येव तत्रापि तस्य मुखं प्रधानभूतं तत्राप्यम्बुजं परमशीतं सर्वतापमाशकं स्वभावत एव तादृशधर्मयुक्तं तत्रत्या च सुधा अलौकिकी भवत्येवेति कालेन भक्षितपदार्थानामपि पुनरुद्गमनं युक्तमेव तत्रापि मुहुरिति अनेन तेषाममृतमयत्वमेव युक्तं कियदेतदतिबलिष्ठत्वादि ॥ १९ ॥ एवं सर्वेषां निरोधमुक्त्वा नन्दादीनां प्रस्थापनेन तामसानामप्युत्कर्षार्थं राजसप्रकरणे विशेषमाह। अथ नन्दमिति षड्भिः। भगवतैव षड्गुणैस्ते व्यावर्तिताः अतिबलेन अन्यथा अव्यावृत्त एव भवेयुरिति "संभाषणार्थमुद्योगः पूर्वस्थापनमेव च। निराकृतिश्च बाधानां प्रेषणाज्ञापनं ततः। दानं च प्रीतिसंसिद्ध्यै गमनं चापि रूप्यते" अथेति भिन्नप्रक्रमे "प्रामाणिकत्वं दासत्वं स्वामित्वं च निरूपितम्। पुनः संस्थानतासिद्ध्यै नन्दसामीप्यमागतौ"। सम्यगासाद्य पूर्ववदेव भगवदिच्छाया बलिष्ठत्वात् पुत्रप्रतीतिर्दृढोत्पादितेति अन्यथा शङ्काभावात् सम्यगेवासाद्य भगवान् सर्वसमर्थः प्रत्यक्षदृष्टमप्यन्यथा कर्तुं समर्थः प्रेषणार्थं संकर्षणश्च उभौ मिलित्वेदमूचतुः उभयोरप्यन्यपुत्रत्वेन तुल्यत्वात् समानभावं च ख्यापितवन्तौ। नन्वेवं किमिति कृतवान् कथं गोकुलपर्यन्तं न गत इत्याह। संकर्षण इति। चकारात्सोऽपि देवकीसुतः तर्हि कथं रोहिणीसुत इत्याशङ्क्य तदुदराद्यापादकं धर्मं सूचयितुं संकर्षण इत्याह। राजेन्द्रेति महामन्त्रयुक्तानां राज्ञामयं धर्म इति बोधयति परिष्वङ्गः विरहाभावाय स्वधर्मसंस्थापनार्थं बाला हि दूरादागत्य पितरमालिङ्गन्ति इदं वक्ष्यमाणम् ॥ २० ॥

श्रीसुबोधिनी-सारः

कृष्णरामहस्तैर्गुप्ता रक्षिताः प्राप्तमनोरथाः कृष्णरामाभ्यां गता ज्वरास्तापा येषां ते सिद्धा पूर्णा गृहेषु रेमिरे ॥ १७ ॥ नित्यं प्रमुदितं विकसितं श्रीमत् सदयेन स्मितेन वीक्षणं यस्मिन् तत् मुकुन्दस्य वदनाम्बुजं मुखपद्मम् अहरहः प्रतिदिनं वीक्षन्तः प्रीताः ॥ १८ ॥ अक्षैर्नेत्रैर्मुकुन्दस्य मुखाम्बुजस्य सुधाममृतं मुहुरसकृत् पिबन्तः प्रवयसो वृद्धा अपि तत्र मथुरायामतिबलौजसो युवानस्तरुणा आसन् ॥ १९ ॥ अथानन्तरं भगवान् देवकीसुतः कृष्णः संकर्षणो रामश्च नन्दं समासाद्य संप्राप्य परिष्वज्यालिंग्येदमूचतुः हे राजेन्द्र ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कृष्णसङ्कर्षणभुजैर्गुप्ताः शत्रुभ्यो रक्षिताः, अत एव ताभ्यामेव गतो निवृत्तः ज्वरः आध्यात्मिकादिः सन्तापो येषां ते, लब्धमनोरथाः आप्तकामाः, अत एव सिद्धाः कृतार्थाः सन्तो यादवा गृहेषु रेमिरे ॥ १७ ॥ तेषां तद्दर्शनानन्दं दर्शयति—वीक्षन्त इति। मुकुन्दस्य मोक्षप्रदस्य कृष्णस्य वदनमेव सन्तापनाशकत्वादानन्दजनकत्वाच्च अम्बुजं तदहरहः पश्यन्तः प्रीताश्च सन्तो गृहेषु रेमिरे इति पूर्वेणैवान्वयः। परमानन्दजनकत्वमेव सूचयन् विशिनष्टि-नित्यं प्रमुदितमिति। श्रीमत् सौन्दर्यातिशययुक्तम्, दयास्मिताभ्यां सहिते वीक्षणे यस्मिंस्तत् ॥ १८ ॥ तद्दर्शनफलान्तरमाह—तत्रेति। तत्र मधुपुर्यां मुकुन्दस्य मुखाम्बुजसुधां मुखमाधुर्यं नेत्रैर्भृङ्गैर्मुहुः पिबन्तः प्रवयसो वृद्धा अपि युवानः अतिशयितं बल ओजश्च येषां तथा आसन् ॥ १९ ॥ अथ मथुरावासिजनसमाश्वासनानन्तरं 'इयमपि भगवतो राजलीला विचित्रा' इति सूचयन् सम्बोधयति—राजेन्द्रेति। हे राजेन्द्र भगवान् कृष्णः सङ्कर्षणश्च नन्दं समासाद्य तत्समीपमागत्य परिष्वज्य आलिङ्ग्य इदं वक्ष्यमाणमूचतुः। एवमुक्तौ हेतुमाह—देवकीसुत इति। देवक्या अपि मनोरथस्य तेनैव पूरणीयत्वादित्याशयः ॥ २० ॥

अन्वितार्थप्रकाशिका

कृष्णेति। कृष्णसङ्कर्षणभुजैर्गुप्ताः शत्रुभ्यो रक्षिता अत एव ताभ्यामेव गतो निवृत्तः ज्वरः तापो येषां ते लब्धमनोरथाः आप्तकामाः अतएव सिद्धाः कृतार्थाः सन्तो यादवा गृहेषु रेमिरे ॥ १७ ॥ वीक्षन्त इति। नित्यं प्रमुदितं श्रीमत्सौन्दर्यातिशययुक्तं दयास्मिताभ्यां सहिते वीक्षणे यस्मिंस्तत् मुकुन्दस्य वदनाम्बुजम् अहरहः वीक्षन्तः। शता आर्षः। प्रीताश्च सन्तो गृहेषु रेमिरे इत्यनुषङ्गः ॥ १८ ॥ तत्रेति। तत्र मधुपुर्यां मुकुन्दस्य मुखाम्बुजसुधां मुखमाधुर्यं नेत्रैर्भृङ्गैर्मुहुः पिबन्तः प्रवयसो वृद्धा अपि युवानः अतिशयितं बलम् ओजश्च येषां तथा आसन् ॥ १९ ॥ अथ बहुदिवसकथानन्तरं कंसवधदिवसस्य परेद्यवि कस्यांश्चदतिमुख्याया दुरधिगमार्थायाः कथायाः उपक्रमः। अथेति। हे राजेन्द्र! भगवान् देवकीसुतः संकर्षणश्च नन्दं समासाद्य तत्समीपमागत्य परिष्वज्य प्रणामावसरमप्राप्य प्रेमवेगात् आलिङ्ग्य वेदं वक्ष्यमाणमूचतुः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सिद्धाः पूर्णमनोरथाः रामकृष्णाभ्यां गतज्वराः नष्टकंसकृतसंतापाः ॥ १७ ॥ दयासहितं स्मितं वीक्षणं च यस्मिन् तत् ॥ १८ ॥ तत्र प्रवयसोऽपि स्थविरा अपि अतिशयं बलं देहसामर्थ्यं ओजः इन्द्रियान्तःकरणसामर्थ्यं च येषां ते वीक्षन्तो वीक्षमाणा ॥ १९–२० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्णेति ॥ ततः, कृष्णश्च रामश्च ताभ्यां गतो ज्वरो येषां ते, लब्धो मनोरथो यैस्ते यादवाः, कृष्णसंकर्षणभुजैः गुप्ताः, सिद्धाः पूर्णकामाः सन्तः, गृहेषु स्वभवनेषु, रेमिरे ॥ १७ ॥ वीक्षन्त इति ॥ दया च स्मितं च ताभ्यां सहिते सदयस्मिते वीक्षणे यस्मिंस्तत्, दयाशब्दस्य पुंवद्भाव आर्षः। श्रीमत्सौन्दर्यातिशयोपेतं, नित्यं प्रमुदितं सर्वदा विकसितं, मुकुन्दवदनाम्बुजं मुक्तिप्रद-श्रीकृष्णमुखपद्मं, अहः अहः प्रतिदिनं, वीक्षन्तो वीक्षमाणाः, अत एव प्रीताः प्रसन्नतोपेताः सन्तः, रेमिरे इति पूर्वेण सम्बन्धः ॥ १८ ॥ तत्रेति ॥ तत्र तदा, प्रवयसो वृद्धाः अपि, मुहुः मुकुन्दस्य मुखाम्बुजसुधां, अक्षैर्नेत्रैः, पिबन्तः सन्तः, युवानः अतिबलीयसः नितरां बलीयसश्च, आसन्। अतिबलौजस इति पाठे अतिशयितं बलं शारीरं सामर्थ्यं ओज ऐन्द्रियं सामर्थ्यं च येषां तथाभूताः, आसन् ॥ १९ ॥ अथेति ॥ अथ देवकीसुतः देवकीसुत इति प्रसिद्धिं प्राप्तः, भगवान् श्रीकृष्णः, संकर्षणः रामश्च, हे राजेन्द्र, नन्दं समासाद्य समीपमेत्य, परिष्वज्यालिङ्ग्य च, इदं वक्ष्यमाणं, ऊचतुः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तत्र प्रवयस इतिः १०.४५.१९.

यातं नैति पुनर्वयः कथमपीत्युक्तिर्हि तेषु प्रमा भ्रान्तोन्मत्तधियो भवन्ति विमुखा ये सम्मुखेऽपि त्वयि।
त्वद्वक्त्राब्जसुधारसानवरतास्वादास्तु ये स्युर्जरादुःखं ते निखिलं विधूय तरुणाः स्युस्तत्र मानं जनः ॥ २१ ॥

अथ नन्दमिति : १०.४५.२०.

आसीदनर्हसमयो हि यदा तदाऽहमेतेन नैजसुतवद् बहुलालितस्तम्।
त्यक्ष्याम्यहंयदि समग्रसुखेऽह्नि काऽन्यास्यात् तत्कृतघ्नपदवीति तमाजगाम ॥ २२ ॥
सदानन्दसमाश्लिष्टस्वरूपोऽहमिति प्रथाम्। यथार्थां विशदीकर्तुं स नन्दं परिषस्वजे ॥ २३ ॥
व्रजं व्रजाम्यद्य कथं विना त्वामेवं विभाव्याशयमस्य कृष्णः।
आलिङ्गनेनाखिलसौख्यभाजा निजात्मतादात्म्यमकल्पयत् सः ॥ २४ ॥
सम्बन्धो हार्द एव व्रजमनुजपते चिन्तनीयस्त्वयेतो नान्यः पित्रात्मजात्मेत्यखिलहृदयगो बोधयन् वासुदेवः।
मन्ये तं वाऽऽलिलिङ्ग स्वहृदयविलसत्प्रेमपीयूषपात्रं नैवं चेद्वन्दनार्हे कथमकृत परीरम्भणं मित्रयोग्यम् ॥ २५ ॥
स्वप्रेम तद्धृदयगं बहुवर्धमानमाकृष्टमेव परिरम्भण - कैतवेन।
मन्येऽन्यथा कथमहो विरहासहिष्णुर्गच्छेद् व्रजं विरहितः प्रभुणा न नन्दः ॥ २६ ॥
अहं परोक्षोऽपि बहिर्दृशा व्रजे व्रजामि योगादपरोक्षतां सदा।
व्रजेशमेवं प्रतिबोधयन् प्रभुर्बलेन सानन्दमिहालिलिङ्ग सः ॥ २७ ॥

कृष्णप्रिया

मथुरा से बाहर चले गए हुए सर्वयादवादिजनों को भगवान् श्रीकृष्ण एवं बलरामजी ने वापिस बुलाकर निर्भय बनाकर सर्व को सफल संकल्प बना दिए। भगवान् श्रीकृष्ण एवं बलभद्रजी का आश्रय समागम आदि सब मिलने से उनके समस्त दुःख दूर हो गए, एवं सर्व यादव अपने अपने घरों में सानन्द रहने लगे, सुख भोगने लगे ॥ १७ ॥ राजन् यादवों के दुःख निवृत्ति के लिए क्या कहा जाय! बड़भागी यादव, नित्यप्रसन्न, नित्यमुदमङ्गलमय, सौन्दर्यपूर्ण कारुण्यस्मित से सुमधुर श्रीमुकुन्द भगवान का मुखकमल का दर्शन करते सदा प्रफुल्लित रहते थे ॥ १८ ॥ भगवद् दर्शन की यह एक विशिष्टता थी कि जो लोक श्रीमुकुन्द के मुखाम्बुज की दिव्य सुधा का बार बार पान करने वृद्धजन भी युवान और अत्यन्त बलशाली हो जाते थे ॥ १९ ॥ अब तक शुकाचार्यजी माथुर राजस भक्तों का निरोध कह रहे थे, लेकिन प्रसङ्गवश प्रभु के अनन्य एवं लाडीले व्रज के तामस दिव्यभक्तों की गाथा सुनाते हैं। "अथ" अव्यय प्रकरण भेद के लिए व्यासजी ने इस श्लोक में लिया है—राजेन्द्र परीक्षित! अब देवकीनन्दन श्रीकृष्ण एवं संकर्षण श्रीबलभद्रजी श्रीनन्दरायजी समीप पधारे उनकी गोद में बैठ गए पुनः आलिङ्गन करते कहने लगे ॥ २० ॥

पितुर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशम् । पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोऽपि हि ॥२१॥
स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् । शिशून् बन्धुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥२२॥
यात यूयं व्रजं तात वयं च स्नेहदुःखितान् । ज्ञातीन् [2]वो द्रष्टुमेष्यामो विधाय सुहृदां [3]सुखम् ॥२३॥
एवं सान्त्वय्य भगवान् नन्दं सव्रजमच्युतः । वासोऽलङ्कारकुप्या[4]ग्रैरर्हयामास सादरम् ॥२४॥

कर्वमक्षमा

अन्वयः—हे पितः ? स्निग्धाभ्याम्, युवाभ्याम्, हि, आत्मनः, आत्मनेषु, पित्रोः, अपि, अधिका, प्रीतिः, (विहिता) भृशम्, लालितौ, पालितौ ॥ २१ ॥ पोषणरक्षणे, अकल्पैः, बन्धुभिः, उत्सृष्टान्, शिशून्, यौ, स्वपुत्रवत्, पुष्णीताम्, सः, पिता, च, सा, जननी ॥२२॥ हे तात ? यूयम्, व्रजम्, यात, वयम्, सुहृदाम्, सुखम्, विधाय, वः, ज्ञातीन्, द्रष्टुम्, एष्यामः ॥२३॥ एवम्, भगवान्, अच्युतः, सव्रजम्, नन्दम्, सान्त्वय्य, वासोऽलङ्कारकुप्याग्रैः, सादरम्, अर्हयामास ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भृशमात्मनोऽप्याधिक्येन पोषितौ । न चाश्चर्यमेतदित्याह । पित्रोरिति । आत्मनो देहादप्यात्मजेषु पित्रोरभ्यधिका हि प्रीतिरिति ॥ २१ ॥ देवकीवसुदेवयोः पुत्रौ युवां नास्मत्पुत्रावित्यपि न वाच्यमित्याह । स पितेति ॥ २२-२३ ॥ सव्रजं व्रजवासिभिः सहितम् । कुप्यानि स्वर्णरजतव्यतिरिक्तकांस्यपात्रादीनि तत्प्रभृतिभिः ॥ २४-२५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

युवाभ्यां नन्दयशोदाभ्याम् । एतत् आत्माधिक्येन पोषणम् । प्रथमं ज्येष्ठत्वाद्बलदेव आह—द्वाभ्याम् । हे पितुर्युवाभ्यां मातापितृभ्यां यशोदानन्दसंज्ञाभ्यामित्यर्थः । एतच्च युक्तमेवेत्याह—पित्रोरिति । आत्मनो देहादप्यात्मजेष्वौरसेष्वभ्यधिका स्यादेव । पोषितौ लालितावित्यत्र द्विवचनेन मित्रपुत्रे मयि स्वपुत्रे कृष्णे च युवयोस्तुल्यवात्सल्यस्य दृष्टत्वात् । युवामेव यथा कृष्णस्य तथा ममापीत्यावयोर्द्वयोरपि पितराविति द्योतयित्वा युवां लालकौ विना कोटिप्राणप्रियतमं भ्रातरं कृष्णञ्च विनाऽत्र पुर्यामपरिचितयोर्देवकीवसुदेवयोः पित्रोर्गृहे मया स्थातुं न शक्यत इत्यनुद्योतितम् ॥ २१ ॥ नन्दं बोधयति भगवान्—देवकीत्यादिना । उत्सृष्टाँस्त्यक्तान् । पोषरक्षणे इति समाहारद्वन्द्वः । ननु भो बलभद्र सत्यमेव त्वं मम मित्रस्य वसुदेवस्यैव पुत्रोऽसि, स च विषन्मुक्तश्चिरात्प्राप्तं त्वां पुत्रं कथं त्यक्तुं प्रभविष्यत्यतस्त्वं सम्प्रति स्वपितुस्तस्यैव गृहे तिष्ठ आवां तु त्वद्विच्छेदविदीर्णं स्वहृदयं विवेकशिलया पिधाय कथंचिज्जीविष्यावो न तु वसुदेवस्य सख्युर्दुःखं द्रष्टुं प्रभविष्यावो यत आवां तव पोषकावेव पितराविति चेत्तत्राह—स इति । तेषां शिशूनां स एव पिता सैव जननी न त्वाधानकर्तापि पिता स्वकुक्षौ धृतवत्यपि जननी, ताभ्यामुत्सृष्टानां शिशूनां यदि प्राणा एवाऽयास्यँस्तदा केषां तौ पितरावभविष्यतामतः शिशुभिरपि विवेकिभिः पोषकावेव पितरौ, ताभ्यामपि सकाशाद्बहु माननीयावतो मया नात्र स्थातव्यं, यदि स्वयं ब्रह्माप्यागत्य वदेत्तेनापि ममायं हठो न शिथिलयितुं शक्यः, हन्तहन्त पितुस्तव सगे कृष्णो व्रजं गत्वा सुखेन खेलयिष्यति, अहं तु कृष्णविच्छेददावदग्धो मथुरायां स्थास्यामीति सर्वथैव न भवेत्तस्माद्धोः पितरहं सशपथमेवेदं ब्रुवे—यदि कृष्णो मां हित्वा त्वत्संगेन व्रजं यास्यति तदा मे प्राणाः सद्य एव यास्यन्तीति स्वाभिप्रायो द्योतितः ॥ २२ ॥ वो युष्मान् ज्ञातीन् । पूर्वोक्तरीत्या नन्दादयोऽपि ज्ञातय एव । अत्रत्यं किंचित्कृत्यं कृत्वेत्याह—विधायेति । एष्याम इत्युक्त्येश्च बहवो मिलित्वा गमिष्यामः । एतेन कुरुक्षेत्रयात्रा सूचिता, तत्रैव तथा संभवादिति तात्पर्यम् । तथैव सान्त्वयति—यातेति । वयमिति द्वित्वे "अस्मदो द्वयोश्च" इति वचनात् । चकारेणोद्धवं संगृह्णाति । पूर्वमेतावागमिष्यतः पश्चात्स्वयमित्यर्थः । सुहृदां भवत्सख्यादिसम्बन्धेनैव पित्रादितया मतानां श्रीवसुदेवादीनां सुखं विधायेति तदिच्छया तत्तत्कार्यसाधनाय यद्यस्मिन्यादवपांडवादिमेलनेच्छया च तदौरसत्वख्यापनपूर्वकं तद्विद्वेषिदंतवक्त्रपर्यंतदुष्टवधावधिकमभीष्टं सम्पाद्येत्यर्थः । एतदर्थं भवतां यदुवंशोत्पन्नत्वमवलम्ब्य मातृपक्षेऽपि "ब्राह्मणादुग्रकन्यायामावृतो नाम जायते । आभीरोबष्ठकन्यायामायोगव्यात्तु धिग्वणः ।" इति मनुस्मृतेस्तदुत्तमत्वमालम्ब्य क्षत्रियकन्या अपि परिणेष्यामीत्यनुक्त्वा प्रार्थनव्यञ्जना च । आपातगमनेनैषां प्रीतिभंगः स्याद्भवतां तु न कोटिकल्पान्तरेऽपीति भावः । तदेव ज्ञातीन्साक्षात्पित्रादीन् स्नेहदुःखितान्द्रष्टुमेष्यामः । पश्यन्त एव स्थातुमागमिष्याम इत्यर्थः । तदर्थतायां विहितेन तुमुन्प्रत्ययेन तस्यैव पुरुषार्थत्वव्यञ्जनात् । यद्वा—'तथापि भूमन्महिमा गुणस्य ते' इत्यत्र बोधगोचरीभवितुमितिवदत्रापि द्रष्टुं गोचरीभवितुमिति व्याख्येयम् । न च यत्किञ्चिदेव दर्शनमात्रार्थं किन्त्वविच्छिन्नमेवेत्यभिप्रेत्याह—स्नेहदुःखितानिति । स्नेहस्य निरवधिकत्वे तद्धेतुकादर्शनदुःखस्य तादृशत्वमिति विचार्य यस्मात्करुणाकुलतया गमिष्यामस्तस्मान्नित्यनिजाविर्भावदानेन युष्माकं तद्दुःखमवश्यमेव दूरीकरिष्याम इत्यर्थः । अत्र सुखं विधायेति तस्य

---

१. रण्य-विज. । २. ज्ञातीन्नो-विज. । ३. प्रियम्-वीर. । ४. कुप्याद्यै-श्रीधर. वंशी. जीव. वीर. विश्व. ; कुप्याग्रै-विज. ।

तु पुनरपेक्षणीयत्वं दर्शितम् । तदेवं ज्ञातिषु भवत्सु नित्यावस्थानमेव युक्तं तेषु सुहृत्सु पुनरैच्छिकमेव तदिति भावः । किञ्च—सुहृदां सुखं विधायेति मध्ये मध्ये समागमने कदर्थनैव स्यात्, आपातसमाधानार्थं साक्षात्कारतुल्यं ममाप्रकटलीलास्फोरणं तदुद्धव एव करिष्यतीति व्यञ्जितम् । तदेतदुद्धवसंदेशे व्याख्यास्यते व्रजमागत्य श्रीकृष्णस्य नित्यावस्थितिश्च दन्तवक्त्रवधान्ते स्थापयिष्यते । श्रीनन्दस्तु तदेतत्सर्वं तदभिप्रेतं न तदानीं सदावगतवान्, क्रमेणैव तु बोद्धेति गम्यम् ॥ २३ ॥ एवं निजागमनोक्त्या सान्त्वय्याश्वास्य । "अकुप्यं रूप्यहेमादि कुप्यमन्यद्धनादिकम्" इति हलायुधः । प्रभृतिपदेन ताम्रलोहकाष्ठपीठशकटादीनां ग्रहः । सान्त्वय्येत्यत्र हेतुः—भगवान्, सर्वं कर्तुं समर्थः । मत्पुत्रोऽयं सत्यवाक्यात्कदापि च्युतो न स्यादिति श्रीनन्दसम्भावनोत्पादनायेति भावः । सव्रजं सर्वव्रजजनैः सहितम् । ये तत्र सङ्गे गतास्तान्साक्षादेव तादृशवाक्येन तत्तत्प्रदानेन च, ये व्रजस्थाः श्रीयशोदादयस्तानपि तत्तत्प्रेषणेन चेत्यर्थः । कुप्यानि गोदोहनार्थं कांस्यादिपात्राणि । आदिशब्दादुत्तमयानादीनि । व्रजस्य तत्तदधिकसम्पत्सद्भावेऽपि तत्तत्प्रदानं प्रीति मयत्वाद्वांछिततमं गन्धपुष्पादिवत् । तदेवाह—सादरं यथा स्यात्तथा । यद्वा-सादरं श्रीनन्दं पुत्रेण यदुच्यते क्रियते वा तत्रतत्रैव स्नेहभरेण प्रीयमाणमित्यर्थः । अर्हयामासेति—श्रीवसुदेवोग्रसेनादीनानाय्य तद्द्वारा पूजयामास । स्वयं तु सन्निधानेनैव हेतुरासीदित्यर्थः । 'कारीषाग्निरध्यापयति' इतिवत्तदायुक्तवात् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथैव हेतुर्हे पितः ! हि यस्मात् आत्मानमप्यतिक्रम्य पित्रोरात्मजेष्वौरसेषु अभ्यधिका प्रीतिः स्यात्तस्मादेव भृशमत्यर्थं स्निग्धाभ्यां युवाभ्यां भोजनादिना पोषितौ स्नपनादिना लालितौ च तदिदं नाश्चर्यमिति भावः ॥ २१ ॥ अत्र सङ्कर्षणोऽपि नान्यथा मन्तव्य इति स्वयं श्रीकृष्ण आह । स पितेति । चकारोऽप्यर्थे । सोऽपि तस्मात् सङ्कर्षणाऽपि नान्यथा मन्तव्य इति मम तु जन्मादित्रयहेतू एव भवन्ताविति भावः । यद्वा । स एव पिता सैव जननी नतु त्यक्तवन्तः पूर्वपित्रादयः । तस्माद्यद्यन्यतो जन्म स्यात्तथापि किमुतात्मजादित्रयमित्यादि ॥ २२ ॥ तथैव सान्त्वय्येति । यातेति । वयमिति द्वित्वे "अस्मदोद्वयोश्च" इति वचनात् । चकारेणोद्धवं संगृह्णाति पूर्वमेतावागमिष्यतः पश्चात् स्वयमित्यर्थः । सुहृदां भवत्सख्यादिसम्बन्धेनैव पित्रादितया मतानां श्रीवसुदेवादीनां सुखं विधायेति तदिच्छया तत्तत्कार्यसाधनाय यद्यस्मिन् यादवपाण्डवादिमेलनेच्छया च तदौरसत्वख्यापनपूर्वकं तद्विद्विषिदन्तवक्त्रपर्यन्तदुष्टवधावधिकमभीष्ट सम्पाद्येत्यर्थः । एतदर्थं भवतां यदुवंशोत्पन्नत्वमवलम्ब्य मातृपक्षेऽपि "ब्राह्मणादुग्रकन्यायामावृतो नाम जायते । आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वण" इति मनुस्मृतेस्तदुत्तमत्वमालम्ब्य क्षत्रियकन्या अपि परिणेष्यामीत्यनुक्त्वा प्रार्थनव्यञ्जना च । आपातगमनेनैषां प्रीतिभङ्गः स्याद्भवतान्तु न कोटिकल्पान्तरेऽपीति भावः । तदेव स्थापयति ज्ञातीन् साक्षात् पित्रादीन् स्नेहदुःखितान् द्रष्टुमेष्यामः पश्यन्त एव स्थातुमागमिष्याम इत्यर्थः । तदर्थतायां विहितेन तु तुमुन्प्रत्ययेन तस्यैव पुरुषार्थत्वव्यञ्जनात् । यद्वा । तथापि भूमन्महिमागुणस्येत्यत्र बोधगोचरीभवितुमितिवदत्रापि दृष्टिगोचरीभवितुमिति व्याख्येयं नच यत् किञ्चिदेव दर्शनमात्रार्थं किन्त्वविच्छिन्नमेवेत्यभिप्रेत्याह । स्नेहदुःखितानिति । स्नेहस्य निरवधिकत्वे तद्धेतुकादर्शनदुःखस्य तादृशत्वमिति विचार्य यस्मात् करुणाकुलतया गमिष्यामस्तस्मान्नित्यनिजाविर्भावदानेन युष्माकं तद्दुःखमवश्यमेव दूरीकरिष्याम इत्यर्थः । अत्र सुखं विधायेति क्त्वाप्रत्ययेन तस्य तु पुनरपेक्षणीयत्वं दर्शितं तदेवं ज्ञातिषु भवत्सु नित्यावस्थानमेव युक्तं तेषु सुहृत्सु पुनरैच्छिकमेव तदिति भावः । किञ्च सुहृदां सुखं विधायेति मध्ये मध्ये समागमने कदर्थनैव स्यात् । आपातसमाधानार्थं साक्षात्कारतुल्यं ममाप्रकटलीलास्फोरणं तदुद्धव एव करिष्यतीति व्यञ्जितं तदेतदुद्धवसन्देशे व्याख्यास्यते । व्रजमागत्य श्रीकृष्णस्य नित्यावस्थितिश्च दन्तवक्त्रवधान्ते स्थापयिष्यते । श्रीनन्दस्तु तदेतत् सर्वं तदभिप्रेतं न तदानीं सदावगतवान् क्रमेणैव तु बाद्धेति गम्यम् ॥२३॥ सान्त्वय्येत्यत्र हेतुः । भगवान् सर्वं कर्तुं समर्थ इत्यर्थः । मत्पुत्रोऽयं सत्यवाक्यात् कदापि च्युतो न स्यादिति श्रीनन्दसम्भावनोत्पादनायेति भावः । सव्रज सर्वव्रजजनैः सहितं ये तत्र सङ्गे गतास्तान् साक्षादेव तत्तादृशप्रणयवाक्येन तत्तत् प्रदानेन च ये च व्रजस्थाः श्रीयशोदादयस्तानपि तत्तत्प्रेषणेन चेत्यर्थः । कुप्यानि गोदोहनाद्यर्थं कांस्यादिपात्राणि आदिशब्दादुत्तम यानादीनि । व्रजस्य तत्तदधिकसम्पत्सद्भावेऽपि तत्तद्दानं प्रीतिमयत्वाद्व्यञ्जिततमं गन्धपुष्पादिवत्तदेवाह सादरं यथा स्यात् । यद्वा । सादरं श्रीनन्दं पुत्रेण यदुच्यते क्रियते वा तत्र तत्रैव स्नेहभरेण प्रीयमाणमित्यर्थः । अर्हयामासेति श्रीवसुदेवोग्रसेनादीनानाय्य तद्द्वारा पूजयामास स्वयन्तु सान्निध्येनैव हेतुरासीदित्यर्थः । कारीषोऽग्निरध्यापयतीति वत् तदा युक्तत्वात् ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे पितरिति तदानीमपि तस्मिन्नेव स्वस्य पितृत्वज्ञानात् । स्नेहाधिक्यं द्योतयति—युवाभ्यामिति । तत्रावर्त्तमानामपि श्रीव्रजेश्वरीं स्नेहभरेण स्मरन् साक्षादिव मत्वा परामृशति—लालितौ च परिपालनालिंगनपरिचरणेच्छानुवर्त्तमानादिना क्रीड़यदभ्यामानन्दितौ, यतः स्निग्धाभ्यामिति निरुपाधिकत्वमुक्तम्, हि यत इति; पोषिताविर्त्युक्त्या प्राप्तां पुष्टपुत्रताशंकां निरस्यौरसपुत्रत्वं स्थिरीकृतम् ॥ २१ ॥ स एव पिता, सैव जननी च; न च गर्भाधानात् गर्भे धारणाच्चेति भावः । शिशून्—अभिनव-

बालकान्, बन्धुभिः पित्रादिभिरुत्सृष्टान् दूरतस्त्यक्तान्; तत्र हेतुः—अकल्पैरिति; इति तेषां दोषोऽपि परिहृतः; शिशूनां महादैन्यं चोक्तम्। यद्वा, 'च' अपि, सोऽपि पिता, सापि जननी, किं पुनर्जन्मदाता त्वम्, गर्भे धात्री सा चेति श्रीवसुदेवदेवक्योश्च पूर्वजन्मनि पुत्रतया सम्बन्धमात्रं पाल्यत इतिभावः ॥ २२ ॥ तथैव सान्त्वयति—यातेति। युयमिति संगागतगोपवर्गसाहित्याभिप्रायेण। हे तातेति स्वोक्तप्रतिपालनायाधिकस्नेहं जनयति। वयमिति बहुत्वं श्रीबलदेवोद्धवाद्यपेक्षया, किंवा श्रीबलदेवरूपेण व्रजमेष्याम इति तस्य गुरुत्वाद्बहुवचनम्। 'ज्ञातीन्' इति तत्वतो युयमेव ज्ञातयः, न तु यादवा इति यदुभ्योऽपि युयमधिकमपेक्ष्या इति भावः। किञ्च, स्नेहेन दुःखितान् मद्विच्छेदेन स्नेहोद्रेकादधिकसन्तप्तानित्यर्थः। सदार्त्तान् वा, अतएवानुपेक्ष्याप्यवश्यं युष्मान् द्रष्टुं व्रजमेष्याम इति भावः। द्रष्टुमिति, न च किञ्चित् प्रत्युपकर्त्तुम्, तत्रासामर्थ्यादित्यर्थः। तत्र तस्य (भा० १०।३२।२२)—'न पारयेऽहम्' इत्यादिवचनान्येव प्रमाणम्, तत्त्वतस्तु द्रष्टुमेव, न तु वस्तुं सान्त्वयितुं वेत्यर्थः। तत्र हेतुः—स्नेहेति, स्नेहभरस्वभावेन विशेषतश्च विश्लेषेणात्यार्त्तानित्यर्थः। 'अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता। नादृष्टेन न दृष्टेन भवता लभ्यते सुखम्।' इत्यादि-न्यायेन सुखायितुमशक्तेरिति भावः। एतच्च श्रीभागवतामृतादिखण्डान्ते विवृतमस्त्येव ॥ २३ ॥ सान्त्वय्येत्यत्र हेतुः—भगवानिति सर्व्वं कर्त्तुं शक्त इत्यर्थः। किञ्च, अच्युत इति मत्पुत्रोऽयं सत्यवाक्यात् कदापि च्युतो न स्यादिति श्रीनन्दसम्भावनयापीत्यर्थः। सव्रजं सर्व्वव्रजजनैः सहितम्, ये तत्र सङ्गगतास्तान् साक्षादेव तत्तत्प्रदानेन, ये च व्रजे स्थिताः श्रीयशोदादयस्तानपि तत्तन्नाम्ना तत्तत्प्रेषणेनेत्यर्थः। कुप्यानि गोदोहनार्थं दुग्धपाकाद्यर्थञ्च तत्तद्योग्यानि चिरस्थायीनि कांस्यादिपात्राणि, आद्य-शब्दादुत्तमपात्रादीनि; आदरः श्रद्धा, तत्सहितं यथा स्यादित्यौदासीन्यं निरस्तम्, तच्च सर्व्वं व्रजे पुनर्निजागमनं प्रति श्रीनन्दादीनां विश्वासोत्पादनार्थम्। यद्वा, सादर नन्दं पुत्रेण यदुच्यते क्रियते वा तत्र तत्रैव स्नेहभरेण प्रीयमाणमित्यर्थः। अयमर्हणे सान्त्वने च हेतुविशेषः; तथापि वस्त्रादिभिरर्हणप्रयोजनं तदेव ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह त्रिभिः। हे पितः! स्निग्धाभ्यामनुरक्ताभ्यां युवाभ्यां भृशमात्मनोऽप्याधिक्येन पोषितौ पालितौ च न चाश्चर्यमेतदित्याहतुः पित्रोरिति। मातापित्रोरात्मनः स्वशरीरादप्यात्मजेष्वभ्यधिका प्रीतिरिति ॥ २१ ॥ ननु युवयोः पितरौ देवकीवसुदेवौ नावागमित्यत्राहतुः। स पितेति। पोषणे रक्षणे चाकल्पैरसमर्थैर्बन्धुभिः उत्सृष्टांस्त्यक्तान् शिशून् यौ स्वपुत्रवत्पोषितवन्तौ तावेव पितरावित्यर्थः ॥ २२ ॥ अस्तु प्रकृते किं तत्राहतुः। यातेति। हे तात! यूयं व्रजं प्रति गच्छत वयं त्वत्रत्यानां सुहृदां प्रियं विधाय अस्मत्स्नेहेन दुःखितान् युष्मान् द्रष्टुमेष्यामः आगमिष्यामः ॥ २३ ॥ इत्थं सभायां सव्रज व्रजवासिभिः सहितं नन्दं सान्त्वयित्वा वस्त्रादिभिः सादरं यथा तथाऽर्हयामास तत्र कुप्यानि सुवर्णरजतादिव्यतिरिक्तानि कांस्यादिपात्राणि तत्प्रभृतिभिः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

आत्मनः स्वस्मादपि ॥ २१ ॥ पुष्णीताम् अपुष्णीतां पोषणमकुर्वत पोषणक्षणे पोषणरक्षणयोः ॥ २२ ॥ वयं नोऽस्माकं ज्ञातीन् स्नेहनिमित्तेन दुःखितान् युष्मान् द्रष्टुमेष्यामोऽधुना व्रजं यात इदानीमागन्तुककार्यमस्ति तत्संसाध्येत्याह। विधायेति ।२३। सान्त्वय्य सान्त्वयित्वा सव्रजं सगोपं वासोभिरलङ्कारैश्च कुप्याग्र्यैः रजतहेमादिव्यतिरिक्तद्रव्यश्रेष्ठैश्च अकुप्यं रूप्यहेमादि कुप्यमन्यद्धनादिकमिति हलायुधः ॥ २४-२५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नतु वसुदेवदेवक्यौ प्रतीव किञ्चित् किञ्चदन्यथात्वेन जनमोहनमित्यर्थः। कोऽसौ भगवान् पूर्णसर्वैश्वर्यत्वेन निरपेक्षः। यश्च देवकीसुतः देवक्यां प्रकटितजन्मा स एव तथा सङ्कर्षणश्च तत्तन्निरुक्त्या यो वसुदेवात्मजतां प्राप्तः तदनुसङ्गे न स चैव तत्रैव हेतुः हि यस्मादात्मानमप्यतिक्रम्य पित्रोरित्यादिकोऽन्यः तदिदं नाश्चर्यमिति भावः ॥ २१ ॥ तदेतदप्यस्तु यतः स पितेत्यादि चकारोऽप्यर्थे। सोऽपि साऽपि। तस्मात् सङ्कर्षणोऽपि नान्यथा मन्तव्यः। मम तु जन्मादित्रयहेतू एव भवन्ताविति भावः ॥२२॥ तदेव स्पष्टयति। यातेति। ज्ञातीन् पित्रादिरूपान्। इति भवन्मध्य एव मम वासो भवितेति भावः द्रष्टुमिति। भवद्दर्शनमेव मम तत्र पुरुषार्थः। सुहृदां भवत्सख्यादिसम्बन्धेनैव पित्रादि तया मतानां श्रीवसुदेवादीनां सुखं विधायेति तदिच्छया तत्तत्कार्यसाधनाय स्वस्मिन् यादवपाण्डवादिमिलनेच्छया तदौरसत्वख्यापनापूर्वं वा तद्विद्विषिदन्तवक्त्रपर्यन्त दुष्टवधावधिकमभीष्टं सम्पाद्येत्यर्थः ॥ २३-४१ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

यात यूयमित्यादिना ज्ञातीन् व इति नन्दादयोऽपि यादवा एव, अन्यथा ज्ञातित्वानुपपत्तेः। एष्याम इति भगवतः सत्यवाक्त्वात् तत्र गमनं मध्ये मध्ये भवतीति बोद्धव्यम्। प्राकृतानुपयोगित्वात्तत् पुनर्न विवृतम्। यद्वा; नित्यवृन्दावनस्थरूपेण मध्ये मध्ये तेषां साक्षाद्भवतीति एष्याम इति पदस्य भावः ॥ २४-४४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

वयञ्च यास्याम इति नन्दं प्रति साश्वास-भाषणम् । तच्च प्रतिज्ञाभाषणं (भा० १।११।९) "कुरून् मधून् वापि सुहृद्दिदृक्षया" इत्यादि पूर्वोक्तेन स्फुरितम् । यद्वा, नित्यं वृन्दावने तिष्ठता सर्वालक्ष्यत्वेन कुमारीभिः सह विहरता प्रतिज्ञातमर्थं प्रतिपालयितुं कदाचित् कदाचित्तत्रैव नन्दगृहेऽपि प्रकटीभवतीति सर्वमनवद्यम् ॥ २३-४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रथमं ज्येष्ठत्वाद्बलदेव आह द्वाभ्याम् । हे पितर्युवाभ्यां मातापितृभ्यां यशोदानन्दसंज्ञाभ्यामित्यर्थः । एतच्च युक्तमेवेत्याह । पित्रोरिति । आत्मनो देहादपि आत्मजेष्वभ्यधिका प्रीतिः स्यादेव पोषितौ लालितावित्यत्र द्विवचनेन मित्रपुत्रे कृष्णे च युवयोस्तुल्यवात्सल्य दृष्टत्वात् युवामेव यथा कृष्णस्य तथा ममापीत्यावयोर्द्वयोरपि पितराविति द्योतयित्वा युवां लालकौ विना कोटिप्राणप्रियतमं कृष्णं भ्रातरं च विना अत्र पुर्य्यामपरिचितायां देवकीवसुदेवयोः पित्रोर्गृहे मया स्थातुं न शक्यते इत्यनुद्योतितम् ॥ २१ ॥ ननु भो बलभद्र ! सत्यमेव त्वं वसुदेवस्य मन्मित्रस्यैवौरसः पुत्रोऽसि स च विपन्मुक्तश्चिरात् प्राप्तं स्वपुत्रं त्वां कथं त्यक्तुं प्रभविष्यत्यतः त्वं सम्प्रति स्वपितुस्तस्यैव गृहे तिष्ठ आवां तु त्वद्विच्छेदविदीर्णस्वहृदयं विवेकशिलया पिधाय कथञ्चिज्जीविष्यावो न तु वसुदेवस्य सख्युः दुःखं द्रष्टुं प्रभविष्यावो यत आवां तव पोषकावेव पितराविति चेत्तत्राह । स इति । तेषां शिशूनां स एव पिता सैव जननी तत्वाधानकर्त्तापि पिता स्वकुक्षौ धृतवत्यपि जननी ताभ्यामुत्सृष्टानां शिशूनां यदि प्राणा निरास्पदास्तदा केषां तौ पितरावभविष्यतामतः शिशुभिरपि विवेकिभिः पोषकावेव पितरौ ताभ्यामपि सकाशाद्बहुमाननीयावतो मया नात्र स्थातव्यं यदि स्वयं ब्रह्माप्यागत्य वदेत्तेनापि ममायं हठो न शिथिलयितुं शक्यः । हन्त हन्त पितुस्तव सङ्गे कृष्णो व्रजं गत्वा सुखेन खेलिष्यति अहं तु कृष्णविच्छेददावदग्धो मथुरायां स्थास्यामीति सर्वथैव न भवेत् तस्माद्धो पितरहं शपथमेवेदं ब्रुवे यदि कृष्णो मां हित्वा त्वत्सङ्गेन व्रजं यास्यति तदा मे प्राणाः सद्य एव यास्यन्तीति स्वाभिप्रायो द्योतितः ॥ २२ ॥ ततश्च हन्त-हन्त किमहं करोमि यदि बलदेवं नीत्वैव व्रजं यामि तदा व्रजे महासुखं भविष्यति किं त्वत्र यादवानां विशेषतो वसुदेवस्य महादुःखं भविष्यति ममापि महाकलङ्को भावी हाहा कंसेन मे सर्वे पुत्रा हता यस्त्वेकस्तद्धस्तादपि रक्षितोऽवसिष्टोऽभूदयं बलभद्रस्तमपि नीत्वा नन्दो व्रजं जगाम तन्मे नायं सखा किं तु दैवहतस्य मम द्वितीयः कंस एवेति भावयन्नतिसंप्तो वसुदेवः परस्सहस्रानभिशापान्मे दास्यति ततश्च मे कृष्णस्यापि कुतः कुशलमिति भावनासंकटग्रस्तं नन्दं कतिशः क्षणांस्तूष्णीमेव स्थितमालक्ष्य तं युक्त्या प्रबोधयन् कृष्णः ससान्त्वनमाह । यातेति । हे तात ! यूयं सम्प्रति व्रजं यात वयमित्यहं बलदेवो मधुमङ्गलादयः प्रियसखाश्च वो ज्ञातीन् द्रष्टुमेष्यामः सम्प्रति कतिशो दिनान्यत्रैव पुर्य्यां वसेमेति भावः । कदा आयास्यथेत्यत आह । वः सुहृदां वसुदेवादीनां सुखं विधायेति यथा त्वां कलङ्को न स्पृशेत् यथं तेषां च स्वपुत्रं बलदेवं प्राप्याभिमत्य संलाल्यास्मद्गृहे स्थास्यवीति विश्वस्य सुखं भवेत्तथा कृत्वेत्यर्थः ॥ २३ ॥ एवं सांत्वय्येति । यद्यत्र मम कतिचिद्दिनविलम्बो भवेत्तदापि न व्याकुलीभवितव्यं मम तत्रैव मनोऽस्त्यत्रत्वेतदनुरोधेनैव स्थितिरिति सव्रजं व्रजवासिभिः सहितं कुप्यानि स्वर्णरजतातिरिक्तकांस्यादिपात्राणि तत्प्रभृतिभिः ॥ २४ ॥

गूढार्थदीपिनी

आत्मनः स्वदेहादपि अधिका ॥ २१ ॥ उत्सृष्टान् त्यक्तान् । अकल्पैः असमर्थैः ॥ २२ ॥ वयमिति अस्मदो द्वयोश्चेति नियमात् ॥ २३ ॥ सव्रजंव्रजवासिभिः सहितम् । कुप्यानि गोदोहनार्थं कांस्यादिपात्राणि ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आत्मनः स्वस्मादपि ॥ २१-२३ ॥ सव्रजं व्रजवासिभिः सहितं वासोऽलङ्कारादिभिः सादरं यथा तथा अर्हयामास तत्र कुप्यानि स्वर्णरजतातिरिक्तकांस्यादिपात्राणि ॥ २४-२६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे पितर्युवाभ्यां दम्पतीभ्यां पोषितौ भृशं लालितौ च पित्रोरात्मनः स्वस्माद्प्यात्मजेषु चाभ्यधिका प्रीतिः ॥२१॥ अर्थादुक्तं स्वापुत्रत्वं किञ्चिद्विवेचयति ॥ स पितेति । पोषरक्षणे पोषणरक्षणयोः पोषरक्षणे प्रति । अकल्पैरसमर्थैर्बन्धुभिः पित्रादिभिरुत्सृष्टान् शिशून्स्वपुत्रवद्यौ पुष्णीतां सा जननी स एव पिता च । अनेनान्नदानाद्युपाधिपितृताऽपि युवयोरस्तीति देवकीवसुदेवपुत्रौ किलेति दौमुख्यं तं भजतमिति वाऽसूचि ॥ २२ ॥ हे तात यूयं व्रजं यात सुहृदां चिरायास्मद्विरहकातराणां सुखं विधाय स्नेहदुःखितान्स्नेहनिमित्तदुःखयुतान्नो ज्ञातीन्भवदादीन्द्रष्टुमेष्यामः प्रस्तुतं यूय यात ॥ २३ ॥ सान्त्वय्य समाधानं विधाय साव्रजं तद्वासिजनसहितं वासांसि वस्त्राण्यलङ्कार आभरणानि कुप्यानि रसपूरितपात्राणि सुवर्णदुर्वर्णभिन्नान्येतान्येवाग्रे येषां ते पदार्थैः सादरमर्चयामास । पुष्पाग्रैरिति च स्फुटार्थं । अकुप्यं रूप्यहेमादि कुप्यमन्यद्धनादिकमिति हलायुधोक्तेः ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदेवाह । पितरिति त्रिभिः । आदौ पूर्वकृतस्य परिपालनस्याभिनन्दनमाह । पितरिति सम्बोधनं पूर्ववत् तस्योपकारमनुवदति स्निग्धाभ्यां युवाभ्यां यशोदानन्दाभ्यां भृशं पोषितौ लालितौ च अवां तु यथा जनकः तथैव पोषकः तद्वक्ष्यति धर्मार्थमपि पालनं भवतीति तद्व्यावृत्त्यर्थं स्निग्धाभ्यामिति पोषणमात्रं स्नेहेनापि भ्रात्रादिष्वपि संभवति एतदर्थमाह । लालिताविति अल्पलालनं बालत्वाद्भ्रातृपुत्रादावपि भवति तत आह । भृशमिति स्वशरीरापेक्षयाप्यधिकं लालितौ एतच्च लालनं पुत्र एव भवति किंच न केवलं लालनं बाह्यमान्तरः स्नेहोऽप्यसाधारणः आवयोः कृत इति पित्रोरप्यधिका प्रीतिरिति आत्मनोऽप्यधिका आत्मजेषु पित्रोरेव भवति क्षेत्रजादिव्यावृत्त्यर्थमात्मजेष्वित्युक्तं प्रजा ह्यात्मनोऽन्तरन्तरेति श्रुतेः लोकेऽपि स्वानिष्टं परं वाञ्छति न पुत्रस्य तदाह । हीति ॥ २१ ॥ ननु सहजे पुत्रे एतदुचितं नतु कृत्रिम इत्याशङ्क्याह । स पिता सा च जननीति । पितृत्वं पुत्रत्वं वा अन्नविकारत्वात् । आत्मत्वेन परिगृहीतान्तःकोशो भवति तदन्नं साधारणं तत्र यद्यन्य एवाभिमानं कुर्यात् तादृशं तदा तस्यैव भवति अन्नस्य साधारणत्वात् अन्यथा अन्योद्भवे भर्तरि भार्यायां च स्वाधिकस्नेहो न स्यात् स्नेहश्च कालीयप्रसङ्गे परीक्षितः नहि दृष्टे अनुपपन्नं नाम अतः सिद्धमेव पुत्रत्वं च स्नेहानुभवाभ्यां ननु लोके तथा न प्रसिद्धिः एकेन परिपालने उपचारोऽपि भवेत् न तु उभाभ्यां बहुभिरप्युपचारः तत्रापि पौषणे अबाह्याभ्यान्तरभावः पुत्र एव भवति चेत्तदा लोक इव स्वहृदयेऽपि सम्भवति तत्रापि विशेषः बन्धुभिः सर्वैरेव उत्सृष्टान् पुष्णीतः परित्यागे न दानरूपं परित्याजनं किन्तु पोषणं रक्षणं च एकवद्भावेन निरूपितम् अन्यतरसामर्थ्यनिराकरणाय तत्रासमर्थैः सर्वथा ॥ २२ ॥ एवं पूर्वसिद्धं पितृत्वं स्थापयित्वा सर्वस्वं च निवेद्य आज्ञापयति । यात यूयमिति । यूयं सर्वे गोपालाः व्रजं यात वयं च कार्यार्थं यास्याम इति चकारार्थः भवन्तः कुत्र गमिष्यन्तीत्याशङ्क्य देवगुह्यत्वात् परोक्षेणाह । ज्ञातीन् वो द्रष्टुमेष्याम इति गोपेष्वात्मभावः प्रापित इति सर्वात्मकता तेषु सिद्धा अतस्त एव ज्ञातयो भवन्ति ये यादवगोत्रजाः अथवा वयमिति अस्मत्संबन्धिनः पुत्रादयोऽपि सर्वे भवतामेवेति वयं सर्वे भवतामेव ज्ञातयः भवन्तश्चास्माकमयमधिको वरो दत्तः अत एवाद्यापि गोकुलसम्बन्ध्येव भगवान् कीर्त्यते विवाहादिष्वपि छलादेव विवाहः । भगवदिच्छयैव सर्वलोकानामपि तथा प्रतीतिः अत एव रुक्मिवचनं गोपाल इति तथैव श्रुतावुपासनाकाण्डेऽपि मन्त्राः तस्माद्भवन्त एव ज्ञातयः तथाप्येतेऽपि सुहृदः अतस्तेषां सुखं विधाय पश्चादागमिष्यामः ज्ञातीनेव द्रष्टुं नतु गोकुलमित्यपि अत एव भगवान् वक्ष्यति गतांश्चिरायितान् शत्रुपक्षक्षपणचेतस इति आगमने हेतुः स्नेहदुःखितानिति नत्वन्यद्वयं भविष्यतीति भावः ॥ २३ ॥ एवं त्रयमुक्तम् अलौकिकं लौकिकमपि बहुदत्तवानित्याह । एवं सान्त्वय्येति । भगवानित्यङ्गीकारे सामर्थ्यं ननु कथमेवं पूर्वमर्थं स्थापितवान् लीलार्थमेव हि भगवतः सेवकाश्च ते कस्तेषामनुरोध इति चेत्तत्राह । अच्युत इति । स हि सर्वदा च्युतिरहितः पूर्वधर्मपरित्यागे धर्मतः च्युतिः स्यात् न केवलं गोपालानेवार्हयामास किन्तु सव्रजमिति स्त्रीणां पुरुषाणां च सर्वेषामेवार्थे वस्त्राण्याभरणानि च दत्तवान् कुप्याग्राणि व्यवहारपात्राणि सुवर्णरजतातिरिक्तधातुमयानि सादरमिति प्रत्येकं नामग्रहणेन गृहस्थवत् नतु महाराजवत् ॥ २४ ॥

श्रीसुबोधिनी–सारः

हे पितः स्निग्धाभ्यां सुप्रीताभ्यां युवाभ्यां पोषितौ आप्यायितौ लालितौ स्वः भृशमत्यर्थमात्मजेषु पुत्रेषु आत्मनः स्वदेहादपि पित्रोः प्रीतिरभ्यधिका हि ॥ २१ ॥ देवकीवसुदेवयोः सुताविति न वाच्यं पोषरक्षणेऽकल्पैबन्धुभिरुत्सृष्टान् त्यक्तान् शिशून् स्वपुत्रवत् यौ पुष्णीतां स पिता सा च जननी माता ॥ २२ ॥ हे तात यूयं व्रजं यात गच्छत सुहृदां मित्राणां भक्तानां वा सुखं विधाय कृत्वा स्नेहेन दुःखितान् ज्ञातीन् वो युष्मान् द्रष्टुं वयमेष्याम आयास्यामः ॥२३॥ एवं सान्त्वय्य सान्त्वनं कृत्वा भगवानच्युतः श्रीकृष्णः सादरं यथा भवति तथा स व्रजं सगोपं नन्दं वस्त्राभूषणकांस्यपात्रादिभिः पूजयामास ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमेव दर्शयति—पितरित्यादित्रिभिः श्लोकैः । हे पितः ! स्निग्धाम्यामनुरक्ताभ्यां युवाभ्यां भृशमात्मनोऽप्याधिक्येन पोषितौ लालितौ च । 'न चाश्चर्यमेतत्, लोकेऽपि तथैव प्रसिद्धत्वात्' इत्याहतुः—आत्मनः स्वदेहादपि आत्मजेषु मातापित्रारभ्यधिका प्रीतिः । हि शब्दः प्रसिद्धिद्योतकः ॥ २१ ॥ न च 'देवकीवसुदेवौ युवयोः पितृत्वेनेदानीं प्रसिद्धौ, नावाम्' इति मन्तव्यम् । यतः पोषणे रक्षणे चाकल्पैरसमर्थैर्बन्धुभिः पित्रादिभिरुत्सृष्टांस्त्यक्तान् शिशून् अस्मान् यौ यशोदानन्दौ युवां पुत्रववत्पुष्णीतां पोषितवन्तौ, तावेव पितराविर्थः । शिशूनिति बहुवचनमन्येऽपि वसुदेवपुत्रा अन्यगता आसंस्तदभिप्रायेण ॥ २२ ॥ 'अस्त्वेवम्, प्रकृते किम्' तत्राहतुः—यातेति । हे तात ! यूयं सर्वे गोपा व्रजं प्रति यात, वयं त्वत्रत्यानां सुहृदां पित्रादीनां सुखं विधायास्मत्स्नेहेन दुःखितान् वो युष्मान् ज्ञातीन् द्रष्टुमेष्याम इत्यन्वयः । वयमिति बहुवचनं रामोद्धवाद्यभिप्रायेण ॥ २३ ॥ एवं सव्रज व्रजवासिभिः सहितं नन्दं भगवान् कृष्णः सान्त्वय्य सादरं यथा स्यात्तथा वस्त्रादिभिरर्हयामास । तत्र कुप्यानि सुवर्णरजतादिव्यतिरिक्तकांस्यादिपात्राणि । 'भगवान्' इत्यनेनैश्वर्यादिमत्त्वेन सान्त्वने सामर्थ्यं सूचितम् । तत्रौपचारिक भगवत्त्व वारयन्नाह—अच्युत इति ॥ २४ ॥

अन्वितार्थप्रकाशिका

पितरिति ॥ हे पितः ! स्निग्धाभ्यामनुरक्ताभ्यां युवाभ्याम् आवां भृशमात्मनोऽप्याधिक्येन पोषितौ लालितौ च यतः आत्मनः स्वदेहादपि आत्मजेषु मातापित्रोरभ्यधिका प्रीतिर्भवति । यद्वा प्रेमानुकूल्येन व्याख्यान्तरम् । तत्र प्रथमं बलदेव आह । पितरिति । तथा च यथा मित्रपुत्रे मयि स्वपुत्रे कृष्णे च युवयोः समं वात्सल्यमतो ममापि युवां पितरौ तस्माद्युवां कृष्णं च विनात्र पुर्यां नाहं स्थातुं शक्नोमीत्याशयः ॥ २१ ॥ युवां वसुदेवसुतावित्यपि न वाच्यमित्याहतुः–स इति ॥ स एव पालकः पिता सैव च जननी चेति यौ पोषणे रक्षणे चाकल्पैरसमर्थैर्बन्धुभिः पित्रादिभिरुत्सृष्टांस्त्यक्तान् शिशून् स्वपुत्रवत् पुष्णीतान् शिशून् इति बहुवचनमन्येऽपि वसुदेवपुत्रा अन्यत्र गता आसंस्तदभिप्रायेण प्रेमव्याख्याने तु पोषकावेव मातापितरावधिकमान्यौ अतो मया भवता सहैव गन्तव्यमित्याशयः ॥ २२ यातेति ॥ हे तात ! यूयं संप्रति व्रजं यात वयमित्यहं बलदेवादयश्च सुहृदां वसुदेवादीनां सुखं विधाय स्नेहदुःखितान् वो ज्ञातीन् द्रष्टुमेष्यामः । यद्यत्र मम कश्चिद्विलम्बोऽपि भवेत्तदापि न व्याकुलीभवनीयमिति अत्र व्रजमागत्य श्रीकृष्णस्य नित्यस्थितिश्च दन्तवक्रवधानन्तरमिति तोषिणी । श्रीकृष्णस्येममभिप्रायं नन्दस्तदैव न ज्ञातवान् किन्तु क्रमेणैव । प्रेमव्याख्याने तु बलदेववचसि नन्दे तूष्णीं स्थिते कृष्ण आह । यातेति । तथा च यद्यधुनैव सहैव राममपि नेष्यसि चेद्वसुदेवस्य महादुःखं भविष्यतीत्याशयः ॥ २३ ॥ एवमिति ॥ एवं सव्रजं व्रजवासिभिः सहितं नन्दम् अच्युतः भगवान् कृष्णः सान्त्वय्य । ल्यबार्षः । सादरं यथा स्यात्तथा वासोऽलङ्कारकुप्याद्यैरर्हयामास । तत्र कुप्यानि गोदोहनाद्यर्थं कांस्यादिपात्राणि आदिना यानरत्नादिभिः ॥ २४

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे पितः आत्मनो देहादपि भृशमाधिक्येन पोषितौ कुतः एतदिति चेत्तत्राह पित्रोरिति यतः पित्रोः आत्मनः स्वशरीरादपि आत्मजेषु स्वपुत्रेष्वभ्यधिका प्रीतिरस्ति ॥ २१ ॥ युवां आवयोः पुत्रोनस्त इति चेत्तत्राह ॥ स इति ॥ यौशिशून् स्वपुत्रवत् ॥ पुस्नीतां स पिता सा च माता ॥ २२ ॥ ज्ञातीन् वो युष्मान् द्रष्टुम् ॥ २३ ॥ स व्रजं व्रजवासियुक्तं सान्त्वय्य आश्वास ॥ कुप्यानि कनकरजतभिन्नानि कांस्यादिपात्राणि आदि शब्देन वाहनादीनि च तैः सादरं यथा तथा ॥ २४–२५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह त्रिभिः पितरिति । हे पितः, स्निग्धाभ्यामनुरक्ताभ्यां, युवाभ्यां, भृशमात्मनोऽप्याधिक्येनेत्यर्थः । पोषितौ, लालितौ च, कुत एवमित्यत्राह । यतः पित्रोः, आत्मनः स्वशरीरादपि, आत्मजेषु अभ्यधिका प्रीतिः जायते । यद्वा । आत्मजेषु पित्रोः इव, युवयोः आवयोः, आत्मनः स्वदेहादपि, प्रीतिः अभ्यधिका अस्ति ॥ २१ ॥ न चाश्चर्यमेतदित्याहतुः । स इति । पौषेणेन सहितं रक्षणं तस्मिन् , अकल्पैः पोषणविधाने रक्षणाचरणे चासमर्थैरित्यर्थः । बन्धुभिः पित्रादिभिः, उत्सृष्टांस्त्यक्तान् शिशून् , यौ स्वपुत्रवत् पुष्णीतां पोषितवन्तौ, सः पिता, सा जननी च । तावेव पितरावित्यर्थः ॥ २२ ॥ अस्तु शास्त्रदृष्टयैवं प्रकृते किं वक्तव्यं तत्राहतुः । यातेति । हे तात, यूयं व्रजं प्रति, यात गच्छत । वयं च वयं तु, सुहृदामत्रत्यानां सुहृज्जनानां, सुखं प्रियं, विधाय, स्नेहेन दुखितास्तान् ज्ञातीन् , वो युष्मान् , द्रष्टुं एष्यामः आगमिष्यामः ॥ २३ ॥ एवमिति । एवमित्थं, सभायामिति शेषः । सव्रजं व्रजवासिभिः सहितं, नन्दं सान्त्वय्य सान्त्वयित्वा, भगवान् अच्युतः श्रीकृष्णः, सादरं यथा तथा, वासांसि च अलंकाराश्च कुप्याद्यानि च तैः, अर्हयामास । तत्र कुप्यानि सुवर्णरजतादिव्यतिरिक्तानि कांस्यादिपात्राणि तत्प्रभृतिभिः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पितरिति : १०.४५.२१.

यत्कार्यं नहि तत्कृतं कृतमथाकार्यं शिरस्युद्धतानाज्ञा जातुचिदप्यहो न विहिता सेवाऽपि वां पादयोः ।
वक्तुं यन्न च शक्यते बहुविधं तत्तादृगाचेष्टितमित्यन्यायकृतोऽपि मेऽवनमकार्यस्मात् त्वमस्मत्पिता ॥ २८ ॥
कृष्णोत्तिष्ठ गभस्तिमानुपगतः कृष्णाद्य भुक्तं न वा श्रान्तोऽसि त्वमरण्यसञ्चरणतः कृष्णाद्य मा गा वनम् ।
सुस्वापो भव कृष्ण कृष्ण भवतो मित्राणि चाकारस्य भोक्तुं कृष्ण मयैव भुङ्क्ष्य च सह प्रेष्टं च ते कृष्ण किम् ॥ २९ ॥
कृष्ण त्वज्जननी वदाशु विहितः पाको न वा कृष्ण किमन्तस्त्वज्जननी करोति कुरुते प्रीतिं न वा सा त्वयि ।
दुग्धं चेन्न तयार्पितं वद तया साकं न चेतः परं सा च त्वां यदि ताडयेत् कथय मामेनामहं ताडये ॥ ३० ॥
नैको याहि निमज्जनाय कुरुषे किं साहसानीदृशान् यद्यायाहि मयैव साकमवनौ मा कृष्ण लोडीर्हठात् ।
त्वद्भाग्यादनुकूलमस्ति सकलं मुष्णासि कृष्णान्यतः कस्मात् कृष्ण रमस्व वेश्मनि निजे मा ताडयान्यार्भकान् ॥ ३१ ॥
सन्त्यज्योत्तमभूषणानि किमिमां गुञ्जास्रजं धारयस्युष्णीषे मुकुटे च सत्यपि रुचिः केयं नु बर्होद्धृतौ ।
अङ्गं लेपय चन्दनैः सघुसृणैर्मा धातुरागादिभिर्मैवं कृष्ण कुरुष्व पश्य शिशवोऽप्येते कथं वा स्थिताः ॥ ३२ ॥

मा तिष्ठाऽऽतपतापितेऽवनितले मा धाव गोपृष्ठतो माऽऽरूढो भव चोन्नतावनिरुहे मा भञ्जय क्षुत्तृषौ ।
मा भुङ्क्ष्वाऽऽमफलानि कृष्ण विपिने मा निर्झराम्भः पिव मा स्वापं कुरु वामलूरनिकटे शृण्वेकमस्मद्वचः ॥ ३३ ॥
चक्षुस्त्वं मम सर्वलोकपदवीसन्दर्शकं कृष्ण हे त्वय्येवाखिल कार्यतन्त्र-विमुखं संसक्तमेतन्मनः ।
सर्वस्वं त्वमिहास्मदभ्युदितसद्भाग्यस्य कृष्णान्वहमस्मद्वाञ्छि धृतव्रतो भव भवेत् सौख्यं तवाप्यावयोः ॥ ३४ ॥
कृष्णं रक्षत वाञ्छितं ददत भो गोपाश्च हे गोपिका दत्वा दृष्टिमहर्निशं मयि हरेर्मन्तुर्न चिन्त्यः क्वचित् ।
इत्येवं प्रतिवासरं प्रतिपलं मां तात संरक्षतस्त्वत्तोऽन्यस्तु पिता पितैव सुतपस्तातस्त्वमेकोऽवनौ ॥ ३५ ॥
जननीति शुद्धचरितां जननीं मम लास्यमृष्टवदनाममलाम् । बहुधार्मिकी प्रतिनतिं बहुधा कथयाऽनया सह मुहुः कथया ॥ ३६ ॥
मयाऽनुभूतं भवतोः सुखं यत्तद्वक्तुमीशो न फणाभृदीशः । गायन्ति चैतद्भुवि ये तदीयश्रेयःसुखोत्कीर्तनकुण्ठशक्तिः ॥ ३७ ॥
किं वा बहूक्तिभिस्तात व्यापारेष्वखिलेष्वपि । नैकः क्षणोऽप्यतिक्रान्तो मन्नामग्रहणं विना ॥ ३८ ॥
हे गोपाः पाकभावं स्मरत मम सदा मूर्तिमत्पुण्यपाकं नाकेशं केशवं वा यजत भजत मे तातमेनं भजध्वम् ।
सन्तुष्टस्तेन चाहं प्रतिपलमिह वः क्लेशनाशं विधाय प्राग्वत्सान्निध्यलाभं सुलभमनुविधास्याम्यमीष्टप्रदानात् ॥३९॥
कदाचिदपशब्दितं क्वचिदनादृतं शासनं क्वचित्प्रलपितं भवेत् क्वचिदनर्पितं प्रार्थितम् ।
सहध्वमितरैरसह्यमपि साहसं मत्कृतं भवत्सु मम मित्रता मयि तथाऽस्त्विति प्रार्थये ॥ ४० ॥
स्वकीयः परकीयो वा भवद्भिर्गण्यतामयम् । जगत्स्वखिलसत्कीर्तिमूर्तीर्वः कलये त्वहम् ॥ ४१ ॥
हृतं यशोदा नवनीतमर्वाग् यो वासवानन्द-समृद्धिकारी । यो गोकुलप्राणभृदीड्यमानो वृन्दावनोरीकृत सत्क्रियो यः ॥ ४२ ॥
अयं स एवेति जना अभीक्ष्णं यन्मामवेक्ष्यात्र वदन्ति सर्वे ।
तद्वः स्मृतिर्मेऽर्थत एव सिद्धा मत्संस्मृतिर्वोऽस्त्विदमर्थयेऽहम् ॥ ४३ ॥ (युग्मम्)
अलं बहूक्तया भोगोपाः सारमेकं वदामि वः । नैकः क्षणोऽपि तादृक् स्याद्यत्र युष्मत्स्मृतिर्न मे ॥ ४४ ॥
ये वृक्षा गिरयश्च ये शुकपिकानेकाण्डजाश्चापि वा यद्वृन्दावनमुष्णरश्मितनयातीरं च यच्चापरम् ।
सर्वांस्तत्किल युष्मदस्मदतनुक्रीडारसज्ञान् मुहुः पृष्टं वः कुशलं निवेदयत यैरात्माऽस्मदर्थीकृतः ॥ ४५ ॥
निश्चित्यानन्यजातोदर्यमिममिह मामात्मसर्वस्वभावैः संलाल्याहर्निशं वै स्वतनुपरिभवो याभिरासह्यते स्म ।
स्वीया एवेति मत्वा स्वतनुसमुचितैर्या विहारैर्मयाऽपि हृत्प्रेम्णा त्रासितास्तत्तदुपकृतमहं किं किमन्तः स्मरामि ॥ ४६ ॥
वाच्यं किं कथनीयमत्र किमु वा स्मर्तव्यमर्वाग्भवं सन्देष्टशब्दनिचयैः किं वेत्यहं मुग्धधीः ।
तत्त्वं त्वेकमिह ब्रवीम्यवितथं गोपा मदेकात्मनां सर्वेषां भवतां च गोकुलजुषामृण्यस्मि सर्वांशतः ॥ ४७ ॥

यात यूयमिति : १०.४५.२३.
रामं तत्रोद्दिश्य किं वा प्रभासमेष्यामो वो द्रष्टुमित्यब्रवीत् सः । नो चेद्भूयस्तत्र तद्यानलेखाभावान्मोघोक्तिः कथं सत्यवक्तुः ।४८।
विधाय सुहृदां सुखं विरहभूरिदुःखान् व्रजाधिपेक्षितुमलं हि वो व्रजमुपागमिष्याम्यहम् ।
सहेतुकमिदं वचः प्रभुरुवाच तन्नानृतं यदस्त्यखिलसत्-सुहृत्सुखदवासना-ऽद्यावधि ॥ ४९ ॥

एवं सान्त्वय्येति : १०.४५.२४.
द्रव्यैः क्षुद्रजनप्रलोभनचणै-र्नानाविधै-र्भूषणैरालोभ्याप्तसुहृत्तमानपि करोषि स्वं परोक्षस्थितिम् ।
धौर्त्यं भूयैविदंस्तवेदमृजुधीर्नन्दः स सम्मोहितस्त्वां प्रत्यक्षमपास्य माधव वयं तद्वन्न मुह्याम भोः ॥ ५० ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण और बलभद्रजी दोनों भाई कहने लगे—हे पितृचरण ! हे बाबा ! आपने और मेरी मैया यशोदा ने अत्यन्त वात्सल्य प्यार दुलार से दीर्घ काल पर्यन्त हम दोनों भाईयों का पालन-लालन पोषण प्रीणन किया, निजी सन्तानों से कई गुनी अधिक प्रीति आपने हम बालक से रखी है ॥२१॥ बाबा ! कंसत्रासत्रस्त माता-पिता हमारे पालन में असमर्थ थे तब आपने-आप दोनों ने असाधारण एवं निज जननी जनक से भी अधिक वात्सल्य से पालन किया, शास्त्र ने बताया कि पालन करने में माता-पिता बन्धुजन जब असमर्थ होते निज बालकों को अन्यत्र रखते हैं तब जो सज्जन और स्वजन पालन करते हैं वे सच्चे माता-पिता हैं ॥ २२ ॥ हे तात ! हे बाबा ! हमें कुछ कार्यवश यहाँ रहना अनिवार्य है आप सब स्वजन व्रज को पधारें चिन्ता न करें हम दोनों भाई दुःखित सर्वज्ञातिजन स्नेहाजन माता-पिता सखिजन को देखने के लिए यहाँ बन्धुजन को सुख प्रदान करके गोकुल अवश्य आवेंगे ॥ २३ ॥ श्रीशुकदेवजी ने कहा राजन् ! इस प्रकार करुणानिधान षडैश्वर्य सम्पन्न भगवान् अच्युत ने समस्त व्रजजनों के साथ श्रीनन्दरायजी को सान्त्वना प्रदान किया, पुनः समस्त व्रजवासियों का स्मरण करते हुए सारे व्रज के दिव्य वस्त्र, अलङ्कार सोने चाँदी ताम्र कांसे पीतल के विविध पात्र मणि रत्न मौलिक आदि दैन्य एवं स्नेह से समर्पण करके समर्चन किया ॥ २४ ॥

इत्युक्तस्तौ परिष्वज्य नन्दः प्रणयविह्वलः । पूरयन्नश्रुभिर्नेत्रे सह [1]गोपैर्व्रजं ययौ ॥ २५ ॥
अथ शूरसुतो राजन् पुत्रयोः समकारयत् । पुरोधसा ब्राह्मणैश्च यथावद् द्विजसंस्कृतिम् ॥ २६ ॥
तेभ्योऽदाद् दक्षिणा गावो रुक्ममालाः स्वलंकृताः । स्वलंकृतेभ्यः सम्पूज्यः सवत्सा क्षौममालिनीः ॥२७॥
याः कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः । ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः ॥ २८ ॥

कर्दमक्षमा

अन्वयः—इत्युक्तः, प्रणयविह्वलः, अश्रुभिः, नेत्रे-पूरयन्, तौ, परिष्वज्य, गोपैः, सह, व्रजम्, ययौ ॥ २५ ॥ राजन्! अथ, शूरसुतः, पुत्रयोः, पुरोधसा, च, ब्राह्मणैः, यथावत्, द्विजसंस्कृतिम्, कारयामास ॥ २६ ॥ याः, कृष्णरामजन्मर्क्षे, याः, मनोदत्ताः, च, कंसेन, अधर्मतः याः, गावः, हृताः, ताः, रुक्ममालाः, स्वलङ्कृताः, सवत्साः, क्षौममालिनीः सवत्सः–रुकम-मालाः, सम्पूज्य, महामतिः, गाः, च, दक्षिणाः स्वलङ्कृतेभ्यः, अदात् ॥ २७–२८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुरोधसा गर्गाचार्येण अन्यैश्च ब्राह्मणैः द्विजसंस्कृतिमुपनयनम् ॥ २६ ॥ गावो गाः रुक्मस्य माला विद्यन्ते यासां ताः क्षौमवस्त्रमालावतीः ॥ २७ ॥ याः पूर्वं मनोदत्ता आसंस्ताः स्वा एवाददात् । ननु ताः कंसेनापहृताः सत्यं राजगोष्ठादाच्छिद्य दत्ता इत्याह । कंसेनाधर्मत इति ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तौ रामकृष्णौ । इत्युक्त इत्यस्य 'यात यूयम्' इत्याद्यन्तपूर्वपद्यत्रयेण व्यवहितेनाप्यन्वयः । प्रणयविह्वल इति स्तम्भमोहादिकञ्च सूचयति । गोपैः सहेति तेषामपि प्रत्येकमालिंगनं तथा प्रेमविह्वलत्वादिकञ्चोक्तम् । "अहो भगवतो नौमि बलात्सर्वप्रवर्तनम् । प्राहिणोद्यः स्वशून्येऽपि श्रीनन्दादीनपि व्रजे । त्वां व्रजेश्वरि शोचामि त्वां च वृन्दा वनेश्वरि । कृष्णं विना गतेष्वेषु जीयिष्यथः कथम्" ॥ २५ ॥ अथ नन्दागमनोत्तरम् । ब्राह्मणैरन्यैः सभ्यादिरूपकर्मार्थमागतैः सह । यथावत् । क्षत्रियोचितदण्डचर्मादिभिः "पालाशं ब्राह्मणस्योक्तं बैल्वं क्षत्रस्य वै विशः । औदुम्बरं मार्गसैहवास्तचर्माणि वै क्रमात् ।" इत्याद्युक्तेः ॥२६॥ तेभ्यो ब्राह्मणेभ्यः । क्षौमं वस्त्रं मालाः पुष्पमालाश्च विद्यन्ते यासां तास्तथा ॥ २७ ॥ गोदान आशङ्कते–नन्विति । रामकृष्णयोर्जन्मर्क्षे तदुपलक्षितसमय इत्यर्थः । अतः 'कृष्णावतारोत्सव—' इत्यादिवद्रामजन्म श्रुत्वापि तथैवादादिति बोद्धव्यम् । तथा दाने हेतुः–महामतिरिति । तज्जन्मसमये भाविवृत्तज्ञानादधुना च तदनुस्मरणादिति भावः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्युक्त इत्यस्य यात यूयमित्याद्यन्त पूर्वपद्यत्रयेण व्यवहितेनाप्यन्वयः । प्रणयविह्वल इति स्तम्भमोहादिकञ्च सूचयति गोपैः सहेति तेषामपि प्रत्येकमालिङ्गनं तथा प्रेमविह्वलत्वादिकं चोक्तम् । "अहो भगवतो नौमि बलात् सर्वप्रवर्तनम् । प्राहिणोत् यः स्वशून्येऽपि श्रीनन्दादीनपि व्रजे । त्वां व्रजेश्वरि ! शोचामि त्वाञ्च वृन्दावनेश्वरि ! कृष्णं विना गतेष्वेषु हा हा जीविष्यथः कथम्" ॥ २५ ॥ अथ तदनन्तरमिति युक्तत्वात् शूरसुत इति स्वपित्रा सहित इति सूचयति । अतः श्रीरोहिणीमपि व्रजादानयामास इति ज्ञेयम् ॥ २६ ॥ रुक्मेति तैर्व्याख्यातं तत्र विद्यन्त इति पदन्यासाद्रुक्ममालिनीरिति मत्वर्थीयान्तपाठस्तर्क्यते स च कुत्रापि न दृश्यते इति तद्विचार्य्यं स्वलङ्कृतेभ्य इति कर्मप्रत्ययेन दातृकर्त्तृकत्वमेव बोध्यते ॥ २७ ॥ रामकृष्णयोर्जन्मनक्षत्रे तदुपलक्षितसमय इत्यर्थः । अतः कृष्णावतारोत्सवेत्यादिवत् रामजन्म श्रुत्वापि तथैवादादिति बोद्धव्यं तथा दाने हेतुर्महामतिरिति । तज्जन्मसमये भाविवृत्तज्ञानादधुना च तदनुस्मरणादिति भावः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इति 'यात यूयम्' इत्याद्युक्तः सन्निति अर्हणेऽपि सति तत्रादरविशेषाभावाद्व्रजयाने 'एष्यामः' इत्येतमेव हेतुमभिप्रैति—प्रणयविह्वल इति । परिष्वङ्गे दाढर्यादिकमश्रुभिः पूरणेनाविच्छिन्नधारत्वादिकञ्च तथा मुठ्ठरार्त्तनादस्खलन—मोहादिकं सूचयति । गोपैः सहेत्यनेन तेषामपि प्रत्येकमालिंगनम्, तच्च क्रमतस्तच्छक्तिविशेषेण युगपदेव वा, तथा प्रेमविह्वलत्वादिकं चोक्तम् । यद्वा, प्रणयविह्वल इत्यनेन रोदनं सूचितमेव, ततश्च तयोः सर्व्वेषामेव नेत्रे पूरयन् तौ गोपान् यादवांश्चात्यर्थं रोदयन्नित्यर्थः । एवं श्रीवसुदेवोग्रसेनादिभिः सह तस्य विदूरतः श्रीनन्दानुव्रजने हेतुः प्रणयेति स्नेहभरेण कथञ्चित् कदाचिदपि तदुक्तमतिक्रमितुं न शक्यत इत्यर्थः । अतएव गोपैरपि सहितः, अन्यत् समानम् ॥ २५ ॥

---

[1] सगोपोव्रजमा–वीर. ।

हा व्रजेश्वरि शोचामि नितरां व्रजदेवि ते । कृष्णं विना गते नन्दे प्राणान् रक्षिष्यथः कथम् ॥

अथ तदनन्तर श्रीवल्लवेन्द्रस्य व्रजे यानतः पुत्रयोर्मधुपुरीस्थितिनिर्द्धारेण तत्संस्कारस्यात्मनैव कृत्यत्वात् । शूरसुत इति स्वपित्रा सहित इति सूचयति । श्लेषेण सर्व्वार्थे समर्थ इति, अतो यथावत् सर्व्वमुख्यविध्यादिसहितं यथा स्यात्तथा सम्यगकारयत् । हे राजन्निति क्षत्रियत्वेन तत्प्रकारो भवता ज्ञायत एवेति किं तद्विशेषवर्णनेनेति भावः । किंवा राजमानः सन्, हर्षभरोदयात्; अतः श्रीरोहिणीमपि व्रजादानयामासेति ज्ञेयम् ॥ २६ ॥ सुष्ठु अलंकृतेभ्यः, सम्यक् पूजयित्वेत्यनेन यथाविधि श्रद्धयोत्तमप्रचुर-वस्त्रालंकार-धनादिदानञ्च बोध्यते ॥ २७ ॥ रामकृष्णयोर्जन्मन ऋक्षे समय इत्यर्थः; तत्र (भा० १०।३।११)— 'कृष्णावतारोत्सवसम्भ्रमोऽस्पृश,–न्मुदा द्विजेभ्योऽयुतमाप्लुतो गवाम्' इतिवत् गोकुले श्रीरोहिण्यां रामजन्म श्रुत्वादि सद्यस्तथैवादादित्येतस्मादेव वचनाद्बोद्धव्यम् । महामतिरिति परममेधारित्वौदार्य्यादिकमुक्तम्; अतोऽनुस्मृत्य ताश्च तेभ्यो दत्तवान् ॥२८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थमुक्तो नन्दः तौ रामकृष्णावालिङ्गय प्रणयेनानुरागेण विह्वलः अश्रुभिर्नेत्रे पूरयन् गोपैः सह व्रजं प्रति ययौ ॥२५॥ अथानन्तरं शूरसुतो वसुदेवः पुरोधसा गर्गाचार्येण ब्राह्मणश्च यथाविधि उभयोः रामकृष्णयोर्द्विजसंस्कृतिं द्विजत्वापादकसंस्कारम् उपनयनं सम्यगकारयत् ॥ २६ ॥ ततः सुष्ठ्वलङ्कृतेभ्यः तेभ्यः ब्राह्मणेभ्यः सम्पूज्य दक्षिणां गावो गाश्चादात् कथम्भूता रुक्मस्य सुवर्णस्य माला आसां सन्तीति तथा सुष्ठ्वलङ्कृताः वस्त्रैः सहिताः क्षौमवस्त्रमालावतीः ॥ २७ ॥ रामकृष्णजन्मनक्षत्रे याः गावो मनोदत्ताः ताश्चानुस्मृत्याऽदाद्ददौ ननु ताः कंसेनापहृताः सन्त्यद्य राजगोष्ठादाच्छिद्यदत्ता इत्याह । कंसेनाधर्मत इति ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

द्विजसंस्कृतिं ब्राह्मणसंस्कारम् उपनयनलक्षणम् ॥ २६ ॥ गावो गाः रुक्मं सुवर्णं क्षोमाणि पुष्पमालाश्चासां सन्तीति क्षौममालिनीः । २७॥ याः कृष्णरामयोः जन्मनक्षत्रे मनसा दत्ताः सङ्कल्पितास्ताश्च अददात् याः कंसेनाधर्मेण हृतास्ता अपि ॥२८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रणयविह्वलः पुत्रविच्छेदोत्थमूर्च्छा विवशः व्रजं ययौ रामकृष्णौ तौ तु श्रीवसुदेवस्य गृहमागत्य सुखं वर्त्तेते स्मेति अत्र केचिद्रसज्ञाः प्रेम्णोऽणुमात्रमप्यपचयमसहमाना आक्षिपन्तो विवदन्ते इति तांश्च समाधित्सामो व्याख्यान्तरेण तत्र ये उपादित्सते त एवोपाददतां तत्रायमाक्षेपः पितर्युवाभ्यामित्यादिश्लोकपञ्चकस्य यथाश्रुतार्थः खलु प्रेमप्रतिकूल एव स्पष्टः एतावता व्याख्यानेनापि न प्रेमा स्थिरीभवति नन्दकृष्णयोर्मिथस्त्यागात् तत्रापि कृष्णः खल्वीश्वरो दुर्गमलीलो नन्दं पितरमपि त्यक्त्वा तिष्ठतु नाम नन्दस्तु कृष्णं त्यक्त्वा कथं व्रजं गन्तुमशकत् प्राणकोट्यधिकप्रेष्ठं तमप्युपेक्ष्य व्रजे गोधनाद्यपेक्षैव किं तस्य दुस्त्यजाभूत् मथुराप्रान्त एव तावत् कालं किं नावसत् तद्व्याख्यानं चैवं श्रीनन्दप्रबोधनामात्रोपक्षीणं न तु रामकृष्णयोस्तादृश्येव मनसि निष्ठा वास्तवी यतो रामोऽपि व्रजमायास्यन् दशमे वर्णितो न तु कृष्णः निखिलान् स्ववध्यान् शत्रून् दन्तवक्त्रपर्य्यन्तान् हत्वा निश्चिन्तीभूय यद्व्रजागमनं पद्मोत्तरखण्डदृष्ट यर्ह्यम्बुजाक्षापससार भो भवान् कुरून् मधून् वेति प्रथमस्कन्धीयवाक्यज्ञापितं च वर्त्तते तदपि न प्रेमलक्षणं संगमयति तथा हि तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः । सान्त्वयामास सप्रेमैरायास्य इति दौत्यकैरिति शुकोक्तौ दौत्यकैर्दूनवाक्यैरिति टीकाकाराणां व्याख्यानं तत्र बहुवचनेन बहूनां दूतानां वाक्यैरेकस्यैव वा दूतस्य आयास्ये आयास्ये आयास्ये अवस्यमायास्याम्येवेति पुनः पुनरुक्तैरिति बुद्धयते कीदृशैः सप्रमैः प्रेमसहितैरिति दुर्ल्लङ्घ्याज्ञस्य राज्ञो धनुर्मखदर्शनार्थकनिमन्त्रणानुरोधेनैवाद्य मथुरां युष्मांस्त्यक्त्वा यामि न तु स्वेच्छया । अतः श्वो धनुर्मखं दृष्ट्वा परश्व आयास्यामि तत्र यदि कार्य्यान्तरमापतेत् तदपि श्व एव कृत्वा परश्वस्तु शीघ्रमायास्याम्येवेत्येषोऽर्थ एव कृष्णस्य यदि वाङ्मनसयोः स्यात्तदैव तद्वाक्यानां प्रेमसहितत्वं स्यादन्यथा तु कपटसहितत्वमेव यथा न लब्धो दैवहतयोर्वासो नौ भवदन्तिके । यां बालाः पितृगेहस्थाः विन्दन्ते लालिता मुदमित्यादिदेवकीवसुदेवमोहनार्थकानां तद्वाक्यानामिति सन्तु वा तद्वाक्यानि तादृशान्येव श्रीशुकदेवः कथं सप्रेमैरित्यनेन तानि विशिनष्टि स्म तत्तस्माद्यदि जरासन्धादिदुष्टदमनादिनानाकृत्यान्यनपेक्ष्यैव कंसवधपरदिन एव कृष्णः शीघ्रं व्रजमागच्छेत् तदैव तस्य गोपीनां प्रेम्ण्यपेक्षा स्यादन्यथा तूपेक्षैव सप्रेमैरिति पदार्थश्चालीक एव स्यात् तस्मादत्रोपपत्तिश्चिन्तनीया तत्रेयं चिन्ता वसुदेवादयोऽपि प्रेमवन्तो भवन्त्येवेत्येषामप्युपेक्षा अनुचिता नन्दादयस्त्वसमोर्ध्वप्रेमवन्तस्तेषामुपेक्षा सर्वथैवानुचिता जरासन्धादिदुष्टवधशिष्टपालनमप्यवतारप्रयोजनमवश्यं सम्पाद्यं रुक्मिण्यादि पारिजाताद्याहरणधर्मपुत्रादिसाहित्यविचित्रचरित्रात्मका द्वारिकादिलीलाप्यवश्यप्रकाश्या धनुर्मखं दृष्ट्वैवायास्यामीति गोपीष्वागमनं प्रतिश्रुतं च सत्यं कार्य्यं वह्निदाहेन कनकस्वरूपमिव महाप्रवासविप्रलम्भप्रकाशितं तासामसमोर्ध्वप्रेमस्वरूपञ्च मथुराद्वारकाप्रेमपरिकरमुख्यमभिज्ञचूडामणिमुद्धवं दर्शयित्वा तस्यैव प्रेम्णः सर्वोत्कर्षश्च ख्यापनीय इत्याद्यावश्यकनिखिलकृत्यसमाधात्रीमतर्क्यैश्वर्य्यां स्वीययोगमायाशक्तिमाश्रित्य बलदेवसहित एव कृष्णः श्रीनन्दं पितरमासाद्य तदैव तेषां नन्दादीनां स्वस्य च द्वौ द्वौ प्रकाशावाविर्भाव्य प्रथमेन प्रकाशेन श्रीनन्दं प्रति पितर्युवाभ्यामिति श्लोकत्रयं यदुवाच तस्य एवं सान्त्वय्येति तदुत्तरस्य श्लोकद्वयस्य च व्याख्याकृतैव तत्रैव प्रकारान्तरेण वर्तमानौ कृष्णरामावाहतुः पितरिति युवाभ्यां स्निग्धाभ्यां आवां कृष्णरामौ द्वावपि पोषितौ लालितौ चेति युवयोरावां पोष्यपुत्रावेव न त्वात्मजौ

किमित्यावाभ्यां त्वं पृच्छ्यसे अत्र तत्त्वं ब्रूहि अत्रत्यास्तु नन्दस्य पोष्यपुत्रावेवेत्युग्रसेनादयः सर्वे एव यादवा ब्रुवन्ति अत एव देवकीवसुदेवौ आवामात्मजौ मत्वा लालनादिकं मथुरायामत्रैव बहुतरं निरुद्ध्य रक्षितुमीहेते त्वत्समीपमायातुमपि न ददाते त्वं तत् प्रियसखोऽपि लौकिकरीत्या श्वो भोजनार्थमपि न निमन्त्रितः। अद्यापि त्वां मिलितुमपि केऽपि यादवा नायान्ति आवां त्वति-तरामुद्विग्नौ तैरलक्षितं बलात् पलाय्यैव त्वत्समीपमायाताविति भावः। ननु भोः कृष्ण! त्वं पूर्वजन्मनि वसुदेवस्य पुत्र आसीरेव "प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज" इति त्वन्नामकरणसमये गर्गेणोक्त तेनैव वसुदेवं प्रत्यपि तथैवोक्तमित्यनुमिमे अतो वसुदेवस्त्वां गुणार्णवमेतज्जन्मन्यपि पुत्रत्वेनाभिमत्य जिघृक्षति बलदेवं स्वपुत्रं तु स्वगृहं नेष्यत्येवेत्यहं जाने एव तत् त्वामप्यहं पृच्छामि एतेषां वाचैव त्वं किमावां पोषकौ पितरावेव संप्रति मन्यसे आवयोः किं त्वं पोष्य एव पुत्रोऽभूस्तत्र कृष्णः सास्रमाह। पित्रोः खल्वात्मजेष्वेव पुत्रेषु आत्मनो देहात् जीवात्मनश्चापि सकाशादप्यधिका प्रीतिर्भवेत्। यद्यहं युवयोः पोष्य एव पुत्रः आत्मजस्तदा कथमहं युवयोरात्मप्राणकोटेरपि प्रियोऽभूवमतस्त्वद्वैरिणां वसुदेवादीनां मुखमप्यतः परं न द्रक्ष्यामीति भावः। ननु भो वत्स! बलदेव! तव कोऽभिप्रायस्तं ब्रूहीत्यत आह। स पितेत्यादि। तदहं वसुदेव गृहे त्वां कृष्णं च हित्वा नैव स्थास्यामि यदि स्वयं ब्रह्माप्यागत्य वदेदिति पूर्वव्याख्यात एव भावः। ततश्च यदि बलदेवमपि नीत्वा व्रज यामि तर्हि ते महादुःखिनो भविष्यन्ति एतैः स्वार्थपरैर्मयि वैरभावः कृत एव अहं तु वैरं कथं करवाणीति क्षण चिन्तयन्तं व्रजराजं ता सत्वरमाहतुः। यातेति हे तातेति हे तात! यूयं व्रज यात वयं च व्रजं यामः न चात्र क्षणमपि विलम्ब्यतामिति भावः "ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फल"मिति नीतिशास्त्रं जानास्येव तदपि स्वसाधुत्वेन यद्येषां दुःखगन्धमपि सोढुं न शक्नोमि तर्हि शृणु यद्ब्रूमहे इत्याहतुः। ज्ञातीनिति। वो युष्माकं यादवत्वेन ज्ञातीन् वसुदेवादीन् द्रष्टुम् एष्यामः सुहृदां तत्रत्यानां सौहार्दवतां जनानां स्वदर्शनदानादिना सुखं विधाय इति ताभ्यामुक्तस्तौ कृष्णरामौ वामदक्षिणाभ्यां भुजाभ्यां पार्श्वस्थयैव कृपणः स्वधनमिव न तु स्वाङ्गविच्युतीकृत्येत्यर्थः। प्रणयानन्दविवशः अश्रुभिरानन्दधाराभिर्नेत्रे पूरयन्नेत्रे पूरयन्नेव कनकशटमारुह्य व्रजं ययौ अतो योगमायाप्रभावात् परस्परालक्षित एको नन्दः कृष्णवियुक्त एव व्रजं ययावन्यस्तु कृष्णसंयुक्त इति एवं च व्रजस्थानामपि सर्वेषां गोपीगोपपश्वादीनां प्रकाशद्वयीकरणादेके कृष्णवियुक्तेन नन्देन सह दुःखसमुद्रनिमग्ना अन्ये कृष्णसंक्तेन नन्देन सहानन्दसमुद्र निमग्ना व्रज एव तत्र परस्परमलक्षिता असंपृक्ता एव वर्त्तन्ते स्म यथा द्वारकायां नारददृष्टप्रकाशेषु एकत्र कृष्ण लालयन्ती भोजयन्ती देवकी परमानन्दनिमग्ना तदैवान्यत्र कृष्णवियुक्ता हन्त हन्त मृगयां कृत्वा अधुनापि मत्पुत्रो नायातः क्षुधातृषा व्याकुल इति वदन्ती परमदुःखे निमग्नैवेति यदुक्तम् भागवतामृते आश्चर्यमेकदैकत्र वर्त्तमानानपि ध्रुवम्। परस्परमसम्पृक्तस्वरूपाण्येव सर्वथेति" यद्यपि प्रकाशस्तु न भेदेषु गण्यते स हि नो पृथगित्युक्तेर्वस्तुतो न प्रकाशानां भेदस्तदप्यभिमानचेष्टादीनां लीलाशक्तिप्रभावाद्भेदस्तिष्ठत्येवेति योगमायाविभूत्यध्याये बहुलाश्वश्रुतदेवोपाख्याने च व्यक्तीभविष्यतीति प्रकाशद्वयस्य क्रमेण प्रयोजनद्वयं यथा स्वीयकनकस्यानर्घ्यस्य स्वरूपज्ञापनार्थमेव यथा वह्निना तत्सन्दह्यते तथैव स्वीयसर्वप्रेमपरिकरमुख्यमप्युद्धव दिव्योन्मादचित्रजल्पादिभिर्महाचमत्कारमयं व्रजप्रेम्ण उत्कर्षं ज्ञापयितुमेव प्रथमो वियोगमयः प्रकाशः प्रकाशितः। अत एव व्रजं प्रत्युद्धव एव प्रस्थापयिष्यते स च प्रायस्तमेव वियोगमयं प्रकाश दृष्ट्वा महाप्रेमचमत्कारमाप्नुवन्नेताः परं तनुभृतो भुवीति नायं श्रियोऽङ्गेति आसामहो चरणरेणुजुषामित्यादिपद्यैस्तत्प्रेम्ण एव सर्वोत्कर्षमुद्घोषयिष्यति स एव प्रकाशः कुरुक्षेत्रं गत्वा देवकीवसुदेवादीन् रुक्मिण्यादींश्च स्वं दर्शयित्वा महाप्रेमचमत्कार प्रापयिष्यति बलभद्रोऽपि व्रजं गतस्तमेव प्रकाश प्रेमोन्मादमयं दृष्ट्वा चमत्कारमाप्स्यतीति व्रजविषयक स्वाश्रयक प्रेमाणं निश्चलमेव ज्ञापयितुं द्वितीयः संयोगमयः प्रकाशः, अत एव विशोका अहनी निन्युर्गोप्यस्य: प्रियचेष्टितमित्यत्राहनी इति द्विवचनेन द्व अहनी व्याप्यैव विच्छेदो न तत इति ज्ञापितम् उद्धवेनापि हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्वताम्। यदाह वः समागत्य कृष्णः सत्यं करोति" तदिति तदा वर्तमानकाल एव प्रयुक्तः तथा तेन व्रजप्रवेशे प्रथमं स संयोगमय एव प्रकाशः सामान्यतो द्रक्ष्यते यद्वक्ष्यते वासितार्थेऽभियुद्ध्यद्भिर्नादितं शुष्मिभिः वृषैरिति गोदोहशब्दाभिरवं वेणूनां निस्वनेन चेति स्वलंकृताभिर्गोपीभिर्गोभिश्च सुविराजितमिति तादीपदीप्तैर्मणिभिर्विरेजु रज्जुर्विकर्षद्भुजकङ्कणस्रजः चलन्नितम्बस्तनहारकुण्डलत्विषत्कपोलारुणकुङ्कुमाननाः सामान्यतो द्रक्ष्यते उद्गायतीनामरविन्दलोचनामित्यादि कृष्णसंयोगानन्दलक्षणमित्येवं प्रकाशद्वयस्य प्रयोजनं प्रमाणं चोक्तम् ॥२५॥ पुरोधसा गर्गेण द्विजसंस्कृतिमुपनयनम् ॥२६॥ क्षौमवस्त्रमाल्यवतीर्गोः ॥२७॥ मनसा दत्ता या यावत्य आसन् कंसेनापहृता इति ता एव स्वीया राजगोष्ठादाच्छिद्य अददात् ॥ २८ ॥

गूढार्थदीपनी

तौ रामकृष्णौ ॥ २५ ॥ संस्कृतिम् उपनयनसंस्कारम्। शूरसुतो वसुदेवः ॥ २६ ॥ या गावस्ता इति योज्यम्। रुक्म सुवर्णम्। क्षौमं दुकूलं पुष्पमालाश्च विद्यन्ते यासां ताः। स्वलङ्कृतेभ्यः आचारसम्पन्नेभ्यः ॥ २७ ॥ या हृताः ताः तद्गोष्ठात् आच्छिद्य ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

द्विजसंस्कृतिमुपनयनम् ॥ २६ ॥ तेभ्यः गावः गाः अदात् क्षौमवस्त्रमालावतीः ॥ २७–२८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इति कृष्णरामाभ्यामुक्तो नन्दस्तौ परिष्वज्य प्रणयविह्वलो नेत्रे अश्रुभिविरहशोकोदकैः पूरयन्सहगोपैर्व्रजं ययौ ॥ २५॥ अथ नन्दगमनानन्तरे पुरोधसा तेनैव द्विजातिसंस्कृतिं स्वाध्यायोऽध्ययनोपयुक्तमुपनयनलक्षणं यथावद्ब्राह्मणैः सह समकारयत् ॥ २६ ॥ शूरसुतो रुक्ममालाः स्वलङ्कृताः सवत्साः क्षौममालिनीः । क्षोमाणां मालो मल धारणे घञ् । धारणमासाप्रस्तीति क्षौममालिन्यस्ता गाः सम्पूज्य गन्धादिना स्वलङ्कृतेभ्यस्तेभ्यो ब्राह्मणेभ्यो यः सम्प्रददे न ममेति दक्षिणामदात् ॥ २७ ॥ जन्मर्क्षे जन्मनक्षत्रे मनोदत्ता मनसा दत्ताः कंसेनाधर्मतो हृतास्ताश्चानुसंस्मृत्य स्मृतिपथं नीत्वाऽऽनाय्याददात् ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

दानानन्तरं गताविति शङ्कां वारयितुमाह । इत्युक्त इति । तौ कृष्णरामौ परिष्वज्य नन्दः प्रणयविह्वलः भगवद्दत्तसर्वार्थैः पूर्णः किञ्चिदपि वक्तुमसमर्थः तत्र अश्रुभिः नेत्रे पूरयन् गोपैः सह व्रजं ययौ । भगवता गोपाला अपि प्रस्थापिताः नतु मित्राणीव केचित्स्थापिताः ॥ २५ ॥ एवमेतेषां निरोधमुक्त्वा वेदेन भगवतोऽपि निरोधमाह यावदध्यायपरिसमाप्ति । तत्र प्रपञ्चविस्मृतिं पञ्चभिराह । शिष्टैर्वेदार्थासक्तिर्वक्तव्या । अथ सर्वकार्यसिद्ध्यनन्तरं शिशिरे शूरसुतः वसुदेवः राजनिति क्षत्रियाणामवश्यकर्तव्य इति ज्ञापनार्थं पुत्रयोः सम्यगकारयत् पुरोधसा गर्गेण अश्यैश्च ब्राह्मणैः क्षत्रियाणां पुरोहित एवोपदेष्टा उपनयने मातामहप्राधान्यव्यावृत्त्यर्थं शूरपदं यथावत् स्वगृह्योक्तानुसारेण द्विजसंस्कृतिं येन द्विजो भवति चूडाकरणसंस्कारः पूर्वमेव जातः काकपक्षधराविति वचनात् उपनयनसंस्कारस्त्वत्र कृतः द्वादशे पशुकाममिति संवत्सरविचारेण तु एकादश एव भवति काम्यपक्ष एवात्राश्रयणीयः सप्रायश्चित्तमित्यन्ये ॥ २६ ॥ ततस्तेभ्यः उत्सवार्थं दक्षिणार्थं च दानानि दत्तवानित्याह । तेभ्य इति । गवादय एव दक्षिणा विहिता वा रुक्ममालायुक्ताः सुष्ठु अलंकृताश्च स्वलंकृतेभ्यः सम्पूज्य तेभ्यश्च निधानपूर्वकमयुतद्वयं भगवज्जन्मनि रामजन्मनि च तावदन्यथा वा या मनोदत्ताः महामतिरिति स्मरणे पूर्वमेव सेत्स्यतीति दाने वा ताः अनुस्मृत्य ब्राह्मणेभ्यः अदात् नन्वेतावत्यो गावः कुत्रत्या वसुदेवस्येति चेत्तत्राह । कंसेन गृहलुण्ठनसमये हृताः ॥ २७-२८ ॥

श्रीसुबोधिनी-सारः

इत्येवमुक्तो नन्दः प्रणयेन प्रेम्णा विह्वलो व्याकुलस्तौ रामकृष्णौ परिष्वज्यालिङ्गयाऽश्रुभिर्नेत्रे पूरयन् गोपैः सह व्रजं जगाम ॥ २५ ॥ अथानन्तरं शूरस्य सुतो वसुदेवः पुरोधसा पुरोहितेन गर्गेण ब्राह्मणैश्चान्यैर्यथा वृद्धैरोक्तविधानवत् पुत्रयोर्द्विजसंस्कृतिमुपनयनं समकारयत् ॥ २६ ॥ तेभ्या ब्राह्मणेभ्यो दक्षिणाः सुवर्णमाल्याः सुभूषिताः सवत्साः क्षौममालिनीः पट्टवस्त्रमालायुक्ता गावो वा अदात् स्वलंकृतेभ्यः सुपूजितेभ्यः ॥ २७ ॥ कृष्णरामजन्मनक्षत्रे या मनोदत्ताः पूर्वं संकल्पिताः कंसेनाऽधर्मतः पापात् हृताः ताश्चाददात् अनुस्मृत्य स्मरण कृत्वा एतेन रामजन्मनि अपि संकल्पकल्पनोक्ता केचित्कर्मधारयमाहुः ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्येवमुक्तः, अत एव प्रणयेन स्नेहेन विह्वलो नन्दस्तौ रामकृष्णौ परिष्वज्य अश्रुभिर्नेत्रे पूरयन् गोपैः सह व्रजं प्रतिययावित्यन्यः ॥ २५ ॥ अथ अनन्तरं शूरसेनो वसुदेवः पुरोधसा गर्गाचार्येण ब्राह्मणैश्च यथाविधि पुत्रयो रामकृष्णयोर्द्विजसंस्कृतिं द्विजत्वापादकसंस्कारमुपनयनं सम्यगकारयत् ॥ २६ ॥ ततश्च विप्रान् सम्पूज्य सुष्वलङ्कृतेभ्यस्तेभ्यो ब्राह्मणेभ्यो दक्षिणां रुक्मस्य सुवर्णस्य माला आसां सन्तीति तथा सुष्ठ्वलङ्कृताः सवत्साः क्षौममालिनीः क्षामवस्त्रमालावतीर्गावो गाश्चादात् ॥ २७ ॥ रामकृष्णयोर्जन्मर्क्षे जन्मनक्षत्रे या गावो मनोदत्ता मनसा सङ्कल्पितास्ताश्चानुस्मृत्य विप्रेभ्यो ददौ। ननु 'तदानीं गावः क्व गता, येन मनसा दत्तवान् , इदानीं च कुत आगता' इत्याकाङ्क्षायामाह—कंसेनेति । तदानीमधर्मतः कंसेन हृताः इदानीं तद्गोष्ठादाच्छिद्य दत्ता इत्यर्थः । स्मृत्वा दाने हेतु सूचयन्नाह—महामतिरिति ॥ २८ ॥

अन्वितार्थप्रकाशिका

इतीति ॥ इत्येवमुक्तोऽत एव प्रणयेन स्नेहेन विह्वलो नन्दस्तौ रामकृष्णौ परिष्वज्य अश्रुभिर्नेत्रे पूरयन् गोपैः सह व्रजं प्रति ययौ । अत्र पितर्युवाभ्यामित्यादिश्लोकद्वयं बलदेववचस्त्वेन यातेति कृष्णवचस्त्वेन काञ्चित्प्रेमानुकूलां रीतिमनुसृत्य यथाश्रुतार्थस्य किञ्चिद्वैपरीत्येन व्याख्यातम् । तत्रापि प्रेम्णोऽणुमात्रमप्यपचयमसहमानाः पञ्चश्लोक्या व्याख्यान्तरं प्रणयन्ति । तत्रैव शङ्का पितर्युवाभ्यामित्यादेर्यथाश्रुतार्थः । प्रेमप्रतिकूल एव पूर्वलिखितोऽप्यर्थः प्रेमप्रतिकूल एव नन्दकृष्णयोर्मिथस्त्यागात् कृष्णो नन्द त्यक्त्वा तिष्ठतु । नन्दस्तु प्राणाधिकं कृष्णं कथं त्यक्तुमशकत् मथुरायामेव किन्नावसत् किंच पूर्वं सान्त्वयामास । सप्रेमैरायास्ये इति दौत्यकैरिति शुकवाक्ये दौत्यकैरिति बहुवचनेन भूयः कथनं सप्रेमैरिति च तेषां प्रेमसहितत्वमुक्तम् । श्रीकृष्णो गोपीनामाश्वासनाय वदतु वा । श्रीशुकः सप्रेमैरिति कथं विशिनष्टि । तस्माद्यदि कंसवधानन्तरमेव कृष्ण आगच्छेत्तदैव सप्रेमत्वं स्यादन्यथा सप्रेमैरित्यलीकमेव स्यात् । तत्रैवमुन्नीयते वसुदेवादीनां नन्दादीनां चोपेक्षाऽनुचिता । जरासन्धादिदुष्टनिग्रहार्थं

दशमस्कन्धोक्तमवतारप्रयोजनं च सम्पाद्य गोपीषु प्रतिश्रुतमागमनं च सम्पाद्यम्। अतः निखिलकृत्यसमाधात्रीमतर्क्यैश्वर्यां स्वीययोगमायाशक्तिमाश्रित्य बलदेवसहित एव कृष्णः श्रीनन्दं पितरमासाद्य तदैव तेषां नन्दादीनां स्वस्य च द्वौ द्वौ प्रकाशावाविर्भाव्य प्रथमेन प्रकाशेन श्रीनन्दं प्रति पितुर्युवाभ्यामिति श्लोकत्रयं यदुवाच। तस्य एवं सान्त्वय्येति तदुत्तरस्य श्लोकद्वयस्य च व्याख्याकृतैव तत्रैव प्रकाशान्तरेण वर्तमानौ कृष्णरामावाहतुः। पितरिति। युवाभ्यां स्निग्धाभ्याम् आवां कृष्णरामौ द्वावपि पोषितौ लालितौ चेति अत्रत्या यादवाः आवां भवतः पोष्यपुत्रावेव वदन्ति। तत्र कृष्ण आह। पित्रोः खल्वात्मजेष्वेव पुत्रेषु आत्मनो देहान् जीवात्मनश्चापि सकाशादभ्यधिका प्रीतिर्भवेत् अतोऽहम् आत्मज एव नतु पोष्यपुत्रा। बलदेव आह। स पितेत्यादि। तस्मादहं वसुदेवस्य गृहे त्वां कृष्णं च हित्वा नैव स्थास्यामि। तत उभावाहतुः। यातेति। हे तात! यूयं व्रजं यात वयं च व्रजं यामः। ततश्च तत्रत्यानां सुहृदां जनानां स्वदर्शनदानादिना सुखं विधाय पश्चात् वो युष्माकं यादवत्वेन ज्ञातीन् वसुदेवादीन् द्रष्टुमेष्याम इति ताभ्यामुक्तो नन्दः प्रणयानन्दविवशः अश्रुभिरानन्दधाराभिर्नेत्रे पूरयन्नेव शकटमारुह्य व्रजं ययौ। अतो योगमायाप्रभावात् परस्परालक्षित एको नन्दः कृष्णवियुक्त एव व्रजं ययावन्यस्तु कृष्णसंयुक्त इति। एवं च व्रजस्थानामपि सर्वेषां गोपीगोपपश्वादिप्रकाशद्वयीकरणादेके कृष्णवियुक्तेन नन्देन सह दुःखसमुद्रे निमग्ना अन्ये कृष्णसंयुक्तेन नन्देन सहानन्दसमुद्रे निमग्ना व्रज एव तत्र परस्परमलक्षिता असम्पृक्ता एव वर्तन्ते स्म। यथा द्वारकायां नारददृष्टप्रकाशेषु एकत्र कृष्णं लालयन्ती भोजयन्ती देवकी परमानन्दनिमग्ना तदैवान्यत्र कृष्णवियुक्ता हन्त हन्त मृगयां कृत्वा अधुनाऽपि मत्पुत्रो नायातः क्षुधातृषाव्याकुल इति वदन्ती परमदुःखे निमग्नैवेति। यदुक्तं भागवतामृते। "आश्चर्य्यमेकदैकत्र वर्तमानान्यपि ध्रुवम्॥ परस्परमसंपृक्तस्वरूपाण्येव सर्वथा॥" इति। यद्यपि "प्रकाशस्तु न भेदेषु गण्यते स हि नो पृथक।" इत्युक्तेर्वस्तुतो न प्रकाशानां भेदस्तदप्यभिमानचेष्टितादीनां लीलाशक्तिप्रभावाद्भेदस्तिष्ठत्येवेति योगमायाविभूत्यध्याये बहुलाश्वश्रुतदेवोपाख्याने च व्यक्तीभविष्यतीति। स्वीयकनकस्यानर्घ्यस्वरूपज्ञापनार्थमेव यथा वह्निना तत्संदह्यते तथैव स्वीयसर्वप्रेमपरिकरमुख्यमप्युद्धवं दिव्योन्मादचित्रजल्पादिभिर्महाचमत्कारमयं व्रजप्रेम्ण उत्कर्षं ज्ञापयितुमेव प्रथमो वियोगमयः प्रकाशः प्रकाशितः। अत एव व्रजं प्रत्युद्धव एव व्रजं प्रत्युद्धव एव प्रस्थापयिष्यते। स च प्रायस्तमेव वियोगमयं प्रकाशं दृष्ट्वा महाप्रेमचमत्कारमाप्नुवन्नेताः परं तनुभृतो भुवीति नायं श्रियोऽङ्गेति आसामहो चरणरेणुजुषानित्यादिपदैस्तत्प्रेम्ण एव सर्वोत्कर्षमुद्घोषयिष्यति। स एव प्रकाशः कुरुक्षेत्रं गत्वा देवकीवसुदेवादीन् रुक्मिण्यादींश्च स्वं दर्शयित्वा महाप्रेमचमत्कारं प्रापयिष्यति। बलभद्रोऽपि व्रजं गतस्तमेव प्रकाशं प्रेमोन्मादमयं दृष्ट्वा चमत्कारं प्राप्स्यतीति व्रजविपयकं स्वाश्रयकं प्रेमाणं निश्चलमेव ज्ञापयितुं द्वितीयः संयोगमयः प्रकाशः। अत एव "विशोका अहनी निन्युर्गायन्त्यः प्रियचेष्टितम्॥" इत्यत्राहनी इति द्विवचनेन द्वे अहनी व्याप्यैव विच्छेदो न तत इति। ज्ञापितम् उद्धवेनापि हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्वता यदाह वः समागत्य कृष्णः सत्यं करोति तदिति। तदा वर्तमानकाल एव प्रयुक्तः तथा तेन व्रजप्रवेशे प्रथमं ससंयोगमय एव प्रकाशः सामान्यतो द्रक्ष्यते यद्वक्ष्यते। "वासितार्थेऽभियुद्ध्यद्भिर्नादितं शुष्मिभिर्वृषैः।" इति गोदोहशब्दाभिरवं वेणूनां निःस्वनेन चेति स्वलङ्कृताभिर्गोपीभिर्गोभिश्च सुविराजितमिति। "ता दीपदीप्तैर्मणिभिर्विरेजू रज्जूविकर्षद्भुजकङ्कणस्रजः॥ चलन्नितम्बस्तनहारकुण्डलत्विषत्कपोलारुणकुङ्कुमाननाः॥" इति सामान्यतो वक्ष्यते। "उद्गायतीनामरविन्दलोचनम्" इत्यादि कृष्णसंयोगानन्दलक्षणामित्येवं प्रकाशद्वयस्य प्रयोजनं प्रमाणं चोक्तम्॥ २५॥ अथेति॥ अथ हे राजन् शूरसुतो वसुदेवः पुरोघसा गर्गाचार्येण ब्राह्मणैश्च यथाविधि पुत्रयो रामकृष्णयोर्द्विजसंस्कृतिं द्विजत्वापादकसंस्कारमुपनयनं सम्यगकारयत्॥ २६॥ तेभ्य इति॥ ततश्च विप्रान्संपूज्य सुष्ट्वलंकृतेभ्यस्तेभ्यो ब्राह्मणेभ्यो दक्षिणां रुक्मस्य सुवर्णस्य माला आसां सन्तीति तथा सुष्टु अलंकृताः क्षौममालिनीः क्षौमवस्त्रमालावतीर्गावो गाश्चादात्। प्रथमार्षी॥ २७॥ या इति॥ रामकृष्णयोर्जन्मर्क्षे जन्मनक्षत्रे या गावो मनोदत्ताः मनसा संकल्पितास्ताश्चानुस्मृत्य तदानीमधर्मतः कंसेन हृताः। इदानीं तद्गोष्ठादाच्छिद्य महामतिर्वसुदेवः विप्रेभ्यो ददौ॥ २८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शूरसुतो वसुदेवः पुरोधसागर्गनाम्नागुरुणाद्विजसंस्कृतिं उपवीतसंस्कारं॥ २६॥ गावो गाः रुक्मस्य कनकस्य मालाः सन्ति यासां ताः क्षौमवस्त्रकृतकंठमालया युक्ता इत्यर्थः॥२७॥ या गावः कृष्णः रामयोर्जन्मनक्षत्रसमये मनसा अन्तःकरणसंकल्पेन दत्ता अभवत् ता एव दत्तवान् कुतस्ता आनीतास्तत्राह कंसेनाधर्मतोहृता इति जनेभ्य इति शेषः॥ २८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्युक्त इति॥ इतीत्थं, उक्तस्ताभ्यामभिहितः, नन्दः, तौ रामकृष्णौ, परिष्वज्यालिङ्ग्य, प्रणयेनानुरागेण विह्वलः, अश्रुभिः नेत्रे, पूरयन् सन्, गोपैः सह, व्रजं ययौ॥२५॥ अथेति॥ अथानन्तरं, हे राजन्, शूरसुतः वसुदेवः, पुरोधसा गर्गाचार्येण, ब्राह्मणैश्च, यथावद्यथाविधि, पुत्रयोः रामकृष्णयोः, द्विजसंस्कृतिं द्विजत्वापादकमुपनयनसंस्कारं, समकारयत्॥ २६॥ तेभ्य इति॥ ततः, स्वलंकृतेभ्यः तेभ्यो ब्राह्मणेभ्यः, यथावत् संपूज्य, रुक्मस्य सुवर्णस्य माला आसां सन्तीति रुक्ममाल्यः रुक्ममालिनी-

रित्यर्थः । स्वलङ्कृताः सुष्ठ्वलंकृताः, क्षौममालिनीः क्षौमवस्त्रमालावतीः, सवत्साः, गावो गाः, अदात ॥ २७ ॥ या इति ॥ कृष्णरामजन्मर्क्षे कृष्णरामयोर्जन्मनः नक्षत्रे, याः गावः, मनोदत्ताः, ताश्च ता अपि, अनुस्मृत्य, महामतिः वसुदेवः, ददौ । ननु वसुदेवगावस्तु प्राक् कंसेनाहृतास्तत्क्षणमेव कुत आनीय दत्ता इत्यत्राह । कंसेन अधर्मतः, हृताः, अतः स्वास्ताः राजगोष्ठादानीय दत्ताः ॥ २८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

इत्युक्त इति : १०.४५.२५.

वासुदेवस्त्वयमिति गर्गोऽवादीत्तदैव हि । मया परं न मूढेन तदर्थो ज्ञात इत्यहो ॥ ५१ ॥
तद्वशोऽस्मि सदा प्रेम यस्य मय्यस्त्यकृत्रिमम् । इति श्रीशोक्तिदृक् चक्रे तद्वादं तन्मिषाद् दृढम् ॥ ५२ ॥

अनुदिनमुपनीतः प्रेमतो यैर्व्रजस्थैरहमिह बहु तेभ्योऽदायि सौख्यं मयाऽपि ।
उपनयनमिदं यल्लौकिकं नास्ति तस्मादधिकमिति किमस्मात प्राहिणोत्तं पुरेशः ॥ ५३ ॥

लोकौ गोकुल-माथुरावनिगतावेकैकजन्मार्जितक्रीडाजातविलोकनैकविलसत्पुण्याविमौ स्तो मम ।
इत्यालोच्य जनुर्जिघृक्षुरपरं संस्कारतः श्रीधरोमन्ये स्वोपनयात्पुरा व्रजजनं तं तादृशं प्राहिणोत् ॥ ५४ ॥
नैवं चेदचिरान्महोत्सवसमारम्भे प्रसक्तेऽप्यसौ नन्दं स्वाप्ततमं सहैव निखिलैर्गोपैः कथं प्राहिणोत् ।
यल्लोकेषु जनैः परस्परमनुप्राप्तं समीक्ष्यात्सवं मित्रं स्वाप्तमविद्यमानमपि तत्प्रेम्णा समाहूयते ॥ ५५ ॥ (युग्मम्)
यैः साक्षादनघैरलक्ष्यमहो हंसस्वरूपः सतां तेषामाप्तसुखात्मनां तदधरेणान्यस्वरूपेण किम् ।
कर्तव्यं किमु वाऽवशिष्टमिति वा संचिन्त्य चित्तेऽच्युतो मौञ्जीबन्धनतः पुरैव स जनं तादृग्दृशं प्राहिणोत् ॥ ५६ ॥

अथ शूरसुत इति : १०.४५.२६.

येनाकारि मुदानन्दघोषोपनयनं हरेः । पुरोहितं पुरस्कृत्य युक्तं भूयस्तथा व्यधात् ॥ ५७ ॥
प्राग्वैरिरुद्धनिखिलव्यवहारजातस्यासीन्न मे सुखमलं तदवाप्तमद्य ।
इत्याप्तमुत्सपदि नन्दसमर्हणांशं विस्मृत्य युक्तमभवत्स सुतोत्सवोत्कः ॥ ५८ ॥

तेभ्योऽदादिति १०.४५.२७.

वक्तारः सन्त्यनन्ताः श्रुतिशतकलितब्रह्मविद्याविभूतेर्ज्ञाता त्वेकोऽपि तुच्छीकृतविषयधनो दुर्लभोऽस्यां भुवीति ।
सत्यं यद्ब्राह्मणास्ते सदय सपदि ते वेदविद्यामयस्याप्याराद् ब्रह्मापदेशप्रणिहितमतयः प्राभवन् वित्तलुब्धाः ॥ ५९ ॥

याः कृष्णरामजन्मर्क्ष इति : १०.४५.२८.

रामस्य यस्यां जनुरास तद्भे मनोज्ञतज्जन्मकृताश्रये वा । ऋक्षं स सङ्कल्पितगोरितीदं वाच्यं यतो रामजनुष्यदत्तगौः ॥ ६० ॥
सति सम्प्राप्ते समये भव्ये विधितो बुधेन नालस्यम् । कार्यं चित्तगवितरणकृतार्विति स्पष्टमजनि तद्दानात् ॥ ६१ ॥
यः सङ्कल्पितभागो दानं तस्येति मुख्यविधिपक्षः । व्यक्तोऽभवद्यदस्मिंस्ता एवादात् स गा अनुस्मृत्य ॥ ६२ ॥
मुक्तबन्धेन पुंसाऽत्र दृष्टेशेनापि पूर्णताम् । नेयः सङ्कल्पः इत्यर्थस्तत्तद्गोदानतः स्फुटः ॥ ६३ ॥

कृष्णप्रिया

राजन् ! स्नेहावतार भगवान केशव-श्रीकृष्ण के इस प्रकार के स्नेह दैन्य लपेटे वचनो से नन्द बाबा भाव विभोर बन गये व्याकुल हो गये कण्ठ गद्-गद् हो गये नयनों से अश्रुओं की धारा बहने लगी केवल बेटा शब्द भी नहीं बोल पाये केवल दोनों पुत्रों को गाढ आलिङ्गन किया और गोपों के साथ व्रज पधारे ॥ २५ ॥ श्री नन्दबाबा के प्रस्थान के बाद हे राजन्! दोनों भाईओं का चूड़ाकरण सस्कार ब्रज में हो चुके थे इसलिए शूर सूत श्री वसुदेवजी ने कुल पुरोहित गर्गाचार्यजी एव चतुर्वेदी विप्रों को आदर से बुलाकर दोनों पुत्रों का वेदविधान के अनुसार यज्ञार्थ उपनयन संस्कार कराया एव "क्षात्रियाणां पुरोहित एव उपदेष्टा" क्षत्रियों के लिए निजकुल पुरोहित ही उपदेष्टा होते हैं इसलिए गृह्यसूत्रानुसार उपदेश दिलाया ॥ २६ ॥ श्री वसुदेवजी ने गौओं का दो प्रकार से दान किया । आज यज्ञोपवीत संस्कार के अवसर पर विधि विहित गोप्रदान किया और दोनों पुत्रों के प्राकट्य प्रसङ्ग में जो मन संकलिपत था । राजा कंस ने जब वसुदेवजी को जेल में रखकर उनका सर्वस्व लूट लिया था तब गौओं को ले गया था । कस की मृत्यु के बाद वसुदेवजी को मिल गई वे २०,००० बीस हजार थी । भगवान् श्रीकृष्ण बलभद्रजी के जन्म नक्षत्र के दिन मन संकलिपत की हुई थी आज विविध तरह के अलङ्कारादि से विप्रवरों को अलङ्कृत कर दान मान अन्न देकर पूजन कर, गौओं को सुवर्ण माला दुकूल वस्त्र पुष्पमालादि से विभूषित कर वछड़ों वाली गौओं का पूर्व के संकल्पों का स्मरण करते हुए दान किया ॥ २७–२८ ॥

ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ । गर्गाद् यदुकुलाचार्याद् गायत्रं व्रतमास्थितौ ॥ २९ ॥
प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ । नान्यसिद्धामलज्ञानं गूहमानौ नरेहितैः ॥ ३० ॥
अथो गुरुकुले वासमिच्छन्तावुपजग्मतुः । काश्यं सांदीपनिं नाम [1]ह्यवन्तीपुरवासिनम् ॥ ३१ ॥
[2]यथोपसाद्य तौ दान्तौ गुरौ वृत्तिमनिन्दिताम् । ग्राहयन्तावुपेतौ स्म भक्त्या देवमिवादृतौ ॥ ३२ ॥

कर्वमक्षमा

अन्वयः—ततः, लब्धसंस्कारौ, द्विजत्वम्, प्राप्य, च, सुव्रतौ, यदुकुलाचार्यात्, गर्गात्, गायत्रम्, व्रतम्, आस्थितौ ॥२९॥ सर्वविधानाम्, प्रभवौ, सर्वज्ञौ, जगदीश्वरौ, नान्यसिद्धामलज्ञानम्, नरेहितैः, गूहमानौ, गुरुकुले, बासम्, इच्छन्तौ, अथ, हि, अवन्तीपुरवासिनम्, काश्यम्, सान्दीपनिम्, नाम, उपजग्मतुः ॥ ३०-३१ ॥ यथा, उपसाद्य, दान्तौ, गुरौ, अनिन्दिताम्, वृत्तिम्, ग्राहयन्तौ, देवम्, इव, भक्त्या, आदृतौ, तौ, उपेतौ, स्म ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गायत्रं व्रतं ब्रह्मचर्यम् ॥ २९ ॥ प्रकर्षेण भवन्त्याभ्यामिति प्रभवौ अत एव सर्वज्ञौ स्वतः सिद्धममलं ज्ञानं नरचेष्टितैः प्रच्छादयन्तौ ॥३०-३१॥ यथा यथावत् उपसाद्य प्राप्य गुरौ वृत्तिमन्यान् ग्राहयन्तौ शिक्षयन्तौ । गुरुमुपेतावुपगतौ । सेवितवन्तावित्यर्थः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत उपनयनोत्तरम् । द्विजत्वं क्षत्रियत्वसंपादकधर्मम् । व्रतं तज्जपरूपनियमं वा ॥ गर्गादिति तच्छिक्षयेत्यर्थः । गायत्रमिति प्राजापत्यब्राह्मयोरुपलक्षणम् । तत्र गायत्रं गायत्रीमधीयानस्य त्रिरात्रव्यापि, प्राजापत्यं वेदारम्भपर्यन्तम्, ब्राह्मं तत्समाप्तिपर्यन्तम् । अत एव सामान्यतो ब्रह्मचर्यमेव तैर्व्याख्यातम् । सुव्रतौ सन्तौ ॥२९॥ प्रभवौ मूलकारणे । अत एव सर्वज्ञानकारणत्वादेव । नान्येन तपआदिना सिद्धं किं तु स्वाभाविकं यदमलं वेदरहस्यरूपं ज्ञानम् ॥ प्रभवाविति युग्मकम् ॥ ३० ॥ अथो अतः । काश्यां पठितवान् काश्यस्तम् । केचिदिह काश्यामिति पठन्ति तन्नादर्तव्यम् "तदोपनीतो भगवानवन्तीनगरं ययौ । चकार विद्याग्रहणं मुनेः सांदीपनेर्गुरोः ॥" इति ब्रह्मवैवर्तोक्तेः । शिष्टास्तु काश्यमित्येकदेशन्यायेन कश्यपगोत्रोद्भूतमित्यर्थमाहुः ॥ उपजग्मतुः रथमारुह्येति ज्ञेयं, रथस्य वक्ष्यमाणत्वात् । काश्यं काश्यां जातम् ॥ ३१ ॥ तौ रामकृष्णौ । शिक्षयन्तौ 'यद्यदाचरति श्रेष्ठः' इत्याद्युक्तसंपादनार्थमित्यर्थः । देवमिवेत्यनेन "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इत्यादिकां श्रुतिं सूचयति । अनिन्दितामिति विद्याभ्यासं कुर्वता छात्रेणाध्यापकेतरसेवा न कार्या तन्निन्दाश्रुतेः,—"विप्रः शास्त्रमधीयानो ह्यन्नपानादिलिप्सया । विना विद्याप्रदातारं सेवमानः पतत्यधः ॥ भिक्षादिना प्रभुञ्जीत न तु वृत्तिं समाश्रयेत् । निन्दाभिरेव संशय्य तादृशत्वे तु नारकी ॥" इति संहितोक्तेः । "वृत्तिर्बुद्ध्यादिविकृतौ सेवाजीवनयोरपि" इति धरणिः । यद्वा—अनिन्दिता सेवा गुरोः कार्या न तु तस्मिन्प्रवसिते तद्भार्यारजःसमाप्तौ तत्संगादिरूपाऽपीत्यर्थः । अत्र महाभारतीया गाथैतद्विषयिण्यनुसन्धेया—"विद्यां श्रुत्वा ये गुरुं नाद्रियन्ते प्रत्यासन्ना मनसा कर्मणा च । तेषां पापं भ्रूणहत्याविशिष्टं तेभ्यो नान्यः पापकृच्चास्ति लोके ॥" इति । प्रत्यासन्नच्छात्रादिनाऽवश्यमाचार्यसेवा शक्त्यनुसारेण कार्येति बोधितम् । "योऽन्नाद्याप्तये त्यक्त्वा गुरुसेवां करोति च । अन्यस्य स च संज्ञेयो नामधारकछात्रकः । स तु विप्रो न पूजार्हः कुक्षिंभरगणाग्रणीः ॥" इति बहुधा संहिताभागे वर्णितमस्ति वरतन्तुनेति ॥ यथावत् समित्पाणित्वादिश्रुत्युक्तप्रकारेण । दान्तौ संयतौ सन्तौ । तथा च श्रीहरिवंशे—"निवेद्य गोत्रं स्वाध्यायमाचारेणाभ्यलंकृते । शुश्रूषू निरहंकारावुभौ रामजनार्दनौ ॥" इति । वृत्तिमनुवृत्तिम् । अनिन्दितामीश्वरत्वेऽपि कर्तुं योग्यत्वेन श्लाघ्याम् । स्मेति तद्वृत्तं प्रसिद्धमेवेत्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

गर्गादिति तच्छिक्षयेत्यर्थः । गायत्रमिति प्राजापत्यब्राह्मयोरप्युपलक्षणं तत्र गायत्रं गायत्रीमधीयानस्य त्रिरात्रव्यापि-प्राजापत्यं वेदारम्भपर्यन्तं ब्राह्मं तत्समाप्तिपर्यन्तम अतएव सामान्यतो ब्रह्मचर्यमेव तैर्व्याख्यातं सुव्रतौ सन्तौ ॥ २९ ॥ कक्ष प्रभवाविति युग्मकं सर्वविद्यानां प्रभवावपि अथो अनन्तरम् उपजग्मतुः रथमारुह्येति ज्ञेयम् । रथस्य वक्ष्यमाणत्वात् । काश्यां काश्यां जातम् ॥ ३०-३१ ॥ यथा समित्पाणित्वादि श्रुत्युक्तप्रकारेण दान्तौ तथा च श्रीहरिवंशे । "निवेद्य गोत्रं स्वाध्यायमाचारेणाभ्यलङ्कृतौ । शुश्रुषू निरहङ्कारावुभौ रामजनार्दनाविति" । वृत्तिमनुवृत्तिं परमदैवतामिव आदृतौ सादरौ गुरुणा सम्मानितौ सन्तौ वा । स्मेति तद्वृत्तं प्रसिद्धमेवेत्यर्थः ॥ ३२ ॥

---

[1] अवन्ती-वीर ; अवन्ति-विज । [2] अथोप-वीर. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुव्रतौ तन्त्रोक्तनियमनिष्ठौ सन्तौ; किंवा सदा सर्व्वस्वं दत्तवन्तावपि आस्थितौ स्वीचक्रतुः ॥ २९ ॥ किञ्च, सर्व्वविद्यानां प्रभवावपि तत्सर्व्वं लोकशिक्षणार्थमेवेति ग्राहयन्तावित्यनेन वक्ष्यत एव ॥ ३० ॥ अथो अनन्तरम्, अतो हेतोर्वा। इच्छन्ताविति श्रीवसुदेवादीनामुपनयने यथेच्छा नास्तीति सूचयति,—विच्छेदादिदुःखात् प्रयोजनविशेषाभावाच्च । उपजग्मतुः—समीपे गतौ, रथमारुह्येति ज्ञेयम्, रथस्य वक्ष्यमाणत्वात्। काश्यं काश्यां जातमिति सर्व्वसच्छास्त्राद्यभ्यासनिष्ठत्वमुक्तम्; सम्यग् दीपयति सर्व्वविद्याः प्रकाशयतीति सन्दीपनस्तस्य पुत्रं नामेति तत्संज्ञयैव प्रसिद्धम्, देवकीत्यादिकदित्यर्थः । अवन्तीपुरवासिनमिति मथुरा-द्वारकयोरन्तरालवर्त्तित्वेनावन्त्याः स्वीयत्वज्ञानात्तत्र गमनम् ॥ ३१ ॥ यथावत् कुशपाणित्वादिपूर्व्वकप्रकारेण यथा गुरूपसत्तिः शास्त्रेण विहितास्ते तदनुसारेणेत्यर्थः । दन्तौ सन्यतौ सन्तादुपेतौ; तथा च श्रीहरिवंशे (विष्णु० प० ३३।४)—“नवेद्य गोत्रं स्वाध्यायमाचारेणाप्यलङ्कृतौ। शुश्रूषु-निरहंकारावुभौ राम-जनार्द्दनौ ।” इति । अनिन्दितामुत्तमां वृत्तिं वर्त्तनं वासमित्यर्थः, अनुवृत्तिं वा; परमदैवतमिवादृतौ सादरौ गुरुणा सम्मानितौ सन्तौ वा; स्मेति तद्वृत्तं प्रसिद्धमेवेत्यर्थः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ईहितैः चेष्टाभिः ॥ ३०–३३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततश्चेति लब्धः संस्कार उपनयनाख्यो याभ्यां तौ द्विजत्वं प्राप्यकुलस्याचार्याद्गायत्रं व्रतं गर्गोपदिष्टं ब्रह्मचर्यमास्थितावाश्रितौ ॥ २९ ॥ अथो ततः सर्वज्ञौ स्वतः सिद्धामलं ज्ञानं नरचेष्टाभिः प्रच्छादयन्तौ ॥ ३० ॥ गुरुकुलावासमिच्छन्तौ काश्यं काश्यपगोत्रजमवन्तीपुरवासिनं सान्दीपन्याख्यं गुरुमभिजग्मतुः ॥ ३१ ॥ तौ रामकृष्णौ यथावत् उपसाद्य दान्तौ जितेन्द्रियौ सन्तौ निर्दिष्टां गुरौ वृत्तिमन्यान् ग्राहयन्तौ शिक्षयन्तावादरयुक्तौ देवभक्त्या गुरुमुपेतौ सेवितवन्तौ इत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

द्विजत्वमुपनीतत्वं प्राप्य लब्धसंस्कारौ लब्धदेहशुद्धी गायत्रं व्रतं गायत्रीजपनियमं ब्रह्मचर्यम्वा ॥ २९ ॥ प्रभवौ मूलकारणे नान्येत्येकं पदं नगनाकाशब्दवत् अन्यस्य सिद्धं न भवतीति नान्यसिद्धम् औत्पत्तिकम् अत एवामलं यज्ज्ञानं तन्नरेहितैः मनुष्यचेष्टाभिश्छादयन्तौ ॥ ३० ॥ यस्मादथो तस्मात् काश्यङ्काश्यपगोत्रजातम् ॥ ३१ ॥ यथावदुपासाद्य समित्पाणी उपेतौ स्म प्रापतुः भक्त्या देवमित्यनेन “यस्य देवे परा भक्तिर्यथा देवे तथा गुरा” विति श्रुतिंसूचयति ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गायत्रं ब्रह्मचर्य्यम् ॥ २९ ॥ अनन्यसिद्धं स्वाभाविकं ज्ञानं नरचेष्टितैरेव यत आच्छादयन्तावथो अत एव गुरुकुले इत्यादि ॥ ३०–३१ ॥ यथा यथावत् गुरौ वृत्तिम् उपसत्तिम् अन्यान् ग्राहयन्तौ शिक्षयन्तौ उपेतौ स्म सेवितवन्तौ गुरुणा तेनाप्यादृतौ ॥ ३२–३३ ॥

गूढार्थदीपिनी

गायत्रीमधीयानस्य त्रिराजन्यापि गायत्रम् ॥ २९ ॥ अनन्यसिद्धं स्वतः सिद्धं गुरूपदेशं विनैव ईहितैः नरचेष्टितैः गूहमानौ आच्छादयन्तौ ॥ ३० ॥ काश्यं काश्यां पठितवन्तं तत्र जातं वा । एकदेशन्यायेन कश्यपगोत्रोत्पन्नं वा ॥ ३१ ॥ यथा यथावत् वृत्तिम् अनुवृत्तिं अन्यान् ग्राहयन्तौ स्वयं च गुरुमुपेतौ सेवितवन्तौ च ॥ ३२–३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गायत्रं सावधिब्रह्मचर्य्यम् ॥ २९ ॥ ननु सर्वज्ञस्य सर्वगुरोः श्रीभगवतः तदवतारस्य वलस्य च गुरुकुले वासः किमभिप्राय इत्यत्र नरशिक्षायै इत्याह । प्रभवावित्यादिना । प्रकर्षेण भवन्त्याभ्यामिति प्रभवौ नरेहितैः नरशिक्षार्थकैः नरचेष्टितैः नान्यसिद्धं स्वाभाविकममलं ज्ञानं गूहमानौ प्रच्छादयन्तौ ॥ ३०–३१ ॥ तौ रामकृष्णौ यथा यथावदुपसाद्य प्राप्य गुरौ अनिन्दितां शुद्धां वृत्तिमन्यान् ग्राहयन्तौ शिक्षयन्तौ भक्त्या देवमिव गुरुमुपेतौ उपगतौ सेवितवन्तौ अत्र “यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः” इति । श्रुतिरनुसन्धेया ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

द्विजत्वमुपनीततां प्राप्य लब्धसंस्कारौ व्रतोपयुक्तप्राप्तगात्रनैर्मल्यौ गायत्रव्रतं यदुकुलाचार्याद्गर्गादास्थितौ तदुपदिष्टमार्गेण व्रतस्तावभूतामित्यर्थः । अनेनापातप्रतीताविज्ञत्वं ग्रन्थकृद्दूरयति ॥ प्रभवाविति । सर्वविद्यानां प्रभवौ व्यञ्जकावुत्पादकौ च सर्वज्ञौ जगदीश्वरौ नान्यसिद्धं सहजममलं ज्ञानं नरेहितैर्मानुषचेष्टाभिर्गूहमानौ आच्छादयन्तौ ॥ ३० ॥ काश्यप नामैकदेशेन येन

कश्यपगोत्रे वा स्वतन्त्रे काशगोत्रे वा भवमवन्तिनामपुरवासिनं नाम्ना सान्दीपिनिं गुरुकुले वासमिच्छन्तौ सन्तावुपजग्मतुः ॥३१॥ यथोपसाद्य यथावत्समित्पाणित्वादिना प्राप्य दान्तौ गुरावनिन्दितां वृत्तिमन्यान्ग्राहयन्तौ शिक्षयन्तौ भक्त्या सुदामादीन्देवमिवादृतावुपेतौ न सर्वात्मसाम्यम् । देवे यथा तद्योग्यतानुसारेणेति यथा देवे तथा गुराविति सूचितः श्रुत्यर्थः ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततोऽन्येन निरोधे कारितेऽपि स्वतोऽपि कर्त्तव्यमिति व्रतात्मकं नियमं पूर्वसिद्धत्यागापरपर्यायं स्वयं कृतवन्तावित्याह । ततश्चेति द्वाभ्याम् । ग्रहणसमर्थनभेदेन तदनन्तरमेव संस्कारदिनं परित्यज्य दिनत्रयं मासषट्कं सम्वत्सरमात्रं वा सुव्रतौ शोभनवेदव्रतयुक्तौ ब्रह्मचर्यनियमयुक्तौ वा यदुकुलस्यैवाचार्यो गर्ग इति गायत्रं व्रतं सावित्रापरपर्यायं व्रतमास्थितौ जातौ ॥२९॥ नन्वेतस्य व्रतस्य काम्यत्वं यथा सरसस्फूर्तिर्भवति तदत्र प्रकृते नोपयुज्यत इति किमिति व्रतमास्थितावित्याशङ्कायामाह । प्रभवाविति । यद्यपि सर्वविद्यानां प्रभवौ विद्यापेक्षाभावे स्वतोऽपि सर्वज्ञौ मास्तु वा ज्ञानं जगदीश्वरौ कर्तुमकर्तुमन्यथा कर्तुं समर्थौ क्रियाशक्तिरेवोत्कृष्टेत्यर्थः । तथाप्यनन्यसिद्धं स्वतः सिद्धमेव ज्ञानं नरेहितैर्मानुषलीलाभिः गूहमानौ गोप्यं कुर्वाणौ गायत्रं व्रतमास्थिताविति पूर्वेणैव सम्बन्धः । सर्वज्ञता ब्रह्मविदामिव कृत्रिमाऽपि भवतीति नान्यसिद्धेत्युक्तम् ॥ ३० ॥ एवं प्रपञ्चविस्मरणात्मकनिरोधमुक्त्वा आसक्त्यात्मकनिरोधमाह । अथो इति विंशत्या ततो द्वाभ्यां प्रत्यापत्तिं वक्ष्यति अन्यथा अग्रे क्रियमाणो निरोधः कर्तृरहितः स्यात् आत्मैकविंश इति नखस्थानीया एते धर्मा भगवतो निरूपि अवश्यं हि गुरुकुल एव विद्याग्रहणम् । अतः गुरुकुले वासमिच्छन्तौ जातौ तत ईश्वरत्वात्कश्चिद्गुरुः स्वयमुपस्थितः भगवता वा कल्पित इति शङ्कां वारयितुमथ जग्मतुः काश्यमिति । सान्दीपनिरिति सन्दीपनस्यापत्यं सान्दीपनिः "अत इञ्" पितृनाम्नैव तस्य प्रसिद्धिः काश्य इति एकदेशग्रहणेन काश्यपगोत्रजः काश्यो वा स्वतन्त्रः गोत्रप्रवर्तकः काश्यः कुत्सो गृत्समद इति गृत्समदात् शौनकः तथा काश्यस्यापि ब्रह्मवंशजनकत्व यद्यपि विशतो नोक्तं तथाप्यवगम्यते केचन ऋषयः पितृनाम्नैव प्रसिद्धा इति सन्दीपनिरेव निरुक्तः सम्यक् दीपन बुद्धेर्यस्मादिति अवन्तीपुरं तु शैवं महाकालस्थानं तत्रापि यथा मुक्तिर्भवति सोऽपि तीर्थव सेन विरक्तो महान् ॥ ३१ ॥ तत्र गत्वा यथा गुरुवृत्तिः कर्तव्या तथैव कृतवन्तौ नत्वैश्वर्येण धनादिना वा विद्याग्रहणमित्याह । यथोपसाद्येति । अरिक्तहस्ततया ब्रह्मचर्यमागामुपमानयस्वेत्यादि वाक्यात् उपसाद्य निकटे गत्वा आवश्यकधर्मपरिग्रहणार्थमाह । दान्ताविति । नन्वेवं किमर्थं कृतवन्तौ तत्राह । गुरौ वृत्तिमनिन्दितां ग्राहयन्तौ गुरावेवं गुरुशुश्रूषयैव नीचतयैव विद्याग्राह्येति शिक्षयितुं निन्दिता वृत्तिर्धनादिना अत एव उपेतौ स्म यतः उपनीतौ गुरुणा समीपे आनीतौ अत्र प्रमाणं न वक्तव्यं गुरुः कथमेवं धाष्टर्यं कृतवानित्यपिनाशङ्कनीयं यतः स्मेति प्रसिद्धं भगवदिच्छा तत्र युक्तिः ततो ग्रहणानन्तरं विहितभक्त्या परमादरयुक्तौ प्रेमबहिरपि भक्तिधर्मोऽपि पदद्वयेनोक्तः देवमिव आराध्येष्टदेवतामिव उपेतौ स्म बहिरन्तश्च समीपं गतौ स्मेत्यर्थः ॥ ३२ ॥

श्रीसुबोधिनी–सारः

ततो यदुकुलस्याचार्यात् गर्गात् प्राप्तसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ सूपनयनौ गायत्रं व्रतं ब्रह्मचर्यमास्थितौ अभूताम् ॥२९॥ सर्वविद्यानां प्रभवौ जनकौ जगदीश्वरौ नान्यसिद्धं स्वतः सिद्धम् अमलं ज्ञानं नरेहितैर्मनुष्यचेष्टितैर्गूहमानौ प्रावृण्वन्तौ ॥ ३० ॥ अथो मंगले गुरोः कुले वासमिच्छन्तौ तौ काश्यं काश्यां भवं सांदीपनिं नामोज्जयनीनगरीवासिनम् उपजग्मतुः ॥ ३१ ॥ यथा यथावत् उपसाद्य समीपं प्राप्य दान्तौ जितेन्द्रियौ गुरौ अनिन्दितां शुद्धां वृत्तिं ग्राहयन्तावन्यानुपशिक्षयन्तौ आदृतौ सत्कृतौ भक्त्या देवमिव गुरुमुपेतौ सेवितवन्तौ ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च लब्धः संस्कारो उपनयनाख्यो याभ्यां तौ द्विजत्वं प्राप्य सुव्रतौ दृढसङ्कल्पौ यदुकुलाचार्याद्गर्गाद्गायत्रं व्रतं गर्गोपदिष्टं ब्रह्मचर्यमास्थितौ गृहीतवन्तौ ॥२९॥ सर्वज्ञावपि अनन्यसिद्धं गुरुपदेशं विना स्वतःसिद्धममलमप्रतिहतं ज्ञानं नरचेष्टितैर्गूहमानौ प्रच्छादयन्तौ लोकसङ्ग्रहार्थं विद्याग्रहणार्थं गुरुगृहे वासमिच्छन्तौ काश्यं काशगोत्रजं अवन्तिपुरवासिनं सान्दीपन्याख्यं गुरुं हीति प्रसिद्धतया उपजग्मतुरिति त्रयाणामन्वयः । सर्वज्ञत्वे हेतुमाह—सर्वविद्यानां प्रभवौ उत्पादकाविति । तत्रापि हेतुमाह—जगदीश्वराविति ॥ ३०–३१ ॥ तौ रामकृष्णौ यथावत्तमुपासाद्य प्राप्य दान्तौ जितेन्द्रियौ सन्तौ अनिन्दितां निर्दुष्टां गुरौ वृत्तिं ग्राहयन्तौ अन्यान् शिक्षयन्तौ आदृतौ आदरयुक्तौ देवमिव भक्त्या गुरुमुपेतौ सेवितवन्तावित्यर्थः । अस्यार्थस्य "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन" इति शास्त्रप्रसिद्धत्वं सूचयति–स्मेति ॥ ३२ ॥

अन्वितार्थप्रकाशिका

ततश्चेति ॥ ततश्च लब्धः संस्कार उपनयनाख्यो याभ्यां तौ द्विजत्वं प्राप्य सुव्रतौ दृढसंङ्कल्पौ यदुकुलाचार्याद्गायत्रं गायत्रप्राजापत्यब्राह्माख्यं व्रतं गर्गोपदिष्टमास्थितौ गृहीतवन्तौ तत्र गायत्रं गायत्रीमध्येतुस्त्रिरात्रं ततः प्राजापत्यं ततो ब्राह्मं तत्समाप्ति-

पर्यन्तम् ॥ २९ ॥ प्रभवादिति द्वयम् ॥ अथो सर्वविद्यानां प्रभवौ उत्पादकौ सर्वज्ञौ जगदीश्वरावपि तौ अनन्यसिद्धं गुरूपदेशं विना स्वतःसिद्धममलमप्रतिहतं ज्ञानं नरेहितैः नरचेष्टितैर्गूहमानौ प्रच्छादयन्तौ लोकसंग्रहणार्थं गुरुगृहे वासमिच्छन्तौ काश्यं काशगोत्रजं काश्यां जातं वा अवन्तीपुरवासिनं सान्दीपन्याख्यं गुरु हीति प्रसिद्धतया उपजग्मतः ॥ ३०-३१ ॥ यथेति ॥ तौ गुरुर्यथावत् समित्पाणित्वादिप्रकारेण तं गुरुमुपसाद्य प्राप्य दान्तौ जितेन्द्रियौ सन्तौ अनिन्दितां निर्दुष्टां गुरौ वृत्तिं ग्राहयन्तौ अन्यान् शिक्षयन्तौ आदृतौ आदरयुक्तौ गुरुणाऽपि बुद्धिप्रकर्षात्सम्मानितौ वा देवमिव भक्त्या गुरुमुपेतौ स्म सेवितवन्तौ ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गायत्रं त्रिरात्रपर्यन्तं व्रतं ब्रह्मचर्यं ॥ २९ ॥ प्रभवौ हेतुभूतौ अन्यैराचार्यादिभिः सिद्धं प्राप्तं न भवतीति नान्यं सिद्धं स्वतः सिद्धं यत् अमलं अतिशुद्धं ज्ञानं सर्वविद्यावेदनं नरेहितैर्मनुजाचरणैः गूहमानौ आच्छादयन्तौ ॥ ३० ॥ काश्यां वाराणसीपुर्यां जातमुत्पन्नमिति वैष्णवतोषिण्यां अवन्तिपुरेवासिनं वसन्तं ॥ ३१ ॥ यथा यथा योग्यं समित् पाणित्वादिप्रकारेणोपसाद्य गुरोः समीपं प्राप्य गुरौ अनिन्दितां वृत्तिमनुवृत्तिं अन्यमनुष्यान् ग्राहयन्तौ शिक्षयन्तौ उपेतौ गुरुमुपगतौ गुरोः सेवा कुरुतः स्मेत्यर्थः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति । ततः, लब्धः संस्कार उपनयनाख्यो याभ्यां तौ, सुव्रतौ शोभनव्रतोपेतौ रामकृष्णौ द्विजत्वं प्राप्य, यदुकुलाचार्यात् गर्गात् , गायत्रं व्रतं, गर्गोपदिष्टं ब्रह्मचर्यव्रतमित्यर्थः । आस्थितावाश्रितौ ॥ २९ ॥ प्रभवाविति । अथो इति च । अथो ततः, सर्वविद्यानां प्रभवावुत्पत्तिकारणभूतौ, अत एव सर्वज्ञौ जगदीश्वरौ रामकृष्णौ, नरेहितैर्नरचेष्टाभिः, नान्यसिद्ध स्वतः सिद्धं, अलं स्वात्मनि सम्पूर्णतया विद्यमानं ज्ञानं, गूहमानौ प्रच्छादयन्तौ, गुरुकुले वासं इच्छन्तौ सन्तौ, काश्यं काशर्षिगोत्रजं, यद्वा । काश्यं पूर्वं काशीनिवासिनं, साम्प्रतं अवन्तिपुरवासिनमुज्जयिन्यां कृतनिवासं, सान्दीपनि नाम सान्दीपनोति संज्ञाप्रसिद्धं, उपजग्मतुः। इति द्वयोरेकान्वयः ॥ ३०-३१ ॥ यथेति । तौ रामकृष्णौ, यथा यथावत् , उपसाद्य प्राप्य, दान्तौ जितेन्द्रियौ, अनिन्दितां निर्दोषां, गुरौ वृत्तिं, अन्यान् ग्राहयन्तौ निक्षयन्तौ, आदृतावादरयुक्तौ सन्तौ, देवं इव, भक्त्या गुरुं उपेतौ स्म । सेवितवन्तावित्यर्थः ॥३२॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अथो गुरुकुल इति : १०.४५.३१

यद्यप्यात्मैव गुरुस्तथापि शरणं विधेय एव गुरुः । सज्जन-सच्चरित-पथप्रवर्तकेन व्यबोधि विभुनेदम् ॥ ६४ ॥
सर्वविदाऽपि प्रभुणा निगमागमकारिणाऽप्यहो हरिणा । गुरुगृहगमनाद् ध्वनितं गुरूपसत्तेः सदैव नैयत्यम् ॥ ६५ ॥
विद्यावाप्तिरभीष्टदा भुवि गुरोः शुश्रूषयैवेरिता सा निर्व्याजमखण्डिता हि घटतेऽन्यत्रैव म स्वाश्रमे ।
इत्यन्याननुबोधयन् प्रभुरगादन्यत्र मन्ये न चेद्गर्गोऽपि प्रथितः कृतो निजकुलाचार्यो न कस्माद् गुरुः ॥ ६६ ॥
यत्सर्वतोऽप्यवन्तीं तां विद्यामिव पुरीं प्रभुः । अगमद्युक्तमेवेदं स्वावतारैक - लक्ष्यधीः ॥ ६७ ॥

यथोपसाद्येति : १०.४५.३२

यथा शुश्रूषया तुष्टाद् गुरोर्विद्याऽऽगमस्तथा । नान्येनेति विदञ्छ्रीशोऽप्येनामाधादनन्यधीः ॥ ६८ ॥
देववत् पूजयित्वैनं सर्वविद्यार्थशोभिना । तस्यैते कथिता ह्यर्थाः श्रुत्यर्थोऽयं स्फुटीकृतः ॥ ६९ ॥
ज्ञानिनाऽपि गुरोर्विद्याग्रहणादिति बोधितम् । पत्रपुष्पफलाकाङ्क्षी श्रीभानप्यस्मि भक्तितः ॥ ७० ॥

कृष्णप्रिया

पितृचरणों ने गोप्रदान करने के बाद दोनों भाई गर्गाचार्य से उपनयन संस्कार सम्पादन कर द्विज बने। पुनः कुलाचार्य श्रीगर्गाचार्य चरणों से शास्त्राज्ञानुसार दीक्षा ग्रहण करके ब्रह्मचर्य के नियमों का पालन के साथ सावित्र व्रत में स्थित हुए। द्विजत्व संस्कार की समाप्ति के बाद तीन दिन, छह मास या एक वर्ष पर्यन्त ब्रह्मचर्य दीक्षा से गुरु-यज्ञोपवीत प्रदाता गुरु गृह निवास करना रहता है ॥ २९ ॥ भगवान् श्रीकृष्ण और बलभद्रजी तो सर्वज्ञ है सर्वविधाओं के जनक है जगदीश्वर हैं फिर भी भूतल पर धर्म की एवं भक्तजनों की रक्षा के लिए प्रकट हुए हैं और मनुष्य लीला कर रहे हैं, अतः स्वतः सिद्ध ज्ञान को गुप्त रखते हैं ॥ ३० ॥ दोनों भाई गायत्र व्रत समाप्त करके विद्याध्ययन के विधि पालनार्थ गुरुकुल में रहना चाहते थे। अतः दोनों भाई पितृगेह से श्री उज्जयिनी नगरी में विराजमान श्री सान्दीपनि गुरुवरों के समीप पधारे। संदीपन मुनि-ऋषि के विरक्त भक्त पुत्र श्री सान्दीपनि मुनि थे। वे काश्य अथवा काश्यप गोत्र के थे। काश्यः कुत्सो-गृत्समदः आदि गोत्र प्रवर्तक ऋषि है। शौनक ऋषि जैसे गृत्समद है वैसे सांदीपनि "काश्यः" गोत्र के थे ॥ ३१ ॥ दोनों भाई यथाविधि

गुरुकुल में पधारे जितेन्द्रिय रहते हुए, विद्योपार्जन का गुरुसेवा नाम का उत्तम प्रकार का आश्रय लेकर 'यथा देवे तथा गुरौ' जैसे देव में वैसी ही गुरुचरणों की श्रद्धापूर्वक सुश्रूषा करते गुरुवरों का सम्पूर्ण आदर करते हुए विद्याध्ययन करने के लिए गुरुकुल में रहने लगे ॥ ३२ ॥

तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः । प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः ॥ ३३ ॥
सरहस्यं धनुर्वेदं धर्मान्[1] न्यायपथांस्तथा । तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ॥ ३४ ॥
सर्वं [2]तदमरश्रेष्ठौ सर्वविद्याप्रवर्तकौ । सकृन्निगदमात्रेण तौ संजगृहतुर्नृप ॥ ३५ ॥
[3]अहोरात्रैश्चतुःषष्ट्या संयतौ[4] तावतीः कलाः । [5]गुरुदक्षिणयाऽऽचार्यं छन्दयामासतुर्नृप ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—द्विजवरः, गुरुः, तयोः, शुद्धभावानुवृत्तिभिः, तुष्टः, अखिलान्, वेदान्, साङ्गोपनिषदः, प्रोवाच ॥ ३३ ॥ सरहस्यम्, धनुर्वेदम्, धर्मान्, तथा न्यायपथान्, तथा, आन्वीक्षिकीम्, विद्याम्, च, षड्विधाम्, राजनीतिम् प्रोवाच ॥ ३४ ॥ हे नृप ! सर्वविद्याप्रवर्तकौ, अमरश्रेष्ठौ, तौ, हे, नृप ! तत्, सर्वम्, सकृत्, निगदमात्रेण संजगृहतुः ॥ ३५ ॥ नृप, चतुःषष्ट्या, अहोरात्रैः, संयतौ, तौ, तावती, कलाः, संजगृहतुः, गुरुदक्षिणया, आचार्यम्, छन्दयामासतुः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शुद्धो भावो यासु ताभिरनुवृत्तिभिः । सांगोपनिषदः अंगानि षडंगानि शिक्षादीनि तैरुपनिषद्भिश्चैतरेयादिभिः सहितान् ॥ ३३ ॥ सरहस्यं मंत्रदेवताज्ञानसहितम् । धर्मान्मन्वादिधर्मशास्त्राणि । न्यायपथान्मीमांसादीन् । आन्वीक्षिकीं तर्कविद्याम् । षड्विधाम्—"संधिश्च विग्रहो यानमासनं द्वैधमाश्रयः" इत्येवं षड्विधां राजनीतिम् ॥ ३४ ॥ सकृन्निगदमात्रेणैकवारं गुरोरुच्चारणमात्रेण ॥ ३५ ॥ चतुःषष्ट्या अहोरात्रैस्तावतीश्चतुःषष्टिकलाः संजगृहतुः । ताश्च शैवतन्त्रेप्रोक्ता लिख्यन्ते यथा । गीतम् १ । वाद्यम् २ । नृत्यम् ३ । नाट्यम् ४ । आलेख्यम् ५ । विशेषकच्छेद्यम् ६ । तण्डुलकुसुमबलिविकाराः ७ । पुष्पास्तरणम् ८ । दशनवसनांगरागाः ९ । मणिभूमिकाकर्म १० । शयनरचनम् ११ । उदकवाद्यमुदकघातः (उदकयानम्) १२ । चित्रयोगाः १३ । माल्यग्रथनविकल्पाः १४ । शेखरापीडयोजनम् १५ । नेपथ्ययोगाः १६ । कर्णपत्रभंगाः १७ । सुगन्धयुक्तिः १८ । भूषणयोजनम् १९ । ऐन्द्रजालम् २० । कौचुमारयोगाः २१ । हस्तलाघवम् २२ । चित्रशाकापूपभक्ष्यविकारक्रियाः २३ । पानकरसरागासवयोजनम् २४ । सूचीवावकर्म २५ । सूत्रक्रीडा २६ । वीणाडमरुकवाद्यानि २७ । प्रहेलिका २८ । प्रतिमाला २९ । दुर्वचकयोगाः ३० । पुस्तकवाचनम् ३१ । नाटकाख्यायिकादर्शनम् ३२ । काव्यसमस्यापूरणम् ३३ । पट्टिकावेत्रबाण (न) विकल्पाः ३४ । तर्ककर्माणि ३५ । तक्षणम् ३६ । वास्तुविद्या ३७ । (सुवर्ण) रूप्यरत्नपरीक्षा ३८ । धातुवादः ३९ । मणिरागज्ञानम् ४० । आकरज्ञानम् ४१ । वृक्षायुर्वेदयोगाः ४२ । मेषकुक्कुटलापकयुद्धविधिः ४३ । शुकसारिकाप्रलापनम् ४४ । उत्सादनम् ४५ । केशमार्जनकौशलम् ४६ । अक्षरमुष्टिकाकथनम् ४७ । म्लेच्छितकुतर्कविकल्पाः ४८ । देशभाषाज्ञानम् ४९ । पुष्पशकटिकानिमित्त (र्मिति) ज्ञानम् ५० । यन्त्रमातृकाधारणम् ५१ । मातृकासंवाच्यम् ५२ । मानसीकाव्यक्रिया ५३ । अभिधानकोशः ५४ । छन्दोज्ञानम् ५५ । क्रियाविकल्पाः ५६ । छलितकयोगाः ५७ । वस्त्रगोपनानि ५८ । द्यूतविशेषः ५९ । आकर्षक्रीडा ६० । बालक्रीडनकानि ६१ । वैनायिकीनाम् ६२ । वैजयिकीनाम् ६३ । वैतालिकीनां च विद्यानां ज्ञानम् ६४ । इति चतुःषष्टिकलाः । छन्दयामासतुरुपलोभितवन्तौ ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तयोः रामकृष्णयोः । निखिलान् पदक्रमांगजटावल्ल्यादिसहितान् । आदिना कल्पव्याकरणनिरुक्तज्योतिर्गणच्छन्दोविचितीनां ग्रहः । उपनिषदः केनमांडूकाद्याः । शिक्षादीनां लक्षणान्यक्रूरस्तुतौ विवेचितानि शुद्धेन भावेन भक्त्या या अनुवृत्तयस्ताभिः । तद्विशेषश्चाग्रे श्रीदामविप्रोपाख्याने श्रीभगवन्मुखादेव व्यक्तीभाव्यत एवात्र स्वयं बादरायणिना न प्रपञ्चित इति ज्ञेयम् । अखिलान् चतुरोऽपीत्यर्थः । एतदुपदेशश्च शब्दमात्रतः, अर्थज्ञानं मीमांसोपदेशेनैव भविष्यतीति तदनन्तरं तत्पाठशुद्ध्यर्थमावश्यकत्वादर्थसहितान्येव च तान्यंगान्युक्तानि । "शिक्षा व्याकरणं कल्पो ज्योतिषं छन्द एव च । निरुक्तं च निरुक्तानि षडङ्गानि मनीषिभिः ।" इति ज्योतिषोऽङ्गत्वं तदर्थकालादिशुद्ध्यपेक्षणात् । अङ्गानन्तरं रहस्यत्वेनानुपदिष्टचरीरुपनिषदः । एताश्च पूर्ववत्प्रथशब्दत एव ॥ ३३ ॥ तर्कविद्यां वेदेतिहासाद्यर्थनिर्णायकामित्यर्थः । सन्धिः साम, बलवताऽरिणा मेल इति यावत् । विग्रहो दण्डः,

---

[1] धर्मन्या–वीर. विज. । [2] नरवर–श्रीधर. वंशी. जीव. विश्व. शुक. ; तदमर–वीर. विज. ; तद्विबुध–मू. । [3] रात्र च–वीर. । [4] संपत्तौ–श्रीधर. वंशी. जीव. विश्व. शुक. ; संयतौ–वीर. ; संयातौ–विज. । [5] ततश्च कृतविद्यौ तौ कृतार्थौ रामकेशवौ–अधिक. विजये ।

दुर्बलेऽरौ निग्रह इत्यर्थः। यानं विजिगीषोररिं प्रति यात्रा। आसनं कदाचिच्छक्तिप्रतिबन्धे च तत्रैव शत्रोर्दुर्गमावेष्ट्य तत्र धान्यादिप्रवेशं प्रतिबन्धताऽवस्थानम्। बलवता विग्रहे बलवत्तरेण तच्छत्रुणा सन्धिं कृत्वोभयत्र दासोऽस्मीति वाचैवात्मसमर्पणं कर्तव्यं न कर्मणेति स द्वैधीभावस्तदुक्तं कामन्दके—"बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन्। द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः।" इति। अरिणा पीड्यमानस्य बलवद्भूपदुर्गाद्याश्रयणमाश्रय इति। एषामवान्तरभेदा विस्तरभिया न लिखिताः। सरहस्यमिति सार्द्धद्वयकम्। ततश्च क्षत्रियजातावावश्यकत्वाद्धनुर्वेदः, एतदादीन्यर्थतोऽपि ज्ञेयानि। ततश्च तत्तत्सर्वविद्योपकारकत्वेनापेक्ष्याणि धर्मशास्त्राणि। ततश्च वैशिष्ट्याधानार्थं न्यायपथान्, तत्तद्वेदार्थनिर्णायकाञ्जैमिनिकपिलपतञ्जलिबादरायणरचितपूर्वमीमांसादीञ्शब्दानुगतयुक्तिग्रन्थान। ततश्च बाह्यवादनिरासार्थं स्वतन्त्रयुक्तिमयीमान्विक्षिकीमपि। एव जातायां राजत्वयोग्यतायां राजनीतिमित्येवं क्रम एव सिद्ध्यति॥ ३४॥ सर्वं विद्यासमूहम्। सर्वा विद्या यत्र सा सर्वविद्या वेदचतुष्टयी तस्याः सर्वासां विद्यानां वा प्रवर्तकौ "अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः, सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः' इत्यादिबृहदारण्यकश्रुतेर्विद्यापदवाच्या वैशेषिकपातञ्जलादिरूपाज्ञेया। इह 'शास्त्रयोनित्वात्" इति न्यायाच्च॥ ३५॥ चतुःषष्ट्या संख्ययासंख्यातैरहोरात्रैर्दिननिशाभिः। तावतीस्तावत्संख्याकाः। ताश्च कलाश्च। कं सुखं लान्ति सर्वविदामिति कला इति। ता गणयति—यथेति। गीतम्—गानशिक्षा, गीतनिर्माणं, स्वरजातिरागभेदास्तालमात्रादिरचनाप्रकाराः, साधकबाधकस्वरादिमेलनपरिज्ञानञ्च। "स्वरगं पदगं चैव तथा लयगमेव च। चेतोऽवधानगं चैव गेयं नृयुश्चतुर्विधम्।" स्वरादिभेदा अनन्ताः। रागाश्च भैरवश्रीरागादिभेदेन षोढाऽप्तवांतरभेदैरनन्ता एव। तालश्च कालक्रियामानम्, कालस्य क्रिययाऽऽवापनिष्क्रमादिकया मानं परिच्छेदः। लयश्च गीतवाद्यपादादिन्यासानां क्रियाकालयोः साम्यम्। गीतविशेषमाह—"गा (धा) तुमातुसमायुक्तं गीतमित्युच्यते बुधैः। तत्र नादात्मको गातुर्मातुरक्षरसञ्चयः।" इति। तद्द्विविधम्। यथा—"गीतं च द्विविधं प्रोक्तं यन्त्रगात्रविभागतः। यन्त्रं स्याद्वेणुवीणादि गात्रं तु मुखजं मतम्।' किञ्च—"निबद्धमननिबद्धञ्च गीतं द्विविधमुच्यते। अनिबद्धं भवेद्गीतं वर्णादिनियमं विना। यद्वा गमकधातुज्ञैरनिबद्धं विना कृतम्। निबद्धञ्च भवेद्गीतं ताल मानरसान्वितम्। छन्दोगमकधातुज्ञैर्वर्णादिनियमैः कृतम्। ऋग्भिः पाठ्यमभूद्गीतं सामभ्यः समपद्यत। यजुर्भ्योऽभिनया जाता रसाश्चाथर्वणः स्मृताः। अङ्गैरालम्बयेद्गीतं हस्तेनार्थं प्रदर्शयेत्। दृष्टिभ्यां भावयेद्भावं पादाभ्यां तालनिर्णयः। गीतं पीनपयोधरा समदना नारी विचित्रा कथा रम्यं हर्म्यतलं सुधांशुकिरणप्रोद्दीपिता यामिनी। चित्तज्ञाः सुहृदः सुताः सुमनसो भक्ताः पुनः सेवकाः शुद्धं गीतफलं कवित्वमतुलं संसारसारामताः। संगीतकेन रम्येण सुखं यस्य न चेतसि। मनुष्यवृषभो लोके विधिनैव स वञ्चितः। संसारदुःखदग्धानामुत्तमानामनुग्रहात्। प्रभुणा शंकरेणात्र गीतं वाद्यं प्रकाशितम्। गीतज्ञो यदि गीतेन नाप्नोति परमं पदम्। रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते। गीतेन हरिणा रङ्गं प्राप्नुवन्त्यपि पक्षिणः। वनादायान्ति फणिनः शिशवो न रुदन्ति च। श्रुतिचमत्कृतये किमतः परं फणिवरोऽश्वतरो बत पञ्चमः। अपि मृतां यदवाप मदालसां मधुरगीतवशीकृतशंकरः। परमानन्दविवर्धनमभिमतफलं वशीकरणम्। सकलजनचित्तहरणं विमुक्तिबीजं परं गीतम्।' अत एव—"नाहं वसामि वैकुण्ठे योगिनां हृदये न वै। मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद।' इति भगवताऽप्युक्तमित्यलम् १॥ अथ वाद्यानि—'तालेन राजते गीतं तालो वादित्रसंभवः। गरीयस्तेन वादित्रं तच्चतुर्विधमुच्यते। ततं सुषिरमानद्धं घनमित्थं चतुर्विधम्। तत तन्त्रीगतं वाद्यं वंशाद्यं सुषिरं तथा। चर्मावनद्धमानद्धं घनं तालादिकं मतम्।' इति। तत्र ततं यथा—'अलावती ब्रह्मवीणा किन्नरी लघुकिन्नरी। विपञ्ची वल्लकी ज्येष्ठा चित्रा जोषवती जया। हस्तिका कुब्जिका कूर्मा शारंगी परिवादिनी। त्रिशवी शतचन्द्री च नकुलौष्ठी घटंसवी। औडम्बरी पिनाकी च निबन्धः शुष्कलस्तथा। गदावारणहस्तश्च रुद्रोऽथ शरमण्डलः। कपि लासो मधुस्यन्दी घोणेत्यादि ततं वदेत्।' अलावणी यथा—'कनिष्ठिकापरिध्यर्धमध्यच्छिद्रेण संयुतः। दशयष्टिमितो दण्डः खादिरो वैणवोऽथ वा। अधः करभवानूर्ध्वे छत्रावल्याभिशोभितः। नवांगुलादधः छिद्रोपरि चन्द्राऽर्धसन्निभाम्। निवेश्य तुम्बिकां भद्रालाबुखण्डं निवेशयेत्। द्वादशांगुलविस्तारं दृढपक्वं मनोहरम्। तुम्बिकावेधमध्येन दण्डच्छिद्रे तु निर्मिताम्। अलाबूमध्यगां डोर्वी कृत्वा स्वल्पां तु काष्ठिकाम्। तथा संवेष्ट्य तन्मध्ये काष्ठिकां भ्रामयेत्ततः। यथा स्यात्रिश्चलालाबून्धश्च करभोपरि। पञ्चांगुलषु संत्यज्यालाबूं स्वल्पाञ्च बन्धयेत्। केशान्तर्निर्मिता पट्टमयी सूत्रकृताथ वा। समा सूक्ष्मा दृढा तत्रतत्र देया विचक्षणैः। एतल्लक्षणसंयोग्यात्रा (न्या) लावणी प्रकीर्तिता। बिन्दुना न समुपेतं तुबं निक्षिप्य वक्षसि। मध्यमानामिकाभ्यां च वाद्या दक्षिणपाणिना। तारे मन्द्रे च घोषे च त्रिस्थाने बिन्दुरिष्यते। तुम्बीमूलं समुत्पत्य वामांगुष्ठेन धारयेत्। ततस्ताभिस्तु सर्वाभिः स्वरव्यक्तिर्विधीयते। त्रिस्वरो दक्षिणः पाणिर्वामस्तत्र चतुःस्वरः। अलावण्यां स्थिता ज्ञेयाः सप्त षड्जादयः स्वराः। रागव्यक्तिर्यथा रागे भवेत्षड्जादिभेदतः। अश न्यासविभेदाच्च तथात्राऽपि विधीयते। इयमलावणी प्रोक्ता मनःश्रवणरञ्जनी। प्रत्यक्षा शारदा देवी वीणारूपेण संस्थिता।' इत्यलावणीलक्षणानि। अन्येषां विस्तरभयान्नोदाहृतानि। तानि च संगीतदर्पणसंगीतदामोदरादिग्रन्थेभ्योऽवसेयानि। सुषिरं यथा—'वंशोऽथ पारो मधुरी तित्तिरीशंखकाहलाः। तोरडीमुरलीबुकाश्शृङ्गिकास्वरनाभयः शृङ्गं कापालिकं वंशश्चर्मवंशस्तथापरः। एते सुषिरभेदास्तु कथिताः पूर्वसूरिभिः वर्तुलः सरलश्चैव पर्वदोषविवर्जितः। वैणवः खादिरो वाऽपि रक्तचन्दनजोऽथ वा। श्रीखण्डजोऽथ सौवर्णो दन्तिदन्तमयोऽपि वा। राजतस्ताम्रजो वाऽपि लौहजः स्फाटिकोऽथ वा।

कनिष्ठांगुलितुल्येन गर्भरंध्रेण शोधितः। शिल्प विद्याप्रवीणेन वंशः कार्यो मनोहरः। वंशेनैव मतोऽपीति मतङ्गमुनिनोदितम्। ततोऽन्येपि तदाकारा वंशा एव प्रकीर्तिताः। तत्र चैवं शिरोदेशादधोऽद्रिमितमंगुलम्। फूत्काररन्ध्रं कुर्वीत मितमंगुलिपर्वणा। पञ्चांगुलानि संत्यज्य तावद्रंध्राणि कारयेत्। कुर्यात्तथाऽन्तरंध्राणि सप्तसंख्यानि कौशलात्। बदरीबीजतुल्यानि सत्यज्यार्धार्धमंगुलम्। प्रांतियोर्बंधनं कार्यं स्वराद्यैर्नादहेतवे। सिक्थकेन कला देया तेन सुस्वरता भवेत्। पञ्चांगुलाऽयं वंशः स्यादेकैकांगुलवृद्धितः। षडंगुलादिदाम्ना स्याद्यावदष्टादशांगुलम्। फूत्कारताररन्ध्रस्य यावदंगुलमंतरम्। तदेव नाम वंशस्य वांसिकैः परिकीर्त्यते। एकांगुलो द्व्यंगुलश्च त्र्यंगुलश्चतुरंगुलः। अतितारतरत्वेन वांशिकैः समुपेक्षितः। त्रयोदशांगुलो वीणा विधौ च समुपेक्षितः। निंदितो वंशतत्त्वज्ञैस्तथा सप्तदशांगुलः। महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा। चत्वार उत्तमा वंशा मतंगमुनिसंमताः। दशांगुलो महानन्दो नन्द एकादशां गुलः। द्वादशांगुलमानस्तु विजयः परिकीर्तितः। चतुर्दशांगुलमितो जय इत्यभिधीयते। ब्रह्मा रुद्रो रविर्विष्णुः क्रमादत्र व्यवस्थिताः। नैविद्यं प्रौढता चापि सुस्वरत्वञ्च शीघ्रता। माधुर्यमिति पञ्चामी फूत्कृतेषु गुणाः स्मृताः। शीत्कारबहुलः स्तब्धो विस्वरः स्फुटतो लघुः। अमाधुर्यश्च विज्ञेयाः षड् दोषाः फूत्कृतेः क्रमात्। वृथा प्रयोगबाहुल्यमल्पता गीतवादने। एभिर्दोषैर्युतोऽतीव निन्दितो वांशिको मतः। स्थानकादिलयाभिज्ञो गमकाढ्यः स्फुटाक्षरः। शीघ्रहस्तः कलाभिज्ञो वांशिको रक्त उच्यते। प्रमुक्तिबद्धमुक्तिश्च युक्तिश्चेत्यंगुलेर्गुणाः। सुस्थानत्वं सुस्वरत्वमङ्गुलौ सावनक्रियाम्। समस्तगमकज्ञानं रागरागांगवेदिता। क्रियाभाषाविभासु दक्षता गीतवादने। सुस्थाने चापि दुःस्थाने नादनिर्माणकौशलम्। गातॄणां स्थानदातृत्वं तद्दोषाच्छादनं तथा। वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः।" इति वंशः।

काहलात्रीति निषंगः तोडही मुरली बुक्का इत्येतेऽत्र त्रियां सप्तस्वराणां नाभिरिव स्वरनाभिः त्रियां वर्तते, इतरेषां विस्तरभिया स्वरूपं नोक्तम्। तच्च संगीतदर्पणसंगीतदामोदरादिग्रन्थेभ्योऽवसेयम्। आनद्धं यथा—"आनद्धे मर्दलः श्रेयानित्युक्तं भरतादिभिः"। अपि च—मुरजपटहढक्का बिम्बको दापवाद्यं पणवघनसरुञ्जालावजाहूत्रिवल्यः। करठकमठभेरी स्यात्कुडुक्का हुडुक्का मनसमुरलिझल्ली ढुक्कली दौडिशाना॥ डमसटमुकिमड्डुः कुण्डली तण्डनामा रणमभि घटवाद्यं दुंदुभी चारजश्च। क्वचिदपि ढुढुकी स्याद्दर्दुरं चाप्युपांगं प्रकटितमनवद्यं वाद्यमित्थं जगत्याम्। त्रिपुरमथनकर्तुस्ताण्डवे तत्प्रयाणे ततमुखसुषिरञ्चानद्धमित्थं घनञ्च॥ मर्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः। रक्तचन्दनजो वाद्यो गभीरध्वनिरुच्चकैः॥ सार्धहस्तप्रमाणञ्च दैर्घ्यमस्य विधीयते। त्रयोदशांगुलं वाममथ वा द्वादशांगुलम्॥ दक्षिणञ्च भवेद्धीनमेकेनार्द्धांगुलेन वा। करणानद्धवदनो मध्ये चैव पृथुर्भवेत्॥ षण्मासीयो भवेद्वस्तस्तच्चर्मकरणं मतम्। मृत्तिकानिर्मितश्चैव मृदंगः परिकीर्त्तितः। पातयेत्खरलिं वाद्यमादनार्थञ्च मर्दले॥ विभूतिर्गैरिकं भक्तं केन्दुकेन समन्वितम्। यद्वा चिपि (पी) टकं देयं जीवनीसत्त्वमिश्रितम्॥ सर्वमेकत्र पिष्टं तल्लेपः खरलिरुच्यते। वामास्ये पूरिकां कृत्वा लेपं दद्याच्च दक्षिणे॥ एवं मदलकः प्रोक्तः सर्ववाद्योत्तमो मतः। अस्य संयोगमासाद्य सर्वं वाद्यञ्च शोभते॥ एतदंगे बीजकाष्ठे दलमर्द्धांगुलं विदुः। तदिधीमिति विज्ञेयाः पाठवर्णा मृदंगजाः॥"। थोंदंढ धिक्कटस्तद्धीताकंदंदंथोंगंधिधिखर्झंझिनंगटंदंथाः कूटपाठा मता अमी। तधिंथोंडेंतक्कवीदोंदंदंधिगणांतत तधितक्कतंधांधिदोंतांधिपाटखंडे त्वयं क्रमः। तथा च—यतिमाने पाटखंडः—द्रगतथेजां द्रगतथेजां धोधोधिकताधिकाथोजांथोजांतकतताधिकाथोताद्रगतताधिधिधिधिकतताकडनाथोधिकथोजांधोताद्रगतताद्रतताधि इति। "यतिरोढाप्यवच्छेदो गजरो रूपकं ध्रुवम्। गलपः सारिगोणी च नादं च कथितं तथा। प्रहरणं वृंदनञ्च प्रबंधा द्वादश स्मृताः॥"। यथा—दंथात इत्येकताल्यां यतिः। ओडवाद्यं यथा—"दांतथोतधिकतधिकदंथादंथाथोधियोधितत्ततत्तथाविथविदिश्यांदिश्यांटटनकिटटनकितदटङ्ननटतगथवटङ्गथवटङ्गतागिनगित गनागदांदांददंदीदींदंतातथा" इति। अवच्छेद्यवाद्यं यथा—"दंथातः दथातः धिक्किधिक्किदिगणंदंताथः" इति। गजरवाद्यं यथा—थोकटेन्ननेजढेंडंगथोगथोङ्गटेङ्कथोगतकिधिकटेङ्ननधिधिकटतकथोकत्तधिकटतक्ककतथोगतद्धीम्" इत्येकताल्यां गजरः। रूपकवाद्यं यथा—"तर्काधिकतर्कधिकक्कथवितकिथवितक्किधिक्कदंथातः" इति। ध्रुवकवाद्यं यथा—'तक्कतक्काटधिक्कधिक्काट' इति निसारताले ध्रुवकः। गलयो यथा—"तधिदधिधिकतकतधिगलगंथाथादेंतथाढेनन्व" इत्येकताल्यां गलपः। सारिगोणी यथा—"थोङ्गटेन्नतक्कधिक्कतकधिकतकथोहटङ्गनहटङ्गनथोराक्कथोः" इति प्रथमखण्डः। "टेन्नथोःधिथोहःटेन्नटेन्नदक्कतगदक्कधिक्कतदिददक्कदंगदंगथोगथोकतकतकधिकतधिकतधोटेन्नधोटेन्नथटेगलखोगगलखोगखोहटगेंठगेंखोहटम् इत्यस्य छंदनम्" इति। नादो यथा—"दांकारत्रितयं पूर्वं दांधिगिति ततत्त्रयम्। दांदांधिकत्रयं यत्र इति नादः शचीप्रियः॥" इति। "द्रुतं मानसमारब्धशुद्धं कूटविनिर्मितम्। सप्तखण्डमयं वाद्यं कथितं तदिहोच्यते।" द्रुतमानत्वात्प्रतिताले यथा—"तत्तततत्ततक्कितक्किदिदंधिगनथोधिगनथोधिक्कधिक्कधिक्कधिक्कधिकनगिनगमिथोथोधिधिधिः दांदांधिकथंथोथोहथोहनन्निथोनन्निथोथोहथोहडेटिडेडिथोहथोहतटितटितटुकगींगींधगिधगिततघेततघेततततगिङीन्वङीथोगथोगथोंथोगगथोगथोतत्तात्ताः" "इति सप्तपदान्याहुः कथितं वाद्यपडितैः। प्रतितालेन तालेन पादवर्णसमासतः॥ गंधर्वपतिना पूर्वमुर्वशीलास्यनर्तने। सुधर्मारञ्जनार्थञ्च कथितं प्रकटीकृतम्॥" इति प्रहरणं यथा—"थोगक्का तद्धिकाथागकटगगोंदंथोगदिदधिक्धिक्कदिकटेन्न" इत्येकताल्या प्रहरणम्। "वाद्यं विमुच्यते येनच्छदनं तन्निगद्यते" यथा—'तद्धिथोदिन्नटेन्नतन्न' इति छदनम्। "कलासो विकलासश्च टाकलं चार्धटाकली। जोलाटाकलिका चैव गोमुद्री मुरजस्तथा॥" अलाबुवाद्यं म्लेच्छवाद्यम्। मर्दलत्रयोदशांगुल-

वाममुखो, द्वादशांगुलदक्षिणमुखः। मुरजस्त्वष्टादशांगुलवाममुखः, सप्तदशांगुलदक्षिणमुखः, मर्दलमुरजयोरयं भेदः। घनं यथा—"अनुरक्तं विरक्तञ्च द्विविधं घनवाद्यकम्। गीतानुगञ्चानुरक्त विरक्तं तालसंश्रयम्॥ करतालः कांस्यतालो जयघंटोऽथ शुक्तिका। कंबिकापटवाद्यं च पट्टातोद्यञ्च घर्घरम्॥ झंझातालश्च मंजीरं कर्तयुंकुर इत्यपि। द्वादशैते मुनीन्द्रेण कथिता गवसंज्ञिकाः॥ त्रयोदशांगुलव्यामौ शुद्धकांस्यविनिर्मितौ। मध्यमुखौ स्तनाकरौ तन्मध्ये रज्जुगुम्फितौ॥ पद्मिनीपत्रसदृशौ कराभ्यां रज्जुयंत्रितौ। करतालावुभौ वाद्यौ पोटह्य नटकैरिति॥ यद्वा त्रयोदशयवव्यानं वक्रयवोन्मितम्। यवपञ्चकगम्भीरं मध्ये च यवसप्तकम्॥ विसृतं वर्तुलं निम्न यवत्रयमितं ततः। पृष्ठतो मध्यदेशे च शिवलिंगसमाकृतिम्॥ अत्यम्लपैष्टिनिर्दिग्धशुद्धकांस्यविमिर्षितम्। संरक्तांगुलिसुस्निग्धसुदीर्घमधुरध्वनिम्॥ घनानिसाविसंरक्तं दृढं शुष्कं मनोहरम्। काश्मर्यादिसमुद्भूतं तालमाहुर्मनीषिणः॥ सुनादं दक्षिणं तालं ततो हीनञ्च वामकम्। कुर्वीत तद्द्वयं कार्यं तर्जन्यंगुष्ठयोगतः॥ वामहस्तस्य तालस्य मध्यमं सन्निनादितम्। तिर्यग्दक्षिणतालस्य परिव्यंसेन तालयेत्। तालादौ वादयेच्चैव प्लुतदीर्घलवुद्रुतैः।" इति करतालविशेषः। कर्तरी घनविशेषः। डक्कुरश्च घनविशेषोऽदन्तरेफान्तपुँल्लिङ्गः। अन्येषां लक्षणं विस्तरभयान्नोक्तम्। "रुक्मिण्याः सत्यभामायाः कालिन्दीमित्रविन्दयोः। जांबवत्या नाग्नजित्या लक्ष्मणाभद्रयोरपि। कृष्णस्याष्टमहिषीणां पुरोद्वाहमहोत्सवे॥ ततं शुषिरमानद्धं घनञ्च युगपज्जनाः। अवादयन्नसंख्यातमिति पौराणिकी श्रुतिः॥ ततं वाद्यं तु देवानां गन्धर्वाणां च शौषिरम्। आनद्धं राक्षसानां तु किन्नराणां घनं विदुः। निजावतारे गोविन्दः सर्वमेवानयत्क्षितौ॥ यावन्ति वाद्यभांडानि रामरावणयोर्युधि। तावन्त्यो नाभवन्सेनाः कुरुपांडवसंगरे॥" किञ्च—"निर्लिपहृत्कंपनतोमरेण रणे सुरारेर्मथनात्सुरेण। अभूत्तताद्यैरपि सिंहनादैः सा पञ्चशब्दीति कणादवादः॥" युधि सैन्यानां योऽहंकाररवः स सिंहनादः। ततादिभिरेभिश्चतुर्भिर्वाद्यैश्च पञ्चशब्दीवाद्यमभूत्। सिंहनादेन सह वाद्यं पंचविधमस्तीति संगीतदामोदरः। "शिवागारे झल्लकञ्च सूर्यागारे तु शंखकम्। दुर्गागारे वंश (शी) वाद्यं माधुरीञ्च न वादयेत्॥"। झल्लकं कांस्यनिर्मितकरतालमिति योगिनीतंत्रम्। मत्स्यपुराणेऽपि—"गीतवादित्रनिर्घोषं देवस्याग्रे च कारयेत्। विरिञ्चेश्च गृहे ढक्कां घंटां लक्ष्मीगृहेत्यजेत्॥ घंटा भवेदशक्तस्य सर्ववाद्यमयी यतः।"। किञ्च—"देवस्याग्रे प्रतिदिनं कारयेत्सद्यकारकः। तत्तद्देवस्य चरितं पौराणं व्यासकीर्तितम्॥ तेनैव सर्ववाद्यानां फलं पूर्णं प्रजायते। न्यूनता चोपचाराणां सापि पूर्णा भवेत्ततः॥ वेदिता सर्वशास्त्राणां वेदानामंगसंयुजाम्। विशुद्धोभयवंशश्च वक्ता कार्यो द्विजोत्तमः॥ कुटुम्बी शान्तचित्तश्च छात्राध्यापनतत्परः। अनन्यजीविको विप्रो जयोच्चारे शुभावहः॥" इति भविष्योक्तेः। जयशब्दार्थस्तु—"अष्टादश पुराणानि रामस्य चरितं तथा। विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत॥ कार्ष्ण्यं च पञ्चमो वेदो यन्महाभारतं स्मृतम्। सौराश्च धर्मा राजेन्द्र मानवोक्ता महीपते। जयेति नाम एतेषां प्रवदन्ति मनीषिणः॥" इति ब्रह्मचारिकाण्डे भविष्योक्तेः। वाद्यम्—"विततञ्च घनं वाद्यं ततं सुषिरमेव च। कांस्यं पुष्करतंत्रीभिर्वेणुना च यथाक्रमम्॥"। एतदेवामरेणापि—"ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्। वंशादिकं तु सुषिरं कांस्यतालादिकं घनम्॥ चतुर्विधमिदं वाद्यम्" इति। तत्र शिक्षादयः पूर्ववत् १॥ नृत्यनाट्यम्—"नृत्यं कृतानुकरणं नाट्यं तु नर्तकाश्रयम्। करणान्यङ्गहाराश्च विभावो भाव एव च। अनुभावो रसाश्चेति संक्षेपान्नृत्यसंग्रहः॥" इति। करणानि साधनानि। अंगहारो अंगविक्षेपः। विशेषेण भावयन्त्युत्पादयन्ति रसमिति विभावाः, स्त्रीवसन्तोद्यानादयः रसकारणानि। अनुभूयते रस एभिरित्यनुभावाः, कंपस्वेदादीनि रसकार्याणि। भावाः सात्त्विकाः स्तम्भादयो, व्यभिचारिणश्च धृतिस्मृत्यादयः। एतैरुत्कर्षमारोप्यमाणोऽत्र व्यञ्जितः स्थायीभावो रत्यादिः शृङ्गारादिरसरूपो भवतीति। तन्त्रान्तरे तु नृत्यभेदज्ञानार्थमेव पृथग्नाट्यकलोक्ता २॥ आलेख्यम्—चित्रकर्म। "रूपभेदाः प्रमाणानि भावलावण्ययोजनम्। सादृश्य वर्णिकाभंगमिति चित्रं षडंगकम्॥" एषां स्वरूपं स्थापत्यशास्त्रादवसेयम् ४॥ विशेषकच्छेद्यम्—विशेषकं तिलकं यद्यल्ललाटे दीयते तस्य भूर्जादिपत्रमयस्य छेदनं, विशेषकग्रहणमादरार्थं विलासिनीनामतिप्रियत्वात् ५॥ तंडुलकुसुमावलिविकाराः—तण्डुलैर्नानावर्णैः कुसुमैर्वा शिवादिपूजार्थं नानाप्रकाररचना। अत्र ग्रथनं माल्यग्रथन एवान्तर्भूतं भक्तिविशेषेणावस्थापनं कलान्तरम् ६॥ पुष्पास्तरणम्—पुष्पादिभिः शय्यादिरचनम्। पुष्पशयनमित्यपरा संज्ञा ७॥ दशनवसनांगरागाः—रागशब्दः प्रत्येकं संबध्यते। दशनरागो मस्यादिना। वसनरागः कौसुंभादिना। अंगरागोंगमार्ष्टिः ८॥ मणिभूमिकाकर्म—मणिभूमिकावत्कुट्टिमभूमिस्तस्या मरकतादिभेदेन करणम् ९॥ शयनरचनम्—शयनीयस्य कालापेक्षया रक्तविरक्तमध्यस्थाभिप्रायादाहारपरिणत्यादिदशाकद्रचनम् १०॥ उदकवाद्यम्—उदकपूरितपात्रे मुरजादिवन्मधुरनानातालसमुत्थापनम् ११॥ उदकघातः—हस्तयंत्रयुक्तिभिरुदकस्य ताडनं तदुभयं जलक्रीडांगम्। जलस्तंभविद्येति केचित् १२॥ चित्रयोगाः—दौर्भाग्यकेशपलितीकरणादयोऽद्भुतदर्शनोपायाः १३॥ माल्यग्रथनविकल्पाः—माल्यानां देवपूजार्थं नेपथ्यानां ग्रथनविकल्पाः १४॥

शेखरापीडयोजनम्—ग्रथनविकल्प एवायं किन्तु योजनं कलान्तरम्। तत्र शेखरस्य शिखास्थानेऽवलम्बनन्यासेन परिधापनादापीडस्य च मण्डलाकारग्रथितस्य काष्ठिकायोगेन परिधापनान्नानावर्णैः पुष्पैर्विरचनं योजनम्। तदुभयं नेपथ्यांगम् १५ नेपथ्ययोगाः—देशकालापेक्षया वस्त्रमाल्याभरणादिभिः शोभार्थं शरीरस्य मंडनाकाराः १६॥ कर्णपत्रभंगाः—दंतशंखादिभिः कर्णपत्रविशेषा नेपथ्यार्थाः १७॥ सुगन्धयुक्तिः—स्वशास्त्रविहितप्रपंचातीतप्रयोमना १८॥ भूषणयोजनम्—तद्योगो द्विविधः-संयोज्योऽसंयोज्यश्च। तत्र संयोज्यस्य हारादेर्मणिमुक्ताप्रबालादिभिर्योजनम्। असंयोज्यस्य कटकादे रचनम्। तदुभयं नेपथ्यांगं न तु शरीरे

भूषणयोजनं, तस्य 'नेपथ्य योगाः' इत्यनेन गतार्थत्वात् १९॥ ऐन्द्रजालम्—इन्द्रजालादिशास्त्रप्रभवयोगाः सैन्यादिदर्शनाद्विस्मयार्थाः २०॥ कौचुमारयोगाः—कौचुमाराश्च योगाः कुचुमारर्षिणा प्रोक्ताः सुभगंकरणादयः, सुरूपत्वाद्यापादका इत्यर्थः। कौचमार इति पाठे कुचानां स्तनानामिमे कौचा, काठिन्यादयः, मारस्य कामस्येमे मारा रागकरणादयः, कौचाश्च ते माराश्चेति कौचमाराः। यद्वा—कुचुशब्दः पक्षिशब्दानुकरणे, तेन पक्षिणो लक्ष्यन्ते, कुचून् पक्षिणो मारयन्तीति कुचुमारास्त एव कौचुमारा जालनिर्माणादयः २१॥ हस्तलाघवम्—चमत्कारार्थं लघुहस्ततया तत्तद्वस्तुपरिवर्तनम्, शस्त्रास्त्राद्युत्सर्गशैघ्र्यं वा २२॥ चित्रशाकापू (कसू) पभक्ष्यविकारक्रियाः—पानकरसरागासवयोजनं दशविधशाकमुद्गादिसूपभक्ष्यविकाराणां क्रिया पाकविधिना निष्पादनम्। द्रावितमद्रावितं रसं पानकम्। रागो लेह्यम्। आसवः संधानमेका कला द्विविधोक्ता, पानकेषु रसादियोजनमिति केचित्। "मूलपत्रकरीराग्रफलकाण्डादिरूढकम्। त्वक्पुष्पं कवकं चैव शाकं दशविधं स्मृतम्॥" अधिरूढं नालबीजांकुरास्थिमज्जादि। 'सूपं व्यञ्जनसूदयोः' इति मेदिनी २३॥ सूचीवायकर्म—सूच्या पुष्पमूर्त्यादिरूपेण सीवनम् २४॥ सूत्रक्रीडा—सूत्राणामन्यथा दर्शनं, सूत्रचारेण पुत्रिकादिचालनं वा २५॥ वीणाडमरुकवाद्यानि—एतच्च विशेषविवक्षयेहोक्तमपि केचिन्न लिखन्ति, वाद्यशब्देनोक्तार्थत्वात् २६॥ प्रहेलिका—अपह्नुतवागर्थज्ञानम्। "व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात्। यत्र बाह्यार्थसंबद्धं कथ्यते सा प्रहेलिका॥" इति हरिः। तथाहि—"वने जाता वनं त्यक्त्वा वने वसति नित्यशः। पण्य स्त्री न तु सा वेश्या यो जानाति स पण्डितः। अघं वसति वैकुण्ठे तदघं गणिकागृहे। सर्वं तु वणिजो हट्टे वद वैद्य किमौषधम् (२)। पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः। चलति (ते) वायुवेगेन तस्याहं कुलबालिका (३) श्यामा स्या न च मार्जारी द्विजिह्वा नैव सर्पिणी पञ्चभर्त्री न पाञ्चाली यो वेद स च पंडितः॥ (४)। अपदो दूरगामी च साक्षरो न तु पण्डितः। अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥ (५)। क्रमादेता नौ-हरिताल-कुलालजा-लेखनी-पत्राणां बोधकाः। एवमन्या बह्व्यः सन्ति २७॥ प्रतिमाला—"प्रतिश्लोकं क्रमाद्यत्र संधायाक्षरमंतिमम्। पठेत्तं श्लोकमन्योऽन्यं प्रतिमालेति सोच्यते॥" तथाहि—"कृष्णेति मंगलं नाम यस्य वाचि प्रवर्तते। भस्मीभवन्ति तस्याशु महापातककोटयः॥" इह 'यः' अन्ते पठित एतच्छ्रुत्वाऽपरो यकारादिमं श्लोकं पठेत्। स च—"य इच्छेन्निजकल्याणं स सदा संगमाचरेत्। हरिभक्तिपराणां हि ते हि कल्याणभाजनम्॥" इत्येतच्छ्रुत्वा परस्तु—"नन्दनन्दन मे देहि दधिपात्रं नमोऽस्तु ते। पात्रं विना गताया मे श्वश्रूस्ताडयिता भृशम्॥" इतोऽन्यस्तु—शंखचक्रगदापद्मास्ते करेषु जनार्दन। द्योतन्तेऽर्कं त्वतिक्रम्य रणे मुरनिषूदन॥" इति श्रुत्वाऽपरो नकारादिमं पठेदित्थं प्रतिमालाभवति। सर्ववस्तुप्रकृतिनिर्माणं वा प्रतिमाला २८॥ दुर्वचकयोगाः—शब्दतोऽर्थतश्च यद्दुःखेनोच्यते तद्वक्तुमुपायाः। यथा—"वाश्चारेड्ध्वजधग्धृतोड्वधिपतिः कुध्रेड्जजानिर्गणेड्गोराडारुडुरस्सरेडुरुतरग्रैवेयकभ्राडरम्। उडुवीड्धृङ्नरकास्थिभृत्त्रिदग्भृदार्द्राजिनाच्छच्छविः स स्तादंबुमदंबुदालिगलरुग्देवो मुदे वो मृडः॥" इत्येवं रूपं वृत्तं पाठार्थतो दुरुच्चार्यम्। (पदच्छेदः—वाश्चारेढ्ध्व जधक्। धृतोड्वधिपतिः। कुध्रेड्जजानिः। गणेट्। गोराडारुडुरस्सरेडुरुतरग्रैवेयकभ्राट्। अरम्। उडुवीड्धृक्। नरकास्थिभृत्। त्रिदग्भृत्। आर्द्राजिनाच्छच्छविः। सः। स्तात्। अम्बुमदम्बुदालिगलरुक्। देवः। मुदे। वः। मृडः)। वार्षु चरन्तीति वाश्चारा मत्स्याः, तेषाम् ईट्—ईष्टे इतीट् स्वामी महामत्स्यो ध्वजे यस्य स कामः, तं दहतीति तथा। धृत उडूनामृक्षाणामधिपतिश्चन्द्रो येन स तथा। कुं भूमिं धरन्तीति कुध्राः पर्वतास्तेषामीड् हिमालयस्तज्जा पार्वती जाया यस्य स तथा। गणानां प्रमथानामीड् स्वामी। गवां राजा नन्दी गोराट्, तमारोहतीति गोराडारुट्। उरसा सरन्ति गच्छन्तीत्युरःसरा सर्पास्तेषामीडेव उरुतरं ग्रैवेयकं कंठाभरणं तेन भ्राजते द्योतते इति तथा। "उ संबुद्धौ रुषोक्तौ च शिववाचि त्वनव्ययम्। उ प्रश्ने च" इति हैमः। उना शंभुना डीयते उपरि ध्रियत इत्युडुर्गंगाप्रवाहः। विशेषेणेड्यत इति वीट्, उडुश्चासावीट् चेत्युडुवीट्, तं धृजतीति तथा। नराणां कं मस्तकं च तदस्थि चेति तथा, तद्बिभर्तीति तथा। तिस्रः दृशस्त्रिदशस्ता बिभर्तीति तथा। आर्द्राजिनेनाच्छा छविर्यस्य स तथा। अंबुमन्तश्च तेम्बुरास्तेषामालिस्तद्वद्गलरुक्कण्ठकान्तिर्यस्य स तथा। स देवो मृडः वो मुदे अरं शीघ्रं स्यादित्यर्थः २९॥ पुस्तकवाचनम्—पुस्तकस्थानां काव्यानां शृंगारादिरसानुकूलगीतस्वरेण वाचनम् ३०॥ नाटिकाख्यायिकादर्शनम्—नाटकस्य दशरूपकस्याख्यायिकायाश्च परिज्ञानं निर्माणञ्च। तत्र नाटकम्—"पूर्वरंगं विधायादौ सूत्रधारे विनिर्गते। प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः॥ प्रथमं पूर्वरंगः स्यात्ततः प्रस्थापनेति च। आरम्भे सर्वनाट्यानामेतत्सामान्यमिष्यते॥" इत्यादिनारभ्यते। पूर्वरंगो नान्दी। सूत्रधारो नाट्याचार्यः। आख्यायिकाऽज्ञातप्रत्यार्थभूता कथा। यथा—"उत्पातकं तदिह देव विचारणीयं नारायणः पतति चेदथ वा सुभद्रा। कादम्बरी मदविघूर्णितलोचनस्य युक्तं हि लांगलपतेः पतनं पृथिव्याम्॥ १"। अयं श्लोकः साख्यायिकः। सा च—कदाचित्कश्चिद्ब्राह्मणोऽधीतशास्त्रो वृत्त्यर्थं देशान्तरे भ्रमन् कस्यचिन्नृपस्य नगरसमीपस्थसरसि स्नात्वा हरिमर्चयँस्तत्रागतेनैकाकिनैव तन्नगरनृपेण नमस्कारपूर्वकं पृष्टः—किमर्थं कुतश्चागत इति, तेनोक्तं—वृत्त्यर्थमत्र नृपपार्श्वे आगतोऽस्मि, तेनोक्तं—यदि न किञ्चिदास्यति तदा किं करिष्यसि, विप्रेणोक्तं—यदि मे दैवं प्रबलं तदा पादत्राण प्रहारेण ग्रहीष्याम इत्युक्तो नृपः स्वद्वारपालादींस्तं दर्शयित्वोवाच—अयं न मत्पार्श्वमानेयो नास्य वार्तापि कार्येति। ब्राह्मणश्च मध्याह्नोत्तरं भ्रमन्राजमार्गे केनचिन्नृपाधिकारिणा दृष्टः स्वगृहमानीय सत्कृत्येह तिष्ठ तव वृत्त्यर्थं यत्नं करिष्यामीत्युक्तस्तत्स्थान उवास। तत्र वसतस्तस्याल्पेनैव कालेन तद्गृहस्थजगन्नाथमन्दिरमूर्तित्रयमध्यतो बल-

भद्रमूर्तिरकस्मात्पपात । ततो नृपो ब्राह्मणानाहूयोत्पातोऽयं जातः किमर्थं का चास्य शांतिरित्युवाच । तच्छ्रुत्वा ते स्वस्वमत्यनुरोधेनोत्पातं मत्वा शान्त्याद्यूचुः । यद्गृहे राजदृष्टचरविप्र आसीत्तेनोक्तं-मद्गृहेऽप्येकः पण्डितोऽस्ति तमहं पृष्ट्वा वदिष्यामि, राज्ञोक्तमवश्यं पृष्ट्वागच्छ । स तदैव गत्वा तं तद्वृत्तं पप्रच्छ, तेनोक्तं-नृप पार्श्वे एव वदिष्यामि नान्यत्र । स चागत्य नृपाय तथैवाकथयत् । नृपश्च तमानाय्य नत्वा च दृष्टचरं तमेव मत्वा पप्रच्छ, तेन हि पूर्वमुक्तश्लोकः पठितस्तदाकर्ण्य नृपो नानावस्त्रालंकाराद्यानाय्य तदुपरि पादत्राणं संस्थाप्य विप्राय ददौ । कथं राजन्सर्वोपकरणोपरि पादत्राणं स्थापितमित्युक्तो विप्रेण नृपस्तमाह्वानेन मां ताडयित्वा गृहाणैतदिति, भवदुक्तिरियं सत्या जातेति कथामेतां विना श्लोकतात्पर्यं न लभ्यते । इत्थं साख्यायिका अन्येऽपि सन्ति ३१॥ काव्यसमस्यापूरणम् - पूरणसाकांक्षा कविशक्तिपरीक्षार्थमपूर्णतयैव पठ्यमाना समस्या । तस्याः पूरणं यथा-‘शतचन्द्रं नभस्तलम्’ इति । तत्र “दामोदरकराघातविह्वलीकृतचेतसा । दृष्टं चाणूरमल्लेन” इत्यनेन पूर्यते । एवम्—‘पिपीलिका चुम्बति चन्द्रबिम्बम्’ इति । तत्र “लघुर्जनः सज्जनसंगमेन करोति दुःसाध्यमपीह साध्यम् । पुष्पाश्रया शम्भुशिरोऽधिरूढा” इत्यादिना पूर्यते । एवमन्या अप्यनन्ताः सतीति ३२॥ पट्टिकावेत्रवानविकल्पाः—पट्टिकायाः खट्वादेश्च वेत्रैर्वाने वितनने विविधकल्पनाऽनेकपुष्पलतादिरूपा कल्पना । ‘पट्टिका छुरिकासंद्योः’ इति धरणिः । केचित्तु—छुरिका वेत्र बाणानां प्रहरणे विविधकल्पना ऊर्ध्वाधस्तिर्यगादिप्रकारेण प्रहरणमित्याहुः ३३॥ तर्ककर्माणि -- तर्काणां शास्त्रीयानां लौकिकानां वा नानाविधोहापोहेन क्रिया। तथाहि— भट्टस्य कट्यां शरटः प्रविष्टः । तत्र छिद्राभावे प्रवेशो न संभवतीत्याद्यूहनम् । यदि माता स्यात्तर्हि पिताऽपि स्यादित्येवंरूपा अनन्ताः सन्तीति । तार्किकास्तु व्याप्यारोपेण व्यापकारोपस्तर्क इत्यूचुः । तदुदाहरणञ्च-‘यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यात्’ इति । “व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्” । यथा—वह्न्यभावो व्याप्यस्तदारोपप्रयुक्तो व्यापकधूमाभाव इति केचित्तु—‘तर्कोऽनिष्टप्रसञ्जनम्’ इत्याहुः । तच्च शंखोऽस्थि कथं पवित्रं मृगचर्मापि कथं तत्, तयोरस्थिचर्माविशेषत्वात्पावित्र्ये हेतुर्वाच्य इत्येवमनेकधानिष्टप्रसंगारोपोऽस्ति वैधेयानम् ३४॥ तक्षणम्—शयनाद्यर्थं वार्धकिकर्म ३५॥ वास्तुविद्या—गृहनिर्माणादिरूपा ३६॥ सुवर्णरत्नरूप्यपरीक्षा—तेषां गुणदोषमूल्यादिभिः परीक्षणम् । स्वर्णमेकादशवर्णतो हीनं न ग्राह्यमधिकवर्णं ग्राह्यं षोडशवर्णं यावत् । एवं रूप्यमपि मृदु कांस्यादिसंगहीनं ग्राह्यम् । तत्र वज्रमौक्तिकमणिक्यनीलमरकतभेदात्पञ्च रत्नानि, गोमेदपुष्परागवैदूर्यप्रवालभेदाच्चतुर्धोपरत्नानि । वज्रमौक्तिके श्वेते, माणिक्यं लोहितम्, नीलं नीलमेव, मरकतं हरितं श्वेतं पीतञ्च। गोमेदं पुष्परागं पिंगलम्, प्रवालं लोहितम् । वैदूर्यं हरिपाण्डुरञ्च इति । वज्रे सप्त दोषाः पञ्च गुणाश्च सन्ति । षट्कोणलघुभास्वरतीक्ष्णधारसर्वतोरश्मिस्निग्धञ्चाकालमृत्युसर्पादिशत्रुव्याधिभयहरं वज्रं भवति । मलबिन्दुरूक्षरेखावैषम्यकाचवत्तदनिष्टकरम्। तन्मौल्यं द्वादशधा परीक्षानुसारेण । एवमेव रत्नशास्त्रे सर्वेषां गुणदोषमूल्यान्युक्तानीत्यलमतिप्रसङ्गेन ३७॥ धातुवादः—स हि मृत्प्रस्तररसधातूनां गैरिकाभ्रकपारदादिरूपाणां पातनसाधनमेलनादिज्ञानहेतुरर्थार्थः । यद्वा—धातूनां क्रियाणां वादः । धातुरित्युपलक्षणम् । स च गुप्तक्रियादिरूपः । तथाहि-“रामनाम सुधाधाम पवित्रं रसना रसम् । कः कर्ता कर्म किञ्चात्र क्रियासंबोधने च के ॥” इति । इह हे न इति सम्बुद्धिः, रसेति क्रियापदम् ‘रस-आस्वादने’, रामनामेति कर्मत्वमिति कतति । एवम्-“सार स्व तेन कौ मुद्याथ वा भवति देहिनाम । अत्र क्रियावद् गुप्तं कर्तृसम्बोधने तथा ।” इति केचिदाहुः । हे स्व देहिना या मुद् हर्षः कौ भूमौ भवति सा ते न आरेति योजनया सर्वं ज्ञायते ॥ ३८ ॥ मणिरागाकरस्थानम्—स्फुटिकादि रञ्जनज्ञानम् । तदुत्पत्तिस्थानमेतादृशभूमावमुकमण्याकर इति ज्ञानम् ॥ ३९ ॥ वृक्षायुर्वेदयोगाः—वृक्षाणां रोपणपुष्टिचिकित्साः । वृक्षाश्चाम्रादयस्तेषां रोपणम् “सम्यक्कृष्टे समे क्षेत्रे माषानुत्वा तिलांस्तथा । सुनिष्पन्नान्समुद्धृत्य तत्र बीजोप्तिरिष्यते ।’ इति । “क्षीरनिषिक्तं बीजं बृहतीतिलभस्मसर्पिषा तिप्तम् । गोमयमृदितमथोप्तं सद्यो जायेत धूपितं वसया । (१) । खर्जूरबिल्वलकुचाः सितसर्षपेण पिण्याकतश्च तुषवारिवशेन चाम्राः । ऐरावता निचुलपत्रजलोक्षितेन सार्द्रा हिमाभसलिलेन च यान्ति वृद्धिम् । (२) नराणामिव वृक्षाणां वातपित्तकफाद्गदाः । संभवन्ति न संदेहस्तल्लक्षणमथो ब्रुवे । (३) कृशो दीर्घो लघू रूक्षो निद्राहीनोऽल्पचेतनः । न धत्ते फलपुष्पाणि वातप्रकृतिकस्तरुः । (४) । आतपाऽसहनः पाण्डुः शाखाहीनो मुहुर्यदि । अकालफलाकी च शाखी पित्तात्मकः कृशः । (५) स्निग्धशाखादलः शाखी सम्यक्पुष्पफलोज्ज्वलः । लतापरीतगात्रस्तु कफवान्परिमण्डलः । (६) । सस्निग्धैः पिशितरसैः प्रयाति वातः सस्निग्धैस्सुहिमजलैश्च याति पित्तम् । कट्वम्लैरहिमजलैः कषायरूक्षैः श्लेष्मापि क्रमविहितैः प्रयाति नाशम् ।(७)॥” इत्थं बहुधा वृक्षायुर्वेदे वर्णितमित्यलं प्रपञ्चेन ४० । मेषकुक्कुटलावकयुद्धविधिः—मेषादीनामुपस्थानादिचतुरङ्गैर्योधनम् । लावकः पक्षिविशेषः । उपस्थानानुस्यानप्रस्थानपुरस्थानानि चतुरङ्गानि ४१ । शुकसारिका प्रलापनम्—तयोर्मानुषभाषापाठनम् ४२। उत्सादनम्–उत्सादने संवाहने केशमर्दने च कौशलम । पादयोर्मर्दनमुत्सादनं, शेषांगेषु मर्दनं संवाहनं शिरोऽभ्यंगकर्म केशमर्दनम् ४३ । अक्षरमुष्टिकाकथनम्—अक्षराणां मुष्टिरिव गुप्तिः साभासा निराभासा च । आद्याक्षरमुद्रा यथा—‘मे-वृ-मि-क-सिं’ इत्यादिना मेषवृषादिकथनम् । दिवोदासीयेऽपि—“आ-भा-का-सितपक्षेषु मैत्रश्रवणरेवती-।-संगमे न हि भोक्तव्यं द्वादश्यां द्वादशाऽऽहरेत् ।’ इति । “आ:का-पौ-चै-द्वितीयायां शिष्यं नाध्यापयेद्गुरुः” इति स्मृत्यन्तरे । “जन्मर्क्षसंख्यासहिता शताब्दा दगूनिता नन्दहृतावशेषाः । आ-चं-कु-रा-जी-श-बु-के-शु-जाताः क्रमेण मौढीयदशाः प्रदिष्टाः ।’ इति । हिल्लाजेऽपि-“धनिष्ठार्धश-

पू-उ-रे तृणकाष्ठादिसंग्रहम् । शय्यावितति गेहांतर्द्धिप्रेतदहनं त्यजेत् ।'' इति मुहूर्तशास्त्रेऽपि । यद्वा—एकाक्षरोक्त्याक्षरमुष्टिकाया वर्णसमुदायरूपपादादेर्ज्ञानम् । तथाहि—कदाचिदेकनगरवास्तव्यौ स्वस्वविद्याप्रवीणौ सवयसौ कौञ्चिद्वनिदेवरुक्मकारतनयौ मिथः सख्येनार्थार्जनाय नगरान्तरमीयतुः । तत्र च पश्यतोहरतया बहुसख्यातुरीचुञ्चुनापि नाडिन्धमेन न तथा धनमार्जितं यथाधिमारुतिमन्दिरमिन्दिराजानि कथां कथयतैकदैव,-सन्तोषसेविना वाडवजनिना परेण । ततश्च हायनाऽनेहसि गते पितृदर्शनाभिलाषुकयोर्भवनमभिपरावर्तमानयोर्द्रव्यापहारभिया कृतजागरणयोररण्ये क्रमेण शयने कृतसमययोः पुरश्शयितेन वर्णकारसुतेन शयानस्य साधुद्विजदारकस्य शिखां पादेनाक्रम्य शिरश्छेदाय पापेन वसुलिप्सयासिरुदयोजि । ततश्च बहुबोधितस्यापि दुर्मतिशान्तिमनालोक्यासिच्छिन्नांगुल्यसृजा पत्रे 'अ-प्र-शि-ख' इति वर्णचतुष्टयं विलिख्य मत्पित्रे देयमिति तस्मै प्रायच्छत् । स च स्वमनोरथं सम्पाद्यागत्य तत्पित्रे तददात् । स च तदर्थमबुध्यमानो भोजराजसभामगात् । तत्रत्येष्वपि तदर्थमकथयत्सु बुधेषु राज्ञि 'सप्तदिनाभ्यन्तरेऽब्रुवाणा यथार्हं दण्ड्या इमे' इति कृतनियमे पलायमानेषु तेषु वनवटाधः स्थितेन वररुचिना रात्रौ तत्रस्थगृध्र-गर्भिणीमांसाभिलाषितत्पत्नीसंवादेन तदक्षरार्थोऽवगतः । यतश्च श्रूयते—''दिवा निरीक्ष्य वक्तव्यं रात्रौ नैव च । नैव च धूर्ताः सर्वत्र तिष्ठन्ति वटे वररुचिर्यथा ।'' इति । ततश्च प्रसन्नमनाः स प्रातः राजसभामागत्येमं श्लोकमेकैकाक्षरज्ञातैकैकपादं पपाठ—''अ-नेन तव पुत्रस्य प्र-सुप्तस्य वनान्तरे । शि-खामाक्रम्य पादेन ख-ड्गेन निहतं शिरः ।'' इति । अपरा चेष्टामुद्रा । सा च किसलयादिरूपेणाक्षरकथनम् । तथाहि—''अहिफणकजचक्राणि टंकारासिप्रभञ्जनान् । मुखोर्द्ध्वरोमसंस्पर्शकेशस्पर्शौ क्रमेण च । अकचटतपयशा इति वर्गाष्टकस्य च । एतानि कुर्यान्मतिमान्समितौ बोधनाय वै । अगुल्या निर्दिशेद्वर्णं मात्राः स्फोटिकया तथा । एतद्रामेण निर्दिष्टं लक्ष्मणाय वने सता । नासाकर्णौ शूर्पणख्याश्छेत्तुं बोधाय चेष्टया ।' अस्यार्थः—कजं कमलम् । टंकारो दुंदुभिवादनानुकरणम् । असिपदेन खड्गप्रहारानुकरणम् प्रभञ्जनो वातकरणानुकरणम् । स्पष्टमन्यत् यदा 'रामं नौमि' इति कथनेच्छा स्यात्तदा मुखोर्द्धवरोमाणि स्पृष्ट्वांगुलिद्वयमुत्थाप्य स्फोटिकाद्वयं कुर्यादेतेन 'रा' इति सिद्धम् । ततो 'मं' सिद्ध्यर्थं हस्तेन पवनं कृत्वांगुलिपञ्चकमुत्थाप्यैकादश स्फोटिकाः कुर्यात् । ततो 'नौ' सिद्धये खड्गप्रहारं हस्तेनानुकार्यांगुलिपञ्चकमुत्थाप्य स्फोटिकात्रयं कुर्यादित्येषा रीतिः सर्वत्र बोध्या । एवम् 'कृष्णोऽस्ति' इति बोधनार्थमादौ कमलं कृत्वा तत एकांगुलिमुत्थाप्य तां वक्रां कुर्यादपारसिद्धये स्फोटिका न कार्या, तेन 'कृ' इति सिद्धम् । ततः केशं स्पृष्ट्वांगुलिद्वयमुत्थाप्य दुन्दुभिवादनानुकरणं कृत्वांगुलिपञ्चकमुत्थाप्य पुनरंगुलिद्वयं संयोज्य नव स्फोटिकाः कुर्यात्तेन 'ष्णो' इति जातम् । ततः केशान्स्पृष्ट्वांगुलित्रयमुत्थाप्य पुनरंगुलिद्वयं संयोज्य स्फोटिकात्रयं कुर्यात्तेन 'स्ति' इति । सर्वसंयोजनात्कृष्णोऽस्तीति जायते । किञ्च—'कृ' कथनार्थमादौ कमलं कृत्वैकांगुलिमुत्थाप्य ततो मुखोर्द्धवरोमाणि स्पृष्ट्वांगुलिद्वयमुत्थाप्यांगुलिद्वयसंयोगं कृत्वा षट् स्फोटिकाः कुर्यात् । 'क्ष' कथनेऽपि कमलं कृत्वा केशान्स्पृष्ट्वांगुलिद्वयं संयोज्यैकां स्फोटिकां कुर्यात् । 'ष्नि' कथनार्थं मुखरोमाणि स्पृष्ट्वांगुलिद्वयमुत्थाप्यासिचेष्टां कृत्वांगुलित्रयमुत्थाप्य पुनरसिचेष्टां कृत्वांगुलिचतुष्कमुत्थाप्य पुनरसिचेष्टां कृत्वांगुलिपञ्चकमुत्थाप्यांगुलि चतुष्टययोगं विधाय स्फोटिकात्रयं कुर्यादित्येवं संयुक्ताक्षरेऽक्षरपौर्वापर्यापेक्षयाक्षरसंयोगसमांगुलियोगेनांते मात्रासमाः स्फोटिकाः कार्या इति ॥ ४४ ॥ म्लेच्छितविकल्पाः-यत्साधुशब्दोपनिबद्धमप्यक्षरविन्यासादस्पष्टार्थं, तस्य भेदा ववलनागन्तुकशृङ्गादयः । यथा—'साहेऽव शलाम्' इति । इहाहिना शेषेण सह वर्तते इति साहिर्विष्णू रुद्रो वा, तत्संबुद्धौ हे साहे । शं मोक्षलक्षणं कल्याणं लाति ददातीति शला ब्रह्मविद्या ताम् । अव रक्ष देहि वा । भारतेऽपि विदुरेणोपदिष्टा लाक्षामन्दिरप्रवेशसमये । भेदाश्चास्य ग्रन्थान्तरगम्याः ४५॥ देशभाषाज्ञानम्—अप्रकाशवस्तुज्ञापनार्थं तत्तद्देशीयैर्व्यवहारार्थं च ४६ ॥ पुष्पशकटिकानिमित्तज्ञानम्-पुष्पाणि निमित्तीकृत्य शुभाशुभादेशपरिज्ञानम् । पुष्पसंख्यावर्णाभ्यां शुभाशुभकथनम् । तच्च शकुनशास्त्रादवसेयम् । निमित्तज्ञानम्—आगतस्य भाषणादिना तदागमनकार्यज्ञानम् । भवदीयं तत्कमतिमिष्टामित्युक्ते तत्कार्यमागतोऽयमित्येवंरूपतया ज्ञानमिति सामान्येनोक्तम् ४७ ॥ यन्त्रमातृका—सजीवानां च यन्त्राणां संग्रामार्थं घटनाशास्त्रं विश्वकर्मप्रोक्तम् । सजीवयन्त्राणि तु जीववदुत्पत्योत्प्लुत्य नाशहेतूनि । तानि च धनुर्वेदे प्रसिद्धानि ४८ ॥ धारणमातृका—श्रुतग्रन्थस्य धारणार्थं शास्त्रम् । यथोक्तम्—''वस्तु कोशस्तथा द्रव्यं लक्षणं केतुरेव च । इत्येते । धारणादेशाः पञ्चांगरुचिरं वपुः ।'' इति । वस्तुपदेन वस्तूनां स्वरूपबोधकं शास्त्रम् । निघंट्वादिकोशः प्रसिद्धः । द्रव्यस्य तल्लक्षणस्य च बोधकं शास्त्रं तर्कादि । केतुपदं तत्तच्चिह्नपरम्, व्याकरणं पुंस्त्र्यादिबोधकम् ४९ ॥ सम्पाद्य (वाच्य) म्-तत्रैकः पूर्वधारित ग्रन्थं पठति, अपरोऽश्रुतपूर्वं तेन सह तथैव पठति । केचित्तु सम्पाट्यमिति पठित्वाऽभेद्यस्यापि वज्रादेर्द्वैधाकरणमित्याचक्षते ५० ॥ मानसी-मनःसंभवा चिन्ता । तत्र कश्चिद्व्यञ्जनाकारैः पद्माद्याकृतिर्यथास्थितानुस्वारविसर्गयुक्तैरनुक्तार्थं श्लोकं लिखत्यन्यस्तथैव पठतीति दृश्यविषया । यदा तु तथैव यथाक्रममाख्यातानि श्रुत्वाऽपूर्ववदुन्नीय पठति तदादृष्टविषया, सा चाकाशमानसी । तदुभयं क्रीडार्थं वादार्थञ्च । तदुक्तं विदग्धमुखमण्डने—''मानसी नाभसीत्याद्या बुद्ध्यादौ न्यासितापि या । बाहुल्येन प्रयोगात्तु नेह नासां प्रदर्शनम् ।' इति । आदिपदान्मूर्ता-विचित्रा-वाचिकी-प्रातिलोमिकी-मौलदेवी-धारा-पल्लवी-साभिनयालंकारादयः संवेद्याः । ''ि◌ ◌ ◌ ◌ ◌ॄ ◌ ◌ वं ि◌ वं ि◌ ◌ोः ◌ु ◌ु ◌ो ◌ ि◌ ◌ः । । ◌ ◌ु ◌ ◌ ठि◌ु ◌ ◌ा ◌ु

० ० ०ठी ० ०ठो ० ०वं ०ः ।।” इयमेव बिन्दुमतीत्युते—“स्वरेषु बिन्दुयुक्तेषु हलां यदवबोधनम्। तद्बिन्दुमदिति प्राहुः केचिद्बिन्दुमतीमिति ।” “त्रिनयनचूडारत्नं मित्रं सिंधोः कुमुद्वतीदयितः अयम् दयति घुसृणारुणरमणीवदनोपमश्चन्द्रः।” इत्यस्योदाहरणं स्वरबिन्द्वादि पूर्वोक्तम्। यद्वा—पत्रादिचित्ररूपा सा “वर्णद्वयेन चैकैकदलभूतदलाष्टकम्। सर्वोत्तराद्यवर्णेन पद्मं स्यात्वृत्तकर्णिकम् ।” उदाहरणम्—“अलयोऽपश्यदरयोऽररेऽवंद्योऽहस्तोऽगजोऽहीनः”



एवमन्येऽपि बहवो भेदाः सन्तीति ५१ ।। काव्यक्रिया—संस्कृतप्राकृताऽपभ्रंशकाव्यकरणम्, चित्रकाव्यकरणम्। तदुक्तम्—“भाषाभिश्चित्रितं यत्स्यात्संस्कृतप्राकृतादिभिः। सन्तश्चित्रं तदिच्छन्ति संशुद्धं त्वेकभाषया ।” इति। उदाहरणं संस्कृतप्राकृतयोः–“किं न स्यात्कीदक्षं महतोऽपि हि तादृशस्य जलराशेः। दिनमणिकिरणसिफंसणपडिबद्धं लोहि किं गोसे (१)”। कमलवणं महतोऽपि समुद्रस्य किं कीदृशं न स्यात्। कं जलमलवणमक्षारं न स्यात्। दिनमणेः किरणानां स्पर्शेन प्रतिबुद्धं भवति किं प्रभाते कमलानां वनम्। एवमन्यदपि साहित्यशास्त्रतोऽवसेयम्। संस्कृतापभ्रंशमुदाहरति—“किं सुखमाहुः प्रायः केशविकारं च का हरेर्दयिता। भा कस्मिन्निशि किं भृशवाक्कोलुच्च इवीलपुलसाणम् (१)”। क रोचते वीरपुरुषाणामिति चतुर्थः प्रश्नः। ‘शमलकम्मालं भे’ शं सुखम्, अलकं चूर्णं कुन्तलम्, मा लक्ष्मीः, अलमत्यर्थम्, भे नक्षत्रे, समरकर्मारम्भे इत्यलमति प्रसंगेन ५२ ।। अभिधानकोशः—उत्पलमालादि। आदिना विश्व-हैम-शब्दार्णवो-ज्ज्वला-जय-धनंजयसंसारावर्त-नाममाला-यादव-शाश्वत-धरणि हलायुध-वररुचि-व्याडच-मर-भागुरि-बोपालित-रन्तिदेव-हर-केशव शुभांक गोवर्धन-रभश-रुद्रदत्त गंगाधर-हारावली-त्रिकाण्ड-रत्नमाला सौभरि - वाग्भट-माधव-वाचस्पति-धर्म-तारपाल-विक्रम-वामन-कात्यायन-चन्द्र - गोभि - पाणिन्यनेकार्थध्वनिमञ्जर्यणेकार्थादीनां ग्रहः ५३ ।। छन्दो ज्ञानम्—पिंगलादि-प्रणीतच्छन्दसो ज्ञानम्। छन्दश्च मात्रावर्णभेदेन द्विधा। मात्राछन्दांस्यार्यादीनि। वर्णच्छन्दांसि तु श्र्यादीनि। तेषां प्रस्तारोद्दिष्टैनष्टैकव्द्यादिलगक्रियापथिमार्गयोगमेरुमर्कटीसूचीपताकयादिभिः प्रत्ययैर्यथार्थज्ञानं भवतीति ५४॥ क्रियाकल्पः—काव्यकरणविधिः। स च—“साधुशब्दार्थसंदर्भं गुणालंकारभूषितम्। स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ।।” इति वाग्भट उक्तः। साधूनिर्दोषौ सालंकारौ यौ शब्दार्थौ तयोः संदर्भो गुम्फनं यत्र तत्। गुणैरौदार्यादिभिरलंकारैश्चित्रोपपमादिभिर्भूषितम्। स्फुटा रीतयः पाञ्चालीगौड्यार्भट्यादयः, रसाश्च शृङ्गारादयस्तैरुपेतम्। कीर्तय इत्युपलक्षणम् “काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।” इति काव्यप्रकाशोक्तार्थानाम्। तत्कारणञ्च प्रतिभाव्युत्पत्त्यभ्यासाः। नवनवार्थोन्मेषशालिनी बुद्धिः प्रतिभा, व्युत्पत्तिर्गुरूपदेशपूर्वकसर्वशास्त्रज्ञानम्, अभ्यासोऽनारतं काव्यरचनादरः। एवमन्येऽपि मनःप्रसत्त्यादयः काव्यहेतवस्तच्छास्त्रतोऽवसेयाः। यद्वा—क्रियाणां यज्ञादीनां कल्पो बौधायनादिपद्धतिग्रन्थज्ञानम्। वा—क्रियाणां स्वर्णकारादिकर्मणां कल्पो ज्ञानम्। तेन भूषणभाजनहर्म्यादिसर्वक्रियाकरणं बोध्यम् ५५ ।। छलितकयोगाः—“तद्रूपमन्यरूपेण संप्रकाश्य हि वञ्चनम्। देवेतरप्रयोगाभ्यां ज्ञेयं तच्छलितं तथा ।।”। वञ्चनार्थं देवादिबहुरूपधारणोपाया इत्यर्थः ५६ ।। वस्त्रगोपनानि–वस्त्रेणाप्रकाश्यदेशसंवरणम्। यथा तद्रूपं मानमपि तस्मान्नापैति, त्रुटितस्यात्रुटितस्येव परिधानं महतो वस्त्रस्य संवरणादिनाऽल्पीकरणं च गोपनानि। सूत्रादिमयानां कौशेयादिरूपतया प्रदर्शनं वा ५७॥ द्यूतविशेषाः–निर्जीवसजीवादिभेदेन बहवो द्यूतभेदाः। सपण सजीवं, तद्धीनं निर्जीवम्। चतुरंकादिरूपमेतन्निर्जीवविधानम् ५८॥ आकर्षक्रीडा—दूरस्थक्रीडकान्याकृष्य यत्र क्रीडा काष्ठपुत्तलिकाचालनरूपा। यद्वाऽऽकाशे दीर्घडोरकया प्रेषितस्य शरणपत्रादिनिर्मितयन्त्रस्याकर्षणादिना क्रीडा, पाशकक्रीडा वा। दुर्विज्ञयतया पुनर्वचनं सजीवद्यूतविधानं वा। पाशके चतुरंके सति द्रव्यं दशधा विभज्य लापयेत्। एकाङ्कपाते एक जेता गृह्णीयात्, द्व्यंके त्र्यंशान्, त्र्यंके षडंशान्, चतुरंके पतिते दश भागानेव पूर्वांकयोजनया गृह्णीयादिति द्यूतविदां स्थितिः ५९ ।। बालक्रीडनकानि—बालानां कंदुकवीटापुत्रिकादिभिः क्रीडनानि। तानि च देशकालभेदादनंतानि ६०।। वैनायिकी—हस्त्यादिशिक्षा। आदिना वाजिग्रहः ६१।। वैजयिकी—विजयप्रयोजना दैव्यपराजितादिः, मानुषी सांग्रामिकी शस्त्रविद्या ६२ ।। व्यायामिकी व्यायामप्रयोजना मृगयादिः। एतास्तिस्र आत्मोत्कर्षरक्षणाजीव्यार्थाः ६३ ।। इत्येताश्चतुःषष्टिकला व्याख्याताः। उत्सादनात्केशमार्जनस्य पृथग्गणने संख्यापूर्तिः ६४ ।। “कला स्यान्मूल्यैर्वृद्धौ शैल्यादावंशमात्रके। षोडशांशे च चंद्रस्य कलना कालमानयोः ।। भूमौ भक्त्यां कृपायां च कादंबिन्यामथो कला ।।” इति मेदिनीनिरुक्ती। गुरुदक्षिणाया आवश्यकत्वमाह—“याजने हि ददतं वै ते तमयाजयंस्तस्माद्दद्याज्यः, प्रतिगृह्णन्तो वै ते तमयाजयस्तस्मात्प्रतिगृह्णता याज्यमुभये राध्नुवन्ति” इति श्रूयते। तद्वदध्यापनेऽपि—“याजने प्रतिग्रहवज्जीविकारूपे दददेवाऽध्याप्यः। प्रतिगृह्णतैवाध्याप्यम्” इति धर्मः। अत्र भारतस्मृतिमप्याह—“यश्चाधर्मेण वै ब्रूयाद्यश्चाधर्मेण पृच्छति। तयोरन्यतरः प्रैति विद्वेषं चाधिगच्छति ।।” इति। अस्यार्थः—यो दक्षिणाया अग्रहणेनाधर्मेण ब्रूयादध्यापयेत्। यश्चाधर्मेण तस्या असमर्पणेन पृच्छत्यधीते

अन्यतरोऽदाताऽप्रतिग्रहीता वा प्रैति म्रियते। विद्वेषं चान्यतरोऽदानादप्रतिग्रहाद्वाऽधिगच्छति। मद्दत्तदक्षिणाया अग्रहे तवाधर्मः स्यान्मम च त्वयि द्वेषः स्यादहमनेन कृतार्थो न कृत इति भावः॥ ततश्च कौतुकविशेषार्थं कला अभ्युपदिदेशेत्याह—अहोरात्रैरिति। यावतीः कलाः सञ्जगृहतुरिति-चतुःषष्टिकलासंग्रहे एतावन्त्यहोरात्राणि। एवमखिलवेदादिसंग्रहणेऽप्यहोरात्राणि ज्ञेयानि। कलानां नामानि तु तैरेव लिखितानि। केचित्तु कलाः कल्पसंहितोक्ताः सुधियामेव प्रत्येकमहोरात्रशिक्षणार्हाः क्षुद्रासिद्धिरूपाः परचित्ताद्यभिज्ञतादूरश्रवणदर्शनचिंतारत्नामूर्तविशेषनिर्माणाद्या अन्या एवाहुः। यद्वा-तत्सर्वं कलाश्चाहोरात्रचतुःषष्ट्या संजगृहतुरित्यन्वयः। तथा च विष्णुपुराणे—"सरहस्यं धनुर्वेदं ससंग्रहमधीयताम्। अहोरात्रचतुःषष्ट्या तदद्भुतमभूद्द्विज॥" इति। श्रीहरिवंशे च—"तौ च श्रुतिधरौ वीरौ यथावत्प्रतिपद्यताम्। अहोरात्रैश्चतुःषष्ट्या सांगवेदमधीयताम्॥" इति। छदयामासतुः कामप्यभीप्सितां दक्षिणां गृह्णात्विरयुक्त्वा तत्प्राप्तीच्छां कारयामासतुरित्यर्थः। 'अभिप्रायवशौ छंदौ' इत्यमरः॥३६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

शुद्धेन भावेन भक्त्या या अनुवृत्तयस्ताभिः। तद्विशेषश्चाग्रे श्रीदामविप्रोपाख्याने श्रीभगवन्मुखादेव व्यक्तो भावी। अत एवात्र स्वयं वादरायणिना न प्रपञ्चित इति ज्ञेयम्॥ ३३॥ सरहस्यमिति सार्द्धद्वयकम् अखिलान् चतुरोऽपीत्यर्थः। एतदुपदेशश्च शब्दमात्रतः। तदर्थज्ञानं मीमांसोपदेशेनैव भविष्यतीति तदनन्तरं तत्पाठशुद्ध्यर्थमावश्यकत्वादर्थसहितान्येवाङ्गानि तानि चोक्तानि। "शिक्षा व्याकरणं कल्पो ज्योतिषं छन्द एव च। निरुक्तञ्च निरुक्तानि षडङ्गानि मनीषिभि"रिति। ज्योऽतिषोङ्गत्वं तदर्थकालादिशुद्ध्यपेक्षणात्। अङ्गानन्तरं रहस्यत्वेनानुपदिष्टचरीरुपनिषदः एताश्च पूर्ववत् प्रथमतः शब्दत एव ततश्च क्षत्रियजातावश्यकत्वाद्धनुर्वेद एतदादीन्यर्थतोऽपि ज्ञेयानि। ततश्च तत्तत्सर्वं विद्योपकारकत्वेनापेक्ष्याण्येव धर्मशास्त्राणि। ततश्च वैशिष्ट्यघनार्थं न्यायपथान् तत्तद्वेदार्थनिर्णायकान् जैमिनिकपिलपतञ्जलिवादरायणरचितान् पूर्वमीमांसादीन् शब्दानुगतयुक्तिग्रन्थान्। ततश्च बाह्यवादिनिरासार्थं स्वतन्त्र युक्तिमयीमान्वीक्षिकीमपि एवं ज्ञातायां राजत्वयोग्यतायां राजनीतिमित्येवं क्रम एव सिद्ध्यति॥ ३४-३५॥ ततश्च कौतुकविशेषार्थं कला अभ्युपदिदेश इत्याह। अहोरात्रैरिति। यावतीः कलाः सञ्जगृहतुरिति चतुःषष्टिकलाः संगृहे एतावन्त्यहोरात्राणि अखिलवेदादिसङ्ग्रहेणाप्यहोरात्राणि ज्ञेयानि। कलानां नामानि तैरेव लिखितानि स्वरूपाणि तु लेख्यानि। तत्र गीतं गानशिक्षा गीतनिर्माणं स्वजातिरोगभेदाः तालमात्रादिरचनाप्रकाराः साधकबाधकस्वरादिमेलनानां परिज्ञानञ्च १ अथ वाद्यं चतुर्विधं तत्रापि शिक्षादयः पूर्ववज्ज्ञेयाः एवमुत्तरत्रापि २ नृत्यं सामान्यम् ३ नाट्यं रूपकमयं ४ आलेख्यं चित्रकर्म ५ विशेषकच्छेद्यं तिलकेषु नाना विच्छेदरचना ६ तण्डुलादिबलिविकारास्तण्डुलानां कुसुमानाञ्च पूजोपहाररूपाणां विकारा नानाप्रकाररचना ७ पुष्पास्तरण पुष्पादिभिः शय्या रचनं ८ द॰ नवसनाङ्गरागास्तेषां तेषाञ्च रञ्जनभेदाः ९ मणिभूमिकाकर्मयनिर्मितपाण्डवसभावन्मणिवद्धभूमिक्रिया १० शयनरचनं पर्यङ्कादिनिर्माणम् ११ उदकवाद्यं सरोवरादिस्थापितभाण्डे उदकपूरितपात्रे वा मधुरनानातानसमुत्थापनं १२ उदकघातः जलस्तम्भविद्या १३ चित्रा योगाः नानाद्भुतदर्शने सम्यगुपायाः १४ माल्येत्यादि सप्तकं सुगमं १५-२१ कौचुमारयोगः कुचुमारनाम्ना प्रकाशिता स्वस्मिन्नानारूपा व्यञ्जना २२ हस्तलाघव चमत्कारलम्भनार्थमलक्षितेन हस्तसञ्चारेण तत्तद्वस्तुप्रवर्त्तनं २३ चित्रेऽति द्वयं चित्रमत्र नानाप्रकारं २४ पानकरसरागः पानकेषु रसस्य रागस्य च नानानिर्माणमित्यर्थः। तद्वदासवयोजनञ्चेत्यर्थः। २५ सूचीति सुगमं सूत्रक्रीडादि सूत्रसञ्चालनेन पुत्तलिकादिचालनं २७ प्रहेलिका अपह्नुतवागर्थपरिज्ञानं २८ प्रतिमाला सर्ववस्तु प्रतिकृति निर्माणं २९ दुर्वचयोगाः यद्यद्वक्तुं न शक्यते तत्तद्वक्तुमुपायाः ३० पुस्तकवाचनम अतिशीघ्रमविद्यमानानपि वर्णान् योजयित्वा यद्वाचनं ३१ नाटकाख्यायिकादर्शनं तत्तच्छास्त्राणां परिज्ञान निर्माणञ्च ३२ काव्यसमस्यापूरणं काव्येषु गुप्तपदस्य समस्यायाः सङ्क्षेपेणोक्तस्य सहसा पूरयितुमशक्यस्य श्लोकांशस्यांशान्तरेण पूरणं ३३ पट्टिकावेत्रवाणविकल्पाः सूत्रोप्त चिपिटाकारस्य बन्धनादिसाधनस्य कलाया वाणस्य च कल्पनाः ३४ तर्कुम मर्माणि सूत्रनिर्माणसाधनलौहशलाकया साध्यानि विविधसूत्रकल्पानि ३५ तक्षणं तक्ष्णां कर्म ३६ वास्तुविद्या गृहोचितभूम्यादीनां तन्निर्माणभेदानाञ्च ज्ञानं ३७ रूप्यरत्नपरीक्षा रूप्यादीनां रत्नानां सदसत्ताज्ञानं ३८ धातुवादः स्वर्णादिकल्पनं ३९ मणिरागज्ञानं मणिषु रागनिर्माणज्ञानं ४० आकरज्ञानं दर्शनादेव मण्वाद्युद्भवभूमिज्ञानं ४१ वृक्षेति त्रयं स्पष्टम् ४२-४४ उत्सादनं मन्त्रादिना परस्परासक्तित्याजनं ४५ केशेति स्पष्टम् ४६॥ अक्षरमुष्टिकाकथनम् अक्षराणामदृष्टानां तथा मुष्टिकास्थितवस्तूनाञ्च स्वरूपस्य सङ्ख्यायाश्च कथनं ४७ म्छेच्छि विकल्पाः। म्लेच्छविविधभाषाभरत शास्त्राणां ज्ञानं ४८ देशभाषाज्ञानमिति स्पष्टं ४९ पुष्पशकटिकानिमित्तज्ञानं पुष्पशकटौपाधिकायां कस्याञ्चिद्विद्यायां निमित्तस्य ज्ञानं ५० यन्त्रमातृकापूजार्थे मातृका वर्णैर्यन्त्रनिर्माण ५१ सैव धारणार्था चेद्धारणमातृका ५२ सम्पाट्यम् अभेद्यस्यापि हीरकादेर्द्वधीकरणं ५३ मानसीकाव्यक्रिया परमनः स्थितस्यार्थस्य श्लाकनं ५४ क्रिणाविकल्पाः एकैकस्या क्रियाया विविधैरुपायैर्निष्पादनं ५५ छलितकयोगाः परवञ्चनोपायाः ५६ अभिधानेति सुगमं तत्राभिधानकोपयोर्नानार्थता पर्यायसमर्थता भेदाद्भेदः छन्दः तच्छास्त्रं एतानि च वेदाङ्गानि अन्यानि तत्तद्विपश्चिन्निबद्धानि ५७ वस्त्रगोपनानि तूलसूत्रमयादिवस्त्राणां पट्टवस्त्रादितया दर्शनप्रक्रिया ५८ द्यूतेति स्पष्टम् ५९ आकर्षक्रीडा दूरस्थान्यपि क्रीडाद्रव्याणि यत्राकृष्यन्ते स क्रीडाविशेषः ६० बालेति स्पष्टं ६१-६३ वैनायिकी वैजयिकी वैतानिकी चेति विद्यात्रयमुन्नेयं ६४

केचित्तु कलाः कल्पसंहितोक्ताः सुधियामेव प्रत्येकमेकाहोरात्रशिक्षणार्हाः क्षुद्रसिद्धिरूपाः परचित्तज्ञता दूरश्रवणदर्शनचिन्ता रत्नामृतविशेषनिर्माणाद्या अन्या एवाहुः यद्वा । तत्सर्वं कलाश्चाहोरात्रैश्चतुःषष्ट्या सञ्जगृहतुरित्यन्वयः । तथाच श्रीविष्णुपुराणे । "सहरस्यं धनुर्वेदं ससङ्ग्रहमधीयताम् । अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विजे"ति श्रीहरिवंशे च "तौ च श्रुतिधरौ वीरौ यथावत् प्रतिपद्यताम् । अहोरात्रैश्चतुःषष्ट्या साङ्गं वेदमधीयता"मितिछन्दयासतुः तदानिच्छुकमपीच्छां कारितवन्तौ ।। ३६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

शुद्धेन भावेन प्रेम्णा या अनुवृत्तयस्ताभिः, तद्विशेषश्चाग्रेऽशीतितमाध्याये श्रीदामानुग्रहे श्रीभगवन्मुखादेव व्यक्तो भावी; दुःसहत्वाञ्चात्र स्वयं श्रीवादरायणिना न प्रपञ्चित इति ज्ञेयम् । गुरुस्तत्तदध्यापकत्वेन प्रसिद्धः; यद्वा, आचार्य्यत्वेन स्वीकृतः, अतः प्रकर्षेण सस्नेहोत्तमप्रकारादिनोवाच, न चान्यशिष्यस्येवोपदिदेशेति क्षत्रियत्वेन तत्रापेक्षा-विशेषात् ।। ३३ ।।

तथा न्यायश्रौतपथगृहीताया अप्यान्वीक्षिक्याः पृथगुक्तिः प्रायः श्रौतत्वेन तर्कमात्रत्वात् ; अतएवोक्तम्—विद्यामिति, लोकरञ्जनाद्युपायमित्यर्थः । तथा द्वयम्, चकारौ च समुच्चये; तैश्च धर्म्मादीनां यथोत्तरं न्यूनत्वेऽपि सर्व्वेषामेव तेषां प्रवचने प्राधान्यं द्योत्यते । यद्वा, अप्यर्थे चकारौ; यथा धनुर्व्वेदं तथा धर्म्मादीनपि; इति धनुर्व्वेद बद्धर्म्मशास्त्रादिष्वपेक्षाराहित्येऽपि लोकशिक्षार्थं तेषामपि स्वीकारेण तथैवाध्ययनमभिप्रेतम् । अतएव चकारौ, तथा स्वयं च । तदखिलवेदादिकं सर्व्वं सकृदुच्चारणमात्रेणैव सम्यक् जगृहतुर्धृतवन्तौ । यतोऽमरश्रेष्ठौ सर्व्वदेवपूज्यावित्यर्थः । अतः सर्व्वविद्यानां प्रवर्त्तकौ सृष्टिस्थितिकरावित्यर्थः । यद्वा, सर्व्वविद्या प्रवर्त्तयन्तौ सन्तावित्यर्थः । इति संग्रहणप्रयोजनं पुनरप्युक्तम्, लोकशिक्षामात्रापेक्षयैव तत्र प्रवृत्तेः । हे नृपेति—अतिशीघ्रमश्रमेण तत्सर्व्वसंग्रहतो गुरुसेवादुःखसमाप्त्युपसक्तेश्च प्रहर्षादयात् ।। ३४-३५ ।। अहोरात्रैरिति रात्रिष्वपि तत्तदभ्यासः सूचितः । संयतौ गुरुसेवादिनियमपरावित्यर्थः । तावतीः कलाः संजगृहतुरिति चतुःषष्ठिकलासंग्रहे तावन्त्यहोरात्राण्यखिलवेदादि-संग्रहे चान्यान्यप्यहोरात्राणि, एवं मासकतिपयान् तत्रैवोषतुरिति ज्ञेयम् । वह्वहानीति वक्ष्यमाणत्वात् ; यद्वा, कतिदिनैः संजगृहतुरित्यपेक्षायामाह-अहोरात्रैरिति । केचित्तु कलाः कल्पसंहितोक्ताः सुधियामेव प्रत्येकमेकाहोरात्रशिक्षणार्हाः क्षुद्रसिद्धरूपाः परचित्तज्ञता दूरश्रवण-दर्शनचिन्ता, रत्नामृतविशेषनिर्म्माणाद्या अन्या एव कलाः प्राहुः । यद्वा, तत्सर्व्वं कलाश्चाहोरात्रैश्चतुः षष्ट्या सञ्जगृहतुरित्यन्वयः । तथा च श्रीविष्णुपुराणे (५।२१।२१)—'सरहस्यं धनुर्व्वेदं ससंग्रहमधीयताम् । अहोरात्रैश्चतुः षष्ट्या तदद्भुतमभूद्द्विज ।।" इति; श्रीहरिवंशे च (विष्णु० प० ३३। ;)—'तौ च श्रुतिधरौ वीरौ यथावत् प्रतिपद्यताम् । अहोरात्रैश्चतुःषष्ट्या सांगं वेदमधीयताम् ।।' इति छन्दयामासतुः, तदनिच्छुमपीच्छां कारितवन्तौ; अतएव विस्मयेन सन्बोधयति—नृपेति ।। ३६ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

न्यायपथान् मीमांसान्यायान् आन्वीक्षिकीं तर्कविद्यां षड्विधां सन्धिविग्रहयानासनद्वैधीभावसमाश्रयरूपाम् ३४-४६।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

शुद्धः भावो यासु ताभिरनुवृत्तिभिस्तुष्टो द्विजवरः गुरुरङ्गैः शिक्षाकल्पादिभिः षड्भिरुपनिषद्भिश्च सहितानखिलान्वेदांस्तयोः प्रोवाच ।। ३३ ।। तथा सरहस्य मन्त्रदेवताख्यानसहितं धनुर्वेदं धर्मन्यायपथान्मन्वादिधर्मशास्त्राणि मीमांसान्यायादींश्चान्वीक्षिकीं तर्कविद्यां षड्विधां सन्धिविग्रहयानासनद्वैधीभावसमाश्रयरूपां राजनीतिं च प्रोवाचेत्यन्वयः । ३४।। हे नृप ! सर्वमिति । तावमरश्रेष्ठौ परमपुरुषावत एव सर्वविद्याप्रवर्तकावत एव सकृन्निगदमात्रेणैव तद्गुरूपदिष्टं सर्वं जगृहतुः सम्यग्गृहीतवन्त। ।।३५।। कियता कालेन कति विद्याः सञ्जगृहतुरित्यत्राह । अहोरात्रैरिति । अहोरात्राणाञ्चतुः षष्ट्या चतुःषष्टिसंख्याकैर्दिवसैश्चतुःषष्टिविद्याः संजगृहतुरित्यन्वयः ततो हे नृप ! गुरुदक्षिणयेति हेत्वर्थे तृतीया गुरवे देयदक्षिणार्थमाचार्यं छन्दयामासतुरभीष्टं वरयेति प्रलोभयामासतुः ।। ३६ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अङ्गैः शिक्षादिभिः उपनिषद्भिः वेदान्तैस्तदुपयोगिभी रहस्यज्ञानैर्वा सहितान् ।। ३३ ।। सरहस्यं प्रयोगोपसंहारसहितं धर्मपथः वर्णाश्रमधर्मलक्षणः पूर्वमीमांसालक्षणो वा न्यायपथान् ब्रह्मतर्कादि तर्कशास्त्रलक्षणांश्च आन्वीक्षिकीं मीमांसाशास्त्रं वेदेतिहासाद्यर्थनिर्णायकम्—

सन्धिञ्च विग्रहञ्चैव यानमासनमेव च । द्वैधीभावं संश्रयञ्च षड्गुणान्कवयो विदुरिति ।।

षड्विधाम् ।। ३४ ।। सकृन्निगदमात्रेण एकवारं पाठमात्रेण ।। ३५ ।। चतुःषष्ट्या संख्यातैरहोरात्रैः कालावयवैस्तावतीः तावत्संख्याः कलाः चतुःषष्टिकला विद्या इत्यर्थः । संयत्तौ सम्यक् प्राप्तौ छन्दयामासतुः प्रार्थयामासतुः ।। ३६ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सरहस्यं मन्त्रदेवताज्ञानसहितं धर्मान् मन्वादिशास्त्राणि न्यायपथान् मीमांसादीन् आन्वीक्षिकीं तर्कविद्यां सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रय" इत्यमरोक्तां षड्विधां राजनीतिम् ।। ३४-३५ ।। तावतीश्चतुःषष्टिकलाः ताः शैवन्तत्रे द्रष्टव्याः छन्दयामासतुः कामप्यभीप्सितां दक्षिणां गृहाणेत्युक्त्वा तत्प्राप्तीच्छां कारयामासतुरित्यर्थः । अभिप्रायवशौ छन्दावित्यमरः ।।३६।।

गूढार्थदीपिनी

आन्वीक्षिकीं तर्कविद्याम् ।। ३४-३५ ।। चतुःषष्ट्या संख्यातैः अहोरात्रै तावती कलोः संजगृहतुरिति पूर्वेणान्वेति । दक्षिणया दक्षिणार्थम् छन्दयामासतुः प्रार्थयामासतुः ।। ३६ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदोपः

गुरुरपि शुद्धो भावो यासु ताभिरनुवृत्तिभिः तुष्टः अङ्गैः "छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृत"मिति षड्भिः उपनिषद्भिश्च सहितान् ।।३३।। सरहस्यं मन्त्रदेवताज्ञानसहितं धर्मान् मन्वादिधर्मशास्त्राणि न्यायपथान् मीमांशादीन् आन्वीक्षिकीं तर्कविद्यां षड्विधां सन्धिविग्रहयानासनद्वैधीभावसमाश्रयरूपां राजनीतिं प्रोवाचेत्यनुषङ्गः ।।३४।। हे नृप ! तावपि सकृन्निगदमात्रेण एकदैवोच्चारणमात्रेण जगृहतुः ।३५। अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः संयत्तौ रामकृष्णौ चतुःषष्टिसंख्याकैरहोरात्रैस्तावतीः चतुःषष्टिः कला विद्याः सञ्जगृहतुरित्यन्वयः । ताश्चोक्ता विद्यासङ्ग्रहनिबन्धे—

मुक्तिविद्या समाख्याता पराऽनेककला यथा । मुमुक्षूणां हिता श्रेष्ठा परमार्थप्रदायिनी ।।
भक्तिविद्या तथा चात्र बुभूक्षुणां हिता मता । भोगेच्छुस्तामनाश्रित्य किञ्चिरिष्यति बालिशः ।।
तत्र षष्टिकलास्तास्तु ह्युद्देशेन वदाम्यहम् । सन्ति विद्याकलास्तिस्रो गान्धर्वेषु प्रतिष्ठिताः ।।
उत्तमा गीतसंज्ञास्ति १ वाद्यसञ्ज्ञास्तु मध्यमा २ । नृत्याख्या तु कनिष्ठास्ति ३ गृहीता नारदादिभिः ।।
नाट्यविद्या ततो भिन्ना वा गृहीता शिवादिभिः ४। आलेख्याख्या कला ज्ञेया त्रिलोकीर्लिखिता यया ।। ५ ।।
ज्ञेया विशेषकच्छेद्यविद्या यस्यां विशेषतः । छेद्यते ६ ऽन्या कला यत्र तण्डुलादिर्बालिक्रिया ।। ७ ।।
पुष्पास्तरणसंज्ञान्या ८ दशनद्यङ्गरञ्जना ७ । गणिभूमिक्रियाख्या च १० शतनरचनात्मिका ।। ११ ।।
ज्ञेया चोदकवाद्याख्या १२ अन्या चोदकघातकः १३ । चित्रयोमसमाख्या च कला ज्ञेया बुभुक्षुभिः ।। १४ ।।
माल्यग्रथनभेदाख्या १५ शेखरापीडयोजना १६ । नेपथ्यकक्रियाख्या च कला ज्ञेया सुबुद्धिभिः ।। १७ ।।
या कर्णपत्रभङ्गाख्या १८ युक्तिर्यान्या सुगन्धिया १९ । भूषणयोजनाख्या च २० ह्यैन्द्रजालक्रिया तथा।। २१ ।।
कौचुमारक्रिया चापि २२ हस्तलाघवसंज्ञिका २३ । चित्रशाकस्वपूपादिविकारजननक्रिया ।। २४ ।।
रसानामासवस्यापि पानके योजना तथा २५ । सूचीक्रिया २६ तथा सूत्रक्रीडाख्या च कलापरा ।। २७ ।।
प्रहेलिका कला ज्ञेया २८ प्रतिमाला कला तथा २९। या दुर्वाचकयोगाख्या कलान्या परिकीर्तिता ।। ३० ।।
पुस्तकवाचनाख्या च ३१ नाटकाख्यायिका गतिः ३२। ज्ञेया काव्यसमस्यासु पूरणाख्या कलापरा ।। ३३ ।।
पट्टिकावेत्रवाणादिविकलाख्या तथापरा ३४ । तर्ककर्मसमाख्या च ३५ तक्षणाख्या परा मता ।। ३६ ।।
वास्तुविद्या च ३७ रूप्यादिपरीक्षाख्यकलापरा ३८। ज्ञेया च धातुवादाख्या ३९ मणिरागाद्यभिज्ञता ।। ४० ।।
आकरज्ञानसंज्ञान्या कला प्रोक्ता मनीषिभिः ४१ । वृक्षायुर्वेदयोगाख्या कला चात्र प्रकीर्तिता ।। ४२ ।।
मेषादियुद्धयुक्तिश्च ज्ञातव्या कलहप्रियैः ४३ । या शुकसारिकादीनां प्रलापनक्रिया कला ।। ४४ ।।
उत्सादनक्रिया चापि ४५ केशानां मार्जनक्रिया ४६। अक्षरमुष्टिकाप्रोक्तिः कला ज्ञेया विवेकिभिः ।। ४७ ।।
म्लेच्छिततर्कभेदाख्या ४८ देशभाषा विधारणा ४९। पुष्पशकटिकाहेतुबोधाख्या च कलापरा ।। ५० ।।
यन्त्रमातृकया साकं ज्ञेया धारणमातृका ५१। सम्पाट्याख्या कलाचान्या ५२ मानसी काव्यसुक्रिया ।। ५३ ।।
अभिधानकोशविद्या च ५४ तथा छन्दोऽवधारणा ५५। क्रियाविकल्पसंज्ञान्या ज्ञेया च सूक्ष्मबुद्धिभिः ।।५६।।
या छलितकयोगाख्या ५७ वस्त्रगोपनसंज्ञिका ५८। द्यूतविशेषविद्या च ५९ कर्षक्रीडा कलापरा ।। ६० ।।
बालक्रीडनकाख्या च ६१ विद्या वैनायकापरा ६२। विद्या वैजयिकाख्या च ६३ ज्ञेया वैतालिकापरा ।। ६४ ।।
इति चतुःषष्टिकलाः आचार्यं गुरुदक्षिणया छन्दयामासतुरुपलोभितवन्तौ ।। ३६ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शुद्धाभावानुवृत्तिभिः शुद्धभावाः शुद्धभक्तिपूर्विका अनुवृत्तयः परिचर्यास्ताभिस्तुष्टो गुरुर्द्विजस्तयोरखिलान्वेदान्प्रोवाच साङ्गोपनिषदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमित्यङ्गैः सहिता उपनिषदः ।। ३३ ।। प्रयोगोपसंहाररूपरहस्य-

सहितं धनुर्वेदं धर्मपथो वर्णाश्रमाचाररूपो न्यायपथो नीतिमार्गास्तानान्वीक्षकीं तत्त्वविद्यां। आन्वीक्षकी कुतर्काख्या तथैवान्वीक्षकी परेति मात्स्य इति प्रथमतात्पर्योक्तेरत्र तत्त्वविद्येत्यर्थः। षड्विधां राजनीतिं सन्धिं च विग्रहं चैव यानयासनमेव च। द्वैधीभावं संश्रयं च षड्गुणान्कवयो विदुरित्युक्तप्रकारोपेतोममरश्रेष्ठौ सर्वविद्याप्रवर्तकौ तौ सर्वं सान्दीपन्युद्दीपितं सकृन्निगद एव निगदमात्र तेनैकवारमुक्ति एव सञ्जगृहतुः ।। ३५ ।। चतुःषष्ट्या । वैशिष्ट्य तृतीयार्थः। तत्सङ्ख्यापरिच्छेद्यैतावद्भिरहोरात्रैः कलावयवैस्तावतीर्विद्याः कलाः काश्चिदत्रोक्ताः काश्चिववेदविद्यां नक्षत्रविद्यां सर्पविद्यामित्यादिनोक्ताश्चेति तावतीः। गीतादिविद्यानां ज्ञानमित्यन्तशैवतन्त्रगीताः कला इत्यपरे। संयातौ प्राप्तौ। आचार्यं गुरुदक्षिणया छन्दयामासुः। वरय गुरोः का च दक्षिणापेक्षिता तामिति प्रार्थयामासतुः। अन्यथा न फलनं विद्यानामिति भावः ।। ३६ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो गुरुकर्तव्यमाह । तयोरिति द्वस्भ्याम् । स हि द्विजवरः ब्राह्मणश्रेष्ठः सर्वधर्मप्रवर्तकः प्रथमतस्तत्स्वरूपमज्ञात्वापि तयोरनुवृत्तिमेव दृष्ट्वा सन्तुष्टो जातः तत्रापि शुद्धेन भावेन सहिता अनुवृत्तिः अत्र भावशुद्धिः अलोलुपत्वादिः प्रसादातिरिक्तकामनाभावश्च ततो विद्यार्थमागताविति आदौ सर्वानेव वेदान् प्रोवाच चत्वारो वेदा बहुशाखावितताः ततोऽङ्गानि षट् उपनिषदश्च ब्रह्मप्रतिपादिकाः यतो गुरुरुपदेष्टा नत्वीश्वरः ।। ३३ ।। अन्या अपि विद्या उक्ता इत्याह । सरहस्यमिति । सरहस्यं मन्त्रसहितं धनुर्वेदं पाठितवान् क्षत्रियाणामिदं दृष्टोपयोगि उपवेदेषु नान्ये धर्मान् धर्मशास्त्रं न्यायपथान् न्यायमार्गान् सामादीन् आन्वीक्षिकीं आत्मविद्या सांख्ययोगादिरूपा राजनीतिरन्या सा षाड्विधा सन्धिविग्रहयानासनद्वैधीभावसंश्रयाख्या ।। ३४ ।। एतावतीं विद्यां कियता कालेन पठितवन्तावित्याह । सर्वं नरवरश्रेष्ठाविति । यावद्गुरुणा उक्तं तावत्सकृन्निगदमात्रेणैव एकवारश्रवणेन सञ्जगृहतुः सम्यक् गृहीतवन्तौ यावता कालेनाध्ययनादिपरिपालनेन गुरुस्तावतीं विद्यामुच्चारितवान तावता कालेन गृहीतवन्तौ नृपेति सावधानार्थं सम्बोधनम् ।। ३५ ।। किञ्च कौतुकविद्या अपि कलारूपाः पठितवन्तावित्याह । अहोरात्रैरिति । चतुःषष्टिसंख्यायुक्तैः अहोरात्रैः संयत्तौ तावतीः कलाः चतुःषष्टिकलाः सञ्जगृहतुरिति सम्बन्धः। एकस्यां कलायां बहुप्रकाराः बहवो ग्रन्थाः शिक्षा च महती तथाप्येका कला एकस्मिन्नेव दिवसे शिक्षिता । ताः कलाः शैवतन्त्रोक्ता लिख्यन्ते गीतं वाद्यं नृत्यं आलेख्यविशेषकच्छेद्य तण्डुलकुसुमबलिविकाराः पुष्पास्तरणं दशनवसनाङ्गरागाः मणिभूमिकाकर्म शयनरचनम् उदकवाद्यम् उदकाघातः चित्रायोगाः माल्यग्रन्थनविकल्पाः शेखरापीठयोजनं नेपथ्ययोगाः कर्णपत्रभङ्गा गन्धयुक्तिः भूषणयोजनम् ऐन्द्रजालानि कौचुमारयोगाः हस्तलाघवं चित्रशाकापूपाश्चेति भक्ष्यविकारक्रियापानकरसरागासवयोजनं सूचीवानकर्म सूत्रक्रीडावीणाडमरुकवाद्यानि प्रहेलिका प्रतिमाला दुर्वाचकयोगाः पुस्तकवाचनं नाटकाख्यायिकादर्शनं काव्यसमस्यापूरणं पत्रिकाचित्रवाचनविकल्पाः तक्षकर्माणि तक्षणं वास्तुविद्या रूप्यरत्नपरीक्षा धातुवादः मणिरागज्ञानम् आकारज्ञानं वृक्षायुर्वेदयोगाः मेषकुक्कुटलवकयुद्धविधिः शुकसारिकाप्रलापनम् उत्सादनं केशमार्जनकौशलम् अक्षरमुष्टिकाकथनं म्लेच्छितकविकल्पाः देशभाषाज्ञानं पुष्पशकटिकानिमित्तज्ञानं यन्त्रमातृकाः धारणमातृकाः सम्पाट्यं मानसीकाव्यक्रिया अभिधानकोशः छन्दोज्ञानं क्रियाविकल्पाः एताश्चतुःषष्टिकलाः तत्र गीते गानशिक्षा गीतकारणं रागभेदाः तानमात्रादिरचनाप्रकाराः साधकबाधकतानानां परिज्ञानं च एवमेकस्य गीतस्य तथैव वाद्ये चतुर्विधवादनसामर्थ्यं ज्ञानं तदाधाररचनं तद्भेदानां कारणज्ञानं साधकबाधकज्ञानं च पञ्चप्रकाराः सर्वत्र नृत्यमभिनयमात्रं नाट्यं ग्रन्थरूपम् आलेख्यं चित्रकर्म तत्र ये विशेषाः के कुत्सिताः भ्रामकाश्च सर्वे कप्रत्ययेन सङ्गृहीताः तेषां छेद्यं यथा छेदनप्रकारेण छिन्ने वैचित्री भवति तथा चणकाद्विदलेहस्तिशतलेखनं तण्डुलानां कुसुमानां च आरात्रिकाकारेण बलिविकाराः पूजायां वा स्थापनप्रकाराः पुष्पास्तरणं स्पष्टं शय्यादौ दशनवसनानां रागभेदाः अधरोष्ठयोः लक्षणपरिज्ञानं रसार्थमेषा परीक्षा मणिभूमिकाकर्म यथा मणयो यत्र यादृशाः अपेक्ष्यन्ते तत्र यादृशी भूमिः तत्क्रिया शयनं शय्यास्थानं तस्य रचनमुदकवाद्यं यथा स्वतएवोदके नादाः स्पष्टा भवन्ति उदकाघातः उदकस्याघातः यथा आहतमुदकमुपरिगच्छति अधोगच्छति विपरीतं च गच्छति चित्रायोगाः विचित्राः प्रकाराः सर्वत्र माल्यानां पुष्पाणां रचने विविधाः प्रकाराः शेखरस्य शिरसः केशबन्धस्य आपीडयोजनं केशादीनां पुष्पाणां मुकुटस्य वा योजनप्रकाराः नेपथ्ययोगाः नटशालादिनिर्माणप्रकाराः कर्णपत्राणां कर्णाभरणपत्राणां भङ्गा अनेके भेदाः गन्धयुक्तिः गन्धयुक्तिश्चन्दनादेः पुष्पवस्त्राद्याकारेण निर्माणं नाना सुगन्धनिर्माणं वा भूषणानां योजप्रकाराः ऐन्द्रजालाः मायादर्शनप्रकाराः यासु मायासु कल्पिकायुक्तिर्न सम्भवति विंशतिभेदा एते कौचुमारयोगाः बहुरूपप्रकाराः हस्तलाघवं स्पष्टं चित्रं शाकपूपाश्चेति प्रायेण स्थौल्यसङ्कोचौ भक्ष्यविकाराणां क्रिया पानकानां ये रसाः रागाश्च तेषामासावता मादकता भावप्रधानो निर्देशः पानकानां रसानाम् आसवानां रागाणां सूचीवानकर्म सूच्या वानं सीवनमिव परिवयनं तत्र नानाप्रकाराः योजनप्रकारा वा सूत्रक्रीडा सूत्रैर्नानाविधा क्रीडा यथा भ्रमरादि भ्रामणं सूत्रोपरि चलनं च बन्धनप्रकारो वा वीणाडमरुकवाद्यानां वादनप्रकाराः प्रहेलिका कूटवाक्यानां परिज्ञानं प्रतिमाला वस्तूनामनुकरण दुर्वाचकयोगाः चतुरक्षरादिप्रकारा पुस्तकवाचनमतिशीघ्रमविद्यमानानपि वर्णान् योजयित्वा वाचनं नाटकाख्यायिकादर्शनं दीप्यव्यवधायक पेटे नाटकाख्यायिकाया नाटकस्थितकथायाः प्रदर्शनं वस्त्रादिनिर्माणे वा नाटकस्थ कथायाः प्रदर्शनं काव्यं अविद्यमाने पदे तस्यैव पदस्य पूरणं कविकर्मानुसारेण वा समस्या पूरणं पत्रिका-

चित्रवाचनविकल्पाः नानाविधाः पत्रिकाः व्यस्तसमस्तमेषयुद्धादिप्रकाराः तत्र विविधाः कल्पाः तर्ककर्माणि तर्केणैव सर्वपदार्थज्ञानं कृतिश्च तक्षणं चन्द्रावर्त्तादिप्रकारेण शिल्पभेदाः वास्तुनिर्माणं वास्तुविद्यागृहनिर्माणप्रकाराः रूप्यरत्नपरीक्षा रूप्याणां रत्नानां च परीक्षा इति विंशतिः धातुवादः प्रसिद्धः मणिरागज्ञानं मणिषु रागनिर्माणज्ञानम् आकरज्ञानं राशिं दृष्ट्वैव एतावदस्तीति । वृक्षाणामायुर्वेदयोगाः वृक्षाणां जीवनप्रकाराः फलेः निर्बीजकरणं वृक्षान्तरात्फलोत्पादनमित्यादि मेषाणां कुक्कुटानां लावकानां युद्धप्रकाराः शुकसारिकादीनामशिक्षितानामपि प्रकर्षोलापप्रकारः उत्सानं यस्य कस्य चिद्युद्वेगोत्पादनेनान्यत्र गमनप्रकारः केशमार्ज्जनं कौशलं स्पष्टमक्षरमुष्टिका कथनम् अक्षराणां परदृष्टानां मुष्टिकादीनां च मुष्टिकास्थितपदार्थानां कथनं म्लेच्छितकलिकल्पाः म्लेच्छितकल्पाः कलिकल्पाश्च यथा शत्रुर्म्लेच्छितो भवति सवः सह कलिं च करोति तथोपायाः देशभाषाज्ञानं सर्वदेशेषु भाषापरिज्ञानं पुष्पशकटिकापुष्पैरेव शकटविमादि रचनाप्रकारः निमित्तज्ञानं काकादिभिरन्यैर्वा भाव्यर्थपरिज्ञानं यन्त्रमातृका प्रतिमादिचालनभाषणादिप्रकाराः करपल्लवीवाधारणामातृका वस्त्रादिपदार्थधारण एव आदिमध्यान्तवर्णभेदमातृकावर्णपरिज्ञानं भवति सम्पाट्यमभेद्यस्यापि हीरकादेर्द्वैधीकरणप्रकारः मानसी काव्यक्रिया मानसिकसमस्यापूरणमभिधानकोशः अन्योच्चारितानां सर्वेषामेव पदानां क्रमेण पुनरुच्चारणसामर्थ्यं पुरुषं दृष्ट्वैव तस्य छन्दोज्ञानमयमेवं वृत्त इति । कामिन्यादीनां मनोज्ञानं वा क्रियाविकल्पाः सर्ववस्तुषु या प्रक्रिया पूर्वसिद्धा तामनादृत्य अन्यैरेव प्रकारैस्तन्निर्माणं विंशतिः कामादिसान्त्वनं उद्बुद्धानां शमनं तदुद्बोधः शत्रुमित्रकरणं सर्ववस्तूनामन्यथाकरणं प्रतिभानेन च तत्र उक्ताः पूर्वोक्तेषु वा अवान्तरभेदाः क्वचिद्ग्राह्याः ततो गुरवे तु वरं दत्त्वेति श्रुतेः । गुरुदक्षिणादेयेति दक्षिणार्थं मनस्यभीष्टा दक्षिणा ग्राह्येति छन्दयामासतुः स्वाच्छन्द्यं सम्पादयामासतुः विद्यासमाप्त्यनन्तरं या दक्षिणा गुरवे दीयते तथा कृत्वा स्वाच्छन्द्यम् "उपनीय तु यः शिष्य वेदमध्यापयेद्द्विजः । सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षते" इति । यद्यप्युभौ वरद्वयं न दास्यतस्तथापि उभयोः कर्तव्यमिति स्वच्छन्ददानं निरूप्यते । नृपेति । तादृशा राज्ञः स्थाने समागत्य कृतार्थो भवन्तीति अनुभवार्थं गुरुस्तु बहूनेवाध्यापयामास नैवं विधौ कदाचित् दृष्टौ अत एताभ्यामलौकिकमपि दातुं शक्यत इति निश्चयं कृतवान् पत्नी च कदाचिद्गां दुहन्ती दोहनपात्रं विस्मृत्य सन्ध्यावन्दनार्थं नियमेनोपविष्टं भगवन्तं प्रार्थितवती तदा भगवान्नियमोल्लङ्घने गुरुपत्नीवाक्योल्लङ्घने च दोषं दृष्ट्वा उपविश्यैव हस्तं प्रसार्य दोहनपात्रं दत्तवान् तदा अनुत्थितं स्वनिकटे दोहनपात्रं च दृष्ट्वा विस्मिता आसीदिति पुराणान्तरप्रसिद्धिः ॥ ३६ ॥

श्रीसुबोधिनी–सारः

तयोः शुद्धभावानुवर्त्तनैर्द्विजवरः सांदीपनिगुरुस्तुष्टोऽखिलान्सर्वान् अङ्गैः शिक्षादिभिरुपनिषद्भिः सहितान् वेदान् प्रोवाच ॥ ३३ ॥ सरहस्यं मंत्रदेवताज्ञानसहितं धनुर्वेदं धर्मान् धर्मस्मृतीर्मन्वाद्युक्तान् मीमांसादीन् तथाऽऽन्वीक्षिकीं तर्कविद्यां षड्विधाम् "संधिर्विग्रहो यानमासनं द्वैधमाश्रयः" इति षट् प्रकारां राजनीतिमुवाच ॥ ३४ ॥ नरवरश्रेष्ठौ सर्वासां विद्यानां प्रवर्त्तकौ तौ रामकृष्णौ सकृत् एकवारं निगदमात्रेण कथनमात्रेणैव सर्वं संजगृहतुः हे नृप ॥ ३५ ॥ चतुःषष्ट्याऽहोरात्रैस्तावतीः कलाः संजगृहतुः संयत्तौ एकाग्रचित्तौ ताश्च शिवतन्त्रोक्ता वैष्णवतोषिण्यां सार्था लिखिताः हे नृप गुरुदक्षिणया गुरवे दक्षिणा गुर्वी महती वा दक्षिणेत्येके आचार्यं श्रीगुरुं छन्दयामासतुर्यथेच्छं व्रियतामित्युक्तवन्तौ ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

शुद्धः छलहीनो भावः स्नेहो यासु ताभिरनुवृत्तिभिः सेवाभिस्तयोस्तुष्टो द्विजवरो गुरुरङ्गैः "अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । धर्मशास्त्रं पुराणं च विद्याश्चैताश्चतुर्दश" "आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः । अर्थशास्त्रं चतुर्थं च विद्या ह्यष्टादशैव ताः" इति ॥ "छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्" इत्युक्तलक्षणैः षड्भिरुपनिषद्भिश्च ब्रह्मप्रतिपादकैः सहितान् निखिलान् ऋगादिवेदान् प्रोवाचेत्यन्वयः ॥३३॥ तथा सरहस्यं मन्त्रदेवताज्ञानसहितं धनुर्वेदम्, धर्मान् मन्वाद्युक्तधर्मशास्त्राणि, न्यायपथान् न्यायशास्त्राणि, आन्वीक्षिकीं आत्मविद्यां सांख्ययोगादिरूपाम्, षडिवधां सन्धिविग्रहयानासनद्वैधीभावसमाश्रयरूपां राजनीतिं च प्रोवाचेत्यन्वयः ॥ ३४ ॥ तयोर्विद्याग्रहणप्रकारमाह—सर्वमिति । हे नृप ! तौ रामकृष्णौ सकृदेकदा निगदमात्रेणैव तद्गुरूपदिष्टं सर्वं जगृहतुः सम्यग्गृहीतवन्तौ । तत्र हेतुमाह—सर्वविद्याप्रवर्तकाविति । तत्रापि हेतुमाह—नरवरेषु श्रेष्ठौ पुरुषोत्तमाविति ॥ ३५ ॥ संयतौ वशीकृतदेहेन्द्रियादिसङ्घातौ रामकृष्णौ चतुःषष्टिसङ्ख्यायुक्तैरहोरात्रैस्तावतीश्चतुःषष्टीः कला विद्याः सञ्जगृहतुरित्यन्वयः । ताश्च कलाः शैवतन्त्रोक्ता लिख्यन्ते—गीतं गानविद्या १, वाद्यं वादनविद्या २, नृत्यम् ३, नाट्यं गीतादि त्रयं मिलित्वा यत्तत् ४, आलेख्यं पुस्तकादिलेखनप्रकारः ५, विशेषकच्छेद्यं विशेषका भ्रामकास्तेषां छेद्यं खण्डनप्रकारः ६, तण्डुलकुसुमबलिविकाराः तण्डुलानां कुसुमानां च आरात्रिकाद्याकारेण रचनाप्रकाराः ७, पुष्पास्तरणं शय्यादौ ८, दशनवसनादिरागाः दशनादिरञ्जनप्रकाराः ९, मणिभूमिकाकर्म मणयो यथा शोभन्ते तादृशतद्भूमिरचनाप्रकारः १०, शयनरचनं स्पष्टम् ११, उदकवाद्यमुदकघातः यथा स्वत एवोदके नानाशब्दा भवन्ति तत्प्रकारः यथा आहतमुदकं उपरि गच्छति अधोगच्छति विपरीतं च गच्छति १२,

चित्रयोगाः चित्रलेखनप्रकाराः १३, माल्यग्रथनविकल्पाः माल्यानां पुष्पाणां रचने विविधाः प्रकाराः १४, शेखरापीडयोजनं शेखरस्य शिरसः केशबन्धस्य आपीडयोजनं पुष्पादिमुकुटरचनाप्रकारः १५, नेपथ्ययोगा नटशालादिनिर्माणप्रकाराः १६, कर्णपत्रभङ्गाः कर्णाभरणपत्राणां भङ्गा अनेकभेदाः १७, सुगन्धयुक्तिः नानाविधसुगन्धोत्पादनप्रकारः १८, भूषणयोजनम् १९, ऐन्द्रजालं मायाप्रदर्शनप्रकाराः २०, कौचुमारयोगाः स्वस्मिन्नानारूपव्यञ्जनप्रकाराः २१, हस्तलाघवं शैघ्र्ययुक्तेनालक्षितेन हस्तसञ्चारेण तत्तद्वस्तुपरिवर्तनम् २२, चित्रशाकापूपभक्ष्यविकारक्रियः २३, पानकरसरागासवयोजनं पानकेषु रसस्य रागस्य आसवस्य मादकत्वविशेषस्य निर्माणम् २४, सूचीवायकर्म सीवनम् २५, सूत्रक्रीडा सूत्रसञ्चारणेन पुत्तलिकादिचालनम् २६, वीणाडमरुकवाद्यानि वीणादिवाद्यानां रचनाप्रकारः २७, प्रहेलिका कूटवाक्यपरिज्ञानम् २८, प्रतिमाला सर्ववस्तुप्रतिनिधिनिर्माणम् २९, दुर्वाचकयोगाः यद्यद्वक्तुं न शक्यते तत्तद्वक्तुमुपायाः ३०, पुस्तकवाचनं अतिशीघ्रमविद्यमानानपि वर्णान् योजयित्वा पुस्तकवाचनम् ३१, नाटकाख्यायिकादर्शनं नाटकशास्त्रस्य कथानां परिज्ञानं निर्माणम् ३२, काव्यसमस्यापूरणं काव्ये अविद्यमानस्य सहसा पूरयितुमशक्यस्य पदस्य झटिति पूरणम् ३३, पट्टिकावेत्रबाणविकल्पाः पट्टिकादीनां विविधकल्पनाः ३४, तर्ककर्माणि तर्केणैव सर्वपदार्थानां ज्ञानं कृतिश्च ३५, तक्षणं तक्ष्णां कर्म ३६, वास्तुविद्या गृहनिर्माणप्रकारज्ञानम् ३७, रूप्यरत्नपरीक्षा ३८, धातुवादः स्वर्णादिधातूत्पादनोपायः ३९, मणिरागज्ञानं मणिषु रागनिर्माणज्ञानम् ४०, अकारज्ञानं मण्याद्युद्भवभूमिज्ञानम् ४१, वृक्षायुर्वेदयोगाः वृक्षाणां जीवनप्रकारः फले निर्बीजत्वकरणं वृक्षान्तरात्फलान्तरोत्पादनमित्यादि ४२, मेषकुक्कुटलावकयुद्धविधिः ४३, शुकसारिकाप्रलापनम् ४४, उत्सादनं मन्त्रादिना परस्य चित्तोद्वेगोत्पादनेन चासत्याऽऽजनप्रकारः ४५, केशमार्जनकौशलं ४६, अक्षरमुष्टिकाकथनं अक्षराणां वस्त्रादिना आच्छादितानामदृश्यानां तथा मुष्टिकास्थितवस्तुनां सङ्ख्यायाः स्वरूपस्य च कथनम् ४७, म्लेच्छितकलिविकल्पाः म्लेच्छितविकल्पाः कलिविकल्पाश्च यथा शत्रुर्म्लेच्छितो भवति सर्वैः सह कलिं च करोति तथोपायाः ४८, देशभाषाज्ञानम् ४९, पुष्पशकटिकानिमित्तज्ञानं पुष्पैरेव शकटविमानादिरचनाप्रकारः ५०, यन्त्रमातृकाधारणमातृका यन्त्रमातृका पूजनार्थं मातृकावर्णैर्यन्त्रनिर्माणं सैव धारणमातृका ५१, सम्पाद्यं अभेद्यस्यापि हीरकादेर्द्वैधीकरणम् ५२, मानसी काव्यक्रिया मानसस्थितस्यार्थस्य पूरणम् ५३, अभिधानकोशाः तत्तन्नामनिरूपकाः कोशाः प्रसिद्धाः ५४, छन्दोज्ञानं कामिन्यादीनामभिप्रायज्ञानम् ५५, क्रियाविकल्पाः येषां पदार्थानां लोके य उपायाः प्रसिद्धास्ताननादृत्याप्येकैकस्याः क्रियाया विविधैरुपायैर्निष्पादनप्रकाराः ५६, छलितकयोगाः परवञ्चनोपायाः ५७, वस्त्रगोपनानि तूलसूत्रमयादिवस्त्राणां पट्टवस्त्रादितया प्रदर्शनप्रक्रियाः ५८, द्यूतविशेषाः ५९, आकर्षक्रीडा दूरस्थान्यपि क्रीडाद्रव्याणि यत्राकृष्यन्ते स क्रीडाविशेषः ६०, बालक्रीडनकानि तद्रचनाप्रकाराः ६१, वैनायिकानां वैजयिकानां वैद्यासिकानां विद्यानां च ज्ञानमिति विद्यात्रयमिति चतुःषष्टिकलाः । ततो हे नृप ! गुरुदक्षिणया गुरवे देयदक्षिणार्थं आचार्यं तमेव गुरुं छन्दयामासतुः स्वाभीष्टं वरयेति प्रेरितवन्तौ ॥ ३६ ॥

अन्वितार्थप्रकाशिका

तयोरिति । शुद्धः छलहीनो भावः स्नेहो यासु ताभिरनुवृत्तिभिः सेवाभिस्तयोस्तुष्टो द्विजवरो गुरुरङ्गैः "शिक्षाकल्पो व्याकरणं छन्दो ज्योतिर्निरुक्तयः ।" इत्यङ्गानि एभिरुपनिषद्भिश्च ब्रह्मप्रतिपादकभागैः सहितान् निखिलान् ऋगादिवेदान् प्रोवाच ॥ ३३ ॥ सरहस्यमिति । क्षत्रियाणामावश्यकं सरहस्यं मन्त्रदेवताज्ञानसहितं धनुर्वेदं धर्मान् मन्वाद्युक्तधर्मशास्त्राणि न्यायपथान् मीमांसादिन्यायमार्गान् साङ्ख्ययोगादींश्च आन्वीक्षिकीं तर्कविद्यां सन्धिविग्रहयानासनद्वैधीभावसमाश्रयरूपां राजनीतिं च प्रोवाच ॥ ३४ ॥ सर्वमिति । हे नृप ! सर्वविद्याप्रवर्तकौ नरवरेषु श्रेष्ठौ तौ रामकृष्णौ सकृदेकदा निगदमात्रेण गुरोरुच्चारणमात्रेणेव तद्गुरूपदिष्टं सर्वं जगृहतुः सम्यग्गृहीतवन्तौ ॥ ३५ ॥ अहोरात्रैरिति अर्द्धम् । संयत्तौ वशीकृतचित्तौ रामकृष्णौ चतुःषष्टिसङ्ख्यायुक्तैरहोरात्रैस्तावतीश्चतुःषष्टिः कलासंज्ञा विद्याः संजगृहतुः । वेदादिग्रहणे एतदन्ये अहोरात्रा ज्ञेयाः । यद्वा पूर्वोक्तं सर्वं कलाश्च चतुःषष्ट्याहोरात्रैर्जगृहतुरित्यन्वयः । "सरहस्यधनुर्वेदं ससंग्रहमधीयताम् । अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विज ।" इति वैष्णवोक्तेः । "चतुःषष्टिः शैवतन्त्रात्कलाः स्वामिभिरुद्धृताः । स्फुटीक्रियन्ते क्रमतो बालानां बोधहेतवे । गानशिक्षा गायकत्वं तालरागस्वरज्ञता । स्वरादिमेलनमिति गीताख्या षड्विधा कला । १ । ततं वीणादिकं ज्ञेयमानद्धं मुरजादिकम् । वंशादिकं च सुषिरं कांस्यतालादिकं घनम् । वाद्यैष्वेतेषु वाद्याख्या गीतवत्षड्विधा कला । २ । अङ्गविक्षेपणं नृत्यं षोढा प्राग्वच्च तत्कला । ३ । नटक्रिया नाट्यकला नाटकाभिनयात्मिका । ४ । चित्राणां पुस्तकानां च लेख आलेख्यजा कला । ५ । विशेषकच्छेद्यकला स्तनादौ कुङ्कुमादिभिः । मत्स्याद्याकाररचना तिलकस्य विधिस्तथा । ६ । पूजाप्रकारादिकला कुसुमैस्तण्डुलादिभिः । शय्यादे रचना पुष्पादिभिरास्तरणे कला । ८ । दशने वसनेऽङ्गे च रञ्जनं रागजा कला । ९ । पाण्डवादिसभातुल्यमणिभूरचना कला । १० । मञ्चकादिकनिर्माणं कला शयनकल्पना । ११ । जलस्तम्भो जले यानं जलवाद्यं च तत्कला । १२ । चित्रयोगकलानेकाद्भुतदर्शनवेदिता । १३ । पुष्पैर्हारादिरचना माल्यग्रथनजा कला । १४ । पुष्पादिभिः कला तद्वत् शेखरापीडयोजने । १५ । नेपथ्यस्य कला भूषा वस्त्राद्यैरंगसंस्कृतिः । १६ । कर्णादौ पत्रभङ्ग्यादिनिर्मितिस्तत्कला मता । १७ । सुगन्धियोजनकला पटवासादिषु स्मृता । १८ । भूषादियोजनकला स्वर्णकारक्रिया भवेत् । १९ । ऐन्द्रजालकला ख्याता मृदादेः स्वर्णतादिका ।२०।

कुचुमारर्षिकथिता कौचुमारकलाऽत्र तु । धारणं भूरिवेषाणां पटूनामपि मोहनम् ।२१। शरदौ वस्तुगुत्थादौ हस्तलाघवजा कला ।२२। सूदशास्त्रं चित्रशाकापूपभक्ष्यादिकृत्कला । २३ । पानकादिकला नानापेयमद्यादियोजनम् । २४ । स्यूतिर्बानं चित्रकृतिरित्यादिः सूचिजा कला । २५ । सूत्रक्रीडा कला सूत्रैः पुत्तल्यादिकचालनम् । २६ । वीणाडमरुवाद्यादिकला तद्यन्त्रनिर्मितिः । २७ । प्रहेलिका कला कूटवाक्यार्थज्ञानिता यथा । पानीयं पातुमिच्छामि त्वत्तः कमललोचने । यदि दास्यसि नेच्छामि नो दास्यसि पिबाम्यहम् । २८ । प्रतिमाला कला नानाप्रतिमानां विनिर्मितिः । छायया चित्रनिर्माणमपि केचित्प्रचक्षते । २९ । दुर्वञ्चककला दुष्टलोकानां वञ्चनं यया । उपाया दुर्वचं वक्तुमिति त्वन्ये प्रचक्षते ।३०। पुस्तकवाचनकला शीघ्रं पुस्तकवाचनम् । यद्वा दृष्ट्वा हस्तचेष्टां लिखतोऽक्षरवाचनम् । ३१ । नाटकाख्यायिकादीनां निर्माणं तत्कला मता । ३२ । समस्यापूरणकला श्लोकपादादिपूरणम् । यथा, शतचन्द्रं नभस्तलम् । तत्पूरणं, दामोदरकराघातविह्वलीकृतचेतसा । दृष्टं चाणूरमल्लेन शतचन्द्रं नभस्तलम् । ३३ । पट्टिकावेत्रबाणादिकला तद्रचना भवेत् । ३४ । तर्कुकर्मकला सूत्रैर्नानावस्त्रादिनिर्मितिः । ३५ । तक्षणस्य कला काष्ठादिभिः स्तम्भादिकल्पनम् । ३६ । वास्तुविद्याकला गेहप्रासादादिविनिर्मितिः । ३७ । सुवर्णरूप्यरत्नादेः परीक्षायाः कला स्फुटा । ३८ । धातुवादकला ख्याता ताम्रादेः स्वर्णकारिका । ३९ । मणिरागज्ञानकला रत्नरञ्जनकौशलम् । ४० । आकरस्य कला स्वर्णरत्नादिखनिभूज्ञता ।४१। वृक्षरक्षाचिकित्सादिर्वृक्षायुर्वेदजा कला । ४२ । मेषकुक्कुटलावादियुद्धरीतिस्तु तत्कला । ४३ । शुकसारिकयोः पाठकला तच्छिक्षणे विधिः । ४४ । उत्सादनकला शत्रोर्मन्त्रैरुच्चाटनाविधिः । उद्वर्त्तनं शरीरस्य संस्कारमपरे जगुः ।४५ स्यात्केशमार्जनकला रचना मार्जनादिका । ४६ । लुप्ताक्षराणां मुष्टिस्थवस्तूनां कथने कला । ४७ । म्लेच्छितादिकला तत्तद्भाषाशास्त्रेषु कौशलम् ।४८। देवभाषाकला तत्तद्देशभाषणकौशलम् । ४९ । कला पुष्पशकटव्याख्या सदसत्फलधीस्ततः । ५० । पूजायन्त्रादिनिर्माणं कला स्याद्यन्त्रमातृका । ५१ । मातृकासंवाच्यकला नानाभाषाविनिर्मितिः ॥ हीरकादेर्वेध्यस्य वेधादिरपि सा मता । ५२ । परचित्तार्थकविता कलामानसकाव्यजा । ५३ । कलाऽभिधानकोषस्य बहुकोशप्रवीणता । ५४ । छन्दोज्ञानकला नानाच्छन्दोविषयनैपुणम् ।५५। नानोपायैरेकवस्तु भूरीण्येकेन कर्मणा ॥ कुर्यात्क्रिया विकल्पाख्या सा कला भूरिपाटवा । ५६ । क्रिया छलितयोगाख्या चोरणावञ्चनादिका । ५७ । वस्त्रगुप्तिकला तूलवस्त्रादौ पट्टतादिका । ५८ । स्फुटा द्युतकला । ५९ । कर्षक्रीडा ख्यातुकला परा । यत्र दूरस्थवस्तूनामाकर्षैः क्रीडनं भवेत् । ६० । बालक्रीडाकला स्पष्टा क्रीडनं कन्दुकादिभिः । ६१ । वैनायिकी कला भूतचेटादेर्मन्त्रसाधनम् । ६२ । कला वैजयिकी यत्र वादादौ ज्ञायते जयः । ६३ । वैतालिकी कला सिद्ध्यै वेतालादेरुपासनम् । ६४ । इति स्वामीक्रमोद्दिष्टकलानामर्थवर्णनम् ॥” गुरु इत्यर्द्धम् ॥ हे नृप ! गुरुदक्षिणया गुरवे देयदक्षिणार्थम् आचार्यं तमेव गुरुं छन्दयामासतुः । स्वाभीष्टं वरयेति इच्छां कारितवन्तौ “अभिप्रायवशौ छन्दौ” इत्यमरः । छन्दशब्दात्तत्करोतीति णिच् । ततो हेतुमण्णिच् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शुद्धभावेन या अनुवृत्तयः अनुकूलवर्त्तनानि ताभिस्तुष्टो गुरुः अंगानि शिक्षाकल्पव्याकरणादीनि तैः उपनिषदः छान्दोग्यबृहदारण्यादयश्च तैः सहितान् वेदान् पाठयामास ॥ ३३ ॥ सरहस्यं शस्त्राऽस्त्रप्रयोगमन्त्रास्तन्मन्त्रोपास्य देवताश्च मंत्रजपकर्त्तव्यताप्रकाराश्च एतेषां ज्ञानं रहस्यं तत्सहितं धनुर्वेदं ॥ धर्मान् धर्मशास्त्राणि न्यायपथान् विविधमीमांसाशास्त्रविचरान् आन्वीक्षिकीं तर्कविद्यां षड्विधां राजनीतिं च तथा चोक्तं संधिश्चविग्रहो यानमासनं द्वैधमाश्रय इति षड्प्रकाराः ॥ ३४ ॥ सकृन्निगदमात्रेण एकवारगुरोः कथनमात्रेण ॥ ३५ ॥ चतुःषष्ट्या अहोरात्रैः चतुःषष्टिदिनैः सांगवेदादिभ्यः अन्याः तावतीः चतुःषष्टीः कलाः चातुर्याणि संयतौ सावधानौ संतौ संजग्नहतुरिति पूर्वेणान्वयः आचार्यं गुरुं दक्षिणयाच्छंदयामासतुर्लोभयामासतुः तोषणीसारे वैष्णवोक्तानि कलास्वरूपाण्याह गानशिक्षागायकत्वतालरागस्वरज्ञता स्वरादिमेलनर्मिति गीतं ज्ञेयं तु षड्विधं ॥ १ ॥ ततं वीणादिकं ज्ञेयमानद्धं मुरजादिकं वंशादिकं च स्तुषिरं कास्यतालादिकं घनं ॥ २ ॥ चतुर्विधमिदं वाद्यं ज्ञेया अत्रापि षड्विधा ॥ २ ॥ गीततालानुगं नृत्यं ॥ ३ ॥ नाटकाभिनयस्तथा ॥ ४ ॥ ३ । चित्रलेखक्रिया । ५ । नानातिलकेरचनाद्भुता । ६ । पूजाप्रकाररचना कुसुमैस्तंडुलैरपि ॥ ७ ॥ ४ ॥ पुष्पैः शय्यादिरचना चातुरीपल्लवादिभिः । ८ । दशनेंगे च वसनेनानारंजनचातुरी ॥ ९ ॥ ५ ॥ पांडवादिसभातुल्यमणिभूबंधनाक्रिया ॥ १० ॥ मंचकादिकनिर्माणं ॥ ११ ॥ जलेभांडादिवादनं ॥१२॥६॥ जलस्तंभो ॥ १३ ॥ नैकविधाद्भुतदर्शनवेदिता ॥ १४ ॥ मालाग्नथनकल्पश्च ॥ १५ ॥ शेखरापीडयोजनं ॥ १६ ॥ ७ ॥ नेपथ्ययोगा ॥ १७ ॥ कर्णादौ पत्रभंगीविनिर्मितिः ॥ १८ ॥ सुगंधीकरणं ॥ १९ ॥ भूषायोजनं ॥ २० ॥ चैंद्रजालकं ॥ २१ ॥ ८ ॥ धारणं बहुरूपाणां ॥ २२ ॥ क्रियायां हस्तचापलं ॥ २३ ॥ नानाभक्ष्यादिपाकाश्च ॥ २४ ॥ पानकासवयोः क्रिया ॥ २५ ॥ ९ ॥ सूचीक्रिया ॥ २६ ॥ सूत्रबद्धपुतलीनां विचापलनं ॥ २७ ॥ कूटवागर्थविज्ञानं ॥ २८ ॥ प्रतिमानां विनिर्मितिः ॥ २९ ॥ १० ॥ उपां या दुर्वचां वक्त ॥ ३० ॥ शीघ्रं पुस्तकवाचनं ॥ ३१ ॥ नाटकाख्यायिकादीनां निर्माणज्ञानतापि च ॥ ३२ ॥ ११ ॥ समस्यापूरणं काव्यं ॥ ३३ ॥ वेत्रबाणादिकल्पनाः ॥ ३४ ॥ नानासूत्रादिनिर्माणैस्तत्तद्वस्तुविकल्पनाः ॥ ३५ ॥ १२ ॥ तक्षणं ॥ ३६ ॥ वास्तु-

विद्या च ।। ३७ ।। रूप्यरत्नपरीक्षणं ।। ३८ ।। ताम्रादेर्हेमकरणं ।। ३९ ।। रत्नरंजनकौशलं ।।४०।।१३।। रत्नादिखनिभूज्ञानं ।।४१।। वृक्षायुर्योगवेदिता ।। ४२ ।। मेषादीनां युद्धविधिः ।। ४३ ।। शुकादीनांप्रलापनं ।। ४४ ।। १४ ।। शत्रोरुच्चाटनं मंत्रैः ।। ४५ ।। केशमार्जनकौशलं ।। ४६ ।। लुप्ताक्षराणां मुष्टिस्थवस्तूनां कथनं यथा ।। ४७ ।। १५ ।। म्लेच्छभाषा शास्त्रगतिः ।। ४८ ।। देशभाषासुवाग्मिता ।। ४९ ।। पुष्पशकटिकाद्याख्य क्षुद्रविद्या निमित्तधीः ।। ५० ।। १६ ।। निर्माणं मातृकावर्णैः पूजाधारणयंत्रयोः ।। ५१ ।। हीरकादेरभेद्यस्य द्वैधीकरणकौशलं ।। ५२ ।। १७ ।। परचित्तस्थितार्थस्य श्लोकनं ।। ५३ ।। बहुकौशधीः ।। ५४ ।। वेदांगसूत्रवद्धान्यच्छंदसां लक्षणादिधीः ।। ५५ ।। १८ ।। नानोपायैरेककर्मनिमितैः ।। ५६ ।। परवञ्चनं ।। ५७ ।। तूलसूत्रादिवस्त्राणां पदाद्वित्वप्रदर्शनं ।। ५८ ।। १९ ।। द्यूतविद्या ।।५९।। दूरवस्त्वाकृष्य क्रीडा च ।।६०।। शैशवी ।। ६१ ।। वैनायकी ।। ६२ ।। वैजयिकी ।।६३।। विद्यावैतालिकीति च ।। ६४ ।। २१ ।। इति चतुःषष्टिकलाः ।। ३६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तयोरिति ।। तयोः शुद्धो भावो यासु ताश्च ता अनुवृत्तयश्च ताभिः तुष्टः द्विजवरः गुरुः साङ्गोपनिषदः अङ्गैः शिक्षाकल्पादिभिः षड्भिः उपनिषद्भिश्च सहितान् अखिलान् वेदान् प्रोवाच ।।३३।। सरहस्यमिति । तथा सरहस्यं मन्त्रदेवताख्यानसहितं धनुर्वेदं तथा धर्मश्च न्यायश्च तयोः पन्थान इति धर्मन्यायपथास्तान् तत्र धर्मो धर्मशास्त्रैरुदितो वर्णाश्रमलक्षणः, न्यायः पूर्वमीमांसालक्षणः इति । धर्मान् न्यायपथांस्तथेत्यपि पाठः । तथा आन्वीक्षिकीं विद्यां च षड्विधां संधिविग्रहयानासनद्वैधीभावसमाश्रयरूपां राजनीतिं च प्रोवाचेत्यन्वयः ।।३४।। सर्वमिति । हे नृप, नरवरश्रेष्ठौ नरोत्तमोत्तमौ तौ सर्वविद्याप्रवर्तकौ अत एव सकृन्निगदमात्रेणैकवारं गुरोरुच्चारणमात्रेणैव सर्वं गुरूपदिष्टं सकलं संजगृहतुः सम्यक् गृहीतवन्तौ ।।३५।। क्रियता कालेन कति विद्याः संजगृहतुरित्यत्राह । अहोरात्रैरिति । चतुःषष्ट्या अहोरात्रैः अहोरात्रचतुःषष्ट्येति पाठे अहोरात्राणां चतुःषष्ट्या उभयथा पाठेऽपि चतुःषष्टिसंख्याकैर्दिवसैरित्यर्थः । तावतीः चतुःषष्टिसंख्याकाः कलाः उक्तविद्याभ्योऽन्या विद्याः यद्वा । कलाः शैवतन्त्रोक्ता गीतवाद्यनृत्यनाट्यालेख्याद्याः वैष्णवोक्तानि कालस्वरूपाणि तोषणीसारेऽपि' गानशिक्षागायकत्वतालरागस्वरज्ञता । स्वरादिमेलनमिति गीतं ज्ञेयं तु षड्विधम्' इत्यादिनोक्तानि । संयतौ सावधानौ जगृहतुरिति पूर्वश्लोकादनुषञ्जनीयम् । ततः हे नृप, आचार्यं गुरुदक्षिणया, हेत्वर्थे तृतीया । गुरवे देयदक्षिणार्थमित्यर्थः । छन्दयामासतुरभीष्टं वरयेति प्रलोभयांचक्रतुः ।। ३६ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सर्वमिति : १०.४५.३५.

यावान्विद्याकलानां प्रसर इह मयाऽकारि यादृग् जनेऽस्मिन्निर्व्याजस्तादृगेव व्यजनि किमुत स स्वैरवृत्त्याऽन्यथैव ।
इत्थं ज्ञातुं रमेशः श्रुतिनिगम-कला-सर्वतन्त्रस्वतन्त्रः प्राश्रौषीत्तन्मुखाब्जान्नहि यदि कृतवांल्लोकतुल्यं न कस्मात् ।।७१।।

अहोरात्रैरिति : १०.४५.३६.

न रात्रिं न दिनं चापि न च सौख्यं न चासुखम् । विद्याभ्यासरतः पश्येदिति स्पष्टं तथा कृतात् ।।७२।।
अदक्षिणो गुरुर्यस्य स सर्वत्राप्यदक्षिणः । भवतीति विभाव्यैच्छत् कर्तुं तं स्वं सदक्षिणम् ।।७३।।
गुरोरानृण्यमायाति न पुमान् दक्षिणां विना । व्यजिज्ञपत् कृतज्ञोऽसौ विधिमेवं विबोधयन् ।।७४।।

कृष्णप्रिया

द्विजकुल शिरोमणि श्री सांदीपिनि मुनिश्वर श्रीकृष्ण और श्री बलभद्रजी की विशुद्ध भाव की सेवा से अत्यन्त प्रसन्न हो गए । भगवान होते हुए भी केवल सेवा से गुरु कृपा की आकांछा चाहते दोनों सत्पात्र शिष्यों को साङ्गचारों वेद सार्थ उपनिषद् शास्त्रादि सर्व विद्या गुरुवर ने पढ़ाई ।।३३।। वेदवेदाङ्ग उपनिषद आदि पढ़ाने के बाद मंत्रो के रहस्य के साथ धनुर्वेद समस्त धर्मशास्त्र सामदंड आदि न्यायमार्ग सांख्ययोग नाम की आन्वीक्षिकी आत्मविद्या और सन्धिविग्रह यान आसन द्वैधीभाव समाश्रय नाम की छः प्रकार राजनीति भी नीति विधायक नाथ को पढ़ाई ।।३४।। हे राजन् ! अमरवर समस्त विद्या के प्रवर्तक विधायक श्रीकृष्ण और बलभद्रजी ने केवल सांदीपनि गुरुजी के एक वार उच्चारण से ही समस्त विद्याओं को अब धारण कर लिया ।।३५।। राजन् स्वयं भगवाम् है इनका यश कैसे गाया जाय इन दोनों ने केवल ६४ अहोरात्र में ६४ कलाए एक बार श्रवण कर सब धारण कर ली । संयमी और आज्ञांकित दोनों भाईयों ने विद्याध्ययन सम्पूर्ण कर लिया और गुरु चरणों में अभीष्ट दक्षिणा समर्पण कर दी पुनः गुरुवर की कृपा प्राप्त कर ली ।। ३६ ।।

द्विजस्तयोस्तं महिमानमद्भुतं संलक्ष्य[1] राजन्नतिमानुषीं मतिम्[2] ।
सम्मन्त्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयाम्बभूव ह ॥ ३७ ॥
तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरन्तविक्रमौ ।
वेलामुपव्रज्य निषीदतुः क्षणं सिन्धुर्विदित्वार्हणमाहरत्तयोः ॥ ३८ ॥
तमाह भगवानाशु गुरुपुत्रः प्रदीयताम् । योऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा ॥ ३९ ॥[3]

समुद्र उवाच

[4]नैवाहार्षमहं देव दैत्यः पञ्चजनो [5]महान् । अन्तर्जलचरः कृष्ण शङ्खरूपधरोऽसुरः ॥४०॥

कर्दमक्षमा

अन्वयः—हे राजन् ! सः, द्विजः, तयोः, तम्, अद्भुतम्, महिमानम्, च, अतिमानुषीम्, मतिम्, संलक्ष्य, पत्न्या, सम्मन्त्र्य, प्रभासे, महार्णवे, मृतम्, हे, वरयां बभूव ॥ ३७ ॥ महारथौ "तथाऽस्तु" इति उक्त्वा । अथ दुरन्तविक्रमौ, महारथौ, रथम्, आरुह्य, प्रभासम्, आसाद्य, वेलाम्, उपव्रज्य, क्षणम्, निषीदतुः, तत्, विदित्वा, सिन्धुः, तयोः अर्हणम्, आहरत् ॥३८॥ भगवान्, तम्, आह, यः, त्वया, महता, उर्मिणा, इह, ग्रस्तः, असौ, बालः, गुरुपुत्रः, आशु, प्रदीयताम् ॥ ३९ ॥ समुद्र उवाच–हे देव ! हे कृष्ण ! अहम्, न, एव, अहार्षम्, 'किन्तु' शङ्खरूपधरः, अन्तर्जलचरः, महान्, पञ्चजनः, दैत्यः, असुरः ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रभासे क्षेत्रे महार्णवे मृतं बालं वरयामास ॥ ३७ ॥ ईश्वराविति विदित्वा समुद्रस्तयोरर्हणमाजहार ॥ ३८-३९ ॥ पंचजनस्त्वसुरोऽहार्षीत् स च महान्ममासाध्य इत्यर्थः ॥ ४०-४२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तयोः रामकृष्णयोः । अतिमानुषीं मनुष्यदेहे असंभवाम् । स सांदीपनिः । प्रभासे मृतं, तीर्थयात्राया पितृभ्यां सह तत्र महाशिवक्षेत्रे गतस्य तत्र बालतया जले क्रीडतः शंखासुरेण ग्रसनादिति ज्ञेयम् ॥ ३७ ॥ गुरूक्तिं तथेत्यंगीकृत्य । अथांगीकारोत्तरम् । महान्तौ लोकापेक्षयाऽलौकिकौ पूज्यौ रथौ ययोस्तौ, न तु योधमहारथावनन्तबलत्वेन तत्त्वासंभवात् । वेलां सिन्धुतीरम् "बेला काले च सीमायामब्धेः कूलविकारयोः । अक्लिष्टमरणे रागे ईश्वरस्य च भोजने ।" इति मेदिनी । तयोः रामकृष्णयोः । विदित्वा पूर्वावतारीयपुरुषार्थस्मरणेन तावेताविति ज्ञात्वा महारथौ वीरप्रवरौ, अनेन सर्वायुधसाहित्यादिकमुक्तम् । दुरन्तविक्रमावनन्तपराक्रमौ । वेलां समुद्रतीरम् । निषेदतुरुपविष्टौ । 'निषीदतुः' इति पाठस्त्वार्षः । अर्हणममूल्यरत्नादिकम् ॥३८॥ तमब्धिम् । यो गुरुपुत्रः, असौ प्रदीयतामिति भगवानित्यैश्वर्यं प्रदर्शयन्नित्यर्थ । असौ प्रकर्षणाऽविकृतशरीरत्वादिना दीयतां देहवत्त्वात्तथाशक्तेरिति भावः । इह प्रभासे ॥ ३९ ॥ शङ्खाकारमत्स्यरूपधरः । समुद्र उवाचेति क्वचिदस्ति क्वचिदस्ति क्वचित्तु न, टीकाकृद्भिस्तद्वाक्यत्वेन न स्पष्टीकृतः । न चेत्यर्धकं क्वचिन्नास्ति । देव हे क्रीडापरेति, तत्सर्वं जानन्नपि यदेवमाज्ञापयति सेयमेका तव क्रीडेति भावः । अत्र दैत्य इत्यस्यैवासुर इति टीका । अन्तरित्यर्धकम्, आस्त इति शेषः । "आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभु" इत्यर्धकं क्वचिदस्ति । एतदभावे तूत्तरत्र 'प्रभुः' इत्यध्याहार्यम् । कृष्णेति–सर्वाकर्षकशक्तेस्तव तस्य निग्रहो न दुष्कर इति भावः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रभासे मृतमिति । तीर्थयात्रायां पितृभ्यां सह तत्र महाशिवक्षेत्रे गतस्य बालतया जले क्रीडतः शङ्खासुरेण ग्रसनादिति ज्ञेयम् ॥ ३७ ॥ तथेति । स्वीकृत्येत्यर्थः । अथानन्तरं सद्य एवेत्यर्थः । महारथौ वीरप्रवरौ इति सर्वायुधसाहित्यादिमुक्तं दुरन्तविक्रमौ अनन्तपराक्रमौ वेलां समुद्रतीरं निषेदतुरुपविष्टौ निषीदतुरिति पाठस्त्वार्षः अर्हणममूल्यरत्नादिकम् ॥ ३८ ॥ भगवानित्यैश्वर्यं प्रदर्शयन्नित्यर्थः । असौ प्रकर्षेणाविकृतशरीरत्वादिना दीयतां देवत्त्वात्तया शक्तेरिति भावः । इह प्रभासे ॥ ३९ ॥ समुद्र उवाचेति क्वचिदस्ति क्वचित्तु न किन्तु टीकाकृद्भिस्तद्वाक्यत्वेन न स्पष्टीकृतं नचेत्यर्द्धकं नेति क्वचित् पाठः देव हे क्रीडापरेति तं सर्वं जानन्नपि यदेवमाज्ञापयसि सेयमेव तव क्रीडा इति भावः । अत्र दैत्य इत्यस्यैव असुर इति टीका ॥ ४० ॥

---

१. वीक्ष्य–वीर. । २. गतिम्–वीर. । ३. तमाह वरुणो देवो विनयावनतः स्थितः–अ. वीरे. विजये. । ४. नाहार्षं तमहं–वीर. ; न ह्यहार्षमहं–विज. । ५. जनोऽहरत्–विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स परमबुद्धिमान् द्विजस्तं स्वल्पतरेणैव कालेनाशेषविद्यासंग्रहणलक्षणमतएवाद्भुतमलौकिकं तमेवाभिव्यञ्जयति—अतीति । यद्वा, दान्तत्वादिलक्षणम् , मतिं च, पत्न्या सह सम्मन्त्र्येति दुर्लभार्थधारणे सन्देहात् , तस्याः प्रीत्यर्थं वा । प्रभासे मृतमिति तीर्थयात्रया पितृभ्यां सह तत्र गतस्य बालतया जले क्रीड़तः शङ्खासुरेण ग्रसनादिति ज्ञेयम् । 'ह' हर्ष, यमनिर्ज्जयप्रारब्धानपेक्षणादि-श्रीभगवन्माहात्म्यविशेषप्राकट्योपपत्तेः, हे राजन्निति तद्वरणस्याद्भुतत्वात् राजमान इति वा ॥ ३७ ॥ तयेति एवमस्त्विति तत् स्वीकृत्येत्यर्थः । अथानन्तरं सद्य एवेत्यर्थः । महारथौ वीरप्रवराविति सर्व्वायुधसाहित्यादिकमुक्तम् । दुरन्तविक्रमौ-अनन्तपराक्रमौ; वेलां समुद्रतीरम् ; अर्हणममूल्यरत्नादिकम् ॥ ३८ ॥ भगवानिति—ऐश्वर्य्यं दर्शयन्निति भावः । असौ प्रकर्षणाविकृतशरीरत्वादिना दीयताम् । इह प्रभासे, महतोर्मिणा कृत्वा ग्रस्तः संहृत इत्यपमृत्युनैव मृतत्वादायुः शेषवृत्तेर्जीवन्नेवास्तीति भावः ॥ ३९ ॥ देव हे क्रीडापरेति त्वं सर्व्वं जानन्नपि यदेवमाज्ञापयसि, सेयमेका तव क्रीड़ेति भावः । तत्त्वोचितमेवेति सम्बोधयति—कृष्णेति । सर्व्वचित्ताकर्षक-सहजविनोदपरत्वादिति । यद्वा, जगद्धितार्थमवतीर्णेन साक्षाद्भगवता त्वया सोऽप्युद्धर्त्तुं युज्यत इति भावः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

द्विज इति हे राजन् ! द्विजः सान्दीपनस्तयो रामकृष्णयोस्तं चतुःषष्टिदिवसैस्तावत्कलाग्रहणात्मकमद्भुतं महिमानमानुषीं मनुष्येष्वसम्भावितां गतिं चेष्टां चावलोक्य वा महापुरुषौ इमौ इति निश्चित्येति शेषः । पत्न्या सहालोच्य प्रभासे क्षेत्रे महार्णवे मृतं बालं स्वं पुत्रमयाचत स्मेति विस्मये मृतप्रत्यादानमसम्भावितमिति विस्मीयते ॥ ३७ ॥ तदा तथेत्यङ्गीकृत्य महारथौ रामकृष्णौ रथमारुह्यदुरन्तोऽपारो विक्रमा ययोस्तौ प्रभासं सम्प्राप्य तत्र वेलां तीरं समुद्रस्येति शेषः । उपव्रज्य क्षणं निषीदतुः उपविष्टवन्तौ तदा सिन्धुः समुद्रो विदित्वा ईश्वराविमाविति ज्ञात्वा तयोरर्हणं पूजामाजहार समर्पयामास चकारेति यावत् ॥ ३८ ॥ ततः भगवान् सिन्धुमाह । किमिति । इह यो बालको गुरुपुत्रः त्वया कर्त्रा महतोर्मिणा तरङ्गेण ग्रस्तोऽन्तर्द्धापितः सोऽस्मद्गुरुपुत्रः आशु प्रदीयताम् इति ॥ ३९ ॥ इत्थमुक्तः प्राह सिन्धुः । नैवेति । हे देव तं द्विजपुत्रमहं नाहार्षं नापहृतवान् किन्तु हे कृष्ण ! पञ्चजनाख्यो दैत्योऽहार्षीत्स च महान्ममासाध्य इत्यर्थः । तदेवाह सोऽसुरोऽन्तर्जलचरः शङ्खाकृतिधरश्चास्ते विवेक्तुमशक्य इति भावः तेन पञ्चजनेन नूनमपहृत इति एतत्सिन्धोर्वचः श्रुत्वा श्रीकृष्णः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

महार्णवे प्रभासे तीर्थे ॥ ३७ ॥ वेलां तीरसीमाख्यम् ॥ ३८ ॥ योऽसौ गुरुपुत्रः त्वया महतोर्मिणा ग्रस्तः स प्रदीयतामित्यन्वयः ॥ ३९ ॥ तं कृष्णम् शङ्खमत्स्यरूपधरः ॥ ४०–४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रभासे मृतमिति । तत्र महाशिवक्षेत्रे बालतया जले क्रीडतस्तस्य शङ्खासुरेण ग्रसनादिति ज्ञेयम् ॥ ३९–३९ ॥ पञ्चजनोऽहार्षीदिति शेषः । स च महान् ममासाध्य इत्यर्थः ॥ ४० ॥

गूढार्थदीपिनी

ह हर्षेण ॥ ३७ ॥ द्विजः सान्दीपनिः प्रभासक्षेत्रे मृतम् । ह औत्सुक्ये ॥ ३८ ॥ तथाऽस्तु वाढमिति । वेलां समुद्रतटम् । अर्हणं पूजनं कृतवान् । निषेदतुः इति पाठः ॥ ३९ ॥ नैवेति द्वयम् ॥ ४०–४१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सः द्विजोऽपि तयोः रामकृष्णयोः अद्भुतमचिन्त्यं महिमानं संलक्ष्य प्रभासे क्षेत्रे महार्णवे मृतं बालं वरयांबभूव वरयामास ॥ ३७ ॥ प्रभासं क्षेत्रमासाद्य वेलां सिन्धुतीरमुपव्रज्य क्षणं निषीदतुः सिन्धुरपि भगवन्तौ स्वतीरस्थौ विदित्वा तयोरर्हणमाजहार ॥ ३८–३९ ॥ पञ्चजनो दैत्यः अहार्षीत् शङ्खरूपधर इति "तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम्"। इत्यादिषु प्रोक्तमनादिसिद्धम् त्वत्प्राप्त्यर्थं मयि वसन्तं पाञ्चजन्यमाश्रित्य वर्तते इत्यर्थः । नन्वसुरस्य मच्छङ्खाश्रयणे कोऽधिकार इत्यत आह । महानिति । कश्चिद्भक्त एवेति भावः ॥ ४०–४२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तयो रामकृष्णयोरद्भुतं तं महिमानं तथाऽतिमानुषीं मानुषीमतिमतिक्रान्तां मतिं च संलक्ष्य द्विजः पत्न्या सम्मन्त्र्यालोच्य महार्णवे तत्रापि प्रभासक्षेत्रे मृतं बालं स्वपुत्रं वरयाम्भूवावृणोत् ॥ ३७ ॥ तथैव भवत्वित्युक्त्वा महारथौ रथमारुह्य प्रभासमासाद्य वेलां तीरमुपव्रज्य च क्षणं निषीदतुः । सिन्धुर्विदित्वा तयोरर्हणमहरत् । रामवदिमावपि मां शुष्कीकर्तुं क्षमाविति भीतः

स स एवायात इति क्षणोक्त्या ध्वनयति ॥ ३८ ॥ तं वरुणं महतोर्मिणा तरङ्गेण । तरङ्ग ऊर्मिर्वा स्त्रियामित्यमरः । तदीयेन कृतमपि तेन कृतं भवतीति विदितपञ्चजनाह्वयव्यापारोऽपि तन्मुखेन वादयितुं त्वयेत्युक्तवानिति ज्ञेयं ॥ ३९ ॥ विनयावनतो देवो वरुणो हे देवेति सम्बोधनेन तद्धनन एक एव समर्थ इति ध्वनयति । अहं नाहार्षम् । कस्तर्ह्यपाहार्षीत्तं वदेत्यतो वदति । पञ्चजनाह्वयो दैत्योऽहार्षीदिति ॥ ४० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अत उभयोरपि भगवन्माहात्म्यपरिज्ञानादलौकिकमेव याचनीयमिति निश्चित्य तथा याचितवानित्याह । द्विज इति । स हि यज्ञादीनां चिकीर्षुः पुत्रवांश्चाधिकारी तस्मिन्नुपहते स्थगितः विचार्य च वंशकर्तृत्वेन तथोत्पादितः ईश्वरकृपाव्यतिरेकेण कालेन तदुपहतं तथापि वेदप्रमाण्यात् ईश्वरेच्छामज्ञात्वा कालं प्रतीक्षन्नेव स्थितः अतस्तस्य तदावश्यकमिति ज्ञापयितुं द्विज इत्युक्त तृतीयजन्मापेक्षितं तयो रामकृष्णयोः तदलौकिकं महिमानं श्रुतं च दृष्टं च अद्भुतश्च महिमा दृष्टः तौ पाठयन् स्वयं ज्ञातवान्नहि पूर्वमयमेतादृशः स्थितः अन्यथा ऋषिभ्योऽप्यधिकः स्यात् अतस्तौ पाठयन् स्वयमेव पठितवान् वैपरीत्यमेवाद्भुतत्वं संलक्षयति स ह्यूहापोहकुशलः स्वस्य पश्चात् पूर्णज्ञानं भगवत्कृतमेवेति निश्चित्य लोकन्यायेन भगवदिच्छयैव गुरुत्वं स्थापयितु महार्णव एव मृतं पुत्रमयाचतेति सम्बन्धः । राजन्निति क्लिष्टत्वादादरेण सम्बोधनं विश्वासार्थं च किञ्च मतिरप्यलौकिकी न त्वलौकिक एव भावः यन्त्रादिष्विव अतः असाध्यमपि ज्ञास्यति करिष्यतीति निश्चित्य दृष्टादृष्टस्य साधनस्य विद्यमानत्वात् पत्न्या च यज्ञकर्मयोग्यया सम्मन्त्र्य एतदेव प्रार्थनीयमिति भावयतः सः प्रसिद्धः तदाकाङ्क्षी तदुपपादितं महार्णवे न तु सागरे मृतं ते प्रभासयात्रायां बहव एव गताः तत्र सकुटुम्बगमने अग्निकुण्डे बालको निमग्नः ननु कोऽयं निर्बन्धः मृत्युकालादीनां सत्यतापि स्यात्तत्राह । बालमिति । तत्रोत्पन्नः स्नेहः स निवृत्त इति प्रभासे मृतः पुनर्नायातीति मन्त्रादिनापि तदानयनमशक्यं वरयाम्बभूव वरत्वेन याचितवान् गुरुत्वे तु वर दद्यादिति वरदानमावश्यकमिति हेत्याश्चर्यं विदितसर्वतत्त्वाः किं प्रजया करिष्याम इति श्रुतिवशात् प्रजाव्यतिरेकेणापि कार्यसिद्धिः तथापि याचितवानिति निरोधो भगवता तस्यापि कर्त्तव्य इति तथैव याचितवान् पुनः ॥ ३७ ॥ अलौकिके दत्ते स्वात्मानं ज्ञास्यतीति गोपनार्थं वृतोऽपि कालादिमर्यादापि दूरीकर्त्तव्येति कदाचिन्न करिष्यतीत्याशङ्क्याङ्गीकारमाह । तथेति । ओमिति वक्तव्या आकृतिरेव तुल्येति समानरूपं सञ्जातान्तरमेवानेष्यतीति शङ्काव्यावृत्त्यर्थं य एव सञ्जातः यादृशस्तथैवानेतव्य इति तथेति स्वाज्ञोक्ता एतच्च शिष्यभावेन सम्भवतीति ऐश्वरं भावमाश्रित्य भिन्नप्रक्रमेण तदर्थं गतावित्याह । अथेति । महारथं सर्वगामिनं स्वयमपि महारथौ रथशिक्षायां निपुणौ एकमेव रथं समारुह्य पर्यायेण सारथित्वं सम्पादयन्तौ शीघ्रमेव प्रभासमासाद्य समुद्रादपि भयाभावायाह । दुरन्तो विक्रमो ययोरिति । ततः समुद्रवेलामुपव्रज्य ज्ञापयन्ताविव क्षणमुपसेदतुः ततः सिन्धुर्भगवन्तं जामातरं गृहपतिं बन्धकं च ज्ञात्वा अर्हणं पूजां तयोराहरत् ॥ ३८ ॥ त्रेधा हि तस्य बालकस्य विनियोगः वियोजनं प्राणापानयोः समुद्रेण कृतं शरीरभोगः पञ्चजनेन गृहीतः अन्यश्च सञ्जातः सर्ववशात्पूर्वसूक्ष्मावस्थया सतः स जीवः यमपुर्यां तिष्ठति भगवता च तावती भूमिः समुद्रात् पृथक्कर्त्तव्या लीलौपयिकं भवति न वेति विचारणीयम् अतः समुद्रं प्रति भगवान् किञ्चिदुवाचेत्याह । तमाहेति । ननु पूजया तत्सापेक्षः सङ्कोचं च प्राप्य कथमेवमाज्ञां दत्तवानित्याशङ्क्याह । भगवानिति । स हि सर्वेश्वरः सेवकः सङ्कोच इति तथैवाज्ञां दत्तवान् आशु गुरुपुत्रः प्रदीयतामिति । मम स्थाने क्वेति न वक्तव्यम् आधिदैविकं रूपं प्रदर्शयन्नाह । योऽसाविति । असौ यः अभिज्ञानार्थं प्रदर्शनं क्रिययापि समागत इत्याशङ्कायामाह । त्वया ग्रस्त इति । ननु ब्राह्मणः कथं ग्रासमर्हति तत्राह । बालक इति । अनुपनीतः ग्रासश्च न बुद्धिपूर्वक इत्याह । महतोर्मिणेति । महता तरङ्गेण तस्मात्तु दण्ड्यः ॥ ३९ ॥ प्रत्युत्तरमाह समुद्रः । तं नाहार्षमिति । शरणागतः पञ्चजन इति भगवता ऐक्यात्समुद्र एव निरुक्तः त्वया ग्रस्त इति सुतस्थित्यर्थमेवाहं प्रयोजकः न तु तत्कृतगुणदोषयोरिति तं पृथक्कृत्य आत्मनो दोषाभावमाह । तं नाहमहार्षम् ऊर्मयः करा भवन्ति न हि कराः हरणे साधनत्वेन समागताः किंतु स्वभावत एव निमित्तत्वं जातमिति न दोष इति समुद्राभिप्रायः साक्षात्कर्तारं निर्दिशति । दैत्यः पञ्चजन इति । अत्र विश्वासार्थं देवेति सम्बोधनं प्रत्यक्षेणापि सर्वं पश्यति स कथं न निराकृत इत्याशङ्कायां दैत्य इत्याह । दैत्या हि बहवो बलिष्ठाश्च तत्राप्ययं पञ्चजनः वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति पञ्चानामयमेवानुकल्प इति पञ्चजनरूपः पञ्चसम्वत्सरात्मको वा दैत्यरूपः पञ्चपर्वाविद्यारूपो वा तत्रापि महान्मयापि मारयितुमशक्यः तमसाध्यं निरूपयितुं स्वरूपमुक्तवान् स्थानं निरूपयति । अन्तर्जलचर इति । जलमध्य एव चरति न कदाचिदपि बहिरायाति रूपमात्रं दृष्ट्वा भीतः सन् परमन्यथा वदति । ननु स्वरूपं जानातीति शङ्कां वारयितुमाह । कृष्णेति । परिज्ञानार्थमाकृतिमाह । शङ्खरूपधर इति । अन्यथापि स वध्य इति वक्तुं तद्दोषमाह । असुर इति । सुरप्रतिपक्षी ॥ ४० ॥

श्रीसुबोधिनी–सारः

अत्रोपविष्टौ पठतामित्युक्ते वत्सबन्धने "गुरुपत्न्याभ्यनुज्ञातौ हस्तवृद्ध्या तथाकरोत्" इति तयोरद्भुतं तं महिमानं संलक्ष्यातिमानुषीं मतिं दैवीं बुद्धिं संलक्ष्य द्विजो गुरुः स पत्न्या स्त्रिया संमन्त्र्य प्रभासे क्षेत्रे महार्णवे समुद्रे मृतं बालं वरयामास ह ॥ ३७ ॥ तथास्त्वित्युक्त्वाऽथ रथमारुह्य दुरन्तोऽपारो विक्रमो ययोस्तौ महारथौ प्रभासमासाद्य प्राप्य वेलां तटमुपव्रज्य क्षणं

निषीदतुः तस्थतुः विदित्वेश्वराविति ज्ञात्वा तयोस्ताभ्यामर्हणं बलिमाददात् सिन्धुः ।। ३८ ।। तं समुद्रं भगवानाह पुरोः पुत्र आशु शीघ्रं त्वया प्रदीयतां महतोर्मिणा योऽसौ बालकस्त्वया ग्रस्तः ।। ३९ ।। समुद्रोक्तिः । हे देव अहं नैवाहार्षं नाग्रसं किं तु पञ्चजनो नाम महान् दैत्यो जलेचरः शंखरूपधरोऽसुर आस्ते ।। ४० ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'आश्चर्यान्तरं शृणु' इत्याशयेन सम्बोधयति—राजन्निति । स द्विजः सान्दीपनिस्तयोः रामकृष्णयोस्तमनायासेनैव सर्वविद्याग्रहणात्मकमद्भुतं श्रोतृजनाश्चर्यजनकं महिमानं तथा अतिमानुषीं मनुष्येष्वसम्भावितां मति च संलक्ष्य 'महापुरुषाविमौ' इति निश्चित्येति शेषः पत्न्या सह सम्मन्त्र्य विचार्य प्रभासे क्षेत्रे महार्णवे निमज्ज्य मृतं स्वपुत्रं वरयांबभूव दक्षिणारूपेण याचितवानित्यर्थः । 'मृतस्य याञ्चाप्याश्चर्यकर्यैव' इति सूचयन्नाह—हेति ।। ३७ ।। 'तथास्त्विति गुरुयाञ्चामङ्गीकृत्य मृतपुत्रप्रदानं कथमङ्गीकृतवन्तौ' इत्याशङ्क्याह—महारथाविति । एतदेव स्पष्टयन्नाह—दुरन्तविक्रमाविति । दुरन्तोऽपारो विक्रमो ययोस्तौ रथमारुह्य प्रभासाख्यं तीर्थमासाद्य प्राप्य तत्र वेलां समुद्रस्य तीरमुपव्रज्य क्षणं निषीदतुः उपविष्टवन्तौ । समुद्रश्च 'परमेश्वराविमौ' इति विदित्वा तयोरर्हणमाहरत् यथावत् पूजनं कृतवान् ।। ३८ ।। तदा च भगवान् इहस्थाने महता ऊर्मिणा तरङ्गेण योऽसौ बालकस्त्वया ग्रस्तः अन्तर्धापितः सोऽस्मद्गुरुपुत्रः, अत आशु प्रदीयतामिति तं समुद्रमाहेत्यन्वयः ।। ३९ ।। एवमुक्तः समुद्रः प्राहः—नैवेति । 'तव तु सर्वं विदितमेवास्ति, किं मया विज्ञापनीयम्' इत्याशयेन सम्बोयधति–हे देव ! हे कृष्ण ! तं द्विजपुत्रमहं नैवाहार्षं नापहृतवान् , किन्तु अन्तर्जलचरः जलान्तर्वर्ती पञ्चजनाख्यो दैत्य आस्ते तेन तव गुरुपुत्र आहृतः नूनम् , अत्र सन्देहो नास्ति । स च महान् अस्मदसाध्य इत्यर्थः । 'स च केन रूपेण वर्तते ? तत्राह–असुरोऽपि शङ्खरूपधर इति तत्सिन्धुवचनं श्रुत्वा प्रभुः समर्थः श्रीकृष्णः सत्वरं शीघ्रमेव जलमाविश्य तं दैत्यं हत्वा तस्योदरे अर्भकं नापश्यत् ।। ४०–४१ ।।

अन्वितार्थप्रकाशिका

द्विज इति हे राजन् ! स द्विजः सान्दीपनिः तयो रामकृष्णयोस्तमनायासेनैव सर्वविद्याग्रहणात्मकमद्भुतं श्रोतृजनाश्चर्यजनकं महिमानं तथा अतिमानुषीं मनुष्येष्वसम्भाविताम् । ह्रस्वाभाव आर्षः । मतिं च संलक्ष्य महापुरुषाविमाविति निश्चित्येति शेषः । पत्न्या सह संमन्त्र्य विचार्य प्रभासे क्षेत्रे महार्णवे तत्र महाशिवक्षेत्रे बालतया जले क्रीडतस्तस्य शङ्खासुरेण ग्रसनात् निमज्ज्य मृतं स्वपुत्रं वरयांबभूव दक्षिणारूपेण याचितवान् ।। ३७ ।। तथेति । महारथौ दुरन्तोऽपारो विक्रमो ययोस्तौ रामकृष्णौ तथाऽस्त्विति गुरुयाच्ञामङ्गीकृत्य रथमारुह्य प्रभासाख्यं तीर्थमासाद्य प्राप्य तत्र वेलां समुद्रस्य तीरमुव्रज्य क्षणं निषेदतुः । निषीदतरिति त्वार्षः पाठः । पाठः । समुद्रश्च परमेश्वराविमाविति विदित्वा तयोरर्हण माहरत् यथावत्पूजनं कृतवान् ।। ३८ ।। तमिति इह स्थाने महता ऊर्मिणा तरंगेण योऽसौ बालकस्त्वया ग्रस्तः अन्तर्धापितः सोऽस्मद्गुरु पुत्रः अत आशु प्रदीयतामिति तं समुद्रं भगवानाह स्म ।। ३९ ।। नैवेति द्वयम् । हे देव ! तं द्विजपुत्रमहं नैवाहार्षं नापहृतवान् किन्तु अन्तर्जलचरः जलान्तर्वर्ती पञ्चजनाख्यो दैत्य आस्ते तेन तव गुरुपुत्र आहृतः नूनम् अत्र संदेहो नास्ति । स च महान् अस्मदसाध्यः स च असुरोऽपि शङ्खरूपधरः । तत् सिन्धुवचनं श्रुत्वा प्रभुः समर्थः श्रीकृष्णः सत्वरं शीघ्रमेव जलमाविश्य तं दैत्यं हत्वा तस्योदरे अर्भकं बालकं नापश्यत् । "आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः । इत्यर्द्धं काचित्कमिति तोषिणी ।।४०-४१।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तन्महिमानं अतिमानुषीं मतिं च संलक्ष्य दृष्ट्वा पत्न्या सह समम् अविचार्य ।। प्रभासे तीर्थक्षेत्रे महार्णवे समुद्रे मृतं बालं वरयांबभूव ।। २७ ।। तथेति स्वीकृत्य वेलां समुद्रतीरं गत्वा क्षणं निषीदतुः निषेदतुरुपविष्टौ निषीदतुरिति पठनमार्षं सिंधुः तौ परमेश्वरौ विदित्वा तयोः अर्हणं रत्नादिपूजां आहरत ।। २८–२९ ।। गुरुपुत्रं अहं नैवाहार्षं पंचजनोऽसुरः अहार्षीत् स च महान् ममाधीनो नास्तीत्यर्थः ।। ४०–४१ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

द्विज इति । हे राजन् , सः द्विजः सान्दीपनिः, तयोः तं चतुःषष्टिदिवसैस्तावत्कलाग्रहणात्मकं, अद्भुतं महिमानं, अतिमानुषीं मनुष्येष्वसंभारितां, गतिं चेष्टां च, संलक्ष्यावलोक्य, महापुरुषाविमाविति निश्चित्येति शेषः । पत्न्या सह संमन्त्र्यालोच्य, प्रभासे क्षेत्रे, महार्णवे, मृतं बालं पुत्रं, वरयांबभूव ।। ३७ ।। तथेतीति । तथेति अङ्गीकृत्य, दुरन्तविक्रमावपारपराक्रमौ, महारथौ रामकृष्णौ, रथं आरुह्य, प्रभासं आसाद्य संप्राप्य, अथ वेलां तीरं, समुद्रस्येति शेषः । उपव्रज्य, क्षण निषीदतुः उपविष्टवन्तौ । तदा सिन्धुः समुद्रः, विदित्वा ईश्वराविमाविति ज्ञात्वा, तयो रामकृष्णयोः, अर्हणं पूजां, आहरत् समर्पयामास चकारेति यावत् ।। ३८ ।। तमिति । हे सिन्धो, त्वया कर्त्रा, महता ऊर्मिणा करणेन, यः असौ बालकः, गुरुपुत्रः आवयोः गुरुसुतः । इह ग्रस्तः अन्तर्धापितः सः आशु, प्रदीयताम् । इति, भगवान् श्रीकृष्णः, तं सिन्धु, आह ।। ३९ ।। इत्थं भगवतोक्तः सिन्धुः प्राह ।

नैवेति। आस्ते इति च। हे देव, अहं त्वद्गुरोर्द्विजस्य, पुत्रमिति शेषः। नैव अहार्षं, किं तु हे कृष्ण, पञ्चजनःपञ्चजनाख्यः दैत्यः, अहार्षीत्। स च महान् ममासाध्य इत्यर्थः। तदेवाह। सः असुरः, अन्तर्जलचरः शङ्खरूपधरः शङ्खाकृतिधरः सन्, आस्ते। तेन आहृतः, नूनं, तच्छ्रुत्वा, प्रभुः सत्वरं जलं आविश्य, तमसुरं हत्वा, उदरे तज्जठरे, अर्भकं न अपश्यत्। ततः, तदङ्गप्रभवं शङ्खं पाञ्चजन्याख्यं दरवरं आदाय, रथं आरुहत्। इति सार्द्धद्वयस्यैकान्वयः ॥ ४०–४१ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

द्विजस्तयोरिति : १०.४५.३७.

बुद्धिमानपि विद्वानप्यात्मकार्यं विविक्तधीः। कुर्याद्धितज्ञं पृष्ट्वैव पत्नीमन्त्रादिति स्फुटम् ॥ ७५ ॥
वंशवृद्धिर्यथैवेष्टा तथा नान्यत्प्रियं जने। व्यक्तमेतदयाचद्यत् प्रभुमात्मसुतं गुरुः ॥ ७६ ॥
यद्दयोल्लासिनि श्रीशे प्रसादाभिमुखे सति। पुन्नामनरकात्त्राणं प्रार्थितं युक्तमेव तत् ॥ ७७ ॥

तथेतीति : १०.४५.३८.

आत्मजातोदयकरी विद्याऽनेन प्रदर्शिता। तत्परीक्षाप्रसङ्गोऽयं युक्त इत्याददे वचः ॥ ७८ ॥
योगेनैव विधेयं तच्छोधनं द्रुतमित्यजः। सरामोऽगादन्यथा तु नैकस्याशक्यमण्वपि ॥ ७९ ॥
यदि स्थास्याम्यहं तूष्णीभूतः प्राग्वत्तदेष माम्। बध्नीयादिति किं भीतो वार्धिरर्हणमाहरत् ॥ ८० ॥
मत्सुताकरपरिग्रहयोग्यः सम्प्रति प्रभुरसावजनीति। अब्धिरेनमुपनीतमवेक्ष्य श्रीशमर्हणमधात् क्षममेतत् ॥ ८१ ॥

कृष्णप्रिया

द्विजवर श्रीसांदीपनिजी ने दोनों की लोकोत्तर महिमा देखी। पुराणान्तर मे है कि एक गोदोहन विधि में बैठी श्रीगुर्वाजी ने श्रीकृष्ण से दोहिनी माँगी। "श्यामसुन्दर गुरुजी पास बैठे अध्ययन करते थे अथवा सन्ध्यावन्दन करते थे। उठने से व्रतभङ्ग का अपराध हो रहा था दोहिनी पात्र न देने गुरुपत्नीजी का आज्ञाभङ्ग हो रहा था। ऐसी विकट समस्या में भगवान हाथ पसार दोहिनी उठायी गुरुप्रत्नी को दे दी "इस प्रकार की अलौकिक महिमा को जान ने वाली अर्धाङ्गना से सान्दीपनिजी ने दक्षिणा के विषय में परामर्श करके प्रभास तीर्थक्षेत्र में समुद्र के अगाधजल में डूब जाने से मरे हुए पुत्र को ले आने का वरदान की दक्षिणा माँगी ॥ ३७ ॥ भगवान् श्रीकृष्ण ने गुरुचरणों को निवेदन किया कि गुरुवर! जैसी आपकी आज्ञा, ऐसा कहकर श्रीचरणों में प्रणाम किया पुनः अनन्त पराक्रम वाले दोनों महारथी महान् रथ में बिराजकर प्रभासक्षेत्र की ओर प्रस्थान किया। वहाँ समुद्र के तट पर क्षण भर बैठे। क्षीरनिधि को क्षण में बधाई मिली कि नाथ हैं तब वह अर्घ की सामग्री हाथ में लेकर सन्मुख आकर प्रभुचरणों का अर्चन किया ॥ ३८ ॥ समुद्रदेव जब भगवान् श्रीकृष्ण के समीप आए तब भगवान् ने कहा कि हे समुद्र? जिस बालक को समुद्र की गहरी लहरों ने डूबा दिया है वह मेरे गुरुजी का पुत्र है वह निर्दोष है अभी यज्ञोपवीत नहीं हुआ इसलिये मुझे शीघ्र लौटाइए ॥ ३९ ॥ समुद्र ने विनम्रता से निवेदन किया कि हे नाथ! हे कृष्ण? मैंने उस गुरु पुत्र का अपहरण नहीं किया है। सागर के जल के भीतर शंख रूप से 'पञ्चजन' नाम का एक महान् असुर रहता है। निश्चय रूप शंखासुर ने बालक डूबाकर ले गया है और बालक उसके पास होना चाहिए। इस बात को सुनकर भगवान ने शंखासुर की ओर गमन किया ॥ ४० ॥

[1]आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः। [2]जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकम् ॥ ४१ ॥
तदङ्गप्रभवं शङ्खमादाय [3]रथमागमत्। ततः संयमनीं नाम यमस्य दयितां पुरीम् ॥ ४२ ॥
गत्वा जनार्दनः शङ्खं प्रदध्मौ सहलायुधः। शङ्खनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः ॥ ४३ ॥
तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहिताम्[4]।
उवाचावनतः कृष्णं सर्वभूताशयालयम्। लीलामनुष्य[5] हे विष्णो युवयोः [6]करवाणि किम् ॥ ४४ ॥[7]

---

[1] इदमर्धं मधिकं "आस्ते"–वीर.

[2] जलमाविश्य तं हत्वा गृह्यतामित्युवाच सः। ततस्तौ जलमाविश्य हत्वान्तर्जलवासिनम् ॥
विदार्य जठरं तस्य नापश्यदुदरेऽर्भकम्। इदं सार्धं विजये.।

[3] मारुहत–वीर.। [4] बृंहितः–विज.। [5] मानुष–वीर ; मानुषयो–इति कस्यचित्। [6] वाम–श्रीधर. वंशी जीव. वीर. विज. विश्व. [7] इत्युक्तस्तेन देवेशो देवकीनन्दनोऽब्रवीत्–विज.।

कर्दमक्षमा

अन्वयः—आस्ते, तेन, नूनम् , आहतः, श्रीशुकउवाच—तत् , श्रुत्वा, प्रभुः सत्वरम् , जलम् , प्रविश्य, तम् , हत्वा, उदरे, अर्भकम् , न, अपश्यत् , "तदा" शङ्खम् , आदाय, रथम् , आगमत् ॥ ४१ ॥ ततः, जनार्दनः, सहलायुधः, यमस्य, दयिताम् , संयमनीम् , नाम, पुरीम् , गत्वा, शङ्खम् , प्रदध्मौ ॥ ४२ ॥ प्रजासंयमनः, यमः, शङ्खनिर्ह्रादम् , आकार्ण्य, भक्त्युपबृंहिताम् , तयोः, महतीम् , सपर्याम् , चक्रे ॥४३॥ अवनतः, यमः, सर्वभूताशयालयम् , कृष्णम् , उवाच—हे लीलामनुष्य ! हे विष्णो! युवयोः, किम् , करवाणि ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सपर्यां पूजाम् । सर्वेषां भूतानामाशया अंतःकरणानि तान्यालयो निवासो यस्य तम् ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं पञ्चजनम् ॥ जलमिति श्रीशुकोक्तिः । सक्षोभमन्तः प्रविश्य अर्भकं तदस्थीन्यपीत्यर्थः । तदन्वेषणं च यद्यप्यस्थीन्यपि प्राप्स्यामि तदपि गुरुप्रसादेन जीवयिष्यामीति समुद्रं प्रति लौकिकलीलाव्यञ्जनार्थम् । एकवचनादेकाक्येव श्रीकृष्णः प्रविष्ट इति ज्ञेयम् । तथा च विष्णुपुराणे—"इत्युक्तेन्तर्जलं गत्वा हत्वा पञ्चजनं तु तम् । कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तमम् ॥" इति । तच्च रथरक्षार्थं बलदेवस्य तीरे स्थापनात् ॥ ४१ ॥ तस्य पञ्चजनस्य । अङ्गप्रभवं शरीरसम्भूतम् । ततो दैत्यहननोत्तरम् ॥ तदङ्गप्रभवमिति—तत्त्वतो विप्रशापापेक्षया नित्यपार्षदेन शङ्खेन दैत्यस्यानुकरणात् , जयविजयवत् । अत एवेच्छया श्रीकृष्णहस्ते तु वाद्ययोग्यसूक्ष्माकारोऽप्यभवदिति ज्ञेयम् । अवन्तीखंडमते तु—"ततः पञ्चजनं हत्वा ग्राहरूपं महासुरम् । तन्मध्यस्थ स जग्राह शंखं ग्रस्तं हि यत्पुरा ॥ तस्योदरे यदा बालं नाप्तवाँस्तं जनार्दनः । यमालयगतं मत्वा तदा वरुणमब्रवीत् ॥ भगवन्यादसामीश रथो मे दीयतां महान् । येनाहं विहितात्मा हि पश्येयं संगरे यमम् ॥ पुराजिरे हता दैत्या दानवा बलगर्विताः । त्वया येन रथेनाद्य मह्यं स दीयतां रथः ॥" इत्यादि । दीयतामिति तत्र निवासनिश्चयात् ॥ ४२ ॥ प्रजाः संयच्छति नियच्छतीति प्रजासंयमनः ॥ जनार्दनः सर्वनिजजनाभीष्टपूरकः । अत एव हलायुधेनापि सह, एतन्नाम्ना तस्य हलप्रकटनमपि तदा ज्ञेयम् । शंखप्रध्मानानन्तरम् अवंतीखण्डे त्वेवम्—"तेन शब्देन वित्रस्ताः कृतान्तालयवासिनः । नरकान्तर्गता मर्त्याः पापाचारपरायणाः ॥ सुखमापुः प्रशान्ताश्च बहवः कृष्णदर्शनात् । शस्त्राणि कुण्ठतां प्रापुर्यन्त्राणि विविधानि च ॥ विदीर्णानि तदा व्यासः वासुदेवस्य दर्शनात् । असिपत्रवनं नाम शीर्णपत्रमजायत ॥ रौरवं नाम नरकमरौरवमभूत्तदा । अभैरवं भैरवाख्यं कुम्भीपाकमपाचकम् ॥ शृङ्गाटकमशृङ्गाटं लोहसूच्यप्यसूचिताम् । जगाम जगतामीशे प्राप्ते तत्र जनार्दने ॥ हस्तमात्रतरा जाता तदा वैतरणी नृणाम् । नारकास्ते तदा याते तत्र विश्वेश्वरे विभौ ॥ पापक्षयात्तदा सर्वे विमुक्ता नारका नराः । पदमव्ययमासाद्य दृष्ट्वा विष्णुं तमोऽपहम् ॥ विमानायुतसाहस्रैरारूढास्ते समंततः । समीक्ष्य पुण्डरीकाक्षं मुक्तास्ते सर्वपातकात् ॥ ततः शून्यं मुने यातं सर्वं निरयमंडलम् । दर्शनात्तस्य देवस्य विष्णोर्विश्वस्वरूपिणः ॥" इति । प्रजासंयमन इति भयङ्करत्वमुक्तम् । तथाऽत्र युद्धं च सूचितं, श्रीविष्णुपुराणे—'जित्वा वैवस्वतं यमम्' इत्युक्तेः । अवन्तीखण्डे बहुशो वर्णितमेतत् ॥ ४३ ॥ तयोः रामकृष्णयोः । अवनतोऽतिनम्रः ॥ सर्वेति—तस्य तत्र निष्कपटतामपि जानन्तमित्यर्थः । विष्णोर्व्यापकत्वेन विश्वप्रभो इत्यात्मनस्तत्सेवकत्वं सूचितम् । लीलाप्रधानममुष्याकारयोः 'लीलामनुष्य हे' इति क्वचित्पाठः । किन्तु 'लीलामनुष्ययोर्विष्णवोः' इति पाठः स्वामिसंमतो लक्ष्यते एकसबोधनस्याग्रह एव वत्सेत्यत्र करिष्यमाणसमाधानत्वात् । किं करवाम आज्ञापयेति शेषः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जलमिति श्रीशुकोक्तिः । आविश्य सक्षोभमन्तः प्रविश्य अर्भकं तदस्थीन्यपीत्यर्थः । तदन्वेषणञ्च यद्यप्यस्थीन्यपि प्राप्स्यामि तदा गुरुप्रसादेन जीवयिष्यामीति समुद्रं प्रति लौकिकलीलाव्यञ्जनार्थम् । एकवचनादेकाक्येव श्रीकृष्णः प्रविष्ट इति ज्ञेयं तथा च श्रीविष्णुपुराणे । "इत्युक्तेऽन्तर्जलं गत्वा हत्वा पञ्चजनं तु तम् । कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तम" मिति । तच्च रथरक्षार्थं श्रीबलदेवस्य तीरे स्थापनात् ॥ ४१ ॥ तदङ्गप्रभवमिति तत्त्वतो विप्रशापापेक्षया नित्यपार्षदेन शङ्खेन दैत्यत्वानुमरणात् जयविजयवत् । अतएवेच्छया श्रीकृष्णहस्तेषु वाद्ययोग्यसूक्ष्माकारोऽप्यभवदिति ज्ञेयम् । अवन्तीखण्डमते तु "ततः पञ्चजनं हत्वा ग्राहरूपं महासुरम् । तन्मध्यस्थं स जग्राह शङ्खं ग्रस्तं हि यत् पुरा । तस्योदरे यदा बालं नाप्तवांस्तं जनार्दनः । यमालयगतं मत्वा तदा वरुणमब्रवीत् । भगवन् ! यादसामीश ! रथो मे दीयतां महान् । येनाहं विहितात्मा हि पश्येऽहं सङ्गरे यमम् । पुराजिरे हता दैत्या दानवा बलगर्विताः । त्वया येन रथेनाद्य मह्यं स दीयतां रथ" इत्यादि । दयितामिति तत्र निवासनिश्चयादित्यर्थः ॥ ४२ ॥ जनार्दनः सर्वनिजजनाभीष्टपूरकः । अतएव हलायुधेनापि सहैतन्नाम्ना तस्य हलप्रकटनमपि तदा ज्ञेयं शङ्खप्रध्मानानन्तरमवन्तीखण्डे त्वेवं । "तेन शब्देन वित्रस्ताः कृतान्तालयवासिनः । नरकान्तर्गता मर्त्याः पापाचारपरायणाः ।

सुखमापुः प्रशान्ताश्च बहवः कृष्णदर्शनात् । शस्त्राणि कुण्ठतां प्रापुर्यन्त्राणि विविधानि च । विदीर्णानि तदा व्यास वासुदेवस्य दर्शनात् । असिपत्रवनं नाम शीर्णपर्णमजायत । रौरवं नाम नरकमरौरवमभूत्तदा । अभैरवं भैरवाख्यं कुम्भीपाकमपाचकम् । शृङ्गाटकमशृङ्गाटं लोहसूच्यप्यसुचिताम् । जगाम जगतामीशे प्राप्ते तत्र जनार्द्दने । हस्तमात्रतरा जाता तदा वैतरणी नृणाम् । नरकान्ते तदा याते तत्र विश्वेश्वरे विभौ । पापक्षयात्ततः सर्वे विमुक्ता नारका नराः । पदमव्ययमासाद्य दृष्ट्वा विष्णुं तमोऽपहम्' विमानायुतसाहस्रैरारुढास्ते समन्ततः । समीक्ष्य पुण्डरीकाक्षं मुक्तास्ते सर्वपातकात् । ततः शून्यं मुने जातं सर्वं निरवमण्डलम । दर्शनात्तस्य देवस्य विष्णोर्विश्वस्वरूपिण'' इति प्रजासंयमन इति भयङ्करत्वमुक्तं सोऽप्यत्र युद्धञ्च सूचितं श्रीविष्णुपुराणे । जित्वा वैवस्वतं यममित्युक्तेः । अवन्तीखण्डे बहुशो वर्णितम् ।। ४३ ।। सर्वेति । तस्य तत्र निष्कपटतामपि जानन्तमित्यर्थः विष्णो-र्व्यापकत्वेन विश्वप्रभो इत्यात्मनस्तत्सेवकत्वं सूचितं लीलाप्रधानमनुष्याकारयोः लीलामनुष्य हे इति क्वचित्पाठः किन्तु लीला-मनुष्ययोर्विष्णोरित्येव पाठः स्वामिसंमतो लक्ष्यते एकसम्बोधनस्याग्रत एव वत्सेत्यत्र करिष्यमाणसमाधानत्वात् किम् करवाम तदाज्ञापयेति शेषः ।। ४४ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आस्त इत्यादि पद्यार्द्धं श्रीस्वामिपादानामसम्मतम्, अहार्षीदिति तैर्व्याख्यानात्, आविश्य सक्षोभमन्तः प्रविश्य, एकाकी श्रीभगवानेवेति ज्ञेयम् । तथा च श्रीविष्णुपुराणे (५।२१।२७)—'इत्युक्तोऽन्तर्जलं गत्वा हत्वा पञ्चजनञ्च तम् । कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तमम्' ।। इति, तच्च रथरक्षाद्यर्थं श्रीबलदेवस्य तीरे स्थापनात् । तदङ्गप्रभवमिति तत्त्वतो विप्रशापा-पेक्षया नित्यपार्षदेन शङ्खेन दैत्यत्वस्वीकारात् ।। ४१ ।। तत इति तदुदरे दर्शनेन तस्य मरणमननादित्यर्थः । दयितामिति सदैव सपरिवारस्य यमस्य तत्रैव निवासात्, अत एव हलायुधसहितस्तां गत्वेति श्रीबलदेवेन युद्धार्थं हल प्रकटयामासेति ज्ञेयम् । जनार्द्दन इति वैष्णवाग्र्येण धर्म्मराजेन चिरं निजगृहेऽच्चर्चयितुमपेक्ष्यत इति भावः । शङ्खं तमेव प्रकर्षेणात्युच्चैर्दध्मौ ।। ४२ ।। प्रजाः पापिप्राणिनः संयमयति दण्डयतीति तथा स इति महाभयङ्करत्वमुक्तम्, सोऽपि, यद्वा, प्रजासंयमन इति श्रीभगवद्दत्ताधि-कारापेक्षया प्राक्कृतयुद्धार्थनिर्जितः सन्निति श्रीविष्णुपुराण—हरिवंशोक्तानुसारेण ज्ञेयम् । तथा च विष्णुपुराणे (५।२१।३०)—

'तं पाञ्चजन्यमापुर्य्य गत्वा यमपुरीं हरिः । बलदेवश्च बलवान् जित्वा वैवस्वतं यमम् ।।
तं बालं यातनासंस्थं यथापूर्वं शरीरिणम् । पित्रे प्रदत्तवान् कृष्णो बलश्च बलिनां वरः' ।। इति;

श्रीहरिवंशे च (विष्णु० प० ३३।२०)—'ततो वैवस्वतं देवं निर्ज्जित्य पुरुषोत्तमः । आनिनाय गुरोः पुत्रं चिरनष्टं यम-क्षयात्' ।। इति, यद्वा, प्रजाः सर्वानेव प्राणिनः, सम्यक् यमयति धर्म्माधर्म्मफलप्रदानेन शोधयित्वा मर्यादायां स्थापयतीति तथा सः । एवं लोकहितकारित्वेन परमसाधुत्वमुक्तम् । अत एव भक्त्योपबृंहितां बर्द्धितां सम्पादितां वा सर्वभूताशयालमिति मद्भक्त-वरोऽयं मद्दर्शनाद्यर्थमेव मृतं गुरुपुत्रमानीतवानित्यस्यापराधः कश्चिन्न घटते, अथ चानुग्राह्य एवेति भावः । कृष्णमिति प्राधान्यात्त-त्प्रत्येवोक्तेः; अतस्तमेव सम्बोधयति—विष्णो हे प्रभुत्वेन विश्वव्यापकेति । इत्यात्मनस्तत्सेवकत्वं सूचितम् युवयोरिति तत्संगि-त्वाग्रजत्वादिना श्रीबलदेवस्याप्यपेक्षत्वात् । लीलया लीलार्थं वा मनुष्ययोः; यद्वा, लीलामयमनुष्याकारयोः । किं करवाम तदा-ज्ञापयेति शेषः । बहुत्वं निजपरिवारापेक्षया, यद्वा, किं करवाम, किं कर्त्तुं शक्नुम इत्यर्थः । परमेश्वरतया परिपूर्णत्वात्, ततश्च बहुत्वमिन्द्राद्यभिप्रायेण ।। ४४ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सात्वरं यथा तथा जलमाविश्य तं पञ्चजनं हत्वा तस्योदरे बालं नापश्यत् किं तु तस्य पञ्चजनस्याङ्गाज्जातं शङ्खं पाञ्च-जन्याख्यमादाय रथमारुरोह ।। ४१ ।। ततो यमस्य प्रियां संयमनीं नाम पुरीं गत्वा शङ्खं पाञ्चजन्यं दध्मौ ध्वनयामास ।। ४२ ।। तदा प्रजानां शास्त्रातिलङ्घिनां शास्ता यमः शङ्खनिर्ह्रादमाकर्ण्य आगत्य भक्त्युत्कलितां तयोर्महतीं पूजां चक्रे ।। ४३ ।। सर्वेषां भूता-नामाशया हृदयानि तान्यालयानि यस्य तं कृष्णमवनतः सन्प्रोवाच किं हे लीलामनुष्य ! लीलार्थपरिगृहीतमनुष्यसंस्थान ! हे विष्णो ! युवयोः वः किं करवाम किङ्करा वयमित्यर्थः ।। ४४ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सर्वभूतानामाशयो हृदयस्थानमालयो यस्य स तथा तम् ।। ४४–४६ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदङ्गप्रभवमिति । तत्ततो विप्रशापापेक्षया नित्यपार्षदेन शङ्खेन दैत्यानुकरणात् ।। ४२–५० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पञ्चचत्वारिंशोऽध्यायः ।। ४५ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

लीलामनुष्ययोर्लीलायां मनुष्ययोरप्राकृतयोः ।। ४४ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अन्तर्जलचर इत्यत्रास्ते इति शेषो ज्ञेयः आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुरिति पद्यार्द्धमधिकं क्वचिदिति वैष्णवतोषणी अत उत्तरत्रापि प्रभुरित्यध्याहार्य्यम ।। ४१ ।। रथमागमदिति । रथं तत्रस्थं बलदेवं च तीरे स्थापयित्वैव स्वयमेकाकयेव कृष्णः सर्वज्ञत्वात्तज्जानन्नपि तदन्वेषणमिषेण स्वीयं शङ्खमानैषीदिति ज्ञेयं तदङ्गप्रभवमिति । चिन्मयत्वान्नित्यस्यापि पाञ्चजन्यस्य जयविजयवदसुरत्वमिति केचिदाहुः । "ततः पञ्चजनं हत्वा ग्राहरूपं महासुरम् । तन्मध्यस्थं स जग्राह शङ्खं प्रस्तं हि हि यत्पुरे"त्यवन्तीखण्ठवचनदृष्ट्या तदङ्गमध्ये प्रकर्षेण भवः स्थितिर्यस्य तमिति च केचिद्व्याचक्षते ।। ४२ ।। शङ्खं प्रदध्माविति तद्ध्वनिं श्रावयित्वा सर्वानेव नारकारन् जीवान् कृपासिन्धुः संसारादुद्धारेत्यवन्तीखण्डं दृष्टं यथा "असिपत्रवनं नाम शीर्णपत्रमजायत । रौरवं नाम नरकमरौरवमभूत्तदा अभैरवं भैरवाख्यं कुम्भीपाकमपाचक"मित्यादि अन्ते च "पापक्षयात्ततः सर्वे विमुक्ता नारका नराः । पदमव्ययमासाद्ये"त्यादिना वैकुण्ठं च तान् प्रस्थापयामासेत्यपि दृष्टम् ।। ४३ ।। लीलामनुष्ययोर्विष्णोरिति लीलामनुष्य हे विष्णो इति च पाठद्वयम् ।। ४४ ।।

गूढार्थदीपिनी

तदिति सार्द्धम् । पञ्चजने दैत्ये भवः पाञ्चजन्यः । 'पञ्चजनारात्' इति यत् प्रत्ययः । पञ्चजनस्य अङ्गात् प्रभवो यस्य ।।४२।। प्रजाः संयच्छति नियच्छतीति तथा ।।४३।। आशयो हृदयमेव आलयो यस्य तम् । लीलेति पृथक्-पृथक् द्वयोः सम्बोधनम् ।।४४–४६।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सम्यक् यमयतीति संयमनस्तथा सः ।। ४३ ।। सपर्य्यां पूजां सर्वभूताशयालयम् सर्वप्राणिहृत्पद्मनिलयम् । हे लीलामनुष्य ! लीलार्थं मनुवंशे आविर्भूत ! ।। ४४ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अन्तर्जलं चरतीति स तथा । तदाकारमीरयति । शङ्खरूपस्य धरतीति धर इति । जलमाविश्य तं दितिसुतं हत्वा गृह्यतां त्वया सुतः सान्दीपिनेरिति स उवाच ।। ४१ ।। जठरं विदार्य तत्र दीर्णे उदरे नापश्यन्न ददर्श तदङ्गात्सम्भवतीति स तथा तं शङ्खं ।। ४२ ।। संयमिनीं नाम तन्नाम्नीं सहलायुध इति गमनपात्रे सहितता ।। ४३ ।। आकर्ण्यागत्य चेति शेषः । सर्वभूतानामाशयोऽन्तःकरणं हृदयमिति यावत् स एवाश्रयो यस्य तं हे लीलामनुष्य नीलचैल हे विष्णो कृष्ण युवयोः किं करवाम इति यम उवाच ।। ४४ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदि पश्चात्सोऽपि मृतः स्यात्तदापि व्याजत्वं सम्भवति तन्निवृत्त्यर्थमाह । आस्त इति । जीवतीत्यर्थः । तेनैकाहृतः तत्र प्रविश्यान्यो मारितवानिति शङ्काव्यावृत्त्यर्थमाह । नूनमिति । नयनमात्रं निषिद्धमिति संयोगविभागः अनेनैव कृत इति एतस्मात्संयोगः बलं च गृहीतं कालादीनां परिणामहेतूनां प्रतिलोमतया निवेशनार्थम् उत्तमं कार्यं भगवान् गृह्णातीत्याह । तच्छ्रुत्वा दूरेमागच्छत्विति शीघ्रमेव समर्थत्वात्स्वयमेकाकी समुद्रजलं प्रविश्य पलायमानं तं शङ्खोद्धारे हत्वा तदुदरे तं बालकं प्राणेन्द्रियजीवसंघातरूपं नापश्यत् ततः कर्मवशात् अन्यत्र गत इति । ननु गच्छत्येवान्यत्र किमिति जिज्ञासया दृष्टः हतो वेत्याशङ्क्याह । अर्भकमिति । बालकत्वाददनकर्माधीनो भविष्यतीत्याशङ्क्य दर्शनं हेतुः ।। ४१ ।। मारणे तु तदङ्गप्रभवं शङ्खमादायेति अत एव भगवतः शङ्खः पाञ्चजन्यः तत्र स्थितान् सूक्ष्मानवयवान् प्रति लोमतया मज्जनक्षणास्थितपर्यतान् विधाय तान् पुनः यमलोके स्थितः देहे निवेश्य तत्र स्थितान् प्रतिलोमतया पुनरुत्क्रमेणावस्थास्थितान् कर्तुं रथमागमत् यत्र बलभद्रः ततः संयवनीं सम्यग् यमयति सर्वानेवेति मर्त्यदेवतायाः पुरीं नामेति प्रसिद्धां यद्भयात्सर्व एव सन्मार्गरता भवन्ति यद्यपि यमस्य बहूनि स्थानानि सन्ति तथापि सा दयिता ।। ४२ ।। अभयार्थमाह । जनार्दन इति । जनामविद्यामेव यत्रादर्दयति तत्र कान्यवार्ता तत्रापि सहलायुधः पातालस्यापि पतिः समुद्रवद्यमस्यापि कृत्यमाह । शङ्खनिर्ह्रादमाकार्ण्येति । शङ्खनादनं तु सर्वप्रबोधनार्थं तत्रत्यावयवानां प्रेरणार्थं प्रजानां संयमन इति स्वस्वाधिकारव्यावृत्त्यर्थं च ।। ४३ ।। भीतः सन् तयोः महतीमेव सपर्यां पूजां वैष्णवत्वाद्भक्त्युपबृंहितां चक्रे स हि कृतार्थः सन् आत्मानं कृतकृत्यं मन्यमानः सन् कार्यविशेषात् समागतइति विज्ञाय स्वापराधनिवृत्तये तत् पृच्छति । उवाचेति। नम्रः सन् कृष्णं सदानन्दकरणार्थमागतं वा भयाभावार्थमुक्तं ज्ञात्वैव पृच्छतीति शङ्काव्यावृत्त्यर्थमाह । सर्वभूताशयालयमिति। सर्वभूतानामाशयेष्वन्तःकरणेषु आलयो गृहं यस्य अज्ञात्वा कथं न व्यावर्तयति लीलामनुष्येति लीलामनुष्य हे विष्णो ! युवयोः करवाम किं वस्तुतस्तु विष्णुरेव भगवान् एवं सति युवयोरहं किङ्करः किङ्करवाणीति वा सर्वात्मतया परिगृह्य मर्यादां बाधकत्वेन वक्ष्यति ।। ४४ ।।

श्रीसुबोधिनी–सार

हे कृष्ण तेन दैत्येन नूनमाहृतः तद्वचः श्रुत्वा प्रभुः समर्थः सत्वरं यथा भवति तथा जलं प्रविश्य तं पञ्चजनं हत्वा तदुदरेऽर्भकं बालकं नापश्यन ॥ ४१ ॥ तस्यां गात्रप्रभवमुत्पन्नं शंखं पांचजन्यं नामादाय रथमागमत् ततोऽनन्तरं यमस्य संयमनीं नाम दयितां प्रियां पुरीं गत्वा ॥ ४२ ॥ सहलायुधः सबलो जनार्दनः कृष्णः शंखं प्रदध्मौ वादितवान् शंखस्य निर्ह्रादं ध्वनिमाकर्ण्य श्रुत्वा प्रजासंयमनो यमो धर्मराजः ॥ ४३ ॥ तयो रामकृष्णयोः भक्त्योपबृंहितां महतीं सपर्यां पूजां चक्रे अवनतः प्रणतः सर्वभूतानामाशय आलयो निवासो गृहं यस्य स तं कृष्णमुवाच ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्य पञ्चजनस्याङ्गाज्जातं पाञ्चजन्याख्यं शङ्खमादाय रथं प्रत्यागमत् ततश्च सहलायुधः बलभद्रेण सहितो जनार्दनः श्रीकृष्णो यमस्य दयितां प्रियां संयमनीं नाम पुरीं गत्वा शङ्खं पाञ्चजन्यं प्रदध्मौ ध्वनयामास । तदा च प्रजानां शास्त्रमर्यादातिलङ्घिनां संयमनः शास्ता यमः शङ्खनिर्ह्रादं शङ्खध्वनिमाकर्ण्य श्रुत्वा आगत्य भक्त्योपबृंहितां युक्तां तयोर्महतीं सपर्यां पूजां चक्रे ॥ ४२–४३ ॥ सर्वेषां भूतानां आशयाः हृदयानि यस्य तं सर्वान्तर्यामिण कृष्णमवनतः सन्नुवाच । तदुक्तिमेवाह—लीलामनुष्य लीलार्थं परिगृहीतमनुष्यविग्रह, वस्तुतस्तु हे विष्णो ! युवयोः किं कार्यं वयं करवाम ? ॥ ४४ ॥

अन्वितार्थप्रकाशिका

तदिति सार्द्धम् । तस्य पञ्चजनस्याङ्गात्प्रभवो यस्य तं पाञ्चजन्याख्यं शङ्खमादाय रथं प्रत्यागमत् । रथस्थं बलदेवं च तीरे स्थापयित्वैव स्वयमेकाक्येव कृष्णः सर्वज्ञत्वात्तत्र गुरुपुत्राप्राप्तिं जानन्नपि तदन्वेषणमिषेण स्वीयं शङ्खमानैषीदिति ज्ञेयम् । तदङ्गप्रभवमिति चिन्मयत्वान्नित्यस्यापि पाञ्चजन्यस्य जयविजयवदसुरत्वमिति केचिदाहुः । महानपि शङ्खः स्वेच्छया वाद्ययोग्यः सूक्ष्माकारः कृत इति ज्ञेयम् । तत इति । ततश्च सहलायुधः बलभद्रेण सहितो जनार्दनः श्रीकृष्णो यमस्य दयितां प्रियां संयमनीं नाम पुरीं गत्वा शङ्खं पाञ्चजन्यं प्रदध्मौ ध्वनयामास । तद्ध्वनिं श्रावयित्वा सर्वानेव नारकान् जीवान् कृपासिन्धुः संसारादुद्धारेत्यवन्तीखण्डे दृष्टम् । यथा "असिपत्रवनं नाम शीर्णपत्रमजायत ॥ रौरवं नाम नरकमरौरवमभूत्तदा । अभैरवं भैरवाख्यं कुम्भीपाकमपाचकम्" ॥ इत्यादि अन्ते च "पापक्षयात्ततः सर्वे विमुक्ता नारका नराः ॥ पदमव्ययमासाद्य" इत्यादिना वैकुण्ठं च तान् प्रस्थापयामासेत्यपि दृष्टम् ॥ ४२ ॥ शङ्खेति । तदा च प्रजानां शास्त्रमर्यादातिलंघिनां संयमनः शास्ता यमः शङ्खस्य निर्ह्रादं ध्वनिमाकर्ण्य श्रुत्वा आगत्य भक्त्योपबृंहितां युक्तां तयोर्महतीं सपर्यां पूजां चक्रे ॥ ४३ ॥ उवाचेति ॥ सर्वेषां भूतानाम् आशयाः हृदयानि आलयानि यस्य तं सर्वान्तर्यामिणं कृष्णमवनतः सन्नुवाच । हे लीलार्थं मनुष्यविग्रह ! हे विष्णो ! युवयोः किं कार्यं करवाम ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सपर्यां पूजां भक्त्या उपबृंहितां युक्तां ॥ ४३ ॥ अवनतो नम्रः सर्वभूतान्तःकरणनिवासम् ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः, यमस्य दयितां, संयमनीं नाम पुरीं गत्वा, सहलायुधो बलभद्रसहितः, जनार्दनः कृष्णः, शङ्खं पाञ्चजन्यं, प्रदध्मौ ध्वनयामास ॥ ४२ ॥ शङ्खेति ॥ तदा, प्रजासंयमनः शास्त्रातिलङ्घिप्रजानां शास्ता यमः, शङ्खनिर्ह्रादं पाञ्चजन्यध्वनिं आकर्ण्य, सन्मुखमागत्येति शेषः । भक्त्युपबृंहितां भक्त्युत्कलितां, तयोः महतीं सपर्यां पूजां, चक्रे ॥ ४३ ॥ उवाचेति ॥ सर्वेषां भूतानामाशया हृदयानि ते आलयो निवासस्थानं यस्य तं कृष्णं, अवनतः सन्, उवाच । हे लीलामनुष्य लीलार्थमनुगृहीतमनुष्यसंस्थान, हे विष्णो, युवयोः किं करवाम ॥ ४४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

आस्ते तेनाहृत इति : १०.४५.४१.

नैवास्मिन्नधुना सुतः प्रभुगुरोरित्यब्धिना जानताप्यास्ते तेन हृतः स चेति वितथं ह्युक्त्वा स नीतो लयम् ।
तस्माच्चेत् परमार्थदाय्यनृतमप्युक्तं न दोषावहं शास्त्रार्थोऽयमभूत् स्फुटस्त्वितरथा नैवोभयोरज्ञता ॥ ८२ ॥
नानादिग्भ्रमकृज्जडान्तरगतो दुर्दानवः स्वाश्रितो गुर्वर्थापहरोऽयमित्युपशमं नीतः स दैत्यारिणा ।
तादृक् चेदचिरेण तत्फलमपीदृक् तस्य लभ्यं भवेदित्यावेदयितुं तथा स विदधे सन्मार्गसंदर्शकः ॥ ८३ ॥
स्वभावदुष्टोऽयमिहास्ति दानवः कृतापराधस्तु न मेंऽशतोऽप्यसौ ।
ध्रुवं विमान्यैवमजो जघान तं छलादविद्याऽस्य कुतोऽन्यथा प्रभोः ॥ ८४ ॥
यद्यस्ति नियतं स्वार्थलाभस्तर्हि विवेकिनः । तावज्जडान्तर्वासोऽपि न दोषायेति बोधितम् ॥ ८५ ॥

तदङ्गप्रभवमिति : १०.४५.४२.

मया निरागा हत एष दैत्यः कृतार्थमेनं तदहं करिष्ये । विबोधयन्नेवमधोक्षजस्तद् - दरापहाराददरं व्यधात्तम् ॥ ८६ ॥

गत्वेति : १०.४५.४३.

यः स्याद्दर्वापराधो तद्धतिमहमीदृशीं करोमीति । ध्वनयन्नध्वनि शङ्खं ध्वनयन्नध्वगदयालुरवतु हरिः ॥ ८७ ॥

तयोरिति : १०.४५.४४.

शङ्खस्वनेन ते श्रीश कृतान्तोऽपि प्रकम्पितः । आर्चयत्त्वयि पर्याप्ता भीषाऽस्मादिति तच्छ्रुतिः ॥ ८८ ॥
त्वत्पादाब्जजुषो जनानपि मनाक् स्प्रष्टुं प्रभो वीक्षितुं शक्तो नाहमहो कुतः पुनरिमं त्वत्पूज्यपादात्मजम् ।
भृत्योन्मत्ततयाऽथवा त्वदुररीकारात् पुराऽभूदिदं क्षन्तव्यं यदितो न जातुचिदपि स्यादीदृशं श्रीपते ॥ ८९ ॥
मन्नामप्रेमभाजो मदपचितिकृतो मत्पदन्यस्तचित्ता मत्सङ्कल्पा मदर्थो मदभिहितगिरो मद्वपुर्भूषणा ये ।
तान्मत्सर्वस्वभूतान् क्वचिदपि न दृशा वक्रया पश्य भृत्यानप्याख्याहि त्वमेवं यम मम कथितः क्रोधशान्तेरुपायः ॥९०॥

ध्यानं हि यस्य हृदये वदने समाख्या कर्णे यशः श्रवणमक्षिण तव स्वरूपम् ।
तान्नैव जात्वपि दृशेश विलोकयामीत्यत्राच्युताङ्घ्रिशपथस्तव मे प्रमाणम् ॥ ९१ ॥

कृष्णप्रिया

शुकदेवजी कह रहे हैं कि राजन् ! समुद्र का प्रत्युत्तर सुनकर शीघ्र ही भगवान् ने समुद्र के भीतर प्रवेश किया और पञ्चजन्य असुर को मार दिया । मारने के बाद उसके पेटको चीरकर भीतर देखा तो बालक नहीं था, तब पाञ्चजन्य शंख लेकर जलसे बाहर तट पर जहाँ रथ था वहाँ पधारे । श्री बलभद्रजी एवं भगवान् कृष्ण रथारोहण कर धर्मराज की प्रिय संयमनी नगरी में पधार कर पाञ्चजन्य शंख बजाया ॥ ४१-४२ ॥ प्रजा को सदा संयम में रखने वाले धर्मराज महाराज यम शंख ध्वनि सुनते ही जहाँ प्रभु विराजे थे वहाँ पहुँचकर भक्ति भाव से दोनों पुरुषों का अद्भुत अर्चन किया । राजन् ! धर्मराज स्वयं वैष्णव होने से यह अर्चन स्वाभाविक था ॥४३॥ वैष्णव वर यमराजा अतिशय दैन्य पूर्वक प्रणामाञ्जलि बद्ध प्राणीमात्र के अन्तःकरण में विराजमान सदानन्द श्रीकृष्ण को निवेदन कर रहे हैं लीला से मनुष्य विग्रह धारण करने वाले हे नाथ हे विष्णो १-मुझे क्या आदेश है २-मैं सेवक आप दोनों देवादि देवों की क्या सेवा करूँ ? ॥ ४४ ॥

श्रीभगवानुवाच

गुरुपुत्रमिहानीतं निजकर्मनिबन्धनम् । आनयस्व महाराज मच्छासनपुरस्कृतः ॥ ४५ ॥
तथेति [1]तेनोपानीतं गुरुपुत्रं यदूत्तमौ । दत्त्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ॥ ४६ ॥[2]

गुरुरुवाच

सम्यक् सम्पादितो [3]वत्स भवद्भ्यां गुरुनिष्क्रयः[4] । को नु युष्मद्विधगुरोः कामानामवशिष्यते ॥ ४७ ॥
गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी । [5]छन्दांस्ययातयामानि भवन्त्विह परत्र च ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—श्रीभगवान् उवाच-महाराज ! निजकर्मनिबन्धनम् , इह, आनीतम् , गुरुपुत्रम् , मच्छासनपुरस्कृतः आनयस्व ॥ ४५ ॥ श्रीशुकउवाच-"तथाइति" उक्त्वा, तेन, उपनीतम् , गुरुपुत्रम् , यदूत्तमौ, स्वगुरवे दत्त्वा, भूयः, वृणीष्व इति तम् , ऊचतुः ॥ ४६ ॥ हे वीरौ ! स्वगृहम् , गच्छतम् , वाम् , पावनी, कीर्तिः, अस्तु, इह, च, परत्र, छन्दांसि, अयातयामानि, भवन्तु, गुरुः उवाच-वत्सौ ! भवद्भ्याम् , गुरुनिष्क्रयः, सम्यक् , सम्पादितः, युष्मद्विधगुरोः, कामानाम् , कः, नु अवशिष्यते ॥ ४७-४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

निजं कर्मैव निबन्धनं नितरां बन्धनं यस्य तथाभूतमपि मदाज्ञापुरस्कारेणानयतस्ते न दोष इत्यर्थः ॥ ४५-४६ ॥ वत्सेति प्राधान्येनेकस्य सम्बाधनम् । गुरोर्निष्क्रयो गुरुदक्षिणा । युष्मद्विधयोः शिष्ययोर्गुरोर्मम कामानां मध्ये को नु कामोऽवशिष्यते न कोऽपीति । पत्न्यभीप्सितया दत्तया पुत्रदानलक्षणया दक्षिणयैवालमित्यर्थः ॥ ४७ ॥ हे वीरौ ॥ ४८ ॥

---

[1] तेनोप-वीर. विज. ।

[2] ततः प्रीतमना राजन्निदं वचनमब्रवीत् । सान्दीपनिर्महाभागो रामकृष्णावरिन्दमौ ॥ विजये ।

[3] वत्सो-बीर.; संपादिता वत्सौ-विज. । [4] निष्क्रिया-विज. [5] इदमर्धं नास्ति-वीरे. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति । अपराधिनो विनापराधमयातनाभोगत्यागे यद्यप्यधिकारिणस्तव दोषस्तथापि परनियन्तुर्ममाज्ञयाऽकर्तव्यमपि कर्तव्यमेवेति भावः । निजकर्म प्रारब्धाख्यं निबन्धनमवश्यभोग्यं यस्य तथाभूतमपि । हे महाराजेति तदत्यन्ताभिक्रममभिप्रेत्य कृपया तत्प्रोत्साहनाय सादरं सम्बोधनम् । तदाज्ञानुवर्ती सन् । अयं भावः–प्रारब्धस्यावश्यकत्वमपि मदाज्ञयैव, अधुना च गुरुपुत्रानयनं मदाज्ञयैव किन्तु विशिष्य साक्षान्मया क्रियमाणत्वादियमेव बलवती, यथा यावदायुः कारावासायाज्ञप्तः कश्चिन्नृपेण, स यदि तं पक्षसमाप्तौ मोक्तुमिच्छेत्तदा पूर्वाज्ञां बाधित्वा तं मुञ्चत्येवेति तद्वदत्रापि ज्ञेयम् । मच्छासनपुरस्कृत इत्यत्र मदाज्ञया तमानमतस्तव को दोष इति विश्वनाथः ।। ४५ ।। तेन यमराजेन । तं गुरुम् । भूयो वृणीष्व पुनराज्ञापय । तथेत्युक्त्वा यमेन तेनोप समीप आनीतम् । गुरुपुत्रमिति यादृशो मृतस्तादृशतच्छरीरकमेवेत्यर्थः । अवन्ती खण्डे तु–"तच्छ्रुत्वा धर्मराजस्तु पुत्रं सांदीपिनेस्तदा । ससर्ज बालरूपं च तद्वन्मानं तदुद्भवम् । पश्यतां सर्वदेवानां तदद्भुतमिवाभवत् ।" इत्युक्तम् । तच्च कृष्णप्रभावैरेव ज्ञेयम् । मच्छासनपुरस्कृत इत्यनेनैव क्रोडीकृतत्वात् । यतो वक्ष्यते एकादशे–"मर्त्येन यो गुरुसुतं यमलोकनीतं त्वाञ्चानयच्छरणदः परमास्त्रदग्धम्" इति । तत्र तेनैव शरीरेणेति तट्टीका च । अतस्तत्प्रभाव एव विवक्षित इति । तथा च श्रीविष्णुपुराणे—"तं पाञ्चजन्यमापूर्य गत्वा यमपुरीं हरिः । बलदेवश्च बलवाञ्जित्वा वैवस्वतं यमम् । तं बालं यातनासंस्थं यथापूर्वं शरीरिणम् । पित्रे प्रदत्तवान्कृष्णो बलश्च बलिनां वरः ।" इति । अत्र यातनासंस्थमिति प्राचीनावस्थोक्ता,—सर्वेषां यातनाशान्तेः । अस्य वैकुण्ठगमनं तु भगवदिच्छया । अथ समुद्राहृतं रत्नादिकं तस्मै दत्तमिति च ज्ञेयम् । तथा च श्रीहरिवंशे—"तदा सांदीपिनेः पुत्रं तद्रूपवयसं तदा । प्रादात्कृष्णः प्रतीतात्मा सह रत्नैरुदारधीः ।" इति । स्वशब्देन गुरौ महाभक्तिर्बोध्यते । अतः परामपि दक्षिणां वृणीष्वेति भूयः पुनरूचतुस्तच्च युक्तमेवेत्याशयेनाह—यदूत्तमाविति । तादृशधर्मप्रचारार्थं यदुकुलेऽवतीर्णत्वादिति भावः ।। ४६ ।। "निष्क्रिया प्रतिकारे स्यात्क्रियाऽभावे स्त्रियाम्" इति धरणिः । ईश्वरानुचराणां सर्वकामाप्तिर्भवति कथं न तद्गुरोरिति भावः । वत्सेति स्नेहविशेषात्कृष्णं प्रति सम्बोधनम् । युष्मद्विधानामपि किमुत युवयोरित्यर्थः ।। ४७ ।। वीरौ सुभटौ । वां युवयोः । "अयातयामः सफले प्रहारादर्वाक्कर्मणि" इति धरणिः । इह साफल्यमध्यापनादिना परत्र तदुक्ताचरणेनोत्तमफलदत्वादित्यर्थः । अत्रार्थे मानम्—"यो वा अविदितार्थ यच्छन्दोदैवतविनियोगेन ब्राह्मणो न मन्त्रेण वा यजते याजयति अध्यापयति वा स्थाणुं गच्छति श्वभ्रं वा वार्च्चेत्प्रमीयते पापीयान्भवति यातयामान्यस्य छन्दांसि भवन्ति । अथ मन्त्रे मन्त्रे वेद सर्वमायुरेति अयातयामान्यस्य छन्दांसि भवन्ति । तस्मान्मंत्रेमंत्रे विद्यात्" इति श्रुतेरेवार्थो यजुर्वेददीपे कात्यायनेन धृतः । तथाह—"द्रष्टार ऋषयः स्मर्तारः परमेष्ठ्यादयो देवता मन्त्रान्तर्भूता अग्न्यादिका हविर्भाजः स्तुतिभाजो वा छन्दांसि गायत्र्यादीनि एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयति वा तस्य ब्रह्म निर्वीर्यं यातमामं भवत्यन्तराशु गर्तं वा पद्यते स्थाणुं वार्च्छति प्रमीयते वा पापीयान्भवति" इति । स्वगृह इति— यद्यप्येतन्मद्गृहमपि युवयोरेव गृहं तथापि तत्र केवलनिजाभिमानात् स्वीये माथुरे गृहे इत्यर्थः । 'स्वगृहम्' इति पाठः क्वचित् । हे वीराविति—तादृशदानशौर्यदयासु वीरत्वात्त्रिविधवीरतायुक्तौ युवामिति भावः । तत्र तदादीन्प्रणम्य गच्छन्तावाशिषाभिनन्दयति— कीर्तिरिति ।। ४८

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निजं कर्म प्रारब्धलक्षणं निबन्धनमवश्यभोग्यं यस्य तथाभूतमपि हे महाराजेति तदत्यन्तातिक्रममभिप्रेत्य कृपया तत्प्रोत्साहनाय सादरं संबोधनं मदाज्ञानुवर्ती सन् अयं भावः । प्रारब्धस्यावश्यकत्वं मदाज्ञयैव अधुना च गुरुपुत्रानयनं मदाज्ञयैव किन्तु विशिष्य साक्षान्मया क्रियमाणत्वादियमेव बलवतीति ।। ४५ ।। तथेत्युक्त्वा तेन यमेन उप समीपे आनीतं गुरुपुत्रमिति यादृशो मृतस्तादृशतच्छरीरकमेवेत्यर्थः । अवन्तीखण्डे ह्युक्तं तच्छ्रुत्वा धर्मराजस्तु पुत्रं सान्दीपनेस्तदा । ससर्ज बालरूपं च तदुन्मानं तदुद्भवम् पश्यतां सर्वदेवानां तदद्भुतमिवाभवदि"ति तच्च श्रीकृष्णाज्ञाप्रभावेणैवेति ज्ञेयं मच्छासनपुरस्कृत इत्यनेनैव क्रोडीकृतत्वात् यतो वक्ष्यते एकादशे "मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्ध"मिति तत्र तेनैव शरीरेणेति तट्टीका च अत्र तत्प्रभाव एव हि विवक्षित इति तथाच श्रीविष्णुपुराणे" तं पाञ्चजन्यमापूर्य्य गत्वा नमपुरीं हरिः । बलदेवश्च बलवान् जित्वा वैवस्वतं यमम् तं बालं यातनासंस्थं यथापूर्वं शरीरिणम् । पित्रे प्रदत्तवान् कृष्णोः बलश्च बलिनां वर" इति अत्र यातनासंस्थमिति प्राचीनावस्थोक्ता सर्वेषां यातनाशान्तेः अस्य वैकुण्ठागमनं तु भगवदिच्छया अथ समुद्राहृतं च रत्नादिकं तस्मै दत्तमिति ज्ञेयं तथाच श्रीहरिवंशे "ततः सान्दीपनेः पुत्रं तद्रूपवयसं तदा । प्रादात् कृष्णः प्रतीतात्मा सहरत्नैरुदारधी"रिति स्वशब्देन गुरौ महाभक्तिर्बोध्यते अतः परामपि दक्षिणां वृणीष्वेति भूयः पुनरूचुतुः तच्च युक्तमेवेत्याशयेनाह । यदूत्तमाविति । तादृशसद्धर्मप्रचारार्थं यदुकुलेऽवतीर्णत्वादित्यर्थः ।। ४६ ।। वत्सेति स्नेहविशेषाच्छ्रीकृष्णं प्रति तथा सम्बोधनं युष्मद्विधानामपि किमुत युवयोर्गुरोरित्यर्थः ।। ४७ ।। स्वगृहं इति यद्यप्येतन्मद्गृहमपि युवयोरेव गृहं तथापि तत्र केवलनिजाभिमानात् स्वीये माथुरागृहे इत्यर्थः । स्वगृहमिति पाठः क्वचित् हे वीराविति तादृशदानात्तादृशशौर्य्याच्च ततस्तदादीन् प्रणम्य गच्छन्तावाशिषाभिनन्दयति । कीर्त्तिरिति ।। ४८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

निजं कर्म्म प्रारब्धलक्षणं निबन्धनमवश्यभोग्यं यस्य तथाभूतमपीति पूर्व्वं तदानयने यमस्य दोषः परिहृतः, तस्यैव तादृक् प्रारब्धत्वात् । हे महाराजेति धर्म्मराजत्वात् मद्भक्त्या प्रारब्धस्याप्यतिक्रमो भवतीति धर्म्मतत्त्वं त्वया ज्ञायत एवेति भावः। अन्यत्तैर्व्याख्यातम् । यद्वा, नन्वेवं मर्य्यादाया भंगः स्यात्तत्राह—मदिति, मदाज्ञानुवर्त्ती सन् । अयं भावः—सोऽपि मदाज्ञयैवाधुना च गुरुपुत्रानयनं मदाज्ञयैव, किन्तु निजभक्तापेक्षया साक्षान्मया क्रियमाणेयमाज्ञावश्यमेव परिपाल्येति । हे महाराजेति निजभक्तार्थं मया मर्य्यादातिक्रम्यत इति त्वया ज्ञायत एवेति भावः । यद्वा, राजदन्तादिवत मच्छासनानां राजा, तत्रापि महान्, महाराज ! मच्छासनं तत्पुरस्कृत इति मर्य्यादापालनाज्ञायाः सकाशान्निजभक्तार्थाज्ञायास्तत्र च साक्षान्मया विधीयमानायाः परमगरिष्ठत्वादियमेव नितरामपेक्ष्येति भावः ।। ४५ ।। तेन यमेन, उप समीपे; किंवा, उपायनत्वेनानीतं समर्पितं गुरुपुत्रं स्वगुरवे दत्त्वा; यद्वा, यथापूर्व्वशरीरत्वादिनोपस्कृत्यानीतम् , आदायेति शेषः । समुदाहृतञ्च रत्नादिकं तस्मै दत्तमिति ज्ञेयम् , तथा श्रीहरिवंशे (विष्णु प० ३३।२६)—ततः सान्दीपनेः पुत्रं तद्रूपवयसं तदा । प्रादात् कृष्णः प्रतीतात्मा सहरत्नैरुदारधीः' ।। इति । 'तम्' इति पाठे यादृशो मृतस्तादृशमेव, तथेति यमेनोक्ते सति स्वयमेव गुरुसमीपमानीतमित्यर्थः । स्वशब्देन गुरौ महाभक्तिर्बोध्यत, अतः परामपि दक्षिणां वृणीष्वेति भूयः पुनरूचतुः, तच्च युक्तमेवेत्याशयेनाह—यदुत्तमाविति, गुरुसन्तोषणादिसद्धर्म्मप्रदर्शनार्थं यदुकुलेऽवतीर्णत्वादित्यर्थः ।। ४६ ।। वत्सेति स्नेहविशेषाच्छ्रीकृष्णं प्रति तथा सम्बोधनम् । भवद्भ्यामिति द्वयोरपि सामान्येन सम्यग्गुरुदक्षिणा सम्पादनात् । युष्मद्विधानां कथञ्चिद्युवयोः किञ्चित् सादृश्यवतामपि, किमुत युवयोर्गुरोरित्यर्थः ।। ४७ ।। स्वगृहमिति यद्यप्येतन्मद्गृहमपि युवयोरेव गृहम् , तथापि स्वकीये माथुरे गृहे इत्यर्थः । हे वीराविति तादृशदानात् तादृशशौर्य्याच्च । हेयमप्युक्तिचातुर्य्येणाशीर्ज्ञेया; पावनी परमनिर्म्मलेत्यर्थः, यद्वा, जगत्पावित्र्यकारिणी, अतो मृतपुत्रानयनाद्यर्थं युष्मन्नियोजनादिना जातो मदपराधोऽपि युष्मत्कीर्त्त्यापनेष्यत इति भावः ।। ४८ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कोनु इति युष्मद्विधगुरोः युष्मद्विधानां गुरोः ।। ४७-५० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पञ्चचत्वारिंशोऽध्यायः ।। ४५ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थमुक्तः प्राह भगवान् । गुरुपुत्रमिति । इह त्वत्संनिधावानीतं त्वद्भटैरिति शेषः । निजकर्मनिबन्धनं स्वकर्माधीनं स्वकर्मणेह प्रापितमप्यस्मद्गुरुपुत्रं हे महाराज ! यम मच्छासनपुरस्कृतस्त्वमानय मदाज्ञापुरस्कारेणानयतस्तव न दोष इति भावः ।। ४५ ।। तथेत्यङ्गीकृत्य तेन यमेनोपानीतं गुरुपुत्रमादायागत्य स्वगुरवे दत्त्वा पुनर्वरान्तरं वृष्णीष्वेत्यूचतुः ।। ४६ ।। एवमुक्तः प्राह द्विजः । सम्यगिति । हे वत्सौ भवद्भ्यां गुरुनिष्क्रयः गुरुदक्षिणा सम्यक् सम्पादितः युष्मद्विधयोर्गुरोर्मम कामानां मध्ये को नु कामोऽवशिष्यते न कोऽपि ।। ४७ ।। अतो हे वीरौ ! स्वगृहं गच्छतं वां युवयोः कीर्त्तिर्लोकं पुनानाऽस्तु विपुला भवतु ।। ४८ ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

गुरुपुत्रमित्यादि । निजकर्मनिबन्धनमिति निजकर्मैव नितरां बन्धनं यस्य, तथाभूतमपि मच्छासनपुरःसरः सन् आनयस्व । मच्छासनेनैव तस्य प्रारब्धं नष्टमित्यर्थः । त्वयात्र मच्छासने विप्रतिपत्तिर्न कार्येति भावः ।। ४६-५० ।।

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे पञ्चचत्वारिंशोऽध्यायः ।। ४५ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

निजकर्म-निबन्धनमिति-निजकर्मैव नितरां बन्धनं यस्य तथाभूतमपि मच्छासन पुरस्कृत इत्यनेनास्य सर्वं प्रारब्धं क्षीणम् , तस्मादत्र विप्रतिपत्तिर्न कार्या । शीघ्रं गुरुपुत्रम् आनीयतामिति भावः ।। ४६-५० ।।

इति पञ्चचत्वारिंशोऽध्यायः ।। ४५ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निजं कर्म प्रारब्धलक्षणमवश्यभोग्यं यस्य तथाभूतमपि । मर्त्येन यो गुरुसुतं यमलोकनीतमित्येकादशोक्तेः तेनैव शरीरेणैव युक्तमिति टीका व्याख्यानाच्च मच्छासनेति मदाज्ञा पुरष्कारेणानयतस्तव को दोष इति भावः ।। ४५-४६ ।। युष्मद्विधानामपि गुरोः किमुत युवयोर्गुरोर्मम कामानां नानाविधानां मध्ये कः कामः ।। ४७-५० ।।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमस्य पञ्चचत्वारिंशोऽप्यजनि सङ्गतः ।। ४५ ।।

गूढार्थदीपिनी

गुरुनिष्क्रयः गुरुदक्षिणा युष्मद्विधयाः शिष्ययो; गुरोः कामानां मध्ये को नु कामः उपशिष्यते न कोऽपीत्यन्वयः। वत्सेति प्राधान्यादेकस्य सम्बोधनम् ॥ ४७ ॥ वां युवयोः। अयातयामानि सफलानि सर्वदोषस्थितानि 'अयातयामः सफले' इति धरणिः ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निजानि कर्माण्येव निबन्धनानि यस्य तम्। मच्छासनं पुरोऽग्रे शिरसि कृतं येन सः ॥ ४५-४६ ॥ गुरोर्निष्क्रयो विद्यासमाप्तौ दक्षिणा ॥ ४७ ॥ हे वीरौ ! स्वगृहं गच्छतम् वां युवयोः पावनी लोकपावनी कीर्तिरस्तु ॥ ४८ ।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गुरुपत्रमानीतं स्वामिन्नानयो मया कृतस्तत्कृतं कर्म तथा वर्ततेति स आनीत इति सत्यं तथाऽपि मच्छासनं पुरस्कृतं येन स सन्निजकर्मबन्धनं। एवं त्वत्तो मयाऽऽनीय पित्रे देयत्वे च निजकर्मनिबन्धनम्। आनयस्व ॥ ४५ ॥ तेन यमेन सादृश्य-सम्भाषणस्मृत्यादिकं सर्वं श्रीकृष्णकृपातो नचिकेतोवदिति ज्ञेयं ॥ ४६ ॥ प्रीतमनास्सन्तुष्टमनाः ॥ ४७ ॥ मुखतो मुख्योऽयमिति वत्सेति सम्बोधितवान्। यद्वा वत्सौ च तौ भवन्तौ चेति ताभ्यां। गुरुनिष्क्रिया गुरुकृतप्रतिक्रिया सम्यक सम्पादिता। वत्साविति पाठो निर्वत्सनाभिः। युष्मद्विधानां गुरोः कामानां काम्यानां विषयाणां मध्ये कः कामोऽवशिष्यते सर्वः सम्पूर्ण एव। स्वगृहं गच्छती वां पावना कीर्तिः पावनी लोकपाल्यस्तु ॥ ४८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवान् ईश्वरवाक्यमाह। गुरुपुत्रमिहानीतमिति। निजकर्मैव नितरां बन्धनं यस्य स्वतः कर्माधीनम् अतस्त्वया स्वार्थं नानीतः भाविज्ञानेऽप्यतो नापराधः आज्ञामाह। आनयस्वेति। कथं मर्यादा मया त्यक्तव्येति शङ्कायां महाराजसम्बोधनं स हि कदाचित्पुष्टिमपि स्वीकरोतीति विशेषमप्याह। मर्यादातिक्रमे मच्छासनपुरस्कृत इति मम शासनमाज्ञैव पुरस्कृतं येन ॥ ४५ ॥ एवमधिकारवशादीश्वराज्ञया च निरूपितार्थे तदर्थं निःसंदिग्धं प्रवृत्त इत्याह। तथेति। तथैव करिष्यामीति तेनानीय दत्तं गुरुपुत्रं भगवत्कृपया पूर्वावस्थां प्राप्तं प्रति संक्रमेण दृष्टद्वारैव न त्वलौकिकप्रकारेण समानीय यादवश्रेष्ठौ यदुरपि धर्मपरायणः अतो गुरूक्तं तथैव कृतवन्तौ ततः स्वगुरवे दत्त्वा भूयो वृणीष्वेत्यूचतुः अयं तु वस्तुतो न दक्षिणारूपः किं तु तेषामेव तेभ्यो दत्तमिति प्रतिबन्ध-निवर्त्तकत्वेनाज्ञाकारी जातः ॥ ४६ ॥ द्वितीयवारं वरो न याचनीय इति तस्य बुद्ध्या स एव वर इति लोकबुद्ध्या अप्रार्थयन्निव प्रार्थयति। सम्यक् संपादितो वत्साविति। भवद्भ्यां गुरुनिष्क्रयः गुरोः प्रत्युपकाररूपः दक्षिणात्मकः। भवद्भ्यामेव सम्यक् संपादितः नत्वन्य असाध्यं कर्तुं शक्तः सर्वं सति शास्त्रप्रामाण्यात् शिष्याद्गुरुर्महान् भवतीति भगवत्कृपयैव महत्त्वे सिद्धे युष्मद्विधस्य गुरोर्मम कामानां मध्ये कः कामोऽवशिष्यते यः प्रार्थनीयः स्यात् परमेतदेव कर्त्तव्यमिति ॥ ४७ ॥ अभ्यनुज्ञारूपं द्वयं प्रार्थयति। स्वगृहं गच्छतं वीरौ भवतं गार्हस्थेन स्थातव्यं सर्वदा जय एव भवत्वित्यर्थः। कीर्त्तिश्च सर्वलोकपावनी भवतु आशीर्वादो वा वरो वा यथाधिकारं ज्ञातव्यः ॥ ४८ ॥

श्रीसुबोधिनी–सारः

हे लीलामनुष्य हे विष्णो युवयोः किं करवाम। कृष्णोक्तिः। निजं स्वीयं कर्मैव निबन्धनं यस्य तथाभूतं गुरोः पुत्रम् इहानीतं त्वमानयस्व हे महाराज मम शासने आज्ञायां पुरस्कृतोग्रेचरः सन् ॥ ४५ ॥ तथेति उक्त्वा तेन यमेनोपानीतं प्रापितं समर्पितं वा गुरुपुत्रं स्वगुरवे सान्दीपिनये दत्त्वा भूयः पुनर्वृणीष्वेति यदूत्तमौ तं गुरुमूचतुः ॥ ४६ ॥ गुरूक्तिः। हे वत्स गुरोर्निष्क्रयो गुरुदक्षिणा भवद्भ्यां सम्यक् प्रकारेण सम्पादितः युष्मद्विधयोर्गुरोर्मम को नु कामोऽवशिष्यते न कोऽपि नामेति पादपूर्त्तौ ॥ ४७ ॥ हे वीरौ इत्येके वीरौ युवां स्वगृहं गच्छतं वां युवयोः पावनी विश्वोद्धारकर्त्री कीर्तिरस्तु न यातो गतो यामः सारो येषां तानि अयातयामानि छन्दांसि इह परत्र च लोकद्वये भवन्तु इत्याशीर्वादः तत्प्रसादमन्तरा विद्यायाः श्रमहेतुत्वेनानर्थकारितोह्या ॥ ४८ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

इत्युक्तो भगवानाह—गुरुपुत्रमिति। उत्साहार्थं तन्महत्त्वेन सम्बोधयति—हे महाराज ! इह त्वत्समीपे त्वद्भृत्यैरानीतं मम गुरुपुत्रमानयस्वेत्यन्वयः। तमानीय मह्यं समर्पयेत्यर्थः। 'अत्रानयने तवापराधो नास्ति' इति सूचयन्नाह–निजकर्मनिबन्धनमिति। तस्य कर्म चैतादृशम्, येनात्रागत इत्याशयः। 'तर्हि मर्यादामुल्लङ्घ्य कथं समर्पणीय' इत्याशङ्क्याह—मच्छासनपुरस्कृत इति। मदाज्ञया तत्समर्पणे न तव कश्चिद्दोष इत्याशयः ॥ ४५ ॥ तथेत्यङ्गीकृत्य तेन यमेनोपानीतं गुरुपुत्रमादायागत्य यदूत्तमौ रामकृष्णौ स्वगुरवे दत्त्वा पुनर्वरान्तरं वृणीष्वेति तमूचतुः ॥ ४६ ॥ एवमुक्तो गुरुराह—सम्यगिति। स्नेहेन सम्बोधयति—

वत्सेति। मुख्यतया कृष्णस्यैव सम्बोधनम्। भवद्भ्यां गुरुनिष्क्रयः गुरुदक्षिणा सम्यक् सम्पादिता, अतो युष्मद्विधयोर्गुरोर्मम कामानां मध्ये को नु कामोऽवशिष्यते ? न कोऽपि। अतो न वरान्तरमपेक्षितम् ॥ ४७ ॥ हे वीरौ ! स्वगृहं गच्छतम्। वां युवयोः कीर्तिः पावनी श्रोत्रादिजनपावनकर्यस्तु, तथेह परत्र च युवयोरधीतानि छन्दांसि अयातयामानि अविस्मृतानि भवन्तु ॥ ४८ ॥

अन्वितार्थप्रकाशिका

गुरुपुत्रमिति ॥ हे महाराज ! मच्छासनेन पुरस्कृतः प्रेरितः त्वं इह त्वत्समीपे त्वद्भृत्यैरानीतं निजं कर्मैवावश्यभोग्यं निबन्धनं यस्य तं मम गुरुपुत्रमानयस्व। तव तु दोषो नास्तीति भावः ॥ ४५ ॥ तथेति ॥ तथेत्यङ्गीकृत्य तेन यमेनोपानीतं गुरुपुत्रमादाय यथा मृतस्तादृशशरीरं निर्माय जीवयित्वा चागत्य यदूत्तमौ रामकृष्णौ स्वगुरवे दत्त्वा समुद्राहृतरत्नादिकं च दत्त्वा "सह रत्नैरुदारधीः" इति हरिवंशात् पुनर्वरान्तरं वृणीष्वेति तमूचतुः ॥ ४६ ॥ सम्यगिति ॥ हे वत्स ! मुख्यतया कृष्णस्यैव सम्बोधनम् भवद्भ्यां गुरुनिष्क्रयः गुरुदक्षिणा सम्यक् सम्पादितः अतो युष्मद्विधयोर्गुरोर्मम कामानां मध्ये को नु कामोऽवशिष्यते न कोऽपि। अतो न वरान्तरमपेक्षितम् ॥ ४७ ॥ गच्छतमिति ॥ हे वीरौ ! स्वगृहं गच्छतं वां युवयोः कीर्तिः पावनी श्रोत्रादिजनपावनकरी अस्तु। तथेह परत्र च युवयोरधीतानि छन्दांसि अयातयामानि अगतसाराणि नित्योपस्थितानि भवन्तु ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निजं प्रारब्धं कर्मेव निबन्धनं आवश्यकभोग्यं यस्य एवं भूतमपि मच्छासनपुरस्कृतः मदाज्ञानुवर्त्ती सन्। तं आनय ॥ ४५-४६ ॥ वत्सेति मुख्यस्यैकस्यैव संबुद्धिः गुरोर्निष्क्रयो दक्षिणा प्रत्युपकारो वा युष्मद्विधानां भवादृशानां गुरोः कामो नामकः अवशिष्यते ॥ ४७ ॥ हे वीरौ समर्थौ अयातयामानि सद्यः पठितानि ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमुक्तः प्राह भगवान्। गुरुपुत्रमिति। इह त्वत्संनिधौ, आनीतं, त्वद्भटैरिति शेषः। निजकर्मनिबन्धनं स्वकर्माधीनं, स्वकर्मणा इह प्रापितमपीत्यर्थः। गुरुपुत्रमस्मद्गुरुसुतं, हे महाराज यम, मच्छासनपुरस्कृतः त्वं आनयस्व, मदाज्ञापुरस्कारेण आनयतस्तव न दोष इति भावः ॥ ४५ ॥ तथेतीति। तथेति अङ्गीकृत्य, तेन यमेन, उपानीतं गुरुपुत्रम् आदाय, आगत्य, यदूत्तमौ रामकृष्णौ, स्वगुरवे दत्त्वा, भूयोऽपि वरं वृणीष्व इति, तं गुरुं, ऊचतुः ॥ ४६ ॥ एवमुक्तः प्राह द्विजः। सम्यगिति। हे वत्सौ, भवद्भ्यां गुरुनिष्क्रयः गुरवे देया दक्षिणा, सम्यक् सम्पादितः। युष्मद्विधगुरोः भवादृशयोर्गुरोर्मम, कामानां मध्ये, को नु कामः, नाम अवशिष्यते न कोऽपीत्यर्थः ॥ ४७ ॥ गच्छतमिति। अतः, हे वीरौ, स्वगृहं, गच्छतम्। वां युवयोः, कीर्त्तिः इह, परत्र च, पावनी लोकं पुनाना, अस्तु। छन्दांसि च, अयातयामानि, भवन्तु। अयातयामवदगतसाराणि भवन्त्वित्यर्थः ॥ ४८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तथेतीति : १०.४५.४६.

गतं यत्तत्पुनर्नैतीत्युक्तिरन्यत्र न त्वयि। यतो गुरुसुतो यातोऽऽप्यानीय गुरवेऽर्पितः ॥ ९२ ॥

दाक्षिण्यमालक्ष्य विलक्षणं तयोर्विचक्षणः सोऽपि तथाऽऽचकाङ्क्ष।
युक्तं प्रभुश्चापि ददौ परीक्षां दाक्षिण्य - पुत्रार्पण - दक्षिणायाम् ॥ ९३ ॥

निजशरणागतसत्कृतिरकारि गुरुणाऽर्पणेन विद्यानाम्। शरणागतः स हरिरपि सत्कृतिमकृतात्मजार्पणाच्चित्रम् ॥ ९४ ॥

स्वयं स भगवान् प्रभुः शमनसद्म गत्वा गुरोः सुतं भुवमुपानयत्तदिदमस्य बीजं ध्रुवम्।
न भक्तभवनं व्रजत्वद्य एष मच्छासनादितः क्वचिदिहान्यथा भृशमशक्यमीशस्य किम् ॥ ९५ ॥

कृतनिजापचितिं विनयान्वितं यदुपतिं समवेक्ष्य पुरः स्थितम्। गुरुरसौ परिपूर्णमनोरथो वरगिरं यदुवाच तदोचितम ॥९६॥

गच्छतमिति : १०.४५.४८.

ग्राधीताः शतशोऽभवन् यदुपते शिष्या भविष्यन्ति च नैतादृक् त्रिजगत्स्वपि त्रिसमयेष्वश्रावि कृत्यं क्वचित्।
तत्सिद्धं भुवि निष्कलङ्कमतुलं भास्वद्यशस्ते मुहुर्मद्वंशर्धिकृतश्च वंशविततिः सिद्धैव लोकोत्तरा ॥ ९७ ॥
शौर्यं किं किमु धैर्यमुत्तमगुणा दानादयोऽन्येऽपि वा सर्वेषामिह मन्महे त्रिभुवने सीमापदं वैभवान्।
तत्त्वं धन्यमना निसर्गत इहैवासीति कोऽन्यो वरो देयः सन्तु त एव मद्वचनतः श्रीशर्धिभाजोऽनिशम् ॥ ९८ ॥
उद्यत्कल्पकविश्रुतं श्रुतिसुखं सन्तानवृद्ध्यन्वितं मन्दारातिविजृम्भितं सुजलजानन्ताप्सरःसेवितम्।
राजच्छ्रीहरिचन्दनं च सुरतोल्लासावहं मद्गिरा भूयान्नन्दनवद् गृहं तव चिरायाऽपारिजातं परम् ॥ ९९ ॥
सौधाभिख्यं सुधर्मोल्लसितमविरतं नन्दनोल्लासितमध्यं गुर्वध्यक्षेशकार्यं बुधजनलसितं हारि वाचामराढ्यम्।
नाना-नेत्राभिरामाखिल-षिभवपदं लेखकालोचितश्रिश्रीकृष्णानन्तधाम्ना भवतु तव गृहं स्वर्गसौभाग्यशालि ॥ १०० ॥

कीर्तिर्जगज्जन - विशुद्धिकृदप्यपङ्का श्रीकृष्णशोभितपदाऽप्यमलोज्ज्वलश्रीः ।
क्षीराब्धिमिन्दुमिभराजमहीशमीशं श्रीशारदामपि सदा विमलीकरोतु ॥ १०१ ॥
अस्थापि लीलया येन त्वयाऽस्मिन् यातयामता । अयातयामता वेदे सिद्धा तस्य तवाच्युत ॥ १०२ ॥
इत्थं निजस्तुतिमर्तिं समक्षेक्ष्य कृष्णस्तं सुप्रसन्नवदनं नतिनम्रमौलिः ।
प्रत्याह साञ्जलिरनुद्धतया च वाचा मन्दाक्षमोदभरनोदितयाऽऽद्यपूज्यम् ॥ १०३ ॥
श्रीदैशिकन्द्र - सकलागम - तत्त्वविद्वन् ज्ञाताखिल-त्रिसमयार्थ-परार्थदृष्टे ।
संसारिताप - विगमैक - दयासुधाब्दस्तुत्याऽनयाऽलमहमानतिमातनोमि ॥ १०४ ॥
कुत्रेदं वर्णनं नाम कुत्रायं छात्रकुक्षिगः । यद्वा प्रयोजिकाऽस्त्येका स्वकीयत्वाभिमानिता ॥ १०५ ॥
अनलीकमलीकं वा भवत्वन्यदिदं ध्रवम् । धन्यो धन्यतरश्चाद्य सत्यं त्वत्पदसेवनात् ॥ १०६ ॥
यद्यप्यलीकमखिलं तथापि नालीकवसतिदायिगुरो । भविता भवन्मुखोदितमतो गृहीतं वरं वचः सवरम् ॥ १०७ ॥
स्वयं स्वीकृतसच्छिष्यभावेन विशदीकृतम् । गुरुणाऽखिललोकानां प्रभुणा गुरुगौरवम् ॥ १०८ ॥
याते ह्यज्ञानराजे लयमुपशमिते सर्वदुर्वैरिसङ्घे सिद्धोऽसौ ब्रह्मचारी भवति स च ततोऽप्युग्रसेनानुवृत्तिः ।
पश्चाद्योगेन युक्तोऽखिलमपि भुवनं शोधयन् ब्रह्मनिष्ठो जीवन्मुक्तैकदृक् स्यात्तदनु भुवि महामृत्युजित् सन्कृतार्थः ॥ १०९ ॥
योगेन युक्तो भुवनैकशोध-प्राप्तासुराहत्युदितातिनादम् । सदाशयस्थं विनिधाय जीवन्मुक्तेक्षणः कालजयं विदध्यात् ॥ ११० ॥
ततः कृतार्थमात्मानं पश्यन् ब्रह्मपुरस्थितः । लब्धाभीष्टाखिलवरो वसेदत्र यथासुखम् ॥ १११ ॥ (विशेषकम्)
निरुक्ताध्यायचरितादैशादाशय ईदृशः । भाति तज्ज्ञैः समालोच्यस्तत्तदर्थो ह वैभवात् ॥ ११२ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण ने कहा महाराज धर्मराज ! गुरु पुत्र के कर्मानुसार उस बालक को आप यहाँ ले आए हो। धर्मराज ! उस बालक को यहाँ ले आईए हमारा आदेश होने से एवं आप महाराज है इसलिए यमलोक से लौटाने की मर्यादा का उल्लङ्घन नहीं होगा ॥ ४५ ॥ श्रीशुकाचार्य जी ने कहा कि राजन् परीक्षित ! श्रीधर्मराज यम ने महाराजाधिराज ? जैसी आपकी आज्ञा होगी वैसा ही करूँगा यह कहकर भगवान के श्रीचरणों में बालक को लाकर रख दिया। गुरुपुत्र को लेकर यदुवर श्रीबलभद्र एवं श्रीकृष्ण ने गुरुगृह में आकर गुरुवर के श्रीचरणों में दक्षिणा के स्वरूप में भक्तिभाव पूर्वक समर्पण किया। पुनः, पुनः प्रणाम पूर्वक निवेदन करने लगे कि गुरुवर ! हम आपके हैं बिना संकोच जो आज्ञा है कहिए हम सदा सेवा में तत्पर है ॥४६॥ श्रीसांदीपनि गुरुवर सार्द्रदय एवं सजल नयन निजाङ्गना के साथ शुभाशीर्वाद प्रदान करते कहने लगे हे वत्स ! आप दोनों ने गुरु निष्क्रय-गुरुदक्षिणा सर्वोत्तम प्रकार की अर्पित की है। वत्स ? आपके समान जिसके शिष्य है वैसे गुरु की कौन सी कामना पूर्ण नहीं हो सकती ? वत्स ? हमारे दोनों की आप दोनों ने सर्व कामना सम्पूर्ण की ॥ ४७ ॥ वत्स ! अब आप दोनों पिताजी के घर पधारो, आप वीर बनो ! आप दोनों की दिव्य कीर्ति एवं विश्वपावनी कीर्ति बनो, गृहस्वामी बनो, पुत्र पौत्रवान बनो, सर्वत्र आपकी जय हो, दीर्घायु रहो, समस्त वेद शास्त्र इह एवं परलोक में स्मृतिपथ में रहते सदा सफल होवें ॥ ४८ ॥

गुरुणैवमनुज्ञातौ रथेनानिलरंहसा । [1]आयातां स्वपुरं तात पर्जन्यनिनदेन वै ॥ ४९ ॥
[2]समानन्दन् प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ । अपश्यन्त्यो बह्वहानि नष्टलब्धधना इव ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] [5]गुरुपुत्रानयनं नाम [6]पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—हे तात ? एवम्, गुरुणा, अनुज्ञातौ, अनिलरहंसा, पर्जन्यनिनदेन, वै, रथेन, वै, स्वपुरम्, आयाताम् ॥ ४९ ॥ बह्वहानि, अपश्यन्त्यः, सर्वाः, प्रजाः, नष्टलब्धधनाः, इव, रामजनार्दनौ, दृष्ट्वा, समानन्दन ॥ ५१ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्द्धे राजसप्रमेयप्रकरणे पञ्चचत्वारिंशत्तमेऽध्यायेऽन्वयाः सम्पूर्णाः ॥ ४५ ॥

श्रीवरस्वामिविरचिता भावार्थदीपिका

अनिलवद्रंहो वेगो यस्य तेन। पर्जन्यो मेघस्तद्वन्निनदो यस्य तेन ॥ ४९ ॥ नष्टमदृष्टं तत्पुनर्लब्धं धनं याभिस्ता इवेति ॥ ५० ॥

इति श्रीमद्भागवते म० दशमस्कन्धे पूर्वार्धे टीकायां पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

---

[1] आयातौ–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. । [2] सम–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [3] पारमहंस्यां संहितायां–प्रा. पा. । [4] पूर्वार्द्धे–प्रा. पा. । [5] गुरुकुलवृत्ति पञ्च–प्रा. पा. । [6] त्रिचत्वारिंशो–विजये ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमाशीःप्रदानपूर्वकम् । तातेति कृष्णलीलाकर्णनाविष्टत्वेन प्रियत्वद्योतनाय राज्ञ आमन्त्रणम् 'नित्यं विष्णुजनप्रियः' इत्युक्तत्वात् । "तातस्तु प्रियपित्रोः स्याद्विस्तृते चात्मजे गुरौ" इति धरणिः । 'स्वगुरुणा' इति पाठोऽपि क्वचित् । स्वपुरमिति तत्र ममतास्नेहो दर्शितः । अत एवानिलरंहसेति शीघ्रगमनम् । अनिलरंहस्त्वादेव पर्जन्यो गर्जन्मेघस्तद्वन्निनदो यस्य तेन । अतो विदूरादेव । तच्छब्दश्रवणेन सर्वे तदभिमुखं जग्मुरिति ज्ञेयम् । हे तातेति प्रहर्षात् ॥ ४९ ॥ बह्वहानि बहूनि दिनानि । सर्वाः पौर्य्यः जानपदाश्च । तत्र जानपदाः काश्चित्पथि दृष्ट्वा काश्चिच्च पुर्यामागताः सत्य इति ज्ञेयम् । तद्विशेषश्च श्रीहरिवंशे—"ततः प्रत्युत्थिताः सर्वे यादवा यदुनन्दनौ । सबलौ हृष्टमनस उग्रसेनपुरोगमाः । श्रेण्यः प्रकृतयश्चैव मन्त्रिणः सपुरोहिताः । सबालवृद्धा सा चैव पुरी समभिवर्तत । नन्दितूर्याण्यवाद्यंत तुष्टुवुश्च जनार्दनम् । रथाः पताका नालिन्यो राजन्ते स्म समन्ततः । प्रहृष्टमुदितं सर्वमन्तः पुरमशोभत । गोविंदागमनेऽत्यर्थं यथैवेन्द्रमखे तथा । मुदिताश्चाप्यगायन्त राजमार्गेषु गायनाः । जयाशीःप्रथिता गाथा यादवानां प्रियंकराः गोविन्दरामौ संप्राप्तौ भ्रातरौ लोकविश्रुतौ । स्वे पुरे निर्भयाः सर्वे क्रीडन्ति सह बान्धवैः । न यत्र कश्चिद्दीनो वा मलिनो वा विचेतनः । मथुरायामभूद्राजन्गोविन्दे समुपस्थिते । वयांसि साधुवाक्यानि प्रहृष्टा गोहयद्विपाः । नरनारीगणाः सर्वे भेजिरे मनसः सुखम् । शिवाश्च वाताः प्रववुर्विरजस्का दिशो दश । दैतेयानि प्रहृष्टानि सर्वेष्वायतनेषु च यानि लिंगानि लोकस्य बभुः कृतयुगे पुरा । तानि सर्वाण्यदृश्यन्त पुरीं प्राप्ते जनार्दने ।" इति ॥ ५० ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

गुरुणैवमनुज्ञाताविति अनुज्ञातौ स्वगुरुणेति च पाठद्वयं स्वपुरमिति । तत्र ममतया स्नेहो दर्शितः अत एवानिलरहंसेति शीघ्रमागमनमनिलरंहस्त्वादेव पर्जन्यो गर्जन् मेघस्तद्वन्निनदो यस्य तेन अतो विदूरादेव तच्छब्दश्रवणेन सर्वेऽभिजग्मुरिनि ज्ञेयं हे तातेति प्रहर्षात् ॥ ४९ ॥ सर्वाः पौर्य्यो जानपद्यश्च तत्र जानपद्यः काश्चित्पथिदृष्ट्वा काश्चिच्च पुर्य्यामागताः सत्य इतिं ज्ञेयं तद्विशेषश्च श्रीहरिवंशे "ततः प्रत्युद्यताः सर्वे यादवा यदुनन्दनौ । सबला हृष्टमनस उग्रसेन पुरोगमाः । श्रेण्यः प्रकृतयश्चैव मन्त्रिणः स पुरोहिताः । सबालवृद्धा साचैव पुरी ससभिवर्त्तत । नन्दितूर्य्याण्यवाद्यन्त तुष्टुवुश्च जतार्दनम् । रथ्याः पताकामालिन्यो राजन्ते स्म समन्तः । प्रहृष्टमुदितं सर्वमन्तः पुरमशोभत । गोविन्दागमनेऽत्यर्थं यथैवेन्द्रमखेः तथा । मुदिताश्चाप्यगायन्त राजमार्गेषु गायनाः । जयाशीः प्रथिता गाथा यादवानां प्रियंकराः गोविन्दरामौ सम्प्राप्तौ भ्रातरौ लोकविश्रुतौ । स्वे पुरे निर्भयाः सर्वे क्रीडन्ति सहबान्धवैः । न तत्र कश्चिद्दीनो वा मलिनो वा विचेतनः । मथुरायामभूद्राजन् गोविन्दे समुपस्थिते । वयांसि साधुवाक्यानि प्रहृष्टा गोहयद्विपाः । नरनारीगणाः सर्वेभेजिरे मनसः सुखम् । शिवाश्चवाताः प्रववुर्विरजस्का दिशोदश दैवतानि च हृष्टानि सर्वेष्वायतनेषु च यानि लिङ्गानि लोकस्य बभुः कृतयुगे पुरा । तानि सर्वाण्यदृश्यन्त पुरीं प्राप्ते जनार्दने" इत्यादि ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् पञ्चचत्वारिंशोऽध्यायः ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गुरुणैवमनुज्ञाताविति पाठः स्पष्टः । स्वपुरमिति तत्र ममतादिना स्नेहभर उक्तः । अतएवानिलरंहसेति शीघ्रमागमनं बोधयति । अनिलरंहस्त्वादेव पर्ज्जन्यो गर्ज्जन्मेघस्तद्वन्निनेदो यस्य तेन, अतो विदूरादेव तच्छब्द-श्रवणेन श्रीवसुदेवोग्रसेनादयः सर्व्वे अग्रेऽभिजग्मुरिति ज्ञेयम् । वै प्रसिद्धौ, हे तातेति मधुपुर्य्यागमनेन श्रीनन्दव्रजनिकटतया पुनरागमनाशया च प्रेमोदयात् ।४९। सर्व्वाः पौर्य्यो जानपद्यश्चेत्यर्थः । तत्र जानपद्यः काश्चित् पथि दृष्ट्वा काश्चिच्च पुर्य्यामागताः सत्य इति ज्ञेयम् । बहून्यहान्यपश्यन्त्य इत्यनेन नष्टेति दृष्टान्तेन च परमोत्कण्ठतयातिप्रीत्या दर्शनं बोधितम् । अतएव सम्यगनन्दन् । तद्विशेषश्च श्रीहरिवंशे (विष्णु० प० ३३।२९-३८)—

'ततः प्रत्युद्यताः सर्व्वे यादवा यदुनन्दनौ । सबला हृष्टमनस उग्रसेनपुरोगमाः ॥
श्रेण्यः प्रकृतयश्चैव मन्त्रिणः सपुरोहिताः । सबालवृद्धा सा चैव पुरी समभिवर्त्तत ॥
नन्दितुर्य्याण्यवाद्यन्त तुष्टुवुश्च जनार्दनम् । रथ्याः पताकामालिन्यो राजन्ते स्म समन्ततः ॥
प्रहृष्टमुदितं सर्व्वमन्तः पुरमशोभत । गोविन्दागमनेऽत्यर्थं यथैवेन्द्रमहे तथा ॥
मुदिताश्चाप्यगायन्त राजमार्गेषु गायनाः । जयाशीः प्रथिता गाथा यादवानां प्रियंकरा ॥
गोविन्द-रामौ संप्राप्तौ भ्रातरौ लोकविश्रुतौ । स्वे पुरे निर्भयाः सर्व्वे क्रीडन्ति सह बान्धवैः ॥
न तत्र कश्चिद्दीनो वा मलिनो वा विचेतनः । मथुरायामभूद्राजन् गोविन्दे समुपस्थिते ॥
वयांसि साधुवाक्यानि प्रहृष्टा गो-हय-द्विपाः । नरनारीगणाः सर्व्वे भेजिरे मनसः सुखम् ॥

शिवाश्च वाताः प्रववुर्विरजस्का दिशो दश। दैवतानि च हृष्टानि सर्व्वेष्वायतनेषु च ॥
यानि लिंगानि लोकस्य बभुः कृतयुगे पुरा। तानि सर्वाण्यदृश्यन्त पुरीं प्राप्ते जनार्द्दने ॥' इति ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील–सनातन–गोस्वामिपाद–कृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशम–टिप्पण्यां पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं गुरुणानुज्ञातौ हे तात! अनिलवद्रंहो वेगो यस्य पर्जन्यो मेघस्तद्वन्निनदो यस्य तेन रथेन स्वगृहमाजग्मतुः ॥४९॥ तावद्बहून्यहानि अत्यन्तसंयोगे द्वितीया अपश्यन्त्यः प्रजा मथुरास्थास्तदा रामजनार्द्दनौ दृष्ट्वा नष्टमदृष्टं पुनर्लब्धं धनं याभिस्ताऽशा इव समनन्दन् सञ्जहृषुः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गुरुनिष्क्रया गुरुकृतप्रतिक्रिया युष्मद्विधानां पुंसां गुरोः को नु कामानां मध्ये कामोऽवशिष्यते सर्वोऽपि कामः सिद्धो भवतीत्यर्थः ॥ ४७–४९ ॥ तौ अपश्यन्त्यः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां त्रिचत्वारिंशोऽध्यायः ॥ ४३–४५ ॥

गूढार्थदीपिनी

स्वपुरं मथुराम् ॥ ४९ ॥ नष्टं पुनर्लब्धं धनं याभिस्ताः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पर्जन्यवन्मेघवन्निनदो यस्य तेन ॥ ४९ ॥ नष्टानि पुनर्लब्धानि धनानि याभिस्ता इव सर्वाः प्रजाः समनन्दन् सञ्जहृषुः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चचत्वारिंशाध्यायार्थप्रकाशः ॥ ४५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं साशीर्वचनं ॥ ४९ ॥ बह्वानि बहुदिनान्यपश्यन्त्यः प्रजा नष्टलब्धधना इव समनन्दंस्तुतुषुः ॥ ५० ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायांदशमपूर्वार्धे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एतदपि गुरुवाक्यं कृतवन्ताविति वदन् प्रत्यापत्तिमाह। गुरुणैवमनुज्ञाताविति। भगवदिच्छानुसारेणैव गुरुणा उक्तौ क्षणमात्रेणैव अनिलरंहसा रथेन स्वपुरमायाताम् आगतौ वा स्वपुरत्वेन प्रत्यापत्तित्वमुक्तम् दूरादेव तापनाशकत्वाय पर्ज्जन्यवन्निनदो यस्येत्युक्तम् ॥ ४९ ॥ भगवन्त पूर्ववदुक्त्वा तत्सम्बन्धिनाऽपि पूर्ववदेव जाता भगवति निरुद्धा वेत्याह। समनन्दन्निति। सर्वाः विद्यानधिकारिणोऽपि विद्यया तेजोऽनुभावौ भगवता प्रकटिताविति तदर्थमाह। दृष्ट्वा रामजनार्द्दनाविति। सामान्यतोऽपि दर्शनाकाङ्क्षायामाह। अपश्यन्त्य इति। बहून्येव दिनानि वर्षत्रयचतुष्टयात्मकानि अपश्यन्त्यः सत्यः दृष्ट्वा परमानन्दयुक्ता जाताः पूर्वापेक्षया अधिकत्वमाशङ्क्य तथा सति प्रमाणबलं भविष्यतीति तन्निराकरणार्थं दृष्टान्तमाह। नष्टः अदृष्टः क्वचिल्लीनः पुनर्लब्धश्चेत् धनादिश्चेत्तदा पूर्ववदेव जायमानमपि सुखविशिष्टमिव भवतीति भगवत्यपि तथा जातमित्यर्थः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां द्विचत्वारिंशाध्यायविवरणम् ॥ ४२–४५ ॥

श्रीसुबोधिनी–सारः

गुरुणा एवमनुज्ञातौ रामकृष्णौ वायुवेगेन मेघनादेन रथेन स्वपुरं मथुरामायातौ हे तात इति शुकोक्तिः ॥ ४९ ॥ बह्वानि बहुदिनानि यावत् रामजनार्दनौ अपश्यन्त्यः सर्वाः प्रजास्तौ दृष्ट्वा नष्टं पुनर्लब्धं धनं याभिस्ता इव समनन्दन् अहृष्यम् ॥ ५० ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायां पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

राज्ञि स्वस्नेहं सूचयन् सम्बोधति–तातेति। गुरुणैवमनुज्ञातौ रामकृष्णौ अनिलवद्रंहो वेगो यस्य, तेन, तथा पर्जन्यो मेघस्तद्वन्निनदो यस्य तेन रथेन वै प्रसिद्धतया स्वपुरं प्रत्यायातौ आजग्मतुः ॥ ४९ ॥ बहून्यहान्यापश्यन्त्यस्तदा रामजनार्दनौ दृष्ट्वा सर्वाः प्रजाः समनन्दन् परमानन्दयुक्ता जाताः। तत्र दृष्टान्तमाह— नष्टेति। नष्टमदर्शनं गतं तत् पुनर्लब्धं दृष्टं धनं यैस्ते यथा परमानन्दयुक्ता भवन्ति तद्वदित्यर्थः ॥ ५० ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने। पञ्चचत्वारिंशकोऽगाद्व सुदेवादिबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

गुरुणेति ॥ हे तात! गुरुणा एवमनुज्ञातौ रामकृष्णौ अनिलस्येव रंहो वेगो यस्य तेन तथा पर्जन्यो मेघस्तद्वन्निनदो यस्य तेन रथेन वै प्रसिद्धतया स्वपुरं प्रत्यायातौ आजग्मतुः ॥ ४९ ॥ समिति ॥ बहून्यहान्यपश्यन्त्यस्तदा रामजनार्दनौ दृष्ट्वा सर्वाः प्रजाः नष्टमदर्शनं गतं तत्पुनर्लब्धं दृष्टं धनं याभिस्ता यथा परमानन्दयुक्ता भवन्ति तद्वत् समनन्दन् परमानन्दयुक्ता जाताः ॥५०॥

इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनिलरंहसा वायुवेगेन। अनुज्ञातौ आज्ञप्तौ ॥ ४९ ॥ नष्टम् अन्यत्रगतं तद्भूयो लब्धं धनं याभिस्ता इव ॥ ५० ॥

इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कन्धव्याख्याने गुरुपुत्रानयन नाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गुरुणेति ॥ हे तात, एवमित्थं, गुरुणा अनुज्ञातौ रामकृष्णौ, अनिलवद्रंहो वेगो यस्य तेन; पर्जन्यो मेघस्तद्वन्निनदो यस्य तेन रथेन, स्वपुरं आयातौ वै ॥ ४९ ॥ समनन्दन्निति ॥ बह्वहानि बहून्यहानीत्यर्थः। अत्यन्तसंयोगे द्वितीया। अपश्यन्त्यः, सर्वाः प्रजाः मथुरास्था जनाः, तदा रामजनार्दनौ दृष्ट्वा, नष्टमदृष्ट पुनर्लब्धं धनं याभिस्तादृशाः इव, समनन्दन् संजहृषुः ॥ ५० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचायविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे पञ्चचत्वारिंशोऽध्याय. ॥ ४५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

समनन्दन्निति : १०.४५.५०.

गुरूपसत्तेः सकलाग्र्यविद्यानिष्णातचित्तस्य च योगभाजः। स्थितेः फलं व्यक्तमिदं यदत्रोत्सवेक्षणं वृत्तिषु सर्वतोऽपि ॥ ११३॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

कृष्णप्रिया

श्रीशुकदेव स्नेहावेश में परीक्षित राजा को सम्बोधन करते हैं तात! हे वत्स! सान्दीपनि गुरुजी ने जो वचन कहे वे गुरुदेव की इच्छा से ही कहें। गुरुचरणों में पुनः दोनों भाईओं ने प्रणाम किया, विदाय का अनुमोदन पाकर आज्ञा प्राप्तकर मेघसमान गर्जना करते एवं वायु के समान वेगवाले रथ में विराजमान होकर श्रीकृष्ण भगवान एवं बलभद्रजी निजपुर के ओर मङ्गल प्रस्थान किया ॥ ४९ ॥ श्रीमथुरा में पधारे हुए भगवान् श्रीबलभद्रजी एवं जनार्दन श्रीकृष्ण का दर्शनकर समग्र प्रजा प्रसन्न होकर प्रभुकी जय पुकारने लगी एवं अभिनन्दन करने लगी। बहुत दिनों के बाद दर्शन पाने से आनन्द की सीमा न रही। मानो किसी सम्पन्न धनी पुरुष ने गुमाया हुआ धन को पुनः प्राप्त किया हो वैसे अपने जीवन धन कृष्ण बलभद्रजी को प्राप्त करके आनन्द पाया ॥ ५० ॥

श्रीमद्भागतदशमस्कन्ध पूर्वार्द्ध राजसलीला प्रमेय प्रकरण में ४५ वाँ अध्याय का भाषानुवाद समाप्त ॥

◆

अथ षट्चत्वारिंशोऽध्यायः

श्लोकाः	अनु.	इ. व.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४९	४२	३	४	४	१६५९	२४	४४	१७२७	५३।।।	७

श्रीशुक[1] उवाच

वृष्णीनां प्रवरो मन्त्री कृष्णस्य दयितः सखा । शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥ १ ॥
तमाह भगवान् प्रेष्ठं भक्तमेकान्तिनं क्वचित् । गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥ २ ॥
गच्छोद्धव व्रजं सौम्य पित्रोर्नौ[2] प्रीतिमावह । गोपीनां मद्वियोगाधिं[3] मत्संदेशैर्विमोचय ॥ ३ ॥
ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ।
([4]मामेव दयितं [5]प्रेष्ठमात्मानं मनसा[6] गताः) । ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच-कृष्णस्य, दयितः, सखा, बृहस्पतेः, साक्षात्, शिष्यः, बुद्धिसत्तमः, उद्धवः, वृष्णीनाम्, प्रवरः, मन्त्री, आसीत् ॥१॥ प्रपन्नार्तिहरः, भगवान्, हरिः, क्वचित्, एकान्तिनम्, प्रेष्ठम्, भक्तम्, पाणिना, पाणिम्, गृहीत्वा, तम्, आह ॥ २ ॥ हे सौम्य ! हे उद्धव ! व्रजम्, गच्छ, नौ, पित्रोः, प्रीतिम्, आवह, मत्सन्देशैः, गोपीनाम्, मद्वियोगाद्धिम्, विमोचय ॥ ३ ॥ ताः, मन्मनस्काः, मत्प्राणाः, मदर्थे, त्यक्तदैहिकाः, ये च मदर्थे, त्यक्त लोकधर्माः तान, विभर्म्यहम् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

षट्चत्वारिंशके घोषमुद्धवं प्रेष्य तद्गिरा । यशोदानन्दयोश्चक्रे कृष्णः शोकापनोदनम् ॥ १ ॥
कामचारं द्विजातिः सन्परित्यज्यातिसंयतः । गुरोर्ज्ञानमनुप्राप्य सख्या गोपीरुपादिशत् ॥ २ ॥

गोपीनां सांत्वनमपि रहस्यं सन्मंत्रिसाध्यमिति तदर्थमुद्धवं विशिनष्टि । वृष्णीनामिति । बुद्ध्याऽतिश्रेष्ठः ॥ १–३ ॥ गोपीनां विशेषतः सन्देशे कारणमाह । ता इति । मय्येव संकल्पात्मकं मनो यासां ताः । अहमेव प्राणो यासां ताः । मदर्थे त्यक्ता दैहिकाः पति पुत्रादयो याभिस्ताः। ततः किमत आह । ये त्यक्तलोकधर्मा इति । मन्निमित्तं त्यक्तौ लोकधर्मौविहामुत्रसुखे तत्साधनानि च यैस्तानहं बिभर्मि पोषयामि संवर्धयामि सुखयामीत्यर्थः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तद्गिरा उद्धववाचा (१) कामचारं यथेच्छाचरणम् । द्विजातिः कृतोपनयनः । अतिसंयतः जितेन्द्रियः । सख्या उद्धवेन (२) । भगवद्वशीकरणे भक्तिरेव मुख्येति वक्तुं हरेर्गोपीष्वनुकम्पित्वमाह–तदर्थं सान्त्वनार्थम् । बुद्ध्या सत्तमः पण्डितशिरोमणिः । आर्तैकशरणं कृष्णमार्तान्व्रजजनांश्च तान् । तज्ज्ञातो श्वासकं भक्तमार्त्या वन्दे दुराशया ॥ (१) ॥ एवमात्मनः प्राथमिकावश्यकसमाप्त्या तथा 'आयास्य' इति, 'द्रष्टुमेस्यामः' इति स्ववाक्यव्यभिचारतर्कतस्तेषामार्तिविशेषशंकया च व्रजं गन्तुमर्होऽपि यच्छ्रीभगवान्व्रजं नाजगाम, तत्र श्रीनन्दयशोदादिप्रेमबद्धतया पुनस्तदागमनाभावमाशंकमानानां श्रीवसुदेवदेवक्यादीनां गुरुत्वेनालंघ्यवाक्यानामनुज्ञैव कारणं लक्ष्यते, "ज्ञातीन्वो द्रष्टुमेष्यामः विधाय सुहृदां सुखम्" इत्युक्तत्वात् । श्रीव्रजराजादिभिश्च तद्विधगुरुजनानामिच्छां रक्षामप्युल्लंघ्य तदागमनस्य लिङ्गातिक्रमशंकया स्फुटमप्रार्थितत्वात् । जरासंधादिमहाशत्रुभ्यो रक्षा चास्मद्व्रजे न स्यात्किन्तु दुर्गादिसम्पत्तिमत्यां पुर्यामेव स्यादिति स्वयमपि विचारितत्वाच्च । अतः श्रीवसुदेवादिभ्यो गोपनानुसारेणोद्धव प्रति 'भक्तमेकान्तिनं क्वचित्' इति वक्ष्यते । "अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया । गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतसः ।" इति वक्ष्यमाणानुसारेण जरासंधादिदुर्जननिर्जयादिकृत्यशेषोऽपि कारणान्तरम् । अन्यथा तैर्जनानां व्रजजनानामपि महानुपद्रवः स्यात् । अत औदासीन्यव्यञ्जनाय नन्दादीन्स्वांनकटेऽपि नाजुहाव । किञ्च—युगपदुभयत्र पितृत्वादिव्यवहारस्याभिरुचितलीलावेशादीनां समञ्जसतायां दुर्घटता स्यात् । निजप्रेयसीनां चानयनेऽनानयने चासमञ्जसत्वमिति । अत एव पूर्वमपि वयं च स्नेहदुःखिताञ्ज्ञातीन्वो द्रष्टुमेष्याम इत्येवोवाच न त्वाह्वयिष्याम इति । अतस्तादृशानपि वो

---

[1] वादरायणि–प्रा. पा. । [2] नः–वीर. विज. । [3] गार्ति–वीर. । [4] मामेवं–अधिक वीरे. विजये । [5] श्रेष्ठं–वीर. । [6] मनसाऽगमन्–वीर. ।

वयमेव द्रष्टुमेष्यामो न तु यूयमत्रागच्छतेति व्यञ्जनामभिप्रेत्यैव तयोर्दिदृक्षया स्वयं नन्दादयोऽतिनिकटा अपि व्रजान्नागता स्तत्तदुपद्रवापातात्। पुरे व्रजे च युगपत्प्रकटा स्थितिश्च न स्यात्, तज्ज्ञाने श्रीनन्दादीनामस्मदीयत्वे ज्ञानहान्या बन्धुभावहानिश्च स्यात्। यथैव वक्ष्यते—'यथा दूरचरे प्रेष्ठे' इत्यादि। तस्मात्तथा स्थितिमपि न चकार। अप्रकटा स्थितिस्तु तस्य सर्वदाऽस्त्येव। तथैव प्रतिपादयिष्यते—"मा शोचतं महाभागौ' इत्यादौ, "भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्" इत्यादौ च। किन्त्वसौ प्रकटलीलाविर्भाविनां तेषामनुभवगोचरो न भवति। प्रकटलीलायामपि मध्येमध्ये यत्तस्य व्रजस्थं कञ्चित्कंचित्प्रति गुप्तमागमनं तदप्युत्कंठाप्रधानानां स्फुरणभ्रमकरत्वाद्विश्वासाय न भवति। तस्माद्दन्तवक्त्रवधान्ते प्रश्नोत्तरखण्डे वर्णयिष्यमाणं श्रीभागवतमते च व्यञ्जयिष्यमाणं यावत्तत्र निजगमनं सम्पद्यते तावत्तेषां यथा केनापि व्याजापदेशेन तत्तद्विश्वासास्पदं स्यान्महाराजत्ववैभवश्रवणं स्यात्तथा समाधातुं स्वयमगत्वा स्वस्यागमने केवलश्रीरामगमनं च दुःखकरं मत्वा स्वतुल्येन श्रीमदुद्धवाख्येन प्रियसखेन तादृशं संदिश्य श्रीव्रजवासिनः सान्त्वयामासेति क्रमप्रोक्तां लीलां वक्तुमारभतेऽध्यायद्वयेन—वृष्णीनामिति। वृष्णीनामसंख्यानामूद्ध्वोद्ध्वैमहानुभावानां विविधभावानामपि सर्वेषां यादवानां सम्मत आदृतवचनाचरणः। 'प्रवरः' इति पाठेऽपि तथैवाभिप्रायः। इति परममाहात्म्यं परमसामञ्जस्यं चाभिप्रेतम्। तेन च व्रजजनानामपि तादृशां सान्त्वने सामर्थ्यम्। किञ्च—'मन्त्री गुप्तयुक्ति प्रदोऽमात्यविशेषः' इति विश्वास्यत्वेन बुद्धिनैपुण्येन च तत्सामर्थ्यम्। तेन च पूर्वलिखितयुक्तिरपि श्रीभगवता तस्मिन्स्वयमेव कदाचिद्व्यञ्जिताऽस्तीति गम्यते। न केवलमेतावदेव किन्तु कृष्णस्य दयितो दयाविशेषविषयः, इत्यनिर्वचनीयगुणत्वम्। तेनात्मीयतया स्वीकृतत्वं चोक्त्वात्मगम्यस्थानप्रस्थापने श्रीगोपिकास्वपि सन्देशे योग्यत्वञ्च। एवमन्तरंगलोकदृष्ट्या यथोत्तरश्रेष्ठत्वेन तन्महिमानं चोक्त्वा तद्योग्यतावैशिष्ट्यम्। यथा सखा असंकोचप्रेम्णा दत्तसख्यपदवीकोऽपि। इति श्रीकृष्णेन गुणरूपवयआदौ साम्यं सर्वयादवेभ्यस्तस्य परमासंकोचविस्रम्भास्पदत्वं चोक्त्वा बहिरंगलोकदृष्ट्याप्याह—बृहस्पतेः साक्षादेव शिष्यः, न तु शिष्यादिद्वाराऽध्यापनादित्यर्थः। तच्च नीतिशास्त्रमारभ्य श्रीभागवतपर्यन्तस्येति ज्ञेयम्, बृहस्पतेरपि तत्र संकर्षणसंकर्षणसंप्रदायान्तःपातात्। इति परमवाग्मित्वमुक्त्वा तेषां श्रीकृष्णजित्वरशुद्धप्रेमवाक्यानां प्रत्युत्तरे तस्य तु यत्किञ्चित्सामर्थ्यं व्यञ्जितम्। सर्वत्र हेतुः—बुद्धिसत्तम इति। एवं श्रीभगवत इव षड्गुणा दर्शिताः। एतदेव च मनसि विचारित श्रीभगवता नोद्धवोऽण्वपि मन्न्यूनः, इत्युद्धवनामा श्रीवसुदेवस्य भ्रातुर्देवभागस्य पुत्रस्तत्रास्तीति शेषः। यद्यपि हरिवंशे—"उद्धवो देवभागस्य महाभागः सुतोऽभवत्। पण्डितानां परं प्रादुर्देवश्रवसमुद्धम्।" इति। द्वयोरपि भ्रात्रोरुद्धवनामानौ पुत्रौ कथ्येते, तथाप्ययं देवभागसुत एव ज्ञेयः। महाभागत्वं खलु तादृशकृष्णकृपायोग्यत्वं न तु पण्डितमात्रत्वम्। तदेववमेव—"क्वचिदंग महाभाग सखा नः शूरनन्दनः" इति। स एव व्रजेश्वरेण तथा सम्बोधयिष्यते। श्लेषेण साक्षादुद्धवो मूर्तिमानुत्सव इति॥ १॥ तमुद्धवम्। क्वचिद्रहसि। तस्य श्रीकृष्णदयितत्वादौ हेतुं तत्परतां च विशेषणैर्दर्यँस्तादृशतद्वर्णनोद्देश्यमाह—तमिति। प्रेष्ठं बाल्यमारभ्यैवातिशयेन प्रीतिकर्तारम्। भक्तं परमादरेण सेवातत्परं च "यः पञ्चहायनो मात्रा प्रातराशाय याचितः। तन्नैच्छद्रचयन्यस्य सपर्यां बाललीलया। इत्यादितृतीयोक्तेः। अत एवैकान्तिनं तदेकापेक्षकम्। यथोक्तं श्रीव्रजेन्द्रेण—"एकान्तिमो यस्य न कञ्चनार्थं वांछन्ति ये वै भगवत्प्रपन्नाः।" इति। श्रीवैष्णवेऽपि—"विहाय पितृदेवादीन्परिनिष्ठां गतो हरौ। तद्गाढप्रेमभिः पूर्ण एकान्तीति निगद्यते।" इति। अत्र सर्वयादवापेक्षामतीत्य तस्यैकान्तित्वं ज्ञेयम्। तथाभूतं तमाह। किमर्थम्—प्रपन्नानां तवास्मीति सकृद्याचमानानामपि, किमुत तदेकजीवनानां य आर्तिं हरति सः। तेषामार्ति हर्तुमित्यर्थः। तस्य तत्तज्ज्ञानतादृशानुग्रहादौ योग्यं पदं—भगवानिति। सर्वज्ञदयादिगुणानां मर्यादावारांनिधिरित्यर्थः। नन्वपरिहार्यनानास्निग्धजनवेष्टितेन श्रीभगवता तादृशसदेशो दुष्करस्तत्राह—क्वचित्। कथंचिल्लब्धे। तदेवं द्वितीयस्थाने हंत तादृशं सन्देशं कया मुद्रयोवाच तत्रात–गृहीत्वेति। तच्च निजेष्टप्रयोजने तस्य रागोत्पादनेच्छातः परमगोप्यत्वेन शनैर्निकटे विवक्षातः, तदुक्तिप्रवृत्त्या प्रेमभरोदयस्वभावत्वाच्च॥ २॥ मत्संदेशैर्मदाज्ञावचनैः। न इति बहुत्वं तत्पितृकत्वेनात्मनो बहुमननात्। किं वा–मत्पितृत्वेन भवादृशामपि तौ पितरावित्यभिप्रायेण। इति तयोस्तस्य स्नेहं वर्धयति। 'नौ' इति क्वचित्पाठः। कृष्णरामयोरित्यर्थः। पित्रोर्मद्विच्छेददुःखितयोः प्रीतिं सुखमा सम्यक् बहुस्वचातुर्येण बलादिव वह प्रापय, मद्विना तयोस्तयोः पीतेर्दुःसाध्यत्वात्। यद्वा–प्रवाहन्यायेन कुरु यथा तत्पश्चादपि तयोः प्रीतिस्तिष्ठेदेवेत्यर्थः। ननु तत्र मम वराकस्य का शक्तिरित्याशक्य सम्बोधयति—हे उद्धवेति। उद्धव एव त्वमसीति पूर्वोक्तसद्गुणनिधित्वं सूचयति। उद्धवशब्दस्य श्लेषार्थश्चोक्त एव। किञ्च–हे सौम्य हे शान्तमूर्ते, मनोज्ञेति वा। अस्तु तावत्तच्चातुर्यं त्वद्दर्शनमात्रेण च तयोः प्रीतिर्भवितेति भावः। इदं प्रोत्साहनार्थम्। गोपीनां तु मद्वियोगेनाधिस्तं विशेषेण मोचय। दृढबन्धनवद्धृदि संलग्नमपुनःस्पर्शतया त्याजय। एवमाधिमोचनमात्रमेव तासां न तु प्रीतिं कर्तुं शक्ष्यसीत्यर्थः। तच्च संदेशैर्बहुभिरेव न तु तत्तद्वाक्चातुर्यादिना नापि द्वित्रैर्वा॥ ३॥ ततः पतिपुत्रादित्यागेन। किं किं जातम्। अतोऽत्राक्षेपे। यद्वा–लोको देहस्तद्धर्मा अशनवसनानुलेपादयः। यद्वा–लोकाः स्वर्गादयस्तदर्थं धर्मा यागादयः। यद्वा–लोकानां जनानां धर्मः प्रवृत्तिलक्षणः। निवृत्तिमार्गे वर्तमाना इत्यर्थः। यद्वा–त्यक्ता दत्ता लोकेभ्यो धर्मा मदर्चनादिरूपा यैस्ते, मद्धर्मोपदेष्टारः। यद्वा–अत्यक्तो लोकधर्मः स्वविहितधर्मो वर्णाश्रमाचारलक्षणो यैस्ते, मत्प्रीतये ये स्वधर्मनिष्ठा इत्यर्थः। बिभर्मि स्वसायुज्यमावहामीत्यर्थः। गोपीनां विशेषतः सन्देशे द्वाभ्यां विशेषावस्थावर्णनेन कारणं वक्तुं प्रथमतः साधारणावस्थां वर्णयति—ता इति। विक्षेपणत्रयेण क्रमेण तासां स्वं विना धर्माद्यशेषार्थेषु देहेषु

लोकेष्वपि नैरपेक्ष्यमुक्तम् । अन्यत्तैः । तत्रादिग्रहणाद्भोजनपानादयश्च दैहिकाः । यद्वा—मन्मनस्का इति बाह्यसर्व प्रियार्थानादरः । मत्प्राणा इति ततोऽपि प्रियाणामन्तरीणसर्वार्थानामनादरः । मदर्थ इत्यादिना "भोक्तृत्वे सर्वदुःखानां पुरुषः प्रकृतेः परम्" इत्यात्मपर्यवसायिसर्वभोगानादरात्मानादरश्च विवक्षितः । तत्रतत्र हेतु माह-मामेव दयितं प्रियं मनसा गता निश्चितवत्यः, न तु बाह्यान्विषयान् । तथा प्रेष्ठं ततोऽपि प्रियतम् मामेव न तु ततोन्तरीणप्राणादीन्, मद्वियोगे तत्तदनादरात् । तथा निरुपाधिप्रेष्ठमात्मानमपि मामेव न तु देहिनम्, मद्वियोगे तस्यापि शून्यायमानत्वात् । मद्विनाभूतानां तासामात्मान्यत्र प्रीतिमात्रं न स्पृशतीत्यर्थः । तदेवं त्रिभिर्योगैः पदैर्मामेव पतिं निश्चितवत्य इत्यर्थः । न तु किंवदन्तीप्राप्तमन्यदित्यर्थः । तथैव ता एव वक्ष्यन्ते—'अपि अत मधुपुर्यामार्यपुत्रोऽधुनास्ते' इतीदं पद्यार्धं बहुत्र तत्त्ववादिनां टीकायामपि ध्रियते । किन्तु स्वामिपादैरनभिमतमिव लक्ष्यते मध्ये प्रविष्टस्य सुदुर्गमस्याप्यव्याख्यानात् । य इति सामान्येन निर्देशः, अधिकाराद्यनपेक्षया भरणस्यावश्यकताबोधनार्थम् । चकारात्तानपि किं पुनः प्राणाद्युतेक्षिकास्ता इत्यर्थः । यद्वा—मम मनो यासु ताः । किञ्च—मम ता एव प्राणा यतो मदर्थ-इत्यादि । तत्र हेतुः—मामेव इत्यादि । कैमुत्येन हेतुः-य इत्यादि । अहं ब्रह्मादिध्येयोऽपि बिभर्मि अन्तर्धारयामि, चिन्तयामीत्यर्थः । तथा चादिपुराणे—"भक्ता ममानुरक्ताश्च कति सन्ति न भूतले । किन्तु गोपीजनः प्राणाधिकप्रियतमो मम ।" इति । अतस्तासामाधेर्मदन्तःप्रवेशेन सदाहमप्याधिमानित्यर्थः । यद्वा—ये ताभिस्त्यक्ताः पत्यादिलोकाः, भोजनादिदेहधर्माः, लज्जादि साध्वीधर्माश्च तानप्यहं बिभर्मि रक्षामि, किमुत ताः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आर्त्तैकशरणं कृष्णमार्त्तान् व्रजजनांश्च तान् । तञ्चार्त्ताश्वासकं भक्तमार्त्त्या वन्दे दुराशया ॥

एवमात्मनः प्राथमिकावश्यसमाप्त्या तथा आयास्य इति द्रष्टुमेष्याम इति स्ववाक्यव्यभिचारतर्कतस्तेषामार्त्तिविशेषशङ्कया च व्रजं गन्तुमर्होऽपि यत् श्रीभगवान्नाजगाम तत्र श्रीनन्दयशोदादिप्रेमवद्धतया पुनस्तदागमनाभावमाशङ्कमानानां श्रीवसुदेवदेवक्यादीनां गुरुत्वेनालङ्घनीयवाक्यानामननुज्ञैव कारणं लक्ष्यते ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखमित्याद्युक्तत्वात् । श्रीव्रजराजादिभिश्च तद्विधगुरुजनानामिच्छारक्षामप्युल्लङ्घ्य तदागमनस्य तत्र मङ्गलातिक्रमशङ्कया स्फुटमप्रार्थितत्वात् जरासन्धादिमहाशत्रुभ्यो रक्षा चास्यास्मद्व्रजे न स्यात् किंतु दुर्गादिसम्पत्तिमत्यां पुर्य्यामेव स्यादिति स्वयमपि विचारितत्वाच्च । अतः श्रीवसुदेवादिभ्यो गोपनानुसारेणैवोद्धवं प्रति भक्तमेकान्तिनं कञ्चिदिति वक्ष्यते । "अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया । गतांश्चिरायितान् शत्रुपक्षक्षपण चेतस" इति वक्ष्यमाणानुसारेण जरासन्धादिदुर्जननिर्जयादिकृत्यशेषोऽपि कारणान्तरवत् । अन्यथा तैर्यदूनां व्रजजनानामपि महानुपद्रवः स्यात् । अत औदासिन्यव्यञ्जनाय श्रीनन्दादीन् स्वनिकटेऽपि नाजुहाव । किञ्च युगपदुभयत्र पितृत्वादिव्यवहारस्याभिरुचितलीलावेशादीनां समञ्जसतायां दुर्घटता स्यात् निजप्रेयसीनां चानयनेऽनानयने चासमञ्जसत्वमिति । अतएव पूर्वमपि वयञ्च स्नेहदुःखितान् । ज्ञातीन वो द्रष्टुमेष्याम इत्येवोवाच । न त्वाह्वयिष्याम इति । अतस्तादृशानपि वो वयमेव द्रष्टुमेष्यामः नतु यूयमत्रागच्छतेति व्यञ्जनामभिप्रेत्यैव तयोर्दिदृक्षया स्वयं नन्दादयोऽतिनिरूढा अपि व्रजान्नागताः । तत्तदुपद्रवापातात् पुरे व्रजे च युगपत् प्रकटा स्थितिश्च न स्यात् । तज्ज्ञाने श्रीनन्दादीनामस्मदीयत्वे ज्ञानहान्या बन्धुभावहानिश्च स्यात् यथैव वक्ष्यते यथा दूरचरे प्रेष्ठ इत्यादि तस्मात्तथा स्थितिमपि न चकार । अप्रकटा स्थितिस्तु तस्य सर्वदास्त्येव तथैव प्रतिपादयिष्यते । मा शोचतं महाभागावित्यादौ । भवतीनां वियोगो मे नहि सर्वात्मना क्वचिदित्यादौ च किन्त्वसौ प्रकटलीलाविर्भाविनां तेषामनुभवगोचरो न भवति प्रकटलीलायामपि मध्ये यत्तस्य व्रजस्थं कञ्चित् कञ्चित् प्रति गुप्तमागमनं तदप्युत्कण्ठाप्रधानानां स्फुरणभ्रमकरत्वाद्विश्वासाय न भवति । तस्माद्दन्तवक्त्रवधान्ते वर्णयिष्यमाणं श्रीभागवतमते च व्यञ्जयिष्यमाणं यावत्तत्र निजगमनं सम्पद्यते तावत्तेषां यथा केनापि व्याजोपदेशेन तत्तद्विश्वासास्पदं स्यान्महाराजत्ववैभव श्रवण स्यात्तथा समाधातुं स्वयमगत्वा स्वस्यागमने केवलश्रीरामगमनञ्च दुःखकरं मत्वा स्वतुल्येन श्रीमदुद्धवाख्येन प्रियसखेन तादृशं सन्दिश्य श्रीव्रजवासिनः सान्त्वया मासेति क्रमप्राप्तां लीलां वक्तुमारभते अध्यायद्वयेन । वृष्णीनामिति । वृष्णीनामसङ्ख्यानामूर्ध्वोर्ध्वमहानुभावानां विविधभावानामपि सर्वेषामेव यादवानां सम्मतस्तादृशवचनाचरणः । प्रवर इति पाठेऽपि तथैवाभिप्रायः । इति परममाहात्म्यं परमसामञ्जस्यमभिप्रेतं तेन च व्रजजनानामपि तादृशां सान्त्वने सामर्थ्यं किञ्च मन्त्री गुप्तयुक्तिप्रदोऽमात्यविशेष इति विश्वासास्पदत्वेन युक्तिनैपुण्येन च तत्सामर्थ्यं तेन च पूर्वलिखितयुक्तिरपि श्रीभगवता तस्मिन् स्वयमेव कदाचिद्व्यञ्जितास्तीति गम्यते । न केवलमेतावत् किन्तु कृष्णस्य च दयितो दयाविशेषविषय इत्यनिर्वचनीयगुणत्वं तेनात्मीयतया स्वीकृतत्वं चोक्त्वा आत्मगम्यस्थाप्रस्थपने श्रीगोपिकास्वपि सन्देशे योग्यत्वञ्च । एवमन्तरङ्गलोकदृष्ट्या यथोत्तरश्रेष्ठेन तन्महिमानमुक्त्वा तद्योग्यतावैशिष्ट्य तथा सखा असङ्कोचप्रेम्णा दत्तसख्यपदवीकोऽपि इति । श्रीकृष्णेनापि गुणरूपवयआदौ साम्यं सर्वयादवेभ्यः तस्य परमासङ्कोचविस्रम्भास्पदत्वं चोक्त्वा बहिरङ्गलोकदृष्ट्याप्याह । बृहस्पतेः साक्षादेव शिष्यः नतु शिष्यादिद्वाराध्यापनादित्यर्थः । तच्च नीतिशास्त्रमारभ्य श्रीभागवतपर्यन्तस्येति ज्ञेयम् । बृहस्पतेरपि तत्र सङ्कर्षणसम्प्रदायान्तःपातादिति च परमवाग्मित्वमुक्त्वा तेषां श्रीकृष्णजित्वरशुद्धप्रेमवाक्यानां प्रत्युत्तरे तस्य तु यत्किञ्चित् सामर्थ्यं व्यञ्जितं सर्वत्र हेतुः बुद्धिसत्तम इति । एवं

श्रीभगवत इव षड्गुणा दर्शिताः। एतदेव च मनसि विचारितं श्रीभगवता नोद्धवोऽण्वपि मन्न्यून इति उद्धव नामा श्रीवसुदेवस्य भ्रातुर्देवभागस्य पुत्रः तत्रास्तीति शेषः। यद्यपि हरिवंशे। "उद्धवो देवभागस्य महाभागः सुतोऽभवत्। पण्डितानां परं प्राहुर्देवश्रवसमुद्धव"मिति। द्वयोरपि भ्रात्रोरुद्धवनामानौ पुत्रौ कथ्येते तथाप्ययं देवभागसुत एव ज्ञेयः महाभागत्वं खलु तादृशश्रीकृष्णकृपायोग्यत्वं नतु पण्डितमात्रत्वं तदेवमेव कच्चिदङ्ग महाभाग सखा नः शूरनन्दन इति स एष व्रजेश्वरेण तथा सम्बोधयिष्यते श्लेषेण साक्षादुद्धवः मूर्त्तिमानुत्सव इति॥ १॥ तस्य श्रीकृष्णदयितत्वादौ हेतुं तत्र तत्परतां च विशेषणैर्दर्शयन् तादृशतद्दर्शनस्योद्देश्यमाह। तमिति। प्रेष्ठं बाल्यमारभ्यैवातिशयेन प्रीतिकर्त्तारं भक्तं परमादरेण सेवातत्परञ्च "यः पञ्चहायनो मात्रा प्रातराशाय याचितः। तन्नैच्छद्रचवन् यस्य सपर्यां बाललीलये"त्यादि तृतीयाद्युक्तेः अत एव एकान्तिनं तदेकापेक्षकं यथोक्तं श्रीगजेन्द्रेण "एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्ना" इति श्रीवैष्णवैरपि "विहाय पितृदेवादीन् परिनिष्ठाङ्कतो हरौ। तद्गाढप्रेमभिः पूर्ण एकान्तीति निगद्यत" इति अत्र सर्वयादवापेक्षामप्यतीत्य तस्यैकातित्वं ज्ञेय तथा तथाभूतं तमाह किमर्थं प्रपन्नानां तवास्मीति सकृद्याचमानानामपि किमुत तदेकजीवनानां व्रजजनानां य आर्तिं हरति सः तेषामार्तिं हर्तुमित्यर्थः। तस्य तत्त्वज्ञानतादृशानुग्रहादौ योग्यं पदं भगवानिति सार्वज्ञ्यदयादिगुणानां मर्य्यादावाराम्निधिरित्यर्थः। नन्वपरिहार्य्यनानास्निग्धजनवेष्टितेन श्रीभगवता तादृशसन्देशो दुष्करः तत्राह। कच्चित्कथ चिल्लब्धे तदेकद्वितीये स्थाने हन्त तादृश सन्देशं कया मुद्रयोवाच तत्राह। गृहीत्वेति। तच्च निजेष्टप्रयोजने तस्यानुरागोत्पादनेच्छातः परमगोप्यत्वेन शनैर्निकटे विवक्षातः तदुक्तिप्रवृत्त्या प्रेमभरोदयस्वभावाच्च॥ २॥ न इतिबहुत्वं तत्पितृकत्वेनात्मनो बहुमानात् किंवा मत्पितृत्वेन भवादृशामपि तौ पितरावित्यभिप्रायेण इति तयोस्तस्य स्नेहं वर्द्धयति। नाविति कच्चित्पाठः कृष्णरामयोरित्यभिप्रायेण पित्रोर्मद्विच्छेददुः खितयोः प्रीतिं सुखम् आ सम्यगवह स्वचातुर्य्येण वलादिव प्रापय मद्विना तयोः प्रीतेर्दुःसाध्यत्वात्। यद्वा प्रवाहन्यायेन कुरु यथात्वत्पश्चादपि तयोः प्रीतिस्तिष्ठेदेवेत्यर्थः। ननु तत्र मम वराकस्य का शक्तिरित्याशङ्क्य सम्बोधयति हे उद्धवेति। उद्धव एव त्वमसीति पूर्वोक्तसद्गुणगणनिधित्वं सूचयति। उद्धवशब्दस्य श्लेषार्थश्चोक्त एव किञ्च सौम्य! हे शान्तमूर्त्ते मनोज्ञेति वा अस्तु तावत्तच्चातुर्य्यं त्वद्दर्शनमात्रेण च तयोः प्रीतिर्भवितेति भावः। इदं प्रोत्साहनार्थं गोपीनां तु मद्वियोगेन आधिस्त्वं तं विशेषेण मोचय दृढबन्धनवद्धृदिसंलग्नमपुनः स्पर्शतया एवमाधिविमोचनमात्रमेव त्याजयतासां नतु प्रीतिं कर्तुं शक्ष्यसीत्यर्थः। तच्च मत्सन्देशैर्बहुभिरेव नतु त्वद्वाक्चातुर्यादिना नापि द्वित्रैर्वा॥३॥ गोपीनां विशेषतः सन्देशे द्वाभ्यां विशेषावस्थावर्णनेन कारणं वक्तुं प्रथमतः साधारणावस्थां वर्णयति। ता मन्मनस्का इति। विशेषणत्रयेण क्रमेण तासां स्वं विना धर्माद्यशेषार्थेषु देहेषु लोकेष्वपि नैरपेक्ष्यमुक्तम् अन्यत्तैः तत्रादिग्रहणाद्भोजनपानादयश्च दैहिकाः। यद्वा मन्मनस्का इति बाह्यसर्वप्रियार्थानादरः मत्प्राणाः इति ततोऽपि प्रियाणामन्तरीणसर्वार्थानामनादरः मदर्थ इत्यादिना भोक्तृत्वे सुखदुःखानां पुरुषः प्रकृतेः पर इत्यात्मपर्य्यवसायिसर्वभोगानादरादात्मानादरश्च विवक्षितः तत्र तत्र हेतुमाह। मामेव दयितं मनसागता निश्चितवत्यः न तु बाह्यान् विषयान् तथा प्रेष्ठ ततोऽपि प्रियतमं मामेव नतु नतोऽन्तरीणप्राणादीन् मद्वियोगे तत्तदनादरात् तथा निरुपधिप्रेष्ठमात्मानमपि मामेव नतु देहिनं मद्वियोगे तस्यापि शून्यायमानत्वात् मद्विना भूतानां तासामात्मान्यत्र प्रीतिमात्रं न स्पृशतीत्यर्थः। तदेवं त्रिभिर्योग्यैः पदैर्मामेव पतिं निश्चितवत्य इत्यर्थः। ननु किंवदन्तीप्राप्तमन्यदित्यर्थः। तथैव ता एव वक्ष्यन्ते अपि वत मधुपुर्य्यामार्यपुत्रो धुनास्त इति इदं पद्यार्द्धं बहुत्र तत्त्ववादिनां टीकायामपि ध्रियते किन्तु स्वामिपादैरनभिमतमिव लक्ष्यते मध्ये प्रविष्टस्य दुर्गमस्याप्यव्याख्यानात्। य इति। सामान्येन निर्देशः अधिकाराद्यनपेक्षया भरणस्यावश्यकताबोधनार्थं चकारात्तानपि किं पुनः प्राणाद्यनपेक्षिकास्ता इत्यर्थः। यद्वा मम मनो यासु ताः किञ्च मम ता एव प्राणाः यतो मदर्थ इत्यादि तत्र हेतुः मामेवेत्यादि कैमुत्येन हेतुः य इत्यादि अहं ब्रह्मादि ध्येयोऽपि विभर्मि अन्तर्धारयामि सदा चिन्तयामीत्यर्थः। तथाचादिपुराणे "भक्ता ममानुरक्ताश्च कति सन्ति न भूतले। किन्तु गोपीजनः प्राणाधिकप्रियतमो ममे"ति अतस्तासामाधेर्मदन्तः प्रवेशेन सदाहमप्याधिमानिति भावः। यद्वा ये ताभिस्त्यक्ताः सखीदास्यादिलोकाः भोजनादिदेहधर्मा लज्जादिसाध्वीधर्माश्च तानप्यहं बिभर्मि रक्षामि किमुत ताः॥ ४॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आर्त्तैकशरणं कृष्णमार्त्तान् व्रजजनांश्च तान्। तच्चार्त्ताश्वासकं भक्तं वन्देऽत्यार्त्तो दुराशया॥

एवमात्मनोऽवश्यकृत्य-समाप्त्या तथा (भा० १०।४१।१७) "आयास्ये' इति, (भा० १०।४५।२३) 'द्रष्टुमेष्यामः' इत्यादि-वाक्य-सत्यतापेक्षया च व्रजे जिगमिषन्नपि पाण्डवाश्वासन-जरासन्धनिर्ज्जयादिना सुहृदां हितार्थमेव पुरे वसन् आदौ स्वतुल्येन प्रियसखेन व्रजजनान् सान्त्वयामासेति क्रमप्राप्तं वक्तुमारभतेऽध्यायद्वयेन। वृष्णीनां विविधभावानामपि सर्वेषामेव यादवानां सम्मत अत्यादृत इति परमचातुर्य्यमभिप्रेतम। तेन च बालवृद्ध-तरुणादीनां प्रायः प्रत्येकं पृथग् भावानां विचित्ररसवतामपि व्रजजनानां सान्त्वने सामर्थ्यम्। किञ्च, मन्त्री—गुप्तयुक्तिप्रदो राजामात्यविशेषः, यद्वा, वृष्णीनां सम्मतत्वेन मन्त्रित्वमायातमेव, ततश्च स्वभावेनैव सिद्धमन्त्र इत्यर्थः। तेन सर्व्ववशीकारित्वं सूचितम्। किञ्च, कृष्णस्य सर्वचित्ताकर्षक-गुणस्य दयितः सखा प्रियसख इत्यर्थः। इति तस्यापि तादृशत्वमभिप्रेतम्, तथा समवयस्कतादिकं परम-विश्वासास्पदत्वादिकञ्च, तथात्मगम्ये

स्थाने प्रस्थापनयोग्यत्वञ्च । यद्वा, दयितो यथानुगृहीतकनिष्ठभ्राता वा सखा च सहचर इति सदा संगित्वादिना श्रीकृष्णस्य भावाभिज्ञतादिकम् । किञ्च, बृहस्पतेः साक्षादेव शिष्यः, न तु शिष्यादिद्वाराध्यापनादित्यर्थः । इति सर्वशास्त्रतत्त्वज्ञत्वं परमवाग्मित्वञ्च । किञ्च, बुद्धिसत्तम इति महाप्रतिभादिमत्त्वम् । एवं श्रीभगवत इव षड्गुणा उक्ताः । उद्धवनामा श्रीवसुदेवभ्रातृदेवभागस्य पुत्रः, श्लेषेण साक्षादुद्धवो मूर्त्तिमानुत्सव इत्यर्थः । विशेषणानामेषामुत्तरोत्तरस्मिन् हेतुहेतुमत्तोह्या फलञ्चाग्रे तद्वचनादौ पृथक् पृथग् व्यक्तं भावि । इत्थं सर्वथा व्रजं प्रति प्रस्थाने योग्यतोक्ता ॥ १ ॥ क्वचिद्व्रजस्मृतिविशेषजनके कस्मिंश्चित् समये स्थाने वा तमुद्धवमाह । वक्ष्यमाणस्य पितृभ्यामपि गोपीनां विशेषस्य परापरहस्यस्य प्रकाशनयोग्यत्वेन तं पूर्वतो विशिष्टतया पुनर्विशिनष्टिप्रेष्टं प्रियतमम्, ततो भक्तमाबाल्यादेव सेवारतम् (भा० ३।२।२)— 'यः पञ्चहायनो मात्रा प्रातराशाय याचितः । तन्नैच्छद्रयन् यस्य सपर्य्यां बाललीलया' ॥ इत्यादिना तृतीयस्कन्धादौ तदुक्तमेव, तत्र चैकान्तिनं तदेकापेक्षकमित्यर्थः, यद्वा, एकान्तिनं भक्तं तदेकभक्तिनिष्ठमित्यर्थः । तथा श्रीवैष्णवैरुक्तम्—'विहाय पितृदेवादीन् परिनिष्ठां गतो हरौ । तद्गाढप्रेमभिः पूर्णं एकान्तीति निगद्यते' ॥ वक्ष्यमाणस्य तादृशत्वे हेतुः—भगवान् स्वभावत एव परमकारुणिक इत्यर्थः । विशेषतश्च प्रपन्नादीनां भक्तानामार्त्तिहरः, किंवा तवास्मीति याचनादिना शरणागतानामपि, किं पुनस्तदेकजीवनानां व्रज-जनानामार्त्तिहरः, यतो हरिः, अत एव तस्य पाणिं स्व-पाणिना गृहीत्वा तच्च निजेष्टप्रयोजने तस्यानुरागोत्पादनार्थम्, किंवा परमगोप्यत्वेन शनैर्निकटे वाच्यत्वात् किंवा तदुक्तिप्रवृत्त्या प्रेमभरोदयस्य स्वभावात् ॥ २ ॥ 'नः' इति बहुत्वं तत्पितृकत्वेनात्मनो बहुमानात्, किं वा मत्पितृत्वेन भवादृशामपि तौ पितरावित्यभिप्रायेणेति तयोस्तस्य स्नेहं वर्द्धयति । पित्रोर्मद्विच्छेददुःखितयोः प्रीतिं सुखम् आ सम्यग् वहत्व, स्वचातुर्य्येण बलादिव प्रापय, मद्विना तयोः प्रीतेर्दुःसाध्यत्वात्, यद्वा, प्रवाह-न्यायेन कुरु, यथा त्वत्पश्चादपि तयोः प्रीतिस्तिष्ठेदेवेत्यर्थः । ननु तत्र मम वराकस्य का शक्तिरित्याशंक्य सम्बोधयति—हे उद्धवेति । पूर्वोक्त-सद्गुणगणनिधित्वं सूचयति । उद्धव-शब्दश्लेषार्थ उक्त एव । किञ्च, सौम्य ! हे शान्तमूर्त्ते ! मनोज्ञेति वा । अस्तु तावत् त्वच्चातुर्य्यम्, त्वद्दर्शनमात्रेण च तयोः प्रीतिर्भवितेति भावः । इदं तत्प्रोत्साहनम्, गोपीनान्तु मद्वियोगेन यम् आधिस्तं विशेषेण मोचय दृढबन्धनवत् हृदि संलग्नमपुनःस्पर्शतया त्याजय । एवमाधिविमोचनमात्रमेव तासाम्, न तु प्रीतिं कर्तुं शक्ष्यसीत्यर्थः । तच्च मत्सन्देशैर्बहुभिरेव, न च तद्वाक्चातुर्य्यादिनापि द्वित्रैर्वा । भो देव्यः ! कृष्णेनेदमुक्तमेवं चोक्तमित्येवं मुहुर्मत्सन्देशत्वेन सद्युक्तिपूर्वक-मदीय भावव्यञ्जनादात्मनि मदपेक्षामननेन तासां किञ्चिदाश्वास-सम्भवात् ॥ ३ ॥ मन्मनस्का इत्यादि-विशेषणत्रयेण क्रमेण तासां तं विना धर्म्माद्यशेषार्थेषु देहेषु लोकेष्वपि नैरपेक्ष्यमुक्तम् । किञ्च, अनन्यचिन्तादिना गूढत्वमिव तथात्मनो दूरस्थित्या मृततुल्यत्वम्, तथा दैहिकानपेक्षया निर्गतित्वादिकञ्च सूचितम् । अन्यतैर्व्याख्यातम् । यद्वा, मम मनो यासु ता मच्चित्ताकर्षिण्य इत्यर्थः । किञ्च, मम प्राणाः । कुतः ? मदर्थे मदेकापेक्षया त्यक्ताः पुरैवोपेक्षिता दैहिकाः पतिपुत्रादयो भोजनपानादयश्च याभिस्ताः, यतः परमात्मानमपि मां दयितं निजपतिमिति, न तु पाणिगृहीतारं गोपम् । तत्रापि प्रेष्ठं तत्त्वतः पतिपुत्रादिभ्योऽधिकप्रियस्यात्मनोऽप्याधिक्यात्, किं वा उपपतित्वेनाधिकप्रमास्पदत्वात् । प्रियतममिति मामेव व्रजेन्द्रनन्दनरूपम्, न तु श्रीनारायणरूपं श्रीबलदेवं वा मनसा गताः जानन्तीत्यर्थः, निश्चितवत्य इति वा । इदं पद्यार्द्धं श्रीस्वामिपादानामसम्मतम्, तैरस्पृष्टत्वात्, तथा वाक्यसमाप्त्यपेक्षया ततः किमित्यादिव्याख्यानाच्च । विभर्स्मि तानपि, चकारःन्मोक्षाद्यनपेक्षकाश्च । य इति सामान्येन निर्देशः, अधिकाराद्यनपेक्षया भरणस्यावश्यकत्वबोधनार्थः, किं पुनः प्राणाद्यपेक्षिकास्ता इत्यर्थः । यद्वा, अहं ब्रह्मादिभ्येयोऽपि विभर्म्मि अन्तर्धारयामि, सदा चिन्तयामीत्यर्थः । अतस्तासामाधेर्मदन्तःप्रवेशेन सदाहमप्याधिमानिति भावः । यद्वा, ये ताभिस्त्यक्ताः पत्यादिलोका भोजनादिदेहधर्म्मा लज्जादि साध्वीधर्म्माश्च तानप्यहं विभर्मि रक्षामि, किमुत ताः, अतस्तासु ते ते विद्यन्त इत्यर्थः । तेन तदर्थं त्वां तत्र प्रस्थापयामीति भावः । अथवा ननु तर्हि कुतोऽत्र त्वत्पार्श्वे नायान्ति ? तत्राह—मदर्थे आयास्यामीति । मदाज्ञाहेतोस्तत्रैव स्वच्छन्दमत्संगमार्थं वा । अकारप्रश्लेषेण—न त्यक्ता देहिका गृहादयोऽलंकारादयश्च याभिस्ताः । एवं तासां गृहावस्थितावपि परमौदासीनां स्वप्रहितालंकारधारणादिकञ्च लक्षणमुद्दिष्टम् ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

त्यक्तदैहिकाः त्यक्तदेहभूषणाः ॥ १-८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथाध्यायद्वयेन भगवतः स्वसखोद्धवमुखेन गोपीसान्त्वनात्मकं चरित्रमनुवर्ण्यते गोपीनां सान्त्वनमतिरहस्यं सन्मन्त्रिसाध्यमित्येतदर्थमुद्धवं विशिनष्टि । वृष्णीनामिति । दयितः सखा प्रियसखः साक्षाद्बृहस्पतेः शिष्यः अनेन बुद्धिकौशलं सूचितं बुद्धिसत्तमः निसर्गतोऽपि बुद्ध्या श्रेष्ठः ॥ १ ॥ तमिति । क्वचिन्निर्जने देशे प्रपन्नार्त्तिहरः हेतुगर्भमिदं तत्त्वात्संदेशप्रेषणमुचितमिति भावः ॥ २ ॥ तदेवाह । गच्छेति सार्द्धैश्चतुर्भिः । हे उद्धव ! नोऽस्माकं पित्रोर्नन्दयशोदयोः प्रीतिमावह हर्षं जनय मत्संदेशैरित्यपकर्षःमद्वियोगाद्धेतोर्य आधिर्मनःपीडा तं विमोचय त्याजय ॥ ३ ॥ गोपीनां विशेषतः संदेशनयनकारणमाह । ता इति । मय्येव

संकल्पात्मकं मनो यासाम् अहमेव प्राणो यासां ताः मदर्थेत्यक्तदैहिकाः त्यक्तदेहपोषणाः मामेव दयितं दयास्य संजातेति दयितस्तं दयावन्तं प्रियतमं तत्र हेतुगात्मानं मनसा आगमन् गत्यर्था बुद्ध्यर्थाः अध्यवसितवत्यः सन्त्वेवं विधास्ताः कितवेत्यत आह। ये जना मदर्थे त्यक्ता लोकधर्मा यैस्तानहं बिभर्मि सम्वर्धयामि सुखामीति यावत् ।। ४ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भगवन्मनोवशीकरणार्थं भक्तिरेव प्रधानसाधनमिति दर्शयितुं हरेर्गोपीष्वनुकम्पित्वं निरूपयत्यस्मिन्नध्याये। तत्र कृष्णेन उद्धवं गोकुलं गमयितुं वक्ति। वृष्णीनामिति ।। १ ।। य एवंविधगुणोपेत उद्धवस्तमाह क्वचिद्रहसि ।। २ ।। मद्वियोगेन मम विरहेण य आधिस्तं मत्सन्देशैर्मदीयाज्ञावचनैः ।। ३ ।। अहमेव प्राणो जीवनं यासां तास्तथा त्यक्तदैहिकाः दूरीकृतदेहधर्माः दयितमिष्टस्य दातारं प्रेष्ठं स्वशरीरादेरपि प्रियतमम् आत्मानं सन्ततामुगतरूपम् ।। १-४ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवमात्मनः प्राथमिकावश्यकृत्यासमाप्त्या तथा आयास्य इति द्रष्टुमेष्याम इति स्ववाक्यव्यभिचारतर्कतः तेषामार्त्तिविशेषाशङ्कया च व्रजं गन्तुमनाअपि यच्छ्री भगवान्न जगाम तत्र श्रीनन्दयशोदादिप्रेमबहुतया पुनस्तदागमनाभावमाशङ्कमानानां श्रीवसुदेवदेवक्यादीनां गुरुत्वेनालङ्घनीयवाक्यानामनुज्ञैव कारणं लक्ष्यते। ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखमित्युक्तत्वात् अतः श्रीवसुदेवादिभ्यो गोपनानुसारेणैव उद्धवं प्रति भक्तमेकान्तिनं क्वचिदिति वक्ष्यते ज्ञानहान्या बन्धुभावहानिश्च स्यात्। पुत्रादिरूपस्य स्वस्य महाराजताश्रवणेन तूत्कण्ठात्ययप्रेमानन्दवृद्धिः स्यात् यथैव वक्ष्यते। यथा दूरचरे प्रेष्ठे इत्यादि। तस्मात्तथा स्थितिमपि न चकार। अप्रकटा स्थितिस्तु तस्य तत्र सर्वदास्त्येव तथैव प्रतिपादयिष्यते माशोचतं महाभागावित्यादौ भवतीनां बियोगो मे नहि सर्वात्मना क्वचिदित्यादौ च। किन्त्वसौ प्रकटलीलाविर्भाविणां तेषामनुभवगोचरो न भवति। तस्मादन्तवक्त्रवधान्ते पाद्मोत्तरखण्ड वर्णयमानं श्रीभागवतमते च वर्णयिष्यमाणं यावत्तत्र निजगमनं सम्पद्यते। तावत्तेषां यथा केनापि व्याजोपदेशेनाशावनुभवगोचरः स्यान्महाराजत्वे वैभवश्रवणं च स्यात् तथा समाधातुं स्वयमगत्वा स्वस्यागमने केवलं श्रीरामगमनञ्च दुःखकरं मत्वा स्वतुल्येन श्रीमदुद्धवाख्येन प्रेयस्त्वेन तादृशं सन्दिश्य श्रीव्रजवासिनः सान्त्वयामासेति क्रमप्राप्तां लीलां वक्तुमारभते अध्यायद्वयेन वृष्णीनामिति। ये त्यक्तेति। यच्छब्दसामान्यनिर्देशः। तन्निर्देशश्च विप्रत्वाद्यनपेक्षार्थः। चकारात्तानपि किमुत तन्मनस्का इत्यादि लक्षणास्ता इति ।। १-५ ।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तमाह भगवानित्यादि। भक्तं तत्रापि प्रेष्ठं प्रेयांसम्, तत्रापि एकान्तिनम्। क्वचित् रहसि पाणिना पाणिं गृहीत्वेति प्रणयाधिक्य-प्रकटनम्। प्रपन्नार्तिहर इति हेतुमद्विशेषणम् ।। ३ ।। ता मन्मस्का इत्यादि। ता इति विप्रलम्भलीलाविषयत्वेनाङ्गीकृताः, मयि मनसः कः सुखं यासाम्, अत एव मत्प्राणाः, मम प्राणस्वरूपाः, मदर्थं मन्निमित्तं त्यक्तं दैहिकं देहसम्बन्धि सुखं याभिः। नन्वेवं चेत्, तत् कथं तद्विरहेण जीवन्तीत्याह—मामेवेत्यादि। मामेवात्मानं मनसा गताः प्राप्ताः मयात्मनैव ता जीवन्तीत्यर्थः। कीदृशमात्मानम्? दयितं वल्लभम्। स्वात्मभ्योऽपि वल्लभम्। कुतः प्रेष्ठमतिप्रियतमम्। नन्वेवं चेज्जीवन्ति तदा किं ताः प्रति चिन्ताकरणेन? नैवमित्याह—ये त्यक्तलोकेत्यादि। ये जना मदर्थं मन्निमित्तं त्यक्तलोकधर्माः, त्यक्ता लोका धर्माश्च यैस्ते तथा, तानहं विभर्मि, हृदि वहामि। किं पुनस्त्यक्तदैहिकास्ता इति तदुद्देशाकरणे मम कृतघ्नता अधैर्यञ्चेति, तत्र गन्तव्यमेव भवतेति भावः। ननु भवन्मतेऽप्रकटरूपेऽभौमांशे वृन्दावने नित्यं भगवान् काभिश्चिन्नित्यसिद्धाभिः सह वर्तत एव तत् कथं तत्रैव प्रकटीभूय तासां विरहं नापनोदयति? सत्यम् नापनोदयतीति कथं ज्ञायते? किन्तु विप्रलम्भ—भृङ्गारस्यापि रमणीयत्वे भगवतस्तदङ्गीकारो युज्यत एवेति विप्रलम्भलीला नान्यथा भवतीति तदर्थैवेदृशीच्छा भगवत इति सर्वमनवद्यम्। विप्रलम्भो नाना, तत्र प्रवासरूपस्यास्य तासां मनस्याविर्भावः। तेन भक्तविच्छेददुःखानुभवलीलेयमिति सुरसा। अतोऽप्रकट वृन्दावनस्थानां कासाञ्चिन्नित्य-संयोग एव प्रकटवृन्दावनस्थानां कदाचित् संयोगः कदाचिद्वियोगश्च। अन्यासां राजकन्यात्वेन स्थितिरिति पूर्वोक्तं त्रैविध्यमेव तासामिति स्थितम् ।। ४ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

भक्तं तत्रापि एकान्तिनं तत्रापि प्रेष्ठं प्रेयांसम्, अतस्त्वयि किमपि न गोप्यमिति भावः ।। १-३ ।। मन्मनस्का इत्यत एव मत्प्राणा मम प्राणरूपाः। प्रेयसां प्रेष्ठे मयि प्रेयसां प्राणानामपि प्रेष्ठः प्राणेभ्योऽपि परे प्रेष्ठा न सन्ति, तेभ्योऽपि प्रेष्ठः ।। ४-५ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

षट्चत्वारिंशके गोष्ठ गत उद्धव उद्धवम्। ददर्शास्येशयोः कृष्णविरहादत्यनुद्धवम् ।।

स्वविच्छेदवतां व्रजस्थानां दुःखमनुस्मृत्य तेन स्वयं व्याकुलस्तद्दुःखहरं मत्सन्देशं प्रापयितुं तत्तत्प्रेम्णाञ्च सर्वोत्कर्षं ख्यापयितुममत्र पुर्यां कोऽनुरूपो यः खलु व्रजनगरस्थः तत्रस्थानां तत्तत्प्रेम्णाञ्च माधुर्यसुधासिन्धौ खेलितुं कृतपरःसहस्रतप-

स्कोऽस्तीति परामृशति भगवत्यकस्मात्तत्रैवागतमुद्धवं तत्कृत्यसाधकं ज्ञापयितुं विशिनष्टि। वृष्णीनां सम्मतः यदुवंश्यैः सर्वैरेव प्रमाणीकृतवचनाचरणादिरित्यर्थः। तेन व्रजादागत्य यदयं तत्तत्प्रेमाणमनुभूय श्रीयशोदानन्दयोः गोपानां गोपीनां प्रेम्णां सौभाग्योत्कर्षान् अत्र तेभ्योऽपि परःसहस्रान् वक्ष्यते तत्र सर्वेऽपि वृष्णयो विश्वासं प्राप्स्यन्ति। येऽमी परमेश्वरपुत्रकत्वेन देववसुदेवयोरेव सौभाग्यस्य प्रेम्णश्च सर्वोत्कर्षं तत्सम्बन्धित्वेन स्वेषामेव च तं मन्यन्त इति भावः। मन्त्रीति व्रजस्थानां सान्त्वनं यया मन्त्रणया सम्भवेत्तदभिज्ञ इति भावः। कृष्णस्य दयितो वल्लभ इत्यत एव व्रजप्रेमसुधापानयोग्यतेति भावः। सखेति व्रजभूमौ सुवलस्येवास्याप्युज्ज्वलरससंलापवावदूकत्वं ह्युत्पन्नमेवाग्रतस्त्वदधिकमेवोत्पत्स्यते तथा नोद्धवोऽण्वपि मन्न्यून इति तृतीयोक्तेश्च कृष्णतुल्यवात् कृष्णप्रतिमूर्त्तिना अनेन कृष्णदूत्यं साधु सम्पत्स्यते इति भावः। बृहपतेः साक्षात् शिष्य इत्यस्य बुद्धेरति तैक्ष्ण्यं दृष्ट्वा स्वयमेव बृहस्पतिरिमं सर्वशास्त्राण्यध्यापयामास किन्त्वेकस्मिन् शास्त्रे बृहस्पतेरप्यगम्येऽस्य न्यूनतेत्यतस्तत् सर्वमुकुटोत्तमं कृष्णवशीकारकं प्रेमशास्त्रमेनं कृष्णदयितत्वात् व्रजे गोपिका एवाध्यापयिष्यन्तीति भावः। बुद्धिसत्तम इति। अतिबुद्धिमत्त्वात् तच्छास्त्रावधारणक्षममेनं कृष्णाऽपि रहसि पट्टमहिषीसभायां तच्छास्त्रमेव वाचयिष्यति। तदेव श्रुत्वा "व्रजस्त्रियो यद्वाञ्छन्ति पुलिन्द्यस्तृणवीरुधः। गावश्चारयतो गोपाः पादस्पर्शं महात्मनः" इत्युक्तिमत्यः पट्टमहिष्योऽप्यभिलषिष्यन्तीति भावः। उद्धवोऽयं वसुदेवभ्रातुर्देवभागस्य पुत्रः। तदुक्तं हरिवंशे "उद्धवो देवभागस्य महाभागः सुतोऽभवदित्यत एव कच्चिदङ्ग महाभागेति श्रीनन्देन सम्बोधयिष्यते। श्लेषेण साक्षादुद्धवो मूर्त्तिमानुत्सव इतीमं दृष्ट्वा व्रजस्था उत्सवं प्राप्स्यन्तीति भावः ॥१॥ भक्तं तत्राप्येकान्तिनं "विहाय पितृदेवादीन् परिनिष्ठाङ्गतो हरौ तद्गाढप्रेमभिः पूर्ण एकान्तीति निगद्यते" इति तल्लक्षणं तत्रापि प्रेष्ठं तेष्वतिप्रीतिविषयं कञ्चित् विविक्ते गृहीत्वा पाणिना पाणिमिति स्ववैयग्र्यद्योतना। प्रपन्नमात्रस्याप्यार्त्तिहरः किमुत प्रेमवच्छिरोमणीनां व्रजस्थानामिति भावः ॥ २ ॥ आ सम्यक् प्रापय विमोचयेत्यनेन यद्वियोगाधिस्तासां हृदि दृढेन ग्रन्थिना निबद्ध इति ज्ञापयति तद्विमोचनमपि मम सन्देशैरेव नतु तद्वाक्चातुर्यादिभिः। सन्देशैरपि बहुभिरेव नतु सन्देशेनैकेन ज्ञानयोगोपदेशेन नतु द्वाभ्यां तदनन्तरं वक्तव्याभ्यां सन्देशाभ्यां मत्प्राप्त्युपायाश्वासनाभ्यां तत्प्रेमवाडवाग्निज्वालया भस्मीभावित्वात्। किन्तु सर्वान्ते प्रकाशितैस्ताभ्योऽन्यत्र ज्ञापनानर्हैः सन्देशै रहस्यव्यञ्जकैर्बहुभिरेव ॥ ३ ॥ मय्येव संकल्पात्मकं मनो यासां ताः अहमेव प्राणो यासां ताः त्यक्ता दैहिकाः पतिपुत्रपितृशयनभोजनपानादयोऽपि याभिस्ताः तत्र तत्र हेतुः मामेव नतु स्वस्वपतिमन्यं दयितं प्रियं मनसा गता ज्ञानवत्यः न केवलं दयितमेव अपितु प्रेष्ठं न च प्रेष्ठमेव किन्त्वात्मानं ताभिरहमेव स्वस्वजीवात्मा परमात्मा च निश्चित इत्यर्थः। सचाहमत्र मथुरायामतस्ताभिः स्वस्वदेहान्निर्गतात्मान एव मन्यन्ते केवलं मदीययोगमायैव दुस्तर्कया शक्त्या जीव्यन्ते इति भावः। येन्येऽपि साधकभक्ता अपि मन्निमित्तं लोकधर्मादीस्त्यजन्ति तानपि बिभर्मि किंपुनस्ताः ॥ ४ ॥

गूढार्थदीपिनी

षट्चत्वारिंशके गोष्ठमुद्धवं प्रेष्य माधवः। नन्दादीनां स्वसन्देशैः शोकमोहौ न्यवारयत् ॥ १ ॥

बुद्ध्या सत्तमः अतीवनिपुणः ॥ १–२ ॥ नौ आवयोः। प्रीतिम् आवह कुरु ॥ ३ ॥ मत् अहमेव प्राणो यासाम् ताः। त्यक्ता दैहिकाः देहसम्बन्धिनः पतिपुत्रादयः याभिः ताः बिभर्मि पालयामि ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

षट्चत्वारिंशे भगवदाज्ञया व्रजं गतेनोद्धवेन यशोदानन्दयोः शोकापनोदनं कृतमिति वर्णयति। वृष्णीनामिति ॥१–३॥ यशोदानन्दयोर्मन्मात्रयोरवश्यं सान्त्वनं करिष्यति मत्प्रियाणां गोपीनामपि सान्त्वनं तत्स्वभावानुसारेणायं करोत्वित्येतदर्थं तासां स्वस्मिन्प्रेमातिशयमाह। ता इति त्रिभिः। मय्येव मनो यासां ताः अहमेव प्राणो यासां ताः त्यक्तानि दैहिकानि देहसुखसाधनानि याभिस्ताः अतस्तान् बिभर्मि सम्वर्द्धयामि सुखयामीत्यर्थः। किम्बहुना ये जनाः मदर्थे त्यक्तलोकधर्माः त्यक्तः लोकधर्मः। ऐहिकामुष्मिकलोकप्रापकः प्रवृत्तिरूपो धर्मो यैस्तान् सर्वांश्च बिभर्मीत्यर्थः ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ भक्तिमत्यस्ता अहं च भक्त्यनुरक्तोऽतस्त्वं गोकुलं गत्वा मत्सन्देशैः समाधत्स्वेत्युद्धवं प्रेषयामासेति सकरुणो देव इति प्रतिपाद्यतेऽस्मिन्नध्याये। तत्रादौ तमुपदिदेशैवमिति शंसति शुक इत्याह ॥ श्रीशुक इति वृष्णीनां प्रवरो मन्त्र्यमास्य आलोचनापर इति वा दयितः सखा च बृहस्पतेः साक्षाच्छिष्यो बुद्धिसत्तमो बुद्धिसती येषु ते बुद्धिसन्तस्तेषां श्रेष्ठ इति बुद्धिसत्तमः ॥ १ ॥ एकान्तिनमेकान्तभक्तं रहस्यप्रमेयनिरूपणयोग्यमिति वा ॥ २ ॥ नः पित्रोर्यशोदानन्दयोस्तथा गोपीनां मद्वियोगाधिं मत्सन्देशैरेव आयस्यतीत्यादिभिर्विमोचय ॥ ३ ॥ तत्स्वभाववेदितारमप्युद्धवं प्रेमातिशयवशाद्देव आवेदयति ॥ ता इति। मन्मनस्का मयि मनो यासां ता मत्प्राणा अहमेव जीवनं चेष्टको वा यासां ता मदर्थे मन्निमितं त्यक्तो दैहिको लज्जादिर्धर्मो याभिस्ता दयितं प्रेष्ठादपि प्रेष्ठं मामेवमात्मानं स्वामिनं मनसाऽत्रैवागता गात्रमात्रं तत्रेति तात्पर्यम्। पूर्वोक्ततन्मनस्कताविवरणपरमिदमिति केऽपि ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

त्रिचत्वारिंशकेऽध्याये स्वस्थित्यैव निरोधनात्। यशोदानन्दयोश्चैव ह्युक्तोऽपि विनिरूप्यते ॥
गोपिकानां ततो वाच्यस्तेनोक्तं च समर्थितम्। राजस्त्वं च संसिद्धं गुणोत्कर्षश्च रूपितः ॥

पूर्वाध्याये ज्ञातीन् वो द्रष्टुमेष्याम इति नन्दं प्रति भगवता निरूपितं तेषामेव च सम्बन्धः पुत्रत्वादिरूपः स्थापितः तत्र मध्ये विद्याग्रहणेन विलम्बो जात इति स्वस्यापि गमनं कार्यस्यावश्यकत्वात् न सम्भवतीति विद्यातः समागत्य नन्दादीनां सान्त्वनार्थमुद्धवं प्रषयतीति निरूप्यते। तत्र सन्ति त्रिविधाः प्रकटसंदेशयोग्याः यशोदानन्दप्रभृतयः मित्रभूता गोपाः अल्पगोप्याः गोप्यस्त्वतिगोप्याः अत एतादृशेऽर्थे निपुणेन दूतेन भाव्यमिति उद्धवं प्रेषणार्थं वर्णयति। वृष्णीनां प्रवर इति। कुलीनः कर्मसु प्रशस्तः तत्रापि स्वगोत्रजः तत्रापि महानिति प्रेषणे स्वरूपयोग्यता निरूपिता दौत्यार्थं सहकारियोग्यतामाह। मन्त्रीति। स हि मन्त्रं न प्रकाशयति तर्ह्युचितमेव वदेन्नानुचितमिति भगवदुक्तमपि न वदेदतो गह्यार्थे प्रेषणमयुक्तमित्याशङ्क्याह। कृष्णस्य दयित इति दयितोऽत्यन्तप्रियः। यद्यनभिप्रेतधर्मवान् भवेन् तर्ह्यत्यन्तप्रातिविषयो न स्यात्। गुर्वादिरप्येतादृशो भवतीति पितृव्यत्वाच्च तथात्वे गुह्यं न वक्तव्यमित्याशङ्क्याह। सखेति। भगवतः समानशीलव्यसनत्वात् तथाप्यनीतिज्ञश्चेत् देशकालप्रकरणादिनिरपेक्षतया वदेत ततश्च यथार्थमपि भाषितं फलाय न भवेदित्यत आह। बृहस्पतेः देवगुरोः शिष्य इति। नीतिस्तत्रैव तिष्ठति। साक्षादिति। न ग्रन्थद्वारा साक्षादुद्धवो वा उत्सवात्मकः दूरे गतस्य बन्धोः पुनरागमनख्यापकः परम्परयोत्सवहेतुर्भवति अयं तु साक्षात् एव एष्वैव जानन्ति भगवद्दर्शनेनेव च सुखिता भवन्ति तथापि यावदुक्तार्थग्रहणसामर्थ्यं मृग्यत इति तादृशो वक्तव्य इत्यत आह। बुद्धिसत्तम इति। बुद्धया अत्यन्तं सन् बुद्धिमत्त्वेऽपि कार्यसिद्धौ स्वतोऽपि छायया गोकुलवासिनां दुःखदूरीकरणसमर्थ इति तथोक्तम् ॥ १ ॥ एवं दूतगुणानुक्त्वा तादृशे भगवन्नियोगमाह। तमाहेति। तेन कार्यं सेत्स्यतीति ज्ञानार्थमत्यनुरोध्येषु स्वागमनार्थं च प्रेष्ठोऽत्यन्तं प्रियः अतः स्वसमान इति प्रतिनिधित्वात्प्रेषणीयः तथापि स्त्रीषु विक्रियां प्राप्स्यतीत्याशङ्क्याह। भक्तमिति। स्वीकृतस्तथा भविष्यतीत्याशङ्क्याह। एकान्तिनमिति। एकान्ते स्थातुं योग्य उभयेषां विकारानालम्बनमिति कचिदेकान्ते यत्र कोऽपि न पश्यति तत्र पाणिना पाणिं गृहीत्वा आहेति सम्बन्धः। एवं निर्बन्धेन कथने को हेतुस्तत्राह। प्रपन्नातिहर इति। शरणागताः गोकुलवासिनः तेषामार्तिर्हर्तव्येति सहज एव धर्मस्तस्य तादृश इति न त धर्मपरित्यागः ॥ २ ॥ भगवद्वाक्यान्याह चतुर्भिः—

प्रमाणं च प्रमेयं च उपपत्तिश्च बाधकम्। चत्वारोऽत्रैव वक्तव्या अन्यथा प्रेषणं न हि ॥

आदौ नियोगमाह। हे उद्धव ! व्रजं गच्छ सौम्येति सम्बोधनान्नान्यः प्रेषयितुमुचित इति सूचितं गत्वा कर्तव्यमाह। पित्रोः यशोदानन्दयोः नौ आवयोः उभाभ्यां तस्मिन्नेव पितृत्वं स्थापितमिति तदुपपादितम् अतो यथैव प्रीतिर्भवति अस्मदागमनेनेव तथा प्रीतिमावह अयं प्रकटः सन्देशः गुप्तमाह। गोपीनां मद्वियोगाधिमिति। मम वियोगेन आधिर्मनः पीडा तां मत्संदेशैः मत्पत्रलिखितैः तत्र प्रकटीकृतैः विमोचय आधिमस्तास्ताः यथा तद्ग्रासो गच्छति तथोपायं कुरु ॥ ३ ॥ ननु तासु को विशेष इत्याशङ्क्य तासां स्वरूपमाह। अस्मत्कथने प्रमेयबलत्वेन ता मन्मनस्का इति प्राणिनामात्मा मदीय एव सर्वसाधरणः सर्वासिद्धत्वात् ज्ञातेऽपि तथा नादरणीयः किं तु देहेन्द्रियमनांसि अन्यपराण्येवोत्पत्तिशिष्टानि तानि चेन्मत्पराणि स्युः तदा तत्संघाता मदीया भवन्ति तदाह। मय्येव मनो यासां मय्येव प्राणा इन्द्रियाणि च तदर्थमेव जीवति मय्येव सति जीवति सर्वाणीन्द्रियाणि मद्विषयकाण्येव कुर्वन्ति देहमपि मदर्थमेव कुर्वन्तीत्वेतदर्थमाह। मदर्थे त्यक्तदैहिका इति। दैहिका हि देहापयोगिनः तेषु विद्यमानेषु न भगवदर्थमेव देहो भवेत् अतस्ते त्यक्तव्याः। ननु तेषां त्यागे देहनिर्वाहो न भवेत् तत्राह। ये त्यक्तलोकधर्माश्च मदर्थ इति। त्यक्तः लोकः धर्मो वैदिकश्च यैः चकारात्सर्वे लौकिकधर्मा वेदैश्च परिगृहीता एतादृशानहं बिभर्मि यथा मद्धस्तस्थितपदार्थः केनापि नोपहन्यते तथा त इत्यर्थः अतस्तेषां न कोऽप्युपद्रवः किं तु मद्विरहः ससन्देशो निराकर्तव्यः ॥ ४ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः। वृष्णीनां मध्ये प्रवरः श्रेष्ठो मंत्री कृष्णस्य दयितः प्रियः सखा बृहस्पतेः शिष्यः सक्षाद् बुद्धिसत्तमो ज्ञानश्रेष्ठ उद्धवोऽस्ति ॥ १ ॥ तमेकान्तिनं भक्तं प्रेष्ठमुद्धवं कस्मिंश्चिदपि समये पाणिना पाणिं गृहीत्वा प्रपन्नानामार्त्तिहरो दुःखहन्ता हरिर्भगवान् आह ॥ २ ॥ हे उद्धव हे सौम्य व्रजं त्वं गच्छ नौ आवयोः पित्रोः प्रीतिं त्वमावह कुरु मम संदेशैर्गोपीनां मद्विरहपीडां विमोचय विस्मारय निवारय वा ॥ ३ ॥ मय्येव मनो यासां मय्येव प्राणा अहं वा प्राणो यासां ता मदर्थं त्यक्ता दैहिका देहसंबंधिनः पतिपुत्रादयो याभिस्ता तथा भूताः सन्ति मदर्थे यन्निमित्तं त्यक्तौ लोकधर्मौ यैस्ते ये भवन्ति तान् अहं विवर्द्धयामि सुखयामि वा ॥ ४ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

कृष्णेन प्रेषितश्चक्रे यशोदानन्दसान्त्वनन्। उद्धवो विद्ययेति षट्चत्वारिंशे निरूप्यते ॥ १ ॥

पूर्वाध्याये 'ज्ञातीन् वो द्रष्टुमेष्याम' इति भगवता नन्दं प्रत्युक्तं तत्र अत्रत्यस्यापि कार्यस्यावश्यकत्वात्तदुपेक्ष्य गमनं न सम्भवति, अतः कश्चित् प्रेषणीयः, तत्रापि गोपीनां सान्त्वनमतिरहस्यं सन्मन्त्रिसाध्यम्, तादृशश्चोद्धव इति तं विशिनष्टि—

वृष्णीनामिति। श्रीकृष्णस्य दयितः वल्लभः प्रियः। तत्र हेतुः—सखेति। तत्राप्युत्कर्षमाह—मन्त्रीति। तत्र हेतुः—प्रवरः श्रेष्ठ इति। तत्र हेतुः—बुद्ध्या सत्तमः श्रेष्ठ इति। तत्र हेतुः—साक्षाद्बृहस्पतेः शिष्य इति ॥ १ ॥ तमेकान्तिनं अनन्य भक्तम्, अत एव प्रेष्ठं क्वचिदेकान्ते पाणिना पाणिं गृहीत्वा भगवानाह। तत्र प्रयोजनमाह—प्रपन्नानां व्रजभक्तानामार्तिहरः स्ववियोगदुःखं हर्तुमित्यर्थः। तत्र हेतुमाह—हरिः भक्तदुःखहरणस्वभावः ॥ २ ॥ तदुक्तिमाह—गच्छेति सार्द्धैश्चतुर्भिः। श्रवणे सावधानतार्थं सम्बोधयति—उद्धवेति। 'त्वत्सदृशो व्रजप्रेषणयोग्योऽन्यो नास्ति' इति सूचयन् पुनः सम्बोधयति—सौम्येति। त्वं व्रजं गच्छ। गमनप्रयोजनमाह—नौ आवयोः पित्रोर्नन्दयशोदयोः प्रीतिमावह मद्वियोगदुःखं निवर्त्य हर्षं जनय। तथा गोपीनामपि मद्वियोगाद्धेतोर्य आधिः मनःपीडा तां मत्सन्देशैर्विमोचय ॥ ३ ॥ गोपीनां विशेषतः सन्देशे कारणमाह—ता इति। यतस्ता गोप्यः मन्मनस्का मय्येव सङ्कल्पविकल्पात्मकं मनो यासां ताः। तथा मत्प्राणाः मदर्थमेव प्राणधारणं यासां ताः। मदर्थे मत्प्राप्तिप्रतिबन्धतया त्यक्ता दैहिकाः देहसम्बन्धिनः पतिपुत्रादयः, देहनिर्वाहका भोजनशयनादयश्च याभिस्ताः। किं बहुना ? सर्वथा मामेव मनसा गताः प्राप्ताः मदतिरिक्तसर्वानुसन्धानरहिता इत्यर्थः। तत्र हेतुमाह—प्रेष्ठमिति। निरतिशयप्रीतिविषयमित्यर्थः। तत्रापि हेतुद्वयमाह—दयितमिति। दया सञ्जाताऽस्यास्तीति दयितः तम्, दयावन्तमित्यर्थः। आत्मानमिति। 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति श्रुतेः ॥ 'सन्त्वेवंविधाः, तथापि तदाधिविमोचनेन किम्' तत्राह—य इति। मदर्थे मत्प्रसादार्थे त्यक्तो लोकः इहामुत्रसुखं धर्मस्तत्साधनं च यैः ये एवंविधा जनाः तानहं बिभर्मि संवर्धयामि सुखयामीत्यर्थः। एवं मत्प्रतिज्ञास्ति तत्सम्पादनाय गच्छेत्याशयः ॥ ४ ॥

अन्वितार्थप्रकाशिका

षट्चत्वरिंशके कृष्णगिरा नन्दयशोदयोः" ॥ उद्धवः सान्त्वनं चक्रे तत्र श्लोका नवाब्धयः (४९) ॥
चत्वायुंवाचवाक्यानि (४) नेत्रबाणा (५३) अनुष्टुभः ॥ ४६ ॥

अत्र आयास्य इति "दौत्यकैर्द्रष्टुमेष्यामः" इत्युक्त्वाऽपि भगवान् व्रजं यन्न जगाम तत्र दुर्जयजरासन्धजयादिकृत्यशेषः स्वस्य तदुपद्रवशङ्कया व्रजं गतो नन्दादिप्रेमबद्धो नागच्छेदिति शङ्कया वा वसुदेवाद्यननुज्ञा चेति हेतुद्वयं लक्ष्यते। तच्छत्रुजयो दुर्गादिमत्यां पुर्यामेव स्यान्न व्रजे इति विचार्यैव नन्देनापि साक्षात्सन्देशैर्वा व्रजागमनाय न प्रार्थितः। भगवानपि शत्रून्प्रत्यौदासीन्यव्यञ्जनाय नन्दादीन्निकटे नाजुहाव। तथात्वे यदूनां गोपानां च युगपदुपद्रवः स्यात्। किंच युगपदुभयत्र पितृव्यवहारस्तदुचितगोचारणादियुद्धादिलीलानामन्योन्यविरोधात् दुर्घटः। अत एव वयमेव द्रष्टुमेष्यामो न तु यूयमत्रागच्छतेति भगवता व्यञ्जितम्। तत्स्मृत्वैव चोत्कण्ठिता अपि निकटादपि व्रजान्नन्दादयो नागताः। पुरे व्रजे च युगपत् स्थितिस्तु न युक्ता। तज्ज्ञाने ऐश्वर्यज्ञानेन पुत्रादिभावमयप्रेममहान्यापत्तेः। किंच "भक्तानां नित्यसंयोगे प्रेमेशाय न रोचते। यथोत्कण्ठामयं प्रेम तल्लोभः परमो हरेः।" तस्मात् दन्तवक्रवधान्ते गन्तुमना भगवान् नन्दाश्वासनार्थं गोपीविरहपीडानिवृत्त्यर्थं चोद्धवं प्रेषयामासेति तोषिणी। वृष्णीनामिति। वृष्णीनां प्रवरो मन्त्री कृष्णस्य दयितः सखा वृहस्पतेः साक्षाच्छिष्यः बुद्ध्या सत्तमः अतिश्रेष्ठः उद्धवः आसीत्। अयं च वसुदेवभ्रातुर्देवभागस्य पुत्रः। "उद्धवो देवभागस्य महाभागः सुतोऽभवत्।" इति हरिवंशात्। एभिर्विशेषणैरुद्धवस्य रहस्यकथनयोग्यत्वमुक्तम् ॥ १ ॥ तमिति। प्रपन्नानामार्त्तिहरः हरिः तमेकान्तिनमनन्यभक्तम् अत एव प्रेष्ठमतिप्रिय क्वचिदेकान्ते पाणिना पाणिं गृहीत्वा भगवानाह स्म ॥२॥ गच्छेति। हे उद्धव ! हे सौम्य ! त्वं व्रजं गच्छ। नौ आवयोः पित्रोर्नन्दयशोदयोः प्रीतिमावह तथा गोपीनां मद्वियोगाद्धेतोर्य आधिः मनःपीडा तं मत्सन्देशैर्विमोचय ॥ ३ ॥ ता इति। ताः गोप्यः मय्येव मनो यासां ताः मदर्थमेव प्राणाः प्राणधारणं यासां ताः मदर्थे मत्प्राप्तिप्रतिबन्धकतया त्यक्ता दैहिकाः देहसंबन्धिनः पतिपुत्रभोजनशयनादयश्च याभिः तथाभूताः सन्तीति मामेव दयितं प्रेष्ठमात्मानं मनसा गता इत्यर्द्धं न सार्वत्रिकमिति तोषिणीसारे। ये इत्यर्द्धम्। ये जनाः मदर्थे मत्प्रसादार्थे त्यक्तो लोकः इहामुत्र सुखं धर्मस्तत्साधनं च यैः य एवंविधा भवन्ति तानहं बिभर्मि पालयामि सुखयामीत्यर्थः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ षट्चत्वारिंशेऽध्याये उद्धवस्य व्रजप्रेषणं तद्द्वारा नन्दयशोदासांत्वनं च प्रोच्यते कृष्णस्य मंत्री दयितः स्निग्धः बृहस्पतेः साक्षादेव शिष्यो न तु परम्परया उद्धवो वसुदेवभ्रातुर्देवभागस्य पुत्रो योऽस्तीति शेषः ॥१॥ एकान्तिनं रहस्यज्ञं मन्यमानः प्रपन्नानां गोपीजनानां शरणागतानां दुःखहर्त्ता ॥ २–३ ॥ गोपीनां स्वस्मिन्ननन्य प्रेमत्वं द्योतयन्नाह ता इति मय्येव मनो यासां ताः मत्संकल्पं बिना स्थातुमशक्या इत्यर्थः। मयेव प्राणा इन्द्रियाणि यासां ताः। यद्वा अहमेव प्राणो जीवनं यासां ताः मां विना जीवितुमशक्या इत्यर्थः मदर्थे त्यक्ता दैहिकादेवहसंबन्धिनो याभिस्ताः। नन्वेवं जाते सति किं स्यात्तत्राह मदर्थे त्यक्ताः लोकधार्माः स्वस्वकुलाचारा न तु शास्त्रीयधर्मा यैः एवंभूता ये जातास्तानहं बिभर्मि धारयामि पोषयामि च तेषां सत्समागमदानेन भागवत धर्मेषु स्थितिं कारयामीत्यर्थः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

घोषं प्रेष्योद्धवं वस्य षट्चत्वारिंशके गिरा । शोकापनोदनं कृष्णश्चक्रे नन्दयशोदयोः ॥ १ ॥
द्विजातिः सन् परित्यज्य कामचारं सुसंयतः । सम्यक् प्राप्य गुरोज्ञानं गोपीः सख्या ह्युपादिशत् ॥ २ ॥

अथान्यायद्वयेन स्वैकान्तिकभक्तस्य सख्युरुद्धवस्य मुखेन भगवतैव कृतं गोपीनां सान्त्वनात्मकं भगवतश्चरित्रमनुवर्ण्यते, तत्रापि गोपीनां सान्त्वनमतिरहस्यं, तच्च सन्मन्त्रिसाध्यमित्येतदर्थमादौ तदर्हमुद्धवं विशिनष्टि । वृष्णीनामिति । वृष्णीनामिति । वृष्णीनां वृष्णिकुलोत्पन्नानां, प्रवरः श्रेष्ठः, कृष्णस्य दयितः सखा, बृहस्पतेः शिष्यः, अनेन बुद्धिकौशल्यं सूचितम् । बुद्धिसत्तमः निसर्गतोऽपि बुद्ध्या श्रेष्ठः, मन्त्री बाह्याभ्यन्तरीयकार्ष्णमन्त्रकृत्यकुशलः, साक्षात् यः उद्धवः, तमित्युत्तरेण सम्बन्धः ॥ १ ॥ तमिति । क्वचिन्निर्जने देशे, प्रपन्नार्त्तिहरः स्वशरणागतजनबाह्यान्तरीयपीडानिवर्त्तकः, हेतुगर्भमिदम् । तत्त्वात् सन्देशप्रेषणमुचितमिति भावः । भगवान् हरिः, एकान्तिकं, प्रेष्ठं, भक्तं, तमुद्धवं, आमन्त्र्य, पाणिना पाणिं गृहीत्वा, आह । इति द्वयोरेकसम्बन्धः ॥ २ ॥ तदेवाह गच्छेति सार्द्धैश्चतुर्भिः । गच्छेति । हे उद्धव, हे सौम्य, व्रजं गच्छ, नोऽस्माकं, पित्रोर्नन्दयशोदयोः, प्रीतिं आवह, वर्षं जनयेत्यर्थः । मत्संदेशैरिति शेषः । मत्संदेशैः, गोपीनां मद्वियोगाधिं मद्विरहजां मनःपीडां, विमोचय विशेषतः त्याजय ॥ ३ ॥ गोपीनां विशेषत आधिनिवर्त्तनात्मकसन्देशनयनकारणमाह । ता इति । हे उद्धव, ता गोप्यः, मयि मनः संकल्पात्मकं मनो यासां ताः, अहमेव प्राणो यासां ताः, मदर्थे मत्कृते, त्यक्तं दैहिकं देहपोषणादिकर्म याभिस्तास्तथाभूताः सत्यः, दयास्य संजातेति दयितस्तं दयावन्तमित्यर्थः । प्रेष्ठं प्रियतमं, तत्र हेतुः । आत्मानं, मामेव, मनसा गताः । गत्यर्था बुद्ध्यर्थाः । अध्यवसितवत्य इत्यर्थः । ता एवंविधाः सन्त्वेव तत्र तव किमित्यत्राह । ये जनाः, मदर्थे त्यक्ता लोकधर्मा यैस्तथाभूताः भवन्ति, तान् च तांस्त्वित्यर्थः । अहं बिभर्मि संवर्द्धयामि सुखयामीति यावत् ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वृष्णीनां प्रवर इति : १०.४६.१.

मदपरोक्षसुखानुभवो यथा भवति गोकुलकेलिजुषां तथा । सदुपदेशकृदेष कृतज्ञधीरिति स वाक्पतिशिष्यमुपाह्वयत् ॥ १ ॥
सुराजपदरक्षको नृपतिधर्म-विद्याधुरन्धरो गुरूकृपोल्लसत्सफलसर्वमन्त्रः प्रभुः ।
स्वतुल्यगुणमुद्धवं समवलोक्य सख्यं व्यधादिति क्रममिदं भवे प्रथितमेव तुल्यात्मनोः ॥ २ ॥
तातवत् पूज्यपादं तं कथं गर्ह्ये न्ययोजयत् । नैवं शक्यमिति प्रोक्तं मैत्र्यमिष्टार्थसाधकम् ॥ ३ ॥

तमाहेति : १०.४६.२.

गुरूपसत्तिं न विनाऽधिकारस्तत्त्वोपदेशे त्विति वासुदेवः । उपादिशद्धीष्पतिशिष्यमेवं तद्द्वारतः कर्तुमनुग्रहं सः ॥ ४ ॥
किं वा वाचिकमस्ति ते यदुपते स्नेहश्च तासां त्वयि कीदृग्वा तव तास्वपीत्यरमसावुच्चैर्न पृच्छत्विति ।
पूर्णानङ्गरहस्य - मेतदपराश्राव्यं च हृन्मध्यगं तत्पाणिग्रहणच्छलात्तदुभयं व्यक्तीचकाराऽच्युतः ॥ ५ ॥
त्वदुपकारमिमं नहि विस्मराम्यहमिहोद्धव जातुचिदप्यहो । ऋतमवैतु ममैतदिति प्रभुर्झटिति दिव्यमधात्किमु तन्मिषात् ॥ ६ ॥
सर्वेषां भववार्द्धिमग्नमनसामुद्धारकस्यापि मे सम्प्रत्युद्धव गोपिकोपकृतिवाराशौ त्वमेवाश्रयः ।
इत्थं स्वीयमहाशयं तदधिकारुण्यं सुलेखोज्ज्वलं श्रीनाथः समुदा तदाशयगतं चक्रे स्फुटं तन्मिषात् ॥ ७ ॥

गच्छोद्धवेति : १०.४६.३.

तौ स्तः काममकामिनौ विधृतमद्रूपान्तरङ्गौ सदा नन्देनास्मि यशोदया विलसितोऽहं नित्यमित्याशयात् ।
पित्रोः प्रीतिमिहावहोद्धव वियोगाधिं तु सन्देशतो गोपीनां समपाहरेत्यकथयत् प्रायेण भक्तप्रियः ॥ ८ ॥

ता मन्मनस्का इति : १०.४६.४.

मदनारतवृत्तयः स्त्रियस्ता नितरामुद्धव सन्ति सम्प्रतीति । भविताऽचिरतस्तवोपदेशः सफलस्तास्त्विति मे विनिश्चयोऽलम् ॥ ९ ॥
गोपा एव जनेषु यत्प्रथमतो मूर्खत्वसीमाभुवस्तत्रैतास्तु तदङ्गना इति कथं तासूपदेशक्रमः ।
शङ्कापङ्किलमेवमस्य न मनो भूयादितीशः स तत्तत्काल स्थितिमब्रवीन्निजजनत्राणव्रतं चात्मनः ॥ १० ॥
त्वं मद्विभूतिरसि तास्तु मदेकरूपाः सन्त्युद्धवेति भविता च तवापि भव्यम् ।
तत्र प्रयाणत इति स्फुटमिन्दिरेशः प्रोत्साहनं द्रुतमदात् स तदीयवृत्तात् ॥ ११ ॥
मत्पालनं भृशमनेन विधेयमेवं चित्ते तवास्ति यदि तत्कुरु निविशङ्कम् ।
मत्कार्यमेतदधुना यदिह प्रमाणं ता एव मत्कृतमहासुखदाभ्युपायाः ॥ १२ ॥
आधिं तदीयं व्यपनेतुमस्मिन्न कोऽपि शक्तस्तदहं कथं स्याम् ।
नैषास्तु चिन्ताऽस्य हृदीति सौम्य सम्बोध्य सन्देशमदात् स्वामीशः ॥ १३ ॥

कृष्णप्रिया

इस अध्याय में प्रमेय प्रकरण की "श्री" नाम का ऐश्वर्य लीला का निरूपण किया जा रहा है। माता-पिताजी को गोप सखाओं को एवं व्रजसखिओं को भिन्न-भिन्न से गोप्य विशेष गोप्य और सामान्य सन्देश देना है। इस प्रकार के कार्यक्षम केवल उद्धवजी ही हैं इसमें भगवान व्रज में हरिदास उद्धवजी को भेज रहे हैं।

श्रीशुकदेवजी ने कहा राजन्! वृष्णियों के कुलीन सर्वकार्य कुशल एवं महान् मन्त्री, भगवान श्रीकृष्ण के प्रिय सखा, देवगुरु बृहस्पति के उत्तम शिष्य, भगवान् श्रीकृष्ण के प्रत्यक्ष स्वरूप श्रेष्ठ मतिमान् उद्धवजी श्रीकृष्ण के अन्तरङ्ग थे ॥ १ ॥ शरणागत बत्सल, प्रपन्नजन क्लेश हारी श्रीहरि भगवान् श्रीकृष्ण ने अपने ऐकान्तिक प्रिय सखा उद्धव जी का कर कमल अपने कर सरोज में रखकर सर्वथा एकान्त में अत्यन्त गोप्य हृदय की बात कहने लगे ॥ २ ॥ अब कृपानिधान भगवान् चार श्लोकों से उद्धवजी को कह रहे हैं प्रिय उद्धव! हे सखा! हे सौम्य! आप व्रज में पधारे, वहाँ मेरे माताजी एवं पिताजी विराजते हैं उनको प्रसन्न करो और मेरे विरह से सदा सन्तप्त गोपियों के सन्ताप को भी मेरे सन्देशामृत वर्षा से शान्त करो। भैया आप मेरे प्रेष्ठ हो अन्तरङ्ग ज्ञान देने के लिए योग्य हो ॥ ३ ॥ वास्तविक रूप से उन गोपियों के मन मुझमें है, उनके प्राण भी मुझमें है, उन्होंने मेरे लिए दैहिक धर्मों का त्याग किया है, मेरे लिए ही लोक सुख धर्म, वेद विहित धर्म का भी परित्याग किया है, उन गोपियों की मैं सराहना नहीं कर पाता। जो लोक इस प्रकार के अनन्य है उन सबको सर्व प्रकार से मैं पालन करता हूँ ॥ ४ ॥

मयि ताः प्रेयसां प्रेष्ठे[1] दूरस्थे गोकुलस्त्रियः। स्मरन्त्योऽङ्ग[2] विमुह्यन्ति विरहौत्कठ्यकातराः[3] ॥५॥
धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन। प्रत्यागमनसंदेशैर्बल्लव्यो[4] मे मदात्मिकाः ॥६॥

श्रीशुक उवाच

इत्युक्त उद्धवो राजन् [5]संदेशं भर्तुराहृतः[6]। आदाय रथमारुह्य प्रययौ नन्दगोकुलम् ॥७॥
प्राप्तौ नन्दव्रजं श्रीमान् निम्लोचति विभावसौ। छन्नयानः [7]निविशतां पशूनां खुररेणुभिः ॥८॥

कर्दमक्षमा

अन्वयः—हे, अङ्ग, प्रेयसाम्, प्रेष्ठे, मयि, दूरस्थे, विरहोत्कण्ठ्यकातराः, ताः, गोकुलस्त्रियः, स्मरन्त्यः, विमुह्यन्ति ।५। मदात्मिकाः, वल्लव्यः, मे, प्रत्यागमनसन्देशैः, अतिकृच्छ्रेण, कथञ्चन, प्राणान्, प्रायः, धारयन्ति ॥ ६ ॥ श्रीशुक उवाच— राजन्? आहृतः, उद्धवः, भर्तुः, सन्देशम्, आदाय, रथम्, आरुह्य, नन्दगोकुलम्, प्रययौ ॥ ७ ॥ विभावसौ, निम्लोचति, निविशताम्, पशूनाम्, खुररेणुभिः, छन्नयानः, श्रीमान्, नन्दव्रजम्, प्राप्तः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तासां वियोगाधिं दर्शयति द्वयेन। मयि ता इति विरहेणौत्कण्ठ्यं तेन विह्वलाः परवशाः ॥ ५ ॥ गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति ये प्रत्यागमनसंदेशास्तैः। मे मदीया बल्लव्यो गोप्यः। मदात्मिका इति। तासामात्मा यदि स्वदेहे स्यात्तर्हि विरहतापेन दह्येतैव तस्य मयि वर्तमानत्वात्कथंचिज्जीन्तीति भावः ॥ ६ ॥ संदेशं 'भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्' इत्यादिकम् ॥ ७ ॥ निम्लोचत्यस्तं गच्छति सति। छन्नं यानं रथो यस्येति तदा गोपीभिरज्ञातत्वेन नन्दसंगं स लब्धवानिति सूचयति ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तासां गोपीनाम्। ता गोप्यः। औत्कण्ठ्यं रागित्वम्। प्रेयसां गेहादीनां मध्ये प्रेष्ठे तेभ्योऽपि प्रियतमे। विगतं ह्वलं चलनं यासां ताः ॥ ननु वा भवन्मनस्कादि रूपास्ता एवं लब्धभवत्का एव कथमनु शोचन्तीति चेत्—सत्यम्, अन्तरनुसंधाने तादृश्य एव ताः, किं तु बहिरवधाने जाते परमव्यग्रा भवन्तीत्याह—मयीति। गोकुलस्त्रीत्वेन तावन्मदीयदर्शनमात्रजीवनाः, तत्रापि ताः अनिर्वचनीयस्वभावाः। द्वयोः प्रकर्षे तरबीयसुनौ बहूनां तु तमबिष्ठनाविति प्रियं तावत्सर्वं ममतास्पदं, ततोऽपि प्रियः प्रेयान् अहंतास्पदमात्मा ते च यद्येकस्य बहवः संभवन्ति तदा तेषां कोटिसंख्यानामपि प्रेष्ठे तानप्यतिक्रम्य ये मत्संबंधिनः प्रियास्तेभ्योऽप्यधिकप्रियमित्यर्थः एवंभूते मयि 'कुटिलकुन्तलं श्रीमुखं च ते' इति तद्व्याख्यानुसारेण निकटस्थेऽप्यार्तिप्रदे, संप्रति तु दूरस्थे

---

१. श्रेष्ठे–वीर.। २. न्यङ्ग–विज। ३. विह्वलाः–श्रीधर. वंशी. जीव. बीर. विज. विश्व. शुक. सु.। ४. वक्तव्याः–विज.। ५. संदेशान्–विज.। ६. रातमनः–इति कस्यचित्। ७. प्रवि–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक सु.।

इत्यर्थः । स्मरन्त्यो मम दूरस्थत्वं भावयन्त्यः, तद्भावनारम्भवत्य एव मुह्यन्ति मूर्च्छां प्राप्नुवन्ति । एवं तथा भावनायाः स्वल्पकालत्वं मूर्च्छायास्तु चिरस्थायित्वं व्यञ्जितम् । ततश्च हा कष्टं मद्भावनमपि कर्तुं न शक्नुवन्तीति भावः । वर्तमानप्रयोगेण स्मरणस्य मोहस्य च पौनःपुन्यं दर्शितम् । मोहे हेतुः—विरहेति । अतो लालास्रवादेरयमपस्माराख्यः सञ्चारी भावः । अतः "कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं च" इति पूर्वमपि तथावस्थास्पृष्टानामेव मया त्यक्तानां सम्प्रति तु लब्धतदतिशयानां मयि भावस्य सर्वतः प्रचारादपि सांप्रतं तत्र गमने मम लज्जापि जायत इति भावः । अंगेत्यार्त्या संबोधनम् । श्लेषेण हे मदङ्गतुल्येति, तासां सान्त्वयाय प्रोत्साहनाय च ॥ ५ ॥ तासां बल्लवीनाम् । विरहतापेन मद्वियोगाग्निना । तस्यात्मनः । इति भाव इति-अन्यत्र वर्तमानस्यान्यत्रत्यवह्निना दाहो न भवतीत्याशयः ॥ अतिकृच्छ्रेणेति—तासां मत्प्राप्त्याशया प्राणधारणमिवातिकष्टं, प्राणत्यागस्तु सुगम एवेति । ननु केन प्रकारेण प्राणान्धारयन्तीत्यत आह-प्रतीति । गोकुलन्निर्गमनसमये शीघ्रमागमिष्यामीति ये प्रत्यागमनसंदेशास्तैः । अतो मत्प्राप्त्याशैव बलवती निर्गच्छतोऽपि प्राणान्बध्नातीति भावः । तव का भवन्ति तास्तत्राह—बल्लव्यः यद्यपि ता बल्लवानामेव स्त्रियस्तथापि मे मदीया एव । तासां महामाधुर्यमयरूप-रस-गंध-शब्द-स्पर्शादिगन्धमपि तत्पतयः स्वप्नेऽपि न लभन्ते, किं त्वस्मद्भार्या इमा इत्यभिमानमात्रमेवेत्यतो रसशक्त्यैव स्वपुष्ट्यर्थमननादित एव ता नित्यपरकीयाः कृता अपि मद्भोग्या मदीया एव, यतो मदात्मिकाः मत्स्वरूपशक्तेर्ह्लादिन्या अपि महासारप्रेमवृत्तित्वान्मत्स्वरूपभूता अपि सर्वोत्कृष्टह्लादरूपत्वान्मदाकर्षणसमर्थाः, अत एवात्मारामस्यापि मम ताभी रमणसुखमत्यधिकम् , अत एव मयात्मनः सकाशादप्यधिकं ता अनुकम्पनीया इत्यनुकंपार्थकः क प्रत्ययः प्रयुक्तः । श्लेषेण-ममात्मा मनोरमणार्थी यासु ताः, मय्येवात्मा तथाभूतो यासां ता इति वा । मत्संभोगान्मदीया एवेत्यर्थः ॥ ६ ॥ नन्दगोकुलं नन्दग्रामम् ॥ भर्तुरिति तस्य तद्भावेन भक्तिभरो द्योत्यते । रथमारुह्येति शीघ्रगमनं बोधयति । प्रकर्षेण प्रकृष्टमनोरथाचरणादिना ययौ । नन्दयतीति नन्दस्तस्य गोकुलमिति तद्वद्गोकुलस्यापि श्रीकृष्णप्रेम्णा नन्दकत्वमभिप्रेतम् ॥ ७ ॥ विभावसौ सूर्ये 'सूर्यवह्नी विभावसू' इत्यमरः । यानं रथः । तदा प्रवेशसमये । 'यानं स्याद्वाहने गतौ' इति मेदिनी । श्रीमान् स्वशोभया रथशोभया च विराजमानः । 'श्रीमन्' इति पाठे तु संबोधनम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु या भवन्मनस्कादिरूपास्ता लब्धभवत्का एव तर्हि कथमनुशुच्यन्तां सत्यमन्तरनुसन्धाने तादृश्य एव ताः किन्तु बहिरवधाने जाते परमव्यग्रा भवन्तीत्याह । मयीति । गोकुलस्त्रीत्वेन तावन्मदीयदर्शनमात्रजीवनाः तत्रापि ताः अनिर्वचनीयस्वभावाः द्वयोः प्रकर्षे खलुतरवीयसुनौ बहूनांतु तमविष्ठनाविति प्रियं तावत्सर्वं ममतास्पदं ततोऽपि प्रियः प्रेयानहन्तास्पदमात्मा ते च यद्येकस्य बहवः सम्भवन्ति तदा तेषां कोटिसंख्यानामतिप्रेष्ठे तानप्यतिक्रम्य ये मत्सम्बन्धिनः प्रियास्तेभ्योऽप्यधिकप्रिय इत्यर्थः । एवं भूते मयि कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशामिति तद्वाक्यानुसारेण निकटस्थोऽपि महार्तिप्रदः सम्प्रति तु दूरस्थ इत्यर्थः । स्मरन्त्यः तत् मम दूरस्थत्वं भावयन्त्यः तद्भावनारम्भवत्य एव मुह्यन्ति मूर्च्छां प्राप्नुवन्ति एवं तथा भावनायाः स्वल्पकालत्वं मूर्च्छायास्तु चिरस्थायित्वं व्यञ्जितं ततश्च हा कष्टं मद्भावनमपि कर्तुं न शक्नुवन्तीति भावः । वर्तमानप्रयोगेण स्मरणस्य मोहस्य च पौनः पुन्यं दर्शितं मोहे हेतः विरहेति अतो लालास्रावादेरयमपस्माराख्यः संचारी भावः अतः कुजगतिं गमिता न विदामः कश्मलेन कवरं वसनं वेति पूर्वमपि तथावस्थास्पष्टानामेव मया त्यक्तानां सम्प्रति तु लब्धतदतिशयानां मयि भावस्य सर्वतः प्रचारदिति साम्प्रतं तत्र गमेन मम लज्जापि जायत इति भावः । अङ्गेत्यार्त्या सम्बोधनं श्लेषेण हे मदङ्गतुल्येति तासां सान्त्वनाय प्रोत्साहनं च ॥ ५ ॥ अथ तासां दशमीं दशामपि शङ्कते अत्यायासेनैव प्राणान् धारयन्ति निर्गच्छतोऽप्यवस्थापयन्ति अतोऽग्रे कतिदिनानि वा धारयितुं शक्ष्यन्तीति भावः । ननु कोऽसावायासः येन धारयन्ति तत्राह । कथं च नेति । केनापि प्रकारेण यस्तेन तदेवं स्ववाक्चलनलज्जया कारणं व्यक्तमनुक्त्वा पश्चाद्गत्यन्तराभावात्स्पष्टमेव निर्दिशति प्रतीति । सन्देशस्य बहुत्वं मध्ये सन्देशान्तराणामपि प्रेषितत्वात् इत्थं प्रथमोक्तमत्प्रत्यागमनदिनसम्भावनप्रपञ्चः । ततो विलम्बतर्कतो मूर्च्छा ततस्तस्यामेव उद्भूतस्वाभाविक तत्स्मरणं तच्चेतना पुनस्तत्संभावनादि पौनःपुन्यादायासेनैव धारयन्तीत्यर्थः मे वल्लव्य इति । ब्राह्मणस्यास्य ब्राह्मणीति यन्मम गोपरूपस्य गोपीरूपा भार्या इत्यर्थः । पूर्वं हि पित्रोर्नः प्रीतिमावहेत्यनेन तु गोपाभिमानित्वं स्वस्य स्वयमेव व्यञ्जितं न केवलं साधारणलोकरीत्या तादात्म्यव्यवहारस्ताभिर्मम किन्तु मदात्मिका मत्स्वरूपभूतशक्तय इत्यर्थः । मन्मनस्का इत्यादिकं तूक्तमेव ब्रह्मसंहितायां तु स्पष्टमेव तादृशत्वम्—

आनन्दचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः ।
गोलोक एव निवसत्यखिलात्मभूतोगोविन्दमादिपुरुषं तमहम्भजामीति ॥

तस्मात्परदारतया कल्पनं तासां वागनिर्गलताप्रकटनाय लीलाशक्त्या कृतमिति प्रातीतिकमात्रं परशय्यासम्बन्धश्च तासां नासूर्यम्पत्यादौ प्रत्याख्यात एवेति भावः । यद्यपि मदीयत्वभावमयेन प्रेम्णा मद्वाक्ये विश्वासानपगमात् मत्प्राप्त्याशां कदाचिदपि न त्यक्तुं शक्नुवन्तीति तथापि प्राय इति काश्चिन्न धारयन्त्यपीति सम्भाव्यते अतः प्रत्यागमनपर्य्यवसानैरेव सन्देशैरधुनापि ताः

सान्त्वनीया इति भावः। अत्र यद्यपि सर्वेऽपि व्रजवासिनस्तदेकजीवनत्वात्सान्त्वनार्हाः एषां घोषनिवासिनामित्यादिषु यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते इत्यादिभ्यः अहो भाग्यमहोभाग्यमित्यादिभ्यः कालियह्रदप्रवेशोत्थापनयोः पशूनां स्थावराणामपि सुखदुःखवर्णनाच्च दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसाम्। नन्द! ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथमित्यादिभ्यश्च अतो मनसि चिन्तितं स्वयं भगवता तस्मान्मच्छरणं गोष्ठमित्यादि तत्रापि श्रीमदुपनन्दादयस्तत्रापि श्रीदामादयस्तदर्हाः तत्र तत्र तथा तथा प्रशस्तत्वात् अतः श्रीव्रजराजेन वक्ष्यते—

अपि स्मरतिः नः कृष्णो मातरं सुहृदः सखीन्। गोपान् व्रजं चात्मनाथं गावो वृन्दावनङ्गिरिम् इति।

तथापि यस्तेषामनुल्लेखस्तस्मादिदङ्गम्यते केषु चिच्छ्रीपित्राद्यन्तःपातित्वेन केषु चित्त्वभिप्रायविशेषेण सान्त्वनाभाव एव सान्त्वनमभिप्रेतमिति तथाहि श्रीमति गोकुले प्रेमा खलु त्रिविधो दृश्यते औत्कण्ठ्यप्रधानो विस्रम्भप्रधानो विवेकशून्यश्चेति सचान्यत्रापि सर्वोऽपि गरिष्ठः सन् प्रेष्ठस्फूर्त्तिसाक्षात्कारमेव जनयति यथा श्रीलीलाशुकचरणैरुक्तम् "अग्रे समग्रयति कामपि केलिलक्ष्मीमन्यासु दिक्ष्वपि विलोचनमेव साक्षी"तितत्र च श्रीजयदेवचरणैरपि वर्णितं "श्लिष्यति चुम्बति जलधरकल्पम् हरिरुपगत इति तिमिरमनल्प"मिति अत्रैव च वक्ष्यते व्रजराजेन मनो याति तदात्मतामिति तत्रोत्तरोभयभावानां साक्षात्कारबुद्धिजनिकैव सा भवेत् विस्रम्भाविवेकयोरन्यत्वप्रतीतिजननायोग्यत्वात् प्रथमभावानां तु साक्षात्कारेऽप्यप्रतीतिः स्यात् किमुत स्फूर्तौ उत्तरकाले तु सर्वथोत्कण्ठाया विकल्पस्वभावत्वात् यथा द्वारकाजलविहारे पट्टमहिषीणां वर्णयिष्यते अत उत्कण्ठाप्रधानप्रमाणः पितरौ प्रेयस्यश्च वियोगिमानिन एवासन् यथैवोक्तं गच्छोद्धवेत्यादिना वक्ष्यते च इति संस्मृत्येत्यादिना इति गोप्यो हि गोविन्द इत्यादिना च अथ ये विवेकशून्यप्रमाणो गवादयः ये च विस्रम्भप्रधानप्रेमाणः श्रीदामादयस्ते संयोगिमानिन एवासन् गवादीनां स्वानुभवेनैव निश्चयात् श्रीदामादीनां च मान्त्वेकान्ते मथुरात इहागत्य मिलतीति रहो मिथः संवादेन तद्दाढर्यात् अत एवैषां हर्षोऽपि वर्णयिष्यते वासितार्थेऽभियुध्यद्भिरित्यादिना तस्मात्पित्रोःप्रेयसीनां च सान्त्वनमेव सान्त्वनम् अन्यथा समाधानाभावात् श्रीदामादिषु तु सान्त्वनाभाव एव सान्त्वनं सान्त्वने प्रत्युत संदेहापत्तेरिति तदेवं त्रिविधानामुत्कण्ठादिप्रधानानां सान्त्वनासान्त्वनव्यवस्थायां सिद्धायामन्येषां तत्तदनुगतभावानां तयैव तद्व्यवस्था यथा अक्रूर अगतः किं वा यः कंसस्यार्थसाधक इति वचनोपलक्षितानां दुखं गोप्यः समुत्थायेत्यादि तदुपलक्षितानां सुखं वृक्षाणां पक्षिण च तथा तथा वर्णयिष्यमाणानां प्राचानतत्स्पर्शनादिसंस्कारविमुक्तानां सुखमिति कालियह्रदप्रवेशनिर्गमयोः स्थावराणामपि किमुत मृगपर्य्यन्तप्राणिनां दुःख सुखयोर्व्यक्तिस्तु तत्तदनिष्टेष्टतापरमातिशयलीलाविशेषश्लिष्टकालस्य तादृशस्वभावभावत्वादेव जातेति मन्तव्यं यत्र भुवि दिवि चामङ्गलमङ्गलनिमित्तानि जातानीति केचित्तु सखीनां गमनागमनाभिप्रायेण सान्त्वनमिति व्याचक्षते तत्तु न बुध्यते तत्र श्रीगोपेन्द्रप्रश्ने सखीनित्यस्यास्वारस्यात् तदेवमग्रिमग्रन्थोऽपि व्याख्येयः॥ ६॥ भर्त्तुरिति तस्य तद्भावेन भक्तिभरो द्योत्यते रथमारुह्येतिशीघ्रगमनं बोधयति प्रकर्षेण प्रकृष्टमनोरथाचरणादिना ययौ नन्दयतीति नन्दस्तस्य गोकुलमिति तद्वद्गोकुलस्यापि श्रीकृष्णप्रेम्णानन्दकत्वमभिप्रेतम्॥ ७॥ प्राप्त इति षट्कं श्रीमान् स्वशोभया च विराजमानः श्रीमन्निति पाठे सम्बोधनं किन्तु छत्रयानः। प्रविशतामिति। अनन्तानां पशूनां व्रजे प्रवेशेन खुररेणूनां महासम्वाराणां चाधिकाधिकोत्थानं विवक्षितम्॥ ८॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

किन्तु मदाधेरपि तासामाधिर्गरीयानिति शोचन्नाह—मयीति द्वाभ्याम्। ता उक्तस्वभावा अनिर्व्वचनीयभावा मदेकप्राणवल्लभा वा गोकुलस्य स्त्रिय इति गोकुले स्थितया स्त्रीत्वेन चात्मनस्तासु भावादपि तासामात्मन्यधिकोऽसौ दर्शितः। किञ्च, प्रेयसामपि मध्ये प्रेष्ठमित्यनन्यप्रियत्वमुक्तम्। अतो मयि दूरस्थे मधुपुर्य्यामत्र वसति सति विरहेण यदौत्कण्ठ्यं मद्दर्शनलालसा तेन विह्वलाः परमार्त्ताः सत्यः स्मरन्त्यो मां रासक्रीडादिकं वा चिन्तयन्त्यः, कृष्ण! कृष्णेति लघु लघु कीर्त्तयन्त्यो वा विस्मर्त्तुमशक्नुवत्यो वा विशेषेण मुह्यन्ति, चिरं नष्टसंज्ञतया भूमौ पतितास्तिष्ठन्तीत्यर्थः। अग हे मद्गात्रतुल्य। हे परमप्रियेत्यर्थः। अतस्त्वयेदं बुध्यत एवेति भावः॥ ५॥ हा तर्हि महानिष्टप्राप्तिं शङ्के, तत्राह—धारयन्तीति। अतिकृच्छ्रेण मरणादप्यधिकदुःखेन प्राणान् धारयन्ति, स्वयं निर्गच्छतो यत्नाद्रक्षन्तीत्यर्थः। प्राय इति कासाञ्चिन्निश्चेष्टतया मृतत्वेनेव व्यवहारात्, कथञ्चनेति स्ववागसत्यता-लज्जयादौ सामान्योक्त्या तदर्थमप्रकाश्य पश्चात् प्रसंगात्तमेव विवृणोति—प्रतीति। मे वल्लव्य इति मदीयत्वेन प्रेमकोमलस्वभावत्वेन च मद्वाक्ये विश्वासानपगमान्मत्प्राप्त्याशा कदापि त्यक्तु न शक्यत इति भावः। एवमुक्तानां धारणहेतुनां त्रयाणामेषां यथोत्तर श्रेष्ठ्यम्। अन्यत्तैर्व्याख्यातम्। यद्वा, ममात्मीयाः सुताः, अतस्तासामार्त्त्याहमप्यार्त्तोऽस्मीति तासामप्यार्त्तिमोचनेन ममाप्यार्त्तिस्त्वया मोचिता स्यादिति भावः। अथवा दूरस्थ तत्रैव श्रीवृन्दावनविहारादिना दूरवर्त्तिनि सत्यधुना त्वत्यन्तदुःखं सदा विन्दन्तीत्याह—धारयन्तीति। अन्यत् समानम्। यद्वा, सन्देशमुख्यं प्रकारमेवान्ते समादिशति—धारयन्तीति। सामीप्ये वर्त्तमाना। मे प्रत्यागमनं व्रजे तत्र पुनरागतिस्तस्य सन्देशैः सम्यक् प्रतिपादनैरेव प्राणान् धारयिष्यन्ति, तच्चाति-

कृच्छ्रेणैव, तदपि कथञ्चन कण्ठगतप्राणत्वादिना, अतो भवतीनां प्रियतमोऽसावचिरादेष्यति समागतप्राय इत्येवंप्रधानाः सन्देशा बोधिता इति दिक्। एवं सर्व्वथा पितृभ्यामात्मनोऽपि सकाशात्तासां विशेषः साधितः। सर्व्वेषामेव व्रज-जनानां तद्विच्छेदार्त्तानां सामान्येन सान्त्वने समादेष्टुं योग्योऽपि केवल पित्रोर्गोपीनाञ्च तदादेशः, तयोस्तासाञ्च तद्विशेषाभिप्रायेण श्रीदामादिषु वयस्येषु न सन्दिष्टः, तेषां मधुपुरे समागमसम्भावनाभिप्रायेण; यद्वा, गोपीनामिति निर्व्विशेषतया सर्व्वासामेव वृद्धातरुण्यादीनामाधिविमोचनमादिष्टम्, ता गोपीः, तथा ये मदर्थे त्यक्तलोकधर्म्माः (भा० १०।१६।१०) 'कृष्णेऽर्पितात्म-सुहृदर्थकलत्रकामाः' इत्याद्युक्तेः, श्रीदामादयो गोपास्तांश्च विभर्म्मि, अधुना तत्रैव निजप्रियतमानां गोपीनां विशेषतराभिप्रायेणाह—मयीति द्वाभ्याम्। अन्यत् समानम् ॥ ६ ॥ हे राजन्निति, श्रीकृष्णकृत-व्रजजनानुग्रहेण प्रहर्षोदयात्, किंवा, इत्युक्तः सन् राजमान आदृतः सादरः, किंवा प्रेषणार्थं प्रसादवस्त्रादिप्रदामेन, किंवा तादृशसन्देशेन तत्र प्रेषणेनैव वा भर्त्रा सम्मानितः। अयमपि राजमानत्वे हेतुरेकः। सन्देशमादाय चित्ते धृत्वा, किंवा स्वाक्षरेण तल्लिखितसन्देशपत्रं शिरसि गृहीत्वा। भर्त्तुरिति तदेव पोषणमिति भावः। रथमारुह्य शीघ्रगमनार्थं प्रकर्षेणाक्रूरतोऽप्यधिकविचित्रमनोरथाचरणादिना ययौ ॥ ७ ॥ नन्दयतीति नन्दस्तस्य गोकुलमिति गोकुलस्यापि तादृशत्वमभिप्रेतम्, तच्च परमोत्कटभाववैचित्र्या तेनोद्धवस्यानन्दनात्। अतएव पुनरप्यग्रे श्रीमान् श्रीभगवत्प्रसादाद्व्यालंकारादिना महाशोभावानपि छन्नयानः प्रविशतामित्यनन्तानां पशूनां व्रजप्रवेशे खुररेणुनामधिकाधिकोत्थानात्। इति गोधूलिसंज्ञकोत्तमयोगे गत इति बोधयति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तासां वियोगाधिं दर्शयति द्वयेन। मयि ता इति। प्रेयसां प्रीतिविषयाणां मध्ये निरतिशयप्रीतिविषये दूरस्थेऽपि मयि विषयभूते स्मरन्त्यः ताः गोकुलस्थाः स्त्रियः। अङ्ग हे उद्धव! विरहेण यदौत्कण्ठ्यं तेन विह्वलाः विवशाः विमुह्यन्ति देहधर्मान् विस्मरन्ति ॥ ५ ॥ किं च गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति ये प्रत्यागमनसंदेशाः तैर्मदीया वल्लव्यो गोप्यः मच्चित्ताः कथंचित्कृच्छ्रेण क्लेशेन प्रायः प्राणान् धारयन्ति विरहतापेन दह्यन्ते एव मच्चित्तत्वात्कथंचिज्जीवन्तीति भावः ॥ ६ ॥ इत्थमुक्त उद्धवो हे राजन्नादृतः भर्तुर्भगवतः सन्देशं "भवतीनां वियोगो मे न हि सर्वात्मना क्वचि"दित्यादिना वक्ष्यमाणमादाय रथमारुह्य नन्दगोकुलं जगाम प्राप्तः ॥ ७ ॥ कदा कीदृशश्च प्राप्त इत्यत आह। प्राप्त इति। विभावसौ सूर्ये निम्लोचति अस्तं गच्छति सति श्रीमत्संपत्तिमन्नन्दव्रजं प्रातः अक्रूरवद्भक्त्युद्रेकान्मध्ये मध्ये विलम्ब्यास्तमयवेलायां व्रजं प्राप्त इति भावः। कथंभूतः प्रविशतां पशूनां खुररेणुभिः छन्नं यानं रथो यस्य सः अनेन गोपीभिरज्ञातः सन्नन्दसंगमं लब्धवानिति सूच्यते ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वस्वभक्तवात्सल्यं कथयति। य इति। ये ये जना मदर्थे मां निमित्तीकृत्य त्यक्तलोकधर्माः लोको देहस्तद्धर्माः अशनवसनानुलेपनादिलक्षणास्त्यक्ता यैस्ते ताथ यद्वा त्यक्ताः स्वर्गादिलोकविषयाः धर्माः यागादिसुकृतलक्षणाः मदर्थं मन्निमित्तं निवृत्तौ वर्तमाना ये ते यद्वा मामुद्दिश्य त्यक्ता दत्ता लोकधर्माः जनविषयाः नमनाद्याचारा यैस्ते अहं तान् बिभर्मि तेभ्यः भीतोऽस्मि बिभर्मि रक्षितास्मि मत्सायुज्यमावहन्तीति भक्तवश्यतां दर्शयति बिभर्मि वा ॥ ५ ॥ विरहेणोत्पन्नमौत्कण्ठ्यम् उत्कण्ठारागित्वं तेन विक्लवाः ॥ ६ ॥ प्रत्यागमनसन्देशैः आगमिष्यति युष्मत्प्रेष्ठः कृष्ण इत्यादिवाक्यैः मयि आत्मामतिर्मननशक्तिः मतिर्बुद्धिर्यासां तास्तथा मत्स्वभावा वा ॥ ७ ॥ विभावसौ सूर्ये निम्लोचति अस्तं गच्छति सति सूर्यवह्नी विभावसू इति दिवाकर इतिकेचित् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

धारयन्तीति। अतः प्रत्यागमनपर्यवसानैरेव सन्देशैरधुनापि ताः सान्त्वनीया इति भावः। मे वल्लव्य इति वस्तुतस्तस्यैव पत्नीत्वात्। मन्मनस्का मत्प्राणा इत्यनेन पौनरुक्त्यान्मदात्मिका मत्स्वरूपता इत्येवार्थः। तत्र यद्यपि सर्वेऽपि व्रजवासिनस्तदेकजीवनत्वात् सान्त्वनार्हाः। यद्धामार्थ सुहृदित्यादिभ्यः। तत्रापि श्रीवदुपनन्दादयः तत्रापि श्रीदामादयः। अतः श्रीव्रजराजेन वक्ष्यते। अपि स्मरति नः कृष्णो मातरः सुहृदः सखीन्। गोपान् व्रजं चात्मनाथं गावो वृन्दावनं गिरिमिति। तथापि यस्तेषामनुल्लेखस्तस्मादिदं गम्यते। केषुचित् श्रीपित्राद्यन्तःपातित्वेन सान्त्वनं केषुचित्त्वभिप्रायविशेषेण सान्त्वनाभाव एव सान्त्वनमभिप्रेतं तथाहि श्रीमति गोकुले प्रेमा त्रिविधो दृश्यते। उत्कण्ठाप्रधानो विश्रम्भप्रधानो विवेकशून्यश्चेति स च सर्वोऽपि गरिष्ठः स्फूर्त्ति साक्षात्कारमेव जनयति तत्रोत्तरभावानां साक्षात्कारबुद्धिजनिकैव सा भवेत् विस्रम्भाविवेकयोरन्यत्वप्रीतिजननायोग्यत्वात् प्रथमभावानां तु साक्षात्कारेऽप्यप्रतीतिः स्यात् किमुत स्फूर्त्तौ। उत्तरकाले तु सर्वथा उत्कण्ठाया विकल्पस्वभावत्वात्। अत उत्कण्ठाप्रधानप्रेमाणौ पितरौ प्रेयस्यश्च वियोगमानिन एवासन्। यथोक्तं गच्छोद्धवेत्यादि वक्ष्यते च इति सस्मृत्येत्यादि। अथ ये विवेकशून्यप्रेमाणो गवादयः। ये च विस्रम्भप्रधानप्रेमाणः श्रीदामादयस्ते संयोगमानिन एवासन् तत्तत्कनिष्ठप्रेमाणः पितृप्रेयसीतरगोप्यादयस्तु कासांचिदेव गवादीनां स्वानुभवेनैव निश्चयात्। अन्येषां मां तु एकान्ते मथुरात इहागत्य मिलतीति

मिथः सम्वादेन तद्दाढर्यात् । यथैतेषां हर्षोऽपि वर्णयिष्यते वासिभार्थेऽभियुध्यद्भिरित्यादिना च । तस्मात् श्रीदामादिषु सान्त्वनं केषु चितत्तदन्तःपातित्वेनैव सान्त्वनमिति ॥ ६-१४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

मयि ताः प्रेयसामित्यादि । प्रेयसां प्राणानामपि प्रेष्ठे प्रियतमे दूरस्थे गोकुलस्त्रियः स्मरन्त्यः सत्यो विमुह्यन्ति । तस्मात्ता मत्सन्देशैः सान्त्वयेत्यर्थः ॥ ५ ॥ ननु कथञ्चिदेव ता जीवन्ति, तदलं तत्र गमनेनेत्याह —धारयन्त्यश्चेत्यादि । कृच्छ्रेण कष्टेन, प्रायः कथञ्चन, कथमपि प्राणान् धारयन्ति । ननु कथं तव विरहेण तासां जीवनं सम्भाव्यते ? इत्याशङ्क्याह—प्रत्यागमनसन्देशैरित्यादि । मया (भा० १०।३९।३५) "आयास्ये" इति यदुक्तम् तदाशयैव जीवन्तीरयर्थः । मे वल्लव्य इति ममकारपुरःसरोक्तिः परमप्रेमसूचिका ॥ ६ ॥ इत्युक्त इत्यादि । आदृत इति गोपीनां दर्शनं मम भावीति स्वभाग्यमुद्भाव्य सादरः ॥ ८-२९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ननु कथं त्वद्विरहेण ता जीवन्ति ? तत्राह —प्रत्यागमन सन्देशैरिति । (भा० १०।३९।३५) "आयास्यामि" इति मया यदुक्तं तेनैवाशापाशेन जीवनं बद्धा तिष्ठन्तीति भावः । वल्लव्यो मे मदीया इति स्वपरिग्रह–गोपीः प्रति ममताधिक्यम् । ननु भवन्मते वृन्दावने नित्यमेव रूपान्तरेणासौ वर्त्तत एव, तत् कथं तत्रैव मध्ये मध्ये प्रकटीभूय तासामपि बिरहदुःखं न निराकरोति ? सत्यम् न निराकरोतीति कथं त्वया ज्ञातम् ? किन्तु विप्रलम्भ—शृङ्गारोऽपि रमणीयत्वात् तस्याङ्गीकार्य एव तेन भक्त-विषयत्वे श्रवणता-भूयस्त्वेन वर्ण्यमानानुरागा कापि तस्य सर्वमनवद्यम् । तेन लोकप्रतीत्यैव तद्विच्छेद–दुःखानुकरणलीलेयमिति सुरसा, अन्यथा केवलेनैश्वर्येण रसो रसनीयो न भवतीति स्थितम् । अतो वृन्दावनस्थानां कुमारीणां सर्वसंशयोऽपि तथा वर्त्तते व्रजस्थानां पूर्वपति-गृहे वर्त्तमानानामपि तत्तत् सम्बन्धरहितानां कदाचित् संयोगितया चेति ॥ ६ ॥ आदृत इति ममापि गोपीनां दर्शनं भविष्यतीत्युत्कण्ठा महती । तदहो भद्रं जातमिति मनसि कुर्वन्नादरवानिति भावः ॥ ८-२९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु तासां यदि त्वमेव मनःप्राणादयः प्रेष्ठ आत्मा च तर्हि ताः कथमत्र नायातास्तत्र स्थातुमेव कथं शक्नुवन्ति तत्राह । मयि ताः खलु गोकुलस्य स्त्रियः गुञ्जागैरिकमुरलीमयूरपिच्छाद्यलंकृतेन गोपवेशेनैव मया सह तत्र गोकुले एव विलासे प्राप्तमनोनिष्ठा मयाप्यत्रानेतुमनभिप्रेताः कथमत्र वृष्णिपुर्य्यामागच्छेयुरिति भावः । ततश्च प्रेयसामपि प्रेष्ठ दूरस्थे सतीति प्रियं तावत्सर्वं ममतास्पदं ततोऽप्यधिकोऽहंतास्पदमात्मा प्रेयान् ते च यद्येकस्य बहवः सम्भवन्ति तदा तेषामपि कोटिसंख्यानां प्रेष्ठ इति यद्यात्मकोटिभ्योऽपि केचित् पदार्थाः प्रियाः सम्भवेयुस्तेषामपि मध्ये योऽतिप्रियस्तद्रूपे मयीत्यर्थः । अत एव विमुह्यन्ति विशिष्टां मूर्च्छां प्राप्नुवन्तीत्यर्थः । मदीयदुस्तर्क्यया शक्त्या जीव्यमाना अपि न जीवयितुमिव शक्यन्त इति भावः ॥ ५ ॥ अतिकृच्छ्रेणेति । तासां मत्प्राप्त्याशया प्राणधारणमेवातिकष्टं प्राणत्यागस्तु सुगम एवेति भावः । ननु केन प्रकारेण प्राणान् धारयन्त्यत आह । प्रतीति । गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति ये प्रत्यागमनसंदेशास्तैरतो मत्प्राप्त्याशैव महाबलवती निर्गच्छतोऽपि प्राणान् बध्नातीति भावः । तव का भवन्ति तास्तत्राह । बल्लव्यः यद्यपि ता बल्लवानामेब स्त्रियस्तदपि मे मदीया एवं तासां महामाधुर्य्यमयरूपरसगन्धशब्दस्पर्शादिसम्बन्धगन्धमपि तत्पतयः स्वप्नेऽपि न लभन्ते किंत्वस्मद्भार्य्या इमा इत्यभिमानमात्रमेवेत्यतो रसशक्त्यैव स्वपुष्ट्यर्थमनादित एव नित्यपरकीयाः कृता अपि ता मद्भोग्या मदीया एव यतो मदात्मिकाः मत्स्वरूपशक्तेर्ह्लादिन्या अपि महासारप्रेमवृत्तित्वान्मत्स्वरूपभूता अपि सर्वोत्कृष्टह्लादरूपत्वान्मदाकर्षणसमर्था अत एवात्मारामस्यापि मम ताभी रमणसुखमत्यधिकम् अत एव मयात्मनः सकाशादपि ता अधिकमनुकम्पनीया इत्यनुकम्पार्थकः कप्रत्ययः प्रयुक्तः श्लेषेण ममात्मा मनो रमणार्थी यासु ता मय्येवात्मा तथा भूतो यासां ता इति वा मत्सम्भोग्यत्वान्मदीया इत्यःर्थ ॥ ६-७ ॥ निम्लोचति अस्तं गच्छति सति छन्नयानः आच्छन्नरथः ॥ ८ ॥

गूढार्थदीपिनी

अङ्ग हे उद्धव । दूरस्थे सति मां स्मरन्त्यः ॥ ५ ॥ बल्लव्यो गोपिकाः ॥ ६-७ ॥ निम्लोचति अस्तं गच्छति सति । यानं रथः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विरहेण यदौत्कण्ठ्यं तेन विह्वलाः कातराः ॥ ५ ॥ आयास्ये इति दौत्यकैः प्रत्यागनसन्देशैः कथञ्चित्प्राणान् धारयन्ति ॥ ६ ॥ भर्तुः श्रीकृष्णस्य भवतीनां वियोगो मे न हि सर्वात्मना क्वचिदित्यादिनिजवाक्यरूपम् ॥ ७ ॥ विभावसौ सूर्ये निम्लोचति अस्तं गच्छति सति तत्रापि खुररेणुभिश्छन्नयानो नन्दव्रजं प्राप्त इत्यनेन गोपीभिरलक्षित एव नन्दगृहे प्रविष्ट इति सूच्यते ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तद्वृत्तिरित्थं तत्र मद्वृत्तिरेवमिति सामान्यतस्तान्समान्यतास् पर्यवसाययन्देवो वक्ति ॥ य इति । लोकस्य देहस्य स्वर्गादेर्वा धर्मास्ते त्यक्ता यैस्ते तेन त्यक्तेनेत्यादिवन्मद्दत्ता लोकधर्मा यैरिति वा । सर्वत्राप्यकेवलत्वान्नानि च । मदर्थे मद्रूपार्थे विषये एतानहं बिभर्मि पोषयामि । बिभेमीति पाठे तान्निमित्तीकृत्य भीतामाप्नवानीति वा । प्रेयसां प्रेष्ठेऽतिप्रियतमे मयि दूरस्थे त्रुटियुगीभवनवत्कोशाल्पतायामपि तदाक्रोशस्येत्यम्भवतीति दूरस्थ इत्युक्तिः । ता गोकुलस्त्रियो विरहोत्कण्ठ्यविक्लवा विरहेणोत्पन्नमौत्कण्ठ्यं दिदृक्षोत्कलिकता तेन विक्लवा विह्वलाः स्मरन्ति विमुह्यन्ति प्राणान्कथञ्चन दुर्दशातोऽतिकृच्छ्रेण बहुकष्टेन मायो धारयिष्यन्ति ॥ ५-६ ॥ मदात्मिका मन्मनस्काः प्रत्यागमनसन्देशैरायताक्ष्य आयाति नायको नायासं भजत त्यजत शोकमित्यादिरूपैर्वाक्यैर्वल्लव्यास्त्वया सन्देशानाज्ञावचनानि श्रीमानुद्धवो विभावसौ सूर्ये । विभावसुर्दिनमणौ हारभेदे च पावक इति विश्वः । निम्लोचत्यस्तं गच्छति सति नन्दव्रजं प्राप्तः । विभौ सूर्ये निम्लोचति सत्यसौ उद्धवः प्राप्त इत्यन्वयः । दिवाकर इत्यपि पठन्ति॥८॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु फलसाधकत्वात् भक्तिमार्गे विरह एव पुरुषार्थ इति किमिति निराक्रियते तदाह । मयि ता इति । ता विमुह्यन्ति क्षणे क्षणे मूर्च्छां प्राप्नुवन्ति कातरा दीनाश्च भवन्ति प्राणा रक्ष्या दैन्यं च दूरीकर्तव्यं ननु मूर्च्छायां को हेतुः ज्ञानस्य मानसव्यापारस्य घातकत्वाभावात् प्राणघाते हि मूर्च्छा भवति तत्राह । ता मयि दूरस्थे सति गोकुलस्त्रियः विचारचातुर्यादिरहिताः प्रेयसामतिप्रियाणा सर्वेषामेव मध्ये प्रेष्ठे अतिप्रिये प्राणादप्यधिकप्रिये दूरे विद्यमाने सति स्मरन्त्य एव विमुह्यन्ति स्मरणमात्रमेव मूर्च्छनहेतुः अङ्गेति सम्बोधनं तासु स्नेहात् तदर्थं प्रेषणीयेऽपि स्नेहसूचकं मरणमनेनैव भवत्यनेन नेति किंचिदुपपन्नमस्ति यथा महाभयात्प्राणोत्क्रमणमतिक्रूरदर्शनाच्च यथा वा पुत्राद्यपगमश्रवणे तथा दासामपि प्राप्तिसम्भावनारहिते मयि सति मत्स्मरणमात्रेणापि न हि दृष्टेऽनुपपन्न नाम भगवत्प्राप्तिसम्भावनाभावसहिता भगवत्स्मृतिः महाप्रहार इव मूर्च्छाहेतुः प्रेष्ठत्वात् स्मरणमावश्यकम् अतोऽचिकित्स्यदोषात् निरन्तरं मूर्च्छैव । किं च पूर्वमनुभूतस्यार्थस्य साम्प्रतमभावो विरहः तेन तासामुत्कण्ठा महती अत औत्कण्ठ्येन कातरा दीनाश्च मत्स्मरणे मूर्च्छा मद्धर्मस्मरणे तु कातरत्वमिति उभयं मत्सन्देशो निवारयिष्यति ॥ ५ ॥ तर्ह्येवं मूर्च्छायां जीवने का प्रत्याशङ्केत्याशङ्कायामाह । धारयन्त्यतिकृच्छ्रेणेति । अतिकृच्छ्रेणेति अतिकष्टेन प्राणान्धारयन्ति बाह्या मृता इति प्रायग्रहण देहेन्द्रियान्तःकरणानि तु विकलान्येव प्राणान् केवलं धारयन्ति तत्र का उपपत्तिरित्याशङ्कायामाह । कथंचिदिति । न काप्युपपत्तिः प्रसिद्धा वस्तुतस्तु मरणमेवोचितं जीवनमस्तीति किञ्चित्साधनं परिकल्प्यते अप्रसिद्धत्वात्कथञ्चिदित्युक्त प्रमेयबलेनेति भगवदिच्छयेति जीवनमात्रं प्रमेयबलस्यापि दुःखदूरीकरणे न सामर्थ्यं किं तु धारणात्मक भूत्वा कथञ्चिद्धारयन्ति तर्हि सन्देशेन किं कर्त्तव्यं तत्राह । प्रत्यागमनसन्देशैरिति । भगवान्प्रत्यागमिष्यतीति यो ममैव सन्देशः आयास्य इति तज्जीवने साधनं तत्कालेन जीर्णं चेत् मरणनेवेति । तदर्थमुपायान्तरं कर्तव्यं स उपायः पत्रे स्पष्टो भविष्यतीति भावः । ननु स्त्रीणां स्थाने तत्रापि गुह्यसन्देशे कथं पुरुषाः प्रेष्यन्ते तत्राह । बल्लव्यो म इति । त्वयि न सन्देहः ता पुनः मे मदीयाः न हि मदीयानामन्यत्र मनो भवति मत्सम्बन्धस्यैव तथासामर्थ्यात् वल्लवीपदेन चैतत् ज्ञापयति वल्लवानां गोपानां स्त्रियः अहोरात्रं च गोपाः स्त्रीणां बलयप्राया इति ताः संवेष्ट्यैव तिष्ठन्तीति अतिकामुकाः नित्यं स्त्रीसुखदातारः तादृशानामपि स्त्रियो भूत्वा तान्परित्यज्य मत्पराश्चेत् अन्यस्मि शङ्कैव नेति । ननु ममैव यदि तास्वन्यथा बुद्धिर्भवेत् तदा का गतिरिति शङ्कायामाह । मदात्मिका इति । अहमेवात्मा यासां मत्स्वरूपास्ताः, अतस्तव मद्बुद्धिरेव भविष्यतीति न काचिच्चिन्तेत्यर्थः ॥ ६ ॥ एवमुपपत्तिपूर्वकं गोकुलगमनार्थमाज्ञप्तस्तथा कृतवानित्याह इत्युक्त इति । राजन्निति ईश्वराज्ञा सेवकैरवश्यं कर्तव्येति ज्ञापनार्थं स हि उत्सवात्मकः यत्रैव गच्छति तत्रैवोत्सवः भर्ता हि स्वामी अनेन पातिव्रत्यं तस्योक्तं तेन निन्दा स्तुतिः लोकातिक्रमः परलोकादिबाधो वा सर्वमवगणय्य भर्तुः सन्देशमेवादाय नन्दस्य गोकुलं प्रययौ तत्राप्यादरपूर्वकं परमपुरुषार्थं प्राप्त इव भगवत्स्मरणेन मार्गे वैकल्ये गमनं बाधित भविष्यतीति रथेन प्रययौ ॥ ७ ॥ गमनदिवसे सन्देशो वक्तुमशक्य इति आदौ नन्दश्च वक्तव्य इति स्मारकेण तासां विरहोऽधिको भविष्यतीति सन्ध्यायां गत इत्याह । प्राप्त इति । नन्दस्यैव व्रजं गतः विशेषाकारेण कालस्य तथात्वात् अतिथिप्रकारेण गमनमाशङ्क्य निराकरोति श्रीमानिति । सर्वसम्पत्तियुक्तः विभावसौ सूर्ये निम्लोचति अस्तं गच्छति सति विशेषेण भा कान्तिरेव धनं यस्येति योगप्राधान्यात् सूर्यवाचकोऽग्निवाचकश्च अनेन सर्वेषां लौकिकवैदिककर्माणि वैयर्थ्यात् स्वाज्ञानं सूचित किं च प्रविशतां पशूनां खुररेणुभिः छन्नयानः आच्छन्नरथः प्रवेशे पशूनां वेगो भवति भगवद्रहितत्वात् ॥ ८ ॥

श्रीसुबोधिनी-सारः

प्रेयसां मध्ये प्रेष्ठे दूरस्थे मयि सति ता गोकुलस्त्रियः विरहेणौत्कण्ठ्यं तेन विह्वलाः परवशा मां स्मरन्त्यो विमुह्यन्ति हे अङ्ग ॥ ५ ॥ अतिकष्टेन प्रायः प्राणान् धारयन्ति कथंचन केनापि कारणेन मे प्रत्यागमिष्यामीत्यादिसन्देशैर्बल्लव्यः प्रिया मदात्मिका जीवन्ति "एति जीवन्तमानंदो नरं वर्षशतादपि" इत्युक्तेर्वा ॥ ६ ॥ शुकोक्तिः । एवमुक्त उद्धव आदृतो भर्त्तुः

श्रीकृष्णस्य सन्देशमादाय रथमारुह्य नन्दस्य गोकुलं प्रययौ ॥ ७ ॥ विभावसौ सूर्ये विभौ इति साधु निम्लोचत्यस्तंगते सति प्रविशतामागच्छतां पशूनां खुररेणुभिः छन्नं यानं यस्य स उद्धवः श्रीमन्नन्दव्रजं प्राप्तः ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तासां वियोगाधिमेव स्पष्टयति—मयीति द्वयेन । 'आवयोरपि भेदो नास्ति, अतोऽतिरहस्यमपि तवाग्रे कथयामि' इति सूचयन् सम्बोधयति—अङ्गेति । प्रेयसां प्रीतिविषयाणामपि मध्ये प्रेष्ठे निरतिशयप्रीतिविषये मयि दूरस्थे सति ता गोकुलस्त्रियो मां स्मरन्त्यो विरहौत्कठ्येन विह्वलाः परवशाः सत्यो विमुह्यन्ति देहतद्धर्मादींश्च नानुस्मरन्तीत्यन्वयः ॥ ५ ॥ किञ्च गोकुलान्निर्गमनसमये 'शीघ्रमागमिष्यामि' इत्यादयो ये प्रत्यागमनसन्देशास्तैर्मदात्मिका मच्चित्ता मे मदीया बल्लभाः प्रिया गोप्यः कथंचित् कृच्छ्रेण क्लेशेन प्राणानेव धारयन्ति । प्रायःशब्दो मूर्च्छासूचकः । न तासां देहाद्यनुसन्धानमित्याशयः ॥ ६ ॥ 'स्वाम्याज्ञापालनावश्यकत्वं तु स्ववृत्तान्तेन निश्चेयम्' इति सूचयन् सम्बोधयति—राजन्निति । इत्येवं भगवता उक्तः आदृतश्चोद्धवः 'भवतीनां वियोगो मे नहि सर्वात्मना क्वचित्' इत्यादिना वक्ष्यमाणं भर्तुः स्वामिनः श्रीकृष्णस्य सन्देशमादाय स्वीकृत्य रथमारुह्य नन्दस्य गोकुलं प्रययावित्यन्वयः ॥ ७ ॥ विभावसौ सूर्ये निम्लोचति सति अस्तं गच्छति सति उद्धवः श्रीमत् सर्वसम्पद्युक्तं नन्दस्य व्रजं प्राप्तः । 'तदा गोपीभिरज्ञात एव नन्दसङ्गमं लब्धवान्' इति सूचयन्नाह—प्रविशतां पशूनां खुररेणुभिश्छन्नं यानं रथो यस्य स इति ॥ ८ ॥

अन्वितार्थप्रकाशिका

मयीति ॥ अङ्ग हे उद्धव ! प्रयसामपि प्रेष्ठे मयि दूरस्थे सति ता गोकुलस्त्रियो मां स्मरन्त्यो विरहौत्कण्ठ्येन विह्वलाः परवशाः सत्यो विमुह्यन्ति देहं तद्धर्मादींश्च नानुस्मरन्ति ॥ ५ ॥ धारयन्तीति ॥ गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीत्यादयो ये प्रत्यागमनसंदेशास्तैः मदात्मिका मय्येवात्मा यासां ताः मे मदीया बल्लव्यः गोप्यः कथंचन अतिकृच्छ्रेण क्लेशेन प्राणानेव धारयन्ति । प्रायःशब्दो मूर्च्छासूचकः । तासामात्मा यदि स्वदेहे स्यात्तदा विरहाग्निना दह्येतैव । मयि वर्तमानत्वात् कथंचिज्जीवन्तीति भावः । प्राय इत्यनेन काश्चिन्नापि जीवन्तीति संभाव्यते । यद्यपि सर्वे व्रजवासिनः कृष्णैकजीवनाः सान्त्वनार्हाः "दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसाम् ।" इत्याद्युक्तेः । तथापि तेषामनुल्लेखादिदं गम्यते । व्रजे खलु त्रिविधः प्रेमा उत्कण्ठाप्रधानो विश्रम्भप्रधानो विवेकशून्यश्च । तत्रोत्कण्ठाप्रधानानां साक्षात्कारेऽपि परोक्षतावभासः यथा द्वारकाजलविहारे पट्टस्त्रीणाम् । अत उत्कण्ठाप्रधानप्रेमाणः पितरौ प्रेयस्यश्च वियोगमानिन इवेति तयोस्तासां च सान्त्वमेव सान्त्वनम् अन्यथा समाधानासम्भवात् । विश्रम्भप्रेमवतां सखिश्रीदामादीनां च शिलष्यति । "चुम्बति जलधरकल्पं हरिरुपगत इति तिमिरमनल्पम्" इति न्यायेन विरहाद्वनादौ तत् स्फूर्त्यादिना मामेकान्ते मथुरात आगत्य मिलति संवदतीत्यादिविश्वासेन संयोगिताभिमानादसान्त्वनमेव सान्त्वनं सान्त्वने संदेहापत्तेः । विवेकशून्यप्रेम्णां गवादीनां स्वानुभवेनैव संयोगितानिश्चयः । अत एवैषां हर्षो वर्णयिष्यते । वासितार्थेऽभियुध्यद्भिरित्यादिना उपनन्दादीनां तु पित्राद्यन्तःपातिसान्त्वनम् । एवं त्रैविध्ये अक्रूर आगतः किं वेत्यादिना कासांचिद्दुःखम् । गोप्यः समुत्थायेत्यादिना कासांचित् सुखं वृक्षपक्ष्यादीनां च सुखं तथा तथा वक्ष्यमाणं तत्र तत्र तत्रान्तर्भावाभिप्रायेण व्यवस्थापनीयमिति सर्वसामञ्जस्यम् । पूर्वं प्रकाशद्वयतया व्याख्यानमप्यत्रानुकूल्येन बोध्यम् ॥ ६ ॥ इतीति ॥ हे राजन् ! इत्येवं भगवता उक्तः आदृतश्चोद्धवः "भवतीनां वियोगो मे नहि सर्वात्मना क्वचित् ।" इत्यादिना वक्ष्यमाणं भर्तुः स्वामिनः श्रीकृष्णस्य संदेशमादाय स्वीकृत्य रथमारुह्य नन्दस्य गोकुलं प्रययौ ॥ ७ ॥ प्राप्त इति ॥ विभावसौ सूर्ये निम्लोचति अस्तं गच्छति सति प्रविशतां पशूनां खुररेणुभिश्छन्नं यानं रथो यस्य स उद्धवः श्रीमत् सर्वसम्पद्युक्तं नन्दस्य व्रजं प्राप्तः श्रीमानिति वा पाठः । छन्नयान इति तदा गोपीभिरज्ञातत्वेन नन्दसङ्गं लब्धवानिति सूचितम् ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रेयसां प्रेष्ठेप्रियेभ्योऽपि प्रियतमे अत्र पंचम्यर्थे षष्ठी न निर्धारणे कुतः तस्याः सामान्यतो न्यूनाधिकभावकथने विधानात् अत्युत्कलष्ट विश्लेषावधौ तु तस्याविधानाभावाच्च विरहेण औत्कण्ठ्यं प्रियप्रास्यभिलाषस्तेन विह्वलाः परतन्त्रा ॥ ५ ॥ गोष्ठान्निर्याणकालेऽहं मायास्ये इति प्रत्यागमनसंदेशैः मदात्मिकाः मदागमनमानसाः मे मदीया बल्लव्यो गोप्यः अतिकृच्छ्रेण प्राणान् कथं च न किंचित् धारयन्ति प्राय इति पदेन काश्चन न जीविष्यन्तीत्यपि संभाव्यतेऽतः प्रत्यागमननिश्चायकसंदेशैः शीघ्रमेव सांत्वनीया इति भावः ॥ ६ ॥ आदृत आदरयुतः ॥ ७ ॥ सवितरिनिम्लोचति अस्तं गते सति छन्नयान आच्छादितरथः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तासां वियोगाधिं दर्शयति द्वयेन । मयीति । प्रेयसां प्रीतिविषयाणां मध्ये, प्रेष्ठेऽतिप्रीतिविषये, दूरस्थे, मयि विषये, प्रीतिविषयभूतं मामित्यर्थः । स्मरन्त्यः ताः, गोकुलस्त्रियः, अङ्ग हे उद्धव, विरहेण यदौत्कण्ठ्यं तेन विह्वलाः विवशाः सत्यः,

विमुह्यन्ति देहधर्मान् विस्मरन्तीत्यर्थः ॥ ५ ॥ धारयन्तीति । किं च गोकुलान्निर्गमनसमये 'शीघ्रमहमागमिष्यामि' इति ये प्रत्यागमनसन्देशास्तैः, मे मदीयाः, बल्लव्यो गोप्यः, मदात्मिका मच्चित्ताः सत्यः, कथंचन कथंचित्, कृच्छ्रेण बहुकष्टेन, प्रायः प्राणान्, धारयन्ति । विरहतापेन दह्यमानाः सत्य एव मच्चित्तत्वात् कथं चिज्जीवन्तीति भावः ॥ ६ ॥ इतीति । इतीत्थं, उक्तो भगवताभिहितः, उद्धवः, हे राजन्, आदृतः सादरः सन्, भर्त्तुर्भगवतः, सन्देशं, 'भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्' इत्यादिना वक्ष्यमाणं सन्देशमित्यर्थः । आदाय, रथम् आरुह्य, नन्दगोकुल, जगाम प्राप्तः ॥ ७ ॥ कदा कीदृशश्च प्राप्त इत्यत आह । प्राप्त इति । विभावसौ सूर्ये, निम्लोचति अस्तं गच्छति सति, श्रीमत् सम्पत्तिमत्, नन्दव्रजं प्राप्तः । अक्रूरवद्भक्त्युद्रेकात् मध्ये विलम्ब्यार्कास्तमयबेलायां व्रजं प्राप्त इति भावः । अनेन कदेत्यस्योत्तरम् । कथंभूतः । प्रविशतां पशूनां खुररेणुभिः छन्नं यानं यस्य तथाभूतः अनेन कीदृश इत्यस्योत्तरं, कैश्चिदप्यज्ञातः सन्नन्दसंगमं लब्धवानिति सूचितम् ॥ ८ ॥

श्रीहरिसूरिविरचितं भक्तिरसायनम्

इत्युक्त इति : १०.४६.७.

यस्याग्रे हि सकृत्कृतः सुरकृते हस्तप्रसारोऽमुना तस्याप्येष बलेर्बभूव भगवान् वश्यो यथा तत्पशः ।
आसां त्वात्मकृते पुरः प्रतिदिनं प्रासारि गव्याशया हस्तस्तत्प्रहिणोति मामुचितमित्यद्धोद्धवोऽन्वग्रहीत् ॥ १४ ॥

सन्देशं भृशमच्युतो न कथयत्येनं पुनस्तन्मिषात् सन्देशं ननु दर्शयत्यखिलभूत्तं सन्तमित्युद्धवः ।
तद्वक्त्रेरिततत्स्थितिस्तुतिपदैर्निर्णीतपूर्णो मुदा तूर्णं तव्जगृहेऽनुशासनमनायासोपलब्धेष्टदृग् ॥ १५ ॥

चक्रयन्तरङ्ग - व्रजवासिलोक - चेतोवशीकारकृते मयाऽपि । चक्रयन्तरङ्गेण हि भाव्यमेवेत्यगान्मुदाऽऽरुह्य रथं सघोषम् ॥१६॥

मत्सङ्गात्प्रतिघस्रमुत्सवजुषामासां न तोषोदयस्तादृक् स्याद्विरहोपशान्तिरथवा मत्तुल्यसङ्गं विना ।
इत्यन्तर्निहिताशयो निजजनानन्दप्रदः प्राहिणोत् सत्स्वन्येष्वपि वृष्णिषूद्धवमसौ श्रीशो विभूत्यात्मकम् ॥ १७ ॥

अन्योपदेशयोग्यत्वं नैवामन्त्रविदोऽस्ति यत् । तन्मन्त्रिमुख्यं स्वसखं प्राहिणोद्युक्तमच्युतः ॥ १८ ॥

मद्वेदप्रतिपाद्यमाद्यमनिदं वेद्यस्वरूपं हि यत् तच्चास्यास्त्यनघस्य वस्तु पुरतः सन्दर्शनीयं मया ।
आलोच्यैवमधोक्षजः प्रहितवानद्धा तमेव व्रजे मन्ये गोकुलसद्वशीकरणतस्तत्राधिकाराय सः ॥ १९ ॥

मन्मात्रसक्तमतयो भुवि ये भवेयुस्तेषां दिशाम्यनिशमुत्सवमिन्द्रियेभ्यः ।
सम्बोधयन्निति दयानिधिरेष घोषं तं प्राहिणोत् प्रथित - तत्पदवाच्यमीशः ॥ २० ॥

एष्यामीति यदीरितं तदधुना सत्यं विधेयं मत्याऽऽलोच्यात्मविभूतिमुद्धवमसौ किं तत्र न प्राहिणोत् ।
आयास्ये इति दौत्यकैरिति गिरं चक्रे यथार्थां प्रभुर्यच्चोवाच स वाचिकं तदधिक - प्रेमश्चर्यभिव्यक्तये ॥ २१ ॥

प्राप्तो नन्दव्रजमिति : १०.४६.८.

श्रीशपदाम्बुजविमुखो गोकुलसन्तोषजननधृतयत्नः । युक्तं तस्य हि सूर्यालोकन-तद्गुणकणांश-दौर्लभ्यम् ॥ २२ ॥

साहङ्कारमलं सलीलमथवा यो गोकुलाविर्भवद्वृत्त्यानन्दविलोकनोत्सुकमनाः स्यात्तस्य पुंसः स्फुटम् ।
पाराङ्मुख्यमिहैशमध्वरार्चिताऽनेकागमप्रेक्षणं तद्गोजन्यरजः - समावृतिरथा - ऽसूर्याश्रयाशोदयः ॥ २३ ॥
कर्मप्रचारो विधिमार्गदृष्टो धर्मप्रकारोऽपि सकाम एव । भूयो भवत्यत्र स गोकुलाभिनिविष्ट एवास निदर्शनं यत् ॥२४॥ (युग्मम्)

कृष्णप्रिया

भैया उद्धव तुम हमारी आत्मा हो । हे अङ्ग ? ये गोकुल की स्त्रियाँ सर्वथा सरल कपट चातुरी से रहित है इन गोकुल की स्त्रियों का प्रिय से भी मैं प्रियतम हूँ । वे गोपीजन मेरे के मारे सदा सर्वदा मेरे दर्शन समागम के लिए समुत्कण्ठित रहने से दीन बन गई है उनकी स्थिति के लिए भैया मैं क्या कहूँ, मेरे स्मरण मात्र से ही वे विमूच्छित हो जाती है ॥ ५ ॥ भैया उद्धव ! गोकुल से प्रस्थान के अवसर कितने गोपीजन ने प्राण छोड़ दिए हैं । जो विद्यमान है वे भी गत प्राण के समान श्वांस लेती है और प्राणों को कष्ट से बचाती है । प्राण रक्षण का कारण भी यह है कि मेरे आगमन के संदेशों के भरोंसे ही प्राणों का बचाती है ॥ ६ ॥ श्रीशुकदेव जा ने कहा राजन् परीक्षित ! भगवान् श्रीकृष्ण ने उद्धव जी को हृद्गत बात सुनाई । परम भागवत उद्धवजी ने आदर पूर्वक भगवान का आदेश एवं संदेशों को धारण कर चरणों में प्रणाम कर रथ में विराजकर श्रीनन्दबाबा के गोकुल की ओर चले ॥ ७ ॥ श्रीविभावसु सूर्य भगवान् पश्चिमाशा के निकट पधार रहे थे और अग्निनारायण को आहुति देने के लिए अग्नि होत्री जी सक्रिय बन रहे थे तब सर्व सम्पत्ति सम्पन्न श्री उद्धव जी श्रीनन्दरायजी के व्रज में पहुँचे । बन से लौटते हुये पशुवृन्द के चरणों की खुरों की धूलि से उद्धवजी का रथ आच्छादित हो गया था ॥ ८ ॥

वासितार्थेऽभियुध्यद्भिर्नादितं शुष्मिभिर्वृ[2]षैः । धावन्तिभिश्च वास्राभिरूधोभारैः[1] स्ववत्सकान् ॥९॥
इतस्ततो विलङ्घद्भिर्गोवत्सै[5]र्मण्डितं सितैः । गोदोहशब्दाभिरवं[3] वेणूनां निःस्वनेन च ॥१०॥
गायन्तीभिश्च कर्माणि [4]शुभानि बलकृष्णयोः । स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविराजितम् ॥११॥
अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः । धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमम् ॥१२॥

कर्दमक्षमा

अन्वयः—वासितार्थे, युध्यद्भिः, शुष्मिभिः, वृषैः, नादितम्, च, ऊधोभारैः, स्ववत्सकान्, (अपश्यद्भिः) वास्राभिः, धावन्तीभिः ॥ ९ ॥ इतस्ततो, विलङ्घद्भिः, सितैः, वत्सैः, मण्डितम्, वेणूनाम्, निःस्वनेन, मण्डितम्, गोदोहशब्दाभिरवम्, नन्दव्रजम्, प्राप्तः ॥ १० ॥ बलकृष्णयोः, शुभानि, कर्माणि, गायन्तीभिः, च, स्वलंकृताभिः, गोपीभिः, च, गोपैः, सुविराजितम्, नन्दव्रजम्, प्राप्तः ॥ ११ ॥ अग्न्यर्कातिथि, गोविप्रपितृदेवार्चनैः, च, धूपदीपैः, च, माल्यैः, गोपावासैः, मनोरमम्, नन्दव्रजम्, प्राप्तः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्रजं वर्णयति पंचभिर्वासितार्थ इत्यादिना । वासिताः पुष्पवत्यो गावस्तन्निमित्तमभितो युध्यद्भिः शुष्मिभिर्मत्तैर्वृषैर्नादितम् । वास्राभिर्धेनुभिः । स्ववत्सकान्प्रति ॥ ९ ॥ विलङ्घद्भिरुत्पतद्भिः गोदोहशब्दैः सहाभितो रवाः मुञ्च मा मुञ्च नय आनय देहि गृहाणेत्यादयो यस्मिंस्तम् । वेणूनां निस्वनेन च मण्डितम् ॥ १० ॥ गायन्तीभिर्गोपीभिर्गोपैश्च गायद्भिः सुविराजितम् ॥ ११ ॥ अग्न्याद्यर्चनान्वितैर्गोपगृहैर्धूपादिभिश्च मनोरमम् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'वासिता वृषकाङ्किनी' इति यादवः । 'शुष्मं तेजसि सूर्ये च' इति मेदिनी । शुष्मं तेजोबलवीर्यरूपं विद्यते येषां ते शुष्मिणस्तैः । वासयति दुग्धं स्वस्यामिति वास्रा 'धेनुर्वास्रा रोहिणी च' इति कोशान्तरात् । पञ्चभिर्व्रजं वर्णयति—मदीयव्रजस्य शोभामुद्धवः पश्यत्विति भगवदिच्छाशक्तिप्रेरिता योगमाया निर्वेद-विषाद-दैन्यादिसंचारिभिर्विधुरं कृष्णवियुक्तप्रकाशं संवृत्य हर्षौत्सुक्यचापलोत्साहादिभिरतिमनोहरं कृष्णसंयुक्तप्रकाशं प्रथमं समये सामान्यत एवोद्धवं दर्शयामासेति ज्ञेयम् ॥ ९ ॥ मुञ्चादिक्रियाणां वत्सं क्षीरञ्चेति यथायथं शेषः । आदिना उपेहि, अपसर, तरस्व, मा त्वरस्वेत्यादीनां ग्रहः ॥ १० ॥ शुभानि मंगलकराणि । गोपीभिः प्रेयसीभ्य इतराभिः 'मदर्थे त्यक्त दैहिकाः' (४) इत्युक्तेः । गोपैश्च श्रीदामादिभिरन्यैश्चालङ्कृतैरिति ध्येयम् ॥ ११ ॥ माल्यैः पुष्पैः । एवं लौकिकशोभां वर्णयित्वा वैदिकशोभामपि वर्णयति—अग्नीति । नित्यहोमोपस्थानादिनाग्न्यर्कयोः, ग्रासदानदिना गवाम्, अतिथ्यादीनां चतुर्णां सत्कारादिना । यद्वा—अग्न्यादयः पञ्च भगवत्पूजाधिष्ठानान्येव, पित्रादयश्च स्वगृहस्थानामवश्यार्च्या एवेति, वैष्णवानां ते च तदीयत्वेनवेति तेषामर्चनान्वितैः । यद्यपि महाभागवतैरप्युपास्यानां विधिकैङ्कर्यं नास्ति तथापि श्रीभगवत इव तेषां च कर्मकरणमिदं लीलयैवेति ज्ञेयम् । किन्तूभयथा वैश्याभीरतया द्विजत्वमेवैषां दर्शितम् । तदुक्तं श्रीकृष्णरामनामकरणे—'कुरु द्विजातिसंस्कारम्' इति । 'वैश्यस्तु वार्तया जीवेत्' इत्यादौ वार्ता चतुर्विधा । तत्र 'वयं गोवृत्तयोऽनिशम्' इति च । अन्तर्गृहशोभां वर्णयति—धूपेति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेव वर्णयन् श्रीमदुद्धवानन्दनत्वं व्यनक्ति पञ्चभिर्वासितार्थ इति । युध्यद्भिर्युध्यमानैः वत्सकानित्यनुकम्पायां कन् ॥ ९ ॥ सितैरिति शुभ्रताधिक्यविवक्षया गोदोहशब्दमिश्रा अभिरवा यस्मिंस्तदिति टीकायां तु लेखकभ्रमः । निःस्वनेन च गोपैश्च सुविराजितमिति गोपीभिः प्रेयसीभ्य इतराभिः मदर्थे त्यक्तदैहिका इत्याद्युक्तेः श्रीगोपैः श्रीदामादिभिरन्यैश्च कैश्चित् स्वलङ्कृतैरिति योज्यम् ॥ १०-११ ॥ एवं लौकिकशोभां वर्णयित्वा वैदिकशोभामपि वर्णयति । अग्नीति । नित्यहोमोपस्थानादिनाऽग्न्यर्कयोः ग्रासदानादिना गवाम् अतिथ्यादीनां चतुर्णां सत्कारादिना । यद्वाऽग्न्यादयः पञ्च भगवत्पूजाधिष्ठानान्येव पित्रादयश्च स्वगृहस्थानामवश्यार्च्चर्या एवेति वैष्णवानां तेषां ते च तदीयत्वेनैवेति तेषामर्च्चनान्वितैः यद्यपि महाभागवतैरप्युपास्यानां श्रीव्रजवासिनां विधिकैङ्कर्यं नास्ति तथापि श्रीभगवत इव तेषाञ्च कर्मकरणमिदं लीलयैवेति ज्ञेयं किन्तूभयथा वैश्याभीरतया द्विजत्वमेवैषां दर्शित तदुक्तं श्रीकृष्णरामनामकरणे कुरु द्विजातिसंस्कारमिमिति । वैश्यस्तु वार्त्तया जीवेदित्यादौ । वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशमिति च अन्तर्गृहशोभां वर्णयति । धूपेति ॥ १२ ॥

---

१. भारैश्च—वीर. ; भारेण—विज. । २. ववृषद्भिर्गोभिर्वत्सैश्चगुम्फितं—विज. । ३. रवैर्—वीर. । ४. शुद्धानि—वीर. । ५. गोवत्सैर्मण्डितं सितैः—विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीमदुद्धवानन्दनत्वमेव पञ्चभिर्दर्शयन्नधिकरेणुत्थाने हेतुमाह—वासितार्थ इति सार्द्धेन। अभितः सम्मर्दनं मिथो युध्यद्भिर्युध्यमानैः, 'च'कारात् हुंकारघोषैश्च लक्षिताभिः। वत्सकानिति नवजातत्वेनाल्पत्वात् कः ॥ ९ ॥ गवां वत्सैरिति महिष्यादयो वर्ज्जिताः, अतएव सितैः; यद्वा, गवां वत्सेषु वात्सल्यातिशयात्तैः समं तासामपि धावनमभिप्रेतम्। सितैरिति वृषाणां धेनूनां प्रायो धवलत्वेऽपि वत्सानामतिनूतनत्वेन सुनिर्म्मलतयातिधावल्यात्। एवं वृषादिभिरानन्दनत्वमुक्त्वा गोपानां कर्म्मणापि तदाह—गोदोहेति; निःस्वनेन चोपलक्षितम्, किंवा नादितमिति पूर्व्वेणैवान्वयः ॥ १० ॥ गोपीनां कर्म्मणा चानन्दनत्वमाह—गायन्तीभिरिति। शुभानि मंगलानि, च-कारात् प्रेम्णा रुदतीभिश्च। यद्यपि परमदुःखिनो जनाः सुष्ठुमलिनत्वादतीव विकलत्वाच्चानन्दहेतवो न स्युः, तथापि श्रीभगवदीयगाढ़प्रेम्णां लोकोत्तरचमत्कारित्वात् मालिन्येऽपि कामपि शोभां वैकल्येऽपि कामपि हृदयंगमतां च प्रकटय्य परमानन्दकारित्वं भवत्येव, अधुना तासां गोपानाञ्च रूपादिना चानन्दनत्वमाह—स्वलंकृताभिः। श्रीकृष्णेनागत्य दृष्ट्वा साधु मन्तव्यमित्येवं तस्य प्रोत्येकापेक्षया तत्प्रेषितैरलङ्कारैः सुष्ठु भूषिताभिः, च-कारात्तथैव गोपैरपि स्वलंकृतैः, अतएव सुष्ठु विशेषेण राजितं शोभितम् ॥ ११ ॥ धर्म्म-सम्पत्त्या चानन्दनत्वमाह—अग्नीति। तत्र नित्यहोमापस्थानादिनाग्न्यर्कयोः ग्रासदानादिना गवाम्, अतिथ्यादीनाञ्च चतुर्णां सत्कारादिना; यद्वा, अग्न्यादयः पञ्च भगवत्पूजाधिष्ठानान्येव, पित्रादयश्च गृहस्थानामवश्याच्चर्या एवेति तेषामर्च्चनेनान्वितैः। यद्यपि महाभागवतैरप्युपास्यानां व्रजवासिनां विधिवैकर्य्यं नास्ति, तथापि श्रीभगवत इव तेषाञ्च कर्म्मकरणमिदं लीलेति विविधोपभोगसामग्रीभिश्चानन्दनत्वमाह—धूपेति। धूपादीनां मंगलत्वेन स्पष्टतयोक्तिः, ध्वजपताकादयश्च ज्ञेयाः। अन्यत्तैर्व्याख्यातम्। यद्वा, धूपादिभिरुपलक्षितैर्गोपावासैः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

वासितार्थं संयोगार्थं शुष्मिभिर्मत्तैः ॥ ९-१४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

व्रजं वर्णयति पञ्चभिः। वासिताः पुष्पिण्यो गावः तदर्थं संयोगार्थमिति यावत्परस्परं नियुध्यद्भिः शुष्मिभिर्मत्तैः वृषैर्नादितं तथा वास्राभिर्धेनुभिरूधोभारैरुपलक्षिताभिरिति शेषः वत्सान्प्रति धावन्तीभिर्मण्डितम् ॥९॥ तथा इतस्ततो विलङ्घद्भिः सितैर्वद्भैर्गोवत्सैर्मण्डितं गोदोहशब्दैः सहाभिवा मुञ्च मा मुञ्च नय मानयेत्यादिविधास्तैर्वेणूनां निःस्वनेन च ॥ १० ॥ रामकृष्णयोश्चेष्टितानि गायन्तीभिर्गोपीभिर्गोपैश्च स्वलङ्कृतैरिति। लिङ्गव्यत्ययेन सम्बन्धः सुविराजितम् ॥ ११ ॥ अग्न्याद्यर्चनान्वितैर्गोपगृहैर्धूपादिभिश्च मनोरमं मतोरमैरिति पाठे तैर्गोपावासैर्धूपादिभिश्च सुविराजितमिति सम्बन्धः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यानं रथः वासितार्थे सम्भागार्थे वृषकामिनी वासिता वा शुष्मं स्थेमा दृढं बलमेषामस्तीति शुष्मिणः तैः ॥ ९॥ ऊधोभाथेण युक्ताभिः वास्राभिर्वत्सलोलुपाभिर्गोभिश्च वत्सैश्च गुम्फितं नादितं गवां योनिनदीगुम्फेति यादवः इतस्ततो वबृधद्भिर्गोपैश्च सुविराजितमिति पाठः वबृधद्भिरुत्पतद्भिः नृत्यद्भिर्वा इतस्ततो विलङ्घद्भिरिति केचित पठन्ति विलङ्घनं कुर्वद्भिः॥१०-१४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

व्रजं वर्णयति। वासितार्थ इति पञ्चभिः। मदीयव्रजस्य शोभामुद्धवः पश्यत्विति भगवदिच्छाशक्तिप्रेरिता योगमाया निर्वेदविषाददैन्यादिसञ्चारिभिर्विधुरं कृष्णवियुक्तप्रकाशं सम्भृत्यहर्षात्सुक्यचापल्योत्साहादिभिरतिमनोहरं कृष्णसंयुक्तप्रकाशं प्रथमं सायं समये सामान्यत एवोद्धवं दर्शयामासेति ज्ञेयं वासिताः पुष्पवत्यो गावस्तन्निमित्तमभितो युद्धयद्भिः मिथो युद्धयमानैः शुष्मिभिर्मत्तैः नादितं नादयुक्तीकृतं वास्राभिर्धेनुभिश्च नादितं स्ववत्सकान् नूतनान् प्रति धावन्तीभिः ॥ ९ ॥ गोदोहशब्दैः सह अभितोरवा मुञ्च मा मुञ्च उपेहि अपसर त्वरस्व मात्वरस्व नयानय देहि गृहाणेत्यादयो यस्मिंस्तत् वेणूनां निःस्वनेन च गायन्त्यादिभिश्च विराजितम् अग्न्यर्केति गोपावासैरित्यस्य विशेषणम् ॥ १०-१३ ॥

गूढार्थदीपिनी

वासितार्थं मैथुनार्थे। 'वासिता वृषकामिनी' इति यादवः। शुष्मिभिः मत्तैः। वास्राभिः धेनुभिश्च मण्डितम् ॥ ९ ॥ शब्दैः सह अभितो रवाः मुञ्च मा मुञ्च मा मुञ्चेत्यादयः ॥ १०-११ ॥ माल्यैः पुष्पैः। आवासैः गृहैः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीमद्व्रजमित्युक्तं तच्छ्रीमत्त्वमाह। वासितार्थे इति पञ्चभिः। वासितानां पुष्पवतीनां गवामर्थं अभितो युध्यद्भिः शुष्मिभिर्मत्तैर्वृषैर्नादितम्। वास्राभिर्धेनुभिः ॥ ९ ॥ विलङ्घद्भिरुत्पतद्भिः गोदोहशब्दैः सह अभितो रवाः यस्मिन् तत् ॥ १०-११ ॥ अग्न्याद्यर्च्चनान्वितैर्गोपानामावासैर्गृहैः ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गोधूलिलग्नसमय इति गोधूल्यो लग्ना इत्याह । व्रजं प्रविशतां पशूनां खुररेणुभिश्छन्नं यानं यस्य स वासितार्थे वृषानभिलषन्त्यो वासितास्तदर्थे नियुद्ध्यद्भिर्द्वन्द्वयुद्धं कुर्वद्भिः शुष्मिभिर्वीर्यवृद्धिमद्भिर्बलिष्ठैर्वा गतं । वृषैर्नादितम् ।। ९ ।। ऊधोभरेणान्विताभिर्वत्सकांस्तर्णकान्प्रति धावन्तीभिर्वाश्राभिर्वाहम्भारवं कुर्वन्तीभिः सकृत्प्रसूता गावो वाश्रास्ताभिः । तथा हि वाश्रा अभिज्ञवत्यृग्भाष्यटीकाटिप्पणेषु । वाश्रा वचनशीलिनः । शब्दमात्रे वाश्यतिमङ्गीकृत्य ताच्छीलिको रो विहितः । वाशृशब्द-कुत्सायामित्युक्तेः । कथमत्र वचनं शाब्दव्याख्यानमित्यत आह । शब्दमात्र इतीति । प्रस्थानान्तरे तत्रैव वस्रैव विद्युदित्यत्र गौर्वत्समिव वस्रेव वत्सला माता गौरित्युक्तेः । परोऽप्येतद्व्याख्याने वत्सशब्दप्रयुक्तप्रस्नुतस्तनवती गोः स्फायितंचीत्यादिना वासृशब्द इत्यतो रगिति व्याजहार । तालव्यपाठः । इतस्ततो विलङ्घिद्भिः सितैः शुभ्रैर्गोवत्सैर्मण्डितं गोदोहशब्दाज्जातोऽभितो रवः शब्दोत्पन्नशब्दान्तरं तद्युतं वेणूनां निःस्वनेन च बलकृष्णयोः शुभानि कर्माणि गायन्तीभिः स्वलङ्कृताभिर्गोपीभिर्गोपैश्च सुविराजितं । गोपव्यापारं निरूपयति । अग्न्यर्केत्यादिना ।। १०–१२ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

पञ्चधा वर्णयति गोकुलमैश्वर्यरहिताः अन्ये गुणाः सन्ति वीर्यं कामे प्रतिष्ठितमिति तत्र पशूनां कामलीलामाह । वासितार्थ इति । शुष्मिभिर्मत्तवृषैर्नादितं तेन पितरोऽपि तृप्यन्तीति प्रसिद्धः स च नादो जयपूर्वक इति वक्तुं युद्धमाह । युध्यद्भिरिति । वासिता भोगयोग्या गौः यथा ऋतुकाले स्त्री सा विरलैव भवतीति तदर्थं वृषाः युद्धं कुर्वन्ति वृषभाणामुक्त्वा गवामाह । धावन्तीभिरिति । वाश्राः सद्यः प्रसूताः धेनवः सवत्साः पुनः इतस्ततो धावन्ति वत्सादर्शनात् सवत्सकानन्यान् स्थूलान् विलङ्घद्भिः गोवत्सैर्विशेषेण लङ्घद्भिर्मण्डितं वत्सकान् प्रति धावद्भिर्धेनुभिर्मण्डितं तानेव विलङ्घद्भिः गोवत्सैश्च मण्डितम् । अथवा वाश्राभिर्धेनुभिश्च नादितम् ऊधसो भारेण धावनमशक्यमिति तथापि धावनं प्रेमाधिक्यात् तत्तद्वीर्यमेव स्त्रीपुरुषैर्निरूपितम ।। ९ ।। इतस्तत इति । श्रीवर्णनं श्वेतगोवत्सैः शोभातिशयो भवतीति गोदोहनशब्देन अभितो रवो यत्र वेणूनां निःस्वनेन च मण्डितं स्वरूपतः शोभा धनं श्रीकार्यं च वीणावादनं वेणुवादनमपि श्रीकार्यमेव चकाराद्वीणादिवाद्यान्यपि ।। १० ।। यशो गायन्तीभिश्चेति । बलकृष्णयोः शुभानि कौतुकलीलाकर्माणि गोकुलवासिनामुत्सवानिरूपणार्थं कर्मणां शुभत्वं निरूपितम् त्यक्त्वा गत इत्यपि कर्म भवति तथापि स्वस्य हितकरं न भवति तद्व्यावृत्त्यर्थं वा गानं च यशोरूपं स्त्रियश्चेत्ययन्ति अन्यथा भगवद्गुणगानस्य विहितत्वात् धर्मत्वमेव स्यात् अतो गोपाः गोपीश्च वर्णयति । स्वलंकृताभिर्गोपीभिः गोपैश्च स्वलंकृतैः सुष्ठु विराजितमिति ज्ञानार्थं धर्ममाह । प्रवृत्तिभावमेव ज्ञानमुपयोगीति ।। ११ ।। अग्न्यर्कातिथीति । अग्नयः अग्निहोत्रादिना पूज्यन्ते अर्कः सन्ध्यावन्दनादिभिः अतिथयः पूज्यन्त एव गावो व्रतादौ दाने च तथा विप्राः पितृणां देवतानां च नैमित्तिके अर्चनम् अनेन श्रौतः स्मार्तश्च धर्मस्तत्र वर्तत इति निरूपितं देवता हविर्मन्त्राश्च श्रौतै निरूपिताः पितरो देवताः स्मार्ते श्राद्धे होमे च तान्त्रिकधर्मोऽपि तत्र वर्तत इति ज्ञापयितुमाह । धूपदीपैश्च माल्यैश्चेति । अर्चनायामन्वितैर्धूपादिभिर्विराजितं मनोहरं वा व्रजस्य गृहाः सुन्दरा न भविष्यन्तीति धर्मप्रस्तावे आधारत्वेन निरूपितं गोपानामावासैरुत्तमगृहैः मनोरमं सर्वेषामेव मनोरतिजनकम् ।। १२ ।।

श्रीसुबोधिनी–सारः

तं वर्णयति पञ्चभिः । वासिताः पुष्पवन्त्यो गावस्तदर्थे तन्निमित्तम् अवियुध्यद्भिः शुष्मिभिर्मत्तैर्वृषैर्नादितम् ऊधोभारैः स्ववत्सकान् धावन्तीभिर्वाश्राभिर्धेनुभिर्नादितम् ।। ९ ।। इतस्ततोविलंघद्भिरुत्पतद्भिः वितैः श्वेतैर्गोवत्सैर्मंडितं गोदोहशब्दैः सहाभितो रवा मुञ्च नयानयेति शब्दास्तैर्वेणूनां निस्वनेन च मण्डितम् ।। १० ।। बलकृष्णयोः शुभानि कर्माणि गायन्तीभिः स्वलंकृताभिर्गोपीभिर्गोपैः सुविराजितम् ।। ११ ।। अग्निसूर्यातिथिगोब्राह्मणपितृदेवानामर्चनेनान्वितैर्युक्तेः धूपदीपैर्माल्यैः पुष्पैर्गोपानाम् आवासैर्गृहैर्मनोहरम् ।। १२ ।।

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

व्रजं वर्णयति—वासितेति पञ्चभिः । वासिताः पुष्पिण्यो गावश्च तदर्थे तत्सम्बन्धनिमित्तं अभितः परस्परं युध्याद्भिः शुष्निभिर्मत्तैर्वृषैर्नादितम् । ऊधोभारैरुपलक्षिताभिः स्ववत्सान् प्रति धावन्तीभिः वाश्राभिर्धेनुभिश्च मण्डितम् ।। ९ ।। तथा इतस्ततो विलङ्घिद्भिः सितैः श्वेतवर्णैर्गोवत्सैश्च मण्डितम् । तथा गोदोहशब्दैः सहाभितो रवाः "मुञ्च मा मुञ्च नय आनय देहि गृहाण" इत्यादयो यस्मिंस्तत् । तथा वेणूनां निःस्वनेन च मण्डितम् ।। १० ।। रामकृष्णयोः शुभानि दुरितनिवर्तकानि कर्माणि गायन्तीभिः स्वलंकृताभिर्गोपैश्च सुविराजितम् ।। ११ ।। अग्न्याद्यर्चनान्वितैः गोपगृहैश्च धूपादिभिश्च मनोरमम् ।। १२ ।।

अन्वितार्थप्रकाशिका

व्रजं विशिनष्टि—वासितार्थ इति पञ्चभिः ।। वासिताः पुष्पिण्यो गावस्तदर्थे तत्संबन्धनिमित्तम् अभित परस्परं युध्यद्भिः आर्षः । शता । शुष्मिभिर्मत्तैर्वृषैर्नादितम् ऊधोभारैरुपलक्षिताभिः स्ववत्सान् प्रति धावन्तीभिः वास्राभिर्धेनुभिश्च मण्डितम् । तथा गोदोहशब्दैः सहाभितोरवाः मुञ्च मा मुञ्च नय आनय देहि गृहाणेत्यादयो यस्मिंस्तत् तथा वेणूनां निस्वनेन च मण्डितम् बलकृष्णयोः शुभानि कर्माणि गायन्तीभिः स्वलंकृताभिर्गोपीभिस्तथाविधैर्गोपैश्च सुविराजितम् ।। ११ ।। अग्न्यर्काद्यर्चनान्वितैः गोपगृहैश्च धूपादिभिश्च मनोरमम् ।। १२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

घोषं प्रशंसयन्नाह पञ्चभिः वासितार्थ इत्यादिभिः वासितानां ऋतुमतीनां गवामर्थे अभितो युध्यद्भिः शुष्मिभिः काममत्तैः वृषैः वास्राभिः धेनुभिः ।। ९ ।। विलंघद्भिरुत्प्लवद्भिः गोदोहशब्दैः सह अभिरवाः गृहाण देहि आनय नय इत्याद्याः शब्दाः यस्मिन् तत् ।। १०–११ ।। अग्न्यादीनां अर्चनयुक्तैः गोपगेहैः धूपादिभिश्च ।। १२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इदानीं व्रजं वर्णयति पञ्चभिः । वासितेति । वासिताः पुष्पवत्यो गावस्तदर्थे संयोगनिमित्तमिति यावत् । नियुद्ध्यद्भिः शुष्मिभिर्मत्तैः, वृषैर्वृषभैः, नादितम् ; तथा ऊधोभारैः उपलक्षिताभिरिति शेषः । स्ववत्सकान् , धावन्तीभिः, वास्राभिर्धेनुभिश्च, मण्डितमिति उत्तरश्लोकादाकृष्य योजनीयम् ।। ९ ।। इतस्तत इति । तथा इतस्ततः, विलङ्घद्भिरुत्प्लवद्भिः, सितैर्धवलैर्बद्धैर्वा, गोवत्सैः, मण्डितम् । तथा गोदोहशब्दैः सहाभिरवाः 'मुञ्च, मा मुञ्च, नयानय, देहि, गृहाण' इत्यादिविधास्तैः, वेणूनां निःस्वनेन च, मण्डितम् ।। १० ।। गायन्तीभिरिति । बलकृष्णयोः रामकृष्णयोः, शुभानि कर्माणि, गायन्तीभिः, स्वलंकृताभिः गोपीभिश्च, गोपैश्च, सुविराजितम् । स्वलंकृताभिरिति लिङ्गव्यत्ययेन गोपैः सहापि योजनीयम् ।। ११ ।। अग्नीति । अग्निश्च अर्कश्च अतिथयश्च गावश्च विप्राश्च पितरश्च देवाश्च तेषामर्चनं पूजनं तेनान्वितास्तैः, गोपावासैर्गोपगृहैः, धूपाश्च दीपाश्च तैः, माल्यैः पुष्पमालाभिश्च, मनोरमम् । मनोरमैः इति पाठान्तरे, तैर्गोपावासैः धूपादिभिश्च सुविराजितमिति सम्बन्धः ।। १२ ।।

कृष्णप्रिया

रजस्वला गायों के लिए मदमत्त नंदी परस्पर युद्ध करते थे और जयघोष कर रहे थे । सद्यः प्रसूता होने से दूध से भरे जाने के कारण भारी बने हुए थनों के भार से सर्वथा चलने में अशक्त बन जाने पर भी अपने बछड़ों को न देख कर गोवृन्द इधर उधर दौड़ रहा था । छोटे छोटे इधर उधर कूदते नाचते फांदते श्वेतवर्ण वाले वत्सों से गौओं के नाद से गौओं के दोहन के शब्द की मङ्गल ध्वनि से और वेणु ध्वनि से नन्दबाबा के गोकुल की शोभा बढ़ रही थी ।। ९-१० ।। बलराम और श्रीकृष्ण की माङ्गलिक कौतुक लीलाओं का निरंतर गान करने वाले वस्त्राभूषणों से विभूषित गोपीजन एवं गोपजन से नन्दरायजी का गोकुल-व्रज अत्यंत आनन्द एवं शोभा दे रहा है ।। ११ राजन् सायं प्रातः अग्निहोत्रादि वैदिक कर्मों से अग्नि का अर्चन हो रहा था । सन्ध्यावंदन अर्घ प्रदान सूर्योपस्थान विधि से सूर्यार्चन हो रहा था । व्रतदान के अवसर पर विप्रार्चन एवं गो समर्थन चल रहा था । वैश्वदेव विधि के अन्त में अतिथियों का अर्चन हो रहा था । श्रौतस्मार्त धर्मानुसार बार बार देवार्चन एवं पितरों का अर्चन होता था । धूप, दीप, नैवेद्य, माला, तोरण आदि से मण्डित गोपजनों के निवासों से गोकुल नगरी सर्वथा मङ्गल दर्शन बनी थी ।। १२ ।।

सर्वतः पुष्पितवनं द्विजालिकुलनादितम् । हंसकारण्डवाकीर्णैः पद्मखण्डैश्च मण्डितम् ।। १३ ।।
तमागतं समागम्य[१] कृष्णस्यानुचरं प्रियम् । नन्दः प्रीतः परिष्वज्य वासुदेवधियाऽऽर्चयत् ।। १४ ।।
भोजितं परमान्नेन संविष्टं कशिपौ सुखम् । गतश्रमं पर्यपृच्छत् पादसंवाहनादिभिः ।। १५ ।।
कच्चिदङ्ग महाभाग सखा नः शूरनन्दनः । आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्व्रतः ।। १६ ।।

कर्दमक्षमा

अन्वयः—सर्वतः, पुष्पितवनम् , द्विजालिकुलनादितम् , हंसकारण्डवाकीर्णैः च पद्मखण्डैः, मण्डितम् , नन्दव्रजम् , प्राप्तः ।। १३ ।। नन्दः, कृष्णस्य, अनुचरम् , प्रियम् , समागतम् , तम् , समागम्य, प्रीतः, परिष्वज्य, वासुदेवधिया अर्चयत् ।। १४ ।। परमान्नेन भोजितम् , कशिपौ, सुखम् , संविष्टम् , पादसंवाहनादिभिः; गतश्रमम् , पर्यपृच्छत् ।। १५ ।। अङ्ग ! हे महाभाग ! अपत्याद्यैः, युक्तः, मुक्तः, सुहृद्व्रतः, नः, सखा, शूरनन्दनः, कच्चित् , कुशली, आस्ते ।। १६ ।।

---

[१] कण्वे—वीर.; लोक्य विज. ।

श्रीधरस्वामीविरचिता भावार्थदीपिका

षंडैः समूहैः ॥ १३ ॥ आर्चयत्पूजयामास ॥ १४ ॥ कशिपौ शय्यायां संविष्टम् ॥ १५-१६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"षं (खं) डोऽर्धे मणिदोषे च समूहेक्षुविकारयोः" इति धरणिः ॥ बहिःप्रदेशशोभां वर्णयति—सर्वत इति । पद्मषण्डैः सरोवरादिगतैः ॥ १३ ॥ तमुद्धवम् ॥ आगतं स्वगृहद्वारि प्राप्तं सन्तम् । समागम्य श्रुत्वाभ्यन्तरतः सन्निकृष्टमागम्य । अनुचरं भक्तमतः प्रियं कृष्णस्यात्मनो वा । वासुदेवधिया वैष्णवस्य तदधिष्ठानतदभेदेन ॥ १४ ॥ संविष्टं शयितम् । 'स्वप्नः संवेश इत्यपि' इत्यमरः ॥ पूर्वं परमान्नेन पायसेनोत्कृष्टान्नेन वा भोजितम्, ततः कशिपौ शय्यायां कायं प्रसार्य विश्रान्तवन्तम्, ततश्च सेवकद्वारा पादसंवाहनादिना गतश्रमम्, सुप्तं सुखोपविष्टं पर्यपृच्छदित्यर्थः ॥ १५ ॥ मुक्तो बंधनक्लेशात् । तत्र श्रीकृष्णस्य विश्लेषदुःखवृद्धिमाशक्य सहसा स्पष्टं प्रष्टुमशक्यत्वादादौ तत्प्रश्नभूमिकारूपं वसुदेव कुशलं पृच्छति—कच्चिदिति । श्रीकृष्णस्य सन्निहितत्वाद्भवान्महाभागतायां योग्य एव, वयं तादृशतायामयोग्यास्तेन परित्यक्तुं योग्या एवेति भावः । शूरुनन्दन इति—तेन तत्पितुर्भाग्योदयोऽपि विवक्षितः । तच्च श्रीकृष्णस्य तत्त्रायमाणत्वाभिप्रायेण । मुक्तः आपद्भ्यः । अपत्याद्यैर्युक्त इत्यनेन च सामान्यतः सर्वेषां तथा श्रीकृष्णस्यापि कुशलं पृष्टम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

बहिः प्रदेशशोभां वर्णयति । सर्वत इति । पद्मषण्डैः सरोवरादिगतैः ॥ १३ ॥ आगतं स्वगृहद्वारि प्राप्तं समागम्य श्रुत्वाभ्यन्तरतः सन्निकृष्टमागम्यानुचरं भक्तम् अतः प्रियं कृष्णस्यात्मनो वा वासुदेवधिया वैष्णवस्य तदधिष्ठानत्वात्तदभेदेन ॥१४॥ पूर्वं परमान्नेन पायसेनोत्कृष्टान्नेन वा भोजितं ततः कशिपौ शय्यायां संविष्टं क्षणं कायं प्रसार्य विश्रान्तवन्तं ततश्च सेवकद्वारा पादसम्वाहनादिभिर्गतश्रमं सुप्तं सुखोपविष्टं पर्यपृच्छदित्यर्थः ॥ १५ ॥ तत्र श्रीकृष्णस्य विश्लेषदुःखवृद्धिशङ्कया सहसा स्पष्टं प्रष्टुमशक्यत्वादादौ तत्प्रश्नभूमिकारूपं श्रीवसुदेवस्य कुशलं पृच्छति । कच्चिदिति । हे महाभागेति श्रीकृष्णस्य सन्निहितत्वाद्भवान् प्रसिद्धायां महाभागतायां योग्य एव वयं तादृशतायामयोग्यास्तेन परित्यक्तुं योग्या एवेति भावः । शूरनन्दन इति । तेन तत्पितुर्भाग्योदयो विवक्षितः । तच्च श्रीकृष्णस्य तत्र पुत्रायमाणत्वाभिप्रायेण । मुक्तः सर्वापद्भ्यः अपत्याद्यैर्युक्त इत्यनेन च सामान्यतः सर्वेषां तथा श्रीकृष्णस्यापि कुशलं पृष्टम् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं व्रजस्यानन्दनत्वमुक्त्वा तद्बाह्यस्यापि तदाह—सर्व्वत इति । श्रीवृन्दावनस्य सर्व्वत्वाश्रयत्वेन सर्व्वस्थानेषु सर्व्ववृक्षलतादीनामेव पुष्पितत्वात् हंसकारण्डवाकीर्णैः सरोभिरिति शेषः; पद्मानां षण्डं येषु सरःसु तैश्च; पूर्व्वं (९ म० श्लो०) 'वासितार्थेऽभियुध्यद्भिः' इत्यादिना यत् पशूनां हृष्टत्वमुक्तम्, वनादीनाञ्च यत् पुष्पितत्वादिना, एतत्तु (भा० १०।४५।२३) 'ज्ञातीन् वो द्रष्टुमेष्यामः' इति श्रीभगवद्वचसा गोपानां मुखतः श्रवणेन झटिति तदागमनस्यावश्यकत्वमननादिति ॥ १३ ॥ आगतं स्वगृहद्वारि प्राप्तं सन्तं समागम्य प्रत्युत्थानादिना संगम्य छन्नयानतया तदागमनाज्ञानेनाग्रेऽनभिगमनादभिशब्दाप्रयोगः, अनुचरं भक्तमतएव प्रियं तस्यात्मनो वा, वासुदेवधियेति सतामतिथ्यर्च्चनस्वभावात्; किंवा, वासुदेवः श्रीकृष्णोऽयमागत इति मत्वेत्यर्थः ॥ १४ ॥ परमान्नेनेति प्राधान्यादन्नेन च भक्तगोरसादिना; संविष्टमुपविष्टं कायं प्रसार्य्य निविष्टं वा, आदि-शब्दाद्वीजनानुलेपनादीनि, तैश्च कारितैः स्वयमेव वा कृतैः; गतश्रमं सन्तं परिदेवनतयापृच्छत् ॥ १५ ॥ तत्रात्मसखत्वेन श्रीकृष्ण-पितृत्वेन च प्राक् श्रीवसुदेवस्य पृच्छ्यत्वात्; यद्वा, स्पष्टं कृष्णे पृष्टे सत्यार्त्तिभरोदयेन पश्चादनुप्रश्नस्याशक्यत्वात्, किंवा सूचीकटाह—न्यायेन विस्तीर्णस्य तत्प्रश्नस्य पश्चादेव पृच्छ्यत्वात्, किंवा परमहृद्यस्य स्नेहजविविधशंकया सहसा प्रागपृच्छत्वादादौ श्रीवसुदेवस्य कुशलं पृच्छति—कच्चिदिति । हे महाभागेति कृष्णस्य प्रियत्वाद्भवान् परमभाग्यवानेव, वयन्तु भाग्यहीनास्तेन परित्यक्तत्वादिति भावः । शूरनन्दन इति सखित्वेन गौरवेण च साक्षान्नामाग्राह्यत्वात् स्नेहभरस्वभावाद्वा; आद्य-शब्देन कलत्रादयः; मुक्तः सर्व्वापद्भ्यः, अपत्याद्यैर्युक्त इत्यनेन सुहृद्भिर्यदुभिर्वृत इत्यनेन च सामान्यतः श्रीकृष्णस्यापि तथा श्रीदेवक्यादीनां तत्परिवाराणां यादवानाञ्च सर्व्वेषां कुशलं पृष्टमेव ॥ १६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कशिपौ पर्यङ्के ॥ १५-२४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

परितः पुष्पितानि वनानि यस्मिन् द्विजानां पक्षिणां भृङ्गाणां च समूहैर्नादितं हंसैः कारण्डवैर्जलकुक्कुटैश्चावकीर्णं व्याप्तं पद्मसमूहैश्च मण्डितं हंसकारण्डवाद्याकीर्णं पद्मषण्डमण्डितं सरः प्रान्तवर्ति द्विजालि कुलनादित पुष्पितवनमण्डित

मित्यर्थः ॥ १३ ॥ तावत्कंचित् समागतं ततस्तं कृष्णस्यानुचरं प्रियं चोद्धवमाकर्ण्याभ्येत्येति शेषः । प्रीतः परिष्वज्य भगवद्बुद्ध्या पूजयामास ॥ १४ ॥ ततः परमेणोत्कृष्टेनअन्नेन पायेसेन भोजितं परमान्नेनेति कर्मणः करणत्वविवक्षया तृतीया परमान्नं भोजितमित्यर्थः । कशिपौ पर्यङ्के सुखं यथा तथा संविष्टं गतः अध्वश्रमो यस्य तमुद्धवं पादसंवाहनादिभिः परिचरन्निति शेषः। पर्यपृच्छत् ॥ १५ ॥ प्रश्नमेवाह । कच्चिदित्यादिना । अङ्ग हे महाभाग ! नोऽस्माकं सखा शूरनन्दनः वसुदेवः मुक्तः बन्धादिति शेषः सुहृद्भिर्वृतः अपत्याद्यैः सह कुशली सुखी आस्ते कच्चिन् ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कशिपौ शयनतल्पे ॥ १५ ॥ मुक्तः बन्धनक्लेशात् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पादसम्वाहनादिकं सेवकद्वारा सुहृदस्तन्मातुलादीन् ॥ १५-२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथोद्धवः कृष्णवियुक्तप्रकाशं नन्दालयं प्रविवेशेत्याह । तमिति । समागम्य अभ्यन्तरतः समीपमागत्येति स्वपुत्रसारूप्यावलोकनेनोद्धवस्य च स्वदृष्टजनमात्रोत्सवदायित्वशक्त्या च श्रीनन्दस्य बाह्यव्यवहारानुसन्धानसम्भाषणादिसामर्थ्योन्यो ज्ञेयः वासुदेवधिया अतिथिरूपेण मदिष्टदेवो नारायणे एवागत इत्यार्चयत् पाद्यादिना ॥ १४ ॥ भोजितं परमान्नेनेति । यद्यपि मथुराप्रस्थानादिनावधि व्रजस्थजनानां सर्वमेव महानसममार्जितमलिप्तं तृणपत्रधूलिभिः परिपूर्णं लूतातन्तुवितानमयमेयाभूत् परस्परप्रतिवेशिजनदत्तैर्दधिदुग्धतक्रादिभिरेव प्राणान् धारयन्तो हा हताः स्मेति वादिनः सर्वे बिषीदन्त्येव तदपि तद्दिने हन्त हन्त मद्गृहमायातोऽयद्धवोऽद्य मा क्षुधा विषीदत्विति व्रजराजस्याशयमभिज्ञाय कश्चित् परिजनो ब्राह्मणः खण्डतण्डुलपयोभिरेकपुरुषमात्रभोज्यं परमान्नं पपाचेति ज्ञेयं पादसम्वाहनं सेवकद्वारैव उद्धवस्य तद्भ्रातुष्पुत्रत्वात् ॥ १५ ॥ कृष्णस्य प्रश्ने अश्रुकण्ठावरोधादयः सहसोद्भविष्यन्तीत्याशङ्क्य प्रथमं वसुदेवस्य कुशलं पृच्छति मुक्तो बन्धनात् सर्वापद्भ्यश्च ॥ १६-१७ ॥

गूढार्थदीपिनी

द्विजाः पक्षिणः । कारण्डवाः जलकुक्कुटाः आकीर्णैः व्याप्तैः । षण्डैः समूहैः ॥ १३ ॥ तम् उद्धवम् ॥ १४ ॥ परमान्नं पायसादि । कशिपौ पर्यङ्के संविष्टं शयितम् ॥ १५ ॥ अङ्ग हे उद्धव ! शूरनन्दनो वसुदेवः । मुक्तो बन्धनात् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पद्मानां षण्डैः समूहैः ॥ १३-१४ ॥ श्रीनन्दभृत्यकर्तृकैः पादसम्वाहनादिभिर्गतश्रमम् ॥ १५-१६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गोपावासैर्गोपगृहैर्द्विजा अलयो भ्रमराश्च तेषां कुलैर्नादितं ॥ १३ ॥ पद्मषण्डैः पद्मखण्डैरिति पाठो ॥ १४ ॥ वासुदेवधियाऽस्मिन्सत्कृते वासुदेव एव सत्कृतो भवतीति धीस्तयाऽऽर्चयदपूजयत् । यथासुखं कशिपौ कार्पासगर्भास्तरणविशेषे ॥ १५ ॥ पादसंवाहनादिभिर्गतश्रमं पर्यपृच्छत्पप्रच्छ ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

वैराग्यं निरूपयन् गृहे उद्वेगे बहिर्निर्गतस्य महत्सौख्यं तत्रेति वदन् आह । सर्वतः पुष्पितवनमिति । सर्वतः पुष्पितानि यत्र वनानि अत्र वनशब्देन उपवनप्रायाणि वनानि जलानि चोच्यन्ते पुष्पाणामत्युत्कृष्टत्वाय तद्गन्धरसाभिज्ञान्निरूपयति। द्विजानामलीनां च कुलैर्नादितमिति । जलस्थानामुत्कर्षं वक्तु विशेषणमाह । हंसैः कारण्डवैः आकीर्णमिति मुख्यानि पद्मानीति पद्मषण्डैः पद्मनेसमूहैः मण्डितमिति ॥ १३ ॥ एवं व्रजं वर्णयित्वा तादृशे गतस्य पूजादिकमाह । तमागतमिति । सम्यगासाद्याग्रे गत्वा तत्र हेतुद्वयं कृष्णस्यानुचरं पूर्वमपि प्रियमिति अतो नन्दः आगमनेनैव प्रीतः अनेन स्वशेषत्वमुक्तम् परिष्वज्येति समानत्वं वासुदेवाधिया भगवत्सेवके भगवद्बुद्धिः कर्त्तव्येति बुद्ध्या अर्चयन्ति यो यच्छ्रद्धः स एव स इति वाक्यात् ॥ १४ ॥ विजातीयत्वात् परमान्नेन वायसेन भोजनमिति केचित् । वस्तुप्रकृष्टेनान्नेन ततः कशिपौ पर्यङ्के तूलिकायां सुखमुपविष्टमित्युपलक्षणतया राजोपचारा निरूपिताः ॥ १५ ॥ ततो गतश्रमं स्वयमन्येन वा पादसंवाहनादिभिः कुशलं पर्यपृच्छत्तदेवाह । कच्चिदङ्गेति । तस्य कुशलं स्वामिकुशलेनैवेति भगवन्तं पृच्छन् आदौ स्वमित्रं वसुदेवं पृच्छति परिशब्दार्थः हे अङ्ग परमस्निग्ध भगवद्भक्तत्वात् महाभागवतः सखा शूरस्य नन्दनः वसुदेवः अपत्याद्यैर्युक्तः बन्धनान्मुक्तः सुहृद्भिश्च वृतः कुशल्यास्त इति । अनेन रोहिण्याद्यास्तत्रैव गति ज्ञापितम् । अन्यतोऽपि समागताः पुत्रादयश्चेत्यपि पृष्टं स्वस्य सखित्वेन पुत्रस्थापनकन्वानयनादिभिः वैमनस्यं परिहृतं परमानन्दं प्रापित इति शूरनन्दन इति पितृनाम्ना तस्य स्वतो महत्त्वमुक्तम् मुक्त इत्यनुवादोऽपि सर्वचिन्ताव्यावृत्त्यर्थः ॥ १६ ॥

श्रीसुबोधिनी-सारः

सर्वतः पुष्पितवनं द्विजानां पक्षिणां कुलैर्नादितं हंसैः कारंडवैराकीर्णैर्व्याप्तैः पद्मानां षण्डैः समूहैर्मण्डितम् ॥ १३ ॥ कृष्णस्यानुचरं भृत्यं प्रियमागतं तम् उद्धवं समागम्य संप्राप्य परिष्वज्यालिंग्य प्रीतो नंदो वासुदेवबुद्ध्याऽपूजयत् ॥ १४ ॥ परमान्नेन पायसमोदकादिना भोजितं कशिपौ शय्यायां सुखं संविष्टं पादयोः संवाहनादिभिर्गत श्रमम् उद्धवं पर्यपृच्छत् ॥ १५ ॥ हे अंग हे महाभाग नोस्माकं सखा मित्रं शूरनंदनो वसुदेवोऽपत्याद्यैः पुत्राद्यैर्युक्तो बंधनान्मुक्तः सुहृद्भिर्वृतः कुशली क्षेमी आस्ते कच्चित्किम् ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सर्वतः पुष्पितानि वनानि यस्मिंस्तत् । द्विजानां पक्षिणां अलीनां भ्रमराणां च कुलैः समूहैर्नादितम् । हंसैः कारण्डवैर्जलकुक्कुटैश्चाकीर्णैर्व्याप्तैः पद्मखण्डैः पद्मसमूहैश्च मण्डितम् । हंसकारण्डवाद्याकीर्णपद्मखण्डमण्डितसरःप्रान्तवर्तिद्विजालिकुलनादितपुष्पितवनमण्डितमिति समुदितार्थः ॥ १३ ॥ तं कृष्णस्य प्रियमनुचरं सेवकमुद्धवमागतमाकर्ण्य प्रीतः सन्नन्दः आगत्य तं परिष्वज्य वासुदेवधियाऽर्चयत् कृष्णमेवागतं मत्वा सत्कारं कृतवानित्यर्थः ॥ १४ ॥ परमेणोत्कृष्टेनान्नेन पायसादिना भोजितम् कर्मणः करणत्वविवक्षया तृतीया, परमान्न भोजितं कशिपौ पर्यङ्के सुखं यथा भवति तथा संविष्टं पादसंवाहनादिभिर्गतमार्गश्रममुद्धवं नन्दः पर्यपृच्छदित्यन्वयः ॥ १५ ॥ प्रश्नमेवाह—कच्चिदित्यादिना । भगवत्सखित्वात्तस्मिन् स्वस्नेहं सूचयन् सम्बोधयति—अङ्गेति । 'महाभाग' इति सम्बोधनान्तरं भगवद्भक्तत्वात् । विसर्गान्तपाठे तु वसुदेवविशेषणम्, भगवत्पितृत्वात् । नोऽस्माकं व्रजवासिनां सखा शूरनन्दनो वसुदेवो बन्धान्मुक्तः सुहृद्भिर्बन्धुभिर्मित्रैर्वृतोऽपत्याद्यैर्युक्तश्च कच्चित् कुशली सुखी आस्ते तदस्माकमिष्टम् ॥ १६ ॥

अन्वितार्थप्रकाशिका

सर्वतः पुष्पितानि वनानि यस्मिंस्तत् द्विजानां पक्षिणाम् अलीनां भ्रमराणां च कुलैः समूहैर्नादितं हंसैः कारण्डवैर्जलकुक्कुटैश्चाकीर्णैर्व्याप्तैः पद्मखण्डैः पद्मसमूहैश्च मण्डितम् । हंसकारण्डवाद्याकीर्णपद्मषण्डमण्डितसरःप्रान्तवर्तिद्विजालिकुलनादितपुष्पितवनमण्डितमिति समुदितार्थः ॥ १३ ॥ तमिति ॥ तं कृष्णस्य प्रियमनुचरं सेवकमुद्धवमागतमाकर्ण्य प्रीतः सन्नन्दः आगत्य तं परिष्वज्य वासुदेवधियाऽर्चयत् कृष्णमेवागत मत्वा सत्कारं कृतवान् । यद्वा । वैष्णवस्य वासुदेवपूजाधिष्ठानत्वात्तदभेदेनापूजयत् ॥ १४ ॥ भोजितमिति ॥ परमेणोत्कृष्टेनान्नेन पायसादिना भोजितं कर्मणः करणत्वविवक्षया तृतीया । परमान्नं भोजितं कशिपौ पर्यङ्के सुखं यथा भवति तथा संविष्टं सेवकैः कृतैः पादसंवाहनादिभिर्गतमार्गश्रममुद्धवं नन्दः पर्यपृच्छत् ॥ १५ ॥ कच्चिदिति ॥ अङ्ग हे महाभाग ! सविसर्गपाठे वसुदेवविशेषणम् । नोऽस्माकं सखा शूरनन्दनो वसुदेवो बन्धान्मुक्तः सुहृद्भिर्बन्धुभिर्मित्रैर्वृतोऽपत्याद्यैर्युक्तश्च कच्चित् कुशली सुखी आस्ते ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशिका

पद्मखण्डैः कामलवृन्दैः स्वस्यपरितः स्थितानि यानि तडागादीनि तत्रोत्पन्नैरित्यर्थः ॥ १३ ॥ वासुदेवस्यायमिति बुध्वा ॥ १४ ॥ कशिपौशय्यायां संविष्टमुपविष्टं ॥ १५ ॥ आपद्भ्योमुक्तः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सर्वत इति । सर्वतः परितः, पुष्पितानि वनानि यस्मिंस्तं, द्विजाः पक्षिणश्च अलयो भृङ्गाश्च तेषां कुलानि समूहास्तैर्नादितं, हंसाः श्वेतगरुतश्च कारण्डवा जलकुक्कुटाश्च तैराकीर्णं व्याप्तं, पद्मषण्डैः कमलसमूहैश्च, मण्डितम् ॥ १३ ॥ तमिति तावत् आगतं कंचित् समायातं, समाकर्ण्य, ततः तमागतं, कृष्णस्य प्रियं अनुचरमुद्धव, समाकर्ण्य, नन्दः प्रीतः सन्, अभ्येत्येति शेषः । परिष्वज्य, ततः वासुदेवधिया श्रीकृष्णभगवद्बुद्ध्या, आर्चयत् पूजयामास ॥ १४ ॥ भोजितमिति । ततः, परमान्नेन पायसेन, भोजितं, परमान्नेनेति कर्मणः कर्तृत्वविवक्षया तृतीया । परमान्नं भोजितमित्यर्थः । कशिपौ पर्यङ्के, सुखं यथा तथा, संविष्टमुपविष्टं, गतः श्रमो यस्य तं, उद्धवमिति शेषः । पादसंवाहनादिभिः, परिचरन्सन्निति शेषः । पर्यपृच्छत् ॥ १५ ॥ प्रश्नमेवाह । कच्चिदिति । अङ्ग हे उद्धव, हे महाभाग, नोऽस्माकं, सखा शूरनन्दनो वसुदेवः, मुक्तः, बन्धनादिति शेषः सुहृद्वृतः स्वसुहृद्भिः संवृतः, अपत्याद्यैः युक्तः, कुशली, आस्ते कच्चित् ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सर्वत इति : १०.४६.१३.

यत्र सदानन्दस्थितिरतनुसुखा सा यशोदयोल्लसिता । युक्तं तद्गोकुलमिह विशेषसुषमं ह्यशेषविषयेषु ॥ २५ ॥

तमागतमिति : १०.४६.१४.

सामान्येऽप्यतिथौ याते वासुदेवधियाऽर्चनम् । तस्योक्तमच्युतप्रीतिरथं त्विति च तत्क्षमम् ॥ २६ ॥

भोजितमिति : १०.४६.१५.

यो गोकुलविषयगतस्तस्य तदानन्द-सत्कृतिर्युक्ता । अन्नाच्छादनसुखमपि युक्तं युक्तश्च वाग्विहारोऽपि ॥ २७ ॥

कच्चिदङ्गेति : १०.४६.१६.

प्राग्भुक्तासह्यदुःखो यस्ततो लब्धसुखः सुहृत् । सुखप्रश्ने स एवार्ह इत्यपृच्छत् स तच्छिवम् ॥ २८ ॥

कृष्णप्रिया

राजन् ! कभी कभी घरों में क्लेश हो जाय तब बाहर निकल जाने पर गृहीओं को आनन्द देने वाले विकसित कुसुम वाले रमणीय वन थे, वनों में आनन्द प्रमोद से पक्षीओं का मङ्गल कूजन हो रहा था, सरोवरों के कमलों पर और तरुवरों के कुसुम गन्ध लोभी भ्रमरों की गुञ्जार मनोरञ्जन करती थी। हंस एवं कारण्डव पक्षीओं से व्याप्त कमलों के मनोहर वन, वन में विहार के लिए आए हुए नर नारीओं को सुख दे रहे थे ऐसे सर्वाङ्ग मङ्गल नन्दजी के गोकुल में श्रीउद्धवजी ने प्रवेश किया ॥ १३ ॥ राजन् ? परमोदार श्रीनन्दरायजी, प्रियतम श्रीकृष्ण के प्रिय कृपापात्र अनुचर श्रीहरिदास उद्धवजी को पधारते जानकर श्री उद्धवजी के सन्मुख आए। अत्यन्त प्रसन्नता से श्री उद्धवजी का आलिङ्गन किया। श्रीनन्दरायजी ने वसुदेव नन्दन श्रीकृष्ण साक्षात् नन्दालय में पधारे हैं ऐसी निष्ठा से श्री उद्धवजी का आदर और अर्चन किया। पायस निर्मित विविध प्रकार के पकवान्न एवं व्यञ्जनों का भोजन कराया। श्री उद्धव जी का सुख शय्या पर बैठाए। कहते हैं कि चरण संवाहन से गतश्रम श्री उद्धवलाल को कुल परिवार स्वजन के बालकृष्ण का कुशल पूछने लगे ॥ १४–१५ ॥ प्रथम श्री वसुदेव जी का कुशल पूछते हैं कि हे परम भागवत उद्धवजी ! हे प्रियतम ! कहिये ! शूरसेन यादव के सुपुत्र, और मेरे मित्र श्री वसुदेव अपनी पत्नीओं पुत्र परिवार, कुल कुटुम्बिजन, सुहृद्वृन्द, एवं बन्धन से मुक्त स्वजनों से संयुक्त कुशल है ॥ १६ ॥

दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना । साधूनां यदूनां द्वेष्टि यः सदा ॥ १७ ॥
अपि स्मरति नः कृष्णो [1]मातरं सुहृदः सखीन् । गोपान् व्रजं चात्मनाथं गावो वृन्दावनं गिरिम् ॥ १८ ॥
अप्यायास्यति गोविन्दः स्वजनान् [2]सकृदीक्षितुम् । तर्हि द्रक्ष्यामः तद्वक्त्रं सुनसं सुस्मितेक्षणम् ॥ १९ ॥
दावाग्नेर्वातवर्षाच्च वृषसर्पाच्च रक्षिताः । दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना ॥ २० ॥

कर्दमक्षमा

अन्वयः—दिष्ट्या, स्वेन, पाप्मना, सानुगः, पापः, कंसः, हतः, यः, धर्मशीलानाम्, साधूनाम्, यदूनाम्, यः, सदा, द्वेष्टि ॥ १७ ॥ अपि, कृष्णः, नः, स्मरति ? अपि, मातरम्, सुहृदः, सखीन्, गोपान्, आत्मनाथम्, व्रजम्, गावः, वृन्दावनम्, गिरिम्, स्मरति किम् ? ॥१८॥ अपि, गोविन्दः ! स्वजनान्, ईक्षितुम्, सकृद्, अपि, आयास्यति, तर्हि, सुनसम्, सुस्मितेक्षणम्, तद्, वक्त्रम्, द्रक्ष्यामः ॥ १९ ॥ सुमहात्मना, कृष्णेन, दावाग्नेः, च, वातवर्षात्, च, दुरत्ययेभ्यः, मृत्युभ्यः, रक्षिताः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

साधूनामिति । कर्मणि षष्ठ्यः ॥ १७ । गावो गाः । गिरिं गोवर्धनम् ॥ १८ ॥ अप्यायास्यत्यागमिष्यति किम् सकृदपि ॥ १९ ॥ श्रीकृष्णोपकारस्मरणादिभिरनुपमानन्देनाभिभूयमान आह दावाग्नेरित्यादिना । वाताद्वर्षाच्चेति । वृषात्सर्पाच्चाघासुरात् अन्येभ्यश्च दुरतिक्रमेभ्यो मृत्युभ्यः श्रीकृष्णेन रक्षिताः स्म ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सानुगः केश्यादिसहितः । स्वेन स्वकीयेन 'स्व आत्माऽऽत्मीययोरपि' इति हलायुधः । यदूनामिति द्वितीयार्थे षष्ठी । यद्वा—कर्मेति पदमध्याहार्यम् । यदूनां कर्म कृत्यं यो द्वेष्टीति ज्ञेयम् ॥ क्षणं निजधैर्यार्थं मुक्तत्वस्य मुख्यकारणमेव साक्षात्कृष्णप्रस्तावव्यवधानतया प्रस्तौति—दिष्ट्येति । स्वेनेति तद्धनने दोषः परिहृतः । पाप्मानमेवाह—साधूनां सदाचाराणामत एव धर्मपराणाम् । तत्र श्रीकृष्णगमनमस्माभिरप्यनुज्ञातमिति भावः ॥ १७ ॥ न इति सामान्येनोक्तं, पुनर्विशेषत आह—मातरमिति ॥ ततश्च धैर्य चिरमक्षमः साक्षादेव प्रष्टव्यमेव पृच्छति—अपीति । कृष्णः सर्वचित्ताकर्षको मत्पुत्रः किं नः विस्मृतवानस्तीत्यत्र न

---

[1] मातरः–विज. । [2] स्वजनं–विज.; स्यजनं चात्र वीक्षि–प्रा. पा. ।

इति बहुत्वमुपनन्दाद्यपेक्षया। सा च समानस्निग्धत्वविवक्षया। मातरमिति तन्मात्रनिर्देशस्तु तस्या अत्यन्तदुःखदर्शनव्यग्रतया तदेकस्फुरणात्। सुहृदः संबंधिगोपालतन्मातुलादीन्। सखीन् श्रीदामादीन्। गोपीनिति साधारणान्, एकशेषत्वेन गोपीरपि ताश्च तादृशीः। आत्मा कृष्ण एव नाथो यस्य तम्। व्रजस्य तन्नाथत्वेन सर्वेषां तन्नाथत्वं सिद्ध्यतीत्यस्यैव विशेषणं दत्तम्। गावो गाः गौरवानुसारेण यथाक्रमवन्न्यूनोक्तिः। वृन्दावनाद्रिरेरगुरुत्वं तदन्तभूतत्वात्। अथवा—प्रथमत आत्म स्फूतरेव लभ्यत्वात्पूर्वं न इत्युक्तम्। ततश्चोत्तरोत्तरस्यासंकोचस्थानत्वातिशयेन सान्निध्यातिशयात्स्मरणातिशयसंभावनया सखिपर्यतानुक्रमोक्तिः। अथ विशेषस्मरणासंभावनया सामान्यत्वेनापि द्वयोस्तद्विषयत्वं पृच्छति पदद्वयेन। तत्रापि सामान्योक्तिः—व्रजश्चेति। तत्रतत्राऽसंभावनया पुनर्विशेषोक्तिः—गाव इति। अहो अहरहस्तमपि त्यक्त्वा यत्संगे यत्र चारमत, ता गास्तद्वृन्दावनञ्च किं स्मरति। तत्र च विचित्रक्रीडासुख संपत्कल्पद्रुमं स्वयं प्रवर्तितपूजनं सप्ताहं स्वकरे धृतं गिरिं वा स्मरति। मारितेऽप्येकस्मिन्कंसे तत्पत्नीद्वयानुवर्तिनामन्यत्र च तद्द्वयपित्रादीनां परःकोटीनां दुरुद्यमभाजां प्रतिघातार्थं, स्वजनानामपि यदूनां ततस्तत आनीय सुखवासार्थं व्यग्रचित्तत्वादात्मनः स्मरणमपि तस्य तत्र तत्र प्रतिरुद्धस्य न सुघटते, किमुतान्येषामिति भावः। अत्र क्रमसंदर्भः–"अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया। गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतसः॥" इति वक्ष्यमाणानुसारेण जरासंधादिदुर्जयनिर्जयादिकृत्यशेषेऽपि कारणान्तरमन्यथा तैस्तेषां व्रजजनानामपि महानुपद्रवः स्यात्। अत्रौदासीन्यव्यञ्जनाय स्वनिकटेऽपि तान्नाजुहाव। किञ्च—युगपदुभयत्रापि पित्रादिव्यवहारस्याभिरुचितलीलावेशादीनां समञ्जसतायादुर्घटत्वं स्यात्। निजप्रेयसीनाञ्चानयनेनाप्यसमञ्जसत्वमिति। अत एव पूर्वमपि 'वयञ्च स्नेहदुःखितान्। ज्ञातीन्वो द्रष्टुमेष्यामः' इत्येवोवाच न त्वाहरिष्याम इति। अतस्तादृशानपि वो वयमेव द्रष्टुमेष्यामो न तु यूयमत्रागच्छतेति व्यञ्जनामभिप्रेत्यैव तयोर्दिदृक्षया स्वयं नन्दादयोऽपि निकटादपि व्रजान्नागतास्तत्तदुपद्रवापातात्। पुरे व्रजे च युगपत्प्रकटा स्थितिर्न युक्ता तज्ज्ञाने श्रीनन्दादीनामस्मदीयत्वज्ञानहान्या बन्धुभावहानिश्च स्यात्। पुत्रादिरूपस्य स्वस्य महाराजताश्रवणेन तूत्कण्ठातिशयप्रेमानन्दबुद्धिः स्यात्। यथा वक्ष्यते—'यथा दूरचरे प्रेष्ठे' इत्यादि। तस्मात्तथा स्थितिमपि न चकार। अप्रकटा स्थितिस्तु तस्य तत्र सदैवास्त्येव तथैव प्रतिपादयिष्यते॥ १८॥ तर्हि गोविन्दागमनावसरे। तद्वक्त्रं गोविन्दमुखम्। गोविन्द इति गोप्रियत्वमाह। तदर्थमायास्यति चेत् तर्हीति॥ अप्यायास्यतीति—किंस्विदुद्धव तन्मनोऽभिप्रायं जानासीति भावः। ननु जानाम्येव स आयास्यति, युष्मान्सान्त्वयिष्यति, निश्चलमत्र स्थास्यतीति, तत्रास्मत्सान्त्वनं दूरे वर्ततां, निश्चलवासोऽपि मा भवतु किन्तु तद्दर्शनमात्रमहं याचे इत्याह—गोविन्द इति। स्वजनानस्मान्विरहमहाज्वरपीडितानद्यश्वो वा मरिष्यतो द्रष्टुमपि सकृदपि किमायास्यति गोविन्द इति। परःपरार्धान्गास्तदुपलक्षितानि कोटिशः स्वर्णमुद्रा मुक्ताहीरकादिरत्नबहुराजतकानकपात्रविविधवस्त्रालंकारचन्दनागुरुकुङ्कुमाद्यनेकगृहद्रव्याणि विन्दतां लभताम्। आवयोर्मृतयोरेतेषु वस्तुषु कोऽन्यः स्वत्वं कल्पयेदत एतानि गृहीत्वा यत्र तस्य वस्तुमिच्छा तत्र वसत्विति भावः। ननु किमेवं द्योतयसि तमागतप्रायं विद्धीति, तत्र विलम्बमसहमान आह—कर्हीति। 'तर्हि' इति च पाठः। द्रक्ष्याम इति—सलोप आर्षः। तच्चन्द्रकोटितिरस्कारि वक्त्रं, तां निरुपमां नासाम्, तदमृतमधुरं स्मितम्, ते कमलदलाकारे सुदीर्घनयने तस्मिन्नन्तकाले उपसन्ने दृष्ट्वैव म्रियेमहीत्याकांक्षा महती वर्तत इति भावः॥ संदर्भस्तु—'मा शोचतं महाभागौ' इत्यादौ "भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्" इत्यादौ च किन्त्वसौ प्रकटलीलाविर्भाविणां तेषामनुभवगोचरो न भवति तस्माद्दन्तवक्रवधान्ते पाद्मोत्तरखण्डे वर्णयिष्यमाणं भागवतमते च व्यञ्जयिष्यमाणं यावत्तत्र निजगमनं संपद्यते तावत्तेषां यथा केनाप्यपदेशेनासावनुभवगोचरः स्यान्महाराजत्वे च वैभवश्रवणं स्यात्तथा समाधातुं स्वस्यागमने केवलं श्रीरामगमनं च दुःखकरं मत्वा स्वतुल्येन श्रीमदुद्धवेन प्रेयस्त्वेन तादृश्यं संदिश्य श्रीव्रजवासिनः सान्त्वयामासेति क्रमप्राप्तां लीला वक्तुमारभतेऽध्यायद्वयेन—'वृष्णीनाम्' (१) इति। 'ये त्यक्त—' (४) इति। यच्छब्दसामान्यनिर्देशस्तन्निर्देशश्च विप्रत्वाद्यनपेक्षार्थः। चकारात्तानपि किमुत तन्मनस्का इति। धारयन्तीति (६)—अतः प्रत्यागकनपर्यन्तैरेव संदेशैरधुनापि ताः सान्त्वनीयाः। एतत्पश्चाद्वर्णितमेव॥ १९॥ वातवर्षादिन्द्रकृतात्, वृषसर्पाच्चेति समाहारद्वन्द्वः। अन्येभ्यः केश्यादिभ्यः। मृत्युभ्यो मृत्युहेतुभ्यः॥ ततः सधैर्यमिव स्वेषु तत्कर्तृकात्मदुःखाद्यनपेक्षिस्नेहशतं निजसान्त्वनार्थमिव स्मरन्, प्रत्युत तेन हृदि विदीर्यमाण इव विलपति—दावाग्नेरिति। अहो परमबाल्यादेव तेनास्माकं रक्षा मुहुरेव कृताऽस्ति वा वर्णयामः। यत्र दावाग्नेरपि स्वयमनुकंपावेशेन पातुमारम्भः॥ २०॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

क्षणं निजधैर्यार्थं मुक्तत्वस्य मुख्यकारणमेव साक्षात् कृष्णप्रस्तावव्यवधानतया प्रस्तौति। दिष्ट्येति। स्वेनेति तद्वनने दोषः परिहृतः। पाप्नानमेवाह। साधूनां सदाचाराणामत एव धर्मपराणामतस्तदर्थं तत्र श्रीकृष्णगमनमस्माभिरप्यनुज्ञातमिति भावः॥ १७॥ ततश्च धैर्ये चिरमक्षमः प्रष्टव्यमेव साक्षात् पृच्छति। अपीति। कृष्णः सर्वचित्ताकर्षको मत्पुत्रः किं स्मरति किं न विस्मृतवानस्तीत्यत्र न इति बहुत्वमुपनन्दाद्यपेक्षया सा च समानस्निग्धत्वविक्षया। मातरमिति। तन्मात्रनिर्देशस्तु तस्या अत्यन्तदुःखदर्शनव्यग्रतया तदेकस्फुरणात् सुहृदः सम्बन्धि गोपालतन्मातुलादीन् सखीन् श्रीदामादीन् गोपानिति साधारणान् एकशेषत्वेन गोपीरपि ताश्च तादृशीः आत्मा कृष्ण एव नाथो यस्य तम्। व्रजस्य तन्नाथत्वेन सर्वेषां तन्नाथत्वं सिद्ध्यतीत्यस्यैव विशेषणं

दत्तम् । गावो गाः गौरवानुसारेण यथाक्रममन्यूनोक्तिः । वृन्दावनाद्रिरेरगुरुत्वं तदन्तर्भूतत्वात् । अथवा प्रथमत आत्मस्फूर्त्तेरेव लभ्यत्वात् पूर्वं न इत्युक्तं ततश्चोत्तरोत्तरस्यासङ्कोचस्थानत्वातिशयेन सान्निध्यातिशयात् स्मरणातिशयसम्भावनया सखिपर्यन्तानुक्रमोक्तिः । अथ विशेषस्मरणासम्भावनया सामान्यत्वेनापि द्वयोस्तद्विषयत्वं पृच्छति पदद्वयेन तत्रापि सामान्योक्तिर्व्रजञ्चेति । तत्र तत्रासम्भावनया पुनर्विशेषोक्तिर्गाव इति अहो अहरहस्तमपि त्यक्त्वा यत्सङ्गे यत्र चारमत ता गास्तद्वृन्दावनं च किं स्मरति तत्र च विचित्रक्रीडा सुखसम्पत् कल्पद्रुमं स्वयं प्रवर्त्तितपूजनं सप्ताहं स्वकरे धृतं गिरिं वा स्मरति मारितेऽप्येकस्मिन् कंसे तत्र तत्पत्नोद्वयावर्त्तिनामन्यत्र च तद्रिपुपित्रादीनां परः कोटीनां दुरुद्यमभाजां प्रतिघातार्थं स्वजनानामपि यदूनां ततस्तत आनीय सुखवासार्थं व्यग्रचित्तत्वादात्मनः स्मरणमपि तस्य तत्र तत्र प्रतिरुद्धस्य न सुघटते किमुतान्येषामिति भावः ॥ १८ ॥ ननु धीमान् कृतज्ञोऽसौ सदा स्मरत्येव किन्तु विधाय सुहृदां सुखमित्युक्तेः कार्य्यवशात्किञ्चिन् मात्र एव विलम्बः स्यादित्याशङ्क्य फलं द्वयमन्यत् पृच्छति । अपीति । गोविन्दो गोकुलपालकः इत्यागमनावश्यकतोक्ता स्वशब्देन स्नेहपात्रतयेक्षणावश्यकता आस्तां पौनःपुन्याशा सकृदपि तथैवास्तां सान्त्वनाद्याशा ईक्षितुमपि किमायास्यति तत्रेक्षितुमिति स्वेषां महाव्याधितानामिव तापः सूचितः सकृदिति तत्राप्यसम्भावितजीवनानामिव यन्मात्रेणास्मासु मरिष्यमाणानां पुनर्दर्शनाभावदुःखं कथंचिज्जीविष्यतां च पुनर्दर्शनासम्भावनदुःखम् उभयेषां चापाततस्तृष्णाया असह्यतादुःखं नङ्क्ष्यतीति भावः । तस्मिन्नपि तदागमने द्वयं फलान्तरं सैवाग्न्यमभिव्यनक्ति । कर्हीति । कदागमनं स्यात्कदा द्रक्ष्याम इत्यर्थः । सलोप आर्षः तर्हीति पाठे तर्ह्येवेत्यर्थः । ज्ञातीन् वो द्रष्टुमेष्याम इत्यत्रास्माकं तत्र गमनस्यानभिप्रेतत्वात् एवं श्रीमद्वक्त्रस्तरणे तदीयशोभाविशेषं मुह्यन्निव स्मरति सुनसमित्यादि ॥ १९ ॥ ततः सधैर्य्यमिव स्वेषु तत्कर्तृकात्मदुःखाद्यनपेक्षितस्नेहशतं निजसान्त्वनार्थमिव स्मरन् प्रत्युत तेन हृदि विदीर्य्यन्निव विलपति दावाग्नेरिति अहोपरमबाल्यादेव तेनास्माकं रक्षामुहुरेव कृतास्ति कति वा वर्णयामः यत्र दावाग्नेरपि स्वयमनुकम्पावेशेन पातुमारब्धात्सतो गर्गोद्दिष्टनारायणसमप्रभावत्वेन वा तं दृष्ट्वा स्वत एव दयया वा पीयूषीभूयाप्यायिततद्देहाद्वयं रक्षिता स्मः एवं वातवर्षादावपि योऽयं मृत्युभ्यो मरणाधिष्ठातृदेवताभ्य इतरेभ्यः सुष्ठु महानात्मा कारुण्यप्रभावादिः निरुपाधिप्रेमास्पदादि स्वभाव औत्पत्तिकगुणो यस्य तेन ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मुक्तत्वमुख्यकारणमेव निर्दिशन् क्षणं निजधैर्य्यार्थं वार्तान्तरमापातयति—दिष्ट्येति । स्वकीयेनैव पाप्मना हत इति मातुलस्यापि तस्य वधे श्रीकृष्णदोषः परिहृतः । पाप्मानमेवाह—साधूनां सदाचाराणामतएव धर्म्मपराणां यादवानाम्; यद्वा, तत्रापि धर्म्मशीलानां भक्तिलक्षणधर्म्मपराणां तत्रापि यदुनामेकान्तिनामित्यर्थः । अतस्तदर्थं तत्र श्रीकृष्णगमनं युक्तमेवेति भावः । स चोद्धवसन्तोषणार्थं निजचित्ताश्वासनार्थमेव वा ॥ १७ ॥ ततश्च धैर्य्ये चिरमक्षमः प्रष्टव्यमेव साक्षात् पृच्छति—अपीति । कृष्णः सर्व्वचित्ताकर्षको मत्पुत्रः किं स्मरति, किं न विस्मृतवानस्तीत्यर्थः । 'नः' इति बहुत्वमुपनन्दाद्यपेक्षया; किंवा प्राक् सामान्येनेत्युक्त्वा पश्चात्तदेव विवृणोति—मातरमित्यादिना । ततश्च व्यक्ततया स्वस्यानिर्द्देशो महादैन्येन तत्कर्त्तृक-स्वस्मरणामननात् । सुहृद उपनन्दादीन् सखीन् श्रीदामादीन्, आत्मा कृष्ण एव नाथो यस्य तम्, चकारादिदं लिंगवचनव्यत्ययेन विशेषणतया यथायोग्यमन्यैरपि योज्यम् । तथा वो युष्मदीया इति चानेन तु स्नेहविशेषणं जनयति । एषां स्नेहादिना तारतम्यापेक्षया क्रमेण निर्द्देश्यानामपि तथोक्तिरार्त्तिभरोदयेन वैकल्यात् । अथवा तत्रैव श्रीदेवक्यादिप्राप्त्या मात्रादीनेतान्न स्मरतु नाम, आत्मनाथं व्रजम्, तथा तादृशीरेव स्वयं नित्यं परिपालिता गाः सर्व्वगुणयुक्तं सदा विविधक्रीडासुखपदं वृन्दावनञ्च किं स्मरति ? अहो बत पुर्य्यां गवाश्वादीनामुपवनानां चोत्तमानां प्राप्त्या नैतानि वा स्मरतु, विचित्रसेवया हरिदासवर्य्यत्वेन ख्यातं स्वयं प्रवर्त्तितार्च्चनं सप्ताहं स्वकरे धृतं गिरिं किं स्मरति ?—कथमपि तत्रास्याप्राप्तेः ॥ १८ ॥ ननु धीमान् कृतज्ञोऽसौ सदा स्मरत्येवेत्याशंक्य द्वयमन्यत् पृच्छति—अपीति । गोविन्दो गोकुलेन्द्रो मत्पुत्र इत्यागमने योग्यतोक्ता । स्व-शब्देन स्नेहपात्रतयेक्षणावश्यकता च, अतः स्व-जनान् अत्यार्त्तान् सकृदीक्षितुमपि, किं पुनर्मधुरवाक्यादिना सान्त्वनादिकं कर्त्तुम्; यद्वा, सकृदीक्षितुमेव, न त्वन्यत् किमपि कर्त्तुम्, सकृत्तत्कर्त्तृकदर्शन एवास्माकमपेक्षा, न चान्यत्रेत्यर्थः । एषा परमदैन्योक्तिः । ननु स सर्व्वदर्शी तत्र स्थितोऽपि युष्मान् सदा पश्यत्येव, किमागमनेन ? तत्राह—कर्हीति । द्रक्ष्याम द्रक्ष्यामः, सुन्दरे ईक्षणे नेत्रे यस्मिन् तत्, श्रीमुखस्यान्येषामपि सर्व्वावयवानां सुन्दरत्वेऽपि नासानेत्रयोरेव सौन्दर्य्योक्तिः, मुख्यत्वेनोपलक्षणार्थम् । अतोऽत्रागमनेनैवास्मन्मनोरथोऽयं सम्यक् सिध्यतीति भावः । अथवा सकृदीक्षितुं किमायास्यतीत्युक्त्या मिथो दर्शने सुसिद्धेऽपि पुनरत्यौत्कण्ठ्येन धैर्य्यहानेः सवैयग्र्यमाह—कर्हीति । तथाप्यायास्यति किमित्युक्त्या व्रजे तत्रैव दर्शनमपेक्ष्यते ॥ १९ ॥ एवं दर्शनहेतुतया रूपमुक्त्वा विलपन्निव प्रेमादिगुणं चाह—दावाग्नेरिति । सर्पः कालियोऽजगरश्च । एषां विशेषतो निर्द्देशः स्वयं तेन साक्षादनुभवात् । मृत्युभ्यो मृत्युतुल्येभ्यः स्मेति तत्प्रसिद्धमेवेत्यर्थः । पाठान्तरे रक्षिताः स्म इत्यन्वयः । तेन रक्षितत्वादेव जीवाम इत्यर्थः । रक्षणे हेतुः—महान् आत्मा कृपामयत्वादिस्वभावो यस्य तेन सुमहात्मनेति पाठः क्वचित्, निजदयालुत्वेनैव रक्षिताः, न त्वस्मद्गुणादिनेत्यर्थः, इति खेदात् कार्पण्योक्तिः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पापः कंसः सानुगः स्वकीयेन दुष्टेन कर्मणा निदानेन हतः दिष्ट्या अयं नो महानानन्द इत्यर्थः । पापमेव व्यनक्ति । साधूनामिति कर्मणि षष्ठी । यः कंसः साधून् धर्म एव शीलं येषां तान् यदून् द्वेष्ट्यद्विक्षदित्यर्थः ॥ १७ ॥ पित्रादिरूपान्नोऽस्मानात्मा स्वयं नाथो यस्य तं व्रजं गावो गाः वृंदावनं गिरिं गोवर्द्धनं चापि स्मरति किमित्यर्थः ॥ १८ ॥ अप्यायास्यत्यागमिष्यति किं तर्हि यदाआगमिष्यति तदा तस्य मुकुन्दस्य वक्त्र द्रक्ष्यामः कथम्भूतं शोभना नासिका यस्मिन् सुस्मिते शोभनस्मितयुक्ते ईक्षणे यस्मिंस्तत् ॥ १९ ॥ भगवत्कृतानुपकाराननुस्मरति । दावाग्नेरिति । वाताद्वर्षाच्च वृषात्सर्पाच्चान्येभ्यश्च दुरतिक्रमेभ्यो मृत्युभ्य कृष्णेन वयं रक्षिताः कथम्भूतेन सुमहात्मना आश्रितार्त्तिहारिस्वभावेन ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दिष्ट्या दैवेन स्वकृतेन यदूनामिति षष्ठी द्वितीयार्थे कर्मपदमित्यध्याहार्यं वा ॥ १७ ॥ मातरः मातृः गावो गाः ।१८–२०।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततः साश्रुगद्गदं पृच्छति । अपीति । मातरमिति तन्मातुर्दुरवस्था त्वयैव दृश्यतामिति तर्जन्या तां दर्शयति आत्मा स्वयमेव नाथो यस्य तमिममनाथं सम्प्रति निःशोभं व्रजं च पश्येति भावः गावः गाः ॥ १८ ॥ अप्यायास्यतीति किंस्विदुद्धव ! तन्मनोऽभिप्रायं जानासीति भावः ! ननु जानाम्येव स आयास्यति युष्मान् सान्त्वयिष्यति निश्चलमत्रैव स्थास्यतीति तत्रास्मत्सान्त्वनं दूरे वर्ततां निश्चलवासोऽपि मा भवतु किन्तु तद्दर्शनमात्रमहं याचे इत्याह । गोविन्द इति । स्वस्वजनानस्मान् विरहमहाज्वरपीडितानद्य श्वो वा मरिष्यतो द्रष्टुमपि सकृदपि किमायास्यति गोविन्द इति परः परार्द्धान् गास्तदुपलक्षितानि कोटिशः स्वर्णमुद्रामुक्ताहीरकादिरत्नराजितकानकपात्रविविधवस्त्रालङ्कारचन्दनागुरुकुङ्कुमाद्यनेकगृहद्रव्याणि स्वीयानि विन्दतां लभताम् आवयोर्मृतयोरेतेषु वस्तुषु कोऽन्यः स्वत्वं कल्पयेदत एतानि गृहीत्वा यत्र तस्य वस्तुमिच्छास्ति तत्रैव वसत्विति भावः । ननु किमेवं द्योतयसि तमागतप्रायं विद्धीति तत्र विलम्बमसहमान आह । कर्हीति । तर्हीति च पाठः द्रक्ष्याम इति सलोप आर्षः तच्चन्द्रकोटितिरस्कारिवक्त्रं तां निरुपमां नासां तदमृतमधुरं स्मितं ते कमलदलाकारे सुदीर्घनयने अस्मिन्नन्तकाले उपसन्ने दृष्ट्वैव म्रियेमहीत्याकाङ्क्षा महती वर्त्तते इति भावः ॥ १९ ॥ ननु नैत्र मरिष्यथ बहुकालमेव तं स्वसुतं लालयन्तो जीविष्यथेति तत्राधुना तु मृत्युहस्तान्न मुच्यामहे इति वक्तुमतीतान् मृत्यून् गणयति । दावाग्नेरिति । सुमहात्मना महास्नेहमयस्वभावेन किं स्वधुना सुमहावाडवानलात् कथं न तेन रक्ष्यामहे इति न जानीम इति भावः ॥ २० ॥

गूढार्थदीपिनी

दिष्ट्या मङ्गलार्थेऽव्ययम् । साधूनां शेषे षष्ठी । कर्मणि इति पृथक् पदं योज्यं वा ॥ १७ ॥ अपि किम् । आत्मा श्रीकृष्णः । या गावस्ताः ॥ १८–१९ ॥ वृषोऽरिष्टः सर्पात् अघासुरात् । सुष्ठु महान् दयालुः आत्मा स्वभावो यस्य तेन ॥२०–२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

साधूनामिति कर्मणि षष्ठी ॥ १७ ॥ नः अस्मान् गावो गाः ॥ १८ ॥ अप्यायास्यति आगमिष्यति किम् ॥ १९ ॥ दुरत्ययेभ्यो दुरतिक्रमेभ्यः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मुक्तो निगडतः ॥ १७ ॥ यः सदा मधूनामित्यादिका कर्मणि षष्ठी । य नत्यावृत्तं । यः श्रिय इति द्वितीया बहुवचनान्तं तत्कर्मसमर्पकमिति वा सम्पदो द्वेष्टीति यावत् ॥ १८ ॥ गावो गा मातरो यास्ता वः समीपवर्तिन इवेति वा ॥ १९ ॥ सकृदेकवारमपि तर्हि सुनसं सु शोभना नासा यस्य तत् । टाबन्तता हलन्तत्वात् । सुस्मितेक्षणं तद्वक्त्रं द्रक्ष्यामः । तत्कृतं सोपस्करं तं प्रति शंसति ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतः परं भगवत्कुशलं पृच्छन्नादौ प्रातीतिकं दोषं परिहरति । दिष्ट्या कंस इति । कंसो यो हतः सानुगो भ्रातृसहितः तद्दिष्ट्यामयरूप इत्याशङ्क्य इति च इन्द्रादीमप्यशक्य इति मातुलो भगवता स हत इति तदर्थमाह । स्वेन पाप्मना हत इति भगवतापि मारणपक्षो दोषाभावाय पाप इति तस्योत्कटं पापमाह । साधूनां धर्मशीलानां यदूनां द्वेष्टीति षष्ठ्या तत्सम्बन्धि सर्वमेव द्वेष्टीति निरूपितं साधूनामिति ज्ञानमार्गोत्कर्षः । धर्मशीलानामिति कर्ममार्गः यदूनामिति भक्तौ अतः सन्मार्गमात्रमेव तस्य द्वेष्य इति उत्कटं पापं तद्वधश्च युक्त एवेति निरूपितं कार्यवशात् कादाचित्को दोषः नात्यन्तं विगीत इति सदेति एवं दोषं परिहृत्य भगवद्गुणानामाधिक्यं पराक्रमाश्चोच्यन्ते ॥ १७ ॥ एवं सति दशभिर्गुणातीतेन सह कुशलमुक्त भवति तत्र प्रथमम् अस्माभि-

निरन्तरं स्मर्यते तत्स्मारकाणां बहूनां विद्यमानत्वात् तथापि किं सविस्मरति न वेति स्मारकाभावात् पृच्छति । अपीति । संभावनायां नः अस्मान् कृष्णेति स्नेहेन नामग्रहणं स्मारकाभावात् कथं स्मरणमित्याशङ्क्य सम्बन्धानाह । मातरमिति । आदिपदैश्चिन्ता तत्र संस्कारोद्बोधिका निरूपिता मातरं यशोदामिति पूर्वं स्वात्मानमुक्तवान् बहुबचनं तु सर्वापेक्षं सुहृदः अस्मानन्यांश्च उपनन्दादीन् सखीन् मित्राणि गोपान् व्रजं स्थानं तस्य स्मरणे हेतुः आत्मनाथमिति । आत्मैव नाथो यस्येति पाल्यमानत्वाद्वा गावः गा इत्यर्थः क्रीडास्थानं वृन्दावनं विशेषलीलाधारो गोवर्धन इति गिरिः ॥१८॥ एवमष्टौ स्मरणहेतवः स्मरतीत्युत्तरं प्राप्याह । आप्यायास्यतीति । यो हि यत्स्मरति सर्वदा स तदभिलाषी सन् तत्र गच्छति अतोऽत्रापि सम्भावना नत्वत्र गुणभावः तत्र च राज्यमिति कथमागमनमितिचेत्तत्राह । गोविन्द इति । देवादिभिः सर्वैरेवात्रेन्द्रत्वेन स्थापितः किञ्च स्वजनानिति स्वजना हि द्रष्टव्याः यद्यपि बहुधैवागमनमुचितं सकृदप्यायास्यतीति परमोऽभिलाषो द्योतितः आयास्यतीत्युत्तरे मनोरथमाह । तर्हि द्रक्ष्यामः तद्वक्त्रमिति । ईश्वरप्रेरणाभावात् आज्ञाभावाच्च गमनमसम्भावितं यतस्त निरुद्धाः आगमनमेवहि निरोधज्ञापकम् सुनसमिति । सौन्दर्यं निरूपितं सुस्मितसहितमीक्षणं यत्रेति तस्य सर्वे कृपादिभावा निरूपिताः ॥ १९ ॥ नित्यं निरीक्षितमपि प्रेमाधिक्यात् कामितमिव जातम् अस्माकं तु तत्स्मरणं सर्वदैव स्मारकाणां बहुत्वादिति वक्तुं भगवत्कृतोपकारान्निदिशति । दावाग्नेरिति । साक्षान्नन्देन यावद्दृष्टं तावद्गणयति विशेषतः दावाग्निः कालीयह्रदे वातवर्षात गोवर्धनोद्धरणे वृषोऽरिष्टः सर्पः सुदर्शनः चकारात् सर्वे श्रुताः संगृहीताः द्वितीयचकारेण वरुणाद्युपद्रवात् किं बहुना दुरत्ययेभ्यो मृत्युभ्यः ये मृत्यवोऽप्रतीकार्याः कंसादयो दावानलादय एव वा कृष्णेन सुमहात्मनेति फलरूपेण साधनरूपेण आत्मत्वादुपकारानपेक्ष्यत्वं महद्वा बहूपकारत्वम् ॥ २० ॥

श्रीसुबोधिनी–सारः

सानुगो भृत्यभ्रातृभिः सहितः पापः कंसः स्वेन पाप्मना स्वदोषेण हतो दिष्ट्या मंगलं धर्म शीलानां साधूनां यदूनां यस्सदा द्वेष्टि कर्मणि षष्ठीयम् ॥ १७ ॥ नोऽस्मान् मातरं पितरं सुहृदः सखीन् गोपान् आत्मनाथं व्रजं च गावो गा वृन्दावनं गोवर्द्धनं स्मरति अपि किं कृष्णः ॥ १८ ॥ स्वजनानीक्षितुं द्रष्टुं सकृदेकवारं गोविंद आयास्यति अपि किं सुष्ठु नासिका यस्मिन् सुस्मितेन युक्तमीक्षणं यस्मिंस्तत् तस्य कृष्णस्य वक्रं मुखं तर्हि तदा वयं द्रक्ष्यामः विसर्गलोप आर्षः ॥ १९ ॥ दावाग्नेर्वातवर्षाच्च वाताद्वृष्टेश्च वृषात्सर्पाच्च समाहारद्वंद्वैक्यं दुरत्ययेभ्योऽनिवारणीयेभ्यो मृत्युभ्यः सुमहात्मना परोपकारकेण कृष्णेन रक्षिताः स्मः ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पापः पापाचारः कंसः स्वेन स्वकीयेनैव पाप्मना दुरितेन हेतुना सानुगः भ्रातृमल्लादिसहितो हत इति दिष्ट्या, तेनास्माकं महानानन्दो जात इत्यर्थः । तत्पापमेव दर्शयति—कर्मणि षष्ठी । यः कंसः साधून् परकार्यसाधकान् धर्मिष्ठान् यदून् सदा द्वेष्टि स्मेति ॥ १७ ॥ नोऽस्मान् सुहृदः पित्रादिरूपान् प्रेमवतः, मातरं यशोदां, सखीन् , गोपांश्च, आत्मा स्वयमेव नाथो रक्षको यस्य तं व्रजं, गावो गाः, वृन्दावनं, गिरिं गोवर्धनं चापि किं कृष्णः स्मरति ? ॥ १८ ॥ अपि किं स्वजनानस्मानीक्षितुं गोविन्दः सकृदेकदापि आयास्यति खलु ? । 'तेन किम्' इत्यपेक्षायामाह—तर्हि इति । यदि आयास्यति तर्हि तस्य वक्त्रं द्रक्ष्यामः । तद्वक्त्रदर्शनाभिलाषाय तत्सौन्दर्यहेतुं सूचयन्नाह - सुनसमिति । शोभना नासिका यस्मिंस्तत् । स्मितपूर्वकमीक्षणं यस्मिंस्तत् ॥ १९ ॥ भगवत्कृतानुपकाराननुस्मरति—दावाग्नेरिति । दावानलात् , वातात् , वर्षाच्च, वृषात् अरिष्टात् , सर्पात् कालियात् , सुदर्शनाच्च अन्येभ्यश्च दुरतिक्रमेभ्यः मृत्युभ्यो कृष्णेन वयं रक्षिता जाताः । 'एवं युष्मत्संरक्षणे किं कारणम्' इत्यपेक्षायाम् 'आश्रितार्तिहरणोदारचित्तत्वमेव' इत्याशयेनाह—सुमहात्मनेति ॥ २० ॥

अन्वितार्थप्रकाशिका

दिष्ट्येति । यः कंसः साधूनां धर्मशीलानां यदूनां सदा द्वेष्टि अद्वेट् । शेषे षष्ठी । स पापः पापाचारः कंसः स्वेन स्वकीयेनैव पाप्मना दुरितेन हेतुना सानुगः भ्रातृमल्लादिसहितो हत इति दिष्ट्या ॥ १७ ॥ अपीति । कृष्णः नोऽस्मान् सुहृदः पित्रादिरूपान् प्रेमवतः मातरं यशोदां सखीन् गोपांश्च आत्मा स्वयमेव नाथो रक्षको यस्य तं व्रजं गावो गाः । प्रथमार्षी । वृन्दावनं गिरिं गोवर्धनं चापि किं स्मरति ॥ १८ ॥ अपीति । अपि किं स्वजनानस्मानीक्षितुं गोविन्दः सकृदेकदापि आयास्यति खलु । यदि आयास्यति तर्हि सुनसं शोभननासिकं स्मितपूर्वकमीक्षणं यस्मिंस्तत् । तस्य वक्त्रं द्रक्ष्यामः । सलोप आर्षः ॥ १९ ॥ दावाग्नेरिति । दावाग्नेर्वातयुक्तवर्षाच्च वृषात् अरिष्टात् सर्पात् अघासुरात् कालियात्सुदर्शनाच्च अन्येभ्यश्च दुरतिक्रमेभ्यो मृत्युभ्यः सुमहात्मना कृष्णेन वयं रक्षिताः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

साधूनां मित्यादिषु माषाणामश्नीयादिति वत्संबंध विक्षायां कर्मणि षष्ठी ॥ १७ ॥ गोप्यश्च गोपाश्च गोपास्तानित्येकशेषेण गोपीनां गोपानां च ग्रहणं गोवाः ॥१८॥ आमास्पति अपि किं ॥१९॥ श्रीकृष्णकृतोपकारान् स्मरन्याहदावानेग्नेरिति ॥२०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दिष्ट्येति। पापः कंसः, सानुगः अनुगैः सह वर्त्तमानः, स्वेन स्वकीयेन, पाप्मना दुष्कर्मणा निदानेन, हतः। दिष्ट्या अयं नो महानन्द इत्यर्थः। तत्पापमेव व्यनक्ति साधनामिति। साधूनामिति कर्मणि षष्ठी। यः कंसः, साधूनां साधून्, धर्म एव शीलं येषां तेषां, धर्मशीलान्, यदूनां यदून् सदा द्वेष्टि अद्विक्षदित्यर्थः॥ १७॥ अपीति। हे उद्धव, कृष्णः, मातरं, सुहृदः, सखीन्, नोऽस्मान् पित्रादिरूपान्, गोपान्, आत्मा स्वयं नाथो यस्य तं, व्रजं, गावो गाः, वृन्दावनं, गिरिं गोवर्द्धनं चापि, स्मरति अपि स्मृतिपथं नयति कच्चिदित्यर्थः॥ १८॥ अपीति। हे उद्धव, गोविन्दः श्रीकृष्णः, स्वजनान् ईक्षितुं सकृदेकवारमपि, आयास्यति अपि, आगमिष्यति किमित्यर्थः। तर्हि यदा आगमिष्यति तदा, सु शोभना नासिका यस्मिंस्तत् सुनसं, सुस्मिते शोभनस्मितयुक्ते ईक्षणे नयने यस्मिंस्तत्, तद्वक्त्रं श्रीकृष्णमुखपङ्कजं, द्रक्ष्याम। मुकुन्दवक्त्रं द्रक्ष्यामीत्यर्थः॥ १९॥ एवं श्रीकृष्णं स्मृत्वाथ तत्कृतानुपकाराननुस्मरति। दावाग्नेरिति दावाग्नेर्दावानलात्, वातवर्षात् वातात्तीव्रमारुताद्वर्षाद्धस्तिहस्तसमघनाघनजलधाराभ्यश्चेत्यर्थः। वृषसर्पात् अरिष्टासुरादजगराच्चेत्यर्थः। एवंविधेभ्यः अन्येभ्यो दुरत्ययेभ्यः, मृत्युभ्यः, सुमहात्मना कृष्णेन, वयं रक्षिताः॥ २०॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दिष्ट्या कंस इति : १०.४६.१७.

दुष्टः स्वदोषेण विनाशमेति साधुः सुखं धर्मधियैव भुङ्क्ते।
न तत्र हेतुर्भगवाननन्तः शत्रौ च मित्रे च यतः स तुल्यः॥ २९॥

अपि स्मरतीति : १०.४६.१८.

अस्मद्बुद्ध्या वयं तस्या स्वाप्ताः सोऽस्मत्सुहृत्तमः। नैवेदृशी तु तद्धीः स्यात्तथाप्याशा गरीयसी॥ ३०॥

अप्यायास्यतीति : १०.४६.१९.

यस्मिन् साकमनेकगोपशिशुभिर्वृन्दावने क्रीडितं येभ्यो वृक्षलताद्रिकुञ्जविपिनारामेभ्य आप्तं सुखम्।
द्रष्टुं तानपि चेत्सकृत्कृतमतिः स्यात्तर्हि तेनैव तद्वक्त्राब्जेक्षणतृप्तहृष्टहृदयः स्यामुद्धवाऽहं कृती॥ ३१॥

दावाग्नेरिति : १०.४६.२०.

यो यद्रक्षणकृत्कृती सकृदपि स्यात्सोऽपि तस्मिन् क्वचित् सोपेक्षो न भवत्यसौ तु सदयः श्रीशोऽस्मदीयावने।
निस्तन्द्रं प्रतिवासरं प्रतिपलं यज्जागरूकः समुत्साहेनेत्युदिता न जातु भवितोपेक्षेति पृच्छामि ते॥ ३२॥

कृष्णप्रिया

आनन्द का विषय है कि साक्षात् पापावतार कंस अपने भाईयों के साथ अपने ही पापों से मरा। निरंतर वह ज्ञानमार्ग गामी साधुओं का शास्त्रोक्त कर्ममार्गानुयायी धर्मनिष्ठों का एवं भक्तिनिष्ठ यदुओं का द्वेष करता था और उनसे वैर रखता था॥ १७॥ भक्त हृदय श्रीनन्द बाबा कह रहे हैं भाई उद्धव! कभी श्रीकृष्ण हमरा स्मरण करते हैं। माता यशोदा को, उपनन्द आदि सुहृज्जनों को, स्तोक सुबल आदि मित्रों को गोपालों को, कृष्ण ही जिसके नाथ है वैसे व्रज को, गोधन को, श्रीवृन्दावन को, श्री गोवर्द्धन गिरिवर को (ये सर्व कृष्ण के आश्रित है उनके स्मरण के विषय है) कभी स्मृतिपथ में लाते है॥ १८॥ श्रीनन्दराय जी के प्रश्नोत्तर में श्री उद्धव जी ने कहा बाबा बार-बार नन्द-नन्दन सबका स्मरण करते हैं तब नन्दराय पृच्छा करते हैं कि गोविन्द श्रीकृष्ण एक बार भी अपने आर्त स्वजनों को देखने के लिए व्रज पधारेंगे? बाबा? उद्धव? जब भी पधारेंगे तब प्यारे कृष्ण का सुन्दर सुमङ्गल सुनासिका सस्मित करुणा पूर्ण नयन वाले मुख कमल का दर्शन करेंगे॥ १९॥ क्या कहा जाय उद्धव जी! हमारे लिए तो श्रीकृष्ण फल रूप है हमारी आत्मा है अतः सुमहात्मा श्री कृष्ण ने कालियदय में दावानल से गोवर्धन धरण समय भयानक बात वर्षा से कुबेर वरुण आदि के सर्व उपद्रवों से अरिष्टा सुर, केशी दानव सुदर्शन अजगर कालीय नाग, प्रलम्ब तृणावर्त आदि अनेक महामृत्युओं से हमारा संरक्षण किया है॥ २०॥

स्मरतां कृष्णवीर्याणि लीलापाङ्गनिरीक्षितम्[1]। हसितं भाषितं चाङ्ग सर्वा नः शिथिलाः क्रियाः॥ २१॥
सरिच्छैलवनोद्देशान् मुकुन्दपदभूषितान्। आक्रीडानीक्षमाणानां मनो याति तदात्मताम्॥ २२॥
मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ। सुराणां [2]महदर्थाय गर्गस्य वचनं यथा॥ २३॥
कंसं नागायुतप्राणं [3]मल्लौ गजपतिं तथा। अवधिष्टां[4] लीलयैव पशूनिव मृगाधिपः॥ २४॥

---

1. क्षयम्–वीर. विज.। २. महते–वीर.। ३. मल्लान्–वीर.। ४. धीत्तान्–इति कस्यचित्।

कर्दमक्षमा

अन्वयः—हे अङ्ग ? कृष्णवीर्याणि, लीलापाङ्गनिरीक्षितम्, हसितम्, च, भाषितम्, स्मरताम्, नः, सर्वाः, क्रियाः, शिथिलाः, भवन्ति ॥२१॥ हे अङ्ग ? मुकुन्दपदभूषितान्, सरित्शैलवनोद्देशान्, आक्रीडान्, ईक्षमाणानाम्, मनः, तदात्मताम्, याति ॥ २२ ॥ गर्गस्य, यथा, वचनम्, "तदनुसारेण" सुराणाम्, महदर्थाय, रामम्, च, कृष्णम्, च, इह, सुरोत्तमौ, प्राप्तौ, "इति" अहम्, मन्ये ॥ २३ ॥ मृगाधिपः, पशून्, इव, लीलया, एव, नागायुतप्राणम्, कंसम्, नागायुतप्राणम्, गजपतिम्, तथा, मल्लौ, अवधिष्टाम् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च । स्मरतामिति । लीलयाऽपांगेन निरीक्षितम् । अंग हे उद्धव ॥ २१ ॥ न केवलं शिथिला एव किं तु शनैःशनैरुपरमन्तीत्याह । सरिच्छैलेति । सरितश्च शैलाश्च वनोद्देशाश्च तान् । आक्रडीन् क्रीडास्थानानि तदात्मतां मुकुन्दरूपताम् ॥ २२ ॥ सुराणामर्थायेह प्राप्तौ महद्गंभीरं गर्गस्य वचनं यथा ॥ २३ ॥ न केवलं तद्वचनानुसारेणैव किं तु व्यवहारसंवादादपीत्याह । कंसमिति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदाह-किञ्चेति । क्रिया गृहादिविषयाः । एवं पद्यद्वयेन माधुर्यप्रभावौ स्मृतौ, तत्रोभयथापि वैयग्र्यं लब्ध्वा एतदेव प्रात्यहिकमात्मदुःखं निवेदयति-स्मरतामिति । कृष्णेति-कृष्णस्येत्यर्थः । "सुपां सुलुक्-"इत्यादिना सुपो लुक् । अत एव लीलेत्यादावप्यन्वयः । वीर्याणि दावाग्निमोक्षणादिरूपस्वभावमयचरितानि । न केवलं तान्येवापि तु माधुर्यमयचरितानि चेत्याह-लीलेति । लीला नेत्रयोः स्वाभाविकविलासः, तत्पूर्वकमपांगेन लज्जास्वभावान्नेत्रैकदेशेनैव निरीक्षितम्, सर्वत्रैव स्निग्धस्वभावतया सावधानमीक्षणम्, तथा तत्रैव हसितं तत्रैव भाषितञ्च स्मरतां तद्व्यसनमापन्नानां सर्वा भोजनादिक्रियाः शिथिला अंतर्व्यग्रतया बहिः प्रयत्नशून्याः, ईश्वरेणैव प्रवर्तिता इत्यर्थः । क्रियाभिरन्यचित्ततया वाऽस्वस्थास्तिष्ठेम तदपि न सिद्ध्येदिति भाव ॥ २१ ॥ तदात्मतां तस्मिन्नेव व्याप्तताम् । ननु गृहावस्थाने पुत्रस्मरणमधिकं स्यात्तत्त्यागाय गाः पालयतां यमुनां तीरे भ्रमतामित्याशंक्य तेनाप्यप्रतिकारं निवेदयति-सरिदिति । उद्देशाः, तान् मुकुन्दस्याजगररक्षणादिभ्योऽस्मदादिमुक्तिदातृत्वेन तन्नाम्ना व्रजे विख्यातस्य पदैश्चरणचिह्नैः श्रीपृथ्वीदेव्यापि स्नेहादद्यापि निजांके तथैव रक्ष्यमाणैर्विभूषितान् । तथाऽक्रीडान् तत्तत्क्रीडाचिह्नमनोहरान् । ईक्षमाणानां प्राणिमात्राणां किमुतास्माकं मनस्तदात्मतां तत्स्फूर्तिमयतां याति । अस्माभिः किं कर्तव्यमिति भावः ॥ २२ ॥ गंभीरं दुर्ज्ञेयार्थम् 'प्रागयं वसुदेवस्य' इत्याद्युक्तरूपम् । यद्वा-महते भूभारसंहारलक्षणायार्थाय प्रयोजनाय । इह च सामानाधिकरण्ये महतष्टेराकाराभावश्छांदसः । एवं हठात्पुनरागतेनमाधुर्यस्मरणेन लब्धचित्ताः स्वस्थाः पुत्रबुद्ध्या स्नेह एवात्यन्तातर्हिहेतुरित्याशंक्य तदाच्छादनाशया विश्लेषविशेषमयप्रीतिजातिस्वभावात्तन्माहात्म्यकीर्तनेच्छया वा पुनः प्रभावान्स्मरति-मन्य इति चतुर्भिः । इह मद्गृहे, प्राप्तौ स्वाच्छन्द्येनैव जन्मानुकृतवन्तौ, सुरोत्तमौ नारायणसमौ कावपि मन्ये सभावयामि । इति पुत्रभावस्यैव सहजत्वमंतर्गतत्वं च बोधयति ॥ २३ ॥ तस्य गर्गस्य वचनानुरोधेन न सुरोत्तमावपि तु व्यवहरणं व्यवहारः कृतिरूपः संवदतीति संवादः सम्यग्वक्ता व्यवहार एव संवादो व्यवहारसंवादस्तस्मात् । अवधिष्टां नाशयामासतुः । मल्लौ चाणूरमुष्टिकौ । तथाशब्देन मल्लयोर्गजपतेश्च नागायुतप्राणत्वमुक्तम् । अवधिष्टां हतवन्तौ । यौ यश्च यथास्वमिति शेषः । मृगाधिप इत्येकत्वं प्रत्येकदृष्टान्तत्वात् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं पद्यद्वयेन माधुर्य्यप्रभावौ स्मृतौ तत्रोभयथापि स्मरणे वयग्र्यं लब्ध्वा एतदेव प्रात्यहिकमात्मदुःखं निवेदयति । स्मरतामिति । कृष्णेति । कृष्णस्येत्यर्थः सुपां सुलुगित्यदिना सुपो लुक् अत एव लीलेत्यादावप्यन्वयः कृष्णेति मुहुरुक्तिः पितुः पुत्रस्य मूलनामन्यासक्तेः वीर्याणि दावाग्निमोक्षणादिरूपप्रभावमयचरितानि न केवलं तानि अपि तु माधुर्य्यमयचरितानि चेत्याहि लीलेत्यादि । लीला नेत्रयोः स्वाभाविकविलासः तत्पूर्वकमपाङ्गेन लज्जास्वभावान्नेत्रैकदेशेनैव निरीक्षितं सर्वत्रैव स्निग्धस्वभावतया सावधानमक्षिणं तथा तत्रैव हसितं तत्रैव भापितं च स्मरतां तद्व्यसनमापन्नानां सर्वा भोजनादिक्रियाः शिथिलाः अन्तर्व्यग्रतया वहिः प्रयत्नशून्याः ईश्वरेणैव प्रवर्त्तिता इत्यर्थः । क्रियाभिरन्यचित्ततया वा स्वस्थास्तिष्ठेम तदपि न सिध्येदिति भावः ॥ २१ ॥ ननु स्वगृहावस्थाने पुत्रस्मरणमधिकं स्यादिति तत्त्यागाय स्वयमेव गाः पालयता यमुनातीरादौ भ्रम्यतामित्याशङ्क्य तेनाप्य प्रतीकारं निवेदयति । सरिदिति । उद्देशाः प्रदेशाः तान् मुकुन्दस्य अजगरवरुणादिभ्याऽस्मदादिमुक्तिदातृत्वेन तन्नाम्ना व्रजे विख्यातस्य पदैश्चरणचिह्नैः श्रीपृथिवीदेव्यापि स्नेहादद्यापि निजाङ्के तथैव रक्षप्राणैर्विभूषितान् तथा आक्रीडान् तत्तत् क्रीडाचिह्नमनोहरान् ईक्षमाणानां प्राणिमात्राणां किमुतास्माकं मनस्तदात्मतां तत् स्फूर्त्तिमयतां याति अस्माभिः

किं कर्त्तव्यमिति भावः ॥ २२ ॥ एवं हठात् पुनरागतेन माधुर्यस्फुरणेन लब्धचित्तास्वास्थ्यः पुत्रबुद्ध्या स्नेह एवात्यन्तार्तिहेतुरित्याशङ्क्य तदाच्छादनाशया विश्लेषविशेषमयप्रीतिजातिस्वभावात्तन्माहात्म्यकीर्त्तनेच्छया वा पुनः प्रभावान् स्मरति । मन्य इति चतुर्भिः । इह मद्गृहे प्राप्तौ स्वाच्छन्द्येनैव जन्मानुकृतवन्तौ सुरोत्तमौ नारायणसमौ कावपि मन्ये सम्भावयामीति पुत्रभावस्यैव सहजत्वमन्तर्गतत्वञ्च बोधयति ॥ २३ ॥ मल्लौ चाणूरमुष्टिकौ तथाशब्देन मल्लयोर्गजपतेश्च नागा युतप्राणत्वमुक्तम् । अवधिष्टां हतवन्तौ यो यश्च यथास्वमिति शेषः मृगाधिप इत्येकत्वं प्रत्येकदृष्टान्तत्वात् ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तथैव लीलामपि वर्णयन् तस्या मनोहरताञ्च दर्शयन् निजातिदीनतामाह—स्मरतामिति । कृष्णस्य वीर्य्याणि पूतनावधाद्यद्भुतचरितानि । कृष्णस्येति समासान्तः प्रविष्टमपि कृष्णपरैरपि सर्वयोज्यम् । एवं लीलेति च, लीलात्र विलासविशेषः । एवं वीर्य्यादीनामपि सर्वेषां सर्व्वचित्ताकर्षकत्वमभिप्रेतम्, तेषाञ्च चित्ताकर्षणे यथोत्तरं श्रेष्ठ्यम् । तत्र सर्वेभ्यो भाषितस्य पर्य्यवसितं श्रेष्ठ्यं (भा० १०।३१।८) 'मधुरया गिरा वल्गुवाक्यया' इत्यादि वचनतो व्यक्तमेव, भाषिते हसितादेरपि समुचितत्वात्, क्रिया नित्यनैमित्तिकादिकर्म्माणि भोजनादयो व्यापारा वा, शिथिला मन्दमन्दा बभूवुः, क्रियाभिरन्यचित्ततया वा क्षणं स्वस्थास्तिष्ठेम, तदपि न सिध्येदिति भावः ॥ २१ ॥ ननु तर्हि तद्वीर्य्यादिस्मरणमेवत्यज्यताम्? तत्राह—सरिदिति; सरितः श्रीयमुनाद्याः, शैलान् श्रीगोवर्द्धनादीन् वनोद्देशांश्च वनमयप्रदेशान् काम्यकवनादीन्, मुकुन्दः परमानन्तप्रदो मत्पुत्रस्तस्य पदैर्भूषितान्, यत आक्रीडानिति पदानामपि परमानन्दप्रदत्वमभिप्रेतम्, अतस्तदीक्षणादप्युपरन्तुं न शक्नुम इति भावः । गोविन्देति पाठेऽपि गोकुलेन्द्रतया व्रजजनैकगतित्वेन तथैवार्थः । पदानां तावच्चिरकालेऽप्यम्लानतादिकारणमादावुक्तमेव । अत एवैकादशे वक्ष्यते, (भा. ११।१।६)—पदैस्तानीक्षतां, क्रियाः' इति, यद्वा, मुकुन्दस्य पदाब्जाभ्यां विचित्रक्रीडया विविधश्रीविस्तारणेन भूषिताना क्रीडांश्च क्रीडाविशेषस्थानानि पावनसर, प्रभृतीनि, तदात्मतां मुकुन्दमयतामेव ॥ २२ ॥ ततश्च परमार्त्तः सन् पुत्रबुद्ध्या स्नेह एवात्यन्तार्त्तिहेतुरित्याशंक्य स्वचित्ताश्वासनाय तामाच्छादयन्निव, किंवा तथापि नीचेष्वस्मासूपेक्षा, तस्यातुच्छत्वात्, सम्बन्धासम्भवेन किल घटेतैवेत्यतिदैन्येनाह—मन्य इति । चकारौ द्वयोरपि प्राधान्य बोधनार्थम्, अतः कृपाकोमलस्वभावस्य बन्धुवत्सलस्य रामस्यापि कृष्णस्येवास्मासूपेक्षोचितैवेति भावः । इह मर्त्त्यलोके प्राप्तौ अवतीर्णौ सुरोत्तमौ श्रीहरि-हरौ श्रीवासुदेव-संकर्षणौ वा चतुर्व्यूह-श्रेष्ठौ मन्ये । सुराणामर्थाय भूभारहरणादिप्रयोजनार्थम्, अतोऽस्माकं मर्त्यानां हितं कुतस्ताभ्यां कार्य्यमिति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, सुराणमपि मध्ये सुरोत्तमौ, महतां भक्तानामर्थाय, ततो भक्तानां यादवानामेवार्थः कर्त्तुमुपयुज्यते, न त्वस्माकमभक्तानामिति भावः । इयमत्यन्तदैन्योक्तिरेय, अथवा एवमत्र चित्रविचित्रक्रीडादिना कृतमप्यस्माकं सुखमधुना परित्यागाद्विपरीतमेव वृत्तमित्याह—मन्य इति, (भा. १०।८।१९) 'गोपायस्व समाहितः' इति गर्गस्य सहद्वचनं यथावन्मन्ये, किमपि तु नैव, किन्तु इह व्रजे प्राप्तौ आगतौ यत् तत् सुराणामेवार्थाय पूतनादिदैत्यवधार्थम्, न चास्माकं सुखलाभायेत्येव मन्ये, परित्यागेनात्यन्तदुःखप्रदानात्, पूर्वसुखस्यापि परमदुःखहेतुत्वेन दुःख एव पर्य्यवसानाच्च ॥ २३ ॥ तथा शब्देन मल्लयोर्गजपतेश्च नागायुतप्राणत्वमुक्तम् । अवधिष्टां हतवन्तौ । एव शब्देन परिश्रमादिकं निरस्तम् । तत्रोपयुक्तो दृष्टान्तः—पशून् सिंह एवेति ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

आत्मनोऽवस्थानप्रकारमाह द्वाभ्याम् । अङ्ग हे उद्धव ! भगवतो वीर्याणि चेष्टितानि लीलया अपाङ्गेन निरीक्षणं च भाषितं च स्मरतां नोऽस्माकं सर्वाः क्रियाः व्यापाराः शिथिलाः ॥ २१ ॥ न केवलं शिथिला एव किन्तु शनैरुपरमन्त्यपीत्याह । सरिदिति । सरितः शैलाश्च वनोद्देशाश्च तानाक्रीडानि क्रीडास्थानानि चेक्षमाणानां नो मनस्तदात्मतां कृष्णानन्यविषयक्तां प्राप्नोति ॥ २२ ॥ अनितरसाधारणचेष्टितैर्लिङ्गै रामकृष्णौ भगवदवतारावित्यध्यवस्यति । मन्य इति । रामं कृष्ण च सुरोत्तमौ वासुदेवसङ्कर्षणौ इह लोके प्राप्तावतीर्णौ मन्ये किमर्थं सुराणां महतेऽर्थाय प्रमोजनाय तत्र शिष्टसम्वादं प्रमाणयति । गर्गस्य वचनं यथेति ॥ २३ ॥ तत्र लिङ्गान्याह । कंसमिति त्रिभिः । नागायुतस्य गजायुतस्य प्राणो बलं यस्य तं कंसं बहुवचनान्तपाठे तान्मल्लान् गजपतिं गजेन्द्रं कुवलयापीडं लीलयैवावधिष्टां हतवन्तौ यथा सिंहः पशूंस्तद्वत् ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

क्रियाः गृहादिविषयाः ॥ २१ ॥ तदात्मतां तस्मिन्नेव व्याप्तताम् ॥ २२ ॥ महते अर्थाय प्रयोजनाय ॥ २३ ॥ नागायुतवान् प्राणो बलचेष्टा यस्य तथा तम् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु तदीयमुखचन्द्रस्मरणं सुधयैव सर्वे सन्तापाः शाम्यन्तीति सत्यं तत्स्मरणं सर्वसन्तापहरमपि सम्प्रति दुरदृष्टवशादस्माकं सर्वसन्तापकरमेवाभूदित्याह । स्मरतामिति । क्रियाः शिथिला इति स्नानभोजनपानाद्या अभ्यासवशाज्जायमाना अपि

सम्प्रति शिथिली भवन्त्यत एव न जीवाम इति भावः ॥ २१ ॥ ननु यद्येवं तर्हि गृहावस्थाने पुत्रस्मरणमधिकं स्यादतस्तत्यागाय स्वयमेव गाः पालयता भवता यमुनातीरादौ भ्रम्यतामित्याशङ्क्य तेनाप्यप्रतीकारं ज्ञापयति । सरिदिति । उद्देशाः प्रदेशाः तदात्मतां तत्स्फूर्त्तिमयतां तस्मिन् लीनतां वा ॥ २२ ॥ विश्लेषमयप्रीतिजातिस्वभावादेव सहसा स्फुरितेन तदैश्वर्य्येण क्षणं लब्धविवेक इवाह । मन्ये इति । इह मद्गृहे प्राप्तौ मम च वसुदेवस्य च भाग्यात् पुत्रावभूतामित्यर्थः । सुराणाम् अर्थाय कंसादिशत्रुवधलक्षणाय प्रयोजनाय महत् गम्भीरं गर्गस्य वचनं यथा ॥ २३-२४ ॥

गूढार्थदीपिनी

आक्रीडानि क्रीडास्थानानि ॥ २२ ॥ सुराणामर्थाय कार्यसिद्धये । महद् गम्भीरं यथा यथार्थमेव । यद्वा । महते अर्थाय भूभारहरणाय ॥ २३ ॥ नागायुतस्य हस्तिदशसहस्रस्य प्राणी बलं यस्मिन् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अङ्ग हे उद्धव ! लीलया अपाङ्गेन निरीक्षितम् ॥ २१ ॥ आक्रीडान् क्रीडास्थानभूतान् सरिदादीन् ॥ २२ ॥ महद्गूढार्थगर्गस्य वचनं यथा तथैवायं सुरोत्तमौ सर्वदेवश्रेष्ठौ मन्ये ॥ २३ ॥ तयोः कर्माण्यपि तौ भगवन्ताविति सूचयन्तीत्याह । कंसमित्यादित्रिभिः ॥ २४-२९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दावाग्नेरिति । अङ्गस्मरणाभावात्कथापूर्वापरीकारादिकं युक्तं ॥ २१ ॥ सर्वा नः क्रिया गृह्यकर्माणि शिथिला मनः प्राशस्त्याभावात् ॥ २२ ॥ मुकुन्दपदभूषितांस्तच्चरणचिह्नान् आक्रीडानि क्रीडास्थानानि तत्साधनानीति वा मनस्तदात्मतां तद्व्यग्रतां ॥ २३ ॥ पुरोधाय यदुपदिदेश तदुपदिशति ॥ मन्य इति । सुराणामर्थाय प्रयोजनमुद्दिश्य सुरोत्तमावेवेह प्राप्ताविति गर्गस्य महदनन्यथाभवदिति वचनं यथा तथाऽहं सुरोत्तमौ मन्ये । अविस्मरणमात्रं ममालमिति ध्वनिः ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एष्यदप्यप्रार्थितमपि सर्वमेव हितं करोतीति श्रुते तर्हि कथं न गम्यत इत्याशङ्क्याह । स्मरतामिति । कृष्णवीर्यंस्मरतामप्यस्माकं सर्वाः क्रियाः शिथिला भवन्ति । भगवतः स्थाने गमनं प्रेम्णा भवति अस्मदीयो भगवान् किमिति तत्र तिष्ठति गत्वा समानेय इति तत्र वीर्याणि स्मृत्वा एतावन्तमुपकारं भगवान् कृतवान् किमस्माभिः कृतं के वा वयं कथं चैतत् धार्ष्ट्यमिति शैथिल्यं भवति । सुखार्थं चेत् कृष्णत्वात् सदानन्द इति स्मृत एव सुखं प्रयच्छति । अत उभयथापि गमनं बाधितम् । अथेन्द्रियसुखार्थं भगवान् द्रष्टव्य इति चेत्तत्राह । लीलापाङ्गनिरीक्षितमिति । लीलया यदपाङ्गनिरीक्षणं तत्स्मरतामिति भगवतो दृष्टिश्चेद्भाव्यते तावदेव पश्यतीति बुद्ध्या चक्षुः शाम्यति लीलापूर्वकं पश्यतीति लीलादर्शनेन प्राणास्तृप्यन्ति अपाङ्गेन यत्पश्यति तेनैश्वर्यं प्रकटयन् धाष्ट्र्यं दूरीकरोति हसितेन च मोहयति भाषितेन श्रोत्रादिसुखं सम्पादयति अतः सर्वार्थं प्रयत्नान् दूरीकरोति नास्माकं गमनसामर्थ्यमिति भावः । चकारात्सर्वं भगवच्चरित्रम् अङ्गेत्यप्रतारणाय सर्वाः दैहिका मानसिका लौकिका वैदिकाश्च तदर्थमुद्योगे तत्स्मरणमावश्यकं स्मरणे च गमनासम्भवः ॥ २१ ॥ किञ्च क्षणे क्षणे वयं मुक्ताश्च भवाय इत्याह । सरिच्छैलेति । यत्र यत्र भगवता स्वानुभावः प्रकटीकृतः स्थापितः तद्दर्शनेनैव मनस्तदात्मतां भगवदावेशमेव प्राप्नोति तेन सुतरामेव गमनाभावः सरिद्यमुना शैला गोवर्द्धनादयः वनोद्देशाः वृन्दावनभूयमयः । एतेषु भगवदनुभावार्थमाह । मुकुन्दस्य मोक्षदातुः पदैर्भूषितानिति आभासिप्रेतेष्वपि कदाचित्पदानि भवन्तीति तेषु भगवतस्तात्पर्यार्थमाह । आक्रीडानिति । आसमन्तात् क्रीडास्थानभूतान् ईक्षमाणानामिति नैकधा दर्शनमावश्यकम् । ईक्षणमेव च मनसस्तदात्मकत्वे हेतुः ॥ २२ ॥ ननु कथमेवं सामर्थ्यमवगतं विपरीतबुद्धेर्दृढत्वादिशङ्क्याह । मन्ये कृष्णं च रामं चेति । महत्त्वाद्वस्तुसामर्थ्येनैव मनस्तदात्मकं भवतीति श्रुतमपि कदाचिदसम्भावनया प्रतीतिं न गृह्णातु अनुभवः प्रतीतिं गृह्णातीति मन्य इत्याह । कृष्णं च रामं चेति । चकारद्वयं सर्वदेवगणसमुच्चयार्थं ननु तादृशयोः सुरोत्तमयोर्ब्रह्मादेरप्यधिकयोरिहागमने को हेतुरित्याशङ्क्याह । सुरणां महत्कार्यार्थमिह स्वयमेव समागतौ नतूत्पन्नौ येन विना तत्कार्यं न भवति ननु तर्को न प्रमाणमिति कथं निर्णतुं शक्यते तत्राह । गर्गस्य वचनं यथेति । गर्गस्य तथैव वचनम् ॥ २३ ॥ अतः प्रमाणानुभवाभ्यां देवोत्तमत्वं सिद्धमिति माहात्म्यज्ञानं युक्तमेव सामर्थ्येनापि तन्निश्चीयत इत्याह । कंसमिति त्रिभिः । सात्त्विकी राजसी तामसी च लीला क्रमेण निरूपिता नागायुतस्य हस्तिनां दशसहस्रस्य यावद्बलं तावान् प्राणो बलं यस्य मल्लावपि चाणूरमुष्टिकौ नागायुतप्राणौ गजपतिः कुवलयापीडस्तथा वस्तुतोऽयमपि नागायुतप्राणः चाणूरस्तु स्वापेक्षया हीनत्वं युद्धार्थं वदन् तथोक्तवान् । सहस्राणां वा द्विपानां सत्त्वं बिभर्त्तीति तत्र योजनीयम् अन्यथा तथेति वचनमसङ्गतं स्यात् । ततश्चतुर्णां बलं चत्वारिंशत्सहस्रगजपरिमितं भवति एतादृशानपि लीलयैवावधिष्टां तर्हि मन्त्रादिसामर्थ्येन हतवानित्याशङ्क्य दृष्टान्तमाह । पशूनिव मृगधिप इति । सिंहः स्वभावत एव पशून् हन्ति गजो हि तस्य प्रतिपक्ष्यपि भवति नतु पशवो गवादयः अतस्ततोऽनन्तगुणं सामर्थ्यं भगवतः सूचितम् ॥ २४ ॥

श्रीसुबोधिनी-सारः

कृष्णस्य वीर्याणि लीलयाऽपांगेन निरीक्षणं हसितं भाषितं च स्मरतां नोऽस्माकं सर्वाः क्रियाः शिथिला भवन्ति हे अंग ॥ २१ ॥ मुकुन्दस्य पदैर्भूषितान् नदीपर्वतवनप्रदेशान् आ सर्वतः क्रीडा येषु तान् ईक्षमाणानां पश्यतां मनः तदात्मनां तद्रूपतामेति तन्निष्ठं भवतीत्येके उपरमतीत्येके ॥ २२ ॥ कृष्णं रामं चेह भूतले प्राप्तौ सुरोत्तमौ देववरौ अहं मन्ये सुराणामर्थाय गर्गस्य वचनं महत् गम्भीरं यथावत् ॥ २३ ॥ नागानां हस्तिनामयुतवत्प्राणो बलं यस्य यस्मिन् वा तं कंसं गजपतिं कुवलयापीडं मल्लौ चाणूरमुष्टिकौ मल्लानिति क्वापि पाठः अवधिष्टाम् अहिंसिष्टां रामकृष्णौ मृगाधिपः सिंहः पशूनिव लीलया ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'एवं चेत्तर्हि तद्दर्शनार्थं तत्रैव कुतो न गम्यते ?' तत्राह—स्मरतामिति । 'तद्भक्तस्य तवाप्यत्र नासम्भावना' इति सूचयन् सम्बोधयति—अङ्गेति । कृष्णस्य वीर्याणि गोवर्धनोद्धरणादिपराक्रमान् लीलया अपाङ्गेन निरीक्षणं च हसितं च भाषितं च स्मरतां नोऽस्माकं सर्वा एव क्रियाः भोजनाद्यावश्यकव्यापारा अपि शिथिला जाताः । अतस्तत्र गमनेऽप्यसामर्थ्यमित्याशयः ॥२१॥ 'तद्विस्मृतौ कदाचित् स्वास्थ्यसम्भवेऽपि परं तद्विस्मृतिरेव तावन्न सम्भवति, स्मारकबहुत्वात्' इत्याह—सरिदिति । सरित् यमुना तत्र जलाहरणार्थमवश्यं गन्तव्यम्, तत्रापि कालियदमनादि तेन कृतम्, अतः सापि तत्स्मारिका । तथा शैलवनोद्देशेऽपि गाश्चारयितुमवश्यं गन्तव्यम्, तेऽपि गाश्चारयतो मुकुन्दस्य चरणेनाङ्किताः । आक्रीडानि क्रीडास्थानानि सरितादीनि ईक्षमाणानां नोऽस्माकं मनस्तदात्मतां कृष्णाकारतां याति गच्छति ॥ २२ ॥ मनुष्यादावसम्भावितैर्भगवच्चरितैर्भगवत्त्वमध्यवस्यति—मन्य इति । रामं च कृष्णं च सुरोत्तमौ वासुदेवसङ्कर्षणाविहलोके प्राप्ताववतीर्णौ मन्ये । तत्प्रयोजनमाह—सुराणां महते अर्थाय असुरादिसंहारेण यज्ञादिप्रवर्तनेन च भागसिद्धय इति । भगवदवतारत्वे शिष्टसंवादं प्रमाणमाह—गर्गस्य वचनं यथेति । 'तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः' इत्युक्तत्वात् ॥ २३ ॥ 'यद्यपि समत्वोक्त्याऽवतारत्वं गर्गेण नोक्तं तथापि तत्पराक्रमैस्तदनुमीयत' इत्याशयेनाह—कंसमिति त्रिभिः । नागायुतस्य हस्तिदशसहस्रस्य प्राणो बलं यस्य तं कंसं, तथा मल्लौ चाणूरमुष्टिकौ महाबलौ, गजपतिं 'सहस्रद्विपसत्त्वभृत्' इत्युक्तविधं कुवलयापीडं च लीलया अनायासेनैव अवधीष्टां हतवन्तौ । ननु 'एवंभूतानामपि मणिमन्त्रादिप्रयोगेण हनने किमाश्चर्यम्' इति शङ्कां निराकुर्वन्ननायासेन हनने दृष्टान्तमाह—मृगाधिपः सिंहः इतरान् पशून् यथा हन्ति तद्वदिति ॥ २४ ॥

अन्वितार्थप्रकाशिका

स्मरतामिति । अङ्ग हे उद्धव ! कृष्णस्य वीर्याणि गोवर्धनोद्धरणादिपराक्रमान् तथा तस्य लीलया अपाङ्गेन निरीक्षितं च हसितं च भाषितं च स्मरतां नोऽस्माकं सर्वा एव क्रियाः भोजनाद्यावश्यकव्यापारा अपि शिथिला जाताः ॥ २१ ॥ सरिदिति । मुकुन्दस्य पदैश्चिह्नैर्भूदेव्या तथैव रक्षितैर्भूषितान् सरिच्छैलवनोद्देशान् आक्रीडानि क्रीडास्थानानि ईक्षमाणानां नोऽस्माकं मनस्तदात्मतां कृष्णाकारतां याति गच्छति ॥ २२ ॥ मन्य इति । सुराणामर्थाय असुरादिसंहारेण यज्ञादिप्रवर्तनेन च भोगसिद्धये रामं च कृष्णं च सरोत्तमौ वासुदेवसंकर्षणाविह लोके प्राप्ताववतीर्णौ मन्ये । अतः महत् गम्भीरं गर्गस्य वचनं "नारायणसमो गुणैः" इत्यादि । यथा यथार्थमेव महदित्यर्थविशेषणत्वेन समासे आत्वापत्तिः ॥ २३ ॥ कंसमिति । नागायुतस्य हस्तिदशसहस्रस्य प्राणो बलं यस्य तं कंसं तथा मल्लौ चाणूरमुष्टिकौ महाबलौ गजपतिं सहस्रद्विपप्रत्त्वभृदित्युक्तविधं कुवलयापीडं च लीलया अनयासेनैव मृगाधिपः सिंहः इतरान्पशून्यथा हन्ति तद्वत् अवधिष्टां हतवन्तौ ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृष्णेति लुप्तषष्ठीकपदं तस्य लीलेत्यादिपदैः सम्बधः अंग हे उद्धव कृष्णस्य लीलया अपांगः कटाक्षस्तत्सहितमीक्षितं ॥ २१ ॥ आक्रीडान् विहारस्थानानि ॥ २२ ॥ सुराणामर्थाय इह प्राप्तौ महदुदारंगर्गस्य वचनं यथा तथा ॥२३॥ अवधिष्टां घातयामासुतुः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आत्मनोऽवस्थानप्रकारमाह । स्मरतामिति । हे अङ्गोद्धव, कृष्णवीर्याणि भगवतः कृष्णस्य चेष्टितानि, लीलया अपाङ्गेन कटाक्षेण निरीक्षणं च, हसितं च, भाषितं च, स्मरतां, नोऽस्माकं, सर्वाः क्रिया व्यापाराः, शिथिलाः भवन्ति ॥ २१ ॥ न केवलं शिथिला एव, किं तु शनैरुपरमन्तीत्याह । सरिदिति । मुकुन्दः श्रीकृष्णस्तस्य पदाभ्यां भूषितास्तान्, सरितो यमुनाद्या नद्यश्च शैला गोवर्द्धनादयश्च वनोद्देशा वनप्रदेशाश्च तान्, आक्रीडानि श्रीकृष्णक्रीडास्थानानि च, ईक्षमाणानां, नः अस्माकं, मनः तदात्मतां कृष्णात्मतां कृष्णानन्यविषयतां, याति प्राप्नोति ॥ २२ ॥ अनितरसाधारणैश्चेष्टितैर्लिङ्गैः, रामकृष्णौ भगवदव-

तारावित्यध्यवस्यति ।। मन्य इति । हे उद्धव, रामं कृष्णं च, सुराणां देवानां, महदर्थाय महते प्रयोजनाय, इह लोके, प्राप्तौ अवतीर्णौ सुरोत्तमौ, गर्गस्य वचनं यथा यथार्थतया स्वीकृत्य, मन्ये च एव ।। २३ ।। न केवलं गर्गवचनानुसारेणैवं मन्ये अपि तु व्यवहारसंवादादपीत्याह । कंसमिति । नागानां हस्तिनामयुतस्य प्राणो बलं तद्वत् प्राणो बलं यस्य तं, कंसं, तथा मल्लौ चाणूरमुष्टिकौ, तथा गजपतिं कुवलयापीडं, मृगाधिपः पशून्, इव, लीलया एव, अवधिष्टां हतवन्तौ ।। २४ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स्मरतामिति : १०.४६.२१.

दृष्ट्वा तदोद्धव तदीयचरित्रजातमत्यद्भुतं शिथिलभावमवाप चेतः ।
स्मृत्वाऽधुनेत्युभयथापि गृहात्मकृत्ये शैथिल्यमेवमजनीति किमु ब्रवीमि ।। ३३ ।।

सरिदिति : १०.४६.२२.

तच्चरित्रेक्षणादस्मिन् मनो याति तदात्मताम् । तन्मनोऽस्मासु कस्मात्स्यान्न तादृक् चरितं हि नः ।। ३४ ।।

कंसमिति : १०.४६.२४.

यद्भीभ्रान्तधियो द्रवन्ति निभृतं ब्रह्मेन्द्ररुद्रा अपि यैरव्याहतवैभवैश्च निखिला क्रान्तेयमुर्वी सखे ।
ते दैत्या बक-धेनुकप्रभृतयो मल्लाश्च कंसोऽप्यसौ नीता येन सलीलमेव विलयं तस्मात्स एवाच्युतः ।। ३५ ।।
प्रागेवोद्धव निर्णीतं निजानुभवतो मया । सर्वविद्गर्गवाचाऽपीत्यस्मि तद्वशगोकुलः ।। ३६ ।।
व्यापारं परिकल्प्य कञ्चिदिह तत्संदिष्टविश्वस्तधीः कालातिक्रमणं करोमि कथमप्यस्यास्तु वृत्तं शृणु ।
नो भुङ्क्ते न च तत्प्रभृत्यपि गृहाचारं मनागीक्षते दूरे सुप्तिसुखं तु तद्गतमनास्तिष्ठत्यलं चित्रवत् ।। ३७ ।।

कृष्णप्रिया

हे अङ्ग ! हे प्यारे उद्धव ! प्रियतम कृष्ण के अलौकिक वीर्य, उनका लीला मधुर कृपा कटाक्षों सहित अवलोकन मन्दस्मित हास्य मुस्कान, श्रोत्रसुखावह भाषण, अधिक क्या कहें प्यारे का सारे चरित्र का स्मरण होते ही लौकिक वैदिक कायिक वाचिक मानसिक समस्त क्रिया विसर जाते हैं ।। २१ ।। श्रीमुकुन्द के श्रीचरणों के ध्वज वज्र यवाङ्कुश आदि चिह्नों से समलंकृत श्रीयमुनादि नदी गोवर्धन आदि गिरि वृन्दावनादि वनों की भूमि, एवं उनके जो-जो क्रीडा-विहार के स्थल हैं उनका हमें जब दर्शन होता है तब हमारा मन तद्रूप हो जाता है, उनका दर्शन स्वाभाविक ही है क्योंकि वे सब निकट ही हैं और हमें विना देखे चैन नहीं ।।२२।। उद्धवजी मेरा तो अनुभव से निश्चय है, एवं श्रीगर्गाचार्यजी महाराज के वचन भी प्रमाण हैं श्रीकृष्ण और श्रीराम सुरवरों में श्रेष्ठ पूर्ण पुरुषोत्तम ही है । उनका जन्म नहीं है, वे देवों के असाधारण और अन्य से अशक्य कार्यों को करने के लिए ही भूतल पर गोलोक से पधारे है ।। २३ ।। उद्धवजी ! श्रीकृष्ण बलभद्रजी के पराक्रमों से भी निश्चय होता है कि ये दोनों देववरेण्य हैं । जैसे कोई वन केसरी आसानी से गजराजों को मारता है वैसे है इन दोनों ने महा बलिष्ठ चाणूर मुष्टिकादि मल्लों को, दस हजार नागों के समान बल वाले कंस कुवलयापीड गजराज का लीला से ही वध किया है।२४।

तालत्रयं महासारं धनुर्यष्टिमिवेभराट् । बभञ्जैकेन हस्तेन सप्ताहमदधाद् गिरिम् ।। २५ ।।
प्रलम्बो धेनुकोऽरिष्टस्तृणावर्तो[1] बकादयः । दैत्याः सुरासुरजितो हता येनेह लीलया ।। २६ ।।

श्रीशुक उवाच

इति संस्मृत्य संस्मृत्य नन्दः कृष्णानुरक्तधीः । [2]अत्युत्कण्ठोऽभवत्तूष्णीं प्रेमप्रसरविह्वलः ।। २७ ।।
यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च । शृण्वन्त्यश्रूण्यवास्राक्षीत् [3]स्नेहस्नुतपयोधरा ।। २८ ।।

कर्दमक्षमा

अन्वयः—तालत्रयम्, महासारम्, धनुः, इभराट्, यष्टिम्, इव, एकेन, हस्तेन, बभञ्ज, एवं, एकेन, हस्तेन, सप्ताहम्, गिरिम्, अदधात् ।। २५ ।। येन, इह, लीलया, धेनुकः, अरिष्टः, प्रलम्बः, तृणावर्तः, बकादयः, दैत्याः, सुरासुरजिताः, दैत्याः, "लीलया" हताः ।। २६ ।। श्रीशुकः उवाच—कृष्णानुरक्तधीः, नन्दः, इति, संस्मृत्य, अत्युत्कण्ठः, प्रेमप्रसरविह्वलः, तूष्णीम्, अभवत् ।। २७ ।। यशोदा, वर्ण्यमानानि, पुत्रस्य, चरितानि, च, (स्मरन्ती) शृण्वन्ती, स्नेहस्नुतपयोधरा, अश्रूणि, अवास्राक्षीत् ।। २८ ।।

---

१. वर्तबका—वीर. विज. । २. अश्रु—वीर. विज. । ३. स्नुत—श्रीधर. वंशी. जीव. वीर. विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

इभराड्यष्टिमिव तालत्रयप्रमाणं धनुर्बभञ्ज ॥ २५-३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तालोऽङ्गुष्ठमध्यमे विस्तृते यत्परिमाणं जायते सः, तादृशतालत्रयपरिमाणम् "प्रादेशतालगोकर्णाः सांगुष्ठे वितते करे । तर्जन्यादियुते" इति कोशात् । केचित्तु 'तालो हस्तचतुष्टयम्' इत्याहुः । महासारं बाहुपुरुषधार्यत्वाद्गुरुतरम् । यष्टिमिक्षुदंडम् 'यष्टिर्वेण्विक्षुदंडयोः' इति शाश्वतः ॥ तालः षष्टिहस्तप्रमाणपरिमि (श) तकस्तालवृक्षः । एकेन वामेनैव ॥ २५ ॥ येनेत्येकत्वं प्राधान्यात् ॥ २६ ॥ इतीत्थम् । प्रेमप्रसरेण स्नेहाधिक्येन । विह्वलो विवशः । अत्युत्कण्ठानुरागो यस्य स तथा ॥ कृष्णानुरक्तधीरिति—स्मृत्यारूढेण महैश्वर्येणापि हन्त हन्त एतादृशैश्वर्यवता पुत्रेण गुणरत्नाकरेण दुरदृष्टवशाद्विश्लिष्टोऽभूवमिति कृष्णेऽनुरक्तैव धीर्न तु वसुदेवस्येवैश्वर्यगन्धेनापि संकुचितानुरागा शिथिलितसंबन्धा धीर्यस्य सः । प्रेमप्रसरविह्वल इति—जातिप्रमाणाधिक्यवतः प्रेम्णोऽगस्त्यस्याग्रे खल्वैश्वर्यस्य समुद्रोऽपि कियानिति भावः । एवं कृष्णस्य पिता नन्दो गांभीर्यस्य बलाद्धृतिं धृत्वा लौकिक्या रीत्योद्धवं संमानयितुं सम्यगीक्षितुं परिचेतुं कुशलं प्रष्टुं कृष्णस्य प्रभावमयचरितं वक्तुं शशाक ॥ २७ ॥ अवास्राक्षीन्निरंतरममुचत् ॥ माता श्रीयशोदा स्वधैर्यसिंधुभ्रमिनिमज्जनोन्मज्जनवती तत्तत्किमपि कर्तुं न शशाकेत्याह—यशोदेति । मथुराप्रस्थानदिनमारभ्यैव शतशः स्त्रीपुंसस्वजनैः प्रबोध्यमानापि पुत्रमुखं विनाऽन्यत्किमप्यहं न द्रक्ष्यामीति प्रतिक्षणमेव प्रतिजनानां पुरो मुद्रितनेत्रैवाश्रूणि अवसमंतात् निजवस्त्रादिकमाप्लाव्यास्राक्षीत्—विससर्जैव न तूद्धवं परिचेतुं वात्सल्यविषयीकर्तुं स्वयं किञ्चित्प्रष्टुं पुत्रं प्रति किञ्चित्संदेष्टुं च शक्तेत्यर्थः । स्नेहेन पुत्रविषयकेण स्नुतपयसौ पयोधरौ यस्याः सा । श्लेषेण स्नुतानां पयसां धरा ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तालः षष्टिहस्तप्रमाणकपरिणततालवृक्षः । तालो नववितस्तय इति देवबोधः । एकेन वामेनैव । यष्टिमिव इक्षुदण्डमिव बभञ्ज ॥ २५ ॥ येनेति येन येनेत्यर्थः ॥ २६ ॥ स्वत एव कृष्णानुरक्तधीः । विशेषत इति पूर्वोक्तं माधुर्यं प्रभावमयनिजपालनञ्च सम्यक् मुहुः स्मृत्वा प्रेमवेगविवशः अत एवाश्रुपूर्णकण्ठः सन् तूष्णीमभूत् परं किञ्चिद्वक्तुं न शशाकेत्यर्थः । वीप्सया स्मरणस्य त्यागे शक्त्यभावो बोध्यते ॥ २७ ॥ पुत्रस्येति सुरोत्तमावित्यादि श्रवणेऽपि प्रत्युत तया निश्चिते तत्रैवावेशो दर्शितः । चरितानि प्रभावमयानि । चकारात् किमुत सौन्दर्यादीनीत्यर्थः । अत एव वर्त्तमान शतृशनाभ्यां प्रवृत्तिमात्रेणैव नैरन्तर्येण चैवेत्यर्थः । अव समन्तात् निजवस्त्रादिकमाप्लाव्य अस्राक्षीत् विससर्जैव केवलं नतु किंतु किञ्चित् कर्तुं स्नेहप्रस्नुतपयःपयोधरा च जातेत्यर्थः । इति चिरकालेऽतीतेऽपि तादृशत्वात् स्वाभाविकमहास्नेहः सूचितः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तालो नववितस्तय इति देवबोधः (कोशः) यष्टिमिक्षुदण्डं वभञ्ज । कृष्ण एकेन वामेनैव हस्तेनादधात् ॥ २५ ॥ आदि-शब्दात् केशयादयः, 'अवधिष्टाम्' इति कंसकुवलयापीडयोर्वधे रामस्योक्तिः, अन्योऽन्यं तयोः स्नेहेन साहाय्यादिनैक्याभिप्रायेण अन्त्यपक्षे च सुराणामर्थायेति यदुक्तं तदेवं दर्शयति—कंसमिति त्रिभिः । गोवर्द्धनधरणस्यापि शत्रुमदभञ्जनादिना शत्रुहिताचरणेन देवार्थ एव पर्य्यवसानादिति ॥ २६ ॥ स्वत एव कृष्णानुरक्तधीः पुनश्च 'इति' एवं सम्यक् स्मृत्वा स्मृत्वा प्रेम्णः प्रसरेण वेगेन विह्वलः, अतएवाङ्गुकण्ठो वाष्परुद्धकण्ठः सन् तूष्णीमभूत , परं किञ्चिद्वक्तुं न शशाकेत्यर्थः । वीप्सया पौनःपून्येन स्मरणस्य त्यागे शक्त्यभावो बोध्यते ॥ २७ ॥ पुत्रस्येति; (२३ श० श्लो०) 'प्राप्ताविह सुरोत्तमौ' इत्यादि वचनादिनापि कथमपि पुत्रभावानपगमेन, विशेषतश्च स्नेहवर्द्धनेन तस्मिन् परमवात्सल्यमेव द्योतयति, अतएव वर्ण्यमानानीति शृण्वन्तीति च वर्त्तमानया, वर्णनारम्भे श्रवणप्रवृत्तिमात्रेणैवेत्यर्थः । च-कारात् रूपादीनि च । स्नेहेन स्नुतौ प्रसृतक्षीरौ पयोधरौ यस्यास्तथाभूता सती; इति स्नेहातिरेक उक्तः । चिरकालेऽतीतेऽपि सद्यः स्तनयोः स्नुतत्वात् , अतएवाश्रूणि 'अव' समन्तात् निजवस्त्रादिकमाप्लाव्य अस्राक्षीत् विससर्जैव केवलम् , न तु किञ्चित् प्रष्टुं वक्तुं कर्त्तुं वान्यच्छक्तेत्यर्थः । एवं व्रजेशाद्विशेष उक्तः ॥२८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तालं परिमाणविशेषः ॥ २५-३० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तालं परिमाणविशेषः तत्त्रयपरिमितं महासारमयोवद्दृढं धनुर्बभञ्ज यथा गजेन्द्रो यष्टिमिक्षुदण्डं तद्वत् तथैकेन हस्तेन गिरिं गोवर्द्धनं सप्ताहमित्यत्यन्तसंयोगे द्वितीया सप्तदिवसपर्यन्तमद्धाादधार ॥ २५ ॥ तथा देवदानवजयिनः प्रलम्बादयो दैत्या येन श्रीकृष्णेन हताः एतान्यमानुषाणि चेष्टितानि परत्वलिङ्गानीति भावः । येनेति । प्रयोज्यप्रयोजककर्त्रोस्तन्त्रेण निर्देशः अतः प्रलम्बो

हत इत्यस्याविरोधः ॥ २६ ॥ इत्थमिति कृष्णेऽनुरक्तानुरागयुक्ता धीर्यस्य अश्रूणि कण्ठे यस्य सः प्रेमसंरम्भेण प्रेमोद्रेकेण विह्वलः परवशः तूष्णीं बभूवन किञ्चिदुवाच ॥ २७ ॥ तथा यशोदा च वर्ण्यमानानि भर्त्रेति शेषः । पुत्रचरितानि शृण्वन्ती स्नेहेन स्नुतौ प्रस्नुतौ पयोधरौ स्तनौ यस्याः साश्रूण्यवास्राक्षीदानन्दजनेत्रजलविन्दून् ववर्ष ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अङ्गुष्ठमध्यमे विस्तृते यत्परिमाणं स ताल इत्युच्यते एतादृशातालत्रयपरिमाणं प्रादेशस्तालगोकर्ण इति यष्टिमिक्षुदण्डम् ॥ २५ ॥ सुरासुराञ्जयन्तीति सुरासुरजितः ॥ २६ ॥ प्रेमप्रसरेण प्रेमसन्दोहेन विह्वलः विवशः ॥ २७ ॥ अवास्राक्षीत् निरन्तरममुञ्चत् ॥ २८-२९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तालं षष्टिहस्तप्रमाणकपरिणततालवृक्षः एकेन वामेनैव ॥ २५-२६ ॥ कृष्णानुरक्तधीरिति । स्मृत्यारूढा महैश्वर्य्येणापि हन्त हन्त एतादृशैश्वर्य्यवता गुणरत्नाकरेण स्वपुत्रदुरदृष्टवशाद्विश्लिष्टोऽवभूवमिति कृष्णे अनुरक्तैव धीर्न तु वस्येवैद्वर्य्यगन्धेनापि शिथिलतस्वसम्बन्धासंकुचितानुरागः धीर्यस्य सः । प्रेमप्रसरविह्वल इति । अतिप्रमाणाधिक्यवतः प्रम्णोऽगम्यस्याग्रे खल्वैश्वर्यस्य समुद्रोऽपि कियानिति भावः ॥ २७ ॥ एवं कृष्णस्य पिता न गाम्भीर्य्यवलात्वं धृतिं धृत्वा लौकिकया रीत्या उद्धवमातिथ्येन संमानयितुं परिचेतुं कुशलं प्रष्टुं कृष्ण प्रभावमयं चरितं च वक्तुं शशाक माता श्रीयशोदा त्वौदर्यसिन्धुभ्रमिनिमज्जनोन्मज्जनवती तत्तत् किमपि कर्तुं न शशकेत्याह । यशोदेति । मथुराप्रस्थानीदिनमारभ्यैव शतशः स्त्रीपुंसजनैः प्रबोध्यमानापि पुत्रमुखं विना अन्यत् किमप्यहं न द्रक्ष्यामीति प्रतिक्षणमेव प्रतिजनानां मुद्रितनेत्रैव अश्रूणि अव समन्तात् निजवस्त्रादिकमाप्लाव्य अस्राक्षीत् विससर्जव केवलं नतूद्धवं परिचेतुं वात्सल्यविनयीकर्तुं स्वयं किंचित् प्रष्टुं पुत्रं प्रति किञ्चित् सदेष्टुं च शक्तेत्यर्थः । स्नेहेन पुत्रविषयकेण स्नुतपयसौ पयोधरो यस्याः श्लेषेण स्नुतानां वर्षणे जलधारायमाणा ॥ २८ ॥

गूढार्थदीपिनी

महासारं गुरुतरम् । यष्टिम् इक्षुदण्डम् । तालः षष्टिहस्तपरिमितो वृक्षः, केचित्तु 'तालो हस्तचतुष्टयमित्याहुः । एकेन वामेन ॥ २५ ॥ येन कृष्णेन प्राधान्यान्निर्देशो न तु बलस्य । जयतीतिजित् ॥ २६ ॥ प्रसरः प्रवाहः ॥ २७-२९ ।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गजपतिं गजराजं गजेन सहितपतिरस्वष्ठस्तं वा । नागानामयुतस्येव बलं यस्य स तं मृगाधिपः सिंहः ॥ २५ ॥ यत्प्रसादात्सम्पादितं तन्महापुरुषतालत्रयपरिमितं कृतयुगीयतालत्रयपरिमितं वाऽधुनातनाङ्गुष्ठम् यमाङ्गुलिवितत्यात्मकतालस्याल्पीयस्त्वात्तत्परिमाणतायां धनुषस्तनुत्वापत्तेः । ततश्चाद्भुतमित्यत्र हरिवंशे च तद्धनुः स्तम्भसन्निभमित्याद्युक्तिश्चानुपपन्ने स्यातामिति मन्तव्यं । महासारं बहुदृढं धनुरिभराङ्जो यष्टिमिवेक्षुदण्डं वा कञ्चित्काष्ठविशेषं वैकेन हस्तेन बभञ्ज । सप्ताहं गोवर्धनं गिरिं ॥ २६ ॥ सुरासुरजितः सुराश्चासुराश्च सुरासुरं तज्जयन्तीति सुरासुरजितो येन लीलया हताः ॥ २७ ॥ प्रेम्णां प्रसर आनन्दोद्प्रवाहस्तेन विह्वलश्रञ्चलोऽप्रतिभानात्पुररतूष्णीमभवत् ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

राजसीं लीलामाह । तालत्रयमिति । तालवृक्षस्य शतत्रयहस्तपरिमितस्य यावान् विस्तारः तालानां त्रयं यत्रेति । महासारमिति । अतिदृढधनुर्यष्टिमिति । धनुरेव यष्टिरूपमनम्रम् अनम्रस्य भङ्गः सुतरामेवाशक्यः अत्रापि प्रकारान्तरेण भङ्गाभावाय दृष्टान्तः इभराडिति यष्टिमिव या । इभराडिति । यष्टिरपि इक्षुः यथेक्षुदण्डं मदकरीति वाक्यैकवाक्यतया तत्रापि एकेनैव हस्तेनेत्यग्रेऽपि सम्बध्यते सप्ताहमदधाद्गिरिमिति ॥ २५ ॥ तामसीमाह । प्रलम्ब इति । नात्र क्रमो विवक्षितः आदिशब्देन वत्सादयः सर्व एव दैत्याः मानुषैरवध्याः किञ्च सुरासुरजितः सुरा असुराश्च जिता यैस्ते सर्वे अस्मत्समक्षमेव लीलयैव हताः अतः सामर्थ्येनापि देवोत्तमत्वमेवेति निर्द्धारः ।।२६।। एवं स्निग्धाय भगवद्गुणानुवर्णने यद्बाव्यं तज्जातमित्याह । अयमर्थः नोद्धवो बोधितः किंतु पदार्थस्मरणाभिलाष एवेति उत्तमाधिकारं बोधयितुं संस्मृत्य संस्मृत्येत्युक्तं नतूक्त्वोक्त्वा यत्रैव स्मरणानन्तरं वचने सामर्थ्यं बुद्धेरनुरागः मनस उत्कण्ठा तत्रैव तूष्णीं स्थित इति स्मरणतूष्णींभावयोर्मध्ये भावोदयमवान्तरव्यापाररूपमुत्पन्नमित्याह । कृष्णानुरक्तधीरुत्कण्ठ इति । चित्तस्य स्मरणं बुद्धेरनुरागः मनस उत्कण्ठा मनश्च वाचः पूर्वरूपं तत्र अनुरक्तबुद्ध्या औत्कण्ठ्येन च ज्ञानक्रियारूपाभ्यां शब्दोत्पत्तिप्रतिबन्धात्तूष्णीमभवत् । तर्हि तयोः प्रतिबन्धकत्वेन न पुरुषार्थपर्यवसायित्वमित्याशङ्क्य तथा स्वतन्त्रकार्यमाह । प्रेमप्रसरेण प्रेमप्रचारेण विह्वलो जात इति ॥ २७ ॥ एवं यशोदापि जातेत्याह । यशोदेति । नन्देनैव वर्ण्यमानानि भगवतश्चरितानि शृण्वन्ती चकारात्स्मरन्ती च अन्तःप्रेमपूर्णा अश्रूणि नेत्रयोरस्राक्षीद्विरहव्याकुला जाता अन्तर्भगवदावेशेन दृढप्रेम्णा स्नुतपयोधरा जाता यथानन्दे आवेशो विरहश्च एवमस्यामपि द्वयं वर्णितम् ॥ २८ ॥

श्रीसुबोधिनी-सारः

तालत्रयमशीत्युत्तरशतहस्तपरिमितं महान् सारो यस्मिंस्तद्धर्बभञ्ज इभराट् गजेन्द्रो यष्टिमिव सप्ताहं सप्तदिनं यावदेकेन हस्तेन गिरिमदधात् ॥ २५ ॥ प्रलम्बादयो दैत्याः सुरासुरजितो देवाऽसुरजेतारो लीलयैव येन हता इह प्राधान्यात्स्वरूपैक्याच्चैकस्य निर्देशः मोहवशाद्वान्ये ॥ २६ ॥ शुकोक्तिः । इत्येव संस्मृत्य संस्मृत्य कृष्णेनुरक्ता धीर्यस्य प्रेम्णः प्रसरेण प्रवाहेण विह्वलोऽत्युकंठो नन्दः तूष्णीमभवत् ॥ २७ ॥ पुत्रस्य श्रीकृष्णस्य कीर्त्यमानानि चरितानि चादूगुणान् शृण्वंती यशोदा स्नेहेन स्नुतौ पयोधरौ कुचौ यस्याः साऽश्रूणि अवास्राक्षीदवर्त्तयत् ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तालं तालवृक्षो हस्तशतत्रयपरिमितस्तत्त्रयपरिमितं महासारं अयोवदतिदृढं धनुःयष्टिमिक्षुदण्डं इभराट् गजेन्द्रो यथा भञ्जयति तथा बभञ्जेत्यन्वयः । तथैकेन हस्तेन सप्ताहं सप्तदिनपर्यन्तं गिरिं गोवर्धनमधात् दधार ॥ २५ ॥ तथा सुरासुरजयिनः प्रलम्बादयो दैत्या येन कृष्णेनेह व्रजे लीलयैव हताः । प्रलम्बे रामहतेऽपि कृष्णहतत्वोक्तिस्त्वस्य प्रधानत्वसूचनार्था ॥ २६ ॥ इत्येवं कृष्णं संस्मृत्य-संस्मृत्य अश्रुकण्ठः अश्रुभिर्निरुद्धकण्ठः 'अत्युत्कण्ठ' इति वा पाठः, नन्दस्तूष्णीं बभूव किञ्चिदपि वक्तुं न शशाक । तत्र हेतुमाह—प्रेम्णः प्रसरेण उद्रेकेण विह्वलो व्याकुलः । तत्रापि हेतुमाह—कृष्णेऽनुरक्ता अनुरागयुक्ता धीर्यस्य स इति ॥ २७ ॥ स्नेहेन स्नुतौ प्रस्नुतौ पयोधरौ यस्याः सा यशोदा भर्त्रा वर्ण्यमानानि पुत्रस्य चरितानि शृण्वन्ती अश्रूणि आनन्दजनेत्रजलबिन्दून् अवास्राक्षीत् ववर्ष ॥ २८ ॥

अन्वितार्थप्रकाशिका

तालत्रयमिति ॥ तालस्तालवृक्षः षष्टिहस्तदैर्घ्यः तत्त्रयपरिमितं महासारम् अयोवदतिदृढं धनुर्यष्टिमिक्षुदण्डम् इभराट् गजेन्द्रो यथा भनक्ति तथा बभञ्जेत्यन्वयः । तथैकेन वामेन हस्तेन सप्ताहं सप्तदिनपर्यन्तं गिरिं गोवर्धनमधात् दधार ॥ २५ ॥ प्रलम्ब इति । येन कृष्णेंन प्रलम्बादयः बकादयश्च सुरासुरजितः दैत्या लीलया हताः । प्रलम्बस्योक्तिः कृष्णप्राधान्वसूचनाय ॥२६॥ इतीति ॥ इत्येवं कृष्णं संस्मृत्य अश्रुकण्ठः अश्रुभिर्निरुद्धकण्ठः अत्युत्कण्ठ इति वा पाठः । प्रेम्णः प्रसरेण उद्रेकेण विह्वलो व्याकुलः कृष्णेऽनुरक्ता धीर्यस्य स नन्दः तूष्णीं बभूव किंचिदपि वक्तुं न शशाक ॥ २७ ॥ यशोदेति ॥ स्नेहेन स्नुतौ पयोधरौ यस्याः सा यशोदा भर्त्रा वर्ण्यमानानि पुत्रस्य चरितानि शृण्वन्ती । नुमार्षः । अश्रूणि नेत्रजलबिन्दून् एव केवलम् अवास्राक्षीत् ववर्ष । नतु प्रष्टुं वक्तुं वा शशाक ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तालानां त्रयं प्रमाणामस्य महासारं अतिकठिनं धनुः इभराड्यष्टिमिवबभंज ॥ २५-२६ ॥ प्रेमप्रसरेण स्नेहप्रवाहेणविह्वलः ॥ २७ ॥ अवास्राक्षीत् मुमोच ॥ २८-३० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तालेति ॥ तालं परिमाणविशेषः तत्त्रयं तत्त्रयपरिमितं, महासारमयोवदृढं, धनुः, इभराट् गजेन्द्रः यष्टिमिक्षुदण्डं इव, बभञ्ज । तथा एकेन हस्तेन, गिरिं गोवर्द्धनाचलं, सप्ताहं सप्ताहोरात्रं अदधात् ॥ २५ ॥ प्रलम्ब इति ॥ तथा सुरासुरजितः देवदानवजयिनः, प्रलम्बः, धेनुकः, अरिष्टः, तृणावर्त्तश्च बकश्च तावादी येषामघासुरादीनां ते, दैत्याः, इह येन लीलया, हताः ॥ २६ ॥ इतीति ॥ इतीत्थं, कृष्णे अनुरागवती धीर्यस्य सः नन्दः, संस्मृत्य संस्मृत्य कृष्णचरित्राणीति शेषः । अश्रूणि कण्ठे यस्य सः, प्रेम्णः प्रसरः प्रकर्षेण प्रसरणं तेन विह्वलः परवशः, प्रेमसंरम्भविह्वल इति पाठे, प्रेमसंरम्भेण प्रेमोद्रेकेण विह्वलः सन्, तूष्णीं अभवत् ॥ २७ ॥ यशोदेति ॥ तथा च यशोदापि, वर्ण्यमानानि भर्त्रेति शेषः । पुत्रस्य श्रीकृष्णस्य, चरितानि शृण्वन्ती आकर्णयन्ती, अत एव, स्नेहेन स्नुतौ पयोधरौ यस्याः सा एवं भूता सती, अश्रूणि अवास्राक्षीत् । आनन्दजनेत्रजलबिन्दून् ववर्ष ॥२८॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यशोदेति : १०.४६.२८

अच्युतचरित्रचित्रितहृदया प्रागेव सा सदैवासीत् । उद्बोधकसामग्री तदोद्धवेक्षेति युक्तमास तथा ॥ ३८ ॥

कुशलमस्तु सुतस्य ममोद्धव कथमपि क्वचनानि च कामपि ।
विदधतः सुखकेलिमिहाशिषं निजगिराऽजगिरा च मुहुर्भुवे ॥ ३९ ॥

निशि निधाय रहो निजजङ्घयोर्व्यरचि मङ्गलवार्यभिषेचनम् ।
कथय विस्मृतिरस्य कथं भवेत् कुशमते शमतेजित-धीरसि ॥ ४० ॥

स्तनजपानकृतोऽस्य मुखं मया चलविलोचनमैक्षि सुलक्षणम् ।
मनसि तत्सततं किल कीलितं तदरमादरमानकृता गिरा ।। ४१ ।।

स्तनजपानमिषादघभूरलं घनवकी नवकीचकनिःस्वना । इह हता महतामपि विस्मयं जनयतानयता प्रमदं सतः ।। ४२ ।।

क्वचिदिहोद्धव - कार्यवशादहो शिशुवयाः समया भुवि शायितः ।
निजपदा शकलानि चकार यत् समनसो मनसोऽद्भुतकारि तत् ।। ४३ ।।

पवनरूपधरोऽधमधीरिपो-र्हितचिकीर्षुरनेन मनस्विना । तृणपदोऽश्मपदे स निपाततोदितिसुतोऽतिसुतोदनमापितः ।। ४४ ।।
किमु वदामि तदीयतरस्वितामपरवेश्मगताशनलोलुपः । सुरुचि चारुपयोदधि पुष्कलं निजगृहे जगृहे न मयार्पितम् ।। ४५ ।।

परगृहाण्यधिगम्य हृतानि तद्दधि पयांस्यधसत् सखिमर्कटैः ।
तदुदिताऽद्भुत - तच्चरितश्रुतौ न समयोऽसमयोऽपि मयेक्षितः ।। ४६ ।।

अद्यासौ नवनीतगोलमलघुं हस्ते गृहीत्वा स्थितां मामूचे कुशलानने शृणु कथामेकां तु मे ह्यस्तनीम् ।
कालिन्द्यां बक ईदृगेव सहसा मामेवमास्ये निजे चिक्षेपेति वदंस्तमेव कवलं स्वास्ये जवान्न्यक्षिपत् ।। ४७ ।।

अद्यानेन हृतं पयो-दधि मम प्रातर्यशोदे हृतं ह्यः सिद्धं नवनीतमद्य सकलं नैवेद्यमन्नं मम ।
वासो मे शकलीकृतं परिहृतं गोदोहपात्रं पुनर्गोदोहावसरे समेत्य तरसा तत्तर्णको मोचितः ।। ४८ ।।

अद्यायं व्रजराजभामिनि बहून् दुर्वाद - वादान्जगावद्यानेन सुतेन ते मम पटाकृष्टिः कृता चत्वरे ।
उष्णीषं मम भर्तुरात्मशिरसि प्रोद्धृत्य भर्ताऽस्मि ते किं दूरं द्रवसीति यत्समुदितं कि तद्ब्रुवे त्वत्पुरः ।। ४९ ।।

नीताऽनेन सुतेन ते मम सुता कान्तारमेकाकिनी कामं मुग्धतमां स्नुषां मम बलादभ्रंशयत् स्त्रीव्रतात् ।
त्याज्यो ग्राम इतः किमु स्वमखिलं प्रत्यर्प्यमेतत्पदे स्थेयं कीदृगिति त्वमेव विहितं दृष्ट्वा यशोदे वद ।। ५० ।।

सत्रासं किञ्चिदुक्तं यदि खरसदृशीर्नः करोषि प्रियं चेत् प्रोक्तं तर्हि ब्रवीषीदृशि पथि पटुता सोऽस्ति युष्मत्प्रसादः ।
किञ्चिच्चेत्ताडितस्तद्भवसि बत सरुण्णेहि वेश्मास्मदीयमित्युक्ते स्वाधिकारं प्रकटयसि गृहे स्थापिते त्वस्मदीये ।। ५१ ।।
साशङ्कं वक्षि कस्मान्निजगृहवसति - स्वत्वर्पिताऽस्यावकृष्टोगेहाच्चेत् तर्ह्य नागाः शिशुरिति वदसि स्वैरवृत्ता भवत्यः ।
दत्तं चेत्किञ्चिदिष्टं किमिति ददत भो नैव चेत्तत्कदर्या उक्तेऽनुक्तेऽपि चैवं छलयसि तदिदं सङ्कटं सर्वतो नः ।। ५२ ।।

(युग्मम्)

वृद्धाऽसि त्वमसोऽपराभिरिह किं वाच्यं तदज्ञानिता कुत्रास्ते तव सर्वतोऽन्तरदशा सर्वास्वसर्वास्ति हि ।
पुत्रिण्योऽपि सहस्रशस्त्वदपरा वर्तन्त एवात्र ते त्वत्पुत्रस्य च साम्यमैक्षि न पुनः पुत्रेषु तन्मातृषु ।। ५३ ।।
इत्यादीनि परापवादवचनान्यस्यानिशं श्रीपतेराकर्ण्योद्धव तेन तेन विधिना तत्तन्मनोधारणम् ।
कुर्वत्या मम सद्मकर्मलवमप्याधातुमप्यन्ततः स्नातुं भोक्तुमपि त्वभून्न समयः स्वल्पोऽपि रिक्तः सखे ।। ५ ।।

लघु विधाय पुरा पितुरन्तिकेऽशनमनेन मया सममश्नता ।
सुखमभूत्तदिदं स्पृहणीयमप्यविकलं विकलङ्कहृदां न किम् ।। ५५ ।।

मम मृदादनशङ्कितचेतसो लघु पुरः प्रविसार्य मुखं स्थितः ।
भृशमलोकि तदा तु चयत्कृतिर्न सुरभासुर - भावजुषामपि ।। ५६ ।।

क्वचिदयाचत मन्थनदण्डधृत् - स्तनमसावनुपायितवत्यहम् । तमपहाय गतिं विदधेऽन्यतो - ऽयमपरामपराधपरम्पराम् ।।५७।।

क्वचिदनन्तगुणोऽप्यगुणज्ञया लघुगुणेन मया निगडीकृतः । मदपरानपरोद्धव मत्परा कृतवती तव तीर्थपदेऽप्यघम् ।। ५८ ।।

तरुवरौ सहजो गतितोऽन्तरापतदुलूखल - कर्षण - कैतवात् ।
बत निपातयता हरिणा तदा प्रकटितं कटितन्त्रबलं न किम् ।। ५९ ।।

विना रामं यामो मिहिरतनया - तीरविहृतौ कथं गोपानेवं वदसि पुनरद्याप्यतिहठात् ।
पुराहेरुन्मोचः समजनि महादिष्टत इति मयोक्तेऽन्तर्हासः स च सदिदमं वैवमगदत् ।। ६० ।।

किं कृष्ण मां छलयसि व्रज तं व्रजेशं सुप्तेरयं न समयो न च भुक्तिवेला ।
इत्युद्धव प्रतिपदं कटु मे ब्रुवत्या व्यक्तीकृतो न किमु वा प्रमदानुभावः ।। ६१ ।।

विलोक्यास्य लोभं समाराधिकायां समाराधिका राधिका सोद्धवाऽभूत् ।
तदा यानि वाच्यान्यवाच्यान्यवोचं न तान्यत्रपा वक्तुमत्र क्षमेऽहम् ॥ ६२ ॥

मातर्मदिष्टमिदमर्पय मह्यमुक्ते दत्तं मयोद्धव न किन्तु सरोषवाचा ।
निर्भत्सिते यदकरोत्स्वमुखं पुपुरो मे तस्य स्मृतिर्हृदयभेदमलं करोति ॥ ६३ ॥

आसीदहर्निशमनेन सहैव वासस्तत्सत्कृतं क्वचिदसत्कृतमप्युपेतम् ।
तच्चिन्तयामि किमहं किमु वा स्मरिष्यत्येषोऽच्युतोऽस्म्यलमिहोद्धव मुग्धबुद्धिः ॥ ६४ ॥

किमु वदामि ददामि दधामि वा किमु चरामि हरामि सरामि किम् ।
भवति सर्वकृतावकृतार्थकं द्रुतविलम्बित वृत्ततुलं मनः ॥ ६५ ॥

प्रतिपलस्मृततद्गुणसङ्ख्यया प्रतिपलेक्षित-तत्कृतिलक्षया । कथनपक्रमणीयमहोमयोद्धव वदाव वदान्यगिरैव माम् ॥ ६६ ॥
समशने शयने सदनेऽङ्गने गृहवने विपिनेऽप्यवने गवाम् । तदभिधानमिहैकमपक्रियो व्रजपतिर्जपति स्मृततद्गुणः ॥ ६७ ॥

कृष्णप्रिया

अत्यन्त दृढ कठोर, अनम्र, तीन ताल तरुवर के समान सुदीर्घ तीन सौ हाथ लम्बे धनुष दण्ड को, गजराज गन्ने को जैसे अनायास तोड़ता है वैसे श्रीकृष्ण ने एक हाथ से तोड़ दिया और एक हाथ से सात दिन पर्यन्त श्रीगोवर्धन गिरिवर को धारण किया ॥ २५ ॥ युद्धव जी ! कहाँ तक कहें ? जो देवदैत्य असुरों पर आसानी से विजय पा चुके हैं वैसे प्रलम्बासुर, धेनुकासुर, अरिष्टासुर, चक्रवात तृणावर्त, अघ, बक आदि महान् दैत्यों को राम कृष्ण ने सहज ही में मार दिए है ॥२६॥ श्रीनन्दबाबा की भूमिका का आलेखन करते व्यास जी, निरूपण करते शुकदेव जी, श्रवण करते राजा परीक्षित सब श्रीनन्द बाबा की अवाक् एवं परमानन्द की अनुभूति मेंआ गए है इसलिए यहाँ पद आया श्रीशुक उवाच श्रीशुकदेव जी कह रहे हैं—राजन् ! प्यारे नन्द दुलारे पूर्ण ब्रह्म श्रीकृष्ण में स्नेहासक्त बुद्धि वाले श्रीनन्द राय जी, श्रीकृष्ण की लीलाओं का इस प्रकार स्मरण करते करते मिलने की इच्छा हो जाने से-मिलने की उत्त्कण्ठा बढ़ जाने से प्रेम बट गया, विह्वल हो गए कुछ भी बोल न सके केवल मूक बन गए आनन्द में डूब गए ॥ २७ ॥ माता यशोदाजी श्रीनन्द राय उद्धवजी की रामकृष्ण गोष्ठी का श्रवण कर रही थी। प्रिय पुत्र श्रीकृष्ण एवं बलदाऊ जी के सुमङ्गल चरितों को सुनते हीं अश्रुधारा बहने लगी, स्नेह उमड़ पड़ा, माता के स्तनों से दूध टपकने लगा ॥ २८ ॥

तयोरित्थं भगवति कृष्णे नन्दयशोदयोः । वीक्ष्यानुरागं परमं नन्दमाहोद्धवो मुदा ॥ २९ ॥

उद्धव उवाच

युवां श्लाघ्यतमौ नूनं देहिनामिह मानद । नारायणेऽखिलगुरौ यत् कृता मतिरीदृशी ॥ ३० ॥

एतौ हि विश्वस्य च बीजयोनी [1]रामो मुकुन्दः पुरुषः प्रधानम् ।
अन्वीय भूतेषु [2]विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ ॥ ३१ ॥
यस्मिञ्जनः प्राणवियोगकाले क्षणं समावेश्य मनोऽविशुद्धम् ।
[3]निर्हृत्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोऽर्कवर्णः ॥ ३२ ॥

कर्वंमक्षमा

अन्वयः-तयोःनन्दयशोदयोः, भगवति, कृष्णे, इत्थम्, परमम्, अनुरागम्, वीक्ष्य, उद्धवः, मुदा, नन्दम्, आह॥२९॥ उद्धवः उवाच—हे मानद नन्द ! इह, देहिनाम्, (मध्ये) नूनम्, युवाम्, श्लाघ्यतमौ, यत्, अखिलगुरौ, नारायणे, ईदृशी, मतिः, कृता ॥ ३० ॥ एतौ, रामः, मुकुन्दः, विश्वस्य, बीजयोनी, च, पुरुषः, प्रधानौ, हि, भूतेषु, अन्वीय, विलक्षणस्य, ज्ञानस्य, ईशातः, च, इमौ, पुराणौ, स्तः ॥ ३१ ॥ जनः, प्राणवियोगकाले, क्षणम्, "अपि" विशुद्धम्, मनः, समावेश्य, कर्माशयम्, आशु निर्हृत्य, अर्कवर्णः, ब्रह्ममयः, पराम्, गतिम्, याति ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अखिलगुरुत्वमेव जनकत्वेन नियन्तृत्वेन चाह । एताविति । रामो मुकुन्दश्चेत्येतौ विश्वस्य बीजयोनी निमित्तोपादाने । ननु पुरुषप्रधानयोर्बीजयोनित्वं प्रसिद्धमत आह । पुरुषः प्रधानमिति । पुरुषोंशः प्रधानं शक्तिः । अतः प्रधानपुरुषावप्येतावेवे-

---

१. इमौ प्रधानं पुरुषः पुराणः-विज. । २. विलक्षणेषु विज्ञाय ईशात इमौ-विज. । ३. निगृह्य-विज. ।

त्यर्थः। एवं जनकत्वमुक्तम्। किं च। अन्वीय भूतेषुभूतेष्वनुप्रविश्य भूतानां तदुपहितस्य विलक्षणस्य च नानाभेदस्य ज्ञानस्य जीवस्य चेशाते ईश्वरौ नियंतारौ भवतः। कुतः। पुराणावनादी। अनादित्वात्कारणत्वं ततश्च नियन्तृत्व मित्यर्थः॥ ३१॥ ननु सृष्ट्यादिकर्मावेशान्मनुष्यादिजन्मदर्शनाच्च तस्यान्येभ्यः को विशेष इत्याशंक्याह यस्मिन्निति द्वाभ्याम्। यस्मिन्क्षणमपि मनः समावेश्य कर्माशयं कर्मवासनां निर्हृत्य त्यक्त्वा ब्रह्ममयः स्वरूपज्ञानवानर्कवर्णः शुद्धसत्त्वमूर्तिः सन्परां गति तत्पदं याति॥ ३२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परमं परां काष्ठां प्राप्तम्। तयोः कीदृशभावौ तौ भवेतामिति सविस्मयं परिचिन्त्यमानयोः श्रीनंदयशोदयोरित्थं पूर्वोक्तप्रकारेणानुरागं तृष्णातिशयमयस्नेहं भगवति सर्वेश्वरे वीक्ष्य विशेषेण साक्षात्कृत्य, तत्रापि कृष्णे परमपूर्णाविर्भावे तस्मिन्वीक्ष्य, तत्रापि परमं सर्वोत्कृष्टं वीक्ष्य उद्धवो नंदं तस्यैव प्राधान्यात्संवादे प्रवृत्तत्वाच्च। श्रीयशोदायास्तु परमवैयग्र्येण तत्प्रवृत्त्यशक्त्या तमेवाह। उच्चैः सांत्वयितुमिति शेषः॥ २९॥ यद्धेतोर्नारायणे मतिः कृताऽतो युवां श्लाघ्यतमावित्यन्वयः। तच्च मुदाऽहो मम भाग्यं ममैतज्जन्मैव सार्थकं जातं यदीदृशोऽनुरागो दृष्ट इति तयोर्दुःखदर्शनेऽप्युद्धवस्यानन्दः। हर्षेण तदंशाविष्कारेणैवोपलक्षितो न तु तद्दुःखदर्शनमयदुःखांशाविष्कारेणेति भावः। तस्य हि तदैश्वर्यस्फूर्तेरेव प्रधान्यात्। तदनुरागस्यापि महिमांशस्फूर्तिरेव प्रथमतो जाता न तु वैयग्र्यांशस्फूर्तिः। केवलवयग्र्यांशस्फूर्तेर्योग्यत्वे तु सान्त्वनानधिकारिणं मन्यमानो भगवानपि न तं प्रास्थापयिष्यदिति भावः। अतः प्रथमतस्तन्महिमवर्णनद्वारैव प्रोत्साह्य तौ सान्त्वयितुमिच्छंस्तज्जातयिश्रीनंदवाक्यावसरं प्राप्य तथैवाह—युवामिति द्वाभ्याम्। इह श्रीकृष्णावतारावतीर्णतदीयमहाभक्तगणपूर्णे जगति देहिनां तत्पर्यन्तानां सर्वेषां मध्ये ये श्लाघ्याः श्रीनारदादयः श्रीगोकुलवास्यन्तास्तेषामपि मध्ये श्रेष्ठौ। हे मानदेति—एवं युवाभ्यामेव तदीयानामस्माकं मानो दत्तः। यतः श्रीकृष्णसंबंधिन एवंविधा जाता इति लोकैः कीर्तयिष्यत इति भावः। यद्यस्मान्नारायणे नरस्य महत्स्रष्टृप्रभृतिपुरुषावतारसमूहस्याऽप्याश्रयेऽखिलगुरौ परमव्योमनाथादितोऽपि महत्तमप्रकाशे उभयथा परमोपादेयपरमदुर्लभपरमभाग्यदुष्प्रापाश्रयमात्र इत्यर्थः। तस्मिन्नीदृशी पुत्रभावतया तद्वश्यतातिशयकारिणी मतिः कृता विद्यते। युवाभ्यामेवेति शेषः॥ ३०॥ निमित्तोपादानत्वे आक्षिपति—नन्विति। अतोऽत्र। अतः पुरुषप्रधानयोरप्यनयोरंशशक्तित्वात्। इत्यर्थ इति—अंशांशिनोः शक्तिशक्तिमतोश्चाभेदोपचारादेतावेवेत्याशयः। यद्वा—पाठक्रमादर्थक्रमो बलीयान्—"अग्निहोत्रं जुहोति", "यवागूः पचति" इति वत्। 'रामो मुकुन्दः पुरुषः प्रधानम्' इह रामः प्रधानम्। 'यस्याद्य आसीद्गुणविग्रहो महान्यत्संभवोऽहम्' इति पञ्चमस्कन्धे रुद्रोक्तेः संकर्षणस्य प्रधानत्वमुक्तम्। प्रधानादेव महत्तत्त्वोत्पत्तिस्ततोऽहंकारोत्पत्तिश्च सांख्यैर्मन्यत इति मुकुंदस्य पुरुषत्वम्। 'स एव पुरुषः साक्षात्' इत्यादि बहुश उक्तेः स्फुटमेवेति। एवमित्थम्। नियन्तृत्वमाह—किञ्चेति। तदुपहितस्य भूतोपाधिकस्य। जानातीति ज्ञानं जीवस्तस्य नियन्तृत्वे हेतुमाशंकते—कुत इति। इत्यर्थ इति—अनादिभावस्य कारणता कारणस्य नियंतृता च प्रसिद्धेति भावः। यद्वा—एतौ रामो मुकुंदश्च प्रधानं सर्वोत्तमः। कुतः–यतः पुरुषः, अन्येषामर्वाचीनत्वात्पुराणः पुरातनः। किञ्चानयोरवतारप्रयोजनं दैत्यहननमेव न किन्तु स्वोपदिष्टज्ञानरक्षणमपीत्याह—अन्वीयेति। इमौ पुराणौ पूर्णानन्दौ रामकृष्णौ विलक्षणेषु विविधलक्षणेषु नानाविधव्यावर्तकधर्मेषु भूतेषु अन्वीयावतीर्य विज्ञस्य व्यासाद्यात्मनोपदिष्टविशिष्टज्ञानस्यासुरजनकृतनाशं विज्ञायेशाते समर्थयेते, रक्षत इत्यर्थः। हि एव, एतावेव। मुकुन्दश्चेति चकारान्वयः। एवं (भू) तेषु प्राणिषु अन्वीय तद्विलक्षणस्य ज्ञानस्य शुद्धचिन्मात्रस्वरूपस्य जीवस्येशाते। चकाराद्भूतानाञ्च। संधिरार्षः। इमाविति पुनरुक्तिस्तयोरेव तादृशतां निर्धारयति। अन्यत्तैः। तत्रानादित्वात्कारणत्वमिव स्वातंत्र्येणेति वैशिष्ट्यं ज्ञेयं जीवादेरप्यनादित्वात्। यद्वा—नारायणत्वमखिलगुरुत्वमप्याह—एताविति। अंशांशिनोरभिन्नत्वाद्येन रामेण सहैकरूपो यो मुकुन्दस्तावेतौ रामकृष्णाभिधतया पृथक्तया दृश्यमानावेव च विश्वस्य, चकारादवतारादीनामपि बीजयोनी द्वावपि निमित्तोपादानरूपौ विश्वस्य तत्तद्रूपतया नाम्नापि पुरुषः प्रधानमिति विख्यातौ इमावेव तदेतद्द्वयरामकृष्णरूपेण पुराणावनादिसिद्धौ सन्तौ भूतेषु जीवेष्वन्वीय तत्तदुपाधावन्तर्यामिरूपेणानुप्रविश्य विलक्षणस्य ज्ञानस्य चाद्वयज्ञानस्वरूपस्य ब्रह्मणोऽपीशाते, प्रकाशनाप्रकाशनयोः समर्थौ भवतः। "प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः। सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम्॥" इति, "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति, 'ब्रह्मणो हि प्रतिष्ठाहम्' इत्यादिश्रीभागवतगीतोक्तेः। "मदीयं महिमानं च परं ब्रह्मेति शब्दितम्। वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि॥" इति च॥ ३१॥ पुनरीशतामाक्षिपति—नन्विति। तस्य श्रीकृष्णस्य। विशुद्धं तद्भक्त्यादिना पूतम्। तत्पदं श्रीकृष्णसायुज्यम्। तत्र तयोश्चेतः प्रसक्तिमदृष्ट्वा तदेव पुनः कैमुत्येन विवृणोति—यस्मिन्निति द्वयेन। यस्मिन् कृष्णे। एकस्य निर्देशो द्वयोरभेदाभिप्रायेण। जनः यः कश्चिदपि जीवः मरणसमये क्षणमपि विशुद्ध केवलं न त्वन्येंद्रिययुक्तम्। यद्वाऽविशुद्धमपि मनः समावेश्य यथाकथञ्चिल्लब्धपदं कृत्वाऽऽशु सद्य एव ब्रह्ममयः श्रीभगवत्पार्षदतया चिच्छक्तिवृत्तिः शुद्धसत्त्वस्यैव तादृशमूर्तित्वेन स्वरूपप्रकाशचतुरः प्राधानिकवत्तिरोहिततदंशोऽतोऽर्कवर्णः स्वयमेव प्रकाशमानोऽन्यांश्च प्रकाशयन्नित्यर्थः। 'आदित्यवर्णं तमसः परस्तात्' इतिवत्॥ ३२

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तयोः कीदृशौ भावौ तौ भवेतामिति सविस्मयं परिचिन्त्यमानयोः श्रीनन्दयशोदयोरित्थं पूर्वोक्तप्रकारेणानुरागं निरन्तरमाह । कृष्णेतिप्रश्रयमयस्नेहं भगवति सर्वेश्वरे वीक्ष्य विशेषेण साक्षात्कृत्य तत्रापि कृष्णे परमपूर्णाविर्भावे तस्मिन् वीक्ष्य तत्रापि परमं सर्वोत्कृष्टं वीक्ष्य उद्धवो नन्दं तस्यैव प्राधान्यात् सम्वादे प्रवृत्तत्वाच्च श्रीयशोदायास्तु परमवैयग्र्येण तत् प्रत्ययशक्त्या तमेवाह उच्चैः सान्त्वयितुमिति शेषः । तच्च मुदा अहो मम भाग्यम् एतादृशदर्शनमपि जातमिति हर्षेण तदंशाविष्कारेणैवोपलक्षितः नतु तद्दुःखदर्शनमयदुःखांशाविष्कारेणेत्यर्थः । तस्य हि तदैश्वर्यस्फूर्त्तेरेव प्राधान्यात् तदनुरागस्यापि महिमांशस्फूर्त्तिरेव प्रथमतो जाता नतु वैयग्र्यांशस्फूर्त्तिः । केवलवैयग्र्यांशस्फूर्त्तेयोग्यत्वे तु सान्त्वनानधिकारिणं मन्यमानो भगवानपि न तं प्रास्थापयिष्यदिति भावः ॥ २९ ॥ अतस्तत्र प्रथमतस्तन्महिमवर्णनद्वारैव प्रोत्साह्य तौ सान्त्वयितुमिच्छन् तज्जातीयश्रीनन्दवाक्यावसरं प्राप्य तथैवाह युवामिति द्वाभ्याम् । इह श्रीकृष्णावतारावतीर्णतदीयमहाभक्तगणपूर्णे जगति देहिनां तत् पर्यन्तानां सर्वेषां मध्ये ये श्लाघ्याः श्रीनारदादयः श्रीगोकुलवास्यन्तास्तेषामपि मध्ये श्रेष्ठौ हे मानदेति एवं युवाभ्यामेव तदीयानामस्माकं मानो दत्तः यतः श्रीकृष्णसम्बन्धिनः एवं विधा जाता इति लोकैः कीर्तयिष्यत इति भावः । यद्यस्मान्नारायणे नारस्य महत्स्रष्टृप्रभृतिपुरुषावतारसमूहस्याप्याश्रयेऽखिलगुरौ परमव्योमनाथादितोऽपि परमोत्तमप्रकाशे उभयथा परमोपादेये परमदुर्ल्लभपरमभाग्यदुष्प्रापाश्रयमात्रे इत्यर्थः । तस्मिन्नीदृशी पुत्रभावतयां तद्वश्यतातिशयकारिणी मतिः कृता विद्यते युवाभ्यामेवेति शेषः ॥ ३० ॥ हि एव एतावेव मुकुन्दश्चेति चकारान्वयः । भूतेषु प्राणिषु अन्वीय तद्विलक्षणस्य ज्ञानस्य शुद्धचिन्मात्रस्वरूपस्य जीवस्येशाते चकाराद् भूतानाञ्च सन्धिरार्षः । इमाविति पुनरुक्तिस्तयोरेव तादृशतां निर्द्धारयति । अन्यत्तैः । तत्रानादित्वात् कारणत्वमिव स्वातन्त्र्येणेति वैशिष्ट्य ज्ञेयं जीवादेरप्यनादित्वादिति यद्वा । नारायणत्वमखिलगुरुत्वमप्याह । एताविति । अंशांशिनोरभिन्नत्वाद्येन रामेण सहैकस्वरूपो यो मुकुन्दस्तावेतौ रामकृष्णाभिधतया पृथग्दृश्यमानावेतावेव च विश्वस्य चकारादवतारादीनां च बीजयोनी द्वावपि निमित्तोपादानरूपौ विश्वस्य तत्तद्रूपतया नाम्नापि पुरुषः प्रधानमिति विख्यातौ । इमावेव तदेतद्द्वयं रामकृष्णरूपेण पुराणावनादिसिद्धौ सन्तौ भूतेषु अन्वीय तत्तदुपाधावन्तर्यामिरूपेणानुप्रविश्य विलक्षणस्य ज्ञानस्य चाद्वयज्ञानस्वरूपस्य ब्रह्मणोऽपीशाते प्रकाशनाप्रकाशनयोः समर्थौ भवतः । यथोक्तं "प्रकृतिर्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वह"मिति । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति ब्रह्मणो हि प्रतिष्ठाहमिति श्रीभगवद्गीताभ्यः । "मदीयं महिमानञ्च परंब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदी"ति ॥ ३१ ॥ तत्र तयोश्चेतःप्रसत्तिमदृष्ट्वा तदेव पुनः कैमुत्येन विवृणोति यस्मिन्निति युग्मकेन । तत्र कृष्णे एकस्य निर्देशो द्वयोरभेदाभिप्रायेण जनो यः कश्चिदपि जीवः मरणसमये क्षणमपि विशुद्धमपि मनः समावेश्य यथा कथञ्चिल्लब्धपदं कृत्वा आशु सद्य एव ब्रह्ममयः श्रीभगवत्पार्षदरूपतया चिच्छक्तिवृत्तिः शुद्धसत्त्वस्यैव तादृशमूर्त्तित्वेन स्वरूपप्रकाशप्रचुरः नतु प्राधानिकवत्तिरोहिततदंशः अतोऽर्कवर्णः स्वयमेव प्रकाशमानोऽन्यांश्च प्रकाशयन्नित्यर्थः । आदित्यवर्णः आदित्यवर्णं तमसः परस्तादितिवत् । अखिलेति तैर्व्याख्यातं तत्रात्मा स्वांशानामीश्वररूपाणां विभिन्नांशानां च जीवानां मूलरूपः हेतुश्च सर्वप्रकाशक इति ज्ञेयम् ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवति ब्रह्मरुद्रादिध्येयपादनखचन्द्रिके निजेश्वरे श्रीकृष्णे सर्व्वमाधुरीभरपूर्णे तयोर्व्रजनाथयोः परमं सर्व्वोत्तममनुरागं प्रगाढ़प्रेमाणम् , इत्थमदृष्टाश्रुतप्रकारेण वीक्ष्य मुदा विस्मयेन नन्दमाह,– प्राधान्यात्तस्य किंवा मातुः स्नेहविह्वलत्वेन श्रवणाशक्तेः । यद्वा, तयोरनिर्व्वचनीय-तादृशमाहात्म्ययोः, किंवा पूर्व्वजन्मनि द्रोणधरयोः श्रीब्रह्मवरप्राप्तपरमप्रेमभक्तिकयोः, यतो नन्दयति प्रेमभक्त्या जगदिति परमस्निग्धत्वादिना कृष्णमेव वेति नन्दः, दामबन्धनादिना तस्य भक्तवश्यतादियशोविस्तारणद्यशोदा, तयोरिति सर्व्वथा तादृशानुरागयोग्यत्वेन विस्मयकरत्वमुक्तम् । यद्वा, इत्थमीदृशम् , किंवा, अनेन 'अश्रुकण्ठोऽभवत्तूष्णीम्' इत्यादिना, तथा 'शृण्वन्त्यश्रूण्यवास्राक्षीत् ' इत्यादिना चोक्तप्रकारेण परमं परां काष्ठां प्राप्तमनुरागं नवनवोल्लासिस्नेहविशेषं वीक्ष्य साक्षादनुभूय मुदा प्रीत्याह, यत उद्धवो भागवतोत्तम इत्यर्थः, भक्तवराणां प्रेमविशेषवीक्षणेन स्वत एव हर्षोदयात् ; यद्वा, रोदनार्होऽपि मुदा सुखाविष्कारेणैवाह, यत उद्धव उक्तमहामान्त्रत्वादिगुणयुक्त इत्यर्थः, अन्यथा सान्त्वनासिद्धेः ॥ २९ ॥ युवामित्यादि-चतुर्द्दशपद्यात्मकं श्रीमदुधृव-वचनम् । केचिदेवं व्याचक्षते-श्रीमदुद्धवेन श्रीभगवतो विविधैश्वर्य्यकथनेन तस्यासंगोदासीनतानिरूपणेन च तथा सर्व्वात्मकत्वबोधनेन च व्रजनाथयोः प्रेम्णां स्तम्भनं क्रियते, तत्र तु प्रयोजनद्वयम्—तयोर्दुःखस्य प्रेमैकजन्यत्वात् प्रेमस्तम्भनेन दुःखह्रासः स्यादिति श्रीभगवदाज्ञासफलीकरणमेक तथा तयोः प्रेमभिराकर्षात् कृष्णे व्रजमागते परमभक्तानां स्वबान्धवानां यादवादीनामिष्टसिद्धिर्न स्यादित्यपरमिति तत्राद्ये तादृशानां तादृशो गाढ़प्रेमा स्तम्भयितुशक्य एवेति स्वानुभवेन महाभागवतैस्तैरेवोद्धवादिभिर्ज्ञायते । किञ्च, गाढ़प्रेमविवर्त्तविशेषाणामनिर्व्वचनीयपरमानन्दरूपत्वात् प्रेम्णः स्तम्भनं कदाचिदपि भक्तानां दुःखनिरसनाय न कल्पते, प्रत्युत दुःखभरायैव; श्रीभगवते च भक्तप्रेमोल्लास एव वाढ़ं रोचते,

अतएवाग्रे व्रजवासिभिः प्रार्थयिष्यते (भा० १०।४७।६७)—'रतिर्नः कृष्ण ईश्वरे' इति। द्वितीये पित्रोरानन्दनार्थं यथावसरं (कदाचित् कदाचित्) श्रीभगवतो व्रजगमनेन यादवादीनां हानिर्नास्ति, किन्तु पूर्व्ववत् सह-निवासेनैव स च सम्प्रति प्रारीप्सितप्रकटलीलानुगुणो न स्यादिति, अपि च श्रीकृष्णे ईश्वरभावादपि पुत्रभावेन स्नेहस्य भावनया सर्व्वत्र तद्दर्शनादपि साक्षात् कृष्णदर्शनस्य तथा प्रपञ्चात्मक-विराड्रूपादपि सच्चिदानन्दघनमूर्त्तेः, समन्ततः परमोत्कृष्टत्वात्तथा प्रतिपादनं कापट्य एव पर्य्यवस्यति। तस्मादयमर्थः—व्रजनाथयोरनुरागौत्कट्ये नातिविस्मयादुद्धवेन प्रथमं युवामित्याभिश्चतुर्भिस्तौ स्तुतौ, शेषैश्च पद्यैः श्रीभगवदागमनस्यावश्यकत्वप्रतिपादनेन सुदृढमाश्वासितौ, न च तदाश्वासनमात्रमेव केवलम् (भा० १।११।९) 'यर्ह्यम्बुजाक्षापससार भो भवान्, कुरून्मधून् वाथ सुहृद्दिदृक्षया' इति प्रथमस्कन्धे श्रीद्वारकावासिनां वचनेन व्रजे श्रीभगवदागमनं व्यक्तमेव। तदा माथुरमण्डलेऽन्येषां सुहृदामभावादेषोऽर्थस्तत्तत्पद्यानां व्याख्याने स्फुटीभविष्यति। तत्रादौ विस्मयेनाभिष्टौति—युवामिति। इह जगति देहिनां ऋषिदेव नराणां मध्ये नूनं निश्चितं युवामेव श्लाघ्यतमौ, भक्तः श्लाघ्यः, प्रेमभक्तः श्लाघ्यतरः, स्नेहविशेषवान् श्लाघ्यतमः, तादृशत्वेन परमस्तुतियोग्यावित्यर्थः। हे मानदेति युवाभ्यामेवमस्माकमपि लोके मानो दत्त इति भावः। यद् यस्मान्नारायणे सर्व्वजीवेश्वरे; किञ्च, अखिलानां श्रीब्रह्मादीनां सर्व्वेषां गुरावपीदृशी पुत्रस्नेहमयी मतिर्युवाभ्यां कृतेति श्रीभगवन्माहात्म्यकथनमपीदमेतयोः स्तुतावेव पर्य्यवस्यति॥ ३०॥ 'हि' एव, एतावेव, मुकुन्दश्चेति चकारान्वयः। भूतेषु प्राणिषु देहेषु वान्तीय विलक्षणस्य देहादेर्भिन्नस्य, यतो ज्ञानस्य 'च' अपि, ज्ञानस्वरूपस्यापि जीवस्येत्यर्थः। इमाविति पुनरुक्तिस्तयोरेव तादृशत्वनिर्द्धारार्थम्; अन्यत्तैर्व्याख्यातम्। यद्वा, भूतेषु सर्व्वजीवेष्वन्तर्य्यामितयान्वीय, तेषां तथा विलक्षणस्य सर्व्वतोऽसाधारणस्य ज्ञानस्वरूपस्य च ब्रह्मणोऽपीत्यर्थः। ईशाते प्रभुत्वेन वर्त्तेते, यतः पुराणौ पुरापि नवनवाविति ब्रह्मणोऽप्यधिकाश्चर्य्यत्वाद् ब्रह्मघनरूपावित्यर्थः॥ ३१॥ तादृशेश्वरे च तस्मिन् कथञ्चित् कदाचिद्बलात् किञ्चिन्मनः-प्रवेशेनापि सर्व्वस्य कृतार्थता स्यात्, भवतोश्च सहजसन्ततभावविशेषेण कृतार्थता किं वर्ण्यत्याह—यस्मिन्निति। यत्र कृष्णे द्वयोरभेदाभिप्रायेण कृष्णस्य प्राधान्येन वा एकत्वेन निर्द्देशः। जनो यः कश्चिदपि जीवो मरणसमयेऽपि क्षणमपि विशुद्धं केवलमेव, न त्वन्येन्द्रियम्। यद्वा, अकारप्रश्लेषेणाविशुद्धमपि मनः समावेश्य सम्यक् सुष्ठु 'आ' ईषत् किञ्चिन्मात्रमपीत्यर्थः। बलादपि प्रवेश्य आशु सद्य एव ब्रह्ममयः, श्रीभगवत्पार्षदरूपतया ब्रह्मस्वरूपमूर्त्तिः सन्, अतोऽर्कवर्णः सूर्य्यरूपो जगत् प्रकाशयन्नित्यर्थः॥ ३२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

एतौ रामो मुकुन्दश्च बीजयोनी बीजभूतानां पृथिव्यादीनां कारणभूतौ पुरुषप्रधानं प्रधानं पुरुषमन्वीय अत एव योनिभूतावित्यर्थः। विलक्षणस्य ज्ञानस्य ईशाते प्रवर्त्तकावित्यर्थः॥ ३१॥ तदेव विवृणोति। यस्मिन्निति। निर्हृत्य दग्ध्वा ब्रह्ममयः ज्ञानप्रचुरः अर्कवर्णः अप्राकृतरूपः॥ ३२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं तयोर्नन्दयशोदयोः भगवति षाड्गुण्यपूर्णे श्रीकृष्णे परमं सर्वोत्कृष्टमनुरागमवलोक्य उद्धवः मुदा नन्दमाह॥२९॥ उक्तिमेवाह। युवामित्यादिना। एवं निशा सेत्यतः प्राक्तनेन ग्रन्थेन। हे मानद! युवां दम्पती देवानामपि श्लाघ्यतमौ पूज्यतमावित्यर्थः कुतः यत् यस्मादखिलगुरौ नारायणे श्रीभगवति कृष्णे एवं विधाऽनुरागयुक्ता मतिः कृता अनेन कृतकृत्यत्वं सूचितं हितकृत्त्वेन जनकत्वेनाखिलगुरुत्वं विवक्षितम्॥ ३०॥ तदेवोपपादयति। एताविति। रामो मुकुन्दश्चेत्येतौ विश्वस्य बीजयोनी बीजभूतानां पृथिव्यादीनां कारणभूतौ ननु विश्वसजातीयौ प्रकृतिपुरुषौ तस्य बीजयोनी नैतावित्यत आह। पुरुषः प्रधानं प्रधानपुरुषशरीरकावेतावेव बीजयोनी इत्यर्थः। अनेन जनकत्वं स्पष्टीकृतौ इमौ पुराणौ पुरुषौ विलक्षणेषु देवमनुष्यादिरूपेण नन्दनादिकेषु भूतेष्वन्वीयान्तः प्रविश्य ज्ञानस्य ईशाते विलक्षणस्येति पाठे शब्दादिविषयगोचरस्य ज्ञानस्येशाते नियन्तारौ प्रवर्त्तकौ भवत इति यावत् अनेन नियन्तृत्वमुक्तं यद्वा विलक्षणस्य ज्ञानस्येति सम्यग्ज्ञानस्य प्रवर्त्तकत्वेन हितत्वमीशात इति नियन्तृत्वमुक्तम्॥ ३१॥ यत् कृतामतिरीदृशीत्यनेन सूचितां तत्कृत्यतामेवोपपादयति। यस्मिन्निति द्वाभ्याम्। यस्मिन्नित्यस्य तारन्नित्युत्तरेणान्वयः क्षणं क्षणमात्रमपि विशुद्धं विषयान्तरविमुखं भाव यस्मिन्निधाय कर्माशयं कर्मवासनां निर्हृत्य दग्ध्वा ब्रह्ममयः ज्ञानप्रचुरः अर्कवर्णोऽप्राकृतरूपः परां गतिं तत्पदं याति॥ ३२॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नूनमिदानीम्॥ ३०॥ नारायणशब्दार्थौ ऐरावतो नागरङ्ग इति वत् नारायणो नाम कश्चित् किंन स्यादखिलगुरुश्च पाषाणवदिति तत्राह। एताविति। एतौ कृष्णरामौ विश्वस्य प्रपञ्चस्य बीजयोनी बीजत्वेन रतिहेतुत्वाद्रेतस्त्वेनोपजीव्यत्वेन वा योनित्वेन स्वमहिम्ना रतो निधानस्थानत्वेन करणत्वेन वा कीर्तितावितिशेषः। बीजं शुक्रे फले सस्यान्ने इति यादवः योनिः स्त्रीणां भगस्थाने कारणे ताम्रके पणे इति च यद्वा विश्वनाम्नो हरेः बीजे फले निष्पन्नरूपौ योनी गोवर्धनस्योद्धरणादिकर्मणा तत्त्वस्य योग्यौ च योग्यं यत्नक्षमारूपधानीपाधिषु वन्दन इति लाभे निष्पत्तिभोगे च बीजं फलधने फलमिति च यद्ययं न विष्णुस्तर्हि

गोवर्धनोद्धरणादिकर्म न कुर्यात् मानवबलासाध्यत्वादित्यादि हि शब्दो वक्ति अजामेकां लोहितशुक्लकृष्णां प्रधानादिदमुत्पन्नमित्यादिना प्रकृतेर्बीजयोनित्वप्रतीतेः कथमेतयोर्युज्यत इति तत्राह । इमाविति । यस्त्वेष पुरुषः प्रकृतिरिति श्रुतेः प्रधानं प्रकृतिमूल कारणमित्यर्थः । अनेन विरिञ्चस्य कारणत्ववार्त्ताप्यपि चित्प्रयुक्तेत्याशयेनाह । पुरुष इति । "प्रकृतिं पुरुषञ्चैव प्रविश्य पुरुषोत्तम" इत्यादेः तत्कारणत्ववाचोऽपि गतिरुक्ताभवतात् असङ्गस्य तत्प्रवेशः कथमित्यत उक्तं पुराण इति पुरमणति प्राप्नोतीति तदेवानुप्राविशदिति श्रुतेरसङ्गस्यापि प्रवेशो युज्यत इत्यर्थः यद्वा । बीजयोनित्वे हेतुमाह । प्रधानमिति प्रधानत्वात् सर्वस्मादुत्तमत्वात् एकमेवाद्वितीयमिति श्रुतिः उत्तमत्वं कुत इत्यत्राहः पुरुष इति । पुरातनपुरुषत्वात् अन्येषामर्वाचीनपुरुषत्वादित्यर्थः । केवलमवतारप्रयोजनं कंसादिहननं न भवति किन्तु स्वोपदिष्टज्ञानरक्षणं चेति भावेनाह । अन्वीयेति । इमौ पुराणौ पूर्णानन्दौ कृष्णरामौ विलक्षणेषु विविधलक्षणेषु नानाविधव्यावर्तकधर्मेषु भूतेषु अन्वीय अवतीर्य विज्ञाय व्यासाद्यात्मना विशिष्टज्ञानमुत्पाद्यासुरजनप्रकृतिजनेन तन्नाशं विज्ञाय तद्धननेन तिरोहितज्ञानोपदेशेन च ज्ञानस्येशाते तदर्थयेते रक्षत इत्यन्वयः ॥ ३१ ॥ जन्मादिकं श्रोतव्यं श्रीकृष्णस्यैव मोक्षहेतुत्वात्तस्येति भावेनाह । यस्मिन्निति । कर्माशयं शरीरारम्भककर्मसमूहं यस्मिन्मनो वा निगृह्य विनियम्य विनाश्य ब्रह्ममयः ज्ञानप्रधान इत्यर्थः । अर्कवत्स्फटिकवद्वर्णः प्रकाश्ये यस्य स तथा अतिस्वच्छ इत्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मुदा अहो मम भाग्यम् एतादृशदर्शनमपि जातमिति । हर्षांशाविष्कारेणोपलक्षितः । नतु तत् दुःखांशाविष्करेणेत्यर्थः । तस्य हि तदैश्वर्यांशस्फूर्त्तेरेव प्रधान्यात्तदनुरागस्यापि महिमांशस्फूर्त्तिरेव तावज्जाता न च वैयग्र्यांशस्फूर्त्ति वैयग्र्यांशमयत्वे तु तु सान्त्वनानधिकारिता भवदिति ॥ २९ ॥ अतस्तत्र प्रथमतः तव महिमवर्णनद्वारैव प्रोत्साह्य तौ सान्त्वयितुमिच्छन् तज्जातीया । नन्दवाक्यावसरं प्राप्य तथैवाह । युवामिति द्वाभ्याम् । नारायणे नारस्य महत्स्रष्टृप्रभृतिपुरुषाकारसमूहस्याप्याश्रये अखिलगुरौ परमव्योमाधिपादितोऽपि महत्त्वप्रकाशे मति तद्वश्यताकारी वात्सल्यमयो भावः । भूतेषु प्राणिषु तद्विलक्षणस्य ज्ञानस्य शुद्धचिन्मात्रस्वरूपस्य जीवस्येशाते यद्वा । नारायणत्वमखिलगुरुत्वमप्याह । एताविति । विश्वस्य चकारादवतारादीनाञ्च यतेः भूतेषु सर्वभूतेषु अन्वीयाऽपि तद्विलक्षणस्यान्तर्यामिणः तथा तादृशतया स्थितस्य ज्ञानस्य चिन्मात्रस्य ब्रह्मणस्तद्रूपस्यापि ईशाते प्रकाशनाप्रकाशनयोः प्रभवतः । तयोरप्याश्रयत्वात् विष्टभ्याहमित्यादि ब्रह्मणो हि प्रतिष्ठाहमित्यादिश्रीगीताभ्यः ॥३०-३१॥ तत्र तयोश्चित्तप्रसत्तिमदृष्ट्वा तदेव पुनः कैमुत्येन विवृणोति । यस्मिन्निति द्वाभ्याम् । जनः यः कश्चिदपि जीवः मरणसमयेऽपि क्षणमपि अविशुद्धमपि ब्रह्ममयः श्रीभगवत्पार्षदरूपतया चिच्छक्तिवृत्तिशुद्धसत्त्वस्यैव तादृशमूर्तित्वेन स्वरूपप्रकाशप्रचुरः । नतु प्राधानिकवत्तिरोहिततदंशः । अतोऽर्कवर्णः स्वयमेव प्रकाशमानोऽन्यांश्च प्रकाशयन्नित्यर्थः । आदित्यवर्णं तमसः परस्तादित्यादिवत् ननु नारायणश्चतुर्भुजस्तत्राह । सर्वकारणं यत्तत्त्वं तदेवामर्त्याकारा मूर्त्तिर्यस्य सः नराकृति परं ब्रह्मेत्यर्थः । भावमीदृशानुरागं तथाप्यजातशान्ती प्रत्युत त एवहितेऽपि सदुत्कर्षमेवं कथयन्तीति पितृत्वे हेतुः । भगवानपि सात्वतानां भक्तानां पतिः पालकः । तदभीष्टसुखसम्पादकः । ये यथा मामित्यादेः तत्तस्माद्धेतोः सत्यं सपथमेव कुर्वन्नास्त इत्यर्थः । सत्यं शपथतथ्ययोरित्यमरः ॥ ३२-३५ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

युवां श्लाघ्यतमावित्यादि । नारायणेऽखिलगुरोरिति नारायणोपासकत्वेनापि नारायणे सति यद् यस्मादखिलानां नारायणादीनामपि गुरौ श्रीकृष्णो ईदृशी मतिः कृता, तत् तस्माद् युवां श्लाघ्यतमौ । वस्तुतस्तु श्रीनन्दयशोदे नित्यसिद्धे एव तथापि तत्र प्रविष्टौ द्रोणधरात्मानौ प्रतीयमुक्तिर्वदितव्येति ॥ ३० ॥ एवं श्रीव्रजराजस्य निर्गच्छतः प्राणान् रुन्धन्निव ज्ञानमार्गं प्रस्तौति—एतौ हीत्यादि । विश्वस्य योनी उत्पत्तिस्थाने, न तु कस्यापि पुत्रौ; विश्वयोनेः पुत्रत्वमनुपपन्नमेवेति भक्त्या स्नेहादिरेकं वारयति ॥ ३१-३२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नारायणेऽखिलगुरावित्यादि । नारायणोपासकेनापि नारायणेऽपि सति अखिलानां नारायणादीनामपि गुरौ श्रीकृष्णे यत्त्वया ईदृशी मतिः कृतेति नन्दं स्तौति ॥ ३० ॥ नन्दस्य स्नेहातिरेकेण बहिर्गच्छतः प्राणान् रक्षन्निव ज्ञानमार्गं प्रस्तौति–एतौ हीत्यादि । विश्वस्य योनी, न तु तव पुत्रौ विश्वयोनेः पुत्रत्वमनुपपन्नमेवेति स्नेहातिरेकं स्थगयति ॥ ३१-३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वीक्ष्य ज्ञातचरतन्महाप्रेमकोऽपि विशेषेण ईक्षित्वा परमं देवकीवसुदेवाभ्यां सकाशादप्युत्कृष्टं मुदेति ममैतज्जन्मैव सार्थकमभूत् यदीदृशोऽनुरागो दृष्ट इति तयोर्दुःखदर्शनेऽप्युद्धवस्यानन्दः ॥ २९ ॥ इह जगति श्लाघ्येषु भक्तेष्वपि देवकीवसुदेवौ श्लाघ्यतरौ ताभ्यामुत्कर्षान् युवां श्लाघ्यतमौ नारायणेऽखिलगुराविति मन्ये रामं च कृष्णं च प्राप्ताविह सुरोत्तमाविति तद्वाक्येनैव तस्य कृष्णैश्वर्यस्फूर्त्तिं ज्ञात्वा तदैश्वर्येणैव तौ सान्त्वयितुं तदेव व्याचष्टे स्मेति भावः ॥ ३० ॥ नारायणत्वमखिलगुरावमाह ।

एताविति । अंशांशिनोरभिन्नत्याद्बहुमूर्त्येकमूर्तिकमित्यब्रह्मज्ञानश्च एतौ द्वावप्येक एव नारायण इत्यर्थः । विश्वस्य बीजयोनी द्वावपि निमित्तोपादनरूपौ द्वावेव पुरुषः प्रधानं शक्तिशक्तिमतोरैक्यादिति भावः "प्रकृतिर्यस्योपादनमाधारः पुरुषः परः । सतोऽभिव्यञ्जनः कालो ब्रह्मरात्रित्रतयं त्वह"मित्येतदुक्तेः भूतेषु अन्वीय अन्तर्य्यामितया प्रविश्य विलक्षणज्ञानस्य ईशाते प्रदानसमर्थौ भक्तेभ्यो भगवद्ज्ञानस्य ज्ञातभ्यो ब्रह्मज्ञानस्य च कृपया दातारौ स्याताम्—

तेषां सततयुक्तानां भजतां प्र पूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ इति ।

"मदीयं महिमानं च परंब्रह्मेति शब्दितम वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदी"ति चैतदुक्तेः चकारादविलक्षणज्ञानस्य प्राकृतस्य स्वर्गादिसाधनस्यापि कर्मिभ्यो दातारौ ॥ ३१ ॥ निर्हृत्य दग्ध्वा परां गतिं वैकुण्ठलोकं ब्रह्ममयश्चिन्मयशरीरः सन् अर्कवर्णः सूर्य्यतुल्यतेजाः ॥ ३२ ॥

गूढार्थदीपिनी

यत यस्मात् ॥ ३० ॥ बीजम् उपादानं पुरुषः मुकुन्दः । योनिः निमित्तं प्रधानं प्रकृतिः रामः अन्वीय अनुप्रविश्य । देहात् विलक्षणस्य ज्ञानस्य चिद्रूपस्य जीवस्य ईशाते नियन्तारो भवतः । पुराणौ अनादी ॥ ३१ ॥ क्षणं क्षणमात्रमपि । समावेश्य स्थिरीकृत्य । कर्माशयं कर्मवासनां दग्ध्वा । गतिं मुक्तिम् याति ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विश्वस्य अयने प्रवेशनिर्गमनस्थाने विश्वहेतौ अखिलस्य प्राणिमात्रस्य गुरौ ज्ञानप्रदे श्रीकृष्णे ॥ ३० ॥ हेतुत्वं ज्ञानप्रदत्वं चाह । एताविति । विश्वस्य बीजयोनी निमित्तोपादानहेतू इति हेतुत्वमुक्तम् ज्ञानप्रदत्वमाह । भूतेषु अन्वीय अनुप्रविश्य विलक्षणस्य विविधलक्षणस्य तत्तत्प्राणियोग्यस्य भोगमोक्षानुरूपस्य इमौ पुराणपुरुषौ ईशाते ईश्वरौ उद्बोधकावित्यर्थः । ननु चेतनाचेतनपरमपुरुषभेदात्तत्त्वत्रयमस्ति तत्र परमपुरुषो विश्वहेतुरेकोऽस्ति एतौ बीजयोनी इति कथं द्विवचनमत्राह । रामो मुकुन्द इति । तदवतारत्वात् अत एक एव विश्वहेतुः ननु चेतनाचेतनात्मकविश्वहेतुकथं पुरुषप्रधानयोर्युक्तमनुरूपत्वादित्यत्र पुरुषस्याल्पज्ञत्वादसर्वज्ञत्वात् प्रधानस्य जडत्वादसर्वात्मत्वाच्च उभयोर्मुकुन्दनिरपेक्षस्थित्याद्यभावाच्च न विश्वहेतुत्वं सर्वात्मा सर्वज्ञः श्रीमुकुन्द एव विश्वहेतुरित्याशयेनाह । पुरुषो जीवः जातावेकवचनम् स्वसाधारणेन रूपेण भिन्नेऽपि मुकुन्दपिरपेक्षस्थितिप्रवृत्त्यभावात्तदभिन्न एव तदंशत्वात् तत् प्रधानमपि मुकुन्द एव तच्छक्तित्वात् अतः सर्वात्मा सर्वगुणशक्त्याद्याश्रयः श्रीकृष्णः सर्वस्य हेतुर्गुरुश्चेति सिद्धम् ॥ ३१ ॥ अत एव कारणन्तु धेयमिति श्रुतिप्रोक्तस्य तद्ध्यानस्य मोक्षहेतुत्वमाह । यस्मिन्निति । यस्मिन्नित्यस्य तस्मिन्नित्युत्तरेण सम्बन्धः ब्रह्ममयः ब्रह्मप्रधानस्तत्परोनो मुमुक्षुः यस्मिन् क्षणमपि प्राणवियोगकालेऽपि विशुद्धं मानसं समावेश्य कर्माशयं कर्मवासनां निर्हृत्य त्यक्त्वा अर्कवर्णः प्रकाशरूपाकृतमूर्तिः सन् परां गतिं तत्पदं याति ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्नेहेन स्नुतौ पयोधरौ स्तनौ यस्यां साऽश्रूणि शीतान्यशीतानि चावास्त्रक्षीदुत्ससर्ज ॥ २९ ॥ तयोर्नन्दयशोदयोर्नन्दगोपयशोदयोर्नन्दश्चानन्दश्च यशश्च तौ ददत इति तयोः स्वकुलानन्दयशःमुदयोरिति यावत् ॥ ३० ॥ यद्यतोऽखिलगुरौ साक्षान्नारायणे युवाभ्यामीदृशी मतिः कृता तस्माद्युवामिह हे नन्द मानद यशोदे च देहिनां प्रशस्तशरीरभाजां तन्मध्ये श्लाघ्यतमौ सुस्तुत्यौन्नत्यौ नूनं निश्चयः । इहैतद्विषये मा नदाहं कियानिति विपरीतं न वदेत्यप्यर्थः ॥ ३१ ॥ अखिलगुरुत्वं चैतस्मादित्याह । एताविति । छत्रिनयेनेषमुक्तिर्वा वेशविवक्षया बलं सङ्कलय्येति ज्ञेयम् । एतौ रामकृष्णौ विश्वस्य प्रपञ्चस्य बीजं च व्यञ्जकत्वान्नित्यं प्रति योनिश्चानित्यं प्रति कारणताद्बीजयोनी इत्युच्यते । अत्र मानं किमित्यतो वेदादिरेवेतीदमप्याह । बीजं नित्यं भगवव्यञ्जकमिति वेदादिशास्त्रं तदेव योनिरेतदाद्यर्थनिगमकं ययोरिति शास्त्रयोनीत्यर्थः । प्रकृतिकृतताकथनं ब्रह्मस्रष्टृता कथमित्यत आह । प्रधानं प्रकृतिः पुरुषो हिरण्यगर्भः समवर्तताग्र इति श्रुतः पुरुषावपीमाविति । परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरित्युक्तेरेकशेषस्यापि तद्विशेषत्वादेतद्विस्तृतमधिकारश्च तद्धानिः प्रसङ्गादेव चिन्तिताविति सुधातट्टिप्पणीषु प्राच्युदङ्क्तिमस्माभिः स्कन्धान्तरविवृताविति ततोऽप्यनुसन्धेयं । ईदूद् इति प्रगृह्यतां प्रगृह्य प्लुतप्रगृह्या इति प्रकृति भावः । पुरुषशब्द स्वयं मूलकृद्याचर्करीति ॥ पुराण इति । यथोक्तं गीताभाष्ये । पुरं देहमणतीति पुराणः पुरि शेत इति पुरुष इति व्युत्पत्तिः सर्वासु पूर्षु । एषस्त्र्येण पुरुष इति श्रुतेः । प्रकृतिकारणतावादस्तु प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः । क्षोभयामास भगवान्सृष्ट्यर्थं जगतो विभुरित्याद्यविदितगतिरेव । स्वसृष्टव्यक्तिं कृतेषु च विलक्षणेषु सुरनरतिर्यगादिनानाभेदकधर्मवत्सु । अन्वीयान्तः प्रविश्य विज्ञाय नित्यज्ञानावपि तद्विषयतां नीत्वेवेति विज्ञायेत्युक्तिः । एतद्ध्वननार्थमेवासन्धिः । इमौ प्रत्यक्षसिद्धौ । पुराणावादिकालिकौ । ईशाते प्रेरयतः । मानमिदमत्रेत्याह । भूतेषु विलक्षणेषु ब्रह्मलक्षणेष्विमौ इः इच्छाविषयस्य मा ज्ञानं ययोस्तौ पुराणौ देहाद्यन्तर्गतौ ईशाते इति ये विज्ञा विशेषज्ञानिनो व्यासादयो यः पुराणस्तत्रावदन्निति वेति । पुराणौ पद्मनाभदेहगतौ केशाविति यावत् । विलक्षणेषु दुर्लक्षणवत्सु दैतेयेषु भूतेषु भुव्यूतेषु प्रोतेषु पुरुषो ब्रह्माऽन्वीय प्रार्थयामास । तद्विज्ञायेशापद्मनाभेनोत्सृष्टाविभौ ते सकाशाज्जाताविति योजयन्ति । पुराणशब्दस्य

पुल्लिङ्गता त्वितिहासपुराणाः पञ्चमो वेदानां वेद इति तत्त्वनिर्णये तथा पुराणशब्दस्य विशेष्यलिङ्गत्वाद्ग्रन्थविशेषणत्वेन पुल्लिङ्गत्वमेवाश्रितमिति तट्टीकायां चोक्तेः। ग्रन्थ इत्यध्याहृत्यान्वयः। ये विज्ञास्त एवैवमभ्यधुरिति वा भूतेषु नित्यसत्ताकेषु विलक्षणेषु नानाशब्दलिङ्गादिर्विभिन्नेषु वेदादिष्वन्वीयोपक्रमादितात्पर्यलिङ्गैः सम्यग्विचार्य ये विज्ञा ते इमौ पुराणौ ईशाते इत्यवदन्नत एतौ। उर्वरितं पूर्ववत्। तत्तु समन्वयादित्यादेरिति वा। विलक्षणेषु विगतं लक्षणं येषां तानि तेषु भूतेषु ये वितद्रक्षणादेर्विश्वस्य च तं कर्तुमिमौ पुराणौ मानवतनूमाप्तवन्तायन्वीय ईशाते इति ये विज्ञाः शिष्टं स्पष्टम्॥ ३२॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

उभयेनापि अनुराग एव भाति परमप्रेमात्मको निरूपितो भवति परमं लौकिकः अयं च ज्ञानेनालौकिकः कर्त्तव्यः तत्कर्तुं प्रेषित उद्धव इति तदुपयोगिसर्वमाहेत्याह। तयोरित्थमिति। उभयोरपि भक्तौ मुख्यत्वान्नन्दस्य प्रथमतो नन्दग्रहणमसहजः सम्बन्धो लौकिको नास्तीति नन्दाद्यशोदायां विशेषः नन्दयशोदयोः भगवति कृष्णे आविर्भूते सदानन्दे परमनुरागं सर्वक्रियात्याजनपूर्वकं सर्वभावभगवद्ग्रहणात्मकं वीक्ष्य यशोदा कदाचिल्लज्जिता भविष्यतीति नन्दमाह। यतः स उद्धव उत्सवात्मकः तस्मिन्नागते शोकांशेन न भाव्यमिति मुदेति भगवद्भक्तान् दृष्ट्वा संभाषणेनाहमपि कृतार्थो भविष्यामीति वा स्नेहमभिनन्द्य विषयस्यालौकिकत्वं सम्बोधयति। येन माहात्म्यज्ञानपूर्वकः सर्वतोऽधिकः स्नेहो भवति॥ २९॥ युवामिति। प्रथमतोऽभिनन्दनं तत्रापीह भूमौ युवां यशोदानन्दो श्लाध्यतमौ सत्कर्मणा श्लाध्या भवन्ति। ततोऽपि ज्ञानेन ततोऽपि भक्त्या भक्तावपि परमप्रेम सर्वोत्कृष्टं प्रमाणाच्च प्रमेयबलमधिकं तेन स्वतन्त्रभक्त्यपेक्षयापीयं प्रमेयभक्तिः रसाला अत आह। नूनमिति। मानदेति सम्बोधनं मद्य मानं प्रयच्छसीति मद्वाक्यमपि सत्यतया स्वीकुर्वित्यर्थः। ननु पुत्रे स्नेहातिशयः कथं स्तूयते तत्राह। नारायण इति। अयं हि नारायणो मूलपुरुषः नारायणशब्दोऽत्र पुरुषोत्तमवाची अखिलगुराविति प्रमाणरूपोऽपि सर्ववेदवक्ता नारायणः पुरुषोत्तम एवेति अतः सर्वशास्त्रार्थरूपे प्रमेयबलवति यद्यस्मात्कारणात् एतादृशी मतिः कृता देवोत्तमत्वं तु नन्देनोक्तकोटिकसम्भावनया ज्ञातमेव तस्मादसम्भावना न भविष्यतीति तत्र पुरुषोत्तमत्वं बोधितवान् अतः परं तस्मादधिको विषयो नास्ति भक्तेरप्यधिकं कर्त्तव्यं नास्तीति वक्तव्यम्॥ ३०॥ तत्र प्रथमं भगवतः सकाशादन्यो महान्नास्तीति आह। एतौ हीति द्वाभ्याम्। धर्म्युत्कर्षेण धर्मोत्कर्षेण च माहात्म्यं द्विविधमिति तत्र प्रथममाह। एक एव ताभ्यां जात इति आवेशिनमपि ज्ञापयितुं तुल्यतया सम्बन्धं च दूरीकर्तुं कृष्णरामौ निर्दिशति। एतौ हि निश्चयेन विश्वस्य बीजयोनी समवायिकारणं तन्निमित्तकारणं च बीजं हि समवायि कारणं तत्र भगवत्सामर्थ्येन सजातीयत्वमापद्यमानाः भूम्यवयवाः पुष्णन्ति ततो वर्द्धते सजातीयैव योनिरपि मृग्यते विजातीया नोत्पद्यते उत्पन्नमन्यथा स्यादेतदुभयमेव दृष्टं कारणम् अन्यत्तु जलान्नादिसाधनपोषकत्वेन तत्र यद्येकप्रकारेण भवेतां वृद्धिह्रासौ आविर्भावतिरोभावौ न संगच्छेयातां ततो भगवानुभयात्मको भवति लोके तु उभयोः साधका अन्येऽपि मृग्यन्ते अत्र भगवानेवेति तदेकप्रयोजनाय च तथा च जात इति न सहकार्यपेक्षा अत एव प्रथमं प्रकृतिपुरुषरूपेण भवति एवं सति युक्तिर्ब्रह्मणि संगच्छते ब्रह्मवादे तु तदेव सर्वशक्तियुतं क्रमेणैवाभिव्यक्तो भविष्यामीति प्रथमस्रष्टौ तादृशमुत्पाद्य क्षयवृद्ध्यनपेक्ष्यं वा तादृशमेवोत्पाद्य पश्चाल्लोके बहूपकारसिद्ध्यर्थमेवैकैकस्य बहुधोपयोगाय शक्तिसमूहं विभज्य बीजयोन्यादिभावेन वस्तूनि परिकल्प्य स्थापितवानिति विशेषः। उभयथापि पश्चात्प्रकारद्वयं सिद्धमिति मन्तव्यम् अनुभवसिद्धत्वात् तथात्रापि मोक्षसृष्ट्यादिचतुर्विधपुरुषार्थान् साधयितुं सर्वस्यापि सर्वं माभवत्विति स्वशक्ति विभज्य मोक्षभक्त्योः स्वयं बीजं योनिश्च रामः सृष्ट्यादौ तु विपरीतमिति उभावपि योनिबीजभावेन सर्वलोकानां हितार्थमवतीर्णौ अत एकस्यैव हितार्थत्वेन ग्रहणेन कोऽपि पुरुषार्थः सिद्ध्येत् अत एव सर्वत्राभ्युदयफलेषु रामस्य प्राधान्यं भगवतः सहभावमापन्नं क्वचिद्रामस्य प्राधान्यं प्रथमनिर्देशेन साक्षात् महती शक्तिः कृष्ण एवेति नो कापि सहभावो निरूपितः निःश्रेयसे तु रामस्य सहभावः साधारण्यं द्वयोस्तुल्यतया निरूपणमिति सर्वत्रैव विमर्शः अतो भगवत जगत्कारत्वं मोक्षदातृत्वं निरूपयन् निरूपयति एषा युक्तिर्हिशब्देनोच्यते एतौ कृष्णरामौ विश्वस्य बीजयोनी उभावपि तौ गणयति। मुकुन्द इति। नाम्नाभ्युदयनिःश्रेयसफलं ज्ञापितम् एताविति भक्त्या प्रादुर्भूतौ प्रदर्शन्निवाह द्रष्टुमेष्याम इत्यनेन सत्यं निरूपितं द्विरूपता किमर्थेत्याशङ्क्य दृष्टान्तमिव वदन् स्वरूपद्वयं निर्दिशति पुरुषः प्रधानमिति अनयोः प्रकृते विशेषमाह। अन्वीय सर्वेषु भूतेषु विलक्षणस्य विः काल एव लक्षणं यस्य तस्याभ्युदयस्येशानौ तथा ज्ञानस्य च मोक्षसाधकस्य विलक्षणत्वं प्रापञ्चिकाद्वैलक्षण्यं चकाराद्भक्तेरपि ईशाते समर्थौ भवतः एतदर्थमेवैतौ प्रादुर्भूताविन्यर्थः। एवं सति ब्रह्म भगवान् कार्यमिव एतत्प्रयोजकावेतावाविर्भूताविति शङ्का स्यात् तद्व्यावृत्त्यर्थमाह। इमौ पुराणाविति। एतावेवं भूतौ पूर्वसिद्धावेवावन्तर्मूर्त्तित्वाद्भगवतः॥ ३१॥ एवं स्वरूपोत्कर्षमुक्त्वा धर्मोत्कर्षमाह। यस्मिन्जन इति। यद्यपि परः सहस्रं भगवद्धर्माः सन्ति तेषां माहात्म्यं च भगवत एव धर्मधर्मिणोरभेदात् भगवानेव धर्मरूपेण भवतीति सिद्धान्तात् धर्मान् परित्यज्य प्रमाणबलेन भावकेन भगवता परिकल्पितं भगवद्रूपं सर्वेषां स्वाधीनं मुदा तस्य माहात्म्यमाह यस्मिन्मानसे रूपे जनः प्राणी प्राणवियोगकाले क्षणं मनोविशुद्धं समावेश्य कर्माशय निर्हृत्य परां गतिं याति साधनान्तरनिरपेक्षत्वज्ञापनाय यस्मिन्मानसे रूप इत्युक्तं जन इति सामान्यः नतु ब्राह्मण ऋषिर्वा तत्रापि प्राणवियोगकाले सर्वेन्द्रियवैकल्पे अशुद्धावस्थायां क्षणं चित्तं समावेश्य नतु बहुकालं नापि वा देहयोरनुवृत्तिः तदपि रूपं सर्वफल-

साधकमिति विशुद्धमित्युक्तम् अन्यथा कामनायां तदेव फलिष्यतीति विशेषेण शुद्धिः कामनाभाव एव । ननु "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः अथ मर्त्योऽमृतोऽभवत्यत्र ब्रह्मसमश्नुत" इति श्रुतेः कामने भाव एव पुरुषार्थसिद्धौ निष्कामं सदात्मगाम्येव भवतीति निरूप्यते येनान्यथा सिद्धं स्यात् कितु क्षणं सम्यगावेशनेनैवमनो विशुद्धमपि भवति ततः कर्माशयं कर्माण्याशेरतेऽस्मिन्निति बीजात्मकं संघातं च निवर्त्य स्वाभिमानपरित्यागेन मृतमिव तदिति ज्वालानामिव तं कारणभूतमपि संघातं दग्ध्वा उत्तरत्र गमनसाधनान्तरमप्यनपेक्ष्य परां गतिं स्वरूपेणैव याति तत्रापि न सायुज्यार्थं जीवभावे गमनं किंतु ब्रह्ममयः ब्रह्मैव सन् ब्रह्माप्येतीत्येषा गतिर्भवति तत्रापि भगवद्धर्माणामपि सर्वेषां स्फूर्तिर्भवतीति ज्ञापयितुमर्कवर्ण इति । तस्माद्यावान् पुरुषार्थः सर्वैरेव ज्ञानादिर्भवति क्रमेणापि साध्यं सकृदेव च भवतीति भगवद्धर्माणां माहात्म्ययुक्तम् ॥ ३२ ॥

श्रीसुबोधिनी–सारः

तयोर्नन्दयशोदयोर्भगवति कृष्णे परमनुरागं परां प्रीतिं वीक्ष्य दृष्ट्वा मुदा हर्षेणोद्धवो नन्दमाह ॥ २९ ॥ हे मानद इह लोके देहिनां मध्ये युवां श्लाघ्यतमौ प्रशस्यौ स्थः नूनमेव यत् यतः अखिलगुरौ नारायणे ईदृशी मतिर्बुद्धिः कृता यत् याभ्यामिति वा ॥ ३० ॥ रामो मुकुन्द एतौ विश्वस्य बीजयोनी निमित्तोपादाने पुरुषः प्रधानं चेतौ भूतेषु प्राणिषु अन्वीयानुप्रविश्य विलक्षणस्य भेदस्य ज्ञानस्य चेमौ पुराणौ अनादी ईशाते नियन्तारौ भवतः ॥ ३१ ॥ तत्प्रभावमाह प्राणानां वियोगकाले मरणसमये विशुद्धमकलुषितं मनः क्षणं समावेश्य यस्मिन् श्रीकृष्णे कर्माशयं कर्मकोशं निर्हृत्य दग्ध्वा ब्रह्मभूतोऽर्कवर्णः परां गतिं मोक्षमाशु शीघ्रं याति ॥ ३२ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

इत्थं तयोर्नन्दयशोदयोर्भगवति परममनुरागं वीक्ष्य युक्तं नन्दं उद्धव आह ॥ २९ ॥ तदुक्तिमेव दर्शयति—युवामित्यादिना । 'एवं प्रेमदर्शनेन ममापि महासुखं ददासि' इति सूचयन् सम्बोधयति—मानदेति । युवां यशोदानन्दो इहलोके देहिनां मध्ये श्लाघ्यतमौ अतिशयेन प्रशंसायोग्यौ । नूनमिति, अत्र सन्देहो नास्तीत्यर्थः । तत्र हेतुमाह—यत् यस्मात् अखिलस्य सर्वस्य ब्रह्मादेरपि गुरौ पूज्ये नारायणे कृष्णे ईदृशी अनुरागयुक्ता मतिः युवाभ्यां कृतेति ॥ ३० ॥ अखिलगुरुत्वेजनकत्वं नियन्तृत्वं च हेतुमाह—एताविति । हि यस्माद्रामो मुकुन्दः मुक्तिदाता श्रीकृष्णश्चेत्येतौ द्वावपि विश्वस्य योनी बीजे भवतः । बीजं उपादानकारणम्, योनिः निमित्तकारणं च । ननु 'पुरुषप्रधानयोर्बीजत्वं योनित्वं च प्रसिद्धम्' इत्याशङ्क्याह—पुरुषः प्रधानमिति । पुरुषोंऽशः, प्रधानं शक्तिः अतः प्रधानपुरुषावप्येतावेव इत्यर्थः । एवं जनकत्वमुक्तम् । नियन्तृत्वमाह—अन्वीयेति । भूतेषु स्थावरजङ्गमशरीरेषु अन्वीय प्रविश्य तेषां भूतानां तद्विलक्षणस्य ज्ञानस्य चैतन्यात्मकस्य जीवस्य ईशाते ईशौ नियन्तारौ भवत इत्यर्थः । एवं सर्वकारणत्वे नियन्तृत्वे हेतुमाह—इमौ पुराणाविति, अनादित्वादित्यर्थः ॥ ३१ ॥ 'यत्कृता मतिरीदृशी' इत्यनेन सूचितां कृतकृत्यतामेवोपपादयति—यस्मिन्निति द्वाभ्याम् । 'यस्मिन्' इत्यस्य 'तस्मिन्' इत्युत्तरेण सम्बन्धः जनो यः कोऽपि प्राणी क्षणं क्षणमात्रमपि विशुद्धं विषयान्तरचिन्तारहितं मनो यस्मिन् समावेश्य स्थिरीकृत्य तेन कर्माशयं कर्मवासनां निर्हृत्य दग्ध्वा ब्रह्ममयः प्राकृतसङ्घातनिवृत्त्या प्राप्तनिजानन्दस्वरूपः अर्कवर्णः प्रकाशमानमूर्तिश्च सन् परां गतिं तत्पदं याति । 'कदाचिदेवं तस्मिन् मनोधारणेऽपि पुनरविद्यया शक्त्या तत्पदप्राप्तिर्न भवति' इति सूचयन्नाह—प्राणवियोगकाल इति । ततो विषयासक्त्यसम्भवादित्याशयः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

तयोरिति ॥ इत्थं तयोर्नन्दयशोदयोर्भगवति कृष्णे परममनुरागं वीक्ष्य मुदा युक्त उद्धवो नन्दम् आह स्म ॥ २९ ॥ युवामिति ॥ हे मानद ! युवां यशोदानन्दादिह लोके देहिनां मध्ये श्लाघ्यतमौ अतिशयेन प्रशंसायोग्यौ यत् यस्मात् अखिलस्य सर्वस्य ब्रह्मादेरपि गुरौ पूज्ये नारायणे कृष्णे ईदृ ी अनुरागयुक्ता मतिः युवाभ्यां कृता ॥ ३० ॥ अखिलगुरुत्वमेव जनकत्वेन नियन्तृत्वे चाह—एताविति ॥ रामो मुकुन्दश्च इत्येतौ एकरूपौ विश्वस्य बीजमुपादानं योनिर्निमित्तकारणं च । ननु पुरुषप्रधानयोर्बीजयोनित्वं प्रसिद्धं तत्राह । पुरुषः अंशः प्रधानं प्रकृतिश्चाप्येतावेव पुराणौ अनादी इमौ भूतेषु स्थावरजङ्गमशरीरेषु अन्वीय अनुप्रविश्य तेषां भूतानां च तदुपहितस्य च विलक्षणस्य नानाभेदस्य ज्ञानस्य चैतन्यात्मकस्य जीवस्य च ईशाते ईशौ नियन्तारौ भवतः । सन्धिरार्षः । यद्वा । विलक्षणस्य निर्द्धर्मकस्य निर्गुणब्रह्मज्ञानस्यापि ईशाते तत्प्रकाशाप्रकाशयोः समर्थौ भवतः ॥ ३१ ॥ यस्मिन्निति ॥ जनः प्राणी प्राणवियोगकाले क्षणं क्षणमात्रमपि विशुद्धं विषयान्तराचिन्तारहितं मनो यस्मिन् रामकृष्णरूपे एकत्वमभेदाभिप्रायेण समावेश्य स्थिरीकृत्य तेन कर्माशयं कर्मवासनां निर्हृत्य दग्ध्वा ब्रह्ममयः प्राप्तनिजानन्दस्वरूपः अर्कवर्णः शुद्धसत्त्वप्रकाशमूर्तिश्च सन् आशु शीघ्रम् परां गतिं तत्पदं याति ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशिका

नारायणत्वमखिलगुरुत्वं चोत्पादकत्वेनाह एताविति विश्वस्य बीजयोनी बीजं कारणं च योनिः क्षेत्रं च ते पुरुषः प्रधानपतिः प्रधानं प्रकृतिश्च तयोः अंतर्यामित्वे न नियामकत्वात् प्रेरकत्वाच्च तदात्मकौ एतौ रामः मुकुन्दश्च ज्ञातव्यौ तौ भूतेषु

चेतनाचेतनेषु अन्वीत अन्तर्यामिशक्त्या अन्वयं प्राप्य मनुष्यलोके नराकृतया वर्त्तमानौ पुराणौ अनादिसिद्ध ब्रह्मपुरस्थाने सनातनत्वेन स्थितौ इमौ विलक्षणस्य व्यवहारिकज्ञानाद्भिन्नस्य ज्ञानस्य क्षेत्रक्षेत्रज्ञ वेदतस्य ईशाते उपदेष्टृतया प्रकाशन समर्थौ भवत ईशाते इत्यत्र संधिरार्षः ।। ३१ ।। तयोर्मध्ये एकस्य त्वतिमाहात्म्यमस्तीत्याह यस्मिन्निति द्वाभ्यां यस्मिन् श्रीकृष्णे जनः मरणसमये क्षणं मनः समावेश्य तेन समावेशनेन कर्माशयं प्राकृतकर्मवासनां निर्हृत्य परित्यज्य: ब्रह्ममयः त्रिगुणातीताऽक्षरब्रह्मस्वरूपः अर्कवर्णः अर्कस्य सूर्यस्य वर्णः प्रकाशमया कृतिस्तद्वत् वर्ण आकृतिर्यस्य एवंभूतः दिव्यविग्रहः सन् परां गतिं तस्य ब्रह्मपुरपदं याति ।। ३२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तयोरिति ।। इत्थं, तयोः नन्दयशोदयोः, भगवति कृष्णे, परमं अनुरागं वीक्ष्य, उद्धवः मुदा नन्दं, आह ।। २९ ।। उक्तिमेवाह युवामित्यादिना एवं निशा सेत्यतः प्राक्तनेन ग्रन्थेन ।। युवामिति ।। हे मानद, युवां दम्पती, इह लोके, देहिनां शरीरिणां, पाठान्तरे देवानामपि, नूनं श्लाघ्यतमौ पूज्यतमावित्यर्थः । कुतः । यत् यस्मात्, अखिलगुरौ, नारायणे, ईदृश्येवंभूता, मतिः कृता । अनेन कृतकृत्यत्वं सूचितम् । ३० ।। अखिलगुरुत्वमेव हितकृत्त्वेन नियन्तृत्वेन जनकत्वेन चाह ।। एताविति ।। रामः मुकुन्दश्च इत्येतौ, विश्वस्याखिलजगतः, बीजानां कारणभूतानां पृथिव्यादीनां योनी कारणभूतौ, ननु विश्वस्य सजातीयौ प्रकृतिपुरुषौ तस्य बीजयोनी नैतावित्यत आह । पुरुषः प्रधानं, प्रधानपुरुषशरीरकावेतावेव बीजयोनी इत्यर्थः । अनेन जनकत्वं स्पष्टीकृतम् । इमौ पुराणौ पुरातनौ पुरुषौ, हि यतः, विलक्षणेषु देवमनुष्यादिरूपेण नानाविधेषु भूतेषु, अन्वीयान्तः प्रविश्य, ज्ञानस्य ईशाते । सर्वेषामपि आत्मविषयकज्ञानस्य विषयगोचरज्ञानस्य च नियन्तारौ प्रवर्त्तकौ च भवत इत्यर्थः चकारोऽवधारणार्थः । विलक्षणस्येति पाठे, ज्ञानस्य वैषयिकज्ञानस्य विलक्षणस्य, ततो विलक्षणस्यात्मज्ञानस्य च, ईशाते तत्प्रकाशकत्वेन नियन्तारौ भवतः । अनेन हितकृत्त्वं नियन्तृत्वं चोक्तम् ।। ३१ ।। 'यत् कृता मतिरीदृशी' इत्यनेन सूचितां कृतकृत्यतामेवोपपादयति यस्मिन्निति द्वाभ्याम् ।। यस्मिन्निति । यस्मिन्नित्यस्य तस्मिन्नित्युत्तरेणान्वयः । जनः, प्राणवियोगकाले, यस्मिन् श्रीकृष्णे, मनः विशुद्धं विधाय, विषयान्तरविमुखं कृत्वेत्यर्थः । क्षणं क्षणमात्रकालपर्यन्तमपि, समावेश्य निधाय, कर्माशयं कर्मवासनां, निर्हृत्य दग्ध्वा, ब्रह्ममयः ज्ञानप्रचुरः, अर्कवर्णः अप्राकृतरूपः सन्, आशु परां गतिं तत्पदमित्यर्थः । याति प्राप्नोति ।। ३२ ।।

श्रीहरिसूरिविरचितं भक्तिरसायनम्

तयोरित्यमिति : १०.४६.२९

इत्थं विविक्तमभिकाशित-हार्दभावं श्रुत्वा वचो मधुरमीश्वरमातुरीड्यम् ।
तत्सान्त्वनं तदुचितोत्तरचारुवाचा कर्तुं तदाऽऽस स समुद्धव उद्धवोऽपि ।। ६८ ।।

युवां श्लाघ्यतमाविति : १०.४६.३०

य इह दैवतदुर्लभदर्शनो जननि ते स यदङ्कमुपाश्रितः । तदखिलेऽपि जने नहि सौख्यभृच्छुभवती भवतीसदृशी परा ।। ६९ ।।
कुत इतोऽरिदुरुन्नतिदीनते विलसदच्युतमूर्तिहृदां हि वः । निजसकृत्स्मृतिमात्रजुषामसावपरिषुः परिपूरयति श्रियः ।। ७० ।।
जननि येन निजान्तरधामनि निजगुणैः प्रभुरेष वशीकृतः । तमनलो न मरुन्न यमोऽपि वा दिनकरो न करोत्यसुखाकुलम् ।। ७१ ।।
पदरजो भृशमैशमिहाल्पमप्यजरराडजमानस - दुर्लभम् । त्वदजिरेऽर्भकलभ्यमभूत्तदीप्सितवरं तव रम्यमितोऽपि किम् ।। ७२ ।।

निरुपमं किमु भाग्यमहं ब्रुवे जननि तोषदघोष - महीजुषाम् ।
प्रतिपलं किल ये कलितोत्सवाः सुरचयं रचयन्ति सविस्मयम् ।। ७३ ।।

जननि सर्वजनाघविनाशिनीयमधुनैव मही नहि केवलम् । अपि भवेदिह याम्ब जनैरितः प्रकलिता कलिताडनकाङ्क्षिभिः ।।७४।।
व्रजजनावलिमेव न केवलं जननि जन्मभृदीड्यपदां ब्रुवे । इह गतां जडजातविहारिणीं सुमलिनामलिनामपि मण्डलीम् ।। ७५ ।।
वसतिरत्र ममास्तित्वति चिन्तयाम्यहमिहैव न केवलमुत्सुकः । बहु किमम्ब वदामि मुदा शुकप्रभृतयो भृतयोगकला अपि ।। ७६ ।।
अमलगोकुलवेद्यमहोऽम्ब ते निखिलगोकुलसेवनकार्यभूत् । विमलगोकुलमेतदिलातले कमलभूमलभूरिहरं न किम् ।। ७७ ।।
नहि विहाय विभुं विभवप्रदा क्षणमपीक्षणमन्यजने क्वचित् । जननि या कुरुते भुवि साऽधुना तव रमा वरमाश्रयते पदम् ।। ७८ ।।
तदिह सिद्धमिदं नहि किं मुदा हरिरसौ विहरत्यलमन्वहम् । तदलमल्पवदल्पविकल्पितैर्निजपदे जप देवगुणान् स्थिता ।। ७९ ।।
यदिह नाम्ब भवेत् कमलापतिस्तदमलोद्भव हर्षसुखस्थितिः । कथमिहोल्लसतीति विलोकयत्वमितराऽमितरागसुखं यतः ।। ८० ।।
भगवतो निखिलान्तरवासिनोऽप्यजनि तेऽम्ब हरेर्विरहो यदि । हृदयमेव न तेऽस्त्यथवाखिलान्तरगतः स न तर्हि भवेदितः ।। ८१ ।।
पल्लीला भवतीनामहीशपर्यङ्कशायिनः सुलभा । समजनि जननि जनेऽस्मिन्नहि किं सा सुरसभाव - मानकरी ।। ८२ ।।

यो लोकेशमदः पितामहपदः सत्यावसत्याश्रितः स्रष्टा सर्वचराचरस्य चतुराम्नायस्थ - तत्त्वार्थवित् ।
स ब्रह्माऽपि यदर्भको निगदितः स श्रीपतिः सर्वदा ब्रूते मत्पितराविमाविति किमाशंस्यं न वा वामिदम् ।। ८३ ।।

यस्मिन्मतिः सकृदकार्यतयाऽपि सक्ता प्रेष्टं तनोत्यमरदुर्लभमेष कृष्णः ।
युष्मत्पदे निजधियं विदधाति तद्वां श्रेयोऽवशिष्टमिह किं तदलं वचोभिः ॥ ८४ ॥
एकैव त्वं सदानन्दयुता तद्वदसावपि । यशोदया युतस्तद्वां युक्तोऽसावच्युतान्वयः ॥ ८५ ॥
योऽत्र स्थितोऽपि तत्रत्यास्वीयक्षेममधाद् विभुः । तस्य तत्र स्थितस्यापि भवच्छङ्करणं स्फुटम् ॥ ८६ ॥

कृष्णप्रिया

श्रीनन्दबाबा की एवं श्रीयशोदा माताजी की भगवान् श्रीकृष्ण में दिव्य प्रीति को देखकर श्रीउद्धवजी अत्यन्त आनन्द से नन्दबाबा को कह रहे हैं ॥ २९ ॥ श्रीउद्धवजी ने कहा कि हे मानद ? नन्दबाबा ! हे यशोदाजी ! आप दोनों बड़भागी हैं, विश्व के समस्त देहधारीओं में सबसे अधिक स्तुतिपात्र हैं । आप का श्रीकृष्ण में जो स्नेह है वह अखिल जगद् के गुरु साक्षात् श्रीपुरुषोत्तम में है । प्रभु में आप की जो अहैतुकी भक्ति है वह सर्वसुलभ नही है वह केवल कृपालभ्य है ॥ ३० ॥ हे नन्दबाबा ? ये श्रीराम एवं श्रीकृष्ण दोनों इस विश्व के बीज-समवायी कारण तथा योनि निमित्त कारण हैं, एवं दोनों प्रधान तथा पुरुषरूप भी ये ही हैं । सर्वभूतों में ये ही प्रविष्ट होकर रहे हैं एवं काल ही जिसका लक्षण है वैसे अभ्युदय के स्वामी है तथा मोक्षसाधक जो विलक्षण ज्ञान है उस ज्ञान के एवं भक्ति के भी ये ही ईश है, एवं दोनों पुराण पुरुष हैं ॥ ३१ ॥ मनुष्य प्राण त्याग काल में क्षणमात्र भी अपना निर्मलमन जिस मानसरूप में समाविष्ट करके कर्मवासनाओं का क्षय कर शीघ्र ही सूर्य के समान वर्ण वाला ब्रह्मरूप हो गया तब वह परम गति को प्राप्त करता है ॥ ३२ ॥

तस्मिन् भवन्तावखिलात्महेतौ[1] नारायणे कारणमर्त्यमूर्तौ ।
भावं विधत्तां नितरां महात्मन् किं वावशिष्टं युवयोः [2]सुकृत्यम् ॥ ३३ ॥
आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः । प्रियं विधास्यते पित्रोर्भगवान् सात्वतां पतिः ॥ ३४ ॥
हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्वताम् । यदाह वः समागत्य कृष्णः सत्यं करोति तत् ॥ ३५ ॥
मा [3]खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमन्तिके । अन्तर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—अखिलात्महेतौ, कारणमर्त्यमूर्तौ, तस्मिन्, नारायणे भवन्तौ, नितराम्, भावम्, विधत्ताम्, हे महात्मन्! युवयोः, किम्, वा, सुकृत्यम्, अवशिष्टम् ॥३३॥ अच्युतः, सात्वताम्, पतिः, भगवान् अदीर्घेण, कालेन, व्रजम्, एष्यति, "च" पित्रोः, प्रियम्, विधास्यति ॥ ३४ ॥ सर्वसात्वताम्, प्रतीयम्, कंसम्, रङ्गमध्ये, हत्वा, समागत्य, कृष्णः, वः यद, आह, तत्, सत्यम्, करोति ॥ ३५ ॥ हे महाभागौ ? मा, खिद्यतम्, अन्तिके, कृष्णम्, द्रक्ष्यथः, एधसि, ज्योतिः, इव, स, भूतानाम् हृदि, अन्तः, आस्ते ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अखिलस्यात्मा च हेतुश्च तस्मिन् कारणमर्त्यमूर्तौ केनापि कारणेन मनुष्याकृतौ तथापि महात्मन्महात्मनि परिपूर्णे भवन्तौ भक्तिं कुरुतः । अतः कृतकृत्याविंत्यर्थः ॥ ३३ ॥ प्रस्तुतमाह । आगमिष्यतीति । पित्रोर्युवयोः ॥ ३४ ॥ 'यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ॥ ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥' इति यदाह कृष्णस्तत्सत्यं करिष्यतीति ॥ ३५॥ कालविलंबनमसहमानौ प्रत्याह । मा खिद्यतमिति । हे महाभागौ खेदं मा कुरुतम् । अन्तिके इदानीमेव समीपे वा । कुत इत्यत आह । अंतर्हृदीति । तर्हि सर्वैः किमिति न दृश्यते तत्राह । ज्योतिरिवैधसीति । तद्यथा मथनं विना न दृश्यते तथा भक्तिं विना कृष्णोऽपीति भावः ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्मिञ्छ्रीकृष्णे । कारणेन भूभरहरणादिना हेतुना । महात्मन्निति सप्तमी । भावमतिप्रेमाणम् । यतः श्रीकृष्णभक्तावतो हेतोः । इत्यर्थ इति—'समुद्रान्ता इवापगाः' इति न्यायेन हरिभक्त्यन्ताः सर्वविधय इति । तद्वत्त्वाद्युवां कृतार्थावेवेति भावः । अखिलेति—अथात्मा स्वांशानामीश्वररूपाणां विभिन्नांशानाञ्च जीवानां मूलरूपः हेतुश्च सर्वप्रकाशक इति ज्ञेयः । तत्र हेतुः—नारायण इति । ननु स चतुर्भुजस्तत्राह—सर्वकारणं यत्तत्त्वं तदेव मर्त्याकारा मूर्तिर्यस्य तस्मिन्नराकृतिपरब्रह्मणीत्यर्थः । भावमीदृशानुरागम् । नितरामित्यनेन श्रीवसुदेवदेवकीभ्यामपि तदुत्कर्षं बोधयति । हे महात्मन् तादृशानुरागशीलत्वात्परमोत्कृष्टस्वभाव श्रीव्रजेश्वर । वाशब्दो भ्रूक्षेपे तयोर्युवयोः । किं कतरत् अवशिष्टं किन्तु सर्वं परिपूर्णमेव, केवलं युष्मत्संतोषकं तस्यैव कृत्यमव-

---

[१] योनौ–विज. । [२] स्वकृत्यम्–प्रा. पा. । [३] खिद्येतां–विज. ।

शिष्यत इति स्वशब्दार्थः । 'युवयोः' इति पाठेऽपि स एवार्थः ।। ३३ ।। प्रस्तुतं प्रकृतम् । अदीर्घेण शीघ्रम् । अच्युत इति वाक्यच्युतिवर्जितत्वमाह । तथाप्यजातशान्ती प्रत्युत हन्त त एव हितेऽपि तदुत्कर्षमेवं कथयन्तीति तद्गुणचिन्तने नात्यन्तार्तौ तौ वीक्ष्याधुना तु तद्वैयग्र्यस्पृष्ट आह—आगमिष्यतीति । अच्युतः सत्यसंकल्पादिना तन्नामासौ । प्रियमव्यभिचारिसंगमरूपम् । अवश्यप्रियविधाने हेतुः पित्रोः, यथा युवाभ्यां पितृभावमयेन महाप्रेम्णा वशीकृत्य पुत्रत्वेन संपादितोऽसौ तथा तेनापि पितृत्वेनैवाभिमतयोर्युवयोरित्यर्थः । 'ये यथा मां प्रपद्यन्ते' इत्यादेः । यतो भगवानपि सात्वतानां भक्तानां पतिः पालकस्तदभीष्टसुखसंपादकः । यद्वा भगवानपि यादवानां पतिरपि तादृशप्रेमवशत्वादिति भावः ।। ३४ ।। प्रतीपं प्रतिकूलम् "प्रतीपौ नृपतौ पुंसि प्रतिकूले तु वाच्यवत्" इति धरणिः । किञ्च—करोतीति वर्तमानार्थकलटा श्रीमदुद्धवः स्वात्मानम् "नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः" इति तृतीस्कंधोक्तिं स्वविमर्शरूपां श्रीकृष्णस्य स्फुटयितुं साक्षादेव कृष्णरूपत्वेनाह । ननु तस्यागमनमत्र न प्रतीमस्तत्राह—हत्वेति । यद्वा—पितृत्वं विलम्बकारणञ्च तद्वाक्येनैव प्रतिपादयति— हत्वेति । करोतीति—"वर्तमानसामीप्ये वर्तमानवद्वा" करिष्यते इत्यर्थः । किं वा–तत्तस्माद्धेतोरस्माभिस्सह सत्यं शपथं करोति कुर्वन्नेवास्ते इत्यर्थः । 'सत्यं शपथतथ्ययोः' इत्यमरः । वस्तुतस्तूद्धवेनादृष्टस्तत्रैव ताभ्यां तदैव लालितः स प्रकाशांतरेण वर्तत एवेत्युद्धवमुखात्सत्यैव वाग्निरगात् ।। ३५ ।। इदानीमेव कालक्षयं विनैव 'अंतिकं शीघ्रसामीप्ये' इति यादवः । प्रकटमप्याह— मा खिद्यतमिति । द्रक्ष्यथः पश्यथः । इह वर्तमाने लट् । अत एव श्रीमदनुभूतिस्वरूपचरणैः कारकप्रक्रियायाम् "छन्दसि स्यादिः सर्वत्र" इत्यत्र स्यादिपदं त्वाद्युपलक्षकमुक्तम् 'एकसंबंधिज्ञानमपरसंबंधिस्मारकम्' इति न्यायेन । स्यादित्याद्युभयावयववत्वाद्विभक्तेरिति । अत्र हेतुमाशङ्कते—कुत इति । तत्राक्षेपे तद्यथा ज्योतिर्यथा । इति भाव इति—'भक्त्याहमेकया लभ्यः' इति श्रीमुखोक्तेरित्यर्थः । 'काष्ठं दार्विंधनं त्वेधः' इत्यमरः ।। हंतहंत धिगावां ययोरभाग्यस्य प्राबल्यमेव सत्यवचसोऽपि पुत्रस्यात्रागमने प्रतिबन्धकीभवतीति खिद्यन्तौ प्रत्याह—मेति । नन्वन्तिके यद्रक्ष्यावस्तत्कस्मिन्दिने श्वः परश्वो वा पञ्चमे दिने दशमे दिने वा संप्रति निर्जिगमिषून्प्राणान्केनाश्वासेन स्थापयिष्यावस्तावत्, न चेदागमिष्यति तदेव निश्चित्य ब्रूहि, निर्यान्तु प्राणा मास्तु तन्निरोधनकष्टमावयोरित्युक्तवति श्रीनंदे उद्धवः स्वहृदि परामर्शं— हंतात्र कमुपायमनुतिष्ठामि प्राकृतपुत्रवियोगातुराः खल्वेवं प्रबोध्यन्ते—भो भो किमिति सांसारिक मोहमग्ना भवथ, मिथ्याभूतपुत्रकलत्रादिष्वासक्तिमनर्थहेतुं परित्यज्य भगवत्यासक्तिः क्रियतामिति । यस्य तु भगवत्येव पुत्रीभूते आसक्तिः सोऽयं नन्दः कथं प्रबोधयितव्यः । न च वसुदेवस्येवास्य पुत्रभाव ऐश्वर्यप्रदर्शनया शिथिलयितुं शक्यः, प्रत्युतानयोर्गाढत्वमेवापद्यते । हंत प्राकृतमपि पुत्रं गृहे खेलन्तमदृष्ट्वा तत्पितरौ दुःखेन म्रियेते । आवयोस्त्वतिभाग्यवशात्परमेश्वरोऽपि पुत्रीभूतो गृहे खेलति स्म, आवयोः क्षणमपि लालमनप्राप्य खिद्यते स्म, स्वगृहे तं पुत्रमदृष्ट्वा कथं जीविष्यावः, धिगावां यत्तादृशोऽपि पुत्राद्वियुक्तावित्येवं विधाऽनयोर्मनोनिष्ठा । देवकीवसुदेवौ त्वेतत्पारमैश्वर्यानुभवे सति हंतावयोरयमाराध्य एव न तु पुत्र इत्येतत्परिष्वंगलालनादावपि शंकेते । तेन केवलमेषामेक एव कृष्णे ममताग्रंथिर्दृढः । किन्तु परमेश्वरस्यापि तस्यैतेषु दृढैव ममता "गृहीत्वा पाणिना पाणिं पित्रोर्नौ प्रीतिमावह" इत्येतदर्थे तस्यापि व्याकुलता मया दृष्टैव । "दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषां नो व्रजौकसाम् । नन्द ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम् ।।" इति गोपवागपि स्मृत्वा स्मर्यत एव । यदि पुनर्मथुरां गत्वा श्वस्तमानयेयं तदा कंसभार्याद्वयोपजापकुपिते जरासंधे मथुरां हंतुमागमिष्यति सति तत्र वसुदेवादीन्यादवान्को रक्षेत्, यदि तद्रक्षार्थं कृष्ण एव पुनर्मथुरां गच्छेत्तदैते म्रियेरन्, यदि चातश्चतुःपञ्चवर्षान्ते आयास्यतीति ब्रवीमि तदा तावत्कालपर्यन्तं धैर्यदिधीर्षाप्येतैर्दुष्करा, चतुःपञ्चदिनान्ते आयास्यतीत्यलीकोक्त्याश्वासने तस्मिन्नेवावधिसमाप्तिदिने मदुक्तेरलीकत्वे व्यक्ते म्रियेरन्, तस्मादुपायांतराभावादधुना श्रीकृष्णस्य परमात्मत्वेन सर्वत्रौदासीन्यं तथा निर्विशेषब्रह्मस्वरूपत्वेन जन्म·कर्म·शरीर·पित्रादिसम्बन्धराहित्यं तदनुकूलाध्यात्मयोगञ्च प्रपञ्चयानयोः प्रेमा संकोचनीयः । तेनतेनाप्यप्रमेयो दुष्पारो दुर्निवारः प्रेमा यदि प्रत्युत वर्धेतैव तदा मथुरां गत्वा कृष्णवसुदेवोग्रसेनादिमहासदस्यनयोः प्रेम्णो निरुपमां कीर्तिं कीर्तयित्वा सर्वान्विस्माप्य मया कृष्ण एवोपालंभनीय इति मनसि कृत्वा प्रथमं कृष्णस्य परमात्मत्वं द्योतयन्नाह–अन्तरिति । तर्हि सर्वैः किमिति न दृश्यते तत्राह–ज्योतिरिति । तद्यथा मन्थनं विना न दृश्यते तथैव कृष्णोऽपि । तस्माद्युवाभ्यां तस्मिन्पुत्रे कृष्णे वैष्णवैरिव भक्तिः कर्तुं न शक्यते कथं स साक्षात्स्वगृहे द्रष्टव्य इति द्योतिते सति येन तेन प्रकारेण पुत्रः स्वगृहमायातु पुत्रेऽपि तस्मिन्भक्तिः कर्तव्येति नन्दयशोदाभ्यां मनसि विचारितमत एव "मनसो वृत्तयो नः स्युः कृष्णपादांबुजाश्रयाः" इत्युद्धवं प्रत्युपरिष्टाद्वक्ष्यते ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र हेतुर्नारायणे । ननु स चतुर्भुजस्तत्राह । सर्वकारणं यत्तत्त्वं तदेव मर्त्याकारा मूर्त्तिर्यस्य तस्मिन्नराकृतिपरब्रह्मणीत्यर्थः । भावमीदृशानुरागं नितरामित्यनेन श्रीवसुदेवदेवकीभ्यामपि तदुत्कर्षं बोधयति हे महात्मन् ! तादृशानुरागशीलत्वात् परमोत्कृष्टस्वभाव ! श्रीव्रजेश्वर ! वाशब्दो भूक्षेपे तयोर्युवयोः किं कतरत् अवविष्टं किन्तु सर्वं परिपूर्णमेव केवलं युष्मत्सन्तोषकं तस्यैव कृत्यमवशिष्यत इति स्वशब्दार्थः युवयोस्स्विति पाठे स एवार्थः ।। ३३ ।। तथाप्यजातशान्ती प्रयुत हन्त त एव हि तेऽपि

त्तदुत्कर्षमेवं कथयन्तीति तद्गुणचिन्तनेनात्यन्तार्त्तौ तौ वीक्ष्याधुना तु तद्वैयग्र्यस्पृष्ट आह। आगमिष्यतीति। अच्युतः सत्यसङ्कल्पत्वादिना तन्नामासौ प्रियमव्यभिचारिसङ्गमरूपम्। अवश्यं प्रियविधाने हेतुः पित्रोः यथा युवाभ्यां पितृभावमयेन महाप्रेम्णा वशीकृत्य पुत्रत्वेन सम्पादितोऽसौ तथा तेनापि पितृत्वेनैवाभिमतयोर्युवयोरित्यर्थः। ये यथा मामित्यादेः। यतो भगवानपि सात्वतानां पतिः पालकः तदभीष्टसुखसम्पादकः। यद्वा। भगवानपि यादवानां पतिरपि तादृशप्रेमवशत्वादिति भावः ॥ ३४ ॥ ननु तस्यागममत्र न प्रतीम इत्याशङ्कयाह। हत्वेति। यद्वा पितृत्वं विलम्बकारणञ्च तद्वाक्येनैव प्रतिपादय। हत्वेति। करोतीति वर्त्तमानसामीप्ये वर्त्तमानवद्वा। किं वा। तत्तस्माद्धेतोरस्माभिः सह सत्यं शपथं करोति कुर्वन्नेवास्ते इत्यर्थः। सत्यं शपथतथ्ययोरित्यमरः ॥ ३५ ॥ आगमिष्यतीत्यप्यसहमानौ प्रत्याह। मा खिद्यतमिति महाभागावित्यधुना द्वयोः सम्बोधनं पुत्रागमनवार्त्तया तस्या अपि स्वं प्रति दृष्टिनिक्षेपं दृष्ट्वा। अथाल्पविलम्बमसहमानावाशङ्क्य शोकशमकलोकरीत्या तत्त्वोपदेशमारभमाण आह अन्तरिति। स कृष्णः भूतानां सर्वेषामेव प्राणिनामन्तर्हृदि हृदयाभ्यन्तरं यदन्तःकरणाख्यं हृदयं तत्राप्यास्ते किमुत बहिरिति। अप्रकटतामात्रांशे दृष्टान्तः। ज्योतिरिवेति दामबन्धनमृद्भक्षणलीलादौ श्रीमत्या मात्रैव तद्व्यापकत्वानुभवात् तत्रान्येषां स्वतोऽप्यनुभावो नास्तीत्यसन् निवर्त्तते भवतोस्तु सदा स्फूर्त्तेर्हृदयाभ्यन्तरेऽपि सन्नेव विराजते इत्यलं बहिस्तदपेक्षया तथापि तदपेक्षा चेत् तदा शीघ्रमेव तदपि भविष्यतीत्यर्थः। अथवा भूतानामन्तर्हृदि परमात्मलक्षणं ज्योतिरिव एधसि चाग्निलक्षणं ज्योतिरिवाप्रकटः सन् अन्तिके युवयोर्निकटे तत्रैव स्वयं भवद्भ्यां दर्शिते गोलोकाख्ये प्रकाशे आस्ते स तु युवां निकटात् पश्यत्येव युवाञ्च मनसा तं पश्यथ एव चक्षुषापि शीघ्रं पश्यतमेवेति तात्पर्य्यम् ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भवन्ताविति प्रागत्यादरात्, पश्चाद्भक्तिभरावेशेन युवयोरिति। एवमग्रेऽप्युह्यम्। अखिलेति तैर्व्याख्यातम्। तत्र आत्मा हेतुश्चेत्यभिन्नत्वं भिन्नत्वं चेति श्रीवैष्णवसिद्धान्तमतम्। यद्वा, अखिलानामात्मनां जीवानां हेतौ कारणे, तस्मादेव तेषामाविर्भावादिति ब्रह्मत्वमुक्तम्। ननु तदमूर्त्तमित्याशंक्याह—नारायण इति। ननु स चतुर्भुजः, अत आह—कारणेति; कारणं भक्तवात्सल्यं विचित्रासाधारणविहरणं वा, भावं स्नेहलक्षणम्, अतितरामित्यनेन सर्व्वावतारतात, जननीभ्यस्तथा वसुदेव देवकीभ्यामपि भावविधानोत्कर्षं बोधयति। महात्मन् महाबुद्धे! नन्दमाहेत्युक्त्या तस्यैव सम्बोधनम्। वा-शब्दो भ्रक्षेपे। किं कतरत् युवयोः कृत्यम् परिपूर्णमेव केवलं युष्मत्सन्तोषकं तस्यैव कृत्यमवशिष्यत इति स्व-शब्दार्थः ॥ ३३ ॥ तथाप्यजातशान्तिं विशेषतश्च तदुत्कर्षश्रवणजातस्नेहभरेणात्यन्तार्त्तं तं विलोक्य कृष्णागमनदार्ढ्येनाश्वासयन्नाह—आगमिष्यतीति। अच्युतः—स्वसत्यवाक्यादेः कदापि न चलित इति भावः। न चागत्योदासीनः सन् स्थास्यति, किन्तु चिरमत्र निवसन् पूर्ववद्युवयोः प्रीतिं करिष्यतीत्याह—प्रियमिति। अवश्यं प्रियविधाने हेतुः—पित्रोरिति। भगवान् परमदयालुः, किञ्च, सात्वतां भक्तानां पतिः पालकः, यद्वा, ननु तर्हि कुतोऽधुनैव नायाति? तत्राह—प्रियमिति, पित्रोः पितृनिर्विशेषयोर्देवकीवसुदेवयोः, सात्वतां पतिरिति यादवानां पालनञ्च तस्यावश्यं विधेयम्, यतो भगवान् भक्तानां कृते स्वयमेवतीर्णः, अतोऽवशिष्टं किञ्चित् समाप्यायास्यतीति भावः ॥ २४ ॥ ननु तस्यात्रागमनं न प्रतीम इत्याशंक्यागमनप्रत्यायकं तद्वचनमेव स्मारयंस्तदव्यभिचारित्वञ्च प्रतिपादयन्नाह—हत्वेति। स्वभक्तहर्षार्थं स्ववीर्य्यं प्रदर्श्य यत्तेनोक्तं तत्र कदाप्यसत्यतानास्तीति भावः ॥ ३५ ॥ अहो सर्वेषां भूतानां हृद्येव स आस्ते, तत्राप्यन्तर्निगूढतयैवेत्यर्थः। तं युवामन्तिकं निजांके द्रक्ष्यथः, अतो मा खिद्येथाम्। महाभागाविति महता युवयोर्भक्तिभाग्येनैवासावाकृष्यानेष्यत इति भावः। अत एव भक्त्याकृष्यत्वात् कृष्णमित्युक्तम्, एवमधुना व्रजेश्वर्य्या अपि सम्बोधनम् अत्यन्तार्त्त्याकुलायास्तस्या अचिरात् पुत्रदर्शनोक्त्या खेदनिरासार्थम् ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

किमवशिष्टं किं कर्त्तव्यं युवां कृतकृत्यावित्यर्थः ॥ ३३-३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्मिन् नारायणे कारणमर्त्यमूर्तौ साधुपरित्राणरूपनिमित्तात्स्वसङ्कल्पोपात्तमनुष्यविग्रहे महात्मनि अखिलस्य चिदचिदात्मकप्रपञ्चस्यानुगते आत्मनि कारणभूते च भवन्तावित्यर्थं भावमनुरागं विधत्ताम् अकुरुतामतो युवयोः प्रियं विधास्यत इत्यर्थः ॥ ३३ ॥ प्रस्तुतमाह। आगमिष्यतीति। अदीर्घेण कालेनाच्युतो व्रजं प्रत्यागमिष्यति तथा भगवान्पित्रोर्युवयोः प्रियं संविधास्यते करिष्यति ॥ ३४ ॥ सर्वेषां सात्वतां यादवानां भगवद्भक्तानां वा प्रतीपं प्रतिकूलं कंसं रङ्गमध्ये हत्वा भगवान् कृष्णः वो युष्मान्प्रति यदाह "यात यूयं व्रजं तात! वयं च स्नेहदुःखितान्। ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां प्रियम्" इति यदाह तत्सत्यं करिष्यति ॥ ३५ ॥ तथापि विलम्बमसहमानौ प्रत्याह। माखिद्यतमिति। हे माहाभागौ! माखिद्यत खेदं मा कुरुतमन्तिके अन तविप्रकृष्टकालेन कृष्णं द्रक्ष्यथः किं च भगवान्न मथुरायामेवास्ते किं त्वत्रापीत्याशयेनाह। अन्तर्हृदीति। तर्हि सर्वैः किमिति न दृश्यते तत्राह। ज्योतिरिवैधसीति। यथैधसि दारुणि ज्योतिरग्निर्मन्थनाद्युपायमन्तरेण न दृश्यते तद्वद्भगवान् श्रीकृष्णः भक्तिं विना न दृश्यत इत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भावं भक्तिं यद्वा लीलादिकं वा यद्विषयमन्तरेण किमपि नास्तीत्यर्थः । व्यधत्तां व्यदधातां कृतवन्तावित्यर्थः । महात्मन् महात्मनि चेतनोत्तमे इत्यर्थः ॥ ३३-३४ ॥ प्रतीपं प्रतिकूलम् ॥ ३५ ॥ अन्तिके कालक्षेपं विना बालबुद्धिमन्तरेण कृष्णस्य नास्तीत्याह । अन्तर्हृदीति । एधसि काष्ठे ज्योतिरग्निः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मा खिद्यतं विशेषतश्च चिरं विलम्बमसहमानावाशङ्क्याह । मेति । अल्पविलम्बमप्यसहमानावाशङ्क्य शोकशमकलोकरीत्या तत्त्वोपदेशमाह । अन्तरिति । यद्यपि कारणान्तरेण प्रियाप्रियादयो न सन्ति तथापि साधुत्वेन प्रियवयस्यः । तद्राहित्येनाप्रियादयश्च सन्तीत्याह । सदिति । सज्जातिरियमसज्जातिरियमित्यादरा नादरावननुसन्धाय तासु तदनुकारिस्वरूपविग्रहेण प्रकटीभूय साधूनां साधुत्वेन प्रियवदितया स्वीकृतानां सर्वतो रक्षणाय योग्यो भवतीत्यर्थः ॥ ३६-३८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तस्मिन् भवन्तावित्यादि । नारायणे कारणमर्त्यमूर्तौ नारायणस्य ईर्लक्ष्मीर्विभूतिरिति यावत् तस्याः कारणरूपा मर्त्या मर्त्याकारा द्विभुजा मूर्तिर्यस्य तस्मिन् । भावं विधत्तः, अतः किंवा युवयोः स्वकृत्यम् । अवशिष्टे भावविधानमेव फलम्, तत्तु भवतोऽखण्डमेव ॥ ३३ ॥ अतो दर्शनमपि शीघ्रं भावीत्याह—आगमिष्यतीत्यादि । अदीर्घेण शीघ्रमेव ॥ ३४ ॥ तत्र किं प्रमाणमित्याह—हत्वा कंसमित्यादि । तद्वाक्यमेव प्रमाणम्, तस्य सत्यवाक्त्वात् ॥ ३५ ॥ अतः खेदो न कार्य इत्याह—मा खिद्यतमित्यादि । खेदाभावे कारणमाह—द्रक्ष्यथः कृष्णमन्तिके । ननु तस्यागमनं दुष्करम्, कार्यव्यापृतत्वेनानवसरत्वादिति चेत्, नैवम् । न स जीववद्देशान्तरगमने प्रयत्नवान्, व्यापकत्वात् सर्वत्राभिव्यक्तिरेव तस्येत्याह—अन्तर्हृदि इत्यादि । भूतानामन्तर्हृदि स ह्यंशरूपेणास्तु । कस्मिन् क इव ? एधसि ज्योतिरिव । अतो यदंशः सर्वव्यापी, तस्य सर्वव्यापित्वे किमाश्चर्यमिति भावः ॥ ३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नारायणेकारणमर्त्त्यमूर्त्तौ-नारायणस्य ईः लक्ष्मीरैश्वर्यमिति यावत, तस्याः कारणरूपा मर्त्त्याकारा द्विभुजेति यावत्–ईदृशी मूर्त्ति, श्री विग्रहो यस्य तस्मिन् श्रीकृष्णे ॥ ३३-४९ ॥

इति षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अखिलानामात्मा च हेतुश्च तस्मिन कारणं च मनुष्यमूर्तिश्च तस्मिन युवयोस्तु कृत्यं किमवशिष्टमिति तुकारेण तस्य कृष्णस्यैव युष्मत्सान्त्वनप्रीणनवशीभवनादिकृत्यमवशिष्यते इति ज्ञाप्यते स्वकृत्यमिति पाठेऽपि स एवार्थः ॥ ३३ ॥ भो वत्स उद्धव ! त्वमतिबुद्धिमान् श्रुतः किं तु मुग्ध एवासि यदावामपि स्तौषि हन्त हन्त तादृशो गुणार्णवः पुत्रो यद्गृहादन्यत्र गतस्ततोऽधिको मन्दभाग्योऽधमो दुःखी त्रिभुवनमध्ये कोऽस्तीत्यावां सर्वैर्निन्दनीयावेवेति तदुक्तिमाशङ्क्य साश्वासमाह । आगमिष्यतीति । अच्युतः द्रष्टुमेष्याम इति सत्यवाक्यात् च्युतिरहितः सात्वतां यदूनां पतिः पालक एव केवलमत्रैव स्थित्वा भविष्यति युवयोस्तु प्रियं मनोऽभीष्टं करिष्यतीति ॥ ३४ ॥ यदाह । यात यूयं व्रजं तातेति श्लोकेन तत्सत्यं करोति करिष्यति वर्त्तमानसामीप्ये लट् वस्तुतस्तूद्धवेनादृष्टस्तत्रैव ताभ्यां तदैव लालितः स प्रकाशान्तरेण वर्तत एवेत्युद्धवमुखात् सत्यैव वाग्देवी निरगात् ॥ ३५ ॥ हन्त हन्त धिगावां ययोरभाग्यस्य प्राबल्यमेव सत्यवचसोऽपि पुत्रस्यात्रागमने प्रतिबन्धकी भवतीति खिद्यन्तौ तौ प्रत्याह । मेति । नन्वन्तिके यत् द्रक्ष्यावस्तत् कस्मिन् दिने श्वः परश्वो वा पञ्चमे दिने दशमे दिने वा सम्प्रति निर्जिगमिषून् प्राणाम् केनाश्वासेन स्थापयिष्यावस्तावत् न चेदागमिष्यति तदैव निश्चित्य ब्रूहि निर्य्यान्तु प्राणा मास्तु तन्निरोधनकष्टमावयोरित्युक्तवति श्रीनन्दे उद्धवः स्वहृदि पराममर्श हन्तात्र कमुपायमनुतिष्ठामि प्राकृतपुत्रवियोगातुराः खल्वेवं प्रबोध्यन्ते भो भोः ! किमिति सांसारिकमोहे मग्ना भवथ मिथ्याभूतपुत्रकलत्रादिष्वासक्तिमनर्थहेतुं परित्यज्य भगवत्यासक्तिः क्रियतामिति यस्य तु भगवत्येव पुत्रीभूते आसक्तिः स नन्दोऽयं कथं प्रबोधयितव्यः न च वसुदेवस्येवास्य पुत्रभावः ऐश्वर्यप्रदर्शनया शिथिलयितुं शक्यः प्रत्युत तयोः सगाढत्वमेवापद्यते हन्त प्राकृतपुत्रमपि गृहे खेलन्तमदृष्ट्वा तत्पितरौ दुःखेन म्रियेते आवयोस्त्वतिभाग्यवशात् परमेश्वरोऽपि पुत्रीभूतो गृहे खेलतिस्म आवयोः क्षणमपि लालनमप्राप्य खिद्यते स्म स्वगृहे तं पुत्रमदृष्ट्वा कथं जीविष्यावः धिगावां यत्तादृशादपि पुत्राद्वियुक्तावित्येवंविधानयोर्मनोनिष्ठा देवकीवसुदेवौ त्वेतत्पारमैश्वर्य्यानुभवे सति हन्तावयोरयमाराध्य एव न पुत्र इत्येतत्परिष्वङ्गलालनादावपि शङ्केते न च केवलमेषामेव कृष्णे ममताग्रन्थिर्दृढः किं तु परमेश्वरस्यापि तस्यैतेषु दृढैव ममता

गृहीत्वा पाणिना पाणिं पित्रोर्नौ प्रीतिमावहेत्येतदर्थे तस्यापि व्याकुलता मया दृष्टैव दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसां नन्द ते तनये ऽस्मासु तस्याप्यौत्पत्तिकः कथमिति गोपवागपि श्रुता स्मर्य्यते एव यदि पुनर्मथुरां गत्वा श्वस्तमानयामि तदा कंसभार्य्याद्वयोपजापकुपिते जरासन्धे मथुरां हन्तुमागमिष्यति सति तत्र एव वसुदेवादीन् यादवान् को रक्षेत यदि तद्रक्षार्थं कृष्ण एव पुनर्मथुरां गच्छेत् तदैते म्रियेरन् यदि चातश्चतुः पञ्चवर्षान्ते आयास्यतीति ब्रवीमि तदा तावत्कालपर्य्यन्तं धैर्य्यदिधीर्षाप्येतैर्दुष्करा चतुःपञ्चदिनान्ते आयास्यतीत्यलीकोक्त्या आश्वासने तद्दिन एव मदुक्तेरलीकत्वे व्यक्ते म्रियेरन् तस्मादुपायान्तराभावादधुना कृष्णस्य परमात्मत्वेन सर्वत्रौदासीन्यं तथा निर्विशेषब्रह्मस्वरूपत्वेन जन्मकर्मशरीरपित्रादिसम्बन्धराहित्यं तदनुकूलमध्यात्मयोगं च प्रपञ्चयानयोः प्रेमा संकोचनीयः तेन तेनाप्यप्रमेयो दुष्पारो दुर्निवारप्रेमा यदि प्रत्युत वर्द्धतैव तदा मथुरां गत्वा कृष्णवसुदेवोग्रसेनादिमहासदस्यनयोः प्रेम्णो निरुपमां कीर्तिं कीर्तयित्वा सर्वान् विस्माप्य कृष्ण एव मयोपालम्भनीय इति मनसि कृत्वा प्रथमं कृष्णस्य परमात्मत्वं द्योतयन्नाह । अन्तरिति । तर्हि सर्वैः किमिति न दृश्यते तत्राह । ज्योतिरिति । तद्यथा मन्थनं विना न दृश्यते तथैव कृष्णोऽपि तस्माद्युवाभ्यां तस्मिन् पुत्रे कृष्णे वैष्णवैरिव भक्तिः कर्तुं न शक्यते कथं स साक्षात्स्वगृहे द्रष्टव्य इति द्योतिते सति येन तेन प्रकारेण पुत्रः स गृहमायातु पुत्रेऽपि तस्मिन् भक्तिः कर्तव्येति नन्दयशोदाभ्यां मनसि विचारितम् अत एव मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रया इत्युद्धवं प्रत्युपरिष्टाद्वक्ष्यते ॥ ३६ ॥

गूढार्थदीपिनी

भावं भक्तिं व्यधत्ताम् अकुरुताम् महात्मनि 'सुपां सुलुक् इति ल्लुक्' सम्बोधनं वा । अखिलस्य जगतः आत्मा उपादानं हेतुः निमित्तं च किं वा अवशिष्टं न किमपि ॥ ३३ ॥ पित्रोः युवयोः ॥ ३४ ॥ सात्वतां यदूनां प्रतीपं शत्रुम् । करोति करिष्यत्येव ॥ ३५ ॥ एधसि काष्ठे ज्योतिः अग्निरिव ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्मिन् महात्मन् महात्मनि अखिलस्य आत्मा च हेतुश्च तस्मिन् कारणेन भजनमिति तेन ये मर्त्याः धृतमर्त्यशरीरास्ते मूर्तयः स्वमूर्तिवत्प्रिया यस्य तस्मिन् भक्तप्रिये भावं भक्तिं विधत्तामकुरुताम् ॥ ३३ ॥ पित्रोर्युवयोः ॥ ३४ ॥ वः युष्मान्प्रति यदाह "यात यूयं व्रजं तात ! वयं च स्नेहकातरान् । ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुख"मिति तत्सत्यङ्करिष्यत्येव ॥ ३५ ॥ किं च अन्तिके समीपे कृष्णं द्रक्ष्यथः यतः स एव कृष्णः अन्तर्हृदि आस्ते अतो मा खिद्यतम् ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इतराशक्यापवर्गनिसर्गदातृत्वाज्जगतो जन्मादिकर्तेत्युक्तं युक्तमिति वक्ति । यस्मिन्निति । जनो यज्जातो यस्मिन्भगवति तव लोके प्राणवियोगस्य कालः समयस्तस्मिन्विशुद्धं प्राक् साधनासाधनेन मनः क्षणमावेश्य कर्माशयं निगृह्य बहुशरीरापादकः कर्मसङ्घस्तं निगृह्योपमर्द्याशु परां गतिं ब्रह्ममयो हरिप्रधानोऽर्कवर्णः स्फटिकवर्णो वासुदेववर्णस्य तत्त्वादर्शनेन गच्छतोऽपि स एव वर्णो न्याय्यः । शुद्धस्फटिकसङ्काशं वासुदेवमित्यादेः । अर्के वर्णे स्फटिके रवाविति विश्वः । अर्कवर्णः सूर्यवर्ण इति । तस्यापि अथ येऽस्य दक्षिणा रश्मय इत्यारभ्य तद्वा एतद्यदेवदित्यस्यशुक्लं रूपमित्यन्तेन छन्दोगोपनिषदुक्तेः शुक्लोऽपि वर्णः सम्भवतीति वा ॥ ३३ ॥ अखिलानामात्मनां योनौ कारणे नारायणे कारणमस्यमूर्तौकारण एव मर्त्या मूर्तिर्यस्य तस्मिन्कृष्णे महात्मन्महात्मनि परमे व्योमन्नितिवत् नितरां भावं भक्तिं व्यधत्तां व्यधतां कुरुतम् । युवयोः सुकृतनवशिष्टमुर्वरितं वा न किमपि सर्वं सुकृतं कृतमेवेत्यर्थः । भवन्तौ वर्तनाने काले हि महात्मन्नन्द त्वय्यखिलात्मनः सर्वस्वामिनोयोनौ प्रादुर्भावस्थाने यशोदाया चेति युवयोः ॥ ३४ ॥ पुष्कलशुष्ककथया क उद्धवो भवितोद्धवेत्यत आह । आगमिष्यतीति । पित्रोर्युवयोः ॥ ३५ ॥ प्रतीपं प्रतिकूलं वः समागम्य सङ्गस्य कृष्णो यदाह तत्सत्यं करोति सर्वसात्वतां प्रतीपं विरोधं निमित्तीकृत्य यो यदाहोवा य आहवो युद्धं यस्य तं कंसं हत्वा समागस्य यदाह च वचस्तत्सत्यं करोतीति वाऽन्वयः । यदाह वः कृष्णः कंसं समागम्य तं हत्वा यदाह तदिति वा ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एतादृशे च भगवत्स्वरूपे सः सर्वात्मना सर्वदा सर्वभावेन मनो निहितं तेषां फले वक्तव्यमित्याह । तस्मिन् भवन्ताविति यादृशं हि उपास्यं चिन्त्यं ध्येयं वा तादृशमेव भवतीति सर्वजनीनं भगवांश्च सर्वपरूपः अतो नावशिष्यत इति वक्तुं सर्वहेतुत्वमाह । अखिलात्महेत्विति । अखिलानामात्मा हेतुश्च सर्वस्यात्मा भवति सर्वमस्यात्मत्वं भवति सर्वमस्यान्नं भवतीति फलं सिद्ध्यति किञ्च विकृतोऽपि हेतुरात्मेति च वक्तुं अयं पुरुषो नारायण इत्याह । अयं पुरुषो नारायणः किञ्चित्कारणार्थं सर्वेषामुद्धारार्थमेव कपटवेशमपि कृतवान् अनेन फलावश्यकत्वं द्योतितं प्रायिकत्वशङ्काव्यावृत्त्यर्थं यतः लोकस्य व्यसनापनोदपरो दासस्य किं न क्षम इति सिद्धान्तो भवति तत्रापि नितरां भावं विधत्तां रसत्वव्यावृत्त्यर्थं भावपदं पुत्रत्वेऽपि देवत्वाप्रतीस्तथापि फले स्वरूपयोग्यताप्यपेक्ष्यत इति यथा मर्यादायां ब्राह्मणानामेव मुक्तिः पुष्टौ वा वैकुण्ठेषु पक्ष्यादिरूपत्वं तद्व्यावृत्त्यर्थमाह । महात्मन्निति । महात्मत्वं

भगवदागमनान्निश्चीयते अतः युवयोः कृत्यं नावशिष्यते अनेनेयमेवावस्था पुरुषार्थ इति ज्ञापितम् ॥ ३३ ॥ एवं विषयं साधनं चाभिनन्द्य लौकिकभावेन खेदं वारयितुमाह । आगमिष्यतीति । अदीर्घेणैव कालेन व्रजमागमिष्यतीति यतः अच्युतः स्वरूपतो धर्मतश्च अन्यथा वाक्यतश्च्युतः स्यात् लौकिकभाषया न बाधनमिति केचित् शास्त्रार्थतः समागमिष्यतीति अन्ये भगवद्वाक्यानुरोधेन भगवदीयानां च कुरून्मधून्वेति वाक्याच्च पित्रोरिति विशेषवचनाच्च गतांश्चिरायितानिति वाक्यविरोधाभावात् नन्दं द्रष्टुं समागत एव भगवान् वरं यथा न गोपिकाप्रतीतिस्तथेति अर्थादवगम्यते आर्थिके विरोधाभावादिममर्थमेव ज्ञापयितुमाह । प्रियं विधास्यते पित्रोरिति । यथैव प्रियं भवति येन प्रकारेणागते च तथैव विधास्यति एतादृशकरणे सामर्थ्यमाह । भगवानिति । एवं गुप्ततयागमने हेतुमाह । सात्वतां पतिरिति । यादवानां भगवद्भक्तानां च पतिः यादवानुरोधान्मार्गानुरोधाच्च तथा समागमिष्यतीति भावः । प्रीतिमावहेति वाक्यादेवमुच्यते अन्यथा शास्त्रार्थमात्रमेव कथयेत ॥ ३४ ॥ ननु भगवानेवमायास्यतीत्यत्रावश्यकत्वे च किं प्रमाणमिति चेत्तत्राह । हत्वेति । कंसं हत्वा यदा भगवान् वो युष्माकं स्थाने समागत्य तत्सत्यमेव करोतीति कंसो व्याजेनैव मारणीय इति परोक्षवादेनापि तावत्पर्यन्तं वदति अतो गोपिकाः प्रति समागमनकथाशास्त्रार्थत्वेनापि सङ्गच्छते कंसमारणानन्तरं तु प्रयोजनाभावाः परोक्षकथायां निमित्तमस्ति कापट्ये हि शीघ्रं हतो भवत्यक्लिष्टकमात्म नान्यथेति वधश्च शीघ्रमेव कर्तव्य इत्यत्र हेतुमाह । प्रतीपं सर्वसात्वतामिति । सतां भक्तानां सर्वथा प्रतीपं प्रतिकूलं पूर्वमन्यथाकरणे ज्ञापकमाह । रङ्गमध्य इति । रङ्गस्थानं हि लीलाया न तु वधस्य तत्राप्यनुरोधात् युष्मानागत्य तत्रापि कृष्णः फलरूपः सर्वनिरपेक्ष्यः अनेन प्रयोजनादि प्रयोजनाभाव उक्तः अतस्तत्सत्यं करोत्येव वर्त्तमान सम्प्रतमपि तस्यागमनं सूचितं वर्तमानसमीपे च वर्त्तमानप्रयोगेः अत आगमिष्यतीत्यप्यविरुद्धम् ॥ ३५ ॥ ननु यथेदानीमागतो न दृश्यते तथाऽग्रेऽप्यागतो न द्रष्टव्य इति किमागमनेन सत्यवाक्यं न चेत्याशङ्क्याह । मा खिद्यतमिति । भगवद्दर्शनार्थं खेदमाकुरुतं दर्शने स्वरूपयोग्यो हेतुर्युवयोरस्तीत्याह । महाभाग्याविति । प्रतीत्या अनुमानेन च युवयोर्महाभाग्यं प्रतीयते तदवश्यं दर्शयतीति दर्शनेन सन्देहः योगज्ञानादिना दर्शनं वारयते । अन्तिक इति । लौकिके भगवानेवापेक्ष्यत इति न रामग्रहणं तस्य प्रादुर्भावः सर्वत्रैव सुगम इति ज्ञापयितुमन्तर्निरूपयति । अन्तर्हृदीति । अन्यो भविष्यतीत्याशङ्कं व्यावर्त्तयति । स इति । यो भवद्भिरपेक्ष्यते स एव सर्वेषामन्तर्हृदये वर्तत इति तत्र प्रमाणमाह । भूतानामिति । अन्यथा ते कथं जाताः प्राणिनः आधारव्यतिरेकेण अन्नादिक्रियाणां स्थित्यसम्भवात् अतः सूत्रापेक्षयाप्याधारत्वेन सर्वत्रैव वर्त्तते अन्तर्हृदीति प्रतीत्यर्थं विशेष उक्तः जीवासत्ययोर्व्यावृत्त्यर्थं दृष्टान्तमाह । ज्योतिरिवैधसीति । भूरुहत्वाविशेषेऽपि यथा घटादयो निमज्यन्ते न ज्वलन्ति तथा न काष्ठादयः उत्पन्नानपि भूम्यंशान् स्वसमानान् न गृह्णन्ति अतो ज्ञायते स्वभावत एव ते वह्न्यात्मकाः जलेन च पुष्टा भवन्ति उभयोर्व्यवधायकाभावेन सूक्ष्माः पृथिव्यवयवाः उभयोरप्यपगमे यावद्भस्म तावन्मात्राः अतो भूयानंशस्तेजस एव जलस्थानीयो ह्यासन्यः पृथिव्यंशस्थानीयो जीव इति सर्वत्र भगवानचेतनेषु उत्तम्भनचलनादिना वर्त्तत इत्यवसीयते अन्यथा मथनेनेष योगादिना न प्रादुर्भूतः स्यात् ॥ ३६ ॥

श्रीसुबोधिनी-सारः

अखिलस्य सर्वस्यात्मा हेतुश्च तस्मिन् कारणेन मर्त्यमूर्त्तौ मनुष्यशरीरे तस्मिन्नारायणे भवन्तौ नितरां भावं भक्तिं विधत्तां कुरुतां युवयोः किं वा सुकृत्यमवशिष्टं न किमपि कृतकृत्यावित्यर्थः हे महात्मन् सप्तम्यन्तं वा ॥ ३३ ॥ अच्युतः श्रीकृष्णो दीर्घेणाल्पेन कालेनागमिष्यति व्रजं सात्त्वतां पतिर्भगवान् पित्रोर्युवयोः प्रियं करिष्यति ॥ ३४ ॥ सर्वसात्त्वतां यदूनां भक्तानां वा प्रतीपं शत्रुं कंसं हत्वा रंगमध्ये समागत्य समीपं प्राप्य वो युष्मान्कृष्णो यदाह ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखमिति तत्सत्यं करिष्यति ॥ ३५ ॥ विरहदुःखितौ दृष्ट्वाह । हे महाभागौ अन्तिके समीपे एव कृष्णं युवां द्रक्ष्यथ मा खिद्यतां स भूतानामन्तर्हृदि आस्ते एधसि काष्ठे ज्योतिरग्निरिव ॥ ३६ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

तस्मिन् भवन्तौ भावं निरतिशयानुरागं नितरां निरन्तरं विधत्तां अकुरुताम् । अतो युवयोस्तु कृत्यं कर्तव्यं किमवशिष्टम् ? न किञ्चिदपीत्यन्वयः । तद्भक्तेरेव परमफलत्वे हेतुं सूचयन् विशिनष्टि—महात्मन्निति । महात्मनि पुरुषोत्तमे । तत्र हेतुमाह—अखिलस्य चिदचिदात्मकस्य जगतः आत्मा उपादानं हेतुर्निमित्तं स च तस्मिन्निति । 'तर्हि कथमस्मदादिवत्प्रतीतिः ?' तत्राह—कारणेन भूभारहरणादिनिमित्तेन मर्त्यस्येव मूर्तिर्यस्य तस्मिन्निति ॥ ३३ ॥ यत्पृष्टम् "अप्यायास्यति गोविन्दः स्वजनान् सकृदीक्षितुम्" इति तत्राह—आगमिष्यतीति । अच्युतः अदीर्घेण स्वल्पेन कालेन गच्छता व्रजमागमिष्यति । पित्रोर्युवयोः प्रियं दर्शनादिमनोरथं विधास्यति पूर्णं करिष्यति । तत्र कैमुत्यन्यायं सूचयति—सात्वतां स्वभक्तानां पतिः पालक इति । यः साधारणसर्वभक्तानां मनोरथं पूरयति, तस्य स्वपितृमनोरथपूरणे कः सन्देह इत्याशयः । तत्र सामर्थ्यमाह—भगवानिति ॥ ३४ ॥ 'न केवलं भवन्मनोरथपूरणमेव तदागमनप्रयोजनम्, किन्तु स्वप्रतिज्ञापालनार्थमप्यागमिष्यति' इत्याशयेनाह—हत्वेति । रङ्गमध्ये मल्लयुद्धभूमौ कंसं हत्वा वो युष्मान्प्रति समागत्य कृष्णः "यात यूयं व्रजं तात वयं च स्नेहदुखितान् । ज्ञातीन्

वो द्रष्टुमेष्यामो विधाय सुहृदां प्रियम्'' इति इदाह तत् सत्यं करोति करिष्यत्येव। कंसस्य हनने हेतुमाह—सर्वसात्वतां प्रतीपमिति। सर्वेषां यादवानां स्वभक्तानां प्रतिकूलमित्यर्थः ॥ ३५ ॥ 'तद्दर्शनादौ भक्तेः कारणत्वात्तस्या युवयोर्विद्यमानत्वान्न तत्र सन्देह' इति सूचयन् सम्बोधयति—महाभागाविति। मा खिद्यतं खेदं मा कुरुतम्। अन्तिके समीपे कृष्णं द्रक्ष्यथः। 'न केवलं स मथुरायामेवास्ति, किन्तु सर्वत्र' इत्याहुः—स श्रीकृष्णः सर्वभूतानामन्तर्हृदि हृदयमध्ये आस्ते। 'तर्हि सर्वैः किमिति न दृश्यते ?' तत्राह—ज्योतिरिवैधसि इति। यथैधसि काष्ठे स्थितमपि ज्योतिरग्निर्मथनाद्युपायमन्तरेण न दृश्यते, तथा सर्वत्र स्थितोऽपि भगवान् भक्तिंविना न दृश्यत इत्यर्थः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

तस्मिन्निति। भवन्तौ अखिलस्य चिदचिदात्मकस्य जगतः आत्मा उपादानं हेतुर्निमित्तं स च तस्मिन् कारणेन भूभारहरणादिनिमित्तेन मूर्तिर्यस्य तस्मिन् महात्मन् महात्मनि। "सुपां सुलुक्" इति ङेश्छान्दसो लुक् सम्बोधनं वा। तस्मिन् नारायणे भावं निरतिशयानुरागं नितरां निरन्तरं विधत्ताम् अकुरुताम्। अडभाव आर्षः। अतो युवयोः सुकृत्यं श्रेष्ठं कर्त्तव्यं किमवशिष्टं न किञ्चिदपि ॥ ३३ ॥ आगमिष्यतीति। भगवान् सात्वतां पतिः अच्युतः अदीर्घेण स्वल्पेन कालेन व्रजमागमिष्यति पित्रोर्युवयोः प्रियं दर्शनादिमनोरथं विधास्यते पूर्णं करिष्यति ॥ ३४ ॥ हत्वेति। रङ्गमध्ये मल्लयुद्धभूमौ सर्वसात्वतां प्रतीपं शत्रुं कंसं हत्वा वो युष्मान् प्रति समागत्य कृष्णः ज्ञातीन् वो द्रष्टुमेष्याम इति यदाह स्म तत्सत्यं करोति करिष्यत्येव। वस्तुतो वर्तमाननिर्देशात्प्रकाशान्तरेण कृष्णस्तत्रास्त्येवेति प्रागुक्तमनुसन्धेयम् ॥ ३५ ॥ मा इति। हे महाभागौ। मा खिद्यतं खेदं मा कुरुतम्। तङभाव आर्षः। अन्तिके इदानीमेव समीपे वा कृष्णं द्रक्ष्यथः। यतः स कृष्णः एधसि काष्ठे ज्योतिः अग्निरिव सर्वभूतानामन्तर्हृदि आस्ते। अतो मथनं विना यथाग्निर्न दृश्यते तथा भक्तिं विना कृष्णः। युवयोस्तु पूर्णा भक्तिरतो द्रक्ष्यथः ॥३६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अखिलस्य विश्वस्य आत्मा अन्तर्यामितया नियामकश्च हेतुरुत्पादकश्च तस्मिन् कारणं सर्वकारणं यत् परंब्रह्म तदेव मर्त्त्यमूर्त्तिर्मनुष्याकृतिस्तस्मिन् महात्मन् महात्म निक्षराक्षर श्रेष्ठे नारायणे भवन्तौ नितरां भक्तिं विधत्तः कुरुतः अतो युवयोः किं कृत्यमवशिष्टमस्ति न किमपीत्यर्थः ॥ ३३ ॥ प्रसङ्गमाह आगमिष्यतीति पित्रोः युवयोः ॥ ३४ ॥ ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखमिति यदाह कृष्णस्तत्सत्यंकरोति करिष्यन्ति ॥ ३५ ॥ वियोगमसहमानौ प्रत्याहमेति हे महाभागौ यूयं मा खिद्यतं खेदं न कुरुथः अंतिके कृष्णं द्रक्ष्यथ कालेनेति शेषः सः अधुना सर्वभूतानां अंतर्हृदि हृदयाकाशे एधसि काष्टसमूहे ज्योतिरग्निरिव आस्ते वर्त्तते यथा अग्निर्मंथनं विना न प्रकाशते तथा माहात्म्यज्ञानपूर्वकं स धर्मस्नेहं विना कृष्णोऽपीत्यभिप्रायः ॥ २६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्मिन्निति ॥ आत्मा च हेतुः कारणं च तत्समाहारः अखिलस्य चिदचित आत्महेतुः तस्मिन्, सर्वेषामात्मभूते कारणे चेत्यर्थः। कारणमर्त्त्यमूर्त्तौ साधुपरित्राणरूपनिमित्तात् स्वसंकल्पोपात्तमनुष्यविग्रहे, महात्मन् महात्मनि, तस्मिन् नारायणे, भवन्तौ युवां, नितरामत्यर्थं, भावमनुरागं, विधत्तामकुरुताम्। अतः, युवयोः सुकृत्यं, किं वा किं नु अवशिष्टम्। कृतकृत्यौ भवन्तौ स्त इत्यर्थः ॥ ३३ ॥ प्रस्तुतमाह ॥ आगमिष्यतीति ॥ हे नन्द, हे यशोदे, अच्युतः श्रीकृष्णः, अदीर्घेण कालेन, व्रजं आगमिष्यति। सात्त्वतां पतिः भगवान् श्रीकृष्णः, भवतोः, प्रियं विधास्यते करिष्यति ॥ ३४ ॥ हत्वेति ॥ सर्वेषां सात्त्वतां यादवानां भगवद्भक्तानां वा, प्रतीपं प्रतिकूलं कंसं, रङ्गमध्ये हत्वा, कृष्णः वो युष्मान् प्रति, समागत्य, यत् आह 'यात यूयं व्रजं तात वयं च स्नेहदुःखितान्। ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां प्रियं' इति यदुक्तवान्। तत् सत्यं, करोति करिष्यतीत्यर्थः। 'वर्त्तमानसामीप्ये भूते भविष्यति च' इति लट् प्रयोगः ॥ ३५ ॥ तथापि विलम्बमसहमानौ प्रत्याह ॥ मा खिद्यतमिति ॥ हे महाभागौ, मा खिद्यतं खेदं मा कुरुतम्। अन्तिके समीपे एव, इदानीमेव वा, अनतिप्रकृष्टकालेनेत्यर्थः। कृष्णं, द्रक्ष्यथः। ननु कृष्णो मथुरायामेवास्ते, तत् कुत इदानीं समीपे वा तद्दर्शनं स्यात्तत्राह। स कृष्णः, भूतानां शरीरिणां, अन्तर्हृदि हृदयस्य मध्यप्रदेशे, आस्ते। तर्हि सर्वैः किमिति न दृश्यते तत्राह। यथा एधसि दारुणि, ज्योतिरग्निः इव, आस्ते अतो न दृश्यते। अग्निर्यथा मथनाद्युपायमन्तरेण न दृश्यते तथा श्रीकृष्णस्तीव्रभक्तिं विना न दृश्यते इत्यर्थः ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यदाहेति : १०.४६.३५

प्रियं वः करवाणीति यदुक्तं येन ते पुरः। तत्सत्यसन्धसद्वाचि नैवाश्रद्धं मनः कुरु ॥ ८७ ॥

कृष्णप्रिया

हे नन्द बाबा ! आप महान् पुरुष हैं कि आपके यहाँ पूर्णपुरुषोत्तम भगवान पधारे हैं, आपका महत्व कैसे गाया जाय ? जो श्रीकृष्ण रामस्तों की आत्मा है और हेतु भी है, और सर्व के उद्धार के कारण से जिन्होंने मनुष्य स्वरूप धारण

किया है ऐसे श्रीनारायण भगवान में आप दोनों ने अत्यन्त दिव्य भाव स्थापन किया है। अब आपको कौन सा सुकृत करने को रहा। आप के ज्ञान भक्ति आदि सिद्ध हो गए ॥ ३३ ॥ बाबा! भगवान् अच्युत श्रीकृष्ण, अल्प काल में व्रज भूमि में पधारेंगे। श्रीकृष्ण भगवान् तो यादवों के पति और सर्वसंपत्ति जीवों के स्वामी है। वह दयालु यहाँ पधार कर माता पिता का अवश्य प्रिय करेंगे क्योंकि अच्युत है। ३४ ॥ सर्व यादवों का और भक्तजनों का वैरी कंस का रङ्गभूमि में बध करने में पधार कर अनुरोध से भगवान् कृष्ण ने स्वयं अपने श्रीमुख से जो कहा है वह अवश्य सत्य करेंगे ॥ ३५ ॥ बाबा! यदि आप कहेंगे कि अभी भी कृष्ण पधारें हैं लेकिन नयन गोचर नहीं होते हैं वैसे पुनः पधारने पर यदि नयन गोचर नहीं बने तो क्या लाभ! तो ऐसी चिन्ता न करें? आप दोनों बड़ भागी हैं, अल्प भी खेद न करें? निकट के भविष्य में भगवान् श्रीकृष्ण को अपने समीप देखेंगे। काष्ठ के भीतर जैसे अग्नि रही है वैसे ही वह सर्वभूतों के हृदय के भीतर विराजमान हैं ॥ ३६ ॥

न [1]ह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वास्त्यमानिनः। नोत्तमो नाधमो नापि समानस्यासमोऽपि वा ॥ ३७ ॥
न माता न पिता तस्य न भार्या न सुतादयः। नात्मीयो न [2]परश्चापि न देहो [3]जन्म एव च ॥ ३८ ॥
न चास्य[4] कर्म वा लोके सदसन्मिश्रयोनिषु। क्रीडार्थः[5] सोऽपि साधूनां परित्राणाय कल्पते ॥ ३९ ॥
सत्त्वं रजस्तम इति भजते निर्गुणो [6]गुणान्। [7]क्रीडन्नतीतोऽत्र गुणैः सृजत्यवति हन्त्यजः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—अस्य, हि, कश्चित्, प्रियः, वा, अप्रियः,न अस्ति, न, उत्तमः, अस्ति, न कश्चित् अस्य अधमः, अस्ति, समानस्य अस्य, समानः, अपि, नास्ति ॥ ३६-३७ ॥ तस्य, न, माता, न, पिता, न, भार्या, न, सुतादयः, न, आत्मीयः, च, न, अपि, परः, नदेहः न, च, जन्म, एव ॥ ३८ ॥ अस्य, च, न, वा, कर्म, तथापि, लोके, सद् असत्, मिश्रयोनिषु-क्रीडार्थः, अयम, सः, साधूनाम् ॥ परित्राणाय, कल्पते ॥ ३९ ॥ निर्गुणः, सत्त्वम्, रजः, तमः, इति, गुणान्, भजते, अतीतः, अत्र, अजः, गुणैः, सृजति, अवति, हन्ति ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अहो आस्तामेतत्तस्य त्विहागमनं स्वस्यातिप्रियान्पित्रादीन्विहाय न संगच्छत इति मन्येह तत्राह। नह्यस्येति। अस्य प्रियादयो नहि सन्ति। तत्रेमौ हेतू। अमानिनः समानस्येति च निरभिमानित्वाद्रागादिरहितत्वाच्चेत्यर्थः ॥ ३७–३८ ॥ सोऽपि जन्मकर्मादिरहितोऽपि क्रीडाप्रयोजनः सन्स साधूनां परिपालनाय सदसन्मिश्रयोनिषु सात्त्विकराजसतामसयोनिषु। यद्वा देवादिमत्स्यादिनृसिंहादियोनिषु कल्पते आविर्भवतीत्यर्थः ॥ ३९ ॥ ननु जन्मकर्मादिरहितस्य कुत एतदित्यत आह। सत्त्वमिति। क्रीडामतीतोऽपि क्रीडन्। तथापि मायागुणैः सर्वं घटत इत्यर्थः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतत् भक्ति विना स नाप्यते इत्येतत्। आस्तां तिष्ठतु। तस्य कृष्णस्य। तत्राक्षेपे। तत्र प्रियाद्यभावे। अमानिनः अहंममाभिमानहीनस्य प्रियादयो न, समानस्य सर्वत्रैकरूपस्य चोत्तमादयो न भवन्तीति भावः ॥ अथापि प्रेमाणसंकुतमालक्ष्य भो व्रजराज कृष्णः साक्षात्परं ब्रह्मैव संभवतीत्याह—त्रिभिः। अस्य प्रियादयो न सन्ति, तत्र हेतुः – अमायिनः, समस्य चेति। न मातेत्यादिः प्रकटार्थः। नन्दं ज्ञापयितुमभीप्सितः अप्रकटोऽर्थस्त्वन्य एव। तत्रतत्र सदसन्मिश्राः सात्त्विकतामसराजस्यो योनयस्तास्वस्य जन्म नास्ति, जन्माभावादेव तदुत्तरकालभवं कर्मापि नास्ति, तादृशजन्मा देहोऽपि नास्ति, तेन देहेन क्रीडापि नैव, अर्थः प्रयोजनञ्च नैव। या गुणातीताः शुद्धसत्त्वरूपा यशोदादेवकीकौसल्याद्यास्तासु जन्म तदनन्तरं कर्म च तज्जन्मा देहश्च क्रीडा च अर्थश्चास्ति, तद्रूपा मात्राद्याः सन्तीति भावः। किन्त्वयं नन्दं ज्ञापयितुमनभीप्सितः। सोऽपि एवं ब्रह्मस्वरूपोऽपि साधूनां स्वभक्तानां दुःखत्राणाय कल्पते योग्यो भवत्येव, भक्तवात्सल्यादिति भावः ॥ ३७ ॥ तदेवाह—न मातेति ॥ धातुद्वारोत्पादनहेतोर्न माता न पिता च, अतः सुतादयोऽपि न विवाहसंबंधहेतोर्भार्यापि न, सर्वकारणादिहेतोरात्मीयो न, तदभावहेतोः परोऽपि न, अभिन्नदेहदेहिस्वरूपादन्यत्रास्मत्त्वाभिमानहेतोर्देहो न, अन्यादृशदेह स्वीकाराज्जन्मैव च न, कुतो देह इत्यर्थः ॥ ३८ ॥ सात्त्विका ऋषयतामसाः सर्पादयो राजसा मनुष्याः, एतदर्थे देवादिग्रहणार्थमाह—यद्वेति। इत्यर्थ इति—समर्थार्थकक्लृपधातोराविर्भावोऽर्थः। समर्थस्यैव प्राय आविर्भावो नासमर्थस्येति भावः ॥ अपूर्वोत्पत्तियोग्यत्वाभावात्कर्म शुभाशुभमदृष्टञ्चेति न सर्वत्र यथायथं हेतुः। पूर्वत्र अमानिनस्तदभिमानशून्यस्य समस्य च विकाररहितस्येति प्रायः सर्वत्रैव नञः प्रयोगस्तन्निषेधनिर्धारणार्थः। आद्यो वा

---

१. नह्यस्यातिप्रियः–विज.। २. श्चास्य–विज.। ३. कर्म चैव वा–वीर.; जन्म कर्म वा–विज.। ४. जन्म वा लोके–वीर.; लोकस्य जन्मकर्माणि–विज.। ५. क्रीडार्थं–वीर. विज.। ६. महान्–विज.। ७. ग्नतीतोऽपि–वीर.; ग्नीहोऽनु–विज.।

शब्दः समुच्चये । अन्ये च तत्संभावनायामपि तन्निरासार्थाः । जन्म एव चेति च शब्दः काचित्कः । किन्तु तस्यैवं भूतस्य साधुत्वेन प्रियादयः साधुद्रोहित्वेनाप्रियादयश्च सन्तीत्यभिप्रेत्याह—सदिति । सज्जातिरियमसज्जातिरियमित्यूह्यादरानादरावननुसंधाय तासु तदनुकारिस्वरूपविग्रहेण प्रकटीभूय, साधूनां साधुत्वेनैव प्रियादितया स्वीकृतानां सर्वतो रक्षणाय योग्यो भवतीत्यर्थः । ननु संकल्पे नैव तत्स्यात्किं तत्तत्प्रादुर्भावेण तत्राह—क्रीडार्थः 'लोकवत्तु लीलाकैवल्यम्' इति न्यायेन क्रीडाप्रयोजनः सन्नित्यर्थः। अयमभिप्रायः—अन्यलेपस्तस्मिन्न भवत्येव किन्तु परमसद्गुणशिरोमणये तस्मै साधुत्वञ्च रोचते । साधुत्वस्य च तदेकनिष्ठायामेव मुख्या वृत्तिः, 'धर्मः प्रोज्झितकैतवोऽत्र' इत्यत्र मोक्षेच्छापर्यन्तस्य कैतवतास्वीकारात्, "न किञ्चित्साधवो धीरा भक्ता ह्येकान्तिनो मम । वाञ्छत्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥ साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यं ते न जानन्ति नाहं तेभ्यो मनागपि ॥" इति स्पष्टत्वात् । तदेकनिष्ठता च तत्प्रेमतारतम्यैकतारतम्या, तद्द्वैविध्येन विविधा च, प्रेमैकहेतुत्वात्तस्याः । यथा चोक्तम्—'यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम्' इति, "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इत्यादि । तच्च तत्प्रेम निर्गुणम् "सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् । तामसं मोहदैन्योत्थं मन्निष्ठं निर्गुणम् स्मृतम् ॥ सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी । तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥" इति भगवता निर्णीतत्वात् । अतस्तादृशसाधुमात्रापेक्षी भगवान् "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः" इति पाद्मोक्ततदुक्तानुसारेण तत्सुखमयस्वसुखाय क्रीडति यत्तत्तस्य स्वभाव एवेति स्थिते 'ये यथा मां प्रपद्यन्ते' इति न्यायाद्यथावसरं प्रियादिरूपतामपि प्राप्नोति संप्रति च वसुदेवदेवक्यादिभ्योऽपि युवयोः शुद्धवात्सल्यप्रेमातिशयवत्त्वात्तानुपेक्ष्य युवयो रक्षामिच्छन् युवयोः प्रेमभिराकृष्यमाणो युवयोरेव पुत्रत्वमात्मनि बहुमन्यमानो युवयोरग्रे तदुचितमनोहरलीलाप्रकाशनलालसो व्रजमागमिष्यत्येवेति । तदुक्तं स्वयमेव—"गच्छोद्धव व्रजं सौम्य पित्रोर्नः प्रीतिमावह" इति ॥ ३९ ॥ अत्राशङ्कते—नन्वति । एतत् आविर्भावकल्पनम्, वस्तुतो निर्गुणोऽपि मायया सत्त्वादिगुणान् लीलार्थमादत्ते । यद्यपि क्रीडातीतस्य क्रीडनं न संगच्छते तथापीति । इत्यर्थ इति-स्फटिकरागवदुपाधिसंबंधेन क्रीडा संपनीपद्यत एवेति भावः ॥ ननु यदि तस्य सर्वत्र साम्यात्प्रियाप्रियादयो न सन्ति तर्हि कथं तेन केचित्सुखिनः केचिद्दुःखिनश्च जगत्यत्र सृष्टास्तत्र गुणकृतमेव सुखदुःखादिकं न तत्कृतमित्याह—सत्त्वमिति । निर्गुणोऽपि स्वमायाशक्त्या वीक्षणादिना गुणांस्तदीयान्स्वीकुरुते । किमर्थम्—क्रीडन् क्रीडितुम् । अतीतः क्रीडातीत इति । क्रीडापि तस्य नास्तीति नन्दं बोधयितुममीप्सितोऽर्थः । वस्तुतस्तु गुणानतीतः सन्नत्र मायिकलोकमध्ये कृष्णरामाद्यवतारेण स्वभक्तैः सह क्रीडितुमित्यर्थः । अतो गुणैर्जगत्सृजति । यत एव प्राक्कल्पगतजीवाः स्वस्वशुभाशुभ कर्मसाधनफलसिद्ध्यर्थं बुद्धीन्द्रियादीनि प्राप्य सुखिनो दुःखिनश्च भवन्तीति तत्र तस्य को दोषः, न हि तस्य प्रिया अप्रियाश्चेति भावः ॥ ४० ॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

न ह्यस्यास्तीति तैर्व्याख्यातम् । तत्रास्तामेतदिति न वयमन्तर्हदीत्यादिकं बुध्यामहे इत्यर्थः । यथा जीवानां तेन तेन लौकिकप्रकारेण प्रियादयः कर्मान्ताः चतुर्दश भावाः स्युस्तथास्यामी न सन्तीत्याह । नहीति त्रिकेण । अस्तीति सर्वत्र निषेधे योज्यम् । अस्य श्रीकृष्णस्य उपकारादिना प्रियोऽतिशयेन न ह्यस्ति एकांशेनापि नास्तीत्यर्थः । अपकारेणाप्रियोऽपि नास्ति कश्चिदिति यथासम्भवमग्रेऽपि योज्यं तथा सौन्दर्यपाण्डित्यादिगुणदृष्टिहेतोरुत्तमः स्तुत्यो न कौरूप्यकौबुद्ध्यादिदोषदृष्टिहेतोरधमो निन्द्यो न तादृशगुणदोषाभावदृष्टिहेतोः आ सर्वतः सम उपेक्षाबुद्धिविषयो न धातुद्वारोत्पादनहेतोर्न माता न पिता च । अतः सुतादयोऽपि न । विवाहसम्बन्धहेतोर्भार्या न । सर्वकारणादिहेतोरात्मीयो न । तदभावहेतोः परोऽपि न । अभिन्नदेहदेहिस्वरूपादन्यत्रात्मत्वाभिमानहेतोर्देहो न । अन्यादृशदेहस्वीकाराज्जन्मैव च न कुतो देह इत्यर्थः । अपूर्णोत्पत्तियोगत्वाभावात् । कर्म शुभाशुभमदृष्टं च नेति । सर्वत्र यथायथं हेतुः अमानिनः तत्तदभिमानशून्यस्य समानस्य विकाररहितस्येति प्रायः सर्वत्रैव नञ् प्रयोगस्तन्निषेधनिर्द्धारणार्थः आद्यो वाशब्दः समुच्चये अन्ये च तत्सम्भावनायामपि तन्निरासार्थाः । जन्म एव चेति च शब्दः काचित्कः ॥ ३७-३८ ॥ किन्तु तस्यैवम्भूतस्यापि साधुत्वेन प्रियादयः साधुद्रोहित्वेनैवाप्रियादयः सन्तीत्यभिप्रेत्याह । सदिति । सज्जातिरियमसज्जातिरियमित्याद्यादरानादराननुसन्धाय तासु तदनुकारिस्वरूपविग्रहेण प्रकटीभूय साधुनां साधुत्वेनैव प्रियादितया स्वीकृतानां सर्वतो रक्षणाय योग्यो भवतीत्यर्थः । ननु सङ्कल्पेनैव तत् स्यात् किं तत्तत्प्रादुर्भावेन तत्राह । क्रीडार्थं "लोकवत्तु लीलाकैवल्यम्" इति न्यायेन क्रीडाप्रयोजनः सन्नित्यर्थः । अयमभिप्रायः । अन्यलेपस्तस्मिन्न भवत्येव किन्तु परमसद्गुणशिरोमणये तस्मै साधुत्वं खलु रोचेत साधुत्वस्य च तदात्तनिष्ठतायामेव मुख्या वृत्तिः धर्मः प्रोज्झितकैतवोऽत्रेत्यत्र मोक्षे पर्य्यन्तस्य कैतवतास्वीकारात् । "न किञ्चित् साधवो धीरा परित्यक्ता ह्येकान्तिनो मम । वाञ्छत्यपि मया दत्तं कैवल्यमपुनर्भवम् साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यत्तो न जानन्ति नाहं तेभ्यो मनागपी"ति स्पष्टत्वात् । तदेकनिष्ठता च तत्प्रेमतारतम्यैकतारतम्यात्तद्द्वैविध्येन विविधा च प्रेमैकहेतुत्वात्तस्याः । तथाचोक्तं यथाश्नतः स्युस्तुष्टिः पुष्टिः मदपायोऽनुघासमिति । येषामहं प्रिय आत्मा सुतश्च सखा गुरु सुहृदो दैवमिष्टमित्यादि । तच्च तत्प्रेम निर्गुणम् । "सात्त्विकं सुखमात्मोत्थं विषयोत्थन्तु राजसम् । तामसं मोहदैन्योत्थं मन्निष्ठं निर्गुणं स्मृतम् । सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी । तामस्यधर्मे या श्रद्धा मत्सेवायान्तु

निर्गुणा" इति श्रीभगवता निर्णयात् अतस्तादृशसाधुमात्रापेक्षी भगवान्। मद्भक्तानां विनोदार्थं करोमि विविधाः क्रिया इति पाद्मस्थतदुक्तानुसारेण तत्सुखमयस्वसुखाय क्रीडति यत्तत्तस्य स्वभाव एवेति स्थिते ये यथा मामिति न्यायात् यथावसरं प्रियादिरूपतामपि प्राप्नोति। सम्प्रति च वसुदेवदेवक्यादिभ्योऽपि युवयोः शुद्धवात्सल्याख्यप्रेमातिशयवत्त्वात्तानपेक्ष्य युवयोरक्षामिच्छन् युवयोः प्रेमभिराकृष्यमाणो युवयोरेव पुत्रत्वमात्मनि बहु मन्वानो युवयोरग्रे तदुचितमनोहरलीलाप्रकाशनलालसो व्रजमागमिष्यत्येवेति। तदुक्तं स्वयमेव। गच्छोद्धव व्रजं सौम्य पित्रोर्नः प्रीतिमावहेति ॥ ३९ ॥ सत्त्वमिति तैर्व्याख्यातम्। तत्र तथापीति तत्सान्निध्यबलेन तन्मायागुणास्तत्र कुर्वन्ति तत्तस्मिन्नारोप्यत इत्यर्थः। यद्वा इतः क्रीडा च तस्य स्वभाव एव यत्र प्राकृतसत्त्वादिनाप्यनुरक्ती करोतीति दर्शयति गुणेभ्यः सत्त्वादिभ्यो निष्क्रान्तस्तत्संसर्गरहितोऽपि क्रीडन् निजभक्तसुखमयनिजसुखक्रीडाहेतोः सत्त्वं रजस्तम इति गुणानपि भजते स्वीकरोति तर्हि तैराविष्टो भवति नहि नहीत्याह गुणैः स्वरूपभूतैर्ज्ञानादिभिस्तानतिक्रान्तस्तदनाविष्ट इत्यर्थः। अत एव अजः जन्मादिविकाररहितत्वे तन्नामेत्यर्थः। प्राकृतसत्त्वादिमयीं क्रीडामप्याह। सृजतीति ॥४०॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु पुरे प्रियजनलाभात् स कथमत्रागमिष्यतीत्यशंक्य यथा जीवानां तेन तेन लौकिकप्रकारेणातिप्रियादयः कर्म्मान्ताश्चतुर्दशभावाः स्युस्तथास्यामी न सन्तीत्याह—न हीति त्रिकेण। हि एव नैव, अस्य कृष्णस्यात्युपकारादिनातिप्रियो नास्ति, अपकारेणाप्रियोऽपि नास्ति। तत्र हेतुः—अमानिनस्तादृशप्रियत्वादेरभिमानकृतत्वात्। कश्चिदिति यथायोग्यमग्रे सर्व्वैरपि योज्यम्। योज्यम्। उत्तम उत्तमत्वादपेक्ष्यः, अधम उपेक्ष्यः, समो मध्यमोऽनपेक्ष्यश्च तथा नात्मीयो न हितः, न परश्च न शत्रुः। तत्र हेतुः—समस्य अविषमदृष्टेः। न च धातुसम्बन्धेन मात्रादयः—माता जननी, पिता गर्भाधायकः, भार्य्या सम्भोग्या स्त्री, सुत आत्मजत्वेनैव पाल्यः, भक्तद्रोहित्वादेव स्वावतारवराहजातत्वेन पुत्रस्यापि हननात्, आदि-शब्दात्तादृशाभ्रातृपितृव्यादयः। देहादीनि च त्रीणि प्राकृतानि, चकाराज्जीववदवस्था च। प्रायः सर्व्वत्रैव नञः प्रयोगस्तत्तन्निषेधनिर्द्धारार्थम्। आद्यो वा-शब्दः समुच्चये। अन्ये च तत्तत्सम्भावनायामपि तत्तन्निरसनार्थम्। किन्तु तस्यैवम्भूतस्यापि भक्तत्वेनैव प्रियादयः, भक्तद्रोहित्वेनैवाप्रियादयः सन्तीत्याभिप्रेत्याह—सदिति। स्वभक्तैः सह क्रीड़ाप्रयोजनः सन् साधूनां भक्तानां दुष्टेभ्यो रक्षणाय तद्द्रोहिणो दुष्टान् हनिष्यन् देवादियोनिषु प्रादुर्भवति। तत्रायमभिप्रायः—भक्तिमात्रापेक्षी श्रीभगवान्, अतो देवकीवसुदेवादिभ्योऽपि भवादृशामतीव भक्तत्वात्तानप्यनपेक्ष्य युष्मत्प्रेमदामभिराकृष्यमाणो निजमनोहरलीलार्थं युष्मद्व्रजमेवागमिष्यतीति ॥ ३७-३९ ॥ ननु यद्यस्य प्राकृतं कर्म्म नास्तीत्युच्यते, तर्हि कथम् (३१ श० श्लो०) 'एतौ हि विश्वस्य च बीजयोनी' इत्यादिना विश्वसर्गादिकर्म्मोक्तम्? तत्राह—सत्त्वमिति द्वाभ्याम्। अर्थस्तैरेव व्याख्यातः। यद्वा, क्रीड़ार्थ इत्युक्तम्, सा तु सद्गुणाविष्करणेनैव सुष्ठु सम्पद्यत इत्यतस्तदाह—सत्त्वमिति। सत्त्वं रजस्तम इत्येतद्गुणत्रयम्, अतीतः, अतोनिर्गुणः—गुणैः प्रकृतिगुणकार्य्यैरस्पृष्टोऽपि स्वयमजोऽपि गुणानप्राकृतान् वैदग्ध्यमाधुर्य्यकारुण्यादीन् भजते प्रकटयति। किमर्थम्? अत्र लोके गुणैस्तैरेव क्रीडन् क्रीडितुम्। क्रीड़ामेवाह—सृजतीति। ब्रह्मरुद्रादिमोहनान् स्वरालापान् सृजति, अवति शङ्खचूड़ादिभ्यो व्रजांगनादीन्, हन्ति शङ्खचूडादीनेव। यद्वा, सृजतिवत्स-वत्सपालान्, अवति तानेव वत्सरपर्य्यन्तम्, हन्ति तानेव संहरति, अन्तर्द्धापयतीत्यर्थः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अमानिनः ममताभिमानरहितस्य समानस्य सर्वसमस्य ॥ ३७-३८ ॥ कल्पते कर्मवश्यो न भवति यद्वा स भगवान् परित्राणाय कल्पत इत्यर्थः ॥ ३९-४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अस्मत्तोऽपि प्रियतरान् वसुदेवादीन् विहायात्रागमिष्यतीत्येतदसम्भावितमित्यत्राह। न ह्यस्येति। अस्य भगवतः प्रियादयो न सन्ति तत्र हेतुरमानिनः समानस्येति च ममताभिमानरहितस्य सर्वसमानस्य चेति ॥ ३७ ॥ तथापि मात्रादयः सन्त्येवेत्यत्राह। न मातेति। तत्र हेतुर्न देह इति। देहस्यैवाभावे कुतस्तत्ससम्बन्धिनो मात्रादय इति भावः। ननूपलभ्यते तस्यापि देहस्तत्कथं न चास्य देह इति ब्रूषे अत आह। कर्तेवेति। पुण्यपापात्मकर्मारब्ध देहोऽस्य नास्तीत्यर्थः ॥ ३८ ॥ ननूपलब्धा तस्यापि देहोत्पत्तिस्तत्राह। न चास्य जन्मेति। तस्योत्पत्तिरवताररूपेति भावः। किमर्थमवताररतत्राह। लोक इति। सोऽपि जन्मकर्मादिरहितोऽपि क्रीडार्थं साधूनां परित्राणरूपपरमप्रयोजनाय लोके सदसन्मिश्रयोनिषूत्तमाधममध्यमयोनिषु देवतिर्यङ्मनुष्ययोनिषु कल्पते आविर्भवति अनेन विलक्षणजन्मकर्मादिभिर्जीववैलक्षण्यं सूचितम् ॥ ३९ ॥ तदेव विशदयति। सत्त्वमिति। निर्गुणः सत्त्वादिप्राकृतगुणेभ्यो निर्गतः गुणपारवश्यरहित इत्यर्थः। जीवस्तु सत्त्वादिगुणवश्य इति भावः। सत्त्वादीन् भजते स्वलीलोपकरणतया नियाम्यतया च तान्प्रतिगृह्णाति जीवस्तु भोग्यतया नियमनाशक्त्या चताननुवर्तत इति भावः। गुणैरुपकरणभूतैः क्रीडन्नपि तानतीतोऽतिक्रान्तः स्वरूपतः स्वभावतश्च गुणैरनभिभूत इत्यर्थः। जीवस्तु तैः स्वभावतोऽभिभूत इति भावः। क्रीडन्नित्यनेन जीवस्य गुणकार्यशब्दादिविषयभोगः सूचितः काऽसौ क्रीडेत्यतस्तां दर्शयति। सृजतीति। विश्वमिति

कर्मपदमध्याहर्तव्यम् अजः स्वयं विश्वगतोत्पत्त्यादिरहितः सृजत्यवति रक्षति संहरति च जगद्व्यापारस्तस्य क्रीडेति दर्शितं भवति अनेन जीवस्तु सुखाद्यनुभवाय पुण्यपापात्मककर्माणि करोतीति सूचितम् अज इत्यनेन विश्वगतोत्पत्त्यादिभाङ्न भवतीति जीवस्तु जातोऽहं मृतोऽहमिति देहधर्मानात्मनि मन्यत इति विशेषः ।। ४० ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रेष्ठानां हृद्येव वर्त्तते नान्येषामिति नियमो नास्तीति भावेनाह । नहीति । अमानिनः अहं ममाभिमानरहितस्य योग्यतानुसारेण समानस्य समोऽपि चेति पाठः ।। ३७-३८ ।। नन्वेवं विधस्य हरेः कथञ्जन्मादिकमुपपद्यत इति तत्राह । लोक इति। सदसन्मिश्रयोनिषु सुरनरतिर्यग्योनिषु ।। ३९ ।। अनुगुणैस्तत्तत्कर्मानुकूलैः सत्त्वादिभिः ।। ४० ।।

मज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु सङ्कल्पेनैव तत् स्यात् । किं तथा प्रादुर्भूतः तत्राह । क्रीडार्थं तत्प्रियादिभावमयक्रीडाप्रयोजनः सन्नित्यर्थः। "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रिया" इति पाद्मे तद्वाक्यात् । अयं भावः । अन्यलेपस्तस्मिन्न भवत्येव किन्तु परमसद्गुणशिरोमणये तस्मै साधुत्वं खलु रोचेत साधुत्वस्य च तदेकनिष्ठायामेव मुख्या वृत्तिः । धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतामित्यत्र मोक्षेच्छापर्यन्तस्य कैतवतास्वीकारात् तदेकनिष्ठता च प्रेमतारतम्यैकतारतम्या तद्द्वैविध्यतो विविधा च प्रेमैकहेतुत्वात्तस्याः । तथाचोक्तं यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपादयोऽनुघासमिति । येषामहं प्रिय आत्मा सुतश्च सखा गुरु सुहृदो दैवमिष्टमित्यादि । अतस्तन्मात्रापेक्षी भगवान् इति स्थिते श्रीवसुदेवदेवक्यादिभ्योऽपि युवयोः शुद्धवात्सल्याख्यप्रेमातिशयतया तानप्यपेक्ष्य युवयो रक्षामिच्छन् युवयोः प्रेमभिराकृष्यमाणो युवयोरेव पुत्रत्वमात्मनि बहु मन्वानो युवयोरग्रे तदुचितलीलाप्रकाशलालसो व्रजमागमिष्यत्येवेति । क्रीडामयसाधुपरित्राणमेव योजयति ।। ३९ ।। सत्त्वमिति । यथा निर्गुणो निर्गता गुणेभ्यः सत्त्वादिभ्यो गुणा तादृशोऽपि गुणान् सत्त्वादीन् भजते सान्निध्येनोपकरोति । तथा सत्त्वादिमयक्रीडातीतोऽपि क्रीडन् "लोकवत्तु लीलाकैवल्य" न्यायात् साधुपरित्राणमयक्रीडां कुर्वन् सान्निध्येन गुणैः सत्त्वादिभिः सृष्ट्यादिकं करोतीत्यर्थः ।। ४० ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

किञ्चान्तर्यामी तु कृष्णस्यांशः कृष्णस्त्वंशी, भेदस्त्वनयोरयमेवेत्याह—न ह्यस्यास्तीति सार्द्ध-द्वाभ्याम् । अस्यान्तर्यामिना तुल्यैव व्याख्या ।। ३८ ।। क्रीडार्थं सोऽपि इति । स-शब्दः श्रीकृष्णपरः—इदं शब्द-तच्छब्दाभ्यां व्यधिकरणत्वेन निर्देशात्। सोऽप्यंश्यपि क्रीडार्थं सन् साधूनां भक्तानां परित्राणाय कल्पते, समर्थो भवति, तथाविधवात्सल्यात् । अतः खलु युवयोरन्तिकवर्ती भविष्यति ।।३९।। नन्वसौ अंशित्वेन परब्रह्मतया निर्गुण एव कथं तस्य वात्सल्यादि गुणकल्पनेत्याह—सत्त्वमित्यादि । निर्गुणोऽपि रजस्तम इति गुणान् भजते । कुतः ? अति अतिशयं क्रीडन् क्रीडा परः सन् । तत्र दृष्टान्तमिवाह—अत्र अजः स एव गुणैरितः प्राप्तः सन् सृजत्यवति हन्ति यथेति बोद्धव्यम् ।। ४० ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथापि प्रेमाणमसङ्कुचन्तमालक्ष्य भो व्रजराजः कृष्णः साक्षात् परं ब्रह्मैव भवतीत्याह त्रिभिः प्रियादयो न सन्ति तत्र हेतुः अमानिनः समानस्येति च न मातेत्यादि प्रकटार्थो नन्दं ज्ञापयितुमभीप्सितः अप्रकटोऽर्थस्त्वन्यः एव तत्र सदसन्मिश्राः सात्त्विकतामसराजस्यो या योनयस्तासु अस्य जन्म नास्ति जन्माभावादेव तदुत्तर कालभवं कर्तरि नास्ति तादृशजन्मा देहोऽपि नास्ति तेन देहेन क्रीडापि नैव अन्यः प्रयोजनं च नैव या गुणातीताः शुद्धसत्त्वस्वरूपा यशोदादेवकी कौसल्याद्यास्तासु जन्म च तदनन्तरं कर्म च तज्जन्म देहश्च क्रीडा च प्रयोजनं चास्ति तद्रूपा मात्राद्याश्च सन्तीति भावः । किं त्वयं नन्दं ज्ञापयितुमनभीप्सितः सोऽपि एवं ब्रह्मस्वरूपोऽपि साधूनां स्वभक्तानां दुःखत्राणाय कल्पते योग्यो भवत्येव भक्तवात्सल्यादिति भावः ।।३७-३९।। ननु यदि तस्य सर्वत्र साम्यात् यथाप्रियादयो न सन्ति तर्हि कथं तेन केचित् सुखिनः केचिदुःखिनश्च जगत्यत्र सृष्टास्तत्र गुणकृतमेव सुखदुःखादिकं न तत्कृतमित्याह । सत्त्वमिति । निर्गुणोऽपि स्वमायाशक्तया वीक्षणादिना गुणांस्तदीयान् भजते स्वीकुरुते किमर्थं क्रीडन् क्रीडितुम् अतीतः क्रीडामतीत इति क्रीडापि तस्य नास्तीति नन्दं बोधयितुमभीप्सितोऽर्थः वस्तु-तस्तु गुणान् अतीतः सन् अत्र मायिकलोकमध्ये कृष्णरामाद्यवतारेण स्वभक्तैः सह क्रीडितुमित्यर्थः । अतो गुणान् अतीतोऽपि गुणैर्जगत् सृजति यत एव प्राक्कल्पगतजीवाः स्वस्वशुभाशुभकर्मसाधनफलसिद्ध्यर्थं बुद्धीन्द्रियादीनि प्राप्य सुखिनो दुःखिनश्च भवन्तीति तत्र तस्य को दोषः न हि तस्य ते प्रिया अप्रियाश्चेति भावः ।। ४० ।।

गूढार्थदीपिनी

अस्य प्रियादयो न सन्ति । तत्र हेतुद्वयम् । निरभिमानिनः समदृष्टेश्च रागादिरहितत्वात् ।। ३ ।। देहः प्राकृतो नास्ति ।। ३८ ।। सदिति सात्त्विकराजसतासतामसयोनिषु । कल्पते आविर्भवति ।। ३९ ।। क्रीडामतीतोऽपि गुणैः कृत्वा क्रीडान् विश्वं सृजति ।। ४० ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यद्यपि सर्वसमस्तथापि भवद्विधानां साधूनां विशेषतोऽनुग्रहायावतीर्णस्तस्मात् युवयोरन्तिके आगमिष्यत्येवेत्याशयेनाह नह्यस्येति त्रिभिः । अस्य श्रीकृष्णस्य अतिप्रियादयो न सन्ति तत्र हेतुगर्भं विशेषणम् अमानिन इति समानस्येति च ॥ ३७ ॥ किंच तस्य श्रीकृष्णस्य कर्म्मसाध्याः मात्रादयो न सन्ति यतः अस्य तन्निमित्तं लौकिकं कर्म नास्ति "जन्मकर्म च मे दिव्य"मिति-श्रीवचनात् लोके प्राकृतलोके सदसन्मिश्रयोनिषु देवतिर्य्यङ्मनुष्ययोनिषु आविर्भाववस्थानेषु स्वाभाविकनिजविग्रहयुक्त एव सोऽपि कर्मसाध्यमात्रादिजन्मान्तपदार्थसम्बन्धवर्जितोऽपि क्रीडार्थः क्रीडाप्रयोजनः निजभक्तमनोरथसिद्धिप्रस्थानः साधूनां परित्राणाय च कल्पते अविर्भवतीत्यर्थः । देहारम्भसत्कर्म नास्ति तदभावे देवादियोनिषु मातृविकारमयो देहो नास्ति तदभावे अपूर्वदेहग्रहणरूपं जन्म नास्ति तदभावे मात्रादयो न सन्तीति फलितोऽर्थः ॥३८-३९॥ कर्माभावे देहतज्जन्मतद्भिमतद्भिमत्तकमात्राद्यभावा इत्युक्तमथ तादृशं कर्मासौ भगवान् कुतो नरा करोतीत्यत्र प्राकृतगुणवश्यो जीवस्तादृशं कर्म करोति तद्देहवद्सिध्यर्थं स्वतः पूर्णकामो भगवांस्तु प्राकृतैर्नियम्यैर्गुणैः सृत्यादि करोति नत्वात्मनो देहादिसिध्यर्थं कर्म करोति प्राकृतगुणरहितत्वादित्याह । सत्त्वमिति । निर्गुणोऽपि प्राकृतगुणरहितोऽपि सत्त्वं रजस्तम इति गुणान् सृष्ट्याद्युपकरणतया गृह्णाति तैर्गुणैः विश्वं सृजत्यवति हन्ति स्वयमतीतोऽपि सृष्ट्याद्यविषयभूतोऽपि यतोऽजो नित्यविग्रहयुक्तः स्वरूपतस्तु जीवस्याप्यजत्वात् किं कुर्वन् क्रीडन् केवलं जीवहितायैव विहरन् स्वतः अवाप्तसमस्तकामत्वादित्यर्थः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे महाभागौ मा खिद्येतामन्तिकेऽल्पकाल एव द्रक्ष्यथः । ज्ञानिनां नायं पन्था इत्याह ॥ अन्तर्हृदीति । एधसि काष्ठे ज्योतिरतिर्यथा तत्र मथनेनाभिव्यक्तस्तथाऽत्र विचारेऽभिव्यज्यत इति तद्ध्यानं कुरुतमिति तात्पर्यम् ॥ ३७ ॥ स च वर्तमानः प्राक प्रियत्वादवेति सत्यमिदानीं तत्रत्याः प्रीतिपात्रमिति तद्धृदये वसेदिति न योग्यतामतिहाय प्रियादयस्तस्येत्याह ॥ न हीति । अस्यातिप्रियः कश्चिन्नास्त्यप्रियो वा न । तत्र तन्त्रममानिनोऽभिमानहीनस्येति । उत्तमो नाधमोऽपि न समो नासमोऽपि नह्यस्य स्वेच्छावद्धप्रपञ्चस्य मध्य इति वा ॥ ३८ ॥ यशोदानन्दयोः कथान्तरकथनापदेशेनोभयोर्युवयोर्न मातृत्वपितृत्वे वस्तुकृते इत्युपदिशति । नेति । सुता धाता वर्तते न सुतादय इति कथं कथयसीत्यतोऽप्याह । यतः सुतादयो न विद्यते दया यस्य सोऽदयः सुते ब्रह्मण्यप्यदय इति सुतादयो नेत्युक्तिः । ब्रह्मचर्मशिरःपट्टीत्यादेः । नञ् योग्यतया सम्भवदन्वयः । उपपादितश्चायं प्रकारः प्राक् । न देहो जन्म कर्म वा न । तर्हि कोऽयमित्यतोऽन्तरङ्गतो जल्पति ॥ न देह इति । नदे क्षीरवारिधावीहा चेष्टा यस्य स इति ॥ ३९ ॥ मत्तो जन्म साक्षात्सिद्धं कथमपलपसि उद्धवेत्यत आह । लोक इति । सदसन्मिश्रयोनिषु सुरतिर्यङ्नरादिषु जन्मदेहग्रहः कर्माणीति तदनुरूपाणि क्रीडार्थम् । लोकवत्तु लीलाकैवल्यमित्यादेः । न तेनास्यालब्धलाभ इति भावः । सोऽपीति जन्मपदार्थदेहपरामर्शः । साधूनां परित्राणाय रक्षायै कल्पते समर्थो भवति हेतुतयोपतिष्ठत इति यावत् । बृहद्भाष्यऋग्भाष्यटीकागीतातात्पर्यादिकमुदाहृत्य प्राग्विवृतस्य विलोकनार्थपरामर्शसङ्गततावगता स्यादिति नापूर्वता ॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं प्रादुर्भावे सुलभतामुक्त्वा तथापि दुर्लभ इति वक्तुं लौकिकप्रयोजकान् सर्वानेव सम्बन्धान् वारयति । न मातेति । अनेनासूयापि निवार्यते न हि भगवान् कस्यचिदुपालम्भ्यो भवतीति तस्य सर्वान्तर्यामिणः कृष्णस्य यशोदाद्या मातृत्वेन प्रसिद्धा अपि ता न मातरः तथा नन्दादयोऽपि न पितरः न च सीताप्रभृतयो भार्याः न वा कुशादयः सुताः आदिशब्देन न भ्रातरः गदादयोऽपि आत्मीयः स्वसत्तात्मकः परः शत्रुः परकीयोऽपि पर एवेति न सम्बन्धी निरूपितः चकारान्नोदासीनः अयमर्थो निर्द्धारित इत्येवकारः नापि देहः यदर्थमेते अपेक्ष्यन्ते तस्य कारणं जन्मापि नास्ति एवकारः पूर्ववत् वेत्यनादरेण अनेन यत्किञ्चिदत्र सम्भावितं तदपि निषिद्धम् ॥ ३८ ॥ ननु कर्मसु विद्यमानेषु जन्मानुच्छेदात् कर्मणां च प्रसिद्धत्वात्कथं जन्माद्यभाव इत्याशङ्क्याह । नचास्येति । नापि अस्यान्तर्यामिणो निर्लेपस्य अग्निवत्सर्वदाहकस्य सदसन्मिश्रयोनिषु उत्कृष्टापकृष्टमध्यभावेषु देवतिर्यङ्मनुष्यरूपेषु अस्य कर्मापिवेत्यनादरे जातेऽपि तेन किञ्चित्कर्त्तव्यमिति तर्हि किमर्थमेतावत्करोतीत्याशङ्क्याह । क्रीडार्थ इति । अयं सर्वोऽपि भगवद्भावः क्रीडार्थः सोऽपि क्रीडाभावः साधूनां परित्राणाय तदपि नोद्देश्यः किन्तु कल्पते स्वयमेव समर्थो भवति तथा सूर्ये समागते स्वयमेवान्धकारो नश्यति । ननु तदर्थं प्रयत्नोऽपि कर्त्तव्यः यथा महाराजनि क्रीडार्थमप्यागते चौरभयनिवृत्तिः एतदप्यङ्गीकृत्योच्यते मतान्तरे तु तदपि नास्तीति वदन् पूर्वोक्तमेवोपपत्तिमाह । सत्त्वं रजस्तम इति । स्वयं निर्गुण एव मूलभूतानेतान् क्रीडन् भजते तेषां विशेषप्रयोजनमाह तैः सृजत्यवति हन्तींति ॥ ४० ॥

श्रीसुबोधिनी-सारः

अस्य कृष्णस्य कश्चित् न प्रियो नाऽप्रियो न अमानिनो निरभिमानस्योत्तमो नाऽधमोऽपि वा समानस्यासमोऽपि वा न॥ ३७ ॥ दयोऽपि न सन्तीत्याह । नेति स्पष्टम् ॥ ३८ ॥ अस्य लोके कर्म वा न साधूनां परित्राणार्थं क्रीडार्थं च सदसन्मिश्र

योनिषु सात्त्विकराजसतामसजन्मसु स हरिः कल्पते उद्भवति ॥ ३९ ॥ निर्गुणः सत्त्वं रजस्तम इति गुणान् भजते गृह्णाति अतीतस्त्रिगुणातीतोऽपि अजो गुणैः क्रीडन् सन्नत्र लोके सृजति अवति हन्ति ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'प्रियतरान् पित्रादीन् विहाय कथमत्रागमिष्यति' इत्याशङ्क्याह—नहीति । अस्य कृष्णस्य प्रियादयो नैव सन्ति। तत्र हेतुमाह—समानस्येति । सर्वत्र समदृष्टेरित्यर्थः । तत्रापि हेतुमाह—अमानिन इति । प्राकृतदेहादौ अहंममानिमानशून्यस्य इत्यर्थः ॥ ३७ ॥ तत्रापि हेतुमाह—प्राकृतदेहोऽपि नैवास्ति इति । तत्रापि हेतुमाह—जन्मापि नास्त्येवेति । एवकारस्य सर्वत्र नञा सह सम्बन्धः । परः शत्रुः ॥ ३८ ॥ जन्मभावे जन्मकारणकर्माभावं हेतुमाह—न चेति । लोके प्राणिसमूहे जन्मादिहेतुः पुण्यपापात्मकं यत् कर्म तदस्य नास्ति । 'तर्हि कथं तस्य लोकेऽवतारः ?' तत्राह–स कर्माद्यनधीनोऽपि क्रीडार्थः क्रीडार्थप्रयोजनः सन् साधूनां परित्राणाय च सदसन्मिश्रयोनिषु देवतिर्यङ्मनुष्येषु कल्पते स्वेच्छया आविर्भवतीत्यर्थः ॥ ३९ ॥ एवं सूचितमेव जीववैलक्षण्यं स्पष्टयति–सत्त्वमिति । निर्गुणः सत्त्वादिप्राकृतगुणपारवश्यरहितोऽपि क्रीडन् सत्त्वादिभिस्त्रिभिर्गुणैर्विश्वं सृजति उत्पादयति, अवति रक्षति, हरति संहरति च ॥ ४० ॥

अन्वितार्थप्रकाशिका

न हीति ॥ अमानिनः देहादावहंममाभिमानशून्यस्य समानस्य समदृष्टेरस्य कृष्णस्य कश्चित् प्रियो नास्ति अप्रियो वा कश्चिन्नास्ति एवं कश्चित् उत्तमो नास्ति नाप्यधमः नाप्यसमः ॥ ३७ ॥ नेति ॥ तस्य माता नैवास्ति नैव च पिता नापि भार्या नापि सुतादयः नाप्यात्मीयः न चापि परः न देहः नापि तस्य जन्म ॥ ३८ ॥ न चेति ॥ लोके प्राणिसमूहे जन्मादिहेतुः पुण्यपापात्मकं यत्कर्म तदपि नास्ति । स कर्माद्यनधीनोऽपि क्रीडार्थः क्रीडाप्रयोजनः सन् साधूनां परित्राणाय च सदसन्मिश्रयोनिषु सात्त्विकराजसतामसेषु देवादिमत्स्यादिनृसिंहादियोनिषु वा कल्पते स्वेच्छया आविर्भवति ॥ ३९ ॥ सत्त्वमिति ॥ निर्गुणः सत्त्वादिप्राकृतगुणपारवश्यरहितोऽपि भगवान् सत्त्वादिगुणान् भजते स्वक्रीडोपकरणतया स्वीकरोति । संसारातीतः अजः कर्माधीनजन्मरहितोऽपि क्रीडन् सत्त्वादिभिस्त्रिभिर्गुणैर्विश्वं सृजति अवति हन्ति च ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु प्रियसंबंधि समागमं त्यक्त्वेहागमने तस्य किं प्रयोजनमिति चेत्तत्राह न हीति । अमानिनः प्राकृताहं ममत्वरूपमानहीनस्य अस्य श्रीकृष्णस्य प्रियादयो न भवंति अतएव सर्वाभक्तक्षेत्रज्ञेषु समानस्य कुतः तेषु प्रयोजनाभवात् असमो विषमः ॥ ३७ ॥ देहाऽपि न अनादिस्वतः सिद्धदिव्यमूर्त्तिमत्त्वात् जन्यापि न इतरजीववत्प्राकृतजन्मरहितत्वात् ॥ ३८ ॥ लोके ब्रह्माण्डे स्थितेषु सती कमनीया असती अकमनीया च मिश्रकामनीयत्वमिश्रा च यो न यो देहा येषां तेषु देवमनुष्य पश्वादिषु अस्य श्रीकृष्णस्य कर्त्तव्यं कर्म न विद्यते तथापि क्रीडार्थः क्रीडाजनकल्याणकरणरूपं रमणमेव अर्थः प्रयोजनं यस्य सोऽपि स्वतंत्रोपि साधूनां स्वदर्शनं विनास्थातुमसक्यानां सज्जनानां परित्राणाय स्वदर्शनदानेन रक्षणाय कल्पते देवमनुष्यादिरूपो भवतीत्यर्थः यद्वा लोके अस्य कर्त्तव्यं कर्म नास्ति एवं निःस्पृहतया स्वतन्त्रोऽपि सदसन्मिश्रयोनिषु देवमनुष्यपश्वादिषु कल्पते आविर्भवतीत्यर्थः शेषं पूर्ववत् सदसन्मिश्रेत्यत्र पुंवद्भाव आर्षः ॥ ३९ ॥ पुनस्तस्यैवान्यां लीलां वर्णयन्नाह सत्वमिति निर्गुणः प्राकृतगुणरहितोऽपि प्रद्युम्नादि त्रिरूपैर्विष्णवादि त्रिरूपश्च सत्वं रजस्तम इति त्रीन् गुणान् भजते अतीतः अस्माल्लोकाद्दूरतरे ब्रह्मपुरे स्थितोपि आजोऽपि प्रद्युम्नविष्णवादि षड्रूपैः क्रीडन् सन् गुणैः सत्वादित्रिभिः सृजत्यवति हन्ति ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अहो आस्तामेवं परं तु तस्येहागमनं त्वस्मत्तोऽप्यतिप्रियान् वसुदेवपित्रादीन् विहाय असंभावितमित्यत्राह । न हीति। हे नन्द, अमानिनः समानस्य च, ममताभिमानरहितस्य चेत्यर्थः । अस्य कृष्णस्य, कश्चित् अतिप्रियः, न अस्ति हि । अप्रियो वा कश्चिदप्रियोऽपीत्यर्थः । न कश्चित् , उत्तमः, न कश्चित् , अधमो वापि अधमश्चापीत्यर्थः । न । वाथवा, कश्चित् समोऽपि, अस्ति ॥ ३७ ॥ एवं सत्यप्यस्य मात्रादयः कथं दृश्यन्ते तत्राह । न मातेति । तस्य कृष्णस्य, माता न, पिता न, भार्या न, सुतादयश्च न सन्त्येव । तथा आत्मीयः न, परश्चापि न, तत्र हेतुः । देहोऽस्मदादिशरीरसमानो देहः न, वा अथ च कर्मापि, न एव। अस्मदादिशरीरस्य पुण्यपापात्मककर्मारब्धत्वं यथास्ति तद्वत् कर्माभावात्तदुद्भूतोऽस्य देहो नास्त्येव, यः दृश्यते सोऽस्याकर्मारब्ध एवेति भावः ॥ ३८ ॥ ननु तस्यापि कर्माधीनस्येव नानावतारधारणदर्शनादुत्पत्तिर्भूयो दृश्यत एवेत्यत्राह । न चास्येति। लोके, अस्य जन्म न, सोऽपि एवं जन्मकर्मादिरहितोऽपि, भगवान् , क्रीडार्थं साधूनां परित्राणाय सत्परित्राणरूपपरमप्रयोजनाय च, सदसन्मिश्रयोनिषु उत्तमाधममध्यमयोनिषु, देवतिर्यङ्मनुष्ययोनिष्वित्यर्थः । कल्पते आविर्भवति । नैतदुत्पत्तयो जीवानामिव कर्माधीना इति भावः ॥ ३९ ॥ एवं जीवविलक्षणजन्मकर्माद्युक्त्या भगवतो जीववैलक्षण्यं सूचितं तदेव विशदयति । सत्त्वमिति।

गुणेभ्यो निष्क्रान्तो निर्गुणः, सत्त्वादिप्राकृतगुणपारवश्यरहित इत्यर्थः । जीवस्तु सत्त्वादिगुणवश्य इति भावः । भगवानेवंभूतः सन्नपीति शेषः । सत्त्वं, रजः, तमः, इत्येतान्, भजते । स्वलीलोपकरणतया नियम्यतया च तान् प्रतिगृह्णातीत्यर्थः । जीवस्तु भोग्यतया नियमनाशक्त्या चताननुवर्त्तते इति भावः । गुणैः स्वलीलोपकरणभूतैः, अत्र क्रीडन् सन्नपि, तान् अतीतः स्वरूपतः स्वभावतश्च सत्त्वादिगुणैरनभिभूत इत्यर्थः । जीवस्तु तैः स्वभावतोऽभिभूत इति भावः । क्रीडन्नित्यनेन गुणकार्यशब्दादिविषयाभोगः सूचितः । कासौ क्रीडेति तां दर्शयति । अजः स्वयं विश्वगतोत्पत्त्यादिरहितो भगवान्, विश्वमिति शेषः । सृजति, अवति रक्षति, हन्ति संहरति च । अनेन जगद्व्यापारस्तस्य क्रीडेति दर्शितं भवति । जीवस्तु सुखाद्यनुभवाय पुण्यपापात्मककर्माणि करोतीत्यपि सूचितम् ॥ ४० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

न ह्यस्यास्तीति : १०.४६.३७.

त एव सुहृदस्तस्य वयं नैवेति मा वद । सर्वत्रापि समः श्रीश इत्यस्ति श्रुतिगर्जनम् ॥ ८८ ॥

कृष्णप्रिया

श्रीकृष्ण तो सदा निर्मान है, अहंता ममता से पर है, सम दृष्टि है, न तो उनको कोई प्रिय है, न कोई अप्रिय है, न कोई उत्तम है न तो उनकी दृष्टि में अधम है न तो विषम है ॥ ३७ ॥ बाबा ! न उनके कोई माता पिता है, न पत्नी है न पुत्र पौत्रादि है, न कोई निज है न तो कोई पराया भी है न भी स्वयं उदासीन भी है ये सम्बन्ध देह से बनते हैं इसलिए देह भी नहीं है और का कारण जन्म भी नहीं है ॥ ३८ ॥ बाबा ! जन्म तो कर्मों से होते है ? श्रीकृष्ण तो परं ब्रह्म है जन्म कर्म से पर है । परन्तु कृपा सिन्धु है साधुजनों का सद् धर्म का वेदों का संरक्षण के लिए भूतल पर पधारते है । लीला विस्तार के लिए कभी कभी भगवान् श्रीकृष्ण ऊँच, नीच और मिश्रयोनि में प्रकट होते ॥ ३९ ॥ भगवान् निर्गुण हैं, फिर भी सत्व रजस इन तीन गुणों को धारण करते है । भगवान् अक्रीडक होते हुए भी क्रीडा करते हुए सत्वादि गुणों से जगत की रचना करते है जगत का पालन करते है और संहार करते हैं ॥ ४० ॥

[1]यथा भ्रमरिकादृष्ट्या भ्राम्यतीव महीयते । चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ॥ ४१ ॥
युवयोरेव नैवायमात्मजो भगवान् हरिः । सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥ ४२ ॥
दृष्टं श्रुतं भूतभवद् भविष्यत् [2]स्थास्नुश्चरिष्णुर्महदल्पकं च ।
विनाच्युताद् [3]वस्तु [4]तरां न वाच्यं स एव सर्वं [5]परमार्थभूतः[6] ॥ ४३ ॥
[7]एवं निशा सा ब्रुवतोर्व्यतीता नन्दस्य कृष्णानुचरस्य राजन् ।
गोप्यः समुत्थाय निरूप्य दीपान् वास्तून् समभ्यर्च्य दधीन्यमन्थन् ॥ ४४ ॥

कर्दमक्षमा

अन्वयः —यथा, भ्रमरिकादृष्ट्या, मही, भ्राम्यति, इव, ईयते, तथा, चित्ते, कर्तरि, सति, तत्र, अहम्, धिया, आत्मा, कर्त्ता, इव, स्मृतः ॥ ४१ ॥ अयम्, भगवान्, हरिः, युवयोः, एव, न, आत्मजः, किन्तु, सः, ईश्वरः, सर्वेषाम्, आत्मजः, पिता, माता, हि, आत्मा, अस्ति ॥ ४२ ॥ यद्, दृष्टम्, श्रुतम्, भूत, भवद्, भविष्यत्, स्थास्नुः, चरिष्णुः, महत्, च, अल्पकम्, अच्युतात्, विना, वस्तुतराम्, न, वाच्यम्, परमार्थभूतः, स, एव, सर्वम् ॥ ४३ ॥ श्रीशुक उवाच—राजन् ! इत्थम्, कृष्णानुचरस्य, च, नन्दस्य, एवम्, ब्रुवतोः, सा, निशा, व्यतीता, गोप्यः, समुत्थाय, दीपान्, निरूप्य, वास्तून्, समभ्यर्च्य, दधीनि, अमन्थन् ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत्राविद्योपाधेर्जीवस्य कर्तृत्वं दृष्टान्तीकुर्वंस्तस्याविद्ययैव कर्तृत्वमिति सदृष्टान्तमाह । यथेति । भ्रमरिका परिभ्रमणं तयोपलक्षितया दृष्ट्या मही भूरपि भ्राम्यतीति यथा प्रतीयते एवं चित्ते कर्तरि सति तत्र चित्ते विक्षिप्तेऽहंधिया आत्माध्यासेनात्मा कर्ता स्मृतो यथा तद्वदिति ॥ ४१ ॥ किं च युवयोरेव नायमात्मजः किं तु सर्वेषामपि तत्रापि नात्मज एव किन्तु शत्रुमित्रादिरूपोऽपीति सर्वात्मत्वनिरूपणेन तयोर्मोहनिवृत्तये सम्बन्धमनैकांतिकीकरोति । युवयोरेवेति द्वाभ्याम् ॥ ४२ ॥ अच्युताद्विना तरां नितरां तत्त्वतो वाच्यं निर्वचनार्हं वस्तु नास्तीति ॥ ४३ ॥ दीपान्निरूप्य प्रज्वाल्य । वास्तून्देहल्यादीन् ॥ ४४ ॥

---

[1] "यथा" श्लोको विजये नास्ति । [2] स्थास्नु चरिष्णु म–विज. । [3] वस्त्वितरन्न–वीर. । [4] तया–विज. । [5] परमात्म–प्रा. पा. । [6] रूपः–विज. । [7] शुक उवाच—मूले ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्र प्रकृते । तस्य जीवस्य । तया भ्रमरिकया । तत्र कर्तृत्वाभिनिवेशवति । आत्मा जीवः । तद्वदीशेऽपि स्रष्टृत्वादिकं मायाकृतमेव न स्वाभाविकमसंगत्वात्तस्येत्याशयः जगत्स्रष्टृत्वमपि वरमेश्वरे तत्र वस्तुतो नास्ति तस्यापि गुणकृतत्वादित्याह—यथेति । भ्रमरिका परिभ्रमणं वातादिधातुवैगुण्यात्तद्युक्तया दृष्ट्या जनेन मही कुम्भकारचक्रवद्भ्राम्यतीव ईयते प्रतीयते । यथा च जीवेन चित्तेऽपि कर्तरि सति तत्रैवाहंधिया चित्तमेवाहमिति बुद्ध्या आत्मा कर्ता स्मृतः स्मर्यते, तथैव गुणकृतैव जगत्सृष्टिरीश्वरे प्रतीयत इति शेषः । एवञ्च स्वरूपेणैव तस्य जगत्स्रष्टृत्वं नास्ति, किन्त्वस्वरूपभूताया अपि मायायास्तच्छक्तित्वेन तद्भेदाज्जगत्स्रष्टृत्वमस्यापीति ज्ञेयम् ।। ४१ ।। पुत्राभिनिवेशं नैजत्वेनाविष्टमालक्ष्य तन्निवृत्तये सर्वरूपतां निरूपयितुमाह—किञ्चेति । अयं कृष्णः । तत्रापि सर्वात्मजत्वेऽपि न केवलमात्मज एवेति । आदिना सुहृदादयो ग्राह्याः । अनैकान्तकीकरोति व्यभिचारयति । अतः प्रेमविशेषवशत्वेनैव युवयोः पुत्रोऽसौ ततः कथंचिदन्यत्र गतोऽप्यागमिष्यत्येव, यदि च प्रातीतिकेन जन्यजनकभावेन तस्मिन्पुत्रत्वं मन्यसे तदा सर्वात्मकत्वेन न केवलं युवयोरेव अपि तु सर्वेषां, न केवलं पुत्र एवापि तु पित्रादिरपि । तत्रतत्र च साक्षात्तदालम्बनकप्रेमविशेषाभावान्न कदाचिदनुगच्छेदिति बोधयति—युवयोरेवेति द्वाभ्याम् । अयं मद्विधस्येश्वरः । भगवान्सर्वैश्वर्ययुक्तः । हरिर्दुःखहर्ता । यद्वा–तस्मात्प्रेमविशेषद्भावमात्रस्य तस्मिन्पुत्रत्वापादकत्वाद्युवयोरेवायमात्मजः, नैव न तु सर्वेषामात्मजः, हि यस्मात्सर्वेषामात्मा परमात्मा, पिता जनयिता, स्थाता धाता, ईश्वरः कर्मदाता चेति ।। ४२ ।। तरामिह निलोप आर्षः । अत एव स्वामिचरणैर्व्याख्यातं—नितरामिति । परमार्थरूपो नित्याप्रतिहतरूपः । स एव श्रीकृष्ण एव । भो व्रजराज, वस्तुतस्तु युष्मदादिकं सर्वमिदं जगदिच्छाशक्तिसृष्टत्वात्तदात्मकमेव जानीहि ब्रूहि च तदनुरूपमित्याह–दृष्टमिति । अच्युताद्विना वस्तु नेतरां नैव वाच्यम् । प्रकृतिप्रत्ययपौर्वापर्यभाव आर्षः ।। ४३ ।। एवमुक्तरीत्या । कृष्णानुचरस्योद्धवस्य । समभ्यर्च्य वासुदेवताः मार्जनालेपनाक्षतादिभिः । एवं पूर्वोक्तप्रकारेण । तत्र श्रीनन्दस्य तत्प्रकारो यथाकथञ्चित्स्वपुत्रागमनमात्रतात्पर्यकः, श्रीमदुद्धवस्य तत्प्रकारस्तु सान्त्वनमात्रतात्पर्यकः "वीक्ष्यानुरागं परमं नन्दमाहोद्धवो मुदा" इत्याद्युक्तेः । यथायमनयोर्भावः सर्वेषां श्लाघनीयः, एतादृशभावमूलकं चेदं विरहदुःखम्, तच्च सम्प्रति परमदुःसहं जातम्, श्रीकृष्णागमनञ्च न सम्प्रति घटते तस्माद्भावश्लाघासहितेनैव तत्त्वोपदेशेन भावमेवैतं यत्किञ्चिद्विश्लथ्यमानं विधाय तद्दुःखञ्च तादृशं विधेयमिति सान्त्वनमात्रतात्पर्यकः । ब्रुवतोस्सतोरिति शतृप्रत्ययेन तु द्वयोरपि पुनःपुनस्तादृगुक्तिं बोधयति । सा तयोः सल्लाँपसम्बन्धिनी दीर्घापि निशैव विशेषेण निरवशेषाऽतीता, न च श्रीगोपेन्द्रस्य शोको नाप्युद्धवस्य तदर्थवाक्प्रयोगो विररामेत्यर्थः । कृष्णानुचरस्येति–तदादेशानुसारेणाशेषवाक्चातुर्यवतोऽपीत्यर्थः । ततश्च प्रातःकृत्यार्थं त्वरया श्रीमदुद्धवो बहिर्निर्गत इति ज्ञेयम् । तदागमनज्ञानेन च गोप्यः प्रातर्गृहकृत्यं कर्तुं प्रवृत्ता इत्याह–गोप्य इति । गोप्योऽत्र विस्रंभप्रधानान्तःपातिन्यः साधारण्यो वा । दधिमन्थनमिदं प्रायः कृष्णाय नवनीतप्रेषणापेया ।। ४४ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तर्हि कथं तत्तद्गुणाविष्टः प्रतीयते तत्राह । यथेति । यथा जीवैर्भ्रमरिकादृष्ट्या कुम्भकारचक्रवन्निजदेहपरिभ्रमणसंस्कारवत्या दृष्ट्या मही भ्राम्यतीव प्रतीयते । यथा जीवैश्चित्तेऽपि कर्त्तरि सति तत्र चित्तेऽहं धिया चित्तमेवाहमिति बुद्ध्या शुद्धस्वरूप आत्मा स्वं कर्त्तेव स्मृतः स्मर्यते प्रतीयत इत्यर्थः । तथेश्वरोऽपि सृष्ट्याद्याविष्टः प्रतीयत शेषः । ४१ ।। अतः प्रेमविशेषवशत्वेनैव युवयोः पुत्रोऽसौ ततः कथञ्चिदन्यत्र गतोऽप्यागमिष्यत्येव । यदि च प्रातीतिकेन जन्यजनकभावेन तस्मिन् पुत्रत्वं मन्यसे तदा सर्वात्मकत्वेन न केवलं युवयोरेव अपि तु सर्वेषां नच केवलं पुत्र एव अपि तु पित्रादिरपि तत्र तत्र च साक्षात्तदालम्बनकप्रेमविशेषाभावान्न कदाचिदनुगच्छेदिति बोधयन्नाह । युवयोरेवेति द्वाभ्याम् । अयं मद्विधस्येश्वरः भगवानखिलैश्वर्ययुक्तः हरिः सर्वदुःखहर्त्ता । यद्वा । तस्मात् प्रेमविशेषसद्भावमात्रस्य तस्मिन् पुत्रत्वापादकत्वात् युवयोरेवायमात्मजः नैव नतु सर्वेषामात्मजः । हि यस्मात् सर्वेषामात्मा परमात्मा पिता जनयिता माता धारयिता ईश्वरः कर्मफलदाता चेति ।। ४२ ।। तत्र हेतुत्वेन सर्वात्मकत्वमेव दर्शयति । दृष्टमिति । अविनाभावत्वे हेतुः परमात्मभूतः सर्वेषां मूलस्वरूपः परमार्थभूतः इति पाठेऽपि स एवार्थः । अर्थो वस्तु ।। ४३ ।। एवं पूर्वोक्तप्रकारेण तत्र श्रीनन्दस्य तत्प्रकारो यथा कञ्चित् स्वपुत्रागमनमात्रतात्पर्यकः श्रीमदुद्धवस्य तत्प्रकारस्तु सान्त्वनमात्रतात्पर्यकः । वीक्ष्यानुरागं परमं नन्दमाहोद्धवो मुदा इत्याद्युक्तेः । यथा अयमनयोर्भावः सर्वेषामेव श्लाघनीयः । एतादृशभावमूलकं चेदं विरहदुःखं तच्च सम्प्रति परमदुःसहं जातं श्रीकृष्णागमनञ्च न सम्प्रति घटते । तस्माद्भावश्लाघासहितेनैव तत्त्वोपदेशेन भावमेवैतं यत्किञ्चिद्विश्लथायमानं विधाय तद्दुःखञ्च तादृशं विधेयमिति सान्त्वनमात्रतात्पर्यकः । ब्रुवतोः सतोरिति शतृप्रयोगेण तु द्वयोरपि पुनः पुनस्तादृगुक्तिं बोधयति सा तयो संलापसम्बन्धिनी दीर्घापि निशैव विशेषेण निःशेषेणातीता न च श्रीगोपेन्द्रस्य शोको नाप्युद्धवस्य तदर्थवाक् प्रयोगो विररामेत्यर्थः । कृष्णानुचरस्येति तदादेशानुसारेणाशेषवाक् चातुर्यवतोऽपीत्यर्थः । ततश्च प्रातःकृत्यार्थं त्वरया श्रीमदुद्धवो बहिर्निर्गत इति ज्ञेयम् । तदागमनज्ञानेन च गोप्यः प्रातर्गृहकृत्यं कर्त्तुं प्रवृत्ता इत्याह । गोप्य इति । गोप्योऽत्र विश्रम्भप्रधानान्तःपातिन्यः साधारण्ये वा । दधिमन्यनमिदं प्रायः कृष्णाय नवनीतप्रेषणापेक्षया ।। ४४ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तर्हि कथं साधारणजनैरसौ गुणत्रयभागिव प्रतीयते? तत्राह—यथेति। आत्मौपम्येनैव तेषां तथा प्रतीतिरिति भावः ॥४१॥ निर्द्धारितेऽप्यर्थे प्रेमोद्रेक-स्वभावेन नातिविश्वासमाजं तमवेक्ष्य प्रोक्तप्रायमेवार्थं पुनरप्याह—युवयोरिति। अयमीश्वरो मद्विधस्य भगवानखिलैश्वर्य्ययुक्तः, हरिः सर्व्वमनोहरः, युवयोरेवात्मजः, तस्य तदनुरूप-व्यवहारदर्शनात्; सर्व्वेषां रोहिणी-देवकी-वसुदेवादीनामात्मजो नैव तथा, नैवेत्यर्थः। किञ्च, न केवलं युवयोरात्मज एव, किन्तु आत्मा परमप्रियः, पिता च पालकः, माता च मातृवदतीव स्निग्धः, किंवा प्रेमसारसर्व्वस्वाभिज्ञः सर्व्वेषां तु तेषां तथा नैवेति भावः। तेनान्यदीयपुत्रत्वशंकया तस्यात्रागमने नाविश्वासः कार्य्य इत्यर्थः ॥ ४२ ॥ न च दूरवर्त्तित्वादस्यात्रागमने विलम्बलवोऽपि सम्भाव्य इत्याशयेनाह—दृष्टमिति। प्रत्यक्षं परोक्षञ्च वस्तु स्थास्नुश्चरिष्णुश्च यः शरीरी, अच्युतादिति कुत्रापि तस्य च्युतिराहित्याभिप्रायेण, यतः सोऽच्युत एव सर्व्वम्। कथं परमात्मभूतः?—सर्व्वजीवानामन्तर्य्यामितया तदेकमयत्वात्। 'परमार्थभूतः' इति पाठे—अर्थो वस्तु तेन तस्य सर्व्वात्मकत्वेन व्यापित्वादत्रैवाविर्भूयासौ शीघ्रमात्मानं दर्शयिष्यतीति भावः ॥ ४३ ॥ एवं पूर्व्वोक्तप्रकारं ब्रुवतोः सतोरिति द्वयोरपि पुनः पुनस्तादृगुक्तिं बोधयति, अतो (भा० १०।४६।१८)—'अपि स्मरति नः कृष्णः' इत्यादिकं मुहुर्वल्लवेन्द्रेणाप्युक्तमिति ज्ञेयम्। यद्वा, एवमीदृशमन्यदपि ब्रुवतोरित्यर्थः। अतः सा तयोः संलापसम्बन्धिनी दीर्घापीति वा, निशैव विशेषेण निःशेषमतीता, न च श्रीगोपेन्द्रस्य शोको नाप्युद्धवस्य तदर्थवाक्प्रयोगो विररामेत्यर्थः। कृष्णानुचरस्येति,—अशेषचातुर्य्यवतोऽपीत्यर्थः। ततश्च प्रातः कृत्यार्थं त्वरया श्रीमदुद्धवो बहिर्निर्गत इति ज्ञेयम्। राजन् हे सर्व्वसद्बुद्धिप्रकाशमानेति तत्त्वया बुध्यत एवेति भावः। तदागमनाज्ञानेन च गोप्यः प्रातर्गृहकृत्यं कर्तुं प्रवृत्ता इत्याह—गोप्य इति। जात्या दधिमथनादिकर्म्मयोग्यतोक्ता, श्लेषेणाशया प्रयत्नेन स्वदेहरक्षिका इत्यर्थः। सम्यगाचमनादिपूर्व्वकं कृष्ण-मनोहरलीलाध्यानावेशेनोत्थाय सम्यग् यथाविधि अभितः सर्व्वतोऽर्चयित्वा, एतच्च पूर्वाभ्यासेनैव विरहवैकल्येन प्रायस्तासां गृहकृत्यस्योपरमेऽपि तत्र प्रवृत्तिः श्रीकृष्णागमनस्य प्रगाढाज्ञया तत्प्रीत्यर्थं प्रयत्नविशेषेण, किंवा तत्कीर्त्तन-हेतुतया दधिमथनमात्रापेक्षया, किंवा कृष्णाय नवनीतप्रेषणापेक्षयेति ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

गुणैः सृष्ट्यादिव्यापारं कुर्वतोऽपि भगवतो जीवस्येव गुणकार्यभ्रमो नास्ति चेतनस्य व्यवस्थितस्यापि नास्तीत्याह। यथा भ्रमरिकादृष्ट्येति। अतिवेगभ्रमणक्रियानिष्ठदृष्ट्या मही भूमिर्भ्राम्यतीव ईयते प्रतीयते तत्र गुणवश्यतया जीवस्य चित्त कर्तरि भ्रमः कर्तरि करणे कर्तृत्वोपचारः भ्रमहेतुर्भूमिर्भ्राम्यतीव ईयते प्रतीवते तत्र गुणवति जीवस्य मनस्यनवस्थितोऽपि आत्मा परमात्मा अकर्त्तेव भवति अहंधिया बुद्धिर्बुद्धिमतामस्मीत्यादि प्रकारेण तच्छरीरकोऽहमिति मन्यमानः स्थितोऽप्यकर्तेव भवतीत्यर्थः ॥ ४१ ॥ सर्वेषामिति। मातापित्रादिशरीरकः परमात्मेत्यर्थः ॥ ४२-४५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एतदेव दृष्टान्तमुखेनोपपादयति। यथेति। भ्रमरिकाऽतिवेगभ्रमणक्रिया तयोपलक्षितया दृष्ट्या यथा भूरपि भ्राम्यतीव बभ्रम्यमाणेवेयते प्रतीयते तथात्मा कर्ता च सन्नेय जीवस्तत्रात्मन्यकर्तरि च चित्तशब्दोपलक्षिते देहे अहंधिया स्वाभेदाभिमानेन स्मृतः मतः स्वगतकर्तृत्वात्मज्ञातृत्वादीन् विस्मृत्य देहमेव तथाविधं मन्यत इत्यर्थः। यद्वैवं जीवविलक्षणो भगवान् कृष्णः तद्याथात्म्यविद्भिः स्व तुल्यतया दृश्यते इति सदृष्टान्तमाह। यथेति। स्वयं भ्रमरिकारहितापि भूर्यथा भ्रमरिकादृष्ट्या भ्राम्यतीव प्रतीयते तथायं श्रीकृष्णोऽप्यहंधिया स्वतुल्यबुद्ध्या कर्ता पुण्यपापात्मककर्मकर्ता य आत्मा जीवः स इव चित्ते कर्तरि स्मृतः करणभूते चित्तेऽनुसन्धीयतेत्यर्थः। यद्वा कर्तरीत्येव च्छेदः कर्तरि जीवे यच्चित्तं तस्मिन्नहंधिया तामेव प्रपञ्चयति तत्र चित्ते आत्मा कर्तेव पुण्यपापादिकर्ता तदायत्तदेहादिभाग्जीव इव स्मृतः मत इत्यर्थः ॥ ४१ ॥ एवं जीववैलक्षण्यमुपपाद्य तयोः स्मिन् केवलं पुत्रत्वाभिमानं वारयन् तदनवगतसम्बन्धान्तराण्युपदिशन् च सर्वजीवसाधारणानीत्याह। युवयोरिति अयं ज्ञानादिकल्याणगुणगणाकरो निरस्तनिखिलदोषः आश्रितबन्धनहरः श्रीकृष्णः युवयोरेवात्मज एव न भवति किं तु सर्वेषामप्यात्मजः कुतः हि यस्मादात्मा सर्वान्तरात्मा तत्तदात्मजाद्यन्तरात्मतया तच्छरीरकत्वेन तत्तद्रूपत्वादिति भावः। न केवलमात्मज एव तु पिता सर्वकारणत्वादिति भावः। माता च हितैककारित्वमिति भावः। यद्वा सर्वात्मकत्वान्मात्रादिरूपोऽपि स एवेति भाव। ईश्वरः स्वामी च अनेन "माता भ्राता पिता निवासः शरणं सुहृद्गतिश्च नारायण" इति श्रुत्यर्थोऽभिसंहितः ॥ ४२ ॥ सर्वेषामात्मेत्यनेनोक्तं सर्वात्मकत्वम् प्रपञ्चयति। दृष्टमिति। दृष्टाद्यन्यतमं यत्किञ्चिद्वस्तु तदच्युतं विनानास्ति सर्वमच्युतायत्तसत्तादिमत्त्वेन तच्छरीकत्वेन च तदात्मकत्यर्थः। कुतः यतः परमार्थभूतः लोकत्रयमप्यन्तः प्रविश्य प्रशासन तस्य भर्ता व्याप्यगतदोषास्पृष्टश्चातः सर्वं जगत्स एव विशेषणबुद्धिशब्दयोराकृत्यधिकरणन्यायेन विशेष्यपर्यन्तत्वस्वाभाव्याद्विशेणीय विशिष्टवस्त्वन्तर्भूतत्वेन विशिष्टात्पृथगवस्तुत्वाच्च जगद्रूपेण स एवानुसन्धेय इत्यर्थः ॥ ४३ ॥ एवमिति। हे राजन्! इत्थं कृष्णानुचरस्योद्धवस्य नन्दस्य च ब्रुवतोः सतोः सा निशा व्यतिक्रान्ता बभूव तदा निशायाः पश्चिमे यामे गोप्यः समुत्थाय दीपान्निरूरूप्य प्रज्वाल्य वास्तूदीन् देहल्यान् समभ्यर्च्य गन्धादिभिरिति शेषः दधीन्यमन्थन्ममन्थुरित्यर्थः ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सम्यक्प्रणिहिते आत्मनि मनसि जायते प्रकाशत इत्यात्मज इत्यध्यात्मम् ॥ ४२ ॥ युवयोरेकं तत्त्वं सङ्क्षिप्य वदामीत्याह । दृष्टमिति । भविष्यन् भूतं भवद्वर्तमानं स्थास्नु स्थावरं चरिष्णु जङ्गमम् अच्युताद्विनाऽन्यत् ब्रह्मादिकं वस्तुतया स्वातन्त्र्येण नैवास्ति किं तु सर्वं स एव तदधीनमेव स कीदृशः परमार्थरूपः नित्याप्रतिहतस्वरूप इति बुध्यध्वमिति ॥ ४३ ॥ निरूप्य प्रज्वाल्य वास्तून् गृहद्वारिदेहल्यादिषु वास्तुदेवताः मार्जनालेपनाक्षतादिभिः सम्यगभ्यर्च्य अमन्थन् ममन्थुः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ईश्वरे साक्षात् कर्त्तृत्वादिकं तु जीवेनारोप्यत एवेति दृष्टान्तेन योजयति । यथेति ॥ ४१ ॥ तदेवं साधारणेषु तस्य साधारणं वैभवं वदन् तत्रैवार्थविशेषेण तयोः सम्बन्धविशेषं स्थापयति । युवयोरिति ॥ ४२ ॥ युवयोरेव सर्वात्मकत्वमिति दर्शयति । दृष्टमिति ॥ ४३ ॥ एवमिति । समाधानं तु न जातमिति भावः । गोप्यः साधारण्यः ॥ ४४-४६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

नन्वन्तर्यामी च कर्त्ता, तत् किमनयोर्भेद इत्युक्तमित्याशङ्क्याह—यथेति । आत्मा अन्तर्यामी कृष्णस्यांशः, चित्ते कर्त्तरि अहं कर्त्तेति स्मृतः । यथा भ्रमरिकेत्यादि तुल्यमेव ॥ ४१ ॥ प्रकृतमाह—युवयोरित्यादि । आत्मजः, आत्मना स्वयं जात इत्यात्मजः स्वप्रकाशः । तथाभूतोऽपि हरिरयमेव भगवान् युवयोरेवात्मज एव न ? अपि त्वात्मज एव । अयमेवेति कः ? सर्वेषामात्मा पिता माता ईश्वरः स प्रसिद्धः । अतो (५५ श्लो०) "मा खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमन्तिके" इति साधूक्तमेव ॥ ४२ ॥ सर्वात्मत्वं तस्य दर्शयन्नाह—दृष्टं श्रुतमित्यादि । तुल्यम् ॥ ४४-४९ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जगत्स्रष्टृत्वमपि तत्र परमेश्वरे वस्तुतो नास्ति तस्यापि गुणकृतत्वादित्याह । यथेति । भ्रमरिका परिभ्रमणं वातादिधातुवैगुण्यात्तद्युक्तया दृष्ट्या जनेन मही कुम्भकारचक्रवद्भ्राम्यतीव ईयते प्रतीयते यथा च जीवने चित्तेऽपि कर्त्तरि सति तत्रैवाह धिया चित्तमेवाहमिति बुद्ध्या आत्मा कर्ता स्मृतः स्मर्य्यते तथैव गुणकृतैव जगत्सृष्टिरीश्वरे प्रतीयत इति शेषः । एवञ्च स्वरूपेणैव तस्य जगत्स्रष्टृत्वं नास्ति किन्तु स्वरूपभूताया अपि मायायास्तच्छक्तित्वेन तदभेदाज्जगत्स्रष्टृत्वमस्यापीति ज्ञेयम् ॥ ४१ ॥ अतः सर्वजगत्स्रष्टरि तस्मिन् परमेश्वरे पुत्रादिभावना सुखदुःखदत्वादिभावना च कर्तुं नोचिता तदपि परमेश्वरोऽपि स कृष्णो ममैव पुत्र इति यदि मन्यसे तदा शृणु तत्त्वमित्याह । युवयोरेव न आत्मजः किन्तु ये ये तस्मिन्नात्मजभावं कुर्य्युस्तेषां सर्वेषामेवात्मजः आत्मा आत्मवत्प्रेष्ठः ये ये तस्मिन्नात्मैवायमिति भावं कुर्य्युस्तेषामात्मा एवं पित्रादिभाववतां स पित्रादिः ईश्वर इतीश्वरत्वात्तस्मिन् किमपि नायुक्तमिति भावः ॥ ४२ ॥ वस्तुतस्तु भो व्रजराज युष्मदादिक सर्वमिदं जगत् तच्छक्तिसृष्टत्वात्तदात्मकमेव जानीहि ब्रूहि च तदनुरूपमित्याह । दृष्टमिति । अच्युताद्विना वस्तु न तरां नैव वाच्यं प्रकृतिप्रत्यययोः पौर्वापर्य्याभाव आर्षः ॥ ४३ ॥ एवं तयोर्ब्रुवतोरेव सा निशा व्यतीता ननु नन्द यशोदयोः सान्त्वनं कर्तुमुद्धवः शशाक नाप्युद्धवस्य प्रबोधनं तौ जगृहतुरिति भावः । अत्र व्रजराजो मनस्येवं विचारयामास अयं कृष्णः परमेश्वर एवेति प्राबोधययुद्धवस्तुतन् किमहं न जानामि अस्य नामकरणसमय एव नारायणसमोऽयमिति गर्गमुखादश्रौषमेव नारायणस्य समस्तं विना कोऽन्यस्तस्मात्तथा पूतनाघबकादिमारणाद्गोवर्द्धनधारणदावानलोपशमनाद्वरुणलोकपालप्रणमनान्नारायणत्वमस्यान्वभूमैव नारायण एव परमात्मा स एव परंब्रह्मेत्येतदपि जानाम्येव तदप्ययमावयोरेव पुत्र इत्यत्राबाधितोऽस्मदनुभव एव प्रमाणं तस्मान्नन्दात्मजोऽयं ते इति श्रीगर्गमहामुनिवाक्यमपि परमेश्वरेऽपि तस्मिन्नाराध्यत्वबुद्धिमकृतवतोरपि स्वभुक्तशेषताम्बूलचर्चितादिकं समर्पितवतोरप्याक्योर्मनःप्रसादान्यथानुपपत्तिरपि कृष्णजन्मनः पूर्वमावयोरिष्टदेवो नारायणो ध्यातुं शक्य एवासीदधुना तु ध्यानमात्र एव स्फुरत्याविर्भवति चेत्यावयोर्मनः प्रसादे लिङ्गमतः आवयोः पुत्रे तस्मिंस्तत्तद्व्यवहृतिर्न दोषः तथा कृष्णस्यावां पितरावेवेत्यत्र कृष्णस्यैवानुभवः प्रमाणम् आवयोस्ताम्बूलचर्वितप्रदानाङ्कारोहणपरिष्वङ्गचुम्बनादिलक्षणलालनस्याप्राप्तौ सत्यां तस्य मुखम्लानेर्बहुशो दृष्टत्वात् यदि तस्येयं माता न स्यात् तदा माण्डस्फोटापराधे तं कथं बबन्ध बन्धने मुखम्लाने मया मुखप्रसादस्य च तदानीं दृष्टत्वात् आवयोः पितृत्वे सत्येव परमेश्वरोऽपि स विविधानुशासनभर्त्सनबन्धनादिकमङ्गीकुरुते स्म अन्यथा परब्रह्मणः सर्वव्यापकस्य परमेश्वरस्य कथं बन्धनमिति किन्तु सांप्रतं मथुरायां चाणूरकंसादिवधानन्तरं हे कृष्ण ! त्वं परमेश्वर एवेति सर्व एव ब्रुवते स्म तत्र देवकी त्वहन्ते मातेति वसुदेवः अहं ते पितेति केचिदन्ये वयं ते पितृव्या इति केचिच्च वयं भ्रातर इति आत्मीया इति बन्धव इत्युक्त्वा बहव एव यदा तं स्वस्वगेहं प्रति नेतुं निमन्त्रयन्तो मथुरायामेव रोद्धुं प्रावर्त्तन्त तदा मत्पुत्रो महाभव्यशिरोमणिः स महासङ्कटे तत्तन्मुखापेक्षया जाले पतितः स्वीयं व्रजमप्यागन्तुमपारयन् सर्वत्रैव दाक्षिण्यादेवमब्रवीदित्यहमनुमिमे अहं खलु परमेश्वर एव सर्वविश्वस्रष्टा मम का

माता कः खलु पिता क आत्मीयः को वा परः किन्तु यूयं सर्वशास्त्रं पश्यत यो मे भक्तिं करिष्यति तस्यैवाहं नान्यस्य तस्यैव गृहं यास्यामि स मम पित्रादिरिति अयं तूद्धवो बालक एव बुद्धिमानपि मत्पुत्रस्य तस्य महागम्भीरहृदयमवगादुसमर्थस्तद्वाच्यं तां श्रुत्वा कृष्णस्यायमेवाशय इति मत्वा तत आगत्यात्र मां तथैव बाधयति स्म किञ्च मत्पुत्रेण चातुर्य्यात् सम्यगेतदुक्तं यो मे भक्तिं करिस्यति स एव मे पित्रादिस्तस्यैव गृहे वसाम्यहमतोऽहमत्युद्धवद्वारा संदेशमिमं संप्रेषयिष्यामि हे कृष्ण ! त्वमहं मम भक्तिर्भवेत्तथा त्वामहं प्राप्नुयामिति ततश्च सर्वयादवसभासु मत्संदेशामिमं प्रथयित्वा भो भो यदुवंश्याः ! भवन्तोऽत्र मद्भक्तिं कर्तुं न शक्नुवन्ति नन्दस्तु करोस्यतः स एव पिता बन्धुः प्रियश्च तद्गृहमेव यामीत्युक्त्वा स शीघ्रमिहागच्छेदिति हन्त ब्रजराजस्तमपि परामर्श दैन्यसञ्चारिप्राबल्येन विसस्मरि अथ प्रकृतमनुसरामः ब्राह्मे मुहूर्ते समुत्थाय दीपान् निकृष्य प्रज्वाल्य वास्तून देहल्यादीन् ॥४४॥

गूढार्थदीपिनी

भ्रमरिका भ्रमणस्वभावा । मही ईयते प्रतीयते । तत्र चित्ते अहंधिया चित्तमेवाहम् इत्यध्यासेन आत्मा कर्तेव स्मर्यते प्रतीयते इत्यर्थः ॥ ४१ ॥ युवयोरेव न केवलम् अपि तु सर्वेषामित्यन्वयः ॥ ४२ ॥ भवत् वर्तमानम् । स्थास्नुः स्थावरः चरिष्णुः जङ्गमश्च । यत् किञ्चित् वस्तुमात्रं तत् तरां नितरां तत्त्वतो तद्भिन्नतया वाच्यं निर्वचनार्हं नास्ति किन्तु स एव सर्वमित्यन्वयः ।४३। निरूप्य प्रज्वाल्य । वास्तून् देहल्यादीन् गन्धपुष्पादिभिः ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्तम्भे नृहरिमूर्तिवत् भक्तमनोरथपूर्त्यर्थं प्रादुर्भूतेऽस्मिन् अजे पुरुषस्य जनकत्वबुद्धस्तु भ्रान्त्यैवेत्याह । यथेति । भ्रमरिका परिभ्रमणरूपा क्रिया तयोपलक्षितया दृष्ट्या मही सुस्थिरापि भ्राम्यतीव ईयते प्रतीयते तथा तत्र तस्मिन्कर्तरि विश्वसृष्ट्यादिकर्तरि सर्वजनके आत्मा जीवात्मा पुरुषः कर्तेव जनकधिया स्वबुद्ध्या चित्ते स्वकीये एव स्मृतः नतु शास्त्रे तज्जनकः कश्चिदुपलभ्यते इत्यर्थः । "अजायमानो बहुधा व्यजायत" इति श्रुतेः ॥ ४१ ॥ भक्तितस्तु युवयोरेव तत्राप्यात्मज एव नायं श्रीकृष्णः किन्तु यत्रयोरन्येषामपि सर्वेषाम् आत्मजः पिता माता च "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह"मिति श्रीमुखोक्तेश्च हि हेतौ यतो हेतोः सः श्रीकृष्णः ईशः नियन्ता हरिः क्लेशहरः आत्मा च सर्वं कृष्णात्मकमित्यर्थः ॥ ४२ ॥ सर्वस्य श्रीकृष्णात्मकत्वं श्रीकृष्णस्य सर्वात्मत्वं चाह । दृष्टमिति । अच्युताद्विना तरां नितरां दृष्टश्रुतादिकं वस्तु न वाच्यं न कथनीयम् अतदात्मकवस्त्वभावात् यतः सर्वं चिदचिदात्मकं वस्तु परमार्थभूतः कारणभूतः स एव "सर्वं खल्विदं ब्रह्म तज्जलानिती"ति स्वरूपतश्चिदचिद्ब्रह्मपदार्थानामभेदासम्भवात् चिदचितोर्ब्रह्मनिरपेक्षस्थितिप्रवृत्त्याद्यभावाद्ब्रह्मणि सर्वात्मनि श्रीकृष्णे अभेदं इत्यर्थः ॥ ४३ ॥ कृष्णानुचरस्योद्धवस्य निरूप्य प्रज्वाल्य वास्तून् देहल्यादीन् अमन्थन् ममन्थ ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सृजत्यवति हन्तीत्यानुगुण्येन रजस्सत्त्वं तम इति विनिमयो ज्ञेयस्तत्तत्कर्मानुगुणैः ॥ ४१ ॥ आत्मज आत्मनि जायते प्रादुर्भवतीत्यन्तर्बहिस्तु सर्वोद्धारकत्वात् ॥ ४३ ॥ इदानीं रहस्यमुपदिश्य समादधति । दृष्टमिति । दृष्टं प्रात्यक्षिकं श्रुतं धर्माद्यतीन्द्रियं भूतेनातीतेन सहितं च तद्भवद्वर्तमानं भविष्यद्भावि स्थास्नु स्थावरं चरिष्णु जङ्गमं महद्गगनादिकमल्पकं परमाण्वादिकमन्यन्मध्यमपरिमाणोपेतं चेत्येतत्सर्वमच्युताद्विना वस्तुतया शक्तत्वेन । अवस्त्वशक्तमुद्दिष्टं शक्तं वस्त्विति भण्यत इति प्रथमतात्पर्योक्तेः । न चास्ति । परमार्थो मुख्यार्थस्तदात्मेति परमार्थरूपः स एव भगवानेव माता पितेश्वर आत्मनश्चेत्यतीतेनान्वयः ।४३। सा निशा रात्रिर्यदा नन्दस्य कृष्णानुचरस्यैवं संवदतोरेतयोर्व्यतीता गता तदा गोप्यः समुत्थाय दीपान्निरूप्य स्तम्भाद्युपरि स्थापयित्वा । रूप उपरिभाव इति धातुः । सुभद्रां रथमारोप्येत्यादिवदिति प्रथमतात्पर्योक्तेः । वास्तून्गृहद्वाराधस्तनकाष्ठादिनिष्ठदेवताः समभ्यर्च्य दध्यक्षतादिभिः पूजयित्वा दधीन्यमन्थन्ममन्थुः ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यथा स्वयमजः स्वरूपतो न जायते अन्यथा तु कार्यरूपेण जननमावश्यकमेवमात्मसृष्ट्याभावे गुणैरेव सर्गे जीवानामपि औपाधिकभेदेनैव भेदसम्भवात् कुत्राप्यात्मनः कर्तृत्वं नास्तीति निरूपयन् अन्तःकरणाध्यासेनैव कर्तव्यं न स्वत इति दृष्टान्तेनोपपादयन् कैमुत्यन्यायेन भगवति कमपिनिषेधमाह । यथा भ्रमरिकेति । यो हि वात्यावद्भ्रमति तस्य दृष्टरिमां भवति तस्य दृष्ट्या भ्राम्यती मही ईयते वस्तस्तु दृष्टिरेव भ्रमति अन्यथा क्षणान्तरे अन्यैर्वा भ्रमणमुपलभ्यते तथा चित्ते कर्तरि सति कर्तृत्वाभिमानस्यैव प्रयोजकत्वात् प्राप्ताप्राप्तविवेकेन अहंकार एव कर्त्ता भवति तत्राहं धिया जीवोऽपि कर्तेव स्मृतः न तु वस्तुत कर्त्ता एवं केचित्तदृष्टान्तार्ष्टान्तिकभावेन एकवाक्यतया योजयन्ति वस्तुतस्तु दृष्टान्तद्वयमन्तर्बहिर्भेदेन अन्यथा इत्येव सङ्गतं स्यात् दृष्टान्ते अत्र विषय अन्यथा बुद्धिर्दार्ष्टान्तिके तु कर्तृत्वे सति असामञ्जस्यं च स्यात् अनुपयुक्तार्थश्च नहि साक्षाद्भगवच्चरित्रे उपपद्यमाने प्रासङ्गिकत्वेन योजनमुचितं तत्र भगवान् ब्रह्मरूपः स्वयं तादृश एवाभिव्यक्तः नित्यस्वरूपगुणक्रियारूपः क्रमेण परं पुरुषाणां

दृष्टया गृहीतः तत्र ग्राहिका दृष्टिः स्वधर्मं च तत्र योजयति ततो ब्रह्मरूपमेव प्राकृतसम्बन्धेन तत्र तत्र परिदृश्यमानं तथा कल्पयति तस्माद्भगवति नैते धर्मा युक्ताः स्वभ्रमादेव सच्चिदानन्दे प्राकृतत्वप्रतीतेः किञ्च यथा स्मृतौ सांख्यादिशास्त्रे चित्ते कर्त्तरि आत्मा कर्त्तेव दृष्टस्तदध्यासात् तथा भगवति स्वसम्बन्ध्यारोपात्तद्भावः प्रतीयते न तु वस्तुतो भगवांस्तथा भवति ततः पूर्ण एव व्यापकः परिच्छिन्नदृष्टया तत्तत्पदार्थेषु अभिव्यक्त्या सूर्यवत्सम्बद्धस्तथा दृश्यते स्वधर्मारोपेण वा तथा मन्यते वस्तुतो दृश्यतेऽपि न अतः पूर्ण एव परमानन्दः परिच्छेदकदृष्टया तदिच्छया क्वचिदुपलभ्यते क्वचिन्नेति यथेदानीं भगवदिच्छया मथुरावासिभिर्दृश्यते न तु भवद्भिर्यथा वा अस्मदादीभिर्दृश्यमानमपि भवन्तो वदन्ति नात्र भगवान् किन्तु मथुरायामिति एवं भ्रमो भवदीयस्तस्मादिमं भ्रमं परित्यज्य सर्वत्रैव भगवान् ज्ञातव्य इत्यर्थः। साक्षात्कारस्तु तदिच्छया भविष्यति ॥ ४१ ॥ ननु अस्माभिरयं पुत्रत्वेन एतावत्कालं व्यवहृतः कथमिदानीमपुत्रत्वं स्वस्य वा भ्रान्तत्वं मन्यामह इत्याशङ्कयाह। युवयोरेवेति। यद्भवतोर्लीलया भगवान् पुत्रो जात इति तथैवाङ्गीक्रियत इति मतं तदा युवयोरेवं भूतो नान्येषामिति नास्ति किन्तु सर्वेषामेवायमात्मजादिः सर्वात्मा ह्यय तेषां पुत्रत्वाकारेण यदि न भवेत् आधिदैविकप्रकारेण न वा तदा संसारे प्राणिनामानन्दो न भवेदिति को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यादिति श्रुतेः यतोऽयं हरिः अकारणसर्वदुःखहर्त्ता भगवान् समर्थः यदि समर्थो भूत्वा न दुःखं दूरीकुर्यात् तदा अयुक्तं भवेदिति अतो युक्तत्वादेव सर्वेषामात्मजः आत्मा च सङ्घातरूपः तथा पिता सङ्घातस्तु बीजं माता योनिः स च जीवः ईश्वरो नियन्ता अन्तर्यामी च एतावद्रूपो भगवान् सर्वेषां भवतीति किमाश्चर्यं भवतां पुत्रत्वेन स्वात्मानं ख्यापितवानिति ॥ ४२ ॥ ननु सर्वेषां तथात्वेऽपि न सर्वेषां तथा प्रतीतिः किं त्वस्माकमेव इदं च भगवता लीलयैव तथैव कृतम् अतः पुत्रोऽस्माकमेव न सर्वेषामिति चेत्तत्राह। दृष्टं श्रुतमिति। भगवान् सर्वेषामेव सर्वरूपो भूत्वा तथात्वं बोधयति तथा सति यदि कोऽपि न मन्यते तदा तेषामभाग्यं भवद्भिरपि भ्रममात्रं मन्तव्यं किन्तु सर्वत्वेन पुत्रत्वमपि मन्तव्यमिति न तु पुत्रत्वमेव परिच्छिन्नदृष्ट्यातावदेव गृहीतमिति तत्रान्यथा बुद्धिर्न वक्तव्येति दृष्टं प्रत्यक्षतः ऐहिकं श्रुतं श्रुत्यादिना पारलौकिकं च भगवानेवेत्यर्थः। भूतभवद्भविष्यदिति त्रिविध कालपरिच्छेद उक्तः अनेन कालपरिच्छिन्नमपि भगवानेवेत्युक्तम् अनेन परिच्छेद्यापरिच्छेद्यविरुद्धसर्वधर्माश्रय इत्युक्तं परिच्छिन्नेऽप्यवान्तरभेदवानयमेवेत्याह। स्थास्नुश्चरिष्णुरिति। स्थावरं जङ्गमं च तत्रापि तृणमेरुभावौ सिकताब्रह्माण्डभावौ वा मशकब्रह्मभावौ च भगवानेवेत्याह। महदल्पकं चेति। एवं चतुर्द्धाभिन्नो भगवान् चतुर्मूर्त्तिः स्वयमेवत यतः अच्युतः अन्यथा केनाप्यंशेन परिच्छेदे च्युतत्वं स्यात् अतः अच्युताद्विना अच्युतव्यतिरेकेण इतरद्वस्तु न वाच्यं किन्तु स एव सर्वम् अच्युतं विभक्तमपि न भवति अच्युतभिन्नमपि न भवति नन्दस्य प्रथमाधिकारित्वात् आधिदैविकप्रकारेण विश्वासार्थं भगवतः सर्वत्वमाह। परमार्थभूत इति। परमार्थो भगवान् भूतः आधिदैविकः परमार्थ आध्यात्मिकः किं त्वर्थो भवति भौतिकस्त्वनर्थः अत एव ब्रह्मवादात् आधिदैविकवादः पूर्वमीमांसासिद्धः किञ्चिदपकृष्टः ततोऽपि भेदवादः आध्यात्मिकरूपः ततोऽपि मायावाद इति बोधने उत्तरोत्तरमपकृष्टप्रकाराः तत्राधिभौतिको भौतिकः मुक्तिश्च प्रमेयबलेनेति ॥ ४३ ॥ एव नन्दोपदेशः समाप्तः रजनी च ततः समाप्तेत्याह। एवं निशेति। सा निशा एवं ब्रुवतोरेव व्यतीता यस्या मुखे समागतः परं भार्यया सह भगवद्गुणालापेनापि रात्रिर्गच्छतीति तद्व्यावृत्त्यर्थं गणयति। नन्दस्य कृष्णानुचरस्येति। नन्दो भगवद्भक्तः प्रसिद्ध एव उद्धवः कदाचिदन्यदपि भवेदित्याशङ्क्य तन्निवृत्त्यर्थमाह। कृष्णानुचरस्येति। सेवको हि स्वामिकथामेव कर्तुमागतः स्वामिस्वामिकथामेव करोति राजन्निति तदभिज्ञत्वात्सम्बोधनं निशा प्रभातेत्यत्र निदर्शनमाह। गोप्यः समुत्थायेति। सम्यगुत्थाय ननु रात्रावेव निमित्तवशादुत्थानं निरूप्य दीपानिति तासां सम्पत्तिरधिका निरूपिता वास्तून् समभ्यर्च्यति दीपानिति बहुवचनेन भगवतो मङ्गलारात्रिकमपि सूचितं देहल्यादीनां सम्यगर्चनं कुलधर्मख्यापनार्थं भगवानत्र स्थित इति भक्त्या दधीनि नानाविधानि प्रातः कृतानि मध्याह्नकृतानि सायंकृतानि च मन्थनं रूपस्यैव लौकिको दोहस्त्रिवारं वैदिको द्विवारं त्रिवारमित्येके अनेन गोपिकानां सन्तोषार्थमयमागतः तासां सुखचरितेन तुष्यतीति नन्दातिथ्यवत् ताभिः कृतमातिथ्यं निरूपितम् ॥ ४४ ॥

श्रीसुबोधिनी–सार

यथा भ्रमरिकया भ्रमणं तयोपलक्षितया दृष्ट्या मही भ्राम्यतीव महीयते प्रतीयते एवं चित्ते कर्त्तरि सति विक्षिप्तेऽहंधियाऽध्यासेन तत्र चित्ते आत्मा कर्त्ता इव स्मृतः ॥ ४१ ॥ अयं युवयोरात्मजो नैव किं तु भगवान् हरिः सर्वेषामेवात्मा माता पिताऽऽत्मजो हि स ईश्वरः ॥ ४२ ॥ दृष्टं श्रुतं भूतं भवद्वर्त्तमानं भविष्यत च स्थास्नुः स्थावरं चरिष्णुर्जङ्गमं महत् अल्पकं स्थूलं सूक्ष्मं चेति अच्युतात् श्रीकृष्णाद्विना वस्तुतरां न वाच्यं स एव सर्वं कार्यजातं परमार्थभूतः स एव ॥ ४३ ॥ एवं नन्दस्य कृष्णानुचरस्योद्धवस्य ब्रुवतोः सतोः सा निशा व्यतीता हे राजन् गोप्यः समुत्थाय दीपान् निरूप्य प्रज्वाल्य वास्तून् देहल्यादीन्समभ्यर्च्य दधीन्यमन्थन् ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'यद्येवं संसारातीतः कर्मपारवश्यरहितश्च तदा कथमस्मदादिवज्जन्मकर्मादिमत्तया प्रतीयते?' तत्राह— यथेति। भ्रमरिका परिभ्रमणं तयोपलक्षितया दृष्ट्या यथा मही भ्राम्यतीव ईयते प्रतीयते, तथा स्वचित्ते कर्तरि सति तत्रचित्ते अहंधिया

भ्रान्तस्य जयस्य स्वदोषेण सर्वात्मा भगवानपि कर्तेव कर्माधीनजन्मादिमत्तया स्मृतः प्रतीतो भवतीत्यर्थः ॥ ४१ ॥ युवयोर्यदि तत्र पुत्रत्वाभिमानस्तर्हि युवर्हि युवयोरेवायमात्यजो नैव भवति, किंतु सर्वेषामपि पुत्रादिरूप ईश्वरो नियन्ता च स एव। हिशब्दोऽवधारणे, यतो भगवान् हरिरिति हेतुः सूचितः ॥ ४२ ॥ किं बहुना ? दृष्टादिरूपं वस्तुतरां वस्तुमात्रं अच्युताद्विना तद्भिन्नतया न वाच्यं निर्वचनार्हं नैव भवति, यतः स एव सर्वम्। तत्र हेतुमाह—परमार्थभूत इति। परमकारणत्वादित्यर्थः। एवमपि अच्युतपदेन विकाराभावः सूचितः ॥ ४३ ॥ हे राजन्! कृष्णानुचरस्य उद्धवस्य नन्दस्य च परस्परमेवं ब्रुवतोः सतोः सा निशा व्यतीता, तदा गोप्यः समुत्थाय दीपान्निरूप्य प्रज्वाल्य वास्तून् देहल्यादीन् समभ्यर्च्य गन्धादिभिः सम्पूज्य दधीन्यः मन्थन् ॥ ४४ ॥

अन्वितार्थप्रकाशिका

अत्राविद्योपाधेर्जीवस्य कर्तृत्वं दृष्टान्तीकुर्वन् तस्या विद्ययैव कर्तृत्वमित्याह—यथेति। भ्रमरिका परिभ्रमणं तयोपलक्षितया दृष्ट्या यथा मही भ्राम्यतीव ईयते प्रतीयते तथा स्वचित्ते कर्तरि सति तत्राहंधिया चित्तमेवाहमिति अध्यासेन भ्रान्तस्य जनस्य स्वदोषेण आत्मापि कर्तेव स्मृतः प्रतीतो भवति। तद्वदीश्वरोऽपि गुणैरेव स्रष्टा प्रतीयते इति ॥ ४१ ॥ युवयोरिति। युवयोरेवायमात्मजो नैव भवति किन्तु सर्वेषामपि आत्मजः न केवलमात्मजः किन्तु आत्मा पिता माता ईश्वरः स्वामी च स एव उपलक्षणतया शत्रुमित्रादिरूपोऽपीति सम्बन्धमनैकान्तिकं करोति ॥ ४२ ॥ दृष्टमिति। दृष्टं श्रुतं भवत् वर्तमानं भविष्यत् स्थास्नुः स्थावरः चरिष्णुः चरः महत् अल्पकं च वस्तु वस्तुमात्रम् अच्युताद्विना तद्भिन्नतया नतरां वाच्यं निर्वचनार्हं नैव भवतितरां नितरां नैव वाच्यमिति वा प्रकृतिप्रत्ययपौर्वापर्यमार्षम्। यतः परमार्थभूतः परमार्थसत्यः स एव सर्वमपि ॥ ४३ ॥ एवमिति। हे राजन्! कृष्णानुचरस्योद्धवस्य नन्दस्य च परस्परमेवं ब्रुवतोः सतोः सा निशा एव केवलं व्यतीता न च नन्दस्य शोको व्यतीतो नाप्युद्धवस्य सान्त्ववाक्प्रयोगो विरतः। ततः प्रातःकृत्यार्थमुद्धवो बहिर्गतः कृताह्निक इति वक्ष्यमाणात्। तदा गोप्यः समुत्थाय दीपान्निरूप्य प्रज्वाल्य वास्तून्देहल्यादीन् समभ्यर्च्य गन्धादिभिः सम्पूज्य दधीन्यमन्थन्। इमा विश्रम्भप्रधानप्रेमवत्यः ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्रीकृष्णो युवयोरेव आत्मजो नाऽस्ति किंतु सर्वेषामेवात्मजादिवत् स्नेहास्पदमस्ति ॥४१॥ वस्तून् देहल्यादीन् भाषायां देहली इत्यस्य उमरो इति लोका वदन्ति ॥ ४२ ॥ दीपवत् दीप्तैः प्रकाशमानैः कांच्यादिस्थितैर्मणिभिः ताः विरेजुः कथंभूताः रज्जूर्विकर्षत् भुजेषु कं करणानां स्रजः पंक्तयो यासां ताः चलन्तो नितम्बास्तनाहाराश्च यासां कुंडलैस्तिष्यंतः त्विषंतः स्फुरंतः कपोला यासां अरुणानि कुंकुमानि येषु तानि आननानि यासां ता एव ताश्च ताश्च ताः त्विष्पदिति श्यन् प्रत्यय आर्षः ॥ ४३ ॥ निर्मथनशब्दमिश्रितः उद्गायतीनां ध्वनिदिवमस्पृशत् ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' इति श्रुतौ अजशब्दवाच्यौ जीवेश्वरौ स्तस्तयोर्मध्येऽजशब्दवाच्येश्वरादन्यस्याऽजशब्दवाच्यजीवस्य वैलक्षण्यं प्रदर्शितमेतदेव दृष्टन्तमुखेनोपपादयति ॥ यथेति ॥ भ्रमरिका अतिवेगेन भ्रमणक्रिया तयोपलक्षिता दृष्टिस्तया, भ्रमरिकायुक्तया दृशेत्यर्थः। यथा मही भूरपि, भ्राम्यतीव सर्वथा बम्भ्रम्यमाणेव, ईयते। प्रतीयते। तथा जीव इति शेषः। आत्मा इन्द्रियान्तःकरणाद्यात्मा, कर्त्ता च सन्नपि, तत्र अनात्मनि, अकर्त्तरि च, चित्त चित्तशब्दोपलक्षिते देहे, अहं धिया भ्रमरिकास्थानीययाऽहंबुद्ध्या, स्वाभेदाभिमानेनेत्यर्थः। युक्तः, स्मृतो मतः एव। स्वगतकर्तृत्वात्मीयज्ञातृत्वादींश्च विस्मृत्य देहमेव तथाविधं मन्यमानः स्मृत इत्यर्थः। नैवंविधो भगवानिति भावः ॥ ४१ ॥ एवं जीवाद्भगवतो वैलक्षण्यमुपपाद्य मोहनिवृत्तये पुत्रादि संबन्धमनैकान्तिकं करोति ॥ युवयोरिति ॥ हे नन्द, भगवान् हरिः ईश्वरः, अयं ज्ञानादिकल्याणगुणाकरः, निरस्तनिखिलदोषः, स्वाश्रितबन्धहरः, त्वयात्मजत्वेनाभिमतः श्रीकृष्णः, युवयोः एव, आत्मजः, न न भवत्येव। किं नु, सः सर्वेषां अपि, आत्मजः। हि यस्मात्, सर्वेषां आत्मा सर्वान्तरात्मेत्यर्थः। तत्तदात्मजाद्यन्तरात्मतया तच्छरीरकत्वेन तद्रूपत्वादिति भावः। किं चायं न केवलमात्मज एव, अपि तु पिताऽपि, सर्वकारणत्वादिति भावः। माता च हितैककारित्वादिति भावः। अनेन 'माता भ्राता पिता निवासः शरणं सुहृद्गतिश्च नारायणः' इति श्रुत्यर्थोऽभिसंहितः ॥ ४२ ॥ सर्वेषामात्मेत्यनेनोक्तं सर्वात्मत्वमेव प्रपञ्चयति ॥ दृष्टमिति ॥ दृष्टं, श्रुतं, भूतं च भवच्च तत्समाहारः, स्थास्नुः, चरिष्णुः, महत्, अल्पकं च, यत् किंचित् वस्तु, तत् अच्युतात् विना, तरां किंचिन्मात्रमपि, पृथक् न वाच्यम्। कुतः। सर्वं, सः एव। सर्वस्याच्युतायत्तसत्तादिमत्त्वेन तच्छरीरकत्वेन च तदात्मकत्वमेवेत्यर्थः। यतः, सः, परमार्थभूतः लोकत्रयमप्यन्तः प्रविश्य प्रशासनेन तस्य भर्त्ता व्याप्यगतदोषास्पृष्टश्च। अतः सर्वं जगत् स एव। विशेषणानां विशेष्यपर्यन्तत्वस्वाभाव्याद्विशेषणस्य विशिष्टवस्त्वन्तर्भूतत्वेन विशिष्टात् पृथगवस्तुत्वाच्च जगद्रूपेण स एवानुसंधेयः ॥ ४३ ॥ एवमिति ॥ हे राजन्, एवमित्थं कृष्णानुचरस्योद्धवस्य, नन्दस्य

च, ब्रुवतोः सतोः, सा निशा, व्यतीता व्यतिक्रान्ता बभूव । तदा निशायाः पश्चिमे यामे इति शेषः । गोप्यः, समुत्थाय, दीपान् निरूप्य प्रज्वाल्य, वास्तून् देहल्यादीन्, समभ्यर्च्य, गन्धादिभिरिति शेषः । दधीनि अमन्थन् ममन्थुः ॥ ४४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दृष्टं श्रुतमिति : १०.४६.४३.

सर्वहार्दस्थितः सर्वभूतस्थः सर्वसन्मयः । स एवं पश्यतोर्नित्यं क्व वा तद्विरहोदयः ॥ ८९ ॥

एवं निशेति : १०.४६.४४.

दुर्लङ्घ्यापि महानिशा ध्रुवमतिक्रान्ता भवत्युत्तमश्लोकस्यैकमपीह नाम सकृदप्युक्तं यदि प्रेमतः ।
तन्नैवाद्भुतमेतदच्युतपदे प्रेम्णोस्तयोः प्रेमतो यन्नन्दोद्धवयोस्तदीयचरितोद्गात्रोर्निशान्तोऽभवत् ॥ ९० ॥
सर्वेऽपि यामाः प्रशमं प्रयान्ति यन्नामसङ्कीर्तनतोऽपि पुंसाम् । तस्याच्युतस्य ब्रुवतोश्चरित्राण्यासीत् त्रियामोपरतिर्न चित्रम् ॥ ९१ ॥

कृष्णप्रिया

जैसे खेल में मनुष्य गोल-गोल घूमता तब उसकी दृष्टि घूमती है लेकिन घूमने वाले को पृथ्वी घूमती मालूम पड़ती है। इस चित्त के कर्तृत्व बुद्धि के अध्यास के कारण जीव भी अपने को कर्त्ता मानता है ॥ ४१ ॥ बाबा ! भगवान् श्रीकृष्ण आप के पुत्र है, यह नहीं ये तो स्वयं ईश्वर होने से सबके पुत्र आत्मज है, सर्व की आत्मा है सबके पिता, माता आदि सर्व है ॥४२॥ हे नन्दबाबा ! जो देखने में एवं सुनने में आया है, जो भूत में था वर्तमान में है, भविष्य में होने वाला है, जो स्थावर है जो जङ्गम भी है छोटी बड़ी भी वस्तु सुनने कहने में आती है वह सब अच्युत भगवान ही है वही सर्व रूप है और वह ही परमार्थ तत्व है ॥ ४३ ॥ श्रीशुकाचार्यजी ने कहा राजन् परीक्षित ! श्रीनन्दबाबा एवं भगवान श्रीकृष्ण के अनुचर हरिदास श्री उद्धवजी के भगवद् गुणानुवाद में सारी रात्री पसार हो गई ब्राह्म मुहूर्त हुआ गोपियाँ उठकर दीपक प्रकट कर देहली का अर्चन कर दही मथने लगो ॥ ४४ ॥

ता दीपदीप्तैर्मणिभिर्विरेजू [1]रज्जूर्विकर्षद्भुजकङ्कणस्रजः ।
चलन्नितम्बस्तनहारकुण्डल[2]त्विष्यत्कपोलारुणकुङ्कुमाननाः ॥ ४५ ॥
उद्गायतीनामरविन्दलोचनं व्रजाङ्गनानां दिवमस्पृशद् ध्वनि ।
दध्नश्च निर्मन्थनशब्दमिश्रितो निरस्यते येन दिशाममङ्गलन् ॥ ४६ ॥

कर्दमक्षमा

अन्वयः—चलत् नितम्ब-स्तन-हार-कुण्डल-त्विष्यत्, कपोल-अरुण कुंकुमाननाः, रज्जूर्विकर्षद्भुजकंकणस्रजः, ताः, दीपदीप्तैः, मणिभिः, विरेजुः ॥ ४५ ॥ अरविन्दलोचनम्, उद्गावतीनाम्, व्रजाङ्गनानाम्, ध्वनिः च, दध्नः, निर्मन्थनशब्दमिश्रितः, ध्वनिः, दिवम्, अस्पृशत्, येन, दिशाम्, अमङ्गलम्, निरस्यते ॥ ४६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दीपप्रकाशेन दीप्तैः मणिभिः कांच्यादिषु स्थितै रत्नैस्ता गोप्यस्तदा विरेजुः । कथंभूताः । रज्जूर्विकर्षत्सु भुजेषु कंकणानां स्रजो यासां ताः । चलन्तो नितम्बाः स्तना हाराश्च यासां ताः । कुण्डलैस्त्विषन्तः स्फुरन्तः कपोला यासां ताः अरुणानि कुंकुमानि येषु तान्याननानि यासां ता एव ताश्च ताश्च ॥ ४५-४६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ता गोप्यः ॥ दीपैर्हेतुभिर्दीप्तैस्तत्प्रतिबिम्बेन विशेषितैः विरेजुः स्वत एव रेजुः, पुनश्च तादृशमणिदीप्तिभिर्विशेषतो रेजुरित्यर्थः । यद्वा—दीपादपि दीप्तैरतो विशेषतो रेजुः, अतो दीपज्वालनं तु मङ्गलतयैव । विराजमाने हेत्वन्तरं—रज्जुरित्यादि । स्वक्श्रोणिकुण्डलस्यापि चलनं प्रकरणवशाज्ज्ञेयम् । अरुणेति बाह्लीकदेशोद्भवानि कुंकुमानि व्यज्यन्ते ॥ ४५ ॥ दिवं स्वर्गम् । येन ध्वनिना । दिशां दिक्षु स्थितानामशुभं नश्यतीत्यर्थः । एनेन तासां ध्वनिस्तदा सर्वदिक्षु दिवि च प्रसृत्य तत्रत्यकर्णदेशमागत्य तेषामशुभं नाशयतीत्यर्थः ॥ संततश्रीकृष्णावेशयुक्तानामपि तासां व्रजव्यवहाररक्षणाय श्रीकृष्णैक रक्षिततत्तत्संस्कारवशाद्दधिमंथनेऽपि तदावेशं सूचयंस्तत्र च योग्याऽवसरतया गानेनातिशयं दर्शयंस्तेन जगतोऽपि मंगलं जातमित्याह—उदिति, उच्चैरित्या-

---

१. रज्वाविकर्षत्करकंकणाः स्त्रियः-विज. । २. त्विषत्-श्रीधर. वंशी. जोव. वीर. विश्व. ।

वेशो दर्शितः। अरविन्दलोचनमिति सौन्दर्यप्रधानं गानं व्रजांगनानामिति तादृशप्रसिद्धैर्गाननैपुण्यञ्च। एवं प्रेम्णोच्चैर्गानात्तासा बाहुल्याच्च गीतध्वनेर्व्यापकता ज्ञापिता। अत एव दिवमस्पृशत्। तत्र हेत्वन्तरञ्च—दध्न इति। निर्मंथनं निरन्तरविलोडनम्। चकारात्कंकणादेश्च शब्दः मिश्रितः। दिशां दशदिग्वर्तिनां सर्वेषामेव लोकानाममंगलमौहिकामुष्मिकाऽशेषदुःखं तन्मूलञ्च कर्म निरस्यते सवासनं दूरतः क्षिप्यते ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

दीपैर्हेतुभिर्दीप्तैस्तत्प्रतिबिम्बेन विशेषतः विरेजुरिति स्वत एव रेजुः पुनश्च तादृशैर्मणिभिर्विशेषत इत्यर्थः। यद्वा। दीपादपि दीप्तैः। अतो विशेषतो रेजुः ततो दीपज्वालनं तु मङ्गलतयैव विराजमाने हेत्वन्तरं रज्जुरित्यादि। स्रक् श्रेणी कुण्डलस्यापि चलनं प्रकरणवशाज्ज्ञेयम्। अरुणेति वाह्लीकदेशोद्भवानि कुङ्कुमानि व्यज्यन्ते ॥ ४५ ॥ सन्ततं श्रीकृष्णावेशयुक्तानामपि तासां व्रजव्यवहाररक्षणाय श्रीकृष्णैकरक्षिततत्तत्संस्कारवशाद्दधिमन्थनेऽपि तदावेशं सूचयन् तत्र च योगावसरतया गानेनातिशयं दर्शयन् तेन जगतोऽपि मङ्गलं जातमित्याह। उदिति। उच्चैरित्यावेशो दर्शितः अरविन्दलोचनमिति। सौन्दर्यप्रधानं गानं व्रजाङ्गनानामिति तादृशप्रसिद्धैर्गाननैपुण्यञ्च। एवं प्रेम्णोच्चैर्गानात्तासां बाहुल्याच्च गीतध्वनेर्व्यापकता ज्ञापिता। अत एव दिवमस्पृशत् तत्र हेत्वन्तरञ्च दध्न इति। निर्मन्थनं निरन्तरविलोडनं चकारात् कङ्कणादेश्च शब्दः मिश्रितः दिशां दशदिग्वर्त्तिनां सर्वेषामेव लोकानाममङ्गलम् ऐहिकामुष्मिकाशेषदुःखं तन्मूलञ्च कर्म निरस्यते सवासनं दूरतः क्षिप्यते ॥ ४६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दीपैः कृत्वा दीप्तैरधिकं द्योतमानैरित्यर्थः। यद्वा, दीपेभ्योऽपि दीप्तैर्विरेजुः, स्वत एव दीप्तिमत्यः, पुनश्च तादृशैर्मणिभिर्विशेषतोऽशोभन्तेत्यर्थः। बिराजने हेत्वन्तरं चाह—रज्जुरित्यादिना। विकर्षदिति भुजानां कंकणस्रजाञ्च चलनं वाद्यं च सूचयति। तथा नितम्बादीनां चलने हेतुश्च। अन्यत्तैर्व्याख्यातम्। यद्वा, चलन्ति नितम्बादीनि कुण्डलान्तानि यासाम, स्वभावत एव रज्जुविकर्षणश्रमजस्वेदबिन्दुभिर्वा भ्राजत्कपोलाः, तच्छ्रमेणैवारुणानि कुंकुमयुक्ताननानि यासां ताश्च ताश्च, मण्यादीनां धारणं स्वभावत एवांगेषु वर्त्तमानतया, किंवा (११ श० श्लो०) 'स्वलंकृताभिः' इत्यत्र पूर्वोक्तयुक्त्यैव ॥ ४५ ॥ दधिमथनमूलप्रयोजनमाह—उदिति उच्चैः। अरविन्दलोचनमिति सौन्दर्यं तेन च प्राधान्येन सौन्दर्यगानम्। तथा व्रजाङ्गनानामिति गाननैपुण्यञ्चाभिप्रेतम्, एवं प्रेम्णोच्चैर्गानात्तासां बाहुल्याच्च गीतध्वनेर्व्यापकतोक्ता, अतएव दिवमस्पृशत्। तत्र हेत्वन्तरञ्च—दध्न इति, निर्म्मन्थन निरन्तरविलोडनम्, च-कारात् कंकणादेश्च शब्दमिश्रितः, दिशां दशदिग्वर्त्तिनां सर्व्वेषामेव लोकाममंगलमैहिकाष्मिकाशेषदुःखं तम्मूलपापञ्च निरस्यते निःशेषतया दूरतः क्षिप्यते ॥ ४६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मन्थन्तीस्ता वर्णयति। ता इति। ता मन्थन्त्यो गोप्यः दीपैर्दीप्ता ये काञ्च्यादिस्थिता मणयस्तैर्विरेजुः। कथम्भूताः मन्थनदण्डरज्जूविकर्षत्सु भुजेषु कङ्कणानां स्रजो यासां ताः चलन्तो नितम्बाः स्तना हाराश्च यासां ताः कुण्डलैस्त्विषन्तः स्फुरन्तः कपोला यासां ताः अरुणानि कुङ्कुमानि येषु तान्याननानि यासां ताश्च ताश्च ॥४५॥ तादात्विकध्वनिं लक्षयति। उद्गायतीनामिति। अरविन्दलोचनं श्रीकृष्णम् उच्चैर्गायतीनां गोपीनां ध्वनिः दध्नो निर्मन्थनजशब्देन मिश्रितो ध्वनिः शब्दः दिवमस्पृशद्व्याप्तवान् येन ध्वनिना दिशाममङ्गलं निरस्यतेऽपनुद्यते ॥ ४६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मन्थनरज्ज्वा विकर्षन्तः उल्लिखन्तः करकङ्कणा यासां ताः। यद्वा मन्थनरज्ज्वाऽविकर्षन्तः चलद्भिर्नितम्बादिभिस्त्विषन्ति कपोलादीनि अरुणकुङ्कुमानि आननानि यासां तथा अरुणानि कुङ्कुमानि येषु तानि तथा वा ॥ ४५ ॥ येन ध्वनिना दिशाममङ्गलमित्यनेन दिगन्तर्वासिनां जनानामशुभं नश्यतीत्युच्यते ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मणिभिः कङ्कणकिङ्किण्यादिषु स्थितै रजूर्विकर्षत्सु भुजेषु कङ्कणानां स्रक् श्रेणी यासां ताः चलन्तः काममाना नितम्बाः स्तना हाराश्च यासां कुण्डलैस्त्विष्यन्तः स्फुरन्तः कपोला यासां अरुणकुङ्कुमं यद्वाह्लीकदेशोद्भूतं तद्युक्तान्याननानि यासां ताश्च ताश्च ताश्च ताः ॥ ४५ ॥ उद्गायतीनामित्यानन्दद्योतते वस्त्रालङ्कारकुङ्कुमालेपमधुरगानादिकं विरहे न घटत इत्युक्ततो कृष्णसंयुक्तप्रकाश एवोद्धवेन सामान्यतो रात्र्यन्तेऽपि दृष्टा तया दिनान्ते इति ज्ञेयम् ॥ ४६ ॥

गूढार्थदीपिनी

काञ्च्यादिषु लग्नैः दीपदीप्तैः मणिभिः रत्नैः ता गोप्यः। विरेजुः। चलन्तो नितम्बादयो यासां ताः कुण्डलैः त्विषन्तः स्फुरन्तः कपोला यासाम् ताः। अरुणकुङ्कुमयुक्तानि आननानि यासां ताश्च ताश्च ताश्चेति त्रिपदबहुव्रीहिः ॥ ४५ ॥ चकारात् कङ्कणादेश्च ॥ ४६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ताः गोप्यः रज्जूर्विकर्षत्सु भुजेषु कङ्कणानां स्रजो यासां ताः चलन्तो नितम्बाः स्तना हाराश्च यासां ताः कुण्डलैः त्विषन्तः स्फुरन्तः कपोला यासां ताः अरुणानि कुङ्कुमानि येषु तान्याननानि यासां ताश्च ताश्च ताश्च मणिभिराभरणानि तैर्विरेजुः ॥४५-४६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दीपैर्दीप्ताश्च ते मणयश्च तैर्दीपा दीप्ता यैस्ते च ते तैरिति वा मणिभिर्विरेजुः। रज्जुविकर्षणोच्चलत्कङ्कणाः स्रज इति पाठः। रज्ज्वा विकर्षणोज्ज्वलाः कङ्कणा यासां ताः। रज्ज्वाविकर्षच्चलकङ्कणाः स्त्रिय इति पाठे रज्जुमाकर्षन्तं करास्तेषु चलाः कङ्कणा यासां ताः स्त्रिय इत्यर्थः। चलन्ति नितम्बस्तनहारकुण्डलानि तैस्त्विषन्तः काशमानाः कपोला यासां ताश्चारुणं कुङ्कुमं तेन युतमाननं यासां ता अमन्थन्नित्यतीतेनान्वयः ॥ ४५ ॥ अरविन्दलोचनं श्रीकृष्णमुद्गायन्तीनां सा ध्वनिर्दिवमस्पृशत्। उच्चैष्ट्वे तात्पर्यम्। सहस्रधनुषस्तूर्ध्वं द्युशब्देनापि भण्यत इति प्रथमतात्पर्योक्तेः। स च दध्नश्च निर्मन्थनशब्देन मिश्रितः। दध्नां चेति क्वचित्कोऽपि पाठो दधीन्यमन्थन्नित्यनुगुणः। दध्नश्चेति पाठ एकवचनं मथनसमकालीनतां ध्वनयति। येन श्रुतेन ध्वनिना दिशां तद्गतजनानामङ्गलं निरस्यते। न केवलमनिष्टनिवृत्तिरिष्टप्राप्तिरप्यस्तीत्यप्याह। दिशामेति। उद्गायन्तीनां मङ्गल दिशामेति दिशां दिग्देवतानां ध्वनिश्च भुवमस्पृशत इति वा ॥ ४६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

यद्यपि स्वरूपस्थित्यैव सन्तुष्टो भवति तथापि तासामुत्कर्षमप्याह। ता दीप्तदीप्तैरिति। दीप्पैर्दीप्ता ये मणयः दीपप्रतिबिम्बग्राहिणः तैर्विशेषेण रेजुः स्वरूपापेक्षयापि अधिका कान्तिरिति भगवद्योग्यता निरूपिता। भगवद्गुणगानयोग्यता वा एवं स्वरूपं वर्णयित्वा क्रियाभिनिवेशेऽपि शोभातिशयमाह। रज्जूनां विकर्षयुक्तौ यौ भृजौ तत्र कङ्कणानां स्रजो यासु स्थूलकङ्कणपरिधानं भगवद्विरहात् क्षामत्वं वा बोध्यते चलन्नितम्बस्ततौ च तत्र हाराः कुण्डले च यासां कुण्डलयोर्वा त्विट् कान्तिस्तद्युक्ते कपोले त्विष्यत्कपोले सामान्यतस्त्विट्युक्ते वा कपोले ताभ्यां कृत्वा अरुणः कपोलयोर्वारुणः अरुणकुङ्कुमयुक्तमुखाः सर्वाङ्गेषु सौष्ठवमाभरणान्युत्तमत्वं च निरूपितम् ॥ ४५ ॥ एवं स्वरूपतो भगवद्योग्यत्वेनातिथ्यमुक्त्वा भगवद्गुणपरत्वेनापि तथात्वमाह। उद्गायतीनामिति। धर्मबुद्ध्यापि गानं सम्भवतीति तद्व्यावृत्त्यर्थमाह। अरविन्दलोचनमिति। सहि कमलनयनः कोटिकन्दर्पसुन्दरः। ननु कथं ब्रह्मत्वादिगुणा नोक्तास्तत्राह। व्रजाङ्गनानामिति। ता हि व्रजस्त्रियः सौन्दर्येणैव वशीकृताः किं ब्रह्मत्वादिना प्रशस्तान्यङ्गानि यासामिति तावन्मात्रपरत्वे हेतुरप्युक्तः। अन्यथाङ्गप्राशस्त्यं व्यर्थं स्यात्तासां लौकिकवैदिकानरपक्षत्वाय गाने विशेषमाह। उद्गायतीनां ध्वनिर्दिवमस्पृशदिति। कार्यकारणसहितं गानं निरूपितम्। कारणाधिक्याल्लोकपरित्यागः तथा सति लोकविद्विित्वात् अस्वर्ग्यमाशङ्क्य तस्यैव स्वर्गबन्धः कः सन्देहस्तत्फलस्येति तेनैव चरितार्थत्वात् वैदिकनिरपेक्षता च तासां भगवदीयत्वेन स्वर्गस्यानपेक्षित्वात् वाचनिककायिकयोरेव कर्मणोः स्वर्गबन्धप्रतिपादनार्थं दध्नश्च निर्मन्थनशब्दमिश्रित इत्युक्तं चकारात्कङ्कणानामपि रणत्कारेण मिश्रितः भगवदीयानां सम्बन्ध्यपि गोपिकानां गवां च सम्बन्ध्यपेक्षत इति भगवानिव तद्गुणा अपि तत्सापेक्षा इति तासां महत्त्व सूचितम्। ननु सर्वधर्मपरित्यागे तासाम्पापं भवेदिति कथं तद्वर्णनेन आतिथ्यं माहात्म्यं चेत्याशङ्क्याह। येन ध्वनिना दिशामेवामङ्गलं निरस्यते किमु तत्सम्बन्धिनाम् ॥ ४६ ॥

श्रीसुबोधिनी–सारः

दीपैर्दीप्तैर्मणिभिस्ता गोप्यो रेजुः शुशुभिरे रज्जूर्विकर्षत्सु भुजेषु कङ्कणानां स्रजो माला यासां ताः चलन्तो नितम्बाः कट्यधोभागाः स्तना हाराश्च यासां ताः कुंडलैः त्विष्यन्तो भ्राजमानाः कपोला यासां ताः अरुणानि कुंकुमानि येषु तानि आननानि यासां ताः ताश्च ताश्चेति ॥ ४५ ॥ अरविंदलोचनं श्रीकृष्णमुद्गायतीनां व्रजस्त्रीणां ध्वनिः शब्दो दध्नो निर्मथनेन शब्देन मिश्रितो दिवमस्पृशत् स्वर्गं व्यापत् येन शब्देन दिशाममंगलं निरस्यते दूरीक्रियते ॥ ४६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मथ्नतीस्ता वर्णयति—ता इति। मन्थनरज्जूर्विकर्षत्सु भुजेषु कङ्कणानां स्रजः समूहा यासां ताः। चलन्तो नितम्बाः स्तनाहाराश्च यासाम्, कुण्डलैस्त्विषन्तः कपोला यासाम्, अरुणानि कुङ्कुमानि येषु तान्याननानि यासां ताश्च, ताश्च ताश्च गोप्यो दीपैर्दीप्ता ये काञ्च्यादिस्थिता मणयस्तैर्विरेजुरित्यन्वयः ॥ ४५ ॥ तदा दध्नो निर्मन्थनजन्यशब्देन मिश्रितः अरविन्दलोचनं श्रीकृष्णमुच्चैर्गायन्तीनां व्रजाङ्गनानां ध्वनिर्दिवमस्पृशत् व्याप्तवान्। येन ध्वनिना दिशाममङ्गलं निरस्यते अपनुद्यते ॥ ४६ ॥

अन्वितार्थप्रकाशिका

ता इति ॥ मन्थनरज्जूर्विकर्षत्सु भुजेषु कङ्कणानां स्रजः श्रेण्यो यासां ताः रज्जुरिति व्यस्तमार्षम्। क्वचित्समस्तोऽपि पाठः। चलन्तो नितम्बाः स्तना हाराश्च यासाम्। कुण्डलैस्त्विषन्तः कपोला यासाम्। गुणाभाव आर्षः। त्विष्यदिति पाठे श्यन्नार्षः

दिवादेराकृतिगणत्वाद्वा । अरुणानि कुङ्कुमानि येषु तान्याननानि यासां ताश्च ताश्च गोप्यो दीपैर्दीप्ता ये काञ्च्यादिस्थिता मणयस्तैर्विरेजुः ॥ ४५ ॥ उद्गायतीनामिति ॥ तदा दध्नो निर्मन्थनजन्यशब्देन मिश्रितः अरविन्दलोचनं श्रीकृष्णमुच्चैर्गायतीनाम् । तुमभाव आर्षः । व्रजाङ्गनानां ध्वनिर्दिवमस्पृशत् व्याप्तवान् । येन ध्वनिना दिशाममङ्गलं निरस्यते अपनुद्यते ॥ ४६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

व्रजौकसो गोप्यः शातकौम्भकनकरचितम् ॥ ४५-४६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मथ्नतीस्ता वर्णयति ॥ ता इति ॥ रज्जू मन्थनदण्डनेत्रं विकर्षन्तश्च ते भुजाश्च तेषु कङ्कणानां स्रजो यासां ताः, रज्जुशब्दे दीर्घत्वमार्षम् । चलन्तः नितम्बाः स्तना हाराश्च यासां ताः कुण्डलैः त्विष्यन्तः स्फुरन्तः कपोला यासां ताः अरुणानि कुङ्कुमानि येषु तान्याननानि यासां तास्ताश्च ताश्च, ताः मथ्नत्यो गोप्यः, दीपैः दीप्तैः मणिभिः काञ्च्यादिस्थितमणिभिः, विरेजुः॥४५॥ तासां तादात्विकं ध्वनिं लक्षयति ॥ उद्गायतीनामिति ॥ अरविन्दलोचनं श्रीकृष्णं, तदुच्चस्वरेण गायन्त्यो गानं कुर्वन्त्यस्तासां, व्रजाङ्गनानां गोपीनां, ध्वनिः शब्दः, दध्नः निर्मन्थनशब्दमिश्रितः संश्च, दिवं अस्पृशत् संव्याप्तवान् । येन ध्वनिना, दिशां अमङ्गलं, निरस्यते अपनुद्यते ॥ ४६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

उद्गायतीनामिति ः १०.४६.४६.

आहुः केचन दुर्महार्जवविधिं चित्तेप्सितप्राप्तये केचिच्छीतकरार्चनं कति परे विष्णोः पदैकस्तुतिम् ।
काङ्क्षन्त्यः पुनरीशदर्शनसुखं ताः प्रातरेवादराच्चक्रुस्तत्प्रतिरोध्यदृष्टहतये तत्सर्वमप्यङ्गनाः ॥ ९२ ॥

सर्वागमस्थितिजुषे द्विजमङ्गलेष्टकर्त्रे कराहितरसाय तमोनिहन्त्रे ।
पद्मानुरञ्जन - कराय गवामवित्रे तस्मै नमांसि हरये करवाण्यजस्रम् ॥ ९३ ॥
तारोपभोग - रसिकाय रसात्मकाय जैवातृकाय शिवमौलि - लसत्कराय ।
सद्भासितोज्ज्वलगुणाय सुधाधराय कृष्णाऽन्तरङ्गवपुषे विधवे नमोऽस्तु ॥ ९४ ॥
रक्तानुरक्तमतये स्वजनावनार्थमुन्मेषिणे सकलमित्र - गुरुप्रियाय ।
सन्मङ्गलाय कमलाधिक - भावनाय सोमप्रियाय नतिरस्तु धराभवाय ॥ ९५ ॥
सौम्यात्मने सितकरान्वयभूषणाय कन्याधिपत्यरुचये कविमित्रकाय ।
अक्रूरगीतचरिताय बुधेडिताय तस्मै मनोज्ञवपुषे नतिरस्तु भूयः ॥ ९६ ॥
पीताम्बराभिरुचये सुमनोर्चिताय गोपाग्रगाय सुरतोत्सव - दायकाय ।
वैचित्र्यवीर्यचरिताय च वश्यवाचे नीचेतरेप्सितपुषे गुरवे नमोऽस्तु ॥ ९७ ॥
बल्युन्नतस्थितिधिये सुरसङ्घपात्रे दात्रे सदा शिवपदस्य निजाङ्घ्रिभाजाम् ।
पूर्वामरार्चितपदाय सुखोदयाय भोजाधिपाय भुवि सत्कवये नमोऽस्तु ॥ ९८ ॥
श्यामाम्बराहितदृशे कविसौम्यदत्तामोदाय काममदयाय विरोधिवर्गे ।
भृत्याखिलार्तिहरणोत्सविने नमो मे कृष्णाय कृष्णवपुषेऽस्तु शनैश्चराय ॥ ९९ ॥
कृष्णत्विषे सुरसमाहितभेदभाजे स्वच्छन्दगुप्तगतये सुरतामृताप्त्यै ।
निर्देहभावरुचये सकलोन्मुखाय प्राक्सैंहिकेयवपुषेऽस्तु नमोऽनिशं मे ॥ १०० ॥
धूम्रध्वजाय निखिलासुरमण्डलानामभ्रत्विषे भृशमनन्त - विराजिताय ।
भूयो ह्यदृश्यगतये खग - केतवे मे प्रेम्णा नमोऽस्तु सततं सकलेष्टसिद्ध्यै ॥ १०१ ॥
ग्रहानुकूल्य - प्रतिकूलते यद्यस्यानुकूल्य - प्रतिकूलताभ्याम् । सिद्धे जनानां विधुमेव तस्मात् सर्वात्मनाऽहं शरणं प्रपद्ये ॥ १०२ ॥
किं तैर्ग्रहैः स्थितिवशादिह ये दिशन्ति लोके शुभाशुभफलं लघुकालभोग्यम् ।
यस्तापहार्यमृतदो निजपादभाजां तं कः श्रयेत न विधुं सुखसंपदिच्छुः ॥ १०३ ॥
उल्लासनं सखि यदाश्रयतो ग्रहाणां यत्सर्वभूतजनकं गुणमात्रबोध्यम् ।
नीरूपमप्यसितरूपतया विभाति कल्याणदायि मम विष्णुपदं तदास्ताम् ॥ १०४ ॥
सूर्याश्रितं बुधनुतं द्विजपूजितं च सन्मङ्गलं त्रिदश - दानव - देशिकेड्यम् ।
यत्तत्पदं ग्रहपदं विशदं च विष्णोर्नित्यानवद्यमिह कस्य भवेन्न वन्द्यम् ॥ १०५ ॥

तत्तत्स्वभक्तजन - वाञ्छितपूर्तये यस्तत्तद् - ग्रहाकृतितया भुवने विभाति ।
सर्वात्मने निजजनार्तिहराय तस्मै श्रीविष्णवे मम सदाऽस्तु सखि प्रणामः ॥ १०६ ॥
आलेपो न मृजाऽपि सद्मनि कृता नाकारि पाकः कुतः किं कार्यान्तरमन्तरे समुदितं किं वा वृथा भ्राम्यसि ।
पृष्टैवं प्रतिवेशिनीं प्रति परा प्रोचे प्रभाते मया तस्यास्यं स्मितचञ्चलाक्षिकमनुस्मृत्याखिलं विस्मृतम् ॥ १०७ ॥
सायं साध्यमुषः करोषि किमिति भ्राम्यन्मनास्त्वं सखीत्युक्ता कापि कयाचिदेवमवदद् भ्रान्ता त्वमेवाऽऽलयसि ।
सन्ध्यातिक्रमणं यथार्थमभवच्चेन्नागतोऽद्याप्यसौ कस्माद्वेणुमुदीरयन् कलितगोसङ्गो मुकुन्दः सखा ॥ १०८ ॥
आप्रातः पुनराप्रभातमखिलं त्यक्तान्यकार्यं मनो लग्नं तत्र भवत्यनुस्मृतिपदं नीत्वैव रासोत्सवम् ।
मुक्तिः सुप्तिरथानुरक्तिरपि वाऽन्यत्रेति किं पृच्छसि यत्किञ्चिद्विहितं भवेदवशतस्तस्यांशतो न स्मृतिः ॥ १०९ ॥
श्वश्रूः क्रुध्यतु कुप्यतु प्रतिपदं भर्ता पिता यातरो निन्दन्तु व्रजगोजनोऽप्यपवदत्वश्राव्यमन्योऽपि वा ।
यास्याभ्यास्यमवेक्षितुं यदुपतेरित्युक्तिरिष्टार्थदा यत्रासीत्तदहो गतं किमधुना कृत्यैरकृत्यैरहो ॥ ११० ॥
पश्याम्यास्यमपास्य कृत्यमपरं पास्यामि तद्वाक्सुधां तत्पादस्थरजो मृदु स्ववसनैः सम्मार्जयिष्ये स्वयम् ।
इत्थं व्यापृतचेतसा सखि मया नालोचि कीदृग्गृहाचारोऽस्त्यत्र मनागपीत्यनिपुणा धीस्तत्र सिद्धैव मे ॥ १११ ॥
आयास्याम्यबला इहेति च समुद्याने यदुक्तं वचस्तत्सत्यं किमसौ करिष्यति सखि प्राप्तोत्तमश्रीरिति ।
सर्वं कार्यमपास्य वेश्मगमलं नित्यं प्रसक्तं दिने तत्सत्यश्रुतिदत्तदृष्टिरखिलं दुःखं क्षिपाम्यन्वहम् ॥ ११२ ॥
गोष्ठीभिर्वितथप्रपञ्चरचना - भाग्भिस्तवाभिः सखि किं कुर्यामहमागता दधिपयोऽनास्थाप्य शिक्योपरि ।
प्राप्तश्चेत् सहसा गृहान्तरमसौ पाटच्चराग्रेसरो बालेभ्यो वितरिष्यतीति सखि मे लग्नं तदस्मिन् मनः ॥ ११३ ॥
कृष्ण त्वं वितर स्वयं दधिपयः सन्दर्शितं यन्मया मद्गेहस्थितमेतदत्ति तदहो कामं विना मां भवान् ।
तत्क्षिप्रं तव मे च मातृसविधे गत्वा ब्रुवे त्वत्कृतिमित्युत्स्वप्नवतां श्रुतं स्फुटपदं सख्यः शिशूनां वचः ॥ ११४ ॥
नान्नं पेयमपि त्वया विरहितः सोऽश्नाति नो वा पिबत्येतद् वत्स कथं विना तमधुना पातुं प्रवृत्तः पयः ।
सद्यस्तप्तमिदं तदन्तरसितं साकं पिबानेन तत्तूष्णीं तिष्ठ शिशो किशोरचरितः श्रीशोऽधुनैवेष्यति ॥ ११५ ॥
विश्वव्याप्तिरनामयाऽस्य जगतीत्युक्तं व्रजेशेन तद्गर्गोक्तीरवधार्य सच्छ्रुतिलसत्प्रामाण्यधूर्वाहिकाः ।
तत्सत्यं यदि तत्कुतो दधिपयो न प्राग्विवात्ति प्रभुः का शङ्काऽस्त्यथवाऽऽत्तमेव यदिदं न्यूनं समालक्ष्यते ॥ ११६ ॥
त्वं मत्तः सखि पुण्यवत्यसि यतः स्वप्नोपभोगस्त्वलं लब्धस्तेन सहाच्युतेन सहसा सोऽप्यद्य मे दुर्लभः ।
त्वं मत्तः सखि पुण्यवत्यसि यतः सम्प्राप्तजाग्रत्स्थितिप्राप्तैतद्विरहस्मृताच्युतपदा जाता न जातास्म्यहम् ॥ ११७ ॥
नीतस्त्वं मथुरां श्वफल्कजनुषा यातस्त्वमप्यच्युतेत्यल्पोऽनल्पतरं प्रजल्पतु जनो ब्रूहि त्वमप्यन्ततः ।
मच्चेतः सितभित्तिचित्रलिखित - त्वन्मूर्तिना प्राक्तनात् सान्निध्यं त्वधुनाऽधिकं कृतवता ध्यानेन नाहं ब्रुवे ॥ ११८ ॥
शीघ्रं स्वीकुरु चारुपत्ररचनां पुष्पोपभोगं च मे जम्बीरा ऽऽम्रज नारिकेलफलभावेतावधीशस्तनौ ।
स्वादुस्वच्छतराधरामृतमपि प्रेम्णा गृहाणेश यत् पत्रं पुष्पफलं जलं च भजकैर्गृह्णासि भक्त्यार्पितम् ॥ ११९ ॥
इष्टप्राप्तिरनिष्टशान्तिरथ च श्रीकृष्णनाम्नि स्थिता नामैवास्य च कामदं सुदिनताप्यह्नीह तत्कीर्तनात् ।
निर्विघ्नाखिलपर्वसर्व - विषयव्यापार - भव्योदयं नामैवेति सखि स्मराभ्युषसि तन्नामैव सन्मङ्गलम् ॥ १२० ॥
हे कृष्णाऽच्युत वासुदेव भगवन् हे पूतनारे हरे जिह्वान-स्तृण-वत्स-धेनुक-बका-ऽरिष्ट-प्रलम्बापह ।
हे दुःसर्पगदापनोदनपटो हे दावसंत्राणकृद्धे गोवर्द्धनधारकैह्यवच मां हे रासशिक्षागुरो ॥ १२१ ॥
हे गोपालक नन्दमोचक विभो हे शङ्खचूडापह हे व्योमान्तक केशिसूदन लसत्कुञ्जान्तरङ्गस्थिते ।
हे गोपीहृदयाम्बुजोज्ज्वलरसग्राहिन् गुणक्षीरधे क्षिप्रं देहि सुदर्शनं निजमघप्राग्भारहारिन् प्रभो ॥ १२२ ॥
कृष्णा गौर्मम कृष्ण एव शिशुरप्यात्माऽपि कृष्णोऽञ्जनं कृष्णं कृष्णमणिर्गलेऽम्बरमिदं कृष्णं च कृष्णः पतिः ।
कृष्णः केशचयश्च पत्ररचना कृष्णा च कृष्णं पयो नद्यास्तत्सखि नास्ति मे पलमपि श्रीकृष्णनाम्नोऽस्मृतिः ॥ १२३ ॥
यो व्यापारः श्रीधरानन्ददायी सद्यो येन क्षीयते दुर्निमित्तम् ।
श्रीशप्राप्त्यै तं विदध्यात्कृतीति व्यक्तं दध्नो मन्थनाद्गीतिपूर्वम् ॥ १२४ ॥

कृष्णप्रिया

राजन् ! यह मन्थन दर्शन दिव्य था, कर सरोज में उत्कृष्ट प्रकार के अनेक कङ्कणों को धारण करने रज्जूओं को खींचने वाली, दधि मन्थन के कारण चलायमान नितम्ब, स्तन, वक्षःस्थल के रत्नहार एवं रत्न कुण्डलों वाली, की कान्ती से कुंकम से अधिक लावण्य वाले कपालों से सुशोभित मुखकमल वाली गोपियाँ प्रातः काल में प्रकट किए दीपकों की कान्ति-ज्योति से चमकती मणियों से अधिक सुन्दर लग रही थी ॥ ४५ ॥ राजन् कोटि कन्दर्प लावण्य कमल नयन भगवान् कृष्ण के गुणों का

गान करने वाली व्रजाङ्गनाओं की मधुर मङ्गल गीत ध्वनि स्वर्ग को छूने लगी। पुनः वह मान ध्वनि दहीं मन्थन की ध्वनि से मिश्रित थी। यह मिश्रित मङ्गल ध्वनि दिशाओं के अमङ्गलों को हटाकर विविध मङ्गलों का प्रदान कर रही थी॥ ४६॥

भगवत्युदिते सूर्ये [1]नन्दद्वारि व्रजौकसः। दृष्ट्वा रथं शातकौम्भं कस्यायमिति चाब्रुवन्॥ ४७॥
अक्रूर आगतः किं वा यः कंसस्यार्थसाधकः। येन नीतो मधुपुरीं कृष्णः कमललोचनः॥ ४८॥
किं साधयिष्यत्यस्माभिर्भर्तुः [2]प्रेतस्य निष्कृतिम्। [3]इति स्त्रीणां वदन्तीनामुद्धवोऽगात् कृताह्निकः॥ ४९॥

इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे[5] [6]नन्दशोकापनयनं नाम [7]षट्चत्वारिंशोऽध्यायः॥ ४६॥

कर्दमक्षमा

अन्वयः—सूर्ये, भगवति, उदिते, व्रजौकसः, नन्दद्वारि, शातकौम्भम्, रथम्, दृष्ट्वा, अयम्, कस्य, च, इति, अब्रुवन्॥ ४७॥ येन, कमललोचनः, कृष्णः, मधुपुरी, मीनः, यः, कंसस्य, अर्थसाधकः, सः अक्रूरः आगतः, किम् वा॥ ४८॥ किम्, अस्माभिः, प्रेतस्य, भर्तुः, निष्कृतिम्, साधयिष्यति? इति, वदन्तीनाम्, स्त्रीणाम्, समीपे, कृताह्निकः उद्धवः, अगात्॥ ४९॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्द्धे राजसप्रमेयप्रकरणे षट्चत्वारिंशोऽध्यायः सम्पूर्णः॥ ४६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदा व्रजौकसो गोप्यः॥ ४ ॥ सक्रोधमाहुः। अक्रूर इति। अर्थं साधितवानित्यर्थसाधकः। तदाहुः। येन नीत इति॥ ४८॥ कंसं घातयित्वा पुनः किमर्थमागत इत्याशंक्य स्वयमेव कारणं सम्भावयन्ति। किमिति। तदा तथा साधितेन कार्येण प्रीतस्य तुष्टस्य भर्तुः। पाठान्तरे। प्रेतस्य मृतस्य कंसस्य निष्कृतिमौर्ध्वदेहिकमस्माभिः कृत्वा साधयिष्यते किम्। अस्मद्रक्तमांसैः तिलोदकं पिंडांश्च कृत्वा दत्त्वा तस्यौर्ध्वदैहिकं सम्पादयिष्यति किमिति भावः। इत्येवं वदन्तीनां स्त्रीणां ततस्तस्मिन्नवसरे कृताह्निकः कृतस्नानादिनियम उद्धव आगत इति॥ ४९॥

इति श्रीमद्भागवते म० दशमस्कन्धे पूर्वार्धे टीकायां षट्चत्वारिंशोऽध्यायः॥ ४६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदा सूर्योदये। शातकौम्भं सुवर्णबहुलम्। 'शात कौभं सुवर्णे च घटपुंजेऽश्वमारके' इति मेदिनी। भगवतीति तमोनाशनादिशक्त्यभिप्रायेण भगवत्पूजाधिष्ठानादिना वा। तादृशी स्तुतिश्च तदुदयस्य सर्वेषां व्रजवासिनां श्रीकृष्णवार्ताप्राप्तिसुखमयहेतुतया सन्तोषेण। व्रजौकसः पुरुषाः, स्त्रीणां वक्ष्यमाणत्वात्। तदेति तच्छब्दप्रयोगश्च सदा व्रज एव निवासात्तद्रथाऽपरिचये हेतुः। किञ्च–शातकौम्भं स्वर्णपरिवृतमिति वैलक्ष्यण्यमुक्तमतोऽयं कस्येत्यब्रुवन्। चकारादनुक्तञ्चान्यत्किञ्चित्समुच्चिनोति॥ ४७॥ स्वयमाक्षिप्य समादधिरे–कंसेत्यादिना। येनाक्रूरेण। अथोत्कण्ठाप्रधानान्तःपातिनीनां कासाञ्चिद्वाक्यमाह–अक्रूर इति द्वाभ्याम्। मधुपुर्यधिकारित्वदैत्यत्वाभ्यां कंसोऽपि मधुस्तस्य पुरीमिति, तस्यां तन्नयनाऽयोग्यता। कृष्ण इति नास्मत्पुत्रादिरन्योऽपि किन्तु स्वयमेव कृष्ण इति, तत्रापि कमललोचन इति विशेष्यसौन्दर्यविशेषसर्वतापहारितागुणविशेषस्मरणेन निजहृदयार्तिविशेषं निवेदयन्ति। अत एव तादृशस्य व्रजाद्बहिरपि नयनमयुक्तं किमुत मधुपुर्यामिति भावः। यद्वा–क्रुद्धा आहुः—यः कंसस्यार्थं साधितवानिति सः॥ ४८॥ निष्कृतिं प्रीतिम् "स्यान्निष्कृतिरौर्द्ध्वदैहप्रीत्यानृण्येषु कृत्रिमे" इति धरणिः। प्रेतस्य परलोकं गतस्य। किमिति वितर्के। इत्यर्थ इति—मृतोद्देशेन मांसेन श्राद्धं बहुतृप्तिकरं भवतीत्यर्थः। ततस्तासां कथनोत्तरम्। तस्मिन्नवसरे कथनोत्तरक्षणे। यद्यपि स्वभर्तुः कंसस्यैवार्थसाधनाय श्रीकृष्णं नीतवाँस्तथापि दैवात्तस्मिन्घातिते स्वार्थसाधनाय तत्रैव श्रीकृष्ण रक्षित्वा यत्पुनरत्रागतस्तन्नूनमेवमभिप्रायेणैवेत्यभिप्रेत्याहुः–किमित्यर्धेन। पूर्वं प्रीतस्य पश्चाद्दैवादन्यथात्वं प्राप्तस्येत्यर्थः। पाठान्तरे प्रेतस्यापि निष्कृतिमानृण्यमिति। ततस्तादृशोक्तिश्रवणात्॥ ४९॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे षट्चत्वारिंशोऽध्यायः॥ ४६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भगवतीति। तमोनाशनादिशक्त्यादिरूपेण श्रीभगवत्पूजाधिष्ठानत्वादिना वा। तादृशी स्तुतिश्च तदुदयस्य सर्वेषां व्रजवासिनां श्रीकृष्णवार्त्ताप्राप्तिसुखसमयो हेतुतया सन्तोषेण। व्रजौकसः पुरुषाः। स्त्रीणां वक्ष्यमाणत्वात्। तच्छब्दप्रयोगश्च सदा

---

१. व्रजद्वारि–वीर. विज.। २. प्रेतस्य–वीर.। ३. तत्र–प्रा. पा। ४. पारमहंस्यां संहितायां–प्रा. पा.। ५. पूर्वार्द्धे–प्रा. पा.। ६. उद्धवयानं नाम–प्रा. पा.। ७. चतुश्च–विज.।

व्रज एव निवासात्तद्रथापरिचये हेतुः । किञ्च शातकौम्भं स्वर्णपरिवृतमिति वैलक्षण्यमुक्तम् अतोऽयं कस्येत्यब्रुवन् । चकारादनुक्तं चान्यत् किञ्चित् समुच्चितेति ॥ ४७ ॥ अथोत्कण्ठाप्रधानान्त पातिनीनां कासाञ्चिद्वाक्यमाह । अक्रूर इति द्वाभ्याम् । मधुपुर्यतीकारित्वदैत्यत्वाभ्यां कंसोऽपि मधुः किञ्च तस्य पुरीमिति तस्तर तन्नयनायोग्यतोक्ता । कृष्ण इति । हन्त नास्मत्पुत्रादिरन्योऽपि किन्तु स्वयवेव कृष्ण इत्यर्थः । तत्रापि कमललोचन इति । विशेष्यसौन्दर्यविशेषसर्वतापहारितागुणविशेषस्मरणेन निजहृदयार्त्तिविशेषं निवेदयन्ति । अत एव तादृशस्य व्रजाद्बहिरपि नयनमयुक्तं किमुत मधुपुर्यामिति भावः ॥ ४८ ॥ यद्यपि स्वभर्त्तुःकंसस्यैवार्थसाधनाय श्रीकृष्णं नीतवांस्तथापि दैवात्तस्मिन् घातिते स्वार्थसाधनाय तत्रैव श्रीकृष्णं रक्षित्वा यत् पुनरत्रागतस्तन्नूनमेवमभिप्रायेणैव इत्यभिप्रेत्याहुः । किमित्यर्धेन । पूर्वं प्रीतस्य पश्चाद्दैवादेयान्यथात्वं प्राप्तस्येत्यर्थः । पाठान्तरे प्रेतस्यापि निष्कृतिमानृण्यमिति ततस्तादृशोक्तिश्रवणात् स्त्रीणां तत्तद्गृहवर्त्तिनीनां सर्वासामेवं वदन्तीनां तास्वपि तथैव परस्परं वदन्तीष्वपीत्यर्थः । पष्ठी श्रुतत्राप्यश्रुतवदाचरणेन श्रीमदुद्धवस्य तदादराव्यञ्जनात् । अगाद्यत्र श्रीकृष्णप्रेयस्यस्ता नित्यं मिथःसमदुःखतया मिलित्वा वसन्ति तमेव स्थानविशेषमेकान्तमन्विष्य गत इत्यर्थः । एवमुक्तः विस्तारदैर्घ्ययोश्चतुरष्टौ क्रोशान् व्याप्तस्य व्रजस्य नानागृहस्थानां तासां परोक्षाणां युगपदेव सहसा तद्दर्शनासम्भवात् । अगृहाणामग्रतो न इति तासां गृहपरित्यागस्य व्यञ्जयिष्यमाणत्वात् । मिलित्वा कृतवनवासत्वादेवासनादिभिस्तदातिथ्यस्य भ्रमरागमनस्यापि वक्ष्यमाणत्वात् । रहस्यपृच्छन्नुपविष्टमासन इत्यहं भर्त्तुरहस्कर इति वक्ष्यमाणत्वात् व्रजस्य वर्त्मनि गृहे च कस्मिंश्चित्तत्तदसमावेशात् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवतीति तमोनाशनादिशक्त्यभिप्रायेण श्रीभगवत्पूजाधिष्ठानत्वादिना वा । व्रजौकस इति सदा व्रज एव निवासात्तद्रथापरिचये हेतुः । किञ्च, शतकौम्भं सर्वनिर्म्मितमिति वैलक्षण्यमुक्तम् ; अतोऽयं कस्येत्यब्रुवन् । च-कारादक्रूररथस्मरणेन विलक्षणं प्रारुदंश्चेत्यर्थः । तत्र व्रजौकसो गोप्य इति तैर्व्याख्यातम् । स्त्रीणां वदन्तीनामिति वक्ष्यमाणत्वात् । यद्वा, सर्व्वे एव व्रजवासिनोऽब्रुवन् । ततश्च तेषां तादृशोक्तिश्रवणात्तथैव वदन्तीनां स्त्रीणामित्यर्थः ॥ ४७ ॥ मधुनामा महादैत्यस्तस्य पुरीमिति श्लेषेण तस्यां तन्नयनायोग्यतोक्ता; किञ्च, कृष्णः परमानन्दघनमूर्त्तिरस्मत्प्राणेश्वरः किञ्च, कमललोचन इति दृष्टिमात्रेण सर्व्वतापापहारित्वादिकमभिप्रेतम् , अत एतादृशस्य व्रजात्तत्र नयनमयुक्तमेवेति भावः ॥ ४८ ॥ किमिति तैर्व्याख्यातम् । यद्वा, तादृशमिव रथं दृष्ट्वा अक्रूरमागतं मत्वार्तिभरोदयेन मिथो मनोरथं कुर्वन्ति—किमिति । प्रेतस्यापि निष्कृतिमानृण्यम् । अन्यत् समानम् । तदा गमनप्रयोजनाविचारणं च वैजल्याद्युक्तमेवागात् , व्रजान्तः प्राप्तः । अतएव तैर्व्याख्यातम्—आगत इति ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अस्माभिः मृताभिरित्यभिप्रायः निष्कृतिं प्रतीकारम् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो भगवत्यादित्ये उदिते सति व्रजौकसो गोप्यः नन्दद्वारि शातकौम्भं सुवर्णालङ्कारं रथं दृष्ट्वा कस्यायमित्यूचुः सक्रोधमिति शेषः ॥ ४७ ॥ तदेवाह सार्द्धेन । अक्रूर इति । किं वा सोऽक्रूरः आगतः कोऽसौ यः कंसस्यार्थं प्रयोजनं साधितवान् तदाहुः । येन च श्रीकृष्णो मधुपुरीं नीतः प्रापितः ॥ ४८ ॥ कंसं घातयित्वा पुनः किमर्थमागत इत्याशङ्क्य कार्यं सम्भावयन्ति । किमिति । तथा साधितेन कार्येण प्रेतस्य मृतस्य भर्तुः कंसस्य निष्कृतिमौर्ध्वदैहिकमस्माभिः कृत्वा साधयिष्यति किमस्मन्मांसैः पिण्डान् कृत्वा दास्यति किमित्यर्थः । इतीति शुकोक्तिः इत्थं स्त्रीणां वदन्तीनां तस्मिन्नेवावसरे कृतस्नानादिनियम उद्धवोऽगादाजगाम ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

शातकौम्भं शातकुम्भेन सुवर्णेन विरचितम् ॥ ४७-४८ ॥ प्रेतस्य मृतस्य भर्तुः कंसस्य निष्कृतिमानृण्यमस्माभिः करिष्यति अस्मद्दण्डेन कर्तुमिच्छति किमित्यर्थः । इति वदन्तीनां कृताह्निकः अनुष्ठितप्रातःकालक्रियः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यांचतुश्चत्वारिंशोऽध्यायः ॥ ४४-४६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

व्रजौकसः पुरुषाः स्त्रीणां वक्ष्यमाणत्वात् ॥ ४७-४८ ॥ अगात् यत्र श्रीकृष्णप्रेयस्यस्तं प्रत्यहं मिथःसमदुःखतया मिलन्ति तमेव स्थानविशेषमेकान्तमन्विष्य गत इत्यर्थः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

व्रजौकसो विरीहण्यो गोप्यः ॥ ४७ ॥ सक्रोधमाहुः । अक्रूर इति । अर्थं साधितवानिति सः ॥ ४८ ॥ कंसं घातयित्वा पुनः किमर्थमागत इत्याशङ्क्य कार्यं सम्भावन्ति । किमिति । तदा साधितेन कार्येण प्रीतस्य भर्तुः प्रेतस्येति पाठे मृतस्य कंसस्य निष्कृतिमौर्ध्वदेहिकम् अस्माभिः कृत्वा साधयिष्यते अस्मन् मांसैः पिण्डान् कृत्वा दास्यतीत्यर्थः इति वदन्तीनां समीपमाजगाम ॥ ४९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । षट्चत्वारिंशकोऽध्यायो-दशमेऽजनि सङ्गतः ॥ ४६ ॥

गूढार्थदीपिनी

व्रजौकसः व्रजवासिन्यः गोप्यः । शातकौम्भं सुवर्णालङ्कृतम् ॥ ४७ ॥ अर्थः कार्यम् ॥ ४८ ॥ प्रेतस्य मृतस्य कंसस्य निष्कृतिम् और्ध्वदेहिकम् अस्माभिः अस्मन्मांसपिण्डैः सम्पादयिष्यति किमिति वितर्के ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

व्रजौकसो गोप्यः ॥ ४७ ॥ कंसस्य अर्थं साधितवानित्यर्थसाधनः पूर्वं यः कंसं जीवितरूपादर्थाद्वियोज्य लोकान्तरमर्थं तस्य साधितवान् स अक्रूर आगतः किम् ॥ ४८ ॥ पुनरागमने प्रयोजनं सम्भावयन्ति । किमिति । प्रेतस्य मृतस्य निष्कृतिमानृण्यम् अस्माभिः कृत्वा साधयिष्यते किम् अस्मन्मांसैः पिण्डान् कृत्वा दास्यति किमित्यर्थः । कृताह्निकः कृतस्नानादिनियमः अगात् आगतः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षट्चत्वारिंशाध्यायार्थप्रकाशः ॥ ४६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भगवति पूज्ये सूर्ये उदिते सति व्रजौकसो गोप्यो व्रजद्वारि शातकौम्भं सुवर्णमयं रथं दृष्ट्वा कस्यायं रथ इति चाब्रुवन् ॥ ४७ ॥ यः कंसस्यार्थसाधक एकदेशान्वयस्तु नित्यसापेक्षत्वाद्युक्तः । सोऽक्रूरः किं वाऽऽगतो येन कमललोचनः कृष्णो मथुरापुरीं नीतः सः ॥ ४८ ॥ कर्तव्यान्तरं न दृश्यते स कुत आगच्छेदित्यतः प्रेतस्याभिप्रेतं किं वा कर्तुमिति प्राचीनभीतित उत्प्रेक्ष्योत्पलाक्ष्यो वदन्ति । किमिति । प्रेतस्य मृतस्य भर्तुः स्वास्वामिनः कंसस्य निष्कृतिमानृण्यमस्माभिः प्रत्यक्षतो हृताभिः साधयिष्यति किमित्यन्वयः । इति स्त्रीणां वदन्तीनां कृतप्रातःसन्ध्योपास्त्यादिक उद्धवोऽगाद्यत्र ता आसते तं देशम् ॥ ४९ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायांदशमपूर्वार्धे चतुचत्वारिंशोऽध्यायः ॥ १०—४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं तासां जिज्ञासापर्यन्तं निलीयैव स्थित इति वक्तुं जिज्ञासाप्रकारमाह । भगवत्युदित इति । वाच्यार्थानुपयुक्ता कथा नोच्यत इति उद्धवस्य प्रातः कृत्यं नोक्तं तद्दिनसूर्यः भगवत्स्मारक इति गोपिकानामुद्धवस्य च परमपुरुषार्थदायीति सूर्यस्य भगवत्त्वमुक्तं नन्दस्य राजगृहवद्भिन्न एव व्रज इति तद्द्वार्येव रथः स्थापित इति मुखतया स्थितः । किं बहुना सर्व एव वृत्तान्तानभिज्ञाः नन्दादीनां तत्सम्बन्धिनां चायं रथो न भवतीति शातकौम्भत्वात् सर्वतः सुवर्णेनालंकृतत्वात् निश्चित्य कस्यायं रथ इत्यब्रुवन् चकाराद्विचारितवन्तः पृष्टवन्तश्च ॥ ४७ ॥ ततः कस्यचित्पुरवासिनो राजकीयस्य सम्बन्धी रथ इति निश्चित्य पूर्वमागतत्वात् अक्रूर एव लब्धस्वादुः पुनरागत इति सम्भावनां कृतवत्यः तदाह । अक्रूर आगतः किं वेति । प्रायेणाक्रूरेणैवेयं भूर्दृष्टेति अक्रूर एवागतः तथापि प्रयोजनाभावात् तस्यागमनं न सम्भवतीति बाधकज्ञानात् सम्भावना । ननु सर्वेषु विद्यमानेषु सुतरां वसुदेवादिषु किमित्यक्रूर एव सम्भाव्यत इत्यत आह । यः पूर्वं कंसस्य अर्थं पुरुषार्थं साधितवान् विपरीतोक्त्या वदन्ति वस्तुतस्तु परमपुरुषार्थं मोक्षं साधितवानेव ननु भवतीनां तस्मिन् कोऽयं दोष इत्याहुः । येन नीतो मधुपुरीमिति । कृष्णः फलात्मा कमललोचनः फलसाधनमैहिकफलरूपो वा ॥ ४८ ॥ तर्हि तादृशस्य कृतकार्यस्य द्विष्टस्य च कथं पुनरागमनमिति चेत्तत्राहुः । किं साधयिष्यतीति । प्रायेणास्मान् गोपिकाः विशेषाकारेण नेतुमागतः नीत्वा च प्रेतस्य कंसस्य निष्कृतिं करिष्यति स हि स्वार्थं

नीत्वा स्वपुरुषार्थमप्यसाध्य अस्मत्पुरुषार्थमपि नाशयित्वा जनैराकृष्टः तदापराधपरिहारार्थं कृष्णमत्र प्रेषयितुमसमर्थः अस्मानेव तत्र नेष्यति तावता निष्कृतिर्भवति भर्त्सनापवादः परिहृत इति। अन्ये तु मृतस्य कंसस्य दैत्यत्वाद्रुधिरं मांसप्रियस्य मांसं दातुं सुतरामस्मान्नयति तथा च सति यथापूर्वमनोरथो विपरीतो जातः एवमयमपि भविष्यति ततो भगवानेव बलिं दास्यति भ्रान्तोऽयं समागत इति उपहासमुक्तवत्य इत्याहुः तदेवाह। किं साधयिष्यति न किञ्चिदिति। इदं विशेषाकारेण वचनं स्त्रीणामेवेति वदन् पूर्वभावमुपसंहरति। स्त्रीणामिति वदन्तीनां सतीनां क्षणं विलम्बे शापमपि दद्युः भयादागत इति पक्षं व्यावर्त्तयति। कृताह्निक इति। प्रातः काल एव सर्वमाह्निकं कृतवान् अग्रे महती व्यावृत्तिरिति। उद्धवत्वादेव न भयं द्वितीयो भगवत्संदेशः गोपीनां मद्वियोगाधिमिति सोऽग्रे प्रारम्भणीय इति पूर्वसमाप्तिः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां त्रिचत्वारिंशाध्यायविवरणम् ॥ ४३–४६ ॥

श्रीसुबोधिनी–सारः

भगवति सूर्ये उदिते सति व्रजद्वारि नन्दद्वारि शातकौम्भं सुवर्णरसांकितं रथं दृष्ट्वाऽयं रथः कस्येति व्रजौकसो व्रजवासिनोऽब्रुवन् ॥४७॥ यः कंस स्यार्थसाधक आज्ञाकरः सोक्रूर आगतः किं वा कमललोचनः पद्मनेत्रः कृष्णो येन मधुपुरीं नीतः ॥४८॥ प्रेतस्य भर्त्तुरस्माभिः किं निष्कृतिं साधयिष्यति इति स्त्रीणां वदन्तीनां सतीनां कृतमाह्निकं स्नानादि येन स उद्धवोऽगात् आगतः ॥ ४९ ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायां षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च भगवति सूर्ये उदिते सति व्रजौकसो व्रजवासिगोपीजनाः नन्दद्वारि शातकौम्भं सुवर्णालङ्कृतं रथं दृष्ट्वा अयं रथः कस्येति चकाराद्वक्ष्यमाणं चोचुः ॥ ४७ ॥ तदुक्तिमाह—'अक्रूर' इति सार्धेन। किं वा सोऽक्रूरः पुनरागतः ? 'कोऽसौ' इत्यपेक्षायामाह—यः। कंसस्यार्थसाधकः प्रयोजनसम्पादकः। प्रयोजनसम्पादनमेव दर्शयति—येनाक्रूरेण कंसप्रयोजनसिद्ध्यर्थं कृष्णो मधुपुरीं नीतः प्रापित इति। 'कृष्णदर्शनादिनाऽस्माकं सर्वतापनिवृत्तिरासीत् तदपहारेण तु तेन पुनर्वयं सन्तप्ताः कृता' इति सूचयन्त्य आहुः—कमललोचन इति ॥४८॥ अस्मद्दुःखदातृत्वेनैवास्य फलवैपरीत्यं जातम्, कंस एव मृतः। अत इदानीं तत्प्रयोजनाभावात् किमर्थं पुनरागत' इत्यपेक्षायां प्रयोजनं सम्भावयन्ति—किमिति। प्रेतस्य मृतस्य भर्तुः कंसस्य निष्कृतिमौर्ध्वदैहिकं किमस्माभिः कृत्वा साधयिष्यति ? किमस्मन्मांसैः पिण्डान् कृत्वा तस्मै दास्यतीत्यर्थः। इत्येवं स्त्रीणां वदन्तीनां सतीनां तस्मिन्नेव समये कृताह्निकः कृतस्नानादिनियमः उद्धवोऽगात् ॥ ४९ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने। षट्चत्वारिंशको यातो नन्दसान्त्वनबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

भगवतीति। भगवति सूर्ये उदिते सति व्रजौकसो व्रजवासिगोपीजनाः नन्दद्वारि शातकौम्भं सुवर्णालङ्कृतं रथं दृष्ट्वा अयं रथः कस्येति चकारात् वक्ष्यमाणं च अब्रुवन् ॥ ४७ ॥ उत्कण्ठाप्रधानाः काश्चिदाहुः–अक्रूर इति। यः कंसस्यार्थस्य साधकः अतः येन कमललोचनः कृष्णः मधुपुरीं नीतः स अक्रूर एव वाऽऽगतः किम् ॥ ४८ ॥ किमिति। साधितेन कार्येण प्रीतस्य तुष्टस्य। प्रेतस्येति पाठे मृतस्य भर्तुः कंसस्य निष्कृतिमौर्ध्वदहिकं किमस्माभिः कृत्वा साधयिष्यति किमस्मन्मांसैः पिण्डान् कृत्वा तस्मै दास्यतीत्यर्थः। इत्येवं स्त्रीणां वदन्तीनां सतीनां तस्मिन्नेव समये कृताह्निकः कृतस्नानादिनियमः उद्धवः गोपीनां समीपमगात् ॥ ४९ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्। गङ्गासहायो दशमषट्चत्वारिंशके व्यधात् ॥
इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायां षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रेतस्य मृतस्य भर्त्तुः कंसस्य निष्कृतिं आनृण्यं वैरग्रहणमिति यावत्। अस्माभिः साधयिष्यते किं अस्माकं हननेन वैरग्रहणं करिष्यति किमित्यर्थः ॥ ४७ ॥

इति श्रीशुद्धैकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने गुरुपुत्रानयन नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवतीति ॥ ततः भगवति सूर्ये, उदिते सति, व्रजौकसो गोप्यः, नन्दद्वारि, शातकौम्भं सुवर्णालंकारं, रथं दृष्ट्वा, कस्य अयं, इति च एवमपीत्यर्थः। अब्रुवन् ऊचुः। सक्रोधमिति शेषः ॥ ४७ ॥ तदेवाह सार्द्धेन ॥ अक्रूर इति ॥ यः कंसस्य अर्थसाधकः कंसप्रयोजनं साधितवान्, येन कमललोचनः कृष्णः, मधुपुरीं मथुरां, नीतः संप्रापितः, सः अक्रूरः, आगतः किं वा ॥ ४८ ॥ कंसं घातयित्वा पुनः किमर्थमागत इत्याशङ्क्य कार्यं संभावयन्ति ॥ किमिति ॥ प्रेतस्य तथा साधितेन कार्येण मृतस्य, भर्त्तुः, निष्कृतिमौर्द्ध्वदैहिकं, अस्माभिः कृत्वा, साधयिष्यति किम्। अस्मन्मांसैः पिण्डान् कृत्वा दास्यति किमित्यर्थः। इतीति शुकोक्तिः। इतीत्थं, स्त्रीणां गोपीनां, वदन्तीनां सतीनां, तस्मिन्नेवासरे इति शेषः। कृताह्निकः विहितस्नानादिनियमः उद्धवः, 'अगादा-जगाम ॥ ४९ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे नन्दशोकापनयनं नाम षट्चत्वारिंशोऽध्याय. ॥ ४६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

भगवत्युदित इति : १०.४६.४७.

येनाऽगाधतमः प्रयाति विलयं प्रत्यर्थि चार्थग्रहे यस्मादक्षिण च पाटवं विजयते यः सर्वदोषापहः।
यस्मै सद्गुणिने नमन्ति निखिला यं स्वप्रकाशं विदुर्विज्ञा यत्र च साक्षिताऽखिलकृतेर्यस्य प्रसादोऽर्थदः ॥ १२५ ॥
यो वेदमृग्यो रसदानदीक्षो यः स्वैर्गुणै रञ्जितभूरिपद्मः। हृद्रोगहर्ता सकलेष्टदाता यश्चामृतात्माऽऽश्रितपर्वशाली ॥ १२६ ॥
हरेस्तस्योदयस्तासामेवं नन्दितचेतसाम्। स्वान्तेऽभवद् वृत्तिरोधी वह्निव्याप्तृतिहेतुकः ॥ १२७ ॥
(विशेषकम्)

अक्रूर इति : १०.४६.४८.

निष्फलापि करोत्यार्तिं प्राग्दृष्टाऽश्लीलकर्मजा। भीतिस्तद्युक्तमेवासां साऽऽसीत्तद्रथदर्शनात् ॥ १२८ ॥
एवं भूरितराणि चित्रचरितान्यन्यान्यपि श्रीपतेर्गीतानि व्रजकामिनीभिरुषसि श्रीशानुरक्तात्मभिः।
श्रावं श्रावमसीमचित्तसुखदान्यद्धा स बद्धादरः श्रद्धायां स्वयमुद्धवः प्रथमतो मोदाब्धिमग्नोऽभवत् ॥ १२९ ॥

कृताह्निक इति : १०.४६.४९.

नित्यकृत्यं तु कर्तव्यमेवेति विधिशासनम्। युक्तमेवोद्धवः सिद्धो विष्युक्तविहिताह्निकः ॥ १३० ॥
श्रौतकृष्णोज्ज्वलरसाभिषिक्तस्योद्धवस्य हि कृष्णोज्ज्वलरसस्नानं तदासीत्सिद्धसाधनम् ॥ १३१ ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

कृष्णप्रिया

राजन् परीक्षित्। भगवान् सूर्य नारायण के उदय होते ही, श्रीनन्दराय जी के व्रज के प्राङ्गण में सुवर्ण जडित रथ को देखकर व्रजभक्त परस्पर पूछने लगे और सोचने लगे कि यह रथ किसका है ॥ ४७ ॥ यह रथ किसी नगर में रहने वाले राजकीय सम्बन्धीं का है यह निश्चय है तो क्या अक्रूर तो नहीं आ गया होगा ! जो कंस का कार्य को सिद्ध करने वाला है। जिसने प्राण प्यारे कमल नयन श्रीकृष्ण को यहाँ से मथुरा नगर में ले जाने का क्रूर काम किया है ॥ ४८ ॥ यदि पूछा जाय कि अक्रूर क्यों आये तो हास्य में गोपाङ्गना कहती है यहाँ से श्यामसुन्दरजी को ले जाने का अनुचित कार्य का समार्जन करने के लिए हमको मधुपुरी में ले जाने के लिए आया हो अथवा तो अपने मरे हुए स्वामी का श्राद्ध से मोक्ष करने के लिए हमारे पिंड को लेने आया होगा। इस प्रकार की नारी वृन्द में हो रही थी इतने में श्री उद्धवजी अपना नित्यकर्म की समाप्ति कर आ गए ॥४९॥

श्रीमद्भागत दशम स्कन्ध पूर्वार्द्ध राजस प्रमेय प्रकरण का भाषानुवाद का ४६ वाँ अध्याय समाप्त ॥

* * *

अथ सप्तचत्वारिंशोऽध्यायः

श्लोकाः अनु. वंश. मालिनी वसंत मि. उ. उ. श्लो. अ. उ. अ. अ. अ. सं. श्लो. अ. सं. श्लो. अक्ष.
७० ५१ १ १० ६ २ ९ २७१२ ५१ ४३ २८०६ ८७।। ६

श्रीशुक उवाच

तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलम्बबाहुं नवकञ्जलोचनम् ।
पीताम्बरं पुष्करमालिनं लसन् मुखारविन्दं [1]मणिमृष्टकुण्डलम् ॥ १ ॥
[2]शुचिस्मिताः कोऽयमपीच्य[3]दर्शनः कुतश्च कस्याच्युतवेषभूषणः ।
इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदाम्बुजाश्रयम् ॥ २ ॥
तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः ।
रहस्यपृच्छन्नुप[4]विष्टमासने विज्ञाय संदेशहरं रमापतेः ॥ ३ ॥
जानीमस्त्वां यदुपतेः पार्षदं[5] समुपागतम् । भर्त्रेह प्रेषितः पित्रोर्भवान् प्रियचिकीर्षया ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—व्रजस्त्रियः, प्रलम्बबाहुम्, नवकञ्जलोचनम्, पीताम्बरम्, पुष्करमालिनम्, लसत्, मुखारविन्दम्, मणिमृष्ट, कुण्डलम्, कृष्णानुचरम्, तम्, वीक्ष्य, अपीच्यदर्शनः, अच्युतवेषभूषणः, शुचिस्मितः, अयम्, कः! च, कुतः, आगतः, कस्य, वा, पुत्रः, पौत्रो वा, इति, उत्सुकाः, सर्वाः, उत्तमश्लोक, पदाम्बुजाश्रयम्, तम्, परिवव्रुः, स्म ॥१-२॥ प्रश्रयेण, अवनताः आसने, उपविष्टम्, सुसंस्कृतम्, रमापतेः, सन्देशहरम्, विज्ञाय तम्, सव्रीडहासेक्षण, सूनृतादिभिः, रहसि, अपृच्छन् ॥ ३ ॥ पित्रोः, प्रियचिकीर्षया, भर्त्रा, भवान्, इह, प्रेषितः, इति, त्वाम्, समुपागतम्. यदुपते, पार्षदम्, जानीमः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सप्तचत्वारिंशकेऽथ कृष्णादेशेन गोपिकाः । बोधयित्वोद्धवस्तत्त्वमनुज्ञाप्यागमत्पुरीम् ॥ १ ॥

अपीच्यं सुन्दरं दर्शनं यस्य सः । अच्युतस्येव वेषो भूषणानि च यस्य सः । कोऽयं कुतो वा कस्य चेति वदन्त्यस्तं परिवव्रुः ॥ १-३ ॥ पार्षदं सेवकम् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ तत्त्वबोधानन्तरम् । ता अनुज्ञाप्य पृष्ट्वा व्रजांगनाव्यामोहोक्तिभंग्या श्रीकृष्णभक्तिमत्राध्याये वक्ति—। तमुद्धवम् । परिमृष्टे देदीप्यमाने कुण्डले यस्य स तम् । व्रजस्त्रिय इति-व्रजेऽपि श्रेष्ठत्वेन याः प्रसिद्धा भगवत्प्रेयसीरूपास्त्रियस्ता इत्यर्थः । 'व्रजस्त्रियः कृष्णगृहीतमानसाः' इत्यादिष्वपि तथैव, तत्प्रसंगे तच्छब्दप्रयोगात् । उद्धवं वीक्ष्य तं च कृष्णानुचरं वीक्ष्य तदाकारतया निभाल्य । तत्र हेतुः-प्रलम्बबाहुमित्यादि । तत्र पुष्करमाला तु प्रस्थापनसमये श्रीभगवतैव स्वकंठात्प्रसादीकृतेति गम्यते । व्रजेऽप्येतादृशतत्समनिवेशरूपा एव तदनुचरा इत्यनुमानात्तदनुचरत्वेन वितर्क्येत्यर्थः ॥ १ ॥ 'पीच-वैरूप्ये' पीचनार्हः पीच्यो न पीच्योऽपीच्यः 'अपीच्यः सुन्दरेऽनिद्ये' इति धरणिदेवः । तम् उद्धवम् । परिवव्रुः परिवेष्टितवत्यः । अतः सुविस्मिताः-अन्यत्रापि कथमेतादृशोऽस्तीति तदेतदाहुः कोऽयमिति । 'शुचि स्मिताः' इति पाठे तस्य प्रसादायारोपितस्मिता इत्यर्थः । दृश्यते इति दर्शनं रूपम् । वेषो वस्त्रतिलककेशबन्धादिः, भूषणं कटककुण्डलादि । यद्वा-अच्युतवेषभूषणे एव वेशभूणणे यस्य तम् "त्वयोपभुक्तस्रग्गन्ध वासोलंकारचर्चिताः" इत्येतद्वाक्यानुसारात् । तत्राप्यापाततोऽसंकोचे हेतुः-उत्सुकाः, कालाक्षमत्वेन विचारशून्याः । पश्चादपि तत्र हेतुः—उत्तमश्लोकः श्रीकृष्णस्तत्पादाम्बुजमेवाश्रयो यस्य तम् । यद्वा—उत्तमश्लोकपदाम्बुजयोः संवाहनार्थमुपधानवदाश्रयस्तस्य तथा तदात्मीयतां निर्धार्येत्यर्थः ॥ २ ॥ ताः किं चक्रुरित्यत आह—तमिति । तम् उद्धवम् । रमापते राधापतेरित्यनेन तस्यां तस्याऽऽसक्तिर्नान्यत्रेति सूचितम् । ततश्च तमिति तमुद्धवं रहसि रमापतेः सन्देशहरं विज्ञाय स्वयमेव पूजांगत्वेन दत्त आसन उपविष्टं सन्तं प्रश्रयेणावनताः सद्यः पुनः सव्रीडहासेक्षणसूनृतादिभिः सुसत्कृतं सन्तमपृच्छन्निति क्रमः

---

१. परि–वीर. विज. । २. सुवि–जीव. विज. । ३. मतीव–विज.; मपूर्व–प्रा. पा. । ४. परि- विज. । ५. पार्षदार्यमनुव्रतम्–विज. ।

कर्तव्यः । अत्रासन इति सामीपिकार्थमेवाधिकरणं ज्ञेयम् । तद्विधासु तस्य महाभक्तेरेव निर्णीयमानत्वात्, यतः सैरन्ध्र्यादिषु तस्य तादृशता वर्णयिष्यते इति कैमुत्यलाभाच्च । प्रश्रयेणावनता विनयनम्रशिरसः । व्रीडो व्रीडा, हासः प्रसादस्ताभ्यां युक्तमीक्षणमवलोकनं सूनृतं च स्वागतं कुशलञ्चेत्यादिप्रियवाक्यं तदादिभिस्तत्पुरःसरासनपाद्यादिभिः सुसत्कृतमादृतम्, ततश्च रहसि विजातीयभावाऽगोचरे तत्रासने उपविष्टं सन्तं तादृशरहःस्थलगमनोपवेशादिहेतो रमापतेः सन्देशहरं विज्ञाय अस्मास्वपि कमपि सन्देशमानीतवानयमिति निश्चित्यापृच्छन् । रमापतेः 'जयति तेऽधिकं जन्मना—'इत्याद्यनुसारेण तादृशतत्संपत्तिदर्शनेन ज्ञातस्य तासामेवाभिप्रायस्य प्रकटनमिति विशेष्य व्याख्येयम् । विश्वनाथस्तु—प्रश्रयेति व्याख्यातचरम् । व्रीडा स्त्रीस्वभावोत्था मूर्द्धादेरीषदावरणलक्षणा लज्जा, सा ह्यादरणीय जनसामान्यदर्शने सहसैव भवेत्, हासः स्वप्रियदास एवायमिति निश्चयेन मुखप्रसादस्ताभ्यामीक्षणं सम्पूर्णावलोकनम् । आदिना यथासमयं यथोपस्थितञ्च पाद्याद्यातिथ्यं रहसि विजातीयजनागोचरस्थले, तादृशस्थले सहसैवागमनेन तं संदेशहरं विज्ञाय । रमापतेरिति गोपीपक्षपातिनः शुकस्यासूयाद्योतनम्—सम्पति मथुरायां स्पष्टमेव परमेश्वरः, तं सुखयितुं रमैवागमिष्यति किमेतासु सन्देशप्रेषणदम्भेनेत्याकारकम् ॥ ३ ॥ यदुपतेरित्यनेनापि गोपीपतित्वाभावं सूचयन्ति । भर्त्रेहेति राधोक्तिः, न हि भर्तॄणां वनितात्यागो योग्य इति भावः । पित्रोर्नन्दयशोदयोः । जानीम इत्यत एवालं प्रश्नेनेति । यदुपतोरिति स गोपजातिरपि सम्प्रति यदूनां पतिरभूदिति बृहत्पदप्राप्तस्य स्वयं कथमत्राजिगमिषा सम्भवेदिति भावः । अत एव भवान्प्रेषितः पित्रोः प्रियचिकीर्षया न तु स्वस्य, तेन यशोदानन्दाभ्यां पितृभ्यां गोपजातिव्यञ्जकाभ्यामस्य किं प्रयोजनमिति भावः । नन्दयशोदे रुदित्वा म्रियेते कृष्णो मथुरायां राज्यं करोतीति लोकनिन्दाभयादेव त्वं प्रेषित इति मन्यामहे, किन्तु भोश्चतुरवर्य तेन सुबुद्धिशेखरेण प्रेषितः पित्रोः प्रियचिकीर्षया त्वं चात्रायातोऽतः प्रयाहि नन्दयशोदयोः समीपम्, तौ हि त्वां प्राप्यानन्देन कृष्ण तं विस्मरिष्यत इति धन्यैव तस्य विवेकतीक्ष्णतेत्याद्या बहव एव व्याजस्तुतिमयात्यन्ततिरस्कृतवाच्यध्वनेः पल्लवाः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तमिति युग्मकम् । रहसीत्यस्य तृतीयपद्यस्थस्याप्यत्रान्वयः कार्यः । कोऽयमित्यादिना वितर्क्य जानीमस्त्वामिति स्वयमेव निर्णयात् आह्निकं कृत्वा व्रजमागतश्चेत्तदाभविष्यत्तर्हि लोकसङ्कटे तस्मिन् परम्परायाः सोऽयं महारथी व्यक्त एवाभविष्यदिति व्रजस्त्रिय इति व्रजेऽपि श्रेष्ठत्वेन याः प्रसिद्धा भगवत्प्रेयसीरूपाः स्त्रियस्ता इत्यर्थः । व्रजश्रियः कृष्णगृहीतमानसा इत्यादिष्वपि तथैव तत् प्रसङ्गे तच्छब्दप्रयोगात् । तमुद्धवं वीक्ष्य तच्च कृष्णानुचरं वीक्ष्य तदाकारतया निभाल्य तत्र हेतुः प्रलम्बबाहुमित्यादिः । तत्र पुष्करमाला तु प्रस्थापनसमये श्रीभगवतैव स्वकण्ठात् प्रसादीकृतेति गम्यते व्रजेऽप्येतादृशतत्समनिवेशरूपा एव तदनुचरा इत्यनुमानात्तदनुचरत्वेन वितर्क्येत्यर्थः ॥ १ ॥ अतः सुविस्मिता अन्यत्रापि कथमेतादृशोऽस्तीति तदेतदाहुः । कोऽयमिति । शुचिस्मिता इति पाठे तस्य प्रसादायारोपितस्मिता इत्यर्थः । दृश्यत इति दर्शनं रूपं वेशो वस्त्रतिलककेशबन्धादिः । भूषणं कटककुण्डलादि । यत्र । अच्युतस्य वेशभूषणे एव वेशभूषणे यस्य तं त्वयोपयुक्त स्रग्गन्धवासोऽलङ्कारचर्चिता इत्येतद्वाक्यानुसारात् तत्रापाततोऽसङ्कोचे हेतुः उत्सुकाः कालाक्षमत्वेन विचारशून्याः पश्चादपि तत्र हेतुः उत्तमःश्लोकः श्रीकृष्णः तत्पादाम्बुजमेवाश्रयो यस्य तं यद्वा । उत्तमःश्लोकपदाम्बुजयोः सम्वाहनाद्यर्थमुपधानवदाश्रयं यस्य तथा तदात्मीयतां निर्धार्येत्यर्थः ॥२॥ ततश्चतमिति तमुद्धवं रहसि रमापतेः संदेशहरं विज्ञाय स्वयमेव पूजाङ्गत्वेन दत्ते आसने उपविष्टं सन्तं प्रश्रयेणावनताः सत्यः पुनः सव्रीडहासेक्षणसूनृतादिभिः सुसत्कृतं सन्तमपृच्छन्निति क्रमः कर्त्तव्यः अत्रासन इति सामीपिकार्थमेवाधिकरणं ज्ञेयं तद्विधासु तस्य महाभक्तेरेव निर्णेष्यमाणत्वात् । यतः सैरिन्ध्र्यादिषु तस्य तादृशता वर्णयिष्यत इति कैमुत्यलाभाच्च । प्रश्रयेणावनताः विनयनम्रशिरसः व्रीडो व्रीडा हासः प्रसादः ताभ्यां युक्तमीक्षणमवलोकनं सूनृतं च स्वागतं कुशलञ्च इत्यादि प्रियवाक्यं तदादिभिस्तत्पुरःसरासनपाद्यादिभिः सुसत्कृतमादृतं ततश्च रहसि विजातीयभावागोचरे तत्रासन उपविष्टं सन्तं तादृशरहःस्थलागमनोपवेशादिहेतो रमापतेः संदेशहरं विज्ञाय अस्मास्वपि कमपि संदेशमानीतवानयमिति निश्चित्यापृच्छन् रमापतेरिति जयति तेऽधिकं जन्मनेत्यनुसारात्तादृशतत्सम्पत्तिदर्शनेन जातस्य तासामेवाभिप्रायस्य प्रकटनमिति विशेष्य व्याख्येयम् ॥३॥ तथा निश्चयेऽपि दुःखेन स्वसम्बन्धमपलपन्त्य आहुः । जानीम इति । सम्यगेतादृशपरिच्छेदतया व्रजजनसमीपागतं त्वां यदुपतेः पार्षदं जानीमः ततस्तत्प्रश्नेनालमिति भावः । आगमने हेतुः भर्त्रा तेन निजस्वामिना प्रेषितः स्वयमनागत्य तव प्रेषणामनादेशेऽपि लौकिकतामात्रादिति तत्परित्यक्तेऽपि व्रजे तवागमनं भर्त्राज्ञाया भृत्येनावश्यपाल्यत्वादिति भावः । यदुपतेरिति । स्वेषु तस्यानादरे हेतुव्यञ्जकं स्वेषां तस्मिन्नयोग्यत्वं व्यञ्जयति । अतस्तच्च भर्त्रेति च सौदासीन्यं वचनं प्रयोजनन्तु किञ्चिदेकमेव जानीम इति तथैवाहुः । पित्रोरिति । तथापि न स्वप्रेम्णेति भावः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णमनुचरति भक्तिविशेषेणात्रैव सारूप्यादिप्राप्त्यानुगच्छतीति तथा तम्, व्रजस्त्रियः सदा श्रीकृष्णरूपवेशादिध्यानगानपरा इति भावः । अतो वीक्ष्य साक्षाद्दूरतो दृष्ट्वैव सुविस्मिताः परमविस्मयं प्राप्ताः प्रायः श्रीकृष्णसारूप्यात्तदेव दर्शयति—

प्रलम्बेत्यादिना। तत्राद्येन पदद्वयेन रूपतः, ततोऽन्येन तद्द्वयेन परीत्यनेन च भूषणतः, लसत्सुन्दरस्मितादिना शोभमानं मुखारविन्दं यस्य तमिति शोभातः। यद्वा, लसदित्यत्रैव हेतुः—परिमृष्टेति ॥ १ ॥ दृश्यत इति दर्शनं रूपम्, अनेनानुक्तमपि श्रीकृष्णसदृशमाकार-वयोवर्णादिकं संगृहीतम्। अच्युतेत्यनेन च तत्सदृशमौक्तिकहारादि। तत्र वेषः—नटवरच्छन्दः; किंवा अच्युतस्य वेषो भूषणमेव भूषणं यस्य तं (भा० ११।६।४६)—'त्वयोपयुक्तस्रग्गन्धवासोऽलंकारचर्चिताः' इति न्यायेन तदीयवस्त्रादिधारणात्, अतएवोत्सुकाः सम्भ्रान्ताः समुत्कण्ठिता वा सत्यः सर्व्वा एकैकशः स्वस्वस्थानादागताः, किंवा विरहार्त्त्या सर्व्वासामेवैकत्र स्थितया युगपदागताः परितो वव्रुरावृतवत्यः, यत उत्तमश्लोकः श्रीकृष्णस्तत्पदाम्बुजमेवाश्रयो यस्य तम्, इत्येकास्तितया गुणेनापि तत्सादृश्यमुक्तम्। यद्वा, उत्तमश्लोकपदाम्बुजयोः सम्वाहनाद्यर्थमुपधानवदाश्रयम्, इति सततात्यन्तसमीपवर्त्तिता परमप्रियता चोक्ता; वाक्यभेदात्तमित्यस्यापौनरुक्त्यम् ॥ २ ॥ व्रजस्त्रियः परिवारणानन्तरमेव प्रश्रयेण विनयेनावनता नम्रशिरसः सत्यस्तं रहस्येकान्त आसन उपविष्टमुद्धवं रमापतेः सन्देशहरमिङ्गितेन विज्ञाय सव्रीडहासेक्षणसूनृतादिभिः सुसत्कृतं यथा स्यात्तथापृच्छन्। व्रीडा च लज्जाविशेषः, तत्सहितो हासश्च दरहसितं तेन युक्तमीक्षणं च मनागवलोकनमिति त्रयं भगवत्सारूप्यदर्शनजातस्य श्रीभगवति भावविशेषस्य स्वभावादुद्भूतं सुनृतं च स्वागतं 'कुशलं वः' इत्यादिप्रियवाक्यं तेन, 'आदि'शब्दादासनपाद्यार्पणादिभिश्च, अतएव सुष्ठु सत्कृतं पूजितमित्युद्धवविशेषणं वा, भगवद्भावदर्शनेन तदीयसुखविधानात्। रमापतेः लक्ष्मीकान्तस्येति प्रियजनपरिपालकत्वेनात्मन्यपेक्षा तस्य सम्भाविता। यद्वा, रहसि प्राप्त्या सन्देशहरं दूतं विज्ञाय रहआगमनादिना निर्द्धार्य्यापृच्छम् ॥ ३ ॥ सम्यक् राजरथारोहणादिना श्रीव्रजेश्वरान्तिके आगतं जानीम एवेति तद्विशेषप्रश्नादिनालमिति भावः। यदुपतेरिति तस्याधुना व्रजजनेषूपेक्षा युक्तेति भावः। जानीम इत्येव विवृण्वन्ति—भर्त्रेति; तत्परित्यक्तेऽपि व्रजेऽत्र तवागमनं भर्त्राज्ञाया भृत्येनावश्यपाल्यत्वादिति भावः। ननु भर्तृप्रेषणादत्र तस्य परमापेक्षावगम्यताम्, तत्राहुः—पित्रोरिति। केवलं तयोर्द्वयोरेव ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तमिति। कृष्णस्यानुचरं भृत्यं प्रलम्बावाजानुलम्बितौ बाहू यस्य नवकञ्जे विकसितपद्मदले इव लोचने यस्य पीते पिशङ्गे अम्बरे यस्य पुष्कराणां पद्मानां मालास्यास्तीति तथा व्रीह्यादित्वान्मत्वर्थीय इनिः मुखमरविन्दमिव मुखारविन्दम् उपमितं व्याघ्रादिभिरिति समासः लसन्मुखारविन्दं यस्य परिमृष्टे निर्मलीकृते कुण्डले यस्य तमुद्धवं वीक्ष्य व्रजस्त्रियः सर्वा उत्सुकाः सत्यः उत्तमश्लोकस्य पदाम्बुजमेवाश्रयो यस्य तमुद्धवं परिवव्रुः परिवेष्टितवत्यः ॥१॥ किं कुर्वत्यः अपीच्यं सुन्दरं दर्शनं यस्य अच्युतस्येव वेषो भूषणानि च यस्य सः कोऽयं कुतो वा कस्य वेति वदन्त्य इति शेषः। स्मेति विस्मये ॥ २ ॥ तमिति। सव्रीडेन हासेनेक्षणेन सूनृतेन मधुरभाषणेनादिशब्देनार्घ्यादिभिश्च तं रहस्येकान्ते आसने उपविष्टं तं रमापतेः श्रीकृष्णस्य संदेशहरं वार्त्ताहर्तारं विज्ञाय ज्ञात्वाऽवनता नम्राः प्रणता इति यावत् प्रश्रयेण विनयेनापृच्छन् पप्रच्छुः ॥ ३ ॥ प्रश्नमेवाह। जानीम इति। त्वां यदुपतेर्भगवतः पार्षदं भृत्यमत्र समवस्थितं समागतं जानीमः किमर्थं समुपस्थितोऽहमित्यत्राहुः। भर्त्रेति। भर्त्रा यदुपतिना पित्रोर्नन्दयशोदयोः प्रियं कर्तुमिच्छयाऽत्र भवान् प्रेषितः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गोपस्त्रीणां व्यामोहोक्तिभङ्ग्यापि श्रीकृष्णैकभक्तिं निरूपयत्यस्मिन्नध्याये तत्र गोपीनामुद्धवसंदर्शनात् हृष्टमनसां तत्त्वप्रश्नप्रकारं वक्तुमाह। तं वीक्ष्येति। परिमृष्टकुण्डलं शाणोल्लीढवत् द्योतमानकर्णाभरणम् ॥१॥ अतीव प्रशस्ततमं दर्शनमवलोकनं यस्य स तथा अयमिति सामान्यप्रश्नः कुतो देशादागत इति च विशेषप्रश्नः अच्युतस्येव वेषभूषणानि यस्य स तथा वैष्णवलक्षणेनेतरव्यावृत्तोऽसौ कः वैष्णवेषु किन्नामधेय इति ततोऽपि विशेषप्रश्न इति मिथोऽनुव्रज्य सामान्यतोऽस्मत्प्रेष्ठ इति स्मृत्वा तं परिवव्रुः आवेष्टितवत्य इत्यन्वयः ॥ २ ॥ पुनस्ताभिः किङ्कृतमत्राह। तमिति। अनेन सामान्यज्ञानं विशिष्टज्ञानपर्यवसायीति निर्णायि प्रश्रयेणोपचारेण प्रियं सत्यञ्च सूनृतमिति च ॥ ३ ॥ पार्षदार्थं पार्षदानां समीपवर्तिनां भृत्यानां श्रेष्ठं तैः पूज्यम्वा अनुव्रतं भगवन्मनोऽनुकूलव्रतम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

व्रजस्त्रिय इति। व्रजेऽपि श्रेष्ठत्वेन याः प्रसिद्धा भगवत्प्रेयसीरूपाः स्त्रियस्ता इत्यर्थः ॥ १-२ ॥ सव्रीडहासेति। व्रीडो व्रीडा हासः प्रसादस्ताभ्यां युक्तमीक्षणं रहसि विजातीयभावागोचरदेशे रमापतेरिति जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि इत्यनुसारात्तादृशतत्सम्पत्तिदर्शनेन जातस्य तासामेवाभिप्रायस्य प्रकटनम् ॥ ३ ॥ पित्रोरिति तत्रापि न स्वप्रेम्णेति भावः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तं प्रश्रयेणेत्यादि । सव्रीडहासेत्यादौ व्रीडात्र तं विनापि जीवाम इति प्रेमणो निर्व्यलीकत्वाभावेनात्मानं प्रति व्रीडा, हासस्तु स्वयमागमिष्यामि इत्युक्त्वापि तेन नायातम्, सखैव प्रेषित इति श्रीकृष्णं प्रत्यसूयासूचकमीक्षणम् । तत्सखेति तत्प्रेमप्राकट्यकरं सूनृतं किमयं व्यक्तीति तच्छ्रवणार्थम् । रमापतेरिति सासूयम् ॥ १–३ ॥ जानीमस्त्वामित्यादि । अकथितेनैव जानीमस्त्वं यदुपतेः पार्षद इत्यर्थः, यदुपतेर्न तु गोपीपतेरिति वक्रोक्तिः । पित्रोः प्रियचिकीर्षया भवान् प्रेषितः, न त्वमस्माकम् । तथा सति स्वयमेवागमिष्यत् ॥ ४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

स व्रीडेत्यादि । व्रीडा अत्र 'तं विनापि जीवन्त्यस्तद्वार्त्ताग्रहणाय समागताः स्मः' इति हासस्तु 'स्वयं समागमिष्यतीत्युक्त्वा सखिद्वारैव संवादो विधीयते, अहो । वञ्चकता इत्यति दुःखे हास एव । ईक्षणं 'प्रिय प्रस्थापितोऽयम्' इति तत्प्रेम प्राकट्यसूचनम् । सूनृतमन्तःकरणस्य द्रवद्भावेन रमापतेरिति कटाक्षोक्तिः । सैव धन्या यतोऽसावनेनैव कारणेनवक्षस्येव वसति अतोऽस्याः कदापि न विच्छेद इति तच्चातुर्याभिव्यञ्जिका वा उक्तिः ॥ १–३ ॥ जानीम इति–अकथितेनापि जानीम इत्यर्थः । यदुपतेः, न तु गोपीपतेः, भर्त्रा न तु प्रियेण, पित्रोः प्रियचिकीर्षया न त्वस्माकम् , तथा चेत् स्वयमागमिष्यत् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सप्तचत्वारिंशकेऽस्मिन् चित्रजल्पान् दशोद्धवः । आकर्ण्य प्रोच्य संदेशान् गोपीः स्तुत्वा पुरीं ययौ ॥

शुचि शुद्धं स्मितं यासामिति कृष्णस्मारकवेषदर्शनोत्थेन हर्षेण स्मितं सुविस्मिता इति पाठे कृष्णस्यैव पीतोत्तरीयमिदं तदङ्गोत्तीर्णमेव कमलमाल्यञ्च कथमनेन प्राप्तमिति विस्मयः अपीच्यं सुन्दरं दर्शनं यस्य सः कोऽयङ्कुतः कस्य वा मनुष्य इति वदन्त्यः कृष्णवृत्तान्तप्राप्तिसम्भावनया उत्सुकाः ॥ १–२ ॥ प्रश्रयेणावनता विनयनम्रशिरसः व्रीडा स्वीयस्वभावोत्थामूर्द्धादेरीषद्वस्त्रावरणलक्षणा लज्जा सा ह्यादरणीयजनसामान्यदर्शने सहसैव भवेत् हासः स्वप्रियदास एवायमिति निश्चयेन मुखप्रसादः ताभ्यां युक्तमीक्षणं सम्पूर्णावलोकनं सूनृतं स्वागतं कुशलमित्यादि प्रियवाक्यम् आदि शब्दात् यथा समयं यथोपस्थितं च पाद्यादिकमातिथ्यं तैः सुसत्कृतमादृतं रहसि विजातीयजनागोचरे स्थले अपृच्छन् तादृशस्थले सहसैवागमनेन तं रहः संदेशहरं विज्ञाय रमापतेरिति गोपीपक्षपातिनः शुकस्यासूयाद्योतनं सम्प्रति मथुरायां स्पष्टमेव परमेश्वरं तं सुखयितुं रमा एवागमिष्यति किमेतासु संदेशप्रेषणदम्भेनेत्याकारकम् ॥ ३ ॥ जानीम इत्यत एवालं प्रश्नेनेति भावः । यदुपतिरिति सगोपजातिरपि सम्प्रति यदूनां पतिरभूदिति बृहत्पदप्राप्तस्य स्वयं कथमत्रजिगामिषा सम्भवेदिति भावः । अत एव भवान् प्रेषितः पित्रोः प्रियचिकीर्षया ननु स्वेषां तेन यशोदानन्दाभ्यां पितृभ्यां गोपजातिव्यञ्जकाभ्यां तस्य किं प्रयोजनमिति भावः । नन्दयशोदे रुदित्वा म्रियेते कृष्णो मथुरायां राज्यं करोतीति लोकनिन्दा भयादेव त्वं प्रेषित इति मन्यामहे किन्तु भाश्चतुरवर्य्य ! तेन सुबुद्धिशेखरेण प्रेषितः पित्रोः प्रियचिकीर्षया त्वं चात्रायातोऽतः प्रयाहियशोदानन्दयोः समीपं तौ हि त्वा प्राप्यानन्देन कृष्णं तं विस्मयिष्येते इति धन्यैव तस्य विवेकतीक्ष्णतेत्याद्याः एव व्याजस्तुतिमयोत्पन्नतिरस्कृतवाच्यध्वनेः पल्लवाः ॥ ४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

रमाकान्तमखण्डेन्द्रवन्द्यमानपदाम्बुजम् । वन्दे प्रेमभराक्रान्तस्वान्ताश्च व्रजयोषितः ॥
सप्तचत्वारिंशकेऽथ गोपिकानां निरूप्यते । उद्धवभ्रमराभ्यां तु सम्वादः श्रोतृमोददः ॥

अथ सूर्योदयानन्तरं स्व स्वगृहाद्बहिर्निःसृत्य शातकौम्भं रथं व्रजद्वारि स्थितमवलोक्य कस्यायं रथ इति ब्रुवन्त्यः स्थितास्ततो यमुनायां स्नात्वा समायान्तमुद्धवं दृष्ट्वा कोऽयमित्यादि वदन्त्यस्तत्सन्निधौ गत्वा तं परिवव्रुरित्याह । तमिति । ननु स्त्रीणामेवंविधं पुरुषं दृष्ट्वा लज्जया एकान्त स्वस्थानगमनमुचितमित्याशशङ्क्याह । व्रजस्त्रियः नगरस्त्रीणामयं स्वभावो न तु ग्राम्यस्त्रीणामिति भावः । ननु तथापि तासां भयात्ततः पलायनं साम्प्रतमित्यत आह । कृष्णानुचरं व्रजाधीशकृष्णसखीनां कृष्णानुचरत्वाद्वा न भयसम्भावनेति भावः । ननु तथाविधाना तासां यः कश्चित्तदनुचरोऽपि नानुसरणीय इत्याशङ्क्याह । प्रलम्बेत्यादि । प्रकर्षेणालम्बौ बाहू यस्य नवीनपद्मवल्लोचने यस्य पीतमम्बरं यस्य कमलग्रथिता माला विद्यते अस्य लसत् स्फुरत् मुखपद्मं यस्य मणिभिर्मृष्टे उज्ज्वले कुण्डले यस्य तथा च स्वस्वाम्यनुग्रहपात्रतया तद्दत्ततद्वस्त्रभूषणादिधारी तदनुचरस्तदीयैरत्यर्थमादरणीयः अयं तु तदवयवसमानावयवधार्यप्रीति परममहान् भवतीत्यतोऽस्यानुसरणे नास्ति कश्चिद्दोष इत्याशयः प्रियविरहव्याकुलमनुश्रान्तेन यत्किंचित्सादृश्यवानप्यादरणीयो भवति अयं त्ववयववस्त्रभूषणैः प्रियसदृशत्वात् तत्तत्प्रियावयवजनिततत्सुखस्मारकतया परमादरविषय इत्यपि ध्वनितम् ॥ १ ॥ तद्दर्शनेन तासां महान् सम्भ्रमो जात इत्याह । शुचीति । अपीच्यं सुन्दरमवयवदर्शनं यस्य अच्युतवत् वेषः पीताम्बरादिभूषणानि कुण्डलादीनि यस्येति पूर्वश्लोकोक्तविशेषणविशिष्टत्वेन दृष्टस्यानुवादः तथाप्येवंविधस्य

गोकुले अदृष्टचरत्वात् अक्रूरस्य चातादृशत्वात् कोऽयमिति जिज्ञासा चतुरशिरोमणिः काचिदस्ति चेन्निश्चित्य वदत्वित्यभिप्रायः नन्वपीच्यदर्शने पीतपटाद्यलंकृते दामोदरे आसक्तचित्ता व्रजाङ्गनास्तथाभूते मय्यप्यासक्ता भविष्यन्तीति दुराशया तादृशविग्रहवेषादिकं विधाय कश्चित्कामुकोऽयं समागत किं वा प्रियतुल्यविग्रहादिमन्तं मां दृष्ट्वा गोपिका बहुधनं दास्यन्तीत्याशया तत्सदृशो भूत्वाकश्चिल्लुब्धोऽयमागत इत्याशङ्क्याहुः । शुचि कामलोभादिदोषविनिर्मुक्तं शुद्धं स्मितं यस्य तथा च परमसज्जनत्वात् नायमुक्ततर्कगोचर इति भावः । अत एवंभूतोऽयं कः किंजातीयः किन्नामधेयः किं च कुतः कस्माद्देशादयमागतः किंस्वाकारादिकमेनं विधायास्मत्प्रियेणैवायं प्रेषितत्वात्तत्सकाशादागतः किं स्वत एव स्वगृहादागतः किञ्च कस्यायं पुत्रः पौत्रो वा विशिष्टसम्बन्धं ज्ञात्वा प्रीत्यतिशयस्य विधीयमानत्वात्तत्संबन्धज्ञानमप्युचितमिति भावः । इति संशयव्याकुलमानसास्तन्निरासार्थमुत्सुकाः प्रियसादृश्यदर्शनेन तदीय एवायं कदाचित्स्यादिति तन्निश्चये उत्कण्ठितचित्ताः सर्वाः व्रजस्त्रियस्तं सर्वतो वेष्टयामासुः उत्सुकानामप्येवंविधसंशयाक्रान्तचेतसां दूतीद्वारा निर्णयं कृत्वा तत्सन्निधौ गत्वा तत्परिवेष्टनमुचितमित्याशङ्क्याहोत्तमेति उत्तमः श्लोको यस्य तत् भगवतः पादकमलमेवाश्रयो यस्य तं तथा च भगवत्पादपद्माश्रयणस्य सर्वाकर्षणकारणस्य तस्मिन्वर्तमानत्वात्तदङ्घ्रिसरोरुहाश्रयाणां तदीयानां लब्धमात्रविलम्बसहनाक्षमाणां तासामाकर्षणे को विस्मय इति भावः ॥ २ ॥ अथ परिवेष्टनानन्तरं स्वबुद्ध्यैव तं प्रियसंदेशहरं ज्ञात्वा सत्कृत्य पप्रच्छुरित्याह । तमिति । प्रियदूतत्वात्सव्रीडहासादिभिरयं सत्कारार्ह इति तैः सुसत्कृतं सव्रीडहासपूर्वकमीक्षणं सूनृतानि प्रियवचनानि कुशलप्रश्नाद्यात्मकानि आदिपदेनासनपुष्पाद्युपचारसंग्रहः तैः सुसत्कृतं क्व स्थितमित्यपेक्षायामाह । रहसि एकान्ते रसाविर्भावाय नन्दादिपुरुषमात्रदृष्ट्यगोचरे स्थाने सम्यग्वस्त्रादिभिर्निर्मिते कोमले आसने उपविष्टम् अव्याकुलतया स्वसन्निधौ निषण्णं तमुद्धवं प्रश्रयेण प्रेम्णा नम्राः सत्यः अपृच्छन् निष्कामस्यास्यास्मत्कृतसत्कृतिग्रहणमस्माभिः सहावस्थानं चास्मदर्थमेवातोऽयं प्रश्रयेण नम्रीभूय प्रष्टव्य इति भावः । ननु प्रियसन्देशहारक इति किमिति ज्ञातवत्यः नत्वस्मदाकारणार्थमागत इत्यत उक्तं रमापतेरिति । इदानीं रमया लक्ष्म्या रमाभिः रामाभिर्नागरस्त्रीभिश्च सह वर्तमानस्य तस्यास्मदपेक्षारहितत्वादप्रयोजिकानामस्माकमाकारणं न घटते किं तु मद्विरहव्याकुलचित्तानां मरणं भवेच्चेत्तर्हि मम पापं स्यादिति तद्भयेनास्मदनुरञ्जनहेतुसन्देशनार्थमेवायं प्रेषित इति ज्ञातवत्य इत्यर्थः ॥ ३ ॥ तं प्रियसन्देशहरं विज्ञाय स्वस्य उपेक्षणीयत्वमनुमाय प्रणयकोपाक्रान्तस्वान्तास्तदागमनमन्यथा वर्णयन्ति । जानीम इति । यदुपतेः पार्षदं न तु गोपिकापतेः तथा च त्यक्तगोपिकापतिभावस्य स्वीकृतयदुपतित्वस्यास्मदुपकाराय प्रवृत्तिरतिदुर्लभेति भावः । तस्य पार्षदः सभानायकोऽतिचतुरस्त्वमपि यथा राजा तथा प्रजेति न्यायात् तथाच वृथा सान्त्वनकुशलोऽविश्वास्यवचनोऽसीति भावः । एवम्भूतं त्वां सम्यगुप समीपे आगतं जानीमः तव समीचीनवर्त्मणास्मत्समीपागमनेन च प्रियस्य तत्रत्यानां तदीयानां तव च कुशलमित्यपि विद्मः । ननु पराधीनस्य ममात्रागमनं भवतीभिः कथं ज्ञातमिति चेत् तत्राहुः । भर्त्रेह भवान् प्रेषितः । ननु भवतीभिरेव तस्मिन् स्वपतित्वं त्यक्तम् अस्मत्पतेरिति वक्तव्ये यदुपतेरिति विशेषणदानात् स तु स्वात्मानं गोपिकापतिमेव मन्यते इत्याशङ्कानिवृत्त्यर्थं भर्त्रेति पदं तेनैवास्मद्भर्तृत्वं विहाय यदुपतित्वमुररीकृतं न त्वस्माभिस्तत्त्यक्तं यथा पूर्वमेव स्थानादिति भावः । यदुपतित्वमस्मद्भर्तृत्वं च तस्यैव विरुद्धमुत्कृष्टजातिनिविष्टत्वात् न त्वस्माकं निकृष्टत्वादित्यप्यनेन ध्वनितम् । अन्यत्र क्वचित्प्रेषितः प्रसङ्गादिह समागत इति सर्वथान्यथाकरणस्य मिथ्याभाषणे पर्यवसानमभिप्रेत्येहेत्युक्तम् । नन्विह प्रेषणं जानतीनां तदुपरि दोषारोपणमनुचितं परमप्रियाणां भवतीनां प्रियसम्पादनस्यैवात्र मत्प्रेषणप्रयोजनत्वादित्याशङ्क्याहुः । पित्रोरिति । नन्दयशोदयोः प्रियचिकीर्षया नत्वस्माकं पित्रोर्हि पुत्रास्तित्वतदैश्वर्यश्रवणेनापि सुखं भवतीति तत्सुखार्थम् अलङ्कृतत्वात्तदैश्वर्यकुशलताबोधको भवान् प्रेषितः नत्वस्मत्सुखार्थं तावतासुखासिद्धेरित्याशयेन भवानित्युक्तम् अस्मत्प्रियचिकीर्षा तस्य स्याच्चेत्तदालङ्कृतां काञ्चिद्दूतीं प्रेषयेन्नतु राजकार्यकुशलं दुतं भवन्तमित्यपि ध्वनितम् ॥ ४ ॥

गूढार्थदीपिनी

आश्वास्य गोपिकाः सप्तचत्वारिंशे तु सोऽद्धवः । भ्रामरं गीतमाश्रुत्य तद्दासः सन् पुरीमगात् ॥ १ ॥

तमिति द्वयम् । गोप्यः तम् उद्धवं वीक्ष्य कोऽयं कुतः आयातः कस्य दूत इति वदन्त्यः तं परिवव्रुः परिवेष्टितवत्यः इति द्वयोरन्वयः । स्मेति वितर्के । पुष्करं कमलम् । परिमृष्टे उज्ज्वले कुण्डले यस्य । शुचीति संबोधनं वा अपीच्यम् अतिसुन्दरं दर्शनं रूपं यस्य सः ॥ १ ॥ गोप्यः सन्देशहरं दूतं विज्ञाय रहसि एकान्ते तम् अपृच्छन् इत्यन्वयः । कथंभूतम् । सव्रीडेन हासादिना सुसत्कृतम् । प्रश्रयेण विनयेन ॥ ३–४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सप्तचत्वारिंशे गोपीनां भगवति प्रेमातिशयं भवगत् सन्देशेन तत्सान्त्वन पुरीं प्रत्युद्धवागमनञ्चेति वर्णयति । तमिति । तमुद्धवं वीक्ष्य लसत् शोभमानं मुखारविन्दं यस्य तं परिमृष्टे उज्ज्वलीकृते कुण्डले यस्य तम् ॥ १ ॥ शुचि परदोषादिनिमित्तवर्जितं स्मितं यस्य तम् अपीच्यं सुन्दर दर्शनं यस्य तम् अच्युतस्येव वेषो भूषणानि च यस्य तं कोऽयं कुतो वा कस्य वेति परस्परं

वदन्त्यः सर्वाः गोप्यस्तं परिवव्रुः आवेष्टितवत्यः ॥ २ ॥ तं रमापतेः सन्देशहरं विज्ञाय अवनताः नम्राः प्रश्रयेण विनयेन सव्रीडहासादिभिश्चोपलक्षिताः सुसत्कृतं रहस्येकान्ते उपविष्टम् अपृच्छन् ॥ ३ ॥ जानीम इत्यादीनि वाक्यानि याः श्रीकृष्णं केवलं कान्तं विदुस्तासाम् । पार्षदं सेवकम् भर्त्रा स्वामिना ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ गोपस्त्रीव्याजोक्तिरप्यव्याजभक्तिपूर्विकेति निरूपयत्यस्मिन्नध्याये । तत्रादौ तासामुद्धवदर्शनात्सोद्धवानां प्रश्नप्रकारं वक्तुमाह । तं वीक्ष्येति । व्रजस्त्रियः प्रलम्बबाहुं नवकञ्जलोचनं पीताम्बरं पुष्कराणां मालाऽस्तीति तं लसन्मुखारविन्दं यस्य स तं परिमृष्टे निष्टप्ताष्टपदवद्द्योतमाने कुण्डले यस्य तम् । एतद्विशेषणैस्तत्किङ्करीभवनयोग्यताऽस्य ध्वन्यते ॥ १ ॥ अतीवदर्शनोऽतीवेति निपातोऽखण्डः प्रशस्त्यर्थेऽतीवप्रशस्ततमं दर्शनं यस्य सः । कुत आगतः कस्य किंसम्बन्धी । अच्युतस्येव वेषो भूषणानि च यस्य सोऽयं क इति सर्वाः सुविस्मिता उत्सुका उदन्तश्रवणसमुत्सुका उत्तमश्लोकपदाम्बुजाश्रयं तं वेषभूषादिभिस्तथोहितं परिवव्रुः ॥ २ ॥ प्रश्रयेण भक्त्याऽवनताः सव्रीडहासेक्षणसूनृतादिभिः प्रियं सत्यं च सूनृतमित्यादेर्यथार्थवाग्भिः प्रियवाग्भिर्वा सुसत्कृतमासने स्वदत्ते परिविष्टं रमापतेः सन्देशहरं विज्ञाय रहस्येकान्तेऽपृच्छन् ॥ ३ ॥ सेर्ष्यप्रेमनिर्भरचित्ताः प्रियप्रेषितत्वं निश्चित्यात्मानमतद्विषयीकृत्य कृत्यान्तरभवोत्प्रेक्ष्याप्राक्षुरुद्धवमित्याह । गोप्य इति । यदुपतेः पार्श्वदेष्वार्यस्तं प्रष्यप्रमुखम् । अनुव्रतं सदा तदनुचरं त्वां वयं जानीमः प्रायः भवान्भर्त्रा स्वामिना पित्रोर्यशोदानन्दयोः प्रियचिकीर्षयेह प्रेषितः ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

चतुश्चत्वारिंशेऽध्याये गोपीनां ज्ञानदेशतः । निरोधं सम्यगेवाह पूर्वस्माच्च विशेषतः ॥
याते कृष्णे लोकरीत्या नैकधा भावतः स्फुटम् । न निरुद्धा इति प्रायः सर्वेषां च भवेन्मतिः ॥
सेवकेनोपदेशेन प्रीत्या चैव निरोधतः । ज्ञानेनापि निरुद्धास्ता आत्मत्वेनैव सर्वथा ॥
यस्तुनिश्चयनं पूर्वमुपालम्भस्तथैव च । व्याजोक्ता दोषगणना त्रिदोषो वर्ण्यते पुरा ॥
अन्यथा ज्ञानसंदेशो व्यर्थः स्यादिति निश्चयः । बीजं भक्तिस्ततः स्तोत्रमुपदेशस्तथैव च ॥
ततो दोषनिवृत्त्या च पूर्वस्नेहो निरूप्यते । ज्ञानस्य च फलं चैव कृतार्थत्वं ततस्तथा ॥
सप्तधा विनिरुद्धास्ता गुणैर्भगवतापि च ।

तत्र प्रथममुपालम्भ्यत्वेन उद्धव इति निर्द्धारं कृतवत्य इत्याह । तं वीक्ष्येति त्रिभिः । "आकृतिर्निश्चयश्चैव चेष्टया तु विशेषतः । स्वार्थमेव ततो ज्ञात्वा मानाद्दोषद्वयं ततः । तत्र प्रथमं मानार्थं भगवत्सारूप्यमुद्धवे गोपिकाभिर्दृष्टं वर्णयति । तमुद्धवम् आकृत्याकृष्णानुचरोऽयमिति वीक्ष्य अथवा न हि महतां चेतः अधर्मे पततीतिवत् तस्य दर्शने कामं वारयितुं कृष्णानुचरमित्युक्तं वस्तुत एव भगवतः अनुचरः तथापि महान्तं भूषितं दृष्ट्वा लज्जिता भवन्ति स्त्रियः कथमयं पृष्ट इत्याशङ्क्याह । व्रजस्त्रिय इति । नागरीणामयं स्वभावो नान्यासां भगवत्सारूप्यत्वाय वर्णयति । प्रलम्बबाहुमित्यादिषड्भिः पदैः भगवत्त्वाय स्त्रीणां हि कामप्राधान्यात्तदुपयोगिषड्गुणा वक्तव्याः प्रकर्षेण लम्बौ बाहू यस्य स्मारकस्वेनास्यावयवा उपयुज्यन्ते क्रियाशक्तिः परिरम्भोपयोगश्च सूचितः न च कमलवल्लोचने यस्येति सर्वतापहारिका ज्ञानशक्तिः कामोद्बोधिका च निरूपिता एवं क्रियाज्ञानशक्तीनिरूप्य मायाशक्तिं निरूपयति । अनावृते रसो न भवतीतिपीतमम्बरं यस्य सवर्णो नीले अधिकां शोभामुत्पादयति सर्वत्रैव तद्वर्णनं पुष्करमालिनं कमलमालायुक्तं कीर्तिमत्त्वमुक्तं लसत् मुखारविन्दं यस्य श्रीर्निरूपिता मणिभिर्मृष्टे उज्ज्वले कुण्डले यस्येति वैराग्यमिव शास्त्रीयकान्तिः सर्वाभरणकृता निरूपिता ॥ १ ॥ एवं स्वरूपं वर्णयित्वा भगवत्सेवकोऽयमिति ज्ञातवत्य इत्याह शुचिस्मितमिति । शुद्धं व्याजलोभाद्यनुपहतं स्मितं यस्य नैतादृशो गोकुले दृष्टः अक्रूरो वा अतः कोऽयमिति जिज्ञासा स्वयं मध्य एव कश्चिदुत्प्रेक्षकश्चेत् महान् भवेत् स वदत्विति कथयन्त्य इवाहुः किञ्च विरुद्धोऽस्मिन् धर्मो दृश्यते स्वरूपतोऽयं निष्कामः एतस्य च दर्शनमपीक्ष्यं स्त्रीणां प्रियम् अतो विरुद्धधर्माश्रमत्वात् भगवदीयो भवितुमर्हति किं च न केवलमाकृतिस्वभावावेव भगवतः किन्तु वेशः पीताम्बरादिभूषणानि च भगवत एव कुतश्चेति उपमायां तु नाश्चर्यं स्वाभरणानि परिधाप्य किं भगवान् अहोस्वित् तद्रसाभिनयार्थं नटवत् समागतः अहोस्विद्भगवानेव रूपान्तरं कृत्वा समागत इति बहूनां विद्यमानत्वात् कुत इति विशेषजिज्ञासा युक्ता किं च कस्यायं पुत्रः पौत्रो वा सम्बन्धज्ञाने हि विशेषप्रीतिर्भवतीति जिज्ञासार्थमेव स्मेति प्रसिद्धे सर्वा एव परिवव्रुः ननु तासां किम्प्रयोजनं तत्राह । उत्सुका इति । औत्सुक्यस्वभावादेव कृष्णस्मारक इति कृष्णौत्सुक्या च तम्परितो वेष्टयामासुः । ननु भगवत्स्त्रियस्ता रक्षिताः रक्षकाश्च कालादयः ततो रक्षकेषु विद्यमानेषु कथं गता इत्याह । उत्तमश्लोकस्य पदाम्बुजमेवाश्रित्य तिष्ठतीति भगवच्चरणसेवकः भक्तिमार्गानुसारी तत्रापि शास्त्रीय इत्यर्थः ॥ २ ॥ एवं निष्प्रत्यूहं संदिग्धा एव तं वेष्टितवत्यः ततो विशेषज्ञानं जातमित्याह । तं प्रश्रयेणेति । तमुद्धवं महान्तं दृष्ट्वा प्रश्रयेणावनता नम्रा जाताः ततः सुष्ठु आसनादिना सत्कारमपि कृतवत्यः पूर्वमेव वा वस्त्राभरणादिभिः सुसत्कृतः ततो भर्तृसम्बन्धिसेवकोऽयमिति ज्ञात्वा व्रीडा काम एवोद्देश्य इति ज्ञापयितुं हासः सत्कारे अन्य दृष्टिः क्रूरा

रूक्षा वा भवतीति हास्यपूर्वकं निरूपितं सूनृतानि उत्तमवचनानि कुशलप्रश्नरूपाणि आदिशब्देन आसनपुष्पाद्युपचारान् एकान्ते यत्र नन्दादीनां न दृष्टिः रसार्थमेतत् सव्रीडादिभिः सहिता वा आसने उपविष्टमव्याकुलं तत्सत्कृतिग्रहणेन ज्ञातवत्यः अयमस्मदर्थमेव समागतः अन्यथा नास्माकमुपचारं गृह्णीयात् नापि सह तिष्ठेत् निष्कामश्चायम् अतः भगवत एवायं सन्देशहारकः तर्ह्याकारणार्थं समागत इति रमापतिवचनं साम्प्रतं रमया सह तिष्ठतीत्यस्मदुपेक्षा इति वयमप्रयोजिका इति केवलं मनोऽनुरञ्जनार्थं प्रेषितवानिति तासां मानमुत्पादयति ॥ ३ ॥ अनेनैको दोषो निरूपितः तेन द्वितीयोत्पत्तिमाह । जानीम इति सप्तभिः । स गोपिकार्थमागतोऽहमिति मन्यत इति बुद्ध्वा तदन्यथा कर्त्तुमन्यथा गमनं निरूपयन्ति अन्यथोपकारस्वीकारे उपालम्भो न घटेतेति बीजमेतत् तस्य च समर्थनमनन्यनिषेधनपूर्वकं स्वसम्बन्धस्य पूर्वसिद्धस्य औपाधिकत्वेन स्वार्थपरसाधनम् अन्यथोभयोरपि समानत्वात्को वा उपालम्भ्यः स्यात् ततो दृष्टान्तौ कृतघ्नतासमर्थनम् एवं पञ्चभिर्दोषं समर्थयित्वा तस्य साध्यत्वज्ञापनाय तासां देहादिस्मरणाभावमुपपादयति ततोऽपि सुसाध्यत्वाय भगवदासक्तिसाध्यो रोगः प्रतिष्ठितो भवति ततोऽग्रिमारम्भः स महादोषः इति कस्याश्चिदेव तामसतामस्या वर्णितः आदौ तस्यागमनमन्यथा कथयन्ति तत्र ज्ञात्वा अन्यथा करणं युक्तमिति ज्ञानमाहुः। त्वां यदुपतेः पार्षदं जानीम इति । पूर्वं गोपिकापतिरधुना यदुपतिरिति नास्मदुपकारं करिष्यतीति भावः। तस्य च पार्षदः सभापतिरतिचतुरः अनेन त्वद्वाक्यमपि नादरणीयमिति सूचितं समुपागतमिति सम्यगुपसमीपे समागतं तत्रापि सर्वतः कुशलं तत्रापि अन्यथा उपेक्षादोषायापि न भवेत् एवं भगवन्तमन्यथा कल्पयित्वा स्वयमेवैताः कदाचिन्निष्टा जाता इति शङ्का स्यात् तद्व्यावृत्त्यर्थं भर्त्रेत्याहुः । प्रसङ्गादागतत्वं न वदन्ति सर्वथा मिथ्या भविष्यतीति इहैव गोकुले प्रयोजनमाहुः । पित्रोः प्रियचिकीर्षयेति । ये हि सत्तामात्रेण सुखिता भवन्ति ऐश्वर्याद्युत्कर्षण च अतः कुशलमैश्वर्यं च ज्ञापयितुं भवान् प्रेषितः अनलंकृते साधारणे प्रेषिते ऐश्वर्ये सन्देहः स्वात् अस्माकं तु न तावता सुखमिति त्वदागमनसाधनमिति अस्मदर्थं न प्रेषितवानेव ॥ ४ ॥

श्रीसुबोधिनी-सार

शुकोक्तिः । कृष्णस्यानुचरं प्रलम्बौ बाहू यस्य तं नवकञ्जवत् लोचने यस्य तं पीते अंबरे यस्य तं पुष्कराणां कमलानां मालास्यास्तीति तं लसच्छोभमानं मुखारविंदं यस्य तं परिमृष्टे उज्ज्वले कुंडले यस्य तम् उद्धवं वीक्ष्य व्रजस्त्रियः ॥ १ ॥ शुचिस्मितं यासां ता अपीच्यं सुन्दरं दर्शनं यस्य सोऽच्युतस्येव वेषो भूषणानि यस्य सोयं कः कुत आगतः कस्यायमित्युत्सुकाः सर्वा उत्तमश्लोकस्य कृष्णस्य पदांबुजमेवाश्रयो यस्य स तं परिवव्रुरावेष्टयाञ्चक्रुः स्मेति प्रसिद्धम् ॥ २ ॥ प्रश्रयेणावनताः सुसत्कृतं सव्रीडेन हासेनेक्षणेन सुनृतादिभिः रमापतेः श्रीकृष्णस्य संदेशहरं दूतं तमुद्धवम् आसने उपविष्टं रहसि एकान्तेऽपृच्छन् ॥ ३ ॥ यदुपतेः श्रीकृष्णस्य पार्षदं सेवकं समुपागतं त्वां वयं जानीमः । पित्रोर्नन्दयशोदयोः प्रियचिकीर्षया भर्त्रा श्रीकृष्णेन भवान् प्रेषित इति व्रजे ॥ ४ ॥

श्रीगोपीजनवल्लभाय नमः ।

भ्रमरगीताध्यायटिप्पणी

श्रीमद्विट्ठलेश्वरप्रकटिता ।

श्रीकृष्णः शरणं मम ।

विविधापराधकूटक्षमाक्षमांस्तातचरणयुगरेणून् । नत्वा तत्तात्पर्यं प्रकटीकुर्मो यथाशक्ति ॥ १ ॥
तत्पादरजसागत्य यादृग्भावः कृतो मम । तादृशेनैव तद्भावं वर्णयाम्यवशः क्वचित् ॥ २ ॥

ननु व्रजसीमन्तिनीनां 'ता मन्मनस्का' इत्यादिवाक्यैः प्रभुणा स्तुतानां ज्ञानोपदेशो निरोधविरोधी, तयोः सहानवस्थाननियमात् । एवं सत्यस्याध्यायस्यैतत्स्कन्धाप्रवेशश्च स्यात् । 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति भगवद्वाक्यादत्युच्चावस्थां प्रापितानां नीचावस्थाप्रापणमयुक्तं चेत्याशङ्कानिरासमध्यायार्थोक्त्यैव कुर्वन्ति चतुश्चत्वारिंशेऽध्याय इति । अस्मिन्नध्याये निरोधमेवाहेति सम्बन्धः । उद्देश्यत्वेन ज्ञानोक्तिव्यवच्छेदायैवकारः । 'तं वीक्ष्ये' त्युपक्रमेण 'भक्त्युद्रेकं व्रजौकसा'मित्युपसंहारेण च स्नेहस्यैवोक्तिः सम्यक्त्वम् । पूर्वमहर्निशं पूर्णो भगवद्भावो निरूपितः। अधुना तु यथा प्रियेण समं स्वसंबन्धव्यवच्छेदकोपस्थितावार्त्यतिशयोऽनिर्वचनीयो भवति लौकिकानामपि, तथा तादृग्ज्ञानोपदेशश्रवणेनातितप्ततैलपतितजलबिन्दुसदृशेनात्युत्कटभावो वर्ण्यत इति पूर्वस्माद्विशेषः । ननूपदेशस्य न भावजनकत्वम् , किन्तु स्थितस्यैव प्राकट्ये हेतुत्वम् । एवं सत्येतदुक्तिर्व्यर्थेत्यत आहुः याते कृष्ण इति । अन्यथेति शेषः । हृदि सर्वदा प्राकट्यान्नैकट्याभावो बाधित इत्यत उक्तं लोकरीत्येति । देहलीदीपवल्लोकरीत्येत्युभयत्र सम्बध्यते । तथा सति लोकरीत्यैव याते, वस्तुतस्तु व्रज एव सदा प्रकट इत्यर्थः । लोकवन्नैकट्याभावः पूर्वमपीति स्फुटमित्युक्तम् । यद्येतत्कथनं न स्यात्तदा बहिःप्राकट्याभावेपि

कालक्षेपदर्शनात् सर्वेषां भक्तानां तथा मतिः स्यात्, तदभावार्थमेतत्कथनमावश्यकमित्यर्थः। ननु ज्ञानोपदेशश्रवणेनापि सा मतिर्भवित्र्येवेत्यत आहुः सेवकेनेति। ता उक्तप्रकारैर्निरुद्धा एव। तत्र हेतवः सेवकेनेत्यादिनोच्यन्ते। यदि ज्ञानमार्गं प्रवेशयेद्, ज्ञानमार्गीयेणैवोपदेशं कारयेत्। सेवकेन कृत्वोपदेशं यत्कारितवांस्तेन भक्तिमार्ग एव प्रवेशोऽभिमतो, नेतरस्मिन्नित्यर्थः। किञ्च। एताः पूर्वं प्रयोजनवशान्न निरुद्धाः। तथा सति प्रयोजने जाते निरोधो गच्छेत्। किन्तु 'शुद्धभावप्रसादितः' 'प्रीतः प्रोवाच सस्मितम्' 'माऽसूयितुं नार्हथ तत्प्रियं प्रियाः। न पारयेह'मित्यादिवाक्यैः भगवतो व्रजसीमन्तिनीविषयिणी या प्रीतिस्तयैव ता निरुद्धाः, अतः कथमन्यथा कुर्यात्। अतो ज्ञानेन उपदेशजनितज्ञानेनापीत्यर्थः। तत्र प्रकारमाहुः आत्मत्वेनेति। नहि स्वात्मनः स्वेन समं वियोगः स्वविस्मृतिः स्वाहिताचरणं वा संभवत्यतस्तथाभूतासु किं समाधेयमस्तीति स्वस्मिन्नसाधारणनिरुपधिस्नेहं प्रियस्य ज्ञातवत्य इति पूर्वस्मादतिविलक्षणः स्नेहभाव उत्पन्नः। अत एव मूले प्रियतमपदमुक्तमेवं प्रियतमादिष्टमिति। अथवा। सेवकेनेत्यादिना भगवतः कायवाङ्मनोभिरेतन्निरोध उच्यते। सेवकः कायरूपः, उपदेशो वाग्रूपः, प्रीतिर्मानसी। अत उपदेशजेनात्मत्वेन ज्ञानेनापि प्रियस्वरूपपरात्वमेवासाम्, न तु ज्ञानिनामिव स्वास्थ्यम्, अन्यथा 'कृष्णावेशात्मविक्लव'मिति न वदेत्। तथा चैतावत्पर्यन्तं स्वसत्ताज्ञानमपि स्थितम्, अतः परं तु तामपि न ज्ञास्यन्तीति पूर्वस्मादधिको निरोधः सेत्स्यतीत्यर्थः। अतएव सर्वथेतिपदम्। एवं भक्तिमार्गविरोधं परिहृत्य ज्ञानोपदेशस्यावश्यकतामाहुः वस्तुन इति। 'विज्ञाय संदेशहर'मितिवाक्यात् स्वार्थमेवागत इति निश्चयेन मानोत्पत्तिरिति निश्चयस्यापि दोषत्वम्। भगवदीमत्वनिश्चयाभाव उपालम्भासंभवादिति भावः। चतुश्चत्वारिंशाध्यायविवरणे स्वामिनीभावेषु दोषशब्दप्रयोगस्यायमाशयः। लोके ह्यन्त्यावस्थाहेतुर्दोषो भवति, विरहभावस्य च तथात्वं प्रसिद्धमेव। यथातिप्रचुरे दोषे तीक्ष्णौषधदानं विषमाशीविषदंशश्च कार्यते मर्मस्थानेषु, तेन बहिःसंवेदनं तत्कालीनमरणनिवृत्तिश्च, ततो विविधरसैः शनैः शनैः सर्वात्मना दोषापगमे स्वाभाविकजीवनहेत्वन्नदानम्, तेन च सर्वात्मना स्वास्थ्यम्, तथात्राप्यत्यन्तप्राणबाधायां हि प्रिये दोषारोपः। स चाचिरादेवान्त्यावस्थाज्ञापको भवति, अतस्तं दृष्ट्वा तन्निवृत्त्यर्थमेवोक्तरूपसदृशोपदेशं दत्वा स्वयं प्रियभिषजा प्रेषित इत्युद्धवस्तादृशं तं दत्तवान्। तदा बाह्यानुसन्धानमभूत्। अत एव 'तत्संदेशागतस्मृती'रितिवचनम्। 'ततस्ताः कृष्णसंदेशैर्व्यपेतविरहज्वरा'इति ज्वरपदप्रयोगश्च। भगवतोऽत्रैव तात्पर्यमित्येतदेव फलत्वेनानूद्यते, न तु ज्ञानमार्गीयं ज्ञानम्, अन्यथान्ते 'कृष्णावेशात्मविक्लव'मिति न वदेत्। तर्हि ज्ञानोपदेशस्य कोपयोग इति चेत्। उच्यते। यथा योगिनो वपुर्योगसंस्कारसंस्कृतं सन्नाग्न्याद्युपहतं भवति, तथा भगवानात्मेति महापुरुषोपदेशेन ज्ञानाख्यसंस्कारे सम्पन्ने विरहेऽन्त्यावस्था भवितुं न शक्नोतीति तत्रैवोपयोग इति। अत्रागतस्मृतित्वे विरहज्वरराहित्ये च हेतुः संदेशे प्रियसम्बन्धित्वज्ञानमेव, न तु शास्त्रार्थोऽयमिति ज्ञानम्। अन्यथोपदेशपदमेव वदेदुभयत्र, न तु संदेशपदम्। किञ्च। ज्ञानोपदेशसंदेशो ह्युक्तरूप एव। तत्रोपक्रमे 'श्रूयतां प्रियसन्देश' इति संदेश एकत्वमेवोक्तम्। 'कृष्णसंदेशै'रिति बहुत्वं पश्चादुच्यते। एवं च सति ज्ञानोपदेशस्य स्मृतावुपयोगो विविधान्तरङ्गवार्तानां तज्ज्वरापगम इति मन्तव्यम्। अत एव भगवतापि 'मत्संदेशै'रिति बहुत्वमुक्तं संदेशेषु। विप्रयोगे प्रियसंदेशस्यापि तत्तुल्यत्वभानेन तदा स्वास्थ्यस्य रसशास्त्रसिद्धत्वादपि। अपरञ्च। स्मृतिर्हि पूर्वानुभूतस्य, पूर्वमनुभवश्च निर्दोषपूर्णगुणस्य भगवतः। मध्ये विरहस्वाभाव्याद्दोषारोपक्षणे व्यभिचारिभावे जाते यथा पैत्तिकादिज्वरभरेण दोषवशात् प्रलापे सत्यञ्जनादिना प्रकृत्यनुसंधानेन प्रलापनिवृत्तिः, न तु ज्वरस्यापि, तथोपदेशसंदेशेन विरहभरनिवृत्त्या पूर्वोक्तव्यभिचारिभावनिवृत्तिः, न तु विरहस्यापीति। अत्र वयं त्वेवं मन्महे। पूर्वमुपक्रमे दुःखमेवोक्तम्, तत उपदेशः, तदनन्तरमपि 'हे नाथे'त्यन्तेन ग्रन्थेन क्लेशो निरूपितः। ततो विविधसंदेशैर्विरहतापनिवृत्तिर्भगवत्यात्मत्वेन ज्ञानं चोक्तम्। ततोऽन्ते 'दृष्ट्वा स्त्रीणां भगवति कृष्णावेशात्मविक्लव'मिति सर्वदानुवर्तमानः क्लेश उक्तः। एवं सत्युपक्रमोपसंहाराभ्यां विरहभाव एव दृढो निरूपितो भवति। मध्ये यद् 'ज्ञात्वात्मानमधोक्षज'मित्युक्तम्, तत्तु 'असावहं' 'कृष्णोऽहं' 'पश्यत गति'मितिवत्कादाचित्क एव भाव उक्त इत्युपसंहारानुरोधान्मन्तव्यम्। नन्वेवं सत्युद्धवप्रेषणं किंप्रयोजनकम्, उक्तभावस्य सार्वदिकत्वादिति चेत्। अत्राप्युच्यते। उद्धवे हि प्रभोः परमा कृपा, अतः पूर्णो भगवद्भावो यादृशोऽस्ति, तादृशोऽत्र देयः। स च व्रजसुन्दरीष्वेव सिद्धः। पुंव्यक्तावसंभावितश्च। अतो मद्भाव एतादृश इत्युद्धवाय प्रदर्शनमेकं प्रयोजनम्। ततस्तद्दर्शनेन सततं तद्भावनया प्रियसंदेशहारकत्वेन तासामत्यनुग्रहेण चोद्धवेऽपि तज्जातीयभावोत्पत्त्यर्थमिति द्वितीयं प्रयोजनम्। विप्रयोगे प्रियसंदेशागमनेन यः कश्चनः संतोषः स नान्यदा चेति तृतीयम्। 'मद्वियोगाधि'मितिवचनान्मध्ये मध्ये यदैव प्रियेणैवमेवं संदेशः प्रेषित आसीदिति स्मरिष्यन्ति, तदा च पूर्वविलक्षणो भावो भविष्यतीति तुरीयम्। ज्ञानाद् भक्तिरधिका, यतस्तदुपदेशेपि भक्त्यैव तदुपमर्दो, न तु तेन भक्तेरिति निदर्शनार्थमपीति पञ्चमम्। अत एवैकादशे भगवद्वचनं 'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति। पित्रोः प्रीतिजननमुक्तमेव। भगवतः स्वामिनीनां चान्योन्यसंदेशैरन्योन्यं ये भावा जायन्ते, तेऽनन्ता एवेत्यनन्तान्येव प्रयोजनानीति दिक्। प्रकरणार्थानाहुः बीजमिति। वक्ष्यमाणस्तोत्रादौ बीजं स्नेहः। स पूर्वं निरूप्यते। स्तोत्रोपदेशयोरनन्तरं दोषस्य प्रिये दोषारोपस्य मानस्य च निवृत्तिः, तया च पूर्वस्नेहोक्तिः। ततो ज्ञानस्य फलं प्रिये निर्दोषपूर्णगुणत्वज्ञानं स्वस्मिन्नल्पत्वज्ञानं च। तत् उद्धववाक्यैः कृतार्थत्वम्॥ ०॥ मानाद्दोषद्वयमिति। उपालम्भो भ्रमरव्याजोक्त्या दोषोक्तिश्चेति द्वयम्॥ १॥ जानीमस्त्वामित्यादिवाक्यप्रतिपाद्यार्थोक्त्यनन्तरं

कस्याश्चिदेव तामसतामस्या इति । श्रुत्युत्कटभक्तिमार्गीयभाववत्त्वेन ज्ञानमार्गीयज्ञानोदयसंभावनारहिताया इत्यर्थः । सत्त्वरजस्तमांसि प्राकृतेभ्यो भिन्नानि भगवद्धर्मरूपाणि सन्तीति पूर्वमेव बहुधोक्तम् । समित्युपसर्गसूचितमर्थमाहुः तत्रापीति । भूषणादिसर्वसंपद्युक्त आगत इति । भर्तरि अपि कुशलं ज्ञायते तत्रापि तथेत्यर्थः । एवं कथने गूढाभिसन्धिमुद्घाटयन्ति अन्यथेति । स्वयमापद्ग्रस्तोऽन्यानुपेक्षेत चेत् , न दोषः स्यात् , सर्वतः कुशली स्वयमन्यान् दुःखितांश्चेदुपेक्षेत, तदा सा दोषायैव स्यात् , प्रकृते स्वापेक्षाकरणात्तथात्वमिति भावः । दुःखिता अपि तदीयत्वममन्यमानाश्चेत् , तदा तदुपेक्षा न दोषाय स्यात् , न तु तद्विपरीतानामपीत्याशयेन स्वस्य केवलतदीयत्वमाहुः भर्त्रेतिपदेन । विवाहितो हि भर्ता भवति । अत्र तदभावेपि स्वस्य केवलतदीयत्वं वक्तुं तथोक्तम् । किञ्च । न पतित्वमात्रम् , किन्तु भरणकर्तृत्वमपि, एतादृशश्चेदुपेक्षते तदा तासां जीवनमेव न भवतीति भावः ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्रुत्वा भ्रमरगीतं तु कृष्णादेशेन गोपिकाः । बोधिता इति वै सप्त-चत्वारिंशे निरूप्यते ॥ १ ॥

तं कृष्णस्यानुचरं सेवकमुद्धवं वीक्ष्य व्रजस्त्रियः शुचि स्त्रीदर्शनेऽपि कामविकाररहितं स्वाभाविकं स्मितं यस्य, अपीच्यं स्त्रीणां मनोहरमतिसुन्दरं दर्शनं यस्य, अच्युतस्य कृष्णस्येव वेषः पीताम्बरादिभूषणानि च यस्य सोऽयं कः कुतश्च देशादागतः कस्य पुत्रभृत्यादिरूपः ? स्मेति वितर्के । इत्येवं वितर्कयन्त्यः उत्सुकाः तत्परिज्ञाने उत्साहवन्त्यः तं परिवव्रुः परिवेष्टितवत्य इति द्वयोरन्वयः । अच्युतवेषभूषण इति तत्परिज्ञानोत्साहे हेतुरुक्तः । तमेव विवृणोति—प्रलम्बौ आजानुलम्बिनौ बाहू यस्य तम् । नवकञ्जे सद्योविकसितपद्मदले इव लोचने यस्य तम् । पीते अम्बरे यस्य तम् । पुष्करस्य कमलस्य मालाऽस्यास्तीति पुष्करमालिनम् । लसत् शोभमानं मुखारविन्दं यस्य तम् । मणियुक्ते मृष्टे परिशुद्धे उज्वले कुण्डले यस्य तम् । उक्तं कृष्णानुचरत्वमेव स्पष्टयति—उत्तमश्लोकस्य अविद्यानिवर्त्तकयशसः श्रीकृष्णस्य चरणाम्बुज एवाश्रयो यस्य तमिति ॥ १–२ ॥ ततश्च तं रमापतेः श्रीकृष्णस्य सन्देशहरं विज्ञाय रहसि एकान्ते आनीय सव्रीडेन हासेन, ईक्षणेन, सूनृतेन मधुरभाषणेन, आदिशब्देन अर्घ्यादिभिश्च सत्कृतं आसने उपविष्टं अवनताः कृतप्रणामाः सत्यः प्रश्रयेण विनयेनापृच्छन् ॥ ३ ॥ तत्प्रश्नप्रकारमेवाह— जानीम इति यदुपतेः कृष्णस्य पार्षदं सेवकं समुपागतं त्वां जानीमः । 'किमर्थं समुपागतोऽहम्' इत्याकाङ्क्षायामाहुः—भर्त्रेति । भर्त्रा त्वत्स्वामिना तेन स्वपित्रोर्नन्दयशोदयोः प्रियं कर्तुमिच्छया भवानिह प्रेषितः प्रस्थापितः ॥ ४ ॥

अन्वितार्थप्रकाशिका

सप्तचत्वारिंशकेऽथोद्धवो गोपीरसान्त्वयत् । मथुरामागमत्तत्र श्लोकाः सार्द्धा नवारयः (६९॥) ॥
उवाचनवकं (९) साङ्घ्रिवेदनागा (८४।) अनुष्टुभः ॥ ४७ ॥

तमिति द्वयम् ॥ व्रजस्त्रियः कृष्णस्यानुचरं प्रलम्बौ आजानुलम्बिनौ बाहू यस्य तं नवकञ्जे सद्यो विकसितपद्मदले इव लोचने यस्य तं पीते अम्बरे यस्य तम् । पुष्करस्य कमलस्य मालाऽस्यास्तीति पुष्करमालिनं लसत् शोभमानं मुखारविन्दं यस्य मणियुक्ते मृष्टे परिशुद्धे उज्ज्वले कुण्डले यस्य तम् उद्धवं वीक्ष्य सुविस्मिता बभूवुः । शुचिस्मिता इति पाठेऽपि विस्मयेन शुचिस्मिता बभूवुः । ततश्च अपीच्यं मनोहरं दर्शनं यस्य अच्युतस्य कृष्णस्येव वेषः पीताम्बरादिभूषणानि च यस्य योऽयं कः कुतश्च देशादागतः कस्य पुत्रभृत्यादिरूपः । स्मेति वितर्के । इत्येवं तत्परिज्ञाने उत्सुकाः सत्यः उत्तमश्लोकस्य हरेः पदाम्बुजमेवाश्रयो यस्य तमुद्धवं परिवव्रुः ॥ १–२ ॥ तमिति ॥ तं रमापतेः श्रीकृष्णस्य सन्देशहरं विज्ञाय रहसि एकान्ते आनीय सव्रीडेन हासेन प्रसादेन सहेक्षणेन सूनृतेन मधुरभाषणेन आदिशब्देनार्घ्यादिभिश्च सत्कृतम् आसने उपविष्टम् अवनताः कृतप्रणामाः सत्यः प्रश्रयेण विनयेनापृच्छन् ॥ ३ ॥ जानीम इति ॥ यदुपतेः कृष्णस्य पार्षदं सेवकं समुपागतं त्वां जानीमः । भर्त्रा त्वत्स्वामिना तेन स्वपित्रोर्नन्दयशोदयोः प्रियं कर्तुमिच्छया भवानिह प्रेषितः प्रस्थापितः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ सप्तचत्वारिंशकेऽध्याये उद्धवं कृष्णानुचरं ज्ञात्वा तच्छ्रावणाय भ्रमरोद्देशेन तासां गीतं ततः कृष्णसंदेशैरुद्धवकृतगोपीबोधनं च ततस्तस्य पुनर्मथुरागमनं च वर्ण्यते नवकञ्जलोचनं नवीनं कमलवन्नेत्रे यस्य तं परिमृष्टे कुण्डले यस्य तं मणिमृष्टेति पाठे तु कुण्डलखचितमणिभिः कृत्वा मृष्टप्रकाशमाने कुण्डले यस्य तं ॥ १ ॥ अपीच्यं मनोहरं दर्शनं यस्य तं अच्युतस्यैव वेषो वस्त्ररचितालंकारः भूषणं आभरणारचितालंकारश्च यस्य सोऽयं कः कुत आयातः कस्यायमस्तीति परस्परं कथयन्त्यः उत्सुकाः श्रीकृष्णवेषदर्शनेनोत्साहयुक्ताः श्रीकृष्णपदायग्रमेव आश्रयोऽवलम्बनं यस्य तं उद्धवं परिवव्रुः परित आवृतवत्यः ॥ २ ॥ तमुद्धवं रहसि स्नेहिभक्तानां कृष्णकथाकरणीयैकान्तस्थाने रमापतेः सदेशहरं विज्ञाय तमेव पूजोपचारैः आसने उपविष्टं प्रश्रयेण विनयेन अवनताः नम्रोतमांगाः सत्यः पुनश्च व्रडी च हासः प्रसादश्च ताभ्यां सहितं ईक्षणं सूनृतं कुशलप्रश्नादिप्रेयवाक्यं चादिदिभिः पाद्याद्युपचारैः सुसत्कृतं संतं अपृच्छन् पप्रच्छुः ॥ ३ ॥ आगमने हेतुः पित्रोः प्रियं कर्त्तुमिच्छया भर्त्रा तव स्वामिना इह प्रेषितः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आदेशेन हरेर्गोपीस्तत्त्वं संबोध्य तूद्धवः । सप्तचत्वारिंशके ता अनुज्ञाप्य पुरीमगात् ॥ १ ॥

अथ तासां तेन सह संवादप्रकारं भगवति प्रेमातिशयं चानुवर्णयति ॥ तमिति ॥ शुचीति च ॥ कृष्णस्य श्रीकृष्णभगवतोऽनुचरो भृत्यस्तं, प्रलम्बावाजानुलम्बिनौ बाहू यस्य तं नवकञ्जे विकसितपद्मदले इव लोचने यस्य तं, पीते पिशङ्गवर्णे अम्बरे परिधानीयोत्तरीयवसने यस्य तं, पुष्कराणां पद्मानां मालास्यास्तीति तं, व्रीह्यादित्वान्मत्वर्थीय इनिः मुखमरविन्दमिवेति मुखारविन्दं, 'उपमितं व्याघ्रादिभिः' इति समासः । लसन्मुखारविन्दं यस्य तं, परिमृष्टे निर्मलीकृते कुण्डले यस्य तं, तमुद्धवं, सर्वाः अपि, व्रजस्त्रियो गोप्यः वीक्ष्य, शुचि स्मितं यस्य सः, अपीच्यं सुन्दरं दर्शनं यस्य सः, अच्युतस्येव वेषः भूषणानि च यस्य सः, अयं कः स्यात्, कुतो वा आगतः स्यात्, कस्य वा अनुचरश्च स्यात्, इति वदन्त्य इति शेषः । उत्सुकाः सत्यः, उत्तमश्लोकस्य पदाम्बुजमेव आश्रयो यस्य तं, तमुद्धवं, परित्रव्रुः परिवेष्टितवत्यः । स्मेति विस्मये । इति द्वयोरेकान्वयः ॥ १-२ ॥ तमिति ॥ तमुद्धवं, रमापतेः श्रीकृष्णस्य, संदेशहरं वार्त्ताहर्त्तारं विज्ञाय, रहस्येकान्ते आसने, उपावेश्येति शेषः । सव्रीडः हासश्च ईक्षणं विलोकनं च सूनृतं मधुरभाषणं च तान्यादयो येषामर्घ्यादीनां तैः, सुसत्कृतं कृत्वेति शेषः । प्रश्रयेण विनयेन, अवनताः नम्राः गोप्यः, उपविष्टं स्वस्थतयासने कृतोपवेशनं ज्ञात्वा, अपृच्छन् ॥ ३ ॥ प्रश्नमेवाह ॥ जानीम इति ॥ त्वां यदुपतेः श्रीकृष्णभगवतः, पार्षदं भृत्यं, समुपागतमत्रगतं, जानीमः । किमर्थमहं समागतस्तत्राहुः । भर्त्रा अस्मत्सत्पतिभूतयदुपतिना, पित्रोर्नन्दयशोदयोः, प्रियञ्चिकीर्षया प्रियं कर्त्तुमिच्छया, भवान् इहात्र, प्रेषितः इत्यपि जानीमः ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

समवकर्ण्य तमागतमच्युतान्निरवधीरयितुं विरहव्यथाः । अगमदाश्वखिलाऽपि तमीक्षितुं पुरवधूरवधूतगृहक्रिया ॥ १ ॥

तं वीक्ष्येति : १०.४७.१.

जलजायतलोचनस्य पीताम्बरभाजो वनमालिनो हि तस्य । व्रजवासिदृशान्तदोद्धवस्य वय एवाभवदीशभेदकं तत् ॥ २ ॥

शुचिस्मिता इति : १०.४७.२.

दृष्ट्वैव कृष्णसखमेनमदृष्टपूर्वं निश्चिक्युरात्मनि शुभं सुदृशो यदेताः ।
तद्युक्तमेव हि निसर्गकृताऽपि चेष्टा व्यक्तं प्रवक्ति महतामवहिष्ठमर्थम् ॥ ३ ॥
व्याप्तोऽच्युतोऽखिलजगत्सु सदैक एवेत्यर्थं श्रुतिस्थितमिहाऽनुभवाधिरूढम् ।
कुर्वन् कुशाग्रमतिरुद्धव एक एव नानोद्धवात्मकतयाऽऽस मनःसु तासाम् ॥ ४ ॥
तेन पित्रर्थमेव त्वं प्रेषितोऽत्र ततोऽपि नः । लाभो निरामयः सिद्धस्तदीक्षासदृगुद्धवः ॥ ५ ॥

कृष्णप्रिया

इस अध्याय में गोपियाँ का अगाध प्रेम का साक्षात्कार होगा । भ्रमर गीत इस अध्याय में आया है व्रजाङ्गनाएँ प्रथम श्री उद्धवजी को कुछ उपालम्ब प्रदान करेंगे, पुनः दोष निवारण करेंगे उद्धव जी नाथ का सन्देश सुनाएँगें, परम भागवत उद्धवजी व्रज रज की कामना करेंगे भगवान् का वास्तविक स्वरूप का दर्शन होगा । इस अध्याय में ७० श्लोक संख्या रहेगी ॥

श्रीशुकदेव जी ने कहा राजन्! आजानुबाहु, अभिनव कमल के समान सुन्दर नेत्र वाले, पीताम्बर धारण किए हुए, कमल की मनोहर माला वाले, उज्वल उत्तम मणि के कुण्डल वाले रमणीय मुख सरोज वाले प्रभु के अनन्य दास परम भागवत श्री उद्धव जी का दर्शन होते ही श्री व्रजवनिताएँ पूछने लगी, कहने लगी ॥ १ ॥ अतिशय सुन्दर दर्शनीय स्वरूप श्री अच्युत भगवान् का कमनीय वस्त्राभूषणों से समलंकृत शुद्ध स्मित वाला ये महात्मा कौन है एवं कहाँ से आये हैं ! ऐसे विचार करती हुई सर्व व्रजवनिताएँ वहाँ आई और अत्यन्त उत्कण्ठा से उत्तम श्लोक भगवान् के चरण कमलों के अनन्याश्रय वाले श्री उद्धव जी को चारों तरफ से घेर लिया ॥२॥ श्री उद्धव जी रमानाथ कृष्ण के प्रिय सन्देश हर भक्त वर है यह जानकर आदर मान पूर्वक सत्कार किया, एकान्त में उत्तम आसन पर बैठाए, और लज्जा सहित अवलोकन मधुर वचनों से बहुमान विनम्रता पूर्वक अभिनन्दन के साथ पृच्छा करने लगे ॥ ३ ॥ हम जानती है कि आप श्री यदुपति श्रीकृष्णचन्द्र जी के अन्तरङ्ग पार्षद है यहाँ नाथ ने अपने माता पिता का प्रिय करने के लिए आप को भेजा है । इसलिए ही आपका पादार्पण यहाँ हुआ है ॥ ४ ॥

अन्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे । स्नेहानुबन्धो बन्धूनां मुनेरपि सुदुस्त्यजः ॥ ५ ॥
अन्येष्वर्थकृता मैत्री यावदर्थविडम्बनम्[1] । पुम्भिः स्त्रीषु कृता यद्वत् सुमनस्स्विव षट्पदैः ॥ ६ ॥
निस्स्वं त्यजन्ति गणिका अकल्पं नृपतिं प्रजाः । अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणम् ॥ ७ ॥
खगा वीतफलं वृक्षं भुक्त्वा चातिथयो [2]गृहम् । दग्धं मृगास्तथारण्यं जारो भुक्त्वा [3]रतां स्त्रियम्[4] ॥ ८ ॥

---

३. बना-वीर. विज. । २. गृहान्-वीर. । ३. परस्त्रियं-विज. ।

४. ददर्श गोपीर्गोविन्द मनोवाग्देहवृत्तिभिः । कृष्णदूतो व्रजं प्राप्त उद्धवस्त्यक्तलौकिकः ॥ विज. ।

कर्दमक्षमा

अन्वयः—अन्यथा, गोव्रजे, तस्य, स्मरणीयम् , न चक्ष्महे, बन्धूनाम् , स्नेहानुबन्धः, मुनेः, अपि, दुस्त्यजः ॥ ५॥ पुम्भिः, स्त्रीषु, कृता, मैत्री, षट्पदैः, सुमनः सु, यद्वत् , तथा, अन्येषु, कृता मैत्री, यावदर्थं विडम्बनम् कृता, मैत्री अर्थकृता भवति ॥ ६ ॥ गणिकाः, निःस्वम् व्यजन्ति, प्रजाः, अकल्पं, नृपतिम् , त्यजन्ति, अधीतविधाः, आवार्यम् , ऋत्विजः दत्तदक्षिणम् त्यजन्ति ॥ ७ ॥ खगाः, वीतफलम् , वृक्षम् , च, अतिथयः, भुक्त्वा, गृहम् , तथा, मृगाः, दग्धम् , अरण्यम् , जारः, रताम्, स्त्रियम् , भुक्वा, त्यजति ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पित्रोः प्रियचिकीर्षयेत्यत्र हेतुः । स्नेहानुबन्ध इति ॥ ५ ॥ अन्यथा गोव्रजे तस्येत्यत्र हेतुः । अन्येष्विति । अर्थकृता कार्यनिमित्ता । विडम्बनं मैत्र्यनुकरणमात्रं न तु तात्त्विकी मैत्री । पुंभिरिति दृष्टान्तौ ॥ ६ ॥ अस्यैवान्यार्थनिदर्शनैः प्रपञ्चः निःस्वमित्यादिना । निःस्वं निर्धनम् । दत्ता दक्षिणा येन तं योज्यम् ॥ ७ ॥ पक्षिणो विगतफलं वृक्षम् । रतामनुरक्तामतृप्तामित्यर्थः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यथा नन्दयशोदाप्रियचिकीर्षामन्तरा । तस्य कृष्णस्य । चक्ष्महे पश्यामः । मुनेरपि शमनिष्ठावतः संन्यासिनोऽपि, वसिष्ठादिषु तथा श्रवणात् । सुदुस्त्यजोऽतिशयेन त्यक्तुमशक्यः । सुरत्रातिशयेऽनेकार्थत्वात् । न हि कृष्णः संन्यासीति भावः। तौ विना तु तस्य यदुपतेः गोव्रजे तन्मात्रधनगोपावासे स्मरणयोग्यमपि न पश्यामः, किमुत तत्स्मरणपथगतमित्यर्थः । यत्तु तयोरपि स्मरणं तदपि तयोरेव स्नेहस्य गुणो न तु तस्येत्याहुः–स्नेहेति । बन्धूनामिति–बन्धुषु पित्रादिषु स्नेहानुबन्धः स मुनेस्संन्यासिनोऽपि दुस्त्यजः कृच्छ्वेणैव विस्मर्तुं शक्यते न तु सहसा त्यक्तव्य इति ततोऽपि काठिन्यमित्यर्थः॥५॥अन्येषु पितृव्यतिरिक्तेषु गोपीजनेषु यावदर्थं प्रयोजनावसानपर्यंतमनुकरणमात्रं यस्या सेति तीर्थः । मैत्र्या इति शेषेण यावदर्थविडम्बनामीति स्वामिनः । तात्त्विकी यथार्था । यद्वत् यथा स्त्रीषु यावदर्था नृणां मैत्री भवतीति तात्पर्यम् । सुमनस्सु पुष्पेषु । ननु कृष्णस्य पितृभ्यां भ्रात्रादिभिश्च निष्प्रयोजनत्वान्मैत्री मास्तु, युष्माभिः स्त्रीभिस्तु लम्पटत्वात्तस्य प्रयोजनमस्त्येवेति यूयमेव स्मरणीया भवथेति तत्राहुः—अन्येष्विति । अर्थकृता प्रयोजवती नियैव मैत्री, यावदर्थविडम्बनम् 'यावत्तावच्च साकल्ये' इत्यभिधानात्सर्वार्थविडम्बनरूपाया मैत्र्याः कर्ता, यश्च मैत्र्याः प्रतियोगी यश्च प्रयोजकः यश्चोपकरणं तेषां सर्वेषामप्यर्थानां विडम्बनं तिरस्कारस्तद्रूपेत्यर्थः । स्वस्य प्रयोजनसद्भावे मैत्र्याः सत्त्वं, प्रयोजनाभावे मैत्र्या अभाव इत्यर्थः । पुंभिः सुमनःस्विव पुष्पसदृशीषु सौन्दर्य सौरभ्यसौकुमार्यमाधुर्यवतीष्वपि स्त्रीषु श्लेषेण शोभनमनस्कासु अचंचलचित्तास्वपि मैत्री तद्वत्कृता यद्वत् षट्पदैः कृतेत्यन्वयः । षट्पदा हि सौरभ्यादिगुणवंत्यपि पुष्पाणि सकृत्पीत्पीत्वैव स्वचापल्यदोषाद्यथा त्यजन्ति तथैव पुमांसः स्वसंभोगार्हमाधुर्यादिमतीरपि एकनिष्ठा अपि स्त्रीः संभुज्य त्यजंतीति प्रयोजनसद्भावेपि मैत्र्या अभाव इत्यतिनिंदा ॥ ६ ॥ अस्यैव यावदर्थ विडम्बनस्यैव । निस्स्वं निर्धनम् । गणिका वेश्याः 'पण्यस्त्री गणिका वेश्या' इत्यमरः । अकल्पं रक्षणाद्यसमर्थम् । अधीता विद्याः शास्त्राणि यैस्ते छात्राः । साचार्यमध्यापकम् । याज्यं यजमानम् ॥ मिथुनतासंबंधश्च यदि धर्मप्रधानतः स्यात्तदा स्थिरोपि स्यात्केवलग्राम्यधर्ममयश्चेदस्थिर एव स्यादित्यर्थांतरन्यासव्याजेन तदेव पर्यवसाययन्ति—निःस्वमिति युग्मकेन । निःस्वं निर्द्धनीभूतम् । अकल्पं पालनासमर्थीभूतम्। ऋत्विजो याजकाः ॥ ७ ॥ खे गच्छन्तीति तथा । गृहं गृहस्थसद्मप्रणयकोपातिरेकं बोधयितुं दृष्टान्तबाहुल्यम् । जीर्य्यति यशः परलोकश्चानेनेति जारः । इत्यर्थ इति–रतिरनुरागो विद्यतेऽस्या इति रता ताम् , मत्वर्थीयाऽचायमर्थो लभ्य इति स्वाम्यभिप्रायः। "रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोः" इति मेदिन्याम् । रागेऽनुराग इत्यर्थः ॥ रतां रमणवतीमपि स्त्रियं त्यजन्ति, तेन यावत्तस्या यौवनं तावन्न त्यजन्तीति पूर्ववदर्थाभावाद्यत्किंचित्प्रयोजनाभावेऽपि मैत्र्या अभावः प्रतिपादितः तेन तस्य स्वप्रयोजनसिद्धिः पुरस्त्रीभिरेव भवतीति कथं वयं स्मरणीया भवामेति कृष्णस्य स्वेषु प्रेमाभावो दर्शितः । तत्रापि जारा इति बहुवचनेन स्त्रियमित्येक वचनेन च बहुजारपरायाः कामोपाधिकप्रीतिमत्यास्तैस्त्यागः संभवत्वस्माकं तु बह्वीनामपि तदेकनिष्ठत्वमेव केवलं, प्रेमापि न च कैशोर एव कामोपाधिकः किन्त्वाबाल्यादेवेत्यतो निरुपाधिक एव, तदपि कृष्णेन वयं त्यक्तास्तस्मात्तद्दृष्टान्तोऽपि तत्र न संभवेदित्यभिव्यज्य निरुपमं नृशंसत्वमेव द्योतितम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अन्यथा तौ विना तु तस्य यदुपतेर्गोव्रजे तन्मात्रधनगोपावासे स्मरणयोग्यमपि न पश्यामः किमुत स्मरणपथगतमित्यर्थः । यत्तु तयोरपि स्मरणं तदपि तयोरेव स्नेहस्य गुणो नतु तस्येत्याहुः । स्नेहेति । बन्धूनामिति बन्धुषु पित्रादिषु स्नेहानुबन्धः स मुनेः सन्न्यासिनोऽपि दुस्त्यजः कृच्छ्रेणैव विस्मर्त्तुं शक्यते नतु सहसा त्यक्तुमिति ततोऽपि काठिन्वमित्यर्थः ॥ ५॥

अन्येषु मैत्री अर्थकृता प्रार्थनीयपदार्थोपाधिका नतु बन्धुष्विव स्वाभाविकीत्यर्थः। सा च यावदर्थविडम्बनं यावन्तस्तेऽर्थास्तावदेव तस्या मैत्र्या अनुकरणमात्रम्। अस्मासु तु न काचिद्बन्धुता मिथुनतासम्बन्धश्च न स्थिरः स्यादिति। शालीनतया दृष्टान्तोपदेशेनैवाहुः पुंभिरिति दृष्टान्तस्यैव दृष्टान्तः सुमनःस्विति श्लेषेण शोभनचित्तेष्विति न तेषां तत्र दोषः किन्तु लौल्यात् षट्पदानामेवेति भावः ।। ६ ।। मिथुनतासम्बन्धश्च यदि धर्मप्रधानतः स्यात्तदा स्थिरोऽपि स्यात् केवलग्राम्यधर्ममयश्चेत् अस्थिर एव स्यादित्यर्थान्तरन्यासव्याजेन तदेव पर्यवसाययन्ति। निःस्वमिति युग्मकेन। निःस्वंनिर्धनीभूतम् अकल्पं पालनासमर्थीभूतम् ऋत्विजो याजकाः ।। ७ ।। दग्धं दग्धीभूतं जारा भुक्त्वा रतां श्रियमित्यत्र दृष्टान्तपक्षेषु पुरुषेषु निन्द्यं जारपदं न्यस्तं स्त्रियान्तु तद्वत् पुंश्चलीपदं न न्यस्तं किन्तु रतापदमेव तत् खलु दार्ष्टान्तिकेषु स्वेषु तद्दोषसंक्रमणनिरसनार्थमेवं स्थिते वयमुत्पत्तित एव निजं तस्मिन्ननुनिर्णीय तमेवानन्यतया स्वयं वृतवत्यः। स पुनरस्मान् भुक्त्वा परित्यजन् जारायमाण एव जात इति तमेवानन्यभावाः भरा इति बहुत्वमुक्त्वा स्त्रियमित्येकवचनन्तु जारपरायाः स्त्रिया बहुजारत्वमपि सम्भवतीति तद्विधायां निन्दाया विवक्षया स्वेषां पुनरेतादृशताया इति ज्ञेयम् एवं धनपालनाध्ययनपूजोपजीवनभोजनाश्रयणरतयोऽष्टौ प्रायो लोकानामपेक्षा अर्था भद्राभद्राश्च सर्वेऽप्युपाधय इति न स्नेहनिर्वाहका इति भावः ।। ८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अन्यथा तौ विना गवां व्रज इति परमदैन्येनात्मनो गोसादृश्यमननात्, स्मरणीयं जनं कञ्चिद्वा न पश्यामः, बन्धुनां बन्धुषु स्नेहस्यानुबन्धः प्रवृत्तिः, मुनेरात्मारामस्यापि, किं पुनरैश्वर्य्याद्यपेक्षस्य तस्य ।। ५ ।। अन्येषु बन्धुव्यतिरिक्तेषु मैत्री स्नेहः; अन्यत्तैर्व्याख्यातम्। यद्वा, यद्यपि मुनेरपि सुदुस्त्यजस्तथापि न चक्ष्महे, प्रियव्यतिरिक्तानां तस्य बन्धूनामत्राभावात्। ननु, अबन्धुष्वपि स्नेहो दृश्यते ? सत्यम्, स त्वौपाधिकोऽस्थिर इत्याहुः—अन्येष्विति। सा ह्यर्थे सिद्धे पश्चान्नैवानुवर्त्तते इत्याहुः—यावदर्थं निजप्रयोजनसाधनपर्य्यन्तमेवेति। अतएव विडम्बनं कदाचित् कस्यचित् पुंसः कयाचित् स्त्रिया सह दृढमैत्रीदृष्ट्या दृष्टान्तान्तरं सुमनःस्विति, श्लेषेण शोभनचित्तेष्विति न तेषां तत्र दोषः, किन्तु चाञ्चल्यात् षट्पदानामिवेति भावः ।। ६ ।। निःस्वं पूर्वं धनवन्तमपि पश्चाद्व्ययादिना निर्धनं सन्तम्; एवमग्रेऽप्यूह्यम्। अकल्पं पालनासमर्थम्। ऋत्विजो याजकाः ।। ७ ।। खगाः खे भ्रमन्तः, फलानि दृष्ट्वा तदर्थमागताः, अतिथयो निमन्त्रणेन क्षुदादिना वा भोजनार्थमेवागताः। तथेति समुच्चये। अतो नवतृणाद्यर्थमागता इति खगवज्ज्ञेयाः। जारा इत्यत्यन्तदैन्येनात्मोद्देशसम्भवेऽपि सामान्येनैवोक्तम्, न त्वात्मोद्देशेनेति ज्ञेयम्, प्रेमविशेषेण तदेकपरत्वादिना तासु तस्य केवलप्राकृतजारत्वाभावात्। एवं क्रमेण धन-पालनाध्ययन-पूजाश्रयण-भोजनोपजीवनरतयोऽष्टौ प्रायो लोकानामपेक्ष्यार्था उक्ताः ।। ८ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अर्थकृता प्रयोजनावधिकतया विडम्बनमात्रम् ।। ६–११ ।।

श्रीमद्वीरराधवाचार्यकृता भागवतचन्द्रचन्द्रिका

कुतोऽयं निश्चय इत्यत्राहुः। अन्यथा पित्रोः प्रियचिकीर्षामन्तरेणेत्यर्थः। तस्यावाप्तसमस्तकामस्येति भावः। गोव्रजेऽतिहीन इति भावः। स्मरणीयं स्मर्तुं योग्यं वस्तु न चक्ष्महे न पश्यामः। प्रियचिकीर्षयेत्यत्र हेतुः स्नेहानुबन्ध इति बन्धूनां पित्रादीनां सम्बन्धी स्नेहरूपोऽनुबन्धः पाशः मुनेरपि त्यक्तुमशक्यः ।। ५ ।। अन्येषु बन्धुषु तु मैत्र्यर्थकृता स्वप्रयोजनप्रयुक्ताऽतः साः यावदर्थनिबन्धना यावत्प्रयोजनं निबन्धनं कारणं यस्यास्तथाभूतेत्यर्थः। विडम्बनेति पाठे यावत्प्रयोजनं विडम्ब्यतेऽनुक्रियते इति तथाभूतेत्यर्थः। न तु सा तात्विकी मैत्रीति भावः किं कच्चिदेवं दृष्टमित्यत्राहुः। पुम्भिरिति। यद्वद्दृष्टा स्त्रीषु पुंश्चलीषु कृता मैत्री यथा सुमनःसु मधुभरितेषु कुसुमेषु षट्पदैर्भृङ्गैः कृता च एते उदाहरणे न तु दृष्टान्तौ ।। ६ ।। उदाहरणान्तरमुखेन यावर्थनिबन्धनत्वं स्पष्टयन्त्यः 'प्राहुः। निःस्वमिति द्वाभ्याम्। न विद्यते स्वं धनं यस्य तं गणिका वेश्यास्त्यजन्ति यावत्स्वमनुवर्त्य ततस्त्यजन्तीत्यर्थः। एवमुत्तरत्रापि अकल्पं प्रजापालनासमर्थं नृपमधीता विद्या यैस्ते शिष्या इत्यध्याहारः दत्ता दक्षिणा येन तं यजमानमृत्विजस्त्यजन्ति विगतानि फलानि यस्मात्तं वृक्षं खगाः पक्षिणः तथा दग्धमरण्यं मृगास्त्यजन्ति तथा जारः स्त्रियं भुक्त्वा तां रतामनुरक्तामतृप्तामेव त्यजति ।। ७–८ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अन्यथा यशोदानन्दगोपयोः प्रियकरणेच्छामन्तरेण स्मरणीयं स्मरणकारणयोग्यं न चक्ष्महे न पश्यामः। गोव्रजे भुवि गोष्ठे सुरभिलोकव्यावृत्त्यर्थो गोशब्दः गवां व्रज समूहो यस्मिन् स्थाने तत्तथा तस्मिन्वा पशुजातियुक्तगोष्ठे वा ।। ५ ।। इतोऽपि स्नेहलक्षणानुग्रहं विना ऽन्यन्नास्तीति भावेनाहुः। अन्येष्विति। अन्येषु पितृव्यतिरिक्तेषु बन्धुषु मैत्री स्नेहानुवृत्तिलक्षणमित्रभावोक्तिः अर्थकृता प्रयोजननिबद्धा इत्यन्वयः कथमिवेति तत्राहुः। यावदर्थेति। यद्वत् यथाः पुम्भिः स्त्रीषु कृता मैत्री यावदर्थं

यावत्प्रयोजनसमाप्तिपर्यन्तं विडम्बनमनुकरणमात्रं यस्याः सा तथा यावदर्थं विडम्बयत्यनुकरोतीति यावदर्थविडम्बना वा इममर्थं दृष्टान्तान्तरेण द्रढयन्ति । सुमनस्स्विति षट्पदैः भृङ्गैः ॥ ६ ॥ निःस्वं वित्तहीनम् अकल्पं रक्षणाद्यसमर्थं तत्तदक्षिणं यजमानम्बा ॥ ७ ॥ वीतफलं फलरहितं प्रणयकोपातिरेकदर्शनार्थं बहुदृष्टान्तकथनं जार उपपतिः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यत्तु तयोरपि स्मरणं तदपि तयोरेव स्नेहस्य गुणो नतु तस्येत्याहुः । स्नेहेति । पूर्वत एव गोविन्दगतरागादयः विरहे त्यक्तलौकिकाः । कृष्णदूते व्रजायातेऽनुगायन्त्य इत्यादि ॥ ५-१० ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तदेव प्रकटयन्त्य आहुः—अन्यथेत्यादि । अन्यथा गोव्रजे तस्य स्मरणीयं न पश्यामः, पितरौ विना स्मृतिविषयोऽत्र नास्तीति भावः । ननु तस्यात्मारामस्य कथं पितरौ प्रति तथा स्नेहः ? इत्याशङ्क्याहुः–स्नेहानुबद्धो बन्धूनामिति । मुनेरात्मारामस्यापि । अतो न वयं बन्धवः, अस्मान् प्रति स्मृतिरपि तस्य दुर्लभेत्यसूयोक्तिः ॥ ५ ॥ ननु भवतीः प्रत्यपि तस्यातिशयैव मैत्रीति सुप्रसिद्धैव वार्ता नेत्याहुः—अन्येष्वित्यादि । अन्येषु मद्विधेषु अर्थकृतैव मैत्री प्रयोजनकृतैव । सा च यावदर्थं विडम्बनम् यावत् प्रयोजनम् अतएव विडम्बनं मैत्रानुकरणमेव, न तु मैत्री । तस्मात् पुंभिः स्त्रीषु कृता मैत्री षट्पदैः सुमनः सु कृता मैत्रीव । ते तु यावन्मधु सम्बन्धस्तावदेव तासु रज्यन्ति तद्वत् पुमांसोऽपि स्त्रीषु । एतेन तस्यास्मासु न निष्कैतवं प्रेमेत्याक्षेपोक्तिः ॥ ६ ॥ तत्सजातीयान्युदाहरणानि दर्शयन्ति—निः स्वं त्यजन्तीत्यादि बहुभिः ७ ॥ जारा भुक्त्वा रतां स्त्रियमिति भगवन्तं प्रत्याक्षेपः । वयं तु तं परमप्रेयांसमित्येव ज्ञातवत्यः, सम्प्रति तद्व्यवहारेण जारमेव तं जानीम इत्यर्थः ॥ ८-९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अन्यथेत्यादि—साक्षेपोक्तिः (९ म श्लो०) 'इति' इत्यादि-पर्यन्तम् । स किमस्मासु निरुपाधि प्रेम कृतवान् ? नैवम् अत आहुः—सुमनःस्विव षट्पदैः ॥ ५-६ ॥ उपाधिकृतं प्रेम उपाधिहानौ नश्यतीत्याहुः—निःस्वं त्यजन्तीत्यादि सर्वम्, जारो भुक्त्वा रतां स्त्रियमित्यस्य परिपोषार्थम् ॥ ७-९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्मरणीयं स्मरणयोग्यं जनं कमपि न चक्ष्महे न पश्यामः स्मृतयोः यशोदानन्दयोः पित्रोरपि तेन यद्येवमनादरः कृतस्तदा अस्मदादीनां तदीयस्मृत्येकभूमिकायामप्यारोहणयोग्यता कुत एव स्यादिति भावः । मुनेः कृतसंन्यासस्यापि दुस्त्यजः षष्ठी आर्षी कृष्णेन तु परस्त्रीपुञ्जेषु रममाणेनापि दुस्त्यज एवेत्यहो कृष्णस्य वैराग्यतीव्रतेति भावः ॥ ५ ॥ ननु कृष्णस्य पितृभ्यां भ्रात्रादिभिश्च निष्प्रयोजनत्वान्ममता मास्तु युष्माभिः स्त्रीभिस्तु लम्पटत्वात् तस्य प्रयोजनमस्त्येवेति यूयमेव स्मरणीया भवथेति तत्राहुः । अन्येष्विति । अर्थकृता प्रयोजनवती निन्द्यैव मैत्री यावदर्थविडम्बनं यावत्तावच्च साकल्ये इत्यभिधानात् सर्वार्थविडम्बनरूपाया मैत्र्याः कर्त्ता यश्च मैत्र्याः प्रतियोगी यश्च प्रयोजकः यश्चोपकरणं तेषां सर्वेषामप्यर्थानां विडम्बनं तिरस्कारस्तद्रूपेत्यर्थः । स्वस्य प्रयोजनसद्भावे मैत्र्याः सत्त्वं प्रयोजनाभावे मैत्र्या अभाव इत्यर्थः । तत्रापि पुंभिः सुमनःस्विव पुष्पसदृशीषु सौन्दर्य्यसौरभ्यसौकुमार्य्यमाधुर्य्यवतीष्वपि स्त्रीषु श्लेषेण शोभनमनस्कास्वचञ्चलचित्तास्वपि मैत्री तद्वत् कृता यद्वत् षट्पदैः कृतेत्यन्वयः । षट्पदा हि सौरभ्यादिगुणवन्त्यपि पुष्पाणि सकृत् पीत्वैव स्वचाञ्चल्यदोषात् यथा त्यजन्ति तथैव पुमांसः स्वसम्भोगार्हमाधुर्य्यादिमतीरप्येकनिष्ठा अपि स्त्रीः सम्भुज्य त्यजन्तीति प्रयोजनसद्भावेऽपि मैत्र्या अभाव इत्यतिनिन्दा ॥ ६ ॥ तत्र स्वप्रयोजनाभाव एव मैत्र्या अभाव इत्यत्र दृष्टान्तान् दीपकन्यायेनाहुः । निःस्वं गणिकास्त्यजन्ति तेन यावद्धनप्राप्तिस्तावन्न त्यजन्तीत्येवमग्रेऽपि व्याख्येयम् अकल्पं पालनासमर्थं दत्ता दक्षिणा येन यजमानं वीतफलं विगतफलं जाराः खलु रतां रमणवतीमपि स्त्रियं त्यजन्ति तेन यावत्तस्या यौवनं तावन्न त्यजन्तीति पूर्ववदर्थाभावात् यत् किञ्चित्प्रयोजनाभावेऽपि मैत्र्या अभावः प्रतिपादितः तेन तस्य स्वप्रयोजनसिद्धिः पुरस्त्रीभिरेव भवतीति कथं वयं स्मरणीया भवामेति कृष्णस्य स्वेषु प्रेमाभावो व्यञ्जितः तत्रापि जारा इति बहुवचनेन स्त्रियमित्येकवचनेन च बहुजारपरायाः कामोपाधिकप्रीतिमत्यास्तैस्त्यागः सम्भवतु अस्माकं तु बह्वीनामपि तदेकनिष्ठत्वमेव केवलं प्रेमापि न सम्भवेदित्यभिव्यज्य निरुपमं नृशंसत्वमेव कृष्णस्य द्योतितम् ॥ ७-८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

ननु दूतीप्रेषणे तयोः सन्तोषो न भवेदतोऽर्थात् सोऽपि भवत्वित्याशयेन भवतीनामेव प्रियचिकीर्षया युष्मद्भर्त्राहं प्रेषितो भवत्यस्तु पृथैवान्यथा वर्णयन्त्यः क्लिश्यन्तीत्याशङ्क्याहुः । अन्यथेति । पितरौ विना तस्य यदुपतेः गोव्रजे स्मरणविषयं न पश्यामः यदर्थं भवादृशं प्रेषयेत् त्यक्तगोपालत्वस्य प्राप्तयद्वाधिपत्यस्यानुपयुक्तत्वाद्गोगोपादिकमपि पशुपालादिस्थितियोग्ये स्थाने स्मरणीयं न चक्ष्महे अस्माकं तु स्मरणप्रसक्तिरेव नास्तीत्याशयाः अन्यथास्मद्गृहानागत्यैकत्र स्थित्वास्मानाहूय प्रियसन्देशानुक्त्वा पश्चान्नन्दराजगृहे प्रवेशस्त्वया कृतः स्यान्न तु तथा कृतवानसि किन्तु स्वत एवास्माभिरागत्य परिवेष्टितोऽस्यतोऽस्मत्को

यथार्थ एवेति भावः। नन्वनपेक्षणीयत्वरूपहेतोः पित्रोरपि तुल्यत्वात्तत्स्मरणं तत्प्रियार्थं दूतप्रेषणादिकं चापि न संभवतीत्याशङ्क्याहुः। स्नेहेति स्नेहेनानुबन्धः वन्धनं स्नेहेनानुसम्बन्धो यस्य स स्नेहग्रन्थिर्वा बन्धूनां मातापित्रादिसम्बन्धी सम्बन्धो मुनेस्तत्त्वविदोऽपि अत्यर्थं दुस्त्यजस्त्यक्तुमशक्यः। ननूक्तहेतुर्भवतीष्वपि समान इत्याशङ्कानिवृत्त्यर्थं बन्धूनामित्युक्तं स्नेहमात्रं चेत् कदाचित्त्यक्तुमपि शक्येत परस्परस्नेहकृततद्ग्रन्थिस्तु यथोक्त एवेति बाधयितुमनुबन्धपदोपादानं सम्बन्धेन सह जातस्य स्नेहस्य सम्बन्धनिवृत्त्यैव निवृत्तिर्भवति औपाधिकभ्रमस्य यावदुपाधिसत्त्वनियमात् अत एव तत्त्वविदामपि यावद्देहस्तावत्तत्र स्नेहानुवृत्तिरुपलभ्यते यो मुनेरपि दुष्परिहरः स विषयिभिः कथं परिहर्तुं शक्य इत्यपिशब्देन बोधितं यथा चास्मदादिषु तस्य यावत्प्रयोजनमपेक्षाबुद्धिरासीत्सा च तदभावान्निवृत्तातो नान्यस्य स्मरणादियोग्यता नन्दराजमाहात्म्यात् तद्व्रजसम्बन्धीनां सर्वेषामपि न स्मरणं क्रियते चेत्तर्हि पराङ्गतया स्मरणादिकं नास्माकं सन्तोषकरमुत्कर्षानापादकत्वादिति भावः॥ ५॥ क्लृप्त मेवैतत् न तु वयमपूर्वं कल्पयाम इत्याशयेनाहुः। अन्येष्विति। अन्येषु देहसम्बन्धरहितेषु अर्थकृता प्रयोजनोपाधिका मित्रता यावदर्थविडम्बनमनुकरणमात्रं नतु स्वाभाविकी, अतोऽर्थनिवृत्त्या न तिष्ठति अस्मासु तु भगवत्स्नेहः कदापि न स्थितः किंतु तदनुकरणमात्रं स्थितमतो नास्माकं स्मरणादियोग्यतेत्याशयः तदुदाहरणानि निवेदयन्ति। पुम्भिरिति। तद्यथा पुम्भिः स्त्रीषु कृता मैत्री कामवाधानिवृत्तिरूपार्थपर्यन्तं विडम्बनमात्रं स्वतन्त्राः सर्वसमर्थाः पुमांसः अवलासु स्त्रीषु कामादेव स्नेहं कुर्वन्ति अन्यथा सिद्धे निवृत्ते वा कामं तद्भावदर्शनात् "यदहरेव विरजेत्तदहरेव प्रव्रजे"दिति श्रुत्या तद्रहितस्य संन्यासविधानाच्च। ननु तत्रौपाधिकोऽपि स्नेहः कदाचित्पुत्राद्युत्पत्त्या तद्द्वारा सहजोऽपि भवतीत्यस्यरुच्योदारणान्तरमाहुः। सुमनः स्विति। यथा वा षट्पदैः कृता पुष्पेषु मैत्री मकरन्दग्रहणपर्यन्तं विडम्बनमात्रं तत्र मकरन्दाभावान्निवर्त्तः झटित्यत्र गमनक्रियाबाहुल्यसूचनार्थं षट्पदशब्दप्रयोगः॥ ६॥ ईर्ष्यावशात् पुरुषाणामेव दूषणोद्घाटनमेताभिरारब्धमित्याशङ्कानिरासार्थमाहुः। निःस्वमिति। गणिका वाराङ्गनाः लोकद्वयभयनिर्मुक्ताः परममैत्रीं विडम्बयन्त्यो धनवन्तं पुरुषं भजन्ते तस्य निर्धनतादशायां तं त्यजन्ति तथा चार्थकृता मैत्री स्त्रीष्वपि कृत्रिमैवातो न वयमीर्ष्यावशात् पुरुषेषु दोषमारोपयाम इति भावः। एवं चास्मदुक्तनियमस्य नास्ति क्वापि भङ्ग इत्याशयेनोदाहरणान्तराण्याहुः। अकल्पमिति। पूर्वं सर्वभावेन पाल्यमानाः स्वयं च सर्वभावेन तद्भजनयुक्ताः प्रजा पश्चात्तमेव परम्परागतं राजानं पालनाशक्तं त्यजन्ति पालनक्षमं तच्छत्रुं भजन्तीति प्रसिद्धम् अधीताविद्या यैस्ते शिष्याः।

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः। सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षते॥

इत्युक्तं स्वयं सर्वपुरुषार्थहेतुभूतविद्याप्रदायकत्वात्परमोपकारिणमाचार्यं त्यजन्ति यथा वा दत्ता दक्षिणा येन तं याज्यम् ऋत्विजस्त्यजन्ति कदाचित् अदत्ता दक्षिणा येन तं तत्समीपमपि न गच्छन्तीति वा एतेन मूर्खाणामेवेयं कथा न पण्डितानामित्याशङ्कापि परिहृता॥ ७॥ तथा खगाः पक्षिणः क्षुत्पीडिताः फलवन्तं वृक्षं सेवमानास्तदपगमे तं त्यजन्ति छायाद्यर्थिनस्तु द्रुहितमित्यस्यापीदमुपलक्षणं तथा अतिथयः असम्बन्धिनो ब्राह्मणादयः क्षुत्पीडिता भुक्त्वा चकारादन्यपि सत्करादिकं लब्ध्वा भोजनादिदातृगृहं त्यजन्ति तद्गृहे कस्मिंश्चित् दाहादिरूपोपद्रवेऽपि जाते तदवलोकनमप्यकुर्वन्तो गच्छन्ति तथा यस्मिन्वने उत्पन्ना वृद्धिं च गतास्तादृशमपि वनमुपयोगाभावात्त्यजन्ति न तावदेक एव कश्चिदेवं करोति किन्तु सव एव एवम्विधा इति सूचयितुं सर्वत्र बहुवचनप्रयोगः तथा रतां स्वपतिपुत्रादिकं परित्यज्य स्वस्मिन्नेवात्यर्थमनुरागवतीं भुक्त्वा स्वकार्यार्थं तदीयं लोकद्वयमपि नाशयित्वा अतृप्तामेव स्त्रियं जारस्त्यजति एवम्विधः कश्चिदेवास्मत्प्रियसदृश इति ध्वनयितुं जार इत्येकवचनम् इतः परमुदाहरणान्तरानुपादानमेतस्य कृतघ्नशिरोमणित्वख्यापनार्थम्॥ ८॥

गूढार्थदीपिनी

न चक्ष्महे न पश्यामः। गोव्रजे गोकुले। मुनेः विरक्तस्यापि॥ ५॥ अन्येषु बन्धुव्यतिरिक्तेषु मैत्री अर्थकृता कार्यनिमित्ता। यावदर्थः प्रयोजनं तावत् विडम्बनमनुकरणमात्रमेव मैत्र्या न सा तात्त्विकी। यद्वत् यथा भ्रमरैः सुमनःसु पुष्पेषु॥६॥ निःस्वं निर्धनम्। अकल्पं पालनासमर्थम्। दत्तदक्षिणं यजमानम्॥ ७॥ रताम् अतृप्ताम्॥ ८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु पित्रोरपि प्रियचिकीर्षा तस्मिन् निःस्नेहे कथं संभावनीया इत्यत आहुः। स्नेहानुबन्ध इति॥ ५॥ अन्येषु तु तन्मैत्री अर्थकृता प्रयोजननिमित्ता अत एव यावदर्थविडम्बनं यावत्प्रयोजनानुकरणं तावदेव पुम्भिर्दुर्वृत्तैः स्त्रीषु पुंचलीषु यथा प्रयोजननिमित्तकृता यथा वा सुमनः सु पुष्पेषु षट्पदैः भ्रमरैस्तद्वत्॥ ६॥ इयं लोकरीतिरेवेति विमनस्का आहुः। निःस्वमितिद्वाभ्याम्। दत्तदक्षिणं याज्यम्॥ ७॥ वीतफलं विफतफलं वृक्षम् रतामनुरक्ताम्॥ ८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अन्यथा पित्रर्थं न प्रेषणं चेत्। गोव्रजे। स कीचकैर्मारुतपूर्णरन्ध्रै रित्यादिवद्व्रजपदं स्थानमात्रवाचीति गोस्थाने गोष्ठ इति यावदिति केऽपि। तत्स्मरणीयं रमणीयं किञ्चिन्न चक्ष्महे पश्यामो गवां व्रजः समूहो यत्र तस्मिन्नित्यपरे। तस्य स्मरणीयं व्रजे न च चक्ष्महे। अन्यथा सति पित्रादिकं विना रमणीये स्मरणीये नेति वदन्ति। नास्माकं मिथ्यादित्वेनागोऽपराधः स्यादित्यन्वयो वा। तस्य तत्सम्बन्ध्यागो व्रजेऽस्मत्समूहे स्यादिति वा। आगो मन्तुरिति गतम्। पित्रादिरपि कृत्याभावाद्ग्रामिन्यः कुतः स्मरणीयतेत्यतः कैमुत्येन तद्दुस्त्यजतामावेदयति। स्नेहानुबन्धो मुनेरपि दुस्त्यज सन्ध्यासिनो दुस्त्यजः कथा का कन्याशिनः कृष्णस्येति ॥ ५ ॥ अन्येषु पित्रादिव्यतिरिक्तेषु मैत्री यावदर्थविडम्बना यावदर्थं प्रयोजननिष्पत्तिपर्यन्तं विडम्बनमनुकरणं यस्याः सा स्वप्रयोजनानन्तरं पुनर्न स्मरतीति यावत्। तत्र निदर्शनं स्वानुभूतमन्यापदेशेन वदन्ति॥ पुम्भिरिति। अनेन प्रातिस्विकमेकामेकामुद्दिश्यैवेकमेकमाकारं स्वीकृतवन्तं भगवन्तं कटाक्षयन्तीति ध्वनिः। पुरुषैः स्त्री यद्वदर्थकृता तथेति। केचित्काञ्चिल्लक्षीकृत्य प्राक्तनीस्त्यजन्ति केचिच्च विरक्तास्त्यजन्तीत्यनिर्णयस्त्वस्वरसादन्या दृष्ट्वा त्यजन्तीत्येतदनुरूपं दृष्टान्तान्तरमाहुः। सुमनस्सु पुण्येषु षट्पदैर्भ्रमरैरिवेति। अर्थान्नापराध आचरितोऽस्माभिर्वयशोभनमनरकारस्तास्वप्येवं कृतमिति नाथघ्नतां ध्वनयन्ति। सरसं कुसुमान्तरं दृष्ट्वैव पूर्वतरं पुण्यं त्यजन्तो भजन्ति भृङ्गास्तद्वदेते पुमांस इति भावः। सत्यां षट्समयपदतायां प्रतिपाद्यतायामपि तैर्महात्मभिरिमां दशां नीता वयमहोऽस्मद्दौर्भाग्यमिति षट्पदैरित्यनेन ध्वन्यते। स्त्रीषु कृतेति पदमेकं वा। स्त्रीष्विषुभिः पञ्चबाणकृता तत्पीडानिमित्ता मैत्रीति वा ॥ ६ ॥ बहुदृष्टान्तैः कृष्णान्तःकरणस्योपलतुलतां ललनाः स्फोरयन्त्यो विरहाग्निमस्फोरयन्त्यश्च सन्देशश्रवणालुतया वदन्ति ॥ निःस्वमिति। सकारद्वयं वा स एको वाऽर्थः समः। निःस्वं निर्वृत्तं गणिका वारनार्यः प्रजा नृपतिमकल्पं स्वरक्षणादक्षमधीतविद्या विनेया आचार्यमुपदेशकं दत्ता दक्षिणा येन तं यजमानमृत्विजस्त्यजन्ति ॥ ७ ॥ खगा वीतफलं गलितफलं वृक्षमतिथयो भुक्त्वा तद्गृहं मृगा दग्धं दावतोऽरण्यम्। यदर्थं निःस्वमित्याद्युक्तिस्तं पक्षमधिक्षिपन्ति ॥ जार इति। जारः परस्त्रियं भुक्त्वा त्यजतीति। एकल एकलां किल संल्लाल्य त्यजञ्जारानरोचत उच्च इत्यसम्भव्यं ह्यस्तनप्रमेयं हा किं कथनीयमित्येकवचनेन ध्वन्यते ॥ ८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु भवतीनामपि सुखं कर्तव्यं सम्बन्ध तुल्यत्वात् कथमप्रेषणमिति चेत्तत्राहुः। यद्यपि अन्ये स्मर्तव्याः अस्मदादयोऽपि परं नन्दशेषत्वेन नन्दव्रजे तिष्ठन्तीति नन्दमाहात्म्यार्थम् इममुपाधिं परित्यज्य अन्यप्रकारान्तरेण भोगप्रकारेण गोव्रजेपशुयोग्ये स्थाने तस्य सर्वेश्वरस्य सर्वसमृद्धियुक्तस्य स्मरणीयं न चक्ष्महे अपेक्षितं हि स्मरन्ति लोकाः नन्वेवं सति नन्दस्याप्यस्मरणं स्यात् ईश्वरस्यापेक्षाभावात् तत्राहुः। स्नेहानुबन्ध इति। यथा अपेक्षा स्मारिका एवं स्नेहोऽपि तत्र भवतीष्वपि तुल्य इति चेत्तत्र विशेषमाहुः। बन्धूनामेव स्नेहानुबन्धः पूर्वमुत्पन्नः स्नेहेनानुबन्धो यस्येति न स्नेहमात्रमुभयेषां स्नेहस्य ग्रन्थिरिति यावत् सन् दुस्त्यजो भवति स्नेहकारणस्य सम्बन्धस्य सहजत्वात् आकाङ्क्षायाश्च कृत्रिमत्वात् यथा देहपरित्यागे दैहिकेषु स्नेहो गच्छति एवमाकाङ्क्षापरित्यागेऽपि तत्र तादृशविषयान्तरसम्भवे आकाङ्क्षा निवर्तत इति औपाधिकः सम्बन्ध इत्याहुः। अन्येष्वर्थकृतेति। यावद्देहसम्बन्धः तावत् न ज्ञानादिनापि स्नेहो निवर्तयितुं शक्यते किं वक्तव्यं विषयैः तदाह। मुनेरपि सुदुस्त्यज इति। लौकिकाद्वैदिकं बलिष्ठमिति ज्ञापनार्थमपिशब्दः सुशब्दो नित्यविवेकस्मरणेऽप्यशक्यत्वाय अन्येषु देहसम्बन्धरहितेषु अर्थकृता प्रयोजनकृता प्रयोजनं देहधर्मः धर्मिणो दुर्बलः औपाधिकोऽपि न चिरस्थायी यथा माञ्जिष्ठादिरागः चिरकालमपि तत्रापि तिष्ठति विडम्बनमेव अनुकरणमेव नटवत् अतोऽस्मासु भगवत्स्नेहः कदापि न स्थितः अनुकरणमात्रं स्थितमिति विडम्बनमात्रत्वान्न स्मरति ॥५॥ अर्थकृतत्वं प्रतिपादयितुमौधिकं धर्ममाहुः। पुंभिः स्त्रीष्विति। पुरुषाः स्वतन्त्राः सर्वसमर्थाः तद्विपरीताश्च स्त्रियः तासु स्नेहं न कुर्युरेव यदि कामो न भवेत् कामाच्च स्नेहमेव कुर्वन्ति अन्यथा सिद्धे गते वा कामे निवर्त्तते शास्त्रमपि विरागे त्यागं विधत्ते। यदहरेव विरजेदिति। ननु तत्र धर्मोऽप्यस्ति पुत्रादिद्वारा च स्नेहो भवति ततश्चागन्तुकमपि सहजमिवेति भवति भवतीष्वपि तथा भगवत इत्याशङ्क्य तत्परिहारार्थं दृष्टान्तान्तरमाहुः। सु मनः सु षट्पदैरिवेति गमनक्रियाबाहुल्यार्थं षट्पदशब्दप्रयोगः तेषां मकरन्दग्रहणानन्तरं पुष्पनाशे न कापि क्षतिः अयमस्माकं युक्तो दृष्टान्तः ननु सर्वत्रैव दृष्टान्तः सुलभः ॥ ६ ॥ ननु तावता कार्यं सिध्यति ततः पुष्पाणामाशुतरविनाशयुक्तानां भ्रमराणां च बहूनां साधारणत्वात् भगवत एकत्वाद्भवतीनामसाधारणत्वाच्च न युक्तो दृष्टान्त इत्याशङ्क्य औपाधिकानामेषैव व्यवस्थेतिवक्तुं दृष्टान्ताष्टकमाहुः। निःस्वमिति। यद्यपि नच कैशोर एव मामोपाधिकः किं त्वाबाल्यादेवेत्यतो निरुपाधिक एव तदपि कृष्णेन वयं त्यक्तास्तस्मात्तद्दृष्टान्तोऽपि तत्र सर्वत्र बहुत्वं साधारणत्वं चोपाधिरस्त्येव तथापि बहुधा दर्शनानात् सन्दिग्धोपाधित्वं साधयितुं दृष्टान्तानां कथनं सर्वथा निराकरणे अचिकित्स्य एव दोषः स्यात् यथा मित्रातनयत्वं संदिग्धोपाधिकं दशमोऽपि चेत् श्याम एव स्यात् तदोपाधिर्न भवेदेव अन्यथा तु भविष्यतीति एवं बहुत्वसाधारणत्वेऽपि भगवांस्त्यक्ष्यत्येव तदास्मास्वभावान्नोपाधिर्भविष्यतीति भावः। तत्र प्रथमस्त्रियः स्वभावतः अदुष्टाः पुरुषो दुष्ट इतीर्ष्यावशात् भगवान् दूष्यत इति इमं पक्षं व्यावर्तयितुं स्त्रीणामेव प्रथमं स्वार्थाभावे पुरुषपरित्यागमाहुः। निःस्वं त्यजन्तीति। ता हि

प्रथमतः सर्वभावेन भजन्ते नह्येवं कश्चिदात्मानं परस्मै निवेदयति तत्रापि यस्मै कस्मैचित् अनेन धर्मार्थमपि भजनं निषिद्धं लोकेऽपि निन्दिताः एवं लोके वेदे विरुद्धा अपि सर्वानपि परित्यज्य यं कञ्चित् सर्वभावेन भजन्ते ताः सर्वोत्तमा भवितुमर्हन्ति यद्यर्थं न कामयेयुः अर्थश्च न केवलं निर्वाहकः किन्त्वधिकोऽपि तस्मात्तासां तावद्व्यर्थमेव निमित्ताभावे तादृशस्यापि त्यागात् यस्तु तथा भूतानां विदित्वा सर्वस्वं निवेदयति तादृशमपि धनरहितं स्वशब्देनापार्जनेऽप्यसमर्थं गणिका वेश्यास्त्यजन्ति नहि तादृशः स्नेहोऽन्यत्र भवितुमर्हति। ननु तथाप्येताः समभावेन भजनं कृतवत्यः तूत्नकर्षभावेन सेवन्ते तेषु त्यागो न भविष्यतीत्याशङ्क्याहुः अकल्पमसमर्थं नृपं राजानमपि प्रजास्त्यजन्ति पूर्वं सर्वभावेनपाल्यमानाः प्रजाः स्वयमपि सर्वभावेन भजनयुक्ताः। तथापि पश्चात्पालनासामर्थ्ये तं परित्यज्य तच्छत्रोर्भवन्ति ताश्चेन्न मन्येरन् न कोऽपि भवेद्राजा तथापि कः प्रयासं करिष्यतीति अल्पेनापि निमित्तेन परम्परागतमपि राजानं त्यजन्ति अनेन ज्ञायते देहसंबन्धव्यतिरिक्तेषु कथमपिलौकिकं भजनं यावदर्थमेव नतु कदाचिदपि क्षणमात्रमपि अनुपवोगे भजन्त इति। ननु लौकिके तथास्तु वैदिकेषु वाक्यप्रामाण्यात्तथा भविष्यतीत्याशङ्क्य परिहरन्ति। अधीतविद्या इति पादद्वयेन। शब्दानुष्ठानभेदेन आदौ विद्या सर्वा यतो गृहीता यतः सर्वोऽपि पुरुषार्थो भवति तादृशीमपि प्राप्य ग्रहणपर्यन्तमेव आचार्यं सेवन्ते नत्वग्रे "उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः। सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षते" इति एतादृशमपि स्वकार्ये सम्पन्ने त्यजन्तीति सर्वथा अन्येष्वर्थकृतैव मैत्री किञ्च यत्र वैदिकः सम्बन्धः सूतकव्यवहारः। अधीतस्यार्थोपयोगेजीविका च स्वस्य भवति तादृशमपि दत्ता दक्षिणा येन दक्षिणामेव प्राप्य शिष्टमर्थं यजमानं च त्यजन्ति कदाचिद्वा अदत्तदक्षिणं तस्मादन्वयव्यतिरेकाभ्यां प्रयोजनकृतैव मैत्री ॥ ७ ॥ एवमेकेन श्लोकेन धर्मार्थापेक्षयैवेतरभजनं न स्वाभाविक दैहिकवदित्युक्तम् अधुना कामार्थं लौकिकवैदिकप्राकृतनिषिद्धभेदेनापि प्रवृत्ताः तत्तत्फलमनुभूय पश्चात्त्यजन्तीत्याहुः। खगा वीतफलमपि कामो हि द्विविधः उपर्यधश्चेन्द्रियभोगभेदेन तत्र खगाः पक्षिणः क्षुत्पीडिताः फलवन्तं वृक्षमाश्रयन्ति यदैव वीतफलो भवति तदैव च त्यजन्ति उपलक्षणमेतत् छायार्थिनो गतच्छायं तत्तदर्थिनस्तत्तदर्थापगमे तथा अतिथयः असम्बन्धिनो ब्राह्मणाः क्षुत्पीडिताः भुक्त्वा चकारादन्यमपि सत्कारं प्राप्य तद्गृहे अनिष्टेऽपि जाते निरीक्षणरहिताः गच्छन्ति कदाचिदेक एव कुर्यादिति सन्देहव्यावृत्त्यर्थं सर्वे एव तथाविधा इति ज्ञापयितु सर्वत्र बहुवचनं यस्मिन्नरण्ये मृगा उत्पन्नाः वृद्धिञ्च गताः तादृशस्य जातायामापदि अग्रे सम्पत्तिसम्भावनायामपि अल्पानुपयोगमाशङ्क्य त्यजन्ति मृगाः सर्वत्र साधारणं मत्वा असाधारण्येन तस्य नाशमपि कृत्वा गच्छन्तीत्याहुः। जारो भुक्त्वेति। साहि परस्य स्त्री भोग्या स्वयं जारस्तदेकस्वभावस्तदुपजीवी वा तादृशोऽपि भोगानन्तरं तां चेत्कश्चिद्धन्यात्तदपि अनपेक्षमाणस्त्यजत्येव तथैतज्जातमित्यमित्यभिप्रायः अथवा एतादृशविधान् दश दृष्टान्तानाहुः तत्र सात्त्विकादिभावेषु तथा वचनं जारो भुक्त्वेत्यन्ते राजसतामस्याः अथवा दृष्टान्ताष्टकमेवैतदवधि तामसतामसस्यास्तु सर्वभावापन्नायाः भ्रमरकथायां स्वरूपं वक्तव्यम् अत एव काचिदित्येमां निरूपयिष्यति ॥ ८ ॥

श्रीसुबोधिनी-सारः

अन्यथा प्रकारान्तरेण गोव्रजे तस्य श्रीकृष्णस्य स्मरणीयं न चक्ष्महे चिन्त्यं न पश्यामः तत्र हेतुः बन्धूनां मात्रादीनां स्नेहानुबंधो मुनेरपि सुदुस्त्यजोऽस्ति ॥ ५ ॥ अन्येषु प्रीतिरर्थकृता स्वार्थनिमित्ता अर्थविडंबनं यावत् स्त्रीषु पुंभिर्यद्वत् यथा कृता सुमनस्सु पुष्पेषु षट्पदैर्भ्रमरैरिव ॥ ६ ॥ तथा हि निःस्वं निर्धनं नरं गणिका वेश्यास्त्यजन्ति अकल्पं राज्यभ्रष्टं नृपतिं राजानं प्रजास्त्यजन्ति अधीता विद्या यैस्ते शिष्या आचार्यं गुरुं त्यजन्ति ऋत्विजो होमकर्त्तारो दत्ता दक्षिणा येन तं यजमानं त्यजन्ति ॥ ७ ॥ वीतानि क्षीणानि फलानि यस्य तं वृक्षं खगाः पक्षिणस्त्यजन्ति भुक्त्वाऽतिथयोऽपूर्वमागता गृहं भिक्षादातुर्गेहं त्यजन्ति दग्धमरण्यं वनं मृगास्त्यजन्ति रतामनुरक्तां स्त्रियं भुक्त्वा जारो विपतिस्त्यजति ॥ ८ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

पुंभिः स्त्रीषु कृतेत्यत्र विवाहिताः पुमांसः स्त्रियश्च ज्ञेयाः। अत एव विरागे श्रुत्युक्तत्यागोक्तिः। स्नेहमेव कुर्वन्तीति। न त्वपराधेपि क्रोधानुवृत्तिमिति भावः। अथवा। कुर्वन्त्येवेति संबन्धो ज्ञेयः ॥ ६ ॥ तत्र सात्त्विकादिभावेष्विति। आद्यो दृष्टान्तो राजससात्त्विकः। ततो राजसराजसः। ततस्तामसतामसः। ततस्तामसराजसः। ततो निर्गुणः। ततः सात्त्विकराजसः। ततस्तामससात्त्विकः। ततः सात्त्विकसात्त्विकः। ततः सात्त्विकतामसः। ततो राजसतामस इति दश ॥ ८ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

'कुतोऽयं निश्चय' इत्यत आहुः—अन्यथेति। पित्रोः प्रियचिकीर्षामन्तरेण तस्य कंसं हत्वा वशीकृतराज्यस्य यदुपतेर्गोव्रजे पशुपयोग्ये स्थाने स्मरणीयं किञ्चिन्न चक्ष्महे न पश्यामः। 'तर्हि पित्रोरपि स्मरणं मा भूत्' इत्याशङ्क्याहुः—स्नेहेति। बन्धूनां पित्रादीनां सम्बन्धी यः स्नेहरूपोऽनुबन्धः पाशः स सहजत्वान्मुनेः मननशीलस्य विरक्तस्य संन्यासिनोऽपि दुस्त्यजस्त्यक्तुमशक्यः ॥ ५ ॥ अन्यत्र स्नेहस्यौपाधिकत्वमाह—अन्येष्विति। बन्धुव्यतिरिक्तेषु मैत्री स्नेहः अर्थकृता प्रयोजनप्रयुक्ता। अतो यावदर्थविडम्बनं यावत् प्रयोजनं तावत् स्नेहानुकरणमात्रम्। प्रयोजनसिद्ध्यर्थं स्नेहप्रदर्शनम्, न तात्विकः स्नेह इत्यर्थः। तत्र

दृष्टान्तद्वयमाहुः—पुम्भिः स्त्रीषु कृता यद्वत् यथा कामनिमित्ता मैत्री कामे निवृत्ते तु सापि निवर्त्तते । 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति शास्त्रेणापि निष्कामस्य स्त्रीपरित्यागविधानात् ॥ सुमनस्सु पुष्पेषु षट्पदैर्भ्रमरैः कृता यथा मकरन्दनिमित्ता, मकरन्दग्रहणानन्तरं तदभावदशायां वा तत्परित्यागदर्शनात् । पुष्पनाशेऽपि क्लेशादर्शनाच्च ॥ ६ ॥ उदाहरणान्तरैर्यावदर्थविडम्बनमेवान्यत्र मैत्र्याः प्रदर्शयन्ति निःस्वमिति श्लोकद्वयेन । प्रथमं धनवन्तं पुरुषं स्वदेहमपि तदधीनं कृत्वाऽनुवर्तमाना अपि गणिका वेश्यास्तद्धनं गृहीत्वा न विद्यते स्वं धनं यस्य तथाभूतं पश्चात्त्यजन्ति । 'समबुद्ध्याऽनुवर्तमानानामेवं त्यागो भवतु, उत्कृष्टभावेनानुवृत्तौ तु स न स्यात्' इत्याशङ्क्याहुः—अकल्पमिति । पालनपोषणादिसामर्थ्यदशायां नृपतिमनुवर्तमाना अपि प्रजाः पश्चाद्दैवयोगेन अकल्पं पालनाद्यसमर्थं तं त्यजन्ति । 'लोके एवं कापट्यात्त्यागो भवतु, वैदिके सदाचारे तु स न स्यात्' इत्याशङ्क्याहुः—अधीतेति । पूर्वमध्ययनदशायां आचार्यं "उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । संकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" इत्युक्तलक्षणं गुरुमनुवर्तमाना अपि शिष्याः पश्चात् अधीता विद्या यैस्तथाभूताः सन्तस्तं त्यजन्ति । ननु 'शब्दव्यवहारे एवं भवतु, अनुष्ठानव्यवहारे स न स्यात्' इत्याशङ्क्याहुः—ऋत्विज इति । पूर्वं यज्ञादिकर्मानुष्ठानेन यजमानमनुवर्तमाना अपि ऋत्विजः पश्चाद्दत्ता दक्षिणा येन तं लब्धदक्षिणाः सन्तस्त्यजन्ति ॥७॥ तथा खगाः प्रथमं सफलं वृक्षं सेवमाना अपि वीतफलं फलरहितं तं त्यजन्ति । 'विवेकहीनानामेव एवं व्यवहारः, विवेकिनामयं न स्यात्' इत्याशङ्क्याहुः—भोजनात् पूर्वमुपविष्टा अपि अतिथयो भुक्त्वा च गृहं त्यजन्ति । तथा हरिततृणेऽरण्ये विचरन्तोऽपि मृगा दग्धं तत्त्यजन्ति । जारः कामान्धः परस्त्रीभोक्ता भोगात् पूर्वं तस्यां प्रीतियुक्तोऽपि भुक्त्वा च कामनिवृत्तौ रतामतृप्तामपि तां त्यजति ॥ ८ ॥

अन्वितार्थप्रकाशिका

अन्यथेति ॥ पित्रोः प्रियचिकीर्षामन्तरेण तस्य कंसं हत्वा वशीकृतराज्यस्य यदुपतेर्गोव्रजे पशूपयोग्ये स्थाने स्मरणीयमपि किञ्चिन्न चक्ष्महे न पश्यामः किं पुनः प्रियचिकीर्षया दूतं प्रेषयितुम् । यतः बन्धूनां पित्रादीनां सम्बन्धी यः स्नेहरूपोऽनुबन्धः पाशः स सहजत्वान्मुनेः विरक्तस्यापि । शेषे षष्ठी आर्षी वा । दुस्त्यजस्त्यक्तुमशक्यः ॥ ५ ॥ अन्येष्विति ॥ बन्धुव्यतिरिक्तेषु मैत्री स्नेहः अर्थकृता प्रयोजनप्रयुक्ता अतः सा तु यावत् अर्थः प्रयोजनं तावत् विडम्बनं स्नेहानुकरणमात्रं नतु तात्त्विकः स्नेहः । तत्र द्वौ दृष्टान्तौ यद्वत् यथा पुंभिः स्त्रीषु कृता कामनिमित्ता मैत्री कामे निवृत्ते निवर्त्तते सुमनःसु पुष्पेषु षट्पदैरिव कृता मैत्री मकरन्दग्रहणानन्तरं तदभावदशायां वा निवर्त्तते ॥ ६ ॥ निःस्वमिति ॥ गणिकाः पूर्वसेवितमपि निःस्वं निर्द्धनं सन्तं त्यजन्ति तेन यावद्धनप्राप्तिस्तावन्न त्यजन्तीत्येवमग्रेऽपि व्याख्येयम् । प्रजाः अकल्पं राज्यच्युतं पूर्वपालकं नृपतिं त्यजन्ति । शिष्या अधीता विद्या यैस्तादृशाः सन्तः पूर्वमध्यापकम् आचार्यं त्यजन्ति । ऋत्विजः दत्ता दक्षिणा येन तादृशं पूर्वं धनदं यजमानं त्यजन्ति ॥७॥ खगा इति ॥ खगाः वीतफलं नष्टफलं वृक्षं त्यजन्ति । अतिथयः भुक्त्वा गृहं त्यजन्ति । मृगाः दग्धमरण्यं त्यजन्ति । जाराः स्त्रियं भुक्त्वा रतां प्रीतियुक्तामतृप्तामपि तां त्यजन्ति । अतस्तत्रार्थकृतैव मैत्री । अत्र पुंक्षु जारपदं दत्तं न स्त्रीषु पुंश्चल्यादिपदम् । तेन वयमुत्पत्तित एव तं वृतवत्यः स तु अस्मान् भुक्त्वा त्यजन् जारायमाण एव जातः । जारा इति स्त्रियमिति बहुत्वैकत्वाभ्यां जारपरायाः स्त्रियाः बहुजारत्वमपि स्यादिति स्वेषां ततो वैलक्षण्यं व्यज्यते ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अन्यथा पितरौ विनायतो बन्धूनां बन्धूषु पित्रादिषु स्नेहानुबन्धो मुनेस्त्यागिनोपि सुतरां त्यक्तुमशक्यः ॥ ५ ॥ अर्थकृता प्रयोजनायकृता मैत्री सापि यावान् अर्थः प्रयोजनं तावत् विडम्बनं मैत्र्या अनुसरणमात्रं भवति तत्र दृष्टान्तद्वयं यद्वत् यथा ॥ ६ ॥ निःस्वं निर्धनं गणिकावारांगनाः अकल्पं रक्षणेऽसमर्थं दत्तदक्षिणं यजमानं ॥ ७ ॥ वीतफलं गतफलं ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कुतोऽयं भवतीनां निश्चयस्तत्राहुः अन्यथेति ॥ अन्यथा पित्रोः प्रियचिकीर्षामन्तरेणेत्यर्थः । तस्यावाप्तसमस्तकामस्य कृष्णस्येत्यर्थः । गोव्रजेऽतिहीनेऽस्मिन् घोषे इत्यर्थः । स्मरणीयं स्मर्त्तुं योग्यं वस्तु, न चक्ष्महे नोत्पश्यामः । प्रियचिकीर्षयेत्यत्र हेतुः । स्नेहानुबन्ध इति । बन्धूनां पित्रादीनां संवन्धी, स्नेहपाशः, मुनेरपि सुदुस्त्यजः सुतरां त्यक्तुमशक्यः ॥ ५ ॥ अन्येष्विति अन्येषु वन्धुषु तु, मैत्री अर्थकृता स्वप्रयोजनसाधनप्रयुक्ता, अतः सा यावदर्थं यावत्प्रयोजनं निवन्धनं कारणं यस्यास्तथाभूता, न तु सा तात्त्विकीति भावः । किं क्वचिदेवं दृष्टमित्यत्राहुः । स्त्रीषु पुंश्चलीष्वङ्गनासु, पुम्भिः कृता मैत्री, यद्वद्यथा अदृढा तथाविधैव सापीति भावः । अन्यदृष्टान्तमाहुः, सुमनस्सु मधुभरितेषु कुसुमेषु, षट्पदैर्भृङ्गैः, कृता मैत्री इव तद्वत् ॥ ६ ॥ उदाहरणान्तरमुखेन यावदर्थनिबन्धनत्वं स्पष्टयन्त्यः प्राहुः निस्स्वमिति द्वाभ्याम् ॥ निस्स्वमिति ॥ निर् न विद्यते स्वं धनमस्येति निस्स्वो निर्धनस्तं, गणिका वेश्याः, त्यजन्ति । यावत् स्वमनुवृत्त्य ततस्त्यजन्तीत्यर्थः । एवमुत्तरत्रापि । अकल्पं प्रजापालनासमर्थं, नृपतिं प्रजाः, त्यजन्ति ।आचार्यमध्यापकं गुरुं, अधीता विद्या यैस्ते, शिष्या इत्यध्याहारः । त्यजन्ति । दत्ता दक्षिणा येन तं,

यजमानं, ऋत्विजो यज्ञकर्त्तारो द्विजाः, त्यजन्ति ॥ ७ ॥ खगा इति ॥ विगतानि फलानि यस्मात्तं, वृक्षं, खगाः फलभुजः पक्षिणः, त्यजन्ति। गृहं कस्यचिदन्नदातुर्गृहं, यावद्भोजनवेलं चिरं स्थित्वा ततो भुक्त्वा, अतिथयश्च, त्यजन्ति। तथा दग्धं दावदग्धं, अरण्यं वनं, मृगा आरण्याः पशवः, त्यजन्ति। एवं जारः स्त्रियं भुक्त्वा, रतामनुरक्तामतृप्तामेव, त्यजति ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अन्येष्विति : १०.४७.६.

कार्यं स्वार्थपरायणं भुवि समुद्दिश्यैव सर्वे जनाः प्रीतिं मानसकार्यकर्तरि जने सन्दर्शयन्त्यञ्जसा।
तादृग्वृत्तिरिहाच्युतोऽप्यजनि चेत् सम्प्रत्ययास्तक्रमं तस्याऽऽब्रह्मपिपीलकं निरुपाधि त्राणव्रतं स्यान्न किम् ॥ ६ ॥
महत्स्वपि महत्प्रीतिः कार्यगा किं पुनर्लघौ। उक्तमेतदभिव्यक्तयै सुमनःस्विव षट्पदैः ॥ ७ ॥

निःस्वं त्यजन्तीति १०.४७.७.

स्वार्थैकदृष्टिर्लोकोऽयं भवत्वन्यो न सहृदयः। श्रीगोविन्द इति व्यक्तं यतः स्वीयार्पितोद्धवः ॥ ८ ॥

कृष्णप्रिया

यदि आप उनके माता-पिता श्रीयशोदाजी एवं नन्दबाबा के लिए यहाँ नहीं आए हो तो यहाँ आने का कोई कारण नहीं दीखता है। यह स्थान तो पशुओं के रहने का व्रज प्रदेश है। सर्वेश्वर और सर्व समृद्धि सम्पन्न श्रीकृष्ण के लिए नन्द यशोदा आदि के बिना अन्य कोई स्मरणीय व्यक्ति यहाँ मालुम नहीं होते हैं। बाबा ? बन्धुजनों का स्नेह एवं बन्धुजनों का सम्बन्ध तो मुनिलोग के लिए भी दुस्त्यज है ॥ ५ ॥ उद्धवजी देह सम्बन्ध से रहित अन्यजनों से जो मैत्री होती है वह तो स्वार्थसिद्ध करने के लिए ही होती है प्रयोजन सिद्ध हो जाने पर मैत्री पूर्ण हो जाती है। जैसे पुरुष अपने काम-सिद्धि के लिए स्त्रियों से प्रीति करता है और षट्पद् भौंरे रस चूसने के लिए कुसुमों से स्नेह करते हैं ॥ ६ ॥ गणिका जैसे निर्धन का त्याग करती है, प्रजा असमर्थ नृपति का त्याग करती है, विद्या सम्पादन करने के बाद शिष्य आचार्य का त्याग करते हैं और दक्षिणा के बाद ऋत्विज अपने यजमान का त्याग करते हैं ॥ ७ ॥ पक्षी फल पूर्ण होने पर तरुवरों का, जो सम्बन्धी नहीं है केवल पाने भोजनार्थी है—वैसे अतिथि लोग भोजन कर लेने के बाद उस घर का त्याग करते हैं, हरिण जले हुए जंगलों का त्याग करते हैं, और जारलोग अपने में आसक्त भोग्या स्त्री को उपभोग के बाद त्याग कर देते हैं वैसा तुम्हारे स्वामी का कार्य है ॥ ८ ॥

इति गोप्यो हि गोविन्दे गतवाक्कायमानसाः। कृष्णदूते व्रजं याते उद्धवे त्यक्तलौकिकाः ॥ ९ ॥
गायन्त्यः प्रियकर्माणि [1]रुदन्त्यश्च गतह्रियः। तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः ॥ १० ॥
काचिन्मधुकरं दृष्ट्वा ध्यायन्ती कृष्णसङ्गमम्। प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत् ॥ ११ ॥

गोप्युवाच

मधुप कितवबन्धो मा स्पृशाङ्घ्रिं[2] सपत्न्याः कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः[3]।
वहतु [4]मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥ १२ ॥

कर्दमक्षमा

अन्वयः—कृष्णदूते, उद्धवे, व्रजम्, याते, "दृष्टम् यत्", हि, गोविन्दे, गतवाक्कायमानसाः, त्यक्तलौकिकाः, प्रियकर्माणिगायन्त्यः, गतह्रियः, रुदन्त्यः, तस्य, कैशोरबाल्ययोः, यानि, प्रियकर्माणि, तानि, संस्मृत्य, संस्मृत्य, रुदन्त्यः, दृष्टाः ॥ ९-१० ॥ काचित्, कृष्णसङ्गमम्, ध्यायन्ती, मधुकरम्, दृष्ट्वा, प्रियप्रस्थापितम्, दूतम्, कल्पयित्वा, इदम्, अब्रवीत् ॥ ११ ॥ हे मधुप ! हे कितवबन्धो ! सपत्न्याः, कुचविलुलितमालाकुङ्कुमश्मश्रुभिः, नः, अङ्घ्रिम्, मा, स्पृश, त्वम्, यस्य, दूतः, सः, मधुपतिः, ईदृक्, यदुसदसि, विडम्ब्यम्, मानिनीनाम्, तत्प्रसादं वहतु ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्यक्तलौकिकास्त्यक्तलोकव्यवहाराः ॥ ९ ॥ प्रियस्य कर्माणि गायन्त्यस्तथा तस्य बाल्यकैशोरयोर्बाल्ये कैशोरे च वयसि यानि कर्माणि तानि संस्मृत्य संस्मृत्य गतह्रियो निर्लज्जाः सत्यो रुदत्यश्च तमपृच्छन्निति पूर्वक्रियैव संबन्धः ॥१०॥ प्रियेण श्रीकृष्णेन

---

१. रुदत्यः-श्रीधर. वंशी. जीव. वीर. विज. विश्व.। २. शास्मान्-विज.। ३. स्त्वं-विज.। ४. यदु-वीर.।

मां प्रसादयितुं प्रस्थापितोऽयं दूत इति कल्पयित्वाऽब्रवीत् । यद्वा तस्मिन्नप्युद्धवे प्रियप्रस्थापितं दूतमिति दूतदृष्टिं कृत्वा मधुकरापदेशेनोद्धवमेवाप्रस्तुतप्रशंसयाब्रवीदित्यर्थः ॥ ११ ॥ हे मधुप कितवस्य धूर्तस्य बन्धो नोऽस्माकमंघ्रिं मा स्पृश । मा मां नमस्कारेण प्रार्थयस्वेत्यर्थः । तत्किमित्यपेक्षायां कृष्णवर्णस्य तस्य श्मश्रूणां लोहितत्वे कारणमुत्प्रेक्षमाणाह । सपत्न्याः कुचविलुलिता कुचाभ्यां विलुलिता संमर्दिता या कृष्णस्य वनमाला अत एव तस्याः कुंकुमं येषु तैः श्मश्रुभिरुपलक्षितः । किन्तु तन्मानिनीनां तासामेव मानिनीनां प्रसादं मधुपतिर्वहतु किमस्मत्प्रसादनेन तस्य । यदुसदसि विडंब्यमुपहासास्पदम् । कुतः । यस्य दूतस्त्वमीदृगीदृशोऽविवेकीति ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतीत्थम् । लोकव्यवहाराः पुरुषसमक्षं नग्नांगाच्छनादिरूपाः । गोविन्द इत्याद्यलुक्समासः । इति पूर्वोक्तवचनप्रकारेण । त्यक्तलौकिकाः स्वमुखेनैवौपपत्यस्पष्टीकरणादनादृतलोकसंकोचा बभूवुः । क सति—कृष्णस्य सर्वेषामप्याकर्षकतया तन्नाम्नस्तस्य निजप्रेष्ठस्यान्यत्र गतस्य सतो दूते तत्राप्युद्धवे समायाते सति, तत्र हेतुः—हि यस्माद्गोविन्दे पूर्वमेव गोकुलेन्द्रे, श्लेषेण सर्वेन्द्रियव्यापके गतानि वागादीनि यासां ताः । तत्र कायेन गतिर्निजांगानां समर्पणात्तदर्थकमात्रकर्माचरणात्तदाविष्टतया कायस्य विस्मरणाच्च । तस्मात्तासामिदानीमीदृशभवनं युक्तमेवेति भावः । इत्थमेव च पूर्वमनन्यतया स्वयं वृतवत्य इति व्याख्यातम् ॥ ९ ॥ तस्य कृष्णस्य । तम् उद्धवम् । ल्यबन्तद्विरुक्तिश्छांदसी । ततश्च गतह्रियः सत्यः यानि कैशोरबाल्ययोः प्रियकर्माणि तानि मुहुः स्मृत्वा गायन्त्योऽपि बभूवुः, रुदत्यश्च बभूवुरित्यर्थः । कैशोरस्य प्रथमोक्तिस्तासां स्वरसोद्दीपनत्वेन, बाल्यं कौमारपौगण्डात्मकं तदीयस्मरणमाबाल्यस्नेहेन ॥ १० ॥ काचिन्मुग्धा । मधुकरे दूतत्वारोपणमसम्भवं मन्वानो वक्ति—यद्वेति । मधुकरापदेशेन भ्रमरव्याजेन । इत्यर्थ इति—अन्योक्त्योद्धमेव भ्रमरीकृत्यावददिति भावः । अथ “महाभावविशेषस्य गतिं कामप्युभ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्यते । तद्धर्णाश्चित्रजल्पाद्यास्तद्भेदा बहवो मताः । प्रेष्ठस्य तु (सु) हृदालोके प्रणयक्रोधजृंभितः । भुवि रागमयो जल्पश्चित्रजल्पस्तदुद्भवः ।” इति रसग्रन्थानुसारेण तास्वेव कस्या अपि दिव्योन्मादमयश्चित्रजल्पं वक्तुमाह—काचिदिति । कापि परमप्रेष्ठा, सा च श्रीराधेत्यर्थः । श्लेषेण के प्रेमसुखे आसमंताद्विज्ञानं यस्याः, कं सर्वेषां प्रेमसुखमाचिनोति क्षणेक्षणे वर्द्धयति या सेति च मुख्यत्वात्सैव, तथैवसैषा तन्नाम्नैव प्रतिपादिता । वासनाभाष्येऽपि तादृशी सा पीतपरागपिंजरश्मश्रुं कश्चिद्भ्रमरमकस्माद्दृष्ट्वा तं दूतं कल्पयित्वा वक्ष्यमाणभङ्गीमयमिदमब्रवीत् । ननु महाविरहदुःखेऽस्मिन्कुतो मानस्तत्राह—प्रियसंगमं ध्यायन्ती, स्फूर्तिस्वप्नयोर्यः प्रियसंगमस्तमेव गुप्तं मुहुरागतस्यैव तस्य साक्षात्तथा स्मरंती । ननु तथापि यद्यन्यनायिकया प्रियस्य तत्र प्रसंगस्स्यात्तदा सम्भवत्यपि मानस्तत्राप्याह—कल्पयित्वेति, या भ्रमरमपि दूतं कल्पयति सा तदपि कल्पयेदिति भावः । वक्ष्यति च ‘सपत्न्याः कुचलुलित—’ इति । प्रियेण स्वविषयकपरमप्रेमवता तेन प्रस्थापितं दूतं वितर्क्यदं चित्रजल्पाख्यं श्लोकमब्रवीदतो यत्तत्र वासनाभाष्यस्थापितमाग्नेयवचनम् “गोप्यः पप्रच्छुरुषसि कृष्णानुचरमुद्धवम् । हरिलीलाविहारांश्च तत्रैकां राधिकां विना । राधा तद्भावसँल्लीना वासनाया विरामिता । सखीभिः साभ्यधाच्छुद्धविज्ञानगुणजृंभितम् । इज्यान्तेवासिनं वेदचरमांशविभावनैः ।’ इति, तदेतत्पूर्वं तस्याः निर्वेदाख्यं जातमासीदित्यपि ज्ञेयम् । तन्मूलतया प्रणयरोषमयोऽयमपि भावविशेषो जज्ञे, विचित्रसंचारिमयत्वात्तादृशावस्थायाः । अतस्तद्भावमयदशमीदशानन्तर्यपर्यालोचनया वासनाया विरामिता, पुनस्तत्संगमसंभावनरहिता बभूव, ततश्च तज्जातीयवार्तामसहमाना तदाच्छादनाय देहान्तरेष्वपि तद्दुःखपारावारमपश्यन्ती मुक्तिरेव वरमिति प्रतिपादनाय वा वेदचरमांशस्य ज्ञानकाण्डस्य विभावनैरुदाहरणैः शुद्धेत्यादि यथा स्यात्तथैवाभ्यधात् संवादमाचचार । न केवलं सा किन्तु सख्योऽपीत्याह—सखीभिरिति योज्यम् । अथ वा वेदचरमांशस्तादृशभावप्रकाशको वेदः, वासना तादृशभावेतरः सर्व एव भावः शुद्धविज्ञानं च तादृशभावमयानुभव उच्यते, “यं सर्वे वेदा आमनन्ति मुमुक्षवो ब्रह्मवादिनश्च” इति मुक्तावस्थोपरि सामान्यभक्तेरपि प्राशस्त्याम्नायात् , ‘वाञ्छन्ति यद्भवभियो मुनयो वयञ्च’ इति श्रीगोपिकामात्राणामपि सर्वस्पृहणीयभावत्वाच्च, ‘इत्यच्युतांघ्रिं भजतोऽनुवृत्त्या’ इत्याद्येकादशानुसारेण यथा भक्त्यैवानुभावोदयाच्च ॥११॥ अत्र गोप्यश्चित्रजल्पेन भ्रमरमुद्दिश्योद्धवमाहुः । चित्रजल्पश्च रसरत्नाकरे—“चित्रजल्पो दशांशोऽयं प्रजल्पः परिजल्पितः । विजल्पोज्जल्पसंजल्पा अवजल्पोभिजल्पितः । आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्तितः ।” इति । तत्र प्रजल्पमाहैका—मधुपेति । ‘उन्मत्तः कितवो धूर्तः’ इत्यमरः । इत्यर्थ इति—त्यक्तासु को नमस्कारः, किं तत्प्रार्थनेन वेति भावः । तद्वारणम् । किं कुत इति । तस्य भ्रमरस्य । श्मश्रूणां मुखरोम्णाम् । लोहितत्वे रक्तत्वे । अत एव सम्मर्दनादेव । तस्याः सपत्न्याः । कुपिताह—किन्त्विति । तासामेव मथुरास्थानामेव । मधुपतिर्यदुपतिः एकदेशन्यायेन मधुरापतिर्वा ‘मधुरा मथुरा प्रोक्ता’ इति कोशात् । तस्य कृष्णस्य । उपहासास्पदत्वे हेतुमाशंकते—कुत इति । ईदृशो भ्रमरोऽर्थात्तद्वत् । अत्र प्रजल्पलक्षणमाह—“असूयेर्ष्यामदयुजा योवधीरणमुद्रया । प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्तितः ।” इति । इह सपत्नीर्ष्यामदाभ्यां भ्रमरावधीरणं, भ्रमरदूतत्वेन कृष्णाकौशलमपि ध्वनितम् । “स्वतः प्रेमजवार्ताया गोविन्दे लीनचेतसः । राधायाः केन वागर्थो वेद्यः स्यात्तत्कृपां विना ।” स्वचरणकमलसौरभलोभेन भ्रमन्तं भ्रमरं वीक्ष्य दिव्योन्मादवती श्रीवृषभानुनन्दिनी प्रजल्पति— हे मधुप भ्रमर कितवस्य धूर्तस्य

'एवं मदर्थोज्झित—' इत्यादिना, 'न पारयेऽहम्' इत्यादिना, 'आयास्ये' इति दौत्यकेन च मिथ्यावचनवृंदेन वञ्चकस्य कृष्णस्य बन्धो बन्धुतारूपदौत्यकारिन् अंघ्रिं मा स्पृश। ननु किमिति नमस्कर्तुं न ददासि, तत्राह—हे मधुप मद्यप 'मधु मद्ये पुष्परसे' इत्यनेकार्थवर्गः। मद्यपस्पर्शेन चरणस्यापावित्र्यं स्यादतो नमश्चिकीर्षा चेद्दूरमसृत्य नमस्कुर्विति भावः। नन्वदुष्टे मयि किमिति मिथ्या मद्यपत्वपरिवादमर्पयसीति, तत्र नायं परिवादः किन्तु यथार्थमेव वच्मीत्याह—मम सपत्न्याः कुचयोः कृष्णवक्षःसंघर्षणविलुलिता विमर्दिता या माला किं वा कुचाभ्यामेव विलुलिता या कृष्णवनमाला तत्संबन्धिकुंकुमयुक्तैः श्मश्रुभिर्मा स्पृशेति भ्रमरस्य स्वाभाविकश्मश्रुपीतिम्न एव तथारोपः। तेन च मानिनी मामनुनेतुमिहायातस्त्वमथ च तथाभूतकुंकुमश्मश्रुप्रक्षालनं विनैवेति विवेकाभाव एव मद्यपलक्ष्म। एतद्दर्शनया मानो वर्द्ध्यत एव न तु निवर्त्यत इति बुध्यस्वेति भावः। ननु यथा तथास्तु त्वं तावत्प्रसीदेति तत्राह—हे मधुप मद्यपालक तत्र गत्वा निजप्रभोः पेयं मद्यमेव पालय पिब च, तत्कर्मैव त्वं कर्तुं शक्नोषि न तु दौत्यं निर्बुद्धित्वादिति भावः। नन्वेवं चेदलं मया, सम्प्रेत्यहं पुनर्मथुरामेव यामि स एव गोपेन्द्रनन्दनः स्वयमेत्य त्वां प्रसादयत्वित्यत आह—वहत्वित्यादि। मधूनां यादवविशेषाणां पतिः संप्रति सोऽभूत्—व्रजेश्वरीगर्भजातत्वेन गोपजातिरपि वशात्क्षत्रियजातिरभूदतस्तन्मानिनीनां क्षत्रियस्त्रीणां प्रसादं वहतु प्राप्नोतु, ता एव सद्यः प्रसादयतु किमस्माभिर्निकृष्टाभिर्गोपस्त्रीभिरिति भावः। तत्र बहुवचनेन वह धातुप्रयोगेण च मधुस्त्रीणामानंत्यात्सर्वामेव तद्भुक्तत्वादेकस्यां प्रसादितायामन्यस्यां मानोत्पत्तेस्तस्यामपि प्रसादितायामन्यस्यामित्येवं तासां प्रवाहरूपेण प्रसादं प्राप्नोत्वित्यस्मत्सन्निधावागमने तस्यावसर एव नास्तीति भावः। ननु तदीयसर्वसौभाग्यनिधे देवि मैवं वादीर्यदि त्वयि तस्य मनो नास्ति तर्हि कथमहं तेन दूतः प्रस्थापितस्तत्राह—यस्य दूतस्त्वमीदृक् क्षत्रियजनसुरतचिह्नधारी, तस्य यदुसदसि विडम्ब्यं विडम्बनमेव यदुस्त्रीणां तत्कृतधर्मलोपस्य व्यक्तीभावेन कुपितैस्तत्पतिभिस्तस्य विगम्बनमेव करिष्यत इति भावः। यद्वा—यस्य त्वमीदृग्दूतस्तस्य यत् यदुसदस्तत्राधिकरणे एव विडम्बनं भाविगोपेन तन्नारीणां भुक्तत्वाद्यदूनां निन्दैव सर्वदेशे भविष्यतीत्यर्थः। श्लेषेण यस्य दूतस्त्वमीदृक् स च मधुपतिर्मधूनां मद्यानां पतिर्मद्यप एव, यतो मद्यस्य विक्षेपेणैव त्वादृशो भ्रमरो दूतः कृत इति। अत्र कितवेत्यसूया, सपत्न्या इत्यादिनेर्ष्या, अंघ्रिं मा स्पृशेति मदः, वहत्वित्यादिनाऽवधीरणम्, यदुसदशीत्यादिनाकौशलोद्गार इत्ययं प्रजल्पः। तदुक्तमुज्ज्वलनीलमणौ—"असूयेर्ष्यामदयुजा योवधरिणमुद्रया प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्यते" ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति पूर्वोक्तवचनप्रकारेण गोप्यस्त्यक्तलौकिका अनादृतलोकसंकोचा बभूवुः क्व सति कृष्णस्य सर्वेषामप्याकर्षकतया तन्नाम्नस्तस्य निजप्रेष्ठस्यान्यत्र गतस्य सतो दूते तत्राप्युद्धवे समायाते सति तत्र हेतुः हि यस्मात् गोविन्दे पूर्वमेव गोकुलेन्द्रे श्लेषेण सर्वेन्द्रियव्यापके तस्मिन् गतानि वागादीनि यासां ताः तत्र कायेन गतिः निजाङ्गानां समर्पणात् तदर्थकमात्रकर्माचरणात् तदाविष्टतया कायस्य विस्मृतत्वाच्च तस्मात्तासामिदानीमीदृशीभवनं युक्तमेवेति भावः। इत्थमेव च पूर्वमनन्यतया स्वयं वृतवत्य इति व्याख्यातम् ॥ ९ ॥ ततश्च गतह्रियः सत्यो यानि कैशोरबाल्ययोः प्रियकर्माणि तानि मुहुः स्मृत्वा गायन्त्योऽपि बभूवुः रुदन्त्यो रुदत्यश्च बभूवुरित्यर्थः। कैशोरस्य प्रथमोक्तिस्तासां स्वरसोद्दीपनत्वेन बाल्यं कौमारपौगण्डात्मकं तदीयस्मरणमावाल्यस्नेहेनेति ॥ १० ॥ अथ "महाभावविशेषस्य गतिं कामप्युपेयुषः। भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्यते। उद्घूर्णाश्चित्रजल्पाद्यास्तद्भेदा बहवो मताः। प्रेष्ठस्य सुहृदालोके प्रणयक्रोधजृम्भितः। भूरिभावमयो जल्पश्चित्रजल्पस्तदुद्भव" इति रसग्रन्थानुसारेण तास्वेव कस्या अपि दिव्योन्मादमयं चित्रजल्पं वक्तुमाह। काचिदिति। काचित् कापि परमप्रेष्ठा सा च श्रीराधेत्यर्थः। श्लेषेण च के प्रेमसुखे आ समन्तात् चित् ज्ञानं यस्याः सेति कं सर्वेषां प्रेमसुखमाचिनोति क्षणे क्षणे वर्द्धयति या सेति च मुख्यत्वात् सैव। तथैव सैषा एतन्नाम्नैव प्रतिपादिता वासनाभाष्येऽपि। तादृशी सा पीतपरागपिञ्जरश्मश्रुं कञ्चिद् भ्रमरमकस्मात् दृष्ट्वा तं दूतं कल्पयित्वा वक्ष्यमाणभङ्गीमयमिदमब्रवीत्। ननु महाविरहदुःखेऽस्मिन् कुतो मानस्तत्राह। प्रियसङ्गमं ध्यायन्ती स्फूर्त्तिस्वप्नयोर्यः प्रियसङ्गमस्तमेव गुप्तं मुहुरागतस्यैव तस्य साक्षात्तया स्मरन्ती। ननु तथापि यद्यन्यनायिकया प्रियस्य तत्र प्रसङ्गः स्यात्तदा सम्भवत्यपि मानस्तत्राप्याह। कल्पयित्वेति। या भ्रमरमपि दूतं कल्पयति सा तदपि कल्पयेदिति भावः। वक्ष्यति च सपत्न्याः कुचविलुलितेति प्रियेण स्वविषयकपरमप्रेमवता तेन प्रस्थापितं दूतं वितर्क्येदं चित्रजल्पाख्यं श्लोकमब्रवीत्। अतो यत्तत्र वासनाभाष्योत्थापितमाग्नेयवचनम्। "गोप्यः पप्रच्छुरुषसि कृष्णानुचरमुद्धवम्। हरिलीलाविहारांश्च तत्रैकां राधिकां विना। राधा तद्भावसंलीना वासनाया विराभिता। सखीभिः साभ्यधाच्छुद्धविज्ञानगुणजृम्भितम्। इज्यान्तेवासिनं वेदचरमांशविभावनै"रिति। तदेतत् पूर्वं तस्या निर्वेदाख्यं भावान्तरं जातमासीदित्यपि ज्ञेयम्। यन्मूलतया प्रणयरोषमयोऽयमपि भावविशेषो जज्ञे। विचित्रसञ्चारिमयत्वात्तादृशावस्थायाः अतस्तद्भावमयदशमीदशानन्तर्यपर्यालोचनया वासनाया विरामिता पुनस्तत्सङ्गमसम्भावनरहिता बभूव। ततश्च तज्जातीयवार्त्तामसहमाना तदाच्छादनाय देहान्तरेष्वपि तद्दुःखपारावारमपश्यन्ती मुक्तिरेव वरमिति प्रतिपादनाय वा वेदचरमांशस्य ज्ञानकाण्डस्य विभावनैरुदाहरणैः शुद्धेत्यादि यथा स्यात्तथैवाभ्यधात् सम्वादमाचचार। न केवलं सा किन्तु सख्योऽपीत्याह। सखीभिरिति योज्यम्। अथवा वेदचरमांशस्तादृशभावप्रकाशको वेदः। वासना तादृश-

भावेतरः सर्व एव भावः शुद्धविज्ञानं च तादृशभावमयानुभव उच्यते। "यं सर्वे वेदा आमनन्ति मुमुक्षवो ब्रह्मवादिनश्चे"ति मुक्त्यवस्थोपरि सामान्यभक्तेरपि प्राशस्त्याम्नानात्। वाञ्छन्ति यद्भवभियो मुनयो वयञ्चेति श्रीगोपिकामात्राणामपि सर्वस्पृहणीयभावत्वात्। इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या इत्याद्येकादशानुसारेण यथा भक्त्यैवानुभावोदयाच्च ॥ ११ ॥ "स्वतः प्रेमजवार्त्तया गोविन्दे लीनचेतसः। राधायाः केन वागर्थो वेद्यः स्यात् तत्कृपां विना"। सोऽयमसङ्गतिप्रायोऽपि कृष्णसन्देशहरसन्दर्शनेन बाढमुल्लङ्घितमर्यादस्य महाभावामृतराशेस्तरङ्गभरैर्गूढासूयागर्वेर्ष्यानादरोपहासादिभिर्माधुरीभरमेव नीयमानः श्रीराधाया दिव्योन्मादमयचित्रजल्पः कस्यचिदेव बोधगोचरी भवितुमर्हतीति तत्र मानिनिमन्याह। मधुपेति। श्लेषेण हे मद्यपेत्यर्थः। मद्यपस्तु प्रायः परं वञ्चयते इति सम्बोधयति। कितवः शठः श्रीकृष्णः अस्मत्परित्यागेन न पारयेऽहं निरवद्यसंयुजामित्यादिवचनव्यभिचारात्। तस्य बन्धो तद्बन्धुत्वं दूतत्वादेव वर्णादिसाम्याद्वा। किं वा त्वं मधुपः सोऽपि मधुपतिरिति नामसाम्यात्। मद्यपकितवयोः प्रायः सख्यं भवतीति कर्मसाम्याच्च। तत्र कितवेत्यसूयाविष्कृता। रङ्गणकुसुमधिया नखेषु पिपतिषन्तं भृङ्गं प्रसादनाय पादग्रहणं कुर्वन्तं मत्वाह। अङ्घ्रिं मा स्पृशेति। वयन्तु मानधनाः परमस्वतन्त्रास्तेन त्वद्विधेन प्रसादनीया न भवेमेति अङ्घ्रिस्पर्शनेन किमित्यर्थः इति गर्वः स्पर्शनिषेधे तु विशेषमप्याह। सपत्न्याः अद्य श्वो यासु स रमते तासां मुख्यायाः कस्याश्चित् सपत्नीशब्दप्रयोगः स्त्रीणां स्वपत्युपपत्न्यां द्वेषे तथोक्तिस्वाभाव्यात् विशब्देन दृढालिङ्गनत्वादिकं बोध्यते। न इति बहुत्वं निजवर्गापेक्षया गर्वेणैव वा। अयं भावः। प्रायो मधुपजातिरयं तदनुवर्त्तीरहोवेदी च तत्समीपत इतस्ततोऽप्यव्यक्तरवेण भ्रमणलीलत्वात् विशेषतो अस्मान् परितस्तथा चरितत्वात्तदीय दूत एव पीतश्मश्रुरसौ वनमालानिवासित्वात्तथैव सम्भाव्यत इति। तदेवं याभिः किल वयं विस्मारिता विदूरे परित्याजिताश्च तासां तत्रत्यत्वादयोग्यानामेव मानिनीनां प्रसादं वहतु इतीर्ष्या बहुत्वमेकस्यां प्रसादितायामन्यस्या मानात्तस्यामपि प्रसादिनाया मन्यस्या इत्येवं बाहुल्याभिप्रायेण। मधुपतिरिति वहत्विति चैश्वर्य्येण तद्युक्तमेवेत्यस्माकं वा तेन किमित्यनादरः। श्लेषेण मद्यपस्वामीत्यविचारः सौहृदाभावश्च सूचितः ततश्च मद्यपतित्वान्मुख्ये मद्यपे सौहृदं नास्तीति प्रसिद्धेः सच प्रसादस्तेन स्वमाहात्म्यरूपेण मन्यमानोऽपि वैपरीत्या नैवं सम्पत्स्यत इत्याह। यदुसदस्यपि विडम्ब्यमुपहासास्पदतां गमिष्यन्तं कथमसौ व्यक्तीभविष्यतीत्याशङ्क्याह। यस्य दूतोऽपि त्वमीदृक् व्यक्ततदीयसुरतचिह्नधारी तस्यैतद्व्यक्तौ किमाश्चर्य्यमित्यर्थः। इति तस्याः कौशलं दर्शितम् अन्यत्तैः। यद्वा। श्मश्रुभिः कृत्वा मा स्पृशेति ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इति एतद्वदन्त्य इत्यर्थः, यद्वा, इत्येवं त्यक्तलौकिकाः, स्वत एव पूर्वं गोविन्दे गोकुलेन्द्रे, श्लेषेण सर्व्वेन्द्रियव्यापके भगवति, अत एव गतानि प्राप्तानि वागादीनि यासां ताः, तत्र कायप्राप्तिर्निजांगानां सर्व्वेषां प्राणानां वा समर्पणात्, तदाविष्टतया कायस्य विस्मरणाद्वा, यद्वा, कायिकव्यापारस्य तदर्थं त्यागात्। किंवा, तदर्थकमात्रकर्म्माचरणात्, पुनश्च कृष्णस्य स्वचित्ताकर्षकस्य प्रभोर्दूते तत्र चोद्धवे व्रजमायाते सति। अन्यत्तैर्व्याख्यातम्। यद्वा, गतह्रियो बभूवुरिति, किंवा, रुदत्यो मुमुहुरिति शेषः ॥ ९ ॥ पौगण्डस्य बाल्येऽन्तर्भावो ज्ञेयः। कैशोरस्यादावुक्तिस्तत्र रासादिक्रीडाविशेषापेक्षया ॥ १० ॥ काचित्—कापि तासां मुख्यतमैका; यद्वा, के प्रेम-सुखे आ समन्तात् चित् विज्ञानं यस्याः सा राधा; यथा आग्नेये—

'गोप्यःपप्रच्छुरुषसि कृष्णानुचरमुद्धवम्। हरिलीलाविहारांश्च तत्रैकां राधिकां विना ॥
राधा तद्भावसंलीना वासनाया विरामिता। सखीभिः साभ्यधाच्छुद्धविज्ञानगुणं हितम् ॥
इज्यान्तेवासिनं वेदचरमांशविभावनैः' ॥ इति,

अस्य सार्द्धपद्यद्वयस्यार्थः,—राधिकां विना अन्या गोप्यस्तत्रोद्धवं हरिलीलाविहारान् पप्रच्छुः, सा राधा तद्भावसंलीना तस्य कृष्णस्य भावे महाभावे सम्यग् लीना मग्ना, अत एवान्यसर्ववासनातो विरामिता विराममुपरमं लम्भिता भावेनैव। वेदचरमांशविभावनैर्वेदचरमांशा उपनिषदस्तासां विभावनैर्विशेषभावनैः सारप्रकाशनैरिज्यान्तेवासिनं गोष्पतिशिष्यमुद्धवमभ्यधात्। कथम्भूतम्? प्रेम्णां शुद्धविज्ञानं तदेकरसतयानुभवस्तेन बृंहितमुत्फुल्लम्, एतेनोपनिषत्सारसंग्रहरूपो दिव्योन्माद-विवर्त्तोऽयं श्रीराधायाश्चित्रजल्पः, तथा च रसग्रन्थे (उ० नी० स्थायि० १९०–१९१)—'महाभावविशेषस्य गतिं कामप्युपेयुषः। भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्य्यते ॥ उद्घूर्णाश्चित्रजल्पाद्यस्तद्भेदा बहवो मताः ॥', तथा—'प्रेष्ठस्य सुहृदालोके, प्रणयक्रोधजृम्भितः। भूरिभावमयो जल्पश्चित्रजल्पस्तदुद्भवः ॥' तदुद्भवो दिव्योन्मादोद्भवः, अतोऽन्तिमपद्यं विहायान्यत्र सर्व्वत्रैव रोषव्यञ्जनं ज्ञेयमिति, मधुकरं स्वयमकस्मात्तदैव प्राप्तं तच्चप्रियप्रस्थापितं दूतं मत्वा। स्वभावादेव तद्दर्शनाद्वा, कृष्णसंगमस्यैव ध्यानेन तदर्थं तद्दूतागमनबुद्धेः। किन्तु तं लक्ष्मीकृत्य उद्धवमेवाब्रवीदिति तैर्व्याख्यातमेव। यद्वा, प्रिय-प्रस्थापितं दूतमुद्धवं दृष्ट्वा तच्च मधुकरं कल्पयित्वा। तत्र हेतुः—ध्यायन्तीति, कृष्णसंगमे चित्तस्य प्रवेशेन विरहार्त्तिविशृङ्खलित-महाभाववैवश्येन चानुसन्धानाभावः श्यामत्वादिना मधुकरतया प्रतीतेरिति।

स्वतः प्रेमजवार्त्तया गोविन्दे लीन चेतसः। राधायाः केन वागर्थो वेद्यः स्यात्तत्कृपां विना ॥ ११ ॥

मधुपेति श्लेषेण हे मद्यपेत्यर्थः। मद्यपस्तु प्रायः परं वञ्चयत इति सम्बोधयति। कितवः शठः, श्रीकृष्णोऽस्मत्परित्यागेन (भा० १०।३२।२२) 'न पारयेऽहं निरवद्यसंयुजाम्' इत्यादिवचनार्थ-व्यभिचारात्तस्य बन्धार्थतद्बन्धुत्वं दूतत्वादेव वर्णादिसम्याद्वा, किंवा त्वं मधुपः, सोऽपि मधुपतिरिति नाम साम्यात् मद्यप-कितवयोः प्रायः सख्यं भवतीति कर्म्मसाम्याद्वा, सोऽयं कृष्णसन्देश-हरसन्दर्शनेन बाढमुल्लङ्घितमर्य्यादस्य महाभावामृतराशेस्तरंगरूपैर्गूढासूयागर्वेर्ष्यानादरोपहासादिभिर्मोविमाधुरीभरमेव नीयमानः श्रीराधाया जल्पः कस्यचिदेव बोधगोचरीभवितुमर्हतीति तत्र कितवेत्यसूया। रंगणकुसुमधिया नखेषु पिपतिषन्तं भृंगं प्रसादनाय पादग्रहणं कुर्व्वन्तं मत्वाह—अङ्घ्रिं मा स्पृशति। वयं तु मानधनाः परमस्वतन्त्रास्तेन तद्विधेन प्रसादनीया न भवेमेत्यङ्घ्रिस्पर्शनेन किमित्यर्थ इति 'गर्व्वः'। किंवा, कृष्ण संगमध्यानावेशेमात्मप्रसादनार्थमुद्धवमेव तथा कुर्व्वन्तं मत्वाह। एवं महाभावोन्मादेनोक्तत्वाद्वाक्यानामसंगत्या महागुणत्वेऽपि सतां प्रीतये कथञ्चित् काचित् संगतिः कार्य्या। सपत्न्या लक्ष्म्याः पुरस्त्रिया वा कस्याश्चित्, जातावेकत्वं वा। विशब्देन दृढालिंगनत्वादिकं बोध्यते, 'नः' इति बहुत्वं निजसखीवर्गापेक्षया गर्वेणैव वा, एवमग्रेऽपि, मधुपस्य दूततया भगवदीयत्वेन तत्र च तद्वनमालायां निवासेन तस्यां च रतिसमये लग्नकुंकुमेन श्मश्रूणां लौहित्यसम्भावनया तथोक्तम्, यच्च केचिदित्थमुद्धवस्य रक्तश्मश्रुलत्वं मन्यन्ते, तदसंगतम्, (द्वितीय श्लो०) 'अपीव्यदर्शनः' इत्युक्तत्वात्। पक्षान्तरे तु भ्रमरतयोद्धवस्य कल्पनया तदीयाशेष-रूप-गुणादेरुद्धवेऽध्यासेन सर्व्वं संगतमेव, अहो सपत्न्या सह रत्यैव वयं तेन किल विस्मृताः स्म इति भावः। इतीर्ष्या, अतस्तासां तेन रमितानां तदीयानां वा नागरीणां मानिनीनां सतीनां बहुत्वमेकस्यां प्रसादितायामन्यस्या मानात्, तस्यामपि प्रसादितायामन्यस्या इत्येवं बाहुल्याभिप्रायेण, प्रसादं वहतु, पाद-ग्रहणादिना प्रयत्नेन नित्यं नित्यं प्रापयतु, मादृशां तेन किमायातमित्यर्थ इत्यनादरः, यतो मधुपतिः यदुकुलेश्वरः, ऐश्वर्य्येण तद्युक्तमवेति भावः। श्लेषेण 'मद्यस्वामी' इत्यविचारः सौहृदाभावश्च सूचितः—'मद्यपे सौहृदं नास्ति' इति प्रसिद्धेः। यद्यस्मात्, 'उ' इति सम्बोधने भो मधुप! सदसि विदग्धसखीनां सभायां विडम्ब्यमुपहसनीयम्, तस्य चरितमिति शेषः। ईदृक् सपत्नीकुचकुंकुमाक्त-श्मश्रुर्निर्लज्ज इत्यर्थः यादृशः स्वामी 'तच्छीलास्तत् प्रकृतयः' इति न्यायात् त्वत्त एव तत्स्वभावोऽपि ज्ञात एव। यद्वा, प्रसादनार्थं प्रेषितोऽपि बत स्वपत्नीकुचकुंकुमबहुश्मश्रुभिरागतोऽसीति निर्बुद्धिरेवेत्यर्थः। स्वतः स्त्रैणत्वाद्दूतस्य चेदृक्त्वाद्विडम्ब्यमेवेत्युपहासः। अन्यत्तैर्व्याख्यातम्। यद्वा, श्मश्रुभिः कृत्वा मा स्पृश। कुतः? कितवेति कितवबन्धुत्वादित्यर्थः। कैतवञ्च व्यञ्जितमेव सपत्न्या इत्यादिना। तदस्मासु कैतवेनालम्, पुरस्त्रीष्वेव सदा तत्तनोत्वित्याशयेनाह—वहत्विति। यस्य त्वमीदृङ् मधुपो दूतः, स मधुपतिः। कथम्भूतं प्रसादम्? विडम्ब्यं विडम्बनार्हम्, पादग्रहणादिना विडम्बनमेव करोषीत्यर्थः॥ १२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कुङ्कुमश्मश्रुभिर्नः मधुपतिः यदुपतिः मानिनीनां सपत्नीनां प्रसादं वहतु प्रसादपात्रं भवतु न वयं प्रसादनीया इत्यर्थः। यदुसदसि विडम्ब्यं हास्यं कृष्णस्य प्रणयित्वमधिक्षेप्यमित्यर्थः। यद्वा यथा विडम्ब्यं भवतीति क्रियाविशेषणम् ईदृक् भुक्तपूर्वपुष्पपरित्यागशीलस्त्वं यस्य भवत्वित्यन्वयः॥ १२-१३॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीति। इत्थं कृष्णस्य दूते उद्धवे व्रजं गते सति गोप्यः गोविन्दे गतानि निविष्टानि वागादीनि तद्व्यापाराश्च यासां ताः॥ ९॥ तस्य प्रियस्य कृष्णस्य भगवतो यानि कैशोरबाल्ययोः कर्माणि तानि पुनः पुनः संस्मृत्य गायन्त्यः त्यक्तलज्जाः रुदत्यश्च त्यक्तलौकिकव्यवहारा अपृच्छन्निति पूर्वेणान्वयः॥ १०॥ तत्र काचिद्गोपी कृष्णसङ्गमंध्यायन्ती मधुकरं भ्रमरं दृष्ट्वा तं प्रियेण प्रस्थापितं प्रेषितं दूतं कल्पयित्वा कृष्णेन मां प्रसादयितुं प्रेषितोऽयं दूत इत्यभिमत्येत्यर्थः। इदं वक्ष्यमाणमब्रवीज्जगौ यद्वा, तस्मिन् भ्रमरे प्रियप्रस्थापितोद्धवदृष्टिं कृत्वा मधुकरापदेशेन उद्धवमेवाब्रवीदित्यर्थः॥ ११॥ तदेवाह दशभिः। मधुपेति। हे मधुप! भ्रमर हे कितवबन्धो नोऽस्माकमङ्घ्रिं चरणं मा स्पृश मा स्पृश मां नमस्कुरु मा प्रार्थयस्वेत्यर्थः। यत्किमित्यपेक्षायां कृष्णवर्णस्य तस्य श्मश्रूणां लोहितत्वे कारणमुत्प्रेक्षमाणा सासूयं प्राह। सपत्न्याः कुचाभ्याम्विलुलितां सम्मर्दिता या माला अत एव तस्याः कुङ्कुमं येषु तैः श्मश्रुभिरुपलक्षितस्त्वं मा स्पृशेति सम्बन्धः। किं तु यदुपतिः मधुपतिरिति पाठे मधूनां यादवविशेषाणां पतिः तासां नः सपत्नीनां मानिनीनां प्रसादं वहतु प्रसादपात्रं भवतु न वयं प्रसादनीया इत्यर्थः। कुत इत्यत आह। यत् यस्मात् उ इत्यवधारणे विडम्ब्यं प्रणयित्वमिति शेषः। यस्मात् यत्प्रणयित्वं सदसि विडम्ब्यमुपहास्यं कृष्णस्य प्रणयित्वं सभायामधिक्षेप्यमित्यर्थः। यस्माच्च यस्य भगवतो भुक्तपूर्वयोषित्त्यागिन ईदृग्भुक्तपूर्वपुष्पत्यागशीलो दूतस्त्वमागत इत्यर्थः॥ १२॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उत्तरकथाप्रसङ्गः क इति तत्राह। ददर्शेति। गोविन्दगतमनआदिभिस्त्यक्तलौकिकाः त्यक्ताः लोकाचाराः पुरुषाग्रतः श्लथितवसनादिदृढीकरणादिलक्षणक्रिया याभिस्तास्तथा॥ ९॥ गायन्त्यः गायतीः रुदन्त्यः रुदतीः कैशोरशैशवावस्थायां गतह्रिय

इति लोकाचारविरुद्धाचरणं गानादिकम् ॥ १० ॥ तथाच कृष्णसङ्गमध्यानेन मुग्धा काचिन्मधुकरं दृष्ट्वा प्रियेण कृष्णेन प्रस्थापितं दूतं कल्पयित्वा इदं वक्ष्यमाणमब्रवीदित्यन्वयः ॥ ११ ॥ हे मधुप ! सपत्न्याः मथुरायां स्थितायाः समानभार्यायाः अधरमधुपानलोलोद्धव ! तस्या आलिङ्गनकाले दृढपीडितकुचाभ्यां विलुलितायामितस्ततो विक्षिप्तायां मालायामनुषक्तकुचकुङ्कुमेन रूषितश्मश्रुभिरञ्चितस्त्वमस्मान् मास्पृशप्रणयकोपात्कितवबन्धो इति सम्बोधयति कितवस्य नवनीतादिपरद्रव्यचोरस्य कृष्णस्य बन्धो ! न केवलं त्वमेव मास्पृश किन्तु स कितवो न स्पृशत्विति भावेन बक्ति । वहत्विति । स मधुपतिः श्रीकृष्णः तस्यां मथुरायां विद्यमानानां मानिनीनां मानधराणां स्त्रीसां प्रसादं प्रणयकापेशान्तिलक्षणमनुग्रहं वहतु नतमूर्ध्नेति शेषः कीदृश यदुसदसि बिडम्ब्यम् अनुकरणयोग्यं सोत्प्रासपूर्वं वक्तव्यं सोत्प्रासः समनाक् स्मितमिति स्वकैतवं परस्मिन्नपि संक्रामयितुं पटुतम इति भावेनाह । यस्येति । यस्य कृष्णस्य दूतस्त्वमपीदृग्धूर्त इत्यर्थः । हे भ्रमर कितवबन्धो उन्मत्तपुष्पबन्धो सपत्न्याः भृङ्ग्याः कुचस्पर्शनेन विलुलितमाल उद्बुद्धकाम आसमन्तात् कुङ्कुमपुष्परसमिश्रमुखरोमभिरस्मान्मा स्पृश ईदृक् त्वं यस्य वसन्तस्य दूतस्स मधुश्चायं पतिश्चेति मधुपतिः वसन्तनामा परिवृढः यत्सदसि पुष्पसमूहे विडम्ब्यं स्थिरीकर्तव्यमेतन्मानिनीना भृङ्गीणां प्रसादं प्रसन्नभावं वहतु करोतु कृष्णवद्वैलक्षण्यं न करोत्विति वा उन्मत्तः कितवो धूर्त इत्यमरः ॥ १२ ॥

मज्जीवगोस्वामिकृतः क्रमसन्दर्भः

काचित् कापि परमश्रेष्ठा सा च राधेत्यर्थः । वासनाभाष्ये तत्र सैव व्याख्याता । यत्तत्र तदुत्थापितमाग्नेयवचनम् । "गोप्यः पप्रच्छुरुषसि कृष्णानुचरमुद्धवम् । हरिलीलाविहारांश्च तत्रैकां राधिकां विना । राधा तद्भावसंलीना वासनाया विरामिता । सखीभिः सा व्यधाच्छुद्धविज्ञानगुणजृम्भिता । इव्यान्तेवासिनं वेदचरमांशविभावनै"रिति । तत्रैतत् पूर्वं तस्या निर्वेदाख्यं भवान्तरं जातमासीदित्याद्यपि ज्ञेयं तन्मूलकतया प्रणयरोषमयोऽपि भावविशेषो ज्ञेयः । विचित्रसञ्चारिमयत्वात्तादृशावस्थायाः ततस्तद्भावमयदशमदशानन्तर्य्यालोचनया वासनाया विरामिता पुनस्तत्सङ्गमसम्भावनरहिता बभूव । ततश्च तज्जातीयवार्त्तामसहमाना तदाच्छादनाय देहान्तरेऽपि तद्दुःखपारमपश्यन्ती मुक्तिरेव वरमिति प्रतिपादनाय वेदचरमांशस्य ज्ञानकाण्डस्य विभावनैरुदाहरणैः । शुद्धेत्यादि यथा स्यात्तथैवाभ्यधात् सम्वादमकरोत् सखीभिः सहेति अथवा वेदचरमांशस्तादृशभावप्रकाशको वेदः वासना तादृशभावेतरः सर्व्व एव भावः । शुद्धविज्ञानं च तादृशभावमयानुभव उच्यते । यं सर्वे वेदाआमनन्ति मुमुक्षवो ब्रह्मवादिमश्चेति मुक्त्यवस्थोपरि सामान्यभक्तेरपि प्राशस्त्याम्नानात् । वाञ्छन्ति यद्भवभियो मुनयो वयं चेति श्रीगोपिकामात्राणामपि सर्वस्पृहणीयभावत्वात् इत्यच्युताङ्घ्रि भजतोऽनुवृत्त्येत्येकादशानुसारेऽपि यथा भक्त्यैवानुभावोदयाच्च ध्यायन्तीति मध्ये मध्ये तत्स्फूर्त्तेः ॥ ११ ॥ मधुपेत्यादि किञ्च सपत्न्या अद्य श्वो यस्यां रमते तस्याः कस्याश्चित् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

इति संस्मृत्य संस्मृत्येत्यादि । यानि कैशोरबाल्ययोरिति स्वकैशोरे तत्कैशोरे च स्वबाल्ये तद्बाल्ये च यद्यद् कृतं तत्तदित्यर्थः ॥ १० ॥ तत्रैव काचिद्दैवागतं मधुकरं दृष्ट्वा साक्षेपमुद्धवं प्रति वक्तुमनौचित्यात् तस्मिन्नेव मधुकरे तद्भावमापाद्य नानाभावशवलेनोन्मादेन निगदति । तथा च 'भावन्तरसमावेशादुक्तिवैचित्र्यतोऽपि च । उत्तरङ्गतयाङ्गीत्वादुन्मादो बहुधामतः । तद्यथा—'प्रलापश्च विलापश्चानुलापो विप्रलापकः । आलापश्चापलापश्च सुप्रलापश्च सप्तमः ॥ प्रविलापोऽष्टमश्चैव प्रतिलापस्ततः परम् । संलापश्चेति वैचित्र्यमुन्मादेदशधा गिराम् ॥' इत्यत्रापि श्लोकदशके यथायथं दशधा वैचित्र्यं ज्ञेयम् । तत्र प्रलापं दर्शयति–मधुपेत्यादि । हे कितवबन्धो ! किं तवास्तीति कृत्वा परसर्वस्वं यो हरति, स कितवस्तस्य बन्धुः स एव वा बन्धुर्यस्य स तथा मधुप ! भ्रमर ! पक्षे मधुश्रेष्ठ उद्धव ! मधुकरोऽपि कितवस्याङ्गस्य बन्धुर्भवति, वर्णसाम्यात् । अतः कितवरूपस्य कृष्णस्यापि बन्धुर्मित्रम्, मधून् पातीति, मधुपिबतीति च शब्दसारूप्याच्च बन्धुः । त्वं नोऽस्माकमङ्घ्रिं मा स्पृश । कितवबन्धुत्वं पुनर्द्रढयति—सपत्न्या इत्यादि । स च कितवः सपत्न्याः कुचविलुलितमालायाः कुङ्कुमाकाराणि यानि श्मश्रूणि श्मश्रुप्रायाणि केशराणि तैर्विशिष्टस्त्वमपि मधुपः, तथा सपत्न्याः पद्मिन्यपेक्षया नागकेशरवल्ली सपत्नी तस्याः कुचप्राया ये स्तबकास्तेषां विलुलिता विगलिता यस्या सा तथा न वेत्यर्थः । यद्वा, विलुलिता स्फुटेति यावत् । तथाभूतायां मालायां श्रेण्यां ये कुङ्कुमप्रायाः परागास्तद्युक्तानि श्मश्रूणि श्मश्रुप्रायाणि मुखरोमाणि तैर्युक्तः । अहोऽस्माकं पादस्पर्शस्तवानुचित इति भावः । ननु त्वत्प्रसादनाय तन्नियुक्त एव त्वत्पादस्पर्शनं करोमीति चेत् तदप्ययुक्तमित्याह—वहत्वित्यादि । मधुपतिः स कितवस्तन्मानिनीनां मधुमानिनीनां प्रसादं वहतु प्रापयतु कारयत्वित्यर्थः । किमस्माकं तत्प्रसादनेन मधुपतित्वात् । मधुमानिनीनां प्रसादकरणमेव तस्योचितम् । यदा गोकुलपतिरासीत्, तदास्माकं प्रसादनं यत् कृतं तत् समुचितम्; नाधुनेति वाक्यार्थः । किञ्च ईदृगेवंविधमस्माकमदर्शकरणं यदुसदसि विडम्ब्यमुपहास्यम् । कस्येत्यपेक्षायामाह—यस्य त्वं दूतः । मधुपतिः स तत्रापि वन्याः प्रति प्रसादनापेक्षोऽयमिति, यादव उपहसिस्यन्तीत्यर्थः । अतः सर्वथा तवेदं कर्तुमनुचितमिति महावाक्यार्थः । अत्रोन्मादोऽङ्गी निर्वेदाक्षेपग्लानि गर्वादयोऽङ्गानि प्रलाप उक्तिवैचित्र्यम् । दूतत्वेन कल्पयित्वा सपत्न्यः कुचविलुलितेत्यादि नानार्थक्यात् ॥ ११-१२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

यानि कैशोरबाल्ययोरिति—स्वकैशोरे तत्कैशोरं स्वबाल्ये तद्बाल्यं यत्तदित्यर्थः ॥ १०-११ ॥ तत्रैव कदाचिद् वादागतं मधुकरं दृष्ट्वा साक्षेपमुद्धवं प्रति वक्तुमनौचित्यात् मधुकर एव तद्भावमापाद्य नानाभाव शावल्येन निगदति–मधुपेत्यादि हि कितवबन्धो ! किं तवास्तीति कृत्वा पर·सर्वस्वं यो हरति, स कितवः, तथाविधस्यास्मत् प्राणाद्यपहारकस्य तस्य बन्धो ! स एव वा बन्धुर्यस्य तथाविध इति साक्षेपोक्तिः। बन्धुत्वं मित्रत्वम्, तच्च सावर्ण्येन मधुपत्वेन च, मधून् पातीति स तथा सोऽधुना मधुपो मधुपतिः, कितव बन्धुत्वादस्माकं स्पर्शनमनुचितमेव। वस्तुतस्तु मधुपस्य नागकेशरपरागेण मुखरोम्णां कपिशत्वं कृतम्, तदुत्प्रेक्षमाणाह—सपत्नी इति। वयं न मधुभानिन्यः, किमस्माकं प्रसादेन ? तासामेव प्रसादं वहतु प्रापयतु चेन्मधुपतिरियम्। किञ्च यदु-सदसि विडम्ब्यमुपहास्यम्, किं तत् ? तत्राह—ईदृक् एवम्विधोद्देशाचरणम्; कः स इत्यपेक्षायामाह—यस्य त्वं दूतः, अतः सर्वमिदमनुचितमेव, तस्मात् मा स्पृशाङ्घ्रिमिति। निर्वेद·ग्लानि·सर्वाणाञ्च शावल्यात् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्यक्तलौकिकाः स्वमुखेनैवौपपत्यस्पष्टीकरणात् त्यक्तलौकिकव्यवहारा बभूवुः ॥ ९ ॥ रुदन्त्यश्च बभूवुः कैशोरबाल्योरिति बाल्यमारभ्यैव तस्मिंस्तासां प्रेमा निरुपाधिक एव न तु कैशोर एव कामोपाधिक इति भावः ॥ १० ॥ काचिदिति। ह्लादिनी शक्तिसारवृत्तिरूपस्य प्रेम्णोऽपि या सप्तमी भूमिका महाभावस्तन्मयी श्रीवृषभानुनन्दिनीयमिति वैष्णवतोषिणी कृष्णकर्तृकं सङ्गमं मधुराङ्गनासु ध्यायन्ती ध्यानेन कल्पयन्ती अत एव उद्भूतमाना प्रियेण श्रीकृष्णेन मां प्रसादयितुं प्रस्थापितोऽयं दूत इति कल्पयित्वा कमपि मधुकरमब्रवीत्, यद्वा मधुकरापदेशेनोद्धवमेवाब्रवीदित्यर्थः ॥ ११ ॥ स्वचरणकमलसौरभलोभेन भ्रमन्तं भ्रमरं वीक्ष्य दिव्योन्मादवती श्रीवृषभानुनन्दिनी प्रजल्पति हे मधुप ! भ्रमर ! कितवस्य धूर्तस्य एवं मदर्थोज्झितेत्यादिना न पारयेऽहमित्यादिना आयास्य इति दौत्यकेन च मिथ्यावचनवृन्देन वञ्चकस्य कृष्णस्य बन्धो ! बन्धुतारूपदौत्यकारिन् ! अङ्घ्रिं मास्पृश ननु किमिति नमस्कर्तुं न ददासि तत्राह। हे मधुप ! मद्यप मधु मद्ये पुष्परस इत्यनेकार्थवर्गः मद्यपस्पर्शे चरणस्यापावित्र्यं स्यादतो नमश्चिकीर्षा चेद्दूरमपसृत्य नमस्कुर्विति भावः। नन्वदुष्टेऽपि मयि मिथ्यामद्यपत्वपरिवादं किमर्पयसीति तत्र नायं परिवादः किन्तु यथार्थमेव वच्मीत्याह। मम सपत्न्याः कुचयोः कृष्णवक्षः संघर्षेण विलुलिता विमर्दिता या माला किंवा कुचाभ्यामेव विलुलिता या कृष्णस्य वनमाला तत् सम्बन्धि कुङ्कुमयुक्तैः श्मश्रुभिर्मास्पृशेति भ्रमरस्य स्वाभाविकश्मश्रुपीतिम्न एव तथारोपःतेन च मानिनीं मामनुनेतुं त्वमिहायातोऽस्यथ च तथाभूतकुङ्कुमश्मश्रुप्रक्षालनं विनैवेति विवेकाभाव एव मद्यपानलक्षणम् एतद्दर्शनया मानो वर्ध्यते एव नतु निवर्त्यते इति बुद्ध्यस्वेति भावः। ननु यथा तथास्तु त्वं तावत् प्रसीदेति तत्राह। हे मधुप ! मद्यपालक ! तत्र गत्वा निजप्रभोः पेयं मद्यमेव पिब च तत्कर्मैव त्वं कर्तुं शक्नोषि नतु दौत्यं निर्बुद्धित्वादिति भावः। नन्वेवं चेदलं मया सम्प्रत्यहं पुनर्मथुरामेव यामि स एव गोपेन्द्रनन्दनः स्वयमेत्य त्वां प्रसादयित्वित्यत आह। वहत्वित्यादि। मधूनां यादवविशेषाणां पतिः सम्प्रति सोऽभूत् व्रजेश्वरीगर्भजातत्वेन गोपजातिरपि भाग्यवशात् क्षत्रियजातिरभूदतस्तन्मानिनीनां क्षत्रियस्त्रीणां प्रसादं वहतु प्राप्नोतु ता एव सदा प्रसादयतु किमस्माभिर्निकृष्टाभिर्गोपस्त्रीभिरिति भावः। अत्र बहुवचनेन वहधातुप्रयोगेण च मधुस्त्रीणामानन्त्यात्सर्वासामेव तद्भुक्तत्वात् एकस्यां प्रसादितायामन्यत्या मानोत्पत्तेस्तस्यामपि प्रसादितायामन्यस्या इत्येवं तासां प्रवाहरूपेण प्रसादं प्राप्नोत्वित्यस्मत्सन्निधावागमने तस्यावसर एव नास्तीति भावः। ननु तदीयसर्वसौभाग्यनिधे ! देवि मैवं वादीर्यदि त्वयि तस्य मनो नास्तितर्हि कथमहं तेन दूतः प्रस्थापितस्तत्राह। यस्य दूतस्त्वमीदृक्। क्षत्रियस्त्रीजनसुरतचिह्नधारी तस्य यदुसदसि विडम्ब्यं विडम्बनमेव यदुस्त्रीणां तत्कृतस्य धर्मलोपस्य व्यक्तीभावेन कुपितैस्तत्तत्पतिभिस्तस्य विडम्बनमेव करिष्यत इति भावः। यद्वा यस्य त्वमीदृक्दूतस्तस्य यत् यदुसदस्तत्र अधिकरण एव विडम्बनं भावि गोपेन तन्नारीणां भुक्तत्वात् यदूनां निन्दैव सर्वदेशे भविष्यतीत्यर्थः। श्लेषेण यस्य दूतस्त्वमीदृक् स च मधुपतिर्मधूनां मद्यानां पतिरिति मद्यप एव यतो मद्यस्य विक्षेपेणैव त्वादृशो भ्रमरो दूतः कृत इति अत्र कितवेत्यसूया सपत्न्या इत्यादिनेर्ष्या अङ्घ्रिं मास्पृश इति मदः वहत्वित्यादिना अवधीरणं यदुसदसीत्यादिना अकौशलोद्गार इत्ययं प्रजल्पः यदुक्तमुज्ज्वलनीलमणौ "असूयेर्ष्या यदयुजा योऽवधीरणमुद्रया। प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्यते" इति ॥ १२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

इयं चेर्ष्या तासां विरहव्याकुलचेतसां प्रणयकोपनिबन्धना नतु द्वेषनिबन्धनातस्तदुपदेशार्थं भृत्यप्रेषणं भगवत उचितमित्याशयेनाह। इतीति। गोप्य इत्यग्रुच्छन्निति पूर्वक्रियया अन्वयः इति वदन्त्यः एवम्भूता जाताः इति वा। ननु प्रणयकोपवतीनामप्यत्युपालम्भो न युक्त इत्याशङ्कानिरासार्थं गोप्य इत्युक्तं तथा चात्यन्तं विवेकहीनानां मुग्धानामियमुक्तिर्न दौष्ट्यमूलेति भावः। तासां दुष्टत्वे तु तत्पतित्वसिद्ध्यर्थं गवामिन्द्रादिभिर्भगवान्नाभिषिक्तः स्यादिति सूचयितुं गोविन्दपदप्रयोगः। यद्वा यो यद्रक्षणार्थं सप्तदिनपर्यन्तं गोवर्द्धनं धृतवान् तेन च गवामिन्द्रत्वं प्राप्य गोविन्देति संज्ञामवाप्तवान् स च विरहानलज्वालासु ता निक्षिप्य

यद्यु पेक्षेत तर्हि तासामियमुक्तिर्नोयुक्तेति ध्वानयितुं गोप्यो गोविन्द इत्युक्तं किञ्च प्रियगतवागादिव्यापाराणामुपालम्भात्मकव्यापारोऽपि तत्रैवोचित इत्याशयेनाह । गतेति । अत एव कृष्णदूते समागमनाद्यासामेवम्भूता दशा जाता तासां प्रियसमागमनसम्भाविता दशा तु वाचामप्यगोचरश्रुता इति भावः । कृष्णेन मनः आकृष्य गतेनास्मत्स्वामिना वयं स्मृता यतोऽस्मद्व्रजे तेन स्वदूतः प्रेषितस्तस्माद्यावत्कालमस्यात्रावस्थानं तावत्कालं सर्वं लौकिकं विहायास्माकमवस्थितिरेतत्सन्निधावेव न्याय्येति विचार्य तथाभूता जाता इत्यर्थः ॥९॥ किञ्च तस्य यानि कैशोरबाल्ययोरवस्थयोः सम्बन्धीनि प्रियकर्माणि तानि संस्मृत्य गायन्त्यो रुदन्त्यश्च गतह्रियो जाता गायन्त्यो रुदन्त्यो गतह्रियश्च पूर्वश्लोकोक्तस्वरूपा जाता इति वा गायन्त्य इति तासां वाग्व्यापारस्य रुदन्त्य इति कायव्यापारस्य संस्मृत्येति मनोव्यापारस्य भगवद्गतत्वं बोधितं त्यक्तलज्जा इत्यनेनासाधारणधर्मोऽपि याभिस्त्यक्तस्तासु किमवशिष्यत इति सूचितं स्मरणधाराबोधनार्थं संस्मृत्यपदावृत्तिः तथाचानुक्षणं सर्वभावेन तासां तत्परत्वमित्यर्थः ॥ १० ॥ गोपिकासमुदावदत्तोपालम्भैः परितोषमलभमानायाः परममानवत्याः श्रीवृषभानुनन्दिन्याः ह्लादिन्याः शक्तेर्वृत्तमावेदयति काचिदिति । काचित्कृष्णसङ्गमं ध्यायन्ती मधुकरं दृष्टवती दृष्ट्वा च तं प्रियेण मां प्रति पृथक् प्रस्थापितोऽयं दूतं इति कल्पयित्वा इदं वक्ष्यमाणमब्रवीत् मधुकरस्तु कश्चिदकस्मात्सौरभ्यलोभात्तत्र समागतः भगवतैव वा प्रेयसीप्रेमातिरेकमुद्धवाय दर्शयितुं प्रेषितः स्वयमेव प्रेयस्याश्चित्रजल्पमाधुरीपिपासया तद्रूपेण समागत इति वा कृष्णसङ्गमं लब्धवती पूर्वं प्राप्तं कृष्णसङ्गमं स्मरन्तीति वा प्रियसङ्गमः कदा भविष्यतीति विलपतीति वा यद्वा नागरस्त्रीणां प्रियेण सार्द्धमिदानीं सङ्गमोऽस्तीति चिन्तयन्ती मम परितोषायेयं न समीचीनेति कोपनिवृत्त्यर्थं वाऽयं दूतः प्रेषित इति कल्पयित्वा वा च तद्व्याजेनोद्धवं प्रत्येवोक्तवतीति वा मधुकरशब्दप्रवृत्तिस्तु तेनैव स्वपानार्थं प्राचीनकर्मणा मधुकृतं स्वकृतमेव सर्वोऽपि भुङ्क्त इति प्रसिद्धेरित्य प्रायेण मधुकृन्तनाद्वा ॥ ११ ॥ पादसरोजसौरभलोभात्तत्समीपमागतं तं प्रियशिक्षितोऽयं मां प्रसादयितुं मदङ्घ्रिं स्पृशतीति कल्पयित्वा प्रजल्पति । मधुपेति । हे मधुप ! नोऽस्माकमङ्घ्रिं चरणसरोजं मास्पृश मधुपत्वास्पृशन् अङ्घ्रिसरोरुहमकरन्दमपि पास्यसीति मदङ्घ्रिर्निःसारो भविष्यति तत्रत्यप्रेयस्या रममाणेन मदागमनभयान्मदङ्घ्रिभङ्गार्थं त्वं प्रेषितो न स्पर्शार्थमिति तव दौष्ट्यं मया बुद्धमतस्त्वं गत्वा स्वस्वामिनं प्रति ब्रूहि भो भगवान् ! सा वदति मया कदापि तत्र नागम्यते यथेष्टं रमतां तव स्वामी किमर्थं स्पर्शव्याजेन मदङ्घ्रिभङ्गार्थं त्वं प्रेषितः अन्यथान्यमेव प्रेषयेदितीति संबोधनाशयः । यद्वा "मधु पुष्परसे मद्ये" इति कोशात् हे मद्यप ! तव स्पर्शोऽपवित्रतासम्पादकोऽतस्तवात्यन्तभक्तिरस्ति चेत्तर्हि दूरे स्थित्वा नमस्कारं कुर्विति भावः । ननु भवतीं प्रति त्वत्प्रियेणाहम्प्रेषितो भगवतोऽत्यर्थं प्रियायाश्चरणस्पर्शेनात्मानं कृतार्थीकर्तुमिच्छामीति महापातकित्वेन मामुत्प्रेक्षस इति चेत्तत्राह । हे कितव बन्धो ! कितवस्य न पारयेऽहं निरवद्यसंयुजामित्याद्युक्त्वापि परित्यज्य गतत्वाद्वञ्चकस्य श्रीकृष्णस्य बन्धो ! स च मधून्पातीति मधुपस्त्वं च मधुप इति नामैक्यात् वर्णसाम्यात् वञ्चकत्वरूपधर्मसादृश्यात् मधुपतिधूर्तयोः सख्यावश्यम्भावाच्च तद्बन्धुस्त्वं तस्मान्न मया त्वयि दोष आरोप्यतेऽपि तु यथार्थमेवाऽभिधीयतेऽतस्त्वं न केवलं मधुप किन्तु शठबन्धुरपीति सर्वथा त्वं दोषधिनिर्मुक्तत्वात् परमपवित्राभिरस्माभिरस्पृश्योऽसीति भावः। किञ्च तेनाप्यागत्यास्मदङ्घ्रिसमीपे चिरं पतितेनाप्यस्मद्दुःखमपनेतुमशक्यं त्वद्विधेन दूतमात्रेण क्रियमाण चरणस्पर्शमात्रेण दुःखापनयस्य का प्रत्याशेति निष्फलमिदं कर्मणानुष्ठेयमित्यपि चरणस्पर्शनिषेधेन ध्वनितम् । ननु भो मातर्दूरे स्थित्वैव श्मश्रुभिरेवाहं स्वदरेङ्घ्रिस्पर्शं करिष्यामि तेन च स्वस्वाम्याज्ञापालनं स्वपापाकरणं च मम सेत्स्यतीत्याशङ्क्य ससम्भ्रममाह । श्मश्रुभिस्तु सर्वथा मा स्पृश किमर्थमित्यपेक्षायामाह । सपत्न्या इति । यथेदानीं रमते तस्याः कुचाभ्यां विलुलिता विमर्दिता या श्रीकृष्णवनमाला कुचयोः कृष्णवदनसङ्घर्षेण मर्द्दिता या मालेति वा तत्संबन्धि कुङ्कुमं येषु तैस्तथा च स्पर्शमात्रेण दहनक्षमबिषसम्पृक्तश्मश्रुभिः स्पृष्ट्वा चरणमारभ्य शिखापर्यन्तं दग्धुं समागतोऽस्यतः कृपया दूरे तिष्ठेत्याशयः यद्वा ननु मयि मद्यपता मत्स्वामिनि कितवता च श्रीमत्या त्वया कथमवधारितेत्यपेक्षायामाह । सपत्न्या इति । तथा चास्मत्कोपोद्दीपक तादृशकुङ्कुमवद्भिरेव नतु प्रक्षालितैः श्मश्रुभिरस्मत्कोपनिवृत्त्यर्थमस्मच्चरणं स्प्रष्टुं तवागमनमेव विवेकशून्यस्य तव मद्यपत्वं बोधयति तव स्वाम्यपि यदि साधुः स्यात्तर्हि तत्र गत्वा उदासीनतया तिष्ठेत् तदनुरोधेन तदालिङ्गमात्रं वा कुर्यात् नतु यथा तेन कृतं किन्त्वतिसौरतं कृत्वा श्रान्तो वर्तते श्रान्तत्वादेव विवेकोऽपि तस्य नष्टवत्प्रतिभाति यतस्त्वादृशं मद्यपं प्रेषितवान् नापि श्मश्रुक्षालनादिकृत्वा समाहितो भूत्वा गन्तव्यमिति शिक्षितवानत एव तत्कापट्यमस्माभिर्ज्ञातमिति तच्चेष्टा तस्य कितवत्वं ज्ञापयति । यद्वा मधुपश्चासौ कितवश्च तस्य बन्धो ! माधवो यादवास्तत्पतिर्वा मधुपः तेषां प्रायेण मद्यपत्वादयमपि यादवत्वाद्वा तदर्थं मद्यपालकत्वाद्वा प्रियाधरामृतलक्षणमधुपानकर्तृत्वाद्वा मधुपः त्वमपि तच्छिष्यभूतः मधुपानादिकर्मानुष्ठानक्षमो नतु विवेकसाध्यं दौत्यं कर्तुं योग्यस्तस्माद्गुरुसमीपं गत्वा मधुरक्षणादिरूपायां तत्सेवायामेव सर्वदा तिष्ठ नतु तथाभूतश्मश्रुप्रदर्शनेन तदपकीर्तिं लोके प्रसारयेत्याशयः । विप्रलम्भे शृङ्गाररसे दूतनायकयोरुभयोर्दूषणं तत्पोषकत्वाद्रसशास्त्रानुगुणं "निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे नूनमनञ्जने पुलकिता तन्वी तवेयं तनुः । मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिक"मित्यादौ तथा दर्शनात् सपत्न्या इत्येकवचनस्य न इति बहुवचनस्य चाभिधानेन स्वस्य तदपेक्षयोत्कृष्टता ध्वनिता तस्य श्मश्रुलौहित्येकुङ्कुमसंबन्धाल्लौहित्यर्मिति तदारोपः । नन्वेवं चेत्सम्प्रत्यहं मथुरां प्रति गच्छामि स्वयमेव श्रीयशोदानन्दनः

समुपागत्य त्वां प्रसादयिष्यतीति चेत्तत्राह। वहत्विति। मधूनां यादवविशेषाणां मधुदेशस्य वा पतिः मधुमानिनीनां प्रसादं वहतु ताः प्रसन्नाः करोतु तथा च भाग्यवशाल्लब्धमधुपतित्वस्य स्वमानिनीनां प्रसादन एवास्ति सम्प्रत्यधिकारो न तु निकृष्टानां गोपिकानामस्माकमतो मिथ्यैव ब्रवीषि स्वयमेवेत्यादि तस्मात्सङ्कोचमपि विहाय तासां प्रसादं वहत्वित्यस्माभिरप्यनुज्ञायत इति भावः। तासां बाहुल्यात्प्रसादन एव तस्यायुर्गमिष्यति अस्मत्प्रसादनायागन्तुं तस्यावकाश एव दुर्लभ इति सूचयितुं मानिनीनामिति बहुवचनं यद्वा बुद्धमस्माभिस्त्वदागमनकृत्यं श्मश्रुभिस्तादृशकुङ्कुमरूपतन्मानिनीनां प्रसादं धृत्वास्मभ्यं दातुमागतोऽसि तस्य च मस्तके लापयितुमुचितस्य चरणे लापनं मद्यपस्य तवोन्मादविजृम्भितम् अस्माभिस्त्वेवं विधवस्तु चरणेनापि न स्पृश्यते गुरुदेवतातिरिक्तोपभुक्तैवंविधवस्तुधारणस्य निषिद्धत्वात् अहो नास्ति तवापराधः स एव धूर्ताधिराजोऽस्मदुपहार्यं निषिद्धवस्तुप्रदानाय त्वां प्रेषितवान् त्वमपि मद्यपत्वाद्विवेकमकृत्वैवागतवान् अतः कस्मादस्मांस्तत्र गमनार्थं प्रार्थयसि तत्र गतास्वप्यस्मासु प्रसादत्वेन परं कुङ्कुममेव दास्यति अतिप्रियाय तुभ्यमपि तस्यैव प्रदानात्तज्ज्ञापयितुमेव तथाविधश्मश्रुमतो दूतस्य प्रेषणाच्च अपरं कैतव्यं तस्य ज्ञातमस्माभिः किं तदिति चेत् शृणु गाढसुरते श्रमापनोदनार्थं खलु वायुरपेक्षितः स च स्वाभाविकः सर्वतो निरुद्धे पुरे दुर्लभः व्यजनवायुस्तु कर्तृसाध्यः तत्कर्ता पुरुषस्तु त्वादृशोऽपि तत्र स्थातुमयोग्यस्तस्मात्पूर्वोपभुक्ताः तदर्थं दासीः कर्तुमाकारयतीति तच्च जन्मान्तरेऽप्यशक्यमिति। ननु स्वयमपि यं प्रसादं धारयति तद्धारणे भवतीनां को दोष इति चेत्तत्राह। वहतु मधुपतिरिति। मद्यपस्य तस्यैव तद्धारणं योग्यं न त्वस्माकमिति भावः। मद्यपत्वादेव ममापकीर्तिर्भविष्यति न तु तासां काचिद्धानिरित्यपि तेन विचारितं नापि यदुसभायामुपहासकरमिदं कर्मेति चेत्याशयेन प्रसादं विशिनष्टि। यदुसदसि विडम्ब्यमुपहासास्पदं ननु तत्र केनैवं विधं कर्म ख्याप्यत इति चेत्तत्राह। यस्य दूतस्त्वम् एतत्पर्यन्तं ख्यापनायागतेन त्वया सन्निधाने कथं न स्थापितं स्यादिति भावः। ननु तत्रावसराभावात्तूष्णीमेव मया स्थीयत इति चेत्तत्राह। ईदृक् एवं विधश्मश्रुधारिणस्तव दर्शनमपि तस्यापकीर्तिकरमिति भावः। ईदृक् मद्यपत्वात्स्पष्टसुरचिह्नधारी सोऽपि मद्यपोऽतः स्वशदृशस्त्वमेव तेन दूतः कृतः विवेकी कश्चित्तस्य हितैषी यदि भवेत्तर्हि एवं बोधयेत् भो व्रजराजकुमार! किमिह स्वस्य यदूनां चापकीर्तिकरं कर्म कर्तुं प्रवृत्तोऽसि व्रज एव गत्वा रहसि स्वसखीभिरेव किमर्थं न रमसे इत्यप्यनेन ध्वनितम्। यदुसदसि प्रसादं वहतु सर्वत्र विडम्ब्यमिति वा एतदारभ्य दशभिः श्लोकैर्दशाङ्गश्चित्रजल्पोऽत्र मुनिना वर्णितस्तदङ्गानि तु प्रजल्पादीनि तदुक्तम्—

> चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितः। विजल्पो जल्पसञ्जल्पा अवजल्पोऽपजल्पितम्॥
> आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्तितः इति। असूयेर्ष्यामदयुजा यो ऽव धीरणमुद्रया।
> प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्तित इत्युक्तं॥

प्रथममङ्गमाद्यपद्य दर्शितं तत्र कितवेत्यसूया सपत्न्या इतीर्ष्या अङ्घ्रिं मा स्पृशेति मदः वहत्वित्यवधीरणं यदुसदसीयकौशलोद्गार इति उद्धवपक्षे हे मधुप! मधुपते भगवद्ध्यानपरां तत्प्रियामवलोक्य तत्पादपद्मं द्रष्टुं नम्रीभूतं श्मश्रुभिर्मदङ्घ्रिं स्प्रष्टुमिच्छतीति प्रकल्प्य निषेधति। मास्पृशेति। तिलकदानावसरे सम्प्रति वा श्मश्रुषु पतितान्कुङ्कुमकरणानालक्ष्याह। सपत्न्या इति। समानमन्यत् रसशास्त्रानुरोधेनेत्थं वर्णयता मुनिना स्वशास्त्रसिद्धन्तोऽपि निरूपितः गोपिकानां श्रुत्यवतारत्वात् तथा हि काचित्तत्त्वमस्यादिरूपा मुख्या श्रुतिर्मधुकरं स्वकर्मणा मधुसदृशतत्तद्विषय कर्तारं जीवात्मानं दृष्ट्वा करुणाक्रान्तस्वान्ता तस्य कृष्णस्य सङ्गमं ध्यायन्ती "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत" इत्युक्तत्वात्कृष्णेन सच्चिदानन्दस्वरूपेण परब्रह्मणा सङ्गममभिन्नत्वं ध्यायन्ती तत्राभिशयवती प्रियेणानन्दात्मत्वात्परमं प्रेमास्पदेन प्रस्थापितं प्रशेशितं दूतं कल्पयित्वेदं वक्ष्यमाणमब्रवीत् जीवात्मनः प्रियप्रस्थापितत्वम् "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याककरवाणी"ति श्रुतिसिद्धं श्रुतिरूपनायिकासङ्गमानन्दानुभवार्थं ब्रह्मणो जीवात्मभावेन दूतत्वमवगन्तव्यं तथा च श्रुतिः रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणायेति इदं वक्ष्यमाणं वाक्यं प्रियप्रस्थापितं दूतं कल्पयित्वा ब्रवीदित्यपि द्रष्टव्यं यदब्रवीत्तदुदाहरति। हे मधुप! पानोदर्कमधुतुल्यविषय रसपानपरायण! यद्यपि त्वं कर्तृत्वभोक्तृत्वविनिर्मुक्तः सच्चिदानन्दघनस्तथापि यत्सम्पर्कादनर्थपरम्परां प्राप्तोऽसि तं त्वं न जानास्यतोऽहं त्वां बोधयामीत्माशयेनाह। हे कितवबन्धो! त्वत्तः सत्तां प्राप्य त्वामेव तत्तद्विषयसुखरूपमधुलवान्प्रदर्श्य जन्ममरणादिलक्षणसंसारानलज्वालामालायां क्षेप्तुं प्रवृत्तत्वात्परमशठस्य चित्तस्य बन्धुस्तथा च तत्तादात्म्यात्त्वयि संसारो न स्वत इति भावः। ननु संसारापादकान्तःकरणतादात्म्याध्यासिकोहेतुः कथं च स्वस्वरूपप्राप्तिरिति चेत्तत्राह। मास्पृशेति। वस्तुतः सः त्रिगुणात्मकमायापतिः परमात्मैव त्वं सपत्न्या मायाया अङ्घ्रिं स्पृष्टवानसि तदधीनतया तत्पादप्रहारास्पदतां गतोऽसि तेन चान्तः करणाध्यासेन संसृतिमापन्नोऽसि स्त्रीजितो यथा स्वामित्वं तिरोधाय कैङ्कर्यादिदुर्दशां भजते तद्वत्" सम्प्रति तव मोक्षेच्छास्ति चेत्तर्हि तदङ्घ्रिं मास्पृशेत्यर्थः। तथा च श्रुतिः "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति। अजामेकां लोहितशुक्लकृष्णामजो ह्येकोजुषमाणोऽनुशेत" इत्याद्या स्त्रीपुरुषादिदेहतादात्म्याध्यासमपि तच्चरणस्पर्शमाहात्म्यादेव प्राप्तोऽसीत्याशयेनाह। कुचेति। कुचाभ्यां तत्र स्फुरन्मालाकुङ्कुमाभ्यां श्मश्रुभिश्चोपलक्षितः तदुत्पन्नविलक्षणोऽपि एतत्सङ्घातरूप एवाहमिति ज्ञातवानसीत्यर्थः। तर्हि तदधीनत्वनिवृत्तौ क

उपाय इति चेत्तत्राह । वहत्विति । समधुपपतिर्भवांस्तेन मानिनीनां तत्प्रत्यगभिन्नं ब्रह्मैव प्रमाणं तात्त्विकमिति प्रतिपाद्यत्वेनास्ति यासां तासां तत्त्वमस्यहं ब्रह्मास्मि प्रज्ञानं ब्रह्मेत्यादिकानां यद्वा तत्र प्रामाण्यवतीनां नोऽस्माकं प्रसादं वहतु प्रत्यगभिन्नं परमात्मानं मामेव सर्वाः श्रुतयः प्रतिपादयन्तीति सर्ववेदान्तवाक्यसमन्वयावधारणरूपं प्रसादं धारयतु । नन्वल्पज्ञस्य संसारिणो मम कथं समस्तश्रुतितात्पर्य विषयतेति चेत्तत्राह । यदिति । यद्यस्मात्सदेवासिउशब्दोऽवधारणे त्वय्यल्पज्ञत्वादेः परमेश्वरे सर्वज्ञत्वादेर्मायिकत्वात्सच्चिदानन्दरूपस्त्वं तत्स्वरूपं ब्रह्मैवासीत्यर्थः । प्रसादोऽपि नवास्तवोऽन्यथा द्वैतापत्तेरित्याशयेन प्रसादं विशिनष्टि । विडम्ब्यमिति । यथा तव जीवभावेन संसरणं विडम्बनमात्रं तथास्वात्मबोधायस्वस्मिञ्छ्रुतितात्पर्यावधारणमपि यक्षानुरूपो बलिरिति न्यायादित्याशयेनाह । यस्य दूतत्वमीदृक् । यस्य सद्रूपस्य ब्रह्मणः स्वरूपतोऽपि त्वमीदृक् अनुकरणमात्रेण दूतो न वस्तुत इत्यर्थः ॥ १२ ॥

गूढार्थदीपिनी

गतानि प्राप्तानि वागादीनि तत्तद्व्यपाराः यासां ताः । लौकिका त्यक्तलोकव्यवहारा आसन् ॥ ९ ॥ रुदत्यश्च तम् अपृच्छन्निति योज्यम् । यानि चरितानि तानि संस्मृत्य ॥ १० ॥ काचित् श्रीराधा ॥ ११ ॥ हे मधुप भ्रमर नोऽस्माकम् अङ्घ्रि मा स्पृश । कैः । सपत्नीकुचमर्दितकृष्णमालागतं यत् कुङ्कुमं तद्युक्तश्मश्रुभिः । मधुपतिः यदुपतिः कृष्णः तासां प्रसादं प्रसन्नतां वहतु करोतु । यस्य दूतः त्वं स च द्वयमपि विडम्ब्यम् उपहासास्पदं स्यात् । गोपीसन्तोषार्थं कृष्णेन भ्रमरो दूतः प्रेषित इति ॥१२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

त्यक्ता लौकिकाः लोकव्यापारा याभिस्ताः ॥ ९ ॥ तस्य भगवतः कैशोरस्बाल्ययोर्यानि प्रियाणि मनोज्ञानि कर्माणि तानि संस्मृत्य संस्मृत्य गायन्त्यः गतह्रियः रुदन्त्यस्तमपृच्छन्निति पूर्वेणान्वयः ॥ १० ॥ काचित् गोपी कृष्णसङ्गमं ध्यायन्ती मधुकरं दृष्ट्वा प्रियेण श्रीकृष्णेन प्रस्थापितं दूतं कल्पयित्वा इदं वक्ष्यमाणमब्रवीत् कल्पयित्वेत्यस्यायमर्थः अस्मत्सान्त्वनार्थं श्रीकृष्णेनोद्धवः प्रेषित इति मन्वाना तं च श्रीकृष्णसन्देशविवक्षुमप्यलब्धावसरत्वात् तूष्णीं स्थितमवधार्य श्रीकृष्णस्नेहवैवश्यात्प्रेमसंरम्भवेगेनोद्धवस्य शृण्वतो भ्रमरमुद्धवस्थाने दूतमगोप्य प्रायः साक्षादुद्धवं प्रति कितव बन्धो ! इत्यादिवक्तुमशक्यत्वाच्चेदमब्रवीदिति ।११। हे मधुप ! भ्रमर हे कितवबन्धो ! हे धूर्त ! दूत नोऽस्माकमङ्घ्रिं मास्पृश । ननु तस्मिन्कैतव्यमस्तु मास्तु वा मयि को दोष इत्यत आह । सपत्न्याः कुचाभ्यां विलुलितायाः सम्मर्दितायाः कृष्णवनमालायाः कुङ्कुमं येषु तैः श्मश्रुभिः उपलक्षितः कृष्णवर्णस्य तव श्मश्रूणां लोहितत्वमन्यथा नोपपद्यते अतस्तादृशमाला सेवित्वात्त्वमपि धूर्त एवेति भावः । किन्तु यस्य त्वं दूतस्तस्य कृष्णस्य मानिनीनामीदृगेव कुचकुङ्कुमं विडम्ब्यमुपहासास्पदं प्रसादं यदुसदसि मधुपतिर्भगवान् वहतु उपहासास्पदीभूतप्रसादवाहं भवन्तं प्रति यदुसदो गताः प्रसन्ना भवन्तु किमस्मदङ्घ्रिस्पर्शनेनेत्यर्थः ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं सुदतीषु वदन्तीषु उद्धवनिमित्तमुद्धवः किं पुरतोऽकरोदित्यत ईरयति शुकः ॥ ददर्शेति । गोविन्दमनोवाग्देहचेष्टितैर्गोविन्दस्य तत्रार्पितत्वेन तत्सम्बन्धीनि मनोवाग्देहचेष्टितानि तैर्निमित्तैस्त्यक्तलौकिका युक्तलौकिकव्यापारा व्रजं प्राप्तः कृष्णदूत उद्धवो गोपीर्ददर्शेत्यन्वयः ॥ ९ ॥ गायन्त्यो गायतीर्यानि कैशोरबाल्ययोः प्रियकर्माणि तानि संस्मृत्य संस्मृत्य रुदतीर्गतह्रियो गतलज्जाः ॥ १० ॥ कृष्णसङ्गमं ध्यायन्ती काचिद्गोपी मधुकरं भ्रमरं दृष्ट्वा प्रियप्रस्थापितं प्रियेण नाथेन प्रस्थापितं सान्त्वनेन स्वप्रियं कर्तुं प्रेषितं वा दूतं कल्पयित्वेदं वक्ष्यमाणमब्रवीदवोचत् । कृष्णसङ्गमं रतिमतीव जनयित्वा निजां विधाय विहाय गत इति कलुषस्य कलुषो वा सङ्गमस्तमितीर्ष्योक्तिरनेन ध्वन्यते ॥ ११ ॥ हे मधुष अमात्य इति मधुपतोद्धवस्यापि ज्ञेया । मद्यपायन्निति ध्वनिः । कितवस्य कपटिनो बन्धुः कितवः कृष्णो बन्धुर्यस्येति वाऽस्मान्मा स्पृश न स्पृश । अङ्घ्रिमिति पाठेऽस्मत्सान्त्वनार्थं पादस्पर्शं न कुर्वित्यर्थः । पुनरनन्यजोत्तेजकतयाऽङ्घ्रि ज्ञानं न स्पृशास्मज्ज्ञानविषयो न भवेति कटाक्षितोऽर्थः । कोऽपराधो मयाऽऽचारीति रीतिरियमादृतेत्यत आह । सपत्न्या एकाप्रियत्वं प्रेयसः परमानिष्टामत्येकवचनं पुरतस्तु विद्यमानस्थितिकथनमिति बोधयितुम् । तथा रमणस्थितिं वा तन्मानिनीनामिति बहुवचनमिति विशेषोऽवसेयः । मधुरास्थायाः कुचाभ्यां विलुलिता रतिलव इतस्ततो लोला माला तस्या मालायाः कुचकुङ्कुमं येषां तानि च तानि श्मश्रूणि मुखरोमाणि च तैर्युक्तोऽस्पर्शने हेतुवचनम् । सपत्न्या इत्येकवचनेन नेत्यनुदीर्य मेत्युदीरणेन च या मा लक्ष्मीस्तस्याः कुचविलुलितमालाकुङ्कुमश्मश्रुभिरञ्जितस्त्वं कितवानां बन्धो येन स त्वमस्मानपि स्पृशाङ्घ्रि ज्ञानं वा स्पृश सदाऽस्मज्ज्ञानविषयोऽपि भव । त्वां तत्सपत्न्या अन्यं स्त्रीजनं मा स्पृशेति स्वानुमतिमेकत्र ध्वनयति । अननुमतमते करणात्कितवतां स्फोरयति । तन्मानिनीनां तन्नगरगाङ्गनानां स्वसत्कारात्पदानामिति ध्वनिः । मधुपतिस्तव स्वामी प्रसादं वहतु । यदुसदसि यादवसभायामेतादृशं मृगदृशं सुन्दरीमहमगममिति वचनानुकरणयोग्यामाभिराभीरभामिनीभिर्ममाङ्गसङ्ग इत्यस्येदानीं मानहानिनिदानतेति ध्वनिः । अस्मदीयं सज्जनं उसदारी रुद्रसभायां पिशाचपूरितायां विडम्ब्यमनुकरणीयमित्यान्तरङ्गिको भावः । यस्य दूतस्त्वमीदृक् स्वामिसमः कितव इत्यतो न तव नाथेन त्वयाऽपि कृत्यं

गच्छेति तात्पर्यम् । यस्य दूतस्त्वमपि तादृगिति यद्यपि वक्तव्यं तथाऽपि ई लक्ष्मी सम्पदमेव पश्यतीति दृग्दुर्भगाङ्गनावलोको न तथाऽपि संमतमिति ध्वनयितुमीदृगितीदृगुक्तिरिति युक्तिमत्य इति मन्तव्यम् । भृङ्ग भृङ्ग प्रसक्तिमपि केवलमज्ञा अप्येवं कुर्वन्ति किङ्करीणामेतत्सर्वज्ञता किङ्करीति वक्ति ॥ मधुपेति । मधुप प्रागस्मदनुरक्तभृङ्ग सपत्न्याः कुचविलुलितानि मालातः पङ्क्तितो विद्यमानानि कुङ्कुमकुसुमानि जपाकुसुमानि तेन तद्रसो लक्ष्यते । रसरक्तश्मश्रुभिरुपलक्षितस्तथा कितवबन्धो कितवो धुत्तूरपुष्पं स एव बन्धुर्यस्य तत्सम्बुद्धिः । अनेन चित्तभ्रंशसम्भाविततामाचष्टे । कितवो धूर्त उन्मत्तवञ्चके कनकाह्वये । कनकश्चम्पके स्वर्णे किंशुके नागकेसरे । धुत्तूरे काञ्चनारे चेत्युपयुक्ततदुपयुक्तविधौ । अस्मान्मा स्पृश मधुर्वसन्तः पतिर्यस्य स तन्मानिनीनां प्रसादं वहतु वसन्तरूपः सोऽपि यस्य दूतस्तदनुसारतो वर्तमानस्त्वमपीदृक् येषां पुष्पाणाम् वाच्यं यत्सदस्तस्मिन्विडम्ब्यमनुकार्यमित्यर्थः । उ वाच्ये चापि कुत्सायामिति विश्वः । उत्कृष्टं सदं इति वा । यदस्ति तत उच्चत्वाद्यदुरित्युग्भाष्योक्तेः । भगवत्सभायां विडम्ब्यमिति पारमार्थिकोऽर्थः । यत्कितवो मधुपतिं तत्तस्मान्मानिनीनां न उ सदसि विडम्ब्यं प्रसादं विशीर्णतां वहतु पुनरपि ददातु । इयताऽपि न तृप्तिस्तस्येति रुषाऽऽभाषेति भाव इति वा ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नन्वेवमसूयायां दुष्टा एव जाताः किं ज्ञानेन पुनः सञ्जीक्रियन्त इत्याशङ्क्य तासां क्लेशवशादेवायं स्वभावो जातः वस्तुतस्तूत्तमा इत्याह द्वाभ्याम् । इतीति । समाप्तौ प्रकारे च पूर्वोक्तदोषस्य तदासक्तिः फलं न तु नाश इति वक्तुं गतवाक्कायमानसा इत्युक्तं, ननु कथमेवं कल्प्यते दुष्टा एव कथं न भवेयुरित्याशङ्क्याह । गोप्य इति ता मुग्धाः न कापट्यम्विवेकं च जानन्ति अतः खेदवशात्तथैव मनोवृत्तिर्भवति तथैव वदन्तीति न दुष्टाः हि युक्तश्चायमर्थः महता कष्टेन हि सर्वपरित्यागो न सर्वभावेन पूर्वं भगवन्तं प्रपन्नाः किञ्च गोविन्दो भगवान् तासामेवेन्द्रः सर्वैर्देवैः कृतः अन्यथा तेषां करणं व्यर्थं स्यात् दुष्टस्वामित्वं वा भवेत् । अत एतैर्वचैनगतवाक्कायमानसा एव ता इति ज्ञायते अथवा पूर्वमेव गोविन्दं स्वत एव गतानि कायवाङ्मनांसि यासामत एतान्यपि वचनानि न दोषःस्यात् भगवदीयत्त्वात्तेषां तासां सर्वपरित्यागे निदर्शनमाह । कृष्णदूत इति । साक्षाद्भगवति समागते को वेद किम्वा कुर्युः कृष्णस्य स्वामिनः दूतेऽपि उद्धवे व्रजमागते त्यक्तलौकिका जाताः सर्वापेक्षां परित्यज्य प्रकटा भूत्वा तेन सह यत उपविष्टाः किञ्च तस्याप्यग्रे प्रियस्यैव कर्माणि गायन्त्यो जाताः अनेन भगवत्येव निवेदिता वाक् नान्यतः सङ्कोचं लभत इत्युक्तं रुदन्त्यश्च जाताः ॥ ९ ॥ एवमुपवेशनेन कायं गानेन वाचं रोदनेनान्तःकरणमिति साधारण्येन त्रयमपि निवेदितमुक्तम् असाधारणस्वभावमपि त्यक्तवत्य इत्याह । गतह्रिय इति । स्त्रीणां स्वाभाविको धर्मः लज्जा तामपि चेत्त्यक्तवत्यः किमवशिष्यते तासु । नन्वेतत्सर्वं कादाचित्कमित्याशङ्क्य तत्परिहारार्थं विशेषमाह । तस्य संस्मृत्येति । तस्य भगवतः कैशोरबाल्ययोः अवस्थाद्वयसम्बन्धीनि यानि संस्मृत्य पुनः पुनरादरेण स्मृत्वा ताः पूर्वोक्तविधा जाता सम्बन्धः ॥ १० ॥ एवमिममपि दोषम्महान्तं मत्वा महता प्रबन्धेन साध्यत्वं निरूपितं ततोऽप्यधिकं दोषं निरूपयन् प्रस्तावनामाह । काचिदिति । तस्य च साध्यत्वमग्रे वक्ष्यति तत उपदेशः अर्थसङ्गतिस्तु पूर्वमुपालम्भनमुक्त्वा स्वासक्तिख्यापनार्थं स्वगतान् भावान् रससङ्गोपनार्थं काचिदाह तत्रापि व्याजेन अन्यापदेशन्यायेन अन्यथा रसः पुष्टो न भवेत् भगवान् वा गोपिकानां स्वरूपमुद्धवाय प्रदर्शयितुं भ्रमरमपि प्रेषितवान् तदा तं दृष्ट्वा आर्षज्ञानेन भगवदीयत्वं मत्वा काचिदाह यथोद्धवस्य मयोपकारः कृत इति गर्वो न भवेत् अन्यापदेशन्यायेन तु पदान्युद्धवेऽपि योजनीयानि तदा दोषसम्भावनापि भवति द्वितीयेऽप्यर्थे न कापि सम्भावना स्यात् मधुकरो भ्रमरः वस्तुतोऽयं विपरीतनामा मधु भक्षयति न तु करोति अतो वसन्तो मधुकरः अयं मधुपोऽपि मधुकरत्वेनोच्यते अन्यथा पुष्पाणि तदभिमानिन्यो वा देवता एन न प्रवेशयेयुः पूर्वं हि सा कृष्ण सङ्गमं ध्यायन्ती स्थिता प्रथमतो भगवता सह मनसा सम्बन्धं प्राप्य पश्चान्मानवती जाता तदा भगवानन्यां गृहीतवानिति परिकल्प्य सा न समीचीनेति च पुनर्भगवान्मामेव प्रार्थयितुं भ्रमरं प्रस्थापितवान् इति ज्ञातवती तदाह । प्रियप्रस्थापितं दूतं कल्पयित्वेति इदं वक्ष्यमाणमब्रवीदिति ॥ ११ ॥ आदौ हि मानवत्याः क्रोधेन पारुष्यं भवतीति ततः प्रथमं तामसतामसी तद्भावयुक्ता वा दूषणमाह । मधुपेति । सर्वत्र हि रसे विप्रलम्भे दूतो नायकश्च इष्यते यथा अज्ञातपीडागमा अधमस्येत्युभयोर्दूषणं तथात्राप्याह । मधुप कितवबन्धो इति । मतान्तरभाषेयमिति कामशास्त्रानुरोधिनी निरूपितेति न समाधिभाषायां भक्तिमार्गे वा विरोधः यद्यपि भ्रमरो मधु भक्षयति तथाप्यन्यार्थेऽपि सक्त इति तत्सूचकत्वेन निन्दापि भवति अन्यापदेशे तु यादवाः सर्वे पानरता इति लोक प्रसिद्ध्या निन्दा भवति । यद्यपि भगवद्भक्ता भगवांश्च न भवति अनुकरणं साधारणविगीतधर्माणामेव न तु सर्वेषां तथापि साधारण्यं न प्राप्तो धर्मः श्रुतोऽत्यन्तं खेदाय भवति वस्तुतस्तु सरस्वती अन्यार्थमप्याह । भगवान् स्वामी कालश्च दूतः स्वयं च श्रुतय इति कालद्वारा हि भगवान् वक्तव्यो ज्ञातव्यो वा भवति अत्र सम्वत्सरात्मकः काल आदौ मधु वसन्तं पात्येव ततः कितवस्य ग्रीष्मस्य वञ्चयित्वा सर्वसंहारकस्य बन्धुरपि भवति स चेद्भगवत्सम्बधिनं वृन्दावनादिभूप्रदेशं भगवच्चरणं वा तत्रत्यं स्पृशेत्तदा क्लेशो महानेव भवेदिति पादस्पर्शं निषेधति मास्पृशाङ्घ्रिमिति । पूर्वं तु भगवति विद्यमाने निदाघवन्ह्यर्कभवः भुवो रसं न गृहीतवानित्युक्तम् अधुना दूरे भगवानिति मत्वा कदाचित्स्पृशेदिति निषेधः अतो नमस्कारार्थमागतं भ्रमरमुद्धवं वा निषेधति । ननु नमस्कारे को दोष इत्याशङ्क्य मधुपत्वाच्चरणकमलमकरन्दमपि पास्यतीति निषेधति तदा

चरणौ गतसारौ भगवदुपयोगाय न भवेयातां मधु मादकं च यः पिबति स न स्पृश्यो भवति। ननु दूतोऽहं भगवता आकरणार्थं प्रेषितः नतु कश्चित् अहमुदासीनः स्त्रीणां च भोगार्थिनां तादृशी अवस्था उचितेत्याशङ्क्य स हि वञ्चनार्थमेव त्वां प्रेषितवानित्याह। कितवबन्धो इति। कितवोऽयं वञ्चकः तत्रापि धूर्तः अतः फलस्याभावान्मानापनोदनादिसाधनं व्यर्थमिति अङ्घ्रिं मास्पृशेति निषेधो युक्तः अनेनोद्धवस्यापि सम्माननार्थं निषेध एव इममर्थमभिप्रेत्यैव निषेधः किञ्च पत्न्याः कुचवितलीलतमाला कुङ्कुमश्मश्रुभिरुपलक्षितः सपत्नी द्यौः तस्या मेघाः कुचस्थानीयाः तत्र विलुलिता मालाः विद्युतः तत्र कुङ्कुमसदृश्यो दीप्तयः तत्सहिताः श्मश्रुस्थानीया धाराः तैरपि सहितो मा स्पृश शरदेव परमस्माकं हितकारिणीति वर्षापर्यन्तं निषेधः न केवलं ममैव किन्तु सर्वासामेवेत्युक्तं न इति। यो हि सम्माननार्थमायाति स हि द्विष्टपदार्थं दूरीकृत्य समायाति नतु तत्प्रदर्शयन् भ्रमरस्य श्मश्रुस्थानीयानि रोमाणि मकरन्दसम्बन्धात् पीतानि भवन्ति तद्भगवदीयस्य नान्यपुष्पेषु मकरन्दार्थं गमनं मृग्यत इति भगवत एव मालास्थपुष्पाणां मकरन्दसम्बन्धः तत्र ग्राथितानां मकरन्देऽन्तः प्रवेशाभावात् श्मश्रुतत्सम्बन्धो बहिरेव तथा पीतत्वं कुङ्कुमसम्बन्धादेव नान्यथा घटेत तथोद्धवस्यापि भगवदुपभुक्तमालाप्तौ आघ्राणेन कुङ्कुमसम्बन्धः सम्भवति तस्यापि श्मश्रूणि तादृशान्येव प्रायेणेति लक्ष्यते निरन्तरमालाघ्राणात् रञ्जितान्येव श्मश्रूणि आघ्राणं च मकरन्दपानं वा बहिःप्रदेश एवेति न भगवदङ्गरागेण पीतत्वं विलुलितपदेन च सम्भोगो लक्ष्यते न त्वालिङ्गनमात्रं तथा सत्यनुरोधेनापि तथापकरणं सम्भवति तदा नात्यन्तं द्वेष्यः श्रमश्च तस्याः सूच्यते तेन महासौरतं द्योतितं तस्यान्मानवृद्धिजनकत्वात् अर्थत्रयेऽप्यङ्घ्रिस्पर्शनिषेधो युक्तः ननु भवत्यो हि भगवदीयाः भगवांश्चेत्तथा मन्यते कथं भवतीनामस्वीकार इत्याशङ्क्याह। वहतु मधुपतिरिति। कालपक्षे ऋतुद्वयस्यैव निरोधः आद्यसङ्ग्रहार्थमाह। मधुपतिरिति। वसन्तसम्बन्धी सम्वत्सरः तत्रत्यानां मानिनीनां प्रसादं वहतु ता हि मानं परित्यज्य प्राप्तसन्तोषाः कालाय प्रसादं कुर्वन्ति यतो वर्णनायां तत्सम्बन्धेन महत्त्वमापद्यते अस्माकं तु न तत्रापि प्रसादः शरद्येव भगवत्प्रसादस्य जातत्वात् ऋतुद्वये निषेधः वसन्ते शरदि च तस्य प्रशंसा तथापि वसन्ते भगवत्कृतः कालोत्कर्षः शरदि तु सर्वथेति वसन्ते हि यज्ञा अग्नयः संस्काराश्चेति सपत्नीभिर्हि प्रसादतया भगवते कुचकुङ्कुमं दत्तं यो हीश्वरः स चेद्दासीनां प्रसादं लभते तदा यदुसभायां वाच्यता भवत्येव अन्योपभुक्तस्यान्येन ग्रहणं देवव्यतिरिक्ते वाच्यतापादकं महतः सुतरां तर्हि भगवता कथं स्वीकृत इत्याशङ्क्याह। मधुपतिः। मधुदेशस्य मथुरायाः पतिः ईर्ष्यया वा यथेष्टं मधुपानकर्ता अतो देशस्वाभाव्याद्वस्तुस्वाभाव्याद्वा प्रसादग्रहणं तादृशस्याप्ययं प्रसादं गृह्णातीत्ययमपि नादरणीयः अनेनैवं सूचयति अत्रैवागत्य एकान्ते परं भोगः कर्तव्यः। ननु मथुरायां यादवा उपहसिष्यन्ति तत्र चावश्यं यादवत्वाद्यदुसभायां गन्तव्यं सजातीयवाच्यता च दुःसहा अथापि इतरसम्बन्धात्स एव तत्प्रसादं वहत्वयम् अस्मासु तु गतास्वपि तथैव करिष्यति प्रसादत्वेन परं कुङ्कुमं दास्यति एतच्च नापेक्षितमिति स्वार्थं निषेधः प्रशस्ता एव धर्मा भगवदीया ग्राह्या इति अप्राशस्त्यार्थं विडम्ब्यमित्युक्तम् ननु भवतीभ्योऽप्येतदेव दास्यतीति अत्र किं प्रमाणं वस्तुतस्तु तास्त्यक्ष्यतीशङ्क्याह। यस्य दूतस्त्वमीदृगिति। तत्सम्बन्धी भवांस्तस्यातिप्रियः तुभ्यं चेद्ददाति अस्मभ्यमपि दास्यति अन्यथा दैन्येन प्रेषयन् त्वां पीतश्मश्रुं न प्रेषयेत् अतो ज्ञापनार्थमेव तथाविधं प्रेषितवान् अनेन तयैवं ज्ञातमिति प्रतिभाति गाढसुरते व्यजनाद्यपेक्षणात् पुरे सर्वतो निरोधेन सहजवाय्वभावात् पुरुषस्य यादृशस्यापि तत्र स्थातुमयुक्तत्वात् पूर्वोपभुक्ताः अस्मान् तस्याः दासीकर्तुं व्यजनार्थमाकारयतीति एतच्च सर्वथा आवश्यकमिति भ्रमरोद्धवपक्षे निषेधो युक्तः वसन्तकृतश्चोत्सवः धर्मरूपः यादवसभायां विडम्ब्य एवानुकार्यः ते हि लौकिकप्रधानाः अनुकरणमात्रेण धर्मं करिष्यन्तीति कालकृतो धर्मः भगवदीयकृताधीन इति वा प्रमाणमित्याकाङ्क्षायां यस्य मुख्यस्य कालस्य भगवतो वा सम्बन्धी दूतः कलिस्वरूपस्त्वमीदृक् श्यामः नहि धर्मे उत्कृष्टे तदाधारः श्यामो भवति अतोऽस्मान् प्रति ऋतुत्रयनिषेध एव युक्तः पुष्टिमार्गे हि दक्षिणायनस्यैव प्राशस्त्यात् तत्र हि रात्रयस्थूला दिवसाश्च सूक्ष्मा इत्यनङ्गीकारे मुख्यो हेतुः ॥ १२ ॥

श्रीसुबोधिनी-सारः

इत्येवं गोविन्दे प्राप्तवाणीदेहमानसा गोप्यः त्यक्ता लौकिका लोकव्यवहारा याभिस्ताः कृष्णस्य दूते उद्धवे व्रजं याते सति ॥ ९ ॥ प्रियस्य कर्माणि गायन्त्यः तस्य श्रीकृष्णस्य कैशोरबाल्ययोरवस्था विशेषयोर्यानि चरितानि तानि संस्मृत्य संस्मृत्य रुदन्त्यो गतभियस्त्यक्तलज्जाः ॥ १० ॥ काचित् मधुकरं भ्रमरं दृष्ट्वा कृष्णस्य संगमं ध्यायन्ती प्रियेण श्रीकृष्णेन प्रस्थापितं दूत कल्पयित्वा इदमब्रवीत् ॥ ११ ॥ लिंगसमवायन्यायेन छत्रिणो यान्तीतिवद्रोप्य ऊचुरिति। हे मधुप हे कितवस्य धूर्त्तस्य बंधो सपत्न्याः कुचाभ्यां विलुलितायाः संमर्दितायाः मालायाः कुंकुमं येषु तैः श्मश्रुभिरुपलक्षितस्त्वं नोऽस्माकमङ्घ्रिं मा स्पृश मधुपतिः श्रीकृष्णस्तासामेव मानिनीनां प्रसादं वहतु करोतु यदूनां सदसि सभायां विडम्ब्यमुपहासास्पदं कुतः यस्य दूतस्त्वमीदृक् ॥ १२ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

मधुप कितवेत्यस्याभासे, प्रथमं तामसतामसीति। अत्रेदमाकूतम्। विप्रयोगे प्रलापदैन्यादिवद्दोषारोपोऽपि व्यभिचारिभाव एव। तथा सति रसात्मकत्वाविशेषेऽप्यत्युग्रभावोत्पत्तौ भगवद्धर्मरूपो रसात्मकः प्रमाणादिसर्वबलनिरासकोत्युग्रस्तामसत्वेनोच्चर्यमाणो यः स एव हेतुरिति वाच्यम्। भावानां मिथ उपमर्द्योपमर्दकभावस्तु 'रजस्तमश्चाभिभूय सत्त्वं भवति भारत।

रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथे'ति प्रभुवाक्यात्सत्त्वादीनां यथा, तथैवेति तत्त्वमुपचारेणोच्यते। एवं सति रसात्मकप्रभुधर्म एवाविर्भवतीत्यारोपो दोषस्यायमिति न वक्तुं शक्यम्। भगवदितरास्मरणात्, स्मर्यमाणस्य तस्य स न वक्तुं शक्यः। इत एव नानुभूयमानस्य, प्रभुस्वरूपे तद्धर्मेषु वा दोषत्वाभावात्। ज्ञानवत आत्मस्फूर्तिश्चावश्यकी। एवं सति तदा तदभावाद्दोषत्वेनैव प्रभुधर्मेषु ज्ञानादुच्यमानधर्मात्मकत्वमेव स्वामिन्यास्तदा संपन्नमिति तामसतामसीत्युक्तम्। श्रीमदुद्धवानामपि स्वामिन्या एतादृगवस्थादर्शनेन प्रभुरेतादृशीरेताः कथं न मिलतीति भावो दोषारोप इव जात इत्यपि ज्ञापनायैतत्स्वरूपत्वमेवोक्तम्, एतादृश्याः स्वामिन्या ह्यागमनेनैतद्भावोदयात्। उपचारोऽयमित्यरुच्या पक्षान्तरमाहुः **तद्भावयुक्ता वेति**। **मधुप** कितवेत्यत्र, **मतान्तरभाषेयमित्यादि**। अत्रायमाशयः। **शुद्धपुष्टिमार्गीयभक्तानां** ज्ञानमार्गबोधनं भक्तिमार्गविरुद्धतमम्, अतो न समाधिभाषायामस्य प्रवेशो वक्तुं शक्यः। वर्ण्यते चात्युत्कटो रसात्मकः स्नेहभावः। स एव हि परमपुरुषार्थरूपः। तद्विघातकश्च सः। यद्यपि ज्ञानस्य स्वातन्त्र्येणात्रानुद्देश्यत्वम्, किन्तु प्रिये दोषारोपमात्रनिवर्तकत्वेन, तथापि तदारोपस्यापि रसात्मकत्वाद् व्यभिचारिभावत्वेनास्थिरत्वाच्च न सर्वथा ज्ञानस्योपयोगः। न ह्येतावत्पर्यन्तं साधिते निरोधे काचिन्न्यूनतास्ति, येन ज्ञानमुपयुज्येत। तस्मात् सूष्टूक्तं मतान्तरेत्यादि। कथने तूपपत्तिरियमेव। यत्संगमस्तदार्तिर्वा पुरुषार्थ इतिशास्त्रार्थः। एवं सति विप्रलम्भे प्रिये दोषस्फूर्तौ स्वदुःखदत्वज्ञानं हेतुः। तथा सति स्वसुखदत्वेनोत्तमत्वं प्रियत्वं च सिध्यति, न तु स्वरूपतः। तथा सति स्नेहस्य निरुपधित्वं भज्येतेति तत्समाधानायात्मत्वेन बोधनम्। तथा सति भगवत्येतासामेतासु च भगवतः सहजः स्नेहः सूचितो भवति, दुःखदत्वासंभवश्च। यथा स्वाधिष्ठितं देहं पीडयितुं जीवात्मा नोत्सहते, तथा स्वाधिष्ठितं जीवात्मानं भगवानित्युक्तं भवति। अत एव श्रुतिराह 'यमेवैष वृणुते तेन लभ्यस्तस्यैव आत्मा विवृणुते तनूं स्वा'मिति। तथा च विप्रयोगेऽन्तर्लाभः, संयोगे बहिरिति तदा तदा तत्तद्धर्माः स्नेहवशादाविर्भवन्ति। तावपि स्नेहजनितावेव, अन्यथा सर्वेषां तौ स्याताम्। तथा च स्नेहस्यैव दोषस्फूर्तिहेतुत्वं पर्यवस्यतीति निर्दोषत्वं प्रिये भाति। इदं तु मर्यादारीत्योच्यते। वस्तुतस्त्वत्युत्कटस्नेहेनैव दोषः स्फुरति, सोऽपि भगवद्भाव एवेति न भ्रमरूपो, न वा दोषरूपः। रसात्मकभगवत्स्वरूपमेतादृशमेवेति नाधिकं विचारणीयमत्रास्ति। अन्यथा रसाभाव (रसाभास ?) एव सिध्यतीति नः प्रतिभाति। ज्ञानात् भक्तेराधिक्यमप्यनेन ज्ञाप्यते। **समाधिभाषायामिति**, तत्र हि माहात्म्यज्ञानस्नेहौ क्वचिद् व्यस्तौ क्वचित्समस्तौ च निरूप्येते। प्रकृते तु 'काचिन्मधुकर'मित्यादिना प्रस्तुता कथा न तादृशीत्यस्याः कथायाः समाधिभाषात्वं तद्विरुद्धार्थकत्वं च विरुद्धमिति कस्यचिद् भाति, विहितस्नेहाभावेन भक्तिमार्गविरोधश्च तथा, स बोध्यते विरोधोऽत्र नास्तीति। तत्र मतान्तरभाषात्वं कामशास्त्रानुरोधित्वं चेति हेतुद्वयम्। अत्रेदं ज्ञेयम्। मर्यादामार्गीयमतात् पुष्टिमार्गीयं तत् मतान्तरमित्युच्यते। समाधौ तु व्यासैर्द्विविधोऽपि भक्तिमार्गो दृष्टः, 'अनर्थोपशमं साक्षाद् भक्तियोग'मिति वाक्यात्। तदर्थस्तु 'अनर्थोपशमं भक्तियोग'मिति पदेन साधनरूप उच्यते, 'साक्षाद् भक्तियोग'मिति पदेन फलरूपः। 'अजानतो लोकस्य' आद्यः। 'समाधौ दृष्ट्वा स्वयं विद्वा'निति द्वितीयमपि तमुक्तवान् व्रजसीमन्तिनीषु। अयं पुष्टिमार्गीय इति मतान्तररूपः। एतादृशेषु ज्ञानोक्तिरपि तथा। कामशास्त्रानुसारेणैव पूर्वं स्वरूपानन्दं दत्तवानित्यधुनापि तथैवोच्यत इति न कोऽपि विरोधः। तथाचेयं समाधिभाषैव। तथाचात्र समाधिभाषायां सत्यां भक्तिमार्गे च सत्युक्तरीत्या न विरोध इत्यर्थः। कालस्य दूतत्वमुपपादयन्ति **कालद्वारा** हीत्यादिना। तत्तत्काले तथा तथा भगवत्पूजाध्यानस्तोत्रादेर्विहितत्वेन स स काल एव भगवत्प्रापकः, तदभावे तदकरणादिति भावः॥ १२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्य श्रीकृष्णस्य कैशोरबाल्ययोरवस्थयोर्यानि प्रियाणि कर्माणि तानि संस्मृत्य संस्मृत्य गायन्त्यो रुदन्त्यश्च गोप्यः कृष्णदूते उद्धवे व्रजं याते आगते तमित्येवमपृच्छन् इति पूर्वेणैवान्वयः। 'कथमेवं परपुरुषं प्रति प्रश्नः सम्भवति ?' इत्याशङ्क्याह गतह्रिय इति। परित्यक्तलज्जाः॥ तत्र हेतुमाह—त्यक्तलौकिका इति। लोकव्यवहारानुसन्धानरहिता इत्यर्थः। तत्रापि हेतुमाह—गोविन्द इति। गोविन्द एव गतानि निविष्टानि वागादीनि तद्व्यापाराश्च यातां ताः। हि शब्दो युक्तिसूचकः। युक्तश्चायमर्थः। अन्यत्रासक्तमनसामन्यानुसन्धानाभावस्य प्रसिद्धत्वादित्याशयः॥ ९-१०॥ तत्र काचिद्गोपी कृष्णसङ्गमं ध्यायन्ती मधुकरं भ्रमरं दृष्ट्वा तं प्रियेण श्रीकृष्णेन प्रेषितं प्रस्थापितं दूतं कल्पयित्वा साक्षादुद्धवं प्रत्येवं कथनस्यानुचितत्वात् तस्मिन्नुद्धवे दृष्टिं कृत्वा तदपदेशेन उद्धवमेव इदं वक्ष्यमाणमब्रवीदित्यन्वयः॥ ११॥ तद्भ्रमरगीतमेव दर्शयति—मधुपेति दशभिः। तत्र चरणनिकटमागच्छन्तं विलोक्याह—**हे मधुप भ्रमर**! हे कितवस्य धूर्तस्य वञ्चकस्य बन्धो कार्यसाधक मित्र! अस्मत्सपत्न्याः कुचाभ्यां विलुलिता आलिङ्गनदाशायां सम्मर्दिता या माला तस्याः कुङ्कुमंकुचसम्बन्धात्ततो मालायां प्राप्तं यत्कुङ्कुमं तद्येपु तैः श्मश्रुभिर्नोऽस्माकमङ्घ्रिं मा स्पृशेत्यन्वयः। 'सपत्न्या' इत्यादिना चरणस्पर्शनिषेधे हेतुः सूचितः, ईर्ष्या च प्रदर्शिता। 'आयास्ये' इत्युक्त्वा गतस्य तस्य स्त्र्यन्तरसम्बन्धकथनाद्भगवतो धूर्तत्वं स्पष्टीकृतम्। 'मधुप' इति सम्बोधनेन केवलंमध्वर्थित्वात्त्वमपि धूर्तोऽविश्वसनीय एवेति सूचितम्। ननु 'युष्मत्प्रसादार्थं कृष्णप्रेषितेन मया युष्मदङ्घ्रिस्पर्शो युक्त एव' इत्याशङ्क्याह—वहस्विति। मधवो यादवाः तेषां पतिः कृष्णः यदि व्रजपतित्वं विहाय यदुपतिर्जातस्तदा तासां मानिनीनां मानवतीनां पुरस्त्रीणामेव प्रसादनं

वहतु करोतु, किमस्माकं वनचरीणां प्रसादनेन ? तादृङ्मानाभावादित्याशयः। किञ्च यस्य दूतस्त्वमीदृक् स्त्रीकुचकुङ्कुमयुक्तश्मश्रुवांस्तस्य यदुसदसि उपहासास्पदत्वमेव स्यात् ॥ १२ ॥

अन्वितार्थप्रकाशिका

इतीति द्वयम् ॥ तस्य श्रीकृष्णस्य कैशोरबाल्ययोरवस्थयोर्यानि प्रियाणि कर्माणि तानि संस्मृत्य संस्मृत्य गायन्त्यो रुदन्त्यश्च । नुमार्षः । गोविन्द एव गतानि वाक्कायमानसानि तद्व्यापारा यासां ताः गतह्रियः त्यक्तलज्जा गोप्यः कृष्णदूते उद्धवे व्रजं याते आगते सति त्यक्तो लौकिको याभिः लोकानुसन्धानरहिताः। आसन्निति शेषः। यद्वा। प्रियस्य कर्माणि गायन्त्यः तथा तस्य बाल्यकैशोरयोः कर्माणि संस्मृत्य संस्मृत्य गतह्रियः सत्यो रुदन्त्यश्च तमपृच्छन्निति सम्बन्धः ॥ ९-१० ॥ काचिदिति ॥ कृष्णसङ्गमं ध्यायन्ती काचिद्गोपी पीतपरागपिङ्गश्मश्रुं मधुकरं भ्रमरं दृष्ट्वा तं प्रियेण श्रीकृष्णेन प्रेषितं प्रस्थापितं दूतं कल्पयित्वाऽब्रवीत्। यद्वा। साक्षादुद्धवं प्रत्येवं कथनस्यानुचितत्वात्तस्मिन्नुद्धवे प्रियप्रस्थापितो दूत इति दूतदृष्टिं कृत्वा भ्रमरापदेशेनोद्धवमेवेदं वक्ष्यमाणं मानभङ्गीमयं वचनमब्रवीत्। इयं श्रीराधेति तोषिण्यादयः ॥ ११ ॥ मधुपेति ॥ हे मधुप भ्रमर मद्यप ! इति व्यङ्ग्यम्। हे कितवस्य धूर्तस्य वञ्चकस्य बन्धो कार्यसाधक मित्र ! अस्मत्सपत्न्याः कुचाभ्यां विलुलिता आलिङ्गनदशायां सम्मर्दिता या कृष्णस्य वनमाला तस्याः कुचसंबन्धात्ततो मालायां प्राप्तं यत्कुङ्कुमं तद्येषु एतच्च कृष्णवर्णस्य भ्रमरस्य रक्तत्वे कारणमुत्प्रेक्षितं तैः श्मश्रुभिर्नोऽस्माकमंघ्रिं मा स्पृश। मां मा नमस्कारेण प्रार्थयस्वेत्यर्थः। तथा मधुपस्य तवानुरूपः स्वामी मधुपतिः श्रीकृष्णः तासां मानिनीनां पुरस्त्रीणामेव प्रसादं वहतु करोतु। किमस्मत्प्रसादनेन तस्य यस्य दूतस्त्वमीदृक् स्त्रीकुचकङ्कुगयुक्तश्मश्रुमान् व्यक्ततदीयसुरतचिह्नधारी तस्य यदुसदसि विडम्ब्यम् उपहास्यास्पदत्वमेव स्यात् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

त्यक्तानि लौकिकानि गृहकृत्यानि याभिस्ताः ॥ ९ ॥ यानिप्रीयेण कृतानि कर्माणि चरित्राणि तानि संस्मृत्य संस्मृत्यगतह्रिपः सत्यः रुदन्त्यो बभूवुः ॥१०॥ प्रियेण श्रीकृष्णेन प्रस्थापितो मां आश्वासयितुं प्रेषितोऽयं दूत इति कल्पयित्वा इदं वक्ष्यमाणं मानमयतरंगयुक्तं विचित्रं जल्पाख्यं पददशकंता सुगोपीषु मध्येकाचिदब्रवीत् ॥११॥ प्रेमप्रवाहपीडिता गोपीनिंदा मुखेन तस्य स्तुतिं करोति मधुपेति हे मधुपभ्रमरकितवस्य अनृतवाचकस्य बंधुस्तत्सम्बुद्धौ हेकपटमित्र तद्वत् कृष्णवर्णस्त्वं सपत्न्याः इदानीं यया रमते तस्याः कुचाभ्यांस्तनाभ्यां विलुलिता संमर्द्दिताचासौ कृष्णवर्णस्य त्वमित्रस्य पुष्पमाला च तस्याः कुंकुमं येषु तैः श्मश्रुभिर्मुखरोमभिः कृत्वानोस्माकं गोपीनामङ्घ्रिं चरणकलापंमा स्पृश अस्माकं नमनेन प्रार्थनांमा कुर्वित्यर्थः एवं च कृते सत्यस्माकंसपत्नी कुचकुंकुमस्पर्शः स्यादिति भावः किंतु तासां मधुपुरस्थानां मानिनीनामेव। प्रसादं श्मश्रुसंलग्न कुंकुमरूपं मधुपतिस्त्वादृशः श्रीकृष्णो वहतु अङ्गी करोतु अस्माकं स्वपत्नी प्रसादग्नहणेन किं प्रयोजनमस्ति न किमपि पुनः किं च यस्या मांगस्य नवनवरसप्रियस्य श्रीकृष्णस्य दूतस्त्वमीदृक तत्तुल्यः तद्वत्कुंकुमधारी च तस्य श्रीकृष्णस्यैतत्सर्वं यदुसदसि यादवसभायां विडम्ब्यमुपहासयोग्यमस्ति एवमस्माकमपि तत्कुंकुमस्पर्शेन उपहास्यं भवेत् अतोऽङ्घ्रिंमा स्पृशेति भावः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति। गायन्त्य इति च। इतीत्थं, कृष्णदूतेउद्धवे, व्रजं याते गते संप्राप्ते सतीति यावत्। गोविन्दे श्रीकृष्णचरित्राणि, गायन्त्यः, तस्प श्रीकृष्णस्य, यानि कैशोरबाल्ययोः सम्बन्धीनि चरित्राणि, तानि संस्मृत्य संस्मृत्य, रुदन्त्यः, गतह्रियस्त्यक्तलज्जाश्च सत्यः, तमपृच्छन्निति पूर्वेणान्वयः ॥ ९-१० ॥ काचिदिति। तत्र काचिद्गोपी, प्रियसंगमं ध्यायन्ती सती, मधुकरं भ्रमरं दृष्ट्वा, तं भ्रमरं, प्रियेण श्रीकृष्णेन प्रस्थापितं, दूतं कल्पयित्वा, कृष्णेन मां प्रसादयितुमयं दूतः प्रेषित इत्यभिमत्येत्यर्थः। इदं वक्ष्यमाणं, अब्रवीत्। यद्वा। तस्मिन् भ्रमरे, प्रियप्रस्थापितोद्धवदृष्टिं कृत्वा मधुकरापदेशेनोद्धवमेवाब्रवीदित्यर्थः ॥ ११ ॥ तदेवाह दशभिः। तत्रादौ कृष्णवर्णस्य तस्य श्मश्रूणां लोहितत्वे कारणमुत्प्रेक्षमाणाः सासूयं प्राहुः। मधुपेति। हे कितवबन्धो धूर्त्तस्य श्रीकृष्णस्यानुचर, हे मधप भ्रमर, सपत्न्याः अस्मत्सापत्न्योपेताया मधुपुरवनितायाः, कुचाभ्यां तदधरपानलोलुपकृष्णतालिङ्गनकाले दृढपीडितसकुङ्कुमतत्कुचाभ्यां विलुलिता संमर्द्दिता या माला तस्याः कुङ्कुमं येषु तानि यानि श्मश्रूणि तैः उपलक्षितः त्वं, नोऽस्माकं, अङ्घ्रीं चरणं, मा स्पृश अस्मच्चरणस्पर्शं मा कुरु इत्यर्थः। मधुपतिः मधूनां यादवविशेषाणां पतिः श्रीकृष्णः, तासामस्मत्सपत्नीभूतानामभुक्तपूर्वाणां, मानिनीनां माथुरीयाङ्गनानां, प्रसादं वहतु। तासां प्रसादनं करोतु इत्यथः। उपभुक्तपूर्वा वयं न तत्प्रसादनीया इति भावः। यद्यस्मात्, उ इत्यवधारणे। गोपजातीयानामस्माकं प्रसादनमिति शेषः। यदुसदसि यादवसभायां, विडम्ब्यं तस्योपहासास्पदं, ननु 'भुक्तपूर्वा वयं, न तत्प्रसादनीयाः' इति कथं ब्रूध्वे इति चेत्तद्दूतस्त्वमेव तथा सूचयसीत्याहुः यस्येति। यस्य श्रीकृष्णस्य, दूतः त्वं ईदृक्। भुक्तपूर्वपुष्पत्यागशीलस्त्वं, यथा भुक्तपूर्वपुष्पाणि पुनः संप्राप्य न प्रसादयसि, किं त्वभुक्तपूर्वाणि प्रसादयसि, तथा त्वत्पतिरपि नाऽस्मान् प्राप्य प्रसादयितेति त्वमेव ज्ञापयसीति भावः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

काचिदिति : १०.४७.११

इतः सारं समास्वाद्य मधुरैकरसाश्रितः । कृष्णोऽभूदिति तद्युक्तं तस्या मधुकरेक्षणम् ॥ ९ ॥
अद्धा मिथः प्रवचनाद्रसोद्रेकोदयोऽधिकः । दूतद्वारेति जानाना तादृशं तमकल्पयत् ॥ १० ॥
मिथो घटनपर्याप्तचातुर्यं रसशास्त्रतः । मालिनीवृत्तमेवेति युक्तं तद्वृत्ततोऽब्रवीत् ॥ ११ ॥

वाच्यं स्वान्तरमात्रवेद्यभजनश्राव्यं यदस्मिन् सुदृग् भूतो तत्पुरतो हि यो निजसदृग् ज्ञात्वेति सत्पद्धतिम् ।
एका तं मधुपं च वीक्ष्य सदृशं स्वं वालिजातप्रिया सामोदाच्युतपादपद्ममधुपा हार्दं जगाद क्षमम् ॥ १२ ॥
कृत्वा मैत्र्यमकृत्रिमं प्रतिदिनं दत्वा च सौख्यं मुहुः क्षान्त्वा चाप्यपराधराशिमनिशं सन्दर्श्य विश्वास्यताम् ।
यं योऽत्र प्रजहात्यहेतुकमसौ चक्षुः श्रुतिश्रीयुतस्तस्य स्यादरितुल्य इत्यलिमिमं सोद्दिश्य युक्तं जगौ ॥ १३ ॥
कृष्णाकारजुषं द्विरेफकलितं पद्मान्तरङ्गस्थितं राजद्वंशनिवासिनं बहुपदं श्रुत्यर्हमञ्जुस्वरम् ।
ज्ञात्वा तं मुरलीधरं भ्रमरमप्येकात्मभावं पुरः प्राप्तं तत्परिचारकं च चतुरा काऽप्येनमेवाब्रवीत् ॥ १४ ॥
कृष्ण त्वं बहिरन्तरे सरसतापादश्च पद्माश्रितो यस्योक्तिः श्रुतितोषणी ध्रुवमुदासीनान्तरात्मस्थितिः ।
प्रीतिश्च द्विजमित्रसुन्दरगुणप्रोल्लासिहार्दाशये तुल्यं तेन तमच्युतेन मधुपं मत्वा तदन्याऽब्रवीत् ॥ १५ ॥

अयं पद्मिनीत्यागकृत् सोऽपि यद्यप्ययं षट्पदः षट्पदैनः स चापि ।
अयं गोपिकारावमस्मिन् शृणोति स नैवेत्यलिं श्लाघयोवाच काचित् ॥ १६ ॥

अगाधवसुजातसंपदमनेककोशाश्रितमनकेवसुमद्भसूदित - रसोपभोगक्षमम् ।
सुपद्मवसतिं महाधनिकमेव मत्वाऽवदत् पराऽलमिति साधु यद्धनिकवश्यमेतज्जगत् ॥ १७ ॥
कश्चित्स्वार्तिकृते नृपेण सहसा संप्रेषितं सेवकं दृष्ट्वा तत्पुरतस्तदीयचरितान्युद्घाट्य तं स्वात्मसात् ।
सद्यो हन्त यथाकरोति सुमनोभूत्याश्रितं तं तथा प्राप्तं वीक्ष्य शिलीमुखं वशयितुं तद्वृत्त्यमन्याऽब्रवीत् ॥ १८ ॥
पुण्यात्मा स्वात्मसौख्यं निजसुकृतचयादेव यातीति नास्योद्धारे तादृक्प्रतिष्ठा प्रभवति जगतीत्यच्युतः साधवश्च ।
दीनोद्धारात्तदीक्षा इति हृदि विदुषी पङ्कजातस्थितं तं मत्वाऽलिं संभ्रमन्तं प्रकलयितुमनुग्राह्यमूचे तदन्या ॥ १९ ॥
मत्ताल्यामोदसार-ग्रहणचतुरधी राधिकेऽवस्थिता किं तूष्णीमित्येव तालीवनभुवि बहुशः श्रीधरोदीरिताङ्गाम् ।
स्मृत्वा लोलस्वभावा मधुकरमुपरि भ्रान्तमुन्मत्तशब्दमन्नादोऽस्मीति सारग्रहणचतुरधी सा निरीक्ष्येत्यवादीत् ॥ २० ॥

अस्मच्चित्तवशीकृतौ भृशमसौ मध्यस्थमायोजयत्यव्यक्तध्वनिमेव पूरुषमिति व्यक्तं हि वेणो पुरा ।
भात्येष भ्रमरोऽपि तादृश-रवस्तत् तादृगेवाधुना स्यादेवेति सुपत्रसंस्थितममुं निश्चित्य चान्याऽब्रवीत् ॥ २१ ॥
रसभुगसि मिलिन्द त्वं सदा पद्मिनीनां कथय जगति कुत्रापीदृशोऽलक्षि पन्थाः ।
किमु विधिरतनुश्रीरेवमेनं करोति किमतनुरविधिर्वा बीजमत्रेत्यपृच्छत् ॥ २२ ॥
आप्तान् संमोह्य मञ्जुश्रुतिमधुररवै - र्यतमीशङ्कचेताः स्थाता स्वच्छन्दवृत्तौ परयुवति मनोजातमाविष्करोति ।
ईदृक् सज्जारकर्मा प्रकटमसुलभोऽन्विष्यमाणोऽपि दैवाल्लब्धस्तत्तुल्य एवायमिति किमपरोवाच तद्वृत्तमेनम् ॥ २३ ॥
मधुपतिरधुना जातो मधुरिपुरपि यत्ततोऽनयोर्मैत्र्यम् । निर्व्याजमर्थसिद्धं त्विति काचिदुवाच भृङ्गमुचितार्थम् ॥ २४ ॥
जानन् पङ्कविभूतिमेवमनिशं जानञ्जडावस्थितिं जानञ्छूरगुणानुरक्तहृदयां जानन् भुजङ्गावृताम् ।
नो मुञ्चाम्यहमब्जिनीमविकलाङ्गीकार - पक्षावृतो निर्दोषाः किमिमा जहात्ययमिति ब्रूयात्तमित्यब्रवीत् ॥ २५ ॥

जात्याऽहं मधुपस्तमोगुणमयो व्यक्त्या रसाङ्घ्रिस्तथा स्थित्या च स्फुट - पङ्कजातनिलये वासश्च नाम्नाऽप्यलिः ।
एवं सत्यपि कृष्णविष्णुपदभाक् संसारभाक् पद्मिनीयोगादस्मि पदैवमेनमिह ते तुल्यः स इत्यब्रवीत् ॥ २६ ॥
जानात्यत्रैष एवोज्ज्वलमधुररसं पद्मिनीनामपारां ग्लानिं वा मित्रपादद्युतिविरहितया षाट्पदीं चापि नीतिम् ।
मत्वेत्थं काऽपि मुग्धा निजहृदपगतं बोधयन्त्युद्धवार्थं युक्तं तद्यत्प्रकल्प्य ह्यलिमलभवदद् द्वारमेवाब्जिनीस्थम् ॥ २७ ॥
मधुपे एव सर्वासामुक्तिबीजं पृथक् पृथक् । निरुक्तं भिन्नभिन्नोक्तेराशयोऽप्येवमूह्यताम् ॥ २८ ॥

मधुपेति : १०.४७.१२.

दूतत्वेन स्थितोऽपि त्वमिह चलगतिः पद्मिनीं यासि भूयस्त्यक्त्वा तामत्रपोऽन्यां व्रजसि कुमुदिनीं तासथान्यां तथैव ।
स स्वामी तत्वकीनस्त्वहह किमु भवेद् भोग्यमस्यैकमस्मिँल्लोके विद्यो न यद्वा बहु मधु पिबतः को विधिः को निषेधः ॥ २९ ॥
आप्रातः सायमा च त्वमिह भुवि ययोल्लास्यहृत् स्वं रसार्द्रं पद्मिन्यां स्वान्तरङ्गातनुरसविसरैः पोषितस्तोषितोऽसि ।
म्लानास्यां तां विलोक्य त्यजसि चलगते निस्त्रपत्वेऽदयत्वे तत्सीमाभूस्त्वमेव स्फुटमिह कितवस्त्वत्सखः काऽत्र शङ्का ॥ ३० ॥

को वा किं वा कथं वाऽऽचरतु स हि भवेत्तत्फलस्योपभोक्ता तत्रास्माकं न चिन्ता तनुरपि तदलं भुङ्क्ष्व भोग्यं यथेच्छम् ।
ज्ञातत्वद्रीतिसाराः स्पृश न मधुप नः शुद्धसत्त्वान्तरङ्गास्तत्सङ्गी पञ्चमोऽसौ वहति तदघमत्रैवमास्ते स्मृतिर्यत् ॥ ३१ ॥
तावद्धौर्त्यं हि पुंसां चलति यदवधि स्त्रीभिराविष्कृतं न प्रायस्ता एव धात्रा मनसि विदधता निर्मितं यत्प्रयत्नात् ।
आस्तामस्मत्करात्तच्युत - मतनुसुखाशावशादग्र्यभोग्यात् तादृक्सम्मीलिता चेद्व्रजसि सरलतां त्यक्तपूर्वस्वभावः ॥ ३२ ॥

त्वच्चित्ते चेद्रसाशा निवसति तदितो गच्छ मल्लीमतल्लीमन्यामात्मानुरूपामतनुकुसुमितां वीक्ष्य तत्राऽऽरमस्व ।
अस्मत्पादाग्रदेशे लुठसि किमिति रे दुर्लभे निर्जराणां दुःसाध्ये यत्प्रयत्नो भवति भुवि महामूर्खतामुख्यहेतुः ॥ ३३ ॥

सद्वंशे छिद्रकारी मृदु - सरल गुणाम्भोजिनी - मौलिदेशे भूयः पादप्रहारी जनमलिन - महापानकृष्णाऽसितात्मा ।
येनास्मिन् प्रेषितोऽसि त्वमपरमिह किं ब्रूमहे धन्यबुद्धिः सोऽस्मिन्नन्योन्यकिञ्चित्कलहनिरसने नारदं किं न युङ्क्ते ॥ ३४ ॥

किं वा संचिन्त्य यातस्त्वमलिवर वनेऽस्मद्वशीकारहेतोरायातश्चेज्जनेऽस्मिन्क्वचिदपि विदितो नेदृशस्तत्प्रकारः ।
यन्नामाऽप्यन्तरङ्गं शकलयति महाखड्गधारेव तस्या गायन् कीर्तिं सपत्न्याः स्फुटकुचघुसृणश्मश्रुगश्रीरुपेतः ॥ ३५ ॥
आस्तां तावत्कृतं ते रुचिररसिकतावर्णनं गानतोऽस्य ज्ञातोऽस्माभिः स पूर्वं तदनुमतगतेर्धीप्रभावस्तवापि ।
यस्त्यक्त्वाऽत्युत्तमाङ्गी - र्नवसुमलसिता निर्जरैरप्यलभ्या गत्वा कुब्जां त्रिवक्रामतनुलघुलतां मन्यते स्वं कृतार्थम् ॥ ३६ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण के सन्देश हर श्रीउद्धवजी जब ब्रज पधारे तब उन्होंने अनुभव किया कि श्रीगोपीजन के प्राण, वाणी, तन, मन आदि सर्व भगवान गोविन्द में ही लगे है, श्रीकृष्ण के श्रीचरणों में ही समर्पित है। श्रीकृष्णार्पित जीवन गोपीजन ने लोक व्यवहार सुख आदि का त्याग किया है। उद्धवजी ने अपने नेत्रों से देखा कि गोपियाँ प्रियतम श्रीकृष्ण के बाल्य किशोर पौगण्ड अवस्था के चरित्रों को गतलक्ष बनकर भी रही हैं उनके हृदय भाव से विह्वल हो गए थे, प्यारे श्यामसुन्दर के चरित्रों का बार-बार स्मरण करती थी और नयनों से नीर बह रहा था ॥ ९-१० ॥ राजन्! कोई एक गोपी प्रियतम श्रीकृष्ण से हुए सङ्गम का ध्यान करती थी, उस समय मधुकर को देखकर समझने लगी कि मेरे प्यारे ने मेरे पास यह दूत भेजा है वैसी मन में कल्पना कर यों कहने लगी ॥ ११ ॥ अब तामस तामसी गोपी कह रही है कि हे मधुप! हे भ्रमर! हे कपटी के मित्र! मेरे चरणों का मत कर। क्योंकि तुमारी आदत रस पीने की है रस चुसने की है यदि तुम रस चुस लोगे तब मेरे चरण मेरे प्रियतम के लिए योग्य न रहेंगें और मधुका पान करना व्यसनी है उसका स्पर्श निषिद्ध है इसलिए चरण स्पर्श न करें। फिर ये तेरी दाढ़ी एवं मूँछ सौतन के वक्षस्थल के आलिङ्गन से मर्दित बन माली की वन माला की केसर से रङ्गी हुई है। वे मधुपति-वे मधुरापति उन माथुर की मानवती नारियों का मान को भले बटाते रहे अथवा भले उनको प्रसन्न करते रहें, जिस मधुपति का यदुओं की परिषद में होता है और जिसका तुम दूत बनकर आए हो, तुमसे कौन बात करे ॥ १२ ॥

सकृदधरसुधां स्वां मोहिनी पाययित्वा सुमनस इव [1]सद्यस्तत्यजेऽस्मान् भवादृक् ।
परिचरति कथं [2]तत्पादपद्मं तु पद्मा [3]ह्यपि बत हृतचेता[4] [5]उत्तमश्लोकजल्पैः ॥ १३ ॥
किमिह बहु षडङ्घ्रे गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम् ।
विजयसखसखीनां [6]गीयतां तत्प्रसङ्गः क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः ॥ १४ ॥

कर्दमक्षमा

अन्वयः—स्वाम्, मोहिनीम, अधरसुधाम्, सकृत्, पायतित्वा, भवादृक्, सुमनसः, इव, सद्यः, अस्मान्, तत्यजे, पद्मा, तत् पादपद्मम् कथम्, परिचरति, तु इत्याश्चर्यम्। उत्तमश्लोकजल्पैः, हि, पद्मा अपि, हृषचेताः वश इति निश्चयः ॥ १३ ॥ हे षडङ्घ्रे, अगृहाणाम्, नः, अग्रतः, यदूनाम्, अधिपतिम्, पुराणम, त्वम्, बहु, किम्, इह गायसि? तत्प्रसङ्गः विजयसखसखीनाम्, अग्रतः, गीयताम्, क्षपितकुचरुजः, इष्टाः, ते इष्टम्, कल्पयन्ति ॥ १४

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु किमित्येवं तमवजानीथ किं वस्तेनापकृतमत आह। सकृदिति। भवादृक् त्वादृशः कृष्णवर्णो दुर्मनाः सुमनस इव कुसुमानि यथा त्यजति तद्वत् (शोभनमनसोऽस्मान्सद्यस्तत्यजे) अहो बताकृतज्ञस्य तस्य पादपद्मं श्रीः कथं सेवते। विदितं

---

१. सद्यः कस्त्यजन्मां-विज.। २. तत्पद्यकिञ्जल्कपादं-विज.। ३. अपि-विज.। ४. चित्ताः-बिज.। ५. हृयु-प्रा. पा.। ६. गायतां-विज.।

मयेत्याह। अपीति। बतेति खेदे। उत्तम श्लोकस्य जल्पैर्मिथ्याकथाभिः प्रलापैः प्रायो हृतचेताः। वयं तु न लक्ष्मीवदविचक्षणा-इति भावः॥ १३॥ झंकारान्बहुधा कुर्वन्तमस्मत्प्रसादलाभाय कृष्णं गायतीति मत्वाऽऽह। किमिहेति। पुराणं पुरातनं बहुशोऽनुभूतम् विजयसखस्य श्रीकृष्णस्य साम्प्रतं याः सख्यस्तासामग्रतस्तत्प्रसंगो गीयताम्, संदेशः कथ्यतामित्यर्थः। इष्टाः कृष्णस्य प्रियाः तेन गीतेन पूजिता इति वा। तेनालिंगितेन क्षपिता कुचरुक्स्तनगतविकारो यासां तास्तवेष्टमपेक्षितं दास्यन्तीति॥ १४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न हि कृष्णेन किंचिद्वोऽपराद्धमित्याक्षिपति—नन्विति। अवजानीथावज्ञां कुरुत। वो युष्माकम्। अपकृतमपराधः कृत इति। अतोऽत्राह परिजल्पेन—सकृदिति। दुर्मनाः सकपटः। तद्वत् सोस्मांस्तत्यजे। अहो बतेति अत्यद्भुते निपातद्वयम्। तस्य कृष्णस्य। इति भाव इति—लक्ष्मीस्तु क्षीरसागरस्य जडत्वेन तदुद्भूताऽकुशला वयं नराणामतिनिपुणत्वेन तत्रापि गोपानां गोपरिचर्यावाप्तातिपुण्यानां कुले जातत्वान्न तादृश्य इत्याशयः। परिजल्पितलक्षणन्तु—"प्रभोर्निर्दयताशाठ्यचापलाद्युपपादनात्। स्वविचक्षणताव्यक्तिभंग्या स्यात्परिजल्पितम्॥" इति। इह तथैवोपपादितम्। सुमनसां त्यागो यथा तद्गन्धमादाय भवतोऽपि नोचितस्तथा वयमपि सुमनोभिस्तुल्याः शरीरदौर्गन्ध्यादिरहिताः सुकुमाराश्च, यथा घ्राणेन्द्रियतर्पकत्वेन पुष्पाणि सेव्यानि तथा तरुण्योऽपि तरुणैः सेव्या एव। सुमनःपदेन मालती वा ग्राह्या "सुमनाः पुष्पमालत्योः स्त्री देवबुधयोः पुमान्" इति यादवः। यद्वा—भवं संसारमापश्यतीति भवादृक्, अतीव गृहासक्तः सुमनसो देवान् ज्ञानिनश्च यथा त्यजति तत्सेवां नाद्रियत इति भावः। भवं न पश्यतीति भवादृक् विरक्तो ज्ञानी सुमनस इन हृद्यान्स्त्रीपुत्रादींस्त्यजति तद्वद्वेति॥ ननु भ्रमरजातेर्ममायं स्वाभाविक एव श्मश्रुपीतिमा न तु सुरतकुंकुममिदम्, तस्य च त्वदेकतानमानसस्य मधुपुर्यां कामपि स्त्रियं स्वप्नेप्यपश्यतः कोऽपराधो यतस्त्वमीदृशं मानमाविष्करोषीति तत्राह—सकृदिति। पायनस्याऽसकृत्त्वेऽपि सकृदित्युक्तिरनुरागेण। तत्र तृष्णाधिक्यं व्यञ्जति—अधर एव सुधा तामित्यत एव एतावद्भिरपि संतापैर्न म्रियामहे इति भावः। एता मद्दत्तैः कष्टैर्यदि मरिष्यति तदाहं काभ्यः कष्टं दास्यामि तस्मान्मरणाभावाय स्वाधरसुधां पाययामीति स पुरैव विचारयामासेति भावः। अतः सकृदेव पाययित्वा सद्यस्तत्क्षण एवास्मांस्तत्याज। अतोस्मत्सुखदानतात्पर्ये सति सुधापायनस्यासकृत्त्वं स्यादिति त्वमेव विचारयेति भावः। तत्रापि पाययित्वेति णिचा तस्य बलात्कारो दर्शितः। नन्वेवं चेत्साध्व्यो भवत्यः कथं तस्मै स्पृहयन्ति तत्राह—मोहिनीं बुद्धिभ्रंशिनीम्। अतस्तेनास्मदादयो लोकद्वयत एव भ्रंशिता इति "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्" इति न्यायोपि कृष्णेन न गणित इति भावः। किञ्च—तस्य प्रीत्यप्रीती द्वे एवातिचित्रे इत्याह—सुमनसो देवश्रेणीरिव विष्णुः कृष्णोऽस्मान्सुधां पाययित्वा सुमनसो मालतीर्भवादृक् भ्रमर इवास्मांस्तत्याज, पायनत्यागयोः कर्मणि कर्तरि च पृथक्पृथग्दृष्टान्तः। देवपक्षे–हे अधर निकृष्टेति संबोधनम्। 'सुपर्वाणः सुमनसः' इत्यमरः। ननु तस्य युष्मत्कर्मकत्यागेषु युष्माकमेव कोऽपि दोषः कारणमस्ति तस्य वेति तत्राह—सुमनस इवास्मान्स भवादृक् तत्याज, भ्रमरो यन्मालतीस्त्यजति तत्र दोषः कस्येति त्वयैव विचार्यतामिति भावः। 'सुमनो मालती जातिः' इत्यमरः। सौरभ्यसौकुमार्यपावित्र्य सर्वोत्कर्षादिभिः सुमनःसाधर्म्याच्छोभनमनस्कत्वाच्च वयं सुमनस इति व्रजे प्रसिद्धा एव। स च भ्रमरसाधर्म्याच्चपलः स्वसुखमात्रार्थी प्रसिद्ध एवेति नेदं कवितामात्रमिति ध्वनिः। ततश्च चाञ्चल्यदोषादेव मालतीर्बह्वीरपि त्यक्त्वा निकृष्टेष्वपि पुष्पेषु विषज्जति अविषज्जति वा भ्रमर इव कृष्णे कथं वयं मानिन्यो न भवाम इत्यनुध्वनिः। ननु कृष्णस्य निर्दोषत्वं शास्त्रप्रसिद्धमेव, शास्त्रज्ञेन गर्गेण 'नारायणसमः' इत्युक्तत्वात्, तत्र भवतु स नारायणः, परवंचनादिदोषाणां प्रत्यक्षत एव दृष्टत्वात्ते कथमपलपनीया भवंत्विति विमृश्य सविचिकित्समाह—परिचरतीति। पद्मा लक्ष्मीः। लक्ष्मीपरिचर्यायामपि हेतुं स्वयमेवोद्भावयन्त्याह—अपि बतेति। उत्तम श्लोक इति ये जल्पाः स्तावकलोकानां स्तुतिमात्राणि तैर्हृतं चेतो यस्याः सा। तेन लक्ष्मीरतिऋज्वी वयं तु वैचक्षण्यवैदग्धबुद्धिवैचित्र्यादिगुणानां विधात्रा दत्तत्वात्कथं तादृशीभवितुं प्रभवाम इति भावः। अत्र पाययित्वेति मोहिनीमिति च तस्य शाठ्यं, सद्यस्त्यागान्निर्दयत्वं, भवादृगिति चापल्यं, लक्ष्म्या आर्जवव्यञ्जनया स्वविचक्षणत्वम्, आदिनाऽकृतज्ञत्वप्रेमशून्यत्वादिकं सर्वत्रैवानुस्यूतमित्ययं परिजल्पः। तदुक्तम्—"प्रभोर्निर्दयताशाठ्यचापल्याद्युपपादनात्। स्वविचक्षणताव्यक्तिभंग्या स्यात्परिजल्पितम्"॥ १३॥ विजल्पेनाह—किमिति। विजयः सखीष्वेव यस्य, स्वसखीनामेव विरहादिना घातकस्येति तत्रानामुक्तिः। अग्रतोऽग्रे, यदुपतिर्गीयताम्। सविसर्गपाठे तत्प्रसंगो वा। "इष्टमाशंसितेऽपि स्यात्पूजिते प्रेयसि त्रिषु। सप्ततन्तौ पुमान् क्लीबे संस्कारे कृतकर्मणि"॥ इति मेदिनी। यथा पूजिताः पूजकस्य तदीयस्य चेष्टं कुर्वन्ति तथा प्रिया नेत्यरुच्याऽऽह पूजिता वेति। निर्विसर्गपाठे तेन कृष्णेन, प्रसंगेनालिंगितेन, क्षपिताऽपास्ता, रुक् कामक्लेशः। विजल्पलक्षणम्—"व्यक्तयाऽसूयया गूढमानमुद्रान्तरालया। अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः॥" इति कटाक्षोक्तिर्यदुपतिपुराणविजयसखादिशब्दैः सूचितात्रेति। किञ्च, यद्वा—स्वपुरतो वर्ण्यमानप्रियकथया प्रबुद्धमदनकलिका पुनरपि श्रोतुमना असहमानेवाधिक्षेपं कापनार्थमधिकं वक्तीति कृत्वोद्धवमुद्दिश्याह—षट्सु संधिविग्रहादिषु कपिलादिदर्शनेषु वांघ्रिरवक्रगतिर्यस्य स तथा। यद्वा—षट्सु विषयेषु भगवद्भक्तिपरिपंथिषु अंघ्रिः पादो यस्य तत्सम्बुद्धौ हे उद्धव 'अंघ्रिः स्याद्गतिपादयोः' इति निरुक्तिकारः। 'अघि-गतौ' रिप्रत्ययः। त्वमगृहाणां गृहाश्रमरहितानाम्, वनचारिणामित्यर्थः। नोऽस्माकमिहाग्रतः—पुरमणति प्राप्नोतीति पुराणस्तम्

'अण—गतौ' मथुरागतं यदूनां पतिं किं बहु कर्णबिलपूरं गायसि, न शब्दायस्वेत्यर्थः। तस्य गृहान्तर्वर्तित्वेन वनमध्यवासिपुरतो गायनमनुचितमित्यर्थः। तर्हीदं कस्याग्रे युक्तमिति तत्राह—विजयेति। कृष्णसखीनां मथुरांगनानामग्रतस्तस्य प्रसंगो गीयताम्। तत्र गातुस्तव फलसिद्धिरप्यस्तीत्याह—क्षपितेति। तत्प्रसंगेन क्षपिता निरस्ता कुचानां रुक् संतापरूपा यासां ताः, इष्टाः कृष्णप्रिया मथुरांगना उद्गात्रे ते तुभ्यमभीष्टं धनादिकं कल्पयन्तीत्यन्वयः। 'तत्प्रसंगम्' इति पाठे तु गायतामित्यात्मनेपदमार्षम्। भवान् गायताम्। यद्वा—यदुपतिविषया या गीतिस्तां गायेति परस्मैपदमेव। तस्य प्रसंगेन प्रकृष्टाऽऽलिंगनेन विजयसखसखीनामग्रतो यदुपतिं गायताम्। पुंसां ते कृष्णेष्टाः स्त्रीजना अभीष्टं कल्पयन्तीति वा॥ तदेवं तदीयसरोषवचनसरोजविक्षेपेणापसृत्य पुरतो रुवन्तं मधुपमस्मत्प्रसादनायैव श्रीकृष्णं बहुधा गायत्यसाविति वितर्क्य तमवज्ञातुमन्यथोत्प्रेक्षते—हे षडंघ्रे। तज्जातिस्वभावादेव गानस्वभावः, तस्माद्यद्गायसि तदिह व्रजे परमदुःखिते किं किमिति गायसि, तत्रापि बहु किं गायसि, तत्रापि यदूनामधिपतिं किं गायसि। यदूनां महाराजवंश्यानामसंख्यानामधिपतिः, अत्रत्यास्तु गोपास्तत्रापि संप्रति तेनानादृताः, अतस्तत्परिपाल्यमाना यदव एव गानजीविनस्तवेष्टं विधातुमर्हन्ति न त्वेते इति स्वल्पं वा बहु वा तत्रैव गातव्यमिति भावः। षडंघ्रे इत्यनेन पशुश्चतुष्पात् त्वं तु षट्पदः, तेन सार्धपशुत्वेन बुद्ध्यभावातिशयादेव गायसि न तु विचारादित्यसूया। ननु व्रज एव सर्वाधिकप्रेमवानसौ ततो व्रज एव श्रेष्ठ इत्याशंक्य पुराणं बहुशोऽनुभूतं तत्तत्सर्वं कापटयेनैवानुभूतं, तत्तत्सर्वं कापट्येनैवानुष्ठितवानिति निश्चितम्। यद्वा—चिरमतिक्रान्तं सम्बन्धं पूर्वमेव व्रजस्य तत्तदासीन्नाधुनेति भावः। यद्वा—'कृषिर्भूवाचकः शब्दोऽणश्च निर्वृतिवाचकः' इति द्व्यात्मकत्वे पुराणं पुरवणम् तदैव व्रजस्य सुखरूपमासीदधुना तु केवलं कर्षति धात्वर्थसत्तारूपेणैवावशिष्टमित्यर्थः। किञ्च—हंत कुरु च नाम व्रजेऽपि गानस्माकमश्रुतः किं गायसि, तत्रापि बह्वित्यादि। कथंभूतानाम्—अगृहाणाम्। तेन स्वेच्छिष्टमोहनरसविशेषसकृत्पायनमात्रपूर्वकत्यागाद्विदूष्यं त्याजितगृहाणाम्। अतो यदुपुरेऽपि तत्प्रेयस्य एव विशिष्टं तव गानस्थानमित्याह—विजयते सर्वं वशीकरोतीति विजयः श्रीकृष्णः सखा त्वद्बंधुस्तस्य सखीनां सह खेलतीनामग्रतः। तत्प्रसंगस्तस्य विजयस्य सांप्रतमस्मत्परित्यागपूर्वकयादवकुलाधिपत्यफलतत्पुरवनिताशतवशीकरणलक्षणस्य प्रसंगस्तत्सुखदः प्रस्तावो गीयताम्। तेन ता इ (ह) ष्टास्तेन त्वयैव वा संमानितास्तवेष्टं द्रुतमेव कल्पयिष्यन्ति। यद्वा—कल्पयन्ति सदा कुर्वत्य एवासते। अधुना त्वस्मद्दुखस्यां दृष्ट्वा तद्वर्णनपूर्वकेण तासां सौभाग्यज्ञापनेन त्वया मानिताः सत्यो विशेषेण कल्पयिष्यन्तीत्यर्थः। यद्वा—क्षयितकुचरुजः सम्प्रति श्रीकृष्णेनैव खण्डितकामपीडाः, दुखान्ते लोकः समुल्लासाद्वंदिभ्यो बहु ददतीति समात्सर्यकौटिल्यम्, धाष्ट्र्येप्रदर्शनेन सकटाक्षोपहासश्च॥ १४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तस्य कैतवमेव दर्शयन्ती माने कारणमाह। सकृदिति। अत्रेर्ष्याधिक्येनागृहीतमपि कर्तुर्नाम वाक्यस्य पूरयितव्यतया मधुपतिरिति पूर्वस्मादेवाकृष्यते तत्सङ्गतत्वाद्भवादृगित्यनेन मधुप एव लभ्यते। तत्रेयं योजना मधुपतिरसौ स्वाम् असाधारणी निजामधरसुधामस्मान् सकृत् पाययित्वा बलाच्छलादपि साध्वीरस्मान् पानायापाद्य सद्यस्तत्याज कीदृशीमित्याशङ्क्याह। मोहिनीं बुद्धिं भ्रंशयित्वा दुःसहनिजदुरन्तलालसासम्पादिनीं तत्र तस्य तथा पायने नास्त्येव दृष्टान्त इति त्यागे तु सोऽयं दृष्टान्तः क्रियत इत्याह। भवादृक् भवद्विधमधुपजातीयः सुमनस इवेति। अयमर्थः। भवद्विधमधुपजातिस्तदन्यजीविकत्वात्तासु बहुषु यत्र तत्र रसमल्पमल्पं प्राप्य बुभुक्षाशान्त्यभावात्तां तां सुमनसं स्वसुखार्थं यत्त्यजति तद्युक्तमेव। मधुपतिस्तु सुधामयाधरत्वादन्यरसापेक्षामतीतः किन्तु दुःशीलत्वाच्छोभनमनसां दुःखदानमेव स्वसुखतया मन्यते तस्माद्भवतापि तस्मिन् कितवे बन्धुता न कार्येति। अथवा भवादृगित्युभयत्र सम्बन्धनीयम्। तत्र दृष्टान्तपक्षे मधुपजातीयः दार्ष्टान्तिकपक्षे विदूरसौरभग्रहणसमागमनपरितो भ्रमणमधुरास्फोटनसहचुम्बनादिभिर्भवद्वच्चेष्टमानोऽपीति योज्यम्। ननु जयति तेऽधिकमित्यादिकभवद्वाक्यरीत्या पद्मायाः अपि तदासक्तायाः सम्प्रति तत्रापि तदुपासनं दृश्यते भवत्या कथमसौ निन्द्यते तत्राह। परिचरतीति। सकलपद्माधिकारिण्य पद्मा तत्पादपद्मं कथं नु परिचरतीति न बुध्यते तदेतदुक्त्वा क्षणं विभाव्याह। अपि बतेति। अपीति सम्भावनायां बतेति खेदे हीति प्रसिद्धौ उत्तमःश्लोकस्येव ये तस्य जल्पाः प्रलोभनमयानि भाषितानि तैर्हृतचेताः सती तत्परिचरतीति ज्ञातं ज्ञातमित्यर्थः। तदेवं तस्या अविचक्षणत्वं व्यज्य स्वस्यतु विचक्षणत्वं व्यञ्जि म्। तस्मात् कितवे तस्मिन्नस्माकमपि मान युक्त इति भावः। तत्रासकृत्पायनमप्युत्कण्ठया विस्मृत्य सकृदेव पाययित्वेति तस्यानायासत एव वञ्चनाकर्त्री सामग्रीसम्पत्ति दर्शयित्वा स्वय त्रासातिशयः प्रकटितशयः प्रकटितस्तस्मिन्नीर्ष्याद्यतिशयश्च सूचितः तथापि मोहिनीमित्युक्वा स्वलालसाव्यवछेदं प्रत्याख्याय मोहाद्यतिशयश्च व्यञ्जित इत्यादिकमूह्यम्॥ १३॥ तदेवं तदीयसरोषचरणसरोजंविक्षेपेणापसृत्य पुरतो रुदन्तं मधुपमस्मत्प्रसादनायैव श्रीकृष्णं बहुधा गायत्यसाविति वितर्क्यतमवज्ञातुमन्यथोत्प्रेक्षते हे षडङ्घ्रे तज्जातिस्वभावा देव गानस्वभाव तस्माद्यद्गायसि तदिह व्रजे परमदुःखिते किं किमिति गायसि तत्रापि बहु किं गायसि तत्रापि यदूनामधिपतिं किं गायसि स यदूनां महाराजवंश्यानामसंख्यानामधिपतिः अत्रत्यास्तु गोपास्तत्रापि सम्प्रति तेनानादृताः अतस्तत्परिपाल्यमाना यदव एव गानजीविनस्तवेष्टं बिधातुमर्हन्ति न त्वेते इति स्वल्पं वा वहु वा तत्रैव गातव्यमिति भावः। षडङ्घ्र इत्यस्य पशुश्चतुष्पात् त्वन्तु षट् पदः तेन सार्द्धपशुत्वेन बुद्ध्य-

भावातिशयादेव गायसि नतु विचारादिति च इत्यसूया। ननु व्रज एव सर्वाधिकप्रेमवानसौ ततो व्रज एव श्रेष्ठ इत्याशङ्क्य विशिनष्टि। पुराणं बहुशोऽनुभूतं तत्तत् सर्वं कापटय्ं नैवानुष्ठितवानिति निश्चितम्। यद्वा। चिरमतिक्रान्तसम्बन्धं पूर्वमेव व्रजस्य तत्तदासीत् नाधुनेति भावः। यद्वा "कृषिर्भूवाचकः शब्द" इति व्यात्मकत्वेऽपि पुराणं पुरैव णं तदैव व्रजस्य सुखरूपम् अधुना तु केवलं कर्षति धात्वर्थसत्तारूपेणैवावशिष्टमित्यर्थः। किञ्च हन्त कुरुस्व नाम व्रजेऽपि गानमस्माकमग्रतः किं गायसि तत्रापि बह्विस्यादि। कथम्भूतानाम् अगृहाणां तेन स्वोच्छिष्टमोहनरसविशेषसकृत्पायनमात्रपूर्वकत्यागात् विशिष्य त्याजितगृहाणाम् अतो यदुपुरेऽपि तत्प्रेयस्य एव विशिष्टं तव गानस्थानमित्याह। विजयते सर्वं वशीकरोतीति विजयः श्रीकृष्णः स एव सखा त्वद्बन्धुस्तस्य सखीनां सह खेलन्तीनामेवाग्रतस्तत्प्रसङ्गस्य विजयस्य साम्प्रतमस्मत्परित्यागपूर्वकयादवकुलाधिपत्यफलं तत्पुरवनिताशतवशीकरणलक्षणस्य प्रसङ्गः। तत्सुखदः प्रस्तावो गीयताम्। ततस्ता इष्टास्तेन त्वयैव वा सम्मानि तास्तवेष्टं द्रुतमेव कल्पयिष्यन्ति। यद्वा। कल्पयन्ति सदा कुर्वत्य एवासते। अधुना त्वस्मद्दुरवस्थां दृष्ट्वा तद्वर्णनपूर्वकेण तासां सौभाग्यज्ञानेन त्वया मानिताः सत्या विशेषेण कल्पयिष्यन्तीत्यर्थः। यतश्च क्षयितकुच रुजः सम्प्रति श्रीकृष्णेनैव खण्डितं कामपीडाः दुःखान्ते लोकाः समुल्लासाद्वन्दिभ्यो बहुशो ददति। इति समात्सर्याकौटिल्यं धाष्टय्ं प्रदर्शनेन सकटाक्षोपहासश्च ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुष्ठु दधाति, पिबतां चित्तं मादकत्वादिना गृह्णातीति 'सुधा' इति परममाधुर्य्यपायनं च सूचयति। सुमनस इति दृष्टान्तेन सदा तस्मिन्नात्मनः शुद्धभावश्च ध्वनितः। तथापि सद्यस्तत्यज इति, तस्य निर्दयता वञ्चकता च। ननु साध्वीनां धैर्य्यं योग्यम्; यद्वा, ननु तस्य पुरीप्रस्थाने किमिति भवतीभिर्विघ्नो न कृतः, तत्राह—मोहिनीं बुद्धिभ्रंशिनीमिति। भवादृगिति भवन्तं कथञ्चिद्योऽनुकरोति मधुमक्षिकादिः, सोऽपि, किं पुनर्भवानित्यर्थः, इति तस्यात्यन्तास्थिरसौहृदत्वेन चापलं सूचितम्, पूर्व्वोक्तं बन्धुत्वमपि साधितम्। अन्यत्तैर्व्याख्यातम्। यद्वा, भवानिव चपलप्रकृतिर्दृश्यत इति भवादृक् श्रीकृष्णः सुमनसो यथा सकृदाघ्राय त्यजति लोकः, स एव वा तद्वत्; एवमस्थिरसौहृदत्वादकृतज्ञत्वादिना तस्यासेव्यत्वमभिप्रेतम्। तथापि लक्ष्म्याः सदा तत्सेवां स्मृत्वा तत्कारणमुन्नयन्त्याह—परीति। 'नु' अहो कथं कुतो हेतोस्तस्य उक्तस्वभावस्य मधुपतेः पादपद्मं पद्मरूपकेण कमलहस्तायास्तस्या लीलाकमलवत् सम्वाहनादिना सदा तत्सेवनं ध्वन्यते। अहो अविचक्षणत्वादित्याह—अपीति सम्भावनायाम्, उत्तमश्लोकस्य तस्य जल्पैः (भा० १०।३२।२२) 'न पारयेऽहम्' इत्यादिवत् कपटमिष्टगोष्ठीभिः; यद्वा, उत्तमः श्लोकस्तद्यशस्तस्य जल्पैः, अनुत्तमस्यापि तद्यशसो बन्दिजनैकत्ततया गीयमानगाथाभिरित्यर्थः। यद्वा, उत्तमश्लोकोऽयमिति जल्पैर्मिथ्याभूततत्सेवकवार्त्ताभिरिति सपत्न्या मुग्धता स्वेषां चातुरी च सूचिता ॥ १३ ॥ हे षडङ्घ्रे' इति जाति-स्वभावेन गानचातुर्य्यात्, तथा पशुश्चतुष्पात्, त्वन्तु षट्पदः, तेन सार्द्धपशुत्वेन बुद्ध्यभावादेव गायसि, न तु विचारादित्यर्थः। तत्रापि बहु किं वा गायसि, तत्रापि नोऽस्माकमग्रतः समक्षं चेत्तव दूर्निवारा गानेच्छा, तर्हि सकृदेव परोक्षं गाय, वादमस्माभिरश्रूयमाणमपि तं मुहुः समक्षं किं गायसीत्यर्थः। इति गूढमानगर्भासूया सूचिता। ननु निजेष्टसिद्ध्यर्थं तथा गायामि, तत्राह—इह व्रज इति। पुर्य्यामेव तवेष्टसिद्धिर्न तु वनमध्येऽत्रेति भावः। ननु पुरीतोऽप्युत्तममिदम्, तत्राह—यदुनामधिपतिमिति। परिपाल्यमानानां तेषामेवाग्रे तद्गानं युक्तम्, न त्वन्येषामिति भावः। ननु युष्माकमपि स एव प्राणनाथः, तत्राह—अगृहाणामित्यर्थः। वन्यत्वेनास्माकं गीतार्थज्ञानादिकं नास्तीति भाव इति सोल्लुण्ठोक्तिः। ननु यूयमेव परमविदग्धाः, तत्राह—पुराणं बहुशस्तद्गीतमस्माभिः श्रुतमेवास्तीत्यर्थः, इति सेर्ष्यः कटाक्षः। अन्यत्तैर्व्याख्यातम्। यद्वा, नोऽस्माकमगृहाणां 'दारेषु च गृहाः' इत्यमरः; अभार्य्याणामप्रियाणामिति यावन्' अग्रतः पुराणं पुरा पूर्व्वमेव णं निर्वृतिरूपं सुखरूपं 'णश्च निर्वृतिवाचकः' इत्युक्तेः, न तु साम्प्रतम्, साम्प्रतं दुःखकरमित्यर्थः। किं गायसि ? तर्हि क्व गायामि ? तत्राह—विजयसखसखीनां विजयस्य जगत्-पराजयशक्तेः सख्युः सहचरस्य कृष्णस्य सखीनां स्थाने तत्प्रसंगो गीयताम्, क्षपितकुचरुक्तयैव साम्प्रतं प्रियकरणादिष्टास्तास्ते तवेष्टं कल्पयिष्यन्तीति समात्सर्य्यकौटिल्यम्। यद्वा, विजयते सर्व्वोत्कर्षेण वर्त्तत इति विजयः कृष्णस्तस्य सखे, श्रीकृष्णबन्धुत्वेन तत्सखीनामपि त्वत्सखीत्वेन तवैव सखीनां तस्मिन् कृष्णे प्रसंगः परमासक्तिः। यद्वा, स कुचरुक्क्षपणादिलक्षणप्रसंगो गीयताम्, अयं धाष्टर्य्यं प्रदर्शनेनोपहासः; क्षपिता श्रीकृष्णेनालिंगन-नखक्षतादि-इत्यापहृता कुचयो रुक् कामपीडा यासां ताः, कल्पयन्ति तव प्रियं सदा कुर्व्वन्त्येव, अत इष्टाः, एवं त्वया गानेन मानिताः सत्यो विशेषेण कल्पयिष्यन्तीत्यर्थः ॥ १४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अगृहाणां वनचरीणां विजयसखसखीनामिति अन्यासां कृष्णप्रेयसीनामग्रतो गीयतां ता तदिष्टाः तां चेष्टङ्कल्पयन्ति ता एव विशिनष्टि। तत्प्रसङ्गक्षयितकुचरुजः कृष्णकथाप्रतावनिरस्तस्तनतापाधयः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु किमित्येवमवजानीथ किं वस्तेनापकृतमत आह। सकृदिति। मोहिनीं तापत्रयविस्मारिणीं स्वासाधारणामधरस्य सुधां सकृत्पाययित्वाऽस्मांस्तत्यजे त्यक्तवान् यथा त्वं सुमनसः। पुष्पाणि पीतमधूनि त्यजसि तद्वदतः स भवादृक् त्वमीदृगित्युक्तं

भवति अत्र तु स भवादृगिति अयं भावः त्वं तादृशः स तु त्वादृशः अहो युवयोरेव स्वामिभृत्यभावो विधात्रा निर्मित इति इत्याक्षेपगर्भमिदं वचः न्यूनाधिकये एव स्वामिसेवकभावो न तु समयोरिति दिक्। वयन्तु कदापि तादृश्यो न भवामः सोऽस्मादृशः कदापि न भवतीत्यतः सदा स्वामिसेवकभावसम्बन्धज्ञानप्रतिपादकश्रुतिस्मृत्याचार्यपरम्पराहार्दोऽव्युत्पन्नो नाचार्यो भवितुमर्हतीति गूढोऽभिप्राय इति दिक्। अहो बताकृतज्ञस्य पादपद्मं कथं श्रीः सेवते विदितं मयेत्याह। अपीति। उत्तमश्लोकस्य जल्पैर्मिथ्याकथाभिर्हृतं चेतो यस्यास्तथाभूता तत्पादपद्मं परिचरति बतेति खेदे वयं तु न लक्ष्मीवदविचक्षणा इति भावः ॥ १३ ॥ झङ्कारान् बहुधा कुर्वाणं तमस्मत्प्रसादलाभाय श्रीकृष्णं गायतीति मत्वाह। किमिहेति। हे षडङ्घ्रे इहागृहाणां वनचारिणीनां नोऽस्माकमग्रतः पुरतः पुराणं बहुशोऽनुभूतं यदुपतिं किं किमर्थं गायसि नानेन तव काचिदिष्टसिद्धिरिति भावः। किंतु विजधसखस्य श्रीकृष्णस्य सखीनां पुरस्त्रीणामग्रतः तस्य विजयसखस्य प्रसङ्गो गीयताम् एवं चेत्तस्येष्टास्तास्तवेष्टं कल्पयन्त्यपेक्षितं दास्यन्ति तत्र हेतुं वदन्ती ता विशिनष्टि। क्षपिता विजयसखालिङ्गनेन निरस्ता कुचरुग्यासां ताः ॥ १४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कृष्णस्य कितवत्वं कथमापाद्यते इत्यत एवमिति व्यनक्ति। सकृदिति। भवादृक् भावनिव पूज्य इव स्थितः कः पुरुषः मां त्यजेन्न त्यजति मत्त्यागे हत्यादोषो भवति।—

ब्राह्मणं स्वयमाहूय याचमानमकिञ्चनम्। पश्चान्नास्तीति यो ब्रूयात्तमाहुर्ब्रह्मघातकमिति ॥

स्मृतिर्वदतीति भावेन कथितः स्वामधरसुधामधरोष्ठामृतं पाययित्वेति निषेधवचनाभावादुक्तदोषः कथं स्यादित्याशङ्क्य सकृत्पानेन बहुतृष्णाजननहेतुत्वात्ततोऽप्यधिक इवेति भावेनोक्तं सकृदिति। तृष्णाजनकत्वञ्च कथमित्यत उक्तं मोहनीमिति बुद्धिमोहकरीं मोहिनीमिति पाठे मोहकत्वशक्तिरस्यास्तीत्यर्थः। अत्र निदर्शनमाह। सुमनस इति। यथा सुमनसः पुष्पस्य गन्धमाघ्राय पुनस्तदानीमेव तत्त्यागो दृष्टचरस्तथेति। तस्य त्वत्तृष्णा नास्ति चेत्तवापि माभूदिति माशङ्कीति भावगर्भमाह। परिचरतीति। अत्र लक्ष्मीपदममरश्रीपदञ्चाध्याहृत्य व्याख्येयं लक्ष्मीः मथुरां गता वा तस्य कृष्णस्य पद्मकिञ्जल्कवत् कोमलं पादं कथं केन प्रकारेण परिचरति शुश्रूषइति शङ्कित्वा हेतुमाह। अपीति। सापिउत्तमश्लोकजल्पैः उत्तमश्लोकस्य हरेः जल्पैः मधुरवचनविशेषहृतचित्ता मुग्धचित्तत्वात्तृष्णया परिचरतीत्येवं निश्चेयं बत हर्षे चित्ता उत्तमेति सन्ध्यकरणेन प्रियत्वातिरेकदर्शनार्थमेवं कथनं न तु दोषापादकत्वेन निर्दोषत्वात्तस्य सर्ववैलक्षण्यप्रदर्शनार्थञ्चेति ज्ञाप्यत इति सुमनस इव सद्य इत्यनेन शरीरदौर्गन्ध्यं कितवेति पाण्डित्यप्रदर्शित्वञ्चेति प्रवयस्त्वं त्यागनिमित्तानि सन्तीति सूचयति सुमनस इव पुष्पस्य सदृशी यथापुष्पं सौरभ्येण घ्राणेन्द्रियतर्पकत्वेन च सेव्यं स्यात्तथाहं सद्यः सद्यस्का यथा प्रत्यग्रवयसि वर्त्तमाना तरुणी तरुणैः परिहर्तुं न शक्या तथेति किञ्च सुमनसः मालत्या लतायाः तनुत्वं यथा मम मध्ये मुष्टिग्राह्यत्वमनेनालिङ्गने सुखोद्रेकं लक्षयति यथा सुमनसो देवाः स्वसेवकं न त्यजन्ति तथा मामपि यथा बुधाः कामकलाज्ञास्तरुणीं न मुञ्चतीति वा अतो भावादृगेव श्रीकृष्ण एव नृशंसत्वेन त्यक्तवायिति वा सुमनाः पुष्पमालत्योः स्त्रीदेवबुधयोः पुमानिति यादवः इतरत्समं परिहरतीति केचित्पठन्ति ॥ १३ ॥ स्वपुरतो वर्ण्यमानया प्रियवार्तयोद्बुद्धमदनकलिका पुनरपि श्रोतुकामा असहमानेवावाधिक्षिप्तं कोपनार्थमधिकं वक्तीति कृत्वा तमुद्धवमाक्षिपतीव वक्ति। किमिहेति। षट्सु दर्शनेषु सन्ध्यादिषु चाङ्घ्रिरवकगतिर्यस्य स तथा षट्सु विषयेषु भगवद्भक्तपरिपन्थिषु अङ्घ्रिः पादो यस्य स तथेति वा तस्य सम्बुद्धिः हे षडङ्घ्रे उद्धव! आघ रघि लघिगत्यर्था इति धातुः त्वमगृहाणां गृहाश्रमराहतानां वनचारिणामित्यर्थः। नोऽस्माकमिहाग्रतः पुराणं पुरे वर्तमानं यदूनामधिपतिं किम्बहुकर्णबिलपूरं गायसि न शब्दयेत्यन्वयः कैगै शब्द इतिधातुः तस्य गृहान्तर्वर्तित्वेन वनमध्यवासिपुरतो गायनमनन्वितमित्यर्थः। तर्हीदं कस्याग्रतो युक्तमिति। तत्राह। विजनेति विजयोऽर्जुनस्तस्य सखा कृष्णः तस्य सखीनां मथुराङ्गनानामग्रतस्तस्य कृष्णस्य प्रसङ्गः गायतां गीयतां त्वयेति शेषः। तत्र गातुस्तव फलसिद्धिरप्यस्तीत्यत्याह। क्षपितेति। तत्प्रसङ्गेन क्षपिता निरस्ता कुचानां रुक्सन्तापलक्षणा यासां तास्तथा इष्टाः कृष्णप्रियाः मथुराङ्गना उद्गात्रे ते तुभ्यमिष्टमभीष्टं धनादिकं कल्पयन्तीत्यन्वयः तस्मात्तो ऽयं धनसमय इतिश्रुतेः तत्प्रसङ्गमितिपाठे भवान्गायतामित्यात्मने पदे लोट् तत्प्रसङ्गक्षपितेतिपाठे या यदुपतिविषया गीतिस्तां त्वं गायेति परस्मैपदेलोट् तस्य प्रसंगेन प्रकृष्टालिङ्गनलक्षणेन विजयसखसखीनामग्रतो यदुपतिं गायतां पुंसां ते कृष्णेष्टाः स्त्रीजना अभीष्टं कल्पयन्तीति वा ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ जयति तेऽधिकं जन्मना व्रज इत्यादिरीत्या लक्ष्म्याः सदा तत्ससेवां स्मृत्वा सा कथं सिद्ध्यतीति व्रजचारित्वस्मरणेन सकारुण्यममिव वितर्क्य तत्र कारणमाभाषयन्ती स्वमानमेव द्रढयति। परीति ॥ १३ ॥ विजयते सर्वं वशीकरोतीति विजयः श्रीष्णः सखा तद्बन्धुः तस्य सखीनां सह खेलन्तीनामेवाग्रतः तत्प्रसङ्गः तस्य विजयस्य साम्प्रतमस्मत्परित्यागपूर्वकयादवकुलाधिपत्य फलतत्पुरवासिवनिताशतवशीकारलक्षणस्य प्रस्तावः क्षपितकुचरुजः श्रीकृष्णेनैवखण्डितकामपीडाः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

ननु किं तेनापराद्धम, कथमेवं तमाक्षिपसीत्याह—प्रकृतीत्यादि। स्वामधरसुधां सकृत् पाययित्वा अस्मान् तत्यजे तत्याजेति यत् स एवापकारो महान्, यतः पीतामृतानां मरणमपि दुर्लभम्। अतो मरणाभावे हि नो दुःखमित्याशयः। कीदृशः? तवादृक् भवत्सदृशः, भवान् यथा सुमनसस्त्यजति। किन्त्वियानेव बिशेषः, त्वं पीत्वा त्यजसि, स पाययित्वा त्यजति। पीत्वा यद्यत्यक्ष्यत्, तथापि मर्तुमशक्यम्। पाययित्वा चेदत्यजत्तेनैव मर्तुं न शक्यते, पीतामृतत्वादित्युक्तमेव। कीदृशीम्? मोहिनीम्, न केवलं मरणाभावजननीमपि तून्मादकारिणीम्। मधुप-पक्षे पाययित्वेति स्वार्थे णिच्। सुधामपि सुमनसस्त्यजन्ति, दुर्मनसः परिगृह्णन्तीति श्लेषेण विदग्धता तस्य सूचिता। आत्मनः सौमनस्यञ्चेति गूढो गर्वः। एवंविधमविदग्धं पद्मा कथं सेवते इत्याशङ्कामुद्भाव्य स्वयमेव सिद्धान्तयति च-परिचरतीत्यादि। तत्पादपद्मं कथं तु पद्मा परिचरतीति पूर्वपक्षः। अपि सम्भावनायाम्, वतेत्यद्भुते। उत्तमाः श्लोका ये जल्पास्तैर्हृतचेताः। उद्गतं तमः पापं यस्मात्तथाभूतः श्लोको यशो येषां ते तथा। तथाविधैरेव जल्पैर्हृतचित्ता, तथाविधकथयैव प्रलोभिता न सा तस्य हृदयज्ञेति साप्यविदग्धेति तां प्रति चाक्षेपः। अत्राप्युन्माद एवाङ्गी, गर्वासूयाक्षेपादयोऽङ्गानि। विलापः॥ १३॥ पुनरपि हुङ्कुर्वाणं मधुकरमुद्दिश्य सासूयमिवाह—किमिह वह्वित्यादि। हे षडङ्घ्रि षट्पद! इहास्माकमग्रतो यदूनामधिपतिं किं गायसि? यदूनामधिपतित्वेनास्माकं पुरतः स गेयो न भवति, तत्रापि बहु। सकृद्यद्गीतं तदहं क्षेमे, पुनः पुनर्मा गीयताम्। षडङ्घ्रि इति चरणबाहुल्यमेव, न तु बुद्धिबाहुल्यम् तवेत्याक्षेपः। ननु मयासौ यदूनामधिपतित्वे न गीयते, अपि तु भवत्प्रियत्वेनैवेति चेत् सत्यम्। गतः स काल इत्याह—पुराणं पुराणप्रेमाणम्। कुतः इत्याह—अगृहाणां वन्यानां प्रति हर्म्यस्थानां मधुमानिनीनामेव प्रिय इति द्वयोरेव हेतुमद्विशेषणम्। ननु तर्हि कासौ गेय इत्याह—विजयसखेत्यादि। विजयः सर्वोत्कर्षस्तस्य सखा स तथा। अथवा, बिजयेन सर्वोत्कर्षेण सखाः सच्छिद्राः साहङ्काराः, अहङ्कारात् परं छिद्रं नास्ति, तथाभूता याः सख्यः। अर्थात् तस्यैव तासामग्रे तत्प्रसङ्गो गीयतामित्यर्थः। ननु तदाग्रतो गानैर्मम को लाभः? इत्याशङ्क्याह क्षपितेत्यादि। ता इष्टं तवाभीष्टं कल्पयन्ति कल्पयिष्यन्ति, यत इष्टा अर्थात् तस्येति। ननु भवत्योऽपीष्टा इत्याशङ्क्याह—क्षपितकुचरुजः। तदाश्लेषेण क्षपिता नष्टा कुचरुजो यासाम्, अतस्ता एवेष्टाः, वयं तु सरुज इति न तथा। अतस्ता एव तवाभिमतप्रदाः, न वयमिति माऽत्र गीयतामिति वाक्यार्थः। अत्राप्युन्मादोऽङ्गी अमर्षाक्षेपासूया दैन्यादयोऽङ्गानि। अनुलापः किं गायसीति सिद्धे निषिद्धे गीयतामिति मुहुर्भाषणात्॥ १४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कथमेवाक्षिपसि, किं तेनापकृतम्? तत्राह—सकृदित्यादि। भवादृक् भवत्सदृशो भवान् यथा स्वामधरसुधां पाययित्वा सुमनसस्त्यजति, तथा स च सकृदेकवारं तथा कृत्वा नस्तत्याज। अयं भावः—इयं स्वानुभावेनासम्भाव्यमानमपि भ्रमराधरसुधापानं सुमनसामुद्भाव्य स्वमौग्ध्यं प्रतिपादयति, वस्तुतस्तु श्रीकृष्ण एव ता अधरसुधामपाययत्, न तु ताः तेन भ्रमरा अपि स्वामधर-सुधां सुमनसः पाययन्तीति तथैवानुभवः। अथवा स श्रीकृष्णः कृत् कृती अधरसुधां पाययित्वा तत्याज, अतोऽस्माभिर्मर्त्तुमपि न शक्यते पीतामृतत्वात्, क इव भवादृक् भवानिब, किन्त्वियान् विशेषः—भवान् सुमनसः पीत्वा त्यजति, स पाययित्वा त्यजतीति कृतित्वम्। सुमनसस्त्यजति, दुर्मनसो गृह्णातीत्याक्षेपलभ्य आक्षेपः। एवम्विधं वञ्चकं कथं श्रीः परिचरतीत्याशङ्क्याह—अपि वतेत्यादि। तस्य मधुरकथयैव प्रलोभिता वयमिब सा तस्य न तत्त्वज्ञा इति गर्वमौग्ध्यासूयानाम्॥ १३॥ तमेवाह—किमिहेत्यादि। कृष्णगाने कोऽपराधः? तत्राह—यदूनामधिपतिमिति, न हि भवत् प्रियत्वेनैवासौ गीयते? तत्राह—पुराणं पुराण-प्रेमाणम्। कुतोऽसौ पुराण-प्रेमा? तत्राह—अगृहाणाम्, वयमगृहा वन्याः इदानीं समीचीन-हर्म्यवासिन्य एव तत्प्रियाः। तर्हि किं करोमि? तत्राह—विजय सखेत्यादि। विजयजन्यगर्व एव सखा यस्य तस्य सखीनां पुरवधूनामग्रस्तत्प्रसङ्गो गीयताम्, ताभिः सह तत्प्रसक्तिर्गीयतामित्यर्थः। ता एव तस्येष्टाः तेन क्षपितकुचरुजः सत्यस्ते तवेष्टं कल्पयिष्यन्ति 'भविष्यत् सामीप्ये वर्त्तमाना', वयं सहजस्तव किं करिष्यामः॥ १४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु भ्रमरजातेर्ममायं स्वाभाविक एव श्मश्रुपीतिमा नतु सुरतकुङ्कुममिदं तस्य च त्वदेकतानमानसस्य मधुपुर्यां कामपि स्त्रियं स्वप्नेऽप्यपश्यतः कोऽपराधो यतस्त्वमीदृशं मानमाविष्करोषीति तत्राह। सकृदिति। पायनस्यासकृत्त्वेऽपि सकृदित्युक्तिरनुरागेण तत्र तृष्णाधिक्यं व्यञ्जयति। अधर एव सुधा तामित्यत एव एतावद्भिरपि सन्तापैर्न म्रियामहे इति भावः। एता मद्दत्तैः कष्टैर्यदि मरिष्यन्ति तदाहं काभ्यः कष्टं दास्यामि तस्मादासां मरणाभावाय स्वामधरसुधां पाययामीति स पुरैव विचारयामासेति भावः। अतः सकृदेव पाययित्वा सद्यस्तत् क्षण एवास्मांस्तत्याज। अतोऽस्मत् सुखदाने तात्पर्ये सति सुधापायनस्यासकृत्त्वं स्यादिति त्वमेव विचारयेति भावः। तत्रापि पाययित्वेति णिचा तस्य बलात्कारो दर्शितः। नन्वेवञ्चेत् साध्व्यो भवत्यः कथं तस्मै

स्पृहयन्ति तत्राह । मोहिनीं बुद्धिभ्रंशिनीम् । अतस्तेनास्मदादयो लोकद्वयत एव भ्रंशिता इति "विषवृक्षोऽपि सम्बर्द्ध्य स्वयं छेत्तुमसाम्प्रतमि"ति न्यायोऽपि कृष्णेन न गणित इति भावः । किञ्च तस्य प्रीत्यप्रीती द्वे एवातिचित्रे इत्याह । सुमनसो देवश्रेणीरिव विष्णुः कृष्णोऽस्मान् सुधां पाययित्वा सुमनसो मालतीर्भवादृक् भ्रमर इवास्मांस्तत्याजेति पायनत्याजनयोः कर्मणि कर्त्तरि च पृथक् पृथक् दृष्टान्तः । देवपक्षे हे अधर । निकृष्टेति सम्बोधनं "सुपर्वाणः सुमनस" इत्यमरः । ननु तस्य युष्मत्कर्मकत्यागे युष्माकमेव कोऽपि दोषः कारणमस्ति तस्य वेति तत्राह । सुमनस इवास्मान् स भवादृक् तत्याज । भ्रमरो यन्मालतीस्त्यजति तत्र दोषः कस्येति स्वयैव विचार्यतामिति भावः । "सुमना मालती जाति"रित्यमरः । सौरभ्यसौकुमार्यपावित्र्यसर्वोत्कर्षादिभिः सुमनः साधर्म्यात् शोभनमनस्कत्वाच्च वयं सुमनस इति व्रजे प्रसिद्धा एव स च भ्रमरसाधर्म्यात् चपलः स्वसुखमात्रार्थी प्रसिद्ध एवेति नेदं कवितामात्रमिति ध्वनिः । ततश्च चाञ्चल्यदोषादेव मालती वल्लीरपि त्यक्त्वा निकृष्टेष्वपि पुष्पेषु विषज्जति अविषज्जति वा भ्रमरे इव कृष्णे कथं वयं मानिन्यो न भवाम इत्यनुध्वनिः । ननु कृष्णस्य निर्दोषत्वं शास्त्रप्रसिद्धमेव शास्त्रज्ञेन गर्गेण नारायणसम इत्युक्तत्वात् । तत्र भवतु स नारायणस्तथापि परवञ्चनादिदोषाणां तत्र प्रत्यक्षत एव दृष्टत्वात्ते कथमपलपनीया भवन्त्विति विमृश्य सविचिकित्समाह । परिचरतीति । पद्मा लक्ष्मीः परिचर्यायामपि हेतुं स्वयमेवोद्भावयन्त्याह । अपि बतेति । उत्तमः श्लोक इति ये जल्पास्तावकलोकानां स्तुतिमात्राणि तैर्हृतं चेतो यस्याः सा । तेन लक्ष्मीरति ऋजी वयन्तु वैचक्षण्यवैदग्ध्यबुद्धिवैचित्र्यादिगुणानां विधात्रादत्तत्वात् कथं तादृश्यो भवितुं प्रभवामेति भावः । अत्र पाययित्वेति मोहिनीमिति च तस्य शाठ्यं सद्यस्त्यागान्निर्दयत्वं भवादृगिति चापल्यं लक्ष्म्या आर्जवव्यञ्जनया स्वविचक्षणत्वम् आदि शब्दादकृतज्ञत्वप्रेमशून्यत्वादिकं तु सर्वत्रैवानुस्यूतमित्ययं परिजल्पः । यदुक्तम् ।

प्रभोर्निर्दयताशाठ्यपचालाद्युपपादनात् । स्वविचक्षणता व्यक्तिभङ्ग्या स्यात् परिजल्पितम् ॥ १३ ॥

भ्रमरजातिस्वभावेन हुंकारान् कुर्वन्तं तं मत्कृतेन तिरस्कारेणाप्तः संरम्भोऽयं स्वीयं गानगुणं प्रकाशयतीति मत्वाह । इह गोपीसभासु किं गायसि अज्ञस्य तव गाने नैताः प्रसीदन्तीति भावः । तदपि पुनः पुनर्गायसि । तत्रापि यदुपतिं यदूनां पतित्वेन ख्याप्यमानं तत्रापि नोऽस्माकमग्रतः । कीदृशीनाम् अगृहाणां तेनैव त्याजितगृहाणामिह वनप्रदेशे उपविष्टानां तुभ्यङ्कणकमुष्टिभिक्षादानेऽप्यसमर्थानाम् । ननु स्वाङ्गोत्तीर्णपुरातनवस्त्रमाल्यादिकं किञ्चिद्देहीति चेत् तुभ्यं सर्वथैवानभिज्ञाय नैव ददामीत्याह । पुराणं गायसि तस्य यदुपतित्वे पुराणं प्रमाणमयसीत्यर्थः । हे षडङ्घ्रे ! इति पशुस्तावच्चतुष्पात् त्वन्तु षट्पदः सार्द्धपशुः कुत्र किं वा गातुमुचितमिति बुद्ध्यभावान्न जानासि पशुत्वात् पुराणं वा कथं जानास्यतः कथं भिक्षां प्राप्स्यसीति भावः । किन्तु तव पशुत्वात्तुभ्यं वयं न कुप्यामः किन्तु गानोपजीविनस्तदवस्थानमुपदिशामः शृण्वित्याह । विजयेति । कामयुद्धे विशिष्टो जयो यस्य विगतजयो वा यस्य स चासौ सखा चेति विजयसखस्तस्य सखीनां तव सखा कामयुद्धे या जयति याभिर्वा विजीयते तासामेवाग्रतस्तत्प्रसङ्गः सुरतजयपराजयविरुदावली गीयतां श्लेषेण पूर्वं सुवलसख आसीत् सम्प्रति विजयोऽर्जुनस्तस्य सखा अभवदिति भाविवार्त्तापि तस्या मुखात् स्वयं निःसृतेति ज्ञेयम् । ततश्च ताः क्षपितकुचरुजः खण्डितकुचज्वालास्तवेष्टं वाञ्छितं कल्पयिष्यन्ति त्वया च त्वद्गानश्रावणया इष्टाः पूजिताः सत्यः अत्र उत्तरार्द्धे असूया मानगर्भा सर्वत्रैव उपहासात्मकः कटाक्षः कृष्णे पर्याप्नोतीत्ययं विजल्पः । यदुक्तम् ।

व्यक्तयासूयया गूढमानमुद्रान्तरालया । अघद्विषि कटाक्षोक्तिर्विजाल्पो विदुषां मतः ॥ इति ॥ १४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

ननु मदन्यया प्रेयस्या मत्प्रियो मथुरायां रमत इति केन प्रमाणेन श्रीमत्या ज्ञातं प्रत्यक्षेणोतानुमानेन किम्वा शब्देन नाद्यः अयोग्यत्वात् न द्वितीयः धूलीपटले धूमभ्रमवत् श्मश्रुनिष्ठस्वाभाविकलौहित्ये तादृशकुङ्कुमलौहित्यभ्रमात् न तृतीयः अनाप्तवाक्यस्याप्रमाणत्वादयथार्थवादिनोऽनाप्तत्वात्तस्मात्सर्वदा त्वत्सङ्गमध्यानपरे स्वप्नेऽपि त्वदन्यस्त्रीसमागमरहिते त्वद्विरहव्याकुलस्वान्ते परमप्रेष्ठे श्रीव्रजराजनन्दने परमभक्त्या भगवत्प्रियायाश्चरणसरोजं द्रष्टुं स्प्रष्टुं च तदाज्ञयागते मयि च किमित्येवं दोषा आरोप्यन्त इति चेत्तत्राह । सकृदिति । असकृत्पायनेऽपि तत्पिपासाया अनिवृत्तत्वात्तदुपकारतिरोधानाय प्रवृत्तत्वाद्वासकृदित्युक्तम् अधरसुधां सकृत्पाययित्वा यद्योऽस्मांस्तत्याज उत्कृष्टवस्तुलाभनिश्चयं विना पूर्वसिद्धं वस्तु केनापि न त्यज्यते प्रयोजनमुद्दिश्य न मन्दोऽपि प्रवर्तत इति न्यायात्तथा च त्यागान्यथानुपपत्त्येदं कल्प्यत इत्यर्थापत्तिप्रमाणेय मयेदं ज्ञातमिति भावः । ननु यः सुधां पाययित्वा गच्छति स किमुपालम्भविषयो भवति पिपासितस्य जलमपि पाययित्वा यो गच्छति स कृतज्ञैः सर्वदा स्तूयत एव ननु निन्द्यत इत्यपि शङ्काऽनेन निरस्ता शुष्ककाष्ठैर्यो दहति तदपेक्षया आर्द्रगोमयेन यो दहति सोऽत्यन्तदुःखप्रद इति न्यायोऽत्र घटते ननु त्वदुक्तस्तथा च मरणे दुःखाननुभवात्सुधां पाययित्वा गतो नत्वस्मदुपकारार्थं तथा कृतवान् येन तदवहेलनेऽस्माकमकृतज्ञतादोषः स्यादन्यथा पुनः पुनस्तत्पायनं कुर्यात् त्यागं च न कुर्यादिति अधरपदेन जातितोऽपि वयं भ्रंशिता इति ध्वनितम् नन्वेवम्विधा सुधा किमर्थं भवतीभिः पीतेत्याशङ्कानिवृत्त्यर्थं बलात्कारः सूचितः । ननु तदर्थं सन्तापो न कार्यस्तत्राहं गत्वेदं कथयिष्यामि स च

श्रुत्वैव तां सुधां कनकपात्रे निधाय प्रेषयिष्यति यां पीत्वा तृप्ता भविष्यथेति चेत्तत्राह । स्वां स्वेन दानं विना तदधररूपपात्रं विना च पातुमयोग्याम् अधरवियोगे तु तस्याः सुधात्वमेव नश्येदिति भावः । नन्वलभ्यवस्तुस्पृहा न युक्तेति विचार्य स्वस्थचित्ता भवथेति चेत्तत्राह । मोहिनीं विवेकं नाशयित्वा दुरन्तलालसोत्पादिनीं दृष्ट्वा तेन त्यागः कृतः स्यादित्याशङ्क्याह । सुमनस इति । सुमनस इवास्मान्स भवादृक् तत्याज तथा च भ्रमरकर्तृकमालतीत्यागे यथा नास्ति तासां कश्चिद्दोषः तथा साधुमनसां तत्समानामस्माकमपि तथा च स्वथानस्थितत्वाद्वयं मालतीसमाः स तु अन्यत्र गतत्वाच्चञ्चलो भ्रमरसम इतीदं प्रत्यक्षमेव न तु कल्पनेति भावः । अतः एव सद्यस्तत्याज एतेन भवतीभिः कुतो न धृत इत्याशङ्कापि परिहृता यथा त्वं मालतीभितुमशक्यस्तद्वदतिचञ्चलस्यातिबलिष्ठस्य च तस्यास्माभिर्धर्तुमशक्यत्वात् यद्यपि भ्रमरः पीत्वा गच्छति भगवांस्तु पाययित्वा गत इति वैषम्यं तथापि तादृशत्यागे दृष्टान्ताभावव्यञ्जनार्थं त्यागमात्रे भ्रमरो दृष्टान्तीकृतः तथा चाधरसुधासम्बन्धाज्जातिभ्रष्टानां तदासक्तचित्तत्वाल्लौकिककृत्योयाग्यानां विवेकनाशात्परलोकसाधनसम्पादनाक्षमाणां तेन गतत्वादालम्बनविधुराणां न पूर्वसिद्धसामग्री नापि प्रेष्ठ इत्युभयतो भ्रष्टास्तेन वयं कृता इत्यस्मत्कृत उपालम्भो नेर्ष्यामूलकः किं तु यथार्थ एवेति त्वमेव पक्षपातं विहायेदं विचारयेति यद्यपि परितो भ्रमणमधुरभाषणसहावस्थानचुम्बनश्यामत्वादिना तत्सदृशत्वात् भवादृगितितद्दृष्टान्तत्वेन भवानस्माभिरुपात्तस्तथापि तत्रात्मरसप्राप्त्या बुभुक्षानिवृत्त्यभावात्सुमनसां त्यागेन दुःखदानमयुक्तमेवातो त्वयापि तस्मिन्कितवे बन्धुता न विधेयेति भावः । ननु भगवान्सर्वास्वेवंविध एवातो नोपालम्भयोग्यः स्वभावस्य दूरतिक्रमणीयत्वादित्याशङ्क्याह । पद्मा लक्ष्मीः परमचतुरा तत्पादकमलं कथं सेवते तथा च तत्सेवां तत्सन्निधौ स्थित्वा गृह्णातीति अस्मांस्तु त्यजत्यतो नैकविधस्वभावोऽपि तु वञ्चनादिदोषवानेव प्रत्याक्षेणोपलभ्यतेऽतश्चतुरशिरोमणिरपि तद्दूतस्त्वं तानपलपितुमशक्तोऽसीति भावः । नारायणसमो गुणैरिति गर्गोक्तिमनुसृत्य श्रयत इन्दिरा शश्वदत्र हीति पूर्वं यथोक्तं तद्वदिदमुक्तमिति द्रष्टव्यं यद्वा कंसादिषु दोषवत्त्वेन व्यक्तमेव तस्य श्रीमद्विष्णववतारतेत्यभिप्रेत्येदं । यद्वा ननु स वञ्चकश्चेत्तर्हि लक्ष्मी कुतो न वञ्चितवांस्तस्मात्तद्वशीकारहेतुभूतसेवाज्ञानमेव युष्माकं नास्तीति चेत्तत्राह । परीति । तत्कृतसेवाप्रकारो ज्ञातः सन्ननुष्ठातुं शक्यः स त्वस्माभिर्न ज्ञातः प्रियसन्निधौ तत्प्रष्टुमवकाशस्यालब्धत्वादिदानीं तस्य दूरचरत्वादतस्त्वयैव करुणया तत्र गत्वा तां पृष्ट्वात्रागत्य वक्तव्यः परं तु स प्रकारो ज्ञातोऽपि अस्माभिरनुष्ठातुमशक्यो यतः सा पद्मा यदि चरणे मातीति तथा तदभिन्नतयावस्थिता अस्माकमपि चरणाभेदो भूमिभावो वा यदि भवेत्तदा तत्सादृश्यं स्यान्नान्यथेति भावः । एतेन लक्ष्म्यवताराप्रसिद्धेः कथमेवमुक्तमिति शङ्कानिरासाय तत्र प्रमाणमप्युक्तं तस्या भगवन्तं विना क्षणमात्रमपि स्थातुमशक्तत्वात् अत एव परिचरतीति वर्त्तमानापदेशः । यद्वा ननु यदि तस्मिन् दोषगन्धोऽपि चेत् भवेत्तर्हि चतुरशिरोमणिभूत्वा ब्रह्मादिभिरपि प्रार्थ्यमानपादपद्मा मा कथमनिशं तत्पादपद्मसेवापरा स्यादित्याशङ्क्याह । परिचरतीति । तु वितर्के चपलशिरोमणिभूतेन तेन तथाभूतायास्तस्याः कथं निरन्तरः सम्बन्धः इति तु वयं न विद्म इत्यर्थः । क्षणं विचार्याहो ज्ञातं मयेत्याह । अपीति । अपिः सम्भावनायां वतेति खेदे हि प्रसिद्धौ उत्तमश्लोकस्योत्तमयशस्वित्वेन ख्यातस्य जल्पैर्निरर्थकसान्त्वनवचोभिर्हृतं चेतो यस्याः सा तथा चैतद्वचनान्यनर्थकानीत्यबुध्वैव सेवत इत्यसौ नास्मद्वदभिज्ञेति भावः । उत्तमश्लोकस्यैव जल्पैरिति वा । यद्वा उत्तमश्लोकानां नारदादीनां जल्पैर्वचनैः स्वपक्षस्थापनपूर्वकपरपक्षनिराकरणात्मककथाविशेषैरिति वा तथा च दोषानुद्भावयन्तं प्रमाणाभासं वदद्भिर्बहुभिः पुरुषैर्वादिभिर्बलात्कारेण स्वमते प्रवेशिता सती पररतिप्रतिष्ठितैरयुक्तं सर्वैर्युक्तमित्येव मन्यत तद्वक्तोक्तयुक्त्या लक्ष्म्याः पराजय इति भावः । अस्मिन्पक्षे परिजल्पो वर्णितः पाययित्वा तत्याज भवादृगिति प्रभोः शाठ्यनिर्दयचापल्याकृतज्ञत्वादेः प्रतिपादनात् उत्तरार्द्धेन स्वयं च विचक्षणताभिव्यक्तेश्च तदुक्तं "प्रभोर्निर्दयताशाठ्यचापल्याद्युपपादनात् । स्वविचक्षणताव्यक्तिभङ्ग्या स्यात्परिजल्पितंमिति उद्धवपक्षे हे अधर ! अं वासुदेवं धृतवतां यादवानां मध्ये मुख्यं यथा श्रीविष्णुः सुमनसो देवान् सुधां पाययित्वा स्वां मोहिनीं तद्रूपं तत्याज तथा श्रीकृष्णः अधरसुधां स्वामस्मान् पाययित्वा अस्मांस्तत्याज भवादृक् भवदवयवसदृशावयवादिमान् अन्यत्समानं श्रुतिपक्षे मायाङ्घ्रिस्पर्शात्त्वं संसारी तदस्पर्शादीश्वरोऽसंसारी तया सेव्ययानपादपद्म इत्याह । सकृदिति । हे अधर ! तच्चरणसेवनादनीश्वरत्वभ्रान्त्या निकृष्ट अनीशया शोचति मुह्यमान इत्यादिश्रुतेः स परमेश्वरः सकलजीवमोहकरीं मोहिनीं मायां स्वां सुधां सत्तास्फूर्तिलक्षणां सकृत् पाययित्वा स्वां स्वाधीनां मोहिनीमिति वा तत्याज जहात्येनां भुक्तभोगामजोऽन्य इत्यादिश्रुतेः इवशब्दः पायने त्यागे च सम्बन्धनीयः तयोर्वस्तुत्वाभवात् असुभिर्मा प्रमा यस्य स इन्द्रियजन्यतत्तद्विषयकयथार्थत्वज्ञानवान् सुमनसस्तस्य सम्बोधनं हे असुमेति असूपलक्षितसङ्घाते आत्मत्वप्रमा यस्येति वा अस्मान्न तत्याज यः सर्वज्ञः सर्ववित् सर्वस्य वशी सर्वस्येशानः मायिनन्तु महेश्वरमित्यादिभिरस्माभिः प्रतिपाद्यत्वेन न जहौ त्वन्तु देहादावात्माभिमानं कृत्वास्मत्प्रतिपाद्यमात्मस्वरूपं विस्मृतवानसीति भावः । नन्वहमनीश्वरत्वेन तस्मादत्यन्तविलक्षणत्वानोपालम्भयोग्य इति चेत्तत्राह । भवादृक् भवत्सखैव सः न तु वस्तुतोऽत्यन्तविलक्षण इत्यर्थः । सयुजा सखायेत्यादिश्रुतेः । ननु स यदि मायां त्यक्तवांस्तर्हि कथं लक्ष्मीरूपेण सा तत्पादपद्मं सेवत इति शङ्कते । परीति । नन्वर्थे नुः समाधत्ते । अपीति । वतेत्वाश्चर्ये हृतचेताः वशीकृतचित्ता सती उत्तमश्लोकजल्पैर्वशाकीर्तनादिभिस्तत्पादपद्मं परिचरति स तु सर्वदोदासीन एव तिष्ठतीति भावः । यद्वा ननु सा तस्मिन्नेवास्ति अधिष्ठानात्पृथगारोपितस्य स्थित्ययोगादित्याशङ्क्याह । परीति । स्वयं लक्ष्म्यादिरूपेण परिणता च

सती तत्पादपद्मं वतेत्याश्चर्ये कथं नु परिचरति तस्यास्तत्परिचरणस्य चानिर्वाच्यत्वात्तद्विरुद्धस्वभावाच्चेति भावः। यद्वा विपर्यये बाधकमाह। परीति। न हि मायावृतं पद्मा परिचरत्यतोऽसौ निर्माय इति भावः॥ १३॥ एवं बहुधोक्तोऽपि पादं स्प्रष्टुमेव प्रवृत्तस्ततश्च सकपोतया प्रक्षिप्तेन पादेन ततोपसृत्य बहुधा झङ्कारानकरोत् तान् श्रुत्वाऽस्मत्प्रसादलाभाय कृष्णं गायतीति मत्वा आह। किमिति। हे षडङ्घ्रे! किं किमर्थं गायसि। ननु तत्र को दोष इति चेत्तत्राह। इहेति अत्र शोकाविष्टे व्रजे रुदतां सन्निधौ रोदनमुचितं न गानमिति भावः। किं च यत्र गानमयुक्तं तत्र बहु गायसि किं च दुःखशमोपयुक्तं गानमपि कृतं चेन्नास्ति तादृशोऽपराधस्त्वं तु क्षतोपरि क्षारं निक्षेप्तुमुद्यतोऽसीत्याह। यदूनामधिपतिं ननु गोपिकानामधिपतिं तथा च रोदनं गानं वा यदि ते कर्त्तव्यं तर्हि गोपिकाधीशसम्बन्ध्येवात्र कुरु सम्प्रत्यसौ यदुपतिरित्यभिप्रेत्य गायसि चेत्तर्हि यादवा एव तवेष्टं विधास्यन्ति न त्वत्रत्या अत गत्वा तत्सन्निधावेव गानं कुर्विति भावः। चतुष्पादपशुर्हि विवेकशून्यो भवति त्वं तु षट्पद इति सार्द्धपशुत्वात्स्थानविधुरत्वात्तथा करोषीति ध्वनयन्ती सम्बोधयति हे षडङ्घ्र! इति यद्वा यद्यपि मद्गानं भवतीनां दुःखजनकं तथापि गानस्वभावोऽहमन्यत्र गन्तुमशक्तत्वादत्रैव गायामीति चेत्तत्राह। हे षडङ्घ्र! इति द्विपादपि बहुदूरे गन्तुं शक्नोति त्वं तु षट्पदत्वादन्यत्र किमर्थं न गच्छसि किमित्यस्मद्दुःखदानाय प्रवृत्तोऽसीति भावः। ननु व्रजे तस्य प्रेमातिशयादहमपि व्रजं दृष्ट्वा प्रसन्नः सन् गायामीति चेत्तत्राह। पुराणं प्रेमातिरेकस्तस्यास्माभिर्बहुशोऽनुभूतो न त्वया वर्णनीयः सकपटैव तत्प्रप्रीतिः स्थितेति भावः। यद्वा यावत्कालं स इह स्थितस्तावत्कालं तस्य प्रीतिरासीन्नाधुनेति भावः। यदि व्रजे एव गानं मया कर्तव्यमिति तवाग्रहस्तर्हि यत्र स्थितस्य तव गानशब्दोऽस्मत्कर्णपथं नावगाहते तत्र स्थित्वा गानं कुर्वित्याह। नोऽस्माकमग्रतः किं गायसि। कुत इति चेत्तत्राह। अगृहाणामिति। न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यत इत्युक्तत्वादगृहिणीनां तेन त्याजितगृहिणीभावानां तथा च दुःखितानामस्माकं दुःखदाने तव को लाभः। यद्वा सर्वेश्वरस्य भगवतो यदुपतित्वेनापि गानं तच्छ्रवणं च नानुचितमिति चेत्तत्राह। अगृहाणामिति। त्वं स्वार्थं गायसि किं वास्मदर्थं नाद्यः यतो वयमगृहास्तेनैव त्याजितपूर्वगृहाः स्वगृहे च न स्थापितास्तस्मात्स्वगृहभगवद्गृहविधुराणां मार्गप्रविष्टानां चणकमुष्टिमात्रभिक्षादानेऽप्यशक्तानामग्रे यानकर्तुस्तव कि फलं सेत्स्यति सर्वा अप्येवंविधा इति बोधकिंतु बहुवचननिर्देशः। ननु युष्मत्प्रसादलब्धैर्युष्मदङ्गोत्तीर्णवसनमालाशीर्वादादिभिरेवाहं कृतकृत्यो भविष्यामि धर्मं वा लप्स्यामीति चेत्तत्राह। पुराणमिति। भगवतो बहुधा दृष्टत्वाच्छ्रुतत्वाच्च तद्गानस्य विस्मयकारित्वाभावादुक्तं फलमपि दुर्लभं नाप्यत्र तद्गाने तव कश्चिद्धर्मविशेषः अस्माकं ते सुखाप्राप्तेः एतेन द्वितीयः पक्षोऽपि निरस्तस्तच्छ्रवणस्यानिष्टापादकत्वात् श्रवणादिनैवं दशाप्रापकत्वेनानुभूतस्य सम्बन्धिगानादिकमितः परं वयं न श्रोष्याम इतोऽधिकफलादर्शनेन पारिशेष्यात्तेन स्वरूपनाशस्यैव सम्भावितत्वात् स च स्वरूपे सति भगवान्कदाचित्प्राप्येतेत्याशावतीनामस्माकमनिष्टोऽतो नास्मदर्थमपीहेदं तव गानमिति। अथ मन्दझङ्कारान्कुर्वन्तं खिन्नचित्तं मत्वा भो भ्रमर! माविषण्णो भव विवेकशून्ये गानोपजीविनि न वयं कुप्यामोऽपि तु तव प्राप्त्युपायं वदाम इत्याशयेनाह। विजयेति। विशेषेण जयते सर्वोत्कर्षेण वर्तत इति विजयः श्रीकृष्णः स चासौ तव सखा चेति विजयसखस्तस्य सखीनामेवाग्रतस्तस्य प्रसङ्ग अस्मत्त्यागपूर्वकपुरस्त्रीवश्यतावाक्यसन्दर्भो गीयतां ततस्ता इष्टास्तेन सम्मानिताः अस्मद्दुर्दशापूर्वकतत्सौभाग्यगानेन त्वया वा सम्मानिताः सत्यस्तवेष्टं विशेषतः करिष्यन्ति। यद्वा कामयुद्धे विशिष्टो विगतो वा जयो यस्य सः स चासौ सखा चेति तथा तस्य सखीनां प्राप्तजयपराजयानामग्रतः सुरतजयपराजयनिरूपकसंदर्भो गीयतां, यद्वा प्रकृष्टो जयश्च सखा यस्य तस्य सखीनां तथा च ता एवंभूतास्तस्य सख्यो वयं त्वेकनिष्ठत्वान्न तथाभूता अत्र प्ररोचनार्थं गानं नापेक्षितमिति भावः। यद्वानवच्छिन्नभगवद्ध्यानलब्धसर्वज्ञया भावी वृत्तान्तोऽपि भूतवन्निर्दिष्टः तथा च विजयस्यार्जुनस्य सखा विजयसखस्तस्य सखीनां हरणादिना प्राप्तख्यानां कल्पयन्ति कल्पयिष्यन्ति यद्वा इन्द्रादिकृतगवेन्द्राभिषेकमारभ्य श्रीकृष्णस्य गोविन्देति नामधेयं यथा प्रतिष्ठितमभूत्तथा स ह्यर्जुनस्तव सखा भविष्यति स च त्वया पालनीय इतीन्द्रोक्तिमारभ्य विजयसख इत्यपीति तदभिप्रायेण भगवति तच्छब्दः प्रयुक्तस्तथा च स्त्रिय एव तत्प्रिया रसिकाश्चेत्यतो गायके तु मया तत्सन्निधावेव गानं विधेयं न तु पुरुषाणां समीप इति यदि तवाभिप्रायस्तर्हि विजयसखसख्यो यथोक्तलक्षणत्वात्तच्छ्रवणधारिण्यो नेदानीं वयमिति भावः। अप्राप्तपुरुषार्थस्यान्येष्टसम्पादनाशक्तत्वात्ता एव लब्धपुरुषार्थत्वात्ता एव तवेष्टसम्पादनायालमित्याशयेनाह। क्षपितेति। कामयुद्धे गाढालिङ्गनेन कठिनभावं प्राप्तेन हस्तेन वा मर्दनेन क्षपिता नाशिता कामकृतकुचपीडा यासां ता इति सकटाक्षमुपहासः अत्र विजल्पः तदुक्तं "व्यक्तयासूयया गूढमानमुद्रितलीलया। अलं द्विषि कटाक्षोक्तिर्विजल्पो विदुषां मत" इति उद्धवपक्षे हे बहुषडङ्घ्रे! पुष्करमालासौरभाकृष्टानां बहूनां षडङ्घ्रीणां तत्सन्निधौ विद्यमानत्वात् बहवः षडङ्घ्रयो यस्य स तथा समानमन्यत् श्रुतिपक्षे ननु प्रकृतेः परमेश्वरपराधीनत्ववर्णनमनुपपन्नं परमविद्वद्भिः सांख्यैरीश्वरमनङ्गीकृत्य त्रिगुणात्मिकायाः प्रधानापरसंज्ञायाः प्रकृतेः स्वतन्त्राया एव जगत्कारणत्वाभिधानात् न चाचेतनायाः प्रकृतेः स्वतन्त्राया जगत्कारणत्वमनुपपन्नं तदैक्षतेत्यादिश्रुती जगत्कारणस्येक्षितृत्वश्रवणादिति वाच्यम्, अचेतनेऽपि प्रधाने चेतनवदुपचारात् दृष्टो ह्यचेतनेऽपि कूले कूलं पिपतिषतीति चेतनवदुपचारः यथा लोके चेतनो देवदत्तादिः स्नात्वा भुक्त्वा चापराह्णे रम्यं नगरं प्राप्स्यामीत्यालोच्यानन्तरं नियमेन तथैव प्रवर्तते तथा प्रधानस्यापि महदाद्याकारेण नियमेन प्रवर्तनात्तत्र चेतनत्वोपचारः तत्तेज ऐक्षत ता आप ऐक्षन्तेति वत् जहात्वेनामित्यादिश्रुतयस्तु मुक्तजीवपरास्तस्मात्कथमुक्तमीश्वरः सर्गाद्यर्थं स्वशक्तिभूतां प्रकृतिमधितिष्ठति जहाति चेति चेत्तत्राह। किमिहेति। श्रोत्रं चक्षुः स्पर्शनं च

रसनं घ्राणमेव च अधिष्ठाय मनश्चायं विषयानुपसेवत" इत्युक्तं मनः षष्ठानीन्द्रियाणि अङ्घ्रयो गमनागमनसाधनानि यस्यात्मनः स षडङ्घ्रिस्तस्य सम्बोधनं हे षडङ्घ्रे इह स्वस्वरूपभूतपरब्रह्मोपलब्धिसाधनाऽधिकारिशरीरे ऊनां न्यूनां जडात्मत्वादपरां "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परा"मिति भगवतोक्ता बहुस्वतन्त्रेयमित्यादिना पुनः पुनरुत्कृष्टात्वेन यद्गायसि तत्राप्यस्माकं श्रुतीनामग्रतः श्रुतिसिद्धान्तत्वेन तत्किं न किमपि तद्गानमयुक्तमिति यावत् इह श्रुतिमस्तकेषु जडत्वेन प्रतिपादितामिति वा तर्हि किं युक्तमिति चेत्तत्राहाधिपतिमिति। अवासुदेवाधिपतिं प्रकृत्यधिष्ठातारं तत्सत्तास्फूर्तिप्रदत्वेन ततोऽपि पुरातनत्वात्पुराणम् अवासुदेवः गृहाणाम् अयमर्थः स य एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति प्रकृतस्य जगत्कारणस्यात्मत्वेनोपदेशादनात्मभूतायाः प्रकृतेर्न स्वातन्त्र्येण जगत्कारणत्वं श्रुतिसिद्धम् उदाहृतदृष्टान्तेष्वपि सदधिष्ठितृत्वप्रयुक्तमेवेक्षितृत्वमतः प्रकृतिस्वातन्त्र्यवादस्य श्रुत्यनभिमतत्वातदनुसरणं त्वया न कार्यमिति यः सर्वकारणं भगवान्वासुदेवः स एव त्वं नान्योऽतोऽहमेव वासुदेव इति स्वात्मत्वेन तं गृहाणेति सम्बोधनाशयः यद्वा अधिपतौ मा प्रमा यस्य स तस्य सम्बोधनं हे अधिपतिम तथा च श्रुतिबहिर्भूतं मतमुपेक्ष्य सर्वानर्थहेतुमायातरणार्थं तदधीशविषयकप्रमामेव सम्पादय "दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त" इति भगवद्वचनादिति भावः। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः सततं कीर्तयन्तो मामित्युक्तत्वात्प्राप्त्युपायं श्रवणादिकमाह। विजयेति। "ब्रह्म ह देवेभ्यो विजिग्ये ब्रह्मणो वा एतद्विजये महीयध्व"मित्यादिश्रुत्या विशेषेण जयो यस्य स विजयः परमात्मा सयुजा सखायेति श्रुत्या तत्सखा जीवात्मा तस्य सम्बोधनं हे विजयसखेति नोऽस्माकं सखीनां "यतो वा इमानि भूतानि जायन्ते सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं सत्यं ज्ञानमनन्तं विज्ञानमानन्दं ब्रह्म अदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्तृ नान्योऽतोऽस्ति द्रष्टेत्याद्याना तस्मिन् प्रत्यगभिन्ने परामात्मनि प्रसङ्गः समन्वयो यस्य तस्य सखीनामस्माकमिति वा विजयसखत्वात्तवेदमेवोचितमिति संबोधनाशयः तत्प्रसङ्गं विशिनष्टि। क्षपितेति कुत्सितं चरति अनर्थहेत्वहंकाराद्यात्मना परिणमत इति कुचरु अज्ञानं तस्माज्जातः सर्वोऽपि संसारः कुचरुजः क्षपितो नाशितः समूलः कुचरुजो येन सः एवं सम्मानिता उक्तसख्यस्तद्गानपरायणस्य तवेष्टं मोक्षं कल्पयन्ति प्रतिपादयन्ति "तरति शोकमात्मवित् ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भवती"त्यादिश्रुतेः वर्तमानापदेशेन मोक्षप्राप्तेः कालान्तरसाध्यत्वं वारयति "अत्र ब्रह्म समश्नुते विमुक्तश्च विमुच्यते ब्रह्मैव सन् ब्रह्माप्येती"त्यादिश्रुतेः ॥ १४ ॥

गूढार्थदीपिनी

सुमनसः पुष्पाणि। भवादृक् कृष्णवर्णो दुर्मनाः। बत अहो पद्मा लक्ष्मीः कथं तं परिचरति सेवते। जल्पैः मिथ्याप्रलापैः आकृष्टचेताः ॥ १३ ॥ पुराणं बहुशोऽनुभूतं कृष्णं नोऽस्माकम् अग्रे किं किमर्थं गायसीत्यन्वयः। अगृहाणां तेनैव त्याजितगृहाणाम्। विजयस्य अर्जुनस्य सखा कृष्णः तस्य सखीनाम् अग्रतः तत्संदेशः कथ्यताम्। इष्टाः प्रियाः माथुरस्त्रियः ते इष्टम् अभीष्टं पूरयिष्यन्ति। कुतः आलिङ्गनेन क्षपिता अपास्ता निवृत्ता कुचरुक् कामपीडा यासां ताः ॥ १४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काश्चित् श्रुततत्त्वा आहुः। सकृदिति। भवादृक् यथा त्वं सुमनसः पीतमधूनि पुष्पाणि त्यजसि तद्वत्प्रियवस्तुत्यागित्वात्त्वत्समः मोहिनीमधरसुधां नः सकृत्पाययित्वा बतेति खेदे सद्यः अस्मान् तत्यजे नु वितर्के अपि अहो पद्मा श्रीः तत्पादपद्मं कथं परिचरति। अन्या आहुः उत्तमश्लोकस्य उत्तमकीर्तेः जल्पैर्मनोहरैर्वचनैः हृतचेताः मोहितचित्ता परिचरतीति ॥ १३ ॥ भ्रमरशब्दं श्रीकृष्णगुणगीतं कल्पयित्वा अन्या आहुः। किमिहेति हे षडङ्घ्रे! पुराणं पुरातनं बहुशोऽनुभूतं यदूनामधिपतिं कृष्णम् अगृहाणां वनचरीणां नोऽस्माकमग्रतोऽग्रे किञ्चिमर्थं त्वं बहु गायसि विजयसखस्य अर्जुनमित्रस्य सखीनां पुरवासिनीनामग्रतस्तत्प्रसङ्गो गीयताम् ताः इष्टाः कृष्णस्य प्रियाः क्षपिता कुचरुक् यासां ताः ते इष्टं वाञ्छितं कल्पयन्ति दास्यन्ति ॥ १४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तदेव देवकितवत्वं व्यक्तं व्यनक्ति। सकृदिति। सकृदेकवारमधरसुधां स्वां मोहयतीति मोहिनी। ल्युडन्ततया ङीपि पाठः। मोहिनी मोहोऽस्या देयत्वे नास्तीति मोहिनीत्यपि पाययित्वा। तर्हि मनोरथपूर्तिर्जाता किमतोऽपि कैतवं पश्यसीत्यतो रुचिमुत्पाद्यातृप्तायाः पुनरप्राशने कथं न कितवस्तव देव इति बोधयति सकृदित्यनेन। मां सुमनस इव पुष्पं सकृदेकदैवाघ्राय यथा त्यजन्ति तथा कस्त्यजेत्। स यथोदास्ते त्वमपि तथोदास्स्वेत्यतः श्रीरपि न शक्ता त्यक्तुं कथा काऽस्माकमिति कथयति। भवादृगिति। भवं संसारं न पश्यतीति नित्यमुक्ता रमाऽपि। समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य। नित्यमुक्ता इत्यादेर्भवादृग्रमा तत्पद्मकिञ्जल्कपादं तस्य पद्मकिञ्जल्कवाद्वद्यमानः पादस्तं कथं परिचरति कथं सेवते। एवमव्यवस्थितं मत्वा सेवते संसाररहिताऽपि वयं तु सांसारिक्यः कथं कथय त्यक्ष्याम इति भावेनाह। अपीति। अपि किञ्चोत्तमश्लोकस्य जल्पैर्हृतानि चित्तानि यासां तास्तद्याहृतहृतचेतसः कथं त्यक्ष्यामो बत खेदे। अपि मधुरीस्था अप्युत्तश्लोकजल्पैर्हृतचित्ता एवं भवेयुर्बत हर्षे इति वा।

पाययित्वा यूयमपि बत किलेति कस्त्वदन्यो निर्घृणस्त्यजेदिति वा । हे अबला बलाद्युष्माभिः पीतं न मया प्रीतिपूर्वकं पायितमिति नेत्यप्याह । हे अ भगवन्निपिबेतेति पाययित्वेति मामिति मदाद्या इत्यर्थः । सुमनसस्त्यागहेतुदौर्मनस्यरहिता इत्यप्यर्थः । सौन्दर्याभावादित्यपि न त्याज्या इत्याह । सुमवत्तिलकुसुमवन्नासिका यासां ताः । प्रथमाबहुवचनम् । प्रभृतिग्रहणस्य प्रकारार्थत्वाज्ज्ञापकं त्वत्र ककुद्दोषणी इति भाष्यम् । तदनुगमानीतराङ्गानीति सुन्दरीरति न स्मरपरवशतेति त्यागः कथमसम्भावित इत्यत आह । ईर्मन्मथो वसत्यास्मिन्स वसन्निति यशो यस्य स इव सद्य इति । यं यशो यानयोस्त्यागे वाते यातरि दातरीति विश्वः । इति धाष्ट्यदिव देवत्याग इति भावः ॥ १३ ॥ कृष्णविनेयमनुनयनायायातमिव सञ्चारं कुर्वन्तं निरीक्ष्य न तव गानेनात्र लभ्यं तत्र गच्छानच्छेष्ठ सिद्धिः स्यादिति वक्ति । किमिति । हे षडङ्घ्रे षट्पद षट्सु कामक्रोधादिष्वङ्घ्रिर्यस्य तत्सम्बुद्धिर्वा । अधः कामादेः । हे उद्धव यदूनामधिपतिं किं बहु यथा तथा । उद्धवसम्बोधनपक्षे ईषदूनः षडङ्घ्रिरिति बहुषडङ्घ्रिः । बहुच्प्रत्ययो वा । तस्य सम्बुद्धिः । नोऽग्रतः पुरतो गायसि । अङ्गनागानयोग्य इति युष्माकं धुरि मया क्रियत इति नेत्याह । अगृहाणां न इति । न विद्यते गृहं यासां तास्तासां । सोऽपि निर्जनसदन इत्यतो नेदानीं तथेत्याह । पुराणमिति । पुरे मधुरापुरेऽणतीति सन्तं यदूनां ये न ऊन उज्झिता तां मां निरीक्ष्य पुराणमतीतं वृत्तमिह किं बहु गायसीति वा । नत्वत्पुरत आसामग्रत इति न वदता अपि मद्वदयोग्या इत्याह । अगृहाणामिति । ममस्वभावोऽयं न हातुं शक्य इत्यतस्तत्स्थाने स्थानं वदामस्तत्र गच्छ यथेच्छं गायेति वक्ति । विजयसखेति । विजयोऽयं कंसहिंसासादितो जयो विशिष्टस्तस्य सखा तस्य कृष्णस्य सख्योऽधुना मधुनगरीचन्द्रमुख्यस्तासामग्रतस्तत्प्रसङ्ग कृष्णवार्ता त्वया गायतां । ताश्च क्षपितकुचरुजः क्षपिता कुचानां रुक् तदपीडनजो रोगो यासां ताः श्रुतस्वालिङ्गितकृष्णकथा इति ते इष्टा प्रेमपात्राणि ते इष्टं कल्पयन्ति गातुस्तवाभिलषितं योषितस्ता ददतीति भावः । विजयोऽर्जुनस्तस्य सखेति विजयसखस्तस्य सखीनामग्रतस्तां कथां त्वं गाय । परस्मैपदे लोट् । तत्प्रसङ्गक्षपितेति पाठे तत्प्रसङ्गेन क्षपिता कुचरुग्यासां ता इति पदमेकं वा । विजयसखसखीनामित्यनेनैष्यज्ज्ञत्वं पुंसखिताविषयेऽस्माकमेवं देवस्तनुयादिति स्वविषये मतिहीनतां ध्वनयति । विजयसस्वसखीनां गायतामन्येषां भ्रमराणां ते च तत्प्रसङ्गक्षपितरुज इष्टाः पुनरार्यं इष्टं कल्पयन्तीति वा ॥ १४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु कथमेवं धाष्ट्र्येन भगवति दोषा आरोप्यन्ते अस्मास्वपि चेत्याशङ्क्याह । सकृदधरसुधामिति । यो हि यं वञ्चयति स तस्याक्रोशं करोति भगवांश्च सर्वथास्मान्वञ्चितवान् वञ्चनामेवाह । अधरसुधां पाययित्वा तत्यज इति । अस्मान् त्यक्त्वा गतः अधरेत्यनेन उच्छिष्टतया लोके जातिभ्रंशो निरूपितः मोहिका च सा सुधात्वात् पीता ननु तह्युपकार एव कृतः यो हि जलमपि पाययित्वा गच्छति सोऽप्याक्रोशं नार्हति किम्पुनः सुधां सुतरां लोभात्मके स्थापितां तत्राह । मोहितीमिति । मोहिका हि सा नहि मोहकानां लड्डुकादिकं दानफलमुपकारं वा जनयति । नन्वन्येन तर्हि तदुत्तारणं क्रियतां किमाक्रोशेनेत्यत आह । स्वामित्यन्योपायसहस्रेणापि तत्कृतो मोहो निवर्त्तयितुं न शक्यते । ननु मोहनस्य न फलं किञ्चिज्जातं रसश्चोत्तमः पीत इत्याशङ्क्याह । सकृदिति । बहुवारं चेत्पाययेत् तथाप्यन्ततः सुखं भवेत् किन्तु सकृदेव अन्यथा सकृदेवाधरसुधाप्राप्त्या पुष्पाणि च यथा मृदितानि सर्वकार्यानुपयुक्तानि भवन्ति तथा भगवता वयं वीर्यविवेकादिभिर्हीनाः कृताः अतोऽस्माकं सर्वनाशं कृत्वा यदर्थमस्माभिः सर्वं त्यक्तं तमपि हृत्वा इतो गतवान् तर्हि कथं न धृत इत्याशङ्क्याह । सद्यस्तत्यज इति । भवादृगिति भ्रमरतुल्यः स हि पीत्वा निःसारान् कृत्वा गच्छति तथा भगवानपि पाययित्वेति विशेषः, अग्रेऽपि रसानुत्पादनार्थमन्यथा कमलादिवत् सूनरसः स्यात् अतः पाययित्वा भगवान् गतः पीत्वा च भ्रमर इति वैषम्यात् समाधानं परिहृतं सुधापानेनासक्तिर्जनिता अधरसंबन्धेन लोकस्त्याजितः मोहेन विवेकाद्यभावात् ज्ञानभक्ती निवारिते परित्यागादाश्रयोऽपि निराकृतः अतोऽस्माकं न पूर्वसिद्धा इमे लोका अपि भगवानित्युभयतो भ्रष्टा वयं जाता इति युक्त एवोपालम्भः । ननु भवत्य एव भगवतो जाताः भगवदीयत्वमेव परमपुरुषार्थः अतः कथं शोक इति चेदुच्यते नहि भगवदीया भगवांस्त्यजति त्यक्ताश्च न भगवदीयाः प्रत्यासत्तिश्च न भवति मोहेन तत्र दृष्टेर्गतत्वात् । ननु भगवान् मोहं किमिति सम्पादयति नापि स्वार्थंत्यक्तत्वात् नापि तासामर्थे दोषनिवृत्तावपि गुणाभावात् दोषेचावश्यकदुःखनिवृत्तिः तदभावाद्दोषश्च तस्मादयुक्तं मोहनमिति चेत् सत्यं भवेदेतदेवं यदि तासां मनसो भगवत्यनुवृत्तिर्न स्यात् अतो मोहाभावे स्वस्थानगमनकृतोऽपि निरोधो व्यर्थः स्यात् तात्पर्याज्ञानादयं मोहः एतत्कृतो वा अग्रे स्मरणेन च परिहर्त्तव्य इति तदर्थमेव वायमुद्योगः । ननु भगवानेतादृश एव तर्हि सर्वाऽप्येकविधो भवति तस्मान्नोपालम्भ्य इति चेत्तत्राह । परिचरतीति । स्त्रीणां मध्ये मूलभूता चतुरा लक्ष्मीः सा कथं भगवन्तमेतादृशं ज्ञात्वा सेवितवती । अथ साप्येवं वञ्चिता तथापि केनचिदुपायेन सा पुनः सेवते तथोपायश्चेद्ज्ञातः स्यात् तदास्माभिरपि सेव्यते इति प्रश्नार्थो वा कथं शब्दः पद्मेत्युत्तरं वा साहि परिचरणे माति अत एव चरणस्य कमलत्वं सापि कमला चरणात्मकं तं प्राप्य सा तिष्ठतीति न तस्याः कापि क्षतिः गोपिकानामपि भूमौ निरन्तरं चरणे वा सम्बन्धे जाते घटते नान्यथेति अपि च पुनश्च पद्मासम्भूतेति वाक्यात् रूपान्तरेषु सौम्येष्वप्यादित्वोऽत्यन्तं कठिनो भ्रमणश्च स्वभावतश्च तत्र कथं सेवां कृतवतीति प्रश्नः उपालम्भो वा तादृश एवायमवतारः प्रति भातीति भावः । एकत्र स्थैर्याभावात् । ननु लक्ष्म्या अवतारो न जात इति शङ्कां वारयितुमाह नु इति वितर्के साहि भगवन्तं विना क्षणमपि स्थातुमशक्तेति पद्मेति प्रमाणं चोक्तं परिचरतीति

वर्तमानप्रयोगादिदानीमपि सेवा लक्ष्यते भगवांस्तूदासीन इति तु निर्विवादं तर्हि का उपपत्तिरिति चेत्तत्राह । अपीति । प्रमाणमत्र बाधितं परं किञ्चित्सम्भाव्यते उत्तमश्लोकजल्पैः हृतचेताः प्रायेण तथा सति बत खेदे उत्तमश्लोकाः कीर्त्तिमन्तो ये भक्ताः ये नारदादयः तेषां जल्पाः स्वपक्षस्थापनपूर्वकपरपक्षनिराकरणरूपाः कथास्तेन वादिन्यायेन प्रायेण सा परिगृहीता यथानभिप्रेतमपि युक्त्या साधितमर्थं प्रतिवादी मन्यते तर्हि लक्ष्मीपक्षेऽपि कथं न युक्तिरिति चेत्तत्राह । उत्तमश्लोकेति । तेषां तु कीर्त्तिरुत्तमा लक्ष्म्यपेक्षयापि अतो लोके प्रतिष्ठितत्वात् भक्तानामेव जयः न लक्ष्म्याः प्रायेणैवं भविष्यतीत्यर्थः ॥ १३ ॥ एवं भ्रमरगतिं पादस्पर्शत्वेन निषिध्य तदागमनं च परिहृत्य तद्गतं शब्दं निषेधति । किमिह बहुषडङ्घ्रे इति । उद्धवस्याग्रे वाक्यमप्यनेन निषिध्यते कालगतानि सर्वाण्येव प्रमाणानि चेत्तैः प्रमाणैः भगवद्गता धर्माः दोषाः परिहर्तुं गुणा वा वक्तुं शक्याः अतो व्यर्थमिति त्रिष्वपि साधारणं हे षडङ्घ्रे इह अस्मत्समीपे किमिति गायसि । नन्वन्यत्र गन्तुमशक्त इति चेत्तत्राह । बहुकिमिति । गायसीति स्थानान्तरे गानं नापि कदाचिद्गानशङ्का यतो बहु गायसि । ननु भवतीनां स्वामी कृष्ण इति भवत्समीपे गानं युक्तमिति चेत्तत्राह । यदूनामधिपतिमिति । यादवानामधिपतिर्नत्वस्माकं साम्प्रतम् अतो यादवानामग्रे गानमुचितं नत्वन्येषां ननु सर्वेश्वरो भगवान् यादवत्वेऽपि न दुष्यति अतः सर्वेषामुपकारार्थं स्वार्थं च सर्वत्रैव गानमुचितमिति चेत्तत्राह । अगृहाणामिति । गृहरहितानां वयं त्यक्तगृहा मार्गे उपविष्टाः नाप्यस्माकं स्वगृहं नापि भगवद्गृहमिति तादृशीनामग्रे गानेन किं फलं भवेत् गृहस्था एव हि किञ्चित् दातुं शक्ताः । ननु त्वमेका न चेत्प्रयच्छसि अन्या दास्यन्तीत्याशङ्क्याह । न इति । सर्वा एव वयं तादृश्यः ममाधुनाद्युपकाराभावेऽपि धर्मो भविष्यतीति भवतीनां च अपूर्वार्थप्रदर्शनेन सन्तोषे आशीर्वादेन वा कृतार्थता भविष्यतीति कथङ्गानं निषिध्यत इत्याशङ्क्याह । पुराणमिति । नायमपूर्वो वादः किन्तु बहुधैव श्रुतो भगवान् । ननु भगवद्गुणान् श्रुत्वा न कोऽपि विरज्यते । कथमेता विरक्ता इति चेत् । सत्यं पूर्वं श्रवणेन हि वयमेवं जाताः इतोऽधिकं च फलं न पश्यामः पुनश्चेत् श्रोष्यामः स्वरूपेणापि निवृत्ता भविष्याम इति वरमेतदुपेक्षया अश्रवणमेव स्थिते स्वरूपे तु भगवान् कदाचित्प्राप्येतापि संसारपतनभयं चेत् सम्भाव्येत तदा पुरातनत्वादेव सुलभत्वात्तदैव गानं भवत्विति साम्प्रतं नोपयोग इति भावः । ननु वयं गायका एव भगवांस्त्रीप्रियः पुरुषास्तथा न रसिकाः स्त्रीणां चाग्रे गानमावश्यकमतोऽनन्यगत्या गानं क्रियत इति चेत्तत्राह । विजयसखसखीनामिति । सन्ति स्त्रियः सुखिताः विजयसखस्य भगवतः सख्यः भगवता तुल्यभावं प्रापिताः परमानन्दयुक्ताः । यदर्थमर्जुनवत् अलक्ष्यादि मत्स्यादिवेधमपि कृत्वा यथेष्टलक्ष्मणाप्रभृतीनां विवाहं करोति विविधश्च जयस्तस्येति लुण्ठने वधे एव स्त्रियः प्राप्यन्ते अर्जुनेनापि दीयन्ते सखित्वात् स्वयमपि तादृशः । अर्जुनसखित्वेन कालरूपतया सर्वमारकत्वं चोक्तं ततश्च तत् स्त्रीणां विलापे दुःखसम्मार्जनं कुर्वन् सखेव भवति ता गतभर्तृकाः भोगनिरपेक्षाः कथायां मुख्याधिकारिण्यः ननु वयं भोगसापेक्षा इति भावः । वक्रोक्त्या वा द्योतितास्त्वमारयिष्यन्तीति । यथास्ति प्रभृतयः विजय एव प्रकृष्टजयः सखा यस्य सखीनां योऽहि सर्वत्रजयं प्राप्नोति तमेव मन्यन्ते नान्यान् वयं त्वेकनिष्ठा इति प्ररोचनार्थमपि गानं नोपेक्ष्यत इति अतस्ताःसर्वा एव क्षपितकुचरुजः सत्यः युद्धे कठिनभावं प्राप्तेन हस्तेन मर्दितरुजः भारक्लेशनाशेन सूचिताः ते इष्टाः स्तव इष्टं सङ्कल्पयिष्यन्ति यद्वेष्टं तव नत्यप्राप्तपुरुषार्थः काश्चिदन्येष्टं सम्पादयति अत उद्धवं प्रत्यपि तावद्दौत्यं कर्त्तव्यं भगवद्गुणवर्णनेन नास्मासु अनुभूतेऽर्थे वचनस्य दुर्बलत्वात् कालपक्षेऽपि ऋतुभिः षडङ्घ्रिर्भवति सम्वत्सरः स हि ऋतुभेदैत कोकिलादि शब्दैर्वेदैश्च भगवन्तं स्मारयति ते च शब्दाभगवत्सहितानां ज्ञानिनां धर्मपराणां वा उदासीनानां भक्तानां वा भगवति मिलितानां सुखदा भवन्ति नत्वस्मत्सदृशीनां सर्वत्रा सक्तिरहितानां धर्मिणामेवापेक्ष्यमाणानां कालादि निरपेक्षाणां तैः शब्दैः सुखं भवात पूर्वावस्थाप्राप्तौ तु तादृशशब्दानां सुलभत्वात् तदानीमेव सर्वथा श्रवणे न किञ्चित् प्रयोजनत्यिर्थः ॥ १४ ॥

श्रीसुबोधिनी–सार

स्वां स्वकीयां मोहिनीमधरसुधां सकृदेकवारं पाययित्वाऽस्मान्सद्यः तत्यजे भवादृक् रूपतो गुणतस्त्वादृशः सुमनसः पुष्पाणि त्वमिव पद्मा लक्ष्मीः तस्य पादपद्मं कथं सेवते । अन्याह । उत्तमश्लोकस्य हरेर्जल्पैर्मिथ्याभिहृतं चेतो यस्याः सा इति तदभिप्रायः बतेति खेदे हि युक्तम् ॥ १३ ॥ अस्मत्तुष्टये झङ्कारान् कुरुत इति मत्वाह हे षडंघ्रे अगृहाणामशृण्वतीनां नोऽस्माकमग्रतो यदूनामधिपतिं श्रीकृष्णं पुराणं किं किमर्थं बहु गायसीह विजयस्यार्जुनस्य सखा श्रीकृष्णस्तस्य सखीनामग्रतः तस्य प्रसंगो गीयताम् इष्टाः प्रियास्तस्यालिंगने न क्षपिताऽपहृता कुचरुग् यासां ताः तवेष्टं कल्पयन्ति वाञ्छितं दास्यन्ति ॥ १४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'किमिति एवमवजानीथ ? किं वस्तेनापकृतम् ?' अत आह—सकृदिति । सकृदेकदेव स्वामधरसुधामस्मान् पाययित्वा सद्यः अविलम्बेनैव तत्यजे । त्यागमात्रे दृष्टान्तमाह—सुमनस इवेति । भवादृक् । त्वादृशः कृतघ्नो भ्रमरो यथा रसं पीत्वा सुमनसः कुसुमानि त्यजति तद्वत् । अयं तु पाययित्वा तत्यजे । एतावांस्तु विशेषः । 'तस्य तर्हि कोऽपराध ? नहि तेन युष्माकं किञ्चिदपि गृहीतम्' इत्याशङ्क्याह—मोहिनीमिति । लोकवेदमर्यादाविस्मारिकामित्यर्थः । अतो यल्लोभेन लोकद्वयं नष्टं तदपि सुखं न लब्धमित्यस्माकं सर्वस्वहानिर्जातेत्याशयः । आश्चर्यमाह—परिचरतीति । वयमनभिज्ञत्वादेवं वञ्चिताः । पद्मा

सर्वोत्तमा परमचतुरा लक्ष्मीस्तस्य कृतघ्नस्य पादपद्मं कथं नु परिचरति सेवते ? एवमाश्चर्यं कृत्वा स्वयमेव तत्र कारणं तर्कयन्त्याह—अपि बतेति । अपीति सम्भावनायाम् । बतेति वितर्के । एवमेव सम्भवतीत्यर्थः । उत्तमश्लोकाः पुण्यकीर्तिमन्तो ये तद्भक्ता नारदादयस्तेषां जल्पैः श्लाघावचनैर्हृतमाकृष्टं चेतो यस्यास्तथाभूता सत्येव तत्पादपद्मं सेवते इत्यन्वयः । हीत्यवधारणे ॥ १३ ॥ 'बहुधाझङ्कारं कुर्वाणं तमस्मत्प्रसादलाभार्थं श्रीकृष्णं गायति' इति मत्वाह—किमिति । 'गमनसाधनानां चरणानां बहुत्वादन्यत्र कुतो न गच्छसि' इति सूचयन्ती सम्बोधयति—हे षडङ्घ्रे इति । इह नोऽस्माकमग्रतो यदूनामधिपतिं ब्रजाधिपतित्वं विहाय स्वीकृतयदुपतित्वं कृष्णं किमर्थं बहु गायसि ? 'किञ्चिल्लाभार्थम्' इति चेत् 'गृहे स्थिता एव दाने समर्था भवन्ति, वयं तु तदर्थं त्यक्तगृहाः तेन त्यक्ताश्च । अतो न किमपि दातुं समर्था' इत्याशयेनाह—अगृहाणामिति । किंच 'नवीनगानश्रवणे आह्लादो भवति, तत्कापट्यस्य तु बहुशोऽनु भूतत्वात् किं तद्गानश्रवणेन' इत्याशयेनाह— पुराणमिति । अतो यदि किंचित् प्राप्तुमिच्छसि तर्हि विजयस्यार्जुनस्य सखा यः कृष्णस्तस्य सखीनामग्रे तस्य कृष्णस्य प्रसङ्गो गीयताम् । ताश्चेष्टास्तद्गानेन सत्कृतास्ते तव इष्टं कल्पयन्ति शीघ्रं सम्पादयिष्यन्ति । शैघ्र्यद्योतनार्थो वर्तमानप्रयोगः । तत्र हेतुमाह—तदालिङ्गनेन क्षपिता दूरीकृता कुचरुग् यासां ता इति । कृष्णकृतसन्मानेन सर्वसम्पादने समर्था इत्याशयः ॥ १४ ॥

अन्वितार्थप्रकाशिका

सकृदिति । स मधुपतिः सकृदेकदैव मोहिनीं स्वामधरसुधामस्मान्पाययित्वा भवादृक् त्वादृशः कृतघ्नो दुर्मना भ्रमरो यथा रसं पीत्वा सुमनसः कुसुमानि त्यजति तद्वत् शोभनमनसोऽस्मान् सद्य एव तत्यजे । तङार्षः । किञ्च सुमनसो देवश्रेणीरिव विष्णुः कृष्णोऽस्मान् सुधां पाययित्वा सुमनसो मालतीर्भवादृक् भ्रमर इवास्मांस्तत्याजेति पायनत्यागयोः कर्मणि कर्त्तरि च पृथग्दृष्टान्तः । देवपक्षे अधरनिकृष्टेति सम्बोधनम् । पद्मा परमचतुरा लक्ष्मीस्तस्य कृतघ्नस्य पादपद्मं कथन्नु परिचरति सेवते । अपि सम्भावनायाम् । बत वितर्के । एवमेव सम्भवतीत्यर्थः । उत्तमश्लोकाः पुण्यकीर्तिमन्तो ये तद्भक्ता नारदादयस्तेषां जल्पैः श्लाघावचनैः उत्तमश्लोकस्य कृष्णस्य जल्पैः मिथ्याप्रलापैर्वा हृतमाकृष्टं चेतो यस्यास्तथाभूता सत्येव तत्पादपद्मं सेवते । वयं तु न लक्ष्मीरिवाविचक्षणाः इति भावः ॥ १३ ॥ किमिति । हे षडङ्घ्रे साद्धंपशो ! त्वम् इह अगृहाणां गृहादिरहितानां नोऽस्माकम् अग्रतः पुराणं बहुशः पूर्वानुभूतकपटगुणं यदूनामधिपतिं कृष्णं किं किमर्थं बहु गायसि । अतः विजयस्यार्जुनस्य सखा श्रीकृष्णः यद्वा विजयत इति विजयः कृष्णः स चासौ सखा त्वद्बन्धुः तस्य सखीनां पुरस्त्रीणामग्रे तस्य हरेः प्रसङ्गो गीयताम् । ताश्च तदालिङ्गनेन क्षपिता कुचरुग्यासां ता इष्टाः कृष्णप्रियाः तेन पूजिता वा तत्सौभाग्यवर्णनप्रसन्नाः सत्यः ते तव इष्टं कल्पयन्ति शीघ्रं सम्पादयिष्यन्ति ॥ १४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु श्रीकृष्णेन तव कोऽपराधः कृतो यतस्त्वं तं निन्दसीति चेत्तत्राह सकृदिति मोहजनिकां स्वास्बकीयामधरसुधामसकृदेकचारं पाययित्वा सकृदित्युक्तिस्तु विभ्रांतत्वेन कुतः मुहुर्मुहुस्तस्याधरसुधायाः पीतत्वात् भवान् सुमनसः पुष्पाणीवमदृक् नवनवप्रियत्वेनत्वत्तुल्यः श्रीकृष्णोऽस्मान् सद्यस्तत्यजे अहो बत खेदे पद्मा अतिनिपुणा लक्ष्मीरपितस्यैवमस्थिरचित्तस्य पादपद्मं कथं परिचरति उपास्ते तत् वयं न विद्मः क्षणं विचार्य अहो मयाज्ञातमिताह । अपीति । अयमुत्तमश्लोक इति जल्पैः नारदादीनां वाक्यैः । यद्वा उत्तमश्लोकस्य संजल्पैः प्रलोभनकपटयुक्तिवाक्यैः यतो हृतचेता अस्ति अतिनिपुणायाः श्रियोप्येवं तर्ह्यस्माकं मूढानां तु काकथेतिभावः ॥ १ ॥ सांप्रतं भ्रमरजातिरवं कुर्वाणमालक्ष्य उत्प्रेक्षां कुर्वती सत्याह किमिति । हे षडंघ्रे मधुपपुराणं व्रजे बहुकालमनुभूतं तं यदूनामधिपतिं । अगृहाणां श्रीकृष्णा शक्त्या गृहासक्तिहीनानां नः अग्रतः इह दुःखिते व्रजे त्वं किं बहुगायसि तद्विरहबाणेन हतानामस्माकमग्रे गानं मा कुर्विति भावः । तस्य मथुरा सुंदरीष्वा सक्तस्य प्रसंगो गुणवर्णनं विजयसखस्यार्जुनमित्रस्य श्रीकृष्णस्य अधुना याः सख्यस्तासामग्रतस्त्वया गीयतां यतः तास्तस्य ईष्टाः स्निग्धाः संति । अतः परिरंभणादिना क्षपिता दूरीकृता कुचरुग्मदनकृतस्तनपीडा यासां एवंभूताः संत्यः ते तव इष्टं प्रियं वस्तु कल्पयंति कल्पयिष्यन्ति अर्पयिष्यन्ति ॥१४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु किमित्येवमवजानीथ, किं वस्तेनापकृतमत आहुः ॥ सकृदिति ॥ मोहिनीं तापत्रयविस्मारिणीं, स्वां स्वासाधारणां, अधरसुधामधरामृतं सकृदेकवारं, पाययित्वा, अस्मान् सद्यः, तत्यजे त्यक्तवान् । क इव । त्वमिव । त्वं यथा सुमनसः पीतमधूनि पुष्पाणि त्यजसि, तद्वत् । अतः हे मधुप, सः भवादृक त्वद्विध एव । पूर्वश्लोके त्वमीदृगित्युक्तमत्र तु स भवादृगित्युक्तं तस्यायं भावः । त्वं तादृशः, स तु त्वादृशः, एवमहो युवयोरेष स्वामिभृत्यभावो विधात्रैव निर्मित इति सूचितम् । बत अहो, तस्याकृतज्ञस्यास्य पादपद्मं, पद्मा विचक्षणा श्रीः अपि, कथं नु परिचरति सेवते, इत्याशङ्क्य विदितमस्माभिरित्याहुः । उत्तमश्लोकजल्पैः भगवता चातुर्येणोक्ताभिर्मिथ्याकथाभिः, हृतं चेतो यस्यास्तथाभूता सती, परिचरति हि । अतः सा अविचक्षणा एव, वयं तु न लक्ष्मीवदविचक्षणा इति भावः ॥ १३ ॥ झंकारान् बहुधा कुर्वाणं तमस्मत्प्रसादलाभाय श्रीकृष्णं गायतीति मत्वाहुः ॥ किमिहेति ॥

हे षडङ्घ्रे षट्पद, इह अगृहाणां वनचारिणीनां, नोऽस्माकं, अग्रतः पुरतः, पुराणत्वाद्बहुशोऽनुभूतमित्यर्थः । यदूनां अधिपतिं श्रीकृष्णं, बहु यथा तथा, किं किमर्थं, त्वं गायसि । अस्मत्पुरतः कृतेन तदीयबहुगानेन न काचित्तवाभीष्टसिद्धिरिति भावः । तर्हीदं कस्या अग्रतो गीतं सन्ममाभीष्टसिद्धिदं स्यात्तत्राहुः । विजयोऽर्जुनस्तस्य सखा श्रीकृष्णस्तस्य सख्यो मथुराङ्गनास्तासां, अग्रतः तत्प्रसङ्गः विजयसखप्रसङ्गः, गीयताम् । एवं तासां पुरो गाने कृते सति इष्टाः संप्रीतास्तस्येष्टा वा ताः, क्षपिता विजयसखालिङ्गनेन निरस्ता कुचरुग्यासां तास्तथाभूताः, साम्प्रतं जाताः सन्त्यत इति शेषः । ते तव, इष्टं वाञ्छितं, कल्पयन्ति तवापेक्षितं दास्यन्तीत्यर्थः ॥ १४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सकृदधरेति : १०.४७.१३.

त्रैलोक्याशेषमोहप्रद - पदपरिषन् - मुख्यसाम्राज्यपट्टां स्वामस्मान् पाययित्वा सकृदधरसुधामत्यजन् मन्तुहीनाः ।
तत्सेवामब्जहस्ता चरति कथमले त्वं च वेत्स्येव चित्रं यद्वाऽस्त्येकोऽत्र हेतुर्निखिलमुखगतोऽस्योत्तमश्लोकशब्दः ॥ ३७ ॥

किमिहेति : १०.४७.१४.

कृत्वा दूत्यं कृतार्थं समभिलषसि चेद् द्रव्यमिष्टं षडङ्घ्रे तद्याह्यन्यत्र याः स्युर्ह्य तनुरसजुष - स्त्वतिप्रियप्रेमभाजः ।
दीनाः कान्तारभाजो वयमिह वसुमद्भुतिरोधस्थितास्तत्किं वा ते लभ्यमस्मद्भवति बत मुधा श्राम्यसि स्वास्यगीतैः ॥ ३८ ॥
आकर्ण्याऽनेकदीनावन - विशदतमां कीर्तिमङ्गीकृताङ्गीवाराखण्डप्रतिज्ञां भवति मम मनस्तत्पदप्रेक्षणोत्कम् ।
किं चाऽनास्त्वां श्रियामप्यखिलगुणकलापूर्ण - पर्याप्तिभूमौ श्रुत्वौदासीन्यमेव व्रजति मधुपते किं करोम्यप्रगल्भा ॥ ३९ ॥

कृष्णप्रिया

भ्रमर ! तुम्ह और तुम्हारे स्वामी में कोई अन्तर दृष्टि पथ नहीं आया, प्रायः दोनों का समान स्वभाव मालुम पड़ता है—कारण स्पष्ट है कि भौंरा कुसुमों का मकरन्द पान करके तुरन्त ही पुष्पों से चला जाता है, वैसे ही श्रीकृष्णने भी मुग्ध करने वाली अपनी अधर सुधा का एक बार पान कराकर हमारा त्यागकर दिया, स्वार्थ सिद्ध होने के बाद त्याग देना दोनों का समान धर्म है । यदि भगवान श्रीकृष्ण ऐसे स्वार्थी होते तब भगवती लक्ष्मी प्रभु की सेवा कैसे करे ? तो समाधान किया कि लक्ष्मीजी स्वयं पद्मा है—परम सरल है और उत्तम श्लोक भगवान् श्रीकृष्ण के दिव्य यश का सतत कीर्त्तन करने वाले भक्तवर श्रीशुक नारद सनत्कुमार आदि पुण्य पुरुषों वे लक्ष्मीजी का मन को कृष्ण के चरणा में आसक्त कर लिया है, इसलिए चरणों की सेवा में रत रहा है ॥ १३ ॥ हे मधुकर हे षट् चरण भ्रमर ? हमारे सन्मुख लगातर यदुओं के अधिपति श्रीकृष्ण के पुरातन गुणों का गान क्यों कर रहे हो ? देखो भ्रमर ! हम तो घरबार रहित बन चुके हैं इसलिए कथकों को क्या दे सकते हैं ? अर्जुन के सखा कृष्ण की वर्तमान में जो नवीन सखियाँ बनी है या बनाई हैं उनके सन्मुख श्रीकृष्ण के चरित्रों का गान करो, जिन नवीन स्त्रियाँ का हृदय रोग भगवान ने शान्त किया है एवं शान्त कर रहे हैं वे नारियाँ आप कथाकार को अभीष्ट पदार्थों का प्रदान करेंगी ॥ १४ ॥

> दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः ।
> चरणरज उपास्ते यस्य भूतिर्वयं का [1]अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥ १५ ॥

कर्दमक्षमा

अन्वयः—दिवि, भुवि, रसायाम् , च सर्वत्र’ काः, स्त्रियः ! कपटरुचिर हास भ्रूविजृम्भस्य, तत्तस्य, दुरापाः, भूतिः, यस्य, चरणरजः, उपास्ते; तत, वयम् , काः ! अपि च कृपणपक्षे, हि, उत्तमश्लोकशब्दः ॥ १५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भो मातमवं वोचस्त्वामनुस्मृत्यानङ्गविक्लवस्त्वां प्रसादयितुं मामादिष्टवानित्यत आह । दिवीति । दिवि भुवि रसातले च याः स्त्रियः स्युस्ताः का नाम तस्य दुरापा न काश्चन । तदित्यव्ययं तस्येत्यर्थः । कपटेन रुचिरेण हासेन भ्रूविजृंभो यस्य तस्य । हे कपट इति वा ॥ किं च । यस्य चरणरजः श्रीः सेवते तत्र वयं काः । अपि च यद्यप्येवं तथापि कृपणपक्षे कृपणानुकम्पिनि पुंस्युत्तमश्लोकशब्दो भवतीति तथा कथनीयं त्वयेति भावः ॥ १५ ॥

---

[1] ह्य-वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वयमाक्षिप्य समादधे— आदिष्टवानाज्ञप्तवान् । उज्जल्पेनाह—दिवीति । तस्य कृष्णस्य । स्वन्यूनतां द्योतयन्त्याह—किञ्चेति । तत्र तस्य अत्रापि विमृश्याह —अपि चेति । यद्यप्येवं लक्ष्मीसेव्यस्य दृष्टौ वयं—सितोपलाशिनस्तत्किट्टाशनमिव वन्या न योग्यास्तथापि । इति भाव इति—कृष्णपार्श्वे गत्वेत्थं त्वया वाच्यमित्याशयः । उज्जल्पलक्षणम्—"हरेः कुहकताख्यानं गर्वगर्भितयेर्षया । सासूयश्च तदाक्षेपो धीरैरुज्जल्प ईरितः ॥" इति ॥ तीर्थस्तु—ननु त्वमित्थं वदन्ती प्रगल्भा मत्तकाशिन्यसि त्वदर्थं कृष्ण आयास्यतीति चेदत्राह —याः स्त्रियः कपटरुचिरहास्युक्तो यो भ्रूविजृम्भस्तस्य विषयास्ता दिव्यादिषु कास्तस्य दुरापा न का अपि, कपटरुचिरहासभ्रूभंगरूकाकर्षणमन्त्राविस्त्वात्त्वात्तस्येति भावः । कमानन्दं पटयति गमयतीति कपटः, रुचिं राति ददातीति रुचिरस्तत्संबुद्धौ वा । तथा कपटेति पृथक्संबुद्धिर्वा । कपटे हेतुः—चरणेति । भूतिर्लक्ष्मीर्यस्य हरेश्चरणरज उपास्ते । तदनुग्रहार्थमिति शेषः । ननु भवन्त्योऽपि तथा कुर्वंत्वित्यत्राह—वयमिति । तत्र वयं वनचारिण्यः काः स्याम न का अपि । पुनरपि शृणु—कृपणस्य किंपचानस्यास्मद्विधस्य जनस्य पक्षेतिके उत्तमश्लोकशब्द एव कर्णविषयो न तु वाच्योर्थश्चक्षुर्विषय इत्यर्थः । यद्वा—उत्तमश्लोकशब्दो दीनपक्षपाती श्रुतः सोप्यस्मद्विषयो नाभूदित्यर्थः ॥ ननु भोः कृष्णप्रेयसीशिरोमणे तत्र स्थितः स रात्रिन्दिवमेव त्वां ध्यायन्कामशरार्दितः खिद्यति त्वं चेत्प्रसीदसि तदैव तस्य निस्तार इति तत्र सासूयमाह—दिवीत्यादि । कृष्णस्य स्त्रीभिर्विना कालो न यातीत्यहं सुष्ठु जानामि, तत्र यदि मथुरायाः स्त्रियो न मिलति तदा सोऽस्मान्ध्यायतु प्रसादयतु तत्र नेतुं त्वादृशं दूतं प्रस्थापयतु। न च गोपजातिं तं पुरस्त्रियः क्षत्रियजातयः कथमंगीकरिष्यन्तीति वाच्यम्, यतो दिवि भुवीति । तदित्यव्ययम् । तस्य कादुरापाः, यदि स स्वर्गे गच्छेत्तदा देव्योऽपि रसायां रसातलादिषु नागपत्न्योऽपि स्वस्वपतीं स्त्यक्त्वा तमागच्छेयुर्मथुरांगनानां का वार्तेति भावः न च तत्तदंगनाप्राप्तौ तस्य किञ्चित्पणादिकमपेक्षितव्यमित्याह—कपटेनापि रुचिरौ सर्वासां मनोहरौ भ्रूविजृभहासौ यस्य तथाभूतस्यैव तस्य या देव्यादयः स्युर्न तु स्वस्वपतीनामित्यर्थः । सकपटहासमूल्येनैव ताः स्वयमेव क्रीता भूत्वा स्वस्वपतिं त्यजन्ति, कपटपदेन कृष्णस्तु सकृदेव भुक्त्वा त्यजन्ति, नवप्रियत्वादिति भावः । देव्यादयो दूरे वर्तन्ताम्, भूतिर्लक्ष्मीर्नारायणस्यापि स्त्री चरणरज उपास्ते तदंगसंगार्थमिति नागपत्नीवाक्यं वयं पौर्णमासीमुखादश्रोष्म, अतो वयं काः कस्यां गणनायां तिष्ठामो यतो मानुष्यस्तत्रापि वृंदावनीया इति भावः । इदं दैन्यमयवाक्यमपि समस्तकोद्भूननस्त्वविशेषेण गर्वगर्मितामीर्ष्यामेव व्यनक्ति, सा चेर्ष्या स्वेषां लक्ष्म्यादितोऽपि प्रेमाधिक्यं रूपालावण्याधिक्यञ्चानुव्यनक्ति । अपि च किञ्च । उत्तमश्लोकशब्दो हि कृपणपक्षे एव संतप्तहीनदीनजनान्यो दयते स उत्तमश्लोक इत्युच्यते । कृष्णेतत्तल्लक्षणाभावान्मिथ्यैवोत्तमश्लोकशब्द इत्यर्थः । यद्यस्मद्विधान्कृपणनानात्मनाऽदुःखयिष्यत्तदा स्वस्मिन्कथमुत्तमश्लोकशब्दवाच्यत्वमधास्यादिति वाऽऽक्षेपध्वनिः । अत्र पूर्वर्द्धे दिवि भुवीत्यादिना कुहकताख्यानम्, चरणरज इति तृतीयचरणे गर्वगर्भितेर्ष्या, अपि चेति चतुर्थे चरणे सासूय आक्षेप इत्ययमुज्जल्पः। तदुक्तम्—"हरेः कुहकताख्यानं गर्वगर्भितयेर्ष्यया । सासूयश्च तदाक्षेपो धीरैरुज्जल्प" ईर्यते इति ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उन्मादस्वाभाव्यादकस्मादानो मानभङ्गीं परित्यज्य कलहान्तरिताभङ्ग्याह । दिवीति । ऊर्ध्वमध्याधोलोकत्रय इत्यर्थः। कपटत्वं सच्छलत्वमन्यजनवञ्चनाय चरणस्य रज उपास्त इति । सुष्ठु नीचतया सेवोक्ता हि निश्चितम् अन्यत्तैः तत्र तस्य दुरापा इति सम्बन्धविवक्षया षष्ठी । अथवा मान एवानुवर्त्तनीयः तथा हि नन्वेवं चेत्तर्हि तत्सम्बन्धे प्रथमत एव कथं न सावधाना जाताः स्थ इत्याशङ्क्य स्वदोषं परिहरन्ती मायया ग्रह इव गृहीतवानस्मानबलाजनानधुनाप्यसौ परित्यजतादिति सदैन्यमिव सेर्ष्यं संदिशति । दिवीति । कपटेन माययैवापातरुचिरौ हासभ्रूविजृम्भौ यस्य तस्य अन्यत् पूर्ववत् । अत उत्तमः श्लोकत्वेऽपि कटाक्ष एव व्यञ्जितः । यद्वा । दिवि भुवीत्यादिना तस्य प्रभावानुवादं सासूयं ज्ञात्वा तथापि शेषं तदवशत्वं सूचयन्ती सदैन्यमिव सेर्ष्येण गर्वेण सोल्लुण्ठमाह । का दुरापा इति । अपि तु यत्राकृष्टुमिष्यन्ते तत्रैव सुलभाः । लक्ष्मीस्तु तत्र तत्रैवानुगच्छन्ती चरणरज उपास्ते तत्र वयं का इति । अपिचेति कृपणा एव तत्रोत्तमश्लोकत्वं जल्पन्ति नतु मादृशाः कृपणाम् इति एवमाक्षेपः ॥ १५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दिवि भुवि रसायां चेति । ऊर्द्ध्व—मध्यालोलोकत्रय इत्यर्थः । चरणस्य रज उपास्त इति सुष्ठु नीचतया सेवोक्ता । हि निश्चितम् । अन्यत्तैर्व्याख्यातम् । यद्वा, ननु भवत्य एव केवलं तं नाद्रियन्ते, सर्व्वत्र यावत्यो युवतयस्तावत्य एव तद्वशे वर्त्तन्ते इत्यत आह—दिवीति । सर्व्वभुवनेषु काः स्त्रियः क्षुद्रस्त्रियोऽपि यास्तास्तद्दुरापाः स्युः, किंवा याः काः स्त्रियः, याः काश्चन स्त्रियः सर्व्वा इत्यर्थः, तेन 'दुरापाः स्युः' इत्यवहेलनम् ; तत्र हेतुः —कपटेनैव रुचिरो हासयुक्तो भ्रुवोर्विजृम्भो नर्त्तनं भ्रूविजृम्भो भ्रुकुटी वा यस्य तस्य, इति स्त्रीजनप्रतारणमात्रचातुर्य्येण तस्य कुहकता । ननु किमेवं ब्रूषे, सुन्दरीवृन्दवृन्दिष्ठा श्रेष्ठा यदिन्दिरापि तत्पदारविन्दरजो वन्दते इति चेत्तत्राह—चरणेति । यस्य चरणरजो भूतिश्चेदुपास्ते, तर्हि उपास्तां नाम, तत्र वयं काः, किमस्माकमायातम् ? न हि मद्विधानां मध्ये श्रीरेकतमापीत्यर्थः । इति गर्व्वेर्ष्ययोः सूचनम् । अपि च कृपणानां पक्षः सहायो यस्तस्मिन्नेवोत्तम-

श्लोकशब्दो नाम ख्यातिर्वा भवति, अतः कृपणानामुपेक्षया गानकारणयशोहानेस्तस्य गानमेव न युज्यत इति भावः। यद्वा, ननु उत्तमश्लोकशब्दाश्रयत्वादेव लोकोत्तरे तस्मिन्नुपेक्षा नोचितेत्यत आह—अपिचेति। कृपणपक्षेऽपि च कृपणो निष्ठुरो बद्धमुष्टिर्वा, तेन स्वदर्शनादिसौख्यानामदातृत्वं लक्ष्यते, तत्पक्षेऽपि तद्विषयेऽपीत्यर्थः; तस्मिन्नुत्तमश्लोक इति शब्दस्तद्विधैरेव मृषास्तावकैः सेवकैः क्रियत इत्यर्थः। इत्यसूयया तदाक्षेपः॥ १५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

रसातले च ताः कास्तद्दुरापाः न काश्चिदपीत्यर्थः। कपटरुचिरहासभ्रूविजृम्भस्य यस्येत्यन्वयः कृपणः कदर्यः लुब्धकोऽपि तस्य पक्षे इत्यर्थः॥ १५॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु यदि पौरस्त्रियः तद्वशङ्गतास्तदालिङ्गेन क्षपितकुचरुजो भवेयुस्तदा मदिष्टं कल्पयेयुस्तस्य ता एव दुष्प्रापा इत्यत्राह। दिवीति। दिवि स्वर्गे भुवि रसायां पाताले च याः स्त्रियः स्युस्तासां मध्ये काः स्त्रियः तदिति पृथक् पदमव्ययं तस्य श्रीकृष्णस्य दुरापाः दुष्प्रापाः सर्वाः अपि स्त्रियः सुलभा एवेत्यर्थः। तत्र हेतुं ब्रुवन्तो विशिनष्टि। कपटो रुचिरः सुन्दरश्च हासो भ्रूविक्षेपश्च यस्य तस्यात एव यस्य भगवतश्चरणरेणुं भूतिर्लक्ष्मीरप्युपास्ते कपटरुचिरहासभ्रूविजृम्भाभ्यां च तद्वशगा तच्चरणरजः सेवत इत्यर्थः। वयन्तु विचक्षणाः ताभ्यां न तद्वशगा इति भावः। तदाह। वयं का हीति। तद्वशगानां मध्ये न काश्चिद्धीत्यर्थः। किञ्च कृपणपक्षे कृपणानां दीनानां जनानां पक्षे कोट्यामेव ह्युत्तमश्लोकशब्दः उत्तमश्लोकप्रसङ्गगोचरः शब्दो गेय इति शेषः। नत्वदीनपक्षेऽस्मत्समुदाये इति भावः। एवं भ्रमणशीलं भ्रमरं स्वपादमूले चरन्तमात्मानं प्रसादयितुमिवालक्ष्य तं प्रत्युक्तम्॥ १५॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ननु प्रगल्भा चेत्त्वमेवं प्रलपनं विना! मत्तकाशिन्या लज्जाभावात्कृष्ण आगमिष्यतीति शङ्का माभूदित्याह। दिवीति। स्वर्गादिषु विद्यमाना देवस्त्रियः तस्य कृष्णस्य दुरापाः दुष्प्रापाः स्युः किन्तु सुप्रापा एव कर्षण मन्त्रमाह। कपटेति। याः स्त्रियः कपटश्च रुचिरश्च हासयुक्तो यो भ्रूविजृम्भः भ्रूभङ्गस्तस्य विषया लक्ष्यीभूताः स्युः अध्यात्मकमानन्दं पटयति गमयतीति कपटां रुचिं स्पृहां राति ददातीति। कपटे रुचिरः हे कपटेति वा तत्र हेतुमाह। चरणेति। भूतिर्लक्ष्मीर्यस्य हरेश्चरणरज उपास्ते तदनुग्रहार्थमिति शेषः। ननु भवत्योऽपि तथा कुर्वन्त्वित्यत्राह। वयमिति। तत्र वयं वनचारिण्यः काः स्याम अपि च पुनरपि शृणु कृपणस्य किम्पचानस्यास्मद्विधस्य जनस्य पक्षे अन्तिके उत्तमश्लोकशब्द एव कर्णविषयो नतु वाच्योऽर्थश्चक्षुर्विषय इत्यर्थः। यद्वा उत्तमश्लोकशब्दः कृपणपक्षे दीनपक्षपाती श्रुतः सोऽप्यस्मद्विषयो नाभूदित्यर्थः॥ १५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

उन्मादस्वाभाव्यादकस्मान्मानभङ्गीं परित्यज्य कलहान्तरिताभङ्ग्याह। दिवीति। कपटत्वं सच्छलत्वम् अन्यजनवञ्चनाय सोल्लुण्ठमेवेदं वचनम्॥ १५-१६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु भवतीभिर्विना तस्य का अन्या एवंविधसौभाग्याः सन्ति यासामग्रे मया तत्प्रसङ्गः कर्त्तव्यः? इत्याशङ्क्याह—दिवि भुवीत्यादि। त्रिलोक्यामित्यर्थे दिवीत्यादि। तस्य काः स्त्रियस्त्रिलोक्यां दुरापाः? न काश्चिदपि। किं बहुना? यस्य चरणरजो भूतिर्लक्ष्मीरूपास्ते तत्र वयं काः, वयं क्षुद्रा एव। ननु लक्ष्मीश्चरणरज एवोपास्ते न तु भवत्य इव सा तन्मनोमाणिक्यहारिणी, तेन भवत्यो लक्ष्मीतोऽप्यतिसौभाग्याः, इत्याशङ्क्याह—अपि चेत्यादि। अपि चेत्यङ्गीकृतौ उत्तमश्लोक इति शब्दः कृपणपक्ष एवेति कृत्वा कृपणास्वस्मासु कदाचिदनुरज्यत्यपि। तेन किं वयं लक्ष्मीतो धन्याः? नैव, वयं कृपणा एवेति। अथवा, वयं का इति वयं नोत्तमाः, न कृपणाः। उत्तमाश्चेदभविष्याम, तदाभिलषणीया एवाभविष्याम। कृपणाश्चेदभविष्याम, तदापि तस्य उत्तमश्लोकतया कृपणलक्षणातित्वेनानुग्राह्या एवाभविष्याम। यथा कृपणायाः कुब्जायाः पक्षपातित्वेनानुग्रहः कृत इत्याह—अपि चेति। उत्तमश्लोकशब्दः कृपणपक्ष इति यत्, तत् कुब्जायामेव चरितार्थमिति हृदयस्थम्। अत्राप्युन्मादोऽङ्गी मतिदैन्यादयोऽङ्गानि। विप्रलापः। दिविभुवीत्यादिना सर्वासामेव सुखापत्वात् स्वस्यापि च सुखापत्वे प्राप्ते दुरापत्वेन विरोधात्॥ १५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ननु भवतीभिर्विना तस्य का एव मान्याः सन्ति? इत्याशङ्क्याह—दिवि भुवीत्यादि। कास्तस्य दुरापाः, न का अपीत्यर्थः। किमन्यत्, यस्य चरणरजो भूतिर्लक्ष्मीरप्युपास्ते, तत्र वयं काः? ननु यूयं लक्ष्मीऽतोऽपि तस्य प्रियाः, एवञ्चेत् संभवत्यपि, यतोऽपिकृक्षे ह्युत्तमः लोकशब्दः। वयन्तु कृपणा एव, तेनास्मासु कदाचित् स्निह्यतीत्यसूयाभावशान्तिः। अथवा,

अपि च कृपणपक्षे इत्यादि यत् तस्य तत्त्वम्, तन्मास्मासु मानयत्वयम्, अपि तु कुब्जायामेव यतस्तामृजुकरणव्याजेन स्वीचकारेत्यसूयोदयो वा ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नतु भोः कृष्णप्रेयसीशिरोमणे तत्र स्थितः स रात्रिन्दिवमेव त्वां ध्यायन् कामशरार्हितः खिद्यति। त्वञ्च तु प्रसीदसि तदैव तस्य निस्तार इति तत्र सासूयमाह। दिवीत्यादि। अयमर्थः। कृष्णस्य स्त्रीभिर्विना कालो न यातीत्यहं सुष्ठु जानामि तत्र यदि मथुरायां स्त्रियो न मिलन्ति तदा सोऽस्मान् ध्यायतु प्रसादयतु तत्र नेतुं तादृशं दूतञ्च प्रस्थापयतु। न च गोपजातिं तं पुरस्त्रियः क्षत्रियजातयः कथमङ्गीकरिष्यन्तीति वाच्यम्। यतो दिवि भुवीति। तदित्यव्ययं तस्य का दुरापाः यदि स स्वर्गं गच्छेत् तदा देव्योऽपि रसायां रसातलादिषु नागपत्न्योऽपि स्वस्वपतींस्त्युक्त्वा तमागच्छेयुर्मथुराङ्गनानां का वार्त्तेति भावः। न च तत्तदङ्गनाप्राप्तौ तस्य किञ्चित् पणादिकमपेक्षितव्यमित्याह। कपटेनापि रुचिरौ सर्वासां मनोहरौ भ्रूविजृम्भहासौ यस्य तथाभूतस्यैव तस्य या देव्यादयः स्युः। नतु स्वस्वपतीनामित्यर्थः। सकपटहासमूल्येनव ताः स्वयमेव क्रीता भूत्वा स्वस्वपतींस्तास्त्यजन्ति। कपटपदेन कृष्णस्तु ताः ताः सकृदेव भुक्त्वा त्यजति नवप्रियत्वादिति भावः। देव्यादयो दूरे वर्त्तन्तां भूतिर्लक्ष्मीर्नारायणस्यापि स्त्री चरणरज उपास्ते तदङ्गसङ्गार्थमिति नागपत्नीवाक्यं वयं पौर्णमासीमुखादश्रौष्म। अतो वयं काः कस्यां गणनायां तिष्ठामो यतो मानुष्यस्तत्रापि गोप्यस्तत्रापि वृन्दावनीया इति भावः। इदं दैन्यमयवाक्यमपि समस्तकोद्धूननस्वरविशेषेण गर्वगर्भितामीर्ष्यामेव व्यनक्ति। सा चेर्ष्या स्वेषां लक्ष्म्यादितोऽपि प्रेमाधिक्यं रूपलावण्याधिक्यञ्चानुव्यनक्ति अपि च। किञ्च उत्तमःश्लोकशब्दो हि कृपणपक्ष एव सन्तप्तदीनहीनजनान् यो दयते स ह्युत्तम श्लोक उच्यते कृष्णे तु तल्लक्षणाभावान्मिथ्यैवोत्तमःश्लोकतेत्यर्थः। यद्यस्मद्विधान् कृपणजनान् स नादुःखयिष्यत्तदा स्वस्मिन् कथमुत्तमःश्लोकशब्दवाच्यत्वमधारयिष्यदिति वा आक्षेपध्वनिः। अत्र पूर्वार्द्धे दिवि भुवीत्यादिना कुहकताख्यानं चरणरज इति तृतीयचरणे गर्वगर्भिता ईर्ष्या। अपिचेति चतुर्थपादे सासूय आक्षेप इत्ययमुज्जल्पः। यदुक्तं।

हरेः कुहकताख्यानं गर्वगर्भितयेर्ष्यया। सासूयश्च तदाक्षेपो धीरैरुज्जल्प ईर्यते ॥ इति ॥ १५ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

ननु भो मातश्चातुर्यसागरभूते मथुराख्ये पुरे क्षत्रियाङ्गनानां स्वस्वान्तःपुरेऽवस्थितानां दर्शनस्यापि दुर्लभत्वाद्भगवतश्च त्वदासक्तचित्तत्वेन त्वां चिन्तयतस्त्वद्वियोगेन विह्वलतया वर्तमानत्वान्नासौ यथोक्तोपालम्भविषयोऽतः प्रसीदः त्वदनुस्मरणोत्थमन्मथविष्टपरवशेन तव प्रियेण त्वत्प्रसादार्थमेवाहं प्रषितस्त्वत्प्रसादमप्याकर्ण्य तस्य सुखं भविष्यत्यतस्तदुपरि करुणां कुर्वित्वाशङ्क्य करमर्दनशिरःकम्पपूर्वकं सेर्ष्यमाह। दिवीति। दिवि स्वर्लोकादारभ्य ब्रह्मलोकान्तेषु लोकेषु भुवि सभुवर्लोके रसायां सप्तसु पातालेषु चकाराद्ब्रह्माण्डाद्बहिरपि या स्त्रियस्ताः का नाम तत् तस्य दुरापाः दुष्प्रापा न काश्चनापि तथा च स्वर्लोकादौ गतस्यात्रैव वा तदाकर्षणपरस्य स्त्रीमात्रमपि यदा न दुष्प्रापं तदा मधुपुरस्त्रीणां का कथेति भावः। यद्वा तत्तल्लोकस्थिता दुष्प्रापा अपि याः स्त्रियस्ता अपि तस्य स्युः नतु स्वपतीनां यतस्तद्वशीकरणसामग्री तत्सन्निधौ पुष्कला वर्तत इत्याशयेन तं विशिनष्टि। कपटेति। कपटेन रुचिरेण चारुणा हासेन च भ्रूविजृम्भो यस्य कपटेन रुचिरौ हासभ्रूविजृम्भौ यस्येति वा कपटपूर्वकयो रुचिरो हासस्तेन भ्रूविजृम्भः स्थानादिसूचनपूर्वकरत्यर्थमाकारणरूपो यस्येति च तथा चैवंविधस्य न कापि दुर्ल्लभेत्यर्थः। तदुक्तं "स्थानं नास्ति क्षणो नास्ति, नास्ति प्रार्थयिता नरः। तेन नारद! नारीणां सतीत्वमुपजायते" इति किं चालौकिकसामग्री तस्य निकटे या वर्तते तत्सत्त्वे लौकिकसामग्र्यपेक्षैव नास्तीत्याशयेनाह। चरणेति। सर्वैरर्थार्थिभिरर्थ्यमाना विभूतिर्लक्ष्मीः यस्य स्वतः सामर्थ्याद्वस्तुतुमाहात्म्याद्वा चरणज उपास्ते परमादरेण किङ्करीवत्सेवते यद्वा अन्यासां स्त्रीणां का कथा परमसतीत्वेन प्रसिद्धा नारायणाङ्गविभूतिरपि तच्चरणरज उपास्त इत्याह। चरणेति। तत्रैवंविधस्य तस्य निकटे वयं का त्रिभूतिकोटिकोट्यंशादपि न्यूना व्रजस्त्रियः कस्यां गणनायां स्थातुं योग्याः अत एव वयं तेन निष्कृष्टाः एवं सति किमस्मास्वेवं कपटं कर्तुमागतोऽसीत्याशयेन हे कपटेति सम्बोधनम् एवं स्वस्यायोग्यत्वमापाद्य परिहरति अपि चेति। यद्यप्येवं तथापि कृपणपक्षपातिनि दीनानुकम्पावति पुरुषे उत्तमश्लोकशब्दः प्रवर्तत इति प्रसिद्धं तथा चोत्तमश्लोकशब्दवाच्यस्य तस्य दीनानामस्माकं पक्षपात उचितो यथा चैवं भवेत्तथा त्वयास्मत्प्रियो वक्तव्य इति भावः। यद्वा यद्यप्येवं तथाप्युत्तमश्लोकशब्दः तस्मिन्मिथ्यैव प्रयुज्यते कृपणपक्षपातित्वरूपतत्प्रवृत्तिनिमित्ताभावात् तथा च तच्छब्दयाथार्थ्यं च यदि तस्य प्रार्थ्यं तर्ह्यस्मद्विधदीनजना दुःखसागरादुद्धर्तव्या इति भावः। अनया वक्रोक्त्या विभूतिसहितस्योपेक्षया स्वस्थानमत्यजन्त्यो वयमेवोत्तमा इति ध्वनयति। यद्वा यथा वयं तस्यागण्यास्तथाऽस्माकं सोऽप्यगणनीयः कार्पण्याभावादित्याशयेनाहापिचेति कृपणा एव तस्योत्तमश्लोकत्वं जल्पन्ति तदर्थमनुसन्धाय तदधीनाश्च भवन्ति नत्वस्मादृश्यो निःस्पृहस्य तृणं जगदिति न्यायादित्यर्थः। अत्रोज्जल्पस्तदुक्तं "हरेः कुहकताख्यानं गर्वगर्भितयेर्ष्यया। सासूयश्च तदाक्षेपो धीरैरुज्जल्प इष्यत" इति इदं पद्यमुद्धवपक्षेऽपि समानं श्रुतिपक्षे ननु ब्रह्मणोऽपि श्रुतिप्रतिपाद्यत्वमसङ्गतं प्रत्यक्षादिविषयपरिनिष्ठितवस्तुप्रतिपादने हेयोपादेयरहितप्रयोजनाभावात् अत एव जैमिनिना "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थाना"मित्याशङ्क्य

"विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्यु" रित्यर्थवादवाक्यानां विधिस्तावकत्वेनार्थवत्त्वमुक्तं मन्त्राणां वेषे त्वादीनां क्रिया तत्साधनाभिधावकत्वेन तत्त्वमुक्तं तस्मादुपनिषदामपि कर्मापेक्षितकर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वमास्थेयमिति चेत्तत्राह । दिवीतिस्वर्गादौ काः आनन्दघनब्रह्मसम्बन्धियः याः स्त्रियः पतिव्रतास्त्रीवत्स्वार्थाविनाभूताः याः स्युः तत् ताः कपटरुचिरहासभ्रूविजृम्भस्य कर्मकर्तुर्दुरापाः प्रतिपादकत्वेन प्राप्तुमशक्याः रुचिरौ हासभ्रूविजृम्भौ मायापरमेष्ठिधिष्ण्ये यस्य कपटश्चासौ रुचिरहासभ्रूविजृम्भश्च "तस्य हासो जनोन्मादकरी च माया तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यम्" इत्युक्तत्वात् हासभ्रूविजृम्भाभ्यां मायासत्यलोकौ गृह्येते भ्रूविजृम्भ इत्युपलक्षणं लोकान्तराणामपि रुचिरौ स्त्र्यादिहासभ्रूविजृम्भौ यस्येति वा तथा च विचित्रवासनाक्रान्तस्वान्तस्य दुःखासत्याद्यात्मके कार्यकारणभूते प्रपञ्चे सुखसत्याद्यात्मकत्वभ्रान्तिमतः स्त्र्यादिविषयासक्तचित्तस्य कर्मकर्तुः प्रतिपादन उपनिषदां नास्त्युपयोगः "सदेव सोम्यदेमग्र आसीदात्मा वा इदमेक एवाग्र आसीत् तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्मसर्वानुभूः ब्रह्मैवेदममृतं पुरस्तात् अचक्षुरश्रोत्रम् अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिकदम्बस्य प्रत्यमभिन्ने ब्रह्मणि समन्वितस्यान्यपरत्वमुपचरितार्थत्वं कल्पयितुमिन्द्रादेरप्यसमर्थत्वात् यद्यपि परिनिष्ठितं ब्रह्म तथापि तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुत्या प्रत्यक्षाद्यविषयत्वात्तत्त्वमसीति ब्रह्मात्मभावः शास्त्रमन्तरेण नावगम्यते नच हेयोपादेयरहितत्वादुपदेशानर्थक्यं शङ्क्यं हेयोपादेयविधुरब्रह्मसाक्षात्कारादेव समस्तक्लेशविनिवृत्त्या पुरुषार्थसिद्धेः ननु जातिगुणकर्मस्वरूपसंज्ञासम्बन्धानां शब्दप्रवृत्तिनिमित्तानां ब्रह्मण्यभावात् कथं तस्य युष्मत्प्रतिपाद्यत्वमित्याशङ्क्यैवं चेद्यदा तव ज्ञानं तर्हि परमसिद्धान्तं शृण्वित्याशयेनाह । चरणेति । तथाचानन्तकोटिब्रह्माण्डरचनायां समर्था विभूतिः सकलैश्वर्यवती महामायाशक्तिरपि यन्न स्पृशेत तत्र निर्गुणे ब्रह्मणि वयं कास्तद्वद्वयमपि दूरत एव तत्स्वरूपं लक्षयामः तथा च श्रुतयः "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । को श्रद्धा वेद क इह प्रावोच"दित्याद्या इति भावः । नन्वेवं तर्हि किमिति महता प्रयासेन श्रुतिप्रतिपाद्यत्वं ब्रह्मणः स्थापितमिति चेत्तत्राहापि चेति । यद्यप्येवं तथापि उत्तमश्लोकस्य प्रतिपादकः शब्दरूपः श्रुतिकदम्बः कृपणस्याज्ञस्यासम्भावनाविपरीतभावनाविष्टचित्तस्य पक्षे तत्पक्षपाती तदुपकारायेति यावत् तथा च श्रुतिः "आत्मानमविदित्वा योऽस्माल्लोकात्प्रैति स कृपणः तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं स उपसन्नाय प्राह" त्याद्या ॥ १५ ॥

गूढार्थदीपिनी

रसायां रसातले एवं लोकत्रयेऽपि ताः काः स्त्रियः याः तत् तस्य दुष्प्रापा इत्यन्वयः । कथं भूतस्य । कपटपूर्वको यो रुचिरो हासः तेन भ्रूचालनं यस्य तस्य । भूतिः लक्ष्मीः । अथापि कृपणपक्षे शतानु शर्मेनि जने उत्तमश्लोकशब्दः प्रवर्तते । उद्गतं निवृत्तं तमो दुःखं यस्मात् स तथाभूतः श्लोकः यशो यस्येति तच्छब्दार्थः ॥ १५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु युष्मान् प्रसादयितुं प्रेषितोऽस्मि श्रीकृष्णेन इत्यत आहुः । दिवीति । तदित्यव्ययं पृथक्पदम् । हे कपट ! तत्तस्य रुचिरः सुन्दरः हासः भ्रूविजृम्भश्च यस्य तथाभूतस्य दिवि रसायां रसातले याः स्त्रियः स्युः ताः का दुरापा न काश्चन किञ्च यस्य चरणरजः भूतिः श्रीरप्युपास्ते तत्र वयं काः सर्वथा तस्याऽनीप्सिता एवेत्यर्थः । किञ्च कृपणानां भगवतोऽनीप्सितानामस्माकं पक्षे उत्तमश्लोकस्य पुण्यकीर्तेः श्रीकृष्णस्य शब्दः संदेशशब्दोऽपि दुराप इत्यर्थः । दुरापशब्दस्य वचनव्यत्ययेनान्वयः ॥ १५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मन्मथमथितो मधुमथनः स्वत एव स्मृतत्वात्सङ्गः सङ्गरुचिरचिरेणागमिष्यति किं चिन्तया कान्ता इति न वदेति वदन्ति दिवि स्वर्गे भुवीह रसायां भोगिन्यादिलोके विद्यमानाः स्त्रियः कास्तद्दुरापास्तद्दुष्प्रापाः सर्वा अपि सुमिलास्तस्योपायमुपदिशन्ति कपटेति । कपटो वक्त्रो रुचिरश्चासौ हासश्च तेन सहितो भ्रूविजृम्भस्तस्य पाः पान्तीति पाव्यः स्युः । अरेयंश्च कपटरुचिर्वस्तुतस्तु नास्मत्सङ्गरुचिता रमारतेरितीरयन्ति ॥ आह आसेति । अहेति खेदे । इयमपीयत्कृत्वा लभतेऽस्मत्कथा केति कथयन्ति ॥ भूतिरिति । भूतिर्महालक्ष्मीर्यस्य चरणरज उपास्ते । स्वरतस्य स्वरतिपात्रत्वमात्रघटनायोपासनां करोति । एतादृशे वयं कः किं तनुपत्राण्यपि शृणु । आगमिष्यतीति वचनं बन्धनमात्रं कृपणानां दीनानां नः पक्षे उत्तमश्लोकस्य शब्दः कृष्णकृष्णेत्यादिरूप एव न तदर्थं प्रत्यक्षसन्धिरित्युतरत्र भावीति भावः । तन्नाममात्रोच्चारणं तद्ध्यानमेवानुष्ठेयमहेति वा । अह खेदविषादयोरिति विश्वः । पक्षे उत्तमेत्यत्र सन्ध्यभाव एवैतत्सर्वस्य मूलमिति मन्तव्यं । हे मधुप कपट तददर्शकत्वाद्रुचिरकथाकथकत्वाद्दिवि भुवि वा चर नास्मत्समीपे भ्रूविजृम्भस्य याः स्युरिति ताः स्त्रियः का न का अपि । न च दृश्यते तत्र प्रागदर्शि च दर्शनीये सङ्गस्तस्येत्यत आह ॥ सेति । सा रमा यां पश्यति तत्र स्वयमेवासातो वयं तद्दुरापाः स दुरापो दुष्प्रापो याभिस्ता हा लोकावलोकनतोऽपि तन्नास्तीति खेदः । हा सेत्याद्यैकपद्ये यां पश्यति तां स्वयमेवोपास्त इत्यन्वयः । यस्य पक्षे हे कृपण वयं अवगमोऽस्ति किं भूतिरेवेति चरणरज इव चेति वाऽध्यात्ममन्वयः । स यामुपास्ते सा दिवि भुवि चर का न कोऽपि यस्य भ्रमतस्ते चरणरज एवोपास्ते धूलिधूसरतस्तव चरणे स्यातामिति तादृशी नोपलभ्यतेऽतो वृथा श्रमस्तवेति तात्पर्यं । वयं सायाङ्काः सायो हि स स एवाङ्को यासां ता इति वा

पदोऽस्मत्पक्षसायकवदयमिति भावः। आसायाङ्कमित्यग्भाष्यटीकाटिप्पणीषु सायङ्करं लयकृज्ज्ञानमेव। षोन्तकर्मणीत्यस्येदं रूपं। सायमन्तं करोतीति ङ इत्यस्य रूपमिति। अस्माद्भावे घञि आदे च इत्यात्वे युगागमे सायमिति रूपम् ॥ १५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

प्रार्थनां वारयितुं तस्य भगवतः स्त्रीसौलभ्यमाह। दिवीति। लोकत्रये याः स्त्रियः तासां भगवान् दुरापः नतु भगवतस्ताः स्त्रियो हि त्रिविधास्तत्र लोके तास्तु भगवतः सुलभा एव तत्र हेतुं वक्ष्यति चकाराद्ब्रह्माण्डाद्बहिः स्थिता इति स्त्रीणां हि रमणमपेक्ष्यते नाना विलासैर्हि रमणं देवस्त्रीणां प्रत्येकनियततया रमणं भूस्त्रीणां विलासतया च रमणं क्वचिद्भूस्त्रीणां परं निरोधस्तुल्यः अतिगुप्ततया रमणं रसास्त्रीणां भगवति पूर्वश्लोकैरुक्तप्रकारेण त्रिविधत्वमप्यस्ति प्राकट्यविलासरूपः प्रथमं निरूपितः विरुद्धतया द्वितीये अतिप्रयासेन अतिगुप्ततया सुभद्राहरणवत् विजयसखित्वेन रमणनिरूपणात् गुप्ततया द्वितीये अतिप्रसासेन रमरमणमुक्तं किञ्च सुतरां स्त्रियः येन धर्मेण वशे भवन्ति स धर्मो भगवति वर्त्तत इत्याह। कपटेति। कपटपूर्वकं यो रुचिरो हासः तेन भ्रूविजम्भः स्थलादिसर्वसूचनपूर्वकं रत्यर्थमाकारणरूपः स यस्य वर्तते धर्मस्यैव वा याः स्त्रियो भवेयुः तदधीनास्ताः यदि कश्चित् यथा न प्रकटी भवति तथा गोप्यं विधाय तथा समर्थः यथैव तासां मनःप्रीतिर्भवति तथा रमणं कुर्वन् सर्वसामग्रीं सम्पाद्य समाकारयति चेन्न कापि स्त्री दुर्लभा भवति अत एव क्वचित् श्लोकः "स्थानं नास्ति क्षणो नास्ति, नास्ति प्रार्थयिता नरः। तेन नारद! नारीणां सतीत्वमुपजायत" इति अत एतावत्यर्थ कृते प्रार्थना व्यर्था अकृतेऽपि व्यर्थेति उभयथापि प्रार्थना न कर्तव्येति भावः। किञ्च एतदस्माभिर्दृष्टोपायत्वेन निरूपितम् अलौकिकोपाये तु किमपि न कर्त्तव्यमित्याह। चरणरज उपास्त इति। सर्वैरेवार्थार्थिभिः सेव्यमाना विभूतिर्लक्ष्मीः यस्य स्वतः सामर्थ्यात् वस्तुमाहात्म्याद्वा चरणरज उपास्ते अत्यादरेण दासीत्वं प्रार्थयते तत्रैवं विधेऽर्थे च वयं काः तस्या कोटथंशभूताः तस्मादस्मान्प्रति न किञ्चिदेतावत्कर्त्तव्यं किञ्च एतदप्यस्माभिर्विचारेणोच्यते वस्तुतस्तु भगवति विचारोऽपि न कर्त्तव्य इत्याह। अपिचेति। उत्तमश्लोकशब्दः कृपणपक्षे सति भवतीति नान्यथा भगवांश्च सर्वलोकप्रसिद्धः उत्तमश्लोक इति वयमतीव दीनाः अस्मत्पक्षपातं करिष्यत्येव अन्यथा कथमुत्तमश्लोकजल्पो भवेत् युक्तश्चायमर्थः तस्मात्प्रमाणबलेन प्रमेयबलेन लोकप्रसिद्धया भगवान् दीनानुकम्पीति यथैवास्माकं युक्तं तथैव करिष्यति न दूतोऽपेक्षते नापि वचनानीति निर्गुणगोपिकाया वचनं तद्भावापन्नाया वा एतत्तामसप्रकारेण तमोरजःसत्त्वानि गुणतीतश्च प्रकारो निरूपितः अतः परं राजसप्रकारेण ततोऽग्रे सात्त्विकप्रकारेण चोभयत्र त्रैविध्यं निरूपयिष्यति रजस्तमःसत्त्वानां तमोरजःसत्त्वानां च क्रमः श्लोकानां ज्ञातव्यः ॥ १५ ॥

श्रीसुबोधिनी–सारः

कपटेन रुचिरेण हासेन भ्रुवां विजृम्भो यस्य तस्य तत्तस्य श्रीकृष्णस्य दिवि स्वर्गे भुवि कौ रसायां पाताले च याः स्त्रियः स्युः दुरापा दुर्लभाः काः सर्वा सुलभा इत्यर्थः। यस्य भूतिर्लक्ष्मीः चरणरज उपास्ते सेवते वयं का अतितुच्छाः अपि च तथापि कृपणानां पक्षे उत्तमश्लोकस्य शब्दः कीर्तनम् ॥ १५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'यदि पुरस्त्रियस्तस्य सुलभाः स्युस्तदा तेन सन्मानिता मदिष्टं साधयेयुः, परन्तु ता एव तस्य दुर्लभाः, अत एव युष्मान् प्रसादयितुं मां प्रेषितवान्' इत्याशङ्क्याह—दिवीति। दिवि स्वर्गे, भुवि भूलोके, रसायां रसातले, अधोलोके च याः स्त्रियः स्युस्तासां मध्ये काः स्त्रियः तदिति पृथक् पदमव्ययं तस्य श्रीकृष्णस्य दुरापा दुर्लभाः? न का अपि दुर्लभाः, किन्तु सर्वा अपि दुर्लभाः, किन्तु सर्वा अपि सुलभा एवेत्यर्थः। तत्र हेतुं भ्रुवती विशिनष्टि—कपटपूर्वको यो रुचिरो मनोहरो हासस्तत्पूर्वको भ्रूविजम्भः भोगादिसूचको भ्रूविलासो यस्य तस्येति। भूतिः सर्वोत्तमा सर्वोपास्या सर्वसम्पदधिष्ठात्री लक्ष्मीरपि यस्य चरणरज उपास्ते सेवते, तत्र वयं काः किं दुर्लभाः कथं प्रार्थनीयाः? 'एवं चेत्तर्हि कथं पूर्वं तेन यूयमङ्गीकृताः' इत्यपेक्षायामाह—अपि चेति। उत्तमस्त्रीणां तत्सुलभत्वेऽपि कृपणपक्षे दीनानुकम्पिनि पुरुषे एव यत उत्तमश्लोकशब्दः प्रवर्तते महायशा इति व्यवहारो भवतीति स्वयशोविस्तारायैवास्मानङ्गीकृतवान्, नाऽस्मत्सुखार्थः। अन्यथा त्यक्त्वा न गच्छेदित्याशयम् ॥ १५ ॥

अन्वितार्थप्रकाशिका

दिवीति। दिवि स्वग भुवि भूलोके रसायां रसातले अधोलोके च याः स्त्रियः स्युस्तासां मध्ये कपटपूर्वको यो रुचिरो मनोहरो हासस्तत्पूर्वको भ्रूविजृम्भः भोगादिसूचको भ्रूविलासो यस्य श्रीकृष्णस्य तदिति तस्येत्यर्थे वा। पृथक् पदमव्ययम्। दुरापा दुर्लभाः का स्युः न का अपीत्यर्थः। भूतिः सर्वोत्तमापि लक्ष्मी यस्य चरणरज उपास्ते तस्य वयं का नाम अभिलषणीयाः अपि च किन्तु उत्तमस्त्रीणां तत्सुलभत्वेऽपि कृष्णपक्षे दीनानुकम्पिनि पुरुषे एव यत उत्तमश्लोकशब्दः प्रवर्तते। महायशा इति व्यवहारो भवतीति तथा कथनीयं त्वयेति भावः। यद्वा। स्वयशोविस्तारायैवास्मानङ्गीकृतवान्नास्मत्सुखार्थम् अन्यथा त्यक्त्वा न

गच्छेदित्याशयः । यद्वा । अपि च किंच उत्तमश्लोकशब्दः कृष्णपक्षे दीनानुकम्पिनि पुरुषे प्रवर्त्तते । तस्य तु अस्मादृशीषु दीनास्वनुकम्पानावान्न उत्तमश्लोकता ॥ १५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे स्वसः मैवंवद त्वयि स्नेहाधिक्या तेन तत्वदर्थमेवाहं प्रेषित इत्याशंकायामाह दिवीति अद्य प्रभृतिषु याः स्त्रियः स्युः तासुमध्ये काः स्त्रियः कपटेन कपटरूपेण रुचिरहास्येन भ्रूविजृंभो भृकुटिविलासो यस्य एवंभूतस्य तत्तस्य कृष्णस्य दुरापाः दुःप्रापाः न काश्चिदपीत्यर्थः कपटेति संबोधनं वा किंच यस्य चरणरजः भूतिर्लक्ष्मीः उपास्ते समीपस्था सती सेवते तत्र वयं काः तत्र रूपचातुर्यलावण्यादिहीनानामस्माकं किं प्रयोजनमित्यर्थः अपि च यद्यप्येवमस्ति तथापि कृपणानां दीनानां पक्षे यस्य तस्मिन् दीनदयालौ नरोत्तमे उत्तमश्लोकशब्दः प्रवर्त्तते उत्तमः सर्वोत्कृष्टः श्लोकः कीर्त्तिर्यस्य स इति शब्दस्तत्रैव प्रवर्त्तते तस्य दीनदयालुत्वात् तेन त्वं प्रेषितः खलु अतस्ततसमाचारास्त्वया वक्तव्या इति भावः । यद्वा उत्तमश्लोकः इति । शब्दस्तस्य नाम कृपणानामविवेकीनां पक्षे भवति कृपणा एव तस्योत्तमश्लोकत्वं जल्पन्ति नतु मादृश्य इत्यर्थः अतोऽस्माकमग्रे तत्प्रसंगातिशयं कुतोवदसीतिभावः ॥ १५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु यदि पौरस्त्रियस्तद्वशं गताः स्युस्तदा तदालिङ्गनेन क्षपितकुचरुजश्च भवेयुस्तदा मदिष्टं चापि कल्पयेयुः, परं तु तास्त्वस्यातिदुरापा इत्यत्राहुः ॥ दिवीति ॥ हे मधुप, दिवि स्वर्गे, भुवि पृथिव्यां, रसायां पाताले च, याः स्त्रियः स्युः सन्ति, तासां मध्ये, काः स्त्रियः, कपटेन रुचिरेण हासेन सहितो भ्रूविजृम्भो यस्य तस्य, यद्वा । कपटः कपटप्रायः रुचिरः सुन्दरः हासश्च भ्रूविजृम्भो यस्य तस्य, तदिति पृथक् पदं तच्चाव्ययं, तेन तस्य श्रीकृष्णस्येत्यर्थः । दुरापाः दुष्प्रापाः, सर्वा अपि स्त्रियः तस्य सुलभा एव सन्तीत्यर्थः किं च यस्य श्रीकृष्णस्य भगवतः चरणरजः चरणरेणुः, भूतिः रूपलावण्यादिसंपन्ना स्वयं लक्ष्मीः, उपास्ते समीपस्था सती सेवते, तत्र वयं काः । रूपचातुर्यलावण्यादिहीनत्वात् किमात्मकाः. न किंचिदित्यर्थः । अतो रूपादिहीनानामस्माकं तस्य किं प्रयोजनमिति भावः । यद्यप्येवमस्ति तथापि सोऽस्मानपि संभावयिष्यतीति मन्यमाना वदन्ति अपि चेति । अपि च तथापि, अनुत्तमानुत्तमान् करोतीत्युत्तमयति उत्तमयतीत्युत्तमः श्लोको यशो यस्येत्युत्तमश्लोकः स चासौ शब्दश्चेत्युत्तमश्लोकशब्दः, कृपणपक्षे, दीनानामदीनतापादके नरोत्तमे, हरावेव प्रवर्त्तते हि । दीनदयालुत्वात्तेन त्वं प्रेषितः खल्वतस्त्वया तत्समाचारा वक्तव्या इति भावः । यद्वा । यदेतदस्माभिरुक्तं तत् त्वया कृष्णस्यानुकम्पा यथाऽस्मासु भवेत्तथैव तदग्रे कथनीयमिति भावः ॥ १५ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दिवि भुवीति १०. ७.१५.

का वै तादृक् त्रिलोकेऽप्यलिवर भवति स्त्री न वश्याऽस्य भूयात् का वा तत्रास्मदीया बत परिगणना नात्र वच्मः परं तम् ।
गृहीत्यङ्गीकृते यश्चरति समदृशैवोत्तमे वाऽधमे वा तस्मिन्नेवार्थवत्तां भजति निष्कपमामुत्तमश्लोकशब्दः ॥ ४० ॥

कृष्णप्रिया

भैया भ्रमर ? यदि आप कहेंगे कि भगवान तुम्हारा त्यागकर चले गए है तो स्तुति करेंगे तो मिल जाएँगे तो आशा व्यर्थ है क्योंकि स्वर्ग में भूमि में एवं रसातल में वे कौन सी स्त्रियाँ है जो कृष्ण के लिए असुलभ हो ? क्योंकि कृष्ण मधुरहास्य और हृदयहारी विलास कपट से भरा होने से स्त्रियाँ को निकट कर देने वाला है ऐसे छलिया के लिए क्या दुर्लभ है ? सतत् जिसकी कामना एवं उपासना करते हैं फिर भी एक कृपा कटाक्ष न करने वाली लक्ष्मीजी जिनके श्रीचरणों के रज की सतत् उपासना कर रही है उनके सामने हम क्या चीज है । लेकिन भ्रमर ! इस बात का हमें पूर्ण विश्वास है कि भगवान् श्रीकृष्ण उत्तम श्लोक हैं वे दीन दयालु है, आप सतत् दीनों पर दया करते रहे हैं हमें आशा है हम दीन पर कभी न कभी कृपा करेंगे॥ १५ ॥

विसृज शिरसि पादं वेद्म्यहं चाटुकारै[1]रनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात् ।
स्वकृत इह विसृष्टापत्य[2]पत्यन्यलोका व्यसृजदकृतचेताः किं नु संधेयमस्मिन्[3] ॥ १६ ॥

कर्दमक्षमा

अन्वयः—हे मधुप ! शिरसि, पादम् विसृज, मुकुन्दात्, अभ्येत्य, अनुनयविदुषः, ते, चाटुकारैः दौत्यैः, अहम्, वेद्मि, स्वकृते, इह, विसृष्टापत्यपत्यन्यलोकाः, व्यसृजत्, अकृतचेताः अयम्, अस्मिन् किं, नु, संधेयम् ॥ १६ ॥

---

१. रलमनुनयसारैर्याहि दौत्ये मुकुन्द–विज. । २. पत्याप्त–विज. । ३. मस्य–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

पादमूले प्रविशन्तं क्षमापयिष्यन्तमिव मत्वाऽऽह। विसृजेति। शिरसि न्यस्तं पादं विसृज। तथाऽप्यमुञ्चन्तमाह। वेद्मीति। मुकुंदादभ्येत्य ततः शिक्षित्वेत्यर्थः। दौत्यैर्दूतकर्मभिश्चाटुकारैः प्रियोक्तिरचनाभिरनुनयः सांत्वनं तत्र विदुषः प्रार्थनाचतुरस्य ते तव सर्वमहं वेद्मि। मुकुंदवत्त्वमप्यविश्वसनीय इति भावः। ननु तेन किमपराद्धं तत्राह। स्वकृत इति। स्वकृते तदर्थमेव विसृष्टा अपत्यपत्यन्यलोकाः अपत्यानि पतयश्चेहलोकोऽन्यलोको धर्मसाध्यश्च स्वर्गादिः याभिस्ता नोऽस्मान् अकृतचेता असंयतचित्तश्चंचलो यो व्यसृजत्तत्याज अस्मिन्किं नु संधेयं किमनुसंधातव्यं किं तथ्यं ज्ञातव्यमित्यर्थः॥ १६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

संजल्पेनाह—विसृजेति। न्यस्तं स्थापितम्। विसृज अपाकुरु। तथापि तथोक्तेपि। ततस्तस्मात्। इत्यर्थ इति—अभ्याङ्संबंधादिणः शिक्षार्थत्वम् 'धात्वर्थं बाधते कश्चित्' इत्युक्तेरिति तात्पर्यम्। सर्वं कृत्यम्। इति भाव इति-भृत्येऽपि स्वामिनो धर्मः प्रायः स्यादिति न्यायेनेति भावः। स चाक्षिपति—नन्विति। तेन कृष्णेन। तत्राक्षेपे। असंयतचित्तोऽवशीकृतचित्तः। यः कृष्णः। अस्मिन्कृष्णे। अनुसंधातव्यं योक्तव्यम्, न किमपीति। संजल्पमाह—"सोल्लुंठया गहनया कयाप्याक्षेपमुद्रया। तस्याकृतज्ञताद्युक्तिः संजल्पः स तु कीर्तितः॥" इति। अर्थान्तरम्—प्रणतकृष्णशिरस्थितस्वपादस्मरणातिरेकविवशा स्वपादमुद्धवशिरसि स्थितं मत्वाह-विसृजेति। तव शिरसि स्थितं मम पादं विसृज मुञ्च, अहं त्वां वेद्मि। अनुनयः सांत्वनम्। किं ते दौत्येनेतो मुकुंदं याहि, किमित्येवं कोपगर्भं वचनं वदसीति तत्राह-स्वकृत इति। कृष्णार्थं त्यक्तपुत्रभर्तृबंधुजना अस्मानिह वने व्यसृजदिति। य इतोऽकृचेता अकृतज्ञः, कृतघ्न इत्यर्थः। दूतोऽहं त्वां संदधामीत्यत्राह—किन्त्विति। "उमाप्रणामसंक्रांतचरणालक्तकः शशी। संध्यानुग इवाभाति यस्य पायात्स वः शिवः॥" इत्याद्युक्तेरीश्वरेपीयं लीला जनमोहनार्थेति। सौरभलोभेन चरणतले प्रविशन्तमपि भ्रमरं—ननु लक्ष्मीकोटिनिर्मंछनीयनखद्युते देवि सत्यं त्वय्यपराद्ध एव कृष्णस्तस्मात्त्वं कृपयैव क्षमस्वेति प्रणमन्तं तं मत्वाह – शिरसि धृतं मम पादं विसृज त्यज, इतो दूरीभवेत्यर्थः। वेद्म्यहमिति-लक्ष्म्यादिकेव नाहं प्रतार्यति भावः। मुकुन्दात्सकाशादभ्येत्य चाटुकारैः प्रियोक्तिरचनारूपैर्दौत्यैर्दूतकर्मभिरनुनयविदुषस्तस्मादनुनयप्रकारं शिक्षितवतस्तव सर्वं शीलादिकं वेद्मि। कर्मणि वा षष्ठी, त्वां वेद्मीत्यर्थः। ननु स्वामिनि! त्वत्प्राणकोट्यधिकेन तेन सह विग्रहेणालं प्रत्युत मया तीर्थेन संधिरेव कर्तुं युज्यत इति तत्राह—स्वकृत इति। तैर्व्याख्यातम्। तत्र रासमुरलीवादनसमयेतगृहनिरुद्धगोपीभिरपत्यानि त्यक्तानि तदानीं तानि त्यक्त्वैव निस्सृतत्वात्, अस्माभिः पतयः, धन्यादिकन्याभिः पित्रादय इति यथासंभवं ज्ञेयम्। ता गोपीर्यो व्यसृजत्। कीदृशः—अकृतचेताः, न विद्यते कृते उपकृते चेतो यस्य सः, अकृतज्ञ इत्यर्थः। नु अहो ईदृशे तस्मिन्कठोरे किन्नु संधेयं संधातुमर्हमपि तु नैवेत्यर्थः। अत्र पूर्वार्द्धे सोल्लुंठाक्षेपमुद्रा, उत्तरार्द्धेऽकृतज्ञता। आदिना निर्दयत्वपरद्रोहित्वप्रेमशून्यत्वानीत्ययं संजल्पः। तदुक्तम्—"सोल्लुण्ठया गहनया कयाप्याक्षेपमुद्रया। तस्याकृतज्ञताद्युक्तिः संजल्पः कथितो बुधैः॥" ॥ १६॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

अहमित्यन्या न जानन्तु नाम अहं तु विचक्षणा जानाम्येवेत्यर्थः। दौत्यैर्दूतकर्मभिश्चाटुकारैर्दूत्यैरिति काचित्कं मुकुन्दादित्यस्माकं सर्वासां गृहादिसर्वपरित्यागं ददातीति तथानाम्नः इत्यनेन धूर्त्तत्वं क्रूरत्वञ्चाभिप्रेतं तदीयत्वेन दूतस्य च धूर्त्तस्वभावत्वेन तस्य तु परमाविश्वसनीयत्वमुक्तम् अन्यत्तैः। यद्वा। कमलबुद्ध्या पुनरुपसृत्य पादोपरि तं मृदु रुवन्तं भ्रमरमवेक्ष्य भो देवि मा रोषं कार्षीः सकृदपि मे विज्ञप्तिं कृपया शृण्विति याचमानमिव च तं मत्वाह विसृजेति। तत्र सोल्लुण्ठमाह त्वां मुकुन्दञ्च युवयोः शीलञ्च सर्वमहं वेद्मि तस्मान्मे पादं ते त्वदीयैरसाधारणैश्चाटुकारैः सह विसृज मत्पादं निजचाटुकारांश्च युगपत्त्यज इत्यर्थः कथम्भूतैः। अनुनयविदुषो मुकुन्दादभ्येत्य कृतैर्दूतकृत्यैः। ननु स्वामिनि तेन प्रेष्ठेन सह विग्रहेणालं सकृदपराधं क्षान्त्वा मय गीतेन सन्धिरेव कर्त्तुं युज्यत इति तत्राह। स्वेति। विसृष्टा पतयश्चापत्यानि चान्ये च गृहादयो लोकाश्च सर्वे ऐहिक मुष्मिकसुखभोगसहायाः। यद्वा। किं विशेषेणायं परश्चेति लोकौ याभिस्ताः। अकृतचेताः न विद्यते कृते उपकृते चेतो यस्य स अकतज्ञ इत्यर्थः। यद्वा। न कृतमस्मासु चेतः एता अनन्यगतय इति मनोऽपि येन सः अथवा स्वकृते स्वार्थम् अस्मान् विसृष्टापत्यपत्यन्यलोका अकृत अकार्षीत् इताश्च प्राप्तास्तु व्यसृजत्। नु अहो ईदृशेऽस्मिन् कठोरे शठवरे किं सन्धेयं सन्धातुमर्हमपि तु नैवेत्यर्थः इत्याक्षेपः॥ १६॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहमित्यन्या न जानातु नाम, अहन्तु विचक्षणा जानाम्येवेत्यर्थः। दौत्यैर्दूतकृत्यैश्चाटुकारैः, यद्वा, चाटुकारैः, यद्वा चाटुकारैर्दौत्यैश्च; पादग्रहणादिभिः; यद्वा, मुकुन्दात्तत्सकाशाद् दूतत्वैरभ्येत्य, बहुत्वं गौरवात्। तत्र च मुक्तिं कुत्सितामपि ददातीति लोकवञ्चनया धूर्त्तत्वमभिप्रेतम्। तदीयत्वेन पुनश्च दूतस्य धूर्त्तस्वभावत्वेन परमधूर्त्ततोक्ता, श्लेषेण मुखे कुन्दतुल्या दन्ता

यस्येति सौन्दर्य्यमेवास्ति, न च विचार इत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, कमलबुद्ध्या पादोपरि पतितं मृदु रुवन्तं भ्रमरमवेक्ष्य भो देवि! मा रोषं कार्षीः, सकृदपि मे विज्ञप्तिं कृपया शृणुवेति याचमानमिव तं मत्वाह—विसृजेति। त्वां मुकुन्दञ्च युवयोः शीलञ्च सर्व्वमहं वेद्मि, तस्मान्मे पादं त्वदीयैरसाधारणैश्चाटुकारैः सह विसृज, मत्पादं निजचाटुकारांश्च त्यजेत्यर्थः। कथम्भूतैः? अनुनयविदुषो मुकुन्दादभ्येत्य दौत्यैर्दूतकृत्यैः। ननु स्वामिनि! तेन प्रेष्ठेन सह विग्रहेच्छयालम्, सकृदपराधं क्षान्त्वा मया तीर्थेन सन्धिरेव कर्त्तुं युज्यत इति तत्राह—स्वेति। विसृष्टाः पतयश्चापत्यानि च, अन्ये च गृहादयः लोकाश्च सर्व्वे ऐहिकामुष्मिक-सुखभोगसहायाः। यद्वा, किं विशेषनिर्द्देशेन, अयं परश्चेति लोकौ याभिस्ताः, अकृतचेताः—न विद्यते कृते उपकृते चेतो यस्य सः, अस्माकं स्वस्य च कृतमननुसन्दधानोऽकृतज्ञ इत्यर्थः। यद्वा, न कृतमस्मासु चेतः, एता अनन्यगतय इति मनोऽपि येन सः। यद्वा, स्वकृते स्वार्थस्मान् विसृष्टापत्यपत्यन्यलोका अकृत चकार। इताश्च प्राप्तास्तु व्यसृजत्। नु अहो अस्मिन् ईदृशेऽतिकठोरे शठवरे किं सन्धेयं सन्धातुं योग्यम्, अपि तु नैवेत्यर्थः—इत्याक्रोशः॥ १६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

शिरसि पादं त्वच्छिरसि निहितं पादम् अकृतवेत्तुः अकृतस्य॥ १६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ स्वशिरसि भ्रममाणं तं श्रोत्रान्त्युपांशु प्रियोक्तीरभिधातुं चरन्तमिवालक्ष्याह। शिरसि पादं न्यस्तमिति शेषः। विसृज पादेन मच्छिरो मास्पृशेत्यर्थः। तथाप्यमुञ्चन्तमाह। वेद्मीति मुकुन्दादभ्येत्य ततः शिक्षित्वेत्यर्थः। दौत्यैर्दूतकर्मभिश्चाटुकारैः प्रियवचनैश्चालमनुनयविदुषः प्रार्थनाचतुरस्य ते वेद्मि सर्वं विवक्षितं वेद्मीत्यर्थः। मुकुन्दवत्त्वमपि न विश्वसनीय इति भावः। ननु तेन किमपराद्धं तत्राह। स्वकृते तदर्थमेव विसृष्टान्यपत्यानि पतयोऽन्ये लोका धर्मसाध्या याभिस्ता अस्मान् व्यसृजत्करस्ततोऽन्यो महानपराध इति भावः। अतो ऽसावकृतचेता अकृतज्ञः कृतघ्न इति यावत् अतोऽस्मिन् किंनु संधेयं सन्धिना साध्यं किमस्तीत्यर्थः। नहि कृतघ्नेन सन्धिरुचितः नवा कृतोऽपीष्टसाधनमिति भावः॥ १६॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रणतकृष्णशिरःस्थितस्वपादस्मरणातिरेकविवशा स्वपादमुद्धवशिरसि स्थितं मत्वा वक्ति। विसृजेति। तव शिरसि स्थितं मम पादं विसृज मुञ्च अहं त्वां वेद्मि अनुनयसारैः सान्त्वनविषयैश्चाटुकारैरापातरमणीयैः प्रियवचनैः अलं पर्याप्त किञ्च दौत्ये स्थितस्त्वं मुकुन्दं याहि किमित्येवं कोपगर्भवचनं वदसीति तत्राह। स्वकृत इति। स्वकृते स्वनिमित्तं कृष्णार्थमित्यर्थः विसृष्टापत्यपत्याप्तलोकाः त्यक्तपुत्रभर्तृबन्धुजनाः अस्मानिह वने व्यसृजदिति यदतोऽकृतचेताः अकृतज्ञः कृतघ्न इत्यर्थः। इतोऽहं त्वां सन्दधामीति तत्राह। किन्न्विति। अस्य कृष्णस्यानुसन्धेयं किन्नु न किमपीत्यन्वयः अनुनयसारैः श्रेष्ठैर्वा—

उमाप्रणामसङ्क्रान्तचरणालक्तकः शशी। सन्ध्यारुण इवाभाति यस्य पायात्स वः शिवः॥ इति

वचनात् ईश्वरोऽप्यजनमोहनार्थमेवं विधलीलो जयतीति॥ १६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

पुनर्भ्रान्त्वा भ्रान्त्वा चरण एव पतितं तमालक्ष्य सोपेक्षमाह—विसृज शिरसीत्यादि। मुकुन्दादभ्येत्य मुकुन्दसमीपादागत्य दौत्यैर्दूतकर्मभिश्चाटुकारैः पादपतनादिभिश्चानुनयविदुषः प्रसादनपण्डितस्य तव चरितं वेद्मीत्यर्थः। चरितमित्यध्याहार्थम्। उन्मादोक्तौ न्यूनपदं गुणः। तस्माच्छिरसि कृतं पादं विसृज। मुकुन्दादभ्येत्येति मुकुन्दात् सर्वमिदं शिक्षितमिति भावः। तेन धूर्त्ततैवेयम्, न तु साहजिकमिदम्। तस्मात् पादं मुञ्च। अथवा, पादं शिरसि विसृज। शिरसि करोषि चेत् कुरु। किं तेन तेनापि, न कतिधैवं कृतम्। ननु कथमेवं काठिन्यादौदासीन्यमालम्बसे? इत्याह–स्वकृत इवेत्यादि। स्वकृते स्व स्वनिमित्तं विसृष्टापत्यपत्यन्यलोकाः। अस्मादकृतचेता अकृतज्ञ इव यो वासृजत् तस्मिन्नकृतज्ञे नु भोः किं सन्धेयम्, किं पुनः सन्धिः कार्य इत्यनपेक्षैव समुचिता। तेन शिरसि कृतपादं मुञ्च, शिरसि वा पादं विसृज, मम न कापि हानिरिति। अत्रोन्मादोऽङ्गी, अवहित्थास्मृत्यमर्षादयोऽङ्गानि। आलापः, पूर्ववृत्तभाषणात्॥ १६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

विसृज शिरसीत्यादि तुल्यमेव एवं विधान् चरणपतनादीननुननयान् वेत्तीति तथा तस्मात् मुकुन्दादभ्येत्य शिक्षित्वा आगतस्त्वं शिरसि कृतं पादं विसृज। एवं तेनापि कति वा पादमूले न पतितमिति भावः। ते त्वां वेद्मि; यद्वा, ते तव सर्वं वेद्मि॥ १६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सौरभलोभेन चरणतले प्रविशन्तमपि भ्रमरं ननु लक्ष्मीकोटिनिर्मञ्छनीयनखद्युते देवि ! त्वयमपराद्ध एव कृष्णस्तस्मात्त्वं कृपयैव क्षमस्वेति प्रणमन्तं तं मत्वाह । शिरसि धृतं मम पादं विसृज त्यजेतो दूरीभवेत्यर्थः । वेद्म्यहमिति । लक्ष्म्यादिकेत्र नाहं प्रतार्येति भावः । मुकुन्दात सकाशादभ्येत्य चाटुकारैः प्रियोक्तिरचनारूपैर्दौत्यैर्दूतकर्मभिरनुनयविदुषस्तस्मादनुनयप्रकारं शिक्षितवतस्तव सर्वं शीलादिकमहं वेद्मि । कर्मणि वा षष्ठी । त्वां वेद्मीत्यर्थः । ननु स्वामिनि ! त्वत्प्राणकोट्यधिकेन तेन सह विग्रहेणालं प्रत्युत मया तीर्थेन सन्धिरेव कर्तुं युज्यत इति तत्राह । स्वकृते तदर्थं विसृष्टानि त्यक्तानि अपत्यानि च पतयश्चान्यलोकाश्च मातापित्रादयश्च याभिः । तत्र रासमुरलीवादनसमये अन्तर्गृहनिरुद्धगोपीभिरपत्यानि त्यक्तानि तदानीं तानि त्यक्त्वैवाभिसृतत्वात् । अस्माभिः पतयः धन्यादिककन्याभिः पित्रादयः इति यथासम्भवं ज्ञेयम् । ता गोपीर्यो व्यसृजत् । कीदृशः । अकृतचेताः न विद्यते कृते उपकृते चेतो यस्य स अकृतज्ञ इत्यर्थः । नु अहो ईदृशेऽस्मिन् कठोरे किं नु सन्धेयं सन्धातुमर्हम् अपि तु नैवेत्यर्थः । अत्र पूर्वार्द्धे सोल्लुण्ठा आक्षेपमुद्रा । उत्तरार्द्धे अकृज्ञता आदिशब्दान्निर्दयत्वपरद्रोहित्वप्रेमशून्यत्वानीत्ययं सञ्जल्पः । यदुक्तम् ।

सोल्लुण्ठया गहनया कयाप्याक्षेपमुद्रया । तस्याकृतज्ञताद्युः सञ्जपः कथितो बुधैः ॥ इति ॥ १६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

सरोजबुद्ध्या पादतले प्रविशन्तं भो मातः ! सज्जनाग्रगण्यास्तव पादं शिरसि धृत्वाऽहं त्वां क्षमापये पदोपरि शिरःस्थापनमात्रेऽपि क्षमन्ते सज्जनाः अतः क्षमैव तवोचितेति ज्ञापयिष्यन्तमिव मत्याह । विसृजेति । स्वशिरसि स्थापितं मदीयं पादं विसृज एतावता अस्मद्दुःखनिवृत्त्यभावात् वृथैव तद्धारणाग्रह इति भावः । तथाप्यत्यजन्तं प्रत्युत रुदन्तं भो देवि ! त्यज्यतां कोपस्त्वन्मनोऽनुकूलमेव भविष्यतीति प्रार्थयन्तमिव मत्वाह । वेद्म्यहमिति । मुकुन्दादभ्येत्य तत्तस्मात्सर्वं शिक्षित्वा दौत्यैर्दूतकर्मभिश्चाटुकारैः प्रियोक्तिरचनाभिरनुनयविदुषः प्रार्थनाभिज्ञस्य तव सर्वमहं वेद्मि त्वामिति कर्मणि वा षष्ठी मुक्तिं ददातीति मुकुन्द इति बन्धनकर्तुरिदं विपरीतं नाम तस्मात्त्वया सर्वं शिक्षितमतो विपरीतार्थतावृत्तत्वात्त्वद्वाक्यं मुकुन्दवत् त्वं च न विश्वासार्हं इति भावः । अनभिज्ञा हि वञ्च्यन्ते न चाहं लक्ष्मीवदनभिज्ञा किन्तु विपरीतार्थनिश्चयवतीति वेद्म्यहमित्यनेन सूचितं वञ्चनाय प्रवृत्तस्य तव तव चातुर्यमपि प्रत्युत मन्निश्चयमेव दृढीकरोतीति ज्ञापनाय चाटुकारैरित्युक्तं सुपुष्पितः स्यादफल इत्युक्तत्वेन निष्फलवाङ्माधुर्यस्य वञ्चनायामेव पर्यवसानात् । यद्वा मुकुन्दादभ्येत्यास्मद्गृहान् प्रत्यागत्यैवंविधस्य तव विद्वत्तामहं जानामि मदग्रे त्वया स्वविद्वत्ता न प्रकटनीया स्वत एवैवंविधविनयं जानासि न तु परत इति सूचनाय त इत्युक्तम् । ननु दूतत्वात्तच्छिक्षित एवाहमिदं ब्रवीमीति शङ्कानिवृत्त्यर्थमभ्येत्य विदुष इत्युक्तम् अत्रैवागत्यायं प्रकारस्त्वया कल्पितः किं च स मुकुन्दः मरणानन्तरं मोक्षप्रदः जीवतीनामस्माकं सुखावहमुक्तप्रकारं शिक्षयितुमयोग्य इति मुकुन्दपदेन सूचितं यद्वा केवलं कल्पितोक्तप्रकारेण नास्माकमेव त्वं वञ्चकः किन्तु स्वभर्तुरपि निरुक्तमुकुन्दाख्यस्वस्वामिकार्यविरुद्धकार्यसम्पादकत्वान्मोक्षसाधनब्रह्मज्ञानाद्युपदेष्टुः सकाशादागतस्य तवाननुरूपत्वाद्वास्य प्रकारस्येति ध्वनयितुं मुकुन्दपदयोगः तथा च वृथैववदत पाण्डित्यप्रकटनमस्माभिर्बुद्धत्वात्स्वभर्तुः प्रतिकूलत्वाच्चात इतो दूरे गत्वा तूष्णीं तिष्ठेत्यर्थः । ननु तर्काप्रतिष्ठानादिति न्यायात्तत्त्वानिश्चायकैः कोपोद्भूतैरेवंविधतर्कैः स्वभर्तरि दोषानारोप्य वृथैव तेन विग्रहवती जातासि तेन च संतप्यसे अतः प्राणप्रियया त्वया प्राणप्रियेण तेन सन्धिरेव कर्त्तव्य इति बद्धोञ्जलिः सन् त्वामहं प्रार्थयामीतिचेत्तत्राह । स्वकृत इति । स्वस्य कृष्णस्य कृते तत्सुखार्थं तत्सङ्गजन्मसुखार्थं वा इह जीवद्दशायामेव विसृष्टास्त्यक्ताः अपत्यानि पतयः अन्ये पित्रादयः लोका इतरजना स्वर्गादयश्च याभिस्ता नः अकृतचेताः असंयतचित्तः न कृते अस्मत्कृतोपकारे चेतो यस्य स अकृतज्ञ इति व्यसृजत् त्यक्तवान् । यद्वा न च कृतमस्मासु चित्तं येन स यो हि प्रेष्ठो गच्छति स प्रेयसीं चित्ते धृत्वैव गच्छति स तु नैवं कृतवान् । यद्वा आत्मार्थमस्मान् विसृष्टापत्यादिका अकृत अकार्षीत् इताः प्राप्तास्तु सतीर्व्यसृजत् नु अहो एवंभूते अस्मिन् कठोरे अकृतज्ञे शठे संधातुमर्हं किं न किमपि यावत्कर्त्तव्यं स्थितं तावद्गोपिकाभिरस्माभिः कृतं स तु सर्वसमर्थोऽपि न किंचित्कृतवानेवमर्थे पूर्वज्ञाते पुनरधुना किं कर्तव्यं वक्तव्यान्तराभावात् फलाभवश्चेत्यर्थः॥ तथाचैवं भूतातिप्रसिद्धापराधवति दोषोद्भावनं नासत्तर्कविजृम्भितं सद्युक्तिबोधितं त्वर्थं वेदोऽपि न बाधनायालमिति भावः । यद्वा सन्धिः कर्तव्य इत्यस्मान्प्रति प्रार्थना व्यर्था तस्य विग्रह पूर्वकत्वात्तस्य च तेनैव कृतत्वादतः स एवैवं प्रार्थनीय इत्याशयेनाह स्वकृत इति । अस्माभिस्तु सन्धिसाधनं सर्वमप्यनुष्ठितं न किञ्चिदप्युर्वरितमतो न वयं तत्र नियोज्या वस्तुतः सोऽपि न नियोज्यः एवं कृतोपकारा अप्यस्मानकृतार्थां विहाय गतः स किमर्थं सन्धिवार्तामपि श्रोष्यतीत्यर्थः । अत्र संजल्पः तदुक्तम्—

सोल्लुण्ठया गहनया कयाप्याक्षेपमुद्रया । तस्याकृतज्ञताद्युक्तिः सञ्जल्पः कथितो बुधैः ॥

इति निर्दयत्वपरद्रोहित्वप्रेमशून्यत्वान्यादिपदादादेयानि उद्धवपक्षेऽपि तथा करिष्यन्तं तमालक्ष्येयमुक्तिः समाना श्रुतिपक्षे एवमविद्यावृतस्य जीवस्यान्तःकरणादितादात्म्याध्यासादनर्थपरम्पराप्राप्तिः समस्तोपनिषत्तात्पर्यविषयप्रत्यगभिन्नब्रह्मसाक्षा-

त्काराद्धरित्युक्तमथेदानीं तदन्तरङ्गसाधनभूतां भगवदनुवृत्तिं विधत्ते विसृजेति । मुकुन्दान्मुक्तिप्रदानाय वेदरूपेण कृष्णादिरूपेण च त्वदुपायोपदेशपरायणात् निःसृतैर्दौत्यैःदूतभावं प्राप्तैरिव वाक्यैः "देहान्ते देवः परं ब्रह्म तारकं व्याचष्टे यस्य देवे परा भक्तिः परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश पुरुषः स परः पार्थ ! भक्त्या लभ्यस्त्वनन्यया । तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयान्ति ते । तमेव शरणं गच्छ सर्वभावेन भारत ! तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् । मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे" । इत्यादिभिः चाटुकारैरभ्येत्य तमनुसृत्यानन्यशरणो भूत्वा यस्तवानुनयस्य प्रायो विमुखस्याभिमुख्यरूपनिवृत्तिस्तद्विदुषः परमात्मनः पादं शिरसि विसृज धारय कदापि तत्पादपद्मं मामुञ्च मनसा प्रपन्नत्वनिश्चयः वचसा तवास्मीति प्रार्थना शिरसा तच्चरणोदकादिधारणं चेति मनोवाक्कायैर्भगवदाराधनं त्वया सर्वदा कार्यमितीदमेव तव निःश्रयस्करमित्येवमहं वेद्मीत्यर्थः । इममेवार्थं तदनुवृत्तिरहितानन्दया द्रढयति । स्वकृत इति । स्वस्य जीवस्य कृते धर्मार्थकाममोक्षार्थम् अपत्यानि पतयो भर्त्तारः स्वामिनो राजादयश्चान्ये पितृभ्रातृभार्यादयः लोकाः स्वर्गादयः विसृष्टा रचिताश्च ते अपत्यादयश्च ते वर्तन्ते तथाभूतेऽस्मिन् परमात्मनि अकृतचेताः विवेकविधुरः कृतघ्नो वा इहाधिकारिशरीरे सन्धेय संधिसाधनं किमिति व्यसृजत् त्यक्तवान् अयोग्यमिदमित्यर्थः । यद्वा अत्र शिष्टाचारं प्रमाणयति । स्वेति । स्वकृते स्वाभीष्टसिद्ध्यर्थं विसृष्टास्त्यक्ता अपत्यादयो यैस्ते भगवत्यर्पितसर्वार्था इतः मोक्षं गताः हे अकृत अज ! अस्मिंश्च एवभूतेऽपि भगवति सन्धेयं किन्न व्यसृजत् तथा च श्रुतयः "आराममस्य पश्यन्ति न तं पश्यति कश्चन । न तं विदाथ य इमा जजान अन्यद्युष्माकमन्तरं बभूव नाहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्तीः त्याद्याः ॥ १६ ॥

गूढार्थदीपिनी

शिरसि निहितं मे पादं त्यज । मुकुन्दात् अभ्येत्य शिक्षित्वा दूतकर्मभिः चाटुकारैः प्रियवचनैः प्रार्थनाचतुरस्य ते सर्वं कपटं वेद्मि । स्वकृते कृष्णार्थमेव विसृष्टा अपत्यादयो याभिस्ताः नः व्यसृजत तत्याज एतादृशोऽकृतचेताः कृतघ्नः नु अहो अस्मिन् कृतघ्ने किं नु सन्धेयं सन्धिः करणीयः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कान्तमात्रज्ञानवती काचित् शिरसि निहितचरणं कर्णे सन्देशशब्दविवक्षुमिव मत्वाह । विसृजेति । शिरसि निहितं पादं विसृज पादं मदीये शिरसि माकुर्वित्यर्थः । मुकुन्दादभ्येत्य ततःशिक्षित्वा दौत्यैर्दूतकर्मभिः चाटुकारैः प्रियवचनैश्च अनुनयविदुषः शिक्षाकुशलस्य ते सर्वमहं वेद्मि मुकुन्दसन्देशैरस्मत्स्नेहार्थं प्रवृत्तोऽसीति भावः तत्स्नेहस्तु अनुभूतपूर्व इत्याह । स्वकृत इति । स्वकृते मुकुन्दकृते विसृष्टाः पत्यादयो यया तां माम् अकृतचेताः अकृतं नार्पितं मयि चेतो येन सः व्यसृजत् एवम्भूतेऽस्मिन्मुकुन्दे पुनः किन्नु सन्धेयं न किमपीत्यर्थः ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

क्रमात्क्रीडता षट्पदेन शिरसि पादस्थापने कृष्णपादं तं ध्वनयन्त्युपात्तकोपा वदति ॥ विसृजेति । शिरसि स्थापितं तव पादं विसृज त्यज निष्कासयेति यावत् । अनेनोद्धवोऽपि कटाक्षितः । त्वामपि कितवदूतत्वात्कितवं वेद्मि । अनुनयसारैः प्रणयिनीप्रणयमेलकालापश्रेष्ठैश्चाटुकारैरापातप्रियवचनैरलमफलपर्यवसायित्वात् । दूत्ये पुनरपि मुकुन्दं याहि । दौत्ये इति लेखकप्रसादः । दूतवणिग्भ्यामिति भावकर्मणोर्यतो यतो विधानं । किं तव विषये कितवता त्वयाऽदर्शि देवस्येत्यत आहुः ॥ स्वकृते स्वनिमित्तमिति विसृष्टास्त्यक्ता अपत्यानि पुत्राः पतयो भर्तार आप्तलोका बन्धवश्च याभिस्ता अस्मान्यो व्यसृजत तत्याज । सन्धिं कर्तुमेवायातः किमायताक्ष्य एवं तर्जनमित्यतः किं दुर्जनेन सन्ध्यार्जनेनेत्याहुः । अकृतचेता अकृतज्ञ इत्यस्यानेन किं सन्धेयमिति । इह स्वकृतेऽस्मत्कर्मण्येवं विघटके सति हे सन्धे विरहजबान्धे पादामित्यनुवर्तते । किं तु नुमः सोऽपीदानीं संयमिनीं नयत्वित्यान्तरङ्गिको भावः । इन्द्रावरुणनूनुवामित्यग्भाष्ये अद्य वां नु नुमो लोप इत्याद्युक्तेर्नु नुम इत्यर्थः । विस्तृतं च स्कन्धान्तरेऽस्माभिर्मन्तव्यं । सन्धा स्थितौ प्रतिज्ञायां बाधादुःखनिषेधयोरिति विश्वः । शरणीकृतमरणानां न तेन सन्धानकृत्यमिति तात्पर्यः । अयमस्यासदृशस्य कृष्णस्य हे सन्धे युष्मदायुष्मत्ता यावत्तावन्न त्यक्ष्यामीति प्रतिज्ञे त्वां नु नुमस्त्वया वयं वञ्चिता इति वा । अस्य सन्धा इयं किं नु इति । उद्धवं शिरस्थापितस्वाङ्घ्रिं मत्वा निष्कासयेति वदन्तीति वा ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु नास्माभिर्ज्ञाताः भवत्यः क्रुद्धाः इति उदासीना इति वा तथा सति दौत्येन नागच्छेम अधुना तु समागताः किञ्चित्कर्तव्यमिति प्रार्थनया भगवता सह सन्धिः कर्तव्य इति ससाष्टाङ्गप्रणामं भ्रमर उद्धवो वा करोतीत्यभिप्रेत्याह । विसृजेति । शिरसि बलात् स्थापितं पादं विसृज नह्येतावता उपपत्त्यभावात् अस्माभिरङ्गीकर्तुं शक्यते अतः वृथैव पादग्रहणनिर्बन्धः । ननु यथैव

भवतीभिर्वक्तव्यं तथैव करिष्याम इति कथं निषेध इति चेत् तत्राह । वेद्म्यहमिति । इममर्थं करिष्यति भगवान् न वेतीममर्थमहं वेद्मि सन्दिग्धे हि वचनेन बोधनम् अस्माकं तु विपरीतनिश्चय एव ननु कश्चित्स्वापमानं करोति अनभिप्रेत्य कार्यं तस्मात् न निरादरणं कर्तव्यमित्याशङ्क्याह । चाटुकारैरनुनयविदुष इति । अयं प्रकारस्तु स्वकपोलकल्पितः नतु भगवताप्युक्तः यतः स मुकुन्दो मोक्षदाता मारयिष्यत्येवेति भावः । ननु जीवतीनामस्माकं सुखं करिष्यति ततश्च त्वमागतोऽस्मदभिप्रेतं करिष्यामीति कथं वदस्यतः स्वामिविरुद्धवाक्यत्वाद्दूतस्त्वं वञ्चक एव । ननु तदकथने मया कुतः शिक्षितमिति चेत्तत्राह । अनुनयविदुष इति । अनुवयं कर्त्तुमत्यन्तमभिज्ञस्त्वमतस्ते विद्यां जानामि । न केवलं वृथानुनय एव किन्तु चाटुकारैः सहितोऽपि अतः उत्पत्त्या उपपत्त्या च तव मनो न शुद्धं कायेन वाचा च वञ्चनार्थमनुननयाभिनयं करोषीति भावः । ननु कथमेवं निषिध्यते अन्तःकरणम्याप्रत्यक्षत्वात् कायवाग्भिरेव तदभिज्ञानादतः क्रोधवशादेवान्यथा स्फुरति नत्वस्मासु दोषोऽस्तीति चेत्तत्राह । स्वकृत इह विसृष्टेति । नहि युक्तिबाधितं वेदोऽपि बोधयति भगवानीश्वरः वयं गोपिकाः यावत्कर्तव्यमस्माभिः तावत्कृतं स सर्वसमर्थोऽपि न किञ्चित्कृतवान् एवमर्थे पूर्वं जाते पुनरधुना किं कर्त्तव्यं तदाह । स्वकृते इहैव विसृष्टाः अपत्यानि पतयश्च अन्ये च लोकाः स्वर्गादयोऽपि भर्त्राज्ञातिक्रमात् त्यक्ता याभिर्लोको हि दूरे गत्वा परित्यज्यते जनस्तु तत्रैव त्यक्तुं शक्तः त्यागोऽपि भगवदर्थ एव अत्यागे भगवानस्मान्न ग्रहीष्यति परसम्बन्धात् तादृशीश्च व्यसृजत् । ननु लोको हि कार्यार्थं गच्छति सर्वत्रैव विलम्बश्च भवति नैतावता त्यागो भवतीति चेत्तत्राह । अकृतचेता इति । न कृतं चेतो येन यो हि गच्छति सोऽन्तःकरणे तानत्यक्त्वैव गच्छति तास्वन्तःकरणं कृत्वैव गच्छति भगवांस्तु तद्विपरीतः अत एतादृशे भगवति किं संधेयं नु इति वितर्के येन सन्धितो भवति तं हेतुं न पश्यामीति। बहिः स्थिता अस्माभिरेव त्यक्ता अस्मदीया अन्तःस्थिताश्च तेनैव त्यक्ताः ॥ १६ ॥

श्रीसुबोधिनी–सारः

शिरसि पादं चरणं त्वं विसृज धेहि मुकुन्दादभ्येत्य ततः शिक्षित्वा दौत्यैः दूतोक्तैः चाटुकारैः प्रियवचोभिरनुनयविदुषः संप्रसादननिपुणस्य ते तव सर्वमहं वेद्मि जानामि स्वकृते आत्मार्थं विसृष्टास्त्यक्ता अपत्यं पतिरन्यलोकः स्वर्गो याभिस्ता अस्मान् अकृतमवशं चेतो यस्य स व्यसृजदत्यजत् अस्मिन् श्रीकृष्णे किं नु विश्वसनीयम् ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पादमूले प्रविशन्तं क्षमापयिष्यन्तमिव मत्वाह— विसृजेति । बलाच्छिरसि न्यस्तं पादं विसृज त्यज । ननु 'भवतीभिरुक्तमेव करिष्यामीति, किमेवं तिरस्कारेण' इत्याशङ्क्याह— वेद्मीति । मुकुन्दादभ्येत्य शिक्षित्वा आगतस्य दौत्यैर्दूतकर्मभिश्चाटुकारैः प्रियवचनैश्चानुनयविदुषः प्रार्थनाचतुरस्य ते सर्वं कपटमहं वेद्मि । मुकुन्दवत् त्वमपि न विश्वसनीय इति भावः । ननु 'तेन किमपराद्धम् , येनैवं तिरस्क्रियते ?' तत्राह स्वकृत इति । स्वकृते तदर्थमेव विसृष्टानि उपेक्षितानि अपत्यानि पतयोऽन्ये च लोका धर्मसाध्याः स्वर्गादयो याभिस्ता अस्मान् इह व्रजे व्यसृजत् तत्याज अयं महानपराधः । त्यागे हेतुमाह—अकृतचेता इति । न कृते उपकारे चेतो यस्य सः, कृतघ्न इत्यर्थः । अतोऽस्मिन् किं नु सन्धेयं सन्धिना साध्यम् ? नहि कृतघ्ने सन्धिरुचितः । न वा कृतोऽपि स इष्टसाधनमित्याशयः ॥ १६ ॥

अन्वितार्थप्रकाशिका

विसृजेति ॥ कपटेन शिरसि न्यस्तं मम पादं विसृज त्यज मुकुन्दादभ्येत्य शिक्षित्वा आगतस्य दौत्यैर्दूतकर्मभिः। दूत्यैरित्यार्षः पाठ इति तोषिणी । वृत्तिमते साधुरेव चाटुकारैः प्रियवचनैश्चानुनयविदुषः प्रार्थनाचतुरस्य ते सर्वं कपटमहं वेद्मि। मुकुन्द इव त्वमप्यविश्वसनीय इति भावः । नास्ति कृते उपकारे चेतो यस्य स अकृतचेताः कृतघ्नः चञ्चलचित्तो वा स्वकृते कृष्णार्थमेव विसृष्टानि उपेक्षितानि अपत्यानि पतयोऽन्ये च लोका धर्मसाध्याः स्वर्गादयो याभिस्ता अस्मान् इह व्रजे व्यसृजत्तत्याज अतोऽस्मिन् किं नु सन्धेयं सन्धिना साध्यं नहि कृतघ्ने सन्धिरुचितः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं पद्मबुद्ध्या पुनरुपगम्य पादमूलेरुवंतंमलोक्य भोभगनिरोषं मा कृथाः शिरसा ते चरणयुगलं नमामि एकवारमपि मत्कृतविज्ञापनं शृण्विति या च मानमिव आशंक्य निगदति विसृजेति हे कितवबंधो शिरसि धृतं पादं विसृज त्यज मुकुन्दादभ्ये सततः शिक्षित्वात्रागत्य दौत्यैः दूतकर्मभिः चाटुकारैः प्रियवचनरचनाभिः अनुनयविदुषः आश्वासननिपुणस्य ते निखिलं कृत्यमहं वेद्मि तस्य दूतत्वात्त्वमपि तद्वच्छंकनीय इति भावः । ननु तेन तव कोपराधः कृतस्तत्राह स्वकृत इति स्वकृते कृष्णार्थमेव विसृष्टास्त्यक्ताः अपत्यानि च पतयश्च अन्यलोकः स्वर्गश्च याभिस्ताः नोऽस्मान् अकृतचेता अस्वाधीनचितः यः श्रीकृष्णः इह व्रजे व्यसृजत तत्याजनु अहो अस्मिन् कठिनहृदये श्रीकृष्णे किं संधेयं अस्माभिस्तेन सह कृतः संधानं कर्त्तव्यं अपि तु नैवेत्यर्थः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ स्वशिरसि भ्राम्यमाणं तं श्रोत्रान्त्युपांशु प्रियोक्तीरभिधातुं चरन्तमिवालक्ष्याह ॥ विसृजेति ॥ शिरसि, न्यस्तमिति शेषः। पादं, विसृज। पादेन मच्छिरो मा स्पृशेत्यर्थः। एवमुक्तेऽपि चरन्तममुमाह वेद्मीति। हे भ्रमर, मुकुन्दाच्छ्रीकृष्णात्, अध्येत्य ततः शिक्षित्वेत्यर्थः। अभ्येत्येति पाठान्तरे, मुकुन्दसकाशादागत्येत्यर्थः। दात्यैः दूतकर्मभिः, चाटुकारैः प्रियवचनैश्च, अनुनयविदुषः प्रार्थनाचातुर्याभिज्ञस्य, ते तव, वेद्मि। सर्वं त्वद्विवक्षित जानामीत्यर्थः। मुकुन्दवत्त्वमपि न विश्वसनीयोऽसीति भावः। ननु तेन वा किमपराद्धं तत्राह। स्वकृते तदर्थमेव, विसृष्टाः अपत्यानि पतयः स्वामिनश्चेतीहलोकाः अन्यलोका धर्मसाध्याश्च याभिस्ता अस्मान्, इह अकृतचेताः अतज्ज्ञः कृतघ्न इति यावत्। व्यसृजत्। कस्ततोऽन्यो महानपराध इति भावः। अतः अस्मिन् कृष्णे, संधेयं संधिना साध्यं, किं नु किं वाऽस्तीत्यर्थः। न हि कृतघ्नेन संधिरुचितः, न वा कृतोऽपीष्टसाधनभूत इति भावः ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

विसृजेति : १०.४७.१६.

सख्युस्ते मित्रभावः सरलितमनसा नैव कार्यः कृतश्चेत् पाकस्तस्येदृगेव प्रभवति मधुप भ्रान्तिलेशो न चास्मिन्।
त्वं चेद्वक्ष्यस्ति मैत्र्यं मम सततमनेनेति युक्तं तदेतत् पुंसोर्वा कान्तयोर्वा भवति नहि पुनः पूरुषैर्योषितां तत् ॥ ४१ ॥
कृष्णस्त्वं कृष्णरूपः स च भवति भवान् षट्पदः षट्पदज्ञः स त्वं पद्मानुरक्तो मधुप सरलसद्वंशजातप्रचारः।
एवं वां मित्रभावः कथमिव न भवेन्नित्यवर्धिष्णुरस्मास्वास्ते नैकोऽपि योगस्तदिह वद कुतो मित्रभावेन भाव्यम् ॥ ४२ ॥
मद्वागर्थावधान-स्खलदखिलमनः संशया-स्तच्छयस्थाः कुर्यां हार्दाशयस्था इव चतुरतया तस्य तद्यात शीघ्रम्।
यत्प्रेयो मे तदस्यानुमतमिति वृथा कत्थनैः पथ्यभाजो नैवास्मान्मोहयालंत्वमसि हि मधुपो मध्वरिः स प्रसिद्धः ॥ ४३ ॥
यूयं मन्मित्रभोग्यायतनमिति मयाऽऽलम्बितं दूतकृत्यं किं नाम न्यूनमस्मिन् सरलितमनसो यूयमेषोऽपि तादृक्।
एवं चेत्त्वं ब्रवीषि प्रथमगुणिपदे त्वां वयं वर्णयामः सख्युस्ते चित्रचेष्टाऽऽशयफलितविदस्ता वयं नासि रे त्वम् ॥ ४४ ॥

कृष्णप्रिया

भ्रमर? यदि भगवान् श्रीकृष्ण के साथ समाधान के लिए आप विनय कर रहे हों तो क्षमा कीजिए? कृपया हमारे मस्तक पर बार-बार पैर रखना बन्द कर दीजिए। हमें अच्छी तरह से जानते हैं कि! आप मुकुन्द के दूत बनकर यहाँ आए हो, अनुनय विनय आदि दौत्यपना के धर्मों के आप अच्छे जानकार हो, पण्डित हो, मीठे वचनों से फुसलाने में कुशल हो लेकिन आप की यहाँ नहीं कामयाब होगी उद्धव? जिनके लिए श्रीकृष्ण के लिए, पति-पुत्र परिवार-लोक-परलोक आदि का सर्वथा त्याग कर दिया है ऐसे अनन्याश्रितों का विना विचार ही त्याग किया वैसे कृष्ण के साथ समाधान कैसे करें? ॥ १६ ॥

मृगयुरिव कपीन्द्रं विव्यधे [1]लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम्।
बलिमपि [2]बलिमत्त्वावेष्टयद् ध्वाङ्क्षवद् यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥ १७ ॥

कर्दमक्षमा

अन्वयः—अलुब्धधर्माः, अपि, मृगयुः, इव, कपीन्द्रम्, विव्यधे, स्त्रीजितः, अपि, कामयानाम्, स्त्रियाः, विरूपाम्, अकृत, ध्वाङ्क्षवत्, बलिम्, अत्वा, अपि, यः, बलिम्, अवेष्टयत्, तत्, असितसख्यैः, अलम्, "किन्तु", तत्, कथार्थः, दुस्त्यजः ॥ १७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च कृष्णस्य पूर्वाणि कर्माण्यनुसंदधाना बिभेम्यहमस्मादित्याह। मृगयुरिवेति। मृगयुर्लुब्धक इव यः कपीन्द्रं वालिनं विव्यधे अविध्यत्। लुब्धधर्मा क्रौर्यवान्। अलुब्धधर्मेति वा। लुब्धको हि तन्मांसमत्तुकामो विध्यत्ययं तु न तथाऽतो वृथा कठिन इत्यर्थः। तथा स्त्रियं च शूर्पणखां स्त्रीजितः सीतापरतन्त्रः काम एव यानं प्राप्तिसाधनं यस्यास्तां विरूपां छिन्नकर्णनासिकामकरोद्दाशरथिरूपेण। तथा बलिमपि वैरोचनिं तद्दत्तं बलिमत्त्वा भक्षयित्वा गृहीत्वेत्यर्थः। ध्वांक्षवत्काकवदवेष्टयद्बबन्ध वामनरूपेण। बलिमत्त्वाऽधोऽक्षिपत्। विष्टपाद्य इति पाठे बलिं पूजां गृहीत्वा विष्टपात्स्वर्गादधोऽक्षिपदित्यर्थः। तत्तस्मादसितस्य कृष्णस्य सख्यैरलम्। न किंचित्कार्यमित्यर्थः। एवं चेत्किमिति तं नित्यं गायथ तत्राह। दुस्त्यजस्तु तस्य कथारूपोऽर्थ इति ॥ १७ ॥

---

[1] यः किरातः—विज.। [2] बिलवासं वेदविदवर्गवन्द्य—विज.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

संधेयत्वे दोषमाह—किञ्चेति । अनुसंदधाना विमृशति—अस्मात्कृष्णात् । लुब्धको व्याधः । "मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनि" इति मेदिनी । लुब्धकानां त्विदमुचितमपि स तु न तथेत्याह—अलुब्धधर्मेति । तन्मांसं वानरपशुमांसम् । विध्यति हिनस्ति । अयन्तु कृष्णस्तु । न तथा न वानरमांसाशित्वाभावात् । इत्यर्थ इति-वानरमांसस्याभक्ष्यत्वात्तदर्थमपि तद्धननं नोचितं कुतोऽतोऽन्यथेति भावः । तथा तद्वत् । तथा ततोऽपि पूर्वतरावतारचरितमस्य शृणु—बलिमिति । तद्दत्तबलिं तत्समर्पितत्रिलोकीरूपपूजाम् । अत्त्वा गृहीत्वा । ध्वांक्षपक्षे तद्दत्तबलिं पुरुषार्पितबलिमत्त्वा तच्छिद्रस्येव स्वमलं त्यजतीतीत्यर्थः कार्यः । "ध्वांक्षपक्षे तद्दत्तबलिं पुरुषार्पितबलिमत्त्वा तच्छिद्रस्येव स्वमलं त्यजतीतीत्यर्थः कार्यः । "ध्वांक्षो मत्स्यात्स्वंगे काके तर्कोटे भिक्षुकेऽपि च" इति मेदिनी । तस्मात् सदातनकौटिल्यस्वभावत्वात् । एवं चेत् सख्यानिच्छा चेत् । तस्य कृष्णस्य । कथार्थः चरितव्यवहारः दुस्त्यजस्त्यक्तुमशक्यः, पारवश्यापादकत्वादिति भावः । एतच्चावजल्पेनोक्तम् । स च—"हरौ काठिन्यकामित्वधौर्त्यादासक्त्ययोग्यता । यत्र सेर्ष्यं भियेवोक्ता सोऽवजल्पः सतां मतः ॥" इति । वस्तुतस्तु कपेः सुग्रीवस्य ईं लक्ष्मीं द्रावयतीति कपींद्रस्तमपराधिनमित्यर्थः । बलिमिति—'बल-परिवर्तने' धातुः । बलति परिवर्तयतीन्द्रश्रियमिति बलिस्तेन परकीयं त्रैलोक्यं स्वीयं कृतमिति चौर्याख्यापराधं दृष्ट्वा दुष्टशिक्षणं कृतवानिति ॥ किञ्च - न केवलं तस्य तादृशचेष्टितादेव बिभेम्यपि तु श्यामतास्वभावादपीति तद्गुणयोगेन तदभेद बुद्ध्या धीरोदात्तत्वादिगुणतया प्रसिद्धेष्वपि श्रीरामवामनादिरूपेषु दोषं दर्शयन्ती तद्रूपं कैमुत्यं दर्शयति—मृगयुरिवेति । मृगयुर्व्याध इव निर्दयो गुप्तश्च सन् एको योऽसितः सोऽपि कपीनामवध्यानामीशमपि बालिनं विव्यधे । प्रसिद्धस्य मांसादिलुब्धस्य धर्माः क्रौर्यादयो यत्र तादृशः । अलुब्धधर्मा तद्धर्मरहितोऽपि वा । तदप्यास्ताम् । य एव स्त्रियं तत्रापि कामयमानामपि कामयानां साक्षाद्विश्रवःप्रभवां विरूपां छिन्नकर्णनासामकृत । तस्य च क्षत्रियजातितया तत्तत्संभवेन्नाम योऽन्योऽसितो ब्राह्मणजातितया तत्रापि ब्रह्मचारितया शान्त्यादिशुभयोग्योऽपि, बलिं परमधर्मात्मानमपि, तत्रापि बलिं तस्य पूजामुपहारमत्त्वा भुक्त्वा गाप्यवदात्मसात्कृत्यापि छलेन दानपूर्तिममत्वा विष्टपात् त्रैलोक्यराज्यादक्षिपत् भ्रंशयामास, तत्राप्यधोऽक्षिपत् भूविवरे विचिक्षेपः । पाठान्तरे त्ववेष्टयत् बबन्ध, पराजयतेति । काको यथा बलिं जग्ध्वापि लोकं वेष्टयति स्वजातीयानन्यानाहूय तद्गृहमावृणोति तद्वत् । अत्र विव्यध इत्यादिभिः काठिन्यम्, स्त्रीजित इति कामित्वम्, बलिमपीति धौर्त्यमभिप्रेतम् । तत् तस्मात् । असितमात्रस्य सख्यैर्बहुषु सख्यप्रकारेष्वेकेनाप्यलं न तु प्रयोजन मित्यर्थः । ननु तस्य कथं कथा रूपोऽर्थो मुनिभिरपि न त्यज्यते तत्राह—दुस्त्यज इति । सोऽयं तस्य कोपि दुरन्तो मोहनः स्वभाव इति भावः । इति भियेव सेर्ष्योक्तिः । ननु 'नाख्येयं परदूषणम्' इति निषेधः, सत्यम्, निषिद्धत्वाद्वक्तुमयुक्तमपि तद्वैगुण्यं तस्य परमन्याय्यकारित्वादुत्पद्यमानेन रोषावेशेन त्यक्तुं न शक्यते इत्याह—तद्वैगुण्यरूपकथाप्रयोगो दुस्त्यज इति ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किञ्च न केवलं तस्य तादृशचेष्टितादेव बिभेमि अपि तु श्यामतास्वभावादपीति तद्गुणयोगेन तदभेदबुद्ध्या धीरोदात्तत्वादिगुणतया प्रसिद्धेष्वपि श्रीरामवामनादिरूपेषु दोषं दर्शयन्ती तद्रूपं कैमुत्यं दर्शयति । मृगयुरिवेति । मृगयुर्व्याध इव निर्द्दयो गुप्तश्च सन् एको योऽसितः सोऽपि कपीनामवध्यानामीशमपि वालिनं विव्यधे । प्रसिद्धस्य मांसादिलुब्धस्य धर्माः क्रौर्यादयो यत्र तादृशः । अलुब्धधर्मा तद्धर्मरहितोऽपीति वा । तदप्यास्तां य एव स्त्रियं तत्रापि कामयानां कामयमानामपि साक्षाद्विश्रवःप्रभवां विरूपां छिन्नकर्णनासामकृत । तस्य च क्षत्रियजातितया क्रूरस्य तत्तदपि सम्भवेन्नाम । योऽऽन्योऽसितो ब्राह्मणजातितया तत्रापि ब्रह्मचारितया शान्त्यादिगुणयोग्योऽपि बलिं परमधर्मात्मानमपि तत्रापि बलिं तस्य पूजामुपहारम् अत्त्वा भुक्त्वा गोप्यवदात्मसात्कृत्यापि छलेन दानपूर्त्तिममत्वा विष्टपात् त्रैलोक्यराज्यादक्षिपत् भ्रंशयामास तत्राप्यधोऽक्षिपत् भूविवरे विचिक्षेप पाठान्तरे त्ववेष्टयत् बबन्ध ध्वाङ्क्षवदिति । काको यथा बलिं जग्ध्वापि लोकं वेष्टयति स्वजातीयानन्यानाहूय तद्गृहमावृणोति तद्वत् । अत्र विव्यध इत्यादिभिः काठिन्यं स्त्रीजित इति कामित्वं बलिमपीति धौर्त्त्यमभिप्रेतं तस्मात्तदिति तस्यासितमात्रस्य सख्यैर्बहुषु सख्यप्रकारेष्वेकेनाप्यलं नतु प्रयोजनमित्यर्थः । ननु तर्हि कथं तस्य कथारूपोऽर्थो मुनिभिरपि न त्यज्यते तत्राह । दुस्त्यज इति । सोऽयमिति तस्यैको दुरन्तो मोहनः स्वभाव इति भावः । इति भियेव सेर्ष्योक्तिः । यद्वा । ननु नाख्येयं परदूषणमिति हि निषेधः सत्यं निषिद्धत्वाद्वक्तुमयुक्तमपि तद्वैगुण्यं तस्य परमान्याय्यकारित्वादुत्पद्यमानेन रोषावेशेन त्यक्तुं न शक्यते इत्याह । तद्वैगुण्यरूपकथाप्रयोगो दुस्त्यज इति ॥ १७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कपीनामिन्द्रं परमश्रेष्ठमिति निर्दोषत्वादिकमभिप्रेतम् । स्त्रीजित इति लक्ष्म्या सह सापत्न्येन तदवतार-श्रीसीतायामपि सापत्न्यात् ध्वजाङ्क्षवत्—कालो यथा बलिमत्त्वापि लोकं हिनस्ति तथेत्यर्थः । यद्वा, काकमिवेति महादज्ञा, बन्धनदृढता, निर्दयता च सूचिता । एवमकृतज्ञत्वादिकमप्यभिप्रेतम् । असितेति श्यामा ईदृशा एव भवन्ति, तत् कस्यापि श्यामस्य सख्यैरल-

मितिभावः। बहुत्वं सर्व्वस्यैव तत्सख्यस्य निरसनार्थम्। अन्यत्तैर्व्याख्यातम्। यद्वा, अहो श्रूयतां तस्य तव सख्युर्गुणा इति सोपालम्भमाह—मृगयुरिति। भारेण महीं कम्पयतीति कपीन्द्रो वृषवरः, (भा० १०।३६।१)—'महीं महाककुत्कायः कम्पयन् खुरविक्षताम्' इत्युक्तेः, तं तद्विषाणेनैव व्याधवद्धर्म्मविमुखो विव्याध, तथा लुब्धधर्म्मा लुब्धाचारः कामुको विरूपां स्त्रियं कुब्जां कामयानामकृत चकमे इत्यर्थः। स्त्रीजितः कुस्त्रीवश्यः, तथा गोपैर्गिरये दत्तं बलिमुपहारमत्त्वा इन्द्रस्यापि बलिं पूजां पिष्टपादधोऽक्षिपत्। ननु तर्हि मिथस्तद्वार्त्ता किमिति क्रियते ? तत्राह—तस्य कथैवार्थः प्रयोजनं यस्य सः, व्रज इति शेषः। व्रजस्य सदा तद्वार्त्तापरत्वेनास्माकमपि तत्संगत्या तद्वार्त्ता स्यात्, न च स्वेच्छया। स च व्रजस्त्यक्तुं न शक्यते, अहो बत किं कार्य्यमिति भावः। यद्वा, ननु 'नाख्येयं परदूषणम्' इति हि निषेधः, सत्यं निषिद्धत्वाद्वक्तुमयुक्तमपि तद्वैगुण्यं तस्य परमान्याय्यकारित्वादुत्पद्यमानेन महता रोषावेशेन त्यक्तुं न शक्यत इत्याह—दुस्त्यज इति; तद्वैगुण्यरूपकथाप्रयोग इति ॥ १७ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कपीन्द्रं वालिनं निरपराधमिति भावः। असितसख्यैः कृष्णसख्यैः ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

न केवलमयमकृतज्ञ एवापि तु क्रौर्यकाठिन्यादियुक्तश्चेत्याह। मृगयुरिवेति। मृगयुरिव व्याध इव वञ्चित्वा कपीन्द्रं निरपराधीनं वालिनं विव्यधे जघानातोऽयं लुब्धधर्मा लुब्धस्य ये धर्माः क्रौर्यकाठिन्यादयः तद्युक्त इत्यर्थः। यद्वा अलुब्धधर्मेतिच्छेदः मृगुयुरिवेत्यनेनैव तत्सादृश्यलाभात् अलुब्धधर्मा लुब्धेऽप्यसम्भाविता ये धर्मास्तद्युक्त इत्यर्थः। लुब्धको हि मांसमत्तुं मृगान् हन्ति अयन्तु न तथेति वृथा काठिन्यादिमानिति भावः। तथा स्त्रीजितः स्त्रिया सीतया जितः तद्वशङ्गत इत्यर्थः। कामायानां काम एव यानं प्राप्तिसाधनं यस्याः कामेन याति स्वेच्छया चरतीति तथा तामिति वा नन्द्यादित्वात्कर्तरि ल्युःस्त्रियं शूर्पणखां विरूपामकृत छिन्नकर्णनासिकामकरोदित्यर्थः। एवं दाशरथिरूपेण कृतं तथा वामनरूपेण यो ध्वाङ्क्षवद्वायसवद्बलिं पूजां वैरोचनिसमर्पितामत्त्वा भुक्त्वा परिगृह्येत्यर्थः। बलिं वैरोचनिमवेष्ट्यत्पाशैरिति शेषः। बबन्धेत्यर्थः। तत्तस्मादसितस्य श्रीकृष्णस्य सख्यैरलम् असितेत्यनेन नैल्यं दुष्टं हीति पामरन्यायोऽभिप्रेतः एवञ्चेन्नित्यङ्कि तं गायथेत्यत्राह। दुस्त्यज इति। तस्यासितस्य कथारूपोऽर्थो दुस्त्यजस्त्यक्तुमशक्यः ॥ १७ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रणयकोपातिरेकेणासन्धेयत्वे दोषानुत्पादयति। मृगयुरिति। यो रामनामा भूत्वा कपीन्द्रं वालिनं विव्यधे हिंसितवान् क इव मृगयुलुब्धकं इव यथा लुब्धकः उपाश्रये स्थित्वा विध्यति मृगं तथायमपीत्याक्षेपार्थः कपेः सुग्रीवस्य इन्द्रियं द्रावितवानित्यपराधं दृष्ट्वेति स्तुत्यर्थः। किञ्च किरातः निषाद इव स्त्रियं विरूपां छिन्ननासिकाकर्णत्वेन सौन्दर्यहीनामकृत परामृष्टायाः शूर्पणख्या मे पतिर्भवेति विरूपं विपरीतशब्दं श्रुत्वा विरूपामकरोत् नतु शुद्धस्त्रियमिति निष्कृष्टोऽर्थः किन्नः परमानन्दिनो मुक्ताः रातं मित्रं यस्य स किरातः स्त्रीजितः स्त्रैणः स्त्री जिता पराभूता येन स तथा कामयानां पतिमिच्छन्तीं काम एव यानं यस्याः सा तथा स्मरनामरथाधिरूढत्वाहुष्टामित्यर्थः। किञ्च वामनावतारे महावहपर्वे यज्ञे सबहुमानं बलेः त्रिपदपरिमितं भूम्युपहारमादाय कृतघ्न इवायं बलिनामानं दैत्यं विलवासं पातालवासिनम् अकृत पूजायां हेतुमाह। वेदेति। वेदविदामृषीणां वर्गेण समूहेन वन्द्य इति यत्तस्मान्मुग्धाद्बलेः पूजामवाप्यापि तं बद्ध्वा पातालनिवासिनमकरोदित्यर्थः। बलपरिवर्तन इति धातोः बालिमिन्द्रस्य विद्यमाने त्रैलोक्ये परिवर्त्तं परकीयं स्वीयवत् वशं कृत्वा चरणलक्षणं चौर्याख्यापराधं दृष्ट्वा दुष्टशिक्षणं कृतवानित्याध्यात्मार्थः बकारवकारयोः अन्योऽन्यात्मकमनुशासनसिद्धं कृष्णः कीदृशः वेदविदां वैदिकानां वर्गो वर्जनं येषु ते वेदविद्वर्गा वन्द्यादयः तैः वन्द्य इत्यनेनाविद्यमानकथननिपुणत्वेनास्मन्मनो मोहनं कृत्वा हृतवानिति सूचितं निन्दास्तुती उपसंहरति। तदिति। यतोऽयं कृष्णोऽस्मासु शोकाधानमकरोत्तस्मादसितेन मलिनेन कृष्णेन सह सख्यैः सहासनशयनादिलक्षणैरलं वारितम् असितस्य मेघश्यामस्य नित्यमुक्तस्य वा षिञ्बन्धन इति धातुः हरेः सख्यशब्देनार्चनादिकमुपलक्ष्यते अर्चनादिभिरलम्भूषणमात्मन इति शेषः। निर्विण्णा चेत्किमिति तत्प्रसङ्गं करोषीति तत्राह। दुस्त्यज इति। तस्य कृष्णस्य कथार्थः चरितविषयव्यवहारो दुस्त्यजस्त्यक्तुमशक्यः पारवश्यादिति शेषः। किञ्च दुःखं त्यजतीति तस्य कथानिवृत्तिः अशोभनं ददातीति ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदिति। तस्य असितस्य श्यामपात्रस्य सुपां सुलुगित्वादिछान्दससूत्रेण सुपो लुक्। दुस्त्यजः। इत्ययमप्येकस्तस्य दुरन्तो मोहनस्वभाव इति भावः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अस्मिन् किमनुसन्धेयमिति प्रागुक्तमेव, दोषान्तरमुद्भाव्य दृष्टान्तेन स्पष्टयति मृगयुरिवेत्यादि। असितस्य श्यामस्य सखैरलम्। श्यामेन सार्द्धं सख्यमनुचितमेवेत्यर्थः। श्यामेन किमपराद्धमित्याह—मृगयुरिवेति। एको रामाख्यः श्यामः कवीन्द्रं

वालिनं निरपराधमपि विव्यधे। न केवलं तस्य स एव दोषः, स्त्रियं शूर्पणखामपि विरूपामकृत। न केवलं स एव दोषः स्त्रीजितश्च। अन्यो वामनाख्यः श्यामो वलिं पूजामत्वा भुक्त्वा वलिं ध्वाङ्क्षवद्बवन्ध। तथायमप्यस्माकं सर्वमेवापहृत्य त्यक्त्वा गतवान्। श्यामत्वेनायमपि तथेत्यनेन सख्यमनुचितमेवेति भावः। ननु तर्हि निराकांक्षत्वेनैव स्थीयताम्? किमेतेन तद्दोषप्रकटनेनेति चेत्तत्राह—दुस्त्यजस्तत्कथार्थः। तस्येदृशी या कथा सैवार्थो धनं तद्दुस्त्यजस्त्यक्तुमशक्यः। यद्वा, तस्या अर्थो निर्वृत्तिदुस्त्यजः, तस्य काठिन्यात्तद्वार्त्ता न श्रूयते एव। तस्मात् परं गीयतामिति शेषः। अत्राप्युन्मादोऽङ्गी, असूयावहित्थामर्षादयोऽङ्गानि। अपलापः—उक्तिवैचित्र्यम्, सख्याकाङ्क्ष्यानिह्नुवात् ॥ १७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

किन्तु सन्धेयमस्मिन्, अस्मिन् प्रेम किमनुसन्धेयमिति प्रागुक्तमर्थं स्पष्टयति—मृगयुरित्यादि। असितस्य श्यामस्य सख्यैरलम्, श्यामेन सार्द्धं सख्यमनुचितमेवेत्यर्थः। श्यामेन किमपराद्धमित्याह—एको रामाख्यः श्यामः कपीन्द्रं विव्यधे, निरपराधमपीति वाक्यशेषः। न केवलं कपीन्द्रं विव्यधे, स्त्रियमपि विरूपामकृत; अन्यो वामनाख्यः श्यामः सर्वस्वापहारेणापि वलिं बबन्ध ध्वाङ्क्षवत् काकवत्। अतः श्यामस्यैवम्विधा रीतिः तेन सह सख्यमनुचितमेवेति पूर्वोक्तिदार्ढ्यम्। तर्हि निरकाङ्क्षतयैव स्थीयताम्, किमेतेनेत्याह—दुस्त्यजस्तत्कथार्थः, तस्य कथारूपोऽर्थः, कथारूपं दुस्त्यजमेवेत्यसूयाभावशान्त्यौत्कण्ठ्यभावादयः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नन्वतिकोमलमनाः स त्वामेव ध्यायंस्तत्रास्माभिर्दृश्यत इति। तत्र त्वमर्वाचीनो दासस्तस्य तत्त्वं न जानासि न केवलं सह्यस्मिन्नेव जन्मनि कठोरः किन्तु पूर्वपूर्वजन्मस्वपीति पौर्णमासी मुखादस्माभिः श्रुतत्वादित्याह। यदा स क्षत्रियजातौ रामचन्द्रोऽभूत्तदा क्षत्रियधर्मं परित्यज्य मृगयुर्व्याध इव कपीनामिन्द्रं वालिनं विव्यधे विव्याध। निर्दयो गुप्तः सन्नित्यर्थः। अधर्मकथापि तदुपाख्याने ज्ञेया। अत्रापि लुब्धस्य व्याधस्यापि धर्मरहितः। न हि व्याधो वानरान् हिनस्ति तन्मांसस्याभक्ष्यत्वेन केनाप्यक्रेयत्वादिति भावः। अन्यमधर्मं शृण्वित्याह। स्त्रियं सूर्पणखां कामयानां तमेव कामयमानां तां विरूपां छिन्नकर्णनासामकृत। अन्योऽपि कोऽप्येतां न सम्भुङ्क्तामिति क्रौर्येणेति भावः। न च जटावल्कलधारित्वाद्वैराग्येणेत्यत आह। स्त्रिया सीतया जितः। तथा तत्पूर्वजन्मनि स ब्राह्मणोऽभूत्तदापि ब्राह्मणधर्मं शान्त्यकैतवादिकं परित्यज्य बलिं परमधार्मिकमपि तत्रापि बलिं तत्पूजोपहारम् अत्त्वा भुक्त्वा विष्टपात् त्रैलोक्यराज्यादक्षिपत् तत्रापि भूविवरे। पाठान्तरे अवेष्टयत् छलेन बबन्ध। ध्वाङ्क्षवत् स यथा बलिं जग्ध्यापि स्त्रीजनं वेष्टयति स्वजातीयानन्यानाहूय तमावृणोति कदर्थयति च। तस्मादसितस्य कृष्णवर्णस्य तस्य सख्यैः सर्वैरेवालमस्माकं गौरीणां तत्सम्बन्धिनः सख्य स्यावन्तः प्रभेदास्तेषामेकोऽपि न भद्र इति बहुवचनेन द्योतितम्। असिताः खल्वशुद्धचित्ता भवन्तीति तेभ्यो भयस्यावश्यम्भावित्वादिति भावः। नन्वभीक्ष्णं परनिन्दां कुर्वती किं शुद्धचित्तासीति तत्राह। तस्य कथायाः प्रतिजन्मचरित्रस्यार्थो व्याख्या दुस्त्यजः सोऽस्मानेवं दुःखयति। अस्माभिस्तत्कथाया अप्यर्थो न वक्तव्य एव किम् अत्र निन्दा वा भवतु यथार्थभाषणत्वेनानिन्दा वा भवतु। असौ त्युक्तुमशक्य एवेति भावः। यद्वा। स त्वस्माभिस्त्यक्त एव किन्तु तत्कथारूपोऽर्थो वस्तुविशेषस्तु दुस्त्यज एव। कर्तृपदानुक्त्या सर्वैरेव मुन्यादिभिरपीत्यर्थः। अत्र विव्यधे इति काठिन्यं स्त्रीजित इति कामित्वं वलिमपीति धौर्त्यम् असितसख्यैरित्यासक्त्ययोग्यता भयमीर्ष्या चेत्ययमवजल्पः। यदुक्तं "हरौ काठिन्यकामित्वधौर्त्यादासक्त्ययोग्यता। यत्र सेर्ष्याभियेवोक्ता सोऽवजल्पः सतां मत" इति ॥ १७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

ननु भो मातः! निरपराधापकाराय तु न प्राकृतोऽपि प्रवर्त्तते स पुनः कृतज्ञाग्रणीः शोभनगुणालङ्कृतो भगवानपराधपराधनिर्मुक्तानां युष्माकं दुःखाय प्रवृत्त इति का वाचोयुक्तिरतः स्वात्मसु कश्चिदपराधोऽन्वेषणीय इति चेद्दर्शनश्रवणाभ्यां निरपराधपीडाकरमेतदीयं स्वभावं वर्तमानप्राचीनजन्मसंबन्धितया सञ्जानतीनामस्माकमग्रे किमित्येवमबुद्ध्वा जल्पसीत्याशयेनाह। मृगयुरिवेति। यः दाशरथिर्भूत्वा मृगयुरिव कपीन्द्रमपराधविनिर्मुक्तं वालिनं विव्यधे यथा व्याधः मृगचर्मणा स्वशरीरमाच्छाद्य मृगं वेधयति तथा वृक्षेणायमपि तमपि अविध्यत् यतः लुब्धस्य धर्मैः क्रौर्यादिभियुक्तः। यद्वा व्याधा अनुपकारिणं स्वोपकाराय नाशयन्ति स तु ततोऽपि विलक्षण इत्याह अलुब्धेति। वानरस्याभक्ष्यत्वात्सीतान्वेषणस्य बालिनातिसुकरत्वाद्वृथैव तं नाशितवानित्यर्थः। स्त्रियं शूर्पणखां निरपराधां विरूपां छिन्नकर्णनासामकृत न केवलं निरपराधामपि तु सेवनाय कामयानामपि काम एव यानं प्राप्तिसाधनं यस्यास्तां कामयमानामिति वा यतः स्त्रीजितः सीतापरतन्त्रः तथा यः वामनो भूत्वा बलिमपि निरपराधं प्रत्युत त्रैलोक्यार्पणात्परमोपकारिणमपि तद्दत्तबलिमत्त्वा भक्षयित्वा ध्वाङ्क्षवत् काकवदवेष्टयत् काको यथा बलिं जग्ध्वा अन्यान् काकानाहूय बलिदातारं सर्वत आवृणोतिति तद्वद्बबन्ध वामनोऽधिक्षिपद्य इति पाठे इति बलिं पूजां गृहीत्वा तं त्रैलोक्यराज्यादधः पातितवानित्यर्थस्तस्मादसितस्यैवं भूतस्य कृष्णस्य सख्यैः दुःखसागरे पतितत्वादितः परं तत्सख्यसम्पादनजन्यदुःखभोगसामर्थ्यमस्माकं

नास्तीत्यर्थः। नन्वेवं तर्हि किमिति नित्यं तत्कथापरायणा यूयमिति चेत्तत्राह। दुस्त्यज इति। यद्यप्येवं तथापि तत्कथारूपं वस्तु त्यक्तुमशक्यं किं कुर्मस्तत्त्यागे उपायं न पश्याम इत्यर्थः। यद्वा कथं तर्हि कृष्णस्य तत्तदवतारकथा मुनिभिर्न त्यज्यत इति चेत्तत्राह दुस्त्यज इति। तत्कथायां का वा मोहनशक्तिरिति न जानीमः। यद्वा ननु नाख्येयं परदूषणमिति निषेधात् किमिति दूषणाख्याने यूयमुद्युक्ता इति चेत्तत्राह। दुस्त्यज इति। यद्यप्येवं तथापि रोषावेशात् तूष्णीं स्थातुं न शक्यत इति भावः। यद्वा ननु सर्वं विहाय भगवत्सख्यमास्थिता इदानीं तदपि परित्यज्य किं करिष्यथ इति चेत्तत्राह। दुस्त्यज इति। तत्कथामवलम्ब्य स्थास्यामः अस्माभिस्तु स त्यक्तुं न शक्यते स एव कृष्णस्त्यक्ष्यति चेत्तदा तु मरणमेव भविष्यतीति भावः। यद्वा ननु सख्या केनचित्कारणेन प्राप्तेऽपि यत्किञ्चिद्वैमनस्ये तन्मार्जयित्वा पुनः सख्यमेव सम्पादयितुमुचितं न तु सर्वदा विग्रहपालनमित्याशङ्क्याह। मृगयुरिवेति। अहो किमित्येवं त्वया बोध्यते कृष्णात्प्राप्तदुरन्तदुःखाब्धिरस्माभिरितः परं शठत्वकामित्ववञ्चकत्वादिदोषाक्रान्तत्वात्कृष्णवर्णेन केनापि सख्यं न सम्पाद्यमिति निश्चयः कृतोऽतः पुनस्तेन सख्यसम्पादनं तु दूरापास्तमिति भावः। नन्वेकत्र कृष्णे वञ्चकत्वादि दृष्ट्वा यत्र यत्र कृष्णत्वं तत्र तत्र वञ्चकत्वादिकमिति व्याप्तिः कथं गृहीतेत्याशङ्क्य भूयो दर्शनेनेत्याह। मृगयुरिति। तथा च स्वधर्मनिष्ठस्य क्षत्रियस्य रामचन्द्रस्य तथाविधकर्मानुष्ठाने तदेव प्रयोजकम् एवं शान्त्यादिगुणालङ्कृतस्य ब्राह्मणस्य ब्रह्मचारिणो वामनस्य तथा चान्यत्र प्रयोजकान्तरसत्त्वेऽपीदमेव प्रयोजकमाश्रयणीयमनुगतत्वात्। इदञ्च शठत्वादीनामप्युपलक्षणं कोऽपि सख्यभेदोऽसितवर्णैर्नापेक्षित इति सूचनाय सख्यैरिति बहुवचनं नन्वेवं तर्हि तत्कथयाप्यलङ्कृतो न क्रियत इति चेत्तत्राह। दुस्त्यज इति। तत्कथार्थोऽपि परित्याज्य इति सर्वदाप्यस्मन्मनो वर्त्तते तथापि त्यक्तुं न शक्यते किं कुर्मः अशक्यत्वाद्दुःखं सहामः कृष्णोऽपि नास्माभिः परित्यक्तः किन्तु स एवास्मान् परित्यज्य गतस्तद्वदयमपि यदि त्यक्ष्यति त्यजतु नाम नास्माकं तत्त्यागसामर्थ्यमित्यर्थः।

हरौ काठिन्यकामित्वधौर्त्त्योदासक्त्ययोग्यता। यत्र सेर्ष्यभियेवोक्ता सोऽवजल्पः सतां मतः॥

इत्युक्तेरत्रावजल्पः उद्धवपक्षेऽपि समानमिदं श्रुतिपक्षे भगवानेव शरणीकरणीय इतीममर्थं द्रढयितुं तत्तदवतारे कृतं भगवतो भक्तपक्षपातमावेदयति। मृगयुरिवेति। अल्लुब्धधर्मा पूर्णकामत्वाल्लुब्धादिधर्मैरसंस्पृष्टोऽपि कपीनामिन्द्रं मारणायोग्यमपि मृगयुरिवायोग्योपायेनापि स्वभक्तस्य सुग्रीवस्य परित्राणाय विव्यधे तथा स्त्रियमपि तत्रापि कामयानां विरूपत्वानर्हामपि भक्तिमत्या सीतया जितो वशीकृतः विरूपामकृतः तथा बलिं परमधार्मिकं बलिमपि तदीयां पूजां गृहीत्वापि महेन्द्रादिभिः तदर्थमाराधितत्वादवेष्टयत् यथा काकः स्वजातिपक्षपाती तद्वत् एवं भूतो यः स्वभक्तपालनायाकृत्यमपि करोति तस्य कथारूपार्थस्तदनन्यशरणैर्दुस्त्यजः तत्कथैव परमपुरुषार्थत्वेन तैः सेव्यते नतु तैः प्रार्थ्यत इति ज्ञापनायार्थपद तत्तस्मादसितानां मलिनानां भार्यापत्यधनादीनां मलिनैः संसारार्थप्रदैः सख्यैरलम् असङ्ख्यातकल्पेषु तत्फलं भुक्तमितः परं तानि परित्यज्य वासुदेवैकशरणो भवेत्यर्थः॥ १७॥

गूढार्थदीपिनी

मृगयुः व्याध इव कपीन्द्रं वालिनम् विव्यधे। स्त्रियं शूर्पणखाम्। कामयमानाम्। यद्वा। कामः यानं प्राप्तिसाधनं यस्यास्ताम्। बलिं विरोचनपुत्रम्। ध्वाङ्क्षवत् काकवत् अवेष्टयत् बबन्ध। बलिं त्रिलोकीरूपमत्त्वा गृहीत्वा। तत् तस्मात् असितस्य कृष्णवर्णीयवस्तुमात्रस्य सख्यैः अलं न किञ्चित्प्रयोजनम् अथापि हा किं कुर्मः तत्कथारूपोऽर्थः दुस्त्यजः॥ १७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मां तु सप्राणां साङ्गां सधनाञ्च व्यसृजदहो मम भाग्यमन्ये त्वनेन केचित्प्राणतः केचिदङ्गतः केचिद्धनतश्च वियोजिता इत्याह। मृगयुरिवेति। यः कृष्णः मृगयुरिव व्याध इव कपीनामिन्द्रं राजानं निरपराधिनं विव्यधे अविध्यत्। व्याधस्तु मांसमत्तुं मृगं हन्ति अयन्तु वृथैवाविध्यत् यतः अलुब्धधर्मा तन्मांसभक्षणलोभाभावात् नापि धर्मयुद्धे अविध्यत् किन्तु ध्वाङ्क्षवत् ध्वङ्क्षमिव यथा ध्वाङ्क्षं काकं छलेन कश्चिद्धन्ति तद्वत् तथा काम एव यानं प्रीतिसाधनं यस्यास्तां कामातुरां स्त्रियं सूर्पणखां स्त्रिया स्वप्रियया जितः विरूपां छिन्नकर्णानासिकाम् अकृत अकरोत्। दाशरथिरूपेण तथा बलिमपि बलिं तद्दत्तां पूजामत्त्वा भक्षयित्वा अवेष्टयत् नागपाशैर्बबन्ध वामनरूपेण ध्वाङ्क्षं यथा कश्चिद्वेष्टयति तद्वत् तत्तस्मादसितस्य कृष्णस्य सख्येनालम् तर्हि किमर्थोऽयं तद्विषयकः प्रवादः अत्राह। तत्कथारूपोऽर्थस्तु दुस्त्यज इति॥ १७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

माधवस्य धवस्यासन्धेयत्वे समाधेयानो महान्प्रकारानवतारयुगलीलाः सङ्गृह्य बहिरन्तस्तुतिगर्भितश्लोकेनोपश्लोकयन्ति। मृगयुरिति। यो रामो यश्चैकाप्रियः शमादिसहितस्तस्यापीयं दशा चेदस्मदीशानां कृतपुरतरुणीविहाराणां का कथेति द्योतयितुं रामा रामाचरितं वर्णयन्त्यो ध्वनयामासुः। कपीन्द्रं वालिनं मृगयुरिव लुब्धक इवादृश्यः सन्विव्यधे। मृगव्यादयश्चेति

यातेः कुप्रत्ययान्तत्वे निपातितः शब्दः । यो मृगयुरिव कपीन्द्रं सुग्रीवं विव्यधे स्त्रियं तत्स्त्रियं रुमां कामयानामिच्छया यानं यानं गमनं यस्याः सा तां विरूपां विगतं रूपं यशो यस्यास्ता कृतेति तं कपीन्द्रं विव्यधे नानयोऽनेनानुष्ठित इति भावः । यः किरात इव निषाद इव कामयानां पतिमपेक्षमाणां स्त्रियं शूर्पणखां विरूपामकृत । किमर्थमित्थं कृतवानानतवतीमित्यतो वदन्ति ॥ स्त्रीजित इति । यः स्त्रिया स्वभार्यया जितः पराभूतः । अनेन तद्वचनादनागस्या नाशिकाकर्णच्छेदनं कारयित्वा विरूपां चक्रे । स्त्रियो जिता येनासावतद्वश्यः कामयानां स्वैरिणीस्त्रियं किं नो वायुजयवन्तः सुखवन्तो वा । रातिशब्दपर्यायोऽयं रातशब्दः । रातं मित्रं यस्य स विरूपामकृत शिक्षायोग्यशिक्षायां न दोष इति भावः । रूपं स्वभावे सौन्दर्ये चालोके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारे श्लोकयोरपीति विश्वः । स्त्रीजितो गौतमभार्यां प्राप्तः सन्विरूपांकामयानामिन्द्रमिति पत्या शापतो जाता शिलातुलेति विरूपा तां देवराजकुतूहलात्प्रहृष्टेनान्तरात्मनेत्यादिरामायणोक्तेस्तां स्त्रियमकृतेति स्तुतिः । स संस्तुत्यारातयो बोधं तु शूरराताय इत्यृग्भाष्ये बोधं तु चैवमित्राणीत्युक्तेः । कामयानां कामं यानं गमनं वीथ्यां यस्याः सा तां विरूपां त्रिवक्रेति तां स्त्रियं खवधूमकृतैवं स्त्रीजित स्त्रैण इति किरातस्तद्वदिति । आन्तरङ्गिकोऽर्थस्तु कामयानां स्त्रियं मां नः स्त्रीजितः प्राप्तपुरयोषिांदति विरूपामप्रतिष्ठामकृतेति किरात इवेत्यपि द्वितीयार्थवादपरतयाऽपि योजना ज्ञेया । यः स्वस्वामित्वं वेद तमपि बलिं स्वाज्ञामनुसृत्य परिवर्तमानमपि बिलवासं पातालवासमकृत यो विद्वद्वर्गबन्ध इति काकुः । नेत्यर्थः । यत्तदसितसख्यैरसितः श्यामवर्णोऽनेन कलुषताऽपि ध्वन्यते । तस्य सख्यैरलं न प्रयोजनमित्यर्थः । तर्हि तद्वार्तोविति कुतुकता कुत इत्यत आहुः । तत्कथार्थस्तच्चरितश्रवणादिरूपो विषयो दुस्त्यजस्त्यक्तुमशक्यः । बलिमप्यहन्तायुततया गर्हितमपि बिलवासं तत्र राजनमकृतातो वेदविद्वर्गेण ज्ञानिसमूहेन वन्द्य इति । अलमसितो नित्यावद्धस्तस्य सख्यैः सहासनाशनादिभिः प्राचीनैस्तत्कथार्थो दुस्त्यज इत्यान्तरङ्गिकः । प्रथमार्थवादश्च । बिलवासमिति कपीन्द्रपक्षेऽपि किष्किन्धाबिलवासमित्यर्थकं सदन्वेतव्यं । असितः षिञ् बन्धनेऽसितोऽबद्धो नित्यमुक्तस्तस्य सख्यैरलं भूषणमित्यपि व्याकुर्वते । मन्वन्तरान्तरे बलिमपि बिलवासं उच्चैः श्रवो हयवासं तद्वाहनकमिन्द्रमिति यावत् अकृत निश्चितत्वेनैवमुक्तिः । बिलं छिद्रे गुहायां च बिल उच्चैःश्रवो हय इति विश्वः । बलिमस्मन्मध्यप्रदेशं तदुपलक्षितमङ्गं बिलवासं स्वाङ्गसङ्गायोग्यतया बिलवासं गुहानिहितमकृतेत्यान्तरङ्गिको भावश्च । बलिः पूजोपहारः स्याद्बलिर्दानवपुङ्गवः । बलिः स्त्रीमध्यभागः स्यादित्यनेकार्थध्वनिपदमञ्जरीं । वेदविद्वर्गैर्वेदज्ञवर्जितैर्वन्द्यो वेदबाह्यसहवासयोग्य इति वर्णयन्ति । विटोत्कटतां घटयन्ती स्वैरत्वमीश्वरस्य कथयति ॥ कामिति । विरूपामसुन्दरीमपि स्त्रियं कां अयानां न विद्यते यानं स्वगमनं यस्यास्तामकृत कृतवान् । न काञ्चनजितं इति भावः । न तु तद्वत्त्वमञ्चितवतीति त्वां त्यक्तवानित्यपि नारद उद्धवेति वक्ति ॥ बलिमिति । अस्मद्दत्तं बलिं स्वपूजोपहारं च बिलवासमकृत गर्तं प्राक्षिपदित्याक्रोशोक्तिरिति वा । सख्यान्येवैतादृशानि तस्यास्मद्विषय इत्यपि वक्ति ॥ तदिति । तानि च तान्यलमत्यन्तमसिता तालव्याश्चैव दन्त्याश्च शम्बशूकरपांशव इति वचनादसिरप्यशिरिति मन्तव्यम् । खड्गता येषां तान्यलमसितानि तानि च तानि सख्यानि तैः स्त्रियं । जातावेकवचनं । इतरद्यथापूर्वं । विव्यधे तर्हि तत्कथास्त्यजतेत्यत आहुः । दुस्त्यजस्तत्कथार्थो इति ॥ १७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नन्वेवमस्ति सन्धेयं सख्यमिति पूर्वं हि प्रपन्ना अपि भवत्यः भगवता त्यक्ताः अधुना प्रार्थनया तं दोषं परिहृत्य तेन सह सख्यं कर्त्तव्यमिति चेत्तत्राह । मृगयुरिति । "न वै स्त्रैणानि सख्यानी"ति वयं सख्ये अनधिकृता एव ईश्वरोऽपि सख्ये नाधिकृतः राजा मित्रं केन दृष्टं श्रुतं वेति सुतरां भगवता सह सख्यं न भवति स्थलत्रये अनिष्टदर्शनात् आर्षज्ञानेन भगवत्स्वरूपं ज्ञात्वा स्वस्मात् पूर्वावस्थां भावयति । तत्र भगवान् रामः पूर्वतनः तेन सह सख्यं पुरुषेण स्त्रिया च कृतं तयोर्मरणं जीवन्मृतत्वं च जातमिति सुग्रीवेण सहाग्निसाक्षिकं मैत्री कृता तस्यैव भ्राता वाली भगवता हतः तद्भ्रात्रा सह सख्यं कृतमेव कपीनां च स इन्द्रः अनेन कार्यार्थतापि निवारिता तेन ततोऽपि अधिकं कार्यं भवतीति नहि कश्चित् कपिभिः सह सख्यं करोति अनेन सख्यशास्त्रानभिज्ञता च सूचिता । तत्रापि सर्वसमर्थः युद्धं न हतवान् किन्तु हरिणान्तरं योजयित्वा यथा आरण्यं हरिणं मारयति लुब्धकः तद्वत्सुग्रीवं योजयित्वा तेन सह युध्यमानमविध्यत् । ननु हरिणादयः सर्वत्रैवमेव हन्यन्ते को दोष इति चेत्तत्राह । अलुब्धधर्मेति । लुब्धकस्येव नास्मिन् धर्मः तन्मांसस्याभक्ष्यत्वात् ईश्वरत्वेन तदपकराभावाच्च किञ्च स्त्रियं सूर्पणखां काममोहितां सर्वथा सम्माननीयां विरूपां छिन्नकर्णनासिकाम् अकृत । ननु युक्तमेवोर्ध्वरेतसस्त्र्यतिक्रमे तथात्वमिति चेत्तत्राह । स्त्रीजित इति । सीतया वशीकृतः अन्यथा तदुक्तं न कुर्यात् सापि न प्रतिबन्धिका ताटकेव किन्तु कामयाना काम एव यानं यस्या इति वा तत्र दूषणद्वयं ततोऽपि पूर्वजन्मनि दोषं विचारयन्ती परशुरामे अलभमाना वामने दृष्टत्वादाह । बलिमपीति । बलिर्ह्यत्यन्तं बलिरूप एव पूजात्मकः अतः श्रद्धया तथा पूजां कृतवान् ब्राह्मणक्षत्रिययोः तुल्यता सख्यं च भवति तत्राप्यन्योऽन्यकार्यसाधकयोः व्याजेन लोकत्रयग्रहणं न दोषाय यथाकथञ्चित् स्वकीयं ग्राह्यमेवेति किन्त्वन्यदस्तीति पूर्वमनुवदति बलिम् अत्त्वा जग्ध्वा नात्र धात्वादेशः बहुलं छन्दसीत्यग्रे वक्ष्यमाणत्वात् आवेष्टयत् गर्त्तविशेषे बद्ध्वा स्थापितवान् ध्वाङ्क्षवत् द्वितीयार्थे वतिः अयुक्तो हि काकः पायसादिभक्षण इति तथा कृतवन्तं दुष्टं बध्नाति प्रभुः तथा कपिरपि इन्द्रवद्ध्याप्रियमाणो हन्तव्यः मृगत्वात् व्याजेनैव मारणीयः ब्रह्मणा तथैव तेषां मृत्युर्निर्मित इति मत्स्यानां तु बुद्ध्यैव स्त्रीजित इत्यनेनैव स्त्रियैव स्त्री विकृता नतु भगवता अत एव ताः सजा-

तीयातिक्रमं न कुर्वन्ति तथा वयमपि न करिष्यामः कृते त्वनिष्टं स्वधर्मत्यागादेव तथा हीना वयं नोत्तमभावं प्राप्स्यामः "अयोग्यमिच्छन् पुरुषः पतत्येव न संशय" इति वाक्यात् मर्यादोल्लङ्घने तद्रक्षकैः दण्ड्यत इत्यविवाद स्त्रियो जिता अनेनेति नहि रामः स्त्रीवश्यः जितानां च हितं कर्त्तव्यमिति तथा नगरे अस्मदनुपभोग्यो भगवान् यथा वलेस्तन्मन्वन्तरकालः अतः हीनत्वात् स्वायोग्यं स्त्रीत्वात् अतिक्रममन्यासरत्वाच्च कालमर्यादोल्लङ्घनं च कर्त्तव्यमिति प्रार्थनया सख्यं न करणीयं तदाह । तदलमिति । तत्तस्मादसितसख्यैरशुद्धसख्यैरलं कपटसख्यानि न कर्त्तव्यानि यतो विपरीतफलानि तामसभावाद्वा कृष्णवर्णपरोऽसितशब्दः । ननु सर्वं परित्यज्य भगवदवलम्बनं कृत्वा भगवन्तमपि परित्यज्य क्व यास्यथेत्याशङ्कयाह । दुस्त्यज इति। यस्य कथारूपोऽर्थो दुस्त्यजः कथामवलम्ब्य तिष्ठामः सोऽपि त्यक्तव्य इत्यस्ति मनःप्राणवाधात् तथापि त्यक्तुमेवाशक्य इति दुस्त्यजः सापि भगवानिव चेत्स्वयं त्यक्ष्यति तदा त्यजतु नाम न त्वस्माभिस्त्यक्तुं शक्येत्यर्थः । यदकालेऽपि भगवद्धर्मा बोध्यन्ते श्रवणादयः धर्मत्वेन तत्रापि सख्यमात्मनिवेदनं च बोध्यते यथा सुपर्णावेतौ ब्रह्मैव सन् ब्रह्माप्येतीति वेदा यज्ञाश्च न कालात्मका इति शिर उपनिषदो भवन्त्येव तत्र भगवन्निरूपणं न कर्त्तव्यमिति पुष्टिश्रुतीनामभिप्रायः इतरथा अन्यथासिद्धिः स्यात् । ननु भक्तिमार्ग इव तत्रापि भगवदुत्कर्षः प्रतिपाद्यत इति कथं निषध इत्याशङ्क्याह । वेद्मयहमिति । स हि भगवदभिमतः परमात्मा मोक्षप्रद एव तस्य दूतेनात्यन्तनिपुणेनापि मोक्ष एव फलति प्ररोचनार्थमेव भक्तिमिव प्रेमेव वदति न वारे पुत्राणां कामायेत्यादिभिः यमेवैष वृणुत इति च किञ्च शास्त्राणां सर्वपरित्याजनपरत्वं यथा आत्मकामः सर्वं परित्यजेत् तादृशविरक्तस्यापि नित्यमात्मानुसन्धानयुक्तस्य यदि नात्मस्फूर्त्तिः किन्तस्योपनिषदा गुरुभिर्वा भविष्यति तस्मात् सख्यादिकमनभिप्रेतमेव तथापि वैदिकत्वेन भाव्यमन्यथा पाषण्डित्वं स्यात् एवं सर्वत्र योजनीयम् ॥ १७ ॥

श्रीसुबोधिनी–सारः

पूर्वावतारकर्माण्यनुसन्दधाना बिभ्यतीवान्याह । मृगयुर्जीवघातक इव कपीन्द्रं वालिनं विव्यधे जघ्ने स्त्रीजितः सीतावशः कामयानां स्त्रियं शूर्पणखां विरूपामकृत कर्णनासाच्छेदनात् बलिमत्त्वा भक्षयित्वा बलिम् असुरं योऽवेष्टयत् पाशैरबन्धत् ध्वांक्षवत्काकवत् वलि मत्त्वा भक्षयित्वाधोऽक्षिपद्विष्टपाद्य इति पाठे स्वर्गादधोऽक्षिपत् तत्तस्माद्धेतोरसितस्य कृष्णस्य सख्यैरलं पर्याप्तं किं तर्हि तद्वानं तत्राह । तस्य कथारूपोर्थो दुस्त्यजस्त्यक्तुमशक्यः यद्वा । मृगयुर्लुब्धक इव कपीद्रं विव्यधे दैत्यान्हतुं लुब्धस्येव धर्मो निलयनादिर्यस्य लुब्धधर्मा बालचेष्टः स्त्रीजितः तन्माधुर्यादिवशः कुब्जां विरूपां कामयानां स्त्रियं सुनारीम् अकृत । बलिमनुलेपनम् अत्त्वा गृहीत्वा बलिमत्त्वा भक्षयित्वा वा योऽपि अवेष्टयत् प्राक्रामयत्प्रादक्षिण्येन असितस्य सख्यैरलं मण्डितं गोवर्द्धनमिति ॥ १७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'न केवलं कृतघ्न एव, अपि तु क्रौर्यादिगुणयुक्तश्च' इत्याह—मृगयुरिवेति । मृगयुर्व्याध इव सुग्रीवमग्रे कृत्वा स्वयं विलीनः सन् कपीन्द्रं स्वापराधरहितं वालिनं विव्यधे जघान । ननु 'मांसार्थं हरिणादयो राजादिभिर्हन्यन्ते एव, तेन को दोष' इत्यत आह—अलुब्धधर्मेति । न लुब्धस्य सम्भावितो धर्मो यस्य सः । लुब्धको हि मांसमत्तुं मृगान् हन्ति, अयं तु न तथा, कपिमांसस्याभक्ष्यत्वात् । अतो वृथाकाठिन्यादिमानिति भावः ॥ तथा स्त्रियं शूर्पणखां विरूपामकृत छिन्नकर्णनासिकामकरोदित्यर्थः । 'तथाकरणं तस्य अनुचितम्' इत्याशयेनाह —कामयानामिति । काम एव यानं प्राप्तिसाधनं यस्यास्तामित्यर्थः । ननु 'विरक्तस्य तन्निरासोऽपि युक्त एव' इत्याशङ्क्याह—स्त्रीजित इति । सीतापरतन्त्र इत्यर्थः । एवं दाशरथीरामरूपेण अनर्थं कृतवान् । तथा वामनरूपेणापि बलिं वैरोचनिसमर्पितां भूम्यादिपूजां अत्त्वा परिगृह्य तं बलिमावेष्टयत् पाशैबेबन्धेत्यर्थः । तत्र दृष्टान्तमाह—ध्वाङ्क्षवदिति । ध्वाङ्क्षः काकः स यथा किञ्चिद्भुक्त्वापि स्वामिनं पुनरावेष्टयति तद्वदित्यर्थः । य इत्थं दुःखदस्तत्तस्य असितस्य कृष्णस्य सख्यैर्मैत्रीभिरलं पूर्णम्, न किञ्चित्प्रयोजनमित्यर्थः । ननु 'एवं चेत्तर्हि तत्कथयापि किमन्यैव कथा कथनीया' इति चेत्तत्राह—दुस्त्यज इति । तस्य कथारूपोऽर्थो दुस्त्यजस्त्यक्तुमशक्य इत्यर्थः ॥ १७ ॥

अन्वितार्थप्रकाशिका

पूर्वजन्मस्वपि तस्य तादृशमेव चरितमित्याह यद्वा श्यामवर्णाः सर्वे निष्ठुरा एवेत्याह—नृगयुरिवेति । रामावतारे स्वधर्मं त्यक्त्वाः लुब्धस्य मांसभक्षकस्येव धर्मः स्वभावो यस्य । अकारप्रश्लेषेण लुब्धकधर्मरहितोऽपि लुब्धको हि तन्मांसमत्तुकामो विध्यति अयं तु न तथा अतो वृथा प्राणहरो यः मृगयुर्व्याध इव सुग्रीवमग्रे कृत्वा स्वयं विलीनः सन् कपीन्द्रं स्वापराधरहितं वालिनं विव्यधे जघान । दङ् । तत्र द्वित्वात्पूर्वं सम्प्रसारणाभावश्च आर्षः । तथा स्त्रीजितः सीतापरतन्त्रः सन् कामयानां कामो यानं प्राप्तिसाधनं यस्यास्तां कामयानां कामयमानामिति वा मुगभाव आगमस्यानित्यत्वात् कामयानशब्दः सिद्धोऽनादिश्चेति वामनः । स्त्रियं शूर्पणखां विरूपां कर्णनासाच्छेदनेन विकृतरूपाम् अकृत तथा वामनरूपेणापि बलिं भूम्यादिपूजाम् अत्त्वा परिगृह्य तं बलिं वैरोचनिमावेष्टयत् पाशैर्बबन्ध । बलिमत्त्वाऽधोऽक्षिपद्विष्टपादिति पाठे बलिं पूजां गृहीत्वा बिष्टपात्स्वर्गादधोऽक्षिपत् ।

ध्वांक्षः काकः स यथा किञ्चिद्भुक्त्वापि स्वामिनं पुनरावेष्टयति स्त्रीजनं कदर्थयति च तद्वदित्यर्थः। य इत्थं दुःखदस्तत्तस्य असितस्य कृष्णवर्णस्य सख्यैर्मैत्रीभिरलं पूर्णं न किञ्चित्प्रयोजनम्। कृष्णवर्णा ईदृशा एव भवन्ति तथापि तस्य कथारूपोऽर्थो दुस्त्यजः त्यक्तुमशक्यः ॥ १७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशिका

संप्रतितस्य पूर्वकर्माणि ज्ञात्वाऽस्मादहम्भीतास्मीत्याह मृगयुरिति लुब्धधर्मा क्रूरत्वयुक्तः। यद्वा अलुब्धधर्मा इति पदच्छेदः लुब्धो मांसभक्षणाय पशुघातकस्तद्धर्मा न भवत्यपि वृथा कठिन इत्यर्थः। जन्मांतरे मृगयुर्व्याध इव कपींद्रं वालिनं विव्यधे घातयामास स्त्रीजितो जानक्यासक्तः कामयानां कामार्थमेव यानमागमनं यस्यास्तां स्त्रियं सूर्प्पणखां विरूपां नासिकाकर्णहीनामकृत चकार लक्ष्मणद्वारेतिशेषः तथा वामनावतारे बलिनादत्तं बलिभूमिरूपमुपहारं अत्त्वा जग्ध्वा अंगीकृत्याऽपीत्यर्थः बलिं प्रह्लादपौत्रं अवेष्टयत् बबंध अर्देर्जग्ध्या देशाभाव आर्षः कईव ध्वांक्षवत् काकवत् काको मनुष्यदत्तं बलिमन्नं भुक्त्वा अन्यकाकानाहूय यथा पुनःपुनस्तमावृणोति तथा बलिमत्त्वाऽधोक्षिपद्विष्टयादिति पाठे तु बलिं अत्त्वा गृहीत्वा विष्टपात् इन्द्रासनात् अधःपातालेऽक्षिपदित्यर्थः तत्तस्मादसि तस्य कृष्णवर्णमात्रस्यसख्यैर्मित्रत्वैः अलं पूर्णावयं अतस्तेन सह सख्यं न कर्त्तव्यमित्यर्थः एवं सत्यपि तत्कथार्थः तस्य कथारूपः अर्थः प्रयोजनं दुस्त्यजस्त्यक्तुमशक्यः ॥ १७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न केवलमयमकृतज्ञ एवापि तु क्रौर्यकाठिन्यादियुक्तश्चातोऽस्य पूर्वाणि कर्माण्यप्यनुसंदधानाऽस्मादहं बिभेमीत्याह ॥ मृगयुरिवेति ॥ मृगयुर्व्याधः इव, वञ्चित्वेति शेषः। कपीन्द्रं निरपराधं बालिनं, विव्यधे जघान। अतोऽयं, लुब्धधर्मा लुब्धकसमानधर्मा, अलुब्धधर्मेतिच्छेदे, किं बहुना लुब्धेऽप्यसंभाविता ये धर्मास्तद्युक्त इत्यर्थः लुब्धको हि मांसमत्तुं मृगान् हन्ति। अयं तु न तथेति वृथा काठिन्यादिमानिति भावः। तथा स्त्रिया सीतया जितः स्त्रीजितः। तद्वशंगत इत्यर्थः। काम एव यानं प्राप्तिसाधनं यस्याः सा ता, कामेन याति स्वेच्छया चरतीति तथाभूता तामिति वा। नन्द्यादित्वात्कर्त्तरि ल्युः। स्त्रियं शूर्पणखां, विरूपां छिन्ननासिकामित्यर्थः। अकृत अकरोत्। एवंभूतं तु दाशरथिरूपेण वर्त्तमानेनानेन कृतं, तथा ततोऽपि पूर्वं वामनरूपेण कृतं, तथा ततोऽपि पूर्वं वामनरूपेण कृतं शृणु। हे भृङ्ग; योऽयं कृष्णः, ध्वाङ्क्षवद्वायसवत्, बलिं वैरोचनिसमर्पितां पूजां, अत्त्वा भुक्त्वा परिगृह्येत्यर्थः। बलिं वैरोचनिं अपि, अवेष्टयत्। पाशैर्बबन्धेत्यर्थः। तत्तस्मात्, असितस्य श्यामवर्णशरीरस्य कृष्णस्य सख्यानि तैः, अलं पूर्णम्। एवं चेत्तं नित्यं किमिति गायथेत्यत्राह। तस्यासितवर्णकृष्णस्य कथारूपोऽर्थः, दुस्त्यजस्त्यक्तुमशक्यः ॥ १९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मृगयुरिवेति : १०.४७.१७.

उक्त्वायोग्योपदेशानतनुसुखकरान्मोक्षयिष्ये स्वभावात् तं युष्मत्क्लेशसूतेरिति वदतु भवानस्मदुक्तिं निशम्य।
एतज्जन्मानुगाऽपि प्रकृतिरतितरां दुस्त्यजा प्राग्जनिस्था सा चेत्किं वाच्यशेषा तव सुहृदि तथा वालिवृत्ताद्विभाति ॥ ४५ ॥
भव्यं गव्यमहो यथेच्छमनिशं प्रादाय्यमूभिर्ममत्येषाऽस्य स्मृतिरंशतोऽपि न कथं प्रादुर्भवत्यन्तरे।
यद्वाऽनन्त-रसप्रभूतिमचलां गां दातुरप्यस्मरन् बद्धं प्रत्युत तं चकार बलिमित्यस्य श्रुता प्राक्स्थितिः ॥ ४६ ॥
को विश्वास्यस्तदन्यो विलसति जगतीत्युक्तिमेतां त्वदीयां मान्यां लोकत्रयेऽपि स्फुटतरमनृतां वक्तुमीशोऽत्र कः स्यात्।
यस्मिन् विश्वास्यतास्ति त्वदनुमतिमताऽकारि तेनापि चेत्थं को वाच्यः को न वाच्यः किमपरमथवा दिष्टमस्माकमेव ॥ ४७ ॥
निर्हेत्वन्योन्यपीडाकरणमिदमनार्यं न कार्यं सदाऽऽर्यैरेवं जानन् वदंश्चाप्यसकृदतिकृपः शास्त्रविद् वेदविच्च।
सोऽस्मिन्नेवं स्वयं चेच्चरति चतुरधीः कोऽस्ति शास्ता तदन्यश्चित्रं वा चित्रगुप्तः स हि तदविषयस्तद्वरं सर्वमेव ॥ ४८ ॥

कृष्णप्रिया

उद्धवजी ! समाधान किससे किया जाय ? जिसका कुछ सिद्धान्त ही नहीं हैं ? सुनिए ! जिस कृष्ण ने रामावतार में स्वयं व्याध-शिकारी नहीं है फिर भी व्याध की नाई कपिराज बाली का वध किया, स्वयं स्त्रीजित है—जितेन्द्रिय है फिर भी सकाम भाव से आई हुई शूर्पणखा का नाक कान लक्ष्मण से कटवाकर कुरूप बनाया, पुनः वामन अवतार में आत्म निवेदन एवं सर्व समर्पण करने वाले बलि राजा से बलि लेकर उसको काल के समान बाँध लिया, ऐसे श्याम लाल के सख्य में क्या विश्वास ? एवं क्या लाभ ? उद्धवजी हम तो उनसे अघा गई है फिर भी उन करुणानिधान के कथा अमृत नाम का दिव्य अर्थ का कभी भी त्याग नहीं कर सकती है ॥ १७ ॥

यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वन्द्वधर्मा विनष्टाः ।
सपदि गृहकुटुम्बं दीन[1] मुत्सृज्य दीना बहव इह विहङ्गा[2] भिक्षुचर्यां चरन्ति ॥ १८ ॥

कवंमक्षमा

अन्वयः—यदनु, चरित, लीला, कर्णपीयूष, विप्रुट्, सकृद्, अदन, विधूत, द्वन्द्वधर्माः, विनष्टाः, दीनाः, दीनम्, गृहकुटुम्बम्, सपदि, उत्सृज्य, बहवः, विहङ्गाः, भिक्षुचर्याम्, चरन्ति ॥ १८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च जानीम एव तत्कथाऽपि त्रिवर्गलतामूलोन्मूलनीति तथापि न त्यक्तुशक्नुमः । किं कुर्म इत्याह । यदनुचरितमेव लीला तदेव कर्णपीयूषं तस्य विप्रट् कणिका तस्याः सकृददनं सेवनं तेन विधूता निरस्ता द्वन्द्वधर्मा रागादयो येषां तेऽत एव विनष्टा असत्तुल्या दीनं दुःखितं गृहं कुटुम्बं विहाय दीना भोगहीना विहंगा अपि भिक्षुचर्यां प्राणवृत्तिमात्रं चरन्त्यतस्त्याज्यस्तथापि त्यक्तुं न शक्नुम इति निंदापरत्वेऽयं तावच्छ्रौतोऽर्थः । दुस्त्यजत्वेऽपि पारमार्थिकोऽयमर्थः । विधूतद्वन्द्वधर्मा इत्यन्तः समासः पूर्ववत् । ततस्ते च ते अविनष्टाश्चेति समासः । इतरे पुनर्द्वन्द्वधर्माणो विनष्टा एव । सपदि तत्क्षणमेव दीनं तुच्छं गृहसहितं कुटुम्बं विहाय दीना इवाकिंचनाः । धीरा इति वा पाठः । बहवो विहंगा हंसा इव सारासारविवेकचतुरा भिक्षुचर्यां पारमहंस्यं चरन्ति तस्मादेवं परमपुरुषार्थरूपत्वाद्दुस्त्यज एव तत्कथार्थ इति ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदाह—अपि चेति । तत्कथा । त्रिवर्गलता धर्मार्थकामरूपा वल्ली तस्य मूलनिकृन्तनी । तथापि जानन्त्योऽपि वयं त्रिवर्गस्थाः । अभिजल्पेनाह—यदिति । यस्य कृष्णस्य । अनुचरितमवतारचरितमेव । लीला विलासः । तदेव लीलैव । कर्णपीयूषं श्रवणामृतम् । अत एव विनष्टरागादित्वादेव । "लीला प्रियस्यानुकृतिः श्लिष्टा वाग्वेषचेष्टितैः । लीला विलासः केलिश्च क्रिया शृंगारभावजा ॥" इति कोशः । "पृषन्ति विन्दुपृषताः पुमांसो विप्रुषः स्त्रियः" इत्यमरः । प्राणवृत्तिमात्रमित्यनेन ज्ञानार्थमेव तेषां देहधृतिर्न तु भोगार्थेत्युक्तम् । अतः अस्य लीलाकर्णनस्य दीनतापादकत्वात् । तावदधुना । श्रौतः श्रुतिविहितः । परमार्थिको वास्तवः अयं वक्ष्यमाणः । ततश्च पूर्ववत् समासोत्तरम् । ते चेत्यादि कर्मधारयः । इतरे गृहस्थाः । इवेन न तु दीना इत्युक्तम्, किन्त्वत्युदारास्त्यक्तुमशक्यस्य त्यागित्वात् । इवाऽध्याहाराऽपेक्षया 'धीराः' इति पाठः सम्यक् । विहंगपदं लक्षणया हंसपरम् । पारमहंस्यं संन्यासम् । तथा च श्रुतिः—"प्रव्रजन्त्येतद्ध स्म वै पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मा लोकः" इति । "ते ह स्म पुत्रेषणायाश्च वित्तेषणायाश्च लोकेषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" इति च । 'दीनो दुःखितदुर्गततुच्छमूषिकवाचकः' इति स्वामी । अभिजल्पलक्षणम्–"भंग्या त्यागौचिती तस्य खगानामपि खेदता । यत्र सानुनयं प्रोक्ता तद्विद्यादभिजल्पितम् ॥" इति ॥ वयं साक्षात्तेन सह सख्यं कृतवत्यो तद्दुःखिन्योऽभूम तत्र किं चित्रं, तल्लीलाकथापि सर्वजगत्संतापिनीत्याह—यस्यानुचरितं प्रतिक्षणचेष्टितमेव लीला सैव कर्णपीयूषशब्दमात्रेणैव सुखदं, किं पुनरर्थत इति भावः । तस्या अपि विप्रुट् तस्या अपि सकृदप्यदनं किञ्चिदास्वादनं तेनापि विधुता विशेषेण खण्डिता द्वन्द्वधर्माः स्त्रीपुंसादिपरस्परसख्यरूपधर्मा येषां ते । तत्कथां स्त्री चेच्छृणोति सद्य एव पतिस्नेहं त्यजति, पतिश्चेत्स्त्रीस्नेहमेवं पुत्रश्चेत्पितरं मातरञ्च, माता चेत्पुत्रमित्येवं परस्परत्यागाद्विशेषेण नष्टा इति तेषां नाशे तथा न दुःखं यथा वैराग्य इति सांसारिकलोकानुभव एव प्रमाणमिति भावः । किञ्च—ते जनाः स्निग्धमनसोऽपि कठोरस्य कृष्णस्य लीलाश्रवणादतिकठोरा निर्दया कृतघ्नाश्च भवन्तीत्याह—सपदि कथाश्रवणक्षणमात्र एव । गृहकुटुम्बं पितृश्वश्र्वादिपर्यन्तम् । दीनमन्यस्योपार्जकस्याऽभावान्, वो यद्वोक्ता तद्धनरहितमपि । यद्वा तद्विच्छेदकातरम् उत्सृज्य, मृत्यवे कुशवारिसंयोगेन संप्रदायैवेत्यर्थः । हंतहंत ते स्त्रीपुत्रादयो म्रियन्तां नाम स्वयमपि सुखिनो न भवन्तीत्याह—दीना गृहं त्यक्त्वा गच्छन्तश्चित्तविक्षेपाद्वराटकमात्रमपि ग्रन्थो न गृह्णन्तीति भावः । 'धीराः' इति पाठे भार्यादिरोदनदर्शनेऽप्यक्षुभ्यन्तो महाकठोरा इत्यर्थः । न च ते एकद्वा द्वित्रा वा चतुःपञ्चा वा किन्तु बहवः परःसहस्राश्च । ननु ततस्ते कया जीविकया जीवन्ति तत्राह—विहंगाः पक्षिण इव गोधूमादिकणभिक्षापरिपाट्यैव जीवन्ति, न तु केनापि दत्तया स्थूलभिक्षयापीति भावः । इहेति—अत्रैवाऽस्मद्दुःखस्थाने वृन्दावने एवागत्यास्मत्संगादपि महादुःखिनो भवन्तीति भावः । तेन तत्कथाया बहुमत्स्यण्डिकामप्रधत्तूरबीजचूर्णत्वम्, कथावाचकस्य साधुवेशच्छन्नमहाधातुकत्वम्, पुराणपुस्तकस्य जालत्वम् । अत एव ते वनाद्वनं भ्रमन्तोऽपि स्वकक्षगृहीतपुस्तका एय दृश्यन्ते । व्यासादीनां जालनिर्मातृत्वं, कृष्णस्य परमेश्वरत्वेन तत्तदादेष्टृत्वमेतदर्थमेव कृष्णेन परमेश्वरता गृहीता गोप्य इव सर्वे लोका दुःखाब्धौ पतंत्विति तस्य विचारः, ईदृशपरदुःखदर्शनमेव तस्य सुखमत ईदृशपरदुःखदानजन्यफलभागी यथा स न तथा व्यासादय इति परःशता एव ध्वनयोऽस्य पद्यस्य सर्वे एव सिद्धान्ततो व्याजस्तुत्या

---

[1] गेहं–विध. । [2] भैक्ष–विज. ।

भक्तेः सर्वोत्कर्षव्यञ्जका ज्ञेयाः । अत्र खगसदृशीकृत्य सज्जनानां खेदनात्तस्य त्याग एव समुचित इत्यनुतापमयं वाक्यमित्ययमभिजल्पः । तदुक्तम्—“भंग्या त्यागौचिती तस्य खगानामपि खेदनात् । यत्र सानुशयं प्रोक्ता तद्भवेदभिजल्पितम्” ॥ इति ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यस्यानुचरितं स्वस्यानुकूलं कर्मैव लीला बालचेष्टितवत् स्वच्छन्दखेलामात्रमिति निन्दैव लोकहितार्थकर्मणा सह लीलायाः प्रतियोगित्वात् । तदेव कर्णपीयूषं शब्दतः कर्णसुखप्रदं नत्वर्थतो मनः प्रीतिकरमित्यर्थः । तस्यापि विप्रुट् नतु बाहुल्यं तस्या अपि सकृदप्यदनं दूरदेशात् कथञ्चित् किञ्चिदास्वादनं तेन विशेषेण धूता द्वन्द्वधर्मा मिथुनाचारा उष्णशीतादिभोगा वा यैस्तथाभूताः सन्तः विहङ्गाः आकाशगामित्वाद्दूरादागता हंसादयः पक्षिणोऽपि तत्रापि बहव एव नतु द्वित्राः । सपदि लीलाश्रवणातन्तरमेव । दीनमपि गृहस्य कुटुम्बं तातजननीभार्यादिकं त्यक्त्वा स्वयमपि दीना विनष्टाश्च सन्त इह तल्लीलास्थाने वृन्दावने समागत्य भिक्षुचर्यामेव चरन्ति । धीरा इति पाठे तेषा दुःखेनाक्षुभिताः कठोरचित्ताः सन्त इत्यर्थः । बहव इवेति पाठः सर्वटीकाकृतां सम्मतः । श्रीस्वामिभिरपि स्तुतिपक्ष एव हंसा इवेति गौणवृत्तिद्योतनायैव इवशब्दो दत्त इति । अयं भावः । येऽमी पक्षिणो दृश्यन्ते नूनं न प्राचीनाः तेषां तद्वियोगे जीवनासम्भवात् ततोऽमी आगन्तुका एव । तत्र तादृशमागमनमीदृशी भिक्षुचर्या च तेनैव सम्भवति यथा भवदागमनं दौत्येनैवेति । यद्वा तस्य निष्ठुरता किं वाच्या तच्चरितलवमपि ये केचित् शृणुयुस्तेऽपि निष्ठुराः स्युरित्याह । यदिति । अर्थः पूर्ववत् । यद्वा । तर्हि कथं मां गातुं निषेधसि तत्राह । यदिति । अर्थः पूर्ववदेव । विशेषतश्च इह बहव एव विहङ्गास्तदावेशात्तद्गानशीला भिक्षुचर्यां चरन्ति तत्र को वा वराको भवान् तत्र च ते प्रायो व्राजपत्यलीलामेव गायन्ति तथापि न रोचन्ते भवांस्तु यादुपत्यलीलामिति कथंतरां रोचतां नामेति ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तस्य निष्ठुरता किं वाच्या, तच्चरितलवमपि ये केचित् सकृदपि शृणुयुस्तेऽपि निष्ठुराः स्युरित्याह–यदिति । अनुचरितं स्वस्यानुकूलं कर्मैव लीला बालचेष्टितवत् स्वच्छन्दखेलामात्रमिति निन्दैव, लोकहितार्थकर्म्मणा सह लीलायाः प्रतियोगित्वात्तदेव कर्णपीयूषं शब्दतः कर्णसुखप्रदम्, न त्वर्थतोमनःप्रीतिकरमित्यर्थः । तस्यापि विप्रुट्, न तु बाहुल्यम् । तस्या अपि सकृदप्यदनं कथञ्चित् किञ्चिद्ग्रहणं तेनापि विशेषेण धूता द्वन्द्वधर्म्मा मिथुनाचाराः खादनपानादिरागा वा यैस्तथाभूताः सन्तो विहंगाः पक्षिणोऽपि तत्रापि बहव एव, न तु द्वित्राः, सपदि लीलाश्रवणानन्तरमेव दीनमपि गृहस्य कुटुम्बं तात-जननी-भार्य्यादिकं सर्व्वपरिवारमवश्यापेक्ष्यमपि इह सर्व्वसमृद्धियुक्ते वृन्दावनेऽपि । स्तुतिपक्षे—इह संसारे बहवो जना विहंगा इव विहंगाः, हंसवद्विवेकिन इत्यर्थः । अतएव तैरपि व्याख्यातम्—हंसा इवेति । एवमिहेत्येव पाठः; एष च सर्वटीकाकृतां सम्मतः । यद्वा, विभ्यः पक्षिभ्यो नष्टा अदर्शनं प्राप्ताः, विविक्तवासत्वात्; भिक्षुचर्य्यामिन्द्रियग्रामनिग्रहम् ॥ १८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

यदनुरचिताः विहङ्गाः पक्षितुल्याः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

न केवलमस्माकमेव तत्कथार्थो दुस्त्यजः किन्त्वन्येषामपि नापि वयमेव तदर्थे विसृष्टापत्यादयः अपि त्वन्येऽपीति स्तुतिगर्भम् निन्दन्नाह । यदनुचरितेति । इह लोके बहवो जना यस्यानुचरितमेव लीला तदेव कर्णयोः पीयूषममृतं तस्य विप्रट् कणिका तस्याः सकृददनं सेवनं तेन विधूता निरस्ता द्वन्द्वधर्मा रागद्वेषादयो येषां तेऽत एव विनष्टा असत्तुल्याः अचेतनप्राया इति यावत् लब्धात्मस्वरूपसत्ताका इति स्तुतिरप्यभिप्रेता समस्तत्वेऽविनष्टा इतिच्छेदात् सपदि तदैव दीनं दुःखितं गृहकुटुम्बं विहाय दीना विहङ्गा इव भिक्षुचर्यां चरन्ति सन्यासिवत्प्राणधारणमात्रं कुर्वन्ति ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गुणा अप्यनेन सूचिता इति प्रकटनायोत्तरबन्धेन गुणानेव वक्ति । यदनुचरितेति । यस्य कृष्णस्यानुवचनमनुयुगम्वान्ववतारं वाचरिता लीलैव कर्णपीयूषं कर्णामृतं तस्य विप्रट् बिन्दुस्तस्य सकृददनेन एकवारश्रवणलक्षणेन विधूता द्वन्द्वधर्मा रागादिलक्षणा येषां ते ते चाविनष्टा अनुच्छिन्नज्ञानधर्माश्च अनुच्छित्तिधर्मेति श्रुतेः विनष्टा इति पृथक्पदं वा विगतं नष्टं नाशनं येभ्यस्ते तथा मुक्तावपि स्वरूपभेदधर्मरहिता न भवन्तीत्यर्थः । “स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमय” इत्यादिश्रुतेः सपदि वैराग्यज्ञानानन्तरं दीनं दारिद्र्यापादकं कुटुम्बं विसृज्य दीनाः दीङ्क्षय इति धातोः दीना निर्दोषा इत्यर्थः । बहवो विहङ्गाः विहायसा नाम्नाकाशेन हरिणाधारेण गच्छन्तीति विहङ्गाः सन्यासिन इह जीवराशौ भैक्ष्यचर्यां ज्ञानलक्षणामुद्दिश्य चरन्ति देहयात्रां कुर्वन्ति ज्ञानार्थमेव तेषां देहधारणं नोदरपूरणार्थमित्यर्थः । “प्रव्रजन्त्येतद्धस्मवैते पूर्वे विद्वांसः प्रजां न कामयन्ते किम्प्रजां करिष्यामो येषां नोऽयमात्मा यं लोक इति ते हस्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यां चरन्ती”ति श्रुतेः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स्वस्यानुचरितं तस्यानुकूलं कर्मैव लीला बालचरितवत् स्वच्छन्दखेला । सैव कर्णमात्रस्य पीयूषं न तु मनसः आपाततः सुखप्रदा परिणामतस्तु दुःखदैवेत्यर्थः । तस्यापि विप्रुट् नतु बाहुल्यमित्यादि स्वयं विनष्टाश्च सन्तः इ तल्लीलाख्याने । धीरा इति पाठे तेषां दुःखेनाक्षुभिताः कठोरचित्ताः सन्तः ॥ १८-१९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

कथार्थो दुस्तज इति यदुक्तम् , तत्प्रकारान्तरेण द्रढ़यति—यदनुचरितेत्यादि । यद् यस्यानुचरितलीला अनु अनुक्षणं चरिता कृता या या लीला, सैव कर्णपीयूषं तस्य विद्रूषः, कर्णस्य सकृददने एकवारपाने विधूता द्वन्द्वधर्माः शीतोष्णादिधर्मा यैस्ते, दीनं गृहकुटुम्बं सपदि तत्क्षणादुत्सृज्य वहवो जना विहङ्गा इव भिक्षुचर्यां चरन्ति । विनष्टा मृतप्राया अतिक्षामा अतएव दीनाः । यद्वा, एकमेव पदं विधूतद्वन्द्वधर्मा विधूतद्वन्द्वा विधूतधर्मास्त्यक्तवर्णाश्रमधर्मास्तथाप्यविनष्टा अभ्रष्टादीना निर्विण्णाः । एवम्भूतस्य तस्य तथाविधाङ्गसङ्गं प्राप्य कथं तत्कथां त्यक्ष्याम इति वाक्यशेषः । अत्राप्युन्माद एवाङ्गी मत्यौत्सुक्यादयोऽङ्गानि सुप्रलाप उक्तिवैचित्र्यम् । यद्यप्युन्मादस्य सुवचनत्वं न स्वाभाविकं तरङ्गीत्वात् , तथापि कदाचिद् भवति लोके दृष्टत्वात् ॥ १८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कथाया दुस्त्यजत्वं दर्शयति—यदनुचरितेत्यादि । बहवो भाग्यमाजो जना विहङ्गा इव भिक्षुचर्यां चरन्ति, वयन्तु यदधुनापि गृहे वर्त्तामहे, तदेवाधमतास्माकमिति ग्लानि-दैन्य-मतीनां शाबल्यम् ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वयं साक्षात्तेन सह सख्यं कृतवत्यो यद्दुःखिन्योऽभूम तत्र किं चित्रं तल्लीलाकथापि सर्वजगत्सन्तापनीत्याह । यस्यानुचरितं प्रतिक्षणचेष्टितमेव लीला सैव कर्णपीयूषं शब्दमात्रेणैव सुखदं किं पुनरर्थत इति भावः । तस्या अपि विप्रट् तस्या अपि सकृदप्यदनं किञ्चिदास्वादनं तेनापि विधूता विशेषेण खण्डिता द्वन्द्वधर्मा स्त्रीपुंसादिपरस्परसख्यरूपधर्मा येषां ते तत्कथां स्त्री चेत् शृणोति सद्य एव पतिस्नेहं त्यजति । पतिश्चेत् स्त्रीस्नेहम् एवं पुत्रश्चेत् पितरं मातरञ्च । माता चेत् पुत्रमित्येवं परस्परत्यागाद्विशेषेण नष्टा इति तेषां नाशं तथा न दुःखं यथा वैराग्य इति सांसारिकलोकानुभव एव प्रमाणमिति भावः । किञ्च । ते जनाः स्निग्धमनसोऽपि कठोरस्य कृष्णस्य लीलाश्रवणादतिकठोरा निर्दया कृतघ्नाश्च भवन्तीत्याह । सपदि कथाश्रवणक्षणमात्र एव गृहकुटुम्बं पितृश्वश्र्वादिपर्यन्तमपि दीनम् अन्यस्योपार्ज्जकस्याभावात् श्वो यद्भोक्ष्यते तद्धनरहितमपि । यद्वा तद्विच्छेदकातरम् उत्सृज्य मृत्यवे कुशवारिसंयोगेन सम्प्रदायैवेत्यर्थः । हन्त हन्त ते स्त्रीपुत्रादयो म्रियन्तां नाम स्वयमपि सुखिनो नैव भवन्तीत्याह । दीनाः गृहं त्यक्त्वा गच्छन्तश्चित्तविक्षेपाद्वराटकमात्रमपि ग्रन्थौ न गृह्णन्तीति भावः । धीरा इति पाठे भार्यादिरोदनदर्शनेऽप्यक्षुभ्यन्तो महाकठोरा इत्यर्थः । नच ते एकद्वा द्वित्रा वा चतुःपञ्चा वा किन्तु बहवः परःशताः परःसहस्राश्च । ननु ततस्ते कया जीविकया जीवन्तीत्यत आह । विहङ्गाः पक्षिण इव भिक्षुचर्यां गोधूमादिकणभिक्षापरिपाट्यैव जीवन्ति नतु केनापि दत्तया स्थूलभिक्षयापीति भावः । इहेति पाठे अत्रैवास्मद्दुःखस्थाने वृन्दावन एवागत्येति अस्मत्सङ्गादपि महादुःखिनो भवन्तीति भावः । तेन तत्कथाया बहुमत्स्यण्डिकामयधुस्तूरबीजचूर्णत्वं कथावाचकस्य साधुवेशच्छन्नमहाघाकत्वम् । पुराणपुस्तकस्य जालत्वम् अत एव ते वनाद्वनं भ्रमन्तोऽपि स्वकक्षगृहीतपुस्तका एव दृश्यन्ते व्यासादीनां जालनिर्मातृत्वं कृष्णस्य परमेश्वरत्वेन तत्तदादेष्टृत्वम् एतदर्थमेव कृष्णेन परमेश्वरता गृहीता गोप्य इव सर्वलोका अपि दुःखाब्धौ पतन्त्विति तस्य विचारः । ईदृशपरदुःखदर्शनमेव तस्य सुखम् अत ईदृशपरदुःखदानजन्यफलभागी यथा स भविष्यति न तथा व्यासादय इति परःशता एव ध्वतथोऽस्य पद्यस्य सर्व एव सिद्धास्ततो व्याजस्तुत्या भक्तेः सर्वोत्कर्षव्यञ्जका ज्ञेयाः । अत्र खगं सदृशीकृत्य सज्जनानां खेदनात्तस्य त्याग एव समुचित इत्यनुतापमयं वाक्यमित्यभिजल्पः । यदुक्तम् । "भङ्ग्यात्यागौचिती तस्य खगानामपि खेमनात् । यत्र सानुशयं प्रोक्ताभद्भवेदभिजल्पितम्" ॥ १८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

यद्यपि तत्कथार्थोऽन्यपुरुषार्थमूलोच्छेदक इति जानीमस्तथापि त्यक्तुं न शक्नुमः किं कुर्म इत्याशयेनाह । यदिति । यस्यानुचरितमेव लीला स्वच्छन्दक्रीडा तदेव कर्णपीयूषं तस्यापि विप्रुट् कणिका तस्यापि सकृददनं दूरात्कथञ्चिदास्वादनं तेन निरस्ता द्वन्द्वधर्मा रागादयः मिथुनीभूताचाररत्यादयो वा यैः तत्कथां पुरुषश्चेच्छृणोति सद्य एव भार्यादिस्नेहं जहाति स्त्री चेत्पत्यादिस्नेहं पुत्रश्चेत् पित्रादिस्नेहं माता चेत्पुत्रादिस्नेहमिति परस्परत्यागात् विनष्टा मृतादपि संबन्धिनो विरक्तास्तस्मादधिकदुःखस्य सांसारिकानुभवगोचरत्वाद्विशेषेण नष्टाः सपदि लीलाश्रवणव्यवहितक्षण एव गृहं तत्र स्थितं कुटुम्बं पितृभार्यादिपोष्यवर्गं

च दीनं जीवनोपायरहितत्वाद्धनोपार्जकत्वविच्छेदकातरं परित्यज्य स्वयमपि दीनाः निष्किञ्चनत्वात् भोगहीना धीरा इति पाठे रुदतः पित्रादीनदृष्ट्वाप्यतिकठिनचित्तत्वात् धैर्यमत्यजन्त एवंविधा असंख्याताः पक्षिण इव भिक्षुचर्यां चरन्ति गोधूमादिकणभिक्षापरिपाट्यैव जीवनवृत्तिं सम्पादयन्ति, इहेति पाठे विहङ्गास्तद्वत्परिग्रहरहिताः इहास्मद्वृन्दावने अस्मत्समक्ष एवातस्तेषां तत्कथार्थकृतामुक्तदशां प्रत्यक्षेणानुभूयापि वयं ततो निवृत्तिं न भजाम इति महत्कष्टमित्यर्थः। एतेन कृष्णादिष्टव्यासादिकृतपुस्तकात्मकजालस्थितकथारसास्वादनकृतजालबन्धनमवाप्य बहवोऽपि दुर्दशां प्राप्ता इति निरूपणेन कृष्णस्यैव परदुःखजातसुखार्थिनः समस्तदुःखाय गृहीतेश्वरभावस्य मूलकारणस्य दुःखदानजन्यफलभाक्त्वमित्यपि ध्वनित। यद्वा ननु सर्वथा दोषाढ्य एव कृष्णश्चेत्तर्हि तत्कथार्थत्यागे कः प्रयासः दोषदर्शनस्यैव वैराग्योपायत्वाभिधानाद्गोपिकानां तत्कथार्थत्यागासामर्थ्यमात्रे किं चित्र यतस्तल्लवोऽपि महतोऽपि महदनर्थसम्पादक इत्याशयेनाह। यदिति। यस्य कृष्णस्यानुचरितं यादृशः कृष्णस्तादृशमेव तदनुचरितमधिकानर्थसम्पादकत्वादधिकमपि भगवता पूर्वमाचरितं पश्चाद्व्यासादिभिरुपनिबद्ध तस्माच्छब्दव्यवहितमपि तथा कार्यसम्पादकं वस्त्रादिव्यवहितस्यापि ग्रीष्मसूर्यस्य तापजनकत्वं यथेति भावः। अन्येषां पीडाकरमपि तस्य सुकरमिति ज्ञापनाय इह लीलेति दोषसहस्राक्रान्तमपि विजातीयरसलोभविमोहिता भक्षयन्तीति सूचयन्त्याह। पीयूषेति। कर्णामृतं निमीलिताक्षेणापि पातुं शक्यमिति भावः। श्रवणमात्ररम्यमपीति वा तत्रापि विन्दुमात्रं बहुपाने तु किं स्यादिति भावः। एवं भूतस्य बिन्दुमात्रस्वाप्यत्वादरेण ग्रहणं तेनैव विधूता द्वन्द्वधर्मा रागादयो येषां ते तद्वद्धृदयत्वाद्विनष्टाः अदृश्यत्वं प्राप्ता गृहकुटुम्बादिकं दीनमुत्सृज्य स्वयमपि दीनाः सन्तः इहास्मिन्नेव जन्मनि विहङ्गा हंसाः परमहंसा वा जाताः। ननु तादृशाः कथमुपलभ्यन्त इति चेत्तत्राह। भिक्षुचर्यां भिक्षाटनादिरूपमाचारं चरन्ति कुर्वन्ति अस्मद्गृहद्वारि भिक्षार्थमागत्य स्थिता इत्युपलभ्यन्त इत्यर्थः। तथा च महान्तोऽपि तत्कथालवेनाप्येवंविधदुःखमनुभवन्तोऽपि यदा तं न त्यजन्ति तदा त्यागे अस्माकं किं सामर्थ्यमिति भावः। यद्वा ननु तत्कथार्थो दुस्त्यज इति यदि जानासि तर्हि किमर्थं तद्गानं कुर्वन्तं मां निषेधसीति चेत्तत्राह। यदिति। इह बहवो विहङ्गास्तद्गानशीलाः सन्तो भिक्षुचर्यां चरन्ति तत्र को वराको भवान् ते च गोपिकापतिं गोपिकाश्च गायन्तो नादरं लभन्ते भवांस्तु यदुपतिं तत्सखीश्च गायन् कथंतरामादरं लभतामित्याशयः। समानमन्यत् यद्वा मास्तु तत्कथात्यागात्यागकथा स तु सर्वदुःखप्रदत्वात्त्यक्तुमेवोचित इत्याशयेनाह। यदिति। “भङ्ग्यात्यागोचितिस्तस्य खगानामपि खेदनात्। यत्र सानुशयं प्रोक्ता तद्भवेदभिजल्पितम्” इत्युक्तेरत्राभिजल्पः उद्धवपक्षेऽप्येवं श्रुतिपक्षे शृणु तत्कथालवस्याप्यलौकिकं माहात्म्यमित्याह। यदिति। पूर्वार्द्धमेकपदं यथोक्ताश्च ते अविनष्टाश्च यद्द्वन्द्वधर्माणस्ते विषभक्षकत्वाद्विनष्टाः तदुक्तम्—

भोगा विषयसम्भोगा भोगा एव फणावताम्। स्पृशन्नपि मनाग्दृष्टो दष्टो नष्टः प्रतिक्षणम्॥ इति

त्यक्तविषयत्वात्पीतामृतत्वादेत एवाविनष्टाः सपदि तत्क्षणमेव दीनं तुच्छं गृहकुटुम्बं विहाय दीना औद्धत्यरहिता विनयसम्पन्ना निष्किञ्चना वा धीरा इति क्वचित्पाठः बहवो विहङ्गा हंसा इव सारासारसत्यासत्यादिविवेकचतुराः भिक्षुचर्यां पारमहंस्यं चरन्ति इहेति पाठे अस्मिन् अधिकारिशरीरे विहङ्गाः चिदाकाशगाः तथा च यत्कथालवमात्रप्राणिनामपि यदा कृतकृत्यता तदा तदनन्यशरणानां माहात्म्यं किं च वक्तव्यमित्यर्थः। तथा च तत्कथाप्रसादलब्धतत्त्वधानानां माहात्म्यप्रतिपादिका श्रुतयः “यथा पुष्करपलाश आपो न श्लिष्यन्ते तद्वद्विदि पापं कर्म च श्लिष्यते न कर्मणा लिप्यते पापकेन तत्सुकृतदुष्कृते विधूश्रुते” इत्याद्याः॥ १८॥

गूढार्थदीपिनी

यस्य अनुचरितमेव लीला आनन्दजनकं कर्णपीयूषं तस्य विप्रुट् कणिका सस्या सकृददनेन सेवनेन निवृत्ता रागद्वेषादयो येषां ते अत एव असत्तुल्याः दीना भोगहीनाः सन्तः विचरन्ति वस्तुतस्तु अविनष्टा दीनं कुटुम्बं विहाय दीना परिग्रहशून्या एव बहवो हंसा इव सारग्राहिणः भिक्षुचर्यां पारमहंस्यं ज्ञानपथम् आश्रयन्ति॥ १८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्कथापि प्रवृत्तिमार्गविरोधिनीत्याह। यदनुचरितेति। इह बहवो जनाः यत् यस्य कृष्णस्य अनुचरितमेव लीला तद्रूपकर्णपीयूषस्य विप्रुट् कणिका तस्याः सकृददनेन सेवनेन विधूता निरस्ता द्वन्द्वधर्मा ऐहिकामुष्मिकलोकद्वयसङ्कल्पा येषां ते अतः विनष्टाः लोकद्वयसाधनापेक्षया नष्टतुल्याः दीनं वियोगकातरं गृहेण सहितं कुटुम्बं सपदि उत्सृज्य दीनाः केनोपायेन श्रुतचरितलेशस्य कृष्णस्य प्राप्तिः स्यादिति दैन्ययुक्ताः विहङ्गाः प्रवृत्तकर्मत्यागात् कृष्णप्राप्त्युपायस्वीकारात् हंसवद्विवेकयुक्ताः भिक्षुचर्यां चरन्ति उपस्थितं विषयानन्दं त्यक्त्वानुपस्थितं किमपि कृष्णप्राप्तिसुखं वाञ्छन्ति अतः प्रसिद्धसुखतत्साधनप्रवृत्तिमार्गविरोधिन्यपि तत्कथा तथापि सा दुस्त्यजा तस्मात्कथ्यतामिति भावः॥ १८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्फुटं प्रथमाद्वितीयाभ्यामर्थवादाभ्यां स्वनायकगुणावगुणौ कथयन्ति॥ यदिति। येन अनु अवतारानुरचिता लीला सैव कर्णानां पीयूषममृतं तस्य या विप्लुट् बिन्दुस्तस्या विप्लुषः सकृदेकदा दानं श्रवणरूपं तेन विधूता द्वन्द्वधर्मा रागादयो येषां ते

विनष्टाः । भावे क्तः । नष्टं नष्टिः सा विगता येभ्यस्ते ते च तेऽविनष्टा इत्यैकपद्यं वा । उ थोक्तेषां तद्धर्माणां चानुच्छित्तिरुक्ता भवति । विधूतद्वन्द्वा दूरीकृतशीततृष्णास्तद्बाधाश्च ते धर्मैरविनष्टाश्चेति वा । अयमात्मानुच्छित्तिधर्मेति श्रुतेः । दीनमभिमानेन तप्तं गृहकुटुम्बं सपदि विरक्त्यङ्कूरणानन्तरमेवोत्सृज्य स्वयं दीनाः क्षीणाभिमाना विहगेति गतम् । आकाशनामकभगवन्तं गच्छन्ति तदाधारेण गच्छन्तीति भावत् । सन्यासिनो भैक्षचर्यां ज्ञानभिक्षाचरणमुद्दिश्य चरान्त न त्वैहिककामा एतादृशोऽपि परपर्शास्मानित्यहो दयालुतेति । यथोक्तं बृहदारण्यकशारीरब्राह्मणे । तमेवं विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्त्येतद्ध स्म वैतत्पूर्वे विद्वांसः प्रजां न कामयन्ति किं प्रजया करिष्यामो येषां नायमात्माऽयं लोक्त इति ते ह स्म पुत्रैषणा याश्च वित्तैषणा याश्च लोकैषणा याश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः स एव नेति नेत्यात्मा गृह्यो न हि गृह्यते शीर्यो न हि शीर्यते सङ्गो न हि सज्जते शितो न व्यथते न रिष्यत्येतमु हैवेते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युमे उ हेवैषणे एते तरति नैनं कृताकृते तपत इति । भावबोधे व्याख्यातोऽयं खण्डः । सकृदेकदा यददनं तेन विधूता द्वन्द्वधर्माः पतिपत्नीधर्मास्त आविनष्टा यास। ता दीनमस्मन्निमित्तं दैन्योपेतं गृहसहितं कुटुम्बं बन्धुसन्दोहं च विसृज्य विहङ्गा इव पक्षिण इव निराधारा दीनास्तद्विरहेण क्षीणास्तप्ता वा बहवो गोप्यो मदादिकं दृष्ट्वा भैक्षचर्या भिक्षुकघाटी स्वामिनस्त्यक्त्वा गतः किं कार्यं यूयं गत्वा वदतेति याचनां चरन्स्याटीकन्त इति स त्वं पदि पादे पतित्वा वदेति शेषः अवदन्निति च ॥ १८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु तर्हि कथामेव कुर्वन्तु किमिति भगवतो दोषा उच्यन्तो नहि भगवद्गुणतत्परा भगवद्दोषान् कथयन्ति नवा तेषामन्यथा स्फुरतीति चेत्तत्राह । यदनुचरितेति । यथा भगवान् तथैव तत्कथापि ततोऽप्यधिकापि वयं हि स्त्रियः नात्यन्तं विवेकवत्यः भगवता बहुकालं स्थित्वा कथञ्चिद्व्यामोहिताः तत्रापि न भिक्षां प्रार्थयामः नापि भ्रान्ता इव जातिभ्रष्टा जाता नापि त्यक्तस्थानाः कथा त्वदीयस्यापि महान्तमनर्थं सम्पादयति इत्याह । यस्य भगवतः अनुचरितं भगवता तु पूर्वमाचरितं तत्पुनः व्यासादिभिरुपनिबद्धमनुचरितं जातमनेन शब्दव्यवहितमपि तथा कार्यं सम्पादयतीत्युक्तं यथा निदाघे वस्त्रादिव्यवहितोऽपि भानुः सन्तापयत्येव तत्रापि ग्रहणसौकर्यार्थमाह । लीलेति । दुर्जरत्वं ज्ञात्वा अभक्षयन्नपि रसव्यामोहितो भक्षयति तत्रापि न प्रयत्नसाध्यता कापीत्याह । कर्णपीयूषेति । निमीलिताक्षेणापि कर्णामृतं पातुं शक्यं बहुपाने तु को वेद किं वा भवेत् किन्तु तस्यामृतस्य विप्रुट् विन्दुमात्रं तस्यापि सकृददनं सादरमनसा ग्रहणं तेनैव विधूता द्वन्द्वधर्मा रागादयो येषां तैर्वद्धस्तिष्ठति अतस्तदभावात् विनष्टा भवन्ति "णश अदर्शने" यथा सर्वप्रतीत्या गृहीता भवन्ति तथा गच्छन्तीत्यर्थः । लौकिकवैदिकमार्गादपि पुष्टिमार्ग एवाभिनिवेशात् अन्यानुरोधेनापि तेषां स्थितिं निवारयति । सपदीति । ज्ञानिनो विरक्ताः कर्मिणोऽपि स्वार्थमपेक्षाभावेऽपि परार्थमपेक्षन्ते एतेषां तदपि नास्ति यतः सपद्येव गृहस्थितमपि कुटुम्बं दीनमपि उत्सृज्य त्यक्त्वा स्वयमपि दीनाः सन्तो बहव एव विहङ्गा जाताः इहास्मिन् जन्मन्येव हंसाः परमहंसा वा विहङ्गपदं गताः साधारण्यप्रतिपादनार्थमितो गताः काका गृध्रा हंसा वा भवन्तु परं गच्छन्त्येवेति ज्ञापनार्थं तेषां तु आकाशगतिरिव सर्वविलक्षणा भवतीति । ननु तादृशाः कथमुपलभ्यन्ते तत्राह । भिक्षुचर्यां चरन्तीति । भिक्षुश्चतुर्थाश्रमवान् तस्य चर्यामाचारं गृह्णन्ति तदनधिकारिणोऽपि तत्फलानभिलाषिणोऽपि तन्मार्गरहिता अपि तदाचारं गृह्णन्तीत्यर्थः । एवं स्वधर्मं परित्याज्य परधर्मं ग्राहयति दुःखितांश्च करोति तान् सत्सम्बन्धिनश्च स्वसुखमपि बहुताननुभावयति अतः कथापि त्यक्तव्यैव परमशक्यत्वान्न त्यज्यत इति भावः । पुष्टिमार्गश्रुतीनामपि भगवन्मर्यादाश्रुतयोऽपि नात्यन्तद्वेष्याः किन्तु ग्राह्या एव परं नाभिप्रेता इति तृतीयपर्याये प्रथमं तामस्याः ॥ १८ ॥

श्रीसुबोधिनी-सारः

यस्यानुचरितं लीला तदेव कर्णपीयूषं तस्य विप्रुट् कणिका तस्याः सकृददनं सेवनं तेन विधुता निरस्ता द्वन्द्वधर्मा रागादयो येषां ते विनष्टा असत्तुल्याः सपदि शीघ्रं गृहं कुटुम्ब दीनं तुच्छं विहाय त्यक्त्वा दीना भोगहीना बहवो विहंगाः पक्षिणोऽपि भिक्षुचर्यां प्राणवृत्तिमात्रं कुर्वन्ति चेष्टन्ते वा । यद्वा दीना निष्किचना बहवो विहंगा हंसा इव सारासारविदो भिक्षुचर्यां पारमहंस्यं धर्मं चरन्ति ॥ १८ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

न केवलं वयमेव तत्कथया विक्षिप्ताः, किंतु बहवो जनाः । यस्यानुचरितमेव लीलापरमानन्दजनकम् । अत एव कर्णयोः पीयूषममृतं तस्या विप्रुट् कणिका तस्याः सकृत् अदनं सेवनं तेन विधूता निरस्ता द्वन्द्वधर्मा रागद्वेषक्षुत्पिपासादयो येषां ते । अतएव अहंकारनिरासाद्विनष्टाः असत्तुल्या अचेतनप्रायाः सपदि शीघ्रमेव दीनं दुःखितमपि गृहे स्थितं कुटुम्बं विहाय दयारहिताः स्वयमपि दीना भोगहीना विहङ्गाः पक्षिण इहलोके भिक्षुचर्यां चरन्ति प्राणवृत्तिमात्रं कुर्वन्तीत्यर्थः । अतो यद्यपि त्याज्य एव

तत्कथार्थः, तथापि त्यक्तुं न शक्नुमः । किं कुर्म इति निन्दापरोऽर्थः ।। पारमार्थिकस्त्वयमर्थः—विधूतद्वन्द्वधर्मो इत्यन्तः समासः पूर्ववत्, ततस्ते च ते अविनाष्टश्चेति समासः । इतरे तु द्वन्द्वधर्माणो विनष्टा एवेत्यर्थात्सूचितम् । ते सपदि तत्क्षणमेव दीनं तुच्छं गृहसहितं कुटुम्बं विहाय किञ्चित्सङ्ग्रहाभावाद्दीना इव 'धीरा' इति पाठान्तरम्, विहङ्गा हंसा इव सारासारविवेकचतुरा भिक्षुचर्यां चरन्ति । तस्मादेवं परमपुरुषार्थरूपत्वाद्दुस्त्यज एव तत्कथार्थः, कथं तं त्यजाम इति ।। १८ ।।

अन्वितार्थप्रकाशिका

यदिति ।। न केवलं वयमेव तत्कथया विक्षिप्ताः किंतु बहवो जना यस्यानुचरितमेव लीलापरमानन्दजनकम् अत एव कर्णयोः पीयूषममृतं शब्दमात्रेण किम्पुनरर्थतः तस्यापि विप्रट् कणिका तस्याः अपि सकृत् अपि अदनं किंचित्स्वादनं तेनापि विधूता निरस्ता द्वन्द्वधर्मा पतिपत्न्यादिस्नेहरूपा येषां पतिश्चेच्छृणोति पत्नीं त्यजति । पत्नी चेत्पतिम् एवं पिता चेच्छृणोति पुत्रं त्यजतीत्यादि । अत एव परस्परत्यागाद्विनष्टाः असत्तुल्या अचेतनप्रायाः सपदि शीघ्रमेव दीनं दुःखितमपि गृहे स्थितं कुटुम्बं विहाय दयारहिताः स्वयमपि दीना भोगहीना विहगाः पक्षिण इव इह लोके भिक्षुचर्यां चरन्ति प्राणवृत्तिमात्रं कुर्वन्तीत्यर्थः । अतो यद्यपि त्याज्य एव तत्कथार्थस्तथापि त्यक्तुं न शक्नुमः । किं कुर्मः इति निन्दापक्षेऽर्थः । वास्तवस्तु द्वन्द्वधर्मो इत्यन्तः समासः प्राग्वत् । ततस्ते च ते अविनष्टाश्चेति समासः । इतरे पुनर्द्वन्द्वधर्माणो विनष्टा एव सपदि दीनं तुच्छं गृहसहितकुटुम्बं विहाय दीना इव अकिञ्चना धीरा इति वा पाठः । बहवो विहगा हंसा इव विवेकचतुराः भिक्षुचर्यां पारमहंस्यं चरन्ति । अतः तत्कथार्थः परमपुरुषार्थत्वाद्दुस्त्यजः ।। १८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्माकं त्यजने तस्य निर्दयत्वं यत्तत्र किमुवाच्यं तद्भक्ता अपि तस्य चरितलेशश्रवणे न पुत्रकलत्रादि परिवारं विहाय निःस्नेहाः संतस्त्यागिनो भवन्तीत्याह यदनुचरितेति यस्यानुचरितं भक्तानुकूलं कर्मतदेव लीलास्वच्छन्दविहारः सैवकर्णपीयूषं श्रोत्रामृतं तस्यापि विप्लुट्कणिकांतस्यापि सकृददनं कर्णैरेकवारं स्वादुतया श्रवणं तेन विधुतानि वृत्ताद्वन्द्वधर्मामीथुनीभूताचारागृहाश्रमजनितसुखदुःखादयो वा येषां तथाभूताः संतःसपदिशीघ्रमेव गृहेणसहितं कुटुम्बं तात्तजननी भार्यादिरूपं दीनं स्वहेतोर्दुःखितमपि उत्सृज्य त्यक्त्वा दीनाः अकिंचनाः विनष्टाः गृहादिसुखभ्रष्टाः संतः विहगा वृक्षेषु पक्षिण इव बहवः साधवः गृहीगृहेषु भिक्षुचर्यां प्राणाहारमात्रं चरन्ति यथा धर्मं गृह्णन्ति यद्वा विहगा हंसाः मुक्ताफलाहारमिव विवेकनिपुणाः भिक्षुचर्यां शुद्धं त्यागिधर्मं चरन्ति अतः स त्याज्योपि त्यक्तुं न शक्नुम इति भावः ।। १८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अपि च जानीम एव तत्कथापि त्रिवर्गलतोन्मूलिनीति तथापि न त्यक्तुं शक्नुमः किं कुर्म इत्याह । यदनुचरितेति । इह लोके, बहवः जनाः यस्यानुचरितमेव लीला तदेव कर्णयोः पीयूषममृतं तस्य विप्रट् कणिका तस्याः सकृददनं सेवनं तेन विधूता निरस्ता द्वन्द्वधर्मा रागद्वेषादयो येषां ते, अत एव विनष्टाः असत्तुल्याः अचेतनप्रायाः सन्त इति यावत् । लब्धात्मस्वरूपसत्ताका इति स्तुतिरप्यभिप्रेता । समस्तत्वेऽविनष्टा इतिच्छेदात् । सपदि तदैव, दीनं दुःखितं, गृहकुटुम्बं पत्नीसहितं बन्धुवर्गं, उत्सृज्य विहाय, दीना भोगहीनाः सन्तः विहङ्गाः पक्षिणः इव, भिक्षुचर्यां चरन्ति संन्यासिवत्प्राणधारणमात्रं कुर्वन्ति ।। १८ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यदनुचरितेति : १०.४७.१८.

ये त्वेनं समुपासते जहति तेऽप्यागारदारादिकानारादेष जहावकिञ्चनमती नश्चित्रमत्रास्ति किम् ।
तादृग्युक्तमुपासकानुचरणं प्राप्यार्थसंदायकं प्राप्योऽर्थः स्वयमेव सन्नपि तथाऽचारीति चित्र महत् ।। ४९ ।।

कृष्णप्रिया

उद्धवजी भगवान् श्रीकृष्ण एवं भगवान् की कथा दोनों समान धर्म होने पर भी कथा की कुछ अधिकता ही है ! बाबा कथा के लिए कहना ही क्या ? महर्षि व्यास कृष्णद्वैपायन ने भगवान् ने किए हुए चरितों का ग्रथन करके श्रीमद्भागवतादि अनुचरित हैं जो लीलामृत है उनका एक भी बिन्दुका पान-एक कण का भी पान किया है वे तो रागद्वेष, मान, अपमान आदि सुख, दुःखद द्वन्द्वों से मुक्त हो गए है और विना विलम्ब दीन कुटुम्ब पारवार का त्यागकर स्वयं दीन-विनम्र होकर विहङ्गों की पक्षिओं की भाँति हंस परम हंस दीक्षा लेकर मधुकरी वृत्ति जीवन व्यवहार चलाते है ।। १८ ।।

वयमृतमिव[1] जिह्मव्याहृतं श्रद्दधानाः कुलिकरुतमिवाज्ञाः कृष्णवध्वो हिरण्यः ।
[2]ददृशुरसकृदेतत्तन्नखस्पर्शतीव्र[3]स्मररुज उपमन्त्रिन् भण्यतामन्यवार्ता ।। १९ ।।

---

१. मिति–बीर. । २. ददृशिम–वीर. विज. । ३. स्तनरुजपरमार्ति भण्यतामस्य वार्ता–विज. ।

कर्दमक्षमा

अन्वयः—हे उपमन्त्रिन् ? अज्ञाः, कृष्णवध्वः हरिण्यः, जिह्मव्याहृतम्, कुलिकरुतम्, वयम्, इव, ऋतम् श्रद्धानाः असकृत्, एतत् तन्नखस्पर्शतीव्रस्मररुज्ञः, ददृशुः, अतः, अन्यवार्ता मण्यताम् ॥ १९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु किमेवं ब्रूषे पूर्वं त्वयैव साकं रहसि किमेवं नावोच यथाद्येत्यत आह। वयमिति। उपमंत्रिन् दूत। आस्तामियं वार्ता। यतः कुलिकस्य मृगयो रुतं गीतमज्ञा यथा ऋतं सत्यमिति श्रद्धानाः कृष्णस्य हरिणस्य वध्वो भार्या हरिण्यः शरैः क्षताः सत्यो रुजो ददृशुः। एवं जिह्मस्य कुटिलस्य तस्य व्याहृतमृतमिव श्रद्धानाः स्पृहयन्त्यो वयमसकृदेतद्ददृशिम। किं तत्। तस्य नखैः स्पर्शस्तेन तीव्रः स्मरस्तेन रुजः पीडाः। तस्मादन्या वार्ता भण्यतां कथ्यतामिति ॥ १९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनराशंकन्ते—नन्विति। एवमयोग्यम्, द्वितीयैवंपदस्याप्ययमेवार्थः। किंशब्दद्वयं कुत इत्यर्थे। इयं वार्ता एकान्तवार्ता। यतो यस्मात्। "कुलिकं मृगयौ योगभेदे वल्मीककाकयोः। पटोलेन्दुकुलश्रेष्ठसमूहेषु च वाच्यवत् ॥" इति धरणिः। एतत्पदार्थं पृच्छति—किं तदिति। तस्य कृष्णस्य। 'रुक् पीडारोगकान्तिषु' इति धरणिः। तस्मात् तस्य संयोगस्य पीडाहेतुत्वात्। वस्तुतस्तु तच्छ्रवणस्यानंदजनकत्वादन्यस्य सर्वस्माद्विलक्षणस्य कृष्णस्य वार्ता भण्यतामिति ध्येयम्। तस्य कुलिकस्य नखस्पर्शात्तीव्रो दुःसहः स्मरस्पर्शो यस्य शरस्य तेन रुजः पीडा इति वा। "स्मरः कामस्पर्शनयोः स्मरणेऽवगतौ हरौ" इति निरुक्तिकारः। "जिह्मं तु कुटिले मंदे क्लीबं तु गरपादपे" इति मेदिनी। इहाऽऽजल्पेनोक्तिः। लक्षणन्तु—"जैह्म्य तस्यातिदत्वं च निर्वेदाद्यत्र कीर्तितम्। भंग्यान्यसुखदत्वं च स आजल्प उदाहृतः ॥" इति। तस्य प्रियस्य। वयमिति तैरवतारितं, तत्रैवमिति जानीम एवेत्यादि पूर्वपद्यावतारिकात्मकं पूर्वपद्यार्थमित्यर्थः, उत्तरैवंशब्दोऽपि तदर्थः। पूर्वः किं शब्द आक्षेपे, उत्तरस्तु प्रश्ने। आस्तामिति—तद्वाक्यं यदि प्रमाणं स्यात्तदैव त्वया प्रष्टव्यं न त्वन्यथा, यतस्तद्वाक्यप्रामाण्यबुद्ध्यैव वयं दुःखसागरे मग्ना इत्यर्थ इति। यद्वा–अहो तल्लीलाश्रवणमात्रेण बहवो व्यसनं प्राप्ताश्चेत्कथं तत्कपटोक्त्या महादुःखं वयमन्वभूमेति किमाश्चर्यमित्याह—वयमिति। यद्वा—ननु देवि प्रथमतः प्रियसंदेशं शृणु ततो विचारय ततस्तुष्य कुप्य वा तत्राह—वयमिति। जिह्मस्य पूर्वोक्तस्य कितवस्य तद्बंधोरसकृद्व्याहृतम् 'न पारयेहम्' इत्यादिकम् 'आयास्ये' इत्यन्तं वचनसहस्रम् ऋतं सत्यमिवासकृच्छ्रद्दधानाः यथा महतां वाक्यं सत्यं तदिव निश्चिन्वाना मुहुर्व्यभिचारेपि मुहुः श्रद्धाना इत्यर्थः। ततो मोहेन कृष्णस्य तस्यैव वध्वोऽपि सत्यस्ततोऽसकृन्नखस्पर्शेन मुहुः स्वस्मिंस्तच्चिह्नदर्शनात्तीव्रस्मररुजः' 'तीव्रा स्मररुक् यासां तथा भूताश्च सत्यः एतदेतादृशं दुरवस्थानमेव न तु कदापि स्मरसुखं ददृशुर्ददृशिम, प्राप्तवत्य इत्यर्थः। 'तिङां तिङो भवति' इति छांदसवार्तिकात्। स्वतस्तून्मोदनास्मत्प्रयोगाननुसंधानादतः परोक्षप्रयोगोऽपि तदानीं बोधावरणं सूचयति। यत एवं तस्मात्। वयमज्ञा एवेति तत्र दृष्टान्ता हरिण्यः। कुलिकरुतमिवेति—यथा हरिण्यः कुलिकरुतं सत्यमिवास्मदनुकूलमेवेदं न पुनरन्यथारूपमिति मन्यमानाः भवद्बन्धुनखसदृशकुलिकबाणस्पर्शेनास्मत्स्मररुक्सदृशरुजः सत्य एतदस्मदीयदुरवस्थासदृशं दुरवस्थानं ददृशुः, प्राप्नुवन्तीत्यर्थः। उभयत्र तद्योग्यतार्थं विशेषणमज्ञा इति। ननु भवत्यस्तावत्कुलवध्वस्तास्तु पशुजातीया मनुष्यभक्ष्यास्तां दुरवस्थां प्राप्तुमर्हन्त्येवेति तासु कथं स्वसाम्यं निर्दिशसीत्याशंक्य स्वपक्षान्तःपात्यमानानां तासां पक्षपातमाचरन्ती श्लाघामाह—कृष्णवध्व इति। तद्भर्तारोऽप्यात्मानं परमोत्कृष्टकृष्णनामतयाख्यापयन्ति ततस्तद्बन्धुतस्तेषां को निष्कर्षो येन तासामपि निष्कर्षः स्यात्, ततो यथा तादृशीषु तासु कुलिक एव दुःखदायी स्यात्तथास्मासु भवद्बंधुरेवेति भावः। ततो हे उपमंत्रिन् दांभिकतया तूष्णीं स्थितरयास्य तन्मंत्रिणः प्रतिनिधे। यद्वा—"तत्रोपमंत्रिणोऽराजन्नानाहास्यरसैर्विभुम्" इत्यत्र तथा व्याख्येयानुसारेण हे भण्डविद्यापण्डित अन्या वार्ता भण्यतामुपहासस्त्यज्यतामित्युन्मादवचने तासां या कृच्छ्रादर्थसंगतिस्तदुत्कर्षाय सा भातीत्यनुक्तं मुनिभिस्तथेति ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वयमिति। तैरवतारितम्। तत्रैवमिति जानीम एवेत्यादि पूर्वपद्यावतारिकात्मकं पूर्वपद्यार्थमित्यर्थः। उत्तरैवंशब्दोऽपि तदर्थः। पूर्वः किंशब्द आक्षेपे। उत्तरस्तु प्रश्ने। आस्तामिति तद्वाक्यं यदि प्रमाण स्यात्तदैव त्वया प्रष्टव्यं नत्वन्यथा। यतस्तद्वाक्यप्रामाण्यबुद्ध्यैव वयं दुःखसागरे मग्ना इत्यर्थ इति। यद्वा। अहो तल्लीलाश्रवणमात्रेण बहवो व्यसनं प्राप्ताश्चेत् कथं तत्कपटोक्त्या महादुःखं वयमन्वभूमेति किमाश्चर्यमित्याह। वयमिति। यद्वा ननु देवि ! प्रथमतः प्रियसंदेशं शृणु ततो विचारय ततस्तुष्य कुप्य वा तत्राह। वयमिति। वयं जिह्मस्य पूर्वोक्तस्य कितवस्य त्वद्बन्धोरसकृद्व्याहृतं न वारयेऽहमित्यादिकम् आयास्य इत्यन्तं वचनसहस्रम् ऋतं सत्यमिवासकृच्छ्रद्दधानाः यथा महतां वाक्यं सत्यं तदिव निश्चिन्वानाः मुहुर्व्यभिचारेऽपि मुहुः श्रद्धाना इत्यर्थः। ततो मोहेन कृष्णस्य तस्यैव वध्वोऽपि सत्यस्ततोऽसकृन्नखस्पर्शेन मुहुः स्वस्मिंस्तच्चिह्नदर्शनात् तीव्रस्मररुजाः तीव्रा

स्मररुक् यासां तथा भूताश्च सत्यः एतदेतादृशं दुरवस्थानमेव नतु कदापि स्मरसुखं ददृशुः ददृशिम प्राप्तवत्य इत्यर्थः। तिङां तिङो भवन्तीति छान्दसवार्त्तिकात् स्वतरतून्मादेनास्मत्प्रयोगाननुसन्धानात् अतः परोक्षप्रयोगोऽपि तदानीं बोधावरणं सूचयति यत एवं तस्मात् वयमज्ञा एवेति। तत्र दृष्टान्तो हरिण्यः कुलिकरुतमिवेति यथा हरिण्यः कुलिकरुतं सत्यमिवास्मदनुकूलमेवेदं न पुनरन्यथा रूपमिति मन्यमानाः भवद्बन्धनस्वसदृशकुलिकबाणस्पर्शेनास्मत्स्मररुक्सदृसरुजः सत्यः एतदस्मदीयदुरवस्थासदृशं दुरवस्थानं ददृशुः प्राप्नुवन्तीत्यर्थः। उभयत्र तद्योग्यतार्थं विशेषणमज्ञा इति। ननु भवत्यस्तावत् कुलवध्वस्तास्तु पशुजायती मनुष्यभद्यास्तां दुरवस्थां प्राप्तुमर्हन्त्येव इति तासु कथं स्वसाम्यं निर्दिशसीत्याशङ्क्य स्वपक्षान्तः पात्यमानानां तासां पक्षपातमाचरन्ती श्लाघामाह। कृष्णवध्व इति। तद्भर्त्तारोप्यात्मानं परमोत्कृष्टकृष्णनामतया ख्यापयन्ति ततस्त्वद्बन्धुतस्तेषां को निकर्षो येन तासामपि निकर्षः स्यात्। ततो यथा तादृशीषु तासु कुलिक एव दुःखदायी स्यात् तथास्मासु भवद्बन्धुरेवेति भावः। ततो हे उपमन्त्रिन्! दाम्भितया तूष्णींस्थितस्यास्य तन्मन्त्रिणः प्रतिनिधेः। यद्वा। तत्रोपमन्त्रिणो राजन्नानाहास्यरसैर्विभुमित्यत्र तथा व्याख्येयानुसारेण हे भण्डविद्यापण्डित! अन्या वार्त्ता भण्यतामुपहासस्त्यज्यतामिति। "उन्मादवचने तासां या कृच्छ्रादर्थसङ्गतिः। तदुत्कर्षाय सा भातीत्यनूक्तु मुनिभिस्तथेति" ॥ १९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो तल्लीलाश्रवणाद्बहवो व्यसनं प्राप्ता इति किं वक्तव्यम्, वयमपि तत्कपटोक्त्या महादुःखमन्वभूमेत्याह—वयमिति असत्यमपि ऋतमिति श्रद्दधानाः, कृष्णवध्व इत्यसितजनवधूत्वेन तदुयुक्तमेवेति पूर्वोक्तम् 'अलमसित-सख्यैः' इत्येतदेव दृढीकृतम् अन्यत्तैर्व्याख्यातम्। यद्वा, भो देवि! तव प्रेयान् सन्दिशति—प्रिये! प्रसीद, न कदापि पुनर्वियोक्ष्ये, ततः शीघ्रमत्रागत्य मामनुगृहाणेति चेत्तत्राह—वयमिति। अज्ञत्वादेव पूर्वं कृष्णवध्वः सत्यस्तन्नखस्पर्शतीव्रस्मररुजो वयं साम्प्रतं तु जिह्मस्य कुटिलस्य तस्य व्याहृतं गमनसमये (भा० १०।४१।१७) 'आयास्ये' इति दूतद्वारा लब्धम्, तथा (भा० १०।४५।२३) 'ज्ञातीन् वो द्रष्टुमेष्यामः' इति मधुपुराद् गोपद्वारा च लब्धम्, ऋतमिति श्रद्दधानाः, इवेति लोकोक्तौ, एतत् किमप्यनिर्वचनीयं प्रगाढाशाभरेण देहधारणलक्षणमसमोद्र्ध्वदुःखं ददृशिम इति सनिर्वेदः विषादः, अन्यस्य कृष्णेतरस्य वार्त्ता, ततश्च कराभ्यां गाढं वक्षो धृत्वा व्याकुला क्षणं विमुह्य भूमौ निपपातेति, एतच्छब्दध्वनितोऽर्थः, अतो मधुकरोऽपि प्रस्थित इति ज्ञेयम् ॥ १९ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वयं कृष्णवध्वः कुलिकरुतं भूतानामास्वासनकर्तुः शब्दगानम् उपमन्त्रिन्! दूत ॥ १९–२७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तर्ह्येवं विचक्षणास्त यूयं कथं तद्दशां गता इत्यत्राह। वयमिति। कृष्णस्य हरिणस्य वध्वो हरिण्यः अज्ञाः कुलिकरुतमिव मृगविश्वासकर्तुर्व्याधस्य गानरूपशब्दमिव वयं जिह्मस्य कुटिलस्य तस्य व्याहृतं भाषणमृतं सत्यमिति श्रद्दधानाः तस्य नखस्पर्शैर्नखक्षतैः तीव्राः स्मररुग्यासां तथाभूताः सकृदेतद्व्रणं चिह्नं स्वात्मनि स्वदेहे स्वात्मस्वरूपेवेति शेषः व्रणयुक्तं स्वात्मानमिति वार्थः ददृशिमाद्राक्ष्म अतो हे उपमन्त्रिन्! दूत अन्यवार्ता भण्यतां कथ्यतां तद्वार्तया त्वलमिति भावः ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कृष्णवध्वो वयं यस्य जिह्मं कुटिलं व्याहृतं वचनामृतं सत्यमिति श्रद्दधानाः यथा अज्ञाः कृष्णमृगवध्वो हरिण्यः कुलिकस्य मृगविश्वासकर्तुः रुतं गीतं नानाप्रकारं श्रद्दधते आस्तिक्यबुद्धिं कुर्वन्ति तथा तस्यैतस्य सकृन्नखस्पर्शनेन नखस्पर्शोपतापेनोत्पन्नेन तीव्रेण स्तनानां रुजेन क्षतेन जाता या तां परमाम् अत्युत्कटातिसुखलक्षणां पीडां ददृशिम अनुबभूविमेति यत्ततोऽस्य वार्ता भण्यतां श्रुतया तयाप्यानन्दमाशास्महे इति जिह्मं मन्दमल्पमपि व्याहृतमिति यदतः श्रद्धधानाः ईश्वराणां वचः सत्यं तथैवाचरितं क्वचिदिति वचनात् जिह्मं मन्देभवक्रयोरिति स्वध्वनिसादृश्याद्धारिणीनां कुलिकरुतवशत्वं न त्वसत्यं तदित्यध्यात्म योज्यम् अन्यवार्तेति केचित् अन्यविषयं वचनं नत्वेतद्विषयं सर्वस्मादन्यस्य विलक्षणस्य भिन्नस्येति वा ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

किन्तु वयमज्ञा एव यतस्तत्कथां सत्यामेवेति मन्यमानास्तप्यामहे इत्याह—वयमृतमेवेत्यादि। वयमज्ञाः यतो जिह्मव्याहृतं जिह्मस्य कुटिलस्य व्याहृतं वचनमृतं सत्यमिव श्रद्दधाना अभवामेत्यर्थः। काः किमिव? कृष्णवध्वो हरिण्यः कुलिकरुतं व्याधगीतमिव, ता यथा व्याधस्य रुतं मनोरमामिति श्रद्दधाना नश्यन्ति। ताश्चाज्ञा एव पशुत्वात्। ताः कृष्णवध्व एतदसकृद्ददृशुरनुभूतवत्यः—दृशेर्ज्ञानवचनत्वात्। कीदृश्यो वयं ताश्च? तन्नखस्पर्शेन तीव्राः स्मररुजो यासाम्। हरिणीपक्षे तस्य नखो नाराचः सर्वलोहमयः शरविशेषः न विद्यते खमाकाशो यस्य, निखकाशत्वात्तत्स्पर्शेन तद्वेधेन तीव्रस्मरास्तीव्रानुभवा रुजो यासाम्।

अतः कृष्णवधूत्वेन ताभिः समस्माकं साम्यम् । तस्मात् हे उपमन्त्रिन् ! अन्यवार्त्ता भण्यताम् , तद्वार्त्ता त्यज्यतामिति वाक्यशेषः। अत्राप्युन्मादोऽङ्गी, असूयामर्षादयोऽङ्गानि । प्रतिलाप उक्तिवैचित्र्यम् । (१४.श. श्लो०) "किमिह बहु षडङ्घ्रि गायसि" इति लपितस्य प्रतिलापात् ॥ १९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पुनर्दैन्यादि-भावशान्तौ पुनरसूयामर्षयोरुदये सति निगदति-वयमृतमिवेत्यादि । अज्ञा एव वयम् , यतः कुटिलस्य तस्य व्याहृतं सत्यं मन्यमानाः स्मः । काः कमिव ? हरिण्य इव कुलिकरुतम् ता अपि अज्ञा एव वणेचरत्वात् । कृष्णवधूत्वाद्योमयोषामेव दुःखोदर्कत्वमिति भावः । तन्नखस्पर्शतीव्रस्मररुज इति तन्नखस्पर्शेन तीव्राः स्मररुजो यासाम् , हरिणीपक्षे तस्य कुलिकस्य नखो नाराचः, न विद्यते खमाकाशो यस्य केवललौहनिर्मितशरीरविशेषः । तस्य स्पर्शेन तीव्रस्मरा तीव्रानुभवा रुजो यासाम् । ददृशुरनुबभूवुः, अतो हे उपमन्त्रिन् ! अन्यवार्त्ता त्यज्यताम् , तद्वार्त्ता त्यज्यतामिति शेषः । अमर्षासूययोः ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नन्वेवञ्चेत् परमविज्ञाभिर्भवतीभिः कृष्णे तस्मिन् कथं सख्यं कृतं तत्राह । वयं तस्य न न पारयेऽहं निरवद्यसंयुजामित्यादिकं जिह्मव्याहृतमपि ऋतमिव सत्यमिव श्रद्दधाना अज्ञा अभूम कुलिकस्य व्याधस्य रुतं श्रद्दधाना हरिण्यः कृष्णवध्वः कृष्णसारस्त्रिय इव ततः किंकिमित्यत आह । एतत् कुलिकरुतं ददृशुः रुतस्य दर्शनासम्भवात् तत्फलं शराघातं ददृशुरित्यर्थः । तथैव वयमपि तन्नखस्पर्शेन तीव्राः स्मररुजः कन्दर्पपीडा ददृशिमेत्यर्थः असकृदिति । एकवार तत्फलदर्शनेऽपि पुनरपि विश्वासात् पुनरपि तत्फलदर्शनादशत्वाधिक्यं हरिणीनां तथैवास्माकमपि लब्धपुनःपुनर्मानोत्थदुःखदशानां तस्मात् उपमन्त्रिन् ! हे विदूषक अन्यवार्त्ता भण्यतां तस्य तद्वार्त्तायाश्च दुःखदत्वादन्यकथैव सम्प्रत्यस्माकं सुखदा इत्यर्थः । अत्र तस्य कौटिल्यं तद्वार्त्ताया दुःखदत्वम् अन्यवार्त्तायाः सुखदत्वामित्ययमाजल्पः । यदुक्तम् ।

जैह्म्यं तस्यार्त्तिदत्वञ्च निर्वेदाद्यत्र कीर्त्तितम् । भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः ॥ १९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

ननु पूर्वं तेन सख्यमासाद्य रमिता त्वं किमिदानीमेवं वक्तुं प्रवृत्तासि परमाभिज्ञया त्वया प्रथममेव विचारणीयं स्थितमतः प्रियसंदेशमाकर्ण्य ततो विचार्य तुष्य वा कुप्य वेत्याशङ्क्याह । वयमिति । यद्वा दूरस्थितास्तत्स्वभावानभिज्ञा आपातरम्यां तत्कथामाकर्ण्य यथोक्तदशां प्राप्नुवन्ति चेत्प्राप्नुवन्तु नाम यूयं तु तत्सहचर्यैः बालभावमारभ्य तत्स्वभावाभिज्ञाः कथं तस्मिन् विश्वस्यैवं विधां दुर्दशां प्राप्ता इति चेत्तत्राह । वयमिव अज्ञाः सहचरत्वेऽपि ग्रामीणत्वाद्वञ्चकत्वादिलक्षणतत्स्वभावानभिज्ञाः जिह्मस्य सकपटस्य त्वद्बन्धोर्व्याहृतमसकृद्भवदीय एवाहमित्यादिमिष्टभाषितं सत्यं वेदवाक्यमिव श्रद्दधाना निश्चिन्वानाः । यद्वा कपटेनान्यथा प्रयुक्तमन्यथा प्रतीतिं जनयित्वा साभिप्रायेण भाषितं न मयोदितपूर्वं वा अनृतमिति साधनकाले न पारयेऽहं निरवद्यसंयुजामिति फलकाले इदं वाक्यद्वयं पूर्वं मया नानृतमुक्तं भवदर्थं तु वक्ष्यामि भवतीनां साधुकृत्यं न पारये न करिष्यामीत्यर्थविवक्षया तेन प्रयुक्तम् अस्माभिस्तत्कपटानभिज्ञाभिः अन्यथैव बुद्धमिति भ्रान्त्या सत्यमिव श्रद्दधानाः क्वचिदृतमितीति पाठः स्वाज्ञानहेतुं ज्ञापयन्ती अनुरूपं दृष्टान्तमाह । कुलिकेति । कुलिकस्य मृगवेषं विधाय गायमानस्य रुतं तत्प्राणापहाराभिप्रायेण प्रयुक्तं गीतशब्दं सत्यमिव श्रद्दधाना अयं कृष्णसारो मत्कृष्णसाराद्विशिष्टः तत्कार्यं करिष्यति गानं चेति मत्वा तद्रुतं कृष्णसाररुतं सत्यमिव श्रद्दधानास्तद्बन्धुत्वार्थं तत्सन्निधौ गताः यथा गोपभार्या वयं गोपत्वेनाच्छन्नं यादवमीश्वरं वा कृष्णं गोपं मत्वा कृष्णवध्वो जाता इति सूचनायाह । कृष्ण वध्व इति । शरैः क्षताः सत्यो रुजो ददृशुस्तथा वयमेतद्ददृशिम किमित्यपेक्षायामाह तस्य नखस्पर्शस्तेन तीव्रः स्मरस्तेन रुजः पीडाः एता इदानीमप्यनुभूयमानास्तन्नखस्पर्शतीव्रस्मररुज इति वा । यद्वा ननु यूयमेव विधविशालनेत्राः किमिति वञ्चनां प्राप्ता इत्याशङ्क्य प्रज्ञाचक्षुर्विधुरा वञ्च्यन्त एवातो न वयमेवोपालम्भनीया इत्याशयेनाह । वयमिति । यथा जिह्मव्याहृतं सत्यं श्रद्धाना अज्ञा वयं तन्नखस्पर्शेनं तीव्रः स्मरस्तेन रुक्पीडा यासां तथाभूता जातास्तथा कृष्णसारवध्वो हरिण्योऽपि कुलिकरुतं श्रद्दधाना अज्ञा एतदेव ददृशुः अस्मदनुभूयमानदुःखसमानशराघातजन्यं दुःखं ददृशुः कटाक्षादयः कदाचिद्विस्मर्यन्ते ननु नखक्षतानि स्मारकचिह्नानां विद्यमानत्वादिति ध्वनयितुं नखस्पर्शेत्युक्तम् अन्याः पीडास्त्वौषधैः स्वनिदाननिवृत्त्या निवर्तन्ते एतास्तु न कदापि एतन्निदानस्य स्मरणस्य सर्वदा सत्त्वादिति सूचयितुं स्मर इत्युक्तं यद्वा तिष्ठत्वस्माकमन्येषां च वार्त्ता तिर्यग्योनिजा अपि दुर्दशां प्राप्ता इत्याह । वयमिति । तन्नखस्पर्शतीव्ररुजो वयमिवाज्ञाः कृष्णसारवध्वो व्याधगीतसदृशं कृष्णस्य मुखेन वेणुना व्याहृतम् ऋतं श्रद्दधाना एतदस्माभिरनुभूयमानं कामजन्यं दुःखमसकृद्ददृशुर्वयं नखस्पर्शेन यां दशामधिगतास्तास्तां तद्व्याहृतश्रवणनैव प्राप्ता इति कोऽस्माकमपराध इति भावः । तस्मात् हे उपमन्त्रिन् ! अन्यवार्ता भण्यतां कृष्णवार्तायाः क्लेशप्रदत्वादन्यार्थमहमागतोऽहमन्यो न तु कृष्णसंदेशहरः इत्युक्त्वा अन्यवार्ता कथ्यतां तदोपालम्भं न दास्याम इत्यर्थः ।

तत्स्वरूपस्य ज्ञातत्वात्तच्च तन्निकटवर्त्तितया गुह्यवार्ताधारिणस्तद्गुह्यवृत्तप्रकटीकरणस्यायुक्तत्वाच्च मास्तु तद्वार्तेति सम्बोधनाशयः। यद्वा हे हास्यप्रधानभाण्डविद्यानिधानोपहास्यवार्तातिरिक्तवार्त्ता प्रोच्यतां रुदतीनामस्माकमुपहासवार्तया हृदयविदारकत्वादिति भावः—

जैह्म्यं तस्यार्तिदत्वं च निर्वेदाद्यत्र कीर्तितम्। भङ्ग्यान्यसुखदत्वं च स आजल्प उदीरितः ॥

इत्युक्तत्वादत्राजल्पः उद्धवपक्षे हे उपमन्त्रिन्! अन्तरङ्गमन्त्रिन् समानमन्यत् श्रुतिपक्षे ननु—

अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोममभृता अभूम ॥

इत्यादिभिर्वेदवाक्यैः—

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदम् ॥

इत्याद्यभिरुक्तवाक्यैश्च स्वर्गसुखस्यनित्यत्वाभिधानात्सुगमे तत्प्राप्त्युपायेति सति किमर्थं सर्वत्यागरूपे महत्यायासे नियोजयसीति चेत्तत्राह। वयमिति। कपटेन व्याहृतं हि वाक्यमन्यार्थाभिधायकमन्यथाप्रतीतिं जनयति उदाहृतवाक्यमपि कर्मप्राशस्त्यबोधनाय प्रयुक्तं तत्फलनित्यत्वबोधकत्वाज्जिह्मेन व्याहृतं तदज्ञाः कर्मश्रद्धाभराकान्ताः यज्जन्यं तदनित्यमिति व्याप्तिज्ञानविधुरत्वान्मन्दमतयः ऋतुं यथोक्तार्थकमिव श्रदधानाः नखानीन्द्रियाणि तैः स्पृश्यन्त इति स्पर्शा विषयाः तेषु तीव्रो यः स्मरः कामः स्मरपदस्याभिलाषे लक्षणा तेन स एव वा रुक् येषां ते असकृत् पुनः पुनः एतज्जन्ममरणादिलक्षणं संसृतिचक्रं ददृशुः कृष्णवध्वो हरिरायो यथा कुलिकरुतं श्रद्दधानाः दुःख ददृशुस्तद्वत् तथाचोक्तं भगवता—

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः। कामात्मानः स्वर्गपरा भोगैश्वर्यगतिं प्रति ॥
गतागतं कामकामा लभन्ते ॥

इत्यादि यस्मादुदाहृतवाक्यजातं न स्वार्थे प्रमाणं—

तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते इति ॥

तर्कानुगृहीतश्रुतिवाक्यैः कर्मफलस्यानित्यत्वाभिधानात् तत्तस्माद्भो उपमन्त्रिन्! प्रपञ्चानित्यत्वब्रह्मनित्यत्वप्रतिपादकान्तरङ्गमन्त्रार्थज्ञ वयमिवान्यत् प्रतिपादयामस्तद्वत् तथा च श्रुतिः—

प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढाः जरामृत्युं ते पुनरेवापियन्ति ॥
यस्मिन् द्यौः पृथिवींचान्तरिक्षमोतं मनः सर्वप्राणैश्च सर्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ ॥
नानुध्यायेद्बहून् शब्दान् वाचो विग्लापनं हि तत् ॥ इत्याद्या ॥ १९ ॥

गूढार्थदीपिनी

कृष्णस्य मृगस्य पत्न्यो हरिण्यः यथा कुलिकस्य व्याधस्य गीतं सत्यमिति श्रद्दधानाः बाणजनिता रुजो ददृशुः एवं जिह्मस्य कुटिलस्य कृष्णस्य वचनम् ऋतमिव श्रद्दधाना वयमपि असकृत् एतत् ददृशिमेति योज्यम्। तदेवाह–तस्य श्रीकृष्णस्य नखस्पर्शेन तीव्रा असह्या कामपीडाः। द्वितीयाबहुवचनम्। तस्मात् अन्यवार्ता कथ्यतां न तु कृष्णस्य। हे उपमन्त्रिन् हे दूत ॥१९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्यास्तु आस्तां बहुदुःखदस्य कृष्णस्य कथाऽन्यवार्ता कथ्यतामित्याहुः। वयमिति। हे उपमन्त्रिन्! दूत कृष्णवध्वः कृष्णमृगभार्याः हरिण्यः अज्ञाः कुलिकहार्दानभिज्ञाः कुलिकस्य वधिकस्य रुतं गीतम् ऋतमिव श्रद्दधानाः शरैः क्षताः सत्यो रुजो ददृशुः एवं वयं जिह्मस्य दुर्ज्ञेयहार्दस्य व्याहृतमृतमिव श्रद्दधानाः असकृदेतत् ददृशिम किन्तत् तस्य नखस्पर्शेन यस्तीव्रः कामस्तेन रुजः पीडाः तस्माद्दुःखदस्य कथां हित्वाऽन्यवार्ता भण्यतां कथ्यताम् ॥ १९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वयं कृष्णवध्वो हरिण्यो हरिणतरुण्यः कुलिकस्य वशयितुं स्वविश्वासकर्तुर्व्याधस्य रुतं गीतं यथा श्रद्दधतेऽज्ञा इत्युभयान्वयि। अनेन व्याहृतं जिह्मं वक्त्रं मिथ्याभूतमिति यावत् ऋतं यथार्थमिति श्रद्दधाना विश्वसन्त्यः। तदानृत्यमर्यादां वेदयन्ति ॥ सकृदिति। अकृदेकवारमेवैषा चासौ स च तस्य नखस्पर्शोत्पन्नेन तीव्रेण दृढेन स्तनानां रुजेन भङ्गेन परमा याऽऽर्तिः पीडा तां ददृशिम। अनेनानेकवारप्रतिश्रयस्तेन कृत इति तदनृतवत्ता द्योत्यते। वार्तायां वा वर्तामहे तां भणेति भणन्ति ॥ अस्य वार्ता त्वया भण्यतामिति। आर्तिरिति सुखपीडा ग्राह्या। बन्धोज्झिताया अपि सिन्धुपुत्र्या माङ्गल्यसूत्रं किल नित्यबद्धमितिवत्। जिह्मं मन्देभवक्त्रयोरित्यभिधानान्मन्दं वचनं व्याहृतमृतमिव गतं। श्रद्दधाना अज्ञा अपि हरिण्यः कुलितः कुलसत्तमो रागालाप-

कलापज्ञस्तद्रुतमिव निश्शङ्कं श्रद्दधत इति दृष्टान्तदार्ष्टान्तिकभावो भावनागम्यः सकृद्धैतदयोग्या अपि तन्नखस्पर्शे तीव्रस्तनरुजपरमार्तिमेतन्नखस्पर्शेन तीव्राः कठिणा ये स्तनास्तेषां रुजः कृष्णकरानर्पणजो भङ्गस्तस्य परमार्तिर्भङ्ग इति यावत् तां ददृशिम पूर्ववदुर्वरितम्। एतत्तन्नखानां स्पर्शनतीव्राः दृढाः कठिणा इति यावत् स्तनास्तेभ्यो रुजस्तज्जातां परमार्तितां ददृशिम। अनेन कोमलानां नखाङ्कुराणामस्मद्दृढदृषत्तुलस्तेन स्पर्शेन तत्परमार्तिं ददृशिनेति तन्मन्तुपरिहृत्यै अस्य वार्ता भण्यतामित्युक्तिरिति वा। बाल्ये मामपि रोप्य वक्षसि शिशुः सन्नर्तयन्त्यास्तव स्थूलोरोजसमागमेन तदिति प्रौढिं स दद्यान्ममेति रुक्मिणीशविजयोक्तेः। कृष्णस्यस्पर्शतीव्रस्तनरुजपरमेव ददृशिम। अत्रेन्द्रियसामान्यवाचकस्वशब्देन योग्यः करो गृह्यते। न जिह्मं कुवलयापीडवक्त्रं नाप्यार्तिं कंसोपस्थापितचापकोटिं वा ददृशिमेति। तस्य श्रीकृष्णस्य नखस्पर्शेन तीव्रो यः स्तनरुः स्वकुचशब्दस्तस्य जपो जपनं तच्चिन्तनमिति यावत् यस्याः सा च सा रमा च तस्या आर्तिस्तां सकृदेव ददृशिम। एकदा मत्सम्भोगे तस्या आर्तिर्जातेत्यर्थः। लोकदृष्ट्यै तदिति वा। अस्य वार्ता का मधुरायां मधुनाथस्य मधुरा वृत्ता साऽधुना वर्ण्यतामिति वा। तीव्रैकान्तनितान्तानि गाढबाढदृढानि चेत्यमरः। कुलिकश्च कुलश्रेष्ठे वल्मीके काकतुण्डके। कुलिको व्याधभेदे स्याद्भेदे कुलसत्तम इति विश्वः। आर्तिः पीडा धनुष्कोट्योरिति च। रुज उपमन्त्रिन्भण्यतामन्यवार्तेति पाठश्चतुरस्रो नेति ज्ञेयं। अस्य सकाशाद्द्वयमिव केति शेषः। का वाऽऽर्ता ऋतं यथार्थं यथा तथा भण्यतामित्यन्वयः। भण्यन्तामस्यमज्ञानं यस्य तत्सम्बुद्धिः॥ १९॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु यावन्ति दूषणान्युच्यन्ते तानि सर्वाण्येवासङ्गतानि प्रमाणविरोधात् तत्राह। वयमृतमिति। वयमपि पूर्वं प्रमाणपरा एव जाताः भगवता हि पूर्वमुक्तं न मयोदितपूर्वं वा अनृतमिति ततः न पारयेऽहं निरवद्यसंयुक्तामिति साधनकाले फलकाले च वाक्यद्वयं जिह्मव्याहृतं कपटेनोक्तमन्यथोक्तमन्यथा प्रतीतिं जनयति भगवता उक्तं पूर्वं मया नानृतमुक्तं भवदर्थे वक्ष्यामीति भवतां साधुकृत्वं न पारये इति न करिष्यामीति परं परिज्ञाने अस्माकमेवान्यथा वुद्धिर्जाता अयमस्मान् प्रति अनृतं न वक्ष्यति ऋणित्ववचनात् कदाप्यदासीनो न भविष्यामीति अत एव वयं जिह्मव्याहृतमपि ऋतमिति सत्यमिति श्रद्धाना जाताः। नन्विदानीं विचारचतुराः पूर्वं कथं भ्रान्ता इत्याह शङ्क्याह। कुलिकरुतमिति। वयमष्यारण्याःहरिणोऽपि हरिणवेषं कृत्वा मृगयुर्गायति तदा हरिण्यो मुग्धाः पूर्वं हरिणादेनं विशिष्टं मत्वा हरिणोऽयं हरिणकार्यमधिकरिष्यति गानादिकमधिकं चेति भ्रमात् पूर्वहरिणं परित्यज्य तत्स्थाने गताः तदाह। अज्ञाः कृष्णवध्व इति। भ्रमादेव द्वितीयकृष्णसारस्य बध्वो जाताः। यथा वयं कृष्णपत्न्यः। ननु को दोषो जात इति चेत्तत्राह। हरिण्य इति। हरिणस्य हि ता भार्याः नत्वाकृतिसाम्यादन्यस्य इमा गोपभार्याः नापीश्वरस्य नापि क्षत्रियस्य नापि यादवस्य परं स एव गोपत्वेन स्थित इति गोप एवायमस्माद्धितं करिष्यतीति प्रहृत्ताः पश्चात्स ईश्वर एवेश्वरो जातः गोपीकाः परं नष्टा इति भावः। ननु किमिति नाशो भाव्यते हरिण्यस्तु तेन विद्धा नतु भवत्य इति चेत्तत्र तुल्यार्थतामाह। ददृशुरिति। एतद्दृशुः स्वावस्थामभिनयेन प्रदर्शयन्तीः हरिणीनां तामवस्थामाह। हरिण्योऽप्युभयतो भ्रष्टा जाताः स्वयमेव हरिणीनां बोधने दृष्टान्तभूता इति पूर्वं हरिण्युपक्रमेणनिरूप्यमाणमप्यर्थं पश्चात्स्वप्राधान्येन निरूपयति। तन्नखस्पर्शेति। नखकामयोः स्वस्मिन्नेव प्रसिद्धिरिति बाणवेदनमुपलक्ष्यते तस्य भगवतः नखानां यः स्पर्शः तेन तीव्रा या स्मररुक् सा यासां कटाक्षादयो विस्मृता अपि भवन्ति न नखादयः अन्या वेदना त्वौषधेनापि शाम्यति स्मरणेनैव तथा भवति इति स्वस्थोपमानत्वम् उपमन्त्रिन्निति सामीप्येन नीतिज्ञत्वेन च सम्बोधनमाह। एतन्न प्रकटी कर्त्तव्यं ज्ञायते च भगवत्स्वरूपमिति अतो भगवद्वार्त्ता लेश एव भवतीति भण्यताम् अन्यार्थमागतः कश्चिदहमन्य इति ज्ञाप्यतामित्यर्थः। तदैवमुपालम्भं न करिष्यामः॥ १९॥

श्रीसुबोधिनी-सार

जिह्मव्याहृतं कपटोक्तमृतं सत्यमिव श्रद्दधाना वयं कृष्णानां मृगानां वध्वो भार्या हरिण्योऽज्ञा मूढाः कुलिकस्य मृगयोः रुतं गीतम् इव एतस्य नखैः स्पर्शस्तेन तीव्रोऽसह्यः स्मरः कामस्तेन रुजः पीडा असकृत् ददृशिम अन्या ददृशुः। हे उपमन्त्रिन् अन्यस्य वार्त्ता प्रसंगः कथ्यताम्॥ १९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तर्ह्येवं विचक्षणा यूयं कथं तद्वशं गता' इत्यत्राह—वयमिति। जिह्मस्य कुटिलस्य तस्य व्याहृतं 'न मयोदितपूर्वं वा अनृतम्' इति साधनकाले, 'नपारयेऽहं निरवद्यसंयुजाम्' इति फलकाले च वाक्यद्वयं बस्तुतोऽनृतमपि ऋतं सत्यमिति श्रद्दधाना वयं तस्य नखस्पर्शैर्नखक्षतैस्तीव्रा स्मररुक् स्मरपीडा यासां तथाभूताः असकृत् पुनःपुनरेतद्दुःखमेव ददृशिम अद्राक्ष्म। तत्र दृष्टान्तमाह—कुलिकरुतमिति। कृष्णस्य हरिणस्य वध्वो हरिण्यो यथा कुलिकस्य व्याधस्य रुतं मधुरगानं श्रुत्वा मोहितास्तत्समीपं गता बाणवधादिदुःखमेवानुभवन्ति तथेत्यर्थः। तथामोहे हेतुमाह—अज्ञा इति। 'कृष्णवध्व' इति नाम्नापि साम्यता दर्शिता। 'सुदूतस्य तव अस्मद्धिताचरणमेव युक्तम्' इति सूचयन्ती सम्बोधयति—उपमन्त्रिन्निति। तद्वार्तायास्तत्स्मारकत्वेन दुःखहेतुत्वादन्यवार्ता भण्यतां कथ्यताम्॥ १९॥

अन्वितार्थप्रकाशिका

वयमिति । हे उपमन्त्रिन दूत ! आस्तामियं वार्ता । अज्ञाः मुग्धाः कृष्णस्य कृष्णसारहरिणस्य वध्वो हरिण्यो यथा कुलिकस्य व्याधस्य रुतं मधुरगानं श्रुत्वा मोहितास्तत्समीपं गता बाणवेधादिदुःखमेव ददृशुः तथा जिह्मस्य कुटिलस्य तस्य व्याहृतं न मयोदितपूर्वं वा अनृतमिति साधनकाले "न पारयेऽहं निरवद्यसंयुजाम्" इति फलकाले च वाक्यद्वयं वस्तुतोऽनृतमपि ऋतं सत्यमिति श्रद्धानाः विश्वसत्यः स्पृहयन्त्यो वा वयं तस्य नखस्पर्शैर्नखक्षतैस्तीव्रा स्मररुक् स्मरपीडा यासां तथाभूताः असकृत् पुनः पुनरेव दुःखमेव ददृशिमेति । यद्वा । अनृतमपि सत्यमिति श्रद्धाना वयम् असकृत् तन्नखस्पर्शेन तीव्राः स्मरस्य रुजः पीडा एव ददृशिमेति । अतः तद्वार्तीया दुःखहेतुत्वादन्यवार्ता भण्यतां कथ्यताम् ॥ १९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु मयोच्यमानं श्रीकृष्णसंदेश श्रुत्वा तं च विचार्य संतोषं प्राप्नुहि किमादौ जल्पसीति ब्रुवन्तं मत्वा सरोषं प्राह वयमिति हे उपमंत्रिन् हे कृष्ण दूत किं जल्पसि श्रूयतां कुलिकस्य व्याधस्य रुतं गीतं अज्ञाः तत्कपटमविदः ऋतं स्वानुकूलमिव श्रद्धानाः मन्वानाः कृष्णस्य श्याममृगस्य वध्वो युवत्यः हरिण्यः बाणविद्धाः सन्तः यथा पीडामेव ददृश्रः तथा जिह्मस्य कितवस्य व्याहृतं त्वद्बंधो रुदितं न पारयेऽहं निरवद्य संयुजामित्याद्युक्तप्रकारं अज्ञाः अतरुतमिव सत्यमिव श्रद्धाना आहतवत्यो वयं तस्य नखानास्पर्शन तीव्रो यः स्मरस्तेन रुजो व्यथा यासां एवंभूताः सत्यः एतत् ईदृशं दुःखवृन्दमेवासकृत् मुहुर्मुहुः ददृशिमन सुखं अतो हे अज्ञत्वयाऽन्यवार्त्ता भण्यतामुच्यताम् ॥ १९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तर्ह्येवं विचक्षणा यूयं तावत् कथं तद्दशां गता इत्यत्राह । वयमिति । कृष्णस्य कृष्णवर्णहरिणस्य वध्वो हरिण्यः, अज्ञाः। अत एव, कुलिकरुतं इव, मृगविश्वासकर्त्तुर्गानरूपशब्दमिवेत्यर्थः । कृष्णवध्वः कृष्णस्य वधूभावभाजः, अज्ञास्तत्कपटानभिज्ञाः वयं, जिह्मस्य कुटिलकृष्णस्य, व्याहृतं भाषणामृतं, ऋतं इव, श्रद्धानाः सत्यमिव मन्यमानाः, तस्य श्रीकृष्णस्य नखस्पर्शैर्नखक्षतैस्तीव्रा स्मररुक् कामरोगो यासां तथाभूताः सत्यः, असकृत् एतन्नखार्पणपूर्वकं तत्कृतं प्रणयित्वमित्यर्थः । ददृशुर्ददृशिम अद्राक्ष्मेत्यर्थः । अतः, हे उपमन्त्रिन् श्रीकृष्णदूतभूतभङ्ग, अन्यवार्त्ता, भण्यतां कथ्यताम् । तद्वार्त्तया त्वलमिति भावः ॥ १९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वयमिति : १०.४७.१९.

यस्माल्लांशलेशो न भवति सुजनैस्त्याज्यमेवाखिलं तच्छाज्ञार्थोऽसौ प्रसिद्धस्तदलिवर ततो भण्यतामन्यवार्ता ।
एषा भावत्कगोष्ठी जनयति मनसः खेदमस्माकमेवं वैफल्याच्चेतसस्तेऽप्यलिवर भविता दूतकृत्यस्य खेदः ॥ ५० ॥

कृष्णप्रिया

हे नीति निपुण, कृष्ण के अन्तरङ्ग मन्त्रिन् ! यदि आप कहेंगे कि जो जो दोष बताया वे सब असङ्गत है ऐसा यदि आप प्रतिपादन करते हो तो क्षमा कीजिए, सावधान होकर सुनिए, जैसे कृष्ण हरिण की हरिणियाँ हरिण वेष धारण कर गान करने वाले व्याध के गान में फस जाती है और घायल होकर पीडित होती है वैसी हमारी दशा हो गई है । आपके कृष्ण ने प्रथम कहा कि "न मयोदितं पूर्वं हि" मैं कभी असत्य नहीं कहा, फिर कहा कि "न पारयेऽहम्" आपके ऋण से मुक्त नहीं हो सकता" ऐसे कपट वाक्यों को वास्तविक मानकर उनको रामर्पण किया, उनकी गृहिणियाँ बनी उनके नखक्षतादि से हम घायल बनी, कामदेव की तीव्र वेदना हमने पाई इसका व्रज साक्षी है सब देख रहे हैं इसलिए हे रहस्य मन्त्रिन् अब कृपया कृष्ण की वार्ता को छोड़कर अन्य वाता करें ॥ १९ ॥

प्रियसख पुनरागाः प्रेयसा प्रेषितः [1]किं वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग ।
नयसि कथमिहास्मान् [2]दुस्त्यजद्वन्द्वपार्श्वं सततमुरसि सौम्य श्रीर्वधूः साकमास्ते ॥ २० ॥

कर्दमक्षमा

अन्वयः—हे प्रियसख ! प्रेयसा प्रेषितः, किम्, पुनः, आगाः ! हे अङ्ग ! मे, माननीयः, असि, वरय, किम्, अनुरुन्धे ! दुस्त्यजद्वन्द्वपार्श्वम्, इह, अस्मान्, कथम्, नयसि ? हे सौम्य ! श्रीः, वधूः, उरसि, सततम्, साकम्, आस्ते ॥२०॥

---

१. स्वं–विज. । २. दुस्त्यजं बन्धुपार्श्वं–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

परावृत्य गत्वा पुनरागतं प्रत्याह । प्रियसखेति । हे प्रियस्य कृष्णस्य सखे प्रेयसा कृष्णेन पुनः प्रेषितः किं त्वमागतोऽसि । अङ्ग हे दूत मे माननीयः पूज्योऽसि । अतो भवान् किमनुरुन्धे प्राप्तुमिच्छतीत्यर्थः । तद्वरय वृणीष्व । एवं सम्मानितं प्रत्याह । नयसीति । इहात्र सतीः अस्मान् दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य प्रेयसः पार्श्वं समीपं कथं नयसि नेष्यसि । तथाहि । हे सौम्य श्रीर्नाम वधूः साकं सहैव सततमास्ते । तत्राप्युरसि वक्षस्येव ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परावृत्य ततोऽन्यत्र पर्यावृत्य । प्रियेति—यद्वा–ग्रहाविष्टेवात्मनः कृष्णैकचित्ततां दर्शयन्त्याह प्रतिजल्पेन । "पुनरप्रथमे प्रश्ने व्यावृत्ताववधारणे" इति हलायुधः । पूज्यः प्रेष्ठबन्धुत्वात् । अतः पूज्यत्वात् । इत्यर्थ इति–किमर्थमस्मत्तः स्वीकर्तुमिच्छसीति भावः । तदवांछितम् । आत्मनो नेतुमागत इति भ्रान्तधीराह–इह सतीः अत्र स्थिता अस्मान् । तस्य कृष्णस्य । सततशब्द आपेक्षिक इति तदाह—साकमिति, अर्धांगीकृत्यास्ते । सपत्न्या लक्ष्म्याः कदापि वियोगाभावात्त्वद्गीतानां दर्शनमपि दुर्लभं किं पुनः सम्भाषणं किन्तरां तच्चित्ताऽऽदानं किन्तमां सुरतलीलानुभव इत्यास्तामयं प्रसंगः । प्रतिजल्पलक्षणम्—"दुस्त्यजद्वन्द्वभावेऽस्मिन्प्राप्तिर्नार्हेत्युदाहृतम् । दूतसम्माननेनोक्तं यत्र स प्रतिजल्पकः ।" इति । अथोन्मादेन तत्रैव भ्रमन्तं भ्रमरमनुसंधाय क्षणमन्तर्हिता वा तमपश्यन्ती सखेदं पराममर्श–हंत हंत मम तीक्ष्णया गिरा संतप्तेनानेन दूतेन मथुरां गतेनावेदितसर्ववृत्तान्तः कृष्णो मामुपेक्षांचक्रे इति कलहान्तरितां दशां प्राप्ता प्रेमांबुधिना सद्गुणमौलिना मत्कान्तेन पुनरपि स एव प्रेषितो दूतोऽत्रायातीति तद्वर्त्म निरीक्षमाणाऽकस्मात्तं विलोक्य सादरमाह—हे प्रियसख मत्प्रियस्य सखे पुनरागाः मद्वाक्यशरताडितोऽपि साद्गुण्येन मदपराधमगणयित्वैवागाः, आः जानामि प्रेयसामप्यतिप्रेमवता मदपराधकोटीरप्यगणयता तेनैव कि प्रेषितः, तर्हि वरय वृणु किमनुरुन्धे अनुरुत्से, कामयस इत्यर्थः । यद्वा–कमनुरोधं ते सम्पादयामीत्यर्थः । तव मथुरा गमनमेव वृणोमीति चेद्यामि मथुरामित्युक्त्वापि पुनः पुरस्त्रीवेष्टितं तं तत्र पश्यन्त्या मेऽवश्यं मानो भावीति वरामृश्याह–नयसीति । दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य पार्श्वम् । नन्वेकाकी स तत्र वर्तत इति सशपथं ब्रवीमीति तत्राह—हे सौम्य आर्यबुद्धिरसीति भावः । श्रीरेव वधूः साकं सहैव तत्रापि सततं तत्राप्युरसि, पुरुषायितत्वेनैवेति भावः । अथमर्थः–श्रियो देवीत्वेन नानारूपधारित्वशक्तेः कृष्णो यदाऽन्यां स्त्रियं भुक्ते तदा रेखारूपतां हित्वा प्रकटमेव युवतिर्भूत्वा तं रमयतीति । अत्र दूतं समान्यापि तदुक्तिमंगीकृत्याप्यनौचित्यं ज्ञापयान्ती नांगीकुरुत इत्ययं परिजल्पः । तदुक्तम्—"दुस्त्यजद्वन्द्वभावेऽस्मिन्प्राप्तिर्नार्हत्यनुव्रतम् । दूतसम्माननेनोक्तं यत्र स परिजल्पकः ।" इति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततो भ्रमरस्वभावतो व्यवधानमपि प्राप्तं वा प्रदेशान्तरमेव गतं वा निजोन्मादमूर्च्छयोरेकतरतस्तत्रैवस्थितमप्यननुसंहितं वा क्षणं तमदृष्ट्वा सहजप्रेमोत्कण्ठास्वभावतस्तदुपेक्षामाशङ्क्य मङ्क्षु कलहान्तरितावस्थामिव प्राप्नुवन्ती दैवात्तं पुनरागतं वान्यमेव वा तमेवानुसंहितं वा दृष्ट्वा हृष्यन्त्याह द्वयेन तत्र सस्तुतिकमाह अर्द्धेन । ईदृशोपकारपरत्वात् प्रियसख ! अभिरुचितमित्रेति प्रेयसेति च परमोल्लासात् किमनुरुन्धे अनुरुन्त्से कामयसे । पूर्ववत् तिङ्व्यत्ययः । यद्वा । कामये एतमेव कामयिष्ये कर्तुमिच्छामीत्यर्थः । हन्त युष्माकं मधुपुरींगमनमेव वृणोमि तत्र ससान्त्वं सयुक्तिकं सकाकु प्रत्याख्यानमाह अर्द्धेन । दुस्त्यजं द्वन्द्वम् अस्मद्विजातीयतत्रत्यनागरीभिर्मिथुनभावो येन तस्य त्वद्बन्धोः पार्श्वं कथं कया युक्त्या नयसि । ननु भवद्गमने सर्वास्ताः स्वयमेव न्यक्करिष्यन्ते सत्यं ता वराक्यः काः किन्त्वस्मद्व्रजतस्तेन सहैव गता सा लक्ष्मीरेव तत्र स्वरमणाय तं रक्षतीति तां प्रत्यपि सेर्ष्यमाह । श्रीरिति । सा तस्य वधूः श्रीरादरबाहुल्येन कं सुखं यथा स्यात्तथा उरस्यास्ते वसति तदेतच्च लक्ष्मीरेखामेव तन्मूर्त्तितयोत्प्रेक्ष्योक्तम् । गोप्यः किमाचरदयं कुशलं स्म वेणुरितिवत् । श्लेषेण तस्या विपरीतस्थितिव्यञ्जनया धाष्टर्यातिशयश्च दर्शितः । इति मत्सरासूये । अयम्भावः । यद्यप्यत्रापि सा तदविच्युतैवासीत् तथापि श्रीमन्नन्दव्रजस्वाभाव्येन तस्य तदा प्रेममात्रादरान्न तादृशस्तदादरो वृत्तः । तत्र तु सम्पत्तिमात्रपुरुषार्थत्वान्महानेव तदादरः इत्यतो वयं कथं तत्र यास्याम इति तस्मादत्रैव तमानयेति गूढोऽभिप्रायः । एवमीर्षासूया स्पृहा च ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

क्षणात् स्वस्थोत्थिता सती मधुपमप्यागतं दृष्ट्वाह—प्रियेति । उद्धवपक्षे च सम्भ्रमभरेण जलाद्याहरणार्थं वेगेन गतं तं पुनरागतं दृष्टवेति, हे प्रियसखेति पुनरागमनात्, प्रेयसेति तस्य पुनरागमनेन तत्प्रेषणमननात् । दुस्त्यजद्वन्द्वत्वमेव दर्शयति—सततमिति । हे सौम्य ! शान्तप्रकृते ! अतस्तेन सह तव सख्यमनुचितमिति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, पुरःस्थमपि तं

प्रेमोन्मादादुद्गतमिव सम्भाव्य ततश्च भावान्तरापत्त्या पुनरागतञ्च मत्वा सविषादमिवाह—प्रियेति। प्रेयसा प्रेषितोऽपि किं किमिति त्वं पुनरागाः, मादृशां मानधनत्वात्तदभीष्टासिद्धेः। भवतु, 'यथोक्तवादिनो दूता नावमन्याः कदाचन' इति नयेन मे माननीयोऽसि, ततः किमनुरुन्धे, कमनुरोधमनुवृत्तिं करोमि, कं ते कामं पूरयामीत्यर्थः। ननु युष्माकं मधुपुरीगमनमेव वृणोमि, तत्राह—नयसीति। सौम्य! हे सोमवत्प्रियदर्शन! अतो रूपमेवास्ते, न तु बुद्धिरिति भावः। दुस्त्यजं द्वन्द्वं पुरस्त्रीभिः सह मिथुनीभावो येन तस्य पार्श्वम्, सदा पुरस्त्रीभिः सह तस्य प्रसंगात्, तत्रास्माकं गमनं व्यर्थमिति भावः, इतीर्ष्या। ननु युष्मासु प्रयातासु ताः सद्यः परित्याज्याः, तत्राह—सततमिति। सा नित्यं तत्प्रियत्वादिना प्रसिद्धा कं सुखं यथा स्यात्तथास्ते, उरसीति विपरीतरत्या वक्ष आक्रम्येति श्लेषः—इत्यसूया ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

परावृत्य पुनरागतं प्रत्याह। प्रियसखेति। हे प्रियस्य सखे पुनः प्रेयसा प्रियतमेन श्रीकृष्णेन प्रेषितस्त्वमागाः किमागतोऽसि किं तर्ह्यङ्ग हे भ्रमर मम सम्माननीयोऽसि पूज्योऽसि अतः कियत्किञ्चिदनुरुन्धे भवान्प्राप्तुमिच्छति तद्वरय वृणीहि इह स्थिता इति शेषः अस्मान् कथं दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य भगवतः पार्श्वंसमीपं नयसि नेष्यसि तथा हि हे सौम्य श्रीर्लक्ष्मीर्नाम वधूः साकं सहैव अत्राप्युरसि इति वक्षस्येव सततमास्ते इति ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

आत्मनः कृष्णैकचित्तत्वं दर्शयन्ती ग्रहाविष्टेव वक्ति। प्रियेति। हे प्रियसख! प्रियस्य कृष्णस्य सखे पुनरागाः पश्चाद्व्यावृत्यागतोऽसि पुनरप्रथमे प्रश्ने व्यावृत्ताववधारण इति त्वं प्रेयसा कृष्णेन पुनः प्रेषितः किमनुरुन्धे कमर्थमस्मत्तः स्वीकर्तुमिच्छति तं वरयः प्रेष्ठबन्धुत्वात्त्वमस्माकं माननीयोऽसि आत्मनो नेतुमागत इति भ्रान्तबुद्धिराह। अङ्गेति। अङ्ग भो उद्धव इह स्थितानस्मान् दुस्त्यजं बन्धोः कृष्णस्य पार्श्वं समीपं नयसि किं दौर्घट्यमित्यतः सपत्नीबुद्ध्या न शक्यमित्याह। सततमिति। श्रीनामवधूस्तस्योरसि सततमास्ते सततशब्दः आपेक्षिक इति तत्राह। साकमिति। अर्धाङ्गित्वेन आस्त इति सपत्न्याः लक्ष्म्याः कदापि वियोगाभावात् त्वन्नीतानां तद्दर्शनमपि दुर्लभं किम्पुनः सम्भाषणं किन्तरां तच्चर्वितादानं कुतस्तमां सूरतलीलानुभव इत्यास्तामयं प्रसङ्ग इति ॥ २० ॥

मज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रीर्वधूः साकमास्ते इति लक्ष्मीरेखामेवोद्दिश्योत्प्रेक्षितम् ॥ २०–२३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

पुनः कियद्दूरान्निकटमागच्छन्तं मधुपमालोक्य पुनः सोत्कण्ठमाह—प्रियसखेत्यादि। हे प्रियसख! प्रियस्य सखे! पुनरागाः पुनरागतोऽसि। अहो भद्रम्, किं प्रेयसा प्रेषितः, अन्यथा कथं स्वयमागमिष्यसि? वरय वृणीष्व किमनुरुन्धे, किं प्रार्थयसि, यतस्त्वं मे माननीयोऽसि, प्रियसखत्वात्। हे अङ्ग! अतस्तेऽभिलाषः सम्पादनीय एव। नन्वेवं चेद्युष्मान् नेतुमागतोऽस्मीति वेद् ब्रूतामित्यादि। नयसीत्यादि। कथं केन प्रकारेणास्मान् दुस्त्यजद्वन्द्वस्य तस्य पार्श्वं नयसि नेतुमभिलषसि। दुस्त्यजद्वन्द्वं वीररसो नागरीजनसङ्गश्चेति द्वितयञ्चेति यस्य। एवम्भूतस्य पार्श्वं गन्तुमस्माभिर्नेष्यते तदिदं विनान्यद्वरयेति वाक्यशेषः। न वयं श्रीरिव, यतः सा हे सौम्य! श्रीर्वधूः साकं नागरीभिः सार्द्धमुरसि सततमास्ते। सेव वयं निरभिमानिन्यो न भवामः। तयैव तथा कर्त्तुं शक्यते, नास्माभिः। तस्मात्तत्र नेतुमस्मान् मा यतस्वेति वाक्यार्थः। अत्राप्युन्मादोऽङ्गी हर्षासूयादयोऽङ्गानि। प्रविलाप उक्तिवैचित्र्यम्, परितो युक्तिमत्त्वेन भाषणात् ॥ २० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

यदि तस्यैव वार्त्ता भणितव्या, तदितो याहीति वक्तव्ये दैवाद्दूरं गत्वा पुनरागच्छन्तं तमाह—प्रियसखेत्यादि। हे प्रियसख! पुनरागाः पुनरागतोऽसि? किं प्रेयसा प्रेषितः? भद्रम्, भद्रम्, कथय किमनुरुन्धे वरय प्रार्थय, त्वं माननीयोऽसि मे, हे अङ्ग! अतस्तेऽभिलाषः सम्पादनीय एव। युष्मान्नेतुमागतोऽस्मीति चेद् वदसि, तदा श्रूयतामित्याह नयसीत्यादि। अस्मान् कथं नयसि? दुस्त्यजद्वन्द्वस्य तस्य पार्श्वं कथं केन प्रकारेण नयसि? दुस्त्यजं द्वन्द्वं वीररसो नागरीजनसङ्गश्चेति द्वितीयं यस्य। अस्माभिस्तत्र न गन्तव्यमेव वयं किं श्रीरिव या सततं ताभिरपि साकमुरसि आस्ते? योग्यायोग्यविचारं न करोति, यतो वधूर्प्रौढा, वयं ताभिः साकं तस्योरसि वर्त्तितुं न भवाम इति शेषः। उन्मादासूयौत्कण्ठ्यानाम् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथोन्मादेन तत्रैव भ्रमन्तमपि तं भ्रमरमननुसन्धाय क्षणमन्तर्हितं वा तमपश्यन्ती सखेदं परामर्श। हन्त हन्त मम तीक्ष्णया गिरा सन्तप्तेनानेन दूतेन मथुरां गतेनावेदितसर्ववृत्तान्तः कृष्णो मामुपेक्षाञ्चक्रे इति कलहान्तरितां दशां प्राप्ता प्रेमाम्बुधिना

तद्गुणमौलिना मत्कान्तेन पुनरपि स एव प्रेषितो दूतोऽत्रायात्विति तद्वर्त्म निरीक्ष्यमाणा अकस्मात्तं विलोक्य सादरमाह। हे प्रियसख! मत्प्रियस्य सखे पुनरागाः मद्वाक्शरताडितोऽपि स्वसाद्गुण्येन मदपराधमगणयित्वैव आगाः। आं जानामि प्रेयसा मय्यतिप्रेमवता मदपराधकोटीरप्यगणयता तेनैव किं प्रेषितः तर्हि वरय वृणु किम् नुरुन्ध अनुरुन्त्से कामयसे इत्यर्थः। यद्वा। कमनुरोधं ते सम्पादयामीत्यर्थः। तव मथुरागमनमेव वृणोमीति चेद्यामि मथुरामित्युक्त्वापि पुनः परस्त्रीवेष्टितं तं तत्र पश्यन्त्या मेऽवश्यं मानो भवतीति। परामृश्याह। नयसीति। दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य पार्श्वं, नन्वेकाकी तत्र स वर्त्तत इति शपथं ब्रवीमीति तत्राह। हे सौम्य! आर्यबुद्धिरसीति भावः। श्रीरेव वधूः साकं सहैव तत्रापि सततं तत्राप्युरसि पुरुषायितत्वेनैवेति भावः। अयमर्थः। श्रियो देवीत्वेन नानारूपधारित्वशक्तेः कृष्णो यदा अन्याः स्त्रीः सम्भुङ्क्ते तदा स्वर्णरेखारूपैव तद्वक्षसि तिष्ठति। यदा तमन्याः स्त्रियो नायान्ति तदा रेखारूपतां हित्वा प्रकटमेव युवतिर्भूत्वा तं रमयतीति। अत्र दूतं सम्मान्यापि तदुक्तिमङ्गीकृत्याप्यनौचित्यं ज्ञापयन्ती नाङ्गीकुरुते इत्ययं प्रतिजल्पः। यदुक्तम्—

दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राप्तिर्नार्हत्यनुद्धतम्। दूतसंमाननेनोक्तं यत्र स प्रतिजल्पकः॥ २०॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

एवं हस्तक्षेपादन्यत्र गतं तत्रैव भ्रमन्तं वा विह्वलत्वादपश्यन्ती अहो असौ मदुक्तं स्वस्वामिन आवेदयितुं मथुरायां गतः भवतु द्रष्टव्यं मत्प्रियस्तन्निवेदितान्मदुक्तोपालम्भानाकर्ण्य मामुपेक्षते किं वा मदनुनयार्थमन्यं तमेव वा प्रेषयति स्वयमेव वा स सम्भ्रममायातीत्यादि मनसि भावयन्ती तदागमनपथि दत्तदृष्टिः पुनरपि सौरभलोभात् स्वसंनिधावागच्छन्तमवलोक्य क्षान्त्यादिगुणगणाकरेण प्रेमभराक्रान्तस्वान्तेन मत्कान्तेन प्रेषितः स एव पुनरागत इति मत्वा विकसितवदनारविन्दा सादरमाह। प्रियसखेति। हे मत्प्रियस्य श्रीकृष्णस्य सखे अन्यथा मां प्रति त्वामेव पुनः पुनः किमिति प्रेषयेदिति भावः। प्रेयसा प्रेषितस्त्वं किं पुनरागतोऽसि मत्प्रेमातिरेकदत्तदृष्टिर्मदपराधानगणयित्वा मत्प्रप्रेयांस्त्वां पुनः प्रेषितवान् किं वा मयातिरस्कृतत्वादितो गतः स्वसौजन्येन मदपराधमुपेक्ष्य सन्देशान् गृहीत्वा गन्तव्यमिति विचार्य मार्गमध्यात्परावृत्य स्वयमेवागतोऽसीति किं शब्दार्थः उभयथापि मानार्हस्त्वमित्याह। वरयेति। अङ्ग हे प्रियदूत! भवान् किमवरुन्धे प्राप्तुमिच्छति यदिच्छसि तदेव वरय वृणीष्व त्वन्मनसेप्सितं वस्त्वहं दातुमिच्छामि यतः संमाननीयः पूज्योऽसि तत्सन्निधौ त्वमेव मुख्यः इतः पूजामप्राप्य प्रत्युत तिरस्कारमवाप्यापि तत्र गतस्त्वं न मद्दत्तोपालम्भानुक्तवान् किन्तु मत्प्रेमातिरेकमेवावेदितवानतः सज्जनशिरोमणिश्चेति पुनस्त्वदागमनेन मयावगतमतो यथेष्टत्वपूजां कर्तुं मम स्पृहा महती वर्त्तत इति भावः। यदीप्सितं वरं दातुं प्रवृत्तासि चेत्तर्हि प्रेयसा सार्द्धं त्वत्समागममेवाहं प्रार्थये स्वामिकार्यमेवेप्सितं तत्सिध्यनन्तरमनुग्रहेण यद्दास्यसि तद्ग्रहीष्यामीति चेत्तत्राह। नयसीति। अहो मां तत्र नीत्वा मथुरायां तेन सार्धं संयोजयितुमिच्छामि परं भयादेवं न ब्रवीमि भगवत्या सर्वज्ञया मदभिप्रायानुरोधेनेदमुक्तमतः अवश्यं तत्र चलनीयमिति चेत्तत्राह। कथमिति। अस्मान्नेतुमेव त्वमागतश्चेत्तदुपकरणं शिविकादिकं किमर्थं नानातीतवानसि तद्विना च कथमस्मान्नयसीति भावः। किं चेह गोकुले सत्यः तथा च निरोधस्थाने स्थिता वयं तत्रापि वह्वयस्त्वञ्चैकोऽतोऽस्मान्नेतुमशक्तोऽसीति भावः ननु यद्यप्यहं भवतीर्नेतुमशक्तस्तथापि भवत्यो गन्तुं शक्ता इति चेत् सत्यं तथापि पुरस्त्रीवेष्टितं द्रष्टुं न शक्ता इत्याशयेनाह। दुस्त्यजेति। दुस्त्यजं द्वन्द्वं तत्रत्यस्त्रीभिर्मिथुनीभावो येन तस्य त्वत् स्वामिनः पार्श्वं, ननु त्वां प्रतीक्षन् एकाकी स वर्तते सशपथं ब्रवीमीति चेत्सन्तु ता नास्ति ताभ्यो मम भयं मद्गमने ता वराक्यः स्वत एव धिक्कृता स्युस्तथापि तेन सार्धमित एव गता श्रीस्तं रमयतीति सेर्ष्यमाह। सततमिति। श्रीरेव वधूः साकं सहैव तत्रापि सततं तत्राप्युरसि श्रियो नानारूपग्रहणसामर्थ्यात्कृष्णो यदा अन्याभिः स्त्रीभिः क्रीडते पुरुषेषु च तिष्ठति तदा रेखारूपेण सा तदुरसि तिष्ठति यदा रहसि स वर्तते तदा प्रकटमेव वधूर्भूत्वा तं रमयतीति तत्साहित्यं सर्वदा तस्य वर्ततेऽतोऽस्मद्गमनं तत्र नोचितमिति भावः। यद्वा याऽस्मद्भयाद्रेखारूपेण तिरोहिता आसीत् सा श्रीरिदानीं निर्भयस्थाने स्थितत्वात्कं सुखं यथा स्यात्तथा च वधूर्भूत्वा सततमुरसि आस्ते इदानीं प्राप्ताधिकारायास्तस्या अस्माकं भयमतस्तत्सार्धमस्मत्समागमं कर्तुमिच्छसि चेत्तमेवात्रानयेति भावः। यद्वा प्रेयसा त्वत्समागममहमिच्छामीति चेत् किमस्मांस्तत्र प्रापयसि किं वा तमत्रेति विकल्प्य नाद्यामीति अस्माकं मानिनीनां तत्र गमनायोगादित्याद्यपेक्षायोगमभिप्रेत्य द्वितीयं प्रतिक्षिपति। नयसीति। इह इत्युक्तः आस्मन्व्रजे अस्मान्प्रति दुस्त्यजद्वन्द्वपार्श्वं कथम्प्रापयसि दुस्त्यज द्वन्द्वपार्श्वं यस्य तं द्वन्द्वसम्बन्धस्य दुस्त्यजत्वात्तत्साहित्येनास्मान्प्रत्यागमनस्य दुर्घटत्वात्कथमित्यर्थः। ननु भवत्यर्थं सर्वमपि तस्य सुत्यजमिति चेत्तत्राह। सततमिति। हे सौम्य! साधो त्वं पक्षपातं विहायैतत्सर्वं ज्ञातुं योग्योऽसीति सम्बोधनाशयः "दुस्त्यजद्वन्द्वभावस्य प्राप्तिर्नार्हत्यनुद्धतम्। दूतसम्मानेनोक्तं यत्र स प्रति जल्पक" इत्युक्तत्वादत्र प्रतिजल्पः उद्धवपक्षे भगवतो दोषान् श्रुत्वा तत उत्थाय गतः गते च तस्मिन्मूर्च्छितायां तस्यां पुनरागतः निवृत्तमूर्च्छा पुनरागतं तमवलोक्याह। प्रियेति। यद्वा स्वाम्युपालम्भानाकर्ण्य खिन्नचित्तं तमालक्ष्याश्वासयति। हे प्रियसखेति। प्रियसन्निधावितोऽप्यधिकं वयं वक्तुं शक्ताः सोऽपि तच्छ्रुत्वा प्रत्युत्तरं दातुं मनसि खेदं वा दातुं न समर्थस्तस्य सखा त्वं किमिति खिन्नोऽसीति सम्बोधनाशयः। वयं तवोपरि प्रसन्ना यतस्त्वमस्मान् प्रत्येवागता पूर्वमिदमबुद्ध्वैवमुक्तमित्याह। पुनरिति। पित्रोः प्रियचिकीर्षया प्रेषितो नागतोऽसि किं पुनः किन्तु अस्मत्प्रियचिकीर्षया प्रियेण प्रेषितः

आगतोऽसि तथात्वे सति वरयेत्यादिपूर्ववत् श्रुतिपक्षे यद्वैमुख्येन कृतकर्मणां फलभोगाय संसृतिचक्रे प्रवेशितोऽसि सर्वभावेन तदाश्रयणेनैव तव मोक्षो नान्यथेत्याह । हे प्रियसख प्रेयसा परमेश्वरेण प्रेषितः प्रेरितः किमपि अनिर्वचनीयं संसृतिचक्रमागतः आसमन्तात्प्राप्तवानसि तमेव वरय शरणत्वेनाश्रय किमवरुन्धे संसारपाताय तदतिरिक्तं भवान् किमभिलषितवान् "तमुह्येष एव साधु कर्म कारयति यमेभ्यो लोकेभ्य ऊन्निनीषति तमुह्येष एवासाधु कर्म कारयति यमेभ्यो लोकेभ्यः अधो निनीषति तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वैशरणमहं प्रपद्ये अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया । तमेव शरणं गच्छ सर्वभावेन भारत तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् इत्यादि श्रुतिस्मृतिभ्यः एवं चेदनन्यभावेन भगवदाराधने त्वं प्रवृत्तस्तदा मम हे सौम्य ! माननीयः अधिकारिसम्पत्सम्पत्त्या मदर्थविचारतत्फलप्राप्तियोग्यः अन्यथा तु नास्ति मोक्षो नापि भोग इत्याह । कथमिति । तत्त्वज्ञानान्तरङ्गसाधनभगवद्भक्तिलभ्यभगवत्प्रसादाभावे इह स्वस्वरूपभूतपरमात्मनि समन्विता अस्मान्प्रति दुस्त्यजद्वन्द्वपार्श्वं मनः कथं नयसि द्वन्द्वं रहस्ये कलहे पार्श्वान्तिके कक्षाद्यावयवे च पापे पशुगणेऽपि चेति कोशात् दुस्त्यजद्वन्द्वपार्श्वं कलहपापे येन तत् दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरित्यादिशुद्धस्यैकाग्रमनसो ब्रह्मसाक्षात्कारकरणत्वाभिधानात् निष्कामकर्मभगवद्ध्यानविनिर्मुक्तं कलहादिदोषाविलं यन्मनस्तेन क्रियमाणो वेदान्तविचारो न फलाय कल्पत इति भावः । तथा श्रीर्वधूः साकं सहैव तत्रापि सततमुरस्येवास्ते । यद्वा या सर्वैर्भोगार्थिभिरभिलष्यते सा श्रीरपि वधूः कं सुखं यथा स्यात्तथा तस्य भगवतः उरस्येव सततमास्ते तथा च भगवदनुग्रहं विना कथं तत्प्रसादस्तमृते च कथं भोगस्तस्माद्भोगमोक्षार्थिभिर्भगवान् वासुदेव एव सर्वभावेनानुक्षणमाराधनीय इति भावः ॥ २० ॥

गूढार्थदीपिनी

परावृत्य पुनरागतं प्रत्याह-अङ्ग हे प्रियस्य कृष्णस्य सखे । पुनः आगाः आगतोऽसि अतः त्वं माननीयोऽसि किम् अनुरुन्धे प्राप्तुमिच्छति तत् वृणीष्व । इह अत्र स्थिताः अस्मान् कथं नयसि । दुस्त्यजं द्वन्द्व नार्यन्तरसम्पर्को यस्य तस्य पार्श्वम् । श्रीः साकं सहैव सततमास्ते ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काचित्पुनरागतं प्रत्याह । प्रियसखेति । हे प्रियसख ! मधुकर प्रेयसा अतिप्रियेण श्रीकृष्णेन पुनः प्रेषितः त्वमागतः आगतोऽसि किम् तर्हि हे अङ्ग दूत ! त्वं मे माननीयोऽसि भवान् किमनुरुन्धे प्राप्तुमिच्छति तद्वरय वृणीष्व मां नेतुं पुनः प्रेषित इतिचेत् तर्हि इह सतीः अस्मान् दुस्त्यजं दुर्निवारं द्वन्द्वमन्यसाहित्यं यस्य तस्य श्रीकृष्णस्य पार्श्वं वामाङ्के कथं नयसि नेष्यसि अन्यसाहित्यं दर्शयति । हे सौम्य मधुकर ! श्रीवधूः श्र्याख्यवधः साकं सहैवोरसि नित्याचिन्त्यापरिमितश्रीमन्मङ्गलविग्रहैकदेशे वक्षसि सततं निरन्तरं कालत्रयेऽपि आस्ते अनेनापि श्रीविग्रहस्य नित्यता द्योत्यते ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भ्रमतो भ्रमन्तं भ्रमरमिव पुनरागतं मत्वा देहस्मृतिः काचिद्वदति । प्रियसुखेति । प्रियस्य वल्लभस्य सखेति तत्सम्बुद्धिः । प्रेयसा प्रेषितस्त्वं पुनर्गत्वाऽऽगा आगतवानसि किं किञ्च भवाननुरुन्धेऽनुवाञ्छति तत्त्वं वरय । कुत इयत्यायतक्षिप्रह्वती त्वयीत्यत आह । मेऽङ्ग दूत स्वामिदूतत्वान्माननीयोऽसि । प्रायेणाभिप्रायेणानेनायात इव भासि भो त्वमिति वक्ति । नयसीति । इहावस्थायां बन्धुपार्श्वं कृष्णसमीपं कथं नयसि । नादरस्तत्र तवेति नेति वक्ति । दुस्त्यजमिति । कुतः कौतुकं तवेत्यतः साऽप्येवं लुब्धा का कथा न इति प्रोचे । सततमिति । हे सौम्य साऽऽकं सुसुखं यथा तथा यस्योरसि श्रीवधू रमारूपिणी भार्याऽऽस्तेऽस्माकं तदाशा नालौकिकीति भावः । गमनेऽपि सपत्न्या उरसि सत्त्वान्नास्मदभिलषितलाभ इत्यास्तामन्नयनकथेति ध्वनिं वर्णयन्ति । सदा मायां सत्यामपि प्राक् तदनुभवित्रीणां सोऽनुपपन्न इवाभाति । आनन्दानुभव उत्कृष्टानुभवात्स्मृतः । तद्युक्तत्वं तथा सौम्य गुणानामधिकं तदित्येकादशतात्पर्योक्तानन्दनिर्भरसौम्यं वा । प्रियश्चासौ सखा चेति सोऽस्मत्स्वामिप्राप्यसुखसखे । यथोक्तं छान्दोग्यभाष्ये । यं सुखं प्रोक्तं प्रियमित्येव पण्डितैरिति । स श्रीमाज्ञात इदानीं वयं दरिद्रा इति कथं नयसीत्युक्तिः । स्वकीयप्रेषितत्वमारोप्य तथा मधुमथानागमं च वक्ति । प्रियेति । प्रेयसा केनचिदस्मत्प्रीतिपात्रेण प्रेषितो नायकानुनयनाय पुनः प्रेया श्रीकृष्णेन सहागाः किं । अतोऽङ्ग हे उद्धव माननीयोऽसि सत्कारार्होऽसि किमनुरुन्धे तद्वरय । दुस्त्यजं बन्धुपार्श्वमस्मान्नयसि किं कथं नयसि । उपसर्गा धातुलीदार्थद्योतका इति । अनुनयसि त्वन्तु उ उत्कृष्टोऽसि । न च स्तुत्या कृत्यं प्रस्तुतं न रमासमासक्तिर्युष्मास्विति कथमहं यामनुनयमिति न वदेति वदति । सौम्येति । सततं श्रीवधूः साकमस्माभिरास्त इति सम्भावितमनुनयनमिति वा भावः । सततमुरसिसौम्यश्रीवधूरिति पदमेकं । ततेन वेणुपादनेन सहितः सततः । ततं वीणादिवादनमिति विश्वः । स चासौ मुरस्यासुरस्य सो बारणं वा । सः कोपे वारणे चेति विश्वः । सोऽस्यास्तीति सततमुरसी स चासौ सौम्यः । प्रसादोन्मुखस्तस्य श्रीमती वधूस्तद्दूषणी वधूर्वा साकमास्त इति वा । एतादृशे । नयसीत्यत्र ने असीति छेदः । ने नेतरि श्रीकृष्णे कथमसि केन प्रकारेणासि । नो नेता समुदीरित इति विश्वः । किंवा भवतु किमनुरुन्धे तद्वरय ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमुक्त्वा सम्बन्धं विनिवार्य मूर्च्छिता जाता पुनः सात्त्विकराजसभावेनाह । प्रियसखेति । बहव एव दोषा निवृत्ताः सत्त्वप्राधान्याद्गुणकथनाद्वा अतस्त्वां दृष्ट्वा प्रथमपर्यायात् अन्यथाबुद्धिजनकत्वेन प्रकारान्तरेणागमनं सम्भावयति भ्रमरमपि पुनरागतमिव भगवतो दोषान् श्रुत्वा तत उत्थाय मूर्च्छितायामुद्धवः पुनरागत इति वा इदानीमपि कि प्रेयसैव प्रेषितः तदा आकाङ्क्षाधिक्यादस्मत्कार्यं भविष्यतीति भावः । हेमन्ते तासां साधनोपक्रम इति पुनर्नवम्युक्तौ व्याप्रियत इति, नवमश्लोके हेमन्ते प्रथमो मासो भवति । पुनर्दण्डकलितवदावृत्तिर्भविष्यतीति मत्वा फलदात्रा भगवता प्रेयसा प्रेषित इति तथेत्यङ्गीकृतेत्याह । वरयेति । वरं ब्रूहि साधनेनेदं कार्यं सेत्स्यति अयुक्तमपि वरेण सिध्यति सात्त्विकः कालः भक्तानुगुणो वा तदीयप्रमाणान् उररीकृत्य भागवतादिकामिव प्रदर्शयन् पुनरागमनमाह । तत्रापि मन्त्रदेवतावरेणैव तत्कार्यं भवति नान्यथेति ज्ञापयितुं वरयेत्युक्तम् । उद्धवेऽप्याशीर्वादो देयः भ्रमरस्याप्यामोदोपभोगः कारणीय इति किमिह पुनरुन्धे तुभ्यं दास्यामि तत्कथयेत्यर्थः । ननु कोऽयं निर्बन्ध इति चेत्तत्राह । माननीयोऽसीति । अङ्गेति स्नेहसम्बोधनं मित्रत्वात् उपकारं हि कुर्वन् माननीयो भवति । ननु तथास्माभिर्नदीयते तथा त्वयापि न देयमित्याशङ्क्याह । नयसीति । त्वं तु नयनार्थमागतः अयमेवोपकारः परं नयने साधनापारज्ञानादस्माकं संदेहोऽस्ति तत्कथयेत्याह । कथमिहास्मानिति । वयं वह्व्यः स्त्रियः गोकुलं च निरोधस्थानं त्वं चैकः किंच दुस्त्यजो द्वन्द्वो यस्य भगवान् हि नित्यभार्यः विभज्यैव शक्तिं कृष्णो भगवानवतीर्ण इत्यवोचाम ननु सांप्रतं कापि तिष्ठति चेत्तत्राह । सततमुरसीति । सौम्येति सम्बोधनं साधुत्वाय श्रीरेव वधूः नतूरसि लक्षणमात्रं लोकप्रदर्शनार्थं लक्षणत्वमापन्ना वस्तु साकमास्ते सहैव तिष्ठति सौम्यत्वात् । सम्मतिदर्शने निरूपिता ॥ २०

श्रीसुबोधिनी–सारः

पुनरागतं प्रत्याह । हे प्रियसख प्रेयसा कृष्णेन प्रेषितः पुनरागाः किं पुनरागतोसि किम् । हे अङ्ग मे मम माननीयोऽसि त्वं वरय किमनुरुन्धे इच्छसि अस्मान् दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य पार्श्वं समीपं कथं नयसि नेष्यसि हे सौम्य वधूः श्रीः साकं सहैवोरसि आस्ते सततं निरन्तरम् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

परावृत्य पुनरागतं प्रत्याह—प्रियसखेति । हे प्रियस्य सखे ! प्रेयसा प्रियतमेन कृष्णेन प्रेषितस्त्वं पुनरागाः आगतः, तर्हि हे अङ्ग ! मे मम त्वं माननीयोऽसि पूज्योऽसि, अतः यत्किञ्चिदवरुन्धे भवान् प्राप्तुमिच्छति तद्वरय वृणीष्व । 'भगवत्समीपे युष्माकं नयनमिच्छामि' इति चेत्तत्राह—नयसीति । 'त्वमपि सौम्यस्वभावोऽसि, अतो विचारय सापत्न्यदुःखं कथं सोढव्यम्' इत्याशयेन सम्बोधयति—हे सौम्येति । इहास्मिन्नपि काले दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य पार्श्वं समीपमस्मान् कथं नयसि नेष्यसि ? । 'तत्र को दोष' इत्यपेक्षायामाह—श्रीर्लक्ष्मीर्नाम वधूः साकं सहैव तत्राप्युरस्येत्र सततं निरन्तरमास्ते इति ॥ २० ॥

अन्वितार्थप्रकाशिका

परावृत्य पुनरागतं प्रत्याह—प्रियसखेति । अङ्ग हे प्रियस्य कृष्णस्य सखे ! प्रेयसा प्रियतमेन कृष्णेन प्रेषितस्त्वं किं मद्वाक्शरैस्ताडितोऽपि पुनरागाः आगतः तर्हि मे मम त्वं माननीयः असि । अतः यत् किञ्चिदवरुन्धे भवान् प्राप्तुमिच्छति तद्वरय वृणीष्व । यदि अस्यान्नेतुमिच्छसि तर्हि इहास्मिन् अपि काले दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य पार्श्वं समीपमस्मान् कथं नयसि । हे सौम्य ! यतः श्रीर्लक्ष्मीर्नाम वधूः साकं सहैव तत्राप्युरस्येव सततं निरन्तरमास्ते ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं किंचित्प्रयोजनमिषेण गत्वा पुनरागतं तं पुनःकृष्णप्रेषितं मत्वाह प्रियेतीहे प्रियसख प्रियस्य सखे प्रेयसा मनोहरिरामानुजेन पुनः प्रेषितः अतः पुनरागाः आयातोसि किं एवमादौ संदेहं कृत्वा पुनः प्रेषित इति निश्चित्याह वरयेति अग हे मनोज्ञ कृष्णानुचरस्त्वं मे मया माननीयः अर्च्योसि अतो भवान् किमनुरुद्धं उपलब्धुमिच्छतीत्यर्थः । तद्वस्तु वरय तस्य याचनं कुर्वित्यर्थः । अहं तु युष्माकं मथुरागमनमेव वृणोमीत्याशंक्य तत्र स युक्तिकं सकाकुप्रत्याख्यानमाह नयसीति इहस्थितानस्मान् मथुरायां दुस्त्यजं त्यक्तुमशक्यं द्वन्द्वं तत्रत्य सुंदरीभिः सह मिथुनीभावो यस्य तस्य दुस्त्यज द्वन्द्वस्य श्रीकृष्णस्य पार्श्वं निकटं कथं नयसि प्रापयिष्यसि एवं चेत्तर्हितमिहानयिष्यामीत्याशंक्याह सततमिति हे सौम्य अत्रानयनेपि श्रीरभि वधूरस्मत्सपत्नी साकं सहैव सततं नित्यं उरसि तस्य हृदयोपरि आस्ते अतः सेर्ष्याणामस्माकं यत्र कुत्रापि सुखं नास्तीति भावः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

परावृत्य पुनरागतं प्रत्याह । प्रियेति । प्रियः श्रीकृष्णस्तस्य सखेति प्रियसखस्तत्संबुद्धौ हे प्रियसखिभूतभृङ्ग, त्वं प्रेयसाऽस्मत्प्रियतमेन श्रीकृष्णेन, प्रेषितः सम्प्रेरितः सन् , पुनः आगाः किम् । श्रीकृष्णेन प्रेषितः सन् पुनः किमागतोऽसि, यदि

तत्प्रेषितः पुनरागतः स्याच्चेत्तर्हि, अङ्ग हे भ्रमर, मे मम, माननीयः असि सम्पूज्योऽसीत्यर्थः। अतः, किं अनुरुन्धे भवान् किं प्राप्तुमिच्छति। वरय वृणीहि। हे भृङ्ग, इह स्थितानिति शेषः। अस्मान्, कथं दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य भगवतः पार्श्वं समीपं, नयसि, नेष्यसि। ननु कयास्य मिथुनीभावोऽस्तीत्यत्राह। हे सौम्य भृङ्ग, श्रीलँक्ष्मीर्नाम वधूः, साकं सर्वदा सहवर्त्तमाना, तत्रापि उरसि वक्षस्येव, सततं, आस्ते ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

प्रियसखेति : १०.४७.२०.

आहूयास्मान्निशायां वनभुवि मुरलीवादनच्छद्मना यः कस्मात् प्राप्ता इहेति च्छलनपटुमतिः पृष्टवान्नष्टशङ्कम्।
अद्यानाहूतयाता यदि मधुपपदाब्जं तदा तादृगर्थं ब्रूयादेवैष तस्माच्चयवनमुभयतः स्याद्यदमे तदूह्यम् ॥ ५१ ॥
मानो वा नापमानः पदजलज-रजोराजि-रज्यच्छिरोभिर्नैवालक्षि क्षणोऽपि प्रभुवदनसमीक्षां विना नैव यातः।
प्राप्ता कस्मादकस्माद्विरहगतिरिति ज्ञायते नेक्षितेऽपि दिष्टं वाऽनिष्टमिष्टं फलति फलमिदं विष्टपे स्पष्टमेव ॥ ५२ ॥
का हानिर्वः सतीनामनुपदमिह यावत्तवृत्त्या स्वहार्दात् तेनाखण्डं रतानां स च निजमनसोऽभ्यन्तरे चैवमेव।
अन्योन्यं नित्यसङ्गो विलसति सुतरां तत्र मे नापमानो ब्रूतेत्युक्तिं प्रकल्प्योज्जगुरिति मुदितास्त्वं चिरं जीव साधो ॥ ५३ ॥

कृष्णप्रिया

भगवद् गुणगाथा करते गोपीजी को मूर्च्छा आ गई थी पुनः कुछ चेतना आई और श्रीउद्धवजी पुनः पधारे ऐसा समझ कर दैन्य से पृच्छा कर रही है कि हे प्यारे नन्द दुलारे के मित्र! क्या आप मथुरा से वापिस आए! क्या प्रियतम श्रीकृष्ण ने भेजा है? हे अङ्ग! आप हमारे माननीय है। कहिए क्या चाहते हो? आप संकोच न करें, जो कुछ अभीष्ट हो वह मांग लीजिए। क्या नाथ के पास हमको ले जाने के लिए आप का आगमन हुआ? उनके पास हमको क्यों ले चलते हो? वो कभी अकेले रहते ही नहीं, नित्य युगल स्वरूप में विराजते हैं उनको हमसे क्या मतलब है। हे सज्जन! हे सौम्य! हे उद्धवजी! उनके वक्षःस्थल में-हृदय में सदैव लक्ष्मी जी विराजती है पुनः हमारा क्या उनको प्रयोजन रहा? ॥ २० ॥

अपि बत मधुपुर्यामार्यपुत्रोऽधुनाऽऽस्ते स्मरति स पितृगेहान्[1] सौम्य [2]बन्धूंश्च गोपान्।
क्वचिदपि स [3]कथा नः किङ्करीणां [4]गृणीते भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु ॥ २१ ॥

कर्दमक्षमा

अन्वयः—हे सौम्य आर्यपुत्रः, मधुपुर्याम्, बत, अधुना, अपि, आस्ते, हे सौम्य? सः, पितृगेहान्, बन्धून्, गोपान्, च (नः) स्मरति किम्? सः, क्वचिद्. अपि, किङ्करीणाम्, नः, कथाम्, गृणीते? अगुरुसुगन्धम्, भुजम्, कदा, नु, मूर्ध्नि, अधास्यत्? ॥ २१ ॥

श्रीवरस्वामिविरचिता भावार्थदीपिका

तेन संमन्त्रिता सती ब्रूते। अपि बतेति। बत हर्षे। हे सौम्य गुरुकुलादागत्यार्यपुत्रः कृष्णोऽधुना किं मधुपुर्यां वर्तते। पितृगृहं बन्धूंश्च किं स्मरति कदाचिदपि प्रसंगवशान्नोऽस्माकं वार्ताः किं ब्रूते। अगुरुवत्सुगन्धं भुजं नो मूर्ध्नि कदा नु धास्यतीति ॥ २१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तेनोद्धवेन। संमन्त्रिता संबोधिता। अपि बतेत्यव्ययद्वयं संप्रश्ने। गुरुकुलादुदुज्जयिनीतः। आर्यस्य पूज्यस्य वसुदेवस्य पुत्रः। "आर्यो वेदानुगे पूज्ये श्वशुरे वैश्यजे गुरौ। ब्राह्मणादिषु वर्णेषु चाश्रमेषु चतुर्षु च ॥" इति धरणिः। स कृष्णः। पितुर्नन्दस्य गेहान् भार्याम्, बहुत्वं पूजायाम्, यशोदामित्यर्थः। बध्नन्ति स्नेहेनेति बन्धवः स्त्रीजनाः, गोप्य इत्यर्थः। चकाराद्गोगृहगिरीणां ग्रहः। यद्यागमिष्यत्तदाधास्यन्न संदेहोऽत्रातस्तदागमनं पृच्छामीति वा। अत्र च सुजल्पेनोक्तम्—"यत्रार्जवात्सगांभीर्यं सदैन्यं सहचापलम्। सोत्कंठं च हरिः पृष्टः स सुजल्पो निगद्यते ॥" इति। हंतहंत मयोन्मत्तया किं प्रजल्प्यते प्रष्टव्यन्तु न पृच्छयत इत्यनुसंतप्य ससंभ्रममाह—अपि बतेति। मधुपुर्यामास्ते-व्रजमिव तामपि त्यक्त्वाऽन्यत्र किं न यियासतीति भावः। इतः समीपवर्तिन्यां तत्र पुर्यां तस्य स्थितिरत्रागमनसंभवनामप्युत्पादयतीत्यभिप्रायेण। यद्वा—सुखमास्ते इत्यनुक्तेरस्मत्प्रणयस्मरणव्याकुलोऽनुरोधवशादेव तत्रास्ते, यत आर्यस्य यदुभिर्दुर्विनीतैः प्रतार्यमाणत्वात्सारल्यसमुद्रस्य श्रीव्रजराजस्य तदेकप्राणस्य पुत्रः, हंतहंत मत्पितापि मां व्रजं नेतुं नाऽशकदहं तत्र गन्तुं कमुपायं करोमीति स्वविलंबमसहमानस्त्वां प्रस्थापयति स्मेति भावः।

---

१. गेहं—विज. । २. सौम्यबन्धून्—इति कस्यचित। ३. कथां—वीर. ; कथं—विज. । ४. गृहीतो—विज. ।

तेन मधुपुर्यामास्त इति तस्य को दोषः, यत आर्यस्यातिसरलस्य स्वपरिणामदर्शित्वेनापि शून्यस्य नन्दस्य पुत्रः, तादृशं पुत्रं तादृशः पिता यत्त्यक्त्वा व्रजमायास्यतीति को जानाति, यद्यज्ञास्यद्व्रजराज्ञी सा तावदक्रूररथारूढैव स्वपुत्रं कंठे कुर्वत्येव मथुरामयास्यत्तामनुगोपिकाश्रेण्यश्चेति व्रजराजस्यायत्तत्वमेवास्माकं सर्वनाशे कारणमभूदिति भावः। अतस्तादृशस्यापि पितुरपि सरलस्य वसुदेवेन महाप्रतारकेणाच्छिद्य गृहीतपुत्रस्य व्रजमागत्य मूर्छया पतित्वा स्थितस्य गृहान् कोशागारबंधनागारशयनागारादीन् संप्रत्यमार्जितालिप्तेन तृणधूलिलतापत्रलूलातंतुवृताञ्शून्यायितान्स्मरति कच्चित्, गेहान्तरेषु बन्धून्संप्रति मूर्छितान्कांश्चिदितीति। यदा तस्य मनोभिरुचितं कैंकर्यं कर्तुं पुरस्त्रियो न जानंति तदैव तत्सुखमनुपलब्धवतीभिस्ताभिः सुखानुपलंभकारणं पृष्टो नोऽस्माकं कथां गृणीते। वनमालागुम्फने स्थासकसंपादने वीटिकानिर्माणे वीणावादने रागतालादिसृष्टौ गीतनृत्यरासादौ सौंदर्यलावण्यवैदग्ध्यादिषु प्रश्नोत्तरविलासे संयोगलीलायां प्रेमस्नेहमानप्रणयादिषु यथास्मद्व्रजस्था गोप्यो मां सुखयन्ति न तथा यूयमिति गच्छत भो यदुस्त्रियः स्वपतीनेवालमलं युष्माभिः, अहन्तु प्रातर्व्रजमेव गच्छन्नस्मीत्युक्त्वाऽत्रागत्याऽगुरुसुगंधभुजमस्माकं मूर्ध्नि कदाऽधास्यत् धास्यति। तेन च समाश्वसितम्—भोः प्राणप्रेयस्यः सशपथामदमहं ब्रवीमि भवतीस्त्यक्त्वा न क्वापि यास्यामि त्रिभुवनमध्ये क्वापि युष्मत्सादृश्यगंधलेशमपि नोपलब्धवानस्मीति व्यंजयिष्यति। अत्र प्रथमे पादे आर्जवं, द्वितीये स्वप्रसंगानुख्यापनेन गांभीर्यं, तृतीयचतुर्थयोर्दैन्यचापलोत्कण्ठा इत्ययं सुजल्पः। तदुक्तम्—"यत्रार्जवात्सगांभीर्यं सदैन्यं सहचापलम्। सोत्कंठं च हरिः पृष्टः स सुजल्पो निगद्यते॥" इत्येवं दशविधो दिव्योन्मादप्रभेदश्चित्रजल्पो ज्ञेयः। स च दिव्योन्मादो महाभावोत्कंठभागस्य मोहनस्य विलासविशेषो वृंदावनेश्वर्या वर्णितः। "प्रायो वृंदावनेश्वर्यां मोहनोऽयमुदञ्चति। एतस्य मोहनाख्यस्य गतिं कामप्युपेयुषः॥ भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्यते। उद्घूर्णाश्चित्रजल्पाद्यास्तद्भेदा बहवो मताः॥ प्रेष्ठस्य सुहृदालोके गूढरोषाभिजृंभितः। भूरिभावमयोजल्पो यस्तीव्रोत्कंठितांतिमः। चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितः॥ विजल्पोज्जल्पसंजल्पा अवजल्पोऽभिजल्पितः। आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्तितः॥" इति। प्रेयस्या चित्रजल्पस्य माधुरीपिपासया कृष्ण एव भ्रमररूपमधादिति केचित्॥ २१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो किं किं मया प्रलपितं प्रष्टव्यं तु न पृष्टमिति पर्यवसाने सार्जवं सगाम्भीर्यं सदैन्यं सचापलं सोत्कण्ठं सगद्गदवाष्पधारं पृच्छति। अपीति। अपि प्रश्ने अस्य चरणत्रयमयवाक्यत्रयेणाप्यन्वयः वत भो दूत! आर्यपुत्र इति रूढया वृत्त्या आर्यस्य श्रीगोपेन्द्रस्य पुत्र इति तच्छब्देन स एवास्माकं वास्तवः पतिः अन्यस्तु लोकप्रतीतिमात्रमयः बाल्यमारभ्यान्यत्रास्मदीयभावाभावादिति व्यञ्जितं तदुक्तम् इति गोप्यो हि गोविन्दे इत्यादिना इत्यार्जवं तत्र मधुपुर्यामास्त इति प्रागयं प्रश्नश्चिरात्संदेशस्याप्यनागमनात् नतु केवलतयातिदूरगुरुकुलगमनश्रवणात् तच्छ्रवणे सति व्यग्रतया प्रथमं तदेव पृच्छ्येत नतु मानभङ्गी प्रसङ्गं लभेत यस्मादेव व्रजनरदेवेनापि तन्न पृष्टं तदश्रवणं च प्रथमं लब्धगायत्रीपुरश्चरणार्थं गुप्तवासव्याजेन तत्प्रख्यानात् स च व्याजः शत्रुभिरतिक्रान्तिभयात् व्रजस्थानामेषां महादुःखस्य च शङ्कितत्वादिति ज्ञेयं तदेवमन्यत्र गमनाज्ञानेऽपि सोऽयं प्रश्नस्तूपालम्भकं गाम्भीर्यं व्यनक्तीति गाम्भीर्यम् ननु देवि तत्रासौ सुखमास्त एवेति चेत्तर्हि अत्रत्यान् पित्रादीन् किं स्मरतीत्यन्यत् पृच्छति स्मरतीत्यादि एवमग्रेऽपि व्याख्येयं पूर्वस्मिन्नतृप्त्योत्तरोत्तरः प्रश्नोः ज्ञेयः तत्र पित्रादिस्मरणगर्भिततद्गृहस्मरणं पृच्छति। स मधुपुरीनिवासी रोचमानतत्पुराचिरवासो वा तत्र विलम्बमानो वा व्रजजनैकजीवातुर्वा आर्ययुत्रः पितुर्व्रजेन्द्रस्य गेहान् इति जन्मभूमित्वादिना स्मरणयोग्यतोक्ता बहुत्वं व्रजस्येतस्ततो गमनेन पुत्रसुखार्थं स्थाने-स्थाने विचित्रगृहनिर्माणात् श्रीनन्दीश्वराख्ये शैले एव दिव्यप्रासादवाहुल्याद्वा गेहशब्देन तत्स्थपितृमातृतल्लालनं तत्र स्वकीयबाल्यलीलादिकमुपलक्ष्यते बन्धून् ज्ञातीनुपनन्दादीन् गोपांश्च श्रीदामादीन् क्वचित्कस्मिंश्चित् स्थानेऽवसरे वा स श्रीदामप्रियसखोऽस्मत्प्रियनाथो वा गृणीते स्वमुखेनोच्चारयेदपि तत्र योग्यतामाह। किङ्करीणामिति। बहुधा कृतसेवानामिति दैन्यं बहुत्वं किंकरीणां बहुत्वात् विविधसुवहुवृत्तान्तगर्भवाक्यप्रबन्धरूपाः इति प्रत्येकं कथाः वैचित्र्या स्वत एव बाहुल्याच्च कथामिति पाठे एकामपि अगुरुसकाशादपि सुष्ठु गन्धो यस्य तादृशं भुजमिति ध्यानविशेषेण साक्षात् सौरभमनुभवन्तीवोत्कण्ठावेशं द्योतयति मूर्ध्निधास्यतीति दैन्यात् किङ्करीत्वमेव सर्वविघ्ननिवारणपूर्वकं स्थापयिष्यतीत्यर्थः। इति चापलं कदेति तत्रानिश्चयेन परमवैकल्यं सूचयति तत्रापि वितर्के नुशब्दो विचारतोऽप्यनिश्चयं सूचयतीति परमोत्कण्ठापरकाष्ठा दर्शिता पूर्वमार्य्यपुत्र इत्युक्त्या स्वस्य तद्वधूत्वं स्थापयित्वा सम्प्रतिकिंकरीत्वस्थापनप्रार्थना दैन्यादेव तात्पर्यं तु तद्वधूत्वं एव यथा नन्दगोपसुतं देवि पतिं मे कुरुते नम इति सङ्कल्प्यापि श्यामसुन्दर ते दास्य इति कुमारीभिरुक्तं तद्वत् तस्याहं गृहमार्जनीत्यादि श्रीकालिन्द्यादिवचनवच्च अन्यत्तैः। यद्वा वत खेदे अधुनापि मधुपुर्यामेवास्ते किमेतावन्तं कालं तत्र स्थातुं नार्हति किन्तु शीघ्रमागन्तुमर्हतीति भावः। यतः आर्य्यपुत्रः सौम्याश्च ते बन्धवश्च तान् इति सुप्रकृतित्वादिना स्मरणयोग्यतोक्ता॥ २१॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं निजप्राणनाथे सर्वसद्गुणमये विरहार्त्तिभरजनितक्रोधोद्रेकेण कठिनतरोक्त्या विशेषतः प्रेमवेगोदयेन परमार्त्ता सती सार्जवमिव सगाम्भीर्य्यं सदैन्यं सचापलं सौत्कण्ठमुच्चै रुदती पृच्छति—अपीति प्रश्ने; अस्य वाक्यत्रयेणैवान्वयः। वत

भो दूत; यद्वा, सुखमित्यर्थः। आर्य्यस्य श्रीगोपेन्द्रस्य पुत्रोऽस्मत्स्वामीति वा, प्रागयं प्रश्नः, मधुपुर्य्यामवस्थित्या नैकट्येन ब्रजागमनसम्भवात्। ननु देवि! तत्रासौ सुखमास्त एवेति चेत्तर्ह्यत्रत्यान् किं स्मरतीत्यन्यत् पृच्छति एवमग्रेऽपि व्याख्येयम्। पूर्वपूर्वस्मिन्नतृप्त्योत्तरोत्तरप्रश्नो ज्ञेयः। स मधुपुरनिवासी ब्रजजनैकजीवातुर्वार्य्यपुत्रः पितुः श्रीब्रजेन्द्रस्य गेहान् गेहानि, इति जन्मभूमित्वादिना स्मरणयोग्यतोक्ता, बहुत्वं ब्रजस्येतस्ततो गमनेन पुत्रसुखार्थं स्थाने स्थाने विचित्र गृहं निर्म्माणात्। यद्वा, नित्यनिवासमूलस्थाने श्रीनन्दीश्वराख्य एव दिव्यमहाप्रासादबाहुल्यात्, किंवा निकुञ्जाद्यपेक्षया। एवं पित्रोः स्मरणप्रश्नोऽप्यायात एव। यद्वा, पितरौ गृहांश्च निजान् स्मरति, तेषामेव तद्गृहत्वाद्विशेषणाप्रयोगः, यत्स्मरणेनापि तत्सम्बन्धेन निजस्मरणसम्भावनया, किंवा, स्वतस्तेषु स्नेहेनैव तत्स्मरणप्रश्नः। हे सौम्य! सोमवंशोद्भव! महाकुलप्रसूतत्वाद्वञ्चना न कार्य्येति भावः। बन्धून् ज्ञातीन् उपनन्दादीन् गोपांश्च श्रीदामादीन्। यद्वा, गोपानामेव विशेषणम्—बन्धून् सखीनिति। अयं स्मरणे हेतुः। क्वचित् कस्मिंश्चित् प्रसंगे स्थानेऽवसरे वा स श्रीदामप्रियसखोऽस्मत्प्राणनाथो वा गृणीते स्वमुखेनोच्चारयेदपि। तत्र योग्यतामाह—किंकरीणामिति। बहुधा कृतसेवानां किंवा स्वयमेव दासीभूतानामित्यर्थः। कथा इति बहुत्वं किंकरीणां बहुत्वात्, किंवा प्रत्येकं कथाया वैचित्र्या स्वत एव बाहुल्यात्। अगुरुसुगन्धमिति ध्यानविशेषेण साक्षात्तत्सौरभ्यमनुभवन्तीव भावविशेषं द्योतयति—मूर्ध्नि धास्यतीति स्पर्शविशेषापेक्षया, यद्वा, तन्मात्रेणापि कृतार्थतामननात्। तत्र च मूर्द्धनि सर्व्वांगश्रेष्ठे धारणस्यापि बहुमानात्। यद्वा, रासाभिप्रायेण कण्ठ इति वक्तव्ये लज्जादिना मूर्ध्नीति धारणे हेतुः। किंकरीणामित्येव तु प्रश्ने पूर्वमपीत्युक्तेऽपि पुनर्नुशब्दोऽत्यन्तार्त्तिप्रश्नात्। यद्वा, किंन्वित्यादिवत् कदाचिदित्येकमेव पदम्। एवं प्रश्नानां चतुर्णामेषां यथोत्तरं लालसाधिक्येन श्रैष्ठ्यमूह्यम्। अन्यत्तैर्व्याख्यातम्। यद्वा, वत खेदे, अधुनाप्यास्ते किम्? एतावन्तं बहुकालं तत्र स्थातुं नार्हतीति भावः। यत आर्य्यपुत्रः, सौम्याश्च ते बन्धवश्च तानिति सुप्रकृतित्वादिना स्मरणयोग्यतोक्ता, मूर्ध्नीत्येकत्वं लालसाविशेषेण दैन्यभरेणैव वा, केवलमात्मापेक्षया, मे इति साक्षादनुक्तिर्धाष्टर्य्य परिहारार्थं वैदग्धीविशेषेण वा, प्रेमभरस्वभावेनैव वेति दिक ।। २१ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अपि वतेति हर्षे। हे सौम्य! आर्यपुत्रः श्रीकृष्णोऽधुना मधुपुर्यामास्ते किम्पितृभ्याङ्गेहैश्च सहितान् बन्धून् गोपान् स्मरति च किं क्वचिदपि कदाचिदपि किङ्करीणां नोऽमाकं कथां वार्तां गृणीते किं कदा नु कदा वा अगरुवत्सुगन्धं भुजं नो मूर्ध्नि अधास्यन्निधास्यति ।। २१ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

इदं चोन्मत्तप्रलपितसममित्याह। अपीति। अधुना आर्यस्य पूज्यस्य वसुदेवस्य पुत्रः श्रीकृष्णः मधुपुर्यां वत लोकस्य मनः सन्तोषं विधाय आस्ते किं किञ्च स कृष्णः पितुर्नन्दस्य गेहम्भार्यां यशोदां तञ्च पितरं स्मरत्यपि किञ्च बन्धुभूतान् गोपांश्च स्मरति अपि च स कृष्णः क्वचित्कञ्चनकालमादाय किङ्करीणां नोऽस्माकं गृहीतोऽपि अनुग्रहं करोति किम्वद कोऽयमनुग्रह इति तत्राह। भुजमिति। कदा न अगुरुत्वत्सुगन्धं भुजमस्मन्मूर्ध्नि अधास्यत् धारयिष्यति तदापि वक्तव्यमित्यर्थः। यद्यागमिष्यत्तर्ह्यधास्यन्न सन्देहः तदागमनं कदान्विति पृच्छामीति वा ।। २१–२२ ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

निराकाङ्क्षतां प्रतिपादयन्ती निराकाङ्क्षमिव गच्छन्तं तं मत्वा पुनराह— अपि वतेत्यादि। अपि सम्बोधने प्रश्ने वा वत खेदे। हे सौम्य! आर्यपुत्रो ब्रजराजपुत्रोऽधुना मधुपुर्यामास्ते, किं ततोऽपि दूरं गत इत्यधुनाशब्दद्योत्यम्। मधुपुरी स्थितत्वे सुखलभ्या भवति तद्वार्त्ता। तत्रैवास्ते इति चेत् स किं पितृगेहान् स्मरति? पुस्त्वमार्षम्। स्मरत्येवेति चेन् गोपान् स्मरति स्मरत्येव। किं बन्धून् वयस्यान् स्मरति? स्मरत्येव। भद्रं भद्रम्। किङ्करीणां नोऽस्माकं क्वचिदपि प्रस्तावविशेषे कथां गृणीते कथयति? कथयत्येव। सततमेवेति चेत् कदा नु। भो नोऽस्माकं मूर्ध्नि अगुरुसुगन्धं भुजमधास्यत् धास्यति, विभक्ति-व्यत्ययः। इतः परं वाष्परुद्धकण्ठत्वात्तूष्णीमेव तस्थौ। अत्राप्युन्मादोऽङ्गी वितर्कौत्कण्ठ्यादयोऽङ्गानि संलाप उक्तिर्वैचित्र्यम् ।। २१–२२ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

निराकाङ्क्षतां प्रतिपादयन्ती निराकाङ्क्षमिव गच्छन्तं तं मत्वा पुनराह—अपि वतेत्यादि। अपि प्रश्ने बत खेदे। हे सौम्य! आर्यस्य वसुदेवस्य पुत्रः, न त्वधुना नन्दपुत्रः, स कथमस्माकं भविष्यतीति स्वरसः, अधुना मधुपुर्यामास्ते? किं ततोऽपि दूरं गत इति वाक्यशेषः। मधुपुरी-स्थितत्वे कदाचिद्वार्त्ता सुखलभ्या भवति, तत्रैवास्ते इति चेत्, स पितृगेहान् स्मरति? पुंलिङ्गमार्षम्; स्मरत्येव किम्? गोपान् वन्धून् स्मरति? स्मरत्येव किम्? अपि क्वचित् समयविशेषे किङ्करीणां नोऽस्माकं कथा गृणीते? अस्माकं स्मरणन्तु दूरमास्ताम्, कथां किं स्मरतीति वक्रोक्तिः। गृणीत एव, अन्यथा कथं प्रेषितोऽहम्? एवञ्चेत् 'भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु' इत्यौत्कण्ठ्यादये पर्याप्तिः ।। २१–२२ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हन्त हन्त मयोन्मत्तया किं प्रलप्यते प्रष्टव्यं तु न पृच्छ्यते इत्यनुतप्य ससंभ्रममाह। अपि वतेति। मधुपुर्यामास्ते ब्रजमिव तामपि त्यक्त्वा अन्यत्र किं स्विन्न यियासतीति भावः। इतः समीपवर्तिन्यां तत्र पुर्य्यां तस्य स्थितिरत्रागमनसंभावनामप्युत्पादयतीत्यभिप्रायेण। यद्वा सुखमास्ते इत्यनुक्तेरस्मत्प्रणयस्मरणव्याकुलोऽनुरोधवसादेव तत्रास्ते यत आर्य्यस्य यदुभिर्दुर्विनीतैः प्रतार्यमाणत्वात् सारल्यसमुद्रस्य श्रीब्रजराजस्य तदेकप्राणस्य पुत्रः हन्त हन्त मत्पितापि मां ब्रजं नेतुं नाशकत्तदहं तत्र गन्तुं कमुपायं करोमीति स्वविलम्बमसहमानस्त्वां प्रस्थापयति स्मेति भावः। तेन मधुपुर्य्यामास्ते इति तस्य को दोषः यत आर्यस्यातिसरलस्य स्वपरिणामदर्शित्वेनापि शून्यस्य नन्दस्य पुत्रः तादृशं पुत्रं तादृशः पिता यदुपुर्य्यां त्यक्त्वा ब्रजमायास्यतीति को जानाति यद्यज्ञास्यत् ब्रजराज्ञी सा तावदक्रूररथारूढैव स्वपत्रं कण्ठे कुर्वत्येव मथुरामयास्यत् तामनु गोपिकाश्रेण्यश्चेति ब्रजराजस्यार्य्यत्वमेवास्माकं सर्वनाशे करणमभूदिति भावः। अतस्तादृशस्यापि पितुरतिसरलस्य वसुदेवेन महाप्रतारकेणाच्छिद्य गृहीतपुत्रस्य ब्रजमागत्य मूर्च्छया पतित्वा स्थितस्य गेहान् कोशागाररन्धनागारशयनागारादीन् सम्प्रत्यमार्जितालिप्तत्वेन तृणधूलिपत्रलूतातन्तुवृतान् शून्यायितान स्मरति क्वचित् तथा गेहान्तरेषु बन्धून् सुबलादीन् सम्प्रति मूर्च्छितान् क्वचिदपीति यदा तस्य मनोऽभिरुचितं कैङ्कर्य्यं कर्तुं पुरस्त्रियो न जानन्ति तदैव तत्सुखमनुपलब्धवतीभिस्ताभिः सुखानुपलम्भकारणं पृष्टो नोऽस्माकं कथां गृणीते वनमालागुम्फने स्थासकसंपादने वीटिकानिर्माणे वीणावादने रागतालादिसृष्टौ गीतनृत्यरासादौ सौन्दर्य्यलावण्यवैदग्ध्यादिषु प्रश्नोत्तरविलासे संप्रयोगलीलायां प्रेमस्नेहमानप्रणयादिषु यथास्मद्ब्रजस्था गोप्यो मां सुखयन्ति न तथा यूयमिति गच्छत भो यदुस्त्रियः स्वस्वपतीनेवालमलं युष्माभिः अहं तु श्वः प्रातर्ब्रजमेव गच्छन्नस्मीत्युक्त्वा अत्रागत्य अगरुसुगन्धभुजमस्माकं मूर्ध्नि कदाधास्यत् धास्यति तेन च समाश्वसितः भोः प्राणप्रेयस्यः सशपथमिदमहं ब्रवीमि भवतीस्त्यक्त्वा न क्वापि यास्यामि त्रिभुवनमध्ये क्वापि युष्मत्सादृश्यगन्धदेशमपि नोपलब्धवानस्मीति व्यञ्जयिष्यति अत्र प्रथमे पादे आर्जवं द्वितीये स्वप्रसङ्गानुत्थापनेन गाम्भीर्यं तृतीयचतुर्थयोर्दैन्यचापलोत्कण्ठा इत्ययं संजल्पः। यदुक्तम् "यत्रार्जवात् सगाम्भीर्यं सदैन्यं सहचापलम्। सोत्कठं च हरिः पृष्टः स सुजल्पो निगद्यते" इत्येवं दशविधो दिव्योन्मादप्रभेदश्चित्रजल्पो ज्ञेयः स च दिव्योन्मादो महाभावोत्कृष्टभागस्य मोहनस्य विलासविशेषो वृन्दावनेश्वर्यां वर्णितः—

प्रायो वृन्दावनेश्वर्यां मोहनोऽयमुदञ्चति। एतस्य मोहनाख्य गतिं कामप्युपेयुषः॥
भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्य्यते। उद्घूर्णा चित्रजल्पाद्यास्तद्भेदा बहवो मताः॥
प्रेष्ठस्य सुहृदालोके गूढरोषाभिजृम्भितः। भूरिभावमयो जल्पो यस्तीव्रोत्कण्ठितान्तिमः॥
चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितः। विजल्पोज्जल्प सञ्जल्पः अवजल्पोऽभिजल्पितम्॥
आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्तितः। इति

प्रेयस्याश्चित्रजल्पमाधुरीपिपासया कृष्ण एव भ्रमररूपमधादिति केचित्॥ २१-२२॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

ननु युष्मांस्तत्र नेष्यामीत्यङ्गीकृतवन्तमिव मत्वाहापीति। सम्भावनायामपि वतेति हर्षे उपनीतो भगवान् विद्याध्ययनार्थं गत इति श्रुतं तत आगत्याधुना आर्यस्य नन्दस्य वसुदेवस्य वा पुत्रो मधुपुर्य्यामास्ते भर्तृत्वेन नामाग्रहणम् अस्मद्गमनपर्यन्तं तत्र स्थास्यति न वेति संदेहाद्वा प्रश्नः। विद्यमानोऽप्यन्याभिनिविष्टश्चेन्नास्मासुखावह इति स्वस्मिन्नभिनिवेशजिज्ञासार्थं पृच्छति। स्मरतीति। यद्वा अहो कामाक्रान्तस्वान्तत्वादुन्मत्तया मया वृथैवैतत्प्रलपितं प्रष्टव्यं तु न पृष्टमिति पश्चात्तापेन सरलहृदया सती ससम्भ्रमं पृच्छति। अपि वतेति। वतेत्याश्चर्ये आर्यपुत्रोऽधुना मधुपुर्य्यामास्ते किम् अहो अस्माभिर्ज्ञातं ततोऽप्यन्यत्र गतः नो चेन्निकटस्थाने वसन् किमिति चास्मद्दृष्ट्या तत्र नास्त्येवेति व्यङ्ग्यम् यद्वा आर्यस्य वसुदेवस्य पुत्रः सन्नधुना मधुपुर्य्यामेवास्ते किं वा नन्दराजपुत्रत्वं परित्यज्यवसुदेवपुत्रः सन् यथेतो मथुरायां गतस्तथा तत्पुत्रत्वमप्यपहायान्यपुत्रः सन् ततोऽप्यन्यत्र गत इति व्यङ्ग्यम्। यद्वा तत्र तस्य स्थितौ निकटवर्त्तित्वात्तदागमनस्यापि सम्भावना वर्तत इति कृत्वैवं पृच्छामीति भावः। यद्वा सुखमास्त इति वक्तव्ये तत् स्थितिमात्रं पृच्छन्त्या अयमाशयः अस्मत्प्रेमातिरेकस्मरणव्याकुलमानसोऽसौ तत्रत्यानुरोधेनैव तत्रास्ते न सुखपूर्वकमित्यहं जानामि यत आर्यस्यातिसरलस्य वसुदेवादिकृतं प्रतारणमजानतस्तदेकप्राणस्य पुत्रः अहो मत्पितापि व्रजं प्रति मां नेतुं नाशकत् उपायान्तरं च नास्त्यतः किं कर्तव्यमित्युत्कण्ठया व्याकुलमना यथाकथञ्चिच्चित्तसमाधानाय त्वां प्रेषितवान् अहो प्राणप्रियपुत्रपरित्यागपरिणामाज्ञानरूपसरलता श्रीनन्दरायस्य न ज्ञाता नोचेत्तन्माता स्वपुत्रं कण्ठे कुर्वन्त्येव मथुरामयास्यत् तामनुगोपिकाश्रेण्यश्चेति व्रजराजार्यत्वमेवास्माकमनर्थकरं जातमिति अतः पितृगेहान् स्मरति पितुरतिसरलस्य वसुदेवेन महाप्रतारकेणाच्छिद्य गृहीतपुत्रस्य व्रजमागत्य मूर्च्छयानिपतितस्य गेहान् कोशागारधनागारादीन् सम्प्रत्यमार्जितालिप्तत्वेन तृणधूलिपत्रलूतातन्तु

वृतान् शून्यायितान् स्मरति कच्चित् हे सौम्य ! स्वविरहव्याकुलमानसान् मूर्च्छितप्रायान् बन्धूनुपनन्दादीन् गोपान् श्रीदामप्रभृतान् तव दर्शनेन किं चित्तापोपशमनं जातमिति संबोधनाशयः । यद्वा सौम्याश्च ते बन्धवश्चेति स्मरणयोग्यतासूचनाय विशेषणं चकारात् गोवर्द्धनादिसंग्रहः स अस्मत्प्राणनाथः क्वचिद् देशे काले वा उपहासकथायां लौकिककथायां वा नोऽस्माकं कथां गृणीते स्वमुखेन कथयति तत्र योग्यतामाह । किङ्करीणामिति । बहुधा कृतसेवानाम् अस्मद्वत्कैंकर्य्यं कर्तुमसमर्थाभिः पुरस्त्रीभिरुदासीनं तमालक्ष्यौदासीन्यकारणे पृष्टे अस्माकं किङ्करीणां कथां गृणीत इति भावः । वार्ताकथनेन स्मृत्यात्मिकां तदन्तःकरणवृत्तिं विज्ञातवानस्यतः कथयेति भावः । यद्वा अस्मान्नेतुं किमर्थं त्वमागतः स एव कुतो नागत इत्याशयेनाहापीति । बतेति खेदे विस्मये वा आर्यपुत्रोऽधुनापि मधुपुर्य्यामेवास्ते कंससंहाररूपस्य कार्यस्य जातत्वादेतावत्पर्य्यन्तं तत्र किमर्थं स्थितः अत्र कुतो नागतः आर्य्यपुत्रोऽपि मधुपुर्य्यामपीत्यनेनार्यस्य पितुरत्रागतत्वान्मद्यपानादिविमुक्तपुत्रत्वाच्च मद्यपप्रधाने पुरे किमर्थमास्त इति ध्वनितं ननु तदीयं चित्तं तत्र संलग्नमतो नागत इति चेन्न, तदीयं मनोऽहं जानाम्यतोऽत्र स्थितापि तदन्तःकरणवृत्तिं ब्रवीमीत्याशयेनाह । स्मरतीति । पितृगेहतुल्यानां स्वक्रीडायोग्यस्थानानामलाभेन पितृगेहादिविरहव्याकुलचित्त एव तत्रास्त इत्यहं जानामि दुःखितस्य तत्र निरोधो भवतां नोचित इति सूचनाय सम्बोधयति हे सौम्येति । यद्वा स आर्यपुत्रोऽधुना मधुपुर्यामास्त इत्येव ननु तत्स्थित्या तस्य तत्रत्यानां वा कश्चिदुपकारोऽस्ति सर्वदा पितृगेहादिस्मरणादिना व्याकुलचित्तत्वादित्याशयेनाह । स्मरतीति । यद्वा मधुपुर्य्यां प्रियस्य स्थितिं जानत्यपि प्रयोजनाभावात्तत्रास्ति न वेति न जानामीति स्वगाम्भीर्यद्योतनायाजानतीव पृच्छति । मधुपुर्य्यामिति । सर्वमेवमेवेत्यङ्गीकृतमिवालक्ष्याह । भुजमिति । तादृशक्रीडायोग्यस्थानानां तथाविधबन्धुगोपादीनां वनमालागुम्फनवीटादिनिर्माणगीतनृत्यरससौन्दर्य्यलावण्यवैदग्ध्यप्रश्नोत्तरविलाससम्भोगलीलारासक्रीडाविलासादिसहस्रगुणाढ्यानां चात्रादर्शनान्मम मनो नात्र लगति श्वः परश्वो वा व्रजमेवाहं गन्तेत्युक्त्वाऽत्रागत्य अगरुसुगन्धं भुजमस्माकं मूर्ध्नि कदा अधास्यत् धास्यति तेन समाश्वासयेत् भो प्राणप्रेयस्यः सशपथमहं ब्रवीमीतः परं भवतीस्त्यक्त्वा क्वापि न यामि लोकत्रये युष्मत्सादृश्यगन्धलेशस्याप्यनुपलम्भनादिति पूर्वमपि तिरोहितः पुनश्चाविर्भूत इति कृत्वा तद्वत्तदागमनाशा मम महती वर्त्तते इति भावः । "यत्रार्जवं सगाम्भीर्यं सदैन्यं सहचापलम् । सोत्कण्ठं च हरिः पृष्टः स सुजल्पो निगद्यते" इत्युक्तत्वादत्र सुजल्पः उद्धवपक्षेऽपि समानं श्रुतिपक्षे । अथ स्वस्वरूपभूतं परमात्मानं विस्मृत्य देहादावहं ममाभिमानवन्तं जीवात्मानमालक्ष्य सखेदमाहापीति । "कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः। ममैवांशो जीवलोके जीतभूतः सनातन" इत्यादिश्रुतिस्मृतिभ्यामार्यस्य परमात्मानः पुत्रः अंश इवांशः भगवानधुना अज्ञानावस्थायां मधुपुर्य्यां मधुलवसदृशविषयरसोपभोगायतनभूतदेहलक्षणनवद्वारनगर्य्याम् आस्ते अहमेवेति तादात्म्याध्यासेन तद्रूपो भूत्वा तिष्ठति मधुपुर्य्यामपीत्यपिशब्दोऽत्यन्तविलक्षणेन देहेन तादात्म्यमत्यन्तानुचितमिति द्योतयति अधुनापि अधिकारिशरीरं लब्ध्वापि देहादितादात्म्यं न त्यजसीति वापिशब्दार्थः आर्यस्य सर्वत्र पूर्णस्य परमात्मानः पुत्रस्तदात्मभूतः "आत्मा वै पुत्रनामासी"तिश्रुतेः तथाभूतोऽपि किं देहमात्रपरिच्छिन्नाभिमानेन परिच्छेदं प्राप्तोऽसीति वापिशब्दार्थः । तदनुरूपैव तव प्रवृत्तिर्दृश्यत इत्याह । स्मरतीति । पित्रा परमात्मना निर्मितान् गेहान् गृहान् भूरादिलोकांश्च स्मरति हे सौम्य ! बन्धून् सहोदरादीन् बान्धवान् चकाराद्भार्यापुत्रादीन् गोपान् तत्तद्विक्यसम्भोगार्थं तत्तदिन्द्रियाधिष्ठातृदेवान् स्मरति न तु स्वस्वरूपभूतं परमात्मनं कदाप्यनुसन्धत्ते क्वचिदपि अहो देहाद्विलक्षणोऽहं स्वकर्मानुसारेण स्वर्गनरकभोक्तेति विद्वद्दशायामपि नोऽस्माकं किङ्करीणां स्वर्गकामो यजेतेत्यादिकानां श्रुतीनां कथां गृणीते न त्वस्माकम् अतो ऽस्माकं महत्युकण्ठा वर्तते अगरुसुगन्ध तत्स्थानीयं साधनचतुष्टयसम्पत्तिसम्पन्नं भुजस्थानीयमन्तःकरणं श्रुतीनां मूर्ध्नि मस्तके कदा अधास्यत् धास्यति । यद्वा प्राप्ताधिकारिशरीरं जीवात्मानमालक्ष्येदं शरीरमासाद्य स्वोद्धार एव त्वया कर्तव्य इति ससम्भ्रममाहापीति । अधुना आर्यपुत्रो भवान् ब्रह्मानन्दपर्यन्तमधुमात्रसाधनभूतायां मनुष्यशरीरलक्षणपुर्य्यामास्ते अपि वतेत्यलभ्यलाभोक्तिः तत्रापि सर्वविवेकसमर्थोऽसीत्याह । स्मरतीति सर्वयोग्यतां त्वयि दृष्ट्वाहमत्युत्कण्ठितास्मीत्याह । भुजमिति । यद्वा हितोपदेशमाकर्ण्य देहाद्यभिमानं विहाय भगबदाराधनपरायणं जीवात्मानमालक्ष्य तत्पराक्रमानुवादपूर्वकमुर्वरितग्रहणे स्वोत्कठामाविष्करोति । अपिवतेति । बत हर्षे मधुपुर्य्यां सर्वासक्तिस्थानभूतायामपि देहलक्षणपुर्य्यामार्यपुत्रः भगवदंशभूतो देहादिविलक्षणो नगरस्थानीयदेहस्वरूप इत्येवमास्ते तत्र स्थितिरपि तव न भोगायापितु भगवदाराधनायेत्याह । स्मरतीति । पितुः परमेश्वरस्य गेहान्मथुराद्वारवत्यादिरूपान् यद्वेमान् देहान् चतुर्दशभुवनानि पितुर्गेहान् देवालयभूतान् स्मरति हे सौम्य ! तद्बन्धून् वलदेवादीन् चकारान्दादीन् गोपान् श्रीदामप्रमुखान् स्मरति किङ्करीणां गोपाङ्गनानां कथां च भवान् क्वचिद्गृणीते । यद्वा बन्धून् गोपात्मकान् स्मरति नोऽस्माकं श्रुतीनां मध्ये किङ्करीणां भगवत्कैङ्कर्य्यप्रतिपादिकानां सर्वदा भगवत्परायणो भवानस्ति अतोऽवशिष्टमपि सम्पादयतु अगरुसुगन्धम्भुजं निरुक्तमन्तःकरणं श्रुतिमस्तके कदाधास्यत् ॥ २१ ॥

गूढार्थदीपिनी

अपि किम् । बत हर्षे । आर्यस्य नन्दस्य पुत्रः श्रीकृष्णः । नु वितर्के अगुरुतोऽपि सुगन्धं भुजं शिरसि कदा अधास्यत् धारयिष्यति ॥ २१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या अतिस्निग्धस्वभावा आहुः। अपीति। हे सौम्य! आर्य्यपुत्रः श्रीकृष्णः अधुना मधुपुर्याम् आस्ते सः श्रीकृष्णः पितृगेहादीन् स्मरति क्वचित्सः अस्माकं प्रियः नोऽस्माकं किङ्करीणामपि कथा गृणीते ब्रूते अगुरुवत्सुगन्धं भुजं नो मूर्ध्नि कदा नु धास्यत् धास्यतीति ॥ २१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वाभीप्सितं स्मरपरवती प्रकाशयति ॥ अपीति। अधुनाऽऽर्य्यपुत्रः श्वसुरसुतो मधुपुर्यामपि गुरुकुलवासत आगत्याप्यान्ते बत सुखेन हे सौम्य स पितृगेहं स्मरति किं पित्रा सहितं च तद्गेहं गृहिणीं यशोदां च। बन्धून्गोपांश्च क्वचिदपि स वासुदेवो नोऽस्माभिर्यः प्राग्गृहीतस्तमगुरुसुगन्धं सु शोभनश्चासौ सौगन्धश्च। अगुरुणा सुगन्धो यस्य स तम्। अगुरोरपि सुगन्धो येन तं वा भुजं किङ्करीणां मूर्ध्नि शिरसि कथं कदाऽन्वधास्यदिति पृच्छामि त्वामिति भावः। स कथं ससल्लापं गृही गृहस्थाश्रमीतः प्राप्तः कदा नु नः किङ्करीणां मूर्ध्न्यगुरुसुगन्धं चम्पककुसुमसौरभ्यमिव न नाशिकावमर्दहेतुगन्धसहितं भुजं क्वचिदपि त्वं करं धारयितुर्माधवस्य किमुपकुरुष इत्यत आह ॥ हे कदेति। सुखदेति आनु आनुमो गते उ सुगन्धं नारायणीतरुतरुणीरूपधारणसमये शोभनश्चासौ गन्धश्च ओ रुद्रस्य सुगन्धो येन तं मधुपुर्यामधुनाऽगुरङ्गनास्तमिति वा। भवद्भर्तारो वर्तन्ते गृहे किमेतत्कामनया कामिन्य इत्यत आहुः। यः स्मरति मन्मथवदाचरति स इति सौन्दर्यसागर इति न तत्स्पृहा हातुं शक्येति भावः। अगुरुरित्यपपाठः। रूपं प्राङ्निरूपितमनुसन्धेयं। धन्याकमगुरुर्वा पुंसि लघु नाम चेति वोपालितः। अगुरुर्जाङ्गके लवाविति हैमः। अगुरु क्लीबे शिंशुपायां नोऽङ्गके लघुनि त्रिष्विति रुद्रः ॥ २१ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सुखेन नेष्यामीति स्वीकृतवन्तमिवाह। अ प बतेति। अपीति सम्भावनायां बतेति हर्षे भगवान् उपनीतो विद्यार्थङ्गत इति श्रुतं ततः समागत्य मधुपुर्यां पुष्टिपुर्यामार्यस्य नन्दस्य वसुदेवस्य वा पुत्रः भर्तृत्वेन नामाग्रहणं सत्कुले प्रादुर्भूतः नास्मांस्त्यक्ष्यतीति भावः। अधुना किमास्ते अथवा नीत्वा यावदागमनं स्थापयिष्यतीति सन्देहात्प्रश्नः विद्यमानोऽप्यन्याभिनिविष्टश्चेत् न कार्यं सेत्स्यतीत्यभिप्रायेणाह। स्मरति स पितृगेहानिति। तदा गोकुलस्मरणादस्मत्परत्वं बहुवचनेन स्वच्छन्दरमणमपि सूचितम् एवं वचनं पुरुषान्तरम् अयुक्तमित्याशङ्क्याह। सौम्येति। सम्बोधनं व्याजेन पृष्ट्वा विशेषतोऽपि पृच्छन्ती आह बन्धूंश्च गोपानिति। नन्दगोत्रिणो बान्धवाः अन्ये च गोपाः चकाराद्गोकुलस्थाः सर्वे तदाभिनिवेशो ज्ञायत इति एवं पृष्ट्वा पुनः स्थातुमशक्ता स्ववार्त्तामपि पृच्छति। क्वचिदपीति। रसभावकथायां लौकिककथायां वा पूर्वस्वामी नोऽस्माकं सर्वासां कथामपि स्मरणे हेतुः किङ्करीणामिति। नन्वन्तः करणवार्त्ता कथं ज्ञायत इत्याह। गृणीते क्वचिदिति। तथोत्तरं दत्तमिति ज्ञात्वा पूर्वमपि परमसन्तापानन्तरं प्रादुर्भूतमिव कथं द्रक्ष्यामीति मनोरथाभिलाषमाह। भुजमगरुसुगन्धमिति। कदा वा अगरुसुगन्ध भुजम् अगर्वपेक्षया वा अगरुणा वा कदा वा पुनः मूर्द्ध्नि अधास्यद्धास्यति ॥ २१ ॥

श्रीसुबोधिनी-सारः

बत हर्षे आर्यस्य वसुदेवस्य पुत्रः कृष्णो मधुपुर्यां मथुरायाम् अधुनास्तेऽपि किं हे सौम्य पित्रादीन् स्मरति किं क्वचिदपि प्रस्तावे किंकरीणां कथा वार्त्ता गृणीते वदति किम्। अगुरुवत्सुगंधं भुजं नोऽस्माकं मूर्ध्नि शिरसि कदा नु अधास्य धास्यति ॥२१॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

प्रणयकोपं विहाय शान्ता सत्याह—अपीति सम्भावनायाम्, बतेति हर्षे, नन्विति वितर्के। उद्धवे स्वस्नेहं सूचयन्ती सम्बोधयति—सौम्येति। आर्यस्य पूज्यस्य नन्दस्य पुत्रः भक्तत्वेन स्वीकृतत्वान्नामाग्रहणम्, उपनीतः सन् विद्याग्रहणार्थं गत इति श्रुतम्। ततो गुरुगृहादागत्य अधुना किं मधुपुर्यामास्ते? पितृभ्यां गेहैश्च सहितान् बन्धून् गोपान् किं स्मरति? क्वचित् कदाचिदपि किङ्करीणां नोऽस्माकं कथां वार्तां स गृणीते?। एवं वृत्तं पृष्ट्वा मनोरथं करोति—कदा वा अगुरुवत् सुगन्धं स्वभुजं नो मूर्ध्नि अधास्यत् निधास्यति इति ॥ २१ ॥

अन्वितार्थप्रकाशिका

अपीति ॥ अपि बत प्रश्ने। हे सौम्य! आर्यस्य नन्दस्य पुत्रः उपनीतः सन् विद्याग्रहणार्थं गत इति श्रुतं ततो गुरुगृहादागत्याधुना किं मधुपुर्यामास्ते? पितृभ्यां गेहैश्च सहितान् बन्धून् गोपान् किं स्मरति। यद्वा सः पितरौ तद्गेहांश्च स्मरति किम्? पितुर्गेहानिति वा अत्र गेहस्य पुंस्त्वमार्षम्। वाक्यभेदात्स इति पौनरुक्त्यं न दोषः। क्वचित्कदाचिदपि सः किङ्करीणां नोऽस्माक कथा वार्ता गृणीते। एवं वृत्तं पृष्ट्वा मनोरथं करोति। कदा वा अगुरुमिव अगुरुतोऽपि वा सुगन्धं स्वभुजं नो मूर्ध्नि आध्यास्यत् निधास्यति। अत्र कृष्णस्य सन्देशैस्ताः सान्त्वयन्नुद्धव इदं वक्ष्यमाणमभाषत ॥ २१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यद्यप्येवमस्ति तथापि येन केनापि प्रकारेणतत्समागम एव श्रेयानित्यभिप्रायेणाह अपीति। अपीति प्रश्ने बतेत्यानंदे हे सौम्य आर्यपुत्रो वसुदेवनंदनः रामानुजः मधुपुर्यो अधुना आस्तेव सति श्रीकृष्णः पितृगेहान् पितृवत् लालनत्वात् रक्षकत्वाच्च पितुर्नंदस्य गृहान् यद्वा पितरौ नंदयशोदे तद्गृहांश्च बधून् वयस्यान् गोपांश्च स्मरति कच्चिन्कादाचिदपि स गोपी बिहारी किंकरीणां सेवानुकूलानां नोऽस्माकं कथाः रहस्यगोष्ठयीः किं गृणीते स्वसुखेन कथयति अगरुतोपिसुगंधमतिगंधयुक्तं भुजं नो मूर्द्धिन मस्तके कदा अधास्य तथास्यति ॥ २१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तेन सम्मन्त्रिता सतीव ब्रते ॥ अपीति ॥ अपि बतेति हर्षे। हे सौम्य, आर्यपुत्रो वसुदेवपुत्रः, सः श्रीकृष्णः, अधुना मधुपुर्यां, आस्ते किम्। माता च पिता च पितरौ, पितरौ च गेहाश्च तान्, गेहशब्दस्य पुंस्त्वमार्षम्। मातापितरौ तद्गेहं चेत्यर्थः। बन्धून् गोपांश्च, स्मरति अपि। कच्चिदपि, स कृष्णः, किंकरीणां नोऽस्माकं, कथां वार्त्तां, गृणीते ब्रूते किम्। अगुरुवत् सुगन्धस्तं भुजं, मूर्द्धिन अस्माकं मस्तके, कदा नु कदा वा अधास्यत् निधास्यति ॥ २१ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अपि बतेति : १०.४७.२१.

यथा धास्यति हस्ताब्जं स्वमस्मिन् मूर्धसु प्रभुः। तथाऽले कुरु तद्बोधं श्रुतिमञ्जुस्वरोऽसि यत् ॥ ५४ ॥
स्वीयाङ्घ्र्यब्जवियोगदुःस्थमनसा-मासामपास्तांहसां शेषक्लेशविशेष-शोषणकृते स प्राहिणोदुद्धवम्।
बाह्यार्थोऽयमिहाऽन्तरस्तु पुरतो वाच्यात्मविद्याधिकारायेति श्रुतिबोधितोऽप्यनुपदं द्रष्टव्य एवंविधः ॥ ५५ ॥
जारिण्यो मदनाहताः कथमिमाः प्राप्तात्मतत्त्वाः स्त्रियोऽपीत्यन्तर्भ्रममेष राति भगवद्भक्तो मुधैवोद्धवः।
संचिन्त्यैव मनङ्गवैभवजुषः श्रुत्यन्तरङ्गास्तदा प्रोचुस्तं भ्रमरं प्रकल्प्य परमार्थं साधुबोधाय तत् ॥ ५६ ॥
रे सत्तत्त्वमसि भ्रमिष्ठ वितथो बन्धोऽयमात्मस्थितीरस्मान् मा स्पृश सद्रजोयुततमोभागै रविद्योदितैः।
वृत्तीनां वहतु प्रसादमनिशं सोऽन्तर्नियन्ता प्रभुस्तादात्म्यावगतौ च सत्त्वमिति तद्वाच्यं विडम्ब्यं न किम् ॥ ५७ ॥
महावाक्यानुपूर्वीकं पद्यमाद्यमुदीरितम्। तत्तत्पदं विभाव्यैवमग्रेऽपीद्दृयं लघूच्यते ॥ ५८ ॥
मोहोत्पत्त्यैकहेतुः सुरसदनसुधा काम्यकर्मोद्भवा या तां नो निक्षिप्य वक्त्रे प्रवचनकुशले स स्वयं त्यक्तसङ्गः।
संसारादत्तदृष्टिस्त्वमिव सुमनसः संजहाति स्म चास्मान् मायाप्यस्मन्मुखोक्तोत्तमगुणकपदाश्लेषतः श्लिष्यतीशम् ॥ ५९ ॥
कामक्रोधमुखारिषट्चरणभाक् किं स्तौषि शाब्दं महश्चेतोहार्य-निशान्तसंस्थितिजुषा-मस्माकमग्रे मुधा।
तत्त्वे दृष्टिमनामयेऽतिविमलां धत्स्वाऽऽत्मरूपे भज स्वेशं वाऽनघतद्गुणौघरसिकः स्वार्थोऽर्थतस्ते ततः ॥ ६० ॥
क्षुद्राः क्षुद्रदृशः स्त्रियः स्युरखिलास्तद्वश्यभूता इति किं वाच्यं च रमा हि या निजगुणव्याप्तत्रिलोकान्तरा।
साऽप्यस्यास्ति वशेति तस्य पुरतः का वा गुणैरुत्तमान्नूमोऽस्मिन् वयमित्यथापि शरणाङ्गीकारपक्षेवराः ॥ ६१ ॥
तत्पादं हृदि वाऽनघे शिरसि वा संधार्य यागैरङ्कारश्रीभिरलं यदुज्झित-ममत्वाहङ्कृतेरप्यसौ।
दुष्प्राप्योऽत्र निदर्शनं वयमले हृद्वृत्त्यवेद्यो हि यस्तद्वाच्यांशविशेषपोषितमतिस्त्वं चेति किं ब्रूमहे ॥ ६२ ॥
कुर्वन् कर्माऽप्यकर्ता सकलगुणनिधिर्निर्गुणः सन्नपि स्त्रीवश्योऽप्यस्पृष्टयोषिद्रतिरतुलबली लाघवानूनवृत्तिः।
निष्पापोऽपाणिपादो ग्रहणगतिकरो धर्मभृद्धर्मभक्त्या तस्यैवं भूरिधर्मांच्छृणु मधुप विरुद्धांस्त्वमस्मन्मुखेन ॥ ६३ ॥
लिखित इव यदास्ते तत्कथार्थोऽयमस्मद्धृदयभुवि सदाऽले दुःशकोऽतो विहातुम्।
त्वमतुलरसकामश्चेद् विरुद्धप्रधानैस्तदलमसितसख्यैः पीयतां सत्त्ववृत्त्या ॥ ६४ ॥ (युग्मम्)
दृष्ट्वा बलिं तदुपभुक्तिकृते स्वशब्दैरन्यानसौ बलिभुजो ह्वयते कृतार्थः।
अत्ति स्वयं क्वचिदनत्ति च काकधर्मं जानत्य एवमुपमां ददुरिन्दुवक्त्राः ॥ ६५ ॥
एवं चेत्तत्कथार्थो लिखित इव कुतोऽकार्यसौ स्वीयहार्दे शङ्केथा नैवमस्ति प्रचुरतररसोऽन्योपकारः सदा नः।
लेखः केनापि कृत्स्नस्त्वयमिह कलितो नैव तल्लेशभाजोऽप्यानन्दामग्नचित्ताः कति कति न जनाः सन्ति पश्य त्वमन्तः ॥ ६६ ॥
स द्वन्द्वोऽयं विरुद्धोऽपि च यदपि मिलिन्दास्ति लेखस्तथापि निर्द्वन्द्वं चाविरुद्धं फलति फलमिहानन्दसंसारगर्भम्।
पश्यास्मल्लेखचित्ताः कति जगति न वा सन्तोऽनुभूततादृङ्मुख्यार्थसौख्या सुरतरुचिरमाः पक्षिवद्भिक्षवश्च ॥ ६७ ॥
यद्वाऽस्मद्धार्दवेद्या - मविकलरचिता - मद्भातानन्तचेष्टां चापश्यन्तो यथार्थं स्थितिमगुरुदृशः किञ्चिदंशावलम्बात्।
धन्यंमन्या विहङ्गा इव जडमतयो व्यर्थमुत्सृज्य दीनं स्पष्टं स्वेष्टं कुटुम्बं कति न परिचरन्त्यत्र मा त्वं तथा भूः ॥ ६८ ॥
कृतकमपि तदीयं चेष्टितं श्रद्दधानाः किमिति सदिव यूयं दर्शयध्वे मुधेति।
अतिगहनविचारै - रेभिरस्मन्मनस्थैरलमिह हि वदान्यद् यद् द्वयोरिष्टकृत् स्यात् ॥ ६९ ॥

अस्मान् द्रष्टुमुतास्मदुक्तिमनघां श्रोतुं तथाऽस्मन्मनस्तात्पर्यं ह्यवगन्तुमुत्सुकमतिर्यस्मादसि त्वं ततः ।
अन्तर्यामि - परेशपूर्णकरुणापात्रं सखे निश्चितं तन्मान्योऽसि जगत्त्रयेऽपि किमु नस्तत्प्रार्थ्यताप्सितम् ॥ ७० ॥
अस्मानाश्रितसद्द्वयश्रिश्रय इह प्रेष्ठेन तेनानिशं श्रीनाथेन सहाद्य सङ्गमयितुं यत्काङ्क्षसि त्वं हृदि ।
तत् स्याद्द्वयभावगर्भ - सुरतावस्थान - मत्युज्ज्वलं कीदृग् वा कथमित्यले न सुमनो धैर्यं समालम्बते ॥ ७१ ॥
मन्निष्ठाः मत्कृतज्ञा मदनघनरतोत्साहचित्ताः सदैव मत्प्रीत्यै गोकुलान्तर्विलसिततनवो मत्पदप्राप्तिकामाः ।
सहास्यः श्रीपतेर्मे यदिह भुवि सहैवास्तु भव्यं तदासामित्यस्मद्वृत्तिभावस्मृतिरपि यदि ते प्रेयसस्तत्कृतार्थाः ॥ ७२ ॥
यावत् सद्द्वैतभावो लसति मृदुपदश्रौतघोषो मनोज्ञो जिज्ञासोस्तावदेवा - ऽखिलखसुखकरो - ऽखर्वसर्वार्थदश्च ।
विज्ञायैवं विदेहस्थितरपि मनुजः संयतेतास्ततन्द्रं जीवन्मुक्तावितीमाः पितृपदघटितैर्भेदभावं विवव्रुः ॥ ७३ ॥
अद्वैततात् सुखमतिशाय्युपासनाढ्यं द्वैते त्वित्यतिविशदं वचोभिरासाम् ।
यत्प्राक्तत्सुखमनुभूय तादृशस्तास्तं प्रोचुर्भण सुखदामिहान्यवार्ताम् ॥ ७४ ॥
एवं गोपीभिरुदितैः श्लोकैर्दशभिरीरितः । दशोपनिषदर्थोऽत्र दिग्दर्शि विमृश्यताम् ॥ ७५ ॥
अर्थोऽयं सम्मतः श्रीमद्व्यासस्य च शुकस्य च । तत्तादृक्पदविन्यासाद्भाति मेऽनीर्ष्यमीक्ष्यताम् ॥ ७६ ॥
गोकुलालङ्कृता दिव्या अथवा दशदेवताः । जीवमेवं बोधयन्तीत्येवं वा योज्यमादितः ॥ ७७ ॥
उत्फुल्लान्तरपद्मिनीहृदयभूप्राप्तोदयं निर्मलं श्रीमद्विष्णुपदोच्छ्रितं निरुपमामोदं सुगीतं रसम् ।
पातुं सच्छ्रुतिवक्त्रतः कृतमनाः सत्यं द्विरेफोऽभवत् सोऽपि श्रीधरकिङ्करोऽतिरसिको हर्यङ्घ्रिपद्मस्थितः ॥ ७८ ॥
अन्यान् स वृष्णिनिवहानपहाय कृष्णस्तत्रोद्धवं प्राहितवानिति चिन्तयानः ।
यत्सत्यमद्वयतत्त्वविदः किलैतास्तद्द्वारतोऽवमचिराद्भविताऽधिकारी ॥ ७९ ॥
एवं हि तत्प्रथितमर्थमबाधसारं जिज्ञासुरात्मनि कृतार्थ इवानुभूय ।
ईशाशयं विशदयन्नवदत् स चोत्कस्ताः सर्वकिल्बिषमुषः प्रणयेन योषाः ॥ ८० ॥
तत्प्रेमभावमतुलं भगवत्यवेक्ष्य सामान्यचित्तमपि सद्रवतामुपेयात् ।
श्रीनाथभक्तिरतसंभृतचेतसोऽस्य चित्त तथाऽभवदलं किमिवात्र चित्रम् ॥ ८१ ॥
असीममेव तत्प्रेम प्रभौ यच्छ्रवणादहो । उद्धवस्यापि यदभूदुद्धवोऽन्यस्य कथा ॥ ८० ॥

कृष्णप्रिया

श्रीउद्धवजी ने कहा कि प्रियतम श्रीकृष्ण के पास आपको अवश्य ले चलूंगा यह सुनकर श्रीगोपीजी ने कहा हमने सुना है कि श्रीनन्दनन्दन–श्रीवसुदेव नन्दन आर्यपुत्र श्रीकृष्ण यज्ञोपवीत संस्कार धारण करके गुरु कुल में पढ़ने के लिए गए हैं वहाँ से लौट कर पुष्टिपुरी मधुपुरी में विराजते होंगे और कुशल होंगे। आप ठाकुरजी के अन्तरङ्ग हो, तो बताइए कि कृष्ण कभी पिता माता बान्धव गोपजन आदि का स्मरण करते हैं ! और यह भी कहिए कि हम किङ्करिणां को कभी स्मृति करते हैं ? हे सौम्य ! और दयालु नाथ अगरु से भी अधिक सुगन्धवाली अपनी भुजा को हमारे सिर पर कब धरेंगे ॥ २१ ॥

श्रीशुक उवाच

अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः । सान्त्वयन् प्रियसंदेशैर्गोपीरिदमभाषत ॥ २२ ॥

उद्धव उवाच

अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः । वासुदेवे भगवति यासामित्यर्पितं[1] मनः ॥ २३ ॥

कर्दमक्षमा

अन्वयः—श्रीशुकः उवाच, अथ उद्धवः, एवम् , निशम्य, कृष्णदर्शनलालसाः, गोपीः, प्रियसन्देशैः, सान्त्वयन् , इदम् , अभाषत ॥ २२ ॥ उद्धव उवाच, अहो, भवत्यः, यूयम् , पूर्णार्थाः, लोकपूजिताः, ? अपि ! वासुदेवे, भगवति, मनः अर्पितम् , इति ॥ २३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

श्रीकृष्णदर्शनोत्सुका गोपीः प्रियस्य संदेशैः सान्त्वयन् प्रथमं तावदिदमभाषत ॥ २२ ॥ तदाह षड्भिः । अहो इति स्म नूनं यूयं पूर्णार्थाः कृतार्थाः ॥ २३ ॥

---

[1] षिता सतिः—विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अथ भ्रमरगीताकर्णनोत्तरम् । एवं भ्रमरमुद्दिश्य गीतम् । इदं वक्ष्यमाणम् ।। एवं पूर्वोक्तप्रकारं साक्षात्परंपरयाप्यश्रुतचरप्रेमवचनं निशम्य, अथ प्रेमविकारशान्तेरनन्तरं सांत्वयन्सांत्वयितुमिदं श्रीकृष्णैश्वर्यं तत्प्रेममहिमज्ञापनमयतया तादृशप्रेमविकारस्तम्भनाय तासां श्लाघामयतया दैन्यशमनाय च तथा वक्ष्यमाणं प्रयुक्तमन्यथा श्रवणाशक्तेः गोपीसंभ्रमेण श्रीराधां साक्षादसंभाष्यमाणां श्रावयन्नन्याः ।। २२ ।। तद्वक्ष्यमाणम् । इति शब्दो हेतौ, यतो वासुदेवे मनोर्पितमिति हेतोः ।। २३ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं पूर्वोक्तप्रकारं साक्षात्परम्परया श्रुतचरं प्रेमवचनं निशम्य अथ तादृशप्रेमविकारशान्तेरनन्तरं सान्त्वयन् सान्त्वयितुम् इदं श्रीकृष्णैश्वर्यतत्प्रेममहिमज्ञापनमयतया तादृशप्रेमविकारस्तम्भनाय तासां श्लाघामयतया दैन्यशमनाय च तथा प्रयुक्तं वक्ष्यमाणम् अन्यथा श्रावणाशक्तेः गोपीः सम्भ्रमेण श्रीराधां साक्षादसम्भाष्यमाणां श्रावयन्नन्याः ।।२२।। अहो आश्चर्ये ऽदृष्टाश्रुतं खल्वेतदिति भावः । स्म निश्चये यूयमेव यूयं भवत्य इति पदद्वयेन तासामावृत्तिरत्यन्तादरेण वर्त्तमाने क्तः । पूर्णस्वरूपेण सर्वैश्च गुणैः सर्वोद्रिक्तः अर्थः श्रीकृष्णप्रेमलक्षणो यासां ता इति स्वतः सम्पत्तिः । अत एव लोकैरन्यैः सर्वैरेव पूजिता इति परतोऽपि यद्वा । यूयं पूर्णार्थां इति श्रीराधाद्याः प्रति । भवत्यो लोकपूजिता इति अन्याः प्रतिज्ञेयं यासां वासुदेवे सर्वाश्रये सर्वांशिनि भगवति सर्वैश्वर्य्यादीनां परमाश्रये स्वयं भगवति श्रीकृष्णे इत्यर्थः । अनेन महाप्रेमप्रकारेण । यासामिति भर्त्तरि सम्बन्धमात्रविवक्षया षष्ठी । मनसः स्वातन्त्र्येण कर्म्मकर्तृत्वबोधनार्थम् ।। २३ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथेत्यारम्भे, सन्देशारम्भे प्रवर्त्तमान इत्यर्थः । तादृशप्रेमवैकल्योदये सद्यः किञ्चिदपि वक्तुमयोग्यत्वात् पश्चादारम्भं कृतवानित्यर्थः । एवमेतदननुभूत-पूर्वप्रेमविलपितं विशम्य सान्त्वयन् सान्त्वयितुम्, प्रियस्य सन्देशैरिति तेषामपि प्रियत्वं ध्वनितम् । यद्वा, प्रियैः सन्देशैः, प्रकृतत्वात् कृष्णस्यैवेत्यर्थः । वक्ष्यमाणानां सन्देशानां प्रियैः सन्देशैः, प्रकृतत्वात् कृष्णस्यैवेत्यर्थः । वक्ष्यमाणानां सन्देशानां प्रियत्वं कृष्णसम्बन्धादेव । यद्वा, हे प्रियेति श्रीपरीक्षित्सम्बोधनम् । प्रेमभरोदयात् प्रेमवैकल्योपशान्तावेव सत्यां सन्देशास्ते श्रुतिपथं प्रविशेयुः सफलाश्च स्युरिति दैन्यविरोधिधन्यताप्रतिपादनेनादौ वैह्वल्यं त्याजयितुं पूर्व्ववदिदं वक्ष्यमाणमभाषत ।। २२ ।। अहा आश्चर्य्ये हर्षे वा । स्म एव, अस्य यथापेक्षं सर्व्वैरप्यन्वयः । पूर्णाः साकल्येन संसिद्धा अर्थाः सर्व्वासाध्यपदार्थां यासां तथाभूता यूयमेव, न तु लक्ष्म्यादयः, अतएव लोकानां चतुर्द्दशभुवनानां सर्व्वजीवानां वा पूजिताः वर्त्तमाने क्तप्रत्ययः, पूज्या इत्यर्थः । यूयमिति प्राक् प्रहर्षोदयेन, पश्चाच्च भक्त्या भवत्य इति; एवमग्रेऽप्यूह्यम् । वासुदेवे सर्व्वान्तर्य्यामिनि भगवति षड्गुणैश्वर्य्यैः; यद्वा, श्रीवसुदेवनन्दने भगवति साक्षात्परमेश्वरे श्रीकृष्णे (भा० १०।१।२३)—'वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः' इत्यादिप्रसिद्धया । यद्वा, वसुश्रेष्ठनन्दने श्रीगोपेन्द्रतनये भगवति स्वयमनुभूतासमोर्द्ध्वसौन्दर्य्यविलासाढ्ये श्रीपुरुषोत्तमे इति श्रीकृष्णस्य सर्व्वत आधिक्यकथनेन तासां पूर्णार्थतातिशयबोधनार्थमिति । एवं प्रेमविशेषेण यासां याभिर्मनोऽर्पितम् ।। २३ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथेति । श्रीकृष्णदर्शनोत्सुका गोपीर्निशाम्य दृष्ट्वा प्रियप्रेषितैः संदेशैः सान्त्वयिष्यंस्तावदिदं वक्ष्यमाणमभाषत ।। २२ ।। तदेवाह षड्भिः । अहो इति । स्म नूनं यूयं पूर्णार्थाः कृतार्थाः भवत्यो यूयं लोकेषु पूजिताः उभयत्र हेतुं वदंस्ता विशिनष्टि । यासां युष्माकम् इतीत्थं भगवति वासुदेवे मनोऽर्पितं निहितम् ।। २३ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पूर्णार्थाः कृतकृत्याः इतिशब्दो हेत्वर्थः ।। २३ ।।

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तासामलौकिकप्रेमचमत्कारेण विस्मितमनाः सन उद्धवो वदति—अहो यूयमित्यादि । हे भवत्यः ? यूयं पूर्णार्थाः स्म, एवार्थे स्म-शब्दः । अतएव लोकपूजिता लोकानां चतुर्दशभुवनानां । कुतः ? वासुदेवे भगवति यासामिति एवं प्रकारेण प्राण–वल्लभभावेनेति यावत् अर्पितम् । वसुदेवशब्दोऽत्र व्रजराजपर एव,—वसुभिर्गोधनैर्दीव्यतीति व्युत्पत्तेः । (भा० १०।८।४८) "द्रोणो वसूनां प्रवरः" इति वसुर्द्रोणः तेनापि दीव्यति, तस्य तत्र लीनत्वादिति वा ।। २३ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अहो यूयं स्मेत्यादि । स्म एवार्थे पूर्णार्था एव । कुतः ? इति—एवं प्रकारेण यासां मनो भगवति वासुदेवेऽर्पितमिति प्राणवल्लभत्वेन, न त्वन्येषामिव मोक्षदत्वेन ।। २३–२४ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहो इति। स्म नूनं यूयं पूर्णार्थाः कृतार्थाः यासां मन इति एवं प्रकारेण भगवत्यर्पितमित्यन्वयः अन्येषामपि भक्तानां मनो भगवत्यर्पितं दृढं किं त्वेवं प्रकारेण तु न दृष्टमिति भावः ॥ २३ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

एवं भगवत्प्रियावाक्यामृतपानासक्तमानसः किञ्चिदपि वक्तुमवसरमलभमानस्तत्प्रेमातिरेकमवलोक्यातिचकितहृदयो हाहेत्यादि मनस्येव वदन् तद्वचनानि शृण्वन् तूष्णीमास्थितः भगवत्प्रियाचेतःपरं वक्तुमक्षमावशिष्टसख्यश्च चित्रवत्तूष्णीं स्थितास्तदनन्तरं तदाश्वासनार्थमुद्धव उवाचेत्याहाथेति एवं विरहव्याकुलमानसानां लोकोत्तरप्रेमाक्रान्तानामुपालम्भवाक्यान्याकर्ण्योद्धवः कृष्णदर्शनलालसा गोपीः प्रियसंदेशैः सान्त्वयन्निदं वक्ष्यमाणमभाषत उत्कृष्टः सर्वोत्तमः श्रीकृष्णो धवः स्वामी यस्य स तथा भगवद्भृत्यस्य भगवत्प्रियाणामाश्वासने प्रवृत्तिरुचितेति भावः। चित्तमाकृष्य गतस्य कृष्णस्य दर्शने लालसया‌सां ताः। ननु किमिति मथुरायां गत्वा दर्शनं न कृतवत्य इत्यत आह। गोपीः गोपपराधीनाः तत्र गन्तुमशक्ताः। यद्वा गोपस्य कृष्णस्येमाः गोपकृष्णदर्शनाभिलाषाः। नतु यदुपतिकृष्णदर्शनलालसाः सान्त्वयन् तत्रापि प्रियस्य कृष्णस्य संदेशैः नतु स्वतः। यद्वा प्रियसंदेशैर्न त्वायाति प्रिय इत्युक्त्या अत एव सान्त्वयन्नतु हर्षयत् इदं वक्ष्यमाणमब्रवीत् ॥ २२ ॥ यदाहाहो यूयमिति। वसन्ति भूतान्यस्मिन्निति वासुः वसतीति वा वासुः स चासौ देवश्च वासुदेवस्तस्मिन्भगवति षड्गुणैश्वर्यसम्पन्ने यासामिति इत्थं मनः समर्पितं ता यूयं स्म नूनं कृतार्थाः स्मेति प्रसिद्धमिति वा किं च भवत्य एवंविधप्रेमातिरेकवत्यो लोकपूजिताः अस्मदादिभिर्लोकैः पूज्यतां गताः "यं लब्ध्वाचापरं लाभं मन्यते नाधिकं तत" इत्युक्तेर्वासुदेवे सर्वात्मभूते परब्रह्मणि अर्पितमानसत्वात्पूर्णार्थाः भगवति ब्रह्मादिपूज्यपादपाथोरुहे तस्मिन्नासक्तचित्तत्वात् लोकपूजितास्तस्मात्स्वात्मानं दुःखितं हीनं च मावगच्छतेति भावः ॥ २३ ॥

गूढार्थदीपिनी

निशाम्य दृष्ट्वा ॥ २२ ॥ स्म नूनम्। इत्येवम् अनन्यनिष्ठम् ॥ २३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णदर्शने लालसा औत्सुक्यं यासां ताः गोपीः प्रियस्य श्रीकृष्णस्य संदेशैः सान्त्वयन् प्रथमं तावदिदं वक्ष्यमाणमभाषत ॥ २२ ॥ स्मेति नूनम् पूर्णार्थाः कृतकृत्याः ॥ २३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रियस्य सन्देशैराज्ञारूपैर्वचनैः सान्त्वयन्गोपीः प्रतीदमभाषत ॥ २२ ॥ पूर्णार्थाः कृतकृत्यास्तत्र तन्त्रं यासां मतिर्भगवति वासुदेव इत्येवमर्पिता तत एवेति ॥ २३ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं सर्वभावेन सर्वावस्थासु उत्कृष्टापकृष्टास्वपि भगवत्परत्वं बोधितं प्रातीतिको दोषोऽप्युक्तः ततो दोषनिर्हरणार्थमुपदेशात्पूर्वमुद्धवोऽभिनन्दनं कृतवानित्याह। अथोद्धव इति। स हि उत्सवात्मकः ताभिः दोषगुणमिश्रतया निरूपितानपि भगवद्धर्मान् गुणत्वेनैव स्वीकृतवान् अतो भिन्नप्रक्रमेणैव निशम्य दोषाभावात् तात्पर्यतः एवं कृष्णदर्शनलालसाः विदित्वा यथा सभायामपि भुजमगरुसुगन्धमिति मनोरथाभिलाषः एतादृशाः अवश्यं सान्त्वनीया इति ताः सान्त्वयन् तत्रापि प्रियसंदेशेनैव न तु स्वतः यतो गोप्यः भगवदीयाः आज्ञा च भगवतस्तथैवेति इदं स्तोत्ररूपं वक्ष्यमाणमभाषत ॥ २२ ॥ तासां स्वाभाविको दोषोऽपि भगवत्कृत इति भगवद्गुणैः गुणा वत इति ज्ञापयितुं षड्भिः स्तोत्रमाह। अहो इति। तासामभिनन्दनं हि भक्तत्वात् भक्तेश्च तासु भाक्तिस्थापनं च—

तत्राप्यनन्यता तासां सर्वभावेन च स्थितिः। अतिकृपा हरेर्युक्ता सफलत्वाय सोच्यते ॥

अहो इत्याश्चर्यमस्मदादीनामपि दुर्लभो भावः एतास्विति स च भावः सर्वदा सिद्धः कादाचित्को हि न तथा सामान्यतो भक्तस्तोत्रव्यावृत्त्यर्थं यूयमिति पूर्णः अर्थो यासां भक्तिः स्वतन्त्रफलेति। ततश्च यथा भगवान् स्वतन्त्रस्तथा भवत्योऽपि जाता इत्याह। भवत्यो लोकपूजिता इति। भवच्छब्दलोकशब्दौ सर्वसाधारण्यार्थौ तेषां भ्रमात् प्रवृत्तिं वारयति। मनः अर्पितमिति ॥ २३ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः। अथानन्तरमेवं निशम्य श्रुत्वा कृष्णस्य दर्शने लालसेच्छा यासां ता गोपीः प्रियस्य प्रियैर्वा सन्देशैः सान्त्वयन् इदमुद्धवोऽब्रवीत् ॥ २२ ॥ यूयं पूर्णार्थाः कृतकृत्याः स्थ स्म प्रसिद्धं भवत्यो लोकमान्याः वासुदेवे भगवति यासां याभिरित्येवं मनोर्पितम् ॥ २३ ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

प्रियसखेत्यत्र, प्रथमपर्यायादित्यादि । 'काचिन्मधुकरं दृष्ट्वे'त्यादिनोक्तः प्रथमः पर्यायः । तदैतद्दर्शनेन यादृशी बुद्धिर्जनिता तस्याः सकाशादन्यथा प्रकारान्तरेण बुद्धिमधुना जनयतीत्यागमनमपि तथैव संभावयतीत्यर्थः । कालपक्षे अर्थसंगतिमाहुः हेमन्ते तासामित्यादिना । पूर्वं वसन्तर्तोरागमनमुक्तम् । तथा च 'पुनरागा' इति पदात्तस्यैवाधुनाप्यागमनं वक्तुमुचितम् , न तु हेमन्तस्येति शङ्कां निरस्यन्ति तासां साधनोपक्रम इत्यादिना । अत्रेदमाकूतम् । पूर्वोक्तस्तु नेष्टसाधकत्वेन प्रतीतः, अधुना प्रतीयमानस्त्विष्टसाधकत्वेन प्रतीयते, तादृशश्च हेमन्त एव । व्रते कालस्याप्यङ्गत्वात्तेन तत्त्वमुच्यते । तथा च व्रततत्फलदानसमये पूर्वमागत आसीः 'अधुना किं पुनरागा इष्टं साधयितुमित्यर्थः । पर्यवस्यति । किञ्च । चैत्रादिकस्य संवत्सरस्य नवमो मासो, हेमन्तस्य प्रथमो मासो मार्गशीर्षो भवति । उक्तिश्चेयं नवमीति स एव तद्व्यापारविषयीक्रियते । गतस्य तस्यैवावृत्तिरसंभावितेतिशङ्काभावायाहुः पुनर्दण्डकलितवदिति । यथा गतोपि पुरुषः पुरुषान्तरेण दण्डेन प्रेरितः पुनरावर्तते, कुलालचक्रप्राग्देशो वा, यथा पुनरस्मदिष्टं सिषाधयिषुस्त्वां प्रेषितवानित्यर्थः । कालो हि सर्वनियामकः, तस्यान्यशेषत्वेनागमनमसंभावितमित्यत आहुः सात्त्विक इति । दोषाभावज्ञापनपूर्वकप्रियत्वादिज्ञानानुगुणत्वेन तथा । भक्त्यनुगुणत्वेन गुणातीतो वेत्यर्थः । प्रेषितो हि प्रेषकवाक्यमङ्गीकृत्यागत्य तदुक्तं वचनं निवेदयति । प्रकृते कालस्तादृश इति तस्मिंस्तद्धर्मानाहुस्तदीयेत्यादिना । कालपक्षे स्वस्य श्रुतिरूपत्वान्मन्त्रदेवतारूपत्वम् । तत्तत्काले कृतं पूजनादिकं मन्त्राधिष्ठातृदेवतावरेणैव फलितं भवतीति वरयेत्युक्तमित्यर्थः । विभज्यैवेति । शक्तीनां भगवद्धर्मत्वेन तत्स्वरूपाश्रितत्वेऽपि पृथक्कार्यकरणार्थं तथेत्यर्थः । सान्त्वयन् प्रियसन्देशैरित्यत्र, तत्रापि प्रियसन्देशेनैव, न तु स्वत इति । अत्रायमाशयः । एतादृशीनां सान्त्वनं प्रभुप्रादुर्भावं विना तद्वाक्यानामप्यशक्यम् , किं पुनर्मम, तच्चावश्यकम् , तत्र स्नेहस्यैवायं सहजो धर्मो यत्तत्संबन्धिन्यपि तत्त्वेनैव भानम् । तेन शब्दार्थस्यानभिप्रेतत्वेपि प्रियसम्बन्धित्वेन शब्दाज्ञानेनैव तच्छ्रवणेनापाततः सान्त्वनं भविष्यतीति ज्ञात्वा श्रीमदुद्धवैर्विवक्षितमुक्तमितिज्ञापनाय प्रियपदमुक्तमिति । अत एवोपक्रमोपसंहारयोरपि 'श्रूयतां प्रियसन्देश' इति, 'तत्संदेशागतस्मृती'रित्येवोक्तम् , न तूपदेशपदम् । वस्तुतस्तु संदेशोप्येतादृशीषु न वक्तुं शक्यः, तथापि प्रभोराज्ञा तथेति तत्पालनार्थमुक्तमित्याहुराज्ञा चेत्यादि । स्वरूपातिरिक्तस्य सान्त्वनहेतोः स्वस्याज्ञानेप्याज्ञानुभावेनैव सान्त्वनं भविष्यति, नो चेत्प्रभुः कथं वदेदिति हृदि कृत्वा वदन्तीति भावः । एतदवस्थादर्शने तादृग्वाक्यश्रवणेपि यदेतेषां वाक्प्रसवः स तु 'मत्सन्देशैर्विमोचये'त्याज्ञानुभावेन, न तु स्वसामर्थ्येनेति ज्ञेयम् । वस्तुतस्त्ववश्यंभाव्यसामर्थ्ये प्रेषणवैयर्थ्यं ज्ञात्वा स्वसामर्थ्यमेव वरमिव दत्तवान् 'मत्संदेशैर्विमोचये'ति वचनेनेति प्रतिजानीमः ॥ २२ ॥ अहो यूयमित्यादेराभासे, तासां स्वाभाविक इत्यादि । षड्भिः स्तोत्रकरणं तात्पर्यमुच्यते । स्त्रीत्वादिस्तत्स्वभावश्च भगवद्गुणकृत एवेति । 'ता मन्मनस्का' इति भगवद्वाक्याच्च तद्धर्मा एवेति निर्दोषगुणरूपा एवेति ज्ञापयितुमैश्वर्यादिगुणसंख्यासमानसंख्याकैः श्लोकैः स्तवनमित्यर्थः । भगवद्गुणैः अन्तःस्थितभगवत्स्वरूपा इति तद्धर्मा एव वागादिरूपेणाविर्भवन्तीति तथेत्यर्थः । साधारण्यार्थोविति । कतिपयानामेव न पूर्णार्थत्वम् , किन्तु सर्वासाम् । लोका अपि न तथा किन्तु सर्व इत्यर्थः । तेषामिति । लोकानामित्यर्थः ॥ २३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं कृष्णस्य दर्शने लालसा औत्सुक्यं यासां तथाभूता गोपीर्निशम्य दृष्ट्वा अथ गोपीवाक्यश्रवणानन्तरं प्रियस्य कृष्णस्य सन्देशैस्ताः सान्त्वयन्नुद्धव इदं वक्ष्यमाणमभाषत ॥ २२ ॥ तद्भाषणमेव दर्शयति—अहो इति षड्भिः । घोषवासिनीनामेवंभक्तदुर्लभत्वात्तां दृष्ट्वाऽऽश्चर्यं सूचयति—अहो इति । स्मेति निश्चये । पूर्णः अर्थः पुरुषार्थो यासां तथाभूता यूयम् , तथा भवत्यो लोकेषु पूजिताः पूजायोग्याः । उभयत्र हेतुमाह—वासुदेव इति । भगवति ऐश्वर्यादिषड्गुणपूर्णे वासुदेवे वसुदेवनन्दने श्रीकृष्णे यासां युष्माकमित्येवमनन्यवृत्तिकं मनोऽर्पितं स्थिरीकृतम् ॥ २३ ॥

अन्वितार्थप्रकाशिका

अथेति ॥ एवं कृष्णस्य दर्शने लालसा औत्सुक्यं यासां तथाभूता गोपीर्निशाम्य दृष्ट्वा अथ गोपीवाक्यश्रवणानन्तरं प्रियस्य कृष्णस्य सन्देशैस्ताः सान्त्वयन्नुद्धव इदं वक्ष्यमाणमभाषत ॥ २२ ॥ अहो इति ॥ अहो स्म नूनं यूयं पूर्णार्थाः कृतकृत्याः तथा भवत्यो लोकेषु पूजिताः पूजायोग्याः यासां युष्माकं वासुदेवे भगवति इत्येवमनन्यवृत्तिकं मनोऽर्पितं स्थिरीकृतम् ॥ २३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवंनिशम्य श्रुत्वा कृष्णदर्शनोत्कण्ठीः गोपिः प्रियस्य हरेः संदशैः सान्त्वयन् इदं वक्ष्यमाणमभाषत ॥२२॥ तद्वक्ति अहो इति षड्भिः स्मेत्यवधारणे यूयमेव पूर्णार्थाः कृतार्थाः यतः यासां भवन्तीनां इत्युक्तप्रकारेण मनः अर्पितमस्ति ॥ २३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथेति ॥ एवमुक्तप्रकारेण, कृष्णदर्शनलालसाः श्रीकृष्णदर्शनोत्सुकाः, गोपीः निशाम्य दृष्ट्वा, अथानन्तरं, उद्धवः प्रियसंदेशैः प्रियप्रेषितसंदेशैः, सान्त्वयन् सान्त्वयिष्यन् , तावत् इदं वक्ष्यमाणं, अभाषत ॥ २२ ॥ तदेवाह षड्भिः । अहो इति ।

अहो हे गोप्यः, यासां युष्माकं, मनः इत्थं, भगवति षाड्गुण्यपूर्णे, वासुदेवे वसुदेवपुत्रे श्रीकृष्णे, अर्पितं निहितं भवति, ताः भवन्त्यः, लोकपूजिताः, न केवलमेतावदेव, किं तु यूयं पूर्णार्थाः कृतकृत्याश्च, स्म नूनम् ॥ २३ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अहो यूयमिति : १०.४७.२३.

वक्तव्यं किल यन्मयात्र भगवद्धृत्प्रेमसौधस्थितं तद्वोऽभूदलिकल्पितप्रवचने पद्येऽन्तिमेऽतिस्फुटम् ।
तद्वाच्यं किमितो मयाऽच्युतपदे युष्मन्मनोवन्मनो युष्मास्वस्य च वर्तते यदभवं प्रेष्योऽहमेवेक्ष्यताम् ॥ ८३ ॥
यत्क्षुद्रवस्तुविवशं क्षणशालि लोकेष्वल्पत्वमेत्य भवति क्षणसौख्यभागि ।
तद्वो मनोऽखिलसुखावधिवासुदेवरूपं सदाऽजनि कुतोऽपरिपूर्णतेतः ॥ ८४ ॥
यौ भिन्नौ भवतस्तयोर्युवतयः सम्भाव्यते लौकिका युक्ताऽयुक्तविकल्पना मुदमुदाविर्भावसंवर्धिना ।
ध्यानासादित तत्स्वरूपमनसां युष्माकमस्याप्यहो युष्मद्रूपहृदो विभोरिह कथं योगो वियोगोऽथवा ॥ ८५ ॥

कृष्णप्रिया

श्रीशुकदेवजी कहने लगे कि राजन् ! गोपीयों के हृदगतभाव भगवत्प्रेरित है इसलिए दोषरहित ही है यह समझते हुए श्रीउद्धवजी प्रियतम श्रीकृष्णचन्द्र के दर्शन की प्यासी गोपियों के वचनों को सुनकर प्रियतम भगवान के सन्देशों से सान्त्वना देते हुए यह बात कहने लगे ॥ २२ ॥ श्रीउद्धवजी ने कहा कि हे गोपीजन ! आनन्द की बात है । सचमुच आप कृतार्थ हो गई हो और त्रिलोकों में सदा पूजित हो। आपने अपना मन भगवान् वासुदेव में समर्पित कर दिया है यह परम सौभाग्य है ॥ २३ ॥

दानव्रततपोहोमजपस्वाध्यायसंयमैः । [1]श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥ २४ ॥
भगवत्युत्तमश्लोके भवतीभिरनुत्तमा । भक्तिः प्रवर्तिता[2] दिष्ट्या मुनीनामपि दुर्लभा ॥ २५ ॥

कर्दमक्षमा

अन्वयः—(तत्र-अपि, तासाम् , अनन्यता, च, सर्वभावेन, स्थितिः, अतः, हरेः, कृपा, युक्ता, सा, कृपा, सफलत्वाय, उच्यते । दानव्रततपो होमजपस्वाध्याय समयैः, च श्रयोभिः, च, अन्यैः, विविधैः, सुकृतैःहि, कृष्णेभक्तिः, साध्यते ॥ २४ ॥ दिष्ट्या ! भवतीभिः, उत्तमश्लोके, भगवति, मुनीनाम् , अपि, दुर्लभा, अनुत्तमा भक्तिः, प्रत्यर्पिता ॥ २५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रेयोभिः श्रेयःसाधनैः ॥ २४ ॥ अनुत्तमा अतिशेष्ठा सर्वोत्कृष्टेत्यर्थः । सा भवतीभिः प्रवर्तितेति ॥ २५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

शास्त्रतो नियमकरणं व्रतम् , स्वाध्यायो वेदाभ्यासः, संयम इन्द्रियनिग्रहः । अन्यैस्तीर्थाटनसत्संगादिरूपैः । विशेषेण विधिर्येषां संध्याग्निहोत्रादीनां ते विविधाः "अच् प्रत्यन्वव–"इत्यत्राजिति योगविभागादच् । "अहरहः संध्यामुपासीत" "यावज्जीवमग्निहोत्रं जुहुयात्" इत्यादिश्रुतिभिः । अन्यैरित्युक्तेर्विविधपदवैय्यर्थ्यशंकावारणायायमर्थः । तदेव कैमुत्येन प्रतिपादयति-दानेति । दानाद्यात्मकानि यानि श्रेयांसि । अन्यैश्च योगसांख्यज्ञानादिभिः कृष्णेऽर्पितैस्सद्भिः 'नैष्कर्म्यमप्यच्युतभाववर्जितम्' इत्याद्युक्तेः । कृष्णे स्वयं भगवति भक्तिः श्रवणादिरुचिमात्रं साध्यते "स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे" इति, 'धर्मः स्वनुष्ठितः पुंसां विष्वक्सेन—'इत्यन्वयव्यतिरेकाभ्याम् । तत्र दानं विष्णुवैष्णवसम्प्रदानकम् , व्रतमेकादश्यादि, तपः कृष्णार्थे भोगत्यागादि, होमो विष्णुमंत्रैः, जपोऽष्टादशाक्षरादीनाम् , स्वाध्यायो गोपालतापन्यादिपाठः, संयमः कृष्णेतरेभ्यो मनोनिवृत्तिरिति । श्रेयांसि भक्त्यंगानि ज्ञेयानि, अन्येषां दानादीनां भक्तिहेतुत्वाभावस्य प्रतिपादितत्वात् ॥ २४ ॥ दुर्लभेति भक्तेरवश्यकर्तव्यतामाह । भवतीनां तु महाभावात्मिका भक्तिर्नित्यसिद्धैव, ततः सा किं श्लाघ्या, किन्तु तच्छिक्षया लोकानां भाग्यमेव श्लाघ्यमित्याह—भवतीभिर्भगवति सर्वनिजैश्वर्यप्रकटके अत उत्तमश्लोके तस्मिन्ननुत्तमा सर्वतोपि श्रेष्ठा महाप्रेमलक्षणा प्रवर्तिता स्वदर्शनश्रवणप्रभावेण लोकेषु प्रचारितेतिवत् । यथा वक्ष्यते–'सर्वात्मभावोऽधिकृतः' इत्यादि, यथा च प्रोचे 'विक्रीडितं व्रजवधूभिः' इत्यादि, एतादृष्ट्या भद्रं जातमित्यर्थः ॥ २५ ॥

---

[1] श्रेयोविधिभिरन्यैश्च–वीर. विज. । [2] साध्वी–वीर. ।

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

तदेव कैमुत्येन प्रतिपादयति। दानेति। दानाद्यात्मकानि यानि श्रेयांसि अन्यैश्च विविधैर्योगसाङ्ख्यज्ञानादिभिः कृष्णेऽर्पितैः सद्भिः नैष्कर्म्यमप्यच्युतभाववर्जितमित्याद्युक्तेः। कृष्णे स्वयं भगवति भक्तिः श्रवणादिर्रुचिमात्रं साध्यते स वै पुंसां परो धर्मो यतो भक्तिरधोजक्ष इति। धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनेत्यन्वयव्यतिरेकाभ्याम्। तत्र व्रतं नियमः तपः कृच्छ्रादि-संयम इन्द्रियनिग्रहः ॥ २४ ॥ भवतीनां तु महाभावात्मिका भक्तिर्नित्यसिद्धैव। ततः सा किं श्लाघ्या किन्तु तत् शिक्षया लोकानां भाग्यमेव श्लाघ्यमित्याह। भवतीभिर्भगवति सर्वनिजैश्वर्यप्रकटके अत उत्तमःश्लोके तस्मिन् अनुत्तमा सर्वतोऽपि श्रेष्ठा महाप्रेम-लक्षणा प्रवर्त्तिता स्वदर्शनश्रवणप्रभावणे लोकेषु प्रचारितेति यत्। यथा वक्ष्यते सर्वात्मभावोऽधिकृत इत्यादि। यथा च प्रोचे। विक्रीडितं व्रजवधूभिरित्यादि। एतद्दिष्ट्या भद्रं जातमित्यर्थः ॥ २५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु श्रीकृष्णप्राप्त्यैव पूर्णार्थता स्यान्न तु मनोऽर्पणमात्रेण, तत्राह—दानेति द्वाभ्याम्। व्रतं कृच्छ्रादि, तपः-स्वधर्म्मः, होमो हवनं यज्ञः, स्वाध्यायो वेदाभ्यासः, संयमः सर्व्वेन्द्रियनियमः, दान-जपौ प्रसिद्धौ, एते च प्राय आवश्यकत्वात सर्व्वकर्म-श्रेष्ठतया लोके प्रसिद्धत्वाच्च व्यक्तमुक्ताः। श्रेयांसि ज्ञानादीनि, अन्ये च मोक्षादयस्तैः, विविधैरिति प्रत्येकं सर्व्वेषां विशेषणम्। तत्र मोक्षस्य विविधत्वं न्यायवेदान्तादि सिद्धान्तभेदेन सालोक्यादिभेदेन वा। अन्यत् स्पष्टम्। दानादीनामेषां भक्तिसाधनत्वे यथोत्तरं श्रैष्ठ्यम्। कृष्णे परमेश्वरे, हि एव, भक्तिरेव या काचित् साध्यते, अन्यथा तेषां वैयर्थ्यात्; तच्चोक्तमेव (भा० १।२।८) 'धर्म्मः स्वनुष्ठितः पुंसाम्' इत्यादिना ॥ २४ ॥ भवतीभिस्तु भगवति सर्व्वनिजैश्वर्य्य-प्रकटके, अत उत्तमश्लोके तस्मिन्ननुत्तमा प्रेमलक्षणा, प्रवर्त्तिता स्वाचारेण लोकेषु प्रचारितेति यदेतद्दिष्ट्या भद्रं जातमित्यर्थः। स्वत एव सर्व्वलोकस्य परमहितसिद्धेः। न चैषात्मानुमानेन सर्व्वेषां सुलभा मन्तव्येत्याह—मुनीनामिति श्रीसनकादीनामपि। एवं भक्तिरेव परमफलम्, ततश्च श्रीकृष्णः स्वत एव वश्यः स्यादिति तात्पर्य्यम् ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कथं तदर्पणमात्रेण पूर्णार्थता पूजितता चेत्यत्राह। दानेति। दानादिभिरन्यैश्च श्रेयःसाधनैः नानाविधैर्या भगवति वासुदेवे भक्तिर्न साध्यते न साधयितुं शक्यते ॥ २४ ॥ सा भक्तिरनुत्तमोत्कृष्टा मुनीनामपि दुर्लभा युष्माभिर्दिष्ट्या सुखेनैव भगवति प्रवर्तिता। यद्वा दिष्ट्या अयमस्माकं महानानन्द इत्यर्थः। तत्र दानं सत्पात्रे वित्तत्यागः तपोऽनशनादिः स्वाध्यायो वेदाध्ययनं संयम इन्द्रियनिग्रहः अत्र "नाहं वेदैर्न तपसा" इत्यादि भगवद्वचनार्थोऽभिप्रेतः "नान्यः पन्था" इति श्रुत्यर्थश्च ॥ २५ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

शास्त्रतो नियमकरणं व्रतं संयम इन्द्रियनिग्रहः हितसाधनानुष्ठाने श्रेयोविधिः ॥ २४ ॥ दुर्लभेति वचनं भक्तेः कर्तव्यत्व-परं ननु मुनीनां तादृशी भक्तिर्नास्तीति ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गोप्यः किमाचरदितिवत् भक्तिः श्रवणादिरुचिः साध्यते ॥ २४ ॥ भवतीनां तु महाभावात्मिका भक्तिर्नित्यसिद्धैव। ततः सा किं श्लाघ्या किं तु तच्छिक्षया लोकानां भाग्यमेव श्लाघ्यमित्याह। प्रवर्त्तिता स्वाचारेण श्लोकेषु प्रचारितेति यत् एतद्दिष्ट्या भद्रं जातमित्यर्थः ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अन्यच्चेत्याह—दानव्रतेत्यादि द्वाभ्याम्। दानादिभिर्विविधैरन्यैश्च श्रेयोभिर्हि निश्चितं कृष्णो भक्तिः साध्यते। दानादीनि यदि कृष्णेऽर्पितानि भवन्ति, तदा तानि मद्भक्तेः साधनानि भवन्तीति भावः। किन्तु सा सा भक्तिरनुत्तमा, न विद्यते उत्तमा यस्याः सा, तथा न भवति, साधनत्वात्। अनुत्तमा अहैतुकी साध्यानुभावा भवतीभिः प्रवर्तितेति वाक्यार्थः। दिष्ट्या भाग्यविशेषेण लोकानामिति शेषः, न तु दानादीनाम्, तेषामनुत्तमायाः प्रेमभक्तेः कारणत्वमयोग्यत्वात्। कीदृशी! मुनीनामपि दुर्लभा, तैरपीयं विशेषेणानिर्दिष्टा प्रवर्तितेति। ईदृश्या भक्तेर्भवत्य एव सम्प्रदाय प्रवर्तिकाः। इतः परं भाग्यभाज ईदृशमेव प्रेम भगवति करिष्यन्तीत्यर्थः। अतो भवत्यः पूर्णार्था एवेति यदुक्तम, तदतीव साध्विति शेषः ॥ २४-२६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

'भगवत्युत्तमः श्लोके' इत्यादि। (२४ श० श्लो०) "श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हिसाध्यते" इति सर्वशास्त्र प्रतिपाद्यम्, किन्तु भवतीभिरनुत्तमा भक्तिः प्रवर्त्तिता न विद्यते उत्तमा यस्याः सा तथा भवतीभिरेव प्रचारिता, मुनीनामपि दुर्लभा मुनिभिरपि न दृष्टेत्यर्थः। अतः परं भवतीनां दृष्टान्तेन प्रायः सर्वः एवैतादृशीं भक्तिं करिष्यन्ति ॥ २५-२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दानादिभिः साधनैः कृष्णे भक्तिः साध्यते तत्र दानं विष्णुवैष्णवसम्प्रदानकं व्रतमेकादश्यादिकं तपः कृष्णार्थभोगत्यागादिहोमो वैष्णवः जपो विष्णुमन्त्राणां स्वाध्यायो गोपालतापन्यादिपाठः श्रेयांस्यपि भक्त्यङ्गान्येव ज्ञेयानि अन्येषां दानादीनां भक्तिहेतुत्वाभावस्य प्राक् प्रतिपादितत्वात् ॥ २४ ॥ भवतीनां भक्तिस्त्वन्यैव सर्वविलक्षणेत्याह । भगवतीति । अनुत्तमा सर्वश्रेष्ठा । प्रवर्त्तितेति प्रागियं नासीत् परन्तु भवतीनां रागात्मिकां भक्तिमनुसृत्यैव रागानुगा भक्तिर्लोकैः क्रियमाणा प्रचरिष्यतीत्यर्थः । प्रवर्त्तितेति "आशंसायां भूतवच्च" इति निष्ठा । दिष्ट्या लोकानामतिभाग्येन ॥ २५ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

ननु जारबुद्ध्या भगवति वासुदेवे समासक्तचेतसां दानव्रतादिभक्तिसाधनविधुराणामस्माकं कथं पूर्णार्थता कथं वा लोकपूज्यतेत्याशङ्क्य "येन केनाप्युपायेन मनः कृष्णे निवेशयेत्" इत्युक्तत्वात्कृष्णे मनः सन्निवेशरूपभक्तेः फलस्य साधनतयोपायसाध्यस्यानुज्ञातत्वादेकेनोपायेन तस्य जातत्वान्नोपायान्तरान्वेषणं युक्तमप्रयोजिकत्वादित्याशयेनाह । दानेति । दानं तुलापुरुषादि व्रतमेकादश्युपवासादि तपः कृच्छ्रचान्द्रायणादि, होमः अग्निहोत्रादि, जपः प्रणवादिमन्त्राणां मनसावृत्तिः, स्वाध्यायो वेदाध्ययनं विविधैर्वापीकूपतडागारामादिनिर्माणप्रमुखैः श्रेयःसाधनैः कृष्णे भक्तिर्हि साध्यते उत्पाद्यते हिः प्रसिद्धिं द्योतयति यद्यपि "तमेतं वेदानुवचनेन ब्राह्मणो विविदिषन्ति यज्ञेन दानेन तपसा नाशकेने"ति श्रुत्या यज्ञादीनां संयोगपृथक्त्वन्यायेन विविदिषाया वेदनस्य वा साधनत्वमभिहितं तथापि भक्त्या लभ्यस्त्वनन्यया भक्त्या मामभिजानातीत्यादिवचनानामेतस्य चानुरोधेन भक्तिद्वारा तेषां तत्साधनत्वं व्याख्येयं तथा च दानादीनां भक्तिरेव फलं सा च जन्मान्तरेष्वनुष्ठितदानादिसर्वसाधनानां युष्माकमेवं विधप्रेमातिरेकवतीनां कृतार्थतादौ नास्ति संशय इति भावः ॥ २४ ॥ नन्वस्माकं व्रजराजकुमारविषयककामवतीतां कथं भक्तिमत्त्वं कामस्य तदुपायत्वानभिधानादिति चेत्तद्विषयककामस्य दानादिभिरपि दुर्लभत्वात् तज्जन्येयं भक्तिरनुत्तमेत्याशयेनाह । भगवतीति । उत्तमैर्नारदादिभिः श्लोक्यते स्तूयते इत्युत्तमश्लोकस्तस्मिन् अनेन भवतीभिः स निन्द्यते भवत्यस्तु तेन स्तूयन्त इति महान्विशेष इति ध्वनितं भवतीतरेषां भगवान् भवतीनां तु याच्ञ्यादिमानिति सूचनाय भगवतीति दिष्ट्या अहो भाग्यमस्मदादीनां याभिर्भवतीभिरेवैवम्विधा भक्तिः प्रवर्तिता आविर्हिता भक्तिरपि प्रकटिता तासां दर्शनादिना अस्मदादयो भाग्यातिरेकवन्तः सम्पन्ना युष्मद्भाग्यं तु वक्तुमशक्यमित्यर्थः । न चासौ शास्त्राविहितत्वाल्लोकाप्रसिद्धत्वाच्च निकृष्टेति भ्रमितव्यम् । उक्तहेतुभ्यः सर्वोत्कृष्टत्वादित्याह्वानुत्तमा न विद्यते उत्तमा यस्याः सा यतो मुनीनां दानादिसाधनकदम्बवतामपि दुर्लभा तदधिकाराभावात् अत्रेदमवधेयम् उपायपूर्वकं भगवति मनःस्थिरीकरणं भक्तिः सा द्वेधा विहिता अविहिता च तत्राद्या द्वेधा मिश्रा शुद्धा च मिश्रा त्रेधा कर्ममिश्रा कर्मज्ञानमिश्रा ज्ञानमिश्रा च कर्ममिश्रा त्रेधा तामसी राजसी सात्त्विकी चेति तत्र तामसी त्रेधा हिंसार्था दम्भार्था मात्सर्यार्था चेति राजसी च त्रेधा विषयार्था यशोऽर्था ऐश्वर्यार्था च सात्त्विकी च त्रेधा कर्मक्षयार्था विष्णुप्रीतिसिद्ध्यर्था विधिसिद्ध्यर्था च कर्मज्ञानमिश्रा त्रेधा उत्तमा मध्यमा अधमा चेति ज्ञानमिश्रा त्वेकधा गुणकार्याणामनुपलम्भान्निर्गुणा शुद्धाप्येकधा अहैतुक्यव्यवहिता कर्मज्ञानाभ्याममिश्रत्वाच्छुद्धा एवं विहितायाश्चतुर्दश भेदाः अविहितापि चतुर्धा कामजा द्वेषजा भयजा स्नेहजा चेति तत्र कर्ममिश्रा नव गृहस्थानां कर्मज्ञानमिश्रास्तिस्रो वनस्थानां ज्ञानमिश्रैका भिक्षुकाणां शुद्धैका सर्वेषां कामजा गोप्यादिसमानां द्वेषजा शिशुपालादितुल्यानां भयजा कंसादिसमानानां स्नेहजा पाण्डवादिसदृशानामेवं भक्तेरष्टादश भेदास्तत्र सर्वोत्कृष्टा कामजा अन्येषु तद्द्वेषु तथाविधमनःस्थिरीकरणस्यालभ्यत्वादिति ॥ २५ ॥

गूढार्थदीपिनी

श्रयोभिः श्रेयःसाधनैः ॥२४॥ प्रवर्तिता । 'आशंसायां भूतवच्चेति भविष्यति निष्ठा । दिष्ट्या लोकानामतिभाग्येन ॥२५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्यैश्च श्रेयोभिः कल्याणोपायैः—

जन्मान्तरसहस्रेषु तपोदानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥

इति पुराणान्तराच्च ॥ २४ ॥ अनुत्तमोत्कृष्टा ॥ २५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

द्वाभ्यां श्लोकाभ्यामितरदुर्लभा भक्तिः सुलभा भवतीनामित्याह ॥ दानेति । व्रतमेकादश्यादिव्रतं तपः कृच्छ्रचान्द्रायणादिकं स्वाध्यायो वेदाध्यनं संयम इन्द्रियनिग्रहो अन्यैः प्रवचनादिभिः श्रेयोविधिभिस्तत्साधनोपायैर्हि यतो भक्तिरुत्तमश्लोके भगवति साध्यते या मुनीनां पूर्वोक्तसाधनसम्पन्नानां दुर्लभा साऽप्यनुत्तमा भक्तिर्भवतीभिर्दिष्ट्या प्रवर्तिता अहो मुनिदुर्लभतावचनमवश्यकर्तव्यतारुचिं जनयितुं न तु तेषां दुर्मिलतापरम् । यद्वा कामादित्याद्युक्ता भक्तिर्मुनीनां दुर्लभेति तत्परम् ॥ २४-२५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नन्वयं भावः सुलभः कामाच्च जात इति तत्राह । दानव्रतेति । दानादिभिः सर्वैः कृष्णे स्नेह एव साध्यते स चेत्कामेनैव जातः किं दानादिना स्नेहे वैलक्षण्याभावात् फले वैलक्षण्याभावे साधनवैजात्यमप्रयोजकं तदर्थं हित्वेति विशेषरतूक्तः दानं तुलापुरुषादि व्रतमेकादश्यादि तपः कृच्छ्रादि होमः काम्यः अग्निहोत्रादिरपि जपो मन्त्रादिः स्वाध्यायो वेदाध्ययनं वेद एव वा सर्वविधोऽपि संयमो योगादिः अन्यानि श्रेयांसि कूपारामादीनि सर्वेषामेषाम् "एकस्य तूभयत्वे संयोग पृथक्त्व"मिति न्यायेन तत्तत्फलसाधकत्वं भक्तिसाधकत्वं च अन्यैरित्यविहितैरपि कृष्णे सदानन्दे तस्यैव फलत्वमिति एतर्थमेवाविभूत इति वा भक्तियोगविधानार्थमिति वाक्यं विशब्देनोच्यते साध्यत इत्यनेन आत्मत्वेन नित्यस्नेहो निवारितः ।। २४ ।। तह्यस्मद्भक्तिरन्यादृशीति चेत्तत्राह । भगवतीति । सत्यं भिन्ना परं सर्वोत्तमा उत्तमैरपि श्लोक्यत इति तेषामपि वाक्यमेव भवति । नत्वेवम्भूतं मनः भवतीभिरिति बहुत्वं सामर्थ्यं च द्योतितं न उत्तमा यस्याः भवदीयायाः अन्या भक्तिरस्ति अतो ब्रह्मकल्पमारभ्य अद्यप्रभृति भक्तिर्वृद्धा अद्य पर्यवसिता यतो भवतीभिरेवेयं दर्शिता एतदस्मदादीनां भाग्येन एतादृशी भक्तिरस्तीति । ननु बहिर्मुखेष्वेवैता उत्तमा इति चेत्तत्राह । मुनीनामपि दुर्लभेति । अन्यथेदं परित्यज्य मननार्थं कथं प्रवृत्ता भवेयुः ।। २५ ।।

श्रीसुबोधिनी-सारः

दानादिभिः विविधैर्नानाप्रकारैः अन्यैः श्रेयोभिर्मंगलैरिष्टापूर्त्तादिभिः कृष्णे भक्तिः साध्यते हि ।। २४ ।। उत्तमश्लोके भगवति भवतीभिर्नोत्तमा यस्याः सेति मुनीनामपि दुर्लभा भक्तिः प्रवर्त्तिता दिष्ट्या भद्रं जातम् ।। २५ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'कथं तदर्पणमात्रेण पूर्णार्थत्वं लोकपूज्यत्वं च' इत्यत आह—दानेति । दानादिभिर्या कृष्णे भक्तिः साध्यते सा एव अनुत्तमा न उत्तमा यस्याः सर्वपुरुषार्थश्रेष्ठा भक्तिर्भगवति भवतीभिः प्रवर्तितेति दिष्ट्या महानानन्दो जात इति द्वयोरन्वयः। 'दानादीनां भक्तिसाधनत्वं सर्वशास्त्रप्रसिद्धम्' इति सूचयति—हीति । दानं तुलापुरुषादिदानम् , व्रतं एकादश्यादि उपवासः, तपः कृच्छ्रचान्द्रायणादि, होमः अग्निहोत्रादिः, जपः मन्त्रादिः' स्वाध्यायः स्वाधिकारानुरूपवेदाध्ययनादिः, संयमः इन्द्रियादिनिग्रहः, अन्यानि च विविधानि श्रेयःसाधनानि कूपारामनिर्माणादीनि, तैः । भक्तेरुत्तमत्वमेव स्पष्टयति—मुनीनामपि दुर्लभेति । तत्र हेतुत्वेन भगवन्तं विशिनष्टि—उत्तमश्लोक इति । उत्तमः अविद्यानिवर्तकः श्लोको यशो यस्य तस्मिन्नित्यर्थः ।। २४-२५ ।।

अन्वितार्थप्रकाशिका

दानेति । हि यतः दानव्रतादिभिः अन्यैर्विविधैः श्रेयोभिः तीर्थसेवादिभिः श्रेयः साधनैः कृष्णे भक्तिः साध्यते ।। २४ ।। भगवतीति । भवतीभिस्तु भगवति उत्तमश्लोके अनुत्तमा सर्वोत्तमा मुनीनामपि दुर्लभा भक्तिः प्रवर्तिता इति दिष्ट्या आनन्दो जात इत्यर्थः ।। २५ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्रेयोभिः कल्याणसाधनैः ।। २४ ।। अनुत्तमा अत्युत्कृष्टा ।। २५ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु कथं मनसस्तदर्पणमात्रेण पूर्णार्थता पूजितता चेत्यत्राह । दानेति । दानानि च व्रतानि च तपश्च होमश्च जपश्च स्वाध्यायश्च संयमश्च तैः, तत्र दानं सत्पात्रे वित्तत्यागः, शास्त्रतो नियमकरणं व्रतं, तपोऽनशनादिकं, होमः संस्कृते वह्नौ आज्यादिहविःप्रक्षेपः, जपो भगवन्मूलमन्त्रादिजपनं, स्वाध्यायो वेदाध्ययनं, संयम इन्द्रियनिग्रहः, विविधैः अन्यैः श्रेयोभिश्च, नानाविधैरन्यैः साधनैरित्यर्थः । कृष्णे या भक्तिः, न साध्यते साधितुं न शक्यते, अत्र 'नाहं वेदैर्न तपसा यथा भक्तिर्ममोर्जिता' इत्यादिभगवद्वचनार्थः । 'नान्यः पन्था विद्यतेऽयनाय' इति श्रुत्यर्थश्चाऽभिप्रेतः । अत्र 'कृष्णे भक्तिर्हि साध्यते' इत्यपि पाठः। तत्पक्षे दानादिभिः, कृष्णे भक्तिः साध्यते इत्यर्थः ।। २४ ।। भगवतीति ।। अनुत्तमाऽत्युत्कृष्टा, मुनीनां अपि दुर्लभा, सा परानुरक्तिरूपा, उत्तमश्लोके भगवति कृष्णे, भक्तिः भवतीभिः, दिष्ट्या सुखेनैव, प्रवर्त्तिता । भवतीभिर्यथा कृष्णे मनःसमर्पणं कृतं तथा तस्मिन्मनःसमर्पणं परा भक्तिः सा च भवतीभिः साधितेति अहो वो भाग्यमिति भावः । इति द्वयोरेकसम्बन्धः ।। २५ ।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दानव्रतेति : १०.४७.२४.

दानव्रताध्ययनमन्त्रतपोजपादि यस्यां निधाय दृशमत्र जनः करोति ।
सा भक्तिरच्युतपदा भवतीषु सिद्धा श्रद्धावतीष्विति किमन्यदिहावशिष्टम् ।। ८६ ।।

कृष्णप्रिया

तुलापुरुष आदि का दान, एकादशी उपवास आदि व्रत, कृच्छ्र चान्द्रायण आदि तप, अग्नि में आहूति एवं अग्निहोत्र आदि होम, अष्टाक्षर महामन्त्रादि का जप, वेदाध्ययन आदि स्वाध्याय, योग के यम नियम, कूप उद्यान तड़ाग मन्दिर आदि का निर्माण आदि श्रेयस सत्कृत्यों से भगवान् श्रीकृष्ण में भक्ति सिद्ध की जाती है, वह भक्ति आपने केवल अहैतुकी प्रीति से सम्पादन की है ॥२४॥ हे गोपीजन ! आप का यशोगान कैसे करूँ ! व्यास वाल्मीकि आदि ऋषिवर ब्रह्मादि देव जो उत्तम पुरुष हैं वे जिन पूर्ण पुरुषोत्तम उत्तमश्लोक भगवान् श्रीकृष्ण का नित्य यशोगान करते हैं, उनमें आपकी अलौकिक एवं सर्वोत्तम प्रीति-भक्ति बन चुकी है इसके लिए आप धन्य धन्य है। क्या कहा जाय ! यह भक्ति तो मुनिजनों को भी दुर्लभ है ॥ २५ ॥

दिष्ट्या पुत्रान् पतीन् देहान् स्वजनान् भवनानि च । हित्वावृणीत यूयं यत् कृष्णाख्यं पुरुषं परम् ॥ २६ ॥
सर्वात्मभावोऽधिगतो[1] भवतीनामधोक्षजे । विरहेण महाभागा महान् [2]मेऽनुग्रहः कृतः ॥ २७ ॥

कर्दमक्षमा

अन्वयः—दिष्ट्या, पुत्रान्, पतीन्, देहान्, स्वजनान्, भवनानि, च, (लोकान्) हित्वा, यत्, यूयम्, कृष्णाख्यम्, परम्, पुरुषम्, वृणीत ॥ २६ ॥ हे महाभागाः ! विरहेण, भवतीनाम्, सर्वात्मभावः, अधोक्षजे, अधिगतः, मे, महान्, अनुग्रहः, कृतः ॥ २७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अवृणीत वृतवत्यः ॥ २६ ॥ सर्वात्मभाव एकान्तभक्तिः । अधिकृतः प्राप्तः । भगवत्प्रेमसुखप्रदर्शनेन ममैव महाननुग्रहः कृत इति ॥ २७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यत्कृष्णाख्यं पुरुषमवृणीत तद्दिष्ट्येति योज्यम् ॥ भक्तिप्रवर्तनरीतिमेव स्पष्टयति— यद्यस्मात्पुत्रादस्तित्तन्मन्यान्निजकृष्णैकालम्बनं स्वाभाविकभावबले हित्वाऽवस्तुबुद्ध्या परित्यज्य कृष्ण इत्याख्या ख्यातिर्यस्य तं परं पुरुषं नराकृतिपरब्रह्मरूपं यूयमवृणीत वास्तवकान्ततया स्वीकृतवत्यस्तद्दिष्ट्या भद्रं, लोकानां महद्भाग्यमित्यर्थः । भवतीनां तादृशचरितं दृष्ट्वा श्रुत्वा चान्ये तथा प्रवर्तरन्निति ॥ २६ ॥ विरहेणेत्यस्यैवायं प्रपञ्चः भगवत्प्रेमसुखदर्शनेनेति । ननु वयं यद्धर्मं त्यक्त्वा परपुरुषं वृतवत्यस्तत्र भवतः किं भाग्यमभूदत आह—सर्वात्मेति । अधोक्षजेऽन्यैः प्रत्यक्षीकर्तुमप्यशक्ये श्रीकृष्णे प्रेमैव तावद्दुर्लभः, भवतीनां सर्वात्मभावः सर्वात्मना सर्वेणैव स्वरूपेण सहितः परिपूर्णो यो भावः स महाभाव इत्यर्थः । सूर्यो यथा सर्वांस्तापसंक्रमणेन व्याप्नोति, चन्द्रो यथा सर्वाञ्शैत्यसंक्रमणेन व्याप्नोति तथा यः सर्वान्स्वधर्मसंक्रमणेनाततिं व्याप्नोतीति सर्वात्मा स चासौ भावश्चेति स इति श्लेषेण । तल्लक्षणनपि प्रकटीकृतम् । यदुक्तम्—"अनुरागः स्वसंवेद्यदशां प्राप्य प्रकाशितः । यावदाश्रयवृत्तिः स्याद्भाव इत्यभिधीयते ॥" इति । स च महाभावः प्रेम्णः सप्तमो विलासः । भवतीनां न त्वन्यासां लक्ष्म्यादीनामपीत्यर्थः कीदृशः—अधिकृतः अधिकारविषयीकृतः । तत्राधिकारो भवतीभ्य एव परमेश्वरेण दत्तो नान्याभ्य इति भावः । अत एव विरहेण कर्त्रा मे मम महाननुग्रहः कृतः दिव्योन्मादचित्रजल्पादिमहाभावभेदान्दर्शयित्वेत्यर्थः । यदि भवतीनां विरहो नाऽभविष्यत्तदा कृष्णो मां न प्रास्थापयिष्यत्, अहं चैतदाश्चर्यं नाद्राक्ष्यमिति स्वभाग्यपरावधिरुक्त इति ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भक्तिप्रवर्त्तनरीतिमेव स्पष्टयति । यद्यस्मात् पुत्रादीन् तत्तन्मन्यान् निजकृष्णैकालम्बनस्वाभाविकभावबलेन हित्वा अवास्तवबुद्ध्या परित्यज्य कृष्णेति आख्या ख्यातिर्यस्य तं परं पुरुषं नराकृतिपरब्रह्मरूपं यूयमवृणीत वास्तवकान्ततया स्वीकृतवत्यः । तद्दिष्ट्या भद्रं लोकानां महद्भाग्यमित्यर्थः । भवतीनां तादृशचरितं दृष्ट्वा श्रुत्वान्ये च तथा प्रवर्त्तेरन्निति ॥ २६ ॥ अधिकृत इति शीलादित्वात् वर्त्तमाने क्तः । तद्योगे च भवतीनामिति कर्त्तरि षष्ठी । ततश्चाधोक्षजे सर्वात्मना परिपूर्णत्वेन यो भावो महाभावपर्यन्तस्तद्दशां प्राप्तः निरन्तरतदाविर्भावकः प्रेमा स भवतीभिरधिक्रियते वशीकृत्य स्थाप्यत एव । यद्वा । तस्मिन् यः सर्वत्रात्मभावः । "आततत्वाच्च मातृत्वादात्मा हि परमो हरि"रिति न्यायेन सर्वत्र स्फुरति स भवतीष्वेव दर्शनाद्भवतीभिरेव वशीक्रियते इत्यर्थः । अतः सोऽपि भवतीनां न दूर इति भावः । अत एव हे महाभागास्ततो विरहो नामायं बहिरङ्ग एवेति न तत्रान्तःकरणावेशो युज्यत इति । किन्तु मह्यमेतादृशप्रेममहिमदर्शनानुग्रहार्थमेवासौ विरहो बहिः स्फुरतीति मन्ये इत्याह । विरहेणेति । विरहेण कर्त्रा ॥ २७ ॥

---

१. गतो–विज. ; कृतो–श्रीधरादयः । २. व्वो–विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तर्हीदृश-भक्तिमती लक्ष्मीरेव श्लाघ्यताम्, वयं तु परमास्वतन्त्रत्वात्तादृशभजनासमर्थाः, तत्राह—दिष्ट्येति। एतच्चातीव भद्रं जातमित्यर्थः। स्वजनं भ्रातृभगिन्यादिकम्, 'अवृणीत' स्वकान्ततया स्वीकृतवत्यः, परं पुरुषं पुरुषोत्तमं तत्र च कृष्ण इति आख्या नाम ख्यातिर्वा यस्य तम्; इत्यशेषरूपगुणादिप्रकटनेन माहात्म्यविशेष उक्तः, पुत्रादीनां त्यागस्तत्तत्स्नेह-त्यागेन साक्षात् परित्यजनेनैव वा; ततश्च देहानां त्यागस्तत्र नैरपेक्ष्येण मृततुल्यतावाप्तेः। त्यागस्य यथोत्तरं न्यूनताभिप्रायेण निर्द्देशः, अतएवाप्यर्थे चकारः। इति भक्तेरेव प्रकारविशेषेण लक्ष्मीतोऽपि यूयं परमधन्या इति भावः॥ २६॥ ननु तर्हि तेन सह वियोगो न स्यात्; सत्यम् स तु भक्तेरेवोत्कर्षविशेषार्थमित्याह—सर्व्वेति। अधोक्षजे इन्द्रिय वृत्त्यगोचरेऽपि भगवति सर्व्वात्मना सर्व्वेन्द्रियवृत्तीनां तदेकनिष्ठत्वादिना भावः प्रेमा विरहेणाधिकं कृतः। हे महाभागा इति परमभाग्यवतीनां भवतीना-मेवायं सम्भवेत्, न त्वन्यजनस्येति सर्व्वप्रियजनेभ्यो युयं धन्यतमाः, किं पुनर्महालक्ष्म्याः सकाशात्; अतोऽस्मत्प्रभुरसौ भवती-भिरेव वशीकृत इति भावः। महानिति तैर्व्याख्यातम्। यद्वा, ईदृशोऽद्भुतः कोऽपि महाभाव एकोऽवश्यं वर्त्तते न वेति बुद्ध्या चिरमनुमीयमानोऽप्यदृष्टाश्रुतत्वान्मादृशां भक्तानां विश्वसनीयो न स्यात्, अधुना तु साक्षादनुभवेन ममात्राशाप्युत्पन्ना, इति महानेवानुग्रहो भवतीभिः श्रीभगवतैवात्र प्रेषणेन कृतः॥ २७॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च पुत्रादींस्त्यक्त्वा यद्यस्माद्यूयं श्रीकृष्णाख्यं परमपुरुषं वृणीत वृतवत्यः एतदपि दिष्ट्या भद्रं जातमित्यर्थः। अतः भवत्यः पूर्णार्थाः लोकपूजिताश्चेति सम्बन्धः॥ २६॥ भवतीभिरहमपि कृतार्थीकृत इत्याह। सर्वात्मभाव इति। हे महाभागाः! विरहेण हेतुना ऽधुनाधोक्षजे भवतीनां कर्तरि षष्ठी युष्माभिर्यत्सर्वात्मभावोऽधिकृतः प्रस्तुतः सर्वात्मना करणत्रयेण भावो भक्तिः सर्वोऽप्यात्मनो मनसः भावोऽभिप्रायविशेषोऽधिकृतः प्रस्तुतः प्रकाशित इति वा एष मे मह्यं महाननुग्रहः कृतः तत्स्मारणेनाहमपि कृतार्थीकृत इत्यर्थः॥ २७॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यूयं कृष्णाख्यं परमपुरुषं वृणीतेति यत्तद्दिष्ट्या सदैवानुग्रहः॥ २६॥ भवतीनां सर्वात्मना अखण्डस्वामिना हरिणा सह भावो लीलाधिगतः प्राप्त इति यदतो विरहेण महाननुग्रहः कृत इति मन्ये॥ २७॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

भक्तिप्रवर्त्तनैरीतिमेव स्पष्टयति। दिष्ट्या पुत्रानिति॥ २६॥ भवतीनां तु सर्वात्मना परिपूर्णत्वेन यो भावो महाभाव-पर्यन्तदशां प्राप्तः प्रेमा यस्त्वधोक्षजेऽपि कृतः अधिकारितया प्रवर्त्तितस्तद्वशकारीत्यर्थः। अतः सोऽपि भवतीनां दूर इति भावः। किन्तु मह्यमेतादृशप्रेममहिमदर्शनार्थमेवासौ भवतीष्वभ्युदित इति मन्यतामित्याह। विरहेणेति। विरहेण कर्त्रेति भवतीना-मित्यादि॥ २७–२८॥

श्रीमज्जीवगोस्वाकृतः बृहत्क्रमसन्दर्भः

अपि च भवतीनां भगवता सह विरहो नास्तीति दर्शयितुमुपक्रममाण आह—सर्वात्मभाव इत्यादि। अधोक्षजे श्रीकृष्णे भवतीनां सर्वात्मना कृतो भावोऽधिकृतः, अधिकारी कृष्णविषये स्वामीत्यर्थः। तेन कृष्णेन भवतीनामधीन इत्यर्थः। तस्मात् सर्वथैव भवतीनां पुरतोऽसौ वर्तत एव, अतो न तेन सह विरहः। ननु तद्विरहेण वयमपि तप्ता एव वर्तामहे, भवता किमिद-मुच्यते इत्याशङ्क्याह—विरहेणेत्यादि। हे महाभागाः। युष्माकं विरहेण मे महाननुग्रहः कृतः। अयमाशयः—भवतीनां वास्तवो विरहो नास्ति, तथापि ममानुग्रहार्थं भगवतैव भवतीनां विरह इति प्रतीतिः कारिता। अन्यथा भवतीनां चरण-दर्शनं मे कुतः स्यात्॥ २७–२८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तेन सह भवतीनां विरहो नास्त्येव, यतोऽधोक्षजे कृष्णे सर्वात्मभावोऽधिकृतोऽधिकारी, स एव तमुपसन्नीकरिष्यति। किन्तु ममैवानुग्रहार्थं भवतीनां विरहव्यपदेशः, अन्यथा भवच्चरणसन्दर्शनं कुतो मे स्यादित्याह—विरहेणेत्यादि। हे महाभागः? रहस्करो नर्मसखा॥ २७–२८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुत्रादीन् ममतास्पदानि त्यक्त्वा कृष्णाभिधानं परं पुरुषं स्वसम्भोक्तृत्वेन यत् अवृणीत एतद्दिष्ट्या ममातिभाग्ये-नैव॥ २६॥ ननु वयं धर्मं त्यक्त्वा यत् परपुरुषं वृतवत्यस्तत्र भवतः किं भाग्यमभूत्तत्राह। सर्वात्मेति। अधोक्षजे अन्यैः प्रत्यक्षीकर्त्तुमप्यशक्ये श्रीकृष्णे प्रेमैव तावद्दुर्लभः। भवतीनां तु सर्वात्मभावः सर्वात्मना सर्वेणैव स्वरूपेण सहितः परिपूर्णो यो

भावः स महाभाव इत्यर्थः। सूर्यो यथा सर्वांस्तापसङ्क्रमणेन व्याप्नोति चन्द्रो यथा सर्वान् शैत्यसङ्क्रमणेन व्याप्नोति तथा यः सर्वान् स्वधर्मसङ्क्रमणेन अतति व्याप्नोतीति। सर्वात्मा चासौ भावश्चेति स इति श्लेषेण तल्लक्षणमपि प्रकटीकृतं। यदुक्तम् "अनुरागः स्वसम्वेद्यदशां प्राप्य प्रकाशितः। यावदाश्रयवृत्तिः स्याद्भाव इत्यभिधीयत" इति। स च महाभावः प्रेम्णः सप्तमो विलासः भवतीनां न तत्रन्यासां लक्ष्म्यादीनामपीत्यर्थः। कीदृशः अधिकृतः अधिकारविषयीकृतः तत्राधिकारो भवतीभ्य एव परमेश्वरेण दत्तो नान्याभ्य इति भावः। अत एव विरहेण कर्त्रा मे मम महान् अनुग्रहः कृतः दिव्योन्मादचित्रजल्पादिमहाभावभेदान् दर्शयित्वेति भावः। यदि भवतीनां विरहो नाभविष्यत्तदा कृष्णो न मां प्रास्थापयिष्यत्। अहञ्च एतदाश्चर्यं नाद्रक्ष्यमिति स्वभाग्यपरावधिरुक्तः॥ २७॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

"स्वकृत इह विसृष्टा" इति पश्चात्तापो न विधेयस्तेनैव कृतार्थत्वसम्पादनादित्याह। दिष्ट्येति। देहाभिमानस्य देहव्यापाराणां च परित्यागाद्देहत्यागः अत एव मथुरां न गच्छन्ति। पुत्रादीन् हित्वा तद्योगक्षेमाद्यनुसंधानं विहाय यत्कृष्णाख्यं परं पुरुषं वृणीत तद्दिष्ट्या महद्भाग्यं पुत्राद्यासक्तिरेव भगवदासक्तौ प्रतिबन्धिका तदासक्तित्यागश्चातिदुष्करः तत्रापि यूयं स्त्रियः यासां पुत्राद्यासक्तित्यागः परमदुष्करः न तत्त्यागो वृथा यतः परं सर्वोत्कृष्टं पुरुषं पूर्णं परमात्मानं वृणीत। ननु स्त्रीणां स्वपुरुषत्यागः परपुरुषस्वीकारो अतिदोषावहत्वेन शास्त्रे प्रतिपादितः "पतिशुश्रूषणं स्त्रीणां परो धर्मो ह्यमायये"त्यादिना भगवता च पतिशुश्रूषणादिरेव धर्मत्वेन निरूपित इत्याशङ्कानिवृत्त्यर्थमुक्तं कृष्णाख्यं सच्चिदानन्दाख्यपरमेश्वरस्यैव सर्वपतित्वात्त विहाय पत्यादिशुश्रूषणस्य परमानर्थावहत्वात्पतिशुश्रूषणमपि वासुदेवबुद्ध्यैव श्रेयस्करं किं पुनर्वक्तव्यं साक्षात् परब्रह्मासक्तमतीनां भवतीनां माहात्म्यं यथा व्यभिचारिण्योऽपि पुनरासक्तिपूर्वकं स्वपतिशुश्रूषणात्कृतार्था भवन्ति। तद्वत्स्वपतिकृष्णत्यागाद्व्यभिचारित्वं तत्रैव पुनः समासक्तिसम्पादनात्परमपतिव्रततेति भावः॥२६॥ ननु प्रियविरहानलज्वालामालाव्याकुलहृदयानां क्षणमात्रमपि स्वास्थ्याभावादुभयभ्रष्टानामस्माकं कुतस्त्वं कृतार्थत्वमित्याशङ्क्याह। सर्वात्मेति। सर्वात्मना भाव एकान्तभक्तिः अधिकृतः प्राप्तः। यद्वा सर्वोऽपि आत्मनोऽन्तःकरणस्य भावः प्रीतिमात्रं भवतीनामधोक्षज एवाधिकृत उत्तरोत्तरं वृद्धिं नेतुमारब्धः भवतीनां साधनविधुराणां तत्रापि बह्वीनां तत्राप्यधः अक्षजं वृत्तिमात्रं यस्मात्तस्मिन् वृत्तिमात्रागोचरे परमात्मनि कामजस्तादृशो भावो विरहेण पुष्टिं गमिष्यति अतो नायं विरहोपकारकः अधो न क्षीयते जात्विति निरुक्त्या च सत्यस्वरूपे तस्मिन् पुष्टिं गतो भावः प्रियवियोगाभावाय फलिष्यतीति भावः। ननु साधनैर्विना कथमेवं जातं कार्यमात्रस्य साधनसाध्यत्वनियमादित्याशङ्क्याह। हे महाभागाः! पूर्वपुण्योत्थभाग्यवशादस्मिन् जन्मनि भगवद्भक्तिसाधनेषु दानादिषु प्रवृत्तिर्भवति पूर्वजन्मनि सम्यगनुष्ठितसाधनानां तु महाभाग्यशालिनां नास्मिन् जन्मनि साधनापेक्षा तस्मान्महाभागानां भवतीनामिदानींतनसाधनविरहेऽपि तथा भूतभावोत्पत्तौ न विरोध इति भावः। न चेदं प्रशंसामात्रमिति शङ्क्यं ममाप्येवंविधभावस्य साध्यत्वादित्याशयेनाह। महानिति। तादृशभावबोधनेन तत्रोत्कण्ठामुत्पादयन्तीभिर्भवतीभिर्ममोपरि महानपरिच्छिन्नोऽनुग्रहः कृत इत्यर्थः॥ २७॥

गूढार्थदीपिनी

अवृणीत तदपि दिष्ट्या॥ २६॥ सर्वात्मभाव अनन्यप्रेमा प्राप्तः। विरहेण हेतुना आगतस्य ममोपरि अनुग्रह कृतः॥ २७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

परं निःसमानातिशयं वृणीत वृतवत्यः॥ २६॥ सर्वैरात्मभिः मनोवचनदेहैर्यो भावो भक्तिः स तथाभूतः अधिकृतः प्राप्तः विरहो वियोगस्तेन अत्र मम आगमेनेन हेतुभूतेन मम महाननुग्रहः कृतः॥ २७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यूयं देहान् लज्जादिवर्जनेन कृष्णाख्यं परं पुरुषं साक्षान्नारायणं वृणीतेति यत्तद्दिष्ट्या दैवतः॥ २६॥ सर्वात्मभावः सर्वस्वामित्वपूर्विका भक्तिः पत्याद्यत्वस्थानेऽयमेवेति भावोऽनुसन्धानं वा विरहेण हे महाभागा व उपरि महाननुग्रह एव कृत इति मन्ये॥ २७॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

न केवलं स्नेहोत्कर्षेणैव भवतीनामुत्कर्षः किं तु प्रपत्तिरप्युत्कृष्टेत्याह। दिष्ट्येति। प्रपत्तिबाधका एत पुत्रादयः पुत्रादीनामासक्तिजनकत्वात् अनासक्तो हि प्रपद्यते स्त्रीणां सुतरामेवैते प्रतिबन्धका इति गणयति। देहाः स्वस्यैव अवस्थाभेदेन भिन्नाः नानाविधोपयोगा इति तदपेक्षाभावाय बहुवचनं स्वार्थं विनियोगाभावात्त्यागः अन्यथा भगवतः स्थाने गच्छेयुः किं तु भगवदाकाङ्क्षामेव भावयमानास्तिष्ठन्तीति पुत्रादिवत् देहत्यागोऽपि तथा भिन्नानां स्वजनानां गोपिकानां परस्परमपि प्रासङ्गिकः समाजः

गृहाणामाधारभूतानामपि परित्यागः पूर्वमुपपादितः चकारात् लोकानामपि वृथा परित्यागं वारयति । वृणीतेति । पुरुषत्यागो दोषायेति तदर्थमाह । परमिति । व्यभिचारिण्या पतिं यदि भवन्ति तदापि पूर्वदोषं परित्यज्य कृतार्था भवन्ति जगति प्रायेण चर्षणीरूपाः व्यभिचारिण्य एव परं दिनजन्मव्यवस्थाः । अतः परः पुरुषः सेव्य एव । ननु पूर्वमपि स्थिताः यथा दोषात्ततोपगता एवमग्रेऽपि भविष्यन्तीति किं परमपुरुषप्रपत्त्येत्याशङ्क्याह । वृणीतेति । इदानीं हि वरप्राप्तौ भगवान् पूर्वमिच्छयति विशेषः किं च कृष्णाख्यमिति स हि तदर्थमेवावतीर्णः प्रमेयबलेनापि न त्यक्ष्यति पुरुषत्वेन फलान्तराभावेन न काचित् क्षतिः ॥ २६ ॥ एवं भक्तिप्रपत्ती निरूप्य सर्वात्मभावं निरूपयति । सर्वात्मभाव इति । तदुपपादितं दशधा तत्रापि विशेषमाह । विरहेणेति सम्भोगे भवेदपि तादृशी मतिः सर्वोऽप्यात्मनो भावः भगवत्येवाधिकृतः उत्तरोत्तरवृद्धिमारब्ध इव । विषयस्याप्यलौकिकत्वमाह । अधोक्षज इति । अधः अक्षजं यस्मात् इति कोऽपि भावः तत्र कर्तुमशक्यः तादृशे सर्वात्मभावो दुर्लभः तत्रापि बह्वीनां तत्रापि साधनरहितानां तर्हि साधनाभावे दृश्यमानं कार्यं भ्रमप्रपन्नं भविष्यतीति आशङ्क्याह । हे महाभागाः ! इति भवतीनामुत्पत्तिशिष्टमेव तादृशं भाग्यं साधनमिति न साधनाभावः । ननु स्तुतिरेवैषा क्रियते न वस्तुत इत्याशङ्क्याह । महान्मेऽनुग्रहः कृत इति । न हि कोऽपि परस्तोत्रं कुर्वन् आत्मनो गुणभावमङ्गीकरोति । अतः स्वाभिप्रायप्रदर्शनेन त्वयाप्येवं कर्तव्यमिति उपदेशेन महानेवानुग्रहः कृतः ॥ २७ ॥

श्रीसुबोधिनी-सारः

पुत्रादीन् हित्वा त्यक्त्वा कृणाख्यं परं पुरुषं यूयम् अवृणीत वृतवत्यः यत् यतः ॥ २६ ॥ अधोक्षजे श्रीकृष्णे भवतीनां भवतीभिः सर्वात्मभाव एकान्तभक्तिरधिकृतः प्राप्तः विरहेण हेतुना मे ममोपरि महाननुग्रहः कृतः तद्भक्तजनं दर्शनसंगादेर्दुर्लभत्वात् हे महाभागाः ॥ २७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तासां भक्तिमेव दर्शयति—दिष्ट्येति । यत् यस्मात् पुत्रादीन् हित्वा त्यक्त्वा परं पुरुषं श्रीकृष्णाख्यं अवृणीत वृतवत्यः अतः पूर्णार्था लोकपूजिताश्चेत्यन्वयः ॥ २६ ॥ तासां भक्तिदर्शनेन स्वस्यापि भक्तेरुद्बोधादात्मनः कृतार्थतामाह—सर्वात्मभाव इति । अधोक्षजे विषयाविष्टचित्तानामिन्द्रियजन्यज्ञानाविषयेऽपि श्रीकृष्णे भवतीनां सर्वात्मभावः सर्वतोऽधिकस्नेहरूप एकान्तभक्तियोगः अधिकृतः प्राप्तः । 'अतो युष्मद्भाग्यं तु किं वक्तव्यम्, इत्याशयेन सम्बोधयति—महाभागा इति । विरहेण हेतुना स्वसर्वात्मभावप्रदर्शनेन भवतीभि र्मे मह्यमपि महाननुग्रहः कृतः, तेनाहमपि कृतार्थो जात इत्यर्थः ॥ २७ ॥

अन्वितार्थप्रकाशिका

दिष्ट्येति । यद्ययं पुत्रान् पतीन् देहान् स्वजनान् भवनानि चेति पुत्रादिमन्यान् अवास्तवधिया हित्वा कृष्णाख्यं परं पुरुषं पतित्वेन अवृणीत वृतवत्यः तदपि दिष्ट्या ॥ २६ ॥ सर्वेति हे महाभागाः ! अधोक्षजे श्रीकृष्णे भवतीनां सर्वात्मभावः सवतोऽधिकस्नेहरूप एकान्तभक्तियोगः अधिकृतः प्राप्तः विहरेण हेतुना स्वसर्वात्मभावप्रदर्शनेन भवतीभिर्मे ममापि महाननुग्रहः कृतः तेनाहमपि कृतार्थो जातः ॥ २७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यद्यस्मान् पुत्रादीन् विहाय परं क्षराक्षर श्रेष्ठं पुरुषं अनादि सिद्धं दिव्यपुरुषाकारं यूयमवृणीतवत्यःइत्येतत् दिष्टराभद्रं जातं ॥ २६ ॥ सर्वेति अधोक्षजे भवतीनां भवतीभिः सर्वः समग्र आत्मनः अन्तःकरणस्य भावः परमभक्तिरूपः अधिकृतोऽधिकं प्राप्ता इत्यर्थः । हे महाभागाः विरहेण हरौ स्नेहजनितवियोगाधिक्यं दर्शनेन मे मम महाननुग्रहः कृतः ॥ २७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दिष्ट्येति किं च हे गोप्यः, यूयं पुत्रान्, पतीन्, स्वजनान्, भवनानि च, हित्वा, यद्यस्मात्, कृष्णाख्यं परं पुरुषं, वृणीत तवत्यः, एतदपि दिष्ट्या भद्रं जातमित्यर्थः । अतो भवन्त्यः पूर्णार्थाः लोकपूजिताश्चेति सम्बन्धः ॥ २६ ॥ भवतीभिरहमपि कृतार्थीकृत इत्याह । सर्वात्मभाव इति । हे महाभागाः, विरहेण हेतुनाऽधुना, अधोक्षजे श्रीकृष्णे, भवतीनां युष्माभिरित्यर्थः । कर्त्तरि षष्ठी । यत : सर्वात्मना करणत्रयेण, भावो भक्तिः, सर्वात्मभावः अधिकृतः प्रस्तुतः, यद्वा । सर्वोऽप्यात्मनो मनसो भावोऽभिप्रायविशेष इत्यर्थः । अधिकृतः प्रकाशितः । एषः मे मह्यं, महान् अनुग्रहः कृतः तत्करणेनाहमपि कृतार्थीकृत इत्यर्थः ॥ २७ ॥

श्रीहरिसूरिविरचितं भक्तिरसायनम्

सर्वेति : १०.४७.२७.
तत्सन्देशहरोऽहमस्मि तदिमाः प्रेम्णोपदेश्या इति गर्वोऽखर्वतरो ममाऽऽस हृदये हे गोपिकाः प्रागिह ।
सम्प्रत्युक्तपरात्मतत्त्ववचसां युष्माकमेवोक्तिभिर्जातो भूर्युपदेशपात्रमहमित्यत्यद्भुतं किं ब्रुवे ॥ ८७ ॥

कृष्णप्रिया

हे तादृशीजन हे गोपीजन ! यह आनन्द का विषय है कि पुत्रों का, पतिजन का, देह स्वजन एवं घर परिवार आदि सर्वका परित्याग करके परब्रह्म श्रीकृष्ण को सर्वसमर्पण किया एवं वरण किया है । यह ही जीवन का परम एवं चरम फल है आप सर्वथा प्रशंसा योग्य है ॥ २६ ॥ भगवान् श्रीकृष्ण अधोक्षज होने से इन्द्रियों से इनका ज्ञान शक्य नहीं है वैसे श्रीकृष्ण में आपने सर्वात्मभाव केवल विरह से ही सम्प्राप्त किया है सचमुच आप महाभाग हो । विशेष कर आपने मुझे उस दिव्य सर्वात्मभाव का दर्शन कराया । आपने मुझ पर असाधारण अनुग्रह किया है ॥ २७ ॥

श्रूयतां प्रियसंदेशो भवतीनां सुखावहः । यमादायागतो भद्रा अहं [1]भर्तू रहस्करः ॥२८॥

श्रीभगवानुवाच

भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् । आत्मत्वाद्भक्तवश्यत्वात्सत्यवाक्त्वात्स्वभावतः ॥२९॥
यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही । तथाहं[2] च मनःप्राणबुद्धीन्द्रियः[3]गुणाश्रयः ॥३०॥

कर्दमक्षमा

अन्वयः—हे भद्राः, भर्तृरहस्करः, अहम् , भवतीम् , सुखावहः, प्रियसन्देशः, यम् , आदाय, आगतः, सः श्रूयताम् ॥ २८ ॥ श्रीभगवान्, उवाच–आत्मत्वात् , भक्तवश्यत्वात् , सत्यवाक्त्वात् , च, स्वभावतः, मे, भवतीनाम् , वियोगः सर्वात्मना-क्वचित् , न हि ॥ २९ ॥ यथा, भूतेषु, खम् , वायुः, अग्निः, जलम् , मही, च भूतानि, तथा, मनः, प्राणबुद्धिन्द्रिय गुणाश्रयः, अहम् ॥ ३० ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

भर्तुः कृष्णस्य रहस्करो रहस्यकार्यकर्ता ॥ २८ ॥ भवतीनां मे मया सह वियोगो नास्ति । कुतः । सर्वात्मना सर्वस्योपादानकारणेन । अत एव सर्वेषु मनआदिकार्येष्वहमनुगतत्वेन स्थित इति स दृष्टान्तमाह । यथेति । भूतेषु चराचरेषु महाभूतानि वाय्वग्निर्वायुसहितोऽग्नि वायुश्चाग्निश्चेत्यर्थः । यथा तथाऽहं चेति । मन आदीनि कार्याणि गुणाः कारणं तेषामाश्रयत्वेनानुगत इत्यर्थः ॥ २९ ॥ ननु कारणत्वे सर्वानुगतत्वे च कार्यकारणभेदः स्यादत आह । आत्मन्येवेति । ननु नित्यसिद्धस्य कुतः सृष्ट्यादिरूपता अत आह । भूतेन्द्रियगुणात्मना । बुद्धीन्द्रियेति वा पाठः । तद्रूपेणेति । ननु निर्विकारस्य कुतस्तद्रूपतेति तत्राह । आत्ममायानुभावेनेति ॥ ३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इदानीं कृष्णसंदेशं वक्तुमुपक्रमते—श्रूयतामिति । यं संदेशम् ॥ एवमाश्वास्य किञ्चित्स्वास्थ्यमुपलभ्य वक्तव्यमाह । यद्वा—तथापि कैवल्यह्रासमदृष्ट्वा व्यग्रः संस्तत्संदेशेनैव स्वास्थ्यं भवतीति संभाव्य तमेव वक्तुमारभते—श्रूयतामिति । प्रियस्य संदेशः । ननु तेन संदेशेनालं येनाशु तत्प्राप्तिर्न स्यात्तत्राह—भवतीनां परमोत्कण्ठितानां सुखावह आश्वेव तत्प्राप्तिनिर्धारणात् । तदर्थमेवात्रागतोऽस्मि न त्वन्यार्थमिति तस्मिन्नादरं जनयति—यमिति । 'अन्यथा गोव्रजे तस्य' इत्यादिकमनेन प्रत्युत्तरितम् । भर्तुरित्यात्मनस्तद्दूतत्वं बोधितम् । तत्र च रहस्कर इत्यात्मनः परमाप्तत्वेन तत्संदेशदानयोग्यत्वम् , तथा संदेशस्य गोप्यत्वम् । किञ्च—भद्रा हे साध्व्य इति तासामेव तत्संदेशैकपात्रत्वं, तथा संदेशस्यापि भद्रत्वमादरार्थं सूचितम् ॥ २८ ॥ अवियोगे हेतुमाशंकते कुत इति । अत एव सर्वोपादानत्वादेव । उपादानकारणत्वं सदृष्टान्तमाह—यथेति । अनुगतानि कानि—भूतानीत्यत आह—खमित्यादि । इत्यर्थ इति—कारणस्य मृदादेः कार्येषु घटादिष्वनुगतत्वप्रसिद्धेरिति भावः ॥ अत्र प्रथमो ज्ञानोपदेशरूपः परमविज्ञान्प्रति तत्प्रेम्णोऽन्या धर्षणीयमहाबलवत्त्वज्ञापनार्थकः, मन्दधियः प्रति तत्प्रेममाहात्म्याच्छादनार्थकश्च । तथाहि—मया गोपीभ्यो दातुमुद्धवद्वारा ज्ञानामृतं प्रेषितं तदपि तासां प्रेमाग्निं निर्वापयितुमसमर्थं प्रत्युत तत्तापेनैवालीढं बभूवेत्यहो तासां प्रेमप्राबल्यं यन्महायोगेश्वरेण मयाप्युपदिष्टो ज्ञानयोगो वैय्यर्थ्यमगाद्यथा रासारम्भे कर्मयोग इत्यन्तरंगविज्ञभक्तान् प्रेम्णः प्राबल्यं प्रकाशयामास, तथा महाप्रेमवतीष्वपि गोपीषु सर्वहितकारिणा परमेश्वरेण मोक्षसिद्ध्यर्थं ज्ञानोपदेशः कृत इत्यन्यान्पंडितंमन्यान्मन्दधियः प्रति प्रेम्णो माहात्म्यमाच्छादयामास परमरहस्यत्वादिति । एवं भक्तविबुधान्प्रेमामृतस्य प्रदानेन पुष्णात्यभक्तासुरांस्त्वप्रदानेन वंचयतीत्युभयमेव मोहिनी सधर्मणः शास्त्रस्याऽस्य प्रयोजनं ज्ञेयम् । अथ प्रकृतमनुसरामः—भगवानुवाचेत्युद्धववाक्यम् तत्रोवाचेति लिटो महाप्रेमवतोऽपि मत्प्रभोरेतादृशवचनस्य प्रयोजनं मम दुर्गमत्वात्परोक्षमेवेति ज्ञापितम् । भवतीनां मे मया

---

[1] भर्तुर्हि किंकरः–विज. । *ग्रन्थलेखने लेखक प्रमादान्नष्टं श्रीमत्वल्लभाचार्यैः समाधिना दृष्टम् । [2] तथा ह्यहं–वीर. इदमर्धं च. मु. नास्ति । [3] भूतेन्द्रियः–श्रीधर. वंशी. सना. जीव. सु.; बुद्धिन्द्रिय–वीर. विज. विश्व. ।

सह वियोगो नास्त्येव, कथं रुदित्वारुदित्वा मर्तुमीहध्व इति भावः। कुतः-सर्वेषामात्मना परमात्मना, अहं हि परमात्मा भवाम्यत्र सर्वशास्त्राणि सर्वे गर्गादयो मुनयश्च वरुणादयो देवाश्च प्रमाणम्, तस्मात्परमात्मरूपेण भवतीनां देहेष्वहं वर्त एवेत्यतो मया सह सदा संयोग एव भवतीति भावः। अत्र च यथा रासारम्भे धर्मोपदेशवाक्येष्वप्याभ्यन्तरी शृंगारकथा स्वोपालम्भेन दोषनिवृत्त्यर्थो स्थापिता। तथाहि—दिनान्तरे भोः कृष्ण कामुकशिरोमणे त्वया रासकेलिदिने कथमस्मासु धर्मोपदेशः कृत इति प्रेयसीभिः सोपालम्भमुक्ते सति भो अविदुष्यः मया तु तद्दिने संभोगमकृत्वोपदेश एव कृतः कथं मुग्धाभिर्भवतीभिर्धर्मोपदेश एवावधारित इत्युक्त्वा 'रजन्येषा घोररूपा' इत्यादि वाक्यानां संभोगकथारूपं द्वितीयमर्थं कृष्णो व्याचष्टे स्म। तथैव सुदूरप्रवासान्ते भाविनि संयोगे—भोः प्राणनाथ कथमस्मासु महाविरहिणीषूद्धवद्वारा त्वया ज्ञानोपदेशः कृत इत्युक्त्वा 'भवतीनां वियोगो मे' इत्यादि वाक्यानां द्वितीयं प्रेमरीतिमयमर्थं व्याख्यास्यतीत्यत एतेषु वाक्येषु वर्तमान एवेति द्वितीयः प्रेमरीतिमयोऽर्थो व्याख्येयः। स यथा भवतीनां मया सह विरहो न सर्वेणात्मना किं त्वेकेन देहेनैव, आत्मशब्दस्य देहजीवमनोबुद्धिवाचित्वात्, प्रेमा ह्यात्मधर्म एव ममात्मबुद्धीद्रियादयो भवतीष्वेव स्थिता देह एव मया मथुरामानीतः, भवतीनामप्यात्ममनोबुद्धीन्द्रियादयो मय्येव वर्तन्ते केवलं देहा एव तत्र व्रजे स्थिताः, किन्त्वहं सर्वशास्त्रेषु सर्वैः प्रेमाधीन एव निरूपितोऽत एव प्रेम्णि मम नास्ति स्वातन्त्र्यम्, प्रेमवतामस्माकं परस्परं देहविच्छेद एव विप्रलम्भस्तमारुह्य प्रेमा संप्रत्यतिवर्धितुमिच्छत्यतो मया सोत्कंठेनापि स्वदेहः सांप्रतं कथं व्रजमानेतुं शक्यः, किन्तु स एव प्रेमा स्वाभीप्सितां वृद्धिं प्राप्य विप्रलम्भं दवयित्वा यदा संभोगभूमिकामारोहयति तदैव तदधीनेन स्वदेहो व्रजमानेतव्य इति देहेनापि वियोगोऽपयास्यतीति भावः। किन्त्वहमुपादानकारणत्वादपि सर्वभूतेषु वर्त एवेत्याह—यथेति। भूतेषु चराचरेषु, भूतानि महाभूतानि, तान्येव कानीत्यत आह—खमिति। वाय्वग्निर्वायुसहितोऽग्निः यथा वर्तते तथाह—मन आदीनि कार्याणि गुणास्तेषां कारणम् सर्वेषामपि परमकारुण्येनाश्रयः, तत्रातत्रानुगतो वर्त एवेत्यर्थः। पक्षे मां सदा प्रेम्णा ध्यायन्तीनां भवतीनां मनःप्राणबुद्धीन्द्रियगुणाञ्छब्दादींश्चाश्रयामीति सः। आश्रित्य तत्रतत्र स्फुरन्नेवाहं सदा वर्त इत्यर्थः॥ २९॥ भगवतः "एको देवः सर्वभूतेषु गूढः" इत्यादिश्रुतिसिद्धमेकत्वमाक्षिप्य समाधत्ते—नन्वित्यादिना। अतोऽत्राक्षेपे। पुनराशंकते—नन्विति। भूतादिरूपेण आत्मनीति। एतेन कार्यकारणसाधनाधारत्वं स्वस्यैवोक्तम्। पाठान्तरे गुणशब्देन भूतग्रहणमपि। किञ्चेन्द्रियपदेनैव बुद्धेर्ग्रहात्पूर्वपाठो मम सम्यग्भातीति। तद्रूपेणेति—बुद्ध्यादिरूपेण। भूतादिरूपत्वे शंकते—नन्विति। आत्मनो मायानुभावेनाचिन्त्यशक्तिप्रभावेण॥ आत्मन्येवेति। तत्र प्रथमार्थः-नन्वेकस्योपादानत्वमन्तर्यामित्वञ्च दुर्घटं घटादौ मृत्तिकादेरन्तर्यामित्वसंभवान्मतान्तरेप्युपादानरूपाणां परमाणूनामचेतनानामन्य एवेश्वरश्चेतनो नियामकस्तत्राह—आत्मन्येवेति। आत्मन्येवाधिष्ठाने। आत्मना निमित्तरूपेणात्मानमुपादानरूपं भूतेन्द्रियगुणात्मना भूतरूपेणेन्द्रियरूपेण गुणरूपेण जीवरूपेण च सृजामि प्रकटयामि। 'बुद्धीन्द्रिय-' इति पाठे भूतान्युपलक्षणीयानि। न त्वात्मा खल्वेक एव तस्याधिष्ठानादित्वं युगपत्कथं सिद्ध्यतीत्याशंक्य सर्वाशंकानिरासार्थमाह—आत्ममायानुभावेनाचित्यशक्तिप्रभावेण। 'श्रुतेस्तु शब्दमूलत्वात्' इति न्यायेन चिन्तामण्यादिष्वपि तादृशत्वदर्शनेन चेति भावः। द्वितीयो यथा—ननु सत्यमस्मासु तथैव त्वं स्फुरसि त्वयि तु न वयं, संयोगो नाम च स्वप्नादिव्यतिरिक्तो मिथो मेलनमेव तत्राह—आत्मनि चित्ते निर्विकारेत्यात्मना मनसा संकल्पविकल्पात्मकेनात्मानं प्रयत्नं भवत्संयोगविलासात्मकमेकं सृजे करोमि "आत्मा देहमनोबुद्धिस्वभावधृतिब्रह्मसु। प्रयत्ने च" इति विश्वप्रकाशः। न केवलं सृजेऽनुपालयामि चिरकालं व्याप्य सम्बर्धयामि च तथा हन्मि विलासान्तरार्थं त दूरीकरोमि च, एवमन्यमपि जानीतेत्यर्थः कीदृशेनात्मना—आत्मनः स्वस्य मायाया यदा भवतीषु, यद्वा—आत्मनि स्वस्मिन्भवतीनां वा माया (दया) तस्या अनुभावः प्रभावो यत्र तादृशेन। पुनः कीदृशेन—भूतानि सिद्धानि साक्षात्थितान्येव इन्द्रियाणि चक्षुरादीनि गुणा रूपादयः आत्मनोऽहंकारास्पदानि यत्र तादृशेन। 'बुद्धी—' इति पाठे ननु मनोरथमात्रमिदं भवतः कथं सत्यं स्यात्तत्राह—बुद्धिगुणा विकारादय इन्द्रियगुणा दर्शनादयश्चात्मनस्तदात्मतां प्राप्ता यत्र तादृशेन विचारसिद्धप्रत्यक्षसंवलितेनेत्यर्थः। तस्मादुभयानुभवाद्बहिः प्रातीतिकोऽयं वियोगो नादरणीय इति भावः। तृतीयो यथा—प्रकाशः कथं सम्भवति तत्राह— आत्मनि विग्रहस्वरूपेऽधिष्ठाने आत्मना तेनैव करणभूतेनात्मानं तत्प्रकाशविशेषं सृजे 'तदाऽऽत्मानं सृजाम्यहम्' इति वदाविर्भावयामि! अनुपालयेऽभीष्टलीलापर्यन्त रक्षामि। हन्मि तदवसानेतद्गोपयामि। ननु कथं तेनैव सृजसि तत्राह—आत्ममायाऽचिंत्यशक्तिस्तस्या अप्यनुभावो यत्र तादृशेन तेन। पुनः कीदृशेन—भूतानि नित्यसिद्धानि, इन्द्रियाणि गुणा रूपादयश्चात्मा स्वरूपं च यस्य तादृशेन। 'बुद्धी—' इति पाठे बुद्धयोऽन्तःकरणानि इन्द्रियाणि च गुणाश्चात्मनः स्वरूपभूतान्येव यत्र तादृशेन। अतस्तत्रतत्र प्रकाशमात्रमेव स्यान्न तु विकार इति भावः॥ ३०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमाश्वास्य किञ्चित् स्वास्थ्यमुपलभ्य वक्तव्यमाह। यद्वा। तथापि वैकल्यह्रासमदृष्ट्वा व्यग्रः सन् तत्सन्देशेनैव वा स्वास्थ्यं भवतीति। सम्भाव्य तमेव वक्तुमारभते। श्रूयतामिति। प्रियस्य सन्देशः। ननु तेन सन्देशेनालं येनाशु तत्प्राप्तिर्न स्यात् तत्राह। भवतीनां परमोत्कण्ठितानां सुखावहः आश्वेव तत्प्राप्तेर्निर्द्धारणात्। तदर्थमेवात्रागतोऽस्मि न त्वन्यार्थमिति अस्मिन्नादरं

जनयति । अन्यथा गोव्रजे तस्येत्यादिकमनेन प्रत्युत्तरितम् । भर्त्तुरित्यात्मनस्तद्भृत्यत्वं बोधितं तत्र च रहस्कर इत्यात्मनः परमाप्तत्वेन तत्संदेशदानयोग्यत्वं तथा सन्देशस्य गोप्यत्वं किञ्च भद्रा हे साध्व्य इति सासामेव तत्सन्देशैकपात्रत्वं तथा सन्देशस्यापि भद्रत्वमादरार्थं सूचितम् ॥ २८ ॥ तत्र च श्रीभगवानुवाचेति तत्तदक्षरेणैवाहं तद्वक्ष्यामीति भावः । तत्र च सुप्तोऽहं किल विललाप हेतिवत् लिटा परोक्षनिर्द्देशस्तदर्थं तु नाहं विवेक्तुं शक्नोमि किन्तु भवत्य एव विचारयन्त्विति व्यनक्ति तथैवाह । भवतीनामित्यादि । तत्रापातप्रतीतो ज्ञानरूपः प्रथमार्थो रहस्यार्थान्तरगोपनाय प्रयुक्तोऽपि लोकरीत्या शोकशमक इव च भवतीति स्वयं भगवता विचार्य प्रयुज्यते स्म । तत्र न ज्ञानं नच वैराग्यं प्रायः श्रेयो भवेदिहेति नात्यन्तिकं विगणयन्त्यपि ते प्रसादमिति साधारणभक्तैरपि ज्ञानस्य तत्फलस्य च हेयतां शुद्धमत्प्रेमसाधुर्यस्य सर्वातिशयितां स्वानुभवेनैव निश्चिन्बतीनां तासां स्फुरिष्यतीति विचार्य प्रेमानुभवप्रमाणकसिद्धान्तमयस्तासां प्रतीतये मध्ये न्यस्तः । अथ तथापि तासां तत्र स्फूर्त्तिमात्रप्रतीत्या समुत्कण्ठाक्लेशपराकाष्ठामाशङ्क्य ताभिरस्यामवस्थायामनुभूयमानो नित्यलीलारूपस्तृतीयस्त्वर्थः सद्यः शान्तये स्यात् । तदनुसन्धानञ्च मदुपदेशप्रभावेण भविष्यतीति विचार्यैव निर्दिष्ट इति ज्ञेयं तत्र भवतीनामित्यर्द्धकं मुख्यवाक्यम् । अस्य प्रथमोऽर्थस्त्वेवं मे मया सह भवतीनां वियोगः क्वचिदपि न हि स्यात् तत्र हेतुः । सर्वात्मना सर्वेषामात्मना उपादानरूपेणान्तर्यामिरूपेण चेति । अथ द्वितीयः । सर्वत्रैव बहिरन्तश्च सदा मत्स्फूर्तेः सर्वात्मना सर्वप्रयत्नेन सर्वथैव मया सह वियोगो नास्तीति तदेव सदृष्टान्तमाह । यथेति । तत्राहमपि भवतीनां मनआदीनि गुणाः सौशील्यादयः मनआदीनां गुणवृत्तय एव वा आश्रयो यस्य सः । तेषामेवाश्रयरूपो वा तथा भूतोऽहं तत्र तत्र सदा वसन् परिस्फुरामीत्यर्थः । अथ तृतीयः सर्वात्मना सर्वेण प्रकाशेन वियोगो नास्ति किन्त्वेकेनानेन प्रापञ्चिकलोप्रकटप्रकाशेनैव साम्प्रतोऽयं वियोगः अन्येन तदप्रकटप्रकाशेन तु संयोग एवेत्यर्थः । कथं तत्राह । यथा खादीनि भूतानि स्वस्वकार्येषु वाय्वादिषु अप्रकटप्रकशेन वर्त्तन्त एव तथाहञ्च तत्र तत्र वर्त्ते इत्यर्थः । किमाकारस्तत्राह । भवतीनां बुद्ध्याद्याश्रयाकारः श्यामसुन्दरवेणुविलासिरूप एव सन्नित्यर्थः । एतदुक्तं भवति वृन्दावने मथुरायां द्वारकायामपि नित्यैव तस्य स्थितिः श्रूयते । वृन्दावने यथास्कान्दे तत्र वृन्दावनं रम्यं वृन्दादेवीसमाश्रितम् । हरिणाधिष्ठितं च तच्च ब्रह्मरुद्रादिसेवितमिति । वत्सैर्वत्सतरीभिश्च सदा क्रीडति माधवः । वृन्दावनान्तरगतः सरामो बालकैर्वृत इति च । पाद्मपातालखण्डे । अहो अभाग्यं लोकस्य न पीतं यमुनाजलम् । गोगोपगोपिकासङ्गे यत्र क्रीडति कंसहेति । यमुनाजलकल्लोले सदा क्रीडति माधव इति च । बृहद्गौतमीये च इदं वृन्दावनं रम्यं मम धामैव केवलम् । इत्यारभ्य सर्वदेवमयश्चाहं न त्यजामि वनं क्वचित् । आविर्भावस्तिरोभावो भवेन्मेऽत्र युगे युगे । तेजोमयमिदं रम्यमदृश्यं चर्मचक्षुषेति । श्रीगोपालतापनीश्रुतौ । गोविन्दं सच्चिदानन्दविग्रहं वृन्दावनभूसुररुहतलासीनं सततं समरुद्गणोऽहं परमया स्तुत्या परितोषयामीति । जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयं योऽसौ सौर्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गाःपालयति योऽसौ गोपेषु तिष्ठतीत्यादि । मथुरायां यथादिवाराहे । अहोऽतिधन्या मथुरा यत्र सन्निहितो हरिरिति । पातालखण्डे । अहो मधुपुरी धन्या यत्र तिष्ठति कंसहेति । वायुपुराणे । चत्वारिंशद्योजनानां ततस्तु मथुरा स्मृता । यत्र देवो हरिः साक्षात् स्वयं तिष्ठति सर्वदेति गोपालतापनीश्रुतौ । प्राप्य मथुरां पुरीं रम्यां सदा ब्रह्मादिसेविताम् । शङ्खचक्रगदाशार्ङ्गै रक्षितां मुसलादिभिः । यत्रासौ संस्थितः कृष्णस्त्रिभिःशक्त्या समाहितः । रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुरिति । अत एवोक्तम् मथुरा भगवान् यत्र नित्यं सन्निहितो हरिरिति । द्वारकायां यथैकादशस्कन्धान्ते । द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत् क्षणात् । वर्जयित्वा महाराज ! श्रीमद्भगवदालयम् । नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः । स्मृत्याशेषाशुभहरं सर्वमङ्गलमङ्गलमिति । अत्र श्रीविष्णुपुराणे त्वयं विशेषः । यदुदेवगृहन्त्वेकं नाप्लावयदिति कृष्णक्रीडाकरं स्थानमिति च । सर्वत्र जयति जननिवास इत्यादिकमुदाहरणीयम् । अतस्तत्र तत्र नित्यैव तस्य स्थितिर्वर्त्तते अथ च जन्मादिलीलायां गमनत्यागौ च श्रूयेते इति प्रकाशभेदेनैवोभयविधत्वं व्यवतिष्ठते तथाहि नचान्तर्न बहिर्यस्येत्यादिदामोदरलीलादृष्ट्या मृद्भक्षणलीलादौ च श्रीव्रजेश्वर्य्यादीनां तथानुभूत्याच श्रीकृष्णविग्रहस्य मध्यमत्वे एव विभुत्वं दृश्यते । तच्च विरोधिधर्मद्वयमेक एतस्मिन्नासम्भवम् अचिन्त्यशक्तित्वात् । तस्य च "श्रुतेश्च शब्दमूलत्वात्" इत्येतन्न्यायसम्मतत्वात् । तदेवं विभुत्वे सति युगपदनेकस्थानाद्यधिष्ठानार्थं रूपान्तरसृष्टिः विष्टपेषिता । किन्तु युगपन्मध्यमत्वविभुत्वप्रकाशिकया तयैवाचिन्त्यशक्त्या तदिच्छानुसारेणैक एव श्रीविग्रहोऽनेकधा प्रकाशते । बिम्ब इव स्वच्छोपाधिभिः किंतु तत्रोपाधिमात्रजीवनत्वेन साक्षात्स्पर्शाद्यभावेन वैपरीत्यादिनियमेन बिम्बस्य परिच्छिन्नत्वेन च प्रतिबिम्बत्वम् । अत्र तु स्वाभाविकशक्तिस्फुरितत्वेन साक्षात्स्पर्शादिभावेन यथेच्छमुदयेन तद्विग्रहस्य विभुत्वेन च बिम्बत्वमेवेति विशेषः । तत्र तेषां प्रकाशानां तयैवाचिन्त्यशक्त्या पृथक्-पृथगेव क्रियादीनि भवन्ति, अत एव युगपदाविर्भूतानां प्रकाशभेदावलम्बिनीनां निमेषोन्मेषादिक्रियाणामविरोधः । अत एव विभोरपि परस्परविरोधिक्रियागणाश्रयस्यापि तत्तत्क्रियाकर्तृत्वं यथार्थमेव तद्यथार्थत्वे बहु श्रीभागवतादि वर्णितं विदुषां तदुद्भवं सुखं नोत्पद्यते इति तदन्यथानुपपत्तिश्चात्र प्रमाणम् । इत्थमेवाभिप्रेत्य भगवता नारदेन "चित्रं बतैतदेकेन वपुषा युगत् पृथक्" इत्यादौ वपुष एकत्वेऽपि पृथक् प्रकाशत्वं तेषु प्रकाशेषु पृथक्-पृथक् क्रियाधिष्ठानादित्वं तादृशमुन्यादावपि न सम्भवतीति स्वयं चित्रत्वं च वक्ष्यते । एष प्रकाशः क्वचिदात्मशब्देनोच्यते क्वचिद्रूपादिशब्देन च । यथात्रैव नहि सर्वात्मना क्वचिदिति । अन्यत्र कृत्वा तावन्तमात्मानमिति । तावद्रूपधरोऽव्यय इति कृष्णेनेच्छाशरी-

रिणेति च । तत्र नानाक्रियाद्यधिष्ठातृत्वादेव लीलारसपोषाय तेषु प्रकाशेष्वभिमानभेदं परस्परमननुसन्धानञ्च प्रायः स्वेच्छयाङ्गीकरोति भगवानित्यपि गम्यते । एवं तच्छक्तिमयत्वात्तत्परिकरेष्वपि ज्ञेयम् । तत्र तेष्वपि प्रकाशभेदो यथा कन्याषोडशसहस्रविवाहे श्रीवसुदेवदेवक्यादिषु । वक्ष्यते च टीकाकृद्भिः । अनेन देवक्यादिबन्धुजनसमागमोऽपि प्रतिगृहं यौगपद्येन सूचित इति । तेषु श्रीकृष्णे च प्रकाशभेदादभिमानभेदो यथा नारददृष्टयोगमाया वैभवे । तत्र तत्र ह्येकत्र । दीव्यन्तमक्षैस्त्रापि प्रियया चोद्धवेन च । पूजितः परया भक्त्या प्रत्युत्थानासनादिभिरिति । तत्रान्यत्र मन्त्रयन्तं च कस्मिंश्चित् मन्त्रिभिश्चोद्धवादिभिरिति । तत्र भावभेदादभिमानभेदो लक्ष्यते । अयमेतदवस्थोऽहमत्रस्मीति एवं षोडश सहस्र कन्याविवाहे कुत्राचित् श्रीकृष्णसमक्षं कर्म कुर्वत्या देवक्यास्तदर्शनसुखं भवति तत्परोक्षं तद्दर्शनोत्कण्ठेति । यथा योगमायावैभव एव क्वचिदुद्धवेन संयोगः क्वचिद्वियोग एव इति विचित्रता । तदेवं तत्र प्रकाशभेदे सति तदभेदेनाभिमानक्रियाभेदेचावस्थिते सति च प्रकाशो द्विविधो ज्ञेयः । प्रकटोऽप्रकटश्च । तत्र प्रकटः प्रापञ्चिकेष्वभिव्यक्तिः । अप्रकटस्तेष्वनभिव्यक्तिः । तत्र पूर्वमष्टाविंशेऽध्याये यो गोलोकतया दर्शितः श्रीवृन्दावनस्यैव प्रापञ्चिक्तेष्वप्रकटः प्रकाशविशेषस्तत्र तदानीमपि स्थितेन श्रीकृष्णस्याप्रकटाख्येन प्रकाशविशेषेण तासामप्यप्रकाशैः संयोगः श्रीवृन्दावनप्रकटप्रकाशे प्राक्स्थितेन सम्प्रति मथुराप्रकटप्रकाशं गतेन श्रीकृष्णस्य प्रकटप्रकाशेन तु तासां प्रकटप्रकाशैर्वियोग इति । तदेव सदृष्टान्तमाह । यथेति । तत्र प्रथमार्थे कं वाय्वग्निर्जलं महीति । खादीनि भूतानि यथा भूतेषु वाय्वादिपार्थिववस्त्वन्तेषुपादानतयानुगमितानि तथा अहं सर्वेष्वित्यर्थः । अथ द्वितीयः । यथा भूतानि भूतेषु कार्यरूपेषु भूतानि कारणरूपाणि आश्रयत्वेन वर्त्तन्ते तथाहमपि भवतीनां ये मनआदयो गुणाश्च धैर्यादयस्तेषां मत्स्फूर्त्येकजीवनानामाश्रय इत्यर्थः । अथ तृतीयः । तत् कथं तत्राह । यथा स्वादीनि भूतानि स्वस्वकार्येषु वाय्वादिषु अप्रकटप्रकाशेन वर्त्तन्त एव तथाहञ्च तत्र वर्त्ते इत्यर्थः । किमाकारस्तत्राहं भवतीनां मनआद्याश्रयाकारः श्यामसुन्दरवेणुविलासिरूपएव सन्नित्यर्थः ॥ २९ ॥ आत्मन्येवेति । तत्र प्रथमार्थः । नन्वेकस्योपादानत्वमन्तर्यामित्वं च दुर्घटं घटादौ मृत्तिकादेरन्तर्यामित्वासम्भवात् मतान्तरेऽप्ययुपादानरूपाणाम्परमाणूनामचेतनानामन्य एव चेतन ईश्वरस्तन्नियामकः तत्राह । आत्मन्येवेति । आत्मन्येवाधिष्ठाने आत्मना निमित्तेनात्मानमुपादानरूपं भूतेन्द्रियगुणात्मना भूतरूपेणेन्द्रियरूपेण गुणरूपेण जीवरूपेण च सृजामि प्रकटयामि बुद्धन्द्रियेति पाठे भूतान्युपलक्षणीयानि । नन्वात्मा खल्वेक एव तस्याधिष्ठानादित्वं युगपत्कथं सिद्ध्यतीत्याशङ्क्य सर्वाशङ्कानिरसनार्थमाह । आत्ममायानुभावेन अचिन्त्यशक्तिप्रभावेण "श्रुतेस्तु शब्दमूलत्वात्" इति न्यायेन चिन्तामण्यादिष्वपि तादृशत्वदर्शनेन चेति भावः । द्वितीयो यथा ननु सत्यमस्मासु तथैव त्वं स्फूरसि त्वयि तु न वयं संयोगो नाम च स्वप्नादिव्यतिरिक्तं मिथो मिलनमेव तत्राह । आत्मनि चित्ते निर्विकारेऽपि आत्मना मनसा सङ्कल्पविकल्पात्मकेन आत्मानं भवत्संयोगविलासात्मकमेकं सृजे करोमि आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु प्रयत्ने चेति विश्वप्रकाशकोशः न केवलं सृजे अनुपालयामि चिरकालं व्याप्य संवर्द्धयामि च तथा हन्मि विलासान्तरार्थं तं दूरीकरोमि च एवमन्यमपि जानीतेत्यर्थः । कीदृशेनात्मना आत्मनः स्वस्य माया भवतीषु दया आत्मनि स्वस्मिन् भवतीनां वा दया तस्या अनुभावः प्रभावो यत्र तादृशेन पुनः कीदृशेन भूतानि सिद्धानि साक्षात् स्थितान्येव इन्द्रियाणि चक्षुरादीनि गुणा रूपादयः आत्मनः अहङ्कारास्पदानि च यत्र तादृशेन बुद्धीति पाठे । ननु मनोरथमात्रमिदं भवतः कथं सत्यं स्यात्तत्राह । बुद्धिगुणाः विवेकादयः इन्द्रियगुणा दर्शनादयश्च आत्मानस्तदात्मतां प्राप्ता यत्र तादृशेन विचारसिद्धप्रत्यक्षसंवलितेनेत्यर्थः तस्मादुभयानुभवाद्बहिः प्रातीतिकोऽयं वियोगो नादरणीय इति भावः । तृतीयो यथा । ननु तथा तथा प्रकाशः कथं सम्भवति तत्राह । आत्मनि विग्रहस्परूपे ऽधिष्ठाने आत्मनि तैनैव करणभूतेन आत्मानं तत्प्रकाशविशेषं सृजे तदात्मानं सृजाम्यहमिति वत् आविर्भावयामि अनुपालयेऽभीष्टलीलापर्यन्तं रक्षामि हन्मि तदवसानेऽन्तर्धापयामि । ननु कथं तेनैव सृजसि तत्राह । आत्ममाया अचिन्त्यशक्तिस्तस्या अनुभावो यत्र तादृशेन तेन पुनः कीदृशेन भूतानि नित्यसिद्धानीन्द्रियाणि गुणा रूपादयश्च आत्मा स्वरूपं च यस्य तादृशेन बुद्धीति पाठे बुद्धयोऽन्तःकरणानि च इन्द्रियाणि च गुणाश्च आत्मानः स्वरूपभूतान्येव यत्र तादृशेन अतस्तत्र तत्र प्रकाशमात्रमेव स्यात् न तु विकार इति भावः ॥ ३० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमाश्वास्य किञ्चित् स्वास्थ्यमुपलभ्य वक्तव्यमाह । यद्वा, तथापि वैकल्यह्रासमदृष्ट्वा व्यग्रः सन् तत्सन्देशेनैव वा स्वास्थ्यं भवेदिति सम्भाव्य तमेव वक्तुमारभते—श्रूयतामिति । ननु तेन सन्देशेनालम्, येनैवाशु तत्प्राप्तिर्न स्यात्तत्राह—भवतीनां परमोत्कण्ठितानां सुखावहः, तत्प्राप्तेर्निर्द्धारणात् । यद्वा, भवतीनां प्रियस्य सन्देशः—तदर्थमेवात्रागतोऽस्मि, न त्वन्यार्थमिति तस्मिन्नादरं जनयति—यमिति । (भा० १०।४७।५) 'अन्यथा गोव्रजे तस्य' इत्यादिकमनेन प्रत्युत्तरितम्, भर्त्तुरित्यात्मनस्तद्भृत्यत्वं बोधितम् । तत्र च 'रहस्करः' इत्यात्मनः परमाप्तत्वेन तत्सन्देशादानयोग्यत्वम्, तथा सन्देशस्य गोप्यत्वम्; किञ्च, भद्राः! हे साध्व्य इति तासामपि तत्सन्देशैकपात्रत्वं तथा सन्देशस्यापि भद्रत्वमादरार्थं सूचितम् । अत्रपक्षे श्रूयतामिति तासां विरहवैकल्येन लेखवाचनाशक्ति किंवा प्रवहदश्रुधारया लेखलोपं सम्भाव्य पत्रं दर्शयित्वा तन्मुद्रामुन्मुच्य स्वयमेवावाचयदिति ज्ञेयम् । एवं पूर्वोक्तं बुद्धिसत्तमत्वं तथा बृहस्पति—शिष्यतया वाग्मित्वादिकञ्च दर्शितम् ॥ २८ ॥ हि निश्चितम् । क्वचित् कदाचिदपि ।

अन्यत्तैर्व्याख्यातम्। यद्वा, सर्व्वात्मना सर्व्वेण प्रकारेण वियोगो नास्ति, भवतीनां प्रकाशविशेषैरेव सह नित्यं रासादिलीलाभिर्व्रजे विहरमाणत्वादिति नित्यलीला सूचिता। यद्वा, सर्वत्रैव बहिरन्तश्च सदा मत्स्फूर्त्तेरिति सदृष्टान्तमाह—यथेति। खमित्यादिना यथाक्रमनिर्द्देशेन खादीनामपि पूर्व्वपूर्व्वस्य कारणत्वेनोत्तरस्मिन् कार्य्ये स्थितिः सूचिता। तथाहमपि भवतीनां मनआदीनि गुणाश्च सौशील्यादयः; किंवा मनआदीनां गुणा वृत्तय एवाश्रयो यस्य तथाभूतस्तत्र तत्र सदा वसन् परिस्फुरामीत्यर्थः ॥ २९ ॥ न चैवमत्र पुर्य्यां वर्त्तमानस्यापि तत्र तत्र स्थितिर्ममासम्भाव्येति मन्तव्यम्। मच्छक्तेर्दुर्वितर्क्यत्वादित्याह—आत्मनीति। सृजे प्रकटयामि, हन्मि अन्तर्द्धापयामि, अनु निरन्तरं पालये विचित्रविभूतिभिर्विभूषयामि। तत्र चात्मन्येवेत्यादिना सृष्ट्यादेराधारः, करणं, कर्म, कर्त्ता चाहमेवेति। तत्र कारकान्तरसम्बन्धो निरस्तः। ननु नूनं त्रिगुणात्मिकया मायया सृजसि, तत् किं नस्तेनेत्यत आह—आत्ममायानुभावेन। आत्ममाया—स्वरूपभूतमाया चिच्छक्तिस्तस्याः प्रभावेण। ननु किमस्माकमन्येन त्वदीयरूपेण, वयन्तु त्वामेव व्रजेन्द्रनन्दनं लब्धुमिच्छामः; तत्राह—भूतेन्द्रियगुणात्मना विशिष्टमात्मानमेव सृजे, भूतानां सर्व्वजीवानामिन्द्रियाणि चक्षुरादीनि सौन्दर्य्यादिना गुणयति स्वस्मिन्नावर्त्तयतीति भूतेन्द्रियगुणो य आत्मा स्वभावस्तेन भवतीनां मनोहरं रूपमेवेत्यर्थः ॥ ३० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

रहस्करः रहस्यप्रकाशकः ॥ २८ ॥ तथाहं चेति। व्याप्य स्थित इति शेषः स्वमेव विशिनष्टि। मन इति। मनः प्राणाख्याधारभूतः स्थित इत्यर्थः ॥२९॥ मायानुभावेन स्वसङ्कल्पानुभवेन भूतेन्द्रियगुणात्मना भूतेन्द्रियादिरूपेण सृजामीत्यर्थः ॥३०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं ताः प्रशस्याथ प्रियसन्देशः श्रूयतामित्याह। श्रूयतामिति। हे भद्राः भवतीनां सुखकरः प्रियस्य सन्देशः श्रूयतां सन्देशं विशिनष्टि भर्तुः रहस्करः भगवतः रहस्यप्रकाशकः अहं यं सन्देशमादायागतः ॥ २८ ॥ स्वतन्त्रात्मभ्रमदेहात्मभ्रमरूपमोहशान्तये चिदचिदीश्वरतत्त्वोपदेशपराणि प्रियसन्देशवचनान्येव सान्त्वनरूपाण्याह। भवतीनामिति नवभिः। मे मम सर्वात्मना भावप्रधानो निर्द्देशः सर्वेषामन्तरात्मतया भवतीनां वियोगो मद्विश्लेषो नास्ति नह्यात्मानं विहाय शरीरं तिष्ठतीति भावः। सर्वकारणतयापि न वियोग इति दृष्टान्तमुखेनाह। यथा भूतेषु देवमनुष्यादिशरीरेषु कार्येष्वाकाशादीनि महाभूतानि वर्तन्त इति शेषः। वाय्वग्निजलमिति समाहारत्वेनैकवचननिर्द्देशः यथा महाभूतानां तत्कार्याणां च मिथो वियोगो नास्ति कारणतया तेषां तेषु समन्वयादित्यर्थः। तथाहमपि मनआदीनामाश्रयः आधारः तद्विशिष्ट इति यावत् कृत्स्नजगदन्तर्भूतचिदचिदात्मकपदार्थेषु कारणतया समन्वितः अत्र प्राणो जीवः इन्द्रियाणि श्रोत्रादीनि गुणाः शब्दादयः साश्रयाः गुणपदेन मुख्यप्राणोऽपि सङ्गृह्यते वायुपरिणामविशेषरूपत्वात्। अयं भावः महदादिपृथिव्यन्ताचेतनवर्गशरीरकः कृत्स्नजगद्रूपेण परिणतोऽहमतो न वियोगः नहि कारणं विहाय कार्यं तिष्ठति कारणस्यैवोत्तरोत्तरावस्थाविशिष्टस्य कार्यत्वादिति ॥ २९ ॥ सत्यं कार्यं न कारणाद्वियुज्यते मनआदिशरीरकत्वरूपविशिष्टविशेषेण त्वं कृत्स्नजगदुपादानकारणं तथापि मनआदीनामन्यकारणकत्वे तु न तव कृत्स्नजगदुपादानत्वसिद्धिः तथाधारोपकरणकर्महेतुस्थितिलयकारणानामन्यत्वेऽपि चेत्यत आह। आत्मन्येवेति। आत्मन्येवेत्यनेनाधारान्तरव्यावृत्तिः आत्मनेत्यनेनोपकरणान्तरस्यात्मानमिति सृज्यान्तरस्य सृज इत्यनेन निमित्तान्तरस्यानुपालये हन्मीति पदाभ्यां स्थितिलयकारणान्तरयोः। एवं न केवलं व्यष्टिरूपेणैव सृजाम्यपि तु समष्टिरूपेणापीत्यभिप्रायेण भूतेन्द्रियगुणात्मनेत्युक्तम्। अनेन महदादिपृथिव्यन्तानामपि स्वोपादानकत्वसिद्धिः। आत्ममाया स्वसङ्कल्पः एकोऽहं बहुस्यां प्रजायेयेत्येवंरूपः तस्यानुभावेन प्रभावेण हेतुना अनेन हेत्वन्तरव्यावृत्तिः कारणत्वोपयुक्तसार्वज्ञ्यसर्वशक्तित्वादिगुणयुक्तिश्चाभिप्रेता। अत्र "ब्रह्म वनं ब्रह्म स वृक्ष आसीत् तदात्मानं स्वयमकुरुत"इत्यादिश्रुत्यर्थोऽभिप्रेतः तत्राधारत्वनिमित्तत्वस्थितिकारणत्वान्यविशिष्टब्रह्मगतान्युपादानत्वोपकरणत्वसृज्यत्वव्यष्टिसृष्टिसंहारकारणत्वानि तु चिदचिच्छरीरकब्रह्मगतानीति विवेकः ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इदानीं कृष्णसन्देशं वक्तुमुपक्रमते। श्रूयतामिति ॥ २८ ॥ सर्वात्मना सर्वप्रकारेण निरूप्यमाणे सति एनमर्थं दृष्टान्तेनोपपादयति। यथेति। यथा पञ्चभूतानि भूतेषु चराचरशरीरेषु कारणत्वेनानुगतानि तथाहं कानि तानि भूतानीत्यत आह। खमित्यादिना। वाय्वग्निरिति छान्दसः प्रयोगः ॥ २९ ॥ सामान्यत उक्तं विशिनष्टि। मन इति। नन्वत्र मुख्यकारणत्वं कस्येति तत्राह। आत्मना परप्रेरणामन्तरेणात्मानं देहादिसर्वं सृजे हन्मि संहरामि अनुपालये रक्षामीति। ननु तर्हि भूतवत्त्वं तदभिन्नः किमित्यत उक्तम् आत्मनीति ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अत्रापातप्रतीतो ज्ञानरूपः प्रथमार्थो रहस्यान्तरगोपनाय प्रयुक्तोऽपि लोकरीत्या शोकशमक इव भवतीति प्रयुज्यते स्म तत्रारुचिशङ्कया द्वितीयस्त्वर्थः प्रेमानुभवप्रमाणकसिद्धान्तमयो मध्ये विन्यस्तः। अथ तासां तथाप्युत्कण्ठापराकाष्ठामाशङ्क्य ताभि-

रस्यामवस्थायामननुभूयमानो नित्यलीलारूपस्तृतीयस्त्वर्थः । सद्यः शान्तये सहसैव निर्दिष्ट इति ज्ञेयम् । तत्र प्रथमोऽर्थष्टीकायामेव दृश्यः । तृतीयः कृष्णसन्दर्भे । अथ द्वितीयो यथा । सर्वत्रैव बहिरन्तश्च सदा मत्स्फूर्त्तेः सर्वात्मना सर्वथैव मया सह वियोगो नास्ति तदेव सदृष्टान्तमाह । यथेति । तथाहमपि भवतीनां मनआदीनि गुणाश्च सौशील्यादय आश्रयो यस्य तथाभूतः सन् तत्र तत्र सदा वसन् परिस्फुरामीत्यर्थः इत्यादिकं श्रीदशमटिप्पण्यां दृश्यम् ॥ २९–४८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तदेव भगवद्वचनेनापि दृढीकरोति–भवतीनां वियोगो मे इत्यादि । भवतीनां वियोगो मम क्वचित् कदाचिदपि न हीति जानीथ । भवतीनां समीप एवाहं तिष्ठामीत्यर्थः । सर्वात्मना सर्वतोभावेन यतश्चाक्षुष एव नाहम्, किन्तु समीपवर्त्त्यैव; अन्यथा मद्विरहेण भवत्यः किं जीवन्तीति निरन्तरं वृन्दावनस्थितत्वमात्मनः प्रकटितम् । नन्विदमघटमानं दशान्तरवर्तित्वान्नैवमित्याह—यथेत्यादि । यथा भूतेषु पञ्चीकरणावस्थासु भूतानि पृथिव्यामाकाशादीनि, आकाशे पृथिव्यादीनीत्यादि । तथापि पृथिवी पृथिव्येवेति दृश्यते, आकाश आकाश एव दृश्यते, तथाहञ्च भवतीषु मनःप्राणबुद्धीन्द्रियगुणाश्रयः सन् निकट एव वर्त इति भावः । तत्र निकटस्थ एव भवतीनामन्तरेवाहं प्रविष्टः । मनः प्राणेत्यादि भवतीनां मनो मन्मनः भवतीनां प्राणा इत्यादिप्रकारकः सन्नित्यर्थः । एतेन भवतीनां मम चाभेद इति प्रेम्णः परिपाकप्राकट्यम् नतु ज्ञानयोगवार्त्ता । अतः सर्वात्मना नहि विरह इत्युक्तम् ॥ २९ ॥ ननु सर्वजीव-साधारण्येन भवानस्माकमपि मन आदिषु वर्तते । को विशेषः ? नैवम्, तेषु तदिन्द्रियाधिष्ठातृणां नियन्तृतयाऽहमंशेन वर्त्ते, न तथा भवतीषु । भवतीषु पुनर्भवद्विधालक्षित एव वर्त्ते, ममैतादृश एव स्वभाव इत्याह—आत्मन्येवात्मनेत्यादि । आत्मना स्वयमात्मनि स्वहृदि आत्मानं सृजे विरचयामि प्रवेशयामीत्यर्थः । आत्मनि स्वहृदि आत्मना स्वयमात्मानं हन्मि, तिरोधापयामि तदनुरागावेगं वर्द्धयामीत्यर्थः । एवमात्मनि स्वहृदि आत्मानं पालयामि तद्वित् कारयामि । एवमात्मनि स्वस्मिन्नात्मानं सुहृदं सृजे, प्रवेशयामि । एवमात्मनि आत्मानं सुहृदं हन्मि, तिरोधापयामि, तद्विरहदुःखमनुभवामि । एवमात्मनि स्वस्मिन्नात्मानं प्रतिपालये परिचरामि; मनसा सेवे इत्यर्थः । भक्तैः सममेतादृशी मे लीलेत्यर्थः । आत्मना कीदृशा ? आत्ममायानुभावेन भूतेन्द्रियगुणात्मना, आत्मनि विग्रहे या मा लक्ष्मीः वक्षः स्थिता या श्रीस्तस्या आत्ममाया इति षष्ठी । नु भो वल्लभा भावे प्रेम्णि न भूत उत्पन्न इन्द्रियगुणैरूपादिभिरात्मा धृतिर्यस्य, 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' इत्यमरसिंहः । अथवा, भवतीनां स सर्वात्मना वियोगः कुतः ? यतो भवतीषु महदेव मे प्रेमेति स्वप्रेम प्रकटयन्नाह—आत्मनि मनसि आत्मना स्वयमेवात्मानं सृजे बहुलीकरोमि, भवतीनां प्रेमास्पदत्वात् ममाप्यतिशयप्रियत्वेन विस्तरीकरोमि, सर्वतः स्वमेव पश्यन् निर्विण्णोऽस्मीत्यर्थः । एवं कदाचिद् भवतीनां विरहदुःखेन तथैवात्मानं मनसि स्वयमात्मानं हन्मि । किं कृतं किं कृतमिति कृत्वा शिरस्ताडनादि करोमि । कदाचिद्भवतीनां प्रेमास्पदत्वेनैव आत्मनि आत्मना स्वयमेवात्मानं प्रतिपालयामि च, शेषार्द्धं पूर्ववत् । अथवा, भवतीभिः सह मे वियोगो नास्त्येव, तथापि भवतीभिरात्मा विरहीति यन्मन्यते तन्ममैवेच्छाविशेषेणेत्याह—आत्मन्येवात्मनात्मानमित्यादि । आत्मनि सुहृदि मध्ये कञ्चनात्मानं सुहृदमात्मना स्वयमेव सृजे रूपान्तरेण स्थानान्तरे सृजामि, आविर्भावयामि । क्वचित् हन्मि, विरहेण पीडयामि, क्वचित् प्रतिपालयामि, स्वरूपेण स्थापयामि, येन सह या लीला समुचिता, तामेव तेन सह करोमीति मे प्रकृतिः । सर्वैव लीला मे सुरसा, भवतीनां वियोगदुःखानुभवोऽपि रसनीयत्वात् समास्वाद्य इति कृत्वा वियोग आहार्य एव कारितः, न तु स्वाभाविक इति । पूर्वोक्तं व्रजवधूनां त्रैविध्यम्; तथाहि—सृजे इति राजकन्यारूपेण अनुपालये इति वृन्दावनस्थरूपेण हन्मीति विरहिणीरूपेण । शेषार्द्धं समम् ॥ ३० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

भवतीनामित्यादि । भवतीना वियोगो मे मम क्वचित् कदाचिदपि न हीति जानीथ, सर्वात्मना प्रपन्नस्येति वाष्परुद्धकण्ठत्वादर्धोक्तिः । ननु कथमेवं देशान्तर–वर्त्तित्वात् ? नैवमित्याह–यथेत्यादि । यथा भूतेषु खादीनि पञ्चभूतानि तथाहञ्च भवतीष्वित्यर्थः—सततानुध्यानेन तादात्म्यात् । कीदृश ? मनः सु प्राणेषु बुद्धिषु इन्द्रियेषु च गुणेष्वाश्रयो यस्य स तथा अर्थात् भवतीनाम् । अथवा भवतीनां मन आदीनामाश्रयोऽहम् । अतो नोभयथैव वियोगः ॥ २९ ॥ ननु सर्वजीव—साधारण्येन भवानस्माकमपि मन–आदिषु वर्त्तसे, को विशेषः ? तेषु तदिच्छयाधिष्ठातृणां नियन्तृरूपेणाहमंमेन, न तथा भवतीषु । भवतीषु पुनः सततानुध्यानतादात्म्यमहिम्नैवेति प्रेम्णस्तथाविधं विक्रमं वर्णयन्नाह— आत्मन्येवेत्यादि । आत्मना मनसैव आत्मानं विग्रहं कदाचिद्भवतीनामयं परमप्रेमास्पदमिति कृत्वा सृजे, मनसैव बहुलीकरोमि, यथा सर्वाष्वेव दिक्षु पश्यामि । एवमनुपालये स्रक्चन्दनादिना सत्करोमि । कदाचिद् वियोगदुःखात् हन्मि च ललाटे उरसि च कर-ताडनादिनाधिगित्याक्षेपेण ताड़यामि च । ननु त्वं वक्षः स्थिरायाः श्रिया भावेनैव परिपूर्णोऽसि तदलीकमेव वदसि ? नवमित्याह—आत्ममायेत्यादि । नु भोः प्रियाः आत्ममाया आत्मनि शरीरे वक्षसि स्थिता या मा लक्ष्मीस्तस्या भावे प्रेम्णि न भूत उत्पन्नः, इन्द्रियाणां गुणेषु रूपादिषु आत्मा प्रयत्नो यस्य मनसस्तेन । "आत्मा यत्नो धृतिर्बुद्धि स्वभावो ब्रह्म वर्ष्म च" इत्यमरः ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु किमेतयैवास्मत्स्वश्लाघया चास्मान् सान्त्वयितुं त्वमिहायातः किञ्चिदस्ति वा कृष्णसंदेशादिकमस्मद्दुःखोपशमकं तद्ब्रूहीत्यत आह । श्रूयतामिति । भर्त्तुः कृष्णस्य रहस्करः रहस्यकार्यकर्त्ता ॥ २८ ॥ अत्र प्रथमो ज्ञानोपदेशरूपः संदेशः परमविज्ञान् प्रति तन् प्रेम्णोऽन्याधर्षणीयः महाबलवत्त्वज्ञापनार्थकः मन्दधियः प्रति तत्प्रेममाहात्म्याच्छादनार्थकश्च । तथा हि मया गोपीभ्यो दातुमुद्धवद्वारा ज्ञानामृतं प्रेषितं तदपि तासां प्रमाग्निं निर्वापयितुमसमर्थं प्रत्युत तत्तापेनैवालीढं बभूवेत्यहो तासां प्रेमप्राबल्यं यन्मनो योगेश्वरेण मयाप्युपदिष्टो ज्ञानयोगो वैयर्थ्यमगात् । यथा रासारम्भे कर्मयोग इत्यन्तरविज्ञभक्तान् प्रेम्णः प्राबल्यं प्रकाशयामास । महाप्रेमवतीष्वपि गोपीषु सर्वहितकारिणा परमेश्वरेण मोक्षसिद्ध्यर्थं ज्ञानोपदेशः कृतः इत्यन्यान् पण्डितमन्यान् मन्दधियः प्रति प्रेम्णो माहात्म्यमाच्छादयामास रहस्यत्वादित्येवं भक्तविबुधान् प्रेमामृतस्य प्रदानेन पुष्णाति अभक्तांस्तु तदसुप्रदानेन वञ्चयतीत्युभयमेव मोहिनीसधर्मणः शास्त्रस्यास्य प्रयोजनं ज्ञेयम् । अथ प्रकृतमनुसरामः भगवानुवाचेत्युद्धववाक्यं तत्रोवाचेति लिटा महाप्रेमवतोऽपि मत्प्रभोरेतादृशो वचनस्य प्रयोजनं मम दुर्गमत्वात् परोक्षमेवेति ज्ञापितं भवतीनां मे मया सह सदा वियोगो नास्त्येव कथं रुदित्वा रुदित्वा मत्तु मीहध्वे इति भावः । कुतःसर्वेषामात्मनापरमात्मनाअहं हि परमात्मा भवामि । अत्र सर्वशास्त्राणि सर्वेगर्गादयो मुनयश्च वरुणादयो देवाश्च प्रमाणं तस्मात् । परमात्मरूपेण भवतीनां देहष्वहं वर्त्ते एवेत्यतो मया सह सदा नियोग एवेति भावः । अत्र च यथा रासारम्भे धर्मोपदेशवाक्ये वध्याभ्यन्तरी शृङ्गारकथा स्वोपालम्भनदोषनिवृत्त्यर्था स्थापिता तथा हि दिनान्तरे भो कृष्ण ! कामुकशिरोमणे त्वया रासकेलिदिने कथमस्मासु धर्मोपदेशः कृत इति प्रेयसीभिः सोपालम्भमुक्ते सति भो अविदुष्यः मया तु तद्दिने सम्भोगकृत्योपदेश एव कृतः कथं मुग्धाभिर्भवतीभिर्धर्मोपदेश एवावधारितः इत्युक्त्वा रजन्येषा घोररूपा इत्यादिवाक्यानां सम्भोगकथारूपं द्वितीयमर्थं कृष्णो व्याचष्टे स्म तथैव सुदूरप्रवासान्ते भाविनि संयोगे भोः प्राणनाथ ! कथमस्मासु महाविरहिणीषूद्धवद्वारा त्वया ज्ञानोपदेशः कृत इत्याभिर्गोपीभिर्वक्ष्यमाणे भो अविदग्धा मया तूद्धवद्वारा प्रेमरीत्युपदेश एव कृतः कथं युष्माभिर्ज्ञानोपदेश एवावधारितं इत्युक्तया भवतीनां वियोगो मे इत्यादिवाक्यानां द्वितीयं प्रेमरीतिमयमर्थं व्याख्यास्यतीत्यत एतेषु वाक्येषु वर्त्तमान एव द्वितीयः प्रेमरीतिमयोऽर्थो व्याख्येयः सः यथा भवतीनां मया सह विरहो न सर्वेणात्मना किं त्वेकेन देहेनैव आत्मशब्दस्य देहजीवमनोबुद्धिवाचित्वात् प्रेमा ह्यात्मधर्म एव ममात्मबुद्धीन्द्रियादयो भवतीष्वेव स्थिताः केवलमेको देह एव मया मथुरामानीतः भवतीनामप्यात्मानो बुद्धीन्द्रियादयो मय्येव वर्त्तन्ते केवलं देहा एव तत्र व्रजे स्थिताः किं त्वहं सर्वशास्त्रेषु सर्वैः प्रेमाधीन एव निरूपितः, अत एव प्रेम्णि मम नास्ति स्वातन्त्र्यं प्रेमवतामस्माकं परस्परदेहविच्छेद एव विप्रलम्भस्तमारुह्य प्रेमा सम्प्रत्यतिवर्द्धितुमिच्छति । अतो मया सोत्कण्ठेनापि स्वदेहः कथं साम्प्रतं व्रजमानेतुं शक्यः किं तु स एव प्रेमा स्वाभीप्सितां वृद्धिं प्राप्य विप्रलम्भं दर्शयित्वा यदा सम्भोगभूमिकामारोक्ष्यति तदैव मया तदधीनेन स्वदेहो व्रजमानेतव्य इति देहेनापि वियोगो ऽपयास्यतीति भावः । किं त्वहम् उपादानकारणत्वादपि सर्वभूतेषु वर्त्ते एवेत्याह । यथेति । भूतेषु चराचरेषु भूतानि महाभूतानि तान्येव कानीत्यत आह । खमिति । वाय्वग्निः वायुसहितोऽग्निः यथा वर्त्तते तथैवाहं मनआदीनि कार्याणि गुणास्तेषां कारणं सर्वेषामपि परमकारणत्वेनाश्रयः । तत्र तत्रानुगतो वर्त्ते एवेत्यर्थः । पक्षे मां सदा प्रेम्णा ध्यायन्तीनां भवतीनां मनःप्राणबुद्धीरिन्द्रियगुणान् शब्दादींश्च आश्रयामीति सः आश्रित्य तत्र तत्र स्फुरन्नेवाहं सदा वर्त्ते इत्यर्थः ॥ २९ ॥ किञ्चाहमेव कर्त्ता अधिकरणं कर्म चेत्याह । आत्मन्येवाधिष्ठाने आत्मनैव कारणेन आत्मानमेव जगद्रूपं सृजे सृजामि । ननु त्वं सच्चिदानन्दस्वरूपः । जगदिदं ततो भिन्नं प्रतीयते तत्राह । आत्मनो मम या माया शक्तिस्तस्या अनुभावः कार्यं तेन भूताद्यात्मना सृजामि । तस्या मद्बहिरङ्गशक्तित्वाज्जगतोऽस्य मद्रूपत्वं नतु मत्स्वरूपत्वमिति भावः । पक्षे भवतीनामात्मनि मनसि आत्मना प्रयत्नेन आत्मानं स्वं सृजाम्याविर्भावयामि सम्भोगादिलीलार्थं मुहुर्त्तमनुपालयामि । ततो हन्मि अन्तर्द्धापयामि केन प्रयत्नेन आत्ममायाप्रभावेण योगमायाप्रभाव एव मम प्रयत्न इति भावः । आत्मानं कथम्भूतं भूतान्यङ्गानि इन्द्रियाणि चक्षुरादीनि गुणाः सौन्दर्यमाधुर्यवैदग्ध्यादयः । आत्मानो बुद्ध्यादयस्तेषां द्वन्द्वैक्यं तेन सहितम् ॥ ३० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

"तेषां सततयुक्तानां भजतां प्रीतिपूर्वक"मिति भगवद्वाक्यात् भगवद्भक्तिमूलं तत्त्वज्ञानं भगवद्वाक्यैर्वक्तुमवतारयति । श्रूयतामिति । ननु नेमानि स्तुतिवाक्यान्यस्माकं सुखजनकानि प्रियेणास्मान्प्रति किंचिदुक्तं चेत्तर्हि तद्वदेति चेत्तदेवेदानीं निवेदयामीत्याह । प्रियेति । सम्यगुपदेशरूपः संदेशः अवश्यकर्तव्यः प्रियसम्बन्धित्वाच्च प्रियवदादरणीयः तत्रापि भवतीनां सर्वसाधनफलैरेवं विधप्रेमवतीनां सर्वासामस्मिन्नेव जन्मनि सुखावहः नतूत्कृष्टसाध्यसाधनेषु प्रवर्तनेन दुःखजनकः, अत एवायं संदेशः भगवन्मुखपद्मादादायाहमागतो नत्वन्यायः कश्चित् यतोऽहं भर्तू रहस्करः रहस्यकार्यकर्ता तथा च रहस्यमेवार्थं तेनोपदिष्टं वक्तुमहमागत इति भावः । यतः भवत्यो भद्राः कल्याणरूपिण्यस्तत्पात्रभूताः एतेन भर्त्रेह प्रेषित इत्याद्युपालम्भो निराकृतः युष्मत्प्रियचिकीर्षया समागतोऽप्यहमेतद्गोपनार्थमादौ तत्पितृगृहं प्रविष्ट इत्याशयात् ॥ २८ ॥ तत्र सर्वोपालम्भकारणं व्यसृजदकृतचेता इत्युक्तं

त्यक्त्वा तद्गमनं भगवत्संदेशेन निराकरोति । भवतीनां मे मया सार्द्धं वियोगो नास्तीति प्रतिज्ञा तत्र हेतुगर्भितं विशेषणं सर्वात्मनेति सर्वस्यात्मना उपादानकारणेन "तदनन्यत्वमारम्भणशब्दादिभ्य" इति न्यायात् तस्मात्कारणात्परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः । कार्यस्यावगम्यते कुतः "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य" मित्यादि श्रुतिभ्यः आदिशब्दादेत"दात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि सर्वं यदयमात्मा ब्रह्मैवेदं सर्वम् आत्मैवेदं सर्वं नेह नानास्ति किंचने"त्येवमाद्यात्मैकत्वप्रतिपादनपरं वचनजातं गृह्यते तथा च यथा घटाद्याकाशानां महाकाशात् यथा च मृगतृष्णोदकादीनामूषरादिभ्यो नान्यत्वं दृष्टं नष्टस्वरूपत्वात्स्वरूपेणानुपास्यत्वादेवमस्य भोग्यभोक्त्रादिप्रपञ्चस्य ब्रह्मव्यतिरेकेणाभावः । ननु यथा वृक्षो नैकशाख एवमनेकात्मकमनेकशक्तिप्रवृत्तियुक्तं ब्रह्मात एकत्वमनेकत्वमुभयमपि सत्यमेव तथा मृदादिदृष्टान्ता अप्यस्मिन् पक्षे नाननुरूपा इति चेन्न मृत्तिकेत्येव सत्यं तत्सत्यमिति दृष्टान्तदार्ष्टान्तिकयोः प्रकृतिमात्रस्य सत्यत्वावधारणात् तत्त्वमसीति शारीरस्य ब्रह्मभावोपदेशाच्च उक्तमर्थं स्फोरयितुं सदृष्टान्तमाह । यथेति । भूतेषु स्थावरजङ्गमसंघातेषु महाभूतान्याकांशादीनि वायुसहितोऽग्निर्वाय्वग्निः ॥ २९ ॥ यथा भूतेषु चराचरेषु स्वस्मिन् कल्पितनामरूपत्वाद्वाचारम्भणमात्रेषु प्रकृतित्वात्सत्याधिष्ठानरूपेण महाभूतानि वर्तन्ते तथाहमपि वाचारम्भणमात्राणां कार्यभूतानां मन आदीनां तत्कारणभूतानां सत्त्वादिगुणानां चाश्रयः अधिष्ठानरूपत्वात्सत्यत्वेनानुगतः । ननु कार्यकारणयोरनुगतव्यावृत्तयोर्लोके भेदोपलम्भात् कथं सर्वकारणात्सर्वानुगतात्परमात्मनः सर्वस्यानन्यत्वमित्याशङ्क्याह । आत्मन्येवेति । वाचारम्भणमित्यादिश्रुत्या विकारमात्रस्य मिथ्यात्वबोधनात् नेति भावः । तथा च श्रुतिरेकोऽहं बहुस्यां तदात्मानमकुरुतेत्याद्या । नन्वेकस्मिन्नाधारत्वकारणत्वकार्यत्वरूपविरुद्धधर्मसम्बन्धः कथं युज्यत इति चेत्तत्राह । भूतेति । तथा च सत्तास्फूर्तिप्रदातृत्वेनाधारत्वं भूताद्यात्मना कार्यत्वं गुणात्मना कारणत्वमित्यवच्छेदभेदान्नास्ति विरोध इत्यर्थः । नन्वसङ्गनिर्विकारस्य कथं तद्रूपतेति चेत्तत्राह । आत्ममायेति । स्वात्मनः प्रकाशाल्लब्धसत्ताकाया मायाशक्तेरनुभावः अन्यस्यान्यात्मनावभासनसामर्थ्यं तेन तथा चानिर्वचनीयमायाकृतमेवानिर्वचनीयं ब्रह्मणस्तदात्मत्वमिति भावः ॥ ३० ॥

गूढार्थदीपिनी

हे भद्रा रहस्करः गुप्तकार्यकर्ता ॥ २८ ॥ भवतीनामित्यर्द्धम् । मे मया सह वियोगो नास्ति । कुतः । सर्वात्मना सर्वव्यापकेन ॥ २९ ॥ भूतेषु स्थावरजङ्गमेषु । वायुना सहितोऽग्निः वाय्वग्निः । मन आदीनि कार्याणि गुणाः कारणं तेषामाश्रयः अनुगतः ॥ ३० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रहस्करः रहस्यकार्यकरः ॥ २८ ॥ विरहसन्तप्तानां संयोगेन शान्तिः स्यात् स च वियोगो हि भगवत्संयोगः सर्वोपादानकारणत्वेन सर्वान्तर्यामित्वेन सर्वसाधरणः "तदैक्षत बहु स्यां तदात्मानं स्वयमकुरुत सच्च त्यच्चाभवत् तत्सृष्ट्वा तदेवानुप्राविशदि"त्यादिश्रुतिप्रसिद्धः श्रीमूर्तिमत्त्वेनचानेकविधः तत्तदधिकारिविशेषविषयः तत्र कार्यकारणरूपप्रकृतिसम्बन्धरहितानां मुक्तानामप्राकृतलोके सदा पश्यन्ति सूरयः निरञ्जनः परमं साम्यमुपैतीत्यादिश्रुतिप्रसिद्धः प्राकृतलोके च अनुकूलानां प्रतिकूलानाञ्च जीवानां भगवत्संयोगो यथोपयोगं प्रसिद्ध एव एवं सति गोपिकानां भगवत्प्रियाणां कारणत्वेनान्तर्यामित्वेन संयोगं श्रीमूर्तिवियोगे तु ध्याने निष्ठा भवत्वित्येवं रूपं कारणं भगवत्पदप्राप्तिरूपं ध्यानफलं च भगवद्वाक्येनैव वर्णयति । भवतीनामित्यादिना । मे मया सर्वात्मना सर्वस्योपादानकारणेन अन्यर्यामिरूपेण च भवतीनां वियोगः क्वचिदपि नास्ति "एतदात्म्यमिदं सर्वम् अन्तर्यामी"त्यादिश्रुतेः एतदेव सदृष्टान्तमाह । यथेति । खं वायुसहितोऽग्निश्च जलं च मही चेत्येवं नामकानि महाभूतानि यथा भूतेषु चराचरेषु कारणत्वेन समन्वितानि तथा अहं परमकारणभूतः ममआदीनि कार्याणि गुणाः कारणं तेषामाश्रयः कारणम् अत्र मनआदिकरणनिर्देशो जीवोपलक्षणार्थः गुणनिर्देशः सर्वप्राकृतपदार्थोपलक्षणार्थः तेषामाश्रयः सर्वचेतनाचेतनात्मके विश्वस्मिन् कारणत्वेन समन्वितोऽहमित्यर्थः । चकारान्तर्यामित्वेन प्रविष्टोऽस्मीति बोध्यम् ॥२९॥ एतदेवोपपादयितुं स्वस्य सर्वकारणत्वं दर्शयति । आत्मनीति । अत्र उपलक्षणतया अपादानं सम्प्रदानञ्चेति कारकद्वयमप्यूह्यम् । एवं सति चिदचिच्छक्तिमानहं कर्ता आत्मनि अधिकरणे आत्मना करणेन आत्मनः अपादानरूपात् कारकात् आत्मानं विश्वं कर्मरूपम् कारकम् आत्मना भूतेन्द्रियादिचिदचिद्रूपेण सृजे अनुपालयामि हन्मि च ननु भवतो ब्रह्मणः अपादानत्वे परिणामित्वप्रसङ्गात् कर्मत्वे अनित्यत्वप्रसङ्गात् सम्प्रदानत्वे संसारित्वप्रसङ्गात् सर्वे दोषाः त्वयि ब्रह्मण्येव भवेयुरित्यत आह । आत्ममायानु भावेनेति । आत्मा जीवश्च माया च तयोश्चेतनाचेतनरूपयोःमत्प्रकृत्योः "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महावाहो ! ययेदं धार्यते जगत्"इति श्रीमद्गीतोक्तयोः अनुभावः संसारित्वविकारित्वादिरूपो यस्मिन् तेन इन्द्रियोपलक्षितचेतनोऽपि ग्राह्यः तथा च सचेतनेन भूतेन्द्रियादि सृज्यरूपेण आत्मानं सृजामीति सम्बन्धः । अतः संसारित्वपरिणामित्वादयो धर्माः प्रकृतिद्वयस्य नतु प्रकृतिमति मयि ब्रह्मणि दोषप्रसङ्ग इति सिद्धान्तः एवं चिदाचिद्ब्रह्मपदार्थानां स्वरूपतो हि

भेदः चिदचितोः ब्रह्मशक्तित्वेन पृथगवस्थानाभावादभेदः इति स्वाभाविको भेदाभेदसंबन्धः पूर्वाचार्यैर्वेदान्तकौस्तुभादौ सुदृढं निर्णीतः ये केचित्तु स्वाभाविकभेदवादेऽपि ब्रह्मणः स्वत एव जीवभावाभ्युपगमादुगुणवद्दोषाश्च स्वाभाविका भवेयुरित्वाद्याहुः ते एतेन प्रत्युक्ताः किञ्च तदात्मानं स्वयमकुरुतेत्यादिश्रुतिभिः ब्रह्मणः स्वतः एव विश्वभावोऽभ्युपगम्यते ब्रह्मणो जीवभावं मात्रस्यैव शङ्का अपरया प्रकृत्या परया च नित्यसिद्धया देहदेहिभावं ब्रह्मैव प्राप्नोतीति सिद्धान्तात् किंच तैरपि ब्रह्मणो जगदुपादानकारणत्वमभ्युपगम्य कार्यावस्थाकारणावस्थयोर्ब्रह्मणोरैक्यमभ्युपगम्यते एवं सति तन्मते एव सर्वे दोषाः ब्रह्मण्येव तदुक्त्यैव भवेयुरित्यलं विस्तरेण ॥ ३० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नानयसि तं न नयसि नः किन्तु होद्धव विरहेण योऽनुग्रहः कृत इति वदसि महानसीति न वदत सुदत्यः समर्थितार्थपारं तद्वचनं च शृणुतेति तच्छ्रावयति ॥ श्रूयतामित्यादिना । भवतीनां सुखावहो भर्तुः किङ्करोऽहं यमादायागतोऽहं प्रियसन्देश इष्टवाची प्रियशब्दः । हे भद्रा युष्माभिः श्रूयताम् । भर्तुरहस्कर इति पाठे एकान्तकार्यकर्तेत्यर्थः । कस्कादिः ॥ २८ ॥ भवतीनां मे वियोगः क्वचिदपि सर्वात्मना सर्वथा न हि सर्वप्रकारेणोपपादयत वियोगं तथाऽपि संयोग उपपादयितुं शक्य इति वाक्यतात्पर्यम् । तत्र निदर्शनं दर्शयति । यथेति । भूतानि । तानि नामनिर्देशपूर्वकमाह । खमित्यादिना । खमाकाशो वा्ऽिवत्यविभक्तिको निर्देशो वायुरग्निर्जलं मही चेति भूतेषु सर्वशरीरेष्वनुगतानि तथाऽहं सर्वानुगत इति कथं वियोगो मयेति भावः । वायुना सहितश्चासावग्निश्च वाय्वग्निरिति वा ॥२९॥ साम्मुख्यं विशिनष्टि ॥ मन इति । तथा भूतवदहं वो मनश्च प्राणश्च बुद्धिश्चेन्द्रियाणि च गुणास्तद्विषयाश्च तेषामाश्रयस्तथाऽऽत्मन्येवानन्यथारतया स्थितः । आत्मना स्वेच्छयैवात्मानं देहादिकं सृजे हन्म्यनुपालये । सर्जनं पालनं संहरणमिति क्रमतो वक्तव्ये व्युत्क्रमत उक्तिर्विधाता धाता हर्ता हर इत्यपप्रथां श्लथयितुम् । पालनं त्वामरपामरं भगवत्कर्तृकमिति निश्चितमिति नान्ते निवेशेऽपि चिन्तेति ध्येयम् ॥ ३० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतोऽनुगृहीतेन धाष्टर्यात् किञ्चिद्विज्ञाप्यते इत्याह । श्रूयतामिति । स्तोत्रवदेतदप्यनभिप्रेतं ज्ञास्यन्तीत्याह । प्रियसंदेश इति । भगवतोऽयं संदेशपदेन चैतत् ज्ञापयति तदुक्तं भवतीभिरवश्यं कर्तव्यमिति । अन्यथा तदुपदेशं शृणुतेत्येव वदेत् । प्रियेणोपदिष्टत्वात् असाध्यता दुःसाध्यता च निवृत्तैव कदाचिदन्यार्थमुपकारवद्वदेत् तद्व्यावृत्त्यर्थमाह । भवतीनां सुखावह इति । दृष्टफलापेक्षा भवत्यः सुखं चावहतीति तत एव सुखं न तु भवतीनां पुनः साधनान्तरापेक्षापि । नन्वेतादृशत्वे किं प्रमाणं तत्राह । यमादायागत इति । मया हि प्रथमतः सोऽर्थो ज्ञातः ज्ञायते च भवतीनामधिकारः । एवमपि सति यत्पुनः तमेव संदेशमादयाहमागतः भर्तृरहस्करः भर्त्ता हि सः भवतीनां ममापि स तमुपायं न वक्ष्यत्येव येन वयममृता भवामः नापि प्रायिकोऽर्थः यतोऽहमेकान्त एवाभिप्रेतं करोमि एकान्तं वा करोमि एकान्तं गूढकर्त्ता न प्रतार्यते भर्त्ता च न प्रतारकः अतः संदेशो यथोक्तफलकः ॥२८॥ तमेवाह दशभिः । भवतीनामिति—

षड्भिः स्वरूपकथनं पुरुषार्थास्ततः परैः । जीवब्रह्मविभेदेन द्वेधा रूपं निरूप्यते ॥
दोषाणां मूलभूतस्य विरहस्य निवारणे । बन्धमोक्षव्यवस्थायां जीवो द्वेधा निरूप्यते ॥
आश्रयत्वाच्च कर्तृत्वाद्द्वेधा ब्रह्मापि रूप्यते । दोषाभावप्रतिज्ञाद्ये हेतुभिर्विनिरूप्यते ॥
फलं जीवेति येनैषा बुद्धिर्नश्यति सर्वथा । गुणाविभाजका यस्मात् तदा त्रिभिरुदीर्यते ॥

तत्र प्रथमं वियोगाभावाय मूलहेतूनवदन् प्रतिजानीते । भवतीनामिति । वियोगः स्वाभाविकः औपाधिकः अज्ञानतश्चेति त्रेधा भवति आत्मनां जीवानामेकत्वात् परस्परभेदाभावेऽपि औपाधिको भेदो हि तत्रोपायः उद्यमो वा माया वा भगवदिच्छा वा अज्ञानं चेति वादान्तरं जीवब्रह्मणोस्तु भेदे अज्ञानमेव हेतुः सुतरां वियोगे ब्रह्मणस्तु तदुभयाभावात् न जीवैः सह कथञ्चित् भेदः भगवांस्त्यक्त्वा गत इति हि ईर्ष्यादौ हेतुः स नापि त्यजति नापि त्यागं मन्यते जीवास्तु भगवन्तं त्यक्ष्याम इति वदन्तः भ्रान्ता एव अतोऽयमर्थो निरूपणीयः तत्र द्वेधापि प्रतिजानीते । भवतीनां वियोगो मम नास्ति मम च वियोगो भवतीनां नास्ति । एकत्र कृतघ्नता अपरत्र दुःखं च फलति वस्तुस्वरूपेण वियोगाभावेऽपि एकदेशेन वृक्षकपिवियोगवत्कालभेदेन च स्त्रीपुरुषवच्च वियोगः सम्भवति तदुभयं निषेधति । नहि सर्वात्मनेति । क्वचिदिति काले सर्वात्मना केनाप्यंशेनेति देशे एवं चतुर्द्धा भवति अत्र प्रायेण साधनचतुष्टयप्रतिपादकम् अर्द्धमन्तरितमिति प्रतिभाति आत्मत्वात् भक्तवश्यत्वात् सत्यवाक्त्वात् स्वभावत इत्येवं रूपं गोपिकावियोगो भगवतो नास्ति भगवानात्मेति भगवद्वियोगश्च न गोपिकानां भक्तवश्यत्वात् कालभेदेनापि न वियोगः पारयेऽहमिति नह्येतावदुक्त्वा एतावत्यर्थे तासामिच्छां किन्न पूरयेत् भगवतश्चायं स्वभावः यत् स्त्रीषु कृपावान् अतः केनाप्यंशेन ता न परित्यजन्ति विशेषहेतव एते चेद्भवन्ति सामान्यहेतूनाह । यथा भूतानीति द्वाभ्याम् भगवानाश्रय इति ता विहाय द्यायास्यति

अन्यथा आधारात्तासां भावे स्वरूपमेव न तिष्ठेत् । अथ देहभावेन आत्मागौण इति देहेन सह वियोगः आविर्भूतस्योच्येत तदपि न घटते समवायिकारणत्वेन तेषु वर्त्तत इति । अन्यथा देहा निःस्वभावाः स्युः आर्विभूतेन वियोगस्तु हितकारी अन्यथा स्वरूपनाश एव स्यात् यथाग्निकाष्ठयोः सर्वसम्बन्धेनैवैता अर्द्धदग्धा पुनः सम्बन्धेन सर्वदाह एव स्यात् सुखानुभवस्तु स्वान्तःस्थिताग्न्याभिव्यक्तिवत् स्वान्तः स्थितः भगवदभिन्यक्त्या सर्वदाभिव्यक्तौ काष्ठांशो ज्वलिष्यतीति न सम्बध्यते यतो भगवान् प्रलयकर्ता स्थितिहेतुत्वात् नैकदेशेनापि नियोगः सम्भवति तदाह । दृष्टान्तेन यथा भूतानि महाभूतानि अन्येषां भूतानागाधारभूतानि सन्ति तेभ्यो न वियुक्तानि भवन्ति तथा भगवानपि देहांशेन न वियुक्त इति दृष्टान्तेनैव साधितं प्रकारेणैव तल्लभ्यमिति अनन्यलभ्यो हि शब्दार्थः साधारणदृन्ष्टान्तेन च चकारात् पुनरुक्तेन दृष्टान्तान्तरमाह । यथाहमिति । देहव्यतिरिक्तानि च मनःप्राणबुद्धीन्द्रियगुणात्मकानि तेषामप्यहमाश्रयः समसङ्ख्यार्थं पञ्च गणिताः सत्त्वादिगुणेषु प्रकृतेरन्तर्भावः अहङ्कारस्य च त्रिगुणात्मत्वात् बुद्धौ चित्तस्य प्राणाः दशेन्द्रियाणि च सङ्कल्पादि सर्वधर्मसहितं च मनः क्रमेण च अन्नमयं हि सौम्य मनः आपोमयः प्राणः तेजोमयी वागीति सा हि बुद्ध्यात्मिका ज्ञानप्राधाना यथारूपं क्रियाप्रधान इन्द्रियाणि प्राणेन वायुना पुष्टानि गुणाश्चाकाशे अत एवाभ्रतमः प्रकाशाः आकाशे भवन्ति च ख वाय्वग्निञ्जलं महीत्युत्पत्तिप्रकारेणाधारत्वेन वा गणनां अन्नं महीपर्यायः एतेषु जीवस्थितेषु कारणभूतानि सन्तीति वक्तव्येऽपि प्रसिद्धभावात् नोक्तम् ॥ २९ ॥ अतः परं कारणभूतत्वात् कार्यस्य न कारणव्यतिरेक इति भगवद्विरहो गोपिकानां नास्तीति वक्तुमाह । आत्मन्येवेति । कर्ता भगवान् "यतो वा इमानि जायन्ते" इति श्रुतेः समवायश्च भगवान् "तस्माद्वा एतस्मादिति" श्रतेः स आत्मानं स्वयमकुरुतेति श्रुतेश्च कार्यमपि स्वयमेव जीवपरत्वेऽपि सुतरामत्र न संदेहः आधारे संदेह इति समवाय्यतिरिक्ताधारं निरूपयन्नाह । आत्मन्येवेति । यथा कुशलश्चक्रे घटं करोति आत्मानात्मसङ्करप्रतिषेधाय एवकारः करणस्य भिन्नत्वमाशङ्क्याह । आत्मनेति । वैषम्यनैर्घृण्यादिदोषाभावाय कार्यस्याप्यन्यत्वं निवारयति । आत्मानमिति कदाचिदानीय कश्चित् घटादिकमपि स्वस्मिन् स्थापयति स्वपादं च स्वजघने स्फोटयति च स्वस्मिन् तन्निषेधाय उत्पत्त्यादीनाह । सृजे हन्मि नाशयामि पालये परंपरया वा तत्त्वेष्वेव भवत्कारणता प्रतीयते न भौतिकेषु अत एव भूतैर्यदा पञ्चभिरित्यादि वाक्यानि तत्राह । आत्ममायानुभावेनेति । अहमेव तत्रापि करोमि परं मन्मायानुभावेन लोकोऽन्यथा मन्यते मायया वहितः मायां पुरस्कृत्य वा करणात् । ननु वाक्यानुभावाभ्यां पृथिव्यादेरेव कारणत्वं प्रतीयते तत्कथमत्र व्यामोह इति चेत्तत्राह । भूतानि इन्द्रियाणि गुणाश्च आधिभौतिकादिभिन्नास्त्रिविधाः तदात्मभूता माया तेषु प्रविष्टा सा हि यत्र प्रविशति तत्रान्यदेव भासयति अकरणेषु करणत्वम् ॥ ३० ॥

श्रीसुबोधिनी–सारः

श्रूयतां प्रियस्य संदेशः ननु तत्स्मृत्या दुःखकरत्वात्किं तच्छ्रवणेनेत्यत आह भवतीनां सुखावहः यं संदेशमादाय गृहीत्वा भर्त्तुः श्रीकृष्णस्य स्वामिनो रहस्कर्त्ता रहस्यसंपादकोऽमागतो हे भद्राः ॥ २८ ॥ कृष्णवाक्यम् भवतीनां मे मम वियोगो न हि क्वचिदपि काले सर्वात्मत्वात् भूतेषु भूतानि खादीनि पञ्च तानि च खमिति स्पष्टानि मनःप्राणादिरूपेणाहं तथास्मि ॥ २९ ॥ आत्मन्याश्रये आत्मना स्वयमात्मानं सृजेऽहं सृजामि हन्मि संहरामि अनुपालये रक्षामि भूतेंद्रियगुणरूपेणात्ममायया अनुभावेन प्रभावेण ॥ ३० ॥

(१) श्रीप्रभुचरणविरचिता श्रीटिप्पणी

भवतीनां वियोग इत्यत्र, जीवब्रह्मणोस्तु भेदेऽज्ञानमेव हेतुरित्यादि । अत्रेदं प्रतिभाति । 'एतावानस्य महिमा अतो ज्यायांश्च पूरुष' इत्यादिश्रुतिभ्यो 'यस्मात्क्षरमतीतोह'मित्यादिवाक्यैश्च प्रपञ्चातीतत्वं पुरुषोत्तमस्य निर्विवादम् । 'एतावानस्य महिमा' 'सर्वं खल्विदं ब्रह्मे'त्यादिश्रुतिभ्यः प्रपञ्चस्य विभूतिरूपब्रह्मात्मकत्वम्, पुरुषोत्तमस्य तदतीतत्वं चोपपद्यते । एवं पुरुषोत्तमलीलापदार्थानां पुरुषोत्तमात्मकत्वमेव, न तु पूर्वमध्यपातित्वमिति मन्तव्यम्, अन्यथा 'ते ते धामान्युश्मसी'त्याद्यृक्षु 'विष्णोः परमं पद'मिति न वदेद्, 'विष्णोः कर्माणि पश्यत' 'तद्विष्णोः परमं पद'मित्यादि च । एवं सति सर्वस्यापि लीलापदार्थस्यात्मरूपेण सह भवतीनां वियोगो न संभवति । न हि स्वेन साकं वियोगः संभवति । एतदेव मूले सर्वात्मनेति पदेनोक्तम् । सर्वात्मना सर्वथेत्यर्थः । तथाच तत्तद्देशकालज्ञानक्रियातत्करणादेरातृणस्तम्बस्य नित्यत्वेन श्रीरासोत्सवस्वनृत्यप्रभुबाहुगृहीतकण्ठानि स्वस्वरूपाणि पूर्वमनुभूतान्यधुनापि वर्तमानैस्तैः साकमेतदवस्थापन्नानामपि स्वानामभेदज्ञापने पूर्वोक्तानामनिर्वचनीयनिरवध्यानन्दात्मकत्वात्तथात्वमेवाधुनापि स्वस्मिन्भातं भवतीति स्वास्थ्यं भवति । यद्यप्यस्य कादाचित्कत्वेन तस्य च सर्वोपमर्दित्वेन न सर्वात्मना स्वास्थ्यसंभावना, तथाप्यस्य प्रियसंगमरूपत्वेन निरवध्यानन्दरूपत्वेन भवतितरां तथात्वम्, येन तत्सामयिकोत्कटदुःखनिवृत्त्या किञ्चित्कालं सस्मितस्वामिनीमुखाब्जदर्शनेन स्वागमनसार्थकत्वज्ञानेन स्वस्यापि दुःखनिवृत्तिः । एवं सति भवतीनां मे वियोगो, मम च भवतीनां वियोगः, सर्वात्मना सर्वात्मरूपेण वर्तमानस्य मम न संभवतीत्यर्थः संपद्यते । अयमेवार्थोऽग्रे व्यक्तीकृतो यथा भूतानीत्यादिना । आश्रयकरणकर्मणामभेदश्चोक्त आत्मन्येवेत्यादिना । सृष्टिः स्वरूपस्थितिहेतुः, सोऽत्र प्रभुसंगम

एव । हननं वियोगकरणम्, सर्वतिरोधायकत्वात् । तदपि रसार्थमेवेत्यनुपश्चात्पालये स्वरूपानन्ददानेन । अत एवान्ते पालनमुक्तम् । अत्र हेतून् क्रमेणाह आत्मेत्यादिना । आत्मानुभावे सृजे, तदपि माया योगमायान्तरङ्गा लीलोपयोगिनी तदनुभावेन माने सति हन्मि, तेन सर्वतिरोधाने भूतेन्द्रियगुणस्वरूपेण पुनराविर्भूयानुपालये । ननु देहाद्यध्यासवानात्मा प्रतीयत इति कथं भगवदात्मकत्वमिति चेत्तत्राह आत्मा ज्ञानमय इति । ज्ञानप्रचुर इत्यर्थः । लीलासंबन्धिदेहानामपि तदात्मकत्वात्तत्राहमिति ज्ञान वास्तवमेव, न त्वविद्याकृतम्, यतः शुद्धोऽविद्यासंबन्धरहितः । अत्र हेतुर्व्यतिरिक्तः प्रापञ्चिकेभ्यो जीवेभ्य इति शेषः । तत्र हेतुर्गुणाश्रय इति । पुरुषोत्तमगुणाश्रयत्वात्तथा । न हि प्राकृतेषु लीलां स्वयं करोतीति भावः । स्वापाद्यवस्थावत्त्वेनापि प्राकृतत्वं न शङ्कनीयम् । यतः सुषुप्त्यादयो लीलोपयोगिन्या मायया संपादिता या वृत्तयस्ताभिः स संबध्यते । 'लोकवत्तु लीलाकैवल्य'मितिन्यायेन लोकमध्ये क्रियमाणा लोकसमानाकारा चेन्न भवेत्, तदा लीलारसो न भवेत् । अत एव व्यासैरपि लोकसमानाकारत्वम्, न तु लोकमध्यपातित्वमिति ज्ञापनाय 'लोकव'दित्युक्तम् । ननु लीलाविषयिणी कस्यापि नैवं प्रतीतिर्दृश्यत इत्याशङ्क्य प्रतिबन्धकवशान्नैवं प्रतीतिर्लोकस्य, तदपगमे सा भवतीत्याशयेनाह येनेति । सर्वतो मनसो निवृत्तौ केवलभगवत्परत्वे तथैव प्रतिपद्यते जानातीत्यर्थः । नन्वेवं सति शास्त्रानेकत्वं कथमित्याशङ्क्य साधनप्रकारभेदत एव तद्भेदः, न तु तत्र फलभेदोप्यस्तीत्याह एतदन्त इति । नन्वेवं सति विशेषाभावात्संनिकर्ष एव कुतो न साध्यते, दुःखहेतुर्विप्रकर्षः, किमर्थ इत्याशङ्कायां तत्तात्पर्यमाह यथेत्यादिना । अत्रेदमाकूतम् । पूर्वमनुभावितो यो भजनानन्दः स तु ब्रह्मानन्दतः शास्त्रीयभक्त्यानन्दतश्च कोटिगुणाधिकोऽनिर्वचनीयश्च भवति । तथा च संनिकर्षे त्वग्रिमाग्रिमनूतननूतनरसाकाङ्क्षा तदनुकूलो यत्नश्च भवति, न तु पूर्वानुभूतलीलास्वरूप तलस्पर्शः कदापि । विप्रकर्षे तु मनआदीनां बहिःस्वविषयालाभेऽन्तर्विद्यमानमेव तं गृह्णन्ति, तदा यथा बहिः प्रकटात्प्रियाद्रसानुभवः पूर्वमासीत्तथान्तःप्रकटात्प्रियात् पूर्वस्मादपि विलक्षणो रसोऽनुभूतो भवति, यः संगमेऽपि दुरापः । अतो महारसदानार्थमेवैवंकरणम् । एतदेवोक्तं मदनुध्यानकाम्ययेतिपदेन, यथेत्यादिना च । संगमे मदुपयोगित्वेन देहादिस्फूर्तिरप्यस्ति, द्वितीये तु सापि नास्तीत्यपि रसाधिक्यम् । एतदेवोक्तं विमुक्ताशेषवृत्तीति विशेषणेन । एतेन रसानुभवे नैरन्तर्यमुक्तं भवति । बहिरनुसन्धाने तु तदेव बहिः साक्षात्संबन्धात्मकं फलं शीघ्रमेव साधयति । अतस्तथैव भविष्यतीत्याह अचिरादित्यादिना । एतासां त्वधुनैव बहिःसंगमोऽभिलषितः, तदभावादस्मदनभिप्रेतामप्यस्मदधिकारविरुद्धामपि ज्ञात्वेश्वरभावेनाज्ञापितवान्, अनभिप्रेतमपि बलाद् ग्राहयितुमित्यनाकर्णनीयमिदं भवति यद्यपि, तथापि प्रियतमसम्बन्धीत्याकर्णनमावश्यकमिति तथा । एताभिः प्रियसंबन्धित्वेनैव श्रुतत्वात्तथैव फलिष्यति, न तूपदेशत्वेनेतिज्ञापनायाग्रे सदेशपदम् । एतेनैव 'ननु वयमिव भगवानपि पूर्वमस्मदयोगासहिष्णुरनुभूतः, अधुना तं कथं सहत' इत्याशङ्का निरस्ता । भगवदुक्तिष्वाज्ञात्वमेव प्रतीतम्, न तु प्रीतिवचनत्वम् । सा त्वीश्वरभावेनैव भवतीत्यैश्वर्यमेवाधुना स्वस्मिन् जानाति, ईशितव्यतामेवास्मासु जानातीति युक्तमनागमनम् । न चैव भक्तिमार्गविरोध इति वाच्यम्, 'स्वागतं व' इत्यादिवचनवत्पूर्वतिरोधानवदस्यापि रसविशेषानुभावकत्वात् । एवमेव प्रभावोपि ज्ञेयमिति दिक् । मतान्तरभाषेयमित्याचार्यवर्यैः पूर्वमेवोक्तमिति नाधिक शङ्कनीयं समाधेयं वास्त्यत्र । परन्तु 'यन्मायया दुर्जयया मुह्यन्ति ज्ञानकाशये'तिवाक्याज्ज्ञानस्य मोहरूपत्वाद्धर्मिमात्रपराणामन्येन मोहासंभवात् तस्य फलत्वेन मोहकत्वासंभवान्न भगवद्भावच्युतिः कदापि भविष्यतीति सर्वं सुस्थम् । अत एव 'ज्ञानिनामपि वाक्येन न भक्तं मोहयिष्यती'त्याचार्यवचनमस्मत्सर्वस्वपालकमस्तीत्यतिनिश्चिन्ता वयम् ॥ २९ ॥

ईश्वरस्य कृतौ वाचि पूर्वपक्षसमाहिती । ब्रह्मादीनामप्यशक्ये तथापि स्वस्य सर्वथा ॥ १ ॥
तदीयत्ववशाद्धाष्टर्याद्यत्किञ्चित्कथयामि तत् । क्षमन्तां तातचरणास्तेनैवाशेषमुत्तमम् ॥ २ ॥
यो बीजावापमारभ्य फलपाकावधिः स्वयम् । पोषितस्तं व्रजतरुं नाथो नापि जिहासति ॥३॥

इति श्रीमद्विट्ठलेश्वरविरचितभ्रमरगीताव्याख्याटिप्पणी ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे भद्राः कृतार्थाः ! यं सन्देशमादाय अहमागतोऽस्मि, स भवतीनां सुखावहः प्रियस्य श्रीकृष्णस्य सदेशः श्रूयतामित्यन्वयः । 'साधारणपुरुषं प्रति रहस्योक्त्यसम्भवादिदानीं तेनापि साधारणेनापि सन्देशेन किम्' इति शङ्कां वारयन् आत्मानं विशिनष्टि-भर्त्तू रहस्कर इति । श्रीकृष्णस्य रहस्यकार्यकर्तेत्यर्थः ॥ २८ ॥ तत्सन्देशमेवाह-भवतीनामिति सार्धनवभिः । भवतीनां मे मया सह वियोगः क्वचित् कस्मिन्नपि देशे काले च नहि नास्त्येवेत्यर्थः । तत्र हेतुमाह—सर्वात्मनेति । भावप्रधानोऽयं निर्देशः । मम सर्वात्मत्वेनेत्यर्थः ॥ २९ ॥ एतदेव दृष्टान्तेन स्पष्टयति—यथेति । यथा भूतेषु चराचरेषु महाभूतानि तदाश्रयतया स्थितानि तथाऽहमपि मनआदीनामाश्रय इत्यन्वयः । भूतान्येव दर्शयति—खं आकाशः, वायुश्च, अग्निश्च, जलं, च मही च ॥ ३० ॥

अन्वितार्थप्रकाशिका

श्रूयतामिति । हे भद्राः कृतार्थाः ! भर्तुः श्रीकृष्णस्य रहस्करः रहस्यकार्यकर्ताऽहं यं सन्देशमादाय आगतोऽस्मि स भवतीनां सुखावहः । प्रियस्य श्रीकृष्णस्य संदेशः श्रूयताम् ॥ २८ ॥ भवतीनामित्यर्द्धकम् । अत्रैको ज्ञानोपदेशरूपोऽर्थः द्वितीयस्तु

प्रेमभक्तैर्ग्राह्यः प्रेममयोऽर्थः। तत्र सर्वात्मना भावप्राधान्यात् सर्वोपादानकारणत्वेन हेतुना भवतीनां मे मया सह वियोगः क्वचित् कस्मिन्नपि देशे काले च नहि नास्त्येव। पक्षे मया सह भवतीनां वियोगः सर्वेणात्मना नास्ति किन्त्वेकेन देहेनैव अत्र मम आत्मशब्दवाच्या मनोबुद्ध्यादयो भवतीष्वेव स्थिताः देहः केवलम्मथुरामानीतः भवतीनामपि देहा एव केवलं तत्र स्थिता मनोबुद्ध्यादयस्तु मय्येवेति ॥ २९ ॥ यथेति। यथा भूतेषु चराचरेषु खं वायुसहितः अग्निर्जलं मही इति महाभूतानि तदाश्रयतया स्थितानि तथाहमपि मनःप्राणभूतेन्द्रियाणि कार्याणि गुणाः कारणं तदात्मना तेषामाश्रयतया स्थित्वाऽनुगतो वर्ते। पक्षे मां सदा प्रेम्णा ध्यायन्तीनां भवतीनां मनःप्राणबुद्धीन्द्रियगणान् शब्दादीन् आश्रयामीति सः तान् आश्रित्य तत्र तत्र स्फुरन्नेवाहं वर्ते इत्यर्थः ॥ ३० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशिका

भर्त्तुः रामानुजस्य रहस्करः गुह्यकार्यैकारकः ॥ २८ ॥ यत्त्वहमिति भवतीनां दूरे यद्वर्त्ते तन्मदनुध्यानस्य काम्यया तदर्थमित्यर्थः। तच्च्ध्यानं युष्माकं मनसः सन्निकर्षार्थं मयि निकटवृत्त्यर्थं श्रीभगवानुवाचेत्यनेन तदुक्ताक्षरै रेव वक्ष्यामीत्युद्धवाभिप्रायः ॥ २९ ॥ तदेव विस्तारयति यथेति त्रिभिः प्रेष्ठे अतिस्निग्धे सन्निकृष्टे समीपस्थे ॥ ३० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं ताः प्रशंसित्वा प्रियसंदेशः श्रूयतामित्याह। श्रूयतामिति। हे भद्राः, यं प्रियं संदेशं आदाय, भर्त्तुर्भगवतः, रहस्करो रहस्यप्रकाशकः, अहं आगतः। सः भवतीनां सुखावहः सुखकरः, प्रियसंदेशः, श्रूयताम् ॥ २८ ॥ स्वतन्त्रात्मभ्रमदेहात्मभ्रमरूपमोहशान्तये चिदचिदीश्वरतत्त्वोपदेशपराणि प्रियसंदेशवचांस्येव सान्त्वनानुरूपाण्याह नवभिः। भवतीनामिति। मे मम, सर्वात्मना, भावप्रधानो निर्देशः। सर्वान्तरात्मतयेत्यर्थः। भवतीनां वियोगः मद्विश्लेषः, क्वचित् कदाचिदपि, न हि। नास्त्येवेत्यर्थः। मम युष्माकं च शरीरशरीरिभावादित्यर्थः। न ह्यात्मानं विहाय शरीरं तिष्ठतीति भावः। सर्वकारणतयापि न वियोग इति दृष्टान्तमुखेनाह। यथा भूतेषु देवमनुष्यादिशरीरेषु कार्येषु, खमाकाशं, वायुश्चाग्निश्च जलं चेति समाहारत्वेनैकवचनत्वेन निर्द्देशः। मही पृथ्वी, एतानि भूतानि आकाशादीनि भूतानि, वर्त्तन्ते इति शेषः। यथा महाभूतानां तत्कार्याणां च मिथो वियोगो नास्ति कारणतया तेषां तेषु समन्वयादित्यर्थः। तथा अहं च मनश्च प्राणश्च बुद्धिश्च इन्द्रियाणि च गुणाश्च तेषामाश्रयः, एतेषु कारणतया वर्त्तमानो भवामीत्यर्थः। अत्र प्राणो जीवः, इन्द्रियाणि श्रोत्रादीनि, गुणाः शब्दादयः, गुणशब्देन मुख्यः प्राणोऽपि संगृह्यते, वायुपरिणामविशेषरूपत्वात्। अयं भावः। महदादिपृथिव्यन्ताचेतनवर्गशरीरककृत्स्नजगद्रूपेण परिणतोऽहमतो न वियोगः। न हि कारणं विहाय कार्यं तिष्ठति कारणस्यैवोत्तरोत्तरावस्थाविशिष्टस्य कार्यत्वत इति ॥ २९ ॥ उपादानकारणतानिमित्तकारणते स्वगते एवेति दर्शयति। आत्मनीति। आत्मनि एव स्वशरीरभूतायां प्रकृतावेव, भूतानि पृथिव्यादीनि च इन्द्रियाणि श्रोत्रादीनि च गुणाः शब्दादयश्च तदात्मना, आत्मनो माया 'बहुस्यां प्रजायेय' इत्येवंरूपः संकल्पस्तस्यानुभावः प्रभावस्तद्रूपेण आत्मना स्वात्मना, आत्मानं सृज्यवर्गस्य स्वशरीरकत्वादास्मानं, सृजे, हन्मि, अनुपालये। अत्र सर्जनं न केवलं व्यष्टिप्रपञ्चस्यापि तु समष्टेरपि बोध्यम्। अत्र ब्रह्मवनं 'ब्रह्मसवृक्ष आसीत्। तदात्मानं स्वयमकुरुत' इत्यादिश्रुत्यर्थः प्रमाणभूतोऽभिप्रेतः। एतानि सर्जनादीनि चिदचिच्छरीरकब्रह्मगतानि ब्रह्म चोपादाननिमित्तकारणात्मकं स्वयमेवेति सिद्धम् ॥ ३० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

श्रूयतामिति : १०.४७.२८.

गोप्यो मे हृदयङ्गमा नहि रमा तादृक सखे तद् द्रुतं गत्वा तत्सविधे वद स्वसुतवत् पाल्योऽयमस्मद्विधिः।
एवं श्रौतहृदाशयेन हरिणा सन्दिष्टमिष्टार्थकं यन्मां प्रेषयता न्यवेदि सुदृशो यूयं स्थ तज्ज्ञायताम् ॥ ८८ ॥

भवतीनामिति : १०.४७.२९.

भूतग्रामो भौतिके यत्र कुत्राप्याराद् दृष्टे नास्ति नैवं विभाति।
हेतुस्तस्मिन् कारणत्वं तथा मे सर्वाद्यस्य स्याद्वियोगः कथं वा ॥ ८९ ॥

कृष्णप्रिया

हे यदा कल्याण स्वरूप गोपियों! आपकी कृपा से कुछ निवेदन कर रहा हूँ। मैं भगवान् श्रीकृष्ण का अन्तरङ्ग सेवक हूँ, कृपा से नाथ रहस्य कार्य मुझसे कराते हैं। प्रियतम कृष्ण का आपको सर्वथा सुख देने वाला संगोप्य संदेश लेकर यहाँ आया हूँ आप कृपया श्रवण करें ॥ २८ ॥ श्रीगोपीजनों के पोषक एवं रक्षक प्राणनाथ प्रभु के दशश्लोकों से सन्देश सुनाते हुए श्रीउद्धवजी ने कहा कि भगवान् श्रीकृष्णजी कहते हैं कि हे गोपियों! आपका वियोग किसी प्रकार से अल्प प्रमाण में भी मुझे

नहीं है कारण कि मैं सर्व की आत्मा हूँ, भक्तों के सदा यश हूँ, सदा सत्य वक्ता हूँ, और स्वभाव से दयालु होने के कारण मेरा वियोग संभवित नहीं ॥ २९ ॥ हे ब्रजनारियों ! जैसे पांच भौतिक शरीरों में आकाश, वायु, अग्नि, जल और पृथ्वी रही है इन पञ्चभौतिक देहों के ये पञ्चभूत आश्रय है वैसे ही मैं सबकी आत्मा होने से मन, प्राण, बुद्धि, इन्द्रियों एवं गुणों का आश्रय हूँ सबका समवायि कारण एवं निमित्त कारण मैं ही हूँ ॥ ३० ॥

आत्मन्येवात्मनाऽऽत्मानं सृजे हन्म्यनुपालये । आत्ममायानुभावेन भूतेन्द्रियगुणात्मना ॥ ३१ ॥
आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणाश्रयः[1] । सुषुप्तिस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ॥ ३२ ॥

कर्वमक्षमा

अन्वयः—आत्ममायानुभावेन, भूतेन्द्रियगुणात्मना, आत्मनि, एव, आत्मानम्, सृजे, हन्मि, अनुपालये ॥ ३१ ॥ आत्मा, ज्ञानमयः, शुद्धः, व्यतिरिक्तः, अगुणाश्रयः, सुषुप्तिस्वप्नजाग्रद्भिः मायावृत्तिभिः ईयते ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वात्मनो भूतादिरूपत्वे तद्दोषप्रसंगः स्यात्तत्राह । आत्मेति । आत्मा तु शुद्धः । कुतः । अगुणान्वयः न गुणेष्वन्वेतीति तथा । तत्कुतः । व्यतिरिक्तः । तदपि कुतः । ज्ञानमयो ज्ञानस्वरूपः । नन्वहंप्रत्यये स्वसंवेद्यमेवात्मनो नानावस्थावत्त्वमिति कुतस्तस्य शुद्धतेति तत्राह । सुषुप्तीति । मायाकार्यमनोवृत्तिभिर्विश्वतैजसप्राज्ञरूपेण प्रतीयते । न स्वत इत्यर्थः ॥ ३१ ॥ एतत्कुतः । मनोनिरोधे तदभावादिति व्यतिरेकं दर्शयितुं मनोनिरोधं विधत्ते । येनेति । उत्थितः पुमान्यथा मिथ्याभूतमेव स्वप्नं ध्यायत्येवं बाधितानपीन्द्रियार्थान् शब्दादीन्येन मनसा ध्यायेत ध्यायेच्चिंतयेत् । ध्यायंश्च येनेंद्रियाणि प्रत्यपद्यत प्राप तन्मनोविनिद्रोऽनलसः सन्निरुध्यान्नियच्छेदिति ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आत्मनो जडत्वं शंकते—नन्विति । तेषां भूतादीनां दोषो जडत्वादिरूपस्तस्य प्रसङ्गः प्रसक्तिः । तत्राक्षेपे । शुद्धत्वे हेतुमाशङ्कते—कुत इति । अन्वेति सङ्ग प्राप्नोतीति । व्यत्तिरिक्तः सर्वस्माद्भिन्नः । अत्र हेतुमाशङ्कते—तदपीति, व्यतिरिक्तत्वमपि । शुद्धरूपतामाक्षिपति—नन्विति । अहं करोम्यहं शृणोम्यहं वदामीत्यनेकावस्थता । तत्राक्षेपे । इत्यर्थ इति—मायाकृतं नानात्वमेकस्यौपाधिकमेव न स्वाभाविकमित्यर्थः । ननु तर्हि तव स्वरूपं किं लोकैः कथं वा ज्ञेयमिति चेन्मत्स्वरूपन्तु गुणातीतमन्तर्यामिसंज्ञं सर्वत्र प्रतीयत एवेत्याह—आत्मा परमात्मा ज्ञानं मायातीतं चित्तन्मयः, गुणैः सृष्ट्यादिकर्त्रप्यचिन्त्य शक्त्या तत्सम्बंधाभावाच्छुद्धः, शरीरमध्यवर्तित्वेपि तद्व्यतिरिक्तो गुणाधिष्ठातृत्वेऽपि न गुणानन्वेतीति सः । स तु सर्वैरप्यनुमानगम्य इत्याह—सुषुप्तेति । ईयतेऽनुमीयते । तदुक्तं पक्षे—'गुणप्रकाशैरनुमीयते भवान्' इति, "भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ।" इति च । आत्माऽहं ज्ञानमयोऽत्र स्थितोऽपि युष्मद्विषयकातिशयज्ञानवान्न तु कदाचिदपि युष्मान्विस्मरामीत्यर्थः । शुद्धो मथुरा स्थोऽपि मथुराजनाऽऽसंगदोषरहितः, यतो व्यतिरिक्तो युष्मद्वियोगखिन्नः, कथमन्या रोचयामीति भावः । यतो गुणान्वयः, युष्मद्गुणसौन्दर्यमधुरकटाक्षावलोकादीनन्वेमि ध्यानेन निरन्तरं प्राप्नोमीत्यर्थः । एवंभूतो युष्माभिरपि सदैवाहमनुभूय इत्याह—सुषुप्तेति । तत्र सुषुप्तेन ममात्ममनोनुभूतचरस्य रूपगुणादिसामान्यं, स्वप्नेन तद्विशेषं, जागरणेन तु हास्यलास्यादिसंभोगमाधुर्यमयः साक्षादात्मैवेयतेऽनुभूयत एव ॥ ३१ ॥ कुतो मायिकं नानात्वमित्याशंक्य सहेतुकं तदाह—मन इत्यादिना । व्यतिरेकमभावः । एवं स्वप्नवत् । येन मनसा । येनेति तैर्व्याख्यातम् । तत्र चिंतयेत् चिंतयति । प्राप प्राप्नोतीत्यर्थः । द्वितीयोऽर्थो यथा—ननु सत्यं साक्षात्कारनिभा सा स्फूर्तिः, किन्तु न सदेति बहिर्दृष्ट्या वियोगस्फूर्तेरपाये क उपायः—बहिर्वृत्तितो मनोनिरोध एवेति योगशास्त्रप्रक्रियामुपदिशति—येनेति । तृतीयेपि—हन्त यद्यस्मिन्प्रकाशे वियोग एव च तद्दृष्टिश्चास्माकं हातुमशक्या भवतश्च नागमनं तर्हि कथमिव कालं क्षिपाम इत्याशंक्य ममागमनं यावन्मनोनिरोधः क्रियतामित्यभिप्रेत्याह—येनेति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आत्मा ज्ञानमय इति । प्रथमार्थः । नन्वेतावन्तं कालं तवात्मानं घनश्यामवर्णं परिमितसर्वाङ्गं परमाश्चर्यकरं रूपवन्तमेव मन्यामहे स्म । सम्प्रति भवता त्वचिन्त्यशक्तिमयस्तत एव सर्वेषामुपादानतया अन्तर्यामितया च व्यापक एव स इत्यस्माकं भवता सह न वियोग इत्युपदिश्यते । स च न केनापि दृश्य इत्यरूपश्चेत्यवगते तत्तद्रूपता च तव भवदेकगम्येति भवतु नामायं सन्देशः ।

---

[1] गुणान्वयः श्रीधर. वंशी. जीव. वीर. विज. विश्व. ध. सु. शु. धन ।

वयन्तु स्वं स्वमात्मानं परिच्छिन्नदेहरूपमेवानुभवामः ततः कथञ्चिज्जातीयेनानेन तादृशस्य भवदात्मनः सङ्गममनुभविता स्मः। तत्राह। आत्मा ज्ञानमय इति सर्वैरप्यात्मा सुषुप्त्यादिभिर्मनोवृत्तिभिस्तत्तद्रूपासु तद्वृत्तिषु प्रतीयते एव सुषुप्तावपि सुखमहमस्वाप्समिति प्रत्यभिज्ञाबलात् किमुतान्ययोरिति भावः। यतो ज्ञानमयः प्रकृतिज्ञानस्वरूपत्वात् स्वयं प्रकाशः। यतोऽसौ तत्तद्गुणानुगतोऽपि व्यभिचारिणीभ्यस्तत्तद्वृत्तिभ्यो व्यतिरिक्तत्वात् शुद्ध इत्यर्थः। तस्मात् ज्ञानरूपेण सर्वेषामुपादानेन व्यापकेन मदात्माना ज्ञानरूपस्य निजात्मनस्तादात्म्यभावनया सुखिन्यो भवत किमनया बहिर्योगदुःखमयभावनयेति भावः। मायावृत्तिभिरिति पाठेऽपि स एवार्थः। द्वितीये त्वर्थे। यो मम तादृशविग्रहरूपात्मा भवतीभिर्निर्धारितः स तु सुषुप्त्यादिवृत्तिषु भवतीभिरीयते अनुभूयते एव मत्समाधेरेव भवतीषु सुषुप्तवद्भासमानत्वात् यथोक्तं "जाग्रत्स्वप्न सुषुप्तेषु योगस्थस्य च योगिनः। या काचिन्मनसो वृत्तिः सा भवेदच्युताश्रयेति"। तमेवात्मानं विशिनष्टि। ज्ञानमयो नानाविद्याविदग्धः शुद्धो दोषरहितः व्यतिरिक्तो विशेषेण सर्वोत्तमः गुणान्वयः सर्वगुणशालीति ! तृतीयेऽप्यर्थे भवतीभिर्यत् सुषुप्त्यादिषु स्वीयमन आद्याश्रयस्तादृशो यो ममात्मानुभूयते स च गौतमीयन्त्रादिस्थस्य। "नवीननीरदश्यामं नीलेन्दीवरलोचनम्। वल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणमिति वर्त्तमानवन्दनात्मकस्य सार्वदिकानुशीलनीयस्य श्रीगोपालस्तवराजादेर्दृष्ट्या नित्यतत्तद्विध एव ज्ञेय इति भावः ॥ ३१ ॥ येनेति। तैर्व्याख्यातं तत्र चिन्तयेत् चिन्तयति प्राप प्राप्नोतीत्यर्थः। द्वितीयोऽर्थो यथा। ननु सत्यं साक्षात्कारनिभा सा स्फूर्तिः किन्तु न सदेति बहिर्दृष्ट्या वियोगस्फूर्त्तेरप्येक उपायः उच्यते। बहिर्वृत्तितो मनो निरोध एवेति योगशास्त्रक्रियामुपदिशति। येनेति। तृतीयेऽपि। हन्त यद्यस्मिन् प्रकाशो वियोग एव च तद्दृष्टिश्चास्माकं हातुमशक्या भवतश्च नागमनं तर्हि कथमिव कालं क्षिपाम इत्याशङ्क्य ममागमनं यावन्मनोनिरोधः क्रियतामित्यभिप्रेत्याह। येनेति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो बत मायया सृजामीति कथमुच्यते जीवस्यापि तत्त्वतो मायिकदेहेन संबन्धो नास्ति मम तु कुतः स्यादिति दृष्टान्तमाह। आत्मेति। मनो वृत्तिभिरिति। तस्य विश्वादिभेदो मायिक एव न वस्तुत इत्यर्थः। अन्यत्तैर्व्याख्यात्तम् यद्वा मयापि सदा भवत्यो दृश्यन्त इत्याह। आत्मेति। परमादरात् आत्मना सह प्रेमविशेषेणाभेदाद्वा भवतीत्यर्थः। तासां चान्योऽन्यस्नेहभेदाभावात् एकत्वं सुषुप्त्याद्यवस्थाभिः अन्याभिश्च मनोवृत्तिभिरीयते तत्र तत्र दृश्यत इत्यर्थः। यद्यपि जीवस्यैवावस्थायमिदं तथापि श्रीभगवतोऽपि लीलाविशेषोऽयं सम्भवेत् सुषुप्तौ दर्शनासम्भवेऽपि तथोक्तिर्दर्शनस्याविच्छेदविधाने तात्पर्य्यार्था। यद्वा सुषुप्तिस्तदेकाग्रतया सामधिरूपा। ननु दुर्भगानामस्माकं कुतस्तद्योग्यमित्याशङ्क्य तदेव दर्शयति। ज्ञानेत्यादि चतुर्भिर्विशेषणैः आत्मपदविशेषणत्वात् पुंस्त्वं ज्ञानमयः जीवेश्वरभक्त्यादितत्त्वज्ञानपूर्णः अत एव शुद्धः माया गुणाद्यस्पृष्टः अत एव व्यतिरिक्तः प्रपञ्चाद्विलक्षणः अत एव गुणानां नित्यसद्रूपयोः वैदग्ध्यादीनामन्वयो यस्मिन् सः। यद्वा आत्मा भवतीनां देहः। ननु प्राकृतनिन्द्यास्मदीयदेहस्य त्वया सदा दर्शनं न घटत इत्याशङ्क्य तस्य सच्चिदानन्दघनतां द्योतयति। ज्ञानमयः ज्ञानघन इत्यर्थः। यतः शुद्धः अतो व्यतिरिक्तः अन्यत्समानम् ॥ ३१ ॥ अहो अन्तर्यामित्वेन सर्वेन्द्रियप्रवर्तकत्वेन च सर्वत्र प्रकाशमानमपि मां भवतीर्विना न कोऽपि विषयासक्त्या द्रष्टुमर्हतीति विषयेभ्योऽन्येन सर्वेण मनो नियन्तव्यमेवेति प्रसङ्गात्तासां माहात्म्यार्थमेवाह—येनेति तैर्व्याख्यातम्। यद्वा, ततश्च विनिद्रो निर्मायः सन्निन्द्रियाणि प्रति सर्व्वेन्द्रियेष्वेव मां मद्भक्तः प्रत्यपद्यत, प्राप्तनिर्द्धारार्थमतीतनिर्द्देशः, प्रतिपद्यत एवेत्यर्थः, यद्वा, शुद्धार्थं पूर्व्वपूर्व्वसदाचारो दर्शितः, अन्यत् समानम् ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आत्मा जीवः अगुणान्वयः स्वतो गुणान्वयरहितः ॥ ३१ ॥ येनेन्द्रियर्थानिति। येन मनसाः विनिद्रः। निवृत्ताज्ञानः प्रतिपद्यते ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवमब्रह्मात्मकस्वतन्त्रवस्तुभ्रमो निरस्तः अथ देहात्मभ्रमं निरस्यति। आत्मेति। आत्मा जीवः व्यतिरिक्तः देहेन्द्रियमनःप्राणादिभ्य इति शेषः। अत एवागुणान्वयः वस्तुतः प्राकृतसत्त्वादिगुणान्वयरहितः। यद्वा गुणान्वय इति छेदः व्यतिरिक्तः कर्मनिमित्तो गुणानामन्वयो यस्मिन्निति तथाभूतः अत एव स्वतः स्वरूपतः शुद्धः निर्मलः अस्तु किन्तत्स्वरूपं तत्राह। ज्ञानमयः। अन्योऽन्तर आत्मा विज्ञानमय इत्यत्रेव स्वार्थिको मयट् ज्ञानमयस्वरूप इत्यर्थः। यद्वा प्राचुर्ये मयट् नच ज्ञानप्राचुर्यमज्ञानाल्पमवगमयतीति शङ्क्यं तत्प्राचुर्यस्य तदल्पस्यैव व्यावर्तकत्वाद्व्यतिरिक्तस्य कथं न तथा प्रतीतिः, कथं वा देवोऽहं मनुष्योऽहं सुप्तोऽहं किल बिललाप सुखमहमस्वाप्समित्यादि रूपेण प्रतीतिस्तत्राह। सुषुप्तीति। मायावृत्तिभिः प्रकृतिपरिणामभूतमनो व्यापारविशेषात्मिकाभिर्जाग्रत्स्वप्नसुषुभिर्देवादिशरीरात्मतादात्म्यादिविषयाभिर्देवादिरूपेण प्रतीयत इत्यर्थः। तत्र जाग्रन्मायावृत्तिर्बाह्येन्द्रियद्वारा बाह्यविषयगोचरा आन्तरसुखदुःखादि गोचरा च नतु व्यतिरिक्तात्मस्वरूपगोचराऽतो देवोऽहमिच्छामि द्वेष्मि सुख्यहं दुःख्यहमिति प्रतीतिः स्वप्नवृत्तिस्तु तद्दशायां तत्स्वप्नद्रष्टृकर्मानुगुणं तदेककरणतया तत्कालमात्रावस्थायितया च परमपुरुषसृष्टचक्षुरा-

दीन्द्रियद्वारिका वा तदेकानुभाव्यतत्कालमात्रावस्थायिपरमपुरुषसृष्टविषयदेहादिगोचरा नतु व्यतिरिक्तात्मगोचरेति तदा न तथा प्रतीतिः। सुषुप्तौ तु यद्यपि न मनसो व्यापारः अत एव न देवाद्याकारप्रतीतिरेवं च व्यतिरिक्तात्मस्वरूपप्रतीतिरपि सुलभा तथाप्याप्रबोधमहमित्येव प्रकाशते नतु देहेन्द्रियादिभ्यो व्यतिरिक्तोऽहमिति प्रतियोगिग्राहकमनोव्यापाराभावात्प्रतियोगिन एवाप्रतीतेः यद्यपि सुषुप्तावहमिति प्रतीतिर्न मायावृत्तिस्तथापि छत्रिन्यायेन मायावृत्तिभिरित्युक्तम् ॥ ३१ ॥ तदेवं संसृतिहेतुभूतदेहात्मभ्रमादिर्मनः पारवश्यकृत इत्युक्त भवति कथं तर्हि तत्पारवश्यनिवृत्तिरित्यपेक्षायां तन्नियमनेनैवेत्याह। येनेति। उत्थितः स्वानादिति विभक्तिविपरिणामेन संनिहितत्वात् सम्बध्यते प्रबुद्धः स्वप्नवत्स्वाप्नार्थानिव येन मायापरिणामरूपेण मनसा इन्द्रियार्थान् मृषा शब्दादिविषयान् सम्प्रत्यविद्यमानानपि पूर्वाननुभूतानप्यनुभूतसजातीयान् दुर्लभान् ध्यायीत तन्मनो निरुन्ध्यान्नियच्छेदिति सम्बन्धः "ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायत सङ्गात्संजायते काम" इत्याद्युक्तरीत्या विषयध्यानतत्सङ्गाद्यापादनद्वारा मनसो बन्धकत्वमिति येनेन्द्रियार्थान् ध्यायीतेत्यनेनोक्तं येनेत्युपात्तं मनो विशिनष्टि। येन चेन्द्रियाणि बाह्यानीन्द्रियाणि प्रत्यपद्यत प्राप कथंभूतः विनिद्रोऽनलसः निरुन्ध्यात्। यद्वा तन्मन इन्द्रियाणि चेति शेषः। विनिद्रः देहात्मभ्रमरहितः अन्तर्बाह्येन्द्रियाणि निरुन्ध्यात् प्रत्यपद्यतेत्यस्य मामित्यादिः येन निरुद्धेन मनसा मां यथावज्जानीयादित्यर्थः। यद्वा तदित्यव्ययं तेभ्यो विषयेभ्यो ध्यातेभ्य इन्द्रियाणि निरुन्ध्यात् यथेन्द्रियाणि तत्प्रावण्यरहितानि भवेयुस्तथा निरुन्ध्यादित्यर्थः। अनेन तावन्मनसा बाह्येन्द्रियनियम उक्तः कथम्भूतः विनिद्रः पूर्ववदर्थः अनेन मनोनियमनोपयुक्तदेहात्मभ्रमराहित्यमुक्तम् एवमान्तरिन्द्रियनियम उक्त कथमेतदुभयं लभ्यं तत्राह। प्रत्यपद्यत मामिति पूर्ववच्छेषः प्रतिपद्यतेत्यर्थः। मद्विषयज्ञानेन तत्सुलभमिति भावः ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

स्वाधारत्वेनाततत्वेन आत्मनेत्युक्तं विवृणोति। आत्मेति। आत्ममायानुभावेन स्वरूपेच्छानिश्चयेन निश्चयं विशिनष्टि। भूतानीति भूतादीन् व्याप्य वर्तमानेन अनेन भूतादीनामवान्तरकारणत्वेन तत्कारणत्वोक्तिविरोधः भूतेन्द्रियगुणात्मनेत्यनेन जडरूपत्वं परमात्मनः प्राप्तं निवारयति। आत्मेति। ज्ञानमयः पूर्णज्ञानः गुणानां सत्त्वादीनामन्वयो यस्य स तथा न केवलं ज्ञानमेव गुणोऽस्य किन्त्वन्येऽप्यानन्दादयः सन्तीत्यतो वोक्तं गुणान्वय इति आनन्दादिगुणानामन्वयो यस्मिन् स तथा उक्तार्थे किम्प्रमाणमिति तत्राह। सुषुप्तीति। मायया हरेरिच्छया वृत्तिः स्वरूपलाभो यासां तास्तथा ताभिः स्वपादिकं सकर्तृकं कार्यत्वात् घटवदित्याद्यनुमानं पक्षधर्मताबलेनेयतो ज्ञायत इत्यर्थः ॥ ३१ ॥

श्रीमज्जीवगोस्वाकृतः बृहत्क्रमसन्दर्भः

(२९ श० श्लो०) "तथाहञ्च मनः प्राण" इत्यादिनोक्तमर्थं प्रकटयति—आत्मा ज्ञानमय इत्यादि। आत्मा मल्लक्षणः अहमित्यर्थः। ज्ञानमयः सर्वज्ञत्वात्। अतो भवतीनामन्तर्गतं यत् किञ्चित्, तत्सर्वं जानामि, तेनाकृतज्ञ इति नाहमवज्ञातव्यः; यतः शुद्धो निरपराधः सुषुप्ति-स्वप्न-जाग्रद्भिर्मनोवृत्तिभिरीयते गम्यते, अर्थाद् भवतीभिः, अतएव भवतीनां मनःप्राणेन्द्रियादिष्वहं वर्त्ते इति। व्यतिरिक्तोऽपि दूरस्थोऽपि अतएवागुणाश्रयोऽपि रूपादिगुणानामनाश्रयोऽपि ॥ ३१ ॥ न केवलं भवतीभिरेव मद्रूप आत्मा एवं प्रकारेण ईयते, अपि तु भवत्योऽपि मया तथैवेयते इत्यादि। येन हेतुना मद्रूप आत्मा इन्द्रियार्थान् रूपादीनि अर्थात् भवतीनामेव, ध्यायेत ध्यायतीत्यर्थः। अनुभूतानि रूपादीनि ध्यायामीति यावत। इन्द्रियार्थध्यानेन तदनुभवेऽपि स्वप्नवत् मृषा, न वास्तवोऽनुभवः, वियोगदुःखशमनत्वाभावात्। अतस्तस्माद् ध्यानादुत्थितः सन् तन्निरुन्ध्यात् तन्निरुन्धे दुःखं सहेतेत्यर्थः। तदा विनिद्रः सन् इन्द्रियाणि भवतीनां करचरणादीन्येव प्रत्यपद्यत प्रतिपद्यते। सर्वत्र विभक्तिविपरिणामः। तेन "तथाहञ्च मनः प्राण" इत्यादि यदुक्तम् तत् साध्वेव। अतो (२९ श० श्लो०) "भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्" इति मान्यथा शङ्कनीयम् ॥ ३२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ननु तदा किमनीश्वरः, यतः प्राकृतवच्चेष्टसे ? नैवमित्याह—आत्मा ज्ञानमय इत्यादि। संभूत आत्माप्यहमपि त्वद्विधानां प्रेम्णा विकल इत्यर्थः। कोऽसावात्मेत्याह—आत्मा सुषुप्त्यादिभिर्मनोवृत्तिभिः प्रतीयते मनसि वृत्तिर्यस्य स मनोवृत्तिरात्मा, अवस्थाभेदेन संज्ञाभेदमापन्नैस्त्रिभिरेव तैः प्रतीयते। यस्तुरीयो निरुपम-चिदानन्दविग्रह आत्माहम्, अतएव ज्ञानमयादिविशेषेण विशिष्टः स एवम्भूतोऽप्यात्मा मद्रूपो भवद्विधाना प्रेम्णा इन्द्रियार्थान् अनुध्यायेत, तानि स्पर्शसुखानीत्यादिवत् सर्वेन्द्रियार्थानुभवेऽपि स्वप्नवत् मृषैव ते भवन्तीत्यर्थः। अतः स आत्मा उत्थितः, तदनुभावादुत्थितः सन् तन्निरुन्ध्यात्। तद्दुःखं वशीकरोति सहत इत्यर्थः। तदा विनिद्रोऽनलसः सन् इन्द्रियाणि प्रत्यपद्यत भवतीनामिन्द्रियाणि करचरणादीनि प्रतिपेदे पुनस्तादृशीरवध्यायतीत्यर्थः। सर्वं वर्त्तमानायामतीतवन्निर्देशः ॥ ३१-३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु तर्हि तव स्वस्वरूपं किं लोकैः कथ वा ज्ञेयमिति चेत् मत्स्वरूपं तु गुणातीतमन्तर्यामिसंज्ञं सर्वत्र प्रतीयत एवेत्याह। आत्मा परमात्मा ज्ञानमयः ज्ञानं मायातीतं चित् तन्मयः गुणैः सृष्ट्यादिकर्तृत्वेऽप्यचिन्त्यशक्त्या तत्सम्बन्धाभावाच्छुद्धः।

शरीरमध्यवर्त्तित्वेऽपि व्यतिरिक्तः । गुणाधिष्ठातृत्वेऽपि न गुणान् अन्वेतीति सः । स तु सर्वैरप्यनुमानगम्य इत्याह । सुषुप्तेति । ईयते अनुमीयते । यदुक्तं पक्षे "गुणप्रकाशैरनुमीयते भवान् इति । भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकै"रिति च आत्मा अहं ज्ञानमयः अत्र स्थितोऽपि युष्मद्विषयकातिशयज्ञानवान् नतु कदाचिदपि युष्मान् विस्मरामीत्यर्थः । स्थितोऽपि मथुराङ्गनासङ्गदोषरहितः यतो व्यतिरिक्तः युष्मद्वियोगखिन्नः कथमन्या रोचयामीति भावः । यतो गुणान्वयः युष्मद्गुणान् सौन्दर्यमधुरकटाक्षावलोकादीन् अन्वेमि ध्यानेन निरन्तरं प्राप्नोमीत्यर्थः । एवम्भूतो युष्माभिरपि सदैवाहमनुभूय इत्याह । सुषुप्तेति । तत्र सुषुप्तेन ममात्मनोऽनुभूतचरस्य रूपगुणादिसामान्यं स्वप्ने न तद्विशेषः । जागरेण तु हास्यलास्यादिसम्भोगमाधुर्यमयः । साक्षादात्मैव ईयते अनुभूयते एव ॥ ३१ ॥ उपदिष्टोऽयं ज्ञानयोगो मनोनिरोधे सति फलतीति मनोनिरोधं विधत्ते । येन मनसा इन्द्रियार्थान् विषयान् ध्यायेत उत्थितः प्रबुद्धो जनः स्वप्नवत् स्वप्नं यथा मृषाभूतानप्यर्थान् ध्यायेत् तन्मन इन्द्रियाणि च निरुन्ध्यात् यतो विनिद्रः सावधान एव जनः प्रत्यपद्यत । प्रतिपन्नो ज्ञानवानभूदिति पूर्वाचारः प्रमाणितः । पक्षे उत्थितः मूर्च्छोदितः प्रबुद्धो भवद्विधो जनः इन्द्रियार्थान् मद्दर्शनसंस्पर्शनाधरपानालिङ्गनादीन् विषयान् मदाविर्भावजनितत्वात् सत्यानेव येन मनसा स्वप्नवन्मृषाभूतानेव ध्यायेत तन्मनो निरुन्धयात् तिरस्कुर्वीत तदप्रामाण्यादिति भावः । यतो विनिद्रः निद्रारहित एव भवदादिः इन्द्रियाणि स्वनेत्रादीनि प्रत्यपद्यत प्रत्यक्षत एव निरञ्जननीरागनिश्चन्दनानि अपद्यत ज्ञातवानेव युष्माभिरनुरागान्धाभिर्महाविरहोत्कण्ठ्य विगतविचाराभिर्मत्कर्तृकयुष्मत्कर्मकनानाविधसम्भोगोऽपि यन्मृष भूत एव मन्यते एतदेव मे महद्दुःखम् । अत एव तत्तत्सत्यापनार्थकमेतत्सन्देशप्रेषणं ममेति भावः ॥ ३२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

परमार्थतस्तु आत्मा ज्ञानमयः ज्ञानस्वरूपः ज्ञानमित्युपलक्षणं सच्चिदानन्दरूपः सत्यं ज्ञानमनन्तं विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतेः अज्ञानोपहितमेवात्मरूपं केचिदङ्गीकुर्वन्ति तान्निराह । शुद्ध इति । अविद्योपाध्यसंस्पृष्टः निरवद्यं निरञ्जनमित्यादिश्रुतेः अत एवाहङ्कारादिभ्योऽपि व्यतिरिक्तः "अप्राणो ह्यमनाः शुभ्र" इत्यादिश्रुतेः अत एवागुणान्वयः गुणसंबन्धरहितः "साक्षी चेता केवलो निर्गुणश्चेत्यादिमन्त्रवर्णात् देहादिवैशिष्ट्यप्रतीतिस्त्वौपाधिकीत्याह । सुषुप्तेति मायाजनितैर्जाग्रत्स्वप्नसुषुप्तिभिरन्तःकरणधर्मैरीयते विश्वतैजसप्राज्ञरूपेण प्रतीयते स्वतः यदा सुषुप्त्यादिभिर्मनोवृत्तिभिर्गुणान्वयः प्रतीयते तथा चान्तःकरणतादात्म्याध्यासात्तदवस्थावत्त्वेन प्रतीयत इति भावः । यद्वा सुषुप्त्यादिभिर्व्यतिरिक्तः ईयते अनन्वागतः स तेन भवतीत्यादिश्रुत्या सर्वावस्थास्वनुगतादात्मनोऽवस्थानां व्यतिरेकाभिधानात् अत एवागुणान्वयः गुणकार्यावस्थात्रितयसंबन्धशून्यः । नन्वेवमात्मन एकत्वैकान्ताभ्युपगमे नानात्वाभावात्प्रत्यक्षादिप्रमाणानि विधिप्रतिषेधमोक्षशास्त्रं च व्याहन्येतेति चेन्न स्वप्नव्यवहारस्य प्राक् प्रबोधादिवत् सर्वव्यवहाराणां प्राक् ब्रह्मात्मत्वप्रबोधात् सत्यत्वोपपत्तेः । नन्वसत्येन वेदान्तवाक्येन कथं सत्यब्रह्मात्मत्वप्रतीतिरितिचेन्न शङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः कल्पितादपि ह्रस्वत्वादिधर्मान्नगो नाग इति पर्वतादिविषयकप्रमोत्पत्तिदर्शनाच्चेति संक्षेपः ॥ ३१ ॥ तथा च मानसः संसारो मनोनिरोधाच्छाम्यतीत्याह । येनेति । यथा निद्राया उत्थितः पुमान्मिथ्याभूतमेव स्वप्नं ध्यायति तथा वाधितानपि इन्द्रियार्थान् शब्दादिविषयान् येन मनसा ध्यायेच्चिन्तयेत् ध्यायंश्च येनेन्द्रियाणि प्रत्यपद्यत प्राप्तवान् तन्मनः विनिद्रोऽनलसः सन्निरुन्ध्यान्नियच्छेत् । यद्वा मनोनिरोधान्वयव्यतिरेकाभ्यां संसारभाननिश्चयात्संसारविनिर्मुक्तान्यस्वरूपावगत्यर्थं मनसो निरोधः सम्पाद्य इत्याह । येनेति । उत्थितः समाधेः सकाशादुत्थितो येन मनसेन्द्रियार्थान् ध्यायेत् स्वप्नवन् मृषा भूतान्मिथ्याभूतानपि चिन्तयति समाधिस्थश्च न चिन्तयति तस्मात्तन्मनो निरुन्ध्यादिन्द्रियाणि च निरुन्ध्यात् तत्रापि विनिद्रः लयशून्यः प्रत्यपद्यतात्मस्वरूपमवाप्नोतीत्यर्थः । यद्वा एवम्भूतात्मज्ञानमपि नात्मसकाशात्पृथगतस्तदपि निरुन्ध्यादन्यथा द्वैतापत्तेरित्याशयेनाह । येनेति । उत्थितो देहादिभ्यो व्यतिरिक्तात्मज्ञानाभ्यासवान् येन ज्ञानेनेन्द्रियार्थान् स्वप्नवन्मृषा मिथ्याभूतान्ध्यायेत् तज्ज्ञानमिन्द्रियाणि बहिरन्तर्भेदेन द्विविधानि कारणानि च निरुन्ध्यात् ततश्च विनिद्रः अज्ञानतत्कार्यविनिर्मुक्तः प्रत्यपद्यत ब्रह्म सम्पद्यत इत्यर्थः ॥ ३२ ॥

गूढार्थदीपिनी

अनुभावेन कार्येण । आत्मना जीवरूपेण च ॥ ३१ ॥ अगुणान्वयः न गुणेषु अन्वेति यतो व्यतिरिक्तः पृथक् । ईयते तत्रत्साक्षिरूपेण विश्वतैजसप्राज्ञरूपेण प्रतीयते ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु विश्वभावापन्नस्य तव संसारित्वादयो दोषा मा भवन्तु पराप्रकृतिनाम्न आत्मनस्तु कार्यत्वेनानित्यत्वे सति कस्य पुनस्त्वत्प्राप्तिलक्षणमोक्ष इत्यत्र प्रलयकाले सङ्कुचितज्ञानस्य सृष्टिवेलायां देवमनुष्यादिदेहतादात्म्यात्तत्तदनुरूपज्ञानविकाशादिना कार्यत्वं न स्वरूपत इत्याह । आत्मेति । ज्ञानमयः ज्ञानप्रचुरः शुद्धः निर्विकारः देहादिभ्यो व्यतिरिक्तः एवम्भूतो ममांशः आत्मा

क्षेत्रज्ञः सृष्टिसमये गुणेषु गुणकार्येषु देवमनुष्यादिदेहेन्द्रियादिषु अन्वेति तादात्म्यं प्राप्नोति इत्यन्वयः एवं कार्यभावं प्राक् कर्मसाक्षिणा मया नीतः न स्वरूपतः कार्यभावापन्नोऽतो नानित्य इति भावः। ननु देहेन्द्रियादितादात्म्यं गतः अनित्येभ्यः देहेन्द्रियादिभ्यः पृथक् कथं बोद्धुं शक्योऽत आह। सुषुप्त्यादिभिर्मनोवृत्तिभिरीयते देहादिभ्यो मनोवृत्तिर्विषयेभ्यः ग्राहकत्वेन पृथक् प्रतीयते ॥ ३१ ॥ एवं जगत्कारणं सर्वदा सन्निहितं मां ममैवांशभूतः क्षेत्रज्ञो मच्छक्तिपरिणामरूपं जगज्जलधिं ततुं "कारण तु ध्येय"मिति श्रुत्युक्तरीत्या ध्यायेदित्याह। येनेति। पूर्वं स्वप्नवान् दृष्टस्वप्नः पश्चादुत्थितः प्रबुद्धो जनः स्वप्नदृष्टं पदार्थं यथा मृषा प्रबोधवेलायामसन्तं ध्यायति तथेन्द्रियार्थान् दृष्टश्रुतान् शब्दादीन् ध्यानवेलायामविद्यमानानेव अतीतान् अनागतान् येन मनसा ध्यायेत् तन्मनः इन्द्रियाणि च निरुन्ध्यात् नियच्छेत् तदनन्तरं विनिद्रः सन् क्षेत्रक्षेत्रज्ञमूलभूते सर्वनियन्तरि मयि "या निशा सर्वभूतानां यस्यां जागर्ति संयमी"त्येवं प्रबुद्धः सन् प्रत्यपद्यत मद्ध्यानेन मां प्राप्त एव भवेदित्यर्थ ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आत्मनेति स्वोक्तं विशदयति। आत्मेति। आत्मनो मायेच्छा गतम्। तस्यानुभावेन सामर्थ्येन! तत्स्वरूपम् निरूपयति। भूतेन्द्रियगुणात्मना भूतेन्द्रियगुणादीन्व्याप्य वर्तमानम्। अनेन स्वस्य मुख्यकारणतामवान्तरकारणता भूतानामभिप्रैतीति न बिरोधः। भूतेन्द्रियगुणात्मनेनापाततः प्रतीतजडतादाम्यं निराकर्तुं व्यावर्तकधर्मानाह। आत्मेति। ज्ञानमयो ज्ञानात्मकः शुद्धोऽप्राकृतो निरञ्जनो वाऽगुणान्वयो न विद्यते गुणानां सत्त्वादीनामन्वयो यस्य स गुणानामानन्दादीनामन्वयो यस्य सोऽप्रधानसम्बद्धः कार्यं कारयतीति गुणान्वयो वाऽतो व्यतिरिक्तस्तद्भिन्न इत्यर्थः ॥ ३१ ॥ स केनावसीयत तत्राह। सुषुप्तीति। सुषुप्तिश्च स्वप्नश्च जाग्रच्च तैर्माया च मुख्यतो विष्णुशक्तिस्तु मायाशब्देन भण्यत इति द्वितीयतात्पर्योक्तेः। स्वशक्त्या वृत्तयः (मायया हरीच्छया वृत्तिः स्वरूपलाभो यासां तास्तथा ताभिः। विजयध्वजोव्याख्या) सोऽयमात्मा चतुष्पाज्जागरितस्थानेऽन्तः प्रज्ञः। बहिः प्रज्ञो बिभुर्विश्वो ह्यन्तः प्रज्ञस्तु तैजसः। घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृत इत्यारभ्य त्रिधा तृप्तिमित्यन्तमण्डूकोप निषदा। तथा जाग्रद्दर्शनरूपत्वादित्यादीकृत्येति मार्कण्डेय इत्यन्तद्भाष्येण' तथा स्वप्नस्यान्तः सुषुप्तिः स्वातन्त्र्यात्स्व इति प्रोक्तो विष्णुः सर्वेश्वरेश्वरः। तं प्राप्नोति मनोनामा संसारी स्वापतीत्यत इत्यादि छान्दोग्यादिभाष्येण चोक्ता वृत्तयस्ताभिरीयते। स्वप्नादिकं सकर्तृकं कार्यत्वाद्घयदित्यनुमानेन ज्ञायते ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं ब्रह्मधर्मनिरूपणेन वियोगाभावं निरूप्य जीवधर्मनिरूणेनापि तदभावं निरूपयन्नाह। आत्मेति। आत्मा जीवः गोपिकाः अहमिति मन्यन्ते स देह एवेति प्रतीतिसिद्धत्वात् तद्व्यतिरेकार्थमाह। ज्ञानमय इति। मयट् प्राचुर्ये सच्चिदानन्दरूपत्वात् ज्ञानप्रचुरोऽयमात्मेत्यर्थः। तर्हि वैषयिकज्ञानमयो भविष्यतीत्याशङ्क्याह। शुद्ध इति। ननु शुद्धमात्मानं तु पश्यामः अतः प्रमाणाभावात् प्रतीतस्य चाशुद्धत्वात् बाधितार्थ इति चेत्तत्राह। व्यतिरिक्त इति। अस्माद्देहादिसंघाताद्व्यतिरिक्तः यथा तप्तबालुकातः सूर्यो व्यतिरिच्यते। नन्वत्र व्यतिरेके का उपपत्तिरिति चेत्तत्राह। अगुणाश्रय इति। स हि गुणानाश्रित्य न तिष्ठति गुणाश्रया अन्ये स तु तद्व्यतिरिक्तः अत्र सर्वत्रानुभवं प्रमाणयति सुषुप्तीति। मायाया गुणमय्यास्तिस्रो वृत्तयः जाग्रत्स्वप्नसुषुप्तिभेदाः तिसृष्वप्यलौकिकोक्तसामर्थ्यात् मायाग्रहणम् अन्यथा सुषुप्तौ परमानन्दस्य स्फूर्तिः स्वप्ने नानाविधपदार्थानां जागरणदशायां च चतुर्विधपुरुषार्थसिद्धिर्न स्यात्। अत्र सर्वत्र आत्मनः अन्वयो दृश्यते एकस्यां वृत्तौ द्वितीयवृत्तिव्यतिरेकश्च तद्धर्माणां च अतो ज्ञायते यदा मूलभूतगुणाद्व्यतिरिच्यते अयमात्मा तदा सङ्घात व्यतिरेके किं मे वक्तव्यमिति अतो वस्तुत आत्मा सङ्घातात् व्यतिरिक्त इति आत्मनैव अहं प्राप्तव्यः ॥ ३१ ॥ ननु देहसहितेन ह्युत्तमः पदार्थः स्वोपभोग्यो धनैः सह भोक्तुमर्हः। अतोऽस्मात्सङ्घातदादौ निवृत्ता भवत पश्चान्मदुपभोगं कुरुतेति तात्पर्यम् साधनाकाङ्क्षायां तदुपदिशति। येनेन्द्रियार्थान् ध्यायेतेति। येन मनसा इन्द्रियार्थान् रूपादिविषयान् मृषा अविद्यमानान् असम्भावितांश्च ध्यायेत् पुरुषः यस्मिन् वेद्यमाने ध्यानमावश्यकमिति। नन्वयमपि पुरुषार्थ इति चेत्तत्राह। पयप्नवदिति। जन्मान्तरोत्पत्त्यर्थमेव तस्य ध्यानं यथा स्वप्नः सूचकः तथा ध्यायमानं मनोऽपि जन्मान्तरं सूचयति नतु स्वरूपतः किञ्चित्पुरुषार्थसाधकमतोऽनर्थसूचकं तन्मनो निरुन्ध्यात्तस्यापि निरोध इन्द्रियनिरोधः कारणमिति इन्द्रियाणि च निरुन्ध्यादित्याह। इन्द्रियाणीति। उभयनिरोधे किं स्यादित्याशङ्क्याह। विनिद्रः प्रतिपद्यत इति अवस्थाद्वयं समीचीनम् आनन्दोऽभिव्यज्यते पुरुषार्थाश्चान्यत्रेति अतः स्वप्न एव व्यर्थ इति सूचयितुं वैयर्थ्योपगमाय विनिद्रः सन् आत्मानमयमस्मीति प्रतिपद्यते व्यतिरिक्तम् ॥ ३२ ॥

श्रीसुबोधिनी-सारः

आत्मा तु शुद्धो ज्ञानमयो व्यतिरिक्तोऽसंगोऽगुणान्वयो निर्गुणः मायाया वृत्तिभिः सुषुप्त्याद्यवस्थाभिरीयते ॥ ३१ ॥ उत्थित उद्बुद्धः पुमान् स्वप्नवत् मृषा मिथ्या भूतानेवेन्द्रियार्थान् शब्दादीन् येन ध्यायेत् चिन्तयन्निन्द्रियाणि प्रत्यपद्यत प्राप तन्मनो निरुन्ध्याद्विनियच्छेत् विनिद्रोऽनलसः ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'आकाशादीनां चराचरसर्वोपादानत्वात्तदाश्रयत्वं सम्भवति, तव कथं मनआद्याश्रयत्वम्' इत्याशङ्क्य स्वस्यापि तदुपादानत्वादिकमाह—आत्मन्येवेति। आत्ममायानुभावेन स्वसङ्कल्पमात्रेण आत्मन्येवाधारे आत्मनैव साधनान्तररहितेन आत्मानमेव भूतादिरूपेण सृजे सृजामि, तदनु अनन्तरं पालये पालयामि, हन्मि च इत्यन्वयः। 'बुद्धीन्द्रिय' इति पाठान्तरम् ॥३१॥ ननु 'एवं सर्वस्यैकात्मत्वे जीवात्मनोऽपि जाड्यादिदोषप्रसङ्गः स्यात् तत्राह—आत्मेति। जीवात्मा तु शुद्धः। तत्र हेतुः—अगुणान्वय इति। न गुणेषु सत्त्वादिषु अन्वेतीति तथा प्राकृतगुणगतविकारादिदोषरहित इत्यर्थः॥ तत्र हेतुः—व्यतिरिक्त इति। गुणकार्याद्व्यतिरिक्त इत्यर्थः॥ तत्रापि हेतुः—ज्ञानमय इति। ज्ञानस्वरूप इत्यर्थः॥ ननु 'जाग्रदादिनानावस्था जीवस्य प्रसिद्धैव, कुतः शुद्धता' इति चेत्तत्राह- सुषुप्तीति। मायावृत्तिभिः प्रकृतिपरिणाममनोवृत्तिभिः विश्वतैजसप्राज्ञरूपेण प्रतीयते, न स्वत इत्यर्थः। तत्र जाग्रदवस्थापन्नो विश्वः, स्वप्नावस्थापन्नस्तैजसः, सुषुप्त्यवस्थापन्नः प्राज्ञः। तथाच 'देवोऽहं मनुष्योऽहं काणोऽहं बधिरोऽहं सुख्यहं दुःख्यहं बुभुक्षितोऽहम्' इत्यादिप्रतीतिरपि देहेन्द्रियान्तःकरणाध्यासादेव, न स्वत इति बोध्यम्॥ ३२॥

अन्वितार्थप्रकाशिका

आत्मन्येवेति। आत्मनो मायाया अनुभावेन कार्येण भूतेन्द्रियगुणात्मना आत्मन्येवाधारे आत्मनैव साधनान्तररहितेन आत्मानमेव जगद्रूपं सृजे सृजामि। तङार्षः। तदनु अनन्तरं पालये पालयामि हन्मि चेत्यन्वयः बुद्धीन्द्रियगुणाश्रय इति पाठान्तरम्। पक्षे भवतीनामात्मनि मनसि आत्ममायाप्रभावेण तद्रूपेण आत्मना यत्नेन भूतान्यङ्गानि इन्द्रियाणि चक्षुरादीनि गुणाः सौन्दर्यादयः आत्मनो बुद्ध्यादयस्तेषां द्वन्द्वैक्यं तत्सहितम् आत्मानंस्वं सृजाम्याविर्भावयामि हन्मि अन्तर्द्धापयामि संभोगादिलीलार्थं मुहूर्त्तमनुपालयामि॥ ३१॥ आत्मेति। आत्मा तु ज्ञानमयः ज्ञानस्वरूपः शुद्धः गुणकार्येभ्यो व्यतिरिक्तः गुणेषु अन्वेति इति तथा सुषुप्तिस्वप्नजाग्रद्भिः मायावृत्तिभिः ईयते विश्वतैजसप्राज्ञरूपेण प्रतीयते न स्वतः। पक्षे आत्माहं ज्ञानमयः न कदाचिद्युष्मान् विस्मरामि शुद्धो मथुराङ्गनासङ्गदोषरहितः व्यतिरिक्तः युष्मद्वियोगखिन्नः गुणान्वयः युष्मद्गुणान्सौन्दर्यादीन् अन्वेमि। सुषुप्त्यादिभिर्मायावृत्तिः सुषुप्तेन सामान्यतो रूपादिगुणसामान्यं स्वप्नेन तद्विशेषः जागरेण तु नानामाधुर्यमयः साक्षादात्मैव ईयतेऽनुभूयत एव॥ ३२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विमुक्तास्त्यक्ता अशेषाः समग्रावृत्तयो विषयेषु प्रवर्त्तनानि येन तत् विमुक्तशेष वृत्ति यत् मनः तत् मय्यावेश्य॥ ३१॥ उपेष्यथेति यदुक्तं तत् स्फुटयति या इति हे कल्याण्यः स्वपतिभिर्गृहे रुद्धः सत्यः व्रजे आस्थिताः वने क्रीडता मया सह अलब्धरासाः या गोप्यः ताः सर्वाः तदैवमापुः मां प्रापुः॥ ३२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवं जीवानामब्रह्मात्मकतास्वतन्त्रताभ्रमो निरस्तः। अथ तेषामेव देहात्मभ्रमं निरस्यति। आत्मेति। आत्मा जीवः, व्यतिरिक्तः। देहेन्द्रियमनः प्राणादिभ्य इति शेषः। अत एव अगुणान्वयः। वस्तुतः प्राकृतसत्त्वादिगुणरहितः, शुद्धः स्वरूपतो निर्मलः, अस्त्वयं स्वरूपत एवंविधः, परं तत्स्वरूपं किमित्यत्राह। ज्ञानमयः। अत्र स्वार्थिको मयट्। ज्ञानधर्मज्ञानस्वरूप इत्यर्थः। 'अन्योऽन्तर आत्मा विज्ञानमयः' इति श्रुतेः। ननु कथमस्य न तथा प्रतीतिः, कथं वा देवोऽहं मनुष्योऽहं 'सुप्तोऽहं किल विललाप' 'सुखमहमस्वाप्सम्' इत्यादिरूपेण प्रतीतिस्तत्राह। मायावृत्तिः प्रकृतिपरिणामभूतमनोव्यापारविशेषात्मिकाभिः, सुषुप्तिस्वप्नजाग्रद्भिः जाग्रत्स्वप्नसुषुप्तिभिः, तथा ईयते। देवादिशरीरादावात्मतादात्म्याद्देवादिशरीराभिमानतस्तथा प्रतीत इत्यर्थः॥ ३१॥ तदेवं संसृतिहेतुभूतदेहात्मभ्रमादिः मनः पारवश्यकृत इत्युक्तं भवति। कथं तर्हि तत्पारवश्यनिवृत्तिरित्यपेक्षायां तन्नियमनेनेवेत्याह। येनेति। स्वप्नात् उत्थितः प्रबुद्धः पुमान्, स्वप्नवत् स्वाप्नार्थानिव, येन मायापरिणामरूपेण मनसा, इन्द्रियार्थान् मृषा संप्रत्यविद्यमानानपि, ध्यायेत पूर्वानुभूतान् पूर्वमप्यननुभूतान् अनुभूतसजातीयान् दुर्लभांश्चापि चिन्तयेत। येन च इन्द्रियाणि, बाह्यानीन्द्रियाणि, प्रत्यपद्यत। तत्तथाभूतं मनः, विनिद्रः अनलसः सन्, मयीति शेषः। निरुन्ध्यात् नियच्छेत् 'ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते। सङ्गात् संजायते कामः' इत्युक्तरीत्या विषयध्यानतत्सङ्गाद्यापादनद्वारा मनसो बन्धकत्वमित्येवं 'येनेन्द्रियार्थान् ध्यायेत' इत्यनेनोक्तम्। बन्धकस्य तस्य मनसो मयि नियमनेन मनोजयः सुलभ एवेति भावः। अनेन देहात्मभ्रमराहित्यमुक्तम्॥ ३२॥

कृष्णप्रिया

भगवान् कहते हैं कि जैसे घट में कुम्भार चक्र और मिट्टी आदि भिन्न पदार्थ होते हैं वैसे ब्रह्माण्ड बनाने में मेरे लिए नहीं हैं श्रुति का वाक्य है कि "स आत्मानं स्वयं अकुरुत स सर्वमभवत" इस वाक्य का उल्लेख करते हुए भगवान् कह रहे हैं कि मैं अपनी आत्मा में ही आत्मा रूप साधन से अपनी आत्मा की ही रचना करता हूँ, विसर्जन करता हूँ और पालन

भी करता हूँ । ये सर्जन विसर्जन और पालनादि मेरी माया के बल-प्रमाण सामर्थ्य से भूत, इन्द्रियों और गुणों द्वारा होते हैं ॥ ३१ ॥ गोपीजनों को भगवान ने कहा कि ब्रह्मभाव से वियोग नहीं है अब जीव भावसे भी वियोग नहीं है यह कहते हैं कि-जीव-आत्मा ज्ञानमय है, शुद्ध है और देहादि से व्यतिरिक्त भिन्न है एवं गुणों का आश्रित नहीं है । सुषुप्ति स्वप्न और जाग्रत ये तीन माया की जो वृत्तियां है उनसे भी भिन्न है फिर भी चैतन्य होने से ऐसा समझा जाता है ॥ ३२ ॥

[1]येनेन्द्रियार्थान् [2]ध्यायेत मृषा स्वप्नवदुत्थितः । तन्निरुन्ध्यादिन्द्रियाणि विनिद्रः [3]प्रतिपद्यते ।३३।
एतदन्तः समाम्नायो योगः सांख्यं मनीषिणाम् । त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः ।३४।

कर्दमक्षमा

अन्वयः—येन, इन्द्रियार्थान् , स्वप्नवद्, उत्थितः, मृषा, ध्यायेत, तत् , मनः, इन्द्रियाणि, निरुन्ध्यात् , विनिद्रः, प्रतिपद्यते ।३३।। आपगाः, समुद्रान्ताः, इव, समाम्नायः, योगः, साङ्ख्यम् , त्यागः, तपः, सत्यम् , मनीषिणाम् , एतदन्तः ।।३४।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तावता च कृतार्थो भवतीत्याह । एतदन्त इति । एष मनोनिरोधः अन्तः समाप्तिः फलं यस्य सः । समाम्नायो वेदः । स तत्र पर्यवस्यतीत्यर्थः । योगोऽष्टांगः । सांख्यमात्मानात्मविवेकः । त्यागः संन्यासः । तपः स्वधर्मः । दम इन्द्रियदमनम् । मार्गभेदेऽप्येकत्र पर्यवसाने दृष्टान्तः । समुन्द्रान्ता आपगा नद्य इवेति ॥ ३३ ॥ ननु किमन्यानिवास्मानात्मविद्यया प्रलोभयसि वयं तु सर्वसुन्दरसकलगुणगणालंकृतेन त्वया विरहं नैव सहामहे इति चेदत आह । यत्त्वहमिति । दृशां दूरे यद्वर्ते तन्मदनुध्यानार्थम् । तच्च ध्यानं मनसः सन्निकर्षार्थमिति ॥ ३४

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तावता मनोनिरोधमात्रेण । इत्यर्थ इति—अन्यथा वेदाभ्यासादि निष्फलमेव । तथा च वक्ष्यत्येकादशे श्रीकृष्णः—“दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि । सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः ।।” इति अष्टाङ्गो यमादिसमाध्यन्तः । अपां समूह आपः प्रवाहस्तेन गच्छन्तीत्यापगाः ।। मनोनिरोधार्थका एव सर्वशास्त्रोक्ताः सर्वेऽप्युपाया इत्याह—एतदन्त इति । एष मनोनिरोध एवान्तः समाप्तिफलं यस्य स इति तैर्व्याख्यातम् । पक्षे—मनोनिरोधे सत्येव संसारतरणं तथैव भवतीनामपि मद्विरहतरणं मनोनिरोधादेव यत्खलुः मनः सत्यमपि मत्संगं भवतीरलीकत्वेन प्रत्याययतीति भावः अर्थस्तूभयत्र तुल्य एव ॥ ३३ ॥ न हि वयं संन्यासिन्यो यतो ब्रह्मज्ञानेन संतोषं करिष्याम इति कृत्वा शङ्कन्ते—नन्वित्यादिना । अतोऽत्र । यदहं वर्ते । मदनुध्यानकाम्यया निरन्तरमदुपासनेच्छया । सन्निकर्षः सामीप्यम् ॥ तदेवमप्रकटप्रकाशे वियोग एव नास्ति प्रकटप्रकाशेऽपि बहिः प्रातीतिकप्रायिक एव च कदाचित्स्फूर्तेरपि साक्षात्कारपदवीप्राप्तत्वात् , स च केनापि मम स्वाभाविकेन दुराग्रहेणास्तीति ज्ञायतामित्यभिप्रेत्य तमेवाग्रहं दर्शयति—द्वाभ्याम् । तु शब्दो भिन्नोपक्रमे । कंसवधलक्षणमहाकार्यानुरोधेनैव तावदत्रागतं संप्रति कार्यविशेष परित्यागपूर्वकागमनयोग्यत्वेऽपि यदहं भवतीनां या दृशो नेत्राणि तासामेव दूरे वर्ते न तु भवतीनामपि, अप्रकटप्रकाशे तत्र विद्यमानत्वात् , तत्रापि केवलं वर्ते न तु सुखेनास्मीत्यर्थः । तत्खलु मत्कर्तृकं यदनुध्यानं तत्काम्यया तद्धेतोरेव, ध्यानं भवत्कर्तृकम् “क्षणं युगशतमिव यासां येन विनाभवत्” इति प्रसिद्धया पूर्वत एव सिद्धम् । मद्विषयमनुध्यानं तदनुगतं तत्सदृशतां प्राप्तं मत्कर्तृकं भवद्विषयं प्रेयसीकर्तृकस्याग्रे वक्ष्यमाणत्वात् , तन्मम मनस्युदियादिति वाञ्छयेत्यर्थः । तच्च किमर्थं तत्राह—मनसो यः सन्निकर्षः भवतीनां सान्निध्ययोग्यता तदर्थमित्यर्थः । यतस्तां विना मम चेतसि सदैव लज्जा जायत इति भावः । उक्तञ्च स्वयमेव—‘न पारयेऽहं निरवद्यसंयुजाम्’ इत्यादि एवमीदृशमपि दुःखं सहे इति वाक्यार्थः । उक्तं हि मुनिभिः “न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान्रागोऽभिवर्द्धते ।।” इति ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एतदिति तैर्व्याख्यातम् । किञ्च आम्नायः शास्त्रं ज्ञापकं योगादयः साधनानि अत्र सत्यं विविधकर्मस्वपि सदा वित्तशाठ्यादिवर्जनम् । योगः साङ्ख्यञ्च सर्वेषामेव सामान्यधर्मः । त्यागादयः क्रमेण यतिवनस्थब्रह्मचारिगृहिधर्माः । यद्वा । त्यागो दानं गृहिधर्मः । सत्य समदर्शनं यतिधर्मः । यद्वा । सर्व एवैते मुख्याः सामान्यधर्मा इत्यर्थत्रयेऽपीदं समानम् ॥ ३३ ॥ तदेवमप्रकटप्रकाशे वियोग एव नास्तिप्रकटप्रकाशेऽपि बहिः प्रातीतिकः प्रायिक एव च कदाचित् स्फूर्त्तेरपि साक्षात्करपदवी प्राप्तत्वात् । स च केनापि मम स्वभाविकेन दुराग्रहेणैवास्तीति ज्ञायतामित्यभिप्रेत्य तमेवाग्रहं दर्शयति । यत्त्विति द्वाभ्याम् । तुशब्दोभिन्नोपक्रमे कंसवधलक्षणमहाकार्यानुरोधेनैव तावदत्रागतः । सम्प्रति तु कार्यविशेषपरित्यागपूर्वकागमनयोग्यत्वेऽपि यदहं भवतीनां

---

१. येने श्लोको विजये नास्ति । २. ध्यातीत—वीर. । ३. प्रत्यपद्यत—श्रीधर. वंशी. जीव, वीर. विज. विश्व. शुक. सु. स. ।

यादृशो मित्राणि तासामेव दूरे वर्त्ते । नतु भवतीनामपि अप्रकटप्रकाशेन तत्र विद्यमानत्वात् । तत्रापि केवलं वर्त्ते नतु सुखेनास्मीत्यर्थः । तत् खलु मत्कर्तृकं यदनुध्यानं तत्कामाय तद्धेतोरेव स्थानं भवत्कर्तृकं क्षणं युगशतमिव यासां येन विनाभवदिति प्रसिद्ध्या यूर्वत एव सिद्धं मद्विषयम् अनुध्यानं तदनुगतं तत् सदृशतां प्राप्तं मत्कर्तृकं भवद्विषयं प्रेयसीकर्त्तृकस्याग्रे वक्ष्यमाणत्वात् तन्मम मनस्युदियादिति वाञ्छयेत्यर्थः । तच्च किमर्थं तत्राह । मनसो यः सन्निकर्षः भवतीनां सान्निध्ययोग्यता तदर्थमित्यर्थः । यतस्तां बिना मम चेतसि सदैव लज्जा जायत इति भावः । उक्तञ्च स्वयमेव । न पारयेऽहं निरवद्यसंयुजामित्यादि । एवमीदृशभवदुपासनयैव तद्योग्यता स्यादिति ईदृशमपि दुःखं सहे इति वाक्यार्थः । उक्तं हि मुनिभिः—

न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान् रागो विवर्द्धते ॥ ३४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एष मनोनिरोधः; किंवा, एषा सर्व्वेन्द्रियेषु मत्प्राप्तिरेवान्तो यस्य, अस्य लिङ्गविपरिणामेन सर्व्वैरप्यन्वयः । मनीषिणां बुद्धिमतामिति निर्बुद्धीनां लाभपूजाख्यात्यर्थमेवेति भावः । आम्नायः शास्त्रं ज्ञापकम्, योगादयः साधनानि, तत्र सत्यं विविधकर्म्मस्वपि सदा वित्तशाठ्यादिवर्ज्जनम्, योगः साङ्ख्यं च सर्व्वेषामेव सामान्यो धर्म्मः, त्यागादयः क्रमेण प्रायो यतिवनस्थ-ब्रह्मचारि-गृहिधर्म्माः । अन्यत्तैर्व्याख्यातम् । यद्वा, त्यागो दानं गृहिधर्म्मः, सत्यं समदर्शनं यतिधर्म्मः । यद्वा, सर्व्व एवैते मुख्याः सामान्यधर्म्माः ॥ ३३ ॥ नन्वेवं वञ्चनयालम्, साक्षादेव त्वां द्रष्टुमिच्छामः, तत् किमर्थं तत्र चिरं विलम्बसे ? तत्राह—यत्त्विति द्वाभ्याम् । तु शब्दो भिन्नोपक्रमे । प्रिय इति दूरस्थित्ययोग्यतोक्ता, तथापि दूरे वर्त्ते । दृशामिति साक्षाच्चक्षुर्गोचर एव केवलं न वर्त्ते, अन्येन्द्रियेषु च सदा वर्त्त एवेत्यर्थः । तच्च ममानुध्यानं निरन्तरं भवत्कर्म्मक-चिन्तनम्, तत्काम्यया । पाठान्तरेऽपि स एवार्थः । तच्च मन्मनो भवतीनां सन्निकर्षार्थं, नैकट्याय । अयमर्थः—यथा सर्व्वपरित्यागेन भवतीनां मनो मयि सदा सुस्थिरं तथा मम न भवतीषु, अतो लज्जयाशेषापेक्षया निजमनसो भवतीनां सदा सामीप्यप्राप्त्यर्थमत्र तिष्ठामीति ॥ ३४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

एतदन्तः समाम्याय उपदेशः ॥ ३३—३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किं मनोनियमनेनेत्यत्राह । एतदन्त इति । समाम्नायादयः सत्यान्ता एतदन्ता मनोनियमनान्ता अन्तः फलं मनोनियमनफला इत्यर्थः । एतदन्त इत्येकवचनं समाम्नायादि प्रत्येकाभिप्रायकं नियमने च मनसि मत्प्राप्तिः सुलभेति भावः । तत्र दृष्टान्तमाह । समुद्रान्ता इवापगा इति । समुद्रपर्यन्तगमनमेव नदीभिः कार्यं ततः तत्प्राप्तिर्यथा सुलभा तद्विषयान्तरेभ्यो मन आकृष्य मयि नियन्तव्यं ततो मत्प्राप्तिरयत्नलभ्येति तात्पर्यम् । यद्वा प्रत्यपद्यतेतीन्द्रियनियमः तस्य यथावत्सर्वविषयज्ञानं फलमिति सूचितं तदेव सदृष्टान्तं विवृणाति । एतदन्त इति । तत्र समाम्नायः तदुपदेशः वेदार्थज्ञानानुष्ठाने वा योगः विवेकादिसाधनसप्तकानुगृहीतः सांख्यं प्रत्यगात्मयाथात्म्यावलोकनं त्यागो दानं तपोऽनशनादि दम इन्द्रियनिग्रहः सत्यं सत्यवचनम् ॥ ३३ ॥ यद्यप्युक्तरीत्या त्वद्वियोगो नास्ति तथापि निरतिशयसुखावहं स्वविग्रहं किं न दर्शयसीत्यत्राह । यत्त्विति । हे प्रियाः ! अहं भवतीनां दृशां दूरे वर्ते वर्त्तमान इति यत्तत्तु मदनुध्यानकाम्यया मदनुध्यानार्थं तच्च मनसः सन्निकर्षार्थम् ॥ ३४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उपजीव्यप्रमाणाभावेनानुमानस्य दुर्बलत्वं स्यादिति तत्राह । एतदन्त इति । समाम्नायः निर्दोष आगमः एतस्यानुमानार्थस्यान्तो निर्णयो यस्मात्स तथा अन्तोऽध्यवसिते मृत्याविति च न केवलमनुमानेनायमर्थः, सम्पद्यते वेदादिनापीति भावेन चाह । एतदन्त इति । हरितत्त्वनिर्णायकः एतज्ज्ञानपर्यवसायीत्यर्थः । "वासुदेवपरा वेदा वासुदेवपरा मखाः । वासुदेवपरा योगा" इत्यादेः त्यागो दुर्दर्शनाभ्यासवर्जनं सत्यं सत्यभूतं वाक्यम् अत्र दृष्टान्तमाह । समुद्रान्ता इति ॥ ३३ ॥ कस्त्यजेन्मां भवादृगित्युक्तिपरिहारमिवाह । यस्त्विति । योऽहमन्तिके वर्तमानोऽपि भवतीनां दृशां दूरे वर्तीति प्रतीयत इति यत्तन्मदनुध्यानकाम्यया निरन्तरमदुपासनेच्छया मनः सन्निकर्षार्थं कृतमित्यन्वयः ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

किं बहुना ? भवतीभिः सह ममायं प्रेमानुबन्धोऽवधिभूत इति जानीथेत्याह—एतदन्त इत्यादि । योग एतदन्त एतदवधिः । अतः परं संयोगान्तरं नास्तीति भावः । कीदृशः समाम्नायः ? समाम्नायः सम्यगाम्नायः पौनः पुन्यं यस्य । मनीषिणां बुद्धिमतामयमेव सांख्यं त्यागस्तपोदमश्च, एवं विधो मयि योगः मम च भक्तेषु योगः सर्वशास्त्रप्रतिपाद्यः । मयि योगे सति तस्मिन् ममापि योगः स्वाभाविक एवेति भाव । तत्रः दृष्टान्तः—समुद्रान्ता इवेति । यथा नद्यस्तावदेव स्वरूपेण वर्तन्ते यावत्

समुद्रं न प्रविशन्ति, सांख्यादितावदेव यावत् मय्येवं योगो न भवति, भूते सति तानि हेयानि भवन्तीति भावः ॥ ३३ ॥ एवं (२९ श-श्लो०) "भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्" इत्युक्तस्य साधकमुक्त्वा वियोग इव यत् प्रतीयते तन्मदिच्छासिद्धमेव, न तु कार्योपाधिकमिति दर्शयति— यत्त्वहमित्यादि । यत्तु प्रियोऽहं भवतीनां दृशां दूरे वर्ते तन्मनसः सन्निकर्षार्थम्, न तु कंसादि-दैत्यवधादिकार्यार्थम्, तथा सति ममाकृतज्ञतादोषप्रसक्तेः । दृशामिति केवलं चक्षुषामेव, न त्वस्तः करणस्य : कथा मनसः सन्निकर्षः ? तत्राह— मदनुध्यानकाम्यया ॥ ३४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अहो प्रियाः ! किं वहुना प्रलपितेन ! श्रूयतामित्याह—एतदन्त इत्यादि । समाम्नायः प्रेम्णः परस्परा एतद्बधः । तत्र दृष्टान्तः—समुद्रान्ता इत्यादि । समाम्नायं रूपकालङ्कारेण रूपयति—मनीषिणामयमेव योग इत्यादि । इदं सत्यमेव ब्रवीमीति यावत् ॥ ३३ ॥ तर्हि कथमस्मानत्याक्षीः ? तत्राह–यत्त्वहमित्यादि । इयमेव मे प्रकृतिः, उक्तञ्च पुरैव (भा० १०।३२।२०) "यथाधनो लब्धधनः" इत्यादि मनसः सन्निकर्षार्थमिति ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मनोनिरोधार्थका एव सर्वशास्त्रोक्तासर्वेऽप्युपाया इत्याह । एतदन्त इति । एष मनोनिरोध एव अन्तः समाप्तिः फलं यस्य सः समाम्नायः सम्पूर्णो वेदः स तत्र पर्य्यवस्यतीत्यर्थः । योगोऽष्टाङ्गः सांख्यमात्मानात्मविवेकः मार्गभेदेऽप्येकत्र पर्य्यवसाने दृष्टान्तः समुद्रान्ता आपगा नद्य इव पक्षे यथा मनोनिरोधे सत्येव संसारतरणं तथैव भवतीनामपि मद्विरहतरणं मनोनिरोधादेव यत् खलु मनः सत्यमपि मत्सङ्गं भवतारलोकत्वेन प्रत्याययतीति भावः । अर्थस्तूभयत्र तुल्य एव ॥ ३३ ॥ भो उद्धव ! एतेन सन्देशेनास्मांस्त्वं द्विगुणं ज्वालयसि स्म । तस्मात्तं सन्देशप्रेषकं कालदेशपात्रानभिज्ञं किं ब्रूमस्त्वां वा परामर्शशून्यं किमाक्षिपामः । एतद्ब्रह्मज्ञानं खलु व्रजभूमावस्यां कः क्रेष्यति यस्य भावस्त्वया एतावत् दूरमानीतः । किमेते गोपीजना जन्मावधि श्रीकृष्णसौन्दर्यामृतपायिनः सम्प्रति ब्रह्मज्ञानर्निम्बरसं पास्यन्ति महादुर्भिक्षे हि वरामह स्त्रियः प्राणान् जहति तदपि घास नाश्नन्ति । श्रृणु रे महामूर्ख श्रृणु इदं ब्रह्मज्ञानं खलु संसाररोगस्यौषधं महामुनिचिकित्सकानां हृदयपर्णशालायां तिष्ठति । किमिदं कृष्णप्रेममहारोगस्य भेषजं भवति ते चिकित्सका अपि किमिमं रोगं तावत् कदापि परिचिन्वन्त्यपि सान्दीपनिमुनेः सकाशाचिकित्साशास्त्रमधीत्य त्वामुद्धवमध्याप्य अस्मभ्यं प्रेमज्वालोपशमकमौषधं प्रेषययामास । गच्छाधुनैवास्मत्प्रेषित इदमौषधं नीत्वा स एव एतत् पीत्वा अस्मद्विषयकस्य प्रेमरोगस्य ज्वालां न्यवर्तयत् पुनरपि रोगशेषं निवर्त्तयतु अस्माकं प्रेमानलमहाज्वालैवशतजन्मपर्यन्तं वर्त्ततां नचैतदौषधस्पर्शोऽपि किमरे दावानलोपशमकोऽप्यम्बुराशिर्वज्रानलमुपशमयितुं शक्नोति । किञ्चास्य सन्देशस्यान्तरस्मत्किञ्चिननुकूलोऽप्यर्थो यो यथा कथञ्चिद्भासते स किं तदभिप्रेतो घुणाक्षरन्यायेनायातो वेति न तत्र विश्वसिम इति ससंरम्भं ब्रुवाणासु तासु भो स्वामिन्यः क्षणमवधत्त ब्रह्मज्ञानादन्यमपि सन्देशमानीतवानस्मीत्युक्त्वा तत्र श्रोतुं श्रद्दधानास्ताः प्रति कृष्णवाक्यमाह । यत्त्वहमिति । भवतीनां दृशां प्रियोऽपि यदधुना दृशां दूरे वर्त्ते तन्मदनुध्यानकाम्ययैव । तच्चानुध्यानं मनसः सन्निकर्षार्थम् । अतोऽधुना भवतीनां मनसः समीप एव वर्त्ते । एकत्रोपलक्षणमेतत् मम दृशां प्रिया अपि भवत्यो यदधुना दृशां दूरे स्थितास्तन्मनसः समीप एव वर्त्तध्वे इत्यप्यर्थः । तेन च दृक्समीपवर्त्तित्वे मनोदूरवर्त्तित्वं मनः समीपवर्त्तित्वे दृग्दूरवर्त्तित्वमासक्तिविषयीभूतस्य वस्तुनो भवति अत्रापि मनोदृशोर्मध्ये मनस एवाभ्यर्हितत्वात् मनःसमीपवर्त्तित्वमेव मदभीप्सितं तदेवं भवतीनामप्यभीप्सितं भवत्विति भावः ॥ ३४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

एतत्सिद्धौ कृतकृत्यता भवतीत्याह । एतदन्त इति । इयं ब्रह्मसम्पत्तिः अन्तः समाप्तिः फलं यस्य सः समाम्नायः कर्मकाण्डरूपो वेदभागः योग उपासनाकाण्डलक्षणो वेदभागः साङ्ख्यं ज्ञानकाण्डात्मकस्तद्भागः । यद्वा समाम्नायः काण्डत्रयात्मको वेदः । ननु वेदस्य कर्मादिप्रतिपादनपरत्वदर्शनात्कथमेतदन्तत्वमित्याशङ्क्य फलवर्थावबोधनपरस्य वेदस्यैतदन्तत्वमेव न्याय्यमेतदतिरिक्तस्य मुख्यफलत्वाभावादित्याशयेनाह । योग इति । कर्मयोग उपासनायोगश्च सांख्यमात्मानात्मविचारात्मको ज्ञानयोगः ननु सर्व एवं कुतो न प्रतिपन्ना इत्याशङ्क्याह । मनीषिणां पण्डितानाम् —

सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः ।

एकं सांख्यं च योगं च यः पश्यति स पश्यतीत्यादिशास्त्रात्तत्तत्काण्डोक्तसाधनान्यप्येतदन्तान्येवेत्याह । त्यागः आहुतित्यागदानादिसंन्यासपर्यन्तः तपः कृच्छ्रचान्द्रायणादिमनः संयमान्तं दमः इन्द्रियदमनं सत्यं यथार्थभाषणमिदमहिंसादेरप्युपलक्षणं तत्रानुरूपदृष्टान्तमाह । समुद्रान्ता इति । यथा आपगाः सर्वा नद्यः साक्षात्परम्परया च समुद्रान्तास्तद्वत् ॥ ३३ ॥ नन्वात्मस्वरूपेण यद्यपि न त्वं वियुक्तस्तथापि सौन्दर्यसौष्ठवादिगुणालंकृतविग्रहनन्दनन्दनात्मा दृशां प्रियोऽसह्यविरहः किमर्थं दूरे वर्तत इति चेत्तत्राह । यत्त्वमिति । दृशां प्रियो यदि निकटे वर्तते तदा कदाचिन्मनोऽसन्निकृष्टमपि भवति दूरे तु तस्मिन्मनः सन्निकृष्टमेव

भवति अतः भवतीनां मनः सन्निकर्षार्थं भवतीनां दृशां प्रियोऽहं दूरे वर्ते वै निश्चयेनैवं ज्ञातव्यं यो मदनुध्यानं करोति स मम प्रिय इति कृत्वा मदनुध्यानकाम्ययाहं दूरे वर्ते अनुध्यानेन च परस्परं मनः सन्निकृष्टं भवतीत्यर्थः ॥ ३४ ॥

गूढार्थदीपिनी

स्वप्नात् उत्थितः पुमान् जाग्रदवस्थायामपि स्वप्नवत् यथा मृषा मिथ्याभूतानेव इन्द्रियार्थान् विषयान् ध्यायेत् ध्यायंश्च येन मनसा इन्द्रियाणि इन्द्रियोपलक्षितभोग्यदेहान् स्त्रीपुत्रादीन् प्रतिपाद्यते तत् मनो निरुन्ध्यात् ततो हृदि मदाभासः स्यादित्यन्वयः ॥ ३३ ॥ मनीषिणां समाम्नायः वेदः तदादिः सर्वोऽपि साधनकलापः एतदन्तः मनोनिरोधान्तः । त्यागः संन्यासः आपगाः नद्यः ॥ ३४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवम्भूतः मत्प्राप्तिफलका वेदः अत एव वेदोक्तानि कर्मज्ञानवैराग्यादिसाधनानि च मत्प्राप्तिफलकानीत्याह । एतदिति । एषा मत्प्राप्तिः फलं यस्य स तथा समाम्नायो वेदः न वेदवेदी महतीं विनष्टीमित्यादिश्रुतेः यदर्थपरो वेदस्तदर्थबोधकतया वेदो यस्यास्तीति वेदी स महती विनष्टीं पुनः पुनर्जन्ममरणलक्षणां न वेद किन्तु वेदार्थप्राप्तिलक्षणां मुक्तिं प्राप्नोतीतिश्रुत्यर्थः वेदार्थः श्रीकृष्णः वेदैश्च सर्वैरहमेव वेद्य इति श्रीमुखोक्तेः योगः वेदोक्तः कर्मयोगो विवित्सोत्पादनद्वारा एतदन्त एव तमेतं ब्राह्मणा यज्ञनदानेन तपसानाशकेन विविदिषन्तीति श्रुतेः सांख्यं वेदोक्ता हि आत्मानात्मपरमात्मविवेको ज्ञानम् एतदन्तमेव ब्रह्मविदाप्नोति परमिति श्रुतेः अत्र योगशब्देन सांख्यशब्देन च केनापि मुनिना पतञ्जलिना कपिलनामकेन च प्रोक्तं पातञ्जलं योगशास्त्रं सांख्यशास्त्रञ्च वेदविरुद्धं सूत्रकारविदूषितं न ग्राह्यमिति द्योतयितुमाह मनीषिणामौपनिषदानां यो योगः सांख्यमित्यर्थः । त्यागो मद्भजनविरोधिवस्तुषु वैराग्यम् किम्प्रजया किं धनेन त्यागेनैकेनामृतमानशु”रिति श्रुतेः तपः तदर्थतीर्थ वासदेहशोषणशाकाहारब्रह्मचर्य्यैकादश्युपवासादि दम इन्द्रियनिग्रहोपलक्षितमद्ध्यानं भक्तिः “आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः “कृष्ण एव परो देवस्त ध्यायेदि”त्यादि श्रुतिभ्यः तथा सत्यं सत्यान्मत्तोऽनपेतं सत्यमनुक्तं मत्प्राप्तिसाधनमात्रमित्यर्थः । सर्वेषां वेदानां तदुक्तानां योगादीनामेकत्र पर्य्यवसाने दृष्टान्तः समुद्रान्ता इवापगा इति समाम्नाय्यग्रहणेनैव सर्वग्रहणेऽपि तद्विरुद्धशास्त्रोक्तयोगादित्यागार्थस्तत्प्रपञ्च इति ज्ञेयम् ॥ ३३ ॥ ननु सत्यमुक्तरीत्या सर्वज्ञसर्वशक्तेः सर्वकारणकारणस्य सर्वान्तर्यामिणः सर्वत्र संयोगोऽस्ति तथापि कान्त्यादिगुणयुक्तमनोहरविग्रहादर्शनेनातिव्याकुला वयमित्यत आह । यत्त्वहमिति । भवतीनां दृशामहं दूरे वर्ते इति यत्तत्तु मदनुध्यानकाम्यया मनसः सन्निकर्षार्थम् एकाग्रेण मनसा मद्ध्यानार्थमित्यर्थः ॥ ३४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नैतच्छुष्कमनुमानमिति तन्मूलयति ॥ एतदन्त इति । एतस्यानुमानिकार्यस्यान्तो निर्णयो येन स समाम्नाय आगम उदाहृतः । स विश्वकृत्स हि सर्वस्य कर्तेत्यादेः । समा निष्पातनिकार्थतया सम्यक्त्वमाम्नायस्य ज्ञेयम् । योगः समाध्यादिः साङ्ख्यं पञ्चरात्रं त्यागो दानदुःसमयवर्जनं वा तपो दमः सत्यमित्यादिः सर्वोऽप्येतदन्त एष भगवदपरोक्षावगमोऽन्ते यस्य स तत्पर्यवसायीति यावत् । यथाऽऽपगा अपगा वा नद्यः समुद्रान्तर्नदीनां सागरो गतिः । आकाशात्पतितं तोयं यथा गच्छति सागरम् । सर्वदेवनमस्कारः केशवं प्रति गच्छतीत्यादेः । सर्वस्पर्शादिरूपव्यापारे भगवदवगमके सति किं सुषुप्त्यादिग्रहणमिति चेत् । सत्यम् । गोपीः प्रतीदं वचनमिति ताश्च कामतः सह सख्या इति तदाद्युक्तिरिति मन्तव्यम् । सुषुप्तिर्मोक्षस्तदर्थं स्वप्ने स्वापगमके स्वापं नयन्निति तथा स्वर्गः सुषुप्तिरित्याख्या मुक्तेरपि समा यत इति च बृहद्भाष्योक्तेः । स्वप्ने हरौ जाग्रद्भिर्जागरणवद्भिस्तत्रैव निरतैर्मायावृत्तिभिर्भगवदिच्छयैव वृत्तिर्वर्तनं येषां ते तैरीयते तत्प्रत्यक्षतो विषयीक्रियत इति मनीषिणां समाम्नायः । सर्वोऽप्यभ्यासस्तथा योगं साङ्ख्यं त्यागस्तपो दमः सत्यमित्यादिरापगाः समुद्रान्ता इवैतदपरोक्षज्ञानमेवान्ते जन्यत्वेन यस्य तथेति वा वा ॥३३॥ कस्त्यजेन्मां भवादृगिति मृगदृशो वदिष्यन्तीति विदितवृत्तः सर्वावित्तदुत्तरयति ॥ यत्त्विति । भवतीनां दूरे वैविदूरमेव वैदूरं तस्मिन्समीपे वर्त्यपि दृशां दूरेऽहमभवमिति यत्तन्मदनुध्यानकाम्यया ममानुध्यानमखण्डं ध्यानं तत्काम्यया तदिच्छया मदनुदतीति, मदनुदहङ्कारपरिहारकं यद्ध्यानं तत्काम्ययाऽहङ्कृता इत्येवमहङ्कृतवानिति वा युष्मन्मनसः सन्निकर्षार्थं मनःसंयोजनार्थमेवेति ॥ ३४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु शास्त्रेषु वेदादिषु बहून्येवात्मज्ञानार्थसाधनान्युक्तानि तत्कथं मनोनिरोधमात्रमुच्यते इत्याशङ्क्याह । एतदन्तः समाम्नाय इति । वेदो हि साधनान्युपदिशति तस्यापि मनोनिग्रह एव अन्तः पर्यवसितसाधनमेतदेवान्तो यस्य तादृशः समाम्नायो वेदः सर्वे मनोनिग्रहलक्षणान्ता इति शास्त्रात् योगस्य त्वेतदेव प्रयोजनं सांख्यमप्यध्यासं निवर्त्तयन् मूलकारणं मन एव व्यावर्त्तयात । ननु लोका नैवं व्याचक्षते तत्राह । मनीषिणामिति । विवेकिनामेतद्व्याख्यानं मनस ईषिणो मनीषिण आत्मसम्बन्धः

साक्षान्मनस्येवेतिहेतुरप्युक्तः । ननु स्वतन्त्राणि मोक्षफलानि साधनानि श्रूयन्ते यथा सन्यासः यथा तपो वनस्थस्य यथा वा दम इन्द्रियसंयमो गृहस्थस्य सत्यं ब्रह्मचारिणो वेदाध्ययनरूपम् एतेषामाश्रमधर्माणामपि मनोनिग्रहपर्यवसायित्वमेव तत्र हेतुं वदन् दृष्टान्तमाह । समुद्रान्ता इवापगा इति । बहन्तीरापः भूमौ न पर्यवसिताः तथा सति स्थावरा इवात्रैव तिष्ठेयुः अतो भूम्यन्ताय प्रसर्पन्ति तत्रावधिः समुद्र एव तथा सङ्गातेऽपि प्रविष्टाः लौकिकवत्तत्रास्थिराः तदगमाकाङ्क्षिण सन्मार्गे प्रवृत्ताः न्यासाधिकारिणः मध्ये स्थितिमलभमानाः । साक्षान्मनसि सम्बद्धमात्मानं मोचयन्तः तन्निग्रह एव विश्रान्ता भवन्ति ॥ ३३ ॥ एवं वियोगाभावं वियोगस्योत्तमत्वं च परमार्थतो निरूप्य लौकिकप्रतीतौ तद्व्यधिकरणमिति मत्वा दूरे स्थितिलक्षणस्य वियोगस्य चतुर्विधपुरुषार्थसाधकत्वमाह । यत्त्वहमिति चतुर्भिः । गोपिकानां धर्मादयो भगवानेव परं प्रकारविशेषमापन्नः तत्र धर्ममाह । तु शब्दः तत्त्वनिरूपणं व्यावर्तयति अहं भवतीनां यत् दूरे तन्मनसः सन्निकर्षार्थं दृशो दूरे स्थितो मनसि सन्निकृष्टो भवति तत्र हेतुमाह । प्रिय इति । अयमर्थः बहिर्भगवति गोपिका दृष्टिं प्रक्षिपन्ती स्वधर्मान् दृष्टिधर्मान् वा योजयति नतु स्वयं भगवद्धर्मान् गृह्णाति मनसि तु भगवति समागमे मनो भगवद्धर्मान् गृह्णाति एतत्तु हिताचरणं प्रियस्य कार्यम् अनेन योगाद्यपेक्षयापीयमवस्था समीचीनेति ज्ञापितं योगे हि चक्षुर्वत् मनोऽपि स्वधर्मानेव भगवत्यारोपयति परं स्वयं निर्माणार्थं शास्त्रतः तद्धर्मान् गृह्णातीति विशेषविरहेण स्मरणे तु बलादागत इति भगवानेव धर्मान् स्थापयति मनोधर्माणां दुर्बलत्वात् विपरीतत्वाच्च भगवतः यतोऽहं प्रियः अतो दूरे वर्ते मनसा ह्यात्मा सम्बद्ध इति च तथा सत्यात्मगामि भवति विषयेषु तु तेषामभावात् जन्मान्तरसाधकत्वेन अनर्थहेतुत्वमेव किञ्च न केवलं संनिकर्षमात्रं फलं किन्त्वन्यदप्यस्तीत्याह । मदनुध्यानकाम्ययेति । ममानुध्यानमेव ममाभिप्रेतं गोपिकाश्चेन्मदभिध्यानं कुर्वन्ति तदाहं तासु रतिं करोमि नत्वन्यथा अक्लिष्टकर्मत्वात् अतः स्वार्थमप्येवं करोमीत्यर्थः । कामेन हि सम्बन्ध उभयोः स च मनसि प्रतिष्ठितः मनसो दूरभावे मानादिना सम्बन्धाभावादहमपि निवृत्तो भवामि ॥ ३४ ॥

श्रीसुबोधिनी-सारः

समाम्नायो वेदः एतन्मनोनिरोधोऽतः समाप्तिः फलं यस्य सः योगः मनीषिणां सांख्यमात्मानात्मविवेकः त्यागः संन्यासः तपः स्वधर्मः दमः इन्द्रियनिग्रहः सत्यं च एतन्निष्ठान्येतानि तत्र दृष्टान्तः आपगा नद्यः समुद्रान्ता इव तत्र पर्यवसानात् "सर्वे वेदाश्च तत्पराः" इत्युक्तः ॥ ३३ ॥ विरहपीडिताः प्रत्याह । भवतीनां प्रियोहं दृशां नेत्राणां यत् दूरे वर्त्ते इति मन्दबुद्ध्या लोकदृष्ट्या च तन्मनसः सन्निकर्षार्थं मदनुध्यानार्थं च ॥ ३४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'कथं तद्ध्यासनिवृत्त्या कृतार्थता' इत्याकाङ्क्षायामाह—येनेति । येन मनसा इन्द्रियार्थान् शब्दादीन् ध्यायेत चिन्तयेत् ध्यायंश्च सन् इन्द्रियाणि प्रतिपद्यते, इन्द्रियाणीति देहादेरप्युपलक्षणम् , देहेन्द्रियाद्यध्यासं प्राप । अतोऽध्यासनिवृत्त्यर्थं तन्मनो निरुन्ध्यात् शब्दादिविषयेभ्यो निवर्त्य वशं नयेदित्यर्थः । ननु 'तत्तद्विषयाणां तद्ग्राहकेन्द्रियान्तःकरणानां च सत्त्वे कथं मनसस्ततो निरोधः सम्भवति' इत्याशङ्क्य 'विविक्तात्मज्ञानेन तत् सम्भवति' इति दृष्टान्तेनाह–मृषेति । विगतनिद्रः स्वापादुत्थितो यथा मृषा मिथ्याभूतं स्वप्नं ध्यायन्नपि न तत्र सज्जते किन्तु ततो मनोरोधमेव करोति, तथा शब्दादिश्रवणादेरिन्द्रियधर्मत्वात्तज्जन्यसुखादेरन्तःकरणधर्मत्वाच्चात्मनस्तेन प्रयोजनाभावात् प्रत्युत बन्धहेतुत्वाच्च विविक्तात्मज्ञानवान् विषयेभ्यो मनो निरुन्ध्यादित्यर्थः ॥ ३३ ॥ ननु 'बहूनि मोक्षसाधनानि महद्भिरुपदिष्टानि, तत्कथं निरोधमात्रेण कृतार्थता इत्युच्यते' इत्याशङ्क्य 'साधनान्तराणां मनोनिरोधे एव पर्यवसानात् मनोनिरोध एव साक्षात्साधनम्' इत्याह—एतदन्त इति । समाम्नायो वेदः वेदोक्तसाधनकलापः, योगो यमनियमाद्यष्टाङ्गः, साङ्ख्यं साङ्ख्योक्तात्मानात्मविवेकः, त्यागो दानम् , तपः अनशनादिः, दमः इन्द्रियनिग्रहः, सत्यं यथार्थभाषणम् । समाम्नायादयः सत्यान्ता एतदन्ताः एतमनोनियमनं अन्तः अवधिः फलं येषां तथाभूता इत्यर्थः । तत्र दृष्टान्तमाह—आपगा नद्यो यथा समुद्रान्ता इति ॥ ३४ ॥

अन्वितार्थप्रकाशिका

येनेति । यथा स्वापादुत्थितः पुमान् मृषा मिथ्याभूतमेव स्वप्नं ध्यायति तथा स्वप्नवत् बाधितानपि इन्द्रियार्थान् शब्दादीन् येन मनसा ध्यायेत ध्यायेच्चिन्तयेत् । तत्रार्षः । ध्यायंश्च येन इन्द्रियाणि उपलक्षणतया देहेन्द्रियादीन् प्रत्यपद्यत प्रापः । तन्मनः कर्म विनिद्रः अनलसः सन् निरुन्ध्यात् नियच्छेत् । विनिद्रः स्वापादुत्थित इति पूर्वत्रान्वयो वा । पक्षे उत्थितः मूर्च्छातः प्रबुद्धो भवद्विधो जन इन्द्रियार्थान् मद्दर्शनस्पर्शनादीन् सत्यानेव येन मनसा स्वप्नवन्मृषाभूतानेव ध्यायेत् तन्मनो निरुन्ध्यात् अप्रामाण्यात्तिरस्कुर्वीत । यतः विनिद्रः निद्रारहित एव भवदादिः इन्द्रियाणि प्रत्यपद्यत प्रत्यक्षतो ज्ञातवानेव युष्माभिरनुरागान्धाभिर्मत्संयोगोऽपि मृषैव मन्यते अत एव तत्सत्यज्ञापनार्थमेतत्सन्देशप्रेषणमिति भावः ॥ ३३ ॥ एतदिति । मनीषिणा समाम्नायो वेदोक्तसाधनकलापः एतदन्तः एतन्मनोनिरोधनमेव अतः अवधिः फलभूतं यस्य तथाभूतः अस्ति । मनोनिग्रह एव पर्यवस्यति

इत्यर्थः । एवं योगोऽष्टाङ्गः साङ्ख्यमात्मानात्मविवेकः त्यागः संन्यासः तपः स्वधर्मः दम इन्द्रियदमनं सत्यमित्येतेऽपि मनोनिरोधफला इति मार्गभेदेऽप्येकत्र पर्यवसाने दृष्टान्तः । आपगा नद्यो यथा समुद्रान्ताः पक्षे यथा मनोनिरोधे सत्येव संसारतरणं तथैव भवतीनामपि मद्विरहतरणं मनोनिरोधादेव अर्थस्तूभयत्र तुल्यः ॥ ३४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्य कृष्णस्य संदेशेन आगता स्मृतिर्यासां ताः तत्संदेशागतस्मृतयः अत्र प्रथमार्थे द्वितीया विधानमार्षः ॥ ३३ ॥ अहितः शत्रुः सानुगः सानुचरः अघकृत् दुःखकृत् आप्तैर्बन्धुवर्गैः सहितः दिष्ट्येति सुखः ॥ ३४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं मनोनियमनेनेत्यत्राह । एतदन्त इति । समाम्नायो वेदः योगोऽष्टाङ्गः योगः, मनीषिणां सांख्यमात्मानात्मविवेकः, त्यागः संन्यासः, तपः स्वधर्मः, दम इन्द्रियदमनं, सत्यं स्वपरद्रोहवर्जितयथार्थभाषणमपि, एतन्मनोनियमनमन्तः फलं यस्य, एतदन्त इत्येकवचनं समाम्नायादिप्रत्येकाभिप्रायकं, लिङ्गव्यत्ययेन यथायथं योज्यम् । तत्र दृष्टान्तमाह । आपगा नद्यः, समुन्द्रान्ताः इव, नद्यो यथा समुद्रे पर्यवस्यन्ति तद्वदित्यर्थः । नियमिते च मनसि मत्प्राप्तिः सुलभैवेति भावः । अत्र केचित्तु समाम्नाय उपदेशो वेदार्थज्ञानानुष्ठानं वा योगो विवेकादिसाधनसप्तकानुगृहीतः, सांख्यं प्रत्यगात्मयाथात्म्यावलोकनं, त्यागो दानं, तपोऽनशनादिकं, दम इन्द्रियनिग्रहः, सत्यं सत्यवचनमित्याहुः ॥ ३३ ॥ यद्यप्युक्तरीत्या त्वद्वियोगो नास्ति तथापि किमन्यानिवास्मानात्मविद्यया प्रलोभयस्यस्माकं तु सर्वसुन्दरं सकलगुणगणोलंकृतं निरतिशयसुखावहं त्वद्विग्रहनिरीक्षणमेव सदातितरां प्रियमस्ति ततस्तं किमिति न दर्शयसीत्यत्राह । यत्त्विति । हे प्रियाः, अहं भवतीनां, दृशां, दूरे वर्त्ते इति यत्, तत्तु मदनुध्यानकाम्यया मदनुध्यानार्थं, तच्चानुध्यानं, मनसः सन्निकर्षार्थं मत्स्वरूपे भवतीनां मनसः सम्यगाकर्षणार्थं, वै एव ॥ ३४ ॥

कृष्णप्रिया

जिस मन से स्वप्न की भाँति उपस्थित मिथ्या रूपादि विषयों का चिन्तन किया जाता है उस विषयों का ध्यान करने वाला मन को अवश्य रोकना चाहिए एवं मन के साथ इन्द्रियों भी संयम करना चाहिए जिससे आत्मा जाग्रत होकर मुझे प्राप्त कर सके ॥ ३३ ॥ साधनों का उपदेश करने वाला वेद यमादि का उपदेशक योग, तत्व का चिन्तन को कहने वाला सांख्य, त्याग की सूचना करने वाला सन्यास, वानप्रस्थों के लिए कहा गया तपः, इन्द्रियों का विग्रह को यम, ब्रह्मचारियों के लिए वेदाध्ययन रूप सत्य इन सबका अन्तिम फल मनीषियों के लिए मनः संयम ही है । जैसे नदियां जाकर अन्त में सागर में ही मिल जाती है वैसे इन सब साधनों का परम फल मनोविग्रह ही है ॥ ३४ ॥

यत् त्वहं भवतीनां वै दूरे वर्ते [1]प्रियो दृशाम् । मनसः संनिकर्षार्थं मदनुध्यानकाम्यया ॥ ३५ ॥
यथा दूरचरे[2] प्रष्ठे मन आविश्य वर्तते । स्त्रीणां च न तथा चेतः[3] संनिकृष्टेऽक्षिगोचरे ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—भवतीनाम्, दृशाम्, प्रियः, यत्, तु, अहम्, दूरे, वर्ते, तद्, वै, मदनुध्यानकाम्यया, भवतीनाम्, मनसः, सन्निकषार्थम् ॥ ३५ ॥ स्त्रीणाम्, मनः, दूरचरे, प्रष्ठे, यथा, आविश्य, वर्तते, तथा, चेतः, अक्षिगोचरे, च, सन्निकर्षे, न, वर्तते ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतदुपपादयति त्रयेण । यथा दूरचर इति ॥ ३५–३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतत् मनःसामीप्यम् । दूरे चरति गच्छतीति तथा तस्मिन् । चात्पुरुषाणामिति । सन्निकृष्टे निकटस्थे । अक्षगोचरे इन्द्रियविषये ॥ फलसंदेहात्प्रियतमस्मरणं मत्स्मरणसदृशं न, फलनिश्चयादित्याशयेनाह—मयीति । विमुक्ता त्यक्ता अशेषाः वृत्तयः संकल्पादयो येन तत्तथा । कृत्स्नम्—सर्वभावेन कृतत्यज्ञानमिति कृत् ज्ञानम्, तेन स्नस्यत आदीयत इति कृदुपपदात् 'स्नसु–आदाने' इति धातोरौणादिको डः । ज्ञानज्ञेयमित्यर्थः ॥ एतदेव स्त्रीपुंसानामनुभवदर्शनायोपपादयति—यथेति । स्त्रीणां चेति चकारात्पुंसां च, दूरवर्तिन्यां प्रष्ठायां यथा मन आविश्य वर्तते न तथा सन्निकृष्टायामक्षिगोचरीभूतायाञ्चेत्यर्थः । हंहो उद्धव एषोऽपि संदेशः संप्रति त्वया स्वहृदयसमूढ एव स्थाप्यताम्—संप्रति कृष्णेन याः स्त्रियः संभुज्यन्ते कदाचित्तासां दृशां दूरवर्तिनि

---

[1] प्रियाः दृशाम्–वीर. ; दूरवर्ती प्रिया दृशाम्–विज. । [2] तरे–विज. । [3] चित्तं–प्रा. पा. ।

कृष्णे भविष्यति सति ताभ्य एव तदानीं त्वया दातव्यः, संप्रति व्रजस्थास्तु नास्य ग्राहिकाः, यासां पूर्वं व्रजवर्तिन्यपि दृग्गोचरीभूतेऽपि तस्मिन्कृष्णे एकैकनिमेषेणैकैकयुगकालं व्याप्य स दृग्दूरवतिकृत एवाभूत्तदा तदैव सहस्रशोविवाहेषु सहस्रकृत्य एव मनःसन्निकर्षः खल्वभूदेवासामिति सावहेलमाचक्षाणासु तासु—भोः स्वामिन्यः यद्येषोऽपि न रोचते तर्ह्यस्मादप्यन्यं संदेशं शृणुत मया तु बहव एव संदेशा आनीता इति प्रोच्य पुनः कृष्णवाक्यमाह—मयीति। विशेषेण मुक्तास्त्यक्ता गृहपत्यादिविषया अशेषाश्च स्ववृत्तयो येन तथाभूतं मनः मयि कृष्णे आविश्य मां नित्यमनुस्मरन्त्यो यद्वर्तध्वे तदचिरादेव मामुप स्वसमीप एव वर्तमानमेष्यथ प्राप्स्यथ। ननु भवतु नाम भवतो भावसिद्धिस्तत्रास्माकं किमित्याशंक्याह—भवतीनामपि तदाधिक्यं स्यादिति कामनयापीत्याह—यथेति। स्त्रीणामन्यासामपि किमुत भवतीनां चेत्युक्तार्थसमुच्चये। अतो मिथःप्रेमवर्धनाभिलाषेच्छोर्दुर्निग्रहोऽयं मम दुराग्रहो भवतीभिः क्षन्तव्य इति भावः। तदेतावत्संदिश्य पुनर्विचारयति स्म मया यत्त्रिधा समाधानं कृतं तद्यद्य प्रकटलीलामयं ते संभावनया तान् मंस्यन्ते मनोनिरोधे च नोत्सहिष्यन्ते तर्हि प्रकटलीलायामेव साक्षान्मत्प्राप्तिः समाधानाय कल्पेतेति तदेतद्विचार्य सोऽपि मम दुराग्रहो भवतीनामाग्रहेण चिरादेव नंक्ष्यतीत्याह—मय्या वेश्येति। पद्येऽस्मिन्नुत्तरत्र च मयीत्याद्यस्मच्छब्दप्रयोगस्य द्वित्रिरावृत्त्या तत्राप्यादित एव कृष्ण इति विशिष्टसर्वत्राप्युन्नेयमिदमित्यधिकारनिर्मित्या कृष्णपदं यथायथं योज्यं, तच्चावश्यकत्वायान्याकारप्राप्तिपरिहाराय च गम्यमिति स्थिते सोऽयमत्रार्थः—यद्यस्माद्विमुक्तं तदाशेषवृत्तिकं मनो मयि कृष्णे यथाकथंचिदाश्रयितव्ये स्वदायकतया प्रसिद्धेस्मिन्कृष्णतया प्रसिद्धाकारे आवेश्य निरन्तरं मां कृष्णतया प्रसिद्धाकारमेव स्मरन्त्यः स्थ तस्मादचिरादेव मां कृष्णतया प्रसिद्धाकारमुप समीप एष्यथ प्राप्स्यथैव, न तु ममात्र स्वातंत्र्यमिति भावः। नन्वेवं चेत्पुनरपि तथा दुराग्रहो भवतः स्यात्तत्र सचाटु प्राह–नित्यमिति। सहासेनैव तथाकरवम, किन्त्वित ऊर्ध्वं न करिष्यामीति भावः ॥३५–३६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु भवतु नाम भवतो भावसिद्धिस्तत्रास्माकं किमित्याशङ्क्याह। भवतीनामपि तदाधिक्यं स्यादिति कामनयापीत्याह-यथेति। स्त्रीणामन्यासामपि किमुत भवतीनां चेत्युक्तार्थसमुच्चये। अतो मिथः प्रेमवर्द्धनाभिलाषजो दुर्निग्रहोऽयं मम दुराग्रहो भवतीभिः क्षन्तव्य इति भावः ॥ ३५ ॥ तदेतावत् सन्दिश्य पुनर्विचारयति स्म मया यत्त्रिधा समाधानं कृतं तद् यद्यप्रकटलीलामयन्ते सम्भावनया तान् मंस्यन्ते मनोनिरोधे च नोत्सहिष्यन्ते तर्हि प्रकटलीलायामेव साक्षान्मत्प्राप्तिः समाधानाय कल्पेतेति। तदेतद्विचार्य सोऽपि मम दुराग्रहो भवतीनामाग्रहेण चिरादेव नङ्क्ष्यतीत्याह। मय्यावेश्येति। पद्येऽस्मिन्नुत्तरत्र च मयीत्याद्यस्मच्छब्दप्रयोगस्य द्विस्त्रराावृत्त्या तत्राप्यादित एव कृष्ण इति विशिष्य सर्वत्राप्युन्नेयमिदमित्याधिकारनिर्मित्या कृष्णपदं यथायथं योज्यम्। तच्चावश्यकत्वायान्याकारप्राप्तिपरिहाराय च गम्यमिति स्थिते सोऽयमत्रार्थः। यद् यस्माद्विमुक्ते तवाशेषवृत्तिकं मनो मयि कृष्णे यथाकथञ्चिदाश्रयिभ्यः स्वदायकतया प्रसिद्धेऽस्मिन् कृष्णतया प्रसिद्धाकारे आवेश्य निरन्तरं मां कृष्णतया प्रसिद्धाकारमेव स्मरन्त्यः स्थ तस्मादचिरादेव मां कृष्णतया प्रसिद्धाकारम् उप समीपे एष्यथ प्राप्स्यथैव। न तु ममात्र स्वातन्त्र्यमिति भावः। नन्वेवञ्चेत् पुनरपि तथा दुराग्रहो भवतः स्यात्तत्र सचाटु प्राह। नित्यमिति। सहासेनैव तथाकरवं किन्त्वित उदूर्ध्वं न करिष्यामीति भावः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र स्थित्या कथं तत् सुसिध्येत्तदुपपादयति—यथेति। 'च' अपि, स्त्रीणां प्रेष्ठेऽपि, दूरचरे सत्येव यथा तस्य मन आविश्य वर्त्तते, स्त्रीष्वाविष्टं भवति, स्त्रीणामिति स्त्रीष्वित्येव वार्थः ॥ ३५ ॥ ननु तथापि तदर्थं चिरं तत्र स्थातुं नार्हसि, सत्यम्, अधुना तत् सुसिद्धम्, अतो मामागतप्रायं जानीथेत्याह—मयीति। अचिरादेव मां नित्यमवलम्बनतया प्राप्स्यथ। नित्यमिति पुनर्विरहं निरस्यति। ननु सर्वशक्तिहीना वयं तत्र निजं किमपि साधनं न पश्यामः, तत्राह—मयीति, विशेषेण मुक्तास्त्यक्ता अशेषा वृत्तयोऽन्यसंकल्प–विकल्पाद्यात्मिका येन तत्, इति स्वरूपमात्रकथनं स्वतः सुखेनावेशबोधनार्थम्। किञ्च, कृष्णे भवतीनां चित्ताकर्षक इति, अतो मामेवैकमनुस्मरन्त्य ईदृशेन भवतीनां मदनुस्मरणेनैवाह—माकृष्य तत्र नेतव्यः, तत्र भवतीनां साधनान्तरेण किमित्यर्थः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्चक्षुर्गोचरे त्वय्यनुध्यानं मनसः सन्निकर्षार्थं न लभ्यते इत्यतो नेत्याह। यथेति। प्रेष्ठे प्रियतमे दूरचरे सति तस्मिन् यथा स्त्रीणां मन आविश्य वर्तते स्थिरतयेति शेषः तथा तासां चेतः सन्निकृष्टेऽक्षिगाचेरे प्रियतमे न वर्तते तद्वत् ॥ ३५ ॥ किं तदनुध्यानेन मनः सन्निकर्षेण च साध्यमित्यत आह। मयीतिविमुक्ता अशेषा वृत्तयः व्यापाराः यस्मात्तद्यन्मन स्तन्मयि कृत्स्नं कात्स्न्येंन निवेश्य मामेव नित्यमनुस्मरन्त्योऽचिरादेव मामुपैष्यथ ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

निदर्शनेनैतमर्थमुपपादयति । यथेति चशब्दात्पुरुणामिति ग्राह्यं प्रेष्ठे प्रियतमे पदार्थे पूर्वानुभूते इति शेषः अक्षगोचरे इन्द्रियविषये ॥ ३५ ॥ लोके प्रियतमस्मरणे फलसन्देहो न फलनिश्चयादिति भावेनाह । मयीति । यद्विमुक्ता अशेषा वृत्तयो यस्य तत्तथा तन्मनः मय्यावेश्य नित्यं मामनुस्मरन्त्यो यूयं शीघ्रं मां तथा उपैष्यथेत्यन्वयः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तत्रापत्तिमाह—यथा दूरचर इत्यादि । लोकेऽप्येवं दृश्यते—पतिसान्निध्ये स्त्रियो वाम्यादि कुर्वन्ति, तदसान्निध्ये तु निरन्तरं तमेव ध्यायन्तीति वाक्यार्थः ॥३५॥ नन्वेतावन्तं कालं किमस्माकं मनः सन्निकर्षो नासीत्, त्वयि दूरस्थ एव स जातस्तदा ज्ञातम्, पुनरस्माकं साक्षान्न भविष्यतीति कृत्वा प्रतारणा एव भवता क्रियते, इत्याशङ्क्याह—मय्यावेश्येत्यादि । मयि कृष्णे मन आवेश्य विधूताशेषवृत्ति यथा स्यात्तथा यन्मामनुस्मरन्त्यो नित्यमवाप्स्यत अवाप्नुवन् विभक्तिविपरिणामः, तदचिरात् चिरमततीति चिरात् तच्चिरकालं न भविष्यति साक्षात् संयोग एव सम्प्रति भविष्यतीत्यर्थः । आन्तरेण संयोगेन नित्यमधुना मालम्भन्त एव भवत्यः किन्तु त्वरितं साक्षात्संयोगश्च भविष्यतीति वाक्यार्थः ॥ ३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तर्हि अस्मासु किमियमेव समाधा ? नेत्याह मयीत्यादि । मयि कृष्णे मन आवेश्य । ननु अद्य आवेशितव्यं त्वयि मनः ? नैवमित्याह—यत् निवृत्ताशेषवृत्ति, यद्यपि निवृत्तिकरं मनस्तथाप्येकान्तावेशार्थमचिरादनेनैव देहेन उपैष्यथेति कुरुक्षेत्रयात्रायाम् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एतदेव स्त्रीपुंसानामनुभवदर्शनायोपपादयति । यथेति । स्त्रीणाञ्चेति चकारात् पुंसाञ्च दूरवर्त्तिन्यां श्रेष्ठायां यथा मन आविस्य वर्त्तते । न तथा सन्निकृष्टायामक्षिगोचरीभूतायाञ्चेत्यर्थः ॥ ३५ ॥ हं हो उद्धव ! एषोऽपि सन्देशः सम्प्रति त्वया स्वहृदयसम्पुटे एव स्थाप्यतां सम्प्रति कृष्णेन याः स्त्रियः सम्भुज्यन्ते कदाचित्तासां दृशां दूरवर्त्तिनि कृष्णे भवष्यति सति । ताभ्य एव तदानीं त्वया दातव्यः । सम्प्रति व्रजस्थास्तु नास्य ग्राहिकाः । यासां व्रजवर्त्तिन्यपि दृग्गोचरीभूतेऽपि तस्मिन् कृष्णे एकैकनिमेषेणैकैकयुगकालं व्याप्य सदृगदूरवर्त्तीकृत एवाभूत् तदा तदैव सहस्रशो विरहेषु सहस्रकृत्व एव मनःसन्निकर्षः खल्वभूदेदेवासामिति सावहेलमाचक्षाणासु तासु भोः स्वामिन्यः यद्येषोऽपि न रोचते तर्ह्यस्मादप्यन्यं सन्देशं शृणुत मया तु बहव एव सन्देशा आनीता इति प्रोच्य पुनः कृष्णवाक्यमाह । मयीति । विशेषेण मुक्तास्त्यक्ता गृहपत्यादिविषयाः अशेषा स्ववृत्तयो येन तथाभूतं मनः मयि कृष्णे आविश्य मां नित्यमनुस्मरन्त्यो यद्वर्त्तध्वे तदचिरादेव मामुप स्वसमीप एव वर्त्तमानम् एष्यथ प्राप्स्यथ ॥ ३६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

ननु किमित्येवमुच्यते अस्माकं तु सन्निकृष्टेऽपि त्वयि मनः सन्निकृष्टमेवासीदितिचेत्सत्यं तथाप्यस्ति विशेष इत्याह । यथेति । यथा प्रेष्ठे दूरचरे तच्चिन्तया मनसस्तस्मिन्नेव सन्निविष्टत्वं न तथा सन्निकृष्टे नैश्चिन्त्यार्थः । यद्यपि पुरुषाणामप्येवं तथापि स्त्रीणां विशेषतः इत्थमिति द्योतयितुं स्त्रीणामित्युक्तं चकारात्पुरुषाणामपि ॥ ३५ ॥ एतत्फलमाह । मयीति । कृत्स्नमित्येतद्विवृणोति निवृत्ता अशेषास्तत्तद्विषयगोचरा वृत्तयो यस्य तथाभूतं यत् तन्मनो मय्यावेश्य मामेवानुक्षणं स्मरन्त्योऽचिरात्मान् मामेवाप्स्यथ ॥ ३६ ॥

गूढार्थदीपिनी

दृशां दूरे यत् वर्ते तत् मदनुध्यानार्थं तच्च ध्यानं मनसः सन्निकर्षार्थम् ॥ ३५ ॥ स्त्रीणां चकारादन्येषां च मनः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तथाह । यथेति ॥ ३५ ॥ ध्यानफलमाह । मयीति । माम् अनुस्मरन्त्यो ध्यायन्त्यः अचिरान्मामेवैष्यथ प्राप्स्यथ ॥३६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

किमस्माकं समीपे सति भगवति भगवन्मनस्सन्निकर्षो दुष्कर इत्यतः सत्यमित्युत्तरयति । यथेति । दूरतरे प्रेष्ठे मन आविश्य वर्तते लग्नं भवतीति यावत् तथा स्त्रीणां चेतः सन्निकृष्टे पूर्वं सङ्गसहितेऽक्षिगोचरे चक्षुर्विषये । अक्षगोचर इति पाठ इन्द्रियविषय इत्यर्थः । नाविश्य वर्तत इत्यनुवर्तते । चशब्दात्पुरुषाणामित्यपीति । स्वयं तु लोकविलक्षणः पुमानिति सूचयितुं कण्ठतोऽनुक्तिरिति ज्ञेयम् ॥ ३५ ॥ कृत्स्नं स्ववृत्तिनिकुरम्बं तन्मनो मय्यावेश्य । कीदृक् तदित्यत ईदृगित्याह । विमुक्ता अशेषवृत्तयो येन तत्तथा मां नित्यमनुस्मरन्त्योऽचिरात्त्वरया मामुपैष्यथ तत्र मां श्रियं स्वरूपसम्पदमुपैष्यथेत्यप्यन्वयसूचनार्थं पुनर्मामित्युक्तिरिति ज्ञेयम् ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु किमेतदुच्यते अस्माकं तु सर्वदैव त्वयि मन इति चेत्तत्राह । यथा दूरचर इति । अयमेव च गोपिकानां धर्मः यथा सर्वदा मां स्मरन्ति ममाप्ययं धर्मः यथा ताभ्यः आनन्दं प्रयच्छामि एतदुभयं तदैव घटते नान्यथेति धर्मो निरूपितः अर्थोऽपि भगवानेव परं गुप्ततया संरक्ष्यतयैवहिगोपायति यत्र निरन्तरं मनस्तिष्ठति अन्यथा क्षणमपि प्रमादे अर्थो गच्छेत् अतः पाक्षिकः कादाचित् कोऽपि दोषः परिहरणीय इति सन्निकर्षापेक्षया विप्रकर्षे मनसः स्थैर्यमाह । दूरचरे दूरेऽप्यस्थिरे अन्यथा स्वयं गच्छेत् निराशो वा भवेत् अतो दूरचरे आवश्यके प्रेष्ठे यथा मनो वर्तते निश्चलं सर्वदा तत्रापि स्त्रीणां निकटे हि शीघ्रमेव मानादिदोषोत्पत्तिसम्भवात् चकारादन्येष्वपि सम्बन्धेषु यथा पुत्र माता स्मरति पिता च वा एवमन्य अपि सन्निकृष्टे चेतो न स्मरति अयं हि बहिः पूर्वस्त्वान्तरः किञ्च अयमक्षिगोचरः नह्यन्यविषये अन्यदिन्द्रियं स्वतन्त्रतया प्रवर्त्तते अत एवाक्षिगोचरे न चेतः प्रवर्त्तते बलिष्ठं च चेतः अन्यथा प्रत्यक्षे विषये अन्यचित्तता न स्यात् ॥ ३५ ॥ नन्वस्माभिः त्वत्प्राप्त्यर्थं चिन्ता क्रियते तथा सति किं मनः स्थापनेन किं निरन्तरसम्बन्धेन वा कामार्थं हि प्रयत्नः लोके च यादृशः व्यवहारसिद्धः तत्र क्षणं मनश्चाञ्चल्यमप्यावश्यकत्वात् न विगीतामित्याशङ्क्याह । मय्यावेश्येति । अहं हि कृत्स्नप्रसादेनापि प्रायः कृत्स्नेनापि साधनेन प्राप्तुं योग्यः सा च कृत्स्नता अस्यामेवावस्थायां भवति नान्यथा कृत्स्नतायां हेतुं वदन् अवस्थान्तरे तदभावमाह । विमुक्ताशेषवृत्तीति । विमुक्ताः सर्वेभ्यो अशेषा दशापि वृत्तयो यस्य एकादश द्वादश वा सहजाश्चेत् गुणकृतास्तु दशैव ताः भ्रमरवाक्येषु निरूपिताः "एकादशामी नमनसो हि वृत्तय" इत्यत्र स्वाभाविका अपि निरूपिताः । ननु सर्ववृत्त्यभावे स्वरूपनाश एव स्यादित्याशङ्क्याह । तदिति । प्रसिद्धं तन्मनः इदानीं त्वहमाविष्टः अतः परं भवतीभिर्मय्यावेश्य बलान्मयि मनोनिवेशनं कृत्वा पश्चात् शीघ्रमेवाहं प्राप्तव्यः । ननु वस्तुविचारे मनस्त्वन्यदेव तस्मिन्निविष्टे कथं भगवत्प्राप्तिरिति चेत्तत्राह । अनुस्मरन्त्य इति । मनोद्वारा आत्मापि स्मरति यद्यपि स्मरणं चेतसो धर्मः तथाप्यनुस्मरणमात्मन एव अनेनोभयविधोऽपि सम्बन्धो निरूपितः मनोद्वारा स्वयं भगवति प्रविष्टाः स्मरणद्वारा च भगवांस्ताष्वनु प्रविष्ट इति एवं सत्यचिरादेव मामवाप्स्यथ परम्परया नित्यं सम्बन्धे संघर्षादन्तरास्थितं गच्छति तथा मनोविलये चित्तस्यापि विलयादचिरादेव प्राप्तिः आत्मगाम्येव कामेन फलरूपोऽहंमुख्य इति तात्पर्यम् ॥ ३६ ॥

श्रीसुबोधिनी-सारः

यथा दूरचरे विदेशवर्त्तिनि प्रेष्ठे मनः प्रविश्य वर्त्तते स्त्रीणां तथाऽक्षगोचरे नेत्रविषये सन्निकृष्टे चेतो न प्रवर्त्तते ॥३५॥ किं ततस्तत्राह विमुक्ता अशेषा वृत्तयो यस्माद्येन तन्मनः कृत्स्नं साकल्येन मयि आवेश्य मामनुस्मरन्त्यो नित्यम् अचिरात् शीघ्रं मां प्राप्स्यथ ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'न वयं संसारविमुक्तिमात्रकामाः, किन्तु सर्वसुन्दरसकलगुणालङ्कृतत्वत्प्राप्तिकामा एव, अतस्तदुपायोपदेश एवोचित' इति चेत्तत्राह—यत्त्विति । यत्तु भवतीनां दृशां दूरेऽहं वर्ते तन्मदनुध्यानकामनया मनसः सन्निकर्षामेव । 'वै' इत्यवधारणे । दूरस्थितावपि 'कथं मनःसन्निकर्षः स्यात्' इत्याशङ्क्याह–प्रिय इति ॥ ३५ ॥ उक्तमेवोपपादयति । प्रसङ्गात् स्त्रीणामित्युक्तम् । चकारादन्येषां च मनो यथा दूरचरे प्रेष्ठे आविश्य निश्चलं सद्वर्तते तथा सन्निकृष्टेऽक्षगोचरे न वर्तते, सदा सन्निधानस्य अनादरकारणत्वात् ॥ ३६ ॥

अन्वितार्थप्रकाशिका

यदिति ॥ यत्तु प्रियः अहं भवतीनां दृशां दूरे वर्ते तन्मदनुध्यानकाम्यया तच्च ध्यानं मनसः सन्निकर्षार्थमेव ॥ ३५ ॥ यथेति ॥ यथा स्त्रीणां चकारादन्येषां च ममो यथा दूरचरे प्रेष्ठे आविश्य निश्चलं सद्वर्तते तथा सन्निकृष्टेऽक्षगोचरे न वर्तते सदा सन्निधानस्यानादरकारणत्वात् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अपराः प्राहुः कच्चिदिति न इति पुरयोषितामिति च सप्तम्यर्थे षष्ठ्यौ नोऽस्मासु कर्त्तव्यां प्रीतिं कच्चित्पुरयोषिसु करोति वा न कथंभूतः सः स्निग्धं च तत् स लज्जहासेनोदारमीक्षणं च तेनार्चितः पूजितः अस्माभिभिर्वा ॥ ३५ ॥ अपराः प्रोचुः कथमिति तासां वाक्यैर्विभ्रमैर्विलासैश्च अनुपूजितः अनुभाजितः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चक्षुर्गोचरे त्वयि सत्यनुध्यानं मनसः संनिकर्षरूपमर्थं किं न लभते नेत्याह ॥ यथेति ॥ प्रेष्ठे प्रियतमे, दूरचरे सति, तस्मिन् यथा च यथैव, स्त्रीणां मनः, आविश्य वर्त्तते, स्थिरतयेति शेषः । तथा, तासां चेतः, संनिकृष्टे अक्षिगोचरे, प्रेष्ठे प्रियतमे न वर्त्तते ॥ ३५ ॥ किं तदनुध्यानेन मनःसंनिकर्षेण च साध्यमित्यत आह ॥ मयीति ॥ विमुक्ताः अशेषाः वृत्तयो व्यापाराः

यस्मात्तत्, यत् मनः तत्, मयि कृत्स्नं यथा तथा, आवेश्य, मां एव नित्यं अनुस्मरन्त्यः सत्यः, अचिरादेव, मां उपैष्यथ प्राप्स्यथ एतत्तेन साध्यमिति भावः ॥ ३६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यत्त्वहमिति : १०.४७.३५

सत्यनारतयोगेऽपि यद्वियोगावभासनम् । तद्बीज जातमद्भक्ति- सुखश्रद्धा-ऽभिवर्धनम् ॥ ९० ॥

यथा दूरचर इति : १०.४७.३६.

यत्प्रीतिर्निरपायिसौख्यजनिका वैर्नित्यमाकाङ्क्ष्यते कार्यस्तैर्न कदाप्यनादरपदं तत्सन्निकर्षो भृशम् ।
यत्स्त्रीणां स्वपतावनारतगृहासे प्रवासागते प्रेमोत्साहसमादरोक्तिरचनाभेदो महान दृश्यते ॥ ९१ ॥

कृष्णप्रिया

हे गोपियों आप का मैं अत्यन्त प्रिय हूँ और आपकी नजरों से दूर रहा हूँ इसका यह कारण है कि आपके मन को मेरी तरफ खीच लूँ इससे यह फल होगा कि आप निरन्तर ध्यान करती रहें ॥ ३५ ॥ प्रियतम विदेश हो अत्यन्त दूर हो तब स्त्रियों का मन जैसा पति में रहता है वैसा उनका चित्त नयनों से निरखे जाने वाले और समीप में रहने वाले पति में नहीं रहता है ॥ ३६ ॥

मय्यावेश्य मनः [1]कृत्स्नं विमुक्ताशेषवृत्ति [2]यत् । अनुस्मरन्त्यो मां नित्यमचिरान्माम [3]वाप्स्यथ ॥३७॥
या [4]मया क्रीडता रात्र्यां वनेऽस्मिन् व्रज आस्थिताः । [5]अलब्धरासाः कल्याण्यो माऽऽपुर्मद्वीर्यचिन्तया ॥३८॥

कर्दमक्षमा

अन्वयः—यत्, विमुक्ताशेषवृत्ति, कृत्स्नम्, मनः, मयि, आवेश्य, माम्, नित्यम्, अनुस्मरन्त्यः, अचिरात्, माम्, अवाप्स्यथ ॥ ३७ ॥ अस्मिन्, वने, रात्र्याम्, मया, क्रीडता, याः, व्रजे, आस्थिताः, अलब्धरासाः, कल्याण्यः मद्वीर्यचिन्तया, मा, आपुः ॥ ३८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उपैष्यथेति माधुर्यमात्रमिति चेदत आह । या इति । हे कल्याण्यः याः स्वभर्तृभिः प्रतिवद्धा वने क्रीडता मया सहालब्धक्रीडास्तास्तदैव मत्कृतलीलानुस्मृत्या मामापुः प्रापुः ॥ ३७ ॥ तस्य संदेशेनागता स्मृतिर्यासां ताः । प्रथमार्थे द्वितीया । ३८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

माधुर्यमात्रं प्रियोक्तिमात्रम् । अत्र स्वानुभूतमर्थमाह—या इति । मद्वीर्यं मत्स्वरूपम् "वीर्यं तेजोबलप्रख्यस्वरूपेषु च रेतसि" इति धरणिः ॥ तत्रतत्र प्रमाणं दर्शयति–या इहास्मिन्प्रकाशात्मके वृन्दावने रात्र्यां तस्यां क्रीडता मया कृष्णतया प्रसिद्धाकारेण सहालब्धरासाः । तत्र हेतुः–व्रज अस्थिता रुद्धा इत्यर्थः । ता अपि मद्वीर्यचिन्तया मम कृष्णतया प्रसिद्धाकारस्य सर्वातिक्रमिमद्गुणप्रभावेण मा मां कृष्णतया प्रसिद्धाकारमापुरेव, अप्रकटप्रकाशात्मके वृन्दावन इति भावः । कल्याण्य इति संबोध्य भवत्यस्तु साक्षादेव प्राप्स्यति साक्षादेव प्राप्स्यन्ति न तु 'जहुर्गुणमयं देहम्' इति रीत्येति व्यंजितम् ॥ ३७ ॥ तस्य कृष्णस्य । ता गोप्यः ॥ ता अन्तर्गृहनिरुद्धचर्या एवोचुः । तेन संदेशेनागता स्मृतिर्यासां ताः । द्वितीयाऽऽर्षी । आं ! सत्यमेव तस्यां रात्रौ तेन रममाणेनैव सह वयमास्मेति स्मरन्त्यः स्वानुभवं प्रमाणीकृत्योद्धवं प्रीतास्ता एव लौकिकरीत्योद्धवं पप्रच्छुः ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र प्रमाणं दर्शयति । या इत्यस्मिन् प्रकटप्रकाशात्मके वृन्दावने रात्र्यां तस्यां क्रीडता मया कृष्णतया प्रसिद्धाकारेण सह अलब्धरासाः तत्र हेतुर्व्रज आस्थिता रुद्धा इत्यर्थः । ता अपि मद्वीर्यचिन्तया मम कृष्णतयाप्रसिद्धाकारस्य सर्वातिक्रमिमद्गुणप्रभावेण मा मां कृष्णतया प्रसिद्धकारमापुरेव अप्रकटप्रकाशात्मके वृन्दावने इति भावः । कल्याण्य इति सम्बोध्य भवत्यस्तु साक्षादेव प्राप्स्यन्ति नतु जहुर्गुणमयं देहमिति रीत्येति व्यञ्जितम् ॥ ३७ ॥ एवमिति क्रमेण यदा यदा यच्छ्रुतं तदा तदा तत्रार्थत्रयस्यापि ताभिस्तारतम्येनानुसंहितत्वात् प्रथमार्थे स्वप्रेयसि तस्मिन् । पूर्वं यत् पत्यपत्यसुहृदामित्यादिषु या सर्वतनुभृतां निरुपाधिप्रेमास्पदत्वादिना परमात्मता स्थापिता सम्प्रति तेन ज्ञानमयेन सन्देशेनागता तदात्मिका स्मृतिर्यासां ताः । तन्त्रेण तु तेन

---

[1] कृष्णे । [2] वृत्तयः–प्रा. पा. । [3] मुपैष्यथ–श्रीधर वंशी. जीव. वीर. विज. विश्व. शुक. ध. सु. । [4] यन्मया क्रीडिता रात्रीः–विज. । [5] अलब्धावासकल्याणा आपुर्गा मद्विचिन्तया–विज. ।

ज्ञानमयेनापि सन्देशेन न गता स्मृतिर्निजभावोचितानुसन्धानरूपा यासां ताः। तत्र हेतुः। प्रीताः तस्मिन् स्वाभाविकतादृशप्रेमवत्य इत्यर्थः। प्रियतमादिष्टमिति सोऽप्येवमस्मासु नोपदिशेदिति विभाव्येति भावः। द्वितीयार्थे। तेन प्रेमकृतसाक्षात्कारसूचकेन सन्देशेनागता स्मृतिः साक्षात्कारस्य स्मरणं यासां ताः। तृतीयार्थे तेनाप्रकटप्रकाशे संयोगं सूचयता सन्देशेनागता स्मृतिर्जातिस्मरवत्तत्संस्काररूपा यासां ताः। अन्त्यार्थद्वये अत एव प्रीताः प्राप्तपरमानन्दाः अत एव विश्वासे हेतुः प्रियतमेति। अथ मय्यावेश्य मनः कृष्ण इति चतुर्थपक्षे सा स्मृतिस्तु पूर्वं स्ववर्गवज्जातपूर्वानुरागतया दृष्टानां तासां रासे तु तत्रादृष्टानामप्येतावन्तं कालं स्वीयश्रीकृष्णानुरागावेशेनाननुसंहितानामनेन त सन्देशप्रभावेणानुसन्धानरूपेति ज्ञेयम्। अत्रैवं श्रीभगवतोऽभिप्रायः मम सम्प्रति गमनादिकं न सम्भवत्येवेति सान्त्वनसन्देशे प्राप्ते प्रथमत आगमनप्रतिज्ञैव समञ्जसा भाविनि कालविलम्बे तु न केवला सा समञ्जसेति विविधसमाधानसन्धायकविविधार्थसम्बन्धे सन्देशोऽपि योग्यः। यस्य पर्यवसानार्थेन मुहुस्तत्रत्यनित्यविहारानुसंधानमपि भवेत्। कदाचिद्बहिरनुसन्धाने तु मद्दर्शनतृष्णा च मुहुस्तत्स्फुरणरसास्वादचमत्कारहेतुः स्यात्। आयत्यां मत्साक्षात्कारे परमचमत्कारः स्यादिति ॥ ३८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तत्र विश्वासं कर्त्तुं न शक्ताः स्मः, तत्राह—या इति। मया क्रीडता सह, किंवा मयि क्रीडति सतीत्यर्थः। अस्मिन्निति सदैव चित्तान्तः साक्षादिव तद्वृत्तेः, किंवा तत्रागमनस्याविलम्बताबोधनार्थम्। 'मा' न, मा-शब्दो नञर्थे, अलब्धरासा न वृत्ताः, किन्तु मम वीर्य्याणां रासक्रीडादिलक्षणानां चिन्तया ध्यानेन वा मामापुरेव, यतः कल्याण्यः—युष्मत्सख्यसौभाग्यवत्य इत्यर्थः। मद्ध्यानस्यायं प्रभावो व्यक्त एवेति विश्वासः कार्य्य एवेति भावः ॥ ३७ ॥ एवमेतत्, स्मृतिर्ज्ञानम्। अन्यत्तैर्व्याख्यातम्। यद्वा, अहो वत तथापि तासां शोको न निवृत्तः, विशेषतश्च तत्सन्देशाज्जातस्मृतिवेगेन सर्वा अपि विलेपुरित्याह—एवमिति। ईदृशमप्याकर्ण्य प्रीता हृष्टाः किम्? काक्वा, नैवेत्यर्थः। यतो व्रजस्त्रियस्तद्दर्शनैकजीवना इत्यर्थः अतस्तत्सन्देशादागता विशेषेणोद्गता तत्स्मृतिर्यासां तथाभूता ऊचुः। यद्वा, तत्सन्देशेन कृष्ण-सन्देशेनागता रासे सखीनां तासां कृष्णप्राप्तौ स्मृतिर्यासां ताः, अत एव विश्वासेन प्रीताः ॥ ३८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

या रात्रय क्रीडया नीताः तासु मामापुरित्यन्वयः ॥ ३७–४७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

व्यामोहनमात्रमेतदित्यतो निदर्शयति। या इति। हे कल्याण्यः याः स्त्रियः व्रज एवास्थिता भर्त्रादिप्रतिबन्धादिति भावः। वने क्रीडिता मया सह न लब्धः रासः क्रीडा याभिस्तथाभूताः मद्वीर्याणां मच्चेष्टितानामनुचिन्तया मामेवापुः प्रापुः खलु ॥ ३७ ॥ एवमिति। इत्थं प्रियतमेन भगवतादिष्टं श्रुत्वा तस्य सन्देशेनागता स्मृतिर्यासां ताः व्यत्ययेन द्वितीया प्रीता हृष्टा उद्धवमूचुः ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अस्मिन्नर्थे स्वानुभूतमर्थं प्रमाणयति। यन्मयेति। यद्यथा व्रजे आस्थिता अस्मिन् वने अलब्धावासकल्याणाः अप्राप्तगृहसुखाः यूयं मया रात्रीः क्रीडिताः मद्विचिन्तया मामापुः एवमिति शेषः ॥ ३७ ॥ तत्सन्देशेनागतभगवद्विशेषस्मरणाः ॥ ३८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अत्र किं प्रमाणमित्याशङ्क्य सोदाहरणमाह—या मया क्रीडतेत्यादि। या व्रजवध्वोऽलब्धरासास्तेनेश्वरेण न लब्धो रासो याभिस्ताः, अस्मिन् व्रजे रात्र्यां क्रीड़ता मया आस्थिताः कृतास्थाः कल्याण्य आनन्दविग्रहा भूत्वा मा मामायुः। (भा० १०।२९।११) "जहुर्गुणमयं देहम्" इत्यादिना याः कथितास्ता एव तत्क्षणं कल्याण्यो भूत्वा पश्चान्मयैव रात्रौ क्रीडता रासे नृत्यता सह आस्थिता इत्यर्थः। कुतः? इत्याह—मद्वीर्यचिन्तया, वीर्यं गुणाः। अतस्ता एव प्रमाणम्; तास्तु पूर्वमयोग्या एवासन्, तथापि मत्प्रेम्णा तद्देहत्यागेन योग्यदेहं लब्ध्वा तदैव मां प्रापुः। भवत्यस्त्वनेनैव देहेन प्रापुश्च प्राप्स्यथ चेत्यर्थः ।३७–३९।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नन्वत्र का प्रतीतिः? तत्राह—या मयेत्यादि। ता मामायुः, तर्हि वयमपि देहान्तरेणैव प्राप्स्यामः? नैवमित्याह—हे कल्याण्यश्चिरजीविन्यः! कथमेवमाशङ्क्यते शान्तं प्रतिहतमङ्गलमाचिरादिति पूर्वमेवोक्तम्; अनेनैव देहेन प्राप्स्यथेत्यर्थ इति सरस्वती-रहस्यं गोप्य एव विदुर्नोद्धवोऽपि तथा ज्ञानवान् ॥ ३७–३९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अत्रार्थे भवतीनां मध्ये पूर्वमन्तर्गृहनिरुद्धा या गोप्यस्ता एव प्रमाणमित्याह । या इति । अस्मिन् वृन्दावने रात्र्यां क्रीडता मया सह या अलब्धरासा अभवन् कुतः व्रजे आस्थिताः भर्तृभिर्निरुद्धत्वादिति भावः । ताः स्वमनोरथासिद्ध्या मद्विच्छेदमहापीडया च मर्त्तुकामा अपि कल्याण्यः कल्याणवत्यो जीवन्त्य एव मद्वीर्यचिन्तया मा मां तदैवापुः । तत्रैवाविर्भूय रममाणेन मया सार्द्धमेव तस्यां रात्रौ व्रजे स्थिताः तत्पररात्रिषु रासमपि प्राप्ता इत्यर्थः ॥ ३७ ॥ ता अन्तर्गृहनिरुद्धचर्य एवोचुः । तेन सन्देशेन आगताः स्मृतिर्यासां ताः । द्वितीया आर्षी । आं सत्यमेव तस्यां रात्रौ तेन रममाणेनैव सह वयमास्मेति स्मरन्त्यः स्वानुभवं प्रमाणीकृत्य उद्धवं प्रति प्रीतास्ता एव लौकिकरीत्या उद्धवं पप्रच्छुः ॥ ३८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

नेदं रुच्युत्पादकमात्रमपि तु यथास्थितमदनुस्मरणफलस्य सखीषु भवतीभिर्दृष्टत्वादित्याह । या मयेति । स्वभर्त्रादिभिः प्रति वदत्वाद्या व्रजे स्थिताः अस्मिन्वने रात्र्यां क्रीडता मया अलब्धरासाः मद्वीर्यचिन्तया मां प्रापुः कल्याण्यः जन्मान्तरेषु अनुष्ठितरीकृताः । यद्वा मदनुचिन्तया मत्प्राप्तिप्रतिबन्धकदुरितक्षयात्कल्याण्यः । यद्वा अलब्धरासा अपि मां प्रापुः भवत्यस्तु लब्धरासा अत एव कल्याण्यः तथा च ब्रह्मलोकावधिभोगमात्रं यदपेक्षया तुच्छं तन्मया सह क्रीडनं प्राप्तवतीनां युष्माकं मत्स्वरूपप्राप्तिरेवावशिष्यते न त्वन्यत्सा च यथोक्तोपायेन भविष्यत्येवाऽतोऽसूयादिकं विहायानन्यतया मदनुस्मरणं कार्यमिति भावः । "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह"मित्यनुरोधेनास्मिन्नित्युक्तम् अहमपि युष्मत्संन्निधावेव तिष्ठामि मन्मनसो युस्मासु प्रविष्टत्वात् ॥ ३७ ॥ एवमुक्तप्रकारेण प्रियतमेनानुप्रेक्षणीयवचनेनाष्टतमेन तत्रापादिष्टमाज्ञापूर्वकमुपदिष्टमाकर्ण्य सम्यगवधार्य प्रीताः अस्मदुपकाराय भगवानिमं दूतं प्रेषितबानिति विचार्य प्रसन्नचित्ताः यतः प्रियतमसन्देशैरागता स्मृतिर्वयमनुचर्यो भगवान्स्वामी सर्वदा सूयादिदोषनिवृत्तिपूर्वकमनुमन्धेय इत्मादिलक्षणं स्मरणं यासां ताः अनुगृहीता यतः व्रजयोषितः अनुकम्प्य स्थानवासिन्यः सरलचित्त उद्धवमूचुः ॥ ३८ ॥

गूढार्थदीपिनी

कृत्स्नं निर्वासनम् । अस्यैव विवरणं विमुक्तेति । वृत्तयो बहिर्वृत्तयः ॥ ३७ ॥ या मया सह अलब्धरासाः ताः मामेव आपुरित्यन्वयः । हे कल्याण्यः ॥ ३८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एतदेवोपपादयति । या इति । हे कल्याण्यः ! भर्त्रादिभिः प्रतिरुद्धाः याः वने क्रीडता मया सह अलब्धरासाः ता मद्वीर्यचिन्तया मद्गुणानुध्यानेन मा मामेवापुः प्रापुरिति ॥ ३७ ॥ तस्य भगवतः सन्देशेनैव आगता स्मृतिर्यासां ताः आगतस्मृतीः आगतस्मृतयः प्रथमार्थे द्वितीया ॥ ३८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

रोचनार्थं रसनाग्रोपरितनी वाणीति नेति भवदनुभूतमिदं प्रमेयमित्युक्त्या ता विश्वासं जनयन्नाश्वासयति । यदिति । यद्यस्मादस्मिन्वने आगताभिर्गोपीभी रात्रीः क्रीडिता मया व्रजे आस्थिताः पतिप्रतिषिद्धा व्रजाद्व्रजन्त्योऽलब्धरासोऽलब्धो रासो रासक्रीडा याभिस्ताः कल्याण्यो मद्विचिन्तया किं तया तन्वेति तां त्यक्त्वा मामायुः प्राप्ताः । एवमनुवादेन सैका पतिविधृता पदमाप विष्णोरितिवत्काश्चन स्वधवप्रतिषिद्धा भगवन्तमगुरिति । अन्तर्गेहगता इत्यारभ्य जहुर्गुणमयं देहमित्यन्तोक्तमनुसन्धेयम् । व्रज आस्थिता इति च सुलग्नमेतत्पक्षे । उपेत्यथेतीदं कायं विहायेत्यर्थकमिति तदानुगुण्यं च गुण्यैरस्मत्पक्षे वर्तत इति विभावनीयम् । अलब्धरासकल्याणा इति पाठोऽपि कल्याणकरः । अलब्धरासक्रीडाकल्याण याभिस्ताः सत्य इत्यर्थः ॥ ३७ ॥ प्रियतमस्य पुत्रात्प्रेयो विनात्प्रेय इत्यादेरतिपियस्यादेशमाज्ञानरूपं वचनं तत्सन्देशेनागता स्मृतिर्विशेषतो यासां ता आगतस्मृतयः प्रीता उद्धवं प्रत्यूचुः ॥ ३८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एतस्य निदर्शनं वदन् मोक्षप्रकारमाह । या इति । भवत्यः समागताः गृह एव स्थिताः तास्तदैव सर्वप्रकारेण मां प्राप्तवत्यः अनेनैव निदर्शनेन भवतीभिरप्यहं प्राप्तव्यः तस्मान्मदर्थजीवनस्थापनमिति पक्षो निरर्थकः । अन्यथा समागतानां भवेत् अनुभवसिद्धश्च क्लेशः । ननु ताः प्रतिबन्धेन तथाभूताः कथं स्तुत्या इत्याशङ्क्याह । कल्याण्य इति । तासां महद्भाग्यमस्तीति अवश्यं प्रतिबन्धरूपं दुरितं दृष्ट एवोपक्षीणमिति कण्टकेन कण्टकोद्धारवद्देहनिराकरण एवोपक्षीणं भवतीनां तु तद्दुरितं पश्चादिमामवस्थां प्रापितवत् अतो मदुक्तप्रकारेण दोषं परित्यज्य तामवस्थां प्राप्स्यथेति भावः । रात्र्यां क्रीडतामया सहालब्धरासाः

क्रीडा स्वतः सिद्धेति निरूपणार्थं तथोक्तं प्रतिबन्धाभावाय रात्र्यामिति वन इति साधनसंपत्तिः मयैव क्रीडा क्रियत इति न तासां प्रयासः अस्मिन्नेव वन इति भगवानपि तत्रैव स्थित्वा वदतीति ज्ञापितम् अस्मिन्निति व्रजसम्बन्ध्यपि अस्मिन्नेव व्रजे ता आस्थिता इति भवतीनामपि निर्बन्धेनार्थैवास्थापनम् । अलब्धरासां भाग्यमुपभोगेन नोपक्षीणमिति ज्ञापितम्, अत एव पूर्णभाग्याः । ननु तासां किं साधनमित्याकाङ्क्षायामाह । मद्वीर्यचिन्तयेति । ता हि गमनार्थं प्रवृत्ताः भर्त्रादिभिः प्रतिबद्धाः तत्प्रतिबन्धाभावाय भगवत्पराक्रमं स्मृतवत्यः ततो भगवद्धर्मा अप्यक्लिष्टा इति एव पराक्रमः तदीयं तेभ्यो दत्त्वा स्वबालकमिव दोषान्निवार्य भगवन्तं गमयामास अतो मत्पराक्रमेस्यैव चिन्तोचिता नतु दोषपुरःसरं ममेति भावः । यद्वा नन्वचिरान्मामवाप्स्यथेत्यनेन व्रजे समागतस्य भगवतः पूर्ववन्मिलनलक्षणा प्राप्तिरुच्यते उतान्तर्गतगोपभार्याणमामिव सोच्यते आद्याचेदोमिति ब्रूमः अन्त्या चेदनिष्टत्वान्नेदं समाधानमित्यत आह । या मयेति । या गोप्यो व्रजस्थिता एव स्थितं मामापुराक्षेपलभ्यत्वादमङ्गलत्वाच्च तद्देहत्यागः स्पष्टतया नोक्तः देहत्यागपूर्वकं तासां स्वप्राप्तौ हेतुभूतविशेषमाह । रात्र्यां क्रीडता मया सह पूर्वमलब्धरासा यतो व्रजस्थिता एव सत्यो वने स्थितं मामापुरित्यर्थः । भवतीनां लब्धरासत्वान्न तथा भविष्यतीति भावः । अत एव कल्याण्य इति सम्बोधनम् अत्रायं भावः रासे हि पूर्णस्वरूपानन्द एतासु स्थापितः स च भगवत्स्वरूपात्मक इति तदनुभावेन विरहेऽपि जीवनमेव सम्पद्यते । न वैपरीत्यं भवितुं शक्नोति । यद्यप्ययं भावोऽति कठिनोऽत एव प्रियेणाप्यतिकृच्छ्रेण प्रायः कथं च नेति पदत्रयमुक्तम् अग्रे च प्रत्यागमनसन्देशैरिति प्राणधारणे हेतुरुक्तः तथापि सन्देशानुसन्धानेऽप्युक्तधर्मकार्यमेवेति ज्ञेयम् अन्यथैतस्य सर्वतिरोधायकत्वेनातितीक्ष्णत्वेन क्षणमात्रेणैवान्यथा भवेदतः सुष्टूक्तं देहत्यागे तामामलब्धरासत्वं हेतुरिति । तथा च तासु विरहसामयिकजीवनहेतूक्तरूपधर्माभावात्तथाप्तिरभूद्भवतीनां तु तद्वत्त्वाद्यथा पूर्वमेव मेलनं भविष्यतीति अत एव जन्मोत्सवेऽप्यात्मानं भूषयाञ्चक्रुरित्यत्र शरीरपदं त्यक्त्वात्मपदं तद्वाचकमुक्तमविकृतत्वज्ञापनाय अन्यथा स्वक्रीडातो लब्धरासोक्तिप्रयोजनं न पश्याम इति ॥ ३७ ॥ एवमुपदेशेन तासां दोषो निवृत्त इत्याह । एवमिति पञ्चदशभिः । बिद्यारूपास्ता इति तासां चतुर्दशवाक्यान्युपक्रमश्चापरः तथा सति सर्वा एव भगवत्कलास्तासु सिद्धा इति निरूपितं भवति प्रतारणशङ्काभावायाह । प्रियतमेनादिष्टमिति । आज्ञापूर्वकमुक्तम् अमानने दण्डोऽपि निरूपितः व्रजयोषित इति शुद्धाः कापट्यरहिताश्च भगवता अनुगृहीता उक्तार्थफलं स्वस्मिन् जातमिव ज्ञापयितुमिव उत्सवरूपम् उत्सवेऽपि प्रियस्मरणं दृढं भवतीति उपदेशेनैव प्रीताः पूर्वासूयादिक्लेशान् त्यक्तवत्यः । ननु कथं पूर्वमाक्रोश कथमिदानीं प्रीतिः विरहस्य तुल्यत्वादित्याशङ्क्याह । तत्सन्देशेन तादृशसन्देशेन पूर्वं ज्ञात एवार्थः मध्ये कालादिदोषाद्विस्मृतः भावान्तरमुत्पादितवान् स पुनरिदानीं स्मृतः अस्मरणकार्यं दूरे चकार ॥ ३८ ॥

श्रीसुबोधिनी-सारः

तत्र स्वानुभवं प्रमाणयति अस्मिन् वने वृन्दावने क्रीडता रासं कुर्वता मया सह व्रजे आस्थिता या कल्याण्यो लब्धरासा अप्राप्तलीलोत्सवा मम वीर्याणां चिन्तया मामापुः ॥ ३७ ॥ शुकोक्तिः । एवं प्रियतमेन श्रीकृष्णेनादिष्टमुक्तमाकर्ण्य श्रुत्वा तस्य सन्देशेनागता स्मृतिर्यासां ता व्रजयोषितो गोप्यस्ताः प्रीता उद्धवम् ऊचुः ॥ ३८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'त्वयि मनआवेशेऽपि किम्' इत्यपेक्षायामाह—मय्यावेश्येति । विमुक्ता अशेषा वृत्तयो व्यापारा यस्मात् तत् । अतएव कृत्स्नं सम्पूर्णं मनो मय्यावेश्य स्थिरीकृत्य मामेव नित्यमनुक्षणं स्मरन्त्यः अचिराच्छीघ्रमेव मामुपैष्यथ प्राप्स्यथ ॥ ३७ ॥ 'नच मामुपैष्यथेति मधुरवचनमात्रम, तथा जातत्वात्' इत्याशयेनाह—या इति । 'युष्माकं तु मत्प्राप्तिः सुलभैव' इति सूचयन् सम्बोधयति-कल्याण्य इति । अस्मिन् वृन्दावने रात्र्यां क्रीडता मया सह अलब्धरासा या गोप्यस्ता मद्वीर्याणां मल्लीनां चिन्तया मामेवापुरित्यन्वयः । अतो यूयमपि मच्चिन्तनेन मां प्राप्स्यथेति न सन्देहः । तासां रासालाभे हेतुमाह—व्रज आस्थिता इति । भर्त्रादिभिः प्रतिबन्धादिति भावः ॥ ३८ ॥

अन्वितार्थप्रकाशिका

मयीति ॥ विमुक्ता अशेषा वृत्तयो व्यापारा यस्मात् तत् अत एव कृत्स्नं संपूर्णं मनो मय्यावेश्य स्थिरीकृत्य मामेव नित्यमनुक्षणं स्मरन्त्यः अचिराच्छीघ्रमेव मामुपैष्यथ प्राप्स्यथ ॥ ३७ ॥ या इति ॥ हे कल्याण्यः ! या गोप्यः भर्त्रादिप्रतिबन्धात् व्रज एवास्थिता अत एव अस्मिन्वृन्दावने रात्र्यां क्रीडता मया सह अलब्धरासास्ता गोप्यः मद्वीर्याणां मल्लीलानां चिन्तया मामेवापुः ॥ ३८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उपैष्यथेति व्यामोहमात्रमित्यत आह । या इति । हे कल्याण्यः, याः स्त्रियः, अस्मिन् व्रजे, आस्थिताः । भर्त्रादिकृतप्रतिबन्धादिति भावः । वने रात्र्यां, क्रीडता मया सह, न लब्धो रासः क्रीडायाभिस्ताः, ताः मद्वीर्याणां मच्चेष्टितानां चिन्ताऽनुचिन्तनं तया, मा मामेव, आपुः संप्रापुः । अतो नेदं व्यामोहमात्रमिति भावः ॥ ३७ ॥ एवमिति । एवमित्थं प्रियतमेन भगवता

आदिष्टं, यत्तदुद्धवमुखादिति शेषः। आकर्ण्य श्रुत्वा, तस्य श्रीकृष्णस्य संदेशेनागता स्मृतिर्यासां ताः, प्रथमार्थे द्वितीया। ताः व्रजयोषितः, प्रीताः सत्यः, तद्धवं प्रति ऊचुः ॥ ३८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुनरन्या ऊचुः अपीति अपि प्रश्ने क्वचित् प्रस्तुतं वार्त्ता प्रसंगेग्नाय्याः चातुर्यहीनाः नोऽस्मान् स्वैरं कथान्तरे स्वतंत्र वार्त्तांतरे ॥ ३७ ॥ बुद्धियुक्ता अपराः प्राहुः ता इति कुमुदैश्च कुंदैश्च शशांके न चंद्रेण चरमे सुंदरे वृंदावने क्वणंति चरणनूपुराणां पादाभरणानि यस्यां तस्यामतिमनोहरायां रासगोष्ट्यां अस्माभिर्गोपीभिः प्रियाभिः इडितास्तुता मनोज्ञा कथा यस्य सः कृष्णः तदा यासु रात्रिषु रेमे ताः निशाः कदाचिदपि किं स्मरतिवान् ॥ ३८ ॥

श्रीहरिसूरिविरचितं भक्तिरसायनम्

मय्यावेश्येति : १०.४७.३७.

सर्वत्रापि ममाक्षि लक्षयति वो रूपं तथा मे श्रुतिर्युष्मन्नाम सकाममेवमखिलं युष्मन्मयं मे मनः।
तत्सङ्कल्पविकल्पकल्पनमलं संत्यज्य सर्वात्मना हृत्स्थोऽस्मीति विभावनीयमनिशं यूयं यथास्मिन्मया ॥ ९२ ॥

या मयेति : १०.४७.३८.

यो निर्व्याजमनन्यगोचरचरः संदर्शितो वो व्रजे निःसीमोत्सव उत्सवान्तर-तिरस्कार प्रगल्भोदयः।
नित्यं तत्सुखलिप्सुनात्र हि मयाऽस्मिन्नुद्धवे तद्वचोन्यासात्संप्रति वोऽन्तिके हितमिमं जानीत संप्रेषितम् ॥ ९३ ॥
कामिन्यः सन्तु सद्यस्तनसह-जघनाक्रान्तदेहाः सहस्रं ताभिर्नैकासिका मे क्वचिदपि भवितेत्येवमेवावधेयम्।
यस्मादेषोऽस्ति सद्यस्तनसह-जघनस्पर्धिरूपस्वभावो गोपीवित्तापहारीति च सभयहृदो मामवेक्ष्य ब्रुवन्ति ॥ ९४ ॥
युष्माभी रतिसङ्गसङ्गतसुखे घोषे मया क्रीडितं तत्संप्रत्यपि युष्मदीडितपदे घोषे मया रम्यते।
क्रीडाऽकारि पुरा सुराधिकरता या साधुवृन्दावने तां भूयोऽप्यनिवर्तितुं भृशमहं प्राप्तोत्सवः सम्प्रति ॥ ९५ ॥
स्वगोकुलेऽहं भवतीभिरद्धा सुराधिकाभिर्बहु रञ्जितोऽस्मि।
ऋणं निराकर्तुमनास्तदेतत् स्वगोकुले वः किल रञ्जयामि ॥ ९६ ॥
तत्तु मामकमेवास्ति गोकुलं भवदाश्रितम्। ममाश्रितं यूयमपि श्रयध्वं नमदाश्रितम् ॥ ९७ ॥
यथोद्धवेन स्वसखेन भूषिताः कृता भवत्यः स्मरता समागमम्।
निजोद्धवेनापि सवाचिकेन हि तथोत्सवश्रीरय-माविधीयताम् ॥ ९८ ॥
किमन्तरङ्गा किमनन्तरङ्गा प्रीतिः प्रभौ वः प्रियभावभाजाम्।
आद्या तु बाह्याङ्गवियोगसिद्धा परा तु नित्येति कुतो वियोगः ॥ ९९ ॥
भूयोऽङ्गसङ्गतिरनेन सहास्तु नित्यमेषोऽभिलाष इह वोऽभिनवो विभाति।
यस्माद्वयं श्रृणुम ईशपदेऽनुरक्तिर्युष्मत्कृता - ऽसकृदनङ्ग - समागमेति ॥ १०० ॥
तद्वः साङ्गमभूदनङ्गयुतमप्यङ्गाङ्गिभावैरलं सत्यः स्वार्पणकव्रतव्रजभुवि श्रीशप्रसादार्थकम्।
आपन्नोद्धवमा च पामरजनं त्रैलोक्यपर्याप्तिभूराप्ता कीर्तिरकल्मषोभयविधाऽनङ्गाप्तिसौलभ्यतः ॥ १०१ ॥
भूयो गोकुलवासिनां निजनिज - प्रारब्धकार्यादरेष्वत्यासक्तहृदां न जातुचिदपि प्रीतिः प्रभौ जायते।
जाता चेन्निखिलानपास्य विषयान् देवोऽपि बद्धादरस्तां तत्रोद्धववर्धितां प्रकुरुते स्पष्टं हि युष्मास्विदम् ॥ १०२ ॥
किमु वदामि भवद्विधिवैभवं यदसुरामरदुर्लभदर्शनः। श्रुतिविमृग्यपदोऽप्यमलोक्तिभिः श्रमहरो महरोच्चिरभूत्प्रभुः ॥ १०३ ॥
अङ्गीकृत्य विदेहभावमतुलानन्दावहं योषितो घोषस्थाः परमास्थया हरिपदे धीप्रस्थिताः सर्वतः।
घोषोऽशेषजनश्रुतिस्थितिरभूदेषो - ऽतिसन्तोषकृत् तद्घोषा न मृषाप्यदो वदत भो घोषोऽयमल्पोऽस्ति नः ॥ १०४ ॥
वृत्तीनां गोकुलोद्यद्विषयरसजुषां धीमतैवं विधेयं पाराङ्मुख्यं रिपुभ्यो मदनमदमहाक्रोधमोहादिकेभ्यः।
इत्थं जिज्ञासुभक्तोत्तमजनहितकृत् ख्यापयञ्छ्रौतमार्गं मन्ये श्रीशो विधायोद्धवमकथयत द्वारमात्मस्वरूपम् ॥ १०५ ॥

कृष्णप्रिया

भगवान् कहते हैं कि हे गोपियों ! यदि आप सर्व प्रकार के विषयों की दश-एकादश द्वादश, प्रकार की वृत्तियों से रहित सम्पूर्ण विशुद्ध मन मुझमें लगाकर नित्य मेरा स्मरण करते रहेंगे तब विना विलम्ब मुझे प्राप्त कर लेंगे ॥ ३७ ॥ हे गोपियों ? इस वन में शारदी रात्रिओं में क्रीडा करते हुए जो रास लीला की, तब जो गोपियों अन्तर्गृह गता होने के कारण न आ सकी परवश गृह में ही रहना पड़ा वे बडभागिनी गोपियों मेरे वीर्यों के मेरी लीलाओं के चिन्तन मात्र से अनायास मुझे प्राप्त कर गई ॥ ३८ ॥

श्रीशुक उवाच

एवं प्रियतमादिष्ट[1]माकर्ण्य व्रजयोषितः । ता [2]ऊचुरुद्धवं प्रीतास्तत्संदेशागतस्मृतीः ॥ ३९ ॥

गोप्य ऊचुः

दिष्ट्याहितो हतः कंसो यदूनां सानुगोऽघकृत् । दिष्ट्याऽऽप्तैर्लब्धसर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना ॥ ४० ॥
कच्चिद् गदाग्रजः सोम्य करोति पुरयोषिताम् । प्रीतिं नः[3] स्निग्धसव्रीडहासोदारेक्षणार्चितः ॥ ४१ ॥
कथं रतिविशेषज्ञः प्रियश्च [4]वरयोषिताम् । नानुवध्येत तद्वाक्यैर्विभ्रमैश्चानु[5]भाजितः ॥ ४२ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—एवम्, प्रियतमाऽऽदिष्टम्, आकर्ण्य, तत्सन्देशागतस्मृतीः; प्रीताः, ताः, व्रजयोषितः, उद्धवम्, ऊचुः ॥ ३९ ॥ गोप्यः, ऊचुः, यदूनाम्, अहितः, सानुगः, कंसः, हतः, दिष्टया, लब्धसर्वार्थैः, अच्युतः, अधुना, कुशली, आस्ते, दिष्ट्या ॥४०॥ हे सौम्य ! नः, स्निग्ध, सव्रीड, हासोदारेक्षणार्चितः, गदाग्रजः, कच्चित्, पुरयोषिताम्, प्रीतिम्, करोति ? ॥ ४१ ॥ रतिविशेषज्ञः, च, वरयोषिताम्, प्रियः, तद्वाक्यैः, विभ्रमैः, च (मनोरञ्जनैः) अनुभावितः, कथम्, न, अनुबध्येत ॥ ४२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यदूनामहितः शत्रुः अघकृद्दुःखदः । दिष्ट्येत्यानंदे । आप्तैः प्राप्तैर्हितैर्वा सह ॥ ३९ ॥ अन्या ऊचुः । कच्चिदिति । नोऽस्माकम् उचिताम् अस्मासु करणीयामित्यर्थः । प्रीतिं कच्चित्पुरयोषितां करोति । स्निग्धं च तत्सव्रीडहासेनोदारं सुंदरमीक्षणं तेनार्चितस्ताभिरस्माभिर्वा ॥ ४० ॥ अन्या ऊचुः । कथमिति । तासां वाक्यैर्विभ्रमैश्चानुभाजितः पूजितः ॥ ४१ ॥ पुनरन्या ऊचुः । अपीति । किमनया चिंतयाऽस्मान् कचित्प्रस्तुते प्रसंगे ग्राम्या अविदग्धाः स्मरति किम् ॥ ४२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आप्ता जगति बहवः सन्ति तद्व्यावृत्त्यर्थमाह—हितैरिति । अथागतस्मृतितया किञ्चिदाश्वासयुक्तानां पुनरननुसंहितप्रकटप्रकाशतया जातविरहस्फूर्तीनां वाक्यानि दर्शयितुमाह—गोप्य ऊचुरिति । अहो अस्माकं निजसुखेन सिद्धं नासिद्धेन वा किं, तस्य सुखमेवास्माकं परममंगलमित्यभिप्रेत्यादौ तदभिनन्दन्ति—दिष्ट्येति । लब्धसर्वार्थैरिति तेषामप्यशेषसुखसिद्ध्या तदर्थचिंता निरस्ता । अतः कुशली सुखी । अच्युत इति कथमपि सुखच्युतिराहित्याभिप्रायेण । अधुनेति पूर्वमसौ कंससंबंधेन बहुधा दुःखं प्राप्तोऽस्तीति भावः । दिष्ट्या एतदेव भद्रमिति वा । अहितस्तद्द्वेष्टा, यदूनामघकृच्च । आप्तैस्तत्र प्राप्तैर्युदुभिः ॥ ३९ ॥ अन्याः सापत्न्यमसहमानाः । गदोऽग्रजो यस्य स तथा, गदस्यातिशययोद्धृत्वेन क्रूरस्वभावत्वात्तदनुजोऽपि तादृश एवेति । सौम्येति निजार्तिश्रावणाथ तमाह्लादयंत्य आहुः । अस्माभिर्वेति पूर्वकालापेक्षयोक्तम् ॥ ४० ॥ अन्यास्तदागमने ससंदेहाः । विभ्रमैः शृङ्गारचेष्टाभिः, नायास्यतीति भावः । अयि मुग्धाः किमिदमपि जिज्ञासध्वेऽत्र सन्देह एव नास्तीत्यन्याः सोल्लुंठसान्तःकोपमाहुः—कथमिति । रतिविशेषज्ञः स सांप्रतं पुरयोषितां प्रियोऽभूत्कथं नानुबध्येत नासक्तो भवेत्, तासां वाक्यैस्तादृशैर्विभ्रमैश्चानुभाजितः निरंतरं ता भजन्नसौ तैर्भाजितः भजनं कारित इत्यर्थः । तेन वयं ग्रामयोषितः रतिविशेषं च महामत्ताय तस्मै न दित्सामहे, तादृशीमनुकूलां वाचं विभ्रमांश्च न जानीम इत्यतो वयं तेन ताः प्राप्य त्यक्ता एवेति निश्चिनुध्वमिति पृच्छ्यत इति भावः ॥ ४१ ॥ स्वस्मरणेन तदागमनं संभावयंत्योऽन्याः । अनया पुरस्त्रीकृततदादरादिरूपया । स्वैरकथांतरे स्वच्छन्दविषयव्यवहारविशेषे । प्रस्तुते प्रसक्ते सति । अपीति—सख्यः सत्यमेव वयं त्यक्तुमर्हत्वात्तेन त्यक्ता एव । किञ्च—लोके हि अतिनिकृष्टा अपि संभुक्तत्यक्ता अपि केनचिद्गुणांशेन दोषांशेन वा स्मृत्यारूढाः कदाचिद्भवंतीति पृच्छ्यत इत्याहुः । ग्राम्या अविदग्धाः । स्वैरकथांतरे गाननर्मप्रहेलीकवित्वादिरचनाकथामध्ये । भोः पुरस्त्रियः यूयं यथा गानादि जानीध्वे तथाऽस्मद्गोष्ठे गोप्योपि प्रायः किञ्चिज्जानंति । यद्वा—ता ग्राम्या एवं नैव जानन्तीति किमस्मानुल्लिखतीत्यर्थः । गोविन्दो गोकुलेन्द्र इति स्मरणार्हतोक्ता । साधो इति अत्र कदापि किञ्चिन्मिथ्या न वाच्यमिति संबुद्ध्यभिप्रायः ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथागतस्मृतितया किञ्चिदाश्वासयुक्तानां पुनरननुसंहितप्रकटप्रकाशतया जातविरहस्फूर्त्तीनां वाक्यानि दर्शयितुमाह । गोप्य ऊचुरिति । अहो अस्माकं निजसुखेन सिद्धेनासिद्धेनैव वा किं तस्य सुखमेवास्माकं सर्वमङ्गलमित्यभिप्रायेणादौ तदभि-

---

[1] देश–विज. । [2] तमूचुः–वीर. । [3] सुस्निग्ध–विज. । [4] पुर–वीर. विज.; स पुर–इति कस्यचित् । [5] भावितः–वीर. ।

नन्दन्ति। दिष्ट्येति। लब्धसर्वार्थैरिति। तेषामप्यशेषसुखसिद्ध्या तदर्थचिन्ता निरस्ता अतः कुशली सुखी अच्युत इति कथमपि सुखतश्च्युतिराहित्याभिप्रायेण। अधुनेति पूर्वमत्रासौ कंससम्बन्धेन बहुधा दुःखं प्राप्तोऽस्तीति भावः। अन्यत्तैः। यद्वा दिष्ट्या एतदेव भद्रमित्यर्थः। अहितस्तद्द्वेष्टा यदूनामघकृच्च। आप्तस्तत्र प्राप्तैर्यदुभिः। अन्यत् समम् ॥ ३९ ॥ अत्र वक्तृभेदेऽपि सङ्गतिरुक्षरोत्तरमैकमत्येनोक्तकार्यैव तथाहि अथ सुखस्थितिप्रकारं प्रेमलालसौत्कट्येनैव पृच्छन्त्यः तदीयविलासविशेषस्फूर्त्ताः पुरस्त्रीणां स्मरणात् सापत्न्यस्वभावेनेर्ष्यामङ्कुरयन्ति। कच्चिदिति। सप्तम्यर्थे षष्ठ्यौ। गदाग्रज इति। गदोऽयं प्रथमो देवरक्षितायाः पुत्रः श्रीकृष्णानुजः तस्मिंश्च सम्प्रत्यनुजताभिमननेन तस्याधिक्ये प्रीतिं श्रुत्वा गोकुलसम्बन्धः शिथिलीभूत इति व्यञ्जयन्त्यः स्वेषु तद्वत्स्नेहशैथिल्यं पुरस्त्रीषु तदाधिक्यं व्यञ्जितवत्यः उदारमुत्कृष्टम् ॥ ४० ॥ अहो तत् किं पृच्छ्यते सन्देह एव तत्र नास्तीत्याहुः। कथमिति। प्रियश्च रूपवेशोपकारादिना तथा तासां वाक्यविभ्रमैरनुभाजितः। तद्वाक्यैर्विभ्रमैश्चेति क्वचित्। एवं मिथः प्रीतिहेतुकवैदग्ध्यादिकमुक्तम् अतः कथं नानुबध्येत कुतस्तासु आसक्तो न भवेत् अपितु भवितैवेत्यर्थः ॥ ४१ ॥ अथोत्कण्ठया सोल्लुण्ठं पृच्छन्ति। अपीति। क्वचित् कस्मिंश्चित् प्रस्तुते प्रस्तावे। प्रस्तावमेव विशिषन्ति। पुरस्त्रीणां या गोष्ठी सभा तन्मध्ये या स्वैरकथा स्वच्छन्दवार्त्ता तस्या अन्तरे मध्ये ग्राम्या अपि नः किं स्मरति। गोविन्दः गोकुलेन्द्रः इति स्मरणार्हतोक्ता। हे साधो! इति तत्र कदापि किञ्चिन्मिथ्या न वाच्यमिति भावः। यद्वा। क्वचिदित्यस्याप्यग्रेऽप्यन्वयः। अहो अन्यप्रस्तावे क्वचिन्न स्मरतु पुरस्त्रीणां गोष्ठीमध्येऽपि क्वचित् स्मरति तथापि स्वैरकथान्तरे क्वचित् स्मरति अन्यत् समम् ॥ ४२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो! अस्माकं निजसुखेन सिद्धेनासिद्धेनैव वा किम्, तस्य सुखमेवास्माकं सर्व्वमंगलमित्यभिप्रायेणादौ तदभिनन्दन्ति—दिष्ट्येति। लब्धसर्व्वार्थैरिति तेषामप्यशेषसुखसिद्ध्या तदर्थचिन्ता निरस्ता, अतः कुशली सुखी। अच्युत इति कथमपि सुखतश्च्युतिराहित्याभिप्रायेण। अधुनेति पूर्व्वमत्रासौ बहुधा दुःखं प्राप्तोऽस्तीति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, दिष्ट्या एतदेव भद्रमित्यर्थः। अहितस्तद्द्वेष्टा यदूनामघकृत्, आप्तैस्तत्र, प्राप्तैर्यदुभिः, अन्यत् समानम् ॥ ३९ ॥ अत्र बहुधा वाक्यभेदेन वक्तृभेदकल्पनायां योग्यायामपि यथाकथञ्चित् संगतिः पूर्व्ववत् कार्य्या। सुखस्थितिप्रकारमेव प्रेमलालसौत्कट्येन पृच्छन्ति—कच्चिदिति; गदाग्रज इति पौरस्त्रीजनसंगत्या पुरस्त्रीप्रीत्याचरणार्हतोक्ता। उदारमुत्कृष्टम्। अन्यत्तैर्व्याख्यातम्। यद्वा, नोऽस्मदीयः स्वामी गदाग्रज इत्यन्वयः। अथवा, अधुनास्मासु कृपां किं कर्त्तेति प्रेमार्त्त्या पुनः पृच्छन्ति—कच्चिदिति। पुरयोषितां स्निग्धसव्रीड-हासादिभिरर्च्चितोऽपि नोऽस्माकं प्रीतिं किं करोति करिष्यति? सामीप्यापेक्षया वर्त्तमाना ॥ ४० ॥ अहो तत् किं पृच्छ्यते, सन्देह एव तत्र नास्तीत्याहुः—कथमिति। प्रियश्च रूपवेशोपकारादिना तथा तासां वाक्यविभ्रमैरनुभाजितः; एवं मिथः प्रीतिहेतुवैदग्ध्यादिकमुक्तम्। अतः कथं नानुवध्येत, कुतस्तास्वासक्तो न भवेत, अपि तु भवितेवेत्यर्थः। यद्वा, तद्वाक्यविभ्रमैर्नानुवध्येत, न वशीक्रियेत, तैरेवानुभाजितश्च। अन्यत् समानम्। पक्षान्तरे—ननु तस्य ताभिः संग एव नास्तीति चेत्तन्न सम्भवतीत्याहुः—कथमिति। अर्थः स एव; अतस्तास्वासक्तोऽस्माकं प्रीतिं न कर्त्तैवेति भावः ॥४१॥ सुपत्न्यादिष्वपि भवत्यो दृश्यन्त इति सन्देशतः श्रुतेऽपि स्वसौभाग्ये पुनः प्रेमविशेषेणाशान्त्या पृच्छन्ति—अपीति। क्वचित् कस्मिंश्चित् प्रस्तुते प्रस्तावे, तमेवाहुः—पुरस्त्रीणां या गोष्ठी सभा तन्मध्ये या स्वैर-कथा स्वच्छन्द-वार्त्ता, तस्य अन्तरे मध्ये ग्राम्या अपि नः किं स्मरति? गोविन्दो गोकुलेन्द्र इति स्मरणार्हतोक्ता। हे साधो! इति तत्र कदापि क्वचिन्मिथ्या न वाच्यमिति भावः। यद्वा, क्वचिदित्यस्याग्रेऽप्यन्वयः; अहो! अन्यप्रस्तावे क्वचिन्न स्मरतु नाम, गोष्ठीमध्येऽपि क्वचित् स्मरति, तत्रापि स्वैरकथान्तरेऽपि क्वचित् स्मरति? अन्यत् समानम्। पक्षान्तरे—अहो! प्रीतिमस्माकं न करोतु नाम, कदाचित् किं स्मरत्यपीति पृच्छन्ति—अपीति। अर्थः स एव। एवमग्रेऽन्यदप्यूह्यम् ॥ ४२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दिष्ट्येति। यदूनामहितः शत्रुरघकृत् दुःखकृत् कंसः हतः किलैतद्दिष्ट्या अयमस्माकं महानानन्द इत्यर्थः। लब्धाः सर्वेऽथा पुरुषार्था यैस्तैराप्तैर्मित्रैः सहाच्युतोऽधुना कुशल्यास्ते किल ॥ ३९ ॥ कच्चिदिति। हे सौम्य! गदाग्रजः श्रीकृष्णः पुरयोषितां स्निग्धं च तत्सव्रीडहासेनोदारमीक्षणं तेनार्चितो बहुमतो वशीकृत इति भावः। तासां प्रीतिमस्मासु कर्तव्यां करोति कच्चिदितीष्टप्रश्ने ॥ ४० ॥ ननु स्वतन्त्रः स कथं तद्वशः स्यादत आहुः। कथमिति। तद्वाक्यैः पुरयोषिन्मधुरवाक्यैः तद्विभ्रमैश्चानुभाजितः कथं नानुबध्येत अनुबध्येतैवेत्यर्थः ॥ ४१ ॥ अपीति। हे साधो! पुरस्त्रीणां गोष्ठीनां मध्ये तत्रापि ग्राम्यस्वैरकथान्तरे ग्रामे भवा ग्राम्या जनास्तेषां सम्बन्धि यादृच्छिककथान्तरे तस्मिन् प्रस्तुते सति तदा नोऽस्मान् स्मरति किं प्राधान्येनास्मान् न स्मरत्येव यदृच्छयापि स्मरति किमित्यर्थः ॥ ४२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यदूनामहितः आप्तैर्जनैः ॥ ३९–४० ॥ तासां वाक्यैः कथं नानुबध्येत विभ्रमैः शृङ्गारचेष्टाभि अनुभाजितः सभाजितः ॥ ४१ ॥ ग्राम्याणां शब्दादिविषयलालसानां स्वैरकथान्तरे स्वच्छन्दविषयस्य व्यवहारविशेषे प्रस्तुते प्रसक्ते ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

इदानीं श्रीकृष्णसन्देशैर्गतसम्मोहा लब्धाश्वासाश्च विशेषवार्त्तां पृच्छन्त्य आहुः—कच्चिदित्यादि । हे सौम्य ! गदाग्रजः कच्चित् पुरयोषितां प्रीतिं करोति ? असम्भावनायां प्रश्नः । असम्भावनैव कुतः ? इत्याहुः—नोऽस्माकं स्निग्धसव्रीडहासोदारेक्षणैरर्चितश्चेत् । एवमस्मद्विधकटाक्षपूजितोऽन्यत्र किं रज्यतीति भावः ॥ ४० ॥ अन्या आहुः—कथं न करिष्यति, करोत्येव । तथाहि—कथं रतिविशेषज्ञ इत्यादि । रतिविशेषज्ञत्वात्तदुचितमेव पुरयोषितां प्रियः सन् न तद्वाक्यैरनुबध्येत, अपि त्वनुबध्येत ॥ ४१ ॥ अन्या आहुः—अपीति । तस्मिन् समये किमस्मान् स्मरति ? स्मरणेऽसम्भावनामाह—पुरस्त्रीणां गोष्ठीमध्ये, यतो वयं ग्राम्याः । प्रस्तुते प्रस्तावोचिते स्वैरकथान्तरे स्वच्छन्दकथामध्ये । यद्वा, स्वैः सुहृद्भिरकथान्तरे सति कथान्तरविरमो यदा च भवति ॥ ४२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कच्चिदित्यसम्भावनायां प्रश्नः । अकरणे हेतुमाह—नोऽस्माकं स्निग्धं सव्रीडहासोदारेक्षणार्चित इति तथापि किं करोति ॥ ४० ॥ अन्या आहुः—कथं न करिष्यति ? रतिविशेषज्ञश्चेत् रतिविशेषानुरूपं रमत इति यावत् । अतः कथं नानुबध्येत, एतत् पृच्छ्यताम् ॥ ४१ ॥ अस्मान् किं तस्मिन् समये स्मरतीत्याहुः—अपि तु स्मरतीत्यादि । अत्र कः सन्देह इति चेत् सन्देहे हेतुमाह—ग्राम्या इति ॥ ४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दिष्ट्या भद्रमित्यर्थः । अहितः शत्रुः ॥ ३९ ॥ अन्याः सेर्ष्यमाहुः । कच्चिदिति । गदाग्रज इति । गदो देवरक्षितायाः प्रथम पुत्रः देवकीपुत्रमात्मानं मत्त्वा सम्प्रति तस्याग्रजोऽभूदिति गोकुलसम्बन्धस्तस्य शिथिलीभूत इति द्योतयामासुः । नोऽस्माकं स्निग्धं च तत् सव्रीडहासेनोदारं च यदीक्षणं तेनास्माभिरर्चितः स सम्प्रति पुरयोषितां प्रीतिमुत्पादयति सहासावलोकादिभिस्ता अर्च्चयति किं शिव शिव अस्मदर्च्चनीयः संस्तासामर्च्चकोऽभूदित्यस्माकमेव दौर्भाग्यमिति भावः ॥ ४० ॥ अयि मुग्धाः ! किमिदमपि जिज्ञासध्वे अत्र सन्देह एव नास्तीत्यन्याः सोल्लुण्ठं सान्तःकोपमाहुः । कथमिति । रतिविशेषज्ञः स साम्प्रतं पुरयोषितां योऽभूत् कथं नानुबध्येत नासक्तो भवेत् । तासां वाक्यैस्तादृशैर्विभ्रमैश्च अनुभाजितः निरन्तरं ता भजन्नसौ तैर्भाजितः भजनं कारित इत्यर्थः । तेन वयं ग्रामयोषितः रतिविशेषज्ञ महामत्ताय तस्मै न दित्सामहे । तादृशीवाचमनुकूलां विभ्रमांश्च न जानीम इत्यतो वयं तेन ताः प्राप्य त्यक्ता एवेति निश्चिनुध्वमिति पृच्छ्यते इति भावः ॥ ४१ ॥ अपीति । सख्यः ! सत्यमेव त्यक्तुमर्हत्वात्तेन वयं त्यक्ता एव किञ्च लोके हि अतिनिकृष्टा अपि सम्भुक्तत्यक्ता अपि केन चिद्गुणांशेन दोषांशेन वा स्मृत्यारूढाः कदाचिद्भवन्तीति पृच्छ्यते इत्याहुः । ग्राम्या अविदग्धाः स्वैरकथान्तरे गाननर्मप्रहेलीकवितादिरचनाकथामध्ये भोः पुरस्त्रियः यूयं यथा गानादिकं जानीध्वे एवमस्मद्गोष्ठे गोप्योऽपि प्रायः किञ्चित् किञ्चिज्जानन्ति । यद्वा । एवं नैव ता ग्राम्यत्वाज्जानन्तीति किमस्मानुल्लिखतीत्यर्थः ॥ ४२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

यदूचुस्तदाह । दिष्ट्येति । अहितः शत्रुः प्रेषणेन विरहकारणत्वादस्माकमपि यदूनामघकृत् दुःखदः यद्वा यदूनामहितः ब्राह्मणादिदुःखकरत्वात्पापकृत् हतस्तत्रापि सानुगः अनुजसहितः तद्दिष्ट्या परमानन्दकरं यच्च लब्धसर्वार्थैराप्तैर्वसुदेवादिभिः सहाच्युतोऽधुना कुशली आस्ते तदपि दिष्ट्या यद्यपि प्रियतमसन्देशैर्लब्धस्मृतयस्तथाप्यारूढसख्यभावा विरहव्याकुलचित्ता उक्तवाक्येन स्वदुःखमपि व्यञ्जयन्ति यदूनां शत्रुर्हतः अस्माकं तु सर्वेऽपि यदव एव सम्प्रति शत्रवो जीवन्ति च लब्धसर्वार्थाः सम्पन्ना वयं तु नष्टसर्वार्थाः तेषामिदानीं संनिहितत्वादच्युतोऽस्माकं तु प्रच्युत इति तेषां भाग्यातिशयोऽस्माकं भाग्यानतिशय इति ॥ ३९ ॥ हृदिस्थं स्वभावभूतं मात्सर्य्यं गूहितुमशक्ताः स्पष्टं समात्सर्यमाहुः । कथमिति । सः अनुभूतपूर्वः रतिविशेषान् जानातीति रतिविशेषज्ञः अत एव पुरयोषितां प्रियः प्रीतिविषयः स्वदत्तसुखविशेषाभिज्ञस्य प्रीतिविषयत्वनियमात् तद्वाक्यैर्व्यङ्ग्यार्थगर्भितैर्विभ्रमैः कटाक्षादनेत्रादिविचेष्टितैश्चकारान्मनोवृत्तिभिश्च तथा च वाक्कायमानसव्यापारैरनुभावितः अनुभवपर्यन्तं नीतः अनुभव युक्तो वा कारितः पूजित इति वा अनुभाजित इति क्वचित्पाठः कथं नानुबध्येत प्रेमशृङ्खलावद्धः कथं न भवेत् अमाकं तादृशनयनसामग्रीविधुरत्वादितो गतस्तद्देशात्क्वापि न गमिष्यतीति भावः । पुरेणसहितानां योषितां प्रिय इति वा तथा च पुरवासिनां तत्पत्यादीनामपि तदासक्तचित्तत्वान्नास्ति तादृशबन्धनप्रतिबन्धकं किञ्चिदिति भावः ॥ ४० ॥ अस्मासु करणीयां प्रीतिं तासु करोतीत्यनुसन्धाय सदुःखमाहुः । कच्चिदिति । स्निग्धं च तत्सव्रीडहासेनोदारमीक्षणं तेनार्चितः अमाकं तादृशकटाक्षेणार्चितो रामानुजो यथा च प्रीतिं करोति स्म तथेदानीं गदाग्रजः पुरयोषितां तेनार्चितस्तासां तथा प्रीतिं करोति कच्चित् यद्वा अस्माकं तेनार्चितः प्रीतिं न कृतवान् अपि तु विहाय गतः पुरयोषितां तु प्रीतिं करोति कच्चित् यद्वा नस्तेनार्चितः प्रीतिं पुरयोषितां करोति कच्चित् सौम्यस्त्वमतस्त्वामेवं पृच्छाम इति सम्बोधनाशयः यद्वा अस्माकं तादृशकटाक्षेणार्चितोऽस्मास्वासक्तचित्तस्तासां

प्रीतिं मनोऽनुरञ्जनमात्र करोति कच्चित् यद्वा स्त्रियः कामितकामिन्यः लोकः पूजित-पूजक इति न्यायादस्माक तादृशेक्षणेनार्चितोऽतस्तासामपि तेनार्चितः ॥ ४१ ॥ यद्यप्यधुना भगवान् ब्रह्मोपदेष्टृत्वाद्गुरुर्जातस्तथापि सखित्वभावनाभावितस्वान्तानामस्माकं तथात्वेनैव स्मृतिपथमारोहति न गुरुत्वेन नापि परमात्मत्वेनातो भगवानपि सखीत्वेनैवास्मान् स्मरति चेत्तत्राह नास्त्यस्माकमपराध इति मनसि निधाय पृच्छन्ति नोऽस्मान् स्मरति स्मरणसम्भावनया प्रश्नः । ननु स्मरणाभावे कथमुपदेशार्थं मां प्रेषितवानित्याशङ्क्य नोपदेशार्थं स्मरणं वयं पृच्छामः किन्तु पूर्वानुभूतवृत्तान्तं संबन्धित्वेनेत्याशयेनाहुः । पुरस्त्रीगोष्ठीमध्ये ननु तत्र भवतीनां स्मरणे का सम्भावनेति चेत्तत्राहुः । प्रस्तुते क्वचित् एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति न्यायात् कस्मिंश्चिदस्मत्सदृशप्रसङ्गे प्रस्तुते सति । ननु युष्मत्संबन्धिस्मरणे कः प्रसङ्ग इति चेत्तत्राह । स्वैरकथान्तरे अहो व्रज इवात्र स्वैरतया प्रवृत्तिं कर्तुं न शक्तोऽसीत्येवं कथान्तराले किञ्च व्यावर्त्यत्वे वा न तु स्मरणमावश्यकमित्याशयेनाहुः । ग्राम्या इति । स्वस्मिन्स्मरणकर्मत्वयोग्यतामुपपाद्य तस्मिंस्तत्कर्तृत्व योग्यतामाहुः । गोविन्द इति । अस्मद्रक्षणेन लब्धगोविन्दपदो भगवान् कृतान्यस्माभिः सार्द्धंविचेष्टितानि स्मर्तुं योग्य इति साध्नोति परकार्यमिति साधुस्त्वमस्मत्सुखावहमेतदुत्तरं निर्व्याजेन देहीति सम्बोधनाशयः ॥ ४२ ॥

गूढार्थदीपिनी

स्मृतोः प्राप्तलीलास्मृतय ॥ ३९ ॥ अघकृत् दुखदः । अहितः शत्रुः । दिष्ट्या शोभनं जातम् । आप्तैः तत्र प्राप्तैः यदुभिः ॥ ४० ॥ नोऽस्मासु उचितां प्रीतिं तास्वपि करोति कच्चित् । सप्तम्यर्थे षष्ठ्यौ । स्निग्धं सरसं सव्रीडहासेन उदारम् आकर्षकं च यत् ईक्षणं तेन अर्चितः ॥ ४१ ॥ बिभ्रमैः कटाक्षादिभिः सत्कृतः कथं नानुबध्येत ॥ ४२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अघकृत् दुःखकृत् आप्तैः शिष्टैर्यदुभिः सह ॥ ३९ ॥ अन्या आहुः । हे सौम्य ! नोऽस्माकं करणीयां प्रीतिं पुरयोषितां कच्चित् किं करोति स्निग्धञ्च तत् सव्रीडहासेनोदारमीक्षणं तेनार्चितस्ताभिः सत्कृतः ॥ ४० ॥ अन्याः आहुः । कथमिति । विभ्रमैर्विलासैश्चानुभाजित पूजितः ॥ ४१ ॥ अन्या आहुः । अपीति । हे साधो ! पुरस्त्रीणां गोष्ठीमध्ये स्वैरकथान्तरे यादृच्छिककथान्तरे प्रस्तुते प्रवृत्ते सति ग्राम्याः अविदग्धाः नः अस्मान् स्मरति किम् ॥ ४२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यदूनां सानुगः सदासोऽघकृत्पापकार्यहितः कंसो दिष्ट्या हतो दिष्ट्यैव । आप्तैर्वसुदेवादिभिर्लब्धाः सर्वार्था येन स सन् अधुनाऽच्युतः कुशल्यास्ते कच्चित् । अच्युत इति वचनेन कुशलप्रश्नो लोकमपेक्ष्येति सूचयन्ति ॥ ३९ ॥ पुरयोषितां गदाग्रजः प्रीतिं करोति कच्चित् । ताभिः पुरयोषिद्भिः सुस्निग्धानि सव्रीडानि हाससहितान्युदाराणीक्षणान्यवलोकनानि तैरर्चितः सन् एवं तत्सत्कृतः स्वयं तत्फलरूपां प्रीतिं करोति कच्चिदित्यन्वयः । क्वचिदिति पाठे क्वचित्करोति किमित्यर्थः ॥ ४० ॥ अनुभाजितः सभाजितः पात्रीकृत इति वेति विशेषज्ञः पुरयोषितां प्रियश्च संस्तद्वाक्यैः पुरयोषितां विभ्रमैर्विलासैः कथं नानुबद्ध्येत न बद्धः स्यात्स्याच्च बद्ध एवेति भावः ॥ ४१ ॥ केवलमेकान्तिको देवस्येति परमरहस्यं पृच्छन्ति । अपीति । गोविन्दः पुरस्त्रीणां गोष्ठीमध्ये व्यवहरणान्तरे तथा ग्राम्यस्वैरकथान्तरे सुरतकालिकेच्छाप्रवृत्तकथान्तरे प्रस्तुते प्रसक्ते वा कच्चिन्नः स्मरति ॥ ४२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवद्वीर्यस्मरणावश्यकमिति कृतमभिनन्द्य भाविवीर्यस्मरणार्थं कुशलं पृच्छन्ति । दिष्ट्येति । दोषरहितास्त एव भावाः पुरुपार्थसाधका इति सिद्धानेव कीर्त्तयन्ति । दिष्ट्या अस्मदादिभाग्येन कंसो हतः अदृष्टस्य कारणत्वमातुलवधदोषाभावाय पूर्वं हि ताः अक्रूर आगतः किंचेति वाक्ये तं दोषं गृहीतवत्यः तस्य प्रतिप्रसवोऽत्र निरूप्यते यतः अहितः न स्वस्य नान्येषामतस्तस्यापि भाग्येन स हतः किञ्च सुतरां यदूनां भक्तानामहितः अनेन प्रसङ्गात् भ्रातृवधः कृत इति निराकृतः केवलं हितमेव न करोतीति न किन्तु अघकृत् पापं सम्पादयति हितं न करोति पापं च कारयति येन तेषां परलोकनाशः स्यात् तस्मादेतादृशो हन्तव्य एव किञ्च आप्तैर्बन्धुभिः पुनर्भगवत्कृपयालब्धोऽर्थः सर्वोऽपि पुरुषार्थो यैः यत्र कालातिक्रमोऽपि स्वतः सिद्धः अनेन तेषामहितं दूरीकृत्य हितं च सम्पाद्य अग्रे तदनुवृत्त्यर्थमधुना कुशली किमास्ते केवलमयमनुवादः यतः सोऽच्युतः न तस्य काचिदन्या सम्भावनास्ति ॥ ३९ ॥ एवं माहात्म्यज्ञानं सर्वोपकारकत्वं च भगवतो निरूपितं ततः पुरस्त्रीषु मात्सर्याभावज्ञापनार्थमाहुः । कच्चिद्गदाग्रज इति । गदाग्रजत्वेन वंशजननसामर्थ्यमुक्तम् अस्मिन् गते मथुरायां रोहिण्या यदो जातः अनेन भगवतः प्रद्युम्नरूपता निरूपिता अत एव स्त्रीणां सर्वकामनापूरक इति पुरयोषितां प्रीतिं कच्चित् करोतीति प्रश्नः सङ्गच्छते सौम्येति सम्बोधनं तथा सति दोषदृष्ट्यभावाय । ननु त धाष्ट्र्ये न कथं प्रसन्ना भविष्यन्तीत्याशङ्क्याहुः । नः स्निग्धसव्रीडहास्या दारेक्षणार्चित इति । लोकः पूजितपूजक इति प्रथमतोऽस्माभिः स्निग्धादिभावैरर्चितः अनेनास्माभिः पूजित एव न तु भगवानुपभुक्त इति कामाभावः सूचितः । अनेन रसाभासोऽपि निरूपितः कुत्सितेऽपि रसे कदाचित्पुरुषः प्रवर्तत इति भगवतोऽप्यस्मासु प्रवृत्तिः इत उत्तमाः

पुरस्त्रियः तत्रापि न स्वतः प्रवृत्तिः किन्तु तदिच्छयेति ज्ञापयितुं तासां प्रीति करोतीति मादौ धाष्ट्र्य सिद्ध्यर्थं स्निग्धा भगवति दृष्टिः ततः उदारा भगवद्धर्मप्राप्तिः सूचिता भगवतोऽपि सौख्यदायिनी शब्दव्यवहितापि सर्वेषां सर्वपुरुषार्थदायिनी च मध्ये हासः स्वपुरुषार्थसूचकः तस्यापि प्रथमप्रवृत्तौ पश्चात्कृतार्थतेति ज्ञापयितुं व्रीडाप्युक्ता एवंविधैरीक्षणैरर्चितः प्रथमतः स्नेहेन परिग्रहः ततः भगवति प्रसन्ने प्रथमप्रवृत्त्या व्रीडा ततो निर्भरानन्देन हासः ततः सर्वामेव कलां प्रयच्छतीति उदारा भवति ॥४०॥ ननु विलेपो भगवान् किमित्येवं करिष्यतीति आशङ्क्याभिप्रायमाहुः। कथमिति। स हि सर्वरतिविशेषान् जानाति नागरिकं बन्धो नागरीष्वेव भवति अन्यथेदं ज्ञानं व्यर्थं स्यात् कदाचिदेतदवश्यप्रकटनीयं स्वकीयासु तु न भवत्येव किञ्च उत्तमस्त्रीणां स प्रियः प्रीतिविषयः अन्यथोत्तमत्वमेव न स्यादतस्तासां जन्मसाफल्याय ज्ञानसाफल्याय स्वस्य ज्ञानसाफल्याय च कथं तद्रसाभिनिविष्टो न भवेदित्याहुः। नानुमध्येतेति। अनुबन्धो नाम निरन्तर वर्द्धमाना प्रीतिः यथा रेतोमात्रेण न प्रीतिर्नाप्युत्पत्ते नाप्यल्पवृद्धे नापि जातमात्राङ्कुरे यथा सर्वगुणसम्पन्ने पुत्रे भवति अयमनुबन्धः अतः कथं निरन्तरं वर्द्धमानया प्रीत्या नानुबध्येत। ननु तथापि पोषकाभावात् मूर्खे पुत्र इव नानुबन्धः स्यात्तत्राह। तद्वाक्येति। तासां वाक्यानि विभ्रमाश्च मनोऽनुरञ्जनं चकारार्थः एवं कायवाङ्मनसामुत्तमधर्मैः अनुभावितः अनुभावितः अनुभवपर्यंतं नीतः भावकद्रव्यैरेव वा भावितः अनुभावयुक्तो वा कारितः अभिनिविष्टो हि रसः स्वानुभावं जनयति वाक्यादीनि वोद्दीपकानि अतो भगवान् प्रकारद्वयनापि विभक्तवीर्यः आविर्भूतः सम्यग्भावित इति गोपिकानां दोषाभावपूर्विका सर्वगुणासिद्धिर्निरूपिता ॥ ४१ ॥ भगवानिदानीमुपदेशेन गुरुर्जातः अस्माभिस्तु पूर्ववासनया पूर्वावस्थोऽवश्यं स्मर्त्तव्यः तथा सति भगवता चेत् स्वभावस्त्यज्यते तदा अस्माकमपराधो भवतीति भगवतः अस्या अवस्थायाः स्मरणं पृच्छन्ति। अपि स्मरतीति। असम्भावनया प्रश्नः। ननु स्मरणाभावे कथमुपदेशार्थं प्रेषणमिति चेत्तत्राहुः। पुरस्त्रीणं गोष्ठीमध्य इति। ननु शास्त्रार्थज्ञानभावनादशायां नन्वेवमुपदेष्टा स्मरिष्यतीति का सम्भावना तत्राहुः। गोविन्द इति। स ह्यस्माकमिन्द्रः इन्द्रत्वायैव चास्मदुपयोगं कृतवान् किञ्च अनुभूतत्वात्तादृशपदर्थानुभवे सदृशादयः संस्कारबोधका इति कदाचित्स्मरणं भवेत्तदाहुः। प्रस्तुते क्वचिदिति। तदा हि भगवान् स्वाभिलषितावस्थः सत्यसंकल्पश्च ततस्तामप्यवस्थां सम्पादयेत् किञ्च व्यावर्त्तकत्वे स्मरणमावश्यकमित्याहुः। ग्राम्या इति। कथमेवमन्यथा बन्धं करोषि गोपिकेवेति स्वैरकथायाः स्वेच्छाकथायाः अन्तरे मध्ये। नन्वेतदहं कथं जाने इति चेत्तत्राहुः। साधो ! इति। सर्वोपकारी च भगवान् अतो गुह्यमपि वक्तव्यमिति ॥ ४२ ॥

श्रीसुबोधिनी–सारः

यदूनामघकृत् पापः सानुगो भृत्यादिसहितः कसोऽहितः शत्रुर्हतः दिष्ट्या मंगलं जातं प्राप्तसर्वार्थैराप्तैर्गुर्वादिशिष्टजनैः सहाच्युतः श्रीकृष्णोऽधुना कुशल्यास्ते दिष्ट्या ॥ ३९ ॥ नोऽस्माकं स्निग्धं प्रेम व्रीडेन हासेनोदारमीक्षणं तेनार्चितो गदाग्रजः कृष्णः पुरयोषितां माथुरीयानां स्त्रीणां प्रीतिं करोति कच्चित्किं हे सौम्य ॥ ४० ॥ अन्या ऊचुः। रतिविशेषनिपुणः वरस्त्रीणां प्रियः तासां वाक्यैर्विभ्रमैः पूजितः कथं नानुबध्येत तद्वशो भवेदित्यर्थः ॥ ४१ ॥ अन्या आहुः। हे साधो प्रस्तुते प्रसंगे पुरस्त्रीणां गोष्ठीमध्ये स्वेच्छाकथांतरे क्वचित ग्राम्या अविदग्धा नोस्मान्स्मरति अपि किम् ॥ ४२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं प्रियतमस्य कृष्णस्यादिष्टं श्रुत्वा तस्य सन्देशेनागता तल्लीलाविषयिका स्मृतिर्यासां ता व्रजयोषितः प्रीता हृष्टाः सत्य उद्धवं प्रत्यूचुः। 'आगतस्मृतीः' इति द्वितीया प्रथमार्थे ॥ ३९ ॥ तासामुक्तिमाह—दिष्ट्येति चतुर्दशभिः। 'दिष्ट्या' इति आनन्दे। यदूनामघकृत् दुःखदः सानुगो भ्रातृमल्लादिसहितो कंसो हत एतद्दिष्ट्या, तेनास्माकं महानानन्दो जातः। लब्धा अर्था धनादिसम्पदो यैस्तैराप्तैर्वृद्धैर्वसुदेवादिभिः सह अच्युतः कृष्णोऽधुना कुशल्यास्ते एतदपि दिष्ट्या ॥ ४० ॥ 'त्वद्दर्शनेनास्माकं महानानन्दो जात' इति सूचयन्त्यः सम्बोधयन्ति—सौम्येति। कच्चिदिति प्रश्ने। किंचित् पृच्छाम इत्यर्थः ॥ नोऽस्माकं गदाग्रजः श्रीकृष्णः पुरयोषितां स्निग्धं च तत्सव्रीडहासेनोदारं मनोरथपूरकं च यदीक्षणं तेनार्चितः सत्कृतः सन् तासां प्रीतिं करोति ॥४१॥ अन्या ऊचुः—कथमिति। रतिविशेषं जानातीति रतिविशेषज्ञः, अत एव च पुरयोषितां प्रियः, अत एव तासां मधुरवाक्यैर्विभ्रमैर्नानाविलासैश्चानुभाजितः सत्कृतः कथं न अनुबध्येत वशवर्ती भवेदित्यन्वयः ॥ ४२ ॥

अन्वितार्थप्रकाशिका

एवमिति। एवं प्रियतमस्य कृष्णस्यानिष्टं श्रुत्वा तस्य संदेशेनागता तल्लीलाविषयिका स्मृतिर्यासां ताः गुणाभाव आर्षः। व्रजयोषितः प्रीता सत्य उद्धवं प्रत्यूचुः ॥ ३९ ॥ दिष्ट्येति। अहितः यदूनामघकृद् दुःखदः सानुगो भ्रातृमल्लादिसहित कंसो हत एतद् दिष्ट्या। लब्धा अर्था धनादिसम्पदो यैस्तैराप्तैः प्राप्तैर्हि तैर्वसुदेवादिभिः सहाच्युतः कृष्णोऽधुना कुशल्यास्त एतदपि दिष्ट्या ॥ ४० ॥ कच्चिदिति। हे सौम्य ! कश्चित् प्रश्ने। किं पृच्छाम इत्यर्थः। नोऽस्माकं गदाग्रजः श्रीकृष्णः पुरयोषितां स्निग्धं

च तत्सव्रीडहासेनोदारं मनोरथपूरकं च यदीक्षणं तेनार्चितः सत्कृतः संस्तासां प्रीतिं करोति । यद्वा । नोऽस्माकं करणीयां प्रीतिं पुरयोषितां करोति स्निग्धसव्रीडहासोदारेक्षणेन ताभिरस्माभिर्वार्चितः ॥ ४१ ॥ कथमिति । रतिविशेषं जानातीति रतिविशेषज्ञः अत एव च पुरयोषितां प्रियः अत एव तासां मधुरवाक्यैर्विभ्रमैर्नानाविलासैश्चानुभाजितः सत्कृतः कथं नानुवध्येत वशवर्ती न भवेत् ॥ ४२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वकृतया कृष्णनिमितया शुचा शोकेन तप्ताः नोऽस्मान् गात्रैः सर्वांगस्पर्शेन संजीवयन् दाशार्हः इह व्रजे एष्यति न वा ॥ ३९ ॥ ननु स श्रीकृष्ण एष्यत्येव तत्रापराः प्राहुः कस्मादिति ॥ ४० ॥ अन्याः समदृशो गोप्यः प्राहुः किमिति आप्तकामस्य पूर्णकामस्य कृतात्मनो वशीकृतमनसः महात्मनः सर्वोत्कृष्टस्य लक्ष्मीपतेः किंकः अर्थः प्रयोजनं सर्वाभिर्नारीभिः क्रियेतासिध्येत न कश्चिदित्यर्थः ॥ ४१ ॥ स्वैरिणी वारांगना ॥ ४२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दिष्ट्येति । यदूनां अहितः शत्रुः, अघकृत् दुःखदः, कंसः सानुगः हत, दिष्ट्या तेनास्माकं महानानन्द इत्यर्थः । लब्धाः सर्वेऽर्थाः पुरुषार्था यैस्तैः, आप्तैर्मित्त्रैः सह, अच्युतः अधुना, दिष्ट्या सुखयुक्तः सन्, कुशली आरोग्यतायुक्तः, आस्ते ॥ ३९ ॥ कच्चिदिति । हे सौम्योद्धव, गदाग्रजः श्रीकृष्णः, पुरयोषिद्भिरिति शेषः । स्निग्धं च तत् सव्रीडहासेनोदारं यदीक्षणं तेनार्चितः बहुमतः, वशीकृतः सन् इत्यर्थः । नः प्रीतिं, पुरयोषितां करोति कच्चित् । कच्चिदितीष्टप्रश्ने पुरयोषितां नोऽस्माकमिति षष्ठ्यौ सप्तम्यर्थे । ततः नः अस्मासु कर्त्तव्यां प्रीतिं तासु करोति कच्चिदित्यर्थः ॥ ४० ॥ ननु स्वतन्त्रः स कथं तद्वशः स्यादत आहुः । कथमिति । स्वतः रतिविशेषज्ञः, पुरयोषितां प्रियश्च कृष्णः, तद्वाक्यैः पुरयोषितां वचनैः, विभ्रमैस्तासामेव विलासैश्च, अनुभाजितः पूजितः सन्, कथं न अनुबद्ध्येत वद्धश्चैव ॥ ४१ ॥ अपीति । हे साधो उद्धव, गोविन्दः श्रीकृष्णः, पुरस्त्रीणां गोष्ठीमध्ये, तत्रापि कस्मिंश्चित् प्रस्तुते, ग्रामे भवा ग्राम्यास्तेषां स्वैरकथान्तर तस्मिन्, ग्राम्यजनसर्वान्धयादाच्छक-कथाप्रसङ्गे इत्यर्थः । कचित् कदाचित्, नोऽस्मान्, स्मरति अपि किम् । ग्राम्याः स्वैरकथान्तरे इति पाठे ग्राम्या इति नः इत्यस्य विशेषणम् ॥ ४२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एवमिति : १०.४७.३९.

सुरवरगुरुशिष्यगिरा त्यक्त्वा तनुतापमापुरतुलसुखम् । उचितमियं यच्छ्रुतिरिह नैवास्याब्रह्मवित्कुले भवति ॥ १०६ ॥

दिष्ट्याहित इति : १०.४७.४०.

विज्ञातगोकुल-श्रीक-वृन्दावन-रसंहितम् । विज्ञायानन्दितास्ता अप्यूचुस्तद्व्यावहारिकम् ॥ १०७ ॥
यद्यत्क्लेशकृदात्मभक्तिमनसां पुंसामकृत्यान्तरस्तत्सर्वं समपाकरोति भगवानित्यर्थसिद्धे सति ।
यद्दैन्यापहृतौ सतामलसतामङ्गीकरोत्यच्युतस्तत्तेषां हि विधेयमित्यधिगतः प्रायस्तदर्थोऽमुना ॥ १०८ ॥
वयमुद्धव तत्सङ्गात् पुण्यसीमापदं पुरा । विरहादघकोटिस्था अप्यन्याः सदृशो न नः ॥ १०९ ॥

कृष्णप्रिया

श्रीशुकदेवजी ने कहा राजन् इन दश श्लोकों से कृपानिधान श्रीकृष्ण ने उपदेश दिया ? जिससे व्रज वनिताओं के दोष निवृत्ति हो गई और हृदगत भावों का पन्द्रह श्लोकों में व्यासजी निरुपण कर रहे हैं यह सुनिए—श्रीउद्धवजी के मुख कमल से भगवान् श्रीकृष्णचन्द्रजी के मङ्गल वचनों का श्रवण कर अत्यन्त प्रसन्न हुई और प्रियतम के वचनों के श्रवण से श्रीकृष्ण की अधिक स्मृति हो गई और श्रीउद्धवजी को कहने लगी ॥ ३९ ॥ श्रीगोपियों दैन्य पूर्वक कहने लगी । हे उद्धवजी ! अत्यन्त आनन्द की बात है कि—यादवों का अहित कर कंस राजा अपने अनुज भ्राताओं के समेत नष्ट हुआ । हमारे प्यारे श्रीश्यामसुन्दर के सर्व लक्ष्यसिद्ध हुए और अपने निज जनों के साथ सुख पूर्वक मथुरापुरी में विराजते हैं अधिक आनन्द का विषय है ॥ ४० ॥ हे सुजन उद्धवजी ! श्रीरोहिणी कुमार गद के अग्रज श्रीकृष्ण भगवान् का स्नेह एवं लज्जापूर्वक स्मित हास्य के साथ उदार निरीक्षण से निरन्तर समादर एवं समर्चन किया है वे हमारे प्यारे कृष्ण मधुपुरी की सन्नारियों में प्रीतिकर सुख प्रदान करते हैं ? ॥ ४१ ॥ उद्धवजी ! भगवान् श्रीकृष्ण स्नेह-अनुराग के भिन्न-भिन्न विशिष्ट कलाओं के ज्ञाता है और उत्तमगुण गुणशील सम्पन्न स्त्रियों के प्रिय पात्र है । मथुराकी उत्तम नारियों के मधुर वचनों से एवं विलासों से उत्तम द्रव्यों से दिव्य सामग्री से समर्चित दयानिधि नाथ उनमें अवश्य स्नेह बैठाते ही होंगे ॥ ४२ ॥

अपि स्मरति नः साधो गोविन्दः प्रस्तुते क्वचित् । गोष्ठीमध्ये पुरस्त्रीणां ग्राम्याः[1] स्वैरकथान्तरे ॥ ४३ ॥
ताः किं निशाः स्मरति यासु तदा प्रियाभिर्वृन्दावने कुमुदकुन्दशशाङ्करम्ये ।
रेमे क्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित् ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—हे साधो ! गोविन्दः, पुरस्त्रीणाम्, गोष्ठीमध्ये, सैवकथान्तरे, प्रस्तुते, ग्राम्याः, नः, अपि, क्वचित्, स्मरति ? ॥ ४३ ॥ कुमुदकुन्दशशाङ्करम्ये, वृन्दावने, क्वणच्चरणनूपुररासगोष्ठ्याम्, प्रियाभिः, रेमे, तदा, अस्माभिः, ईडितमनोज्ञकथाः, ताः, निशाः, कदाचित्, स्मरति, किम् ॥ ४४ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

अन्या ऊचुः । ताः किमिति । कुमुदैः कुन्दैः शशांकेन च रम्ये वन्दावने क्वणन्ति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यामस्माभिः प्रियाभिरीडिता मनोज्ञाः कथा यस्य स तदा यासु निशासु रेमे ताः कदाचित्किं नु स्मरति वा न वेति ॥ ४३ ॥ स्वनिमित्तेन शोकेन तप्ता नोऽस्मान्गात्रैः करस्पर्शादिभिः संजीवयन्किं नु इहैष्यतीति ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्याः सौंदर्याभिनिविष्टाः । तदा रासावसरे । ता निशाः । भोभो गोप्यः वक्रोक्त्याऽलं, तासां तस्य च निन्दया, स्पष्टमेव किं न ब्रूध्वे, अन्यद्वैदग्ध्यादिकमस्मद् भाग्यवशात्कृष्णेन विस्मर्यतां नाम स्ववासः कथं विस्मृत इत्यन्याः सरोदनमाहुः—ता इति । कुमुदकुन्दशशांकैर्वृंदावनीयपुलिनस्य सर्वशुक्लीकृतत्वाद्रम्ये प्रियाभिरस्माभिः सह रेमे । ईडिता विमानचारिणीभिस्स्वर्गांगनाभिरपि स्तुता कथा यस्य स इति तेन पुरांगना वराक्यः का बा कथा जानन्ति, मथुरायां क्व वैतादृशपुलिनं तदभिमतानि नृत्यगीतवादित्राणि चूडामुकुटस्थासकवनमालावीटिकादिरचना वा तत्र काः कर्तुं जानन्तीति मथुरायां स्थित्या कृष्णस्य सर्वमेव सुखमस्तीभूतमिति तदीयानन्दाभावमेव स्मृत्वा वयं दुःखेन म्रियामहे, वयमिव तत्र काश्चित्तदभिमता विलासिन्यस्स्युश्चेत्ताभिः सह रासलास्यवेणुवाद्यादिविनोदं च शृणुयाम चेत्तदात्र तद्विरहेऽपि वयं सुखेनैव वर्तेमहीति ध्वनितम् ॥ ४३ ॥ स्वशब्दोऽत्र कृष्णार्थकः । संजीवन्संतोषयन् । अयीति कोमलामन्त्रणे । ननु स्मरत्येवेति चेत्तर्हि तस्यात्रागमनं नैव प्रतीम इत्याशयेन रासस्मरणजनितोत्कंठाभरेण तदागमनसन्देशं विस्मृत्यैव पृच्छति—अयीति । दाशार्ह दाशार्हाणां राजा, तत्पालनार्थं व्यग्रोपीति भावः । स्वकृतया शुचेति तत्स्पर्शैकप्रतीकारत्वमन्यथाऽस्निग्धहृदयाविज्ञत्वं स्त्रीवधादभीरुत्वञ्च ज्ञापितम् । गात्रैः सम्यग्यजीवयन्निति तत्स्पर्शानाममृतमयत्वम् । तत्र तु वर्तमानप्रयोगेण समागमकाल एव करस्पर्शादिकं विलंबासहत्वं च । यथेति तात्कालिकं तदेकसाध्यत्वञ्च दृढीकृतम्, गर्जनादिनेव संदेशादिना च तापापनोदनं निराकृतम् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो नागरीगणप्राप्त्यास्मान् वा न स्मरतु तद्रासक्रीडारात्रिरपि क्वचित् स्मरतीति पृच्छन्ति । ता इति अयमर्थः । यः खल्वस्माभिर्दुर्भिक्षभिक्षुकीभिरिव साम्प्रतमीडिता मनोज्ञा तस्य युष्माकं च मनोरमा कथा दिष्ट्या हितो हतः कंस इत्यादिरूपा यस्य स तत्रेश्वरसाक्षान्नामनिर्देशेन लघूकर्तुं शङ्कनीयस्तां साम्प्रतिकीभ्यः पराभ्यश्च विलक्षणाः तत्र च बहुत्वाद्विस्मर्तुमपारणीया निशाः किं कदाचिदपि स्मरति । यासु मुकुंदकुन्दशशाङ्करम्यत्वाद्विलक्षण एव वृन्दावने तदानीं या काश्चन तस्य प्रिया आसन् । एषा भवतास्मासु दृश्यमाना दुःखावस्था तासु न सम्भवतीत्यस्मादृशीभ्यः सर्वाभ्योऽप्यन्याभिरेव ताभिः सह तस्य तासां च क्वणच्चरणनूपुरतयातिमनोहरायां रासगोष्ठ्यां रेमे स्वयं चिक्रीडेति ॥ ४३ ॥ ननु स्मरत्येवेति चेत्तर्हि तस्यात्रागमनं नैव प्रतीम इत्याशयेन रासस्मरणजनितौत्कण्ठ्यभरेण तदागमनसन्देशविस्मृत्यैव वा पृच्छन्ति । अपीति । दाशार्हः दाशार्हाणां राजा तत्पालनार्थं व्यग्रोऽपीति भावः । स्वकृततया शुचेति तत्स्पर्शैकप्रतीकारत्वम् अन्यथा अस्निग्धहृदया विज्ञत्वं स्त्रीवधादभीरुत्वञ्च ज्ञापितम् । गात्रैः सम्यग् जीवयन्निति तत्स्पर्शानाममृतमयत्वम् । तत्र तु वर्त्तमानप्रयोगेण समागमकाल एव करस्पर्शादिकञ्चेति विलम्बासहत्यञ्च । यथेति दृष्टान्तेन तात्कालित्वं तदेकसाम्यत्वञ्च दृढीकृतम् । गर्ज्जनादिनेव सन्देशादिना च तापापनोदनं निराकृतम् ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो ! नागरीगणप्राप्त्याऽस्मान् वा न स्मतु, तद्रासक्रीड़ारात्रीरपि क्वचित् स्मरेदिति पृच्छन्ति—ता इति । तासां स्मरणयोग्यतामाहुः—यास्वित्यादिना । तत्र बहुत्वेन तासामसङ्ख्यत्वमुक्तम् । क्वणन्ति तस्यास्माकं च नूपुराणि यस्यां रास-

---

[1] ग्राम्य–वीर. विज. ।

लक्षणायां गोष्ठ्यां क्रीड़ायां किंवा तादृशरासे पश्चाद्या गोष्ठी गोपीनां सभा तस्यामीड़ितमनोज्ञकथः। अस्माभिरिति सत्सहायाः, वृन्दावन इति सत्स्थानम्, कुमुदेति सूचितया शरदा सत्कालस्तथा सत्पुष्पादिरत्युपकरणं च। क्वणदिति सल्लीला; तत्र च क्वणच्चरणनूपुरेति सन्नृत्यगतिः, ईड़ितेति तत्र सदुत्साहहेतुश्च। अन्यत्तैर्व्याख्यातम्। यद्वा, तदा तदानीं याः प्रियाः प्रियतया स्वीकृतास्ताभिरस्माभिः सह रेमे, ईड़िता तदानीं व्योम्न्यागतैर्देवादिभिः स्तुततया गीता मनोज्ञा जगतां तस्यैव वा चित्ताकर्षिका कथा विविधवैदग्ध्यादिवार्त्ता यस्य सः, इयमप्येका स्मरणयोग्यता। यद्वा, तत्र तैः पुरस्त्र्यादिभिरीड़ितमनोज्ञकथः सन् स्मरति किमिति मनोज्ञकथाप्रसंगे तत्स्मरणयोग्यतैवाभिप्रेता ॥ ४३ ॥ ननु स्मरत्येवेति चेत्तर्हि तस्यात्रागमननैव प्रतीम इत्याशयेन किंवा रासस्मरणजनितौत्कण्ठ्यभरेण पृच्छन्ति—अपीति। दाशार्हः—यदुकुलोद्भव इति तत्पालनार्थं व्यग्रोऽपीति भावः। यद्वा, दाशो दानं व्रजजनेषु निजदर्शनदानं तदर्हतीति दाशार्हस्तेनात्रागमनयोग्यत्वमभिप्रेतम्। शुचा विरहशोकेन तप्ता इति तद्दर्शनैकप्रतिकारत्वम्। स्वकृतयेति, अन्यथाऽकृतज्ञत्वस्य स्त्रीवधस्य च प्रसंगः स्यादिति गात्रैः सम्यग् जीवयन्निति तत्स्पर्शनाममृतमयत्वम्, तत्र तु वर्त्तमानया समागमकाल एव करस्पर्शादिकञ्च; यद्वा, सन्जीवयितुं, यथेति दृष्टान्तेन तात्कालिकत्वं तदेकसाध्यत्वञ्च दृढीकृतम् ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पुनरन्या ऊचुः। ताः किमिति। कुमुदैः कुन्दैः शशाङ्केन च रम्ये वृन्दावने क्वणन्ति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यामस्माभिः प्रियाभिरीडिता मनोज्ञा कथा यस्य तथा यासु निशासु रेमे ताः कदाचित्किं नु स्मरति ॥४३॥ अप्येष्यतीति आगमिष्यति किं स्वनिमित्तेन शोकेन सन्तप्ता नोऽस्मान् दाशार्हः कृष्णः दाशार्हेति पाठे हे उद्धव! स्वकरस्पर्शादिभिः संजीवयिष्यति किं यथेन्द्रः यथा वनमिन्द्रोऽम्बुदैः सञ्जीवयति तद्वत् ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यासु निशासु ॥ ४३ ॥ गात्रैरवयवैः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अन्या आहुः—ग्राम्यत्वेन वयं स्मर्तुमनर्हा एव, किन्त्वस्माभिः सह यो रासविलासः कृतः सत्वलौकिकः स तु सर्वदा स्मरणार्ह एवेति। ताः किं निशा इत्यादि तुल्यमेव ॥ ४३ ॥ अन्या आहुः—सत्यमेव श्रीकृष्णोऽत्रागमिष्यति? तत् कथयेति—अप्येष्यतीत्यादि। अपि सम्भावनायां प्रश्ने वा। आयाति वा किम्? स्वकृतया शुचा तप्ता अस्मान् सञ्जीवयन् एष्यति। क इव? इन्द्रोऽम्बुदैर्वनमिव। जीवयन्नित्येक देशे दृष्टान्तः ॥ ४४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अन्या ऊचुः ग्राम्यत्वेन वयं स्मर्त्तुं न योग्या इति सत्यमेव, किन्त्वस्माभिः सह यो रासः कृतः सकुत्रापि न भवितेति तात्पर्येण ताः किं निशा इत्यादि ॥ ४३ ॥ अन्याश्च—अलमनेन प्रश्नेन फलभूतं पृच्छ्यतामित्याहुः—अप्येष्यतीत्यादि ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भो भो गोप्यः! वक्रोक्त्या अलं तासां तस्य च निन्दया स्पष्टमेव किं न ब्रूध्वे अन्यद्वैदग्ध्यादिकमस्मद्दौर्भाग्यवशात् कृष्णेन विस्मर्यतां नाम स्ववासः कथं विस्मृत इत्यन्याः सरोदनमाहुस्ता इति। कुमुदकुन्दशशाङ्क वृन्दावनीयपुलिनस्य सर्वशुक्लीकृतत्वाद्रम्ये क्वणन्ति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यां प्रियाभिरस्माभिः सह रेमे। ईडिता विमानचारिणीभिः स्वर्गाङ्गनाभिरपि स्तुताः कथा यस्य स इति तेन पुराङ्गनाः वराक्यः का वा कथा जानन्ति मथुरायां क्ववा पुलिनमेतादृशं तदभिमतानि नृत्यगीतवादित्राणि चूडामुकुटस्थासकवनमालावीटिकादिरचना वा तत्र काः कर्त्तुं जानन्तीति मथुरायां स्थित्या कृष्णस्य सर्वमेव सुखमस्तीभूतमिति तदीयानन्दाभावमेव स्मृत्वा वयं दुःखेन म्रियामाहे वयमिव तत्र काश्चित्तदभिमता विलासिन्यः स्युश्चेत्ताभिः सह रासलास्य वेणुवाद्यादिविनोदञ्च शृणुयाम चेत्तदात्र तद्विरहेऽपि वयं सुखेनैव वर्त्तेमहीति ध्वनितम् ॥ ४३ ॥ भो सख्यः! अत एव तस्मात् पुरादुद्विग्नः कृष्णः शीघ्रमत्रायात्विति तदागमनमाशासनम्। अन्यास्तत्समभावा आहुः। अपीति। स्वनिमित्तेन शोकेन तप्ता अस्मान् स्वगात्रैर्दर्शितैः सञ्जीवयन् किं नु इहैष्यतीति ॥ ४४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

अहो रासक्रीडाधिकरणभूता निशास्त्ववश्यं तेन स्मर्तव्यास्तत्सम्बन्धेनास्माकमपि स्मरणमावश्यकमित्याशयेन तत्स्मरणं पृच्छन्ति। ता इति। ताः मयेमा रंस्यथ क्षपा इति पूर्वं वरे दत्तः स्वदत्तं वस्तु स्मर्य्यते सर्वैरिति भावः। किञ्च दुःखाधिकरणभूतः सुखाधिकरणभूतो वा कालोऽवश्यं स्मरणपथमवरोहतीत्याहुः। यासु तदास्मन्नायकतादशायां रेमे तत्रापि प्रियाभिरस्माभिः यदा

तस्य स्मरणमपेक्षितं स्थितं तदा वयं प्रियाः कारिताः इदानींत्यतरप्रियालाभे वयं शिष्या इति व्यङ्गं तत्रापि वृन्दावने स्वच्छन्दलीलास्थाने नानुभूतास्य सा लीला नगरेषु नागरीभिः सम्भवतीति भावः। कुमुदैः कुन्दैः शशाङ्केन च रम्ये अनेनोद्दीपनसामग्री सम्यगुक्ता तत्रापि क्वणन्ति चरणनूपुराणि यस्यां रासगोष्ठ्या तस्यां प्रियाभिरस्माभिरीडिता मनोज्ञा अतिरम्याः कथा यस्य तथा चैवम्विधालम्बनोद्दीपनजन्यस्य वैकुण्ठलोकमप्यतिक्रम्य सुखस्याधिकरणभूता निशाः कदाचित्कस्मिंश्चित्काले स्मरति। कि यदि स्मरति तर्हि सर्वसाधनसंपन्ना गुरुदक्षिणा वयं प्रियत्वेनैव तं स्मरिष्यामो न तु गुरुत्वेन नापि परमात्मत्वेनेति भावः ॥ ४३ ॥ स्मरति नवेतीति तु मुख्यमस्मदभिलषितं यथा वद्ब्रूतेत्याशयेनाहुः। अप्येष्यतीति। ननु युष्माभिरेव तत्र कुतो न गत इत्याशङ्कानिवृत्त्यर्थमिहास्मिन वृन्दावने इत्युक्तं तत्र स्वच्छन्द्यभावात्तादृशरसोत्पत्तिर्न सम्भाव्यत इति भावः। ननु स्वतन्त्रोसौ कथमायास्यतीतिचेत्तत्राहुः। दाशार्ह इति। यथा तेषां दुःखभरासाय तत्र गतस्तथास्मत्तापनिवृत्त्यर्थमत्राप्यायास्यतीति भावः जीवनदानात्परं दानं नास्तीति विचार्य्यायास्यतीत्यस्त्यस्माकं सम्भावनेत्याशयेनाहुः। तप्ता नः स्वगात्रैर्मुखारविन्दादिभिः स्वीवयन् जीवनापगमे तदुपदिष्टार्थाभ्यासः कथं भविष्यति काममतया मृतानामस्माकं मुक्तिरपि दुर्लभा तस्मात्स्वोपदेशसाफल्यायापि तदीयमागमनमुचितमिति भावः। तुशब्देन यथोक्तज्ञानोपदेशैर्नोऽस्माकं जीवनलाभ इति द्योतयन्ति। ननु सकलतापोच्छेदकात्मोपदेशादपि युष्माकं तापनिवृत्तिः कथं न भवतीति चेत्तत्राहुः। स्वकृतया शुचेति। नन्दनन्दनविरहजनितेन शोकेन तप्तास्तथा च स्वविरहजनितशोकस्य तदुपगम एव निवर्तको नान्यत् आत्मज्ञानस्य सांसारिकदुःखनिवर्तकत्वादिति भावः। यद्वोक्तशोकेन तदात्मत्वात्तेन द्रवमाणानां शूद्रत्वाद्वा तापनिवृत्ति विनात्मोपदेशाधिकाराभावात्स्वयमेवात्रागत्य तापं निवर्तयतु आत्मज्ञानं चोपदिशतु भगवानिति भावः। तत्रानुरूपं दृष्टान्तमाहुः। यथेति। गृहादिदाहस्तु जलान्तरैरपि शाम्यति वनदाहस्त्विन्द्रनियुक्तपयोदैरेवोपशाम्यति तत्तद्वदेवायमस्माकं तापः प्रेष्ठप्रदर्शितस्वमुखारविन्दादिनैवोपशान्ति गमिष्यति नान्यथेत्यर्थः ॥ ४४ ॥

गूढार्थदीपिनी

स्वैरकथान्तरे यादृच्छिककथाप्रसङ्गे प्रस्तुते सति ग्राम्या नः कि स्मरति ॥ ४३ ॥ वृन्दावने तत्रापि रासगोष्ठ्याम् अस्माभिः सह यासु रेमे ताः निशाः किं स्मरतीत्यन्वयः। क्वणन्ति ध्वनयन्ति चरणनूपुराणि यस्यां सा चासौ गोष्ठी तस्याम्। ब्रह्मादिभिः अस्माभिरपि ईडिता स्तुता कथा यस्य ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या आहुः। ता इति। कुमुदैः कुन्दैः शशाङ्केन च रम्ये वृन्दावने क्वणन्ति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यां यासु निशासु तदा अस्माभिः सह रेमे ताः निशाः इडिताः मनोज्ञा कार्यस्य यस्य सः कच्चित्स्मरति किम् ॥ ४३ ॥ स्वकृतया स्वेन दूरं गतेन कृता उत्पादिता तया शुचा शोकेन तप्ता नोऽस्मान् ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यासु निशासु कुमुदकुन्दैः शशाङ्केन च रम्ये वृन्दावने क्वणच्चरणा नूपुररासगोष्ठ्यामीडितमनोज्ञकथस्तदा प्रियाभिरस्माभिरित्युभयान्वयि। अस्माभिः सह रेमेः। ता निशाः कदाचित्स्मरति किमित्यन्वयः ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तादृशधर्मविशिष्टाश्चेत् वयं स्मृताः तदा भगवत्परितोषणे गुरुदक्षिणायामपि न किञ्चिद्देयं स्यात् ताः पूर्वं वरे दत्ता मयेमारंस्यथ क्षपा इति स्वदत्तान् हि स्मरति सर्वोऽपि किं कालस्मरणेनेत्याशङ्क्य तद्गतं विशेषमाहुः। यास्विति। यासु तदा रेमे ननु साम्प्रतं कालदेशयोर्विद्यमानत्वेऽपि रमणाभावात् पुनः पुनः स्मरणं तदा वा वयं प्रियाः अधुना तु शिष्याः वृन्दावन इति स्वच्छन्दलीलास्थानमुक्तं नैव लीला नगरेषु सम्भवति कुमुदैः कुन्दैः शशाङ्केन च रम्ये क्वचिद्दोषोऽप्यन्यत्र गुणः यद्यपि शशाङ्कस्तथापि कामे उद्बोधकः कुमुदमपि रात्रिविकासि चन्द्रः ससामग्रीकः तत्र रतिवर्द्धनोऽस्तीति ज्ञापयितुमेवं प्रक्रिया निरूपिता कुन्दाः सर्वकालीनपुष्पाणि रात्रिविशेषपुष्पाणि साधारणानि तेषां विकासहेतुश्च यत्र रतिवर्द्धनः तत्रापि रसोत्पत्त्यथक्वणच्चरणनूपुराणां स्त्रीणां यो रासः तत्सभायामस्माभिः सर्वाभिरेव ईडिता मनोज्ञाः कथा यस्य कदाचिदिति तस्या अवस्थाया दुर्ल्लभत्वं यदीदानीमपि भवेत् मनोज्ञकथया ईडितो भवेत् ततो लौकिकमपि कुर्यात् अस्माभिरिति प्रमाणमुक्तं क्वणन्ति चरणेषु नूपुराणीति भगवदवलम्बनादिति भावः सूचितः। योऽस्मान् नर्त्तयेत् ततो नृत्यगीतादिना समाराधितो भगवान् तच्चेत्स्मरिष्यति तदा साधनरहिता अपि कृतार्था भविष्यामः दोषनिवृत्तावेव तात्पर्यमिति भगवतोऽपि मनोनिग्रहो नाभिप्रेतः उपदेशेन वयं तथा भविष्यामः ॥ ४३ ॥ एवं तथापि पूर्ववत् पुनः किं कृपां करिष्यतीत्यभिप्रायेणाहुः। अप्येऽष्यतीति। अन्यथा नोचेद्वयम् इति वाक्यं श्रुत्वा किमिति भोगमङ्गीकृतवान् तस्मादुत्कटं कामं दूरीकृत्य कोमले जाते पश्चादुपदेशफलं भविष्यतीति पुनः पूर्ववदाकाङ्क्षा तत्र गमने तु सुखं न भविष्यतीति ज्ञातं स्वच्छन्दभावात् नन्वीश्वरः कथमायास्यतीति चेत्तत्राहुः। दाशार्ह इति। दाशानामर्हः

योग्यः यो हि दयालुः सुतरां परदुःखाभिनिविष्टः एवं तापहारकः भगवद्धर्मान्निरूप्य स्वतापमाहुः । तप्ता इति । आध्यात्मिकादिताप व्यावृत्त्यर्थं ज्ञानोपदेश एव क्रियत इति चेत्तत्राहुः । स्वकृतया शुचा इति । अयं शोको भगवतैव सम्पादित स्वनिर्गमात् शुचा च द्रवमाणा जाता इति साम्प्रतं शूद्रा एव कथमुपदेशयोग्या इति भावः । तस्माच्छोके गत एवाधिकारः किञ्च जीवने हि जाते पश्चात्सर्वमेतत् सकाममरणे तु न मुक्तिः अत इदानीं जीवनं यथा भवति तथा गात्रैः मुखारविन्दादिभिः नोऽस्मान् सञ्जीवयन् किमायास्यति तु शब्दो ज्ञानपक्षं वारयति । ननु विशेषतो भगवत एवं करणे को हेतुरिति चेत्तत्राह । यथेन्द्र इति साधारणमेव वनं खाण्डववनं वा न हि पर्जन्यादन्यः दावानलं शमयति । गृहदाहादयस्तु जलान्तरेणापि शाम्यन्ति ॥ ४४ ॥

श्रीसुबोधिनी-सारः

कुमुदैः कुंदैः शशांकेन च रम्ये वृन्दावने यासु रात्रिषु प्रियाभिरस्माभिरीडितास्तुतया मनोज्ञाः कथा यस्य सः क्वणंति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यां तदा रेमे ता निशाः कदाचित्स्मरति किम् ॥ ४३ ॥ स्वकृतया शुचा शोकेन तप्ता नोऽस्मान् गात्रैः करस्पर्शादिभिः संजीवयन्निन्द्र इव दाशार्हः कृष्ण इहागमिष्यति किम् ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'सत्यमेव त्वया वक्तव्यम् , एतदेव तवोचितम्' इति सूचयन्ती सम्बोधयति—साधो इति । पुरस्त्रीणां गोष्ठीमध्ये सभामध्ये तत्रापि स्वैरकथान्तरे यथेष्टविहारकथामध्ये प्रस्तुते कस्मिंश्चित् प्रसङ्गे क्वचिदपि नः अस्मान् गोविन्दः अपि किं स्मरति ? । ननु 'विदग्धानां पुरस्त्रीणां विलासैराकृष्टचित्तस्य तस्य कथमविदग्धानां युष्माकं स्मरणं स्यात्' इत्याशङ्क्य 'वैलक्षण्यस्यापि प्रतियोगिविधया स्मारकत्वात् स्मरणं सम्भवति' इत्याशयेनाहुः—ग्राम्या इति । अविदग्धा अस्मानित्यर्थः ॥ ४३ ॥ तदा व्रजस्थितिकाले कुमुदैः कुन्दैः शशाङ्केन च रम्ये वृन्दावने क्वणन्ति चरणनुपुराणि यस्यां तस्यां रासगोष्ठ्यां राससभायामस्माभिः प्रियाभिः सह यासु निशासु रेमे ताः किं कदाचिदनुस्मरतीत्यन्वयः । 'स स्मरतु मा वा, अस्माकं तु तत्स्मरणं सर्वदैव भवति' इत्यत्र हेतुं सूचयन्त्यो विशिनष्टि-ईडितेति । ब्रह्मादिभिः कविभिः ईडिता स्तुता मनोज्ञा मनोहरा कथा यस्य स इत्यर्थः ॥ ४४ ॥

अन्वितार्थप्रकाशिका

अपीति हे साधो ! पुरस्त्रीणां गोष्ठीमध्ये सभामध्ये तत्रापि स्वैरकथान्तरे यथेष्टविहारकथामध्ये प्रस्तुते कस्मिंश्चित्प्रसङ्गे क्वचिदपि ग्राम्या अविदग्धा नः अस्मान् गोविन्दः अपि किं स्मरति ॥ ४३ ॥ ता इति । ब्रह्मादिभिः कविभिः ईडिता स्तुता मनोज्ञा मनोहरा कथा यस्य स हरिः तदा व्रजस्थितिकाले कुमुदैः कुन्दैः शशाङ्केन च रम्ये वृन्दावने क्वणन्ति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यां राससभायामस्माभिः सह यासु निशासु रेमे ताः किं कदाचिदनुस्मरति । प्रियाभिरस्माभिरीडितमनोज्ञकथ इति वाऽन्वयः ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उत्तमश्लोकस्य कृष्णस्य संविदमेकांतवार्त्तां उत्सहेत ऊत्साहं कुर्यात् ॥ ४३ ॥ वृंदावनविधोरविस्मरणे हेतुमाह सरिदिति त्रिभिः वनोद्देशत्शब्देन व्रजादिसर्वस्थानानां ग्रहणं आचरिताः सेवीताः ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पुनरन्या ऊचुः । ता इति । कुमुदानि च कुन्दानि च शशाङ्कश्चन्द्रश्च तै रम्यं रमणीयं तस्मिन् , वृन्दावने क्वणन्ति चरणनूपुराणि यस्यां सा चासौ रासगोष्ठी तस्यां, प्रियाभिः अस्माभिः, ईडिता स्तुता मनोज्ञा कथा यस्य सः तथाभूतः सन् , तदा कृष्णः यासु निशासु रेमे, ता निशाः, कदाचित् स्मरति किम् ॥ ४३ ॥ अपीति । दाशार्हः श्रीकृष्णः स्वकृतया शुचा, स्वनिमित्तं विहितेन शोकेनेत्यर्थः । तप्ताः, इन्द्रः, अम्बुदैर्मेघैः, वनं यथा संजीवयति, तथा, गात्रैः स्वकरस्पर्शादिभिरित्यर्थः । नोऽस्मान् , संजीवयन् संजीवयितुं, इह एष्यति अपि नु । आयास्यति न वेत्यर्थः ॥ ४४ ॥

श्रीहरिसूरिविरचितं भक्तिरसायनम्

अपि स्मरतीति : १०.४७ ४२.

त्वं सत्यवागसि दयाहृदयोऽसि सत्यं तद् ब्रूहि येन भविताऽखिलदुःखभङ्गः ।
क्रीडाविधौ रहसि वा परिहासकेलावस्मत्कथां कथयति क्वचिदप्यनन्तः ॥ ११० ॥
लब्धेऽतिभव्यतर-गव्यरसे यवागूसक्तो विविक्तमतिरत्र न कोऽपि भूयात् ।
तत्सिद्धमुद्धव सुलब्धवराङ्गनस्य नास्मास्वनादरणमस्य किमल्पिकासु ॥ १११ ॥
अकार्यं कारयित्वा नस्त्यक्तवान् सम्प्रति प्रभुः । न धर्मो नापि भगवानुद्धवैवं दशाऽजनि ॥ ११२ ॥

ताः किं निशा इति : १०.४७.४४.

रासे रसाभिनयशालिनि साह्यकं याः कृत्वाऽथा सौरतरसेऽपि च सौख्यदाव्यः ।
आसन्निशाः स्मरति ताः किमु यत्प्रसङ्गादस्मत्स्मृतिप्रसर इत्यनुपृच्छ्यसे त्वम् ॥ ११३ ॥

कृष्णप्रिया

हे सज्जन ! हे साधो ! हे उद्धव ! कभी-कभी पुरनारियों की परिषद में मधुर गोष्ठीओं करते हुए प्यारे श्रीगोविन्द हम गवारिनियों का कभी स्मरण करते हैं ॥ ४३ ॥ उद्धवजी ! कहिए ! रात्रि विकासि कुमुद सर्वकाल विकासि कुन्द कुसुम तथा आश्रित का कभी त्याग न करने वाला शशाङ्क से रमणीय श्रीवृन्दावन में चरणों के नूपुरों के झंकार वाली रासमण्डली में रसेश श्रीकृष्ण ने जिन रात्रियों में रमण किया था तब हमने नृत्य के साथ मञ्जुल गान से श्याम का स्तवन किया था, उन रात्रियों की कभी मनोज्ञ कथाओं का स्मरण करते हैं ? ॥ ४४ ॥

अप्येष्यतीह [1]दाशार्हस्तप्ताः [2]स्वकृतयाशुचा । संजीवयन्[3] नु नो गात्रैर्यथेन्द्रो वनमम्बुदैः ॥ ४५ ॥
कस्मात् कृष्ण इहायाति प्राप्तराज्यो हताहितः । नरेन्द्रकन्या[4] उद्वाह्य प्रीतः सर्वसुहृद्वृतः ॥ ४६ ॥

कर्दमक्षमा

अन्वयः—यथा, इन्द्रः, अम्बुदैः, वनम्, 'तथा', स्वकृतया, शुचा, तप्ताः, नः, गात्रैः, तु, सञ्जीवयन्, दाशार्हः, इह, एष्यति, अपि ? ॥ ४५ ॥ प्राप्तराज्यः, हताहितः, नरेन्द्रकन्याः, उद्वाह्य, प्रीतः, सुहृद्वृतः, कृष्णः, कस्मात्, इह, आयाति ॥४६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अन्या ऊचुः । कस्मादिति । अनन्यगतित्वेन पूर्वमत्रावसत्संप्रति महदैश्वर्यं प्राप्तः कस्मादिहागमिष्यतीति ॥ ४५ ॥ अन्यास्तु परमार्थमूचुः किमस्माभिरिति । व्रजमेव ओको गृहं यासां ताभिर्वनचरीभिरन्याभिर्वा राजकन्याभिर्महात्मनो धीरस्य किं च श्रीपतेः । तदपि आस्ताम् । स्वत एवाप्तकामस्यात एव कृतात्मनः पूर्णस्य किं कोऽप्यर्थः क्रियेत न कश्चिदिति ॥ ४६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्या व्यवहारनिपुणाः । अनन्यगतित्वेनान्याश्रयाऽभावेन । अत्र गोकुले । "राज्यं राज्ञां समूहे च प्राकाश्ये नृपकर्मणि । पङ्क्तिकृत्ये महैश्वर्ये मुख्यामात्ये नृपस्य च ।" इति निरुक्तिकारः । प्राप्तं राज्यं महैश्वर्यं मुख्यामात्यत्वं वा येन स तथा । तच्छ्रुत्वाऽन्या वाम्यमयस्वभावाः-भोः सख्यः कृष्णस्य रासादिभिः किं सुखं तावन्मुग्धा यूयं किमपि न जानीध्वे तदभिमतसुखं मन्मुखाच्छृणुतेति वक्रोक्त्याऽऽहुः-कस्मादिति । अत्र गोचारणक्लिष्टस्तत्र प्राप्तराज्योऽभूत्, अत्र गोपजातिभिस्तत्रापि परकीयाभिः किं सुखं, तत्र तु नरेन्द्रेत्याद्युद्वाह्येति । क्वचित्पुराणे मथुरास्थस्य कृष्णस्य रुक्मिण्युद्वाहः कल्पभेदेन ज्ञेयः । प्राप्य मथुरामित्यधिकृत्य "रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः" इति गोपालतापिन्यां च श्रूयते ॥ ४५ ॥ अन्या आप्ताः । न केवलं धीर एव किन्तु सर्वसौंदर्याधिष्ठानभूतलक्ष्मीपतिरपीत्याहुः—किं चेति । तदपि श्रीपतित्वमपि । आस्तां तिष्ठतु, न तयापि तस्य किञ्चित्कृत्यमस्तीत्याहुः—स्वतः स्वभावत एवाप्तकामस्य प्राप्ताखिलाभीष्टस्य । अत एवाप्त कामत्वादेव । अर्थः प्रयोजनम् । नरेन्द्रकन्योद्वाहस्य हेतुत्वमाक्षिप्य तास्वपि कारुण्यं व्यंजयन्त्य इव तस्य नैरपेक्ष्यमेव हेतुं सेर्ष्यमाहुः—किमिति । तत्र हेतुः-महात्मनः, महास्तदुपर्यपि वर्तमान आत्मा चित्तं यस्य । यतः श्रीपतेः श्रियः सर्वैराश्रयितुमभीष्टाया अपि तत्रतत्र तदनुगामिन्या लक्ष्म्याः पत्युः । अत एवाप्तकामस्य यथेष्टविषयपूर्णस्य । अत एव कृतात्मनः लब्धधृतेरिति । ततः काचिदपि कन्यका तस्य विवाहाय नाहर्तव्येत्युद्धवं प्रति च निगूढः प्रयत्नः सूचितः ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वेष्यत्येवेति चेन्न घटेतेत्याहुः । कस्मादिति । तदेव दर्शयन्ति । प्राप्तेत्यादिना । ननु तथापि भवतीनां विरहार्त्तं एष्यत्येव तत्रान्यथा सम्भावयन्ति । नरेति । प्रीत इति । अस्मद्गोपजातेस्तस्य तेनैवाभीष्टक्षत्रियजातित्वासिद्धेः कान्ताविशेषलाभाच्च । ननु तथा सत्यपि मातापुत्रादीनामत्रत्यानां परमसुहृदां प्रीत्यर्थमेष्यत्येव तत्राहुः । सर्वेति । सर्वे ते लब्धाः परेष्वधुना कापेक्षेत्यर्थः । यद्वा । तत्रत्यैः सुहृद्भिरत्रागच्छन्नसौ निवारयितव्य इति भावः ॥ ४५ ॥ नरेन्द्रकन्योद्वाहस्य हेतुत्वमाक्षिप्य तास्वपि कारुण्यं व्यञ्जयन्त्य इव तस्य नैरपेक्ष्यमेव हेतुं सेर्ष्यमाहुः । किमिति । तत्र हेतुर्महात्मनः महान् तदुपर्यपि वर्त्तमान आत्मा चित्तं यस्य यतः श्रीपतेः श्रियः सर्वैराश्रयितुमभीष्टाया अपि तत्र तत्र तदनुगामिन्या लक्ष्म्याः पत्युः । अत एवाप्तकामस्य यथेष्टविषयपूर्णस्य तत एव कृतात्मनः लब्धधृतेरिति ततः काचिदपि कन्यका तस्य विवाहाय नाहर्त्तव्येत्युद्धव प्रति च निगूढः प्रयत्नः सूचितः ॥४६॥

---

[1] दाशार्ह-इति कस्यचित् । [2] तप्तं-विज. । [3] संजीवयिष्यन्नो-वीर. ; संजीवयिष्यनव्रज-विश्व. । [4] विहृत्य नगरस्त्रीभिः प्रीतः-विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु एष्यत्येवेति तत्तन्न घटेतेत्याहुः—कस्मादिति। कृष्णः परमानन्दपरिपूर्ण इति भावः। तदेव दर्शयन्ति—प्राप्तेत्यादिना। ननु तस्य राज्योपेक्षा नास्तीति चेत्तथाप्यागमनं न सम्भाव्यत इत्याहुः—हताहित इति। शत्रुवधोपायार्थमेवात्रासीत्, अधुना तत्सिद्धौ कुतोऽत्रैष्यतीति भावः। ननु तथापि भवतीनां विरहार्त्त एष्यत्येव, तत्राहुः—नरेन्द्रेति, नरेन्द्राणां महाराजानां कन्या इति महादैन्येनात्मनः सकाशात्तासामुत्कर्षः सूचितः। भाविन्यपि प्रीत इत्यतीतत्वं तस्यातिसान्निध्यान्निर्द्धाराच्च। ननु तथा सत्यपि पितृमात्रादीनामत्रत्यानां परमसुहृदां प्रीत्यर्थमेष्यत्येव, तत्राहुः—सर्व्वेति। तत्रैव सर्वे पितृमात्रादयो निजसुहृदो लब्धाः, परेष्वधुना कापेक्षेत्यर्थः। यद्वा, तत्रत्यैः सुहृद्भिरत्रागच्छन्नसौ निवारयितव्य इति भावः॥ ४५॥ ननु तथापि भवतीषु परमापेक्षयात्रैष्यत्येव, तत्राहुः—किमिति। अर्थः प्रयोजनम्। अन्यत्तैर्व्याख्यातम्। यद्वा, किं क्रियेत, अपि तु नैवेत्यर्थः। तत्र हेतुः—महात्मनो जगदादृतस्य जितेन्द्रियस्येति वा। ननु तथापि प्रेमविलासपरिपाकरूपतया भवतीनां सम्भोगे रसिकशेखरस्य तस्येच्छास्त्येव, तत्राहुः—श्रीपतेरिति, तदर्थं लक्ष्मीर्विभात्येव, किमन्याभिरित्यर्थः। ननु लक्ष्मीतोऽपि भवतीष्वधिकापेक्षा, तत्राहुः—आप्तकामस्य, अस्माभिः सह कृतरतेरित्यर्थः। ननु तथापि तत्र तस्य तृप्तिर्नास्तीति चेन्नेत्याहुः—कृतात्मन इति। अन्यत् समानम् एषातिदैन्योक्तिः सोल्लुण्ठोक्तिरेव वा, प्रियजनपरवशस्य तस्य कदापि तादृशत्वाननुभवात्॥ ४६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अन्या ऊचुः। कस्मादिति। अनन्यगतित्वेन पूर्वमत्रोषितवान् अधुना तु प्राप्तं राज्यं येन हता अहिताश्च शत्रवो येन तथाभूतः नरेन्द्रकन्या उद्वाह्य प्रीतः सुहृद्भिश्च वृतः अतः कस्माद्धेतोरिहागमिष्यति॥ ४५॥ अन्यास्तु परमार्थमूचुः। किमस्माभिरिति। वनवासिनीभिरन्याभिः पुरयोषिद्भिर्वा महात्मनः श्रीकृष्णस्य किं को वार्थः प्रयोजनमित्यर्थः क्रियेत तत्र हेतुं वदन्त्यो विशिंषन्ति महात्मनः श्रियः पतेः तदप्यास्तां स्वत एवावाप्तसमस्तकामस्य॥ ४६॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अदीर्घेण कालेनागमिष्यामीति यदुक्तं तत्स्तोभनमात्रम् आगमने निमित्ताभावादित्याहुः। कस्मादिति॥४५॥ कृतात्मनः पूर्णरूपस्य अर्थो विषयः किं क्रियेत किं सुखं कुर्यात्॥ ४६॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अन्या ऊचुः—कस्मात् कृष्ण इत्यादि। इहागमने सामग्री न दृश्यते। यतः प्राप्तराज्यः हताहितो हतशत्रुः, तत्रापि नरेन्द्रकन्या उद्वाह्य प्रीतः, तथा सर्वसुहृद्वृतः॥ ४५॥ ननु सर्वेभ्यो भवत्य एव तस्य प्रियाः ततो युष्मद्दर्शनार्थमागमिष्यत्येवेति सम्भाव्याहुः—किमस्माभिरित्यादि। वनौकोभिर्वनवासिनीभिः, अथवा, किं पुरस्त्रीभिरपीत्याहुः—अन्याभिर्वेति। अन्याभिर्वा तस्यार्थः किं क्रियेत ? कुतः ? इत्याहुः—श्रीपतेः। श्रिया वा किम् ? कुतः ? इत्याहुः—आप्तकामस्य पूर्णस्य कृतात्मनः कृतबुद्धेः परमगम्भीरस्य॥ ४६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अन्यास्तदसम्भाव्योचुः—कस्मादिति द्वाभ्याम्॥ ४५-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत् श्रुत्वा अन्या वाम्यमयस्वभावाः भोः सख्यः ! कृष्णस्य रासादिभिः किं सुखं तावत् मुग्धा यूयं किमपि न जानीध्वे तदभिमतसुखं मन्मुखात् शृणुतेति वक्रोक्त्याहुः। कस्मादिति। अत्र गोचारणाक्लिष्टस्तत्र तु प्राप्तराज्योऽभूत्। अत्र गोपजातिभिस्तत्रापि परकीयाभिः किं सुखं अत्रगोपस्तत्र तु नरेन्द्र इत्यादि उद्वाह्येति क्वचित्। पुराणे मथुरास्थस्य कृष्णस्य रुक्मिण्युद्वाहः कल्पभेदेन ज्ञेयः। प्राप्य मथुरामित्यधिकृत्य रामानिरुद्धप्रद्युम्नैः रुक्मिण्या सहितो विभुरिति गोपालतापन्याञ्च श्रूयते॥ ४५॥ भोः सहचर्यः ! प्रेमशून्ये कृष्णे ईर्ष्यासूयादिकं त्यज्यतामिति वदन्त्यस्तस्य सर्वत्रौदासीन्यमन्या आहुः। किमिति। ननु श्रीपतित्वात्तस्यां तस्य प्रेमास्ति चेन्न आप्तकामस्य कृतात्मनः पूर्णस्वरूपस्य तयापि किं कोऽर्थः क्रियते। युगपर्याप्तयो कृतमित्यमरः। पर्याप्तिः परिपूर्णता ततश्च काचिदपि कल्पस्य गतस्य विवाहार्थं नाहर्त्तव्येत्युद्धवं प्रति किमपि निगूढं तत्त्वं सूचितम्॥ ४६॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

तदागमनसम्भावनयैतदुक्त्या पुनर्विचार्यानागमनहेतूननुसन्धाय तदागमनं न सम्भवतीत्याहुः। कस्मादिति। वर्तमानकस्य अत्रागमनहेतुं न पश्यामः यतः प्राप्तराज्यः पूर्वं हि आपद्ग्रस्तस्त्वनी तदिहागत्य स्थित इदानीं लब्धराज्य इह गोपालनादिनिकृष्टाधिकत्वरस्थाने कस्मादायाति किञ्च हतः यद्भयात्पलाय्यात्रागतः स चाहितः हतः शत्रुः कंसो येन स तथा च तादृशशत्रुरपीदानींत्यत्र नास्ति यद्भयादत्रायाति अत्रापि स नास्ति यद्धननार्थं अत्रायातीति भावः। ननु अत्र लब्धमुपकारं स्मृत्वा प्रत्युपकारार्थं

सद्य एव यातीति शङ्कानिरासाय कृष्ण इत्युक्तं श्यामवर्णत्वपातकपटस्तस्मान्नास्ति प्रत्युपकारेण प्राप्तिसम्भावनेत्याशयः नन्विदानीं नव्यानां प्रियाणां नगरस्त्रीणामनुरञ्जने लब्धे नीराज्यस्थत्युपकरणसम्पादनादौ च व्यापृतत्वान्नायाति पश्चादवकाशदश्यामायास्यतीति चेत्तर्ह्येवं विधप्रतिबन्धकानामुत्तरोत्तरं बहूनां सम्भावितत्वात्कदापि तस्यावकाशो दुर्लभः उद्वहनोद्योगस्ततः पुत्रोत्पादनोद्योगस्ततः पुत्रपौत्रादिसुहृद्वृतत्वं तत्र प्रीतत्वं तदनुरोधपरायणत्वं चेति सर्वदा निरवकाशः कस्मदायास्यतीति भावः ॥ ४५ ॥ ननु श्रीपतेस्तस्य किं राज्येन किम्वा नरेन्द्रकृत्याभिरिति चेत्तर्हि सर्वापेक्षया निकृष्टाभिरस्माभिरपि कि तदर्थमायास्यतीत्याशयेनाहुः । किमिति । धर्मार्थकाममोक्षाख्य पुरुषार्थेषु तत्साधनेषु कामनावद्भिरेव सर्वैः समाश्रीयते न चासौ धर्माभिलाषुरित्याहुः । कृतात्मनः । कृतकृत्यस्य नाप्यर्थाभिलाषुरित्याहुः । श्रीपतेरिति । सर्वार्थमूलभूतायाः श्रियः पतिस्तस्य नापि कामाभिलाषुरित्याहुः आप्तकामस्य नापि मोक्षार्थीत्याहुर्महात्मनः परब्रह्मणो मोक्षस्वरूपस्य मुमुक्षुत्वायोगात् एवंभूतस्य तस्यास्माभिर्वनौकोभिर्वनचरीभिः पशुतुल्याभिरन्याभिः सर्वोत्कृष्टाभिर्नरेन्द्रकन्योर्वश्यादिभिर्वा कः अर्थः क्रियेत किं वा प्रयोजनसम्पादनं न किमपीत्यर्थः । इदं राज्यादेरप्युपलक्षणम् । यद्वा । महात्मनः परमात्मनः अत एव श्रीपतेरत एवाप्तकामस्यात एव कृतात्मनः पूर्णस्य ॥ ४६ ॥

गूढार्थदीपिनी

दाशार्हः श्रीकृष्णः स्वकृतया कृष्णकृतया शुचा शोकेन तप्ता नः अस्मान् गात्रैः आश्लेषैः सञ्जीवयन् सन्तोषयन् अपि किं नु इह एष्यतीत्यन्वयः ॥ ४५ ॥ अहिताः शत्रवः ॥ ४६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्या आहुः । कस्मादिति ॥ ४५ ॥ तत्त्वज्ञा आहुः । किमिति । किं कः अर्थः क्रियेत न ततोऽपि ॥ ४६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वकृतया स्वनिमित्तया शुचा तप्तं व्रजं तत्स्थं स्त्रीजनं गात्रैः स्पृष्टैः सञ्जीवयन्निहैष्यत्यपि किम् । अनेनामृतमयतामवयवानां कटाक्षयन्ति । तत्र निदर्शनमाहुः । यथेति । इन्द्रस्तप्तं निदाघतो वनमम्बुदैर्मेघैर्यथेति । गात्राणामप्यम्बुदसाम्यं ध्वनयन्ति ॥४५॥ तां प्रति वा साम्मुख्येन वा काचित्प्रौढा दीर्घेण कालेनागमिष्यामीति प्रलोभनमात्रमिति सहेतुकं वाक्यं । कस्मादिति । प्राप्तराज्यो हताहितो नगरस्त्रीभिर्विहृत्य प्रीतः सर्वसुहृद्वृत्तश्चेत्यनागमनहेतवः । कस्मादिहायाति न कारणं पश्याम इत्याशयः ॥४६॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्मात् क्लिष्टानां तापनाशश्चेदादौ भवेत् पश्चाज्ज्ञानं प्रवर्त्तस्यमिति समग्रमनोरथसम्भावनयैतदुक्त्वा युक्त्या निषेधमाहुः । कस्मादिति । कस्मात्कृष्ण इहायास्यतीत्यर्थः । वर्त्तमानप्रयोगेणैतत् ज्ञापयन्ति यद्यागच्छेत् इदानीमेवागच्छेत् द्वयमपि कृत्वा गच्छेत् विलम्बे प्रयोजनाभावात् ननु साम्प्रतं नागर्यः स्त्रियो भक्ता इति तासां समाधानानन्तरमायास्यतीति चेत्तत्राहुः । प्राप्तराज्य इति । उत्तरोत्तरमागमने प्रतिबन्धा एव भविष्यन्तीति आदौ राज्यमेव ततो मारणीयाः शत्रवः ततो दिग्विजये नरेन्द्रकन्यानामुद्वाहः ततस्तासु प्रीति ततः सर्वसुहृद्धृतः पुत्रपौत्रादिभिः परिवृतः ततः सर्वानुरोधयुक्तः कथमायास्यतीति भावः ॥ ४५ ॥ यथा ते अनुरोधाः तथायूयमपीति ततः समायास्यतीति चेत्तत्राहुः । अस्मत्तापो वा आगमने हेतुः भगवदपेक्षा वा आद्ये इदानीमेवागच्छेत् नन्विदानी महत्कार्यमस्तीति चेत्तत्राहुः । अन्याभिर्वेति । स्वापकारात् कार्यावश्यकत्वं नत्वन्योपकारात् तथा सति वयमेवावश्यकाः स्वार्थे तु किमस्याभिरन्याभिर्वा स्वस्य सर्वथा अप्रयोजकत्वमाहुः । वनौकोभिरिति । वनचर्या वयमनेन वानरतुल्यत्वात् सर्वधर्म वहिष्कारः सूचितः अस्तु वा धर्मवत्त्वं तथापि भगवतो न कोऽप्युपकार इत्याह । अन्याभिर्वेति । वेत्यनादरे सर्वत्र हेतुर्महात्मन इति स हि महानेव न हि महतोऽन्यापेक्षा तत्राप्यात्मनः स हि सर्वान् स्वत एव व्याप्नोति महानुभावस्य वा इत्यलौकिक उपाय उक्तः लौकिकमाह । श्रीपतेरिति । स हि लक्ष्मीपतिः सर्वापेक्षा पूरिका हि सा सेवकानामपि किमुत स्वामिनः किञ्च आत्मकामस्येति आप्तः स्वत एव कामा येन अन्येषामपि कामानां फलदाता स्वयं कथं पूर्णकामो न भवेत् अतोऽस्मदादिभिः कोऽवा अर्थः क्रियेत किञ्च कृतात्मन इति कृताः स्वार्थमात्मानो येन सर्वे हि कीडार्थमेव तेन जनिताः वशीकृत चित्ता इति एके॥४६॥

श्रीसुबोधिनी–सारः

प्राप्तं राज्यं येन हता अहिताः शत्रवो येन स कृष्णः सर्वैः सुहृद्भिर्वृतः नरेन्द्राणां कन्या उद्वाह्य प्रीतः इह व्रजे कस्माद्धेतोरायाति एष्यति न कस्मादपि ॥ ४५ ॥ अभिज्ञोक्तिः । वनमोको निवासो यासां ताभिरस्माभिरन्याभिर्वा महात्मनः श्रीपतेर्लक्ष्मीभर्त्तुराप्तकामस्य कृतात्मनः पूर्णस्य किमर्थः क्रियते न कोप्यर्थः ॥ ४६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्या ऊचुः—किं स्मरणप्रश्नेन ? स्वकृतया शुचा स्वनिमित्तशोकेन सन्तप्ताः नोऽस्मान् गात्रैर्मुखकरप्रदर्शनस्पर्शादिभिः सञ्जीवयन् सम्यक् सुखपूर्वकं जीवयितुं दाशार्हः कृष्णः अपि किं नु इह व्रजे एष्यति आगमिष्यतीत्यन्वयः । तत्र दृष्टान्तमाहुः—

यथेति । इन्द्रो यथा अम्बुदैर्मेघैः शुष्कं वनं सञ्जीवयन्नायाति तद्वत् ॥ ४५ ॥ अन्या ऊचुः—कस्मादिति । पूर्वं त्वनन्यगतिकत्वेनात्र उषितवान् सोऽधुना चेन्नागतस्तर्हि इतोऽग्रे उत्तरोत्तरं प्रतिबन्धकबाहुल्यात् कस्माद्धेतोः कृष्ण इह आयाति आगमिष्यति ? प्रतिबन्धाकानेव सूचयन्त्यो विशिषन्ति–प्राप्तं राज्यं येन सः, हताः अहिताः शत्रवः कंसादयो येन सः, नरेन्द्रकन्या उद्वाह्य सर्वैः सुहृद्भिः पितृपुत्रपौत्रादिभिर्वृतः प्रीतश्च भविष्यति ॥ ४६ ॥

अन्वितार्थप्रकाशिका

अपीति । किं स्मरणप्रश्नेन स्वकृतया शुचा स्वनिमित्तशोकेन सन्तप्ताः नोऽस्मान् गात्रैर्मुखकरप्रदर्शनस्पर्शादिभिः सञ्जीवयन् सम्यक् जीवयितुं दाशार्हं कृष्णः अपि किन्तु इह व्रजे एष्यति आगमिष्यतीति । यथेति । इन्द्रो यथाम्बुदैर्मेघैः शुष्कं वनं संजीवयन्नायाति तद्वत् ॥ ४५ ॥ कस्मादिति । अनन्यगतित्वात्पूर्वमत्रावसत् अधुना तु प्राप्तं राज्यं येन सः हताः अहिताः शत्रवः कंसादयो येन तादृशः सन् कृष्णः इह कस्मात् हेतोः आयाति आगमिष्यति ततश्च नरेन्द्रकन्या उद्वाह्य सर्वैः सुहृद्भिः पितृपुत्रपौत्रादिभिर्वृतः प्रीतश्च भविष्यति ॥ ४६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्य कृष्णस्य पदकैः पादनिक्षेपभूप्रदेशैः माध्व्या मधुरया ॥ ४६–४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्या ऊचुः ॥ कस्मादिति ॥ कृष्णः, अनन्यगतिकत्वेन पूर्वमत्रोषित इति शेषः । प्राप्तं राज्य येन सः, अधुनेति शेषः । हता अहिताः शत्रवो येन एवंभूतः जातः, तस्मात्, नरेन्द्रकन्याः उद्वाह्य, प्रीतः सर्वसुहृद्वृतोऽपि जातः । अतः कस्माद्धेतोः, इह आयात्यागमिष्यतीत्यर्थः ॥ ४५ ॥ अन्यास्तु परमार्थमूचुः । किमस्माभिरिति ॥ वनौकोभिर्वनवासिनीभिः, अस्माभिः, अन्याभिर्वा पुरयोषिद्भिश्चेत्यर्थः । महात्मनः परमात्मनः, श्रीपतेर्लक्ष्मीकान्तस्य, स्वत एव आप्तकामस्य अवाप्तसमस्तकामस्य, अत एव कृतात्मनः पूर्णस्य, किं को वा अर्थः क्रियेत । पूर्णकामस्यास्यास्माभिः किं प्रयोजनं साधनीयमस्ति न किमपीत्यर्थः ॥ ४६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अप्येष्यतीति : १०.४७.४५.

एष्यत्यसावनृतभीति–रुदारचित्तोद्रागुक्तिनिर्वहणपूर्ण दृढप्रतिज्ञः ।
आशेयमेवमनिशं सुदिनत्वमह्नां सम्पादयत्यनुपलं भगवत्स्मृतीनाम् ॥ ११४ ॥

आयातु मा वा गृह्णातु मा वा नामापि नः प्रभुः । कुशलं ब्रूहि तेनैव धन्यात्मानो भवाम भोः ॥ ११५ ॥

कृष्णप्रिया

हे साधो ! जैसे स्वर्गराज इन्द्र जल भरे मेघों से वृन्दावनादि वनों को संजीवित करते हैं, वैसे ही प्यारे व्रजनाथ के वियोग शोक से सन्तप्त हम गोपियों को अपने कोमल रसाल श्री अङ्गों के स्पर्श समालिङ्गनादि सुखों से संजीवित करने के लिए व्रज में पधारेंगे ! ॥ ४५ ॥ उद्धवजी ! अब तो राज्य मिल गया, शत्रुवृन्द के कण्टक उखाड़ दिए, अपने स्वजन भी मिल गए, राज कुमारियों से व्याह भी कर लिए इस प्रकार सर्वविध कार्य सिद्ध हो जाने से आनन्द विभोर बने हुए श्रीकृष्ण अब व्रज में क्यों पधारेंगे ? ठीक है स्वयं आनन्दित रहें ॥ ४६ ॥

किमस्माभिर्वनौकोभिरन्याभिर्वा महात्मनः । श्रीपतेराप्तकामस्य क्रियेतार्थ[1] कृतात्मनः ॥ ४७ ॥
परं [2]सौख्यं हि नैराश्यं स्वैरिण्यप्याह[3] पिङ्गला । तज्जानतीनां नः कृष्णे तथाप्याशा दुरत्यया ॥ ४८ ॥

कर्दमक्षमा

अन्वय—श्रीपतेः, आप्तकामस्य, कृतात्मनः, महात्मनः, वनौकाभिः, अस्माभिः, वा, अन्याभिः, अर्थः, क्रियते ।४७। स्वैरिणी, अपि, पिङ्गला, नैराश्यम् , हि, परम , सुखम् , आह, तत् जानतीनाम् , अपि, नः, तथा, कृष्णे, आशा, दुरत्यया ।४८।

श्रीधरस्वामिविरचिता भावार्थदीपिका

यतोऽघटमानापि या कृष्णस्य संगतिः सैवास्मान्व्याकुलयत्यतो नैराश्यमेव परमं सुखं तच्चातिदुष्करमित्याहुः परं सौख्यमिति । स्वैरिणी कामचारिणी ॥ ४७ ॥ संविदमेकान्तवार्ताम् ॥ ४८ ॥

---

१. महा–वीर. । २. सुखं–विज. । ३. णी प्राह–प्रा. पा. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतो यस्मात् । अघटमाना भवितुमशक्या या । तच्च नैराश्यम् । पिंगला तन्नाम्नी वेश्या । तथापि नैराश्यं परं सुखमिति ज्ञाने सत्यपि । आशा तृष्णा । दुरत्यया त्यक्तुमशक्या । तर्हि तत्प्राप्त्याशा त्यज्यतामिति चेन्न, सा सर्वथैव त्यक्तुमशक्येत्याहुः–परमिति । तदपि कृष्णे आशा कृष्णविषया ह्याशा दुरत्यया सर्वैरेव दुस्त्यजा । पिंगलायाः खलु पुरुषान्तर एवाशाऽऽसीदतः सा तया त्यक्तेति भावः ॥ ४७ ॥ न केवलमस्माकमेव कृष्णाशा दुस्त्यजा किं त्वन्यस्यापीत्याहुः–क इति । यस्य कृष्णस्य ॥ तदेवाभिव्यंजयन्ति—क इति । को जनो लोकमात्रं किं पुनः स्त्रीत्यर्थः । उत्सहेत अध्यवसायमपि कुर्यात् किं पुनस्त्यजेदिति, संत्यक्तुम् अदाढर्य ज्ञानैरप्यवज्ञातुं किं पुनर्विस्मर्तुम् । उत्तमाः श्लोका गुणरूपादिवर्णा अपि यस्य तस्य संविदम् 'न पारयेहम्' इत्यादिरूपाम् । संत्यक्तुमिति संशब्देन मानादावप्यन्तरस्त्यागो निषिद्धः । कुतः—तदाह–अनिच्छत इति । 'नाहमात्मानमाशासे' इत्यादिवन्नवनवप्रियानुरागेण प्रियामनपेक्षमाणस्यापि श्रीर्लक्ष्मी रेखारूपेण वर्तमाना अंगाद्वक्षसः क्वचित्कदाचिदपि न च्यवते नापयाति ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

परं परमं हि एव नैराश्यमेव स्वैरिणीत्वेन तथा वक्तुमनर्हापीत्यपिशब्दार्थः । न च मन्तव्यं तद्वयं न विद्म इत्याहुः । तन्नैराश्यमेव सुखमिति जानतीनामपीत्यन्वयः । तथापि तादृशी आशा दुरत्यया कथमपि त्यक्तुं न शक्येत्यर्थः । कुतः कृष्णे चित्ताकर्षके श्रीव्रजेन्द्रनन्दन इत्यर्थः । अन्यत्तैः । तत्राघटमानायाः श्रीकृष्णसङ्गतेराशैवास्मानाकुलयतीत्युन्नेयम् । स्वैरिण्यपीत्यनेन 'यन्मनस्कास्तत्प्राणास्तदर्थे त्यक्तदैहिकाः । तमेव दयितं प्रेष्ठमात्मानं मनसा गताः" । वयं स्वैरिण्यस्तु न मन्तव्या इति व्यज्य श्रीभगवता वल्लव्यो मे मदात्मिका इतिवत् तथा स्वयमपि जारा भुक्त्वा रतां स्त्रियमित्यर्थान्तरन्यासीकृत्य तस्मिंस्तत्परिहारवन्मधुपुर्यामार्यपुत्रोऽधुनास्त इति साक्षादुक्तिवच्च परमसाधुशिरोमणावुद्धवे सङ्कोचः परिहृत इति च ज्ञेयम् ॥ ४७ ॥ तदेवाभिव्यञ्जयन्ति । क इति । को जनो लोकमात्रं किं पुनः स्त्रीत्यर्थः । उत्सहेत अध्यवसायमपि कुर्यात् किं पुनस्त्यजेदिति सन्त्यक्तुम् । अदाढर्य ज्ञानैरपि अवज्ञातुं किं पुनर्विस्मर्तुम । उत्तमाः श्लोकाः गुणरूपादिवर्णा अपि यस्य तस्य सम्विदं न पारयेऽहमित्यादिरूपां संत्यक्तुमिति संशब्देन मानादावप्यन्तरस्त्यागो निषिद्धः । कुतस्तदाह । अनिच्छत इति । नाहमात्मानमाशास इत्यादिवन्नवनवप्रियजनानुरागेण श्रियमपेक्षमाणस्यापि श्रीर्लक्ष्मी रेखारूपेण वर्त्तमानाऽङ्गाद्वक्षसः क्वचित् कदाचिदपि न च्यवते नापयाति ॥ ४८

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

परं परमम्, हि एव नैराश्यमेव, स्वैरिणीत्वेन तथा वक्तुमनर्हापीत्यापि–शब्दार्थः । न च मन्तव्यम्—तद्वयं न विद्म इत्याहुः—तत् तस्या वाक्यं किंवा नैराश्यमेव सुखमिति जानतीनाम् । यद्वा, तज्जानतीनामपीत्यन्वयः । तथा तादृशी आशा दुरत्यया, कथमपि त्यक्तुमशक्येत्यर्थः । कुतः ? कृष्णे चित्ताकर्षके श्रीव्रजेन्द्रनन्दन इत्यर्थः । यद्यपि श्रीकृष्णाशापि तत्त्वतः परमानन्दमयी, सैव जीवनावलम्बनं च, तथापि विरहार्त्या जीवने नैरपेक्ष्येण तथोक्तम् । अन्यत्तैर्व्याख्यातम् । तत्राघटमानायाः श्रीकृष्णसंगतेराशैवेति लेख्ये या श्रीकृष्णसंगतिः सैवेति लेखकभ्रमादिति । अथवा तत् तदीयं सत्यवाक्यत्वादिकं जानतीनामनुसन्दधानानामिति दुरत्ययत्वे एव हेतुः ॥ ४७ ॥ तदेवाभिव्यञ्जयन्ति—क इति । को जन इति सामान्यनिर्द्देशः सर्व्वलोकापेक्षया यद्वा, कः पुमानपि, किं पुनः स्त्रीत्यर्थः । उत्सहेत—उत्साहमध्यवसायमपि कुर्य्यात्, किं पुनस्त्यजेदिति संत्युक्तुं विस्मर्त्तुमपि, किं पुनस्तदाशां क्षणमपि त्यक्तुम्, उद्गतं तमो यस्मात्तथाभूतः श्लोको यशो यस्येति, यस्य यशः श्रवणादपि तमोहानिस्तस्य, किं वा, उत्तमाः श्लोका गुणरूपादिवर्णनेन कवीनां पद्यानि यस्मिन्निति माहात्म्यविशेष उक्तस्तस्य संविदं संत्यक्तुमिति सं–शब्देन कदाचित् कथञ्चित् त्याज्यता निरस्ता । कुतः ? तदाहुः—अनिच्छत इति । श्रियमनपेक्षमाणस्यापि समन्ततः परिपूर्णत्वात्, श्रीर्लक्ष्मीः, अंगात् वक्षसः क्वचित् कदाचिदपि न च्यवते नापयाति । अन्यत्तैर्व्याख्यातम् । यद्वा, संविदमेकं संकेतनर्म्मापि, श्रीः शोभा, अंगात् श्रीमूर्त्तेः, अन्यत् समानम् ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अन्याः पुनराहुः । परं सौख्यमिति । यत्पिङ्गलाख्या वेश्या प्राह । नैराश्यं परमं सौख्यं हीति । तज्जानतीनामपि नोऽस्माकं तथापि नैराश्यसुखहेतुत्वदर्शनेऽपि कृष्णे कृष्णविषये आशा दुरत्ययाऽपरिहार्या ॥ ४७ ॥ युक्तं चैतदिति काश्चिदाहुः । क इति । उत्तमश्लोकस्य संविदमेकान्तवार्तां त्यक्तुं को जन उत्सहेत न कोऽपीत्यर्थः । तत्संवित्त्यागानुत्साहमेव दृष्टान्तमुखेन दर्शयन्त्यस्तं विशिंषन्ति । अनिच्छतोऽपीति । श्रीर्लक्ष्मीरनिच्छतोऽकामयमानस्यापि यस्योत्तमश्लोकस्याङ्गादुरःस्थलात्क्वचित्कदाचिदपि न च्यवते ॥ ४८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कृष्णस्य पूर्णकामत्वात्तत्तथास्तु युष्माकं सुखनिमित्तं किं तत्राह। परमिति। आशा अतितृष्णा ॥ ४७ ॥ न केवलमस्माकमेव कृष्णाशा दुस्त्यजा अन्यस्यापीत्याहुः। क इति ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तर्हि किं कुर्म इत्यपेक्षयान्या आहुः—परं सौख्यमित्यादि नैराश्यं परं सौख्यम्, उक्तञ्च—पिङ्गलेत्यादि, स्वैरिण्यपीत्यादि। ननु तदेव क्रियतामित्याहुः—तज्जानतीनामप्यस्माकम्, तथापि दुरत्यया दुर्वारा आशा ॥४७॥ तस्मिन्नाशाया दुर्वारत्वं समुचितमेवेत्यन्या आहुः—क उत्सहेत ? न कोऽपि। कुतः ? इत्याहुः—अनिच्छेति। क्वचित् कदाचिदपि न च्यवते नापसरति, अनिच्छतोऽपि पूर्णकामत्वादध्यायमानस्यापि ॥ ४८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अन्या आहुः—हे सख्यः! भद्रं ब्रूत, किन्तु नैराश्यमेव परमं सुखं यद्यपि, तथापि निराशया स्थातु न शक्यते। तथाहि—क उत्सहेत इत्यादि ॥ ४७-४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तर्हि तत्प्राप्त्यांशा त्यज्यतामिति चेन्न सा सर्वथैव त्यक्तुमशक्येत्याहुः। परमिति। तदपि कृष्णे आशा कृष्णविषया ह्याशा दुरत्यया सर्वैरेव दुस्त्यजा। पिङ्गलायाः खलु पुरुषान्तर एव च सीदतः सा तया त्यक्तेति भावः ॥ ४७ ॥ किञ्च लोभी खलु लोभ्यं वस्तु प्राप्नोतु न प्राप्नोतुमया किन्तु तत्रौत्सुक्यं त्यक्तुं नोत्सहते इत्याहुः। क इति। उत्तमः श्लोकस्य कृष्णस्य संविदं सौन्दर्यमाधुर्याद्युपलब्धिं त्यक्तुं न उत्सहेत न कोऽपि। श्रियमनपेक्षमाणस्यापि यस्य श्रीर्लक्ष्मीरेखारूपेण वर्त्तमाना अङ्गाद्वक्षसः कदापि न च्यवते नावयाति ॥ ४८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

तथा चैवंविधनिरपेक्षापेक्षवतीनामस्माकं नास्ति तापनिवृत्तिकरः कश्चिदुपायः यद्यप्यस्ति नैराश्यरूप एकस्तथापि नामवस्माभिरनुष्ठातुं शक्य इत्याशयेनाहुः। परमिति। आशायाः सर्वदुःखनिदानत्वात्तन्निवृत्तिरेव परं सौख्यं हि शब्दः "प्राप्यते आशायाः शाम्यति औपस्थ्यजैह्वयकार्पण्याद्गृहपालातेनरः यस्य यतो निवर्त्तेत विमुच्येत ततस्ततः। निवर्तनाद्धि सर्वतो वेत्ति दुःखमेव मि"त्यादि श्रुतिस्मृतिप्रसिद्धिं द्योतयति अतितमरप्रसिद्धोऽप्ययमर्थ इत्याशयेनाहुः। स्वैरिण्यपीति। तथा तज्जाननीनामप्यस्माकं कृष्णे या आशा सा आशा दुरत्यया त्यक्तुमशक्या पिङ्गला हि वेश्या कृष्णाशयान्याशां त्यक्तवती सदानन्दरूपस्य परमात्मनः सर्वोत्तमत्वाद्वयं किमाशया कृष्णाशां त्यक्ष्याम इति भावः ॥ ४७ ॥ नन्वत्यन्तालभ्यविषये किमित्याशया संतप्तचित्ताः संपन्ना इत्याशङ्क्य यथा सावत्यन्तालभ्यस्तथा तद्विषयकाशापीत्यर्थः। दुरत्यया केनाप्यत्यक्तत्वादतो न वयमेवोपालम्भनीया इत्याशयेनाः। क इति। उत्तमश्लोकस्य संविदम् एकान्तवार्तां ज्ञानं वा सम्बध्य एकान्तवार्तादिविषयिकामाशां कः संत्यक्तुमुत्साहमपि कुर्यात्तस्यागस्य तु का वार्ता यतोऽसावुत्तमैरपि श्लोक्यते श्लाघ्यते अन्येषां का वार्ता ब्रह्मादिभिः प्रार्थनीयकरुणाकटाक्षा सर्वोत्तमा श्रीश्चलापि अनिच्छतोऽपि यस्य भगवतोऽङ्गाद्वक्षःस्थलात्क्वचिन्नच्यवते कदाचित्कुत्रचिदपि प्रच्युता न भवति तस्याशां वयं वराक्यः कथं त्यक्तुं शक्ष्याम इत्यर्थः ॥ ४८ ॥

गूढार्थदीपिनी

अस्माभिः किं श्रीपतेः कोऽपि अर्थः प्रयोजनं क्रियेत सम्पद्येत न कोऽपीत्यन्वयः। कृतात्मनः वशीकृतचित्तस्य पूर्णस्य वा ॥ ४७ ॥ तत् आशया दुःखहेतुत्वम्। दुरत्यया दुस्त्यजा ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वैरिणी स्वेच्छाचारिणी ॥ ४७ ॥ सम्विदं रहस्यवार्ताम् ॥ ४८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्रोद्धवद्वारा स्वधवमाधवबोधनोद्बुद्धस्मृतिमती काचिद्वदति ॥ किमिति। वनमोको यासां ताभिः किं किं प्रयोजनं तथाऽन्याभिर्नगराङ्गनाभिरप्यर्थः क्रियेत किं नेत्यर्थः। महात्मत्वं श्रीपतित्वम।प्तकामत्वं च कृतात्मत्वं च तत्कृतार्थाभावे हेतवः ॥४७॥ इत आशा कुतस्तथाऽपि सा नात्येतुं शक्येत्याहुः ॥ परमिति। नैराश्यं परं सुखं स्वैरिणी पिङ्गला तन्नाम्नी वारनार्याह। एकादशे प्रोक्ता तत्कथाऽनुसन्धेया। तत्तद्वचनं जानतीनामप्यस्माकं कृष्णे तथाऽपि। तथाप्येति छेदः। आशा दुरत्यया साऽप्येतमेव परोक्षतः कान्तं मत्वा नश्यत्कान्तान्तराशां तत्याज। वयं त्वपरोक्षतः सम्प्राप्तसङ्गः कथय कथं त्यक्ष्यामाशामित्याशयः। यथोक्तमेकादशे। सन्तं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय। अकामदं दुःखभयादिशोकमोहप्रदं जारमहं भजेऽज्ञेति ॥४८॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तर्ह्येवं सति किङ्कर्त्तव्यमित्याशङ्क्य कंचिदुपायं परिकल्प्य दूषयन्ति । परं सौख्यमिति । आशा हि सर्वेषां दुःखहेतुः सा त्यक्तव्येति साधनं "प्रजायत आशाया वै शाम्यती"ति श्रुतेः अतो नैराश्यमेव श्रुत्यनुभवसिद्धं साधनं तस्य फलाव्यभिचारमाहुः परं सौख्यमिति । स्वभावतोऽपि परमसुखरूपं युक्तश्चायमर्थः "औपस्थ्यजैह्वयकार्पण्याद्गृहपालायते नरः" इति किञ्च या हि स्वैरिणी सा मनोविक्षेपसहिता अन्यथैकत्र प्रतिष्ठिता स्यात् सापि नैराश्यं कृतवतीत्याहुः । स्वैरिणीति । यथा संछिद्य कान्ताशामित्यग्रे वक्ष्यति अनेन आशाया अन्तो नास्तीत्यपि सूचितं पिङ्गलानाम वेश्या इयमपि कथा नारदादिभिः श्रुत्वा आर्षज्ञानेन वा ज्ञायते तज्जानतीनामपि प्रकारतः फलतः उपपत्तितश्च नोऽस्माकं सर्वासामेव कथं न स पक्ष आद्रियत इति चेत्तत्राहुः । कृष्णे तथाप्याशा दुरत्ययेति । पिङ्गला हि कृष्णाशया इतराशां त्यक्तवती सर्वस्मात् कृष्णोऽधिक इति वयं किमाशया कृष्णाशां त्यक्ष्यामः उत्कर्षः कृष्ण एव पर्यवसित इति अर्थोदर्कत्वात् एतासामाशापूत्योपायापरिज्ञानं कृष्णाशा ततोऽपि सिद्धा भवेत् नवेति सन्देहश्च तमाशात्रवीदित्यत्र तथा निर्णीतम् ॥ ४७ ॥ नन्वाशापरित्यागे पदार्थविस्मरणं हेतुरस्ति तस्मिन् कृते आशा निवर्त्तिष्यत इति चेत्तत्राहुः । क उत्सहेतेति । उत्तमश्लोकस्य भगवतः संविदं स्मरणात्मकं संयुक्तं क उत्सहेत संविच्छब्देन सम्बन्धो ज्ञानं चोच्यते उत्तमैः श्लोक्यते एव नतु संबन्धमभिप्राप्नुवन्ति । सवरेव श्लोक्यत इति सुलभं भगवत्स्मरणम् अविगीतत्वात् बाधरहितं विस्मर्त्तव्यत्वं सम्बन्धो वा दूरीकर्त्तव्य इति को वा उत्साहमपि कुर्यात् अशक्यत्वात् अत्यन्तमीप्सितत्वाच्च ज्ञानपक्षे अशक्यत्वमुत्तमश्लोकपदेनैव साधयित्वा सम्बन्धत्यागेच्छाभावे विद्यमानेऽपि हेतौ न जायत इत्युपपादयन्ति । अनिच्छतोऽपीति । इच्छामात्राभावे कामाभावः सुतरां सिद्धः तादृशे हि स्त्रियो विरक्ता भवन्ति तत्रापि स्वतः प्रौढाः तत्रापि पित्रादेर्गृहे लब्धप्रतिष्ठा स्थिता अपि औदासीन्येन तिष्ठन्ति धर्मपरिपालका इव भगवाननिच्छन् भवति तादृशस्यापि अङ्गाद्वक्षस्थलात् श्रीः अर्थार्थिभिः सर्वदा सेव्यमानापि कदापि न च्यवते च्युता न भवति ॥ ४८ ॥

श्रीसुबोधिनी–सारः

स्वैरिण्यपि पिंगला नैराश्यं निष्कामत्वं परं सौख्यमाह हि एव तज्जानतीनां नोस्माकं तथापि कृष्णे आशा दुरत्ययाऽबाध्याऽनिवार्येत्यर्थः ॥ ४७ ॥ उत्तमश्लोकस्य हरेः संविदमेकांतकथां संत्यक्तुं क उत्सहेत शक्नुयात् न कोपि अनिच्छतोऽपि यस्यांगाद्वक्षसः श्रीर्न च्यवते न पृथक् भवति क्वचित्कदापि ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्यास्तु परमार्थमुचुः—किमिति । वनौकोभिः वनवासिनीभिरस्माभिरनिपुणाभिः, अन्याभिर्विदग्धाभिः पुरवासिनीभिर्वा आप्तकामस्य पूर्णमनोरथस्य कृष्णस्य किं को वाऽर्थः प्रयोजनं क्रियेतेत्यन्वयः । आप्तकामत्वे हेतुमाहुः— महात्मन इति । महान् सर्वमनोरथपूरक आत्मा अन्तःकरणं यस्य तस्येत्यर्थः । सर्वमनोरथपूरकत्वे हेतुमाहुः— श्रीपतेरिति । सर्वसम्पदधिष्ठात्र्या लक्ष्म्याः पतित्वादित्यर्थः । 'पूर्णवैराग्यवत्त्वादपि तस्यान्येनानुपयोग' इत्याशयेनाहुः–कृतात्मन इति । वशीकृतान्तःकरणस्येत्यर्थः ॥ ४७ ॥ आशायाः परमं दुःखम् , नैराश्यं आशाराहित्यमेव परं सौख्यं परमसुखसाधनम् । हीति प्रसिद्धमेतत् । तामेव दर्शयति–स्वैरिणीति । प्रसिद्धा वेश्या पिङ्गलाख्याप्येवमेवाह । 'तर्हि सा आशा कुतो न त्यज्यते ?' तत्राहुः–तदिति । तथा तत् आशायाः दुःखहेतुत्वं जानतीनामपि नोऽस्माकं कृष्णे दुरत्यया दुस्त्यजा आशा वर्तते ॥ ४८ ॥

अन्वितार्थप्रकाशिका

किमिति । महात्मनः श्रीपतेः आप्तकामस्य कृतात्मनः वशीकृतचित्तस्य पूर्णस्य वा हरेः वनौकोभिः वनवासिनीभिरस्माभिरनिपुणाभिरन्याभिर्विदग्धाभिः पुरवासिनीभिर्वा किं को वार्थः क्रियेत ॥ ४७ ॥ परमिति । स्वैरिणी कामचारिणी अपि पिङ्गलानाम्नी वेश्यापि नैराश्यम् आशाराहित्यमेव परं सौख्यं सुखसाधनम् आह स्म । तत् । आशायाः दुःखहेतुत्वं जानतीनामपि नोऽस्माकं कृष्णे आशा दुरत्यया दुस्त्यजा ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्याः पुनराहुः ॥ परं सौख्यमिति ॥ पिङ्गला पिङ्गलाख्या, स्वैरिणी वेश्यापि, नैराश्यं, परं सौख्यं हि इति, आह । तत्, तथा सत्यं इति जानतीनां अपि, नोऽस्माकं, कृष्णे विषये, आशा दुरत्यया अपरिहार्यैव, वर्त्तते ॥ ४७ ॥ युक्तं चैतदिति काश्चिदाहुः ॥ क इति ॥ उत्तमश्लोकस्य श्रीकृष्णस्य संविदेकान्तवार्त्ता तां, संत्यक्तुं, कः जनः, उत्सहेत न कोऽपीत्यर्थः । तत्संवित्यागानुत्साहमेव दृष्टान्तमुखेन दर्शयन्त्यस्तं विशिषन्ति । श्रीर्लक्ष्मीः, अनिच्छतोऽकामयमानस्यापि, यस्योत्तमश्लोकस्य, अङ्गादुरःस्थलात्, क्वचित्, कदाचिदपि, न च्यवते । तस्य तां त्यक्तुं वयं कथं शक्नुम इति भावः ॥ ४८ ॥

कृष्णप्रिया

उद्धवजी ! भगवान् श्रीकृष्ण तो स्वयं पूर्ण काम हैं और सर्व भक्तजन के कामपूरक हैं, पुनः स्वयं श्रीपति हैं, महानुभाव हैं, विश्व के समस्तजनों के चित्त को वश करने वाले हैं अथवा अपनी क्रीडा के लिए ही सर्व आत्माएँ आपने उत्पन्न की है उनको हम वासिनियों से कोई मतलब नहीं है वा अन्य स्त्रियों से भी कोई प्रयोजन नहीं फिर क्यों पधारेंगे, फिर भी हम सब समाप्त है और स्वयं कृपामेध है इसलिए हमको तापमुक्त करने के लिए पधारने की सम्भावना हो सकती है ॥ ४७ ॥ स्वैर बिहारिणी लोकनारी पिङ्गलाने कहा है कि आशा से पर रहना ही परम सुख है हमने नारदादि ऋषि मुनियों से भी यही कथा सुनी है सब ठीक है लेकिन प्रियतम श्रीकृष्ण के लिए जो आशा है वह किसी प्रकार भी छुटती नहीं ॥ ४८ ॥

क उत्सहेत संत्यक्तुमुत्तमश्लोकसंविदम् । अनिच्छतोऽपि यस्य श्रीरङ्गान्न च्यवते क्वचित् ॥ ४९ ॥
सरिच्छैलवनोद्देशा गावो वेणुरवा इमे । संकर्षणसहायेन कृष्णेनाचरिताः[1] प्रभो ॥ ५० ॥

कर्दमक्षमा

अन्वयः—उत्तमश्लोकसम्विदम्, सन्त्यक्तुम्, कः, उत्सहेत, अनिच्छतः, अपि, यस्य, अङ्गात, श्रीः, क्वचित्, न, च्यवते, ॥ ४९ ॥ इमे, सरित् शैल, वनोद्देशाः, गावः, वेणुरवाः, सङ्कर्षणसहायेन, कृष्णेन, आचरिताः ॥ ५० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च तद्विस्मृतौ न तावद्दुःखमस्ति साऽपि नास्माकं संभवतीत्याहुः सरिच्छैलेति त्रिभिः । आचरिताः सेविताः ॥ ४९–५० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अतिदुःखिता आहुः–किञ्चेति । तद्विस्मृतौ कृष्णविस्मरणे । सापि तद्विस्मृतिरपि । इम इति–तदाविष्टमनस्त्वात्प्रत्यक्षीभूता इवेति प्रतीयते तासामिति भावः । प्रभो इति–तद्दूतत्वात्त्वमप्यस्माकं प्रभुरेवेत्यभिप्रायः । यद्वा–त्वं प्रभुरसीत्यतो गोपीवच्छ्रीकृष्णावेशं कुर्विति शुकोक्तिः । किञ्च—तद्विस्मृतौ सत्यामाशापि हीयते सा त्वस्माकं नैव घटत इत्याहुः–सरिदिति त्रिभिः । आचरिता अनुशीलिताः, श्रीनिकेतैर्ध्वजवज्रादिचिह्नशोभायुक्तैः, शिलादिष्वद्यापि वर्तमानैः । तोषिण्यवतरणिका पूर्ववत् । वनोद्देशेन व्रजोपि गृह्यते तदन्तर्वर्तित्वात्तस्येति सर्वाण्यवस्थानानीत्यर्थः । वेणुरवा इदानीमपि कैश्चित्क्रियमाणाः, इमे तु स्फूर्त्या प्रत्यक्षा इव क्रियन्ते । तत्र गाव इत्यत्र लिंगं विपरिणमनीयम् । आचरिता इति व्याख्यातमेव । अन्यकृतवेणुरवस्यापि तदनुशीलित्वं जात्यैक्यात् । संकर्षणसहायेनेति–तत्रतत्र शोभादिपरिपोषात्तेनापि सहागमनमीहितम् । पुनःपुनरिति स्मरणाऽविच्छेदेऽपि स्मरणविशेषाणां पुनःपुनरतिशयिता ध्वनिता । प्रभो इति परमदैन्येन । यद्वा–हे प्रभो सर्वदा समर्थेति त्वमेवात्र न्यायकर्ता भवेति भावः ॥ ४९ ॥ नन्दगोपसुतमिति तस्य तत्रत्यत्वेऽप्यन्तर्हित लीलत्वात्तथोक्तिर्लोकदृष्ट्येति ज्ञेयम् । बताश्चर्ये । सार्धेनान्वयः । ननु सरिदाद्यवलोकनं श्रीकृष्णं स्मारयत्यन्यदा तन्नास्तीत्यागतमिति तत्राह–तत्पदकैः, तस्य कृष्णस्य प्रशस्तपदैः । प्रशस्तता तत्र कथमितिचेदाह–श्रीनिकेतैर्ध्वज वज्रादिश्रीविशिष्टैः । श्रीनन्दाभिधस्य गोपस्य राज्ञः सुतमिति भवद्विधोपदेशात्प्रयत्नशतैरीश्वरत्वेन स्मर्यंयिष्यमाणमपि तद्रूपं तथैव स्मारयन्तीति ज्ञानाद्यवसरो व्यंजितः । ननु तत्रतत्रानुसंधानमात्रं बलात्त्यक्त्वा तं विस्मरत, तत्राहुः–श्रीनिकेतैर्ध्वजाद्यसाधारणलक्षणैः । श्रियः सर्वस्याः सम्पदः शोभाया वा निकेतैस्तस्य पदकैः, सर्वत्रोदितैस्तल्लीलाभेदेन पदचिह्नानां प्रकारैः । स्थूलादित्वात्प्रकारे कन् । तदानीमपि तेषामनुवृत्तिः प्राग्व्युत्पादितैव ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो तद्विस्मरणे सत्याशापि हीयते तच्च नैव घटत इत्याहुः । सरिदिति युग्मकेन । वनोद्देशेन व्रजोऽपि गृह्यते । तदन्तर्वर्त्तित्वात्तस्येति । सर्वाण्यवस्थानानीत्यर्थः । वेणुरवा इदानीमपि कैश्चित् क्रियमाणाः । इमे इति स्फूर्त्या प्रत्यक्षा इव क्रियन्ते तत्र गाव इत्यत्र लिङ्गं विपरिणमनीयम् । आचरिताः सेविता अनुशीलिता इत्यर्थः । अन्यकृतवेणुरवस्यापि तदनुशीलित्वं जात्यैक्यात् । सङ्कर्षणसहायेनेति । तत्र तत्र शोभादिपरिपोषात्तेनापि सहागमनमीहितम् ॥ ४९ ॥ पुनःपुनरिति स्मरणाविच्छेदेऽपि स्मरणविशेषाणां पुनःपुनरतिशयिता ध्वनिता प्रभो ! इति परमदैन्येन यद्वा हे प्रभो ! सर्वदा समर्थेति त्वमेवात्र न्यायकर्त्ता भवेति भावः । श्रीनन्दाभिधस्य गोपस्य राज्ञः सुतमिति भवद्विधोपदेशात् प्रयत्नशतैरीश्वरत्वेन स्मर्त्तयिष्यमाणमपि तद्रूप तथैव स्मारयन्तीति ज्ञानाद्यनवसरो व्यञ्जितः । ननु तत्र तत्रानुसन्धानमात्रं बलात् त्यक्त्वा तं विस्मरत तत्राहुः श्रीनिकेतैर्ध्वजाद्यसाधारणलक्षणैः श्रियः सर्वस्याः सम्पदः शोभाया वा निकेतैस्तस्य पदकैः सर्वत्रोदितस्तल्लीलाभेदेन पदचिन्हनां प्रकारैः । स्थूलादित्वात् प्रकारे कन् । तदानीमपि तेषामनुवृत्तिः प्राग्व्युत्पादितैव ॥ ५० ॥

---

[1] क्रीडिताः–विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो ! तद्विस्मरणे सत्याशापि हीयते, तच्च नैव घटेतेत्याहुः—सरिदिति। यदि जलान्तिके यामस्तदा सरितः, गृहे चेत्तिष्ठामस्तदा शिलाबद्धभूभागेन स्मार्य्यमाणा अत्युच्चत्वाद्वा दृश्यमानाः शैलाः, यदि वा वनानि प्रविशामस्तदापि वनस्थानानीति जल-स्थल वनानि सर्वाण्येवेत्यर्थः। 'इमे' इत्यस्य लिंगविपरिणामेन सर्वैरप्यन्वयः, इति तेषां सर्वेषामेव प्रत्यक्षतोक्ता। यद्वा, इमे तद्विरहातुराः साक्षादत्रैवैते निपतिताः श्रीदामसुबलादयसत्सहचराः, तेषामत्यन्तश्रीकृष्णस्मारकहेतु-महार्त्तिजननान्नामाग्रहणम्। एवं सरिदादीनां यथोत्तरं स्मारणे श्रेष्ठ्यमूह्यम्। सम्यक् कर्षति श्रीकृष्णस्य क्रीडासुखार्थं सखीन्, किं वा स्नेहभरेण तस्य चित्त-मेवाकर्षतीति संकर्षणः सहायः संगी यस्य तेन, किंवा संकर्षणस्य सहायेनेत्युभयथापि मिथः स्नेहेन सुखक्रीडा सूचिता। कृष्णेन जगच्चित्ताकर्षक क्रीडेनेति तत्क्रीडास्पदानां सरिदादीनामपि चित्ताकर्षकत्वमभिप्रेतम्। आचरिताः सेविता इति तैर्व्याख्यातम्। यद्वा, स्वक्रीडा-साधनत्वं नीताः, यद्वा; आचरिताः कृता इति वेणुरवाणामेव विशेषणम्, ततश्च संकर्षणसहायेनेति तदुपगायनत्वेन तेषामेव माधुर्य्यविशेषः सूचितः। सरिदादीनान्तु श्रीकृष्णक्रीडत्वं व्यक्तमेव। यद्वा, आचरिताः प्रवर्त्तिता गोपानां वेणुरवा इमे इदानीन्तनाः, तद्व्रजजातत्वेनैव तत्प्रकारविशेषशिक्षणात्॥ ४९॥ पुनः पुनरिति कथञ्चित् प्रयत्नेन तच्चिन्तायां त्यक्तायामपि पुनः स्मारणात्, पुनस्तथैव त्यक्तायामपि पुनः स्मरणादित्येवमसकृदित्यर्थः। किंवा अविरतमेवेति। प्रभो इति परमदैन्येन सम्बोधनम्। यद्वा, हे बोद्धुं समर्थेति भवतेदं बुध्यत एवेति भावः। नन्दो गोपो महाराजस्तस्य सुतमिति प्रयत्नशतैरीश्वरत्वेन स्मर्त्तुमिष्य-माणमपि श्रीवल्लवेन्द्र कुमारत्वेनैव स्मारयन्तीत्यर्थः। बत खेदे। ननु तत्र तत्र श्रीकृष्णानुसन्धानमात्रं बलात्यक्त्वा तं विस्मरत, तत्राहुः—श्रीनिकेतैर्ध्वजाद्यसाधारणलक्षणैः, श्रियः सर्व्वस्याः सम्पदः शोभाया वा निकेतैस्तस्य नन्दगोपसुतस्य पदकैः कोमलपदैः सर्व्वत्रोदितैः, तदानीमपि तथैव तेषामनुवृत्तिः प्रागव्युत्पादितैव॥ ५०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किं च तद्विस्मृतौ तु नास्माकं दुःखमस्ति सापि न संभवतीत्याहुः त्रिभिः। सरिदिति। प्रभो! हे उद्धव! सङ्कर्षणसहि-तेन कृष्णेन सरिदादय आचरिताः सेविता॥ ४९॥ ततः किमित्यत आहुः। पुनःपुनर्नन्दगोपसुतं स्मारयन्ति बत कैर्लिङ्गैरित्यत आहुः। श्रीनिकेतैः श्रियः सौन्दर्यसम्पदो निकेतैराश्रयैः तस्य भगवतः पदकैः पदानीव पदकानि "इवे प्रतिकृतौ" इति कः प्रत्ययः तैः स्मारयन्तीति पूर्वेण संबन्धः अतस्तं विस्मर्तुं नैव शक्नुमः॥ ५०॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

आक्रीडिताः क्रीडाङ्गीकृताः इमे सरिदादयः॥ ४९॥ नन्दगोपसुतं पुनःपुनः स्मारयन्ति बत आश्चर्यं ननु सरिदादि-दर्शन एव श्रीकृष्णस्मरणम् अन्यदा नास्तीत्यायातमिति तत्राह। श्रीनिकेत इति। तस्य श्रीकृष्णस्य पदके प्रशस्तपदे प्रशस्तत्वं कुत इत्यत उक्तं श्रीनिकेत इति॥ ५०॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

वेणुरवा इदानीमपि कैश्चित् क्रियमाणा इमे इति स्फूर्त्त्या प्रत्यक्षा इव श्राव्यन्ते स्म एषां तदाचरितत्वं जात्यैक्यात्।४९। पुनःपुनरिति। स्मरणाविच्छेदेऽपि स्मरणविशेषाणां पुनः पुनरतिशायिता ध्वनिता॥ ५०-५२॥

श्रीमज्जीव गोस्वामिकृतो बृहत्क्रमसन्दर्भः

अपि च स्वभावतोऽस्माकं निरन्तरमेव तत्स्मरणम् तत्रापीमे पुनः पुनः स्मारयन्तीत्याहुः—सरिच्छैलवनोद्देशा इत्यादि॥ ५०-५१॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तत्राप्येत उद्दीपन-विभावा इति काश्चिदाहुः—सरिच्छैलवनोद्देशा इति द्वाभ्याम्॥ ४९-५१॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च तद्विस्मृतौ सत्यामाशापि हीयते सा त्वमस्माकं नैव घटत इत्याहुः। सरिदिति त्रिभिः। आचरिताः सेविता अनुशीलिताः। श्रीनिकेतैर्ध्वजवज्रादिचिन्हशोभायुक्तैः शिलादिष्वद्यापि वर्त्तमानैः॥ ४९-५०॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

एतद्दुःखस्य भैषज्यं यदेतन्नानुचिन्तयेत्। एतद्विज्ञानसामर्थ्यं न बालैः समतामियादित्यादिना नन्वस्मरणं यद्यपि दुःखौषधमुक्तं तथाप्यस्माकं तदतीव दुर्लभं स्मारकाणां प्रबलानां बहूनां विद्यमानत्वादित्याहुः। सरिदिति। सरित् सर्वत्याऽपि जलानयनार्थमवश्यं गन्तव्या नदी यमुना बहिर्गताभिरनुवारितदर्शन उच्चैः स्थितः शैलो गोवर्द्धनः विहारार्थमव्यं गन्तव्या वनोद्देशा वृन्दावनस्य तत्तत्प्रदेशाः गृहादाववश्यं द्रष्टव्या गावो निमीलितनेत्राभिरवारितश्रवणा वेणुरवाः संकर्षणसहायेन कृष्णेन

सदानन्दस्वरूपेण स्मृतिसन्ततिसंपादनार्थं संकर्षणेन सह कृतावतारेणाचरितास्तदाचरणं बद्धा इमे सविदादयः अवश्यमनुभूयमानाः पुनः पुनः स्मारयन्तीति परेणान्वय यद्वाच चौर्यदैत्यमारणादिस्मृत्या पालनलालनस्वच्छन्दस्मरणापि रूपाणि भगवच्चरितानि निरुद्धश्रोत्रादिवृत्तीनामपि स्मारयति प्रभुणा प्रेषितस्त्वमप्यस्माकं प्रभुरतोऽस्मद्दुःखमाकर्ण्य निवारयेत सम्बोधनाशयः तद्विस्मरणे त्वं प्रभुः स्याः न तु वामिति वा ॥ ४९ ॥ कदाचिन्मूर्च्छादौ क्षणमात्रं विस्मरणे पुनः पुनः स्मरयन्ति इति स्मारकाणां प्राबल्यमुक्तं तत्रापि नन्दगोपसुतं महत्यां पीडायां प्रबलाश्रयणं कार्यमिति विचारे नन्दायश्चेत्स्मृतिपथमारोहति तदा तत्सुतत्वेन श्रीकृष्णोऽपीति भावः यद्वा ननु दूरस्थितं वस्तु स्मर्यते भगवांस्तु न दूरस्थितः किं तु सर्वेषामात्मत्वादत्यन्तनिकटवर्ती अत एव भवतीनां वियोगो मे न हि सर्वात्मना क्वचिदिति भगवतादिमित्याशङ्कानिरासायोक्तं नन्देति किं च श्रियः सर्वलावण्यकारणभूताया निकेतैर्वा संस्थानैस्तस्य पदकैः कोमलैश्चरणरविन्दैः हृदि कृतदृढस्थानैः स्मरणपुष्कलकारणैः कृत्वा विस्मर्तुं नैव शक्नुमः बतेति खेदे अहो कष्टं न प्राप्तुं शक्यते नापि विस्मर्तुं किं कुर्मः क्व गच्छाम इत्यर्थः ॥ ५० ॥

गूढार्थदीपिनी

संविदं गुप्तवार्ताम् । न च्यवते नापयाति ॥ ४९ ॥ सरिदिति द्वयम् । कृष्णेन आचरिताः सेविताः सरिदादयः अङ्कितैः तत्पदकैः नन्दगोपसुतं स्वारयन्तीत्यन्वयः । बत मोहे ॥ ५०-५१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे प्रभो ! उद्धव ! कृष्णेन आचरिताः सेविताः सरिच्छैलवनोद्देशादयः तस्य पदकैः चरणचिन्हैः सहिता पुनः पुनः स्मारयन्ति विस्मरणेन कदाचित्स्वास्थ्यसम्भावनायां विस्मर्तुं नैव शक्नुमः इति द्वयोरन्वयः ॥ ४९-५० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इत उत्तरत्र तद्गात्रसङ्गो नास्माकमिति पुंस्त्वमेवारोप्य स्त्रीजनो वक्ति ॥ क इति । उत्तमश्लोकसंविदं तेनैकान्तव्यवहरणं सन्त्यक्तुं कः स्त्रीजन उत्सहेत या श्रीः साऽपि यस्याङ्गात्क्वचिदपि न च्यवते । सोऽपि तदाकाङ्क्ष इति सा तदाकाङ्क्षेति नेत्याह॥ अनिच्छतोऽपीति । स्वरतत्वान्मुनिवर्य शैल इति पञ्चमोक्तिवदङ्गस्मरणाभावेन क इत्युक्तिर्वाऽतो न दृष्टान्तदार्ष्टान्तिकव्यत्यासः॥४९॥ न तद्विस्मरणे शक्ता इति वदन्ति ॥ सरिदिति । तत्प्रदेशा गावस्तदङ्कितनाम्न इमे तत्किञ्चित्सजातीयो बुद्धिसन्निधानादिम इत्युक्तिः वेणुरवाः सङ्कर्षणसहायेनाक्रीडिताः सरिच्छैलवनोद्देशाश्च तं याचितस्मारयन्तीति वा ॥ ५० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स्मरणत्यागाशक्यतामुपपादयन्ति । सरिच्छैलेति त्रिभिः । स्मारका हि बहवः येष्ववश्यं प्रवृत्तिः सर्वपरित्यागेऽपि जलार्थमवश्यं गन्तव्यं बहिर्निगत उच्चैः स्थितं पश्येदेव अतो यमुनागोवर्द्धनदर्शनमावश्यकं विहारार्थमवश्यं वनोद्देशाश्च द्रष्टव्याः एते त्रयः सत्त्वादिभेदाः गृहेऽप्यवश्यं द्रष्टव्या गावः निमीलिताक्षाणामपि इमे वेणुरवाः स्मारकाः ये इदानीमप्यनुभूयन्ते अतः स्मारकाः सर्वत्र किं च भगवतः आचरितान्यपि भगवत्स्मारकाणीत्याहुः । सङ्कर्षणेति । बहिर्वृत्तिनिरोध पूर्वोक्ता न स्मारका भगवच्चरितानि तु चौर्यादीनि दैत्यादिमारणेन पालनरूपाणि स्वच्छन्दरमणरूपाणि च आचरिता इत्युच्यन्ते सङ्कर्षणसहायत्वं लीलादौ निर्भयत्वाय तत्रापि कृष्णेन सदानन्देन अस्मदर्थमेवाविर्भूतेन स्मारणार्थमेव तादृशकर्त्रा प्रभो ! इति सम्बोधनं तादृशार्थविस्मारणे कदाचित्तव सामर्थ्यं भवेत् न त्वस्माकमिति ज्ञापितम् अनेन स्वदृष्टान्तेन भवतीभिरपि सुखेन स्थातव्यमिति पक्षो निवारितः अत एव त्वं स्वस्थो वर्त्तसे न वयम् ॥ ४९ ॥ स्मारकान्निरूप्य तैः क्रियमाणस्मरणस्य बालिष्ठतामाहुः । पुनः पुनः स्मारयन्तीति । स्मरणेन पीडया मूर्च्छायां जातायां विस्मरणमाशंसमानानां सर्ववृत्तिनिरोधे स्मारयिष्यन्तीति भयात्स्मृता एव भवन्त्यता पुनः पुनः स्मारयन्ति किं च पीडायां समर्थाश्रयणं कर्तव्यमिति विचारेऽपि नन्दश्चेत् स्मृतः तदा नन्दगोपसुतः इति स्मृत एव भवति भगवान् किं च लक्ष्मीस्थानरूपाण्यतिसुन्दराणि सर्वत्रोदितानि पदान्यच्युतत्वादाधारस्थिते अतिरोभावस्वभावानि तादृशैः तस्यैव भगवतः पदैरसाधारणैर्हृदयादिषु स्थापितैर्वा सानुभावैः दृष्टादृष्टोपायेन बलिष्ठैः कृत्वा विस्मर्त्तुं नैव शक्नुमः ॥ ५० ॥

श्रीसुबोधिनी-सारः

हे प्रभो इमे नदीपर्वतवनोद्देशा गावो वेणुरवाः संकर्षणसहायेन कृष्णेनाचरिता अभ्यस्ताः ॥ ४९ ॥ बतेति हर्षे नंदगोपसुतं पुनः पुनः स्मारयन्ति श्रियो निकेतैस्तस्य पदकैः सुपादैर्विस्मर्त्तुं न समर्थाः ॥ ५० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आशाया दुस्त्यजत्वमेवोपपादयन्ति—क इति । उत्तमैः ब्रह्मादिभिः श्लोक्यते स्तूयते स उत्तमश्लोकः तस्य संविदं एकान्तवार्तां सन्त्यक्तुं कः प्राणी उत्सहेत न ? कोपीत्यर्थः । तत्संवित्त्यागानुत्साहमेव कैमुत्यन्यायेन दृढयति-अनिच्छतोऽपि तामकामयमानस्यापि यस्याङ्गात् उदरस्थलात् श्रीः लक्ष्मीः क्वचित् कदाचिदपि न च्यवते न प्रचलति ॥ ४९ ॥ किंच 'तद्विस्मृतौ

तु नास्माकं दुःखं स्यात्, परन्तु सापि न सम्भवति, स्मारकानां बहुत्वात्' इत्याहुः—सरिच्छैलेति त्रिभिः। 'तद्दासत्वेनान्यविस्मरणे समर्थोऽपि तद्विस्मरणे तु त्वमपि न समर्थ' इति सूचयन्त्यः सम्बोधयन्ति—प्रभो इति। सरिच्छैलादयो नन्दगोपसुतं पुनः पुनः स्मारयन्ति। अतस्तं विष्णुं कृष्णं विस्मर्तुं नैव शक्नुम इति द्वयोरन्वयः। 'बत' इति स्वखेदं सूचयन्ति। स्मारणे हेतुमाहुः—सङ्कर्षणसहायेन रामसहितेन कृष्णेन आचरिताः सेविताः, अतः श्रियः सौन्दर्यसम्पदो निकेतैराश्रयैस्तस्य पदकैस्तत्तद्देशे चिह्नतया स्थितैः स्मारयन्तीत्यन्वयः। सरिच्छैलादिदर्शनादीनामपि जलाहरणाद्यर्थमप्यावश्यकत्वमेवेति ध्येयम् ॥ ५०–५२ ॥

अन्वितार्थप्रकाशिका

क इति। उत्तमश्लोकस्य हरेः संविदम् एकान्तवार्तां संत्यक्तुं कः प्राणी उत्सहेत न कोऽपीत्यर्थः। अनिच्छतोऽपि तामकामयमानस्यापि यस्योत्तमश्लोकस्य अङ्गात् उरःस्थलात् श्रीः लक्ष्मीः कच्चित्कदाचिदपि न च्यवते न प्रचलति ॥ ४९ ॥ सरिदिति द्वयम्। हे प्रभो! सङ्कर्षणसहायेन रामसहितेन कृष्णेन आचरिताः सेविताः इमे सरिच्छैलवनोद्देशाः गावः वेणुरवाश्च श्रियः निकेतैराश्रयैस्तस्य पदकैस्तत्तद्देशे चिह्नतया स्थितैः नन्दगोपसुतं पुनः पुनः स्मारयन्ति अतस्तं विस्मर्तुं नैव शक्नुमः ।५०-५१।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शुचः शोकान् बिनुदन् पुनः पुनस्तैः संदेशैर्निवर्त्तयन् गोकुलं तत्र न्यजनान् कृष्णस्य लीलाश्चरित्राणि कथाः प्राकृतसंस्कृत गद्यपद्यानि च गायत् रमयामास आनंदयामास ॥ ४९–५० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च तद्विस्मृतौ न तावत् दुःखमस्ति, परं तु सापि नास्माकं भवतीत्याहुः। सरिदिति त्रिभिः। सरिदिति। प्रभो हे उद्धव, संकर्षणसहायेन संकर्षणसहितेन, कृष्णेन, सरिच्च शैलश्च वनोद्देशा वनप्रदेशाश्च ते, गावः, वेणुरवाः, इमे सरिदादयः, आचरिताः सेविताः ॥ ४९ ॥ पुनः पुनारति। बतेति खेदे। हे उद्धव, श्रीनिकेतैः सौन्दर्यसंपद एकनिकेतभूतैः, तत्पदकैः श्रीकृष्णस्य पादनिक्षेपस्थानभूतभूप्रदेशादिभिर्लिङ्गैः, नन्दगोपसुतं पुनः पुनः स्मारयन्ति। श्रीकृष्णपदाङ्कितसरिदादिप्रदेशा वीक्षिताः सन्तः कृष्णं स्मृतिपथं नयन्तीत्यर्थः। ततः, कृष्णं विस्मर्त्तुं, नैव शक्नुमः ॥ ५० ॥

कृष्णप्रिया

उद्धवजी भगवान् श्रीकृष्ण तो उत्तम श्लोक हैं बड़े समर्थ एवं उत्तम देवाधि देव भी उनकी स्तुति करते हैं प्राप्त नहीं कर सकते हैं उनकी संविद् माने सम्बद्ध एवं स्मरण का त्याग कौन कर सकता है। पूर्ण काम भगवान श्रीकृष्ण भगवती श्रीदेवी की कभी कामना नहीं करते हैं फिर भी भगवती श्रीदेवी भगवान के श्री अङ्ग से क्षणमात्र भी पृथक नहीं होती है ॥ ४९ ॥ हे उद्धवजी! शायद आप सम्बद्ध से मुक्त होने में या विस्मरण में समर्थ हो सकते हैं क्या आप प्रभु हैं लेकिन हमारा जीवन ही वैसा है कि हम कैसे विसर सकें। सुनिए जलादि लाने के लिए हमें श्रीयमुनाजी एवं श्रीगोवर्धनजी जाना रहता है और खेत के कामों के लिए वनप्रदेशों में जाना निरन्तर रहता है उन प्रदेशों में प्यारे श्रीकृष्ण ने संकर्षणजी के साथ बंशी बजाते रमण किया था और गायें चराई थी इन सबका सतत सातत्य अधिक स्मरण कराता है अतः हम विस्मरण करने में असमर्थ हैं ॥ ५० ॥

पुनः पुनः स्मारयन्ति नन्दगोपसुतं बत। श्रीनिकेतै[1]स्तत्पदकैर्विस्मर्तुं[2] नैव शक्नुमः ॥ ५१ ॥
गत्या ललितयोदारहासलीलावलोकनैः। माध्व्या गिरा हृतधियः कथं तं विस्मरामहे ॥ ५२ ॥

कर्दमक्षमा

अन्वयः—सर्वे, नन्दगोप, सुतम्, बत, पुनः, पुनः, स्मारयन्ति, श्रीनिकेतैः, तत्पदकैः, नैव, विस्मर्तुम्, शक्नुमः ॥५१॥ ललितया, गत्या, उदारहासलीलावलोकनैः, माध्व्या, गिरा, हृतधियः, कथम्, तत्, विस्मरामहे ॥ ५२ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

हे उद्धव तं कथं विस्मरामेति ॥ ५१–५२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

माध्व्या मनोहरया। तत्तम्। ननु वस्त्रेण नेत्रमावृत्य बुद्ध्या मनोऽन्यत्र नीत्वा सर्वं तदीयं विस्मृत्य स विस्मर्यतां तत्राहुः—गत्येति, अनया देहचेष्टामात्रमुपलक्षितम्। उदारहासश्च लीलावलोकनानि च तैरिति तदीयभावविशेषः। बहुत्वं

---

१. ते तत्पदके–विज.। २. तद्–विज.।

तेषां प्रत्येकपरंपरया । माध्व्या शब्दतोऽर्थतश्च मधुरया । एवं विविधचेष्टया हृतबुद्धययस्तद्गत्यादिकं तदीयसौहृदं वा कथं केनोपायेन विस्मरामोऽपि तु न कथमपीत्यर्थः । यद्वा—पुनरन्यो वा तदुपाय उपदिश्यतामित्यर्थः ॥ ५१ ॥ स्वजपनीय मंत्र प्रकाशयंत्य आहुः–हे नाथ सर्वैश्वर्ययुक्त । रमयापि स्वाभीष्टावाप्तये नाथ्यते प्रार्थ्यते इति तथा । व्रजनाथाना गोपीनां गोपानां वार्तिनाशन । यद्वा–व्रजं नाथयंत्युपतापयंतीति व्रजनाथाः कंसादयस्तानार्त्या पीडनेन नाशयतीति तथा । भिन्नपदे वा । गोकुलं तद्वासिनः । त्वद्वियोग एव वृजिनं दुःखं तदर्णवात् , न हि गोविन्दस्य गोकुलोपेक्षोचितान्यथा नाम्नोऽन्वर्थता न स्यादित्यभिप्रायः । ततश्चास्माकं दुःखमस्योपदेशान्नापगच्छेदिति तमुद्धवमनादृत्य समुत्थिततया मथुराभिमुखीभवत्यः समुन्नतनादेन स्वकान्तमेव सम्बोधयंत्यः सदैन्यरोदनमाहुः । तत्र च तस्य गोकुलप्रियतास्मरणेन गोकुलदुखासहनतया स्वदुःखमप्यनादृत्य गोकुल रक्षामेव प्रार्थयन्ते–हे कृष्णेति । सर्वतदीयाद्भुतरूपगुणक्रीडाक्रोडीकारितया संततं निजांतःस्फुरता विशेषनाम्ना प्रथमतः सम्बोधनम् । हे रमानाथेत्यादिना विशेषेण नामभिरिति ज्ञेयम् । हे कृष्णेत्यत्र हे नाथेति क्वचित्पाठे प्रथमतः स्वीयभावस्फूर्तिः, हे सर्वासामस्माकमासां स्वामिन्नित्यर्थः । हे रमानाथेति रमापर्यंतनाथ्यमानकृपादृष्टितया परमदुर्लभ । तत्र च 'तस्मान्मच्छरणं गोष्ठं मन्नाथम्' इत्याद्यनुसारेण व्रजस्य नाथ । आर्तिनाशनश्च सन् निर्वाहिततादृशसंकल्प । अतोऽधुना तु दुःखसमुद्रे मग्नं गोकुलं सर्वांस्तत्रत्यान्प्राणिन उद्धर । 'वृजिनार्णवात्' इति क्वचित्पाठः । सकृन्निजदर्शनेन सर्वं दुःखमपास्य पुनर्जीवयन्सुखी कुर्वित्यर्थः । तत्र च हे गोविंदेति सम्बोध्य गोकुलेन्द्रतयाभिषिक्तस्य तव गोविन्दतापालनार्थमप्यवश्यमेवेद कृत्यमिति सूचितवत्यः । "स्वेषामात्मवियोगार्तिमप्यवज्ञाय वल्लभाः । व्रजस्य हर्तुं वृण्वाना निरस्येत्कथमच्युतः ।" इति ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु वस्त्रेण नेत्रमावृत्य बुद्ध्या मनोऽन्यत्र नीत्वा सर्वं तदीयं विस्मृत्य स विस्मर्यतां तत्राहुः । गत्येति । अनया देहचेष्टामात्रमुपलक्षितम् उदारहासश्च लीलावलोकनानि च तैरिति तदीयभावविशेषः बहुत्वं तेषां प्रत्येकं परम्परया । माध्व्या शब्दतोऽर्थतश्च मधुरया एवं त्रिविधचेष्टया हृतबुद्धयः । तद्गत्यादिकं तदीयसौहृदं वा कथं केनोपायेन विस्मरामः अपि तु न कथमपीत्यर्थः । यद्वा पुनरन्यो वा तदुपाय उपदिश्यतामित्यर्थः ॥ ५१ ॥ ततश्चास्माकं दुःखमस्योपदेशान्नापगच्छेदिति तमुद्धवमप्यनादृत्य समुत्थिततया मथुराभिमुखीभवन्त्यः समुन्नतनादेन स्वकान्तमेव सम्बोधयन्त्यः सदैन्यरोदनमाहुः तत्र च तस्य गोकुलप्रियतास्मरणेन गोकुलदुःखासहनतया स्वदुःखमप्यनादृत्य गोकुलरक्षामेव प्रार्थयन्ते हे कृष्णेति । सर्वतदीयाद्भुतरूपगुणक्रीडाक्रोडीकारितया सन्ततं निजान्तःस्फुरता विशेष्यनाम्ना प्रथमतः सम्बोधनं हे रमानाथेत्यादिना । विशेषेण नामभिरिति ज्ञेयम् । हे कृष्णेत्यत्र हे नाथेति क्वचित्पाठः प्रथमतः स्वीयभावस्फूर्त्तिः हे सर्वासामस्माकमासां स्वामिन्नित्यर्थः हे रमानाथेति रमापर्यन्तनाथ्यमानकृपादृष्टितया परमदुर्ल्लभ ! तत्र च तस्मान्मच्छरणं गोष्ठ मन्नाथमित्याद्यनुसारेण व्रजस्य नाथः आर्त्तिनाशनश्च सन् निर्वाहिततादृशसङ्कल्प ! अतोऽधुना तु दुःखसमुद्रे मग्नं गोकुलं सर्वान् तत्र च हे गोविन्देति सम्बोध्य गोकुलेन्द्रतयाभिषिक्तस्य तव गोविन्दतापालनार्थमप्यवश्यमेवेदं कृत्यमिति सूचितवत्यः । "स्वेषामात्मवियोगार्त्तिमप्यवज्ञाय वल्लभाः । व्रजस्य हर्त्तुं वृण्वाना निरस्येत् कथमच्युतः" ॥ ५२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तेषु दृष्टिमकृत्वा बुद्ध्या मनोऽन्यत्र नीत्वा सर्व्वं तदीयं विस्मृत्यासौ विस्मर्य्यताम् , तत्राहुः—गत्येति । देहचेष्टोपलक्षिता उदारहासाश्च लीलयावलोकनानि च तैरिति माधुरीभिर्मनोभावविशेषः, बहुत्वं तेषां प्रत्येक परस्परया । माध्व्या—शब्दतोऽर्थतश्च मधुरया, एवं त्रिधा हृतबुद्धयस्तद्गत्यादिक तदीय–सौहृदं वा कथं केनोपायेन विस्मराम, अपि तु कथमपि विस्मर्त्तुं नैव शक्नुम इत्यर्थः,—तत्तत्स्मरणेन तस्यैव स्मृत्युत्पादनात् , 'तम' इति पाठो वा ॥ ५१ ॥ ततश्च प्रेमार्त्तिभरोदयेन श्रीभगवन्तमेव साक्षादिव सम्बोध्यार्त्तनादेन प्ररुदत्य आहुः—हे कृष्णेति । स्वतः परमानन्दघनमूर्त्ते ! न चानन्दपरिपूर्णत्वादन्यापेक्षास्तीत्याहुः—हे रमानाथ लक्ष्मीपते इति । अत्यन्तार्त्या पुनः पुनर्हे–शब्दः, न च रमानाथत्वादन्यजनोपेक्षास्तीत्याहुः—व्रजनाथ ! हे व्रजपालकेति; यद्वा, हे रम हे कान्त,—'रमः कान्ते रमा लक्ष्म्याम्' इत्यभिधानां, हे अनाथव्रजनाथ–न विद्यते त्वां विना नाथोऽन्यो यस्य तस्य व्रजस्य नाथ । तत च कदापि तव दीनजनोपेक्षा नास्त्येवेत्याहुः—आर्त्तिनाशनेति । एतत्वात्मोद्देशेनोक्तम् । अतो दुःखसमुद्रे मग्नं गोकुलं सर्व्वानत्रत्यान् प्राणिन उद्धर, सकृन्निजदर्शनेन सर्व्वं दुःखमपास्य पुनर्ज्जीवयन् सुखीकुर्व्वित्यर्थः । तच्च तवावश्यकृत्यमेवेत्यभिप्रायेण सम्बोधयन्ति—गोविन्द ! हे गोकुलेन्द्रेति । मग्नमित्यतीतनिर्द्देशेनार्णवरूपकेण च स्वतोऽप्रतिकार्य्यतया महादैन्यं सूचितमिति ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किं च गत्यादिभिर्हृता धीयांसां ता वयं कथं कृष्णं विस्मरामहे ततश्च स्मारकैर्लिङ्गैस्तत्स्मृतिरवर्ज्जनीया ततश्च दुःखमपीति भावः ॥ ५१ ॥ ततश्चेदं दुःखं स एव भगवानपनुदतु इति प्रार्थयन्ते तत्र बुद्ध्यासन्निधापितस्य भगवतः संबोधनानि

हे नाथेत्यादीनि । वृजिनार्णवे दुःखाब्धौ मग्नं गोकुलमुद्धर नाहं शक्त इत्यत्र संबोधयन्ति । हे नाथेति ईश्वरस्य न किमप्यशक्यमिति भावः । नन्वीश्वरो निगृह्णात्यपीत्यत आहुः । हे रमानाथेति । "लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरुपया । रक्षकः सर्वसिद्धान्तः" इत्युक्तरीत्या केवलकारुण्यमूर्त्या पुरुषकारभूतया लक्ष्म्या नित्ययुतस्य तवानुग्रह एवोचित इति भावः । नन्वेवमपि कांश्चिन्निगृह्णन्नेव दृश्ये इत्यत्राहुः । व्रजनाथेति । व्रजन्त्वनुगृह्णन्नेव दृश्यस इत्यभिप्रायः तमेवाविष्कुर्वन्ति हे आर्त्तिनाशनेति विषजलाव्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलादिति तत्तत्प्रयुक्तपीडाहारित्वं बहुशो दृष्टमिति भावः ॥ ५२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उक्तमेव द्रढयन्ति । गत्येति ॥ ५१ ॥ नित्यं स्वजाड्यं विज्ञापयन्ति । हे नाथेति ऐश्वर्यमूर्ते ! रमाया अपि आशीःप्रद ! व्रजनाथानां गोपानाम् आर्तिनाशन ! मग्नं दुःखार्णवे इति शेषः गवां विन्दो लाभो यस्मात्स तथा गोविन्द इति ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अपि च न केवलमस्माकं तदनुध्यानमेव, अपि तु तत्तत्सकलमेवचरितं स्वयमेव पुरः स्फुरतीत्याहुः–हे कृष्णेत्यादि । इत्यौत्कण्ठ्य एव विश्रान्तिः ॥ ५२–५६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तर्हि तत्करुणैव शरणमिति तमेव प्रार्थयन्त्योऽन्या ऊचुः—हे कृष्णेति दैन्योत्कण्ठ्ययोरेव विश्रान्तिः ॥ ५२–५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु तर्हि सरिदादिषु कुत्राप्यगत्वा वस्त्रेण नेत्रमावृत्यधिया मनोऽन्यत्र नीत्वा स विस्मर्यतां तत्रास्माकं घोर्नास्त्येव तेनैव हृतत्वादित्याहुः । गत्येति । माध्व्या मधुरया वाचा उद्धव ! ॥५१॥ ततश्चोद्धवमप्यनादृत्य परमार्त्या मथुराभिमुखीभवन्त्यः कृष्णायमुखेनैव संबोधयन्त्यः सदैन्यरोदनमाहुः । हे कृष्ण ! अयोग्यानामप्यस्माकं चित्ताकर्षक हे रमानाथ ! रमयापि नाथ्यमानादद्भुतमाधुर्यरसविलासादिमहासम्पत्ते ! हे व्रजनाथ ! व्रजस्त्वां नाथति हे आर्दिनाशन ! पूर्वं गोवर्द्धनं धृत्वा इन्द्रकृतामार्त्तिमनाशयत् भवानित्यर्थः । सम्प्रति तु त्वद्विरहादेव सर्वतोऽप्यधिके वृजिनस्यार्णव एव अद्य श्वो वा नश्यदेव गोकुलं स्वयमेवागत्योद्धर हे गोविन्द ! स्वपलितचरीः स्वीयगवीर्विन्दस्व अलं दूतप्रस्थापनयेति भावः ॥ ५२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

किं च बुद्ध्या विस्मरणसाधनं मनोनिरोधः संपाद्यते इत्यविवादमस्माकं सा भगवता पूर्वमेव हृतातोऽस्माभिस्तद्विस्मरणे क उपाय आश्रयणीय इत्याशयेनाहुः । गत्येति । महत्या सेनयाहृतास्माकं बुद्धिः पुनः समानेतुमशक्येति ज्ञापनार्थं गत्येत्यादि गतौ ललितत्वं हासे उदारत्वम् अवलोकनेषु लीलापूर्वकत्वं गिरि मधुरत्वमित्युक्त्या यथोक्तविशेषण विशिष्ट गत्यादीनां कुत्राप्यनुपलम्भात्तद्गत्यादीनां प्राबल्यं बोधितं तथा च भगवान् दूतबुद्धित्वादस्मान विस्मरतु नाम वयं तु हृतधियः तदीयं गत्यादिकं कथं विस्मरामहे तन्न सम्भवतीत्यर्थः । त्वं तदुपायं जानासि चेत्तर्हि वदेति प्रश्नो वा यदा अनुस्मरन्त्यो मां नित्यमचिरान्मामुपैष्यथेति भगवत्सन्देशोत्तरत्वेन विस्मरणाशक्तिप्रतिपादनपरो ग्रन्थो योजनीयस्तथा चैवंविधस्मरणवतीनामस्माकं प्रवृत्तप्रवर्तनरूपोऽयमुपदेशः तादृशस्मरणे सत्यप्यद्यापि तस्यालाभादयथार्थश्चेति भावः ॥ ५१ ॥ एवं वर्णयन्त्यः स्वदुःखनिवृत्तावुपायमपश्यन्त्यः साक्रोशं तमेव प्राप्नुवन्ति हे नाथेति गोकुलवासिगोपिकाजनं त्वद्विरहजनितदुःखसागरे निमग्नं स्वोद्धाराशक्तं त्वमेव दुःखसमुदादुद्धर अत्रक्षीणपर्णादयोऽपि त्वद्विरहजनितवृजिनार्णवे निमग्ना इति ज्ञापयितुं गोकुलमित्युक्तम् । यतस्त्वमेव सर्वस्य नाथः स्वामी यथा गजेन्द्रमन्दराचलादयस्त्वयोद्धृतास्तथा स्वाम्यत्वाविशेषाद्गोकुलमप्युद्धरेत्याशयेनाहुर्हे रमानाथेति । तत्र तत्तद्भोगमोक्षादिनि परपेक्षत्वादेकस्मरणस्वभावा रमा यथा सर्वदा स्वसंप्रदानेनानुगृह्यते तथानुग्रहाकाङ्क्षावत्यो वयमिति भावः । ननु रमानाथत्वेन विशेषतः प्रसिद्धत्वात्तन्मनोरथं पूरयामीति चेत्तत्राहुर्हे व्रजनाथेति तथा च विशेषतो व्रजनाथत्वेनापि प्रसिद्धस्त्वं तद्दुःखं किमिति पापकरोषीति भावः । किञ्च स्वीयानां सर्वेषां दुःखापहारकत्वाद्धरिः सर्वार्तिनाशनस्त्वं स्वस्वरूपरक्षणार्थमस्मदार्तिं नाशरूपत्याशयेन सम्बोधयन्ति हे आर्तिनाशनेति किंच गोकुलरक्षणेन गोविन्दाख्यां प्राप्तवतस्तव तदरक्षणं नोचितमित्याशयेनाहुः हे गोविन्देति । यद्वा महेन्द्रभयाद्रक्षितं गोकुलं स्वभये किमर्थं निमज्जयसति सम्बोधनाशयः यद्वा पूर्वं मत्स्यरूपेण गोकुलं स्वभये किमर्थं श्रुतिसमुदायं यथोद्धृतवांस्तेन च गोविन्दनाम लब्धवान् तद्वर्तमानगोकुलोद्धारोऽप्युचित इति अतः सर्वथाप्यस्य दुःखानिवर्तकत्वमेव तवोचितमित्यर्थः ॥ ५२ ॥

गूढार्थदीपिनी

हे उद्धव । तं कृष्णम् ॥ ५२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत परं ब्रह्म मित्रम्बा श्रीकृष्णं हे उद्धव ! कथं विस्मराम ॥ ५१-५२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

श्रीनिकेते तत्पदके धूल्यन्तिके पदके ॥ ५१ ॥ तद्गत्यादि विस्मराम हे प्रभवित्यन्वयः ॥ ५२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

किं च विस्मरणे हि मनोनिरोधः साधनं मनश्च अमलया बुद्ध्या निरुध्यते सा बुद्धिः पूर्वमेव भगवता हृतेति कोऽन्य उपायो विस्मरण इति पृच्छन्त्य इवाहुः। गत्येति। बुद्धिर्हि त्रिविधगुणैस्त्रिविधा तामपि बुद्धि कार्यवाङ्मनोविषयां त्रिविधा धर्मा हरन्ति तत्र प्रथमं भगवतः कायिकचेष्टया देहविषयिणी बुद्धिर्हृतेत्याहुः। ललितया गत्येति। गतिर्हि स्वयं गच्छन्ती बुद्धिमपि नयति ललिता तु सर्वतो निरोधेन नयति तदंशमनसो हरणात् मनसो हरणे उपायमाहुः। उदारहासलीलावलोकनैरिति। मनो हि सङ्कल्पविकल्पात्मकं तत्र सङ्कल्पांशं भगवतो हासो निवारयति मोहात्मकत्वात् सङ्कल्पसाधनरूपं सुखं च बहुधा प्रयच्छतीतितत्फलेनापि न सङ्कल्पः साधयितुं शक्यते तदाहुः। उदारेति। भ्रान्तो हि विकल्पात्करोति तन्निवृत्त्यर्थं च लीलावलोकनानि ज्ञानात्मकत्वादवलोकनस्य विकल्पं नाशयत्यव तत्रापि फलाभावात् ज्ञानं दुर्बलं भवेत्तन्निषेधार्थं लीलेति स्वतः पुरुषार्थमित्यर्थः वाक्प्रधानन्तु गीर्हरति सजातीयहारिणी स्त्रीत्वयं चेद्धरेत् न कोऽपि प्रतिबन्धको भवति। तत्रापि फलरूपत्वाय माध्व्येति एवं लोकप्रसिद्धप्रकारेण विस्मरणासम्भवात् तत्कथं विस्मरामहे इति प्रश्नः। तस्मिन् हि विस्मृते साधनान्तरे प्रवृत्तिः सम्भवति अतो भगवदुक्तं ज्ञानं पूर्वार्थविस्मरणे भवतीति अशक्यमेवोपदिष्टवान् ॥ ५१ । एवं लौकिकप्रकारेण वैदिकप्रकारेण च वयं सर्वथा दुःखसागरान्न निस्तीर्णा भविष्याम इत्याहुः। हे नाथेति ! प्रमेयबलादेवोद्धर्त्तव्याः न तु प्रमाणबलेन तथा करणे आवश्यको हेतुः तथात्वं नन्वच्युतोऽहमसङ्गोऽहं च अतो ममाप्यशक्यो रमणेनैव भवतीनामुद्धारो भवतीति चेत्तत्राहुः। हे रमानाथेति। स्मरणैकस्वभावा हि सा उत्तरोत्तरं वर्द्धमाना नित्या च तस्यास्त्वं नाथ इति सर्वजनीनं साप्यस्मत्प्रकारेणैव साध्या भवति लक्ष्मीत्वादेव न पोषणादिकमपेक्ष्यते ननु तदावश्यकमिति कथञ्चिन्निर्वाह्यत इति चेत्तत्राहुः। व्रजनाथेति। यथा त्वं लक्ष्मीपतिः सर्वजनीनः एवं व्रजपतिरिति लक्ष्मीव्रजयोस्तुल्यत्वाद्दोषगुणास्तुल्या इति भावः। ननु साप्यशक्या चेत्यब्यत एवेति कोऽयं दृष्टान्त इति चेत्तत्राहुः। आर्त्तिनाशनेति। हरिस्त्वम् आर्त्ति नाशयस्येव कुर्यादन्यन्न वा कुर्यात् आर्त्ति तु नाशय अन्यथा हरित्वमेव न स्यादतः स्वरूपरक्षार्थमेतदवश्यं कर्त्तव्यं किं च इदं हि सर्वमेव गोकुलं दुःखसमुद्रे निमग्नं तदुद्धर पूर्वं ह्येको गजः सोऽपि पुष्करिण्यामर्द्धनिमग्न एव स्थितः सोऽपि दयया चेदुद्धृतः किमस्मदुद्धारे दयाया विलम्बो भवेत् मग्नोद्धारे त्वमेव समर्थः यथा मन्दरोद्धारे ननु तेऽस्मद्वाक्यात्प्रवृत्ता इति तदर्थंमुद्धृताः भवत्यस्तु नास्मद्वाक्यात् प्रवृत्ता इति चेत्तत्राहुः। गोविन्देति। त्वं ह्यस्मदिन्द्रत्वेन सर्वैरभिषिक्तः अतो यावदधिकारत्वादाधिकारिकमिति न्यायेन यावद्गोकुलं जीविष्यति तावदस्य रक्षा भवत आवश्यकी अन्यथा प्रमाणवनं त्वयैव नाशितं स्यात् पूर्वमपि मत्स्यादिभावेन वेदा उद्धृता वा गोविन्दभावेन वयमप्युद्धर्तव्याः नतूद्धवेन तथा सति जघन्यतापत्तिरिति भावः ॥ ५२ ॥

श्रीसुबोधिनी-सारः

ललितया रम्यया गत्या उदारैर्हासैर्लीलावलोकनैः माध्व्या मिष्टया गिरा हृताऽऽकृष्टा धीर्यासां ताः कथं तत् विस्मरामः ॥५१॥ हे नाथ हे रमानाथ हे व्रजनाथ हे आर्त्तिनाशन वृजिनार्णवे दुःखसमुद्रे मग्नं गोकुलं त्वमुद्धर हे गोविंद ॥५२॥

अन्वितार्थप्रकाशिका

गत्येति ॥ हे उद्धव ! ललितया गत्या उदारेण मनोरथपूरकेण हासेन लीलया कटाक्षेण अवलोकनैर्माध्व्या मधुरया। "ऋत्व्यवास्त्व्य" इति छान्दसो निपातः। गिरा वाण्या च हृता आकृष्टा धीर्येषां तथाभूताः वयम्। अतः तं कृष्णं कथं विस्मरामेति। तदिति पाठे तद् गत्यादिकम् ॥ ५२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

व्रजौकसां कृष्णं संस्मारयन् रेमे आनंदं प्राप ॥५१॥ कृष्णे आवेशेन अत्यासक्त्या आत्मनश्चितस्य विक्लवं विक्लवत्वं दृष्ट्वा उधवः ताः नमस्यन् इदं वक्ष्यमाणं तन्माहात्म्यं जगौ ॥ ५२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गत्येति ॥ कृष्णस्य, ललितयाऽतिसुन्दरया, गत्या, उदारहासश्च लीलावलोकनानि च तैः, माध्व्या मधुरया, गिरा वाचा च, हृता धियो यासां ताः, वयं, तं कृष्णं, कथं विस्मरामहे। एवं तत्स्मारकलिङ्गैस्तत्स्मृतिरवर्जनीया ततश्च दुःखमपीति

भावः ॥ ५१ ॥ ततश्च यत इदं दुःखं स एव भगवानस्माकं दुःखमपनुदतु इति प्रार्थयन्ते। तत्र बुद्ध्या संनिधापितस्य भगवतः संबोधनानि हे नाथेत्यादीनि ॥ हे नाथेति ॥ हे नाथ, हे रमानाथ, हे व्रजनाथ, हे आर्त्तिनाशन, हे गोविन्द, वृजिनार्णवे मग्नं, गोकुलं, उद्धर ॥ ५२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

पुनः पुनरिति : १०.४७.५१.

व्रजगतं भृशमीशकृतं पुनश्चरितमद्भुतकृन्मनसः सताम्।
कलयितुं कलितोत्सवमुद्धवं तमभिलक्ष्य जगुः स्मृततत्कथाः ॥ ११६ ॥
अनुगृहीत - तदाननशुक्तिकोदितरमेशगुण - ध्वनिमौक्तिकाः।
तदनु ताः सुदृशो व्रजतत्कृतं चरितमस्य हि मूल्यमिवाऽऽर्पयन् ॥ ११७ ॥
छलधृताल्पक - वत्ससमाकृतिः कलित - वत्सकुलान्तर - संभ्रमः।
इह खलो निखिलान्तरवेदिना विनिहतो निहितश्च कपित्थके ॥ ११८ ॥
इह सुखेन सखे सह गोव्रजैर्वनविहारमनेन हि कुर्वता।
कपटकोटि - निविष्टमति - बकः शकलितः कलितः किल बालकैः ॥ ११९ ॥
खरगणैः सह धेनुकनामकं खरमिहैव निहत्य स सत्यधीः।
अभयमाशु चकार बलाग्रजो वनतलं नतलम्बित - तालकम् ॥ १२० ॥

समधिरुह्य कदम्बमदम्भतस्तदनु यामुनवारि निपत्य च। अकथि भूरि ममर्द स सर्पमित्यपरया परयाऽच्युतचेष्टितम् ॥ १२१ ॥
निशि निकाममुदीक्ष्य तदर्दितान् निजजनान्स्वजनावनदीक्षितः। अकृत सोऽद्भुतवन्यहुताशनाशनमितो नमितोऽखिलबल्लवैः १२२
जटिनमेनमधिश्रयताऽमुना रचयताऽद्भुतकेलिकुतूहलम्। कृतकगोपवपुर्दितिजाग्रणीरिह हतोऽहह तोकवयस्यपि ॥ १२३ ॥
वनमिदं ध्रुवमुद्धव बुद्ध्यतां विपुलवञ्जुल-मुञ्जक-रञ्जितम्। इह शिशूनवति स्म पशूनपि स हि महाहिमहाग्निभृशार्दितान् ॥१२४॥
निजविनोदविवादनिनादतः परममोहि मनोऽपि यया हि नः। मुरलिकाऽद्य तु सा सख उद्धव श्रुतरवा तरवारिसमाऽजनि ॥१२५॥
हृदि निधाय विधिं कमपीष्टदं मिहिरजाऽऽप्लवने कृतमानसाः। पटहठापहृतेरिह वञ्चिताः सशिशुना शिशुनाट्यकृता वयम् ॥१२६॥
अतिकुतूहलशालिहृदाऽमुना द्विजपरिग्रहचारु समर्पितम्। अशितमन्नमिहोद्धव दर्शितो निजपदा जपदानफलावधिः ॥१२७॥
गिरिसमुद्धवमुद्धव पश्यतां गिरि न शक्तिरिहास्य हि वर्णने। प्रलयकालकलाकलितो रसोऽनघनतो घनतोऽभिररक्ष नः ॥१२८॥
विधिमना यमुनाम्भ्ववगाहनं निशि चरन् वरुणस्य हृतश्चरैः। पितरमेनमनामयमानयन्निमिषतो मिषतोऽस्य जनस्य सः ॥१२९॥
रतिरकार्यमुनेह मया सहोद्धव समुद्धवबन्धविधानया। मुखमचुम्बि सुखेन तदाऽर्जितं तदधरादधरामृतमञ्जसा ॥१३०॥
शुभतराभरणैः स्वयमात्मगैर्हरिरसाविह मां समभूषयत्। सुरतभेदविदा हि मयाऽप्यसावलमभूषि निजाङ्गविभूषणैः ॥१३१॥
बहुवनभ्रमणश्रमधर्मजैर्जलकणैः स यदाऽऽस लसन्मुखः। सपदि मे परिधानपटाञ्चलव्यजनतोऽजनतोषणमादृतम् ॥१३२॥
क्षणमिहाभिमुखः सुखमादिशत् क्षणममन्तुकमेव तिरोदधे। इति बहुच्छलकौतुककेलिना सुखलता खलताऽपि च दर्शिता ॥१३३॥
इह हि रासकलाः कलिता इहोद्धव निलायनकेलिरसाकुलः। भृशमभोजि सखे परमादरादिह रसो हरसोमसुरस्पृहः ॥१३४॥
सुजलकेलिमघादिह सौरतश्रमहरां हरिरेष मुदा तदा। उपवनस्थलगामपि सा न किं कृतरसा तरसा स्मृतिकृद्भवेत् ॥१३५॥
विपिनसीम्नि कदाचिदवस्थितं पितरमग्रसतोग्रतरोरगः। तदनु मुक्तिकृता कृपया तदा स हि पदाऽहिपदादभिमोचितः ॥१३६॥
कलितसर्वसुखेन तदोद्धव व्रजजनेन निरीक्ष्य तदद्भुतम्। समवधार्य जगत्पतिरित्यसावरमुदारमुदा मनसा स्तुतः ॥१३७॥
समपहृत्य निशि क्वचिदङ्गना धनदगोऽथ पलायनतत्परः। किमु वदामि सखेऽस्य तु दुर्दशां क्व च शिरश्च शिरश्चरसन्मणिः ॥१३८॥
वनविहारकृदास यदा तदा त्रुटिरभूद्युगकोटिसमा हि नः। तदधुना तु सखा बहुदूरगः कथमितोऽथ मितोऽपि समुत्सवः ॥१३९॥

इह विधाय पुरः करयोर्युगं धृतवृषोन्नतशृङ्गयुगो हरिः।
असुरकं कृतवान्किल कर्म तत् त्रिदिविनो दिविनोऽत्र भयापहम् ॥ १४० ॥
समवलोक्य तमश्वशरीरिणं दितिसुतं छलिताखिलगोकुलम्।
लघु जघान सखे स हरिः सतामभयदो भयदो दिविषद्द्रुहाम् ॥ १४१ ॥
इह हि खाह्वय उग्रतराकृतिर्निमिषतो मुषिताखिल - बल्लवः।
समवबुद्ध्य निबध्य च मध्यमं वसनतः स नतोऽपि हतोऽमुना ॥ १४२ ॥
विधिविधेयमवश्यविधेयतां भजति तत्र न किञ्चन कारणम्।
कृतनिमित्त इतः स तु गान्दिनीतनुभवोऽनुभयोत्सवहार्यभूत् ॥ १४३ ॥

निजजनान् स न पश्यति संश्रितो यदधिकामधिकाममदां श्रियम् ।
भवति यः शुभदृक् स्वजने जनो भुवि सदैव सदैवतपूजितः ॥ १४४ ॥
अनवलोक्य जघन्यमुतोत्तमं चरितमात्मगमाचरितं मुहुः ।
त्वदनुरागविभङ्गभयेन यैस्तव दया वद याति न तान्कथम् ॥ १४५ ॥
एवं स्वरूपमवलम्ब्य निजं व्रजेऽस्मिन् विक्रीडितं सहचरैः सह गोपतोकैः ।
अस्माभिरुद्धव समुन्नतता क्षमा च तेनानिशं भृशमदर्शि हि किं वदामः ॥ १४६ ॥
सकलमेतदहर्निशमीक्ष्यते न चपलं स्मृतिरुज्झति नो मनः । व्यवहृतिः सकलोद्धव तन्मयी परतरा रतरागकथा तु का ॥ १४७ ॥
अलमनेन धनेन जनेन वाऽप्यलमितः सदनस्थितिवाञ्छया । अलमनर्थ-कथापथकत्थनैर्हृदयभूदयभूरिह नः स्थितिः ॥ १४८ ॥
अलमलं बहिरन्तरखेदकैरिहः परैः कठिनैः सगुणोऽपि सः । बहु दुनोति मनांसि करैः शरैर्हिमकरो मकरोर्जितकेतनः ॥ १४९ ॥
अवयवा अपि नामयवाञ्छिताऽच्युतपदाम्बुजलालनलालसाः । निजगुणाकलनं नहि कुर्वते कृशतमाः शतमारशरार्दिताः ॥ १५० ॥
कर्णो नैव शृणोति जिघ्रति न च घ्राणं न पश्यत्यलं चक्षुस्त्वङ् न वृणोति नापि रसना स्पर्शं रसं रागतः ।
त्यक्तास्तेन वयं समीक्ष्य सकलैरग्राहि मौनं व्रतं जिह्वैकैव विधिं विधाय पुरतो धिक्कुर्वती चञ्चति ॥ १५१ ॥
साऽऽनन्दं मनसा सहैव निखिलान्यक्षाणि लब्धक्षणा न्याजग्मुः सविधे तदैव हि हरेः कार्तार्थ्यपूर्तीहया ।
गन्तव्यं च कथं मया प्रभुपदं वीरा सुधर्माश्रितो नैवं सत्रप एक एव हि सखे जीवोऽत्र संतिष्ठते ॥ १५२ ॥
अतिशठो हठकृत्कपटाग्रणीश्चटुनटारभटीस्फुटपाटवः ।
यदि पुरा विदितोऽयमिहेदृशो मतिरियं तिरयन्त्यपि नः कुतः ॥ १५३ ॥
व्रजजनैरुपयोग इतो न चेत् किमपि तस्य ततो वरमेकतः ।
कथय तं त्वमिति स्वमनाप्रियानवसतो वसतो भवतः पदे ॥ १५४ ॥
त्वयि धृतासुभिराभिरहर्निशं व्यवहृतिः क्रियते निखिलेति तम् ।
वद च याहि सकृद् व्रजगान् भवेदपगताऽपगताघकृतघ्नता ॥ १५५ ॥
व्रजजनोऽयमिहास्तु कथञ्चिदप्यनुभवत्ववरं वरमेव वा ।
व्रजजनेन विना तु न तद्यशो भुवि भवेद्विभवेऽपि च कीदृशी ॥ १५६ ॥
गीत्यैव मोहोर्हरिणाङ्गनानां विनिर्मितः केन कुतूहलेन ।
तथापि निर्भीकहृदो वसामो वयं यतो रक्षति कृष्णसारः ॥ १५७ ॥
वितीर्णाङ्गरागां स्त्रियं कामतप्तां मुदा कामतप्तां तथा कामतप्ताम् ।
चकाराविकारिस्वरूपो रमेशो रमापाङ्गयोग्यामिहापाङ्गयोग्याम् ॥ १५८ ॥
इत्थं स्वकीर्तिगानोत्थप्रश्नार्थं व्यक्तमाचरन् ।
कृत्वा स रमते कुब्जां तादृशीमीदृशीं च माम् ॥ १५९ ॥ (युग्मम्)
त्वमसि सर्वविदाशुकविश्रुतस्त्वमसि सर्वकलाकुशलः सखे ।
तदिह नः कथयाद्य हितोल्लसद्धृदयया दयया शोभितो भवेत् ॥ १६० ॥
त्वमिह तत्पुरतः कथयिष्यसीत्यपगतत्रपमुक्तमशेषतः ।
स्वरुचितोऽनृतवागृतवाग्भव वद नवाऽर्दनवार्युपलब्धिदृक् ॥ १६१ ॥
मनसि मानय मानय हेयतां गदितमेतदसाध्वपि साधुवत् ।
वचनसौष्ठवमिष्टद ते पुरः किमिह का मिहिकाद्युतिरुष्णगोः ॥ १६२ ॥
स्त्रीणामेषः स्वभावः प्रियतमचरण-न्यस्तसर्वात्मनां यत् तद्वाक्यं तच्चरित्रं श्रुतिमितिकलितं शासनं चाऽवधार्यम् ।
सत्येवं जिह्मवृत्तिर्यदि हृदि स भवेत् प्रश्नभागी तदा स्यात् को वेत्यालोकय त्वं तदनु वद सखे तत्पुरस्ताद्यथार्थम् ॥ १६३ ॥

कृष्णप्रिया

उद्धवजी ! हमारे लिए विस्मरण की जगह अधिक स्मरण के अधिक पदार्थ सामने उपस्थित है सुनिए श्रीनन्द बाबा का नाम सुनते ही नन्दकुमार की स्मृति हो जाती है, बाहर जाते ही मार्ग में श्रीनिकेतन अच्युत श्रीकृष्णचन्द्र चरणों के चरण-चिह्नों के दर्शन होते ही पुनः पुनः स्मरण हो जाता है अब विस्मरण कैसे हो सके ? ॥ ५१ ॥ उद्धवजी मनोनिरोध होने से विस्मरण शक्य हो सकता है मनोनिरोध निर्मलमति से होगा, लेकिन हमारी जो मति है वह गोपीपति ने ही हरण कर लीनी है श्रीकृष्णने ललित मनोहर गति मञ्जुल मधुर उदार हास्य, लीला रमणीय अवलोकन एवं सुधातिशायिनी मधुर वाणी से हमारे देह मन वाणी आदि को खींच लिया वे सब तो प्यारे के पास ही है, बताइये कैसे प्रियतम को भूल जाये ॥ ५२ ॥

हे [1]नाथ हे रमानाथ व्रजनाथार्तिनाशन । मग्नमुद्धर गोविन्द गोकुलं वृजिनार्णवात्[2] ॥ ५३ ॥[3]

श्रीशुक उवाच

ततस्ताः कृष्णसन्देशैर्व्यपेतविरहज्वराः[4] । उद्धवं पूजयाञ्चक्रुर्ज्ञात्वाऽऽ[5]त्मानमधोक्षजम्[6] ॥ ५४ ॥

कर्दमक्षमा

अन्वयः—हे नाथ ! हे रमानाथ ! हेव्रजनाथ ! हे आर्तिनाशन ! हे गोविन्दावृजिनार्णवात्, मग्नम्, गोकुलम्, उद्धर ॥ ५३ ॥ श्रीशुक उवाच—तत, कृष्णसन्देशैः, व्यपेतविरहज्वराः, ताः, अधोक्षजम्, आत्मानम्, मत्वा, उद्धवम्, पूजयाञ्चक्रुः ॥ ५४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीकृष्णमधोक्षजं ज्ञात्वा तं च स्वात्मानं ज्ञात्वा ॥ ५३ ॥ विनुदन्नपनयन् ॥ ५४–५५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः प्रार्थनोत्तरम् । ता गोप्यः । अधोक्षजं ब्रह्म । तमधोक्षजमेवोद्धवोपदेशत आत्मानं ज्ञात्वा निरस्तवियोगतापाः ।५३॥ अपनयन् दूरीकुर्वन् । कृष्णस्य लीला यासु ताः । ततश्च श्रीगोपीप्रमुखानां श्रीकृष्णस्फूर्तौ साक्षात्कारत्वप्रतीत्या तन्नित्यलीलायां मानसप्रत्यक्षमयप्रवेशेन 'मय्यावेश्य मनः कृष्णे' इति तदाश्वासने च प्रायो विच्छिन्न एव शोक इत्याह–उवासेति त्रिभिः । विनुदन् बहिर्विरहानुसंधानेन विस्मृतौ सत्यां पुनःपुनस्तैः सन्देशैरपनुदन् । एतदुपलक्षणत्वेन श्रीनन्दयशोदयोरपि तथा तदपनयनं ज्ञेयम् । यत्त्वन्यद्गोकुलं तज्जनवृंदं तत्स्फूर्त्यैव तत्साक्षात्कारप्रतीतिमयं तदपि माथुरीर्गोकुलसम्बन्धिनीश्च श्रीकृष्णस्य लीला कथा गायन् रमयामास तल्लीलानां साक्षादेव स्फोरणेन प्रीणितवान् ॥ ५४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अतः पुनरपि तासां वैवश्यं दृष्ट्वा कथितैर्भवतीनां वियोगो म इत्यादिकैर्मय्यावेश्य मनः कृष्ण इत्याद्यन्तैर्महामन्त्रैरिव कृष्णसन्देशैर्व्यपेतो विरहोत्थज्वरो महासन्तापो न तु तत्प्राप्त्यैकनाश्यो विरहो यासां तादृश्यः सत्यः सम्प्रत्येवोद्धवं यथा स्वावस्थमातिथ्योचितं पूजयाञ्चक्रुरिति पूर्वमारब्धापि पूजा दुःखेन वितथा जातेत्यधुना तु विशेषेणैवेत्यर्थः । ननु सन्देशमात्रेण कथं व्यपेतविरहज्वरत्वं तत्राह । ज्ञात्वेति । तत्र प्रथमार्थयस्यात्मनो ज्ञानं सन्दिष्टं तमात्मानमधोक्षजं श्रीकृष्णमेव मत्वानत्वन्यम् । तत्रायमभिप्रायः । अनुवादमनुक्त्वा तु न विधेयमुदीरयेदिति न्यायादत्र तदुपदेशात् ज्ञातत्वेन तस्यात्मत्वमनूद्यपुनरधोक्षजापरपर्यायश्रीकृष्णत्वमेवाभिधीयते । तत्रात्मशब्देन सर्वात्मोच्यते । अधोक्षजशब्देन रूढिवृत्त्या प्रसङ्गसङ्गत्या च श्रीकृष्ण एव प्रतिपाद्यते । तत्रैव योगवृत्त्या सर्वेन्द्रियाधिकारित्वञ्च तत्र च सति मया सर्वात्मनेति यत् पूर्वमुपदिष्टं तत् खलु लक्षणया निर्विशेषस्वरूपत्वेनैवेत्यविद्यावादिनः । परमविशेषवत् परमस्वरूपत्वेनैवेत्यचिन्त्यशक्तिवादिनः । तादृशविशेषवत्त्वेऽपि मे मयेत्युक्तेः कृष्णतया विलक्षणेनेति प्रकरणार्थदर्शिनः । तथैव हि कृष्णमेनमवेहि त्वमात्मानमखिलात्मनामित्यदौ स्वाभाविकपरमप्रेमास्पदत्वोचितं सर्वात्मत्वं स्थापयित्वा देहीवाभाति माययेत्यत्र देहिशब्दोक्तजीवत्वं निषिद्धमिति तत्र व्याख्यातमेव । तत्र यद्यपि गोवर्द्धनमखप्रवर्त्तनाय कर्मवादादिवदभीष्टमप्यत्र प्रथमार्थे परमरहस्योत्तरार्थद्वयाच्छादनाय स्वस्मादुपरततया विरहसन्तापमयकालक्षपणाय च श्रीभगवता निर्विशेषत्वमेव प्रतिपादितं प्रथमतस्ताभिरप्यपेक्षितम् । तथापि पुनस्ताभिस्तच्छ्रवणाद्विलक्षणस्वरति स्वाभाव्येन श्रीकृष्णस्यैव सदा सर्वत्र स्फुरणान्निजसर्वेन्द्रिय प्रवर्त्तकत्वेनाभिगमाच्च । तत्र श्रीकृष्णत्वमेव पर्य्यवसाय्यते स्म । तदेवास्माभिरप्यनूद्य विधेययोरात्माधोक्षजशब्दयोः क्रमबलाद्दृश्यते । अन्यथा अद्वैतावेशे सति पूज्यपूजकत्वाननुसन्धानात्ताभिरुद्धवस्य पूजनं न प्रसज्जते चेति । द्वितीयेऽर्थे । यथा सावस्मान् सदानुभवति तथा वयमपि तमित्यविनाभावस्फूर्त्तेरात्मानमधोक्षजतादात्म्यापन्नं मत्वेति व्याख्येयम् तृतीयेऽर्थे । यथा तेन संदिष्टं तथैवात्मानमधोक्षजं मत्वेत्यर्थः । मय्यावेश्य मनः कृष्णे इति । चतुर्थपक्षे तु । यथा कृष्णेनादिष्टं तथात्मानमचिरात् कृष्ण प्राप्स्यन्तं तथैवाधोक्षजञ्च कृष्णमचिरात् स्वं प्रापयिष्यन्तं ज्ञात्वा निश्चित्य त्यर्थः । च शब्दं विनापि तदर्थः स्वयं गम्यते । ब्रह्मेति परमात्मेति भगवानितिवत् । किन्तु ततस्ताः कृष्णसन्देशैर्ज्ञात्वात्मानमधोक्षजम् । व्यपेतविरहज्वराः पूजयाञ्चक्रुरुद्धवमिति क्रमम् अकृत्वा । यदुद्धवमित्याद्यनन्तरं ज्ञात्वा आत्मानमधोक्षजमिति पठितम् । तत् खलु यथा श्रीनन्दस्य गर्गदर्शने तं दृष्ट्वेत्यादावानर्चाधोक्षजधिया इति तथोद्धवदर्शने वासुदेवधियार्च्चयदित्यातिथ्यतोचिता तथेव सङ्गच्छते यदत्रापि विशेषणद्वयेन तासां तत्र परमात्मदृष्टिरेव निर्दिष्टेति ॥ ५३ ॥ ततश्च श्रीगोपीप्रमुखानां श्रीकृष्णस्फूर्त्तौ साक्षात्कारत्वप्रतीत्या तन्नित्यलीलायां मानसप्रत्यक्षमयप्रवेशेन मय्यावेश्य मनः कृष्ण इति तदास्वासने च प्रायो विच्छिन्न एव शोक

---

१. कृष्ण–प्रा. पा. । २. वे–विज. । ३. पञ्चचत्वारिंशोऽध्यायः–विज. । ४. ह्यामयाः–विज. । ५. स्निग्ध–विज. । ६. जे–विज. ।

इत्याह । उवासेति त्रिभिः । विनुदन् बहिर्विरहानुसन्धानेन विस्मृतौ सत्यां पुनः पुनस्तै सन्देशैरपनयन् । एतदुपलक्षणत्वेन श्रीनन्द यशोदयोरपि तथा तदुपनयनं ज्ञेयं यत्वन्यद्गोकुलं तज्जनवृन्दं तत् स्फूर्त्त्यैव तत्साक्षात्कारप्रतीतिमयं तदपि माथुरीर्गोकुलसम्बन्धिनीश्च श्रीकृष्णस्य लीलाकथा गायन् रमयामास तत्तल्लीलानां साक्षादिव स्फोरणेन प्रीणितवान् ॥ ५४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततस्तस्माद्विलापादेः पश्चादिति क्षणं निश्चेष्टतया निपत्य वृत्तानां तासामथ कथञ्चिद्धैर्य्यतः किञ्चित् स्वस्थतायां सत्यामित्यर्थः । कृष्णस्य परमाकर्षकस्य सन्देशैरिति तत्सन्देशानामपि चित्ताद्याकर्षकत्वमभिप्रेतम् , अतएवाधोक्षजमिन्द्रियज्ञानागोचरमपि भगवन्तम् , किंवा शकटाक्षाधो महाशंकटात् पुनर्जातमिव श्रीव्रजेन्द्रनन्दनमात्मानमुक्तप्रकारेण सदा सर्व्वथा सव्यापकं ज्ञात्वा विश्रामरूपेणापेतो विरहस्य ज्वरो बाह्याभ्यन्तरतापोद्रेको यासां तथाभूताः सत्य उद्धवं तादृश सन्देश-प्रायणादिना साक्षादुत्सवरूपं भागवतप्रवरं पूजयाञ्चक्रुः, श्लाघादिना सम्मानितवत्यः, तस्य प्रीत्यर्थम् , किंवा तच्छ्रवणेन श्रीकृष्ण सुखार्थं शोकशान्त्यर्थम् । यद्वा, व्यपेतविरहज्वरा एव सत्यः, अधोक्षजमात्मानं ज्ञात्वेति योज्यम् , तादृशज्वरे सति तादृशज्ञानासम्भवात् । एतच्च श्रीपरीक्षिच्चित्तसमाधानार्थमुक्तम् । अथवा, आत्मानं प्रियमधोक्षजं व्रजराजकुमारं कृष्णस्य तस्यैव सन्देशैः (भा० १०।४७।२९) 'भवतीनां वियोगो मे' इत्यादिलक्षणैर्ज्ञात्वा, अधुना अत्रैव पश्येमेति विज्ञायेत्यर्थः । अतएव व्यपेतविरहज्वरा उद्धवं सम्मानितवत्यः ॥ ५३ ॥ गोपीनां शुचः शोकान् विनुदन् , हतौ शतृप्रत्ययः, विनोत्तुम् । कतिचित् दशैकादश वा मासानुवास व्रजेऽवसत् । एवं तस्य तत्र वासस्य मुख्यप्रयोजनमुक्त्वान्यदप्याह—कृष्णेति । गोकुलं तत्रत्यान् मनुष्यपशुपक्षिवृक्षादीन् सर्व्वानेव रमयामास सुखयामास । उपनन्दादिवृद्धेषु तत्पत्न्यादिषु वृद्धासु च कृष्णस्य वन्दनादीनां तथा श्रीदामादिवयस्येषु परिरम्भादीनां विज्ञापनादिना, तथा पशुपक्षिवृक्षादिषु प्रत्येकं कुशलप्रश्नादिना यथायथं रमणं ज्ञेयम् । गोकुलस्थेषु वन्दनादिविज्ञापनादिकमेव हरिलीलाकथागानमित्यर्थः । यद्वा, किमर्थं रमणम् ? श्रीकृष्णलीलाकथा गायन् गातुं गोकुलरमण विना तत्रत्यश्रीकृष्णलीलाश्रवणाभावेन तत्कथागानासिद्धेः । इत्थं प्रागुक्तं वृष्णिकुलसम्मतत्वं मन्त्रित्वञ्च तस्य दर्शितम् । यद्वा, गोपीनां शुचो विशेषेण नुदन् , तत्र-तत्र कृष्णसन्दर्शनेन नोदनस्य वैशिष्ट्यम् । अतएव सर्व्वत्र कृष्णप्राकट्यदर्शनेनोत्फुल्लः, कृष्णलीलानां कथाः प्रबन्धान् ॥ ५४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत इति । ता गोप्यः कृष्णसन्देशैर्व्यपेतो विरहज्वरो यासां ता अधोक्षजं श्रीकृष्णमात्मानं सर्वान्तरात्मानं ज्ञात्वा-कृष्ण संदेशैरधोक्षजमात्मानं ज्ञात्वा व्यपेतो विरहज्वरो याभिस्ता इति वा उद्धवं पूजयामासुः ॥ ५३ ॥ उवासेति शुचः दुःखानि वितुदन्नपनयन् रमयामास विज्ञयामास ॥ ५४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भक्तिमेव निरूपयत्यस्मिन्नध्याये तत्रादौ गोप्यः उद्धवं कृष्णबुद्ध्य पूजयन्ति स्मेत्याह । शुक इति ॥ १ ॥ विनुदन् परिहरन् कृष्णस्य लीलाः यासुतास्तथा ॥ २ ॥

मज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत इति । यथा तेन संदिष्टं तथात्मानमधोक्षजं ज्ञात्वेत्यर्थः । विनुदन् बहिर्विरहानुसन्धानेन विस्मृतौ सत्यां पुनः पुनस्तैः सन्देशैरपनयन् एतदुपलक्षणत्वेन श्रीनन्दयशोदयोरपि तदप्ययनं ज्ञेयम् । तत्त्वन्यत् गोकुल तज्जनवृन्दं तत्स्फूर्त्त्यैव तत्साक्षात्कार प्रतीतिमयं तदपि माथुरीर्गोकुलसंबन्धिनीश्च श्रीकृष्णलीलाकथा गायन् रमयामास ॥ ५३-५५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च तासु दुःखेनाशामपि शिथिलयित्वा मर्तुमुद्यतासु अन्यानप्यतिरहस्यान् सन्देशानुक्त्वा उद्धवस्ता आनन्दयामासेत्याह ततस्ता इति । ततस्तदनन्तरं ये कृष्णसन्देशाः पूर्वसन्देशेभ्यो भिन्नास्तैरित्यन्वयः ते च सन्देशाः श्रीशुकेनाविवृता अपि फलतो ज्ञेयाः यथा भोः प्राणप्रेयस्यः ! मत्प्रेषितस्योद्धवस्याग्रे युष्माभिश्चक्षूंषि मुद्रयितव्यानि ततश्च पूर्वं यथा गोपबालकाश्चक्षुर्मुद्रणेन मुञ्जाटवीदावानलादुद्धृतास्तथैव विरहानलाद्भवतीरुद्धरिष्यामि पश्यत मे योगबलमिति सन्देशश्रवणेन ता यदैव चक्षूंषि मुद्रयामासुस्तत्क्षणमध्य एव शतकोटिवर्ष समयं योगमायया प्रवेश्य तत्र ताभिः सह रासवृन्दावनविहारद्यूतमधुपानजलविहार-हिन्दोलनादि विलासानन्यालक्षितान् कृष्णस्तावच्चक्रे यावद्भिः सा विरहपीडा सम्यगेव विस्मृता भवेत् ततश्च तासामङ्गान्यानन्दप्रमुदितान्यालक्ष्य मुहूर्तानन्तरं भोः स्वामिन्यः ! सांप्रतं चक्षूंष्युन्मीलयतेत्युद्धवेनोक्ते सति ताश्चक्षूंष्युन्मील्या अधोक्षजम् अधः कृतभ्योऽक्षिभ्यो निमीलितेभ्यो नेत्रेभ्यः परस्सहस्रानन्दप्राप्त्या पुनर्जातमिव आत्मानं स्वं ज्ञात्वा पूजयांचक्रुः भोः प्रेमवत्यः ! यदि यूयं प्राणांस्त्यक्तुमीहध्वे तर्हि युष्मद्दशां श्रुत्वा अहमपि प्राणांस्त्यक्ष्यामि नात्र सन्देहः शपथसहस्रं कुर्वन्नहं ब्रवीमि यूयमेव प्राणा भवथ व्रजं गन्तुं प्रतिक्षणं यतमानोऽप्यहं यन्न शक्नोमि तत्रायं काल एव कर्मैव वा व्याख्यातलक्षणः प्रेमैव वा प्रतिबन्धक

इत्यहं शङ्के इत्येवं प्रकारकैः संदेशैर्व्यपेतो विरहज्वरः स्वेषु तत्प्रेमाभावनिश्चयलक्षणः संतापो यासां ताः अधोक्षजं कृष्णमात्मानम् आत्मतुल्यं विरहसन्तापजर्जरं ज्ञात्वा किं वात्मानमात्मनः स्वानेव अनाः प्राणा यस्य तथाभूतमधोक्षजं कृष्णं ज्ञात्वा उद्धव पूजयांचक्रुरिति भो उद्धव ! साधूक्तमतः परं कष्टेनापि स्वप्राणान् वयं रक्षिष्याम एवं यदीमं सन्देशं त्वं नाख्यास्यस्तदा वयममरिष्यामैव ततश्च सर्वनाश एवाभविष्यदतोऽस्मदिष्टा सर्वरक्षा त्वया कृतेति तं संमानयामासुः आत्मानं स्वस्व जीवात्मानम् अधोक्षजं परमात्मानं ज्ञात्वेतिप्रकटोऽर्थोऽसुरमोहनार्थं एव न तु वास्तवः शास्त्रस्य अस्य मोहिनीसाधर्म्यात् न हि केनापि प्रेमरसास्वादिना भक्तेनात्म्यैक्यज्ञानं कदापि रोचितम् आभ्यः प्रेमिभक्तमुकुटमणिभ्यस्तत् कथं रोचतां "त्वत्कथामृतपाथोधौ विहरन्तो महामुदः। कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम्"मित्यार्षशास्त्रतात्पर्याभिज्ञैः स्वामिचरणैरप्युक्तम् नापि बलवता अध्यात्मज्ञानेन संपूर्णः प्रेमा क्वाप्यावरीतुं शक्यो दृष्टः वसुदेवार्जुनयोरपि महैश्वर्य्यदर्शनोद्दीपितदास्यभक्तवात्सल्यसख्यभावावृवावृतौ न तु ब्रह्मज्ञानेन यत्तु ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता इति ब्रजौकसां ब्रह्मरसनिमग्नत्वं श्रूयते तदपि ब्रह्मज्ञानस्य तदरोचकत्वज्ञापनार्थमेव ते एव तत्रोद्धृता इति पदं प्रयुक्तम् यथा संसारकूपाज्जीवा उद्‍ध्रियन्ते तथैव ब्रह्मरसात्ते ब्रजौकस उद्धृता इति किं चासामुत्पन्ननिर्भेदात्मज्ञानवत्त्वे गोप्यो हसन्त्यः पप्रच्छुः रामसंदर्शनादृताः कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभ इति कथं नु गृह्णन्त्यनवस्थितात्मनो वचः कृतघ्नस्य वुधाः कुलस्त्रिय इत्याद्यभिमवचनानि साभिमानान्यज्ञानद्योतकानि न सम्भवेयुरिति विवेचनीयम् ॥ ५३-५४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

एवं प्रियविरहानलज्वालाव्याप्तमानसानां तासां तदुत्तरं कीदृश्यवस्था सम्वृत्तेत्यपेक्षायां श्रीशुक उवाच ततः स्वदुःखनिवेदनानन्तरमुद्धवेन त एव प्रियसन्देशाः पुनः श्राविताः तैः प्रियस्य सन्देशैः भवतीनां वियोगो मे नहि सर्वात्मना क्वचिदित्यादिकैः प्रियेण परमाप्तेन प्रेषितत्वाद्यथार्थत्वप्रतीतिजनकैस्ताः प्रियमधोक्षजं सर्वेन्द्रियजन्यज्ञानाविषयं नित्यं ज्ञात्वा तं च स्वात्मानं ज्ञात्वा व्यपेतो विशेषेण निवृत्तो विरहज्वरो यासां ताः उद्धवं भगवदुपदेशप्रापकत्वाद् गुरुप्रीतिनिधिं मत्वा पूजयांचक्रुः सम्माननं कृतवत्यः तथाच तत्त्वज्ञानमवाप्य जीवन्मुक्तदशां प्राप्ताः सफलजन्मवत्यः सम्पन्ना इति भावः ॥ ५३ ॥ ताभिः समर्चित उद्धवस्ततः किं कृतवानित्यपेक्षायामाह। उवासेति। गोपीनां पूर्ववासनया गोपालस्वरूपं प्रियविरहानुसन्धानवतीनां पुनः पुनरुत्थितान् शोकान् विनुदन् भगवत्स्वरूपोपदेशावृत्त्या सम्यगपनयन् कतिचिन्मासानुवास अभ्यासवशात्कृष्णलीला कथास्वेव तत्रत्यानां रमणमालोक्य ता एव गायन् गोकुलंरमयामास कृष्णस्य परब्रह्मणो या गोवर्द्धनोद्धारणादिरूपा लीलास्तासां कथानां गानं मुमुक्षूणां मुक्तानां च रमणस्थानमतः शोकापनोदकात्मज्ञानोपदेशावसरे तद्गानमपि परमानुकूलमेवेत्याशयेनोद्धवस्य तथा प्रवृत्तिरित्यर्थः ॥ ५४ ॥

गूढार्थदीपिनी

वृजिनार्णवे दुःखसागरे ॥ ५३ ॥ आत्मानं सर्वगतम् ज्वरः सन्तापः ॥ ५४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ततः श्रीमदुद्धवं भवतीनां वियोगो मे नहीत्यादिकृष्णसन्देशैः अधोक्षजं सर्वज्ञं सर्वात्मानं सर्वगतं ज्ञात्वा आत्मानं च क्षेत्रज्ञमल्पज्ञत्वादिना भिन्नमपि तदंशत्वात्तदभिन्नं ज्ञात्वा व्यपेतविरहज्वराः सत्यः उद्धवं पूजयांचक्रुः अत्र "आत्मेति तूपगच्छन्ति ग्राहयन्ति च"इति सूत्रमप्यनुसन्धेयम् ॥ ५३ ॥ शुचः शोकान् दुःखानीत्यर्थः। विनुदन् अपनुदन् ॥ ५४-५५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सर्वा अपि पारवश्येन सम्बोध्य प्रार्थयन्ते ॥ हे नाथेति। नाथेदानीमस्मत्प्रेष्ठ याचितैश्वर्यमूर्ते वा ब्रजनाथ तत्स्वामिन् ब्रजनाथस्य नन्दस्यार्तिनाशनेति वाऽविशेषेणार्तिनाशन वा मग्नं तत्रैव तस्माद्वृजिनार्णवाद्गोविन्द त्वमुद्धर। गोविन्देति वचनेन गिर्युद्धरणादिकं कृत्वा स्वावनं प्राग्यथा कृतं तथोत्तरत्रापि स्वानुभवं हेतुं ध्वनयन्ति ॥ ५३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे पञ्चचत्वारिंशोऽध्यायः ॥ १०—४५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं तासां विलापं श्रुत्वा पुनस्तमेवार्थमुपदिष्टवानित्याह। तत इति। तदनन्तरमपि कृष्णसन्देशैः विशेषे
विरहज्वरः यासाम् एतत्सर्वं भगवदुक्तार्थाज्ञानाद्भवति वियोगे हे सति दुःखं चिन्ता उद्धरणादिकं न हि विस्मृत
चामीकरस्मारणादतिरिक्तं दुःखविस्मारकं साधनमस्ति अतः प्रथमोपदेशेन अभिप्रायः सिद्धः भगव
निर्दुष्टानां भावः पुनर्वर्णितः सोऽपि पदार्थः पुनरुपदेशस्मारणेन निवर्त्तितः तदा भगवति आत्मत्वं [illegible]णस्य वार्तया क्षणतुलानि कृत्वा विशेषेण अपेतविरहज्वराः ज्वराभावे दृष्टमेव द्वारं जातमित्याह। अधोक्षजमात्मानं रमे सुखयामास ॥ ५६ ॥

पदेन प्वैतज्ज्ञापितमिन्द्रियाध्यासात् संघातात्मबुद्ध्याचभगवानात्मत्वेन प्रतीतः तदपगमेऽप्रतीत इति अथवा अन्तः स्वरूप प्राप्ताः यथा कोशमध्ये प्रतिमा तथा तासां सङ्घातमध्ये आत्मानं जीवं स्वस्मिन् अन्तर्भाव्य तत्प्रदेशे वा स्वयमाविर्भूय तत्रैव वा आनन्दांशाभिव्यक्तादेव तत्स्वरूपत्वेन सम्पाद्य पश्चादपरोक्षतया स्वप्रकाशत्वेन वा आत्मानं ज्ञापितवान् इति अन्यथा अध्यारोपन्यायेन प्रतीतिः स्यात् शब्दमात्रे तु विरहाभावः आत्मा न भेदेन प्रतीतः यतः संयुक्तः तथा हि भगवत्कृतिर्भगवत एवेत्यासां ज्ञानमेव ततो गुरूपदेशः प्राप्त इति साक्षाद्गुरुत्वाभावेऽपि श्रूयत इत्याद्युपदेशात् निगरणार्थस्य विद्यमानत्वात् पूजयांचक्रुः आत्मविद् वा सम्मानितवत्यः अथवा पूर्वं भगवन्तं भिन्नतया ज्ञातवत्यः इदानीमात्मत्वेन अग्रे तु तथैव भविष्यतीति ब्रह्मभावयोग्यता निरूपिता । तच्चेत् नाभिलषितं स्यात्तदा न भवेत् इत्यतष्टेच्छां ज्ञापयितुमुद्धवपूजा निरूपिता ॥ ५३ ॥ कमलकटकन्यायेनायंभावः अदृढश्चेत् पूर्वभावेन बाध्येतेति पुनः पुनः स्मामरणार्थं किञ्चित्कालं तत्रैव स्थित इत्याह । उवासकतिचिन्मासानिति । स्थितस्व प्रयोजनमाह । गोपीनां विनुदन् शुचय इति । पुनः पूर्ववासनया भेदः स्फुरति स्फुरणमात्रे च क्लेशो भवति तद्दूरीकरणार्थं स्थितिः यावत्स भावो न स्फुरति सजातीयप्रत्ययसंचलितमेतदेव वर्तमानं ज्ञानं भेददुःखानुत्पाद समयमिति देशादिधर्मैः अन्तःकरणावरणे भेदज्ञानमावश्यकमिति तन्निराकरणार्थं भगवज्ज्ञानं कृतवानित्याह । कृष्णलीला कथाः गायन्निति लौकिकाः कथामात्र एवासक्ता भवन्ति स लीलायां कथायां मुक्ता भक्ताश्च कृष्णकथायामिति योगसमुपायाभ्यां प्रतिपाद्यते ॥ ५४ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । ततोनंतरं कृष्णस्य संदेशैर्व्यपेता नष्टा विरहज्वरा वियोगतापा यासां ता गोप्योऽधोक्षजं श्रीकृष्णम् आत्मानं ज्ञात्वोद्धवं पूजयांचक्रुः ॥ ५३ ॥ गोपीनां शुचः शोकान् विनुदन् दूरीकुर्वन् कतिचिन्मासानुवास कृष्णस्य लीलाकथां गायन् गोकुलं रमयामास ॥ ५४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्च सावधानया बुद्ध्या विचारेण परित्यज्य गतत्वात् कृतघ्नतादिदोषदर्शनेन तद्विस्मरणं भवेदपि, वयं तु तस्य गत्यादिभिर्हृता आकृष्टा धीर्यासां तथाभूताः, अतः कथं तं विस्मरामहे विस्मराम ? । ललितया मनोहरया गत्या, उदारेण मनोरथपूरकेण हासेन, लीलया कटाक्षेण अवलोकनैः, माध्व्या मधुरया गिरा वाण्या च ॥ ५२ ॥ 'भगवद्विरहजं दुःखं भगवानेव निवर्तयितुं शक्तः' इति निश्चित्य तमेव प्रार्थयन्ते—हे नाथ स्वामिन् ! वृजिनार्णवे दुःखसमुद्रे मग्नं गोकुलवासिजनं तस्मादुद्धरेत्यन्वयः । ननु 'असङ्गस्य कथं स्वामित्वम्' इत्याशङ्क्य 'लक्ष्मीपतित्वं तव प्रसिद्धमेव' इत्याशयेन सम्बोधयति—हे रमानाथेति । रमापतित्वेऽपि गोकुलोद्धारः कथं सङ्गच्छते तत्राहुः—व्रजनाथेति । 'व्रजनाथत्वं कथम्' इत्यपेक्षायाम् 'इन्द्रसुरभिभ्यां तथात्वेनाभिषेकात्' इत्याशयेन पुनः सम्बोधयति—गोविन्देति । 'स्वभावतोऽपि त्वं भक्तदुःखहर्ता कुतोऽस्मानुपेक्षसे' इत्याशयेन पुनः सम्बोधयति—आर्तिनाशनेति ॥ ५३ ॥ एवं तासां कृष्णविरहेण व्याकुलतां दृष्ट्वा पुनर्भवतीनां वियोगो मे नास्तीत्यादि तद्वाक्यान्युक्तवांस्ततस्तैः कृष्णसन्देशैरधोक्षजं श्रीकृष्णं स्वात्मानं ज्ञात्वा व्यपेतः अपगतो विरहकृतः ज्वरः सन्तापो यासां ता गोप्यो गुरुतयोद्धवमेव पूजयाञ्चक्रुरित्यन्वयः ॥ ५४ ॥

अन्वितार्थप्रकाशिका

उद्धवोपदेशमनादृत्य मथुराभिमुखीभूयोच्चैः क्रन्दन्ति हे नाथेति । हे नाथेत्यादि सम्बुद्धयः । वृजिनार्णवे दुःखसमुद्रे मग्नं गोकुलवासिजनं तस्मादुद्धर ॥ ५३ ॥ तत इति । ततस्ताः कृष्णसन्देशैः भवतीनां वियोगो मे इत्यादिभिः श्रीकृष्णमधोक्षजं ज्ञात्वा तं च स्वात्मानं ज्ञात्वा व्यपेतः अपगतो विरहकृतो ज्वरः सन्तापो यासां ता गोप्यो गुरुतयोद्धवमेव पूजयांचक्रुः ॥ ५४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदेवाह एता इति पंचभिः गोपवध्वोगोप्यः परं केवलं भुवितनुभृतः सर्वोत्तमतनुधारिण एव जाताः यतः एवं गोविंदे रूढभावाः अचलस्नेहयुक्ताः यत् यं भावं भवभियोगभवतीताः मोक्षाभिलाषुकामुनयोनरदादयश्च वांछिति वयं नित्यप्रसंगिनोहरि सेवका अपि वां छामः न विद्यते अंतेनाशो यस्य सः अनन्तोव्ययमूर्त्तिः श्रीकृष्णस्तस्य कथायां रस आनन्दो यस्य तस्य नरस्य ब्रह्मजन्मभिः प्राप्तविप्रजन्मभिः किं स्यात् यत्र कुत्रापि जातः स एव वरः सर्वोत्कृष्ट इत्यर्थः यद्वा हरेः कथायामरसः असुखं यस्य तस्य विधिजन्मभिरपिकियानर्थः ॥ ५३ ॥ तं रूढभावमेव प्रशंसन्नाह । कमा इति । ननु ईश्वरः साक्षात्प्रत्यक्षपुरुषोत्तमः अनुभजतः सेवमानस्य अविदुषस्तन्माहात्म्यामजानतोपि जनस्य उपयुक्तोमुक्तः अगदराजः स्कन्धेव श्रेयः कल्याण तनोति ॥ ५४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रमुदि[illegible] इति ॥ ततः, कृष्णस्य संदेशैः, व्यपेतो नष्टो विरहज्वरो यासां ताः, ता गोप्यः, अधोक्षजं श्रीकृष्णं, आत्मानं कृतभ्योऽक्षिभ्य[illegible] उद्धवं कृष्णसंदेशहरं वातव्याधि, पूजयांचक्रुः ॥ ५३ ॥ उवासेति ॥ उद्धवः गोपीनां शुचः शोकान्, यदि यूयं प्राणांस्त्यक्तुम[illegible]मान्, उवास । गोकुले इति शेषः । कृष्णस्य लीला यासु ताश्च ता कथाश्च ताः, गायन् गोकुलं, प्राणा भवथ ब्रजं गन्तुं प्रतिक्षण—

श्रीहरिसूरिविरचितं भक्तिरसायनम्

हे नाथेति : १०.४७.५३.

उग्रसेनं पुरस्कृत्य यो जनावनमानसः। तस्य त्वावश्यकी रक्षा गोकुलस्येति कथ्यताम् ॥ १६४ ॥

कृष्णप्रिया

उद्धवजी ? श्रीकृष्ण प्रभु यदि प्रमेय बल से उद्धार कर सकते हैं प्रमाण बल का कोई सामर्थ्य नहीं, यह हमारी हालत है, अब तो हे नाथ ! हे रमानाथ ! हे व्रजनाथ ! हे आर्ति विनाशक ? हे गोविन्द ? विरह वारिधि महासागर में निमग्न गोकुल का कृपया उद्धार करें ॥ ५३ ॥ श्रीशुकदेवजी कहने लगे कि हे राजन् ? भगवान् श्रीकृष्ण के हृद्गत भावों से समर सन्देशामृत वचनों से व्रजवासिनी गोपियों विरह ज्वर ताप निवृत्त होने से अधोक्षज भगवान् श्रीकृष्ण को अपनी आत्मा जानकर प्यारे के कृपापात्र अन्तरङ्ग भक्त श्रीउद्धवजी का आदर से समर्चन किया ॥ ५४ ॥

उवास कतिचिन्मासान् गोपीनां विनुदञ्छुचः। कृष्णलीलाकथां गायन् रमयामास गोकुलम् ॥ ५५ ॥
यावन्त्यहानि नन्दस्य व्रजेऽवात्सीत् स उद्धवः। व्रजौकसां क्षणप्रायाण्यासन् कृष्णस्य वार्तया ॥ ५६ ॥

कर्दमक्षमा

अन्वयः—गोपीनाम्, शुचः, विनुदन्, कतिचित्, मासान्, उवास, कृष्णलीलाः, गायन्, गोकुलम्, रमयामास ॥५५॥ सः उद्धवः, यावन्ति, अहानि, नन्दस्य, व्रजे, अवात्सीत्, कृष्णस्य, वार्तया, व्रजौकसाम्, क्षणप्रायाणि, आसन् ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सरिद्वनगरिदर्यादिषु प्रत्येकं श्रीकृष्णलीलासंप्रश्नादिभिर्व्रजौकसां तं संस्मारयन्रेमे ॥ ५६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

क्षणप्रायाणि क्षणकल्पानि, क्षणो (द्वा) दशपलात्मकः कालः ॥ तदेव विवृणोति—यावन्तीति। क्षणप्रायाणीति—उद्धवस्यान्वर्थनामत्वाद्भगवतोऽप्यानन्ददातृत्वस्वशक्त्यर्पणाच्चेति गम्यते ॥ ५५ ॥ संप्रश्नैरत्र किं कृतं भगवतात्र किं कृतमित्येवंरूपैः पार्श्वद्वयोन्नतनिम्नानिम्नपत्रकुसुमित वृक्षनिविष्टा स्थली द्रोणी, सानुविशेषो वा। हरिदासो हरिसेवको ज्ञातात्मतत्त्वो वा "दासो भृत्ये तथा शूद्रे ज्ञातात्मनि च धीवरे" इति मेदिनी ॥ सम्यक्स्मारयन् साक्षात्कृतानिविशेषं कुर्वन्नित्यर्थः। तादृशानामपि तेषां स्मरणे यत्सम्यक्त्वं तत्तथैव पर्यवस्यतीत्यत एव स्वयमपि रेमे। गवादिवत्स्फूर्तिविशेषाद्द्रुमाणामपि कुसुमितत्वमुक्तम् ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेव विवृणोति। यावन्तीति द्वाभ्याम् ॥ ५५ ॥ सम्यक् स्मारयन् साक्षात्कृतानिविशेषं कुर्वन्नित्यर्थः तादृशानामपि तेषां स्मरणे यत् सम्यक्त्वं तत्तथैव पर्यवस्यतीति अ। एव स्वयमपि रेमे। गवादिवत् स्फूर्त्तिविशेषात् द्रुमाणामपि कुसुमितत्वमुक्तम् ॥५६॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स प्रागुक्त-माहात्म्यः, तथा तथा गोकुल रमणो वा, यावन्ति बहुतराण्यहानि व्रजवासिनां सर्व्वेषामेकक्षणतुल्यान्यासन्। कुतः ? कृष्णस्य वार्त्तया, उद्धवेन तैरेव वा कथ्यमानया लीलाकथया,—कृष्णवार्त्तास्वभावेन परमानन्दजननात्, यद्वा, कृष्णस्य वार्त्तया तत्र-तत्र वर्त्तनेन ॥ ५५ ॥ स तु तेषां संगेन श्रीवृन्दावने परिभ्रमन् परमसुखी बभूवेत्याह—सरिदिति। हरेर्विचित्रप्रसादादिना निजमनोहरस्य श्रीभगवतो दासः साक्षाद्विविधसेवानिष्ठः कृष्णं प्रति तत्तद्वार्त्तया व्रजौकसः सम्यक् स्मारयितुं सरिदादीन् वीक्षमाणो रेमे इति तेषां संगतया तत्र-तत्र परिभ्रमणेन वीक्षणे गुणविशेष उक्तः। एवं यदा कदापि भगवत्प्रियजनसंगेन तल्लीलास्थलदर्शनस्य परमानन्दकारित्वान्माहात्म्यविशेषोऽपि दर्शितः। यद्वा, व्रजभूमेः सरिदाद्यास्तत्र तत्र सदा पुष्पितद्रुमांश्च प्रति कृष्णं वीक्षमाणो रेमे, व्रजौकसां गोपीनां, कर्म्मणि षष्ठी। ताः प्रति (भा० १०।४७।२९) 'भवतीनां वियोगो मे' इत्यादि-तत्सन्देशस्य यथार्थतां संस्मारयन् ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यावन्तीति। उद्धवो नन्दस्वामिके व्रजे यावन्त्यपनिदिनानि अवात्सीत्तावन्त्यहानि कृष्णस्य वार्तया क्षणतुलानि बभूवुः ॥ ५५ ॥ सरिदादीन् पश्यन् तेषु प्रत्येकं कृष्णलीलाप्रश्नादिभिस्तं व्रजौकसां स्मारयन् रेमे सुखयामास ॥ ५६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अवात्सीत् उवास क्षणप्रायाणि क्षणकल्पानि ॥ ३ ॥ पार्श्वद्वयोन्नतनिम्ना निम्नकुसुमितवृक्षानिविष्टा स्थली द्रोणी सानुविशेषः व्रजौकसां कृष्णक्रीडास्मरणं यथा भवति तथेति क्रियाविशेषणं सुखं कृत्वा रेमे हरिदास उद्धवः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सरिदिति । तत्र तत्रत्यलीलाविष्टतया सम्यक् स्मारयन्नित्यर्थः । जगाविति प्रत्यहं गमनागमनसमये किञ्चिद्व्यवहितदूरे स्थित्वेति । ज्ञेयम् ॥ ५६-५७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

क्षणप्रायाणीति । उद्धवस्यान्वर्थनामत्वाद्भगवताप्यानन्ददातृत्वशक्त्यर्पणाच्चेति गम्यते ॥ ५५-५६ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

एवं प्रवृत्तिश्च सफलाऽभूदित्याह । यावन्त्यहानीति । स उद्धवोयावन्तिदिनानि नन्दस्य व्रजे नन्दनन्दनासक्तमानसवासस्थाने अवात्सीत् वासंकृतवान् तावन्ति व्रजवासिनां कृष्णस्य परब्रह्मणो वार्तया तत्त्वोपदेशरूपया गृहीतनन्दनन्दनावतारस्य च वार्तया लीलाकथया हेतुभूतया क्षणप्रायाण्यासन् क्षणादपि न्यूनत्वबोधनाय प्रायः पदं बहिर्मुखैर्हि दिनानि गण्यन्ते नतु कृष्णाभिन्नात्मभिर्नोपि तल्लीला कथं श्रवणाद्यासक्तचेतोभिरिति भावः ॥ ५५ । ननु भगवन्तं परित्यज्य किमिति तदर्थं बहून्मासान् तत्र स उवासेत्याशङ्क्य भगवद्दासस्य तस्य लीलास्थानानि सर्वाणि स्वयं गत्वा साक्षाद्द्रष्टव्यानीति चिरकालादारभ्य मनोरथ आसीत्ततश्च सर्वाभिप्रायविदा भगवता प्रेषितस्तदाज्ञापालनस्वपरप्रयोजनसिद्ध्यर्थं तत्रैव बहुकालमुवासेत्याशयेनाह । सरिदिति । यमुनावृन्दावनगोवर्द्धनतद्दरीः भगवदनुभावेनापर्तावपि कुसुमितपुष्पयुक्तान् चम्पकादिवृक्षान् साक्षात्पश्यन् अत्र श्रीकृष्ण इमां लीलां कृतवानत्रेमामिति व्रजवासिभिः प्रदर्शितानि तत्तत्स्थानानि साक्षात्कुर्वन् परं व्रजौकसां च तत्तत्प्रश्नद्वारा कृष्णसन्देशप्रदानेन च कृष्णं परमेष्टं परमात्मानं संस्मारयन् रेमे तथा च भगवदाज्ञापालनतत्रत्येष्टसम्पादनाविरोधेन स्वार्थं सम्पादयामास हरिदास इत्यनेन तत्र मलिनभावेन तस्य वासो निवारितः सामान्येन सर्वदुःखहारिभगवद्दासत्वाच्च सामान्येन सर्वेषां तत्रत्यानां दुःखं निवारयामासेति द्योतनाय व्रजौकसामित्युक्तम् ॥ ५६ ॥

गूढार्थदीपिनी

शुचः शोकोद्गारान् । विनुदन् अपनयन् ॥ ५५-५६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हरिदासः उद्धवः सरिदादीन् पश्यन् तेषु प्रत्येकं कृष्णलीलाप्रश्नादिभिः कृष्णं व्रजौकसां संस्मारयन् रेमे ॥ ५६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

किञ्च सर्वमेव गोकुलं रमयामास अन्यथा संसर्गतोऽपि दुःखं भवेदिति एतत्कृतं गोकुलं जातमित्याह । यावन्त्यहानीति । नन्दस्य व्रजे अयमवात्सीत् यतोऽयमुत्सवात्मकः तावन्त्यहानि क्षणप्रायाणि जातानि आकाङ्क्षायाः परस्परं प्रतिक्षणं वृद्धत्वात् क्षणमिव बभूव इति प्रायग्रहणं बहिः संवेदने हि दिनादिगणना ते ह्यात्मत्वेनैव भगवन्तं ज्ञात्वा तन्मया एव जाता इति कालातिक्रमः सुगमः उद्धवासक्त्या तथात्वमाशङ्क्यत इति निवृत्त्यर्थमुक्तमपि हेतुं पुनः स्मारयति कृष्णस्य वार्तयेति ॥ ५५ ॥ ननु परार्थं कथं बहुकालं तिष्ठेत् भगवन्तं परित्यज्येत्यशङ्क्याह । सरिद्वनेति । भगवल्लीलास्थानानि तत्रत्यानि सर्वाणि स्वयं द्रष्टव्यानीत्येव पूर्वमेव मनोरथः अतः प्रसङ्गादानतः भगवद्वाक्यमिति पालितं भवति भगवल्लीलापि दृष्टा भवतीति शास्त्रार्थस्य च श्रुतत्वात् भगवल्लीलार्थवेव बहुकालं तत्र स्थितः सरिद्यमुना वृन्दावनं गोवर्द्धन उभयतः पर्वतानां मध्ये निम्ना भूमिः द्रोणीसमा गोकुलेऽपि कुसुमितान् द्रुमान् चम्पकादीन् अपर्तावपि भगवदनुभावेन सार्वकालिकपुष्पयुक्तान् एतावान् स्वार्थः कृष्णं स्मारयन्निति भगवदाज्ञाकरणम् अत उभयार्थस्य संपन्नत्वात् रेमे हरिदास इत्यनेनान्यो भावो निवारितः तत्सङ्गस्य प्रसङ्गादप्यागतस्य फलमाह । व्रजौकसामितिसामान्येन सर्वेषां ग्रहणं भगवता उभयोरेव सुखजननमाज्ञप्तं अयं तु सर्वानेव भगवद्भावापन्नान् कृतवानित्यर्थः ॥ ५६ ॥

श्रीसुबोधिनी–सारः

नंदस्य व्रजे यावंत्यहानि दिनानि स उद्धवोऽवात्सीत् तावंति दिनानि कृष्णस्य वार्त्तया व्रजवासिनां क्षणप्रायाणि आसन् बभूवुः ॥ ५५ ॥ नदीवनपर्वत गुहाः पुष्पितान् द्रुमान् वृक्षान् वीक्षन् पश्यन् हरिदास उद्धवो व्रजौकसां कृष्णं संस्मारयन् रेमे ॥ ५६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गोपीनां शुचः शोकान् विनुदन् अपनयितुं कतिचिन्मासान् स उद्धवो व्रजे उवास। 'कथंदुःखापनोदं कृतवान्' इत्यपेक्षायामाह—कृष्णलीलाकथां गायन् गोकुलं गोकुलवासिजनं रमयामास सुखयामासेति ॥ ५५ ॥ स उद्धवो यावन्त्यहानि नन्दस्य व्रजेऽवात्सीत्तावन्त्यहानि कृष्णस्य वार्तया कालाद्यनुसन्धानाभावाद्व्रजौकसां व्रजवासिजनानां क्षणप्रायाणि क्षणतुल्यानि आसन् बभूवुः ॥ ५६ ॥

अन्वितार्थप्रकाशिका

उवासेति ॥ गोपीनां शुचः शोकान् विनुदन् अपनेतुं कतिचिन्मासान् स उद्धवो व्रजे उवास। कृष्णलीलाकथाः गायन् गोकुलं गोकुलवासिजनं रमयामास सुखयामास ॥ ५५ ॥ यावन्तीति ॥ उद्धवो यावन्त्यहानि नन्दस्य व्रजेऽवासीत्तावान्त्यहानि कृष्णस्य वार्तया कालाद्यनुसन्धानाभावाद् व्रजौकसां व्रजवासिजनानां क्षणप्रायाणि क्षणतुल्यानि आसन् बभूवुः ॥ ५६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गोपीनामलभ्यलाभमाह नायमिति रासोत्सवो अस्य हरेर्भुजदंड युगलेन गृहीतः कंठस्तेन लब्धा अरशिषः अभिप्रेतमनोरथयाभिस्ता सां व्रजसुन्दरीणां यः प्रसादः उदगात् उत्पन्नो बभूव उ आश्चर्येषोयं प्रसादः नितान्तरतेः परमस्नेहयुक्तायाः अंगे कृष्णस्य हृदये स्थितायाः श्रियः नोत्पन्नः नलिनवत् पद्मवत् गंधोरुक् कान्तिश्च यासां तासां स्वर्योषितामपि स प्रसादो न जातः अन्यास्तु तं प्रसादं कुतः प्राप्नुयुः ॥ ५५ ॥ गोपीनां श्रीकृष्णे प्रेमपुंजं दृष्ट्वा स्वन्यूनत्वं द्योतयन्नाह आसामिति आसां गोपीनां चरणरेणुं सेवामानानां वृन्दावनेस्थितानां गुल्मस्तृणविशेषस्तदादीनां मध्ये अहं किमपि स्यां भवेयं यतो या गोप्यः आर्यपथं आर्याः कुलवृद्धास्तेषां पंथाः कुलरीति स्तं हि त्वाविमृग्यां परमपुरुषार्थतयान्वेषणीयां मुकुन्दस्य मुक्तिप्रदस्य पदवीं ॥ ५६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यावन्तीति ॥ स उद्धवः, नन्दस्य व्रजे, नन्दस्वामिके व्रजे इत्यर्थः। यावन्ति यावत्संख्याकानि, अहानि दिनानि अवात्सीत्, तावन्त्यहानि, कृष्णस्य वार्त्तया, व्रजौकसां क्षणप्रायाणि, आसन्। क्षणतुल्यानि बभूवुरित्यर्थः ॥ ५५ ॥ सरिदिति ॥ सरिद्यमुना च गिरिर्गोवर्द्धनश्च वनं वृन्दावनं च द्रोण्यो गोवर्द्धनगुहाश्च ताः, कुसुमितान् संजातकुसुमान्, द्रुमांस्तरूंश्च वीक्षन्, हरिदास उद्धवः, व्रजौकसां कृष्णलीलाप्रश्नादिमिषेणेति शेषः। कृष्णं संस्मारयन्, रेमे सुखयामासेत्यर्थः ॥ ५६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

उवासेति : १०.४७.५५.

इति हि तास्तदशेषमवर्णयन् सकलमात्मचरित्रमपत्रपम्। हरिकथामुदितो व्रजवासिनां भृशमयं शमवन्नवसद्व्यथाः ॥ १६५ ॥
भृशमवापि न या सुरपूज्यया परमया रमयाऽरमयाचिता। किमिह चित्रमभूद्वसतिर्हि सा सुमनसो मनसोऽस्य सुखावहा ॥१६६॥

यावन्त्यहानीति : १०.४७.५६.

कल्पोऽप्यनल्पः क्षणवद्विधातुर्भवत्यलं यच्छ्रुतिगीततोऽपि। द्रष्टुः प्रभोस्तस्य चरित्रमद्धाश्रोतुश्च युक्तः स तथोद्धवस्य ॥ १६७ ॥

कृष्णप्रिया

भगवान का वियोग नहीं है वे व्रज में एवं हृदय में ही विराजमान है यह सिद्धान्त ही नहीं परन्तु अनुभव को सुदृढ कराने के लिए ही श्री उद्धवजी भगवदिच्छा से व्रज में कितने ही मास रह गए। प्रतिदिन प्यारे श्रीकृष्ण सुमङ्गल लीलाओं का पुनः पुनः मान करते हुए गोकुल को आनन्द दान करने लगे ॥ ५५ ॥ श्रीनन्दबाबा के व्रज में श्री उद्धवजी जितने दिन रहे उतने दिन केवल प्यारे कृष्ण भगवान की-लीलागाथाओं का गान करते रहे इससे व्रजवासियों के वे दिन क्षण के समान बन गए ॥५६॥

सरिद्वनगिरिद्रोणीर्वीक्षन् कुसुमितान्[1] द्रुमान्। कृष्णं [2]संस्मारयन् रेमे हरिदासो व्रजौकसाम् ॥ ५७ ॥
दृष्ट्वैवमादि गोपीनां कृष्णावेशात्मविक्लवम्। उद्धवः परमप्रीतस्ता नमस्यन्निदं जगौ ॥ ५८ ॥

कर्दमक्षमा

अन्वयः—हरिदासः, सरिद्वनगिरिद्रोणीन्, कुसुमितान्, द्रुमान्, वीक्षन्, व्रजौकसाम्, कृष्णम्, संस्मारयन्, रेमे ॥ ५७ ॥ गोपीनाम्, कृष्णावेशात्मविक्लवम्, एवम्, आदि, दृष्ट्वा, परमप्रीतः, उद्धवः, ताः, नमस्यन्, इदम्, जगौ ॥५८॥

---

१. तद्रु–वीर. । २. कृष्णक्रीडास्मरं–विज. ।

श्रीधरस्वामीविरचिता भावार्थदीपिका

कृष्णावेशेनात्मनो मनसो विक्लवं वैक्लव्यं दृष्ट्वा । ता गोपीर्नमस्यन्नमस्करिष्यन्नुत्तमस्यात्मनो गोपस्त्रीनमस्कृतिरन्याय्या भवतीति दर्शयितुं तासां महत्त्वं पंचभिर्जगौ उवाच ॥५७॥ एता इति । एताः परं केवलं तनुभृतः सफलजन्मानः रूढभावाः परमप्रेमवत्यः । यदिति । यं रूढं भावं भवभियो मुमुक्षवो मुनयो मुक्ता अपि वांछन्ति वयं च भक्ता अपि । अतोऽनन्तस्य कथासु रसो रागो यस्य तस्य ब्रह्मजन्मभिर्विप्रसंबंधिभिः शौक्लसा वित्रयाज्ञिकैस्त्रिभिर्जन्मभिः । किं कोऽतिशयः । यत्र तत्र जातः स एव सर्वोत्तम इत्यर्थः । यद्वा अनन्तकथासु रसो यस्य तस्य ब्रह्मजन्मभिश्चतुर्मुखजन्मभिरपि किं न किमपीत्यर्थः ॥ ५८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमादि पूर्वोक्तभ्रमरोद्देश्यकगानादिप्रार्थनांतरूपम् । अन्याय्याऽयोग्या । तासां गोपीनाम् । उत्कृष्टो धवः स्वामी श्रीकृष्णो यस्य स उद्धवः 'धवः पतिर्धवो भीरुः' इत्यनेकार्थध्वनिमंजर्याम् । उद्धुनोति द्रावयति निजसंगिनामज्ञानमिति वा । एवं यद्यपि सर्वेषामेव व्रजवासिनां श्रीकृष्णे सर्वविलक्षणः प्रेमा तथापि श्रीगोपीषु तस्य परमचमत्कारमयी भक्तिर्जातेति । दृष्ट्वेत्यादि-एवमुक्तप्रकार आदिर्यस्य तच्चरितमिति शेषः । कृष्णावेशेनात्मनो विक्लवो दिव्योन्मादादिर्यत्र तदननुभूतं दृष्ट्वा परमप्रीतः तद्दर्शनात्स्वभाग्यस्फुरेण चासां गुणानुमोदनेनैव वात्यन्तहृष्टो नमस्यन्नमस्कर्तुं स्तोत्रतया जगौ, आवेशेन सुस्वरं तुष्टाव । किं वा–झटिति प्रणमन्नेव जगौ, प्रत्यहं गमनागमनसमये किञ्चिद्व्यवहितदूरे स्थित्वेति ज्ञेयम् ॥ ५७ ॥ एता गोप्यः अपि वांछाम इत्यर्थः । यतो भगवत्प्रेमैवोत्कर्षहेतुरतो हेतोः । अनन्तस्य हरेः । अतिशय आधिक्यम् । यत्र तत्र यस्मिन्कस्मिन्वंशे । स एव भगवद्भक्त एव । इत्यर्थ इति–'विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम्' इत्याद्युक्तेः । ननु 'ब्राह्मणो जन्मना श्रेयान्' इत्याद्युक्तेः "ब्रह्म ब्राह्मण आत्मना" इति श्रुतेश्च तन्निन्दात्र प्रतीयतेऽतोर्थांतरमाह–यद्वेति । इत्यर्थ इति–"स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिंचितामेति ततः परं हि माम् । अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधा कलात्यये ।।" इति शंकरोक्तः ॥ गोपीमाहात्म्यविद्वर्यं सर्वभागवतोत्तमम् । तमुद्धवं प्रपद्येऽहं तद्गीतार्थविलुब्धधीः ॥ ननु भवद्भिः क्षत्रियैर्ब्राह्मणा एव नमस्या इति स्थिते 'क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः' इति कस्याचिद्दुर्मतमाशंक्य तासामेव सर्वोत्तमतनत्वं स्थापयंस्त्रिभिः प्रथमं तावद्भगवन्महाप्रेमप्रकाशाकरत्वेन स्थापयति, तत्राह–एता इति द्वाभ्याम् । एताः श्रीनन्दव्रजवासिन्यः श्रीभगवत्प्रेयस्यः परं केवलं संप्रति भगवदवतारसहभावसम्पन्नतदुक्तिसाधकसिद्ध नित्यसिद्धालंकृतायां भुवि तनुभृतः परमोत्तमतनुधारिण्य इति स्त्रीत्वादिदृष्ट्या नावमन्तव्याः । कथम्–तत्राह–अखिलात्मनि सर्वांशिनि स्वरूपत्वादेव सर्वेषां तावन्निरुपाधितादृशपरमप्रेयसीयोग्ये, तत्रापि गोविन्दे परमरूपगुण सीमताविख्यातगोकुलेन्द्रतया प्रकाशमाने रूढभावा उद्भूतमहाभावाः, तत्राप्येवमित्यनुभवैकवेद्यनानिर्वाचनीयप्रकारेणेत्यर्थः । तस्मात्तादृशभावतेजोमय्यस्तनवो यासां सर्वोत्तमा इति भावः । तत्र प्रमाणानि तु समनंतरमेव दर्शयिष्यन्ते । तदर्थं तादृशभावमहिमानमाह—यद्भावमात्रमास्तां तावद्दूरतरतद्विशेषवार्ता मुमुक्षवो मुक्ताश्च वाञ्छन्ति, वयमपि नित्यतत्संगिनो भक्ता महिमदृष्ट्या केवलं वाञ्छामो न तु प्राप्नुमः, दूरतस्त्वन्ये भावस्यास्य यन्निदानं तन्माधुर्यविशेषानुभवस्तदलाभादिति भावः । टीकायामत इत्यस्याप्येतदेव तात्पर्यम् । अन्यत्तैः । यद्वा–ईदृशभावाभावेन ब्रह्मजन्मभिरप्यलमित्याह–अकारप्रश्लेषेण अनन्तस्य परममाधुरीभिरप्यपारस्य तस्य कथास्वपि अरसो रुचिमात्रस्या भावो यस्य तस्येति तेषाम् । द्वितीयपक्षेऽपि 'अरसः' इत्येव पाठो युज्यते, अन्यथा पूर्वं चतुर्मुखजन्मभिर्वतिमात्रमवक्ष्यतेति ॥ ५८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं यद्यपि सर्वेषामेव व्रजवासिनां श्रीकृष्णे सर्वविलक्षणः प्रेमा तथापि श्रीगोपीषु तस्य परमचमत्कारमयी भक्तिर्जातेति दर्शयति । दृष्ट्वेत्यादिना । एवमुक्तप्रकार आदिर्यस्य तच्चरितमिति शेषः । कृष्णावेशेनात्मनो विक्लवोदिव्योन्मादादिर्यत्र तदननुभूतं दृष्ट्वा परमप्रीतः तद्दर्शनात् स्वभाग्यस्फुरणेन चासां गुणानुमोदनेनैव वात्यन्तहृष्टः नमस्यन् नमस्कर्तुं स्तोत्रतया जगौ आवेशेन सुस्वरं तुष्टाव । किम्वा झटिति प्रणमन्नेव जगौ प्रत्यहं गमनागमनसमये किञ्चिद्व्यवहितदूरे स्थित्वेति ज्ञेयम् ॥ ५७ ॥ "गोपीमाहात्म्यविद्वर्यं सर्वभागवतोत्तमम् । तमुद्धवं प्रपद्येऽहं तद्गीतार्थविलुब्धधीः" । ननु भवद्भिः क्षत्रियतनुभिर्ब्राह्मणतनय एव नमस्या इति स्थिते "क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टा" इति कस्यचित् दुर्मतमाशङ्क्य तासामेव सर्वोत्तमतनुत्वं त्रिभिः स्थापयन् प्रथमं तावद्भगवन्महाप्रेमप्रकाशाकारत्वेन स्थापयति तदाह । एता इति द्वाभ्याम् । एताः श्रीनन्दव्रजवासिन्यः श्रीभगवत्प्रेयस्यः परं केवलं सम्प्रति श्रीभगवदवतारसहभावसम्पन्नतद्भक्तिसाधकसिद्धनित्यसिद्धालङ्कृतायां भुवि तनुभृतः परमोत्तमतनुधारिण्य इति स्त्रीत्वादिदृष्ट्या नावमन्तव्याः । कथं तत्राह । अखिलात्मनि सर्वांशिनि स्वरूपत्वादेव सर्वेषां तावन्निरुपाधितादृशपरमप्रेयसीयोग्ये तथापि गोविन्दे परमरूपगुणसीमताविख्यातश्रीगोकुलेन्द्रतया प्रकाशमाने रूढभावा उद्भूतमहाभावाः तत्राप्येवमित्यनुभवैकवेद्यनानिर्वचनीयप्रकारेणेत्यर्थः । तस्मात्तादृशभावास्तेजोमय्यस्तनवोऽप्यासां सर्वतोऽप्युत्तमा इति भावः । तत्र प्रमाणानि तु समनन्तरमेव दर्शयिष्यन्ते तदर्थं तादृशभावमहिमानमाह । यद्भावमात्रमासां तावद्दूरतस्तद्विशेषवार्त्ता मुमुक्षवो मुक्ताश्च वाञ्छन्ति वयमपि

नित्यतत्सङ्गिनो भक्ताः महिमदृष्ट्या केवलं वाञ्छामः नतु प्राप्नुमः। दूरतस्त्वन्ये भावस्यास्य यन्निदानं तन्माधुर्यविशेषानुभवस्तद्दुर्लभादिति भावः। टीकायाम् अत इत्यस्याप्येतदेव तात्पर्यम्। अन्यत्तैः। यद्वा ईदृशभावाभावेन ब्रह्मजन्मभिरप्यलमित्याह अकारप्रश्लेषेण। अनन्तस्य परममाधुरीभिरपारस्य तस्य कथयस्वपि अरसो रुचिमात्रस्याभावो यस्य तस्येति तेषां द्वितीयपक्षेऽपि अरस इत्येव पाठो युज्यते। अन्यथा पूर्वत्र चतुर्मुखजन्मभिर्वेति मात्रमवस्यतेति ॥ ५८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमुक्तप्रकार आदिर्यस्य तत्, आदि-शब्दान्मुहुरुन्मत्तवद्वचनादिकं मुहुर्मूर्च्छादिकं च ज्ञेयम्। यद्वा, आदिगोपीनां नित्यप्रियाणां व्रजसुन्दरीणां कृष्णे आवेशेन तथा तथानुभवात् सम्यगभिनिवेशेनात्मनो विक्लवं दिव्योन्मादं दृष्ट्वा साक्षादनुभूय नमस्यन् अग्रे नमस्कर्त्तुं प्राक् स्तोत्रतया किंवा परमभक्त्या साक्षादेव प्रणमन्निदं वक्ष्यमाणं जगौ, उच्चैः सुस्वरं कीर्त्तयामास। कुतः? परमप्रीतो निजेश्वरेऽननुभूतपूर्व्वप्रेमविशेषदर्शनेनात्यन्तहृष्टः सन् ॥ ५७ ॥

गोपीमाहात्म्यविद्वर्य्यं सर्व्वभागवतोत्तमम्। तमुद्धवं प्रपद्येऽहं तद्गीतार्थविलुब्धधीः ॥

एताः श्रीव्रजेन्द्रव्रजवासिन्यो गोपवध्वो गोप्यो भुवि पृथ्वीमध्ये, इत्यत्रैव सुष्ठु साधनादिसम्पत्त्या जन्मसाफल्यसिद्धेः। अखिलात्मनि सर्व्वान्तर्यामिणि परमेश्वरे, तत्रापि गोविन्दे रूढभावा जातप्रेम विशेषा बभूवुः, तत्राप्येवमनेन सर्व्वनैरपेक्ष्येण तथानिर्व्वचनीयातिलालसार्त्तिविकारभङ्ग्यादिना प्रकारेण, तत्र च जगच्चमत्कारकारिभावविशेषेण वाञ्छन्त्येव केवलम्, न तु लभन्ते, यं वयमपि वाञ्छामः। एवं मुमुक्षुमुक्त भक्तेभ्योऽधिकमाहात्म्यमुक्तम्; अत ईदृशमेव जन्मसर्व्वोत्तमम् न तु जगत्स्रष्टृत्वादिना सर्व्वश्रेष्ठतया प्रसिद्ध श्रीब्रह्मजन्मापीत्याह—किमिति। बहुत्वं गौरवेण, किवा बाहुल्यापेक्षया,—श्रीभगवत्कथारसेन श्रीब्रह्मजन्मतोऽप्यधिकफलसिद्धेः। अथवा अखिलस्यात्मनि प्रियतम इत्यर्थः। तथापीदृशो भावोऽस्मिन्न कस्याप्यन्यस्यास्तीति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, ब्रह्मजन्मभिर्ब्रह्माकारमनोवृत्तिभिरपि किम्? बहुत्वं गौरवेण सम्मतापेक्षया वा; यद्वा, ईदृशभावाभावेन ब्रह्मजन्मनापि न किमपीत्याह अकार-प्रश्लेषेणअनन्तकथायां न रसो यस्य तस्य तद्रसेनैव ब्रह्मजन्मनामपि साफल्यसिद्धेः। आसां च कथादिसाध्यभावविशेषसम्पत्त्या सर्व्वतः श्रेष्ठ्यं युक्तमेवेति भावः ॥ ५८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दृष्ट्वेति। एवं प्रदर्शितमादिर्यस्य तद्गोपीनां कृष्णावेशेनात्मनो मनसो विक्लवं वैक्लव्यमभाष्टय दृष्ट्वा नितरां प्रीत उद्धवस्ता गोपीर्नमस्यन्नमस्करिष्यन्निदं वक्ष्यमाणं जगौ उत्तमस्यात्मनो गोपस्त्रीनमस्कृतिरन्याय्या न भवतीति दर्शयितुं तासां महत्त्वं पञ्चभिर्जगावित्यर्थः ॥ ५७ ॥ एता इति। एता गोपवध्वः परं केवलं तनुभृतः सफलजन्मानः तत्र हेतुं वदन् गोपवधूर्विशिनष्टि। एवमित्थमात्मनि सर्वान्तरात्मनि गोविन्द एव रूढः भावः प्रेमात्मको यासां ताः कृतस्तावतैव तनुभृत्त्वमित्यत आह। यद्यस्मात्कारणाद्भवभियो मुमुक्षवो मुनयः शुभाश्रयमननशीला वयमभक्ताश्चास्मदादयः वाञ्छन्ति रूढभावमिति विभक्तिविपरिणामेन संबन्धः यद्गूढभावत्वमिति वा यत एवमतः अनन्तस्य गोविन्दस्य कथासु रसो ऽनुरागो यस्य तस्य ब्रह्मजन्मभिः शौक्लसावित्रयाज्ञिकैः त्रिभिर्जन्मभिः किं कोऽतिशयः अनन्तकथारसत्वमेवातिशयावह नतु ब्रह्मजन्मेति भावः। यद्वा। अनन्तकथारसस्य ब्रह्मजन्मभिश्चतुर्मुखजन्मभिरपीत्यर्थः ॥ ५८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गोपीनामेवमादिकृष्णावेशात्मविक्लवं दृष्ट्वा नमस्यन् प्रावण्यं कुर्वन् ॥ ५ ॥ अखिलात्मनि पूर्णात्मनि गोविन्दे दृढभावाः एवं नित्यमतिवर्धमानभक्त्या एता गोपवध्वस्तनुभृतां मध्ये परमुत्तमं शरीरभरणफलभाज इत्यन्वयः मुन्यादिषु सत्सु किं विशिष्योच्यत इति तत्राह। वाञ्छन्तीति। भवधियः भद्रबुद्धयोऽपि मुनयः यद्भक्तिलक्षणं मुक्तिसाधनं वाञ्छन्ति वयं च वाञ्छामः नत्वित्थं प्रभवामः तत्र को हेतुरित्यतो वोक्तं भवधिय इति संसारोद्विग्नबुद्धित्वादित्यर्थः। भवभयादिति पाठे संसारभयं सन्दृश्येति ल्यब्लोपे पञ्चमी मुनीनां ब्रह्मकुलोत्पन्नोत्तमत्वात्किंनिर्निन्दिषुरिव ब्रवीषीति तत्राह। किं ब्रह्मेति। यत्र येषु ब्राह्मणजननेषु अनन्तस्य हरेः कथा नास्ति तैः किं न किमपि प्रयोजनं जीवन्मृतत्वादित्यर्थः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

एता इत्यादिकम् तत्र या वै श्रियार्चितमित्यत्र तथापि श्रिया यत्तदप्राप्तिस्तत्खल्वेतासामिव तस्मिन्नमस्यत्वभावादिति ॥ ५८–६४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

दृष्ट्वेत्यादि। गोपीनामेवमादि अनिर्वाच्यं प्रेम दृष्ट्वा उद्धवस्ता नमस्यन् नमस्कुर्वन्निदं वक्ष्यमाणं जगौ। कीदृशम्? कृष्णावेशेनात्मनो विक्लवो यत्र। नमस्यन्निति सर्वोत्कृष्टत्वेन प्रतिपादनाय श्रीशुकदेव-प्रतिज्ञा ॥५७॥ स चोद्धवः (६३ तम–श्लो०)

"वन्दे नन्दव्रजस्त्रीणाम्" इत्यादि वन्दनं करिष्यन् सर्वोत्कृष्टत्वमन्वयव्यतिरेकाभ्यां दर्शयन्नाह—एताः परमिति द्वाभ्याम्। गोपवध्वस्तनुभृतः, तनुभृन्मात्रस्य परं पारमेताः प्राप्ताः। तत्र हेतुः—अखिलात्मनि गोविन्दे अनिर्वाच्यं यथा स्यात्तथा रूढो बन्धमूलो भावो यासाम्, तेनामूस्तनुभृत्परा एव तनुभृतः। एवं गोविन्दे भावो नास्त्येवेति भावः। एतास्तु स्वभावसिद्धाः। नन्वेतादृशस्य भावस्य कथमेवं महिमा, येन कृतेन तनुभृत्परत्वं सम्भाव्यते ? तत्राह–वाञ्छन्तीत्यादि। यद् यं भावं भवभियो मुमुक्षवो मुनयो जीवन्मुक्ताः, वयञ्च भक्ताः, वाञ्छन्ति, न लभन्ते। ननु ब्रह्म कैवल्यमेव परमपुरुषार्थः, तदनुकूलत्वात्। कथमस्य गोपीकृतभावस्य दुर्लभत्वम् ? यो मुमुक्षुप्रभृतिभिरपि वाञ्छयत इत्याह—कथा यासामिति वा तासां रसोऽनुरागस्तस्य जन्मभिरुत्पत्तिभिः सवासनः सह कथोपकथनात् प्ररोहैः किं ब्रह्म ? ब्रह्मकैवल्यं किमित्यर्थः। यद्वा, अनन्तकथया श्रीकृष्णकथया गोपवधूविलासकथया यो रस आस्वादस्तस्य जन्मभिरुत्पत्तिभिरिति ॥ ५८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

दृष्ट्वेत्यादि। ता नमस्यन् नमस्या एवैता इति दर्शयन् ॥ ५७ ॥ गोपीनां परात्परत्वमन्वयव्यतिरेकाभ्यां दर्शयन्नाह द्वाभ्याम्—एता इत्यादि। गोपवध्वः किल तनुभृतः प्राणित्वेन जायमानस्य तनुभृत-प्राणिमात्राद्वा परं पारमेताः प्राप्ताः 'जातावेकवचनम्' तनुभृन्मध्ये नासागणनेति भावः। यतः श्रीगोविन्द एवं रूढभावाः, गोविन्दाङ्घ्रिप्रकरणेनैवंभाववत्त्वं तनुभृत्परत्वे हेतुः। भावस्य दुर्लभतामाह–वाञ्छन्तीत्यादि। यत् यम् कथमेवं भावो मुमुक्षुमुक्तभक्तैर्वाञ्छ्यते ? तत्राह–किं ब्रह्मेत्यादि। अनन्तस्य कथायामेव किमुत अस्मिन्, रसोऽनुरागः ब्रह्मजन्मभिर्ब्रह्मतापत्तिभिरपि, बहुवचनं सर्वस्पृहणीय-प्राधान्यात् ॥ ५८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवमादि चरितमिति शेषः। कृष्णावेशेनात्मनो मनसो विक्लवो दिव्योन्मादादिर्यत्र तत्। नमस्यन्निदं नमस्कारमन्त्रमिव जगावुच्चैरुच्चारयामास। क्षत्रियजातेरपि स्वस्य गोपस्त्रीनमस्कृतिरन्याय्या न भवतीति दर्शयितुमिति श्रीस्वामिचरणाः ॥५७॥ तासां सर्वोत्कृष्टं माहात्म्यमाह पञ्चभिः। एताः परं केवलं तनुभृतः सफलजन्मानः। रूढभावाः महाभाववत्यः। यदिति यं निरूढभावं भवभियो मुमुक्षवः। मुनयो मुक्ताः वयञ्च श्रीकृष्णसङ्गिनोऽपि भक्ताः वाञ्छन्ति नतु प्राप्नुवन्ति। अतोऽनन्तकथासु रसो रागो यस्य तस्य ब्रह्मजन्मभिर्विप्रसम्बन्धिभिः शौक्लसावित्र्याज्ञिकैस्त्रिभिर्जन्मभिश्चतुर्मुखजन्मभिर्वा किं कोऽतिशयः न कोऽपि। यतोऽनन्तकथासु राग एव सर्वोत्कर्षप्रतिपादको नान्य इति भावः। यद्वा। अनन्तकथासु अरसो यस्य तस्य विप्रजन्मभिर्वा किम्। यतस्तत्कथासु रागाभाव एव तत्तत्सर्ववैफल्यप्रतिपादक इति भावः ॥ ५८ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

क्षणमात्रं कृष्णमात्मत्वेन ज्ञात्वा व्यपेतविरहज्वरत्वेनावस्थानं क्षणमात्रं तं प्रेष्ठं मत्वा तद्विरहतापव्याकुलत्वेनेत्येतद्द्वयमेकत्र दृष्ट्वातिविस्मितस्वान्तउद्धवोऽतिप्रीतो जात इत्याह। दृष्ट्वेति। गोपीनां स्वीकृतगोपवेशप्रियाणां कृष्णस्य चित्ताकर्षकस्य श्यामसुन्दरस्य प्रेष्ठस्यावेशेन हा क्व गत इति तत्सम्बन्धिविरहजनितदुःखावेशेनात्मनो मनआदेर्विक्लवं वैक्लव्यं गोपस्य सर्वेन्द्रियपालकतया स्वान्तर्निविष्टस्यांशभूतत्वेन तदात्मना कृष्णस्य सच्चिदानन्दरूपस्य परमात्मन आवेशेन सम्यगभेदसम्पत्त्या आत्मनो देहादेर्वैक्लव्यमहम्भावत्यागाच्छैथिल्यमुक्तप्रकारकादिरूपं दृष्ट्वा उद्धवः परमप्रीतः अहो एतासामुत्कर्षातिशयः समाहितचेतसां ब्रह्मस्वरूपेणावस्थानेऽप्युत्थितमनसां तदीयविरहव्याकुलत्वेन न त्वेतासां देहाद्यनुसन्धानं लोकव्यवहारानुसन्धाने तु दूरापास्तमित्यनुसन्धाय परमप्रसन्नो जातः एवमेव च भगवद्भक्तैरवस्थेयमेतद्द्वयमप्यस्त्यत एता मत्तोऽभ्यधिका इति मनसि निश्चित्य ता नमस्यन् उत्तमस्य तव गोपाङ्गना नमस्कृतिरयुक्तेति लोकाशङ्कानिरासायेदं वक्ष्यमाणं तासां महत्त्वं जगौ ॥ ५७ ॥ तदुदाहरति। एता इति। परं केवलम् एता एव तनुभृतः सफलजन्मानः न तु तनूरूपा इति वा यतः अखिलात्मनि गोविन्दरूपेण प्रेष्ठत्वमापन्ने रूढभावाः रूढः पराकाष्ठांगतो भावः प्रेमा यासां गोविन्दे स्वप्रेष्ठे भगवत्सन्देशैरखिलात्मत्वेनावगते एवं रूढभावा वासुदेव एवाखिलात्मा नातोऽन्यत्किंचिदस्तीति दृढनिश्चयवत्यस्तथा च नैवम्विधा लौकिकाः देहतादात्म्याध्यासवत्त्वादस्वाधीनसङ्गातत्वाच्च ननु सन्ति लक्ष्मीप्रमुखा एवंविधा इति चेत्तत्राह। गोपवध्वः लक्ष्म्याद्यास्तु नारायणवध्वस्तेन कदापि न वियुक्ता अतस्तस्मिन् यद्यपि प्रेमवत्यस्तथापि नैवम्विधरूढभावा इति भावः। यद्वा ता उत्कृष्टा एतास्तु गोपवध्वो निकृष्टजात्युत्पन्नास्तत्रापि भुवि तास्तु वैकुण्ठादौ स्थिताः भूमौ लब्धस्य जन्मन एवंभूतरूढभावसम्पादनेनैव साफल्यं तच्च तद्व्यतिरिक्तस्य सर्वस्यापि दुर्लभमित्यपि भुवि गोपवध्व इति पदाभ्यां ध्वनितम् इदमेव स्पष्टयति। वाञ्छन्तीति। यत् यं रूढभावं भवभियो भवाज्जन्ममरणलक्षणसंसृतिचक्राद्भीर्भयं येषां ते मुमुक्षवो वाञ्छन्ति मुनयस्तत्त्वविदो जीवन्मुक्ता वयं भगवद्भक्ताश्च मुमुक्षूणां तूभयविधोऽपि भावोऽप्राप्तत्वाद्वाञ्छाविषयः तत्त्वविदां तु सर्वात्मनि रूढभावत्वेऽपि तादृशरूढप्रेमाभावाद्वाञ्छा भक्तानां केषाञ्चिदेतत्सत्त्वेऽपि सर्वात्मनिष्ठत्वाभावात्तद्वाञ्छा यद्यपि नारदप्रह्लादादीनामुभयविधभावो वर्तते तथापि स्वदेहाधिकारानुरूपलौकिकव्यापारपरतापि

दृश्यतेऽतो नैवंविधरूढभाववत्त्वमिति भावः । ननु केचित् ब्रह्मर्षयः अन्तर्मुखतादशायां ब्रह्मनिष्ठाबहिर्मुखतादशायां दीर्घसत्त्राद्यनुष्ठातृत्वेन परमात्माराधनपरायणाश्च दृश्यन्ते ते चोत्कृष्टजन्मवत्त्वादेताभ्यः श्रेष्ठाः स्युरित्यासङ्क्य तेषामपि तत्तत्कर्मानुष्ठानरूपस्य व्यवधानस्य सत्त्वान्मैवमित्याशयेनाह । किमिति । अनन्तस्यकथासु रसो यस्य तस्य ब्रह्मजन्मभिः तत्सम्बंधिभिः शौक्लसावित्रयाज्ञिकैस्त्रिभिर्जन्मभिः किं न कोऽप्यतिशयः यथोक्तभाववान् यत्र कुत्रापि जातः सर्वस्मात्सान्तकथारसादुत्तमः यद्यनन्तकथारसस्य यस्य कस्याप्येवं तर्हि किं वक्तव्यं भगवत्प्रियाणो तासामित्याशयः ननु यद्यप्येवं तथापि जातितस्ता निकृष्टा इत्याशङ्क्याह । किमिति । जातेरुत्कृष्टताया अपकष्टताया वा अप्रयोजकत्वादिति भावः । यद्वा एताभिर्लब्धं पदं सर्वे वाञ्छन्ति एतासां तु चतुर्मुखजन्मसहस्रमपि नाभिलाषास्पदमित्याशयेनाह । किमिति । तथा च ब्रह्मादिवन्द्यपादपद्मानामग्रे के वयं वराका इति भावः ॥ ५८ ॥

गूढार्थदीपिनी

हरिदास उद्धवः स्वयं रेमे आनन्दमनुभूतवान् ॥ ५७ ॥ कृष्णावेशेन आत्म-विक्लवं मनोव्याकुलताम् ॥ ५८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवमादिपूर्वोक्तमादिर्यस्य तत् कृष्णावेशेन आत्मनो मनसो विक्लवं वैक्लव्यं दृष्ट्वा ताः गोपीर्नमस्यन् नमस्करिष्यन् इदं वक्ष्यमाणं तासां महत्त्वं श्रेष्ठस्यापि कनिष्ठहरिभक्तनमस्कृतिरन्याय्या नेति अन्यान् ग्राहयितुं पञ्चभिर्जगौ उवाच ॥ ५७ ॥ मुनयोऽन्तर्वृत्तय ऊर्ध्वरेतसः वयञ्च गृहस्थाः भवभियो मुमुक्षवः इत्युभयत्र सम्बध्यते अखिलात्मनि यद्रूढं भावं वाञ्छन्ति गोपवध्वस्तु रूढः प्राप्तविषयः प्रीत्यात्मको भावो यासां ताः अत एव एताः परन्तु केवलं तनुभृतः सफलजन्मानः गतः अनन्तस्य विष्णोः कथासु रसो रागो यस्य तस्य ब्रह्मजन्मभिः बृहद्भिः शौक्लसावित्रयज्ञिकैस्त्रिभिर्जन्मभिः किं काधिकता विष्णुकथारागी यत्र क्वचन जातोऽपि सर्वोत्तम इत्यर्थ । यद्वा अनन्तरस्य कथासु अरसो यस्य तस्य ब्रह्म जन्मभिरनेकैश्चतुराननजन्मभिरपि किं न किमपीत्यर्थः । भगवद्भजनपरः सर्वोत्तम इति फलितोऽर्थः ॥ ५८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवदाज्ञां कृत्वा इतस्तस्य निर्गमनमाह । दृष्ट्वेति । प्रत्यहमुपदेशः प्रत्यहवैक्लव्यमेवमुभयं दृष्ट्वा आत्मतत्त्वेऽपि बहिःसंवेदनमात्रेणैव तासां भगवदाकाङ्क्षेवोत्पद्यते परं निर्दुष्टा एवं तासां दृष्ट्वा कृष्णावेशेन आत्मनो देहस्य विक्लवं दृष्ट्वा अन्तर्निष्ठा वा विरहो वा द्वयमेव नतु तासामन्या लौकिकी अवस्था एवं दृष्टा अन्तर्निष्ठा वा विरहो वा द्वयमेव दृष्ट्वा परम प्रीतो जात एवमेव स्थातव्यं पक्वेनेति पश्चात्तासूभयं दृष्ट्वा स्वस्मिन्नेकमवेति आधिक्यात् ता नमस्यन् मनोदोषशङ्काभावाय तासां स्तुतिरूपमिदं वक्ष्यमाणं जगौ ॥ ५७ ॥ तस्यैव वाक्यान्याह । एताः परमिति षड्भिः । तासु भगवतः सर्वधर्मज्ञापनाय आदौ तासां स्तुतिमाह । तनुभृतश्चेत् एता एव नापि ज्ञानिनो नापि लौकिका नापि भक्ताः तत्र लौकिकास्तु व्यर्थजीवना एव नहि रज्वा बद्धः पाशी भवति स्वाधीनः पाश एव तथा एवं तनुभृतोऽपि येषां स्वाधीना तनुः ज्ञानिनां तु ज्ञानप्राप्तिपर्यन्तमेव साधनत्वेन शरीरोपयोगादग्रे व्ययमेव देहः अनपेक्षितभारवत् गृह्णातीति भक्त्या अपि मौढ्यात् देहस्यवात्मानं मन्यमानाः तत्रैव न पर्यवसितमतयो बहिर्मुखत्वात्तनुरूपा एव नतु भृतः कालान्तरे परं सफलम् अस्मदादयस्तु भक्ता अपि प्राप्तज्ञाना अपि मन्दभावं प्राप्ताः नोत्कर्षेण तनुभृतः यतः परमुत्कर्षेण एता एव तनुभृतः नृन्वेतादृश्यः सन्ति तनुभृतः लक्ष्मीप्रभृतयस्तत्राह । भुवीति । ननु भुव्यपि उत्कटवक्ता प्रह्लादादयः सन्त्येव तत्राह । गोपवध्व इति । एतादृशीमवस्थां प्राप्य न कोऽप्येवं विधो जात इत्याश्चर्यं किञ्च गोविन्दे स्वकीयत्वेन ज्ञाते वस्तुतः अखिलात्मनि एवं रूढभावाः अतो देहस्य स्वाधीनस्य तदेव फलमिति सर्वात्मत्वेन ज्ञात्वापि निर्दोषार्वभावनिष्ठा एव ननु ज्ञानावस्थोत्तरेति आत्मलाभान्न परं विद्यत इति एता भगवता ज्ञाननिष्ठाः कृताः इति च वस्तुत एवाग्रे देहस्यानुपयोगात्कथमेषा स्तुतिरिति चेत्तत्राह । वाञ्छतीति यं भावं भवात् भीः येषां ते मुनयो मुक्ताः वयं भक्तमेवञ्चचकारात्सर्वे एव धर्ममार्गपरा अपि अवश्यं हि विदेहकैवल्यपर्यन्त सर्वेषां बहिः सम्वेदनास्त्येव जीवन्मुक्तानां तथा श्रवणात् तत्र लौकिक एव भावः सर्वेषां जायत इति कालावच्छेदेनजन्मवैयर्थ्यमेव अन्येषां तु वैयर्थ्यं सिद्धमेव नारदादीनामपि कदाचित्प्राकृतवद्व्यवस्था अन्यथा लौकिकसमानकार्यं न स्यात् प्रह्लादस्यापि राज्यादिकरणात् तथावसीयते बहिः सम्वेदने तु एषैवावस्था सर्वशास्त्रपर्यवसितातोऽन्या क्वचिदप्यस्तीति अवस्थायां विचार्यमाणायमिता एव तनुभृतः । नन्वेतदपेक्षया ये श्रोत्रिया ब्रह्मविदो ब्राह्मणा वसिष्ठादयस्ते महान्तो भविष्यन्तीत्याशङ्क्याह । किं ब्रह्मजन्मभिरपि ब्रह्मभावनापन्नानां जन्मभिः शुक्लसावित्रयाज्ञिकैः किं न किञ्चित् यद्यपि बहिः सम्वेदने तेषां वेदार्थानुष्ठातृत्वं दीर्घसत्रित्वादिरूपम् अन्तर्निष्ठतायां तु ब्रह्मपरत्वमिति तथापि कर्मापेक्षया भक्तिर्बाधिका कर्म हि प्रपञ्चे स्वास्थ्यं सम्पादयति न तु भक्तिः यो हि दुष्टं मन्यते स दुष्ट इति निर्द्धारं तत्तत्प्रकरणे तत्तप्रशंसा तु प्रकरणानुरोधिनी अतः अनन्तकथायामरसस्य ब्रह्मजन्मभिः कर्मोपयोगिभिरपि न किञ्चित् । ननु तथाप्युत्कर्षहेतुर्लोकं तद्भवतीति युक्त्वा बाधेऽपि प्रसिद्ध्यैव उत्तमफलत्वं पर्यवसानविधया कल्प्यत इति चेत्तत्राह । अनन्तकथायां रसयुक्तस्य पूर्वोक्तैः ब्रह्मजन्मभिः न कोऽपि पुरुषार्थः साधननीयः ततोऽप्युत्कृष्टस्यैव साधनदशायां फलदशायां च फलस्य सिद्धत्वात् कर्मापेक्षयापि भक्त्यैव ज्ञाने अधिकारकरणाच्च ॥ ५८ ॥

श्रीसुबोधिनी–सारः

गोपीनां कृष्णावेशेनात्मनो मनसो विक्लवं वैक्लव्यम् एवमादि दृष्ट्वा परमप्रीत उद्धवः ता गोपीर्नमस्यन् नमः करिष्यन्निदं जगौ ॥ ५७ ॥ निखिलात्मनि सर्वात्मनि गोविंदे रूढो भावो यासां ताः परमप्रेमवत्य एता गोपानां वध्वः स्त्रियो भुवि पृथिव्यां परं केवलं तनुभृतः सफलजन्मानः यत् यं रूढभावं भवभियः संसारत्रस्ता मुनयो वयं च वांच्छंति युक्तमित्याह अनंतस्य कथासु रसो रागो यस्य तस्य जनस्य ब्रह्मजन्मभिर्ब्राह्मणजन्मभिः किं न किमपि ॥ ५८ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

ननु 'भगवन्तं परित्यज्य कथं परार्थं बहुकालं व्रजेऽवात्सीत्' इत्यपेक्षायामाह—सरिदिति । सरिदादीन् वीक्षन् विशेषत ईक्षमाणस्तेषु कृष्णलीलाप्रश्नादिभिर्व्रजौकसां कृष्णं संस्मारयन् हरिदास उद्धवो रेमे स्वयमप्यानन्दानुभवं कृतवानित्यर्थः ॥ ५७ ॥ एवं प्रदर्शितप्रकारं आदि यस्य तद्गोपीनां कृष्णावेशेनात्मनो मनसो विक्लवं व्याकुलतां दृष्ट्वा परमप्रीतः उद्धवस्ता गोपीर्नमस्यन् नमस्करिष्यन् उत्तमस्य स्वस्य गोपस्त्रीनमस्कृतिरयुक्ता न भवतीति दर्शयितुं प्रथमं तासां महत्त्वमिदं वक्ष्यमाणं पञ्चभिर्जगौ ॥५८॥

अन्वितार्थप्रकाशिका

सरिदिति ॥ सरित् वनगिरीन् द्रोणीः पर्वतान्तःसमप्रदेशान् कुसुमितान् द्रुमांश्च वीक्षन् पश्यन् । शता आर्षः । तेषु कृष्णलीलाप्रश्नादिभिर्व्रजौकसां कृष्णं संस्मारयन् हरिदास उद्धवो रेमे स्वयमप्यानन्दानुभवं कृतवान् ॥ ५७ ॥ दृष्ट्वेति ॥ एवं प्रदर्शितप्रकारम् आदिर्यस्य तद् गोगोपीनां कृष्णावेशेनात्मनो मनसो विक्लवं व्याकुलतां दृष्ट्वा परमप्रीत उद्धवस्ता गोपीर्नमस्यन् व वन्दे । नन्दव्रजस्त्रीणामित्यादिभिर्नमस्करिष्यन् इदं वक्ष्यमाणं वचनं जगौ ॥ ५८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आदिभिः अर्चितं पूजितं योगेश्वरैरपि आत्मनि मनसि पूजितं तत् कृष्णस्य चरणारविन्द या गोप्यः रासगोष्ठांस्तनेषुन्यस्तं धृतं तत् परिरभ्य ॥ ५७ ॥ तासां पादरेणून् मनस्कुर्वन्नाह वंदे इति अभीक्ष्णशः पुनः पुनः ॥ ५८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दृष्ट्वेति ॥ एवमादि गोपीनां, कृष्णावेशात्मविक्लवं कृष्णावेशेनात्मनो वैक्लव्यं दृष्ट्वा, परमप्रीतो नितरां प्रसन्नतां प्राप्तः उद्धवः, ता गोपीः, नमस्यन् नमस्करिष्यन्, इदं वक्ष्यमाणं, जगौ ॥ ५७ ॥ उत्तमस्यात्मनो गोपस्त्रीनमस्कृतिरन्याय्या न भवतीति दर्शयितुं तासां महत्त्वमाह पञ्चभिः । एता इति ॥ एवमित्थं, अखिलात्मनि सर्वान्तरात्मनि, गोविन्दे श्रीकृष्णे एव, रूढोऽतिसमासक्तः भावः प्रेमात्मको यासां ताः, एताः गोपवध्वः, परं केवलं, भुवि तनुभृतः सफलजन्मानः, कुतस्तावतैव तनुभृत्त्वमित्यत आह । यद्यस्मात् कारणात्, भवभियः मुमुक्षवः, मुनयः शुभाश्रयमननशीलाः ऋषयः, वयं भक्तकल्पा अस्मदादयश्चाऽपि, वाञ्छन्ति । एतादृशरूढभावमिति शेषः । यत एवमतः, अनन्तस्य गोविन्दस्य कथासु रसोऽनुरागो यस्य तस्य, ब्रह्मजन्मभिः शौक्लसावित्र्याज्ञिकैस्त्रिभिर्जन्मभिः, किं कोऽतिशयः । अनन्तकथारसत्वमेवातिशयावहं न तु ब्रह्मजन्मेति भावः । यद्वा । अनन्तकथारसस्य जनस्य ब्रह्मजन्मभिश्चतुर्मुखजन्मभिः किमित्यर्थः ॥ ५८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

सरिद्वनेति : १०.४७.५७.

कुतुकतश्चरतो विपिने स्फुटाच्युतपदे विपदेकविनाशिनि । अभवदस्य मनस्यतिभव्यदा विजनता जनताधिकसौख्यता ॥ १६८ ॥
कुशलवाग्भिरलं जनता जगौ व्रजगता जगतामभयप्रदम् ।
उषसि घोषनिवासिविलासदृक् सकलया कलयाऽपि युतां स ताम् ॥ १६९ ॥
सर्वभावसुखदायिनि कामं गोकुले निवसतोऽपि सतोऽस्य । ईषदुन्मदभून्नमनस्तद्युक्तमेव हरिणाहृतसारम् ॥ १७० ॥
नैव व्याससुतस्य कामकृदभून्नग्नाऽप्यसौ स्त्रीस्थितिः तस्येत्यत्र न चित्रमस्ति यदसौ स्त्रीपुंभिदाशून्यधीः ।
चित्रं तन्मदनागमोहितमतिः स्त्रीजालकान्तस्थितिः प्राग्वृत्तिस्थितिरास रासरुचिरां गोष्ठीं स शृण्वन्नपि ॥ १७१ ॥
कृष्णाऽलं चलकर्मणा किमपरान्तर्वेश्मगस्तान्मुधा लोकांस्त्रासयसीह पश्य निभृतामात्मप्रतिष्ठामहो ।
एवं स्वप्नवचो निशम्य भगवन्मातुः सुधीरुद्धवो वेदान्तार्थकमाकलय्य मनसा तुष्टाव तां विस्मितः ॥ १७२ ॥

दृष्ट्वैवमादीति : १०.४७.५८.

प्रतिदिनमिति भूयो भिन्नभिन्नानि तेषां यदुपतिगुणगीतोल्लासिकृत्यानि वीक्ष्य ।
प्रतिपलमतुलं स प्राप सौख्यं विधेरप्यतिदुरधिगमं यद्यथाश्रुतं निर्जराद्यैः ॥ १७३ ॥

कृष्णप्रिया

राजन् परीक्षित ! परम भागवत हरिदास श्रीउद्धवजी, सरित् श्रीयमुनाजी, वन श्रीवृन्दावन, श्रीगोवर्धनगिरिवर, द्रोणी दोनो तरफ के पर्वतों के बीच की नौका के समान गर्त भूमि का, एवं बारह मास पुष्प देने वाले चम्पकादि कुसुम तरुवरों का दर्शन करते हुए एवं व्रजवासियों को प्यारे श्रीनन्दकुमार का स्मरण कराते हुए व्रज में सानन्द रहने लगे ॥ ५७ ॥ भगवान् श्रीकृष्ण के श्रीचरणों में सर्वथा अनुरक्त गोपीजनों के देह मन इन्द्रियों की तड़पन एवं बिह्वलता का दर्शन करके अत्यन्त प्रसन्न हो गए । व्रजवनिताओं के लिए आदर बढ़ा और नमस्कार करते हुए हृदगत भाव को व्यक्त करने लगे ॥ ५८ ॥

एताः परं तनुभृतो [1]भुवि गोपवध्वो गोविन्द एव[2] निखिलात्मनिरूढभावाः ।
वाञ्छन्ति यद् भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनन्तकथारसस्य[3] ॥ ५९ ॥

कर्दमक्षमा

अन्वयः—निखिलात्मनि, गोबिन्दे, एव, रूढभावाः, एताः, गोपवध्वः, भुवि, परम्, तनुभृतः, यत्, भवभियः, मुनयः, यत्, वाञ्छन्ति, च, वयम्, वाञ्छामः, अनन्तकथारसस्य, वाञ्छाऽस्ति, किन्तु, न प्राप्तः, तर्हि, ब्रह्मजन्मभिः ? ॥ ५९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च इश्वरप्रसादो महत्त्वे कारणं तस्य च न जातिराचारो ज्ञानं वा कारणं किं तु केवलं भजनमेवेत्याह ! क्वेमा इति । साक्षाद्भजतः पुंसः । ननु अहो उपयुक्तः सेवितः अगदराजोऽमृतं यथेति ॥ ५९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदाह—किञ्चेति । इमा गोप्यः । द्वौ क्वावन्वयानुपपत्तिं वक्तः । कथम्—तत्राह–वनचरीरिति । तदाप्तये वनगमनमप्युचितमेव तत्राह—व्यभिचारेति । अनियतभर्तृभिरप्यतृप्तास्तर्हि कृष्णोऽपि कश्चिद्दोषः स्यात्तत्राह–परमात्मनीति । रूढभावः परप्रेमा । अनुभजतः स्वयोग्यतानुरोधेन भक्तिं कुर्वतः । अविदुषः शास्त्रानभिज्ञस्य पुंसः । साक्षाच्छ्रेयः । तदीप्सितम् । नन्वित्यनेन "भक्त्या त्वनन्यया शक्यो ह्यहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन" इत्यैतिह्यं प्रमाणयति । "प्रश्नावधारणैतिह्यसमीहानुमते ननु" इति यादवः । तस्माज्जनानां महोत्कर्षे भक्तिरेव कारणं न तु तपोज्ञानादिकम् । या च भक्तिः स्वयं सर्वोत्कृष्टापि सर्वलोकप्रतिष्ठितत्वेन सर्वोत्कृष्टेऽपि स्थले न तिष्ठति; सर्वलोकविगतित्वेनातिनिकृष्टेऽपि स्थले तिष्ठति, स्थित्वा च तदेव स्वास्पदं सर्वोत्कृष्टं सर्वपूज्यं सर्वदुर्लभपदवकिं च करोतीति सविस्मयं सरोमाञ्चमाह—क्वेति द्वाभ्याम् । इमाः स्त्रिय इति स्त्रीत्वेन गोपसंततित्वेन च जात्या विगीताः । वनचरीर्वनचर्यं इति वनभ्रमणशीलत्वात् । स्वभावेनाऽपि व्यभिचारदुष्टा इत्याचरणेनापि विगीता इमाः क्व, कृष्णे परमात्मनि वैकुण्ठनाथादिभ्य आत्मभ्योपि परमे सर्वांशिनि पूर्णस्वरूपे रूढभावो भक्तेरपि परममहान् विलासो महाभावः क्वेत्यत्यंतासंभवे क्वद्वयप्रयोगः । अहो अत्याश्चर्यमिति विमृश्य क्षणं विभाव्य ज्ञाततत्त्वो नैतदिस्याश्चर्यमित्याह—ननु निश्चये । नु भो इति स्वमन एव सम्बोध्योक्तिः । ईश्वरो भगवान् भजतो जनस्य नापि भजनसिद्धस्याविदुषोपि त्वंतत्पदार्थज्ञानरहितस्यापि साक्षाच्छ्रेयः संसारमुक्तिपूर्वकस्वप्रेमरसास्वादरूपं मंगलं सर्वमुक्तैरपि दुर्लभं वस्तु तनोति, यथाऽगदराजोऽमृतमुपयुक्तः पीतः सन् तत्स्वरूपमजानतोऽपि जनस्य श्रेयः सर्वव्याधिप्रशमनपूर्वकमपूर्वास्वादविशेषं तनोति, किं पुनरासां भक्तिसिद्धनित्यसिद्धशिरोमणीनां तत्स्वरूपरूपगुणैश्वर्यमाधुर्यमहाविदुषीणां तत्परिचर्योपकरणीकृतस्वीयबुद्धीन्द्रियसर्वगात्र यौवनालंकारपरिच्छदानां नारदादिसर्वभक्तदुर्लभं रूढभावं न तनुयादिति भावः । रूढभावलक्षणमुज्ज्वलनीलमणौ द्रष्टव्यमिह विस्तरभिया नोक्तम् । व्यभिचारदुष्टा इति स्त्रीणां त्रैविध्याद्व्यभिचारस्त्रिविधः । पतिमुपपतिं च रमयंत्या एकः, स हि लोकशास्त्रयोविगीतः । पतिं त्यक्त्वोपपतिमेकमेव रमयंत्या अन्यः, स हि लोकशास्त्रविगीतत्वेऽप्येकपुरुषमात्रप्रीतिमत्त्वेन रसशास्त्रसंगीतः । स्वपतिं त्यक्त्वोपपतिबुद्ध्या भगवन्तमेव रमयंत्या अपरः, स ह्यनभिज्ञलोकविगीतत्वेऽप्यभिज्ञलोकसंगतित्वाल्लोकशास्त्रयोः परमार्हणीयत्वाच्च यद्यपि न व्यभिचारस्तदपि व्यभिचारसाधर्म्यादेव व्यभिचार उच्यते व्रजसुन्दरीणाम् । अहोऽत्र व्यभिचारेण दुष्टा इवेति व्याख्येयम् । मम तु व्यभिचारो दुष्टो द्वेषविषयो यासां ताः, साक्षात्परमपतिश्रीपरमेश्वररतत्वात्परमसाध्व्य इत्यर्थः शोभनः प्रतिभाति । प्रसंगसंगतिस्तु यथा कथंचिदुन्नेया ॥ ५९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं पूर्वपद्येन बहिर्मुखानां निगृह्य तदेवात्र क्वेमा इत्यादि पद्ये प्रथमचरणेन साभ्यसूयमनुयुज्यते । यत्र च "निगृह्यानुयोगे" इति वाक्यस्य टेः प्लुतो विभाषितोऽस्ति यथाह काशिकायां स्वमतात् प्रच्यावनं निग्रहः अनुयोगस्तस्य मतस्य

---

१. तां तनु–वीर ; तां–विज. । २. एवमखि–वीर. विज. । ३. कथा न यत्र–विज. ।

आविष्करणं तत्र निगृह्यानुयोगे यद्वाक्यं वर्त्तते तस्य टेः प्लुतो विभाषा । अनित्यः शब्द इति केनचित् प्रतिज्ञातं तदुपपत्तिभिर्निगृह्य साभ्यसूयमनुयुङ्क्ते । अनित्यः शब्द इत्यात्थ इत्यादि इह च तद्वदेव पराक्षेपानुयोगगर्हितं सिद्धान्तमाह । क्वेति । कृष्णे क्व चेत्याद्यर्थस्य सद्भावे सति क्वेमाः स्त्रिय इत्याद्यर्थस्य सम्भावना नैव घटते इत्यर्थः । अत्र च तदेव पूर्वपद्यवत् द्वितीयेन चरणेन दाढ्यार्थं स्वसिद्धान्तमनूद्य परार्द्धनाज्ञानेनाप्युपयुक्तस्यामृतादेर्दिव्यतनुताकारित्वमीश्वरशक्तेः । कैमुत्यातिशयं साधयतीति व्याख्येयं प्रथमचरेण स्थितस्य निकृष्टभूमिकया च कस्य क्वेत्यस्य प्रतियोगितया द्वितीयचरणे क्व चेति निर्दिष्ट यदि कृष्णविषयकरूढभावात्मिका परमोत्कृष्टभूमिका ताभिर्लब्धा तदा तासां निकृष्टभूमिका स्थितिः कुत्र स्थिता एताः परं तनुभृत इति तदीयतनुव्यवसायभावानां श्लाघितत्वात् । यन्नामधेयश्रवणानुकीर्त्तनादित्यादेः विप्राद् द्विषड्गुणयुतादित्यादेः । भक्तिः पुनाति मन्निष्ठा स्वपाकानपि सम्भवादित्यादेश्चात्र कैमुत्यलाभात् । ध्रुवस्यापि पार्थिवदेहस्य सद्यो हिरण्मयत्वश्रवणात् किञ्च स्वतन्त्रश्रीमदुद्धवेन तासु तादृशनिकृष्टवचनं न प्रमोक्तव्यम् । उपक्रमोपसंहाराद्यादिषु तस्य परमादरात् वस्तुतस्तु व्यभिचारस्तासां नास्त्येव गोपीनां तत्पतीनाञ्च इति श्रीशुकसिद्धान्तात् । अत्र च श्रीमदुद्धवेनैव पूर्वमखिलात्मनि तत्र च परमात्मनीति तस्य सूचनात् । न च तासां स्वाभाविकोऽनाचार आशङ्क्यः आर्यपथञ्च हित्वेति वक्ष्यमाणानुसारेण स्वतः सदाचारसम्प्राप्तेः ननु स्त्रीत्वं दूषणयं लक्ष्म्यादेरपि स्त्रीत्वात् । न चेमा इति निन्दावचनम् आसामहो इत्यादावासामित्यनेन इदन्तानिर्द्देशेन स्तुतेरेव व्यञ्जयिष्यमाणत्वात् । न च वनचरीत्वं निन्द्यम् । वनस्यास्य तद्भूरिभाग्यमित्यादिना ब्रह्मणापि प्रार्थ्यमानत्वात् । आसामहो इत्यादिना स्वयमपि । उत्तरार्द्धं तु अगदराजस्तावद्देहमेव दिव्यं करोतीत्येकेनैवांशेन दृष्टान्तः । तादृगगदराजादिस्वभावमूलकारणमीश्वरस्वभावस्तु सर्वमपि श्रेयः स्वमविदुषोऽपि जगतः कुर्यादेव तासां तदीयगुणग्रामविद्वद्वराणामिति तस्मात् परकीयाभ्यसूयाख्यसञ्चार्यनुवादस्य तदुत्तरस्थया कृष्णे क्व चेत्यादिवाक्यमय्या सञ्चारिलक्षणया मत्या आराध्यत्वेनोक्तत्वात् गुणत्वमेव यदुक्तं काव्यप्रकाशे । सञ्चार्यादेर्विरुद्धस्य वाक्यस्योक्तिगुणावहेति । अत्र च यथा तिष्ठेत् कोपवशात् प्रभावपिहिता दीर्घं न सा कुप्यतीत्यत्र पिहितेत्यनन्तरं नैव घटत इति निर्द्देशं विनाप्युत्तरा प्रतिपत्तिः पूर्वां वाधते इति न्यायेनान्वयो लभ्यते । तद्वदप्यत्र तं विनापीति न किञ्चिदप्यसमञ्जसम् । अथवा ननु भवतीप्रभृतयो यूयमप्युत्तरोत्तरं महान्त एव कथं तद्वाञ्छथ तत्राह । क्वेमा इति । स्त्रिय इति जात्यैव सुकोमलत्वं दर्शित तत्र चेद्या इति । सचमत्कारनिर्द्देशेन विशेषतः । अत्रेमाः स्त्रियः इति सर्वोत्तमत्वं दर्शितम् । तथा वनञ्च प्रस्तुतत्वात् श्रीवृन्दावनम् । तच्च श्रीकृष्णैकान्तविरहारास्पदं तच्चारिण्य इति सामान्यतस्तावन्महिमा सूचितः । ता इमाः कृष्णविषये क्व तमाश्रित्य कस्य मूर्द्धभूमिकायां वर्त्तन्ते । तथा ईदृशगाढतदासक्त्या भाव एव व्यभिचारः । अत्र परमविस्मितमानसो सरोमाञ्चं साभिनयं हेतुमाह । परमात्मनि सर्वेषामेव निरुपाधिपरमप्रेमयोग्येऽपि तादृशतयानुभवितुं परमदुर्ल्लभे तस्मिन एष ईदृशतया आसु दृश्यमानो रूढभावः परां कोटिमारूढो महाभावः नत्वस्मासु तल्लेशोऽपीत्यर्थः । न चासामेव तस्मिन्नेतादृशसौहृद्यं ननु तस्यासु इति वाच्यं तस्य परमेश्वरस्य परमसहृदयतया असाधारणेष्वपि दृश्यते किमुत तादृशीष्वित्याह । नन्वीश्वर इति । ननु निश्चये अनु सादृश्ये । भजनानुकरणमपि कुर्वतः अविदुषस्तन्माहात्म्यमजानतोऽपि दैन्यान्मादृशस्यापीत्यर्थः । साक्षादव्यवधानेन श्रेयः एतासां दर्शनादिप्रसादमयं परमहितं तनोति किमुतासां तन्माधुरीपरमोत्कर्षानुभवित्वेन तन्माहात्म्यपरमकाष्ठाभिनिविष्टानामिति भावः ॥ ५९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो ! ममायोग्यस्याप्याभिः संगः केवलं श्रीभगवत्कृपाविशेषेणैव संसिद्ध इत्याशयेनाह—क्वेति, इमाः प्रोक्तमाहात्म्याः क्व वनचरीर्वनचर्य्यः, यद्वा, अकार-प्रश्लेषेण—अस्य विष्णोर्वने वृन्दावने चरन्ति, सदा तत्प्रेम्णा परिभ्रमन्तीति तथाभूताः । अत्र यस्य (६१ तम-श्लो०) 'आसामहो चरणरेणुजुषामहं स्याम्' इत्यादि-प्रार्थना तस्योद्धवस्य 'व्यभिचारदुष्टाः' इत्यतीवानुचितो वाक्प्रयोगस्तासु परमाराध्यासु कदापि न सम्भवत्येवेति । ततश्चायमर्थः—क्व च मादृशा इत्यर्थात् कथम्भूता मादृशाः ? व्यभिचारदुष्टाः—व्यभिचारः सत्कर्म्मणान्यथात्वं पराङ्मुखतेति यावत्तेन दुष्टाः । यद्वा, पूर्व्वपद्यस्थस्य वयमित्यस्याकृष्ट्या व्यभिचारदुष्टा वयञ्च क्वेति बहुत्वं स्वसदृशानामन्येषां गृहणार्थम् । परमविस्मितः सन् सरोमाञ्चं साभिनयमाह—कृष्णे मादृशामीश्वरे परमेश्वरे वा, एष ईदृशो रूढभावो महाभावः परां कोटिमारूढभावविशेषः स्यात् सम्भवेत् । यद्वा, स्त्रियः स्त्रीत्वेन सलज्जत्वादन्यसमक्षमागन्तुमप्ययोग्या मादृशान्तु पुमांसस्तत्रापि वनचर्य्यः, मादृशास्तु पुरवासिनस्तत्रापीमा ईदृश्यः परमाश्चर्य्य महाभावविलक्षणशीलाः मादृशास्तु कृष्णे व्यभिचारदुष्टाः, व्यभिचारो महापराधस्तेन दुष्टा इति वैसादृश्येनासां संगस्य सर्वथातिदुर्लभतोक्ता । इमा इति सूचितं माहात्म्यभरमेव व्यञ्जयति । यः परमात्मनि रूढभावः परमाश्चासावात्मनि रूढभावश्चेत्येकं पदम् । आत्मनि चित्ते नितरां रूढो निरूढोऽतिप्रसिद्धो वा भावः, स एष एव । ननु विस्मये वितर्के निश्चये वा । अविदुषः—भक्तिमाहात्म्यादिकमजानतोऽप्यनुगतानुगतिकत्वेन, किंवा कस्यचिदनुगत्वेनानुकाररूपेण वा भजतोऽपि साक्षात्प्रत्यक्षमेवाव्यवधानेन श्रेयः परमहितं विस्तरेण करोति, यत ईश्वरः परमस्वतन्त्रः, किंवा मत्प्रभुः परमदयालुः श्रीकृष्णः । अज्ञाने सेवाभासेनापि श्रेयोविस्तारणे दृष्टान्तः—अगदेति । तत्र 'नु' इति लेख्ये 'ननु' इति लेखकभ्रमात्, तथा नन्विति च न व्याख्यातम्

स्पष्टार्थत्वात्। 'नु' इति तु 'अनुभजतः' इति निरासार्थमिति। उपयुक्तः-उप सामीप्येन आघ्राणमात्रेण स्पर्शमात्रेण वा अज्ञानेनापि गृहीतः, श्रीकृष्णस्य तथासाञ्च माहात्म्यादिकमजानतोऽपि ममाभिः संगतिः केवलं यथाकथञ्चित्तस्य सम्बन्धप्रभावादेवेत्यर्थः॥ ५९॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु वर्णाश्रमधर्मानुग्राह्यो निरूढभावस्तदभावेऽपि कथमाभिर्लब्ध इत्यघटितघटनदर्शनेनेश्वरः स्वयमेव स्वप्राप्तौ केनापि व्याजेन हेतुरिति सम्भावयन्नाह। क्वेमा इति। इमाः स्त्रियः जात्यापि हीना इति भावः। वनचरीरित्यनेन सत्सङ्गादिसाधनाद्यभावोऽभिप्रेतः व्यभिचारशीला इत्यनेन बाधकसद्भावः एवं विधानां सर्वथाधिकाररहितानां परमात्मनि परमात्मनि श्रीकृष्णे रूढभावः क दुर्घटमेतदिति भावः। यद्यप्येवं तथापीश्वरः स्वात्मयाथात्म्यमजानतोप्यनुभजतः केनापि भावेनानुवर्त्तमानस्य साचात्स्वयमेव श्रेयस्तनोति ननु खल्वविदुषामपि श्रेयःकार्यकर्तृत्वे दृष्टान्तमाह। अगदेति। यथाऽगदराजऔषधश्रेष्ठः उपयुक्तः भुक्तः आरोग्यमेव तनोति तद्वत्॥ ५९॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

इमाः स्त्रियः क कृष्णे एष रूढभावः क अन्वयानुपपत्तेः कथमिति तत्राह। वनचरा इति। तपोऽर्थं वनचरत्वं किं न स्यादित्यत उक्तं व्यभिचारशीलाः अनैकान्तिकस्वभावाः अनियतभर्तृभिः रतितृप्ता इत्यर्थः "शीलं वृत्तस्वभावयो"रिति कृष्णोऽपि कश्चिद्दोषः किं न स्यादित्यत उक्तं परमात्मनीति अनन्वये किमर्थं श्रेयः प्रयच्छतीत्यतो भक्तिरेव प्रयोजिकेत्याशयेनाह। नन्विति। अविदुषोऽपि शास्त्रोक्तिमजानतोऽपि अनुभजतः स्वयोग्यतानुरोधेन भक्तिं कुर्वतः पुंसः ईश्वरः साक्षाच्छ्रेयस्तनोति नन्वित्यनेन भक्त्यात्वनन्यया शक्य अहमेवंविधोऽर्जुनेत्यैतिह्यं दर्शयति प्रश्नावधारणैतिह्यसमीहानुमते नन्विति उपयुक्तः सेवितो ऽगदराजः औषधश्रेष्ठो ऐगिकर्मानुकूलं फलं ददाति यथा तथात्रापीति॥ ७॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

अन्वयेनोक्त्वा व्यतिरेकेणाह—क्वेमा इत्यादि। एताश्चेत्तनुभृत्परा न स्युस्तदासां गोविन्दे कथमेवं भावः, इति व्यतिरेकः। तथाहि—इमा अवनचरीः, अवनचर्यः, श्रीबृन्दावनचरीभिन्नाः स्त्रियः, क गोविन्दे एवं रूढभावः क? अत्यन्तासम्भावनायां क-द्वयम्। अवनचर्यः कीदृश्यः? व्यभिचारदुष्टाः। श्रीकृष्णादन्यत्र रतिमत्त्वं हि व्यभिचारः, तेन दुष्टाः। तथा चोक्तं लक्ष्म्या—(भा० ५।१८।२०) "स वै पतिः स्यादकुतोभयः स्वयम्" इत्यादि। अथवा, इमा वनचरीर्वनचर्यो गोप्यः क व्यभिचारदुष्टाः स्त्रियो वा क च-कारादुगोविन्दे परमात्मनि एष भावः क्वेति कानुवृत्तिः। गोविन्दाधिकरणक एव भावः किं गोपीर्विना सामान्यस्त्रीणां भवति? नैवेत्यर्थः। अथवा, वनचरीर्वनचर्यो गोप्यः क? न कापि अत्रैवेत्यर्थः। कृष्णे च रूढभावः क? न कापि अस्त्येव। कीदृश्यः? अदुष्टाः— अप्राकृतत्वात्। भावः कीदृशः? व्यभिचारः विशेषेणाभिमुख्येन चारयति गमयति कृष्णमित्यर्थात् व्यभिपूर्वात् णिजन्तस्य चरतेः क्विपि रूपम्। अन्यथा ता नमस्यन् (५८ श० श्लो०) "नायं श्रियोऽङ्ग" इत्यादि पौर्वापर्यं विरोधः। अन्यच्च इमाः क, गोविन्दे भावः क्व? इत्यासां गोविन्दे भावस्य सम्भावनैव प्रसज्जेत्, तदा प्रकरण विरोधः, (५८ श० श्लो०) "गोविन्द एवमखिलात्मनि रूढभावाः" इति पूर्वोक्तेः। अतो गोपीनां भजनमेव भजनम्—नन्वीश्वरोऽन्वित्यादि। अविदुषोऽपि अनुभजतो यस्यैतदुगोपीभजनरहस्यमविज्ञानतोऽनुक्षणं भजतो जनस्येश्वरः श्रीकृष्णः, नु वितर्के, न श्रेयस्तनोति, अपि तु श्रेयस्तनोत्येव। तत्र दृष्टान्तः—उपयुक्तः सेवितोऽगदराजो रसायनविशेषोऽमृतं वा यथा विशेषज्ञानाभावेनापि सेवित एव रोगोपशमाय भवति, तथा भजनमात्रमेव भव-रोगापहम्, ईदृग् भजनन्तु परमानन्दप्रदमिति वाक्यार्थः॥ ५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

व्यतिरेकेण तनुभृत्परत्वमाह—क्वेमा इत्यादि। यद्येतास्तनुभृतोऽपरा न स्युः तदा इमा एतद्भिन्नाः, एताः सामान्याः स्त्रियः क्व कृष्णे च एषोऽनिर्वाच्या रूढश्चासौ भावश्चेति तथा स क्व 'अत्यन्तासम्भावनायां क्व द्वयम्', एवम्विधोभावः किं सामान्यस्त्रीणां भवति, नैवेत्यर्थः। चेद् व्यभिचारेण दुष्टाः श्रीकृष्णे तस्मिन् इह पतिभाव एव व्यभिचारः। अथवा, इमा वनचरीर्वृन्दावनचर्यो गोप्यः क्व, व्यभिचारदुष्टाः स्त्रियो वा क्व, कृष्णे रूढभावश्च क्वेति चकारेण पुनः क्व शब्द आकृष्यते, तर्हि एवम्विधयैव रत्या भजनमेव भजनम्, एतदेव कर्तव्यमित्यायातम्। एतद्विदुषो भजत एतदविज्ञाय प्रकारान्तरेण भजतः किं श्रेयो न भवतीत्याशङ्क्याह—नन्वीश्वर इत्यादि। अविदुष एतदुगोपीभजनरहस्यमविदुषोऽपि भजतो जनस्य श्रेयस्तनोति; क इव? अगदराज इव, अगदराजो रसायन विशेषः, अमृतरसो वा, सेवित एव विशेषज्ञानाभावेनापि सेवित एवोपकरोति। एतद्भावः विनापि भजनान्तरेणापि श्रेयो भवति, न तत्र सन्देहः, किन्त्वेतादृशं न परमोत्कृष्टमिति भावः॥ ५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्माज्जनानां महोत्कर्षे भक्तिरेव कारणं न तु तपोज्ञानादिकं सा च भक्तिः स्वयं सर्वोत्कृष्टापि सर्वलोकप्रतिष्ठितत्वेन सर्वोत्कृष्टेऽपि स्थले न तिष्ठति सर्वलोकविगीतत्वेनातिनिकृष्टेऽपि स्थले तिष्ठति स्थित्वा च तदेव स्वास्पदं सर्वोत्कृष्टं सर्वपूज्यं सर्वदुर्लभपदवीकञ्च करोतीति सविस्मयं सरोमाञ्चमाह । क्वेति द्वाभ्याम् । इमाः स्त्रियः इति स्त्रीत्वेन गोपसन्ततित्वेन च जात्या विगीताः । वनचरीर्वनचर्य इति वनभ्रमणशीलत्वात् स्वभावेनापि व्यभिचारदुष्टा इत्याचारेणापि विगीता इमाः क कृष्णे परमात्मनि वैकुण्ठनाथादिभ्य आत्मभ्योऽपि परमे सर्वांशिनि पूर्णस्वरूपे रूढभावः भक्तेरपि परममहान् विलासो महाभावः क्वेत्यन्तासम्भवे कद्वयप्रयोगः । अहो अत्याश्चर्यमिति विमृश्य क्षण विभाव्य ज्ञाततत्त्वो नैतदत्याश्चर्यमित्याह । नन्विति । निश्चये तु भो इति स्वमन एव सम्बोध्योक्तिः । ईश्वरो भगवान् भजतो जनस्य नापि भजनसिद्धस्य अविदुषोऽपि तत्पदार्थत्वम्पदार्थज्ञानरहितस्यापि साक्षाच्छ्रेयः संसारमुक्तिपूर्वकस्वप्रेमरसास्वादरूपं मङ्गलं सर्वमुक्तेरपि दुर्लभं वस्तु तनोति यथा अगदराजोऽमृतम् उपयुक्तः पीतः सन् तत्स्वरूपमजानतोऽपि जनस्य श्रेयः सर्वव्याधिप्रशमनपूर्वकमपूर्वास्वादविशेषं तनोति किं पुनरासां भक्तिसिद्धानित्यसिद्धशिरोमणीनां तत्स्वरूपरूपगुणैश्वर्यमाधुर्यमहाविदुषीणां तत्परिचर्योपकरणीकृतस्वीयबुद्धीन्द्रियसर्वगात्रयौवनालङ्कारपरिच्छदानां नारदादिसर्वभक्तदुर्लभं रूढभावं न तनुयादिति भावः । रूढभावस्य लक्षणमुज्ज्वलनीलमणौ दृश्यम् । व्यभिचारदुष्टा इति स्त्रीणां त्रैविध्यात् । व्यभिचारस्त्रिविधः पतिमुपपतिञ्च रमयन्त्या एकः स हि लोकशास्त्रयोर्विगीतः । पतिं त्यक्त्वा उपपतिमेकमेव रमयन्त्याः अन्यः स हि लोकशास्त्रविगीतत्वेऽपि एकपुरुषमात्रप्रीतिमत्त्वेन रसशास्त्रसङ्गीतः । स्वपतिं त्यक्त्वा उपपतिबुद्ध्या भगवन्तमेव रमयन्त्या अपरः स ह्यनभिज्ञलोकविगीतत्वेऽप्यभिज्ञलोकसङ्गीतत्वाल्लोकशास्त्रयोः परमार्हणीयत्वाच्च यद्यपि न व्यभिचारस्तथापि व्यभिचार साधर्म्यादेव व्यभिचार उच्यते व्रजसुन्दरीणाम् अतोऽत्र व्यभिचारेण दुष्टा इवेति व्याख्येयम् ॥ ५९ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

अथात्यन्तायोग्यत्वात्कथमेवं विधं ब्रह्मादिभिरपि प्रार्थनीयं भावं प्राप्ता इत्यालोच्य विस्मितचित्त आह । क्वेति । द्वौ क शब्दौ महदन्तरं बोधयतः तदुपपादकानि विशेषणानि इमा इत्यादीनि तत्रेमा गोप्यो हीनजात्युत्पन्नास्तत्रापि स्त्रियो योनितो निकृष्टतापादकवनवासवत्यः ननु वने तु सात्त्विको वास इत्युक्तत्वात्कथं वनवासस्य निकृष्टतापादकत्वमुक्तमिति शङ्कानिरासाय वनचरीरित्युक्तं तथा चोत्कृष्टजात्युत्पन्नानां शास्त्रोक्ततप आद्यनुष्ठानपराणां वनवासः सात्त्विकः नतु यथोक्तानां स्वच्छन्दचरीणां वानरादिसमानाम् अनेन लौकिकचातुर्यशास्त्रीयानुष्ठानतदाराधनोपकरणाद्यभावः सूचितः अन्तःकरणतोऽपि हीना इत्याह । व्यभिचारबुद्ध्या दुष्टाः लोके व्यभिचारेण दुष्टत्वेन प्रसिद्धा इति वा कृष्णे सदानन्दरूपे परमात्मनि रूढभावः क्वेति महदाश्चर्यं तथा च जात्याचारज्ञानादिहीनानां सर्वोत्कृष्टपदप्राप्तिदर्शनात् भगवद्भजनलब्धतत्प्रसाद एव परममहत्त्वे हेतुर्न तु जात्यादिकमिति निश्चीयत इत्याशयेनाह । नन्वीश्वर इति । भजनाधारवतोऽविदुषोऽपि भगवत्स्वरूपानभिज्ञस्यापि साक्षाच्छ्रेयस्तनोति न तु परम्परया तत्रानुरूपं दृष्टान्तमाहागदराजः अमृतम् उपयुक्तः स्वरूपेणाज्ञातोऽपि यथा तद्वत् यद्वा ननु जारबुद्ध्या भगवति भक्तानां स्त्रीणामासां कुतस्त्यमेवम्विधं माहात्म्यमित्याशङ्क्याह । क्वेति । इमा भगवत्प्रियाः क अन्या लौकिकस्त्रियश्च क अतस्तत्साजात्यमात्रेण नैतास्वपकृष्टताबुद्धिर्विधेयेति भावः । यतः सामान्यस्त्रियः प्रायेण व्यभिचारदुष्टा भवन्ति एतास्तु अवनचरीः अवने भगवता क्रियमाणे सर्वतो रक्षणे चरन्तीति तथा एवं यासां भगवत्सम्बन्ध एव नतु गोपसम्बन्धः मन्यमानाः स्वपार्श्वस्थानित्युक्तत्वाद्गोपानां तत्सम्बन्धस्य प्रातीतिकत्वात् तथा पुत्रादिसम्बन्धोऽपि तासां लोकप्रतीत्येति भावः । एवं लौकिकस्त्रीभ्यो वैलक्षण्यमुक्त्वा ब्रह्मादिभ्य उत्कृष्टत्वमुक्तमुपपादयति । कृष्ण इति । एष लोकवेदाप्रसिद्धः गोपाङ्गनाभिस्त्वनुभूयमानः क ब्रह्मादौ लक्ष्म्यादौ च दुर्लभस्तत्रापि कृष्णे तदर्थमेव प्रकटीकृतकोटिकन्दर्पाधिकलावण्यादिगुणवत्कृष्णविग्रहे तत्रापि परमात्मनि सर्वस्यात्मार्थं सर्वं प्रियं भवति एतासां तु तदर्थमेव आत्माप्रिय इति विशेषः यद्वा बहिर्मुखतादशायां यथोक्तस्वरूपे कृष्णे अन्तर्मुखतादशायां परमात्मनि तत्रापि रूढः परां काष्ठां प्राप्तस्तथा चैवम्विधे विषय एवं विधस्य भावस्य कुत्राप्यसम्भवात्सिद्धं सर्वोत्तमत्वमासामिति भावः । ननु स्वरूपमविज्ञायानुरक्तानामासां स्वस्मिन्नेवम्विधो भावः किमिति भगवता ताभ्योदत्त इत्याशङ्क्याह । नन्विति । ननु निश्चयेन यतोऽसावीश्वरः कर्तुमकर्तुमन्यथाकर्तुं वा समर्थोऽतो नु भजतोऽविदुषोऽपि साक्षाच्छ्रेयस्तनोतीत्यर्थः । यद्वा स्त्रियस्तत्रापि निकृष्टजात्युत्पन्नास्तत्रापि वनचर्यः प्रायेण व्यभिचारदुष्टा दृष्टाः इमा अपि तद्धर्मवत्त्वात्तथात्वयोग्या अपि क क चैव परमात्मनि कृष्णे रूढभाव इत्यहो परमाश्चर्यमित्यादि पूर्ववत् केचित्तु भगवता स्वार्थमुत्पादिताः मध्ये कालविलम्बे अन्यान् गोपालान् भ्रमात्पतिबुद्ध्या गृहीत्वा व्यभिचारं कृतवत्यस्तेन दुष्टा इत्याहुः । अन्ये तु भगवत्सम्बन्धानन्तरं पुनर्गोपसम्बन्धरूपेण व्यभिचारेण दुष्टा इति वदन्ति ॥५९॥

गूढार्थदीपिनी

एता गोप्यः परं केवलं तनुभृतः सफलजन्मानः । रूढभावः दृढभावः । यत् यं भावम् । अनन्तस्य कथासु रसो रागो यस्य तस्य पुंस इति शेषः ब्रह्मजन्मभिः किं प्रयोजनं न किमपीत्यर्थः ॥ ५९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवद्भजनपरो जनः सर्वोत्तम इत्युक्तमत एव भगवानप्युपनयनगुरुकुलवासयथार्थज्ञानादिविहीनस्यापि कथंचिद्भजतः श्रेयस्तनोतीत्याह । क्वेमा इति । एषः शास्त्रप्रसिद्धः विधिप्राप्तोपनयनेन लब्धगुरुकुलवासेन स्वोचितकर्मभिः प्रक्षालितान्तःकरणमलेन सुज्ञातपरमात्मस्वरूपगुणादियाथात्म्येन लभ्यो रूढभावः मुक्तिहेतुः क्व इमाः स्त्रियः द्विजातिसंस्कारवर्जिताः क्व तथापि आसां जात एवेत्यर्थः । अत इमाः वनचरीः वनचारिण्यः व्यभिचारदुष्टाश्च न किन्तु भगवत्प्रियाः भगवत्प्रियेषु जनेषु कस्याञ्चिदपि जातौ स्थितेषु केनापि भावेन भजत्सु पूज्यत्वबुद्धिर्युक्तेति भावः । ईश्वरोऽपि नु अहो अविदुषोऽपि क्रमप्राप्तस्वात्मयाथात्म्यज्ञानरहितस्यापि साक्षाद्भजतः केनाऽपि भावेन साक्षात्स्वरूपमनुवर्तमानस्य श्रेयस्तनोति मुक्तिं ददाति उपयुक्तः साक्षात्सेवितः अगदराजः अमृतं श्रेय आरोग्यं तनोति यथेति ॥ ५९ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तर्ह्येवमवस्थाप्रापकाणि ब्रह्मजन्मानि भविष्यन्तीत्याशङ्क्य व्यभिचारात्परम्परयाप्युपभोगाभावमाह । क्वेमा स्त्रिय इति । इमा इति गोप्यः जातिहीनाः तत्रापि स्त्रियो योनितो निकृष्टाः स्थानतोऽपि निकृष्टत्वमाह । वनचरीरिति । ग्रामोत्पन्ना एव वनचरणादिना उत्कृष्टा भवन्ति तदर्थमेवोच्यते वने तु सात्त्विको वास इति अन्यथा वानराणामप्युत्कर्षः स्यात् वनचरीरित्यनेन स्वच्छन्दचारित्वमपि सूचितम् अनेन द्रव्यादिसर्वापकर्षः सूचितः अन्तःकरणापचारमाह । व्यभिचारदुष्टा इति । व्यभिचारबुध्या दुष्टा इति केचित् ननु धर्मशास्त्र एतत्प्रायश्चित्तोक्त्यभावादविवाहितपुरुषभजनं न व्यभिचारः स्त्रीमात्रस्यैतद्दोषत्वेन तत्प्रसूतानामधर्मजातत्वेनाग्निहोत्रादिधर्मानधिकाराच्च चतुर्वर्गोच्छेदप्रसङ्गश्च तद्बोधकमानवैयर्थ्यं च स्यात् भगवत्पुत्रानुद्दिश्याकथनात् भगवत्पत्न्यतिरिक्तासु सतीपदप्रयोगश्च भागवतादावनुपपन्नः स्यात् इति चेत् अत्रायमाशयः वर्णाश्रमाणां देहनिष्ठत्वेन तानधिकृत्य च धर्मशास्त्रस्य प्रवृत्तत्वेन दैहिकधर्मनिरूपकं तत्र तु भगवद्धर्मनिरूपकं भिन्नाधिकारात् अध्यासेनात्मसात्कृतत्वाद्देहस्य तद्धर्मेषु स्वधर्मप्रयोगः वस्तुतस्त्वात्मधर्माः एव स्वधर्मा स्वशब्दस्य तत्रैव शक्तेः अत एवाविद्वदधिकारित्वं तेषु उच्यते ब्रह्मविदां तत्रानधिकारो भक्तौ मुख्योऽधिकारश्च तदुक्तमवतारहेतुनिर्णयप्रस्तावे तथा परमहंसानां मुनीनाममलात्मनां भक्तियोगवितानार्थमिति । मुक्तोपसृप्यव्यपदेशात् इति तत्त्वसूत्रं च प्रकृते च भक्तिमार्गमधिकृत्य सर्वोऽर्थो निर्णीयते तत्र च भगवदतिरिक्तभजनस्य दोषहेतुत्वमेवेति सिद्धान्तः अत एव आज्ञायैवं गुणान् दोषान्मयादिष्टानपि स्वकान् । धर्मान् संत्यज्य यः सर्वान् मां भजेत्स च सत्तम'' इत्यादिवाक्यैस्तत्त्यागपूर्वकं भजनमत्रोच्यते अन्यत्रोक्तन्यायेनास्वधर्मस्यापि स्वधर्मत्वेनोक्त्या कापट्यं मन्वानो व्यासो भक्तिशास्त्रं निरूपयन् धर्मः प्रोज्झितकैतवोऽत्रेति प्रतिज्ञातवान् एवं सति भक्तिमार्गीय विहिता निषिद्धाकथनं धर्मशास्त्रे युक्तमेव भिन्नविषयत्वात् वात्स्यायनीय इव धर्मशास्त्रीये तदकथनं न हि तद्दोषमिति धर्मशास्त्रे न तद्बाधकं न वा धर्मशास्त्रं बाधकमिति तद्विरुद्धोपदेशो वात्स्यायनीये कामरसनिरूपणे हि तत्प्रवृत्तं स च यादृशं न्यरूपयदिति न काप्यनुपपत्तिः प्रकृतेऽपि भगवतोऽतिदुरापत्वे यत्स्वातन्त्र्येण स्थितौ स्त्रीणामुत्कटभोगेन यथेच्छाचारान्नाशो भविष्यतीति भगवान् धर्ममार्गीयास्ताः कृत्वा विषयरागःपूर्तिपूर्वकं तदुक्तनियमस्थाः कृतवान्न ह्येतावता नायं व्यभिचारः सहजभर्त्रतिरिक्तभजनात् अत एवाद्य श्रीमहिष्या गीतं ''त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट्कफपित्तवातम् । जीवच्छवं भजति कान्तमतिर्विमूढा या ते पदाब्जमकरन्दमजिघ्रति स्त्री''इति अतस्तद्दुरापादयोऽपि तदाशया तद्भजनमन्यभजनरहितं कुर्वद्भिरेव सर्वैः स्थैर्यमिति भक्तिमार्गनिष्कर्षः एतास्तु भगवदर्थमेव प्रकटिताः गतः सुष्ठूक्तं वस्तुतस्त्वित्यादि यद्वा धर्मो द्विविधोऽन्तरङ्गो बहिरङ्गश्च सोऽपि प्रत्येकं त्रिविधः तथा हि विहितत्वेन क्रियमाणो भगवद्विषयकः श्रवणादिरन्तरङ्गतमो धर्मः योगादिसाधनैरात्मचिन्तनं तादृक्तरः ''अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्''इति स्मृतेः फलानुद्देशेनेश्वरार्पणधिया क्रियमाणो यागादिरन्तरङ्गः वर्णाश्रमधर्मत्वेन स्वर्गादिफलोद्देशेन क्रियमाणो वैदिको धर्मो बहिरंग ततस्तुच्छस्वर्गादिफलको विविधस्त्रीपुरुषाधिकारिकपातिव्रत्यापि विविधदेवताव्रतादिः स्मार्त्तो बहिरन्तरः ऐश्वर्यारोग्यादिफलकविविधदेवताग्रहादिभजनरूपः स्मार्त्तो बहिरङ्गतमः अत्र पूर्वपूर्वप्राबल्यं ज्ञेयं पूर्वपूर्वासम्भव उत्तरोत्तरकर्त्तव्यता च प्रेमानन्तरं स्वस्य सम्मतः क्रियमाणः श्रवणादिर्न धर्मस्तल्लक्षणाभावात् पूर्वोक्ते सर्वत्र प्रवृत्तिनिवृत्त्योस्तदधिकार एव प्रयोजकः भगवान्मर्यादापुष्ट्योर्मध्ये यं जीवं यस्मिन्मार्गे मनुते तस्मिंस्तस्य तदेवाधिकाररूपं तत्तच्छास्त्रं च तत्तन्मार्गीय धर्मनिरूपकं पूर्वोक्ताधिकारवता स्वस्वाधिकारवता स्वस्वाधिकारिकधर्माकरणे च दोषः अत एव पार्थस्य पुष्टावङ्गीकारान्मर्यादामार्गे निषिद्धस्यापि गुर्वादिहननस्याकरणे भगवाननिष्टं फलमाह । अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसीति प्रकृतेऽपि स्त्रीरत्नानामासां पुष्टिपुष्ट्यामङ्गीकार इति न मर्यादामार्गीयधर्मेऽधिकारः किं त्वविवाहेऽपि भगवत एव भजने अत एव मर्यादाधर्मो भगवतोक्तोऽपि नैताभिरङ्गीकृतः अङ्गीकारे तत्राधिकारस्य हेतुत्वात् न ह्यनधिकारिहृदि धर्मः स्फुरति एतज्ज्ञापनायैव हि भगवताप्युक्तम् एतेन मर्यादामार्गस्य पुष्टिमार्गीयधर्मानङ्गीकार इत्यपि ज्ञेयम् एवं च सति मर्यादामार्गीयो धर्म एतासां परधर्म इति विवाहितपुरुषभजनमपि व्यभिचार एवेत्यभिप्रेत्य तथोक्तं सहजभर्तृत्वेऽपि भगवतो विवाहकरणं तु तादृशभक्तनिरोधार्थं तत्तद्रसानुभवार्थं मर्यादा स्थापनेन लोकशिक्षार्थं च अदित्यादीनां लीलार्थं मातृत्वेनाङ्गीकारात्पुत्रभावेनैव भजनं

भगवत्प्रापकं कश्यपादिषु च पितृत्वेनाङ्गीकारात्तासां तासां तत्तत्पतिभजनमेव स्वधर्मः भगवता तथैवाङ्गीकृतत्वात् न तु तत्र विवाहप्रयोजकः तद्विवाहस्य भगवल्लीलोपयोगित्वेन भगवद्विवाहतुल्यत्वादित्यलमधिकोक्त्या वस्तुतस्तु भगवता स्वार्थमुत्पादिता मध्ये कालविलम्बे अन्यान् गोपालान् भ्रमात्पतिबुद्ध्या गृहीत्वा व्यभिचारं कृतवत्यः तेन पुष्टा अपि जाता पुत्राद्युत्पत्त्या यथा अहल्याभ्रमात् प्रवृत्ता दुष्यति अतो जाते दोषे अयं भावो निवर्त्तितुं योग्यः यथा भर्त्रा व्यभिचरिणी त्यज्यत इति तथापि भगवद्भाव उत्पन्न एवेत्याश्चर्यमित्याह । कृष्णे क्व चैष इति । केचित्तु निवेदनानन्तरं पुनर्गोपसम्बन्धाद्व्यभिचारमाहुः बलादपि नाशिता नाशितैवेति तत् मन्यमानाः स्वपार्श्वस्थानिति भावेनैव तत्पतीनां रमणं न तु ताभिः सह यथा नाशशङ्का स्यात् तां रीतिं न हि ते तासु कर्तुं शक्ताः तासामेवानुभावेन भगवता वा भस्मसाद्भवेयुः किं च यदि क्रमानन्तरं दोषः स्यात् भावश्च न भवेत् तदाह । कृष्ण इति । न हि सदानन्दे फलरूपे भावो दोषाय तथा सति फलार्थं कोऽपि न कुर्यात उद्धारार्थं वा परमानन्दः प्रकट इति तत्र य एतादृशो भावः सोऽवश्यं सर्वपुरुषार्थसाधक इति ब्रह्मण्यादिरहितानां सर्वपुरुषार्थसाधको भावो जातः । ननु कथमेवमकारणककार्योत्पत्तिः विरुद्धस्य वा कारणतेति चेत्तत्राह । नन्विति । सत्यमेवैतत् विरुद्धमेतदुभयमिति तथाप्येवं वितर्के ईश्वरः अविदुषोऽपि अनुभजतः स्वानुरूपमेव श्रेयः करोति नतु सेवकानुरूपं यद्यप्ययमर्थः लोके वेदे प्रसिद्धः तथापि गोपिकासु दृष्टत्वादेव वितर्कः उपपत्तिरीश्वरत्वादेव ईश्वरो हि कश्चित्सेवां न मन्यते विपरीतमपि फलं प्रयच्छति प्रमादादप्यपराधे प्राणानेव वियोजयतीति क्वचिदधिकमेव फलं तत्रादृष्टं नियामकमिति चेत् न ईश्वरत्वभङ्गप्रसङ्गात् लोके परमेश्वरत्वाभावात्तथा कल्पनायां प्रमाद एव लोकेन्यार्थेनाप्येकदेशेन दृष्टान्तमाह । अगदराज इवेति । अमृतं हि प्रमादादप्युपभुक्तं प्रसादं सम्पादयत्येव भ्रमादग्निस्पर्शोऽपि दाहहेतुर्भवति न गदो यस्मादिति गदनिवर्त्तकं वा अगदमौषधं सर्वेषां शक्तिरेकत्र प्रतिष्ठिता राजत्वमापादयतीत्यगदराजोऽमृतं भगवतः स्वानुरूपमेतदेव प्रमाणानां तु बलमेकमेव तदपि न परमकाष्ठामापद्यते अन्यथा केषाञ्चिदेवं स्यादतः प्रमेयबलादेवैवं भाव इति लक्ष्यते अनुभजत इति भगवदिच्छया भजनमभिप्रेतं "यदेव विद्यया करोति" इति श्रुत्या ज्ञानाभावे भजनं न फलसाधकमिति शङ्कापरिहारार्थमपिशब्दः साक्षाद्भजत इति विशेषः अनेन मन्त्रादिद्वारा भजनं तु भजनानुरूपमेव फलतीति सूचितम् उपयुङ्क्त इति । समीपे निःसंदिग्धः सर्वलोके नत्वन्यत्र मिश्रितः अथवा नन्तकथारसस्य कि ब्रह्मजन्मभिरित्युक्ते प्राप्ताशङ्कायामाह । क्वेमा इति । आशङ्का तु न तु स्त्रियः पुरुषमात्रे कामुक्यः स्वभावत एव भवन्ति भगवांश्च पुरुषोत्तमः तथा च कामभावेन भगवति भक्तानामेतासां कथं ब्रह्मजन्मादिवद्भ्योऽप्युत्कर्षो युज्यत इति तन्निरासायात्र सर्वाभ्यः स्त्रीभ्यः सर्वेभ्यः पुरुषेभ्याधाधिक्यमुपपाद्यते । तत्रापि स्त्रीभावेन भक्तानां कथमुत्कर्ष इति शङ्कानिरासाय प्रथमं स्त्रीभ्यो वैलक्षण्यमुच्यते इमाः क्व साधारण्यः स्त्रियश्च क्व अल्पसाधर्म्यं एवमन्योऽन्यं नास्तीत्यसम्भावनापूर्वकं कथनम् । अन्यासु स्त्रीशब्दप्रयोगादेतासु स्त्रीत्वमपि न निरूपयितुं शक्यमिति ज्ञायते । स्त्रीणां कामद्वारैव पुंसि स्नेहस्य नियतत्वात् । एतासामतथात्वात् यद्यपि कामलीलाप्येतासु विनिरूप्यते तथापि न तदुपाधिकः स्नेहोऽत्र किं तु निरुपधिरेव भगवान् स्वयं तादृग्रसदानार्थं तं भावं संपाद्य तं रसं ददातीत्यवोचाम वैलक्षण्यमेवाह । अवनचरीरिति । एतास्तु भगवता कालकर्मादिसन्बन्धेभ्योऽपि सर्वदा रक्ष्यते किं पुनः पुरुषान्तरसम्बन्धादित्यवने रक्षण एव चरन्तीति तथा । पुत्रोत्पत्त्यादिकं तु सर्वभवनसमर्थादलौकिकप्रकाराद्भगवत एव गोपानां तु मन्यमानाः स्वपार्श्वस्थानिति न्यायेनाभिमानमात्रमेव सर्वत्र व्यवहारमात्ररक्षयैतद्वार्ता गोपनेनैतद्रसपोषायैव भगवता क्रियते । अतः केवलभगवदीयत्वं नान्यासु तदेवाह । व्यभिचारदुष्टा इति । स्त्रीणां विशेषणं जीवमात्रस्यैव भगवानेव भर्त्ता तत्रापि स्त्रीणां तथा चान्येष्वेव सदा तासां सम्बन्धात्ताः सर्वा व्यभिचारदुष्टा एव अतो बह्वर्थं व वैलक्षण्यमिति भावः । अतः परं पुरुषेभ्योऽप्युत्कर्षमाह । कृष्ण इति । सन्ति नारदब्रह्माद्यो भगवति भाववन्तस्तथाप्येष भावः क्व तेषु वर्त्तत इति चकाराद्व्यभिचारादिदोषरहितायां लक्ष्म्यामपि नायं भावः । एष इति स्वानुभय उक्तः तेनान्यत्रैतत्सजातीयभावश्रवणस्याप्यभावात्कथमन्यत्रैषोऽस्तीति मन्तव्यमिति भावः । अथवा बर्हापीडेति श्लोके गोपिकानामेव भावरूपस्तदर्थमेव कोटिकन्दर्पलावण्यं प्रकटीकृत्य तद्भोग्यत्वेन प्रकटः कृष्णशब्दार्थ इति विवृतं तथा च ब्रह्मादीनां भावो यद्यप्यस्ति तथापि कृष्णे पूर्वोक्तलक्षणे क्व भाव इत्यर्थः । न हि कदाचिद्भगवांस्तद्भोग्यत्वेन तदर्थं प्रकट इति भावः । विषयतो वैलक्षण्यमुक्त्वा स्वरूपतो वैलक्षण्यमाह । एष भावः क्वेति । अनुभवैकवेद्यो लोकवेदाप्रसिद्ध इत्यर्थः । प्रकारतोऽपि वैलक्षण्यमाह । परमात्मनि क्वेति । आत्मा हि प्रियः सर्वत्र प्रियत्वस्य तदुपाधिकत्वात् । एतासां तु आत्मनः सकाशात्परमोऽधिकः प्रियो यस्तस्मिन् भावः तेन नात्मार्थं भगवान् प्रियः कि तु भगवदर्थं स्वात्मेत्यायाति ब्रह्मादीनां तु भगवान्नियामकत्वेनात्महितकर्तृत्वेनैव प्रियोऽतो बहुवैलक्षण्यमित्यर्थः । उत्पत्तितोऽपि वैलक्षण्यमाह । रूढभावः क्वेति । रूढः सहजो लोकवेदाद्यजनित इत्यर्थः । अन्येषां त्वेतादृशभावाभाववत्त्वाद्वैलक्षण्यं किं च रूढभावपदेन प्रमाणतो वैलक्षण्यम् एष भाव इति प्रमेयतः । परमात्मनीति साधनतः कृष्ण इति फलतश्च । अन्यत्र नैवं रूपत्वमुक्तं तथापि भगवति ईश्वरत्वेन ज्ञानाभावाल्लौकिकत्वज्ञानस्य जघन्यत्वात्कथं ब्रह्मादिभ्योऽत्रोत्कर्ष इत्याशङ्क्याह । भाव इति । अत्रायं भावः फलाधिक्येनैवाधिक्यं नतु साधनप्रकारविशेषैः तच्चैतास्वेव दृष्टं नान्येषु एतदेवाह । अविदुषोऽपि ईश्वरत्वेन स्वरूपमविदुषोऽप्यनुभजतः शास्त्रार्थत्वेन ज्ञात्वा भजतः पुरुषस्य साक्षात्स्वयमीश्वरः कि श्रेयस्तनोतीति काकूक्तिः किं तु न तनोतीर्थः । तेषां भगवज्ज्ञानवचनभक्त्यादिभगवद्धर्मैरेवाखिलपुरुषार्थसिद्धिः न तु स्वयं भगवानागत्य किञ्चित्करोतीति तथा अस्तु वा कदाचिद्भक्त्यति-

शयेन गजेन्द्र इव पुरुषार्थदानं तथाप्यगदराज इव किं श्रेयस्तनोत्यन्येषु विवक्षितार्थस्यातिगोप्यत्वात् दृष्टान्तव्याजेनाह । अत्रायमर्थः "एका तदङ्घ्रिकमलं सं तप्तास्तनयारधादिति" न्यायेन विरहानलसन्तापहृदयगतस्मररोगशमनाय यथैवैकमङ्ग भगवतः स्वहृदयादिदेशेष्वेताः स्थापयन्ति न तथा ब्रह्मादयः यत ईश्वरान्नित्यं ते बिभ्यत्येव तत्राप्येतासु भगवतो न स्वातन्त्र्यं प्राधान्यं वा किं तु तासामेतदाह । उपयुक्त इति पदेन यथौषधस्य तापरोगनिवर्तकत्वे नैवोपयोगो न मुख्यत्वं पुरुषस्यैव मुख्यत्वं तथेत्यर्थः । यथा रोगनिवृत्त्यनन्तरमपि पोषकं रस्यं च यदि भवत्यौषधं तदा यथेच्छं भोगस्तस्य तथा तत्रापि विरहतापोपशमनानन्तरं यथेच्छं भोग इति ज्ञापनाय राजपदम् अथवा साक्षाद्यच्छ्रेयस्तत्किं तनोत्येष इति योजना इतररागविस्मारकत्वेनास्यैव रसस्य साक्षाच्छ्रेयोरूपत्वादेतदन्येषु तददानात्तथा अथवा विदुषो जनस्य भगवान् श्रेयस्तनोतीति सत्यं तथापि किमनुभजतो विदुषस्तथाकरणमिति अत्रानुभजनं भगवद्भजनानन्तरं स्वभजनं विरचितचाटुलवचनम् इत्यादिगीतोक्तन्यायेन नह्येवं ब्रह्मादिषु सम्भवति अथवा प्रतिपदं काकूक्तिर्ज्ञेया तथा हि विदुषो जनस्य किमीश्वरः श्रेयस्तनोति अयमर्थः कर्तुमकर्तुमन्यथा कर्तुं समर्थो हीश्वरः नहि ब्रह्मादिष्वेवं रूपं प्रकटीकृत्यफलं ददाति एतासु पूर्णकामत्वात्मारामत्वादीन् स्वरूपधर्मानप्यन्यथा कृत्वा ददाति । तेषु वाङ्मर्यादामपि नान्यथा करोतीति तथा अनुभजतः किं तनोतीति पूर्ववत् । अन्यस्य यच्छ्रेयस्तनोति तत्किं विदुषस्तनोति किं त्वविदुष एव तज्ज्ञानानुरूपं श्रेयस्तनोतीत्यर्थः । स्वरूपस्यानन्दरूपत्वात्तस्य चानुभवैकवेद्यत्वेन वाक्चक्षुराद्यवेद्यत्वाद्ब्रह्मादीनां च पुरुषत्वेन भगवद्दानाच्च साक्षात्स्वरूपानुभवाभावादविद्वत्त्वम् एतासां तथा प्रसिद्धं साक्षाच्छ्रेयोऽपि किं तनोतीति पूर्ववत् । साक्षात्स्वयं किं तनोतीत्यप्युक्तं तनोति किमित्यपि एषु श्रेयः सकृद्ददाति न तु विस्तारयति विस्तारणं च तदेकपराचित्तत्वे तदर्थैकप्रयत्नवत्त्वादिकम् । तदुक्तम् तत्र मम हृदयमतियत्नं प्रति विशति वितनोत्यन्यो न कोऽपीत्यादिना । न ह्येवमन्यत्र करोतीति तथा अगदराज इव किमिति पूर्ववत् उपयुक्तः किं श्रेयस्तनोतीति । न हि ब्रह्मादीनामुप समीपे एकस्मिन्नासने शयनादौ वा युक्तो भगवान् भवति यतो भगवद्दर्शनमपि तेषां दुर्लभम् एतासामुपयुक्तस्तथेति बह्वेव तारतम्यमित्यर्थः यद्वा ननु भक्तिमार्गेऽन्यभजनराहित्येन भजनं मुख्यमित्येतासां स्वपतिसम्बन्धेन कथमेताः परं तनुभृत इत्याशङ्कानिरासायोच्यते इमाः स्त्रियो व्रजस्त्रियो व्यभिचारदुष्टाः क्वेत्यर्थः । अवनचरीरिति सर्वदा स्वस्य भगवदुपभोगयोग्यतां ज्ञात्वा रक्षणपरा इत्यर्थः । किं च यदि तादृश्यस्तदा कृष्णे एव रूढभावः क्व च असम्भावितत्वात् तथाहि रूढपदेन भावस्यावच्छिन्नत्वमुच्यते तेनान्तर्बहिर्भेदोनाहर्निशं भगवद्रमणस्य जायमानत्वात्तद्भावरहितत्वं न कदाप्येतासामिति क्व तत्सम्भावनापि अत्र विवाहितपतिभजनमेव व्यभिचारशब्दवाच्यं तदप्येतासां नास्तीत्युच्यते । ननु शुश्रूषन्त्यः पतीन् काश्चित् ता वार्यमाणाः पतिभिरित्यादिकथनात्तत्सम्बन्धाभावो न वक्तुं शक्य इति चेत् न तत्सम्बन्धस्तासामाभिमानिक एव न तु वास्तवः अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्गः स्थातुं त्वयाभिरमिता इत्यत्र मन्यमानाः स्वपार्श्वस्थानित्यत्रापि तथोक्तत्वात् पुंल्लिङ्गदारपदेनापि तत्सम्बन्धाभाव एव तासु ध्वन्यते न चाभिमानिकस्यापि तस्य सदोषत्वमेवेति वाच्यं स एतावानासेति श्रुतेरेतत्सृष्टेः स्वरूपात्मकत्वेन रसार्थं च प्रभुणैव तथा स्थापितत्वात् न च भगवत्सम्बन्धात्पूर्वं तथेति वाच्यम् उक्तोपपत्तेः न च यथा भगवत्सम्बन्धात् पूर्वं तथात्वं न तथोक्तहेतोस्तदनन्तरमपीति वाच्यं तासां तत्स्वरूपातिरिक्ते तदात्मकत्वास्फूर्तेः वस्तुतस्तु फलप्रकरणीयरमणात्पूर्वमपि तासां स्वप्नेषु तत्सम्बन्धः समजनीति लक्ष्यते अन्यथास्प्राक्ष्म त्वयाभिरमिता इति च सम्बन्धस्य भूतार्थतां न वदेयुः किं च अन्यसमक्षं स्थातुं न पारयामः इत्युक्त्वा यत्रान्यत्र समीपस्थितिरप्यशक्या तत्र तदनन्तरभाविन्याः कृतेः किं वाच्यमिति भावो व्यज्यते तेन तासामेतत्संबन्ध कालो न कदापीति नोक्तानुपपत्तिः भगवत्सम्बन्धस्य तु तथात्वं वक्तुमयुक्तं सर्वप्रमाणविरोधात् अन्तर्गृहगतानां तादृशबुद्धियुक्तत्वेन प्रतिबन्धाभावाच्च परमात्मपदेनाप्येतदेव ज्ञाप्यते तद्भजनस्यातथात्वात् ननु पूर्वं ज्ञानादिसाधनवतामेतद्भावाभावेनाकृतार्थतोक्त्या तदतिरिक्तं साधनं किमेताभिः कृतं येनैतादृशं फलमित्याशङ्क्याह । नन्विति । ईश्वरः साधननैरपेक्ष्येण सर्वकर्णसमर्थः विदुषोऽपि ज्ञानयुक्तस्यापि पुरुषस्य नैष्कर्म्यमप्यच्युतभाववर्जितमिति वाक्यात्केवलज्ञानस्यापुरुषार्थसाधकत्वं ज्ञात्वा अनु पश्चात् भजतः भजनं कुर्वतः साक्षात् स्वयं भजनातिरिक्तसाधनानपेक्षः श्रेयः फलं तनोतीत्यर्थः । परं ये यथा मां प्रपद्यन्त इति वाक्यात्तदधिकारानुसारेण अपिशब्देन परं स्वार्थसाधनत्वेनापि भजनकर्तुः श्रेयः स्वयं साधननोति तत्र तदर्थैकभजनपराणामेतासां साक्षात्स्वयं तनोतीति ज्ञाप्यते प्रत्युत न पारयेऽहं निरवद्यसंयुजामित्यत्रैतद्भजनानुरूपस्य श्रेयस एव भावाभावः सर्वकरणसमर्थेन प्रभुणाप्युक्तः अत एव यथैतासां तत्तनोति न तथा पूर्वोक्तस्येति ज्ञापनाय दृष्टान्तमाह । अगदराज इवेति । अत्राय भावः यथामृतं स्वभजनकर्तुरभीष्टं साक्षात्स्वयमनुपानादिसाधनव्यतिरेकेणापि तनोति न तु तेनामृतस्य तत्तन्यते तथा स्वार्थसाधनत्वेन भजनकर्तुर्ज्ञानिनोऽप्यभीष्टं भगवांस्तनोति ननु तेन भगवतस्तत्तन्यते स्वार्थं परत्वात् अत्र तु यथैतासामभीष्टं प्रभुस्तनोति तथैता अपि तस्य तत्तन्वन्तीति नानुपपत्तिः काचित् अथवा निषेधस्य प्राप्तिपूर्वकत्वेनान्यत्र तदभावात्प्रकारान्तरेण व्याख्यायते एताः परं तनुभृत इत्यनेन व्रजसीमन्तिनीनां सर्वोत्कर्षं निरूप्य तत्रैवोत्तरार्द्धे साधनानां तदसाधकत्वोक्त्या तदभावे कथमेवमेतासामित्याश्चर्यमिव मन्यमानो यत्र भगवत्कृपया सर्वसाधनरहितासु हीनजातीयासु पुलिन्दीष्वप्युत्कर्षसिस्तित्र किं वाच्यमङ्गसङ्गाधिकारवतीष्वेतास्वित्याशयेनाग्रे पुलिन्दीराह । क्वेमा इति । इमाः स्त्रियः पुलिन्द्यः क्व कृष्णे एष रूढभावः किं च यद्यपि ता नमस्यन्निदं जगावित्युक्तेरतेद्वीक्षणस्य कालान्तरीयत्वेऽपि भावनया पश्यन्निव वदतीति इति प्रदर्शनं यदि पुष्टिमार्गीयं वा किमपि साधनं भवेत्तदा सम्भवेदपि एतासां तदुभयाभावाद-

सम्भावितमिवोच्यते तत्र पुष्टिमार्गीयं वा किमपि तद्भावायाह । व्यभिचारदुष्टा इति । अत्रापि व्यभिचारपदं विवाहितपतिभजनपरं यतोऽस्मिन्मार्गे साधनं सर्वात्मभावस्तन्मतत्यागस्यापि विदितत्वेनाङ्गीकृतिः संत्यज्य सर्वविषयान् पतिसुतान्वयभ्रातृबान्धवानित्याद्युक्तेः तेनैतासामेवं भावाभावेन व्यभिचारदुष्टत्वमेवेति पुष्टिसाधनाभावः सूचितः मर्यादामार्गीयतदभावायाह । वनचरीरिति । मर्यादायामधिकारिणामेव साधननिष्पत्तिरुच्यते अतो वनचरीत्वेनातिक्षुद्रजातीयत्वेनाधिकाराभावात्तदभावः जन्मान्तरीयं तदिति नाशङ्कनीयं प्रमाणाभावात् तादृशाधिकारस्याप्यजातत्वात् तर्हि कथमेवमेतासामिति चेत् तत्रोपपत्तिमाह । नन्विति । ईश्वरः साधनानपेक्ष्यः सर्वकरणसमर्थः साक्षात्स्वयं श्रेयस्तनोतीत्यर्थः ननु स्वरूपस्योभयत्र साधनत्वे फलस्याविशेषात् कथमेतदपेक्षयोत्कर्षस्तत्प्रियास्वित्याशङ्कानिरासायाधिकारभेदात्फलभेद इत आधिक्यं चेति विशेषणद्वयेनाह । अनुभजतोऽविदुष इति । व्रजरत्नप्रियाणां स्वागतं वो महाभागा इत्यपि तत्कृतनिषेधेऽपि स्वभावदार्ढ्यात् भजनकर्तृत्वेन नानुभजनं प्रत्युत मानापनोदनादिषु प्रभोरेव तथात्वमस्ति नन्वेतासामेतादृशत्वं क्वचित्सिद्धं तत्रापि दयितास्तनमण्डितेनकुङ्कुमेनाननकुचेषु लिम्पन्त्यस्तदाधि जहुरित्यत्र दयितापदेन व्रजदेवीनामुक्तत्वात्तत्सम्बन्धिकुङ्कुमेन प्रभुसम्बन्धाधिकारस्य जातत्वाद्भजनादनुभजनमेतासां सिध्यतीत्यनुभजत इत्युक्तं किं च "रसो वै स" इति श्रुतेर्भगवतो रसात्मकत्वेन तत्स्वरूपाभिज्ञत्वं वीक्ष्यालकावृतमित्युक्तरीत्या तत्प्रेयसीनामेवोच्यते एतासां तदभावादविद्वत्त्वमित्यविदुष इत्युक्तं विदुष इति पदच्छेदे माहात्म्यज्ञानवत्त्वेन तदभावराहित्यमेव अधिकारानुसारेण ज्ञानं ज्ञानानुसारेण फलमिति मल्लाभामानिरित्यत्रोपपादितम् एकवचनं जात्यभिप्रायेण सामान्यत्वाज्ञापनाय तादृशभोग्यशरीराभावाय पुल्लिङ्गनिर्देशः ईश्वरत्वाद्यमनधिकारिणामपि श्रेयस्तनोति तत्र किं वाच्यं तास्वित्यपिशब्देन द्योत्यते तत्र दृष्टान्तमाह । अगदराज इवेति । नह्यमृतं सम्बद्धं सदधिकारिणं विचारयति तथात्रापीत्यर्थः । अपि च अत्रामृतादिपदानि विहाय केवलरोगनिवर्त्तकत्वापादकागदपदोपादानेन पुलिन्दीनां भगवत्सम्बन्धः स्मररोगशान्त्यर्थमित्यवगम्यते जहुस्तदाधिमित्यत्र तान्निवृत्तिमात्रस्यैव मनोरथत्वेन कथनात् व्रजस्त्वपिसमुद्भूतरत्नानामेतासां तु विरहदशोत्पन्नस्मररोगापगमे जातेऽप्यग्रे विविधरतिकेलिकलापैरखिलरसमयप्रियतमस्वरूपमतिस्वादनमुख्यमिति नैतद्दृष्टान्तत्वं पूर्वोक्तस्येति ज्ञेयं वस्तुतस्तु व्रजपरिवृढप्रेयसीनां प्रियवियोगकालीनार्तिरूपस्यापि भावस्य ता मन्मनस्का इत्यादि भगवदुक्त्या तदात्मकत्वेनानन्दरूपत्वात् अगदत्वमनुपपन्नमिति तथोच्यते उपयुक्तपदेनापि पुलिन्दीनामुपसमीपे स्थितिरेतासां तु साक्षादङ्गसङ्ग इति महद्वैलक्षण्यं सूच्यते तथा चात्र पुलिन्दीकथनमेव सुष्ठु यद्यपि दृष्ट्वैवमादि गोपीनामित्यत्र ता नमस्यन्निदं जगावित्युक्तेस्तत्प्रसङ्ग एवात्र समायाति तथाप्युद्धवः कालान्तरे पुलिन्दीष्वपि भगवद्भावानुभावं दृष्टवानिति लक्ष्यते "सरिद्वनगिरिद्रोणीर्वीक्षन् कुसुमितद्रुमान्" इत्यनेन गिरिस्थितानां तासामपि वीक्षणस्यानूक्तसिद्धत्वात् तथा च पूर्वमेता परं तनुभृत इत्यनेन घोषसीमन्तिनीः स्तुत्वा तत्राश्चर्यमिव मत्वा पुनः पुलिन्दीः स्मृत्वा यत्र तास्वप्येवं तत्र किं वाच्यं तत्प्रियास्वित्याशयेनेदमुक्तमिव गम्यते तेन तासामेवात्रस्तुतिरिति नोक्तानुपपत्तिः किं च इमा इति प्रदर्श्यैवं कथनं प्रभुवल्लभासु नोद्धवस्य सङ्गच्छते तत्रापि क्वेत्यसम्भावनापूर्वकं किं च तासां निरुपधिभाववत्त्वेन स्त्रीत्वकथनमपि नोपपद्यते स्त्रीणां कामोपाधिकभावस्यैव नियतत्वात् उद्धवेन वनचरीपदं तदङ्गसङ्गिनीषु न प्रयोक्तुं शक्यं द्वितीयविशेषणं वा तत्स्वरूपाभिज्ञत्वात् अपरं च कृष्णस्य दयितः सखा । तमाह भगवान् प्रेष्ठं भक्तमेकान्तिनं क्वचित् । तं वीक्ष्य कृष्णानुचरमित्यादिवाक्यैरत्यन्तरङ्गभक्तस्योद्धवस्यासामहो चरणरेणुजुषामिति तच्चरणरजःसम्बन्धिजन्मप्रार्थनमिति विरुद्धयते अतः पूर्णाः पुलिन्द्य इत्यत्र तासां भगवत्सम्बन्धस्योक्तत्वादुक्तानुपपत्तेश्च ता एवात्रोच्यन्त इति सर्वमनवद्यम् ।। ५९ ।।

श्रीसुबोधिनी-सारः

व्यभिचारेण दुष्टा दूषिता इमाः स्त्रियः क्व परमात्मनि कृष्णे एष रूढभावः क्व ननु निश्चयेनानुभजतो भक्तस्य अविदुषोऽज्ञस्यापि ईश्वरः साक्षात् श्रेयः तनोति उपयुक्तः सेवितोऽगदराज औषधमिव ।। ५९ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तद्वाक्यान्याह—एता इति षड्भिः । एता गोपवध्वः परं केवलं तनुभृतः सफलजन्मानः । तत्र हेतुमाह—एवमुक्तप्रकारो गोविन्दे रूढो भावः प्रेमात्मको यासां ता इति । 'कृष्णप्रेमवत्त्वेन कथमेतासां कृतार्थत्वम्' इत्याकाङ्क्षायां 'तस्य सर्वात्मत्वेन तत्सत्कारेणैव ब्रह्मादिसकलसत्कारसिद्धेर्नातः परमन्यत् कृत्यमस्ति' इत्याशयेनाह—अखिलात्मनीति । अत एव तत्प्रेम्णो दुर्लभत्वमाह—यत् प्रेम भवात् भीः येषां ते मुमुक्षवो वाञ्छन्ति मुक्तिहेतुत्वात्, तथा वयं भक्ता अपि यद्वाञ्छामः संसारदुःखविस्मृतिपूर्वकपरमानन्दजनकत्वात् । 'तथापि जन्मना त्वेतासां निकृष्टत्वमेव' इत्याशङ्क्याह—किमिति । अनन्तस्य अनन्तमूर्तेर्भगवतः कथासु रसो रागो यस्य तस्य प्राणिनो ब्रह्मजन्मभिः ब्राह्मणसम्बन्धिभिः शौक्लसावित्रयाज्ञिकैस्त्रिविधैरपि जन्मभिः यद्वा चतुर्मुखजन्मभिरपि किं कोऽतिशयः ? यत्रतत्रापि जातो भगवद्भक्तिमानेव सर्वोत्तम इत्यर्थः ।। ५९ ।।

अन्वितार्थप्रकाशिका

एता इति ।। निखिलात्मनि गोविन्दे एव रूढो भावो यासां ता एता गोपवध्वः एव परं केवलं भुवि तनुभृतः सफलजन्मानः यत् यं रूढं भावं सामान्ये क्लैब्यं भवात् भीर्येषां ते मुमुक्षवो मुनयश्च वाञ्छन्ति तथा वयं भक्ता अपि वाञ्छामः ।

अनन्तस्य भगवतः कथासु रसो रागो यस्य तस्य प्राणिनो ब्रह्मजन्मभिः ब्राह्मणसंबन्धिभिः शौक्लसावित्रयाज्ञिकैस्त्रिविधैरपि जन्मभिः । यद्वा । चतुर्मुखजन्मभिरपि किं कोऽतिशयः यत्र तत्रापि जातो भगवद्भक्तिमानेव सर्वोत्तमः ॥ ५९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नंदादीन् अनुज्ञाप्य अहं गच्छामीति विज्ञाप्य आमंत्र्य हे गोपादयो गच्छामीति संबोधनेन तानुक्त्वा ॥ ५९-६० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं चेश्वरप्रसाद, एव महत्त्वे कारणं तस्य च न जातिराचारो ज्ञानं वा कारणं, किं तु केवलं भजनमेवेत्याह ॥ **क्वेमा इति** ॥ प्रथमतस्तु, इमा गोप्यः, स्त्रियः, तत्रापि वनचरीर्वनचर्य्यः, तत्रापि, व्यभिचारदुष्टाः लोकदृष्ट्येति शेषः । क्व परमात्मनि कृष्णे, एषः रूढभावश्च, क्व । एवमुभयोर्महदन्तरत्वेऽपि भगवद्भजनेनैवासामेवमिति सदृष्टान्तमाह । साक्षात् प्रत्यक्षं भगवन्तमित्यर्थः । अनुभजतः अविदुषः भगवानयमित्यजानतोऽपि जनस्य, नन्वहो ईश्वरः, श्रेयः तनोति । क इव । उपयुक्तः सेवितः, अगदराजोऽमृतं इव । यथाऽमृतमज्ञात्वापि सेवित सत् जीवनदं भवत्येवतथायमज्ञात्वापि सेवितः सन्नात्मप्रदो भवत्येवेत्यर्थः । यद्वा । ननु वर्णाश्रमधर्मानुग्राह्योऽयं भगवति निरूढभावस्तस्याऽऽस्वविद्यमानत्वेऽपि कथमासामेवं विधतेत्यघटिततां प्रदर्श्येश्वरः स्वयमेव स्वप्राप्तौ केनापि व्याजेन हेतुरिति घटनं संभावयन्नाह ॥ **क्वेमा इति** ॥ इमा गोप्यः स्त्रियः, पुरुषापेक्षया जात्यापि हीना इति भावः । वनचरीः वनचर्यः, अनेन सत्सङ्गादिसाधनाभावोऽभिप्रेतः । व्यभिचारदुष्टाः क्व, इत्यनेन सत्सङ्गसिद्धिबाधकतासद्भावोऽपि प्रदर्शितः । एवं विधत्वात् सर्वथाधिकाररहितानामासां, परमात्मनि कृष्णे, एषः निरूढभावश्च, क्व । दुर्घटमेतदिति भावः । यद्यप्येवमुभयमघटमानमस्ति, तथापि ईश्वरः प्रत्यक्षः परमेश्वरः, अविदुषः स्वात्मयाथात्म्यमजानतः अपि, अनुभजतः केनापि भावेनानुवर्त्तमानस्य जनस्य, अज्ञानतोऽपि, उपयुक्तो भुक्तः, अगदराजोऽमृतं इव, साक्षात् प्रत्यक्षः स्वयमेव, श्रेयस्तनोति अत्र केचिद्गोपीनां व्यभिचारदुष्टत्वमसहमानाः विशेषेणाभ्यभितः चारयन्ति भगवन्मूर्त्तौ सर्वेन्द्रियवृत्तीः प्रेरयन्तीति व्यभिचारः, भगवन्मूर्त्तौ सकलेन्द्रियवृत्तिप्रवर्त्तका इत्यर्थः । व्यभिपूर्वात् स्वार्थणिजन्ताच्चरतेः क्विपि व्यभिचारशब्दनिष्पत्तिः । एवंविधा अत एवादुष्टा व्यभिचारदुष्टाः अपि, स्त्रियः 'अनृतं साहसं माया मूर्खत्वमतिलोभता । अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः' इति स्मृतीक्षया अनृतादिदोषवत्यः, तत्रापि वनचरीर्वनचारिण्यः, इमा गोप्यः, क्व । अन्यत्सर्वं पूर्ववदेव इति व्याख्यातारः ।५९।।

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

एताः परमिति : १०.४७.५९.

धन्येयं धरणी ततो व्रजवनी तत्रापि तद्वासिनस्तत्राप्यच्युततात्त्विकामृतजुषो योषा विशेषादिमाः ।
यासां स्वैरविहारवाक्सृत-सुधाधारामपारामिमां पातुं सच्छ्रुतिकस्य तत्र भवतो जाता श्रुतिः सस्पृहा ॥ १७४ ॥

सत्यः सत्यमुखोऽस्ति गोकुलसमो नास्मीति वैकुण्ठतां वैकुण्ठोऽप्युपयाति याति रजताद्रिश्चापि दुर्वणताम् ।
के वाऽन्ये पुरतस्तपोजनमहर्लोकाः स्युरस्य ध्रुवं यन्निःसीममहो महोत्सवपदं यस्मिन् स्वयं क्रीडति ॥ १७५ ॥

ग्रामोऽयमल्प इति जल्पतु कोऽप्यनल्पदृग्वीक्ष्य गोकुलमनन्तरसावभासम् ।
ब्रह्माण्डगोल - मिदमाकलये - ऽकुमध्यं विश्वम्भराश्रयतया यदिदं चकास्ति ॥ १७६ ॥

यल्लोचनं जगति सर्वशिरोभिवन्द्यचन्द्रोल्लसन्मृगदृगञ्चलजित्वरं च ।
पादः पितामहजनुर्गृहपद्मजेता ताः सत्य इत्यनुपमाः किमितोऽपि वाच्यम् ॥ १७७ ॥

कृष्णप्रिया

श्रीउद्धवजी स्वगत कह रहे हैं ये गोपपत्नियों निश्चित रूप से सफलकाय है । इन्होंने पृथ्वीपर आकर सब प्राणियों की आत्मा श्रीगोविन्द भगवान में ही सुदृढ भाव सम्पादन किया है । संसार भय से भयभीत हुए मुनिजन भक्तजन एवं धर्मपरायणजन तो उस दिव्य भाव की अभी तक कामना ही कर रहे हैं वह भाव गोपस्त्रियों के लिए सहज बन गया । जो जीव अनन्त भगवान के कथा रस में जो अनुरक्त है उनको ब्रह्मभावापन्न शुक्ल सावित्र याज्ञिक दीक्षावाले अनेक जन्मों से क्या प्रयोजन है अथवा कौन सी मतलब है ? ॥ ५९ ॥

क्वेमाः स्त्रियो [1]वनचरीर्व्यभिचारदुष्टाः[2] कृष्णे क्व चैष[3] परमात्मनि रूढभावः ।
नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥ ६० ॥

---

१. चराः-वीर. विज. । २. शीलाः-वीर. विज. । ३. चैव-विज. ।

कर्दमक्षमा

अन्वयः—वनचरीः, व्यभिचारदुष्टाः, इमाः, स्त्रियः, क्व ? च, परमात्मनि, कृष्णे, एव, क्व, रूढभावः ? ननु, ईश्वरः, अगदराजः, इव, उपयुक्तः, अविदुषः, अपि, साक्षात् , अनुभजतः, श्रेयः, तनोति ॥ ६० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत्यंतापूर्वश्चायं गोपीषु भगवतः प्रसाद इत्याह । नायमिति । अंगे वक्षसि उ अहो नितांतरतेरेकांतरतिमत्याः श्रियोऽपि नायं प्रसादोऽनुग्रहोऽस्ति । नलिनस्येव गंधो रुक्कांतिश्च यासां तासां स्वर्गांगनानामप्सरसामपि नास्ति । अन्याः पुनर्दूरतो निरस्ताः । रासोत्सवे कृष्णस्य भुजदण्डाभ्यां गृहीतं आलिंगितः कण्ठस्तेन लब्धा आशिषो याभिस्तासां गोपीनां यः प्रसाद उदगादाविर्बभूव ॥ ६० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्यंतापूर्वोऽनन्यलभ्यः । अयं तदनुरागलक्षणः । कुतोऽन्या इति—"बहुलं छन्दसि" इति विभक्तिव्यत्यासः । कुतोऽन्यासामित्यर्थः । अन्यपदेन यक्षादिस्त्रीग्रहः । यः प्रसादः ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु परमव्योमनाथकृष्णयोरभेद एव निरूप्यते । तत्र पूर्वस्य च सदा वक्षःसंगिनी लक्ष्मीः सर्वभक्तशिरोमणिस्तस्यां भावः कथं नाभिनंद्यते । किञ्च यथा दूरचरे प्रेष्ठ इत्यादिरीत्या वियोगमयभावस्योत्कर्षः सर्वत्र लभ्यते । ततो यदि संयोगेऽप्यासां तेनाधिक्यं स्यात्तर्हि तथा वर्ण्यताम् । संयोगे तु लक्ष्म्या एव तदाधिक्यं गम्यते । किञ्च लक्ष्मीर्हि स्वरूपशक्तिस्तदपेक्षया स्वरूपेणामून्यूनाः स्युः कथमेता एव स्तुतेर्विषयीक्रियन्ते तत्र सप्रौढिमाह । नायमिति । अंगे मदीश्वरस्य श्रीकृष्णस्य मूर्तिविशेषे तस्मिन् संसक्ता या श्रीस्तस्या अप्ययम् एतावान् प्रसादस्तदंगसंगसुखोल्लासः उ निश्चितं न विद्यते । कीदृश्या अपि तस्याः नलिनस्य दिव्यस्वर्णकमलस्येव गन्धो रुक् कान्तिश्च यासां तासां स्वर्योषितां 'स्वश्चूडामणि सुभगयंतमिवात्मधिष्ण्यमित्युक्तदिशा दिव्यसुखभोगास्पदलोकगणशिरोमणिवैकुण्ठस्थितानां योषितां भूलीलाप्रभृतीनां मध्ये नितांतरतेः परमप्रेमयुक्तायाः । तदेवं सति कुतोऽन्याः सर्वा एव स्त्रीजातयो दूरत एव परास्ता इत्यर्थः । तं प्रसादमेव दर्शयति । रासेति । व्रजसुन्दरीणां नित्यस्थितः एव यो यावान् रासोत्सवे उदगात् प्राकट्यं प्राप । कीदृशीनाम् अस्येत्यासां समीपे 'यन्मर्त्यलीलौपयिकमित्याद्यनुसारेण परमव्योमनाथादप्युत्कृष्टस्य मया सांप्रतं साक्षादिवानुभूयमानस्यापि श्रीकृष्णस्य यौ भुजदण्डौ ताभ्यां गृहीतः स्वल्पस्यापि विश्लेषस्य भयादिव यः कण्ठः कण्ठालिगनं यत्कृतमित्यर्थः । तेन लब्ध आशिषो मनोरथा याभिस्तासाम् । तस्माल्लक्ष्मीतोऽपि सर्वथा वैलक्षण्याद्यासां स्वरूपेण चास्मिन् प्रेयसीभावेन च वैलक्षण्यं दर्शितम् । अत एव लक्ष्मीविजयवाक्येऽस्मिन् 'व्रजसुन्दरीणामित्युक्त्वा सौंदर्यादीनामप्याधिक्यं दर्शितम् । यस्यास्ति भक्तिरित्यादिरीत्या भक्तितारतम्येन तारतम्याद्युक्तमेव चेदम् । 'व्रजवल्लवीनामिति पाठे तु व्रजस्य च तासाञ्च प्रसिद्धिः सूचिता ॥ ६० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो हरिप्रियेति प्रसिद्धा महालक्ष्मीरप्येतादृशप्रेमाश्रयो न स्यादित्याह—नेति । नञः प्राङ्निर्देशो निषेधदार्ढ्यार्थम्, सप्तम्यर्थे षष्ठी । तथा विमलोत्कर्षिणीज्ञानादीनां स्वर्योषितां दिव्यांगनानां नलिनगन्धरुचामिति रासयोग्यतोक्ता । तत्र रुक्-शब्देन कोमलगौरकान्तिर्ग्राह्या, अन्या मानुष्याद्याः । रास एवोत्सवस्तस्मिन् , दण्डरूपकेण दृढलिंगनं ध्वनितम् । व्रजस्य सुन्दरीणामिति 'व्रजस्त्रियोरमादिभ्योऽप्युरुमाधुर्य्यमण्डिताः' इति बृहद्वामनानुसारेण रमादिभ्योऽप्याकृत्या प्रकृत्या च माधुर्य्येणासामेव रासाहता समर्थिता । अन्यत्तैर्व्याख्यातम् । यद्वा, उ-शब्दः परमविस्मयाक्रोशविशेष, नितान्ता गाढाचासौ रतिश्च नितान्तरतिः प्रेमा तस्या यः प्रसादः प्रसन्नता उत्कर्ष इति यावत् , रासोत्सवे व्रजसुन्दरीणामुदगात् प्रकटोऽभूत् , अयं श्रियोऽपि नास्ति, तथा हि रासे (भा० १०।३३।१४)—

'गोप्यो लब्ध्वाच्युतं कान्तं श्रिय एकान्तवल्लभम् । गृहीतकण्ठ्यस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे ॥'

अस्यार्थः—श्रियः कान्तं वल्लभमात्मन एकान्तवल्लभं नितान्तप्रेष्ठमिति सर्व्वतः श्रैष्ठ्यमासां प्रेमातिशयमाकलय्य वादरायणिनोक्तम् , तथा ताभिरपि तत्रैव गीतम् (भा० १०।३१।१५)—'अटति यद्भवानह्नि काननम्' इत्यादि । यदा श्रिय एवेषं वार्त्ता, तदा स्वर्योषितां कुतः ? स्वर्योषितो वैकुण्ठदेव्यो धरणीलीलाद्यास्तासामन्याः कान्ताद्या दक्षिणाद्याश्च ॥ ६० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अत्यन्तापूर्वश्चायं गोपीषु भगवतः प्रसाद इत्याह । नायमिति । अङ्गे वक्षसि वामाङ्के वा उ अहो नितान्तरतेः एकान्तरतिर्यस्यास्तस्याः श्रियो लक्ष्म्याः नायं प्रसादोऽनुग्रहोऽस्ति नलिनस्येव गन्धो रुक्कान्तिश्च यासां तासां स्वर्योषितां स्वर्गाङ्गनाना-

मप्सरसामपि नास्त्यन्याः इतरस्त्रियस्तु कुतः प्रसादविषया इति शेषः दूरतो निरस्ता इति भावः। कोऽसौ प्रसादो यः श्रिया स्वर्योषिद्भिश्च न लब्ध इत्यत्राह। रासोत्सव इति। रासक्रीडायां कृष्णस्य भुजदण्डाभ्यां गृहीत आलिङ्गितः कण्ठस्तेन लब्धा आशिषो याभिस्तासां गोपीनामुदगादाविर्बभूव वल्लवीनां मध्ये उदगाज्जगाविति वा ॥ ६० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यः प्रसादः व्रजवल्लवीनां गोष्ठस्थानां गोपीनाम् उदगात् उदितः अयं भक्त्या नितान्तरतेः श्रियः स्वर्योषितां च नास्ति नन्वस्माभिरनुज्ञातं न तु शास्त्रेणेत्यर्थः। कीदृशीनां स्वर्गाङ्गनानां ललिताङ्गरुचाम् अखिलविलासोपेतशरीरकान्तीनां कथम्भूतानां गोपीनां रासक्रीडोत्सवे अस्य कृष्णस्य भुजदण्डेन गृहीतकण्ठाश्च लब्धाशिषश्च सुरतसुखोद्बोधकशुभवाक्यप्रबन्धाश्च यास्तासां अन्याः अन्यासां स्त्रीणां बहुलं छन्दसीति विभक्तिव्यत्ययविधानात् अन्यस्त्रिय ईदृशप्रसादं नापुरिति कुत इति वा ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तमेनमुक्तप्रकरणार्थं पुनर्द्रढयति—नायं श्रियोऽङ्गेत्यादि। नितान्तरतेरपि लक्ष्म्या नायं प्रसाद उदगात्, किं पुनर्नलिनगन्धरुचामपि स्वर्योषिताम्। क इत्यपेक्षायामाह—रासोत्सवेऽस्येति। व्रजसुन्दरीणां य उदगात्। कुतः ? लक्ष्म्याश्चेन्नोदगात्, स्वर्योषितो वराकास्तत्र क्वेत्यर्थः। कुत इत्यावर्तनीयम्। अन्याः कुत एतद्भजनमित्यर्थः। एतेन व्यभिचार दुष्टाः स्त्रियः क्वेति प्राग् यदुक्तम्, तस्यैवानुक्तिरियम्। यद्यप्युद्धवस्य तन्न दृष्टं न श्रुतञ्च, तथापि तस्य सा लीला प्रादुरासीदिति मन्तव्यम्, भगवत्प्रसादातिशयभाजनत्वात् ॥ ६० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवमन्वयव्यतिरेकाभ्यां तासां सर्वपरत्वमनूद्य सर्वापवादेन द्रढयति— नायमित्यादि। तर्हि एता नमस्या इति यत् पूर्वमुक्तम् तदकिञ्चित्करम्। आसां पादरजः सम्बन्धोऽपि यः कश्चिन्ममास्त्वित्याह—आसामित्यादि। अहो इत्यसम्भावनायाम्, आसां चरणरेणुजुषां गुल्मलतौषधीनां मध्ये किमपि स्याम्। या इति वर्णस्वरूपं वर्णयति—याः श्रुतिभिर्विमृग्यां मुकुन्दपदवीं भेजुः मुकुन्दे पति भावम्। ननु (भा० १०।३२।१३) "मनोरथान्तं श्रुतयो यथाययुः" इति पूर्वमुक्तम्, कथमिदानीं श्रुतिविमृग्यत्वमुच्यते ? सत्यम्, तत्रैषा युक्तिः—श्रुतयो हि नाना ब्रह्मपराः, कर्मपराः, चरणारविन्दपराश्च। तत्र चरणारविन्दपराभिः सह पूर्वं दृष्टान्तितम्, अन्यासां तु विमृग्यैरिति स्थितम् ॥ ६०–६१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यथा सर्वावतारिश्रेष्ठ एव कृष्णो गोचारणवानरबालकैः सहभोजित्वदधिचौर्यपरस्त्रीचौर्यादिलोकविगानं गृहीत्वैव सर्वसज्जीतः सर्वोत्कर्षसामानं प्राप तथैव सर्वाह्लादिनीशक्तिशिरोमणिभूता अपि इमाः स्त्रियो गोपस्त्रीत्ववनचारित्वव्रजलोकविख्यातव्यभिचारादिविगानं गृहीत्वैव लक्ष्म्यादिभ्योऽपि परमसौभाग्योत्कर्षसीमानमवापुरित्याह। नायमिति। अयं प्रसादः उ अहो अङ्गे नारायणस्य वक्षसि वर्त्तमानायाः श्रियोऽपि नितान्तरतेः प्राप्तात्यन्तरमणाया अपि कदापि नोदगात् कुतः पुनः स्वर्योषिताम् उपेन्द्राद्यवतारपत्नीनां नलिनस्येव गन्धो रुक् कान्तिश्च यासामिति सौन्दर्यसौरभ्यादिमत्त्वे सत्यपीति भावः। अन्यावतारस्त्रियः पुनः कुत एतत्प्रसादभाजः स्युरित्यर्थः। रासोत्सवे अस्य तु भुजदण्डाभ्यां गृहीत आलिङ्गितो यः कण्ठस्तेन लब्धा आशिषो याभिस्तासां तेन भक्तिमज्जनानां मध्ये सर्वोत्कर्षकोटथां गोप्य एव स्थिताः साक्षात् श्रेयसोऽपि मध्ये सर्वोत्कृष्टकोटथां रास इति सूचितम् ॥ ६० ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

यथैव विरूढभावः कुत्रापि नास्ति तथा भगवता यः प्रसाद एतासु कृतः स तु कुत्रापि न कृत इत्याह। नायमिति अङ्गे स्ववक्षसि नितान्तरतेः एकान्तरतिमत्याः श्रियोऽपि नायं प्रसादोऽनुग्राहः न अहो अत्याश्चर्यं स्ववक्षसि स्थाप्य निरन्तरं रतिं प्रयच्छन्नपि नेमं प्रसादं दत्तवान् तथा स्वर्योषितां स्वर्गाङ्गनानां नलिनस्य कमलस्येव गन्धो रुक्कान्तिश्च यासां तासामपि अयं प्रसादो न दत्तः इन्द्रोपेन्द्रादिरूपमापन्नोऽपि बह्वीभिः सह रममाणोऽपि नेमं प्रसादं दत्तवान् अन्यास्तु तत्तदवतारेषु लब्धसम्बन्धा अपि कुतः कस्माद्धेतोरिमं प्रसादं प्राप्नुयुः अत्यर्थं दुर्लभं प्रसादस्वरूपमाविश्करोति। रासोत्सव इति। अस्य तिरस्कृतकोटिकन्दर्पविग्रहस्य भुजदण्डाभ्यां गृहीत आलिङ्गितः कण्ठस्तेन लब्धा आशिषो याभिस्तासां [गोपीनां य उदगात् आविर्बभूव तथा च ब्रह्मादीनामपि प्रार्थनया कदाचिदेकमेव रूपं गृह्णाति न त्वनेकरूपाण्याविष्कृत्य यथोक्तरसाभिनिविष्टो यथोक्तं प्रसादं करोतीत्यहो व्रजवल्लवीनां तादृशप्रसादप्राप्त्युपायविधुराणामपि यथोक्तप्रसादलाभे भगवदिच्छैव कारणमिति भावः ॥ ६० ॥

गूढार्थदीपिनी

इमाः स्त्रियः स्त्रीत्वेन गोपसन्ततित्वेन च गर्हिताः किञ्च भगवदतिरिक्तपत्यन्तरसंयोगात् व्यभिचारेणापि दूषिताः क अनु निरन्तरं भजतः अविदुषः प्रभावम् अजानं तोऽपि श्रेयः तनोति। यथा उपयुक्तः सेवितः अगराजोऽमृतम् आरोग्यम् ॥ ६० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गोपीषु भगवतोऽनुग्रहातिशयमाह। नायमिति। अङ्गे भगवद्वक्षसि। उ अहो नितान्तरतेः एकान्तरतिमत्याः श्रियो लक्ष्म्या अपि अयं प्रसादः अनुग्रहः नास्ति। नलिनस्येव गन्धः रुक कान्तिश्च यासां तासां स्वर्गाङ्गनानामप्सरसामपि नास्ति। अन्याः स्त्रियस्तु तादृशप्रसादविषयाः कुत इत्यर्थः। कोऽसौ प्रसाद इत्यत आह। रासोत्सवे इति। रासोत्सवे अस्य श्रीकृष्णस्य भुजदण्डाभ्यां गृहीतेन आलिङ्गितेन कण्ठेन लब्धा आषियो याभिस्तासां व्रजसुन्दरीणां य उद्गादाविर्बभूव ॥ ६० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नन्वेतदन्योऽन्याश्रितम् एवं भावो भगवति उत्तमकारणाभावे कथं भवतीत्याशङ्क्य ईश्वरस्तथा कृतवानित्युक्तम् ईश्वरः कथं करोतीत्याशङ्कायां तदिच्छानुसारेण भजनादित्यनुभजनेन निरूपितम् इच्छानुसारिभजनमकारणमिति पुनः स दोषस्तदवस्थः अत एकं निश्चित्य साधनं वक्तव्यं भगवदिच्छाकारणानन्तरं चेति आद्ये तासां न कापि स्तुतिः कारणान्तरे तु किं ब्रह्मजन्मभिरिति विरुध्यत इत्याशङ्क्याह। नायं श्रियोऽङ्ग इति। वस्तुतो भगवदिच्छैव नियामिका परमियमेतावता कालेन न कापि जातेति तासां स्तुतिरुच्यते अन्यथा यादृशस्तासु प्रसादस्तादृशोऽन्यत्रापि भवेत् तत्र सम्भावितस्थानान्यनूद्य परिहरति। एकान्ततो रतिर्यस्यां तादृशी लक्ष्मीः तस्यापि निरन्तरं रतिं प्रयच्छन्नपि न प्रसादं दत्तवान् स्वर्योषितामपि इन्द्रोपेन्द्रादिभावापन्नोऽपि बहुभिः सह रममाणोऽपि न दत्तवान् नलिनवत् गन्धो रुक् कान्तिश्च यासां तेन कमलभ्रमोऽपि तासु सम्भवति कमलप्रियश्च भगवानिति कमलखण्डे पूजित इव कदाचित्तासु तिष्ठेत्तस्या अपि निषेधः अन्याः पुनस्तत्तदवतारेषु सम्बद्धा अपि कुतस्तत्प्रसादं प्राप्नुवन्तीत्यर्थः। स कः प्रसाद इत्याकाङ्क्षायामाह। रासोत्सव इति। अस्य भुजदण्डैर्गृहीतकण्ठैर्लब्धा आशिषो याभिः न हि कदाचिदप्यनेकरूपाणि कृत्वा रमणार्थमेवं रसाभिनिविष्टो भवतीति तत्रापि व्रजवल्लवीभिः सह तास्त्वसंवृता दध्यादिविक्रये सर्वत्र पर्यटनपरा महतामपि प्रार्थनया कदाचिद्भगवानेवं रूपं गृह्णाति महति कार्ये आनन्दश्च तासां सर्वोत्तमः संपादितः अनेकधा रसमुत्पाद्यतो अतो ज्ञायते नैतादृश्यः कश्चन नाप्येतादृशः क्वापि भगवत्प्रसाद इति अतो ज्ञायते अवस्थापि तासामेतादृशी प्रमाणेष्वश्रुतापि सर्वोत्तमेति ॥ ६० ॥

श्रीसुबोधिनी-सारः

अंगे वक्षसि तु अहो नितांतरतेरेकांतप्रीतिमत्याः श्रियो लक्ष्म्या अपि अयं प्रसादोऽनुग्रहो नास्ति नलिनस्य पद्मस्येव गंधो रुक् दीप्तिश्च यासां तासां स्वयोंषितां स्वर्गस्त्रीणामपि नायं प्रसादः अन्या अन्यासां कुतः स्यात्। प्रथमायाः षष्ठ्यर्थत्वात् रासोत्सवेऽस्य श्रीकृष्णस्य भुजदण्डैर्गृहीत आलिगितः कण्ठस्तेन लब्धा आशिषो मनोरथा याभिस्तासां व्रजवल्लवीनां गोपीनां यः प्रसाद उदगात् आविरभूत् ॥ ६० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गोपीनां प्रेमातिशयं दृष्ट्वा स्वयमाश्चर्यं करोति—क्वेति। स्त्रियो जन्मतो दुष्टाः, वनचरीः वनचर्यः स्थानतोऽपि दुष्टाः सत्सङ्गरहिताश्च, व्यभिचारो नाम कामसङ्कल्पस्तेनापि लोकदृष्ट्या शास्त्रदृष्ट्या च दुष्टाः इमा गोप्यः क? एषोऽतिदुर्लभः परमात्मनि कृष्णे रूढभावः निश्चलस्नेहश्च क? असम्भावित एवेत्यर्थः। 'आसां स कथं जात' इत्यपेक्षायां 'प्रकारान्तरेणासम्भवाद्भगवदनुग्रहादेव' इति निश्चिनोति—नन्विति निश्चये। ईश्वरः सर्वं कर्तुं समर्थः अनु निरन्तरं भजतो जनस्य अविदुषः स्वप्रभावमजानतोऽपि साक्षात् स्वयमेव श्रेयः फलं तनोति विस्तरतो ददात्येवेत्यर्थः। अविदुषोऽपि फलसम्पादने दृष्टान्तमाह—अगदेति। अगदराजः ओषधिश्रेष्ठः अमृतं उपयुक्तः उपभुक्तः स्वप्रभावमजानतोऽपि यथा आरोग्यं तनोति तद्वदित्यर्थः ॥ ६० ॥

अन्वितार्थप्रकाशिका

क्वेति। स्त्रियो जन्मतो दुष्टाः वनचरीः वनचर्यः। पूर्वसवर्णदीर्घ आर्षः। स्थानतोऽपि दुष्टाः सत्सङ्गरहिताश्च। व्यभिचारो नाम कामसङ्कल्पस्तेनापि लोकदृष्ट्या शास्त्रदृष्ट्या च दुष्टाः इमाः क एषोऽतिदुर्लभे परमात्मनि कृष्णे रूढभावः निश्चलस्नेहश्च क। असम्भावित एव ननु निश्चितम्। ईश्वरः सर्वं कर्तुं समर्थः अनु निरन्तरं भजतो जनस्य अविदुषः स्वप्रभावमजानतोऽपि साक्षात्स्वयमेव श्रेयःफलं तनोति विस्तरतो ददात्येव। अगदराजः ओषधिश्रेष्ठः अमृतम् उपयुक्तः उपभुक्तः स्वप्रभावमजानतोऽपि यथा आरोग्यं तनोति तद्वत् अत्रोद्धवो गोपीः स्तुवति। काश्चित्पुलिन्द्यस्तत्रागतास्तासामपि कृष्णे प्रेमोत्कर्षं वीक्ष्य ता उद्दिश्येदमुद्धववचः पूर्णाः पुलिन्द्य उरुगायपदाब्जेत्यादिना वेणुगीतेऽप्येता वर्णिताः तद्विषय एव व्यभिचार दुष्टा इति

साधारण्येन स्त्रीस्वभावबोधकं विशेषणं न तु भगवत्प्रेयसीषु गोपीषु तासामव्यभिचारस्य प्रतिपादितत्वात्। अथवा व्यभिचारस्त्रिधा। पतिमुपपतिं च रमयन्त्या एकः स तु लोकशास्त्रविगीतः। पतिं त्यक्त्वोपपतिं रमयन्त्या अन्यः स तु विगीतोऽपि रसशास्त्रे सङ्गीतः। उपपतिबुद्धया भगवन्तमेव रमयन्त्या अपरः स तु अनभिज्ञविगीतोऽपि शास्त्रे परमार्हणीयत्वान्न व्यभिचारस्तथापि गौण्या व्यभिचार इवेति व्याख्येयम्॥ ६०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अत्यन्तापूर्वश्चायं गोपीषु भगवतः प्रसाद इत्याह। नायमिति। अङ्गे वक्षसि, उ अहो, नितान्ता रतिरेकान्तरतिर्यस्यास्तस्याः, यद्वा उ इत्याश्चर्ये। नितान्तरतेः भगवति परमस्नेहयुक्तायाः, अङ्गे कृष्णस्य हृदये, स्थितताया इति शेषः। श्रियो लक्ष्म्याः, अयं प्रसादः, न अस्ति। नलिनस्य पद्मस्येव गन्धो रुक् कान्तिश्च यासां तासां, स्वर्योषितां स्वर्गाङ्गनानामप्सरसामपीत्यर्थः। न अस्ति। अन्या इतरस्त्रियस्तु, कुतः। प्रसादविषया इति शेषः। दूरतो निरस्ता इति भावः। कोऽसौ प्रसादः, यः श्रिया स्वर्योषिद्भिश्च न लब्ध इत्यत्राह रासोत्सव इति। रासोत्सवे रासक्रीडायां, अस्य श्रीकृष्णस्य, भुजदण्डाभ्यां गृहीत आलिङ्गितः कण्ठः तेन लब्धा आशिषोयाभिस्तासां, व्रजवल्लवीनां गोपीनां, यः उद्गादाविर्बभूव, सः श्र्यादीनां नास्तीति भावः॥ ६०॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

क्वेमाः स्त्रिय इति : १०.४७.६०.

कान्तारतस्थितिरतीव मनोज्ञसौख्या भावानुभावविभवाऽनुभवप्रभावा।
या शास्त्रमात्रविदिता सुरनार्यवेद्या साऽऽसुस्फुटेत्युचितमच्युतभोगभाक्त्वम्॥ १७८॥

कृष्णप्रिया

उद्धवजी मन में यह सोचते हैं कि ये गोपस्त्रियों वन में विचरने वाली, है एवं असदाचार के दोष से दूषित है ऐसी जीवन दशा कहाँ और भगवान् श्रीकृष्ण के चरणों में दिव्यभाव कहाँ। भगवान का स्वभाव ही है कि जो भक्त भगवान का माहात्म्य-ज्ञान वाला नहीं है केवल सुदृढ स्नेह से सेवा ही करता है तो स्वयं श्रीहरि उनको उत्तम श्रेयस् का दान करते हैं। अनजानपने में अमृत का सेवन किया जाय तो भी वह सेवन करने वाले का हित ही करेगा वैसे भगवान भी कल्याण ही करेंगे॥ ६०॥

नायं श्रियोऽङ्ग[1]उ नितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषां य उदगाद् व्रजवल्लवीनाम्॥ ६१॥
आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम्।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्॥ ६२॥

कर्दमक्षमा

अन्वयः—हे, अङ्ग ! रासोत्सवे, अस्य, भुजदण्डगृहीतकण्ठलब्धाशिषाम्, व्रजवल्लवीनाम्, यः, प्रसादः, उदगात्, अयम्, प्रसादः, नितान्तरतेः, श्रियः, न, उ, (आश्चर्यम्), नलिनगन्धरुचाम्, स्वर्योषिताम्, अपि, न, तर्हि, अन्याः कुतः प्राप्नुयुः॥ ६१॥ अहम्, वृन्दावने, आसाम्, चरणरेणुजुषाम्, गुल्मलतौषधीनाम्, मध्ये, किम्, अपि, स्याम्, अहो, याः, दुस्त्यजम्, स्वजनम्, आर्यपक्षम्, च, (परलोकम्) हित्वा, श्रुतिभिः, विमृग्याम्, मुकुन्दपदवीम्, भेजुः॥ ६२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च आस्तां तावद्गोपीनां भाग्यं मम त्वेतावत्प्रार्थ्यमित्याह। आसामिति। गोपीनां चरणरेणुभाजां गुल्मादीनां मध्ये यत्किमप्यहं स्यामित्याशंसायां लिङ्। कथंभूतानां गोपीनाम्। या इत्यादि। आर्याणां मार्गं धर्मं च हित्वा मुकुन्दस्य पदवीं मार्गम्॥ ६१॥ पुनस्ता एव विशिनष्टि। या वा इति। योगेश्वरैर्ब्रह्मादिभिरप्यात्मन्येवार्चितं तद्रासमण्डले स्तनेषु न्यस्तं परिरभ्य यास्तापं विजहुस्तत्यजुरिति॥ ६२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

किंचित्प्रार्थयितुमाह—किञ्चेति। आशंसा इच्छा। स्वजनं भर्त्रादिकम्। धर्मं श्रुतिस्मृतिविहितं नियतस्वभर्तृसंगरूपम् "नैका द्वौ पती विंदेत" इति श्रुतेः। श्रुतिभिर्वेदशिरोभिः। विमृग्यामन्वेषणीयाम्॥ तस्मादासां भावे परमदुर्लभे मनोरथस्याप्यनौ-

---

१. ननु–विज.। २. ललिताङ्गरुचां–विज.।

चित्यात् 'वाञ्छन्ति यद्भवभियो मुनयो वयञ्च' इति यन्मयोक्तं तदविचारादेव। सांप्रतं तु सविचार माशासे एतदेव मे भूयादित्याह आसामिति। इमा यासामुपरिचरणौ विन्यस्यंति तासामतिक्षुद्रजातीनां गुल्मलतौषधीनां मध्ये किमप्यहं स्याम्। ननु भजनस्य सर्वोत्कृष्टा काष्ठा का खल्वेतासु वर्तते यामे वालक्ष्य त्वमासामेव चरणरेणून्वांछन्न तु लक्ष्म्यादीनामपीत्यत आह–या इत्यादि। लोकधर्मधैर्यलज्जामर्यादादित्रोटनपूर्वकं महारागेण भजनमेव मया न क्वापि दृष्टमत एव प्रतिरजनि यदायदा स्वकुलधर्मादिमर्यादा ब्रजशलाका अपि महारागबलेन त्रोटयित्वा कृष्णमभिसरन्ति तदा कृष्णपार्श्वं प्रति गमने वर्त्मावर्त्मविचारो नासामिति तृणादिरूपस्य मम मूर्ध्नि चरणानर्पयिष्यन्ति, अधुना तु कोटिशः सकाकु प्रार्थिता अपि नेता मन्मूर्ध्नि चरणानाधित्संतीत्यतस्तदैव मम धन्यजन्मता भविष्यतीति भावः॥ ६१॥ ता गोप्यः। या गोप्यः। आप्तकामैः सत्यसंकल्पैः। योगेश्वरैः सनकादिभिः। आत्मनि हृदये। यच्चरणारविन्दम्। तापं कामसन्तापम्॥ ६२॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

अथ पूर्वोक्तरीत्या तस्य नित्यप्रेयसीनामपि तासां जन्मादिलीलाविस्मृततादृशदशानां तादृशीनामपि तस्मिन्नुद्बुद्धलोकधर्मातिक्रमिरागाणां तादृशीनामपि श्रुतिदुर्लभतापदवीभाजामनुगतिं वाञ्छन् तच्चरणरज एव तत्र साधनं निश्चिन्वन् प्रचुरतत्स्पर्शयोग्यं तत्र स्थावरजन्माप्याशास्ते। आसामिति। अहो इत्यत्यन्तदुर्लभलालसा खेदे। वृन्दावन इति। सदा तत्रैव तासां भ्रमणादिना सान्निध्यात्। गुल्मः स्तम्बः। अप्रकाण्डे स्तम्बगुल्मावित्यमरः। वृक्षादीनामनुक्तिरत्युच्चत्वेन सम्यक् तज्जोषणासिद्धेः गुल्मादीनामनुक्रमेणोक्तिर्नीचनीचतया रजसां सम्यक् प्राप्तेरुत्तराभिलाषाधिक्यात् दैन्याच्च। गुल्मादीनां यथोत्तरं न्यूनत्वमूह्यम्। परमदीनतयात्मनोऽतिनीचत्वमननेन तृणत्वमात्रप्रार्थने पर्यवसानात्। गीतमपि तासां माहात्म्यं पुनरत्यौत्सुक्येन गायति या इति। या मुकुन्दस्य पदवी तत्प्राप्त्येकोपायः पूर्वमुक्तो रूढभाव एव। मुकुन्देति मुक्तिं ददातीति निरुक्त्या तादृशभावस्य दुर्लभतां सूचयति। मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगमिति प्रेममात्रदानकार्पण्यसूचनात्। कीदृशीं श्रुतिभिः कर्त्रीभिर्विमृग्यां परमपुरुषार्थतयान्वेषणीयां किं कृत्वा भेजुः स्वजनमार्यपथञ्च हित्वा लोकमर्यादां वेदमर्यादाञ्च त्यक्त्वेत्यर्थः। तत्तु दुस्त्यजं पूर्वोक्तैः श्रीप्रभृतिभिः सर्वैरप्यत्याज्यं ते खलु सर्वलोकसर्वमहावेदपुरुषार्थसारबुद्ध्यैव भजन्तीत्यतो न तेषु रागौत्कट्यमेव कारणमित्येता एवासमोर्द्ध्वरागा इति भावः। तदेवं मुकुन्दपदवीमिति तत्रापि श्रुतिभिर्विमृग्यामिति तस्याः नित्यत्वं सर्वोत्तमत्वञ्च गम्यते। तत्रापि तास्तां भेजुरिति तं शीघ्रं ग्रहीष्यन्त्येव। गृहीतश्चासौ नात्मानं मोचयितुं शक्ष्यतीति नित्यतत्सङ्गित्वं बोध्यते। परमान्तरङ्गेणाप्युद्धवेन तासां यथाकथञ्चित् चरणसम्बन्धेन जन्मप्रार्थनात्। तत्रापि वृन्दावन एव तत्सम्भवमननात्तासां तस्य च तद्विधत्वं बोध्यते इति ज्ञेयम्॥ ६१॥ न केवलं तादृशतल्लाभसाधनस्य तादृशरासस्यैवोत्कर्षेण तासां माहात्म्यम् अपि तु भगवल्लाभस्यापीत्याह। या इति। वै प्रसिद्धं सर्वलोकचमत्कारकरं यथा स्यात्तथा। कृष्णस्य भगवतः कृष्णस्तु भगवान् स्वयमित्यादावसमोर्द्ध्वरूपत्वेन प्रसिद्धस्य तस्य तत्तादृशभावैकभाव्यं प्रपदारविन्दं गोप्यस्तपः किमचरन्नित्यादिरीत्या प्रकृष्टाविर्भावं पदारविन्दं परिरभ्य यत्ते सुजातचरणाम्बुरुहं स्तनेष्वित्यादिरीत्या परमस्नेहमये रागेणालिङ्ग्य तापं जहुः। तादृशतत्प्राप्तितः पूर्वं यः कश्चिद्भावः स सर्वोऽपि तादृशभावानां खल्वनुभवेन ताप एव तत् सर्वं तत्यजुरित्यर्थः। पदमात्रोपादानेन भक्तिव्यञ्जनया तादृशश्रीकृष्णस्य परमदुर्लभता सूचिता। तत्रापि लिट्प्रयोगेण तत्त्यागस्य स्वपरोक्षतां सूचयित्वा स्वपर्यन्तमहाभागवतागम्यत्वं सूचितम्। श्रीभगवतोऽपि ताभिः परिरम्भे रागं दर्शयति न्यस्तं तेन बलादिवार्पितम्। तव समयवैशिष्ट्यमप्याह। रासगोष्ठ्यां रासोपक्रमसभायां तस्यां परमापूर्वलीलायां प्रवर्त्तमानायामित्यर्थः। संस्पर्शनेनाङ्कताङ्घ्रिहस्तयोरिति तदानीन्तनप्रसिद्धेः। ततश्च तदानीं तासामाविरभूदित्यादित्रैलोक्यलक्ष्म्यैकपदं वपुर्दधदित्याद्यनुसारेणात्रत्यसमयान्तरादपि परमापूर्वाविर्भाववत्त्वमिति भावः। कथम्भूतम अपि श्रिया वैकुण्ठलक्ष्म्यापि आत्मनि मनस्येव सदार्चितं भावविशेषेण बोध्यमानमेव वर्त्तते। न तु तथा प्राप्तं यद्वाञ्छया श्रीर्ललनाचरत्तप इत्युक्तेः। अत एव सुतरामजादिभिर्ब्रह्मरुद्रादिभिराधिकारिकभक्तैराप्तकामैरात्मारामभक्तैर्योगेश्वरैः सर्वयोगानामीश्वरैः। शुद्धभक्तियोगिभिरपीति मनस्येवार्चितमिति पूजार्थत्वाद्वर्त्तमाने क्तः तस्मात् सर्वदुर्लभचरणारविन्दस्य तस्याभिरेव तादृशतया लब्धत्वादचिरादेवाकृष्य वशयितव्य इति भावः। यदात्मनीति चरणारविन्दमिति क्वचित् पाठः॥ ६२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं श्रीगोपीनां सर्वतः श्रैष्ठ्यं गीत्वा तासां दास्यमस्तरिच्छन्नपि सुदुर्लभं मत्वा तत्पदाम्बुजैकरजः सम्पर्कमप्याशास्ते–आसामिति। अहो! अत्यन्तदुर्लभ-लालसाखेदे। 'वृन्दावने' इति सदा तत्रैव तासां भ्रमणादिना सान्निध्यात्। गुल्मः स्तम्बः—'अप्रकाण्डे स्तम्बगुल्मौ' इत्यमरः, वृक्षादीनामनुक्तिः,—अत्युच्चत्वेन तेषां तच्चरणरेणुजोषणासिद्धेः; गुल्मादीनां यथोत्तरं न्यूनत्वमूह्यम्,—परमदीनतया आत्मनोऽतिनीचत्वमननेन तृणत्वमात्रप्रार्थने पर्य्यवसानात्। गीतमपि तासां माहात्म्यं पुनरप्यत्यौत्सुक्येन गायति—या इति। दुस्त्यजमत्याज्यम्, स्वजनं पति-पुत्रादिकम्, 'मु' मुक्तिः कुत्सिता यस्मात् प्रेमणस्तं भजमानेभ्यो ददातीति मुकुन्दो भगवान् श्रीकृष्णस्तस्य पदवीमनुवृत्तिं भेजुर्भक्त्याकुर्वन्। यद्वा, तद्दर्शनार्थं सन्ध्ययोरनुगमनाभिगमनाभ्यां

तद्गमनागमन-मार्गं भेजुरसेवन्त इति मुकुन्दे परमप्रेमासक्तिरुक्ता । ननु स्वजनस्यार्य्यपथस्य च त्यागो वेदविरुद्धः, साधुवर्गपूज्यपादाभिस्ताभिस्त्यक्तुं न युज्यते, तत्राह—श्रुतिभिर्विमृग्यामेव केवलम्, न तु प्राप्तां प्राप्यां वेत्यर्थः । अतो धर्म्मज्ञानाद्युपदेष्ट्रीणां श्रुतीनां दुर्लभतरस्य वस्तुनो लब्धये, तदधीनतानर्हत्वेन तत्तत्त्यागो युक्त एवेति । भावश्चायम्—श्रुतीनां धर्म्माद्यपेक्षास्ति, एताश्च सर्वं परित्यज्य भावविशेषेण तमेकमेवाभजन्, अतः श्रुतीनामद्यापि विमृग्यामेव; तथा श्रीब्रह्मस्तुतौ (भा० १०।१४।३४)—'अद्यापि यत्पदरजः श्रुतिमृग्यमेव' इति, एतास्तु सम्यक् प्रापुरेवेति ताभ्योऽप्यासामुत्कर्ष एवेति, अथवा (भा० ११।११।४९) 'त्वं मे भृत्यः सुहृत् सखा' इति, (भा० ११।१६।२९) 'स्वन्तु भागवतेष्वहम्' इत्यादि श्रीभगवद्वचनादिना त्वं भक्तवर्गश्रेष्ठतमोऽत एव स्वमेव साक्षाच्छ्रीभगवद्विचित्रसेवाप्रसादविशेषयोग्योऽसि, कथमेवं प्रार्थयसे ? तत्राह—या इति । स्वजनाद्यत्यागान्मम तादृशी भक्तिर्नास्त्येवेत्यर्थः । ननु गृहस्थस्य तत्तत्त्यागो वेदविरुद्धः, तत्राह—श्रुतिभिरिति । भक्तवर्गादिगुरुश्रीब्रह्मणोऽपि ज्ञानप्रदत्वादिनादिगुरूणां श्रुतीनामप्राप्ततया तदनुवर्त्तितात्यागेन श्रीमुकुन्दप्राप्त्यर्थं श्रीगोपीनामेवासामनुगत्वाय तत्पदाब्जरजःस्पर्शिजन्मैव युक्तमित्यर्थः । एवमुक्तमाहात्म्यभरस्योद्धवस्येदृक्प्रार्थनया श्रीगोपीनां महानुत्कर्षः सिद्ध एव; पश्चात् (भा० १०।१४।३४)—'तद्भूरिभाग्यमिह जन्म किमप्यटव्यां, यद्गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम्' इति श्रीब्रह्मप्रार्थनतोऽस्यायं प्रार्थनाविशेषः सोऽस्यैव तस्य सेवकत्वाद्यभावेन, तथा चतुर्मुखत्वादिना महावैलक्षण्येन व्रजे चिरं स्थातुमप्ययोग्यत्वेन यस्य कस्यापि गोकुलीयस्य पादरजोऽभिषेकार्थं तत्र तृणादिकिञ्चिज्जन्मप्राप्त्यैव कृतार्थतया तादृशप्रार्थनाया योग्यत्वात्, अस्य तु सदानिकटतरसेवकतया तथा व्रजे चिरवासादिना तत्रत्यानामनुग्रहभरसम्पत्त्या च भावविशेषोदयादतृप्त्या ततोऽप्युत्कृष्टाय मधुराय श्रीमुकुन्दभावविशेषाय श्रीगोपिकादास्यार्थं तादृशप्रार्थनस्यौचित्यादुपपद्यत एवेति दिक् ॥ ६१ ॥ ननु सर्वैरपि भक्तैः श्रीभगवदर्थं प्रायः स्वजनादयस्त्यज्यन्त एवेत्यनेन को नाम गोपीनां विशेष इत्याशंक्य परमदुर्लभस्य लाभविशेषेण माहात्म्यविशेषं साधयति– या वा इति । श्रिया महालक्ष्म्याऽर्चितं प्रेमसम्वाहनादिभिः संलालितम्, अत एव अजो ब्रह्मा, आदि-शब्दाच्छ्रीरुद्रादयः, यद्वा, अजा ब्रह्मादिसेव्या योगमाया, आदि-शब्दाद्विद्याशक्त्यादयस्ताभिरर्चितं विविधोपासनया सम्मानितम्, आप्तकामैर्मुक्तैरपि रक्तत्वादिना तापहरत्वादिना मधुररसस्रावित्वादिना च तत् । यद्वा, प्रकृष्टं सर्वथोत्कृष्टमात्मन्येवार्चितं वैष्णवकृपया मुक्ति-तुच्छताविज्ञानेन परमफलतयार्चितम्, योगो भक्तियोगस्तस्मिन्नीश्वराः समर्थाः समग्रभक्तिप्रचारनिष्ठा इत्यर्थः । तैरपि सदात्मनि सन् उत्तमो विशुद्धो य आत्मा चित्तं तस्मिन्नेवार्चितं प्रेमध्यानादिना सेवितम्, तेषामपि सर्व्वेषां प्रायस्तस्य साक्षाद्दर्शनाभावेन मनस्येवार्च्चनात् । यद्वा, सदेत्यस्य परेणान्वयः । (भा० १०।३३।२५) 'एव शशांकांशु-विराजिता निशा' इत्युक्तेः, तच्च तत्रैव व्याख्यातम् । तेन परमदौर्लभ्यमभिप्रेतम् । अर्च्चकानामजादीनामेषां यथोत्तरं श्रैष्ठ्यं प्रायो यदर्चितमित्याद्यक्रूरोक्तवदूह्यम् । एवमजाद्यर्चितत्वेन क्रमेण सर्व्वार्थप्रदत्वं परमफलत्वं परमाराध्यत्वञ्च माहात्म्यमुक्तम् । अर्चितमित्यतीतनिर्देशः सर्वांशैः परिपूर्णतयावतीर्णस्य स्वच्छन्दं गोकुले विक्रीडतोऽनन्यापेक्षस्य श्रीभगवतोऽधुनान्यैरर्च्चयितुमलभ्यत्वात् । कृष्णस्य परमानन्दघनमूर्त्तेस्तत्रापि भगवतो निजाशेषैश्वर्य्यं प्रकटयतः, यद्वा, कृष्णस्य मदीश्वरस्य भगवतः परमस्वच्छन्दस्य, तदिति बहुधा संसेवितमनुभूतरूपगुणादिमाहात्म्यं चिरविरहोदितप्रेमभरेण संस्मरति; किंवा रूपगुणादिना अनिर्व्वचनीयमित्यर्थः । प्रपदं पादाग्रमेवारविन्दं रक्तत्वादिना तापहरत्वादिना मधुररसस्रावित्वादिना च तत्, यद्वा, प्रकृष्टं सर्व्वथोत्कृष्टं पदारविन्दम्, या गोप्यो रासरूपायां गोष्ठ्यां क्रीडायाम्, यद्वा, रासे रासोपक्रमे या गोष्ठी गोपीनां सभा तस्याम्, तथाहि तत्रैव (भा० १०।३२।५)—'एका तदङ्घ्रिकमलं सन्तप्ता स्तनयोरधात्' इति, अत्र एकेत्युपलक्षणार्थम्, किंवा (भा० १०।३२।१६) 'भजतोऽनुभजन्त्येके' इत्यादिप्रश्नोत्तराभ्यां श्रीकृष्णेन सह संलापस्तस्यां स्तनेषु न्यस्तं संलग्नं यथा स्यात्तथा परिरभ्य गाढमालिङ्ग्येत्यर्थः । (भा० १०।३२।१५) –'संस्पर्शनेनांककृताङ्घ्रिहस्तयोः' इति तत्रैवोक्तत्वात् । यद्वा, प्रेमवैवश्यात् स्वयमेव भगवतैव वा नागरशेखरेण धृतं परिरभ्यस्तनोपर्य्येव निधायालिङ्ग्य तापं कामज्वरं विरहदाहं वा विशेषेण जहुः, वै–एतत् प्रसिद्धमेवेत्यर्थः । अक्रूरेणापि पथि मनोरथे (भा० १०।३८।८)—'यद्गोपिकानाम्' इत्यादिना वर्णितत्वात् । एवं तेषामात्मन्येव तस्यार्च्चनम्, आसान्तु क्रीडाविशेषे साक्षात्तादृशपरिरम्भणमपीति माहात्म्यं स्वतः सिद्धमेव । तत्र भगवतः कृष्णस्येत्यजादिभ्यः सकाशात्, प्रपदारविन्दं साक्षात्परिरभ्येत्याप्तकामेभ्यः, स्तनेष्विति मधुररसविशेषाभिव्यञ्जनाद्योगेश्वरेभ्यः, रासगोष्ठ्यामिति लक्ष्मीतोऽपीत्येवं विवेचनीयम् । एवमुद्धवस्य श्रीगोपीसंगप्रभावेण तादृशभावोत्पत्तिर्ज्ञेया, अतः सख्यमिव प्राप्तस्यास्य गूढोऽयमभिप्रायस्तथात्यक्ततापानामासां वताधुना विरहतापापनोदार्थं मया प्रयत्नः कार्य्य इति । यद्वा, कृष्णस्य श्रीव्रजेन्द्रनन्दनस्य यत् प्रपदारविन्दं तदीयासमोर्द्ध्वं सौन्दर्य्यसारसर्वस्वमवेक्ष्य मोहितया श्रिया तदुपलब्धये तप आदिभिरर्चितमिति पूर्वमेव (भा० १०।१५।८)—'गोप्योऽन्तरेण भुजयोरपि यत्स्पृहा श्रीः' इत्यत्र लिखितमेव ॥ ६२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किं तासां भाग्यं सर्वेषां दुर्लभमेव मम त्वेतावदेव प्रार्थ्यमित्याह । आसां गोपीनां चरणरेणुजुषां गुल्मलतौषधीनां मध्येऽहं किमपि स्याम्, केनापि तृणकीटादिरूपेण तच्चरणरेणुसंस्पर्शयोग्येनोद्भवेयमिति तत्र हेतुं वदंस्ता विशिनष्टि । या इति ।

या गोप्यः स्वजनमार्याणां पन्थानं च धर्मं च हित्वा श्रुतिभिर्वेदैरपि विमृग्यां मुकुन्दस्य पदवीं भेजुः मुकुन्दस्वरूपरूपगुणानुचिन्तनपरा बभूवुः इत्यर्थः ॥ ६१ ॥ पुनस्ता एव विशिनष्टि। या वा इति। यद्भगवतः श्रीकृष्णस्य चरणारविन्दं रासगोष्ठ्यां स्तनेषु न्यस्तं निहितं तत् या गोप्यः परिरभ्य तापमान्तरं बाह्यं च जहुरिति सम्बन्धः चरणारविन्दं विशिनष्टि। श्रिया लक्ष्म्यार्चितं तथाप्तकामैरजादिभिश्चतुर्मुखादिभिश्च तथा योगीश्वरैरात्मनि चित्ते चार्चितम् ॥ ६२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अहम् आसां गोपीनां चरणरेणुजुषा वृन्दावने प्ररूढानां गुल्मलतौषधीनां मध्ये गुल्मादिकं किमपि स्याम् उद्धवेयम् अहो अमीषां पूर्वजन्मार्जितपुण्यराशिः या गोप्यः त्यक्तुमशक्यं स्वजनं भर्त्रादिकम् आर्यपथं स्मार्तमार्गं नियतस्वभर्तृसङ्गविषयं हित्वा वेदशिरोभिरपि मार्गणीयां मुकुन्दपदवीं भेजुरित्यन्वयः ॥ ९ ॥ श्रियाऽजादिभिः ब्रह्मादिभिराप्तकामैः सत्यसङ्कल्पैः योगेश्वरैः सनकादिभिरपि आत्मनि हृदये निधाय यदर्चितं या गोप्यः कृष्णस्य भगवतश्चरणारविन्दं स्तनेषु न्यस्य परिरभ्य कामनिमित्तसन्तापं विजहुः आसामिति पूर्वेणान्वयः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तस्मादेतासां चरणरजः सम्बन्धोऽप्यतिदुर्लभ इत्याह—तासामित्यादि। अहो चित्रम्, आसां चरणरेणुजुषां गुल्मलतौषधीनां मध्ये वृन्दावने किमप्याहं स्याम्, यत्र जन्म लब्ध्वासां चरणरजो लभ्यते। तत्रैव गुल्मादिषु मध्ये कतमत् स्यामित्यर्थः। कुतः? इत्याह—या दुस्त्यजमित्यादि। श्रुतिभिर्विमृग्यामेव न तु लभ्याम्, मुकुन्द-पदवीं मुकुन्दप्रेम। ननु (भा० १०।३२।१३) “मनोरथान्तं श्रुतयो यथा ययुः” इति पूर्वमुक्त्वा कथमिदानीं श्रुतिभिर्मृग्यामित्युच्यते? सत्यम् श्रुतयो हि ज्ञानकाण्ड-कर्मकाण्डोपासनाकाण्डात्मिकाः। तत्रोपासनाकाण्डात्मिकास्तु तत्पदवीं गच्छन्त्येव; अन्यास्तु मृगयन्त्येवेति ॥ ६१ ॥ औत्कण्ठ्यात् पुनरेव तासां महिमानं प्रकटयन्नाह—या वै इत्यादि। श्रियार्चितम्, तथा अजादिभिस्तथाप्तकामैर्योगेश्वरैरपि, तत्रापि सदा तत्राप्यात्मनि मनसि, न तु साक्षात्तत् कृष्णस्य प्रपदारविन्दं रासगोष्ठ्यां स्तनेषु न्यस्तं कृत्वा परिरभ्य यास्तापं जहुः, तासां चरणरेणुजुषामिति पूर्वेणैवान्वयः, तस्मात् (६१ तम-श्लो०) “वृन्दावने किमपि गुल्मलतौषधीनाम्’ इति साधूक्तम् ॥ ६२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

औत्कण्ठ्यात् पुनः पुनर्महिमानं वक्ति-या वै इत्यादि ॥ ६२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्मादासां भावे परमदुर्ल्लभे मनोरथस्याप्यनौचित्यं वांछन्ति यद्भवभियो मुनयो वयञ्चेति यन्मयोक्तं तदविचारादेव। साम्प्रतन्तु सविचारमाशासे एतदेव मे भूयादित्याह। आसामिति। इमा यासामुपरि चरणौ विन्यस्यन्ति तासामतिक्षुद्रजातीनां गुल्मलतौषिधीनां मध्ये किमप्यहं स्यां ननु भजनस्य सर्वोत्कृष्टकाष्ठा का खल्वेतासु वर्त्तते। यामेवालक्ष्य त्वमासामेव चरणरेणून् वांछसि नतु लक्ष्म्यादीनामपीत्यत आह। या इत्यादि। लोकधर्मधैर्यलज्जामर्यादादित्रोटनपूर्वकं महारागेण भजनमेवं मया न क्वापि दृष्टमत एव प्रतिरजनि यदा-यदा स्वकुलधर्मादिमर्यादा वज्रशलाका अपि महारागवलेन त्रोटयित्वा कृष्णमभिसरिष्यन्ति तदा कृष्णपार्श्वं प्रतिगमने वर्त्मावर्त्मविचारो नासामिति तृणादिरूपस्य मम मूर्ध्नि चरणावर्पयिष्यन्ति अधुना तु कोटिशः सकाकु प्रार्थिता अपि नैता मन्मूर्ध्नि चरणान्नाधित्सन्तीत्यतस्तदेव मम धन्यजन्मता भविष्यतीति भावः ॥ ६१ ॥ पुनरपि तासां लक्ष्म्यादिदुर्लभवस्तुलाभान्माहात्म्यमाह। या वै या एव स्तनेषु न्यस्तं कृष्णस्य चरणारविन्दं परिरभ्य तापं जहुः यत् खलु श्रिया लक्ष्म्या अजादिभिश्च आत्मनि मनस्येव अर्चितं न तु साक्षात् स्प्रष्टुं शक्यमिति भावः यद्वांछया श्रीर्ललनाचरत्तप इत्यादेः रासगोष्ठ्यां राससभायाम् ॥ ६२ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

एवं तासामुत्कर्षं वर्णयित्वा तत्पदमयोग्यत्वादप्रार्थयन्स्वायोग्यां पदवीं प्रार्थयति। आसामिति। वृन्दावनगुल्मलतौषधीनां मध्ये किमपि अहं स्यां तत्राप्यासां चरणरेणुजुषां एतावतैव मम कृतार्थता भविष्यतीति भावः। एतावदप्यतिदुर्लभमिति बोधनाय तासां माहात्म्यमनुवदति। याः दुस्त्यजं स्वजनं पतिपुत्रादिकम् आर्यपदं कीर्तिपदं पतिशुश्रूषणादिरूपं शिष्टमार्गं तत्साध्यं परलोकसुखं च हित्वा मुकुन्दस्य मोक्षप्रदस्य भगवतः पदवीं स्वरूपं भेजुः स्वरूपं भेजुः आपुर्यथा भगवान् श्रवणादिना मोक्षप्रदस्तथैता अपि सम्पन्ना इति द्योतनाय मुकुन्दपदवीमित्युक्तं सा च पदवी परमविलक्षणत्वात्केनापि न लब्धेत्याशयेनाह। श्रुतिभिर्विमृग्यां श्रुतिभिरपि परमात्मस्वरूपं दूरत एवान्विष्यते यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्यादिश्रुतेस्तथा च श्रुतिभिरपि या विमृग्या तत्रान्येषां का गणनेति भावः ॥ ६१ ॥ किञ्चान्यदपि यत्ताभिर्लब्धं न तत्केनापीत्याह। या इति। याः व्रजाङ्गना रासगोष्ठ्यां भगवतश्चरणारविन्दं परिरभ्य संन्यस्य तस्याप्राप्तिजनितं मनस्तापं जहुः तत्यजुः तदालिङ्गनं च तासां भगवदनुग्रहादेव

सम्पन्नमित्याह । न्यस्तमिति । तद्विरहतत्प्राप्त्याशावर्जनादिजनितपरिश्रमादिना सन्तप्तेषु भगवतानुग्रहात्तत्तापनिवृत्त्यर्थं न्यस्तं तदपि भगवतः समग्रैश्वर्यादिषडगुणसम्पन्नस्य चरणन्यासमात्रेण भगवत्तापादकस्य तत्रापि कृष्णस्य तदर्थमेव गृहीतकृष्णविग्रहस्य कीदृशं तच्चरणारविन्दं सर्वोत्तमया श्रियापि समर्चितमेव न तु यथेष्टं विनियुक्तं तथा ब्रह्मादिभिराप्तकामैरितरैश्च योगेश्वरैर्वशीकृतसर्वसिद्धिभिरपि यदात्मनि मनस्येव ध्यानादिना समर्चितं तथा चैवंविधं स्वपदारविन्दं भगवता तत्स्तनेषु न्यस्तमिति किं वक्तव्यं तासां माहात्म्यमित्यर्थः । तत्रापि स्तनेष्विति बहुवचनात् चरणारविन्दमित्येकवचनात्तत्तापनिवृत्त्यर्थं परमत्वरयाऽसकृद्यातस्तनेषु तत्स्थापनजनितपरिश्रमो भगवता न गणित इत्याहो भगवतस्तदनुग्राहकतावेश इति ध्वनितम् ॥ ६२ ॥

गूढार्थदीपिनी

उ अहो अङ्गे भगवद्वक्षसि नितान्तरते श्रियोऽपि नायं प्रसादः नलिनस्येव गन्धो रुक् कान्तिश्च यासां स्वर्योषितामपि न अन्याः कुतः । कः । यः व्रजवल्लवीनाम् उदगात् प्रकटोऽभूत् । अस्य भुजदण्डाभ्यां गृहीतकण्ठेन लब्ध आशिषो याभिस्तासाम् ॥ ६१ ॥ आसां गोपीनां चरणरेणुस्पर्शकतृणां गुल्मादीनां मध्ये किमति तृणादिकं स्यां भवेयम् । आर्यपथं वेदमार्गम् । 'नैका द्वौ पती विन्देत' इति श्रुत्युक्तं । पदवीं लोकं भेजुः प्रापुः ॥ ६२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आसां व्रजसुन्दरीणां चरणरेणुजुषां गुल्मादीनां मध्ये यत् किमपि वृन्दावने अहं स्यां भवेयं कथं भूतानां या इत्यादि अहो याः दुस्त्यजं स्वजनम् आर्य्यपथमार्य्याणां बुभुक्षुशिष्टानां पन्थानं च हित्वा श्रुतिभिर्विमृग्यां मुकुन्दस्य पदवीं भेजुः—

यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ।
अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥

इत्याद्युक्तरीत्या मुमुक्षुपथं जगृहुरित्यर्थः ॥ ६१ ॥ तासां पुनः कथंभूतानां या इत्यादि यत् कृष्णस्य चरणारविन्दं श्रिया अजो ब्रह्मा तदादिभिश्च अर्चित योगेश्वरैः ज्ञानभक्तियोगनिष्ठैः आत्मनि हृदि अर्चितम् तयाः स्तनेषु न्यस्तं परिरभ्य तापं जहुस्तासाम् ॥ ६२ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

नन्वीर्ष्यया तासामवस्थां श्रुत्वा किमीश्वर एतदेव प्रार्थ्यते तथा सति स्वाभिलषितत्वात् न वस्तुनिरूपणे तात्पर्यमिति नोत्कर्षः सिद्ध्येदित्याशङ्क्याह । आसामहो इति । अहमासां दासानुदासत्वेऽपि न योग्यः कथमेतद्भावयिष्यामि "अयोग्यमिच्छन् पुरुषः पतत्येव न संशय" इति आसां चरणरेणुजुषां गुल्मलतौषधीनां मध्ये किमप्यहं स्याम् आदौ जङ्गमत्वाधिकारो नास्ति तथा सति क्रियया ततोपगमनं स्यात् व्यवहारयोग्ये तु समतया भावः स्यात्तदप्ययोग्यं स्थावरत्वे वृक्षादिभावे चिरकालावस्थितौ न शीघ्रं भगवत्प्राप्तिः स्यात् अतो यो यस्य चरणरजो वाञ्छति स तद्भवति तदीयो वा भवतीति वा अल्पायुः चरणरजः प्राप्तियोग्यं जन्माभिलषितम् अतो गुल्मलतौषधीनां तामसराजससात्त्विकानां तत्रापि रजःसम्बन्धयोग्यानां न तु तुलसीकुन्दजातीव्रीह्यादिषु तेषु हस्तसम्बन्धः तदीयानां भगवत्सम्बन्धशिरःसम्बन्धश्च भवेदिति व्याजेनोत्कर्षप्रार्थनं भवेत वृन्दावनं हि परमोत्कर्षोपादकं भक्तिजनकञ्च अहो इत्याश्चर्ये न ह्येतदपि भविष्यतीति साधनप्रकारेणैव जात उत्कर्षः फलपर्यवसायी भवति नान्यथा किमपीत्यादरे नात्र सत्त्वाद्युत्कर्षोऽभिप्रेतः रजःसम्बन्ध एवोत्कर्षजनक इति तस्य तुल्यत्वात् नन्वेतासां रजसा क्रमेणैतद्भाव एव भवेत् न तु भगवद्भावः ततः किमित्येवं प्रार्थ्यत इत्याशङ्क्याह । या दुस्त्यजमिति । भगवद्भावः आसां सुलभः न त्वन्यत्र तथैवोपपादितत्वात् दृष्टत्वाच्च तदसम्भावितमिति मत्वा पुनस्तासां धर्मानतिवदति । दुस्त्यजाः स्वजनाः पुत्रादयः तत्रापि दुस्त्यजः आर्यमार्गः "संभावितस्य चा कीर्त्तिर्मरणादतिरिच्यत" इति अयमार्यमार्गो लौकिकः यादृशास्ते स्वजनाः वस्तुतस्तु भगवानेव स्वजनः आर्यमार्गश्च अन्यथा फले व्यभिचारश्च एवं त्यक्त्वा चकाराद्भगवदुपदेशं च अन्यथा बहिः संवेदने स्वास्थ्यं भवेत् पश्चान्मोक्षदातुः पदवीं भेजुः यो हि यन्मार्गे गच्छति स तावति धर्मे तत्तुल्यो भवति तत एता अपि मोक्षदात्र्यो जाताः तथा वयमपि भविष्याम इति भगवद्भजनापेक्षयाप्येतदुत्तममिति भावः । नन्वेवं सति ब्रह्मभाववदयमपि कथं वेदेनोक्तस्तत्राह । श्रुतिभिर्विमृग्यामिति श्रुतयोऽपि वक्तुं विचारयन्ति परमिदमित्थन्तया वक्तुं न जानन्ति दृष्टान्तापरिज्ञानात् इदानीमेव हि गोपिकाः भगवता दृष्टान्तीकृताः भगवदभिप्रायः श्रुतीनामपि ज्ञातुमशक्य इति न सर्वज्ञत्वादिनापि दूषणं तदुपपादितं व्यासाद्यैरीश्वरेहाज्ञैरिति इममेवार्थमुररीकृत्य यस्यामतं तस्य मतमित्यादिश्रुतयः अज्ञानमेव तुष्टुवुः तथापि स्वार्थमज्ञाने विशेषजिज्ञासाया अवश्यं भावात्स्वभावसामर्थ्यमवश्यं मन्यमानाः मृगयन्त्येव तत्रापि सर्वोत्कृष्टत्वाद्विशेषेण मृग्यम् ॥ ६१ ॥ किं च यत्सर्वेषां पूज्यमाराध्यं तत्तासां तापहारकत्वेन नियुक्तं तापि हि पूज्यस्पर्शोऽपि निषिद्धः पूजार्थमपि तत्राप्यङ्गभावं प्राप्त इति विशेषत उत्कर्षमाह । या वै श्रियार्चितमिति । सर्वत्र फलरूपा लक्ष्मीः तयापीष्टसिद्ध्यर्थम् अर्चितं न तु यथेष्टं विनियोक्तुं शक्यं किं च अजादयो ब्रह्मादयो सनकादयश्चाप्तकामाः योगेश्वराः सिद्धादयः ये सर्वं कर्तुं समर्थाः सर्वोऽपि पुरुषार्थः प्राप्तो वशीकृतः सर्वसाधनाश्च तेऽपि

ततोऽप्युत्तमफलसिद्ध्यर्थं तच्चरणमानर्चुर्बहिरवस्थायाम् अर्चनं भविष्यतीत्याशङ्क्य विशेषमाह । यदात्मनीति । यदात्मन्यर्पितं ध्यानं कृत्वापि पूजितमित्यर्थः । तादृशमपि कृष्णस्य सदानन्दस्य फलरूपस्य तत्रापि तत्प्रसिद्ध स्वतन्त्रफलदातृत्वं तत्र भक्तिमार्गप्रवर्त्तकं भगवतः सर्व समर्थस्य एवं स्वतः सम्बन्धतोऽप्युत्कृष्टायां रासगोष्ठ्यां कौतुकक्रीडायां स्वयं स्वेच्छया नर्त्तनं कृत्वा श्रान्ताः सत्यः कमलादिकमिव व्यजनवायुमिव चन्दनमिव तन्मन्यमानाः स्तनेषु न्यस्य तापं जहुः धाष्टर्यात् अयुक्तमेव तथा कृतवत्य इति शङ्कानिवृत्यर्थं भगवतैव न्यस्तमित्युक्तं भगवानप्यत्यन्तवशः तासां शीघ्रं तापापनोदनार्थं स्वयमपि शीघ्रं तत्स्तनेषु स्थापितवान् अत आह । न्यस्तमिति ततस्तत्परिरभ्य स्वाधीनं कृत्वा तापं जहुरिति प्रमाणतः प्रमेयतश्च ता उत्कृष्टा इत्यर्थः । अन्यार्थमेवैषा प्रशंसेत्याशङ्क्य पूर्वमपि नमस्कारार्थमेतदारब्धमिति प्रमाणतः प्रमेयतश्च ता उत्कृष्टा इत्यर्थः ।। ६२ ।।

श्रीसुबोधिनी–सारः

आस्ताम् आसां महिमा ममैतदिष्टमित्याह । आसां गोपीनां चरणरेणुजुषां पादरजः सेवमानानां मध्ये किमप्यहं स्यां भवेयं गुल्मलतौषधीनां स्थावराणां मध्ये वा किमहं स्यामित्याशंसा दुस्त्यजमार्याणां पथं मार्गं धर्मं स्वजनं च हित्वा त्यक्त्वा श्रुतिभिर्विमृग्यामन्वेष्यां मुकुन्दस्य पदवीं या भेजुः ।। ६१ ।। श्रियाऽर्चितम् अजादिभिर्ब्रह्मादिभिराप्तकामैर्योगेश्वरैरपि यदात्मनि अर्चितं कृष्णस्य भगवतश्चरणारविन्दं स्तनेषु न्यस्तं स्थापितं तत् परिरभ्यालिङ्ग्य तापं विजहुः तत्यजुर्या वै एव ।। ६२ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'अन्येऽपि भक्ता भगवत्प्रसादं लेभिरे, परन्त्वयं गोपीषु भगवत्प्रसादस्तु अत्यपूर्वं' इत्याह—नायमिति । रासोत्सवे रासक्रीडायामस्य कृष्णस्य भुजदण्डाभ्यां गृहीत आलिङ्गितः कण्ठस्तेन लब्धा आशिषो मनोरथा याभिस्तासां व्रजसुन्दरीणां गोपीनां योऽयं भगवत्प्रसादः उदगात् आविर्बभूव सोऽयं प्रसादः स्वर्योषितां नाभूत् । तासां प्रसादयोग्यतायां सौन्दर्याद्यतिशये हेतुं सूचयति—नलिनस्येव गन्धः, रुक् कान्तिश्च यासां तासामिति । किं बहु वक्तव्यम् ? अङ्गे वक्षसि नितान्तरतेः एकान्तरतिमत्याः श्रियो लक्ष्म्या अप्ययं प्रसादो नाभूत्, अन्याः स्त्रियस्तु कुत एवं प्रसादविषयाः स्युरित्यन्वयः । 'आश्चर्यं भगवदिच्छाया' इत्याह—उ इति ।।६१।। तासां भाग्यातिशयं मत्वा स्वयोग्यं प्रार्थयते—आसामिति । आसां गोपीनां चरणरेणुजुषां गुल्मलतौषधीनां मध्येऽहं किमपि वृन्दावने स्यां भवेयम् । 'एतदपि यदि मम स्यात्तदा दुर्लभत्वादाश्चर्यमेव' इत्याह—अहो इति । ननु 'कथमासां चरणरेणुदुर्लभ' इत्यपेक्षायां ता विशिनष्टि—या इति । या गोप्यः दुस्त्यजं स्वजनं पतिपुत्रादिरूपमार्याणां पन्थानं च हित्वा श्रुतिभिर्विमृग्यामतिदुर्लभां मुकुन्दस्य मुक्तिप्रदस्य श्रीकृष्णस्य पदवीं प्राप्तिमार्गं भेजुः कृष्णैकचिन्तनपरा बभूवुरित्यर्थः । अनेन लौकिकालौकिकसर्वव्यवहारपरित्यागेन "यदा यस्यानुगृह्णाति भगवानात्मभावितः । स जहाति मतिं लोके वेदे च परिनिष्ठिताम्" इत्युक्तपूर्वो भगवदनुग्रहस्तासु दर्शितः ।। ६२ ।।

अन्वितार्थप्रकाशिका

नायमिति ।। रासोत्सवे रासक्रीडायामस्य कृष्णस्य भुजदण्डाभ्यां गृहीत आलिङ्गितः कण्ठस्तेन लब्धा आशिषो मनोरथा याभिस्तासां व्रजसुन्दरीणां गोपीनां योऽयं भगवत्प्रसादः उदगात् आविर्बभूव । सोऽयं प्रसादः नलिनस्येव गन्धो रुक् कान्तिश्च यासां तासां स्वर्योषितामपि न उदगात् किं बहु वक्तव्यम् । उ आश्चर्ये । वक्षसि नितान्तरतेः एकान्तरतिमत्याः श्रियो लक्ष्म्या अप्ययं प्रसादो नोदगात् अन्याः स्त्रियस्तु कुत एवं प्रसादविषयाः स्युः ।। ६१ ।। आसामिति ।। अहो आसां गोपीनां चरणरेणुजुषां गुल्मलतौषधीनां मध्येऽहं किमपि वृन्दाषने स्यां भवेयम् । याः गोप्यः दुस्त्यजं स्वजनं पतिपुत्रादिरूपमार्याणां पन्थानं धर्मं च हित्वा श्रुतिभिर्विमृग्यामतिदुर्लभां मुकुन्दस्य पदवीं प्राप्तिमार्गं भेजुः कृष्णैकचिन्तनपरा बभूवुः ।। ६२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नोस्माकं कायो देहप्रह्वणं नमस्कारः कृष्णनाम्नां अभिधायिनीः अभिधायिन्य ।। ६१ ।। क्वापि कुत्रापि नोस्माकं कृष्णेरतिर्भवेत् ।। ६२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं चास्तां तावद्गोपीनां भाग्यं मम त्वेतावत् प्रार्थनीयमित्याह । आसामिति । या गोप्यः, दुस्त्यजं स्वजनं, आर्यपथमार्याणां पन्थानं धर्मं च हित्वा, श्रुतिभिर्वेदैरपि, विमृग्यां गवेषणीयां, मुकुन्दपदवीं भेजुः, मुकुन्दस्वरूपगुणानुचिन्तनपरा बभूवुरित्यर्थः । अतः, आसां गोपीनां, चरणरेणुजुषां पादरजःसेविनां, वृन्दावने वर्त्तमानानामिति शेषः । गुल्मलतौषधीनां मध्ये, अहं किमपि, स्याम् । केनापि तृणकीटादिरूपेण तच्चरणरेणुसंस्पर्शयोग्यो भवेयमिति आशंसां करोमीत्यर्थः ।। ६१ ।। पुनरपि ता एव विशिनष्टि । या वा इति । यत् श्रिया लक्ष्म्या, अर्चितं पूजितं, तथा आप्तकामैः सत्यसंकल्पैः, अजादिभिर्ब्रह्मादिभिः, तथा योगीश्वरैः सनकादिभिरपि, आत्मनि स्वचित्ते, अर्चितं, रासगोष्ठ्यां स्तनेषु, न्यस्तं निहितं, तत् भगवतः कृष्णस्य, चरणारविन्दं, याः परिरभ्य, तापमान्तरं बाह्यं च परितापं, वै निश्चितमेव, विजहुः ।। ६२ ।।

श्रीहरिसूरिविरचितं भक्तिरसायनम्

नायं श्रिय इति : १०.४७.६१.

> सन्तु स्त्रियोऽप्यतितरामपराः सुरूपाः कामं रमाऽपि चरमायतनं सुखस्य।
> श्रीकृष्णहार्दपद - मुख्यसुखानुभूतेरेताः परावधिपदं त्वपरा न कापि ॥ १७९ ॥
> यच्चिन्तनाय मुनयः सुचिरं यतन्ते धात्रादयश्च विबुधाः स हि पद्मनाभः।
> यच्चिन्तनाञ्चितमना मनुते कृतार्थमात्मानमित्यनुपमत्व - मसीममासाम् ॥ १८० ॥

आसामहो इति : १०.४७.६२.

> स्फुटं निखिलयादवेष्वहमिहैक एव प्रियः प्रभोरिति जगत्यभूत् स्फुटतरोपकाराद्यतः।
> सुपार्षदवरान्तरैरपि न वेद्यमद्यापि यच्चरित्रसुखमुत्कटं स्फुटमसीममासीन्मम ॥ १८१ ॥
> गेयं हर्यभिधानमेव सततं ध्येयं च रूपं प्रभोर्देयं विप्रमुखेऽन्नमुत्सुकधिया पेयं च गीतामृतम्।
> जेयं शत्रुबलं सदैव सुकृतं चेयं वचोऽन्यासुखंहेयं नेयमशेषमायुरिह च स्थेयं समाजे सताम् ॥ १८२ ॥
> भगवद्भक्तपद्रेणुस्पर्शे तृणजनुर्वरम्। तदभावे न वैरञ्चमपीत्यूचे स तत्क्षमम् ॥ १८३ ॥

कृष्णप्रिया

शुकदेवजी ने कहा कि हे अङ्ग राजन् श्री उद्धवजी कह रहे हैं कि- रास महोत्सव में अनेक स्वरूप धारण कर समस्त गोपियों के कण्ठ में अपने करकमल को पधारकर विविध प्रकार के गान नृत्यादि क्रीडाओं से नाथ ने जो अनुपम अनुग्रह किया है वैसा प्रसाद-अनुग्रह निरन्तर सर्वप्रकार के स्नेह से अनुरक्त एवं सेवा शील भगवती श्रीदेवी ने नहीं प्राप्त किया एवं इन्द्र उपेन्द्रादि देवों के स्वरूप से कमलगन्धा कोमलाङ्गी लावण्यमयी स्वर्ग की देवाङ्गनाओं ने कभी नहीं पाया ॥६१॥ उद्धवजी कहते हैं कि इन गोपीजन के दासानुदास पद के लिए मैं योग्य नहीं हूँ। एक अत्यंत आश्चर्य की गाथा है कि बड़े बड़े देवगण भी श्रीवृन्दावन के तरुवर बनकर लता औषधियों के स्वरूप लेकर अपने गुच्छक आदि रूपों से इन व्रज गोपियों के चरणरज का सेवन कर रहे हैं कर कमल का स्पर्श तो दुर्लभ है तो मैं भी इनके चरणरज की प्राप्ति की कामना से इस वृन्दावन में इन गुच्छक-लता औषधियों में से एक कुछ भी होकर यहाँ उत्पन्न हो जाऊँ। इन गोपियों का यह महत्व है कि इन्होंने सर्वथा दुस्त्यज स्वजनों का त्याग किया, पति पुत्र परिवार का त्याग किया, एवं दुस्त्यज आर्य पथ का भी त्याग किया और भगवती श्रुतियों भी जिस पूर्ण पुरुषोत्तम श्रीकृष्ण की सतत खोजकर रही है वैसे दुर्लभ मुकुन्द भगवान् की पदवी को प्राप्त कर लिया है ॥ ६२ ॥

> या वै श्रियार्चितमजादिभिराप्तकामैर्योगेश्वरैरपि यदात्मनि रासगोष्ठ्याम्।
> कृष्णस्य तद् भगवतश्चरणारविन्दं [1]न्यस्तं स्तनेषु विजहुः परिरभ्य तापम् ॥ ६३ ॥
> वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः। यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥ ६४ ॥

कर्दमक्षमा

अन्वयः—यत् वै, श्रिया, अर्चितम्, आप्तकामैः, अजादिभिः, अर्चितम्, आप्तकामैः, योगेश्वरैः अपि, आत्मनि, अर्चितम्, तद्, भगवतः, कृष्णस्य, चरणारविन्दम्, वै, स्तनेषु, न्यस्तम्, याः, परिरभ्य, तापम्, विजहुः, ॥ ६३ ॥ नन्दव्रजस्त्रीणाम्, पादरेणुम्, अभीक्ष्णशः, वन्दे, यासाम्, हरिकथोद्गीतम्, भुवनत्रयम्, पुनाति ॥ ६४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं महत्त्वं प्रतिपाद्य नमस्करोति। वंद इति ॥ ६३ ॥ अनुज्ञाप्यानुज्ञां याचित्वा आमंत्र्य पृष्ट्वा ॥ ६४-६५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमुक्तरीत्या। यासां नन्दव्रजस्त्रीणाम्। हरिकथैवोद्गीतमुच्चैर्गानं भुवनत्रयं पुनाति स्मरणादिना देवाश्शेषो मनुष्याश्च यल्लीनां गायन्तीति भावः। तस्मादास्तां ममातिक्षुद्रस्य साक्षान्नमस्कारसाहसमेतत्स जातीयत्वादन्यासामपि पादरेणुमेव नमस्करोमि। न च साक्षादेव ता इति सकंपसगद्गदं चाटुमाह–वन्द इति। यासामिति–याभिः कर्त्रीभिरित्यर्थः। हरिकथाया

---

[1] न्यस्य–विज.।

उद्गानम् 'उद्गायतीनामरविंदलोचनम' इत्येतत्प्रकारम् । यद्वा-यत्संबंधिहरिकथाया उद्गानं तत्तन्महानुभावैरनुगानं सम्बन्धपरम्परया भुवनत्रयमूर्द्ध्वाधोमध्यलोकं सर्वमपि पुनाति एतद्विपरीतोदासीनसर्वभावापहारतः शोधयति 'मद्भक्तियुक्तो भुवनं पुनाति' इतिवद्विद्यामालिन्यादिति ॥ ६३ ॥ अथ प्रार्थनोत्तरम् । यास्यन् , मथुरामिति शेषः । अथ कालान्तर एव । चः समुच्चये । आज्ञाप्य तेषां चित्तसमाधानपूर्वकमाज्ञां प्रार्थ्य । गोप्यादिनिर्देशक्रमोऽयं तदादीनां प्रेम्णो यथापूर्वं प्रकर्षमनुभूय तत्क्रमादेवानुज्ञा प्रार्थितेति व्यनक्ति, पूर्वोक्तयुक्त्या सांत्वनायां मुख्यत्वात् । गोपांस्त्वामन्त्र्य यथायथं व्रजेश्वराद्यनुज्ञाश्रावणसहितं सबोध्य-हे अमुक तेषामनुज्ञा जाता सम्प्रति गच्छाम इति जनं संतोष्येत्यर्थः । दाशार्ह इति-तत्कुलोद्भवत्वेनैव नीतिज्ञः । किं पुनः सः, वैशिष्ट्येनेति भावः ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तस्मादहो आस्तामतिमुग्धस्य ममासां साक्षान्नमस्कारसाहसः एतत् सजातीयत्वात् अन्यासामपि पादरेणुमेव नमस्करवाणि न च साक्षादेव ता इति सकम्पगद्गदं चाटुमाह । वन्द इति । यासामिति याभिः कर्त्रीभिरित्यर्थः । हरिकथाया उद्गानम् उद्गायतीनामरविन्दलोचनमित्येतत्प्रकारं यद्वा । यत्सम्बन्धिहरिकथाया उद्गानं तत्तन्महानुभावैरुच्चैर्गानं सम्बन्धपरम्परया भुवनत्रयम् ऊर्द्ध्वाधोमध्यलोकं सर्वमपि पुनाति । एतद्विपरीतोदासीनसर्वभावापसारतः शोधयति मद्भक्तियुक्तो भुवनं पुनातीतिवत् प्रकरणेऽस्मिन् श्रीवेदव्यासमहावक्तृणां तात्पर्यमिदम् । सर्वभागवतानां मध्ये श्रीकृष्णसम्बन्धिनः खलु परमश्रेष्ठास्तस्यैव स्वयं भगवत्त्वात् । तत्रापि तल्लीलापरिकरा एवान्तरङ्गाः अन्येषां तदनुगतत्वात् तेष्वपि श्रीमानुद्धवः त्वन्तु भागवतेष्वहं भक्तमेकान्तिनं क्वचित् । अहं भर्त्तु रहस्करः कृष्णस्य दयितः सखा नोद्धवोऽण्वपि मन्न्यून इत्यादिदर्शनात्तस्य चेदृशी तद्भावस्पृहा तास्वादरो दैन्यञ्च श्रूयते न जातु पट्टमहिषीष्वपीति केन वा तासाञ्चचरणारविन्दं नानुगमनीयं तत्रापि श्रीराधाया इति ॥ ६३ ॥

तं श्रीमदुद्धवं वन्दे कृष्णप्रेष्ठवरोऽपि यः । गोपीपादाब्जधूलिस्पृक् तृणजन्माप्ययाचत ॥

अथ कालान्तर एव च शब्दः समुच्चये । अनुज्ञाप्य तेषां चित्तसमाधनपूर्वकमाज्ञां प्रार्थयित्वा । गोप्यादिनिर्देशक्रमोऽयं तदादीनां प्रेम्णो यथापूर्वप्रकर्षमनुभूय तत्क्रमादेवानुज्ञा प्रार्थितेति व्यनक्ति । पूर्वोक्तयुक्त्या सान्त्वनाया मुख्यत्वात् गोपांस्त्वामन्त्र्य यथाऽर्थं श्रीव्रजेश्वराद्यनुज्ञाश्रवणसहितं सम्बोध्य हे अमुक ! तेषामाज्ञा जातास्ति सम्प्रति गच्छाम इति प्रतिजनं सम्भाष्येत्यर्थः । दाशार्ह इति तत्कुलोद्भवत्वेनैव सर्वनीतिज्ञः किं पुनः स वैशिष्ट्येनेति भावः ॥ ६४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतः साक्षाच्छ्रीभगवत्तादृशसेवापि मे दूरे तावदास्तामीदृशभावसिद्धये श्रीगोपीरेवैताः प्रणमामीति । यद्वा, आसामीदृशमाहात्म्यगाने मम का शक्तिर्योग्यता वा, केवलं यत्र तत्र निपतितमासां पादाब्जरज एवैकं नमामि, इत्यैवमेव सदा वन्द इत्याह—वन्द इति । नन्द-व्रजस्य स्त्रीणामिति किं पुनरासां श्रीभगवत्प्रियतमानाम् । आसां सम्बन्धेन सर्व्वासामपि नन्दव्रजवर्त्तिस्त्रीजातीनामित्यर्थः । यासां हरेः सर्व्वथा सर्व्वमनोहरस्य श्रीभगवतः कथाया उद्गीतमुच्चैर्गानं भुवनत्रयमूर्द्ध्वाधोमध्यलोकान् जगदेव पुनाति मुमुक्षादि-सर्व्वमलतः शोधयति; तथा च प्रागुक्तम् (भा० १०।४६।४६)—'उद्गायतीनाम्' इत्यादि; यद्वा, हरिकथावदुद्गीतं यासामुच्चैर्माहात्म्यगानं माहात्म्यनिबद्धमुच्चैर्गीतं वा; यद्वा, यासामुद्गीतमेव हरिकथा इत्यासां माहात्म्यगानमेव मम कृत्यम् । अत्र चिरवासादिना श्रीयदुकुलाद्यपराधतोऽपि न मे किञ्चिद्भयमिति गूढो भावः । इदं गानं वन्दनञ्च तासां साक्षादेव ज्ञेयम् । ततश्च नन्दव्रजस्त्रीणामिति प्रत्यक्षत्वेऽपि परोक्षवदुक्तिः,—तेनैव शब्देन तासां माहात्म्यभरबोधनात् , किंवा गौरवविशेषेण, तथैव वाच्यत्वात् । अतएव युर्यमित्याद्यनिर्देशः । यद्वा, परमलज्जादिगुणवतीनां तासां माहात्म्यस्तुत्यसहिष्णुतया परोक्षमेवेति । ततश्च एता इति, आसामिति च नैकट्येन प्रस्तुतत्वेन वा; किंवा सदा हृदि वर्त्तमानत्वेन प्रत्यक्षत्वादिवेति ॥

तं श्रीमदुद्धवं वन्दे कृष्ण-भक्तवरोऽपि यः । गोपीपादाब्जधूलीस्पृक्तृणजन्मापि याचते ॥ ६३ ॥

अथ कालान्तरे; अप्यर्थे एव-शब्दः, च-शब्दः समुच्चये । चकारात्तद्दासदासीगवादींश्चामन्त्र्य गोप्यादीनां यथोत्तरं श्रीभगवत्प्रेमतारतम्येन तत्तदनुज्ञादिप्रार्थनेऽपि तत्तत्क्रमेण निर्देशः, अतएव गोपानामामन्त्रणमेव । दाशार्हो यदुकुलोद्भव इति यादवानां हितार्थमिति भावः । अन्यथा सर्व्वोपकारपरसम्मन्त्र्यभावेन तेषां दुःखापत्तिः । आरुरुहे— आरोढुमुद्यतः ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं व्रजस्त्रीणां पूज्यतां प्रतिपाद्य नमस्करोति । वन्द इति । अभीक्ष्णशः पुनः पुनर्नन्दव्रजस्थस्त्रीणां पादरजो वन्दे सेवे कथं भूतानां यासां नन्दव्रजस्त्रीणां हरिकथोद्गीतमिति भावे क्तः हरिकथोद्गानं लोकत्रयं पुनाति तथाभूतानाम् ॥ ६३ ॥ अथानन्तरमनुज्ञाप्यानुज्ञां यचित्वा आमन्त्र्य पृष्ट्वा दाशार्ह उद्धवः यास्यन् ''लक्षणहेत्वो''रिति शत्रादेशः यातुं रथमारुरुहे ॥ ६४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वन्दे स्तौभि ॥ ११–१३ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तत्कारणञ्चासामेव प्रसादस्तेन पुनः पुनरासामेव चरणरजो वन्दे, यावत् प्रसादो भवतीत्याह–वन्दे इत्यादि । अहर्निशमिति भक्त्यातिशय-प्रकटनार्थम् । यासां गीतं गानं कीर्त्तनमिति यावत् , भुवनत्रयं पुनाति । कीदृशम् ? हरिकथोत् हरिकथामुदन्तीति तथा, उन्दी क्लेदने क्विपि रूपम् । हरिकथामप्यर्द्रीकरोति यत्कथा सम्बन्धेन हरिकथा सरसीभवति । अन्यथा येन तेन कृतमपि हरिकथोद्गीतं भुवनत्रय पावित्र्यजनकम् । तत्र भगवतीनां को महिमेति ॥ ६३ ॥ अथेत्यादि । आदरातिशयाद्गोपीनामेवादौ अनुज्ञाग्रहणम् , पश्चाद्यशोदायाः पश्चान्नन्दस्य, पश्चाद्गोपानामित्यत्रक्रमः ॥ ६४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अतः परं पुनरपि वन्दते—वन्दे नन्देत्यादि । हरिकथया सह उद्गीतमुद्गानं 'भावेक्तः' हरिकथा यत्र-यत्र श्रूयते तत्र तत्रैव तासामपीत्यर्थः ॥ ६३ ॥ अथेत्यादि । आदरातिशयात् गोपीनामेवादावनुज्ञा ॥ ६४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवं महत्त्वं प्रतिपाद्य प्रणमति । वन्द इति । पादरेणुमभीक्ष्णं तत्रापि शस्प्रत्ययेन प्रतिक्षणमेव न तु त्रिकालं पञ्चकालं वेत्यर्थः यावदनायासेन तत्प्राप्त्यनुकूलतृणादिजन्मभाग्यं मे नाभूदिति भावः । यासामुद्गीतं यत् कर्मकमुच्चैर्गानमेव हरिकथा भुवनत्रयं पवित्रीकरोत्यविद्यामालिन्यादिति भावः । प्रकरणेऽस्मिन् व्यासादिमहावक्तॄणां तात्पर्यमिदं सर्वभागवतानां मध्ये कृष्णसम्बन्धिनः श्रेष्ठाः कृष्णस्य तस्यैव स्वयं भगवत्त्वात् तत्रापि तल्लीलापरिकरा एषान्तरङ्गाः अन्येषां तदनुगतत्वात् तेष्वपि श्रीमानुद्धवः त्वं तु भागवतेष्वहमिति नोद्धवोण्वपि मन्न्यून इत्यादि दर्शनात्तस्यापीदृशी भावस्पृहा तास्वादरोऽधिकः न जातु पट्टमहिषीष्वपीति केन वा तासां चरणकमलं नानुगमनीयं तत्रापि श्रीराधाया इति श्रीवैष्णवतोषणी ॥ ६३ ॥ अनुज्ञाप्य अनुज्ञां याचयित्वा आमन्त्र्य पृष्ट्वा ॥ ६४ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

एवं तदीयं महत्त्वं प्रतिपाद्य तासां साक्षान्नमस्कारे स्वाधिकाराभावं मन्यमानस्तत्पादरेणुं नमस्करोति । वन्द इति । तात्रप्येकमेव रेणुमभीक्ष्णशः पुनः पुनः कोटिकोटिवारं परमादरेण वन्दे न चास्मदाद्यपेक्षया तत्पादरेणुमहत्त्वे विस्मयः कार्यो यतः स्नानादिना पावनशक्तिमतीनां श्रीगङ्गाप्रमुखानां सरिद्वराणां पुलिनरेणुरपि वन्द्यते नन्दव्रजयोषितस्तु गानमात्रेण सर्वपावनशक्तिमत्य इत्याशयेनाह । यासामिति । हरेः पापहारकस्य कथापेक्षयापि उत्कृष्टं गीतं हरिकथासहितमूर्द्ध्वं गीतमिति वा हरिकथारूपम् उच्चैर्गीतमिति वा भुवनत्रयं समस्तं ब्रह्माण्डं पुनाति तथा चैवम्भूतानां तासां पादरेणुवन्दनेनापि वयं कृतार्था इति भावः ॥ ६३ ॥ एवं यदर्थं भगवता प्रेषितस्तत्सर्वं सम्पाद्य पुनर्भगवत्सन्निधौ गन्तुं प्रवृत्त इत्याह । अथेति । गोपीर्भगवदीयाः यशोदां तत्पूज्यां तन्मातरं तथा तत्पितरं श्रीनन्दरायं च एवकारेण तत्त्रयाणामेवात्र प्राधान्यं बोधितम् अत एवानुज्ञाप्यानुज्ञां प्रार्थयित्वेत्युक्तं ततस्तन्मित्रादिभूतान् गोपानामन्त्र्य गच्छामित्युक्त्वायास्यन्नतु विश्रमाद्यर्थं रथमारुरुहे यतो दाशार्हेषु यादवभेदेषु मुख्यः तत्र भगवदादिभिराकाङ्क्षितसन्निधानः ॥ ६४ ॥

गूढार्थदीपिनी

यत् श्र्यादिभिः आत्मनि मनसि अर्चितं रासगोष्ठ्यां तत् स्तनेषु न्यस्तं परिरभ्य आलिङ्ग्य च या गोप्यः तापं जहुः तासामांसामिति पूर्वेणान्वयः ॥ ६३ ॥ उद्गीतम् । उत्कृष्टं गानं । भावे क्तः ॥ ६४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं गोपीनां महत्त्वमुक्त्वा नमस्करोति । वन्दे इति ॥ ६३ ॥ दाशार्हः महाकुलप्रसूतोऽपि गोपीः हरिप्रियाः अनुज्ञाप्य आज्ञां याचित्वा आमन्त्र्य पृष्ट्वा ॥ ६४–६५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अन्यार्थमेवैषा प्रशंसेत्याशङ्क्य पूर्वमपि नमस्कारार्थमेतदारब्धमिति प्रतिज्ञातत्वात् ता नमस्यति । वन्दे नन्दव्रजस्त्रीणामिति । तासां नमस्कारेऽपि नास्माकमधिकारः किन्तु नन्दस्य स्त्रीमात्रस्य पादरेणुमेवैकम् अभीक्ष्णशो वन्दे अस्मदपेक्षया स रेणुः महानेवोत्कृष्टः फलरूपश्चेत्पादरेणुं वन्दे । ननु कथमेवमत्याश्चर्यम् उच्यत इत्याशङ्क्य लोके तदुपपादयति । यासां हरिकथोद्गीतमिति । हरिकथापेक्षयापि हरिकथया वा सह ऊर्ध्वं गीतं यासां सम्बन्धि गीतं भुवनत्रयमेव पुनाति गानमात्रेणैव पुनातीति

गङ्गातोऽप्युत्कर्षः गुणानां साधकत्वं बाधकत्वं वा नास्तीति ज्ञापनाय त्रयमिति ॥ ६३ ॥ एवं भगवत्कृतं तासां निरोधं समर्थयित्वा तादृशमपि भगवान् करोतीत्यवगतभगवन्माहात्म्यः भिन्नप्रक्रमेण भगवत्स्थाने समागत इत्याह । अथ गोपीरिति अनुज्ञां प्रार्थयित्वा तथा यशोदां नन्दमेव च त्रय एवात्र प्रकरणे मुख्याः ततोऽमित्रभूतान् गोपानामन्त्र्य गच्छामीत्युक्त्वा यतोऽयं दाशार्हः यादव श्रेष्ठः दाशार्हभेदः वस्तुतो भक्तिप्रधानो भक्तिहितकारी ततो यास्यन्नतु विश्रामार्थं रथमारुरुहे स पूर्वमप्येवं बहुधा चकार ततो नोद्यमनमात्रेण गमनौपयिकं कोऽपि करोति ॥ ६४ ॥

श्रीसुबोधिनी-सारः

नन्दव्रजस्त्रीणां चरणरजोऽभीक्ष्णशो मुहुर्मुहुरहं वन्दे यासां हरिकथानामुद्गीतं गानं भुवनत्रयं पुनाति ॥ ६३ ॥ शुकोक्तिः । अथानन्तरं गोपीरनुज्ञाप्य यशोदां नन्दं च गोपानामन्त्र्य दाशार्ह उद्धवो यास्यन् रथमारुरोह ॥ ६४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पुनश्चाश्चर्येण तासु भगवदनुग्रहमेव दर्शयति— या इति । 'वै' इति निश्चये । नात्र कश्चित् सन्देहः । भगवत ऐश्वर्यादि-गुणपूर्णस्य कृष्णस्य श्रिया लक्ष्म्याऽर्चितं पूजितं, तथा आप्तकामैः प्राप्तैश्वर्यैरजादिभिश्चतुर्मुखादिभिरपि पूजितं, तथा योगेश्वरैः सिद्धैरप्यात्मनि मनसि चिन्तितं यच्चरणारविन्दं तत्तेनैव रासगोष्ठ्यां स्तनेषु न्यस्तं या गोप्यः परिरभ्य आलिङ्ग्य कामसन्तापं विजहुः परितत्यजुः ॥ ६३ ॥ एवं गोपीनां नमस्कारयोग्यतां प्रतिपाद्य नमस्करोति—वन्दे इति । यासां हरिकथया सहोत्कर्षेण गीतं चरितं भुवनत्रयं भूरादिलोकत्रयस्थान् श्रवणकीर्तनादिपरान् जनान् पुनाति, तासां नन्दव्रजस्त्रीणां पादरेणुमहमभीक्ष्णशः पुनःपुनर्वन्दे इति त्रयाणामन्वयः ॥ ६४ ॥

अन्वितार्थप्रकाशिका

या वै इति ॥ वै निश्चितं श्रिया लक्ष्म्याऽर्चितं पूजितं तथा आप्तकामैः प्राप्तैश्वर्यैरजादिभिश्चतुर्मुखादिभिरपि पूजितं तथा योगेश्वरैः सिद्धैरप्यात्मनि मनसि चिन्तितं यद् भगवतः कृष्णस्य चरणारविन्दं तत्तेनैव रासगोष्ठ्यां स्तनेषु न्यस्तं या गोप्यः परिरभ्य आलिङ्ग्य कामसन्ताप विजहुः परितत्यजुः ॥ ६३ ॥ वन्दे इति ॥ यासां हरिकथया सहोत्कर्षेण गीत चरितं भुवनत्रयं भूरादिलोकत्रयस्थान् श्रवणकीर्तनादिपरान् जनान्पुनाति । तासां नन्दव्रजस्त्रीणां पादरेणुमहमभीक्षणशः पुनः पुनर्वन्दे ॥ ६४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृष्णे भक्त्या हेतुना सभाजितः सत्कृतः ॥ ६३ ॥ भक्त्युद्रेकं प्रेमातिशयं राज्ञे उग्रसेनाय ॥ ६४ ॥

इति श्रीशुद्धकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थ दशमस्कन्धव्याख्याने उद्धवस्य मथुरायां पुनरागमनं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थं व्रजस्त्रीणां पूज्यतां प्रतिपाद्य नमस्करोति । वन्द इति । यासां नन्दव्रजस्त्रीणां, हरिकथोद्गीतं हरिकथोद्गानं, उद्गीतमिति भावे क्तः । भुवनत्रयं लोकत्रयं, पुनाति । तथाभूतानां, नन्दव्रजस्त्रीणां, पादरेणुं अभीक्ष्णशः पुनः पुनः, वन्दे सेवे ॥ ६३ ॥ अथेति । अथानन्तरं, दाशार्ह उद्धवः, गोपीः अनुज्ञाप्य अनुज्ञां याचित्वा एव, यशोदां, नन्दं च अनुज्ञाप्य, गोपान् आमन्त्र्य पृष्ट्वा, यास्यन् यातुमित्यर्थः 'लक्षणहेत्वोः' इति शत्रादेशः । रथं आरुरुहे ॥ ६४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

वन्दे नन्देति : १०.४७.६४.

विश्वं बिभर्ति निखिलं ह्युदरे य ईशः तं चात्मनीति सततं दधतीह गोप्यः ।
वीक्ष्येति तन्निखिलसन्नतिपुण्यलिप्सुस्तत्पादरेणुमसकृत् प्रणनाम किं सः ॥ १८४ ॥
निश्चिन्वन्नेवमैशं स्थलमिह भगवत्क्रीडिताङ्कं च पश्यन् कुर्वन् वृत्तिं स्थिरां स्वां तदुदितकुशलप्रक्रियार्थं विवृण्वन् ।
शंसन् भाग्यं स्वमासामपि विधिमतुलं वर्णयन्नुद्धवोऽसौ रेमे योगीव तस्मिञ्जनमजनमना नन्दयन् मोदमानः ॥ १८५ ॥

कृष्णप्रिया

भगवती लक्ष्मीजी जो स्वतंत्र फलरूपा है उस लक्ष्मीजी ने जिस चरण कमल का अर्चन किया है, आप्तकाम एवं पूर्णकाम सनकादिक कुमारों ने, एवं ब्रह्मादि देवोंने अर्चन किया है, पुनः समर्थ योगेश्वरों ने जिन चरणों का चिन्तन अपनी आत्मा में किया है वैसे सर्वथा दुर्लभ चरणारविन्द भगवान श्रीकृष्णचन्द्र ने रासरमण अवसर जिन गोपीजन के हृदय पर धरा है एवं उनका आलिङ्गन कर गोपियाँ सर्वविध तापसन्ताप से मुक्त हो गई ऐसा सौभाग्य और किसी ने नही पाया ॥ ६३ ॥

उद्धवजी अतिदीन बन कर अनुराग को व्यक्त करते हैं कि मैं इन बड़भागिनी गोपियों के चरण कमलों के स्पर्श के लिए तो अधिकार नहीं हैं लेकिन श्रीनन्दबाबा के व्रज की स्त्रियों की पादरज को मैं पुनः पुनः अभिवन्दन करता हूँ। जिनका प्यारे श्रीकृष्ण की कथाओं का मङ्गलगान तीन भुवन को पावन करता है ॥ ६४ ॥

श्रीशुक उवाच

अथ गोपीरनुज्ञाप्य यशोदां नन्दमेव च। गोपानामन्त्र्य दाशार्हो यास्यन्नारुरुहे रथम् ॥ ६५ ॥
तं निर्गतं समासाद्य नानोपायनपाणयः। नन्दादयोऽनुरागेण प्रावोचन्नश्रुलोचनाः ॥ ६६ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच–दाशार्हः, गोपी, यशोदाम्, नन्दम्, एव, च (स्वकान्) गोपान्मित्राणि, आमन्त्र्ययास्यन्, रथम्, आरुरुहे ॥ ६५ ॥ नन्दादयः, निर्गतम्, तम्, समासाद्य, नानोपायनपाणयः, अश्रुलोचनाः, अनुरागेण, प्रावोचन् ॥६६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नोऽस्माकं मनसो वृत्तयः कृष्णपादांबुजाश्रयाः स्युः। अभिधायिनीरभिधायिन्यः ॥ ६६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तम् उद्धवम् रथारोहणपरिपाटीमाह–रथारोहणार्थं निर्गतं निर्गत्यव्रजद्वारि स्थितं सन्तम्। नानेति–निजमुद्रालक्षितं पुत्रार्थं श्रीव्रजेश्वर्या दत्त नवनीतक्षीरलड्डुकादिकं तथा श्रीबलदेवरोहिण्यर्थं देवक्यर्थं च श्रीव्रजदेवीभिश्च प्राणेश्वरार्थं निजलिगचिह्नितं गुञ्जाहारादिकं च श्रीदामादिभिश्च प्रियसुखार्थं तत्परिचितवन्यपुष्पमूलफलादिकं श्रीव्रजेश्वरेणापि करतूरीगतमौक्तिकं श्रीवसुदेवार्थं घृतपक्वान्नादिकमुग्रसेनार्थं च गोरसादिकं सर्वैश्च श्रीमदुद्धवार्थं वस्त्रालंकरणादिकमित्येवं पृथक्पृथग्नानाविधैरुपायनैर्युक्तपाणयः सन्तः प्रकर्षेण गद्गदत्वादिगुणयुक्ततयाऽवोचन् ॥ ६५ ॥ वृत्तयो व्यापाराः 'वृत्तिर्व्यापारजीवने' इति कोशात्। तत्प्रह्वणादिषु कृष्णनमस्कारादिषु स्यादित्यन्वयः। भो आयुष्मन्नुद्धव आवयोर्माता पित्रोस्तादृशेऽपि महारूपगुणशीलसमुद्रबालके महाकठोरत्वमासीदधुनापि वर्तत एव तदानीं यद्बहुतरस्नेहलालनादिकं कृतं तत्सर्वं कृत्रिममेवेत्यधुनाऽवगतं यत्तद्विरहेप्यावाभ्यां जीव्यते, पिता खलु जगत्येको दशरथः स एव, यः खलु पुत्रं रामं विदूरविगतं श्रुत्वैव प्राणांस्तत्याज, आवयोस्तस्मिन्पुत्रे कृष्णे प्रेमगन्धोपि नास्तीत्यत एवाभिज्ञचूडामणिरस्मत्पुत्रः स्वस्यानरूपौ पितरौ परित्यज्य परमेश्वरत्वेनातर्क्यचरित्रत्वादन्यावेव देवकीवसुदेवौ पितरौ चकार, तद्विगावां त्रिजगत्यतिदुर्भगौ यशोदानन्दौ, तदपि कस्मिंश्चिदपि भाविजन्मनि तस्मिन्नतिः स्यादिति प्रार्थयते द्वाभ्याम्। मनस इति—महानुरागमहावर्त एवायमत एव मनआदीन्द्रियाणां प्रतिक्षणमेव कृष्णरूपादिनिमग्नत्वेऽपि मनसो वृत्तयः कृष्णपादांबुजाश्रयाः स्युरिति। रतिः स्यादिति प्रार्थनायां लिङ्। दैन्यसंचारिणो महाप्राबल्यं दर्शयति। किञ्च, सख्यवात्सल्योज्ज्वलप्रेमवतां स्वभाव एवायं यद्विरहवैवश्येन बिषयालम्बनस्य स्वस्मिन्नौदासीन्यज्ञानेन च जनिते महादैन्ये स्वस्वभावविच्युतिर्दास्यभावग्रहणं च, यथा मयि कृष्णे नाद्यावधि न नः विश्वस्तमौदासीन्यादेवेति मत्वा बलदेवेन 'प्रायो मायास्तु मे भर्तुः' इत्युक्तेः, दास्यास्ते कृपणाया मे' इति वृन्दावनेश्वर्या, 'क्वचिदपि स कथां नः किंकरीणां गृणीते' इति श्रीगोपीभिः। 'मनसो वृत्तयो नः स्युः' इति श्रीनन्दाद्यैः, न तु सुखसमयेऽपि देवकीवसुदेवाभ्यामिव 'युवां न नः सुतौ' इत्यादिकमैश्वर्यज्ञानजनितस्वसंबन्धत्यागपूर्वकं कदाऽप्युक्तम् ॥ ६६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

रथारोहणपरिपाटीमाह। निर्गतं रथारोहणार्थं व्रजद्वारि निर्गत्य स्थितं सन्तं नानेति निजमुद्रालक्षितं पुत्रार्थं श्रीव्रजेश्वर्या दत्तं नवनीतक्षीरलड्डुकादिकं तथा श्रीबलदेवरोहिण्यर्थं श्रीदेवक्यर्थञ्च श्रीव्रजदेवीभिश्च प्राणेश्वरार्थं निजशिल्पचिह्नितं गुञ्जाहारादिकं श्रीदामादिभिश्च प्रियसखार्थं तत्परिचितवन्यपुष्पफलमूलादिकं श्रीव्रजेश्वरेणापि पुत्रार्थं कस्तूरीगजमौक्तिकहारादिकं श्रीवसुदेवार्थं घृतपक्वान्नादिकमुग्रसेनार्थञ्च गोरसादिकं सर्वैश्च श्रीमदुद्धवार्थं वस्त्रालङ्करणादिकं पृथक् पृथगित्येवं नानाविधैरुपायनैर्युक्तपाणयः सन्तः प्रकर्षेण गद्गदत्वादिगुणयुक्ततया अवोचन् ॥ ६५ ॥ अनुरागेण प्रावोचन्नित्युक्तत्वान्मनस इत्यादिरनुरागकृतैवोक्तिर्नत्वैश्वर्यज्ञानकृता। तस्मात्तस्यैश्वर्यप्रधानं मतमालोच्य स्वात्यन्तदुःखव्यञ्जकेन तदभ्युपगमवादेनैव स्वाभीष्टं प्रार्थयन्ते। मनस इति द्वाभ्याम्। यदि भवद्भिरसावीश्वरत्वेनैव मन्यते यदि चास्माकं तत् प्राप्तिर्दूरतः एव तथापि तत्रैवास्माकं तदुचिता वृत्तयः सर्वाः स्युर्नतु तत उदासीना इत्यर्थः। प्रह्वणं प्रह्वाणं नम्रत्वं तदादिषु आदि ग्रहणात् सेवादिकम् ॥ ६६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

निर्गतं व्रजाद्बहिर्गतं सन्तं समासाद्य दूरतः संगम्य, यद्वा, सम्यगासाद्य ज्ञात्वा निश्चित्येत्यर्थः। वारं वारं कृतप्रस्थानस्यापि तस्यादूरतो विदूरतोऽपि निवृत्तेः। नानेति—निजमुद्रालक्षितं पुत्रार्थं श्रीव्रजेश्वर्या दत्तं नव-नवनीतक्षीरलड्डुकादिकं पृथक्

तथा श्रीबलरोहिण्यर्थं श्रीदेवक्यर्थञ्च पृथक् पृथक्, श्रीव्रजदेवीभिश्च निजप्राणेश्वरार्थं निज-निजशिल्पचिह्नितं गुञ्जाहारादिकं पृथक्, श्रीदामादिभिश्च प्रियसखार्थं तत्परिचितवन्यफलमूलादिकं पृथक्, श्रीव्रजेश्वरेणापि पुत्रार्थं कस्तूरी-गजमौक्तिकहारादिकं श्रीवसुदेवार्थं घृतपक्वादिकम्, उग्रसेनार्थञ्च गोरसादिकं पृथक् पृथगित्येवं नानाविधैरुपायनैर्युक्तपाणयः सन्तोऽनुरागेणाश्रुरुद्धलोचनाश्च सन्तः, अत एव प्रकर्षेण आर्त्तस्वरगद्गदभाषादिना सर्वचित्ताकर्षकत्वादिना अवोचन् ॥ ६५ ॥ कृष्णस्य-कृष्ण इत्याख्याया प्रसिद्धस्य साक्षाद्भगवतः पादाम्बुजमेवाश्रयो विषयो यासां तथाभूताः स्युः, सन्तु वृत्तय इत्यनेन सदा सर्व्वत्रैवान्तस्तत्परिस्फूर्त्तिरभिप्रेता। वाचो गिरो वागिन्द्रियस्य च वृत्तयो वा तदिति तस्य, एवमत्रापि तत्सम्बन्धः, तस्य कृष्णस्य नाम्नां श्रीकृष्ण-दामोदर-गोविन्दादीनाम्, किंवा गौरवेण बहुत्वम्। कृष्णेति नाम्नोऽभिधायिनीः कीर्त्तनशीलाः, प्रह्वणं भक्त्या प्रणामः, आदिशब्दात् परिचर्य्यादयश्च, तेषु। एवं मानस-वाचिक-कायिक-भक्तिप्रकाराः प्रार्थिताः, विशुद्धवात्सल्यभाजोऽपि श्रीव्रजेशस्य कृष्णपादाम्बुजाश्रया इत्यादिषु पादादिशब्द प्रयोगः। प्रबलेन विश्लेषजन्यदैन्यवैवश्येनैवेति ज्ञेयम्। यद्वा, नन्दादयोऽश्रुलोचनाः सन्तः प्रावोचन्नित्यत्र वक्तुं प्रवृत्तस्य व्रजेशस्याश्रुरुद्धकण्ठत्वे जातेऽपरे गोपाः प्रावोचन्नित्यत्रातद्गुणसम्विज्ञानो बहुव्रीहिः, यतो 'मनसो वृत्तयो नः स्युः' इति तस्य प्रार्थना न घटते, (भा० १०।४६।२१)—'स्मरतां कृष्णवीर्य्याणि' इत्यादिना सदैव तत्स्मरणस्योक्तत्वात् ॥ ६६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तमिति। निर्गतं व्रजान्निष्क्रान्तं तमुद्धवं समासाद्यानुरागेण प्रोचुः कथम्भूताः नानाविधान्युपायनान्यर्हवस्तूनि पाणिषु येषामश्रूणि लोचनयोर्येषां तथाभूताः ॥ ६५ ॥ उक्तिमेवाह। मनस इति। नोऽस्माकं मनसो वृत्तयः कृष्णपादाम्बुजविषयाः स्युः वाचस्तु तन्नाम्नामभिधायिन्यः स्युः काया देहास्तु तन्नमस्कारादिषु प्रवणाः स्युः ॥ ६६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नोऽस्माकं मनसो वृत्तयो व्यापाराः कृष्णपादपद्माश्रयाः स्युः अस्माकं वाचो नाम्नामभिधायिनीर्वदन्त्यः स्युः अस्माकं कायस्तस्य प्रवणादिषु नमस्कारादिषु स्यादित्यन्वयः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

रथारोहणपरिपाटीमाह। तमिति। निर्गतं रथारोहणार्थं व्रजद्वारे निर्गत्य स्थितं सन्तम् ॥ ६५ ॥ अनुरागेण प्रावोचन्नित्युक्तत्वान्मनस इत्यादिरनुरागकृतैवोक्तिर्नत्वैश्वर्यज्ञानकृता तस्मात्तत्प्रधानं मतमालोक्य स्वान्तर्दुःखव्यञ्जकेन तदभ्युगमवादेनैव स्वाभीष्टं प्रार्थयन्ते। मनस इति द्वाभ्याम्। यदि भवद्भिरसावीश्वरत्वेनैव मन्यते। यदि चास्माकं तत्प्राप्तिर्दूरत एव तथापि तत्रैवास्माकं तदुचिता वृत्तयः सर्वाः स्युः न तु तदुदासीना इत्यर्थः ॥ ६६ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

तं निर्गतमित्यादि। नानोपायनपानय इति कृष्णाय यद्दातुमुचितम्, यद्वा, रामाय, यद्वा, वसुदेवाय, यद्वा, राज्ञे, यद्वा, तस्मै, तत् पाणौ येषाम् ॥ ६६–६८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नानोपायन-पाणय इति श्रीकृष्णाय यद् यद्दातुमुचितं तत्तत् पाणौ कृत्वा तदग्रे निन्युः। पश्चात् स्वजनद्वारा प्रहितवन्त इति ॥ (६६–६८)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नानोपायनानि कृष्णस्य पौगण्डकैशोरविलाससमय एव यानि सञ्चितानि बहुरत्नस्वर्णमुद्रामुक्तालङ्कारादीनि यौवने सति कृष्णस्य परिधास्यमानानि तदा तु तद्वियोगात्तेषु ममतात्यागात्तान्येवोपायनत्वेन कल्पितानि ज्ञेयानि ।६५। भो आयुष्मन्नुद्धव ! आवयोर्मातापित्रोस्तादृशेऽपि महारूपगुणशीलसमुद्रेऽपि बालके महाकठोरत्वमेवासीदधुनापि वर्त्तत एव तदानीं यद्बहुतरस्नेहलालनादिकं कृतं तत् सर्वं कृत्रिममेवेत्यधुनाऽवगतं यत्तद्विरहेऽप्यावाभ्यां जीव्यते पिता खलु जगत्येकः स एव दशरथो यः पुत्रं रामं विदूरगतं श्रुत्वैव प्राणांस्तत्याज आवयोस्तु तस्मिन् पुत्रे कृष्णे प्रेमगन्धोऽपि नास्तीत्यत एवाभिज्ञचूडामणिरस्मत्पुत्रः सः स्वाननुरूपौ पितरौ परित्यज्य परमेश्वरत्वेनातर्क्यविचित्रत्वादन्यावेव देवकीवसुदेवौ पितरौ चकार तद्भगावां त्रिजगत्यातदुर्भगौ यशोदानन्दौ तदपि कस्मिंश्चिदपि भाविजन्मनि तस्मिन्मतिः स्ताद्रतिः स्तादिति प्रार्थयते द्वाभ्याम्। मनसो वृत्तयो न स्युरिति। महानुरागमहावर्त्त एवायम् अत एव मन आदीन्द्रियाणां प्रतिक्षणमेव कृष्णरूपादिनिमग्नत्वेऽपि मनसो वृत्तयः कृष्णपादाम्बुजाश्रयाः स्युरिति रतिः स्यादिति प्रार्थनायां लिङ् दैन्यसञ्चारिणो महाप्राबल्यं ज्ञापयति किं च सख्यवात्सल्योज्ज्वलप्रेमवतां स्वभाव एवायं यत् विरहवैवश्येन विषयालम्बनस्य स्वस्मिन्नौदासीन्य ज्ञानेन च जनिते महादैन्ये स्वस्वभावविच्युतिर्दास्यभावग्रहणं च

यथायमपि कृष्णे नाद्यावधि नः विश्वस्तमौदासीन्यादेवेति मत्वा बलदेवेन प्रायो मायास्तु मे भर्तुरित्युक्तं दास्यास्ते कृपणाया मे इति श्रीवृन्दावनेश्वर्य्याः क्वचिदपि स कथां नः किङ्करीणां गृणीते इति श्रीगोपीभिर्मनसो वृत्तयो नः स्युरिति श्रीनन्दाद्यैः न तु सुखसमयेऽपि देवकीवसुदेवाभ्यामिव युवां न नः सुतावित्यादिकमैश्वर्यज्ञानजनितस्वसम्बन्धत्यागपूर्वकं कदाप्युक्तम ।। ६६–६७ ।।

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

तद्गमनस्य कस्याप्यनभिलषितत्वात् पूर्वं केनाप्युपायनाद्यानयनोद्योगो न कृत इत्याशयेनाह । तमिति । अकस्मात्तं निर्गतमेव समासाद्योपलभ्य नानोपायनानि पाणौ येषान्ते नन्दादयः अनुरागेणाश्रुभिरन्धीकृतलोचनाः सन्तः प्रकर्षेणोच्चैरवोचन्।।६५।। तत्प्रवचनमुदाहरति । मनस इति । नोऽस्माकं मनसो वृत्तयः कृष्णस्य सदानन्दरूपस्य परमात्मनोऽस्मदर्थं गृहीतकृष्णावतारस्य पदाम्बुजमाश्रयो यासां तथाभूताः स्युस्तथा चास्मन्मनसो या वृत्तिरुदेतु सा तदाश्रयैवोदेतु न त्वन्यालम्बना तदतिरिक्तं वस्तुमात्रमस्मच्चित्तं कदापि मा प्रविशतु तथा वाचोऽपि कृष्णस्य नाम्नामभिधायिन्यः स्युः तथा कायस्तस्य श्रीकृष्णस्य वन्दनार्च्चनादिषु स्यात् तथा च सर्वदा तद्गतकायवाङ्मानसाः स्यामेत्यस्मत्प्रार्थना श्रीकृष्णाग्रे वक्तव्येत्यर्थः ।। ६६ ।।

गूढार्थदीपिनी

अनुज्ञाप्य अनुज्ञां नीत्वा । आमन्त्र्य पृष्ट्वा । यास्यन् यातुं लक्षण हेत्वोः' इति शत्रादेशः । दाशार्हः उद्धवः यादवभेदः ।। ६५ ।। तम् उद्धवम् ।। ६६ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नोऽस्माकं मनसो वृत्तयः अभिधायिनीः अभिधायिन्यः ।। ६६–६९ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तचत्वारिंशाध्यायार्थप्रकाशः ।। ४७ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदा पुनः स निर्गत एव तदा तदर्थं भगवदर्थं च उपायनान्यानीय प्रस्थापनार्थं समागता इत्याह । तं निर्गतमिति । समादायाग्रे मिलित्वा नानोपायनानि पाणौ येषां स्नेहेन नन्दादयः अश्रुलोचनाः सन्तः प्रावोचन् ।। ६५ ।। तदुपदिष्टोऽर्थः तेषां हृदये समागत इति ज्ञापनार्थं तत्फलसिद्ध्यर्थं गुरुं प्रार्थयन्ति । मनसो वृत्तय इति द्वाभ्याम् । अस्माकं कायवाङ्मनांसि कृष्णसम्बन्धिकार्यपराण्येव भवन्तु अयमेवोत्कर्षः प्रार्थनीयः न तु लोके प्रसिद्धः अन्यः कोऽप्युत्कर्ष इति ज्ञापयितुं कर्मभिर्भ्राम्यमाणानां यत्र क्वचिद्योनौ सतां तदर्थं प्रार्थनायामुदासीनानां सर्वैरेव मङ्गलाचरितैर्दानैश्च मङ्गलाचरितानि सर्वसाधारणानि दानं विशेषधर्मः वैश्येष्वेव दयामुनिवृत्तिः कृष्णे रतिरसाधारणी इतोऽप्युत्तमास्माकमस्तु द्वयं प्रार्थितं सङ्घातस्य भगवति विनियोगः आत्मनश्च भगवति स्नेह इति मनसो ह्येकादश वृत्तयः ताः सर्वा कृष्णपादाम्बुजमेवाश्रित्य तिष्ठन्तु क्रियया ज्ञानेनाभिमत्या च अम्बुजे हि रूपरसगन्धस्पर्शाः स्पष्टाः शब्दोऽन्यत्रापि स्वतन्त्रतया विनियोक्ष्यत इति न न्यूनता कापि आश्रयपदेन प्रसङ्गात्करणं निवारितम् वाचोऽपि नाम्नामेवाभिधायिन्यः न तु तत्रैव पर्यवसितसर्वशक्तिरूपं भवति नत्वेवंविधानि गुणकर्माणि पदार्थान्तरवाचकत्वाच्छान्दसप्रयोगाल्लौकिकपरा वाचो मा भवन्त्विति ज्ञापितं कायः शरीरं च तस्य भगवतः प्रह्वणादिनमस्कारादिपूजासाधनादिषु भवतु प्रकरणेन प्रार्थना कर्मभिरवश्यं भ्रमणम् ईश्वरस्यापि तथैवेच्छेति न कर्मस्वातन्त्र्यम् अत एव स उत्कर्षः अप्रयोजक इति यत्र क्वापीत्युक्तं ननु वाङ्मनसां भगवति विनियोगे मङ्गलाचरितानि कुत्रत्यानीति चेत् सत्यं यावदेतद्भविष्यति तावत्कर्माणि न त्यक्तानीति तेषामन्यथा फलं मा भवत्विति तथा प्रार्थयन्ति किं च ईश्वरभाव एव कृष्णे सर्वदा भवत्वित्यपि प्रार्थनात्रयम् ।। ६६–६७ ।।

श्रीसुबोधिनी–सारः

निर्गतं व्रजात्तमुद्धवं समासाद्य नानोपायनहस्ता नंदादयोऽश्रुनेत्रा रुदंतोऽनुरागेण प्रेम्णोचुः ।। ६५ ।। नोऽस्माकं मनसो वृत्तयः कृष्णस्य पादांबुजमेवाश्रयंतीत्येवंभूताः स्युः नाम्नामभिधायिनीः कथयित्र्यो वाचः स्युः तस्य प्रह्वणादिषु प्रणामादिषु कायः शरीरं स्यात् ।। ६६ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ गोपीनां विरहतापनिवृत्त्यनन्तरं दाशार्ह उद्धवो गोप्यादीननुज्ञाप्य अनुज्ञां सम्प्राप्य गोपांश्चामन्त्र्य पृष्ट्वा यास्यन् मथुरां गन्तुं रथमारुरुहे ।। ६५ ।। नानाविधानि उपायनानि रामकृष्णाद्यर्हाणि वस्तूनि पाणिषु येषां ते तथा अनुरागेण अश्रूणि लोचनयोर्येषां ते नन्दादयो गोपा निर्गतं व्रजान्निष्क्रान्तं तमुद्धवं समासाद्य सादरमागत्य प्रावोचन्नित्यन्वयः ।। ६६ ।।

अन्वितार्थप्रकाशिका

अथेति ॥ अथ दाशार्ह उद्धवो गोपीः यशोदां नन्दं च अनुज्ञाप्य अनुज्ञां संप्रार्थ्य गोपांश्चामन्त्र्य पृष्ट्वा यास्यन् मथुरां गन्तुं रथमारुरुहे । तञ्चार्थः ॥ ६५ ॥ तमिति ॥ नानाविधानि उपायनानि रामकृष्णाद्यर्हाणि वस्तूनि पाणिषु येषां ते तथाऽनुरागेण अश्रूणि लोचनयोर्येषां ते नन्दादयो गोपा निर्गतं व्रजान्निष्क्रान्तं तमुद्धवं समासाद्य सादरमागत्य प्रावोचन् । उपायनं च नन्दादीनां रत्नहारादि सखीनां वन्यहारादि व्रजेश्वर्याः सुधाधिकस्वादुमोदकादि गोपीनां चूडारत्नादि एवं रामादिभ्योऽपि कल्प्यम् ॥ ६६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति निर्गतं व्रजान्निष्क्रान्तं, तमुद्धवं समासाद्य, नाना नानाविधानि उपायनानि पाणिषु येषां ते, अश्रूणि लोचनायोर्येषां तथाभूताः, नन्दादयः, अनुरागेण प्रावोचन् ॥ ६५ ॥ उक्तिमेवाह । मनस इति । नोऽस्माकं, मनसः वृत्तयः, कृष्णपादाम्बुजाश्रयाः स्युः । वाचः, नाम्नां कृष्णाभिधानानां, अभिधायिनीरभिधायिन्यः, स्युः । काया देहाः, तत्प्रह्वणादिषु श्रीकृष्णनमस्कारादिषु, प्रवणाः इति शेषः । स्युः ॥ ६६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तं निर्गतमिति : १०.४७.६६.

ये सर्वदैव भगवत्पदपद्मसक्ता येषां च सन्ततमनन्तसुखानुभूतिः ।
तेषां सदोद्धव सहस्थितिरत्र युक्ता युक्ता च तन्मुखत ईशपदेऽर्थनाऽपि ॥ १८६ ॥

कृष्णप्रिया

श्रीशुकदेव जी कहते हैं कि राजन् परीक्षित् ! अब व्रज से विदाय लेना चाहते हैं इसलिए गोपियों की अनुज्ञा पाकर श्रीनन्दराय जी एवं श्री यशोदाजी की प्रार्थना पुरःसर अनुज्ञा पाकर पुनः समस्त गोपों से भी मथुरा जाने का अनुमोदन सम्पादन कर रथ की ओर प्रस्थान करने लगे ॥ ६५ ॥ समस्त व्रजवासियों ने भक्तवर श्रीउद्धवजी का रथ में आरोहण करते देखकर निश्चय कर लिया कि अब श्रीउद्धव जी अवश्य पधारेंगे तब श्री नन्दरायजी एवं सब व्रजजनों ने विविध प्रकार के उपायन समर्पण किए यह विरह वेदना असह्य थी, उस अवसर पर प्रेमातिशय के कारण सबके नेत्रों से अश्रुवर्षा हो रही थी, आद्र कण्ठ से वे सब कहने लगे ॥ ६६ ॥

मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रयाः । वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्र[1]ह्वणादिषु ॥ ६७ ॥
कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया । मङ्गलाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ॥ ६८ ॥
एवं [2]सभाजितो गोपैः कृष्णभक्त्या नराधिप । उद्धवः पुनरागच्छन्मथुरां कृष्णपालिताम् ॥ ६९ ॥
कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसाम् । वसुदेवाय रामाय राज्ञे चोपायनान्यदात् ॥ ७० ॥

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] उद्धवप्रतियाने [5]सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

कर्दमक्षमा

अन्वयः—नः, मनसः, वृत्तयः, कृष्णपादाम्बुजाश्रयाः, स्युः, नः, वाचः, नाम्नाम्, अभिधायिनीः, स्युः, कायः, तत्प्रह्वणादिषु, स्यात्, यत्र, क्व, अपि, ईश्वरेच्छया, कर्मभिः, भ्राम्यमाणानाम्, मङ्गलाचरितैः, दानैः, नः, रतिः, ईश्वरे, कृष्णे, अस्तु ॥ ६७–६८ ॥ हे नराधिप ? एवम्, कृष्णभक्त्या, गोपैः, सम्प्रार्थितः, उद्धवः, कृष्णपालिताम्, मथुराम्, पुनः, आगच्छत् ॥६९॥ कृष्णाय, प्रणिपत्य, व्रजौकसाम्, भक्त्युद्रेकम्, आह, वासुदेवाय, रामाय, राज्ञे, च, अन्येभ्यः, (स्वजनेभ्यः) उपायनानि, अदात् ॥ ७० ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्द्धे राजसप्रमेयप्रकरणे सप्तचत्वारिंशोऽध्याये अन्वयाः सम्पूर्णाः ॥ ४७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृष्णे रतिः स्यादिति ॥ ६७-६८ ॥ व्रजवासिनां भक्त्युद्रेकं कृष्णादिभ्य आह । उपायनानि चादादिति ॥ ६९ ॥

इति श्रीभा० म० दशमस्कन्धे पूर्वार्धे टीकायां सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

---

१. प्रव–विज. । २. सदा–इति कस्यचित् । ३. पारमहंस्यां संहितायां–प्रा. पा. । ४. पूर्वार्द्धे–प्रा. पा. । ५. षट्चत्वा–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यत्र क्वापि योनिषु। कर्मभिरित्यचेतनस्य कर्मणः कथं प्रवर्तकत्वन्तत्राह-ईश्वरेच्छयेति। ननु देवः फलं ददातीति मीमांसको न सहते, तथाहि—नवमाध्याये विचारितं किं यागेनाराधिताया देवतायाः फलमपूर्वमुतापूर्वद्वारकं यागस्य फलसाधनत्वमिति संशयः। तत्र भंगुरस्य यागस्य कालांतरभाविफलं प्रति साधनत्वायोगादवश्यं द्वारं किञ्चित्कल्पनीयं, देवताप्रसादश्च श्रुतियुक्तिभ्यां तद्द्वारं स्यात्। "तृप्त एवैन मिंद्रः प्रजया पशुभिस्तर्पयति" इति श्रुतिः। युक्तिरप्युच्यते—क्रियया व्याप्तुमिष्टतमत्वात्कर्मकारकं प्रधानं तेन च कर्मणा व्याप्यत्वात्संप्रदानं ततोपि प्रधानम्, इन्द्रादिदेवता च सम्प्रदानत्वात्पूजामर्हति. यागश्च पूजारूपत्वादतिथेर्भोजनमिव देवताया अंगं स्यात्तस्माद्राजादिवद्देवः फलं ददातीति पूर्वपक्षां। अत्रोच्यते–यागदेवतयोर्योयमंगांगिभाव उपन्यस्तः स तु शब्दाकांक्षानुसारेण विपर्येति। तथाहि-यजेतेत्याख्यातेन भावनाभिधीयते, सा च किं केन कथमिति भाव्यकरणेति कर्तव्यतालक्षणमंशत्रयं क्रमेणाकांक्षति, तत्र यागस्य समानपदोपनीतत्वेप्ययोग्यत्वान्न भाव्यता, स्वर्गस्य तु वाक्यतात्पर्याद्युपनीतस्यापि पुरुषार्थत्वेन योग्यत्वात्स्वर्गे सा स्यात्तस्य च स्वर्गस्य साधनाकांक्षायां यागः करणत्वेनान्वेति, तच्च करणं साध्यरूपत्वात्स्वनिष्पादकं सिद्धम्, द्रव्यदैवतमिति कर्तव्यत्वेन गृह्णाति, ततो यागांगी देवता तदंगमेवं च सति नातिथिवद्देवता यागेनाराध्यते या तु श्रुतिः-"स्तृप्त एवैनम्" इति नासौ स्वार्थे तात्पर्यवती प्रत्यक्षादिविरोधात्, न हि काचिद्देवता विग्रहवती हविर्भुक्त्वा तृप्ता सती फलं प्रयच्छतीति प्रत्यक्षेणोपलभ्यते, प्रत्युत तदभावः प्रत्यक्षेणायोग्यानुपलब्ध्या वा प्रमीयते, किञ्चाश्वमेधे "स्ते गां दंष्ट्राभ्यां मंडूकाः कांक्षान्" इत्यादावश्वावयवानां दंष्ट्रादिद्रव्याणां हविषां भोक्तृत्वेन मंडूकादयस्तिर्यञ्चो देवताविशेषाः श्रूयन्ते, न च तेषां फलदातृत्वं संभाव्यते। "ओषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा" मूलेभ्यः स्वाहा इत्यचेतनानामोषधीवनस्पतितदवयवानां देवतात्वं श्रूयते तत्कुतो हविर्भोक्तृत्वं कुतस्तरां तृप्तिः कुतस्तमां फलदातृत्वम्, तस्माद्विग्रहादिमतां देवतानाम भावान्न देवताप्रसादो यागस्य फलद्वारं किन्तु श्रूयमाणफलसाधनत्वान्यथाऽनुपपत्तिकल्प्यमपूर्वं तद्द्वारम्। अभ्युपगतेष्वपि देवेष्वपूर्वस्यैव फल द्वारत्वमवश्यं वक्तव्यं मन्त्रार्थवादेतिहासपुराणेषु देवतानामपि तपश्चरणानुष्ठान ब्रह्मास्त्रादिमंत्रप्रयोगेभ्यः समाहितविष्यनुकीर्तनात्तस्माद्देवो न फलप्रद इति सिद्धम्। औपनिषदास्तु ईश्वरस्य फलदातृत्वं मन्यंते। तथाहि-तदीये शास्त्रे तृतीयेऽध्याये विचारितम्-किं धर्मः फलं ददात्याहोस्विदीश्वर इति संशयः। तत्र मीमांसकोक्तन्यायेन धर्मः फलप्रद इति पूर्वपक्षः। सिद्धान्तस्तु-किं धर्मोऽन्यानधिष्ठित एव फलप्रदः, किं वा केनचिच्चेतनेनाधिष्ठितः। नाद्यः, अचेतनस्य तारतम्यानभिज्ञस्य यथोचितफलदातृत्वायोगात्, द्वितीये तु येनाधिष्ठितः स एव फलदातास्तु, न चैवं धर्मवैयर्थ्यमिति शंकनीयं वैषम्यनैर्घृण्यपरिहाराय धर्मापेक्षणात्, असति तु धर्मे कांश्चिदुत्तमं सुखं कांश्चिन्मध्यमं कांश्चिदधमं च प्रापयतीश्वरः कथं विषमो न भवेत्कथं वा विचित्रं दुःखं प्रापयन्निर्घृणो न भवेत्। धर्माधर्मानुसारेण तत्प्रापणे गुरुपितृराजादीनामिव न वैषम्यनैर्घृण्ये प्राप्नुतः। न हि दुष्टशिक्षां शिष्टपरिपालनञ्च कुर्वतां गुर्वादीनां वैषम्यनैर्घृण्ये विद्येते। यदुक्तम् "स्ते गाम्" इति मंडूकादीनाम् "तिरश्चामोषधिवनस्पत्यादी च" इति स्थावराणां फलप्रदत्वमयुक्तमिति तत्तथैवास्तु, ईश्वरस्य फलदातृत्वे कः प्रत्यूहः। यदपि "तृप्त एवैनमिंद्रः प्रजया पशुभिस्तर्पयति" इति तत्रापींद्रे देवतायामवस्थितोऽन्तर्यामी फलप्रदत्वेन विवक्षितः "अंतः प्रविष्टः शास्ता जानानाम्" इति श्रुतेः, "ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति" इति स्मृतेः। तस्मादीश्वरप्रसाद एव फलद्वारम्। न च जैमिनीयौपनिषदयोर्मतयोर्विरोधोस्ति, परस्परं विवक्षाविशेषेण तत्समाधानात्। यथा देवदत्तस्यैव पक्तृत्वेऽपि सम्यगभिज्वलनविवक्षितत्वात्काष्ठानि पचंतीति व्यवहारः। तथा परमेश्वरस्यैव फलप्रदातृत्वेऽपि तारतम्यापादननिमित्ततया प्राधान्यविवक्षितत्वाद्धर्मः फलप्रद इति व्यवहारः किं न स्यात्तस्मादविरोधात्फलप्रद ईश्वर एवेत्यलमतिप्रसंगेन। अतः कर्मफलप्रदः श्रीकृष्ण एव। रतिरत्यंतासंगः। कृष्णभक्त्या महानुरागमय्या कृष्णपालितामित्यत एवोद्धवेन व्रजभूमावत्यनुरक्तेनापि तत्र गतं सम्प्रति मथुरा कृष्णेन पाल्यते व्रजः कथं न पाल्यत इत्युपालब्धुमेवेति मुनेराशयः॥ ६७॥ एवमित्थम्। कृष्णभक्त्या कृष्णदूतत्वात्तत्रापि कृष्णभक्तिरेव तेषामित्यर्थः। लोकदृष्ट्योग्रसेनपालितायामपि परमार्थत आह-कृष्णपालितामिति। तस्य सर्वदा तत्पालकत्वादिति भावः। एवमध्यायद्वयोक्तक्रमेण। सभाजितः पूजितः। कृष्णभक्त्या कृष्णासक्त्यैवेति पूर्ववत्। ननु 'आसामहो' इत्यादिरीत्या तादृशवृन्दावनासक्तश्चेत्कथं मथुरां पुनरागच्छत्तत्राह-कृष्णपालिताम्, सम्प्रति कृष्णेन सा पाल्यते तत्प्रियतमभृत्यैस्तत्रानागमनं कर्तुं कथं शक्ष्यत इति भावः॥ ६८॥ भक्त्युद्रेकं प्रीत्याधिक्यम्। नन्दादिभिः पृथक्पृथग्दत्तानि उपायनान्युपहारान्। प्रथमं निजान्तःपुरस्थिताय कृष्णाय प्रणिपत्य प्रणितातपूर्वकं तत्कृतालिंगन कुशलप्रश्नादिकं पूर्वं वृत्तं निर्वाह्य क्रमतस्तत्कृतप्रश्नविशेषमुपलभ्य व्रजौकसां तत्पित्रादीनां भक्त्युद्रेकं प्रेमातिशयं तत्तद्वचनचेष्टात्मकं यथावसरं यथायोग्यं सर्वमेवाह, तच्च साक्षात्तद्दर्शनादेवं तेषां प्रीतिर्दुःखशोकनिवृत्तिश्च सम्यग्भवति न तु तच्चातुर्येण तत्संदेशैर्वेत्यभिप्रायात्मकमिति ज्ञेयम्। तदनन्तरं यथावसरं वसुदेवादिभ्यः पूर्ववद्यथाक्रमं तेषां भक्त्युद्रेकं यथायुक्तमाह, तदनन्तरं यथावसरं तस्मै तेभ्यश्चोपाय नान्यदादिति विवेचनीयम्॥ ६९॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे सप्तचत्वारिंशोऽध्यायः॥ ४७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्ण ईश्वर इति। ईश्वररूपेऽपि कृष्ण एवेत्यर्थः। तदिच्छयेत्यनुक्त्वा ईश्वरेच्छयेति पृथगीश्वरपदोक्तिः स्वभावानुसारेण कर्मभिरिति नरलीलापन्नत्वादात्मनि साधारण्यमननेन मङ्गलाचरितैः पुण्यकर्मभिः। दानस्य पृथगुक्तिस्तेषां स्वेषु प्राचुर्यात् अथ च वाक्यद्वयमिदं वियोगमयपितृवात्सल्येनापि सम्भवतीति॥ ६७॥ एवमध्यायद्वयोक्तक्रमेण सभाजितः कृष्णभक्त्या कृष्णासक्त्यैवेति पूर्ववत्। नन्वासामहो इत्यादिरीत्या तादृशवृन्दावनासक्तश्चेत् कथं मथुरां पुनरागच्छत्तत्राह। कृष्णपालिताम्। सम्प्रति श्रीकृष्णेन सा पाल्यत इति तत्प्रियतमभृत्यैस्तैस्तत्रागमनं कथमिव कर्तुं शक्यत इति भावः॥ ६८॥ प्रथमं तावन्निजान्तःपुरस्थिताय श्रीकृष्णाय प्रणिपत्य प्रणिपातपूर्वकं तत्कृतालिङ्गनकुशलप्रश्नादिकं पूर्वं वृत्तं निर्वाह्य क्रमतस्तत्कृतप्रश्नविशेषमुपलभ्य व्रजौकसां तत्पित्रादीनां भक्त्युद्रेकं प्रेमातिशयं तत्तद्वचनचेष्टात्मकं यथावसरं यथायोग्यं सर्वमेवाह। तच्च साक्षात्त्तद्दर्शनादेव तेषां प्रीतिर्दुःखशोकनिवृत्तिश्च सम्यग् भवति न तु मच्चातुर्येण त्वत्सन्देशैर्वेत्यभिप्रायात्मकमिति ज्ञेयम्। तदनन्तरं यथावसरं पूर्ववत् यथाक्रमं वसुदेवादिभ्यस्तेषां भक्त्युद्रेकं यथायुक्तमाह। तदनन्तरमेव यथावसरं तस्मै तेभ्यश्चोपायनान्यप्यदादिति विवेचनीयम्॥ ६९॥

सोऽयमुद्धवसन्देशः श्रीरामस्य व्रजागमः। दन्तवक्त्रवधस्यान्त्या टिप्पणी च पुरेक्ष्यताम्॥
व्रजैकजीवनैः शीघ्रं व्रजे कृष्णगतीप्सुभिः। तत्रह्युक्तं गवेन्द्रस्य व्रजागमनमङ्गलम्॥
अन्तर्हृत्य व्रजौकोभिर्नित्यक्रीडासु शर्म च। पश्चाद्यथेष्टमन्यच्च दृश्यतां तस्य पुष्टये॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् सप्तचत्वारिंशोऽध्यायः॥ ४७॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न च प्रार्थितैरेतैर्भक्तिप्रकारैश्च शुभकर्म्मभिः श्रीकृष्णप्रेम विनाऽन्यत् किञ्चिदिच्छाम इत्याहुः–कर्म्मभिरिति। ईश्वरस्य तस्यैव कर्म्मफलदातुरिच्छया कर्म्मभिर्यत्र क्वापि भूमावूर्द्ध्वलोके वा भ्राम्यमाणानां नोऽस्माकं मंगलाचरितैर्नित्यनैमित्तिकादिशुभकर्म्मभिः पृथग्गवादिदानैश्च मंगलाचरितान्तर्भूतानामपि दानानां पृथगुक्तिः—गोपेन्द्रस्य परमवदान्यत्वात्, यद्वा, प्रार्थितैर्मनोवृत्त्यादिरूपैर्मंगलाचरितैर्दानैश्च तस्मिंस्तत्तदर्पणैः, बहुत्वं प्रत्येकं सर्व्वेषामेवार्पणेन तद्बाहुल्यात्। कृष्णे रतिरस्तु 'न कर्म्मबन्धनं जन्म वैष्णवानां तु विद्यते' इति पाद्मादावुक्तत्वाद्वैष्णवानामेव तावत् कर्म्मभिर्भ्रमणं नास्ति, तत्रापि नित्यप्रियाणां व्रजवासिनां तथापि श्रीभगवदिच्छानुसारि–लीलानिमग्नत्वेन संसारित्वाभिमानादेतैस्तथोक्तम्॥ ६७॥ 'एवम्' ईदृशमिति तादृशमन्यदपि बोधयति। तच्चासकृच्छ्रीकृष्णागमनादिकं ज्ञेयम्। यद्वा, एतदित्यर्थः। तस्यापि रत्यधीनत्वात् कृष्णे भक्तिः प्रेमलक्षणतयैव हेतुना सम्यक् प्रार्थितम्, यतो गोपैस्तदेकप्रियैरित्यर्थः। प्रेम्णो दैन्योत्पादनशीलत्वात्तद्वतां तादृशप्रार्थनं श्रीभागवतप्रवरे तस्मिन् युक्तमेवेति भावः। तच्च त्वया बुध्यत एवेत्याशयेन सम्बोधयति–नराधिपेति। यद्वा, कृष्णभक्त्येत्यस्य परिणान्वयः। गोपानां कृष्णभक्त्या हेतुना तद्विज्ञापनार्थं मथुरामागच्छदित्यर्थः। उद्धव इति तदागमनेन गृहे परमोत्सवोऽभूदिति भावः। नन्वेतावन्तं कालं सन्मन्त्रादिप्रदेन तेन विना कथं तत्रत्याः सुखमासत? तत्राह—कृष्णेन पालितामिति। एतेन तत्र पूर्व्वतोऽधिका विविधसम्पत्तिरपि सूचिता॥ ६८॥ प्रणिपत्य साष्टांगं प्रणम्येति भक्तिस्वभावात्, तत्रापि चिरप्रवासागमनात्, किंवा विज्ञापनविशेषार्थमाह अकथयत्, भक्तेरुद्रेकं विरहेण विवृद्धम्, अतः साक्षात्तद्दर्शनादेव तेषां प्रीतिर्दुःखशोकनिवृत्तिश्च, न तु मच्चातुर्य्येण त्वत्सन्देशैर्वेति भावः ननु तर्हि कथमत्र ते नायान्ति? तत्राह–व्रजौकसामिति। तत्रैव त्वत्सन्दर्शनमिच्छन्ति, न त्वत्र स्वातन्त्र्यरहिते पद इति भावः। त्वर्थे चकारः कृष्णाय वासुदेव–रामाभ्यां च भक्त्युद्रेकमाह, राज्ञे उग्रसेनाय तु उपायनान्यदात्, न च भक्त्युद्रेकमाह, राजत्वेन तस्य मात्सर्य्यशंकया, यद्वा, समुच्चये चकारः। कृष्णादिभ्यः प्रणिपत्य भक्त्युद्रेकमाह, उपायनानि च तान्यदात्॥ ६९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील–सनातन–गोस्वामिपाद–कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम–टिप्पण्यां सप्तचत्वारिंशोऽध्यायः॥ ४७॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

स कृष्णेन चरिता इति सरिच्छैलवनोद्देशविशेषणम्॥ ४८–५६॥ कृष्णावेशात्मविक्लवं कृष्णसमावेशेन मनसो वैक्लव्यम्॥ ५७॥ बलेन गोविन्द एव रूढभावः यद्रूढभावत्वं भवभियः संसाराद्भीतिमन्तः ब्रह्मजन्मभिः ब्राह्मणजन्मभिः॥६०॥ अविदुषामप्यकर्मकरत्वे मनो ग्राह्यैकदृष्टान्तमाह। आसां गोपीनां चरणरेणुजुषां गुल्मलतौषधीनां याः तासां मध्ये अहं किमपि स्याम्॥ ६१–६५॥ प्रह्वणं प्रणामः॥ ६६–६९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये सप्तचत्वारिंशोऽध्यायः॥ ४७॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कर्मभिरिति यत्र क्वचिदीश्वरेच्छया कर्मानुगुणया कर्मभिः पुण्यापुण्यात्मकैर्भ्राम्यमाणानां संसरतामस्माकं यदि मङ्गलाचरितानि शुभकर्माणि दानानि च सन्ति तर्हि तैर्हेतुभिः कृष्णे भगवति रतिरनुरागः स्यादिति मङ्गलाचरितप्रदर्शनार्थं दानैरित्युक्तम् ॥ ६७ ॥ एवमिति । हे नराधिप ! राजन् इत्थं गोपैः कर्तृभिः कृष्णभक्त्या करणभूतया सभाजितः संमानितः स इति पृथक् पदं वा उद्धवः कृष्णेन पालितां लालिताम् इति पाठे अनुरञ्जितां मथुरां पुनराजगाम ॥ ६८ ॥ ततः श्रीकृष्णाय नमस्कृत्य प्रीत्या हर्षेण व्रजौकसां भक्त्युत्कर्षं प्राह वसुदेवाय श्रीकृष्णाय रामाय राज्ञे उग्रसेनाय च उपायनानि नन्दादिभिः समर्पितान्यर्हवस्तून्यदात् समर्पितवान् ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यत्र क्वापि देवयोनिषु अचेतनस्य कर्मणः प्रवर्तकत्वं कथं घटत इत्यत उक्तम् ईश्वरेच्छयेति । रतिर्भक्तिलक्षणा ॥१५–१७॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कृष्ण ईश्वर इति । ईश्वररूपेति कृष्ण एवेत्यर्थः । तदिच्छयेत्यनुक्त्वा ईश्वरेच्छयेति स्वभावानुसारेण । कृष्णभक्त्या कृष्णसक्त्यैव ॥ ६७ ॥ नन्वासामहो इत्यादि प्रार्थना चेत् कथं मथुरां पुनरागच्छत् तत्राह । कृष्णपालितां सम्प्रति । श्रीकृष्णेन पाल्यत इति तत्प्रियतमभृत्यैस्तैस्तत्रागमनं कथमिव कर्त्तुं शक्यत इति भावः ॥ ६८–६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

कृष्णायेत्यादि । प्रणिपत्याहेति—त्वत्प्रसादेन तादृशो भाग्योदयो जात इत्यौत्सुक्यात् प्रणिपातः । आहेत्यस्य कर्मपदं गोपीनां रहस्यमिति मन्तव्यम् । वसुदेवादिभ्य उपायनान्यदात् । चकारात् कृष्णाय च व्रजेश्वर्या व्रजेश्वरेण गोपैश्च यद् यद् दत्तम् , तत् सर्वं ददावित्यर्थः ॥ ६९ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कृष्णाय प्रणिपत्याह—गोपीनां कथामिति यावत् , अन्यत् सर्वं वसुदेवादिभ्यः ॥ ६९ ॥

इति सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृष्णभक्त्या महानुरागमय्या कृष्णपालितामित्यत एवोद्धवेन व्रजभूमावत्यनुरक्तेनापि तत्र गतम् सम्प्रति मथुरा कृष्णेन पाल्यते व्रजः कथं न पाल्यते इत्युपालब्धुमेवेति मुनेराशयः ॥ ६८ ॥ व्रजौकसां भक्त्युद्रेकं मथुरौकोभ्यः सकाशादित्यर्थस्तेन भोः प्रभो ! कृष्ण ! त्वं भक्तिवशगो भक्तिप्राप्या भक्तिदृश्य इति सर्वशास्त्रार्थस्तेषां च मया त्वदीयसर्वभक्तेभ्योऽपि सकाशात् भक्त्युद्रेक एव दृष्टो यतः ‘ ‘श्वेतीकृताखिलजनं विरहेण तवाधुना । गोकुलं कृष्ण ! देवर्षेः श्वेतद्वीपभ्रमं दधे’’ त्वत् पितुर्नन्दस्य तु महानुरागभ्रमिरियं त्वयैव व बोद्धुं शक्या यदुक्तं मनसो वृत्तयो नः स्युः इति पद्यद्वयं त्वन्माता तु गद्गदरुद्धकण्ठी नैव किमपि वक्तुं शशाकेति श्रुत्वा कृष्णो विगलितधैर्यो मध्ये सममप्युच्चै रुरोद तत् प्रेयसीनां प्रेमवाडवानलस्तु रजन्यां कुत्रचिद्रहस्येवोद्घाटय दर्शितस्तत्प्रेयसीशिरोमणेस्तु दिव्योन्मादचित्रजल्पादिदिङ्मात्रमेवाविष्कृत यदवधार्य कृष्णस्तां रात्रिं सर्वां जज्वालैवेति ॥ ६५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । सप्तचत्वारिंशकोऽयं दशमेऽजनि सङ्गतः ॥ ४७ ॥

श्रीधनपतिसूरिकृतभागवतगूढार्थदीपिका

एतत्फलं च नोऽस्माकं न स्वर्गादिमोक्षपर्यन्तसुखमाकाङ्क्षितं किं तु तस्मिन् रतिरेवेत्याशयेनाहुः । कर्मभिरिति । कर्मभिर्निमित्तभूतैस्तत्तत्कर्मफलप्रदानायोद्भूता या फलप्रदातुरीश्वरस्येच्छा तया यत्र क्वापि भ्राम्यमाणानामस्माकं तथा च तत्तन्निवृत्तिरस्माभिः प्रार्थ्यते इति भावः । मङ्गलभूतैराचरितैर्भगवदर्चनादिभिर्दानोपलक्षितैर्वर्णाश्रमोचितसमस्तकर्मभिश्चेह जन्मनि प्राचीनजन्मसु वा कृतैः कृष्णाख्ये ईश्वरे नोऽस्माकं रतिरुत्तरोत्तरं वर्धमाना स्यादिति प्रार्थनारूपः सन्देशोऽस्मदीयः स्वस्वामिसन्निधौ त्वया वक्तव्य इत्यर्थः ॥ ६७ ॥ इतः परं वक्तुमशक्तास्ते तूष्णीं स्थिता उद्धवश्च तावतैव तैः सम्पूजितो मथुरां प्रत्यगादित्याहैवमिति । एवमुक्तरीत्या गोपैः भगवदीयैः सभाजितः पूजितः पूजोपकरणमाह । कृष्णभक्त्येति । तत्कृता कृष्णभक्तिरेव तेन

स्वस्य पूजोपकरणत्वेन गृहीता तत उत्कृष्टायाः पूजाया अभावत् यद्वा किमर्थं तैः सभाजित इत्यपेक्षायामाह । कृष्णभक्त्येति । न तु तेषामैश्वर्यादिकं किञ्चिदपेक्षितमासीत् न चैवंविधभक्तानां सङ्गं विहाय किमिति मथुरां प्रति गतवानित्याशङ्क्याह । कृष्णपालितां तथा च भगवत्सन्निधानार्थं तत्र भगवानिति भावः । किं च नराधिपानामप्याज्ञा नोपलङ्घितुं शङ्कया किं पुनर्ब्रह्माद्यधिपस्येति सम्बोधनाशयः ॥ ६८ ॥ तत्र गत्वा यत्कृतवान् तदाह । कृष्णायेति । प्रणिपत्य सम्यक् प्रणामं विधाय व्रजौकसां भक्त्युद्रेकं प्राह । तत्प्रेषितं मुख्यमुपायनं निवेदितवान् वसुदेवाय पूर्वसख्यस्थितिख्यापनाय रामाय पूर्वस्नेहस्थितिबोधनाय राज्ञ उग्रसेनायादरज्ञापनाय चकारादक्रूरादिभ्यस्तद्दोषागणनासूचनाय तैः प्रेषितान्युपायनान्यदात् "सकलनिगमबोध्यं सच्चिदानन्दरूपं हरविधिहरिमुख्याभ्यर्च्यपादारविन्दम् । व्रजयुवतिसुखार्थे स्वीकृतानेकलीलं धनपतिरहमीशं नौमि गोपाल बालम्" ॥ ६९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिकृतायां श्रीमद्भागवतगूढार्थदीपिकायाम् दशमस्कन्धे पूर्वार्धे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

गूढार्थदीपिनी

अभिधायिन्यः । प्रह्वणं शिरसा नतिः । प्रह्वशब्दात् आचारक्विन्तात् ल्युट् प्रह्वाणः पृषोदरादित्वात् ह्रस्वश्च ॥ ६७ ॥ यत्र क्वापि योनिषु । मङ्गलाचरितैः पुण्याचरणैः ॥ ६८ ॥ सभाजितः सत्कृतः ॥ ६९ ॥ कृष्णादिभ्यः भक्त्युद्रेकमाह उपायनानि च । राज्ञे उग्रसेनाय तु उपानान्येव न च भक्त्युद्रेकमित्यन्वयः ॥ ७० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यां सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः स तुष्टः तथेति मनसैवाभ्यनुज्ञाय मथुरामागत इत्याह । तेषां प्रार्थनया स्वोत्कर्षो वा तेषाम् अन्यभजनं वा ज्ञातमिति शङ्कां वारयितुं कृष्णभक्त्येत्युक्तं नराधिपेति सम्बोधनं सेवकानुवृत्तिः स्वाम्यर्थेति ज्ञापनार्थं तस्य प्रीतिरेव मुख्येति परमप्रीत इत्युक्तं वचनं तु निर्बन्धादपि वदेदित्यप्रयोजकं मथुरां पुनरागच्छत् भगवांस्तावत्पर्यन्तं मथुरायामेव स्थितः कृष्णपालितामिति विशेषतो भयशङ्कया स्वयमेव पालयतीति भगवदनागमने विशेषहेतुरुक्तः अनेन तादृशं स्थानं परित्यज्य किमित्युद्धवः समागत इति शङ्का निवर्त्तिता ॥ ६८ ॥ एतत्सर्वं दासभावेनैव कृतमिति ज्ञापयितुं निवेदनमाह । कृष्णायेति । उपायनान्यदादिति सम्बन्धः भगवन्तं प्रणिपत्य भक्त्युद्रेकमाह एतावानर्थः पूर्वं भगवता नोक्त इति प्रायेण भगवान् न विचारितवान् इति ततो वसुदेवायाप्युपायनान्यदादित्र सम्बन्धः तिष्ठतीति ज्ञापयितुं रामाय चाददात्पूर्वावस्था तथैवतिष्ठतीति मर्यादामप्यङ्गीकुर्वन्तीति ज्ञापनार्थं राज्ञे चकारादक्रूरादिभ्योऽपि दोषाभवज्ञापनार्थम् ॥ ६९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां चतुश्चत्वारिंशाध्यायार्थविवरणम् ॥ ४४–४७ ॥

श्रीसुबोधिनी–सारः

यत्र क्वापि योनौ कर्मभिर्भ्राम्यमाणानां नोऽस्माकम् ईश्वरस्येच्छया मंगलाचरितैर्दानैर्मतिर्बुद्धिरीश्वरे कृष्णे स्यात् ॥६७॥ एवं कृष्णभक्त्या सभाजितैर्गोपैः प्रशंसित उद्धवः कृष्णेन पालिताम् मथुरां पुनरागच्छत् आयात् हे नराधिप शुकोक्तिः ॥ ६८ ॥ प्रणिपत्य प्रणामं कृत्वा कृष्णाय वसुदेवाय रामाय व्रजौकसां भक्तेरुद्रेकमाधिक्यमाह । राज्ञे उग्रसेनाय च उपायनान्यदात् ॥६९॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायां सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह—मनस इति द्वयेन । उपदेष्टृत्वादुद्धवमेव गुरुं मत्वा प्रार्थयन्ति—नोऽस्माकं मनसो वृत्तयः कृष्णपादाम्बुजविषयाः स्युः । वाचस्तु तन्नाम्नामभिधायिन्यः स्युः । कायो देहस्तु तन्नमस्कारादिष्वस्तु ॥ ६७ ॥ कर्मभिः पुण्यपापात्मकैस्तदनुगुण्या ईश्वरेच्छया च यत्र क्वापि भ्राम्यमाणानां देवमनुष्यादिषु जायमानानां नोऽस्माकं मङ्गलाचरितैर्दानैस्तज्जनितैः पुण्यैरीश्वरे कृष्णे रतिरनुरागोऽस्त्वित्यन्वयः ॥ ६८ ॥ हे नराधिप ! एवं कृष्णभक्त्या गोपैः सभाजितः सम्पूजितः 'सम्प्रार्थित' इति तु पाठान्तरम्, उद्धवः पुनर्मथुरामागच्छदित्यन्वयः । ननु 'कृष्णविहारस्थलं व्रजं विहाय कुतो मथुरामागत' इत्याशङ्क्य 'भगवतो मथुरायां वर्तमानत्वात्तत्र गमनं तद्दासस्योचितमेव इत्याशयेनाह—कृष्णपालितामिति ॥ ६९ ॥ ततश्च कृष्णादिभ्यः प्रणिपत्य यथोचितं व्रजौकसां भक्त्युद्रेकमाह, नन्दादिभिर्दत्तान्युपायनानि चादात् ॥ ७० ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने । सप्तचत्वारिंशकोगाद्भृङ्गगीतनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

मनस इति ॥ नोऽस्माकं मनसो वृत्तयः कृष्णपादाम्बुजाश्रयास्तद्विषयाः स्युः । वाचस्तु तन्नाम्नामाभिधायिनीः अभिधायिन्यः स्युः । पूर्वसवर्णदीर्घ आर्षः । कायो देहस्तु तत्प्रह्वणादिषु तन्नमस्कारादिष्वस्तु । प्रह्वणे इति प्रह्वशब्दाच्चारक्विबन्ताल्ल्युट् प्रह्वाणशब्दे ह्रस्व आर्षो वा । वृषोदरादित्वं वा ॥ कर्मभिरिति ॥ कर्मभिः पुण्यपापात्मकैस्तदनुगुणया ईश्वरेच्छया च यत्र क्वापि भ्राम्यमाणानां देवमनुष्यादिषु जायमानाननाम् । मितो ह्रस्वाभाव आर्षः । नोऽस्माकं मङ्गलाचरितैर्दानैस्तज्जनितैः पुण्यैरीश्वरे कृष्णे रतिरनुरागोऽस्तु ॥ ६८ ॥ एवमिति ॥ हे नराधिप ! एवं कृष्णभक्त्या गोपैः सभाजितः संपूजितः । संप्रार्थित इति तु पाठान्तरम् । उद्धवः कृष्णपालितां मथुरां पुनरागच्छत् ॥ ६९ ॥ कृष्णायेति ॥ प्रथमं कृष्णाय प्रणिपत्य यथोचितं मथुरावास्यपेक्षया व्रजौकसां भक्त्युद्रेकं तेषां त्वद्दर्शनादेव प्रीतिः शोकनिवृत्तिश्च स्यान्नतु मच्चातुर्येण संदेशैर्वेति आह स्म । यशोदा तु तारस्वरं रुरोदैव न किमपि वक्तुं शशाकेति गोपीनां सन्देशं रहस्येवाश्रावयत् उपायनानि च अदात् । ततश्च वासुदेवाय रामाय राज्ञे च प्रणिपत्य व्रजौकसां भक्त्युद्रेकं प्रीत्यतिशयमाह उपायनानि च अदात् ॥ ७० ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो सप्तचत्वारिंशे व्यधादिमाम् ॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कर्मभिरिति । ईश्वरेच्छया अस्मत्कर्मानुगुणया कृष्णेच्छया, कर्मभिः पुण्यपापात्मकैः, यत्र क्वापि यस्यां कस्यांचिद्योनावित्यर्थः । भ्राम्यमाणानां, नोऽस्माकं, रतिः प्रीतिः, मङ्गलाचरितैः पूर्वदेहोत्पादितशुभकर्मभिः, दानैश्च हेतुभिः, ईश्वरे परमेश्वरे, कृष्णे एव, स्तात् । क्वचिन्मतिरित्यपि पाठः ॥ ६७ ॥ एवमिति । हे नराधिप राजन्, एवमित्थं, गोपैः कर्तृभिः, कृष्णभक्त्या करणभूतया, सभाजितः सम्मानितः उद्धवः, कृष्णपालितां मथुरां, लालितामिति पाठेऽनुरञ्जितां, मथुरां पुनः आगच्छत् आजगाम ॥ ६८ ॥ कृष्णायेति । ततः कृष्णाय श्रीकृष्णाय, प्रणिपत्य नमस्कृत्य, व्रजौकसां भक्त्युद्रेकं भक्त्युत्कर्षं, आह । वासुदेवाय श्रीकृष्णाय, रामाय बलभद्राय, राज्ञे उग्रसेनाय च, उपायनानि नन्दादिभिः समर्पितान्यर्हवस्तूनि, अदात् समर्पितवान् । इति द्वयोरेकसम्बन्धः ॥ ६९

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे उद्धवप्रतियाने सप्तचत्वारिंशोऽध्याय. ॥ ४७ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

मनस इति : १०.४७.६७.

मनसा वचसा च वर्ष्मणाऽपि भगवत्पादयशःप्रणामभाजाम् ।
रतिरीशपदानुगेति सारो भृशमेकः कथितः शृणूद्धव त्वम् ॥ १८७ ॥

कर्मभिरिति : १०.४७.६८.

सर्वांशतोऽपि वृत्तिः श्रीकृष्णे निर्व्याजमस्ति नः । सर्ववित् सर्वगः साक्षी स एवात्रेत्यलं गिरा ॥ १८८ ॥
त्वत्पादार्पितवृत्तीनां गवां तद्रक्षिणामपि । समजश्च समाजश्च कुशली त्वत्प्रसादतः ॥ १८९ ॥

प्रभुरसि निखिलानां त्वं नियन्ता खलानां शरणमनुजरक्षादीक्षितः सदयार्द्रः ।
शरणपदमुपेता मैत्र्यभाजः सदम्या वयमपि कथनीयं वाचिकं तूद्धवैतत् ॥ १९० ॥

एवमिति : १०.४७.६९.

श्रीशप्रेरणयैव गोकुलरतिः सर्वोऽपि जन्तुर्भवत्येकस्तत्र विशेष एष यदसौ सद्भक्तियुक्तो भवेत् ।
तद्व्क्लेशमवाप्य तत्र वसतिं तत्प्रीतिमापादयन् भूयः श्रीशपदैकदम्भर्वात भुव्येतत् स्फुटं ह्युद्धवे ॥ १९१ ॥
यन्नामश्रवणादपास्य निखिलं दुःखामयौघं पुमानस्यां नित्यसमुत्सवो भुवि भवत्यापूर्णकामो भृशम् ।
स श्रीशोऽभवदन्तरे बहिरपि द्वेधोद्धवालङ्कृतो यद्वृत्तश्रवणादिति स्फुटमसौ तत्पुण्यविज्ञापरः ॥ १९२ ॥

कृष्णायेति : १०.४७.७०.

भक्तिप्रियो हि भगवानेतद्वाक्यं परिष्कृतं ददता । तद्भक्तिवस्तु हरये तेनोपायनचयं तदा राज्ञे ॥ १९३ ॥

श्रीशकल्पतरुक्रीडा० ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते भक्तिरसायने सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

कृष्णप्रिया

श्री गोपियों ने सदैन्य श्री उद्धव लालजी को कहा कि–हमारे मन की सब वृत्तियाँ भगवान् श्रीकृष्ण पादाम्बुज की आश्रित बनकर ही रहे। हमारी वाणी प्यारे के अनन्त सुमङ्गल नामों का ही गान करती रहे। हमारी काया कायम प्यारे की सेवा में लगी रहे, एवं भावपूर्वक भगवान के श्रीचरणों में प्रणाम करती रहे। हमारी देह भगवान की सेवा सामग्री सम्पादन के कार्यों में लगी रहे ॥ ६७ ॥ उद्धवजी ! भगवान श्रीकृष्ण के श्रीचरणों में हमारी ओर से यह निवेदन करना कि भगवान श्रीकृष्ण की इच्छा से कर्मानुसार हम जहाँ भी परिभ्रमण करें वहाँ वहाँ जो भी मङ्गल सत्कर्म दान व्रत जप तप आदि पुण्याचरणों से जगदीश्वर श्रीकृष्ण के श्रीचरणों में दृढ भक्ति बनी रहे ॥ ६८ ॥ श्रीशुकदेव जी ने कहा कि राजन् ? श्री गोपजनों ने भगवान श्रीकृष्ण की सुदृढ भक्ति पूर्वक श्रीउद्धव जी की प्रार्थना की। श्रीउद्धव जी दिव्य भक्ति भाव का पाथेय साथ में लेकर भगवदाश्रित मधुपुरी में पुनः पधार गए ॥ ६९ ॥ श्रीउद्धव जी प्रभु के चरणों के समीप आए, भाव विभोर उद्धवजी ने श्री कृष्ण भगवान के चरणों में प्रणाम किए पुनः श्रीव्रज में व्रजजनों की विशिष्ट भक्ति का दर्शन किया उसका भगवान के सन्मुख निरूपण किया एवं व्रजजनों ने जो वुपायन समर्पित किए थे वे नाथ के चरणों में रख दिए। श्रीवसुदेव देवकीजी बलभद्र आदि को जो उपायन दिए थे और महाराज उग्रसेन जी को जो उपहार दिए थे वे पृथक् पृथक् दे दिए ॥ ७० ॥

श्रीमद्भागवत दशम स्कन्ध निरोध लीला राजस प्रमेय प्रकरण का ४७ वाँ अध्याय समाप्त ॥

—:-०-:—

अथाष्टचत्वारिंशोऽध्यायः

श्लोकाः	अनु.	मि. उ.	वसंत	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
३६	२३	८	५	३	१४०१	१९	३५	१४५५	४५।	७

श्रीशुक[1] उवाच

अथ विज्ञाय भगवान् सर्वात्मा सर्वदर्शनः । सैरन्ध्र्याः कामतप्तायाः [2]प्रियमिच्छन् गृहं ययौ ॥ १ ॥
महार्होपस्करैराढ्यं[3] कामोपायोपबृंहितम् ।
मुक्तादामपताकाभिर्वितानशयनासनैः । धूपैः सुरभिभिर्दीपैः स्रग्गन्धैरपि मण्डितम् ॥ २ ॥
[4]गृहं तमायान्तमवेक्ष्य साऽऽसनात् सद्यः समुत्थाय हि [5]जातसम्भ्रमा ।
[6]यथोपसंगम्य सखीभिरच्युतं सभाजयामास [7]सदासनादिभिः ॥ ३ ॥
[8]तथोद्धवः साधु तयाभिपूजितो न्यषीददुर्व्यामभिमृश्य चासनम् ।
कृष्णोऽपि [9]तूर्णं शयनं महाधनं विवेश लोकाचरितान्यनुव्रतः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—अथ, सर्वात्मा, समदर्शनः, भगवान्, विज्ञाय, (कुब्जाकामनाम, ज्ञात्वा) कामतप्तायाः, सैरन्ध्र्याः, प्रियम्, इच्छन् गृहम्, ययौ ॥ १ ॥ महार्होपस्करैः, आढ्यम्, कामोपायोपबृंहितम्, मुक्तादामपताकाभिः, वितानशयनासनैः, सुरभिभिःधूपैः, दीपैः, स्रग्गन्धैः, अपि, मण्डितम्, गृहम्, ययौ ॥ २ ॥ गृहम्, समायान्तम्, तम्, अवेक्ष्य, जातसम्भ्रमा, सा, आसनात्, हि, सद्यः, समुत्थाय, अच्युतम्, सखीभिः, यथा, उपसङ्गम्य, सदासनादिभिः, सभाजयामास ॥३॥ तथा, साधुतया, अभिपूजितः, उद्धवः, आसनम, अभिस्पृश्य, उर्व्याम, न्यषीदत्, च, कृष्णः, अपि, लोकाचरितानि, अनुव्रतः, तूर्णम, महाधनम्, शयनम्, विवेश ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अष्टचत्वारिंशकेऽथ कृष्णः कुब्जामरीरमत् । अक्रूरस्य गृहं गत्वा तं गजाह्वयमादिशत् ॥ १ ॥
सैरंध्रीकाममापूर्य पूरयित्वा मनोरथान् । अक्रूरस्य ततः कृष्णस्तेन पार्थानसांत्वयत् ॥ २ ॥ १ ॥

महार्हैरनर्घ्यैरुपस्करैर्गृहोपकरणैरन्वितम् । कामोपायैस्तदुद्दीपकैः सुरतबंधादिलेख्यैरादर्शादिभिरुपबृंहितम् ॥ २ ॥ यथा यथोचितम् । सद्भिरासनादिभिः ॥ ३–४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथोद्धवागमनोत्तरम् । तमक्रूरम् (१) । ततः सैरन्ध्रीकामपूर्त्युत्तरम् । अक्रूरस्य मनोरथान्पूरयित्वा । तेनाक्रूरेण (२)। अथेत्युक्तार्थम् । सर्वं दर्शनं ज्ञानं यस्य स तथा । सैरन्ध्रीमपि संत्यक्तुमहं शक्नोमि नोद्धव । किमुत व्रजलोकांस्तानिति व्यञ्जयिमाम गात् । श्रीसैरन्ध्र्यै नमस्तस्यै यत्कृपाकृष्टमानसः । स्वयं गृहं गतो वस्तुमसंकोचं रमापतिः । अथेति सार्धद्वयकम् । भगवाञ्श्रीकृष्णः अथेत्युद्धवस्यागमनहेतोर्विज्ञाय बहूनि दिनानि व्याप्य तन्मुखाद्व्रजौकसां पित्रादीनां प्रत्येकं सान्त्वनप्रायं विशेषेणानुभूय कदाचित्सैरन्ध्र्या गृहं ययौ । कीदृश्याः–कामतप्तायाः स्वार्थाभिलाषविशेषेण दह्यमानायाः । तर्हि किमेषोऽपि कामी ? नेत्याह–प्रियमिच्छन् मत्प्रीत्यर्थमसावंगरागं मह्यमर्पितवती तस्मादह ममुष्याः प्रीतिविशेषमेव कृत्वाऽनृणः स्यामिति विचारयन्नित्यर्थः ॥ १ ॥ उपबृंहितमुपचितम् । सुरतसम्बन्धिलेख्यानि वृषभबन्धविपरीतरत्यादिचित्राणि । सुरभिर्घ्राणेन्द्रियतृप्त्युत्पादकैः 'सुरभिर्घ्राणतर्पणः' इत्यमरः । सार्द्धेनान्वयः । महार्हेति–संभोगोत्सवोपयोगिबहूपकरणान्वितमित्यर्थः । कामोपाया मधुतांबूलादयः । उपस्कारानेव प्रपञ्चयति—मुक्तादामानि गृहस्य पताकोपरीति ज्ञेयम् ॥ २ ॥ तं कृष्णम् । जातः संभ्रमो वेगो यस्याः सा तथा । सदासनं सिंहासनं, बहुमूल्यनेपालकंबलादिमयं वा । आदिना पुष्पमालादिग्रहः । अवेक्ष्य दूरे । दृष्ट्वा ।

---

[1] बादरायणि–प्रा. पा. । [2] प्रीतिं यच्छन् । [3] स्कारोपेतं–विज. ; स्कराठ्यं वै–इति कस्यचित् । [4] कामशास्त्रकृतालेख्यैर्नानावर्णैः सुशोभनैः–शुकदेवे. वीरे. । [5] सुजात–वीर. । [6] अथो–विज. । [7] सहा–विज. । [8] अथो. । [9] नूत्नं–वीर. ; दान्तं–विज. ।

सम्यगुल्लासेनोत्थाय। हि पादपूरणे। उल्लासकार्यमाह— जातसंभ्रमा, सम्भ्रमः चित्तत्वरा। अच्युतमिति प्रतिज्ञातच्युतिरहितम् ॥ ३ ॥ यथा कृष्णस्तथैव। तया सैरन्ध्र्या। अभिमृश्य स्पृष्ट्वा। सर्वेश्वरसमक्षं समासनोपवेशनानौचित्याद्भूमावेवोर्णाद्यासने न तु सिंहासन इति भावः। महाधनमनर्घ्यम्। लोका अत्र रसिकास्तदाचरितानि दासीसंगादीनि। वस्तुतस्तु लोकाचरितानि स्वोक्तिपालननिजजनाभिप्रेतार्थपूरणादीनि। तथेत्युक्तसमुच्चये। उद्धवश्च साधु यथा स्यात्तथाऽभितः पूजितः उर्व्यां न्यषीददिति भक्त्यासनमभिमृश्य स्पृष्ट्वेति तस्याः प्रीत्यर्थं वन्दित्वेत्यर्थो वा। महाधनममूल्यरत्नादिमयमित्यर्थः। तूर्णं विवेशेति पूजायाः पूर्वमासने निविष्टस्ततः उत्थाय सद्यो गृहान्तःशय्यायां स्वयमुपविवेशेत्यर्थः। तत्र हेतुः–लोकानामाचरितानि स्वैरस्त्रीगृहमध्ये रत्यर्थं स्वेच्छयैवासु तच्छय्यानिवेशादीनि सर्वाण्येवानुसृतः। स्वीकृतलौकिक लीलत्वादेवात इदमपि रात्रावेव बोद्धव्यम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

"सैरिन्ध्रीमपि संत्यक्तुमहं शक्तोऽस्मि नोद्धव! किमुत व्रजलोकांस्तानिति व्यञ्जन्निमामगात्। श्रीसैरिन्ध्र्यै नमस्तस्यै यत् कृपाकृष्टमानसः। स्वयं गृहं गतो रन्तुमसङ्कोचं रमापतिः"। अथेति सार्द्धद्वयकं भगवान् श्रीकृष्णः। अथेत्युद्धवस्यागमनहेतोविज्ञाय बहूनि दिनानि व्याप्य तन्मुखाद्व्रजौकसां पित्रादीनां प्रत्येकं सान्त्वनप्रायं विशेषेणानुभूय कदाचित् सैरिन्ध्र्या गृहं ययौ। कीदृश्याः कामतप्तायाः स्वार्थाभिलाषविशेषेण दह्यमानायाः तर्हि किमेषोऽपि कामी नेत्याह। प्रियमिच्छन् मत्प्रीत्यर्थमसावङ्गरागं मह्यमर्पितवती तस्मादहममुष्याः प्रीतिविशेषमेव कृत्वा अनृणः स्यामिति विचारयन्नित्यर्थः ॥ १ ॥ ननु कुतस्तस्यास्तादृशमपि वाञ्छितं बिधित्सितवान् ज्ञातवांश्च तत्राह। सर्वेति। सर्वात्मत्वेन सर्वहितकारित्वात्तदपि कर्त्तुमुचितः सर्वदर्शनत्वेन तदपि ज्ञातमित्यर्थः। कामोपाया मधुताम्बूलादयः उपस्करानेव प्रपञ्चयति। मुक्तेत्यादिना। मुक्तादामानि गृहस्यान्ते पताकाश्चोपरीति ज्ञेयं सुरभिभीरित। यथायथं वितानादिभिरपि योज्यम् ॥ २ ॥ अवेश्य दूरे दृष्ट्वा सम्यगत्युल्लासेनोत्थाय हि पादपूरणे। तच्च करणं तस्याः सम्भ्रमक्रमेण। उल्लासकार्यमाह। जातसम्भ्रमा सम्भ्रमश्चित्तत्वरा अच्युतमिति प्रतिज्ञातच्युतिराहित्याभिप्रायात् ॥ ३ ॥ तथेत्युक्तसमुच्चये। उद्धवश्च साधु यथा स्यात्तथा तया सैरिन्ध्र्या अभितः पूजित उर्व्यां न्यषीददिति भक्त्या आसनमभिमृश्य स्पृष्ट्वेति तस्याः प्रीत्यर्थं वन्दित्वेत्यर्थो वा। महाधनम् अमूल्यरत्नादिमयमित्यर्थः। तूर्णं विवेशेति पूजायां पूर्वमासने निविष्टस्तत उत्थाय सत्वरं गृहान्तःशय्यायां स्वयमेवोपविवेशेत्यर्थः। तत्र हेतुः। लोकानामाचरितानि स्वैरस्त्रीगृहमध्येरत्यर्थं स्वच्छयैवाशु तच्छय्याधिष्ठेयेति पर्यन्तलक्षणानि सर्वाण्येवानुवृतोऽनुसृतः। स्वीकृतलौकिकलीलत्वादित्यर्थः। अत इदमपि रात्रावेव बोद्धव्यम् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्री सैरन्ध्र्य नमस्तस्यै यस्या भावनियन्त्रितः। स्वयं गृहं गतो रन्तुं नागरीगणवल्लभः॥

गोकुलाश्वासे सत्येवान्तः स्वास्थ्यसिद्धेः, विज्ञाय (भा० १०।४२।१२) 'एष्यामि ते गृहम्' इति दत्तवरमनुस्मृत्य; यद्वा, कामतप्तां तां विज्ञाय, यतः सर्व्वस्यात्मा अन्तर्यामी, अतएव सर्व्वं पश्यतीति तथा सः; काम आत्मना सह रहो रिरंसा तेन ज्वररूपेण तप्ताया इत्येतावन्तं कालं सा तदाशया मुहुर्गृहादिकमुपस्कुर्व्वाणा स्वगृहान्तरेवासीदिति ज्ञेयम्। अतः प्रियं प्रीतिमिच्छन् चिकीर्षन्, यतो भगवान् दीनदयालुरित्यर्थः ॥ १ ॥ गृहस्य कर्त्तव्यरतियोग्यतां दर्शयन् तद्वर्णयति—महार्हेति सार्द्धेन। उपस्कराः स्फाटिकस्तम्भादयः; किंवा तानेव प्रपञ्चयति—मुक्तेत्यादिना; मुक्तादामानि गृहस्यान्तः, पताकाश्चोपरीति विवेचनीयम्। सुरभिभिरिति यथायथं वितानादिभिरपि योज्यम् ॥ २ ॥ अवेक्ष्य दूरतो दृष्ट्वा सम्यक् दूरादासनपरित्यागकम्पादिकामविकाराद्नोत्थाय, 'हि' अपि, जातसम्भ्रमापि सखीभिः सह, 'उप' समीपे, संगम्य। यद्वा, हि विशेषे, जातसम्भ्रमत्वात् स्वयमशक्ता सखीभिः कृत्वा सभाजयामास। आदि-शब्दात् पादप्रक्षालनादयः, अच्युतमिति आगमनेन निजवाक्यच्युतिराहित्याद्यभिप्रायेण ॥ ३ ॥ तथा तेनैवोक्तप्रकारेण, उद्धवश्च साधुतया सम्यक्त्वेन, यद्वा, साधु यथा स्यात्तथा तया, सैरिन्ध्र्या अभितः पूजितः तथेत्येव साधुतयेत्यनेन अभि शब्देन च विवृतम्। यद्वा, तथाभि पूजने हेतुः–साधुतया श्रीकृष्णप्रियत्वादित्यर्थः। उर्व्यान्ययीददिति श्रीभगवतः श्रीसैरिन्ध्र्या वा भक्त्या आसनमभिमृश्य स्पृष्ट्वेति च, तस्याः प्रीत्यर्थम्, महाधनममूल्ययरत्नादिमयमित्यर्थः। तूर्णं विवेश पूजायाः पूर्वमासने निविष्टोऽथोत्थाय सस्वरं गृहान्तःशय्योपरि स्वयमेवोपरिवेशेत्यर्थः। तत्र हेतुः—लोकानामाचरितानि स्वैरस्त्री-गृह मध्येरत्यर्थं स्वेच्छयैव आशु तच्छय्याधिष्ठेयेत्यादिलक्षणानि तान्यनुव्रतोऽनुसृतः, अत इदं रात्रावेव बोद्धव्यम्। एवमीश्वरस्यापि लौकिक क्रीडया पूर्ववल्लीलामाधुर्य्यैव ज्ञेया। 'दान्तम्' इति पाठे गजदम्भादिनिर्म्मितम् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पूर्वं त्रिवक्रया अक्रूरेण च प्रार्थितो भगवांस्तयोर्गृहान्प्रत्येष्यामीत्युक्तवानित्युक्तम् अधुना स्वं वचः सत्यापयितुं भगवांस्तयोर्गृहान् गत्वा तदिष्टं चकारेत्यनुवर्णयत्यष्टचत्वारिंशेन। अथेत्यादिना। अथोद्धवगमनानन्तरं विज्ञायागमिष्यामीत्युक्तं त्रिवक्राक्रूरयोरभिप्रेतं चानुस्मृत्य तत्र हेतुः सर्वान्तरात्मात एव सर्वदर्शनः युगपत् सर्वसाक्षात्कारकर्ता तावत् कामेन

तप्तायाः सैरन्ध्र्याः प्रियमिच्छन् कर्तुमिति शेषः ॥ १ ॥ गृहमनुवर्णयति द्वाभ्याम् । महार्हैरनर्घ्यैः गृहोपकरणैराढ्य मन्वितं कामोपायैः क्रीडोपकरणैरुपबृंहितं समृद्धं वितानैर्विपुलैः शयनादिभिः शय्यादिभिः वितानैः गृहोपरि चन्द्रोदयैश्शयनादिभिश्चेति वा ॥ २ ॥ सुरभिभिर्दीपैः स्रग्भिर्गन्धैश्च मण्डितमलङ्कृतं तथा नानावर्णैः सुशोभनैः सुन्दरैश्च कामशास्त्रकृतालेख्यैः कामशास्त्रोपदिष्टैरतिबन्धादिभिरालेख्यैरभिमण्डितम् ॥ ३ ॥ गृहमिति । उक्तविधं गृहं प्रत्यायान्तं श्रीकृष्णमवलोक्य सुजातः संभ्रमो यस्याः सा सैरन्ध्री सद्यस्तदैवासनात्समुत्थाय सखीभिः सह यथा यथोचितमुपसङ्गम्याभिसमेत्य समीचीनैरासनादिभिराद्िशब्दादर्घ्यादिभिश्च सभाजयामास पूजयामास ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भक्तभक्तिरमालिङ्गितगात्रः श्रीनारायणः सत्सन्नतवाञ्छितार्थसाधनार्थमवतीर्ण इत्येतमर्थमभिप्रेत्यस्मिन्नध्याये तत्रादौ सैरन्ध्र्या अभीष्टसाधनार्थं तद्गृहगमनं वक्ति । अथेत्यादिना । अथ कथान्तरारम्भः सैरन्ध्र्याः गन्धकारिकायाः कृष्णागमनकामेन तप्तायाः यच्छन् ददत् ॥ १ ॥ महार्हैः महतां योग्यैरुपस्करैः उपकरणैरुपेतं कामोपायैः कामभोगसाधनैः उपबृंहितं पूर्णम् एतानेव दर्शयति । मुक्तेति । वितानमुपरिपट्टिका ॥ २ ॥ येन प्रकारेणोपगमनं कार्यं यथोपसङ्गम्य सदासनादिभिः ॥ ३ ॥ साधुतया उचिततया अभिमृश्य परिमृज्य स्पृष्ट्वेत्यर्थः । दान्तं गजदन्तरचितं महाधनेन विक्रीयते आपाद्यते चेति महाधनम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

सैरिन्ध्रीमपि संत्यक्तुमहं शक्तोऽस्मि नोद्धव ! । किमुत व्रजलोकांस्तानिति व्यञ्जन्निमामगात् ॥

अथ उद्धवागमनानन्तरं श्रीगोकुलस्य किञ्चिदाश्वासने ज्ञात एव सर्वात्मा सर्वदर्शनोऽपि ॥ १—३ ॥ न्यसीददुर्व्यामिति साक्षात् स्थितस्य स्वप्रभोर्गौवात् इति ज्ञेयम् ॥ ४-७ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथ विज्ञाय भगवानित्यादि । विज्ञाय तस्यौत्कण्ठ्यं विशेषेण ज्ञात्वा प्रियं प्रीतिमिच्छन् गृहं ययौ । सैरिन्ध्र्यास्तन्नाम्ना ख्यातायाः भगवान् श्रीकृष्णः सर्वात्मा सर्वसुहृद् सर्वदर्शनः सर्वज्ञः स्वरूपं जानातीति भावः । स्वरूपं तु पृथिव्यंशरूपम्, तेन तत्र प्रवृत्ते, न ह्यकार्ये भगवत्प्रवृत्तिः ॥ १-३ ॥ तथोद्धव इत्यादि । तथा तेन प्रकारेण भगवत् सख्यत्वेन सादरतयेत्यर्थः । तथा पूजायामासने दत्ते तदासनमभिमृश्य स्पृष्ट्वा उर्व्यां न्यषीदत् उपविवेश । तेनाति भगवत् प्रियेति कृत्वा समादरः कृत एव । तद्विधा हि तद्विधानां महिमानं जानन्ति । कृष्णोऽपि तस्या शयनं विवेश । कीदृशम् ? दान्तं हस्तिदन्तकृतपर्यङ्कम् महाधनं बहुमूल्यम् लोकाचरितानि लौकिकीलीला ॥ ४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कामतप्ताया इति कामः—कदा कृष्णो मद्गृहमेष्यतीत्यभिलाषस्तेनोद्विग्नायाः ॥ १-३ ॥ आसनं तया दत्तमभिमृश्य वन्दित्वा उर्व्यां न्यषीदत् । तया दत्तमिति संभ्रमेण गोपीनां मतं दृष्ट्वा तादृशरतिमतीषु बहुमानोऽत्यन्त एवोद्धवस्य जात इति नर्मसचिवं तमेव सङ्गे कृत्वा जगाम श्रीकृष्णः । श्रीकृष्णोऽपि तस्या अभिलाषं ज्ञात्वा द्रुतं शयनं विवेश ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अष्टचत्वारिंशकेऽगात् कुब्जां रमयितुं हरिः । स्तुतोऽक्रूरेण तद्गेहे प्राहिणोत्तं गजाह्वयम् ॥

विज्ञाय उद्धवोक्तं विशेषतो ज्ञात्वा तत्र समाधानं पूर्वमेव कृतवानित्याह । भगवान्महातर्क्यैश्वर्यादेव मथुरायां स्थितोऽपि प्रकाशान्तरेण व्रजमगादेवेत्यर्थः । सर्वात्मत्वादेव सर्वमनोरथं पूरयितुमित्यर्थः । किंतूद्धवसमाधानार्थं सर्वदर्शनः तदा उद्धवं प्रति स्वीयप्रकाशद्वैतविरहप्रकाशेऽप्याविर्भावादिकमतिरहस्यमपि ज्ञापयामासैवेत्यर्थः । ततश्च पूर्वं यत् प्रतिश्रुतं तत् दातुं तेन सह कुब्जाया गृहं जगामेत्याह । सैरन्ध्र्या इति ॥ १ ॥ महार्हेति संभोगोत्सवोपयोगिबहूपकरणान्वितमित्यर्थः । कामोपायाः कामोद्दीपकालेख्यविशेषा औषधविशेषाश्च ॥ २ ॥ यथा यथोचितम् ॥ ३ ॥ उर्व्यां न्याषीददिति कृष्णप्रियया तया स्वहस्तदत्तासने दासस्य तस्योपवेशानौचित्यात् । अभिमृश्य स्वहस्तेन स्पृष्ट्वेति तस्याज्ञापालनार्थम् । शयनमन्तर्गृहस्थितशय्याम् ॥ ४ ॥

गूढार्थदीपिनी

अष्टचत्वारिंशके तु कुब्जां सन्तोष्य माधवः । अक्रूरस्यालयं गत्वा प्राहिणोत्तं गजाह्वयम् ॥ १ ॥

अथ उद्धवागमनानन्तरम् । विज्ञाय उद्धवोक्तम् ॥ १ ॥ गृहं वर्णयति सार्द्धेन । महार्होपस्करैः अमूल्यसामग्रीभिः । कामोपायैः कामासनैः परिपूर्णम् । दाम माला वितानम् उपरिपट्टिका ॥ २ ॥ सा कुब्जा आयान्तं तमवेक्ष्य सखीभिः सह सद्यः

समुत्थाय उपसङ्गम्य सम्मुखमागत्य च यथावत् तं कृष्णं पूजयामासेत्त्वयः सदासनं सिंहासनम् । संभ्रमः मानसी त्वरा ॥ ३ ॥ अभिमृश्य हस्तेन स्पृष्ट्वा । तूर्णमित्यत्र नूत्नमिति पाठः प्रशस्तः । शयनं पर्यङ्कम् । महाधनं बहुमूल्यम् । लोकेत्यनेन रात्रावेव अज्ञात एव । अनुव्रतः अनुसरन् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सैरन्ध्र्यक्रूरगृहगमनादिभगवच्चरितमष्टचत्वारिंशे वर्णयति अथेति । अथोद्धवागमनानन्तरम् एष्यामि ते गृहं सुभ्रू इति स्ववाक्यं विज्ञाय यथा जीवानामन्योऽन्यसंयोगे विधिनिषेधौ भवतः नतु पृथिव्यास्तत्संयोगे तस्यास्तादात्म्यत्वादेवं जीवानामन्योऽन्यसंयोगे विधिनिषेधौ भवतः नतु श्रीकृष्णस्य तत्संयोगे इत्याह । सर्वात्मेति ॥ १ ॥ कामोपायैः कामोद्दीपकैः ॥ २ ॥ यथा यथोचितमुपसंगम्य अभिसमेत्य सदासनादिभिः सभाजयामास पूजयामास ॥ ३ ॥ आसनं श्रीकृष्णासनमभिमृश्य शिरसा संस्पृश्य ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ उद्धवस्तद्भक्तिं निशाम्य चित्रचेतस्क एवं तास्तुवन्दिनानि कानिचिद्गमयित्वा मधुरामगादित्यादि कथ्यतेऽस्मिन्नध्याये । तत्रादौ गोपीकृतसत्कारमुद्धवस्य वक्ति शुक इति वक्ति ॥ श्रीशुक इति । व्यपेतो नष्टो विरहजनित आमयो रोगो यासां ता अधोक्षजे स्निग्धं स्नेहसहितं भक्तिमिति ज्ञात्वा । अनेनास्मिन्पूजितेऽजितः पूजितो भवतीति तासां भावो ध्वन्यते ॥१॥ कृष्णस्य लीला यासु ताः कथा गायन् गोपीनां शोकान्विनुदन्परिहरन्गोकुलं रमयामास ॥ २ ॥ तावन्त्यहानि सन्तोषातिशयेन क्षणप्रायाणि तत्सदृशान्युत्सवभूयिष्ठानि वा ॥ ३ ॥ सरिद्वनगिरिद्रोणीर्वीक्षन्वीक्षमाणः कृष्णं संस्मारयन्नेम इति सरलः पाठः । कृष्णक्रीडाः स्मरन्निति पाठे व्रजौकसां तैः सह कृष्णक्रीडां स्मरन्नेम इत्यन्वयः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं पूर्वनिरोधस्य सान्त्वनोत्कर्षवर्णनम् । कृत्वा भविष्ययोश्चैव सान्त्वनं विनिरूप्यते ॥
मथुरावासिनः सर्वे राजसाः परिकीर्त्तिताः । सात्त्विकाः पाण्डवा भक्तास्तयोः सान्त्वनमुच्यते ॥
राजसत्वप्रसिद्ध्यर्थं स्त्रीपुंसोरत्र वर्णनम् । प्रक्रियान्तररूपा हि किञ्चिद्द्वारा तथा कृताः ॥
अक्रूर उद्धवान्मुख्यस्ततोऽग्रे प्रेषणं मतम् । दासभावेत्युद्धवस्तु शास्त्रतस्त्वयमेव हि ॥
स्त्रीसान्त्वनं तु पुरतो राजसत्वात्सरूपतः । वाचान्यस्य निरूप्यं हि स्तुत्या च प्रेषणेन च ॥
पञ्चचत्वारिंशेऽध्याये कुब्जाक्रूरादिसान्त्वनम् । कायेन वचसा चक्रे भाव्यर्थमिति वर्ण्यते ॥

प्रथममेकादशभिः कुब्जायाः कथामाह साधिकैः । अथ विज्ञायेति । तस्या हि सर्वा मनोवृत्तयः पूरणीयाः ततोऽप्यधिकं च कर्त्तव्यमिति आदौ भगवान् तस्या गत इत्यर्थः । अथेति । अथ भिन्नप्रक्रमे भक्त्यभावात् परं तस्याः दुःखं तुल्यमिति तन्निवृत्त्यर्थं गत इत्यभिप्रायेणाह । विज्ञायेति । प्रकरणात् कामसन्तापज्ञाने सामर्थ्यं भगवानिति तथा करणे दोषाभावे चावश्यको हेतुः सर्वात्मेति दृष्ट्वावश्यं प्रतीकारः कर्त्तव्य इति सर्वदर्शन इति फलमुखो हेतुरुक्तः पूर्वमयोग्यता देहे स्थितेति न तस्याः कामपीडा इदानीं तु देहयोग्येऽपि स्त्रीचर्यां सर्वां जानातीति तस्याः कामपीडा महती जातेत्याह । सैरन्ध्र्या इति । सैरन्ध्री हि अन्तः पुरे अधिकारिणी स्त्री स्त्रीचरित्रं जानातीति कामतापो युक्त एव तस्या आगमनसामर्थ्याभावात् स्वयमेव गृहं ययौ स्वगमनमात्रेणैव तस्यास्तापो निवर्तत एव तथापि प्रियमिच्छन् ययौ मनसा तस्याः प्रियं भवत्विति विचारितवान् ॥ १ ॥ ननु किमेवं विचारेण कर्तव्यमेव हि प्रियं तद्गमनेनैव भविष्यतीत्याशङ्क्य तन्निराकरणार्थं भगवदिच्छया जातोत्कर्षं गृहं वर्णयति । महार्हेति सार्धेन । यथा प्राकृतमपि गृहं भगवदिच्छयैवं जातम् एवं सापि गोपिका तुल्या भविष्यतीति प्राकृतायाः तथात्वं कर्त्तव्यमिति प्रियेच्छा युक्तैव महार्हाण्यमूल्यानि गृहादीनि पात्रादीन्युपस्करा यस्य तैर्वा आढ्यं सम्पन्नं कामोपायाः कामशास्त्रोक्तानि साधनानि उद्दीपकानि प्रियाणि पुष्पादिसम्पत्तिः इन्दुर्मन्दिरमित्यादीनि तैरुपबृंहितं लौकिकस्तच्छास्त्रीयश्च उत्कर्ष उक्तः अलौकिकोत्कर्षमाह । मुक्तादामभिः पताकाभिश्च बहिर्मण्डितं वितानैश्चन्द्रातपत्रैः शयनार्थमुपवेशनार्थं च सुखस्पर्शास्तरणैः प्रत्यहं वैशेषिकैरपि मण्डितमित्याह । धूपैरिति । अगरुसम्भवाः आमोदाः दीपा अग्निमयाः मणिमया वा स्रग्भिः गन्धैश्च शैत्यार्थं सर्वत्र लेपनं मण्डनम्॥२॥ एवं त्रिविधोऽप्युत्कर्षः भगवदिच्छया तस्मिन्गृहे जात उक्तः ततो गते भगवति यद्वक्तव्यं तदाह । गृहं तमायान्तमिति । भगवदिच्छाविषयत्वाद्गृहस्यापि कर्मता यतस्तं तादृशं भगवन्तमायान्तः मवेक्ष्य तथैवासनादुत्थाय प्रथमं जातसम्भ्रमा जाता इति कर्त्तव्यतामूढा जाता युक्तश्चायमर्थः ततः यथावदुपसङ्गम्य सखीभिः सहिता सभाजयामास । ननु कान्तोऽयं पूजया विलम्बितः निवृत्तकामो भवेत् तत्राह । अच्युतमिति । सदासनादिभिरिति । सुवर्णमयान्यासनानि शय्यामयानि वा अनुपभुक्तानीति सत्पदेन ज्ञापितम् ॥ ३ ॥ तथोद्धव इति तथैव उद्धवोऽपि पूजितः परं साधुतया अनेन भगवान् भर्तृतया पूजित इति ज्ञायते कामोऽपि दोषात्मक इति अर्थात् व्यावृत्तिः फलति उर्व्यामेवोपविष्टः आसनमुपस्पृश्येति राजधर्मपरिज्ञानं निरूपितं तस्या कृत्ये जाते

भगवानपि स्वकार्यं कृतवानित्याह । कृष्णोऽपीति । तदर्थार्थमारोपिते कामे क्षणविलम्बितश्चेत् जगत् काममयमेव स्यादिति तूर्णमेव शयनं विवेश नन्वनिर्दिष्टमुपभुक्तं वा भवेदिति भगवदर्थं वा अन्यार्थं वेत्यपि शङ्कां व्यावर्तयितुमाह । महाधनमिति । महत् धनमुपपादनार्थं तस्य तदत्युत्कृष्टं भगवदर्थमेवेति विवेशेति पूर्वोपवेशस्थानात् विविक्त इति ज्ञापयितुं ननु भगवानक्लिष्टकर्मा किमित्येवं प्रार्थनाव्यतिरेकेण स्वयमेव गत इति चेत्तत्राह । लोकाचरितानतनुव्रत इति । सा हि लौकिकी लोकरीत्यैव प्राह्येति तस्यास्तथैव मनोरथः सा गृहस्थवत् ईश्वरस्वभावं न जानाति गुप्तत्वात् खड्गव्यवहारं तु जानाति प्रकटत्वात् अतस्तथैव मनोरथ इति लोकानां साधारणानि चरितानि भगवानप्यनुव्रतो जातः ॥ ४ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । सर्वेषामात्मा सर्व दर्शनः सर्वज्ञः स भगवान् विज्ञाय संचित्य कामेन तप्तायाः सैरंध्र्याः कुब्जायाः प्रियमिच्छन् गृहं ययौ ॥ १ ॥ तद्विशिनष्टि । महार्हैरमूल्यैरुपस्करैर्गृहोपकरणैराढ्यं युक्तं कामस्योपायैः सुरतबंधादिचित्रैरुपबृंहितं मौक्तिकगुच्छादिभिर्मंडितम् अलंकृतम् ॥ २ ॥ गृहे आयांतं तं श्रीकृष्णमवेक्ष्य दृष्ट्वासनात्सद्यः तत्कालं समुत्थाय जातः संभ्रमो यस्याः सा कुब्जा यथा यथोचितं सखीभिः सहाच्युतमुपसंगम्य प्राप्य सद्भिरासनादिभिः पूजयामास ॥ ३ ॥ तथा तेनैव प्रकारेण साधु यथा स्यात्तथा कुब्जयाभिपूजित उद्धव आसनमभिमृश्य संस्पृश्योर्व्यां भूमौ न्यषीदत् उपाविशत् कृष्णस्तु महद्धनं यस्मिंस्तत् शयनं तूर्णं शीघ्रं विवेशारुरोह लोकैराचरितानि अनुव्रतः प्राकृतकृत्यान्यनुसृतः ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अष्टचत्वारिंशके हि कुब्जया रमणं हरेः । अक्रूरसान्त्वनं चापि विशेषेण निरूप्यते ॥ १ ॥

अथ नन्दादिव्रजवासिजनसान्त्वनानन्तरं भगवान् कृष्णः कामतप्तायाः सैरन्ध्र्याः कुब्जायाः कामसन्तापं विज्ञाय कामपूर्त्या तस्याः प्रियं सुखमिच्छन् तस्या गृहं ययौ । सन्तापज्ञाने हेतुमाह—सर्वदर्शन इति । सर्वसाक्षीत्यर्थः ॥ एवं परस्त्रीकामपूरणे दोषमाशङ्क्याह—सर्वात्मेति ॥ १ ॥ तदा भगवदिच्छया जातां तद्गृहसम्पत्तिमाह—महार्हेति सार्द्धेन । महार्हैरमूल्यैरुपस्करैः पात्रादिभिराढ्यमन्वितम् । कामोपायैः कामशास्त्रोक्तैः कामोद्दीपकैः सुरतबन्धादिलेख्यैरुपबृंहितं समृद्धम् । मुक्तादामभिः, पताकाभिर्ध्वजैः, वितानैश्चन्द्रातपत्रैः, शयनैः शय्याभिः, आसनैरुपवेशनार्थं सुखस्पर्शस्तरणैः, सुरभिभिरगरुसम्भवैर्धूपैः, दीपैश्च, मणिमयैः स्रग्भिः, गन्धैश्चन्दनादिभिश्च मण्डितमलङ्कृतम् ॥ २ ॥ एवंविधं गृहं प्रति आयान्तं तं कृष्णमवेक्ष्य जातः सम्भ्रमो यस्याः सा सैरन्ध्री सद्यस्तत्क्षण एव आसनात् समुत्थाय सखीभिः सह यथा यथोचितं उप सङ्गम्य अभिमुखमागत्य समीचीनैरासनादिभिः आदिशब्दादर्घ्योदिभिश्च सभाजयामास पूजयामासेत्यन्वयः । 'युक्तं चैवंकरणम्' इति सूचयति—हीति ॥ ३ ॥ तथोद्धवश्च साधु सम्यक् यथा भवति तथा तया सैरन्ध्र्याभिपूजितस्तत्र भगवता साम्यस्यानुचितत्वं मत्वा तया दत्तमासनं हस्तेनाभिमृश्य संस्पृश्य उर्व्यामेव न्यषीदत् उपविवेशेत्यन्वयः । कृष्णोऽपि नूत्नं नवीनं कैश्चिदप्यनधिरूढं महाधनं अनर्घ्यं शयनं पर्यङ्कं विवेश । ननु 'परमेश्वरस्य कथमेवं कामिवत् परस्त्रीशयनारोहणं घटते' इत्याशङ्क्याह—भक्तमनोरथपूर्त्यर्थं लोकानां चरितानि चेष्टितान्यनुव्रतः अनुसरन्नित्यर्थः ॥ ४ ॥

अन्वितार्थप्रकाशिका

अष्टचत्वारिंशके तु कुब्जां रन्त्वा गजाह्वयम् । कृष्णोऽक्रूरं प्रहितवान् श्लोकाः सार्द्धाः षडग्नयः (३६ ॥) ॥

उवाचद्वयम (२) ऋग्युनाश्चतुर्वेदा अनुष्टुभः (४३ ॥।) ॥ ४८ ॥

अथेति । अथ सर्वात्मा सर्वदर्शनः भगवान् उद्धवोक्तं विज्ञाय कुब्जागृहगमनं प्रतिश्रुतं स्मृत्वा वा कामतप्तायाः सैरन्ध्र्याः कुब्जायाः प्रियं सुखमिच्छन् तस्या गृहं ययौ ॥ १ ॥ गृहं विशिनष्टि—महार्हेति सार्द्धम् । महार्हैरमूल्यैरुपस्करैः पात्रादिभिराढ्यमन्वितं कामोपायैः कामशास्त्रोक्तैः कामोद्दीपकैः सुरतबन्धादिलेख्यैरौषधविशेषैः पेयताम्बूलादर्शाद्यैश्चोपबृंहितं समृद्धं मुक्तादामभिः पताकादिभिर्ध्वजैः वितानैश्चन्द्रातपत्रैः शयनैः शय्याभिरासनैरुपवेशनार्थं सुखस्पर्शास्तरणैः सुरभिभिरगुरुसम्भवैर्धूपैर्दीपैश्च मणिमयैः स्रग्भिर्गन्धैश्चन्दनादिभिश्च मण्डितमलंकृतम् ॥ २ ॥ गृहमिति । एवंविधं गृहं प्रत्यायान्तं तम् अच्युतं कृष्णमवेक्ष्य जातः सम्भ्रमो यस्याः सा सैरन्ध्री सद्यस्तत्क्षण एव आसनात्समुत्थाय सखीभिः सह यथा यथोचितम् उपसङ्गम्य सम्यग् अभिमुखमागत्य सद्भिः समीचीनैरासनादिभिः आदिशब्दादर्घ्योदिभिश्च सभाजयामास ॥ ३ ॥ तथेति तथोद्धवश्च साधु सम्यक् भवति तथा सैरन्ध्र्याभिपूजितस्तत्र भगवता साम्यस्यानुचितत्वं मत्वा तया दत्तमासनं हस्तेनाभिमृश्य संस्पृश्य उर्व्यामेव न्यषीदत् उपविवेश । लोकानां चरितानि चेष्टितान्यनुव्रतः अनुसरन् कृष्णोऽपि नूत्नं नवीनं कैश्चिदप्यनधिरूढं तूर्णमित्यपि पाठः । महाधनमनर्घ्यं शयनं पर्यङ्कं विवेश । अतो लोकानुसरणादिदं रात्रावेति ज्ञेयम् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ अष्टचत्वारिंशेऽध्याये हरेः कुब्जागृहगमनम क्रूरगृहगमनं च हस्तिनापुरे अक्रूरप्रेषणं चोच्यते सर्वात्मा सर्वांतर्यामी कुब्जाऽभिप्रायं विज्ञाय सैरंध्रयाः कुब्जाया ॥ १ ॥ महार्हैः महामूल्यैः उपस्करैः गेहासामग्रीभिश्च आढ्यं युक्तं कामोपयैः कामोपायैः कामोद्भवकरैः संभोगसूचनादिलेख्यैः उपबृंहितं अन्वितं ॥ २ ॥ गृहं स्वगेहं प्रति आयातं तमच्युतं सखीभिः सह यथायोग्यमुपसंगम्य ॥ ३ ॥ तथोद्धवः साधु यथा भवति तथा तया सैरंध्रयाऽभिपूजित आसनादिभिः सत्कृतः सन् आसनमभिमृश्य स्पृष्ट्वा भूम्यां न्यषीदतश्रुपविष्टः अनुव्रतोऽनुसृतः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अष्टचत्वारिंशके तु कुब्जां कृष्णो ह्यरीरमत् । ततोऽक्रूरगृहं गत्वा प्रादिशत्तं गजाह्वयम ॥ १ ॥
काममापूर्य कुब्जाया अक्रूरस्य मनोरथान् । पूरयित्वाऽथ तेनासौ कृष्णः पार्थानसान्त्वयत् ॥ २ ॥

पूर्वं त्रिवक्रयाऽक्रूरेण च प्रार्थितो भगवान् युवयोर्गृहान् प्रत्येष्यामीत्युक्तवान्, स्वतन्त्रः सोऽधुना स्वं वचः सत्यापयितुं तयोर्गृहान् गत्वा तदिष्टं चकारेति वर्णयति ॥ अथेति ॥ अथोद्धवागमनानन्तरं, सर्वात्मा सर्वान्तरात्मा, अत एव सर्वदर्शनः युगपत् सर्वार्थसाक्षात्कारकर्त्ता, भगवान् श्रीकृष्णः, विज्ञाय स्वेनागमिष्यामीत्युक्तं त्रिवक्राक्रूरयोरभिप्रेतमनुस्मृत्येत्यर्थः । कामतप्तायाः सैरन्ध्रयाः, प्रियं इच्छन् प्रियं कर्त्तुं वाञ्छन् सन्नित्यर्थः । गृहं सैरन्ध्रीभवनं प्रति, ययौ ॥ १ ॥ तद्गृहमनुवर्णयति द्वाभ्याम् ॥ महार्हेति ॥ महार्हा अनर्घ्या ये उपस्करा गृहोपकरणानि तैः, आढ्यमन्वितं, कामोपायाः क्रीडोपकरणानि तैरुपबृंहितं समृद्धं, मुक्तादामानि च पताकाश्च ताभिः, वितानमुल्लोचश्च शयनं शय्या च आसनानि च तैः अपि, उपबृंहितम् ॥ २ ॥ ॥ धूपैरिति ॥ सुरभिभिः सुगन्धवद्भिः, धूपैः, दीपैः, स्रजः पुष्पमालाश्च गन्धाश्च तैः अपि, मण्डितमलंकृतम् । नानावर्णैः सुशोभनैः, कामशास्त्रकृतालेख्यैः कामशास्त्रोपदिष्टैः रतिबन्धादिभिः अपि, मण्डितम् ॥ ३ ॥ गृहमिति गृहमुक्तविधं गृहं प्रति, आयान्तं समागच्छन्तं तं श्रीकृष्णं, अवेक्ष्यावलोक्य, जातः संभ्रमो यस्याः सा, सा सैरन्ध्री, सद्यस्तत्क्षणमेव, आसनात् समुत्थाय, सखीभिः सह, यथा हि यथोचितमेवेत्यर्थः । उपसंगम्य समभ्येत्य, सदासनादिभिः समीचीनैरासनादिभिः, आदि शब्दादर्घ्योदिभिश्च, सभाजयामास पूजयामास ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

अथ विज्ञायेति : १०.४८.१

यः पूर्णकाममिह मां मनुजो निजान्तः संचिन्तयेदनुदिनं मदनारतात्मा ।
तत्सद्म सोद्धवमहं प्रविशामि भूयोऽनाहूत एव जगतीत्यकृत स्फुटं सः ॥ १ ॥
प्राग्वागाश्रुतमर्थिनेऽर्थमपि चेद्दास्ये न दासाय तद्वाणी स्याच्छ्रुतिरूपिणीव रमणी क्षोण्यां हि गौणी मम ।
इत्यभ्यन्तरचिन्तनो निजवचःप्रामाण्यनैपुण्यधीः कामं पूरयितुं तदीयमगमत् सन्मन्दिरं सोद्धवः ॥ २ ॥
परिहासवचोऽपि नानृतं तन्मम मा भूदिति चिन्तयन् स तस्याः ।
अगमद् गृहमन्यथेन्दिरा यत्पदमायाति कथा तु तत्र काऽस्याः ॥ ३ ॥
निजाङ्गरागेण मदङ्गमर्चितं स्त्रियाऽनयाऽनङ्गधियोज्ज्वलश्रिये ।
न चेदहं तां प्रददे कृतघ्नतेत्यालोचयँस्तत्प्रियमिच्छति स्म सः ॥ ४ ॥
नैवादत्तं सिद्ध्यति क्वापि भूमौ एतद्वाक्याद्दत्तमर्थं प्रसूते ।
नाहं तच्चेदप्यमुष्यै प्रदद्यां तन्माहात्म्यं मे किमित्येतदैच्छत् ॥ ५ ॥
वासः कुविन्देन सुमं सुदाम्ना तथाऽनया चन्दनमर्पितं मे ।
कृतार्थतां तौ नयता मयाऽस्याःकार्येष्टसिद्धिस्त्विति किं तदैच्छत् ॥ ६ ॥
भुजङ्गशेखरत्वं मय्युपान्तेऽस्मिन्न संभवेत् । इति रामं विहायेशः सोद्धवस्तद्गृहं ययौ ॥ ७ ॥
पान्थानां त्वद्गृहं कुब्जे भवत्येव विरामभूः । इति स्मरन् स्ववाच्चं स विरामोऽगमदच्युतः ॥ ८ ॥
अभिरामः प्रकृत्याऽहं सरामोऽप्यनया युतः । स्यामेव प्रकृतेऽपीति तमुपेक्ष्यागमत् प्रभुः ॥ ९ ॥
अवलोत्सङ्गरङ्गोऽद्य वर्तते न तु पूर्ववत् । चिन्तयन्निति किं श्रीशः सोत्सवो ह्येक आययौ ॥ १० ॥
युक्तमेव विना रामं ययौ कुब्जागृहं प्रभुः । यत्तत्केलौ शास्त्रसिद्धं गुरुसान्निध्यवर्जनम् ॥ ११ ॥
अशेषसुखमेवास्यै देयं सम्प्रति कामगम् । अस्तीत्युत्सवसंयुक्त - स्तादृग्रूपतयाऽभ्यगात् ॥ १२ ॥
विदिताशेषघोषस्थ - योषिद्वृत्ते विशेषतः । नोद्धवे वञ्चना युक्तेत्यागात्तेन सहाच्युतः ॥ १३ ॥

उत्सवेन विना नैव शोभतेऽतनुसङ्गरः । तत्कामस्तद्गृहं श्रीशः सोद्धवो युक्तमित्यगात् ।। १४ ।।
सर्वापि भूः सोद्धवाऽभून्मयि शत्रुविनाशिनि । कथमेतद् गृहं तादृङ् नेति तत्सहितोऽभ्यगात् ।। १५ ।।

महार्हेति : १०.४८.२.

भावी प्रसादो यत्रैषस्तद्धामनि सुधोज्ज्वले । युक्ता सुवर्णसद्रत्नमुक्तानामनिशं स्थितिः ।। १६ ।।

तथोद्धव इति : १०.४८.४.

योऽस्मिन्नुत्सवबोध्यतामधिगतो यः स्पृह्यमानो जनैरानन्दः सहि तुच्छमेव भवति श्रीशेक्षणानन्दतः ।
आसीत्तत्र स उद्धवः सुहृदपि श्रीशाश्रितादासनात् तस्माद्यद्बहिरेव तेन समभूद् व्यक्तार्थमुक्तं वचः ।। १७ ।।

प्रभ्वासनं सर्वशुभप्रदं सदा चकास्त्यतस्तत्र किमन्यगोत्सवैः ।
विमृश्य संस्पृश्य तदासनं तदा स उद्धवो युक्तमधिश्रितोऽवनिम् ।। १८ ।।

यत्राद्धा राजते श्रीमान् मूर्तिमान् परमेश्वरः । प्रासादस्तद्गृहं युक्तं तदुर्वी लसदुद्धवा ।। १९ ।।

कृष्णप्रिया

राजस प्रमेय प्रकरण का यह षष्ठ अध्याय है अध्याय क्रम से यह ४८ वाँ अध्याय है श्री सुबोधिनी जी के क्रम से यह ४५ वाँ अध्याय है इस अध्याय में भगवान श्रीकृष्ण काया से कुब्जा का कायिक ताप की सान्त्वना करेंगे और वाणी सुधा से भक्तवर अक्रूर जी की ताप सान्त्वना करेंगे । उद्धव जी दास भाव में मुख्य हैं और अक्रूर जी शास्त्र भाव से लोक में मुख्य है । पाण्डव सात्विक भक्त है भगवान् श्री अक्रूर जी को हस्तिनापुर भेज कर वाणी द्वारा पाण्डवों की सान्त्वना करेंगे । इस अध्याय में ३१ श्लोक है ।

श्री शुकदेव जी कहते हैं कि राजन् परीक्षित् भगवान् श्रीकृष्ण सर्व की आत्मा हैं सर्वदर्शी हैं एवं षडैश्वर्य सम्पन्न हैं । कुब्जा सैरन्ध्री हैं, अन्तःपुर की अन्तरङ्ग दासी हैं और स्त्री चरित्र को अच्छी तरह से जानती है अब सुरूपा बनी इससे अधिक सन्तप्त बनी उसका प्रिय करने की इच्छा से भगवान उसके घर पधारे ।। १ ।। कुब्जा मकान सामाम्य था लेकिन अनुग्रह शील कुब्जा को गोपियों के समान बड़ भागिनी बनाना चाहते थे । इसलिए भगवदिच्छा से उसका घर दिव्य बना । महामूली विविध प्रकार की सामग्रीओं एवं उत्तम पात्रादि से सम्पन्न हो गया । मन को उल्लासित करने वाली कामशास्त्र निर्दिष्ट चित्रादि वस्तुओं से सुसज्जित हो गया । मोतियों के माला एवं गुच्छों से पताकाओं से, चन्दोवाओं से सुखशय्याओं से सुखकर विरामासनों से निवास समलङ्कृत हुआ था । सुगन्धि धूप, घृतदीप, कुसुम मालाएँ और कुङ्कुम केसर के सुमङ्गल चन्दन लेपन इत्र आदि रसोद्रेकक सामग्री से सुमण्डित निवास बना था ।। २ ।। भगवान की पधारने की कोई सम्भावना ही नहीं थी वहाँ भगवान् स्वयं सन्मुख पधारते देखकर कुब्जा विह्वल बन गई, त्वरा से आसन से खड़ी होकर सन्मुख आ गई । अपनी सखियों के साथ कुछ स्वस्थ बनकर अच्युत भगवान का समादर करती हुई विनय से निमन्त्रण करके दिव्य आसन पर नाथ को विराजमान किया ।। ३ ।। भगवान के साथ श्री उद्धव जी थे । कुब्जा ने पति भाव से अच्युत भगवान का सत्कार किया और श्री उद्धव जी का भक्त भाव से आदर किया विवेक शील उद्धवजी सत्कार प्राप्त कर आसन का स्पर्शकर भूमि पर ही बैठ गए । सर्वसाधारण मानव के समान लोक व्यवहार करते हुए भगवान् श्रीकृष्ण जाकर सुखशय्या पर बिराज गए ।। ४ ।।

सा मज्जनालेपदुकूलभूषणस्रग्गन्धताम्बूलसुधासवादिभिः ।
प्रसाधितात्मोपससार माधवं सव्रीडलीलोत्स्मितविभ्रमेक्षितैः ।। ५ ।।
आहूय कान्तां नवसङ्गमह्रिया विशङ्कितां कङ्कणभूषिते करे ।
प्रगृह्य शय्यामधिवेश्य रामया रेमेऽनुलेपार्पणपुण्यलेशया ।। ६ ।।
सानङ्गतप्तकुचयोरुरसस्तथाक्ष्णोर्जिघ्रन्त्यनन्तचरणेन रुजो मृजन्ती ।
दोर्भ्यां स्तनान्तरगतं परिरभ्य कान्तमानन्दमूर्तिमजहादतिदीर्घतापम् ।। ७ ।।
सैवं कैवल्यनाथं तं प्राप्य दुष्प्रापमीश्वरम् । अङ्गरागार्पणेनाहो दुर्भगेदमयाचत ।। ८ ।।

कर्दमक्षमा

अन्वयः—सा, मज्जनालेपदुकूलभूषणस्रग्गन्धताम्बूलसुधासवादिभिः, प्रसाधितात्मा, सव्रीडलीलोत्स्मितविभ्रमेक्षितैः, माधवम्, उपससार ।। ५ ।। नवसङ्गमह्रिया, विशङ्किताम्, कान्ताम्, आहूय, कङ्कणभूषिते, करे, प्रगृह्य, शय्याम्, अधिवेश्य, अनुलेपनार्पणपुण्यलेशया, रामया, रेमे ।। ६ ।। सा, अनङ्गतप्तकुचयोः, उरसः, तथा, अक्ष्णोः अनन्तचरणेन, रुजः, मृजन्ती,

चरणौ, जिघ्नन्ती, स्तनान्तरगतम्, आनन्दमूर्तिम्, कान्तम्, दोर्भ्याम्, परिरभ्य, अतिदीर्घतापम्, अजहात् ॥ ७ ॥ सा, कैवल्यनाथम्, दुष्प्रापम्, ईश्वरम्, अङ्गरागार्पणेन, एवम्, प्राप्य, तम्, इदम्, अयाचत, अहो, इयम्, दुर्भगा ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रसाधितो योग्यतामापादित आत्मा देहो यया सा। सव्रीडं यल्लीलयोद्गतं स्मितं तद्येषु विभ्रमेषु भ्रूविक्षेपादिविलासेषु तद्युक्तैरीक्षितैरुपलक्षिता ॥५॥ अनुलेपार्पणादन्यत्तस्याः पुण्यं नास्तीति दर्शयितुं पुण्यलेशयेत्युक्तं न तु पुण्यस्याल्पत्वविवक्षया ॥६॥ कुचादीनां रुजो मृजंती। जिघ्रंती च चरणमित्यर्थः ॥ ७ ॥ काममेव प्राकृतदृष्ट्या अयाचत। न च गोप्य इव सा तन्निष्ठेति दुर्भगेत्युक्तम्। कृतार्थत्वे तु तस्या न संदेहः ॥ ८–९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सा कुब्जचरा। सुधेव स्वादुरासव ओषध्यर्कस्सुधासवस्तदादिभिरुत्तमांजनादिभिः॥ आलेपश्चंदनपंकः। गंधो बर्हिसंपर्कजश्चंदनादिनिर्यासः। सुधावदासवो मधु। उपससार समीपे शनैर्गता। माधवं लक्ष्मीकान्तमिति, अहो दीनविषयकृपापारवश्यं कियद्वर्णनीयमिति भावः। प्रसाधितो रतियोग्यतां प्रापितः ॥ ५ ॥ नवस्य "यद्यप्यसौ पार्श्वगतो रहो गतस्तथापि तस्यांघ्रियुगं नवंनवम्" इत्याद्युक्तेर्नित्यनूतनस्य श्रीकृष्णस्य संगमेऽहो अयं ब्रह्माद्याशास्यमानलोकश्रीरमापतिः काहं क्वेति या लज्जा तया विशंकितां संकुचिताम्। शय्यामिति कर्मप्रवचनीययोगे सप्तम्यर्थे द्वितीया। भगवतेऽनुलेपार्पणस्यातीव पुण्यत्वात्। "काश्मीरद्रवपाटीरकर्पूरादिभिरन्वितम्। अनुलेपं हरेर्दत्त्वा ह्यश्वमेधफलं लभेत् ॥" इत्यादिपुराणात् ॥ नवसंगमह्रिया विशंकितामित्यनेन तस्याः प्राचीनतत्स्पर्शप्रभावेण तदेव शरीरं परमदिव्यकुमारीभावाय संपन्नमित्येतद्व्यंजितम्। कंकणभूषित इति सुकोमलांगित्वात्कंकणोपर्य्येव प्रगृह्येत्यर्थः। तादृशानुग्रहे भक्तिरेव हेतुरित्याह—अनुपलेपेति, तैर्व्याख्यातम्। यद्वा—अनुलेपार्पणलक्षणं पुण्यं लान्ति आत्मसात्कुर्वंतीत्यनुलेपनलास्तेषामीशयाऽनुलेपार्पकभक्तवर्गश्रेष्ठयेत्यर्थः। स्वयं भगवति श्रीकृष्णे तत्रापि साक्षात्तत्रापि समयविशेषेऽनुलेपार्पणात् ॥ ६ ॥ सा सैरंध्री। दोर्भ्यां बाहुभ्याम्। स्तनावंतरे मध्ये यस्य तत्स्तनांतरं वक्षस्थलं तद्गतं प्राप्तं कांतं कमनीयं, कशब्दोपलक्षितवेदस्यान्तं तात्पर्यविषयं वा। काम्यते सर्वैरिति कमनी रमा तया याच्यते प्राप्यते कमनीया सा मूर्तिर्यस्य, अनेन लक्ष्मीयोग्यमतीव दुर्लभं वस्तु तदिति ध्वनितम्। अतिदीर्घतापं संसारम्, लोकदृष्ट्या कामार्तिं वा ॥ अनंगतप्तेत्यस्योरसाऽक्षिभ्यामप्यनुषंगः। अनंगतप्तेत्यसमस्तत्वेपि संप्लुतत्वात्। अनंतस्यापरिच्छिन्नमाधुर्यतया च तस्य तथा नाम्नश्चरणेन स्वयं तेन वा तत्रतत्र निहितेन रुजः कामपीडा मृजंती अपसारयन्ती, एतच्च रतान्ते ज्ञेयम्। स्तनांतरगतं स्तनरूपावकाशं प्राप्तम् 'अंतरमवकाशावधि' इत्यमरनानार्थात्। अत एवानंदमूर्तिं तत्रापि कान्तं मधुरभावविशेषमयमत एवात्यंतदीर्घमपि तदप्राप्तितापं सद्यो जहौ ॥ ७ ॥ सोक्तार्था। प्राकृतदृष्ट्या संसारिकदृष्ट्या। कामं निधुवनलीलाम्। तन्निष्ठा कृष्णन्निष्ठा। यत्स्मरणं कृतार्थताऽऽपादकं तत्संगस्य तत्र का कथेत्यर्थः। यद्वा—दुर्गतं भं भयं यस्मात्सदुर्भः कृष्णस्तं गच्छतीति दुर्भगा, दुःखेभ्यो बिभ्यतीति दुर्भा विरक्तास्तैर्गम्यतेः इति दुर्भगो हरिः सोस्ति प्रियत्वेनास्या इति दुर्भगा। मत्वर्थीयाजंताट्टाप्। इदं वक्ष्यमाणम्। ईश्वरं परमस्वतन्त्रमत एव परमदुष्प्रापम्। एवमुक्तप्रकारेण। तत्रापि केवलः शुद्धभक्तस्तस्य भावः कैवल्यमेकान्तरतिः 'कैवल्यसंमतपथस्त्वथ भक्तियोगः' इत्यत्र कैवल्यमित्येव संमतः पंथा भक्तियोग इति स्वामिव्याख्यानात्, यथा वर्णविधानमपवर्गश्च भवतीति पंचमस्कन्धपद्यानुसाराच्च तस्य नाथं तत्प्रदानप्रभुं तत्तया प्राप्य प्रकर्षेण लब्ध्वा दुर्भगा पूर्वं कुब्जात्वदासीत्वलक्षणदौर्भाग्ययुक्तापि न तु श्रीगोपीव स्वतः श्रीविजयितत्तद्गुणयुक्ता। अहो आश्चर्यम्। इदं वक्ष्यमाणं सुदुर्लभं पदमयाचत। अस्या दुर्भगावस्थत्वस्य प्राचीनत्वेन निर्देशः। "किमनेन कृतं पूर्वमवधूतेन भिक्षुणा" इत्यादिवत् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आलेपश्चन्दनादिपङ्कः गन्धो बर्हिः सम्पर्कजश्चन्दनादिनिर्यासः। सुधावदासवो मधु। उपससार समीपे शनैर्गता। माधवं लक्ष्मीकान्तमिति। अहो दीनविषयकृपापारवश्यं कियद्वर्णनीयमिति भावः ॥ ५ ॥ नवसङ्गमह्रिया विशङ्कितामित्यनेन तस्याः प्राचीनतत्स्पर्शप्रभावेण तस्यास्तदेव शरीरं परमदिव्यकुमारीभावाय सम्पन्नमित्येतद्व्यञ्जितं कङ्कणभूषित इति सुकोमलाङ्गीत्वात् कङ्कणोपर्येव प्रगृह्येत्यर्थः। तादृशानुग्रहे भक्तिरेव हेतुरित्याह। अनुलेपेति। तैर्व्याख्यातम्। यद्वा अनुलेपार्पणलक्षणं पुण्यं लान्ति आत्मसात् कुर्वन्तीत्यनुलेपनलाः तेषामीशया अनुलेपार्पकभक्तवर्गश्रेष्ठयेत्यर्थः। स्वयं भगवति श्रीकृष्णे तत्रापि साक्षात् तत्रापि समय विशेषेऽनुलेपार्पणात् ॥ ६ ॥ अनङ्गतप्तेत्यस्य उरसाक्षिभ्यामप्यनुषङ्गः। अनङ्गतप्तेति असमस्तत्वेऽपि सप्लुतत्वात् अनन्तस्यापरिच्छिन्नमाधुर्यतया च तस्य तथा नाम्नश्चरणेन स्वयं तेन वा तत्र तत्र निहितेन रुजः कामपीडा मृजन्ती अपसारयन्ती एतच्च रत्यन्ते ज्ञयं स्तनान्तरगतं स्तनरूपावकाशं प्राप्तमन्तरमवकाशावधीति अमरनानार्थात्। अत एवानन्दमूर्तिं तत्रापि कान्तं मधुरभावविशेषमयम् अत एवात्यन्तदीर्घमपि तदप्राप्तितापं सद्यो जहौ ॥ ७ ॥ ईश्वरं परमस्वतन्त्रम् अत एव परमदुष्प्रापं तथापि अङ्गरागार्पणमात्रेण। एवमुक्तप्रकारेण तत्रापि केवलशुद्धभक्तैस्तस्य भावः कैवल्यमेकान्तरतिः कैवल्यसम्मतपथस्त्वथ भक्तियोग इत्यत्र

कैवल्यमित्येव सम्मतः पन्था यो भक्तियोग इति स्वामिव्याख्यानात् । यथा वर्णविधानमपवर्गश्च भवतीत्यादिपञ्चमस्कन्धगद्यानुसाराच्च तस्य नाथं तत्प्रदानप्रभुं तत्तया प्राप्य प्रकर्षेण लब्ध्वा दुर्भगा पूर्वं कुब्जात्वदासीत्वलक्षणदौर्भाग्ययुक्तापि न तु श्रीगोपीवत् स्वतः श्रीविजयितत्तद्गुणयुक्ता अहो आश्चर्यम् इदं वक्ष्यमाणं सुदुर्लभं पदमयाचत । अस्या दुर्भगावस्थत्वस्य प्राचीनत्वेन निर्देशः किमनेन कृतं पूर्वमवधूतेन भिक्षुणेत्यादिवत् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आलेपश्चन्दनकुंकुमादिपंकः, गन्धश्चन्दनागुर्वादिविभागसाधितसुरभिद्रवविशेषः, सुधा घनेषदुष्णदुग्धम्; किंवा सुधावदासवो मधु, आदि शब्दात्तिलकाञ्जनादयः मज्जनादीनां निष्पादनक्रमस्य यथोत्तरं प्रसाधने श्रेष्ठ्यस्य वाभिप्रायेण तत्तत्क्रमेण निर्देशः । उपससार-समीपेशनैर्गताः माधवं लक्ष्मीकान्तमिति । अहो ! तस्या भाग्यमहिमेति भावः । यद्वा, निजाशेषभगवत्त्व-प्रकटनार्थं मधुवंशे जातस्य तस्य विचित्रसौन्दर्य्यमाधुर्य्य-वैदग्ध्यादिकं सूचितं ॥ ५ ॥ वामयेत्यनेन तस्या अपि रूपगुणादिकं वक्ष्यत एव । एवं द्वयोरपि मिथः समप्ररतियोग्यतोक्ता, तथाप्यस्याः । यद्वा, साक्षात्तद्दर्शनेऽपि सति मज्जनाद्यपेक्षणं प्रेमसौष्ठवाभावं सूचयति । कान्तामित्यनेन नवसंगमेत्यनेन तथा वामयेत्यनेन च श्रीभगवदनुग्रहेण बोधितैव, अतस्तामाह्वानेनाप्यनायान्तीं स्वयमुत्थाय करे प्रकर्षेण सभावलीलया बलाद्गृहीत्वा, कंकणभूषित इति सुकोमलत्वात् कंकणोपर्य्येव प्रगृह्ये त्यर्थः-न च केवलं वामात्वेन तादृशोऽनुग्रहः प्राप्तः, किन्तु भक्त्यैवेत्याह—अनुलेपेति । तैर्व्याख्यातम् । यद्वा, पुण्यानि यज्ञाद्यशेषसुकृतानि लेशः समुद्रस्य कण इव यस्य तादृशमनुलेपार्पणं यस्यास्तया, सर्व्वपुण्येभ्योऽनुलेपार्पणस्य परममहत्त्वाद्विशेषणस्य पश्चात् प्रयोग आर्यः । यद्वा, अनुलेपार्पणलक्षणं पुण्यं लान्ति गृह्णन्ति आत्मसात् कुर्व्वन्तीति अनुलेपार्पणपुण्यला वैष्णवविशेषाः, तेषामीशया ऐश्वर्य्या अनुलेपार्पक भक्तवर्ग-श्रेष्ठयेत्यर्थः—समयविशेषे तया तादृशानुलेपनार्पणात् ॥ ६ ॥ ततश्च वैदग्धीविशेषेण रत्या तस्याश्चिराप्राप्तिजात्यन्तहृत्तापो गत इत्याह—सेति । तथेति समुच्चये । तद्बलात्समासान्तर्गतस्यापि अनंगतप्तेत्यस्योरसाऽक्षिभ्यामप्यनुषंगः । समासस्तु स्त्रीणां कुचयोः कामतापाधिक्याभिप्रायेण । यद्वा, तथा तेनानिर्व्वचनीयेन प्रकारेणाजिघ्रन्ती; न विद्यते विरहतापादिना भक्तानामन्तो नाशो यस्मात्, यद्वा, नास्ति अन्तःकारुण्यवैदग्ध्यादि गुणानां परिच्छेदो यस्य तस्य भगवतश्चरणेन पादाब्जेनैकेन तेन स्वयमेव वा तत्र तत्र निहितेन रूजः कामादिपीडा मृजन्ती अपसारयन्ती, एतच्च रत्यन्ते कान्तं प्रियमिति प्रेमपरिरम्भोऽभिप्रेतः । यद्वा, सुन्दरमानन्दमूर्त्तिश्च, विशेषणाभ्यामाभ्यां सुखप्रदत्वं सुखघनत्वं चोक्तम् । अत एवात्यन्तदीर्घमपि तदप्राप्तितावं सद्यो जहौ ॥ ७ ॥ ईश्वरं परमस्वतन्त्रमत एव दुष्प्रापम्, तथाप्यंगरागार्पणमात्रेण, एवमुक्त-प्रकारेण तत्रापि कैवल्यमेकान्तरतिस्तस्य नाथं तत्प्रदानप्रभुम्, प्राप्य प्रकर्षेण लब्ध्वा, दुर्भगा श्रीगोपीसदृशप्रेमराहित्येन तादृशभाग्यहीनापि, अहो आश्चर्य्ये, इदं वद्यमाणं सुदुर्लभपदमयाचत ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथेति । अथोद्धवस्तया सैरन्ध्र्या साधु यथाभिपूजितस्तया समर्पितमासनमभिमृश्य संस्पृश्य उर्व्यामेव न्यषीददुपविवेश न त्वासने भगवता साम्यमनुचितं मन्वानः केवलमुर्व्यामेवोपविष्टवानित्यर्थः । कृष्णस्तु लोकानां कामुकानां चरितानि चेष्टितानि अनुवृतोनुसरन्नूत्नं नवीनं कैश्चिदप्यनधिरूढं महाधनमनर्घ्यं शयनं पर्य्यङ्कमाविवेश सेति । सा सैरन्ध्री मज्जनादिभिः प्रसाधितो योग्यतामापादित आत्मा देहो यया तथाभूता सती यल्लीलयोद्गतं स्मितं तत् येषु विभ्रमेषु तद्युक्तैरीक्षितैरुपलक्षिता माधवमुपससार उपजगाम ॥ ५ ॥ आहूयेति । नवसङ्गमे विषये या ह्रीर्लज्जा तया विशङ्कितां सङ्गन्तुं लज्जन्तीमित्यर्थः । तां कान्तामाहूय कङ्कणेन भूषिते हस्ते गृहीत्वा शय्यामधिवेश्य विलेपार्पणमेव पुण्यलेशो यस्यास्तया स्त्रिया रामया सह रेमे अनुलेपार्पणादन्यत्तस्याः पुण्यं नास्तीति दर्शयितुं तद्विशेषणम् ॥ ६ ॥ सेति । जिघ्रन्ती सन्निहितत्वादनन्तचरणमिति । विभक्तिविपरिणामेन सम्बन्धः । अनन्तस्य भगवतश्चरणं जिघ्रन्ती तेनानन्तचरणेन हेतुनाऽनङ्गेन कामेन तप्तयोस्तनयोरुरसोरणोश्च रुजः पीडाः मृजन्त्यपनयन्ती कुचादिषु निधाय तेन तद्गताः पीडा निराकुर्वन्तीत्यर्थः । स्तनान्तर्गतं कुचमध्यगतं यथा तथा कान्तं प्रियमानन्दघनं भगवन्तं दोर्भ्यामालिङ्ग्येति दीर्घं वहुकालानवृत्तं तापमनङ्गतापमजहात्तत्याज ॥ ७ ॥ सैवमिति । सा सैरन्ध्री कैवल्यं प्रकृतिसम्बन्धराहित्यं तस्य नाथं मोक्षदं योगिभिरपि दुष्प्रापं तं भगवन्तमेवमित्थं केवलमङ्गरागार्पणेनैव हेतुभूतेनानुभूयेति शेषः । दुर्भगा भाग्यहीनेदं वक्ष्यमाणमयाचत अहो इति । खेदे साक्षान्निरतिशयपुरुषार्थभूतमोक्षदं प्राप्यापि केवलं तुच्छमेवायाचतेति । दुर्भगेति । मुनिः खिद्यति ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सुधाकल्पासवादिभिः प्रसाधितात्मा अलङ्कृतदेहा सव्रीडलीलादिभिर्युक्ता ॥ ५ ॥ रतौ निमित्तमाह । अनुलेपेति । अनुलेपार्पणेन हरेर्गन्धसमर्पणेन लब्धः पुण्यलेशः पुण्यैकदेशो यया सा तथा तया ॥ ६ ॥ रुजः कामज्वरान् संसारज्वरान् वा सास्तनान्तरगतं वक्षस्थलगतम् ॥ ७-१० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

सैवमिति द्वयम् ॥ ८-९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

सा किं चकारेत्याह—सा मज्जनालेपेत्यादि । सुधासदृशो य आसवः पुष्परसः, मज्जनं मज्जनसामग्री स्नानसामग्री आलेपनमनुलेपः, दुकूलं पीतकौशेयम्, भूषणं हारादि स्रङ्माल्यम् गन्धस्ताम्बूलं सुधासवश्च तदादिभिरुपससार । कीदृशी ? प्रसाधितात्मा भूषितदेहा । पुनः कीदृशी ? सव्रीडलीलोत् स्मितविभ्रमेक्षितैर्विशिष्टा ॥ ५ ॥ स तदा किमकरोदित्याह—आहूयकान्तामित्यादि । कान्तां पृथिव्यंशत्वेन दयिताम् श्रीभूलीलेत्यादिना भुवः कान्तात्वात् । कीदृशीम् ? नवसङ्गमह्रिया विशङ्कितां कृतसङ्कोचाम्, अतः कङ्कणभूषिते करे, प्रगृह्य गृहीत्वा शय्यामधिशय्य शाययित्वा रेमे, स्वयं रमेशोऽपि । नन्वेवम्भूतमस्याः सौभाग्यं कुतः किमनुलेपनार्पणमेव ? नेत्याह—अनुलेपार्पणं तु पुण्यस्य लेश एव न स्यात् । एवंविधं प्राक्तनं पुण्यं प्रचुरमस्तीत्यर्थः । न हि पुण्यलेशेनैवंविधं भवति सौभाग्यम्, तन् साधूक्तं पृथिव्यंश एवेति ॥ ६ ॥ (६ ष्ठ श्लो०) "रेमे" इत्युक्तस्य रमणप्रकारं सैरिन्ध्री चरितेनैवाह—सानङ्गतप्तेत्यादि । अनङ्गो मनोरथः अनङ्गतप्तयोः कुचयोस्तथोरसश्च नवयौवनत्वेनोरस इति पृथङ्निर्देशः । तथाक्ष्णो रुजः पीडानन्तचरणेन श्रीकृष्ण चरणेन मृजन्ती सती । कीदृशी ? जिघ्रन्ती, मध्ये मध्ये तदेव चरणारबिन्दं जिघ्रन्ती दोर्भ्यां भुजाभ्यां स्तनान्तरगतं कान्तं परिरभ्याति दीर्घतापमजहात्, चिरविरहोत्तापं जहौ । कान्तं कीदृशम् ? आनन्दमूर्त्तिमानन्द विग्रहं मूर्त्तानन्दमिति यावत् ॥ ७ ॥ तदा सा किमकार्षीदित्याह—सैवं कैवल्यनाथमित्यादि । सा सैरिन्ध्री तं कैवल्यनाथं प्राप्यैवं वक्ष्यमाणमयाचत । अतो न दुर्भगा, कैवल्यञ्चेदयाचिष्यत्, तदा दुर्भगाभविष्यत् । कस्मिन् सति एवमयाचतेत्याह—अङ्गरागार्पणे सतीति कालार्थे सप्तमी । अङ्गञ्च रागोऽनुरागश्च, तयोरर्पणे सत्यङ्गार्पणं रागार्पणञ्चकृत्वेत्यर्थः । अहो इति विस्मये । कीदृशम् ? दुष्प्राप्यं योगिभिरपीति भावः । ईश्वरं कर्तुमकर्तुमन्यथा कर्तुं समर्थम् ॥ ८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

सापि माधवं लक्ष्मीधरमुपससार, उपसृत्य व्रीडया स्थगितां वीक्ष्य समाजुहाव ॥ ५ ॥ आहूय कान्तामित्यादि । कान्तां कमनीयां स्वकृत शिल्पकौशलेन परम-रमणीयाम् । इदमस्याः सौभाग्यं कुतः ? अनुलेपनार्पणमिति-वेत्तस्मै मालाकारोऽपि मालादि ददौ, तेन किमित्याह—अनुलेपनार्पण-पुण्यलेशया-अनुलेपार्पणन्तु पुण्यस्य लेश एव यस्याः अङ्गसङ्गयोग्य पूर्वपूर्वसुकृतराशिस्तु भूयानेवास्या इति मन्तव्यम् । भगवत एव यदृच्छया सम्पन्नो वा तथाविधोऽनुग्रहः ॥ ६ ॥ आनन्दमूर्त्तिमित्यस्यायं भावः—अन्यत्रप्रियमालिङ्गन्त्याः प्रियाया आनन्दो जायते, तेन तस्यास्तापादिनाशः, इयन्तु आनन्दमेव परिरेभ इत्यर्थः । यद्वा, आनन्दो ब्रह्म, स एव मूर्त्तिः शक्ति विशेषा यस्य, यद्वा, मूर्त्तिः काठिन्यमानन्दस्य काठिन्यं घनानन्दमित्यर्थः ॥ ७ ॥ तामभिनन्दन्नाह—सैवं कैवल्यनाथमित्यादि । तं दुष्प्रापं सर्वेश्वरमपि एवमेवं प्रकारेण कैवल्येन एकान्तभावेन नाथं प्राणनाथं प्राप्य प्राणनाथत्वेनास्वाद्य इदं वक्ष्यमाणमयाचत अहो ! आश्चर्यम् अत एवासौ न दुर्भगा कस्मिन् सति ? अङ्गरागार्पणे अङ्गञ्च रागोऽनुरागश्च तयोरर्पणे सति अङ्गार्पणं देहार्पणम्, रागार्पणं रागाधिकरणत्वादन्तः करणार्पणं तत्र तत्र सति यथा तयोरर्पणेन अहः अत्यजतः श्रीकृष्णात् हेतोर्न दुर्भगा, न जहातीति अहाः तस्मादहः पुनः पुनरालिङ्गनादि कृत्वापि न त्यजतः श्रीकृष्णस्य स्वात्मानं प्रत्यनुरागातिशयं ज्ञात्वा प्रश्रयवशात् पुनः प्रार्थनमिति भावः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गन्धोऽगुरुधूपः प्रसाधितः रतियोग्यतामापादित आत्मा देहो यया सा ॥ ५ ॥ नवसङ्गमेति । विशङ्कितेति पदाभ्यां मन्दधियः प्रति तस्याः अनन्यभोग्यत्वं ज्ञापितं तत्र तस्याः महासुन्दर्या अपि कुब्ज एव रक्षकः आसीदिति भावः । अनुलेपार्पणलक्षणस्तत्प्रापकः यस्या पुण्यलेश इति । न तु साधनसिद्धानां व्रजस्त्रीणां पुरस्त्रीणामिव वा पुण्यपुञ्ज इति भावः ॥ ६ ॥ कुचादीनां रुजो मृजन्ती चरणं जिघ्रन्ती च ॥ ७ ॥ सा तं कैवल्येनैव नाथम् अयाचत । केवलया मयैव सह रमस्व न त्वन्यया कयाचिदपि इति प्रार्थयामासेत्यर्थः । तथाभूतवरस्य कृष्णेनाप्रदास्यमानत्वात् दुर्भगा ॥ ८ ॥

गूढार्थदीपिनी

मज्जनादिभिः प्रसाधितात्मा सा कुब्जा माधवम् उपससार समीपं जगामेत्यन्वयः कैः । सव्रीडं लीलोत्स्मितैः विभ्रमेक्षितैः सतृष्णकटाक्षपातैश्च । प्रसाधितः रतियोग्यतां प्रापितः आत्मा देहो यया सा । सुधेव स्वादुः य आसवो मादकद्रव्यं तदादिभिः ॥ ५ ॥ शय्यामिति कर्मप्रवचनीययोगे सप्तम्यर्थे द्वितीया । लेशयेत्युक्तेः इतोऽन्यत्पुण्यं नास्तीत्यभिप्रायेण न तु पुण्यस्याल्पत्वविवक्षया ॥ ६ ॥ सा कुब्जा श्रीकृष्णचरणेन कुचादीनां रुजः कामपीडाः मृजन्ती अपनयन्ती चरणं च जिघ्रन्ती सती तं कान्तं परिरभ्य तापम् अजहात् तत्याजेत्यन्वयः । स्तनान्तरं वक्षः ॥ ७ ॥ वस्तु तस्तु दुर्गतं भं भयं यस्मात् स दुर्भः कृष्णः तं गच्छतीति दुर्भगा । मत्वर्थीऽयोऽच् ततष्टाप् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सा सैरन्ध्री मज्जनादिभिः प्रसाधितो योग्यतां नीत आत्मा देहो यया सा सव्रीडं यल्लीलयोद्गतं स्मितं तत् येषु विभ्रमेषु विलासेषु तद्युक्तैरीक्षितैरुपलक्षिता ॥ ५ ॥ अनुलेपार्पणपुण्यलेशयेत्युक्तिः कृष्णार्थं किंचित्कृतमपि महाफलं भवतीति द्योतयति ॥६॥ अनन्तस्यचरणेनेत्यादरोक्तिः अनन्तेनेत्यर्थः । यद्वा अनन्तचरणेन अनन्तचरित्रेण भगवता बहुधा रममाणेन कामतप्तानां कुचादीनां रुजो मृजन्ती आनन्दमूर्तिकार्यकारणप्रकृतिविलक्षणा आनन्दरूपा मूर्तिर्यस्य तं परिरभ्य तमेव जिघ्रन्ती अतिदीर्घतापम् अजहात् ॥ ७ ॥ इदमयाचतेति अरण्ये प्रविष्टो महाराजः कयाचित् फलपुष्पादिना स्वल्पेन पदार्थेन तोषितः तस्यै मनसा स्वसामीप्यं दत्त्वा स्वेष्टं देशं गन्तुं प्रवृत्तस्तया दुर्भगया महाराजसङ्कल्पः न ज्ञातः कृतार्थयापि प्रभो ! मयेदं वस्तु न भुक्तं तद्देहीति याचितो भवति तद्वत् कैवल्यनाथं प्राप्य अर्थात्तत्कृपया आसन्नमोक्षापि दुर्भगा औपस्थ्यसुखलम्पटा औपस्थ्यसुखमात्रप्रदं भगवन्तं मत्वा इदं काममयाचत इदं चरित्रं तन्मनोरथासिद्ध्यर्थमिति फलितोऽर्थः ॥ ८-१० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवमादिकृष्णवेशात्मविक्लवं कृष्णवेशेन निवेशेनात्मनो मनसो विक्लवंवलैव्यं दृष्ट्वा परमप्रीत उद्धवस्ता नमस्यन्निदं वक्ष्यमाणं जगौ ॥ ५ ॥ भुव्येता गोपवध्वो यद्यतोऽखिलात्मनि पूर्णात्मनि गोविन्दे रूढभावा रूढो दृढनिरूढो भावो भक्तिर्यासां तास्तनुभृतां शरीरधारिणां मध्ये । परमित्यव्ययं । उत्तमा इत्यर्थः । परं तनुभृत इति पाठे सफलजन्मान इत्यर्थः । भवधियो मङ्गलबुद्धयो वाञ्छन्ति वयमपि वाञ्छामः किं तन्निन्दनं क्रियत इत्यत आह । ब्रह्मजन्मभिश्च किं प्रयोजनं यत्र ब्रह्मजन्मस्वनन्तकथा न तत इति । भवधियः संसारबुद्धय इति वा ॥ ६ ॥ इमाः स्त्रियो वनचरीर्वनचर्यः क्व । ननु च तपोऽर्थं वनचरणं तासां किन्न भवेदित्यत आह । व्यभिचारशीला अनैकान्तिकस्वभावा इति । कृष्णे परमात्मन्येष रूढभावः क्व । अविदुषोऽपि वेदान्तजनिताज्ञानस्यानुभजतो जनस्य साक्षादीश्वरः श्रेयस्तनोति ननु । अनभिज्ञेनापि वैद्येनोपयुक्तोऽगदराजश्चिन्तामण्यादिमात्रागुणानुगुणं श्रेयस्तनोति तथेति ॥ ७ ॥ रासोत्सवे भुजदण्डैर्गृहीतकण्ठा इति लब्धा आशिषोऽभिलाषो याभिस्तास्तासां व्रजवल्लीवीनां व्रजस्य गोपिनामुपर्यस्य कृष्णस्य यः प्रसाद उदगादयं प्रसादो नितान्तरतेः सदा तदासक्तायाः स्त्रियः श्रियो रमाया न शाश्वतिकस्तत्प्रसाद एवमिदानीमेव नेति तात्पर्यं । सप्तमतात्पर्यादौ वर्णितमनुसन्धेयं । स्वर्योषितामप्सरसां ललिताङ्गरुचां ललिता मनोज्ञाङ्गस्य रुग्यासां तासां न ननु । अन्या योषितः कुतो लभन्ते नेति भावः । उदगादुद्भूतादगाद्गोवर्धनाच्च यः प्रसाद इत्यप्यावृत्त्याऽन्वयो ज्ञेयः । भुजदण्डगृहीतकण्ठलब्धाशिषां व्रजबल्लवीनां यः प्रसादः स नितान्तरतेः श्रिय एव तथा ललिताङ्गरुचां स्वर्योषितां च श्रिय एव । यतोऽयं श्रिय एव नापरमपुरुषोऽन्या वल्लव्योऽप्सरसः कुतस्तत्पात्रं भवेयुरित्यन्तर्भाव उद्धव स्येति ज्ञेयम् ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नन्वनुवादकमेतत्पदं निरोधविरोधापत्तेः ततः सापि गतेति तस्याः संस्कारपूर्वकं गमनमाह । सा मज्जनालेपनेति । आलेपः सुगन्धादिभिः स्नानार्थमेव भगवदिच्छया पूर्वमेव तस्यास्तथात्वं सुधासव इति शक्त्यर्थं देहविस्मरणार्थञ्च कामशास्त्रोक्तद्रव्यपानमुक्तम् आदिशब्देन तथोद्बोधकानां पदार्थानामपि चन्द्रावर्त्तादीनां स्थापनम् एवमेतैः प्रसाधितशरीरा तत्तद्भावापन्ना लक्ष्मीपतिरयमिति तथा करणे शङ्कारहिता माधवमुपससार तथा भगवति सर्वे भावाः स्वान्तःस्थिताः क्रमेण सूचिता इत्याह । सव्रीडेति । स्त्रीभावात् प्रथमसम्बन्धे व्रीडा ततो हासः प्रवृत्तायाः ततो भगवच्चेष्टानां सादरं निरीक्षणं ततोऽप्यभिलषितानां भाषणं सूनृतम् अयमग्रे क्रमो भगवता कर्तव्य इति प्रथमतस्तादृशीं चेष्टाङ्कुर्वाणैव गतेत्यर्थः ॥ ५ ॥ ततः सा कान्ता जाता भगवद्धर्मावेशात्ततो यथाभिलषितं कृतवानित्याह । आहूयेति । स्वतः प्रवृत्त्यभावे हेतुमाह । नवसङ्गमह्रिया विशङ्कितामिति गतायां शङ्कायामाह । कङ्कणभूषिते करे प्रगृह्येति । कङ्कणानां परिधानं सुवासिन्याः अस्यास्तु भगवद्व्यतिरिक्तः पतिर्नास्तीति भगवांश्चेत् न परिगृह्णीयात्तदा कङ्कणपरिधानं व्यर्थमेव भवेदिति सूचितम् शय्यामधिवेश्येति प्रथमसुरतमेवोक्तम् । नन्वेषां कास्त्री सम्बन्धा न सर्वत्र कर्त्तव्या इति चेत्तत्राह । रामयेति । भोगार्थमेवैषा स्त्री नाग्निं चित्वा रामामुपेयादिति विशेषनिषेधादन्यदा तया सम्बन्धो न दोषाय न त्ववश्यं सुखानुभवे धर्मो हेतुः ततः परमानन्दं कथमनुभवतीत्याशङ्क्याह । अनुलेपार्पणपुण्यलेशयेति अनुलेपार्पणादन्यानि लेशमात्राणि यस्याः अनुलेपार्पणस्य वा पुण्यमात्रं लेशो यस्याः अथवा सा त्वनुलेपार्पणपुण्यलेशयुक्तैवातस्तस्याः सहभाव एव कृतः भगवान्स्वयमेव रेमे तावत्फलं स्वयमेवाधिकं दत्तवान् न तु कर्मणा जातमिति तथोक्तम् अथवा भगवान्सर्वसमर्थः । तस्यास्तावन्मात्रमेव सुखं तथा दत्तवानिति ज्ञापयितुं तथोक्तम् ॥ ६ ॥ तथा सापि लब्धधाष्ट्र्या स्वाभिलषितं कृतवतीत्याह । सेति । सा सैरन्ध्री अनङ्गेन तप्तयोः कुचयोः मध्ये या उरसः वक्षःस्थलस्य अनन्तचरणेन एतेषां रुजं मृजन्ती जाता स्वरूपतः केनचित्सम्बन्धेन तत्तापस्योभयत्र व्याप्तत्वात् बहिःस्पर्शेन तापापगमेऽपि अन्तस्तापनिवृत्त्यर्थमुपायमाह । जिघ्रन्तीति । अर्थादनन्तचरणमेव अनन्तत्वादेव पर्यायेण तापनाशो निवारितः तथा सति शीघ्रं तापाभावो न स्यात् । केवलं दुःखाभावः तस्याः

फलितः किं तु परमानन्दोऽप्यनुभूत इत्याह । दोर्भ्यामिति । पूर्वमेव स्तनान्तरे हृदये निविडं बहिर्दोर्भ्याम् आलिङ्ग्य तापं जहौ स्तनान्तः आगतं वा कान्तत्वात् तथाकरणे नापराधः न केवलं पर्यवसानवृत्त्या सुखजनकत्वं किं तु स्वरूपतोऽपि तथात्वमित्याह । आनन्दमूर्त्तिमिति । अत एव अतिदीर्घमपि त्रिविधमपि तापं जहौ कामताप एव वा जन्मकोटिष्वनुस्यूतो दीर्घो भवति ॥ ७ ॥ एवमनुलेपार्पणफलमुक्त्वा फलानुभावार्थं या भगवतः सेवा कृता निरुत्पादिता तस्याः फलं व्यक्तमिति तन्निरूपयति सैवमिति त्रिभिः । इदं हि पूर्वस्मात् उत्कृष्टमपि वरत्वेन पर्यवसितं तथा सति न फलं काचिन्मर्यादा इयदेवेति तथापि भाग्यमेवाल्पमिति तादृश्येवेति अल्पमेव याचितवतीति शुकस्तां निन्दति । दुर्भगेदमयाचतेति । दातरि समर्थे प्रसन्नेऽपि अल्पयाचनं भाग्याभावादेव भवति । सा पूर्वोक्ता एवं जाता तं तथोपकारिणं स्वयमागत्य सर्वसुखदातारं कैवल्यस्यापि नाथं सर्वैरेवोपायैः दुष्प्रापमीश्वरत्वात् अन्यथा साधनाधीनत्वात् तादृशमपि प्राप्य मोक्षं गोपिकावदवस्थां वा न प्रार्थितवती किं तु कालपरिच्छिन्नं भगवत्सम्बन्धमेव यद्यपि स्वरूपतो महान् तथापि कालेन परिच्छिन्नः फलत्वान्न साधनतामापद्यते अतो दुर्भगैव ॥ ८ ॥

श्रीसुबोधिनी-सार

मज्जनादिभिः प्रसाधितः संभोगार्थं साधितो योग्यतामापादित आत्मा शरीरं यया सा कुब्जा माधवं श्रीकृष्णमुपससारोपजगाम प्रापेत्यर्थः । सव्रीडेन लीलया स्मितेन विभ्रमेक्षितैः ॥ ५ ॥ नवो यः संगमस्तस्मिन् ह्रिया लज्जया विशंकितां किं करिष्यतीति भीतां कांतां स्त्रियं आहूय कंकणे भूषिते मंडिते करे हस्ते प्रगृह्य गृहीत्वा शय्यामधिवेश्यारोप्यानुलेपस्यार्पणमेव पुण्यस्य लेशो यस्याः तया रामया सुन्दर्या रेमे श्रीकृष्णः ॥ ६ ॥ अनंगेन कामेन तप्तयोः कुचयोः उरसो वक्षसोरक्ष्णोर्नेत्रयो रुजोनन्तस्य चरणेन मृजन्ती अपकुर्वन्ती जिघ्रन्ती च स्तनयोरन्तर वक्षोगत प्राप्तं कांतं पतिमानन्दं मूर्तिं श्रीकृष्णं परिरभ्यालिंग्यातिदीर्घं तापं दुःखम् अजहात् अत्यजत् ॥ ७ ॥ अंगरागस्यार्पणेन कैवल्यनाथं मोक्षपतिं अन्यैर्दुष्प्रापं तमीश्वरं सा प्राप्य दुर्भगा विषयलांपटथ्यें नादुर्भगा महाभाग्या वा इदमयाचत ॥ ८ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

मज्जनादिभिः प्रसाधितः भगवता सह रमणयोग्यतामापादितः आत्मा देहो यया तथाभूता सती सव्रीडं लीलया उद्गतं स्मितं येषु विभ्रमेषु तद्युक्तैरीक्षितैरवलोकनैरुपलक्षिता सा कुब्जा माधवमुपससार उपजगाम ॥ ५ ॥ नवसङ्गमे विषये या ह्रीर्लज्जा तया शङ्कितां स्वयमागमनमकुर्वतीं तां कान्तां सुन्दरीमाहूय कङ्कणेन भूषिते हस्ते प्रगृह्य शय्या मधिवेश्य तया रामया स्त्रिया सह भगवान् रेमे इत्याशयः । 'अहो भगवत्सेवामाहात्म्यं येन चन्दनार्पणमात्रेण कंसदास्यपि तेन सह विजहार, तदन्यभक्तानां सुखं तु किं वक्तव्यम्' इत्याशयेनाह-अनुलेपार्पणमेव पुण्यलेशो यस्यास्तयेति ॥६॥ सा अनन्तस्य अनन्तशक्तेः कृष्णस्य चरणं जिघ्रन्ती अनङ्गेन कामेन तप्तेषु कुचादिषु तच्चरणं निधाय तेन चरणेन कुचादीनां रुजः कामपीडां मृजन्ती अपनयन्ती स्तनान्तरगतं कुचमध्यगतं कान्तं प्रियतमं कृष्णं दोर्भ्यां भुजाभ्यां परिरभ्य आलिङ्गय दीर्घं बहुकालानुवृत्तं कामसन्तापमजहात् तत्याज । आलिङ्गनमात्रेण सन्तापनिवृत्तौ हेतुं सूचयन् विशिनष्टि-आनन्दमूर्तिमिति ॥ ७ ॥ सा सैरन्ध्री एवमङ्गरागार्पणमात्रेण दुष्प्राप्यमपि तं श्रीकृष्णं प्राप्येदं वक्ष्यमाणमयाचतेत्यन्वयः । केवलं कामभोगपरैव सा, न गोप्य इव तदेकनिष्ठेति तां निन्दति-दुर्भगेति । 'निष्कामाणां मोक्षप्रदत्वात्तदेकनिष्ठात्वमेव युक्तम्' इति सूचयन् दुष्प्राप्यत्वे हेतुमाह- कैवल्यनाथमिति । तत्रापि हेतुमाह-ईश्वरमिति । तन्मायामोहस्याश्चर्यं द्योतयति-अहो इति ॥ ८ ॥

अन्वितार्थप्रकाशिका

सेति ॥ मज्जनम् आलेपश्चन्दनपङ्कः दुकूलभूषणस्रजश्च गन्धो धूपाद्यामोदः ताम्बूलं च सुधासवः अमृतसदृशं पानं तदादिभिः प्रसाधितः भगवता सह रमणयोग्यतामापादितः आत्मा देहो यया तथाभूता सती एतच्च प्रसाधनमुद्धवसन्देशेन कृष्णागमनात्पूर्वमेवेति ज्ञेयम् । सव्रीडं लीलया उद्गतं स्मितं येषु विभ्रमेषु तद्युक्तैरीक्षितैरवलोकनैरुपलक्षिता सा कुब्जा माधवमुपससार उपजगाम ॥ ५ ॥ आहूयेति ॥ नवसङ्गमे विषये या ह्रीर्लज्जा तया शङ्कितां स्वयमागमनमकुर्वतीं तां कान्तां सुन्दरीमाहूय कङ्कणेन भूषिते हस्ते प्रगृह्य शय्यामधिवेश्य अनुलेपार्पणमेव पुण्यलेशो यस्यास्तया रामया स्त्रिया सह भगवान् रेमे । अनुलेपार्पणादन्यत्तस्याः पुण्यं नास्ति इति दर्शयितुं लेशशब्दो नतु पुण्यस्याल्पत्वविवक्षया । यद्वा । अनुलेपार्पणपुण्यं लान्ति गृह्णन्ति तेषां भक्तानामीशया श्रेष्ठया नवसङ्गमेति विशङ्कितेति पदाभ्यां तस्या अनन्यभुक्तत्वं ज्ञापितम् । तत्र तस्या महासुन्दर्या अपि कुब्जत्वमेव रक्षकमासीदिति भावः ॥ ६ ॥ सेति ॥ सा अनन्तस्य कृष्णस्य चरणं जिघ्रन्ती च अनङ्गेन कामेन तप्तयोः कुचयोस्तादृशस्योरसस्तथा तादृशयोरक्ष्णोश्चेति रुजः कामपीडाः कुचादिषु चरणनिधानेन मृजन्ती । नुमार्थः । स्तनान्तरगतं कुचमध्यगतम् आनन्दमूर्तिं कान्तं प्रियं कृष्णं दोर्भ्यां भुजाभ्यां परिरभ्य आलिङ्गय अतिदीर्घं बहुकालानुवृत्तं कामसन्तापमजहात् तत्याज ॥ ७ ॥ सेति ॥ अहो दुर्भगा निर्भाग्या सा कुब्जा कैवल्यनाथं मोक्षप्रदम् ईश्वरम् दुष्प्रापमपि तं हरिम् एवमङ्गरागार्पणमात्रेण प्राप्य इदं वक्ष्यमाणमयाचत प्राकृतदृष्टया काममेवायाचत । नतु गोप्य इव सा तन्निष्ठेति दुर्भगेत्युक्तम् । कृतार्थत्वे तु तस्या न सन्देहः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रसाधितो योग्यत्वं प्रापितः आत्माकायो यया सा सव्रीडं लज्जासहितं यत् लीलयास्मितं हास्यं येषु तथाभूताये विभ्रमास्तद्युक्तैरीक्षितैः युक्तामाधवं उपससादनुपजगाम ॥ ५ ॥ अनुलेपार्पणमेव पुण्यं तस्य लेशो यस्यास्तया अनुलेपार्पणात् अपरं तस्याः पुण्यं न भवतीति सूचयितुं पुण्यलेशयेत्युक्तं नतु पुण्यस्यन्यूनत्व ज्ञापनाय नवसंगमोनवीन समागमस्तेनया ह्रीर्लज्जातया विशंकितां ॥६॥ अनंगेन कामेन तप्तयोः कुचयोः तथाभूत हृदयादीनां च रुजोव्यथाः अनन्तचरणेन तत्र तच्चरणस्पर्शेन मृजन्तीनाशयन्ती चरणो जिघ्रन्ती सती च स्तनान्तरगतं कांतं दोर्भ्यां परिरभ्य आलिंग्य दीर्घतापन्तत्याज ॥ ७ ॥ दुर्भया इदं भोग सुखं अयाचत एतत्तस्या दुर्भगत्वं ज्ञेयं ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथेति । अथानन्तरं, तया सैरन्ध्र्या, साधु यथा तथा, अभिपूजितः उद्धवः, आसनं तया समर्पितमासनं, अभिमृश्य संस्पृश्य, ऊर्व्यां च भूमावेव, न्यषीददुपविवेश, न त्वासने भगवता साम्यमनुचितं मन्यमानः केवलमूर्व्यामेवोपविष्टवानित्यर्थः । कृष्णः अपि, कृष्णस्त्वित्यर्थः । लोकानां कामुकजनानां चरितानि चेष्टितानि तानि, अनुव्रतः अनुसरन्, नूत्नं नवीनं, कैश्चिदप्यनधिरूढमित्यर्थः । महाधनमनर्घ्यं, शयनं पर्यङ्कं, विवेश । नूत्नमित्यत्र तूर्णमित्यपि पाठो दृश्यते तन्मते शीघ्रमाविवेशेत्यन्वयः ॥ ५ ॥ सेति । सा सैरन्ध्री, मज्जनं स्नानं च आलेपः सुगन्धितैलस्य यथास्थानमङ्गमर्दश्च दुकूलानि नूत्नोत्तमवस्त्रधारणानि च भूषणान्युत्तमाभरणधारणानि च स्रजः सुगन्धिहारादिधारणं च गन्धः सुगन्धिचन्दनादेर्यथायथं धारणं च ताम्बूलानि च सुधासवः सुधाकल्पासवोपसेवनं च ते आदयो येषां रत्यर्हवस्तूनां तैः, प्रसाधितः योग्यतामापादित आत्मा देहो यया सा तथाभूता सती, सव्रीडं यथा तथा, लीलया उद्गतं यत् स्मितं तद्येषु विभ्रमेषु तद्युक्तानि यानि ईक्षितानि तैः, उपलक्षिता सती च, माधवं श्रीकृष्णं, उपससारोपजगाम ॥ ६ ॥ आहूयेति । नवो नवीनश्चासौ संगमश्च तस्मिन् या ह्रीर्लज्जा तया विशङ्कितां लज्जमानां, कान्तां कुब्जां, आहूय, कङ्कणेन भूषितस्तस्मिन्, करे पाणौ, प्रगृह्य गृहीत्वा, शय्यां अधिवेश्य, शय्यायामुपावेश्येत्यर्थः । अनुलेपार्पणं सच्चन्दनार्पणं मात्रमेव पुण्यलेशो यस्यास्तया, रामयाऽङ्गनया, रेमे । अनुलेपार्पणादन्यत्तस्याः सुकृतं नास्तीति दर्शयितुं विशेषणम् ॥ ७ ॥ सेति । संनिहितत्वादनन्तचरणमिति विभक्तिविपरिणामेन सम्बन्धनीयम् । अनन्तस्य भगवतश्चरणं, जिघ्रन्ती, अनन्तचरणेनैव हेतुना, अनङ्गतप्तकुचयोः, तथा उरसः अक्ष्णोश्च रुजः पीडाः, मृजन्ती अपनयन्ती, कुचादिषु भगवच्चरणनिधापनेन तद्गतपीडां निराकुर्वन्ती सतीत्यर्थः । सा सैरन्ध्री, स्तनान्तरगतं, आनन्दमूर्त्तिं, कान्तं प्रियतमं भगवन्तं, दोर्भ्यां परिरभ्य आलिङ्ग्य, अतिदीर्घतापं बहुकालानुवृत्तं कामसंभूतपरितापं, अजहात् ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

शयनमिति :

मुकुन्द गोविन्द विधीड्यपाद निजेष्टदाऽऽनन्दपदेति भूयः ।
विलोक्य दान्तां स्वपदालिमीशः शान्तः क्षमं दान्तपदस्तदासीत् ॥ २० ॥
शान्तत्वं दान्तत्वं संरक्ष्यैवात्र सर्वविषयेषु । व्यवहर्तव्यं प्रतिनेत्यासीदीशः स दान्तपर्यङ्के ॥ २१ ॥

आहूयेति : १०.४८.६.

मा भवत्वत्र मे कर्माऽवैधं विधिकृतस्तुतेः । इति तत्सङ्ग्रहं चक्रे पाणिग्रहणपूर्वकम् ॥ २२ ॥
अविवाहितः प्रभुरसौ व्रती कथं तद्रतोऽजनीत्येशा । शङ्का सूर्याप्तदृशां विचारदृष्ट्या विवाहितः सततम् ॥ २३ ॥
अरमत कुब्जायां यद्विहाय गोपीस्तथा स्त्रियोऽप्यन्याः तत्क्षममाप्राग्जननं भरतागमनिपुण बुद्धिरियमेव ॥ २४ ॥
दत्तोङ्गरागमिषतो ध्रुवमेतयाऽस्मै प्राग्जन्मसंस्थिरपदः स्वकराग एव ।
यस्मादुभावपि विभावनया व्यभातां प्रीतावदभ्रमरतागमभावगर्भौ ॥ २५ ॥
अवयवसरला भवती सरला भवती मया कृता कृतिना । नेतो गोप्योऽपीना गोप्योऽपीनोदरि प्रकारोऽयम् ॥ २६ ॥
स्युस्ता भवतीं दृष्ट्वा मत्सरलाभादरारमाभीर्यः । विरलाऽपि त्वं सरला मत्सरलाभादलं कृतास्यधुना ॥ २७ ॥
यया कयापि वेच्छया जगत्सु योऽपि कोऽपि वा चिरन्तनस्तवाञ्चितं चिरं तमच्युतं भजेत् ।
तदर्थितार्थमुज्झितापरार्थं एत्यसाधयत्ययं किलेत्यभूत् स्फुटं तदुत्कटेष्टपूरणात् ॥ २८ ॥
एकेनाम्बरतः परेण सुमतश्चान्येन सच्चन्दनात् सन्तोषं गमितोऽदिशं सुरवरालभ्यं हि तेभ्योऽथितम् ।
साङ्गोपाङ्गमदर्चनं विदधते पुंसे ददाम्यत्र का शङ्केति प्रभुराशयं विशदयंश्चक्रे कृतार्थां सताम् ॥ २९ ॥

सानङ्गतप्तेति : १०.४८.७.

उग्रतापापहरणं धर्मं स्वीयं च वंशगम् । वीक्ष्य युक्तं चकारास्याद्वयं द्विजकुलाञ्चितः ॥ ३० ॥

अनङ्गदानेन तदङ्गतापमनङ्गतापं च निजाङ्गसङ्गात् । सलीलमस्मिन्हरताऽच्युतेन व्यबोधि सर्वं मम कृत्यमीदृक् ॥ ३१ ॥
कुब्जाऽपि सा ककुब्जानिवन्दिताङ्घ्रेरनुग्रहात् । ऋज्वीभूत्वा चकारर्ज्वीश्चित्रं वक्रास्तु गोपिकाः ॥ ३२ ॥
युक्तं सा सरलीभूय निन्ये गोपीः स्ववक्रताम् । लघुत्वं च गुरुत्वं च स्वस्यां तासु च जानती ॥ ३३ ॥
सैवमिति : १०.४८.८.

सकलार्थदमच्युतमवाप्य कुब्जा यया च यत्कुमतिः । सद्भरतोदयसौख्यं ततः स्फुटाऽस्यां हि मन्थरावगतिः ॥ ३४ ॥
प्राप्याप्यनङ्गसुखमीशपदप्रसादाद् गन्धं न वेद तदनङ्गसुखस्य कुब्जा ।
लब्धात्मरूपमपि वेद न चात्मरूपं तद्वृत्तमास मुनिचित्रकरं क्षमं तत्॥ ३५ ॥
निर्यत्नतोऽखिलेऽप्यर्थेऽनुकूले प्राणिनामिह । प्राक् चेतोजातसंस्करात् प्रवृत्तिः सुदृढाद् ध्रुवम् ॥ ३६ ॥

कृष्णप्रिया

कुब्जा भी उबटन, स्नान, सुवासित चन्दन का लेपन, उत्तम अलङ्कार, पुष्पों की मालाएँ, सुगन्धि इत्र, उत्तम ताम्बूल, सुधा मधुर मादक पान, आदि उत्तेजक सामग्री से भोगक्षेम शरीर को बनाकर और विविधशृङ्गारों से देह को सजाकर लज्जायुक्त स्मित सुन्दर हास्य करती, विलासमयी नजरों से निरखती श्रीमाधव भगवान की सेवा में आ पहुँची ॥ ५ ॥ भगवान की कृपा से कुब्जा कान्ता बनी। कुब्जा में भगवान के धर्मों का प्रवेश हुआ। कुब्जा अभिनव सङ्गम के कारण लज्जावश संकोचवश शङ्काशील होने लगी तब दयालुभगवान ने कङ्कण मण्डित कोमल करकमल को पकड़ कर कान्ता होने से समीप लाए। शय्या पर उसको बैठाया और रमानाथ ने रामा से रमण किया। यह सौभाग्य संभवित न था, लेकिन एक बार भक्तिभाव से भगवान को उत्तम चन्दन को समर्पण किया था भगवान माधव ने उस पुण्य के फल में कुब्जा को कान्ता बनायी और सुख प्रदान किया ॥ ६ ॥ माधव भगवान की कृपा से कान्ता बनी हुई कुब्जा में कुछ बल आया और काम सन्तप्त वक्षोज वक्षःस्थल एवं नेत्रों के सन्ताप को कान्त माधव के श्रीचरणों को सूँघकर मिटाने लगी और हृदय के भीतर रहे हुए अन्तर्यामी भगवान् को प्रत्यक्ष प्रकट करके अथवा स्तनों के मध्य में आए हुए कान्तस्वरूप कृष्ण को दोनों भुजाओं से जोर से आलिङ्गन कर कोटि जन्मों के काम ताप-सन्ताप को दूर किया ॥ ७ ॥ उस कुब्जा ने तप जप आदि साधनों से सर्वथा दुर्लभ कैवल्य प्रद नाथ को केवल चन्दन समर्पण के सुकृत से सम्पादन किया। फिर भी वह मन्दभागिनी रही क्योंकि कुब्जा क्षुद्र फल की लालसा करने लगी यही आश्चर्य है ॥ ८ ॥

[1]आहोष्यतामिह प्रेष्ठ दिनानि कतिचिन्मया । रमस्व नोत्सहे त्यक्तुं सङ्गं तेऽम्बुरुहेक्षण ॥ ९ ॥
तस्यै कामवरं दत्त्वा मानयित्वा च मानदः । सहोद्धवेन सर्वेशः स्वधामाग[2]मदृद्धिमत् ॥ १० ॥
दुराराध्यं समाराध्यं विष्णुं सर्वेश्वरे[3]श्वरम् । यो [4]वृणीते मनोग्राह्यमसत्त्वात् [5]कुमनीष्यसौ ॥ ११ ॥
अक्रूरभवनं कृष्णः सहरामोद्धवः प्रभुः । किंचिच्चि[6]कीर्षयन् प्रागादक्रूरप्रियकाम्यया ॥ १२ ॥

कर्वमक्षमा

अन्वयः—हे प्रेष्ठ ? कतिचित्, दिनानि, मया, सह, इह, उष्यताम्, रमस्व, हे, अम्बुरुहेक्षण ? ते, सङ्गम्, त्यक्तुम्, न, उत्सहे, इत्याह ॥ ९ ॥ मानदः, सर्वेश्वरः, तस्यै, कामवरम्, दत्वा, च, मानयित्वा, उद्धवेन, सह, ऋद्धिमत्, स्वधाम, अगमत् ॥ १० ॥ दुराराध्यम्, सर्वेश्वरम्, विष्णुम्, समाराध्य, यः, मनोग्राह्यम्, वृणीते, असत्वात्, असौ, कुमनीषी ॥ ११ ॥ सह रामोद्धवः, प्रभुः, कृष्ण, अक्रूरप्रियकाम्यया, किञ्चित्, चिकीर्षयन्, अक्रूरभवनम्, प्रागात् ॥ १२ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

काम एव वरस्तं दत्त्वा । मानयित्वा चालंकारादिदानैः ॥१०॥ मनोग्राह्यं विषयसुखम् । तस्यासत्त्वात्तुच्छत्वात् ॥११॥ किंचिच्चिकीर्षयन् हस्तिनापुरप्रस्थापनं कारयितुमिच्छन्नित्यर्थः । अक्रूरप्रियकाम्यया च ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेवाह—सहेति । आहोष्यतामिति पाठः सर्वत्र स तु पुनरुक्तः अयाचतेत्युक्तत्वात् । याचनमेव विवृणोति—सहेति । इह मद्गृहे मया सहोष्यतां त्वया । तत्र प्रयोजनमाह—रमस्वेति । तत्रापि मया सहेति योज्यम् । ननु ममान्यत्र कृत्यानि

---

१. साहो–प्रा. पा । २. गात्समृद्धियत्–वीर. ; गमदृद्धिमत्–विज. ; अचितन्–प्रा. पा. । ३. सर्वबरेश्वरम्–प्रा. पा. । ४. याऽवृणीत–वीर. विज. । ५. कुमतिर्ह्यसौ । ६. कीर्षन्स–विज. ।

बहुतराणि संतीति चेत्तत्राह—नोत्सह इति। अतस्त्वं यत्र यास्यसि तत्रैवाहं यायामन्यथा प्राणांस्त्यक्ष्यामीति भावः ॥ ९ ॥ तस्यै सैरंध्र्यै। सर्वेश इति तद्गृहगमने तत्संगे च दोषाभावमाह। कामवरं दत्त्वेति मत्कर्तृकसंपूर्णसंभोग एव तवाभिप्रेतः स च सामान्यस्त्रीसत्त्वेऽपि ते सेत्स्यतीति प्रतिश्रुत्येत्यर्थः। मानयित्वा तत्र तां संमतां कृत्वा, निरंतरं रमणं तु त्वदिष्टं न संभवेत्किंवदन्तीभयादिति चोक्त्वाऽगमत्। गमनागमनयोरुद्धवसाहित्यं लोकवितर्काऽभावाय, तस्य महाशिष्टशिरोमणित्वेन सर्वत्र ख्यातत्वात्। कुब्जेयं भूशक्तेर्विभूतिर्ज्ञेया पूर्वव्याख्यानात् ॥ १० ॥ मनसाप्यग्राह्यम्। कुत्सिते शब्दादिविषये मनीषा बुद्धिर्यस्य स तथा। तदेवं तत्कथां समाप्य तस्या लौकिककामिनीवत्प्रतीयमानत्वेऽपि निंदां निराकुर्वन्प्रशंसामेव व्यनक्ति—दुराराध्यमिति। विष्णुं सर्वव्यापकं परिपूर्णं स्वयं भगवन्तमित्यर्थः। अतः सर्वेषामीश्वराणां महत्स्रष्ट्रादिपुरुषाणामपीश्वरमाविर्भावादिहेतुम्। 'सर्ववरेश्वरम्' इति पाठे तु सर्वेषां वराणां वरणीयार्थानां मुक्तिभक्तिपर्यन्तानामीश्वर प्रदानसमर्थमत एव दुराराध्यं तादृशमपि सम्यगाराध्य यो मनोग्राह्यं वस्तु स्वप्रीतिजनकत्वेन प्रार्थयते असावेव जनः कुमनीषी कुमतिः, तत्र हेतुरसत्त्वात्। अतितुच्छानित्यानर्थकार्यर्थवरणात्। एषा तु वाङ्मनसागोचरमानंदमूर्तिंश्रीभगवन्तमेव तादृशत्वेन प्रार्थितवती परमसुबुद्धिरेवेत्यर्थः। तथैव प्रार्थितं श्रीप्रह्लादेन—"या प्रीतिरविवेकानां विषये ह्यनपायिनी। त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥" इति विष्णुपुराणे ॥११॥ इत्यर्थ इति—किञ्चित्पदं सर्वसाधारणवाचि तेनेष्टार्थावबोधः, इष्टं च हस्तिनापुरप्रेषणमेवेति भावः। अक्रूरप्रियं च "आगच्छ याम गेहान्नः सनाथान्कुर्वधोक्षज" इत्याद्युक्तलक्षणम् ॥ श्रीसैरंध्र्या इवाक्रूरायापि दत्तं वरं संपादयंस्तद्गृहं गत इत्येतदंशेन प्रसंगसाजात्याल्लीलाक्रमाच्चाह— अक्रूरेति। रामोद्धवाभ्यां सहित इति। 'आर्यसमन्वितः' इति भगवता पूर्वं तथैवांगीकारात्तथाग्रजं विना स्वातंत्र्येण तादृशकार्यविधानानौचित्याच्च। रामोद्धवसाहित्यं सर्वत्रैव तस्य तदनुगतत्वात्कार्यवरस्य विधानार्थं मंत्रिवरस्यापेक्ष्यत्वाच्च ॥ १२ ॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

तदेवाह। सहेति। आहोष्यतामिति पाठः सर्वत्र स तु पुनरुक्तः अयोचतेत्युक्तत्वात्। याचनमेव विवृणोति। सहेति। इह मद्गृहे मया सहोष्यतां त्वया तत्र प्रयोजनमाह। रमस्वेति। तत्रापि मया सहेति योज्यम्। ननु ममान्यत्र कृत्यानि बहुतराणि सन्तीति चेत्तत्राह। नोत्सह इति। अतस्त्वं यत्र यास्यसि तत्रैवाहं यायामन्यथा प्राणं त्यक्ष्यामीति भावः। कुतः हे प्रेष्ठेति प्राणादीनां त्वमेव परमालम्बन इति भावः। तत् कुतः हे अम्बुरुहेक्षण! परमसौन्दर्यादिगुणयुक्तत्वेनाकृष्टमदीयसर्वेन्द्रियत्वादिति भावः ॥ ९ ॥ कामः सहोष्यतामित्यादिना तथा प्रार्थितः स्मरोपभोगः स एव वरोऽभीष्टार्थः। आगत्यागत्य रंस्य इति तत्सङ्कल्पात्मकस्तम् इति श्रीगोपीवत् शुद्धप्रेमविशेषाभावो दर्शितः यत्तं सुजातचरणाम्बुरुहमित्यादिरीत्या तासां तदीयसुखैकस्वसुखदत्वादस्यास्तु स्वसुखमात्रोद्देशात् "किन्तु लक्ष्मीसहस्रकोटीनामप्याविर्भावेन च प्रभोः सैरिन्ध्याः स्वीकृतिः सेयं व्यनक्ति स्म परां कृपाम्"। तत्र च तस्य स्वाभाविककरुणैव कारणमित्याह मानद इति उद्धवेन सहित इति। यथा तेन सह गतस्तथा एवागतः। तच्च लोकाचरितमनुसृत्य तस्य परमधर्मनिष्ठस्य सङ्गेनापलयनार्थमिव। वस्तुतस्तु परमप्रणयेनेति भावः। स्वधाम श्रीवसुदेवान्तर्गृहम्। तत्र तत्र च च तस्य लीलेच्छैव कारणमित्याह। सर्वेश इति। ऋद्धिमत् सर्वविधप्रियजनतत्सेवोपकरणसम्पन्नमिति तत्रागमनयोग्यतोक्ता। अत्रेयं माधुरहरिवंशकथेति श्रूयते। पूर्वजन्मनीयं राजकन्यासीत् तत्र नारदात् श्रीभगवद्गुणगानश्रवणेन तस्मिन् जातानुरागा बभूव। पश्चाच्च श्रीनारदं प्रति तस्या योग्यवरे राज्ञा पृष्टे स उवाच। तामेव कन्यां पृच्छामः कोऽभिप्रायस्तस्या इति ततश्च पृष्टा साप्युवाच यं भवान् सर्वोत्तमत्वेन गायति स एव मम वरः इति। ततः श्रीनारदेन तत्प्राप्त्यसम्भावनाया दर्शितायामपि जन्मकोटिभिरपि वरयिष्यामीति तद्वचनं श्रुत्वा विवाहस्य च सा तत्प्राप्तिसाधनमुपदिष्टा चिरं तपस्तप्तवती तदाकाशवाणी जाता जन्मान्तरे भवती कुब्जिका सती यत्स्पर्शेन सौन्दर्यं लप्स्यते सोऽहं तव पतिः स्यामिति ततश्च कंसमन्त्रिवरवैश्यगृहे सा तथैव जाता कंसेन सा प्राप्यर्यनिजगन्धयुक्तौ निर्दिष्टेति। एवमङ्गरागार्पणेनाहो इति यथाधुनिकदृष्टमेवेति। ज्ञेयम्। कल्पभेदकथात्वियमेवेति वा ॥ १० ॥ तदेवं तत्कथां समाप्य तस्या लौकिककामिनीवत् प्रतीयमानत्वेऽपि निन्दां निराकुर्वन् प्रशंसामेव व्यनक्ति। दुराराध्यमिति। विष्णुं सर्वव्यापकं परिपूर्णं स्वयं भगवन्तमित्यर्थः। अतः सर्वेषामीश्वराणां महत्स्रष्ट्रादिपुरुषाणामपीश्वरमाविर्भावादिहेतुं सर्ववरेश्वरमिति पाठे सर्वेषां वरणीयानामर्थानां मुक्तिभक्तिपर्यन्तानामीश्वरं प्रदानसमर्थम् अत एव दुराराध्यं तादृशमपि सम्यगाराध्य यो मनोग्राह्यं वस्तु वृणीते स्वप्रीतिजनकत्वेन प्रार्थयते। असावेव जनः कुमनीषी कुत्सितबुद्धिः। तत्र हेतुरसत्त्वात् अतितुच्छानित्यानर्थकार्यार्थवरणात्। एषा तु वाङ्मनसागोचरानन्दमूर्त्ति श्रीभगवन्तमेव तादृशत्वेन प्रार्थितवतीति परमसुबुद्धिरेवेत्यर्थः। यथैव प्रार्थितं श्रीप्रह्लादेन। या प्रीतिरविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सा मे हृदयान्मापसर्पत्विति। विष्णुपुराणे श्रीप्रह्लादप्रार्थनमपि तथैवेति भावः ॥११॥ श्रीसैरिन्ध्र्या इवाक्रूरायापि दत्तं वरं सम्पादयंस्तद्गृहं गत इत्येतदंशेन प्रसङ्गसाजात्याल्लीलाक्रमाच्चाह। अक्रूरेति। रामोद्धवाभ्यां सहित इति। आर्यसमन्वित इति भगवता पूर्वं तथाङ्गीकारात् तथाग्रजं विना स्वातन्त्र्येण तादृशकार्यविधानानौचित्याच्च। रामसाहित्यमुद्धवसाहित्यञ्च सर्वत्रैव तस्य तदनुगत्वात्। कार्यविशेषनिर्द्धारणार्थं मन्त्रिवरसापेक्षत्वाच्च ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तदेवाह—सहेति। इह मद्गृहे मया सहोष्यतां त्वया। तत्र प्रयोजनमाह—रमस्वेति। अत्रापि मया सहेति योज्यम्। ननु ममान्यत्र कृत्यान्तराणि बहुतराणि सन्तीति चेत्तत्राह– नोत्सहे इति। अतस्त्वं यत्र यास्यसि, तत्रैवाहं यायाम्, अन्यथा प्राणांस्त्यक्ष्यामीति भावः। कुतः? हे प्रेष्ठेति प्राणादिभ्योऽपि प्रियतमत्वादित्यर्थः। तत् कुतः? हे अम्बुरुहेक्षणेति परमसुन्दरत्वादित्यर्थः॥ ९॥ कामः स्मरक्रीडोपभोगः, स एव वरोऽभीष्टार्थस्तं च तादृशवरदानं मानदत्वञ्च, तस्या गुणाद्यपेक्षया, किन्तु तस्य तादृशस्वभावत्वादेवेत्याह—मानद इति। उद्धवेन सहित इति श्रीगोपीनामिव तस्याः सान्त्वनार्थं स तत्र न हि रक्षित इति भावः। यद्वा, तदनुमत्येत्यर्थः। स्वधाम श्रीवसुदेवगृहमागतः। तत्र हेतुः—सर्व्वेश इति, यादवादीनां सर्व्वेषां पालकत्वात्, अन्यथा तेषां दुःखोत्पत्तिरित्यर्थः। ऋद्धिमत्—दासदास्यादिसर्व्वसम्पत्तियुक्तमित्यर्थः॥ १०॥ न च 'मया सह रमस्व' इति कामोपभोगप्रार्थनया श्रीसैरिन्ध्र्या एकान्तित्वहानिर्मन्तव्या, तेन सहैव तद्याञ्चया तद्रसविशेषभोगसिद्धेरित्याशयेनाह—दुराराध्यमिति। विष्णुं निजशक्त्या सर्व्वव्यापकं भगवन्तमतः सर्व्वेषामीश्वराणां ब्रह्मादीनामपीश्वरं नियन्तारमतएव दुराराध्यं तथापि सम्यगाराध्य; पाठान्तरे सर्व्वेषां वराणां वरणीयार्थानां मुक्तिभक्त्यादीनामीश्वरं प्रदानसमर्थमप्यसौ जनः कुमनीषी कुत्सितबुद्धि, अतितुच्छानित्यासत्यार्थवरणात्। एषा च श्रीभगवता सह रतेः प्रार्थनेन तस्याश्च तदेकनिष्ठत्वेन परमफलतया सत्यनित्यत्वात् परमसुबुद्धिरेवेत्यर्थः। तथापि श्रीगोपीसदृशप्रेमाभावेन तादृशसुखानुभवासम्पत्त्यासिद्धाभीष्टापि सा श्रीगोपीभ्यो न्यूनतरैव ज्ञेया; तच्च दुर्भगेत्युक्तमेव। भक्त्यादिसाध्यपरमप्रेम-परीपाकलभ्येऽपि भगवदंगसंगे तया लब्धेऽपि तादृशसुखाभावो भावतारतम्येनैव यथा साक्षाच्छ्रीकृष्णा—दर्शनेऽपि केषाञ्चित् सुखासम्पत्तिः। तच्च रंगस्थलादौ मल्लादीनां दुःखाद्युत्पत्त्या-व्यक्तमेव॥ ११॥ श्रीसैरिन्ध्र्या इवाक्रूरायापि दत्तं वरं सम्पादयंस्तद्गृहं गत इति प्रसंगसाजात्याल्लीलाक्रमाच्चाह– अक्रूरेति। रामोद्धवाभ्यां सहित इति प्राक् तस्यैव (भा० १०।४१।१२) 'सहाग्रजः' इति प्रार्थनया, तथा (भा० १०।४१।१७)–'आर्य्यसमन्वितः' इति श्रीभगवता तदनुमोदनाच्च रामसाहित्यमुद्धवसाहित्यञ्च, सर्व्वत्रैव तस्य तदनुगत्वात्, तथा चिकीर्षमाणार्थनिर्द्धारबोधनार्थं मन्त्रिवरापेक्षत्वात्; तथा (भा० १०।४१।१२)—'सगोपालैः' इति पूर्व्वतत्कृतप्रार्थनासिद्धये तेषां प्रियत्वेन तस्य तैस्तुल्यत्वात्। अतएवोक्तं प्रकर्षेणागादिति। एषोऽपि श्रीभगवदागमनापेक्षया गृहादिकं मुहुर्भक्त्या विचित्रं विरचयन्नेतावत्कालं स्वगृह एवावसदिति ज्ञेयम्। अतएव तेन साक्षाद्दृष्टस्य कंसवधादेरधुनाऽग्रेऽनुमोदनादिकम्॥ १२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

याच्ञामेवाह। आहेति। हे अम्बुरुहेक्षण! तव सङ्गं त्यक्तुमहं नोत्सहे न प्रभवामीति हे प्रेष्ठ मया सह कतिचिद्दिनानि रमस्वात इह मद्गृहे उष्यतां त्वयेति शेषः एवमाह॥ ९॥ तस्यै इत्थं याचमानायै सैरन्ध्र्यै मानयित्वा मधुरभाषणादिभिः संमानयित्वा काम एव वरस्तद्दत्त्वा याचितं सफलीकर्त्तुं पुनरेष्यामीत्युक्त्वेत्यर्थः। मानदः समानाचरणशीलः अतस्तस्यैव संमानं वरदानं च युक्तमिति भावः। उद्धवेन सह सर्वसम्पत्समृद्धं गृहं स्वगृहमाजगाम॥ १०॥ तस्या दौर्भाग्यमेव स्पष्टयति। दुराराध्यं भक्तिप्रपत्तिव्यतिरिक्तोपायैर्दुःसाध्यं सर्वेश्वरो ब्रह्मा तस्यापीश्वरं भगवन्तं समाराध्य केवलमङ्गरागदानेनैव प्रसाद्य या सैरन्ध्री मनोग्राह्यं शब्दादिविषयसुखमसत्त्वादसाधु वा तुच्छत्वात्तद्यतोऽयाचत ततोऽसौ सैरन्ध्री कुमनीषी कुबुद्धिर्मूर्खा दुर्भगेति भावः॥ ११॥ एवं सैरन्ध्री मनोरथं सफलीचकारेत्युक्तम्। अथाक्रूराभिमतं सफलीकर्तुं तद्गृहं जगामेत्याह। अक्रूरभवनमिति। किञ्चिद्धस्तिनापुरप्रस्थानं कारयितुमिच्छंस्तावद्रामोद्धवाभ्यां सहितो भगवान् कृष्णः अक्रूरस्य प्रियं कर्तुमिच्छया तस्य भवनं प्रागात्॥ १२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मनोग्राह्यं शब्दाद्यविषयं मनसाप्यग्राह्यमसत्त्वाद्रागदुष्टत्वात् तत्त्वनिश्चयाभावाद्वा अत एव कुमतिः कुत्सिते शब्दादौ मतिर्यस्याः सा तथा॥ ११॥ मद्गृहमागन्तव्यमिति प्रागुक्तं सत्यं कर्तुम् अक्रूरगृहगमनं कृष्णस्य वक्ति। अक्रूरेति। किञ्चित् पाण्डववृत्तान्तज्ञानायाक्रूरप्रेषणकार्यं कर्तुमिच्छन्॥ १२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

काम एव वर आगत्य रंस्य इति लक्षणस्तम्॥ १०–१२॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

किमयाचतेत्याह—आहोष्यतामित्यादि। हे प्रेष्ठ! इह मद्गृहे मया सह कतिचिद्दिनान्युष्यताम्, ते सङ्गं त्यक्तुं नोत्सहे, हे अम्बुजेक्षण! रमस्व इहेत्यर्थः। अथवा, इहोष्यतां मया सह रमस्व॥ ९॥ स किमुवाचेत्याह—तस्यै कामवरमित्यादि। कामोऽभिलाष उक्तप्रकारको मनोरथ इति यावत्। तस्य वरं तत्स्वरूपं वा वरं तस्यै दत्त्वा इह कतिचिद् दिनानि

स्थास्यामि, त्वया सह रंस्ये चेति वरं दत्त्वा मानयित्वा स मानद उद्धवेन सह स्वधाम चागात्। अयमर्थः—तस्याः संकल्पसिद्ध्यर्थं स्फुरद्रूपेण तत्र च स्थितः, स्वधाम चागात्। व्यापकत्त्वात्तस्य नासम्भाव्यमेतत्, अन्यथा भक्ताभिमतप्रदत्वानुपपत्तिः। तस्यै कामवरं दत्त्वेत्यस्याप्यसङ्गतिः ॥ १० ॥ तमेवार्थं पुनः प्रपञ्चयति—दुराराध्यं समाराध्येत्यादि। सर्वेश्वरेश्वरं श्रीकृष्णं समाराध्य मनोग्राह्यं मनोरथगम्यं यत्किञ्चिद्यो जनो वृणीते, असौ कुमनीषी मूर्खः! कुत असत्वान्मिथ्यात्वाद्यन्मनोग्राह्यम्, तदसत्; अत इयं सैरिन्ध्री न कुमनीषिणी मनोग्राह्यसुखवरवैमुख्यात्। तदङ्गसङ्गसुखं तु मनोग्राह्यं न भवति, परमानन्दत्वात् परमानन्दो हि मनोलोपकरः, स कथं मनोग्राह्यो भवतु? विष्णुमिति व्यापकत्वाभिप्राये यतस्तद्गृहे च स्थितत्वमुक्तम्। समाप्तः प्रकरणार्थः ॥ १२-१७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जषा

तत् किमित्याह—आह्रोष्यतामित्यादि ॥ ९ ॥ स च सर्वेशः सर्वस्यैवाभिलाष-परिपूरकस्तस्यै मानयित्वा साधुवादपूर्वकं कामवरं कामः सङ्कल्पस्तेषु वरं श्रेष्ठम्। अथवा तत् सिद्धिप्रदं वरं तथैव कर्तव्यमिति स्वीकृत्य स्वधामागमदित्यन्वयः। अयमभिप्रायः-तया चिरावस्थितिर्वव्रे, तेन तस्या गृहे स्फुरद्रूपेण तद्विरहं खण्डयन् निरन्तरं स्थितः। कार्यान्तराय स्थानान्तरञ्च गत इत्यहो वस्तु महिम्नः स्वभावात् को विरोध इति तुल्ययोगितायां चकारः ॥ १० ॥ पुनस्तामभिनन्दन्नाह-दुराराध्यमित्यादि। कृष्णं सर्वेश्वरेश्वरं दुराराध्यं समाराध्य विष्णुं व्यापकं तं विना मनोग्राह्यं यत् किञ्चिदन्यत् मोक्षादि यो वृणीते, असौजनः कुमनीषी, इयन्तु न तथा, यतस्तमेव वृणीते स्म। अतोऽसौ न कुमनीषिणी, धन्यतमैवेत्यर्थः। कस्मादन्यन्न वृणीते स्म, असत्वात् मिथ्याभावात्। तदन्यस्य सर्वस्यैवेति वस्तुतोऽपि मोक्षोऽपि मिथ्या-(भा० १०।१४।२६) "अज्ञान-संज्ञौ भवबन्धमोक्षौ" इत्युक्तेः ॥ ११-१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्रापि कतिचिद्दिनानि इहान्तर्गृहे एव उष्यतां न तु बहिर्निष्क्रम्यतां भोजनपानादिव्यवहारसिद्धिरेतद्गृहमध्य एव सर्वा वर्तत इति भावः। सहोष्यतामाह्रोष्यतामिति च पाठद्वयम् ॥ ९ ॥ कामवरं दत्त्वेति मत्कर्तृकपूर्णसंभोग एव तवाभिप्रेतः स च ममान्यस्त्रीसत्त्वेपि ते सेत्स्यतीति प्रतिश्रुत्येत्यर्थः। मानयित्वा तत्र तां समतां कारयित्वा निरन्तररमणं तु त्वदिष्टं न सम्भवेत् किंवदन्तीभयादिति चोक्त्वा अगमत् गमनागमनयोरुद्धवसाहित्यं लोकवितर्काभावाय तस्य महाशिष्टशिरोमणित्वेन सर्वत्रख्यातत्वात् कुब्जेयं भूशक्तेर्विभूतिर्ज्ञेया पूर्वव्याख्यानात् ॥ १० ॥ प्रसङ्गात् प्रेयसीभावेन भजतो जनान् शिक्षयति। दुराराध्यमिति। मनोग्राह्यं स्वेन्द्रियसुखं तेन कृष्णेन्द्रियमुख एव सर्वथा दृष्ट्या यद्यानुषङ्गिकं त्विन्द्रियसुखं स्यात्तदा न दोष भक्तिमात्रैककामित्वेऽपि संसारध्वंसवदिति ज्ञेयम् ॥ ११ ॥ अक्रूरप्रियकाम्ययैव किञ्चित् चिकीर्षयन् दासस्य स्वविषयकप्रभुनिर्दशस्यैव प्रियत्वमननात् ॥ १२-१४ ॥

गूढार्थदीपिनी

आह च इह उष्यतां रमस्व चेत्यन्वयः ॥ ९ ॥ कामवरम् अभीष्टवरम्। स्वधाम वसुदेवगृहम्। कुब्जेयं भूशक्तेर्विभूति सा च पत्न्येव अतो न दोषकल्पनेति। विशेषस्तु अस्मत्कृतसाप्ताहिककथायां द्रष्टव्यः इति ॥ १० ॥ असत्त्वात् नश्वरत्वात् हेतोः यो मनोग्राह्यं विषयसुखं वृणीते स कुमनीषी। कुब्जा तु मनसाऽपि अग्राह्यं श्रीकृष्णं वृणीते अतो बुद्धिमतीत्यर्थ ॥ ११ ॥ भवनं प्रागादित्यत्रान्वेति। किञ्चित् हस्तिनापुरप्रेषणम् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मनोग्राह्यं प्राकृतं सुखम् असत्त्वात् असाधुत्वात् ॥ ११ ॥ किंचिच्चिकीर्षयन् पाण्डववृत्तान्तजिज्ञासया हस्तिनापुरप्रस्थानं कारयितुमिच्छन् अक्रूरप्रियकाम्यया च रामोद्धवाभ्यां सहितः अक्रूरभवनं प्रागात् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वयं तासां भक्तिं दृष्ट्वोत्तेजयितुं ताः पारोक्ष्यतस्तद्दास्यं स्वस्य नानाप्रकारेणाशास्ते त्रिभिः श्लोकैरुद्धव इत्यभिधत्ते ॥ आसामिति। आसां गोपीनां चरणरेणुजुषां पादधूलीः सेवमानानां वृन्दावने तदवनौ गुल्मलतौषधीनां मध्ये किमपि गुल्मादि किमप्येकतमं स्यां। किं तच्चरणरेणुमाहात्म्यमित्यतस्ता एवं महानुभावा इत्याह ॥ या इति। दुस्त्यजमभिमतेस्त्यक्तुमशक्यं स्वजनं हित्वा यथाऽऽर्यपथमार्याणां पन्थाः पत्या नियत्या सार्धमाङ्गिन्या वर्तितव्यमिति यः स आर्यपथस्तं हित्वा श्रुतिभिर्विमृग्यां मुकुन्दपदवीं भेजुर्या आसामित्यन्वयः। अहो नीचानामाभीरभामिनीनामिद च चित्रमिति ॥ ९ ॥ श्रियाऽर्चितं ब्रह्मादिभिश्चार्चितम्। आप्तकामैरिति योग्यान्वयि। योगेश्वरैर्योगेनेश्वरा राजान इति वा योगवदधिकैर्जनकादिभिर्वा सनकादिभिरात्मनि हृदयेऽर्चितं

यत्तकृष्णस्य भगवतश्चरणारविन्दं रासगोष्ठ्यां स्तनेषु न्यस्य किञ्च परिरभ्य चाङ्गं तापं या विजहुरासामित्यतीतेन वोत्तरेण वाऽन्वयः ॥ १० ॥ यासां हरिकथाया उद्गीतं गानं भुवनत्रयं पुनाति तासां नन्दव्रजस्त्रीणामभीक्ष्णशः पादरेणूनहं वन्दे शिरसा वहामि स्तौमि च ॥ ११ ॥ चाद्यशोदां नन्दमप्यनुज्ञाप्येत्यन्वयः सूच्यते । यास्यन्मधुरां ॥ १२–१३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

याचनमाह । आहोष्यतामिति । इहैवोष्यतामिति विवाहस्याकृतत्वात् क्वचिच्छयनं कर्त्तव्यं तदिहैव कर्तव्यमित्यर्थः । किमित्येवं प्रार्थत इत्याशङ्कायामाह प्रेष्ठेति । परमप्रियस्तथोच्यत इति तत्राप्यन्तर्यामिवत् स्थितिं वारयति कतिचित् दिनानि मया सह रमस्व ननु कोऽयं निर्बन्धः अयमेव वर इति कामादिर्वाकथं न प्रार्थ्यत इत्याशङ्क्याह । नोत्सहेत्यक्तुं सङ्गं त इति । तत्र हेतुः अम्बुरुहेक्षणेति दृष्ट्वैव सर्वसुखदायककामोद्बोधकेति वा ॥ ९ ॥ भगवान् यद्यपि केवलं सुखं दास्यामीति विचारितवान् तथापि याचितं दत्तवानित्याह । तस्यैकामवरं दत्त्वेति सत्यसङ्कल्पत्वात् स्वविचारितमपि दत्तवानित्याह । मानयित्वेति । ताम्मानितवान् हि मोक्षं भक्तिश्च दातुमागतः येभ्यो दास्यति तन्मध्ये एतामप्यङ्गीकृतवानित्यर्थः । चकारादात्मानमपि मानद इति । भगवान् सर्वेभ्यो मानं ददातीति स्वधर्माच्च अस्यैव मानं दत्तवान् ततो बहिरागत्य उद्धवेन सहितः तदिच्छानुसारेण धर्मान्तरमपि परिगृह्य कार्ये स्वसम्पन्ने पुनः सहजमेव धर्मं गृहीतवानित्याशङ्क्याह । सर्वेश इति । अनेन तस्या यथा कियद्दिनरमणं भवति तथैव कृतवानित्यपि लक्ष्यते यथा नारदस्य मायया क्षणमप्यषष्टिसम्बत्सरप्रतीतिः तथा अस्या अपीति इतो गतस्य पुनरागमनाभावः सूचितः ननु आकाङ्क्षया पुनर्गच्छेदित्याशङ्क्याह । ऋद्धिमत् स्वधाम अगमदिति ॥ १० ॥ भगवन्तं प्राप्य स्वयं न किञ्चित् प्रार्थनीयं भगवानेव यत्करिष्यति तत्करोतु अन्यथा स कुमनीष्येव भवतीत्याह । दुराराध्यमिति । प्रथमतः स आराधयितुमेवाशक्यः । अत एवास्मदादीन् मुक्त्वा अपि तथैव स्थिता तादृशमप्याराध्य तत्रापि प्रासादपर्यन्तं सम्यक् विष्णुं पालनार्थमेवागतमनाराधनेऽपि पालकं तत्रापि सर्वेश्वराणां कालादीनामपीश्वरं नियन्तारं सर्वेषां हि कालग्रासोऽनिवारणीयः । एवं सति यो मनोग्राह्यं वृणीते स कुमनीषी महाराजस्थाने गत्वा स्वयं क्षुधितः सर्वोपद्रवयुक्तोऽपि स्वसम्बन्धिने मर्कटाय यथौदनं प्रार्थयते तद्वत् स्वयमात्मा मर्कटरूपाय मनसे हितं प्रार्थयतीति । नन्वेवस्तु तथाप्यल्पमेव प्रार्थितं भवेत् न तु मर्कटवदित्याशङ्क्याह । असत्त्वादिति । न हि मनोधर्माः स्वस्य भवन्ति अध्यारोपितास्त्वसन्त एव तर्हि कथं प्रार्थयत इत्याशङ्क्याह । कुमनीषीति । स हि दुर्बुद्धिः अतः प्रमादादन्यथा प्रार्थयत इत्यर्थः ॥ ११ ॥ प्रकरणान्तरमारभते । अक्रूरभवनमिति । तस्मिन्नेव दिवसे अक्रूरायापि वरो दत्त इति तस्यापि गृहे भगवान् गत ननु पूर्वन्तस्मैवरो दत्त इति कथं व्युत्क्रमेण निरूप्यते तत्राह । कृष्ण इति । सहितासामर्थ्ये समागत इति पूर्वमवोचाम तत्र बलभद्रस्यापि कार्यमस्तीत्यत आह । सहराम इति । उद्धवो हि उत्सवासक्तत्वात् रसप्रधान एव रमणं तु स्त्रीभिरेव अतः कुब्जायाः गृहे । उद्धवेन सह गमनं भगवांस्तत्र प्रधानमिति बलभद्रस्य क्रोधोऽपि स्यात् आवेशभूत इति रमणारमणाभ्यां रसाभासनौचित्ये स्याताम् अत्र तु अक्रूराय सम्पूर्णो भावो नेय इति रमणरमयोर्भावार्थं रामं निमित्तभावार्थमुद्धवं च सह नीतवान् नन्वनाकारितः किमिति गत इत्याशङ्क्याह । प्रभुरिति । सर्वेषां हि स्वामी सेवकगृहेऽपि सेवकसम्माननार्थं गच्छति कस्तमाकारयितुं समर्थः प्रयोजनमाह । किञ्चित् कचित् प्रेषणं चिकीर्षयन् चिकीर्षामुत्पादयन् अक्रूरे तदर्थं स्वतोऽपि अक्रूरप्रियकाम्यया च प्रकर्षेण प्रभुरीत्या अगात् अस्योपाख्यानं स्मार्त्ततत्त्वैः प्रतिपाद्यते अयं हि स्मार्त्त इति ज्ञापयितुम् ॥ १२ ॥

श्रीसुबोधिनी–सारः

आहेत्यव्ययं हे प्रेष्ठ इह उष्यतां वासः क्रियतां कतिचिद्दिनानि मया सह त्वं रमस्व ते तव संगं त्यक्तुं नोत्सहेहं न शक्नोमि हे अंबुरुहेक्षण ॥ ९ ॥ तस्यै कुब्जायै काममेव वरं वांछितं वा दत्त्वा मानयित्वा सत्कृत्य मानदः सर्वेशः कृष्णोर्चितः पूजित उद्धवेन सह स्वधाम स्वगृहमायात् ॥ १० ॥ सर्वेषामीश्वराणामीश्वरं दुराराध्यं दुःखेनाराधितुं योग्यं विष्णुं सम्यगाराध्य मनोग्राह्यं विषयसुखं यो वृणीत या चेतासौ कुमनीषी दुर्बुद्धिः असत्त्वादतितुच्छत्वात् विषयादेः ॥ ११ ॥ रामोद्धवसहितः प्रभुः कृष्णोऽक्रूरस्य प्रियकाम्ययाऽक्रूरगृहं प्रागात् किंचित्कार्यं हस्तिनापुरप्रेषणं कर्त्तुमिच्छन् ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनो

तद्याचनमेवाह—आहेति । तत्सङ्गत्यागानुसाहे प्रेमातिशयं हेतुं वदन्ती सम्बोधयति—प्रेष्ठेति । प्रेष्ठत्वे सौन्दर्यातिशयं हेतुं सूचयन्ती सम्बोधयति—अम्बुरुहेक्षणेति । ते तव सङ्गमहं त्यक्तुं नोत्सहे न प्रभवामि, अतो मया सह कतिचिद्दिनानि रमस्व इह मद्गृहे त्वया उष्यतामित्याहेत्यन्वयः ॥ ९ ॥ एवं याचितो मानदो भक्तसम्माननाचरणशीलः कृष्णस्तस्यै याचमानायै सैरन्ध्र्यै कामवरं दत्त्वा तथास्त्वित्युक्त्वा मानयित्वा च किञ्चिद्दिननिवासेन मधुरभाषणभूषणदानरमणादिभिस्तन्मनोरथं पूरयित्वोद्धवेन सह अर्चितं सर्वसम्पत्समृद्धं स्वधाम आगमत् । सर्वमनोरथपूरणसामर्थ्ये हेतुमाह— सर्वेश इति ॥ १० ॥ न केवलं सैव दुर्भगा, किन्तु अन्योऽपि यः कश्चित् दुराराध्यं भक्तिप्रतिपत्तिव्यतिरिक्तोपायसहस्रैरप्याराधयितुमशक्यं विष्णुं सम्यग्भक्त्या आराध्य मनोग्राह्यं मनःप्रियं विषयसुखं वृणीते सोऽसौ कुमनीषी कुबुद्धिरेवेत्यन्वयः । मनोग्राह्यस्य विषयस्य

वरणायोग्यत्वे हेतुमाह—असत्त्वादिति। तुच्छत्वाद्दुःखहेतुत्वाच्च सर्वेश्वरा ब्रह्मरुद्रकालकर्मादयस्तेषामपीश्वरो नियन्ता भगवान्, "अतस्ततः कालाद्यतिक्रमणेन विमोक्ष एव प्रार्थनीयः, न विषयभोग" इति सूचयन्नाह—सर्वेश्वरेश्वरमिति ॥ ११ ॥ प्रकरणान्तरमारभते—अक्रूरेति। किञ्चिच्चिकीर्षयन् हस्तिनापुरप्रस्थानं कारयितुमिच्छन्नक्रूरस्य प्रियकाम्यया प्रियं कर्तुमिच्छया च रामोद्धवाभ्यां सहितो भगवान् कृष्णः अक्रूरभवनं प्रति प्रागादित्यन्वयः। 'कुतः पाण्डवाक्रूरादीनां प्रियं चिकीर्षति' इत्यपेक्षायामाह—प्रभुरिति। स्वामीत्यर्थः ॥ १२ ॥

अन्वितार्थप्रकाशिका

आहेति। हे श्रेष्ठ प्रियतम! हे अम्बुरुहेक्षण कमलनेत्र! ते तव सङ्गमहं त्यक्तुं नोत्सहे न प्रभवामि। अतो मया सह कतिचिद्दिनानि रमस्व। अत इह मद्गृहे एव त्वया उष्यतामित्याह स्म ॥ ९ ॥ तस्यै इति। एवं याचितो मानदो भक्तसम्मानप्रदः सर्वेशः हरिस्तस्यै याचमानायै सैरन्ध्र्यै कामवरं दत्त्वा आगत्यागत्य रंस्ये इत्युक्त्वा मानयित्वा च मधुरभाषणभूषणदानरमणादिभिस्तन्मनोरथं पूरयित्वोद्धवेन सह अर्चितं सर्वसम्पत्समृद्धं स्वधाम अगमत्। अत्र चक्रवर्त्ती। मया सहैव रमस्व नान्यया सहेति सा वृतवती तत्प्रदानाद्दुर्भगेत्युक्तं कामवरं दत्त्वेति मत्कर्तृकपूर्णसम्भोग एव तवेष्टः। स तु ममान्यस्त्रीसत्त्वेऽपि तव सेत्स्यति इति प्रतिश्रुत्येत्यर्थः। मानयित्वा तत्र तां सम्मतां कारयित्वा निरन्तररमणं तु त्वदिष्टं न सम्भवेत् किंवदन्तीभयादिति चोक्त्वा अगमत्। गमनागमनयोरुद्धवसाहित्यं लोकवितर्काभावाय तस्य शिष्टशिरोमणित्वेन ख्यातत्वात्। कुब्जेयं भूशक्तेरंश इति प्राग्व्याख्यातम् ॥ १० ॥ दुराराध्यमिति। यः कश्चित् भक्तिं विना दुराराध्यं सर्वेश्वरेश्वरं विष्णुं समाराध्यापि मनोग्राह्यं मनःप्रियं विषयमेव वृणीते असत्त्वात् तुच्छत्वात्। असौ जनः कुमनीषी कुबुद्धिमानेव ॥ ११ ॥ अक्रूरेति। किञ्चिच्चिकीर्षयन् हस्तिनापुरप्रस्थानं कारयितुमिच्छन्नक्रूरस्य प्रियकाम्यया प्रियं कर्तुमिच्छया च रामोद्धवाभ्यां सहितः प्रभुः कृष्णः अक्रूरभवनं प्रागात्। अहमार्यसमन्वित इति प्रतिश्रुतत्वाद्रामसाहित्यम्। मन्त्रित्वादुद्धवसाहित्यम् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे प्रेष्ठ ईह उष्यतां स्थीयतां अमुना प्रकारेण सा आह उवाच ॥ ९ ॥ कामोभोग एववरस्तं दत्वा वस्त्रादिदानेन मानयित्वा च ॥ १० ॥ मनोग्रहं प्राकृतसुखमसत्त्वाद्दुर्जनत्वात् यो वृणीते ॥ ११ ॥ किंचिच्चिकीर्षयन् गजाह्वये प्रेषितुमिच्छन्नित्यर्थः अक्रूरस्य प्रियकाम्यया प्रियं कर्त्तुमिच्छया चेत्यर्थः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सैवमिति ॥ सा सैरन्ध्री, कैवल्यं प्रकृतिसम्बन्धराहित्यं मोक्ष इत्यर्थः। तस्य नाथस्तं, दुष्प्रापं योगिभिरपि दुरापं, ईश्वरं तं भगवन्तं, एवमित्थं, अङ्गरागार्पणेन केवलेन चन्दनमात्रार्पणेनेत्यर्थः। प्राप्यानुभूय, दुर्भगा भाग्यहीना, अत एव, इदं वक्ष्यमाणं अयाचत। अहो इति खेदे। साक्षान्निरतिशयपुरुषार्थभूतमोक्षदं प्राप्याऽपि केवलं तुच्छमेवायाचतेति दुर्भगेति मुनिः खिद्यन्नाह ॥ ९ ॥ याञ्चामेवाह ॥ आहेति ॥ हे अम्बुजेक्षण कमलनयन, ते तव, सङ्गं, त्यक्तुं, अहं न उत्सहे। हे प्रेष्ठ, मया सह, कतिचित् दिनानि, रमस्व। इह मद्गेहे उष्यताम्। त्वयेति शेषः। एवं, आह ॥१०॥ तस्या इति ॥ तस्यै इत्थं याचमानायै सैरन्ध्र्यै, मानयित्वा मधुरभाषणादिभिः संमानयित्वा, काम एव वरस्तं, दत्त्वा च, याचितं सफलीकर्त्तुं पुनरेष्यामीत्युक्त्वेत्यर्थः मानदः संमानाचरणशीलः, सर्वेशः भगवान्, अर्चितस्तया पूजितः सन्, उद्धवेन सह, स्वधाम सर्वसंपत्समृद्धं स्वगेहं, आगमत् ॥ ११ ॥ तस्या दौर्भाग्यमेव स्पष्टयति ॥ दुराराध्यमिति ॥ दुराराध्यं भक्तिप्रपत्तिव्यतिरिक्तोपायैर्दुष्प्रसाध्यं, सर्वेश्वरो ब्रह्मा तस्यापीश्वरं, विष्णुं भगवन्तं, समाराध्य केवलाङ्गरागदानेनैव प्रसाद्य, या सैरन्ध्री, मनोग्राह्यं शब्दादिविषयसुखं, असत्त्वात्तुच्छत्वात्, वैषयिकसुखानामतितुच्छत्वेऽपीत्यर्थः। अवृणीत तदेव याचितवती। अतः, असौ सैरन्ध्री, कुमनीषी कुमनीषिणी, पुंस्त्वमार्षं कुबुद्धिः ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

आहोष्यतामिति : १०.४८.९.

मदाशया पद्ममुपैति षट्पदो मुहुर्मुहुस्तद्वदिहैतु माधवः।
इति स्वचेतःकृतनिश्चया हि सा वव्रे वरं काममदभ्रसौख्यदम् ॥ ३७ ॥
अङ्गरागार्पणमिव कृतं तेऽङ्गसमर्पणम्। अनङ्गरागाऽनङ्गस्था जाताऽहमिति किं ब्रुवे ॥ ३८ ॥

तस्य कामवरमिति : १०.४८.१०.

यदा ते सङ्कल्पो रतिविषयकस्तत्क्षणमसौ समेत्यारात् कामस्तव सुखकरः स्यात् प्रियतमे।
अहं वा तद्रूपः सुरतसुखदः स्यामिति वराशयो भाति श्रैशो ह्यपुनरनुयानात् सुविशदः ॥ ३९ ॥

आकल्पानुभवो मृकण्डतनयस्याऽऽसीद्यथैकक्षणे देवर्षेरुत षष्टिवत्सर - ऽमिताहर्भानमेकक्षणे ।
तस्यास्तद्वदनेकवासरनिजस्थित्यर्थनायाः कृते मन्ये कल्पितवाँस्तदैव स तथा वासं स्वमुक्तोक्तितः ॥ ४० ॥

विद्यामासाद्य हृद्यां गुरुमुखकमलात् सार्थकं ब्रह्म नित्यं बुद्ध्वा चाधाय शुद्धं व्रततततितिलकं ब्रह्मचर्यं सदार्यम् ।
स्वायत्तीकृत्य सर्वा अपि विषयजुषो देवता गोकुलस्थाः कुर्यात् कर्माविशङ्कं सदसदपि ततो नाश्रितः स्यात् फलेन ॥ ४१ ॥

अधीत्य विद्यां धृतसद्व्रतेन हि वशीकृताशेष - सुगोपयोषिता ।
स्वधामभाजा परमात्मना त्विदं स्फुटीकृतं कामविशेषसेवनात् ॥ ४२ ॥ (युग्मम्)

स्वधामाऽनुवृत्तिं विचिन्त्यैव भूयो विधेयो विधेयो बुधेनाऽङ्गभोगः ।
नभोवन्न भोगैस्ततो युज्यतेऽसावितीह स्वगेहानुयानादबोधि ॥ ४३ ॥

अक्रूरभवनमिति : १०.४८.१२.

कामालम्बनमन्तरे समुदितं प्राक्कर्मपाकेन चेत् कर्तव्यं तु तथा यथा न पुरतः क्रोधोदयः स्यात्क्वचित् ।
कुब्जादत्तनिजाङ्गरागफलकं कामावलम्बं प्रभुः कुर्वन्नेवमबोधयन् निजजना - नक्रूरधामोन्मुखः ॥ ४४ ॥

हिंस्रं कंसमपास्य यत्कृतमिह त्राणं स्वकानां मया नैतद्विस्मयकृद् भवत्यखिलगो मार्गोऽस्त्ययं यत्स्फुटः ।
मुख्यं कार्यमुरीकृतात्मजनुषस्त्राणं सतां मेन चेज्जातं किं विहितं तदेत्यरमगात् तत्कार्यदृक् तद्गृहम् ॥ ४५ ॥

असति सति च कर्मण्यक्रमाद्वाऽभ्युपेते हितदृगिह विदध्यात् प्रागसत् सत्तदूर्ध्वम् ।
प्रभुरिति शुभदर्शी दर्शयन् भव्यमार्गं किमगमदथ कुब्जागेहतो - ऽक्रूरगेहम् ॥ ४६ ॥

नैवं चेत्प्राक्प्रतिज्ञाता - ऽक्रूरसद्मसमागमः । ततः कुब्जेक्षणः कुर्यात्सत्यवाक् कथमीदृशम् ॥ ४७ ॥ (युग्मम्)

नीतोऽनेन सहाबलाभिरखिलः कालः पुरा गोकुलेऽभूत् सम्प्रत्यपि पुंश्चलावशमति-स्तन्मत्स्थभाराहृतेः ।
नास्त्यस्य स्मृतिरित्युदासितमना मा भूदसावित्ययं निन्ये तं सहसोत्सवं गृहमनालस्यप्रकाशाय किम् ॥ ४८ ॥

भूभारक्षपणं तथा बहुविधान्यन्यानि कृत्यान्यपि कर्तव्यानि मयाऽनुसृत्य सरणिं भूलोकसाधारणीम् ।
रामोऽयं तु तमोमयोऽवनिभरक्लान्तोभवेत्साहसी तन्मात्रोचितमित्यमुं किमकरो - दक्रूरधामाश्रितम् ॥ ४९ ॥

दुर्दावानल-जित्वर-स्मयभृता तेनाऽन्धजातेन चेन्नीता अप्यवमानितापदममी कार्यं किमस्मन्मुखैः ।
इत्यक्रूर-कुतर्किताऽपहृदये शक्तोऽस्मि तादृक्प्रतीकारेऽपीति विबोधयन् स सबलस्तद्गेहमागात् प्रभुः ॥ ५० ॥

न राजकार्यं कुर्वीत पूर्वजानुमतिं विना । तद्युक्तमेव तत्कार्यस्तद्गृहं साग्रजो ययौ ॥ ५१ ॥

कार्येऽस्मिन्नपरोक्षतामुपगते संचिन्तयेच्चेतसा स्यात् प्राक्कृत्यमपीदृगेव बहुधाऽस्याऽधोक्षजस्येत्यसौ ।
इत्थं प्राक्कृतसद्विगीतचरिते रामो हि तां गर्ह्यतां निर्मोष्टुं प्रभुरभ्यगात् सह तथा कार्याय रामेण सः ॥ ५२ ॥

प्रभु-मन्त्रोत्साह-शक्तिसाहित्यमचलं मयि । इति किं दर्शयन्नागात् सबलः सोद्धवः प्रभुः ॥ ५३ ॥
यदस्मिन् भुवने हि स्यादक्रूरभवनं सदा । सवरः सोत्सवस्तत्र व्रजामीति विबोधितम् ॥ ५४ ॥

कृष्णप्रिया

कुब्जा ने कहा, हे प्रियतम ! हे नाथ ! आप कृपा करके कुछ दिन यहाँ ही मेरे साथ रहो, यह आप का ही निवास है । हे कमल नयन ! आपका सङ्ग मैं नहीं छोड़ सकती हूँ और आप यहाँ विराजकर मेरे साथ रमण करने की कृपा कीजिएगा ॥ ९ ॥ राजन् परीक्षित् ! भगवान सबको मान देने वाले हैं इसलिए सर्वेश्वर भगवान् श्रीकृष्ण ने कुब्जा की कामना को समझ कर जैसे श्री नारदजी को अपनी अमोघ शक्ति से क्षण में की हुई लीला को ६० संवत्सरों में की हुई लीला की प्रतीति करवाई थी वैसे संतोष दिया । पुनः कुब्जा से सत्कार प्राप्त कर नाथ उद्धव जी के साथ सर्वविध समृद्ध अपने धाम आए ॥१०॥ सर्वेश्वर के भी ईश्वर और सर्वसाधनों से भी दुराराध्य भगवान को सर्वथा प्रसन्नकर, भगवान विष्णु से तुच्छ मनोभिलषित वस्तु की याचना करता है वह तो कुमति ही है क्योंकि मनोवाच्छनाएँ सत् नहीं हैं ॥११॥ राजन् ! भगवान् को उसीदिन और भी अनेक कार्य करने की आवश्यकता थी इसलिए भगवान श्रीकृष्ण, अपने साथ श्रीबलभद्र जी और श्रीउद्धव जी को लेकर श्री अक्रूर जी के निवास स्थान पर पधारे । कृपालु भगवान की श्री अक्रूर जी के माध्यम से कुछ विशिष्ट कार्य करने की इच्छा थी और श्री अक्रूर जी के अभिलाषा को पूर्ण करना था ॥ १२ ॥

स तान् नरवरश्रेठानाराद् वीक्ष्य स्वबान्धवान् । प्रत्युत्थाय प्रमुदितः परिष्वज्याभिवन्द्य च[1] ॥१३॥
[2]ननाम कृष्णं रामं च तैरप्यभिवादितः । पूजयामास विधिवत् कृतासनपरिग्रहान् ॥ १४ ॥
पादावनेजनीरापो धारयञ्छिरसा नृप । अर्हणेनाम्बरैर्दिव्यैर्गन्धस्रग्भूषणोत्तमैः ॥ १५ ॥
अर्चित्वा शिरसाऽऽनम्य[3] पादावङ्कगतौ मृजन् । प्रश्रयावनतोऽक्रूरः कृष्णरामावभाषत ॥ १६ ॥

कर्दमक्षमा

अन्वयः—सः, अक्रूरः, नरवर, श्रेष्ठान्, तान्, स्वबान्धवान्, वीक्ष्य, प्रमुदितः, प्रत्युत्थाय, परिष्वज्य, च अभिवन्द्य, कृष्णम्, रामम्, च, उद्धवम्, ननाम, सः, तैः, अपि, अभिवादितः, कृतासनपरिग्रहान्, अर्हणेन, अम्बरैः, दिव्यैः, गन्धस्रम्, भूषणोत्तमैः, विधिवत्, पूजयामास, हे नृप! पादावनेजनीः, आपः, शिरसा धारयन्, अर्चित्वा, शिरसा, आनम्य, प्रश्रयावनतः, अक्रूरः, अङ्कगतौ, पादौ, मृजन्, कृष्णरामौ, अभाषत ॥ १३-१६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आराद्दूरत एव ॥ १३-१४ ॥ आ अप इति छेदः । अप आ सर्वतो धारयन्नित्यन्वयः ॥ १५-१६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सोऽक्रूरः । तान्कृष्णादीन् । ननामेत्यग्रिमेणाप्यन्वयः । श्रीकृष्णस्य तदीयं पांडवीयञ्च सौहृदांशं प्रकाश्यैव तत्र गतत्वात्प्रथमतोऽक्रूरस्यापि तादृशो भावो जात इत्याह–स इति । नरवरेषु श्रेष्ठान् आरात्तदर्थं चन्द्रशालिकाद्युपवेश्य स्थापयित्वा दूरादेव स्वयं विलोक्य प्रमुदितः सन् प्रत्युत्थाय प्रत्युद्गम्य चेति ज्ञेयम् । ततः परिष्वज्य शुभाशंसनादिनाभ्यनन्दत् । 'अभिनंद्य च' इति पाठे युग्मकम् ॥ १३ ॥ सोऽक्रूरः । तैः कृष्णादिभिः । पश्चादातिथ्यकरणे भक्त्यंशमवलंब्य स्वभावादरेणैवैश्वर्यस्फूर्तिस्तदनुक्रमेणैव कृष्णं रामञ्च ननामेत्यन्वयः । उद्धवं तु "वैष्णवे बन्धुसत्कृत्या' इति रीत्या बन्धूचित्तमेव सत्कारेति ज्ञेयम् । तत्रापि पूर्वयुक्त्या तैः श्रीकृष्णादिभिरभिनंदित एव 'अभिवादितः' इति पाठान्तरम् ॥ १४ ॥ अर्हणेन योग्यपूजोपकरणेन । तदेवाह–अम्बरैरित्यादि । मृजन्मृदु पीडयन् । पादेति युग्मकम् । पादाववनिज्येते याभिस्ताः । धारयन्निति "वर्तमानसामीप्ये वर्तमानवद्वा" । अर्हणेन चतुर्विधान्नताम्बूलपर्यंतार्हणद्रव्येण । तदनन्तरं पूर्वतोऽपूर्वाऽम्बरादिभिरर्चयित्वा शिरसाऽऽनम्य पादसंवाहनारंभे भक्त्या तौ शिरसा स्पृष्ट्वा । पादाविति–कृष्णरामयोः सह विश्रान्तयोरेकमेकमित्यर्थः । तथाभिप्रेत्यैव श्रीकृष्णेन तथा विश्रान्तत्वात् । मृजन्संवाहयन्नित्यर्थः । श्रीकृष्णरामावुत्तानशायिनौ ॥ १५-१६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीकृष्णस्य तदीयं पाण्डवीयञ्च सौहृदांशं प्रकाश्यैव तत्र गतत्वात् प्रथमतोऽक्रूरस्यापि तादृशो भावो जात इत्याह । स इति । नरवरेषु श्रेष्ठान् आरात्तदर्थं प्रायश्चन्द्रशालिकाद्युपविश्य स्थापयित्वा दूरादेव स्वयं विलोक्य प्रमुदितः सन् प्रत्युत्थाय प्रत्युद्गम्य चेति ज्ञेयम् । ततः परिष्वज्य शुभाशंसनादिनाभ्यनन्दत् । अभिनन्द्य चेति पाठे युग्मकम् ॥ १३ ॥ पश्चादातिथ्यकरणे भक्त्यंशमवलम्ब्य स्वभावोदयेनश्वर्यस्फूर्त्तिस्तदनुक्रमेणैव कृष्णं रामञ्च ननामेत्यन्वयः । उद्धवन्तु वैष्णवे बन्धुसत्कृत्या इत्यनेन बन्धूचितमेव सत्कारेति ज्ञेयम् । तत्रापि पूर्वयुक्त्या तैः श्रीकृष्णादिभिरभिनन्दित एव अभिवादित इति पाठान्तरम् ॥ १४ ॥ पादेति युग्मकम् । पादौ अवनिज्येते अवनिक्ते याभिस्ताः । धारयन्निति सामीप्ये वर्त्तमानवद्वा । अर्हणेन चतुर्विधान्नताम्बूलपर्यन्तेनार्हणद्रव्येण तदनन्तरं पूर्वतोऽप्यपूर्वाम्बरादिभिश्चार्च्चयित्वा शिरसानम्य पादसम्वाहनारम्भे भक्त्या तौ शिरसा स्पृष्ट्वा पादाविति श्रीकृष्णरामयोः सह विश्रान्तयोरेकमेकमित्यर्थः । तथाभिप्रेत्यैव श्रीकृष्णेन तथा विश्रान्तत्वात् । मृजन् सम्वाहयन्नित्यर्थः श्रीकृष्णरामावुत्तानशायिनौ ॥ १५-१६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नरवरेषु यादवेषु । किंवा नरेषु वराः श्रेष्ठा भागवतास्तेषामपि पूज्यतया श्रेष्ठा इति परमाचार्यत्वम्, सबान्धवानिति परमस्निग्धत्वम्, अतएव आरादेव वीक्ष्य प्रकर्षेण मुदितः सन्, अभिनन्द्य सुस्वागत कुशलप्रश्नादिना ॥ १३ ॥ कृष्णं रामञ्च ननाम, ईश्वरत्वात् । न चोद्धवं भ्रातुः पुत्रत्वात्, तत्र च प्राक कृष्णं साक्षाद्भगवत्त्वात् । विधिवदिति यथायोग्यं श्रद्धयोत्तमासनपाद्यार्घ्यादिसमर्पणेनेत्यर्थः ॥ १४ ॥ पादावनेजनीः कृष्णरामयोः, हे नृपेति अक्रूरभाग्यदृष्ट्या हर्षेण सम्बोधनम् । विधिवत्

---

१. भ्यनन्दत–वीर विज., भिनन्द्य–श्रीधर. वंशी. जीव. विश्व. शुक. सु., वाद्य च–प्रा. पा. । २. "ननाय" श्लोको विजये नास्ति । ३. तस्य–प्रा. पा. ।

पूजामेव विवृणोति—अर्हणेनेति । अर्ह्यते पूज्यतेऽनेनेत्यर्हणं पूजोपकरणं पाद्यादि, तत्रैव विशेषमाह—अम्बरैरित्यादिना । यद्वा, भोजनानन्तरं पुनः पूजामाह—अर्हणेनेति । ताम्बूलादिना अर्च्चयित्वा, पूर्व्वं 'पादावनेजनीः' इत्याद्यस्यार्द्धस्य पूर्वेणैवान्वयः । शिरसैवानम्येति अंकगतपादाब्जसम्वाहनेन दण्डवत् प्रणामासिद्धेः श्रीमुखसन्दर्शनलोभाद्वा; पादौ द्वयोरेव प्रत्येकं द्वौ पादावित्यर्थः; किंवा श्रीकृष्णस्यैव स्वभक्तवरप्रीत्यर्थं प्रसारणात् मृजन् सम्वाहयन्नित्यर्थः ॥ १५–१६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स इति । सोऽक्रूरस्तान्नरवरेभ्योऽपि श्रेष्ठान् रामकृष्णोद्धवानाराद् दूरत एवोद्वीक्ष्य प्रत्युत्थाय नितरां मुदितः परिष्वज्याभ्यनन्दताभिनन्दितवान् ॥ १३ ॥ ननामेति । सोऽक्रूरः कृष्णं रामञ्च ननाम ववन्दे चकारादुद्धवञ्च तथा तै रामकृष्णोद्धवैरप्यभिवादितः कृत आसनपरिग्रहो यैस्तान् विधिवत्पूजयामास ॥ १४ ॥ हे नृप ! सोऽक्रूरः पादाववनिज्येते प्रक्षाल्येते याभिस्तथा ता आपः आ अप इति छेदः विशेषणस्य द्वितीयान्तत्वादासर्वतः शिरसा धारयन् अर्हणेनार्घ्यादिना वरादिभिश्चार्चित्वा दिव्यै इति पूर्वोत्तरान्वयी ॥ १५ ॥ अङ्कगतौ उत्सङ्गे निधापितौ पादौ शिरसा प्रणम्य मृजन् स्वोत्तरीयेणेति शेषः। यद्वा सम्बहन् प्रश्रयेण विनयेन नम्रः कृष्णरामौ प्रत्यभाषत ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

आरात् दूरात् तान् वीक्ष्य ॥ १३ ॥ पादावनेजनीः पादप्रक्षालिनीः आअप इतिच्छेदः आ इत्यास्वाद्य अपो धारयन् अर्हणेन योग्यपूजासाधनेन ॥ १५–मृजन् परिमृजन् मृदु पीडयन्नित्यर्थः ॥ १६–१७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रीकृष्णस्य तदीयपाण्डवीयं च सौहृदांशं प्रकाश्यैव तत्र गतत्वात् प्रथमतोऽक्रूरस्यापि तादृशो भावो जात इत्याह । स तामिति । पश्चादातिथ्यकरणे भक्त्यंशमवलम्ब्य स्वभावोदयेनैश्वर्यस्फूर्त्तेस्तदनुक्रमेणैव कृष्णं रामञ्च ननामेत्यर्थः ॥ १२–२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आ सर्वतः अपः शिरसा शिरसि धारयन् मृजन् हस्ताभ्यां मर्दनेन संवाहयन् ॥ १५–१७ ॥

गूढार्थदीपिनी

स इति द्वयम् आरात् दूरादेव । सोऽक्रूरः । तैः रामादिभिः । कृतः आसनपरिग्रहः परिग्रहणं यैस्तान् ॥ १३–१४ ॥ पादेति द्वयम् । पादौ अवनिज्येते प्रक्षाल्येते याभिः ताः अपः आ सर्वतः शिरसा धारयन् पादौ मृजन् सम्मर्दयन् पुनः अर्चित्वा च तौ अभाषतेति द्वयोरन्वयः । अर्ह्यतेऽनेनेति अर्हणं पूजनद्रव्यम् ॥ १५–१६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अक्रूरः आरात् दूरत एव ॥ १३–१४ ॥ पादौ अवनिज्येते प्रक्षाल्येते याभिस्ताः पादावनेजनीः अपः आ सर्वतः शिरसा धारयन् अर्हणमर्घ्यं तेन अम्बरादिभिश्च अर्चित्वा पादौ मृजन् अक्रूरः कृष्णरामौ अभाषतेति द्वयोरन्वयः ॥ १५–१६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पारवश्यादुदं च व्यापारं गोपानां वदति ॥ मनस इति द्वाभ्यां । अस्माकं नो मनसो वृत्तयो धर्माः कृष्णपादाम्बुजाश्रयाः स्युः । नो वाचः कृष्णनाम्नामभिधायिनीरभिधायिन्य उच्चारयन्त्यः स्युः । कायस्तत्प्रवणादिषु तन्नमस्कारादिषु स्यात् ॥१४॥ कर्मभिर्जन्मान्तरसञ्चितैर्भ्राम्यमाणानां नानायोनिषु न तेषां स्वातन्त्र्यं चेत्तनानामचेतनानां वेति वेदयितुमीश्वरेच्छया मुख्ययाऽमुख्यैः कर्मभिरित्युक्तिः । नत्रापि यत्र क्वच मङ्गलाचारतैस्तथा दानैः सद्भ्यो वित्तवितरणैः कृष्णे ईश्वरे नो रतिर्भक्तिः स्यात् ॥ १५ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो गतानामक्रूरकृतं सत्कारमाह । धर्मप्रतिपादनाय स तानिति । तस्य सर्वे तुल्या अतो मर्यादया पूजयतीति न बलभद्रादेरपि वैमनस्यं नरवरेभ्योऽपि श्रेष्ठान् नरो नरवरो नरवरात् ज्येष्ठश्चेति वा उद्धवरामस्वामिनः क्रमेणोद्दिष्टाः आराद् दूरादेव दृष्ट्वा स्वबान्धवानिति अवश्याभ्युत्थाने लौकिकोऽपि हेतुः प्रत्युत्थाय प्रथमतः प्रमुदितो जातः भक्तत्वाभावात् न साष्टाङ्गप्रणामः पूर्वोक्रूरस्तु मुक्त एव प्रमोदानन्तरं परिष्वङ्गः ततोऽभिनन्दनम् ॥ १३ ॥ एवं कायिकं वाचनिकमुक्त्वा मानसिकं नमस्कारमाह । ननामेति । बहिर्नमस्कारस्तु व्यावहारिकः अत एव भगवतापि ताभ्यां सह नमस्कृतमित्याह । स तैरप्यभिवादित इति। पूर्वचकारात् फलाद्युपायनादानं द्वितीयादुद्धवं च स त्रिभिरप्यभिवादितः अपि शब्दस्तुल्यतामापादयति ततो गृहागता इति पूजयामासेति विधिवत् शास्त्रदृष्टेन प्रकारेण यथा महापुरुषानभ्यागतान् पूजयति लोकः कृतः आसनपरिग्रहो यैः अत्रोद्धवेनापि धर्मानुरोधात्तुल्यतया आसनं गृहीतं यथा श्राद्धे गुरुशिष्यौ ॥ १४ ॥ ततः पादावनेजनीरापः शिरसा धारयन् इयं धर्मानिष्ठायाम-

धिका भक्तिः नृपेति धर्मपरिज्ञानार्थं ततः दिव्यैर्गन्धैः स्रग्भूषणोत्तमैः सहितेन अर्हणेन पूजयामासेति पूर्वेणैव सम्बन्धः पूजासाधनरूपा पूजयामासेत्याराधयामासेत्यर्थः ॥ १५ ॥ ततो यत् कृतवांस्तदाह । अर्चित्वेति । उच्चासने स्थितस्य भगवतः स्वाङ्कगतौ पादौ मृजन् सेवनार्थं सम्बाहयन् प्रश्रयेण अवनतो भूत्वा अक्रूरः पूर्वोक्तः कृष्णरामावुभौ पूर्वदृष्टाविति अभाषत स्तोत्रं कृतवानित्यर्थः ॥ १६ ॥

श्रीसुबोधिनी–सारः

नरवरेषु श्रेष्ठान् स्वबांधवांस्तान् आराद् दूरतो वीक्ष्य दृष्ट्वा प्रत्युत्थाय संमुखमागत्य परिष्वज्यालिंग्याभिनंद्य प्रशस्य प्रमुदितः प्रहर्षितः कृष्णं रामं च ननाम तैः कृष्णादिभिरभिवादितो नमस्कृतः सोक्रूरः कृतासनपरिग्रहान् विधिवत् पूजयामास ॥ १३–१४ ॥ हे नृप पादावनेजनीः अपो जलानि आ सर्वतः शिरसा धारयन् सन् अर्हणेन दिव्यैरंबरैर्वस्त्रैर्गंधादिभिः अर्चित्वा शिरसानम्य प्रणम्यांके गतौ पादौ मृजन् प्रश्रयेणावनतोऽक्रूरः कृष्णरामौ अब्रवीत् ॥ १५–१६ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

तान् नरवरेभ्यः श्रेष्ठान् स्वबान्धवान् रामकृष्णोद्धवान् आराद्दूरादेव वीक्ष्य प्रमुदितः सोऽक्रूरः प्रत्युत्थाय परिष्वज्य तदागमनमभिनन्द्य च ॥ १३ ॥ रामं कृष्णं च ननामेति द्वयोरन्वयः । ततश्च तै रामकृष्णादिभिरभिवादितो वाचा कृतप्रणामः सोऽक्रूरः कृतः आसनस्य परिग्रहः स्वीकारो यैस्तान् रामादीन् विधिवत् पूजयामासेत्यन्वयः ॥ १४ ॥ पूजादिप्रकारमेवाह— पादावनेजनीरिति । 'भक्तिमार्गरसज्ञस्त्वम्' इति सूचयन् सम्बोधयति—नृपेति । आ अप इति च्छेदः । पादाववनिज्येते प्रक्षाल्येते याभिस्ता अपः आ सर्वतः शिरसा धारयन् अर्हणेन अर्घ्यादिना अम्बरादिभिश्चार्चित्वा शिरसा आनम्य अङ्कगतौ उत्सङ्गे निधापितौ पादौ मृजन् सम्मर्दयन् प्रश्रयेणावनतः अक्रूरः कृष्णरामौ अभाषतेति द्वयोरन्वयः ॥ १५–१६ ॥

अन्वितार्थप्रकाशिका

स इति द्वयम् ॥ तान् नरवरेभ्यः श्रेष्ठान् स्वबान्धवान् रामकृष्णोद्धवान् आराद्दूरादेव वीक्ष्य प्रमुदितः सोऽक्रूरः प्रत्युत्थाय प्रत्युद्गम्य चेति शेषम् । तथा परिष्वज्य तदागमनभिनन्द्य च भगवदैश्वर्यस्फूर्त्या पितृव्यत्वमात्मनो विस्मृत्य राम कृष्णं च ननाम । ततश्च तै रामकृष्णादिभिरपि पितृव्यत्वादभिवादितः कृतप्रणामः सोऽक्रूरः कृतः आसनस्य परिग्रहः स्वीकारो यैस्तान् रामादीन् विधिवत्पूजयामास ॥ १३–१४ ॥ पादेति द्वयम् ॥ हे नृप ! आ अपः इति च्छेदः । पादाववनिज्येते प्रक्षाल्येते याभिस्ता अपः आ सर्वतः शिरसा धारयन् अर्हणेन अर्घ्यादिना दिव्यैः अम्बरस्रगादिभिश्चार्चित्वा शिरस आनम्य अङ्कगतौ उत्सङ्गे निधापितौ पादौ मृजन् सम्मर्दयन् प्रश्रयेणावनतः अक्रूरः कृष्णरामावभाषत ॥ १५–१६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आरात् दूरात् ॥१३–१४॥ आ अप इति पदच्छेदः अपः आसमंताद्भावेन धारयन् ॥ १५ ॥ मृजन् संवाहयन् ॥१६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं सैरन्ध्रीमनोरथं सफलीकृत्याथाक्रूराभिमतं सफलीकर्त्तुं तद्गृहान् जगामेत्याह । अक्रूरभवनमिति । किंचित् चिकीर्षयन्, अक्रूरस्य हस्तिनापुरं प्रति प्रस्थानं कारयितुमिच्छन्, प्रभुः कृष्णः, रामोद्धवाभ्यां सहेति सहरामोद्धवः सन्, अक्रूरभवनं प्रति, अक्रूरप्रियकाम्ययाऽक्रूरस्य प्रियं कर्त्तुमिच्छया, प्रागात् ॥ १३ ॥ स इति । सोऽक्रूरः, नरवरेभ्यः श्रेष्ठास्तान्, स्वबान्धवान् तान् रामकृष्णोद्धवान्, आरात् दूरत एव, वीक्ष्य दृष्ट्वा, प्रत्युत्थाय प्रमुदितः नितरां मुदितः सन्, परिष्वज्य, अभ्यनन्दत अभिनन्दितवान् ॥ १४ ॥ ननामेति । सोऽक्रूरः कृष्णं रामं च, ननाम ववन्दे । चकारादुद्धवं च, तथा सोऽक्रूरः अपि, तैः रामकृष्णोद्धवैः, अभिवादितः सन्, कृत आसनपरिग्रहो यैस्तान् तान्, विधिवत् पूजयामास । पूर्वश्लोकेऽभिवन्द्य चेति पाठे द्वयोरेकसंबन्धः ॥ १५ ॥ पादावनेजनीरिति । अर्चित्वेति च । हे नृप, अक्रूरः, पादाववनिज्येते प्रक्षाल्येते याभिरिति पादावनेजन्यस्ताः, अपो जलानि, आ अप इति च्छेदः । आ सर्वतः शरीरे, शिरसा शिरस्यपीत्यर्थः । अधारयत् । अर्हणेनार्घ्यादिना, दिव्यैः अम्बरैर्वस्त्रैः, गन्धश्च स्रजश्च भूषणोत्तमानि उत्तमाभरणानि च तै, अर्चित्वा, दिव्यैरिति पूर्वोत्तरान्वयि, अङ्कगतौ पादौ, स्वोत्सङ्गनिधापितावङ्घ्री इत्यर्थः । शिरसा आनम्य प्रणम्य, मृजन्, स्वोत्तरीयेणेति शेषः । यद्वा । मृजन् संवहन्, प्रश्रयेण विनयेनावनतो नम्रः सन्, कृष्णरामौ अभाषत । इति द्वयोरेकान्वयः ॥ १६–१७ ॥

श्रीहरिसूरिविरचितं भक्तिरसायनम्

स तानिति : १०.४८.१३.

दृष्ट्वाऽऽगतं धाम्नि यदूत्तमं तमस्तमोजसा स्वेन हरन्तमच्युतम् ।
ससंभ्रमाभ्युद्गमनादिना समुत्सवेन युक्तं स पुरस्सरोऽभवत् ॥ ५५ ॥

कथञ्चिदपि हृद्गृहे स्फुरति यस्य नारायणः स चाप्यतुलमश्नुते सुखमसौ तु धाम्नि स्वके ।
समुद्धव-बलश्रियं स्वयमुपागतं चक्षुषा व्यपश्यदिति साधु वाऽभवदनीदृगानन्दभाक् ॥ ५६ ॥

ननामेति : १०.४८.१४.

बिज्ञाय लोकोपकृतिस्वभावाऽऽविष्कारतोऽनेकधृतावतारम् । अमेयमोदातिभरेण निम्नं मनसस्तदासीन्नमनानुकूलम् ॥ ५७ ॥

अङ्गीकृताखिलजनानुकृतेरमुष्य नारायणस्य जगदादिगुरोरपीह ।
तातप्रभावकलिते गुरुतामुपेतेऽक्रूरेऽभिवादनविधेरुचितः प्रकारः ॥ ५८ ॥

भक्तेष्टानुग्रह-त्राण-दया-दाक्षिण्य-दीक्षितम् । भक्त्यानन्द-रसस्रोत-स्नातचेता-स्तमार्चयत् ॥ ५९ ॥

पादावनेजनीरिति : १०.४८.१५.

उग्रो दधार यन्मौलावक्रूरगुणशालिनि । तत्तीर्थं युक्तमद्धाऽसावक्रूरः शिरसाऽवहत् ॥ ६० ॥

अर्चित्वेति : १०.४८.१६.

पादाम्बु शिरसि न्यस्य शिरोऽन्यस्य पदाम्बुजे । व्यबोधि तेन कृष्णाय पादतादात्म्यमात्मनि ॥ ६१ ॥
सर्वतोऽप्यधिका प्रीतिरस्योर्वंशे विभाति यत् । तत्तत्प्रीतिमना युक्तं स स्वोरौ तत्पदं न्यधात् ॥ ६२ ॥
गर्भितं रसमादातुं जाततृष्णः स भक्तिमान् । युक्तं चक्रे तत्पदाब्जमर्दनं सेवनच्छलात् ॥ ६३ ॥

कृष्णप्रिया

श्री अक्रूरजी ने अपने आंगन पधारे हुए नरवरों में श्रेष्ठ प्रेमास्पद बान्धवों का दर्शन होते ही प्रसन्न हो गए पुनः अभ्युत्थान देते हुए सन्मुख आए और बार-बार अभिवन्दन करने लगे ॥ १३ ॥ श्रीअक्रूरजी ने श्रीबलभद्रजी एवं भगवान् श्रीकृष्ण को नमस्कार किया तथा फलादि वस्तुओं का उपायन भी किया । भगवान् श्रीकृष्ण बलभद्रजी और श्रीउद्धवजी ने अक्रूरजी का अभिवादन किया । श्रीअक्रूरजी ने अत्यन्त भक्ति भाव पुरःसर तीनों को आसन पर बैठाकर मधुपर्क विधि से आसन पादप्रक्षालन, अर्घप्रदान, वस्त्र ताम्बूल माला समर्पण से उत्तम सत्कार किया और पादतीर्थ को अपने मस्तक पर धारण किया, मधुपर्क करने के बाद श्री अक्रूरजी ने दिव्यगन्ध, माला, वस्त्र अलङ्कार आदि से सत्कार किया ॥ १४–१५ ॥ विधिपूर्वक मधुपर्क विधि समाप्त करने के बाद चरणों में सर झुकाया और श्रीचरणों को अपनी गोद में लेकर चरण संवाहना करने लगे । पुनः साञ्जलि स्तुति करने लगे ॥ १६ ॥

दिष्ट्या पापो हतः कंसः सानुगो [1]वामिदं कुलम् । भवद्भ्यामुद्धृतं कृच्छ्राद् दुरन्ताच्च समेधितम् ॥ १७ ॥
युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ । भवद्भ्यां न विना किंचित् परमस्ति न चापरम् ॥ १८ ॥
आत्मसृष्टमिदं विश्वमन्वाविश्य[2] स्वशक्तिभिः[3] । ईयते बहुधा ब्रह्मन् [4]श्रुतप्रत्य[5]क्षगोचरम्[6] ॥ १९ ॥

यथा हि भूतेषु चराचरेषु मह्यादयो योनिषु भान्ति नाना ।
एवं भवान् केवल आत्मयोनिष्वात्माऽऽत्मतन्त्रो बहुधा विभाति ॥ २० ॥

कर्दमक्षमा

अन्वयः—सानुगः, पापः, कंसः, हतः, दिष्टया, भवद्भ्याम्, वाम्, इदम्, कुलम्, दुरन्तात्, कृच्छ्रात्, च मोचितम्, च समेधितम्, दिष्टया ॥ १७ ॥ युवां प्रधानपुरुषौ, जगद्धेतू, जगन्मयौ, भवद्भ्याम्, विना, न, परम्, किञ्चित्, अस्ति, न, च, अपरम्, किञ्चित्, अस्ति ॥ १८ ॥ हे ब्रह्मन्! आत्मसृष्टम्, इदम्, विश्वम्, अनु, स्वशक्तिभिः, आविश्य, श्रुतिप्रत्यक्षगोचरम्, बहुधा, ईयते ॥ १९ ॥ यथा, चराचरेषु, भूतेषु, योनिषु, नाना, भान्ति, एवम्, भवान्, आत्मयोनिषु, आत्मतन्त्रः, केवलः, बहुधा, विभाति ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वां युवयोरिदं कुलं गृहं वा भवद्भ्यामुद्धृतं समेधितं च ॥ १७ ॥ वामिदं कुलमित्यादिव्यहारदृष्टयोक्त्वा परमार्थमाह । युवामिति । जगन्मयौ युवाम् । कुतः । जगद्धेतू । तदपि कुतः । प्रधानपुरुषौ तदात्मकौ । अतो भवद्भ्यां विना परं कारणमपरं

---

१. गः पावितं–विज. । २. वेश्य–विज. । ३. क्तितः–प्रा. पा. । ४. श्रुति–वीर. विज. । ५. प्रत्यय–प्रा. पा. । ६. गोचर–वीर. विज. ।

कार्यं च नास्ति ॥ १८ ॥ ननु प्रत्यक्षादिसिद्धं कथं नास्तीत्युच्यतेऽत आह । आत्मसृष्टमिति । हे ब्रह्मन्परमेश्वर । ब्रह्मेति वा पाठः । रजआदिस्वशक्तिभिरात्मनैव सृष्टमिदं विश्वमन्वाविश्य कारणत्वा दननुप्रविष्टोऽप्यनुप्रविश्येव स्थितः श्रुतप्रत्यक्षगोचरं यथा भवति तथा बहुधा भवानेव प्रतीयते ॥ १९ ॥ एकस्यैव बहुधा प्रतीतिं सदृष्टांतमाह । यथा हीति । योनिषु स्वस्यैव रूपांतरेणाभिव्यक्तिस्थानेषु चराचरेषु भूतेषु यथा महीप्रमुखानि कारणान्येव नाना भाँति तथात्मयोनिषु स्वकारणेषु भूतभौतिकेषु भवान्केवलोऽपि बहुधा विभाति । ननु जीवोऽपि नरमृगादिशरीरेषु बालयुवाद्यवस्थासु च तथातथा प्रतीयत इत्याशंक्य तद्व्यवच्छेदार्थमात्मतंत्रग्रहणम् ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उद्धृतं दुःखात् । समेधितं यथेप्सितप्रदानेन । सम्यगेधितं विचित्र वैभवैः ॥ १७ ॥ जगन्मयौ जगद्व्यापिनौ । तत्र हेतुमाशंकते – कुत इति । तदपि जगद्धेतुत्वमपि । तदात्मकौ प्रधानपुरुषरूपौ । संकर्षणस्य प्रधानकार्याहंकाराधिष्ठातृत्वेन प्रधानरूपत्वं, पञ्चमस्कन्धे तु श्रीरुद्रेण स्फुटमेव प्रधानत्वमुक्तं संकर्षणस्य प्रधानकार्यकारित्वात् । तथाहि—"यस्याद्य आसीद्गुणविग्रहो महान्यत्संभवोऽहं त्रिवृता स्वतेजसा" इति । सांख्यैरपि प्रधानादेव महत्तत्त्वोत्पत्तिस्ततोऽहंकारोत्पत्तिश्च मन्यते, श्रीकृष्णस्य पुरुषत्वम् "स एष आद्यः पुरुषः पुराणो न यत्र कालो विशते न वेदः" इत्यादिवाक्यैर्बहुत्रोक्तमिति । यतः प्रकृतिपुरुषरूपावतो हेतोः । नास्तीति निखिलप्रपञ्चस्य प्रकृतिपुरुषात्मकत्वात् । "अणुर्बृहत्कृशः स्थूलो योयो भावः प्रसिध्यति । सर्वो ह्युभयसंयुक्तः प्रकृत्या पुरुषेण च ।" इति वक्ष्यमाणत्वात् । इदं कुलं वामिति किमुच्यते जगदपि युष्मदीयमित्याह—युवामिति । एकस्यापीश्वरस्य द्विधाविर्भावादित्वेन बहिरंगांतरंगशक्तिभ्यां प्रधानपुरुषौ सन्तौ जगद्धेतू जगदुपादाननिमित्तकारणे, अत एव ताभ्यामेवांशाभ्यां जगन्मयौ, तत्तादात्म्येनापि स्थितावित्यर्थः । तदुक्तमेकादशे—"आसीज्ज्ञानमथो अर्थ एकमेवाऽविकल्पितम् । तन्मायाफलरूपेण द्विधा समभवद्बृहत् ।" इति । अतो भवद्भ्यां विना भूतं कारणं कार्यं च किञ्चिन्नास्तीति जगदेव युवाभ्यामुद्धार्यं समेध्यञ्चेति भावः ॥ १८ ॥ प्रत्यक्षसिद्धस्यापलापो न युक्त इत्याशंकते—नन्विति । नपुंसकानां सम्बोधने न लोपविकल्पत्वाद्द्वितीयपाठोपि साधीयान् । अन्वाविश्याणुत्वमहत्त्वानुरूप्यतया प्रविश्य "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः । श्रुतप्रत्यक्षयोर्गोचरम्—श्रुतं श्रुतिः "वाचारंभणं विकारः—" इत्यादिरूपा, प्रत्यक्षं त्वयं घटोऽयं पट इत्यादिनिर्दोषार्थेन्द्रियसन्निकर्षलक्षणम् । यद्वा—श्रुतस्य प्रत्यक्षं साक्षात्कारो येषां ते श्रुतप्रत्यक्षा ज्ञानिनस्तेषां गोचरं वा । तादृशतत्कार्यस्य विश्वस्य तदव्यतिरेकेण तदभिन्नत्वं साधयन्पुनरंतर्यामितया तद्व्याप्तत्वेन च साधयति । आत्मकार्यं स्वसृष्टं बहुधा देवगंधर्वमनुष्यगवादिरूपेण चेयतेऽवगम्यते यतो विश्वमिदं श्रुतप्रत्यक्षगोचरं श्रवण दर्शनविषयीभूतम् । अजहल्लिगस्यापि गोचरशब्दस्य क्लीबत्वमार्षम् ॥ १९ ॥ "योनिः प्राकट्यनिलये भगणे त्वाकरेषु च" इति धरणिः । भाँति प्रतीयन्ते । तथातथा नरमृगादि रूपो बालयुवादिरूपो वा । तद्व्यवच्छेदार्थं जीवत्वापाकरणार्थम् । एवं केवलः शुद्धोऽचिंत्यशक्त्या विकाररहित एव आत्मयोनिष्वात्माभिव्यक्तिस्थानेषु आत्मा भवान्बहुधा विभाति । आत्मतंत्रः स्वतन्त्रः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्यगेधितञ्च विचित्रवैभवैः । वां युष्मदीयमिति तद्युक्तमेवेत्यर्थः ॥ १७ ॥ इदं कुलं वां किमुच्यते जगदपि युष्मदीयमेवेत्याह । युवामिति । एकस्यापीश्वरस्य द्विधाविर्भावाद्द्वित्वेन निर्देशः । बहिरन्तरङ्गशक्तिभ्यां प्रधानपुरुषौ सन्तौ जगद्धेतू जगदुपादाननिमित्तकारणे । अत एव ताभ्यामेवांशाभ्यां जगन्मयौ तत्तादात्म्येनापि स्थितावित्यर्थः । तथाचैकादशे । आसीज्ज्ञानमयो अर्थ एकमेवाविकल्पितम् । तन्मायाफलरूपेण द्विधा समभवद्बृहदित्यादि । अतो भवद्भ्यां विना भूतं भिन्नं कारणं कार्यञ्च किञ्चिन्नास्ति इति जगदेव युवाभ्यामुद्धार्यं समेध्यं चेति भावः ॥ १८ ॥ तादृशतत्कार्यस्य विश्वस्य तदव्यतिरेकेण तदभिन्नत्व साधयन् पुनरन्तर्यामितया तद्व्याप्तत्वेन च साधयति । आत्मेति । श्रुतं प्रत्यक्षञ्च गोचरो यस्य तादृशं यथा स्यादित्येवजहल्लिङ्गस्यापि नपुंसकत्वम् ॥ १९ ॥ ननु मह्यादिवद्विकारीत्याह । केवलः शुद्धः अचिन्त्यशक्त्या विकाररहित इत्यर्थः । अत एव आत्मतन्त्रः स्वतन्त्रः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पापः परमदुष्टः, तद्वधेनेदं यादवकुलमुद्धृतं सम्यगेधितञ्च, विचित्र-धनजनवैभवादिभिर्वर्द्धितम्, वां युष्मदीयमिति तद्युक्तमेवेति भावः ॥ १७ ॥ इदं कुलम्, वामिति किमुच्यते, जगदपि युष्मदीयमेवेत्याह—युवामिति । एकस्यैवेश्वरस्य द्वैधावतीर्णत्वाद्द्वित्वेन निर्देशः । अतएव प्रधानं कुरुषश्च पुरुषत्वाज्जगद्धेतू, प्रधानत्वाज्जगन्मयौ, प्रधानस्यापि तच्छक्तित्वेन तदंशत्वात्, अतो भवद्भ्यां विनाभूतं भिन्नं कारणं कार्य्यञ्च किञ्चिन्नास्ति, इति जगदेव युवाभ्यामुद्धार्य्यं समेध्यञ्चेति भावः ॥१८॥ ननु तत्र शिष्टा उद्धार्य्याः समेध्याश्च, न तु दुष्टास्तद्योग्या इति चेत्तव प्रेरणयैव सर्व्वे सर्व्वत्र प्रवर्त्तन्ते, तत् कथं दुष्टतास्त्वित्याशयेन पृथक् पृथक् सर्व्वान्तर्य्यामितां दर्शयंस्तयैव कस्यापि तस्य नानात्वेन प्रतीतिमाह— आत्मेति । यद्वा, स्वशक्तिभिरति

बहुत्वं गौरवात्। स्वशक्त्या अनु सृष्टः पश्चात् आविश्य अन्तर्य्यामित्वेनासक्त्या प्रविश्य; श्रुतं श्रवणम्, प्रत्यक्षं दर्शनं तयोर्गोचरम्। नपुंसकत्वमार्षम् । श्रुतं दृष्टं चेत्यर्थः। एवं विश्वविशेषणं प्रत्येकं सर्व्वेष्वन्तर्य्यामितया प्रविश्य पृथक् पृथग् वर्त्तमानो भवानेकोऽपि नाना प्रतीयत एवेत्यर्थः। शक्तिविशेषेण प्रकटीकृतत्वान्नानात्वस्यापि सत्यत्वं साधितमेव। तच्च व्यापकत्वादुपपद्यतैवेति सम्बोधयति—ब्रह्मन्निति। 'ब्रह्म' इति पाठेऽपि स एवार्थः। यद्वा, शक्तिविशेषेणैकस्यापि नानात्वमुक्त्वा तथैव सर्व्वान्तःस्थस्यापि परमेश्वरत्वाद्बहिर्वर्त्तमानतामाह—हे ब्रह्मन्निति॥ १९॥ एकस्यापि नानात्वं तथान्तःस्थस्यापि बहिर्वर्त्तमानत्वं दृष्टान्तेन साधयति—यथेति। हि एव, यथैव, योनिष्विति कारणतया मह्यादीनां बहिःसत्ता सिद्धैव, केवल एकोऽपि आत्मा भवान् योनिः कारणं तेषां विश्वेषां तेषु आत्मा चेतयिता आत्मतंत्र इति परमेश्वरतया बहिरपि सत्ता सिद्धैव; एवमन्तर्य्यामितया भवता सर्वत्र प्रवर्त्तमानानां जीवानां कथं दोषो नाम स्यादिति सर्व्व एवोद्धार्य्याः समेष्याश्चेति तात्पर्य्यम्॥ २०॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

प्रकृतिपुरुषकालैः सृष्टमित्यन्वयः सत्त्वरजस्तमोभिरेवेत्यर्थः ईयते प्रतीयते श्रुतिप्रत्यक्षगोचरः प्रत्यक्षश्रुतिगोचरः वेदान्तयोगिप्रत्यक्षगोचरो वा॥ १९॥ केवल एकरूपः आत्मा स्वयं योनिरुपादानं येषां तेषु पदार्थेषु स्वेन रूपेणावस्थितस्य गुणकर्मान्वयाभाव उक्तः॥ २०–२१॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

भाषितमेवाह। दिष्ट्येत्यादिना। दिष्ट्यापरमानन्द इत्यर्थः किं सानुगः सानुचरः पापात्मा कंसः हतः वां युवयोरिदं कुलं दुरन्तादपारात् कृच्छ्रात् कंसकृतात् दुःखादुद्धृतं समेधितं सम्यग्वर्द्धितं चेति॥ १७॥ युक्तं चैतत् युवयोरित्याह। युवामिति। प्रधानपुरुषौ श्रेष्ठपुरुषौ पुरुषोत्तमौ इत्यर्थः। जगतो हेतू कारणभूतावत एव जगन्मयौ स्वार्थे मयट् जगद्रूपौ प्रधानपुरुषाविति विशेषणव्यावर्त्यं दर्शयति भवद्भ्यां विना परमुत्कृष्टं किञ्चिदपि नास्तीति भवन्तावेव सर्वोत्कृष्टावित्यर्थः जगन्मयावित्यस्य व्यावर्त्यमाह। न चापरमिति। अपरमन्यदतदात्मकं नास्तीत्यर्थः। यद्वा। प्रधानपुरुषावित्यनेन प्रकृतिपुरुषशरीरकत्वं विवक्षितं "यस्याव्यक्तं शरीरं यस्याक्षरं शरीरम्" इति प्रकृति पुरुषयोः परमात्मशरीरत्वश्रवणात् शरीरवाचिशब्दानामपृथक् सिद्धविशेषणं वाचिनां गवादि शब्दानां व्यक्तिपर्य्यन्तबोधकत्ववत् आत्मपर्यन्त बोधकत्वात्तत्सामानाधिकरण्योपपत्तेः जगद्धेतू इत्यनेन प्रकृतिपुरुषशरीरकत्ववेषेण जगदुपादानत्वं विशेषाकारेण तन्निमित्तत्वं चाभिप्रेतम्। यतो विशिष्टाकारेणोपादानत्वमत एव कार्यस्य कारणादभिन्नत्वात्तद्व्यतिरिक्तं नास्तीत्यभिप्रायेणोक्तम्। जगन्मयौ न चापरमिति जगन्मयावित्यन्वयमुखेन जगन्मयतादात्म्योक्तिः। नचापरमिति व्यतिरेकमुखेनेति विवेकः। न चास्ति परमित्यनेन निमित्तकारणान्तरव्युदासः युवयोर्जगदुदयविभवलयैककारणत्वात् यथात्मसङ्कल्पं कंसादिसंहारः स्वकुलोद्धारश्च उचित एवेति भावः॥ १८॥ ननु लोके विविधकार्यवर्गाणां विविधोपादानकत्वदर्शनात् कथं जगतोऽस्मदेककारणत्वं कथञ्चैकस्य ममानेकदेवमनुष्यादिपदार्थात्मकत्वमत आह। आत्मसृष्टमिति। स्वशक्तिभिः स्वविशेषणभूतैः प्रकृतिपुरुषकालैरात्मसृष्टमात्मनः प्रकृतिपुरुषशरीरकत्वात्स्वस्मादुपादानभूतात् सृष्टमात्मना प्रकृतिपुरुषयोर्नियन्त्रा स्वेन संसृष्टमित्यर्थद्वयमत्र तन्त्रेण विवक्षितम् अनेनोपादानान्तरस्य निमित्तान्तरस्य च व्यावृत्तिः इदं नामरूपविभागविभक्तं चिदचिदात्मकं विश्वमन्वाविश्य नियन्तृतयान्तरात्मतया चानुप्रविश्य हे ब्रह्मन्! बहुधा ईयसे प्रतीयसे ईयत इति पाठे भवानित्यध्याहारः स्वात्मन्याधारभूते स्वेनैव कर्त्रा स्वात्मानं प्रकृतिपुरुषशारीरिकं जगद्रूपेण परिणमय्य तत्र नियन्तृतयात्मत्वेन चानुप्रविश्य स्वपर्य्यन्तं देव मनुष्यादिशब्दबुद्धिविषयतया नाना प्रतीयत इत्यर्थः। अनेन कृत्स्नं विश्वं प्रति परमपुरुषस्यैकस्यैव प्रकृतिपुरुषविलसच्छरीरकत्ववेषेणोपादानत्वं स्वस्वरूपेण निमित्तत्वं तदुभयकारणत्वोपयुक्तसर्वज्ञत्वसर्वशक्तित्वादिगुणयुक्तत्वं देवादि बुद्धिशब्दयोरात्मभूतपर्यन्तत्वं चोक्तम् भवति। ननु लौकिकानां देवादिबुद्धिशब्दयोर्देवादिमात्रविषयत्वेनानुभवसिद्धत्वात्कथं तयोर्मत्पर्यन्तता विश्वस्यमदेकोभयकारणत्वे च प्रमाणमित्यस्तं विशिनष्टि। श्रुतिप्रत्यक्षगोचर इति श्रुतिप्रत्यक्षयोर्गोचरो विषयः तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च कक्षिवान्नृषिरस्मिविप्र इति श्रुतिप्रसिद्धानां साक्षात्कृतब्रह्मपर्यन्तस्वात्मयाथात्म्यानां तत्पर्यन्तत्वेन गृहीतचिदचिद्विशिष्टशब्दार्थशक्तीनां वामदेवादीनां प्रत्यक्षस्य अयमात्मा ब्रह्म तत्वमसि ऐतदात्म्यमिदं सर्वं सर्वं खल्विदं ब्रह्मेत्यादि श्रुतीनां चोक्तविधत्वेन विषय इत्यर्थः नहि देहात्मभ्रमस्वतन्त्रात्मभ्रमयुक्तम् लौकिकानुभवमात्रेण देवादि बुद्धिशब्दानां तत्पर्यन्तत्वहानिरिति भावः। श्रुति प्रत्यक्षगोचरमिति पाठे क्रियाविशेषणम् ज्ञेयम्॥ १९॥ उक्तमेवोपादानकारणत्वं कारणस्य तदवस्थायामेकत्वेनावस्थितस्यापि कार्यावस्थायां नानात्वेन भावं च सदृष्टान्तमुपपादयति। यथा हीति। दृष्टान्ते योनिष्वित्यस्य स्वेत्यादिः दार्ष्टान्तिके आत्मयोनिष्वित्यात्मशब्दप्रयोगात्स्वे मह्यादयो योनयः उपादानकारणानि येषां तेषु चराचरात्मकेषु भूतेषु व्यष्टिभूतेषु मह्यादिषु समष्टयः नाना भान्ति कारणानि समष्टिभूतानि एकैकशोऽवस्थितान्यनेककार्यात्मना भान्ति इति दृष्टान्तार्थः एवं भवान्केवलमेकरूपः अविभक्त नामरूपप्रकृतिपुरुषकालशरीरक आत्मा योनिः कारणं येषां तेषु व्यष्टिसमष्ट्यात्मकसर्वपदार्थेषु बहुधा विभाति योनिष्वात्मयोनिषु इत्युभयत्र सप्तमीनिर्देशस्यायमभिप्रायः

थाभेदमात्रमेव नतु कार्य्यं नामकारणादतिरिक्तं वस्त्वस्तीति कार्यावस्थायां कारणमेव तत्तत्कार्यावस्थाविशेषविशिष्टतया बहुधा
अव तीति न केवलं तत्र कारणतयैव कार्य्यताया बहुधा भानमपित्वन्तरात्मतयाऽपीत्यभिप्रायेण विशिनष्टि आत्मेति। अयं भावः
प्रतिभ ' जीवस्य क्रमेण देवमनुष्याद्यनेक शरीरविशिष्टत्वाकारेण बहुधा प्रतीतिः यथा च सौभर्यादेर्युगपदनेकशरीरविशिष्टत्ववेषेण
यथैकस्य तः कृत्स्नचिदचिदन्तरात्मत्वात्तत्तच्चिदचिद्विशिष्टत्वाकारेण बहुधा भानमिति ननु जीवदृष्टान्तेन यद्येकस्यानेकधा
तथा भव शिष्टताकारेण भानं तर्हि तद्वदेव कर्मवश्यतापत्तिरित्यतो विशिनष्टि। आत्मतन्त्र इति। स्वतन्त्रः अकर्मवश्य इत्यर्थः।
तत्तच्छरीरा शावस्थानमेव कर्मवश्यत्वापादकमपि तु सुखदुःखादिभोक्तृत्वं तत्तु न तवास्ति तथा च श्रुयते अनश्नन्नन्योऽभि-
नह्येकस्यानेक '। अनेन जीववैलक्षण्यं सूचितम् ॥ २० ॥
चाकशीति भावः

श्रीविजयध्वजतीर्थकृता पदरत्नावली

जगद्व्यापिनौ एतदेव विशिनष्टि। भवद्भ्यामिति ॥ १८ ॥ अन्वाविश्य पदार्थानामणुत्वमहत्त्वानुकूलतया
जगन्मयौ छादिस्वरूपशक्तिभिः श्रुतेः प्रत्यक्षस्य च विषयः "अनृतेन हि प्रत्यूढाः वाचारम्भणं विकार" इत्यादि श्रुतिः
प्रविश्य स्वशक्तिभि' इ निर्दोषार्थेन्द्रियसन्निकर्षलक्षणं प्रत्यक्षं तत्सृष्ट्वा तदेवानुप्राविश"दिति श्रुतेः "ऋतस्य तन्तुं विततं वितत्य
अयं घटोऽयं पट इत्यादि ादिज्ञानिप्रत्यक्षस्य च विषयो वा ॥ १९ ॥ इममेवार्थं सदृष्टान्तं दर्शयति। यथेति। योनिषु भोगस्थानेषु
तदपश्य"दित्यादिश्रुतेः ब्रह्म षु चराचरेषु पूर्वादृष्टवशात् गमामेषु वस्तुषु पृथिव्यादयो नानाशुक्लनीलपीताद्यात्मना भान्ति आत्मा
उत्पत्तिमत्त्वात् भूतशब्दवाच्य तथा तेषु आत्मा परमात्मा केवल आत्मतन्त्र इति विशेषणद्वयेन महान् विशेषोऽस्ति मह्यादिभ्य
स्वयं योनिः कारणं येषां तानि
इति सूचयति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

। युवामिति श्रीबलदेवः सर्वेभ्योऽशेभ्यः प्रधानपुरुषः श्रीकृष्णः सर्वेश्वरेश्वरतया प्रधान-
युवां प्रधानपुरुषावित्यादि ः पुरुषः मिलित्वा जगद्धेतू जगन्मयौ। प्रधानपुरुषाभ्यामेव जगत्, प्रधानमुपादानम्,
पुरुषः। यद्वा, सङ्कर्षणः प्रकृतिः, कृष्ण
पुरुषो निमित्तम् ॥ १९-२० ॥

श्री ाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

त्वेन प्रधानम्, मुख्यांशत्वात्, श्रीकृष्णः पुरुषः सर्वेश्वरेश्वरत्वात्, अथवा युवामिति
युवां प्रधानपुरुषाविति- श्रीरामोऽश स्वरत्वात् ॥ १९-२० ॥
बलदेवः प्रकृतिरंशत्वात्, श्रीकृष्णः पुरुषः सर्वे

श्रीमद्वि नाथचक्रवर्तिकृता सारार्थदर्शिनी

इदं कुलं वामिति किमुच्यते जगद पि युष्म दीयमित्याह। युवामिति। एकस्यापीश्वरस्य द्विधाविर्भावाद्द्वित्वेन निर्देशः
तेन त्वमेव प्रधानं त्वमेव पुरुष इत्यर्थः। जगद्धेतू जग न्मयाविति त्वमेव कारणं त्वमेव कार्य्यमित्यर्थः। एतदेव व्यतिरेकेणाह।
भवद्भ्यामिति। परं कारणमपरं कार्य्यम् ॥ १८ ॥ एक व भगवान् जगद्रूपेण नाना भवतीत्याह। आत्मसृष्टं स्वकार्य्यं विश्व-
मिदमन्वाविश्य अत्र प्रविश्य स्थित इत्यर्थः बहु देव गन्धर्वादिरूपेण मनुष्यगवादिरूपेण च ईयते अवगम्यते यतो विश्वमिदं
श्रुतप्रत्यक्षगोचरम् श्रवणदर्शनविषयीभूतं क्लीवत्वमा म् ॥ १९ ॥ एकस्यैव नानारूपत्वे दृष्टान्तमाह। यथा भूतेषु भौतिकशरीरेषु
चराचरेषु योनिषु जातिषु मह्यादयः हेतवो नाना भूत्वा भान्ति एवं केवल एक एव आत्मयोनिषु आत्माभिव्यक्तिस्थलेषु आत्मा
भवान् बहुधा विभाति आत्मतन्त्र स्वतन्त्रः ॥ २० ॥

गूढार्थदीपि ी

पापः पापी अर्शः आद्यजन्तः। वां युवयोः कूलं समेधितं बा तं च एतत् दिष्ट्या शोभनं जातम् ॥ १७ ॥ जगन्मयौ
जगद्व्यापिनौ। परं कारणम् अपरं कार्यं च नास्ति ॥ १८ ॥ श्रुतेति वणदर्शनविषमीभूतं यथा भवति तथा नानारूपेण
भवानेव प्रतीयते। यद्वा। श्रुतस्य ब्रह्मणः प्रत्यक्षं साक्षात्कारो येषां ते श्रुतप्रत्य क्षा ज्ञानिनः तेषाम् ॥ १९ ॥ योनिषु अभिव्यक्ति-
स्थानेषु भूतेषु मह्यादयः यथा भान्ति प्रतीयन्ते। एवम् आत्मयोनिषु आत्माभिव्य क्तिस्थानेषु भूतभौतिकेषु आत्मा परमात्मा स्वतंत्रो
भवान् विभातीत्यन्वयः ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वां युवयोरिदं कुलम् ॥ १७ ॥ प्रधानपुरुषौ मुख्यपुरुषो जगतो हेतू निमित्तोपा नकारणभूतौ अत एव जगन्मयौ कारण-
स्यैव कार्य्याकारेण स्थितत्वात्कार्यरूपावित्यर्थः। स्वार्थे मयट् परं कारणमपरं कार्यम् भव यां विना नास्तीत्यतः सर्वकार्यकारण-
रूपौ भवन्तावेवेत्यर्थः। जगद्धेतू श्रीकृष्णः एक एव बलस्तत्कलाभूतः समीपस्थोऽतो द्विवचनम् ॥ १८ ॥ ननु कारणसदृशं कार्यं

भवति प्रकृते तु वैपरीत्यम् अहं चेतनः जगदचेतनमिति अतोऽचेतनात्प्रधानाज्जगदुत्पत्तिर्युक्तेत्यत आह । आत्म सृष्टमिति । हे
ब्रह्मन् ! परमात्मन् इदं श्रुतिप्रत्यक्षयोर्गोचरं विषय भूतम् आत्मसृष्टत्वेन श्रुत्या "यतो वा इमानि भूतानि जायन्ते " इत्युपक्रम्य स
आत्मेत्यादि श्रुत्या प्रतिपादितम् प्रत्यक्षेऽपि घटरथाद्युत्पत्तिश्चेतनादेव अत आत्मसृष्टम् चेतनसृष्टम् त्वया निर्मि म् नहि अचेतना-
त्कार्योत्पत्तिः श्रूयते दृश्यते वेति भावः । यदुक्तं कारणसदृशं कार्य्यं भवतीति तदयुक्तं गोमयादेर्विसदृश वृश्चि काद्युत्पत्तिदर्शनात् ।
ननु जगदुपादानत्वस्वीकारे मम विकारित्वं स्यान्नेत्याह । स्वशक्तिभिरात्मसृष्टमिति । एवमनन्तशक्तिस्त्वं स रूपतो निर्विकारोऽपि
जगदभिन्ननिमित्तोपादानहेतुरसीति सिद्धान्तः किंच "तत्सृष्ट्वा तदनुप्राविश"दिति श्रुतेः भवान् अन्वाविश तत्तन्नियन्तृतया बहुधा
ईयते प्रतीयते ।। १९ ।। कार्यकारणयोः विश्वपरमात्मनोः सदृष्टान्तं भेदाभेदसम्बन्धमाह । यथाहीति । यथा योनिषु कारणदर्शन-
स्थानेषु भूतेषु मह्यादिकार्येषु मह्यादयः हेतवः तत्तदाकारेण नाना भान्ति एवं भवान् सर्वकारणकर गः चिदचिच्छक्तिः आत्मा
स्वयं योनिः कारणं येषां तेषु स्वदर्शनस्थानेषु वा स्वकार्येषु केवलः कारणत्वेन एक एव भवान् सर्वात्मा नाना तत्तदाकारेण
आत्मान्तर्याभिरूपेण च आत्मतन्त्रः पारवश्यादिसर्वदोषास्पृष्टस्वरूपो भाति सर्वेषु चेतनाचेतनेषु भ वदात्मकेषु अनुकूलाचाराध्यव-
सायः कर्तव्यो मुमुक्षुभिरिति भावः ।। २० ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवमित्यनेनैवमुद्धव दयां कुरु यथास्माभिर्मनसो वृत्तय इत्याद्याशंसितं स्यात्त थेति सूचयति । सभाजितः पूजितः
कृष्ण उग्रसेनाय चोपायनानि दत्तान्यदात् ।। १७ ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे षट्चत्वारिंशोऽध्याय : ।। १०—४६ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तां स्तुतिमाह । दिष्ट्येति—

दशभिस्तुरुक्ता हि प्रार्थनैकेन दोषनुत् । सर्वैर्भावैरिह स्तु यो निरोधे ह्यधिकारिभिः ।।
सर्वेष्वेव च भावेषु कृष्णोत्कर्षो निरूप्यते । अयुक्तं प्रार्थयेद्य स्तु तस्मै दद्यान्न सर्वथा ।।
न दत्तं पूर्वगोपीभ्यः नोत्तरस्यापि दास्यति । निरोधो ह्यन्य थाद्य स्यात्फलार्थं कर्मतद्भवेत् ।।
ईश्वरः सर्वहितविदविरोधो नतु दूषणम् । तथा बालकर धो हि ि्त्रापि विनिरूपितः ।।
निवर्त्तयति कामांस्तान् ज्ञानेन गृहिता मतिः । यदि स्याद त्कृष्टा दुष्टा निर्दुष्टा वा विचारतः ।।

भगवत्कृतकर्मणामभिनन्दनरूपां स्तुतिमाह । स्वसाधनधर्मे न युवयोर्युवाभ्यामिदं कुलं कृच्छ्राद्दुरन्तादुद्धृतम्
अनेन कुलसम्बन्धेन कुलस्यानिष्टशङ्कितं निवारितं प्रत्युतेष्टमेव कृतमिति किं च स्यैकस्य निवारणेन समुदायपर्यवसितं यदैश्वर्यं
कुलस्य तत्प्रयेकं पर्यवसितमपि कृतमित्याह । समेधितमिति । च कारादनु मपि कृतं पूर्वसम्बन्धे पापादुद्धृतमिति ।। १७ ।।
एवं तेन दृष्टं द्वयमेवेति तावदेवाभिनन्दितं स्वरूपमाह । युवां प्रधानपु रुषाविति । योनिबीजवदत्रापि व्याख्येयं प्रधानपुरु-
षत्वम् आधिदैविकं भविष्यतीति ब्रह्मत्वेनैव स्तुतिर्निर्द्धर्म्मिका र्यवस्ये त्याशङ्क्याह । जगद्धेतु इति । कारणार्थमेव प्रधान-
पुरुषौ निमित्तत्वमात्रं भविष्यतीत्याशङ्क्याह । जगन्मयावि ते । वि कारे वा तत्प्रकृतवचने वा मयटोऽर्थविधाने भगवन्मयत्वं
जगतो नाद्यापि यद्यपि तथापि भगवत्त्वेन कारणत्वेन जगद त्त इति वक्तुं भगवत एव तन्मयत्वमुक्तम् अन्यथा असतः सत्ता
स्यात् भगवतो वा परिणामः स्यात् "विष्टभ्याहमिदं कृत्स्न "मिति वाक्यात् लोके महत्त्वविधानात् तेन भगवन्माहात्स्यं वक्तुम्
अन्नमयो यज्ञ इतिवत् जगन्मयेत्युक्तम् । ननु तथापि भ गवतः साधारणं कारणत्वं स्यात् कालादिवत् समवायि कारणत्वमपि
साधारणमेव मृदादित् तत्राह । भवद्भ्यामिति । भव द्भ्यां कृष्णरामाभ्यां विभक्तशक्तिभ्यां विना परमुत्कृष्टपरमपकृष्टं चकारात्त-
द्वान्तरभेदा वा न भवन्ति त्वन्मूलकमेव सर्वं त्र स्वसामर्थ्यं बहुप्रकटयसे तदुत्कृष्टं यत्राल्पं तदपकृष्टमिति ।। १८ ।। एवं
कारणत्वेन च भगवन्तं निरूप्य भगवन्तमेवावे त्वेनापि निरूपयति । भेदाभेदपक्षपरिहाराय आत्मसृष्टमिति । यद्यप्यात्मसृष्टेनैव-
म्भेदाभेदो दोषाय भवति तथापि भिन्नसृष्टा पि यथेदं दूषणं न भवेत् तदर्थमेतदुच्यते स्वेनैव सृष्टमिदं सर्वमेव विश्वं सृष्ट्यनु-
सारेण सृष्ट्यनन्तरमेव वा अनु पश्चादावि श्य स्वशक्तिभिरिति सर्वथा सामर्थ्ययुक्तः बहुधा ईयते अनन्तप्रकारेण प्रतीयत इत्यर्थः ।
तथापि वैदिकार्थोऽन्य एव भविष्यति " विरोधः शब्द इति चे"दित्यपि तथापि निरूपणात् भ्रमप्रतिपन्नं च भिन्नं स्यात् अतो
न कर्तृत्वं भगवतः सम्भवतीत्याशङ्क्याह । श्रुतिप्रत्यक्षगोचरमिति । श्रुतिप्रतिपादितो विषयो वा प्रत्यक्षविषयः सोऽपि सर्वं
त्वमेव साधारणप्रत्यक्षस्य तव स्तुति रूपकत्वमित्यभिप्रायेण सामान्यग्रहणं गोचरशब्दोऽपि विशेष्यनिघ्नो भवति अन्वाविश्येत्यस्य
वा कर्म ब्रह्मन्निति सम्बोधनं ब्रह्म सम्वादे सर्वेषोपपत्तिः सिद्ध्यति नायमर्थः पुनः साधनीय इति ज्ञापयितुम् ।। १९ ।। नन्वेकस्य
नानात्वं वैचित्र्यं वा लोके ना स्तीति लौकिकन्यायव्यतिरेकेण केवलमलौकिकमङ्गीकुर्वाणान् प्रति लोकानुसारेणापि एकस्यानेक-
रूपत्वे दृष्टान्तेनाह । यथा हि भूतेष्विति । स्थावरजङ्गमेषु सर्वेष्वेव भूतेषु वस्तुतःपार्थिवेषु कारणभूतानां पृथिव्यादीनां विलक्षणस्य

योनिष्विति। चराचराणां भूतानि सिद्धत्वेऽपि जीवसामर्थ्येन तत्र कारणत्वेन प्रविष्टा मह्यादयः नाना भान्ति तत्रोपपत्तिमाह । सिद्धत्वेऽपि जीवसामर्थ्येन तत्र कारणत्वेन प्रविष्टा मह्यादयः नाना भान्ति तत्रोपपत्तिमाह। बीजस्यापि वापनानन्तरं स्वरूपतो नाशात् योनित्वाप्राप्त्त- योनिवशादेव तथोत्पद्यन्त इति कदाचिन्मह्यादीनामकारणता प्रतीयेत बीजापन्नं ब्रह्म पूर्वमेव भगवति विद्यमानं जगद्रूपं रिति योनिष्वित्युक्तं तत्र मह्यादीनां चेद्बीजं शक्तिवशात् तथात्वमुपपद्यते तदा अनन्तजगदाकारेण वृद्ध्यादिषु बह्वल्पपरिग्रहा- स्वसामर्थ्यान शिष्टं स्वाभिलषितप्रकारेण योनिभावापन्नं स्वस्मिन् प्रवेशयन् विभाति शक्तिवशाद्विद्यमानस्थाने आकर्षणा- विर्भावेन भगवानपि केवल एव आत्मयोनिषु आत्मरूपासु योनिषु जगद्रूपेषु बहुधा भवतीत्यर्थः। दृष्टान्ते पारतन्त्र्यं दनित्यता स्यादिति तद्व्यावृत्त्यर्थमाह। आत्मेति। सर्वत्र व्याप्त एव अपकृष्ट एवाभिव्यक्तो समागतेऽपि प्रकारान् प्रति भासत इति तद्व्यावृत्त्यर्थम् आत्मतन्त्र इत्युक्तं तदपेक्षयाप्यनेकप्रकारत्वं ख्यापयितुं दृष्टान्तेन नानात्वे विभातीति। कारणा- विधत्ते बहुधेति। नन्वहमेवेत्यत्र किं प्रमाणं वादिप्रतिपन्नमतेष्विव भिन्नतयैव तथा जगद्भवत्विति चेत्तत्राह। इत्यर्थ ॥ २० ॥ पेक्षयाप्याधिक्येन कार्ये भानं दृश्यते यथा चित्रपटादिषु अतो भगवानेत्यध्यवसीयत

श्रीसुबोधिनी-सारः

दुरंतात्कृच्छ्रात् अपाराद्दुःखात्समेधितं संवर्द्धितं च सानुगः पापः कंसो हतः वां युवयोरिदं कुलं भवद्भ्याम् उद्धृतं विना पर कारणमपरं कार्यं च नास्ति दिष्ट्या भद्रं जातम् ॥ १७ ॥ युवां जगन्मयौ स्थः जगतो हेतू प्रधानपुरुषौ भवद्भ्यां यथा भवति तथा बहुधा न नीयते किंचित् ॥ १८ ॥ हे ब्रह्मन् आत्मना सृष्टमिदं विश्वम् अन्वाविश्य स्वशक्तिभिः श्रुतप्रत्यक्षगोचरं स्वकारणेषु भूतभौतिकेषु प्रतीयते ॥ १९ ॥ चराचरेषु भूतेषु योनिषु मह्यादयः पृथिवीप्रभृतयो नाना भांति यथा एवम् आत्मयोनिषु केवल आत्मात्मतंत्रः स्वाश्रयो भवान् बहुधा विभाति ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वां युवयोरिदं कुलं दुरन्तादपारात् तद्भाषितमेवाह-दिष्ट्येति। भवद्भ्यां सानुगो मल्लादिसहितः पापात्मा कंसो हतः। ननु 'एवं कष्टादुद्धारे संवर्धने कृच्छ्रात् दुःखादुद्धृतं समेधितं सम्यग्वर्धितं चेति दिष्ट्या, तेन महानानन्दो जात इत्यर्थः ॥ १७ ॥ किन्तु उपादानत्वमपि' च मम किं सामर्थ्यम्' इत्यत आह—युवामिति। युवां जगतो हेतू। 'हेतुत्वमपि न निमित्तत्वमात्रं, जगन्मयत्वमेव स्पष्टयति—परं कारणं इत्यभिप्रेत्याह—जगन्मयाविति। तत्र हेतुमाह—प्रधानपुरुषाविति। पुरुषोत्तमावित्यर्थः। ननु 'प्रत्यक्षादिसिद्धः कार्यकारणभेदः कथं नास्तीत्यु- अपरं कार्यं च भवद्भ्यां विना व्यतिरिक्तं किञ्चिदपि नास्तीति ॥ १८ ॥ रजआदिभिः स्वशक्ति- च्यते ?' तत्राह—आत्मसृष्टमिति। 'ब्रह्मवादश्रुतिप्रसिद्धो ऽयमर्थ इति सूचयन् सम्बोधयति—ब्रह्मन्निति। श्रुतप्रत्यक्षगोचरं यथा भवति तथा बहुधा भिरात्मनैव सृष्टमिदं विश्वमन्वाविश्य उपादानत्वात्तद्रूपोऽप्यन्तर्यामितया प्रविश्य हीति प्रसिद्धमेतत्। भवानेव ईयते प्रतीयते इत्यन्वयः ॥ १९ ॥ एकस्यैवात्मनो बहुधा भानं दृष्टान्तेनोपपादयति—यथा हीति। केवलमेक एव भवान् आत्मयोनिषु योनिषु स्वकारणकेषु चराचरेषु यथा मह्यादिनी कारणान्येव नाना तत्तद्रूपेण भान्ति एवं इत्यपेक्षायामाह— स्वकारणकेषु भूतभौतिकेषु कार्यमात्रेषु बहुधा तत्तद्रूपेण भाति। ननु 'पुरुषोत्तमस्य तत्स्वरूपग्रहणे को हेतुः ?' आत्मतन्त्र इति। कालकर्मादिपारतन्त्र्यरहितोऽपि स्वेच्छया लीलार्थं नानारूपो भवतीत्यर्थः ॥ २० ॥

अन्वितार्थप्रकाशिका

वां युवयोरिदं कुलं दुरन्तादपारात् कृच्छ्रात् दिष्ट्येति ॥ भवद्भ्यां सानुगो मल्लादिसहितः पापात्मा कंसो हतः। दुःखादुद्धृतं समेधितं सम्यग्वर्धितं चेति दिष्ट्या तेन महानन्दो जातः इति व्यवहारदृष्ट्योक्तम् ॥ १७ ॥ परमार्थमाह—युवामिति युवां प्रधानपुरुषौ पुरुषोत्तमौ प्रकृतिपुरुषात्मकौ वा जगतो हेतू निमित्तकारणे जगन्मयौ उपादानकारणे च अतः परं कारणम् अपरं कार्यं च भवद्भ्यां विना व्यतिरिक्तं किञ्चिदपि नास्तीति ॥ १८ ॥ आत्मेति ॥ हे ब्रह्मन् ! रजआदिभि : स्वशक्तिभिरात्मनैव सृष्टमिदं विश्वमन्वाविश्य कारणत्वादननुप्रविष्टोऽप्यनुप्रश्येव स्थितः श्रुतं प्रत्यक्षं च गोचरो यथा यत्र तत् यथा भवति तथा बहुधा भवानेव ईयते प्रतीयते ॥ १९ ॥ यथा हीति ॥ हीति प्रसिद्धमेतत्। योनिषु स्वस्यैव रूपान्तरेणाभिव्यक्तिस्थानेषु चराचरेषु भूतेषु यथा मह्यादयः करणान्येव नाना तत्तद्रूपेण भान्ति एवं केवलः शुद्धो निर्विकार एव आत्मा आत्मतन्त्रो भवान् आत्मयोनिषु स्वकारणकेषु कार्यमात्रेषु बहुधा तत्तद्रूपेण भाति जीवोऽपि नरमृगादिशरीरेषु तथा प्रतीयते इति तद्व्यवच्छेदार्थमात्मतन्त्र- ग्रहणम् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जगन्मयौ जगति अन्वयत्वात् जगदात्मा वांयुवयोः इदं कुलं कृच्छ्रात् उधृतं मोचितम् ॥ १७ ॥ प्रधान पुरुषौ श्रेष्ठपुरुषौ यत् किञ्चित् नास्ति ॥ १९ ॥ तमेवाऽन्वय- भूतौभवद्भ्यांविनाभवदन्वयं विना परं मुक्त कोटिवृंदं अपरं ब्रह्मादि स्थानवरान्तं कृत्वा आत्मनात्वच्छरीर भूतेन पुरुषेणसृष्ट- प्रकारामाह आत्मेति हे ब्रह्मन् परमात्म स्वशक्तिभिः स्वकीयाभिर्महदादि शक्तिभिः

मिदन्नित्याजड चेतन सभूह विशिष्टदेव मनुष्यादि रूपं विश्वं व्यतिरेक भावेन स्व ब्रह्मपुरे स्थितो भगवानन्वाविश्यदेव मनुष्पा-
दीनां कर्मफलप्रदानाय विकसितांतर्यामिशक्त्या प्रविस्य बहुस्यामिति श्रुत्युक्तरीत्या बहुधाबहुविधन्यूनाधिकभावेन स्थित इति
श्रुत प्रत्यक्षगोचरं श्रुतं शाब्द प्रमाणं प्रत्यक्षं प्रत्यक्ष प्रमाणं च तयो गोचरो दृश्यो यथा भवति तथा मुनिभिः इयते ज्ञायते ॥ १९ ॥
चेतनाऽचेतनेषु हरेरन्वयत्वेन व्याप्ति स दृष्टांत निगदति। यथेति योनिषु रूपान्तरेण परिणत स्वप्रवेशस्थानेषु चराचरेषु
भूतेषु क्षेत्रज्ञ विशिष्ट चराचर देहेषु महाद्यः पृथवीव्यादितत्त्वानि पृथक् स्थितान्यपि अस्थिरुधिरादिरुपैः स्वस्वांशैर्यथानाना-
भांति एवं तथा आत्मयोनिषु आत्मनः स्वस्य योनिषु अन्तर्यामि शक्त्या व्याप्ति स्थानेषु विधिभूम्यादि चेतना चेतनेषु आत्म-
तंत्रः स्वाधीनः केवलः शुद्धः आत्मा स्वधामस्थ दिव्यविग्रहः परमात्मा भवान् क्षेत्रज्ञानांनानाविध कर्मफलप्रदानायविक-
सितांतर्यामितया बहुधा बहुविधान्यूनाधिक भावेनस्थितो विभाति ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भाषितमेवाह दिष्ट्येत्यादिना ॥ दिष्ट्येति ॥ हे रामकृष्णौ, सानुगः सानुचरः, पापः पापात्मा, कंसः, हतः । दिष्ट्या,
आनन्दो जात इत्यर्थः । भवद्भ्यां, वां युवयोः, इदं कुलं, दुरन्तादपारात्, कृच्छ्रात् कंसकृतात् दुःखात्, उद्धृतं समेधितं
सम्यग्ववर्द्धितं च । दिष्ट्या, तेनानन्दो जात इत्यर्थः ॥ १८ ॥ युक्तं चैतद्युवयोरित्याह ॥ युवामिति ॥ युवां, प्रधानपुरुषौ प्रकृति-
पुरुषशरीरकौ, 'यस्याव्यक्तं शरीरं यस्याक्षरं शरीरम्' इत्यादिषु प्रकृतिपुरुषयोः परमात्मशरीरत्वश्रवणात् । जगद्धेतू, प्रकृतिपुरुष-
शरीरकत्ववेषभाक्त्वेन वस्तुतो विशेषणात्पृथग्भूतजगदुपादानभूतौ, विशेष्याकारेण निमित्तभूतौ च जगन्मयावन्वयमुखेन जग-
दात्मकौ, एवं भवद्भ्यां विना, परं किंचित्, नास्ति । अनेनान्वयतया तादात्म्यं दृढीकृतम् । अपरं च, नास्ति । अनेन व्यति-
रेकमुखेन पृथक्त्वं च दृढीकृतम् । युवयोर्जगदुदयविभवलयैककारणत्वात् यथात्मसंकल्पं कंसादिसंहारः स्वकुलोद्धारश्चोचित एवेति
भावः ॥ १९ ॥ ननु लोके विविधकार्यवर्गाणां विविधोपादानकत्वदर्शनात् कथं जगतोऽस्मदेककारणत्वं, कथं चैकस्यानेकदेव-
मनुष्यादिपदार्थात्मकत्वमत आह ॥ आत्मसृष्टमिति ॥ स्वशक्तिभिः स्वविशेषणभूतैः प्रकृतिपुरुषकालाद्यात्मशक्तिभिः, आत्मनः
प्रकृतिपुरुषशरीरकत्वेनोपादानभूतात् स्वस्मात्सृष्टमात्मना प्रकृतिपुरुषयोर्नियन्त्रा स्वेन सृष्टं, एतदर्थद्वयमत्रात्मसृष्टमिति पदात्तन्त्रेण
बोध्यम् । अनेनोपादानान्तरस्य निमित्तान्तरस्य च व्यावृत्तिः । इदं नामरूपविभागविभक्तचिदचिदात्मकं विश्वं, अन्वाविश्य
नियन्तृ-तयान्तरात्मतया चानुप्रविश्य, हे ब्रह्मन् ब्रह्मशब्दवाच्यश्रीकृष्ण, श्रुतिप्रत्यक्षगोचरं श्रुत्युक्तार्थसत्यताविश्वासेन प्रत्यक्षबोध्यो
यथा भवति तथेत्यर्थः । बहुधा बहुप्रकारेण, ईयसे । त्वमिति अध्याहार्यं । ईहते इति पाठे, भवानित्यस्याध्याहारः । सर्वाधारभूते
स्वात्मनि स्वेनैव कर्त्रा स्वात्मानं प्रकृतिपुरुषशरीरकं जगद्रूपेण परिणमय्य तत्तन्नियन्तृतयाऽऽत्मत्वेन चानुप्रविश्य स्वपर्यन्तदेव-
मनुष्यादिशब्दबुद्धिविषयतया भवान्नाना प्रतीयते इत्यर्थः । अनेन कृत्स्नं विश्वं प्रति परमपुरुषस्यैकस्यैव प्रकृतिपुरुषकालशरीर-
कत्वेषेणोपादानत्वं स्वस्वरूपेण निमित्तत्वं तदुभयकारणत्वोपयुक्तसर्वज्ञत्वसर्वशक्तित्वादिगुणयुक्तत्वं देवादिज्ञापकशब्दानामात्म-
पर्यन्तत्वं चोक्तं भवति ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

दिष्ट्या पाप इति : १०.४८.१७.

सुखतोषाविर्भावो भवति यथा क्लेशदुःखदापगमात् । न तथाऽन्यत इति तादृक् स कंसहतिसुखमवर्णयत्प्रथमम् ॥ ६४ ॥

आत्मसृष्टमिति : १०.४८.१९.

ज्ञातस्त्वं स मया परः प्रकृतितो यो वेदमृग्यः सदा हृष्यन्मानसयोगि·हंसहृदयानन्दप्रदाऽङ्घ्र्यम्बुजः ।
साक्षी यश्च चराचरस्य जगतो यस्तन्मयस्तद्गतस्तद्बाह्योऽपि तदीयधर्मरहितः सच्चिन्सुखात्मा विभुः ॥ ६५ ॥

कृष्णप्रिया

अत्यन्त आनन्द की बात है कि कंस मूर्तिमंत पाप था। वह अपने भाईयों के लिये मर गया, तथा अपने परिवार एवं
निजकुल का उद्धार किया। अब विश्वास है कि यदुकुल उत्तरोत्तर उत्कर्ष प्राप्त करेगा॥ १७ ॥ आप दोनों प्रधान तथा पुरुष हो,
जगत के कारण हो और जगद्रूप हो आपके विना यह जगत् कुछ नहीं है कार्य-कारण रूप जगत् आप ही हो ॥१८॥ हे भगवन् !
आप विश्व की रचना करते हो और स्वरचित विश्व में अपनी शक्तियों से प्रविष्ट होकर अनेक प्रकार से श्रुति भगवती ने कहे
हुए तथा प्रत्यक्ष में आने वाले प्रत्येक पदार्थों में आपही प्रतीत होते हैं ॥१९॥ जैसे चराचर पञ्चमहाभूतों की योनियों में सूक्ष्म
भूतों में पृथ्वी आदि भिन्न-भिन्म प्रकार से रहते हैं, वैसे ही आप अपनी इस सृष्टि में स्वतन्त्रता से प्रविष्ट होकर विविध
प्रकार से बहुधा प्रकाशित होते हैं ॥ २० ॥

सृजस्यथो लुम्पसि पासि विश्वं रजस्तमः सत्त्वगुणैः स्वशक्तिभिः ।
न बध्यसे [1]तद्गुणकर्मभिर्वा ज्ञानात्मनस्ते [2]क्व च बन्धहेतुः ॥ २१ ॥
देहाद्युपाधेरनिरूपितत्वाद् भवो [3]न साक्षान्नभिदाऽऽत्मनः स्यात् ।
अतो न बन्धस्तव नैव मोक्षः स्यातां [4]निकामस्त्वयि नोऽविवेकः ॥ २२ ॥
त्वयोदितोऽयं जगतो हिताय यदा यदा वेदपथः पुराणः ।
बाध्येत [5]पाषण्डपथैरसद्भिस्तदा भवान् सत्त्वगुणं विभर्ति ॥ २३ ॥
स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः स्वांशेन भारमपनेतुमिहासि भूमेः ।
अक्षौहिणीशतबधेन [6]सुरेतरांशराज्ञाममुष्य च कुलस्य यशो वितन्वन् ॥ २४ ॥

कर्दमक्षमा

अन्व
कर्मभिः, वा, न,
भिदा, तथा, भवान्
जगतः, हिताय, त्वया,
विभर्ति ॥ २३ ॥ हे प्रभ
राज्ञाम्, अक्षौहिणी शतब

यः—भवान्, रजः, तमः, सत्वगुणैः, स्वशक्तिभिः, अदः, विश्वम्, सृजसि, पासि, लुम्पसि; तथापि, तद्गुण
बध्यसे, ज्ञानात्मनः, ते, क्व, च, बन्धहेतुः ॥ २१ ॥ आत्मनः, देहादि उपाधेः, अनिरूपितत्वात्, न, भवः, न,
, साक्षात्, आत्मा, अतः, तव, न बन्धः, न, एव, मोक्षः, स्याताम्, त्वयि, निकामः, अविवेकः, स्यात् ।२२।
उदितः, पुराणः, अयम्, वेदपथः, यदा, यदा, असद्भिः, पाखण्डपथैः, बाध्येत, तदा, भवान्, सत्वगुणम्
ो ! सः त्वम्, स्वांशेन, अध, भूमेः, भारम्, अपनेतुम्, वसुदेवगृहे, इह, अवतीर्णः, असि, सुरेतरांश
ेन, च, अमुष्य, कुलस्य, यशो, पितन्वन्, अवतीर्णः असि ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु सृष्ट्यादिकर्तृत्व
कर्मभिर्वेत्यर्थः । यतः क्व च ते बंध
आश्रयानावरकत्वादिति भावः ॥ २१
त्याह । देहाद्युपाधेरिति । अनिरूपितत्व
ननु मम बन्धाभावं वदता त्वया किं मो
इति । यतो नाविद्या अतो न बन्धो मोक्षः
नस्यतः कथमुभयं नास्तीत्यत आह । निक
नोऽविवेक एव तवोभौ स्यातामिति ॥२२॥ ननु
तु तव लीलेत्याह द्वयेन त्वयोदित इति ॥ २३ ॥
गृहे स्वांशेन रामेण सहावतीर्णोऽसि ॥ २४ ॥

ेन सगुणत्वेन च मम किं जीववद्बंध उक्तो नहिनहीत्याह । सृजसीति । तद्गुणकर्मभिर्वा तैर्गुणैः
हेतुः कदाचिदपि बन्धहेतुरविद्या तव नैवास्ति । कुत इत्यत आह । ज्ञानात्मन इति । मायाया
॥ किञ्च आस्तां तावद्बंधशंका यतोऽविद्योपाधेर्जीवात्मनोऽपि न वस्तुतो बन्धोऽस्ती-
ान्मिथ्यात्वादित्यर्थः । आत्मनो भवो जन्म तन्मूला भिदा च साक्षात्स्वरूपतो न स्यादिति ।
ोंगीकृतः ओमिति चेत्तर्हि बन्धाभावे मोक्षासंभवादापन्नो बन्धोऽपीत्याशंक्याह । अत
ध्व । एवमुभौ न स्यातामित्यर्थः । ननु उलूखले मां बद्धं श्रुतवान्यमुनाह्रदे मुक्तं दृष्टवा-
म इति । स्वाभिप्रायानुरूपस्त्वयि नोऽस्माकमविवेक एव परमेवंभूत इति । यद्वा
तर्हि ममावतारास्तच्चरित्राणि च शुक्तिरजतवदविद्याकल्पितान्येव किं नहिर्नाह इयं
सुरेतरांशा ये राजनस्तेषामक्षौहिणीशतानां वधेन भूमेर्भारमपनेतुम् इह वसुदेव-

श्रीवंशीध

स्वतन्त्रत्वेपि पुनराशंकते—नन्विति । नहिनह
इति । यतो हेतोर्बंधहेतुर्नास्ति अतो न बध्यसे इत्यन्वयः ।
इत्युक्तेः, लौकिकीन्द्रजालादिमायायामपि तथा दर्शनात् । न
विकारित्वं, कथं नाम वीक्षणादिचेष्टामयस्रष्टृत्वादिकं कथं
चिच्छक्तिमात्रविलासप्रयत्नस्य मायाविलासोऽपि यस्तव प्रयत्नः
प्रपंचेऽपि चिच्छक्ति विलासास्त्वदुक्त्यादिरूपा अनुगता दृश्यन्ते
राजसी । तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ।” इत्यादि
नुषंगिकमेवान्यसृष्ट्यादिकं भवतीति पासीति पश्चान्निर्देशस्य तात्व
“तथा परमहंसानां मुनीनाममलात्मनाम् । भक्तियोगविधानार्थं कथ
न तु चिच्छक्तिविलासे, तत्र तन्निषेधात् । यथोक्तं द्वितीये वैकुण्ठ

रकृतो भावार्थदीपिकाप्रकाशः

ीति संभ्रमे वीप्सा । इत्यर्थ इति—तत्पुरुषभ्रमवारणार्थमयमर्थः कार्य
इति भाव इति—“नेश्वरस्याऽशुभं धत्ते स्वे महिम्नि स्थितस्य च”
नु भवत्वचिंत्यशक्तित्वाच्चिंतामण्ययस्कांतादिवदुपादाननिमित्तत्वेप्य-
वा तेन न बद्धस्तत्राह—सृजसीति । सिद्धान्तमाह—ज्ञानात्मनः
पतीयते सोऽपि तत्सम्बन्धेनैवेत्यर्थः । एतदुक्तं भवति-मायिक
तथा चैकादशे “सात्त्विक्याध्ययात्मिकी श्रद्धा कर्मश्रद्धा तु
अतो मायिकवैभवांतर्गतसाधकभक्तजनार्थमेव कुर्वति त्वद्या-
लकत्वेन दृष्टान्ततया विन्यासात् । यथोक्तं प्रथमे श्रीकुन्त्या-
श्येमहिस्त्रियः ।” इति । तदेवं मायाविलास एव विकारित्वं
े–‘न यत्र माया’ इति, ‘न च कालविक्रमः’ इति च । तथा

---

१. त्वं–विज. । २. कव च नेव–विज. । ३. भवो हि ४ ।क्षान्नचि
विज. । ५. पाखण्ड–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. ध. । ६

ात्मनः–विज. ; न साक्षान्नचिदात्मनः–वीर. । ४. निकामं–वीर.
तराणां–प्रा. पा. ।

मायाविलासानासक्तेः तेन न बन्धोऽतो न दोष इति भावः ॥ २१ ॥ तव तु बन्धो दूरापास्त इत्याह–किञ्चेति । तन्मूला जन्म-
कारणम् । भिदा भेदः । अनिरूपितत्वाद्विचारे क्रियमाणे निरूपयितुमशक्यत्वात् । विचारश्च—देहः कुतो जातः शुक्रशोणिताभ्यां,
ते चान्नादन्नश्चादृष्टसहकृतजलादित्येवमादिरूपस्तेन परमकारण एव पर्यवसानं लभ्यते नान्यत्रेति । बन्धाभावेऽपि शंकते–
नन्विति । ओमित्यंगीकारेऽव्ययम् । तत्राप्याक्षिपति– बन्धाभावे इति । 'बद्ध एव मुक्तो भवति नाबद्धः' इति न्यायात् । तथा च
मोक्षाऽभावे बन्ध एवापन्न आयात इति । एवमुक्तरीत्या । उभौ बन्धमोक्षौ । इत्यर्थ इति–सर्वदा विमुक्तस्य कथ बन्धाशंका
तदुत्तरा मोक्षशंका चेत्यर्थः । बन्धमोक्षावभिनीय दर्शयति— नन्वित्यादिना । मुक्तं कालियादिति शेषः । यत उभौ प्रत्यक्षसिद्धावतो
हेतोः । अतोऽत्र । "निकामस्त्वनुकूले निश्चयातिशययोरपि" इति धरणिः । पर केवलमेवंभूतो बधोमोक्षादिप्रदर्शक इति । न हि
वनस्थाग्निना गृहदाहो युज्यत इत्यतो भवदधिकरणकाविवेको भवतामेव बन्धादिप्रदो न मम । त्वयीत्युक्त्या ममैव प्रतीयत
इत्यरुच्याह—यद्वेति । वस्तुतस्तव न स्तस्तावस्माकमेवाविवेकः स यो विद्यमानधर्मारोपः खपुष्पसौरभ्यादिवदिति भावः ।
अनिरूपितत्वादनिर्वचनीयत्वादित्यर्थः । यद्वा – यदि वा स्यातां तादृशौ तदा नोऽस्माकं प्रियवर्गाणां नितरांकाम एव तौ द्वौ
स्याताम् । प्रेमविजातिविशेषोचितमनोरथविशेषं प्राप्यैव तादृश्यो लीलास्तवोदयन्ते, यथा श्रीयशोदाया वात्सल्यमनोरथविशेषेणा-
र्भकभावमयलीलाविशेषोदयाद्बंधनादिप्राप्तिलीलोदय इति भावः ननु कथं प्रकटैश्वर्येऽपि मयि तेषां तादृशभावः सम्भवति
तत्राह—न तिष्ठति विवेक ऐश्वर्यदर्शनेऽपि तदनुसंधानं यस्मात्तादृशोऽपि निष्काम इति । यतः "अहं भक्तपराधीनो ह्यस्वतं
इव द्विज । साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ।' इत्युक्तेस्तवापि तादृशो भावः स्यादिति भावः ॥ २२ ॥ मत्सबांधं नि
कल्पितमेवेत्याशंकते—नन्विति । तच्चरित्राणि अवतारचरितानि । भीत इवाह—नहिनहीति । इयमवतारादिरूपा ।
विलासः । उदितः प्रकाशितः । अयं धर्माधर्मादिबोधकः । हिताय स्वर्गापवर्गाय । अतः स्वभक्तितात्पर्यपर्यवसानं वेदमार्ग
स्तदभिव्यक्तिस्थानं सत्त्वगुणमपि पुष्णातीत्याह—त्वयेति । त्वयेश्वरेणोदित उक्त इति भ्रमादिदोषचतुष्टयराहित्या
मवश्यपाल्यत्वञ्च । न चेत्थं कृत्रिम इत्याह—पुराणोऽनादिः, तवानादित्वेन त्वत्त एवानादितो मुहुराविर्भावित्वेन चे
स यदायदा तादृशत्वदपेक्षार्ह भक्तवृंदाभावात्त्वदौदासीन्येनासद्भिर्बाध्येताऽतिशयेन पीडितः स्यात्तदा दैवाच्छ्रीप्रह्ला
चिद्भक्तजनस्यैकस्य बहूनां वा प्राकट्ये सति तत्पोषणार्थं स्वयमवतीर्य सात्त्विकगणवर्द्धनेन वेदपथं पुष्णन्स्वर
भवान्बिभर्ति पुष्णातीत्यर्थः ॥ २३ ॥ यः पाखण्डनिवृत्त्यर्थं सत्त्वं बिभर्ति स इत्यर्थः । स्वांशेन निजैश्वर्येण । अ
तदेवमुपोद्घातानंतरम् 'दिष्ट्या पापो हतः हतः कंसः' इत्येवानुदिष्टं प्रकृतमेवानुवर्तयति–स इति, एवमुक्तमा
सन्मार्गप्रवर्तकः । विभो हे सर्वैश्वर्यपरिपूर्ण वसुदेवस्य यादवश्रेष्ठस्य, श्लेषेण वसुर्भक्तिलक्षणो धर्मस्तेन दी
तस्य ॥ २४ ॥

त्र
लले
लीला
पुष्णं-
त्प्रामाण्य-
त भावः ।
दस्येव कस्य-
मेव सत्त्वगुणं
ष्य यदूपपदस्य ।
हात्म्यो मुहुरवतीर्य
ति द्योतत इति तथा

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु भवत्वचिन्त्यशक्तित्वाच्चिन्तामण्ययस्कान्तादिवदुपादाननिमित्तत्वेऽप्यविकारित्वं कथं
स्रष्टृत्वादिकं कथम्बा तेन न बन्धः तत्राह । सृजसीति । सिद्धान्तमाह । ज्ञानात्मनः । चिच्छ
विलासोऽपि यस्तव प्रयत्नः प्रतीयते सोऽपि तत्सम्बन्धेनैवेत्यर्थः । एतदुक्तं भवति मायिकप्रपञ्चे
दिरूपा अनुगता दृश्यन्ते तथा चैकादशे । "सात्त्विक्याध्यात्मिकी श्रद्धा कर्म श्रद्धा तु राजसी ।
निर्गुणे"त्यादि । ततो मायिकवैभवान्तर्गतसाधकभक्तजनार्थमेव वीक्षणादिकं कुर्वेति त्वय्यानु
पासीति पश्चान्निर्देशस्तस्य तात्कालिकत्वेन दृष्टान्ततया विन्यासात् । यथोक्तं प्रथमे श्री
मलात्मनाम् । भक्तियोगविधानार्थं कथं पश्येमहि स्त्रिय" इति तदेवं मायाविलास ए
तन्निषेधात् । यथोक्तं द्वितीयस्कन्धे वैकुण्ठवर्णने । न यत्र मायेति न च काल विक्रम
बन्धः ततो न दोष इति भावः ॥ २१ ॥ देहेति । तैर्व्याख्यातं तत्रोलूखले बन्धश्रवणात
यमुनाह्रदे इष्टदेवाकृतिमूर्त्तौ तत्तदैश्वर्यसामग्री दर्शनात् । ततो मुक्तत्वञ्च प्रतीयत
दित्यर्थः । यद्वा यदि वा स्यातां तादृशौ तदा नोऽस्माकं प्रियवर्गाणां नितरां
मनोरथविशेष प्राप्यैव तादृश्यो लीलास्तवोदयन्ते । यथा श्री यशोदाया वात्स
बन्धनादिप्राप्तिलीलोदय इति भावः । ननु कथं प्रकटैश्वर्येऽपि मयि तेषां तादृ
दर्शनेऽपि तदनुसन्धानं यस्मात् तादृशोऽपि निकाम इति अतः "अहं भक्तप
भक्तजनप्रिय" इत्युक्तेस्तवापि तादृशो भावः स्यादिति भावः ॥ २२ ॥ अ
स्थानं सत्त्वगुणमपि पुष्णातीत्याह । त्वयेति । त्वयेश्वरेणोदित उक्त इति
न चेत्थं कृत्रिम इत्याह । पुराणः अनादिः । तवानादित्वेन त्वत्त एवाना
दपेक्षार्हभक्तवृन्दाभावात्त्वदौदासीन्येनासद्भिः बाध्येत अतिशयेन पी

नाम वीक्षणादिचेष्टामय-
क्तविलासमात्रप्रयत्नस्य माया-
पि चिच्छक्तिविलासात्त्वद्भक्त्या-
तामस्यधर्मे या श्रद्धामत्सेवायान्तु
ङ्गिकमेवान्यसृष्ट्यादिकं भवतीति ।
कुन्त्या । "तथा परमहंसानां मुनीनाम-
विकारित्वं ननु चिच्छक्तिविलासे तत्र
इति च । तथा मायाविलासनशक्तेः तेन न
नराकृतिमूर्त्तौ संसारबन्धोऽपि सम्भाव्यते ।
इत्यभिप्रायः । अनिरूपितत्वादनिर्वचनीयत्वा-
ाम एव तौ द्वौ तव स्यातां प्रेमजातिविशेषोचित
ल्यमनोरथविशेषेणार्भकभावमयलीलाविशेषोदयात्
भावः सम्भवति तत्राह । न तिष्ठति विवेकः ऐश्वर्य-
धीनो ह्यस्वतन्त्र इव द्विज । साधुभिर्ग्रस्तहृदयो भक्तैः
ः स्वभक्तितात्पर्यपर्यवसानं देवमार्गं रक्षन् तदभिव्यक्ति-
भ्रमादिदोषचतुष्टयराहित्यात् प्रामाण्यम् अवश्यपाल्यत्वञ्च
तो मुहुराविर्भावित्वेन चेति भावः । स यदा यदा तादृशत्व-
ः स्यात्तदा दैवात् श्रीप्रह्लादस्येव कस्यचिद्भक्तजनस्यैकस्य

बहूनां वा प्राकट्ये सति तत्पोषणार्थं स्वयमवतीर्य सात्त्विकगणवर्द्धनेन वेदपथं पुष्णन स्वयमेव सत्त्वगुणं भवान् बिभर्त्ति पुष्णातीत्यर्थः ॥ २३ ॥ तदेवमुपोद्घातानन्तरं दिष्ट्या पापो हतः कंस इत्यादि निर्दिष्टं प्रकृतमेवानुवर्त्तयति । स इति । एवमुक्तमाहात्म्यो मुहुरेवावतीर्य सन्मार्गप्रवर्त्तकस्त्वं विभो हे सर्वैश्वर्यपरिपूर्ण वसुदेवस्या यादवश्रेष्ठस्य श्लेषेण वसु भक्तिलक्षणो धर्मस्तेन दीव्यति द्योतत इति तथा तस्य ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न चान्तर्य्यामितया प्रेरकत्वात् तत्तद्गुणदोषास्त्वयि पर्य्यवस्यन्तीत्याह—सृजसीति । पासीति पश्चान्निर्देशः । सम्प्रति तस्य पालनप्राधान्याद्गुणा रजआदयः, कर्म्माणि सृष्ट्यादीनि, साक्षाद्विधीयमानानां सृष्ट्यादिमहाकर्म्मणामपि गुणदोषास्त्वयि न प्रसज्यन्ते, किमुतान्तर्य्यामित्वेन प्रेरणाज्जीवगुणदोषा इत्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, 'वा' अपि, तस्य विश्वस्य गुणै रजआदिभिर्घोरमूढशान्तस्वभावैर्वा यानि कर्म्माणि तैरपि न बध्यसे, कुतोऽन्तर्य्यामित्वाज्जीवगुणदोषैरित्यर्थः । तत्र हेतुः—स्वशक्तिभिरिति । कर्त्तापि तत्तद्गुणदोषैर्लिप्तो न भवसीति परमेश्वरस्य तव शक्तिविशेषादित्यर्थः । अहो किं वक्तव्यम्, त्वं न बध्यस इति, तदीयस्यापि गुणदोषैर्बन्धो न स्यादित्याह—'च' अपि; ते तव ज्ञाने त्वन्माहात्म्यादिबोधेऽपि आत्मा चित्तं यस्य तस्यापि बन्धहेतुः क, अपि तु क्कापि नास्त्येवेत्यर्थः ॥ २१ ॥ अहो किमुच्यते—त्वज्ज्ञानात् मनोबन्धहेतुर्नास्तीति, सर्व्वेषां जीवानामपि तत्त्वतो बन्धो नास्तीत्याह—देहेति । देहः, आदि शब्दात् कर्म्मादिश्च, स एवोपाधिर्जन्मादिहेतुस्तस्यानिरूपितत्वात् मिथ्यात्वाद्धेतोः, अतः कर्म्मभिस्तव न बन्ध एव अपि, नापि तैर्मोक्षः, न मोक्ष्यसे न त्यज्यस इत्यर्थः । यदि वा स्यातां तौ, तदा नोऽस्माकं भक्तानां नितरां काम एव तौ द्वौ तव स्याताम्, भक्तानामिच्छया बद्धो मुक्तोऽपि भवसीत्यर्थः । ननु तत्र तत्र भक्तानां कुतो निकामः स्यात्तत्राह—न तिष्ठति विवेको विचारो यस्मात् स नवनीतचौर्य्यादिकर्म्मभिर्बद्धो भवतु, निजभक्तार्थं धर्म्ममर्य्यादाञ्च त्यजत्वित्येतद्रसविशेषेण विचारलोपादित्यर्थः ॥ २२ ॥ अतोऽस्माकं निकामेनैवावतीर्य्य जगद्धितयर्थं वेदमार्गमपि रक्षसीत्याह—त्वयेति । त्वयैवोदित उक्त इति प्रामाण्यमवश्यपाल्यत्वं चोक्तम्, न च तथापि कृत्रिम इत्याह—पुराणोऽनादिः; तवानादित्वेन तस्याप्यनादित्वात् । यद्वा, त्वया हेतुनोदितः प्राकट्यं प्राप्तः, यतः पुराणः, अपौरुषेयत्वात् । असद्भिरिति बाधने हेतुः । शक्तिश्च असतां सन्मार्गप्रतिकूलस्वभावत्वात् काले सामर्थ्याच्च तदा तदा सत्त्वगुणं विभर्त्ति पुष्णाति स्वयमवतीर्य्य तामसानपास्य सात्त्विकान् वर्द्धयतीत्यर्थः ॥ २३ ॥ तत्र चाधुना मोक्षादिप्रदानेन भू भारं क्षपयितुं स्वप्रेमभक्तिं प्रवर्तयितुञ्च यदुकुलेऽवतीर्णोऽसीत्यहो यादवानामस्माकं भाग्यमित्याह—स इति । उक्तमाहात्म्योमुहुरवतीर्य्य सन्मार्गप्रवर्त्तकस्त्वम् । विभो हे सर्व्वैश्वर्य्यपरिपूर्ण ! वसुदेवस्य यादवश्रेष्ठस्य, श्लेषेण वसु भक्तिलक्षणधनं तेन दीव्यति द्योतत इति । तथा तस्य गृहेऽवतीर्ण इति प्राकृतोत्पत्तिनिरस्ता, असीति तत्र नित्यस्थितिः सूचिता । अमुष्य यादवलक्षणस्य यशः प्रेमभक्तिप्रदानेन विशेषेण तन्वन विस्तारयितुं च ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अथ जीवशरीरकस्यापि तस्य जीवगतबन्धमोक्षाद्यस्पर्शनमाह । देहादीति । अनिरूपितत्वात् भोगार्थतया निरूपितत्वाभावात् चिदात्मनः जीवान्तरात्मनः तव भवः संसारः साक्षान्नास्ति शरीरभूतजीवस्येत्यर्थः । यथा सिंहस्य श्वेत इत्यत्र श्वैत्यं देहगतं तद्वत् कामाद्यभावहेतुरविवेकाभावः ॥ २२-२३ ॥ वितन्वन्निति "लक्षणहेत्वोः क्रियाया"मिति शतृप्रत्ययः यशो विस्तारयितुमवतीर्णोऽसीत्यर्थः ॥ २४-२५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवोपपादयति ः सृजसीति । स्वशक्तिभिः कार्योपयुक्तस्वापृथक् स्थितविशेषणात्मकैरज आद्याख्यैः प्रकृतिगुणैर्विश्वं सृजसि लुम्पसि हरसि पासि रक्षसि रजःप्रचुरचतुर्मुखाख्य जीवशरीकत्ववेषेण सृजसि तमःप्रचुररुद्राख्यजीवशरीरकत्ववेषेण लुम्पसि सत्त्वप्रवर्त्तकस्वावतारेण पासीत्यर्थः । यद्यप्येवमथापि तैर्गुणैः कर्मभिः रज आदिगुणमूलकसृष्ट्यादिव्यापारैश्च न बध्यसे गुणपारवश्याभावात् सृष्ट्यादिकर्मणां पुण्यापुण्यमूलकत्वाभावाच्च सुखदुःखादिभोक्तृत्वापादककर्मबन्धो नास्तीत्यर्थः । बन्धाभावहेतूपन्यासेन बन्धहेतुं निराकुर्वन् विशिनष्टि ज्ञानात्मन इति । स्वस्वरूपेणावस्थितस्य स्वत एव निरस्तनिखिलदोषस्य समस्तकल्याणगुणस्य गुणपारवश्यापादकपुण्यापुण्यरूपकर्मान्वयरहितस्य तव बन्धहेत्वभावात्प्रत्युत बन्धप्रतिभटधर्मयोगाच्च न बन्धशङ्काहेतुसम्भावनापीत्यर्थः । जीवस्तूक्तविधत्वद्विपरीत इति भावः ॥ २१ ॥ तदेवं स्वेन रूपेणावस्थितस्य जीववैलक्षण्यापादकगुणकर्मान्वयाभावस्तत एव बन्धाभावश्चोक्तः अथ जीवशरीरकस्यापि तस्य जीवगतबन्धमोक्षाद्यस्पर्शमाह । देहाद्युपाधेरिति । देवमनुष्यादिदेहादिरूपोपाधेरनिरूपितत्वात् भोगाद्यर्थतया निरूपितत्वाभावाच्चिदात्मनः जीवान्तरात्मनस्तव भवः संसारः साक्षान्नास्ति शरीरभूतजीवस्यैवेति भावः । यथा सिंहः श्वेत इत्यत्र श्वैत्यं देहगतं न त्वात्मगतं तद्वत् भिदात्मनः स्यादिति पाठान्तरं तदा

भिदात्मन इत्यनेन दृष्टान्तोऽभिप्रेतः यथा शरीरगता देवत्वमनुष्यत्वादिभिदा न तदात्मनः साक्षात्स्यादपि तु शरीर द्वारा तथा जीवगतो भवोऽपि न साक्षाद्भवतः स्यादपि तु जीवद्वारा स्वरूपतस्तु भवान्वयरहित एव भवानित्यर्थः। यद्वा आत्मन इति। हेतुगर्भं विशेषणम् आत्मनः चिदचिदन्तरात्मत्वात्तव न शरीरभूतचिदचिद्गताभिदास्ति नहि शरीरगतबाल्यादिभिदा शरीरिणि प्रसृजतीति भावः। ननु शरीरगतधर्मान्वयरहितेऽपि जीव इव भवान्वयो दुर्वार इत्यत आह। देहाद्युपाधेरनिरूपितत्वाद्भवो नेति। जीवस्य कर्ममूलकसुखदुःखादिभोगार्थतया करणकलेवराद्युपाधेर्निरूपितत्वाद्भवोऽस्ति तव तु क्रीडार्थतयेति न भवोऽस्तीति भावः। यतो न भवोऽस्त्यतः न बन्धः भवनिदानभूतः कर्मबन्धः नास्ति तस्मान्मोक्षश्च नास्ति बन्धाभावात्त दवधिकमोक्षश्च नास्त्यतस्तावुभौ न स्याताम् इति नञा वृत्या वाक्यभेदेनान्वयः अतो बन्धो मोक्षश्च न स्यातामित्यन्वये तु नञन्तरवैयर्थ्यं प्रत्येकान्वये तु स्याताम् इति द्विवचनान्वयानुपपत्तिः यद्वा नञा बन्धमोक्षयोः प्रत्येकमेव निषेध्यत्वावगतेर्नञोश्च प्रत्येकमेव क्रियान्वयित्वावगमस्वारस्याच्च स्यातामिति द्विवचनमतन्त्रं स्यादित्यर्थः। नन्वहमपि रामकृष्णादिरूपमागतः कर्मवश्य इत्यत आह। स कामस्त्वयीति। स रामकृष्णादिरूपदेहाद्युपाधिः कामः काम्यत इति कामः केवलं स्वेच्छामूलको नतु कर्ममूलक इत्यर्थः तर्हि तथा सर्वैः किं नावसीयते इत्यत आह। नोऽविवेक इति। नोऽस्माकमविवेकः जीवेश्वरयाथात्म्यविवेकाभावप्रयुक्तः त्वद्देहाद्युपाधेः कर्ममूलत्वोद्भावनमित्यर्थः॥ २२॥ ननु देहाद्युपाधेः कर्ममूलत्वमत एव तत्फलभूतसुखदुःखाद्यखिलभोगार्थत्वं च जीवेषु निश्चितं मद्देहाद्युपाधेर्मदिच्छैकमूलकत्वे किं तत्प्रयोजनमित्यत आह। त्वयेति द्वाभ्याम्। जगतो हितार्थं यस्त्वयोपदिष्टः पुराणो वेदमार्गः त्वन्निःश्वसितभूतवेदबोधितो धर्ममार्गः स यदाऽसद्भिः समीहितासाधनैः प्रत्युतानर्थावहैः पाषण्डपथैः वेदपथविरोधिभिः बाध्येत तदा भवान् सत्त्वगुणं शुद्धसत्त्वमयं विग्रहं बिभर्त्ति “यदा यदा हि धर्मस्य परित्राणाय साधूना”मिति श्लोकद्वयोक्तप्रयोजनार्थमवतरसि नतु कर्मफलभोगार्थं जीवज्जन्ममरणादिमच्छरीरद्वारा जायस इति भावः॥२३॥ स इति। यो रामादिरूपेणावतीर्णः स त्वं हे प्रभोऽधुना इह लोके वसुदेवगृहे स्वांशेन बलरामेण सह सङ्कल्परूपज्ञानेन वाऽवतीर्णोऽसि किङ्कर्तुं सुरेतराणामासुरप्रकृतीनां राज्ञां कंसादीनामक्षोहिणीनां यानि शतानि तेषां बधेन भूमेर्भारमपनेतुं निराकर्तुममुष्य यादवकुलस्य यशो वितन्वन् “लक्षणहेत्वो”रिति शत्रादेशः विस्तारयितुं चेत्यर्थः॥ २४॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विश्वस्यात्मयोनित्वं स्पष्टयति। सृजतीति। केवलत्वं स्पष्टयति नेति। गुणैः सत्त्वादिभिः उत्पत्तिहेत्वभवादितियुक्तमितिभावेनाह। त इति। शून्यस्त्वमिति नेत्याह। ज्ञानात्मन इति। क्व च कस्मिंश्चिद्देशे काले च॥ २१॥ जनितोऽत विष्णुरिति जन्मप्रतीतेर्जातस्य हि ध्रुवो मृत्युरिति मरणस्य अवश्यं भावात् कथन्नैव हेतुरित्युच्यत इति तत्राह। देहेति। देहादिरेवोपाधिः देहाद्युपाधिः तस्योत्पत्तौ कारणभूतगुणकर्मणामनिरूपितत्वादसम्भावितत्वात्साक्षाद्भवः शुक्रशोणितसम्पर्कलक्षणं जन्म न स्यात् हि यस्मात्तस्तव देहबन्धो न स्यात् देहवियोगलक्षणो मोक्षश्च नैव स्याद्यावन्यत्र स्यातामतो नो निकामं यावद्योग्यं त्वयि विवेकः तत्त्वनिश्चायकं ज्ञानं स्यादित्यन्वयः॥ २२॥ साक्षाद्भवो नास्तिचेत्तर्हि कीदृशोऽस्तीति तत्राह। त्वयेति। त्वयोदितः प्रकाशितः अयं भवो देहयोगलक्षणो जगतो हिताय ज्ञानलक्षणाय भवति कथमिति तत्राह। यदेति॥ २३॥ एतदेव विशिनष्टि। स त्वमिति अमुष्य कुलस्य यदूपपदस्य॥ २४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यत एवं जीवस्यापि वास्तवो न बन्धः अतोनि तरां ततो न तमां मोक्षः यदि वा स्यातां तादृशौ तदा नोऽस्माकं प्रियवर्गाणां नितरां काम एव तौ द्वौ स्याताम्। प्रेमजातिविशेषोचितमनोरथविशेषं प्राप्यैव तादृश्यो लीलास्तत्रोदयन्ते। यथा श्रीयशोदाया वात्सल्यमनोरथविशेषेणार्भकभावमयलीलाविशेषोदयात्। बन्धनादिप्राप्तिलीलादय इति। कीदृशो निकामः ऐश्वर्यादिदर्शनेऽपि न विद्यते विवेको यत्र तादृशः॥ २२–२९॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमन्दर्भः

प्रथमं द्वावेव स्तुत्वा सृजस्यथो इत्यादि। सम्प्रति भगवन्तमेव स्तौति। तद्गुणैर्विश्वसृजनादि गुणैः सत्वादिभिस्त्वं न वध्यसे निर्गुणत्वात्। अतो गुणात्मनो ज्ञान विग्रहस्य तस्य करुणाभिव्यञ्जकोऽक्रूरस्यस्तवः॥ २१॥ किं बहुना त्वद्भक्तानामपि न बन्ध इत्याह—देहाद्युपाधेरित्यादि। अतस्तवात्मनस्तवात्मीयस्य जनस्य परमभागवतस्य देहाद्युपाधेः प्राकृतदेहाद्युपाधेरनिरूपितत्वादभावान्न बन्धश्च मोक्षश्च स्याताम्, यतो न भवः। भवे सति बन्ध मोक्ष-प्रसङ्गः। यतो न भिदा, त्वया सह तस्य साक्षाद्भेदो नास्ति, त्वद्भक्त एव त्वमित्यर्थः। अतो नोऽस्माकमज्ञानां त्वय्यविवेकः त्वन्महिमानभिज्ञत्वात्। ये तु त्वन्महिमाज्ञास्तेषामुक्त एव प्रकार इत्यर्थः॥ २२–२३॥ स त्वं भवानित्यादि। स्वांशेन बलदेवेन यस्य वसुदेवस्य कुलस्योपर्यधो न यस्य॥ २४–२५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

न बध्यसे तद्गुणकर्मभिरिति—मध्यमपुरुषैकवचनदर्शने श्रीकृष्णं स्तौति-त्वं न बद्धो भवसि, तव तु बन्धो दूरादास्ताम्, ते तव ज्ञानात्मनः-तव तत्त्वज्ञाने आत्मानुभवो यस्य तस्य जनस्यापि क्वचित् कचिदपि बन्धहेतुर्वा ? नेत्यर्थः। अधुनैव कुब्जागृहासक्तिरपि तवात्मारामत्वमेव प्रकटीकरोति। सा च तेनैव देहेन मुक्तेति तात्पर्यम् ॥ २१ ॥ इममेवार्थं स्पष्टयति-देहाद्युपाधेरिति। अतस्तव आत्मन आत्मीयस्य परमभागवतस्य देहाद्युपाधेः प्राकृतदेहाद्युपाधेरनिरूपणान्न भवो न संसारः। कुतः ? तत्राह—न भिदा, यतोऽसौ त्वत्तो न विद्यते, साक्षात्त्वमेव सः। अतो न बन्धो मोक्षश्च स्याताम्। एवंभूते त्वयि नोऽस्माकमविवेक इत्यात्मानं प्रति खेदः। अथवा, साक्षादात्मनस्तव घनानन्दस्य भवः प्रादुर्भावो न देहाद्युपाधेर्महदादितः। कुतः ? अनिरूपितत्वात्। (भा० २।९।१६) "वृतं चतुःषोडशपञ्चशक्तिभिः" इति पञ्चविंशतिभिस्तत्त्वैः परिवृतमासनमास्थितत्वात्तवासनसेवकत्वेनैतेषां निरूपितत्वात्। न तु ते श्रीविग्रहोपाधितायाः, अतः केवलानन्दविग्रहस्य तव न भिदा, परं ब्रह्मैव भवान् अतो न बन्धो न च मोक्षः, केवलमस्माकं त्वय्यविवेक एव ॥ २२–२३ ॥ यद्यादवत्त्वेन ज्ञायसे, वसुदेव गेहे स्वांशेन स्वकीयं यत् आंशःअंश-समूहस्तेन ॥ २४–२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अतस्त्वमेवैको जगदीश्वर इत्याह। सृजसीति। तत्तदभिधैस्तैः गुणैस्तैस्तैः कर्मभिश्च जीव इव त्वं न बध्यसे ननु कुतोऽहं न बध्ये तत्राह। ज्ञानात्मनः ज्ञानस्वरूपस्य परब्रह्मणस्तव बन्धहेतुरविद्या क्व जीवस्येव तव सा नास्तीत्यर्थः ॥२१॥ ननु मे यद्यविद्या नास्ति तदात्मदेहोऽयमाविद्यकः कुत आयातस्तत्राह। देहादीति। तव देहाद्युपाधेरनिरूपितत्वादिति। तव देहादिरुपाधिराविद्यक इति कैरपि शास्त्रज्ञैर्न निरूपित इत्यर्थः। अत एव तव न भवः जीववत् संसारो जन्म वा नैव स्यात् तवापि देहादिराविद्यको यदि भवेत् तदा त्वमपि स्वातन्त्र्येऽपि जीवतुल्य एव जन्मादिमानेव स्या इत्यर्थः। अतस्तव देहादेरुपाधित्वाभावात् जीववत् साक्षात् पैतृकधातुकधातुसम्बद्धं जन्म न स्यात् किन्त्वाविर्भावात्मकमेव जन्म भवेत्। तथा आत्मनो देहाद्भिदा भिन्नत्वं जवस्येव तव नास्ति त्वद्देहोऽपि त्वमेवेत्यर्थः। देहदेहिविभागोऽत्र नेश्वरे विद्यते क्वचिदित्युक्तेः। अतस्तव ब्रह्मत्वादेवाविद्याविद्याभ्यामतीतस्य नैव बन्धो नैव मोक्षः उलूखले मात्रा निबद्धस्य कालियह्रदान्मुक्तस्य मम बन्धमोक्षौ स्त इति चेत् स्यातां तौ तु ते न निषिद्ध्येते इति भावः। कुतस्त्वयि स बन्धः स मोक्षश्च नोऽस्माकं भक्तानां निकामो ध्येयत्वादभीष्ट एव। यतो विवेकः स बन्धो मोक्षश्च विवेक एव मायिकत्वाभात् ज्ञानस्वरूपस्य तव तु न तावज्ञानसंज्ञौ भवबन्धमोक्षावित्यर्थः ॥ २२ ॥ तदेवं गुणातीतस्वरूपलीलोऽपि त्वं धर्ममार्गरक्षया शिष्टजनपालनार्थं सत्त्वगुणं पुष्णन्नाविर्भवसीत्याह। त्वया उदित उक्तः वेदपथः धर्ममार्गः पुराणः प्राचीनः ॥ २३ ॥ स्वांशेन रामेण सह। सुरेतरांशा ये राजानस्तेषामक्षौहिणीशतस्य वधेन भूमेर्भारमपनेतुम् ॥ २४ ॥

गूढार्थदीपिनी

शक्तिभिः शक्तिरूपैः लुम्पसि संहरसि कर्मभिः सर्जनादिभिश्च। यतः क्व च कदाचिदपि ते बन्धहेतुः अविद्या नास्ति। कुतः ज्ञानात्मनः ॥ २१ ॥ अनिरूपितत्वात् मिथ्यात्वात् हेतोः भवो जन्म तन्मूला भिदा भेदश्च साक्षात् स्वरूपतो न स्यात्। यतः अविद्याभावात् उभौ न स्याताम्। उलूखले च प्रतीयमानौ बन्धमोक्षौ नोऽस्माकं त्वयि विषये निकामः इच्छानुरूपः अविवेक एव उभौ स्याताम् व्यापकस्यात्मनः तौ कथं घटेत इत्यर्थः २२ ॥ उदितः प्रकाशितः। हिताय स्वर्गापवर्गाय। पुराणोऽनादिः वेदपथः धर्ममार्गः। सत्त्वगुणं शुद्धसत्त्वात्मकं रूपम् ॥ २३ ॥ स्वांशेन बलदेवेन सह। अमुष्य यदोः यशो वितन्वन् विस्तारयितुम्। 'लक्षणहेत्वोः। इति शतृप्रत्ययः ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आत्मतन्त्रत्वमुपपादयति। सृजसीति। स्वशक्तिभिः प्रकृतिकालादिभिः रजआदिभिर्गुणैश्च विश्वं सृजसि लुम्पसि पासि अथापि तैर्गुणैर्विश्वसृष्ट्यादिगुणैः कर्मभिश्च न बध्यसे अत आत्मतन्त्रोऽसीत्यवसीयसे यतो ज्ञानात्मनः परज्ञानस्वरूपस्य सर्वात्मनस्ते बन्धहेतुश्च न क्वापीत्यर्थः ॥ २१ ॥ बन्धहेतुश्च ते नास्तीत्येतदुपपादयन् न बध्यसे इत्येतत्प्रपञ्चयति। देहाद्युपाधेरिति। साक्षादात्मनः स्वाश्रयस्वरूपस्य तव बन्धहेतोः प्राकृतदेहतन्मूलकर्माज्ञानाद्युपाधेरनिरूपितत्वात् न भवः अपूर्वदेहग्रहणरूप उद्भवः न भिदा देहत्यागश्च अतो न बन्धो न मोक्षश्च तव स्यात् किन्तु नोऽस्माकं देहग्रहणत्यागौ बन्धमोक्षौ च स्याताम् अत्र हेतुरस्तीत्याह। निकामः मायामोहितजीवानुरूपः त्वयि नो जीवानामविवेकः अविवेकोपलक्षितं पराङ्मुखत्वमित्यर्थः ॥ २२ ॥ एवं भूतानामविवेकिनां त्वयि विवेकः नावेदविन् मनुते तं बृहन्तमिति व्यतिरेकश्रुतेः त्वदुक्तवेदमार्गाश्रयणेनैव भवति तमपि असन्तः यदा यदा दूषयन्ति तदा स्वावतारैस्तद्रक्षणं भवानेव करोति इत्याह। त्वयोदिति इति। नियम्यभूतं सत्त्वगुणं बिभर्ति

वेदपथत्राणार्थमिति शेषः ॥ २३ ॥ स एव वेदपथरक्षकस्त्वम् अमुष्य यदुकुलस्य यशो वितन्वन् सुरेतराणामसुराणां राज्ञामक्षौहिणीनां यानि शतानि तेषां बधेन भूमेर्भारमपनेतुं स्वांशेन सह यदुकुले वसुदेवगृहे अवतीर्णोऽसि ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं जगद्रूपतां निरूप्य कर्तृत्वे प्राप्तान् दोषान् वारयितुमाह । सृजस्यदो लुम्पसीति । अदः प्रसन्नं भगवन्तं दृष्टवतः प्रपञ्चास्फुरणादद इति परोक्षनिर्देशः अनेनास्फुरणे हेतुरप्युक्तः रजसा सृजसि तमसा लुम्पसि सत्त्वेन च पासि रजस्तमःसत्त्वानां स्वधर्मप्रतिपादनाय गुणत्वं तथापि स्मृतिन्यायेन भगवतः कर्तृत्वं न भविष्यतीत्याङ्क्याह । स्वशक्तिभिरिति । ननु प्रकृतिधर्म्मैः धर्म्मत्वेऽपि सामर्थ्यमापन्नानीति शक्तित्वं यद्यपि शक्तिपदेनैवाभ्यासो नास्तीति कर्मबन्धो निवारित एव तथापि लोकन्यायेनापि दूषणं परिहर्तुं ज्ञानेन तदभावमाह । न बध्यसे तद्गुणकर्मभिर्वेति । तद्गुणैर्बन्धो मोहवशाद्बन्धो ऽनिच्छयापि वेत्यनादरे कालेनापि न सम्बन्ध इति सुतरामेव तुच्छैर्लोकैः तत्र हेतुमाह । ज्ञानात्मनस्त इति । ज्ञानेनापि बन्धाभाव इति सर्वशास्त्राणि भवांस्तु ज्ञानस्याप्यात्मा स्वस्सामर्थ्यादेव ज्ञानं तथा करोतीत्यात्मपदेन सूचितम् अत एव बन्धहेतूनां निराकृतत्वात् ते सर्वसमर्थस्य को बा बन्धहेतुर्भवति इत्याह । क्वेति । चकारात् देशे काले अवस्थायां च ॥ २१ ॥ ननु तथापि अवतारान्यथानुपपत्त्या सोपाधिरेव सत्त्वगुणाभिमानिनो ऽवतार इति लोकप्रसिद्धैश्च सुतरामेवावतारे बन्धो भविष्यतीत्याशङ्क्याह । देहाद्युपाधेरिति । देह इन्द्रियाण्यन्तःकरणं स्वभावः कर्म कालो वा यस्योपाधिभूता भवन्ति तस्यात्मनः प्रथमं भावो भवति । ननु ममापि वसुदेवाद्भवो दृश्यत इति चेत्तत्राह । साक्षादिति । नटवत् वेषार्थं जन्मप्रकाशनं न जन्म किञ्च आत्मनो भिदापि न स्यात् पूर्वसङ्घातपरित्यागेन सङ्घातान्तरग्रहणं भेदोऽत्र विवक्षितः यतः अयमात्मा नहि सर्वत्र व्याप्तस्तथा भवितुमर्हति आत्मत्वान्न भेदः भेदाभावाच्च न जन्म यतो मूलभूते विष्णौ भगवति वा अत एव हेतोः तवापि न बन्धो नैव च मोक्षः येन सत्कर्मकरणार्थं धर्मस्थापनादिकं कुर्यात् अत एव बन्धमोक्षौ न स्याताम् । ननु यावदधिकारं स्वाधिकरिकमिति न्यायेन विष्णोरप्यधिकारान्नो स्मार्त्तसम्मता मुक्तिः ब्रह्मवादिनोऽप्येकदेशिनः यद्ब्रह्मविद्यया सर्वं भवन्तो मनुष्या मन्यन्ते तद्ब्रह्म किं भवेदित्याशङ्क्य ब्रह्म वा इदमग्र आस आत्मानमेवावेदहं ब्रह्मास्मीति तस्मात्सर्वमभवदिति वाक्यानुरोधात् प्रपञ्चभवनवत् ब्रह्मविदाप्नोति परमित्यत्रापि ब्रह्मज्ञानेनैव ब्रह्मणोऽपि परत्वप्राप्तिरित्यध्यवसीयते कर्मकाण्डेऽपि परमेष्ठिनो वा एष यज्ञोऽग्र आसीदित्युपक्रम्य सर्वेषामुत्कर्षो दर्शपूर्णमासाभ्यां निरूपितः एवं परब्रह्मणोऽपि दर्शपूर्णमासाभ्यामेव उत्कर्षः प्रतीयते परमेष्ठिशब्दश्च ब्रह्मपर्यायः इन्द्रे प्रजापतौ ब्रह्मन्नित्युपक्रमेण तत्प्रकरणस्थानामेवोपलम्भात् अतः सर्वेषामेव बन्धमोक्षौ स्त इति मन्यन्ते किञ्च "इमां विद्यां कृष्णाय देवकीनन्दनाय प्रोवाचे"त्युपाख्याने ब्रह्मविद्याग्रहणमपि श्रूयते अतः सम्भावितत्वात् बन्धमोक्षौ प्राप्ताविति तन्निराकरणं युक्तमेव एते तु निरूपिताः पूर्वपक्षाः अविवेकेनैव प्राप्ता इत्याह । निकामस्त्वयि नोऽविवेक इति । नोऽस्माकं सर्वेषामेव भ्रान्तानां निकामः स्वेच्छया अविवेकः अधिकारस्तु न स्वामिपरः लोके महाराजे अधिकारपदयोगाभावात् परमेष्ठिब्रह्मशब्दौ चतुर्मुखवाचकौ अन्यथा यज्ञो वै विष्णुरिति श्रुत्या दर्शपूर्णमासयोर्यज्ञत्वविधिर्व्यर्थः स्यात् ब्रह्मविद्याद्यधिकारोऽपि सन्दीपनेरिव लीलया सम्भवति अतोऽस्माकमेवाविवेकः ॥ २२ ॥ ननु परब्रह्मणि बन्धमोक्षौ कथं चित्सम्भवत इति चेत्तत्राह । त्वयोदित इति । यदैव त्वयोदितो वेदमार्गः पाषण्डपथैः विरुद्धमार्गप्रतिपादकैः पुरुषैः बाध्येत तदा तेषां च बलिष्ठत्वात् कालविशेषात् सर्वेषामेव बुद्धिनाशात् भगवानेव शक्त इति तदा भगवान् सत्त्वगुणं बिभर्त्ति भगवद्गृहीतं सत्त्वं बलवत् सर्वरजस्तमसोरभिभावकं भवतीति अनेन वैषम्यदोषः परिहृतः नैर्घृण्यदोषस्तु अवतीर्णे नास्तीति न तन्निषेधकं वचनम् ॥ २३ ॥ नन्विदानीं वेदानां पीडाभावात् व्यासावतारस्य जातत्वात् बुद्धावतारस्याद्याप्यजातत्वात् किमनेनावतारेणेत्याशङ्क्याह । स त्वं प्रभोऽद्येति । स एव त्वं सर्वरक्षकः न केवलं वेदमात्ररक्षकः तदाह । प्रभो इति । क्रियाशक्तेरपि पूर्णाया विद्यमानत्वात् वसुदेवस्य गृहे सत्त्वरूपस्य गृहे अभिमानस्थाने अभिमानप्रकारेण पालयिष्यामीत्यवतीर्णः स्वांशेन बलभद्रेण सह इहैवागत्य भारमपनेतुं नतु वैकुण्ठे स्थित्वा मनसा अवतीर्णोऽसीति संमतिमिव पृच्छन्नाह भारस्य महत्त्वख्यापनायाह । सुरेतराणां दैत्यानां शतस्य वधेनेति । ननु न दैत्याः साम्प्रतं प्रतीयन्ते इत्यत आह । राज्ञामिति । प्रयोजनान्तरमप्याह । अमुष्य वसुदेवकुलस्य यशो वितन्वन्निति रूपद्वयेनावतारेण प्रयोजनद्वयमुक्तम् ॥ २४ ॥

श्रीसुबोधिनी–सारः

स्वशक्तिभिः रजस्तमः सत्त्वगुणैर्विश्वं त्वं सृजसि संहरसि पासि तैर्गुणैः कर्मभिर्वा न बध्यसे क्व च क्वापि विषये ज्ञानात्मनो ज्ञानरूपस्य ते बन्धहेतुरविद्या नास्ति ॥ २१ ॥ आत्मनस्तव भवो जन्म भिदा भेदश्च साक्षात्स्वरूपतो न स्यात् देहाद्युपाधेरनिरूपितत्वात् मिथ्यात्वेनावस्तुत्वात् अतः कारणात् बंधो मोक्षश्च नैव स्यातां त्वयि बद्धमुक्तकल्पनारूपो नोस्माकमविवेकोऽज्ञानमस्ति ॥ २२ ॥ जगतो हितार्थं त्वयोदितोऽयं पुराणो वेदपथः सनातनो वेदमार्गो यदाऽसद्भिर्दुष्टैः पाखण्डपथैर्बाध्येत तदा सत्त्वगुणं बिभर्त्ति भवान् ॥ २३ ॥ हे प्रभो अद्य इदानीं वसुदेवस्य गृहे स्वांशेन सत्वमवतीर्णोसि भूमेर्भारमपनेतुं दूरीकर्त्तुं सुरेभ्यो

देवेभ्य इतरे दैत्यास्तेषामंशभूतानां राज्ञामक्षौहिणीशतानां वधेन हननेनामुष्य कुलस्य यादववंशस्य यशो वितन्वन् कीर्त्तिं विस्तारयन् इह मर्त्यलोके ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवमुपादानत्वमुक्त्वा तस्यैव निमित्तत्वं वदंस्ततो जीववद्बन्धमाशङ्क्य निराकरोति—स्वशक्तिरूपै रजआदिगुणैः विश्वं सृजसि, अथ अनन्तरं पासि, लुम्पसि संहरसि च, तथापि तै रजआदिगुणैः सृष्ट्यादिकर्मभिर्वा न बध्यसे। तत्र हेतुमाह—ज्ञानात्मनस्ते क्व च बन्धहेतुरिति। कस्मिन्नपि देशे कस्मिन्नपि काले कस्यामप्यवस्थायां तव बन्धकारणं नास्ति, ज्ञानस्वरूपत्वात्। मायायास्तु स्वाश्रयानावरकत्वात्। जीवस्य तु त्वदिच्छया बन्धो भवतीत्याशयः ॥ २१ ॥ ननु 'जीववद्देहादिदर्शनात् द्विधाग्रहणादिबन्धमोक्षोपायदर्शनाच्च कुतो न बन्धादि' इत्याशङ्क्याह—देहाद्युपाधेरिति। आदिपदेनेन्द्रियान्तःकरणप्राणादिग्रहणम्। देहादेरनिरूपितत्वात् प्राकृतत्वेन निरूपयितुमशक्यत्वात् साक्षादानन्दस्वरूपस्य आत्मनस्तव भवो जन्म नास्ति, तथा देहादिप्रयुक्ताभिदा भेदोऽपि नास्ति, अतो बन्धोऽपि नास्ति, मोक्षोऽपि नास्ति। तर्हि कथं मयि केषाञ्चिद्बन्धमोक्षादिव्यवहार' इत्यपेक्षायामाह—निकाय इति। स्वाभिप्रायानुरूपस्त्वयि त्वद्विषयको नोऽस्माकमविवेक एव तथाव्यवहारहेतुरित्यर्थः ॥ २२ ॥ ननु एवंभूतस्य पुरुषोत्तमस्य ममावतारे किं प्रयोजनम्' इत्यपेक्षायामाह–त्वयेति। जगतः प्राणिमात्रस्य हिताय त्वयोदितो योऽयं पुराणः चिरन्तनो वेदपथः वेदबोधितो धर्ममार्गः स यदा असद्भिः नरकादिदुःखहेतुभूतैर्पाखण्डपथैर्वेदविरुद्धमार्गैर्बाध्येत पीड्येत तदा तदा भवान् सत्त्वगुणं शुद्धसत्त्वमयं विग्रहं बिभर्तीत्यर्थः ॥ २३ ॥ एवं सर्वावतारसाधारणप्रयोजनमुक्त्वा श्रीकृष्णावतारप्रयोजनमाह—सयवमिति। हे प्रभो दुष्टसंहारे सतां पालने च समर्थ! स विश्वपालनादिकर्ता त्वं सुरेतराणामसुराणामंशभूता ये राजानः कंसादयस्तेषामक्षौहिणीनां यानि शतानि तेषां वधेन हेतुना भूमेर्भारमपनेतुं निराकर्तुं तथा अमुष्य यादवकुलस्य यशो वितन्वन् विस्तारयितुं चेह भूलोके वसुदेवगृहे स्वांशेन बलभद्रेण सहावतीर्णोऽसीत्यन्वयः ॥ २४ ॥

अन्वितार्थप्रकाशिका

सृजसीति ॥ स्वशक्तिरूपैः रजस्तमःसत्त्वगुणैर्विश्वं सृजसि अथानन्तरं पासि लुम्पसि संहरसि च तथापि तै रजआदिगुणैः सृष्ट्यादिकर्मभिर्वा न बध्यसे। तत्र हेतुमाह। ज्ञानात्मनस्ते क्व कदाचिदपि बन्धहेतुरविद्या नैवास्ति ज्ञानात्मन इति हेतुगर्भं विशेषणम्। मायायाः स्वाश्रयानावरकत्वादिति भावः ॥ २१ ॥ कुतस्तव बन्धशङ्का यतो जीवस्यापि वस्तुतो बन्धो नास्ति इत्याह—देहादीति ॥ देहेन्द्रियाद्युपाधेरनिरूपितत्वात् अनिर्वचनीयत्वेन मिथ्यात्वात् आत्मनो भवो जन्म तन्मूला भिदा च साक्षात्स्वरूपतो न स्यादेवेति। एवं बन्धाभावे मोक्षोऽपि नास्ति मोक्षस्यापि बन्धपूर्वकत्वादित्याह। यतो नाविद्या अतस्तव न बन्धो मोक्षश्च एवमुभौ न स्याताम्। ननु उलूखले बन्धमोक्षौ दृष्टावेव तत्राह। निकाम इति। लोकैः प्रतीयमानो बन्धः मोक्षश्च निकामः स्वाभिप्रायानुरूपः त्वयि विषये नोऽस्माकमविवेक एव न वस्तुतः। भक्तास्तु त्वयि तादृशो बन्धो मोक्षश्च नोऽस्माकं भक्तानां नितरां काम एव ध्येयत्वादभीष्ट एव। यतः सः बन्धो मोक्षश्च विवेकः ज्ञानस्वरूप एव नतु मायिक इत्यर्थः इति व्याचक्षते ॥ २२ ॥ तवावतारास्तच्चरितादिकं च नाविद्याकल्पितं किन्तु तवलीला एवेत्याह—त्वयेति ॥ जगतः प्राणिमात्रस्य हिताय त्वयोदितो योऽयं पुराणः चिरन्तनो वेदपथः वेदबोधितो धर्ममार्गः स यदा यदा असद्भिः नरकादिदुःखहेतुभूतैः पाखण्डपथैर्वेदविरुद्धमार्गैर्बाध्येत पीड्यते तदा तदा भगवान् सत्त्वगुणं शुद्धसत्त्वमयं विग्रहं बिभर्ति ॥ २३ ॥ स त्वमिति ॥ हे प्रभो! स विश्वपालनादिकर्त्ता त्वं सुरेतराणामसुराणामंशभूता ये राजानः कंसादयस्तेषाम्। रजभाव आर्षः। अक्षौहिणीनां यानि शतानि तेषां वधेन हेतुना भूमेर्भारमपनेतुं निराकर्त्तुं तथा अमुष्य यादवकुलस्य यशो वितन्वन् विस्तारयितुं चेह भूलोके वसुदेवगृहे स्वांशेन बलभद्रेण सहावतीर्णोऽसि ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सृष्ट्यादिकर्त्तृत्वेऽपि निर्लेपत्वमाह सृजसीती त्रिगुणरूपाभिः सृष्ट्यादीन् त्वं करोषि तथा पितैर्गुणैः कर्मभिश्च त्वं न बंधसे यतः ज्ञानात्मनो ज्ञानविग्रहस्य ते तव बंधहेतुर्माया क्व च कथं भवेत् न कथंचिदपि स्यादित्यर्थः ॥ २१ ॥ पुनस्तं स्तुवन्नाह त्वयेति पाषंडमायाः पंथानो मार्गा येषां तथाभूतैः असद्भिरसमीचीनैर्जनैः सत्वगुणंबिभर्त्ति सात्त्विकधर्मं प्रवर्त्तयतीत्यर्थः ॥ २२ ॥ तमेव धर्मप्रवर्त्ति प्रकारमाह स इति स्वांशेन संकर्षणेन सह भूमेर्भारमपनेतुं नाशयितुमिह वसुदेवगृहेऽवत्तीर्णोऽसि अतः सुरेतराणां असुररूपाणां राज्ञां अक्षौहिणी शतवधेन अमुष्य कुलस्य यदुकुलस्य यशोवितन्वन् सन् भूमेर्भारमपाकुर्विति सम्बन्धः ॥ २३ ॥ स्वगेहे भगवदागमनेन स्वं धन्यं मन्यमानमाह अद्येति हे ईश अद्यनोऽस्माकं वसत यो गृहाः भूरिभागा धन्याः खलु निश्चितं यतो यः सर्वेषां देवपितृभूतानां नियामाकत्वेन नृदेवरूपामूर्त्तिर्यस्य सः। यद्वा सर्वेषां देवपि नृमूर्तिनां देवरुपामूर्त्तैर्यस्य सः यस्य पादप्रक्षालन जलं त्रिजगत्पुनाति हेऽधोक्षजजगद्गुरुस्त्वं या वसतीः प्रविष्टः ता भूरिभागा इति सम्बंधः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आदौ कारणावस्थायामेकत्वेनावस्थितस्यापि कार्यावस्थायां नानात्वेन भानं सदृष्टान्तमुपपादयति। यथा हीति। दृष्टान्ते योनिष्वित्यत्र प्राक् स्व इत्यस्य योजना कार्या, दार्ष्टान्तिके आत्मयोनिष्वित्यत्रात्मशब्दप्रयोगात्। स्वे समष्टिभूता मह्यादयः, योनय उपादानकारणानि येषां तेषु, चराचरेषु चराचरात्मकेषु, भूतेषु व्यष्टिभूतेषु, मह्यादयः समष्टिभूता मह्यादयः, यथा नाना भान्ति हि। कारणरूपाणि समष्टिभूतानि वस्तुत एकैकशो भावेनावस्थितानि सन्त्यपि कार्यात्मना परिणामं प्राप्य यथा अनेककार्यात्मना भान्तीति दृष्टान्तार्थः। एवं केवल एकरूपोऽविभक्तनामरूपप्रकृतिपुरुषकालशरीरकः, आत्मतन्त्रः स्वतन्त्रः, आत्मा भवान्, आत्मा स्वयं योनिः कारणं येषां तेषु व्यष्टिसमष्ट्यात्मकसर्वपदार्थेषु, बहुधा विभाति। कार्यकारणभावो नामावस्थाभेदमात्रत्वमेव, न तु कार्यं नामकारणादतिरिक्तं वस्त्वस्ति, कार्यावस्थानां बहुधा भानमपि तदन्तरात्मतयैवेत्यलमधिकपल्लवेन ॥ २१ ॥ अनेन जीववैलक्षण्यं सूचितं तदेवोपपादयति। सृजसीति। हे कृष्ण, स्वशक्तिभिः कार्योपयुक्तस्वापृथक्स्थितविशेषणात्मकैः, रजस्तमः सत्त्वगुणैः रजआदिप्रकृतिगुणैः, विश्वं सृजसि। अथो पासि, लुम्पसि, तत्र सत्त्वप्रवर्त्तकस्वावतारेण तु पास्येव। यद्यप्येवमस्त्यथापि, तद्गुणकर्मभिर्वा तैर्गुणैः कर्मभिश्च, रजआदिभिर्गुणैः तन्मूलककर्मपर्यायभूतसृष्ट्यादिव्यापारैश्चेत्यर्थः। न बद्ध्यसे। तव गुणपारवश्याभावात् सृष्ट्यादिकर्मणां पुण्यापुण्यकर्मणामिव सुखदुःखापादककर्मत्वाभावाच्च कर्मबन्धो नास्तीत्यर्थः। बन्धाभावहेतूपन्यासेन बन्धहेतुं निराकुर्वन् विशिनष्टि। ज्ञानात्मनः स्वस्वरूपेणावस्थितस्य, स्वत एव तिरस्तनिनिखिलदोषत्वेन समस्तकल्याणगुणवत्त्वेन गुणपारवश्यापादकपुण्यापुण्यरूपकर्मान्वयरहितत्वेन च ज्ञानस्वरूपस्येत्यर्थः। ते तव, बन्धहेतुः, क्व च नैवास्ति। तव बन्धहेत्वाभावात् प्रत्युत बन्धप्रतिभटधर्मयोगाच्च न बन्धशङ्काहेतुसंभावनापीत्यर्थः। जीवस्तूक्तविधत्वद्विपरीत एवेति भावः ॥ २२ ॥ जीवगतबन्धमोक्षाद्यस्पर्शमाह। देहाद्युपाधेरिति। देहाद्युपाधेः देवमनुष्यादिदेहादिरूपोपाधेः, अनिरूपितत्वात् भोगार्थतया निरूपितत्वाभावात्, चिदात्मनः जीवान्तरात्मनः तव, भवः संसारः, साक्षात् न स्यात् हि। त्वच्छरीरभूतस्य जीवस्येव तव संसारो नास्तीति भावः। यथा नृसिंहश्वेत इत्यत्र श्वैत्यं देहगतं न त्वात्मगतं तद्वत्। पाठान्तरे भिदात्मन इत्यनेन दृष्टान्तोऽभिप्रेतः। भिदा शरीरगता देवत्वमनुष्यत्वादिभिदा, न आत्मनः साक्षादपि तु शरीरद्वारा। यथा तथा, जीवगतोऽपि भवो न साक्षाद्भगवतस्तव स्यादपि तु जीवद्वारा, स्वरूपतस्तु भवान् भवान्वयरहित एवेत्यर्थः। यद्वा। आत्मन इति हेतुगर्भं विशेषणम्। आत्मनः आत्मत्वात् चिदचिदन्तरात्मत्वादित्यर्थः। तव भिदा, न। भिदा तु शरीरभूतचिदचिद्गतास्ति। न हि शरीरगतबाल्यादिभिदा शरीरिणि प्रसज्जतीति भावः। अतः, तव बन्धः न, मोक्षश्च न स्यात्। उभौ त्वयि स्यातां घटेतां, इति यः कामोऽवबोधः, सः नः अविवेकः एव। स्यातां निकाम इति पाठे, त्वयि बन्धमोक्षविभावनं, नोऽस्माकं, निकामोऽतिशयितः, अविवेकः ॥ २३ ॥ ननु ममैवं देहाद्युपाधेरसंभवस्तदा रामकृष्णादिरूपेण तद्धारके प्रयोजनं किमित्यत आह द्वाभ्याम्। त्वयेति। जगतः हिताय हितार्थः, त्वया उदित उपदिष्टः, यः अयं, पुराणः पुरातनः, वेदमार्गः, त्वन्निःश्वसितवेदबोधितो धर्ममार्ग इत्यर्थः। अस्ति, सः यदा यदा, असद्भिरनर्थावहत्वादतितुच्छैः, पाषण्डपथैः वेदपथविरोधिभिः पथिभिः बाध्येत विनश्येत्, तदा तदा, भवान् सत्त्वगुणं शुद्धसत्त्वमयं विग्रहं बिभर्त्ति। 'यदा यदा हि धर्मस्य' इति परित्राणाय साधूनाम्' इति श्लोकद्वयोक्तप्रयोजनार्थमवतरति। न तु कर्मफलभोगार्थं जीववज्जन्ममरणादिमच्छरीरद्वारा जायते इति भावः ॥ २४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स त्वं प्रभो इति : १०.४८.२४.

यः सत्यव्रतरक्षिताऽचलधरः पृष्ठे धराधारको दन्ताग्रे च कयाधुजाऽवनपरो वैरोचनेर्याचकः।
राजन्यान्तकरश्च यो दशमुखध्वंसी स एवाधुना सञ्जातो मनुजाकृतिर्निजजनत्राणाय जाने भवान् ॥ ६६ ॥
यत्पादतीर्थमृषिभि - र्विधि - शङ्कराद्यैर्देवैः शिरस्यनिशमच्युत धार्यते सः।
त्वं यत्पदाग्रनतमौलिरिहासि नूनं तेऽमी वयं नहि कथं भुवि भूरिभागाः ॥ ६७ ॥

कृष्णप्रिया

हे नाथ ! आप ही अपनी सत्त्व-रजस और तमस् रूप तीन गुण शक्तियों से विश्व की रचना, विश्वका पालन एवं संहार करते हैं किन्तु उन तीन गुण और कर्मों के बन्धन में फँसते नहीं है क्योंकि आप ज्ञान की आत्मा है फिर बन्धन का संभव कैसे हो सकता है ॥ २१ ॥ देह, इन्द्रिय, प्राण, अन्तःकरण, स्वभाव आदि उपाधियाँ जिनकी होती है उनका ही जन्म मृत्यु आदि होते हैं। आत्मा में ये उपाधियाँ नहीं है इसलिए आत्मा का जन्मादि संभवित नहीं हैं। आप तो आत्मा की आत्मा है आप सर्वात्मा है इसलिए आपका जन्म नहीं हैं। देहादि पदार्थों में सजातीय विजातीय आदि भेद होते हैं। भेदादि भी आप में नहीं है इसलिए जन्म आदि नहीं और मोक्ष भी नहीं है वैसे आत्मा में आप में अविवेक भी नहीं है ॥ २२ ॥

हे प्रभो ! आपका अवतार तो विश्वमङ्गल के कारण ही है । विश्वकल्याण के हेतु ही आपने सनातन वेद मार्ग बताया है, जब असज्जनों असदुपदेशों से और पाखण्डों से यह वेद मार्ग खण्डित होता है तब आप सत्त्व गुण को धारण करते ॥ २३ ॥ हे नाथ अब व्यासजी का प्राकट्य होने से और वेदपथ तो सुरक्षित है किन्तु भूमि पर राजाओं के रूप में दैत्यों का भूतल पर आगमन हुआ है उनकी असंख्य सेनाओं के अंश से पृथ्वी पीड़ित हो रही है इसलिए आपके संकर्षण अंश श्रीबलभद्रजी के साथ भूमि के भार को उतारने के लिए श्रीवसुदेवजी के घर प्रकट हुए है । आप पृथ्वी की पीड़ा को दूर करेंगे एवं यदुकुल का यश विस्तारेंगे ॥ २४ ॥

अद्येश नो वसतयः खलु भूरिभागा [1]यः [2]सर्वदेवपितृदेवनृदेवमूर्तिः ।
यत्पादशौचसलिलं त्रिजगत् पुनाति स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः ॥ २५ ॥
कः पण्डितस्त्वदपरं शरणं समीयाद् भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ।
सर्वान् ददाति [3]सुहृदो भजतोऽभि[4]कामानात्मानमप्युपचयापचयौ न यस्य ॥ २६ ॥
दिष्ट्या जनार्दन भवानिह नः प्रतीतो योगेश्वरैरपि दुरापगतिः सुरेशैः ।
छिन्ध्याशु नः सुतकलत्रधनाप्तगेह[5]देहादिमोहरशनां भवदीयमायाम् ॥ २७ ॥

श्रीशुक उवाच

इत्यर्चितः संस्तुतश्च भक्तेन भगवान् हरिः । अक्रूरं सस्मितं प्राह गीर्भिः सम्मोहयन्निव ॥ २८ ॥

कर्दमक्षमा

अन्वयः—ईश ! नः, वसतयः, खलु, भूरिभागाः, यतः, हि "यः, सर्वदेवपितृदेवनृदेवमूर्तिः, एवञ्च, यत्पादशौचसलिलम्, त्रिजगत्, पुनाति", हे अधोक्षज ! सः, त्वम्, भगवान्, जगद्गुरुः, याः, वसतयः, प्रविष्टः, इदं, महद्, भाग्यम् ॥ २५ ॥ भक्तप्रियात्, ऋतगिरः, सुहृदः, कृतज्ञात्, त्वत्, अपरम्, कः, पण्डितः, शरणम्, समीयात्, भजतः, सुहृदः, सर्वान्, अभिकामान्, ददाति, यस्य, उपचयापचयौ, न, स्तः, तादृशः, सदैकरसः, आत्मानम्, अपि, ददाति ॥ २६ ॥ हे जनार्दन ! दिष्ट्या, योगेश्वरैः, सुरेशैः, अपि, दुरापगतिः, भवान्, इह, नः, प्रतीतः ! जनार्दनः, सुत, कलत्र, धन, आप्त, गेह, देह, आदिमोहरशनाम्, नः, भवदीयवार्ताम्, आशु, छिन्धि ॥२७॥ श्रीशुक उवाच—भक्तेन, इति. अर्पितः, च, स्तुतः, भगवान्, हरिः, गीर्भिः, सम्मोहयन्, इव, सस्मितम्, अक्रूरम्, प्राह ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत एवंभूतस्य तवागमनेन कृतार्थोऽस्मीत्याह त्रयेण । अद्येति । हे ईशाद्य नो वसतयो गृहास्तपोवनादपि बहुपुण्याः । कुतः । या वसतीस्त्वं साक्षात्प्रविष्टः । कथंभूतः । यस्य तव पादसलिलमेव गङ्गा त्रिजगत्पुनाति यश्च त्वं सर्वदेवादिपंचयज्ञदेवतामूर्तिः स त्वं जद्गुरुरिति ॥ २५ ॥ स्वमनोरथः परिपूरित इति तुष्यन्नाह । कः पंडित इति । ऋतगिरः सत्यवाचः । त्वत्तोऽपरं शरणं कः समीयाद्गच्छेत् । यतो भवान् भजतः पुंसो भक्तस्य सर्वानभितः कामांश्च ददात्यात्मानमपि ॥ २६ ॥ नोऽविवेकिनाम् । तत्रापीह गृह एव ॥ २७–२८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवंभूतस्य पृथ्वीभारनाशकस्य । अतः कुलयशोविस्तारकत्वादहं कृतार्थोऽत्यन्तकीर्तिमानस्मीति । बहुपुण्यत्वे हेतुमाशंकते—कुत इति । पंचयज्ञाश्चोक्ताः । सर्वे देवा ब्रह्माद्याः, पितरोऽर्यमाद्याः, भूताः कीटपतंगाः, नरोऽतिथयः, वेदा ऋगाद्यास्तेषां मूर्तिरेकत्र घनीभावः । वेदमूर्तित्वादेव जगतां गुरुर्हितोपदेष्टा । यादवेषु चाहं त्वया नितरामनुगृहीत इत्याह–अद्येति । हे ईश सर्वेश्वर भूरिभागा बलिप्रभृतिभ्योऽपि बहुमाहात्म्याः, यतो वेदादयो मूर्तय इव मूर्तयोऽधिष्ठानानि यस्य यज्ञरूपांशावतारे, यस्य च तव वामनांशावतारे पादशौचसलिलमपि त्रिजगत्पुनाति स त्वं जगद्भ्यः सर्वेभ्यः स्वाविर्भावेभ्योऽपि गुरुर्महान्, या मद्वसतीरेव प्रविष्टः न त्वद्याप्यन्ययादवगृहानित्यर्थः । जगद्गुरुत्वादेव हे अधोक्षज सर्वज्ञानातीत ॥ २५ ॥ शरणं रक्षितारम् । 'शरणं गृहरक्षित्रोः' इत्यमरः । यतो हेतोर्ददात्यतः क इति सम्बन्धः, बल्यादिभ्यः स्वात्मार्पणदृष्टेः । उपचयाऽपचयौ वृद्धिह्रासौ,

---

[1] यत्–विज. । [2] भूत–श्रीधरादयः । [3] ति हि भवान् म–वीर. । [4] भजतोऽपि–विज. । [5] देहाभि–विज. ।

महत्त्वाल्पत्वे इति यावत्। सारथ्यवीरासनादिष्वपि निजजनेच्छया प्रवृत्तिदर्शनादिति भावः। भक्तस्तद्द्वेषादिनापि पूतनादिभ्योऽपि तादृशपददानात्प्रीतिविषयत्वेन प्रसिद्धो यस्य तस्मात्। तथोक्तं श्रीमदुद्धवेनापि–'अहो बकीयम्' इत्यादि। तत्प्रियत्वेऽपि कथमप्यनवधानादिना तत्पालनप्रतिज्ञाव्यभिचारः स्यादित्याह—ऋतगिरः सत्यसंकल्पात्, कदाचित्तस्य परमभक्तान्तरेवेशेऽपि संकल्पस्यैव तत्कार्यसाधकत्वादिति भावः। न चोपकारात्मकस्य भजनस्याप्यपेक्षा किन्तु कथंचिदाश्रयणमात्रस्येत्याह—सुहृद इति। न चोपकारानाभिज्ञतेत्याह–कृतमुपकारं जानाति बहुमन्यत इति कृतज्ञस्तस्मात्। तच्चोपकाराभासस्यापि बहुमन्यमानत्वे पर्यवस्यतीत्याह—सर्वानिति। यस्य विषयलाभालाभादिनोपचयापचयौ न स्तः स भजतो भजनमात्रं कुर्वतः पुष्पपत्रादिनापि सेवमानाय सर्वान्कामान्ददाति, तत्र सुहृदः सौहृद्ययुक्ताय यच्च आत्मानमपि ददाति तदाधीनं करोति तस्मान्मदीयगृहागमनमपि तव नाश्चर्यमिति भावः॥ २६॥ सुतादिदेहान्तेषु मोहरशनामज्ञानकृतां बंधहेतुभूतामहंताममतामित्यर्थः। सा केति भवदीयमायां त्वदाज्ञाकरीं वंचकशक्तिम्॥ तादृशतत्कृपां श्वाघमानः सलज्जः सन्निजतदेकनिष्ठतांतरायराहित्यं प्रार्थयते–दिष्ट्येति। जनार्दनेति –हे ब्रह्मादियाच्यमानदर्शन। तदेव दर्शयति–योगेति। योगेश्वरैः सनकाद्यैः, सुरेशैर्ब्रह्माद्यैः, गतिर्ज्ञानं प्रतीतः प्रत्यक्षं प्राप्तः, एतद्दिष्ट्या अहो अस्माकं भाग्यमहिमेत्यर्थः। आप्ताः सुहृदः॥ २७॥ इतीत्थम्। भक्तेनाक्रूरेण। गीर्भिर्लोकविषयाभिः। समोहयन्नुत्पन्नं तत्त्वज्ञानमन्यथा कुर्वन्निव॥ सम्यग्निजाज्ञाप्यार्थानुकूलतया स्तुतः 'स त्वं प्रभो' (४८–२४) इत्यादिभिः श्रुतत्वात्। गीर्भीरिति तद्वैशिष्ट्यं बोधयति, शुद्ध प्रेममयलौकिकलीलाभिरुचेः 'त्वन्नो गुरुः' (२९) इत्यादिलक्षणाभिर्गीर्भिः संमोहयन्मूर्च्छयन्निव चेतनायामपि विवेकलोपात्॥ २८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यादवेषु चाहं त्वया नितरामनुगृहीत इत्याह। अद्येति। ईश हे सर्वेश्वर भूरिभागा बलिप्रभृतिभ्योऽपि बहुमाहात्म्याः। यतः देवादयो मूर्त्तयोऽधिष्ठानानि यस्य यज्ञरूपांशावतारे। यस्य च तव श्रीवामनरूपांशावतारे पादशौचसलिलमपि त्रिजगत् पुनाति स त्वं जगद्भ्यः सर्वेभ्यः स्वाविर्भावेभ्योऽपि गुरुर्महान् या मद्वसतीरेव प्रविष्टः न त्वद्यापि अन्ययादवगृहानित्यर्थः। जगद्गुरुत्वादेव हे आधोक्षज सर्वज्ञानातीत!॥ २५॥ भक्तस्तद्वेशादिना पूतनादिभ्योऽपि तादृशपददानात्। प्रीतिविषयत्वेन प्रसिद्धो यस्य तस्मात्। तथोक्तं श्रीमदुद्धवेनापि अहो वकीयमित्यादि। तत्प्रियत्वेऽपि ननु कथमप्यनवधानादिना तत्पालनप्रतिज्ञाव्यभिचारः स्यादित्याह। ऋतगिरः सत्यसङ्कल्पात् कदाचित्तस्य परमभक्तान्तरावेशेऽपि संकल्पस्यैव तत्कार्यसाधकत्वादिति भावः। नचोपकारात्मकस्य भजनस्याप्यपेक्षा किन्तु कथञ्चिदाश्रयमात्रस्य इत्याह। सुहृदः नचोपकारानभिज्ञतेत्याह। कृतमुपकारं जानाति बहुमन्यत इति कृतज्ञात्। तच्चोपकाराभासस्यापि बहुमन्यमानत्वे पर्यवस्यतीत्याह। सर्वानिति यस्य विषयलाभालाभादिना उपचयापचयौ न स्तः स। भजतः भजनमात्रं कुर्वतः पुष्पपत्रादिनापि सेवमानाय सर्वांस्तदभीष्टान् कामान् ददाति तत्र सुहृदः सौहृद्ययुक्ताय यत आत्मानमपि सुहृद्रूपेण ददाति तदधीनं करोतीत्यर्थः। तस्मान्मदीयगृहागमनमपि तव नाश्चर्यमिति भावः॥२६॥ तादृशतत्कृपां श्लाघमानः सलज्जः सन् निजतदेकनिष्ठतान्तरायव्याहतिं प्रार्थयते। दिष्ट्येति जनार्दन इति। हे ब्रह्मादियाच्यमानदर्शन तदेव दर्शयति। योगेति। योगेश्वरैः सनकादिभिः सुरेशैर्ब्रह्मभवादिभिर्गतिर्ज्ञानं यस्य सः प्रतीतः प्रत्यक्षं प्राप्तः एतद्दिष्ट्या अहो अस्माकं भाग्यमहिमेत्यर्थः। छिन्धीत्यादिकं नरलीलोचितं वचनम् आप्ताः सुहृदः॥ २७॥ सम्यक् निजाज्ञाप्यार्थानुकूलवचनतया स्तुतः। स त्वं प्रभो! इत्यादिमिश्रत्वात्। गीर्भिरिति तद्वैशिष्ट्यं बोधयति। शुद्धप्रेममयलौकिकलीलाविशेषाभिरुचेस्त्वन्नो गुरुरित्यादिलक्षणाभिर्गीर्भिः सम्मोहयन् मूर्च्छयन् इवेति चेतनायामपि विवेकलोपात्। तत्र शक्तिद्योतकं भगवान् सर्वैश्वर्यादिसम्पन्नो हरिर्मनोहारिलीलश्चेति॥ २८॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र चाहं त्वया नितरामनुगृहीत इत्याह—अद्येति। ईश! हे जगदीश्वरेति परमदुर्लभता, सर्व्वदेवेति तत्तद्गुणसमाप्तिः। यदिति वसतीनां सर्वतीर्थमयता, जगद्गुरुः श्रीनारायण इति वैकुण्ठलोकता, अधोक्षजेति गोकुलसदृशताचाभिप्रेता॥ २५॥ अतोऽपरं देवमीश्वरं वा कः शरणं सम्यगीयादाश्रयेत्। दीर्घत्वं परस्मैपदं वार्षम्। संशब्देन कदाचित् कथञ्चित्त्वत्प्राप्त्यर्थमेव वाश्रयेदिति बोध्यते। सदसद्विवेचिका बुद्धिः पण्डा तद्वांश्चेत्त्वामेव समाश्रयेदित्यर्थः। तत्र हेतवः—भक्त एव प्रियो यस्य तस्मादिति भक्तवात्सल्यम्, ऋताः सत्या गिरः 'आर्त्तानां शरणं त्वहम्' इत्यादिलक्षणा यस्य तस्मादिति दीनवात्सल्यम्, सुहृदो निरुपाधिकृपाकारिण इति हीनार्थाधिकसाधकत्वम्। यद्वा, अपराधेऽति सुशोभनं हृदयस्य तस्मादित्यपराधाग्रहणं कृतम्, स्वीयं परकीयं च जानातीति तथा तस्मादिति सर्व्वलोकहितार्थं सदा सर्व्वानुसन्धानकृत्यमुक्तम्। विशेषणानामेषां यथोत्तरमाश्रयणहेतुतायां श्रैष्ठ्यम्, एतानि च गृहागमनेन (भा० १०।४१।१७) 'आयास्ये भवतो गेहम्' इति तद्वाक्यसत्यतापादनेन गोपीविषयकापराधाग्रहणेन गृहनिर्म्माणादिनिजकृत्यज्ञानेन चात्मानमुद्दिश्य क्रमेणोक्तानीत्यपि ज्ञेयम्। सुहृदः प्रियस्येत्यर्थः, यतो भजतः, यद्वा, अकारप्रश्लेषेण—अभजतोऽपि सुहृदो बन्धुत्वमात्रं प्राप्तस्येति बन्धुवात्सल्यम्। इदमपि पूर्ववत् कामानभीष्टार्थान् वाञ्छातीतमपि ददासीत्याशयेनाह—आत्मानमपि ददाति तद्वश्यं करोतीत्यर्थः। तच्च निरुपाधिबन्धुत्वादेवेत्याह—

भगवत उपचयो भजनाल्लाभः, अपचयोऽभजनाद्धानिस्तौ न स्त इति। यद्यपि भक्तानां भक्तिसुखलाभेन भगवतोऽप्युपचयः स्यात्, तथापि तथोक्तिर्भक्त्या विनयात् दैन्याच्च। यद्वा, कामानामदाने उपचयो नास्ति, आत्मनो दानेऽप्यपचयो नास्ति, अचिन्त्यैश्वर्य्यत्वात्; यद्वा, आत्मनः स्वस्य अदाने उपचयो वृद्धिर्नास्ति, पूर्णतापरमकाष्ठाप्राप्तेः, अपचयश्च क्षयो नास्ति, सदैवाविकारत्वात्; ततश्चात्मनः समग्रस्यैव दानमभिप्रेतम् ॥ २६ ॥ मम चालभ्यलाभोऽभूदिति भक्तिसम्पत्तयेऽधुना कृपाविशेषं कुर्व्विवत्याह—दिष्ट्येति। जनैः श्रीब्रह्मादिभिर्भक्तवर्गैरर्द्यते सन्दर्शनाद्यर्थं सदा याच्यत इति तथा तत्सम्बोधनम्, इति परमदौर्लभ्यमभिप्रेतम्; तदेव दर्शयति – योगः समाधिस्तस्मिन्नीश्वरैः समर्थैः श्रीसनकादिभिरपि; किञ्च, सुरेशैः सनकाद्युपदेष्टृश्रीब्रह्मादिभिरपि दुरापा गतिः, हृद्यपि साक्षात्कारो मार्गोऽपि वा यस्य; यद्वा भक्तियोगेश्वरैः सुरेशशैरपि दुरापा सुरेशत्वाभिमानाद्दुर्ज्ञेया गतिस्तत्त्वं यस्य तादृशोऽपि भवान् नोऽस्माकमधमानां गृहे प्रतीतः, कारुण्याद्यभिव्यञ्जनेन तत्र प्रतीतिं प्राप्तः, यद्वा, नोऽस्माभिः प्रतीतः प्रत्यक्षं प्राप्तः, एतद्दिष्ट्या, अहो! अस्माकं भाग्यमहिमेत्यर्थः। 'नः' इति तेनैवात्मनो बहुमानात् स्वपरिवारापेक्षया, वा, अतो नोऽस्माकं सुतादिषु यो मोहः स एव रशना बन्धहेतुत्वाद्दुष्परिहरत्वाच्च, तामाशु छिन्धि, तच्च तवैव शक्यं सुकरमेव चेत्याह--भवदीयेति। आप्ताः सुहृदः, आदि शब्दात् सद्धर्म्मादयः ॥ २७ ॥ भक्तेनेति अर्च्चनसंस्तवयोरुत्तमता, तया श्रीभगवत्प्रीतिरपि सूचिता, अतः सस्मितं प्रकर्षेण सस्नेहविनयादिनाह, यतो भगवान् सर्व्वगुणसम्पूर्ण इत्यर्थः। तेन मनोहरणाच्च हरिः श्रीकृष्णः, अतो गीर्भिर्वाङ्मात्रेणैव, न तु तत्त्वत इत्यर्थः। सम्यक् मोहयन्निति साक्षादीश्वरस्य तादृशोक्त्यनुपपत्तेस्तदर्थतत्त्वनिर्द्धाराशक्तेश्च। इवेति तस्य विनयादिस्वभावत्वेन तादृशोक्त्युपपत्तेः, यद्वा, गीर्भिर्मधुरमधुरवाक्परिपाटीभिः सम्मोहं स्वस्मिन्नत्यन्तममतां विस्तारयन्नित्यर्थः, इवेति स्वतएव तस्य तस्मिन् भक्त्या सदा ममतावृत्तेः ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ऋतगिरः सत्यवाक्यात् त्वत्तः अपरमित्यन्वयः आत्मानमपीति ददासीति मोक्षप्रदत्वमुक्तं यस्य आत्मनः उपचयापचया वृद्धिह्रासौ न ॥ २६-२९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं भगवन्तं स्तुत्वा सम्प्रति तदागमनेनात्मतदनुबन्धिनां कृतार्थतामाविष्करोति। अद्येति। हे ईश! अधुना नोऽस्माकं वसतयः गृहा भूरिभागा बहुभाग्यवत्यः तत्र हेतुं वदन् भगवन्तं वसतीश्च विशिनष्टि। हे अधोक्षज! जगद्गुरुः त्वं या वसतीः प्रविष्टः कथम्भूतः यो भवान् सर्वे देवा ब्रह्मरुद्रेन्द्रादयश्च पितरश्च भूतानि च नृदेवाश्च मूर्त्तिः शरीरं यस्य तथा भूतः स आत्मा अङ्गान्यन्या देवता इत्यादि श्रुत्यर्थोऽत्रानुसंहितः यस्य च तव पादयोः शौचं क्षालनेन पवित्रं सलिलं गङ्गात्मकं कर्तृ त्रिजगत् त्रिलोकीं पुनाति सर्वदेवपितृभूतनृदेवमूर्तिरिति देवादीनां शरीरत्वकथनेन पारतन्त्र्यमुक्तम् ॥ २५ ॥ अत एव को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात् एष एवानन्दयतीति श्रुत्युक्तरीत्या काममोक्षप्रदस्तदुपायभूतश्च त्वमेवेति वक्तुम् उपायत्वोपयुक्तगुणैस्तमेव विशिंषन् तदन्यशरणमिच्छुर्मूर्ख इत्याह। क इति। पण्डित इत्यस्य चेदिति शेषः पण्डितश्चेत्को वा त्वत्त्वत्तोऽन्यं शरणं समीयाद्व्रजेत् समीहितसाधनत्वेनाध्यवस्येदित्यर्थः। योऽन्यं शरणं समीयात्स मूर्ख इति भावः। तत्र बहुव्रीहिपक्षे भक्तानां प्रीतिविषयत्वोक्त्या प्राप्यत्वोपयुक्तगुणवत्त्वम् ऋता सत्या गीर्वाग्यस्य तस्मात् पार्थ नैवेह "नामुत्र विनाशस्तस्य विद्यते न मे भक्तः प्रणश्यति अनृते नोक्तपूर्वं मे न च वक्ष्ये कदाचने"ति सप्रतिज्ञं सत्यमेव ब्रूत इत्यर्थः। अयमपि शरण्योपयुक्तगुणः कृतज्ञात् कृतं यादृच्छिकं प्रासङ्गिकानुषङ्गिकाद्यन्यतमं तत्कृतमविज्ञातं स्वतस्त्वकृतमपि सुकृतत्वेन जानातीति तथा तस्मात् रक्षणे व्याजमात्रापेक्षिणो नतु पुष्कलकारणापेक्षिण इति भावः। अनेन दयालुत्वं फलितं सुहृदः हितैकाचरणशीलात् सुहृदः हितैकाचरणशीलात् अनेन कंसादिमारणम् अन्ततः शिक्षैवेति गूढोऽभिप्रायः ततस्तद्धितार्थेचाति भावः। कुतः यतो भवान् सुहृद भवत्तोषैककरवर्णाश्रमोचितधर्मानुष्ठाननिष्ठस्य भजतो भक्तिं कुर्वतः पुरुषस्याभिकामान् सर्वान् समीहितान् ददाति कियदेतदभिकामान् ददाति यतो निरतिशयानन्दरूपमत एव निरतिशयपुरुषार्थरूपं चात्मानमपि ददाति अनेन मोक्षप्रदत्वमुक्तं भवति कथं भूतमात्मानं यस्यात्मनः स्वस्य उपचयापचयौ वृद्धिह्रासौ न भवतस्तम् अनेननिर्विकारत्वं त एवाचेदचिद्वैलक्षण्यञ्च फलितम् ॥ २६ ॥ अथैवम्भूतस्य दुर्दर्शस्य तथा तस्य केवलं स्वमांसचक्षुर्विषयतापत्त्या तस्मिन्सौलभ्यतया स्वस्यालभ्यलाभरूपमहानन्दप्राप्तिं च वदन् तन्मायानिवृत्तये तमेवोपायत्वेन प्रार्थयते। दिष्ट्येति। हे जनार्दन सर्वान्तरात्मनः सुरेशैर्ब्रह्मादिभिर्योगीश्वरैः सनकादिभिश्च दुरापा दुष्प्रापा प्राप्तुमशक्या गतिः प्रकारो याथात्म्यम् इति यावत्सा यस्य स भवानिहमनुष्यलोके नोऽस्माकं केवलमज्ञानां प्रतीतः चाक्षुष साक्षात्कारात्मकप्रतीतिविषयो जातः दिष्ट्या महानन्दोऽस्माकमित्यर्थः। इहेत्यद्यास्मिन् गृहे एवेत्यर्थः। ननु मद्दर्शनमेव किंबहुमन्यसे नतु समीहितं याचसे इति चेदिदं याचे इत्यभिप्रायेणाह। छिन्धीति। नोऽस्माकं भवदीयमायाकार्यभूतां सुतादिषु मोह एव रशना पाशस्तामाशु छिन्धि इदमेव मम प्रार्थनीयमित्यर्थः ॥ २७ ॥ इतीति। भक्तेनाक्रूरेण स्तुतश्च हरिः सस्मितं स्मितेन सहितं यथा तथाक्रूरं प्राह कथम्भूतो वाग्भिरेव तं संमोहयन्निव स्वयाथात्म्यविषयकमोहं जनयन्निव इवशब्देनैवमपि न तस्य नित्यमुक्तस्य मोह इति सूच्यते ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हे अधोक्षज ! सर्वे देवादयो मूर्तयः प्रतिमा यस्य स तथा जगद्गुरुः सत्वं या वसतीः प्रविष्टः हे ! अद्य ता वसतयो नोऽस्माकं गृहाः भूरिभागा पूर्णभाग्याः अभवन् खलु नैतच्चित्रमित्याह । यत्पादेति ॥ २५ ॥ एकमेवाद्वितीयमिति श्रुत्यर्थं गुरुमुखात्सम्यक् ज्ञातवानहं त्वामतः स्तौमीत्याशयेनाह । क इति । भक्त प्रियात् ऋत गिर इति पदच्छेदः भक्तप्रियादृतगीश्चेति वा तस्माद्भजतः सेवमानस्य सुहृदः फलापेक्षारहितस्य आत्मानमपि स्वात्मानमपि सायुज्यलक्षणं मोक्षमपि सारूप्यम्वा यस्योपचयापचयौ वृद्धिक्षयौ च न स्त इत्यनेन कृष्णस्य बालवार्धकादिकं न स्वाभाविकमिति दर्शितम् ॥ २६ ॥ योगेश्वरादिभिरपि दुरापगतिः दुष्प्रापस्वरूपो भवान् नः प्रतीतः प्रतीतिविषयं गत इत्यत इदङ्कर्तव्यमिति प्रार्थयते किन्तदिति तत्राह । छिन्धीति । भवदीयमायां भवदाज्ञाकरीं बन्धकशक्तिं छिन्धीत्यन्वयः किम्बिधामत्राह । सुतेति । मोहलक्षणां रशानां रज्जुम् ॥ २७ ॥ लोकविषयाभिर्गीर्भिः सम्मोहयन् तत्त्वज्ञानम् अन्यथा कुर्वन्निव न त्वक्रूरस्येत्यन्वयः ॥ २८-२९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

कः पण्डित इत्यादि । त्वदपरं यः शरणं याति, स तु मूर्ख एव । त्वत् कीदृशात् ? भक्तप्रियादृतगिरः उभयमेव सैरिन्ध्र्या मम च गृहागमनादेवावगतम् , पूर्वाङ्गीकृतवचः पालनात् , अतएव सुहृदः कृतज्ञात् । यो भवान् भजतः सुहृदो भजते सुहृदे सर्वानभिकामान् ददाति । किं बहुना ? आत्मानमपि ददाति । तत्र सैरिन्ध्र्येवोदाहरणम् , तस्यै आत्मापि दत्तः । आत्मदानेऽपचयो भवतीत्याशङ्क्याह-यस्यात्मनस्तवोपचयापचयौ न, पूर्णानन्दत्वात् ॥ २६-३० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कः पण्डित इत्यादि । त्वत्तोऽपरः कः पण्डितः शरणं समीयात् ? त्वत्तः कीदृशात् ? ऋतगिरः ऋतगीस्त्वं तत् मयैवानुभूतम् , यतोऽस्मद्गृहमागमः, एवं कुब्जागृहञ्च । भक्तप्रियादिति भक्तप्रियत्वञ्चानेनैव सिद्धम् । अतस्त्वमेव सुहृदित्याह--सुहृदः शोभनं हृद् यस्य, अतएव कृतज्ञात् कृतं यत्किञ्चिद्भक्तिजन्यं तज्जानातीति तथा, तस्या अङ्गरागार्पणं रूपं कृतम्, किं बहुना ? आत्मानमपीत्यत्रापि कुब्जैवोदाहरम् । तस्यै आत्मापि दत्तः । आत्मन्यपचयो भवति, तद्वशत्वात् तव तु नैव इत्याह-उपचयापचयौ न यस्य ॥ २६-३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

या वसतीः स एव त्वं प्रविष्टः यस्त्वं सर्थवेदादिमूर्त्तिः ॥ २५ ॥ त्वदपरं त्वत्तोऽन्यम् ऋतगिरः सत्यवाक्यात् कंसं हत्वा त्वद्गृहं यास्यामीति स्ववाक्यं सत्यं कृतमिति भावः । सुहृदः हितकारिणः येन दासस्य हितं स्यात्तत् त्वमेव ज्ञात्वा करोषीत्यर्थः । कृतज्ञात् कादाचित्कमपि यत्किञ्चिदपि भक्तेन विस्मृतमपि त्वद्भजनं कृतं त्वं जानास्येवेत्यर्थः । यो भवान् सुहृदः शोभनान्तकरणाय निष्कामायेत्यर्थः । भजने भजनं कुर्वते जनाय अभिकामान् अभिवाञ्छितार्थान् सर्वानेव तेनाकामितानपि ददाति नच तावतोऽपि दत्त्वा निवर्त्तसे इत्याह । आत्मानं स्वमपि ददाति अत्र भवानित्यध्याहार्यम् । ननु स्वपर्यन्तदानं नाम महानपचयस्तत्राह । यस्य तव उपचयापचयौ न स्तः । कोटिब्रह्माण्डवर्त्तिद्रव्येषु कोटिसङ्ख्यब्रह्माद्यैस्तुभ्यमुपहृतेष्वपि तव न कोऽप्युपचयः । त्वया स्वपर्यन्तवस्तुजातप्रदानेऽपि न कोऽप्यपचयः । अतर्क्यानन्तशक्तित्वादिति भावः ॥ २६ ॥ नोऽस्माभिः प्रतीतः प्रत्यक्षीकृतः ॥२७॥ सम्मोहयन् स्वैश्वर्यज्ञानं पुष्णन् । इवेति सम्यगलुम्पन्नपि ॥ २८ ॥

गूढार्थदीपिनी

हे ईश ! या त्वं प्रविष्टः ताः नः वसतयो गृहा भूरिभागाः बहुपुण्याः जाताः । कथंभूतस्त्वम् यस्य तव पादप्रक्षालनजलं गङ्गा त्रिजगत् पुनाति । यश्च त्वं सर्वदेवादिमूर्तिः सन् जगद्गुरुरसि । देवा ब्रह्माद्याः । पितरोऽर्यमाद्याः । भूताः कीटपतङ्गाद्याः । नरोऽतिवयः । वेदा ऋगाद्याः तेषां मूर्तिरेकत्र धर्माभावः । एते पञ्चयज्ञदेवताश्चोक्ताः ॥ २५ ॥ कः पण्डितः त्वत्तः अपरं शरणं समीयात् गच्छेत् कथंभूतात् । ऋतगिर। सत्यवाचः । किं च भजतः पुंसः सर्वान् कामान् किं बहुना आत्मानं स्वरूपमपि ददाति यस्य आत्मनः उपचयापचयौ वृद्धिह्रासौ न स्तः तमात्मनमित्यन्वयः ॥ २६ ॥ नोऽस्माकम् अविवेकिनां भवान् प्रतीतः दृष्टिगोचरो जातः एतत् दिष्ट्या शोभनं जातम् । अतः नोऽस्माकं सुतादिषु मोहरशनैव माया ताम् आशु छिन्धीत्यन्वय- ।२७-२८।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे ईश ! अद्य नोऽस्माकं वसतयः गृहाः खलु निश्चितं भूरिभागाः बहुभाग्यवत्यः यतः हे अधोक्षज ! यो भवान् जगद्गुरुः यस्य तव पादशौचसलिलं गङ्गादि त्रीणि जगन्ति त्रीन् लोकान् पुनाति यो भवान् सर्वदेवाः पितरश्च भूतानि च नृदेवाश्च मूर्तयो विभूतयः सदेवादिषु मूर्तिस्तदङ्गुष्ठपरिमिता यस्य स तथाभूतो वा "अगुष्ठमात्रं पुरुषं मध्ये आत्मनि संस्थितं तं ज्ञात्वा-

मृत्युमत्येति नान्यः पन्धा विमुक्तये'' इति श्रुतेः एवं भूतो यः सः साक्षात् त्वं याः वसतीः प्रविष्टोऽसि ।। २५ ।। ऋता सत्या न मे भक्तः प्रणश्यतीत्यादिगीर्वाग् यस्य तस्मात् त्वत्तः अपरमन्यं शरणं पण्डितः सन् कः समीयात् गच्छेत् न कोऽपीत्यर्थः । यतः भजतोऽभिकामान् सर्वन् सम्पूर्णान् किं बहुना यस्योपचयापचयो वृद्धिह्रासौ न स्तस्तमात्मानं देहमपि ददाति ।। २६-२८ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं भनवदवतारं प्रसङ्गात् कर्माणि च श्रुत्वा भगवदागमनं स्तौति । अद्येश न इति । नो वसतयो गृहाः अद्य भूरिभागाः अस्मत्कुले अवतीर्ण इति वयं पूर्वमेव भूरिभागाः वसतयस्त्वद्य इति बहुवचनं भ्रात्राद्यभिप्रायम् । ननु निरोधाधिकारिणो भवन्तः तदर्थमागमनं नतु धर्मार्थमिति कथं वसतीनां कृतार्थतेति चेत्तत्राह । ईश इति । उभयमपि कर्त्तुं समर्थः । ननु भगवत्सम्बन्धादेव तेषां भाग्यमस्तु पृथक्किमिति निरूप्यत इत्याशङ्क्याह । भूरिभागा इति । मद्भाग्यं चेत् यदैव ममेच्छा तदैवागच्छेत् अतो गृहस्यैव भाग्यं ननु गृहं हि त्रिगुणात्मकं गुणातीतो हि भगवदनुगुणो भवतीति कथमेवमुच्यत इति चेत्तत्राह । यः ससर्वदेवपितृदेवनृदेवमूर्त्तिरिति । गृहाणामपि स्वोत्कर्षो येन सिद्ध्यति तदपि रूपं भगवति वर्त्तते गृहं हि देवतायोग्यं भवति पितृणां नराणां तत्र ये हि लोके गृहे सुखिता भवन्ति तेषां स्वदेवत्वमुत्कर्षदेवमात्रे सन्तुष्टे गृहं युक्तं भवत्यन्यथा व्यर्थमेवमित्यनयोस्तत्र देवोत्तमो भगवानिति तत्प्राप्तौ भवत्येव सर्वोत्कर्षः योग्यता च एवमितरयोः किञ्च शुद्धिरप्यपेक्षिता सापि जातेत्याह । यत्पादशौचसलिलमिति । पादशौचसलिलं गङ्गा सा परम्परासम्बद्धाऽपि देशकालव्यवहितापि जलान्तरेण र्मिश्रिता लोकत्रयमपि पुनाति अत्र तु साक्षादेव पततीति किं गृहभाग्यं वक्तव्यमित्यर्थः । ननु रूपभेदात् वैलक्षण्यं भविष्यतीत्याशङ्क्याह । सत्वमिति । अत्रापि प्रमाणत्वमेवेत्यत आह । जगद्गुरुरिति । तर्हि कथं लोका न जानन्तीत्याशङ्क्याह । अधोक्षजेति बहिर्मुखत्वादज्ञानं याः वसतीः पुनर्ग्रहणं तासामभिनन्दनार्थं च ।। २५ ।। एवं भगवदागमनं स्तुत्वा भगवति प्रत्यापत्तिं स्तौति । स्वचिकीर्षिताम् । कः पण्डित इति । स्तुत्यनन्तरं हि फलं प्रार्थनीयं तत्प्रपत्त्यतिरिक्तं नास्तीति ज्ञापयितुं प्रपत्तिमेव स्तौति प्राणिनां कर्त्तव्यतया प्रपत्तिरेव कर्त्तव्येति विवेकवान् हि पण्डितः इममेवार्थमधिकृत्य ''पण्डितो मोक्षबन्धवित्'' इत्युक्तं तत्रानायासेन फलसिद्धिर्विद्यमाने स्वोत्कृष्टे समाश्रयणमेव युक्तम् आश्रयो हि स्वाधीनं सर्वमेव यच्छति मनस्तु क्षणिकमिति सर्वपदार्थाभिलाषि भवतीति कदा वा किं प्रार्थयेदिति तत्तत्साधनेष्वशक्तो हि प्रपत्तिमार्गमवलम्बते तदपि कृत्वा चेत्फलं न प्राप्नुयादसमर्थभजनात् तदा प्रपत्तिर्व्यर्थेति को वा विवेकी त्वत्तः अपरं शरणं सम्यगीयात् साधनत्वेन गुरुत्वेन वा अनुवृत्तिं कुर्यात् अनु शरणं गच्छेत् नन्वाहृत्य कथं त्वं प्राप्तव्यः अतोऽन्यानुवृत्तिः प्रथममावश्यकीति कथमन्यनिरोधः क्रियत इति चेत्तत्राह । त्वदपर इति । त्वमपरो यस्य नियामकत्वे ननु बुद्ध्या गृहीतः गुर्वादिस्तु नैवं विधो भवतीति न दोषः भगवतः शरणागतौ हेतूनाह । भक्तप्रियादृतगिरः सुहृदः कृतज्ञादिति । षड् हेतवोऽहि भगवति तत्र फले हेतुद्वयं साधने चतुष्टयमिति साधनेऽपि स्वधर्मपुरस्कारेण हेतुर्वक्तव्यः अन्यथा फलं काकतालीयं स्यात् यो हि सेवकानपेद्यते स सेवकेभ्यः प्रयच्छति स ईश्वर एव न भवति तत्रापि सेवकधर्मं चेदुररीकुर्यात् तदैव सेव्यो भवति तदाह । भक्तप्रियादिति । लोका हि फलार्थं सेवमानाः सेवायामसक्ताश्चेन्न फलं प्राप्नुवन्ति नहि प्रभुस्तस्य क्लेशं मन्यते अन्यथा दुःखदे साधारणं देशे काले च तान् सर्वान्न प्रवर्त्तयेत् यथा पुत्र भगवांस्तु न तथा भक्तम् अतो भगवानेव सेव्यः किञ्च स्वधर्म्ममप्यवेक्ष्य भक्तहितं करोतीत्याह । ऋतगिर इति । सत्यवाक् सत्यसङ्कल्पः सङ्ग्रामे च प्रपन्नानां तवास्मीति च यो वदेत् । कौन्तेय प्रतिजानीहीत्यादिवाक्यात् यो हि सेवकक्लेशं सहते स न मनसि शुद्धः यो वाचि न दृढः स वाचि तथा यस्तु समागतेऽवसरे मित्रमिव कार्यं न करोति शरीरतः सकायस्तथा एतत्त्रयं लौकिकं स्वतः कर्त्तव्यं तस्य ऋतं जानातीति तद्धर्मकरणे हेतुरुक्तः दोषाभाव एते आत्मवत् पुत्रवच्च भक्ताः कायवाङ्मनोभिः विषयीकर्त्तव्या इति गुणाः प्रह्लादे सर्वापत्सु मनसा हितं कृतवान् वाचा गोपिकादिषु कायेनास्मास्विति एवं भावे भगवद्गुणे न कोऽपि सन्देहः कृतः ज्ञत्वाभावे प्रवाहकरणान्नोत्कर्षः स्यात्फलदातृत्वमाह सर्वान् परेषामनिष्टं वा कर्तुं वाञ्छन्ति तदा न ददातीति ज्ञापयितुं सुहृद इति शुद्धान्तःकरणस्य स्वद्रोहं वा विचारयतः सर्वानेव कामान् ददातीति दाने हेतुर्भजनमित्याह । भजत इति । एकस्मिन्नपि प्रार्थिते सर्वतः प्रयच्छति न त्वन्येऽप्येतादृशा भवन्तीत्याह । आत्मानमपीति । अत्र भजनमेव हेतुः तेन तारतम्येन सर्वं सङ्गच्छते यः स्वात्मानं भगवते प्रयच्छति भगवानपि तथा तस्मै प्रयच्छतीति । नन्वेतादृशमपि लोके क्वचित् सिद्धमिति चेत्तत्राह । यस्योपचयापचयौ न स्त इति । यत्सबन्धिनः सर्वस्यैवोपचयापचयाभावः उभयनिरूपणमुचितं चेद्दत्तं तस्य नापचयं करोति अपचितं चेद्दुःखादिकं तत्कदाचिदपि नोपचितं करोति अथवा एवं रूपमेव सर्वेभ्यो भक्तेभ्यः प्रयच्छति । ननु विषमं वस्त्वेव तथेति नेच्छापि तत्र प्रयोजिकेति धर्मिणि तौ धर्मौ निरूपितौ ।। २६ ।। एवं सर्वप्रकारेण स्तुत्वा किंचित्प्रार्थयते दिष्ट्या जनार्दनेति । पूर्वमपि भक्ताः परमापाततः त्वत्स्वरूपाज्ञानात् अद्य तु नोऽस्माभिरिह भवान् प्रतीतः अतो ज्ञाते कल्पतरौ अभिलषिते विलम्बो न युक्त इति प्रार्थनीय इति भावः । कथमेतावता काले न ज्ञातवान् कथमद्यैव ज्ञातवानित्याशङ्क्य हेतुद्वयमाह । दिष्ट्याजनार्दनेति । भाग्यमद्यैवोन्मुखं जनयतीति जनानामर्दयति इदानीमेवाज्ञानं नाशितवान् प्रसन्नो हि स्वधर्म्मानाविष्करोति सेवकधर्मांश्चातो भाग्यं मोहनाशश्च प्रकाशितवानित्यर्थः । आगमने

प्रसादो निरूपितः साधनान्तरं व्यावर्त्तयति। योगेश्वरैरपि दुरापगपिरिति। योगवशीकरणादिकं स्वसामर्थ्यं न हि नियताः स्वधर्मा अन्येन बोधयितुं शक्यन्ते दुःखेन प्राप्या गतिर्यस्येति भगवदभिप्रायापरिज्ञानमुक्तं स्वाधीनं हि मथित्वा वह्निवत्साधनीयं तदेकः संघातो भगवता दत्ता इति तावन्मात्रे वक्तव्यता भवति नान्यत्रेति सुष्ठूक्तम् अलौकिकेनापि सामर्थ्येन भवति इत्याह। सुरेशैरिति। प्रार्थनामाह। छिन्ध्याशिवति ! सुतादिषु मोहरशनां छिन्धि यतस्त्वयैव सम्पादितमित्याह। भवदीयमायामिति। अन्ते छेदनं वारयति। आश्विति। अत्यन्तदृढमूले छिद्यमाने पुनरुद्गमः छेदके वैमनस्यं च भविष्यतीति ॥ २७ ॥ भगवतो ह्ययं भावः शास्त्ररहस्यसिद्धः यो हि यादृश स तादृश एव कर्त्तव्यः भक्तिवशात् अन्यथाकरणेऽयुक्तत भवतीति भक्तिर्मध्यमा ज्ञानं यथा शृङ्गारलीला गोप्यैव तथाऽवतारलीला गोप्यैव तां यः प्रकटीकुर्यात् स नाभिप्रेत इति विपरीतं वदेत् यथा गोपिकागीतेन गोपिकास्त्यक्ताः तथायमपि लीलार्थमुत्पादितः स्वरूपापरिज्ञानात् बहिर्मुखतया ज्ञानिनमात्मानं मन्यमानः तत्प्रार्थयते। अतोऽस्य सर्वाण्येव वचनान्यसम्बद्धानि। अतस्तन्निवारणार्थं भगवान् मोहयितुं प्रवृत्त इत्याह। इत्यर्चित इति। पूर्वोक्तेन प्रकारेणार्चितः सम्यक् स्तुतश्च भक्तश्चायं तथापि भगवानीश्वरः सर्वदुःखहर्त्ता च भक्तश्चायम्। अत उभयमभिप्रेत्य सस्मितं प्राह। स्मितो हि मन्दहासः अल्पमेव मोहितवान्। गीर्भिरपि सम्यक् मोहयन्निव जातः सम्यक्त्वं लीलौपयिकत्वेनान्यथा प्राकृते लीलामपि त्यजेत् ॥ २८ ॥

श्रीसुबोधिनी–सारः

हे ईश अद्य नोऽस्माकं वसतयो गृहा भूरिभागाः तपःस्थानादप्युत्तमाः यः सर्वदेवपितृभूतराजरूपी जगतां गुरुः स त्वं या वसतीः प्रविष्टः हे अधोक्षज यस्य तव पादशौचसलिलं श्रीगंगारूपंत्रिजगत् पुनाति खलु एव ॥ २५ ॥ भक्तप्रियात् ऋतगिरः सत्यवाचः सुहृद उपकारककर्त्तुः कृतज्ञात् त्वत्त्वत्तोऽपरं द्वितीयं शरणं कः पण्डितः संगच्छेत् भजेत सुहृदः प्रियस्य सर्वानभिकामान्मनोरथान् आत्मानमपि च ददाति यस्य उपचयापचयौ वृद्धिह्रासौ न स्त एकरसत्वात् "सर्वे भावाः परिणामिन ऋते चिच्छक्तेः" ॥ २६ ॥ हे जनार्दन योगेश्वरैः सुरेशैरिंद्रादिभिरपि दुरापा दुर्लभा गतिर्यस्य स भवानिह स्थाने नोस्माकं प्रतीतः दृष्टोऽस्ति दिष्ट्या परममंगलं नोस्माकं सुतादिषु मोहरशनां मोहपाशं भवदीयमायां त्वमाशु शीघ्रं छिन्धि ॥ २७ ॥ भक्तेन इत्येवमर्चितः संस्तुतश्च हरिर्भगवान् गीर्भिर्वाणीभिः संमोहयन्निव सस्मितं यथा भवति तथाऽक्रूरं प्राह ॥ २८ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

एवं भगवन्तं स्तुत्वा तदागमनेनात्मनः स्वानुबन्धिनां च कृतार्थतामाविष्करोति—अद्येति। हे ईश ! अद्य नोऽस्माकं सर्वेषां वसतयो गृहाः खलु निश्चयेन भूरिभागाः महापुण्याः। 'वसतय' इति तत्रत्यानां प्राणिनामप्युपलक्षणम्। तत्र हेतुं वदन् भगवन्तं वसतीश्च विशिनष्टि—हे अधोक्षज अतीन्द्रिय ! सर्वे देवाः ब्रह्मरुद्रेन्द्रादयश्च पितरश्च भूतानि च नृदेवा राजानश्च मूर्तयो यस्य सः, यस्य च तव पादयोः शौचसलिलं क्षालनोदकं गङ्गारूपं त्रिजगत् त्रिलोकीं पुनाति स जगतां गुरुः पूज्यस्त्वं या वसतीः प्रविष्ट इत्यन्वयः ॥ २५ ॥ 'आयास्ये भवतो गेहम्' इति यद्भगवतोक्तं तत्सत्यं कृतमिति परितुष्यन् 'त्वमेव शरणयोग्यः, नान्य' इति आह—क इति। पण्डितो विवेकी चेत्त्वत्तः अपरं शरणं कः समीयात् व्रजेत्। भगवतः शरणयोग्यतायां हेतून् वदन् विशिनष्टि—भक्ताः प्रियाः यस्य तस्मात्, ऋता सत्या गीर्यस्य तस्मात्, सुहृदो हितकारिणः, कृतज्ञात् कृतं भक्तकृतं भजनं दुष्टकृतं द्रोहं वा जानाति स्मरतीति तथा तस्मात्, किञ्च सुहृदः शुद्धान्तःकरणस्य भजतो भक्तस्य सर्वानभिकामान् वाञ्छितान् धर्मादीन् ददाति। किं बहुना ? आत्मानमपि तदधीनं करोति ॥ ननु 'एवं पराधीनतायामपकर्षः स्यात्' इत्याशङ्क्याह—यस्य तवउपचयापचयौ उत्कर्षापकर्षौ न स्त इति ॥ २६ ॥ तद्दर्शनमभिनन्दति—दिष्ट्येति। हे जनार्दन मायानिवर्तक ! योगेश्वरैः सनकादिभिः सुरेशैरिन्द्रादिभिरपि दुरापा दुर्लभा दुर्ज्ञेया वा गतिर्यस्य स भवान् नोऽस्माकमिह गृहे प्रतीतः चाक्षुषसाक्षात्कारात्मकप्रतीतिविषयो जात इति दिष्ट्या, तेन महानानन्दो जात इत्यर्थः। स्ववाञ्छितं प्रार्थयते—छिन्धीति। सुतकलत्रादिषु मोहः आसक्तिरेव रशना पाशः तद्रूपां नोऽस्माकं भवदीयां मायां त्वमाशु छिन्धि विनाशयेत्यर्थः। कलत्रं स्त्री। आप्ता मातापित्रादयो वृद्धाः ॥ २७ ॥ इत्येवं भक्तेन अक्रूरेणार्चितः संस्तुतश्च भगवान् हरिः सस्मितं स्मितेन सहितं यथा भवति तथा गीर्भिरक्रूरं सम्मोहयन्निव प्राहेत्यन्वयः। 'हासो जनोन्मादकरी च माया' इति वचनात्तत्स्मितस्य मायारूपत्वात्तन्मोहनार्थं स्मितं साहित्यं ज्ञेयम्। 'तथापि तस्य परमभक्तत्वान्न तथा मोह' इति सूचयितुमिवशब्दप्रयोगः ॥ २८ ॥

अन्वितार्थप्रकाशिका

अद्येति। हे ईश ! हे अधोक्षज ! सर्वे देवाः ब्रह्मरुद्रेन्द्रादयश्च पितरश्च भूतानि च नृदेवा राजानश्च मूर्तयो यस्य सः यस्य च तव पादयोः शौचसलिलं क्षालनोदकं गङ्गारूपं त्रिजगत् त्रिलोकीं पुनाति स जगतां गुरुः पूज्यस्त्वं याः वसती कर्माणि प्रविष्टः ता नोऽस्माकं वसतयो गृहास्तद्वासिनोऽपि च अद्य खलु निश्चितं भूरिभागाः महाभागाः तपोवनादपि महापुण्याः ॥ २५ ॥ आयास्ये भगवतो गेहमिति वचः सत्यं कृतमिति परितुष्यन्नाह— क इति। कः पण्डितो विवेकी भक्ताः प्रियाः यस्य तस्मात् ऋता

सत्या गीर्यस्य तस्मात् सुहृदो हितकारिणः कृतज्ञात् कृतं भक्तकृतं भजनं दुष्टकृतं द्रोहं वा जानाति स्मरतीति तथा तस्मात् त्वत् त्वत्तः अपरं शरणं समीयात् व्रजेत्। किंच सुहृदः शुद्धान्तःकरणस्य भजतो भक्तस्य सर्वानभिकामान् वाञ्छितान् धर्मादीन् ददाति। किं बहुना आत्मानमपि तदधीनं करोतीति एतावताऽपि यस्य तव उपचयापचयौ उत्कर्षापकर्षौ न स्तः॥ २६॥ दिष्ट्येति। हे जनार्दन! योगेश्वरैः सनकादिभिः सुरेशैरिन्द्रादिभिरपि दुरापा दुर्लभा दुर्बोधा वा गतिर्यस्य स भवान् नोऽस्माकमविवेकिनाम् इह गृह एव प्रतीतः चक्षुर्विषयो जात इति दिष्ट्या। सुतकलत्रधनानि आप्ता मातापित्रादयः गेहदेहादयश्च तेषु मोहः आसक्तिरेव रसनापाशः तद्रूपां भवदीयां मायां नोऽस्माकं त्वमाशु छिन्धि विनाशय॥ २७॥ इतीति। इत्येवं भक्तेनाक्रूरेणार्चितः संस्तुतश्च भगवान् हरिः सस्मितं स्मितेन सहितं यथा भवति तथा गीर्भिरक्रूरं संमोहयन्निव प्राह स्म॥ २८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हरेः सत्यसंकल्पत्वं द्योतयन्नाह क इति ऋतगिरः सत्यप्रतिज्ञात् नियामकत्वेन नृत्वत्तभवत् अपरं अमंशरणं रक्षितारं कः समीयात् प्राप्नुयात् यतः भजते जनाय सर्वान् मनोरथान् भवान् ददाति आत्मानमपि स्वमूर्त्तिमपि ददाति यस्य तव उपचयापचयौ वृद्धिक्षयौ कदापि न स्तः॥ २५॥ नोऽस्माकं ईह गृहे भवान् प्रतितः प्रत्यक्षतया प्राप्तः नो देहाद्यासक्तानां भवदीयमायां आशुछिन्धि॥ २६–२७॥ वो युष्माकं वयं प्रजा अपत्यानि अतो भवद्भिः रक्ष्याश्च॥ २८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति। हे प्रभो, यः प्राग्रामादिरूपेणावतीर्णः, सः त्वं, अद्याधुना, इह लोके, वसुदेवगृहे, स्वांशेन स्वांशभूतबलरामेण सह, अवतीर्णः असि। किं कर्त्तुमित्यत्राह। सुरा देवास्तेभ्य इतरेऽसुरास्तेषामंशभूता ये राजानस्तेषां, अक्षौहिणीनां यानि शतानि तेषां वधस्तेन, भूमेः भारं अपनेतुं निराकर्त्तुं, अमुष्य कुलस्य यादवकुलस्य, यशः कीर्त्तिं, वितन्वन्, लक्षणहेत्वोः–इति शत्रादेशः। यिस्तारयितुं चेत्यर्थः। अवतीर्णोऽसीति संबन्धः॥ २५॥ इत्थं भगवन्तं स्तुत्वा सम्प्रति तदागमनेनात्मतदनुबन्धिनां कृतार्थतामाविष्करोति। अद्येति। हे ईश, अद्याधुना, नोऽस्माकं, वसतयो गृहा गृहभूमय इत्यर्थः। भूरिभागाः बहुभाग्यवत्यः खलु। तत्र हेतुं वदन् भगवन्तं वसतीश्च विशिनष्टि। हे अधोक्षज, सर्वदेवा ब्रह्मरुद्रेन्द्रादयश्च पितरश्च भूतानि च नृदेवा राजानश्च मूर्त्तिः शरीरं यस्य तथाभूतः, अनेन 'स आत्मा अङ्गान्यन्या देवताः' इत्यादिश्रुत्यर्थोऽत्रानुसंहितः। यत्पादशौचसलिलं यस्य तव पादप्रक्षालनसम्बन्धेन पवित्रतामापन्नं गङ्गात्मकं जलमित्यर्थः। कर्त्तृ, त्रिजगत् त्रीलोकीं, पुनाति। यः जगद्गुरुः, सः त्वं, याः वसतीः प्रविष्टः, अतस्ता भूरिभागा इति सम्बन्धः। सर्वदेवपितृभूतनृदेवमूर्त्तिरिति कथनेन देवादीनां त्वच्छरीरत्वमुक्तं तेन च तेषां त्वत्पारतन्त्र्यं चाप्युक्तम्॥ २६॥ अत एव 'को ह्येवान्यात् कः प्राण्याद्यदेष आनन्दो न स्यात्' एष एवानन्दयति' इति च श्रुत्युक्तरीत्या काममोक्षप्रदस्तदुपायभूतश्च त्वमेवेति वक्तुमुपायत्वोपयुक्तगुणैस्तमेव विशिंषन् तदन्यशरण्यप्रेप्सुर्मूर्ख इत्याह क इति। पण्डित इत्यस्य चेदिति शेषः। पण्डितश्चेदित्यर्थः। क को वा, भक्ताः प्रिया यस्य तस्मात् भक्तानां वा प्रियस्तस्मात्, ऋता सत्या गीर्वाग्यस्य तस्मात्, सुहृदः सर्वसुहृद्भूतात् कृतज्ञात् कृतविदः, त्वत् त्वत्त अपरमन्यं, शरणं समीयाद्व्रजेत्। समीहितसाधनत्वेनाश्रयवन्येदित्यर्थः। यस्त्वदन्यं शरणं समीयात् स मूर्ख इति भावः। यतः, भवान्, सुहृदः भवत्तोषैककरवर्णाश्रमोचितधर्मानुष्ठाननिष्ठस्येत्यर्थः। भजतः भक्तिं कुर्वतः पुरुषस्य, अभिकामान् सर्वान् समीहितार्थान्, ददाति, अभिकामान् ददातीति यत्तदेतत् कियत्। यतः, यस्यात्मनः स्वस्य, उपचयापचयौ वृद्धिह्रासौ, न भवतस्तं अनेन निर्विकारत्वं चिदचिद्वैलक्षण्यं च फलितम्। इत्थंभूतं, आत्मानमपि निरतिशयानन्दरूपं निरतिशयपुरुषार्थरूपं चात्मानमपि ददातीत्यर्थः। अनेन मोक्षप्रदत्वमुक्तं भवति। अत्र भक्तप्रियादित्यत्र बहुव्रीहिणा ऋतगिर इत्यनेन च शरण्यत्वोपयुक्तगुणवत्त्वं, तत्पुरुषेण प्राप्यत्वोपयुक्तगुणवत्त्वं चोक्तं सुहृद इत्यनेन स्वभक्तहितैकाचरणशीलत्वमुक्तं, कृतज्ञादित्यनेन दयालुत्वं चोक्तम्॥२७॥ अथैवंभूतस्य दुर्दर्शस्य तस्य मांसचक्षुर्विषयतापत्त्या तस्मिन् सौलभ्यतां स्वस्यालभ्यलाभरूपमहानन्दप्राप्तिं च वदन् तन्मायानिवृत्तये तमेवोपायत्वेन प्रार्थयते। दिष्ट्येति। हे जनार्द्दन, सुरेशैर्ब्रह्मादिभिः, योगेश्वरैः सनकादिभिश्चापि, दुरापा दुष्प्रापा गन्तुमशक्येत्यर्थः। गतिः प्रकारो याथात्म्यमिति यावत्। यस्य सः, भवान्, इह मनुष्यलोके, नोऽस्माकं, केवलमज्ञानामिति शेषः। प्रतीतः चक्षुःसाक्षात्कारात्मकप्रतीतिविषयो जातः। दिष्ट्या तेन मरानानन्दोऽस्माकमित्यर्थः। ननु मद्दर्शनमेव बहु मन्यसे चेदस्तु, तथा समीहितं किं न याचसे इति चेदहमिदं याचे इत्यभिप्रायेणाह। छिन्धीति। हे हरे, नः भवदीयमायां मायाकार्यभूतां, सुतकलत्रधनाप्तगेहदेहादिषु मोह एव रशना पाशस्तां, आशु, छिन्धि। इदमेव मम प्रार्थनीयमित्यर्थः॥ २८॥

श्रीहरिसूरिविरचितं भक्तिरसायनम्

अद्येशेति : १०.४८.२५.

न केवलं वयमहो सुखशेवधिभूमयः। किन्तु नः सकलान्येव स्थावराणि चराणि च॥ ६८॥
युक्तमेतद् गृहं तेऽद्याऽरुणपादश्रिया प्रभो। हृद्यामन्वर्थिकां प्राप्तं निशान्तपदवाच्यताम्॥ ६९॥

निस्तमस्कमिदं गेहं समवेक्ष्य विचक्षणः । को वा न तर्कयेदर्कं त्वयि मध्यनिवासिनि ॥ ७० ॥

कः पण्डित इति : १०.४८.२६.

अनाहूतोऽपि भक्तेष्टदृग् यो भक्तगृहं प्रभुः । समेति तं विहायान्यं याति यः खर एव सः ॥ ७१ ॥

दिष्ट्येति : १०.४८.२७.

मायामपारविषयां विषमावगाहां मोहात्मिकामपनुदाऽनुपदं दयाब्धे ।
सा चेत्तथाऽस्तु धनबन्धुसुहृत्प्रियाप्तबुद्धिर्ययाऽत्र भविता त्वयि सर्वदैव ॥ ७२ ॥

इत्यर्चित इति : १०.४८.२८.

एवं सम्प्रार्थयन्तं प्रणुतिभिरमलं प्रेमपर्याप्तिभूमिमक्रूरं तं निरीक्ष्य स्फुटतरमपरं वक्तुकामं स्वरूपम् ।
व्यक्तीभावो न योग्यो धृतमनुजगतेः स्वस्वरूपस्य सम्प्रत्येवं संचिन्त्य लोकोचितपथमुररीचक्र ईशोऽखिलानाम् ॥ ७३ ॥
यदपाकृतिरर्थ्यतेऽमुनाऽस्य स तु मोहोऽद्य ममास्ति वर्धनीयः । भुवि भक्तजनावनैकदृष्टेरिति कृष्णः स्मितपूर्वमब्रवीत् तम् ॥७४॥

कृष्णप्रिया

हे नाथ ! आप के पधारने से आज हमारे निवास बड़भागी बने हमारा भाग्योदय हुआ । आप कोई साधारण जन नहीं है आप तो सर्वदेव पितृदेव एवं नरदेव के स्वरूप हो । वे तीनों आप में ही रहे हैं । पतितपावनी त्रिजगत्पावनी गंगा भगवती आपके चरणों से प्रकट हुई है । आप तो अधोक्षज है इन इन्द्रियों से आप जाने नहीं जाते हो पुनः आप तो विश्व के गुरु हो । नाथ ! ऐसे देवाधिदेव हमारे घर पधारे हैं यह बड़भाग्य है ॥ २५ ॥ हे ईश ! हे सर्वसमर्थ प्रभो ! विश्व में ऐसा कोई विवेकशील पुरुष नहीं होगा जो आपके श्रीचरणों का आश्रय छोड़ दूसरे की शरण ग्रहण करे ? आप को भक्तजन प्रिय है एवं और आप भक्तों के प्रिय है, आप सत्यवाक् है, सर्व के सुहृद् हो, हितकारी हो एवं कृतज्ञ हो, आप का सेवन करने वाले सुहृदजनों के सर्व मनोरथों को परिपूर्ण करते हैं । भक्त आप की आत्मा है । नाथ ! आप तो ऐसे दयालु है कि भक्तजन को आप आपकी आत्मा दे देते हो । आप अपनी आत्मा दे देते हो फिर भी आप के स्वरूप में न घाटा आता न बढ़ती आती है यही वैशिष्ट्य है ॥ २६ ॥ हे जनार्दन ! आप तो माया एवं अविद्या के निवर्तक है । समर्थ सुरेश्वर एवं योगेश्वर भी कठिनाई से आपके अभिप्राय को जान नहीं सकते हैं और प्राप्त नहीं कर सकते हैं वे सर्व दुर्लभ नाथ मुझ अनाथ को सनाथ करने के लिए मेरे घर पधारे इससे अधिक सद् भाग्य क्या हो सकता है और अधिक प्रसन्नता अन्य नहीं हो सकती है । अब तो यह कृपा करें । की हमारे पुत्र, स्त्री, धन, स्वजन, गेह देह आदि पदार्थों में आप की माया से रहे मोह रूप दृढ बन्धन को तोड़ दीजिए ॥ २७ ॥ श्रीशुकदेवजी कहने लगे राजन् ! भक्तवर श्री अक्रूरजी ने इस प्रकार भगवान का अर्चन एवं संस्तवन किया । तब भगवान श्रीहरि मन्दस्मित करते हुए अक्रूरजी को मानो मोहित करने वाले मधुर वचनों से कहने लगे ॥ २८ ॥

श्रीभगवानुवाच

त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बन्धुश्च नित्यदा । वयं तु रक्ष्याः पोष्याश्च अनुकम्प्याः प्रजा हि वः ॥ २९ ॥
भवद्विधा [1]महाभागा निषेव्या अर्हसत्तमाः[2] । श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ॥ ३० ॥
न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः । ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ३१ ॥
स भवान् सुहृदां वै नः [3]श्रेयाच्छ्रेयश्चिकीर्षया । जिज्ञासार्थं पाण्डवानां गच्छस्व त्वं [4]गजाह्वयम् ॥ ३२ ॥

कर्वमक्षमा

अन्वयः—श्रीभगवान् उवाच, त्वम् , नित्यदा, नः, गुरुः, पितृव्यः, श्लाघ्यः, च, बन्धुः, वयम् , तु, वः, प्रजाः, हि, वयम् , पोष्याः, श्लाघ्याः, च, अनुकम्प्याः ॥ २९ ॥ श्रेयस्कामैः, नृभिः, नित्यम् , अर्हसत्तमाः, भवद्विधाः, महाभागाः, निषेव्याः, यतः, देवाः, स्वार्थाः, साधवः, न, स्वार्थाः ॥ ३० ॥ हि, तीर्थानि, अम्मयानि, सन्ति, देवाः, मृच्छिलामयाः, न-सन्ति, किन्तु ते उरुकालेन, पुनन्ति, साधवः, दर्शनात् , एव, पुनन्ति ॥ ३१ ॥ सः, भवान् , वै, नः, सुहृदाम् , श्रेयः, चिकीर्षया, श्रेयान् , अस्ति, अतः, पाण्डवानाम् , जिज्ञासार्थम् , त्वम् , गजसाह्वयम् , गच्छस्व ॥ ३२ ॥

---

१. भागवता–वीर. । २. अर्हंमहत्तमाः–प्रा. पा. । ३. किञ्चिच्छ्रे–विज. । ४. गजसाह्वयम् वीर. विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

वो युष्माकं प्रजाः पुत्रा हि वयमिति ॥ २९ ॥ ननु नृभिर्देवाः सेव्या इति प्रसिद्धं तत्राह । देवा इति । स्वार्थाः स्वकार्यसाधनपराः साधवस्तु केवलं परानुग्रहपराः । परमार्थतस्तु साधव एव देवा इति त एव सेव्या इत्यर्थः ॥ ३० ॥ तर्हि मृच्छिलादिमयाः किं देवादयो नैव स्युरित्यत आह । न हीति । अम्मयानि जलरूपाणि तीर्थानि मृन्मयाः शिलामयाश्च देवा न भवन्तीति न अपि तु भवन्त्येव । तथाऽपि साधूनां तेषां च महदन्तरमित्याह । ते पुनन्तीति ॥ ३१ ॥ किंचिच्चिकीर्षयन्प्रागादिति यदुक्तं तत्कार्यमादिशति । स इति । नः सुहृदां मध्ये भवाञ्छ्रेयाञ्छ्रेष्ठोऽतः पाण्डवानां श्रेयश्चिकीर्षया गजाह्वयं गच्छस्व गच्छेति । यद्वा स्वेति पृथक् पदम् । हे स्व आत्मीयेत्यर्थः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पितृव्यः पितृभ्राताऽत एव गुरुः 'पितृव्यः पितृवन्मान्यः' इत्युक्तेः । वयं नित्यदा नित्यं रक्ष्या इत्यादि । एतेनास्य सेव्यत्वमुक्तम् ॥ नोऽस्माकमिति विनयेनात्मनः साधारण्यापादनार्थम् । श्रीबलदेवाद्यपेक्षया गुरुरुपदेष्टा, बन्धुश्च हिताचरणेन, तत्र श्लाघ्यः परमोत्तमत्वात्, किं वास्य पदस्य सर्वैरेवान्वयः, नित्यमित्यर्थः । आपद्भ्यो रक्ष्या भोजनादिना पोष्याः सदुपदेशादिनाऽनुकम्प्याश्च, हि यतो वः प्रजा वयम् ॥ २९ ॥ पुनराशंकते—नन्विति । तत्राक्षेपे । अर्हेषु पूज्येषु सत्तमा अतिश्रेष्ठाः । भवद्विधास्त्वत्तुल्यभक्तिमन्तः । इत्यर्थ इति—स्वपूजां प्राप्य फलदातृत्वाद्देवानां वणिक्साम्यम्, स्वार्थमनपेक्ष्य फलदातृत्वात्सेव्यत्वमिति भावः ॥ भवद्विधा इति—अर्ह्यन्त इत्यर्हास्तेषु सत्तमाः । ननु नृभिर्देवाः सेव्या इति प्रसिद्धिस्तत्राह—देवाः खलु स्वार्थसाधनपरा न तु तथा साधवस्ते तु परानुग्रहकातरा एवेति भावः ॥ ३० ॥ तर्हीहाक्षेपेऽव्ययानामनेकार्थत्वात् । आक्षिप्य समाधत्ते 'द्वौ नञौ प्रकृतार्थं गमयतः' इति वामनोक्तेः । आपः स्वरूपं येषां तानि । तथा मृच्छिलयोर्विकारास्तथा । ते तीर्थादयः । उरुकालेन बहुकालसेवया । सर्वदा परनिष्ठचेतस्त्वात्साधूनां महत्त्वमाह—दर्शनादेवेति । देवानां मृच्छिलामयत्वे श्रुतिः—"संस्रवभागास्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः इमां वाचमभिविश्वे गृणन्त आसद्यास्मिन्बर्हिषि मादयध्वं स्वाहा वाट्" इति । हे विश्वे सर्वे देवा यूयं संस्रवतीति संस्रवो घृतम्, उपलक्षणमेतत्, तद्भागवन्तः, इषा भागेन इच्छया वा बृहन्तो वर्द्धयन्तः, प्रस्तरे पाषाणे तिष्ठन्ति प्रस्तरेष्ठाः उपलक्षणमेतत्पार्थिवतैजसानाम्, केन—स्वाहा वेदमन्त्रेण । परि सर्वदा धेया धारणयोग्या ध्येया इत्यर्थः । इमां वाचमभिगृणन्तः । इमां काम्-वहति प्रापयति भागं देवेभ्य इति वाट् पूजकः, त्वं वाट् भवेत्याध्याहृत्य योज्यम् । अस्मिन्बर्हिषि यज्ञेऽर्चने यूयमासाद्य प्राप्य मादयध्वं तृप्यध्वमित्यर्थो वाचा कृतः ॥ अतो यदि देवाः साधारणाः सेवितुं साक्षाल्लभ्यन्ते तदापि न साम्यं साक्षात्तु दुर्लभा एव, ततः प्रतिमारूपेणैव सेव्यन्ते । तत्र तु तदपेक्षयातिनिकर्ष इति वक्तुं प्रसंगतस्तीर्थानामपि साधारणानां तमाह—न हीति, शिरश्चालने नञ् । ते तत्तद्रूपतीर्थदेवाः । एकशेषत्वेऽपि क्लीबत्वाभाव आर्षः पुनन्ति चित्तमलतः शोधयन्ति तच्चिरकालसेवयैव न तु साधुवत्प्रथमक्षणदर्शनादेवेति । अतः साधूनां देवादिभ्यो महदन्तरमिति भावः । प्रतिमापूजनाद्ब्रह्मत्वं च गत्वाऽमृतत्वं च गच्छतीति सामवेदीयप्रतिमोपनिषदि प्रतिमार्चनमपि मोक्षहेतुरुक्तस्तच्च क्त्वाप्रत्ययेन पूर्वकालविहितेन पूजनानन्तरं चिरकालेनैव हरिं नत्वा ग्रामं गच्छतीतिवज्ज्ञेयम् । एवकारेण साधूनां दर्शनसमकालमेव पावकत्वमुक्तम् ॥ ३१ ॥ सोऽर्हत्तमः । यतः श्रेष्ठोऽतो हेतोः । गमेः परस्मैपदित्वादार्षत्वाश्रयणस्यापि वक्रत्वेनर्जु पन्था एव श्रेयानित्यादाह—यद्वेति । इत्यर्थ इति—'स्वः स्वकीये धनेऽपि च' इति कोशात् ॥ एतावता यद्विवक्षितं तदाह—स साधुत्वेनोक्तमाहात्म्यः पितृव्यत्वेनास्मत्प्रियतरः साधुत्वेन परोपकारकश्च नः सुहृदां यादवानां मध्येऽतिप्रशस्यश्च भवान् । वै प्रसिद्धम् । पाडवानां या जिज्ञासा घृतराष्ट्रश्रये ते कथमवतिष्ठन्त इति पर्यालोचनं तदर्थम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नोऽस्माकमिति विनयेनात्मनः साधारण्यापादनार्थं श्रीबलदेवाद्यपेक्षया । गुरुरुपदेष्टा बन्धुश्च हिताचरणेन । तत्र श्लाघ्यः परमोत्तमत्वात् किम्वास्य सर्वैरप्यनुषङ्गः । नित्यमेत्यस्य परेणान्वयः । नित्यमित्यर्थः । आपद्भ्यो रक्ष्याः भोजनादिना पोष्याः सदुपदेशादिनानुकम्प्याश्च हि यतो वः प्रजा वयम् ॥२९॥ अतो महत्तमत्वाच्च विशेषतोऽस्माकं त्वमेव सेव्य इत्याशयेनाह । भवद्विधा इति । किं पुनः साक्षाद्भवन्त इत्यर्थः । अतो देवेभ्योऽपि भवद्विधा महत्तमा इति भावः । नृभिर्नित्यं सम्यङ्नितरां सेव्याः । अतो महाभागाः महान् भागः परमभागवतत्वप्राप्तिहेतुर्भागो भाग्यं येषां ते महत्तमा इत्यर्थः । अतोऽर्हत्तमाः सेवायोग्यतमा इत्यर्थः । पाठान्तरे अर्ह्यन्ते इति अर्हाः पूज्याः तेषु सत्तमाः नृभिरिति प्रायो मनुष्याणामेव श्रेयःसाधकत्वात् अत्र च स्वस्यापि पितृव्यतयोक्त्या यादवतया मनुष्यताममननात् श्रेयस्कामैरिति बहुत्वेन मुक्तिभगवद्भक्तिपर्यन्तानि श्रेयांसि गृह्यन्ते अतो भगवद्भागवतव्यतिरिक्तानां देवजातीनां न तावती शक्तिः । स्वल्पफलदायकत्वेऽप्यस्ति दोषान्तरमित्याह । देवा इति । अतो देवेभ्योऽपि भवद्विधा देवत्वादिजातिनिरपेक्षतया महत्तमा इति साधवस्तितिक्षव इत्यारभ्य त एते साधवः साध्वीतिपर्यन्तेन लक्षिताः ॥ ३० ॥ अतो यदि देवाः साधारणाः सेवितुं साक्षाल्लभ्यन्ते तदापि न साम्यं साक्षात्तु दुर्लभा एव ततः प्रतिमारूपेण

यत् सेव्यन्ते तत्र तु तदपेक्षयातिनिकर्ष इति वक्तुं प्रसङ्गतस्तीर्थानामपि साधारणानां तमाह । नहीति । ते तत्तद्रूपतीर्थदेवाः एकशेषत्वेऽपि साधारणानां तमाह । नहीहि । ते तत्तद्रूपतीर्थदेवाः एकशेषत्वेऽपि नपुंसकत्वाभाव आर्षः । पुनन्ति चित्तमलतः शोधयन्ति तद्दर्शनादेवेति प्रथमक्षणदर्शन एवेदं तुल्यते द्वितीयक्षणादौ तु नेति भावः ।। ३१ ।। एतावता यद्विवक्षितं तदाह । स साधुत्वेनाक्तमाहात्म्यः विशेषतश्च नोऽस्माकं सुहृदो यादवास्तेषां मध्ये किम्वा सुहृदां ज्ञातीनां ना मध्ये वै प्रसिद्धौ श्रेयश्चिकीर्षया पाण्डवानां या जिज्ञासा धृतराष्ट्राश्रये ते कथमवतिष्ठन्त इति पर्यालोचनं तदर्थम् ।। ३२ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नोऽस्माकमिति सहजविनयादिनात्मनः साधारण्यापादनार्थं श्रीबलदेवाद्यपेक्षया, गुरुरुपदेष्टा बन्धुश्च हिताचरणेन; तत्र च श्लाघ्यः, परमोत्तमत्वात् । किंवा अस्य पदस्य सर्वैरप्यनुषङ्गः । नित्यदेत्यस्य परेणान्वयः । रक्ष्या आपद्भ्यः, पोष्या भोजनपायनादिना, अनुकम्प्याश्च सदुपदेशादिना । हि यतो वः प्रजा वयम् ।। २९ ।। अतो महत्तमत्वाच्च विशेषतोऽस्माकं त्वमेव सेव्य इत्याशयेनाह—भवद्विधा इति । गुणादिना कथञ्चिद्भवदनुकारिणोऽपि, किं पुनः साक्षाद्भवन्त इत्यर्थः । नृभिर्नित्यं सम्यङ् नितरां सेव्याः, यतो महाभागाः परमपुण्यवन्तः, अतोऽर्हत्तमाः सेवायोग्यतमा इत्यर्थः । पाठान्तरे अर्हन्त इत्यर्हाः पूज्यास्तेषु सत्तमाः । नृभिरिति प्रायो मनुष्याणामेव श्रेयःसाधकत्वात् । तत्र च स्वस्य तत्पितृव्यक्तोक्त्या यादवतया मनुष्यत्वमननात्, तत्कारणं चोक्तमेव । संशब्द-निशब्दाभ्यामन्यसेवा तु कदाचित् कथञ्चिदेव कार्य्येति बोध्यते ।। ३० ।। ननु तर्हि देवाः किं न सेव्या एव ? तत्राह—न हीति । तीर्थानीति दृष्टान्तत्वेन, अतएव 'ते' इति पुंस्त्वेन निर्देशः, अन्यथा तानीति स्यात् । अन्यत्तैर्व्याख्यातम् । भावस्त्वयम्—मृच्छिलामया अपि पूज्याः, किं पुनर्ज्योतिर्म्मयाः सात्त्विकाः, साक्षादनेन पूर्व्वोक्तसंनिशब्दसूचितार्थस्य विषयो दर्शितः, किन्तु तत्त्वतः साधव एव तीर्थानि देवाश्चेति साधव एव भक्त्याधिकं सेव्या इति, यतस्ते देवा बहुकालसेवनादेव पुनन्ति, पापादिमलतश्चित्तं शोधयन्ति ।। ३१ ।। स साधुत्वेनोक्तमाहात्म्यः; विशेषतश्च नोऽस्माकं सुहृदो यादवास्तेषाम्; किंवा सुहृदां यादवज्ञातीनां नो मध्ये । वै प्रसिद्धौ । जिज्ञासार्थं श्रेयश्चिकीर्षयैव तेषां धृष्टस्य च वृत्तं ज्ञातुम् ।। ३२ ।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अर्हत्तमाः उत्कृष्टतमाः देवा इन्द्रादयः स्वप्रयोजनपराः नतु साधवः ते परोपकारपराः ।। ३०—३३ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह । त्वमिति सप्तभिः । त्वं नोऽस्माकं गुरुर्हितकृत् पितृव्यः पितुर्भ्राता अनेन पूज्यत्वमुक्तं श्लाघ्यो बन्धुश्च नतु कंसादिवन्निन्द्यबन्धुर्नाप्युपेक्ष्यः अपि तु प्रशस्यबन्धुरनेनान्योऽन्यप्रीतिविषयत्वमुक्तं त्वमेवं विधः वयं तु रक्ष्यास्त्वयेति शेषः । गुरुत्वाद्धितोपदेशेनाहिताद्रक्ष्याः पोष्याः पितृव्यत्वात् अनुकम्प्या मद्विषयकप्रीत्याश्रयत्वाद्दयनीयाः वो युष्माकं प्रजाः पुत्रा वयमित्यर्थः । अतो न वयं पूज्याः किन्तु त्वमेवेति भावः ।। २९ ।। न केवलमस्माकमेव यूयं पूज्या अपि तु सर्वेषामपीति सहेतुकमाह । भवद्विधा इति । भवादृशा भागवता अत एवार्हसत्तमाः उत्कृष्टतमाः अत एवात्मविशुद्धिरूपश्रेयस्कामैः सर्वैर्कानवैर्नित्यं सन्निषेव्याः ।। ३० ।। नन्वेवमपि श्रेयस्कामैर्गङ्गादिपुण्यनदीजलानां मृच्छिलामयभगवत्प्रतिमानाम् एव निषेव्यतायाः पावित्र्यावहत्वादित्यत आह । नहीति । अम्मयानि जलमयानि गङ्गादीनि तीर्थानि न भवद्विधा इव पावनकराणि पुनन्तीत्यस्यापकर्षो वा न तथा पुनन्तीत्यर्थः । तथा मृच्छिलामया देवाः श्रीभगवत्प्रतिमाश्च न यथा भवद्विधाः पुनन्ति किं तु प्रकारान्तरेण पुनन्तीत्यर्थः । अभिप्रेत वैषम्यं विशदयति । त इति । तानि च ते च पुंशेष आर्षः अम्मयानि देवाश्च उरुकालेन स्नानपानपरिचर्य्यादिसहचरितेन दीर्घेण कालेन पुनन्ति साधवो भवद्विधास्तु दर्शनादेव पुनन्ति अत्र केचिदेवं व्याचक्षते किं देवादयो न सेव्या एवेत्यत आह । नहीति । अम्मयानि तीर्थानि मृच्छिलामयाश्च देवा न भवन्ति न अपि तु भवन्त्येवेत्यर्थः तथापि साधूनां तेषां च महदन्तरम् इत्याह । ते पुनन्तीति । तच्चिन्त्यं देवाः स्वार्था न साधव इत्यनेनैवासेव्यत्वस्योक्तत्वात् पुनरसेव्यत्वाशङ्कापरिहारयोरयुक्तत्वात्सव्यत्वापादकपवित्रत्वापादकत्वतदभावयोरेव संशयोदयात् एत एव ते पुनन्त्युरुकालेनेति पवित्रताकरत्वतारतम्योक्तिः सङ्गच्छते किम्वा त्रयाणां चातीर्थत्वादेवत्वादिशङ्कायां हि नञ्द्वयं प्रकृतमर्थं सूचयतीति न्यायेन तीर्थत्वदेवत्वस्थिरीकरणोपपत्तिः तदा ह्येवमाशङ्कनीयं तर्हि किमम्मयानि न तीर्थान्येव मृच्छिलामयाः किं न देवा एवेति न च पूर्वग्रन्थादियं शङ्कोदेति अतो यथोक्त एवार्थः ।। ३१ ।। किंचिच्चिकीर्षया प्रागादिति यदुक्तं तत्कार्यमादिशति । स इति स उक्तविधो भवान् नोऽस्माकं ये सुहृदस्तेषां मध्ये श्रेयानतो नः श्रेयः कर्तुमिच्छया पाण्डवानां जिज्ञासार्थं सुखदुःखविचारार्थं हास्तिनापुरं गच्छ ।। ३२ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अर्हाणां पूज्यानां मध्ये श्रेष्ठाः देवा स्वार्थाः स्वप्रयोजनरता आत्मार्चकेभ्योऽर्चनादितृप्तिलक्षणप्रयोजनं प्राप्य फलानां दातारः नतु सर्वसमा इत्यर्थः । साधवः सर्वतुल्याः न स्वार्थपरायणाः परार्थैकनिष्ठा इत्यर्थः । समा स्त्रीवत्सरे धातुसर्वतुल्येषु वाच्यवदिति यादवः ।। ३० ।। देवा अपि हि अम्मयादिशब्दवाच्या न भवन्ति तत्र सन्निहितत्वात् तासां देवशब्दवाच्यत्वमिति

भावेनाह । नहीति । अम्मयानि जलमयानि तीर्थशब्दवाच्यानि न भवन्ति किन्तु तत्संहितानि दैवतानि किमत इति तत्राह । त इति । ते उरुकालेन कृतया सेवया ॥ ३१ ॥ पाण्डवानां वृत्तिजिज्ञासार्थं किचिकीर्षयेत्यस्य विवरणमेतत् गजेन सम आह्वयो यस्य स तमा हस्तिनापुरमित्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रेयस्कामैरिति । बहुत्वेन मुक्तिभगवद्भक्तिपर्यन्तानि श्रेयांसि गृह्यन्ते अतो देवजातीनां न तावती शक्तिः स्वल्पफलदायकत्वेऽप्यस्ति दोषान्तरमित्याह । देवा इति ॥ ३० ॥ अतो यदि देवाः सेवितुं साक्षाल्लभ्यन्ते तदापि न साम्यं साक्षात्तु दुर्ल्लभा एव ततः प्रतिमारूपेण यत्सेव्यन्ते तत्र तु तदपेक्षया त्वतिनिकर्ष इति वक्तुं प्रसङ्गतस्तीर्थानामपि तमाह । नहीति । पुनन्ति चित्तमलतः शोधयन्ति ॥ ३१-३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

न ह्यस्मयानीत्यादि । अस्मयानि तीर्थानि न ? अपि तु तीर्थान्येव; मृच्छिलामया देवा न ? अपि तु देवा एव, किन्तु तानि ते चारुकालेनैव पुनन्ति, साधवस्तु दर्शनादेवेति विशेष इति । स्वभक्तमहिम-ख्यापनार्थमक्रूरमुद्दिश्य भगवता गदितम्—तस्यापि भक्तत्वात् ॥ ३१-३६ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

न ह्यस्मयानीत्यादि । अस्मयानि तीर्थानि न ? अपि तु तीर्थान्येव । मृच्छिलादयो देवा न ? अपि तु देवता एव । किन्तु उरुकालेनैव पुनन्ति, साधवस्तु दर्शनादेवेति भावः ॥ ३१-३६ ॥

इत्यष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रजाः पुत्रतुल्याः । एवं व्यवहारदृष्ट्या । त्वमस्माकमादरणीय एव परमार्थदृष्ट्या तु त्वं परमवैष्णवत्वात् पूज्य एवेत्याह । भवद्विधा इति । अर्ह्यन्त इत्यर्हाः पूज्यास्तेषु सत्तमाः । ननु नृभिर्देवाः सेव्या इति प्रसिद्धिस्तत्राह । देवाः खलु स्वार्थाः स्वकार्यसाधनपराः । नतु तथा साधवः । ते तु परानुग्रहकातरा एवेति भावः ॥ २९-३० ॥ अम्मयानि तीर्थानि नहीति शिरश्चालने नञ् अपि तु एवं देवा अपि तु भवन्त्येव एवं देवा अपि किन्तु साधूनां तेभ्यो महदन्तरमित्याह । ते इति । एकशेषे पुंस्त्वमार्षं दर्शनादपि ॥ ३१ ॥ अतः पितृव्यत्वेनास्मत्प्रियंकरत्वात् साधुत्वेन परोपकारकत्वाच्च इदं त्वया कर्त्तव्यमित्याह । स इति । गच्छस्व गच्छ स्वेति सम्बोधनं वा ॥ ३२ ॥

गूढार्थदीपिनी

हि यतः वो युष्माकं प्रजाः पुत्राः स्मः ॥ २९ ॥ अर्हसत्तमाः योग्यतमाः । स्वार्थाः स्वार्थसाधनपराः । साधवस्तु परार्थसाधनपराः । साध्नोति परकार्यमिति व्युत्पत्तेः ॥ ३० ॥ अम्मयानि तीर्थानि मृन्मयाः शिलामयाश्च देवा न सन्ति अपि तु सन्त्येव । अथाऽपि साधूनाम् अपेक्षाकृतवैशिष्ट्यं मार्गप्रदर्शकत्वात् ॥ ३१ ॥ नोऽस्माकं सुहृदां मध्ये श्रेयान् श्रेष्ठतमो भवान् । अतः हे स्व आत्मीय त्वं गच्छ ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वो युष्माकम् ॥ २९ ॥ देवाः स्वार्थाः स्वः स्वकीयः अर्थ एव येषां नतु परमात्मा इत्येवमर्थप्रियाः साधवस्तु नार्थप्रियाः किन्तु परमात्मप्रियाः ॥३०॥ अम्मयानि तीर्थानि दर्शनान्न पुनन्ति मृच्छिलामया भूप्रदेशाः क्षेत्राणि च दर्शनान्न देवाश्च दर्शनान्न पुनन्ति किन्तु ते सर्वे उरुकालेन सेविताः पुनन्ति साधवस्तु दर्शनादेव भगवच्चरणस्पृष्टाः मृदादिप्रदेशाः अम्मयानि तीर्थानि चात्र प्रयोजनार्हाणि "धन्या अहो अमी आल्यः गोविन्दाङ्घ्र्यब्जरेणवः यान् ब्रह्मेशो रमादेवी दधुर्मूर्ध्न्यघनुत्तये यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभू"दित्याद्युक्तेः ॥ ३१ ॥ हे स्व ! अक्रूर वः सुहृदां मध्ये भवान् श्रेयान् श्रेष्ठोऽतः पाण्डवानां श्रेयश्चिकीर्षया जिज्ञासार्थं तेषां रहस्यजिज्ञासार्थं च हस्तिनापुरं गच्छ ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवान् लौकिकवैदिकविविधशास्त्रप्रकारेण तं मोहयन्नाह । त्वं नो गुरुरिति त्रिभिः । हितोपदेशगुरुः प्रायेण धनुर्पोऽभ्यासं तं कारितवानिति लक्ष्यते । अवश्यं केनचिल्लोकन्यायेन धनुःशिक्षणीयम् । अन्यश्चात्रार्थे गुरुर्नोक्तः भगवांश्च सत्यमेव

वदतीत्यर्थादयं नो गुरुः न इति बलभद्रादीनामभिप्रायेण बालाभ्यासं कारयति पितृव्यः स्पष्टश्चकाराद्धितकारी न ह्यन्यः अन्यत्र क्वापि सतः स्वगृहे समानयति श्लाघ्यः महत्त्वेन प्रसिद्धः पितृव्यादीनां सापत्न्याभाववत् भ्रातृव्यत्वात् अन्यथा त्वाशङ्क्याह । बन्धुश्चेन्नित्यदेति । सर्वदा बन्धुकृत्यमेव करोति एवं चकारेण सहपञ्चधर्मास्तस्मिन्निरूपिताः ततोऽन्यथा पञ्चधर्मान् स्वस्मिन्निरूपयति । वयं त्विति । तु शब्दः पूर्वसम्बन्धेन तुल्यतां वारयति । गुरुस्तु रक्षकः भगवता साधनेषु दत्तेष्वपि बुद्ध्यभावे रक्षासम्भवाद्वयं रक्ष्याः पितरः पोषकाः पुत्राः पोष्याश्चकारान्न वयं भवद्धितकारिणः किन्तु भवन्त एव अर्थाद्दयापात्रमित्युक्तं भवति । अनुकम्प्याः श्लाघ्या हि नानुकम्प्याः सर्वदा हिताचरणं पतिभिः कर्तव्यं वो युष्माकमिति वसुदेवादीस्तोनकीकृत्य निरूपयति । अन्यथा स्तुतित्वं ज्ञायेत ।२९।। एवं लौकिकोत्कर्षमुक्त्वा प्रवृत्तिप्रकारेण वैदेहिकोत्कर्षमाह । भवद्विधा इति । यदि सर्वप्रकारेणोत्कृष्टास्ते सर्वैरुपास्याः । भवद्विधा इति । तेषामुत्कर्षो निरूपितो यादृशास्तत्रापि महाभागाः परमभाग्ययुक्ता इति तेषां संपन्निरूपिता तत्राप्यर्हत्तमाः उत्तमा ये उपकारकर्तारः समृद्धाः सर्वे सम्प्रतिपन्नास्ते सर्वैरुपास्या इत्यर्थः । तत्रापि श्रेयस्कामैः अनेन स्वार्थमेवोपासनमुक्तं दृष्टार्थत्वं च निरूपितम् । नृभिरिति । मनुष्याधिकारो निरूपितः । तेनास्माकमिदमावश्यकमित्यर्थः । ननु शास्त्रे देवा एव सेव्या न त्वन्य इति चेत्तत्राह । देवाः स्वार्थाः स्वार्थं ज्ञात्वैव हितं कुर्वन्ति । साधवस्तु नैवम् । अतो देवभजनापेक्षयापि साधुभजनमेवोत्तमं किञ्च निवृत्तिमार्गे तीर्थानि तीर्थस्थानानि तदपेक्षयाप्येत एव सेव्या इत्यर्थः ।। ३० ।। नह्यम्मयानि तीर्थानीति । तीर्थेषु स्नात्वा तदधिष्ठातृदेवतापूजनं कर्तव्यं तदा तीर्थं कृतं भवति तदुभयमप्यप्रयोजकमित्याह । नह्यम्मयानीति । तीर्थशब्देन जलाभिमानिनीदेवतोच्यते सा चिन्मयी देवता च चिदानन्दमयीत्येव शास्त्रमर्यादा अम्मयानि तु तीर्थानि न भवन्ति देवा अपि मृच्छिलामया न भवन्ति । स्थानस्य देवतापक्षे मृन्मयत्वं प्रतिमाया देवतात्वपक्षे तु शिलामयत्वमुभयमपि लोकप्रसिद्धं निवार्यते शास्त्रप्रामाण्यात् अन्यथा शास्त्रमनुवादकं सदप्रमाणं भवेत् किञ्च अत एव साधनोपदेष्टारः भक्तिप्रवर्त्तका वा दर्शनमात्रेणैव ज्ञानभक्त्योः साधितत्वात् फलतोऽप्युत्कर्षः ।। ३१ ।। एवं स्तुत्वा सम्मोहमुत्पाद्य स्वाभिलषितं करिष्यतीति अभिज्ञाय किञ्चिदाज्ञापयति । स भावनिति त्रिभिः । तेषु त्रिविधं हि कार्यं कर्तव्यं मोक्षः सम्पादनीयः भक्तिर्वा पाण्डवेषु राज्यं वा देयं शत्रवश्च मारणीया इति सः सर्वथोपकारकर्त्ता भवान् तत्रापि सुहृदां भगिनीभागिनेयानां वै निश्चयेनेति तेऽवश्यं पालनीया इति पुरुषस्य पितृवर्गो वा रक्षको भवति तत्रापि तत्र पितृवर्गो न तेषां रक्षकः पितुर्निवृत्तत्वादन्येषां प्रतिकूलत्वादिति वक्ष्यति अत एव वयमेव सुहृदः अस्माकं मध्ये त्वं च श्रेयान् अतः श्रेयश्चिकीर्षया हिताचरणार्थं गजेन समाह्वयं हस्तिना पुरं गच्छ अनेन प्रसिद्ध्या तत्र गमनं न निन्दितं भवति गुप्तस्थानेषु न तिष्ठन्तीत्यर्थः ।। ३२ ।।

श्रीसुबोधिनी–सारः

नोस्माकं गुरुस्त्वं पितृव्यः श्लाघ्यः प्रशस्यो बन्धुश्च त्वं नित्यदा सदा वो युष्माकं प्रजाः पुत्रा वयं रक्ष्याः पालनीयाः पोष्या अनुकम्प्याः स्मो हि युक्तम् ।। २९ ।। भवद्विधाः त्वत्सदृशा महाभागा अर्हसत्तमा अतिश्रेष्ठाः श्रेयस्कामैः शुभेप्सुभिर्नृभिर्नित्यं निषेव्या निषेवितुं योग्याः स्वार्थाः स्वकार्यसाधनपरा देवा न निषेव्याः साधव एव देवा न स्वार्थाः परोपकारकत्वात् ।।३०।। अम्मयानि जलप्रधानानि तीर्थानि मृच्छिलामया मृन्मयाः शिलामया देवा न भवन्तीति न अपि तु भवन्त्येव किं तु ते उरुकालेन सेवया पुनन्ति साधवस्तु दर्शनादेव पुनन्ति ।। ३१ ।। नोस्माकं सुहृदां मध्ये भवान् श्रेयान् एवातः पाण्डवानां श्रेयश्चिकीर्षया कर्तुमिच्छया जिज्ञासार्थं च गजाह्वयं हस्तिनापुरं त्वं गच्छस्व प्रयाहि ।। ३२ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह—त्वमिति सप्तभिः । त्वं नोऽस्माकं गुरुः पूज्यः, यतः पितृव्यः पितुर्भ्राता च । श्लाघ्यः प्रशंसनीयो बन्धुश्च । वयं तु नित्यदा भवता रक्ष्याः कुमार्गतः शत्रुभ्यश्च निवर्तनीयाः, पोष्या वर्धनीयाः अनुकम्प्याः, कृपायोग्याश्च । हि यस्माद् वो युष्माकं प्रजाः पुत्रादिरूपाः ।। २९ ।। 'न केवलमस्माकमेव यूयं पूज्याः, अपि तु सर्वेषामपि' इति सहेतुकमाह—भवद्विधा इति । श्रेयस्कामैर्मोक्षादिफलार्थिभिर्नृभिर्भवादृशा नित्यं निषेव्याः । तत्र हेतुमाह—अर्हसत्तमा इति । उत्कृष्टतमा इत्यर्थः । तत्रापि हेतुमाह—महाभागा इति । अनेकजन्मानुष्ठितपुण्यवन्त इत्यर्थः ।। ननु 'देवानां सेव्यत्वं प्रसिद्धम्' इत्याशङ्क्याह—देवा इति । देवाः स्वार्थाः स्वार्थमपेक्ष्य उपकारं कुर्वन्ति । साधवः भागवतास्तु न तथा, किन्तु केवलं परमार्थसाधनपराः ।। अतो देवाद्यपेक्षयापि साधूनां सेव्यत्वमिति भावः ।। ३० ।। हेत्वन्तरेणापि देवादिभ्यः साधूनामुत्कर्षमाह–नहीति । साधूनामपेक्षया न अम्मयानि जलमयानि गङ्गादितीर्थान्युत्कृष्टानि, न वा मृच्छिलामया देवा उत्कृष्टाः । 'कुत' इत्यपेक्षायामाह—हि यस्मात्ते मृच्छिलामया देवा उरुकालेन सेविताः पुनन्ति, साधवस्तु दर्शनात्तत्क्षण एव ज्ञानभक्त्याद्युपदेशमात्रेण पुनन्तीति साधव एव सेव्या इत्यर्थः ।।३१।। 'किञ्चित् चिकीर्षयन् प्रागात्' इत्युक्तं तदेव कार्यमादिशति–स उक्तविधः साधुर्भवान् नोऽस्माकं ये सुहृदस्तेषां मध्ये श्रेष्ठः, अतः पाण्डवानां श्रेयश्चिकीर्षया तद्वृत्तजिज्ञासार्थं गजसाह्वयं हस्तिनापुरं गच्छस्व गच्छेत्यन्वयः ।।३२।।

अन्वितार्थप्रकाशिका

त्वमिति । त्वं नोऽस्माकं गुरुः पूज्यः यतः पितृव्यः पितुर्भ्राता च श्लाघ्यः प्रशंसनीयो बन्धुश्च । वयं तु नित्यदा । दा आर्षः । भवता रक्ष्याः । कुमार्गतः शत्रुभ्यश्च निवर्तनीयाः पोष्या वर्धनीयाः अनुकम्प्याः कृपायोग्याश्च । हि यस्माद् वो युष्माकं प्रजाः पुत्रादिरूपाः स्मः ॥ २९ ॥ भवदिति श्रेयस्कामैः मोक्षादिफलार्थिभिर्नृभिर्भवादृशाः । अर्हसत्तमाः उत्कृष्टतमा महाभागाश्च नित्यं सेव्याः । देवास्तु स्वार्थाः स्वः स्वीयोऽर्थो येषां यज्ञादिकमपेक्ष्योपकारकाः । साधवस्तु न तथा स्वार्थमनपेक्ष्यैवोपकारकाः । अतो देवापेक्षया साधवः सेव्याः । वस्तुतः साधव एव देवास्त एव सेव्याः ॥ ३० ॥ न हीति । अम्मयानि तीर्थानि पुनन्ति किन्तु शीघ्रं न पुनन्ति एवं मृच्छिलामयाः देवा अपि शीघ्रं न पुनन्ति ते उरुकालेन पुनन्ति । साधवस्तु दर्शनादेव शीघ्रं पुनन्ति । यद्वा । अम्मयानि तीर्थानि मृन्मया देवाश्च न भवन्तीति न परन्तु साधुभ्यस्तेषां महदन्तरमित्याह ते इति । यद्वा । अम्मयानि तीर्थानि साधुभ्यो नोत्कृष्टानीत्यादि तानि च ते चेति । एकशेषे क्लीबत्वाभाव आर्षः ॥३१॥ स इति । स उक्तविधः साधुर्भवान् नोऽस्माकं ये सुहृदस्तेषां मध्ये श्रेष्ठः अस्ति अतः पाण्डवानां श्रेयश्चिकीर्षया तद्वृत्तजिज्ञासार्थं गजसाह्वयं हस्तिनापुरं गच्छस्व गच्छ । तङार्षः । यद्वा । हे स्व स्वीयेति पृथक्पदम् ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अर्हसत्तमाः पूज्येष्वपिश्रेष्ठाः साधवः नृभिः निषेव्याः स्वार्थपरादेवान् सेव्याः ॥ २९ ॥ अथ भगवद्भक्तसाधूनां माहात्म्यमाह नहीति । जलप्रधानानि तीर्थानि मृन्मया शिलामयाश्च देवाश्च न पुनन्तीति न किंतु ते उभयेऽपि उरुकालेन पुनन्ति साधवो ह्यैकान्तिकभक्तास्तु दर्शनादेव शीघ्रं पुनन्ति तानि तीर्थानि च ते देवाश्च ते इत्येकशेषे नपुंसकात्वाभाव आर्षः ॥ ३० ॥ सुहृदां मध्ये भगवान् श्रेयान् अतिश्रेष्ठः अतः पांडवानां श्रेयश्चिकीर्षया तेषां वन्तान्तस्य जिज्ञासार्थं च गजसाह्वयं हस्तिनापुरं गच्छस्व गच्छ ॥ ३१ ॥ पितरिपाण्डौ उपरते मृते सति मात्रा कुन्त्यां सह बालाः युधिष्ठिरादयः स्वपुरं गजसाह्वयं प्रतिराज्ञा धृतराष्ट्रेण आनीताः संतः वसन्ते निवसन्तीति श्रुतवन्तः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति । भक्तेनाक्रूरेण, इति एवं, अर्चितः, संस्तुतश्च भगवान्, हरिः श्रीकृष्णः, स्मितेन हास्येन सहितं सस्मितं यथा तथा, गीर्भिर्वाग्भिः एव, अक्रूरं संमोहयन्निव, प्राह ॥ २९ ॥ उक्तिमेवाह त्वमिति सप्तभिः त्वमिति । हे अक्रूर, त्वं, नोऽस्माकं, गुरुर्हितकृत्, पितृव्यः पितुर्भ्राता च, अनेन पूज्यत्वमुक्तम् । नित्यदा श्लाघ्यः, बन्धुश्च । न तु कंसादिवन्निन्द्यो बन्धुर्नाप्युपेक्ष्यश्चापि तु प्रशस्यबन्धुरेव । अनेनान्योन्यप्रीतिविषयत्वमुक्तम् । वयं तु, त्वयेति शेषः । रक्ष्याः । तव नो गुरुत्वाद्धितोपदेशेनाहिताद्रक्षणीया इत्यर्थः । पोष्याः पितृव्यत्वात्पितृवद्वर्द्धितव्या।, अनुकम्प्या अस्मद्विषयकप्रीत्याश्रयत्वाद्दयनीयाः हि यतः, वो युष्माकं, प्रजाश्च, पुत्रा वयमित्यर्थः । अतो न वयं पूज्याः किं तु त्वमेवेति भावः ॥ ३० ॥ न केवलमस्माकमेव यूयं पूज्या अपि तु सर्वेषामपीति सहेतुकमाह । भवद्विधा इति । भवद्विधा भवादृशाः, महाभागा भागवताः, अत एव अर्हसत्तमा उत्कृष्टतमाः, अत एव, श्रेयस्कामैः स्वविशुद्धतारूपश्रेयस्काममावद्भिः, नृभिः सर्वैर्मानवैः नित्यं निषेव्याः । ननु नृभिर्देवाः सेव्या इति प्रसिद्धं तत्राह । देवाः, स्वार्थाः स्वार्थसाधनपराः, साधवः स्वार्थाः, न, किं तु परानुग्रहपराः । परमार्थतस्तु साधव एव देवा इति त एव सेव्या इत्यर्थः ॥ ३१ ॥ ननु श्रेयस्कानां गङ्गादिपुण्यापः मृच्छिलामया भगवत्प्रतिमाश्च पावित्र्यावहत्वान्निषेव्यतया पुराणादावुक्तास्तत् किमनृतं तत्राह । नेति । अम्मयानि तीर्थानि, सेवितानि सन्तीति शेषः । न पुनन्तीति न, किं तु पुनन्त्येव । मृच्छिलामयाः देवाः भगवदर्चाद्याः, न पुनन्तीति न, पुनन्त्येव । तथापि, तत्पूजायां साधुपूजायां चैतावान्विशेषः । तानि च ते च ते, पुंशेष आर्षः । अविच्छिन्नतया संसेवने कृते सति, उरुकालेन, पुनन्ति । साधवस्तु, दर्शनादेव दर्शनमात्रत एव पुनन्ति । हि एतावान् विशेषः ॥ ३२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

त्वं नो गुरुरिति : १०.४८.२९.

भो भोस्तातवरेण्य—पुण्यजनन-प्रावीण्यपादाम्बुजद्वन्द्वालोकन-तारिताखिल-जगज्जाताऽनुकम्पाम्बुधे ।
सत्यं नाम किमेतदेव सुगिरो यद्यद् वदेयुर्महत्पादाः सज्जनमोदिनस्तदखिलं तादृङ् न को वा वदेत् ॥ ७५ ॥

भवद्विधा इति : १०.४८.३०.

यद्यप्यभीष्टदा देवास्तथाप्यन्यार्पितस्पृहाः । साधवस्तद्वरास्तस्मान्न कथं दीनवत्सलाः ॥ ७६ ॥

न ह्यम्मयानीति : १०.४८.३१.

चैतन्यं भावयित्वैव मृच्छिलामयदेवताः । प्रसाद्यास्तादृशाः सन्तः स्वत एवेति तद्वराः ॥ ७७ ॥

सर्वात्मभावमनसां युक्तमीदृग्वचो हि वः । जनधर्मजुषां तात सत्या एव गिरोऽपि नः ॥ ७८ ॥
यदुक्तं तातेन प्रथितवचसा तन्निखिलमप्यलं मय्यास्तां वा न परमयमेकः स्फुटतरः ।
स्वभावः सत्सौख्येऽनिशमनलसत्वं मम हृदो यदुद्योगश्चैवं तदखिल-परिक्लेशहरणे ॥ ७९ ॥
ममावेशस्तादृङ् नहि नृपपदेनापि धरणीपरित्राणे नो वा त्रिदशगण कल्याणकरणे ।
न वाऽन्यस्मिन् कस्मिन्नपि भवति यादृङ्निजजनोद्गतक्लेशोच्छित्त्यै तदवनधियोऽक्रूर सदिदम् ॥ ८० ॥

स भवानिति : १०.४८.३२.

श्रीदेशिकेन्द्रतनयार्पणतः कृतेष्टो धर्मो वृषापि च सुरभ्युदिताभिषेकात् ।
तत्पुत्ररक्षकतयाऽप्यहमर्पितेष्टः स्यामित्यलं भृशमुवाह स पार्थचिन्ताम् ॥ ८१ ॥
उद्दिश्य धर्मक्षण-पोषण-संस्थापनानि धृतजनुषः । युक्तैव धर्मचिन्ता दयानिधेस्तस्य साधुजनसुहृदः ॥ ८२ ॥
भूर्युपकृतं पुरा यद्वायुभुवा मयि ममापि तदिदानीम् । उचित तदवनचिन्ता प्रत्युपकृतिसमयकाङ्क्षिणोऽविरतम् ॥ ८३ ॥
धनञ्जयमुखेनैव मखभुक् सुखतोषणम् । सम्पाद्यस्तत्प्रसादोऽत्र तत्त्राणात्सततं मया ॥ ८४ ॥
साधुपार्थपरित्राण-चिन्तामहमिहान्तरे । न चेद्वहामि तत्सर्वाप्यपार्थास्यात्कृतिर्न किम् ॥ ८५ ॥
यद्यहं न कुलत्राणचिन्तोपेक्षितमानसः । तदासन्नकुलत्राणा प्रतिज्ञा मे मृषा न किम् ॥ ८६ ॥
सहदेवेन विधिना सुरक्लेशापनुत्तये । अथितो न कथं कुर्यां सहदेवेष्टचिन्तनम् ॥ ८७ ॥
इत्यालोच्यात्मनि श्रीशः स्वभक्तावनमानसः । पाण्डवानां शुभं कर्तुं श्रीशस्तं किमयोजयत् ॥ ८८ ॥ (कुलकम्)
विश्वात्मनो मम प्राणाः पाण्डवा हि बहिश्चराः । तद्रक्षणे विश्वरक्षा सिद्धेत्याधात् तदुद्यमम् ॥ ८९ ॥

कृष्णप्रिया

भगवान श्रीकृष्ण श्री अक्रूरजी के भक्ति प्रचुर वचनों के श्रवण कर कहने लगे कि हे आर्य ! आप तो हमेशा हमारे धनुर्विद्या के हितकारी पूज्य गुरु करके, प्रशंसनीय बन्धुजन, बाल काल के शिक्षादाता, एवं सदा हितका आप्तजन हो इस प्रकार पांचो प्रकार के जमों से गुरुजन हो । बाबा ! हम तो आपकी प्रजा होने से पालन पोषण रक्षण और अनुकम्पा के पात्र है ॥ २९ ॥ भगवान ने कहा हे पूज्यवर ! आपके समान महाभाग पुरुष सदा सर्वदा अर्चनीय एवं सेवनीय होने से मानवमात्र को आपकी सेवा करनी चाहिए जो अपना मङ्गल चाहते हैं । देव लोग भजन सापेक्ष फलद होते हैं तब सन्त पुरुष निरपेक्ष एवं सहज परोपकारी होते हैं ॥ ३० ॥ गंगादि तीर्थ केवल जल रूप नहीं है, देवता शिलारूप था मृत्तिका रूप नहीं हैं, वे चिरकाल पर्यन्त सेवा करने पर फल प्रदान करते हैं साधुजन तो दर्शन मात्र से फल देते हैं ॥ ३१ ॥ पूज्यवर ! आप साधुवर्य हैं आप से अनुरोध है कि आप हम बान्धवों का हित करने वाले है । अतः पाण्डवों के कल्याण करने की इच्छा से हस्तिनापुर पधारिये, उनकी क्या परिस्थिति है क्या कर रहे है यह सब वृत्तान्त प्राप्त कीजिए ॥ ३२ ॥

पितर्युपरते बालाः सह मात्रा [1]ऽतिदुःखिताः । आनीताः स्वपुरं राज्ञा वसन्त इति शुश्रुम ॥ ३३ ॥
तेषु राजाम्बिकापुत्रो भ्रातृपुत्रेषु दीनधीः । समो न वर्तते नूनं दुष्पुत्रवशगोऽन्धदृक् ॥ ३४ ॥
गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा । [2]विज्ञाय तद् विधास्यामो यथा शं सुहृदां भवेत् ॥ ३५ ॥
इत्यक्रूरं समादिश्य भगवान् हरिरीश्वरः । सङ्कर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] [5]अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

कर्दमक्षमा

अन्वयः –पितरि, उपरते, अतिदुःखिताः, बालाः, मात्रा, सह, राज्ञा, इह, आनीताः, स्वपुरम्, वसन्ते, इति, शुश्रुम ॥ ३३ ॥ तेषु, भ्रातृपुत्रेषु, दीनधीः, अम्बिकापुत्रः, राजा, दुष्पुत्रवशगः, अन्धदृक्, नूनम्, समः, न, वर्तते ॥ ३४ ॥ अतः, त्वम्, गच्छ, इदम्, साधु, वा, असाधु इति, तद्, वृत्तम्, जानीहि, तद्, वयम्, विज्ञाय, सुहृदाम्, यथा, सम्, भवेत्, तद्, विधास्यामः ॥ ३५ ॥ भगवान्, हरिः, ईश्वरः, इति, अक्रूरम्, समादिश्य, संकर्षणोद्धवाभ्याम्, सह, ततः, वै, स्वभवनम्, ययौ ॥ ३६ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्द्धे राजसलीला प्रमेयप्रकरणे अष्टचत्वारिंशोऽध्याये अन्वयाः सम्पूर्णाः ॥ ४८ ॥

---

१. सुदु–श्रीधर. वंशी. जीव. वीर. विज. शुक. ध. सु. । २. विचार्य–विज. । ३. पारमहंस्यां संहितायां–प्रा. पा. । ४. पूर्वार्द्धे–प्रा. पा । ५. सप्तचत्वा–विज. ।

श्रीधरस्वामीविरचिता भावार्थदीपिका

राज्ञा धृतराष्ट्रेण । वसन्ते निवसन्तीति । शुश्रुम श्रुतवन्तो वयम् ॥३३॥ दुष्टा ये स्वपुत्रा दुर्योधनादयस्तद्वशेन गच्छतीति तथा । यतोन्धदृगन्धनेत्रः ॥ ३४-३६ ॥

इति श्रीभा० म० दशमस्कन्धे पूर्वार्धे टीकायामष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

राज्ञा सह ऋषिभिरानीताः वसन्तः सन्ति । निजैश्वर्यमाच्छाद्य वदति-शुश्रुम इति ॥ जिज्ञासामेव स कारणं स प्रयोजनञ्चाह—त्रिभिः । उपरते शान्ते तादृशाऽऽदरणीयजनेष्वश्लीलवचनानर्हताख्यापनाय, बाला इत्यानयनसमयापेक्षया, राज्ञेत्यन्धस्यापि तस्याधुना दैवाद्राज्यप्राप्तिर्जातेति सूचितम् । शुश्रुम इति लौकिकलीलामाधुर्यमग्रे नूनमिति च ॥ ३३ ॥ तेषु पाण्डवेषु । अम्बिकापुत्रः धृतराष्ट्रः । दीनधीः मन्दबुद्धिः । अन्धदृगिहान्धपदमेव दृष्ट्यु पघातं वक्ति, पुनर्दृग्ग्रहणम् 'परिणतगजप्रेक्षणीयम्' इति वद्विशेष्यमात्रपरतयैवेति ज्ञापनायेति ध्येयम् नूनं वितर्के । समो न वर्तते, तत्कुतः—अम्बिकापुत्रः, पाण्डोर्वैमात्रेयत्वादित्यर्थः । हेत्वन्तरम्-दुष्पुत्रवशगः, तत्कुतः—दीनधीः क्षुद्रबुद्धिः । तदपि कुतः—अंधदृक् तदादीनां सामुद्रिके बहुदोषश्रवणात् ॥ ३४ ॥ तद्वृत्तं धृतराष्ट्रवर्तनम् । तत् तद्वृत्तं तथा विधास्याम इति । शं सुखम् । सुहृदां पार्थानाम् ॥ अधुनैव गच्छ तस्य राज्ञो वृत्तं वर्तनं साध्वसाधु वेति जानीहीत्यर्थः । तत्तथा ॥ ३५ ॥ इतीत्थम् । ततोऽक्रूरगृहात् ॥ भगवान्समग्रैश्वर्यादिपूर्णोऽपि हरिर्मनसैव दुष्टसंहारसमर्थोऽपि ईश्वरः सर्वनियन्तापि इति पूर्वोक्तानुनयप्रकारेणैव सम्यक्पुरस्कारपूर्वकमादिश्य ततोऽक्रूरगृहात्संकर्षणोद्धवाभ्यां सह, न त्वनुव्रजनार्थमक्रूरेणापीति तत्प्रस्थापनत्वरा दर्शिता । स्वेतित स्मिन्भवने तदनन्तरं स्वेच्छाविलासः सूचितः । वै संबोधने । तच्च लीलामाधुर्यानुभववैशिष्ट्याय ॥ ३६ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धेऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जिज्ञास्यमेव सकारणं सप्रयोजनञ्चाह । पितरीति त्रिभिः । उपरते शान्ते इति तादृशादरणीयजनेष्वश्लीलवचनानर्हताख्यापनाय बाला इत्यानयनसमयापेक्षया । राज्ञेत्यन्धस्यापि तस्याधुना द्वैवाद्राजत्वप्राप्तिश्च जातेति सूचितं शुश्रुमेति लौकिकलीलामाधुर्यं अग्रे नूनमिति च ॥ ३३ ॥ नूनं वितर्के समो न वर्त्तते तत् कुतः । अम्बिकापुत्रः पाण्डोर्वैमात्रेयत्वादित्यर्थः । हेत्वन्तरं दुष्पुत्रवशगः तत् कुतः दीनधीः क्षुद्रबुद्धिः तदपि कुतः । अन्धदृक् तदादीनां सामुद्रिके बहुदोषस्मरणात् । अधुनैव गच्छ तस्य राज्ञो वृत्तं साधु वा भवत्यसाधु वेति जानीहीत्यर्थः । तत्तथा । भगवान् समग्रैश्वर्यादिपूर्णोऽति हरिः मनसैव दुष्टसंहारसमर्थोऽपि ईश्वरः सर्वनियन्तापि । इति पूर्वोक्तानुनयप्रकारेणैव सम्यक् पुरुस्कारपूर्वकं आदिश्य ततोऽक्रूरगृहात् सङ्कर्षणोद्धवाभ्यां सहेति न त्वनुव्रजनार्थमक्रूरेणापीति तत्प्रस्थापनत्वरा दर्शिता स्वेति तस्मिन् भवने तदनन्तरं स्वेच्छामयविलासः सूचितः । वै सम्बोधने तच्च लीलामाधुर्यानुभववैशिष्ट्याय ॥ ३४-३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

जिज्ञास्यमेव सकारणमाह—पितरीति त्रिभिः । 'उपरते' इति विनयात्, मृते सति सुदुःखिताः । राज्ञे तु कनिष्ठभ्रातरि मृते स्वयमेव राज्यं कुर्वतेति दुष्टतां राजाभिमानमत्तताञ्च सूचयति । शुश्रुम इति स्नेहभरविवर्द्धनार्थं लोकरीत्यनुसारेण निजैश्वर्य्यगोपनात् । एवमग्रे नूनमिति च ॥ ३३ ॥ अम्बिकापुत्र इति साधारणजनोचितं वैमात्रेयत्वेन वैषम्यं सूचयति । नूनं वितर्के; भ्रातृपुत्रेषु समो न वर्त्तते, वैषम्यं प्रातिकूल्यमाचरति; यद्वा, यथा स्वपुत्रेषु तथा तेषु न स्यादित्यर्थः । यतो दीनधीरल्पबुद्धिर्दुष्टमतिर्वा; यतो दुष्पुत्रवशगः, अन्धदृग् जन्मनैवान्ध इत्यर्थः । अनेन राजानर्हत्वमपि सूचितम् ॥ ३४ ॥ अधुना इदानीमेव गच्छ, तस्य राज्ञो वृत्त साधु असाधु वा जानीहि । तत्तथा सुहृदामिति तद्योग्यतोक्ता ॥ ३५ ॥ सम्यङ्महाप्रसादप्रदानादिना आदिश्य; यतो भगवान् परमदयालुरिति पाण्डवानुग्रहस्याभिप्रायेण । हरिरिति पाण्डवद्वारा भूभारहरणस्य वा; ईश्वरो नियन्तेति दुर्य्योधनादिदुष्टदण्डनस्येति; वै अनुनये; सानुनयं समादिश्य; ततः समादेशतः पश्चादेवेति समादेशे परमासक्तिरुक्ता; यद्वा, ततोऽक्रूरभवनात्; संकर्षणोद्धवाभ्यां सहेति परमादरार्थं समादेशे तत्साहित्यम् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां

श्रीदशम-टिप्पण्यामष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अम्बिकापुत्रः धृतराष्ट्रः अन्धदृक् अन्धः ॥ ३४–३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पितरि पाण्डावुपरते स्वर्गं गते सति बाला अत एवातिदुखिताः राज्ञा धृतराष्ट्रेण स्वपुरं प्रत्यानीताः सन्तस्तत्राधुना वसन्तीति शुश्रुम ॥ ३३ ॥ अम्बिकापुत्रो धृतराष्ट्रः राजा भ्रातृपुत्रेषु युधिष्ठिरादिषु विषयभूतेषु दीना कृपणा धीर्यस्य तथाभूतः समो न वर्तते नूनं निश्चितं तत्र हेतुः दुष्पुत्रो दुर्योधनः तद्वशगः तत्रापि हेतुरन्धदृगज्ञः ॥ ३४ ॥ अतस्त्वं गच्छ साध्वसाधु वा तेषां पाण्डवानां वृत्तं वर्तनमवस्थानमिति यावत् जानीहि तद्वृत्तं विज्ञाय ततः सुहृदां पाण्डवानां शं सुखं यथा भवेत्तथा भवेत्तथा विधास्यामः करिष्यामः ॥ ३५ ॥ इतीति । इत्थं समादिश्याज्ञाप्य ततः सङ्कर्षणोद्धवाभ्यां सह स्वगृहं गतवान् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

शतशृङ्गगिरिनिवासिभिः ऋषिभिरानीता राज्ञा सह वसन्ते वसन्ति स्वमहिमानमाच्छाद्येति शेषः इत्यत आत्मनेपदम् ॥ ३३ ॥ तत्र हेतुर्ह्यन्धदृगिति तत्त्वज्ञानशून्यत्वात् ॥ ३४ ॥ तद्विधास्यामः तथा करिष्यामः शं सुखम् ॥ ३५–३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

राज्ञा धृतराष्ट्रेण वसन्ते वसन्ति ॥ ३३–३६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । अष्टचत्वारिंशकोऽयं दशमेऽजनि सङ्गतः ॥ ४८ ॥

गूढार्थदीपिनी

पितरि पाण्डौ उपरते मृते सा राज्ञा धृतराष्ट्रेण प्रत्यानीताः वसन्तः वसन्ति ॥ ३३ ॥ अम्बिकापुत्रो धृतराष्ट्र तेषु समो न वर्तते । कुतः दीनधीः क्षुद्र–बुद्धिः । तत्कुतः । दुष्पुत्रेति । तत्कुतः अन्धदृक् अन्धा विवेकहीना दृक् धीर्यस्य । यथेष्टं हेतुहेतुमद्भावः ॥ ३४ ॥ तस्य राज्ञो वृत्तं वर्तनं व्यवहारः । तेषां शं सुखं यथा स्यात्तथेत्यन्वयः ॥ ३५ ॥ वै एवार्थे ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गूढार्थदीपिन्यामष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वपुरमानीताः शतशृङ्गाख्यपर्वतान् मुनिभिरिति शेषः राज्ञा धृतराष्ट्रेण गृहीताः इति शेषः । वसन्ते तत्रैव निवसन्तीति शुश्रुम श्रुतवन्ता वयमित्यर्थः । तेषां पर्वते जन्म तत्रैव पितुर्मृत्युः तत आगमनादिकमादिपर्वणि द्रष्टव्यम् ॥ ३३ ॥ दुष्पुत्राणां दुष्टानां दुर्योधनादिपुत्राणां वशेन गच्छतीति तथा ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टचत्वारिंशाध्यायार्थप्रकाशः ॥ ४८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ पुरपुरन्ध्रीषु सतीषु सैरन्ध्रीं त्रिवक्रामवक्रां विधाय केवलं करुणापरवांस्तया याचित उचितकाले आगच्छाम्यगारमिति स्वोक्तं स्मरंस्तद्भक्तिप्रसन्नः सहोद्धवेनागादित्यादि प्रतिपाद्यतेऽत्र ॥ अथेत्यादिना । अथोद्धवागमनानन्तरं भगवान्सर्वात्मा सर्वदर्शनो विज्ञाय तत्प्रार्थनां स्मृत्वाऽनुग्रहोन्मुखो भूत्वेति यावत् कामतप्तायाः सैरन्ध्र्याः प्रीतिं यच्छन्गृहं ययावित्यन्वयः ॥१॥ महार्होपस्करोपेतं महान्त्यर्हाणि मूल्यद्रव्याणि येषां ते चोपस्करा आस्तरणादिकं तेनोपेतं युतं । उपस्करेति गतम् । कामोपायैस्तदुद्रेककरैर्जातीफलादिभिरुपबृंहितं पूर्णं मुक्तादामभिः पताकाभिर्मुक्तादामात्मकपताकाभिरिति वा वितानैरुल्लोचैः शयनैरासनैश्चोपबृंहितमिति वा मण्डितमिति वाऽन्वयः ॥ २ ॥ धूपैः सुरभिभिः कृष्णागुर्वादिकाष्ठजैर्दीपैर्मण्यात्मकैर्मुक्तादामानुरूप्यात् प्रसिद्धैर्वा धूपानुकूल्यात्स्रजश्च गन्धाश्च तैर्मण्डितमलङ्कृतं गन्धानां वैतदनुबन्धसाधनत्वादुपसंहारे निबन्ध इति केऽपि । यत्रकुत्र वा निबन्धः कार्यो गन्तुं निबन्ध इति ॥ ३ ॥ सा गृहमायान्तं तं कृष्णं । कदेत्यतोऽप्याह ॥ तमायातमिति । रात्र्यामित्यर्थः । औचित्यात् । अवेक्ष्यासनात्स्वोपविष्टात्सद्यः समुत्थाय सम्भ्रमादादरादराच्च । सम्भ्रमस्त्वादरे भय इत्यमरः । उत्थाय हि । जातसम्भ्रमेत्यपि पठन्ति । सखीभिः सह यथा येन प्रकारेणागन्तव्यं तथोपसङ्गम्य सम्यगिति वा सच्च तदामनं च तदेवादिर्येषां तैः सभाजयामासापूपुजत् ॥ ४ ॥ केवलं नैकलसभाजनं सा कृतवतीति चतुरोद्धवमपि यथोचितमानर्चेत्याह ॥

तथेति। साधु सम्यक् तयाभिपूजित आसनं चाभिमृश्य स्वामिसमीपे नोपवेष्टव्यं विष्टर इत्यभिमृश्येत्युक्तिः। उर्व्यां न्यषीदन्निषसाद दान्तं दन्तिदन्तविकृतं मृद्विति वा महाधनं बहुधनलभ्यं शयनं लोकाचरितानि विटकटकघटिताचाराननुव्रतोऽनुकुर्वन्विवेश। उद्धवं बहिरुपवेशयित्वेति सम्भावकोऽपि ॥ ५ ॥ यथोपविष्टा सिपिविष्टमुपससार सारसाक्षी किंवाऽऽत्मानमलङ्कृत्येत्यत आद्यमनभ्युपगमेन द्वितीयमभ्युपगमेन परिहरति। सेति। मज्जनमभ्यञ्जनमालेपो गन्धयक्षकर्दमादिना लेपनं दुकूलमेतदनुकूलं वासो भूषणान्यलङ्काराः सुधामृतं तदासवादिभिः शोभनं गन्धादिभिः सुधाभोजनं भुक्तपदार्थसौरभ्यजनित आमोद आसवो वा। सुधामृतं सुधा च भोजनं ज्ञेयं सुधा रात्रिरित्यनेकार्थध्वनिपदमञ्जरी। एतदादिभिः प्रसाधितात्मा प्रसाधितः सुरतोचितसाधनतामापादित आत्मा देहो यया सा सव्रीडं यथा तथा लीला तयोद्गतं स्मितं च विभ्रमाश्चेक्षितानि च तैरुपलक्षिता माधवमपससार उपसृताऽभूत् ॥ ६ ॥ नवः सङ्गमस्तज्जनिता ह्रीर्लज्जा तया विशङ्कितां शङ्कासहितां कान्तामाहूय कङ्कणभूषिते करे प्रगृह्य शय्यामधिवेश्य तया रामया रमण्या रेमे चिक्रीड। अनुलेपत्यार्पणेन पुण्यस्य महाधिकारिसम्पाद्यस्यैकदेशो लेशः स्वविषये स एव पूर्णो यस्याः सा तथेतः परं सद्यः फलविशेषस्य प्राप्यस्याभावाद्येन स एकदेशः सफलो भविष्यतीत्येकदेशोक्तिर्युक्ता स्यादित्यवधेयम्। अनुलेपार्पणस्य पुण्यं लात्यादत्ते ददाति चानुलेपार्पणपुण्यलः स इशो यस्याः सेति वा ॥ ७ ॥ योग्यतया समस्तमप्यनङ्गतप्तपदमुरोक्षिविशेषणत्वेनानङ्गतप्तकुचयोरनङ्गतप्तोरसोऽनङ्गतप्तयोरक्ष्णोरिति सम्बन्धनीयम्। रुजं विरहजज्वरांश्चरणेन कुचादिस्थापितेनैतेषां कमलतया चरणस्य सूर्यतया रोगमार्जनं युक्तमिति मृजतीत्युक्तिर्युक्ता। अनन्तमाकाशस्तत्र चरणं यस्य द्युमणेस्तद्रूपेणानन्तचरणेनेति तन्त्रावृत्त्यन्यतरेणान्वयः। नवपदरविभासेत्यादेः। अनन्तचरणेनेति च छेदः। अनन्तचरणे पादौ। पदङ्घ्रिश्चरणोऽस्त्रियामित्यमरः। जिघ्रन्ती न इव गन्धानुबन्धाद्वा घ्राणनपौरस्कर्यं युक्तमित्येवमुक्तिः। स्तनान्तरं वक्षस्तद्रूमानन्दमूर्तिं कान्तं दोर्भ्यां परिरभ्यातिदीर्घतापमजहाज्जहौ। अल्पीयो दिनगमनेऽपि तदनिष्पत्तिप्रयुक्तमतिदीर्घत्वं ज्ञेयम्। बहिः कान्तं परिरभ्यान्तर्मूर्तिं तदाकारमानन्दं बबन्धेति वा। इयत्सम्पत्सु धाममुक्तादामादिरूपिणी गन्धकर्त्र्योदास्यास्तत्राप्यनितरनररहोविषयत्रिवक्रकायायाः कथमिति चेत्। यतो वक्रा जाताऽवक्रा तत एव सर्वसमृद्धिः किं दुरशकेति पृच्छसि महात्मन्किमलभ्यं भगवति प्रसन्ने श्रीनिकेतन इत्यादेः ॥ ८ ॥

इतरापेक्षया तस्याः पुण्यं लेश इति द्रढयितुं तस्या मूढतां द्वाभ्यां श्लोकाभ्यामाह। सेति। कैवल्यनाथं मुक्त्यधिपतिं तद्दातारमिति यावत् दुष्प्रापमितरैरङ्गरागार्पणेन गन्धसमर्पणेन दुर्भगा दुर्दैवा सेदमयाचताहो ॥ ९ ॥ तदेव विशदयति। हे प्रेष्ठ इह मम गृहे कतिचिद्दिनानि भवतोऽष्यतां मया सह रमस्व च। हे अम्बुरुहेक्षण ते सङ्गं त्यक्तुं नोत्सह इत्याह ॥ १० ॥ तस्यै एव याचमानायै कामवरो हि काम एव वरस्तं दत्वा तां मानयित्वा सत्कृत्य मानद उद्धवेन सह सर्वेशो ऋद्धिमत्स्वधाम स्वगृहमगमत् ॥ ११ ॥ सिंहावलोकनन्यायेन ग्रन्थकृन्मौर्ख्यं सकौतुकचेताः स्मरन्विवृणोति दुराराध्यमिति। सर्वेश्वरं दुराराध्यं मनोऽग्राह्यं साकल्येनातद्विषयं विना प्रसादं समाराध्य गन्धार्पणेन तर्पयित्वा या एवं वृणीत साऽसौ कुमतिर्हि निश्चयः। तस्या मतेरसत्त्वादमोक्षाधायकत्वाद्रागादिदोषदुष्टत्वाद्वा कुमतिरिति। मनोऽग्राह्यं यथेष्टं या वृणीत वरयामासासत्त्वात् कुमतिर्हीत्यन्वयो वा। यो वृणीते मनोग्राह्यमसत्त्वात्कुमनीष्यसाविति पाठः प्रस्तुतासङ्गतः ॥ १२ ॥ ननु ग्रामागमनात्प्रागक्रूरस्य वचो दत्त दत्तं चानन्तरमनन्तेन मध्येऽध्वनः कुब्जायास्तत्कस्माद्व्यत्यासः। न च योषिदभिलाषतः प्रागगमनमिति स्वरतस्य युक्तं। न वा सर्ववेदितुर्विस्मरणं सम्भवत्यतः कथमिति चेत्सत्यं। अद्य श्वो वा श्वाफल्किगमनेऽपि वेदान्तनिष्णात इति ध्यानपरः सम्वर्तेत। कामार्ता नेयं जीवेद्राजीवलोचनेत्यालोच्य तथा पुण्यमल्पमल्पं च फलं चपलाक्ष्या अक्रूरस्य तु न तथेति सूचीकटाहन्यायेन वा मृदः सर्वत्र बाध्यत इत्यादेः कथं वाऽक्रूरोऽयमिति वा स इति विजानीहि। स्ववचनं सत्यं विधातुमक्रूरागारगमनं वक्ति। अक्रूरभवनमिति। सहरामोद्धवो रामोद्धवाभ्यां सहितः कृष्णः। आर्यरामसाहित्यं न तस्य रहस्यकार्यत्वात्सैरन्ध्रीगेहगमन इवेत्यनेन ध्वन्यते। अक्रूरभवनं किञ्चिद्वक्ष्यमाणमावश्यकं कार्यं चिकीर्षन्कर्तुमिच्छन् अक्रूरप्रियकाम्यया च प्रभुः प्रागात् ॥ १३ ॥ आराद्दूरतोऽभ्यनन्दत। अहो सत्यमकार्षीद्वचनं हरिरिति ननन्द ॥ १४ ॥ कृष्णं राममुद्धवं च तैरित्युतरानुकूल्यात् ॥ १५ ॥ पादवनेजनीरापः शिरसा सम्यग्धारयन्नस्वरैर्दिव्यैर्गन्धस्रग्भूषणोत्तमैरित्यर्हणेन पूजोपयुक्तपदार्थेन ॥ १६ ॥ अर्चित्वा शिरसाऽऽनम्य चाङ्कगतावुत्सङ्गगतौ। अङ्काविति प्रागगतौ। धूल्यामवगताविति च। अनेन तथा पादावित्यनेन च कृष्णचरणसंवाहमेवेति ध्वन्यते। मृजन् शोधयन्संवाहन्निति यावत् प्रश्रयावनतो भक्तिनम्रः ॥ १७ ॥ भवद्भ्यामवतारिताभ्यां कुलं पावितं तथा कृच्छ्रात्कंसकृतकष्टादुद्धृता दुरन्ताद्विना युवां दुष्पारात्। समेधितमभिवृद्धं च ॥ १८ ॥ प्रधानपुरुषौ मुख्यत एकोऽमुख्यत एक इति जगद्धेतू जगन्मयौ जगद्व्याप्तौ भगवद्भ्यां विना परं चेतनमपरमचेतनं चानियम्यं न चास्ति सर्वं नियम्यमेवास्तीति भावः। प्रभुर्हि जीवो जडमपेद्द्येत्यादेश्चेतनस्य परत्वं ॥ आत्मसृष्टं स्वनिर्मितमिदं विश्वं स्वशक्तिभिरिच्छादिस्वरूपशक्तिभिः सु अशक्तिभिस्तत्त्वदेवैश्च सहेत्यप्यर्थः। हे ब्रह्मन्पूर्ण। ब्रह्मेति वा पाठः सम्बुध्यन्तः। बहुधाऽणुत्वानणुत्वादिबहुप्रकारेण श्रुतिश्च तत्सृष्ट्वा तदेवानुप्राविशत्। एकं सन्तं बहुधा कल्पयन्तीत्येतदेतत्सजातीया तस्याः। प्रत्यक्षस्य च ब्रह्मादिज्ञानप्रत्यक्षस्य गोचरो विषयः सन्मीयसे भवान्ज्ञायते। घटोऽयमित्यादिनिर्दोषार्थेन्द्रियसन्निकर्षणलक्षणं वेति व्याकुर्वते ॥ २० ॥ तमेवार्थं सदृष्टान्तमाचष्टे।

यथेति । योनिषु भोगशरणेषु चराचरेषु भूतेषूत्पत्तिमत्सु चराचरेषु जङ्गमाजङ्गमेषु वस्तुषु मह्यादयो नानावर्णात्मना यथा भात्येवमात्मयोनिष्वात्मैव योनिः कारणं येषां तानि तेष्वात्मा व्याप्त आत्मतन्त्रः स्वतन्त्र इत्येतत्प्रवेशमात्रे मह्यादिनिदर्शनं । स्वातन्त्र्यादिकं न तत्रास्त्यत्रेति विशेषसूचकमिति ज्ञेयम् । केवलो जडामिश्रो बहुधा विभाति । एक ईयते बहुधेयते स पुरुषः स ईश्वर इति श्रुतेः ॥ २१ ॥ विश्वयोनित्वं स्पष्टयति । सृजसीति । रजस्तम सत्त्वगुणैस्त्वं विश्वं सृजसि पास्यथो लुम्पसि संहरसि । स्वतन्त्राभिः स्वशक्तिभिश्च । केवलत्वं स्पष्टयति । नेति । गुणकर्मभिर्न बद्ध्यसे ते ज्ञानात्मनस्ते क्व च देशे कलिवा हेतुः कारणं न नास्ति त्वमेव सर्वहेतुरित्यर्थः ॥ २२ ॥ कुतो भगवत उत्पत्त्यादिकं नास्तीत्यत आह । देहाद्युपाधेरिति । देहादेर्जन्मादेर्मुख्यस्योपाधेः प्रयोजकस्य कर्मादेरनिरूपितत्वाच्छास्त्रे हि यतो निरूपणं ततश्चिदात्मनो ज्ञानानन्दात्मकात्मवतः साक्षादुद्रवं कर्मनिर्मितशरीरप्राप्तिरूपो न हि स्यात् अतो देहाभावादेव न बन्धस्तत एव मोक्षस्तदधीनसत्त्व इति तौ नैव स्यातामिति नोऽस्माकं त्वयि त्वद्विषये विवेको विचारो रहस्यं प्रमेयमिति वा । विवेकः स्याज्जले द्रोण्यां विचारेऽपि रहस्यपीति विश्वः । निकाममस्मद्योग्यतामनुसृत्यास्तीति विशेषः ॥ २३ ॥ यस्मिन्समये तव भवो निरूपितः समयः पौरुषेयो यश्चेतरैरसुरप्रायैरन्यार्थतया नेष्यते तदा त्वमेव व्यासाद्यात्मनाऽवतीर्य समीकर्तुं सत्त्वोज्जम्भको भवसीत्याह । त्वयेति । त्वयोदितो राशीभूतो ऋङ्निगदाद्यात्मना व्यक्तीकृतः पञ्चमो वेदपथो निर्मित एकोऽनादिरिति पुराणः परोऽर्थतः पुराणः पुराणानि तदर्थानि सर्गे सर्गेऽन्यथैव तु । क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत् । पुराणानामन्यथारचनमेवानित्यत्वमित्यादेः । जगतोहितार्थमाशीर्विवक्षया । चतुर्थी चाशिषीत्यनेन न षष्ठीति ज्ञेयम् । तेन न तव कृत्यमिति भावः । यदा यदा पाषण्डानां पन्था ईश्वरोऽहमहं भोगीत्यादिमार्गो येषां तैरसद्भिर्बाध्येत दुरर्थलोडितो भवेत्तदा भवान्सत्त्वगुणं ज्ञानोत्तेजकं विभर्ति पोषयति तेन तानसतः खण्डयित्वा सन्मार्गं स्थिरीकरोषीति यावत् । स भवांस्त्वगुणं गुणाद्यविकृतं देहं बिभर्ति स्वीकरोतीति यावत् । यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमित्यादेः । द्वीपे भगिन्याश्च यमस्येत्यारभ्य ये ये च सन्तस्तमसानुविष्टास्तांस्तान्महावरेऽहमसौ विमुञ्चन् । चचार लोकानित्यन्तेन श्रीमदाचार्यमुक्तमत्रानुसन्धेयं । दत्तव्यासादिरूपेषु ज्ञानकार्यो जनार्दन इत्यादेः ॥ २४ ॥

कृष्णरामादिरूपेण बलकार्य इत्युक्ते स व्यासात्मैव त्वं प्रभोऽद्येदानीं वसुदेवगृहे देवक्यां स्वांशेन स्वः पद्मनाभात्मा स्वतन्त्रत्वात्तदंशेन केशेन कृष्णेन भूमेः सुरेतराणां दैत्यानां राज्ञामक्षौहिणीशतानां वधेन भारमपनेतुमवतारयितुं किञ्चामुष्य कुलस्य यदुकुलस्य यशो वितन्वन्नवतीर्णोऽसि । सुरा इतरे येभ्यस्ते सुरेतरस्तेषु मतो न सर्वनामकार्याभावशङ्का । सुरेतरांशराशामिति पाठे सुरेतरेषामंशा ये राजानस्तेषां । समासान्तनित्यतया मायातष्टमिति ज्ञेयं प्रमोद्यं प्रकणा लोकविलक्षण इति व्यवहर्तव्यं यद्वसुदेवगृहं भार्या तत्रैकपद्यं वा । वदः सुपि क्यप् चेत्येतद्व्याख्यायां कर्मणि प्रत्ययावित्येक इत्युक्तेः कौमुद्यां क्यपियजादित्वासम्प्रसारणं उक्तं चात्र । सा देवकी सर्वजगन्निवासभूता नितरां विरेजे । प्रभया जितं भरामीत्वादेः ॥ २५ ॥ हे ईश सर्व इति सर्वान्वयि । सर्वे देवाः पितरः सर्वाणि भूतानि सर्वे च नृदेवा राजानश्च त एव मूर्तौ शरीरे यस्य स विश्वम्भर इति यावत् । अनेन त्वय्यायाते ते सर्वेऽपि समायाताः पूजिते पूजिता एवेति न तत्सपर्यानाचरणान्यौन्यमिति ध्वनयति । यत्पादशौचसलिलं गङ्गा त्रिजगत्पुनाति पाचयति । जगगुरु हे अधोक्षज स त्वं यद्यतो याः प्रविष्टास्ता नो वसतयो गृहा भूरिभागा महासम्पत्प्रदान्यभूवन्खलु निश्चयः । जगतो मातरिश्वनस्तेन व्याख्यातो मरुता विधिस्तद्गुरुरिति वा गतम् । अङ्गावबद्धास्त्वित्यादेः ॥ २६ ॥ भजतः सुहृदः शोभनमनसोऽभजतः फलमलक्षयित्वा सेवमानस्यापि यस्योपचयापचयौ वृद्धिह्रासौ न तमात्मानं देहं ददाति सर्वांस्तद्योग्यान्कामान्ददातीति किमिति योजयन्ति । सर्वान्कामान्ददात्यनन्तरमात्मानमपि । उर्वरितं पूर्ववत् । यद्वाऽऽत्मानं सारूप्यरूपमिति वा मनुष्याणां क्लृप्तस्य मनुष्यव्यतिरिक्तानां देवानां तु न क्लृप्तस्य प्राप्यस्य तौ स्त एवेति विवेको ज्ञेयः, तथोक्तमनुव्याख्याने प्राप्तह्रासो भवेत्क्वापि महता तु विकर्मणेत्यादिना । सङ्क्षेपे च वृद्धिह्रासौ विमुक्तिगौ । नृणां सुराणां मुक्तौ तु सुखं क्लृप्तं यथाक्रममित्यादिना । प्रस्थानान्तरेऽनुव्याख्याने । ह्रासोऽपि मानुषादीनामानन्दस्य विकर्मणा भवेन्मुक्तौ विशेषेण स्वोच्चानामपराधत इत्यादिना च । विस्तरस्तत्सुधादितोऽवसेयः । यस्तस्माद्भक्तप्रियादृतगिरः सत्यवचनात् । ऋगताविति धातोस्तु पूर्वावगतवत्सदा । स्थितेर्ब्रह्मर्तमित्युक्तमित्युक्तेरृतमिति ब्रह्मोति गीर्यस्य तस्मादिति वा । भक्तप्रियश्चासावादृतगीश्च तस्मादिति वा । सुहृदः प्रत्युत्पकारमनपेक्ष्योपकर्तुः कृतज्ञात्कृतस्मरणवतस्त्वदपरमन्यं कः पण्डितः शरणं समीयाद्गच्छेद्यदि समीयात्सोऽपण्डित इति तुविशेषं सूचयति ॥ २७ ॥ हे जनार्दन इहैतदवस्थायां योगेश्वरैः सुरेशैरपि दुरापगतिर्दुरापा गतिर्यस्य सो भवान्नोऽस्माभिर्दिष्ट्या प्रतीतो ज्ञातोऽतो नः सुताः कलत्राणि भार्या धनान्याप्त बन्धवो गेहानि देहश्चैतेष्वभिमोहोऽभिमानस्तदाख्यां रशनां रज्जुरूपिणीं भवदीयां मायामाशु छिन्धि त्वद्दर्शनोत्तरं नायमर्थः स्थातव्य इति तात्पर्यम् ॥ २८ ॥ भक्तेनाक्रूरेण भगवान् हरिरित्यर्चितः संस्तुतश्च तं सस्मितगीर्भिः सम्मोहयन्नकालत्वादङ्कुरितं विवेकमाच्छादयन्निवाह ॥ २९ ॥ त्वं नो गुरुर्हितोपदेश पितृव्यः पितृभ्राता श्लाध्यः स्तुत्यो बन्धुश्चेत्यादयो मान्यताप्रयोजकाः प्रजा वो वयं हि यतो रक्ष्या रोगादितः पोष्या एवन्मुकं वा इति मोहनार्थमत्युक्तिः ।३०। तमेव घाटी नट इव नटयति ॥ भवद्विधा इति अर्हसत्तमा अर्हणीयोत्तमाः श्रेयस्कामैर्नृभिस्सेव्या न तु देवा एव सेव्याः । कुत एवमादय इत्यत आह । देवाः स्वार्थाः स्वप्रयोजनपरफलदा इति । साधवस्तु न स्वार्था अतो भवद्विधा निषेव्याः । अक्रूरस्य साधु

साध्वन्यतमत्वं कटाक्षयत्यनेनेति ॥ ३१ ॥ देवा इत्युक्तौ प्रतिमादय एव तथेह विवक्षिता इति भ्रमं भ्रंशयन्स्वयं विवृणोति ॥ न हीति । अन्नमयानि जलजडमयानि तीर्थानि पावित्र्यादीनि न मृच्छिलामयाः प्रतिमादयो देवा न किन्तु तत्र सन्निहिता देवा एव । तर्हि तेऽहिताः फलं यच्छन्ति किं साधुसमाजनेनेत्यत आह । ते जलशिलादिगता गुरुकालेन व्यवधानेन सेवादिना पुनन्ति साधूनां दर्शनादेत जलशिलादिनिलयदेवानां विलम्बेन पातकस्वमितां यदन्तरमिति भावः । देवाश्च न न साधव इत्यत्र तात्पर्यं किन्तु पृथक् समाजिताश्चेतेऽपि दर्शनादेव पवित्रयन्ति । तथाऽपि ते दुर्दर्शा जगत्यटन्ति नात्यार्थं भास्करा इव भास्वरा इत्यादेः सुमिलाः साधव इति झडिति पवित्रणमित्यवधेयम् । अग्नौ क्रियावतां विष्णुः प्रतिमास्वप्रबुद्धानामित्यादेरधिकारवैशष्यादियमुक्तिः । उरुणा कृतेन कालेनोपदेशेन गुरूपदिष्टेन कालेनेत्यप्यर्थापयन्ति । उभयानि तीर्थानि नेति तान्यपि स्वान्तर्निहितदेवताद्वारोरुकालेन पुनन्तीति । तथा मृच्छिलामया अपि देवा नेति न तेऽपि तथैव । साधवस्तु स्वोचितापनित्यादिकमनपेक्ष्य पुनन्तीति दर्शनादेवेत्युक्तिरिति व्यातन्वते । व्यवधानाव्यवधानकृतौ विशेष इति तेषां भावः ॥ ३२ ॥ किञ्चिच्चिकीर्षन्स प्रागादिति सूचितं व्यक्तीकुर्वन्नुपपादितसाधुत्वं त्वय्यस्तीदं कुर्वित्याह ॥ स इति । श्रेयाञ्छ्रेयश्चिकीर्षयेति श्रेयान्पाठः । नः सुहृदां मध्ये स भवान् श्रेयान् श्रेष्ठः श्रेयश्चित्कार्षया पाण्डवानां जिज्ञासयाऽर्थः फलरूपं ज्ञानं तमुद्दिश्य गजसाह्वयं गजेन सम आह्वयः पर्यायशब्दो वाचकतया यस्य तत्पुरं गच्छ । हे स्वेति सम्बोधनं वा । किञ्चिच्छ्रेयश्चिकीर्षयेति पाठे सुहृदां मध्ये स भवान्सुहृदन्तःपातीत्यर्थः । लोके लोकाः सत्त्वेन ग्रामादिकं प्रति व्यवहरन्तीति स्वगजसाह्वयमस्मदीयं हस्तिनापुरमित्यैकपद्यं वा ॥ ३३ ॥ पितरि पाण्डावुपरते मृते सति मात्रा सह सुदुःखिता बालाः पञ्च वसन्तः शतशृङ्गगिराविति शेषः । राज्ञा स्वपुरमानीता ऋषिभिरिति शुश्रुमः । वसन्त इति वसन्तीति शुश्रुम इति वा ॥३४॥ तेषु पाण्डवेषु मातृपुत्रेषु दीनधीस्तत्प्रबुद्धिः समो न वर्तते नूनं निश्चयः । तत्र तन्त्रं दुष्पुत्रवशगोऽन्धे दृशौ यस्य स इति । यद्यप्यन्ध इत्येवालं तथाऽप्यन्धाः पूर्वोत्तरानालोचनारा इति दृग्ज्ञानं यस्य स इत्यपि सूचनार्थमेवमुक्तमिति ज्ञातव्यम् ॥ ३५ ॥ गच्छ तद्वृत्तं तस्य धृतराष्ट्रस्य तेषु वृत्तमिति वा साध्वसाधु वा जानीहि । अधुना गतास्त्वत्तस्तथा गताद्विज्ञाय ज्ञात्वा सुहृदां शं यथा भवेत्तया विधास्यामः ॥ ३६ ॥ भगवान्हरिरीश्वरः । अनेन लोकरीतिरियमिति ध्वनयामास । अक्रूरमिति समादिश्य सङ्कर्षणोद्धवाभ्यां सह स्वभवनं ततो ययौ ॥ ३७ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे सप्तचत्वारिंशोऽध्यायः ॥ १०—४८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

का जिज्ञासेत्याकाङ्क्षायामाह । पित्तर्युपरत इति । पाण्डौ संस्थिते बाला एव ते च बहवश्च मात्रा सह स्थिता इति स्तनन्धयप्राया इत्यवस्थाया दयापात्रत्वमुक्तम् । अतिदुःखिता इति दयायाः साधारणो हेतुः तदीयानां पालकत्वमस्ति नवेति वचनार्थं परिग्रहो निरूप्यते । आनीताः स्वपुरमिति । ते चेच्छत्रवः सुतरामेवानर्थपर्यवसायित्वं स्वस्थाने स्थापिता इति तत्रापि राज्ञा अनेन तेषां राजत्वाभावो निरूपितः ॥ ३३ ॥ किं च न केवलं ते वसन्ते किन्तु उपद्रुता इत्यपि शङ्का यतोऽयमम्बिकापुत्रः तेषु प्रसिद्धेष्वपि निष्ठुरेष्वपि भ्रातृपुत्रेषु विनीतेषु समो न वर्त्तते तत्र हेतुः दीनाधीर्यस्येति बुद्धिस्तु दरिद्रो हि दुर्गतः सर्वमेव कर्तुं समर्थः निषिद्धं विहितेत्वशक्तः आगन्तुकदोषमाह । दुष्पुत्रवशग इति । दुष्टः सहजः कलित्वात् दुर्योधनो हि कलेरवतार इति । अत एव कालस्य प्राबल्यात् तद्वशगः पुत्रत्वात् मोहेनापि तद्वशगो जातः स्वतो विचारसामर्थ्याभावायाह । अन्धदृगिति साहजात्यन्धः शब्देनैव व्यवहरति प्रियमेव शब्दं सर्वो मन्यते पुत्रशब्दश्च प्रियः ॥ ३४ ॥ तर्हि किं कर्त्तव्यमित्याकाङ्क्षायामाह । गच्छ जानीहीति । एकवचनेन सेनाद्यभावः सूचितः युद्धार्थं न गन्तव्यं किंत्वधुना तेषां साधुमङ्गलमस्ति असाध्वमङ्गलं वा अनिष्टमस्ति वेत्यनादरे नो भयं वा ज्ञानस्य कृतोपयोग इत्याकाङ्क्षायमाह । विज्ञायेति । तदनुरूपम् विधास्याम प्रकारजिज्ञासायामाह । यथा शमिति । सुहृदां बन्धूनां येनैव प्रकारेण शं भवेत् स एव प्रकारः कर्त्तव्य इत्येतत्सर्वं जिज्ञासानन्तरं कर्त्तव्यम् अन्यथा कृतं न सुखपर्यवसायि भवतीति अतो जिज्ञासार्थमेव गच्छ नत्वन्यत्किञ्चित्कर्त्तव्यमिति भावः । मोहितस्यायं गुणः यदधिकमपि करिष्यति अत एव धृतराष्ट्रोऽपि तेन निर्भत्सितः ॥ ३५ ॥ एतावतैव कार्यं भविष्यतीत्यभिज्ञाय भगवान् स्वगृहं गत इत्याह । इत्यक्रूरं समादिश्येति । आज्ञासिद्धौ भगवत्त्वं हेतुः आज्ञापने हरित्वं स्वत आगमने ईश्वरत्वं स्तुत्वा स्वापेक्षयाप्याधिक्यमुपपाद्येदानीं च सेवकार्थं दूतत्वं च कारितवानितीश्वरचर्या संकर्षणोद्धवयोरन्यतरस्य वा गमनं भविष्यतीत्याशङ्क्याह । संकर्षणोद्धवाभ्यामिति । निर्गमन एव सह भावः स्वभवनगमने तु नायं निर्बन्ध इति ज्ञापयितुं तत इत्युक्तं तस्मात् स्थानात् तदनन्तरं चकार्यान्तरावृत्त्यर्थं स्वस्य भवनं ययौ प्रापणकथनेन मध्येऽपि कार्यान्तरं व्यावर्त्तितम् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां सप्तचत्वारिंशाध्यायार्थं विवरणम् ॥ ४५–४८ ॥

श्रीसुबोधिनी–सारः

पितरि पाण्डौ उपरते मृते सति मात्रा कुन्त्या सह सुदुःखिता बालाः पाण्डवा राज्ञा धृतराष्ट्रेण स्वपुरं हस्तिनापुरम् आनीता वसन्ते इति वयं शुश्रुम ॥३३॥ भ्रातुः पुत्रेषु तेषु युधिष्ठिरादिषु दीनधीः कृपणबुद्धी राजा धृतराष्ट्रोऽम्बिकायाः पुत्रोन्धदृक् नेत्रहीनः

दुष्टस्य पुत्रस्य दुर्योधनस्य वशगो वशवर्त्ती समस्तुल्यो न वर्त्तते नूनमेव ॥ ३४ ॥ अधुनेदानीं त्वं गच्छ याहि साधु असाधु वा तस्य वृत्तं चेष्टां त्वं जानीहि विज्ञाय ज्ञात्वा सुहृदां भक्तानां शं सुखं यथा भवेत् तत् वयं विधास्यामः करिष्यामः ॥ ३५ ॥ इत्येवमक्रूरं समादिश्याज्ञाप्य हरिरीशो भगवान् संकर्षणोद्धवाभ्यां सह ततः स्थानात्स्वगृहम् आजगाम ॥ ३६ ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायामष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पितरि पाण्डावुपरते मृते सति बालास्तत्पुत्रा युधिष्ठिरादयो राज्ञा धृतराष्ट्रेण स्वपुरं प्रत्यानीतास्तत्र मात्रा पृथया सह अतिदुखिताः वसन्ते निवसन्ति इति शुश्रुम श्रुतवन्तो वयम् ॥ ३३ ॥ दुःखे हेतुमाह—तेष्विति । अम्बिकापुत्रो राजा धृतराष्ट्रः तेपु भ्रातृपुत्रेषु समः स्वपुत्रतुल्यतया न वर्तते । नूनं निश्चितमेतत् । तत्र हेतुमाह—दुष्पुत्रेति । दुष्टो यः पुत्रः दुर्योधनस्तद्वशग इत्यर्थः । तत्र हेतुः— अन्धदृगिति । अन्धा दृक् नेत्ररूपा यस्य सः । न केवलं नेत्राभ्यामेवान्धः, किंतु दीना विवेकहीना धीर्यस्य तथाभूतोऽपीति ॥ ३४ ॥ अतस्त्वं हतिनापुरं गच्छ । अधुना तेषां पाण्डवानां वृत्तं वर्तनं साध्वसाधु वेति तद्वृत्तं विज्ञाय सुहृदां तेषां शं सुखं यथा भवेत्तथोपायं विधास्यामः करिष्यामः ॥ ३५ ॥ इत्येवमक्रूरं सनादिश्याज्ञाप्य सङ्कर्षणोद्धवाभ्यां सहितस्ततः अक्रूरभवनात् स्वभवनं ययौ । आज्ञापने सामर्थ्यमाह - ईश्वर इति । तत्र हेतुमाह—भगवानिति । ऐश्वर्यादिगुणपूर्णत्वादित्यर्थः ॥ ३६ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसरोधवर्णने । गतोऽष्टचत्वारिंशोऽपि कुब्जारतिनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

पितरीति ॥ पितरि पाण्डावुपरते मृते सति बालास्तत्पुत्रा युधिष्ठिरादयो राज्ञा धृतराष्ट्रेण स्वपुरं प्रत्यानीतास्तत्र मात्रा पृथया सहातिदुःखिताः वसन्तो निवसन्तः सन्ति इति शुश्रुमः श्रुतवन्तो वयम् ॥ ३३ ॥ तेष्विति ॥ दुष्टो यः पुत्रो दुर्योधनस्तस्य वशेनेच्छया गच्छति तादृशः यतः अन्धा दृक् यस्य दीना विवेकहीना धीर्यस्य सः अम्बिकापुत्रो राजा धृतराष्ट्रः तेषु भ्रातृपुत्रेषु । अलुगभावः । प्रजावती भ्रातृजाया इत्यादि लोकेऽपि प्रयुज्यते आर्षो वा । समः स्वपुत्रतुल्यतया न वर्तते नूनं निश्चितमेतत् ॥३४॥ गच्छेति ॥ अतस्त्वं हास्तिनापुरं गच्छ । अधुना तेषां पाण्डवानां वृत्तं वर्तनं साध्वसाधु वेति जानीहि । तद्वृत्तं विज्ञाय सुहृदां तेषां शं सुखं यथा भवेत्तथोपायं विधास्यामः करिष्यामः ॥ ३५ ॥ इतीति ॥ इत्येवमक्रूरं समादिश्याज्ञाप्य सङ्कर्षणोद्धवाभ्यां सहितः भगवान् ईश्वरः हरिः ततोऽक्रूरभवनात्स्वभवनं ययौ ॥ ३६ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायोऽष्टचत्वारिंशे दशमगे व्यधात् ॥

इति श्रीभागवते दशमेऽन्वितार्थेऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दुष्टपुत्राणां दुर्योधनादीनां वशगोवशं प्राप्तः यतोंधदृक् नेत्रहीनः ॥ ३३ ॥ त्वं तत्र गच्छ तेषां वृतं वृत्तान्तसुहृदां यथा शं सुखं भवेत् तथा वयं विधास्यामः ॥ ३४–३५ ॥

इति श्रीशुद्धैकान्तधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य
दशमस्कन्धव्याख्याने अक्रूरस्य हस्तिनापुरगमननिदेशनामा अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किंचिच्चिकीर्षया प्रागादिति यदुक्तं तत् कार्यमादिशति ॥ स भवानिति ॥ स उक्तविधः भवान्, नोऽस्माकं, सुहृदां मध्ये, श्रेयानतिश्रेष्ठः, वै अतः, श्रेयश्चिकीर्षया अस्माकं श्रेयः कर्त्तुमिच्छया, पाण्डवानां, जिज्ञासार्थं, तेषां सुखदुःखावबोधार्थं, गजसाह्वयं हस्तिनापुरं, गच्छस्व । आत्मनेपदमार्षम् । यद्वा । स्वेति पृथक् पदम् । हे स्व आत्मीयेत्यर्थः ॥ ३३ ॥ पितरीति ॥ पितरि पाण्डौ, उपरते स्वर्गं गते सति, बालाः अत एव, सुदुःखिताः, राज्ञा धृतराष्ट्रेण, स्वपुरं प्रति, आनीताः सन्तः, तत्र पुरे, मात्रा सह, अधुना वसन्ते । इति शुश्रुमः ॥ ३४ ॥ तेष्विति ॥ अम्बिकापुत्रः धृतराष्ट्रः राजा, भ्रातृपुत्रेषु तेषु युधिष्ठिरादिषु, दीना कृपणा धीर्यस्य तथाभूतः सन्, समः, न वर्त्तते नूनम् । यतः, दुष्पुत्रो दुर्योधनस्तद्वशगः । तत्रापि हेतुः, अन्धदृक् । अज्ञः अन्धनेत्रो वा ॥ ३५ ॥ गच्छेति ॥ अतः, त्वं गच्छ हस्तिनापुरं याहि, अधुना, साधु असाधु वा, तद्वृत्तं तेषां पाण्डवानां वर्त्तनमव-

स्थानमिति यावत् । जानीहि । तत्तद्वृत्तं, विज्ञाय, यथा सुहृदां शं सुखं भवेत्, तथा विधास्यामः करिष्यामः ॥ ३६ ॥ इतीति ॥ इतीत्थं, भगवान् ईश्वरः, हरिः श्रीकृष्णः, अक्रूरं समादिश्याज्ञाप्य, ततः संकर्षणोद्धवाभ्यां सह, स्वभवनं, ययौ वै ॥ ३७ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्द्धे अष्टचत्वारिंशोऽध्याय. ॥ ४८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तेषु राजेति : १०.४८.३४.

अन्धस्थावरवासांसि नान्धस्तेभ्यो ददाति वा । अन्धस्थावरवासांसि तानि गृह्णन्ति वा न ते ॥ ९० ॥
चक्षुष्मन्तोऽपि जन्मान्धा इव धर्मावनेक्षणे । दुर्जनाः स्युरयं त्वन्धो जात्यैवेत्यलमूहतः ॥ ९१ ॥
धृतराष्ट्रोऽहमेवास्मीत्यलं गर्वोऽस्य चेद्धृदि । उग्रसेनाश्रिता यूयमप्यत्रेति स्फुटं ततः ॥ ९२ ॥

गच्छ जानीहीति : १०.४८.३५.

एकः सूर्यात्मभूतिर्भवति कुरुबले कर्ण एवाखिलेऽपि सोऽप्यन्धस्थाल्युपेतो जगति तदपरे स्पष्टमन्धस्थिताशाः ।
भीष्मो द्रोणः कृपश्चाप्यतुलवसुपदायत्ततोऽस्मत्प्रियाणां नैकस्तेषां हितार्थीत्यवगतमपि मे पश्य गत्वा समक्षम् ॥ ९३ ॥

दुर्वर्णोद्या प्रजा यस्य हि भुवि निखिला विश्रुतास्त्यन्धभावोप्याजन्मप्राप्तयोगो वसतिरपि सदा यस्य मातङ्गभूमौ ।
तस्याग्रे धर्मरक्षाकथनमघकरं वक्तुरेव ह्यथापि पथ्योक्त्यैवोपदेश्यः सततमतिखलोऽप्येष सन्मार्गधर्मः ॥ ९४ ॥

कल्याणं सुहृदां तदन्यदसतां रक्षा च धर्मस्थितेर्येनाकारि न भूभृता भवति तज्जन्मात्र धिग्धिकपदम् ।
ताताक्रूर तमुग्रसेननृपतिं संश्रित्य वस्तस्थुषां रामस्यापि ममाप्यलं तदुचितं भूभृत्समुत्थस्थितेः ॥ ९५ ॥

धर्मरक्षणमेवास्मत्कार्य - मक्रूर मुख्यतः । जानास्येवेति तत्कार्यं कार्यमित्येव वाचिकम् ॥ ९६ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसुरिविरचिते भक्तिरसायने अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

कृष्णप्रिया

पितृचरण पाण्डु राजा के परलोक वासी होने के कारण बालक पाण्डव और उनकी माता कुन्ती फुफा अत्यन्त दुःखी होने लगे इसलिये उन सबको राजा धृतराष्ट्र ने अपने नगर में बुला लिए हैं । वे सब वहाँ रह रहे हैं । ऐसा वृत्तान्त मिल रहा है कि आम्बिकेय महाराजा धृतराष्ट्र अपने भतीजों, अपने पुत्रों के समान पालन करते नहीं हैं । कारण स्वयं पक्षपाती बुद्धि वाले दीन बुद्धि है और अपने खल पुत्रों के आधीन उनकी मति से चलने वाले हैं स्वयं दृष्टि हीन है । वे केवल नेत्रों से अन्ध नहीं है किन्तु हृदय से भीं मोहान्ध है ॥ ३ -३४ ॥ आर्य ? आप हस्तिनापुर पधारिए जाँच कीजिए कि पाण्डवों की कैसी हालत है ? वे दुःखी है या सुखी है ? यह सब वृत्तान्त जानने पर जैसे अपने बन्धुजन सुख प्राप्त करें वैसा प्रदान करेंगे ॥ ३५ ॥ राजन् परीक्षित् ! दयानिधि भगवान श्रीहरि श्रीकृष्ण इस प्रकार श्री अक्रूर जी को सूचित करके श्रीबलभद्र भैया एवं उद्धव जी के साथ अपने भवन पधारे ॥ ३६ ॥

श्रीमद्भागवत दशम स्कन्ध निरोध लीला राजस लीला प्रमेय प्रकरण का ४८ वाँ अध्याय का भाषान्तर समाप्त ॥

—:-०-:—

अथैकोनपञ्चाशत्तमोऽध्यायः

श्लोकाः	अनु.	वसंत	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
३१	३०	१	५	१०१६	३१	७४	११२१	३५	१

श्रीशुक[1] उवाच

स गत्वा हास्तिनपुरं [2]पौरवेन्द्रश्रिया[3]ऽङ्कितम् । ददर्श तत्राम्बिकेयं सभीष्मं विदुरं पृथाम् ॥ १ ॥
सहपुत्रं च बाह्लीकं भारद्वाजं [4]सगौतमम् । कर्णं सुयोधनं द्रौणिं पाण्डवान् सुहृदोऽपरान् ॥ २ ॥
यथावदुपसंगम्य बन्धुभिर्गान्दिनीसुतः । सम्पृष्टस्तैः सुहृद्वार्तां स्वयं चापृच्छदव्ययम् ॥ ३ ॥
उवास कतिचिन्मासान् राज्ञो वृत्तविवित्सया[5] । [6]दुष्प्रजस्याल्पसारस्य[7] खलच्छन्दानुवर्तिनः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—सः, अक्रूरः, पौरवेन्द्रश्रियाङ्कितम्, हास्तिनपुरम्, गत्वा, तत्र, विदुरम्, स भीष्मम्, आम्बिकेयम्, पृथाम्, च, ददर्श ॥ १ ॥ तत्र, सहपुत्रम्, वाह्लीकम्, च, सगौतमम्, भारद्वाजम, कर्णम्, सुयोधनम्, द्रौणिम्, पाण्डवान्, अपरान्, सुहृदः, ददर्श ॥२॥ गान्दिनीसुतः, बन्धुभिः, यथावद्, उपसंगम्य, तैः, सुहृदवार्ताम्, संपृष्टः, च, स्वयम्, अव्ययम्, अपृच्छत् ॥ ३ ॥ दुष्प्रजस्य, अल्पसारस्य, खलच्छन्दानुवर्तिनः, राज्ञः, वृत्तजिज्ञासया, कतिचित्, मासान्, उवास ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ऊनपञ्चाशत्तमे तु गत्वाऽक्रूरो गजाह्वयम् । राज्ञः स्वभ्रातृपुत्रेषु बुद्धा वैषम्यमागमत् ॥ १ ॥

पौरवेन्द्राणां यशोभिस्तत्कृतदेवब्राह्मणायतनादिभिरङ्कितम् ॥ १ ॥ बाह्लीकपुत्रः सोमदत्तः । भारद्वाजो द्रोणः । गौतमः कृपः ॥ २ ॥ स्वयम् अव्ययं कुशलमपृच्छत् ॥ ३ ॥ दुष्प्रजस्यासत्पुत्रस्याल्पसारस्य मन्दधृतेः खलानां कर्णादीनां छन्दमिच्छामनुवर्तितुं शीलं यस्येति तथा तस्य ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ऊनपञ्चाशत्तमे एकोनपञ्चाशत्तमे । राज्ञो धृतराष्ट्रस्य । वैषम्यं दौर्जन्यम् (१) । सोऽक्रूरः । तत्र हास्तिनापुरे । स इति युग्मकम् । प्रथमं राज्ञो दर्शनं योग्यं, ततः कुलश्रेष्ठत्वाद्भीष्मस्य । तद्दिने तयोरेकत्र स्थितिरासीदित्युक्तम्—स भीष्ममिति । तत आत्मीयत्वाद्विदुरस्य, ततः तत्संगेन स्वभगिन्याः पृथायाः ॥ १ ॥ अपरान् कुरून् । सहपुत्रमिति "वोपसर्जनस्य" इति वैकल्पिकत्वान्न सादेशः । ततः कुलवृद्धत्वाद्बाह्लीकस्य, ततः पाण्डवान्वेषणे तदुपाध्यायस्य भारद्वाजस्य, ततस्तत्सहचारित्वेन गौतमस्य, ततः सहाध्यायित्वेन कर्णादीनां सर्वेषामेव बालकानामिति पाठक्रमः । तत्र पाण्डवानां पश्चाद्भावः स्वस्य मध्यस्थत्वख्यापनेन धर्मोपदेशाय । प्रथमश्चशब्दोऽनुक्तसमुच्चये सर्वत्र योज्यः, द्वितीयस्सूक्तार्थो ब्राह्मणस्यापि भारद्वाजस्य क्षत्रियमध्यपातात् । क्वचित् 'भारद्वाजं सगौतमम्' इति पाठः । अपरान् शकुन्यादीन् ॥ २ ॥ गांदिनीसुतोऽक्रूरः । तैर्धृतराष्ट्रादिभिः । यथावद्वृद्धादीन्प्रणामादिनोपसंगम्य स्नेहाधिक्येन मिलित्वा सुहृदां यादवनां वार्तां कुशलवृत्तं सम्यग्यथाविध्यादिपूर्वकं सस्नेह पृष्टः ॥ ३ ॥ राज्ञो धृतराष्ट्रस्य । "छन्दो वशेऽप्यभिप्राये' इति मेदिनी । "खलं भूस्थानकल्केपु नीचक्रूराधमे त्रिषु । खलो वस्त्रप्रभेदे स्याद्धूर्ते चर्मणि घातके ।" इति च । कतिचिन्मासानिति बहुदिनवासात्तस्य कौटिल्यातिशयो व्यञ्जितः । वृत्तमेव कारणद्वारा सूचयति—दुष्प्रजस्येति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स गत्वेति युग्मकम् । प्रथमं राज्ञो दर्शनयोग्यं ततः कुलश्रेष्ठत्वात् श्रीभीष्मस्य तद्दिने तु तयोरेकत्र स्थितिरासीदिति सभीष्ममित्युक्तं ततः आत्मीवत्वात् श्रीविदुरस्य ततस्तत्सङ्गेन स्वभगिन्याः पृथायाः ॥ १ ॥ ततः कुलवृद्धत्वाद्बह्लीकस्य ततः

---

१. बादरायणि–प्रा. पा. । २. कौरवेन्द्र–वीर. । ३. श्रिया–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. ध. । ४. च–प्रा. पा. । ५. दिदृक्षया–वीर. । ६. प्रज्ञ–विज. । ७. वीर्यस्य–प्रा. पा. ।

पाण्डवान्वेषणे तदुपाध्यायस्य भारद्वाजस्य ततस्तत्सहचारित्वेन गौतमस्य ततः सहाध्यायित्वेन कर्णादीनां सर्वेषामेव । बालकानामिति तथा पाठक्रमः तत्र पाण्डवानां पश्चाद्भावः स्वस्य मध्यस्थख्यापनेन धर्मोपदेशाय पश्चान्मिलनात् प्रथमश्चशब्दोऽनुक्तसमुच्चये सर्वत्र योज्यः द्वितीयस्तृप्त्यर्थे ब्राह्मणस्यापि भरद्वाजस्य क्षत्रियमध्यपातात् सगौतममिति क्वचित् पाठः अपरान् शकुन्यादीन् ॥ २ ॥ यथावद्वृद्धादीन् प्रणामादिना उपसङ्गम्य स्नेहाधिक्येन मिलित्वा सुहृदां यादवानां वार्त्तां सम्यक् यथाविध्यातिथ्यपूर्वकं सस्नेहं पृष्टः ॥ ३ ॥ कतिचिन्मासानिति । बहुदिनवासात्तस्य कौटिल्यातिशयो व्यञ्जितः वृत्तमेव कारणद्वारा सूचयति । दुष्प्रजस्येति ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स गत्वेति युग्मकम् । स साधुत्वेनोक्तः, तत्र हास्तिनपुरे तत्रापि सभामध्य इति ज्ञेयम् । एकत्रैव युगपत् सर्व्वेषां दर्शनात्; भीष्मेण सहितमिति सर्व्वकृत्येषु तस्य सम्मतिग्रहणार्थं तदन्तिके राज्ञ आम्बिकेयस्यासनत्वादिति । तस्य पार्श्वे दक्षिणे भीष्मस्य, विदुरस्य मन्त्रित्वाद्वामे, अन्येषाञ्च यथास्थानमासमूह्यम् । यद्वा, विदुरस्यैव विशेषणम् । सभीष्ममिति परमसाधुतया स्नेहेन तयोरेकत्रैवासनात्, अतएव तयोः पार्श्वे श्रीकुन्त्या आसनात्ताभ्यामनन्तरमेव निर्द्देशः ॥ १ ॥ आद्यश्चकारस्त्वर्थे; बाह्लीकस्य पुत्रसाहित्यविशेषात् अप्यर्थे द्वितीयः, द्रोणस्य विप्रत्वेऽपि तदन्तरे वासनात् समुच्चये वा, 'सगौतमम्' इति वा पाठः,—तयोरेकत्रैवासनात्; एवमेषु यथोत्तरं राज्ञ आदराधिक्यन्यूनत्वाभ्यां तदनुसारेण कस्यचिदन्तिके कस्यापि दूरे अपि आसनात्तेषां तत्तत्क्रमेण दर्शनम् । तत्र बाह्लीके भारद्वाजादप्याधिक्यम्, तस्य कुलवृद्धत्वेनातिपूज्यत्वात्; तत्र पुत्रस्य तु पितृपार्श्वासनानपेततया । किंवा तस्यापि पितामहत्वेनात्यादरणीयत्वात्, कर्णस्य च सुयोधनप्रियत्वादिना, अन्यत् स्पष्टम् । अतएवादरहान्या पाण्डवानां सर्व्वान्ते आसनात्तथैव दर्शनम, अपरान् शकुनिदुःशासनादीन् ॥ २ ॥ गान्दिनीसुत इति धर्म्मज्ञत्वमभिप्रेतम्, अतएव यथावदिति वृद्धान् प्रणामादिना सम्मानालिङ्गनादिना कनिष्ठानामाशीर्व्वादादिनेत्येवं यथायोग्यमुपसंगम्य स्नेहादाधिक्येन मिलित्वा सुहृदां यादवानां वार्त्तां कुशलवृत्तं सम्यग् यथाविध्यातिथ्यपूर्व्वकं सस्नेहं पृष्टः ॥ ३ ॥ दुष्प्रजस्येत्यादिना परमासाधुत्वमुक्तम्, अतः क्रूरदुराशयस्य चिरेणैव भावज्ञानशक्तेर्बहून्मासांस्तत्रावसत्, दुष्प्रजस्येत्यादीनां यथोत्तरं हेतुमत्ता, तया दुष्टताधिकता च ज्ञेया ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

वृत्तविवित्सया वृत्तं वेदितुमिच्छया ॥ १-५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथैवं प्रेषितोऽक्रूरः सम्विज्ञातसुहृद्वृतान्तः पुनरागतः तद्भगवते न्यवेदयदित्याहैकोनपञ्चाशत्तमेन । स गत्वेत्यादिना । सोऽक्रूरः कौरवेन्द्राणां कुरुवंशोद्भवानां यशोभिः यशः सूचकदेवब्राह्मणाद्यायतनादिभिरङ्कितं हास्तिनपुरं गत्वा तत्र भीष्मेण सहितमाम्बिकेयं धृतराष्ट्रं विदुरादींश्च ददर्शेति द्वयोरेव सम्बन्धः तत्र पृथा कुन्ती ॥ १ ॥ वाह्लीकपुत्रः सोमदत्तः गौतमः कृपाचार्य्यः भारद्वाजो द्रोणः द्रौणिर्द्रोणपुत्रोऽश्वत्थामा अपरान सुहृदः ज्ञातीन् इत्यर्थः ॥ २ ॥ यथावदिति । गान्दिनीसुतोऽक्रूरः यथायोग्यम्बन्धुभिः सह युधिष्ठिरादिभिः साकं समुपेत्य तैर्बन्धुभिः सह समेत्य सम्पृष्टस्वकुशलः स्वयमपि सुहृदामव्ययं कुशलं पप्रच्छ ॥३॥ किञ्च उवासेति । ततो राज्ञो धृतराष्ट्रस्य वृत्तपरिशीलनार्थं कतिचिन्मासानुषितवान् कथम्भूतस्य राज्ञः दुष्टाः प्रजाः दुर्योधनादयः पुत्रा यस्य असिजभाव आर्षः अल्पसारस्य मन्दः सारो धृतिर्यस्य अत एव खलान् कर्णादीननुवर्त्तितुं शीलमस्येति तथा तस्य ॥४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

योग्यानां भगवति हरौ स्वत एव भक्तिः प्रकाश्यत इति व्यनक्त्यस्मिन्नध्याये तत्रादावक्रूरस्य धृतराष्ट्रादिदर्शनं वक्ति । स गत्वेति ॥ १ ॥ बाह्लीकं कुरुवंशे कञ्चनवृद्धं राजानं शन्तनोर्भ्रातरं भारद्वाजं भरद्वाजस्यापत्यं द्रोणं सगौतमं सकृपम् ॥ २ ॥ तैर्भीष्मादिभिः सुहृद्वार्तां प्रति सम्पृष्टः अभूदिति शेषः अक्रूरः स्वयं च तेषामव्ययमनामयं पृष्टवान् ॥ ३ ॥ वृत्तविवित्सया स्वपुत्रेषु वृत्तं वर्तनं समं विषमं चेति ज्ञातुमिच्छया अल्पमन्याय्यं सारं यस्य स तथा तस्य तत्र हेतुः खलच्छन्दानुवर्तिन इति खलानां पुत्राणां छन्दमिच्छामनुवर्तितुं शीलमस्यास्तीति तस्य ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

जगदीश्वरमपि कृष्णं स्वजनं निजबन्धुतयानुस्मृत्य ॥ १-३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोनपञ्चासप्तमोऽध्यायः ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

नमः कृष्णायेत्यादि । शुद्धाय ब्रह्मणे शुद्धं मूर्तब्रह्म आनन्दः मूर्त्तानन्दायेत्यर्थः "आनन्दो द्विविधः प्रोक्तो मूर्त्तामूर्त्तप्रभेदतः । अमूर्त्तस्याश्रयो मूर्त्तो भगवानच्युतो मतः ।" इति हयशीर्षोक्तेः । अमूर्त्ताश्रयत्वाच्छुद्धम् ॥ १-३१ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नमः कृष्णायेति—कृष्णाय शुद्धाय ब्रह्मणे, श्रीकृष्ण एव शुद्धं ब्रह्म घनानन्दत्वं शुद्धत्वम् ॥ १–३१ ॥

इत्यूनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ऊनपञ्चाशत्तमेऽगादक्रूरो हस्तिनापुरम् । भ्रातुष्पुत्रेषु वैषम्यं राज्ञो ज्ञात्वागमत्ततः ॥

पौरवेन्द्राणां यशोभिर्यशोद्योतकैस्तत्कृतदेवब्राह्मणायतनादिभिरङ्कितम् आम्बिकेयं धृतराष्ट्रं सहपुत्रं सोमदत्तसहितं भारद्वाजं द्रोणं गौतमं कृपम् ॥ १–२ ॥ अव्ययं कुशलम् ॥ ३ ॥ खलानां कर्णादीनां छन्दमिच्छामनुवर्तितुं शीलं यस्य तथा तस्य ॥ ४ ॥

गूढार्थदीपिनी

अक्रूरस्तूनपञ्चाशत्तमे गत्वा गजाह्वयम् । राज्ञः पार्थेषु वैषम्यं बुद्ध्वा भूयः पुरीमगात् ॥

सोऽक्रूरः । पौरवेन्द्राणां पुरुवंशीयनृपाणां यशोभिः यशःसूचकैः मन्दिरादिभिः अङ्कितम् । अम्बिकापुत्रं धृतराष्ट्रम् ॥१॥ पुत्रं सोमदत्तम् । भारद्वाजो द्रोणः । गौतमः कृपः । द्रौणिः अश्वत्थामा । अपरान् शकुन्यादीन् ददर्श ददर्शेत्यन्वयः ॥ २ ॥ गान्दिनी अक्रूरमाता । उपसङ्गम्य मिगित्वा । स्वयमपि अव्ययं कुशलम् ॥ ३ ॥ विवित्सेति 'विदॢ लाभे' इत्यस्मात् । अल्पसारस्य मन्दबुद्धेः । दुष्टपुत्रस्य । खला दुर्योधनादयः तेषामिच्छानुवर्तिनः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एकोनपञ्चाशत्तमेऽक्रूरो हास्तिनपुरं गत्वा सुहृद्वृत्तान्तं ज्ञात्वा श्रीमथुरां पुनः प्राप्य तद्वृत्तातं श्रीरामकृष्णाभ्यां न्यवेदयदित्याह । स गत्वेति । पौरवेन्द्राणां पुरुवंश्यानां नरेन्द्राणां यशोभिः यशःसूचकैस्तद्देवायतनादिभिरङ्कितम् आम्बिकेयं धृतराष्ट्रम् ॥ १ ॥ पुत्रेण सोमदत्तेन सहितम् गौतमेन कृपेण सहितं भारद्वाजं द्रोणम् अपरान् भूरिश्रवःप्रभृतीन ॥ २ ॥ अव्ययं कुशलम् ॥ ३ ॥ दुष्टाः प्रजाः दुर्योधनदुःशासनाद्याः यस्य तस्य अल्पसारस्य स्वल्पधर्मरुचेः खलानां शकुनीकनकादीनां छन्दमिच्छामनुवर्तितुं शीलमस्येति ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ सोऽक्रूरः पौरवेन्द्राणां यशसाऽङ्कितं चिह्नितं हस्तिनापुरं गत्वा तत्र सभीष्ममाम्बिकेयमम्बिकापुत्रं सभीष्मं विदुरं वा पृथां कुन्तीं च ददर्श ॥ १ ॥ बाह्लीकबाह्लिकावित्येकनामनी प्रतीपपुत्र बाह्लीकं सहपुत्रं सोमदत्तसहितम् । प्रतीपस्याभवन्पुत्रास्त्रयस्त्रेताभिर्वर्चसः । देवापिरथबाह्लीकः सोमदत्तोऽस्य चात्मन इत्याचार्योक्तेः । भारद्वाजं भरद्वाजात्मजं द्रोणं सगौतमं सकृपं सुहृदय इत्युभयान्वयि ॥ २ ॥ यथावद्यय आद्यनुसारेण तैर्बन्धुभिः सुहृद्वार्तामुद्दिश्य सम्पृष्टोऽव्ययमुक्त्वा स्वयं चाव्ययमनामयमपृच्छदित्यन्वयः ॥ ३ ॥ झडिति कौटिल्यमकौटिल्यं वा नावगन्तुं शक्यमिति कतिचिन्मासानित्युक्तिः । तत्स्वभावमावेदयति । दुष्प्राज्ञस्य दुर्बुद्धेरल्पसारस्येदं वा निर्वाहयितुं बलविकलस्य । कलिरेवैतमूलमित्यालपति ॥ खलच्छन्दानुवृत्तिन इति । पुत्रेच्छानुवर्तिन इत्यर्थः । राज्ञे, वृत्तं पाण्डवदुर्योधनादिवर्तनं तद्विवत्सया वेदितुमिच्छा विवत्सा तया विविदिषया विचारेच्छया वा ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

षट्चत्वारिंशकेऽध्याये सात्त्विकानां निरूप्यते । सान्त्वन चान्यमुखतो निरोधो मह्याधिकारतः ॥
भगवत्प्रेषितोऽक्रूरः कृत्वा सान्त्वनपूर्वतः । ज्ञानेन तत्प्रतीकारं मत्वा तथोक्तवान् स्वयम् ॥
पाण्डवैर्ज्ञापिताशेषे विचारे कुशलो यतः । अतः स्थित्वा गति बुद्ध्वा स्वशक्ति ज्ञातवांस्ततः ॥

अन्यथा भगवत्कार्यं निरोधो न भविष्यति । प्रथमं भगवत्कार्यं कृतवानित्याह । स गत्वेति षड्भिः । स अक्रूरः स्वतो भगवदाशया च विशिष्टो हास्तिनपुरं हस्तिन् शब्दादपि रूढत्वाभावाय तेन निर्वृतमिति ज्ञापनार्थं बहुलेन गन्तव्यं तथापि स्वभावत उत्तममित्याह । पौरवेन्द्रश्रियोऽङ्कितमिति । पौरवेन्द्राणां श्रिया अङ्कितमिति मुख्यत्वात् प्रथमतो राजदर्शनम् अम्बिकायाः पुत्रो धृतराष्ट्रः धृतं राष्ट्रं येनेति व्युत्पत्तिः सम्भविष्यतीति तन्निषेधार्थं मातृनाम्ना व्यपदिष्टः राजस्थान एव भीष्मं दृष्टवान् विदुरं पृथामिति ज्ञापको ज्ञाप्यश्च निरूपितः ॥ १ ॥ सहपुत्रमिति । बाह्लीकः शन्तनोर्भ्राता । तत्पुत्रा भूरिश्रवादयः भरद्वाजो द्रोणः गौतमः कृपः कर्णदुर्योधनाश्वत्थामानः । एते महारथाः गणिताः षट्सहपुत्रत्वेन ससहाया अपि गणिताः ततोऽग्रे तेषां निवारण-

समर्था इति ज्ञापयितुं पाण्डवाः गणिताः लोकन्यायेन सर्वबन्धुप्रियकृदिति ज्ञापयितुं सुहृदः अपरांश्च दृष्टवानित्युक्तम् ।। २ ।। यथावदिति । ततो यथायोग्यं नमस्कारादिप्रकारेणोपगमनम् अस्यापि माहात्म्यं मातृपुरमाहृतैः मथुरास्थवार्त्ता सम्यक् पृष्टः वसन् स्वयं च तेषामव्ययमपृच्छत् चकारेण वार्त्ता समागतैताव्ययमिति व्ययोऽत्र कस्यचित्परित्यागः अव्ययं यथा भवति तथा सर्वानेव पृष्टवान् आपाततो वृत्तान्तज्ञानं न भवतीति स्वतो ज्ञानार्थं स्थितवान् वर्त्तमानस्यैव ज्ञानं भवतीति ज्ञानं श्रुतवान भविष्यज्ज्ञानार्थं प्रबोधितवानिति संग्रहः ।। ३ ।। तत्र प्रथमं स्थितिमाह । उवासेति । कतिचिन्मासानिति निरन्तरं यावत्तत्परिज्ञानं भवति मासत्रयं स्थितवानिति लक्ष्यते मासे हि नूतना दिवसा आवर्त्तन्ते त्रयो हि पदार्था ज्ञातव्याः धृतराष्ट्रकाः स्वदोषाः पुत्रादिमोहकृता दोषा संसर्गदोषाश्चेति एते नैमित्तिका अपि भवन्तीति मासपर्यन्तं निरन्तरपरिज्ञानार्थं स्थितिः निरन्तरं परिज्ञाने त्रयाणां संश्लेषेण गुणदोषव्यवस्थापकानां प्रत्येकं व्यभिचारात् परिज्ञानं न भवतीति एकैकस्य परिज्ञानार्थं तदीयगुणदोषनिर्द्धारार्थं मासपर्यन्तं स्थितिः एवं दोषत्रये मासत्रयमिति शीघ्रापरिज्ञाने राजत्वं हेतुः राजमन्त्रणं गूढं भवतीति दोषानाह । दुष्टाः प्रजाः पुत्रा अल्पः सारो विवेकधैर्यादिकं यस्य खलाः शकुनिप्रभृतयः तेषां छन्दो वृत्तं तदनुवर्त्तनशीलश्च ।। ४ ।।

श्रीसुबोधिनी–सारः

शुकोक्तिः । पौरवेन्द्राणां यशोभिः कीर्त्तिभिरङ्कितं चिह्नितं देवालयवाप्यारामादिभिस्तत्कृतैर्विजृंभितत्वात् हास्तिनपुरं गत्वा सोऽक्रूरः तत्र पुरे आम्बिकेयं धृतराष्ट्रं भीष्मेण सहितं विदुरं पृथां कुन्तीं च ददर्श ।। १ ।। पुत्रसहितं बाह्लीकं सोमदत्तजनकं सगौतमं कृपाचार्यसहितं भारद्वाजं द्रोणं द्रौणिमश्वत्थानामानं कर्णं दुर्योधनं पाण्डवान् अपरान्सुहृदो ददर्श ।।२।। यथावत् उपसंगम्य मिलित्वा तैर्बंधुभिः सुहृद्वार्त्तां प्रति सम्यक् पृष्टो गांदिन्याः सुतोऽक्रूरः स्वयं चाव्ययं कुशलमपृच्छत् ।। ३ ।। दुष्प्रजस्य कुपुत्रस्याल्पः सारो धैर्यं यस्य स खलानां दुष्टानां कर्णादीनां छन्दमिच्छामनुवर्त्तितुं शीलं यस्य स तस्य राज्ञो धृतराष्ट्रस्य वृत्तविवित्सया चेष्टितज्ञानेच्छया कतिचिन्मासान् उवास ।। ४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पाण्डववृत्तमाज्ञाय कृष्णायावर्णयत् सुधीः । अक्रूर इति ह्येकोनपञ्चाशे विनिरूप्यते ।। १ ।।

सोऽक्रूरः कौरवेन्द्राणां यशोभिः कीर्तिहेतुभिः कृतदेवब्राह्मणाद्यायतनादिभिरङ्कितं हास्तिनपुरं गत्वा तत्र भीष्मेण सहितमाम्बिकेयं धृतराष्ट्रं विदुरादींश्च ददर्शेत्यन्वयः । तत्र पृथा कुन्ती ।। १ ।। बाह्लीकपुत्रः सोमदत्तः । भारद्वाजो द्रोणः । गौतमः कृपः । द्रौणिरश्वत्थामा ।। २ ।। गान्दिनीसुतोऽक्रूरो यथावत् यथायोग्यं हास्यहस्तग्रहणालिङ्गननमस्कारादिपूर्वकं बन्धुभिः सह उपसङ्गम्य मिलित्वा तैश्च सुहृद्वार्तां सम्पृष्टः स्वयमपि तेषामव्ययं कुशलमपृच्छदित्यन्वयः ।। ३ ।। राज्ञो धृतराष्ट्रस्य वृत्तस्य विवित्सया ज्ञातुमिच्छया कतिचिन्मासास्तत्रोवास । 'तत्र किञ्चित्कालावस्थानेनैव तद्वृत्तं ज्ञातुं शक्यते, न झटित्यनायासेनैव' इत्याशयेन राजानं विशिनष्टि–दुष्टाः प्रजाः पुत्रा दुर्योधनादयो यस्य तस्य । अल्पो मन्दः सारः बुद्धिर्यस्य तस्य । तथा खला दुष्टाः कर्णादयस्तेषां छन्दमिच्छामनुवर्तितुं शीलं यस्य तस्य ।। ४ ।।

अन्वितार्थप्रकाशिका

ऊनपञ्चाशत्तमे त्वक्रूरो ज्ञात्वा नृपाशयम् । मथुरामागमत्तत्र श्लोकाश्चन्द्राग्नयो (३१) मताः ।।
पञ्चोवाचेति पादोनाः स्युर्द्वात्रिंशदनुष्टुभः (३१।।।) ।। ४९ ।।

स इति द्वयम् । सोऽक्रूरः पौरवेन्द्राणां यशोभिः यशोहेतुभिः तत्कृतदेवायतनाद्यैरङ्कितं हास्तिनपुरं गत्वा तत्र भीष्मेण सहितमाम्बिकेयं धृतराष्ट्रं विदुरं पृथां कुन्तीं सहपुत्रं सोमदत्तसहितं बाह्लीकं सगौतमं कृपाचार्यसहितं भारद्वाजं द्रोणं कर्णं सुयोधनं द्रौणिमश्वत्थामानं पाण्डवान् अपरांश्च सुहृदो मित्राणि ददर्श ।। १–२ ।। यथावदिति । गान्दिनीसुतोऽक्रूरो यथावत् यथायोग्यं हास्यहस्तग्रहणालिङ्गननमस्कारादिपूर्वकं बन्धुभिः सह उपसंगम्य मिलित्वा तैश्च सुहृद्वार्तां संपृष्टः स्वयमपि तेषामव्ययं कुशलमपृच्छत् ।। ३ ।। उवासेति । दुष्टाः प्रजाः पुत्राः दुर्योधनादयो यस्य तस्य । असिजभाव आर्षः । अल्पो मन्दः सारः बुद्धिर्यस्य तस्य तथा खला दुष्टाः कर्णादयस्तेषां छन्दमिच्छामनुवर्त्तितुं शीलमस्य तस्य राज्ञो धृतराष्ट्रस्य वृत्तस्य विवित्सया लब्धुमिच्छया "विदॢ लाभे" कतिचिन्मासांस्तत्रोवास ।। ४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ नवचत्वारिंशेऽध्यायेऽक्रूरो हस्तिनापुरं गत्वा अम्बिकापुत्रस्य पुत्रेषु पांडवेषु च विषमवर्त्तनं ज्ञात्वा च ततः स पुत्रायाः कुन्त्याः सांत्वनं कृत्वा पुनस्तस्य मथुरागमनं प्रोच्यते कौरवादीनां पौरविंद्राणां पुरुवंशोत्पन्नानां राज्ञां यशोभिः तत्कारितसुरविप्राऽऽलयादिभिरंभिरंकितं चिह्नितं तत्र गजसाह्वये स भीष्मं आम्बिकेयमंबिकापुत्रं धृतराष्ट्रं पृथां कुंतीं ददर्श ।। १ ।। सह पुत्रं पुत्रेण सोमदत्तेन सहितं बाह्लीकं स गौतमं गौतमेन कृपेण सहितं भारद्वाजं द्रोणाचार्यं कर्णं राधेयं ददर्शेति सम्बंधः ।। २ ।।

गांदिनीं सुतः अक्रूरः बंधुभिः सह उपसंगस्य मिलित्वा तैस्तत्रत्यैर्बंधुभिः सुहृदां स देवादीनां वार्त्तां प्रतिपृष्टः स्वयं चाक्रूरोऽपि अव्ययं तेषामनामयं अपृच्छत् ॥ ३ ॥ दुःप्रजस्य दुष्टसुतस्य अल्पसारस्य अल्पधृतेः खलानां शकुनिराधेयादीनां छन्दमभिप्रायमनुवर्त्तते इत्येवं शीलस्य तस्य राज्ञः वृत्तस्य वृत्तांतस्य विवित्सया वेदितुमिच्छया ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अक्रूरस्तूनपञ्चाशत्तमे गत्वा गजाह्वयम् । भ्रातृपुत्रेषु वैषम्यं राज्ञो बुद्ध्वाऽगमत् पुनः ॥ १ ॥

अथैवं भगवता प्रेषितोऽक्रूरः संविज्ञातसुहृद्वृत्तान्तः पुनर्मथुरामेत्य तद्भगवते न्यवेदयदित्याह स गत्वेत्यादिना । स इति । सोऽक्रूरः, पौरवेन्द्राणां पुरुवंशोद्भवानां राज्ञां यशोभिर्यशः सूचकदेवब्राह्मणाद्यायतनादिभिरङ्कितं, हास्तिनपुरं गत्वा, तत्र पुरे सभीष्मं भीष्मेण सहितं, आम्बिकेयं धृतराष्ट्रं, विदुरं, पृथां कुन्तीम् ॥ १ ॥ सहेति । सहपुत्रं सोमदत्ताख्यपुत्रसहितं, बाह्लीकं, सगौतमं कृपाचार्यसहितं, भारद्वाजं द्रोणं, कर्णं, सुयोधनं, द्रौणिमश्वत्थामानं, पाण्डवान्, अपरानन्यान् सुहृदश्च, ददर्श । इति द्वयोरेकसंबन्धः ॥ २ ॥ यथावदिति । गान्दिनीसुतोऽक्रूरः, यथावद्यथायोग्यं, बन्धुभिः युधिष्ठिरादिभिः सह, उपसंगम्य समुपेत्य, तैर्बन्धुभिः, सुहृद्वार्तां संपृष्टः, वार्त्तमिति पाठे, स्वकुशलं संपृष्टः सन्, स्वयमपि अव्ययं तेषां कुशलं च, अपृच्छत् ॥ ३ ॥ उवासेति । किं च ततः, दुष्टाः प्रजा दुर्योधनादयः पुत्रा यस्य तस्य, असिजभाव आर्षः । अल्पो मन्दः सारो धृतिर्यस्य, तस्य, अत एव खलाः कर्णादयस्तेषां छन्देनानुवर्त्तयितुं शीलमस्य तस्य, राज्ञो धृतराष्ट्रस्य, वृत्तविवित्सया वृत्तपरिशीलनार्थं, कतिचित् मासान् उवास ॥ ४ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

स गत्वेति : १०.४९.१.

ये धर्मप्रतिकूलवृत्तिविभवास्ते विद्विषोऽप्यादरादक्रूरोक्त्युपदेशतः स्वयमनुग्राह्याः स्वभावस्त्वयम् ।
साधूनामिति बोधयन् प्रभुरसौ सम्प्रेषयामास तं सोऽप्यागादुपदेष्टुमस्य नगरं निःशङ्कमेतत्क्षमम् ॥ १ ॥
दृष्ट्वा तदा ते नृपतेरधर्मनिष्ठां प्रवृत्तिं पुरवासिलोकाः । युक्तं जगुः प्राग्भवपौरवेन्द्रकीर्तिं मुहुर्धर्मगुणप्रधानाम् ॥ २ ॥
यो गूढप्रणिधेः पदं श्रित इह स्यात्तेन चातुर्यतः स्वाप्तादप्यतिशाय्यनाप्तगजने सप्रमभावादरः ।
सद्यः संसदि दर्शनीय इति सन्नीतिज्ञ एतत्क्षमं पृष्ट्वा भीष्ममुखाननामयमथापृच्छत् पृथां तत्सुताम् ॥ ३ ॥

उवासेति : १०.४९.४.

विना न सहवासितां भवति यस्स्वभावः स्फुटो मनागपि लघोरपि क्वचिदयं तु पृथ्वीपतिः ।
निजान्तरनुचिन्तयन्निति स युक्तमेवाऽऽत्मधीरुवास दिवसान् बहूनखिल - तत्स्थितिज्ञप्तये ॥ ४ ॥
विना बहुदिनावासं न स्युर्वेद्याः सुहृद्गिरः । द्विषत्कर्णाऽस्पृशोऽस्मिन्वा तज्जिज्ञासुरुवास सः ॥ ५ ॥

कृष्णप्रिया

श्रीशुकदेवजी ने कहा राजन् परीक्षित् ? भगवदाज्ञानुसार श्री अक्रूर जी हस्तिनापुर पधारे पुरु वंश के पुण्यशील राजाओं ने यह देवादि मन्दिरों से समृद्ध नगर बनाया था । पुर में प्रवेश करने के पश्चात् प्रथम धृतराष्ट्र पुनः भीष्म पितामह तदनन्दर श्रीविदुर जी एवं पृथा जी से मिले ॥ १ ॥ हस्तिनापुर में शान्तनु राजा के पुत्र बाह्लीक, बाह्लीक के भूरिश्रवा आदि पुत्रों को मिले पुनः भरद्वाज के पुत्र द्रोणाचार्य, कृपाचार्य, कर्ण, दुर्योधन, अश्वत्थामा, पाण्डव और अन्य मित्र देखे ॥ २ ॥ श्री मान्दिनी देवी के सुपुत्र श्री अक्रूर जी सब स्वजनों को यथा योग्य मिले । हस्तिनापुर वासियों ने श्री अक्रूरजी को मथुरा निवासी बन्धुजनों के कुशल समाचार पूछे । श्री अक्रूर जी ने भी सबकी सर्व प्रकार की कुशल पूछी ॥ ३ ॥ श्री अक्रूरजी उच्छृंखल पुत्र वाले, अल्प बलवाले, खल सलाहकारों के कथनानुसार चलने वाले धृतराष्ट्र के सहज दोष, पुत्रों के मोहकृत दोष, एवं संसर्गकृत दोषों को जानने के लिए तीन मास से अधिककाल हस्तिनापुर में ठहर गए ॥ ४ ॥

तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् । प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितम् ॥ ५ ॥
कृतं च धार्तराष्ट्रैर्यद् गरदानाद्यपेशलम्[1] । आचख्यौ सर्वमेवास्मै[2] पृथा विदुर एव च ॥ ६ ॥
पृथा तु भ्रातरं प्राप्तमक्रूरमुपसृत्य तम् । [3]उद्देश्य जन्मनिलयं स्मरन्त्यश्रुकलेक्षणा ॥ ७ ॥
अपि स्मरन्ति नः सौम्य पितरौ भ्रातरश्च मे । भगिन्यो भ्रातृपुत्राश्च जामयः सख्य एव च ॥ ८ ॥

---

१. कौशलम–विजः । २. मेतस्मै–विज. । ३. उवाच–श्रीधर. वंशी. जीव. वीर. विज. शुक. ।

कर्दमक्षमा

अन्वयः—पार्थेषु, प्रजानुरागम्, तेजः, ओजः, बलम्, वीर्यम्, च, प्रश्रयादीन्, सद्गुणान्, न, सहद्भिः, चिकीर्षितं, मान्दिनीसुतः, अभिज्ञातवान् ॥ ५ ॥ अस्मै, पृथा, विदुर, एव, च, धार्तराष्ट्रैः, गरदानादि, अपेशलम्, च, यत्, कृतम्, तत्, सर्वम्, आचक्ष्यौ ॥ ६ ॥ पृथा, तु, तम्, भ्रातरम्, अक्रूरम्, प्राप्तम्, उपसृत्य, जन्मनिलयम्, उद्देश्यम्, च, स्मरन्ती, अश्रुकुलेक्षणा, आह, हे सौम्य ? पितरौ, च, मे, भ्रातरः, भगिन्यः, भ्रातृपुत्राः, च, जामयः, च, भगिनीपुत्राः, सख्यः, एव, च, बालिकाः, अपि, नः, स्मरति ॥ ७-८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तेजः प्रभावम् । ओजः शस्त्रादिनैपुणम् । वीर्यं शौर्यम् । न सहद्भिरसहमानैर्धार्ष्ट्रैश्चिकीर्षितमित उपरि कर्तुमिष्टम् ॥५॥ कृतं च गरस्य विषस्य दानादि । अपेशलमन्याय्यम् । तेज ओज इत्यादि सर्वमस्मै कथयामास ॥ ६ ॥ तत्कथनात्पूर्वतरं पृथाया वृत्तमाह । पृथात्विति । अश्रूणां कला लेशा ययोस्ते ईक्षणे यस्याः सा ॥ ७ ॥ अपि किम् । जामयः कुलस्त्रियः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तेजो ज्योतिर्लक्षणा दीप्तिः । ओजः पराभिभवसामर्थ्यम् । बलं शारीरं, रूपं वा । इत उपरि तत्प्रभावाद्यसहनादूर्ध्वं कर्तुमिष्टं तन्निष्कासनमारणोपायादि । धार्तराष्ट्रैर्यत्कृतं तत्पृथाविदुरावाचख्यतुरित्यर्थः । द्वयोरन्वयः । अस्मै अक्रूराय । तेज इति युग्मकम् । आदिना लज्जाधैर्यादिग्रहः । गरदानं श्रीभीमाय, आदिना जलनिक्षेपादिकृतम्, चिकीर्षितं तु लाक्षागृहादि । किमुत पृथा यतः पितृव्यत्वेनोभयत्र समो विदुरः सोऽपीत्यर्थः ॥ ५-६ ॥ तत्कथनाद्धार्तराष्ट्रकृतान्यायोक्तेः । तम् अक्रूरम् । जन्मनिलयं पितृगृहम् । अश्रूणि कलयतः निरन्तरं मुञ्चत इत्यश्रुकले ईक्षणे नेत्रे यस्याः सेति वा ॥ ७ ॥ नोऽस्मान् । 'जामिः स्वसृकुलस्त्रियोः' इत्यमरः न इति पुत्राद्यपेक्षया बहुत्वम् । सौम्य हे शान्तप्रकृते भवादृशां बन्धुवात्सल्यसाधुत्वादिति भावः । पितरौ शूरतत्पत्न्यौ । जामयः श्रीदेवक्यादयः । सख्यः समशीला अन्याः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तेज इति युग्मकम् । आदिशब्दाल्लज्जाधैर्यादयः गरस्य दानं श्रीभीमाय आदिशब्दाज्जलनिक्षेपादि कृतं चिकीर्षितं तु लाक्षागृहादि ॥ ५ ॥ किमुत पृथा यतः पितृव्यत्वेन उभयत्र समो विदुर एव सोऽपीत्यर्थः । अन्यत्तैः तत्र तेज ओज इत्यादिकमिति सर्वमित्यस्यैव व्याख्या ॥ ६ ॥ श्रीभगवद्भक्तिविशेषेण कुन्त्या वृत्तं विचार्याह । पृथेति । अत एवान्यतो विशेषात्तुशब्दः प्राप्तं स्वगृहे समागतं सन्तं तं श्रीभगवद्भक्तवरत्वेन ख्यातम् अश्रूणि कलयतः निरन्तरं मुञ्चत इत्यश्रुकले ईक्षणे यस्याः सा ॥ ७ ॥ नोऽस्मानिति पुत्राद्यपेक्षया सौम्य ! हे शान्तप्रकृते इति भवादृशां बन्धुवात्सल्यसाधुत्वादिति भावः । पितरौ शूरतत्पत्न्यौ जामयः श्रीदेवक्यादयः सख्यः समशीला अन्याः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आदि-शब्दाल्लज्जाधैर्यादयः, सत उत्तमान् गुणान्, तेज आदीनां षण्णां यथापूर्वमसहने श्रेष्ठ्यम् ॥ ५ ॥ गरस्य दानम्, आदि-शब्दात् तद्दानप्रकारादि, किंवा वधार्थं विविध-दुर्मन्त्रणादि, अस्मै अक्रूराय, एव अपि, पितृव्यत्वेनोभयत्र समो विदुरोऽपीति तद्दाढर्यं बोधितम् । चकारात् द्रोणादिभृत्य-पुरोहितादिर्वा । अन्यत्तैर्व्याख्यातम् । तत्र तेज ओज इत्यादिकमिति सर्वमित्यस्यैव व्याख्या ॥ ६ ॥ श्रीभगवति भक्तिविशेषेण श्रीकुन्त्या वृत्तं विस्तार्याह—पृथेति । अत एवान्यतो विशेषात् तु-शब्दः । प्राप्तं पश्चात् स्वगृहे समागतं सन्तं तं श्रीभगवद्भक्तवरत्वेन ख्यातम् अश्रूणि कलयतो निरन्तरं मुञ्चत इत्यश्रुकले ईक्षणे यस्याः सा ॥ ७ ॥ नोऽस्मानिति पुत्राद्यपेक्षया, 'मे' इति तस्या एव तत्सुतत्वादिना; सौम्य ! हे शान्तप्रकृते इति भवादृशां बन्धुवात्सल्यं साधुत्वादिति भावः । पितरौ शूर-तत्पत्न्यौ, भ्रातरः श्रीवसुदेवादयः, भ्रातृपुत्राः श्रीरामकृष्णादयः, जामवः श्रीदेवक्यादयः, सख्योऽन्याः कुलस्त्रियः, 'एव' अप्यर्थे समुच्चये वा, च-काराद्दासदास्यादयः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तेज इत्यादि । पार्थेषु प्रजानामनुरागं येषां तेजआदिगुणांश्चासहमानैर्धार्तराष्ट्रैर्दुर्योधनादिभिर्यत्कृतं विषप्रदानादिकमपेशलं कठिनं दुष्टं कर्म यच्च चिकीर्षितमग्रे करणीयं तत्सर्वमस्मै अक्रूराय पृथा विदुरश्चाचख्यौ इति द्वयोरेकान्वयः । तत्र तेजः पराभिभवसामर्थ्यम् ओजः परैरनभिभूतत्वं बलं शारीरं धानुषं च वीर्यं शौर्यं तच्च युद्धे स्वगृहे इव प्रवेशसामर्थ्यम् ॥ ५-६ ॥ तत्र पृथाया विशेषमाह । पृथा त्विति । तत्र पृथा तु तदाख्यानात् पूर्वमेव समागतं भ्रातरमक्रूरमुपसृत्य समुपेत्य जन्मनिलयं जन्मभवनं स्मरन्ती अश्रूणां कला लेशा ययोस्ते ईक्षणे यस्याः सा तमक्रूरं प्रत्युवाच ॥७॥ उक्तिमेवाह । अपीति षड्भिः । हे सौम्य ! अक्रूर मे पित्रादयः नोऽस्मान्स्मन्त्यपि स्मरन्ति किम् तत्र जामयः कुलस्त्रियः सख्यः सहचर्य्यः ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तेजो ज्योतिर्लक्षणा दीप्तिः ओजः पराभिभवलक्षणं सामर्थ्यं बलं शारीरं रूपं वा वीर्यं पराक्रमः ।। ५-६ ।। जन्मनिलयं जन्मगृहम् ।। ७ ।। जामयः भ्रातृवर्गभार्याः ।। ८ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तेजः प्रभावः ओजः शास्त्रादिनैपुण्यं वीर्य्यं शौर्य्यम् अपेशलमन्याय्यम् ।। ५-६ ।। तत्कथनात् पूर्वतरं पृथावृत्तमाह । पृथा त्विति ।। ७ ।। यामयः कुलस्त्रियः ।। ८-९ ।।

गूढार्थदीपिनी

तेज इति द्वयम् । प्रभावम् । सामर्थ्यम् शारीरम् । शौर्यमिति क्रमेणार्थाः । एतानि न सहद्भिः दुर्योधनादिभिः यत् अपेशलं क्रूरं कर्म कृतं यच्च अग्रे चिकीर्षितं तत्सर्वम् निवेदयामासेति द्वयोरन्वयः । गरो विषम् ।। ५-६ ।। अश्रुबिन्दुयुक्ते नेत्रे यस्याः सा ।। ७ ।। नोऽस्मात् । पितरौ शूरतत्पत्न्यौ । जामयः । 'जाभिः स्वसृकुलस्त्रियोः' इत्यमरः ।। ८ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तथा पुत्रेषु प्रजायाः पौरजानपदजनतायाः अनुरागम् पार्थानां तेजआदिसद्गुणांश्च न सहद्भिः असहमानैर्धार्तराष्ट्रैर्दुर्योधनादिभिर्यदपेशलं कठिनं विषदानादि कृतं यच्च चिकीर्षितमत उपरि कर्तुमिष्टं तत्सर्वम् अस्मै अक्रूराय पृथा विदुरश्च आचख्यौ इति द्वयोरन्वयः एवकारस्तेषां दुष्टान् दुर्मन्त्रितं प्रायो ऽन्यो न ज्ञातवानिति सूचयति ।। ५-६ ।। कृतचिकीर्षिततत्कर्मकथनात् पूर्वमक्रूरं समुपेत्य पृथया यदुक्तं तद्वर्णयति । पृथेति सप्तभिः । उपसृत्य समुपेत्य जन्मनिलयं जन्मभूमिं स्मरन्ती अश्रूणां कला लेशाः ययोस्ते ईक्षणे यस्याः सा तमक्रूरमुवाच ।। ७ ।। जामयः कुलस्त्रियः ।। ८ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तेजः शारीरवर्चं ओजोऽवष्टम्भशक्तिर्बलं शारीरं वीर्यं पराक्रमः प्रश्रयादीन्सद्गुणान्प्रजानुरागं प्रजाकर्तृकं स्नेहं च न सहद्भिः स एवायं नागः सहति कलमेभ्य इत्युदाहृत्य धात्वन्तररूपमिति प्राग्विस्तृतं विलोक्यम् । चिकीर्षितं कर्तुमिष्टमुत्तरेणान्वयः ।। ५ ।। तथा धार्तराष्ट्रैः कृतं च तदेवाह । यदिति । गरदानादि यदकौशलमक्षेमव्यापारम् । अपेशलमिति पाठोऽपि पेशलः । अपेशलममनोहरमन्यायमिति यावत् आचख्यौ । पृथा विदुर एव चाचख्याविति पृथगन्वयः ।। ६ ।। पृथा भ्रातरं प्राप्तं तमक्रूरम् । तुरेकान्तादिविशेषसूचकः । जन्मनिलयं जन्मगृहं मातृसद्मेत्यर्थः । इदानीं पुत्रजन्मनिलयं गिर्युपरीति तत्स्मरन्तीति वा । अश्रूणां कुलं सङ्घो ययोस्ते ईक्षणे लोचने यस्याः सा सत्युवाच । जन्मनि सति पुत्राणां लयोऽव्ययः पाण्डोरिति पदतदर्थौ वा । अश्रुकलेक्षणेति पाठेऽऽश्रूणां कला बिन्दवो ययोस्ते ईक्षणे यस्याः सेत्यर्थ ।। ७ ।। पितरौ श्वफल्कादिकौ भ्रातरौ वसुदेवादिकौ भगिन्यौ भ्रातृपुत्रा जामयस्तव । जामयो वयमित्पृगव्याख्यामायुष्करो भ्रातरस्ते वयं चेत्यृग्भाष्ये । तथाम्बयोयन्त्यध्वभिर्जामय इति भाष्ये च कारणत्वात्सहोदराः । जगतो जामय इत्युक्त्या भगिन्यो भ्रातरौ चेति मातृभगिनीपुत्रीपुत्राणां ग्रहणमत्र साक्षात्सहोदरीणां सहोदराणां चाग्रहणमिति विवेकः । सख्य एव च नः स्मरन्त्यपि स्मरन्ति किमिति ।। ८ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्कृतं समीचीनं मन्यत इत्यर्थपरिज्ञानमाह । तेज इति द्वाभ्याम् । तेजः कान्तिः ओज इन्द्रियशक्तिः बलं देहस्य वीर्यं पराक्रमः वीररसाभिनिवेशकृत् एते क्षत्रियोत्कृष्टत्वप्रतिपादकधर्माः सद्गुणानाह । प्रश्रयादीनिति । विनयादयो हि सात्त्विकधर्मास्तेन स्वभावतस्ते जीवा उद्धर्त्तव्या इत्युक्तं दोषे हेत्वन्तरमप्याह । पार्थेषु युधिष्ठिरादिषु प्रजानुरागं च त्रेधा हि मात्सर्यमुत्पन्नं त्रिदोषात्मकं सत् अचिकित्स्यमिति तत्कृतं फलमाह । न सहद्भिश्चिकीर्षितमिति ।। ५ ।। सर्वथा मारणं कृतं तु गरदानं भीमाय विषमोदकाः प्रदत्ता इति स च पातालं गत्वा समागत इति च अतिशब्देन बहुधा भीममारणार्थमुद्यमोऽपि प्रदर्शितः अपेशलमसुन्दरं कदाचिदपमानादिकमपि कृतमिति वृत्तान्तसहितमेतत्सर्वं पृथा विदुरश्च स्वकीयसाधारणश्च सर्वमेवाचाख्यौ एकेन स्वरूपज्ञानमपरेण भावमिति चकाराल्लोकमुखतोऽप्येवं भूतार्थपरिज्ञाने भगवदीयत्वं हरेरिति ।। ६ ।। पृथायां भगवदीयत्वनिरूपणार्थं भगवति तस्यानवधानभावमाह । पृथात्विति । यद्यप्येषा कुन्तिभोजाय दत्ता तथाप्युत्पन्न, शूरादेवेति पितृगृहं वसुदेवादय एव भवन्ति वसुदेवो भ्रातेत्ययमपि भ्राता तु शब्दः तज्जिज्ञासाभिन्नप्रक्रमार्षं प्राप्तमिति तस्यालभ्यलाभो दर्शितः उपसृत्येति आचख्यौ सर्वमेवास्मै पृथेत्युक्तं वस्तुतस्तु पूर्वमेव समागमादनन्तरमेव भगवति भावः अत एव तु शब्दप्राप्तशब्दौ उपसृत्य समीपे समागत्य तं पर्यनुयुञ्जाना जन्मनिलयं जन्मगृहं पितृकुलमिति यावत् तत्स्मरन्ती लोकवदश्रुकलेक्षणा जाता एतत्कायिकं मानसिकं च निरूपितम् ।। ७ ।। वाचनिकं निरूयति । अपि स्मरतीति । सौम्येति सम्यक् कथनार्थं सम्बोधनं नोऽस्मान् पाण्डवान् अपीति

सम्भावनायां यतः पितरौ यतो भ्रातरः पित्रोर्वृद्धत्वेनाप्रयोजकता शङ्क्येतेति भ्रातृगृहणं म इति स्वस्य प्रियत्वं सूचितं यद्यपि भगिन्योऽत्र सन्ति तथापि पितृगृहं समायान्तीति तेषां स्मरणज्ञानसम्भावनम् अन्यस्मै दत्तेति शङ्कया कदाचिदस्मरणं तथा सति न निस्तार इति भावः । स्मरणेत्वभिजनसम्पत्तिः सिद्धेति न तथा दुःखं भवति भ्रातृपुत्राः वसुदेवसुदेवादिपुत्राः चकाराद्भगिनी-पुत्राश्च जामयः कुलस्त्रियः पितृवंशविवाहिता देवकीप्रभृतयः सख्यः स्वस्य तासां स्मरणमावश्यकमिति सर्वाश्च ताः सख्य एव चकारात् कालिकाश्च सम्पूर्णवंशस्य ममत्वेन दुःखमिति भावः ॥ ८ ॥

श्रीसुबोधिनी–सार

पार्थेषु पृथापुत्रेषु तेजः प्रभावम् ओजः शस्त्रकौशल्यं बलं देहशक्तिः वीर्यं शूरत्वं प्रश्रयादीन् सुनम्रतासुजन्यादीन् सद्गुणान् प्रजानामनुरागं प्रेम न सहद्भिः असहमानैर्धार्त्तराष्ट्रै दुर्योधनादिभिः कृतं यत् गरदानादि विषप्रदानपादिना जतुगृह-दाहादि चिकीर्षितम् इत उपरि कर्त्तुमिष्टम् अपेशलं मन्याय्यं सर्वं एवास्मा अक्रूराय पृथा कुन्ती आचख्यौ विदुरश्चोवाच ॥५-६॥ प्राप्तमायातं तं भ्रातरमक्रूरम् उपसृत्य प्राप्य जन्मनो निलयं स्थानं स्मरन्ती अश्रूणां कला लेशा ययोस्ते अक्षिणी यस्याः सा पृथा कुन्त्युवाच ॥७॥ हे सौम्य मे पितरौ भ्रातरश्च भगिन्यादयश्च जामयः कुलस्त्रियः सख्यश्च नोऽस्मान्स्मरन्ति अपि किम् ॥ ८ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

तेजः पराभिभवसामर्थ्यम् । ओजः इन्द्रियसामर्थ्यम् । बलं शारीरसामर्थ्यम् । वीर्यं शौर्यम् । प्रश्रयः विनयः । पार्थानां तेजआदिगुणांस्तथा तेषु प्रजानुरागं च न सहद्भिरसहमानैर्धार्तराष्ट्रै दुर्योधनादिभिः यद्गरदानादि विषप्रदानादिकम् अपेशलं दुष्टं कर्म कृतं, यच्चाग्रे चिकीर्षितं तत् सर्वमस्मै अक्रूराय पृथा विदुरश्च आचख्याविति द्वयोरन्वयः ॥ ५-६ ॥ एवं प्रसङ्गात् पृथा सर्वमाचख्यौ इति उक्तम् । ततः पूर्वं तत्सम्मीलनप्रकारमाह—पृथा त्विति । तुशब्देनान्येभ्यस्तस्याः स्नेहाधिक्यं व्याकुलताधिक्यं च सूचयति । पृथा तु भ्रातरमक्रूरं प्राप्तमाश्रुत्य तमुपसृत्य तत्समीपं गत्वा उवाच । व्याकुलतां दर्शयन्नाह—अश्रूणां कला लेशा ययोस्ते ईक्षणे यस्याः सा । तत्र हेतुमाह—जन्मनिलयं पितृगृहं स्मरन्तीति ॥ ७ ॥ तदुक्तिमेवाह—अपीति षड्भिः । 'त्वद्दर्शना-देव मम महानानन्दो जात' इत्याशयेन सम्बोधयति—सौम्येति । अपि किं नोऽस्मान् मे पित्रादयः स्मरन्ति ? जामयः कुलस्त्रियः ॥ ८ ॥

अन्वितार्थप्रकाशिका

तेज इति द्वयम् । तेजः पराभिभवसामर्थ्यम् ओजः शस्त्रशास्त्रनैपुण्यं बलं शारीरं वीर्यं शौर्यं प्रश्रयः विनयः पार्थानां तेजआदीन्सद्गुणांस्तथा तेषु प्रजानामनुरागं च न सहद्भिरसहमानैः । आधृषीयस्य सहेर्णिजभावे रूपम् । धार्तराष्ट्रै दुर्योधना-दिभिर्यद्गरदानादि विषप्रदानादिकमपेशलं दुष्टं कर्म कृतं यच्चाग्रे चिकीर्षितं लाक्षागृहदाहादि तत्सर्वमस्मै अक्रूराय पृथा विदुरश्चैव आचख्यौ ॥ ५-६ ॥ तत्कथनात्पूर्वतरं पृथाया वृत्तमाह-पृथा त्विति । पृथा तु जन्मनि लयं पितृगृहं स्मरन्ती अश्रूणां कला बिन्दवो ययोस्ते ईक्षणे यस्यास्तादृशी अश्रूणि कलयतः मुञ्चतः ते ईक्षणे यस्याः इति वा सती भ्रातरमक्रूरं प्राप्तमाश्रुत्य तमुपसृत्य तत्समीपं गत्वा उवाच ॥ ७ ॥ अपीति । हे सौम्य ! अपीति प्रश्ने । पितरौ भ्रातरश्च भगिन्यो भ्रातृपुत्राश्च जामयः कुलस्त्रियः देवक्याद्याः सख्य एव च मे मम स्मरन्ति किम् । अधीगर्थेति षष्ठी ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तेजः प्रभवाऽतिशयं ऋजः शस्त्रादिप्रयोगचातुर्यं वीर्यं शौर्यादिसामर्थ्यं न सहद्भिरसहमानैः धार्त्तराष्ट्रैः अन्यचि-कीर्पितं कर्त्तुमिष्टं लाक्षागृहदाहादि ॥ ५ ॥ विषदानादि अपेशलमनयत्वं यत् कृतं तत्सर्वं अस्मै अक्रूराय आचख्यौ । अब्रवीत्॥६॥ तत्कथनात्पुर्वतरमेवपृथाया वृत्तांतमाह पृथेति तनुपसृत्य अश्रूणां कलाविन्दवो ययोः एवं भूते ईक्षणे यस्याः सा पृथा उवाच ॥७॥ जामयो देवक्याद्याः कुलयोषितः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तेज इति ॥ कृतमिति च ॥ पार्थेषु तेजः प्रभावः ज्योतिर्लक्षणा दीप्तिर्वा, ओजः शस्त्रादिनैपुण्यं पराभिभवलक्षसामर्थ्यं वा, बलं शारीरं रूपं वा, वीर्यं शौर्यं पराक्रमो वा, प्रश्रयो विनय आदिर्येषां दाक्षिण्यादीनां तान्, सद्गुणान् प्रजानामनुरागस्तं च, न सहद्भिरसहमानैः, धार्त्तराष्ट्रैः धृतराष्ट्रपुत्रैर्दुर्योधनादिभिः, यत् कृतं, गरदानादिविषप्रदानादिकं, अपेशलं कठिनं दुष्टं वा कर्म, यच्च चिकीर्षितमग्रे करणीयं, तत् सर्वं, विदुरः पृथा कुन्ती च, अस्मै अक्रूराय, एवापि आचख्यौ एव । इति द्वयोरेकान्वयः ॥५-६॥ पृथाया विशेषमाह ॥ पृथात्विति ॥ तत्र पृथा तु, तदाख्यानात्पूर्वमेवेति शेषः । प्राप्तं समागतं भ्रातरं तमक्रूरं, उपसृत्य समुपेत्य,

जन्मनिलयं जन्मभवनं, स्मरन्ती, अश्रूणां कला लेशा ययोस्ते ईक्षणे नयने यस्याः सा एवंभूता सती, उवाच ॥ ७ ॥ उक्तिमेवाह षड्भिः। अपीति॥ हे सौम्याक्रूर, मे मम, पितरौ भ्रातरश्च, भगिन्यः, भ्रातृपुत्राश्च, जामयः कुलस्त्रियः, सख्यः सहचर्यश्च, नोऽस्माकं, स्मरन्ति अपि। एवकारो न वेत्यर्थद्योतनार्थकः ॥ ८ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

तेज ओज इति : १०.४९.५.

आसीत् सधर्मेषु गुणान्वितेषु प्रजानुरागो हि पृथाभवेषु। दुर्योधनाद्येषु च दुर्मुखेषु विधूतधर्मेषु न चाऽऽस युक्तम् ॥ ६ ॥
पार्थेषु सार्था निखिलेषु सर्वे गुणाश्च तेऽभ्ये बहवोऽपि चासन्। प्रत्येकमेकः कथितोऽत्र मुख्यो विभाति मे तद्गुणसंख्येति ॥७॥
प्रश्रयो धर्मराजे च बलं भीमे धनञ्जये। वीर्यं तेजस्तु नकुले भात्योजश्चरमे स्फुटम् ॥ ८ ॥ (युग्मम्)

कृतं चेति : १०.४९.६.

चित्रं धर्मानुगायासौ ददौ दुर्योधनो विषम्। अथवा धार्तराष्ट्रस्य तद्युक्तं कुटिलात्मनः ॥ ९ ॥

चन्द्राश्मा चन्द्रयोगे दिनकरमणिरप्यर्कयोगेऽम्बुजं वा सद्रावः सस्फुलिङ्गो भवति विकसितं तद्वदेवाचिरेण।
स्वाप्तालोकेऽभ्युपेते क्वचिदपि सुहृदो दुर्वहक्लेशभाजश्चेतः सोत्कण्ठतां तं व्रजति निगदितुं साधु सोवाच तं तत् ॥ १० ॥

ज्ञाताऽज्ञाता भवतु भुवने योषिता पूरुषो वा दुःखं तावत्परकृतमलं धार्यमन्तः कथञ्चित्।
यावत्कश्चित् सदयहृदयः स्वप्रभोर्मन्त्रिभूतो नाप्तस्तस्मिन् सपादमिलिते तद्वदेत् स्वान्तरस्थम् ॥ ११ ॥

धार्तराष्ट्राप्तदुःखार्तौ तौ पृथाविदुरौ तदा। यन्न्यवेदयतां दुःखमक्रूरं तं ततः स्फुटम् ॥ १२ ॥ (युग्मम्)

पृथा त्विति: १०.४९.७.

भ्राताऽपि दूरतस्त्याव्यो यदि क्रूर इति स्फुटम्। युक्तं पृथा तमक्रूरमुपेता दुःखमब्रवीत् ॥ १३ ॥

अपि स्मरन्तीति : १०.४९.८.

एतावत्कालमासन् विविधरिपुकृतक्लेशभाजो भवन्तस्तत्राक्रूरोदिताऽपि स्मृतिरफलतया दुर्बलैवेति युक्तम्।
सम्प्राप्ते जातभव्येऽहनि यदि वत मत्स्मृत्यभावोऽधुना वस्तत् किं वा वच्मि सभ्यस्तुत चरितजुषां दिष्टमेवेदृशं मे ॥ १४ ॥

सल्लोकव्यवहार चारुसरणि प्रज्ञावतां श्रीमतामेवं चेद्भवतामपि स्वजनसंत्राणप्रकारोऽद्भुतः।
तत्किं वाच्यमतीवमुग्धमनसां पुंसामतो निश्चितं सर्वे श्रीसहचारिणो निरुपधिर्नैवाप्तभावः क्वचित् ॥ १५ ॥

यः स्वाऽऽप्ताऽऽवलिपालनानलसधी स्वर्वर्गिकानन्दभाक् सोऽस्मिन्नित्यखिलाः सखेऽधिधरणि प्रायो यतन्ते जनाः।
दिष्टेनेष्टतमेन वेशकृपया योगस्तथाऽऽप्तोऽद्य वोऽत्राऽऽलस्यं यदि तद् ब्रुवे किमपरं भाग्यं न मे तादृशम् ॥ १६ ॥

यो नाम्नाऽऽनकदुन्दुभिर्जनिसमुद्भूतानकध्वानतः पुत्रः श्रीपतिरात्मवृत्तिरनधाऽऽनन्दान्तरङ्गप्रियः।
तस्मिन् येन हि दर्शितं निजबलं दिष्टस्य तस्याग्रतो दीनाया मम का तु नाम गणना पापैककूपात्मनः ॥ १७ ॥

येषां नास्ति सुहृत्सखा न परमाऽऽप्तोऽप्यत्र तेऽनुक्षणं क्लिश्यन्त्यात्मनि नास्ति कोऽपि ममताभागार्तिहर्तेति नः।
मद्भाग्यादखिलेषु सत्स्वपि मयाऽक्रूरेयमाप्ता दशा तत्किं तैः सदसद्भिरार्त्यपहृतौ त्रातैक एवाच्युतः ॥ १८ ॥

कृष्णप्रिया

श्री अक्रूरजी ने जाना कि पाण्डवों में जो तेज था, ओजस-सामर्थ्य था, पराक्रम था, विनय-विवेकशील आदि सद्गुण थे और प्रजाजन का अनुराग पाण्डवों में अनुराग था यह सर्व सम्पत्ति को देखकर दुर्योधन आदि के दिल में ईर्ष्या की जलन हो रही थी। वे पाण्डवों के उत्कर्ष को सह नहीं सकते थे यह अक्रूरजी को अच्छी तरह से अनुभव हुआ ॥ ५ ॥ दुर्योधनादि धृतराष्ट्र के पुत्रों ने पाण्डवों को और विशेषकर भीमसेन को केवल ईर्ष्या वश विष मोदक खिलाना एवं मारने के अनेक षड्यन्त्र किए यह सारा वृत्तान्त पृथाजी एवं श्रीविदुरजी ने सुनाए। श्रीपृथाजी ने धार्तराष्ट्रों का स्वरूप ज्ञान कराया एवं श्रीविदुरजी ने उनके हृदय के क्या क्या भाव है यह बताया ॥ ६ ॥ पृथाजी ने तो अपने भाई श्रीअक्रूरजी को पधारे जानकर भ्राता के समीप जाने का और वृतान्त पूछने का अभिलाष किया लेकिन अपने पितृकुल का स्मरण होते ही पृथा के नेत्र अश्रुओं से भर आए। पृथाजी शूरसेन सुता है जैसे वसुदेव भाई है वैसे अक्रूरजी भी भ्राता है। भोज राजा की तो पाली हुई पुत्री है ॥ ७ ॥ हे सौम्य ! हे निर्मल मन वाले हे भैया ? पिताजी, माताजी, भ्राताओं, मेरी बहिने, भतीजे कुलस्त्रियों, छोटी बड़ी बालिकों, सहेलियाँ बहिनों के लड़के लड़कियाँ आदि हमें याद करते हैं ॥ ८ ॥

भ्रात्रेयो भगवान् कृष्णः शरण्यो भक्तवत्सलः। [1]पैतृष्वस्रेयान् स्मरति रामश्चाम्बुरुहेक्षणः ॥ ९ ॥
सापत्नमध्ये शोचन्तीं वृकाणां हरिणीमिव। सान्त्वयिष्यति मां वाक्यैः पितृहीनांश्च बालकान् ॥ १० ॥
कृष्ण कृष्ण महायोगिन् [2]विश्वात्मन् विश्वभावन। प्रपन्नां पाहि गोविन्द शिशुभिश्चावसीदतीम् ॥ ११ ॥
नान्यत्तव पदाम्भोजात् [3]पश्यामि शरणं नृणाम्। बिभ्यतां मृत्युसंसारादीश्वरस्यापवर्गिकात् ॥ १२ ॥

कदमक्षमा

अन्वयः—शरण्यः, भक्तवत्सलः, भ्रातेयः, भगवान्, कृष्णः, च, अम्बुरुहेक्षणः, रामः, पैतृस्वस्रेयान्, नः, स्मरति ? किम् ॥ ९ ॥ सपत्नमध्ये, वृकाणाम्, हरिणीम्, इव, शोचन्तीम्, माम्, च पितृहीनान्, बालकान्, वाक्यैः, सान्त्वयिष्यति ? ॥ १० ॥ हे कृष्ण ! हे कृष्ण ! महायोगिन् ! हे विश्वात्मन्, हे विश्वभावन ! हे गोविन्द ! शिशुभिः, अवसीदतीम्, प्रपन्नाम्, पाहि ॥ ११ ॥ ईश्वरस्य, तव, अपवर्गिकात्, चरणाम्भोजात्, अन्यत्, मृत्युसंसारात्, बिभ्यताम्, नृणाम्, शरणम्, न, पश्यामि ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पैतृष्वसेयान्मत्पुत्रान् ॥ ९ ॥ शोचन्तीं मां वाक्यैः सांत्वयिष्यति किम् ॥ १० ॥ हे महायोगिन्महान्योग उपायो मायाख्योऽस्यास्तीति। हे विश्वात्मन् सर्वान्तर्यामिन्। हे विश्वभावन विश्वपालक। प्रपन्नां शरणागताम्। अवसीदतीं क्लिश्यन्तीम् ॥११॥ आपवर्गिकान्मोक्षप्रदात् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृष्णस्य चत्वारि विशेषणानि सम्बन्धसामर्थ्यदयालुतास्वीयरक्षकताबोधकानि। तत्रैव विशेषतः पुनः पृच्छति—भ्रात्रेय इति, तादृशप्रश्ने निजयोग्यतोक्ता। न चासौ मम भ्रात्रेयोऽन्यसाधारणः, किन्तु भगवान्, तत्र शरण्यः रक्षितृवाचकेन शरण्यपदेन तद्धर्मो लक्ष्यते, ततश्च तत्र साधुरित्यर्थः। 'सर्वात्मना यः शरणं शरण्यं गतो मुकुंदम्' इति वत्। तत्र प्रवृत्तौ हेतुः—भक्तवत्सलः, अत एव संभावयामीत्याह—स्मरति, किमिति शेषः। पैतृष्वसेयानिति स्नेहविशेषमात्रत्वेन स्मरणीयविशेषतां बोधयति। अबुरुहेक्षण इति परमसौंदर्यम्, एवं दिदृक्षया तस्मिन्सहजवात्सल्यम्। ततः करिष्यमाणा निजरक्षाप्रार्थनापि तद्विलास एव ज्ञेयो न तु कामनामात्रेण। 'विपदः सन्तु नः शश्वत्' इत्याद्युक्तेः। एतानि विशेषणानि द्वयोरेव योग्यानि, रामस्य पश्चान्निर्देशस्तदनुगत्यैव तद्भावात् ॥ ९ ॥ वृकाणां व्याघ्राणाम्। सपत्नमध्ये शत्रुमध्ये "सपत्नोऽरौ च षतिते पत्नीसहचरे त्रिषु" इति निरुक्तिः। ननु स्मरन्नेव मामत्र प्राहिणोदित्याशंक्याह—सपत्नेति। अनेनात्मनः परमार्तत्वं व्यञ्जितम्। वृकाणामित्यनंतरं मध्य इत्यध्याहार्यम्। वाक्यैः प्रियवचनैः, पूर्ववत्तत्तद्वचनशुश्रूषया ॥ १० ॥ कुर्वीप्सेहादरे। संबुद्धित्रयं सर्वसामर्थ्यमाह। गोविन्देति सर्वथा दीनदयालुतामाह। ननु तत्रत्येषु स्वेषु निजकृत्यं विधायात्रागत्य सान्त्वयिष्यत्येवेति चेदनन्तरं तद्दर्शनामृतं लभेमहि तावत्तत्र स्थितोऽप्यसावस्माकं प्राणरक्षां कुर्यादिति परमसामर्थ्यं निरूपयन्ती परमार्त्या साक्षादिव तं संबोध्य त्रिभिः सकरुणं वदन्ती प्रागुपसन्नापद्रक्षां प्रार्थयते—कृष्णेति। पूर्वं मुख्यनाम्ना सम्बोधनं, तत्र वीप्सा झटित्याभिमुख्याय, तत्र तादृशसामर्थ्यव्यञ्जकं संबोधनं—महायोगिन् हे परमोपाययुक्तेति। न च त्वयि विज्ञापनापेक्षास्ति सर्वज्ञानादिप्रवर्तकत्वादित्याह—हे विश्वात्मन्। न च ज्ञात्वापि कथंचिदुदास्से जगत्पालकत्वादित्याह—विश्वभावनेति। तत्र च प्रपन्नवात्सल्यं दर्शयति—हे गोविन्द गोवर्धनोद्धारण प्रकाशिततन्नामन्निति। न च तत्र विलम्बः कार्य इत्याह–शिशुभिः सह शत्रुसंकटे निरन्तरं दुःखं प्राप्नुवतीञ्च ॥११॥ आपवर्गिकात् मोक्षहेतुभूतात्, सर्वकर्मफलप्रापकाद्वा "अपवर्गः क्रियासाध्यफलाप्तौ त्यागमोक्षयोः" इति वैजयंती। मृत्युग्रस्तः संसारो मृत्युसंसारः। मध्यपदलोपी समासः। तस्मात्तथा। न चैतदर्थमन्यः प्रार्थनीयो यतः सर्वदुःखमूलात्संसारादपि सर्वेषामपि त्वच्चरणमेव निस्तारकमिति मम निश्चय इत्याह—नेति। अन्यद्ब्रह्मज्ञानादपि 'येऽन्येऽरविंदाक्ष' इत्याद्युक्तेः। नृणां जीवानाम्। मृत्युसंसारादनादिमृत्युपरम्पराप्राप्तेः। नान्यत्पश्यामीत्यत्र हेतुमाह—ईश्वरस्येति। "मदीयं महिमानं च परं ब्रह्मेति शब्दितम्। वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥" इति श्रीमत्स्यदेवोक्त्यनुसारेण, "यो मामव्यभिचारेण भक्तियोगेन सेवते। स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥", 'ब्रह्मणो हि प्रतिष्ठाहम्' इत्यादिश्रीभगवद्गीतानुसारेण च प्रसिद्धमहैश्वर्यस्येत्यर्थः। अत एवापवर्गिकात्। अपवर्गदानार्हादिति चक्रवर्ती ॥ यद्वा—ईश्वरस्य महादेवस्यापि वृकासुरादिभवमहाभयतो मोक्षप्रदात् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्रैव विशेषतः पुनः पृच्छति। भ्रात्रेय इति। तादृशप्रश्ने निजयोग्यतोक्ता न चासौ मम भ्रात्रेयोऽन्यसाधारणः किन्तु भगवान् तत्र शरण्यः रक्षितृवाचकेन शरणशब्देनात्र तद्धर्मो लक्ष्यते ततश्च तत्र साधुरित्यर्थः। सर्वात्मना यः शरणं शरण्यं गतो

---

[1] ष्वसेयान्–श्रीधर. वंशी. जीव. वीर विज. विश्व. शुक.। [2] सर्वात्मन् विश्वपालक–विज.। [3] पश्यामः–विज.।

मुकुन्दमितिवत् तत्र प्रवृत्तौ हेतुः भक्तवत्सलः अत एव सम्भावयामीत्याह । स्मरति किमिति शेषः पैतृष्वस्रेयानिति स्नेहविशेषपात्रत्वेन स्मरणीयविशेषतां बोधयति अम्बुरुहेक्षण इति परमसौन्दर्यम् एवं दिदृक्षया तस्मिन् निजसहजवात्सल्यमपि ततः करिष्यमाणा निजरक्षाप्रार्थनापि तद्विलास एव ज्ञेयः नतु कामनामात्रेण विपदः सन्तु ताः शश्वदित्याद्युक्तेः विशेषणान्येतानि द्वयोरेव योग्यत्वात् रामस्य पश्चान्निर्देशस्तदनुगत्यैव तद्भावात् ॥ ९ ॥ ननु स्मरन्नेव मामत्र प्राहिणोदित्याशङ्क्याह । सपत्नेति । अनेनात्मनः परमार्त्तत्वं व्यञ्जितं वाक्यैः प्रियवचनैः पूर्ववत्तद्वचनशुश्रूषया ॥ १० ॥ ननु तत्रत्येषु स्वेषु निजकृत्यं समाधायाचिरादत्रागतः सान्त्वयिष्यत्येवेति चेत् अन्तरा यावत् तद्दर्शनामृतं लभेमहि तावत्तत्र स्थितोऽप्यसावस्माकं प्राणरक्षां कुर्यादिति परमसामर्थ्यं निरूपयन्ती परमार्त्या साक्षादिव तमेव सम्बोध्य त्रिभिः सकरुणं वदन्ती प्रागुपसन्नापद्रक्षां प्रार्थयते कृष्णेति पूर्वं मुख्यनाम्ना सम्बोधनं तत्र वीप्सया झटित्याभिमुख्याय तत्र तादृशसामर्थ्यव्यञ्जकं सम्बोधनं महायोगिन् हे परमोपाययुक्तेति । नच त्वयि विज्ञापनापेक्षास्ति सर्वज्ञानादिप्रवर्त्तकत्वादित्याह । विश्वात्मन्निति । नच ज्ञात्वापि कथञ्चिदुदाससे जगत्पालकत्वादित्याह । विश्वाभावनेति । तत्र च प्रपन्नवात्सल्यं दर्शयति । गोविन्द हे गोवर्द्धनोद्धारण प्रकाशितनामन्निति । नच तत्र विलम्बः कार्य इत्याह । शिशुभिः सह शत्रुसङ्कटे निरन्तरं दुःखं प्राप्नुवन्तीञ्चेति ॥ ११ ॥ नचैतदर्थमन्यः प्रार्थनीयः यतः सर्वदुःखमूलात् संसारादपि सर्वेषामपि त्वच्चरणमेव निस्तारकमिति मम निश्चय इत्याह । नेति । अन्यब्रह्मज्ञानादपि येऽन्येरविन्दाक्ष इत्याद्युक्तेः नृणां जीवानां मृत्युसंसारात् अनादिमृत्युपरम्पराप्राप्तेः नान्यत् पश्यामीत्यत्र हेतुमाह । ईश्वरस्येति । मदीयं महिमानञ्च परं ब्रह्मेति शब्दितं वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदीत्यष्टमस्कन्धस्थश्रीमत्स्यदेववचनानुसारेण यो मामव्यभिचारेण भक्तियोगेन सेवते स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते । ब्रह्मणोऽहि प्रतिष्ठाहमित्यादि श्रीमद्भगवद्गीतानुसारेण च प्रसिद्धमहैश्वर्य्यस्येत्यर्थः । अत एवापवर्गिकात् नच तैर्व्याख्यातं यद्वेश्वरस्य महादेवस्यापि वृकासुरादिभवविविधभयतो मोक्षप्रदात् ॥१२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्रैव विशेषतः पुनः पृच्छति—भ्रात्रेय इति । भगवान् कारुण्याद्यशेष-गुणयुक्तः, अत एव शरण्यः शरणागतपालको विशेषतश्च भक्तवत्सलः, यतः कृष्णः, साक्षाद्भगवन्निजाशेषैश्वर्य्य-प्रकटनार्थमवतीर्ण इति भावः । विशेषणानां यथोत्तरं स्मरणहेतुत्वे श्रैष्ठ्यम् । पैतृष्वस्रेयानिति स्नेहविशेषपात्रत्वेन स्मरणीयतां बोधयति । अम्बुरुहेक्षण इति परमसौन्दर्य्यम्, दृष्ट्यैव सन्तापहारित्वम्, तेन साक्षाद्दिदृक्षाञ्च, एवं द्वयोरेव तत्तत् सर्व्वं ज्ञेयम् । तथापि तत्र तत्र गौणत्वाद्रामस्य पश्चान्निर्द्देशः ॥ ९ ॥ ननु स्मरन्नेव मामत्र प्राहिणोदिति चेत्तर्हि साक्षाद्भूय अचिरात् किमनु ग्रहीष्यतीत्याशयेन श्रीकृष्णे भक्तिविशेषात्तमेवोद्दिश्याम्बुरुहेक्षण इत्यभिप्रेतार्थमेवौत्सुक्यात् सदैन्यमाह—सपत्नेति । अनेनात्मनः परमार्त्तत्वमुक्तम्, अतो वाक्यैः प्रियवचनैराश्वासयिष्यति किम्? ततश्च तस्य सस्मितावलोकपूर्व्वकश्रीमुखमुद्राविशेषोदयेन मधुरगम्भीरस्वरेण च विलसद्वचवामृतं साक्षात् षास्यामीति गूढ़ो भावः । यद्वा, वाक्यैरपि कैश्चित् किं पुनः सद्व्यवहारेणेत्यर्थः । पितृहीनानिति दीनानाथत्वमुक्तम्, अल्पार्थे कः । तेन च किञ्चित् कर्त्तुमसामर्थ्यम्, अतस्तस्य दीनानाथैकशरणता-माहात्म्यापेक्षयावश्यं सान्त्वनयोग्यताभिप्रेता ॥ १० ॥ ननु तत्रत्येषु तेषु निजकृत्यं समाधायाचिरादत्रागतः सान्त्वयिष्यत्येवेति चेत्तत्र स्थितोऽप्यसावस्मानधुनैव परिपालयितुं शक्त इति सर्व्वसामर्थ्यं निरूपयन्ती परमार्त्त्या भक्त्युद्रेकेण साक्षादिव तमेव सम्बोध्य त्रिभिः सकरुणं वदन्ती प्रागुपसन्नापद्रक्षां प्रार्थयते—कृष्णेति परमेश्वरत्वमभिप्रेतम्, वीप्सा तस्य दार्ढ्यार्थम्, तन्नाम्नो जिह्वाकर्षणस्वभावाद्वा, यद्वा, आदौ संज्ञामात्रापेक्षया पश्चादैश्वर्य्याभिप्रायेणैव । परमेश्वरत्वमेव दर्शयति—महायोगिन्नित्यादि सम्बोधनैः, प्रायस्तैर्व्याख्यातान्येव । एवं मायाशक्त्या परमात्मतया च बहिरन्तर्व्यापकत्वेन तथा जगत्पालकत्वेन परमेश्वरत्वं सिद्धमेव, तत्र च विशेषतस्तत्प्राकट्याभिप्रायेण सम्बोधयति—गोविन्द हे गोकुलेन्द्रेति; तत्रैवाशेषैश्वर्य्याभिव्यक्तेरिति । अथवा मायेश्वरत्वेन जगन्नियन्तृत्वेन च, तथा विश्वभावन ! हे जगत्स्रष्टरित्यनेन चानन्ताद्भुतशक्तिमत्त्वम्, गोविन्देति भक्तवात्सल्यञ्च शीघ्ररक्षार्थमुक्तम् । यद्वा, पाहीति प्रार्थयितुं प्राक् कृष्णेति परमैश्वर्य्यमुक्तमेव, शीघ्ररक्षोपायश्च त्वयि भात्येवेत्याह—महायोगिन् हे परमोपाययुक्तेति । न च त्वयि विज्ञापनापेक्षास्ति, सर्व्वज्ञत्वादित्याह—विश्वस्यात्मन् परमार्थत्वेन चेतयितरिति । न च ज्ञात्वापि कथञ्चिदुदाससे जगत्पालकत्वादित्याह—विश्वभावनेति । तत्र चाधुना विशेषतो रक्षितुमर्हसीत्याह—गोविन्देति । इत्येतदवतारसम्बन्धेन बन्धुत्वमप्यवश्यं रक्षार्थं सूचितम् तत्र च प्रपन्नां शरणागतां माम्, न च तत्र विलम्बः कार्य्यं इत्याह—शिशुभिः सह निरन्तरं दुःखं प्राप्नुवन्तीञ्च ॥ ११ ॥ ननु कञ्चिदपरं रक्षार्थं प्रार्थयस्व, सत्कर्म्मादिकञ्चाचरेत्याशंकां परिहरन्ती किं वक्तव्यं शत्रुभयादिति संसारभयतोऽपि रक्षा कार्य्येत्याशयेन जगतस्तदेकशरणतामाह—नेति । अन्यत् किञ्चिदपरं सत्कर्म्मादिकं न पश्यामि नालोचयाम्यहमित्यात्मनस्तदेकप्रपत्तियोग्यतावश्यपाल्यता चोक्ता । नृणामिति वैराग्याद्युत्पत्त्या मनुष्याणामेव प्रायो भयसम्भवात् । यद्वा, सर्व्वेषां जीवानामित्यर्थः । मृत्युलक्षणसंसारात् जन्मादेः संसारत्वेऽपि मृत्यावधिकयातनाभिप्रायेण मृत्यु-शब्दप्रयोगः । यद्वा, मृत्योर्यमात्, किं पुनर्मृत्योः संसाराच्च, द्वन्द्वैक्यम् । तत्र च तत्रैव शक्तिर्न चान्यस्य कस्यापीति वदन्ती नान्यत् पश्यामीत्यत्र हेतुमाह—ईश्वरस्येति । अत एवापवर्गिकात्, तैर्व्याख्यातम्, यद्वा, ईश्वरस्य महादेवस्यापि ब्रह्महत्यादि-विधिशंकटतो मोक्षप्रदात् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

भ्रात्रेय इति। देहसम्बन्धेनाप्यात्मनां रक्षत्वख्यापनाय भ्रात्रेय इत्युक्तिः भ्रातुर्वसुदेवस्य पुत्रो भ्रात्रेयः शरणमुपायतामर्हतीति शरण्यः अनेन सम्बन्धादिकमनादृत्य शरणागतरक्षाशीलत्वमुक्तम् तदुपयुक्तपूर्त्तिरुच्यते। भगवानिति। शरणागतानपि कदाचिद्दोषान्वेषणेन न रक्षेदित्याशङ्कां निराकुर्वन् व्याचष्टे। भक्तवत्सल इति। भक्तेषु दोषादर्शी पितृष्वसुः पितृभगिन्या ममापत्यरूवान् युधिष्ठिरादीन् स्मरति अपीति शेषोऽनुषङ्गा वा स्मरति किमित्यर्थः। तथाम्बुरुहे ईक्षणे यस्य स रामोऽपि स्मरति किम् तदीक्षणप्रसादमात्रेणैव निस्तापा वयं भविष्याम इत्यभिप्रायेण तदीक्षणयोरम्बुरुहोपमा॥ ९॥ किञ्च सपत्नमध्य इति। वृकाणां मध्ये हरिणीमिव तथा शत्रूणां मध्ये शोचन्तीं मां पितृहीनान् बालकान् पुत्रांश्च वाक्यैः सान्त्वयिष्यति किम्॥ १०॥ एवमक्रूरंप्रति परोक्षमुक्त्वाथ सर्वान्तरात्मानं भगवन्तं बुद्ध्या सन्निधाप्य कार्पण्यनिवेदनपूर्वकमात्मीयरक्षां प्रार्थयते। कृष्ण कृष्णेति। हे महायोगिन् सर्वज्ञ हे सर्वान्तरात्मन् विश्वं भावयति स्वभक्तजनं सुखयुक्तं करोतीति तथा शिशुभिः पुत्रैः सहावसीदतीं क्लिश्यन्तीमधुना शरणागतां च मां पाहि॥ ११॥ ननु ब्रह्मरुद्रादिषु प्रपत्तव्येषु सत्सु किं मामेव शरणं गच्छसीत्यत्राह नान्यदिति। मृत्युरूपात्संसाराद् बिभ्यतां ब्रह्मादीनामप्यपवर्गप्रदादीश्वरस्य तव पदाम्भोजादन्यन्नृणां शरणमिष्टसाधनं न पश्यामः ब्रह्मादीनामपि प्रपत्तृतुल्ययोगक्षेमत्वान्न प्रपत्तव्यतेति भावः॥ १२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पैतृष्वस्रेयान् पितृष्वसुः पुत्रान् पाण्डवान्॥ ९॥ सपत्नमध्ये शत्रुमध्ये वृकाणां मध्ये स्थिताम्॥ १०॥ द्युमणेरुदयादुत्फुल्लया नलिन्या यथा तथा अक्रूरस्य दर्शनादुद्रेचितया भक्त्या विवशा विशेषप्रबुद्धभगवद्गुणा नित्यं तत्परा कुन्ती मनस्याविर्भूतं कृष्णं स्तौति। कृष्णेति। महानपरिच्छिन्नो योगो ज्ञानमपायो वास्तीति तत्सम्बुद्धिः महायोगिन् महत्पूज्यविशालयोरिति यादवः। सर्वमाप्नोति धारयतीति सर्वात्मा हे सर्वात्मन्! गोविन्द गवामिन्द्र!॥ ११॥ मृत्युवत् भयहेतोः संसारात् आपवर्गिकात् अपवर्गाख्यक्रियासाध्यफलप्राप्तेः साधकात् तदापादकाद्वा– अपवर्गः क्रियासाध्यफलाप्तौ त्यागमोक्षयोरिति वैजयन्ती॥ १२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वृकाणाम् इत्यनन्तरं मध्ये इत्य इत्यध्याहार्यम्॥ १०॥ महायोगिन्निति। मथुरायां स्थितोऽपि ममैतां खेदोक्तिं शृण्वति भावः। किञ्च विश्वात्मन्निति। मम हृद्यपि त्वं स्थितः शृणोष्येवेति भावः। विश्वभावनेति। विश्वमपि त्वं पालयसि मत्पालनं ते कोऽतिभार इति भावः। हे गोविन्द! मम नेत्रगोचरीभव त्वामहं द्रश्यासमिति भावः॥ ११॥ आपवर्गिकात् अपवर्गदानार्हात्॥ १२॥

गूढार्थदीपिनी

पितृष्वसु; कुन्त्याः पुत्रान् पाण्डवान्॥ ९॥ सपत्नाः शत्रवः। वृकाः व्याघ्राः॥१०॥ अवसीदतीं क्लिश्यन्तीम्॥११॥ मृत्युग्रस्तः संसारः इति मध्यमपदलोपी समासः। बिभ्यतां नृणां तव चरणकमलादन्यात् शरण न पश्यामीत्यन्वयः। आपवर्गिकात् मोक्षप्रदात्॥ १२-१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पैतृष्वस्रेयाम् वसुदेवभागिनेयान्॥ ९॥ सपत्नानां शत्रूणां धार्तराष्ट्रशकुन्यादीनां मध्ये सान्त्वयिष्यति किम्॥ १०॥ योगः सर्वकार्यनिष्पादनसामर्थ्यं यस्य तस्य सम्बोधने हे महायोगिन्! अवसीदतीं क्लिश्यन्तीम्॥ ११॥ आपवर्गिकात् सर्वक्लेशघ्नात्॥ १२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यद्यपि पूर्वं कुन्त्योपजीव्यतामुपजीव्य कृष्णकुशलप्रश्नः कुशलया कर्तव्यो यद्यार्यो विचार्यो मर्यादयेति हन्त तर्हि रामश्चाम्बुरुहेक्षण इति तदनन्तरमनन्तप्रश्नोऽनुपपन्नः स्यादिति चेत्। सत्यम्। तथाऽपि बहुविज्ञाप्यं कृष्णं प्रत्यस्तीति सूचीकटाहन्यायेन बलस्य शुक्लकेशावेशेन साक्षाद्भगवदात्मकृष्णानन्तरतया बोधनं चावश्यकमिति द्वावपि केशावेकस्यैवेति सूचयितुं चार्धाभ्यां पप्रच्छेति तात्पर्यमवधेयम्। भ्रात्रीय इति कृष्णवद्रामोऽपि ज्ञेयः। भ्रातृव्यश्चेति चकाराच्छोणपवादेन ज्ञेयः। भ्रातृव्यो भ्रात्रीयश्चेति काशिकोक्तेः। भ्रातृपुत्र इत्यर्थः। भ्रात्रेय इति क्वाचित्कः पाठः। तत्र शुभ्रादिनिवेशनेन ठक् किति चेत्यादिवृद्धिः। गणितत्वेनानाकृतिगणत्वान्न स्वच्छन्दत उक्तिः सम्भवतीति तु चकारोऽनुक्तसमुच्चयार्थः। आकृतिगणतामस्य बोधयति। तेन गाङ्गेय इत्येवमादिसिद्धमिति काशिकाप्रतिषिद्धम्। शरण्यो भक्तवत्सलः पैतृष्वस्रीयान्पितुर्वसुदेवस्य स्वसुर्ममापत्यानीति पञ्च मत्पुत्रान्। पितृस्वसुश्छणिति छण्। तस्येयादेशे आदिवृद्धौ च पैतृष्वस्रीय इति भवति। पितुष्वसेय इति पाठे तु ठकि लोप

इत्यन्तलोप इत्यादेशे च पितृष्वसेय इत्यवसेयम् । न च केन ठगिति वाच्यम् , यतो लोपस्तस्मिन्परतोऽन्वकाशाच्छाकृतेनैव ठकं प्रत्ययमन्वजिज्ञददिति ज्ञेयम् । भ्रात्रेयोऽम्बुरुहेक्षणो रामश्च स्मरति किमिति पृथगन्वयः । कर्णरहिता हि महीमहदवतारत्वं ध्वनयितुं श्रवणदर्शनकार्यस्य तत्र नेत्रमात्रनिर्वाह्यत्वरूपमहत्त्वं बोधयितुं चाम्बुरुहेक्षण इत्युक्तिरिति मन्तव्यम् ॥९॥ सपत्नानां वैरिणामित्यनेनान्वयः । वृकाणां मध्य इत्यस्य विश्लिष्टस्य हरिणीमिव शोचन्तीं मां भर्तृहीनामित्युत्तरदृष्टथा सिद्धमेवेत्यनुक्तिः । वाक्यैः सान्त्वयिष्यति । पितृहीनान्बालकांश्च सान्त्वयिष्यति किमित्यन्वेति ॥ १० ॥ पारवशेन चिरवरिवश्या फलतया प्रतिफलितं साक्षात्कृत्येव कुन्त्याह ॥ कृष्णेति । महोपायसर्वव्यापिन् जगद्रक्षकेति क्रमार्थः । शिशुभिः सहायसांदन्तीं प्रपन्नां मां पाहि ॥११॥ मृत्युरूपात्संसाराद्विभ्यतां नृणामधिकारिणामीश्वरस्य तवापवर्गिकान्मुक्तिसाधनात्पदाम्भोजादन्यच्छरणं न पश्यामः ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

किञ्च स्मरन्त्वन्ये मा वा । भ्रात्रेय इति । भ्रात्रेयः कृष्णः स्मरति न वेति पृच्छति प्रायेणेयं नन्दगृहे समागत्य गतेति लक्ष्यते तदुपपादितं प्रथमस्कन्धे सा मां विमोहयतीत्यत्रातो भगवतोऽनुभवात्स्मरणं पृच्छन्ती स्मरणे सम्बन्धमाह । पैतृष्वस्रेयानिति । पैतृष्वसुः पुत्रान् पाण्डवान् रामोऽपि स एव सम्बन्ध इति रामश्चेत्युक्तं चकाराद्भगवद्भक्ता उद्धवादयोऽपि अम्बुरुहेक्षण इति स्मरति चेत्तापं ज्ञात्वा समायास्यतीति लक्ष्यते दृष्टथैव तापदूरीकरणार्थम् ॥ ९ ॥ तदर्थं तापं निरूपयति । सपत्नमध्ये शोचन्तीमिति । व्यवहारे नाममात्रेण सम्बन्धिनः वस्तुतः शत्रवः नापकारमात्रं तेषां किन्तु सर्वनाशकत्वमिति दृष्टान्तमाह । वृकाणां मध्ये हरिणीमिति । प्रसङ्गादागमनं निवारयति । सान्त्वयिष्यतीति । प्रसङ्गादागतवाक्यानि न सर्वथा सान्त्वनसमर्थानि भवन्ति मामिति । पाण्डवास्तु भ्रातरो भवन्ति अहं पितृभगिनीति । उभयोर्विशेषाकारेण सान्त्वनं करिष्यति किं वाक्यैरर्थवद्भिः सुखेन सर्वान् स्थापयिष्यामीति इह लोके परलोके च पितृहीनांश्चकारात् मातृहीनामपि कृष्णस्य विशेषणं भगवानित्युक्तत्वात् । अन्येषामवस्थादोषो भवति बालकानित्युक्तं स्वतः असमर्थान् ॥१०॥ एवं मनोरथमुक्त्वा तदानीमेव समागतं मन्यमाना संमुखतया प्रार्थयते । कृष्ण कृष्णेति । आदरे वीप्सा अकस्मादागतवानन्वहमन्यत्र अत्र तव दृष्टि भ्रमो भविष्यतीत्याशङ्कयाह । महायोगिन्निति । तथापि किमेवमेतावद्दूरं सर्वपदपरित्यागेनागमनेनेति चेत्तत्राह । विश्वात्मन्निति । सर्वस्य भगवानात्मा आत्मना हि देहादेः प्रियं कर्तव्यं प्रयत्नस्य तदधीनत्वात् अतः सर्वथा आगमनं तथाप्यक्रूरवदेवागन्तव्यं किमिति विशेषाकारेणागतमिति चेत्तत्राह । विश्वभावनेति । विश्वमेवानुभावयतीति नह्यलौकिकाकरणे विश्वमनुभावितं भवति अलौकिकस्तु तावेवालौकिकानुभावो भवति एवं भगवन्तं सम्बोध्य समागमनं तत्प्रकारं चोक्त्वा प्रार्थयते । प्रपन्नां पाहीति । साधारणा अपि प्रपन्ना रक्षणीया भगवतः सम्बन्धो नापेक्षितः अतः प्रपत्तिरेव हेतुत्वेन निरूपिता । अवसीदतीम् अवसादं प्राप्नुवतीमिति प्रपन्नामिति परिपालने हेतुः तत्रापि शिशुभिः सह लाक्षागृहदाहे वा भगवन्तमिव पश्यन्ती ॥ ११ ॥ ननु पुत्रा अपि तव समर्थाः पितरो भ्रातरश्च अतः किमिति विषादः क्रियत इत्याशङ्कयाह । नान्यत्तव पदाम्भोजादिति । मृत्युसंसाराद्विभ्यतामन्यच्छरणमेव नास्ति मृत्योः संसाराच्च प्रतिजन्म मृत्योर्भवं तु संसारमेव भगवत एव निवर्त्तते उभयं स्वतन्त्रभक्तस्यैव निवर्तत इति पदाम्भोजद्वयपदम् । ननु भगवन्तं परित्यज्य चरणात् कथं निवृत्तिरुच्यते इति चेत्तत्राह । ईश्वरस्येति । स हि चरणद्वारापि सर्वं कर्तुं समर्थः किञ्च ईश्वरत्वात् दुराराध्यत्वात् निर्विचिकित्सं फलार्थिनः प्रवृत्तिरपि कुण्ठिता भवेत् । चरणौ तु नियतौ अत एव नियतो भक्तिमार्गः फले फलावश्यंभावे ईश्वरभावस्तु अनियतः ईश्वरत्वान्मृत्युनिराकरणमापवर्गिकादपवर्गाधिपतेः संसारनिवृत्तिरियं संसारस्तु अपवर्गपर्यन्तो भवतीत्यापवर्गिकः मृत्युरपि तथा ॥ १२ ॥

श्रीसुबोधिनी–सारः

भ्रात्रेयो भ्रातृपुत्रः शरण्यः शरणे साधुः भक्तवत्सलः कृष्णोम्बुरुहेक्षणः पद्मनेत्रो रामश्च भगवान् पैतृष्वस्रेयान् पितुः स्वसुरपत्यानि स्मरति ॥ ९ सपत्नीपुत्राणां मध्ये शोचन्तीं मां वृकाणाम् मध्ये हरिणीमिव मृगीं वा पित्रा हीनान् बालकान् वाक्यैः सान्त्वयिष्यति किम् इति चार्थः ॥ १० ॥ हे कृष्णकृष्ण हे महायोगिम् हे विश्वात्मन् हे विश्वभावन प्रपन्नां शरणगतां शिशुभिर्बालैः सहावसीदतीं क्लिश्यन्तीं मां त्वं पाहि हे गोविन्द ॥ ११ ॥ मृत्योः संसाराच्च बिभ्यतां नृणां आपवर्गिकान्मोक्षप्रदात् ईश्वरस्य तव पदाम्भोजात् पादपद्मादन्यत् शरणं न पश्यामि ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'अन्ये स्मरन्तु मा वा, अस्मद्दुःखनिवृत्तिस्तु रामकृष्णस्मरणेनैव' इत्याशयेन पृच्छति—भ्रात्रेय इति । मम भ्रातृपुत्रः कृष्णो रामश्च पैतृष्वस्रेयान् पितृभगिन्या मम सुतान् युधिष्ठिरादीन् किं स्मरति ? अनेन देहसम्बन्धेनापि स्मरणं सम्भवतीति सूचितम् । 'सम्बन्धं विनापि स एव शरणयोग्य' इति आह—शरण्य इति । तत्र हेतुमाह—भक्तवत्सल इति । 'रक्षायामसमर्थेन स्मरणेऽपि किम्' इत्याशङ्कयाह—भगवानिति । तथापि रक्षायामायासमाशङ्कय दृष्टिमात्रेण सन्तापनिवर्तकत्वं

सूचयन्त्याह—अम्बुरुहेक्षण इति ॥ ९ ॥ वृकाणां घातकानां मध्ये हरिणीमिव सपत्नानां शत्रूणां दुर्योधनादीनां मध्ये शोचन्तीं मां बालकान् मत्पुत्रांश्च किं वाक्यैः सान्त्वयिष्यतीत्यन्वयः। सान्त्वने दीनत्वं हेतुं सूचयन्त्याह—पितृहीनानिति ॥ १० ॥ एवमक्रूरं प्रत्युक्त्वा प्रेमवेगेन समीपमागतं मत्वा भगवन्तमेव प्रार्थयते—कृष्ण इति। कृष्ण कृष्णेति आदरे वीप्सा। अत्र प्रपन्नां शरणमागतां मां पाहि। शरणागमने हेतुमाह—शिशुभिर्बालकैः सहावसीदन्तीं क्लिश्यन्तीमिति 'अस्मद्रक्षा तव युक्तैव' इत्याशयेन सम्बोधयति। विश्वभावनेति। सर्वपालकेत्यर्थः। तत्र सामर्थ्ये हेतुं सूचयन्ती सम्बोधयति—गोविन्देति। गावः इन्द्रियाणि नियम्यतया विन्दत तथा। 'उपादानत्वात् सर्वात्मकत्वेनापि रक्षायां त्वं समर्थ' इत्याशयेन पुनः सम्बोधयति—विश्वात्मन्निति। विश्वरूपधारणसामर्थ्ये तथात्वेऽपि विकाराभावे च हेतुं सूचयन्ती पुनः सम्बोधयति—महायोगिन्निति। महान् योगः उपायः मायाख्योऽस्यास्तीति तथा ॥ ११ ॥ ननु 'ब्रह्मरुद्रादीनां रक्षकाणां सत्त्वात्तान् विहाय मामेव शरणं कुतो गच्छसि' इत्याशङ्क्याह—नान्यदिति। मृत्योः संसारात् उत्पत्तेश्च बिभ्यतां नृणां तव पदाम्भोजादन्यत् शरणं रक्षकं न पश्यामि। ब्रह्मादीनामपि तुल्ययोगक्षेमत्वादित्याशयः ॥ तव चरणाम्भोजं तु रक्षकं भवत्येव। तत्र हेतुमाह—आपवर्गिकात् मोक्षप्रदात्। मोक्षप्रदत्वे हेतुं सूचयन्त्याह—ईश्वरस्येति ॥ १२ ॥

अन्वितार्थप्रकाशिका

भ्रात्रेय इति। भगवान् शरण्यो भक्तवत्सलः अम्बुरुहेक्षणः भ्रात्रेयो मम भ्रातुष्पुत्रः कृष्णो रामश्च पैतृष्वसेयान् पितृभगिन्या मम सुतान् युधिष्ठिरादीन् किं स्मरति ॥ ९ ॥ सपत्नेति। वृकाणां घातकानां मध्ये हरिणीमिव सपत्नानां शत्रूणां दुर्योधनादीनां मध्ये शोचन्तीं मां पितृहीनान् बालकान् मत्पुत्रांश्च किं वाक्यैः सान्त्वयिष्यति ॥ १० ॥ अथ प्रेमवेगेन कृष्णं समीपमागतमिव मन्यमानाह—कृष्णेति। हे कृष्ण कृष्णेत्यादयः सम्बुद्धयः। अत्र शिशुभिर्बालकैः सहावसादतीं क्लिश्यन्तीं प्रपन्नां शरणगतां मां पाहि ॥ ११ नेति। मृत्योः संसारात् उत्पत्तेश्च बिभ्यतां नृणाम् आपवर्गिकात् मोक्षदानार्हात् ईश्वरस्य तव पदाम्भोजादन्यत् शरणं रक्षकं न पश्यामि ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पैतृष्वस्रेयान् मत्सुतान् स्मरति किमिति शेषः ॥ ९ ॥ मां सान्त्वयिष्यति शेषः ॥१०॥ महान् योगो जीवानां मोक्षोपाय एकान्तधर्माख्यो विद्यते यस्य तथाभूतस्तत्संबुद्धौ हे महायोगिन् हे विश्वात्मन् चेतनाचेतनात्मक जगद्व्यापकप्रपन्नां शरणं प्राप्तां शिशुभिः सह अवसीदतीं क्लिश्यतीं मां ॥ ११ ॥ मृत्युशिष्टसंसारात् बिभ्यतां नृणां आपवर्गिकात् मुक्तिप्रदात् तव पदांभोजात् अन्यत् शरणं न पश्यामि ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भ्रात्रेय इति। भ्रातुर्वसुदेवस्य पुत्रः भ्रात्रेयः, देहसम्बन्धेनापि आत्मीयानां रक्ष्यत्वख्यापनाय भ्रात्रेय इत्युक्तिः। शरणं रक्षणोपायतामर्हतीति शरण्यः, अनेन सम्बन्धादिकमनादृत्यापि शरणागतरक्षाशीलत्वमुक्तम्। शरणागतानपि दोषयुक्तान्वीक्षणेन न रक्षेदित्याशङ्कां निराकुर्वती व्याचष्टे। भक्तवत्सलः भक्तेषु दैहिकादिदोषादर्शी, भगवान्, कृष्णः अम्बुरुहेक्षणः कमलनयनः रामश्च, पैतृष्वस्रेयान् पितृभगिन्या ममापत्यानि, स्मरति। अपीति शेषः। स्मरति किमित्यर्थः ॥ ९ ॥ सपत्नेति किं च वृकाणां मध्ये, हरिणीं इव, सपत्नमध्ये शत्रूणां मध्ये, शोचन्तीं क्रोशन्तीमित्यपि पाठः। मां, पितृहीनान् बालकान् मत्पुत्रांश्च, वाक्यैः शोभनवचनैः, सान्त्वयिष्यति अपि ॥ १० ॥ एवमक्रूरं प्रति परोक्षवदुक्त्वाथ सर्वान्तरात्मानं भगवन्तं बुद्ध्या संनिधाप्य कार्पण्यनिवेदनपूर्वकमात्मीयरक्षां प्रार्थयते। कृष्ण कृष्णेति। हे कृष्ण, हे कृष्ण, हे महायोगिन् सर्वज्ञ, हे विश्वात्मन् सर्वान्तरात्मन्, विश्वं भावयति स्वभक्तजनं सुखयुक्तं करोतीति तथाभूत, हे गोविन्द, शिशुभिश्च शिशुभिः सहेत्यर्थः। अवसीदतीं क्लिश्यतीं, प्रपन्नामधुना शरणागतां मां, पाहि रक्ष ॥ ११ ॥ ननु ब्रह्मरुद्रादिषु प्रपत्तव्येषु सत्सु किं मामेव शरणं गच्छसि तत्राह। नान्यदिति। मृत्युसंसारात् मृत्युरूपात् संसारात्, बिभ्यतां नृणां, आपवर्गिकादपवर्गप्रदात्, ईश्वरस्य तव पदाम्भोजात्, अन्यत् शरणं न पश्यामि ॥ १२ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

भ्रात्रेय इति : १०.४९.९.

परित्राता कृष्णो जगति परमाप्तः सुखकरो रिपु द्वेष्टा स्पष्टं भवति ननु कुन्तीतनुभुवाम्।
इति ख्यातो लोकेऽखिलजनवचो दुन्दुभिरतः सखे पृच्छामि त्वां स्मरति स हृदा तान् किमधुना॥ १९ ॥
अक्रूर क्रूरकारानिलयनिगडिताऽवस्थितितिर्येन माता तातोऽपि प्रेमभाजा सपदि रिपुहतिं संविधायाऽन्वमोचि।
तस्यावश्यं तदीयान्वयगतेजनता सौख्यदानन्दयाब्धेर्भूयस्तत्राश्चर्यमेवं यदियमहामतो यात धैर्यावलम्बा ॥ २० ॥

सपत्नमध्य इति : १०.४९.१०.

दीनां वाणीमेवमाकर्ण्य पूर्णामाक्रोशन्त्या मे द्विषत्क्लेशितायाः ।
अत्रैत्यैषोऽक्रूर मां सान्त्वयेद्वा श्रीशस्यास्मत्साध्यमस्मिन्किमस्ति ॥ २१ ॥

कृष्ण कृष्णेति : १०.४९.११.

लोकोपकारविधुरोऽपि नरोऽतिरागी स्वाप्ताऽवने भवति भुव्यनुदासितात्मा ।
त्वं तु त्रिलोकहितकृद्दृगसीति सिद्धे कैमुत्यतस्त्वयि हरे स्वजनार्तिहृत्त्वम् ॥ २२ ॥
स्वाप्तावनैकरसिको यदहं भवामि स्यात् तत्कुटुम्बभृतिसक्त इति प्रसिद्धिः ।
गर्ह्या विरक्तहृदयैरिति चेदुपेक्षा तत्त्वं दयालुरसि दीनजनेऽस्मि दीना २३ ॥
मत्तातस्य सहोदरीति जननीतुल्येति दीनेति वा काचिल्लोकगताऽस्ति धर्मदर्गति प्रोद्यद्गुणाऽसाविति ।
सम्बन्धं कमपि प्रभो त्वमधुना हृद्यानवद्यं दयाम्भोधे बुद्धिमिहाऽऽनयन् कुरु कृपामस्मिन्ननाथे जने ॥ २४ ॥

नान्यदिति : १०.४९.१२.

केऽप्याप्ताः सुहृदश्च केऽपि कतिचिन्मित्राणि वा गोत्रजाः केषां केचन सन्ति भुव्यभयदाः क्लेशापहास्तोषदाः ।
आप्तादाप्ततमः प्रियात् प्रियतमो मित्रोत्तमो मित्रतः कृष्ण त्वं तु ममैक एव तदहं त्वत्पादमेवाऽऽश्रये ॥ २५ ॥
स्वाद्याक्षरं सततमेव विचिन्तयन्ती कुन्ती न पात्रमवनौ मदनुग्रहस्य ।
वक्तुं तवाच्युत न जात्वपि युक्तमेतद् यत्सर्वतोऽस्युपनिषत्सु धृताभिमानः ॥ २६ ॥

कृष्णप्रिया

भतीजे, भक्तवत्सल, शरण्यपालक भगवान् श्रीकृष्ण एवं कमललोचन श्रीबलभद्रजी क्या अपने बूआ के पुत्र पाण्डवों को कभी याद करते हैं ॥ ९ ॥ भैया ! मेरी दशा सुनो ! जैसे व्याघ्रों के बीच में हरिणी फस गई हो वैसे शत्रुओं के बीच में फसी हुई मैं शोक कर रही हूँ । भैया सदा पीडित परतंत्र मुझे और पितृछत्र विरहित बालकों को दयालु श्रीकृष्ण कभी अपने दो वचनों से आश्वासन प्रदान करेंगे ! ॥ १० ॥ हे कृष्ण ? हे कृष्ण ? हे महायोगिन् ? हे विश्वात्मन् ? हे विश्वभावन ? हे गोविन्द ? अपने सन्तानों के साथ क्लेशाक्रान्त मैं आप की शरण हूँ । हे शरणागतवत्सल अब प्रपन्न की रक्षा कीजिए ॥११॥ नाथ ! मैं स्पष्ट रूप से निवेदन कर रही हूँ, इस मृत्युरूप संसार से भयभीत बने जनों का आप कृपानिधि नाथ के ईश्वर के चरण कमलों से अन्य किसी को मैं रक्षक रूप में नहीं देखती हूँ । नाथ जब तक मुक्ति नहीं होती तब तब मरण की भीति नहीं मरती ॥ १२ ॥

नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने । योगेश्वराय योगाय त्वामहं शरणं गता ॥ १३ ॥

श्रीशुक उवाच

इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरम् । प्रारुदद्दुःखिता राजन् भवतां प्रपितामही ॥ १४ ॥
समदुःखसुखोऽक्रूरो विदुरश्च महायशाः । सान्त्वयामासतुः कुन्तीं तत्पुत्रोत्पत्तिहेतुभिः ॥ १५ ॥
यास्यन् राजामानमभ्येत्य विषमं पुत्रलालसम् । [1]अवदत् सुहृदां मध्ये बन्धुभिः सौहृदोदितम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—शुद्धाय, ब्रह्मणे, परमात्मने, योगेश्वराय, योगाय, कृष्णाय, नमः, त्वाम् , अहम् , शरणम् गता ॥ १३ ॥ श्रीशुक उवाच-राजन् ! इति, स्वजनम् , च, जगदीश्वरम् , कृष्णम् , अनुस्मृत्य, भवताम् , प्रपितामही, दुःखिता, प्रारुदत् ॥१४॥ समदुःखसुखः, अक्रूरः च, महायशाः, विदुरः, तत् , पुत्रोत्पत्तिहेतुभिः, कुन्तीम् , सान्त्वयामासतुः ॥ १५ ॥ यास्यन् , अक्रूरः, विषमम् , पुत्रलालसम् , राजानम् , अभ्येत्य, बन्धुभिः, सौहृदा, उदितम् , सुहृदाम् , मध्ये, अवदत् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शुद्धाय धर्मात्मने । ब्रह्मणेऽपरिच्छिन्नाय । परमात्मने जीवसखाय । योगेश्वरायाणिमादियुक्ताय । योगाय ज्ञानात्मने ॥ १३ ॥ प्रपितामही प्रपितामहः पाण्डुस्तस्य भार्या अरुदद्रुरोद ॥ १४ ॥ पृथया सह समं दुःखं सुखं च यस्य सः । तस्याः

---

[1] प्रावदत्–विज. ।

पुत्राणामुत्पत्तिहेतुभिर्जनकैर्धर्मानिलेन्द्रादिभिस्तत्कथनैरित्यर्थः ॥ १५ ॥ बन्धुभिः रामकृष्णादिभिः। सौहृदेनोदितमुक्तं यत्तद्वददिति ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"शुद्धो द्वितीये धर्मे च निर्दोषे पावने सिते" इति धरणिः। निजाभीष्टयोग्यमेव तं प्रणमन्ती शरणं याति–नम इति। शुद्धायेति धर्मात्मतयाऽवश्यं शरणागतरक्षाभिप्रेता। ब्रह्मणे इत्यादिपदद्वयेन तत्र च सदा सर्वत्र रक्षायोग्यता। योगेश्वरायेति तदर्थं स्वतः सर्वार्थपूर्णता। योगायेति चान्यतो ज्ञानाऽनपेक्षा। यद्वा–कृष्णाय स्वयं भगवते, परिपूर्णैश्वर्यादियुक्तायेत्यर्थः। निर्विशेषज्ञानिनामपि परिच्छिन्नतत्त्वज्ञानमात्ररूपाय। परमात्मनेंतर्यामित्वमात्रैश्वर्यज्ञानिनामपि तद्रूपाय त्रिष्वपि विशेषणम्। शुद्धाय मायास्पर्शरहिताय। योगेश्वराय निजतथातथानुभावानुभवोपायदात्रे, शक्तिशक्तिमतोरभेदांशेन स्वयं तत्तद्रूपाय च तुभ्यमिति शेषः। अतो नासाध्यं तव किंचिदिति भावः। इत्येवमादिगुणपूर्णम्। प्रपितामही कुन्ती। स्वेषु जन आविर्भावो यस्य तम्, भक्तार्तिहरमित्यर्थः। इत्येवम्। स्वजनं पित्रादिकम्, जगदीश्वरं जगदीशतया कृष्णं चानुस्मृत्य मुहुः स्मृत्वा। यद्वा–च अपि बन्धुतां स्वजनं प्राप्तमपि कृष्णं जगदीश्वरतयानुस्मृत्य। किं वा–जगदीश्वरमपि स्वजनं निजबन्धु तयानुस्मृत्य तदप्राप्त्या दुःखिता सती प्रकर्षेण सगद्गदमरुदत्। भवतां प्रपितामहीति तस्यास्तादृशप्रणयवत्याः साक्षात्कृष्णपितृष्वसुः प्रपौत्रत्वेन तस्य भाग्यं सूचयन्हर्षं वर्द्धयति। अतः परमादरेण भवच्छब्द प्रयोगस्तत्र बहुत्वञ्च। अतः प्रहर्षेण संबोधयति–राजन्निति। श्रीकृष्णसम्बन्धित्वेन देदीप्यमानोऽसीति भावः ॥ १४ ॥ तस्याः कुन्त्याः। तत्कथनैस्तेषां कथनैः। इत्यर्थ इति–कुन्तिराजगृहदुर्वासः परिचर्यावाप्तदेवतोषिणीविद्याप्रभावागतधर्मादिदेवांशोद्भूततदात्मजप्रभाववर्णनैरित्याशयः। चस्त्वर्थे। विदुरस्तु महद्यशः स्वभावतः पांडवपक्षपातादिसत्ख्यातिर्यस्य सः। तत्पुत्रेति तैर्व्याख्यातम्। तत्र देववरेभ्य उत्पन्नत्वात्तेषां कदाचिदप्यशुभं नास्तीत्यादिकथनैरित्यर्थः। अथ वा–तत्पुत्रोत्पत्तेर्हेतवो भूभारावतारार्थमवतीर्णस्य कृष्णस्य लीलासहाय्यानि तैः ॥ १५ ॥ यास्यन् गन्तुमिच्छन्, अक्रूरः। यद् वचः 'साम्यं हि कार्यं सर्वत्र' "विदुषां महतां चायं धर्मो यद्दीनपालनम्" इत्यादिरूपं तदित्यर्थः। सौहृदेन सुहृद्भावेनोदितम्। पुत्रेषु तेषां राज्यादिसिद्धये लालसा महामनोरथो यस्य तम्। सुहृदां भीष्मादीनां मध्ये तस्य लज्जोत्पादनेन निजोक्ति ग्रहणार्थम् ॥ १६ ॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

निजाभीष्टयोग्यमेव तं प्रणमन्ती शरणं याति। नम इति। शुद्धायेति धर्मात्मतयाऽवश्यं शरणागतरक्षाभिप्रेता। ब्रह्मन् इत्यादि पदद्वयेन तत्र च सदा सर्वत्र सर्वरक्षा योग्यता योगेश्वरायेति तदर्थं स्वतः सर्वार्थपूर्णता योगायेति चान्यतो ज्ञानानपेक्षा यद्वा कृष्णाय स्वयं भगवते परिपूर्णभक्तीनां परिपूर्णैश्वर्यादियुक्तायेत्यर्थः। ब्रह्मणे निर्विशेषज्ञानिनामपि परिच्छिन्नतत्त्वज्ञानमात्ररूपाय परमात्मने अन्तर्यामित्वमात्रैश्वर्यज्ञानिनां तद्रूपाय त्रिष्वपि विशेषणं शुद्धाय मायास्पर्शरहिताय योगेश्वराय निजतथा तथाविर्भावानुभवोपायदात्रे शक्तिशक्तिमतोरभेदांशेन स्वयं तत्तद्रूपाय च तुभ्यमिति शेषः। अतो नासाध्यं तव किञ्चिदिति भावः। अतस्त्वामित्यादि ॥ १३ ॥ इत्येवं स्वजनं पित्रादिकं जगदीश्वरमिति जगदीशतया कृष्णं चानुस्मृत्य वारं वारं स्मृत्वा यद्वा च अपि स्वजनं बन्धुतां प्राप्तमपि कृष्णं जगदीश्वरतयानुस्मृत्य किम्वा जगदीश्वरमपि स्वजनं निजबन्धुतयानुस्मृत्य तदप्राप्त्या दुःखिता सती प्रकर्षेण सगद्गदेत्यादिनारुदत् भवतां प्रपितामहीति तस्यास्तादृशप्रणयवत्याः साक्षात् कृष्णपितृष्वसुः प्रपौत्रत्वेन तस्य भाग्यं सूचयन् हर्षं वर्द्धयति अत एव परमादरेण भवच्छब्दप्रयोगः तत्र बहुत्वञ्चातः प्रहर्षेण सम्बोधयति राजन्निति ॥ १४ ॥ चेति त्वर्थे विदुरस्तु महद्यशः स्वभावतः पाण्डवविषयकपक्षवातादिसत्ख्यातिर्यस्य सः तत्पुत्रेति तैर्व्याख्यातं तत्र देववरेभ्य उत्पन्नत्वात्तेषां कदाचिदप्यशुभं नास्तीत्येवं कथनैरित्यर्थः। अथवा तत्पुत्रोत्पत्तेर्हेतवः भूमारावतारार्थमवतीर्णस्य श्रीकृष्णस्य लीलासाहाय्यानि तैः ॥ १५ ॥ पुत्रेषु तेषां राज्यादिसिद्धये लालसा महामनोरथो यस्य तं सुहृदां भीष्मादीनां मध्य इति तस्य लज्जोत्पादनेन निजोक्तिग्राहणार्थम् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ईश्वरत्वमेव पुनरत्यौत्सुक्येन व्यक्तं वर्णयन्ती भक्त्युद्रेकेण साष्टांगं प्रणमन्ती परमदैन्योदयेन शरणं याति— नम इति। तैर्व्याख्यातमेव। कृष्णायेत्यैश्वर्य्यमभिप्रेतमेव, शुद्धत्वादिना चैश्वर्य्यं व्यक्तमेव। यद्वा, शुद्धायेति धर्म्मात्मतयावश्यं शरणागतरक्षाभिप्रेता 'ब्रह्मणे' इत्यादि-पदद्वयेन। तत्र च सदा सर्व्वत्र सर्व्वरक्षायोग्यता, योगेश्वरायेति तदर्थं स्वतः सर्व्वार्थपरिपूर्णता, योगायेति चान्यतो ज्ञानानपेक्षा; विशेषणानामेषां यथोत्तरं शरणगमनहेतुत्वे श्रेष्ठ्यमूह्यमिति। अथवा परमार्त्त्या शरणं यान्ती माहात्म्यविशेषं वर्णयन्ती प्राक् प्रणमति—नम इति। कृष्णाय साक्षात्परमेश्वराय निजाशेषैश्वर्य्यप्रकटनपराय, अतः शुद्धाय

सर्व्वदोषरहिताय मायाविहीनाय वा; अतो ब्रह्मणे सर्व्वव्यापकाय परमात्मने च प्रत्येकं सर्व्वेषां हृद्यन्तर्य्यामितया वर्तमानाय; किञ्च, योगेश्वराय भक्तियोगप्रवर्त्तकाय; अतएव योगाय, भक्तैः सह प्रेम्णा स्वयं युज्यते संयोगं प्राप्नोतीति योगस्तस्मै, अतस्त्वामेवाहं दीना प्रपन्नेति स्तुत्या भक्तिभरोदयादुक्तक्रमपरित्यागेन परोक्षतया कृष्णायेत्युक्तम्, पश्चाच्च त्वामिति परमदैन्येनेति ज्ञेयम्। यद्वा, तुभ्यमिति प्रसंगबलादध्याहार्य्यम् ॥ १३ ॥ 'इति' एवं स्वजनं पित्रादिकम्, जगदीश्वरमिति दैन्येन जगदीशतया कृष्णञ्चानुस्मृत्य वारं वारं स्मृत्वा; यद्वा, 'च' अपि स्वजनं बन्धुमपि कृष्णं जगदीश्वरतयानुस्मृत्य; किंवा जगदीश्वरमपि स्वजनं भक्तिविशेषोदयेन निजबन्धुतयानुस्मृत्य, तदप्राप्त्या दुःखिता सती प्रकर्षेण सगद्गदार्त्तनादाश्रुधारानिपातादिप्रकारेणारुदत्। भवतां प्रपितामहीति तस्याः प्रपौत्रत्वेन तस्य भाग्यं सूचयन् हर्षं वर्द्धयति; यद्वा, भवत्–सम्बन्धविशेषेण तस्यास्तदुचितमेवेति भावः। अतएव परमादरेण भवच्छब्दस्य प्रयोगः, तत्र बहुत्वञ्च; अतः प्रहर्षेण सम्बोधयति राजन्निति। यद्वा, प्रपितामही भावविशेषश्रवणतः प्रेमोद्रेकेण राजमानं तं दृष्ट्वा तथैव समबोधदिति ॥ १४ ॥ समदुःख-सुख इति श्रीकुन्त्यां परमस्निग्धत्वमुक्तम्, महद्यशः स्वभावतः पाण्डवविषयक-पक्षपातादिलक्षणं यस्य सः, अतः सान्त्वयामासतुः। यद्वा, द्वयोरेव प्रत्येकं विशेषण द्वयम्, समदुःखसुखोऽपि महायशाः, परमधैर्य्यादिगुणलक्षणख्यातिः सन् परमस्निग्धत्वेन तया सह रोदनार्होऽपि धैर्य्यमवलम्ब्येत्यर्थः। यद्वा, महद्यशः परमज्ञानित्वादिलक्षणं यस्य, अतस्तत्पुत्रोत्पत्तिहेतुभिः। तैर्व्याख्यातम्। तत्र देववरेभ्य उत्पन्नत्वादेषां कदापि किञ्चिदशुभं नास्ति, अचिरात् परमसम्पत्तिर्भवितेत्येवं कथनैरित्यर्थः। अथवा तत्पुत्रोत्पत्तेर्हेतवः—श्रीकृष्णस्य साहाय्येन भूभारहरणपूर्व्वकतद्भक्तिप्रवर्त्तनादयस्तैः ॥ १५ ॥ राजानमिति लोभेन धर्म्ममतिक्रम्य गृहीतपरराज्यमिति भावः। अतएव विषमं भ्रातृपुत्रेषु स्वपुत्रेषु च साम्यहीनम्; किंवा, अत्यन्तक्रौर्य्य–कापट्यादियुक्तचित्तम्, यतः पुत्रेषु महादुष्टदुर्य्योधनादिषु लालसं महास्निग्धम्; यद्वा, तेषां राज्यसुखभोगादिसिद्धये लालसा महामनोरथो यस्य तम्। सुहृदां भीष्मादीनां मध्य इति तेषामपि तत्र सम्मति वक्ष्यमाणार्थप्रामाण्यादिकञ्च बोधयति; यद्वा, तेषां साक्षात्तस्य लज्जोत्पादनेन निजोक्तिग्रहणार्थम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अपेशलम् अशुभम् अपीति पित्रादयः किं स्मरतीत्यर्थः ॥ ६–२८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

प्रपत्तिमपि यथावत्कर्त्तुमशक्नुवन्त्या मम भगवत्प्रसादो अञ्जलिरेवेत्यभिप्रायेण प्रणमति। नम इति। शुद्धाय रागद्वेषादिरहिताय किञ्चित्स्वानुकूलमात्रापेक्षायेति यावत् अञ्जलिरेव तं प्रसादयितुमलमिति भावः। ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते अनेन पूर्णस्य नास्माभिर्विधेयमन्यदपेक्षितमित्यभिप्रेतम् परमात्मने अन्तः प्रविश्य प्रशासनेन भर्त्रे त्वत्प्रशासनानुरूपमेवास्म प्रवृत्तिरित्यभिप्रेतम् योगेश्वराय तत्तदधिकार्यनुरूपमनेकधावस्थितन्यासात्मकयोगनिर्वाहकाय योगाय युज्यते सर्वात्मभिरिति योगस्तस्मै निरुपाधिकसर्वविधबन्धवे एवम्भूताय श्रीकृष्णाय स्वर्गापवर्गसुखहेतवे नमः केवलं नमनमेव करोमीत्यर्थः। त्वामुक्तविधमहं कृपणा शरणं गता शरणागतशब्दभागस्मीति भावः ॥ १३ ॥ इतीति। इदं शुकवचनम् हे राजन्! भवतां प्रपितामहः पाण्डुः तस्य स्त्री कुन्ती इत्थं श्रीकृष्णं स्वजनं चानुस्मृत्य दुःखिता सती प्रारुदद्रुरोद ॥ १४ ॥ तदा समं दुःखं सुखं च यस्य सः कुन्त्या सहेति शेषः यद्वा बन्धुजनदुःखसुखदर्शनजमनोविकाररहितः ज्ञाननिष्ठत्वात् अक्रूरो विदुरश्च तस्याः पुत्राणामुत्पत्तिहेतुभिर्जनकैर्धर्मानिलेन्द्रादिभिः तत्कथनैरित्यर्थः। सत्पुत्रैरित्यादिपाठान्तरं तत्र सद्भिर्धर्मानुवर्त्तिभिः पुत्रैः तदुत्पत्तिहेतुभिश्च पूर्वोक्तैः कुन्तीं सान्त्वयामासतुः धर्मानुवर्त्तित्वाद्दिक्पालांशजत्वाद्भगवदभिमानविषयत्वाच्च न तेषामशुभमस्तीत्येवम्विधैरुपदेशैः सान्त्वयामासतुरित्यर्थः ॥ १५ ॥ यास्यन्निति। गमिष्यन्मथुरां प्रतीति शेषः। पुत्रलालसं पुत्रेष्वासक्तबुद्धिमत एव विषमं भ्रातृपुत्रेष्विति शेषः। विषमबुद्धिं राजानं धृतराष्ट्रमभ्येत्य बन्धुभिः श्रीकृष्णादिभिः यत्सौहृदेन कथितं तत्सुहृदां मध्येऽवोचत् ॥१६॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कृष्ण सीसाद्यलोहेषु इत्यतः कृष्णशब्दस्य सीसाद्येऽपि वृत्तेस्तन्निरासाथ शुद्धायेति। कितत् शुद्धमत्राह। ब्रह्मण इति। अस्याप्यनेकार्थवृत्तेर्न निर्णय इत्यतः परमात्मन इति। दुर्भगशरीरे वसतो हरेः कर्दम इव शुद्धत्वं कथं युज्यत इति तत्राह। योगेश्वरायेति। योगैश्वर्याद् घटत इत्यर्थः। ननु तर्हि योगेश्वर्यनिमित्तं शुद्धत्वं चेत्स्वतो नास्तीत्यायातामित्यत उक्तं योगायेति ज्ञानसंहताय ज्ञानात्मत्वेनाप्राकृतवात् स्वाभाविकमित्यर्थः। ततः किमत्राह। त्वामिति ॥ १३ ॥ इति एवमादिगुणपूर्णम् ॥ १४ ॥ तस्याः पुत्राणां युधिष्ठिरादीनाम् उत्पत्तेर्हेतुभिः दुर्वाससोऽनुग्रहेण धर्मानिलेन्द्रसंयोगादिलक्षणैः ॥ १५ ॥ यास्यन् गन्तुमिच्छन् पुत्रलालसं पुत्रस्नेहकातरं बन्धुभिः सहितं सौहृदोदितं सुहृद्भावेन कथितम् ॥ १६–१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृष्णाय भक्तैरुपस्यायेत्यर्थः। शुद्धाय दृश्यत्वेऽपि मायातीताय ब्रह्मणे ज्ञानिभिरुपास्याय परात्मने योगिभिरुपास्याय योगानां तत्तत्प्राप्त्युपायानां भक्त्यादीनामीश्वराय प्रदानसमर्थाय योगाय तत्तद्रूपाय स्वरूपाय च ॥१३॥ प्रपितामही कुन्ती ॥१४॥

तस्याः पुत्राणामुत्पत्तिहेतुभिर्जनकैर्धर्मानिलादिभिः एते धर्माद्यंशाः केन नाशयितुं शक्या इत्यादि तत्प्रभावकथनैरित्यर्थः ॥ १५ ॥ सुहृदां भीष्मादीनां मध्ये स्थितं बन्धुभिर्विदुरादिभिः सहितं सौहृदोदितं सौहृदव्यञ्जकं वाक्यम् ॥ १६ ॥

गूढार्थदीपिनी

स्वजनं पित्रादिकम्। अभिमन्युः परीक्षित्पिता। पितामहोऽर्जुनः प्रपितामहः पाण्डुः तत्पत्नी प्रपितामही कुन्तीति क्रमः ॥ १४ ॥ हेतुभिः जनकैः धर्मानिलादिभिः ॥ १५ ॥ यास्यत् गन्तुमिच्छन्। बन्धुभिः रामकृष्णादिभिः यत् उदितं तत् अक्रूरः अवदत् इत्यन्वयः ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शुद्धाय स्वभावतोऽपास्तसमस्तदोषाय ब्रह्मणे बृहत्स्वरूपगुणशक्तिराशये परमात्मने सर्वोपास्याय योगेश्वराय स्वप्राप्तिसाधनभूताय युज्यते इति योगस्तस्मै प्राप्यायेत्यर्थः ॥ १३ ॥ हे राजन्! परीक्षित् भवतां प्रपितामहस्य पाण्डोर्भार्या ॥ १४ ॥ तस्याः पुत्राणामुत्पत्तिहेतुभिर्जनकैर्धर्मानिलेन्द्रनासत्यदस्रैस्तत्कथनैरित्यर्थः ॥ १५ ॥ राजानं धृतराष्ट्रं बन्धुभिः रामकृष्णादिभिः यत्सौहृदेनोदितं तदवदत् ॥ १६–१८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शुद्धाय निरञ्जनाय ब्रह्मणे पूर्णगुणाय परमात्मने अत्यन्तादानकर्त्रे योगेश्वराय योगाय सर्वान्युङ्क्त इति योगो मातृक्ता प्राक् नमस्त्वामहं शरणं गता ॥ १३ ॥ स्वजनं वसुदेवादिकं सु अजनमुत्पत्तिरहितं। इयति स्वलाघवेऽपि ते नायाता इति द्योतयितुं स्वो लघुः पठितोऽन्यथा वृत्तविच्छित्त्यापत्ते। इत्येवंगुणकत्वेनानुस्मृत्य हे राजन्भवतां प्रपितामही दुःखितान्तः प्रारुदत्। इदितो वेत्यङ्। रुरोद। प्रपितामही प्रपितामहस्य पाण्डोः पत्नी। भवत इति राजन्नित्यानुकूल्येन वक्तव्ये बहुपुत्रस्थानेऽभिमन्योस्त्वमेकोऽनेकगुणकः पुत्र इति भावं ध्वनयितुं भवतामित्युक्तिरिति हृदयं ॥१४॥ समदुःखसुख समे दुःखसुखे यस्य स महाज्ञानित्वादक्रूरो विदुरश्चैवमेव महायशा इति। विदुरोऽक्रूरश्च कुन्तीं तत्पुत्रोत्पत्तिहेतुभिस्तस्याः पुत्राणां धर्मादीनामुत्पत्तौ हेतवोंऽशिनीयमाद्यास्तैस्त एवैतेऽवतीर्णा न चिन्ता कर्तव्येति तत्पुत्रोत्पत्तिहेतुभिरित्यर्थः। सान्त्वयामासतुः। तस्याः पुत्रोत्पत्तौ तत्त्वेन यमानिलेन्द्रनासत्यानामुत्पत्तौ हेतवः कारणानि तैर्निमित्तानि देवताकार्याणि तैर्निरूपितैरिति वा ॥ १५ ॥ यास्यन्मधुरां गन्तुमिच्छन्पुत्रलालसं तद्वर्धिनमतो विषमं राजानमभ्युपेत्य सुहृदां मध्ये। अनेन नैकान्त इति सूचयति। बन्धुभिः कृष्णादिभिः सौहृदेन सुहृद्भावेनोदितमुक्तं प्रावददुवाच। १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एतावत्प्रार्थनानन्तरमङ्गीकारेणेव तत्परितोषं कृत्वा तिरोधानकृते तादृशाय पुनर्नमस्करोति। नमः कृष्णायेति। नमस्कारे सम्बन्धस्य विरुद्धत्वात् यदैव चिकीर्षितः तदैव तिरोहितः कृष्णायेति सदानन्दाय अवतारत्वेऽपि धर्मा न बाधका इत्याह। शुद्धायेति अवतारसम्बन्धिधर्मैरस्पर्शात् अनेन कालान्ताः सर्वधर्मा एव निवारिताः नन्वागतस्य सर्वथेतरसम्बन्ध इति चेत्तत्राह। ब्रह्मण इति। जीवानामेवागतानां बन्धो न ब्रह्मणः ननु जीवोऽपि वस्तुतो ब्रह्म भवतीति को विशेष इति चेत्तत्राह। परमात्मन इति। परमश्चासावात्मा चेति। उत्कृष्ट आत्मा आत्मनामात्मा वा ननु तर्हि कथं मूलसमागमनं हेत्वभावादंशस्वे परिच्छेदे हि समागमनं सम्भवति तत्राह। योगेश्वरायेति। योगो ह्यलौकिकं कर्तुं शक्तः यत्र बुद्धिर्न प्रसरति तस्यापीश्वरः कथं स्वागमनमपि न सम्पादयेत् किञ्च योगस्यापि सामर्थ्यं भगवत एवेत्याह। योगायेति। भगवानेव योगः अतः सामर्थ्यस्य दृष्टत्वान्नानुपपन्नं किंचित् अतो यथा आगतोऽपि तद्धर्मैर्न लिप्यते सर्वत्र पूर्णोऽप्यागच्छति एवमस्मानपि पालयिष्यतीति निश्चित्याह। त्वामहं शरणङ्गतेति। शरणागमने परिपालनमावश्यकमिति ॥ १३ ॥ ततः किञ्जातमित्याकाङ्क्षायामाह। इत्यनुस्मृत्येति। स्वजनं पित्रादीन् कृष्णं चकाराद्बलभद्रं भगवद्गुणांश्च जगदीश्वरमिति सर्व एव पाल्या इति बहिर्मुखाः तिरोधानात्पाक्षिकरक्षामाशङ्क्य प्रकर्षेणारुदत् वंशं दूरीकरिष्यति एवं परीक्षितं कथं चित्स्थापयिष्यतीत्येवं भवद्वंशे स्त्रियोऽपि भक्ता इति ज्ञापयितुमाह। भगवतां प्रपितामहीति पितामही सुभद्रा कुन्ती तु प्रपितामही ॥ १४ ॥ भगवतः सान्त्वनं तु पाक्षिकं मन्यत इति भगवदीयैः सान्त्वनं क्रियत इत्याह। समदुःखसुख इति। तत्रार्थे अक्रूरस्य सान्त्वनमनुचितं मत्वाह। समे दुःख सुखे यस्येति यद्यपि जाते अनिष्टे इष्टे वा सुखं दुःखं समानं तथाप्ययमक्रूरः प्रसिद्धः पुरुष इति सान्त्वनमुचितमेव विदुरोऽपि तुल्यस्तथापि धर्मपक्ष इत्याह। महायशा इति। तत एव हि भवति नान्यथा सान्त्वयामासतुः नतु तद्दुःखं दृष्ट्वा स्वयं युद्धार्थं प्रवृत्तो यतः कुन्ती कुन्तिभोजाय दत्ता तत्रापि स्वरक्षार्थं धर्मादयः प्रार्थिताः इत्यक्रूरविदुराभ्यां युद्धे कृते तत्प्रयत्नो व्यर्थो भवतीति तत्पुत्रोत्पत्तिहेतुभिर्धर्मादिभिः कृत्वाः सान्त्वनमेव कृतवन्तौ नतु युद्धार्थं प्रवृत्ताविति युक्तम् ॥ १५ ॥ तथाप्यक्रूरः असहमानः वाक्ये न धिक्कारे कृते यद्ययं विमतो भविष्यति तदा मारयिष्यामीति निश्चित्य तद्गृहे स्थितः तदधीनो भवतीति निर्गच्छन् राजसम्बोधनार्थं प्रवृत्त इति तदाह। यास्यन्निति। राजानं

धृतराष्ट्रं राजत्वादवश्यं वक्तव्यः अन्यथा मर्यादातिक्रमो भवेत अभित एत्येति। निःशङ्कं ननु राजा न वक्तव्यः सर्वप्राणिभिः यथा भगवान् तत्कथमुक्त वा नित्याशङ्क्याह। विषममिति। तत्र हेतुः पुत्रलालसमिति पुत्रो हि स्वयञ्जीवन् पाण्डवान्न मन्यते अधुना किं पाण्डवा हन्तव्याः पुत्रो वेति विचारे दुष्टो हन्तव्य इति धर्मशास्त्रात् पुत्रस्यैव मारणं प्राप्तं तन्न करोति विषमः सहजो धर्मो विहितं धर्म्मं बाधते एतच्च राजाधिकारे निविष्टस्य बोधनमनुचितमिति भावः। तदपि नैकान्ते तथा सति लज्जा न भवेदतः सुहृदां मध्ये तस्मिन् विषमेऽप्यन्येषामविषमत्वात् न वचने किञ्चिदभीष्टं तत्रापि बन्धुभिरुदितं वसुदेवादिभिः तत्रापि सौहृदादेवोदितं न तु विषमबुद्ध्या ॥ १६ ॥

श्रीसुबोधिनी–सारः

शुद्धाय परमात्मने ब्रह्मणे योगेश्वराय योगप्रवर्त्तकाय योगाय प्राप्याय कृष्णाय नमः त्वां शरणं गताहमस्मि ॥ १३ ॥ शुकोक्तिः। इत्येवमनुस्मृत्य स्वजनं मातृपितृवर्गं जगदीश्वरं कृष्णं चानुस्मृत्य दुःखिता भवतां प्रपितामही कुन्ती प्रारुदत् हे राजन् ॥ १४ ॥ समे तुल्ये सुखदुःखे यस्य सोक्रूरो महायशा विदुरश्च कुन्तीं सांत्वयामासतुः तस्याः पुत्राणाम् उत्पत्ति हेतुभिर्जन्मकारणैः धर्मानिलेन्द्रदस्रैः ॥ १५ ॥ यास्यन् गमिष्यन् विषममसमं पुत्रेषु लालसा यस्य स तं राजानं धृतराष्ट्रमभ्येत्य प्राप्य बन्धुभिः कृष्णादिभिः सौहृदादुदितं कथितम् अवदत् सुहृदां मध्येऽक्रूरः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं शरणमागता प्रणमति—नम इति। कृष्णाय सदानन्दमूर्तये नमः। शुद्धाय रागद्वेषादिदोषरहिताय। ब्रह्मणे वेदान्तप्रतिपाद्याय। परमात्मने अन्तर्यामिणे। योगेश्वराय योगफलदात्रे। युज्यत इति योगः फलं तस्मै योगादिफलरूपाय नमः ॥ १३ ॥ हे राजन्! भवतां प्रपितामही कुन्ती इत्येवं स्वजनं वसुदेवादिबन्धुवर्गं जगदीश्वरं कृष्ण चानुस्मृत्य तद्वियोगादिदुःखिताः सती प्रारुददित्यन्वयः ॥ १४ ॥ कुन्त्या सह समं सुखं दुःखं च यस्य सोऽक्रूरो महायशाः प्रख्यातकीर्तिः विदुरश्च तस्याः पुत्रोत्पत्तिहेतुभिः 'धर्मानिलेन्द्रादिभ्यो जाता महाप्रभावास्तव पुत्राः, अतस्त्वया खेदो न कार्य' इति कथनैः कुन्तीं सान्त्वयामासतुरित्यन्वयः ॥१५॥ यास्यन् मथुरां प्रति गमिष्यन्नक्रूर एकान्ते कथने तस्य लज्जा न स्यात् अतः सुहृदां बन्धूनां मध्ये राजानं धृतराष्ट्रमभ्येत्य बन्धुभिः कृष्णरामादिभिः यत्सौहृदेन प्रेम्णा उदितं कथितं तदवददित्यन्वयः। तथाकथने हेतुमाह–विषममिति। भ्रातृपुत्रेषु स्वपुत्रेषु च विषमबुद्धियुक्तम्। तत्र हेतुमाह—पुत्रलालसमिति। पुत्रेष्वासक्तबुद्धिमित्यर्थः। सौहृदोदितमित्युक्त्या पूर्वमनुक्तमपि तैरुक्तमित्युक्तं ज्ञेयम् ॥ १६ ॥

अन्वितार्थप्रकाशिका

नम इति ॥ शुद्धाय धर्मात्मने ब्रह्मणे अपरिच्छिन्नाय परमात्मने जीवसखाय योगेश्वराय अणिमादियुक्ताय योगाय ज्ञानात्मने कृष्णाय नमः अहं त्वां शरणं गता ॥ १३ ॥ इतीति ॥ हे राजन्! भवतां प्रपितामही कुन्ती इत्येवं स्वजनं वसुदेवादिबन्धुवर्गं जगदीश्वरं कृष्णं चानुस्मृत्य तद्वियोगाद्दुःखिता सती प्रारुदत् ॥ १४ ॥ समेति ॥ कुन्त्या सह समं दुःखं सुखं च यस्य सोऽक्रूरो महायशाः प्रख्यातकीर्तिर्विदुरश्च तस्याः पुत्रोत्पत्तिहेतुभिः धर्मानिलेन्द्रादिभ्यो जाता महाप्रभावास्तव पुत्राः केनाभिभवितु शक्याः अतस्त्वया खेदो न कार्यं इति कथनैः कुन्तीं सान्त्वयामासतुः ॥ १५ ॥ यास्यन्निति ॥ यास्यन् मथुरां प्रति गमिष्यन् अक्रूरः विषमं भ्रातुः स्वस्य च पुत्रेषु विषमबुद्धिं पुत्रलालसं स्वपुत्रेष्वासक्त राजानं धृतराष्ट्रमभ्येत्य सुहृदां बन्धूनां मध्ये बन्धुभिः कृष्णरामादिभिः यत्सौहृदेन प्रेम्णा उदितं कथितं तदवदत् ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शुद्धाय शुद्धैकान्त धर्मप्रवर्त्तकाययोगानां चतुर्वर्गप्राप्त्युपायानां ईश्वराय नियामकाय योगाय कर्मयोगाष्टांगयोगज्ञानयोग भक्तियोगप्रवर्त्तकायतुभ्यं नमः ॥ १३ ॥ पितामाहोऽर्जुनस्तस्य माता प्रपितामहीरुरोद ॥ १४ ॥ कुन्त्या सह समं दुःखं सुखं च यस्य सः तस्यः पृथायाः पुत्राणां उत्पत्तेर्हेतुभिर्वृषवायुशक्रादिभिः कारणैः तेषां माहात्म्यकथीनैरित्यर्थः ॥ १५ ॥ यास्यन् मथुरांगमिष्यन् सन् बंधुभिः रामकृष्णादिभिः सौहृदेनमित्रत्वेन उदितं कथितं यत् तत् सुहृदां भीष्मादीनां मध्ये अवदत् ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रपत्तिमपि यथावत् कर्त्तुमशक्नुवत्या मम भगवत्प्रसन्नतासंपादकोऽञ्जलिरेवेत्यभिप्रायेण प्रणमति। नम इति। शुद्धाय रागद्वेषरहिताय किंचित् स्वानुकूलमात्रापेक्षायेति यावत्। अतोऽञ्जलिरेव तं प्रसादयितुमलमिति भावः। ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते, अनेन पूर्णस्य नास्माभिर्विधेयमन्यदपेक्षितमिति ज्ञापितम्। परमात्मने अन्तः प्रविश्य प्रशासनभर्त्रे, त्वत्प्रशासनानुरूपमेवास्मत्प्रवृत्तिरित्यभिप्रेतम्। योगेश्वरायाऽणिमादिसिद्धियुताय, योगाय निरुपाधिकसर्वबन्धवे, एवंभूताय

कृष्णाय, नमः। त्वामुक्तविधं कृष्णमेव, अहं शरणं गता शरणं प्राप्तास्मीति भावः ॥ १३ ॥ इतीति। इदं शुकवचनम्। हे राजन्, भवतां प्रपितामही कुन्ती, इतीत्थं, स्वजनं जगदीश्वरं कृष्णं च अनुस्मृत्य दुःखिता सती, प्रारुदद्रुरोद ॥ १४ ॥ समेति। तदा, समं दुःखं सुखंः च यस्य सः, कुन्त्या सहेति शेषः। यद्वा। ज्ञाननिष्ठत्वाद्बन्धुजनदुःखदर्शनजमनोविकाररहितः अक्रूरः, महायशाः विदुरश्च, तस्याः कुन्त्याः पुत्राणां उत्पत्तिहेतुभिर्जनकैः धर्मानिलेन्द्रादिभिः, तत्कथनैरित्यर्थः। कुन्तीं सान्त्वयामासतुः। सत्पुत्रोत्पत्तिहेतुभिरिति पाठे सत्पुत्रैर्धर्मानुवर्त्तिभिः सुतैः तदुत्पत्तिहेतुभिश्चेत्यर्थः। धर्मानुवर्त्तित्वाद्दिक्पालांशजत्वाद्भगवदभिमानविषयत्वाच्च न तेषामशुभमस्तीत्येवंविधैरुपदेशैः सान्त्वयामासतुरित्यर्थः ॥ १५ ॥ यास्यन्निति। अक्रूर इति शेषः। यास्यन् गमिष्यन्, मथुरां प्रतीति शेषः। पुत्रलालसं पुत्रेष्वासक्तबुद्धिं, अत एव विषमं विषमबुद्धिं, भ्रातृपुत्रेष्विति शेषः। राजानं धृतराष्ट्रं, अभ्येत्य सम्प्राप्य, बन्धुभिः श्रीकृष्णादिभिः, सौहृदोदितं यत् सुहृद्भावेन कथितं, तत् सुहृदां मध्ये, अवदत्। अवोचत् ॥ १६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

नमः कृष्णायेति : १०.४९.१३.

किं कुर्यां किं न कुर्यां तव सपदि हरे प्राप्तिरर्हा यथा स्यात् किं दद्यां किं न दद्यामविकलसुगुणा धर्मवृद्धिर्यथा स्यात्।
जाने श्रीभूमिजानेऽण्वपरमपि न वै वेद्मि किं त्वेकमेवाऽकम्पा भक्तेऽनुकम्पाऽस्ति हि तव तदहं पादपद्मं प्रपन्ना ॥ २७ ॥

इत्यनुस्मृत्येति : १०.४९.१४.

दयोदयेन बाष्पोदबिन्दूदय इवापरः। हेतुरित्यास तादृक् सा दयोत्पत्त्यै तदनन्तरे ॥ २८ ॥

समदुःखसुख इति : १०.४९.१५

या धर्मोद्भवकारणं जगति या धर्मर्धिमाकाङ्क्षति या धर्मेण समाश्रिताऽनिशमसौ धर्मो यथा पाल्यते।
तस्यां त्वय्यनपायिभव्यगुणसद्धर्मैकहार्दस्थितौ धर्मैकावनदीक्षितस्य सततं सिद्धैव विष्णोः कृपा ॥ २९ ॥
साहाय्यं यस्य लब्ध्वा क्वचिदपि विधितो जानकीजानिरस्मिन् दुर्लङ्घ्यं क्षारवारांनिधिमपि कृतवानञ्जसैवाङ्घ्रिगम्यम्।
सोऽयं ते नित्यमास्ते परिचरणधिया सन्निधौ पावमानिः का चिन्ता संकटं वा रिपुकृतमपि ते सौख्यसौभाग्यभाजः ॥ ३० ॥
यो हेमप्रसवश्च योऽध्वरभुजां हव्यप्रदः पावकः प्राचीन - प्रमुखा - ऽखिला - ऽमर - समुद्गीत-प्रतापो ऽनलः।
तस्मिन् साध्वि धनञ्जये तव वरो सत्येतदाचिन्तय प्राप्ताः स्युर्निखिलारयोऽपि शलभप्राग्भारयोग्यां दशाम् ॥ ३१ ॥
सत्कुलमेव सतीनां रक्षति दुःखाद् दुरध्वभीतानाम्। तत्किं बिभेषि वितथं यस्मान्नकुले न भवसि महती त्वम् ॥ ३२ ॥
सहदेवेन तिष्ठन्त्याः सर्वदैव तवानघे। न दुर्जनभयं नापि दुर्लभं कृष्णदर्शनम् ॥ ३३ ॥
यस्या धर्मानुकूल्यं सततमविकलं या गुणेनामलेन युक्ता या चाप्तसौख्यप्रदविजयवती या च नासत्ययुक्ता।
क्लेशाधिव्याध्युपाधिद्विषदुपधिभवत्रासदारिद्र्यवार्ता तस्याः स्वप्नेऽपि न स्यात्क्वचिदिति कलयासंदिहानाम्ब लोके ॥ ३४ ॥
दुर्वासाः क्व क्व तस्य प्रियकृदपचितिर्मन्त्रलाभश्च तस्मात् तस्मात्प्राप्तिः सुतानामपरदिविषदा - मानुकूल्यं च पत्युः।
इत्थं येनाऽप्रयत्नादघटितघटनाशालिनाऽकारि कर्तुं सम्भाव्याव्याजभव्यं जगति स च विधिने क्षमः स्यात्किमग्रे ॥ ३५ ॥
बधान धैर्यं त्यज शत्रुसाध्वसं दरिद्रभावं न मनः समानय।
अनेहसाऽल्पेन सकल्पवृक्षतां निजामजस्त्वामिह दर्शयिष्यति ॥ ३६ ॥
अव्याजतावकसुतावनचिन्तनं स श्रीशः करोति कियदत्र हि साक्षिभूतम्।
तच्चित्तमेव सति बाह्यदृशा तु वच्मः सर्वात्मनैव स वशस्तव वासुदेवः ॥ ३७ ॥
मुकुन्दपदपङ्कजं तव विधाय हार्दाश्रितं स धर्मगुणमीप्सितं निजमहर्निशं चिन्तयन्।
त्वदङ्घ्रिकमलावलोकनसमुत्सुकोऽनन्यभाग् जनोऽयमिह तेऽधुनेदृगिति विज्ञ विज्ञाप्यताम् ॥ ३८ ॥
मदीयमनुपालयाम्यहमिमं सदेति प्रभुर्गिरैव न तु केवलं वदति दर्शयत्यर्थतः।
प्रथेति च वृथा यथा न भविता तथा तत्पुरोऽपि कथ्यमिह सत्पथे प्रथितधीरसि त्वं यतः ॥ ३९ ॥

यास्यन्निति : १०.४९.१६.

येनावश्यमुपस्थितं प्रभविता वैरस्य संवर्धनं वासस्तत्सविधे पुरा नयविदा पुंसा हि वाग्वादतः।
कार्यो नैव तदूर्ध्वमप्यलमिति न्यायप्रवीणः क्षमं यास्यन् राजसभां जगाम गदितुं नीतिं स राज्ञे सुधीः ॥ ४० ॥

कृष्णप्रिया

सदानन्द श्रीकृष्ण को नमस्कार हो, ब्रह्मस्वरूप को नमस्कार, आत्माओं के आत्मा परमात्मा को नमस्कार, योगेश्वर को मेरे प्रणाम, योगस्वरूप कृष्ण को नमस्कार, हे नाथ मैं पृथा आपकी शरणागत हूँ ॥ १३ ॥ श्रीशुकदेवजी ने कहा राजन्

परीक्षित्! आपकी प्रपितामही–परदादी इस प्रकार अपने स्वजनों को पिता-माता को एवं जगदीश्वर श्रीकृष्ण का स्मरण कर दुःखी होकर जोर से रुदन करने लगी ॥ १४ ॥ श्री कुन्ती जी के सुख दुःख के समभागी परमयशस्वी विदुरजी एवं श्रीअक्रूरजी श्री कुन्ती जी के पांचो पुत्रों की उत्पत्ति के जनक धर्म इन्द्र, वायु, अश्विनी कुमार आदि का सामर्थ्य कहकर आश्वासन देने लगे ॥ १५ ॥ राजन् तीन मास का अनुभव के बाद सब परिस्थिति को यथार्थ जानने वाले अक्रूरजी विदाय के अवसर पर पुत्रों के कहने पर सब कुछ करने वाले, विकृत वृत्ति और विषम दृष्टि वाले राजा धृतराष्ट्र को समस्त बान्धवों के समक्ष भगवान् श्रीकृष्ण एवं बलभद्र जी ने जो बात कहलायीं थी वह सब कहने लगे ॥ १६ ॥

अक्रूर उवाच

भो भो वैचित्रवीर्य त्वं कुरूणां कीर्तिवर्धन । भ्रातर्युपरते [1]पाण्डावधुनाऽऽसनमास्थितः ॥ १७ ॥
धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रञ्जयन् । वर्तमानः समः स्वेषु श्रेयः कीर्तिमवाप्स्यसि ॥ १८ ॥
अन्यथा [2]त्वाजरँल्लोके गर्हितो यास्यसे तमः । तस्मात् [3]समत्वे वर्तस्व पाण्डवेष्वात्मजेषु च ॥ १९ ॥
नेह चात्यन्तसंवासः कर्हिचित् केनचित् सह । राजन् स्वेनापि देहेन किमु [4]जायात्मजादिभिः ॥ २० ॥

कर्दमक्षमा

अन्वयः—भो भो विचित्र वीर्य!, त्वम्, कुरूणाम् कीर्तिवर्धनः, पाण्डौ, भ्रातरि, उपरते, अधुना आसनम् आस्थितः ॥ १७ ॥ धर्मेण, उर्वीम्, पालयन्, प्रजाः शीलेन रञ्जयन्, स्वेषु, समः, वर्तमानः-श्रेयः, कीर्तिम्, अवाप्स्यसि ॥ १८ ॥ अन्यथा, तु, आचरन्, लोके, गर्हितः, तमः, यास्यते, तस्मात्, पाण्डवेषुः च आत्मजेषु, समत्वे, वर्तस्व ॥ १९ ॥ राजन्! इह, कर्हिचित्, केनचित्, सह, अत्यन्तसंवासः, स्वेन, देहेन, सह, कर्हिचित्, अत्यन्तसंवासः किमु, जायात्मजादिभिः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भ्रातर्युपरत इति । पांडोः पुत्रेषु सत्सु राजासनं त्वमास्थित इति कटाक्षः ॥१७॥ भवतु तथाप्येवं वर्तमानः श्रेयोऽवाप्स्यसीत्याह । धर्मेणेति ॥ १८ ॥ तमो नरकमिहैव महद्दुःखमिति भावः ॥ १९ ॥ नन्वात्मजानात्मजादिषु कथं समत्वं स्यात्तत्राह नेह चेति षड्भिः । अत्यंतं नित्यं सवासः सम्यक्स्थितिः ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कीर्तिवर्धनेत्यत्रापि विपरीतलक्षणया छेदकेत्यर्थो लभ्यते । यद्वा—"वर्धनं वृद्धिवर्धिष्णुच्छेदे घटयां तु वर्द्धनी" इति । मेदिनी । कटाक्ष इति–न हि पांडुपुत्रेषु सत्सु तव राज्याधिकारोस्तीति । वैचित्रवीर्येत्यपि तथा ज्ञेयं, पाणिग्रहीतृपुत्राभावत्वेन व्यासात्मजत्वादिति । अधुनेत्यनेन पूर्वमपि तव ज्येष्ठत्वेऽप्यंधत्वान्न राज्यमासीदिति ध्वनितम् । प्राक् सोल्लुंठं सामप्रायमाह–भो भो इति । वीप्साऽत्यंताभिमुख्यार्थं वाच्यार्थाप्रियत्वेनतस्य वैमुख्यसंभवात् ॥ १७ ॥ भवतु राज्यम् । तथापि प्राप्तराज्यत्वेपि । एवं मदुक्तप्रकारेण । उर्वी भूमिम् । स्वेषु निजात्मजपांडवात्मजेषु । श्रेयः पारत्रिकं सुखम् । शीलेन सद्वृत्तेन । स्वेषु स्वपुत्रपांडवादिषु । श्रेयः कुशलं कीर्तिश्च ॥ १८ ॥ अन्यथा वैषम्यमाचरन् । नरकं तत्समम् । इति भाव इति—प्रबलविरोधात्पुत्रनाशेनेहैव महन्नरकस्थवद्दुःखमनुभविष्यसीति भावः । तस्मादैहिकामुष्मिकदुःखभयात् । "तमो राहुस्तमोऽघं च दुःखैनोव्यसनेष्वपि" इति यादवः । अथ सस्मितं सपरिहासमाह–अन्यथेति । तमः महादुःखम्, अत्र पुत्रवियोगादिजममुत्र नरकादिजमित्यर्थः ॥ १९ ॥ साम्यस्य दौर्घट्यमाह —नन्विति । सर्वस्यानित्यत्वात्स्नेहः । कुत्रापि योग्यतामन्तरेण न कार्य इत्याह—नेहेति । इह लोके । कि बहुना, स्वदेहोऽपि नात्यंतसंगीत्याह— स्वेनापीति,–कैमुत्यं दर्शितम् । इह लोके । चकारादमुष्मिश्च लोके । कर्हिचित्कदाचिदपि । 'कस्यचित्' इति क्वचित्पाठः । हे राजन्निति राजत्वेऽपि तदपरिहार्यमिति भावः । स्वेनात्मतया प्रतीतेनापि । अतः पुत्रादिव्यवहारस्यानित्यत्वात्तत्राऽनासक्तिं विधाय धर्मरक्षार्थं स्वेषु साम्येन वर्तनमेव युक्तमिति भावः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्राक् सोल्लुण्ठं सामप्रायमाह । भो भो इति । वीप्साऽत्यन्ताभिमुख्यार्थम् । वाच्यार्थाप्रियत्वेन तस्य वैमुख्यसम्भवात् ॥ १७ ॥ शीलेन सद्वृत्तेन स्वेषु स्वपुत्रपाण्डवादिषु श्रेयः कुशलं कीर्त्तिश्च ॥ १८ ॥ अथ सस्मितं सपरिहासमिवाह । अन्यथेति । तमः महादुःखम् अत्र पुत्रवियोगादिजम् अमुत्र च नरकादिकमित्यर्थः ॥ १९ ॥ इह लोके चकारादमुष्मिश्च लोके

---

१. पाण्डौ बन्धूनां सममास्थितः–विज. । २. ह्या–प्रा. पा. । ३. समस्त्वं–विज. । ४. जादिषु–वीर. ।

कर्हिचित्कदादपि कस्यचिदिति पाठः क्वचित् हे राजन्निति राजत्वेऽपि तदपरिहार्यमिति भावः। स्वेन आत्मतया प्रतीतेनापि अतः पुत्रादिव्यवहारस्यानित्यत्वात्तत्रानासक्ति विधाय धर्मरक्षार्थं स्वेषु समतावर्त्तनमेव युक्तमिति भावः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्राक् साम्नाह—भो भो इति वीप्सा; श्रवणेऽत्यन्ताभिमुख्यार्थम्, वाच्यार्थाप्रियत्वेन तस्य वैमुख्यसम्भवात्, विचित्रवीर्य्येत्यादिना महाराजपुत्रत्वादिप्रतिपादनेन साम व्यक्तमेव। किञ्च, उपरते मृते सतीत्यराजकत्वात् प्रजापालनार्थम्, अधुनेति तदुपरमतो बहुकालेऽतीते सत्येवासनमधिष्ठितोऽसीति युक्तमेवेत्यर्थः। श्लेषेण विचित्रवीर्य्यत्वात्त्वमप्यद्भुतविक्रमोऽसीति भावः, अन्यायेन सद्य एव परराज्यग्रहणात्। कुरूणां कीर्तिवर्द्धनेति सोल्लुण्ठोक्तिः,—तद्वंश्यानां त्वत्तोऽकीर्त्त्युत्पत्तेः। यद्वा, कीर्तिं वर्द्धयति छिनत्तीति तथा सम्बोधनम्। भ्रातरीति श्रीयुधिष्ठिरस्यैव तद्योग्यतां बोधयन् कनिष्ठभ्रातृराज्य-ग्रहणदोषं सूचयति ॥१७॥ शीलेन सद्वृत्तेन, स्वेषु स्वपुत्रपाण्डवादिषु, श्रेयः कुशलं कीर्त्तिञ्च; यद्वा, लोकद्वये श्रेयः सुखं कीर्त्तिञ्चावाप्स्यसि, अवदातत्वेन शुद्धत्वेन लप्स्यसे ॥१८॥ अन्यथान्यप्रकारमुक्तविरुद्धमाचरन् कुर्व्वाणस्तु लोके गर्हित इत्यकीर्त्तिप्राप्तिर्दर्शितैव। तमो महादुःखम्; अत्र पुत्रवियोगादिजम्, अमुत्र च नरकादिजमित्यर्थः। तत्र च स्वेषु समवृत्त्यैव लोकनिन्दाद्यभावः श्रेयआदिकञ्च सिध्येदित्यभिप्रायेण मुख्यकृत्यमुपदिशति—तस्मादिति। समत्वे साम्येनेत्यर्थः ॥ १९ ॥ इह अस्मिल्लोके, च कारादमुष्मिंश्च; कर्हिचित् कदाचिदपि, हे राजन्निति राजत्वेऽपि तदपरिहार्य्यमिति भावः, स्वेन स्वीयतया आत्मतयैव व्याभिमतेनेत्यर्थः। आदि-शब्दात् राज्यधनादयः, अतः पुत्राणामस्थिरत्वात्तेषु महाममत्व-त्यागेन स्वेषु समतावर्त्तनमेव युक्तमिति भावः ॥ २० ॥

श्रीमद्वीरराधवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह। भो भो इति नवभिः। हे वैचित्रवीर्य! हे कुरूणां कीर्तिवर्द्धन एवम्विधस्य तवेयं विषमा बुद्धिरनुचितेति सम्बोधन द्वयाभिप्रायः भ्रातरि पाण्डावुपरते सत्यधुना त्वं नृपासनमधिष्ठितवान् इतोऽप्यनुचितं नेति भावः ॥ १७ ॥ तदाह। धर्मेणेति। शीलेनावैषम्यादिस्वभावेन रञ्जयन् स्वस्मिन् तासामनुरागं जनयन्स्वेषु समो वर्त्तमानः अविषमः सन् श्रेयः कीर्त्ति च प्राप्स्यसि ॥ १८ ॥ अन्यथा वैषम्यमाचरन् जनैर्निन्दितस्ततस्तमो नरकं यास्यसि प्राप्स्यसि तस्मात्पाण्डवेषु युधिष्ठिरादिष्वात्मजेषु च विषये समत्वेन वर्त्तस्व ॥ १९ ॥ नन्वनपायिष्वात्मजेषु यावत्स्वार्थमनुवर्त्तमानेषु भ्रातृपुत्रेषु च कथं साम्यं स्यादित्यत्राह। नेहेति। इह लोके कस्यचित्केनचित्साकमत्यन्तं सम्वासः नित्यं सम्यक् स्थितिर्नास्ति संयोगवियोगयोः कर्ममूलत्वेन यावत्कर्मैव तावदित्यर्थः। तदेव कैमुत्यनयेनाह। हे राजन्! धृतराष्ट्र स्वेन स्वकीयेन देहेन सहापि नात्यन्तसम्वासः भार्यापुत्रादिषु सहात्यन्तसम्बासो नास्तीति किमु वक्तव्यमित्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तमोऽधं दुःखमित्यर्थः। पुत्रनाशेनेति शेषः। तमो राहुस्तमोघं चेति च दुःखैनोव्यसनेष्वघमिति च ॥ १९ ॥ सर्वस्यानित्यात्वात्कचित्कस्मिंश्चिदपि विशेषस्नेहो न कार्यः योग्यतामन्तरेणेति भावेनाह। नेहेति। इह लोके कस्य चित्केन चित्सहात्यन्तसम्वासो नास्त्येव जायात्मजादिभिः सह संवासनिदर्शनात्किंविशिष्य निषिध्यत इत्यत्र कैमुत्यमाह। स्वेनापीति ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भ्रातर्य्युपरते इति। पाण्डोः पुत्रेषु सत्स्वपि त्वं राजासनमास्थित इति कटाक्षः ॥ १७ ॥ भवतु तदाप्येवं वर्तस्वेत्याह। धर्मेणेति ॥ १८ ॥ तमो नरकम् ॥ १९ ॥ न च ते प्रिया अपि पुत्रा दुर्योधनादयश्चिरस्थायिन इत्याह। नेहेति ॥ २० ॥

गूढार्थदीपिनी

विचित्रवीर्यो धृतराष्ट्रपिता। पाण्डौ उपरते मृते सति तत्पुत्रेषु सत्सु तवाधिकारो नास्ति अर्थापि बलात् आथितः इति कटाक्षः। वर्धन छेदक। 'वर्धनं वृद्धिवर्धिष्णुच्छेदे' इति मेदिनी ॥ १७–१८ ॥ अन्यथा वैषम्यमाचरन् इहैव दुःखं परत्र नरकं च ॥ १९ ॥ सं सहार्थे ॥ २०–२१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तमः नरकम् ॥ १९ ॥ अत्यन्तं नित्यं संवासः सम्यक् स्थितिः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कुरूणां कीर्तिवर्धन। यशः शब्दं विहाय निधाय कीर्तिपदं कुलपङ्किलतैव किलानेन कृता भविष्यतीति ध्वनयति। गतं। भो भो वैचित्रवीर्य तत्क्षेत्राम्बिकापुत्र भ्रातरि पाण्डावुपरते मृते सति समयमप्यनेनैवाह। उपमाद्या सहासन्ने रते सुरते सतीति। उप हीनेऽधिके प्रोक्तमासन्नेऽप्युपकीर्तितमिति विश्वः। बन्धूनां पाण्डवानां विषये बन्धुभिरूनामुज्झितां कुन्तीं समं यथा तथाऽऽस्थितः सन् मम ममत्या सहितः सममः सन्नास्थित इति वा। पालयन्नुर्वी च पालयन्प्रजाः शीलेन सच्चारित्रेण रञ्जयन्दाढर्याय

पुनरप्याह। स्वेषु समः वर्तमानः श्रेयः कीर्तिं चाप्स्यसि। कीर्तिच्छेदकेति वाऽन्तरङ्गिको भावः ॥ १७–१८ ॥ अन्यथाऽऽचरन्वैषम्यामाचरन् त्वं तु लोके गर्हितः सन् तम आविष्टदुष्टविवक्षया लोकं गन्धर्वविवक्षया। इह ग्लानिमुत्तरत्रैतत्सहवाससम्भूतं दुःखं यास्यसे। तमोऽन्धकारे स्वर्भानौ तमः शोके गुणान्तर इति विश्वः। तस्मात्पाण्डवेष्वात्मजेषु समो वर्तस्व ॥ १९ ॥ न चासावस्ति विशेषः आत्मजैः सहावस्थानं सुस्थिरमस्थिरमितरैरिति येन विषमता मता स्यादित्याह ॥ नेति। इह कस्यचित्केनचित्सहात्यन्तं संवासो वैषम्यमूलभूतो न नास्ति। कैमुत्येनैतमेवार्थमाह। राजन्निति। स्वेन सत्त्वेन सम्प्रतिपन्नेन देहेनानेन किमु जायात्मजादिभिर्नेति वक्तव्यमिति ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

वचनान्याह नवभिः। भो भो इति। सर्वैर्भावैः सर्वविधात्युक्तानि वचनानीति आदौ रजःसत्त्वतमोभावेन लौकिकेन प्रबोधनं त्रिभिः अन्धत्वान्न पश्यतीति वारद्वयं कम्बोधनं राष्ट्रं न विभर्तीति न धृतराष्ट्रता प्रज्ञाचक्षुरिति चेदुच्यते तर्हि मर्मभेदो भवेत् तथा व्यासात्मज इत्यपि स्त्रीपुत्रादि सम्बन्धो हीनत्वप्रतिपादकः राजत्वं तु नास्तीति मन्यमानः कृत्रिमपितृनाम्ना सम्बोधयति वैचित्र्यवीर्येति। विचित्रवीर्यस्य क्षेत्रजः पुत्र इत्यर्थः त्वमित्येकवचनेन स्वजन्मानुसन्धीयतामिति द्योतितं किं च कुरूणां वंशे त्वमुत्पन्नः तत्कीर्तिवर्द्धनमुचितं वर्द्धनशब्देन छेदनमप्युच्यत इति कीर्त्तिच्छेदकस्त्वमित्यर्थादुक्तं भवति राजाधिकारार्थं पुत्र उत्पादनीय इति विचार्य प्रथममुत्पादितः ततश्चान्ध इति त्वं परित्यक्तः ततः पाण्डुरुत्पादितः तस्मिन्नुपरते आगत्याधुना आसनमास्थितः सिंहासने उपविष्टः अनेनायुक्तमेव करोषीति द्योतितम् ॥ १७ ॥ अङ्गीकृत्यापि सात्त्विकेन बोधनमाह। धर्मेणेति। धर्मेण पृथिवीपालनं कर्तव्यं तदा दृष्टादृष्टोपायेन पालिता भवति भगवता हि नामरूपप्रपञ्चौ निमितौ अतोऽन्यपरिपालनाय तदेकेन रहितं व्यङ्गं भवति अतो धर्मेणैव सह पालनं कर्त्तव्यं केवलकरणत्वे योगिनामिवास्यापि पालनं भवेत् अनेन परलोके सुखमिह लोके तु राज्याद्वैषयिकं सुखं कीतिजन्यं तु ततोऽप्यधिकमिति तत्साधनं बोधयति। प्रजाः शीलेन रञ्जयन्निति। शीलं सुस्वभावस्तेनैव प्रजा अनुरक्ता भवन्ति अन्यथा तु दुःखं देयं प्रयच्छन्ति बहिः कीर्तिसाधनमेतत् अतः कीर्तिसाधनमाह। वर्त्तमानः समः स्वेष्विति। सर्वेष्वेव बन्धुषु समो भवेत् ततोऽन्त्यन्ताकीर्त्तिर्जनैश्च तदा राजा श्रेयः कीर्त्ति च प्राप्स्यसि ॥ १८ ॥ अनङ्गीकारेतामसवचनमाह। स्व यथेति। उक्तप्रकारादन्यथा प्रकारेण भूपालनं प्रजाननुरागं विषमत्वं च कुर्वन् कीर्तिप्रतिनिधिं च प्राप्यसीत्याह। गर्हितो निन्दितः तमोऽन्धं तमः महद्दुखं प्राप्स्यसीति अतो बाधवशादपि समो भवेत्याह। तस्मादिति। समत्वे समत्वार्थं वर्त्तस्व यथैव त्वं समो भवसि तथोपायं कुर्वित्यर्थः। वैषम्यस्थानमुद्घाटयति। पाण्डवेष्वात्मजेष्विति चकारात्तत्सम्बन्धिषु च ॥ १९ ॥ एवं लोकन्यायेन बोधक इति शास्त्रन्यायेनाह। समाभ्यांत्रिभिस्त्रिभिस्तत्त्वं बोधयति। नेह चेति। स्वार्थं हि सर्वेण कर्तव्यं तद्यथा स्वार्थः सिद्ध्यति तत्र कालो बाधक इति हि तमहितं बहिरङ्गस्थापनार्थं यत्नो न कर्त्तव्य इत्याह। इहास्मिल्लोके अत्यन्तं सर्वदा केनापि सह संवासः कस्य चिदपि न अलौकिक बोधन उग्रत्वे च बोधो न भवतीति कोमलवचनेन सम्बोधनं स्नेहज्ञापनार्थं ममतास्पदेन नास्त्येव संवास इहापि व्यभिचारदर्शनात्स्वदेहेन तु न व्यभिचारं पश्यतीति तत्राप्युपदिशति। स्वेनापि देहेनेति। पुत्रादीनामपि देहः स्वस्यैवेत्यपि शब्दं निरूप्य तान्निर्दिशति। किमु जायात्मजादिभिरिति। आदिशब्देन भ्रातृपित्रादयः ॥ २० ॥

श्रीसुबोधिनी–सारः

भो भो वैचित्रवीर्य हे कुरूणां कीर्त्तिवर्द्धन भ्रातरि पांडौ उपरते मृते सत्यऽधुना आसनं राज्यपदं त्वमास्थितोऽसि ॥ १७ ॥ एवं वर्त्तितव्यमित्याह धर्मेणोर्वी पृथिवीं पालयन् शीलेन प्रजाः रंजयन् स्वेषु आत्मीयेषु समो वर्त्तमानः श्रेयः परलोकसिद्धिमिह कीर्त्ति च त्वं प्राप्स्यसि ॥ १८ ॥ विपक्षे दोषमाह। अन्यथा भूम्यरक्षणप्रजापीडनादि आचरन् लोके गर्हितो निंदितस्तमो नरकं यास्यसे त्वं लप्स्यसे तस्माद्धेतोः आत्मजेषु दुर्योधनादिषु पाण्डवेषु युधिष्ठिरादिषु समत्वेन वर्त्तस्व यथाश्रुते तु पाण्डवेष्वात्मजेषु चेति समत्वप्रपंचः ॥ १९ ॥ वियोगस्यांते दर्शनान्न कोपि स्वार्थ इत्याह हे राजन् इह लोके केनचित्सह कर्हिचिदपि कालऽत्यंतं संवास एकात्रावस्थानं न स्वेन देहेनापि अत्यंतसंवासो नास्ति स्त्रीपुत्रादिभिर्नास्तीति किमु वक्तव्यम् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अक्रूरोक्तिमेवाह–भो भो वैचित्रवीर्येति। 'राज्यासनस्थितेन त्वया कीर्तिरेव वर्धनीया, वैषम्ये तु तद्विनाशः स्यात्, तन्नोचितम्' इत्याशयेन सम्बोधयति—कुरूणां कीर्तिवर्धनेति। भ्रातरि पाण्डौ उपरते मृते सति त्वमधुना नृपासनमास्थितः अधिष्ठितवान् ॥ १७ ॥ अतो धर्मेण धर्मशास्त्रोक्तप्रकारेण उर्वी पृथ्वीस्थान् जनान् पालयन् शीलेन सुस्वभावेन प्रजा रञ्जयन् स्वस्मिंस्तासां रागमुत्पादयन् स्वेषु भ्रातृपुत्रेषु स्वपुत्रेषु च समतया वर्तमानः श्रेयो धर्मार्थादिफलं कीर्तिं चावाप्स्यसि ॥ १८ ॥ अन्यथा यथोक्तविपरीतमाचरन् कुर्वंस्तु लोके जनैर्गर्हितो निन्दितः सन् तमो नरकं यास्यसे प्राप्स्यसि। यस्मादेवं तस्मात् पाण्डवेषु आत्मजेषु च विषये समत्वे वर्तस्व ॥ १९ ॥ ननु 'आत्मजानात्मजेषु कथं समत्वं स्यात्' इत्याशङ्क्याह–नेहेति। इहलोके

कस्यचित् केनचित् साकमत्यन्तं नित्यं संवासः सम्यक्स्थितिर्नास्ति। तत्र कैमुत्यन्यायमाह—हे राजन्! स्वेन देहेन सहापि नात्यन्तसंवासः, भार्यापुत्रादिभिः सहात्यन्तसंवासो नास्तीति किमु वक्तव्यमित्यर्थः ॥ २० ॥

अन्वितार्थप्रकाशिका

भो भो इति ॥ भो भो वैचित्रवीर्य विचित्रवीर्यस्य पुत्र! हे कुरूणां कीर्तेर्वर्द्धन! श्लेषेण छेदकेत्यपि। भ्रातरि पाण्डौ उपरते मृते सति त्वमधुना नृपासनमास्थितः अधिष्ठितवान् पाण्डुपुत्रेषु सत्स्वपीति कटाक्षः ॥ १७ ॥ धर्मेणेति ॥ धर्मेण उर्वीं पृथ्वीं पालयन् शीलेन सुस्वभावेन प्रजा रञ्जयन् स्वस्मिंस्तासां रागमुत्पादयन् स्वेषु भ्रातृपुत्रेषु स्वपुत्रेषु च समतया वर्तमानः श्रेयो धर्मार्थादिफलं कीर्तिं चावाप्स्यसि ॥ १८ ॥ अन्यथेति ॥ अन्यथा उक्तविपरीतमाचरन् कुर्वंस्तु इहैव लोके जनैर्गर्हितो निन्दितः तमो नरकं महद्दुःखं यास्यसे प्राप्स्यसि। तद्भावः। यस्मादेवं तस्मात् पाण्डवेषु आत्मजेषु च विषये समत्वे वर्तस्व ॥ १९ ॥ आत्मजत्वादिकमपि न स्थिरमित्याह—नेहेति ॥ हे राजन्! इह लोके कर्हिचित् क्वापि काले कस्यचित्केनचित् साकमत्यन्तं नित्यं संवासः सम्यक् स्थितिर्नास्ति किं बहुना स्वेन देहेन सहापि नात्यन्तसंवासः जायात्मजादिभिः सहात्यन्तसंवासो नास्तीति किमु वक्तव्यमित्यर्थः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे वैचित्रवीर्य शान्तनवस्य विचित्रवीर्यस्य पुत्र उपरते मृते सति अधुना राज्यासनं आस्थितः तदासनं तु पाण्डवानामेवेति साक्षेपवचनं ज्ञेयम् ॥ १७ ॥ स्वेषु दुर्योधनादिषु पाण्डवेषु च समः अन्यूनाधिकत्वेन वर्त्तमानः ॥ १८ ॥ तदेव समत्वं स्पष्टयति अन्यथेति गर्हितो निदितः तमो निरयम् ॥ १९ ॥ हे राजन् धृतराष्ट्र इह लोके चकारात्परलोके कर्हिचिदत्यन्तं संवासो निवासो नास्ति स्वेन स्वकीयेन देहेनापि सह नित्यं वासो नास्ति तर्हि किमु अन्यैर्जायादिभिः सह नितरां वासोऽस्ति नास्तीत्यर्थः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह नवभिः भो भो इति। भो भो इति सम्बोधने। हे वैचित्रवीर्य, हे कुरूणां कीर्त्तिवर्द्धन, एवंविधस्य तवेयं विषमा बुद्धिरनुचितेति सम्बोधनद्वयाभिप्रायः। भ्रातरि पाण्डौ, उपरते सति, अधुना त्वं, आसनं नृपासनं, आस्थितः अधिष्ठितवान् ॥ १७ ॥ धर्मेणेति। ततः धर्मेण, ऊर्वी पालयन्, शीलेन अवैषम्यादिस्वभावेन प्रजाः रञ्जयन् तासामनुरागं जनयन्नित्यर्थः। स्वेषु आत्नीयेषु, समः समभावेनेत्यर्थः। वर्त्तमानः सन्, श्रेयः कीर्त्तिं च, अवाप्स्यसि ॥ १८ ॥ अन्यथेति। अन्यथा वैषम्यभावं तु, आचरन् त्वं, लोके गर्हितो जनैर्निन्दितः सन्, तमो नरकं, यास्यसे प्राप्स्यति। तस्मात् पाण्डवेषु युधिष्ठिरादिषु, आत्मजेषु दुर्योधनादिविषयेषु च, समत्वे समभावेनेत्यर्थः। वर्त्तस्व ॥ १९ ॥ नन्वनपायिष्वात्मजेषु यावत्स्वार्थमनुवर्त्तमानेषु भ्रातृपुत्रेषु च कथं साम्यं स्यादत आह। नेहेति। इह लोके, कस्यचिदिति शेषः। कर्हिचित् कदाचिदपि, केचचित् सह साकं, अत्यन्तसंबासः नित्यं सम्यक् स्थितिः, न अस्ति। संयोगवियोगयोः कर्ममूलत्वेन यावत् कर्म तावदेव स्थितिरित्यर्थः। तदेव कैमुत्यनयेनाह। हे राजन् धृतराष्ट्र, स्वेन स्वकीयेन, देहेन सहापि, नात्यन्तसंवासः तर्हि जायात्मजादिभिः किमु, भार्यापुत्रादिभिः सहात्यन्तसंवासो नास्तीति किमु वक्तव्यमित्यर्थः ॥ २० ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

भो भो इति : १०.४९.१७.

प्रजासु पुत्रेषु च साम्यवृत्त्या स्ववंश्यभूपैर्जनिता सुकीर्तिः। वैषम्यतो येन हि खण्डितेति यथार्थसम्बुद्धिमदात् स तस्मै ॥ ४१ ॥

धर्मेणावनिपालनं निजगुणेनैव प्रजारञ्जनं कार्यं चार्जुनसद्यशःप्रसरणं चैषा स्वरूपस्थितिः।
राज्ञां तेषु न चान्यबोधितनयापेक्षाऽधुनागन्तुकस्त्वं राज्यासनमाश्रितस्त्विति ममोक्तेश्चावकाशोऽर्जनि ॥ ४२ ॥

धर्मेणेति : १०.४९.१८.

दृष्टादृष्टफलं विभाव्य मतिमान् वर्तेत सर्वेष्वपि कार्येष्वेवमगूढदुन्दुभिरयं जागर्ति सत्ताडितः।
तत्राद्ये सहवासिनो हितदृशो बन्ध्वाप्तमित्रादयः साह्याय्याश्चरमे तु धीरिह निजैवैकाऽथवा श्रीधरः ॥ ४३ ॥

अन्यथेति : १०.४९.१९.

पीयूषं विषवद्विषं च मनसा पीयूषवन्मन्यते सोऽस्मिन् योऽपरिपक्वबुद्धिरपरिज्ञातार्थशास्त्रः पुमान्।
त्वं वृद्धः सदसद्विवेकनिपुणः प्रज्ञावतामग्रणीः सन्नप्येवमिहाऽऽचरस्यतिमहच्चित्रं किमस्मात् परम् ॥ ४४ ॥

धर्मं पालय लालयाऽर्जुनमलङ्कुर्वाशु भीमं मुदा वीक्षेथा नकुलं हितं गणयतं देवं सहायस्थितिम् ।
तेषामेव ततो न भव्यमपि तु स्पष्टं तवापि क्षितौ धर्माधिविजयो गुणर्धिरतनुश्रेयोऽखिलश्रीरपि ॥ ४५ ॥
दत्तं वित्तमहो न पाण्डुतनयैर्नो वा भवद्भिर्हतं तुल्या एव सुहृत्तयाऽन्वयितया यूयं च ते चापि नः ।
उक्तं त्वेददथापि भूरि भवतामैक्योदितश्रीकृते कृत्वा चित्तमकैतवं यदि हितं धत्स्वाऽन्यथा सन्त्यज ॥ ४६ ॥
यत्रावस्थितिरस्ति धर्मवचसस्तत्रापि नार्युद्गमः किं वाच्यं पुनरेष तावकगृहे मूर्तः स्वयं तिष्ठति ।
तत्पश्यन् भृशमन्तरङ्गजदृशा वर्तस्व तादृग्यथा स्यादग्रे सुखमन्तरङ्गजदृशां प्रज्ञादृगास्ते भवान् ॥ ४७ ॥
जगत्प्राणाधारं क्षणमपि विनोन्मेषणमपि न कर्तुं ब्रह्माऽपि प्रभवति परे केऽत्र मनुजाः ।
तदीयं प्राणेष्टं तनुजमवधूयाऽतुलबलं कथं सौख्यावाप्तिस्तव तनुभुवां पश्य निभृतम् ॥ ४८ ॥
यश्चासेव्यधनञ्जयं वशयति प्रेप्सुः प्रियं प्राणभृत् क्षिप्रं भूरि धनञ्जयं स लभते निर्विघ्नमेवंस्थिते ।
तद्वैरस्यविचिन्तनं कृतवतस्ते त्वत्सुतानां च वा स्यात्स्वप्नेऽपि धनञ्जयोऽर्जुनयशश्चन्द्रप्रसारःकथम् ॥ ४९ ॥
वर्तस्वाऽऽत्मजवत्स्वबन्धुतनुजेष्वव्याजमेवं मया श्रीशादेष विशिष्टमिष्टममलं निर्दिष्टमाप्तोक्तितः ।
रुच्यं तन्न भवत्यलं यदि मनस्युद्बुद्बुदुर्वासनाजाले ते दृगिवास्ति बुद्धिदृगपि भ्रष्टेति तत्स्यात् स्फुटम् ॥ ५० ॥

नेह चेति : १०.४९.२०.

को नास्मिन् पुरुषो गुरुर्लघुरपि स्वाभीष्टमत्युत्कटं चित्तेऽहर्दिवमेव चिन्तयति तत्तादृक् त्वभीष्टोदयः ।
प्राक्प्रारब्धबलानुसारत इति व्यक्ते बिविक्तात्मनो मोहोऽयं तव भात्यहो विधिवशादूहोऽप्यनीहोऽत्र मे ॥ ५१ ॥

कृष्णप्रिया

हे विचित्रवीर्य के पुत्र हे धृतराष्ट्र ? आप कुरुकुल की कीर्ति को बढ़ाने वाले हो, आपके भाई श्रीपाण्डुराजा सिंहासन के स्वामी है वे जब परलोक सिधारे तब आपने राज्यासन पर कब्जा किया यह उचित नहीं है ॥ १७ ॥ राजन् आप यदि धर्म से पृथ्वी का पालन करोगे और शील सदाचार से प्रजा का रञ्जन करोगे और समस्त सम्बन्धियों से समानता से व्यवहार करोगे तब तो कीर्ति और कल्याण को प्राप्त करोगे ॥ १८ ॥ श्री अक्रूर जी भगवान् के सेवक और संदेश वाहक वे इसलिए कहने लगे महाराज धृतराष्ट्र ? राजा का कर्तव्य मैंने आपको सुनाया, उस प्रकार से विपरीत आचरण करने वाले नृपति की जगत में निन्दा होती है इतना ही नहीं मरणोत्तर वह राजा घोरतर नरक गामी होता है । मैं विनम्र भाव से आपको अनुरोध करता हूँ कि आप आपके पुत्र तथा पाण्डु पुत्रों में समान भाव वर्तन रखकर सम दृष्टि वाला व्यवहार करें ॥ १९ ॥ हे राजन् ! इस भूतल पर कभी किसी के साथ नित्य सहवास शक्य नहीं है, फिर अपने पत्नी पुत्र परिवार आदि के साथ की बात तो करना ही क्या ? अधिक क्या कहें अपना शरीर भी सदा साथ नहीं रहता है ॥ २० ॥

एकः प्रसूयते जन्तुरेक एव [1]प्रलीयते । एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥ २१ ॥
अधर्मोपचितं वित्तं हरन्त्यन्येऽल्पमेधसः[2] । सम्भोजनीयापदेशैर्जलानीव जलौकसः ॥ २२ ॥
पुष्णाति यानधर्मेण स्वबुद्ध्या तमपण्डितम् । [3]तेऽकृतार्थं प्रहिण्वन्ति प्राणा रायः सुतादयः ॥ २३ ॥
स्वयं किल्विषमादाय तैस्त्यक्तो नार्थकोविदः । असिद्धार्थो विशत्यन्धं स्वधर्मविमुखस्तमः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—एकः, जन्तुः, प्रसूयते, एकः, एव, प्रलीयते, एकः, एव, सुकृतम्, भुङ्क्ते, च, एक, एव, दुष्कृतम्, भुङ्क्ते ॥ २१ ॥ जलौकसः, जलानि इव, अल्पमेधसः, संभोजनीयापदेशैः, अधर्मोपचितं, वित्तम्, हरन्ति ॥ २२ ॥ स्वबुद्ध्या, यान्, अधर्मेण पुष्णाति, ते, अकृतार्थाः, प्राणाः, रायः, सुतादयः, अपण्डितम्, तम्, प्रहिण्वन्ति ॥ २३ ॥ तैः, त्यक्तः, न, अर्थकोविदः, असिद्धार्थः, स्वधर्मविमुखः, स्वयम्, किल्विषम्, आदाय, अन्धम्, तमः, विशति ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्र तावदुत्पत्तिमरणयोः सुखदुःखयोश्च केनापि साहित्यं नास्तीत्याह । एक इति ॥ २१ ॥ किं च यदा च सह संवसन्ति तदाऽपि क्लेशोपार्जितवित्तापहारितया पुत्रा नाम शत्रव एव ज्ञेया इत्याह । अधर्मेति । संभोजनीयाः पोष्याः पुत्रादय इति व्यपदेशैरन्ये शत्रवोऽल्पमेधसो मूढस्य वित्तं हरन्ति । जलौकसो मत्स्यस्य जीवनभूतानि जलानि यथा तत्पुत्रादयो हरन्ति स्वत्वेना-

---

[1] प्रमीयते–प्रा. पा. । [2] चेतसः–विज. । [3] अन्तेऽकृतार्था हिन्वन्ति–विज. ।

श्रयन्ते तद्वदिति ॥ २२ ॥ किं च यानेवं पुष्णाति ते धनमादाय मृता जीवन्तोऽपि वा तं जीवन्तं मृतं वा परित्यजन्तीत्याह । पुष्णातीति । स्वबुद्ध्या स्वीया इत्यभिमानेन । रायोऽर्थाः । अकृतार्थमप्राप्तभोगम् ॥ २३ ॥ स पुनः पापैकपाथेयो नरकं विशतीत्याह । स्वयमिति । पुरुषार्थकुशलो न भवतीति नार्थकोविदः । असिद्धार्थोऽपूर्णमनोरथः ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र प्रसिद्धे संसारे । त्वावदिति वाक्यालंकारे । एकोऽसहायः । अनु देहपातोत्तरम् । सुकृतं शुभकर्मफलं स्वर्गादि । दुष्कृतमशुभकर्मफलं नरकादि ॥ प्रसूयते प्रसूतो भवति । प्रमीयते मृत्युना हिंस्यते, प्रम्रियत इत्यर्थः । 'प्रलीयते' इति पाठेऽपि स एवार्थः । युग्मद्वयेऽप्युत्तरत्रैवैवकारः संपदि न करोतु नाम कोऽपि बन्धुः साहाय्यं विपदि कुर्यात्सर्वथा तत्र च न करोतीत्यभिप्रायेण । च उक्तसमुच्चयार्थः उभयत्र युग्मेऽपि योज्यः । अनु तत्तत्पुत्रादिसहभावात्पश्चादेव मरणं जन्मातरं च लब्ध्वा पूर्वपूर्वकर्म भुक्ते ॥ २१ ॥ सहवासेऽपि संबंधिनो न सुखदा इत्याह—किञ्चेति । संभोजयितुं योग्याः संभोजनीया एते मया रक्ष्या इति व्यपदेशैर्मिथ्याहेतुभिः । यद्वा—संभोजनीयाः पुत्रादयो वयमिति व्याजोक्तिभिः संभोजनीयेति पृथक्पदम् । संन्धिरार्षः । तत्पुत्रा मत्स्यानां पुत्राः । अन्यपदमुभयत्र पुत्रादिपरम् । तद्वन्मूढस्याप्यन्य इति "अपदेशः पुमाल्लँक्ष्ये निमित्तव्याजयोरपि" इति मेदिनी जलान्यत्र क्षत्पिष्णूनि ज्ञेनानि, महासंघट्टेन तेषां क्षयदौर्गन्ध्यापातान्महामत्स्यस्य पूर्वमेव मरणापत्तेः ॥ २२ ॥ इतोऽप्यन्यत्स्नेहाविषयत्वादाह—किञ्च । यान् पुत्रादीन् । एवमकार्येण, स्वत्वभ्रान्त्या । ते पुत्रादयः । तम् अज्ञं नरम् । 'राः पुंसि स्वर्णवित्तयोः' इति मेदिनी ॥ अधर्मेण स्वधर्मातिक्रमेण निषिद्धाचरणेन च उपचितं स्वयं यत्नत उपार्जितमपि अन्ये पुत्रादयोऽल्पमेधसो जनस्येति तत्तद्विचाराभावात् यं-तत्र वै पोषणं तस्यैव वर्द्धनं न तु तेन प्राणादिपोषणमिति लक्षणं प्रहिण्वन्ति त्यजन्ति॥२३॥ सोऽज्ञः पथि भोज्यं पाथेयं, पापमेवैकं केवलं पाथेयं यस्य स तया 'पाथेयं महाबले पान्थे' इति धरणिः । तैः पुत्रादिभिः । कोविदः स्वप्रयोजनाऽकुशलः । नञर्थेन न शब्देन 'सुप्सुपा' इति समासः । अन्धमन्धकारयुतम् । तमो नरकम् ॥ अन्धतमो महानरकम् । नार्थकोविदः धर्माद्यर्थानभिज्ञः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रसूयते प्रसूतो भवतीति प्रमीयते मृत्युना हिंस्यते प्रम्रियत इत्यर्थः प्रलीयत इति पाठेऽपि स एवार्थः । युग्मद्वयेऽप्युत्तरत्रैव एवकारः सम्पदि न करोतु नाम कोऽपि बन्धुः साहाय्यं विपदि तु सर्वथा कुर्यात् तत्र च न करोतीत्यभिप्रायेण चशब्द उक्तसमुच्चयार्थः उभयत्र युग्मेऽपि योज्यः अनु तत्तत्पुत्रादिसहभावात् पश्चादेव मरणं जन्मान्तरञ्च लब्ध्वा पूर्वं पूर्वं कर्म भुङ्क्ते ॥ २१ ॥ अधर्मेण स्वधर्मातिक्रमेण निषिद्धाचरणेन च उपचितं स्वयं यत्नतः समुपार्जितमपि अन्ये पुत्रादयः अल्पमेधसो जनस्येति तत्तद्विचाराभावात् । जलान्यत्र क्षयिष्णूनि ज्ञेयानि बहुसङ्घट्टेन तेषां क्षयदौर्गन्ध्यापातात् महामत्स्यस्य पूर्वमेव मरणापत्तेः ॥ २२ ॥ तत्र पोषणं तस्यैव वर्द्धनं नतु तेन प्राणादिपोषणमिति लक्षणम् प्रहिण्वन्ति त्यजन्ति ॥ २३ ॥ अन्धं तमः महानरकं नार्थकोविदः धर्माद्यर्थानभिज्ञः न लोपाभाव आर्षः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अनन्यसाहित्यञ्च जन्मादिषु सुव्यक्तमेवेत्याह— एक इति । प्रसूयते जायते, प्रमीयते; पाठान्तरेऽप्ययमेवार्थः । जन्तुरिति जन्मादिषु स्वातन्त्र्याभावेन सर्व्वेषामपि भोगावश्यकता ध्वनिता एव, द्वयं तत्तद्दार्ढ्याय, अतश्चकारबलात् स्वस्वपूर्व्ववाक्येऽपि तदन्वयः । 'अनु' मरणानन्तरं भुङ्क्ते दुष्कृतं चानुभुङ्क्ते; अन्विति कदाचिदत्र पुत्रादिभिः सह सुखदुःखभोगात् परलोके च तस्य केवलस्यैव ॥ २१ ॥ तस्मादधर्म्मेण धर्म्मातिक्रमेण पापेन वोपचितं स्वयं यत्नतः समुपार्ज्जितमपि, अन्ये पुत्रादयः; अल्पमेधस इति तत्तद्विचाराभावाद्दानाद्यकरणाद्वा ॥ २२ ॥ अधर्म्मेणेति प्राणादिपोषणार्थं विधिनिषेधापालनात्; अतएवापण्डितं मूर्खं तत्र रायं पोषणं सम्बर्द्धनं प्रहिण्वन्ति त्यजन्ति । आदि-शब्दाद्भृत्य-मित्रादयः, प्राणादीनां यथोत्तरं त्यागानर्हत्वे श्रैष्ठ्यमूह्यम्, तेन च म्रियमाणं प्राणास्त्यजन्तीति किं वक्तव्यम्, जीवन्तमपि, धनानि तथा सचेतनाः पुत्रादयोऽपि, धर्म्मादिकमनादृत्य त्यजन्तीति व्याख्येयम् ॥ २३ ॥ किल्बिषं पुत्रादिभरणार्थोर्ज्जितं पापमादाय शरीरान्तरेणापीतो गृहीत्वा, इति तदेकसाहित्यं बोधितम्; अन्धं तमो महानरकं प्रविशति, चिरं भुङ्क्ते इत्यर्थः । यतः स्वकीयधर्म्मविमुखः, यतो नार्थकोविदः परमार्थानभिज्ञः । यद्वा, नार्थोऽनर्थो महापापं तस्मिन् कोविदस्तदाचरणे चतुरः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एतदेव निदर्शयति । जन्तुः शरीरी एक एव प्रसूयते न त्वात्मजायादिभिः सहेति भावः । तथा एक एव प्रलीयते न हि म्रियमाणेन सह जायादयो म्रियन्त इति भावः । सुकृतदुष्कृतशब्दौ तत्फलभूतस्वदैहिकसुखदुःखपरौ तद्भोगेऽपि न केनचित्साहित्यमिति भावः ॥ २१ ॥ किञ्च यदा च सह सम्वसन्ति तदा क्लेशोपार्जितवित्तापहारितया पुत्रा नाम शत्रव एव ज्ञेया इत्याह । अधर्मोपचितमिति । सम्भोजनीयाः पोष्याः पुत्रादय इति व्यपदेशैरल्पमेधसः मूढस्याधर्मेणोपार्जित वित्तं हरन्ति यथा जलौकसो

मत्स्यस्य जीवनभूतानि जलानि तत्पुत्रा हरन्ति तद्वत् ॥ २२ ॥ किञ्च पुष्णातीति स्वबुद्ध्या आत्मात्मीयबुद्ध्या यो यान् पुष्णाति ते प्राणा रायो धनानि सुतादयः इत्यादिशब्दग्राह्या भार्यादयः प्राणशब्दः शरीरोपलक्षकः तं पुष्णन्तमकृतार्थमप्राप्तभोगं कामानभुक्त्वैव मृतं प्रहिण्वन्ति त्यजन्ति ॥ २३ ॥ स्वयं त्वनर्थकोविदः स्वानर्थेष्वेव कुशलो न तु स्वहित इति भावः । प्राणादिभिस्त्यक्तः किल्विषं तत्पोषणार्थं कृतं पापमादायासिद्धार्थः अपरिपूर्णमनोरथः स्वधर्मविमुखः स्ववर्णाश्रमोचितधर्मरहितः हेतुगर्भमिदं तत्त्वादन्धंतमोऽन्धतामिस्राख्यं नरकं प्रविशति ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

इतोऽपि वैषम्यबुद्धिर्न कार्यत्याह । एक इति ॥ २१ ॥ अन्ये अल्पचेतसः दुर्बुद्धेरधर्मेण उपचितमर्जितं हरन्ति सम्भोजनीयापदेशैः सम्भोजनीयाः सह भोजनयोग्याः बन्धवः अपदेशैः कपटवचनैः ममैतेऽपेक्षणीया इति मिथ्याहेतुभिरित्यर्थः । जलानि हरन्तो जलसम्बन्धितया जलौकसः प्राणिनो यथा हरन्ति । यद्वा जलौकसो यादोगणस्य विद्यमानानि जलानि यथान्ये हरन्ति ॥ २२ ॥ यः स्वबुद्ध्या ममत्वभ्रान्तबुद्ध्या अधर्मेणान्यायेन यान्पुष्णाति स्वत्वेनाभिमतास्ते प्राणादयस्त्वन्ते मरणसमये तमपण्डितम् अज्ञं हिन्वन्ति त्यजन्ति "अग्नि वागप्येति वातं प्राण" इतिश्रुतः कीदृशाः अकृतार्था अपूर्णस्वप्रयोजनाः यथा यो योऽधर्मेण यान् स्वीयबुद्ध्या पुष्णाति ते प्राणादयः तमपण्डितं हिन्वन्तीति तच्च मरणं विदुरिति ॥ २३ ॥ पुनः स्वयं किङ्करोतीति तत्राह । स्वयमिति । नार्थकोविदः स्वप्रयोजनकुशलो न भवति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्र तावदुत्पत्तिमरणयोः सुखदुःखयोश्च न केनापि साहित्यमित्याह । एक इति ॥ २१ ॥ किञ्च यदा च सह वसन्ति तदापि क्लेशोपार्ज्जितवित्तापहारितया पुत्रा नाम शत्रव एव ज्ञेया इत्याह । अधर्मेति । सम्भोजनीयाः पोष्याः वयं पुत्रादय इति व्यपदेशैरल्पधियो मूढस्य वित्तं हरन्ति जलौकसो मत्स्यस्य जीवनभूतानि जलानि यथा तत्पुत्रा हरन्ति तद्वत् ॥ २२ ॥ किञ्च स्वबुद्ध्या स्वीया इत्यभिमानेन यान् यः पुष्णाति ते प्राणादयस्तं मूर्खमकृतार्थमेव प्रहिण्वन्ति त्यजन्ति रायः अर्थाः ॥ २३–२४ ॥

गूढार्थदीपिनी

अल्पमेधसः मूढस्य वित्तम् अन्ये पुत्रादयः हरन्तीत्यन्वयः । कैः । संभोज्याः पोष्या वयमिति व्ययदेशैः कपटवचनैः । जलौकसो मत्स्यस्य जीवनभूतानि जलानि यथातत्पुत्रादयः हरन्ति तद्वत् ॥ २२ ॥ यान् पुष्णाति तं मूर्खं ते प्रहिण्वन्ति त्यजन्तीत्यन्वयः । अकृतार्थं अप्राप्तभोगम् ॥ २३ ॥ तमो नरकम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अधर्मोपचितं मृतस्य नरककारणं जीवतस्तु पोष्याः अपत्यादय इति व्यपदेशैः अन्ये हरन्ति अल्पमेधसः क्षुद्रबुद्धेः जलौकसो मीनस्य जीवनार्थानि जलानि तदपत्यादयो हरन्ति यथा तद्वत् ॥ २१–२२ ॥ अकृतार्थमलब्धफलम् प्राणशब्देन तद्धार्यो देहः रायः अर्थाः ॥ २३ ॥ असिद्धार्थोऽनिष्पन्नप्रयोजनः ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्कृतफलमप्येवमेवेति निश्चित्य वर्तस्वेत्याह ॥ एक इति । एको जन्तुः प्रसूयते एक एव जन्तुः प्रलीयते एक एव जन्तुः सुकृतं तच्छुभफलं तथा दुष्कृतं तदशुभफलमनुभुङ्क्ते । दृश्यमाना इदानीं नश्यमाने स्वयं केऽपि सह न सयन्ति । कस्य के पतिपुत्राद्या इत्यादेः ॥ २१ ॥ न्यायार्जितमूर्जितताहेतुवित्तमन्यथा चेदित्थंम्भवतीत्याह ॥ अधर्मेति । अधर्मेणोपचितं । आर्जयत्येवं कुतः स इत्यत आह ॥ अल्पमेधस इति । षष्ठी प्रथमा च । अल्पबुद्धेरस्यान्येऽल्पचेतसः सम्भोजनीयापदेशैः सम्भोजनीया बन्धव एत इत्यपदेशा व्याजास्तैर्हरन्ति । अधर्मो ह्यार्थं कृतो धर्मोऽधर्मस्तेनोपचितं वर्धितं चित्त अल्पचेतसोऽन्ये महाचेतस्काः सम्भोजनीयश्च तेऽपदेशाश्च तैः सहैतद्देशस्था एत इति यावत् हरन्ति । तत्र तर्हि ममतास्यात्किमित्यतो नेतीत्यप्याह ॥ हरन्तीति । हरवदाचरन्ति स यथाऽकिञ्चनस्तेऽपि निष्किञ्चना इदं मुखतो व्रतं तन्वत इति भावः । अकिञ्चन किञ्चन प्राजनमस्त्यभस्मीभवदित्यादेः । तत्र निदर्शनमाह ॥ जलानीवेति । जलौकस उक्तात्सम्भोजनीयापदेशैस्तर्पणादिना सम्भोजनीया इत्यपदेशा निमित्तानि लक्ष्याण्युद्देशा वा तैः सह हरन्त्युपयुक्तानि तन्वते ॥ २२ ॥ यो यान्स्वबुद्ध्या स्वकीया एत इति बुद्धिममैता भ्रान्तिस्तया पुष्णाति पोषयति द्रव्यपोषणं च वार्धुषिकतया प्राणा रायः सुतादेः प्राक् प्राणानन्तरं निर्देशेनार्थो बहिश्चराः प्राणा इत्यादिस्मार्ततत्समतां ध्वनयति । कृतार्थाः सम्पन्नस्वयोजना अकृतार्था अननुष्ठितैतद्दिष्टास्तमपण्डितमनागमज्ञमन्ते हिन्वन्ति ॥ २३ ॥ प्राणादिहानानन्तरं तद्गतिं वक्ति । स्वयमिति । स्वयं किल्विपमेतत्पोषणाद्यायातपातकमादाय । अनेन तस्यावर्जनीयतां ध्वनयति । तैः प्राणादिभिस्त्यक्तो नार्थकोविदः शाश्वतिकेश्वररूपार्थानभिज्ञोऽसिद्धार्थोऽनिष्पन्नमनोरथः स्वधर्मविमुख इतीयदापत्तिहेतुकथनं । अन्धन्तम उक्तरूपयुक्तरूपो विशतीति । अन्धं धृतराष्ट्रं प्रतीत्युत्तरेण सत्पक्षेऽन्वयः । अन्धयतीत्यन्धमज्ञानमिति वा ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्र देहात्मनां भेदज्ञाने सत्येतद्भवतीति देहादात्मानं भिन्नतया निरूपयति । एकः प्रसूयत इति । आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययाविति न्यायेनानुभवपर्यन्तं निरूपयति । प्रसूयते मात्रा प्रलीयते भूमौ कालेन एवमाद्यन्तयोरेकत्वमुक्त्वा उपलक्षणन्यायेन सर्वस्यैव क्रियामयस्यैककर्तृत्वं निरूप्य ज्ञानपर्यवसायीति कर्मणा भोगोऽप्यैकस्यैवेत्याह । एकोऽनुभुङ्क्ते सुकृतमिति । सुकृतं पुण्यं कर्म तस्य फलं स्वर्गादि कार्यकारणयोरभेदात्तथोच्यते कारणानन्तरमेव भोग इत्यनुशब्दार्थः सुखभोगे बहूनामपि समवायोऽस्तीति हास्यक्रीडादौ तथा दर्शनात् दुष्कृते एक एवेत्याह । चकारान्मिथः सङ्गेन कृतपापे मिथ एव भोग इति पक्षमङ्गीकरोति दुष्कृतं पापं सुकृतवद्व्याख्येयम् ॥ २१ ॥ सुखार्थं सुखसाधनार्थं वा पापं न कर्त्तव्यमित्याह । अधर्मोपचितमिति । अधर्मेण उपचितं पुष्टम् अर्थस्योत्पत्तिर्धर्मेणैव उपचयस्त्वधर्मेणापि भवति तथा सति प्रवृद्धो दोषः अन्य एव अधर्मिष्ठाः अधर्मप्रेरिता वा दैत्याः हरन्ति प्रतिरोधे सामर्थ्याभावमाह । सम्भोजनीयापदेशैरिति । सम्भोजनीयाः सम्बन्धिनः अतिलुब्धोऽपि सम्बन्धरक्षार्थं तान् भोजयति । अनपेक्षितं बहुत्वान्नयन्तीत्याशङ्क्य तस्मिन् हृते जीवनमेव यातीत्यत्र दृष्टान्तमाह । जलानीव जलौकस इति । जलौकसो मत्स्यादेः प्राणभूतमपि जलं कुल्याभिर्हरन्ति ज्ञानं चेत् भवेत् तद्द्वारा अन्यत्र गच्छेदज्ञानमात्रे जीवनरूपोऽयमर्थ इति ज्ञापयितुं दृष्टान्तः ॥ २२ ॥ पश्चादुपकरिष्यन्तीत्याशङ्क्याह । पुष्णातीति । अन्यमप्युपक्रम्य पर्यवसानेन पुत्रपरं निरूपयति । तद्बुध्या स्वीया इति बुद्धिमात्रं वस्तुतः शत्रव एव अन्यथा उपकारमेव कुर्युः तेन बलात्कारेण तथा कुर्वन्तीति ज्ञापयितुमपण्डितमित्युक्तम् । ननु लौकिकं वैदिकं नित्यं कर्म कर्तव्यमिति तदर्थं ते भोजिता इति चेत्तत्राह । अकृतार्थमिति । सभोजनं नाम पिशाचिभिक्षेति वाक्यान्न तेषां दानं परलोकाय इह लोके भवत्युपकारः यदि ते उपकारं मन्येरन् तदपि नास्तीत्यकृतार्थतैव किं च अवसरे प्राप्ते प्रकर्षेण हिन्वन्ति संकटस्थाने सर्वार्थास्तं त्यजन्तीत्यर्थः । तान् बाह्याभ्यन्तरांस्तुल्यतया निर्दिशति । प्राणा रायः सुतादय इति । आन्तराः बाह्याः मध्ये उभयोपयोगिनश्च आदिशब्देन सर्व एव बाह्या गृहीताः प्राणा इन्द्रियाणि आसन्यव्यतिरिक्ताः प्राणा आसन्यो हि सर्वान् पोषयति नतु तं कश्चन ननु अनुप्राणन्ति यं प्राणाः अण्डेषु पेशिष्वित्यादिवाक्यैः प्राणानामिन्द्रियाणां चामुक्तेर्वियोगो न श्रूयते मुक्तौ तु कृतार्थबचनं वाधितमिति चेत् सत्यं चर्षणीनां जीवानां सहगमनं नस्थितजीवानाम् अन्यथा पुरञ्जनोपाख्याने प्राणादिसहिते देहे जीवप्रवेशवचनं बाधितं स्यात् यथा प्रवेशस्तथा निर्गम इति प्रथमप्रवेशोऽयमिति चेत् नैनं वीरसूरपि नेष्यतीति वाक्यादस्तु वा तथा सति प्राणभूता राय इति व्याख्येयम् अर्थाद्बहिश्चराः प्राणा इत्यनेन सिद्धान्यं निरूपितम् उत्क्रमणे सहैव गमनमत्रैव परित्याग इति च यत् श्रुत्रौ द्वयमप्युक्तं तमुत्क्रामन्तं प्राणोऽऽनूत्क्रामति प्राणा उत्क्रामन्त्युताहोनेति प्रश्ने नेत्याह याज्ञवल्क्यः इहैव समवलीयन्ते प्राणा इति यतो मृतो ध्मातः शेत इति ब्रह्मैव सन् ब्रह्माप्येतीति तु आक्षेपान्तरम् अतः क्रममुक्तथैव ऊर्ध्वगमने च सद्यः सर्वोऽपि गच्छति जायस्व म्रियस्वेति पक्षशब्दो मुक्तौ च न गच्छतीति सिद्धान्त इति सर्वमविरुद्धम् अयुक्तत्वात् गच्छतीति युक्त एवास्य परित्यागः यथा यो वधार्थं नीयते स केवलो नीयते यो विवाहार्थं नीयते स ससामग्रीक इति ॥ २३ ॥ तदाह । स्वयं किल्विषमादायेति । तदुपार्जनपोषणाभ्यामुपार्जितं पापं गृहीत्वा तैः प्राणादिभिस्त्यक्तः अन्धं तमो विशति ऊर्ध्वगतौ तु न त्यजन्तीति ज्ञापयितुं नार्थकोविद इत्युक्तम् अन्यथा योगशास्त्रं व्यर्थं स्यात् "पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि स" इत्यादिवाक्यात् अतस्तादृशेन्द्रियाणां हिताचरणं युक्तं यदप्युक्तं नोचेत्प्रमत्तमसन्निन्द्रियवाजिसूता इति तद्विषयैः संसारमात्रे प्रवेशनमुक्तं नतु हीनगतिः अत इन्द्रियाणां स्वभावभेदस्य दृष्टत्वात् निकृष्टैः कर्म्मभिनित्यं जन्तुः स्थावरतां यातीत्यादिवाक्यादपुनरावृत्त्यधोगमनमार्गे परित्याग एव मुक्तिव्यावृत्त्यर्थमसिद्धार्थ इति भगवदिच्छया सद्यो मुक्तौ निरुद्धगोपिकावत्सहगमनं नास्तोत्यर्थकोविदत्वाभावेऽपि परित्यागोऽपि वर्तते इति व्यावर्त्तकं पदद्वयमपि मृग्यम् अन्धंतमो हि अपुनरावृत्तितमः प्रविशतीति श्रुतिरपि केवलेन्द्रियपोषका एव सम्भूतिमुपासत इति श्रुतिराह अविद्यामुपास इति च ज्ञानरहितं प्रमाणं बहिर्भूतं यत्कर्म लौकिकं निषिद्धं च तेन तम एव ज्ञानसहितं तु कर्म वैदिकं य एवास्मि स सत्यार्थमित्यादि श्रुतेः तस्य मोक्षफलत्वमेतज्जापयितुमाह । स्वधर्मविमुख इति । तस्मात् स्वधर्मानुसारेण भोगः कर्तव्यः धर्मो ज्ञानसहित इति धर्मसहितश्च भोग इति बुद्धिमांस्तादृश एव कुर्यादिति ॥ २४ ॥

श्रीसुबोधिनी-सारः

एको जन्तुः प्राणी जायते एक एव म्रियते एक एव सुकृतं पुण्यं दुष्कृतं पापं चानुभुङ्क्ते इति समता कार्या ॥ २१ ॥ अल्पमेधसः मंदबुद्धेः पुंसोऽधर्मेणोपचितं समार्जितं वित्तं धनम् अन्ये पुत्रादयो हरन्ति संभोजनीयाः पोष्या इत्यपदेशैर्नामभिः जलौकसो मत्स्यस्य जलानीव तत्पुत्राः ॥ २२ ॥ स्वे स्वीया इमे इति बुद्ध्या यो यान् अवर्मण पुष्णाति अपंडितम् मूर्खं तम् अकृतार्थमप्राप्तभोगं निरुद्यमं निःस्वं ते प्राणा रायो धनानि पुत्रादयः परित्यजन्ति ॥२३॥ तस्माद्धेतोः स्वप्नमायामनोरथतुल्यमिमं लोकं वीक्ष्य दृष्टात्मना स्वयमात्मानं चित्तमायम्य निरुध्य समः शान्तो भव हे प्रभो ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतदेव स्पष्टयति—एक इति । जन्तुः शरीरी एक एव प्रसूयते जायते, नतु जायादिभिः सहितः । तथा एक एव प्रलीयते म्रियते, नहि म्रियमाणेन सह तत्पुत्रादयोऽपि म्रियन्ते । तथा एक एव सुकृतं स्वकृतपुण्यफलं सुखं भुङ्क्ते, तथा एक एव च दुष्कृतं पापफलं दुःखं भुङ्क्ते ॥ २१ ॥ किञ्च 'यदा च सह संवसन्ति तदापि क्लेशोपार्जितवित्तापहारितया विचारेण पुत्रादयः शत्रव एव' इत्याह—अधर्मोपचितमिति । सम्भोजनीयाः 'पोष्याः पुत्रादय' इति व्यपदेशैः कथनैरल्पमेघसः मूढस्याधर्मेणार्जितं वित्तं ते हरन्ति । तत्र दृष्टान्तमाह—यथा जलौकसो मत्स्यस्य जीवनहेतुभूतानि जलानि तत्पुत्रादयो हरन्ति, तद्वदिति ॥ २२ ॥ किञ्च स्वबुद्धया स्वकीयबुद्धया यान् अधर्मेणापि पुष्णाति ते प्राणादयस्तमपण्डितं मूर्खं अकृतार्थं अप्राप्तमनोरथमेव प्रारब्धवशान्मृतं जीवन्तमेव वा प्रहिष्वन्ति त्यजन्ति । आदिपदेन देहकलत्रादिग्रहणम् ॥ २३ ॥ स्वयं तु असिद्धार्थः अपूर्णमनोरथ एव तैः पुत्रादिभिस्त्यक्तः किल्विषं तत्पोषणार्थं कृतं पाषमादाय अन्धं तमः घोरतामिस्रादिनरकं प्रविशति किल्विषमादायेत्युक्तमेव नरकप्राप्तिहेतुं स्पष्टयति—स्वोचितवर्णाश्रमधर्मविमुख इति । तत्र हेतुमाह—नार्थकोविद इति । स्वार्थे मूर्ख इत्यर्थः ॥ २४ ॥

अन्वितार्थप्रकाशिका

एक इति ॥ जन्तुः शरीरी एक एव प्रसूयते जायते नतु जायादिभिः सहितः तथा एक एव प्रलीयते म्रियते नहि म्रियमाणेन सह तत्पुत्रादयोऽपि म्रियन्ते । तथा एक एव सुकृतं स्वकृतपुण्यफलं सुखं भुङ्क्ते तथा एक एव च दुष्कृतं पापफलं दुःखं भुङ्क्ते ॥ २१ ॥ वस्तुतः क्लेशोपार्जितवित्तहारितया पुत्राद्या अपि शत्रव एवेत्याह—अधर्मेति ॥ सम्भोजनीयाः पोष्याः पुत्रादय इति व्यपदेशैः कथनैरल्पमेधसः मूढस्य । असिजार्षः । अधर्मेणार्जितं वित्तं ते हरन्ति । यथा जलौकसो मत्स्यस्य जीवनहेतुभूतानि जलानि तत्पुत्रादयो हरन्ति स्वत्वेनाश्रयन्ति तद्वत् ॥ २२ ॥ पुष्णातीति ॥ स्वबुद्धया यान् अधर्मेणापि पुष्णाति ते प्राणा रायः धनानि सुतादयश्च तमपण्डितं मूर्खम् अकृतार्थमप्राप्तभोगमेव प्रारब्धवशान्मृतं जीवन्तमेव वा प्रहिण्वन्ति त्यजन्ति ॥ २३ ॥ स्वयमिति ॥ नार्थकोविदः स्वार्थेऽपि मूढः स्वधर्मविमुखः । स जनः स्वयं तु असिद्धार्थः अपूर्णमनोरथ एव तैः पुत्रादिभिस्त्यक्तः किल्विषं तत्पोषणार्थं कृतं पापमादाय अन्धं तमः घोरतामिस्रादिनरकं प्रविशति ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जनिमृत्योः सुखदुःखभोगेऽपि च केनापि सह निरन्तरसाहित्यं नास्तीत्याह एक इति ॥ २१ ॥ अधर्मेणोपचितं संचितं अल्पमेधसो मूर्खस्य वित्तं संभोजनीयास्त्वत्पोष्यावयमिति व्यपदेशैर्मिषैः जलौकसो जलनिवासी मीनवृंदस्य जलानी गोमहीष्यादयः इव हरंति ॥ २२ ॥ स्वकीयबुध्या हेतुनायान् प्राणा सुतादीन् अधर्मेण निषिद्धाचारेण यः पुष्णाति तं अकृतार्थमप्राप्तस्वं मूढं प्रहि एवं तित्यज्यंतिरायो धनानि ॥ २३ ॥ तैः सुतधनैः जीवन् त्यक्तः असिद्धार्थोऽपूर्णोऽभिलाषः अन्धतमो निरयं विशति अतः सोऽर्थेषु मोक्षसाधनेषु कोविदः कुशलो नास्ति ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एतदेव निदर्शयति ॥ एक इति ॥ जन्तुः शरीरी, एक एव प्रसूयते । न त्वात्मजादिभिः सहेति भावः । तथा, एकः एव, प्रलीयते । न हि म्रियमाणेन सह तज्जायादयो म्रियन्त इति भावः । सुकृतं, एकः अनुभुङ्क्ते । दुष्कृतं च एकः एव, अनुभुङ्क्ते । सुकृतदुष्कृतशब्दौ तत्फलभूतस्वदैहिकसुखदुःखपरौ, तत्तद्भोगेऽपि न केनचित् साहित्यमिति भावः ॥ २१ ॥ किं च यदा सह संवसन्ति तदापि क्लेशोपार्जितवित्तापहारितया पुत्रनामानः शत्रवस्ते ज्ञेया इत्याह ॥ अधर्मेति ॥ अल्पमेधसः मूढस्य, अधर्मोपचितं वित्तं धनं, अन्ये पुत्रादयः, संभोजनीयापदेशैः संपोषणीयाः पुत्रादय इति व्यपदेशैरित्यर्थः । हरन्ति । कथमिव । जलौकसो मत्स्यस्य, जलानि तज्जीवनभूतानि तोयानि, तत्पुत्राः इव ॥ २२ ॥ यानेवं पुष्णाति ते धनमादाय मृता जीवन्तोऽपि वा तं परित्यजन्तीत्याह ॥ पुष्णातीति ॥ यान् स्वबुद्धया स्वीया इत्यभिमानेन, यः अधर्मेण पुष्णाति, ते प्राणाः, रायो धनानि, सुतादयः आदि शब्देन भार्यादयः, प्राणशब्दः शरीरोपलक्षकः । अपण्डितं तं अकृतार्थमप्राप्तपूर्णभोगं सन्तमेव, प्रहिण्वन्ति त्यजन्ति ॥ २३ ॥ स्वयं च पुनः पापैकपाथेयो नरकं विशतीत्याह । स्वयमिति ॥ स्वयं तु, नार्थकोविदः स्वार्थसाधनेऽपण्डितः, लौकिकस्वार्थेष्वेव कुशलो न तु पारलौकिके स्वहिते इति भावः । तैः प्राणादिभिः, त्यक्तः सन् , किल्विषं तत्पोषणार्थं कृतं पापं, आदाय, असिद्धार्थः अपरिपूर्णमनोरथः, स्वधर्मविमुखः स्ववर्णाश्रमोचित्तधर्मरहितः, हेतुगर्भमिदम् । तत्त्वाद् अन्धं तमः अन्धतामिस्राख्यं नरकं, विशति ॥ २४ ॥

कृष्णप्रिया

जन्तु जीव, एक ही अकेला ही जन्म लेता है अकेला ही पुण्य का फल सुख को भोगता है और अकेला ही पाप के फल दुःख को भोगता है ॥ २१ ॥ अल्पमति ने अधर्म से सम्पादित किया हुआ और बताया हुआ धन को पुत्र पौत्र पत्नी आदि

पालने योग्य है ऐसा निमित्त बताकर हर लेते हैं तब जैसे जल में रहने वाले जलचर मत्स्यादि जन्तु जलक्षीण हो जाने पर जलचर जन्तु दुःखी होते हैं वैसे वह धनक्षीण जन भी दुःखी ही होता है ॥ २२ ॥ जो मति शून्य मनुष्य जिनको स्वकीय मानकर अधर्म से पालन करता है वे प्राण धन पुत्र परिवार आदि उस मतिमन्द मनुष्य को उपकार किये विना पहले ही कष्टापन्न दशा में छोड़ देते हैं ॥ २३ ॥ प्राण पुत्र धनादि से त्यक्त वह मतिमन्द-अविवेकी वालिशजन, अपना प्रयोजन भी न सिद्ध कर पाया फिर स्वधर्म से भी च्युत हुआ केवल अपने किए हुए पापों को साथ में लेकर पुनः रौरव नरक में प्रविष्ट होता है ॥ २४ ॥

तस्माल्लोकमिमं राजन् स्वप्नमायामनोरथम् । [1]वीक्ष्यायम्यात्मनाऽऽत्मानं समः शान्तो भव प्रभो ॥ २५ ॥

धृतराष्ट्र उवाच

[2]यथा वदति कल्याणीं वाचं दानपते भवान् । तथानया न तृप्यामि मर्त्यः प्राप्य यथामृतम् ॥ २६ ॥
[3]तथापि सूनृता सौम्य हृदि न स्थीयते चले । पुत्रानुरागविषमे विद्युत् सौदामनी यथा ॥ २७ ॥
ईश्वरस्य विधिं को नु विधुनोत्यन्यथा पुमान् । भूमेर्भारावताराय योऽवतीर्णो यदोः कुले ॥ २८ ॥

कर्वमक्षमा

अन्वयः—राजन् ! तस्मात्, इयम्, लोकम्, स्वप्नमायामनोरथम्, वीक्ष्य, आत्मना, आत्मानम्, आयम्य हे प्रभो ? समः, शान्तः, भव ॥ २५ ॥ हे दानपते ! भवान्, यथा, कल्याणीम्, वाणीम्, वदति, तथा, अनया, यथा, मर्त्यः, अमृतम्, प्राप्य, न, तृप्नाति, तथा, अहम्, न तृप्यामि ॥ २६ ॥ हे सौम्य ? पुत्रानुरागविषमे, चले, हृदि, यथा, सौदामिनी, विद्युत्, तथा, सुनृतः, अपि, न, स्थीयते ॥ २७ ॥ यः, हि, भूमेः, भारावताराय, यदोः, कुले, अवतीर्णः, तस्य, ईश्वरस्य, विधिम्, कः, नु, पुमान्, ईश्वरस्य, विधिम्, अन्यथा, विधुनोति ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वप्नश्च माया च मनोरथश्च तत्तेन तुल्यमात्मना बुद्ध्या विवेकयुक्तया आत्मानं मनः आयम्य नियम्य शान्तः सन्समो भवेति ॥ २५ ॥ हे दानपते अक्रूर । न तृप्याम्यलमिति न मन्ये ॥ २६ ॥ सूनृता प्रिया वाक्चलेऽस्थिरे हृदि न स्थीयते न तिष्ठतीत्यर्थः । सुदामा पर्वतस्तत्र भवा विद्युदिव । तस्मिन्स्फटिकशिलामये सहसैवातिस्फुरिता विद्युद्यथा लीयते तद्वदित्यर्थः । यद्वा सुदामा माला तस्या इयं सौदामनी मालाकारेत्यर्थः ॥ २७ ॥ नन्वेवं जानतोऽपि कथमयं मोह इति चेदत आह । ईश्वरस्येति । विधिं विधानं मायामिति यावत् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अनेन प्रकृते किमायातं, तत्राह—तस्मादिति । यतोऽधर्मेण पुत्रादिपालनं नरकहेतुरतस्माद्धेतोः । लोकं शरीरं, जगद्वा । स्वप्नेति लुप्तोपमा, स्वप्नवत् । मायापदेनेन्द्रजालं तद्वत् मनोरथः मनोराज्यवत् । प्रभो इति तस्य निजोक्तिस्वीकारार्थं श्लाघामात्रम् । सम इति स्वपरबुद्धिं विहाय निजभ्रातृपुत्रेषु तुल्यतया वर्तस्वेत्यर्थः । वीक्ष्य दृढं ज्ञात्वा । आत्मना बुद्ध्या आत्मानं मनः । शांतः लोभाद्युपरतः । समः स्वपुत्रेषु पांडवेषु च तुल्यभावो भव । यद्वा—समः सन् शान्तः सुखी भव, अन्यथा दुःखमेवेति भावः । यद्वा—भगवन्निष्ठो भवेत्यर्थः । परेष्विव पांडवेषु स्नेहेनैव तादृशत्वसिद्धेरित्युपदेशसारः । तत्र च तव शक्तिरस्त्येवेति सम्बोधयति-प्रभो इति । स्वोक्तग्रहणार्थमियं चातुरी । तदैव राजत्वसिद्धिः, अयमेव राज्ञो मुख्यधर्मश्चेति भावेनाह—हे राजन्निति ॥ २५ ॥ कल्याणीं कल्याणकरीम् । अनया वाचा । अमृतं देवान्नम् "अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जले ह्यग्नौ मोक्षणे हेम्नि गोरसे । क्लीबे ना त्वमरे स्त्री तु गुडूच्यान्" इति यादवः । कदापि समो न भवितास्मीति मनसि द्रढयित्वा शाठ्येन तद्दोषपरिहारार्थं प्रभो इत्यस्य प्रत्युत्तरतया निजस्वातंत्र्यं निषेद्धुं तत्र श्रीकृष्णस्यैव दोषं वक्तुं प्राक् तत्संतोषार्थं तदुक्तमभिनन्दति—ययेति । यथा यदभिप्रायेण, तथा तदभिप्रायेणैव, न त्वभिप्रायान्तरं बुद्ध्वेत्यर्थः । दानपते इति सदुपदेशदानाभिप्रायेण ॥ २६ ॥ यद्यपि यथा वदसि तथैव कर्तुं योग्यं तथापीति । 'विषमं तु नतोन्नम्' इति धरणिः । "सूनृतं मंगलेऽपि स्यात्प्रियसत्ये वचस्यपि" इति मेदिनी । इत्यर्थ इति-कर्मकर्तरि प्रयोगस्त्वत्राकर्मकत्वान्नास्त्यत आर्षत्वाश्रयेण यगादीति बोध्यम् । तद्वत् यथा सुदाम्नि गिरौ विद्युदुद्यंत्येव लीयते तथा त्वद्वाचोऽप्युक्तिसमकालमेव लीयन्त इत्यर्थः । तडिद्दृष्टांतस्य व्यधिकरणत्वात्सामानाधिकरण्येनाह— यद्वेति । तस्या मालाया इयं दीप्तिः विद्योतत इति विद्युत् संज्ञायां कर्तरि क्विम्वा । 'स्याद्वि-

---

१. संभजन्नात्मना-विज. । २. यदा-वीर. । ३. तदा-वीर. ।

द्युत्तडित्पयोः' इति धरणिः । सुदामा मेघः 'सुदामा भूधरे मेघे' इति विश्वः । चपले मेघे चपला विद्युदिवेत्यर्थः ॥ २७ ॥ अत्राक्षिपत्यक्रूरो—नन्विति । अयं त्वदुक्तः पुत्रानुराग ईश्वररचनाया एव मायात्वप्रसिद्धेरिति यावदर्थः । विधुनोति उपसर्गवशादत्र धुनोतेः करणार्थता, करोतीत्यर्थः । "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । विहाराहारसंहारप्रतिहारप्रहारवत् ।" इत्युक्तेः विधिं विधानेच्छाम् , सा च मायाख्येति तैर्व्याख्यातम् । अन्यथा प्रकारान्तरेणापि कर्तुं कोऽपि न शक्नोत्यतस्तां को विधुनोत्यति, क्रमेत, न कोपीत्यर्थः । अत्र त्वमेव प्रमाणम् , एतावता शिक्षणेन मां विवेकं ग्राहयितुं नाऽशक इति भावः । स चेश्वरः संप्रति युष्मद्गृहे वर्तत इत्याह—भूमेरिति । तेन तत्र गत्वा स एव निवेद्यतां यन्मम विधेयम् , स मैवं प्रेरयेदिति भावः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वीक्ष्य दृढं ज्ञात्वा आत्मना बुद्ध्या आत्मानं मनः शान्तः लोभाद्युपरतः सन् समः स्वपुत्रेषु तुल्यभावो भवायद्वा समः सन् शान्तः सुखी भव अन्यथा दुःखमेवेति भावः । यद्वा भगवन्निष्ठबुद्धिर्भवेत्यर्थः । परेष्विव पाण्डवेषु स्नेहेनैव तादृशत्वसिद्धेः इत्ययमुपदेशसारः । तत्र च तव शक्तिरस्त्येवेति सम्बोधयति । प्रभो इति । इयं स्वोक्तग्रहणार्थ चातुरी तदैव राजत्वसिद्धिः अयमेव राज्ञो मुख्यधर्मश्चेत्यभिप्रायेणाह । हे राजन्निति ॥ २५ ॥ कदापि समो न भवितास्मीत्यन्तर्मनसि द्रढयित्वा शाठ्येन तद्दोषपरिहारार्थं प्रभो इत्यस्य प्रत्युत्तरतया निजस्वातन्त्र्यं निषेद्धु तत्र श्रीकृष्णस्यैव च दोषं वक्तुं प्राक् तत्सन्तोषार्थं तदुक्तमभिनन्दति । यथेति । यथा यदभिप्रायेण तथा तदभिप्रायेणैव न त्वभिप्रायान्तरं बुद्ध्वेत्यर्थः । दानपत इति सदुपदेशदानाभिप्रायेण ॥ २६ ॥ न स्थीयते स्थिरा न भवति इत्यर्थः । कुतः चले चञ्चले यतः पुत्रेति सुदामा मेघः सुदामा भूधरे मेघे इति विश्वः । तत्रत्या सौदामनी यथा मेघे सा स्थिरा न स्यादित्यर्थः । सौम्य हे शान्तप्रकृते निजसौशील्येन त्वया मयि क्रोधो न कार्य इति भावोऽपि सकपट एव ॥ २७ ॥ विधिं विधानेच्छां सा च मायाख्येति मत्वा तैस्तथा व्याख्यानं विधुनोति अतिक्रमितुं शक्नुयादित्यर्थः । अन्यथा मिथ्यान्यप्रकारिकां वा कृत्वेत्यर्थः । स च सम्प्रति विधानविशेषेच्छयात्रैव भूमाववतीर्ण इति सोत्प्रासं तन्मतमनुवदन्नाह । भूमेरिति । ततो भवद्भिरेव तत्र प्रयतितव्यमिति भावः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वीक्ष्य विचार्य्य, दृढं ज्ञात्वा वा, आत्मनात्मानमिति (गी. ६।५) 'आत्मनो बन्धुरात्मैव' इति न्यायात् , यद्वा, आत्मना बुद्ध्या आत्मानं मनः शान्तो लोभमोहाद्युपरतः सन् समः स्वपुत्रेषु पाण्डवेषु च तुल्यभावो भव, यद्वा, समः सन् शान्तः सुखी भव, अन्यथा दुःखमेवेति भावः । यद्वा, (भा० ११।१९।३६)—'शमो मन्निष्ठता बुद्धेः' इति श्रीभगवदुक्तेः, भगवन्निष्ठबुद्धिर्भवेत्यर्थः—पुत्रेष्विव पाण्डवेषु स्नेहेनेव तादृशत्वसिद्धेरित्ययमुपदेशसारः । तत्र च तव शक्तिरस्त्यवेति सम्बोधयति–'प्रभो' इति, इयं स्वोक्तग्रहणार्थं चातुरी, तदैव राजत्वसिद्धिः अयमेव राज्ञो मुख्यधर्म्मश्चेत्यभिप्रायेणाह—हे राजन्निति ॥ २५ ॥ कदापि हि समो न भवितास्मीत्यन्तर्मनसि द्रढयित्वा शाठ्येन चद्दोषपरिहारार्थम् , 'प्रभो' इत्यस्य प्रत्युत्तरतया निजास्वातन्त्र्यं वक्तुं प्राक् तत्सन्तोषार्थं तदुक्तमभिनन्दति—यथेति । यादृशीं कल्याणीमुत्तमाम् । 'दानपते' इति सदुपदेशदानाभिप्रायेण, तथा तादृश्या अनया साक्षादनुभूयमानया, यद्वा, अनया ईदृश्येत्यर्थः । यथा मर्त्त्यो न तृप्यति, तथा न तृप्यामीति योज्यम् । इत्युक्त्यपालनेन तस्य क्रोधमाशंक्य तदनुद्भवार्थं स्वोक्तिग्राहणार्थञ्चादौ स्तुति कृता ॥ २६ ॥ न स्वीयते स्थिरा न भवतीत्यर्थः । कुतः ? चले चञ्चले, यतः पुत्रेष्वनुरागेण विषमेत्यक्तसाम्ये दुष्टतां गते वा, सुदामा मेघः, तथा च विश्वः—'सुदामा भूधरे मेघे' इति, तत्रत्या सौदामिनी;—यथा मेघे सा स्थिरा न स्यादित्यर्थः । सौम्य ! हे शान्तप्रकृते ! निज सौशील्येन त्वया मयि क्रोधो न कार्य्य इति भावः । एषापि सर्व्वा परमशाठ्योक्तिरेव, बुद्ध्या स्वनियम्यस्यापि स्वमनसो दोषोक्त्या स्वस्य तदधीनत्वेनाशक्तिबोधनात् ॥२७॥ विधुनोति—अतिक्रमितुं शक्नुयादित्यर्थः, अन्यथा मिथ्या अन्य प्रकारकां वा कृत्वेत्यर्थः । अनेन कथञ्चिदपि किञ्चित्तदतिक्रमणं निरस्तम् । पुमान् पौरुषयुक्तोऽपि जन ऐश्वर्य्यमेव दर्शयति—भूमेरिति । मोक्षादि-प्रदानेनावतारणाय, यद्वा, विधिं विधेयम् , सर्व्वनिजाशेषैश्वर्य्यं प्रकटनायाधुनात्रैव साक्षाद्भूतोऽस्तीत्याह—भूमेरिति । अतस्तदतिक्रमे कस्य शक्तिः स्यादिति भावः । यद्वा, भूभाररूपाणां पापिनां मत्पुत्रादीनां संहारायैवावतीर्णोऽस्तीति तदर्थं तन्मूलं मम वैषम्यं तेनैवोत्पाद्यते, तदन्यथाचरणे मम वराकस्य का शक्तिरिति । पाठान्तरे स एव स्वयमवतीर्णः, अर्थः स एव ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उपदेशमुपसंहरति । तस्मादिति । हे राजन् ! तस्मात् तत्त्वस्थितेरेवं विधत्वादिमं देहतदनुबन्ध्यादिकं देहादिसर्वलोकम् अनित्यं स्वप्नं मायामनोरथं चेति प्रत्येकं वेति वीक्ष्येत्यत्रान्वयः मनोरथमाश्चर्यमनोरथं तमिवानित्यं वीक्ष्य ज्ञात्वा आत्मना बुद्ध्या आत्मानमायम्य नियम्य हे प्रभो समः सर्वत्र समबुद्धिः सन् शान्तः रागद्वेषादिनिर्मुक्तो भव हे प्रभो इति ज्ञानसामर्थ्यं सूच्यते ॥ २५ ॥ इत्थं प्रतिबोधितः प्राह धृतराष्ट्रः । यथेति चतुर्भिः । हे दानपते दानाधिप अत्युदारमूढमप्येवं ज्ञानेन सञ्जीवयिषोस्तवौदार्यमनितरसाधारणमिति सम्बोधनाभिप्रायः । यदा भवान् कल्याणीं कल्याणावहां वाचं वदति तदानया वाचा न तृप्यामि

इत्यभिप्रायेण यदातदाशब्दयोः प्रयोगः यथा मर्त्यो मरणशीलोऽमृतं प्राप्याशित्वा न तृप्यति तद्वन्निरतिशयहिता त्वद्वागिति भावः ॥ २६ ॥ तथापीति । हे सौम्य यद्यपि भवतो वाक् सूनृता मधुरा हिता च तथापि तद्वचः हृदि न स्थीयते प्रतिष्ठितं न भवति तत्र हेतुं वदन् हृद्विशिनष्टि । पुत्रानुरागेण विषमे यथा सौदामिनी विद्युत् तद्वत् सुदामा पर्वतः तेनैकदिक तत्र भवा सौदामिनी सुदाम्नि हि स्फटिकशिलामये स्फुरिता तडित्तथैव लीयते तद्वदित्यर्थः। यद्वा सुदामा माला तन्मयी सौदामिनीति ॥२७॥ नन्वेवं जानतोऽपि कथमयं मोह इत्यत आह । ईश्वरस्येति । को वा पुम् ईश्वरस्य विधिं चिकीर्षितमन्यथा विधुनोति अन्यथा करोति सोऽसावीश्वर इत्यत आह । भूमेरिति । यो यदोः कुले भूमेर्भारस्य मत्पुत्रतदनुबन्धिरूपस्यावतारायावतीर्णः मत्पुत्रसञ्जिहीर्षात्मकभगवच्चिकीर्षानुगुणमेव तन्मायोन्मोहितमन्मनीषा प्रवर्त्तते इति भावः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किमन्येन बहूपन्यासेन प्रकृते किमागतमिति तत्राह । तस्मादिति । लोकं शरीरं स्वप्नेति लुप्तोपमा स्वप्नवत् मायावत् इन्द्रजालवत् मनोराज्यविजृम्भितवदन्यत्र स्वनिमित्तं स्वप्नस्य स्वाधीनत्वप्रतीतेस्तदर्थं मायामनोरथमित्युक्तम् आत्मना मनसा आत्मानं परमात्मानं भजन् शान्तो भगवदेकनिष्ठः स्वपरबुद्धिं विहायात्मजेषु पाण्डुपुत्रेषु च समो भवेत्यन्वयः ॥ २५ ॥ अनया वाचा न तृप्यामि अलम्बुद्धिं न प्राप्नोमि अमृतं देवान्नम्—

अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जलं ह्यग्नौ माक्षणे हेम्नि गोरसे ॥
क्लीबेना त्वमरस्त्री तु गुडूच्यामघभिक्षयोरिति । च ॥ २६ ॥

सूनृता वाक् सुदाम्नः पर्वताद्व्यच्यमाना सौदामनी विद्युत् विद्युलुता, यद्वा विशेषेण द्योति प्रकाशत इति विद्युत् तादृशी सौदामनी क्षणप्रभा यथा अस्थिरा तथेति ॥ २७ ॥ विधिमाज्ञां विधुनोति अन्यथा करोति अनेकार्थत्वाद्धातूनाम् ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अस्थिरत्वात् स्वप्नादितुल्यम् आयम्य नियम्य ॥ २५ ॥ अभिज्ञम्मन्योऽयमक्रूरो मामपि तत्त्वमुपदेष्टुं प्रगल्भेत किमहमिदं न जानामीत्यन्तर्मदपूर्णोऽपि महागाम्भीर्यं प्रकाशयन् बहिर्महासाधुरिवाह । यथेति । दानपते इति । मथुरायामन्नदानेन यथा बुभुक्षूंस्तर्पयसि तथैवात्र हस्तिनापुरे अनभिज्ञं मां ज्ञानदानेन तर्पयसीति भावः ॥ २६ ॥ सूनृता प्रियवाक् न तिष्ठति सुदामा मेघः । "सुदामा भूधरे मेघे" इति विश्वः तत्र भवा सौदामनी चपले मेघे चपला विद्युदिवेत्यवेत्यर्थः ॥ २७ ॥ विधिं विधानम् अन्यथेति प्रकारान्तरेणापि को नु विधुनोति न कोऽपीत्यर्थः । अत्र प्रमाणं त्वमेव एतावतापि शिक्षणेन मां विवेकं ग्राहयितुं नैवाशक इति भावः । स चेश्वरः सम्प्रति युष्मद्गृहे वर्त्तते इत्याह । भूमेरिति । तेन तत्र गत्वा स एव निवेद्यतां यन्मम विधेयं स नैवं प्रेरयेदिति भावः ॥ २८ ॥

गूढार्थदीपिनी

त्रिष्वपि कालेषु अस्यानित्यतासूचनार्थं लुतोपमात्रयम् । माया इन्द्र जालम् । आत्मना बुद्धया आत्मानं मनःनियम्य ॥ २५ ॥ अनया वाचा ॥ १६ ॥ सूनृता मधुरा सुदामा नाम कश्चित् स्फटिकपर्वतः मेघो वा तत्र भवा सौदामनी । तेनैकदिक् ॥ २७ ॥ विधि विधानं को वा विधुनोति अन्यथा कर्तुं शक्नोति न कोऽपि ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

न केवलं देहादय एव प्रक्षिण्वन्त्यतोऽनित्या इति सर्वोऽयं लोकोऽनित्य इत्याह । तस्मादिति । स्वप्नमायामनोरथं तत्तुल्यमनित्यम् स्वप्नादीनां द्वन्द्वैक्यम् स्वप्नवत् मायामनोरथवत् इमं प्राकृतलोकमनित्यं वीक्ष्य आत्मानं मनः आयम्य नियम्य शान्तः सन् समो भवेत्यर्थः ॥ २५–२६ ॥ सूनृता प्रिया वाक् हृदि न स्थीयते हृत्संलग्ना न भवति यथा सुदामा माला तस्या इयं सौदामिनी खे न संस्थीयते खलग्ना न भवति तद्वत् ॥ २७ ॥ विधिं विधानम् ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

न शृणोति न वा वृणोति समतामिति मतिमान्द्येनाद्दूरीकृत्य सतः शासितुं श्वाफल्किः किं बहुनेति परमार्थमुपदिश्योपसंहरति । तस्मादिति । इमं लोकं देहं स्वप्नमायामनोरथं स्वप्नवद्भगवदधीनं मायया निर्मितमैन्द्रजालिकं तद्वन्मनोरथवच्च । अनेन भगवन्मात्राधीनं न मम स्वातन्त्र्यं किमप्यत्रास्तीत्यत्र स्वप्नो मायामनोरथौ च क्रमादविश्वसनीयतां निदर्शनानीति ज्ञेयम् । आत्मना मनसाऽऽत्मानं हरिं सम्भजन्समः सच्छान्तो भगवन्निष्ठबुद्धिर्भव प्रभविति सौमुख्यं सम्पादयितुमित्यन्धं जगाद गान्दिनीतनय इत्यन्वयः ॥ २५ ॥ मनस्येकं वचस्येकमिति न निरूढमूढपुत्रममतः स्वमनोगतमक्रूरं प्रति धृतराष्ट्रो वक्तीति वक्ति । धृतराष्ट्र

इति। हे दानपते भवान्कल्याणीं मङ्गलप्रापकतया तद्रूपिणीं वाचं यथा येन प्रकारेण वदति यथावदकृत्रिमं वदसीति वा तथा तेनैव प्रकारेणानया वाचा न तृप्यामि। तत्र निदर्शनं दर्शयति। यथा मर्त्यो मरणधर्मा अमृतं देवान्नमभूतोपमतायां सुधां वा प्राप्य यथा तृप्तिं नाप्नोति तथेति। अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने। अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते। अयाचिते च मोक्षे चेति यादवविश्वौ॥ २६॥ एवं वचनेन मम ममता सुतेषु गता समतोत्पन्नेतिभ्रमतः सम्भ्रमं न भज भो भोजपते इति जल्पति। तथाऽपीति। सूनृताद्विद्युद्वाणी द्यौर्नाम देवी विद्युत्स्यात्साक्षादेव सरस्वती। द्योतनात्सर्ववस्तूनामिति बृहद्भाष्ये। तथा सूत्रभाष्ये। विद्युत्पतिं वायुमिति। तथा कर्मनिर्णयभाष्ये। द्यौर्वाव विद्युत् द्यौरेव विद्युत्। तट्टीकायां। ननु वरुणावराया विद्युतः कथं चन्द्रादपि परत्वमित्यत आह। द्योरितीत्युक्तेविद्युद्वाणी। सौम्य मम हृदि न स्थीयते स्थिरतया न स्थास्यति। तत्र तन्त्रं। चल इति। चञ्चलता कुत इत्यत आह। पुत्रानुरागविषम इति। तत्र निदर्शनमाह। यथा सौदामिनी सुदामपर्वताकारदिसम्बन्धिनी तेनैकदिग्गतं विद्युदिति वा विशेषतो द्योतमानत्वेन सुदामाद्येकदिक्कयोरन्यतरयोगरूढितो वाऽर्थो ज्ञेयः॥ २७॥ छद्म चरन्पद्मना-भोपरि भारं निधाय विधाय स्वदुष्कर्मावज्ञां बुध इव वक्ति। ईश्वरस्येति। यो भूमेर्भारावताराय यदोः कुलेऽवतीर्णस्तस्येश्वरस्य विधिं निधिं नियमं कः पुमानन्यथैतदन्यथा स्त्री का नु विधुनोति कम्पयति तिरस्करोतीति यावत्। भूमेर्भारावतारायैवावतीर्णोऽन्यथा पूर्वश्लोकान्नेत्यनुवर्त्यान्यथेत्यनेनान्वेतव्यम्। कर्मादिना न जननं जनार्दनस्येति भावः। को नु विधुनोतीत्यन्वयो वा॥ २८॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्माल्लोकमिममिति। कालानुसारेण कर्त्तव्यमिति लोको निन्द्यते स्वप्नमायामनोरथत्वेन स्वप्नस्तामसः माया राजसी मनोरथः सात्त्विकस्तथोत्कर्षापकर्षापन्नमपि जगत् न चिरकालावस्थायीति तदनुरोधे न तु न पुरुषार्थो नाशनीयः उत्पत्तौ ससिद्धायां मरणेऽपि सिद्धे पूर्वं पश्चाच्च नानेन संघातेन सह स्थितः स्थास्यतीति सिद्धत्वात् स्वप्नादितुल्यत्वं युक्तमेव अनेनोत्कृष्टमिदं राजशरीरमित्यपि परिहृतम् एतं वीक्ष्य पूर्वोक्तप्रकारणात्मनैवात्मानं संघातव्यतिरिक्तं ज्ञात्वा देहसम्बन्धिष्वप्युदासीनो भवेत्याह। सम इति। नन्वेवं पर्यालोचना कथं भविष्यतीत्याशङ्कायामाह। शान्तो भवेति। नन्वेवमुपाये कथं न सर्वे भवन्तीत्याशङ्क्याह। प्रभो इति। त्वं समर्थः विवेकी नत्वन्ये अविवेकिनः॥ २५॥ एवमुपदिष्टे ज्ञाने सन्तुष्टः सन् धृतराष्ट्र उत्तरमाह। यथा वदसीत्यादि एवं व्यासेनाप्येतादृशमुक्तं भीष्मेणान्यैश्च तत्तदुपदिष्टज्ञानं क्षणमात्रमवतिष्ठति पश्चादन्यथैव प्रवर्त्तते पुनरुपदिष्टे पश्चात्तापसहितं ज्ञानं भवति तदपि न भवतीति न तिष्ठतीति पुनरन्यथैव प्रवर्तते एवमनेकपर्यायेऽस्मन्मनसोऽयमेव स्वभाव इति निश्चित्य पश्चात्तापो निवृत्तस्ततः प्रभृतिज्ञानमपि मन्यते वैषम्यमपि करोतीमं सिद्धान्तम् अतो न जानातीति तं प्रतिबोधयति तदास्यानिष्टं भषेत् यदि पुत्रनाशं नाङ्गीकुर्यात्तदा स्वस्य दोषो भवेत् परं स्वयं कर्त्तुं न शक्तः नाप्यन्यः किं त्वीश्वर एवेति तस्याभिप्रेतम् अनेनास्य युद्धोद्यमोऽपि निवारितः। हे दानपते दानाध्यक्ष धर्मशास्त्रेऽयमेव निपुण इति अनेन त्वं धर्ममेव जानासि नतु कालं स्वभावमीश्वरेच्छां वा परं यद्वदसि तत्कल्याणीमेव वाचं वदसि सत्यां मनोहरां च सत्यं ब्रूयात्प्रियं ब्रूयादिति स्मृतेः यतस्त्वं दानपतिरिति अद्यापि तव वचनश्रवणे श्रद्धा वर्त्तत इत्याह। तथानयेति। तथाभूतयानया वाण्या न तृप्यामि अलमिति न मन्ये स्वस्य तद्वाक्यमपेक्षितमिति ज्ञापयितुं दृष्टान्तमाह। मर्त्यः मरणधर्मामृतं प्राप्य न तृप्यतीति॥ २६॥ यथा गङ्गायां सज्वरोऽपि श्रद्धावान् गङ्गास्नाने न तृप्यते परं तस्य शरीरं न सहते तथा मम इत्याह। तथापीति। सूनृता सत्यरूपा सतां मनसि यद्यपि तिष्ठति मनसो हि भार्या सा तथापि चञ्चले मनसि वेश्यारते भर्त्तरीव हृदि चञ्चले सति न स्थीयते चाञ्चल्यमात्रे तदनुगुणकार्यकर्तरि तिष्ठेदपि तदपि नास्तीत्याह। पुत्रानुरागविषम इति। पुत्रानुरागेण विषमं जातं यथा जलप्रवाहेण भूमिर्निम्नोन्नता भवति यथा मालाकारा विद्युत् क्षणमपि न तिष्ठति दण्डाकारा तु क्षणं दृश्यतेऽपि अत उक्तं विद्युत्सौदामनी यथेति सौदामनी विद्युदिति प्रत्येकसमुदायाभ्यां विद्युद्वाचकम्॥ २७॥ तर्हि यत्नः कथं क्रियते चित्तवृत्तिनिरोधस्य विद्यमानत्वादिति चेत्तत्राह। ईश्वरस्येति। ईश्वरेण कश्चनप्रकारो विहितः एवं प्रकारेणैवैतत् कर्तव्यमिति तत्कोऽन्यथा कर्त्तुं शक्तः एतद्विज्ञानमावापोद्वापाभ्यां परिश्रमेण भवति तस्मिन् कृते ज्ञापने न काप्यनुपपत्तिः एवं ज्ञात्वा को वा पुमान् विवेकी समर्थोऽपि ईश्वरविचारितं प्रकारं विशेषेण धुनोत्यपि दूरीकरोति कम्पितं वा करोति। नन्वीश्वर उदासीनो नादत्ते कस्यचित्पापं नचैव सुकृतं विभुरिति वाक्यात् अज्ञानेनैव तथाचित्तं जायते नत्वीश्वरस्तथा करोतीति चेत्तत्राह। भूमेर्भारावतारायेति। भगवान् भूभारहरणार्थमवतीर्णः अन्यथावतारमेव न कुर्यादतो न ज्ञायते भगवता अन्यप्रकारो विचारित इति। नन्वेतदपि नाङ्गीकर्त्तव्यं वाक्यविरोधात् अतोऽवतारस्य प्रयोजनान्तरमनवरणं वा कल्पनीयमिति चेन्न तथा सति शास्त्रवैफल्यात् सर्वमुक्तिर्वा प्रसज्यते अतोऽधिकारपरं शास्त्रमित्यपि पक्षे यथा सर्वगुणसंपत्तिर्मम तथा न कस्यापीति सर्वेषामनाश्वास एव स्यात् अतो व्यभिचारादीश्वरेच्छा स्वतन्त्रेति वक्तव्यम् एवमपि शास्त्रवैफल्यमिति चेत् सत्यं न सर्वत्र शास्त्रं प्रमाणं किन्तु क्वाचिदेव यत्रेश्वरेच्छा यथोक्तसाधनेऽप्यजननात् अतः सर्वत्र शास्त्रमेव प्रमाणं यदि शास्त्रानुसारेणापि कदाचिन्न भवति तदेश्वरविधिरिति कल्प्यते यथा मण्यादिप्रतिबन्धे दाहाभावाच्छक्तिः सा अग्नौ मणौ वेत्यत्र वयमुदासीनास्तथा तादृशस्थले ईश्वरेच्छा नियामिकेति ज्ञातव्यम् ईश्वरत्वादेव न पर्यनुयोगः लोके च महाराजाज्ञादिषु सामान्यविशेषभावः श्रूयते सर्वतो निरुपद्रुतेऽपि देशे कस्यचिदुपद्रवो महाराजेच्छया भवतीति नचैतावता

सामान्याज्ञाया निष्कण्टकं राज्यं विरुध्यते अतो निमित्तभूतानस्मदादीन्न मर्यादायां स्थापयतीति युक्तमेव ज्ञातेऽपि शास्त्रे वैषम्यम् अन्यथा भगवान् न यदोः कुले अवतीर्णो भवेत् ॥ २८ ॥

श्रीसुबोधिनी–सारः

किल्विषं पापमादाय तैः पुत्रादिभिः त्यक्तो नार्थकोविदः स्वार्थमूढोऽसिद्धार्थोऽपूर्णमनोरथः स्वधर्मविमुखोऽन्धं तमो विशति ॥ २५ ॥ धृतराष्ट्रोक्तिः । हे दानपते कल्याणीं वाचं यथा भवान् वदति तथाऽनया वाचा न तृप्यामि नालमिति मन्ये मर्त्योऽमृतं प्राप्य यथा ॥ २६ ॥ तथाप्येवं सत्यपि सूनृता त्वयोक्ता प्रिया वाक् चलेऽस्थिरे पुत्रेष्वनुरागेण विषमे मम हृदि न स्थीयते न तिष्ठति सौदामनी विद्युदिव हे सौम्य ॥ २७ ॥ नन्वेवं जानतः कथं मोहस्तत्राह भूमेर्भारस्यावतारार्थं यदोः कुले योऽवतीर्णोऽस्ति तस्येश्वरस्य विधिं रचनां को नु पुमान् अन्यथा विधुनोति करोति न कोऽपि ''दैवं पुरुषकारेण को व्यपोहितुमिच्छति'' इत्युक्तेः ॥ २८ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

उपदेशमुपसंहरति—तस्मादिति । 'हे राजन्! हे प्रभो!' इति सम्बोधनद्वयेन 'तव विचारपूर्विकैव स्थितिर्युक्ता' इति सूचयति—तस्मात् पुत्राद्यासक्तेरनर्थमूलत्वादिमं लोकं धनपुत्रादिसर्वं स्वप्नमनोरथश्च तत्तेन तुल्यमनित्यं वीक्ष्य निश्चित्य आत्मना बुद्ध्या आत्मानं मन आयम्य वशीकृत्य शान्तः रागद्वेषादिरहितः सन् सर्वत्र समो भवेत्यन्वयः ॥ २५ ॥ एवं प्रतिबोधितो धृतराष्ट्रः प्राह—यथेति । 'अत्युदारस्य तव मूढेऽपि मय्येवं ज्ञानप्रदानमुचितमेव' इति सूचयन् सम्बोधयति—दानपते इति । यथा भवान् कल्याणीं शुभावहां वाचं वदति, तथा अनया वाचा न तृप्यामि । तत्र दृष्टान्तमाह—मर्त्य इति । मरणधर्मकः अमृतं प्राप्य अशित्वा यथा न तृप्यति तद्वदित्यर्थः ॥ २६ ॥ 'उदासीनो माभूत्' इत्याशयेन प्रेमातिशयं सूचयन् सम्बोधयति—सौम्येति । यद्यपि भवतो वाक् सूनृता मधुरा हिता च तथापि चले व्याकुले मम हृदि न स्थीयते प्रतिष्ठिता न भवति । तत्र दृष्टान्तमाह—विद्युदिति । सुदामा पर्वतस्तत्र भवा सौदमिनी, सा यथा स्फटिकमये स्फुरिता झटित्येव लीयते तद्वदित्यर्थः । सुदामा माला तदाकारा वा । हृदश्चाञ्चल्ये हेतुमाह पुत्रानुरागविषम इति ॥ २७ ॥ ननु 'एवं जानतोऽपि तव कथमयं सम्मोहः, मनः समाधीयताम्' इत्यत्राह—ईश्वरस्येति । ईश्वरस्य विधिं चिकीर्षितं को नु पुमान् अन्यथा विधुनोति अन्यथा कर्तुं शक्नोतीत्यर्थः । 'कोसावीश्वरः, किं च तच्चिकीर्षितम्' इत्यपेक्षायामाह—भूमेरिति । मत्पुत्रादिवधेन भूमिभारस्यावताराय अपनयनाय यो यदोः कुलेऽवतीर्णोऽस्ति स श्रीकृष्ण एवेश्वरः । तथाच तद्भक्तद्रोहस्य तच्चिकीर्षितदुर्योधनादिवधानुगुणत्वात्तदिच्छयैव अयं मम मोह इत्याशयः ॥ २८ ॥

अन्वितार्थप्रकाशिका

तस्मादिति ॥ हे राजन्! हे प्रभो! तस्मात्पुत्राद्यासक्तेरनर्थमूलत्वादिमं लोकं धनपुत्रादि सर्वं स्वप्नश्च माया च मनोरथश्च तत्तेन तुल्यमनित्यं वीक्ष्य निश्चित्य आत्मना बुद्ध्या आत्मानं मन आयम्य वशीकृत्य शान्तः रागद्वेषादिरहितः सन् सर्वत्र समो भव ॥ २५ ॥ यथेति ॥ हे दानपते अक्रूर! यथा भवान् कल्याणीं शुभावहां वाचं वदति तथा अनया वाचा न तृप्यामि अलमिति न मन्ये । यथा मर्त्यः अमृतं प्राप्य न तृप्यति तथा ॥ २६ ॥ तथापीति ॥ हे सौम्य! यद्यपि भवतो वाक् सूनृता मधुरा हिता च तथापि पुत्रानुरागेण विषमे चले चञ्चले व्याकुले च मम हृदि न स्थीयते न तिष्ठति । आर्षः प्रयोगः । विस्तरस्तु सरस्वती प्रादुरभाविं यत्रेति चतुर्थस्कन्धषोडशाध्याये द्रष्टव्यः । यद्वा । तया वाचेति तृतीयाविपरिणामः न स्थीयते न स्थिरीभूयते । सुदामा पर्वतो मेघो वा तेनैकदिक् तत्र भवा वा सौदामिनी विद्युत् सा यथा तत्र तत्र स्फुरिता झटित्येव लीयते तद्वदित्यर्थः । यद्वा । सुदामा माला तस्या इयं सौदामिनी तदाकारा ॥ २७ ॥ जानन्नप्यहं मुह्यामीत्यत्र कारणमाह—ईश्वरस्येति ॥ ईश्वरस्य विधिं चिकीर्षितं मायां वा को नु पुमान् अन्यथा अन्यथाकृत्वा विधुनोति अतिक्रामति य ईश्वरः भूमेर्भारावताराय यदोः कुलेऽवतीर्णः अस्ति तथा च भूभारहरणाय ईश्वरस्यैवेयमिच्छेति ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्व प्रश्नमायारणभूमौ प्रेतादियुद्धरूपा च मनोरथश्च तेषां समाहारस्तत् यथा तथा इमं लोकमनित्यं वीक्ष्य आत्मनाबुद्ध्या आत्मनं मानसं आयम्य नियम्य स्वकीयेषु च समः शान्तः कामक्रोधलोभादिरहितो भवः ॥ २५–२६ ॥ तथापि सूनृतासमीचीना वाणी पुत्रानुरागेण सुतस्नेहेन विषमे पाण्डवेषु समत्वहीने चले चपले हृदि अन्तःकरणेन स्थीयते यथा सुदामा मेघस्तत्र भवाविद्युन्मेघेन स्थिरा यद्वा सुदामा पर्वतस्तत्रागताविद्युदिव तस्मिन्स्फटिके पाषाणमये पर्वते सह सैवागता विद्युद्यथा तत् प्रकाशाधिक्याल्लीयते न तु दृश्यते यद्वा सुदामा सुष्टुमाला तत्तुल्या इयं सौदामिनी विद्युद्यथा एकत्र न स्थीयते तद्वदित्यर्थः ॥ २७ ॥ यदुःकुले यः अवतीर्णः तस्येश्वरस्य विधिं कर्त्तव्येच्छां ॥ अन्यथा वैपरीत्येन कः पुमान् विधुनोति करोति न कोपीत्यर्थः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उपदेशमुपसंहरति ॥ तस्मादिति ॥ हे राजन्, तस्मात्तत्त्वस्थितेरेवंविधत्वात्, इममनुबन्ध्यादिसहितं देहं, लोकं च, स्वप्नमायामनोरथं स्वप्नादिवदनित्यं, वीक्ष्य ज्ञात्वा, आत्मना बुद्ध्या, आत्मानं मनः, आयम्य नियम्य, हे प्रभो, समः सर्वत्र समबुद्धिः सन्, शान्तः रागद्वेषादिभिर्निर्मुक्तः, भव ॥ २५ ॥ एवं प्रबोधितो धृतराष्ट्रः प्राह चतुर्भिः ॥ यथेति ॥ हे दानपते दानाधिप, मूढमप्येवं ज्ञानप्रदानेन संजीवयिषोस्तवौदार्यमनितरसाधारणमिति संबोधनाभिप्रायः। यथा, भवान् कल्याणीं कल्याणावहां; वाचं वदति, तदा, अनया वाचा, मर्त्यः मनुष्यः, अमृतं प्राप्ये, यथा तथा, न तृप्यामि, निरतिशयहितावहा त्वद्वागिति भावः ॥ २६ ॥ तथापीति ॥ हे सौम्य, भवतः वाक्, इति शेषः। सूनृता मधुरा हिता च। तथापि पुत्रानुरागविषमे पुत्रानुरागहेतुना विषमतामापन्ने इत्यर्थः। चले हृदि, सुदामा पर्वतस्तत्र भवा सौदामिनी विद्युत्, सुदाम्नि, यथा तथा, न स्थीयते। सुदाम्नि हि स्फटिकशिलामये स्फुरिता तडिद्यद्वल्लीयते तद्वदित्यर्थः ॥ २७ ॥ नन्वेवं जानतोऽपि तवायं कथं मोह इत्यत आह ॥ ईश्वरस्येति ॥ ईश्वरस्य विधिं चिकीर्षितं, को नु को वा पुमान् अन्यथा विधुनोति करोति। कोऽसावीश्वर इत्यत आह। यः भूमेः, भारावताराय मत्पुत्रतदनुबन्ध्यात्मकं भूभारमवतारयितुमित्यर्थः। यदोः कुले, अवतीर्णः। तस्येश्वरस्येति सम्बन्धः। मत्पुत्रसंजिहीर्षात्मकभगवच्चिकीर्षानुगुणमेव तन्मायामोहिता मन्मनीषा प्रवर्त्तते इति भावः ॥ २८ ॥

श्रीहरिसूरिविरचितं भक्तिरसायनम्

तस्मादिति : १०.४९.२५.

येषामर्थं प्रयत्नः स्फुरति तव महान् वक्रगामी त एते सर्वेऽप्यर्थानुबन्धा न पुनरुपनतत्वत्कृताघांशभाजः।
जानन्नेवं विहाय स्वपरमतिमिमां शान्तचित्तो यतात्मा धर्मर्द्धौ सन् परस्मिन्निह च सुखकरं भव्यमेवं चिनुष्व ॥ ५२ ॥

सर्वत्राकुण्ठशक्तिर्जगति मतिमतामग्रगण्यः स्वतोऽहं शूरख्यातप्रतापः प्रगुण - नयचणो नाहमस्म्यन्यबोध्यः।
एवं चेद्धक्षि कुक्षिम्भरिरपि मनुते स्वेषु विश्वंभरत्वं स्वस्मिन् किं तावताऽस्मात् त्रिजगदनुमतिर्यत्र वाक् सैव साध्वी॥ ५३ ॥

अस्त्येषा दुर्निवारा रणरसचतुरा वाहिनी साऽवनीशा योद्धारोऽर्कप्रतापप्रतिनिधिमहसः पूरिताशा च सम्पत्।
राजन् सत्योक्तिरेवं सति शुभदविधावन्यथा व्यर्थमेतत् सर्वं स्यादक्षसङ्गो गतनयन इवैषाऽस्ति तेऽद्धाऽनुभूतिः ॥ ५४ ॥

वर्षन्त्यम्बुधराः परन्तु पुरुषाद्दृष्टेन सस्योदयः सन्तस्तत्त्वमुदीरयन्ति परमानन्दस्तु सद्भाग्यतः।
एवं भूरि मयोपदिष्टमपि सत्त्वच्छ्रोत्रयोश्चासकृद् यत्सम्प्रत्यजनीति निश्चिनु मनस्येतद्विधेश्चेष्टितम् ॥ ५५ ॥

मुख्यं धामं दुराग्रहस्य सहसद्वैधुर्यधुर्यास्पदं यच्चाशान्तरसस्य पात्रमवनौ कामस्य लोभस्य च।
वृद्धेऽप्याश्रितदूष्यपाकचरिते तद्बालिशत्वं त्वयि स्पष्टं दृश्यमपि प्रवक्तुमधुना जिह्वैव जिह्रेति नः ॥ ५६ ॥

पथ्यं तावकमेव चेतसि चिरं संचिन्तयन्नच्युतस्त्यक्त्वा कार्यशतान्यतीव मतिमान्वाग्मीति यं प्राहिणोत्।
तस्याप्यत्र ममेदृशी चतुरता सर्वाऽपि सद्वक्तृता त्वामास्पृश्य दुराग्रहग्रहिलमामुक्तस्मयाऽभून्नृप ॥ ५७ ॥

अस्ति द्रोणप्रधानं यदपि तव गृहं मुख्यदुर्वर्णयुक्तं गाङ्गेयाढ्यं तथा सन्मणिगणखचितं सर्वदैवं तथापि।
भ्राजत्पद्मं सुशङ्खं मकरविलसितं नीलकान्ति मुकुन्दं लब्ध्वा स्वानन्दभाजां तव निखिलमिदं तुच्छमेवास्ति तेषाम् ॥ ५८ ॥

धृत्वा पाण्डवपक्षपातमपि मे कुर्यात् किमेषोऽखिलक्ष्मेशस्येत्यभिमानदुर्विलसितां गाथां वृथा मा कृथाः।
सत्यं सत्यमवेहि यस्य हि दृशोलेशं रुषाऽक्तं विपन् मूलं प्राहुरमन्दसंपदुदयं जातानुकम्पं बुधाः ॥ ५९ ॥

यत्प्रोक्तं परिणामसौख्यदममुत्राप्यत्र कीर्त्यास्पदं सद्यः कर्णमनःकठोरमिति चेन्न त्वं वच; श्रोस्यसि।
सत्यं वच्मि ततो न हानिरथवा लाभोऽपि नः किन्त्वलं प्रेष्ठं स्वं भविताऽत्यनिष्टमथवा पश्य त्वमेवान्ततः ॥ ६० ॥

यथा वदतीति : १०.४९.२६.

यथा वदति कल्याणी तद्वाणीति विदन्नपि। नाङ्गीचकार तच्चित्रं नृपः प्रज्ञेक्षणोऽपि सः ॥ ६१ ॥

दातुर्या मधुरा वाणी मन्ये तदमृतं भुवि। यद्दानपतिवाचं तां तुलयामास तेन सः ॥ ६२ ॥

अभिनन्द्यं द्विजैः सर्वैः सन्मानसकृतास्पदम्। साधूदितामृतं चित्रं धृतराष्ट्रोऽपि नापिबत्॥ ६३ ॥

तथापीति : १०.४९.२७.

जाड्यान्वितं च मलिनं धृतराष्ट्रचित्तं युक्तं तदपि घनतां हि तमःप्रसारि।
युक्तं तदुक्तिरपि तत्र हि चञ्चलाऽऽसीद्यच्चाऽऽस सत्पथपराङ्मुखमद्भुतं तत् ॥ ६४ ॥

ईश्वरस्येति : १०.४९.२८.

यद्भीत्या पवनश्चरत्यनुदिनं भास्वानुदेत्यन्वहं वह्निस्तापयतीह वर्षति भुवि श्रीमानमर्त्याधिपः।
मृत्युर्यद्विहितानुशासनगतिः सर्पत्यहो प्राणिधस्तस्य श्रीजगदीशितुर्बत विधेः के वा वयं लङ्घने ॥ ६५ ॥
यं साधुसङ्घा निजमानसेषु हंसायितं बिभ्रति योगभाजः।
कंसादिनाशाय स चावतीर्णः कं साधयेत् स्वेष्टमलं न चार्थम् ॥ ६६ ॥
भूभूरिभार-हरणाय कुले यदूनामाविर्बभूव हरिरेष च भक्तवश्यः।
कुन्तीभुवोऽस्य हि पदाब्जरता हृदीति ज्ञात्राऽप्यकारि तदुपेक्षणमेप मोहः ॥ ६७ ॥

कृष्णप्रिया

महाराज धृतराष्ट्र! सौहार्द भाव से कह रहा हूँ कि इस नश्वर लोक को, स्वप्न माया और मनोरथ के समान समझो और अपनी आत्मा से अपने मन को वशकर शान्त एवं समदृष्टि बनिए। आप प्रभु हैं समर्थ हैं ॥ २५ ॥ धृतराष्ट्र जी ने कहा हे दानपते? आप की अमीमयी कल्याणदायिनी मुझे पिला रहे हैं। भगवन् अमृत पीने पर जैसे तृप्ति नही होती–जीव नहीं अघाता वैसे मैं भी इस वाणी का पान कर नहीं अघाता ॥ २६ ॥ हे सौम्य? हे सज्जन? हे समदृष्टि सन्त? आप की वाणी सुधामयी ही है लेकिन मैं लाचारवश हूँ मैं क्या करूँ? पुत्रों के अनुराग मोह से विषम विकृत चञ्चल चित्त में स्थिरता नहीं पाती जैसे सुदाम पर्वत के शिखर पर बीजली नहीं टीकती ॥ २७ ॥ अक्रूरजी? जिस भगवान् ने भूमि के भार को उतारने के लिए यदुकुल में अवतरण किया है—उसके विधान को अन्यथा करने की शक्ति किसमें रही है ॥ २८ ॥

यो दुर्विमर्शपथया निजमाययेदं सृष्ट्वा गुणान् विभजते तदनुप्रविष्टः।
तस्मै नमो दुरवबोधविहारतन्त्रसंसारचक्रगतये परमेश्वराय ॥ २९ ॥

श्रीशुक उवाच

इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः। सुहृद्भिः समनुज्ञातः पुनर्यदुपुरीमगात् ॥ ३० ॥
शशंस रामकृष्णाभ्यां धृतराष्ट्रविचेष्टितम्। पाण्डवान् प्रति कौरव्य यदर्थं प्रेषितः स्वयम् ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे[1] दशमस्कन्धे[2] [3]एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

समाप्तमिदं दशमस्कन्धस्य पूर्वार्धं

राजसप्रमेयप्रकरणञ्च समाप्तम्।

श्रीकृष्णार्पणमस्तु

कर्दमक्षमा

अन्वयः—यः, दुर्विमर्शपथया, निजमायया, इदम्, सृष्ट्वा, तदनुप्रविष्टः, गुणान्, विभजते, दुरवबोधविहारतन्त्रसंसारचक्रगतये, परमेश्वराय, तस्मै, नमः ॥ २९ ॥ श्रीशुक उवाच—सः, यादवः, इति, नृपतेः, अभिप्रायम्, अभिप्रेत्य, सुहृद्भिः, समनुज्ञातः, पुनः, यदुपुरीम्, अगात् ॥ ३० ॥ हे कौरव्य! पाण्डवान्, प्रति, यत्, धृतराष्ट्रविचेष्टितुम्, ज्ञातुम्, प्रेषितः, तदर्थम्, स्वयम्, रामकृष्णाभ्याम्, शशंस ॥ ३१ ॥

इति श्रीमद्भागवते दशमस्कन्धे पूर्वार्द्धे राजसलीलाप्रकरणे प्रमेयप्रकरणे एकोनपञ्चाशत्तमोऽध्याये अन्वयाः सम्पूर्णाः ॥ ४९ ॥

—अध्याय ४९ सम्पूर्ण—

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतस्तमेव नमस्यति। य इति दुर्विमर्शपथया अवितर्क्यमार्गया गुणान्कर्माणि तत्फलानि च विभजते विविच्य ददाति। दुरवबोधो यो विहारस्तस्य क्रीडा स एव तन्त्रं प्रधानं मुख्यं कारणं यस्य संसारचक्रस्यात एव तस्य गतिर्यस्मात्तस्मै नम इति ॥ २९ ॥ अभिप्रेत्य ज्ञात्वा ॥ ३०–३१ ॥

इति श्रीभा० म० दशमस्कन्धे पूर्वार्धे टीकायामेकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

समाप्तमिदं दशमस्कन्धपूर्वार्द्धम्।

---

[1] वैयासक्यामष्टादशसाहस्र्यां संहितायां–प्रा. पा.। [2] पूर्वार्द्धे–प्रा.। [3] अष्टचत्वारिंशोऽध्यायः विज.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतस्तन्मायाऽपाकर्तुमशक्याऽतो हेतोः। तमीश्वरम्। दुरवबोधो ज्ञातुमशक्यः। अत एव दुर्ज्ञेयविहारैककारणत्वादेव। तस्य संचारचक्रस्य। "तन्त्रं कुटुम्बकृत्ये स्यात्सिद्धान्ते चौषधोत्तमे प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे। श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके। इतिकर्तव्यतायाञ्च" इति मेदिनी अस्माभिर्बहिरङ्गैः परमस्वतन्त्रोऽसौ दूरत एव नमस्कार्य एवेत्याह — य इति। तैर्व्याख्यातम्। तत्रावतारिकायां निजवैषम्यहानेच्छाहेतोरिति शेषः। अवितर्क्यमार्गया ज्ञानातीतप्रवृत्तिकत्वात्परिहर्तुमशक्यया। न चोच्चनीचसुखदुःखविसर्गे तस्य वैषम्यमित्याह-कर्माणीति। कर्माणि पूर्वकर्मानुसारेण विधिनिषेधलक्षणानि। शास्त्रमुखेन व्यवस्थापयति—फलानि सुखदुःखलक्षणानि चोत्पादयतीत्यर्थः। न चैवं तस्यैश्वर्यं कर्माधीनमित्याह—दुरवबोधेति। अनादित्वादनन्तानि जीवानां नानाकर्माणि तद्विहारेच्छानुसारेणैवोदयन्त इति भावः। अतः परमेश्वराय वशीकृतसर्वत्वेन तन्नाम्ने॥ २९॥ इतीत्थम्। नृपतेर्धृतराष्ट्रस्य। सोऽक्रूरः। सुहृद्भिर्विदुरादिभिः। इतीदृशं वैषम्यापरित्यागलक्षणम्। नृपतेरिति समत्वेन युधिष्ठिरराज्ये स्वराजत्वहानिशंकयेति भावः। सुहृद्भिः पांडवादिभिः॥ ३०॥ यदर्थं धृतराष्ट्रविचेष्टितज्ञानार्थम्। कौरव्येति-त्वमपि तद्वंश्यत्वात्तत्परायणो भवेत्यभिप्रायः। पाण्डवान्प्रति विचेष्टितम्। अतः क्रौर्यबहिर्मार्दवाभ्यां विविध चेष्टितम्। यदर्थं यद्विचेष्टितज्ञानार्थं प्रेषितः, ताभ्यामेव। हे परेव्येति-त्वत्पूर्वजानां कुरूणां क्षयकारणं तदेव, तच्च त्वया ज्ञायत एवेति भावः॥ ३१॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे एकोनपञ्चाशत्तोऽध्यायः॥ ४९॥

॥ समाप्तं चेदं दशमस्कन्धपूर्वार्द्धम्॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अस्माभिस्तु बहिरङ्गैः परम स्वतन्त्रोऽसौ तदर्थं दूरतो नमस्कार्य एवेत्याह। य इति। तैर्व्याख्यातं तत्रावतारिकायां निजवैषम्यहानेच्छाहेतोरिवेति शेषः। अवितर्क्यमार्गयेति। ज्ञानातीतप्रवृत्तिकत्वात् परिहर्तुमशक्ययेत्यर्थः। नचोच्चनीचसुखदुःखविसर्गे तस्य च वैषम्यमित्याह। कर्माणीति। कर्माणि पूर्वकर्मानुसारेण विधिनिषेधलक्षणानि शास्त्रमुखेन व्यवस्थापयति सुखदुःखानि चोत्पादयतीत्यर्थः। न चैवं तस्यैश्वर्यं कर्माधीनमित्याह। दुरवबोधेति। अनादित्वादनन्तानि जीवानां नानाकर्माणि तद्विहारेच्छानुसारेणैवोदयन्ते इति भावः। अतः परमेश्वराय वशीकृतसर्वत्वेन तन्नाम्ने इति॥ २९॥ इतीदृशं वैषम्यापरित्यागलक्षणं नृपतेरिति समत्वेन श्रीयुधिष्ठिरराजत्वे स्वराजत्वहानिशङ्कयेति भावः। सुहृद्भिः पाण्डवादिभिः॥ ३०॥ पाण्डवान् प्रति विचेष्टितमिति अन्तःक्रौर्यबहिर्मार्दवाभ्यां विविधं चेष्टितं तदर्थं यद्विचेष्टितज्ञानार्थं प्रेषितः ताभ्यामेव हे कौरव्येति त्वत्पूर्वजानां कुरूणां क्षयकारणं तदेव तच्च त्वया ज्ञायत एवेति भावः॥ ३१॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकोनपञ्चाशत्तमोऽध्यायः॥ ४९॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नन्वेवं स्वातन्त्र्याभावेन विधिनिषेधवाक्यानां वैयर्थ्यं स्यात्, ततश्च पुण्यपापासिद्ध्या तत्तत्फलभोगो न घटते, सत्यम्, तथापि तस्य परमेश्वरतया दुरूहलीलत्वेन तत्तत् सर्व्वं सम्भवत्येवेति परमेश्वरत्वं वर्णयन् प्रणमति—य इति। दुर्विमर्शोऽतर्क्यः पन्था ज्ञानोपायोऽपि, किं पुनस्तत्त्वं यस्यास्तया निजया स्वाधीनया माययेति परमेश्वरत्व-प्रदर्शनाय परमाद्भुतशक्तिमत्त्वमुक्तम्। इदं जगत्, अन्तर्य्यामितया अनुप्रविष्टः सन्निति गुणान् सुखदुःखादीन् तत्र भक्तान् प्रति सुखादीन्, अभक्तादीन् प्रति दुःखादीन् विभजते। ननु कचिद्भक्ता अपि दुःखिनो दृश्यन्ते, तत्राह—दुखबोधेति; दुखबोधश्चासौ विहारतन्त्रसंसारचक्रगतिश्च, सदा सुखिनोऽपि भक्ताः कदाचिद्दुःखिन इव यत् प्रतीयन्ते, एतदेव तस्य दुखबोधत्वमित्यर्थः। ननु सर्व्वानेव सुखिनः, किं नवनवानिव? तत्राह—विहारेति। भक्तैः सह विहार एव तन्त्रं मुख्यं यत्र तस्य संसारचक्रस्य गतये विहारार्थमित्यर्थः। नन्वेवं तस्य वैषम्यं स्यात्, तत्राह—परमेश्वरायेति। परमस्वतन्त्राय; यद्वा, तादृशसृष्ट्यादौ सर्व्वत्रैवायं हेतुः। तदिच्छाकारणं महादुर्बोधमेव, परत्वादिति भावः। यद्यपि तात्त्विकोऽयं सिद्धान्तस्तथापि तत्रानधिकारिणः शाठ्य एव पर्य्यवस्यति, सर्व्वत्र तादृशभावाभावात् केवलं स्वदोष-परिहारार्थमेव तदुक्तेरिति ज्ञेयम्॥२९॥ 'इति' ईदृशं वैषम्यापरित्यागलक्षणम्, नृपतेरिति समत्वेन श्रीयुधिष्ठिरस्य राजत्वे सति तस्य राजाभिमानहानिरिति भावः। सुहृद्भिः पाण्डवादिभिः सम्यक् प्रीतिपूर्व्वक दृढतया अनुज्ञातः सन् यदुपुरीं श्रीमथुरामगात्, यतो यादवः, अतएवोक्तम्—यदुपुरीमिति॥ ३०॥ पाण्डवान् प्रति चेष्टितं व्यवहारम्। पाठान्तरे—अन्तःक्रौर्य्य-बाह्यमार्दवाभ्यां विविधं चेष्टितम्, यदर्थं यच्चेष्टितज्ञानार्थं प्रेषितस्ताभ्यामेव। हे कौरव्येति त्वत्पूर्व्वजानां कुरूणां क्षयकारणम्, तदेव, तच्च तद्वंश्यत्वात्त्वया ज्ञायत एवेति भावः॥ ३१॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यामेकोनपञ्चाशत्तमोऽध्यायः॥ ४९॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

दुर्विमर्शपथया इतरैर्ज्ञातुमशक्यप्रकारया मायया प्रकृत्या गुणान् विभजते ब्रह्मादिष्वित्यर्थः । अन्यैर्दुरवबोधः ईश्वरस्य विहारः क्रीडा तादृशविहारतन्त्रात्मिकसंसारचक्रगतिप्रवर्तनायेत्यर्थः ॥ २९-३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

युक्तश्चैतत् दुरवबोधमायत्वात् सर्वनियन्तृत्वाच्चेत्यभिप्रयन् केवलं तमेवेश्वरं प्रणमति । य इति । य ईश्वरः दुर्विमार्गपथया इतरैर्ज्ञातुमशक्यप्रकारया स्वप्रकृत्या इदं ब्रह्मादि तनुजालं सृष्ट्वा तनुषु चतुर्मुखादि तनुषु प्रविष्टः तत्तत्तन्वधिष्ठातृजीवान्तरात्मतया प्रविष्टः तत्सृष्ट्वा तदेवानुप्राविशदिति वत्स्थित्यर्थोऽत्रानुप्रवेश उक्तः गुणान् शब्दादिविषयान् विभजते ब्रह्मादिभ्य इति शेषः । प्रतिनियतान् शब्दादीनेभ्यो विभज्य प्रयच्छतीत्यर्थः । अन्यैर्दुरवबोध ईश्वरस्य विहारः क्रीडा तादृशविहारतन्त्रात्मिका संसारचक्रगतिर्यस्मात्तस्मै सर्वोत्कृष्टायेश्वराय नमः ॥ २९ ॥ इतीति । स यादवोऽक्रूरः नृपतेर्धृतराष्ट्रस्याभिप्रायमभिप्रेतं ज्ञात्वा सुहृद्भिः पाण्डवादिभिः सम्यगनुज्ञातः पुनर्मथुरामाजगाम ॥ ३० ॥ शशंसेति । हे कौरव्य पाण्डवान्प्रति यद्धृतराष्ट्रस्य विचेष्टितं कृतं विषप्रदानादि यत्तस्य चेष्टितस्य विज्ञानार्थमेव स्वयं भगवता प्रेषितस्तत्सर्वं कृष्णरामाभ्यां शशंस कथयामास ॥ ३१ ॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य श्रीशैलगुरोः सुतेन तच्चरणसेवासमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवीरराघवविदुषा
विलिखितायां श्रीमद्भागवतचन्द्रचन्द्रिकायां दशमस्कन्धपूर्वार्धव्याख्यायामेकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

दुर्विमर्शपथया दुर्विज्ञेयमार्गया दुरवबोधः दुर्ज्ञेयः विहारः सृष्ट्यादिव्यापारलक्षणा क्रिया तस्य तन्त्रधीना संसारचक्रगतिः संसारवृत्तिः प्रकारो यस्य स तथा तस्मै ॥ २९ ॥ इत्यभिप्रेत्येति ज्ञात्वा ॥ ३०-३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां अष्टचत्वारिंशोऽध्यायः ॥ ४८-४९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अतस्तमेव नमस्यति । य इति । दुर्विमर्शपथया दुर्वितर्क्यमार्गया गुणान् विभजते शान्तघोरमूढरूपत्वेन विभक्तान् करोति दुरवबोधं दुर्गमं विहारतन्त्रं लीलासिद्धान्तो यस्य संसारचक्रादस्मात् गतिरुद्धारो यस्मात् स च स च तस्मै धृतराष्ट्रं प्रबोधयेति त्वां मत्प्रबोधार्थं प्रेरयति मा प्रबुध्यस्वेत्यबोधार्थं माञ्च प्रेरयतीत्येवं विषमा तस्य लीला अतोऽस्य सिद्धान्तं को जानीयादिति भावः । नच त्वन्तु संसारचक्रे पतित एवेत्यपि वाच्यं ममापि तस्मादेव गतिर्भाविनीति भावः ॥ २९ ॥ अभिप्रायं वैषम्यापरित्यागरूपमभिप्रेत्य ज्ञात्वा ॥ ३०-३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । ऊनपञ्चाशत्तमोऽत्र दशमेऽजनि सङ्गतः ॥ ४९ ॥

गूढार्थदीपिनी

यो मायया इदं प्राणिजातं सृष्ट्वा तत्र प्रविष्टश्च गुणान् गुण कार्यशान्तरागद्वेषादीन् विभज्य ददाति तस्मै परमेश्वराय नमः इत्यन्वयः । कथम्भूताय । दुःखबोधः विहार एव तन्त्रं मुख्यं कारणं यस्य तत् एवंभूतं यत् संसारचक्रं तस्य गतिः प्रवृत्तिर्यस्मात् तस्मै ॥ २९ ॥ यादवोऽक्रूरः । सुहृद्भिः विदुरादिभिः ॥ ३० ॥ पाण्डवान् प्रति यत् विरुद्धं चेष्टितं तत्सर्वं शशंस कथयामासेत्यन्वयः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे सनाढ्यवंशावतंसपण्डितप्रवरश्रीराममूर्तिशास्त्रि
पौराणिकविरचितायां गूढार्थदीपिन्यामेकोन्पञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

दुर्विमर्शपथया दुर्बोधमार्गया निजमायया "मायान्तु प्रकृतिं विन्द्यान्मायिनं तु महेश्वर"मिति श्रुत्युक्तया निजस्य सर्वेश्वरस्य मायया इदं विश्वं सृष्ट्वा तदनुप्रविष्टः सन् गुणनिबन्धनानि त्रिविधानि कर्माणि तत्फलानि च विभज्य ददाति पूर्वपूर्वसृष्ट्यनरोधेन जीवेभ्य इति शेषः । दुरवबोधो भगवद्विहारः क्रीडा स तन्त्रं मुख्यं कारणं यस्य संसारचक्रस्य तस्य गतिर्यस्मात्तस्मै नमः ॥ २९ ॥ नृपतेर्धृतराष्ट्रस्य अभिप्रेत्य अवधार्य ॥ ३०-३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकोनपञ्चाशाध्यायार्थप्रकाशः ॥ ४६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गन्धर्वराट् पवनावेश इत्याद्युक्तेः स्वस्वरूपानुरूप्येण हरिं नमस्यति ॥ य इति । यो दुर्विमर्शः पन्था यस्याः सा तया निजमाययेच्छया स्वाधीनया प्रकृत्योपादानभूतया गुणान्द्वारीकृत्वा चेदं जगत्सृष्ट्वा तदनुप्रविष्टः सन् तत्तत्कर्मानुगुणान्गुणान्फलादींश्च विभजते विभज्य ददाति । दुःखबोधो दुज्ञयो विहारो लीलां सैव तन्त्रं कारणं यस्याः संसारचक्रस्य तच्चक्रवालस्य गतिर्येन स तस्मै चक्रं परिवर्तनं वा तस्मै परमेश्वराय नमः । गुणान्विभजत इति चतुर्थ्यन्तं वा । य इः सृष्ट्वा तदनुप्रविष्टस्तस्मै गुणान्विभजते दुरवबोधसंसारचक्रगतये परमेश्वराय नम इत्यन्वयः ॥ २९ ॥ स यादवोऽक्रूरो नृपतेर्धृतराष्ट्रस्याभिप्रायमाशयमित्यभिप्रेत्य ज्ञात्वा सुहृद्भिः समनुज्ञातः पुनर्यदुपुरीं मधुरामगात् ॥ ३० ॥ हे कौरव्य परीक्षित् यदर्थं स्वयं प्रेषितः । पाण्डवान्प्रति धृतराष्ट्रविचेष्टितं रामकृष्णाभ्यां शशंस । रामकृष्णाभ्यामिति प्राग्रामनामग्रहणेन दुर्योधनादिपक्षपातो रामस्येति तथा सन्धिनीभिसन्धिस्मितथेति जिह्मगति मनोजिह्मं च विशेषं ध्वनयामासेति तात्पर्यं ज्ञेयम् । यस्य शेष एव द्वारं हर्यपरोक्षस्येति तदवतारपुरस्करमिति राम आदौ गृहीत इति च मनोहरं । रघुनाथाधुना तव दयोदयं नेयाच्चेद्भैक्षचर्यैव तेषामिति सूचयितुं रामकृष्णाभ्यामित्युक्तिरित्यपि पक्षः सुमनोहर इत्यलम् ॥ ३१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां शमपूर्वार्धेऽष्टचत्वारिंशोऽध्यायः ॥ १०—४८ ॥

इति दशमपूर्वार्धः समाप्तः ॥ श्रीकृष्णार्पणमस्तु ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं भगवन्माहात्म्यं स्मृत्वा भगवन्तं नमस्यति । यो दुर्विमर्शेति । पूर्णो भगवान् कथमवतीर्णः किमर्थं वा अवतीर्ण इति सन्देहं वारयन् नमस्यति दुखेनापि विमर्शो विचारो न यस्येति एतादृशः पन्था यस्य मन्त्रादिवदन्यसामर्थ्यपक्षं व्यावर्त्तयति निजेति । भगवद्धर्माणामपि जिज्ञासा अशक्या यथा मर्यादामार्गस्यापि तत्र भगवतो विमर्शं कः करिष्यति—

अलौकिकास्तु ये भावा न तांस्तर्केण योजयेत् ।

इति निषेधश्च एतादृश्या मायया लोके कपटत्वेन प्रसिद्धयापीदं प्रसिद्धं जगत् सृष्ट्वा तत्र स्वयं सत्यस्वरूपः प्रविष्टः गुणान् सत्त्वादीन् उच्चनीचभावेन भजते पृथक्करोति यस्या मार्ग एव न ज्ञायते तया किं कश्चित् कर्त्तुं समर्थः मायासृष्टं वा कश्चित्प्रवेष्टुं प्रविश्य वा तुल्ये उच्चनीचतां सम्पादयितुम् अतो महानुभावो भगवानिति तस्मै नमः । किञ्च श्रुतौ काण्डद्वये पञ्चरात्रे इतिहासपुराणेषु च सहस्रधा सृष्टिनिरूपिता अतः केन साधनेन कथमेव करोतीति दुरवबोधो विहारतन्त्रः क्रीडापरिकरो यस्य संसारस्य तस्य चक्रं तस्यापि गतिर्यस्मात् तत्र वा गतिर्यस्येति भगवतः संसारः अहंताममतात्मकः न लौकिकवत् इच्छया सर्वं जायते इत्यतो लीलार्थमित्यध्यवसीयते भगवतोऽवताराः भगवच्छास्त्रं भगवदीयाः पुरुषाः पदार्थाश्च तेषां साधारणोपयोगाभावात् किमर्थं करणमिति नाशङ्कनीयं दुरवबाधत्वादेव ॥ २९ ॥ अतो भगवतः कार्यं जगत् भगवल्लीलावैष्णवप्रकारश्चेति उभयोर्दुर्ज्ञेयत्वात् परम एवेश्वरो भगवानीश्वरादेवालौकिकात् परमेश्वर उभयालौकिक इत्यनेन भगवतः संसारोऽयं भवदादयोऽस्मदादयश्च तदिच्छयैव प्रवर्त्तितुं योग्याः नतु स्वेच्छयेति उपदेशो वा ज्ञानं वा न विचारणीयमिति तूष्णी सर्वैः स्थातव्यमित्यभिप्रायं बुद्ध्वा ततो निर्गत इत्याह । इत्यभिप्रेत्य नृपतेरभिप्रायमिति । तस्य तद्वाक्यानङ्गीकारहेतुद्वयमाह । नृपतेरिति स यादव इति । राजवाक्यमङ्गीकर्त्तव्यं यदुवंशो भगवदवतारात यादवैश्च सुतरां तदङ्गीकर्त्तव्यं तदुत्कर्ष एवोक्त इति ततोऽत्रापि लौकिकन्यायेन सुहृद्भिर्भीष्मादिभिः सम्यगनुज्ञातो यदुपुरीं मथुरामगात् ॥ ३० ॥ स्वयं केवलमाज्ञाकारी न स्वतन्त्र इति ज्ञापयितुं रामकृष्णयोः स्थाने शशंस धृतराष्ट्रस्य विशेषेण चेष्टितं पाण्डवान् प्रति मारणपर्यन्तमुद्योगं ननु सतामेतदयुक्तमिति चेत्तत्राह । यदर्थं स्वयं प्रेषित इति । अधिकारिणो नायं दोषः कौरव्येति विश्वासार्थं स्वयं प्रेषित इत्यन्यद्वारापि कथनं व्यावर्त्तितम् अनेन पूर्वार्धान्तकरणेनाग्रे भगवतैव कर्तव्यमिति ज्ञापितम् एतावत्पर्यन्तं न साक्षाद्भगवता किञ्चित् कृतं किंत्वन्यानुरोधेनैवेति अतो भगवतो लीलाद्वयमन्यानुरोधेन करणं स्वतः करणमिति भगवतो भक्तानुरोधो निरूपितः—

इत्येवं भगवल्लीला भक्तविश्वासदायिनी । निरूपितातियत्नेन कृष्णपादाम्बुजाश्रया ॥
सर्वेषु पुष्टहृदयेषु निवेदयामि मार्गो यदा—भगवतो भवतामभीष्टः ।
भक्तिप्रकारसहितो हरिभावयुक्तो ज्ञेयस्तदा—विवृतिरेव सदा विचिन्त्या ॥
दशमस्कन्धविवृतिः पूर्वार्द्धे सुनिरूपिता । कृष्णपादाम्बुजे न्यस्ता श्रीपुष्पाञ्जलिरुज्ज्वलः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे श्रीमद्वल्लभदीक्षितविरचितायां सुबोधिन्यां षट्चत्वारिंशाध्यायायविवरणम् ॥ ४६–४९ ॥

श्रीसुबोधिनी-सारः

दुर्विमर्शोऽचिन्त्यः पंथा यस्यास्तया निजमायया इदं जगत् सृष्ट्वा तदनुप्रविष्टो यो गुणान् विभजते कर्मफलानि विविच्य ददाति दुरवबोधो दुर्ज्ञेयो यो विहारः क्रीडा स एव तंत्रं प्रधानं मुख्यं कारणं यस्य संसारचक्रस्य तस्य गतिर्यस्मात्तस्मै परमेश्वराय नमः ॥ २९ ॥ शुकोक्तिः । इत्येवं नृपतेर्धृतराष्ट्रस्याभिप्रायम् अभिप्रेत्य ज्ञात्वा सुहृद्भिः समनुज्ञातः स यादवोऽक्रूरः पुनर्यदुपुरीमगात् ॥ ३० ॥ पाण्डवान् प्रति धृतराष्ट्रस्य विचेष्टितं रामकृष्णाभ्यां शशंस यथाद् यदर्थं स्वयं प्रेषितः ॥ ३१ ॥

इति श्रीमद्भा० दशमस्कन्धे पूर्वार्द्धे सुबोधिन्यां टीकायामेकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥

पूर्वार्द्ध संपूर्णमिदम् । इति श्रीमदाचार्यचरणारविन्ददृढसेवा कृतहृदयगुरुश्रीजयगोविंदजिच्चरण प्रसादप्राप्तशमस्तविद्यासार पण्डितराम-
प्रतापविरचित श्रीमद्भागवत सुबोधिनीटीकायां दशमस्कन्धे पूर्वार्द्ध संपूर्णम् ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'कथं तदिच्छयापि मोहः सम्भवति' इती इत्यपेक्षायां तस्यान्तर्यामित्वं वदन् प्रणमति—य इति । दुर्विमर्शपथया अवितर्क्यमार्गया निजमायया स्वशक्तिरूपया प्रकृत्या इदं महादिशरीरजालं सृष्ट्वा तस्मिन्नन्तर्यामितया प्रविष्टः सन् गुणान् विभजते सत्त्वादिगुणकार्य—शान्तिरागद्वेषादीनुत्पादयति तस्मै परमेश्वराय नमः । ननु 'परमेश्वरस्य विश्वसर्गादिना किं प्रयोजनम्' इत्याशङ्क्य 'स्वविहार एव' इत्याशयेनाह—दुरवबोधो यो विहारः क्रीडा स एव तन्त्रं मुख्यं कारणं यस्य तस्य संसारचक्रस्य गतिर्भ्रमणं यस्मात्तस्मा इति ॥ २९ ॥ स यादवोऽक्रूरः नृपतेर्धृतराष्ट्रस्याभिप्रायमित्येवं परस्परं सम्भाषणेनाभिप्रेत्य ज्ञात्वा सुहृद्भिः पाण्डवादिभिः सम्यगनुज्ञातः पुनर्यदुपुरीं मथुरामगादित्यन्वयः ॥ ३० ॥ 'तव कुलेऽप्येवं विधा दुर्जना जाता' इत्याशयेन सम्बोधयति—कौरव्येति । यदर्थं धृतराष्ट्रवृत्तविज्ञानार्थं भगवता स्वयं प्रेषितस्तत्पाण्डवान्प्रति धृतराष्ट्रस्य विचेष्टितं विषप्रदानादि कृतं सर्वं रामकृष्णाभ्यां शशंस कथयामासेत्यन्वयः ॥ ३१ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसोद्भववर्णने । ऊनपञ्चाशत्तमोऽध्याय पाण्डवृत्तबोधकः ॥ ३ ॥

इति दशमपूर्वार्धटीका बालबोधिनी समाप्तिमगात् ॥

अन्वितार्थप्रकाशिका

य इति ॥ दुर्विमर्शपथया अवितर्क्यमार्गया निजमायया स्वशक्तिरूपया प्रकृत्या इदं महादिशरीरजालं सृष्ट्वा तस्मिन्नन्तर्यामितया प्रविष्टः सन् गुणान् विभजते सत्त्वादिगुणकार्यशान्तिरागद्वेषादीनुत्पादयन् तत्फलानि च ददाति दुरवबोधो यो विहारः क्रीडा स एव तन्त्रं मुख्यं कारणं यस्य तस्य संसारचक्रस्य गतिर्भ्रमणं यस्मात्तस्मै परमेश्वराय नमः ॥ २९ ॥ इतीति ॥ स यादवोऽक्रूरो नृपतेर्धृतराष्ट्रस्याभिप्रायमित्येवं परस्परं संभाषणेनाभिप्रेत्य ज्ञात्वा सुहृद्भिः पाण्डवादिभिः सम्यगनुज्ञातः पुनर्यदुपुरीं मथुरामगात् ॥ ३० ॥ शशंसेति ॥ हे कौरव्य ! यदर्थं धृतराष्ट्रवृत्तविज्ञानार्थं भगवता स्वयं प्रेषितस्तत्पाण्डवान् प्रति धृतराष्ट्रस्य विचेष्टितं विषप्रदानादिकृतं सर्वं रामकृष्णाभ्यां शशंस कथयामास ॥ ३१ ॥

कान्ते विलासिनि कलावति पद्मनेत्रे नित्यं त्वयि प्रियतमे रमते मनो मे ।
इत्थं भवन्तमुरुभावनया वदन्तं श्रीकृष्ण मां सुभजना अपि हा हसन्ति ॥ १ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । दशमस्योनपञ्चाशे व्यधाद्गङ्गासहायकः ॥

इति श्रीमद्भागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायामेकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

॥ समाप्तोऽयं दशमस्कन्धः पूर्वार्द्धः ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तमेव नमस्यन्नाह य इति यो हरिः दुर्विमर्शः अतर्क्यः पंथा वर्त्म यस्यास्तया निजमायया स्वकीयप्रकृत्या इदं विश्वं सृष्ट्वा तदनुप्रविष्टः तस्मिन्विकासितान्तर्यामिशक्त्या जीवानां यथा कर्मफलप्रदानाय प्रविष्टः सान्निध्यार्थः गुणान् शुभाशुभविषयान् देवमनुष्यादिदेहस्थितानां जीवानां कमनीयाकमनीयविषयभोगान् विभजते यथाकर्मविभज्यतेभ्यो ददातीत्यर्थः । दुरवबोधो दुर्ज्ञेयो यो विहारः श्रीकृष्णस्य रमणं स एव तंत्रं मुख्यं कारणं यस्य तथा भूतं यत्संसारचक्रं तस्मात् गतिर्मोक्षो येन तस्मै

परमेश्वराय नमः ॥ २९ ॥ यादवः सोऽक्रूरः ॥ अभिप्रेत्य ज्ञात्वा । पृथाविदुरादिभिः समनुज्ञातः अहं गच्छामि वहि गच्छेत्याज्ञप्तः पुनर्यदुपुरीं मथुरां ॥ ३० ॥ यदर्थं यस्मै कार्याय प्रेषितः प्रस्थापितः ॥ ३१ ॥

मधुरमधुरलालं दानवानां करालं नृपकुलपरिपालं नौमि गोपालबालं ।
व्रजजनवरमोदं सर्वमुक्तप्रणोदं हरिजनसुखनोदं मोक्षदर्पपयोदं ॥ १ ॥
श्रीमच्छ्रीसहजानंदस्वामिनं पुरुषोत्तम् । गोपालानंदनामाहं ध्यायेभक्तसुखप्रदम् ॥ २ ॥
दशमस्कंधपूर्वार्धं निगूढार्थप्रकाशकं व्याख्यानं साद्धमासाभ्यां संपूर्णं रचितं मया ॥ ३ ॥

इति श्रीगुरुकांतधर्मप्रवर्तकानंतकोटिजनसंसारसमुद्रोद्धारकदत्तनवजनमम् उग्रमूर्त्यादि स्वधामदर्शकसज्जनपद्मविकाशनाधर्मध्वान्तनाशक-दिनमणिगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके पुराणार्के श्रीमद्भागवतस्य दशमस्कन्ध-व्याख्याने पूर्वार्धे अक्रूरहस्तिनापुरगमननामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

युक्तं चैतद्दुरवबोधमायत्वात् सर्वनियन्तृत्वाच्चेत्यभिप्रयन् केवलं तमेवेश्वरं प्रणमति ॥ य इति ॥ य ईश्वरः, दुर्विमर्शपथया इतरैर्ज्ञातुमशक्यप्रकारया, निजमायया स्वप्रकृत्या, इदं महदादिगुणं सृष्ट्वा, तदनुप्रविष्टः महदादितनुषु प्रविष्टः तत्तत्स्वधिष्ठातृजीवान्तरात्मतया प्रविष्ट इत्यर्थः । 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति तात्पर्यतयोऽयानुप्रवेश उक्तः । एवं भूतः सन्, गुणान् शब्दादिविषयान्, विभजते महदादिभ्य इति शेषः । प्रतिनियतान् अन्तर्गतेभ्यो, विभज्य प्रयच्छतीत्यर्थः । दुरवपायो दुर्ज्ञेयः विहारः सृष्ट्यादिव्यापारलक्षणा क्रिया तस्य तथा आधीनः संसारचक्रगतः संसारप्रवृत्तिप्रकारो यस्य तस्मै तस्मै, परमेश्वराय सर्वोत्कृष्टेश्वराय, नमः ॥ २९ ॥ इतीति ॥ यादवो यदुकुलोत्पन्नः सोऽक्रूरः, नृपतेर्धृतराष्ट्रस्य, अभिप्रायं इत्युक्तप्रकारेण, अभिप्रेत्य ज्ञात्वा, सुहृद्भिः पाण्डवादिभिः, समनुज्ञातः सन्, पुनः यदुपुरीं मथुरां, अगात् आजगाम ॥ ३० ॥ शशंसेति हे कौरव्य कुरुकुलोत्पन्न नृपते, पाण्डवान् प्रति, यदर्थं यस्य चेष्टितस्य विज्ञानार्थमेव, स्वयं भगवता प्रेषितः, तत् धृतराष्ट्रस्य विचेष्टितं विषप्रदानादि, रामकृष्णाभ्यां, शशंस कथयामास ॥ ३१ ॥

श्रितजनसुखकारं नाशिताशेषभारं स्वजनहितनिविष्टं पालिताशेषशिष्टम् ।
हृतनिजजनदोषं नौमि सद्धर्मपोषं सुतिलकशुभभालं सर्वदा धर्मबालम् ॥ १ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धपूर्वार्धे एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

यो दुर्विमर्शेति : १०.४९.२९.

यः सृष्ट्वा रजसा चराचरमिदं सत्त्वेन रक्षंस्तमोभूम्ना संहरति प्रपञ्चरचना-स्वातन्त्र्यमादर्शयन् ।
तस्मै भक्तसुखार्पणाहितहृदे राज्ञा नमस्कुर्वता श्रीशादहं स्वदभीष्टसिद्धयनमतोऽमीति व्यबोध्याशयः ॥ ६८ ॥

इत्यभिप्रेत्येति : १०.४९.३०.

इति स्वयुक्तिविबोधितमाशयं समवबुद्ध्य नृपस्य स यादवः । निजसुहृद्भिर्हितानुमतिर्मुदा यदुपुरीं हरिपूर्णशुभां ययौ ॥ ६९ ॥

प्रभो राज्ञाऽऽरत्येपेत्युचितमवगम्यात्मनि सुधीर्विभक्तः स्वौत्सुक्यात्तदनु भुवि धर्मानुसरणम् ।
जनानन्यानन्धानुपदिशति चैवं स हि हरेः स्वरूपद्रष्टेति स्फुटमभय-दक्रूरचरितात् ॥ ७० ॥

शशंसेति : १०.४९.३१.

दृष्टो धर्मनृपः ससूनुरथ संतुष्टो मयाऽनामयं दृष्टोपथ्यसुखा पृथा सुखकराऽक्लिष्टोत्तरैर्बोधिता ।
स्पष्टोक्तैर्वचनैर्नृपोऽप्यधिसभं शिष्टोचितैर्बोधिता धृष्टोऽसौ न बुबोध तत्त्व पदं दृष्टोऽस्म्युपेत्य प्रभो ॥ ७१ ॥
श्रुत्वाऽक्रूरसमीरितं क्रमवशाद्गत्वा प्रभुर्हर्षितं नत्वा धर्मसुतेन चोक्तमखिलं तत्त्वार्थमाकर्ण्य च ।
कृत्वाऽऽश्वासनमस्य भक्तहितकृद् भूत्वा च दूतः स्वयं गत्वा भूपसभामिमं शुभगिरा स त्वार्थयाऽबोधयत् ॥ ७२ ॥
ज्ञात्वा चाशयमस्य पाण्डुतनयानुधृत्वा च युद्धोद्यमं धृत्वा चार्जुनसूततां निजरिपून् हत्वाऽखिलानाहवे ।
दत्त्वा राज्यममुष्य शान्तमनसे दत्त्वा च धर्माय तज्जीत्वाऽऽगून् सुखशेवधिं स सुगुरुर्गत्वाऽऽत्मनो धन्यताम् ॥ ७३ ॥
(। युग्मम्)

उपसंहारः

एवं स्वीयजनाऽवनव्यसनया सम्मानितः पूर्णया कामीव प्रियया द्रुतं सदयया स्वेष्टे नियुक्तः प्रभुः ।
कृत्वा कार्यमभीप्सितं निजजनैरानन्दितैरादृतो द्वार्वत्यां मुदितो वसन्निजजनै रेमे सरामश्चिरम् ॥ ७४ ॥

श्रीमच्छ्रीनाथपादाम्बुजरजविलसन्माधुरी साधुरीतिप्रख्यातालङ्कृतार्था चतुमणिरमणी तोदिदणीयं सुवाणी ।
स्वात्मानं सत्कृतार्थं कलयितुमतुलानन्दभाजं प्रवृत्ता दिव्ये श्रीशे चरित्रे न पुनरणुतरो हेतुरत्राभिमानः ॥ ७५ ॥

न भावो विभावोऽनुभावो न रीतिर्न चालङ्कृतिर्बोधिका किन्तु साध्व्याः ।
रमण्याः स्वभर्तुर्यथा प्रीतिरेका सुवाण्यास्तथा मेऽस्त्यतोऽहं कृतार्थः ॥ ७६ ॥

गोदावरीपरिसरोल्लसिताभिरामे श्रीनासिके निवसता हरिणा बुधेन ।
श्रीगोड्डवेन शिवराम-तनूभवेन गोविन्दचिन्तनकृतैष कृतः प्रबन्धः ॥ ७७ ॥

धामाभिधेयस्य रामा प्रविलसति रमा चन्द्रमा यस्य वामा श्यामा कान्तिश्च कामाधिकतरसुषमाऽखर्वमाहात्म्यसीमा ।
प्रेमा भक्तेष्वकामावृतिषु दृढगुणा[illegible]दधाना व्योमादिव्याप्तभूमा ह्यवतु स च मामीश्वरः कृष्णनामा ॥ ७८ ॥

श्रीशकल्पतरु - क्रीडाफल - भक्तिरसायने । मुदे भवतु साधूनामध्यायार्थनिरूपणम् ॥ ७९ ॥

इति श्रीमन्नासिकनिवासि-कविवर-हरिसूरिविरचिते श्रीमद्भागवतदशमपूर्वार्धोक्त-श्रीकृष्णचरित्रबीजविवरणे
भक्तिरसायने एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

हरिः ॐ तत्सत्

॥ श्रीशं वन्दे ॥

कृष्णप्रिया

जिसके पथ का प्रयत्न से भी विमर्श करना भी दुःशक्य है वैसी निजी माया से इस जगत की रचना कर अनन्तर इस जगत में प्रविष्ट होकर जो जगदीश्वर तीन गुणों का विभाग करते हैं और जो समझ में न आने वाले इस संसार चक्र को गतिशील करते हैं उस जगदीश्वर को नमस्कार है ॥ २९ ॥ श्री शुकदेव जी ने कहा राजन ! तीन मास निवास कर वृत्तांत धृतराष्ट्र के हार्द को जानकर यह यदुकुल दीपक अक्रूरजी सुहृज्जनों की अनुमति लेकर पुनः श्री मथुरा लौट आए ॥ ३० ॥ हे कुरुकुल दीपक परीक्षित ! भगवान श्रीकृष्ण ने श्री अक्रूरजी को जिस कार्य के लिए हस्तिनापुर भेजे थे वह कार्य को सम्पादन कर लौट आए एवं [illegible] पाण्डवों के प्रति धृतराष्ट्र का व्यवहार और हृद्गत भाव है वह श्री बलभद्र जी एवं श्रीकृष्णचन्द्रजी को श्रीअक्रूर जी कहने लगे ॥ ३१ ॥

श्रीमद्भागवत दशम स्कन्ध निरोध लीला पूर्वार्द्ध राजस लीला प्रमेय प्रकरण ४९ वां अध्याय का हिन्दी अनुवाद सम्पूर्ण ॥

अध्याय ४९ वां समाप्त ॥

—:-०-:—

श्रीकृष्णः शरणं मम

श्रीमद्वल्लभाचार्यचरणा विजयन्तेतमाम्

श्रीकृष्णद्वैपायन-वेदव्यास-महर्षिप्रणीतमनेकव्याख्यासमलङ्कृतं

श्रीमद्भागवतमहापुराणम्

सात्वतसंहिता

दशमस्कन्धः - उत्तरार्द्धः

निरोधलीलायां पञ्चाशदध्यायतः सप्तत्यध्यायपर्यन्तं
राजससाधनफलप्रकरणे
सात्त्विकप्रमेयप्रकरणञ्च
पञ्चदशं फलम्
आचार्याणां प्राचेतसाञ्च विविधाष्टीका:

⁂

कर्दमक्षमा (अन्वयः), **श्रीधरस्वामिविरचिता**- भावार्थदीपिका, **श्रीवंशीधरकृतः**-भावार्थदीपिकाप्रकाशः, **श्रीमज्जीवगोस्वामिकृता** वैष्णवतोषिणी, **श्रीसनातनगोस्वामिकृता** बृहद्वैष्णवतोषिणी, **श्रीसुदर्शनसूरिकृतशुकपक्षीयम्**, **श्रीमद्वीरराघवाचार्यकृता**-भगवच्चन्द्रचन्द्रिका, **श्रीमद्विजयध्वजकृता**-पदरत्नावली, **श्रीमज्जीवगोस्वामिकृतः** क्रमसन्दर्भः, **श्रीमज्जीवगोस्वामिकृतः** बृहत्क्रमसन्दर्भः, **श्रीनाथचक्रवर्तिपादविरचिता**-चैतन्यमञ्जूषा, **श्रीमद्विश्वनाथचक्रवर्तिकृता**-सारार्थदर्शिनी, **रसिकाह्लादिन-टीका**, **विशुद्धरसदीपिका**, **श्रीरामनारायणकृता**-भावभावभाविका, **श्रीधनपतिसूरिकृता भागवतगूढार्थदीपिका**, **रासरहस्यम्**, **गूढार्थदीपिनी**, **श्रीमच्छुकदेवकृतः** सिद्धान्तप्रदीपः, **श्रीसत्यधर्मकृता**-श्रीभागवतटिप्पणी, **श्रीमद्वल्लभाचार्यचरणविरचिता**-श्रीसुबोधिनी, **श्रीसुबोधिनी**-सारः, (१) **श्रीप्रभुचरणविरचिता**-श्रीटिप्पणी, **गोस्वामिश्रीगिरिधरलालकृता**-बालप्रबोधिनी, **श्रीगङ्गासहायप्रणीता**-अन्वितार्थप्रकाशिका, **श्रीगोपालानन्दमुनिविरचित**-निगूढार्थप्रकाशव्याख्यानम्, **श्रीभगवत्प्रसादाचार्यविरचिता**-भक्तमनोरञ्जनी, **श्रीहरिसूरिविरचितम्**-श्रीभक्तिरसायनम्, इत्येताभिर्व्याख्याभिः कृष्णशङ्करशास्त्रिनिवर्तित**कृष्णप्रियाभाषानुवादेन**—च समलङ्कृतम्।

सङ्कलनकर्त्ता—
कर्दमऋषितनुजो भागवतः ऋषिः
विक्रमसंवत् २०५७ - श्रावण-कृष्ण-८ जन्माष्टमीमहोत्सवपर्व
सन् २००१ जुलाइ

सम्पादकः परिवेषकश्च
कृष्णशङ्करः शास्त्री
शालिवाहन १९२२

सम्पादक:
कृष्णशङ्करः शास्त्री । श्रीभागवतविद्यापीठम् । कृष्णधाम सोला । कर्णावती-३८००६० अहमदाबाद, गुजरात, भारत

— श्रीभागवतविद्यापीठन्यासिपरिषद् —

कृष्णशङ्करः शास्त्री
भागवतऋषिः शास्त्री
जशवन्तराय उपाध्याय
दीपकभाई शेठ
इन्द्रकान्त परीख
नटवरलाल दलाल
शान्तिलाल शाह
नरेन्द्रभाई शास्त्री
सुरेशभाई व्यासः
क्षमा कर्दम शास्त्री
दिनेशभाई महेता
जयंतिलाल रामराम
भोगीलाल यादव
गांडाभाई पटेल

— सर्वेऽधिकाराः श्रीभागवतविद्यापीठाधीनाः —

श्रीभागवतविद्यापीठ :
श्रीमती वीणाबहिन मनहरलाल
सरला दलाल
श्रीवल्लभनिधि कार्यालय

-: प्राप्तिस्थानानि :-
कृष्णधाम : सोला : कर्णावती अ. ३८००६० दूरध्वनि ७४७३८३९
५ आनंद, ५ वाँ रोड नवयुग सोसायटी वीले पारले मुम्बइ ५६ टे.नं. ६१४२६५३
३५-न्युनवरंग ३ मजला पेडररोड मुम्बई-२६ दूर० ३८८२४३३
३०२ रीलीफ शोपींगसेन्टर जी. पी. ओ. पास कर्णावती अ.१ ५५०२९४५

मुद्रक :-आचार्यमुद्रणालय ए १/१२ गायघाट, वाराणसी ।

॥ श्रीहरिः ॥

श्रीगोवर्द्धननाथो विजयतेतमाम्

श्रीनाथचरणाम्बुजयोः तुलसीदलानि

प्राक्कथनम्

भगवतो नन्दनन्दनश्रीकृष्णचन्द्रस्याहैतुकानुग्रहेण विविधविद्वद्भिराचार्यवर्यैः विरचिताभिर्व्याख्याभिः समलङ्कृतस्य भगवत्स्वरूपात्मकस्य निगमफलस्य रसमयस्य साक्षाद्भगवद्रूपस्य श्रीकृष्णद्वैपायनमहर्षिवेदव्यासाविर्भावितस्य श्रीशुकमुखविगलितस्य श्रीराजर्षिपरीक्षिच्छ्रवणसम्भृतामृतमयस्य भगवद्वाङ्मयस्वरूपस्य निरुपमस्य श्रीमद्भागवतस्य द्वादशाङ्गेषु प्रधानस्य हृदयस्येव द्वादशस्कन्धस्य राजससाधनफलसात्त्विकप्रमेयप्रकरणान्वितस्य सम्मुद्र्य प्राकट्यम्भवतीति महते प्रमोदाय कल्पते। इतः पूर्वं राजसप्रमेयप्रकरणान्तः ग्रन्थः मुद्रितः। एषां प्रकरणानां सङ्ग्रहेण विषयान् स्मरामः।

अत्र राजसप्रकरणे राजसभक्तानां यादवानां निरोधस्य निरूपणं व्यधायि श्रीकृष्णद्वैपायनमहर्षिभिरिति श्रीमहाप्रभुवल्लभाचार्यचरणाः निरूपयन्ति। यादवाः राजसाः। तेषामिह निरोधः साधितः साधनफलरूपतया। साधने सप्ताध्यायाः। षट् धर्माध्यायाः एकश्च धर्मी अध्यायः एवमेव फलेऽपि सप्ताध्यायाः सन्ति। साधनस्य सप्ताध्यायेषु प्रथमे कालयज्ञरूपतया सप्तदशविधप्रजापतिप्रसूतस्य जरासन्धस्य पराजयं कृत्वा मथुरावासिनो राजसा भक्ताः दुःखान्मुक्ता विहिताः। ते च श्रीकृष्णव्यसनिनोऽभवन् अष्टादशसङ्ग्रामे विप्रशिवप्रसादपुष्टो जरासन्धः इति तमपराजित्य भगवता योगवीर्येण विश्वकर्मणा मथुरां निर्मीय तत्र सर्वस्वजनान् प्रापय्य दुःखाद् मोचिताः। द्वितीयऽध्याये आध्यात्मिकदुःखनिवारणाय यवनवध इति निरूपणं कृतम्। तृतीयेऽध्याये बलरामविवाहो निरूपितः तत्र बलभार्या निरोधस्था नेति तत्कथा भक्तौ एव नवमस्कन्धे निरूपिता। चतुर्थाध्याये विवाहात् पूर्वेद्युः रुक्मिण्या हरणमिति रुक्मिणीहरणकथानिरूपणं कृतम्। पञ्चमे उद्वाहकथा कथिता तत्र च रुक्मिणः पराभवः वधानुल्पः मुण्डनरूपो दण्डः भगवता प्रदत्तः —

“वधानुकल्पः स्वद्रोहे भक्तद्रोहे वधः स्मृतः।”

इति हि निबन्धवचनम्। षष्ठे कामस्य स्वस्य व्यसनप्राप्तिः अथ च कृष्णात् उपद्य एव तद्व्यसनं हतम्। श्रीकृष्णस्यसम्बन्धिदेहावरोधेन न कामो भगवत्सेवकान् बाधते। एवं षडध्यायेषु समस्तानां व्यसनाभावो दुःखाभावः साधितः। सप्तमाध्याये स्यमन्तकमणिकथा निबद्धा। मणिर्व्यसनं हन्ति इति लोके ख्यातम्। तन्मणिजन्यं दुःखं भगवानेव हन्ति अन्यथा तु भगवान् व्यसननिवारेण ऐकान्तिकत्वं न भजेत। अतो सप्तमे धर्म्यध्याये धर्मिभगवद्द्वारा व्यसननिवारणकथा निरूपिता। इतः परं फलप्रकरणे सप्तभिः अध्यायैः राजसानां फलं निरूप्यते राजसभक्तेषु यादवेषु अक्रूरस्य मुख्यत्वात् आदौ तत्फलकथनम्, ततः विद्यायाः पञ्चपर्वस्वरूपाः पञ्च विवाहाः। श्रीकृष्णसम्बन्धात् नायिकानां फलात्मकता। ततश्च षोडशकलमनसो वृत्तिरूपाः सहस्रशः नायिकास्तासां भगवत्प्राप्तिः। **“कृष्णाद्वैतं फलं मतम्”** इति वचनात् भगवता शुद्धाद्वैतं फलं **“केवलाश्चान्यसंयुक्ताः पुरुषार्थाः फलं मताः”** इति वचनाच्च पुरुषार्थानामपि फलत्वं कथितम्।

राजसफलप्रकरणे प्रथमाध्याये धर्मसंयुतार्थः अक्रूरेण फलं सम्प्राप्तम्। भगवदिच्छयैव मणिः तत्प्राप्यार्थधर्मौ चाक्रूरस्य। द्वितीयाध्याये पाण्डवानां भगवत्कृपया फलम्। भगवान् अक्रूरद्वारा पाण्डवानां सान्त्वनमकरोत् इति अक्रूरफलकथनानन्तरं पाण्डवानां फलकथनम्। पाण्डवेभ्यो भगवानेव वर्गत्रयं धर्मार्थकामाख्यं प्रददे। तत्र

धर्मसाधकं नगरं विश्वकर्मणा कारितम् । अर्थसाधकं गाण्डीवं अग्निना दापितम् । सभाभवनं मयेन रचितम्, तच्च कामसाधकम् । एवं वर्गत्रयं भगवान् प्रददौ । वेदतपोयोगविवेकभक्तिस्वरूपात्मिकानां कालिन्द्यादिलक्ष्मणान्तानां कृते भगवता सर्वपुरुषार्थदानं विहितम् । अत्र अविद्याकार्यरूपं नरकासुरं हत्वा षोडशवृत्तिरूपषोडशसहस्रमहिषीणामुद्वाहः कालदोषनिवृत्तये भगवता कृतः । अत्र भगवतो वीर्यं दृश्यते । चतुर्थाध्याये रुक्मिण्या परिहासविलासः कृष्णेन कृतः । एतच्च परिहासकथनं वाचिकं तिरोधानं यथा गोपिकानां पुरतः कायिकं तथा । भक्तानाम् अभिमानादिदोषनिवृत्त्यै भगवतस्तिरोधानलीला । तद्धेतुना भगवता कायिकं वाचिकं च तिरोधानं कृतम् । मानसं तिरोधानं अस्यैव स्कन्धस्य चरमाध्याये प्रवक्ष्यति । सर्वमपि तिरोधानं दोषाभावाय दोषापगमात् अनन्तरं फलानुकूला शक्तिः । एतत्सामर्थ्यं तिरोधानलीलया भगवान् यच्छति ।

पञ्चमाध्याये पुत्रपौत्रादिसम्पत्तिरूपं फलं निरूपितम् । तत्र समुद्भूतान् दोषानुच्छेत्तुं दैत्यान् नाशयति इति निरूपयितुं बलदेवकर्तृकं रुक्मिवधं निरूपितवान् रुक्मिवधात् यादवानां सुखमभूत् ।

षष्ठसप्तमाध्याययोः वैराग्यधर्मधर्म्यध्याययोः उपाख्यानं प्रोक्तम् । भगवान् श्रीकृष्णः भक्तार्थसाधकः इति दर्शितम् । महादेवेन सह युद्धस्य तु नाट्यमात्रम् । भगवान् भक्तपक्षपाती इत्यपि सूचितम् । एतत् राजसानां फलम् अस्ति । "**फलं कृष्णात्तु निर्गुणम्**" इति वचनात् भगवत्प्रदत्तं फलं निर्गुणं भवतीति सूचितम् । बलादिप्रकर्षजनितकार्यसिद्ध्यादि-रूपफलस्य राजसत्वम् ।

अत ऊर्द्ध्वं सात्त्विकप्रकरणमारभ्यते नृगमोक्षतः वसुदेवयज्ञान्तम् । सात्त्विकप्रकरणे प्रमेय-साधन-फल-रूपाणि त्रीण्येव प्रकरणानि प्रमाणप्रकरणस्यात्र नैरपेक्ष्यम्, सात्त्विकानां सत्त्वमयत्वात् । सत्त्वस्य च ज्ञानात्मकत्वात् ज्ञानप्रकाशकत्वाच्च । अतस्तेषां सात्त्विकानां भगवत्स्वरूपावबोधः स्वभावसिद्ध एव वर्तते ।

तत्र प्रथमाध्याये नृगस्य चरितं ग्रथितम् । नृगः पूर्वतनः भक्तः सात्त्विकः धार्मिकश्च । स अतिदानेन दुःखं प्राप्तः । भगवता मोचितः । अतिदानाग्रहो दोषाय फलितः यतो हि "**दुःखभोगाय भवति कृष्णादन्यत्र सर्वथा**" इत्युक्त्या भगवतोऽन्यत्राग्रहस्य दुःखभोगहेतुकत्वम् ।

भक्तियोगे तु भगवाँस्तादृशमपि मोचयेत् इति नृगस्य भक्तत्वात् भगवता स मोचितः ।

द्वितीयाध्याये भगवदावेशविशिष्टबलदेवकृतयमुनाकर्षणं तादृश बलरामेण सह गोपिकानां रमणञ्च निरूपितम् । कृष्णकथात्मकसत्सङ्गात् गोपिकानां सुखमुत्पन्नम् भगवद्विषयिणी दोषबुद्धिश्चापगता ।

तृतीयाध्याये प्रमेयबलेन पौण्ड्रकस्य मुक्तिः कथिता । कृष्णत्वेन लोकसन्मानात्मककामप्राप्तिनिश्चयत्वात् मात्सर्येण पौण्ड्रकः कृष्णरूपमदधात् तेन श्रीकृष्णस्य विरोधकरणात् तस्य नाशो जातः परं सर्वथैव श्रीकृष्णासक्तचित्तवृत्तित्वात् प्रमेयबलेन तस्य मुक्तिः कथिता । काशीराजेन भगवद्विरोधिपौण्ड्रकपक्षोऽवलम्बितः तेन भगवद्विरोधो जातः । तत्र भगवदाज्ञाया भगवदविरोधेन तद्विरोध्याश्रयस्य चाभावात् काशीराजस्य विनाशः ।

चतुर्थाध्याये बलभद्रकर्तृको द्विविदवधो वर्तते अनायासेन लीलया द्विविदो हतः इति श्रीगुणकार्यम अस्मिन् अध्याये निरूपितम् ।

पञ्चमाध्याये अभिमानदोषात् कौरवाणां त्याज्यता अभूत् तेन बलभद्रः हस्तिनापुरं यमुनायामाकर्षत् ततस्तेषां ज्ञानमभवत् शरणमुपेतश्च अभिमानोऽपि अपगतः । एवमस्मिन् अध्याये कौरवाणामभिमानरूपदोषनिवारणं

कृतम् । वैराग्यसंज्ञके षष्ठेऽध्याये वैष्णवमुख्याय नारदाय भगवता स्वीयो गृहस्थाश्रमो दर्शितः दर्शितञ्च तथा स्वकीयं वैराग्यम् आहुश्च श्रीमदाचार्यचरणाः **"तथा वैष्णवमुख्यस्य नारदस्य विरक्तये"** इति इत्थं स्वकीयं वैराग्यं दर्शयित्वा वैष्णवमुख्यनारदस्य दोषो निवारितः ।

सप्तमे धर्म्यध्याये धर्मिणा भगवता स्त्रीणां **"कुक्कुटान् कूजतोऽशपन्"** इत्यादिरूपेण धर्माचरणावरोधानुकूलवृत्तिरूपा दोषा अथ च यादवनृपाणां नीत्यज्ञानरूपा दोषा धर्माचरणेन बुद्धिसत्तममन्त्रिप्रवरोद्धवेन सह नीतिनिर्धारणेन भगवता अपहृताः । **"एवं प्रमेयरूपो हि हरिर्दोषं न्यवारयत्"** एवं सात्त्विकप्रमेयप्रकरणे प्रमेयरूपः प्रभुः सात्त्विकानां दोषं न्यवारयत् ।

राजससाधनफलप्रकरणाभ्यां सात्त्विकप्रमेयप्रकरणेन सहितोऽयं सर्वहितो ग्रन्थः भगवत्कृपयैव प्रादुर्भावमुपगत इति तस्यैव रसनिधेः सकलकर्मकलापविधेः सर्वकल्याणगुणगणगौरवशेवधेः निरुपधेः निरवधेः नन्दनन्दनस्य यशोदायशोवर्धनस्य गोवर्धनधरस्य श्रीकृष्णचन्द्रस्य चरणसरोजयुगले उपनिधीयते ॥

अत्रावसरे तान् सर्वान् सुकृतिनः स्मरामः प्रणमामश्च यैः परमप्रयते सारस्वतकार्ये भगवत्कर्मणि भृशमुपकृतम् । भूयश्च तान् सदैन्यं नतेन हृदयेन नमामः यैरस्मिन् श्रीमद्भगवद्वाङ्मयप्राकट्यकर्मणि साक्षात् पारोक्ष्येण च साहाय्यं सम्प्रदत्तम् ।

जन्माष्टमीमहोत्सवः २०५८
श्रीभागवतविद्यापीठम्
कृष्णधाम

श्रीवल्लभवरकुलपरिवारचरणकमल-
रजसामकिञ्चनः किङ्करः
कृष्णशङ्करः

SHRI GIRDHARILAL MEHTA

Born January 1907, in a prominent Gujarati Nagar Brahmin Family in Varanasi. Educated in Sangveda Vidyalaya, Varanasi. Studied the Vedas, Sanskrit literature, Amarkosh, etc. for seven years besides the general subjects of humanities. Was deeply steeped in Dharma, its disciplines and mores. He partcipated in Agnihotra,Yagnas and several religious ceremonies and functions, which were usual features of his house. He was a Dharmanishtha and a Karmanishtha as well, of Sattwilk tenor carrying the flag of modesty, etiquette and morality aloft. Following the footsteps of his forefathers, after his glorious innings in Grihastha Ashram, he went to his guru Paramacharya Jagatguru Shankaracharya of Kanchi seeking permission to take to Sanyasa, but was refused sanction because he was told that Fate had ordained him to continue with his good work of service of societry. Karmaphala Sanyas was better than mere Karma Sanyas. Shri Mehta patronised ancient Vedic values. All through his life he successfully ran Sangveda Vidyalaya, Varanasi, a unique institution seat of Ancient Indian Culture and Sanskrit Civilisation, the sacred heritage of India which he wanted to preserve, promote and perpetuate.

Shri Mehta was a prominent industrialist and businessman, apart from being a philanthropist. He was Chairman and/or Director of Jardine Henderson Ltd., Infar (India) Ltd., Scindia Steam Navigation Co. Ltd., The Bank of India Ltd. and was at the helm of several other companies. His contribution to Society extended over several fields covering education, medical care, sports, arts and culture etc. He had great fondness for Indian Classical Music as also for advanced scientific research. A curios amalgam of values old and new, Shri Mehta was instinctively drawn to Shri Bhagwat Vidyapith both being of similar genre. Many important institutions of the country owe their gratitude to Shri Mehta's generosity. To name a few, the Bharatiya Vidya Bhavan, Mumbai, The Mathematical Research Institute, Allahabad, Prayag Sangeet Samity, Allahabad, Nagri Natak Mandali, Varanasi, B. S. Mehta Hospitals, Schools, Varanasi and Bharwari, Allahabad, The Ved Bhawan, Calcultta, B. C. Roy Polio Clinic, Calcutta, Ram Krishna Matri-Mangal Pratisthan, All India Music Conference, Murarilal Mehta School, Calcutta, Anglo-Gujarati School, Calcutta, Bengal T.B. Association, Bengal Table Tennis Institution etc. Shri Mehta was a Trustee of several Trusts e.g. Hindi High School, Calcutta, Sangeet Kala Mandir, calcutta, Shril Somnath Trust, All India Kashiraj Trust, Vidya Mandir Trust, Kashi Mumukshu Sabha, Varanasi etc. He was recipient of Vishwa Gurjari Award.

On the 4th of July, 1998,the last day of Uttarayan, Shukla Paksha, life pierce through his Brahmarandhra and Shri Girdharilal Mehta, a man of Divine virtues, became Brahmaleen.

श्रीगीरधारीलाल मेहता

हमारी संस्था श्री भागवत विद्यापीठ के प्रन्यासी (ट्रस्टी) के स्वरुपमें श्रीगीरधारीलाल मेहताने कुशाग्र बुद्धिसे संस्था की विशिष्ट सेवा की। आज यह ग्रंथ आपकी स्मृति में अर्पण करते सभी ट्रस्टीओं के साथ मुझे अतीव आनंद होता है। भाई श्री महेताजी नें समाज सेवा का जो व्रत लिया था इस विषयमें किंचित् उल्लेख आनंद के साथ सगर्व प्रस्तुत है।

वाराणसीके ख्याति प्राप्त गुजराति नागर ब्राह्मण परिवारमें १९०७में आपका जन्म हुआ। संग्वेद विद्यालय, वाराणसीमें विद्यार्चन किया। मानवता के सामान्य विषयोपरांत वेद, संस्कृत, साहित्य, अमरकोश आदि का सात वर्षों तक अभ्यास किया। धर्म व धार्मिक अनुशीलन-शिस्त में आप गहनता से तरबोळ थे। आपके परिवारमें स्वाभाविक रूप से नियमित होते अग्निहोत्र, यज्ञ-यागादि एवं धार्मिक उत्सव होते रहते और आप भी इनमें भाग लेते रहते थे। आप सात्विक प्रकृति के साथ धर्मनिष्ठ एवं कर्मनिष्ठ होते हुए विनम्रता, शिष्टाचार व नैतिकता का ध्वज शिर पर लिये हुए थे। गृहस्थ आश्रम उज्ज्वलता से परिपूर्ण होने के पश्चात् अपने पूर्वजोंकी परंपरानुसार अपने गुरु कांची के परमाचार्य जगद्गुरु शंकराचार्यजी के सम्मुख सन्यास लेने की अनुज्ञा लेने उपस्थित हुए; किंतु विधाताने आपको समाज सेवा के लिए नियुक्त किया होने से सन्यास के लिये अनुमति नहीं मिली कर्म के फलका सन्यास कर्म सन्यास से उच्चतर होता है। श्री मेहताजीने वैदिक परंपराओंको आश्रय उत्तेजन दिया। जिसको आप संरक्षित एवं अविरत उन्नति चाहते थे इस प्राचीन भारतीय संस्कृति एवं संस्कृत सभ्यता के आधार स्वरुप संस्था संग्वेद विद्यालय, वाराणसी को आजन्म सफलता पूर्वक चलाया। श्रीमेहता परोपकारी होने के उपरांत नामांकित उद्यागपति व व्यावसायिक थे। जार्डीन हैन्डर्सन ली., इन्फार (इन्डीया) ली., सिंधीया स्टीम नेवीगेशन कं.ली., दी बैंक आफ इन्डीया ली. के आप चेयरमेन या डीरेक्टर थे और कुछ और कंपनीयोंके कर्णधार भी थे। शिक्षा, तबीबी सारवार खेल जगत, कला एवं संस्कृति जेसी अनेक दिशाओंमें आपका योगदान समाजके प्रति रहा है। आप को भारतीय शास्त्रीय संगीत के प्रति बडी प्रीति थी वैसी ही प्रीति आधुनिक वैज्ञानिक संशोधन के प्रति भी थी।

पुरातन एवं अद्यतन मूल्यों का विशिष्ट एकीकरण करने की समान शैली के कारण श्री महेता अंतःस्फूरणासे ही श्रीभागवत विद्यापीठ की और खींचते गए। भारतीय विद्या भवन, मुम्बई; दी मेथेमेटीकल रीसर्च ईन्स्टीट्युट, इलाहाबाद; प्रयाग संगीत समिति, इलाहाबाद; नगरी नाटक मंडली, वाराणसी; बी.एस महेता होस्पिटल्स-स्कूल्स, वाराणसी व भारवारी, इलाहाबाद; वेद भवन, कोलकाता; बी.सी.रोय पोलीयो क्लिनिक, कोलकाता; बेंगाल टी.बी. एसोसीएशन; बेंगाल टेबल टेनीस इन्स्टीट्युशन इत्यादि राष्ट्रकी अनेक अग्रगण्य संस्थाएं श्री मेहता की उदारता के प्रति आभारी है। हिन्दी हाईस्कूल, कोलकाता; संगीत कला मंदिर, कोलकाता; श्रीसोमनाथ ट्रस्ट, ओल इण्डीया काशीराज ट्रस्ट, विद्या मंदिर ट्रस्ट, काशी मुमुक्षु सभा, वाराणसी इत्यादि कइ संस्थाओं के आप प्रन्यासी (ट्रस्टी) रहे। आप विश्व गुजराति पुरस्कार से भी संम्मानित है।

उत्तरायण के अंतिम दिन, शुक्ल पक्षमें, दिनांक : ४ जुलाई, १९९८ को दिव्य सद्गुणों युक्त श्रीगीरधारीलाल मेहताने ब्रह्मरंध्र भेदन से प्राणों को ब्रह्मलीन किया।

॥ श्रीहरिः ॥

— श्रीगोवर्धननाथो विजयतेतमाम् —

समाधिभाषा–सात्वतसंहितायाः श्रीमद्भागवतस्य दशमस्कन्धस्य पञ्चाशदध्यायतः सप्तत्यध्यायपर्य्यन्तं **निरोधलीलायाः राजससाधनफलप्रकरण–सात्त्विकप्रमेयप्रकरणो**पायनप्रस्तावे सुमनोभ्यः परोपकारमूर्तिभ्यः **श्रीगिरधारिलाल–महेता**–महोदयवर्येभ्यः अध्यात्मदीप–योगविचक्षण–**सत्यमित्रानन्दाध्यक्ष्ये** पुण्यश्लोक–तुलसीवाल्मीकिप्रतिम–रामकथा–सहस्त्रवदन(शेष)स्वरूप–**श्रीमुरारिवापू**–(वाः पुनाति पवते पूयते वानेनेति)करपाथोजद्वारा सप्रश्रयं सुमनसा

सुमनसामञ्जलिः

तैषकृष्णतृतीयायां बार्हस्पत्ये शुभे दिने । गिरिधारी गिरिधरेणैव सम्पूज्यतेऽमलः ॥१॥

कर्णावतीशिरोरत्नभूते भागवतेऽमले । विद्यापीठे गिरधरो महेता पूज्यतेऽक्षरैः ॥२॥

वाराणस्यामधीतिं विदधति सुकुले नागरे विप्रमान्ये
लब्ध्वा जन्म स्वकीयं सुरगिरि कुशलः साङ्गविद्यालयेऽभूत् ।
गार्हस्थ्ये चाग्निहोत्राद्यनुदिनमजुहोत् वांशिकं कर्मजातं
काञ्चीपीठेश्वरैः यो जनहितकरणेऽयोजि दीक्षां जिघृक्षुः ॥३॥

श्रीशप्रसादममलाप्तिमलञ्चिकीर्षु–र्लोकोपकारकरणायसदार्द्रचित्तः ।
धन्यो ह्ययं गिरधरोऽस्य कुलं 'महेता' ह्यन्वर्थमेवमकरोच्छुभकार्यसङ्घैः ॥४॥

मुरारिदासाः सत्येन मित्रेण च समाहिता । आनन्दमेव सन्दद्युर्गिरिधारिवराय च ॥५॥

गङ्गादितीर्थपतयो जनपापपुञ्जव्याधीन्स्वयं सुखमथाप्य हरन्ति तापम् ।
एते तथा गिरधराः परकीयतापं स्वैरं समाप्य विदधुर्निजतीर्थरूपम् ॥६॥

सेवाधर्मः परमगहनो योगिनामप्यगम्य
इत्युक्तिं स्वैः परहितगुणैः सार्थकीकृत्य पुण्यः ।
विद्यापीठे गिरधरवरः पूज्यते पूज्यपूज्यैः
आनन्दान्तैः मुररिपुयुतैः सत्यमित्रादिसद्भिः ॥७॥

भीष्मो यथा स्वमतमेवमगात्सुमृत्युं संक्रान्तिकालमनुवीक्ष्य परे विलीनः ।
तद्वद्ध्ययं गिरधरो निजकर्मपुण्यैः पुण्येऽमले मकरसंक्रमणेऽभ्यगाच्छम् ॥८॥

श्रीमद्भागवतसात्वतसंहितादशमस्कन्धोत्तरार्धनिरोधलीलायाः
राजससाधनफलप्रकरणसात्त्विकप्रमेयप्रकरणोपायनप्रस्तावः
उद्गाता पुण्यश्लोकश्रीमुरारिबापू
श्रीभागवतविद्यापीठम्–कर्णावती पुरी
पौषकृष्णतृतीया - २०५८ (३१/०१/२००२)

तदीयजनपदसरोजरेणुरकिञ्चनः

किङ्करः कृष्णशङ्करः

दासानुदासः भागवत–ऋषिः

साष्टाङ्गं प्रणमतः उभौ

॥ श्री हरि : ॥



प्रन्यासिन : परमभगवदीयाः श्रीमन्तः गिरधरलाल महेता महोदया :

जन्म : १९०७ गोलोकवास : १९९८

॥ श्रीकृष्णाय नमः ॥

ॐ नमो भगवते वासुदेवाय

दशमः स्कन्धः–उत्तरार्धः

अथ राजससाधनप्रकरणम्

अथ पञ्चाशत्तमोऽध्यायः

श्लोकाः	अनु.	वंश.	मि. उ.	उ.	श्लो. अ.	उ, अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो. अ.
५८	४८	१	९	३	२०२८	१९	८१	२१२८	६६॥

श्रीशुक[1] उवाच

अस्तिः [2]प्राप्तिश्च कंसस्य महिष्यौ भरतर्षभ । [3]हते भर्तरि दुःखार्ते ईयतुः [4]स्म पितुर्गृहान् ॥ १ ॥
पित्रे मगधराजाय जरासंधाय दुःखिते । वेदयाञ्चक्रतुः सर्वमात्मवैध[5]व्यकारणम् ॥ २ ॥
स [6]तदाऽप्रियमाकर्ण्य शोकामर्षयुतो [7]नृप । अयादवीं[8] महीं कर्तुं चक्रे परममुद्यमम् ॥ ३ ॥
अक्षौहिणीभिर्विंशत्या[9] तिसृभिश्चाभि[10] संवृतः । यदुराजधानीं मथुरां न्यरुणत् सर्वतोदिशम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच–भरतर्षभ ! कंसस्य, महिष्यौ, अस्तिः, च प्राप्तिः, भर्तरि हते, दुःखार्ते, पितुः, गृहान्, ईयतुः स्मः ॥ १ ॥ दुःखिते, मगधराजाय, जरासंधाय, पित्रे, सर्वम्, आत्मवैधव्यकारणम्, वेदयाञ्चक्रतुः ॥ २ ॥ नृप ! सः, तदा, अप्रियम्, आकर्ण्य, शोकामर्षयुतः, महीम्, अयादवीम्, कर्त्तुम्, परमम्, उद्यमम् चक्रे ॥ ३ ॥ विसृभिः, च, विंशत्या, अक्षौहिणीभिः, अभिसंवृतः, यदुराजधानीम्, मथुराम्, न्यरुणत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततः पंचाशत्तमे तु जरासंधभयादिव । कारयित्वाम्बुधौ दुर्गं तन्निनाय निजं जनम् ॥ १ ॥
कपटान्कपटैरेव हत्वा दैत्यानयत्नतः । अजयच्च जरासंधं धर्मेणैव तु धार्मिकम् ॥ २ ॥

अस्तिप्राप्तिसंज्ञिके ईयतुर्जग्मतुः ॥ १–२ ॥ कंसे शोकः कृष्णे चामर्षस्ताभ्यां युतः ॥ ३ ॥ न्यरुणद्रुरोध ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

श्रीकृष्णं राधिकानाथं वृन्दावननिकुंजगम् । गोपगोपीगवां सेव्यं वन्दे सर्वार्थसिद्धवे ॥ १ ॥

ततोऽक्रूरागमनोत्तरम् । इवपदं भयाभावमाह । दुर्गं शत्रुभिः दुःखेन गम्यं राज्ञामावासयोग्यं स्थलविशेषं प्रासादविशेषम् "दुर्गो ना नीलि (ली) कठिनदुर्गमेषु च वाच्यवत्" इति धरणिः । "राज्ञां स्थानं भवेद्दुर्गं बह्वम्बुतृणधान्यकम् । सर्वसांग्रामिकोपेतं सर्वतो वीर्यसंयुतम् ॥ वर्तुलं चतुरस्रं वा भूमिष्ठं वातितुङ्गकम् । वार्क्षपार्वततौयादिभेदेन बहुधा मतम् ॥ वीर्यं वर्तुलमत्युच्चं गोलोत्क्षेपणरंध्रयुक् । निरन्तीरक्षं दुर्गांगं कथितं युधि कोविदैः ॥" इति संहितायां दुर्गलक्षणम् । तत् तत्र । नियाय प्रापयामास (१) कपटांस्तृणापर्तवकादीन् । धर्मेण युद्धधर्मेण । धार्मिकं युद्धधर्मविदं वा (२) । सच्छास्त्रस्याऽसच्छास्त्रेणेव श्रीकृष्णस्य जरासंधेन सह संग्रामं वर्णयति । सदसत्तां तत्त्वनिर्णगेन भक्तिद्वेषाभ्यामुद्वृद्धाभ्यां विहितमोक्षावाप्तिर्भवति, तत्र कथां

---

१. बादरायणि–प्रा. पा. । २. प्रास्तिश्च–वीर. ; अस्तिः प्रास्तीति–बिज. । ३, हते–वीर. विज. मृते–श्रीधर. वंशी. जीव. विश्व. । ४. स्वपितु–विज. । ५. वैरूप्य–विज. । ६. स तदप्रिय–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ७. नृपः–इति कस्यचित् । ८. दवा–वीर. । ९. विंशद्भि–विज. । १०. श्चापि–श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

प्रसञ्जयितुमाह—अस्तिप्राप्तिशब्दाभ्यामविद्याया द्वे रूपे संशयविपरतिनामनी कथ्येते। कंसस्य 'कसि—हिंसायाम्' हिंसात्मनोऽधर्मस्य महिष्यौ महि महिमानं धर्मस्य सिनुत इति महिष्यौ 'षिञ्—बन्धने' अस्मादौणादिको डट्, संबंधिन्यौ। भर्तरि स्वनिर्वाहके कंसनाग्न्यधर्मे कृष्णनाम्ना धर्मेण मृते मारिते। निपातनाण्णि चो लोपः। स्वपितुः स्वपोषकस्य जरासंधस्य जरा व्यर्थवयोहानिहेतुभूता कौलिकमार्गेण शैवत्वावेशरूपा, तस्यां संधा मरणापत्तावपि न मुंचामीति प्रतिज्ञा यस्य तस्य। गृहान् प्रमितिविषयानीयतुः प्राप्य स्थिते। शब्दशक्तिनिपुणैरयमर्थोऽध्यात्मविषयतया ज्ञातव्यः। एवमन्यत्रापि ध्येयम्, ग्रन्थविस्तरभिया न प्रदर्श्यत इति। भरतर्षभेति भरतवंश्यत्वात्तवैतद्ब्रवीमीत्यभिप्रायः ॥ १ ॥ मगधराजाय द्विजातिनिषिद्धकुलधर्मेण राजमानाय 'मगधस्त्यक्तनीवृतोः' इति कोशात्। आत्मनो वैधव्यस्य वैरूप्यस्य प्रतिपादनासामर्थ्यलक्षणं कारणम् ॥ २ ॥ सं जरासंधः। तदप्रियं जामातृमृतिरूपममंगलम्। नृन् कौलिकान् नयान् पिबति, नरान्पातीति नृपः। अयः शुभावहः सताम् अदो नाशकोऽसतामित्ययादः श्रीकृष्णस्तं वांति शरणं गच्छन्तीत्ययादवा वैष्णवास्तद्रहिताम् ॥ नृपः सर्वनरपतिः, सम्राडित्यर्थः। नृपेति क्वचित्पाठः। न विद्यन्ते यादवा यस्यां तामयादवाम्। क्वचित् 'अयादवीम्' इति पाठः ॥ ३ ॥ अक्षौहिणीलक्षणार्थमवांतरसंज्ञाप्थमरेणोक्ता—"एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका। पत्त्यंगैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः। अनीकिनी दशानीकिन्योऽक्षौहिणी ॥" इत्यमरः। एको गज एको रथस्त्रयोऽश्वाः पञ्च पदातय इति दशसंख्या पत्तिः, त्रिगुणिता पत्तिः सेनामुखम्, तत्त्रिगुणितं गुल्मः, गुल्मं त्रिगुणितं गणः, त्रिगुणो गणो वाहिनी, त्रिगुणिता वाहिनी पृतना, त्रिगुणिता पृतना चमूः, त्रिगुणा चमूरनीकिनी, दशानीकिन्योऽक्षौहिणीति विवेकः। सर्वसंकलने २१८७० गजाः, २१८७० रथाः, ६५६१० हयाः, १०९३५० पदातय इति। 'विंशत्याद्याः सदैकत्वे' इत्यमरार्द्विशत्येत्येकत्वम् ॥ अक्षौहिणीसंख्येयम्—"खबाणाग्निनवव्योमचन्द्रसंख्याः १०९३५० पदातयः। खेन्दुषट्शरषट्संख्या ६५६१० अश्वा नागा रथा अपि ॥ खाद्रिनागेन्दुदृक्संख्या २१८७० इत्येषाऽक्षौहिणी स्मृता ॥" इति। यदुराजधानीमिति तस्या निरोधस्य च महत्त्वे हेतुः। सर्वदिङ्निरोधविशेषो हरिवंशे जरासंधोक्तौ—"सर्वतो नगरी चेयं जनौघैः परिवार्यताम्। अयोयंत्राणि युज्यंतां क्षेपणीयाश्च मुद्गराः ॥ ऊद्ध्र्वं चापि निवार्यंतां प्राप्ता वै तोमरास्तथा।" इति। किञ्च "मल्लः कलिंगाधिपतिश्चेकितानः सबाह्लिकः। काश्मीरराजो गोनर्दः केकयाधिपतिस्तथा ॥ द्रुमः किं पुरुषश्चैव पार्वतीयो ह्यनामयः। नगर्याः पश्चिमद्वारं शीघ्रमारोधयन्तु वै ॥ पौरवो वेणुदारश्च वैदर्भः सोमकस्तथा। रुक्मी च भोजाधिपतिस्सूर्याक्षश्चैव गालवः ॥ विन्दानुविन्दावावन्त्यौ दन्तवक्रश्च वीर्यवान्। छागलिः पुरुमित्रश्च विराटश्च महोपतिः ॥ कौशल्यो मालवश्चैव शतधन्वा विदूरथः। भूरिश्रवास्त्रिगर्तश्च बाणः पञ्चनदस्तथा ॥ उत्तरं नगरद्वारमेते दुर्गसहा नृपाः। आरुह्य चापि मर्दन्तां वज्रप्रतिमगौरवाः उलूकः कैतवेयश्च वीरश्चांशुमतः सुतः। एकलव्यो बृहत्क्षत्रः क्षत्रधर्मा जयद्रथः ॥ उत्तमौजाश्च शल्यश्च कौरवाः केकयास्तथा। वैदेहो वामदेवश्च शाकल्यश्च सिनीपतिः। पूर्वं नगरनिर्व्यूहमेतेष्वायत्तमस्तु नः ॥ अहं च वरदश्चैव चेदिराजेन संगताः। दक्षिणं नगरद्वारं वारयिष्याम दंशिताः ॥" इति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महाब्धिमध्ये पतितं व्याकुलं शरणागतम्। चैतन्यदेव भगवन् पारं प्रापय सत्वरम् ॥ १ ॥

गोकुलं पाण्डवकुलञ्च सान्त्वयितुमुभयत्र गन्तुमर्हेऽपि श्रीभगवति नरलीलत्वादन्तरायप्रायं महायुद्धादिकं वक्तुमारभते—अस्तिरित्यादिना। हे भरतर्षभेति खलु क्षत्रियस्त्रीणां स्वभावस्त्वया ज्ञायत एवेति भावः। दुःखेनार्त्ते व्यग्रे स्वशब्देन सम्प्रति पतिगृहे ममत्वाभावः सूचितः। स्मेति क्वचित् पाठः ॥ १ ॥ मगधदेशस्य राज्ञ इति तावद्दूरगमनं बोधयति। दुःखिते दुःखाभिव्यञ्जकरोदनादियुक्ते ॥ २ ॥ नृपः सर्वनरपतिः सम्राडित्यर्थः। नृपेति क्वचित् पाठः। अयादवीं न विद्यन्ते यादवा यस्यां तादृशीं अयादवीम् इति पाठः क्वचित् ॥ ३ ॥ अक्षौहिणीसंख्येयं। खबाणाग्नि नवव्योम चन्द्रसङ्ख्याः पदातयः। (१०९३५०) खेन्दु षट्शर षट्सङ्ख्या अश्वाः (६५६१०) नागा रथा अपि। खाद्रि नागेन्दु दृक् संख्या (२१८१०) इत्येषाऽक्षौहिणी स्मृतेति। यदुराजधानीमिति तस्या निरोधस्य च महत्त्वे हेतुः सर्वदिङ्निरोधे विशेषः श्रीहरिवंशे जरासन्धोक्तौ—

"सर्वतो नगरी चेयं जानोघैः परिवार्य्यताम्। अयोयन्त्राणि युज्यन्तां क्षेपणीयाश्च मुद्गराः ॥
उद्ध्र्वञ्चापि निवार्य्यन्तां प्रासा वै तोमरास्तथा।
किञ्च—मल्लः कलिङ्गाधिपतिश्चेकितानः सबाह्लिकः। काश्मीरराज्ये गोनर्द्दः करुषाधिपतिस्तथा ॥
द्रुमः किंपुरुषश्चैव पार्व्वतीयो ह्यनामयः। नगर्याः पश्चिमद्वारं शीघ्रमारोधयन्त्विति ॥
पौरवो वैणुदारवः वैदर्भः सोमकस्तथा। रुक्मीच भोजाधिपतिः सूर्य्याक्षश्चैव गालवः ॥
विन्दानुविन्दावावन्त्यौ दन्तवक्त्रश्च वीर्यवान्। छागलिः पुरुमित्रश्च विराटश्च महीपतिः ॥
कौशल्यो मालवश्चैव शतधन्वा विदूरथः। भूरिश्रवास्त्रिगर्त्तश्च बाणः पञ्चनदस्तथा ॥
उत्तरं नगरद्वारमेते दुर्गसहा नृपाः। आरुह्य चापि मर्द्दन्तां वज्रप्रतिमगौरवाः ॥

उलूकः कैतवेयश्च वीरश्चांशुमतः सुतः । एकलव्यो बृहत्क्षत्रः क्षत्रधर्म्मा जयद्रथः ॥
उत्तमौजाश्च शल्यश्च कौरवाः केकयास्तथा । वैदेहो वामदेवश्च साकेतश्च सिनीपतिः ॥
पूर्वं नगरनिर्व्यूहमेतेष्वायत्तमस्तु नः ।
अहञ्च वरदश्चैव चेदिराजेन सङ्गताः । दक्षिणं नगरद्वारं वारयिष्यामः दंशिताः ॥ इति ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

महाब्धिमध्ये पतितं व्याकुलं शरणागतम् । चैतन्यदेव भगवन् पारं प्रापय सत्वरम् ॥

भक्तवात्सल्येन सपुत्रां श्रीकुन्तीं सान्त्वयितुं विशेषतश्च 'आयास्यामि' इति स्वोक्तिप्रतिपालनाद्यर्थं गन्तुमर्हस्यापि श्रीभगवतः प्रयाणे विघ्नरूपं महायुद्धादिकं वक्तुमारभते—अस्तिरित्यादिना । हे भरतर्षभेति खलक्षत्रिय-स्त्रीणां स्वभावस्त्वया ज्ञायत एवेत्यर्थः । दुःखेन आर्ते व्यग्रे; अतः 'सर्व्वेषामेव भूतानाम्' इत्यादि-स्वोक्तस्यापि विमर्शो न वृत्त इति ज्ञेयम् । अतएव भर्तृगेहादपि पितृगृहेषु मोहाधिक्येन स्व-शब्दः ॥१॥ किमर्थम् ? तदाह-'पित्रे' इति । कुत्र तस्य गृहा इत्यपेक्षायामाह-मगधेति; मगध-देशे तत्रापि राजगृह इति ज्ञेयम्, तस्य तद्राजधानीत्वात्; तथा च श्रीहरिवंशे (विष्णु० प० ३५।३) 'राजा राजगृहेश्वरः' इति, 'दुःखिते' इति पितुः स्नेहविवर्द्धनेन शोकामर्षार्थमार्त्तनादरोदनादिकं कुर्व्वत्यावित्यर्थः ॥ २ ॥ नृप इति-तदानीं तस्य साम्राज्येन सर्व्वनरनरपतित्वं सूचयति । अयादवीं न विद्यन्ते यादवा यस्यां तादृशीम्, अतएव परमोद्योगं चक्रे ॥ ३ ॥ तदेवाह—अक्षौहिणीभिरिति । तत्सङ्ख्या चेयम्—'खराणाग्निनवव्योमचन्द्रसंख्याः पदातयः (१०९३५०) खेन्दुषट्शरषट्संख्या अश्वाः (६५६१०) नागा रथा अपि । खाद्रिनागेन्दुदृक्संख्याः (२१८७०) इत्येषाऽक्षौहिणी स्मृता ॥' इति । अपि एव, सम्यग् वृतो वेष्टित एव, यदुभ्यो भयात् महाराजस्य सर्व्वसैन्यान्तर्व्वर्त्तित्वाच्च, नितरामरुणत् रुरोध । ननु धार्म्मिकोऽसौ सर्व्वतीर्थशिरोमणिं श्रीमथुरां कुतो न्यरुण ? तत्राह—यद्विति । तदानीं सर्व्वेषामपि यदुनां तत्रैवैकत्र निवासात् । सर्व्वदिङ्निरोधे विरोधे विशेषः श्रीहरिवंशे जरासन्धोक्तौ (विष्णु० प० ३५।३४)—

'सर्व्वतो नगरी चेयं जनौघैः परिवार्य्यताम् । अयोयन्त्राणि युज्यन्तां क्षेपणीयाश्च मुद्गराः ।
ऊर्द्ध्वं चापा निवाह्यन्तां प्रासा वै तोमरास्तथा ॥' किञ्च, (विष्णु-प० ३५।३९-४८)—
'मद्रः कलिङ्गाधिपतिश्चेकितानः सवाह्लिकः ॥
काश्मीरराजो गोनर्द्दः करुणाधिपतिस्तथा । द्रुमः किम्पुरुषश्चैव पार्व्वतीयो ह्यनामयः ॥
नगर्य्याः पश्चिमद्वारं शीघ्रमारोधयन्त्विति । पौरवो वेणुदारिश्च वैदर्भः सोमकस्तथा ॥
रुक्मी च भोजाधिपतिः सूर्य्याक्षश्चैव गालवः । विन्दानुविन्दावन्तौ दन्तवक्रश्च वीर्य्यवान् ॥
छागलिः पुरुमित्रश्च विराटश्च महीपतिः । कौरव्यो मालवश्चैव शतधन्वा विदूरथः ॥
भूरिश्रवास्त्रिगर्त्तश्च वाणः पञ्चनदस्तथा । उत्तरं नगरद्वारमेते दुर्गसहा नृपाः ॥
आरुह्य चाभिमर्द्दन्तां वज्रप्रतिमगौरवाः । उलूकः कैतवेयश्च वीरश्चांशुमतः सुतः ॥
एकलव्यो बृहत्क्षत्रः क्षत्रधर्म्मा जयद्रथः । उतमौजाश्च शल्यश्च कौरवाः केकयास्तथा ॥
वैदेहो वामदेवश्च साकेतश्च सिनीपतिः । पूर्व्वं नगरनिव्यूहमेतेष्वायत्तमस्तु नः ॥
अहञ्च दरदश्चैव चेदिराजेन संगताः । दक्षिणं नगरद्वारं पालयामः सुदंशिताः ॥ ४ ॥' इति ।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

व्याख्यातं दशमस्कन्धपूर्वार्द्धं मे यथाश्रुतम् । यथामतीतस्तुष्यन्तु क्षाम्यन्तु गुणवत्तमाः ॥

अथ जरासन्धजयात्मकं भगवच्चेष्टितं वर्णयितुकामः तावज्जरासन्धस्य भगवता सह युयुत्साकारणं प्रस्तौति-अस्तिरिति सार्द्धद्वयेन । हे भरतर्षभ ! अस्तिः प्रास्तिश्चेति द्वे कंसस्य भार्ये ते भर्त्तरि कंसे हते सति भगवतेतिशेषः दुःखार्त्ते दुःखपीडिते भूत्वा पितुः जरासन्धस्य गृहानीयतुर्जग्मतुः ॥ १ ॥ ततो मगधदेशाधिपतये जरासन्धाय स्वपित्रे दुःखिते अस्तिप्रास्ती सर्वमात्मनोः वैधव्यकारणं निवेदयाञ्चक्रतुः ज्ञापितवत्यौ ॥ २ ॥ स जरासन्धस्तद्दुहितृभ्यामावेदितमप्रियमाकर्ण्य शोकामर्षाभ्यां युतः महीं यादवाङ्कुररहितां कर्तुं परममुद्यमं प्रयत्नं चक्रे ॥ ३ ॥ तदेवाह—अक्षौहिणीति । त्रयोविंशत्यक्षौहिणीबलपरिवेष्टित इत्यर्थः । यदुराजानामाश्रयभूतां मथुरां चतुर्दिक्षु निरुद्धवान् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सच्छास्त्रस्यासच्छास्त्रेणेव कतिपयेष्वध्यायेषु श्रीकृष्णस्य जरासन्धेन सह सङ्ग्रामं वर्णयति—तत्त्वनिर्णयेन सदसतां भक्तिद्वेषाभ्याम् उद्बुद्धाभ्यां विहितनिर्वाणाऽवाप्तिर्भवति तत्र कथां प्रसञ्जयितुमाह—अस्तीति । अस्तिप्राप्तिशब्दाभ्यां अविद्याया द्वे

रूपे संशयविपरीतज्ञाननामनी उच्येते तत्र संशये ज्ञानसत्तामात्रमस्ति विपरीते तदपि नास्तीत्यस्तिप्रास्ती "असभुवि" "भू सत्तायाम्" इति धातोः। यद्वा, निश्चायकप्रमाणाभावेन निश्चयज्ञानाभावात्संशयविपरीतज्ञानवाचकावेतौ "असु निरसने" इति धातोः कंसस्य महिष्यो "कसि हिंसायाम्" इति धातोः हिंसात्मनो धर्मस्य महिमबन्धकत्वेन सम्बन्धिन्यौ "षिञ् बन्धने" इति धातोः कृष्णानाम्ना धर्मेण भर्तरि स्वनिर्वाहके कंसनाम्न्यधर्मे हते विनाशिते स्वपितुः स्वपोषकस्य जरासन्धस्य "जॄ वयोहानौ" इति धातोर्वयोहानिहेतुभूता शैवी शास्त्रसंहितां जरेत्युच्यते तस्यां सन्धा मरणापत्तावपि न मुञ्चामीति प्रतिज्ञा यस्य स तथा तस्य गृहान् प्रमेयविशेषानीयतुः प्राप्य स्थिते शब्दशक्तिविचक्षणैः पुरुषैरध्यात्मविषयतया अत्रार्थो ज्ञातव्य इति ग्रन्थबाहुल्यभीरुणा मया न प्रदर्श्यत इति ॥ १ ॥ आत्मवैरूप्यकारणम् आत्मवैधव्यादिनिमित्तम् अन्यत्र प्रतिपादनासामर्थ्यम् ॥ २ ॥ "नॄ नये" इति धातोः नॄन् नयान् शैवशास्त्रोक्तान् पिबतीति नृपः शास्त्रशः यः प्रतिसंभूमेत्यभिधानात् यो विष्णुः स एवादो दुष्टदण्डकस्तं वान्ति शरणं गच्छन्तीति यादवाः वैष्णवाः तद्रहिताम् ॥ ३ ॥ एकस्थानमारभ्य षोडशस्थाने या सङ्ख्या साऽक्षौहिणीत्युच्यते इति अन्ये गजानां सप्तसहस्राणि द्विशती साशीतिः एवं रथानामपि सङ्ख्या अश्वानामेकविंशतिसहस्री पञ्चशती विंशतिश्च पदातीनां पञ्चत्रिंशत्सहस्रं विंशतिभिश्चेत्यक्षौहिणीसङ्ख्यां ब्रुवते एको गज एको रथस्त्रयोऽश्वाः पञ्च पदातय इति दशसङ्ख्यापत्तिर्नाम त्रिगुणिता पत्तिः सेनामुखमिति भिन्नं वा पदं सेनामुखस्त्रिगुणो गुल्मनामा तत्त्रिगुणो गुणनामा गुणत्रिगुणा वाहिनीनामा वाहिनीत्रिगुणा पृतना तत्त्रिगुणा चमूः त्रिगुणिता चमूरनीकिनी दशानीकिनीत्यक्षौहिणीति केचित्—

एकेभैकरथात्र्यश्वा पत्तिः पंच पदादयः। अत्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम्।
सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः। अनीकिनी दशानीकिन्यक्षौहिणी—" इत्यमरः ॥ ४–९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दशमस्यैव पूर्व्वार्द्धोऽनुगृह्णान्मे धियं यथा। परार्द्धोऽप्यनुगृह्णातु तथा श्रीगुरवे नमः ॥
पञ्चाशत्तम ईशोऽपि विजित्वापि जरासुतम्। द्वारकां स्वजनं नित्ये तद्भीत्याऽष्टादशे मृधे ॥ १–४ ॥

गूढार्थदीपिनी

पञ्चाशत्तम ईशाभ्यां जरासन्धपराजयः। यावनैर्मथुरारोधाद् दुर्गनिर्माणमृच्यते ॥ १ ॥

एतन्नामिके द्वे महिष्यौ। स्मेति प्रसिद्धौ। ईयतुर्जग्मतुः ॥ १–२ ॥ कंसे शोकः कृष्णे चामर्षस्ताभ्याम् ॥ ३–४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पञ्चाशत्तमे कंसवधश्रवणकुपितेन जरासन्धेन सहासकृद्युद्धक्रीडां भगवान् कृतवान् समुद्रे दुर्गं कारयित्वा तत्र स्वजनताञ्च स्थापितवानित्याह—अस्तिरिति। ईयतुः। जग्मतुः ॥ १ ॥ वेदयाञ्चक्रतुः ज्ञापितवत्यौ ॥ २ ॥ तद्दुहितृभ्यामावेदितं जामातृवधमाकर्ण्य जमातरि शोकः श्रीकृष्णे अमर्षः ताभ्यां युतः ॥ ३ ॥ सर्वतो दिशं सर्वासु दिक्षु न्यरुणत् रुरोध ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ यदर्थमत्यर्थमर्थितदोऽवनावतीर्णश्चकार चाङ्कुरार्पणं तत्तूर्णमुदीर्णं विधातुमिव गते गतपतिके द्वे सुते मागधस्येन्नादिरेतदादिकथनाकर्णनादिकं च मुक्तिकारणमिति निरूप्यतेऽस्मिन्स्कन्धे। तत्रादौ का कथोत्तरत्र प्रवृत्तेत्यौत्तरीयस्यान्तरीं शङ्कां स्वयमेव शुक आशु करुणः परिहरन्वक्तीति वक्ति ॥ श्रीशुक इति। हे भरतर्षभ। अत्रोत्तरत्र यौष्माकीणपूर्वपुरुषकर्मैव प्रतिपाद्यते प्राप इति प्रोत्साहयितुं सम्बोधनमिति मन्तव्यम्। कंसस्यास्ति प्रास्तीति द्वे महिष्यौ मूर्धाभिषिक्ते योषितो निर्विसर्गे द्वे नामनी अस्तीति प्रास्तौति विवेकः। अस्ति प्रास्तिश्चेन्नापि हरिवंशपाठस्तत्रेतिशब्दोऽध्याहार्यः। भर्तरि कंसे हते कृष्णेनेति शेषः। दुःखार्ते स्वपितुर्जरासन्धस्य गृहानीयतुः। अत्र भर्तृगेहे तन्निवेशकर्तुरदर्शनात्पुत्रौ नष्टा चेत्पितृशरणं शरणमिति नीत्या गते। हरिरेव तदायुरवलोक्यैतेऽत्रैरयत्तत्र गन्तुमिति तात्पर्यम् चावधेयं। यच्च भागवतं तत्र नामातीवदुर्वचः। आध्यात्मिकोऽर्थो विदुषां विदुषैतत्कृते कृत। ईदूदे द्विवचनमिति प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावः ॥ १ ॥ मगधराजाय तद्देशेशाय नाम्ना जरासन्धाय। यद्यपि पूर्वं स्वपितुर्गृहानित्युदीरणादेव जरासन्धस्य पितृत्वं ज्ञातं भवति तथाऽपि मन्दस्य सन्देहः स्यात्स्यपितुर्गेहं गत्वा भ्रात्रे जरासन्धायेतीति तमातङ्कयितुं पुनः पित्र इत्युक्तिरिति ज्ञेयम्। आत्मवैरूप्यस्य वैधव्यस्य कारणं सर्वं वेदयाञ्चक्रतुः। पदे द्वे। अनुप्रयोगमात्रं नियतं तं पातयां प्रथममासेत्यादयोऽपभ्रंशा इति शेखराद्युदीरणात्। विज्ञापयामासतुः। णये पुत्र्यौ किमुर्वरितै रणो न कार्य इत्यतोऽभ्याहतुः। आत्मनेवैरूप्यकस्तेन न विद्यते रणो यस्य तं च सर्वेऽपि तद्भ्रातरश्च मृता न रणधुरीणस्तत्रास्तीति चात्मवैरूप्यकारणं च वेदयाञ्चक्रुरिति। तस्मादरणं रक्षणमुद्दिश्येति। बहुव्रीहौ कप्। यद्वा स्वजनकाक्रोशजननायात्मनोर्वैरूप्यं येन स आत्मवैरूप्यः स च कः कुत्सित इति कटाक्षयत इति वा ॥ २ ॥ स नृपस्तदप्रियं। तदाप्रियमिति

पाठे तदाकर्ण्य शोकेन कंसहिंसाश्रवणजेनामर्षेण कृष्णकर्मासहनेन च युतो महीमयादवी न विद्यन्ते यादवा यस्यां साऽयादवी तां कर्तुं परममुद्यमं चक्रे। आत्मनेपदेन तदुद्योगोद्भवोऽनर्थस्तस्यैवेति सूच्यते। अत्र नारदबोधितमथुरायोजने यतो गदां गदाग्रजमुद्दिश्य चिक्षेपेत्यादिकथाऽनुसन्धेया। क्षुब्धोऽतिकोपवशतः स्वगदामित्यारभ्य राजा स्वमातृत उत गदया च हीन इत्यन्तेन चाचार्योक्तेः॥ ३॥ विंशतिविसृभिरुपरि चाहव्य त्रयोविंशद्भिरक्षौहिणीभि॰। दशनीकिन्यक्षौहिणीत्यमरः। षट्सहस्रं पञ्चशतं षष्ठिरेका तु बाहिनाम्। द्विसहस्रं शतं ससाशीनिर्गजरथस्य च। पत्रयुतं गवशतीत्रिशतययपदातयः। अनीकिन्यभिधेया सेत्युक्तानीकिनी दशकमक्षौहिणी। अन्यत्राप्युक्तम्। प्रयुतं नवसाहस्रं पञ्चशा[illegible]शतं मटाः। पञ्चाशत् षष्ठिसाहस्रं षट्शतं दशवादिनः। एकविंशतिसहस्रं शतानामष्टसप्ततिः द्विशतस्पन्दना यत्र साऽक्षौहिण्युच्यते बुधैरिति। अक्षादूहिन्यामुपसङ्ख्यानमिति वृद्धिः। संवृतः। अक्षौहिणी रथास्तस्याः खसप्तवसुमुर्छनाः। गजास्तावन्त एव स्युस्त्रिपञ्चधा हया नरा इति। व्याख्याता च सङ्ख्या महाभारततात्पर्यनिर्णयटीकायां बुधवन्याम्। तथा चापिभिर्धनुष्पाणिभिः संवृतोऽक्षौहिणीभिः सह यदुराजधानी मथुरां सर्वतो दिशं न्यरुणद्रूरोध॥ ४॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

उत्तारार्धे हरेर्लीला स्वतः सर्वात्मना कृता। यदर्थमवतीर्णोऽसौ सा निरूप्या विभागशः॥ १॥
एषा निरोधलीलैव स्वसंसारहरा परम्। भगवांश्च तदीयाश्च तच्छास्त्रं चेति सा त्रिधा॥ २॥
चतुर्दशभिरध्यायैः प्रमाणं तस्य रूप्यते। तदीया एकविंशत्या षड्भिः स च निरूप्यते॥ ३॥
कृतिः प्रमाणं तु हरेः स्वतश्चान्यानुरोधतः। सप्तभिः सप्तभिः प्रोक्तो गुणैर्युक्तो हरिस्तथा॥ ४॥
वाक्यात्तदीया विज्ञेयास्तस्यैव न तु शास्त्रतः। एकविंशविधं सर्वे श्रुत्वा तद्बहुधोदितम्॥ ५॥
षड्गुणैर्भगवान् रूप्यस्ते सर्वं प्रतिष्ठितम्। तत्र तु प्रथमेऽध्याये स्वावतारप्रयोजनम्॥ ६॥
निरूप्यतेऽत्रधर्मेण जयोऽन्यश्च निरूप्यते। राजसानां साधने तु निरोधे भगवत्कृतिः॥ ७॥
सर्वथा साधनमिति तदेवादौ निरूप्यते। विवाहपुत्रजन्मान्ता सा निरूप्या विशेषतः॥ ८॥
अलौकिकं तु तत्स्थानं निरूप्यमिति रूप्यते। तस्योपद्रवनाशाय भ्रमोत्पादनमीरितम्॥ ९॥
निग्रहानुग्रहौ चैव प्रसङ्गात् सुनिरूपितौ। अन्यथा लौकिकी लीला कृष्णस्य स्यान्न चान्यथा॥ १०॥
त्रिविधो हि क्षत्रियाणां विवाहः परिकीतितः। गान्धर्वो राक्षसश्चैव विहितश्च स्वगृह्यतः॥ ११॥
पुत्रस्यापि कथा वाच्या ह्यन्येनापि समर्पिता। भार्यामाहुः क्षत्रियस्य तत्प्रसङ्गात्तथा परा॥ १२॥
सत्यभामाविवाहान्ता कथेयं विनिरूपिता। त्रिविधं दुःखमादौ हि भक्तानां विनिरूपणम्॥ १३॥
भूमेर्मातुर्वैष्णवानां वैकुण्ठादागतिर्यतः। द्वयमप्यत्र मथुरात्यागे हेतुर्निरूप्यते॥ १४॥
प्रमाणरक्षासिद्ध्यर्थमनिवार्यं तु तद्द्वयम्। निवार्यः सप्तदशधा ब्रह्माण्डे तु प्रजापतिः॥ १५॥
सप्तदशधा प्रोक्तस्तन्निवृत्तावशक्यता। अतोऽत्र प्रथमं वाच्यं कृतिशक्यमनेकधा॥ १६॥
उत्तरार्धसमैः श्लोकैरतिदेशस्ततः परम्। द्वाभ्यां कलाभिपरः साधिकाभिरिति स्थितिः॥ १७॥

भगवानक्लिष्टकर्मेति निरूपयितुं प्रथमं कंसभार्ययोरुपद्रवहेतुमाह अस्तिप्राप्तीति द्वाभ्याम्। उभयोः क्रियायोगित्वाय प्रथमत एव तथा निरूपितम्। अस्तीति सर्वधात्वर्थः, क्रियासामान्यम्। प्राप्तिः सर्वक्रियाफलम्। भगवदिच्छया एते पुत्ररहिते अतिक्रुद्धे भगवत्सान्निध्यादेव भर्त्रा सह गमनरहिते पितृगृहे गते। दिग्विजये पराजितः सोऽपि दुहितरामदादिति पुराणान्तरप्रसिद्धिः। चकारात्तत्सम्भृतिर्दास्यः सर्वाश्च। पितुर्गृहानीयतु.। आकारणं तत एव नोपेक्षितम्। निमित्तंभर्तृमरणम्। भगवतोऽतिसमर्थस्याक्लिष्टकर्मत्वज्ञापनाय तयोर्गमनं प्रसिद्धमेव जातमित्याह स्मेति। नन्वेवं साधनफलरूपयोः कथं वैधव्यमिति चेत्, तत्राह कंसस्य महिष्याविति। महिषीत्वात् पराधीनत्वम्। तद्भोगातिशये प्रवृत्ते अपि भगवदिच्छया तथाभूते तद्विश्वासार्थं भरतर्षभेति। नात्र तयोर्दुःखे लौकिकं किञ्चिदस्तीति भाव॰। गमनेऽपि न दुखान्तरं हेतुः, किन्तु भर्तृहननमेव॥ १॥ गतयोः कृत्यमाह पित्रे इति। मगधराजायेति। प्राकृतदेशाधिपतित्वेन दोषोऽपि निरूपितः। दुर्जयत्वं निरूपयितुं जरासन्धायेति। दुहितृप्रियत्वं निरूपयितुं दुःखित इति। सर्वमाकाशवाणीप्रभृति मरणान्तम्, आत्मनो धवाभावकारणम्, कृष्णचरितमिति यावत्॥ २॥ पूर्वं तेन कंसवधः श्रुत एव, परं मल्लक्रीडायां मञ्चात् पतितो दैवान्मृत इति। इदानीं हेतुपूर्वकं भगवच्चरित्रं श्रुत्वा पयसा पुष्टः सर्प इव जात इत्याह स तदाऽप्रियमाकर्ण्येति। छलेन मारणादमर्षः। मरणं त्वप्रियम्। राजा हि दुःखशोकप्रतीकारं करोत्येव, समर्थस्य तूष्णीम्भावो न युक्त इति। अयं दोषो वस्तुतो वसुदेवस्य। तद्रक्षार्थं सर्व एव यादवाः प्रवर्तिष्यन्त इति दृथिवीमयादवीमेव करिष्यामीति मनसि विधाय, तदर्थं महान्तमेवोद्योगं कृतवान्। स हि महान् भवति, कृष्णस्य च दोषं न पश्यति। आनुपूर्वी तादृशी श्रुतेति। परमोह्युद्यमः तद्बन्धूनामपि स्ववशीकरणमुपायैः। सेनादिसम्पत्तिः स्पष्टैव॥ ३॥ तस्योद्यमस्य फलमाह अक्षौहिणीभिर्विंशत्येति। अक्षौहिणी त्रितयं तस्य गृहस्थम्। विंशतिरुद्यमेन सम्पादिता। पूर्वस्थितं विशेषेण प्रवक्ष्यतीति चकारेण

समुच्चयः, पृथङ्निरूपणं च कृतम् । अभिमतः संवृत इत्यैकमत्यमेकप्रभुत्वं चोक्तम् । यादवानां जये स्थानग्रहणं मूलमिति मथुराग्रहणार्थं तां न्यरुणत् । यतः सा राजधानी । सर्वतोदिशमिति तत्रत्यानां निर्गमनाभावाय । न्यरुणत् आवृतवान्, अष्टदिक्ष्वावरणम् । अनेन रात्रावेव व्याजान्तरेण समागत्यावरणं कृतवानिति लक्ष्यते ॥ ४ ॥

श्रीसुबोधिनी-सारः

ॐ गोविंदो गोमती गंगा गायत्री गौर्गया गुरुः । गीता गीतं सुगाथाश्च ग्रामदेवा दिशन्तु शम् ॥ १ ॥
हत्वा कांश्चिद्घातयित्वाऽभयं दत्त्वा सुभक्ततः । संक्रीडद्द्वारकाधीशो विजयीतेति कीर्त्यते ॥ २ ॥

शुकोक्तिः । हे भरतर्षभ अस्तिः प्राप्तिश्च द्वे कंसस्य महिष्यौ पट्टराज्ञ्यौ भर्त्तरि कंसे मृते सति दुःखेनार्त्ते पीडिते पितुर्जरासंधस्य गृहान् जग्मतुः स्म प्रसिद्धम् ॥ १ ॥ मगधस्य देशस्य राजा तथा तस्मै जरासंधाय पित्रे दुःखिते सत्यौ सर्वमात्मनो वैधव्यस्य कारणं विज्ञापयाम्बभूवतुः ॥ २ ॥ अप्रियं दुःखहेतुत्वात् तदाकर्ण्य श्रुत्वा शोकामर्षाभ्यां युतः स जरासंधोऽयादवीं यदुवंशीयरहितां पृथिवीं कर्त्तुं परमं श्रेष्ठं महान्तं वोद्यमं चकार ॥ ३ ॥ तिसृभिर्विंशत्या त्रयोविंशत्या अक्षौहिणीभिः सेनाभिः संवृतो युक्तो यदूनां राजधानीं मथुरां चतुर्दिशं रुरोध । "सा सेनाक्षौहिणी नाम खागाष्टैकद्विकैर्गजैः । रथैरेतैर्हयैस्त्रिघ्नैः पंचघ्नैश्च पदातिभिः" इति तत्संख्या ॥ ४ ॥

विवरणटिप्पणी

श्रीहरिः । उत्तरार्धे प्रथमाध्याये । कारिकासु । स्वतः सर्वात्मनेति । अन्यानुरोधेन लीला पूर्वार्धे निरूपिता । अत्र स्वतः कृता लीला निरूप्यते इत्यर्थः । इदं पूर्वार्धान्ते सुबोधिन्यां निरूपितम् । निबन्धे 'अलौकिकेन भावेन यावद्धि भगवत्कृतः । स पूर्वार्ध' इति लक्षणमुक्तम् । तत्र अलौकिको भावो भगवतः पुरुषोत्तमस्य भक्तानुरोध इत्यर्थः । 'लोकधर्मं पुरस्कृत्य यच्चकार यदूद्वहः । तदुत्तरार्धकार्य'मित्यत्र लोकवद्धर्मो महाराजवत्प्रकटतया स्वतः सर्वकरणमित्यर्थः । एवमविरोध उभयोः । यदर्थमिति । भक्तिमप्यनपेक्ष्य स्वत एव सर्वोद्धारार्थमित्यर्थः । अत एव स्वतोप्युद्यम्य विवाहादिकरणमिति । नन्वत्र प्रद्युम्नादिलीला अप्युच्यन्ते, अतः सर्वस्या अप्युत्तरार्धलीलायाः कथं निरोधत्वम्, 'निरोधोऽस्यानुशयन'मित्यत्र अस्येतिपदेन भगवल्लीलाया एव निरोधत्वेनोक्तेरित्यत आहुः एषेति । एषा सर्वाप्युत्तरार्धलीला निरोधलीलैव । क्वचित्प्रद्युम्नादिभक्तलीलाकथनेन ईशानुकथात्वं शङ्कितं मा भूदित्येवकारः । परन्तु स्वस्य भगवतो यः संसारः पुत्रादिरूपस्तत्परा । क्वचित्तद्द्वाराप्युच्यते, तथापि लीला भगवत एव । अत एव 'बलपार्थभीमव्याजाह्वयेने'ति वाक्यानीति भावः । भगवांश्चेति । तदीयाश्चेति । धर्मा इति शेषः । भगवद्धर्मविशात्तेषां तथाकृतिः । धर्माश्च भगवद्रूपा । यतः स भगवानेव त्रिधा । अतः सर्वा भगवल्लीलैवेत्यर्थः । तच्छास्त्रं चेति । भगवतः शास्त्रमनुशासकं भगवत्प्रमाहेतुरिति यावत् । तदीयानामेकविंशतिभिर्निरूपणे हेतुमाहुः वाक्यादिति । अत्र भगवत एव वाक्यात्तदीया धर्मज्ञानं निरूपितम् । तच्च सर्वं भगवद्वाक्यं कालातिक्रमेण निरोधसंपादकत्वात्कालस्य चैकविंशतिविधत्वादेकविंशतिविधम् । अतस्तदीया धर्मा एकविंशतिभिर्निरूप्यन्ते इत्यर्थः । तदेव वाक्यं श्रुत्वा अन्यैर्बहुधोदितम्, परन्तु मूलं तदेवेति भावः । भगवतोऽनन्तगुणत्वेपि षड्गुणैरेव निरूपणे हेतुमाहुः तेष्विति । राजसानामिति । साधनरूपे राजसानां निरोधे वक्तव्ये भगवत्कृतिरेव सर्वथा साधनमिति हेतोस्तदेव साधनमाद्याध्याये निरूपितमित्यर्थः । विवाहेति । सा भगवत्कृतिरेतदन्ता साधनप्रकरणे निरूप्या । सप्तमाध्यायस्याग्रिमाध्यायेनैकवाक्यतेति तत्रैव वक्ष्यत इति भावः । अलौकिकमिति । यतो भगवत्कृतिरेव साधनत्वेनोच्यते ततो हेतोः स्थानमप्यलौकिकमेव निरूप्यमिति हेतोस्तादृशं द्वारकारूपं स्थानं निरूप्यते इत्यर्थः । तस्येति । तस्य स्थानस्योपद्रवाभावाय 'सोपि दग्धा'विति श्लोकेन जरासन्धस्य श्रमोत्पादनमीरितम् । द्वारिकागमनज्ञाने तत्राप्यागत्योपद्रवं कुर्यादिति भावः । निग्रहो जरासन्धस्य, अनुग्रहो मुचुकुन्दस्य । पुत्रस्यापीति । पुत्रोपि क्षात्रप्रकारेणैव विवाहं संपादितवानित्यपिशब्दः । तत्पुत्रत्वाद्युक्तमेवेति हिशब्दः । अन्येनापीति । शम्बरेणापि समर्पितां सूपौदनपाचने विनियुक्ताम् । अन्यथा दृष्टिशङ्काभावाय तत्र समर्पितामित्युक्तम् । ततस्तं हत्वा समानीतामिति शेषः । परा रुक्मिणः पुत्र्यपि तत्प्रसङ्गात्क्षात्रधर्मप्रसङ्गादेव स्वयं सर्वान् राज्ञो निर्जित्य हृता प्रद्युम्नस्य भार्या जातेत्यर्थः । आदौ हीति । दशमस्कन्धप्रथमाध्याये इत्यर्थः । इदं च तत्र सम्यग्विवृतमिति तत्संमत्यर्थं हिशब्दः । तन्मध्ये भूमेर्वैष्णवानां चेति दुःखद्वयं मथुरात्यागे हेतुः । तद्द्वयमपि मथुरास्थितावनिवार्यम्, तत्र हेतुः, प्रमाणेति । प्रमाणं वरदानवाक्यं ब्रह्मणोक्तं तस्य रक्षासिद्ध्यर्थमिति । सप्तदशकृत्वो निवारणे अष्टादशे अनिवारणे च हेतुमाहुः निर्वार्य इति । 'यो वै सप्तदशं प्रजापतिं यज्ञमन्वायत्तं वेदेति श्रुतौ प्रजापतेर्ब्रह्माण्डे सप्तदशत्वमुक्तम् । ब्रह्माण्डे तु प्रजापतिः । स च सप्तदशधा । अतो ब्रह्माण्डप्रकारेण यावदागतस्तावत्पर्यन्तं निवारितवान् । अग्रे निवारणं तु अलौकिकभावेन भवति । तादृशो भावस्तु उत्तरार्धे लोकधर्मपुरस्कारेण लीलाकरणान्न संभवति । अतः प्रजापतिनिवृत्तौ सत्यामग्रे भगवतोऽशक्यता । क्वचित्तथाभावोपि स्वीकर्तव्यः, परं प्रयोजनवशात् । तत्तत्रैव विवरिष्यते । अतो हेतोरत्र कृतिशक्यं सप्तदशधा हननमनेकप्रकारेण उत्तरार्धसमैरेकचत्वारिंशद्भिः श्लोकैः प्रथमं वाच्यम् । ततः परं द्वाभ्यामतिदेशो वाच्यः । ततः साधिकाभिः कलाभिः सार्धपञ्चदशभिरपरोतिदेशो वाच्यः । इति स्थितिः । अस्मिन्नध्याये इति शेषः ।

अस्ति प्राप्तीत्यत्र । तत एवेति । पितृगृहादेव हेतोरित्यर्थः । तद्भोगातिशये इति । कंसस्य भोगातिशयार्थं प्रवृत्ते अपि भगवदिच्छया तथाभूते विधवे भोगरहिते जाते इत्यर्थः । तदिति । साधनफलरूपयोरपि भगवदिच्छया भोगराहित्यमित्यत्र विश्वासार्थमित्यर्थः । आभासे वाक्यद्वयार्थ उक्त इति प्रत्येकवाक्यार्थावाहुः गतयोरिति । तथाच गतिः प्रथमवाक्यार्थः, कृत्यं द्वितीयवाक्यार्थ इति भावः । पित्रे इत्यत्र । प्राकृतदेशेति । निषिद्धदेशेत्यर्थः । स तदाऽप्रियमित्यत्र । ननु भगवतो घातकत्वान्निष्कृतिसिद्धये भगवदर्थमुद्योगः कर्तव्यो, न तु वसुदेवार्थं यादवार्थं वेत्यत आहुः स हीति । महान् विचारकुशलः । 'जिघांसन्तं जिघांसीया' दिति शास्त्रात्कृष्णस्य न दोष, किन्तु कापट्यकरणाद्वसुदेवस्य तद्रक्षकत्वाद्यादवानां चेति भाव ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ पञ्चाशत्तमे तु जरासन्धेन संयुगम् । द्वारकाया विनिर्माणं सप्रसङ्गं निरूप्यते ॥ १ ॥

जरासन्धस्य भगवता सह युयुत्साकारणं प्रस्तौति—अस्तिः प्राप्तिश्चेति । महत एव विश्वासो भवतीति तदर्थं तत्कुलमहतो भरतस्य नामग्रहणेन राजानं सम्बोधयति—भरतर्षभेति । अस्तिप्राप्तिसंज्ञके कंसस्य द्वे महिष्यौ भार्ये अतस्ते भर्तरि कंसे मृते सति दुःखेनार्ते पीडिते पितुर्जरासन्धस्य गृहान् ईयतुर्जग्मतुः, स्म प्रसिद्धमेतत् ॥ १ ॥ तत्र गत्वा च ते दुःखिते आत्मनो वैधव्यस्य कारणं देवकीविवाहप्रभृतिकंसमरणान्तं कृष्णचरितं स्वपित्रे जरासंधाय निवेदयाञ्चक्रतुः ज्ञापितवत्यौ । तस्य प्राबल्यं सूचयन्नाह—मगधराजायेति । मगधदेशाधिपतये इत्यर्थः ॥ २ ॥ जरासन्धस्तद्दुहितृभ्यामावेदितं सकारणं स्ववैधव्यमाकर्ण्य कंसे मृते शोकः, तन्मारके कृष्णे अमर्षस्ताभ्यां युतौ महीमयादवीं यादवाङ्कुररहितां कर्तुं परममुद्यमं प्रयत्नं चक्रे ॥ ३ ॥ तदुद्यममेवाह—त्रयोविंशतिभिरक्षौहिणीभिः संवृतो यदुराजधानीं मथुरां सर्वतोदिशं न्यरुणत् निरुद्धवान् ॥ ४ ॥

अन्वितार्थप्रकाशिका

कृष्णः पञ्चाशत्तमे तु जित्वा भूरि जरासुतम् । वकीयान्द्वारकां निन्ये श्लोकाः सार्द्धा गजेषवः (५८॥) ॥
उवाचवाक्त्रयं (३) सार्द्धा त्रयः षष्टिरनुष्टुभः (६३॥) ॥ ५० ॥

अस्तिरिति ॥ हे भरतर्षभ ! अस्तिः प्राप्तिश्चेति संज्ञिके कंसस्य महिष्यौ भर्तरि कंसे मृते सति दुःखार्ते तद्व्यञ्जकरोदनादियुक्ते सत्यौ पितुर्जरासन्धस्य गृहान् ईयतुः जग्मतुः ॥ १ ॥ पित्रे इति । दुःखिते ते स्वपित्रे मगधराजाय जरासन्धाय सर्वं आत्मनो वैधव्यकारणं वेदयाञ्चक्रतुः बोधयांचक्रतुः ॥ २ ॥ स इति ॥ हे नृप ! अप्रियं जामातृमरणसूचकं तत् वचनमाकर्ण्य कंसे शोकः कृष्णे चामर्षस्ताभ्यां युतः स जरासन्धो महीम् अयादवीं यादवराहिताम् । उपसर्जनात् ङीबार्षः । यद्वा । यादवानामियं यादवी न यादवी अयादवी तां यादवसम्बन्धरहिताम् इत्यर्थ । कर्त्तुं परमम् उद्यमं चक्रे ॥ ३ ॥ अक्षौहिणीभिरिति । विंशत्या तिसृभिश्चाक्षौहिणीभिः संवृतः जरासन्धः यदुराजधानीं मथुरां सर्वतो दिशं न्यरुणत् निरुद्धवान् । तत्र कालिङ्गबाह्लीकाद्याः पश्चिमद्वारं रुरुधुः । रुक्मिविदूरथाद्या उत्तरं जयद्रथकेकयाद्याः पूर्वं चैद्यजरासन्धाद्याः दक्षिणमिति हरिवंशात् ज्ञेयम् । अक्षौहिणीप्रमाणं प्रथमव्याख्यायां प्रोक्तम् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

योऽधर्मंन्युदजीजयद्द्विसकुलं वात्येव तू लंक्षितौ धाम्नो ब्रह्मपुराह्वयस्य भवने प्रादुर्बभूवार्दितुम् ।
धर्मंभागवतं हरिः स भगवान् वर्वंति सर्वोपरि तस्मिन्भक्तिसुते भवन्तु सकलामवृन्तयोऽर्हनिशम् ॥ १ ॥
दशमेऽथोत्तरार्धस्य व्याख्यानं क्रियते मया । गोपालानंद मुनिनातुष्टये श्रीहरेः सताम् ॥ २ ॥

इदानीं पंचाशत्तमेऽध्याये युद्धाय जरासंधाऽऽगमनं स्वस्यान्यावतारधारणनिश्चयं च यादवरक्षणाय द्वारिकानिर्माणं तत्र निजजननिवासनं च निरूपयति । तत्रादौ जरासंधागमननिमित्तं शुकः प्राह अस्तिरिति अस्तिः प्राप्तिश्चेत्यभिधे । कंसस्यमहिष्यौषट्ट योषितौ । पितुर्गृहान् ईयतुः जग्मतुः ॥ १ ॥ दुःखिते दुःखव्यंजकरोदनादियुक्ते । आत्मवैधव्यं पतिमरणजन्यं दुःखं तस्य कारणं हेतुं ॥ २ ॥ तयोः अस्ति प्राप्तिनाम्योः स्वदुहित्रोरप्रियं वैधव्यं । शोकामर्षयुतः । जामातरि कंसे शोकः तद्भर्तरि । श्रीकृष्णे अमर्ष क्रोधश्च ताभ्यां युतः । अयादवीं यादवहीनां ॥ ३ ॥ त्रयोविंशति भिरिति वक्तव्येति सृभिर्विंशत्येति पृथगुच्चारणमार्षं यद्वाविंशत्या सहिताभिति सृभिरक्षौणीभिःसंवृत्तः अक्षौहिणी लक्षणमुक्तं । खबाणाग्निनवव्योमचंद्र ॥ १०९३५० ॥ संख्याः पदातयः खेंदु षट्शरषट् ॥ ६५६१० ॥ संख्या अश्वानागरथा अपि ॥ खाद्रिनागेंदुदृक् संख्या ॥ २१८७० ॥ इत्येषाक्षौहिणी स्मृतेति । मथुरांन्यरुणत् रुरोध ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

य: क्षत्त्रियान्वयजनौ धृतकृष्णनामा विप्रान्वये स जनने हरिकृष्णनामा।
सद्धर्मरक्षणसुरारिविनाशने तु तुल्ये द्वयोर्हितनुवृत्तिविनाशनाभ्याम् ॥ १ ॥
एकावुभाविति सदा स्वहितानुरक्तौ स्यातां मदीयहृदयस्थितिकारिणौ हि।
याचे त्वदित्थमहमीश ततो मदीयान् दोषान् निवर्त्त्य दयया कुरु मे हितं यत् ॥ २ ॥
पौत्रोऽहं तव भगवत्प्रसादनामेत्यन्वर्थी कुरु भगवन्ममाभिधां त्वम्।
सत्वेवं दशमपराद्धंकस्य टीकां कर्त्तुं स्यामलमितरप्रकारतो नो ॥ ३ ॥
दशमस्कन्धपूर्वार्द्धं व्याख्यायैव यथामति। अथोत्तरार्द्धं व्याख्यामि तेन तुष्यन्तु साधवः ॥ ४ ॥
स पञ्चाशत्तमेऽध्याये भयादिव जरासुतात्। विधाप्य जलधौ दुर्गं तं निनाय जनान्निजान् ॥ ५ ॥

अथ जरासंधजयात्मकं श्रीकृष्णभगवच्चेष्टितं वर्णयितुकामो मुनिस्तावज्जरासंधस्य भगवता सह युयुत्साकारणं प्रस्तौति सार्द्धद्वयेन। अस्तिरिति। हे भरतर्षभ, अस्तिः, प्राप्तिश्चेति, द्वे कंसस्य महिष्यौ भार्ये, भर्त्तरि कंसे, हते सति, भगवतेति शेषः। मृते इत्यपि पाठः। दुःखार्त्ते दुःखपीडिते, भूत्वेति शेषः। पितुः जरासंधस्य, स्मेति प्रसिद्धान्, गृहान्, गृहं प्रतीत्यर्थः। ईयतुः जग्मतुः ॥ १ ॥ पित्र इति। ततः मगधराजाय मगधदेशाधिपतये, जरासंधाय, पित्रे स्वजनकाय, दुःखिते वैधव्यदुःखवत्यावस्तिप्राप्ती, सर्वं आत्मवैधव्यकारणं, वेदयांचक्रतुः ज्ञापितवत्यौ ॥ २ ॥ स इति। स जरासंधः नृपः, तत् दुहितृभ्यामावेदितं, अप्रियं, आकर्ण्य, शोकश्चामर्षश्च ताभ्यां युतो युक्तः, कंसे शोकः कृष्णेऽमर्षस्तदुभययुक्त इत्यर्थः। महीं पृथ्वीं, न विद्यन्ते यादवा यस्यामित्ययादवी तां, यादवाङ्कुररहितामित्यर्थः। कर्त्तुं, परमं, उद्यमं यत्नं, चक्रे ॥ ३ ॥ अक्षौहिणीभिरिति। विंशत्या तिसृभिश्चापि, अक्षौहिणीभिः संवृतः, त्रयोविंशत्यक्षौहिणीबलपरिवेष्टितः सन्नित्यर्थः। यदुराजधानीं यदुकुलोत्पन्नराज्ञामाश्रयभूतामित्यर्थः। मथुरां, सर्वतोदिशं चतुर्दिक्षु, न्यरुणत् निरुद्धवान्। अक्षौहिणीसंख्या यथा। 'अक्षौहिण्याः प्रमाणं तु खागाष्टैकद्विकैर्गजैः २१८७०। रथै–२१८७०–रेतैर्हयैस्त्रिघ्नैः ६५६१० पञ्चघ्नैश्च १०९३५० पदातिभिः' इति ॥ ४ ॥

कृष्णप्रिया

श्रीमद्भागवत जी के उत्तरार्द्ध में भगवान् ने भक्तों के अनुरोध के बिना ही स्वतः लीलाएँ की है। यह सब निरोध लीला है। उत्तरार्द्ध में ४१ अध्याय है। उत्तरार्द्ध में २॥ प्रकरण है। इस अध्याय में ५८ श्लोक है। यहाँ से राजसलीला के अवान्तर साधन प्रकरण का प्रारम्भ होता है।

श्रीशुकदेव जी ने कहा, भरत कुल मुकुटमणि राजन् परीक्षित् ? अस्ति एवं प्राप्ति नाम की राजा कंस की दो रानियाँ भर्त्ता कंस की मृत्यु के दुःख से दुःखित हो अपने पिता जरासंध के घर चली गई ॥ १ ॥ पति मृत्यु से दुःखित उन दोनों ने मगधाधिपति अपने जनक जरासन्ध को निज वैधव्य का सर्व कारण को निवेदित किया ॥ २ ॥ महाराज परीक्षित ? जरासन्ध ने जब यह अप्रिय बात सुनी तब वह शोक एवं रोष से भर उठा और सारी मही को यादवों से विहीन करने के लिए सर्वथा प्रयत्न शुरु किया ॥ ३ ॥ अपने घर रही तीन अक्षौहिणी सेना और बीस अक्षौहिणी सेना बटोर कर बनी हुई तेईस अक्षौहिणी सेना से यादवों की राजधानी मथुरा पुर को चारों ओर से घेर लिया ॥ ४ ॥

निरीक्ष्य तद्बलं कृष्ण उद्वेलमिव सागरम्। स्वपुरं तेन संरुद्धं स्वजनं च भयाकुलम् ॥ ५ ॥
चिन्तयामास भगवान् हरिः कारणमानुषः। तद्देशकालानुगुणं स्वावतारप्रयोजनम् ॥ ६ ॥
हनिष्यामि बलं ह्येतद् भुवि भारं समाहितम्। मागधेन समानीतं [1]वश्यानां सर्वभूभुजाम्[2] ॥ ७ ॥
अक्षौहिणीभिः संख्यातं भटाश्वरथकुञ्जरैः[3]। मागधस्तु[4] न हन्तव्यो भूयः कर्ता बलोद्यमम् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—कारणमानुषः, भगवान्, हरिः, कृष्णः, उद्वेलम्, सागरम्, इव, तद्बलम्, निरीक्ष्य, तेन, संरुद्धम्, स्वपुरम्, च, स्वजनम्, भयाकुलम्, निरीक्ष्य, तद्देश कालानुगुणम्, स्वावतारप्रयोजनम्, भगवान्, चिन्तयामास ॥ ५–६ ॥ वश्यानाम्, सर्वभूभुजाम्, भटाश्वरथकुञ्जरैः, अक्षौहिणीभिः, संख्याताम्, समाहितम्, एतद्, बलम्, समानीतम्, हि हनिष्यामि, तु (परन्तु) मागधः, न, हन्तव्यः (सः) भूयः बलोद्यमम् कर्त्ता ॥ ७–८ ॥

---

१. वंश्यानां–वीर. ; पश्यतां–विज. । २. भूभृतां–विज. । ३. संकुलं–वीर. । ४. धोऽपि–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्य बलं सैन्यमुद्वेलं लंघितमर्यादं सागरमिव । तेन तस्य बलेन संरुद्धम् ॥ ५ ॥ किं बलमेव हन्मि न मागधम् । मागधं वा हत्वा बलं गृह्णामि । यद्वा समागधं सर्वं हन्मीति चिन्तयामास । ननु प्रथमं कथं जेष्यामीत्येवं चिंतयितुं युक्तं तत्राह । कारण-मानुष इति । भूभारावतारकारणेन मानुषो न तु तत्त्वत इति ॥ ६ ॥ एवं त्रिधा विचिंत्य प्रथमं पक्षं निर्धारितवांस्तदाह चतुर्भिः । हनिष्यामीति ॥ ७ ॥ बलोद्यमं कर्ता करिष्यतीति ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य जरासन्धस्य । उत्त्यक्ता वेला येन स तथा "वेला काले च सीमायामब्धेः कूलविकारयोः" इति मेदिनी ॥ निरीक्ष्येति युग्मकम् ॥ ५ ॥ असंभाव्यमाशंकते–नन्विति । तत्राक्षेपे । तद्देशेति—तस्मिन्देशे काले च यदनुगुणमुचितम् ; इहाधुना किं कार्यमिति विचारितवान्, स्वावतारप्रयोजनं भूभारहरणरूपं च चिंतयामासेति चानुकर्षोऽत्र ॥ कारणं सर्वकारणं यत्तत्त्वं तद्रूप एव मानुषस्तदाकारो न तु प्राकृतरूप इति तल्लीलत्वेऽपि सर्वज्ञानादिशक्तिसत्त्वम् । तस्य देशस्य कालस्य चानुरूपं महासैन्येन श्रीमधुपुर्या निरोधादवश्यमत्रैव तद्धन्तुं योग्यम् । तत्रात्यधुना; विलंबं विनैवेत्यर्थः । किञ्चात्र केचिदाशंकन्ते—अष्टादशाक्षौहिणीक-महाभारतीय युद्धस्य श्रीव्यासदेवेन बहुमहत्त्वं वर्णितमिह चतुर्दशोत्तरचतुःशताक्षौहिणी काहवस्य न किमपि तद्वर्णितमत्र को हेतुरिति । अत्रेदमवधेयम्—तत्र श्रीकृष्णभक्तानां श्रीभीष्मयुधिष्ठिरादीनां महद्युद्धनीत्यादिकौशलवर्णनं श्रोतृजनोद्धारायैव न तु पौत्रसंबंधेनेति, जरासंधादीनां कृष्णभक्तिहीनत्वात्त दीयसंग्रामस्य प्रचुरसैन्यत्वेऽपि न तन्महत्त्ववर्णनमिति । अत एवोक्तम्—"श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोऽर्थः । तत्तद्गुणानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषाम् ॥" इति । यद्वा–अक्षाणां रथचक्राधाराणामूहः समूहो यस्यां सेनायां साक्षौहिणीति सेनाबाहुल्यमेवावयवशक्त्या ज्ञेयं, न तु वाचनिकम् । अत एवोक्तम्—"आजगाम जरासंधस्त्रयोविंशत्यनीकपः" इति । अनीकश्चाक्षौहिण्यवयव एव । तदुक्तममरसिंहेन–'दशानीकिन्योऽक्षौहिणी' इति ॥ ६ ॥ एवमुक्तविधया । प्रथमं पक्षं बलहननरूपम् । तत् बलहननम् । एतद् उपस्थितम् । वश्यानां निजायत्तानाम् समाहितं सम्यक्सर्वतः समाहृत्य प्रोत्साह्य चानीतम् । वश्यानां वंशे स्थितानाम्, अत एव श्रीभीष्मः पांडवाश्च नायाता इति ज्ञेयम् ॥ ७ ॥ भटाश्वरथकुंजरैरुपलक्षिताभिरक्षौरिणीभिः संख्यातं कृतसंख्यामिति पूर्वान्वयि । "भटः परमजातौ स्यात्पदातौ वीरविज्ञयोः" इति निरुक्तिः । बलाय सेनानयनाय । यद्वा—'त्रयोविंशत्यनीकाख्यम्' इति वक्ष्यमाणत्वात्त्रयोविंशतिधाविभक्त-सेनापटलैरिति । सेनापटलेऽपि यौगिकोऽक्षाणां रथचक्रावयवानामूहः समूहो यस्यां सेनायां साऽक्षौहिणीति प्रयोगो नाऽसंगत इति ध्येयम्, अष्टादशकृत्वो लाक्षणिकसैन्याऽऽनयनस्य दौर्घट्यप्रतीतेः ॥ भटादिभिरुपलक्षिताऽक्षौहिणीभिस्संख्यातं कथितम्, न तत्र प्रत्येकं तासां संख्या कर्तुं शक्यते बहुलत्वादाधिक्यमेव विवक्षितम्, चतुरंगिणीत्वादक्षौहिणीशब्दप्रयोगश्चेति प्रतीयते । अघटन-घटनापटीयस्त्वान्मायया यथाश्रुतमपि संभाव्यत एवेति तत्त्वम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निरीक्ष्येति युग्मकम् । कारणं सर्व्वकारणं यत्तत्त्वं तद्रूप एव मानुषस्तदाकारः नतु प्राकृतरूप इति तल्लीलत्वे सर्वज्ञानादि शक्तिमत्त्वं तस्य देशस्य कालस्य चानुरूपं महासैन्येन सर्व्वतः श्रीमधुपुर्य्या निरोधादवश्यमत्रैव योग्यं तत्राप्यधुना विलम्बं विनैवेत्यर्थः ॥ ५–६ ॥ तदेवाभिव्यञ्जयति—हनिष्यामीति सार्द्धकेन । बलं सैन्यं हि यतः सम्यक् आहितमर्पितं भारस्वरूपं सम्यक् सर्व्वतः समाहृत्य प्रोत्साह्य चानीतं वश्यानां वशेस्थितानाम् अत एव पाण्डवाः श्रीभीष्मश्च नायाता इति ज्ञेयम् ॥ ७ ॥ भटा-दिभिर्या अक्षौहिण्यः आभिरेव नतु तासां प्रत्येकं सङ्ख्यातमित्यन्तं बाहुल्यमुक्तं मागधस्त्वित्यर्द्धकम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उद्वेलमिति पारावार-निमज्जनेन सागरस्यानन्त्यम्, तेन बलस्यापि तदुक्तम् । हरिरिति भूभारहरणाभिप्रायेण । भगवान् सर्व्वैश्वर्य्ययुक्तोऽप्यचिन्तयत् । कुतः ? कारणेन भूभारहरणादिप्रयोजनेन मानुषस्तच्चेष्टित इत्यर्थः । किं चिन्तयामास ? तदाह—तदिति । तस्य देशस्य कालस्य चानुरूपं महासैन्येन सर्व्वतः श्रीमधुपुर्य्या निरोधादवश्यमत्रैव तद्धन्तुं योग्यम्, तत्राप्यधुनाऽवि-लम्बेनैवेत्यर्थः ॥ ५–६ ॥ तदेवाभिव्यञ्जयति—हनिष्यामीति । हि यतः सम्यगाहितमर्पितं भारस्वरूपं सम्यक् सर्व्वतः समाहृत्य प्रोत्साह्य चानीतम्, वश्यानामिति तदा तस्य महाप्रतापेन सर्व्वराजवर्गवशीकरणात्, तथा च श्रीहरिवंशे (विष्णु. प. ३४।११–१२)–

'प्रतापावनता ये च जरासन्धस्य पार्थिवाः । मित्राणि ज्ञातयश्चैव संयुक्ताः सुहृदस्तथा ॥
तमेवानुययुः सर्व्वे सैन्यैः समुदितैर्नृपाः । महेष्वासा महावीर्य्या जरासन्धहितैषिणः ॥' इति ।

अतएव पाण्डवाः श्रीभीष्मश्च नायाता इति ज्ञेयम् ॥७॥ भटादिभिर्या अक्षौहिण्यस्ताभिरेव, न तु तेषां प्रत्येकं सङ्ख्यया सङ्ख्यातमित्यत्यन्तं बाहुल्यमुक्तम्, बलेन निजसाम्राज्यशक्त्या उद्यममेतावत्सैन्यानयने युद्धोद्योगम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा श्रीकृष्णः उद्वेलं लङ्घितमर्यादं सागरमिव स्थितं तस्य जरासन्धस्य बलं तेन बलेन संरुद्धं स्वपुरं भयेन व्याकुलं स्वजनं च निरीक्ष्य चिन्तयामासेति सम्बन्धः ॥ ५ ॥ हरिः कारणमानुष इति हेतुगर्भं यद्यपि न तस्योपद्रवः सर्वकारणत्वेन न तद्बलसंहारे प्रयासश्च तथापि आश्रितार्ति—हरत्वात्सर्वकारणत्वेपि मानुष्यत्वात् गृहीतमनुष्यरूपतत्सजातीय चेष्टितत्वान्मनुष्यवच्चिन्तयामास चिन्तयित्वा निश्चितवानित्यर्थः । किङ्कथमित्यत्राह—तद्देशेति । तद्देशकालानुगुणं यथा भवति तथा स्वावतारप्रयोजनं विचार्य्याऽध्यवास्यत् ॥ ६ ॥ विचार्य्य निश्चितमेव दर्शयति—हनिष्यामीति चतुर्भिः । वंशे भवाः वंश्याः तेषां सर्वेषां भूभुजां राज्ञामेतद्भूमेर्भाररूपं समाहितं समुदितं मागधेन जरासन्धेन आनीतमत्र प्रापितम् ॥ ७ ॥ अन्योपि वराहादिदेहः । धर्मरक्षायै प्रभवतः उद्भवतः अधर्मस्य विरमाय च मया सम्भ्रियते ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

कारणं सर्व्वकारणं यत्त्वं तद्रूप एव मानुषस्तदाकारः नतु प्राकृतरूप इति तल्लीलत्वेऽपि सर्व्वज्ञानादिशक्तिमत्त्वं दर्शितम् ॥ ६ ॥ वश्यानां वशे स्थितानाम् अत एव भीष्मपाण्डवांश्च नायातानिति ज्ञेयम् ॥ ७–१० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

चिन्तयामासेत्यादि । हरिः कारणमानुष इति कारणरूपः सर्वस्य हेतुरूपो मानुषो मानुषाकारो द्विभुज इत्यर्थः ॥ (६–९) ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

हरि कारण-मानुष इति कारणरूपो मानुषो मानुषाकारो द्विभुजविग्रह इत्यर्थः । अतएव (भा० १।३।३) "यस्यावयवसंस्थाने" इति प्रथमे व्याख्यान्तरम् । स्वावतारप्रयोजनं चिन्तयामासेति भावः ॥ ६–९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उद्वेलं वेलातस्तीरादप्युद्गतं लङ्घितमर्य्यादमित्यर्थः । ननु किमनेन चिन्तयामास तत्र नहि नहीत्याह, कारणं सर्व्वकारणस्वरूपो महामहेश्वरश्चासौ मानुषश्चेति सः ॥ ५ ॥ तच्चिन्तनमाह चतुर्भिः ॥ ६ ॥ बलं सैन्यं तदर्थमुद्यमं कर्त्ता करिष्यति ॥ ७–८ ॥

गूढार्थदीपिनी

निरीक्ष्येति युग्मकम् । बलं सैन्यम् । उद्वेलं लङ्घितमर्यादम् । अनुगुणमनुरूपं यत् भूमारहरणरूपं प्रयोजनं तत् चिन्तयामासेत्यन्वयः ॥ ५–६ ॥ हनिष्यामीति युग्मम् । समाहितं संस्थितम् भाररूपं बलम् । बलाय सेनानयनाय उद्यमं कर्ता करिष्यति ॥ ७–८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वेलायास्तीरादुद्गतं बहिर्गतं लङ्घिततीरं सागरमिव भगवान् चिन्तयामासेति नन्वाप्तकामस्य चिन्तने किं कारणमत्राह । कारणमानुष इति । कारणचिन्तनेतिमितं । निग्रहानुग्रहविषया मानुषाः यस्य सः कारणं विश्वहेतुश्चासौ स्वकृतसेतुपरिक्षया मानुषः मनुष्याणामयं निग्रहानुग्रहकर्ता चेति वा कथं धार्मिका अनुगृहीताः । अधार्मिकाः निगृहीताश्च स्युरिति चिन्तयामासेत्यर्थः ॥५–६॥ बलं सैन्यं तदुद्यमं कर्त्ता करिष्यति ॥ ७ ॥ अन्योऽपि वराहादिदेहः । धर्मरक्षायै प्रभवतः उद्भवतः अधर्मस्य विरमाय च मया सन्भ्रियते ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उद्वेलं बेलामुद्गत्यायान्तं सागरमिव विद्यमानं तद्बलं सैन्यं तेन बलेन संरुद्धं स्वपुरं मधुरां भयाकुलं स्वकुलं च निरीक्ष्येत्यन्वयः ॥ ५ ॥ कारणेनैव मानुषस्तत्त्वेनावतरितस्तद्देशकालानुगुणं स्वावतारस्य प्रयोजनं भगवांश्चिन्तयामास लोकमनुकुर्वन् ॥ ६ ॥ भारं समाहितं तत्त्वेन स्थितं पश्यतां सर्वभूभृतांताननादृत्येत्यर्थः ॥ ७ ॥ कीदृग्बलमित्यत आह । अक्षौहिणीभिः सङ्ख्यातं भटाश्च रथकुञ्जरैः सङ्ख्यातं तदेव हनिष्यामि । मागधोऽपि मागधस्तु न हन्तव्यः । कुतस्तस्य न हननमित्यत आह ॥ भूयः कर्त्ता बलोद्यममिति ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदा भीतानां वार्ताकथनं व्यर्थमिति भगवतश्चरित्रमाह निरीक्ष्येति । यतो भगवान् कालात्मा अवतीर्णः । तच्च समागतं बलरूपम्, न तु स्नेहार्थमन्यार्थं वा समागतम् । तस्य अमर्यादत्वं चाह । वेलामतिक्रम्य समागच्छन्तं सागरमिव

दृष्टवान्। नन्वक्लिष्टकर्मा भगवान्, यादवनयनार्थमागतो जरासन्धः यादवान् नयतु, राजा वा विचारं करिष्यति, स्वयं किमित्येवं कृतवानित्याशङ्क्याह स्वपुरं तेन संरुद्धमिति । मथुरा तु स्वनगरम्, न केवलं यादवपुरीमात्रम् । निरीक्ष्येति त्रिषु सम्बन्धः । एका मोचनीया, अन्ये निर्भयाः कर्तव्याः, एकं च मारणीयमिति । गुणानां कार्यमुपस्थितमिति दर्शनम् । स्वजना भक्ताः, ते च भयाकुलाः । चकारात् तत्सम्बन्धिनोऽन्ये पुरवासिनः । बलस्यैकत्वमनायासेन मारणज्ञापनाय । पुर्यास्त्वावश्यकत्वाय । स्वजने वसुदेवं ज्ञापयितुम् ॥ ५ ॥ तत्र भगवान् पदार्थद्वयस्योपस्थितत्वात् किं कर्तव्यमिति चिन्तां कृतवानित्याह चिन्तयामासेति । ननु किमेतत् द्वयं यदर्थं चिन्तेत्याशङ्क्याह हरिः कारणमानुष इति । भगवानित्युभयथापि करणे सामर्थ्यमुक्तम् । किमक्लिष्टकर्मत्वात् कंसवदयं मारणीयः, तावत् स्वजनाभिभवः सोढव्यः, आहोस्विदक्लिष्टकर्मत्वं परित्यज्य वैषम्यमङ्गीकृत्य युद्धादिकं कर्तव्यमिति । किं तावत्प्राप्तम् । स्वधर्मपरित्यागोऽनुचित इति हरिस्त्वं दूरीकृत्य कारणार्थं व्याजेन मनुष्यो जात इति कंसवदेव मारणीयः, अन्यथा व्याजकरणं व्यर्थं स्यात् । अक्लिष्टकर्मत्वरक्षार्थमेव मानुषभावेनावतीर्णः । तस्माद्युद्धं न कर्तव्यमिति पूर्वः पक्षः । सिद्धान्तस्तु कर्तव्य इति । यतो हरिरयम्, न भक्तानां दुःखं सहते, स्वधर्मश्च कर्तव्यः, सान्नाहिको हि षोडशवार्षिको भवति, युद्धार्थमागतेन च सह युद्धं कर्तव्यमिति । ननु स्वधर्मोऽन्यथा भविष्यतीति कथं क्लिष्टकरणमित्याशङ्क्य देशानुरोधेन करणं निरूपयति तद्देशकालानुगुणमिति । तस्य देशस्य तस्य च कालस्य युद्धकरणमेवानुगुणम् । कदाचिदङ्गानुरोधेनाप्यङ्गिनो धर्मा अन्यथा क्रियन्ते । यथा प्रवर्ग्यसम्भारे आदित्यास्तमयेविरमणम्, कृतान्तादेव विरमेदिति । यथा वा देशदोषेण प्रधानयागस्यापि नाशः दक्षयज्ञे । तस्मात् तस्मिन्देशे अभक्ताः स्थास्यन्तीति तदनुरोधेन ते मारणीयाः, तेषां च मृत्युकाल उपस्थित इति कालानुरोधोऽपि कर्तव्यः, अतः क्लिष्टकरणं तद्देशकालानुगुणं भवति । किञ्च, स्वावतारस्य प्रयोजनमपि भवति । अवतारो हि भक्तानामुद्धारार्थः । स च कालं वञ्चयित्वा, लौकिकवत् कृत्वा, भक्ता नेयाः । तत्र क्लिष्टकरणमुपयुक्तं भवति । अन्यथा कालो भक्तेषु द्रोहं कुर्यात् कर्मादिभिः । ततो बहुकर्तव्यमापद्येत । अतः स्वावतारस्य प्रयोजनं यस्मात् तादृशमपि विषमकरणमिति भगवतश्चिन्ता युक्ता ॥ ६ ॥ चिन्तया निर्धारितं पक्षमाह हनिष्यामीति चतुर्भिः । बलं हनिष्यामीति प्रतिज्ञा । युक्तश्चायमर्थः । लोके हि यदुपरि यो गच्छति, स तन मार्यत इति नात्र विरोधः । एतदिति प्रदर्शनेन बलस्यातिक्रमोऽपि सूचितः । बलेन समागत इति बलेनैव वधो युक्तो, न तु व्याजेन । पूर्वोक्तास्तु व्याजेन समागताः । अतस्तेषां व्याजेनैव हननं युक्तम् । 'ये यथा मां प्रपद्यन्ते' इति भगवतो व्रतरूपोऽपि धर्मः परिपालितो भवति । अनेन मारणवैषम्यबुद्धिरपि परिहृता भवति । मार्याणामेव तथा बुद्धिर्जातेति । एतत्सर्वमभिसन्धाय भगवान् हिशब्दमाह । किञ्च, सर्वैर्भूभारहरणार्थं विज्ञापिते कार्यान्तरमागच्छन्नपि तेषां कृपयापि तथा समागतः । अत आगमनकार्यसिद्ध्यर्थमपि मारयिष्यामीत्याह भुवि भारमिति । एतद्भाररूपमेव बलम् । अत एव सर्वाधः पाताले स्थापितं तत्कालेन भुवि समाहितम् । सम्यगाहितत्वात् न कृत्रिमकालकर्मादिभिः दूरीकर्तुं शक्यते । ननु राज्ञो बलं धर्महेतुर्भवतीति तद्वधे प्राणिवधः अधर्मश्च स्यादिति चेत् ? तत्राह । मागधेन अधमदेशोद्भवेन समानीतमिति । नन्वेतावता स्वामी महानेव भविष्यतीत्याशङ्क्याह वश्यानां सर्वभूभुजामिति । तद्वश्या दुष्टा एव । तेऽपि तत्स्वभावापन्ना जाता इति । अनेन तद्बलं न ग्राह्यमित्यप्युक्तम् । दुष्टं भारात्मकमिति । तस्याजेयत्वज्ञापनायाह अक्षौहिणीभिः संख्यातमिति । समूहशो युद्धे भङ्गो भवेत् । सजातीया बहवोऽपि एकेन विजातीयेन हस्त्यादिना मार्यन्त इति । आदौ पञ्चभटा युद्धं कुर्वन्ति । तेषां पराजयशङ्कायां त्रयोऽश्ववाराः । तेषामपि पराजये एको रथी प्रवर्तते । तस्यापि तथात्वे षाष्टिहायनो गजः । एवमेकापि पत्तिः क्रमतः सन्निविष्टा जतुमशक्या । तादृशमेतदित्याह । भटाश्वरथकुञ्जरैः कृत्वा पत्त्यङ्गत्रिगुणन्यायेन क्रमबृद्ध्या अक्षौहिणीसंज्ञापन्नाः । तेऽपि बहवः । अतोऽन्येषामशक्यत्वात् मयैव हन्तव्यं बलम् । अनेन सार्द्धश्लोकेन बलस्यावश्यवधार्थं दुष्टत्वं भारत्वं च निरूपितम् । ननु 'शास्त्रफलं प्रयोक्तरी'ति न्यायेन मागध एव किं न हन्यते एते च दीना मोचनीया इति चेत् ? तत्राह मागधस्त्विवति । तुशब्दस्तेषां वधाभावं निराकरोति, भाररूपत्वात् । यद्यपि मागधोऽपि भाररूपः, तथापि शवदाहककाष्ठदाहकदीर्घवंशवदन्तपर्यन्तं संरक्षणीयः । अतो मागधो न हन्तव्यः । तदेवाह भूयः कर्ता बलोद्यममिति बलानयनार्थं उद्यमं करिष्यति, अन्यथा बलं निलीय तिष्ठेत् भारभूतम् । समानयनार्थं वा अधिकः प्रयत्नो भवेत् । यतोऽयं मागधो दुष्टः । आमरणान्तं यत्नं करिष्यतीति ॥ ७–८ ॥

श्रीसुबोधिनी–सारः

उद्वेलं वेलामतिक्रान्तं समुद्रमिव तद्बलं दृष्ट्वा तेन बलेन संरुद्धं स्वस्य पुरं मथुरां दृष्ट्वा भयेनाकुलं व्याप्तं स्वजनं च । देशकालयोरनुगुणमनुरूपं स्वावतारप्रयोजनं तत् दृष्ट्वा कारणेन भूभारहरणेन मानुषो हरिर्भगवान् कृष्णो दध्यौ ॥ ५–६ ॥ तथाहि वश्यानां स्वाधीनानां सर्वेषां भूभुजां राज्ञां समाहितं वर्त्तमानं भुवि पृथिव्यां भारं भाररूपं मागधेन जरासंधेन समानीतमेतद्बलं हनिष्यामि भटाः पत्तयः चतुरङ्गाः भिन्नाक्षौहिणीभिः संख्यातं मागधो न वध्यः तत्र हेतुः बलेनोद्यमं पुनः करिष्यति ॥ ७–८ ॥

विवरणटिप्पणी

भगवतस्तु यादवत्वाभिमानाभावान्नाहत्य रक्षकत्वमिति तेन ज्ञातम् । अतः अयादवीमित्युक्तम् । चिन्तयामासेत्यत्र । स्वधर्मश्चेति । क्षात्रधर्म इत्यर्थः । ननु क्षात्रधर्मास्तु षोडशवर्षानन्तरं विहिता इत्यत आहुः सान्नाहिको हीति । अतिसमर्थस्य

पूर्वमेव सन्नाहग्रहणे तदैव षोडशवार्षिकधर्माः कर्तव्या इति युक्तिबोधनाय हिशब्दः । तं धर्ममाहुः युद्धार्थमिति । ननु स्वधर्म इति । अक्लिष्टकर्मत्वमित्यर्थः । देशदोषेणेति । दैवान्निर्ऋतिग्रहीते देवयजने इति निबन्धे निरूपणादित्यर्थः । हनिष्यामीत्यत्र । कृत्रिमकालेति । कालेन स्वकृतपापेन वा दूरीभविष्यन्तीति नेत्यर्थः । एतदर्थ इत्यत्र । दोषो लौकिक इति । लोकदृष्टान्तसिद्ध इत्यर्थः । यत्रेति । दैत्यवधे पूर्वोक्तप्रकारेण दोषत्वं नापद्यते इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा च कृष्णः उद्वेलं लङ्घितमर्यादं सागरमिव स्थितं तस्य जरासन्धस्य बलं तेन निरुद्धं स्वपुरं तथा भयेन आकुलं व्याप्तं स्वजनं च निरीक्ष्य ॥ ५ ॥ चिन्तयामासेत्यन्वयः 'किं चिन्तयामास ।' इत्यपेक्षायामाह—तद्देशेति । अस्मिन् काले देशे वा किं केवलं सैन्यहननं युक्तं, समागधसैन्यस्य हननं वा, केवलमागधहननं वेति, तथा स्वावतारप्रयोजनं च चिन्तयामासेत्यन्वयः । 'ननु कथं प्रथमतो हननिश्चयं कर्तुं शक्यते' तत्राह—भगवानिति । ननु 'कथं तर्हि अस्मदादिवत्प्रतीयते' तत्राह—कारणमानुष इति । भूभारावतारकारणेन मानुषवज्जातः, न वस्तुतो मानुष इत्यर्थः । भारावतारणेनापि तस्य किं प्रयोजनमित्यपेक्षायामाह—हरिरिति । भक्तदुःखहरणशीलत्वादित्यर्थः ॥ ६ ॥ एवं विचिन्त्य यन्निश्चितवांस्तदाह—हनिष्यामीति । स्ववश्यानां सर्वभूभुजां राज्ञामेतद्भूमेर्भाररूपं समाहितं समुदितं मागधेन जरासन्धेन समानीतमत्र प्रापितम् ॥ ७ ॥ भटैः पदातिभिः, अश्वैः, रथैः, कुञ्जरैश्च व्याप्तं त्रयोविंशतिभिरक्षौहिणीभिः सङ्ख्यातं च बलमेव हनिष्यामि । मागधस्तु मया न हन्तव्यः न हननयोग्य इति द्वयोरन्वयः ॥ तत्र हेतुमाह—भूय इति । अयमधुनैव निहितश्चेत्तदा पुनर्दुष्टानामानेता न स्यात्, तदन्वेषणे च महान् प्रयासः स्यात् । यदि च न हतस्तदा पुनः दुष्टं बलं समानयन्नेवावतिष्ठेत तदा कृत्स्नदुष्टहननं सुकरं स्यात्, अतोऽयमधुना न हन्तव्य इत्यर्थः ॥ ८ ॥

अन्वितार्थप्रकाशिका

निरीक्ष्येति द्वयम् ॥ कारणेन भूभारहरणेन मानुषरूपः भगवान् हरिः कृष्णः उद्वेलम् उत्क्रान्तो वेला तीरमित्युद्वेलः तं लंघितमर्यादं सागरमिव स्थितं तस्य जरासन्धस्य बलं तेन निरुद्धं स्वपुरं तथा स्वजनं भयाकुलं निरीक्ष्य तस्य देशस्य कालस्य चानुगुणमनुरूपं स्वावतारस्य प्रयोजनं चिन्तयामास । किं बलमेव हन्यां किंवा मागधहितं बलमित्यचिन्तयत् ॥ ५–६ ॥ चिन्तितमाह—हनिष्यामीति द्वयेन ॥ स्ववश्यानां सर्वभूभुजां राज्ञामेतद् भुवि भाररूपं समाहितं समुदितं मागधेन जरासन्धेन समानीतमत्र प्रापितं भटैः पदातिभिः अश्वै रथैः कुञ्जरैश्च व्याप्तं त्रयोविंशतिसंख्याभिरक्षौहिणीभिः संख्यातं च बलमेव हनिष्यामि । मागधस्तु मया न हन्तव्यः । यतोऽसौ भूयः बलस्य सन्यसम्पादनस्योद्यमं कर्त्ता करिष्यति । ततश्च भूभारभूतदुष्टसमूहस्यैकत्रैव लाभात्तद्धननं सुकरं स्यात् ॥ ७–८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्य मागधस्य बलमनीकं । उद्वेलमुल्लंघिततटं समुद्रमिव तेन जरासुतसैन्येन संरुद्धम् ॥ ५ ॥ कारणमानुषः कारणं भूभारहरणधर्मस्थापनयोर्निमितं तदर्थं मानुषो मनुष्यत्तुल्यतयेहवर्त्तमानः हरिः शरणगतपीडाहारकः देशः क्षत्रियजातिषु जन्मस्थानं कालो युद्धाय जरासंधागमनसमयश्च तयोर्देशकालयोः अनुगुणं योग्यं । स्वावतारस्य पुरुषोत्तममुख्यावतारस्य प्रयोजनं मुख्यहेतुं स्वमनसि चिंतयामास ॥ ६ ॥ तामेवाचिंतामाह चतुर्भिः हनिष्यामीति । वश्यानां जरासंधाधीनानां भूभुजां राज्ञां वंश्यानामिति पाठे तु भूभुजां राज्ञां वंशे उत्पन्नानां क्षत्रियाणां एतत् बलं सैन्यमेव भुवि समाहितं स्थितं भारं सच्छास्त्रसत्पुरुषोदितधर्मविरुद्धाचरणेन भारभूतं यत् तदेव मागधेन जरासन्धेन सम्यक् आनीतं सत् हनिष्यामि ॥ ७ ॥ तत्र मागधस्तु मया न हन्तव्यः कुतः यतो भूयः पुनर्बलोद्यमं बलाय सैन्याय उद्यमं उद्योगं कर्त्ता करिष्यति अतो न हन्तव्य इत्यर्थः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निरीक्ष्येति ॥ तदा, कृष्णः उद्वेलं लङ्घितमर्यादं, सागरमिव स्थितं, तद्बलं जरासंधसैन्यं, तेन बलेन, संरुद्धं, स्वपुरं भयाकुलं, स्वजनं च, निरीक्ष्य ॥ ५ ॥ चिन्तयामासेति । कारणमानुषः कस्मैचन प्रयोजनाय मानुषवत् प्रतीयमानः हरिः स्वाश्रितापद्धरः, भगवान् श्रीकृष्णः, तद्देशकालानुगुणं तद्देशतत् कालानुगुणं यथा भवति तथा, स्वावतारप्रयोजनं चिन्तयामास । अयं भावः । मया क्षत्रियस्य स्वारिविनाशनमेव मुख्यमस्ति, साम्प्रतं तदर्हौ देशकालौ प्राप्तावती जरासन्धेन युद्धं विधेयं तत्र किमेतद्बलमेव हन्मि, न मागधमिति, युक्तमथवा मागधं हत्वा, तद्बलं गृह्णामि, यद्वा समागधं सर्वं हन्मीति विचारयामासेति द्वयोरेकसंबन्धः ॥ ६ ॥ एवं प्रकारत्रयं विचार्य प्रथमं पक्षं निर्द्धारितवान् तदाह चतुर्भिः ॥ हनिष्यामीति ॥ अक्षौहिणीभिरिति च ॥ वंशे उत्तमान्वये भवा वंश्यास्तेषां, सर्वे च ते भूभुजश्च तेषां, भूमेः भारं भाररूपं, समाहितं समुदितं, मागधेन जरासंधेन, समानीतं, भटाः पत्तयश्चाश्वाश्च रथाश्च कुञ्जराश्च तैः, संकुलमिति शेषः ।अक्षौहिणीभिः त्रयोविंशतिसंख्याकाभिरिति शेषः । संख्यातं एतत्, बलं सैन्यं, हनिष्यामि हि । भूमेरित्यत्र भुवीत्यपि, वंश्यानामित्यत्र वश्यानामित्यपि पाठः । इदानीं मागधो जरासन्धः तु, न हन्तव्यः यतोऽयं जीवन् सन्निति शेषः । भूयः पुनरपि, बलोद्यमं, कर्त्ता करिष्यति । अतोऽयमधुना न हन्तव्य इति भावः । इति द्वयोरेकान्वयः ।७–८।

कृष्णप्रिया

भगवान् श्रीकृष्ण उभरते हुए, सागर के समान जरासंध की विशाल सेना से घिरी हुई अपनी मथुरा नगरी तथा भय से व्याकुल निज प्रजाजन को देखकर मन में विचार करने लगे ।। ५ ।। पुनः कारण मानुष भगवान् श्रीहरि वर्तमान देश एवं वर्तमान काल के अनुरूप अपने भूतल पर प्राकट्य का प्रयोजन को सिद्ध करने के लिए अपने वर्तमान कार्य पर विचार करने लगे ।। ६ ।। विमर्श के अन्त में भगवान् श्रीकृष्ण ने अपना निश्चय दर्शाया कि वर्तमान में तो जरासन्ध राजा के आधीन समस्त राजाओं की भूतल पर भार जो तेईस अक्षौहिणी सेना यहाँ इकट्ठी हुई है उसका ही विनाश करूँगा ।। ७ ।। अभी तो पदाति सैनिक, अश्व, रथ-कुञ्जरों की विपुल अक्षोहिणी सेनाओं का नाश करना है लेकिन मागध जरासन्ध को मारना हैं क्योंकि यदि जरासन्ध जीवित रहा तो वार वार उद्यम कर सेना इकट्ठी कर लाएगा ।। ८ ।।

एतदर्थोऽवतारोऽयं भूभारहरणाय च[1] । संरक्षणाय साधूनां कृतोऽन्येषां वधाय च ॥ ९ ॥
अन्योऽपि धर्मरक्षायै देहः संभ्रियते मया । विरामायाप्य[2] धर्मस्य काले प्रभवतः क्वचित् ॥ १० ॥
[3]एवं ध्यायति गोविन्द आकाशात् सूर्यवर्चसौ । रथावुपस्थितौ सद्यः ससूतौ सपरिच्छदौ ॥ ११ ॥
आयुधानि च दिव्यानि पुराणानि यदृच्छया । ❀दृष्ट्वा [4]तानि हृषीकेशः सङ्कर्षणमथाब्रवीत ॥ १२ ॥

कर्दमक्षमा

अन्वयः—अयम्, अवतारः, एतद्, अर्थः, च, भूभारहरणाय, साधूनाम्, संरक्षणाय, च, अन्येषाम्, वधाय, कृतः ।।९।। मया, अन्यः, अपि, देहः, धर्मरक्षायै, अपि प्रभवतः, अधर्मस्य, विरामाय, क्वचित्, काले, ध्रियते ।। १० ।। एवम्, गोविन्दे, ध्यायति, आकाशात्, सूर्यवर्चसौ, सपरिक्छदौ, ससूतौ, रथौ, सद्यः समुपस्थितौ ।। ११ ।। अथ, दिव्यानि, च, पुराणानि, यदृच्छया उपस्थितानि, तानि, आयुधानि, दृष्ट्वा, हृषीकेशः, संकर्षणम्, अब्रवीत् ।। १२ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वत एव हंतव्यस्तत्राह । एतदर्थ इति । एतच्छब्दार्थं स्पष्टयति । भूभारहरणायेति ।। ९ ।। अयमेतदर्थोऽवतार इत्युपलक्षणमित्याह । अन्योऽपीति । प्रभवतः उद्भवतः ।। १० ।। ससूतौ सारथिसहितौ । परिच्छदः परिकरो ध्वजकवचादिस्तत्सहितौ ।। ११-१२ ।।

---

[1] मे-श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [2] माथ ह्य-विज. । [3] अयं सार्धः श्लोकः कुण्डलितपाठे पाठभेदेन ११ श्लोकरूपेण दृश्यते ।

❀एवं ध्यायति गोविन्दे मागधाधिपतिर्बली । मधुरां सवनोद्यानां रुरोधः बहुसैनिकः ।। १ ।।
कलिङ्गश्चेकितानश्च दन्तवक्रविदूरथौ । उल्मुको वेणुदारी च साल्वश्चैद्यश्च दुर्मतिः ।। २ ।।
पूर्वद्वारं समासाद्य रुरुधुर्मागधाज्ञया । विन्दानुविन्दावावन्त्यौ विराटो दरदस्तथा ।। ३ ।।
एकलव्यो बाह्लिकश्च तथा पञ्चनदेश्वरः । रुरुधुर्दक्षिणद्वारं पौण्ड्रलश्च महाबलः ।। ४ ।।
युधामन्युर्बृहत्क्षत्रः साल्वो भूरिश्रवास्तथा । उत्तमौजाश्च रुक्मी च द्रुमश्चैव सुदक्षिणः ।। ५ ।।
एते नियुक्ता राजानो जरासन्धेन भारत । पश्चिमद्वारमासाद्य रुरुधुर्मधुरां पुरीम् ।। ६ ।।
द्रुपदः शिशुपालश्च त्रिगर्तोऽथ जयद्रथः । शकुनिः सोमदत्तश्च कुणिन्दश्च महाबलः ।। ७ ।।
जरासन्धेन सहिताः सर्वे मदबलान्विताः । उत्तरद्वारमासाद्य रुरुधुर्भरतर्षभ ।। ८ ।।
ते निरुद्ध्य चतुर्द्वाराण्युद्वेलांभोविसंनिभाः ।
सिंहनादं च कुर्वन्तो दध्मुः शङ्खाननेकशः । क्ष्वेलन्तो युद्धसंनद्धा जघ्नुर्भेरीः सहस्रशः ।। ९ ।।
तद्वीरभूपालकदंवजृंभितं युगावसानर्णवघूर्णितोपमम् । निशम्य कृष्णो न चचाल चेतसा मृगालघोषं मृगराडिवोद्धतः ।। १० ।।
एतस्मिन्नेव काले तु गगनात्सूर्यवर्चसौ । रथावुपस्थितौ सद्यः ससूतौ सपरिच्छदौ ।। ११ ।।
आयुधानि च दिव्यानि पुराणानि यदृच्छया । चक्रं सुदर्शनं घोरं सहस्रारं मनोरमम् ।। १२ ।।
गदा कौमोदकी गुर्वी नाम्ना कौमोदकी शुभा । त्रिणतं कार्मुकश्रेष्ठं शार्ङ्गसंज्ञं गुणान्वितम् ।। १३ ।।
तीक्ष्णधारः शितमुखः खड्गो नन्दकसंज्ञितः । लघू शरान्वितौ रम्यौ तूणौ चाक्षयसायकौ ।। १४ ।।
तुरगाः शैव्यसुग्रीवमेघपुष्पबलाहकाः । हलं च बलभद्रस्य मुसलं च दृढं गुरु ।। १५ ।।
इत्येतान्यायुधान्याजौ गगनादागतानि सः ।। १६ ।। (एते श्लोकाः ११।। श्लोकानन्तरं विजये दृश्यन्ते ।)

[4] राजन्-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु निश्चयेन यतः पुनरानयिष्यतीत्यत एव हेतोर्हन्तव्यो भूसार इति। यद्वा—'न त्वतः' इति पाठः स्वामिनां, लेखकप्रमादान्नन्विति जातः, तत्पक्षे, अत एव यतः पुनर्बलमानयिष्यति जरासंधोऽतोऽयं न हन्तव्य इति व्याख्येयम्। एषोऽर्थः प्रयोजनं यस्य स एतदर्थः। एतदर्थम् एतस्मा इत्यर्थः। कस्मै ? तत्राह—भूभारहरणायेत्यादि। अवतारः प्रपंचे प्राकटयम्। 'अयम्' इति पाठः स्वामिसंमतः। 'हि' इति क्वचित्पाठः। भूभारहरण स्पष्टयति—संरक्षणागेति। स शब्देन स्वभक्तिप्रवर्तनादिना लोकद्वयेऽपि रक्षा सूचिता ॥ ९ ॥ अन्योपि रामादिरपि विरामाय विनाशाय ॥ अन्योऽपि किमुत सर्वैश्वर्यादि पूर्णोऽयमित्यर्थः। संस्त्रियते प्रकाश्यते इत्यर्थः। तथा च श्रीगीतासु—"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत" इत्यादि ॥ १० ॥ एवमुक्तप्रकारेण। आकाशाद्वैकुंठात् "आकाशो ब्रह्मवैकुंठस्वर्लोक गगनेषु च" इति धरणिः। सद्यश्चिंतनावसरे। उपस्थितौ प्राप्तौ ॥ एवमिति साद्धकम्। मां पृथ्वीं विन्दतीति गोविन्द इति, भूभारहरणार्थं साक्षादवतीर्णो भगवानित्यर्थः, तस्मिन्। आकाशादूर्ध्वलोकात्तदीयमहावैकुंठादित्यर्थः ॥ ११ ॥ पुराणानि शंखचक्रगदादीनि। यदृच्छयाऽकस्मादेव। "यदृच्छा निर्निमित्ते स्वादद्भुताकस्मिकेऽथवा" इति धरणिः। तानि स्थायुधादीनि। अथ स्थाद्युपस्थित्युत्तरम् ॥ दिव्यानि लोकातीतानि। यतः पुराणानि पुरापि नवानि नित्यानीत्यर्थः। यदृच्छया स्वैरितयां, आनयनादिप्रयत्नं विनैवोपस्थितानि, तेषां भगवदभिप्रायज्ञत्वेन चेतनाभिप्रेता। यद्यपि "हलं संवर्तकं नाम सौनन्दं मुशलं तथा। धनुषां प्रवरं शाङ्र्गं गदां कौमोदकीं तथा ॥" इति श्रीहरिवंशात्, तथा श्रीविष्णुपुराणे च चत्वार्येवायुधान्युक्तानि तथाप्यत्र श्रीभगवच्चक्रं श्रीबलदेवस्य धनुरादिकमपि ज्ञेयं योग्यत्वादन्यत्राऽऽगमनश्रवणाच्च। अत एवाग्रे "एष ते स्थ आयातो दयितान्यायुधानि च" इति बहुत्वम्। दृष्ट्वेत्यद्धकम्। हृषीकेशः विनैव वचनेन सर्वं प्रवर्तयितुं समर्थोऽपि संकर्षणं सर्वं दृष्टिमात्रेण नाशयितुं समर्थमपि। अथ कात्स्न्र्येनाब्रवीत्। लीलाकौतुकावेशेन युक्तिपूर्वकमेव बभाष इत्यर्थः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एतदर्थ इति एतस्मा इत्यर्थः। कस्मै तत्राह—भूभारहरणायेत्यानि अवतारः प्रपञ्चे प्राकट्यं अयमिति तैः (स्वामि) सम्मतः पाठः उत्तरावतारिकानुरोधात् हीति क्वचित् मे मया भूभारहरणं स्पष्टयति, संरक्षणायेति। संशब्देन स्वभक्तिप्रवर्त्तनादिना लोकद्वयेऽपि रक्षा सूचिता ॥ ९ ॥ अन्योऽपि किमुत सर्व्वैश्वर्य्यादिपूर्णोऽयमित्यर्थः सम्भ्रियते प्रकाश्यते इत्यर्थः। तथा च श्रीगीतासु "यदा यदा हि धर्म्मस्य ग्लानिर्भवति" इत्यादि ॥ १० ॥ एवमिति साद्धकम्। गां पृथ्वीं विन्दतीति गोविन्दः इति भूभारहरणार्थं साक्षादवतीर्णो भगवानित्यर्थः। तस्मिन् आकाशादूद्र्ध्वलोकात् तदीयमहावैकुण्ठादित्यर्थः ॥ ११ ॥ दिव्यानि लोकातीतानि यतः पुराणानि पुरापि नवानि नित्यानीत्यर्थः। यदृच्छया स्वैरितया आनयनादिप्रयत्नं बिनैवोपस्थितानि इति तेषां भगवदभिप्रायज्ञत्वेन चेतनाभिप्रेता। यद्यपि—

"हलं सम्वर्त्तकं नाम सौनन्दं मुसलन्तथा। धनुषां प्रवरं शाङ्र्ग ङ्गदां कौमोदकीं तथा ॥"

इति श्रीहरिवंशे तथा श्रीविष्णुपुराणे चत्वार्य्येवायुधान्युक्तानि तथाप्यत्र श्रीभगवतश्चक्रं श्रीबलदेवस्य धनुरादिकमपि ज्ञेयं योगात्वादन्यत आगमनाश्रवणाच्च अतएवाग्रे एष ते रथ आयातो दयितान्यायुधानिचेति बहुत्वं। दृष्ट्वेत्यद्धकं हृषीकेशः विनैव वचनेन सर्वं प्रवर्त्तयितु समर्थोऽपि सङ्कर्षणं दृष्टिमात्रेण सर्वं नाशयितुं समर्थमपि अथ कात्स्न्र्येनाब्रवीत् लीलाकौतुकावेशेन युक्तिपूर्वकमेव बभाष इत्यर्थः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अवतारः श्रीवैकुण्ठलोकादवतरणम्, स मया। ननु भूभारहरणार्थं साधवोऽपि किं हन्तव्याः ? न, साधवः परिपाल्याः, असाधव एव हन्तव्या इत्याह–संरक्षणायेति। सं-शब्देन भक्तिप्रवर्त्तनादिना लोकद्वयेऽपि रक्षा सूचिता। अन्यत्तै र्व्याख्यातम्। यद्वा, ननु साक्षात् त्वया हतस्य सतो नाधिकारिणोऽपि मोक्षो भवितेत्याशंक्याह—एतदिति, भूभाररूपाणां प्राणिनामपि मोक्षप्रदानेन भूभारकेरणाय। तत्प्रकारमेवाह—साधुनां संरक्षणाय योऽसाधूनां वधस्तस्मै चिरान्मोक्षदानाय च, किं वक्तव्यमशेषैश्वर्यप्रकटनावतारेऽस्मिन् साधवः संरक्ष्या असाधवश्च हन्तव्या इति ॥ ९ ॥ अन्यावतारेऽपि तदेतत् क्रियत इति तदावश्यकताभिप्रायेणाह—अन्योऽपीति। संभ्रियते प्रकाश्यत इत्यर्थः। क्वचित्काले प्रभवतो वद्धमानस्येति, यदैव प्रभवेत्, तदैवेत्यर्थः; तथा च श्रीगीतासु (४।७)—'यदा यदा हि धर्म्मस्य ग्लानिर्भवति' इत्यादि; यद्वा, क्वचित् काले संभ्रियत इत्यन्वयः। एवं धर्म्मरक्षया साधूनां संरक्षा, अधर्म्मविरामेण चासाधूनां वधः सिद्ध एव ॥ १० ॥ गां पृथ्वीं विन्दतीति गोविन्दः, भूभारहरणार्थं भुवि साक्षादवतीर्णो भगवानित्यर्थः। तस्मिन् भूभारहरणार्थमीदृशं चिन्तयति सति, आकाशात् ऊद्र्ध्वलोकात् श्रीवैकुण्ठादित्यर्थः ॥११॥ दिव्यानि लोकातीतानि, यतः पुराणानि पूर्व्वसिद्धानि नित्यानीत्यर्थः। इति श्रीभगवदभिप्रायाभिज्ञताभिप्रेता। अतो यदृच्छया लीलया स्वयमेवोपस्थितानि, यद्यपि (विष्णु० प० ३५।६०)–'हलं सम्वर्त्तकं नाम सौनन्दं मुषलं तथा। धनुषां प्रवरं शाङ्र्गं

गदा कौमोदकी तथा ॥' इति श्रीहरिवंशे, तथा श्रीविष्णुपुराणे च चत्वार्य्येवायुधान्युक्तानि, तथाप्यत्र श्रीभगवतश्चक्रं श्रीबलदेवस्य च धनुरादिकमपि ज्ञेयम् । अतएवाग्रे (१३ श० श्लो०) 'एष ते रथ आयातो दयितान्यायुधानि च' इति बहुत्वं युद्धे चक्राद्यप्रयोगश्च तुच्छत्वादिति ज्ञेयम् । हृषीकेशः सर्वेन्द्रियप्रवर्तक इति सर्व्वेषां तदधीनत्वमुक्तम्; किञ्च, संकर्षणं सदा तस्मादपृथग्भूतमग्रजं साहित्याय तेन युद्धक्रीड़ासुखार्थञ्चाह । अथ तत्तद्दर्शनानन्तरमिति तं सद्यो युद्धे प्रवर्त्तयितुं वचनेऽविलम्बतां बोधयति ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

प्रभवतः प्रकर्षेण भवतः ॥ १०–१२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, किं वृथा बलहनने न ममार्थः यो द्वेष्टि स एव हन्तव्यः इत्याशङ्क्य तर्ह्यवतरणं नार्थवत्स्यादित्यभिप्रयन्नाह—एतदर्थ इति । मे मम अवतारः एतदर्थः एष अर्थः प्रयोजनं यस्य तथाभूतः । कोऽसावर्थ इत्यपेक्षायां भूमारेत्यादिभिश्चतुर्थ्यन्तैः प्रयोजनविशेषान्निर्दिशति–भूभारहरणाद्यर्थमयमवतारः कृत इत्यन्वयः । अन्येषामसाधूनां वधाय च ॥ ९ ॥ नेदं प्रयोजनविशेषपरिगणनमपि तु प्रदर्शनमात्रमित्यभिप्रेत्याह–अन्योऽपीति । अन्योऽप्यवतारस्यार्थः प्रयोजनं कोऽसावतस्तं दर्शयति–धर्मरक्षाया इति । अन्योऽपीति एकवचनंसामान्याभिप्रायकं काले कदाचित् क्वचित्प्रभवतः प्रकर्षेण भवतो वर्द्धमानस्य अधर्मस्य विरामाय बिध्वंसनाय च मया देह सम्भ्रियते परिगृह्यते ॥ १० ॥ एवमिति । ध्यायति विचार्य्य निश्चितवति सति तदैव द्वौ रथावाकाशादवतीर्योपस्थितौ स्तः कथम्भूतौ सूर्यस्येव वर्चो ययोस्तौ सारथिसहितौ परिच्छदः परिकरो ध्वजकवचादिस्तत्सहितौ ॥ ११ ॥ नथ हृषीकेशः पुराणानि पुरातनानि दिव्यान्यमानुषाण्यायुधानि चकारात् तैस्सहितौ रथौ च दृष्ट्वा सङ्कर्षणं प्रत्युवाच ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अन्योऽपि वाराहादिरपि स्वकाले प्रभवतः वर्द्धमानस्य विरामाय विनाशाय ॥ १० ॥ मथुरां योग्यानां परमानन्ददात्रीं वेदान्तविद्यां तस्याश्चतुर्द्वाराणि ऋगादीनि पाषण्डशैववीरादयः लिङ्गादिशब्दिता बहवः सैनिकाः सेनारक्षकाः यस्य स तथा "सेनारक्षाश्च सैनिकाः" इत्यमरः ॥ (क–झ) क्ष्वेलन्तः अट्टहासं कुर्वन्तः ॥ (ञ) ॥ कदम्बः समूहः ॥ (ट) ॥ सपरिच्छदौ सोपस्करणौ ॥ ११–१२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

आकाशात् ऊद्र्ध्वलोकात् तदीयमहावैकुण्ठादित्यर्थः ॥११॥ हृषीकेशः विनैव वाण्या सर्व्वं प्रवर्त्तयितुं समर्थोऽपि सङ्कर्षणं दृष्टिमात्रेण सर्व्वं नाशयितुं समर्थमपि अथ कार्त्स्न्येनाब्रवीत् । लीलाकौतुकावेशेन युक्तिपूर्व्वकमेव बभाष इत्यर्थः ॥ १२–२९ ॥

श्रीमज्जीवगोस्वामिकृतो बृहत्क्रमसन्दर्भः

धर्मरक्षायै अन्योऽपि देहो मूर्तिर्मयाध्रियते । इदानीं स्वयमेवावतीर्णो यद्धर्मं रक्षिष्यामि, तत् किमित्यर्थः ॥ १०–१३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

धर्म-रक्षायै अन्योऽपि देहो मयाश्रियते, अधुना तु स्वयमेवावतीर्ण इत्यर्थः ॥ ११–१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एतदर्थोऽवतारः कृतः अर्थं विवृणोति—भूभारेति । अन्येषामसाधूनाम् ॥ ९ ॥ अन्योऽपि देहो वाराहादिः ॥ १० ॥ उपस्थितौ तदिच्छयैव वैकुण्ठादागत्य निकटे स्थितौ ॥ ११–१२ ॥

गूढार्थदीपिनी

एतच्छब्दार्थं विवृणोति भूभारेति । मे मया कृतः ॥ ९ ॥ अन्यो रामादिरपि । प्रभवतां वर्धमानस्य । विरामाय विनाशाय ॥ १० ॥ एवमिति सार्द्धकम् । सूतः सारथिः परिच्छदो युद्धसामग्री ॥ ११ ॥ दृष्ट्वेत्यर्द्धम् । पुराणानि नित्यानि उपस्थितानि ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सूर्यवर्चसौ प्रकाशात्मकौ ससूतौ सारथिसहितौ परिच्छदः परिकरं ध्वजकवचादिस्तत्सहितौ उपस्थितौ तदिच्छयैव निजलोकादागत्य समीपे स्थितौ ॥ ९ ॥ दिव्यान्यमानुषाणि पुराणानि पुरापि नवानि । अनादिसिद्धानीत्यर्थः । आयुधावतरणप्रकारः । हरिवंशे—

ततः खान्निपतन्ति स्म दिव्यान्याहवसङ्कुले । लेलिहानानि दीप्तानि महान्ति सुदृढानि च ॥
क्रव्यादैरनुयातानि मूर्तिमन्ति बृहन्ति च । तृषितान्याहवे भोक्तुं नृपमांसानि वै भृशम् ॥
दिव्यसृग्दामधारीणि त्रासयन्ति च राक्षसान् । प्रभया भासमानानि पतमानानि चाम्बरात् ॥
हलं सम्वर्तकं नाम सौनन्दं मुसलं तथा । धनुषां प्रवरं शार्ङ्गं गदा कौमोदकी तथा ॥
चत्वार्येतानि तेजांसि विष्णुप्रहरणानि च । ताभ्यां समवतीर्णानि यादवाभ्यां महामृधे ॥
जग्राह प्रथमं रामो ललामप्रतिमं हलम् । सर्प्पन्तमिव सर्पेन्द्रं दिव्यमाताकुलं मृधे ॥
सौनन्दं च ततं श्रीमान् निरानन्दकरं द्विषाम् । सव्येन सात्त्वतां श्रेष्ठो जग्राह मुसलोत्तमम् ॥
दर्शनीयं च लोकेषु धनुर्जलदनिस्वनम् । नाम्ना शार्ङ्गमिति ख्यातं कृष्णो जग्राह वीर्य्यवान् ॥
देवैर्निगदितार्थस्य गदा तस्यापरे करे । निक्षिप्ता कुमुदाक्षस्य नाम्ना कौमोदकीति सा इति ॥

प्रकरणान्तरे । तत्रैव श्रीसुदर्शनाद्यागमनं प्रोक्तं श्रीपाञ्चजन्यप्राकट्यं प्राक् प्रदर्शितमेव ॥ १० ॥ त्वं स्वामी विद्यसे येषां ते त्वावन्तः तस्यात्वमार्षम् तेषां व्यसनं प्राप्तम् । न हि स्वामिना भृत्या उपेक्षितव्या इति भावः ॥ ११–१३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अयमवतारो भूभारहरणाय साधूनां रक्षणायान्येषां बलादीनां सकाशाद्वधाय च मे मया कृत इतीदानीमेतदर्थ एतस्य जरासन्धस्यार्थो निवृत्तिस्त्याग इति यावत् ॥ ९ ॥ अन्योऽपि वराहादिरपि देहो मया सम्भ्रियते । क्वचित्प्रभवतः कालेऽधर्मस्य विरामाय विनाशाय देहो व्यासादिदेहो भ्रियते ॥ १० ॥ बहवः सैनिकाः सेनायां समवेता यस्य सः ॥ ११ ॥ दुर्मतिरिति कलिङ्गादिविशेषणम् ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु कथं सर्वेषां वधार्थे प्रयत्नो ब्रह्मणः सर्वात्मनः तत्राह एतदर्थोऽवतारोऽयमिति । मलप्राया व्याधिप्राया दैत्या इति तन्निराकरणे न सर्वात्मत्वं भज्यते । उच्छूनः स्वावयवोऽपि छिद्यत इति । अत एव भगवान् स्वयं पुरुषरूपं प्राप्य तत्र दोषरूपान् दैत्यान् हन्तुं स्वयमेवौषधरूप आविर्भूतः । तदाह एतदर्थोऽवतारोऽयमिति । वैषम्यलक्षणो हि दोषो लौकिकः । स यत्र दोषत्वं न भजते, स दोषो न भवति । अक्लिष्टकर्मत्वं तु पूर्वमेव परित्यज्य समागतमिति 'अङ्गीकृता ग्लानिर्न दोषायेति न्यागेन न दूषणं भवति । स्वतश्चोद्यम्य न हन्यते, निष्कपटेन युद्धार्थमागतं निष्कपटेन युद्धेन हन्तव्यमिति मे अवतारः । मे च भूः । धर्म्यो वधो दोषाय न भवतीति धर्मार्थमप्येतद्वधं करिष्यामीत्याह संरक्षणाय साधूनामिति । कृतत्वान्न करणम् । प्रकारान्तरेण साधुरक्षा कर्तव्येत्याशङ्क्याह अन्येषामपि वधायेति । चकाराद्भक्तिस्थापनार्थम् । ततः कार्यचतुष्टयार्थमवतार इत्युक्तं भवति । भूभारहरणार्थं साधुरक्षार्थं दुष्टनिराकरणार्थं भक्तिप्रवर्तनार्थं चेति । समप्रधानं चतुष्टयम्, नत्वेकमन्यार्थम् । भूभारनिराकरणं राजसम्, रक्षा सात्त्विकी, निग्रहः तामसः, भक्तिर्निर्गुणेति । न हि दुष्टहनने भूभारो गच्छति, पुनरुत्पत्तिसंभवात् । हननार्थमेव प्रयत्ने तु भगवतस्तात्पर्याद्धता एव भवन्ति, न पुनरुत्पद्यन्ते, मुक्तश्च भवन्ति । एवमेव सद्रक्षायामपि । असत्संसर्गात् सतामप्यसत्तापत्तौ सर्ववधे अनिष्टमेव स्यात् । अतस्तेषां बुद्ध्यादिबाधकमेव दूरीकर्तव्यमिति सद्रक्षापि स्वतन्त्रैव । भक्तरननुप्रवेशः स्पष्ट एव । तदाह अन्येषां वधाय चेति ॥ ९ ॥ साम्प्रतवेशस्य प्रयोजनचतुष्टयमुक्त्वा पक्षपातलक्षणो धर्मः पूर्वमपि मयि वर्तत इति सृष्ट्यादावेव तथाङ्गीकारात् न दोषायेति वक्तुं पूर्वमपि धर्मरक्षार्थं मयावताराः क्रियन्त इत्याह अन्योऽपि धर्मरक्षाया इति । एतद्व्यतिरिक्तानामवतारणां धर्मरक्षा अधर्मनिवृत्तिश्च फलम् । एतदेवाभिप्रेत्याह 'यदा यदा हि धर्मस्ये'ति । नत्वयमवतारो धर्मरक्षार्थः केवलः । अपिशब्दात्सोपि संगृह्यते । ततश्च षट् प्रयोजनानि भविष्यन्ति । अधर्मनिराकरणं धर्मरक्षा चेति । अत्रापि पूर्ववदुभयं प्रधानम् । अत एव 'संस्थापनाय धर्मस्ये'त्यपि वाक्यमविरुद्धम् । अत एव बुद्धावतारे केवलं धर्मरक्षैव प्रयोजनम् , कल्वन्यवतारे अधर्मनिवृत्तिरेव, परशुरामावतारै दुष्टनिग्रह एव, बलभद्रे भूभारहरणमेव, पृथ्ववतारे सत्परिपालनमेव । एवं सर्वत्र यथायथमूह्यम् । सर्वाणि तु भगवत्येव । भक्तिश्च स्वतन्त्रा अधिका । नन्वेतत्सर्वं कालकर्मादिभिरेव स्वतन्त्रतया आज्ञया वा सिध्यतु, किं विशेषावतारेणेत्याशङ्कायामाह काले प्रभवत इति । धर्माधर्मौ क्वचिदेव काले प्रभवतः । अतो यदा अनपेक्षितः, तदा अवतीर्य निराकरणं स्थापनं वा कर्तव्यम्, कालस्तु जनक एवेति न तेन तन्निराकरणम्, नियतस्योभयशक्तित्वाभावात् । तस्मादवश्यं वैषम्यं अक्लिष्टकर्मत्वं च भक्ताद्यनुरोधेन कर्तव्यमिति ॥ १० ॥ भगवद्ध्यानमात्रेण भूमिष्ठानां पदार्थानां दैत्यांशवासितत्वात् तेषां सज्जीकरणे विलम्बात् वैकुण्ठादेव साध्ये स्मृते स्वयमेव साधनमागतमित्याह एवं ध्यायतीति । सर्वे हि देवाः अधिकारन्यायेनापि भगवद्वशा इति ज्ञापयितुं गोविन्द इति । आकाशात्सर्वेषामलोकिकत्वज्ञापनाय । दृष्ट एवालौकिकज्ञानं भवतीति दर्शनार्थं सूर्यसङ्काशत्वमाह सूर्यवर्चसाविति । न हि सूर्यं कदाचिदुदितं न पश्यति । अनेन अक्लिष्टकर्मताप्युक्ता । स्वानां भयं च निवारितम् । अलौकिकरथागमनं दृष्ट्वापि यदि युद्धार्थं यतन्ते, तदा मत्युं निश्चित्यैव यतन्त इति न भगवद्दोषः कश्चन । यथा धनुर्भङ्गादिसामर्थ्यप्रदर्शनम्, तथैतदपि । सद्य

एवोपस्थिताविति सिद्धावेव समागतौ, ननु लक्ष्मीवत् रुक्मिण्यादिभावेनोत्पत्तिरपेक्ष्यते । यद्यप्यलौकिकरथस्य न सूताद्यपेक्षा, तथापि तदभावे शोभार्थं वा सूतः कर्तव्य इति प्राकृते स्थापिते तदनुरोधाननुरोधाभ्यां कार्याभावः । अतः ससूतौ । युद्धादिसामग्री कवचादिर्ध्वजादिश्च परिच्छदशब्देनोच्यते ॥ ११ ॥ सायुध एव रथमारोहतीति पृथगायुधानामागमनमाह आयुधानि चेति । धनुःखड्गादीनि दिव्यानि शार्ङ्गप्रभृतीनि । भिन्नान्याकृतिमन्ति निषेधति पुराणानीति । केनचिन्नानीय दत्तानि, किन्तु यदृच्छया स्वयमेवागतानि । एवं सायग्रीं दृष्ट्वा कार्यषट्के भूभारहरणस्योपस्थितत्वात् तदर्थमेव बलभद्रस्यागतत्वात् बलभद्रं इत्याह दृष्ट्वा तानीति । यद्युक्तं न करिष्यति, तथाप्यवतारान्यथानुपपत्त्या तथैव प्रेरयिष्यामीत्यभिप्राय इत्याह हृषीकेश इति । सर्वेन्द्रियप्रेरकस्तथैव प्रेरयिष्यतीति । सङ्कर्षणः सम्यक् भारमाकृष्य दूरीकर्तुं समर्थः ॥ १२ ॥

श्रीसुबोधिनी-सारः

एषोऽर्थो यस्य सोऽयमवतारः कोऽसावित्यत आह भूभारस्य हरणार्थं साधूनां संरक्षणायान्येषामभक्तानां वधाय च मे मया कृतः ॥ ९ ॥ क्वचित्काले समये प्रभवत उद्भवतो धर्मस्य पापस्य विरामाय निवृत्तये धर्मरक्षार्थं चान्योपि देहो मया संध्रियते ॥ १० ॥ गोविंदे एवं ध्यायति सति आकाशात् सूर्यदीप्ती ससूतौ सारथिसहितौ सोपकरणौ द्वौ रथौ उपस्थितौ प्राप्तौ सद्यस्तत्क्षणमेव ॥ ११ ॥ दिव्यानि पुराणानि आयुधानि च प्राप्तानि स्वेच्छया तानि दृष्ट्वा हृषीकेशः श्रीकृष्णो राम माह ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'अवतारप्रयोजनमपि एवमेव सिद्ध्येत्, नान्यथा' इत्याह-एतदर्थ इति । हिशब्दोऽवधारणे । एष अर्थः प्रयोजनं यस्य तथाभूतोऽयमवतारो मे मया कृतः । 'कोसावर्थ' इत्यपेक्षायामाह-अन्येषां दुष्टानां वधायेति । 'दुष्टवधेनापि किम्' इत्यपेक्षायां तत्र प्रयोजनद्वयमाह-भूभारहरणायेति, साधूनां संरक्षणाय चेति ॥ ९ ॥ न केवलमयमेवावतार एतदर्थः, किन्त्वन्योऽपि देहो दुष्टवधेन धर्मरक्षायै क्वचित्कदाचित् काले प्रभवतः प्रकर्षेण वर्धमानस्याधर्मस्य विरामाय विनाशायैव मया सम्भ्रियते परिगृह्यते । यशोविस्तारस्यापि साधुरक्षार्थत्वान्न तद्विस्तारोक्तिविरोधः ॥ १० ॥ गोविन्दे एवं ध्यायति सति सद्यस्तत्क्षणमेव ससूतौ सारथिसहितौ सपरिच्छदौ परिच्छदः परिकरो ध्वजकवचादिस्तत्सहितौ सूर्यस्येव वर्चस्तेजो ययोस्तथाभूतौ द्वौ रथौ आकाशादवतीर्य उपसमीपे स्थितौ ॥ ११ ॥ तथा पुराणानि सनातनानि दिव्यानि आयुधानि चक्रादीनि च यदृच्छया अकस्मादेव रथाभ्यां सहैवागतानीति शेषः । अथ अनन्तरं च तानि दृष्ट्वा हृषीकेशः श्रीकृष्णः सङ्कर्षणमब्रवीत् ॥ १२ ॥

अन्वितार्थप्रकाशिका

एतदिति ॥ हि यतः एष एव अर्थः प्रयोजनं यस्य तथाभूतोऽयमवतारो मे मया कृतः । प्रयोजनमाह । भूभारहरणाय साधूनां रक्षणाय अन्येषामसाधूनां वधाय चेति ॥ ९ ॥ अन्य इति ॥ न केवलमयमेवावतार एतदर्थः किं त्वन्योऽपि वराहनृसिंहादिर्देहो दुष्टवधेन धर्मरक्षायै क्वचित्कदाचित्काले प्रभवतः प्रकर्षेण वर्धमानस्याधर्मस्य विरामाय विनाशायैव मया संभ्रियते परिगृह्यते ॥ १० ॥ एवमिति । गोविन्दे एवं ध्यायति सति सद्यस्तत्क्षणमेव ससूतौ सारथिसहितौ सपरिच्छदौ परिच्छदः परिकरः कवचध्वजादिस्तद्युक्तौ सूर्यस्येव वर्चस्तेजो ययोस्तथाभूतौ द्वौ रथौ आकाशात्तदिच्छयैव वैकुण्ठादवतीर्य उप समीपे स्थितौ ॥ ११ ॥ आयुधानीति । यदृच्छयैव पुराणानि सनातनानि दिव्यानि आयुधानि च उपस्थितानि । अथ तानि रथादीनि दृष्ट्वा हृषीकेशः संकर्षणमब्रवीत् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं देशकालानुगुणं कर्त्तव्यं स्वप्रयोजनं विचिन्त्येदानीं स्वावतारासाधारणप्रयोजनचिंतामाह एतदिति एष दुष्टजननाश एव अर्थः प्रयोजनं यस्य सः अतः अयं अवतारः पूर्णावतारः भूभारहरणाय साधूनां सच्छास्त्रोदित साधुलक्षणसंपन्नानां मद्भक्तानां यद्वा । साधूनां मदनुकूलानां यादवादीनां संरक्षणाय च अन्येषां मत्प्रतिकूलानां वधाय च मे मया कृतो धृतः । यद्वा अन्येषां मद्भक्तप्रतिकूलानां पुरुषाणां स्वभावानां च नाशाय मयाधृतः । अस्मिन् कृष्णावतारे मदिष्टवेदपुराण प्रवर्त्तनलक्षणधर्मस्थापनविरोधकदैत्यांशरजन्यान् स्वयं हत्वा अर्ज्जुनादिभिर्घातयित्वा च युधिष्ठिररक्षितद्वैपायनव्यासद्वारातच्छिष्यैः प्रशिष्यैश्च भरतखंडे सांगवेदपुराणप्रवर्त्तनलक्षणधर्मं स्थापयितास्मीतिभावः तदुक्तमत्रैवाह । त्वानृपानधर्मिष्टान् घातयित्वाऽर्ज्जुनादिभिः अंजसावर्त्तयामास धर्मं धर्मसुतादिभिरिति ॥ ९ ॥ अनेन क्षात्रकृष्णावतारेण दैत्यांशराजन्यहननपूर्वकं वेदपुराणप्रवर्त्तनलक्षणधर्मस्थापनमुक्त्वा इदानीं मोक्षविरोधिका कामक्रोधाद्यधर्मसर्गनाशनपूर्वकसाधुरक्षणरूपधर्मस्य धर्मज्ञानवैराग्यसहितभक्तिलक्षणैकांतधर्मस्य चैवं द्विविधवृषस्य संस्थापनाय नारायणमुनिसंज्ञमन्यं विप्रकुले स्वप्रादुर्भावमाह अन्योऽपीति धर्मरक्षायै उक्तद्विविधधर्मरक्षणार्थं एकान्तधर्मप्रतिपादकशास्त्रविधानेन साधुजनेषु तद्धर्मशिक्षया च साधूनामेकान्तधर्मस्यापि च परिरक्षणायेत्यर्थः क्वचित् कस्मिंश्चित्काले

विक्रमार्कभूपतिशकस्याष्टादशशतोपरिसंवत्सरेषु। प्रभवतो ब्राह्मणादिषूद्भवतः अपेयपानाभक्ष्यभक्षणागम्य स्त्रीगमनस्तेय हिंसादिरूपस्याधर्मस्य विरामायापि विनाशाय च। यो मामेवमसंमूढो जानाति पुरुषोत्तममित्युक्तेन मयापूर्णपुरुषोत्तमेन अन्यः क्षात्रदेहाद्भिन्नः देहो ब्राह्मणतनुः पुनः संश्रियते ध्रियते। क्षात्राऽऽविर्भावादन्येन शांतेन ब्राह्मणरूपेण सामवेदिब्राह्मणकुले आविर्भवामीत्यर्थः। पुरुषोत्तमकालमानदृष्ट्या स्वाविर्भावकालस्यात्यल्पत्वाद्वर्त्तमानप्रयोगः। तज्जन्मोक्तस्कांदेस्फुटमेव। मया कृष्णेन निहतासार्ज्जुनेन रणेषु ये। प्रवर्त्तयिष्यन्त्यसुरास्तेत्वधर्मं यदाक्षितौ धर्मदेवात्तदामूर्त्तौ नरनारायणात्मना प्रवृत्तेऽपि कलौ ब्रह्मन् भूत्वाऽहंसाम गोद्विज इति अस्य नारायणस्य संबंधेन तत्परा बहवो जनाः कलौ भविष्यंतीत्युक्तं जनकं प्रतियोगेश्वरैरपि। कृतादिषु प्रजाराजन् कलाविच्छंति संभवं कलौ खलु भविष्यन्ति नारायणपरायणाः अस्यार्थस्तु अस्मत्कृतैकादशस्कन्धव्याख्याने विवृत्तस्ततोवगन्तव्यः ननु श्रीकृष्णनिश्चितमन्यत् स्वपूर्णावतारत्व मन्येष्वाचार्येष्वपि प्रतिभातीति चेन्मैवं कुतः। यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्। परित्राणाय साधूनां विनाशाय च दुःकृताम्। धर्मसंस्थापनार्थाय संभवामि युगे युगे। इति भगवद्गीतोक्तश्लोकद्वयेनोक्तानि ब्राह्मणादिषु प्रवृत्तस्य श्रुतिस्मृतिनिषिद्धस्यापेयपानाभक्ष्यभक्षणागम्यस्त्रीगमनस्तेय हिंसाद्य धर्मस्य विनाशनरूपं कामक्रोधलोभादिनिवर्त्तनेन साधूनां परित्राणरूपं च वर्णाश्रमव्यवस्थारूपधर्मस्थापनं चेत्यादीनि समग्राणि भगवदवतारमात्रव्यापकलक्षणान्यपि तेष्वाचार्येषु न भांति तर्हि अर्जुनोद्धवौ प्रतिप्रोक्तयोः। श्रीभगवद्गीतैकादशस्कंधयोरुपदिष्टधर्मज्ञानवैराग्यसहित भक्तिरूपैकांतिकधर्मस्य भक्तजनेषु स्थापनं तथा च गोपादीनां प्रकृत्यतीतब्रह्मपुरादिस्वधामदर्शनं च साधनरहितानेकजनवृंदानां स्वस्वरूपे चित्तनिरोधनं चासंख्यकोटिचन्द्रार्क बृंदादप्यधिकप्रकाशमये ब्रह्मपुरे स्वधामनि ब्रह्मभूतदिव्यविग्रहयुक्तकोटिभिः। परिषेव्यमाणस्य स्वस्य स्वभक्तेभ्यो दर्शनदानं समग्रस्वावताराणां स्वमूर्त्तौ दर्शनदानं च स्वयमेकत्रस्थितः। सन् नानाविधदूरदेशस्थितानां भक्तजनसंघानां मरणादिसंकटसमये स्वप्रत्यक्षदर्शनदानं चेत्यादीनां मुख्यानां पूर्णावतारलक्षणानां तु लेशोऽपि तेष्वाचार्येषु किं संभवति न संभवति तानि समग्राणि लक्षणानि श्रीनारायणमुनिचरणेष्वेव वरीवृततीति निःशंकतयाबोध्यम् ॥ १० ॥ एवं श्रीकृष्णे ध्यायति चिंतयति सति। सूर्यवर्चसौ रविप्रभौ। ससूतौ सारथिना सहितौ। सपरिच्छदौ आयुधादिसामग्रीसहितौ। द्वौ रथौ सद्यः उपस्थितौ भवतः ॥ ११ ॥ तानि दृष्ट्वा संकर्षणमब्रवीत् ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु किं वृथा बलहृत्यया यः स्वं द्वेष्टि स एव हन्तव्यः, इत्याशङ्क्य ममावतारो भूभारहरणाय बलमेतद्भूभाररूपमेव तच्चायमितस्ततोऽन्विष्यानयिष्यति, तस्यात्रैव स्थित्वा हनने कृते सहजतया ममार्थसिद्धिः स्यादित्यभिप्रयन्नाह। एतदर्थ इति। मे मया, अयं, अवतारः, एषोऽर्थः प्रयोजनं यस्येत्येतदर्थः, कृतः। कोऽसावर्थ इत्यपेक्षायां भूभारेत्यादिभिश्चतुर्थ्यन्तैः प्रयोजनविशेषान्निर्दिशति। भूभारहरणाय, साधूनां संरक्षणाय, अन्येषां तत्प्रतिपक्षभूतानां, वधाय विनाशनाय, चकाराद्धर्मरक्षणपूर्वमधर्मस्य विनाशनायेत्यर्थः। भूभारहरणाद्यर्थमयमवतारो मया धृतोऽस्तीति भावः ॥ ९ ॥ एवं निर्द्धार्यापि भमावसुरांशभूतनृपदेशिकानां प्राचुर्यमालोच्यानेनावतारेण तु असुरांशभूताऽधर्मिविनाशनद्वारा भूभारहरणतदनुगुणसत्परित्राणधर्मरक्षेत्येतावदेवावश्यं कार्यं विशेषतः सत्परित्राणं सत्प्रतिकूलानामसतामहिंस्रतया वधो धर्मपरित्राणमधर्मविनाशनं तानि यथार्थं त्वन्येनावतारेणैव करिष्यामीति निश्चित्याह। अन्योऽपीति। क्वचित् कदाचित् कस्मिंश्चित् काले, विक्रमार्कशकप्रवृत्तेः संवदष्टादशशतोपरितनेषु संवत्सरैष्वित्यर्थः। प्रकर्षेण भवतीति प्रभवस्तस्य प्रभवतो वर्द्धमानस्य, अधर्मस्यापेयपानाऽभक्ष्यभक्षणाऽगम्यागमनस्तेयहिंसादिरूपस्य धर्मप्रतिपक्षस्य, विरामाय विध्वंसनाय, धर्मरक्षायै अपि, धर्मरक्षणार्थं चेत्यर्थः। अन्योऽपि देहः मया, संश्रियते परिगृह्यते इति तदर्थः। तत्रास्य श्रीकृष्णस्य पुनः क्व प्रादुर्भाव इति चेत्, स स्कान्दे स्फुटमुक्तः। ‘मया कृष्णेन निहताः सार्जुनेन रणेषु ये। प्रवर्त्तयिष्यन्त्यसुरास्ते त्वधर्मं यदा क्षितौ। धर्मदेवात्तदा मूर्त्तौ नरनारायणात्मना। प्रवृत्तेऽपि कलौ ब्रह्मन् भूत्वाऽहं सामगो द्विजः’ इत्यादिना। एवमेव ब्रह्माण्डभविष्यदादावपि सम्यगेवोक्तमस्ति, नारायणस्यास्य सम्बन्धेन जनानां तत्परायणत्वमेकादशेऽपि योगेश्वरैर्जनकं प्रत्युक्तमस्ति। ‘कृतादिषु प्रजा राजन् कलाविच्छन्ति संभवम्। कलौ खलु भविष्यन्ति नारायणपरायणाः’ इत्यादिना। नन्वेकस्यैव कृष्णस्य वारद्वयं कथमवतारः संगच्छेतेति चेन्मत्स्यद्वयकूर्मद्वयवराहद्वयधन्वन्तरित्रयादिवत् घटते। सतत्प्रपञ्चो लघुभागवतामृतात्सविस्तरं बोध्यः। उक्तप्रकारं भगवदवतारप्रयोजनं भगवता श्रीकृष्णेनापि स्वमुखेनोक्तमस्ति। ‘यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्। परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय संभवामि युगे युगे’ इत्यादिना। सतत् स्फुटतया श्रीमद्गोपालानन्दस्वामिकृतदशमस्कन्धटीकायामेतच्छ्लोकव्याख्यानतोऽवगन्तव्यम्। किं च पुनः प्रादुर्भविष्यन् कृष्णः क इति चेत्, स स्वामिनारायण एवेत्यपि सत्सङ्गिजीवनहरिलीलाकल्पतरुसुधासिन्धुहरिदिग्विजयसम्प्रदायशुद्ध्यादेः सविस्तरं बोध्यमकृतत्वादत्र न प्रपञ्च्यते। इति द्वयोरप्येकसंबन्धः ॥ १० ॥ एवमिति। एवमित्थं, गोविन्दे श्रीकृष्णभगवति, ध्यायति विचार्य निश्चितवति सति, सूर्यवर्च्चसौ सूर्यतेजः समानतेजसौ, ससूतौ सारथिसहितौ, परिच्छदः परिकरो ध्वजकवचादिस्तत्सहितौ, द्वौ रथौ, आकाशात्, सद्यः उपस्थितौ, आकाशादवतीर्य पुरतः स्थितौ स्तः स्मेत्यर्थः ॥ ११ ॥ आयुधानीति। अथ हृषीकेशः श्रीकृष्णः, पुराणानि पुरातनानि, दिव्यान्यमानुषाणि, तानि प्रसिद्धानि, आयुधानि, यदृच्छया, प्राप्तानीति शेषः। चकारादुक्तविधौ रथावपि, दृष्ट्वा संकर्षणं संकर्षणावतारं, बलभद्रं, अब्रवीत्। यद्वक्तव्यं तत् प्रत्युवाचेत्यर्थः ॥ १२ ॥

कृष्णप्रिया

मेरा भूतल पर अवरण का लक्ष्य भूमि का भार दूर करना, साधुजनों की रक्षा करना और असाधुजनों के विनाश करने का ही है ॥ ९ ॥ मैं कभी कभी अन्य अवतार भी लेता हूँ लेकिन एक ही कार्य करने के लिए होता है और वह कार्य किसी भी प्रकार के धर्म की रक्षा के लिए एवं अधर्म के निराबल हो, ऐसे कार्य तो कभी किसी समय होते हैं ॥ १० ॥ इस प्रकार भगवान् गोविन्द विचार कर रहे थे इतने में सूर्य के समान तेजस्वी, समराङ्गण की सामग्री से सजे, एवं सारथियों सहित शीघ्र ही दो रथ उतर आए ॥ ११ ॥ इस रथ में यद्यपि नूतन तथापि असल आकृति वाले दिव्य आयुध सजे थे। भगवान् श्रीकृष्ण ने उन दोनों रथ को देखकर अपने बड़े भैया संकर्षण जी से कहा ॥ १२ ॥

पश्यार्य व्यसनं प्राप्तं यदूनां [1]त्वावतां प्रभो । एष ते रथ आयातो दयितान्यायुधानि च ॥ १३ ॥
[2]यानमास्थाय जह्येतद् व्यसनात् स्वान् समुद्धर । एतदर्थं हि नौ जन्म साधूनामीश [3]शर्मकृत् ॥ १४ ॥
त्रयोविंशत्यनीकाख्यं[4] भूमेर्भारमपाकुरु । एवं सम्मन्त्र्य दाशार्हौ दंशितौ रथिनौ[5] पुरात् ॥ १५ ॥
[6]निर्जग्मतुः [7]स्वायुधाढ्यौ बलेनाल्पीयसाऽऽवृतौ[8] । [9]शङ्खं दध्मौ विनिर्गत्य हरिर्दारुकसारथिः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—हे, आर्य, पश्य, त्वा, अवताम्, यदूनाम्, व्यसनम्, प्राप्तम्, पश्य, एष, ते, रथः, आयातः, च ते, दयितानि, आयुधानि, आयातानि ॥ १३ ॥ हे ईश ! यानम्, आस्थाय, एतत्, जहि, स्वान्, व्यसनात्, समुद्धर, हि, नौ, जन्म, साधूनाम्, शर्मकृत्, एतद्, अर्थम्, हि वर्तते ॥ १४ ॥ भूमेः, त्रयोविंशत्यनीकाख्यम्, भारम्, अपाकुरु, एवम्, सम्मन्त्र्य, दंशितौ, रथिनौ, स्वायुधाढ्यौ, बलीयसा, बलेन, आवृतौ, दाशार्हौ, पुरात्, निर्जग्मतुः, दारुकसारथिः, हरिः, विनिर्गत्य शङ्खम् दध्मौ ॥ १५–१६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्वमेवावन् रक्षकौ नाथो विद्यते येषां ते त्वावन्तस्तेषाम् ॥ १३–१४ ॥ दंशितौ बद्धकवचौ ॥ १५ ॥ स्वायुधाढ्यौ शोभनायुधसंपन्नौ ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

त्वावतामत्र समासे त्वदादेशस्य टेराकारश्छांदसः । पश्य अवधेहि । तत्किम्—व्यसनमिति 'व्यसनं विपदि भ्रंशेऽत्याशक्तौ' इति कोशात् । त्वम् नाथः विद्यसे येषां ते त्वावन्तः । मतुप्यात्वमार्षम् । यद्वा—त्वमवन् । रक्षको येषामिति शतर्यपि तथा । "रक्षकोऽवस्त्राणकरो नाथः स्वाम्यधिपो गुरुः" इति कोशात् ॥ १३ ॥ एतद्बलम् । ईशेति संबुद्धिः ॥ निर्णयमाह—यानमिति । एतत्सैन्यं जहि । तन्मुख्यप्रयोजनमादिशति—व्यसनादिति । स्वान् सकलसाधुजनालंबनरूपान्परिकरान्सम्यगक्षतत्वादिनोद्धर । एतच्चावश्यकतार्थमित्याशयेनाह—एतदर्थमिति । हि यस्मात् । यत एवान्येषां च साधूनां शर्मकृन्द्भवेदित्यर्थः । हे ईशेति प्रोत्साहनम् ॥ १४ ॥ अनीकपदमक्षौहिणीपरम् एवमित्थम् । 'दंशितः कवचाचितः, इति मेदिनी ॥ आवश्यकतार्थमेव सैन्यस्य हननस्य च वैशिष्ट्यमाह–त्रयोविंशतिरनीकान्यक्षौहिण्योऽनीकिन्यो वा, तदाख्यं तावत्संख्यम् । यद्वा–त्रयोविंशतिश्च ता अक्षौहिण्यस्त्रयोविंशत्यक्षौहिण्यस्ता एवानीकं सैन्यं त्रयोर्द्विवशत्यनीकम् । मध्यमपदलोपो समासः त्रयोविंशत्यनीक माक्या यस्य तथेति । भार भारभूतम् । दाशार्हाविति मनुष्यलीलापरत्वमभिप्रेतम् । अत एव दंशितौ ॥ १५ ॥ अल्पीयसाऽल्पप्रमाणेन । दारुकस्तन्नामा सारथिर्यस्य स तथा 'दारुकः कृष्णसारथिः' इति कोशात् ॥ अल्पीयसेति जरासंधबलापेक्षया, तत्रापि हरिवंशोक्तविकद्रुदुर्मन्त्रणया सर्वेषामागमनेन च । अत एवावृतौ आवरणशक्त्या चतुर्दिक्षु वेष्टितौ । स्वैर्निजायुधैराढ्यौ युद्धे संसपन्नौ तत्तदायुधदर्शनेनैव परसैन्यं क्षोभयंतावित्यर्थः । विशेषेण सर्वतो वैलक्षण्यन निर्गत्य, यतो दारुकसारथिः तत्सारथित्वोपलक्षणया दिव्यातिदिव्यतत्तद्द्रव्यादिशक्तिमान् । हरिरिति शंखध्वनिनैव परेषां वीर्यादिहरणाभिप्रायेण ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पश्य अवधेहि तत् किं व्यसनमिति त्वावतामित्यत्रात्वमार्षं किञ्च, एष इति । आर्येति सादरसम्बोधनं स्वभावात् प्रभो इति वक्ष्यमाणनिर्णयसामर्थ्यबोधनाय । दयितानीति स्वतः सामर्थ्येप्यङ्गीकारावश्यकं सूचयति ॥ १३ ॥ निर्णयमाह—यानमिति । एतत् सैन्यं जहि तन्मुख्यप्रयोजनमादिशति व्यसनादिति स्वान् सकलसाधुजनालम्बनरूपान् परिकरान् सम्यगक्षतत्वादिनोद्धर । एतच्चावश्यकार्यमित्याशयेनाह–एतदिति हि यस्मात् यत एवान्येषाञ्च साधूनां शर्म्मकृद्भवेदित्यर्थः । हे ईशेति प्रोत्साहनम् ॥ १४ ॥

---

१. सात्वतां–वीर. २. एन–वीर. । ३. तत् कृतम्–विज. । ४. नीकानां–विज. । ५. रथिनां वरी–विज. । ६. [दंशितैश्च यदुश्रेष्ठैर्बहुभिश्च समन्वितां]–विजये. ७. पुरवरात्–विज. । ८. नृप–विज. ९. शंखं–इत्यारभ्य चत्वार श्लोका विजये न सति ।

आवश्यकतार्थमेव सैन्यस्य हननस्य च वैशिष्ट्ययाह—अर्द्धकेन त्रयोविंशतिरनीकानि अक्षोहिण्यः तदाख्यं तावत्सङ्ख्यमित्यर्थः। यद्वा त्रयोविंशतिः अक्षौहिण्यः तत् सङ्ख्याकमनीकं सैन्यमित्याख्या यस्य तं भावरूपं दाशार्हाविति मनुष्यलीलापरत्वमभिप्रेतम् अत एव दंशितौ। अल्पीयसेति जरासन्ध बलाद्यदुर्बलस्याल्पताभिप्रायेण तत्रापि हरिवंशोक्तविकद्रुदुर्म्मन्त्रणया सर्वेषामागमनेन च अतएवावृतौ आवरणतया चतुर्द्दिक्षु वेष्टितौ स्वैर्निजनिजायुधैराढ्यौ युद्धे सम्पन्नौ तत्तदायुधदर्शनायैव परसैन्यं क्षोभयन्तावित्यर्थः। विशेषेण सर्वतो वैलक्षण्येन निर्गत्य यतो दारुकसारथिः तत् सारथित्वोपलक्षणया दिव्यातिदिव्य तद्द्रव्यादिसम्पत्तिमान् हरिरिति शङ्खध्वनिनैव परेषां वीर्य्यादिहरणाभिप्रायेण ॥ १५–१६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आर्य्येति—सादरसम्बोधनं साहाय्यार्थम्, 'प्रभो' इति युद्धादि समर्थेति प्रोत्साहनार्थम्, दयितानीत्येषामागमनसाफल्यार्थमपि। हन्तमर्हसीति, किंवा एतैः सुखं हननं सिध्येदेवेति भावः ॥ १३ ॥ एतत् सैन्यं जहि। तन्मुख्यप्रयोजनमादिशति—व्यसनादिति, सम्यगक्षतत्वादिनोद्धव। एतच्चावश्यं कार्य्यमेवेत्याशयेनाह—एतदिति। हि एव, एतदर्थमेव न तु केवलं क्रीडासुखार्थम्, एतच्छब्दार्थमेव पुनरत्यौत्सुक्येन कृतपदाढ्यार्थमभिव्यञ्जयति—साधूनां शर्म्म सुखं करोतीति तथा तदिति तत्स्वभाव उक्तः, हे ईशेति प्रोत्साहयति ॥ १४ ॥ अतस्त्रयोविंशतिरनीकानि अक्षौहिण्यस्तदाख्यं तावत्सङ्ख्यमित्यर्थः। यद्वा, त्रयोविंशतिस्त्रयोविंशत्यक्षौहिण्यस्तत्सङ्ख्यकमनीकं सैन्यमित्साख्या संज्ञामात्रं यस्य तम्, दाशार्हौ यदुकुलोद्भवाविति मनुष्यलीलापरत्वमभिप्रेतम्। अत एव दंशितौ, अल्पीयसेति जरासन्धबलाद्यदुबलस्यात्यल्पताभिप्रायेग, किंवा प्रियतमानां स्वसंगिनां दुस्त्यजानां कतिपयानामेव युद्धे नयनात्, अत एवावृतौ अवरणतया चतुर्दिक्षु परिवेष्टितौ, विशेषेण सर्व्वतो वैलक्षण्येन निर्गत्य, यतो दारुकसारथिः। हरिरिति शङ्खध्वनिनैव परेषां वीर्य्यादिहरणाभिप्रायेण। अत एव विशिष्टत्रासेन वेपथुः ॥ १५–१६ ॥

श्रीहरिसूरिविरचितं श्रीभक्तिरसायनम्

त्वावतां त्वया नाथवतां संहारान्निवर्त्तितुमिति शेषः ॥ १३–१८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह–सार्द्धद्वयेन। हे आर्य हे प्रभो! यदूनां व्यसनं प्राप्तम् एतत् पश्य नैते यदव उपेक्ष्या इत्यभिप्रायेण तानेव विशिनष्टि–सात्त्वतामिति। सात्त्वतां भक्तानां भृत्यानामितियावत् न हि स्वामिभृत्यानुपेक्षितुमर्हतीति भावः। तर्हि किम्विधेयमित्यत्राह–एष इति। दयितानि प्रियाण्यायुधानि चकारात् कवचादीनि च आयातानीति लिङ्गवचनविपरिणामः ॥ १३ ॥ एनं रथमास्थायाऽधिष्ठायैतत्परबलं जहि नाशय स्वाम् स्वकीयान् व्यसनादापद उद्धर एतदर्थं प्रतिपक्षनिरसनार्थं हि इह लोके नावावयोर्जन्मावतारः। यद्वा नौ जन्म एतत्प्रतिपक्षनिरसनमर्थः प्रयोजनं यस्य तत्तथा साधूनां शर्मकृत् सुखकारि च ॥ १४ ॥ अतस्त्रयोविंशत्यनीकाख्यं त्रयोविंशत्यक्षौहिणीसैन्यव्यपदेशं केवलं भूमेर्भारमपाकुर्वपनय। एवमिति। इत्थं मिथः सम्मन्त्र्य आलोच्य दाशार्हौ रामकृष्णौ दंशिनौ कवचितौ रथिनौ रथारूढौ स्वासारणैरायुधैराढ्यौ युक्तौ चाल्पीयसा कतिपयेन बलेन चावृतौ च भूत्वा पुरान्मथुराया निष्क्रान्तौ। ततो हरिर्दारुकाख्यः सारथिर्यस्य सः तथाभूतः शङ्खं पाञ्चजन्यं दध्मौ ध्वनयामास ॥ १५–१६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

चक्रं सुदर्शनं घोरं सहस्रारं मनोरमम्। गदा कौमोदकी गुर्वी नाम्ना कौमोदकी शुभा ॥
त्रिनतं कार्मुकश्रेष्ठं शार्ङ्गसंज्ञं गुणान्वितम्। तीक्ष्णधारः शितमुखः खड्गो नन्दकसंज्ञितः ॥
लघूशराचितौ रम्यौ तूणौचाक्षयसायकौ।
तुरगाः शैव्यसुग्रीवमेघपुष्पबलाहकाः। हलं च बलभद्रस्य मुसलं च दृढं गुरु ॥
इत्येतान्यायुधान्याजौ गगनादागतानि सः। सहस्रमराणि दलानि यस्य तत्तथा ॥

कौ मह्यां मोदको नारायणः तस्य विद्यमाना कौमोदकी त्रिषु स्थानेषु कोटिद्वये मध्ये च नतं वक्रं विनतं "कार्मुकं तु चतुर्हस्तम्" इति यादवः शार्ङ्गं शृङ्गविकृतं गुणेन ज्यया अन्वितं सहितम्। त्वावतां त्वद्युक्तानाम्। यद्वा, त्वम् अवः रक्षको येषां ते त्वावन्तः तेषां त्वावतामिति पाठश्छान्दसः साधूनां साधुभिः सत्कृतं कृद्योगे षष्ठी ॥ १३–१४ ॥ त्रयोविंशत्यनीकानां त्रयोविंशदक्षौहिणीनां समुत्पन्नं भूमेर्भारम् ॥ १५ ॥ ब्रह्मसूत्रादयो वसुदेवादिशब्दवाच्याः। दुःखं मन्दयन्ति अल्पीकुर्वतीति दुर्मदास्तान् नुमागमाभावश्छान्दसः महाप्राणं महाघोषम्। युद्धदुर्मदान् युद्धे दुष्टमदान्। वसुदेवादिभिश्चतुर्भिः कलिङ्गाद्यष्टानां "कदवलद हिंसार्थौ" इतिधातुः कदनं युद्धम्। गोविन्देनाध्मातमाश्वासितं चेतो येषां ते तथा तेषां राजन्यानां कटकेन सैन्येन सैन्येपि कटकोऽस्त्रियामित्यभिधानं समूहेन वा ॥ १६–२० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एतदर्थमित्यादि। नौ आवयोर्जन्म प्रादुर्भावः ॥ १५–१६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नौ जन्म प्रादुर्भावः ॥ १५-१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्वं नाथो विद्यसे येषां ते त्वावन्तस्तेषां दकारस्यात्वमार्षम् ॥ १३ ॥

गूढार्थदीपिनी

त्वावतां त्वमेव अवन् रक्षको येषां तेषाम्। आत्वमार्षम्। यद्वा। त्वत्सदृशानां युष्मदस्मदोः सादृश्ये वतुप् 'आसर्वनाम्नः' इत्यात्वम् ॥ १३ ॥ एतत् सैन्यम्। यानं रथम्। शर्म सुखम् ॥ १४ ॥ त्रयोविंशतीत्यर्द्धम्। अपाकुरु दुरीकुरु ॥ १५ ॥ दाशार्हौ यदुवंशीयौ। दंशितौ धृतकवचौ ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एतत् परसैन्यम् शर्मकृत्सुखकृत् ॥ १४ ॥ दंशितौ बद्धकवचौ ॥ १५-१६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विराटादयस्तु तत्पराजिता इति तन्निघ्नाः ॥ १३ ॥ पौण्ड्रको वासुदेवः ॥ १४ ॥ बृहत्क्षत्रस्तन्नामा ॥ १५ ॥ नियुक्ता आज्ञप्ताः ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अथ विचारव्यतिरेकेण निर्धारितमेवाह पश्यार्येति। एकान्ते स्थितावुभौ। अतो यथा लोके परिज्ञानं न भवति, तथा शनैर्वचनानि त्रिभिः। आर्येति सम्बोधनं कृतानुकरणत्वाभावाद्वक्तव्यत्वज्ञापकम्। त्वत्त एव अवनं येषां ते त्वावन्तः। अतः रक्ष्याणां व्यसनं प्राप्तमिति तन्निराकरणमवश्यं कर्तव्यम्। रक्षाप्यवश्यं कर्तव्येत्याह यदूनामिति। अप्रतीकार्यं दुःखं व्यसनमित्युच्यते। यद्यपि पूर्वमेव विचारः कर्तव्यः तन्न कृतमित्यनौचित्यमपि ज्ञापयन्नाह प्राप्तमिति। सामर्थ्यं तु वर्तत इत्याह प्रभो इति। अवताराणां गुणव्यवधानात् साधनानि बोधयति एष ते रथ आयात इति। भवदीय एवायं रथ इत साधने सन्देहाभावः। प्रियाणि च मुसलादीनि आयुधानि। चकारादपेक्षितं सर्वम् ॥ १३ ॥ भूभारहरणं तस्यैव मुख्यमिति तमेव बोधयति यानमास्थायेति। रथमस्थाय एतद्बलं जहि, रथारोहणे सर्वा शक्तिः प्रादुर्भविष्यतीति। विलम्बाभावायाह व्यसनात् स्वान् समुद्धरेति। आवश्यकत्वं स्पष्टम्। कार्यस्याप्यावश्यकतामाह एतदर्थं हि नौ जन्मेति। आवयोर्जन्म एतदर्थम्। युक्तश्चायमर्थः। भूम्या प्रार्थितमिति, अन्यथा जन्मैव न स्यात्। सर्वत्रानुस्यूतं प्रयोजनमाह साधूनां शर्मकृदिति। साधूनां सुखमस्माद्भवतीति सर्वैरेव प्रकारैः ते सुखिनो भवन्तीति महतः आविर्भूतस्यैतदेव कृत्यम्। ईशेति सामर्थ्यम्। अन्यथोपेक्षादोषो भविष्यतीति भावः। परिमितमेवेति प्रयासाभावायाह त्रयोविंशत्यनीकाख्यमिति। अनीकशब्देनाक्षौहिणी। अल्पसङ्ख्याशब्दनिर्देशः अनायासेन निराकरणार्थः। त्रयोविंशत्यनीकान्याख्या नाममात्रं यस्य। वस्तुतस्तु न किञ्चित्, तथापि निराकर्तव्यमेवेत्याह भूमेर्भारमिति ॥ १४ ॥ प्रकटतया कथने राजा निर्गच्छेत्, स्नेहाद्वसुदेवादयः प्रतिबन्धं कुर्युः, अत एकान्ते तथा सम्मन्त्र्य युद्धार्थं प्रवृत्तावित्याह एवं सम्मन्त्र्येति। यतो दाशार्हौ सेवकप्रियौ। दंशितौ पूर्वं बद्धकवचौ। ततः रथिनौ। तत पुरान्निर्जग्मतुः। ततः सुष्ठु आयुधाढ्यौ आयुधं गृहीत्वा युद्धार्थं प्रवृत्तौ। तावता पूर्वं राजाज्ञाभावात् विचाराभावाच्च न सर्वं बलमेकीभूतम्, अतोऽल्पेनैव बलेनावृतौ जातौ। तत्राप्यङ्गवैकल्यं प्रत्ययार्थः। आदौ पाञ्चजन्यं वादितवानित्याह, सैनिकानामुद्योगोत्साहनिवृत्त्यर्थम्। 'यस्य ध्वनिर्दानवदर्पहन्ता' इति। अन्तःप्रवेशाभावाय बहिर्निर्गम्य शङ्खं दध्मौ यतो हरिः। अन्यथा पुरस्थानां शङ्का स्यात्। दारुकः सारथिर्यस्यति सङ्कर्षणांश एवात्र विशेषाकारेण प्रवृत्त इति ज्ञापयितुम्। तृतीयप्रकरणे तस्याप्युपयोगः सूचनीयः, यथा द्वितीये अनिरुद्धे सान्त्वनम्। अग्रे आयुधान्तराणामपि कार्यं भविष्यतीति ज्ञापयितुं कृतस्य नादस्य फलमाह ततोऽभूदिति। शत्रुभूतानां सैन्यानां भाविमरणमदूरे प्रतिभातमिति हृदि विशेषेण त्रासो भयं जातम्। तेन कम्पश्च। शरीरेत्यर्थात् ॥ १६ ॥

श्रीसुबोधिनी-सार

हे आर्य हे प्रभो त्वमेवावन् पालको येषां ते त्वावन्तस्तेषां यदूनां प्राप्तं व्यसनं दुःखं त्वं पश्य एष ते तव रथ आयातः। दयितानि प्रियाणि आयुधानि चायातानि ॥ १३ ॥ यानं रथमारुह्यैतद्बलं त्वं जहि। व्यसनाद्दुःखात्स्वानात्मीयान् समुद्धर। नौ आवयोर्जन्म एतदर्थं एतत्प्रयोजनकं किं तत् आह साधूनां सुखकृत् हे ईश ॥ १४ ॥ त्रयोविंशत्यक्षौहिणीसेनात्मकं भूमेर्भारम् अपाकुरु उत्तारय एवं संमन्त्र्य दाशार्हौ रामकृष्णौ दंशितौ रथस्थौ पुरान्मथुरातः ॥ १५ ॥ निश्चक्रमतुः स्वैःस्वैरायुधैः चक्रहलादिभिराढ्यौ युक्तौ अल्पीयसातितुच्छेन बलेन सैन्येनावृतौ। ततः किं कृतवान् तत्राह। विनिर्गत्य दारुकः सारथिर्यस्य स हरिः शंखं दध्मौ वादितवान् ॥ १६ ॥

विवरणटिप्पणी

पश्यार्येत्यत्र । वचनानि त्रिभिरिति । 'दृष्ट्वा तानी'त्यर्धमादाय श्लोकत्रय ज्ञेयम् । अत एव तदाभासे प्रत्याहेति भगवद्वाक्यत्वमेवोक्तम् । कृतानुकरणेति । अनुकरणं नास्ति, किन्तु वस्तुत एव त्वं महान् । तथा च कृतमनुकरणं येन तादृशत्वाभावादित्यर्थः । शङ्खं दध्मावित्यत्र । तृतीयप्रकरणे इति । साधनप्रकरणे इत्यर्थः । द्वितीये इति । प्रमेयप्रकरणे इत्यर्थः । एतेन प्रमाणादिप्रकरणचतुष्टये प्रद्युम्नानिरुद्धसंकर्षणवासुदेवचरित्रमपि सूचितम् ॥ १३–१६ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह—पश्येति सार्धद्वयेन । हे आर्य हे भ्रातः ! यदूनां प्राप्तं व्यसनं जरासन्धनिरोधजं कष्टं पश्य । 'नच ते उपेक्षायोग्याः, निजभक्तत्वात्' इत्याशयेन विशिनष्टि—त्वावतामिति । त्वं स्वामितया वर्तसे येषां ते त्वावन्तः तेषाम् । 'तेषां च तवोपेक्षाऽयुक्ता, समर्थत्वात्' इत्याशयेन सम्बोधयति—प्रभो इति । तर्हि किं विधेयमित्यपेक्षायामाह—एष इति । एषः ते त्वदर्थं रथ आयातः, तथा दयितानि तव प्रियाणि आयुधानि च हलमुसलादानि आगतानि । अतो यानमेनं रथमास्थाय आरुह्य एतत्सैन्यं जहि, तेन स्वान् स्वकीयान् व्यसनात् समुद्धर ॥ १३ ॥ हे ईश परपक्षनिरसनसमर्थ ! एतदर्थं हि प्रतिपक्षनिरसनार्थमेव नौ आवयो र्जन्म, अतः प्रतिपक्षनिरसनादेव साधूनां सदाचारनिष्ठानां शर्म सुखं करोतीति तथा तत् । अतः अनीकशब्दः अक्षौहिणीवाचकः, त्रयोविंशतिः अक्षौहिण्य इति आख्या नाम यस्य तं भूमेर्भारमपाकुरु दूरीकुरु ॥ १४ ॥ एवं सम्मन्त्र्य मिथः सम्मतिं कृत्वा दाशार्हौ रामकृष्णौ दंशितौ बद्धकवचौ रथिनौ रथाधिरूढौ स्वासाधारणैरायुधैराढ्यौ अल्पीयसा बलेन सैन्येनावृतौ च भूत्वा मथुराया निर्जग्मतुर्निर्गच्छतुरित्यन्वयः ॥ १५ ॥ दारुकाख्यः सारथिर्यस्य स हरिर्बहिर्निर्गत्य शङ्खं पाञ्चजन्य दध्मौ वादितवान् । ततः शङ्खध्वनिश्रवणात् परस्य जरासन्धस्य सैन्यानां हृदि वित्रासो भयम्, तेन वेपथः प्रकम्पो बभूव ॥ १६ ॥

अन्वितार्थप्रकाशिका

पश्येति । हे आर्य ! हे प्रभो ! त्वमवन् रक्षको येषां त्वं नाथत्वेन विद्यसे येषां तेषामिति वा । उभयत्रात्वमार्षम् । यद्वा । त्वावतां त्वत्सदृशानां "युष्मदस्मदोः सादृश्ये वतुप्" इति छान्दसवार्तिकात् "आसर्वनाम्नः" इत्यात्वम् । यदूनां प्राप्तं व्यसनं कष्टं पश्य अवधेहि । एष ते त्वदर्थं रथ आयातः तथा दयितानि तव प्रियाणि आयुधानि च हलमुसलादीनि आगतानि ॥ १३ ॥ यानमिति । यानं रथमास्थाय आरुह्य एतत्सैन्यं जहि । तेन स्वान् स्वकीयान् व्यसनात् समुद्धर । हे ईश ! साधूनां शर्मकृत् नौ आवयोर्जन्म एतदर्थं हि प्रतिपक्षनिरसनार्थमेव ॥ १४ ॥ त्रयोविंशतीति अर्द्धम् । त्रयोविंशतिः त्रयोविंशत्यक्षौहिणीकमनीकं सैन्यमित्याख्या नाम यस्य तं भूमेर्भारमपाकुरु दूरीकुरु ॥ १५ ॥ एवमिति । एवं संमन्त्र्य मिथः संमतिं कृत्वा दाशार्हौ रामकृष्णौ दंशितौ बद्धकवचौ रथिनौ रथाधिरूढौ स्वैरसाधारणैरायुधैः शोभनायुधैर्वा आढ्यौ युक्तौ अल्पीयसा बलेन सैन्येनावृतौ च भूत्वा पुरात् मथुराया निर्जग्मतुः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

त्वावतां त्वमेव अवन् । रक्षिता पतिर्येषां ते त्वावंतस्तेषां यदूनां व्यसनं कष्टं त्वदवतामिति वक्तव्ये त्वावतामित्युच्चारणमार्षम् । हे आर्य राम ॥ १३ ॥ यानं रथं एतत्सैन्यं जहि । शर्मकृत्सुखकृत् ॥ १४ ॥ त्रयोविंशतिसेनाख्यं । अपाकुरु नाशय । एवं संमन्त्र्य पूर्वोक्तप्रकारेण समग्रं विचार्य । दाशार्हौ रामकृष्णौ । स्वविधेयनिश्चयं कृत्वा दंशितौ धृतवर्माणौ पुरान्निर्जग्मतुरित्युत्तरैणान्वयः ॥ १५ ॥ स्वायुधाढ्यौ समीचीनायुधयुक्तौ ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह सार्द्धद्वयेन ॥ पश्येति । हे आर्य हे प्रभो, त्वमेवावन् रक्षको नाथः विद्यते येषां ते त्वावन्तस्तेषां, यदूनां यदुकुलोत्पन्नानामेषां, त्वन्नाथानां त्वद्रक्ष्याणां यदूनामित्यर्थः । व्यसनं महती विपदित्यर्थः । प्राप्तं, तत् पश्य । न हि स्वामी भृत्यानुपेक्षितुमर्हतीति भावः । तर्ह्येतदर्थं किं विधेयमित्यत आह । एष इति । एषः, ते तुभ्यं त्वदर्थमित्यर्थः । रथः, आयातः । दयितानि त्वत् प्रियाणि, आयुधानि च, आयातानीति लिङ्गवचनविपरिणामः । पश्य ॥ १३ ॥ एतावता ते वक्तव्यं किमस्तीत्यत आह ॥ यानमिति ॥यानमेतं रथं, आस्थायाधिष्ठाय, एतत्परबलं, जहि नाशय । स्वान् स्वकीयान् यादवान्, व्यसनादापदः, समुद्धर । एतदर्थं प्रतिपक्षनिरसनार्थं, हि इह लोके इत्यर्थः । हे ईश, नावावयोः साधूनां शर्मकृत्, जन्मावतारः अस्ति । अतः त्रयोविंशत्यनीकाख्यं त्रयोविंशत्यक्षौहिणीत्वेन व्यपदेश्यं केवलं, भूमेः भारं अपाकुरु अपनय ॥ १४ ॥ एवमिति ॥ एवमित्थं, संमन्त्र्य मिथ आलोच्य, दाशार्हौ रामकृष्णौ, दंशितौ कवचिनौ, रथिनौ रथाधिरूढौ, स्वायुधाढ्यौ स्वासाधारणैरायुधैर्युक्तौ, अल्पीयसा कतिपयेन, बलेन सैन्येन च, आवृतौ युक्तौ सन्तौ, पुरान्मथुरायाः, निर्जग्मतुः निष्क्रान्तौ ॥ १५ ॥ शङ्खमिति ॥ ततः,

दारुको दारुकाख्यः सारथिर्यस्य सः, हरिः श्रीकृष्णः, विनिर्गत्य पुराद्बहिरागत्य, शङ्खं पाञ्चजन्यं दध्मौ ध्वनयामास। ततः पाञ्चजन्यध्वनिश्रवणात्, परसैन्यानां शत्रुसेनासमवेतानां, हृदिवित्रासो भयं तेन वेपथुर्गात्रकम्पः, अभूत् ॥ १६ ॥

कृष्णप्रिया

हे बड़े भयाजू ! हे प्रभो ! कृपया देखिए। जिन यादवों के आप रक्षक हैं उन पर कैसा संकट आ पड़ा है, जिसका निवारण आपके विना अन्य कोई नहीं कर सकता है। इसलिए आपके उपयोग के हेतु आपके प्रिय हल मुसल आदि शस्त्र भी रथ के साथ आ गए हैं ॥ १३ ॥ रथ में बैठकर इस जरासन्ध की सेना का नष्ट कर अपने जनों को एवं स्थलों को कष्टों से मुक्त करें। हे नाथ ? अपने अवतार साधुजनों के श्रेयस् के लिए एवं लोक मङ्गल के लिए तो धारण किए हैं। अतः आप तेईस अक्षौहिणी सेना का भूमि भार को दूर करें ॥ १४ ॥ इस प्रकार सेवक के प्रिय श्रीकृष्ण एवं बलभद्रजी दोनों भ्राताओं ने परस्पर परामर्श कर, प्रथम कवच अस्त्र आदि धारण किए। पुनः शस्त्रादि से सज्ज होकर रथ में बैठ गए और युद्ध के लिए निकल पड़े। दोनों के साथ स्वरूप सेना थी। अब दोनों भाई नगर से बाहर निकले। श्रीकृष्ण के रथ को दारुक सारथि चला रहा था। भगवान ने प्रस्थान के समय अपना पाञ्चजन्य शङ्ख को बजाया। शङ्खनाद से शत्रु की सेना के हृदय में भयंकर त्रास उत्पन्न हुआ और शरीर में कंपन भी पैदा हो गई ॥ १५–१६ ॥

ततोऽभूत् परसैन्यानां हृदि वित्रासवेपथुः। तावाह मागधो वीक्ष्य हे कृष्ण पुरुषाधम ॥ १७ ॥
न त्वया योद्धुमिच्छामि बालकेन विलज्जया[1]। गुप्तेन हि त्वया मन्द न योत्स्ये याहि बन्धुहन् ॥१८॥
त्वं तु[2] राम यदि श्रद्धा युध्यस्व धैर्यमुद्वह[3]। हित्वा वा मच्छरैश्छिन्नं देहं स्वर्याहि मां जहि ॥ १९ ॥

श्रीभगवानुवाच

न वै शूरा विकत्थन्ते दर्शयन्त्येव पौरुषम्। न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः ॥ २० ॥[4]

कर्दमक्षमा

अन्वयः—ततः, परसैन्यानाम्, हृदि, वित्रासवेपथुः, अभूत्, तौ, वीक्ष्य, मागधः, आह—हे कृष्ण ! हे मन्द ! हे पुरुषाधम ? हे बन्धुहन्, गुप्तेन, बालकेन, त्वया योद्धुम्, नेच्छामि, विलज्जया, याहि, न, योत्स्ये ॥ १७–१८ ॥ हे राम ! यदि श्रद्धा, तु, त्वम्,

---

[1] बालेनैकेनलज्जया–श्रीधर. वंशी. जीव. वीर. विज. विश्व.। [2] त्वं च राम–इति कस्यचित्; तप–श्रीधरादयः। [3] स्थैर्यं–इति कस्यचित्।

[4] निर्गत्य सदनात्कृष्णो वृष्णीनाहूय सर्वशः। आज्ञयापमास तूर्णं चतुर्द्वारस्य पालने ॥ १ ॥
वसुदेवं च निशठं कृतवर्माणमुद्धवम्। कृष्णो निर्यातयामास पूर्वद्वारेण भारत ॥ २ ॥
उग्रसेनं सुदामानं पृथुं विपृथुमेव च। हरिर्निर्यातयामास द्वारेणानुत्तरेण वै ॥ ३ ॥
सात्यकिं च गदं चैव प्रसेनं गान्दिनीसुतम्। हरिः प्रतीचीद्वारेण प्रेषयामास दुर्मदान् ॥ ४ ॥
गोविन्दस्तु महातेजाः स्वयं दारुकसारथिः। आत्ताभीष्टप्रहरणः सङ्कर्षणसहायवान् ॥ ५ ॥
उत्तरेण विनिर्गत्य द्वारेण जगदीश्वरः।
शङ्खं दध्मौ महाप्राणं दैत्यदानवभीषणम्। आह दारुकमासीनं रथाग्रे माधवः स्मयन् ॥ ६ ॥

श्रीभगवानुवाच—

रथं वाहय धर्मज्ञ यत्र तौ चैद्यमागधौ। तर्पयामि नृपान्सर्वान्सायकैर्युद्धदुर्मदान् ॥ ७ ॥

श्रीशुक उवाच—

इत्युक्तो दारुकस्तेन हयास्तूर्णमचोदयत्। व्यनदत्सिंहनादं च गोविन्दः परवीरहा ॥ ८ ॥
शङ्खमाध्माय रामोऽपि सिंहनादं व्यनीनदत्। ततोऽभूत्परसैन्यानां हृदि चिन्ता सवेपथुः ॥ ९ ॥
पूर्वद्वारि नृपैः सार्धं यदूनां कदनं महत्। आसीच्चतुर्भिरष्टानां तदद्भुतमिवाभवत् ॥ १० ॥
दक्षिणद्वार्यपि तथं गोविन्दाध्मातचेतसाम्। आसीद्यदूनां कदनं राजन्यकटकेन वै ॥ ११ ॥
अपरद्वार्यपि तथा यदूनां दृढधन्विनाम्। आसीद्राजसमाजेन सङ्ग्रामो रोमहर्षणः ॥ १२ ॥
ते हन्यमाना यदवो राजभिः शक्रविक्रमैः। न चेलुः सङ्गराद्राजँल्लोकद्वयजिगीषवः ॥ १३ ॥
तत्र यादवशादलो विष्णुस्त्रैलोक्यवल्लभः। आससाद महाघोरौ यत्र तौ चैद्यमागधौ ॥ १४ ॥]

एते विजये गृहीताः। मुनिभावप्रकाशिकापाठेऽपि सन्ति।

युध्यस्व, धैर्यम्, उद्वह, मच्छरैः, छिन्नम्, देहम्, हित्वा, स्वर्, याहि, वा, माम्, जहि ॥ १९ ॥ श्रीभगवान् उवाच–राजन् ! शूराः, वै, न, विकत्थन्ते, पौरुषम्, एव दर्शयन्ति, आतुरस्य, मुमूर्षतः, वचः, न, गृह्णीमः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुरुषा अधमा यस्मादिति वास्तवोऽर्थः । हे पुरुषोत्तमेति ॥ १७ ॥ गुप्तेन सर्वान्तरत्वाद्दर्शनानर्हेण । हे अमन्द । बध्नातीति बंधुरविद्या तां हन्तीति तथा हे अविद्यानिरसनेति । याहि प्राप्नुहि ॥ १८ ॥ अच्छेद्यदेहोऽसाविति स्वयमेव मत्वा परितोषात्पक्षांतरमाह । यद्वा मां जहीति ॥ १९ ॥ यथाश्रुतार्थग्रहणेन भगवत उत्तरम् । न वै शूरा इति । विकत्थंते श्लाघन्ते ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः शंखध्वनेः वित्रासेन वेपथुः कम्पः । तौ रामकृष्णौ ॥ अत एव विशिष्टत्रासेन वेपथुः । श्रीकृष्णं साक्षात्कालरूपं मत्वा तेन साकं युद्धं परिहर्तुमाह—ताविति सार्धेन ॥ १७ ॥ गुप्तेन निह्नेन 'गुप–सोपीजारेणेत्यर्थः । यद्वा गुप्तेन नंदगोपपालितेन वैश्येनेत्यर्थः ॥ बालेनैकेनेति—'बालकेनैव' इति च पाठः । ननु युद्धे शक्तिरेवापेक्ष्यते न तु वय इत्याह—गुप्तेनेत्यर्द्धकेन, कंससार्थेन गोकुले निवासात्, ननु वैरिवञ्चनार्थं काले गुप्तिरेव सर्वान्तरत्वाद्दर्शनानर्हेण अमन्द हे अभद्र । कुतः–बन्धुहन् । अतो याहि धर्मयुद्धादितोऽपसर । तत्त्वार्थस्तु व्याख्यातस्तैः । यद्वा—याहि स्वगृहम्, युद्धश्रमेण ते प्रयोजनाभावादिति भावः । गतस्य तत्र वैश्यपालित्वेन वैश्यधर्मप्राप्तेः ॥१८॥ श्रद्धा युद्धश्रद्धा । 'त्वं च' इति वा पाठः । च शब्दस्त्वर्थे । श्रद्धा युद्धेच्छा । यदीति मद्भयानुभवितैव यदि कथंचित्स्यादित्यर्थः । स्थैर्यमुच्चैर्बहुबलादात्मानमुद्वह प्रापय, न जातूद्विग्नो भव, न पलायस्वेत्यर्थः । 'धैर्यम्' इत्यपि पाठे स एवार्थः । यद्वा–मत् मत्तः पापात्मनः सकाशात्स्ववैकुंठं याहि । किं कृत्वा—शरैश्छिन्नं मम देहं हित्वा त्यक्त्वा, अत्रैव प्रक्षिप्येत्यर्थः ॥ १९ ॥ आतुरस्य जामातृमरणेन दुःखितस्य मुमूर्षतः मर्तुमिच्छवः । "गीर्वृद्धी विपरीते स्त आसन्नमरणस्य नुः" इति शिष्टोक्ते ॥ आत्मना सह युद्धकौतुके त प्रवर्तयितु व्यक्तार्थमाश्रित्य सोलुंठमुत्तरमाह—नेति । वै प्रसिद्धम् । न च तव गालिप्रदानेन वयं क्षुभ्याम इत्याह नेति । आतुरस्य वातादिदोषव्याकुलस्य, तत्रापि मुमूर्षतः सत्येव मरिष्यतः वाचो न गृह्णीमो वस्तुबुद्ध्या न भावयामः, कुतः कोपं कुर्म इत्यर्थः । राजन्निति—यद्यपि राज्ञस्ते तदतीवानुचितमिति भावः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एत एव विशिष्टत्रासेन वेपथुः । श्रीकृष्णं साक्षात् कालरूपं मत्वा तेन सह युद्धं परिहर्त्तुमाह—ताविति सार्द्धेन ॥ १७ ॥ बालेनैकेनेति बालकेनैवेति च वा पाठः । ननु, युद्धे शक्तिरैवापेक्ष्यते न तु वय इत्याह—गुप्तेनेत्यर्द्धकेन । कंसभयेन गोकुले निवासात् । ननु, वैरिवञ्चनार्थं काले गुप्तिरैव योग्येत्यत आह, मन्द ! हे अभद्रेति । कुतः हे बन्धुहन् ! अतो याहि धर्म्मयुद्धादितोऽपसर तत्त्वार्थस्तैर्व्याख्यातः । यद्वा, याहि स्वगृहं याहि युद्धश्रमेण ते प्रयोजनाभावादिति भावः ॥ १८ ॥ तवेति । त्वञ्चेति वा पाठः । त्वर्थे चशब्दः श्रद्धा युद्धेच्छा । यदीति मद्भयानुभवितैव यदि कथञ्चित् स्यादित्यर्थः । स्थैर्य्यमुच्चैर्व्वहुबलादात्मानं प्रापय न जातूद्विग्नो भव न च पलायस्वेत्यर्थः । धैर्य्यमिति क्वचित् पाठः ॥ १९ ॥ आत्मना सह युद्धकौतुके तं प्रवर्त्तयितुं व्यक्तार्थमेवाश्रित्य सोल्लुण्ठमुत्तरमाह—नेति । न विकत्थन्ते नात्मानं श्लाघन्ते वै एतत् प्रसिद्धमेवेत्यर्थः । नच तव गालिप्रदानेन वयं क्षुभ्याम इत्याह—नेति । आतुरस्य वातादिदोषव्याकुलस्य तत्रापि मुमूर्षतः सम्प्रत्येव मरिष्यतः वचो न गृह्णीम न वस्तु बुद्ध्या भावयामः कुतः कोपं कुर्म्म इत्यर्थः । राजन्निति यद्यपि राज्ञस्त्वेतदतीवानुचितमिति भावः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

महापराक्रमं साक्षात् कालरूपं श्रीकृष्णं मत्वा, तेन सह निजयुद्धं परिहर्त्तुमाह—ताविति द्वाभ्याम् । लज्जयैव, न तु भयादिना । कुतः ? बालकेन, तच्च निजवयोऽपेक्षया अल्पवयस्त्वात् । ननु युद्धे शक्तिरेवापेक्ष्यते, न तु वय इत्यत आह—गुप्तेनेति, कंसभयादिव गोकुले निवासात् । ननु वैरिवञ्चनार्थं काले गुप्तिरपि योग्येत्यत आह—मन्द ! हे अभद्रेति । कुतः ? हे बन्धुहन्, अतो याहि, धर्म्मयुद्धादितोऽपसर । तत्त्वार्थस्तैर्व्याख्यातः । यद्वा, याहि, स्वगृहं याहि, युद्धश्रमेण ते प्रयोजनाभावादिति भावः ॥ १७ ॥ श्रद्धा युद्धेच्छा, यदीति मद्भयान्न भवितैव, यदि कुतोऽपि कथञ्चित् स्यादित्यर्थः । स्थैर्य्यमुच्चैर्बहुबलादात्मानं प्रापय, न जातूद्विग्नो भव, न च पलायस्वेत्यर्थः । एषा सर्व्वा महागर्व्वोक्तिः 'युद्धे धैर्य्यं समुद्वह' इति पाठान्तरं सुगमम्; स्वर्याहीति धर्म्मयुद्धेनैव क्षत्रियस्य स्वर्गसिद्धेः ॥ १८ ॥ आत्मना सह युद्धकौतुके तं प्रवर्त्तयितुं व्यक्तार्थमाश्रित्योत्तरमाह—नेति । वै एतत् प्रसिद्धमेवेत्यर्थः । ननु मदुक्तिता लज्जादिनाऽशूरोऽपि कथं त्वमहो पौरुषं दर्शयिष्यसि ? तत्राह—न गृह्णीमः, हृदि कर्णयोर्वा न धारयामः । कुतः ? आतुरस्य व्याकुलस्य, यतो मुमूर्षतः स्वयं मरिष्यत इत्यर्थः,—आसन्नमरणस्यासम्बन्धवाक्योत्पत्तेः; यद्वा, दुरुक्त्या मद्रोषोत्पादनादिना स्वयं शीघ्रं मर्त्तुमिच्छतः ॥ १९ ॥ जरासुत इति जरानाम-राक्षस्या सन्धितदेहत्वात् तद्दत्तशक्तित्वेन मनुष्यातीतशक्तिरुक्ता, अतोऽभिसृत्य आभिमुख्येनाग्रतो गत्वा प्राप्य वा, माधवौ मधुकुलोद्भवाविति दाशार्हावितिवत्, अतएवावृणोत् ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

माञ्जहि मां वा जहि ॥ १९ ॥ मूमूर्षया आतुरस्य तवेत्यर्थः ॥ २०–२२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः शङ्खध्वनात्परसैन्यानां हृदि वित्रासो भयं तेन वेपथुर्गात्रकम्पो बभूव । ताविति । तौ रामकृष्णौ अवलोक्य मागधो जरासन्ध आह; उक्तमेवाह–कृष्णेत्यादिना । गुप्तेन कर्त्तरि क्तः गोपयता आत्मानमिति शेषः स्वजनेनेति वा त्वया सह न योत्स्ये न युद्धं करोमि याहि गच्छ तत्र कारणं वदन् सम्बोधयति—हे मन्द, मूढ ! तत्र हेतुः हे बन्धुहन् ! अत एव हे पुरुषाधम ! बन्धुर्मातुलस्तस्य हन्तः ॥ १७ ॥ न केवलं न यौत्स्याम्येवापितु त्वया योद्धुं नेच्छाम्यपि यथा बालकेन सह लज्जया न युयुत्स्ये तद्वदित्यर्थः ॥ १८ ॥ अथ राममाह–त्वमिति । यदि श्रद्धा युद्धार्थमस्तीति शेषः तर्हि हे राम ! युद्ध्यस्व स्थैर्यमावह न तु प्रारभ्य पलायस्वेति भावः । एवं चेन्मच्छरैर्भिन्नं देहं त्यक्त्वा स्वर् स्वर्गं याहि यास्यसीत्यर्थः । यद्वा, समर्थश्चेत्त्वं मामेव जहि इति ॥ १९ ॥ एवमुक्तः प्राह भगवान्-नहीति विकत्थन्ते विविधम् आत्मानं न श्लाघन्ते शूराः किन्तु रिपूणामपि श्लाघ्यं पौरुषमेव दर्शयन्ति अतस्तवाशूरस्य मुमूर्षतः मर्तुमाशंसमानस्य अत एवातुरस्य वचो वयं न गृह्णीमः न बहुमन्यामहे इत्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तावाहेत्यादि । हे कृष्ण ! पुरुषाधाम ! इति पुरुषा अधमा यस्मात् स तथा पुरुषोत्तमेत्यर्थः ॥ १८–५७ ॥

इति श्रीदशमे श्रीवृहत्क्रमसन्दर्भे पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पुरुषा अधमा यस्मात् पुरुषोत्तम इत्यर्थः ॥ १७–५७ ॥

इति पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुरुषा अधमा यस्मात् हे पुरुषोत्तमेति भवत्यभिमतोऽर्थः ॥ १७ ॥ बाले बाल एव को ब्रह्मा यस्य तेन महामहेश्वरेण लज्जयेति मम दुर्ज्जीवत्वेनायोग्यत्वादिति भावः । गुप्तेनेति कंसस्य भयाद्गोकुलं प्रति गतस्य एव वैश्यपालितत्वेन वैश्यसाधर्म्यप्राप्तेः पक्षे सर्व्वान्तरत्वाद्दर्शनानर्हेण हे अमन्द बन्धुहन् हे मातुलहन्तः पक्षे बध्नातीति बन्धुरविद्या तां हन्तीति तथा ॥ १८ ॥ अच्छेद्यदेहोऽसाविति । स्वयमेव मत्वा परितोषात् । पक्षान्तरमाह—यद्वा मां जहीति । श्रीस्वामिचरणाः । यद्वा, मत्मत्तः पापात्मनः सकाशात् स्ववैकुण्ठं याहि किं कृत्वा शरैश्छिन्नम् अर्थात् मम देहं हित्वा त्यक्त्वा अत्रैव प्रक्षिप्येत्यर्थः ॥ १९–२० ॥

गूढार्थदीपिनी

वेपथुः कम्पः ॥ १७ ॥ पुरुषा अधमा यस्मात् । हे पुरुषोत्तम बालवत्प्रतीयमानेन वस्तुतस्तु एकेनाद्वितीयेन ॥ १८ ॥ गुप्तेनेत्यर्द्धम् । हे मन्द भीरो हे बन्धुहन् मातुलघातिन् गुप्तेन वैश्येन नन्दपालितत्वात् । इति निन्दा । हे अमन्द वीर । बध्नातीति बन्धुरविद्या तां हन्तीति । गुप्तेन अदृश्येन कालरूपेणेति स्तुतिः ॥ १९ ॥ मत् मत्तः पापिनः सकाशात् स्ववैकुण्ठं याहि । किं कृत्वा । शरैश्छिन्नं मम देहं हित्वा गर्ते प्रक्षिप्य । निन्दा तु स्पष्टैव ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रामकृष्णौ नरकौ इति वीक्ष्येति भावः मागध आह ॥ १७–१९ ॥ भगवानपि तदनुरूपमुत्तरं दत्तवान्–न वै इति । विकत्थन्ते श्लाघन्ते ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कुलिन्दो महाबल इति योग्यान्वयि ॥ १७ ॥ मदश्च बलं च ताभ्यामन्विताः ॥ १८ ॥ चतुर्द्वाराण्येवं गतम् । अनेकश इति प्रथमाबहुवचनान्तं द्वितीयाबहुवचनान्तं च सत्त इत्यस्य शङ्खानां च विशेषणम् ॥ १९ ॥ क्ष्वेलन्तः सिंहनादं कुर्वन्तः ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं ज्ञात्वा चतुरो जरासन्धः भगवन्तं युद्धान्निवर्तयितुं किञ्चिदुक्तवानित्याह तावाहेति । ननु सदुत्तरेणैव भगवता सह युद्धमनुचितमिति चेद्वदेत्, तदा भगवान् युद्धं न कुर्यात्, स्वकार्यं च भवेत्, तत्परित्यज्य किमिति विषममुक्तवानित्याशङ्कायामाह मागध इति । देशदोषात्तथा बुद्धिः । तौ वीक्ष्याहेति । तेजः स्वानुभावेन ज्ञात्वेत्येतदर्थम् । आदौ भगवता सह युद्धं न मन्यते,

तदाह, हे कृष्णेति । त्रिधा सम्बोधनं करोति, आनन्दचित्सद्रूपैः । कृष्ण आनन्दः, पुरुषश्चिद्रूपः । अधो मातीत्यधमः प्रपञ्चः सद्रूपः । न हि सदानन्दरूपेण पुरुषार्थरूपेणात्मना स्वोपकारिणा कश्चिद्युद्धमभिकाङ्क्षते । अत आह न त्वया योद्धुमिच्छामीति । किञ्च, बालकेनेति । बालानामपि कं सुखं यस्मात् । बाले बाले को वा । न हि ब्रह्माण्डकोटिविग्रहेण कार्यपक्षेऽपि योद्धु शक्यते । किञ्च, विलज्जयेति । धार्ष्ट्येन यद्यपि युद्धं कर्तुं शक्यते, मरणेन मोक्षो भविष्यतीति, तथापि लोकलज्जयापि न युद्धमुचितम्, लोको हसिष्यति, स्वामिना सह युध्यतीति । अतो विशिष्टलज्जयापि न योत्स्ये । अन्यत्र स्वशक्ति स्थापयसि चेत्, तथापि युद्धं न करिष्यामीत्याह गुप्तेन हीति । त्वया गुप्तः केन वा हन्तुं शक्यते । पराजयपक्षे त्वत्त एव मरणमुचितम्, न त्वन्यस्मात्, अपकीर्तिरपि भवेदिति । अतो युक्तमेव त्वद्रक्षितेन सहायुद्धम् । किञ्च, अमन्देति । अमो मोक्षः । न विद्यते मा माया यत्रेति । अमं ददातीत्यमन्द इति । न हि मोक्षदात्रा आराध्येन सह कश्चिद्युद्धमभिकाङ्क्षति । अतो याहि मोक्षं दातुम् । नन्वहं यादव एव, न तु मोक्षदातेत्याशङ्क्याह बन्धुहन्निति । यदि यादवः स्यात्, तर्हि बन्धून् कंसादीन् किं हन्यात् ? अतो यादवमारकत्वात् अस्मत्स्वाम्येव, नतु यादव इत्यर्थः । यदापाततः प्रतिभात्यन्यथा, तत्प्रकरणविरुद्धत्वात् निन्दापरवचनमुपेक्षणीयमेव । भ्रामकाणि परं वचनानि ।। १८ ।। एवं भगनन्तमयुद्धार्थं प्रार्थयित्वा तेनैव बलभद्रोऽपि निवृत्तो भविष्यतीति तं युद्धायाह्वति त्वं त्विति । तुशब्दः पूर्वप्राप्तार्थव्यावृत्त्यर्थः । अन्यथावयोर्बन्धुमारणं च तुल्यमिति कथं रामं गृह्णीयात् । तेन यादवा एव तस्य मारणीया इति सत्त्वव्यवहितानां सुतरामावेशिनां देहोऽस्तीति यादवत्वं सिद्धमिति वसुदेववैरं तत्पुत्रे पातनीयमिति वसुदेवे युद्धप्रतिप्रसवः । तत्रापि यदि श्रद्धेत्याह । अयं हि वसुदेवानुकल्पत्वेन द्विष्टो भवति । तथा सति यदि पितरि श्रद्धा, क्षत्रियत्वेन युद्धे वा, तदा युध्यस्व । आवयोर्यद्यपि समानं बलम्, तथापि सेना महतीति तद् दृष्ट्वा कदाचिद्भीतो भवेत्, अत आह धैर्यमुद्वहेति । भगवद्व्यतिरिक्तानामन्यधर्मः प्रवर्तते इति, अन्तर्बलमस्तीति धैर्यमस्त्येव, बहिरपि धैर्यं सम्पादयेत्याह उदिति । ततो यद्भविष्यति तदनिश्चयेनाह हित्वेति । एकतरनिश्चये युद्धार्थं प्रवृत्तिरेव न स्यात् । अतो मच्छरैः छिन्नं देहं हित्वा धैर्यमुत् धैर्येण जातां मुदं स्वर्गलक्षणां वह । अथवा मच्छरैः छिन्नं देहं हित्वेति । 'सविशेषणे विधिनिषेधौ विशेषणमुपसङ्क्रामतः' इति न्यायेन शरच्छादनं दूरीकृत्य मां जहि । अनेन प्रथममहमेव प्रहारं करिष्यामीति ।। १९ ।। एवं बलभद्रं प्रति यत्स्वपौरुषं ख्यापितम्, तदयुक्तं मत्वा भगवान् निषेधति न वै शूरा इति । ये हि शूरास्ते स्वख्यातिं न वदन्ति, किन्तु पौरुषमेव दर्शयन्ति । यदप्युक्तं 'न त्वया योद्धुमिच्छामी'ति, तत् तव वाक्यं न गृह्णीमः । अनेन तद्वाक्यमप्रमाणमित्युक्तम् । न हीश्वरेणामतं प्रमाणं भवति । तेन हि शङ्काद्वयेन युद्धं त्यक्तम्, मरणं भविष्यति, मोक्षे प्रतिबन्धो वा भविष्यतीति, तदुभयं न कर्तव्यम्, इदानीं न मारणीयः, मोक्षश्च देय इति । अत एव भगवान् सर्वस्वदानं कारयित्वा मोक्षं दत्तवान् । अतो युक्तमुक्तं न गृह्णीमो वच इति । किञ्च, हे राजन् ! राज्ञां शूरक्षत्रियाणां युद्ध एव मुक्तिः । 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः' इति ब्राह्मणक्षत्रिययोः मोक्षप्रकारस्य प्रतिपादितत्वात् । तयोरेव च मोक्षोपदेशः 'यस्य ब्रह्म च क्षात्रं च उभे भवत ओदन' इत्यत्र निरूपितः । अतो मद्रक्षितेनापि त्वया युद्धं कर्तव्यम्, अहं तु त्वया सह युद्धं न करिष्यामि, बलभद्र एव करिष्यति, बलं परं मारणीयमिति भावः । अयमुपदेशोऽग्रे कार्यार्थः । अन्यथा भीमेनापि न युध्येत् । किञ्च, आतुरस्य वचनं न ग्राह्यम् । स हि स्वापथ्यमेव याचते । अनेन याचितं देयमिति पक्षो निवारितः । किञ्च, मुमूर्षतः मुमूर्षां प्राप्नुवतः । कृदन्तात् षष्ठी । स हि मोक्षं दूरीकृत्य वृथा मरणं वाञ्छति । तादृशं नाङ्गीकर्तव्यम् ।। २० ।।

श्रीसुबोधिनी–सारः

ततः शंखशब्दात् परस्य जरासंधस्य सैन्यानां सैनिकानां हृदि चित्ते वित्रासेनोद्वेगेन वेपथुः कंपोऽभूत् तौ रामकृष्णौ वीक्ष्य दृष्ट्वा मागधो जरासुत आह हे कृष्ण हे पुरुष बालेन एकेन त्वया योद्धुं नेच्छामि लज्जया हेतुना । गुप्तेन गूढेन एतावत्कालमप्रसिद्धत्वात् त्वयाहं न योत्स्ये न युद्धं करिष्यामि हे मन्द त्वं याहि गच्छ हे बन्धुहन् ।। १७–१८ ।। हे राम यदि तव श्रद्धास्ति तर्हि युध्यस्व धैर्यमुद्वह कुरु धर वा पक्षान्तरे मम शरैर्बाणैः छिन्नं देहं हित्वा स्वर्याहि स्वर्गं गच्छ मां वा जहि घातय ।। १९ ।। श्रीकृष्णोक्तिः । शूरा न कत्थंते आत्मश्लाघां न कुर्वंति वै एव किं तु पौरुषं स्ववीर्यं दर्शयन्त्येव हे राजन् आतुरस्य दुःखितस्य मुमूर्षतो मरणमिच्छतस्ते वचो वयं न श्रद्दध्मः ।। २० ।।

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

तौ रामकृष्णौ वीक्ष्य मागधो जरासन्ध आह । तदुक्तिमेव दर्शयति—हे कृष्ण इत्यादिना । हे कृष्ण ! हे पुरुषाधम ! त्वया बालेनैकेन सहाहं योद्धुं नेच्छामि । तत्र हेतुमाह—लज्जयेति । बालत्वात्त्वया सह युद्धे मम वीरस्य लज्जा भवतीत्यर्थः । 'एकेन' इत्यनेन रामादिसहितेन तेन सह युद्धे सम्मतिं सूचयति । अतएव युद्धप्रवृत्तिः । निषेधोक्तिस्तु केवलं तिरस्कारार्था ।।१७।। एवमुक्त्वाऽपि तिरस्कारदार्ढ्यमाह—गुप्तेनेति । हे मन्द मन्दबुद्धे ! तत्र हेतुं सूचयन् पुनः सम्बोधयति—बन्धुहन् हे मातुलहन्तः ! गुप्तेन स्वजनै रक्षायोग्येन बालेन त्वया सह अहं नैव योत्स्ये, युद्धं नैव करिष्ये, अतस्त्वं प्रतियाहि ।। १८ ।। एवं कृष्णं प्रत्युक्त्वा

रामं प्रत्याह—तवेति । हे राम ! तव यदि मया सह युद्धश्रद्धा तर्हि युद्धयस्व । 'परन्तु युद्धं प्रारभ्य पलायनं न कर्तव्यम्' इत्याशयेनाह—धैर्यमुद्वहेति । युद्धफलमाह—हित्वेति । अथवा समर्थश्चेत्तर्हि मां जहि ।। १९ ।। एवमुक्तौ भगवानाह—नेति । शूरा नैव विकत्थन्ते आत्मानं नैव श्लाघन्ते, किंतु श्लाघाहेतुं पौरुषमेव दर्शयन्ति । त्वं तु मन्दबुद्धित्वादात्मानं श्लाघसे, अतस्तव वचो न गृह्णीमः यथार्थत्वेन न स्वीकुर्मः । 'तव तु राजत्वात् पौरुषप्रदर्शनमेव युक्तम्, नात्मश्लाघा' इति सूचयन् सम्बोधयति—राजन्निति । 'आसन्नमृत्यवो हि पीडया विवशा अनन्वितं वदन्ति, तवापि तथात्वात्त्वद्वचो न गृह्णीमः' इत्याह—आतुरस्य मुमूर्षत इति ।। २० ।।

अन्वितार्थप्रकाशिका

शङ्खमिति ।। दारुकाख्यः सारथिर्यस्य स हरिर्बहिर्विनिर्गत्य शङ्खं पाञ्चजन्यं दध्मौ वादितवान् । ततः शङ्खध्वनिश्रवणात् परस्य जरासन्धस्य सैन्यानां हृदि वित्रासो भयं तेन वेपथुः प्रकम्पोऽभूत् ।। १७ ।। ताविति ।। रामकृष्णौ वीक्ष्य मागधो जरासन्ध आह स्म । हे कृष्ण पुरुषाधम ! वस्तुतः पुरुषा अधमा यस्मादिति पुरुषोत्तम ! बालेन एकेन त्वया सह लज्जयाऽहं योद्धुं नेच्छामि । वस्तुतो महाप्रभावेण त्वया बालेन एकेनापि च पराभवलज्जया न योद्धुमिच्छामि किं पुनः ससैन्येन ।। १८ ।। गुप्तेनेत्यर्द्धम् । हे मन्द ! हे बन्धुहन् मातुलघातिन् ! गुप्तेन कंसभयेन गोकुले उषितेन त्वया सह न योत्स्ये अतः याहि । वस्तुतः हे अमन्द ! वध्नातीति बन्धुरविद्या तां हन्तीति हे अविद्यानिरसन ! गुप्तेन अन्तर्यामितया अदृश्येन कालरूपेण वा न योत्स्ये।।१९।। तवेति ।। हे राम ! तव यदि मया सह युद्धे श्रद्धा सामर्थ्यमिच्छा वा तर्हि युध्यस्व धैर्यमुद्वह । मच्छरैश्छिन्नं देहं हित्वा स्वः स्वर्गं जाहि प्राप्नुहि । समर्थश्चेन्मां जहि । वस्तुतः मत् मत्तः पापिनः सकाशादपसृत्य त्वदीयशरैश्छिन्नं मम देहमत्रैव हित्वा प्रक्षिप्य स्वः वैकुण्ठं याहि ।। २० ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वित्रासो विशेषो यस्त्रासो भीतिः वेपथुः कम्पश्च । यद्वा विशेषत्रासेन युक्तोवेपथुः ।। १७ ।। लज्जया हेतु नाराकेनबालेन त्वया सह हे बन्धुहन् मातुलघातक ।। गुप्तेन गोकुले अप्रसिद्धतया स्मितेन त्वया सह अहं न योत्स्ये न युद्धं करोमि त्वंया हि इतोऽन्यत्र गच्छ ।।१८।। उद्वह प्राप्नुहि ।।१९।। एवं तस्य वचनं श्रुत्वा हरिराह नेति ।। विकत्थं तेन स्वश्लाघां कुर्वन्ति पौरुषं स्वसामर्थ्यं आतुरस्य मस्तक प्रविष्ट वायुना व्याकुलस्य ।। अत एव मुमूर्षतः । मरणमिच्छोः ।। २० ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ताविति ।। तौ रामकृष्णौ, वीक्ष्यालोक्य, मागधो जरासंधः, हे पुरुषाधम कृष्ण, बालेन एकेन, त्वया साकं, लज्जया त्रपाहेतुना, योद्धुं न इच्छामि । इति आह । महतो योद्धुर्बालेन युद्धविधाने लोकाभिहितविषमयुद्धजत्रपाभरान्न त्वया योत्स्यामीत्याहेति भावः ।। १७ ।। तत्र कारणं वदन् संबोधयति । गुप्तेनेति । हे मन्द मूढ, हे बन्धुहन् मातुलहन्तः, गुप्तेन गोपायित्रा, कर्त्तरि क्तः । आत्सानमिति शेषः । त्वया सह, न हि योत्स्ये युद्धं नैव करिष्यामि । अतः याहि इतः पलायनं कुरु । अथ राममाह । हे राम, यदि तव, श्रद्धा युद्धार्थमस्तीति शेषः । तर्हि मया सह, युध्यस्व । धैर्यं, वा चार्थे । आवह, प्रारभ्य पलायनं मा कृथा इति भावः । एवं चेत् मच्छरैः छिन्नं भिन्नं, देहं हित्वा त्यक्त्वा; स्वः स्वर्गं, याहि । यास्यसीत्यर्थः । यद्वा त्वं समर्थः स्याश्चेत्, मां जहि ।। १८ ।। एवं जरासंधोक्तो भगवांस्तमाह ।। न वै इति । हे राजन्, शूराः न विकत्थयन्ते, वै । नात्मानं स्वसुखेन श्लाघन्ते इत्यर्थः । किं तु पौरुषं रिपूणामपि श्लाध्यं पराक्रमं एव, दर्शयन्ति । अतः आतुरस्याशूरत्वादातुरतावतः, मुमूर्षतो मर्त्तुमाशङ्कमानस्य तव, वचः वयं, न गृह्णीमः न बहु मन्यामहे ।। १९ ।। जरासुत इति । जरासुतो जरासंधः, सैन्येन, यानध्वजै रथध्वजैः, वाजिभिरश्वैः, सारथिभिश्च सहिताविति ससैन्यमानध्वजवाजिसारथी, माधवौ मधुवंशभवौ, द्वयोरपि मधुवंशजत्वान्माधवाविति निर्देशः । रामस्य माधवांशजत्वाद्वा माधवशब्देन व्यपदेशः । तौ रामकृष्णौ, अभिसृत्याभिमुखमागत्य, बलीयसा अतिबलवता, महाबलौघेन महता सैन्यसमूहेन, वायुः अभ्राणि च रेणवश्च तैः, सूर्यश्चानलो वह्निश्च ताविव, अभ्रैः सूर्यं, रेणुभिश्चाग्निं यथा तथा, आवृणोत् । अनेनादर्शनमात्रमेव, नावरणमिति सूचितम् ।। २० ।।

कृष्णप्रिया

भगवान् श्रीकृष्ण एवं श्री बलभद्र को देखकर पहिचान कर जरासन्ध दोनों को कहने लगा । हे कृष्ण ? आनन्दस्वरूप हे श्रीकृष्ण ? हे पुरुषाधम ? हे चिद्रूप एवं सद्रूप ! तुम तो बालक हो इसलिए तुमसे युद्ध करना नहीं चाहता हूँ । छोटे बालक से लड़ते हुए लज्जा आती है । तुम तो बन्धु-मातुल कंस की हत्या करने वाला एवं छिप कर रहने वाला है इसलिए हे मन्द मैं तुमसे युद्ध करना नहीं चाहता हूं ।। १७–१८ ।। हे राम ! बलभद्र ! यदि आप को युद्ध करने की श्रद्धा हो तो आइए युद्ध करें, धैर्य को धारण कीजिए, मेरे बाणों से छिन्न देह त्यागकर स्वर्ग की ओर जाओ या तो मुझे मार दो ।। १९ ।। भगवान् श्रीकृष्ण कहने लगे राजन् जरासन्ध ! शूरवीर पुरुष अपनी प्रशंसा अपने आप नहीं करते हैं किन्तु अपना सामर्थ्य कार्य करने से ही दिखाते हैं । राजन् ! हम आतुर एवं मौत जिसकी निकट आ चुकी है उसके वचनों पर ध्यान नहीं देते हैं ।। २० ।।

श्रीशुक उवाच

जरासुतस्तावभिसृत्य[1] माधवौ महाबलौघेन बलीयसाऽऽवृणोत् ।
ससैन्ययानध्वजवाजिसारथी सूर्यानलौ वायुरिवाभ्ररेणुभिः ॥ २१ ॥
सुपर्णतालध्वजचिह्नितौ रथावलक्षयन्त्यो हरिरामयोर्मृधे ।
स्त्रियः पुराट्टालकहर्म्यगोपुरं समाश्रिताः सम्मुमुहुः [2]शुचार्दिताः ॥ २२ ॥
हरिः परानीकपयोमुचां मुहुः शिलीमुखात्युल्बणवर्षपीडितम् ।
स्वसैन्यमालोक्य सुरासुरार्चितं [3]व्यस्फूर्जयच्छार्ङ्गशरासनोत्तमम् ॥ २३ ॥
गृह्णन् निषङ्गादथ सन्दधच्छरान् विकृष्य मुञ्चञ्छितबाणपूगान् ।
निघ्नन् रथान् कुञ्जरवाजिपत्ती[4]र्निरन्तरं यद्वदलातचक्रम् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—जरासुतः, अभिसृत्य, बलीयसा, महाबलेन, ससैन्य-यान-ध्वज-सारथी, तौ, माधवौ, वायुः, अभ्ररेणुभिः, सूर्यानलौ, इव, आवृणोत् ॥ २१ ॥ हरिरामयोः, सुपर्णतालध्वजचिह्नतौ, रथौ, मृधे, अलक्षयन्त्यः पुराट्टालक-गोपुरम्, समाश्रिताः, शुचार्पिताः, स्त्रियः, सम्मुमुहुः ॥ २२ ॥ हरिः, मुहुः, परानीकपयोमुचाम्, शिलीमुखात्युल्वणवर्षपीडितम्, सुरासुरार्चितम्, स्वसैन्यम्, आलोक्य, शार्ङ्गशरासनोत्तमम्, व्यस्फूर्जयत् ॥ २३ ॥ अथ, निषङ्गात्, शरान्, गृह्णन्, विकृष्य, संदधत्, शितबाणपूगान्, अलात्तचक्रम्, यद्वत्, मुञ्चन्, निरन्तरम्, रथान्, कुञ्जरवाजिपत्तीः, निरन्तरम्, निघ्नन् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

माधवौ मधुवंशभवौ । महता सैन्यसमूहेनावृतवान् । वायुरभ्रैः सूर्यं रेणुभिश्चाग्निं यथेत्यदर्शनमात्रमेवावरणमिति सूचितम् ॥ २१–२२ ॥ परस्यानीकानि सैन्यानि तान्येव पयोमुचो मेघास्तेषां शिलीमुखा बाणास्तेषामत्युल्वणं वर्षं तेन पीडितम् । व्यस्फूर्जयदुज्जृंभितवान् ॥ २३ ॥ तदाह । गृह्णन्निति । निषंगादिषुधेः शरान् गृह्णन् अथ तान्गुणे संदधत् गुणमाकृष्य निशितबाणसमूहान्मुञ्चन् । निघ्नन्प्रहरन् । पत्तिः पदातिः । निरंतरमिति ग्रहणादिक्रियाविशेषणम् । ज्वलत्काष्ठं भ्रमणे यथा चक्रवद्भवति तद्वद्व्यस्फूर्जयदिति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तौ रामकृष्णौ । सैन्येन, यानध्वजै रथध्वजैः वाजिभिरश्वैः, सारथिभिश्च सहितौ । 'वाजी त्वश्वे शरे खगे' इति हलायुधः । श्रीशुक उवाचेति क्वाचित्कः । जरासुत इति जराराक्षस्या संहितदेहत्वात्तद्दत्तशक्तित्वेन मनुष्यातीतशक्तिरुक्ता । माधवाविति दाशार्हाविितिवत् । वस्तुतस्तु, साक्षान्मायानाशकत्वेन, तत्कार्यप्रपञ्चनाशने तु किंचिदपि प्रयासादिनेत्यर्थः ॥ २१ ॥ तालो वृक्षविशेषः । पुरं गृहम्, अट्टालकं गृहोपरीष्टकादिविरचितुरस्रस्थलम्, हर्म्यं धनिनां वासः, गोपुरं पुरद्वारम् । "पुरं नपुंसकं गेहे देहपाटलिपुत्रयोः । पुष्पादीनां दलावृत्तौ ना गुग्गुलो न ना पुरि ।' इति मेदिनी । "गोपुरं द्वारि पूर्द्वारिकैवर्ते मुस्तकेऽपि च" इत्यपि । 'हर्म्यादि धनिनां वासः' इत्यमरः । "इष्टिकादिविरचितं चतुरस्रं गृहोपरि । स्थलमट्टालिकं प्रोक्तमट्टः क्षौमं तदेव हि ।" इति कोशात् । सुपर्णेति तत्तद्ध्वजादर्शनमपि सूचितम् । पुरस्याट्टालिकं दुर्गोपरिरचितमुच्चगृहम्, हर्म्यं चोच्चप्रासादः, गोपुरं पुरद्वारम्, द्वन्द्वैक्यम् । उच्चारूढा अप्यलक्षायन्त्यो लक्षणैरप्यतर्कयन्त्यः शुचा शोकेनापिता व्याप्ताः । 'अर्दिताः' इति पाठे पीडिताः सत्यः सम्मुमुहुः । स्त्रीणां स्वभावतः एव स्नेहार्द्रचित्तत्वादिति भावः ॥ २२ ॥ 'अलिवाणौ शिलीमुखौ' इत्यमरः । उज्जृंभितवान् उच्चैश्चकार । हरिरिति युग्मकम् । हरिरिति परसैन्यहरणात् । पडिनमत्र सम्पातेन वित्रासनमेव न तु छेदनम् 'मुकुन्दोऽथाऽक्षतबलः' इति वक्ष्यमाणत्वात् ॥ २३ ॥ तत् शरासनोहस्तूमणम् । 'निषंगः संगते तूणे' इति मेदिनी । अथ ग्रहणोत्तरम् । तान्शरान् । गुणे मौर्व्याम् । "अलातं दीप्तकाष्ठे स्यादगृहीते तु वाच्यवत्" इति धरणिः तद्विद्याविशेषाभिव्यञ्जमं शृण्वित्याह—गृह्णन्निति । निषंगादिषुधेः सकाशादेकैकशरान् गृह्णन् अथानुगुणे तान्सन्दधत् । गुणमाकृष्य तान्मुंचँस्तैश्च रथादीन्निघ्नन् । निरन्तरमिति ग्रहणादिसर्वक्रियाविशेषणम्, तेन ग्रहणयोजनकर्षणनिक्षेपणप्रहरणक्रियाः क्रमेणोद्भूता अपि सदैवोद्भवन्त्य एव द्रष्टून्प्रति ताः क्षणार्थमध्ये शतकोटिकत्व उद्भवंतीत्यर्थः । अतएव अलातचकदृष्टान्तः ॥ २४ ॥

---

१. गम्य–वीर, वभिवीक्ष्य–विज. । २. पिताः–वीर विज. । ३. व्याघूर्णयत्–विज. । ४. पत्तीन्–श्रीश्रर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीशुक उवाचेति काचित्कं जरासुत इति जरा नाम राक्षस्या संहितदेहत्वात् तद्दत्तशक्तित्वेन मनुष्यातीतशक्तिरुक्ता। माधवाविति दाशार्हाविितिवत् अत एवावृणोत्। सूर्य्यानलौ प्रलयकालसम्बन्धिनौ ज्ञेयौ। तम्प्रति महायोगितया तथैव भासमानत्वात् ॥ २१ ॥ सुपर्णेति तत्तद्ध्वजादर्शनमपि सूचितम्। हरिर्निजमनोहरणात् राम इति तन्मनोरमणात्। तयोरिति परमप्रियत्वं सूचितम्। पुरस्याट्टालकं दुर्गोपरि रचितमुच्चगृहं हर्म्यञ्चोच्चप्रसादं गोपुरञ्च द्वन्द्वैक्यं सम्यगाश्रिता उपर्य्यधिरूढा अपि मृधे युद्धभूमौ अलक्षयन्त्यः लक्षणैरप्यतर्कयन्त्यः शुचार्पिताः शोकेन व्याप्ताः सत्यः अर्द्दिता इति पाठे पीडिताः सत्यः सम्यङ् मुमुहुः यतः स्त्रियः स्त्रीणां स्वभावत एव स्नेहार्द्रचित्तत्वादिति भावः ॥ २२ ॥ हरिरिति युग्मकम्। तन्नाम च परसैन्यसंहाराभिप्रायेण पीडनमत्र सम्पातेन वित्रासनमेव नतु छेदनं मुकुन्दोप्यक्षत बल इति वक्ष्यमाणात् तच्च तेन स्वविद्याविशेषाभिव्यञ्जनात् अहो तत्र परमाश्चर्य्यं शृण्वित्याह—गृह्णन्नित्यादिना। अथानन्तरं तत्क्षणमेवेत्यर्थः। अस्य वक्ष्यमाणस्यानेकश इत्यस्यापि सर्व्वैरेवान्वयः ॥ २३ ॥ रथानिति तदीयांश्च ध्वजादीन् एतच्चाग्रे व्यक्तं भावि। अन्यत्तैः अत्रोज्जृम्भितवान् सटङ्कारं मुहुराकृष्य नमितवानित्यर्थः। चक्रवद्भवतीति मण्डलाकारतया सर्व्वत्र वर्त्तत इत्यर्थः। तद्वदिति तादृशीं कृत्वेत्यर्थः। यद्वा, ततश्च यद्वदलातचक्रं तद्वदेव हरिः सर्व्वत्राप्यदृश्यतेति शेषः। किं कुर्व्वन् परेषां शितबाणपूगादीन् निघ्नन् ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुपर्णेति तद्ध्वजादर्शनमपि सूचितम्, हरिर्निजमनोहरणात्, रामो मनोरमणात्, तयोरिति परमप्रियत्वं सूचितम्, पुरस्य अट्टालकं हर्म्म्यञ्च उच्चप्रासादं गोपुरञ्च द्वन्द्वैक्यम्, सम्यगाश्रिता उपर्य्यधिरूढा अपि मृधे युद्धभूमौ अलक्षयन्त्यो लक्षणैरपश्यन्त्यः, शुचार्पिताः शोकव्याप्ताः सत्यः, सम्यङ् मुमुहुः, यतः स्त्रियः, स्त्रीणां स्वभावतः स्नेहार्द्रचित्तत्वात् श्रीभगवति भावविशेषाच्च ॥ २१ ॥ हरिरिति परसैन्यसंहाराभिप्रायेण; सुरैरसुरैश्चार्च्चितमादृतम्, तेषु तादृशधनुरभावात्; अतएवोक्तमुत्तममिति, एवं तस्यासाधारणत्वमुक्तम्। अथ अनन्तरं तत्क्षणमेवेत्यर्थः। अस्य वक्ष्यमाणस्यानेकश इत्यस्यापि सर्व्वैरेवान्वयः। रथानिति तदीयांश्च ध्वजादीन्, एतच्चाग्रे व्यक्तं भावि। कुञ्जरादींश्च नितरां घ्नन् ॥ २२–२३ ॥ नितरां पेतुर्मरणात् ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

शिलीमुखं रजः। पूरयामास ॥ २३–२५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

जरासुत इति। तौ सैन्यादिभिः सहितौ मधुवंशजत्वाद्द्वयोरपि माधवौ इति निर्द्देशः रामस्य माधवांशत्वाद्वा माधवव्यपदेशः अभिसृत्याभिमुखमागत्य बलीयसा महता सैन्यसमूहेनावृणोत् आवृतवान् ससैन्य इत्यस्य प्रथमैकवचनान्तपाठे जरासुतविशेषणत्वं यथा वायुरभ्रैः सूर्य्यं रेणुभिश्चाग्निमावृणोति तथेति दृष्टान्तार्थः अनेनादर्शनमात्रमेव नावरणमिति सूचितम् ॥ २१ ॥ सुपर्णेति। तदा पुरस्त्रियः पुरस्याट्टालकादीनां च समाहारः तत्समाश्रिता अधिरूढा अट्टालकाः उपरि भूमिका मृधे युद्धे सुपर्णध्वजतालध्वजाभ्यां चिह्नितौ सञ्जातचिह्नौ हरिरामयोः रथावपश्यन्त्यः अत एव शुचा अर्पिताः व्याप्ताः सम्मुमुहुर्विचित्ता बभूवुः ॥२२॥ हरिरिति परस्यानीकानि सैन्यानि तान्येव पयोमुचो मेघास्तेषां शिलीमुखा बाणास्तेषामत्युल्बणं दुःसहं वर्षं तेन पीडितं स्वसन्यमवलोक्य सुरैरसुरैश्च बहुमतमत्यर्थं (अन्वर्थं) शार्ङ्गाख्यं शरासनोत्तमं धनुःश्रेष्ठं विस्फूर्जयदुज्जृम्भितवान् सघोषज्यायुक्तमकरोदिति वा ॥ २३ ॥ गृह्णन्निति। निषङ्गात् तूणात् शरान् गृह्णन् धनुषीति शेषः विकृष्य सन्निहितत्वाच्छरानाकृष्य निशितबाणसमूहान् मुञ्चन् रथादीन्निघ्नन् ध्वंसयन्नवतस्थे इति शेषः पत्तयः पदातयः न विद्यतेऽन्तरं विच्छेदो यस्यां गृहणादिक्रियायां तद्यथा भवति तथा अवतस्थ इत्यर्थः। तादात्विकभगवच्छार्ङ्गस्य दृष्टान्तमाह–यद्वदलातचक्रमिति। यद्वद्यथा ज्वलत्काष्ठभ्रमणं चक्रवद्भाति तद्वद्धनुरासीदित्यर्थः। निरन्तरमित्यलातचक्रस्यैव वा विशेषणं विच्छेदरहितमलातचक्रं यथा तद्वद्धनुर्व्यस्फूर्जयदिति पूर्वेण सम्बन्धो वा ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

माधवौ मधुकुले जातौ सैन्येन यानध्वजैः रथध्वजैर्वाजिभिरश्वैः सारथिभिश्च सहितौ ''वाजीत्वश्वेशरे खगे'' इति अभ्रैर्जलधरैः रेणुभिश्च ॥ २१ ॥ सुपर्णतालध्वजाभ्यां चिह्नितौ अङ्कितौ हरिरामयोः कृष्णबलभद्रयोः रथौ विलक्षयन्त्यः पश्यन्त्यः पुरं गृहं अट्टालकं गृहोपरीष्टकादिविरचितचतुरस्रस्थलं हर्म्यं धनिनां वासः गोपुरंपुरद्वारम् अल्पवयसो अल्पसेनौ कृष्णरामो मागधं प्रलयार्णवोपमसेनं दृष्ट्वा समुत्पन्नया शुचा ॥ २२ ॥ व्यघूर्णयत् विस्फारयामास परानीकपयोमुचां शत्रुसेनामेघानाम् ॥ २३ ॥ श्रीकृष्णस्य हस्तलाघवं कथयति–गृह्णन्निति। निषङ्गात्तूणीरात् भ्राम्यमाणमलातचक्रम् उल्मुकमण्डलं निरन्तरं छिद्रदर्शनं दुःशकं यद्वत्तद्वत् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

माधवौ मधुवंशोद्भूतौ वायुर्यथा सूर्य्यमभ्रैरग्निञ्च रेणुभिरावृणोति तथेत्यदर्शनमात्रमेवावरणमिति सूचितम् ॥ २१ ॥ शुचार्पिताः शोकव्याप्ताः शुचार्द्दिता इत्यपि पाठः । स्त्रिय इति पुम्भ्यः सकाशात् कृष्णे स्त्रीणामासक्त्याधिकात् ॥ २२ ॥ परेषां शत्रूणामनीकान्येव पयोमुचो मेघास्तेषां शिलीमुखा बाणास्तेषामत्युल्बणवर्षेण पीडितं व्यस्फूर्जयत् उज्जृम्भयामास ॥ २३ ॥ किं कुर्वन्नित्यत आह । निषङ्गात् इषुधेः सकाशात् शरान् एकैकान् गृह्णन् । अथ तदनन्तरं तान् गुणे सन्दधत् गुणमाकृष्य तान् मुञ्चन् तैश्च रथादीन्निघ्नन्निरन्तरमिति ग्रहणादि सर्वक्रियाविशेषणम् । तेन ग्रहणयोजनविकर्षणनिःक्षेपणप्रहरणक्रियाः क्रमेणोद्भूता अपि सदैवोद्भवन्त्य इव द्रष्टॄन् प्रतिभाताः क्षणार्द्धमध्ये शतकोटिकृत्वोद्भवन्तीत्यर्थः । ततश्च अलातचक्रं ज्वलत्काष्ठं भ्रमणे यथा चक्रवद्भवति तद्वदेव मथुरायाश्चतुर्दिक्षु सैन्याभिमुखं भ्रमन् शार्ङ्गं व्यस्फूर्जयदिति ॥ २४–२५ ॥

गूढार्थदीपिनी

न वै विकत्थन्ते नैव श्लाघन्ते ॥ २१ ॥ यथा वायुः अभ्रैः सूर्यं रेणुभिश्चानलम् तथा सैन्यादिसहितौ माधवौ रामकृष्णौ जरासुतः जरासन्धः तवावृणोदित्यन्वयः । अभिसृत्य संमुखमागत्य ॥ २२ ॥ गोपुरं पुरद्वारम् । संमुमुहुः उद्विग्ना बभूवुः ॥ २३ ॥ परेति शत्रुसैन्यरूपमेघानां मेघानां ये शिलीमुखा वाणास्तेषां दुःसहं वर्षं वृष्टिस्तेन । शार्ङ्गस्त्रियं धनुःश्रेष्ठं व्यस्फूर्जयत् टङ्कारयुक्तमकरोत् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

माधवौ मधुवंशोद्भवौ अभिसृत्य अभिमुखमागत्य महाबलौघेन आवृणोत् आवृतवान् वायुरभ्रैः सूर्यं रेणुभिरग्निं यथा ऽऽवृणोति तद्वदिति अदर्शनमात्रमेवावरणमिति सूचितम् ॥ २१–२२ ॥ हरिः स्वभक्तक्लेशहरः परस्य जरासन्धस्य अनीकानि सैन्यान्येव पयोमुचो मेघाः तच्छिलीमुखानां वाणानामत्युल्बणेन वर्षेण पीडितं स्वसैन्यमालोक्य मुहुः व्यस्फूर्जयत् उज्जृम्भितवान् ॥ २३ ॥ किं कुर्वन् व्यस्फूर्जयदित्यत आह—गृह्णन्निति । निषङ्गादिषुधेः असङ्ख्येयबाणालयात् युगपत् अनेकान् गृह्णन् अथानन्तरं तान् गुणे सन्दधत् गुणमाकृष्य तान् मुञ्चन् तैश्च रथादीन् निघ्नन् ध्वंसयन् निरन्तरमिति ग्रहणादिक्रियाविशेषणम् ज्वलत्काष्ठभ्रमणे यथा चक्रवद्भवति तद्वत् शार्ङ्गं शरासनोत्तमं व्यस्फूर्जयत् इति पूर्वेण सम्बन्धः ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वीराश्च ते भूपालाश्च तेषां कदम्बः सङ्घस्तस्य जृम्भितमास्फोटजं शब्दम् । जृम्भितं करणे स्त्रीणामीहास्फुटितयोरपीति विश्वः । युगावसानस्य प्रलयस्य यद्घूर्णितं ध्वनिविशेषस्तेनोपमा यस्य तत् । उद्धृतो मृगराट् सृगालानां गोमायूनां घोषं निशम्येव कृष्णो निशम्य चेतसा न चचाल ॥ २१ ॥ सपरिच्छदौ सोपस्करणौ ॥ २२ ॥ सुदर्शनसहस्रारशब्दौ यौगिकौ । सु शोभनं दर्शनं यस्य तत् सहस्रमराणि दलानि यस्य तत् घोरं रिपूणां मनोरमं साधूनाम् ॥ २३ ॥ कुमोदकस्य हरेरियं कौमोदकी नाम्ना च कौमोदकी गुर्वी गदा शुभा सतां त्रिषु भागेषु कोट्योर्मध्ये चेति न तं शार्ङ्गेति संज्ञा यस्य तत् गुणेन ज्ययाऽन्वितं कार्मुकश्रेष्ठम्॥२४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवमुपदिष्टः युद्धं स्वहितं मन्यमानः ससामग्रीको युद्धार्थमागत इत्याह जरासुत इति । मातुः पुत्रोऽयम् । तत्रापि सा जरा, सर्वानेव विरूपान् करोति, कथमेनं त्यक्ष्यतीति । तत्रापि राक्षसी । तेन दुर्बुद्धिरप्ययं ज्ञापितः । अन्यथा तदुपदेशमेव गृहीत्वा, मरणं निश्चित्य, तेनैव सह किं युद्धं कुर्यात् । तौ कृष्णरामावभिसृत्य सर्वतः संवेष्टयित्वा महाबलौघेन आवृणोत् । माधवाविति । मधुवंशोत्पन्नाविति भगवन्ताविति वा, धनं दास्यत इति वा, पित्रोः स्वबलं प्रदर्शनीयमिति वा । जेष्यामीति बुद्ध्या प्रवृत्त इति ज्ञापयितुं साधनाधिक्यमाह बलीयसा महाबलौघेनेति । महत्त्वं स्वरूपेण, तादृशानां बहुत्वमोघः अन्तस्सारं बलम् । एवं गुणत्रयस्य विद्यमानत्वात् आवरणं कृतवान् । भगवत्सहायं सर्वमेव स्वार्थं गृहीतवानित्याह ससैन्येति । सैन्यसहितौ, यानसहितौ, तत्र त्वजवाजिसारथिभिः सहितौ । अनेनैवमुक्तं भवति, केचन सैन्ये लग्नाः, केचन रथे, केचन ध्वजयोः, केचनाश्वेषु, सूतयोरिति । एतयोरसम्भावितमावरणमिति ज्ञापयितुं दृष्टान्तमाह सूर्यानलाविति । न ह्यावरणं सूर्यं स्पृशति, अग्निं वा, परं पश्यतां चक्षुः प्रतिरोधकमेव । वायुस्थानीयो जरासन्धः, अभ्राणि सूर्यावरकाणि, रेणवोऽग्नेः ॥ २१ ॥ अतः स्वरूपे फलस्यायुक्तत्वात् दृष्टौ तज्जार्तमित्याह सुपर्णतालध्वजचिह्नितताविति । सुपर्णध्वजो भगवद्रथः । तालध्वजो बलस्य । सेनामध्ये पतिताविति रेणुभिः विजातीयध्वजादिभिश्च व्यवधानात् अलक्षयन्तः अपश्यन्तो जाताः । एको दुःखहर्ता, अपरो रमयतीति सुखदाता । उभयोरत्यावश्यकत्वात् तददर्शने व्याकुलता उचितैव । स्त्रियश्च तत्र मुख्यतया द्रष्टुं समागता इति युद्धानभिज्ञत्वात् रसान्तरपरिग्रहे स्ववैयर्थ्यं सूचयन्त्यः शोकेनार्पिता जाता इत्याह स्त्रिय इति । पुरस्य अट्टालकाः अत्युच्चा भवन्ति । हर्म्याणि राज्ञां गृहाः । पुरद्वारं चात्युच्चम् । एतानि समाश्रित्यापि अलक्षयन्त्यः सम्यक् मुमुहुः, मूर्च्छां प्राप्तवत्यः । ततो जागरणे शुचा चार्पिताः । कृष्णो हि

भगवान् स्त्रीणामेवार्थे अवतीर्ण इति तद्बाधकत्वेनैव सैन्यं मारितवान्। न त्वन्यथेति स्वरूपविचारसिद्ध्यर्थमुक्तम्। अन्यथा सङ्कर्षणकार्ये भगवान् प्रविष्ट इति भवेत्। तच्चैकादशे न पुनरुक्तम् ॥ २२ ॥ अतः स्त्रीणां दुःखनिवृत्त्यर्थं भगवान् सैन्यं निहतवानित्याह हरिरिति। सूर्यस्थानीयो हि भगवान्। तत्र मेघस्थानीयाः तदीयाः। अतस्तेषां निराकरणमनायासेनैव भविष्यतीति निरूपयितुं तेषां सेनामनुवदति परानीकपयोमुचामिति। शत्रूणामनीकमेव पयोमुचः मेघाः। तेषां शिलीमुखान्येवोल्बणवर्षः। तेन पीडितं स्वसैन्यम्। अनेन महाशूरा अपि, अहन्यमाना अपि, यथा वृष्टौ समागतायां सर्व एव भीताः पलायन्ते, न हि वृष्टिः कांश्चिन्मारयति, मृता वा भवन्ति केचन, तथापि महाशूरा अपि राजानमपि परित्यज्य पलायन्ते, तथा अत्र जातमित्युपहासार्थं निरूपितम्। स्त्रीषु कृपा, तेषु च हास्यरसमुत्पन्नमिति भावः। अत उभयोरपि हितच्चिकीर्षया स्वशार्ङ्गं गृहीतवानित्याह सुरासुरार्चितमिति। सुराणां हितम्, असुराणां मोक्षम्, द्वयं दास्यतीति ज्ञात्वा शार्ङ्गं धृतवान्, विशेषेणास्फूर्जयत्। शार्ङ्गज्यानिनादः सुराणां चित्ते भयनिवर्तको भवतीति प्रथमं सन्देहनिवारणार्थंमाश्वासनमुक्तवान्। 'यज्ज्यानिनादश्रवणात् सुराणां चेतांसि निर्मुक्तभयानि सद्यो भवन्ति' इति वाक्यात्। शार्ङ्गं एव शरासनेषु उत्तमम्। अनेनाशनिवाणवर्षमिति तस्य द्वितीयं माहात्म्यमुक्तम्। भगवतः अनेकान्यपि धनूंषि सन्तीति बोधितम्। शरासन्धपदेन देवैतारूपत्वं प्रतिषिद्धम्। अन्यथा माहात्म्यमुक्तं न भवेत् ॥ २३ ॥ इदानीं भगवतो युद्धचातुर्यमाह गृह्णन्निषङ्गादिति। अतितेजस्विनां स्वागमेऽपि स्वशक्तिस्तिष्ठतीति क्रियाशक्तेर्व्यापकता नित्यता चोक्ता भवति। निषङ्गात् तूणीरात् शरान् गृह्णन्, अथ तदनन्तरं तस्य योजनाप्रकारेण योजितवान्। ततो विकृष्य मुञ्चन्, ततः चतुरङ्गिणीं सेनां निघ्नन्। जात इति प्रत्येकं वा सम्बन्धः। चतुर्धा भगवत्कृतिः।

स्थानात् प्रच्यावनं पूर्वं साधने योजनं तथा। फलार्थं विनियोगश्च फलसिद्धिरिति क्रमात् ॥ १ ॥

मोचनसमयेऽपि ग्रहणमावर्तते चेत्, तदा क्रिया अपरिच्छिन्ना भवति, नान्यथेत्यत आह निरन्तरमिति। अन्तराभावो यथा भवति तथेति। चतुर्णां विशेषणं। तदसंभावितं मत्वा दृष्टान्तमाह यद्वदलातचक्रमिति। अलातचक्रं परिभ्रममाणं सर्वत्र विद्यमानमिव मण्डलाकृति भाति, तद्वन्निरन्तरमिति सम्बन्धः। यद्यपि भगवतः क्रियाशक्तौ न सन्देहः, तथापि स्वयमपि वक्ष्यति। लोके निरूपणे असंभावना मा भवत्विति दृष्टान्तमप्याह। निषङ्गादित्येकवचनेनाक्षयतूणींरता निरूपिता। अथेति भिन्नोपक्रमेण। अनेक शरेण एतावत् मारयिष्यामीति पूर्वं सङ्कल्पो निरूपितः। तदैव च निघ्नन् जातः, अन्यथा काकतालीयवत् भगवत्प्रवृत्तिरपि स्यात्। ततश्च न पराक्रमः सिध्येदिति। एतावदथशब्देन निरूपितम्। सन्दधत् सम्यग् धनुषि योजयन्। शरानित्यस्त्रव्यावृत्त्यर्थम्। अन्यथा देवताया एव सामर्थ्यं भवेत्। शरानिति बहुवचनं सकृदपि बहूनां सन्धानं सूचयन्ति। विकृष्य मुञ्चनिति। मानुषक्रियैवात्र व्यापृता भगवता, न त्वलौकिकं किञ्चित्प्रकाशितमिति ज्ञापितम्। शितास्तीक्ष्णाः ते च ते बाणाश्च तेषां पूगः समूहो येषु। एकस्मिन् बाणे भगवत्क्रिया व्यापृतेति भगवता स मुक्त इति परिच्छेदे निवृत्ते सहस्ररूपः स एव जात इति बाणस्यानन्तत्वे प्रतिपादिते तेन मोचितशराणामपि अनन्तत्वं फलिष्यतीति तथोक्तम्। अन्यथा पुनरुक्तदोषः स्यात्। सन्धितानामेव विमोकस्य सिद्धत्वात्। नितरांघ्नन्निति सकृत् प्रहारेणैव प्राणवियोगः शरीरस्य शतधा खण्डाश्च प्रदर्शिताः। चतुरङ्गसेना सर्वैव मारिता इति ज्ञापयितुं गणनामाह। रथान् कुञ्जरान् वाजिनः पत्तयः पदातयः। पत्तीरिति स्त्रीप्रयोगः। एको बाणः एकां पत्तिमनेकां वा मारयतीति सूचयति। 'एकेभैकरथा अश्वा पत्तिः पञ्चपदातिके'ति। पत्तीनिति वा पाठः। शूराणां प्राणवियोगमात्रे न सामर्थ्यं सिध्यति। मर्मस्थानस्पर्शे अल्पप्रहारेणापि प्राणवियोगसम्भवात् ॥ २४ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः। जरायाः सुतो जरासन्धोऽभिसृत्य बलीयसा महाबलौघेन महता सैन्यसंघेन सैन्ययानध्वजवाजिसारथिभिः सहितौ माधवौ रामकृष्णवावृणोत् परिवेष्टितवान्। वायुरभ्रैः सूर्यं रेणुभिरग्निमिव ॥२१॥ सुपर्णो गरुडः तालो वृक्षस्ताभ्यामुपलक्षिताभ्यां ध्वजाभ्यां चिह्नितौ हरिरामयो रथौ अलक्षयन्त्योऽपश्यन्त्यः पुरादिकमारूढाः स्त्रियो माथुर्यः शुचा शोकेनार्दिता व्याप्ताः संमुमुहुर्मोहं प्रापुः ॥ २२ ॥ परस्य शत्रोरनीकानि सैन्यानि तान्येव पयोमुचो मेघास्तेषां शिलीमुखा बाणास्तेषामत्युल्वणं वर्षं तेन पीडितं स्वस्य सैन्यम् आलोक्य दृष्ट्वा सुरैरसुरैरर्चितं पूजितं शार्ङ्गं शरासनोत्तमं धनुर्वरं सज्जं चकार ॥ २३ ॥ निषंगात् बाणकोशात् शरान् गृह्णन् अथ गुणे संदधत् आरोपयन् विकृष्य शितास्तीक्ष्णा ये बाणास्तेषां पूगान् समूहान् मुञ्चन् त्यजन् रथान् हस्तिघोटकपदातीन् निघ्नन् सन् निरन्तरमच्छिद्रं यथा भवति तथा अलातचक्रं ज्वलत्काष्ठचक्रं यद्वत् ॥ २४ ॥

विवरणटिप्पणी

जरासुत इत्यत्र। धनं दास्यत इति वेति। लक्ष्मीधवत्वादिति भावः। पित्रोरिति। तदा माप्देन एकदेशग्रहणेन माता तस्याः धवः पितेत्यर्थः। भगवत्सहायमिति। सर्वमेव भगवद्बलं स्वाधीनं कृतवानित्यर्थः। सुपर्णेत्यस्याभासे। स्वरूपे इति। भगवत्स्वरूपे जरासन्धाभिलषितस्य विपरीतफलस्यायुक्तत्वात्सर्वेषां दृष्टौ तत्फलं जातमित्याह। स्त्रीणां दर्शनाभावाच्छोकोपि जातः। भगवति तु न कापि क्षतिः सम्पन्नेत्यर्थः। सुपर्णेत्यत्र। रमयतीति। यथैव भगवद्रमणं सम्भवति, तथैव संपादयतीत्यर्थः।

अतएव हेतुमण्णिजन्तमुक्तम् । स्त्रियश्चेति । अलक्षयन्तः सर्वेऽपि जाताः । तत्र स्त्रियः शोकार्पिता अपि जाता इत्यर्थः । हरिरित्यत्र । अनेन अशनीति । शार्ङ्गस्य शरासनोत्तमत्वकथनेनेत्यर्थः । शार्ङ्गपदस्य तात्पर्यमाहुः भगवतः इति । गृह्णन्नेव संदधत्, संदधदेव मुञ्चन्, मुञ्चन्नेव निघ्नन् इति सर्वासां क्रियाणां वर्तमानतेत्याशयेनाहुः व्यापकता नित्यता चेति । तथा सति अथपदमनर्थकं स्यादित्यत आहुः निषङ्गादिति । स्वयमपीति । वक्ष्यतीति लृडादेशशत्रन्तात्सप्तम्यन्तम् । शुके स्वयमपि वक्ष्यति सति लोके इत्याद्यग्रिमेणान्वयः । प्रथमपक्षे अथपदस्यार्थमाहु' अथेतीति । ते च ते बाणाश्चेति । बाणाः शराग्रभागाः । बृहदारण्यके 'बाणवन्तौ सपत्नातिव्याधिना'वित्यत्र तथा निरूपणात् । तेन मोचितशराणामिति । बाणेन सह मोचितानां शराणामित्यर्थः । बाणस्यैव कार्यकारित्वेन मुख्यत्वाच्छराणां सहभावः । संधितानामिति । संधितानामेव विमोकः सिद्धोभवति । तत्र तु ततो मुक्तस्य बाणस्य सहस्रत्वमधिक' विवक्षितमतो न पुनरुक्तिरित्यर्थः ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्युक्तो जरासुतो जरासन्धः सैन्यादिभिः सहितौ माधवौ मधुवंशे जातौ तौ रामकृष्णावभिसृत्य अभिमुखमागत्य बलीयसा महता बलौघेन सैन्यसमूहेनावृणोत् आवृतवान् । 'तदावरणमप्यदर्शनमात्रमकिञ्चित्करमेव' इति सूचयन् दृष्टान्तद्वयमाह–सूर्यानलाविति । वायुर्यथा अभ्रैः सूर्यं, रैणुभिश्चाग्निमावृणोति तथेत्यर्थः ॥ २१ ॥ तदा च पुरस्य अट्टालिकादि समाश्रिता अधिरूढाः स्त्रियो मृधे युद्धभूमौ सुपर्णध्वजतालध्वजाभ्यां चिह्नितौ हरिरामयो रथौ अपश्यन्त्यः शुचार्दिताः शोकव्याप्ताः सत्य सम्मुमुहुः विचित्ता बभूवुरित्यन्वयः ॥ २२ ॥ तदा हरिः परस्यानीकानि सैन्यान्येव पयोमुचो मेघास्तेषां शिलीमुखा बाणास्तेषां अत्युल्बणं दुःसहं वर्षम्, तेन पीडितं स्वसैन्यमवलोक्य सुरैरसुरैश्च अर्चितं श्रेष्ठत्वेन सम्मतं शार्ङ्गाख्यं शरासनोत्तमं धनुश्रेष्ठं व्यस्फूर्जयत् सघोषज्यायुक्तमकरोत् ॥ २३ ॥ ततश्च निरन्तरं यथा भवति तथा निषङ्गात् तूणीरात् शरान् निगृह्णन् अथ तान् धनुपि सन्दधन् अथ तान् शितबाणपूगान् तीक्ष्णशरसमूहान् विकृष्य मुञ्चन् तैश्च रथादीन् विघ्नन् यद्वत् यथा अलातचक्रं परिभ्रमज्ज्वलत्काष्ठं तथा चतुर्दिक्षु सैन्याभिमुखं परिभ्रमन् बभूवेति शेषेणान्वयः ॥ २४ ॥

अन्वितार्थप्रकाशिका

नेति ॥ शूरा नैव विकत्थन्ते आत्मानं नैव श्लाघन्ते किन्तु श्लाघाहेतु पौरुषमेव दर्शयन्तीति । अतः हे राजन् ! आतुरस्य जामातृमरणदुःखितस्य मुमूर्षतः मर्त्तुमिच्छतः तव गुप्तेनेत्यादिवचो न गृह्णीमः ॥ २१ ॥ जरासुत इति ॥ इत्युक्तो जरासुतः सैन्ययानध्वजवाजिसारथिभिः सहितौ तौ माधवौ रामकृष्णौ अभिमुखमागत्य बलीयसा महता बलौघेन सन्यसमूहेनावृणोत् आवृतवान् । तत्र दृष्टान्तः वायुरिव वायुर्यथा अभ्रैः सूर्यं रैणुभिश्चानलमग्निं प्रावृणोति तथा अदर्शनमात्रमेवावरणमिति सूचितम् ॥ २२ ॥ सुपर्णेति ॥ पुरस्य अट्टालकः दुर्गोपर्युच्चगृहाणि हर्म्याणि उच्चप्रासादाः गोपुराणि पुरद्वाराणि च तेषां समूहं समाश्रिताः अधिरूढाः स्त्रियो मृधे युद्धभूमौ सुपर्णध्वजतालध्वजाभ्यां चिह्नितौ हरिरामयो रथौ अलक्षयन्त्यः अपश्यन्त्यः शुचार्पिताः शोकव्याप्ताः सत्यः संमुमुहुः विचित्ता बभूवुः । पुमपेक्षया स्त्रीणामधिककातर्यात् कृष्णे आसक्त्याधिक्याच्च ॥ २३ ॥ हरिरिति ॥ तदा हरिः परस्यानीकानि सैन्यान्येव पयोमुचो मेघास्तेषां मुहुः शिलीमुखा बाणास्तेषामत्युल्बणं दुःसहं वर्षं तेन पीडितं स्वसैन्यमालोक्य सुरैः असुरैश्च अर्चितं श्रेष्ठत्तेन संमतं शार्ङ्गाख्यं शरासनोत्तमं धनुःश्रेष्ठं व्यस्फूर्जयत् सघोषद्वयायुक्तमकरोत् ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अभिसृत्यतयोः संमुखमागत्य सैन्यादिसहितौ । तौ माधवौ मधुकुलोत्पन्नौ । महता बलौघेनानीकसमुदायेनाऽऽवृणोत् आवृतवान् । काविव । अनिलः । अभ्रैर्भानुमिवरेणुभिश्च अनलमिव तद्वत् ॥२१॥ सुपर्णतालध्वजचिह्नितौ सुपर्णो गरुडः तालस्तालवृक्षश्च तच्चिह्नवन्तौ यौ ध्वजौ ताभ्यां चिह्नितौ हरिरामयोः रथौ गरुडध्वजचिह्नितं कृष्णरथं तालध्वजचिह्नितं रामरथं च । पुरस्य अट्टालकं दुर्गोपर्युच्च गृहं च । हर्म्यमुच्चप्रासादश्च गोपुरं च तेषां समाहारस्तत् । एतत्त्रयं समाश्रिताः समारूढा अपि मृधे रणभूमौ । अलक्षयत्यो लक्षणैरप्यतर्कयन्त्यः ॥ २२ ॥ परेषां शत्रूणामनीकानि सैन्यान्येव पयोमुचो मेघास्तेषां । शिलीमुखैः शरैस्तद्रूपैर्बिंदुभिः । अत्युल्वणं दुःसहं । यद्वार्षणं तेन पीडितं । शरासनोत्तमं चापोत्तमं च तत् शार्ङ्गं च शार्ङ्गशरासनोत्तमं तत् व्यस्फूर्जयत् सज्यंकृतवान् । राजदंतादित्वात् शरासनोत्तमराष्ट्रस्य परनिपातः ॥ २३ ॥ गृह्णन्निति । निषंगात् शरधेस्तूणीरादिति यावत् । शरान् गृह्णन् । अथ तान् प्रत्यंचायां संदधत् । तामाकृष्यतीक्ष्णवाणपूगानमुंचन् । रथांदींश्च निघन् ताडयन् । पत्तीन् पदातीन् निरन्तरमिति बाणग्रहणादिक्रियाणां पृथक्पृथग्विशेषणं यद्वत् यथा । अलातचक्रं ज्वलत्काष्ठं भ्रमणे चक्रवत् दृश्यते तद्वत् संततग्रहणमुंचनादिक्रियाबोध्या ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सुपर्णेति । सुपर्णो गरुडः तालो वृक्षविशेषस्ताभ्यां युक्ताभ्यां ध्वजाभ्यां चिह्नितावङ्कितौ, हरिरामयोः कृष्णबलभद्रयोः, रथौ, पुरा प्राक् सम्यग्विलोकयन्त्य इति शेषः । सांप्रतं, मृधे संग्रामे, अलक्षयन्त्यः, अट्टालकहर्म्यगोपुरं, समाश्रिताः स्त्रियः, शुचा

शोकेन, अर्पिता व्याप्ताः सत्यः, संमुमुहुः विचित्ता बभूवुः । स्त्रियः पुरोऽट्टालकेति पाठे, पुरो मथुरायाः, स्त्रिय इत्यन्वयः । पुराट्टालकेति समस्तपाठे पुरस्य अट्टालकाः, तत्राट्टालका उपरि भूमिकाः, हर्म्याणि गृहाणि, गोपुरं पुरद्वारम् ॥ २१ ॥ हरिरिति । हरिः परस्य शत्रोरनीकानि सैन्यानि तान्येव पयोमुचो मेघास्तेषां, मुहुः शिलीमुखा बाणास्तेषामत्युल्बणं दुःसहं वर्षं प्रवर्षणं तेन पीडितं, स्वसैन्यं आलोक्यावलोक्य, सुराश्चासुराश्च तैरर्चित बहुमतं, शार्ङ्गशरासनोत्तममतिश्रेष्ठं शार्ङ्गाख्यं धनुरित्यर्थः । व्यस्फूर्जयत् उज्जृम्भितवान् । सघोषज्यायुक्तमकरोदिति वा ॥ २२ ॥ गृह्णन्निति । शरान् बाणान्, निषङ्गात्तूणीरात्, गृह्णन्, अथ संदधत्, धनुषीति शेषः । विकृष्य शरासनमाकृष्य, शितबाणपूगान् निशितबाणसमूहान्, मुञ्चन्; रथान्, कुञ्जरवाजिपत्तीन्, कुञ्जरा हस्तिनः, वाजिनोऽश्वाः, पत्तयः पदातयः, निघ्नन् ध्वंसयन् सन्, निर्नविद्यते अन्तरं विच्छेदो यस्यां ग्रहणादिक्रियायां यथा भवति तथा, अवतस्थ इति शेषः । तदा, धनुरपि, यद्वद्यथा, अलातचक्रं भ्रमज्ज्वलत्काष्ठं तद्वत् । आर्यादिति शेषः । निरन्तरमित्यलातचक्रस्यैव वा विशेषणम् । विच्छेदरहितमलातचक्रं यथा तद्वद्धनुर्व्यस्फूर्जयदिति पूर्वेण सम्बन्धो वा ॥ २३ ॥ तादात्विकं भगवच्छरपीडितं परसैन्यमनुवर्णयति । निर्भिन्नेति । तदा, निर्भिन्नाः कुम्भाः कुम्भस्थलानि येषां ते, करिणो गजाः, निपेतुः । शरैः वृक्णा कन्धरा ग्रीवा येषां तथाभूताः, अनेकशः, अश्वा हयाः, अश्वाश्च ध्वजाश्च सूताः सारथयश्च नायका रथिनश्च हता अश्वादयो येषां ते, रथाः, भुजा बाहवश्च ऊरवश्च कंधरा ग्रीवाश्च छिन्नाः भुजादयो येषां ते, पदातयश्च, निपेतुः ॥ २४ ॥

कृष्णप्रिया

श्रीशुक्राचार्यजी ने कहा राजन् परीक्षित ! जरा दासी का पुत्र जरासन्ध ने समीप जाकर अपनी बिशाल सेना से श्रीकृष्ण बलभद्रजी को, उनकी सेना को, सारथि सहित रथ ध्वजा अश्वों को इस प्रकार घेर लिया, कि जैसे वायु बादलों से रवि को एवं रेणुओं से अग्नि को घेर लेता है ॥ २१ ॥ गरुडध्वज भगवान श्रीकृष्ण का रथ को एवं तालध्वज श्रीबलभद्रजी के रथ को युद्ध में न देखकर श्रीमथुरानगरी के अट्टालिकाओं, राज महल और नगर के विशिष्ट भवनों के बड़े दरवाजों पर चढ़ी हुई नगर नारियाँ शोक से संतप्त होकर मूर्छित हो गई ॥ २३ ॥ भगवान् श्रीकृष्ण ने जब देखा कि शत्रु सैन्य के वीर पुरुष हमारे सैन्य पर इस प्रकार शरवृष्टि कर रहें हैं मानों मेघ भयकर जलधाराओं से वृष्टि कर रहा है और हमारा सैन्य अतिशय व्यथित एवं पीड़ित हो रहा है तब प्रतीकार एवं सैन्य रक्षा के लिए सुर और असुरों से समर्चित अपने शार्ङ्ग नाम के धनुष का टङ्कार किया ॥ २३ ॥ पुनः पुरुषोत्तम तरकस में से बाणों को निकालने, धनुष पर चढ़ाने और धनुष की डोरी-प्रत्यञ्चा खींचकर बाणों के समूह को छोड़ने लगे । तब श्रीकृष्ण भगवान का वह शार्ङ्ग धनुष इतनी वेगीली गति से चल रहा था मान लो कोई अत्यन्त वेग से अलाव चक्र को घुमाता हो भगवान् श्रीकृष्ण राजा की हाथी, घोड़े, पैदल, रथों की चतुरंगिणी सेना का संहार करने लगे ॥ २४ ॥

[1]निर्भिन्नकुम्भाः करिणो निपेतुरनेकशोऽश्वाः शरवृक्णकन्धराः ।
रथा हताश्वध्वजसूतनायकाः पदातयश्छिन्नभुजोरुकन्धरा ॥ २५ ॥
संछिद्यमानद्विपदेभवाजिनामङ्गप्रसूताः शतशोऽसृगापगाः ।
भुजाहयः पूरुषशीर्षकच्छपा हतद्विपद्वीपहयग्रहाकुलाः ॥ २६ ॥
करोरुमीना नरकेशशैवला धनुस्तरङ्गायुधगुल्मसङ्कुलाः ।
[2]अच्छूरिकावर्तभयानका महामणिप्रवेकाभरणाश्मशर्कराः ॥ २७ ॥
प्रवर्तिता भीरुभयावहा मृधे मनस्विनां हर्षकरीः[3] परस्परम् ।
विनिघ्नतारीन् मुसलेन दुर्मदान् सङ्कर्षणेनापरिमेयतेजसा ॥ २८ ॥

---

१. ततः शशाङ्काकृतिपाञ्चजन्यं महारवं दैत्यकुलापचारम् । मुखे निधायाशु पुपूर यादवानाश्वासयन् क्षत्रियकूटघट्टितान् ॥ १ ॥
नृपास्तदाकर्ण्य तु कर्णनिष्ठुरं क्रमेण निर्भिन्नहृदो बभूविरे । यदुप्रवीराश्च समुद्यतायुधा रणे नृपाञ्जघ्नुरनीकसंयुताः ॥ २ ॥
ततश्चातुर्द्वारगतान्महीपतीन्यदुप्रवीराः परिभूय सर्वशः । चक्रुः शरौघैः सहसैकवाहिन आप्यायिताः शार्ङ्गरवेण शौरिणा ॥ ३ ॥
ततो हरिं चैद्यपतिर्मण्डलीकृतकार्मुकः । भर्त्सयन्कृष्णकृष्णेति तिष्ठतिष्ठेति चाब्रवीत् ॥ ४ ॥
तमभ्यधावद्गोविन्दो विमुञ्चन्सायकान्बहून् । मण्डलीकृतकोविदण्डस्तैलधौताञ्छिताञ्शरान् ॥ ५ ॥
ततः पञ्च शरान्घोरानादाय दमघोषजः । चतुर्भिस्तुरगानाशु विव्याधैकेन सारथिम् ॥ ६ ॥
भूयो दशाशु सन्धाय विव्याध मधुसूदनम् । व्यनदत्सिंहनादं च तदद्भुतमिवाभवत् ॥ ७ ॥

कर्वमक्षमा

अन्वयः—करिणः, निर्भिन्नकुम्भाः, निपेतुः, शरवृक्णकन्धराः, अनेकशः, अश्वाः निपेतुः, हताश्वध्वजसूतनायकाः, रथाः निपेतुः, छिन्नभुजोरुकन्धराः, पदातयः, निपेतुः ॥ २५ ॥ अपरिमयतेजसा, सङ्कर्षणेन, मुसलेन, दुर्मदात्, अरीत्, संच्छिद्यमान, द्विपद इभवाजिनाम्, अङ्गप्रसूताः, शतशः, असृगापगाः, प्रवर्तिताः, (ताः सरितः) भुजाहयः पूरुषशीर्षकच्छपाः हतद्विपद्वीपहय-ग्रहाकुलाः (भान्ति, (पुनः ताः सरितः) करोरुमीनाः, नरकेशशैबलाः, धनुस्तरङ्गायुधगुल्मसंकुलाः, अच्छूरिकावर्तभयानकाः, महामणिप्रवेका भरणाश्मशर्कराः (असृगापगाः शोणितसरितः) मृधे, भीरुभयावहाः, मनःस्विनाम्, परस्परम् हर्षकरीः, (समभवन्) ॥ २६–२८ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

हता अश्वा ध्वजाः सूता नायका रथिनश्च येषु ते ॥ २५ ॥ संछिद्यमाना द्विपदा इभा वाजिनश्च तेषामङ्गेभ्यः प्रसूता असृगापगा रुधिरनद्यः परस्परं प्रवर्तिता इति तृतीयेनान्वयः । प्रसिद्धनदीरूपकमाह । भुजा एवाहयो यासु ताः । पुरुषाणां शीर्षाण्येव कच्छपा यासु ताः । हता द्विपा एव द्वीपा अन्तर्वर्तिततटानि हया एव ग्रहा ग्राहास्तैश्चाकुला व्याप्ताः ॥ २६ ॥ करा ऊरवश्च मीना यासु ताः नराणां केशा एव शैवालं यासु ताः । धनूंष्येव तरंगा आयुधान्येव गुल्मास्तैश्च तैश्च संकुलाः । अच्छरिकाश्चर्माणि चक्राणि वा तान्येवावर्तास्तैर्भयानकाः । महामणीनां प्रवेका उत्तमा आभरणानि च यथायथमश्मानः शर्कराश्च यासु ताः ॥ २७ ॥ भीरूणां भयावहाः । मनस्विनां धाराणां हर्षकर्यः किं च संकर्षणेनापि तद्बलं क्षयं प्रणीतम् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

निर्भिन्नकुम्भा विदलितमूर्धानः "कुंभो राश्यंतरे हस्तिमूर्द्धांसे राक्षसांतरे" इति मेदिनी । अनीकशः राशिशः "अनीकोऽस्त्री रणे सैन्ये समूहे दुर्गतेऽपि च" इति धरणिः ॥ २५ ॥ 'इभः स्तंबेरमः पद्मी' इत्यमरः । "द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्" इति च । 'ग्रहो ग्राहे च रव्यादौ' इति धरणिः ॥ २६ ॥ "जलनीली तु शेवालं शैवऽलोऽथ" इत्यमरः गुल्मा लवल्यः "गुल्मः सेनाघट्टभिदोः सैन्यरक्षणरुग्भिदोः । स्तंबे स्त्रियामामलक्यां लवलीवस्त्रवेशयोः ॥" इति मेदिनी । "अच्छूरिका स्यात्पुलके वृत्तचक्रध्वनिष्वपि" इति तीर्थः । "प्रवेकस्तूत्तमे पुंसि वाच्यवत्स्याद्विवेक्तरि" इति निरुक्तिः । 'आवर्तस्त्वंभसां श्रमः' इति । यथायथं । मणय अश्मानः पाषाणानि 'अश्मनी मणि पाषाणे' इति कोशात् । अलंकाराश्च शस्त्रभेदनाच्छर्करावज्जाताः, शर्कराः सिकता बालुका इति यावत् "शर्करा खण्डविकृतावुपलाकर्परांशयोः । शर्करान्वितदेशेऽपि रुग्भेदे शकलेऽपि च ॥" इति मेदिनी । अच्छूरिकाचर्माणि चक्राणि वा । पञ्चमस्कन्धे 'अच्छूर्यमृतमणी' इत्यादौ प्रयुक्तश्चक्र एव ॥ २७ ॥ परस्परमन्योन्यम् । न केवलं श्रीकृष्णेनैव नद्यः प्रवर्तिता इत्याह—किञ्चेति । यद्यपीह कृष्णेनेति नोक्तं तथापि 'क्षयं प्रणीतं वसुदेवपुत्रयोः' इत्यग्रिमपद्योक्तिविरोधात्तेनापीति बोध्यम् । दुर्मदान् दुष्टाहंकारान् । साक्षाच्छ्रीभगवता सह युद्धात् । यद्वा—निजबलादिना महामत्तानित्यर्थः । तेजः पराक्रमः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निर्भिन्नकुम्भा इत्यादिना तत्रापि योग्यायोग्यस्थान एव वेधनमिति विशेषोक्तिः ॥ २५ ॥ संच्छिद्येति सार्द्धद्वयम् । गुल्माः स्तम्बा अप्रकाण्डवृक्षजातयः अच्छूरिकाशब्दो वैदिकः पञ्चमस्कन्धेऽपि प्रयुक्तोऽस्ति अस्फूर्यमृतमणीत्यादौ परस्परं हर्षकरो वीर-

---

ततस्तमाह गोविन्दः साधुसाध्विति पूजयन् । भो भो चैद्य महेष्वास वीरोसि बलवानसि ॥ ८ ॥
अतो मे पश्य दुर्बुद्धे धानुष्मत्त्व स्वयं रणे । इति ब्रुवति गोविन्दे राजानः सर्व एव ते ॥ ९ ॥
विव्यधुर्निशितैर्बाणैर्यौगपद्येन माधवम् । तांस्तान्प्रत्येकशः कृष्णो विद्ध्वा पञ्चभिराशुगैः ॥ १० ॥
सारथिं चतुरो वाहाननयद्यमसादनम् । त्रिभिस्त्रिभिः शरैर्भूयोप्येकैकं नृपतीन्रणे ॥ ११ ॥
वक्षस्यास्ये ललाटे च विव्याध यदुनन्दन । ततश्च त्रिशतां राज्ञां त्रिशत्कार्मुकमाहवे ॥ १२ ॥
त्रिशद्भिः सायकैराशु चिच्छेद यदुपुङ्गवः । दमघोषसुतस्यापि धनुश्छित्वा त्रिभिः शरैः ॥ १३ ॥
ध्वजं च मुकुटच्छत्रे चकर्त प्रहसन्निव । ततो दश हरिर्भल्लाञ्शार्ङ्गे सन्धाय माधवः ॥ १४ ॥
आकर्णान्तं समाकृष्य चैद्यं विव्याध सङ्गरे । तेन राजन्यकटकं विभ्रान्तं शरताडितम् ॥ १५ ॥
कालान्तमारुतोद्धूतशैलद्रुमलतोपलम् । त्रातारं नाध्यगच्छद्वै हताश्वरथसारथि ॥ १६ ॥
शरान्विमुञ्चञ्जलजं च पूरयन्विस्फूर्जयन्कार्मुकमुग्रपौरुषः । विलोकयन्मागधसैन्यमाहवे निरन्तरं यद्वदलातचक्रम् ॥ १७ ॥

एते सप्तदश श्लोकाः विजये मुनिभावप्रकाशिकापाठेऽपि दृश्यन्ते ।

२. आस्थू–वीर । आस्फूजिता–विज. । अस्थू–इति कस्यचित् । ३. वहाः–विज ।

स्वाभाव्यान्मारयतां मार्यमाणानाञ्चानन्दप्रदाः प्रवर्त्तिताः श्रीभगवतैव। यद्वा असृगापगा एव परस्परं प्रवर्त्तिताः मिलित्वा महिता इत्यर्थः। तत्र प्रथमपक्षे निर्भिन्नकुम्भा इत्यादिना तत्पराक्रमवर्णनस्यैव सोत्साहमपक्रान्तत्वात् मुकुन्दोऽप्यक्षत बल इत्यादि वक्ष्यमाणात् परस्परं हर्षकरीरित्यव्यवहितान्वयाच्च। द्वितीयपक्षे तत्रैव तात्पर्य्यात् ॥ २६–२७ ॥ दुर्मदान् दुष्टाहङ्कारान् साक्षात् श्रीभगवता सह युद्धात्। यद्वा, निजबलादिना महामृत्तानपीत्यर्थः। तेजः पराक्रमः विशिष्टक्रीडितं लीलाविशेष इत्यर्थः। यतः लीलया वसुदेवपुत्रयोरपि अव्यभिचारिसर्वैश्वर्ययोः परमित्यनेन तत्र भूभारहरणप्रयोजस्यानुषङ्गिकत्वं व्यञ्जितम् ॥ २८–२९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अच्छूरिकेति शब्दोऽयं वैदिकः, पञ्चमस्कन्धेऽपि प्रयुक्तोऽस्ति (भा० ५।३।३) 'अच्छूर्य्यमृतमणि'–इत्यादौ ॥२६॥ परस्परमन्योन्यं मृधे यादवैः परैश्च यद् युद्धं तस्मिन् प्रवर्चिता श्रीभगवतैव निर्भिन्नकुम्भा इत्यादौ, तैनैव तत्तद्बधोक्तेः, अन्यथा अग्रे वक्ष्यमाणेन (भा० १०।५०।३५) 'अक्षतबलः' इत्यनेन विरोधापत्तिः। दुर्म्मदान् दुष्टाहंकारान्, साक्षात् श्रीभगवतां सह युद्धात्, यद्वा, निजबलादिना महामत्तानपीत्यर्थः। अपरिमेयम्—अनन्तत्वात् परिमातुमशक्यं तेजः पराक्रमो यस्य तेन, यतः संकर्षणेन चतुर्व्यूहैकतमेन भगवता क्षयं प्रकर्षेण मुक्त्या पुनरावृत्त्यभावादिना नीतम्, विशिष्टं क्रीडितं लीला विशेष इत्यर्थः। यतो जगदीशयोर्वसुदेवपुत्रयोरिति क्रीडार्थमेव तत्पुत्रताप्राप्त्या जगदीशत्वेऽपि सा क्रीडोचितेति भावः। परमित्यनेन तत्रायासादिकं भूभारहरणादिमात्रप्रयोजनञ्च निरस्तम् ॥ २७–२८ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीय।

ग्रहाकुलाः ग्रहः नक्रः ॥ २६ ॥ प्रवेकः श्रेष्ठः ॥ २७–२८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तादात्विकं भगवच्छरपीडितं परसैन्यमनुवर्णयति–निर्भिन्नेति निर्भिन्नानि कुम्भानि कुम्भस्थलानि येषां ते करिणो गजा निपेतुः तथा अश्वाश्चानेकशः शरैर्मन्नाः कन्धरा ग्रीवाः येषां तथाभूताः निपेतुरित्यनुषज्यते हताः अश्वाः ध्वजा सूता नायका रथिनश्च येषु ते रथाः तथा पदातयश्च छिन्ना भुजा ऊरवः कन्धारश्च येषां तथाभूता निपेतुः ॥ २५ ॥ अथ भगवच्छरनिर्भिन्नपरसैन्यतनुप्रभवरुधिरनदीः प्रसिद्धनदीत्वेन निरूपयति—सञ्छिद्येति संछिद्यमानेभ्य पदातिगजाश्वानाम् अङ्गेभ्यः प्रसूता असृगापगा रुधिरनद्यः शतशः प्रवर्तिताः इति तृतीय श्लोकेनान्वयः। कथंभूताः ? भुजा एव अहयः सर्पा यासु पुरुषाणां शीर्षाण्येव कच्छपा पासु तथाभूता हृता द्विपा गजाः एव द्वीपा अन्तरीपभूमयः हया अश्वा एव ग्रहाः तैश्चाकुलाः व्याप्ताः ॥ २३ ॥ करा ऊरवश्चैव मीनाः यासु नराणां केशा एव शैवलं यासु ताः धनूंष्येव तरङ्गा आयुधान्येव गुल्मानि च तैश्च सङ्कुलाः आस्थूरिकाश्चक्राणि ता एव आवर्त्तास्तैर्भयानकाः महामणीनां प्रवेकाः श्रेष्ठाः उत्तमाभरणानि च यथायथं शिलाः शर्कराश्च यासु ताः ॥ २७ ॥ भीरूणां भयावहाः मनस्विनां धीराणां मिथो हर्षकारिण्यः, विनिघ्नतेति किं च अङ्ग हे राजन् ? अपरिमेयमपरिच्छेद्यं तेजः पराभिभवसामर्थ्यं यस्य तेनारीन् शत्रून् मुसलेनायुधेन विनिघ्नता ताडयता सङ्कर्षणेन कर्त्रा ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

दैत्यकुलस्यापचारं नाशकरं क्षत्रियाणां कूटेन समूहेन घट्टितान् संवेष्टितान् ॥ क ॥ क्रमेण तत्तद्योग्यतानुसारेण ॥ ख ॥ एकवाहिनः एकवाहनगतान् पृष्ठवाहनहीनानित्यर्थः ॥ ग-ङ ॥ दमघोषजः शिशुपालः ॥च॥ सिंहनादं व्यनदत् सिंहनादं चकार ॥छ॥ वीरः शूरोऽसि बलवान् शक्तिमानसि ॥ ज ॥ धानुष्मत्वं धनुष्मतां माहात्म्यम् ॥ झ ॥ आशुगैः शरैः ॥ ञ–ट ॥ यदून्नन्दति बलेन समर्द्धयतीति यदुनन्दनः ॥ ट–ण ॥ कठान्तमारुतेन प्रलयकालवायुना ॥ त–थ ॥ निमिरम्भाः विदलीकृतमूर्द्धानः अनीकशः राशिशः करिप्रभृतयो निमिकम्भादयो बभूवुरित्यन्वयः ॥ २५ ॥ अङ्गप्रसूताः देहापन्नाः असृगापगाः रुधिरं नद्यः भुजा एवाहयो यासु तास्तथा एवउत्तरत्रापि कच्छपाः कूर्मा द्विपा एव द्वीपाः अन्तरद्वीपाः हया एव ग्रहा ग्राहाः ॥ २६ ॥ धनुस्तरङ्गैः आयुधगुल्मैश्च सङ्कुलाः आस्फूर्जिता अतस्थलादवः तज्जलध्वनयः तैरावर्तैः जलभ्रमणैश्च भयानका भयप्रवृत्तकालकध्वनयो वा स्फूर्जितास्त एव आवर्त्ता महामणिप्रवेकाः प्रवेका उत्तमा एवाश्मान आभरणान्येव शर्करा यासु तास्तथा ॥ २७ ॥ सङ्कर्षणेन एवं विधा असृगापगाः प्रवर्तिता इत्यन्वयः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च संच्छिद्यमानानां द्विपदादीनाम् अङ्गेभ्यः प्रसूता असृगापगा रुधिरनद्यः परस्परं कृष्णरामाभ्यां प्रवर्तिता इति तृतीयेनान्वयः। प्रसिद्धनदीरूपकमाह—भुजा एवाऽहयो यासु ताः हतद्विपा एव द्वीपाः अन्तर्वर्तिन उच्चप्रदेशाः हया एव ग्रहा ग्राहाश्चलास्तैराकुलाः व्याप्ताः ॥ २६ ॥ अस्थूरिकाश्चर्माणि चक्राणि वा ता एवावर्तास्तैः भयानकाः महामणीनां प्रवेकाः श्रेष्ठा आभरणानि च क्रमेण अश्मानः शर्कराश्च यासु ताः। मनस्विनां वीराणां हर्षकर्यः ॥ २७ ॥ अङ्ग हे राजन् ! त्वद्बलम् अर्णववत्

दुर्गं भैरवञ्च दुरन्तपारं दुःशब्दो निषेधे अन्तस्तलं पारमवधिः। विक्रमेणागाधं देशतश्च निरवधिकमित्यर्थः। वस्तुविचारे तयोस्तत् कर्म केवलं विक्रीडितं नतु पराक्रमः ।। २८–२९ ।।

गूढार्थदीपिनी

निरन्तरं यथा स्यात्तथा निषङ्गात् तूणीरात् शरान् गृह्णन् तान् धनुषि संदधत् पुनः मुञ्चन् कुञ्जरादीन् निघ्नन् यथा अलातचक्रं ज्वलत्काष्ठं सर्वतो भ्रमति तथा सेनायां चतुर्दिक्षु भ्रमन् भगवान् सर्वैरदृश्यतेत्यन्वयः। शितान् तीक्ष्णान् बाणसमूहान् ॥ २५ ॥ अनीकश इति पाठे राशिशः। शरै छिन्नाः कन्धरा ग्रीवाः येषां। नायका रथिनः ॥ २६ ॥ संच्छिद्यमानेति सार्द्धद्वयम्। द्विपदादीनाम् अङ्गेभ्यः प्रसूताः शतशो रुधिरनद्यो भगवता प्रवर्तितेति तृतीयेनान्वयः। हता गजा एव द्वीपा हया एव ग्रहा ग्राहास्तैर्व्याप्ता 'ग्रहो ग्राहे च रव्यादौ' इति धरणिः। धनूष्येव तरङ्गा आयुधान्येव गुल्माः झाड़ी इति तैः अच्छूरिकाश्चक्राणि। ढालेति वा। मणिप्रवेका मण्युत्तमा पाषाणा अलङ्काराश्च शर्करा बालुकारूपा यासु ताः। वीराणां हर्षकर्य्यः ॥२७–२८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदा शरैर्निर्भिन्नकुम्भाः करिणो शरवृक्णकन्धराः शरैश्छिन्नग्रीवाः अश्वाः तथा हताः अश्वादयो येषु ते रथाः छिन्ना भुजादयो येषां ते पदातयश्च अनेकश इति सर्वेषां विशेषणं निपेतुः ॥ २६ ॥ इदानीं रामकृष्णयुधनिर्भिन्नपरपक्षगद्विपदादिदेहप्रसूतरुधिरनदीः प्रसिद्धनदीरूपकेण वर्णयति–संछिद्यमानेति। सार्द्धद्वाभ्याम्। संछिद्यमानानां द्विपदानां मनुष्याणामभिमानां वाजिनां च अङ्गेभ्यः। पर्वताकारेण संस्थितेभ्यः प्रसूताः असृगापगाः सङ्कर्षणेन अपरिमेय तेजसा श्रीकृष्णेन च प्रवर्तिता इति तृतीयेनान्वयः भुजा एव अहयः सर्पा यासु ताः पुरुषाणां मनुष्याणां शीर्षाण्येव कच्छपा यासु ता हता द्विपा एव द्वीपा अन्तर्गता उच्चप्रवेशास्तैः हया एव ग्रहास्तैश्चाकुला व्याप्ताः ॥ २६ ॥ करा ऊरवश्च मीना यासु ताः नराणां केशा एव शैबलं यासु ता धनूंष्येव तरङ्गा आयुधान्येव गुल्माः तैश्च तैश्च सङ्कुला अच्छूरिकाश्चर्माणि चक्राणि वर्ता एव आवर्ताः तैर्भयानका महामणिप्रवेकाः महामण्युत्तमा आभरणानि च यथायथम् अश्मानः शर्कराश्च यासु ताः ॥२७॥ भीरूणां भयावहाः मनस्विनां च परस्परं हर्षकरी हर्षकर्य्यः ॥२८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तीक्ष्णा धारा यस्य स शितं निशितं मुखं यस्य स नन्दकसंज्ञितः खड्गः शरचितौ शरैर्नालैः पुङ्खैरिति यावच्चितौ सम्बद्धौ। बाणस्त्वयोमयः प्रोक्तः शरो नालोऽस्य कीर्तित इति बृहद्भाष्योक्तेः। तौ चैवम्भूतावित्याह। अक्षयसायकाविति। अक्षयाः सायका ययोस्तौ ॥ २५ ॥ शैब्येत्यपि केचित्पठन्ति। दृढं गुर्विति हलमुसलयोर्विशेषणम्। कुसलं मुसलं तु स्यादिति विश्वः। गगनादागतानि स्यम्। स कृष्णोऽथ सङ्कर्षणमब्रवीत् ॥ २६–२७ ॥ हे आर्य अग्रज त्वावतां त्वद्युक्तानां त्वत्स्वामिकानामिति यावत्। आद्य त्वा वात्मनेत्यृग्भाष्ये त्वद्वान्। टीकायां त्वत्स्वासिक इत्युक्तेः। युष्मदोर्मपर्यन्तस्य प्रत्ययोत्तरलोपश्चेति त्वादेशे दृग्दशवतुष्वेव विहितेऽपि चोन्मतुप्यापि आ सर्वनाम्न इति दकारस्यात्वे त्वमस्यास्तीति मतुपो मस्य झय इति वत्वे च त्वावानिति रूपं ज्ञेयम्। दयितानि प्रीतिपात्राणि। आयुधानि हलमुसलादीनि ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतो भगवतः क्रियाशक्तिं बोधयितुं बाणानां महत्कार्यमाह निर्भिन्नकुम्भा इति। करिणो हस्तिनः नितरां खण्डशो निर्भिन्नाः। यद्यपि निर्भिन्नकुम्भाः करिण एव भवन्ति, तथापि स्वतन्त्रः करो येषामिति षष्टिहायनपरः करिशब्दः। अनीकशः अश्वा एकैकेन शरेण वृक्णाः। कन्धरासु केशाः सन्तीति तत्र बाणप्रचारो न भविष्यतीति कन्धरपदम्। रथास्तु, हता अश्वा ध्वजाः सूता नायकाश्च येषां, तादृशा जाताः। नत्वेकमारणेन शिष्टं दैवान्मृतमिति। रथोऽपि अवयवशः वृक्णः इति ज्ञातव्यम्, अन्यथा निपेतुरिति क्रियासम्बन्धो न स्यात्, अन्यथा जाता इति क्रियान्तरं कल्प्यं प्रसज्येत। पदातयश्च निपेतुः। आघातेनापि पतन्तीति तेषां विशेषणमुच्यते। छिन्नाः भुजाः ऊरवः कन्धराश्च येषाम्। उरु स्थूला वा कन्धरा। नाभेरधो बाणप्रहारस्य निषिद्धत्वात्। अनेन शिरश्छेदः अर्थादुक्तः ॥ २५ ॥ एवं चतुरङ्गसेनामारणमुक्त्वा तस्याधिक्यं वक्तुं तेन जाता रुधिरनदीर्वर्णयति संच्छिद्यमानेति सार्द्धाभ्याम्। चतुरङ्गेषु त्रय एव रुधिरवन्तः, एकं दारुमयम्। अतस्त्रीन् गणयति। द्विपदाः मनुष्याः, इभाः हस्तिनो, वाजिनश्च, तेषामङ्गैः छिन्नैः प्रसूताः शतशः असृगापगा जाताः। अनेन मृतानां निर्भयत्वं सूचितम्। अन्यथा भयेन रुधिरशोष एव स्यात्। विजातीया अपि एकैकप्रकृतिका जाता इत्यपि। अङ्गपदं तु तेषां हनने जाते दैवकृतां रुधिरवृष्टिं व्यावर्तयति। प्रशब्देन मरणानन्तरमपि संस्कारेणापि भयाभावः सूच्यते। अन्योन्यं प्रवाहमेलनात् पूर्वं नामान्तरमप्यापन्नाः पश्चादनेकानि नामानि प्राप्नुवन्तीति शस्प्रत्ययः। असृगापगा रुधिरनद्यः। ननु नदीत्वं कुतः, नहि प्रवाहमात्रेण नदीत्वं भवति, अन्यथा वर्षाकाले जगदेव नदी स्यादित्याशङ्क्य नदीसमानाकृतित्वसिद्ध्यर्थं वर्णयति भुजाहय इति। भुजा एवाहयः सर्पा यत्र। पुरुषशीर्षाण्येव कच्छपा यत्र। एतत्सात्त्विकम्। हता ये द्विपास्त एव द्वीपप्रायाः। द्विर्गता आपो यत्रेति। तस्मिन् द्वीपे छिन्ना ये हयाः

अश्वास्त एव हि ग्रहा ग्राहाः । तैराकुलाः । द्वीपा एव तामसा नदीत्वख्यापकाः । तथापि तत्र प्रवाहेण गच्छतां हयावयवानामारोहावरोहौ द्वीपाधिक्यार्थमेव निरूपितौ । आगन्तुका एवैते नदीधर्माः, न तु सहजा इति । साधारणान् वर्णयति करोरुमीना इति । करा एव उरु अधिका मीना यत्र । करा ऊरवश्च मीना इति वा । मध्यच्छेदे शिष्टो भागः ऊरुशब्देन ग्राह्यः । उरुशब्द एव वा । नराणां केशा एव शैवालानि शैवाला यत्र । धनूंष्येव तरङ्गाः । मीनाः सात्त्विकाः । तरङ्गास्तामसाः इति । त्रयं पूर्वेण वा । नरके शान्तास्त्रयः । आयुधान्येव तूणीरादीनि गुल्माः, तैः सङ्कुलाः । अत एव धनुस्तरङ्गाश्च ताः आयुधगुल्मसङ्कुला इति कर्मधारयः । अच्छूरिकान्येव आवर्ताः । तैर्भयानकाः । अच्छूरिकाश्चक्राणि चर्माणि वा । अनेनातिगाम्भीर्यं नद्याः प्रदर्शितम् । महामणिप्रवेका महामण्युत्तमाः, तद्युक्तान्याभरणान्येव शर्करा यासाम् ॥२७॥ पुराननदीस्थाने कदाचित्पतितं रुधिरं जलेन सहितं तथा जातमिति शङ्कां व्यावर्तयति प्रवर्तिता इति । नूतनतया प्रवर्तिताः । पूर्वस्माद्वैलक्षण्यमाह भीरुभयावहा इति । भीरूणामेव भयावहाः । मनस्विनां तु हर्षकरीः । अन्येषां तु साधारणा यथावद्वर्णिताः । परस्परमिति समयुद्धे । अन्याययुद्धे तु जयशीलानां प्रायेण हर्षो भवतीति नाश्चर्यमेतत् । एवं भगवत्कृतं सपर्यवसानं युद्धमुक्त्वा बलभद्रकृतमाह विनिघ्नतारीनिति । अरयः कथञ्चित् हन्तव्याः । भगवतत्त्वरयो न सन्तीति बलभद्रे तदुक्तम् । हलेनाकृष्य मुसलेन विनिघ्नता सङ्कर्षणेन सह । भगवान् गृह्णन् निषङ्गादित्यादि जात इति पूर्वेणैवान्वयः । अथवा । अरीन् विनिघ्नता सङ्कर्षणेन कृत्वा नद्यः प्रवर्तिता इति । हनने हेतुः दुर्मदानिति । दुष्टो मदो येषां उद्धृत्तिकरणरूपः । सङ्कर्षणपदेनैव तेषामाकर्षणं निरूपितम् । सामर्थ्ये हेतुमाह । अपरिमेयं तेजो यस्येति । अन्तर्बलमस्त्येव, बहिस्तेजोऽपि । कस्याप्येतावदिति मातुमशक्यम् ॥ २८ ॥

श्रीसुबोधिनी–सार

निर्भिन्नाः कुम्भा मस्तकानि येषां ते करिणो गजा निपेतुः अनेकशोऽसंख्याताः शरैर्वृक्णाः छिन्नाः कंधरा ग्रीवा येषां तेऽश्वाः हता अश्वा ध्वजाः सूता नायका रथिनश्च येषु ते रथाः छिन्ना भुजा ऊरवः कंधरा गेषां ते पदातयो निपेतुः ॥ २५ ॥ संछिद्यमानानां द्विपदानां मनुष्याणाम् इभानां हस्तिनां वाजिनामश्वानाम् अङ्गेभ्यः प्रसूता उत्पन्ना असृगापगा रुधिरनद्यः परस्परं प्रवर्त्तिताः शतशः स्पष्टयति । भुजा एवाहयः सर्पा यासु ताः पुरुषाणां शीर्षाण्येव कच्छपा यासु ताः हता द्विपा गजा एव द्वीपा अंतर्वर्त्तितटानि हया अश्वा एव ग्रहा ग्राहास्तैराकुला व्याप्ताः ॥ २६ ॥ करा हस्ता ऊरवश्च मीना यासु ताः । नराणां केशा एव शैवलं जंबालं यासु ताः । धनूंष्येव तरंगा आयुधान्येव गुल्मास्तैः तैः संकुलाः अच्छूरिकाश्चक्राण्येवावर्त्तास्तैर्भयानकाः । महामणीनां प्रवेका उत्तमा आभराणि च यथायथमश्मानः शर्कराश्च यासु ताः ॥ २७ ॥ भीरूणां कातराणां भयावहाः मृधे संग्रामे मनस्विनां शूराणां धीराणां च हर्षकरीः आर्षम् । आनंदकर्त्र्यः अपरिमेयं तेजो यस्य तेन संकर्षणेन मुसलेनायुधेनारीन् शत्रून् विनिघ्नता कर्त्रा ॥ २८ ॥

विवरणटिप्पणी

संछिद्यमानेत्यत्र । प्रशब्देनेति । शूराणां मरणानन्तरमपि संस्कारस्तिष्ठति । यद्वशात्कबन्धोऽपि युध्यति । तदापि भयाभाव इत्यर्थः । करोरुमीना इत्यत्र । नाभेरधः प्रहारोऽनुचितः इति पूर्वमुक्तत्वादूरुमात्रं भिन्नं न संभवतीत्यत आहुः मध्यच्छेदे इति । त्रयं पूर्वेणेति । ऊरुणा सह त्रयम् । तथा च नरके शान्तास्त्रयो जाता इत्यर्थः । अत एवेति । धनुस्तरङ्गस्य त्रिकेऽप्रवेशादेव अग्रिमेण कर्मधारयः कृत इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा भगवच्छरपीडितं परसैन्यमनुवर्णयति—निर्भिन्नेति । निर्भिन्नानि कुम्भानि मस्तकानि येषां ते करिणो गजाः निपेतुः । तथा शरैः वृक्णाः छिन्नाः कन्धरा ग्रीवा येषां तथाभूता अनेकशोऽश्वाश्च निपेतुः । तथा हता अश्वाः, ध्वजाः, सूताः, नायकाः रथिनश्च येषु ते रथाश्च निपेतुः । तथा छिन्ना भुजाः, उरवः, कन्धराश्च येषां तथाभूता पदातयश्च निपेतुः ॥ २५ ॥ तदा च भगवच्छरैः सञ्छिद्यमानेभ्यः द्विपदेभवाजिनां पदातिगजाश्वानां अङ्गेभ्यः प्रसूता असृगापगा रुधिरनद्यः शतशः प्रवर्तिता इति तृतीयेनान्वयः । ताश्च प्रसिद्धनदीतया निरूपयति—भुजा एव अहयः सर्पा यासु ताः पुरुषाणां शीर्षाण्येव कच्छपा यासु ताः । हता द्विपा गजा एव द्वीपाः अंतराभूमयः, हया अश्वा एव ग्रहास्तैश्चाकुला व्याप्ताः ॥ २६ ॥ करा उरवश्च मीना यासु ताः । नराणां केशा एव शैवलं यासु ताः । धनूंष्येव तरङ्गाः, आयुधान्येव च गुल्मानि, तैश्च तैश्च सङ्कुला व्याप्ताः । अच्छूरिकाश्चक्राणि ता एव आवर्तास्तैर्भयानकाः । महामणीनां प्रवेकाः उत्तमाः तन्निर्मितान्याभरणानि यथायथं अश्मानः शर्कराश्च यासु ताः ॥ २७ ॥ भीरूणां भयावहाः । मृधे युद्धे मनस्विनां वीराणां तु परस्परं हर्षकर्यः । एवं श्रीकृष्णकृतं सैन्यविनाशमुक्त्वा बलभद्रकृतं तदाह—विनिघ्नतेति । स्ववाक्ये विश्वासार्थं सम्बोधयति—अङ्गेति । अपरिमेयमपरिच्छेद्यं तेजः पराभिभवसामर्थ्यं यस्य तेन अरीन् शत्रून् मुसलेनायुधेन विनिघ्नता सङ्कर्षणेनापि ॥ २८ ॥

अन्वितार्थप्रकाशिका

गृह्णन्निति । निरन्तरं यथा स्यात्तथा निषङ्गात् तूणीरात् एकैकान् शरान् गृह्णन् धनुषि सन्दधत् । अथ तान् शितबाणपूणान् तीक्ष्णशरसमूहान् विकृष्य मुञ्चन् तैश्च रथान् कुञ्जरान् वाजिनः पत्तीन् पदातीन् निघ्नन् यद्वत् यथा अलातचक्रं परिभ्रमज्ज्वलत् काष्ठं यथा चक्रवद्भवति तथा मथुरायाः चतुर्दिक्षु सैन्याभिमुखं परिभ्रमन् समदृश्यत् । निरन्तरमिति ग्रहणादिसर्वक्रियाविशेषणं तेन ग्रहणयोजनविकर्षणक्षेपणप्रहरणक्रियाः क्रमेणोद्भूता अपि युगपदेवोद्भवन्त्य इव द्रष्टॄन् प्रतिभाता इति ॥ २५ ॥ निर्भिन्नेति । निर्भिन्नाः कुम्भा मस्तकस्था येषां ते करिणो गजा निपेतुः तथा शरैर्वृक्णाः छिन्नाः कन्धरा ग्रीवा येषां तथाभूताः पदातयश्च निपेतुः । निर्भिन्नकुम्भा इत्यादिना तत्तद्योग्यस्थानेष्वेव भेदच्छेदादिप्रदर्शनेन विशेष उच्यत इति न निघ्नन्नित्यादिना पुनरुक्तिः ॥ २६ ॥ संच्छिद्यमानेति सार्द्धद्वयम् । भगवच्छरैः संच्छिद्यमानानां द्विपदेभवाजिनां पदातिगजाश्वानामङ्गेभ्यः प्रसूताः शतशः असृगापगा रुधिरनद्यः भगवता प्रवर्तिता इति तृतीयेनान्वयः । ता वर्णयति । भुजा एव अहयः सर्पा यासु ताः धनूष्येव तरङ्गास्तैः आयुधरूपैः गुल्मैः अप्रकाण्डवृक्षैश्च संकुला व्याप्ताः अच्छूरिकाश्चक्राणि चर्माणि वा ता एव आवर्त्तास्तैर्भयानकाः महामणीनां प्रवेकाः उत्तमाः तन्निर्मितान्याभरणानि च यथायथम् अश्मानः शर्कराश्च यासु ताः भीरूणां भयावहाः मृधे युद्धे मनस्विनां वीराणां तु परस्परं हर्षकरीः हर्षकर्यः । पूर्वसवर्णदीर्घ आर्षः ॥ २७–२८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विभिन्नकुम्भस्थला गजाः शरैः वृक्णाच्छिन्नाः कंधरा येषां तथाभूता अश्वाश्च हता अश्वादयो येषु तथा भूता रथाश्च सूतः सारथिः नायकोरथी ॥२५॥ संच्छिद्यमानानां द्विपदानां मनुष्याणां इभवाजिनां गजाश्वानां ॥ अङ्गेभ्योगात्रेभ्यः प्रसूता उत्पन्नाः असृगापगाः रुधिरसरितो बभूवुः तासां महानदी समत्वं निरूपयन्नाह ॥ भुजा एव अहयः सर्पा या सुताः हता येद्विपा गजास्त एव द्वीपाः जलमध्यवर्त्तिनोजनदृशोन्नतभूप्रदेशा हया अश्वा एव ग्रहाग्राहाश्च तैराकुलाः संकुलाः ॥ २६ ॥ करा उरवश्च त एव मीना अल्पमध्य महामध्यश्च यासुताः मनुष्य केशा एवं शैवलंगातुताः धनूष्येव तरंगाः आयुधान्येव गुल्मास्तृणपूगग्रंथयश्चतैर्व्याप्ताः अच्छूरिकाः चक्राकार चर्माणिता एव आवर्त्ताजलभ्रमरास्तैर्भयानकाः महामणि प्रवेकः श्रेष्ठामणय आभरणानि च । श्मानः पाषाणशकल निशर्कराः पाषाण क्षुद्रशकलानि च यासु ताः ॥ २७ ॥ भीरूणां भयावहाभयप्रापकाः । मृधेरणभूमौ मनस्विनामुभय च मूस्थशूराणां ॥ परस्परं हर्षकरीः हर्षकर्युः एवं भूतारक्तनद्या बभूवुः कुर्मदान दुष्टानरीन् शत्रून् मुसलेन विनिघ्नता ताडयता संकर्षणेनापि एवमसृगापगाः प्रवर्तिताः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ भगवच्छरनिर्भिन्नपरसैनिकतनुप्रभवरुधिरनदीः प्रसिद्धनदीत्वेन निरूपयति सार्द्धद्वाभ्याम् ॥ संछिद्येति ॥ संछिद्यमाना ये द्विपदाः इभा वाजिनोऽश्वाश्च तेषां, अङ्गप्रसृताः अङ्गेभ्य उद्भूताः, असृगापगाः रुधिरनद्यः, शतशः प्रवर्त्तिता इति तृतीयश्लोकगतेनान्वयः । कथंभूताः । भुजा एव अहयः सर्पा यासु ताः, पूरुषाणां शीर्षाण्येव कच्छपाः कूर्मा यासु ताः । हता ये द्विपा गजास्त एव द्वीपा अन्तर्वर्त्तितटानि हया हताश्वा एव ग्रहा ग्राहास्तैश्च तैश्च, आकुला व्याप्ताः ॥ २५ ॥ करेति । कराः ऊरवश्च मीना मत्स्या यासु ताः, नराणां केशा एव शैवलानि यासु ताः, धनूष्येव तरङ्गाः आयुधान्येव गुल्मा अप्रकाण्डद्रुमास्तैश्च संकुलाः । अच्छूरिकाश्चर्माणि चक्राणि वा तान्येवावर्त्ता जलभ्रमास्तैर्भयानकाः । महामणीनां प्रवेकाः श्रेष्ठा, आभरणानि च यथायथमश्मानः शर्कराश्च यासु ताः ॥ २६ ॥ प्रवर्त्तिता इति ॥ मृधे संग्रामे, भीरुभयावहाः भीरूणां भयकर्त्र्यः, मनस्विनां वीराणां, परस्परं मिथः, हर्षंकरीर्हर्षकारिण्यः, असृगापगाः प्रवर्त्तिताः कृष्णेनेति शेषः । अपरिमेयमपरिच्छेद्यं तेजः पराभिभवसामर्थ्यं यस्य तेन, मुसलेनायुधेन, दुर्मदान् अरीन् शत्रून्, विनिघ्नता ताडयता, संकर्षणेन बलभद्रेणापि, प्रवर्त्तिता इति सम्बन्धः ॥२७॥ बलमिति ॥ अङ्ग हे राजन्, एवं दुरन्तपारमन्तोऽत्र तलं पारोऽवधिः, दुःशब्दो निषेधे । विक्रमेणागाधं देशतश्च निरवधिकमित्यर्थः । अर्णववत् दुर्गं दुर्गमं सत्, भैरवं भयंकरं, मगधेन्द्रो जरासंधस्तेन पालितं च तत् , बलं सैन्यं, क्षयं प्रणीतं नाशितमित्यर्थः । अहोऽद्भुतमेवैतद्यत्त्रयोविंशत्यनीकात्मकं बलं द्वाभ्यामेव हतमिति विस्मयमानं प्रत्याह । तत्त्रयोविंशत्यक्षौहिणीसैन्यहननात्मकं कर्म, जगदीशयोः वसुदेवपुत्रयोः, परं केवलं, विक्रीडितं क्रीडामात्रमेव । न तु पराक्रम इति भावः ॥ २८ ॥

कृष्णप्रिया

इस रण संग्राम में फटे-कटे हुए मस्तक वाले मतवाले हाथियों गिरने लगे । अश्व ध्वज-सारथि एवं सेनापतियों के छिन्न-भिन्न हो जाने से बहुत से बड़े-बड़े रथ ही निकम्मे हो गये । कटे हुए हाथ जाँघ-बाहु सिर वाली पैदल सेना भी नष्ट हो गयी ॥ २५ ॥ इस मशहूर संग्राम में बलवीर श्रीबलदाऊजी ने अपने प्रसिद्ध आयुध मुसल की चोट से मरे हुए मतवाले महान् वीरों के अङ्ग-प्रत्यङ्ग को चूर-चूर करने से खून की शतशः सरिताएँ बहने लगी । उन शोणित सरिताओं में कटके गिरी हुई

सैकड़ों सैनिकों की भुजाएँ साँप जैसी दीख पड़ती थी। कट कर गिरे हुए सिर मानो कि कछुओं की भीड़ लग गयी हो। उन सरिताओं में मरे हुए हाथी द्वीप समान मालुम होते थे और घोड़े ग्राहों के समान जान पड़ते थे। मरे हुए मनुष्यों के हाथ और जाँघें मछलियाँ मालुम पड़ती थी और सेनिकों केश सेवार समान, धनुष के समूह तरङ्ग जैसे, और आयुध लता एवं तिनकों के समान दीख पड़ते थे। बड़ी-बड़ी ठालें मानों कि सरिता के भयानक भँवर हो और महामूले मणि और आभरण पत्थर के रोडों और सिकता रेता समान लग रहे थे। इस भयानक दृश्य को देखकर कायर पुरुष भयभीत हो जाते थे नव वीर नरों का परस्पर उत्साह उमड़ रहा था ॥ २६–२८ ॥

बलं [1]तदङ्गार्णवदुर्गभैरवं दुरन्तपारं मगधेन्द्रपालितम्।
क्षयं प्रणीतं वसुदेवपुत्रयोर्विक्रीडितं तज्जगदीशयोः परम् ॥ २९ ॥
स्थित्युद्भवान्तं भुवनत्रयस्य यः समीहतेऽनन्तगुणः [2]स्वमीलया।
न तस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते ॥ ३० ॥
[3]जग्राह विरथं रामो जरासंधं महाबलम्[4]।
हतानीकावशिष्टासुं सिंहः [5]सिंहमिवौजसा ॥ ३१ ॥
बध्यमानं हतारातिं पाशैर्वारुणमानुषैः।
वारयामास गोविन्दस्तेन कार्यचिकीर्षया ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—(उभाभ्याम्-भ्रातृभ्याम्–) तदङ्गार्णवदुर्गभैरवम्, मगधेन्द्रपालितम्, दुरन्तपारम्, तद्, बलम्, क्षयं, प्रणीतम्, वसुदेवपुत्रयोः, जगदीशयोः, तत्, परम्, विक्रीडितम् ॥ २९ ॥ अनन्तगुणः, यः, स्वलीलया, भुवनत्रयस्य, स्थित्युद्भवान्तं समीहते, तस्य, परपक्षनिग्रहः, चित्रम्, न, तथापि, मर्त्यानुविधस्य, वर्ण्यते ॥ ३० ॥ रामः, सिंहः, सिंहम्, इव ओजसा, हतानीकावशिष्टासुम्, विरथम्, महाबलम्, जरासन्धम्, जग्राह ॥ ३१ ॥ गोविन्दः, तेन, कार्यचिकीर्षया, वारुणमानुषैः, पाशैः, बध्यामानम्, हतारातिम्, वारयामास ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अंग हे राजन्। अर्णववद्दुर्गं दुर्गमं भैरवं भयंकरं च यतो दुरन्तपारम्। अंतोऽत्र तलम्। पारमवधिः। दुःशब्दो निषेधे। विक्रमेणागाधं देशतश्च निरवधिकमित्यर्थः। किं च मगधेन्द्रेण च पालितं बलम्। यदेवंभूतं रामकृष्णयोः कर्मोक्तं तत्परं केवलं तयोर्विक्रीडितं न तु पराक्रमः ॥ २९ ॥ न चेतदाश्चर्यमित्याह। स्थित्युद्भवांतमिति। तर्हि किमित्याश्चर्यमिव वर्णितं तत्राह। तथापीति। मर्त्याननुविधत्तेऽनुकरोतीति मर्त्यानुविधस्तस्य ॥ ३० ॥ किं च जग्राहेति। हतान्यनीकानि यस्य अवशिष्टा असव एव यस्य तं च तं च ॥ ३१ ॥ हता बहुशोऽरातयो येन तथाभूतमपि जरासंधं बध्यमानं वारयामासेति ॥ ३२–३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतो दुरन्तपारमतोऽर्णववदिति योज्यम्। तलमिति 'तलं स्वरूपेऽनूद्ध्र्वे स्त्री' इति मेदिनी। इत्यर्थ इति व्याख्येयमिति। रक्षकप्रबलत्वेपि नाशेऽनायासमाह—किञ्चेति। तयो रामकृष्णयोः। विक्रीडितं लीलाविशेष एव परं केवलं न त्वावेशिकं युद्धमित्यर्थः ॥ २९ ॥ एतद्बलनाशनम्। यः कृष्णः। समीहते कुरुते। चित्राभावे तद्वत्कुतो वर्णितमित्याह—तर्हीति। यद्यपि हरेः

---

[1] तुरङ्गा–प्रा. पा. । [2] स्म लीलया–श्रीधर. टी. ।

[3] हतेषु सर्वसैन्येषु जरासन्धो महाबलः। विद्रुतेष्ववशिष्टेषु रथेनैकेन सारिणम् ॥ १ ॥
तावुभौ गिरिसंकाशौ मन्ताविव महागजौ। परस्परमयुध्येतां सामर्षौ लशालिनौ ॥ २ ॥
मागधस्तु गदां गुर्वीमादायामर्षविह्वलः। भ्रामयित्वा शतगुणं चिक्षेप बलवक्षसि ॥ ३ ॥
तामापतन्तीं तरसा गदां शृङ्गोपमां गिरेः। व्यंसयित्वा हलधरो मुधा चक्रे स्मयन्निव ॥ ४ ॥
व्यर्थीकृत्य गदां तस्य मुसलेन हलायुधः। पोथयित्वा रथे क्षब्धो निहत्य हतसारथी ॥ ५ ॥
एते पञ्च विजये–मुनिभावप्रकाशिकापाठे दृश्यन्ते।

[4] बलाः–इति कस्यचित्। [5] क्षुद्रमृगं यथा–वीर.।

परपक्षनिग्रहश्चित्रं न तथापीति। तस्य मनुष्यधर्ममनुकुर्वतो हरेस्तद्युद्धं वर्ण्यते, बुद्ध्यवतारार्थं प्रशस्यत इत्यर्थः। ननु जगदीशता चेत्तर्हि कथं क्षुद्रातिक्षुद्रैः स्वाननुरूपैर्जीवैः सह युद्धे रसः सिध्यति, न चेत्तर्हि तद्वर्णनेन किं तत्राह—स्थितीति। तर्हि किमत्याश्चर्यमिव वर्णितं तत्राह—तथापीति। मर्त्यः सन्ननुरूपमेव विधत्त इति मर्त्यानुविधस्तस्य। अयमर्थः—येन स्वाकारेण जगत्सृष्ट्यादिकं करोति तेनैव यदि जरासन्धं जयति तदा खल्वननुरूपत्वान्न रसः, यदि च मर्त्यः सन् जयति तदा मर्त्यस्य प्रतियोद्धा मर्त्य एवानुरूपस्तत्रातिप्रौढस्य जरासंधस्य जयाच्चमत्कार इति रस एव भवति। न च मर्त्यदेहस्यास्वरूपत्वमिति वाच्यम् 'परमात्मा नराकृतिः'' ''नराकृति परं ब्रह्म हरिः कारणमानुषः'', 'यन्मित्रं परमानन्दं पूर्णं ब्रह्म' इत्यादिश्रवणात्, 'अहं ब्रह्म परं धाम' इति गीतोक्तेश्च ॥ ३० ॥ अन्यदद्भुतमाह—किञ्चिति। ओजसा बलेन। सिंहस्सिंहमिति मर्त्यानुविधतया साम्याभिप्रायात्। 'महाबलम्' इति क्वचित्पाठः। तत्र महाबलत्वमपि मर्त्यानुविधाऽपेक्षयैव न तु ऐश्वर्यापेक्षया ॥ ३१ ॥ वारुणैर्नागादिरूपैः, मानुषै रज्वादिभिः। वारयामास मोचयामास। तेन जरासन्धेन। कार्यस्य पुनस्तदानीतनसेनावधस्य चिकीर्षया। मानुषीयैस्त्वत्यन्तापमानार्थम्। गोविंद इति पूर्ववत्। अत एव तेन जरासंधेन यत्कार्यं हननार्थं भूभारसैन्यसंमेलनं तस्य कर्तुमिच्छया। महाराजोऽयं संबन्धी च ततोऽधुना कृतापराधोऽपि त्यज्येतेति रामस्तमत्रायतेत्यर्थः। अत्र प्रकरणप्राप्तस्य बन्धतस्य ''भीत्रार्थानां भयहेतुः'' इत्यनेनापादानत्वम्, गोभ्यो यवान्वारयतीतिबत् ॥ ३२ ॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

ननु, यदि जगदीशता तर्हि कथं क्षुद्रातिक्षुद्रैर्नीचैर्युद्धे रसः सिद्ध्यति न चेत्तर्हि तद्वर्णनया च किं तत्राह—स्थितीति। स्थितौ तस्य साक्षाल्लीलत्वात् तस्याः प्रथमोक्तिः य इति द्वयोरैक्याभिप्रायेण। ननु, कथमेकोऽनन्तानां स्थित्यादि कुरुते तत्राह—अनन्ता गुणाः सार्वज्ञ्यचातुर्यादयो यस्य सः तच्च स्वकीयया लीलयैव। न च तत्साधनप्रयासादिना स्वशब्देन तत्र परमं स्वाच्छन्द्यमुक्तम्। चित्रमाश्चर्यहेतुरित्यर्थ.। हेतुमति हेतुत्वोपचारान्न लिङ्गत्यागः। एवं पूर्वपक्षमनूद्य सिद्धान्तनाह—मर्त्यानुविधस्येति। यस्तादृशालौकिककर्माण्यपि मनुष्यलीलयैव करोति। नत्वैश्वर्य्याविष्कारादिना तस्येत्यर्थः ॥ ३० ॥ अतोऽन्यच्च तादृशं तच्चरितं शृण्वित्याह—जग्राहेति। ओजसा वेगेनेत्यर्थः। सिंहः सिंहमिवेति मर्त्याऽनुविधतया साम्याभिप्रायात्। अतो महाबलत्वमपि तदपेक्षयैव नत्वैश्वर्यापेक्षया महाबलमिति क्वचित् पाठः ॥ ३१ ॥ मानुषीयैस्त्वत्यन्तापमानार्थम्। गोविन्द इति पूर्ववत्। अत एव तेन जरासन्धेन कृत्वा यत् कार्य्यं हननार्थं भूभारसैन्यसम्मेलनं तस्य चिकीर्षया वारयामास महाराजोऽयं सम्बन्धी च ततोऽधुना कृतापराधोऽपि त्यज्यतेति रामस्तमत्रावतेत्यर्थः अत्र प्रकरणप्राप्तस्य भीतार्थानां भयहेतुरित्यनेनापादानत्वं गोभ्यो यवान् वारयतीतिवत् ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तथापि लीलया सद्यस्तदनन्तबलमारणमाश्चर्य्यमपि न मन्तव्यमिति वदन् जगदीशत्वमेव दर्शयन् केवल विक्रीडितत्वमेव साधयति—स्थितीति। द्वन्द्वैक्यं स्थित्यादेर्यथोत्तरं प्रस्तावापेक्षया श्रैष्ठ्यमूह्यम्। ततश्च किं वक्तव्यं स्थितिमुद्भवं वा अन्तं संहारमपीत्यर्थः। अत एव स्थितेरादौ निर्द्देशः। भुवनत्रयस्येति श्रीब्रह्मणः प्रतिदिनमेव त्रिलोक्यास्तत्तदाचरणात्। य इति जगदीशतया द्वयोरैक्याभिप्रायेण, किं वा प्राधान्याच्छ्रीकृष्णोद्देशेनैव सम्यक् तत्तन्निष्ठया ईहते करोति, यतोऽनन्ता गुणाः सार्व्वज्ञ-चातुर्य्यादयो यस्य सः, तच्च स्वकीयया लीलयैव, न च तत्तत्साधनप्रयासादिना, स्वशब्देन तत्र परमस्वाच्छन्द्यमुक्तम्, परस्य यदुकुलशत्रोर्जरासन्धस्य, पक्षः सहायस्तत्सैन्यं तस्य निग्रहो वध इत्येतच्चित्रमद्भुतं न भवति। मर्त्त्यानुविधस्येति तादृशालौकिककर्म्मण्यपि मनुष्यलीलानुसारात्। एवं सर्व्वतो विलक्षणा पूर्व्ववल्लीला माधुरी दर्शिता ॥२९॥ प्रस्तुतमाह—जग्राहेति। विरथं सन्तम्, तद्विस्तारस्तु श्रीहरिवंशाज्ज्ञेयः। ओजसा वेगेनेत्यर्थः। यतो महाबलः, किञ्च, हतेति तस्य मानसशरीरशक्त्योर्हानेः, गदायुद्धादौ लोकदृष्ट्या द्वयोः साम्येऽप्येकस्य बलहान्योऽन्य च बलातिरेकेण ग्रहणे दृष्टान्तः—सिंहः सिंहमिवेति ॥ ३० ॥ वारुणैर्मानुषैश्च दिव्यैर्लौकिकैश्चेत्यर्थः। दृढबन्धनार्थं लोकेऽपमानार्थञ्च। यद्वा, वारुणवन्मानुषैरिति तेषां महादार्ढ्यादिकमुक्तम्। गोविन्द इत्यस्याभिप्रायः पूर्व्ववत्। अत एव तेन जरासन्धेन कृत्वा कार्य्यस्य भूभारहरण–प्रयोजनस्य चिकीर्षया इतस्ततस्तेनानीय तस्य स्वतो बहुतरसैन्यस्यैकत्रैवानायासेन वधसिद्धेः। वारयामास तद्बन्धनं न्यषेधदित्यर्थः ॥ ३१ ॥ लोकनाथाभ्यामिति सर्व्वलोकनाथत्वेन तस्यापि हितार्थमिति भावः। पुनः पुनः श्रीभगवद्दर्शनादिसिद्धेः, मुक्तो बन्धनात् ग्रहणाद्वा, मुक्तत्वादेव व्रीडितः, यतो वीराणां सम्मतो वीर श्रेष्ठ इत्यर्थः। वीराणां युद्धे ग्रहणादेरतिनिन्द्यत्वात्। अत एव तपसे यदुकुलजयार्थे वानप्रस्थधर्म्मानुष्ठानाय। पथीति निजदेशगमनमार्गे, किंवा युद्धस्थानादेव तस्मात् सद्यो वनं गच्छतो वर्त्मनि ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अर्णवं पर्वसमुद्रघोषोपमं विक्रीडितं परम् उत्कृष्टमभूत् ॥ २९ ॥ मर्त्त्यानुविध्यस्य मर्त्याऽनुविधायिनः ॥ ३०–४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तन्निहतावशिष्टं मगधेन्द्रपालितमर्णववद्दुर्गमं भैरवं च बलं क्षयं प्रणीतं नाशितमित्यर्थः। अद्भुतमेतद्द्वाभ्यामेव त्रयोविंशत्यनीकात्मकं बलं हतमिति विस्मयमानं राजानं प्रत्याह वसुदेवपुत्रयोरिति। यदुक्तं रामकृष्णयोः कर्म केवलं जगदीश्वरयोस्तयोः क्रीडितं क्रीडामात्रमेव न तु पराक्रम इति भावः ॥ २९ ॥ न चात्रविस्मयः कार्य इत्याह—स्थितीति। स्थित्यादिनां समाहर द्वन्द्वः यो भगवानसंख्येयकल्याणगुणः स्वलीलयैव त्रिलोक्याः स्थित्यादिकमेवेहते करोति तस्य शत्रुपक्षनिग्रहो न चित्रं नाश्चर्य्यविषयः तर्हि किमिति वैचित्र्येणोपवर्ण्यत इत्यत आह तथापीति। चित्रत्वाभावेऽपि। मर्त्याननुविधत्ते अनुकरोतीति तथा तस्य वर्ण्यते कर्मेति शेषः मर्त्त्यानुविधस्यामानुषं कर्म चित्रमेवत्यमिप्रायेण वर्ण्यत इति भावः ॥ ३० ॥ जग्राहेति। हतान्यानीकानि सैन्यानि यस्य अवशिष्टा असवः प्राणा एव यस्य स चासौ स च तं विरथं जरासन्धं जग्राह ग्रहीतवान् यथा सिंहः क्षुद्रमृगं ग्रह्णाति तद्वत् ॥ ३१ ॥ बध्यमानमिति। हता अरातयो येन तं वारुणैर्मानुषैश्च पाशैः साधनैर्बध्यमानं जरासन्धं रामेणेति शेषः। गोविन्दः दृष्ट्वेति शेषः वारयामास राममिति शेषः तत्र हेतुः तेन जरासन्धेन सह यत्कार्यं पुनर्युद्धात्मकं तत्कर्तुमिच्छया हेतुभूतया न्यवारयदितिसम्बन्धः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अङ्ग हे विष्णुरात ! यन्मगधेन्द्रेण पालितम् अर्णववद्दुर्गमम् अत एव भैरवं दुरन्तपारं चक्षुरविषयतीरान्तरम् अनवसितसमाप्ति वा तद्बलं कृष्णरामाभ्यां क्षयं प्रणीतमित्यन्वयः। जगदीश्वराभ्यामनायासेन कृतमेतद्युद्धमित्याह–वसुदेवपुत्रयोरिति। जगदीशयोः वसुदेवपुत्रयोः तद्युद्धं परं केवलं विक्रीडितं क्रीडामात्रमेव ॥ २९ ॥ योऽनन्तगुणो भुवनत्रयस्य स्वलीलया स्थित्युद्भवान्तं समीहते करोति स्थितिः उद्भवश्च अन्तश्च तत्तथा मिथो विरुद्धत्वादेकवद्भावः। यद्यपि तस्य हरेः परपक्षनिग्रहः चित्रं न भवति तथापि मर्त्यानुविधस्य मनुष्यधर्ममनुकुर्वतो हरेस्तद्युद्धं बुद्ध्यवतारार्थं वर्ण्यते प्रशस्यत इत्यन्वयः ॥ ३० ॥ सीरिणं बलभद्रमापेति शेषः ॥ क ॥ व्यंसयित्वा वञ्चयित्वा ॥ घ ॥ ङ ॥ हतानीकश्च हतसेनश्च अवशिष्टासुश्च अवशिष्टप्राणश्च स तथा तं हतानीकावशिष्टास्विति पाठे क्रियाविशेषणं ॥ ३१–३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

स्थित्युद्भवः ॥ ३० ॥

गूढार्थदीपिनी

अत्रासृगापगाः न केवलं कृष्णेनैव, प्रवर्तिता किन्तु बलदेवेनापीति व्याख्येयमन्यथाऽग्रिमपद्योक्तवसुदेवपुत्रयोरित्यनेन विरोधः स्यादित्यवधेयम्। विनिघ्नेति सार्द्धम्। अङ्ग हे राजन् सङ्कर्षणेन तद्बलं क्षयं प्रणीतं तत् तयोः परं केवलं विक्रीडितं क्रीडैव न तु पराक्रमः। दुरन्तमनन्तम्। दुर्गं दुर्गमम् ॥ २९ ॥ स्थितिः पालनम्। समीहते करोति। चित्रमाश्चार्य न। मर्त्याननुविधत्तेऽनुकरोतीति तस्य। मनूष्यदेहमनुकुर्वतोऽमानुषं कर्मेत्यतो वर्ण्यत इत्यर्थः ॥ ३० ॥ हतानि सैन्यानि यस्य अवशिष्टा असव एव यस्य स चासौ स च तम् ॥ ३१ ॥ हता बहुशोऽरात्तयो रिपवः येन। वारुणै वरुणदेवताकैः नागपाशैः। वारयामास मोचयामास ॥ ३२–३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अङ्ग, हे राजन् ! तद्बलं सैन्यम् अर्णववत् दुर्गं दुःप्रवेशं भैरवं भयङ्करं च दुर्गमः अन्तोऽग्रभागः पारमवधिस्थानं च यस्य मुखाग्रे कोऽपि विजिगीषुर्मन्तुं न शक्नोति तदलङ्घ्यपारं कुतो व्रजेदेवंभूत क्षयं प्रणीतं नाशितम् वसुदेवपुत्राभ्यामिति विभक्तिव्यत्ययेन सम्बन्धः तत् कर्म परं केवलं वसुदेवपुत्रयोर्विक्रीडितं लीलामात्रं न तु पराक्रमः ॥ २९ ॥ यतो योऽनन्तगुणोऽसङ्ख्येयस्वाभाविकगुणः भुवनत्रयस्य स्थित्युद्भवान्तं लीलामात्रेणैव समीहते तस्य परपक्षनिग्रहः शत्रुपक्षदमनं विक्रीडितमिति किं चित्रम् तथापि मर्त्त्यान् शिक्षणीयान् अनुविधत्ते शिक्षकत्वेनानुकरोतीति स तस्य अत्यल्पमपि कर्माश्चर्य्यमिव वर्ण्यते इत्यर्थः ॥ ३० ॥ हतान्यनीकानि यस्य अवशिष्टा असवो यस्य स चाऽसौ स च तम् ॥ ३१ ॥ हताः अरातयो येन तम् ते चारातयोऽन्यत्र न तु प्रस्तुत युद्धे मुकुन्दोऽप्यक्षतबल इति वचनात् तेन जरासन्धेन भूमारभूतानां पुनरानीयमानानां वधरूपकार्यस्य चिकीर्षया ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एतज्जरासन्धसैन्यं स्वान्व्यसनात्कष्टात् साधूनां साधुभिः सत्कृतम्। कर्तृकर्मणोरिति कर्तरि षष्ठी। ईशेति बलसम्बोधनम् ॥ २९ ॥ अत्रानोकशब्दोऽक्षौहिणीपरः। यद्वा त्रयोविंशतिपदेन तावदक्षौहिणीग्रहोऽनीकशब्दः सेनावाची। तेषां भारं

सङ्घोऽपाकुरु। दंशितौ कवचखचिताङ्गौ ॥ ३० ॥ अल्पीयसा बलेन गणनतोऽल्पतमेन ॥ ३१ ॥ सदनात्समादितश्चतुर्द्वारस्य समाहारः ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवमुक्तं युद्धमुपसंहृति बलमिति। शीघ्रमुपसंहारे ततोऽपि महत्वं भवतीति बलमिति। अङ्गैरश्वादिभिः अर्णवरूपैः दुर्गं भैरवं भयानकं च। अनेन स्वरूपतो माहात्म्यमुक्तं बलस्य। दुरन्ताः पाला यस्येति बलस्य रक्षकाः। सङ्गे समागताः राजानः दुरन्ताः। न हि तेषामन्तं कश्चित्कर्तुं शक्तः। ततोऽपि माहात्म्यमाह मगधेन्द्रपालितमिति। जरासन्धेन पालितम्। इन्द्रपदेन सर्वतो बलस्य समृद्धता द्योतिता। एतादृशमपि क्षणमध्ये क्षयं प्रणीतम्। एतदपि वसुदेवपुत्रयोः क्रीडितम्। यद्यपि वसुदेवपुत्रत्वेन नाट्यं कृतम्। तथा सति पुत्रत्वनिर्वाहार्थं प्रयासोऽपि बाललीलायामिव प्रकाशनीयः। तथापि न प्रकाशितम्, किन्तु क्रीडयैव सर्वं मारितमिति। एवं करणे हेतुमाह जगदीशयोरिति। सर्वजगत एव ईश्वरयोः। नहीश्वरः सदैकरूपो भवति। कदाचिदभिनयं करोतीति सर्वदा अभिनयमेव करिष्यति। परमित्यनेन विशेषक्रीडायामप्यनादरः, ततोऽप्यल्पमिति सूचनार्थः ॥ २९ ॥ ननु किमित्येषा कथा वर्णिता विशेषाकारेण, सामान्यत एवैतद्वक्तव्यम्, जरासन्धसमानीतसैन्यस्य बहुशो वधं कृतवानिति, अल्पे हि पौरुषत्वेन युद्धं वर्णनीयम्, न तु भगवतीति चेत्, सत्यम्, इत्याह स्थित्युद्भवान्तमिति। यस्त्वनन्तः सर्वतः परिच्छेदरहितः, स्वरूपविचारे क्रियमाणे। गुणविचारे त्वाह अनन्तगुण इति। अनन्ताः कोटिब्रह्माण्डेषु यावन्तः पदार्थाः तावद्गुणो भगवान्। ततोप्यधिक इति मुख्यः सिद्धान्तः। कांश्चिद्गुणान् प्रकटीकरोति। क्रियाविचारे त्वाह। भुवनत्रयस्य स्थित्युद्भवप्रलयं स्वस्य लीलामात्रेण समीहत इति। तत्र कियदिदं बलम्। अतः तस्यैतन्न चित्रम्। तथापि तस्य परपक्षनिग्रहो वर्ण्यते भक्तिस्थापनार्थम्। नन्वीश्वरे परपक्षनिग्रहव्यतिरेकेणापि महत्त्वादेव भक्तिर्भविष्यति, किं निग्रहवर्णनेनेत्याशङ्क्याह मर्त्यानुविधस्येति। भगवान् मर्त्यानुविधानं करोति। तथा सति कदाचिद्भक्तपक्षपातं न कुर्यात्, अन्यधर्माभिनिवेशादिति। तत्रापि चेत् भक्तपक्षपातं कुर्यात्, तदा निःसन्दिग्धं भक्तिमार्गः प्रवर्तेतेति। अत एव वर्ण्यते विशेषाकारेणेति ॥ ३० ॥ एवं दूषणं परिहृत्य जरासन्धेन बलभद्रं प्रति यदुक्तं तद्बलभद्रः कृतवानित्याह जग्राह विरथमिति। तस्य रथेऽपि छिन्नः। केवलं पदातिरवशिष्टः। यद्यपि शरीरेणापि महाबलः, तथापि तं जग्राह विरथो हन्तव्यो न भवतीति बद्ध्वा गृहे नेय इति बन्धनार्थं गृहीतवान्। यतोऽयं रामः। सर्वेषां रमणार्थे प्रवृत्तः। सः हन्तुमप्यशक्य इति तस्य नामाह। महाबलमिति च दैवं मानुषं च बलं तग्य निरूपितम्। तर्हि दैवगतया गृहीत इति चेत्, तत्राह ओजसेति तर्हि पाशादिभिर्गृहीतो भविष्यतीति चेत्, तत्राह सिंहः सिंहमिवेति। हस्ताभ्यामेव निगृह्य स गृहीतः, न तु हलादिना आकृष्टः। तस्य मोचकाभावमाह। हतमनीकं यस्य, अवशिष्टा असवो यस्येति ॥ ३१ ॥ ग्रहणानन्तरं परोपकारार्थमागतो न बन्धनीय इति बध्यमानं भगवान् निवारयामासेति आह वध्यमानमिति। महतो बन्धनमनुचितमिति तं विशिनष्टि हतारातिमिति। हताः अरातयो येन। अनेन शत्रुभूयस्त्वात् तेषां च दुष्टत्वात् तत्सुखं भविष्यतीत्यपि मोचने तदभावो हेतुरुक्तः। केवलवन्धनानि तत्र न समर्थानीति पाशैर्बद्धः। ते आकृष्टाः निग्रहहेतवो भवन्ति। तत्रापि वारुणैर्मानुषैश्च। जरादीनां मोचनाभावाय वारुणाः पाशाः, मनुष्याणामर्थे मानुषाः। एतादृशमपि स्वाधीनं जातं परमशत्रुं वारयामास, बन्धनं न कर्तव्यमिति। ननु कथमेवं भूभारहर्ता तं मोचयतीति चेत्, तत्राह गोविन्द इति। सिंहावलोकनन्यायेन पूर्वलीलां स्मृतवान्। अतस्तेनापि काचिल्लीला सेत्स्यतीति तं मोचितवान्। ननु किमिति दुष्टो मुच्यते, तत्राह तेन कार्यचिकीर्षयेति। निरोधो हि कर्तव्यः, एतदभावे सर्वे भगवत्परा राजसाः सात्त्विकाश्च न भविष्यन्तीति तदर्थमयं रक्षितः। अक्लिष्टकर्मत्वाय च ॥ ३२ ॥

श्रीसुबोधिनी–सारः

हे अङ्ग अर्णवः समुद्रस्तद्वत् दुर्गं दुर्गमं भैरवं भीतिकरमनन्तपार मागधानामिंद्रेण पालितं तद्बलं क्षयं प्रणीतम्। जगतामीशयोर्वसुदेवस्य पुत्रयोः तत् परं केवलं विक्रीडितं लीला ॥ २९ ॥ अनन्तगुणो यो हरिर्भुवनत्रयस्य स्थित्युद्भवान्तं पालनसृष्टिसंहारं कुरुते स्वलीलया तस्य परपक्षस्य निग्रहो वधो न चित्रमाश्चर्यं मर्त्याननुविधत्ते नु करोतीति तथा तस्य तथापि उच्यते ॥ ३० ॥ विरथं रथहीनं हतान्यनीकानि यस्य अवशिष्टा असवः प्राणा यस्य तं च तं च महाबलं जरासंधं रामो बलदेवो जग्राह ओजसा बलेन सिंहः सिंहमिव ॥ ३१ ॥ हताः पूर्वमरातयः शत्रवो येन तं वध्यमानं वारुणैर्मानुषैः पाशैरावृत्यमानं मागधं वारयामास मोचयामास गोविंदः श्रीकृष्णः तेन जरासन्धेन कार्यस्य चिकीर्षया करणेच्छया ॥ ३२ ॥

विवरणटिप्पणी

बलं तदित्यत्र। शीघ्रमिति। बलिष्ठस्यापि शीघ्रमुपसंहारे पूर्वस्मादप्यधिकं भगवतो महत्त्वं भवतीत्यर्थः। बध्यमानमित्यत्र वीक्ष्येति शेषः। अनेनेति। जरासन्धस्य शत्रवो भूयांसः। एतद्बन्धने ते सुखिता भविष्यन्ति। तेऽपि दुष्टाः। अतस्तेषां

सुखाभावार्थं मोचनीय इत्यर्थः। काञ्चिल्लीला सेत्स्यतीति। जरासन्धेन हेतुना द्वारिकालीला सिध्यति, महिष्यादिषु लीलाश्च भवन्ति। एतद्बन्धनस्थापने तु द्वारिकानिर्माणमेव न स्यादिति भावः। एतदभावे इति। पुरीनिर्माणाभावादिति भावः ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तन्निहतावशिष्टं मगधेन्द्रेण पालितं अर्णववत् दुर्गमं दुःप्रवेशं भैरवं भयानकं च दुरन्तपारं दुःशब्दो निषेधे, दुरन्तं अन्येन नाशयितुमशक्यं अपारं देशतोऽप्यवधिरहितं बलं सैन्यं क्षयं प्रणीतमिति सार्धान्वयः। अहोऽद्भुतमेतत्। द्वाभ्यामेव त्रयोविंशत्यक्षौहिण्यात्मकं बलं निहतमिति विस्मयमानं राजानं प्रत्याह—वसुदेवपुत्रयोरिति। तत् जरासन्धसैन्यविनाशनं वसुदेवपुत्रयो रामकृष्णयोः परं विक्रीडितं क्रीडामात्रमेव, नतु पराक्रमः। तत्र हेतुमाह—जगदीशयोरिति ॥ २९ ॥ न चैतदाश्चर्यमित्याह—स्थित्युद्भवान्तमिति। अनन्तगुणो यो भगवान् स्वलीलया अनायासेनैव सङ्कल्पमात्रेण भुवनत्रयस्य भूरादिलोकत्रयस्य स्थित्यादिकं समीहते करोति, तस्य पूर्वोक्तोऽयं परपक्षनिग्रहश्चित्रमाश्चर्यविषयो न भवति। 'तर्हि किमिति वैचित्र्येण उपवर्ण्यते' इत्यत आह—तथापीति। चित्रत्वाभावेऽपि मर्त्यान् अनुविधत्ते अनुकरोतीति तथा तस्य मनुष्यदृष्ट्यैतद्वैचित्र्येण वर्ण्यते इत्यर्थः ॥ ३० ॥ ततश्च हतान्यनीकानि सेन्यानि यस्य अवशिष्टा असवः प्राणा एव यस्य स चासौ स च तं विरथं महाबलमपि जरासन्धं रामो जग्राहेत्यन्वयः। ननु 'महाबलश्चेत् स तर्हि कथं तं जग्राह' इत्यपेक्षायामाह—ओजसेति। स्वबलेनेत्यर्थः। सोऽपि महाबल इत्याशयः। तत्र दृष्टान्तमाह—सिंहो यथा सिंहं गृह्णाति तथेति ॥ ३१ ॥ हता अरातयो येनं तं महाबलं वारुणैर्वरुणदेवताकैर्मानुषैश्च पाशैः रामेण बद्ध्यमानं दृष्ट्वा गोविन्दस्तद्बन्धनं वारयामास। तत्र हेतुमाह—तेन जरासन्धेन कार्यस्य दुष्टसङ्ग्रहस्य कर्तुमिच्छयेति ॥३२॥

अन्वितार्थप्रकाशिका

विनिघ्नतेति सार्द्धम्। अङ्ग हे राजन्! अपरिमेयमपरिच्छेद्यं तेजः पराभिभवसामर्थ्यं यस्य तेन दुर्मदान् अरीन् शत्रून् मुसलेनायुधेन विनिघ्नता संकर्षणेनापि तन्निहतावशिष्टं मगधेन्द्रेण पालितम् अर्णव इव दुर्गमं दुष्प्रवेशं भैरवं भयानकं च दुरन्तपारं दुःशब्दो निषेधे नास्ति अन्तस्ततं पारोऽवधिश्च यस्य तेन विक्रमेणागाधं देशतोऽप्यवधिरहितं च बलं सैन्यं क्षयं प्रणीतं तत् जरासन्धसैन्यविनाशनं जगदीशयोः वसुदेवपुत्रयोः परं केवलं विक्रीडितं क्रीडामात्रमेव नतु पराक्रमः ॥ २९ ॥ स्थितीति। अनन्तगुणो यो भगवान् एकत्वं द्वयोरैक्याभिप्रायेण स्वलीलया अनायासेनैव भुवनत्रयस्य स्थित्युद्भवान्तं पालनादित्रयं समीहते करोति। तस्य पूर्वोक्तोऽयं परपक्षनिग्रहश्चित्रमाश्चर्यविषयो न भवति। तथापि चित्रत्वाभावेऽपि मर्त्यान् अनुविधत्ते अनुकरोतीति तथा तस्य मनुष्यदृष्ट्यैतद्वैचित्र्येण वर्ण्यते ॥ ३० ॥ जग्राहेति। रामः हतान्यनीकानि सैन्यानि यस्य अवशिष्टाः असवः प्राणा एव यस्य स चासो स च तं विरथं महाबलमपि जरासन्धमोजसा बलेन जग्राह। सिंहो यथा सिंहं गृह्णाति तथेति ॥ ३१ ॥ बध्यमानमिति। हता अरातयो येन तं महाबलं हतप्रायमरातिमिति कर्मधारयो वा। वारुणैर्वरुणदेवताकैः पाशैः अत्यन्तापमानार्थं मानुषैश्च पाशैः रामेण बध्यमानं दृष्ट्वा तेन जरासन्धेन कार्यस्य दुष्टसंग्रहस्य चिकीर्षया सम्पादनेच्छया गोविन्दस्तद्बन्धनं वारयामास ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अङ्ग हे परीक्षित् अर्णवः समुद्रस्तद्वत् दुर्गं अनवगाह्यं भैरवं भयानकं च दुरन्तपारं दुरिति निषेधेनास्ति अंतस्तल स्पर्शः पारोःवधिश्च यस्य तथा भूतः पयोधिस्तद्वत् पराक्रमेणागाधं देशतश्चावधिहीनमित्यर्थः तत् मगधेंद्र पालितं बलं सैन्यं रामकृष्णाभ्यां क्षयं प्रणीतं गमितं ॥ तत् तयोः। परं केवलं विक्रीडितं लीलामात्रं नतु सामर्थ्यम् ॥ २९ ॥ एतच्चनाद्भुतमित्याह स्थितीति ॥ य इत्येक वचनं तु रामोऽवतारः कृष्णश्चावतारीति भेदज्ञापनाभिप्रायेण। परयक्षाणां शत्रुपक्षस्थ जनानांनिग्नहोनाशः चित्रमाश्चर्यं नास्तिमर्त्यानुविधस्य मनुष्यभावमनुसृतस्य शत्रुनिग्रहः ॥ ३० ॥ हतानी कोनष्ट सैन्यश्चासाववशिष्टप्राणाश्वतं ॥ उर्जसा बलेन जग्राह ॥ ३१ ॥ हता बहवः ॥ अरातयः शत्रवो येन तथाभूतमपि जरासंधं वारुणैर्वरुणो या सत्कृतैः ॥ मानुषैरश्वादिभिश्चपाशैः अत्यंतापमानार्थं बध्यमानं वध्नन्तं रामं गोविंदः वारयामास ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न चात्र विस्मयः कार्यं इत्याह। स्थितीति। भगवान्, अनन्यगुणः असंख्येयकल्याणगुणगणः, स्वलीलयैव भुवनत्रयस्य त्रिलोक्याः, स्थितिश्च उद्भवश्च अन्तश्च तत्समाहारं, समीहते सम्यक्करोति। तस्य भगवतः परपक्षनिग्रहः शत्रुपक्षविनाशनं, न चित्रं नैवाश्चर्यमित्यर्थः। यदि शत्रुपक्षनिग्रहो नाश्चर्यरूपस्तर्हि किमिति विचित्रतया भवद्भिर्वर्ण्यतेऽत आह। तथापि विचित्रत्वाभावेऽपि, मर्त्याननुविधत्तेऽनुकरोतीति मर्त्यानुविधस्तस्य, वर्ण्यते। कर्मेति शेषः मर्त्यानुविधस्यामानुषं कर्म चित्रमेवेत्यभिप्रायेण वर्ण्यत इति भावः ॥ २९ ॥ जग्राहेति हतान्यनीकानि सैन्यानि यत्य अवशिष्टा असवः प्राणा यस्य स चासौ स च तं, विरथं रथरहितं, महाबलमपि, जरासन्धं, रामः, सिंहः ओजसा, स्वसामर्थ्येन, सिंहम् इव, जग्राह गृहीतवान् ॥ ३० ॥ बद्ध्यमानमिति।

हता अरातयो येन तं, वारुणैर्वरुणदेवसाकैः मानुषैः रज्जुप्रभृतिभिः, पाशैर्बन्धनसाधनैः, बद्धयमानं जरासन्धं, रामेणेति शेषः। गोविन्दः श्रीकृष्णः, दृष्ट्वेति शेषः। तेन जरासन्धेन, कार्यचिकीर्षया हेतुना, वारयामास। राममिति शेषः। कार्यं तु भूमारभूतान्यतस्तत आनीय सेनां संपाद्य पुनर्युद्धाय तदागमनरूपं बोध्यम् ॥ ३१ ॥ स मुक्त इति। वाक्यैरिति च। लोकनाथाभ्यां रामकृष्णाभ्यां, मुक्तः पातबन्धनाद्विमुक्तः वीरसम्मतः स जरासन्धः, व्रीडितः लज्जितः अत एव, तपसे यादवपराजयार्थकतपश्चरितुं, कृतसंकल्पोऽपि, पथि स्वदेशगमनमार्गे, राजभिः सम्मिलितैर्नृपैः कर्तृभिः, विचित्रा अर्थाः पदानि शब्दाश्च येषु तैः, वाक्यैः प्राकृतैः नयनैः अपि, न्यायैश्च साधनैः, वारितः। तत्र लौकिकन्यायमाहुः। स्वकर्मेति। हे राजन्, यदुभिरल्पकैरेतैर्यादवैः, ते महतस्तव, अयं पराजयः, पराभवः, केवलं स्वकर्मबन्धः प्राप्तः। अतस्त्वया न लज्जितव्यमिति भावः। एवंविधैर्नयैरिति सम्बन्धः। इत्युभयोरेकान्वयः ॥ ३२–३३ ॥

कृष्णप्रिया

हे अङ्ग ! राजन् जरासन्ध रक्षित वह सैन्य, सागर के समान दुस्तर दुष्पार दुर्गम, और खतरनाक और अजेय सा था। लेकिन वसुदेवजी के वीर पुत्र बलभद्र जी एवं श्रीकृष्ण भगवान ने अल्पश्रम से अल्प समय में साफ कर दिया। जगदीश गोविन्द एवं बलभद्र जी के लिये तो वह बाँये हाथ का खेल था ॥ २९ ॥ राजन् ! अनन्तगुण सम्पन्न भगवान् त्रिभुवन की उत्पत्ति पालन संहार विना श्रम निजलीला से करते हैं। उन भगवान के लिए खलों की दुष्ट दैत्यों की जरासंध आदि शत्रुओं की सेना का विनाश करना कोई बड़ी बात नहीं है। फिर भी जब जब भगवान् मनुष्यावतार लेकर साधारण मनुष्य की लीला करते हैं तब भक्तगण प्रभु की इन लीलाओं का गान करते हैं ॥ ३० ॥ श्रीबलदेव जी ने रथ विरहित बने हुए और सम्पूर्ण सेना भी नष्ट होने पर केवल उनके प्राण अवशिष्ट रहे थे वैसे महाबलिष्ठ जरासन्ध को जैसे युवराज केसरी दूसरे अन्य केसरी को पकड़ ले वैसे उसको पकड़ लिया ॥ ३१ ॥ पूर्व में जरासन्ध ने असंख्य विपक्षी नरपतियों का नाश किया था, आज उसी जरासन्ध को श्रीबलभद्र जी जब वरुण के पाश से एवं मनुष्यों के फंदे से बांध रहे थे तब दयालु दयानिधि श्रीकृष्ण भगवान ने बहुत ही सोचकर छुड़ाया क्योंकि यदि जरासन्ध जीवित रहा तब बार-बार सेनाओं को इकट्ठी कर ले आयगा और उनके भूमि का भार हलका किया जायेगा ॥ ३२ ॥

स मुक्तो लोकनाथाभ्यां व्रीडितो वीरसम्मतः। तपसे [1]कृतसंकल्पो वारितः पथि राजभिः ॥ ३३ ॥
[2]वाक्यैः [3]पवित्रार्थपदैर्नयनैः प्राकृतैरपि। स्वकर्मबन्धनः[4] प्राप्तः यदुभिस्ते पराभवः ॥ ३४ ॥
हतेषु सर्वानीकेषु नृपो बार्हद्रथस्तदा। उपेक्षितो भगवता मगधान्[5] दुर्मना ययौ ॥ ३५ ॥
मुकुन्दोऽप्यक्षतबलो निस्तीर्णारिबलार्णवः। [6]विकीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—लोकनाथाभ्याम्, मुक्तः, व्रीडितः, तपसे, कृतसंकल्पः, वीरसस्मतः, सः, राजभिः, पथि, वारितः ॥ ३३ ॥ पवित्रार्थपदैः, प्राकृतैः, नयनैः, अपि, 'स्वकर्मबन्धनः', यदुभिः, ते पराभवः प्राप्तः, इति वाक्यैः, निवारयामासुः ॥ ३४ ॥ तदा, सर्वानीकेषु, हतेषु, भगवता, उपेक्षितः, बार्हद्रथः, नृपः, दुर्मनाः, मगधान्, ययौ ॥ ३५ ॥ निस्तीर्णारिबलार्णवः, अक्षतबलः, मुकुन्दः, अपि, त्रिदशैः, कुसुमैः, विकीर्यमाणः, अनुमोदितः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पवित्रार्थानि धर्मोपदेशपराणि पदानि येषु तैर्वाक्यैः। नयनैर्नीतिभिः। प्राकृतैर्लौकिकैः। तत्र लौकिकन्यायमाहुः। स्वकर्मेति। यदुभिरल्पकैः कृत्वा ते महतः पराभवः केवलं कर्मबन्धेन प्राप्तोऽतस्त्वया न लज्जितव्यमिति ॥ ३४ ॥ बार्हद्रथो जरासंधः ॥ ३५ ॥ मुकुंदोऽपि ययावित्यनुषङ्गः। न क्षतं बलं यस्य सः। तस्यैवामृतदृष्ट्या क्षतप्रतिसंधानादिति भावः। निस्तीर्णोऽनायासेनैव तीर्णोऽखिलार्णवो येन। साधुसाधु इत्यनुमोदितश्च ॥ ३६ ॥

---

१. वनं विविक्षुस्तपसे–वीर. विज. ; विविक्षुस्तपसेऽरण्यं–इति कस्यचित्। २. अयं विजये नास्ति। ३. विचित्रा–विज। ४. बन्धप्राप्तोऽयं–श्रीधर. वंशी वीर. जीव. ; बन्धतश्चासौ–प्रा. पा.। ५. मागधो–विध.। ६. गृहीत्वा मगधेन्द्रस्य धनं स्त्रीकोशवाहनम्–विजयेऽधिकम्।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मुक्तो विसृष्टः । वारितो निवारितः ॥ स मुक्त इति युग्मकम् । लोकनाथाभ्यामिति पूर्वोक्तरीत्या लोकहितार्थमेवेति भावः । अथ च महाशयत्वाज्झटिति तद्धनने त्वनाग्रहश्च दर्शितः । ततो वीरसंमतोऽतो बन्धे ततोऽपि मोचने व्रीडितः । अत एव तपस उद्यतः, कथं यादवबलादपि पराजयो मम जातस्तत इतः क्षात्रधर्मं न करिष्यामि किन्तु तपसैव शरीरं त्यक्ष्यामीति बहिरभिमानज्ञापनायाऽन्तस्तु वीर्यातिशबलाभायेति ज्ञेयम् । पथि वनवर्त्मनि तपोऽर्थमाश्रिते ॥ ३३ ॥ तत्र नयेषु ॥ पवित्रार्थपदैः क्षत्रियस्य वार्द्धक्य एव सति वैराग्ये तपः, युद्धादिको मुख्यो धर्मः लज्जया तत्त्यागोऽनुचित इत्यादि लक्षणैः । तवैतत्परामवदुःखं ललाटे लिखितमेव तत्कथमन्यथा भवति 'अवश्यमेव भोक्तव्यम्' इति स्मृतेः । अतः स्वकर्मभिरेवैतत्परामवस्तया च प्रारब्धाधीनत्वात्तत्र का लज्जा, कः खलु बुद्धिमानतिक्षुद्राद्यादवादपि दुर्बलं मस्यते । यादवेन युद्धे तव जये सति न किमपि यशः, पराजयेपि न काचिल्लजा, जरासंधसिंहो हि कृष्णसारं जित्वापि न कमप्युत्कर्षमजित्वापि न कामपि निन्दां प्राप्नोतीति वयं जानीमः । समपक्षेणापि सह युद्धे जयपराजयाभ्यां क्षत्रियैर्न गर्वदैत्ये धार्ये, किमुत स्वतोऽतिन्यूनेनेति शास्त्रम् ॥ ३४ ॥ 'नृपो बार्हद्रथस्तदा' इत्येवपाठः सम्यक् । तीर्थस्तु—'नृपतिर्वारहद्रथः' इति पपाठ, तत्रार्षत्वाश्रयणमृते निर्वाहो नास्ति ॥ हतेष्विति त्रिकम् । बृहद्रथः राजचक्रवर्त्ययं तदपत्यमिति तन्नामविख्यापक इत्यर्थः । अत एव साभिमानत्वादुपेक्षितोऽपि दुर्मना दुःखितचित्तः ॥ ३५ ॥ अपिना पूर्वक्रिया गृह्यते । तस्यैव मुकुन्दस्यैव । क्षतप्रतिसंधानं विक्षतीभवनम् । इति भावः—दृष्ट्या मृतिनाशकस्य विक्षतीजरणं नाद्भुतमित्याशयः । अखिलार्णवः शत्रुसेनासमुद्रः ॥ मुकुन्द इति जरासंधमोचनाभिप्रायेण । निस्तीर्णेति मर्त्यानुविधत्वात् । मुकुन्दोऽपि मथुरां ययाविति । अनुमोदितः जयजयेत्यादि शब्दैर्वर्द्धितः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स मुक्त इति युग्मकम् । लोकनाथाभ्यामिति पूर्वोक्तरीत्या लोकहितार्थमेवेति भावः । अथ च महाशयत्वात् झटिति तद्धननेत्वनाग्रहश्च दर्शितः । यतो वीराणां सम्मतः अतो बन्धे ततोऽपि मोचने व्रीडितः । अत एव तपस उद्यतः । कथं यादवबलादपि मम पराजयः तत इतः क्षात्रधर्मं न करिष्यामि तपसैव शरीरं त्यक्ष्यमीति बहिरभिमानज्ञापनाय । अन्तस्तु वीर्यातिशयमलाभायेति ज्ञेयम् । पथि वनवर्त्मनि तपोऽर्थमाश्रिते ॥ ३३ ॥ पवित्रार्थपदैः क्षत्रियस्य वार्द्धक्य एव वैराग्ये सति तपः युद्धादिकमेव मुख्यो धर्मः लज्जया तत्त्यागोऽनुचित इत्यादिलक्षणैः युद्धे कदाचित् जयः कदाचित् पराजयोऽपि तेन निर्वेदः क्षत्रियस्यायोग्य इत्यादिलक्षणैर्नयनैश्च । च एवार्थे स्वकर्मबन्धत एव प्राप्तः नतु वीर्य्याद्यभावतः अयमिति पाठेऽऽन्यो न भावीति भावः । अन्यत्तैः । यद्वा, तत्र पवित्रार्थपदान्याह–सेति । "अवश्यमेव भोक्तव्यं कृतं कर्म" इत्यादि शास्त्रीयन्यायानुगृहीतत्वात् पवित्रार्थपदत्वं प्राकृतैरिति युद्धे वीरस्य मरणमपि श्रेयः न तु तत्राशक्त्यादिना तप इत्यादिलक्षणैः अन्यत् समम् ॥ ३४ ॥ हतेष्विति त्रिकम् । नृपेति बार्हद्रथः राजचक्रवर्त्ययं तदपत्यमिति तन्नामविख्यापक इत्यर्थः । अत एव साभिमानत्वादुपेक्षितोऽपि दुर्मनाः दुःखितचित्तः ॥ ३५ ॥ मुकुन्द इति जरासन्धमोचनाभिप्रायेण निस्तीर्णेति मर्त्यानुविधत्वात् ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पवित्रार्थपदैः क्षत्रियस्य वार्द्धक्य एव वैराग्ये सति तपोयुद्धादिकमेव मुख्यो धर्म्मः । लज्जया तत्त्यागोऽनुचित इत्यादिलक्षणैः, युद्धे कदाचिज्जयः, कदाचित् पराजयोऽपि, तेन निर्व्वेदः क्षत्रियस्यायोग्य इत्यादिलक्षणैर्नयनैश्च, 'च' एवार्थे, स्वकर्म्मबन्धत एव प्राप्तः, न तु वीर्य्यादिह्रासात् । 'अयम्' इति पाठे अन्योन्यभावीति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, तत्र परित्रार्थंपदान्याह—स्वेति । 'अवश्यमेव भोक्तव्यं कृतं कर्म्म' इत्यादिशास्त्रीयन्यायानुगृहीतत्वात्, परित्रार्थपदत्वं व्यक्तमेव; प्राकृतैरिति युद्धे वीरस्य मरणमपि श्रेयः, न तु तत्राशक्त्यादिना तप इत्यादिलक्षणैः । अन्यत् समानम् ॥३३॥ नृपतिः सम्राट् तथापि बृहद्रथस्य महावीरस्य पुत्रः, अतएव दुर्म्मना दुःखितचित्तः, पुनः श्रीभगवता सह युद्धेच्छानपगमात् ॥ ३४ ॥ मुकुन्दः परमानन्दप्रदो भगवानिति भावः । अतएव न विद्यते क्षतमपि तदीयामृतदृष्ट्या यस्मिन् तथाभूतं बलं यादवसैन्यं यस्य सः । अतएवोक्तं श्रीहरिवंशे (विष्णु० प० ३६।४०)—'जित्वा तु मागधं सङ्ख्ये जरासन्धं महीपतिम् । विहरन्ति स्म सुखिनो वृष्णिसिंहा महारथाः ॥' इति । कुसुमैः कृत्वा विकीर्य्यमाणो व्याप्यमान इत्यर्थः ॥ ३५ ॥ माथुरैः सूतादिभिः, उप अधिकं गीयमानविजयः, किंवा माथुरैर्यादवैः; कथम्भूतैः ? अभित आभिमुख्ये वा संगम्य श्रीभगवता सह मिलित्वा, विज्वरैः—विगतो ज्वरः श्रीभगवददर्शनादिना तापो येषां तैः । न च केवलं विज्वरत्वम्, प्रहर्षश्च जात इत्याह—मुदित आत्मा मनो देहो वा येषां तैः, उभयेषां वा विशेषणद्वयमिदम् ॥३६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स इति । लोकनाथाभ्यां रामकृष्णाभ्यां विमुक्तः स वीरश्रेष्ठो जरासन्धः तावत्तपसे तपश्चरितुं वनं प्रवेष्टुमिच्छुः पथि राजभिः शिशुपालादिभिः कर्तृभिः विचित्रा अर्थाः पदानि शब्दाश्च येषु तैः वाक्यैः प्राकृतैर्नन्यायैश्च साधनैर्वारितः अत्र लौकिक-

न्यायमाहुः—स्वकर्मेति। यदुभिरल्पकैर्महतस्ते पराभवः केवलं स्वकर्मबन्धप्राप्त इत्येवम्बिधैर्नयैरिति सम्बन्धः ।। ३३–३४ ।। हतेष्विति सर्वेष्वनीकेषु हतेषु सत्सु बार्हद्रथो जरासन्धो राजा भगवतोपेक्षितो दुःखितचित्तो मागधान् जनपदान् ययौ ।। ३५ ।। मुकुन्द इति। अक्षतमविहतं बलं स्वीयं स्वकीयं यस्य निस्तीर्णोऽरीणां बलमेवार्णवो येन तथाभूतः मुकुन्दः अपि त्वर्थः मुकुन्दस्त्वित्यर्थः साधु साध्विति देवैरनुमोदितः कुसुमैर्विकीर्यमाणश्च विगतः ज्वरः शत्रुपीडात्मको येभ्यः तैरत एव मुदितचित्तैः माथुरैर्जनैरुपसङ्गम्य मिलित्वा सूतादिभिः उपगीयमानो विजयः यस्य येन तथाभूतो ययौ इति सम्बन्धः। तत्र सूताः पौरुषप्रकाशकाः मागधाः गायकाः वन्दिनः स्तुतिपाठकाः इति विवेकः ।। ३६–३७ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मुक्तो विसृष्टः ।। ३३–३७ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

लज्जितत्वे हेतुः वीरसम्मत इति ।। ३३ ।। पवित्राणि तत्त्वोपदेशपराणि अर्था पदानि च येषु तैः। नयनैः नीतिभिः प्राकृतैर्लौकिकैः तत्र तत्त्वोपदेशमाहुः—स्वकर्मेति। तवैतत् पराभवदुःखं ललाटे लिखितमेव तत् कथमन्यथा भवति "अवश्यमेव भोक्तव्यं कृतं कर्म" इति स्मृतेः एतद्व्यङ्गयनार्थेन नीतिश्चाहुः स चार्थो यथा यद्येष पराभवस्ते प्रारब्धकर्माधीन एव तर्हि का लज्जा कः खलु बुद्धिमानतिक्षुद्रात् यादवादपि त्वां दुर्बलं मंस्यते यादवेन सह युद्धे तव जये सति न किमपि यशः पराजयेऽपि न काचिल्लज्जा जरासन्धसिंहो हि कृष्णसारं जित्वापि न कमप्युत्कर्षमजित्वापि न कामपि निन्दां प्राप्नोतीति वयं जानीमः समकक्षेणापि सह युद्धे जयपराजयाभ्यां क्षत्रियैः न गर्वदैन्ये धार्ये किमुत स्वतोऽतिन्यूनेनेति शास्त्रमिति ।। ३४।। बार्हद्रथोऽपि बृहद्रथोऽपि बृहद्रथपुत्रो जरासन्धः ।। ३५ ।। मुकुन्दोऽपि ययावित्यनुषङ्गः ।। ३६ ।।

गूढार्थदीपिनी

पवित्रार्थानि धर्मोपदेशपराणि पदानि येषु तैः। क्षत्रियस्य युद्धमेव मुख्यो धर्मः तपस्तु वार्धक्य एवेति बोधकानीत्यर्थः। नयनैर्नीतियुक्तैः। प्राकृतैर्लौकिकैः तदेवाह स्वेति कर्मबन्धेन ।।३४।। बृहद्रथपुत्रो जरासन्धः ।।३५।। मुकुन्द इति युग्मम्। मुकुन्दोऽपि ययौ इति योज्यम्। अरिबलार्णवः शत्रुसेनासमुद्रः। विकीर्यमाण आच्छाद्यमानः। जयजयेत्यादिशब्दैरनुमोदितश्च ।। ३६–३७ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

राजभिर्वाक्यैर्वारित इति सम्बन्धः ।। ३३ ।। कथम्भूतैर्वाक्यैः नयनैः नीतिशास्त्रस्थैः प्राकृतैः स्वोत्प्रेक्षितैश्च पवित्रार्थानि श्रोतृमोहघ्नानि पदानि येषु तैः तत्रोभयवाक्यसारमूचुः ते त्रयोविंशत्यक्षौहिणीपतेः यदुभिः स्वल्पसङ्ख्यैरपि अयं पराभवः स्वकर्मबन्धेन स्वकर्मबन्धनेन प्राप्त इति ।। ३४ ।। बार्हद्रथो बृहद्रथसुतो जरासन्धः ।। ३५ ।। न क्षतं वलं यस्य स मुकन्दोऽपि ययौ इत्यनुषङ्गः ।। ३६ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वसुदेवः पितरं निर्यातयामास गमयामास ।। ३३ ।। अनुत्तरेणोत्तरभिन्नेन सामुख्येन तत्सदृशेन दक्षिणेनेति यावत् ।।३४।। दुर्मदान् रणकर्मणि ।। ३५ ।। सङ्कर्षणश्चासौ सहायश्च तद्वान् ।। ३६ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो यज्जातं तदाह स मुक्त इति। अन्ये यादवाः पुनर्बन्धनं करिष्यन्तीत्याशङ्क्याह लोकनाथाभ्यामिति। त्रैलोक्यनाथाभ्यां मुक्तं को वा बद्धुं शक्तः। द्विवचनेन विभक्तसामर्थ्यं सर्वमेव मोचने नियुक्तमिति सूचितम्। ननु तादृशः त्यक्तोपि म्रियेति कथं कार्यसिद्धिरिति चेत् ? सत्यम्। व्रीडितः। अत्र हेतुः वीरसंमत इति। वीरेषु अयमतिवीर इति संमतः। ततः मानुषपराक्रमस्य हतत्वात् अलौकिकं पराक्रमं साधयितु तपसे कृतसङ्कल्पो जातः। ततस्तपःकरणार्थं गच्छन् पथि राजभिर्वारितः, ये राजनो भारभूताः। अनेन भगवच्चरित्रमलौकिकमित्युक्तम्। येषामुपकारं करोति तैस्त्यक्तः, येषां त्वपकारं करिष्यति तैर्गृहीत इति ।। ३३ ।। तेषां बोधने करणान्याह वाक्यैरिति। त्रिविधा हि बोधकाः। तत्र सात्त्विकानां वचनं पवित्रार्थपदैरिति पवित्रार्थानि पदानि येषु वाक्येषु। वाक्यैरिति त्रिष्वपि सम्बध्यते। नयनैः प्राकृतैरपि। भगवानीश्वरः सर्वात्मा, तत्र पराजयो भाग्यमेवेति पवित्रार्थपदानि। नीतिवाक्यानि तु स्वदेशो न भवति, विचारश्च न कृतः। अकस्माद्युद्धे पलायनमुचितमेवेति राजसाः। अतो

नीतिविरुद्धं न कर्तव्यमित्युपदेशपरैः । प्राकृतास्तु बहूनामेव महतामपि पराजयो जायत इति प्राकृतवचनैः बोधमुक्तवन्तः । एते त्रिविधा अपि दृष्टन्यायेनैवोक्तवन्तो, नादृष्टन्यायेन । अन्ये पुनरन्तरङ्गाः अदृष्टप्रकारेण बोधयामासुरित्याह स्वकर्मबन्धन इति । त्वया हि बह्वो जिताः, तत्कर्मफलं च भोक्तव्यम्, अन्यथा प्रकारान्तरेण दुष्टैः सह पराजयो भवेत्, यतः स्वकर्मणा बन्धनं यस्य तादृशः पराभवः । अपिशब्दात् सर्वे चतुर्धा व्यस्तैः समस्तैश्च बोधयामासुरित्यर्थः । यदुभिः सह पराभव इति । युक्तमेवैतत् । यतो ज्येष्ठो यदुरित्यपि ज्ञापितम् ॥ ३४ ॥ ततो यज्जातं तदाह । हतेषु सर्वानीकेष्वपि, तथापि सर्वैः पुरस्कृत इति राजचिह्नानि प्राप्य स्वदेशान् गतः जरासन्धः । यतो नृपः दैवमानुषसहायः सूचितः । तदा बोधनानन्तरं दृष्टसामग्र्यां च सत्यां पश्चाद्गत इत्याह तदेति । इत्याशङ्क्याह उपेक्षितो भगवतेति । भगवतः स्थाने यद्यप्युक्तम्, यद्यपि भगवत्त्वाच्च जानाति, तथापि तानि वाक्यान्यनादृत्योपेक्षामेव कृतवान् । भगवत्त्वादग्रिमकार्यमेव विचारयति, न तु नीतिविरोधम् । उपेक्षया सुतरां दुर्मना जातः । तत्त्वे अवगतेऽपि मागधत्वान्न शरणमागतः । नापि तूष्णीं स्थास्यति । मागधत्वादेव मागधान् ययौ ॥ ३५ ॥ तस्य स्वगृहप्राप्तिमुक्त्वा भगवतोऽपि परमवैभवेन मथुराप्रवेशमाह मुकुन्दोऽपीति पञ्चभिः । न क्षतं बलं यस्य । एकोपि न हतः । यद्यपि मोक्षदाता तानपि मारयित्वा मुक्तिं दद्यात्, जरासन्धं वा मोचयेत् । न हि भगवान् जयहेतुः, किन्तु मोक्षहेतुः लीनाः केचन पुनरायास्यन्तीति शङ्काभावार्थमाह । निस्तीर्णः नितरामुत्तीर्णः अरिबलरूप एवार्णवो येन । अर्णवो हि नान्यत्र समायाति । महत्त्वेन पौरुषं पुनरागमनाभावश्च निरूपितः । ततः कुसुमैः विकीर्यमाणः त्रिदशैरनुमोदितो जातः । अन्यथा अनन्तवधे तदधिष्ठातृदेवानां दुःखं भवेदित्याशङ्क्येत । देवार्थमेतत्कृतमित्यपि सूचितम् ॥ ३६ ॥

श्रीसुबोधिनी–सारः

लोकनाथाभ्यां मुक्तस्त्यक्तोऽत एव व्रीडितो लज्जितो वीरेषु सम्मतः तपसे तपस्तप्तुं कृतः संकल्पो येन स जरासंधः पथि मार्गे राजभिर्वारितो निवृत्तिं गमितः ॥३३॥ कैरित्यत्राह । पवित्रमर्थो येषु तानि पदानि येषु तैर्वाक्यैः नयनैर्नीतिभिः प्राकृतैर्लौकिकैः सर्वतोऽधिबलं दैवमित्याह । यदुभिस्ते तवायं पराभवः स्वकर्मबंधेन प्राप्तोऽतो न विषादः कर्त्तव्य इत्यपरोऽर्थः ॥ ३४ ॥ सर्वसैन्येषु हतेषु सत्सु भगवतोपेक्षितोऽवज्ञातो बार्हद्रथो जरासंधो नृपस्तदा दुर्मना उदासीनो मागधान् देशान् जगाम ॥ ३५ ॥ न क्षतं नष्टं बलं यस्य स निस्तीर्णारिर्बलं शत्रोः सैन्यमेवार्णवः समुद्रो येन स मुकुन्दोऽपि ययौ । कुसुमैः पुष्पैरभिवृष्यमाणस्त्रिदशैर्देवैरनुमोदितः ॥ ३६ ॥

विवरणटिप्पणी

सत्यमिति । अङ्गीकृत्योत्तरम् । व्रीडां प्राप्तस्तथाप्यलौकिकोद्यमार्थं न मृत इत्यर्थः । मुकुन्दोऽपीत्यत्र । मोक्षे हेतुरित्यास्यानन्तरं तथापि न कोऽपि हत इति शेषो ज्ञेयः । अन्यथेति । त्रिदशानुमोदनाकथने दुःखं भवेदिति शङ्का स्यादिति शेषः । इत्येवाशङ्क्य इत्यपि सूचितमित्यन्वयः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स जरासन्धो लोकनाथाभ्यां रामकृष्णाभ्यां विमुक्तस्तपसे वनवासपूर्वकं तपः कर्तुं कृतसङ्कल्पः पथि मार्गे राजभिः शिशुपालादिभिः कर्तृभिर्वाक्यैः साधनभूतैर्वारित इत्यन्वयः । लोकनाथाभ्यामित्यनेन ताभ्यां विमुक्तस्य नान्येन केनापि ग्रहणमिति सूचितम् । स्वदेशागमने तपःसङ्कल्पे च हेतुमाह—व्रीडित इति । तत्र हेतुमाह—वीरतया सम्मत इति ॥ ३३ ॥ तत्र वाक्यानां त्रैविध्यमाह—नयनैर्नीतिभिः न युद्धे एकस्यैव जयः पराजयो वेति नियमः, अतः पराजयेऽपि का लज्जेत्यादिभिः । प्राकृतैरपीति, कः खलु बुद्धिमानतितुच्छेभ्योऽपि यादवेभ्यस्त्वां महाबलं दुर्बलं मंस्यते ? अतस्तेभ्य एकदा पराजयेऽपि का लज्जेत्यादिभिः । तथा पवित्रार्थानि धर्मोपदेशपराणि पदानि येषु तैः । तान्याह—स्वकर्मेति । यदुभिरल्पकैरपि कृत्वा ते महतोऽयं पराभवः केवलं कर्मनिमित्तेन प्राप्तः, 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इति स्मृतेः । अतस्त्वया न लज्जितव्यमित्यर्थः ॥ ३४ ॥ एवं सर्वेष्वनीकेषु सैन्येषु हतेषु सत्सु बार्हद्रथो बृहद्रथपुत्रो मागधो नृपतिर्मगधदेशराजा जरासन्धो भगवता उपेक्षितो दुर्मनाः संस्तदा स्वदेशं ययावित्यन्वयः ॥ ३५ ॥ न क्षतं बलं सैन्यं यस्य सः, तस्यैवामृतदृष्ट्या क्षतप्रतिसन्धानादित्याशयः । निस्तीर्णः अनायासेनैव तीर्णोऽरिबलार्णवो येन सः त्रिदशैर्देवैः साधुसाध्वित्यनुमोदितः कुसुमैर्विकीर्यमाणः आच्छाद्यमानो मुकुन्दोऽपि स्वपुरं ययावित्यन्वयः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

स इति द्वयम् । व्रीडितः वीरेषु सम्मतः स जरासन्धः लोकनाथाभ्यां रामकृष्णाभ्यां मुक्तः बालैः पराजितोऽहं क्षात्रधर्मं न करिष्ये । इति विचार्य तपसे तपः कर्त्तुं कृतसंकल्पः पथि तपोवनमार्गे राजभिः शिशुपालादिभिः कर्तृभिः पवित्राणि तत्त्वभूतानि अर्थाः पदानि च येषु तैर्नयनैः नीतिसंवलितैः प्राकृतैः लौकिकैरपि वाक्यैः वारितः वाक्यान्याहुः । अल्पकैरपि यदुभिर्योऽयं ते पराभवः स स्वकर्मबन्धेन प्राप्तः तव ललाट एतल्लिखितमतोऽत्र का लज्जा । इदमेव नीतावपि वाक्यं स्वकर्मप्राप्तत्वात् युद्धे जयः पराजयो वा न नियतः । अतः पराजयेऽपि न खेदः कार्यः । प्राकृते तु कः खलु धीमान् यादवेभ्यस्त्वां दुर्बलं मंस्यते अतः कर्मबन्धेन एकदा पराजयेऽपि न लज्जितव्यमित्यादि ।। ३३–३४ ।। हतेष्विति । सर्वेषु अनीकेषु सैन्येषु हतेषु सत्सु बार्हद्रथो बृहद्रथपुत्रो नृपः जरासन्धः भगवता उपेक्षितो दुर्मनाः संस्तदा मगधान् स्वदेशान् ययौ ।। ३५ ।। मुकुन्द इति द्वयम् । न क्षतं बलं सैन्यं यस्य सः तस्यैवामृतदृष्ट्याक्षतप्रतिसन्धानादित्याशयः । निस्तीर्णः अनायासेनैव तीर्णोऽरिबलार्णवो वैरिसैन्यसमुद्रो येन सः त्रिदशैर्देवैः साधुसाध्वित्यनुमोदितः कुसुमैर्विकीर्यमाणः आच्छाद्यमानः सूतमागधबन्दिभिरुपगीयमानो विजयो यस्य स मुकुन्दोऽपि प्रत्यायातैः विज्वरैर्निवृत्ततापैर्मुदितात्मभिः प्रसन्नचित्तैर्माथुरैर्मथुरावासिभिरुपसंगम्य मिलित्वा स्वपुरं ययौ इत्यनुषङ्गः ।। ३६–३७ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वीरैः सूरैः संमतः । अतो व्रीडितः सन् तपसे कृतसंकल्पोऽ। ।। ३३ ।। पवित्रार्थानि धर्ममिश्राणि पदानि येषु तैः नयनैः नीतियुक्तैश्च । प्राकृतैर्लोकरीतिबोधकैश्च वाक्यैः कृत्वा पथि राजभिर्वारित इति पूर्वेणान्वयः । एवं बोधितेषु त्रिविधेषु वाक्येषु लौकिकवाक्यमाहुः यदुभिस्तुच्छैः कृत्वा यो महतस्ते तव पराभवः सोयं स्वकर्मणां बंधेनैवप्राप्तो नत्वसामर्थ्यतयोपलब्धः ततस्त्वया लज्जा न प्राप्येतिभावः ।। ३४ ।। उपेक्षित उपेक्षयात्यक्तः । बार्हद्रथो बृहद्रथनाम्नश्चक्रवर्त्तिराज्ञः सुतो जरासंधो भवति । अतोऽभिमानित्वेन दुर्मनाः ।। ३५ ।। निस्तीर्णः स्वभावेनैवतीर्णः अरिबलार्णवः । शत्रुसैन्यसमुद्रो येन स । अक्षतं बलं यस्य सः मुकुंदोऽपि स्वपुरं ययावितिशेषः स कथंभूतः । विकीर्यमाणः सक्रियमाणः सुंदरं सुंदरं कृतमित्यनुमोदितः प्रशंसितश्च ।। ३६ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हतेष्विति ।। सर्वाणि च तान्यनीकानि सैन्यानि तेषु हतेषु, रामकृष्णाभ्यां विनाशितेषु सत्सु, बार्हद्रथः राजा जरासंधः, भगवता, यदा उपेक्षितः, तदा दुर्मना दुःखितचित्तः सन्, मागधान् जनपदान् प्रति, ययौ ।। ३४ ।। मुकुन्दः श्रीकृष्णोऽपि, अक्षतमविहतं बलं सैन्यं यस्य सः, निस्तीर्णोऽरीणां बलमेवार्णवो येन सः, त्रिदशैर्देवैः, कुसुमैः विकीर्यमाणः अनुमोदितः साधु साध्वित्यनुमोदितः सन् ।। ३५ ।। माथुरैरिति ।। मुदितात्मभिः प्रसन्नचित्तैः, विज्वरैः शात्रवीयपरितापवर्जितैः, माथुरैर्मथुरावासिजनैः, उपसंगम्य मिलित्वा, सूताश्च मागधाश्च तैः, उपगीयमानः संवर्णितो विजयो यस्य तथाभूतः संश्च, स्वपुरं प्रत्याययाविति शेषः ।।३६।।

कृष्णप्रिया

जब वीरवरों में अति सम्मानित लोकनाथ वलभद्र जी और भगवान् श्रीकृष्ण के हाथों से दयादृष्टि से मुक्त हुआ तब उसे बड़ी लज्जा आई और वन में जाकर तपश्चर्या करने का निश्चय किया लेकिन मार्ग में जाते हुए जरासन्ध को मित्र राजाओं ने रोक लिया ।। ३३ ।। जरासंध के साथी नरपतिजन कहने लगे कि राजन् ? आप क्यों संकुचाते हो ? यादव को क्या सामर्थ्य है वे आपको पराजित कर सकें ? यह सब विधि का प्रारब्ध का ही खेल है जिससे आपको नीचा देखना पड़ा । राजन् ! पराजय में भगवान की इच्छा का कारण है पुनःमौका मिलने पर विजय प्राप्त करेंगे, राजाओं ने और अनेक लौकिक दृष्टान्त दलीलों से समझाकर तपश्चर्या से रोक लिया ।। ३४ ।। राजन् परीक्षित् । इधर मगध नरेश जरासन्ध की सारी सेना मर चुकी थी, पुनः दाऊजी उपेक्षा एवं करुणा की दृष्टि से मुक्त किया था इससे वह हताश वनकर अपने देश मगध को ओर चुपचाप चला गया ।। ३५ ।। महाराज ? भगवान् मुकुन्द की सेना में किसी का वाल भी बाँका न हुआ और श्रीकृष्ण ने समुद्र समान अगाध जरासन्ध की तेईस अक्षौहिणी सेना पर विजय पाई थी । उस आनन्द के अवसर पर समर्थ देववृन्द श्रीवृन्दावन विहारी जी पर नन्दन वन के कुसुमों की वृष्टि करने लगे, भगवान् के इस दिव्य कार्य की स्तुति करने लगें ।। ३६ ।।

माथुरैरुपसङ्गम्य विज्वरैर्मुदितात्मभिः । उपगीयमानविजयः सूतमागधवन्दिभिः ॥ ३७ ॥
शङ्खदुन्दुभयो नेदुर्भेरीतूर्याण्यनेकशः । वीणावेणुमृदङ्गानि पुरं प्रविशति प्रभौ ॥ ३८ ॥
सिक्तमार्गां हृष्टजनां पताकाभिरलङ्कृताम् । निर्घुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणाम् ॥ ३९ ॥
निचीयमानो[1] नारीभिर्माल्यदध्यक्षताङ्कुरैः । निरीक्ष्यमाणः सस्नेहं [2]प्रीत्युत्कलितलोचनैः ॥ ४० ॥
आयोधनगतं वित्तमनन्तं[3] वीरभूषणम् । यदुराजाय तत् सर्वमाहृतं प्रादिशत्प्रभुः ॥ ४१ ॥[4]

---

[1]. विकीर्यमाणो–प्रा. पा. । [2]. त्कण्ठित–वीर । [3]. माहृतं–वीर. । [4]. विजये एकोनपञ्चाशत्तमोऽध्यायः ।

श्रीशुक उवाच —

तृतीये मासि भूयश्च राजा बार्हद्रथो बली । दिवानिशं तप्यमानः स्मरन्पूर्वपराभवम् ॥ १ ॥
आहूय सर्वभूपालान् चकार कलहोद्यमम् । मत्स्यान्मालवांश्चेदीन् कुलपांचालकेरलान् ॥ २ ॥
कुलिन्दकुन्तलावन्तिकाशिगांधारसृंजयान् । कलिंगकेकयानांध्रान् दशार्णान्वंगसैन्धवान् ॥ ३ ॥

माद्रान् त्रिगर्त्तान्सांवीरान्यार्वतेयांश्च सर्वशः । आहूयाक्षौहिणीगणैस्त्रयोविंशतिभिर्युतः ॥ ४ ॥
समागधानतिक्रम्य पश्चिमाभिमुखो ययौ । आकर्षन्निव भूपालान् गजाश्वरथवल्लभान् ॥ ५ ॥
आगत्य मथुरां रोद्धुं प्राविशद्यमुनातटे । स्कन्धावारेण महता राजभिर्बहुभिर्वृतः ॥ ६ ॥
उपगीयमानो न्यरमत्सूतमागमागधबंदिभिः । तदाकर्ण्य रणोद्योगं मागधस्य बलीयसः ॥ ७ ॥
मंत्रयामास शर्वर्यां कृष्णः संकर्षणादिभिः । वसुदेवोद्धवाक्रूरशैनेयाहुकासारणैः ॥ ८ ॥
एभिरालोच्य शर्वर्यां सम्यङ्निर्धारितक्रियः । उषस्यनुदिते सूर्ये समाहूयभटोत्तमान् ॥ ९ ॥

त्रिधा विभज्य गोविन्दः स्वसेनां चतुरंगिणीम् । न्ययोजयदमेयात्मा मागधेन्द्रबलं प्रति ॥ १० ॥
संकर्षणं च हार्दिक्यं गदं सारणमेव च । वामेन प्रेषयामास मार्गेण मधुसूदनः ॥ ११ ॥
सात्यकिं विपृथुं चैव पृथुमुद्धवमेव च । दक्षिणेनैव मार्गेण प्राहिणोत्सेनया सह ॥ १२ ॥
स्वयं कतिपयैर्युक्तो रथैः कमललोचनः । अग्रे मगधराजस्य प्रविवेश महद्बलम् ॥ १३ ॥
सा सेना बहुनागाश्वरथपादातिसंकुला । प्रसुप्ता यमुनातीरे विस्रब्धा रमते सुखम् ॥ १४ ॥
उदयाद्रिसमारोहत्यर्के तमसि नश्यति । नीडस्थेष्वेव कूजत्सु विहंगेषु ततस्ततः ॥ १५ ॥
विकसत्सु सरोजेसु गायत्स्वलिकूलेषु च । प्रविवेश बलं भीमं मागधेन्द्रस्य दुर्जयम् ॥ १६ ॥

हयाश्चाबद्धबैराणाः श्रेणीबद्धाः समंततः । कुंजराश्च तदा राजन्ननारोपितपंजराः ॥ १७ ॥
अनादत्तप्रहरणा भटाश्चाबद्धमूर्धजाः । अप्रविष्टास्तवर्माणस्तदानारूढवाहताः ॥ १८ ॥
रथाश्चाबद्धतुरगाः सर्वतोनुद्धृतध्वजाः । सेनायां मगधेन्द्रस्य प्रवेशे पीतवाससः ॥ १९ ॥
त्रिदिक्ष्वापतितं सैन्यं दृष्ट्वा तद्राजमंडलम् । इति कर्तव्यतामूढं विभ्रांतं समपद्यत ॥ २० ॥
केचिद्भटाः समापेतुर्भयात्केचिच्च दुद्रुवुः । केचिदात्तप्रहणास्त्वभिसस्रुररीन् रणे ॥ २१ ॥
केचिद्विभिन्नवर्माणच्छिन्नपादोरुवाहवः । रिपूनेवाभ्यवर्तत क्रोधोद्वृत्तारुणेक्षणाः ॥ २२ ॥
केचिद्धयानपर्याणानारुह्य दृढविक्रमाः । मर्दयन्तो रिपून्युद्धे विमलं लेभिरे यशः ॥ २३ ॥

राजानः सहसोत्बुध्य दृष्ट्वा सैनिकसंक्षयम् । विनारणोषस्करणं चक्रुः केचन संगरम् ॥ २४ ॥
केचिद्विसृज्य शिबिरं विविशुर्गहनं वनम् । केचिन्मागधमासाद्य विजयस्वेति चाब्रुवन् ॥ २५ ॥
रथेनैकेन गोविंदः प्रविश्य रिपुवाहिनीम् । जघान सुबहून्वीरान्सायुधान्सरणोद्यमाम् ॥ २६ ॥
संकर्षणोऽपि बलवान्महत्या सेनया वृतः । बलं प्रविश्य वामेन मर्दयामास मागधम् ॥ २७ ॥
शैनेयोऽपि महाबाहुर्दक्षिणेनैव वर्त्मना । प्रविश्य चतुरंगेण सैन्येन महताऽर्दयत् ॥ २८ ॥
एवं सा व्यथिता सेना मागधेंद्राभिरक्षिता । दुद्राव त्रास्यमाना वै क्षणमात्रं दिशो दश ॥ २९ ॥
तामनुद्रुत्य वार्ष्णेयः सात्यकिः पंच योजनम् । निहत्य मागधं सैन्यं जयी व्यवर्त्तताहृचात् ॥ ३० ॥

मतंगजान्पर्वतसन्निभान्बहून्निगृह्य सोपस्करतोमरांकुशान् ।
रथांश्च शस्त्रध्वजवाजिसंयुतान्निनाय कृष्णो मधुरां मनोरमाम् ॥ ३१ ॥

छत्राणि हेमांवररत्नमिश्रिनान्यनेकवालव्यजनानि माधवः ।
किरीटपट्टांगदकुंडलांशुकान्यवाप कृष्णोऽगणितानि संयुगे ॥ ३२ ॥
हलायुधो मागधकोशवाहतप्रजावरोधायुधभूषणादिकम् ।
नियोजितः कंसभिदारणाजितं यदुप्रवीराय धनं न्यवेदयत् ॥ ३३ ॥

इति श्रीविजयध्वजीयपाठे पञ्चाशत्तमोऽध्यायः ॥ ५० ॥]

विजयध्वजीयपाठे एकपञ्चाशत्तमोऽध्यायः

श्रीशुक उवाच—

मागधस्तु रणश्लाघी माधवेन पराजितः । जगाम शोणितपुरं बाणं द्रष्टुं बलेः सुतम् ॥ १ ॥
तं तथायान्तमाकर्ण्य वृतराजन्यमंडलम् । मित्रं पराजितं युद्धे विष्णुना दानवेश्वरः ॥ २ ॥
अलंकृतैर्गजैरश्वैर्विचित्रस्यंदनैर्भटैः । वारकांताकदम्बैश्च सूतमागधबंदिभिः ॥ ३ ॥
ध्वजैः पताकैश्छत्रैश्च माङ्गल्यैः पटहस्वनैः । सुवर्णतोरणैश्चित्रैर्दीपैः कलशदर्पणैः ॥ ४ ॥
उपतस्थे जरासंधं बाणो वाहुसहस्रवान् । तौ दृष्ट्वा परमस्निग्धौ परस्परमनोऽनुगौ ॥ ५ ॥
पूजां चक्रतुरन्योन्यमन्योन्यप्रियकारिणौ । ततोऽब्रवीज्जरासंधो बाणमाभाष्य संसदि ॥ ६ ॥
दानवेन्द्र निबोधेदं गोपेनाधर्मचारिणा । रात्रौ चौर्यप्रतापेन वंचितोऽस्मि दुरात्मना ॥ ७ ॥
गृहीता बहवस्तुंगा मातंगा मदशालिनः । तुरंगमाश्च बहवो रथाश्च सपरिच्छदाः ॥ ८ ॥
द्वंद्वेन सज्जमानं मामिमे भूपा न सेहिरे । निरुद्धस्तैरहं भूपैरेतैः समसुखासुखैः ॥ ९ ॥
त्वत्सन्निधिमिहायातः साहाय्यं कुरु मे प्रभो । इन्युक्तस्तं निजपुरं प्रवेश्य बलिनंदनः ॥ १० ॥
सराजमंडलायाशु कारयामास सत्क्रियाम् । भोजनस्नानशयनगंधतांबूलपूर्वकैः ॥ ११ ॥
अर्हणैरर्हयामास स राजन्य जरासूतम् । तं भुक्तवन्तं विश्रान्तं दृष्टदर्शनकौतुकम् ॥ १२ ॥
अलंकृतं सह नृपैरासीनं कांचनासने । उवाच दानवपतिर्नृपानाभाष्य सादरम् ॥ १३ ॥

बाण उवाच—

जरासंध निबोधेदं न मृषा कथ्यते मया ।
एते गजा इमे अश्वा इदं राज्यमिमाः प्रजाः । त्वदधीनमिदं विश्वं यच्चान्यद्वस्तु विद्यते ॥ १४ ॥

श्रीशुक उवाच—

इत्युक्त्वा प्रददौ तस्मै मागधाय वले सुतः ।
गजानां षष्टिसाहस्रं रथानां नियुतं तथा । प्रयुतं च तुरंगाणां मनोमारुतरंहसाम् ॥ १५ ॥
दानवानां प्रसिद्धानां मायासंग्रामवेदिनाम् । त्रिशतं स्वात्मसाम्यानां ददौ बाणो बलेः सुतः ॥ १६ ॥
विचित्रशिबिकाछत्रव्यजनाकल्पवाससाम् । असंख्यातं ददौ राजन् भांडशय्यासनादिकम् ॥ १७ ॥
कुंभांडं कूपकर्णं च मंत्रिणौ दैत्यसत्तमौ । आज्ञापयामास बाणः साहाय्यार्थं कुरूद्वह ॥ १८ ॥
क्व सुरासुरसंघातसंहारणपटुर्हरिः । कुंभांडकूपकर्णौ क्व वराकौ बाणमंत्रिणौ ॥ १९ ॥
अजानतो विष्णुशक्तिं भूपालाविनशिष्णवः । चक्रुर्भूयो रणोद्योगं मागधेन प्रचोदिताः ॥ २० ॥
बाणेन समनुज्ञातो मागधः शोणितात्पुरात् ।
निर्गत्यानेकभूपालचतुरंगबलान्वितः । दिनैः कतिपयैर्भूयो मधुरामन्वपद्यत ॥ २१ ॥
संनिरुध्य पुरद्वारं गोपुराट्टालतोरणैः । दीर्घिकोपवनोद्यानैरुपेतं सालभूषितम् ॥ २२ ॥
कुन्तैः कुठारैः कुद्दालैर्दण्डभारैश्च भूरिभिः । कर्षणस्थैश्च पाषाणैर्बभंज परितः पुरम् ॥ २३ ॥
भज्यमाने पुरे तस्मिन् श्रुत्वा मागधमागतम् । सन्नाहभेरीः सन्नाद्य रामकृष्णावमर्षिणौ ॥ २४ ॥
रथाश्वकुंजरानीकैः सायुधैः सपरिच्छदैः । सात्यकिं कृतवर्माणमुग्रसेनं तथागदम् ॥ २५ ॥
आहुकं वसुदेवं च पुरस्कृत्यमहाबलौ । निर्जग्मतुरसंभ्रांतौ दीप्तौ केसरिणौ यथा ॥ २६ ॥
मधुराया विनिर्गत्य कृष्णः कमललोचनः । पांचजन्यं महाशंखं प्रदध्मौ रिपुभीषणम् ॥ २७ ॥

ततः प्रववृते युद्धं यदूनां क्षत्रियैः सह । कुंभाण्डकूपकर्णौ च दानवौ बाणमन्त्रिणौ ॥ २८ ॥
दैत्यसैन्येन महता वृतौ मायाविशारदौ । युयुधाते महावीर्यौ मायया वृष्णिभिः सह ॥ २९ ॥
स्वसैन्यं मायया क्लिष्टं दृष्ट्वा यादवसत्तमः ।
विज्ञानास्त्रेण तन्मायामपास्य निमिषांतरे । सात्यकिं कृतवर्माणं प्रोवाचाहवलालसौ ॥ ३० ॥

आभ्यां भवन्तौ रणदुर्मदाभ्यां रणं सुघोरं कुरुतां रणप्रियौ ।
तावेव मुक्तौ कदनं भयानकं महाबलौ संप्रति चक्रतुर्नृप ॥ ३१ ॥

चापेनैकेन गोविंदः क्षत्रियैः शतसंमितैः । युयुधेन हितच्चित्रं राजन्विश्वात्मनो हरेः ॥ ३२ ॥
केचिद्धताः समापेतुः कुंजराश्छिन्नपुष्कराः । निपेतुर्बहवो राजंस्तुरंगाः कृत्तकन्धराः ॥ ३३ ॥
विशीर्णैरास्तृता पृथ्वी स्यंदनैच्छिन्नबंधनैः ॥ ३४ ॥

भटाश्च रुधिराक्तांगाश्छिन्नपादोरुबाहवः । पेतुः कृत्तमहामूलाः किंशुका इव पुष्पिताः ॥ ३ ॥
शार्ङ्गमुक्ताः शरगणाः कंकबर्हिणवाससः ।
तैलाक्तानतपर्वाणः स्वर्णपुंखा अयोमुखाः । एकैकस्मिन्दशदश भटे चाश्वे शतंशतम् ॥ ३६ ॥
रथेरथे च साहस्रमयुतं च गजेगजे । अदृश्यन्त परानीके तदद्भुतमिवाभवत् ॥ ३७ ॥
रथातैरर्द्यमानेषु चतुरंगेषु मागधः । रथेन क्रोडचिह्नेन बलभद्रमुपाद्रवत् ॥ ३८ ॥

सपूर्ववैरं नृपतिः स्मरन् रुषारथं महाकांचन तालकूबरम् ।
आलक्ष्य दूरादधिगम्यरंहसा जरासुतः प्राह हलायुधं गदी ॥ ३९ ॥
आदत्स्वं ते मुसलं राम तूर्णं येनाहितानिच्छसि जेतुमाहवे ।
बलं च बाह्वोस्तत्र दर्शयाशुभे यावद्गदां न प्रहराम्यहं त्वयि ॥ ४० ॥
इत्येवमुक्तो मगधेश्वरेण संकर्षणो मर्पणविह्वलेक्षणः ।
आदाय घोरं मुसलं तडित्प्रभं दण्डं यथा सूर्यसुतो युगक्षये ॥ ४१ ॥
आवर्त्तयित्वा मुसलं हलायुधः सहस्रकृत्वो रिपुदर्पहारिणम् ।
धूमांकुरोद्गीर्णमाशु तस्मै चिक्षेप राजन्ध्यनदद्धरिर्यथा ॥ ४२ ॥

रामबाहुविमुक्तेन मुसलेन जरासुतः । साश्वसूते रथे क्षुब्धे क्षणेन व्यंसितः स्वयम् ॥ ४३ ॥
ततः कालायसीं गुर्वीं गिरिकूटोपमां गदाम् । विभ्रद्गुर्वी पदा पृथ्वीं चालयन्नभ्यगाद्बलम् ॥ ४४ ॥
तमापतन्तमालोक्य विरथं रोहिणीसुतः । तमेवाभ्यद्रवत्पद्भ्यां विसृज्य स्यन्दनं रणे ॥ ४५ ॥
पश्यतां सर्वभूतानां मागधः क्रोधविह्वलः ।
आवर्त्तयन्गदां गुर्वीमयःसारमयीं दृढाम् । अभ्येत्य गदयारामं प्रजहार ननाद च ॥ ४६ ॥
तां गदां पतितां वक्षस्यश्मकुट्टनिभां दृढाम् । वामेन जगृहे रामः स्वहस्तेन कुरूद्वह ॥ ४७ ॥
विसृज्य सगदां तूर्णमुरस्याहत्य मागधम् । जग्राहाश्लिष्य बलिनं बलवान् रोहिणीसुतः ॥ ४८ ॥
बबन्ध पद्भ्यां जठरं मागधस्य हलायुधः । चकार कुक्षौ तत्कंठं ततस्तौ पेततुर्भुवि ॥ ४९ ॥
तयोर्निपतितो राजन्नुपर्यासीद्धलायुधः । तं मागधस्य क्षणेनाधश्चकारामितविक्रमः ॥ ५० ॥
तत उत्थाय तौ वीरौ क्रोधसंरक्तलोचनौ । भूयो जग्राहतुर्घोरौ मत्तौ द्वाविव कुंजरौ ॥ ५१ ॥
ताबुभौ परमक्रुद्धौ परस्परवधैषिणौ । उरसोरःसमाहत्य भीमौ च कृषतूरणे ॥ ५२ ॥
एवंधनुःशतशतं तावाकृष्यपरस्परम् । निकटस्थान् द्रुमान् शैलांश्चूर्णयामासतुर्नृप ॥ ५३ ॥
तं विसृज्य जरासंधो गदामादाय दुर्मदः ।
उदतिष्ठदमेयात्मा रामोऽपि स महाबलः । क्षणादादत्तमुसलं प्रहर्तुमुपचक्रमे ॥ ५४ ॥

तं कामपालो मुसलेन मूर्ध्नि जत्रुण्यंसे भुजयोर्नाभिदेशे ।
ऊरौ च जानौ जठरे च वक्षस्यनेकशो वै प्रजाहार युद्धे ॥ ५५ ॥
तं मागधी वक्षसि कंधरे च मुखे ललाटे चुबुके तथांऽसे ।
नाभौ नितंबे च तथैव पार्श्वे समं समानीप्रजहारराामम् ॥ ५६ ॥

एवं प्रहरतोस्तत्र राममागधयोर्मृधे । राजानो रणसंविग्ना बभूबुर्भृशपीडिताः ॥ ५७ ॥
क्रमेण ते विमनसो निवृत्तकदनोद्यमाः । आसन्नासन्ननिधनं मन्वानामागधेश्वरम् ॥ ५८ ॥

सात्यकिस्तु महातेजाः संगरे बाणमंत्रिणा । युध्यमानस्त्रिभिर्वाणैः कुंभाण्डेन समर्दितः ॥ ५९ ॥
सोऽतिविद्धो महाबाहुः क्रुद्धः सर्प इव श्वसन् । आददे पंचनाराचान्कुभांडं हन्तुमाहवे ॥ ६० ॥
ततो हाहारवो जज्ञे सेनायां दैत्यमंत्रिणः । सात्यकिस्तं महाबाहुराकृष्याकर्णमाशुगैः ॥ ६१ ॥
विव्याध कुरु शार्दूल कुंभांडं बाणमंत्रिणम् । नाभौ कंठे ललाटे च हृदि मूर्ध्न्यपि दानवम् ॥ ६२ ॥
अभिविद्धो रथोपस्थे निषसाद विचेतनः ।
तं विचेतनमालोक्य दुर्मनास्तस्य सारथिः । अपोवाहरणात्तूर्णं रथेन भरतर्षभ ॥ ६३ ॥
कूपकर्णस्तु दैतेयः प्रसक्तः कृतवर्मणा ।
गतं कुंभांडमालोक्य प्राप्तं च प्राणसंशयम् । विसृज्य कृतवर्माणमपायात्समरांगणात् ॥ ६४ ॥
तौ विसृज्य रणं दैत्यावनापृच्छ्य च भूपतिम् ।
अविसृष्टौ मागधेन हतशेषबलान्वितौ । दैत्यौ तेनैव मार्गेण जग्मतुः शोणितं पुरम् ॥ ६५ ॥

इति वीजयध्वजीयपाठे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

—★★★—

विजयध्वजीयपाठे द्विपञ्चाशत्तमोऽध्यायः

श्रीशुक उवाच –

बाणसेनां गतां दृष्ट्वा शस्त्रौघेन भृशार्दिताः । राजपुत्रा विमनसो बभूवुर्नृपसत्तम ॥ १ ॥
गतां च दानवीं सेनां श्रांतांश्च धरणीपतीन् । दृष्ट्वा कृष्णं च युध्यन्तं रामस्य ववृधे बलम् ॥ २ ॥
स मागधं गृहीत्वाजौ मौलौवामेन पाणिना । प्रहर्तुमैच्छच्छिरसि मुसलेन हलायुधः ॥ ३ ॥

ततोंऽतरिक्षे घनघोषघर्घरां शुश्राव वाणीं विशदाशरीरिणीम् ।
न रामवध्यो भवता जरासुतः सुखी निवर्त्तस्वरणादितिस्फुटम् ॥ ४ ॥

वचस्तदाकर्ण्य हलायुधो बली विसृज्य चास्थाय रथं रणांगणात् ।
न्यवर्तत ब्रह्मर्षिसिद्धसंघैरभिष्टुतो मागधसूतबन्दिभिः ॥ ५ ॥

जरासुतः संप्रति नम्रकन्धरो नृपैश्च युद्धाभिजितैः समन्वितः ।
हतावशिष्टाल्पबलेन संवृतो निवृत्तयुद्धः प्रययौ स्वकं पुरम् ॥ ६ ॥

श्रीशुक उवाच—

गोविंदस्तु महातेजाः सपत्नाञ्छरसंचयैः । आच्छाद्य भूपान्विद्राव्य हत्वा च सुबहून्रणे ॥ ७ ॥
संस्तूयमानः संतुष्टैः सूतमागधवंदिभिः । ब्राह्मणैश्च महाविद्यैः स्तोत्रं कुर्वद्भिरुच्चकैः ॥ ८ ॥
अन्वीयमानो भगवान्प्राविशन्मथुरां पुरीम् । हृष्टपुष्टजनाकीर्णां तुङ्गप्राकारतोरणाम् ॥ ९ ॥
चलत्कदलिकोपेतां दीपांकुरविराजिताम् । प्रविशन्राजमार्गेण स्त्रीभिः प्रासादसस्थितैः ॥ १० ॥
पुष्पैश्च लाजांजलिभि फार्यमाणो व्यराजत । उपायनानि दिव्यानि पुष्पस्रगनुलेपनान् ॥ ११ ॥
प्रियंकरा माधवाभ्यामुपजह्रु पुरौकसः । एवं स राजमार्गेण गत्वा यादवसत्तमः ॥ १२ ॥
सभां प्रविश्य विपुलामुपविश्य वरासने । रामेण सहितो वीरः शैनेयेन च धीमता ॥ १३ ॥
पूजितो यदुभिर्विप्रैर्दिवि शक्र इवामरैः । तत्रासीनैर्बुद्धिमद्भिर्यदुवृद्धैर्महात्यभिः ॥ १४ ॥
उग्रसेनोद्धवमुखैरक्रूरप्रमुखैर्हरिः । समाभाष्याभ्याभ्यनुज्ञातः संकर्षणसहायवान् ॥ १५ ॥
द्रष्टुकामो महादुर्गं गोमन्तं पर्वत्तोत्तमम् । निर्गम्य मथुरां प्रातर्दक्षिणाऽभिमुखो ययौ ॥ १६ ॥
सरामानुगतः श्रीमानुत्तीर्य यमुनां हरिः । देशान्बहूनतिक्रम्य पर्वतान्सरितो गिरौ ॥ १७ ॥
गच्छन्क्वचिद्वनोद्देशे वृक्षमूलनिवासितम् । ददर्श कंचन मुनिं जटामण्डलमण्डितम् ॥ १८ ॥
चीरकृष्णाजिनधरं कमण्डलुविराजितम् । माधवौ समुपाविष्टं तेजसा भास्करोपमम् ॥ १९ ॥
फलमूलकृताहारं वृतं शिष्यशतैर्मुनिम् । दृष्ट्वा परमसंतुष्टौ रामकृष्णौ जगत्पती ॥ २० ॥
प्रणामं च क्रतुर्वीरौ यथान्यायमतन्द्रितौ । इदं चोवाच भगवान्कृष्णस्तं मुनिपुंगवम् ॥ २१ ॥
नभस्तेभार्गव श्रीमन्जामदग्न्य तपोधन । रामकृष्णौ स्मृतावावां क्वचित्ते श्रवणं गतौ ॥ २२ ॥

इत्युक्तस्तेन धर्मात्मा वासुदेवेन भार्गवः । निरीक्ष्य माधवौ प्राह प्रीत्युत्फुल्लमुखेक्षणः ॥ २३ ॥
स्वागतं ते यदुश्रेष्ठ साग्रजाय महात्मने । जाने त्वां यदुषूत्पन्नं भगवन्तमधोक्षजम् ॥ २४ ॥
कार्याणां कारणं पूर्वं जगतामादिपूरुषम् । नमस्ते पुंडरीकाक्ष विश्वलोकैककारण ॥ २५ ॥
किमर्थमिह संप्राप्तौ भवन्तौ विश्ववन्दितौ । इत्युक्तौ जामदग्न्येन प्राहतू रामकेशवौ ॥ २६ ॥
गोमन्तं द्रष्टुमिच्छावो दुर्गहेतोरिह प्रभो । तदाकर्ण्याब्रवीद्रामो जामदग्न्यो जनार्दनम् ॥ २७ ॥
एवमस्तु महावाहो गोमन्तं गच्छ साग्रजः । करवीरपुरं नाम तन्मूले परिपालितम् ॥ २८ ॥
श्रृगालवासुदेवेन स युवां न सहिष्यति । तं हत्वा समरे शैलं गोमन्तं साध्ववाप्स्यथ ॥ २९ ॥
इत्युक्तौ तेन रामेण जामदग्न्येन माधवौ । तमनुज्ञाप्य सर्वत्र जग्मतुर्दक्षिणामुखौ ॥ ३० ॥
तौ तथा यदुशार्दूलौ गच्छन्तौ दक्षिणापथम् । ददर्शतुश्च गोमन्तमभ्रंकषमहाद्रुमम् ॥ ३१ ॥
करवीरपुरं चैव तन्मूले तुंगतोरणम् । दृष्ट्वा विचित्रप्राकारं हर्म्यप्रासादगोपुरम् ॥ ३२ ॥
शंखमाध्मापयामास शंखचक्रगदाधरः । तस्य शंखध्वनि श्रुत्वा बभूव क्रोधविह्वलः ॥ ३३ ॥
श्रृगालो वासुदेवाख्यः प्रत्यगाद्यदुनन्दनौ । सोऽभ्येत्य बहुपादाति तुरंगरथकुञ्जरः ॥ ३४ ॥
अभ्यवर्षच्छरौघेण छादयन्निव माधवौ । तदनीकमनाधृष्यं दृष्ट्वा यादवसत्तमौ ॥ ३५ ॥
योधयामास तुर्वीरौ द्वावेवाजौ पदातिनौ । सैन्यं च बाणपूगेन व्यथितं भृशविह्वलम् ॥ ३६ ॥
दृष्ट्वा श्रृगालभूपालस्तावधावदमर्षणः ।
तमायान्तमभिप्रेक्ष्य रथिनं धृतकार्मुकम् । न्यवारयद्वासुदेवो वेलेव वरुणालयम् ॥ ३७ ॥
तावुभौ परमक्रुद्धौ वासुदेवौ महाबलौ । युयुधाते तथाऽन्योन्यमन्योऽन्यवधकांक्षिणौ ॥ ३८ ॥
स तथा विद्यमानस्य वासुदेवस्य संगरे । शिरो जहार गोविन्दः क्षणेन मुकुटोज्ज्वलम् ॥ ३९ ॥
ततस्तत्सैनिकाः सर्वे हतशेषाः कुरूद्वह । कृष्णेन स्वामिनि हते दुद्रुबुः सर्वतो दिशम् ॥ ४० ॥
ततस्तौ रामगोविन्दौ करवीरपुरं महत् । प्रविश्य पूजितौ विप्रैर्वणिग्भिश्च यथाप्रियः ॥ ४१ ॥
तद्गजाश्वरथानीककोशादिधनसंचयम् । मधुरां प्रेषयामास तदीयैर्भृत्यपुरुषैः ॥ ४२ ॥

इति श्रीविजयध्वजीयपाठे द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

विजयध्वजीयपाठे त्रिपञ्चाशत्तमोऽध्यायः

रामकृष्णयोर्गोमन्तपर्वतारोहणम् ॥ १ ॥ अत्रान्तरे महाबलिना श्वेतद्वीपं गत्वा भगवतः किरीटहरणम् ॥ २ ॥ गरुडेन तं जित्वा किरीटमादाय गच्छता मार्गे गोमन्ते स्थितस्य श्रीकृष्णस्य शिरसि तत्किरीटस्थापनम् ॥ ३ ॥ ततो रामकृष्णयोर्मधुरागमनम् ॥ ४ ॥ पुनर्युद्धायागतस्य जरासन्धस्य पराजयः ॥ ५ ॥

श्रीशुक उवाच—

गोमन्तं पर्वतश्रेष्ठं तुंगद्रुमलतान्वितम् । सालतालतमालाढ्यं प्रियालाशोकशोभितम् ॥ १ ॥
कदंबर्निहितालपूगपुन्नागशोभितम । आरुह्य कदलीखण्डमण्डितं मत्तकोकिलम् ॥ २ ॥
भ्रमद्भ्रमरसंघातप्लवंगाकपितद्रुमम् । फलभारनतैः स्कन्धैर्नारिकेलैर्विराजितम् ॥ ३ ॥
बहुप्रस्रवणोपेतं सुच्छायं निर्मलोदकम् । रम्यन्द दृशतुर्वीरौ प्रदेशं रामकेशवौ ॥ ४ ॥
तत्र प्रवर्षणं नाम श्रृङ्गं पर्वतमूर्धनि । अवापतुर्यत्र मेघा नित्यं वर्षंत्यविक्लवाः ॥ ५ ॥
तत्रारुह्य यदुश्रेष्ठौ पश्यन्तौ हि दिशोदश । रममाणौ यथाकाममूषतुः पर्वतोत्तमे ॥ ६ ॥
एतस्मिन्नेवकाले तु क्षीरोदे सागरोत्तमे । निवासे देवदेवस्य शंखचक्रगदाभृतः ॥ ७ ॥

उपासीनो महाबाहुः श्रीमान्वैरोचनो बलिः । जहार देवदेवस्य किरीटं रत्नचित्रितम् ॥ ८ ॥
इन्द्रनीलसहस्राढ्यं गोमेदकशताचितम् । पद्मरागमहानीलमुक्ताफलविराजितम् ॥ ९ ॥
पुष्परागप्रबालाढ्यं दिव्यकांचननिर्मितम् ।
हृतं दानववीरेण विदित्वा पुरपालकः । तमन्वधावत्त्वरितं वैनतेयो विहंगराट् ॥ १० ॥
तमंतरेसमासाद्य दानवेन्द्र दुरासदम् । कृत्वा युद्धं महाघोरं जित्वा दानवपुंगवम् ॥ ११ ॥
गृहीत्वा रत्ननिचयं किरीटं भास्करोपमम् । आगच्छन्ददृशे देवं देवकीनन्दनं हरिम् ॥ १२ ॥
वसन्तं साग्रजं रम्ये गोमन्ते पर्वतोत्तमे ।
तस्य मूर्ध्नि निधायाशु किरीटं दिव्यभूषणम् । प्रणम्य पादयोर्मूर्ध्ना स्तोतुं समुपचक्रमे ॥ १३ ॥

गरुड उवाच—

नमोनमः कारणपूरुषाय नारायणायाखिलवल्लभाय ।
सुरारिसंहारणकारणाय नारायणायाखिलकर्मसाक्षिणे ॥ १४ ॥
हिरण्यगर्भत्वमुपेत्य मूले सृजस्यशेषं भुवनं स एव ।
नारायणात्मन्परिपासि भूयो जहार चान्ते भगवन्शिवात्मन् ॥ १५ ॥
तं त्वा यदोर्वंशकरं सुरेशं जानेऽवतीर्णं भुवने वृषाकपिम् ।
अहं हि भृत्यस्तव वैनतेयो ब्रूहि क्रियां किं करवाणि देव ॥ १६ ॥

श्रीशुक उवाच—

इत्युक्त्वा देवदेवेशं प्रणिपत्य विहंगराट् । जानुनी धरणीं कृत्वा तस्थौ प्रांजलिरग्रतः ॥ १७ ॥
तं दृष्ट्वा यादवश्रेष्ठो गरुडं पक्षिपुंगवम् । प्रीत्युत्फुल्लमुखो दोर्भ्यां पस्पर्शाङ्गन्तदुत्तमम् ॥ १८ ॥
गच्छ भद्र यथाकाममेहि काले मया स्मृतः । इत्युक्त्वा तं विसृज्योभावीश्वरौ रामकेशवौ ॥ १९ ॥
फलमूलकृताहारौ पीतनिर्झरवारिणौ । अवरुह्य गिरेः शृङ्गात्करवीरपुरं गतौ ॥ २० ॥
तत्र तौ चतुरो मासानुषित्वा भरतर्षभ । महत्या सेनया सार्धं जग्मतुर्मधुरां पुरीम् ॥ २१ ॥
शृगालं निहतं श्रुत्वा मागधः क्रोधविह्वलः । आजगाम कुरुश्रेष्ठ महत्या सेनया वृतः ॥ २२ ॥
तेन सार्धमभूद्युद्धं ससाहं रामकृष्णयोः । तदा पराजितो युद्धे मागधो बहुसैनिकः ॥ २३ ॥
जगाम मगधानेव बहुभिः क्षत्रियैः सह ।
रामकृष्णौ च धर्मज्ञौ सूतमागधबन्दिभिः । स्तूयमानौ विविशतुः सानुगौ मधुरां पुरीम् ॥ २४ ॥

नमोनम इति पुनरुक्तिरादरार्था पुरुषायेत्युक्ते जीवायेति शङ्कास्यात् अतस्तन्निरासार्थं कारणेति "कारणं बन्धमोक्षयोः" इति श्रुतेः । जीवस्यापि कारणत्वप्रतीतेर्निस्तुषत्वेन शङ्कानिवृत्तये नारायणायेति अयं शब्दो देवदत्तादिशब्दवत्साङ्केतिको न भवति किन्तु गुणनिबद्ध इति भावेनाह—अखिलेति । न तर्हि शौर्यादिगुणयोगोऽस्येत्यत्राह—सुरारिराक्षसवत्संमारीचेन्न कोप्येनमाश्रयतीत्यत्राह–नारायणेति । नारो नरसमुदायस्तदाश्रयो नारायणः तस्मै । ननु, सर्वाश्रयत्वं राजवद्भमिस्यत्वेनोतान्तःस्थत्वेनाहोस्विद्वायुवदुभयरूपेण ? नाद्यः । "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतिव्याकोपात् । न द्वितीयः कर्मभोगप्राप्तेः । न तृतीयः अखण्डात्मनो द्वितीयत्वानुपपत्तेरिति तत्राह—अखिलेति ।१४। सृष्टिसंहारयोश्चतुर्मुखपञ्चमुखहेतुत्वोक्तेस्याखण्डहेतुत्वं कथमिति तत्राह—हिरण्यगर्भत्वमिति । मूले आदिकाले हिरण्यगर्भं सृष्ट्वा तदन्तर्यामित्वेन तन्नामवाच्यत्वमुपेत्य भूयः पश्चान्नरायणान्मन्नारयणनामपरमात्मन् पुनः शिवात्मानं सृष्ट्वा तदन्तर्यामित्वेन तन्नाम आच्यं तदुक्तं "ब्रह्मस्थो ब्रह्मनामासौ रुद्रस्थो रुद्रनामकः" इत्यादि ॥ १५ ॥ एवं विधो विष्णुस्त्वमित्याह—तं त्वेति । भुवने प्रसिद्धं वृषाकपिं विष्णुभवतीर्णं तत्सृष्ट्यादिहेतुं च जान इत्यन्वयः । "विष्णौ रुद्रे वृषाकपि" इत्यतो यदोर्विशकरमित्यादिक्रियाविशेषणं कर्तव्यं धर्मप्रेरकत्वेन फलवर्षणाद्वृषः अकस्यासुखस्य पातृत्वादकपि' यद्वा अकाद्दुःखात् शरणागतं जगत्पातीति वृषाकपिरिति ॥ १६–१७ ॥ तस्य उत्तममङ्गम् उत्तमाङ्गं शिर इत्यर्थः ॥ १८–२५ ॥

(एतावत्पर्यन्तं विजयध्वजतीर्थीयपठित श्लोकाः)

कर्वमक्षमा

अन्वयः—विज्वरैः, मुदितात्मभिः, माथुरैः, उपसङ्गम्य, सूतमागधवन्दिभिः, उपगीयमानविजयः, पुरम्, विवेश ॥३७॥ प्रभौ, पुरं, प्रविशति, शङ्खदुन्दुभयः, अनेकशः, भेरीतूर्याणि वीणावेणुमृदङ्गानि, नेदुः ॥ ३८ ॥ सिक्तमार्गाम्, हृष्टजनाम्, पतकाभिः, अलङ्कृताम्, ब्रह्मघोषेण, निर्घुष्टाम्, कौतुकावद्धतोरणाम्, पुरीम्, विवेश ॥ ३९ ॥ प्रीत्युत्कलितलोचनैः, नारीभिः, सस्नेहं, निरीक्षमाणः, दध्यक्षताङ्कुरैः, निचीयमानः, प्रभुः, आयोधनगतम्, अनन्तम्, वित्तम्, वीरभूषणम्, आहृतम्, तत्, सर्वम्, यदुराजाय, प्रादिशत् ॥ ४०–४१ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रत्युद्यातैर्मथुरावासिभिर्जनैः उपसंगम्य मिलित्वा ॥ ३७ ॥ तदा प्रभौ पुरं प्रविशति सति शंखादयो नेदुः ॥ ३८ ॥ कथंभूतां पुरं तदाह । सिक्तमार्गामिति । ब्रह्मघोषेण वेदघोषेण निर्घुष्टां निनादिताम् । कौतुकेनोत्सवेन आ सर्वता बद्धानि तोरणानि यस्यां ताम् ॥ ३९ ॥ निचीयमानो विकीर्यमाणः । प्रविवेशेति विपरिणताऽनुषंगः ॥ ४० ॥ आयोधनं रणभूमिस्तत्रस्थं वित्तम् । वीराणां भूषणम् ॥ ४१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रत्युद्यातैरानयनार्थं सम्मुखमागतैः ॥ ३७ ॥ प्रभौ सर्वेश्वरे श्रीकृष्णे । शङ्खेति युग्मकम् । अनेकश इत्यस्य सर्वैरेवान्वयः ॥ ३८ ॥ तोरणानि वन्दनमालाः । हृष्टेति दिव्यस्त्रादिधारणं सूचयति । कौतुकेनेति तृतीयालुक्छान्दसः । अतः सर्वत्रान्वेति ॥ ३९ ॥ अंकुरैर्दूर्वांकुरैः । विपरिणतस्य शत्रन्तविशेर्लिडन्तत्वेन विपरिणतस्य । अनुषंगः पृष्ठपाठत आनयनम् । उत्कलितानि प्रफुल्लानि । कीदृशस्सन् प्रविवेश तत्राह—निचीयेति । प्रीतया हर्षेणोत्कलितैर्विकसितैर्लोचनैः कृत्वा । अत्र विपरिणतानुषङ्ग इति 'पुरं प्रविशति प्रभौ' इति पूर्वोक्तशतृप्रत्ययस्य सप्तम्याश्च लिट्प्रत्वप्रथमत्वेन विपरिणामात् । यद्वा–निचीयमान इति परेण युग्मकम् ॥ ४० ॥ यदुराजायोग्रसेनाय । वीराणां भूषणं गात्रालंकरणम्, वेषामतिबहुलतयानन्तं मूल्येनाप्यनिरूप्यमित्यर्थः । आहृतं जनैरानायितम् । यदुराजाय स्वयमेव तथात्वेन स्थापितायोग्रसेनाय । प्रकर्षेण राजयोग्यादरपूर्वकमदिशदुपहृतवान् । यतः प्रभुः स्वयं तद्वैभवानपेक्षः, स्वमर्यादापालनपरश्चेत्यर्थः ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कुमुन्दोऽपि माथुरैः सहाभिमुख्येन सङ्गम्य ययाविति पूर्वेणैवान्वयः । मधुपुरीमिति शेषः । तादृशवर्णितप्रावीण्यात् परास्त्रादिभिर्न क्षतमेव बलं यस्य सः जयजयेत्याद्यनुमोदितः ॥ ३७ ॥ शङ्खेति युग्मकम् । अनेकश इत्यस्य सर्वैरप्यन्वयः ॥ ३८ ॥ हृष्टेति । दिव्यवस्त्रादिधारणञ्च सूचयति—कौतुकेनेत्यर्थः । तृतीयालुक् छान्दसः अतः सर्वत्रापि योज्यम् ॥ ३९ ॥ कीदृशः सन् प्रविवेश ? तत्राह—निचोयेति । प्रीत्या हर्षेण उत्कलितैर्विकसितैर्लोचनैः कृत्वा अत्र टीकायां विपरिणतानुषङ्ग इति पुरं प्रविशति प्रभाविति पूर्वोक्तशतृप्रत्ययस्य सप्तम्याश्च विपरिणामात् । यद्वा, निचीयमानः इति परेण युग्मकम् ॥ ४० ॥ वीराणां भूषणं गात्रालङ्करणम् अत एवानन्तं तेषामतिबाहुल्याद्गणनया महासम्पन्नत्वान्मूल्येन चानिरूप्यमित्यर्थः । आहृतं जनैरानायितं यदुराजाय स्वयमेव तथा स्थापितायोग्रसेनायैव प्रकर्षेण राजयोग्यादरपूर्वकमदिशत् उपहृतवान् यतः प्रभुः स्वयं तद्वैभवानपेक्षः स्वमर्यादापालनपरश्चेत्यर्थः ॥ ४१ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नेदुः स्वयमेवावाद्यन्त, अनेक इत्यस्य सर्व्वैरप्यन्वयः । प्रभौ जगदीश्वरे श्रीमथुरानाथे वा ॥ ३७ ॥ अयं महोत्सवेन स्वयं नदने हेतुः—हृष्टा जना विप्रादयः सर्वलोका यस्यामिति ॥ ३८ ॥ पौराणां दिव्यवस्त्रालंकारपरिधानादिकं सूचयति । प्रीत्या हर्षेणोत्कलितैरुत्फुल्लैर्लोचनैः कृत्वा ॥ ३९ ॥ वीरभूषणमिति वित्तेनैव राज्ञां शोभासिद्धेः, यद्वा, वीराणां भूषणञ्च गात्रालंकारम्, जातावेकत्वम्, आहृतं जनैरानीतं सत्, यदुराजाय उग्रसेनाय तदर्थं तस्मिन् समर्पयितुं प्रकर्षेणानन्यस्वामित्वादिना आदिशत्, यतः प्रभुस्तस्यापीश्वरः, तदिति तेन तस्यैव तत्सिद्धेरिति भावः । यद्वा, स्वप्रतिज्ञापालनसमर्थः, अन्यथा (भा० १०।४५।१४) 'मयि भृत्य उपासीने' इत्यादि-स्वोक्त-व्यभिचारः स्यादिति ॥ ४० ॥ एवमित्यनेन प्रतिवारं पूर्ववत् त्रयोविंशत्यक्षौहिण्यो ज्ञेयाः । अन्यत्तैर्व्याख्यातम्, यद्वा, तावतीत्यत्र पुंवद्भावाभाव आर्षः, केचिद्वैयाकरणा अत्र पुम्वद्भावो न स्यादित्याहुः, तावत्यस्त्रयोविंशति संख्या अक्षौहिण्यो बलं सैन्यं ताभिर्वा युद्धसामर्थ्यं यस्य सः । कृष्णेन साक्षाद्भगवता पालितैरिति पूर्ववदक्षतत्वादिकं बोधयति ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

शङ्खेति । प्रभौ भगवति पुरं प्रविशति सति शङ्खादयो नदुर्दध्वनुः भेर्यश्च तूर्याणि च तानि परिवल्लिङ्गवचनाः तथा वीणावेणुमृदङ्गानीति च ॥ ३८ ॥ पुरं विशिनष्टि–सिक्तमार्गामिति । सिक्ताश्चन्दनाम्बुभिर्मार्गाः यस्यां हृष्टा जना यस्यां तां

ब्रह्मघोषेण वेदपाठघोषेण निनादितां तथा कौतुकेन त्सवेन आ सर्वतो बद्धानि तोरणानि यस्यां ताम् ॥ ३९ ॥ निचीयमान इति । मालामर्हन्तीति माल्यानि कुसुमानि तत्प्रभृतिभिः निचीयमानः विकीर्य्यमाणः प्रीत्योत्कण्ठितानि भरितानि लोचनानि येषां तैर्जनैरिति शेषः । स्नेहेन सहितं यथा तथानिरीक्ष्यमाणो मुकुन्दः प्रविवेशेति विपरिणतेनान्वयः ॥ ४० ॥ ततः किं कृतवान् ? तदाह—आयोधनगतमिति । आयोधनं रणभूमिः तत्र आसमन्ताद्गतं स्थितं यत्तत्सर्वमनन्तमानीतं वीराणां भूषणं यदुराजाय उग्रसेनाय प्रादिशत्समर्पितवान् ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पुरं प्रविशति, सति दुन्दुभ्यादयो नेदुरित्यन्वयः ॥ ३८ ॥ कौतुकाभिर्दण्डमाणभिराबद्धतोरणाम् ॥ ३९ ॥ निचीयमानः राशीक्रियमाणः ॥ ४० ॥ यदुराजाय उग्रसेनाय ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुरं विशिनष्टि—सिक्तमार्गामित्यादिना ॥ ३९ ॥ निचीयमानः विकीर्यमाणः प्रभुः प्राविशदिति विपरिणतानुषङ्ग इति श्रीस्वामिचरणाः । यद्वा, प्रादिशदिति परेणान्वयः ॥ ४० ॥ आयोधनं युद्धभूमिस्तत्र पतितं वीराणां भूषणं गात्रलयम् ॥ ४१ ॥

गूढार्थदीपिनी

शंखेति युग्मम् । ब्रह्म वेदः । कौतुकेनोत्सवेन ॥ ३८–३९ ॥ निचीयमानो विकीर्यमाणो भगवान् तत्सर्वं वित्तमुग्रसेनाय प्रादिशत् ममार्पितवानित्युत्तरेणान्वयः । आयोधनं रणभूमि । उत्कलितानि विकसितानि ॥ ४०–४१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अभिसङ्गम्य मिलित्वा ॥ ३७ ॥ प्रभौ भगवति पुरं प्रविशति । शङ्खादयो नेदुः दध्वनुः ॥ ३८ ॥ कथम्भूतं पुरमित्याकाङ्क्षायां पुरं विशिनष्टि—सिक्तमार्गामित्यादिना । कौतुकेनोत्सवेन आ सर्वतो बद्धानि तोरणानि यस्यां ताम् ॥ ३९ ॥ मालामर्हन्तीति माल्यानि कुसुमानि तदादिभिर्निचीयमान अवकीर्यमाणः प्रीत्या उत्कलितानि लोचनानि येषां तैर्जनैरिति शेषः । सस्नेहेन सहितं यथा भवति तथा निरीक्ष्यमाणः आयोधनगतं रणभूमिगतं वीराणां भूषणमाहृतम् । सर्वं वित्तं यदुराजाय प्रादिशत् दत्तवानिति द्वयोरन्वयः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

महाप्राणं बहुबलं यथा तथा ॥ ३७ ॥ धर्मज्ञ सारथिधर्ममर्मज्ञ । आवृत्या हयधर्मज्ञेति वा । पशुपालेन शिशुपालपुर आलपनं मागधादपि न बलिष्ठतया किन्तु स्वेनैवान्ततो गत्वा संहार्य त्वं निमित्तीकृत्येति बोध्यम् तौ यत्र वर्तते तत्र रथं वाहय ।३८। परवीरहा गोविन्दः सिंहनादं व्यनदच्चकार ॥ ३९ ॥ ततोऽद्वन्द्वशङ्खद्वन्द्वशब्दश्रवणसमनन्तरं सवेपथुर्वेपथुना कम्पेन सहिता सा चिन्ता परसैन्यानां ह्यभूत् ॥ ४० ॥ अल्पीयसा बलेनेत्युक्तं तत्प्रकारं जल्पति । चतुर्भिर्वसुदेवादिभिरष्टान्कलिङ्गादिकानां तदद्भुतमिवाभवदिति ॥ ४१ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो मानुषैरप्यनुमोदित इत्याह माथुरैरिति । दुर्गमुद्घाट्य सर्वे समागताः । यतो विज्वराः मरणशङ्कारहिताः । ज्वरो हि समागत एव मरणशङ्कामुत्पादयति । तेषां स एव ज्वरः प्राप्त इति । कालदेहादिधर्मास्तु पूर्वमेव निवारिताः । किञ्च, बहिर्बुद्ध्यापि मुदितात्मानो जाताः । ततः सूतमागधबन्दिभिः उपगीयमानविजयो जातः । शङ्खदुन्दुभयश्च नेदुः । ततः शनैः गमनसूचनाय । वीणावेणुमृदङ्गान्यपि वादितानि । यतः प्रभुः पुरं प्रविशतीति । लौकिकमेतदिति सूचितम् ॥ ३७–३८ ॥ अन्तःपुरं वर्णयति सिक्तमार्गामितिद्वाभ्याम् । सिक्ताः सर्वे मार्गा यस्याम्, गन्धोदकैः सेकः । हृष्टा जना यस्याम् । पताकाभिः जयलेखाङ्किताभिरलङ्कृतामिति । अधो मध्ये उपरि च शोभा निरूपिता । नितरां घुष्टा ब्रह्मघोषेण वेदपाठेनेति । प्रत्यागाशिषो मन्त्राः प्रवेशे पठनीया इति पुरप्रवेशे तदर्थमेव ब्राह्मणैः ब्रह्मघोषः पठितः । वैश्यानां विशेषचेष्टामाह । कौतुकैराबद्धानि तोरणानि यस्यामिति । सर्वाभिरेव नारीभिः माल्यादिभिः विकीर्यमाणो जातः । दध्यक्षताः विकीर्णाः, यवाङ्कुराश्च । एवं तासां क्रिया भगवति निरूपिता त्रिविधा । ज्ञानमपि तथा निरूपयति निरीक्ष्यमाण इति । स्नेहो बन्धुभावेन । प्रीतिः पुरुषभावेन । उत्कण्ठा कामभावेनेति । एवं त्रिस्वभावैर्लोचनैर्निरीक्ष्यमाणो जातः । स्नेहः पृथक् कृतो लौकिकदोषाभावाय ॥ ४० ॥ ततः प्राप्तधनस्य राजन्येव विनियोगं वदन् स्वस्य तदाज्ञया युद्धादिकरणं सूचयति, तद्दुःखाभावाय, आयोधनगतमिति । आयोधनं युद्धभूमिः, तत्र योधैरानीतं द्रव्यमाभरणादिप्रकारेण । अनन्तं बह्वेव । बहव एव हता इति । अनन्तत्वे हेतुमाह वीरभूषणमिति । यावदाहृतं तत्सर्वं यदुराजाय प्रादिशत् प्रकर्षेण बोधितवान् । रक्षास्थापनादिकं तु स्वकृत्यमेवेति निवेदनमात्रं राज्ञे निरूपितम् । प्रभुत्वात् न सह गतानां यथेष्टं द्रव्यविनियोगः ॥ ४१ ॥

श्रीसुबोधिनी–सारः

हर्षितचित्तैर्विज्वरैः सुखिभिर्माथुरैर्नागरिकैर्जनैरुपसंगम्य मिलित्वा सूतादिभिरुपगीयमानकीर्तिः ॥ ३७ ॥ प्रभौ श्रीकृष्णे पुरं मथुरां प्रविशति सति शंखादयो नेदुः ॥ ३८ ॥ सिक्ता मार्गा यस्यां तां हृष्टा जना यस्यां तां पताकामण्डितां वेदनादेन निर्घुष्टां नादितां कौतुकेनोत्सवेन सर्वतो बद्धानि तोरणानि यस्यां तामिति पुरविशेषणानि ॥ ३९ ॥ पुष्पदध्यक्षतांकुरैः नारीभिः स्त्रीभिः निचीयमानो विकीर्यमाणः सस्नेहं सप्रेम यथा भवति तथा प्रोत्या उत्कलितान्युज्जृंभितानि लोचनानि तैरालोक्यमानः प्रविवेशेति शेषः ॥ ४० ॥ अनन्तमसंख्यातमायोधनं संग्रामस्थानं तत्र गतं वित्तं धनं वीराणां भूषणं च यदाहृतमानीतं तत्सर्वं प्रभुः कृष्णो यदुराजायोग्रसेनायादात् ॥ ४१ ॥

विवरणटिप्पणी

आयोधनमित्यस्याभासे। तद्दुःखाभावायेति। दुःखाभावसूचनायेत्यर्थः। एवं सप्तदशकृत्व इत्यत्र। एक इति। समर इति शेषः। सर्वसाम्यत्वायेति। सर्वैः साम्यं यस्य तादृशत्वाय युद्धस्येति शेषः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पुरीं प्रविशन्तं भगवन्तमेव वर्णयति—शत्रुविनाशात् विज्वरैर्निवृत्ततापैर्मुदितात्मभिः प्रसन्नचित्तैर्मथुरावासिभिरुपसङ्गम्य मिलित्वा सूतादिभिरुपगीयमानो विजयो यस्य सः ॥ ३७ ॥ प्रभौ कृष्णे पुरं प्रविशति सति शङ्खादयो नेदुः ॥ ३८ ॥ पुरं वर्णयति–सिक्ताश्चन्दनाद्यम्बुभिर्मार्गा यस्यां ताम्, हृष्टाः जना यस्यां ताम्, ब्रह्मघोषेण वेदपाठघोषेण निर्घुष्टां निनादिताम्, कौतुकेनोत्सवेन आ सर्वतो बद्धानि तोरणानि यस्यां ताम् ॥ ३९ ॥ पुनर्भगवन्तं वर्णयति—नारीभिः मालामर्हन्तीति माल्यानि कुसुमानि तत्प्रभृतिभिर्निचीयमानः विकीर्यमाणः, प्रीत्या उत्कलितानि उत्फुल्लानि लोचनानि येषां तैर्जनैः सस्नेहं यथा भवति तथा निरीक्ष्यमाणो मुकुन्दः पुरं प्रविवेशेति परिणतेनान्वयः ॥ ४० ॥ आयोधनं रणभूमिः तद्गतं तत्र स्थितं अनन्तमसङ्ख्यातं वित्तं धनम्। तदेव स्पष्टयति—वीराणां भूषणं यत् आहृतं यत् समानीतं तत् सर्वं यदुराजाय उग्रसेनाय प्रभुः श्रीकृष्णः प्रादिशत् समर्पितवान् ॥४१॥

अन्वितार्थप्रकाशिका

शङ्खेति द्वयम्। सिक्ताश्चन्दनाद्यम्बुभिः मार्गा यस्यां तां हृष्टा जना यस्यां तां पताकाभिरलंकृतां ब्रह्मघोषेण वेदपाठघोषेण निर्घुष्टां निनादितां कोतुकेनोत्सवेन आ सर्वतो बद्धानि तोरणानि यस्यां तां पुरं मथुरां प्रभौ श्रीकृष्णे प्रविशति सति अनेकशः अनेकानि शङ्खदुन्दुभयः भेर्यस्तूर्याणि च वीणावेणुमृदङ्गानि च नेदुः ॥ ३८–३९ ॥ निचीयमान इति। नारीभिः कर्त्रीभिः मालामर्हन्ति माल्यानि कुसुमानि तैः दध्यक्षतयवाङ्कुरैश्च करणैर्निचीयमानः विकीर्यमाणः प्रीत्या उत्कलितानि उत्फुल्लानि लोचनानि येषां तैर्जनैः सस्नेहं यथा भवति तथा निरीक्ष्यमाणो मुकुन्दः पुरं प्रविवेशेति शेषः। यद्वा। एवंभूतो मुकुन्दः युद्धलब्धं धनं यदुराजाय प्रादिशदित्युत्तरेणान्वयः ॥ ४० ॥ आयोधनेति। आयोधनं रणभूमिः तद्गतं तत्र पतितम् अनन्तमसंख्यातं वित्तं धनं वीराणां भूवणं गात्रलग्नं च यत् आहृतम् आनीतं तत्सर्बं यदुराजाय उग्रसेनाय प्रभुः श्रीकृष्णः प्रादिशत् समर्पितवान् ॥ ४१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अभिमुखागतैः माथुरैर्मथुराजनैः उपसंगम्य ॥ अभिसंगम्येति पाठे मिलित्वास्वपुरे ययाविति संबन्धनीयम् ॥ ३७ ॥ प्रभौ श्रीकृष्णे पुरं प्रविशति सति शंखादयो नेदुः ॥३८॥ अथ पुरीशोभामाह सिक्तेति ॥ ब्रह्मघोषेण वेशब्देन निर्घुष्टांसुशब्दितां ॥ कौतुकेन महोत्सवेन आसवन्तात् वधानि तोरणांनि यस्यां तां ॥ ३९ ॥ निचीयमानो विकीर्यमाणः प्रीत्यानुत्कलितैः प्रफूल्लर्लोचनैः निरीक्ष्यमाणः सन् पुरीं प्रविष्टः सन् राजगेहं जगामेत्यध्याहार्थं ॥ ४० ॥ आयोधने युद्धभूमौ गतं स्थितं चित्तं वीराणां भूषणमाभरण समूहं आकृतं आनीते। उग्रसेनाय ददौ ॥ ४१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शङ्खेति। प्रभौ श्रीकृष्णभगवति, पुरं प्रविशति सति, अनेकशः शङ्खाश्च दुन्दुभयश्च ते, भेर्यश्च तुर्याणि च तानि, 'परवल्लिङ्गं द्वन्द्व'–इत्यादिना परवल्लिङ्गता। तथा, वीणावेणुमृदङ्गानि च, नेदु. ॥ ३७ ॥ पुरं विशिनष्टि। सिक्तमार्गामिति। सिक्ताश्चन्दनाम्बुभिरुक्षिता मार्गा यस्यां तां, हृष्टा जना यस्यां तां, पताकाभिः, अलंकृतां, ब्रह्मघोषेण वेदपाठघोषेण, निर्घुष्टां निनादितां, कौतुकेनोत्सवेन आ सर्वतो बद्धानि तोरणानि यस्यां ताम् ॥ ३८ ॥ निचीयमान इति। मालामर्हन्तीति माल्यानि कुसुमानि च दधि अक्षताश्च अङ्कुराश्च तैः करणै, नारीभिः कर्तृभिः, निचीयमानो विकीर्यमाणः, प्रीत्या उत्कण्ठितानि प्रेमाश्रुभरितानि लोचनानि येषां तैः, जनैरिति शेषः। सस्नेहं स्नेहसहितं यथा तथा, निरीक्ष्यमाणः मुमुन्दः, प्रविवेशेति विपरिण-

तेनान्वयः ॥ ३९ ॥ ततः किं कृतवांस्तदाह । आयोधनेति । आयोधनं रणभूमिस्तद्गतं, पाठान्तरे तत्रासमन्तात् गतं प्राप्तं, वीरभूषणं वीराणामाभरणात्मकं, अनन्तं, आहृतं, वित्तं आनीय सर्वमपि, तत् यदुराजायोग्रसेनाय, प्रभुः श्रीकृष्णः, प्रादिशत् ॥४०॥ एवमिति । एवमुक्तप्रकारेण, मागधः राजा जरासन्धः, तावत्यः त्रयोविंशतिसंख्याकाः अक्षौहिण्यो बलं सैन्यं यस्य स तथाभूतः सन्, कृष्णपालितैः यदुभिर्यादवैः सह, सप्तदशकृत्वः सप्तदशवारान्, युयुधे ॥ ४१ ॥

कृष्णप्रिया

मागध की विपुल सेना के पराजय से निर्भय बने हुए माथुर जनों के हृदय आनन्दित हो गये थे । तब भगवान् नगर में पधार कर स्वजनों से मिल गये और सूत मागध एवं बन्दी बाण भगवान के विजय गाने लगे ॥ ३७ ॥ जब भगवान् श्रीकृष्ण ने मथुरा पुरी में प्रवेश किया तब नगर में शङ्ख, नगारे, भेरी, तुरही, वीणा, मृदङ्ग, बांसुरी आदि मङ्गल बाजे बजने लगे ॥ ३८ ॥ विजयी भगवान् एवं श्रीबलभद्रजी ने विजय पाकर जल के छिड़काव से सिंचित किए हुए सड़कों एवं राजमार्गों से मण्डित मथुरा जी में प्रवेश किया । नगर के नागरिकों की आनन्दोल्लास भरी चहल-पहल हो रही थी । सम्पूर्ण नगर छोटी-छोटी झंडियों और बड़ी-बड़ी ध्वजाओं से सजाया गया था । विप्रदेवों की वेदध्वनि चारों ओर गूंज रही थी । सारे नगर में आनन्दोत्सव सूचक वंदववार बांध दिये गये थे ॥ ३९ ॥ भगवान् श्रीचन्द्रजी ने जब श्री मथुरा पुरी में प्रवेश किया तब नगर नारियाँ स्नेह सभर नजरों से नाथ को निहार रही थी एवं कुसुम माला दही दूर्वा तण्डुल जौ आदि के अङ्कुरों को भगवान पर वर्षा कर रही थी ॥४०॥ श्रीकृष्ण भगवान् समर भूमि से जो वीरों के आभूषण और अपार धनराशि लाये थे प्रभु ने सह यदुनरेश महाराज उग्रसेन जी के समीप भेज दिया ॥ ४१ ॥

एवं सप्तदशकृत्वस्तावत्यक्षौहिणीबलः[1] । युयुधे मागधो राजा यदुभिः कृष्णपालितैः ॥ ४२ ॥
[2]अक्षिण्वंस्तद्बलं सर्वं [3]वृष्णयः कृष्णतेजसा । हतेषु स्वेष्वनीकेषु त्यक्तोऽयादरिभिर्नृपः ॥ ४३ ॥

कर्दमक्षमा

अन्वयः—एवम्, तावत्यक्षौहिणीबलः, राजा, मागधः, सप्तदशकृत्वः, कृष्णपालितैः, यदुभिः, युयुधे ॥ ४२ ॥ वृष्णयः, कृष्णतेजसा, सर्वम्, तद्, बलम्, अक्षिण्वन्, हतेषु, स्वेषु, अनीकेषु,, अरिभिः, त्यक्तः, नृपः, अयात् ॥ ४३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तावतीति च्छेदः । तावति पराजये वर्तमानेऽप्यक्षौहिण्यो बलं यस्य सः । सप्तदशकृत्वः सप्तदशवारान्युयुधे ॥ ४२ ॥ अक्षिण्वनुक्षयं निन्युः ॥ ४३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवं प्रथमयुद्धवत् । तावति तत्प्रमाणकेऽर्थात्पराजये सति । एवमिति प्रतिवारं त्रयोविंशत्यक्षौहिण्यः, तादृशं युद्धम्, वनगमनागमश्च ज्ञेयः । यद्वा—तावतीत्यत्र पुंवद्भावाभाव आर्षः । तावत्यस्त्रयोविंशतिसंख्या अक्षौहिण्यो बलं सैन्यं ताभिर्वा युद्धसामर्थ्यं यस्य सः कृष्णपालितैरिति पूर्ववदक्षतत्वादि बोध्यते ॥ ४२ ॥ तद्बलं जरासन्धबलम् । अनीकेषु सैन्येषु । अरिभिः कृष्णादिभिः । वृष्णय एव न तु पूर्ववत् कृष्णरामौ, तत्र सात्यक्यादीनां प्राधान्यं क्रमशो ज्ञेयम् । कृष्णतेजसा वह्निना ज्वालानामिव श्रीकृष्णेन समवाय एव तेषां तेजो व्यवर्द्धतेत्यभिप्रायेण, न तु तदभावापेक्षया "नृलाके चाप्रतिद्वन्द्वो वृष्णीञ्छुत्वात्मसम्भितान्" इति वक्ष्यमाणात् । अत एवारिभिर्वृष्णिभिरेव त्यक्तः श्रीकृष्णाभिप्रायेणेति भावः । यद्वारिभिर्हतेषु पूर्ववच्छ्रीभगवता त्यक्तः सन् ॥ ४३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमित्यनेन प्रतिवारं त्रयोविंशत्यक्षौहिण्यो ज्ञेयाः तादृशं युद्धादिकं वनगमनोद्यमश्च अन्यत्तैः । यद्वा तावतीत्यत्र पुम्वद्भावाभाव आर्षः । तावत्यः त्रयोविंशतिसङ्ख्याः अक्षौहिण्यो बलं सैन्यं ताभिर्वा युद्धसामर्थ्यं यस्य सः कृष्णपालितैरिति पूर्ववदक्षतत्वादिकं बोध्यते ॥ ४२ ॥ वृष्णय एव नतु पूर्व्ववत् श्रीकृष्णः श्रीरामो वा नतु तत्र च सात्त्विक्यादीनां प्राधान्यं क्रमशो ज्ञेयम् कृष्णतेजति वह्निना ज्वालानामिव श्रीकृष्णेन समवाय एव तेषां तेजो वर्द्धत इत्यभिप्रागेणैव नतु तदभावापेक्षया "नृलोके चाप्रतिदन्द्वो वृष्णीन् श्रुत्वाऽऽत्मसम्मितान्" इति वक्ष्यमाणात् अत एवारिमिर्बृष्णिभिरेव त्यक्तः श्रीकृष्णाभिप्रायेणेति भावः । किम्वा अरिभिर्हतेषु पूर्व्ववत् । श्रीभगवता त्यक्तः सन् ॥ ४३ ॥

---

१. हिणीर्बलः । २. अक्षिण्वत–विज । ३. बृष्णिभिः ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वृष्णय एव, न तु पूर्व्ववत् श्रीकृष्णो रामो वा, अतएव परिभिर्वृष्णिभिरेव त्यक्तः, किंवा अरिभिर्हतेषु पूर्व्ववत् श्रीभगवता त्यक्तः सन् ॥ ४२ ॥ प्रत्यदृश्यत सहसैवाभिमुखे ददृशे वृष्णिभिः; यद्वा, स्वयमेव प्रत्यक्षोऽभूदित्यर्थः, नारदेन प्रेरित इत्यादौ विशेषः श्रीविष्णुपुराणे (५।२३।१–६)—

'गार्ग्य गोष्ठे द्विजं श्यालः षण्ढ इत्युक्तवान् द्विज । यदूनां सन्निधौ सर्व्वे जहसुः सर्व्वयादवाः ॥
ततः कोपसमविष्टो दक्षिणाब्धिमुपेत्य सः । सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम् ॥
आराधयन् महादेवं सोऽयश्चूर्णमभक्षयत् । ददौ वरञ्च तुष्टोऽस्मै वर्षे द्वादशमे हरः ॥
समाजयामास च तं यवनेशो ह्यनात्मजः । तद्योषित्संगमाच्चास्य पुत्रोऽभूदतिसंप्रभः ॥
तं कालयवनं नाम राष्ट्रे स्वे यवनेश्वरः । अभिषिच्य वनं यातो वज्राग्रकठिनोरसम् ॥
स च वीर्य्यमदोन्मत्तः पृथिव्यां वलिनो नृपान् । पप्रच्छ नारदश्चास्मै कथयामास यादवान् ॥' इति ।

अप्रतिद्वन्द्वः प्रतियोधरहितः स्वतुल्य-हीनः, श्रुत्वा श्रीनारदादेव ॥ ४३–४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमिति । इत्थं पुनः तावत्यः त्रयोविंशतिसङ्ख्याका अक्षौहिण्यो बलं यस्य तथाभूतः सप्तदशवारं कृष्णपालितैर्यदुभिः सह युयुधे ॥ ४२ ॥ अक्षिण्वन्निति कृष्णतेजसा हेतुभूतेन वृष्णया यादवः तस्य जरासन्धस्य बलं सर्वमक्षिण्वन्नाशितवन्तः इत्थं सर्वेष्वनीकेषु हतेषु सत्सु नृपो जरासुतो प्ररिभिः रामादिभिः त्यक्तो जगाम ॥ ४३ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अक्षिण्वत अक्षीयत ॥ ४३–४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तावत्य त्रयोविंशतिसङ्ख्या अक्षौहिण्यो बलं सैन्यं यस्य सः पुंवद्भावाभाव आर्षः ॥ ४२ ॥ अक्षिण्वन् क्षयं निन्युः ॥४३॥

गूढार्थदीपिनी

तावति पराजये वर्तमानेऽपि । सप्तदशकृत्वः सप्तदशवारान् ॥ ४२ ॥ अक्षिण्वन् नाशितवन्तः ॥ ४३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं तावत्यः त्रयोविंशतिसङ्ख्याकाः अक्षौहिण्यो बलं यस्य स पुम्वद्भाव आर्षत्वान्नेति बोध्यम् सप्तदशकृत्वः सप्तदशवारान् युयुधे ॥ ४२ ॥ कृष्णतेजसा वृष्णयः अल्पसङ्ख्याकाः अपि तस्य जरासन्धस्य बलम् अक्षिण्वन् क्षयं निन्युः ॥ ४३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तथा दक्षिणद्वारि उग्रसेनादिभिश्चतुर्भिर्विन्दादिपौण्ड्रकान्तानामष्टानां तथेतरेण राजन्यकटकेन । सैन्येऽपि कटकोऽस्त्रिया-मित्यभिधानम् । गोविन्दस्याध्मातेन शङ्खध्मानेनेन चेतो मनो युद्धे येषां तेषां यदूनां कटनं युद्धम् ॥ ४२ ॥ अपरद्वारि पश्चिमद्वारि सात्यक्यादिभिश्चतुर्भिर्युधामन्वादिसुदक्षिणान्तानां राजसमाजनेतरेण रणः ॥ ४३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमेकप्रकारेण भगवतो जयं निरूप्य जयान्तरेष्वपीमं प्रकारमतिदिशति एवं सप्तदशकृत्व इति । अनेनापि सह सप्तदश । एकः सप्तदशधा आवृत्त इति सर्वसाम्यत्वाय कृत्वसुच्प्रत्ययः । देशदोषात् न विवेक उत्पद्यते इति मागध इत्युक्तम् । सम्पत्तिस्तु राजत्वात् । अन्यत्रापि भगवान् न स्वयं युयुधे । तथा सति लोकप्रतीत्या सर्वदा क्लेश एव भवेत्, किन्तु कृष्णरक्षितैर्यदुभिः सह युयुधे । अत एव च तद्बलमक्षिण्वन् । न केवलं रक्षार्थमेव भगवद्विनियोगः, किन्तु निराकरणार्थमपीत्याह कृष्णतेजसेति ॥ ४२ ॥ पुनः पुनः तस्यापि गमनं वाक्यैरधिकैरावेशेन चेति वक्तुमाह हतेष्विति । यतो नृपः । राज्ये हृते हि स निवृत्तो भवेत् । तद्भगवान् न करोतीति स निवर्तत इत्यर्थः ॥ ४३ ॥

श्रीसुबोधिनी-सारः

तावति पराजये वर्त्तमाने सति एवं प्रकारेण सप्तदशकृत्वेति भूपवारान् अक्षौहिण्यो बलं यस्य स तावत्योऽक्षौहिण्यः बलं यस्येत्येके मागधो राजा जरासंधः कृष्णेन पालितैर्यदुभिर्युयुधे ॥ ४२ ॥ कृष्णस्य तेजसा वृष्णयो यादवाः तत्सर्वं बलमक्षिण्वन् अघ्नन् स्वेष्वनीकेषु सैन्येषु हतेषु सत्सु अरिभिर्वैरिभिस्त्यक्तो नृपो जरासुतोऽयात् अगमत् ॥ ४३ ॥

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

एवमेकं भगवतो जयं निरूप्य जयान्तरेष्वपीममेव प्रकारमतिदिशति—एवमिति । तावत्यः त्रयोविंशतिसङ्ख्याकाः अक्षौहिण्यः बलं सेना यस्य तथाभूतो भूत्वा तावत्सैन्यमादाय मागधो राजा जरासन्धः कृष्णपालितैर्यदुभिः सह सप्तदशवारान् एवमेव युयुधे इत्यन्वयः ॥ ४२ ॥ कृष्णतेजसा युक्ता वृष्णयः यादवास्तस्य जरासन्धस्य सर्वं बलं अक्षिण्वन् नाशितवन्तः, एवमेव तेषु सर्वेषु अनीकेषु सैन्येषु हतेषु सत्सु अरिभिः रामकृष्णादिभिस्त्यक्तः उपेक्षितो नृपो जरासन्धोऽगात् स्वपुरं जगाम ॥ ४३ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ तावत्यः त्रयोविंशतिसंख्याका अक्षौहिण्यः बलं सेना यस्य सः तावतीति । पुंवत्त्वाभाव आर्षः । यद्वा तावतीति छेदः । तावति पराजयेऽप्यक्षौहिण्यो बलं यस्येति तथाभूतो भूत्वा तावत्सैन्यमादाय मागधो राजा जरासन्धः कृष्णपालितैर्यदुभिः सह सप्तदशकृत्वः सप्तदशवारान् एवमेव युयुधे ॥ ४२ ॥ अक्षिण्विन्निति ॥ कृष्णतेजसा युक्ता वृष्णयो यादवास्तस्य जरासम्धस्य बलं सर्वम् अक्षण्वन्नाशितवन्तः । एवमेव तेषु सर्वेषु अनीकेषु सैन्येषु हतेषु सत्सु अरिभिः रामकृष्णादिभिस्त्यक्त उपेक्षितो नृपो जरासन्धोऽयात् स्वपुरं जगाम ॥ ४३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तावति इति पदच्छेदः तावति पराजये सत्यपि अक्षौहिण्यो बलं यस्य सः । यद्वा । तावत्यः । त्रयोविंशतिसंख्याका अक्षौहिण्यः । सैन्यानि यस्य सः पुंवत्त्वाभाव आर्षः सप्तदशकृत्वः सप्तदशवारान् युयुधे ॥ ४२ ॥ अक्षिण्वन् नाशं प्रापयामासुः । अरिभिर्यादवैस्त्यक्तो मागधः ॥ ४३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अक्षिण्वन्निति । कृष्णतेजसा श्रीकृष्णैश्वर्येणेत्यर्थः । पर्याप्ता इति शेषः । वृष्णयो यादवाः, सर्वं समग्रमपि, तद्बलं जरासन्धसैन्यं, अक्षिण्वन् नाशितवन्तः । इत्थं स्वेषु अनीकेषु सैन्येषु, हतेसु सत्सु, नृपो जरासन्धः, अरिभिर्बलभद्रादिभिः त्यक्तः सन्, अयात् अगात् । स्वपुरं प्रतीति शेषः ॥ ४२ ॥ अष्टादशम इति । अष्टादशमे संग्रामे युद्धे, आगामिनि भाविनि सति, तदन्तरा तन्मध्ये, भाव्याष्टादशमसंग्रामात् पूर्वमित्यर्थः । नारदप्रेषितः नारदेन संप्रेषितः, वीरः यवनः कालयवनः, प्रत्यदृश्यत । माथुरैर्जनैरिति शेषः ॥ ४३ ॥

कृष्णप्रिया

राजन् ! बलवान् जरासन्ध ने इस प्रकार सत्रह बार आश्रित नृपतियों से इकट्ठी की हुई तेईस तेईस अक्षौहिणी सेना से श्रीकृष्ण भगवान से सुरक्षित यदुवीरों से युद्ध किया ॥ ४२ ॥ लेकिन पूर्ण पुरुषोत्तम भगवान् श्रीकृष्ण की सहायता से प्रत्येक समय जरासन्ध की सारी सेना का विनाश हो गया । राजा जरासन्ध की अपनी संपूर्ण सेना नष्ट हो जाती, तब यदुवीरों के उपेक्षा पूर्वक छोड़ देने से राजा जरासन्ध लौट जाता था ॥ ४३ ॥

अष्टादशमसंग्रामे[1] आगामिनि तदन्तरा । नारदप्रेषितो[2] वीरो यवनः प्रत्यदृश्यत[3] ॥ ४४ ॥
रुरोध मथुरामेत्य तिसृभिर्म्लेच्छकोटिभिः । [4]त्रैलोक्ये चाप्रतिद्वन्द्वो वृष्णीञ्छ्रुत्वाऽऽ[5]त्मसम्मितान् ॥४५॥
तं दृष्ट्वा चिन्तयत् कृष्णः संकर्षणसहायवान् । अहो यदूनां वृजिनं प्राप्तं ह्युभयतो महत् ॥ ४६ ॥
यवनोऽयं निरुन्धेऽस्मानद्य [6]महान् महाबलः । [7]मागधोऽप्यद्य वा श्वो वा परश्वो वाऽऽगमिष्यति ॥४७॥

कर्दमक्षमा

अन्वयः—अष्टादशमसङ्ग्रामे, आगामिनि, तदन्तरा, नारदप्रेरितः, वीरः, यवनः, प्रत्यदृश्यत ॥ ४४ ॥ नृलोके, अप्रतिद्वन्द्वः, वृष्णीन्, आतमसम्मितान्-श्रुत्वा, च, तिसृभिः म्लेच्छकोटिभिः, एत्य, मथुराम्, रुरोध ॥ ४५ ॥ तम्, दृष्ट्वा, संकर्षणसहायवान्, कृष्णः, अहो, हि, यदूनाम्, हि, उभयतः, महत्कष्टम्, प्राप्तम्, इति, अचिन्तयत् ॥ ४६ ॥ महाबलः, अद्य, तावत्, महान्, यवनः, अद्य, निरुन्धे, अद्य, वा, श्वः, वा, परश्वः, मागधः, आगमिष्यति ॥ ४७ ॥

---

१. अथाष्टादशमे युद्धे–वीर. । २. प्रेरि–प्रा. पा. । ३. पद्यत–श्रीधर. टि. । ४. नृलोके–श्रीधर. बंशी. जीव. वीर. विज. विश्व. । ५. मत्वात्मसन्मितान्–श्रीधर. टि. ; सम्म–विज. । ६. तावन्–श्रीधर. वीर. जीव. विश्व. ; श्वो वा–विज. । ७. मागधोऽप्येति दुष्टात्मा पराश्वो नैव संशयः–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अष्टादशमेऽष्टादशे संग्रामे भाव्ये तन्मध्येऽकस्मात्कालयवनः प्राप्तः ॥ ४४ ॥ आत्मसंमितान्स्वतुल्यान् ॥ ४५ ॥ वृजिनं दुःखम् । उभयतो यवनाज्जरासंधाच्च ॥ ४६ ॥ तदाह द्वयेन । निरुन्धे निरुणद्धि ॥ ४७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तद्बलं जरासंधबलम् । अनीकेषु । अरिभिः कृष्णादिभिः । वृष्णय एव न तु पूर्ववत् कृष्णरामौ, तत्र सात्यक्यादीनां प्राधान्यं क्रमशो ज्ञेयम् । कृष्णतेजसा वह्निना ज्वालानामिव श्रीकृष्णेन समवाय एव तेषां तेजो व्यवर्द्धतेत्यभिप्रायेण, न तु तदभावापेक्षया "नृलोके चाप्रतिद्वंदो वृष्णीञ्छ्रुत्वात्मसंमितान्" इति वक्ष्यमाणात् । अत एवारिभिर्वृष्णिभिरेव त्यक्तः श्रीकृष्णाभिप्रायेणेति भावः । यद्वारिभिर्हतेषु पूर्ववच्छ्रीभगवता त्यक्तः सन् ॥ ४३ ॥ मङत्रार्षः ॥ प्रत्यदृश्यत सहसैव माथुराणां दृष्टिविषयो बभूवातिशीघ्रं प्राप्त इत्यर्थः । नारदेन प्रेरितोऽत्र विशेषो विष्णुपुराणे—"गार्ग्यं गोष्ठे द्विजं श्यालः षण्ढ इत्युक्तवान्द्विज । यदूनां सन्निधौ सर्वे जहसुर्यादवा स्ततः ॥ ततः कोपसमाविष्टो दक्षिणापथमेत्य सः । सुतमिच्छेस्तपस्तेपे यदुचक्रमयावहम् ॥ आराधयन्महादेवं सोयश्चूर्णमभक्षयत् । ददौ वरं च तुष्टोऽसौ वर्षे द्वादशमे हरः ॥ सभाजयामास च तं यवनेशोप्यनात्मजः । तद्योषित्संगमाच्चास्य पुत्रोऽभूदलिसंप्रभः ॥ तं कालयवनं नाम राष्ट्रे स्वे यवनेश्वरः । अभिषिच्य वनं यातो वज्रांगकठिनोरसम् ॥ स च वीर्यबलोन्मत्तः पृथिव्यां बलिनो नृपान् । पप्रच्छ नारदश्चास्मै कथयामास यादवान् ॥" इति । 'प्रेषितः' इति पाठेऽपि स एवार्थः ॥ ४४ ॥ न प्रतिद्वन्द्वः प्रतियोद्धा यस्य स तथा ॥ अप्रतिद्वन्द्वः प्रतियोधरहितः । श्रुत्वा श्रीनारदादेव ॥ ४५ ॥ तं पवनम् ॥ 'संकर्षणसहायवान्' इति मथुरातो दूरगमने तस्य संप्रति ग्रहणार्थ तेन सहेत्यर्थः । मत्यानुविधत्वादेवेति भावः । अत एवाह–अहो इत्यादि । अहो खेदे । हि निश्चितम् ॥ ४६ ॥ तद् वृजिनम् । तावदधुना । श्व आगामिदिने । परश्वस्ततः परदिने ॥ नितरां रुंधे आवृणोति । यतो महाबलोऽतोऽपसर्तुमपि न शक्यत इति भाव ॥ ४७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रत्यदृश्यत सहसैवाभिमुख्येन माथुराणां दृष्टिविषयो बभूव अतिशीघ्रं प्राप्त इत्यर्थः । नारदेन प्रेरित इत्यादौ विशेषः श्रीविष्णुपुराणे—

"गार्ग्यं गोष्ठे द्विजं श्यालः षण्ढ इत्युक्तवान् द्विजः । यदूनां सन्निधौ सर्व्वे जहसुर्यादवास्ततः ॥
ततः कोपसमाविष्टो दक्षिणापथमेत्य सः । सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम् ॥
आराधयन् महादेवं सोऽयश्चूर्णमभक्षयत् । ददौ वरञ्च तुष्टोऽसौ वर्षे द्वादशमे हरेः ॥
सभाजयामास च तं यवनेशोऽप्यनात्मजः । तद्योषित्सङ्गमाच्चास्य पुत्रोऽभूदलिसम्प्रभः ॥
तं कालयवनं नाम राष्ट्रे यवनेश्वर । अभिषिच्य वनं यातो वज्राङ्गकठिनोरसम् ॥
स च वीर्यवलोन्मत्तः पृथिव्यां वलिनो नृपान् । पप्रच्छ नारदश्चासौ कथयामास यादवान्" ॥ इति

प्रेषित इति पाठः क्वचित् ॥ ४४ ॥ अप्रतिद्वन्द्वः प्रतियोधरहितः श्रुत्वा श्रीनारदादेव ॥ ४५ ॥ सङ्कर्षणसहायवानिति मथुरातो दूरगमने तस्य सम्मतिग्रहणार्थं तेन सहेत्यर्थः । मर्त्यानुविधत्वादेवेति भावः । अत एवाह—अहो इत्यादि "अहो खेदे हि निश्चितम्" ॥ ४६ ॥ नितरां रुन्धे आवृणोति यतो महाबलः अत इत्यतोपसर्तुमपि न शक्यत इति भावः ॥ ४७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीमथुरातो दूरगमने तस्य सम्मतिग्रहणार्थं तेन सहेत्यर्थः । अहो खेदे, हि निश्चितम् ॥ ४५ ॥ नितरां रुन्धे आवृणोति, बर्त्तमानया नित्यं निरोधस्याविच्छेदो दार्ढ्यञ्च बोध्यते, यतो महाबलः अत इतोऽपसर्त्तुमपि न शक्यत इति भावः । सर्व्वज्ञस्यापि अद्य वेत्यादि-विकल्पोक्तिरियं कथनरीतिस्वभावात् ॥ ४७ ॥ बन्धूनामबध्यत्वमनुसन्धाय स्वयमेव पक्षान्तरमाह—नेष्यत इति । यतो बली, एतच्च स्नेहविशेषोदयस्वभावात्, किंवाऽन्यत्र तेषां नयनाय भयोत्पादनार्थम् ॥ ४७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ अष्टादशमे युद्धे आगामिनि भाविनि सति तदन्तरा तन्मध्येऽष्टादशसङ्ग्रामात्पूर्वमित्यर्थः । नारदेन प्रेषितः कालयवनाख्यो वीरः प्रत्यदृश्यत माथुरैर्जनैरिति शेषः ॥ ४४ ॥ रुरोधेति । मनुष्यलोके न विद्यते प्रतिद्वन्द्वस्तुल्यबलो यस्य तथाभूतः कालयवनः यदून् स्वात्मना तुल्यबलसम्मितान् श्रुत्वा नारदमुखादिति शेषः । तिसृभिर्म्लेच्छानां कोटिभिः सहागत्य मथुरां सर्वतो निरुद्धवान् ॥ ४५ ॥ तमिति । तं कालयवनं दृष्ट्वा श्रीकृष्णश्चिन्तयामास, चिन्तामेवाह—अहो इति सार्द्धद्वयेन । उभयतो यवनाज्जरासन्धाच्च वृजिनं दुःखं महत् यदूनां प्राप्तम् ॥ ४६ ॥ तदेवाह—यवन इति । महद्बलं यस्य स यवनोऽधुनाऽस्मान्निरुन्धे निरुणद्धि अद्यास्मिन्नहनि वा श्वः परस्मिन्नहनि वा परश्वस्तदनन्तरे अहनि वा मागधोऽप्यागमिष्यति ॥ ४७ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उभयतो मागधाद्यवनाच्च प्राप्तं वृजिनं दुःखम् ॥ ४६-४७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नारदप्रेरित इति विष्णुपुराणे कथा। यथा, कदाचिद्गार्ग्यः स्वश्यालेन षण्ड इति परिहसितः तत् श्रुत्वा यदवो बहु जहसुः ततस्तेषां हास्येन बहु कुपितो गार्ग्यो दक्षिणापथं गत्वा यादवभयङ्करो मे पुत्रो भवत्विति सङ्कल्प्य अयश्चूर्णं भुञ्जानो महादेवमाराध्य द्वादशवर्षान्ते तस्मात् स्वाभीष्टं वरं प्राप्य हृष्यन् स्वगृहमागच्छन्नपुत्रकेण यवनेश्वरेण पुत्रार्थं स वृतस्तद्भार्य्यायाम् कालयवनं पुत्रं जनयामास स च कालयवनः महाबलोन्मत्तः पृथिव्यामिदानीं के बलिनो नृपा इति नारदं पप्रच्छ सच यदून् प्राह एवं नारदप्रेषितो मथुरायां दृष्टो बभूव ॥४४-४५॥ कृष्णो यादवस्नेहाविष्टत्वादचिन्तयत् उभयतो यवनात् जरासन्धाच्च ॥४६-४७॥

गूढार्थदीपिनी

तदन्तरातन्मध्येः प्रतिद्वन्द्वः प्रतियोद्धा। सम्मितान् तुल्यान् ॥ ४५ ॥ वृजिनं दुःखम्। अहो खेदे ॥ ४७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अगामिनि भाव्ये तदन्तरा तन्मध्ये अष्टादशमसङ्ग्रामात्पूर्वमेव यवनः प्रत्यदृश्यत नारदप्रेषित इति। एवं हरिवंशे कथा-

"वृष्णीनामन्धकानाञ्च गुरुर्गार्ग्यो महातपाः। ब्रह्मचारी पुरा भूत्वा न स्म दारान् स विन्दति ॥
तथा हि वर्तमानं तमूर्द्ध्वरेतसमव्ययम्। श्यालोऽभिशप्तवान् गार्ग्यमपुमानिति राजनि ॥
सोऽभिशप्तस्तदा राजन्! नगरे त्वजितं जये। लिप्सुः पुत्रं ततो गत्वा तपस्तेपे सुदारुणम् ॥
ततो द्वादश वर्षाणि अयश्चूर्णमभक्षयत्। आराधयन् महादेवमचिन्त्यं शूलपाणिनम् ॥
रुद्रस्तस्मै वरं दत्वा समर्थं युधि निग्रहे। वृष्णीनामन्धकानां च सर्वतेजोमयं सुतम् ॥
ततः शुश्राव तं राजा यवनाधिपतिर्वरम्। पुत्रप्रसवजं देवादपुत्रः पुत्रकामुकः ॥
स नृपस्तमुपामन्त्र्य सान्त्वयित्वा द्विजर्षभम्। तं योषमध्ये यवनो गोपस्त्रीषु समासृजत् ॥
गोपालीत्वक्षरा तत्र गोपस्त्रीवेषधारिणी। धारयामास गार्ग्यस्य गर्भं दुर्द्धरमच्युतम् ॥
मानुष्यां राजभार्यायां नियोगाच्छूलपाणिनः। स कालयवनो नाम जज्ञे शूरो महाबलः ॥
अपुत्रस्याथ राज्ञस्तु ववृधेऽन्तःपुरे शिशुः। तस्मिन्नुपरते राजन्! स कालयवनो नृपः ॥
युद्धाभिकामो नृपतिः पर्यपृच्छद्द्विजोत्तमान्। वृष्ण्यन्धककुलं तस्य नारदेन निवेदितम् ॥
विज्ञाय वरदानं तं नारदान्मधुसूदनः। उपप्रेक्षिततेजस्वी वर्द्धन्तं यवनेषु तम् ॥
स वृद्धो हि यदा राजा यवनानां महाबलः। तत एनं नृपा म्लेच्छाः संश्रित्याऽनुययुस्तदा ॥
शकास्तुषारा दरदाः पारदास्तङ्कणाः खशाः। पल्हवाः शतशश्चान्ये म्लेच्छा हैमवतास्तथा ॥
स तैः परिवृतो राजा दस्युभिः शलभैरिव। नानावेषधरैर्भीमैर्मथुरामभ्यवर्तत" ॥ इति ॥ ४४ ॥

आत्मसम्मितान् आत्मतुल्यान् ॥ ४५ ॥ वृजिनं दुःखम् ॥ ४६-४७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

लोकद्वयजिगीषवः। साम्राज्यं वा स्वाराज्यं वेति लोबद्ध जिगीषवो जेतुमिच्छवो न लोकेति षष्ठीनिषेधात् ॥ ४४ ॥ यादवेषु श्रेष्ठो यादवशार्दूलः ॥ ४५ ॥ तौ माधवौ मधुकुलोत्पन्नाविति यानध्वजां रथकेतवोऽभ्रै रेणुभिश्च वायुः सूर्यानलौ विवस्वद्विभावम्। आवृणोत् ॥ ४६ ॥ हरिरामयोः सपर्णतालध्वजचिह्नितौ सुपर्णश्च तासश्च तौ ध्वजौ च केतू ताभ्यां चिह्नितौ रथौ मृधे विलक्षयन्त्यः पुराट्टालकहर्म्यगोपुरं समाश्रिताः स्त्रियः शुचार्पिताः सन्मुहुः ॥ ४७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ब्रह्माण्डे हि प्रजापतिरध्यक्षः, स कालात्मा यज्ञात्मा च, स सप्तदशो भवति, स पराजित एव। अतः परं प्रमाणरूपाः ब्राह्मणा अवशिष्यन्ते। शिवश्च वेदरूपः। उभयबलमाश्रित्य अष्टादशे पर्याये समागमिष्यतीत्याह अष्टादशम इति। एवं पुराणान्तरे कथा। बहुधा सर्वैः सम्प्रार्थितोऽपि सप्तदशे पर्याये पराजितः तपस्तप्तुं गतः। तत्र समाराधितः शिवः। पश्चात् प्रसन्नेन शिवेन ब्राह्मणसमाराधनार्थं निरूपितः। ब्रह्मण्यः कृष्णो ब्राह्मणवाक्यमन्यथा करिष्यतीति। ततः स्वनगरीं समागत्य ब्राह्मणानाहूय सिंहासने उपवेशितवान्। ततः प्रीतैर्ब्राह्मणैः पुनस्तस्मै सिंहासनं दत्वा वरोऽपि दत्तः, 'शत्रुं जेष्यसी'ति। 'अजेयश्च त्रैलोक्यस्य भविष्यसी'ति। एतत् ज्ञात्वा नारदः मध्ये कालयवनं च प्रेषितवान्। सोऽपि सर्वयादवनिराकरणार्थं प्रतिज्ञां चक्रे। स चेत्पश्चादागच्छेत्, द्वारकां गच्छेदिति। तस्य तत्र निराकरणं मर्यादापालकेनाशक्यमिति उभयमेकहेलया निर्वहत्विति मध्ये देवगुह्यकर्ता

नारदो यवनं प्रेषितवान् । स हि वृद्धगर्गस्य पुत्रः । महायवनो ह्यग्रज आसीत् । तेन पुत्रार्थं प्रार्थितो वृद्धगर्गः तद्भार्यायां पुत्रमधात् । 'अजेयश्च तव पुत्रो भविष्यती'त्याह । ततः कालान्तरे यदुसभायां स एव वृद्धगर्गो यदुभिरुपहसितः स्वपुत्रं प्रार्थितवान् 'यादवा मारणीया' इति । एवं वैरे सिद्धे नारदेन तेषु प्रविष्ट एव सन्धिकालोऽयम्, शीघ्रं गम्यतामिति तं प्रेषितवान् । तदाह । आगामिनि अष्टादशमे सङ्ग्रामे तदन्तरा नारदेन प्रेषितो यवनः वीरत्वाद्युद्धरसाभिनिविष्टः प्रत्यदृश्यत प्रतिकूलतया समागतो दृष्टः । तस्य प्रतिकूलतामाह रुरोधेति । स्वयं समागत्य म्लेच्छकोटिभिः मथुरां रुरोध । तत्र कारणमाह त्रैलोक्ये अप्रतिद्वन्द्वः । चकारादनुभावेनापि । वृष्णींश्च आत्मसम्मितान् तुल्यान् श्रुत्वा नारदात् तदसहमानो रुरोधेति सम्बन्धः ॥ ४४-४५ ॥ तदा भगवान् तत्स्थानपरित्यागार्थं निरोधं चिन्तयामासेत्याह तं दृष्ट्वेति । इदं तु प्रकटचिन्तनम् । अतो गूढाभिप्रायेणैव चिन्तयति । अभिप्रायस्तु स्थानात् परित्याजनीयाः ये निरोद्धव्याः । यथा वृहद्वनात् निष्कासिताः, तथा मथुरातोऽपि निष्कासनीयाः । यदि देशान्तरं न गच्छेयुः, तदा निरुद्धा एव न भवेयुः, लोके तथा दर्शनात् । अतो भगवानेतानन्यत्र नेतुं विचारयति । तत्संमतिरेकेण नयने मन्त्रभेदः स्यादिति मर्मज्ञेन बलभद्रेण सह मन्त्रयामास । यतोऽयं कृष्णः, निरोधार्थमेव प्रवृत्तः । अन्यथा सदानन्दः तेषां न भवेत्, बहिश्चित्तत्वादिति । सङ्कर्षण एव सहायो यस्येति । अतस्तेन सह चिन्तनम् । अहो इत्याश्चर्ये । कथमयमकस्मादागत इति, कथं वा सन्धिकालं ज्ञातवानिति । यदूनां वृजिनं दुःखमुभयतोऽपि प्राप्तमिति प्रतिज्ञा । तां निरूपयति । महान् यवनोऽयमद्य निरुन्ध इति । अस्मानिति तैः सहाभेदः कार्यार्थं निरूपितः । स्वरूपतोऽपि महान् महाबलश्च । अद्य महाबल इति उभयोर्ब्राह्मणवाक्यं बलमिति सूचितम् । यावज्जरासन्धो नायाति, तावदनेनैव निरुद्धा इति । तर्हि जरासन्धस्थाने अयमेव जातः, को विशेष इति चेत्, तत्राह मागध इति । मागधोऽप्यद्यैवायास्यति । तर्हि तद्बुद्धिः प्रेरणीया, यथाद्य नायास्यतीति चेत्, तत्राह श्वो वा समागमिष्यतीति । तर्ह्यन्तर्यामी वक्तव्यः, श्वोऽपि नानेतव्यः, तत्राह परश्व इति । तर्हि कालो वक्तव्य इत्याशङ्क्य त्र्यधिकपर्याये कोऽपि वक्तुं न युक्त इति वाशब्दं प्रयुक्तवान् । किमद्य श्वो वञ्चनेन आगमिष्यतीत्यत्र तु न सन्देहः । अत उपाय एव कर्तव्य इत्यर्थः ॥ ४७ ॥

श्रीसुबोधिनी-सारः

आगामिनि भाविनि अष्टादशमे धृतिसंख्याके संग्रामे तदन्तरा तन्मध्ये नारदेन प्रोषितो वीरो यवनः प्रत्यदृश्यत कालयवनः प्राप्तः ॥ ४४ ॥ एत्य प्राप्य तिसृभिर्म्लेच्छानां कौटिभिर्मथुरां रुरोध । कीदृशोऽसौ तत्राह । नृलोके मर्त्यलोके न प्रतिद्वन्द्वौ यस्य स एकवीरः आत्मना स्वेन समितांस्तुल्यान् वृष्णीन् यादवान् श्रुत्वा ॥ ४५ ॥ संकर्षः सहायोस्यास्तीति कृष्णः तं कालयवनं दृष्ट्वाऽचिन्तयद्‌ध्यौ यदूनामुभयतो यवनाज्जरासंधाच्चाहो महद्दुःखं प्राप्तमिति ॥ ४६ ॥ तावत् प्रथमं महाबलोऽयं यवनोऽद्य इदानीमस्मान्निरुन्धे आवेष्टयति । अद्य वा श्वो वाऽऽगामिदिने वा परश्वो वाऽऽगामिदिने वा मागधोप्यायास्यति ॥ ४७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अष्टादशमे सङ्ग्रामे आगामिनि सति तदन्तरा तन्मध्ये अष्टादशमसङ्ख्यामात्पूर्वमेव नारदेन प्रेषितः कालयवनाख्यो वीरः प्रत्यदृश्यत मथुरां प्राप्तस्तत्रत्यैर्जवैर्दृष्टो बभूवेत्यर्थः ॥ ४४ ॥ तदागमने कारणं वदंस्तेनागत्य यत् कृतं तदाह—रुरोधेति । नृलोके न विद्यते प्रतिद्वन्द्वस्तुल्यबलो यस्य तथाभूतो कालयवनाख्यो स्वतुल्यबलं योद्धारं नारदं पृष्टवान्, तन्मुखाच्चात्यसम्मितान् स्वतुल्यबलान् वृष्णीन् श्रुत्वा तैः सह युद्धार्थं तिसृभिर्म्लेच्छकोटिभिः सह मथुरामागत्य सर्वतो निरुद्धवान् ॥ ४५ ॥ तं कालयवनं दृष्ट्वा सङ्कर्षणसहायवान् बलरामेण सह श्रीकृष्णोऽचिन्तयत् । चिन्तामेवाह—अहो इति सार्धद्वयेन । अहो आश्चर्यं यदूनामुभयतः कालयवनाज्जरासन्धाच्च महद्वृजिनं महद्दुःखं प्राप्तम् ॥ ४६ ॥ उक्तमेव स्पष्टयति—महत् बलं यस्य स अयं यवनोऽद्य तावदस्मान्निरुन्धे निरुणद्धि । अद्यास्मिन्नहनि वा, श्वः परस्मिन्नहनि वा, परश्वस्तदनन्तरेऽहनि वा, मागधोऽप्यागमिष्यति ॥ ४७ ॥

अन्वितार्थप्रकाशिका

अष्टादशम इति । मडार्षः । अष्टादशे संग्रामे आगामिनि सति तदन्तरा तन्मये अष्टादशसंग्रामात्पूर्वमेव नारदेन प्रेषितो यवनः कालयवनाख्यो वीरः प्रत्यदृश्यत मथुरां प्राप्तस्तत्रत्यैर्जनैर्दृष्टो बभूव । एवं हि विष्णुपुराणे कथा । कदाचित् गार्ग्यस्तस्य श्यालेन षण्ढ इत्युपहसितस्तदा यादवा अपि गार्ग्यमुपजहसुः । ततः गार्ग्यः क्रुद्धः श्रीमहेशं प्रसाद्य यदुभीषणं पुत्रं वरं लब्धवान् । ततश्च यवनेन्द्रेण अपुत्रेण स्वक्षेत्रे पुत्रोत्पादनाय प्रार्थितः स गार्ग्यः कालयवनमजीजनत् । स च कालयवनो बलोन्मत्तः पृथिव्यां के बलिनो नृपा इति नारदं पप्रच्छ । नारदश्च यदून् प्राह । एवं नारदप्रेषितो यवनो मथुरायां दृष्टः ॥ ४४ ॥ रुरोधेति । नृलोके न विद्यते प्रतिद्वन्द्वस्तुल्यबलो यस्य तथाभूतः कालयवनः स्वतुल्यबलं योद्धारं नारदं पृष्टवांस्तन्मुखाच्च वृष्णीन् आत्मसम्मितान् स्वतुल्यबलान् श्रुत्वा तैः सह युद्धार्थं तिसृभिर्म्लेच्छकोटिभिः सह मथुरामेत्यागत्य सर्वतो निरुद्धवान् ॥ ४५ ॥ तमिति । तं कालयवनं दृष्ट्वा संकर्षणेन सहायः सहागमनं तद्वान् रामेण सहितः श्रीकृष्णोऽचिन्तयत् । अहो आश्चर्यं यदूनामुभयतः काल-

यवनाज्जरासन्धाच्च महद्वृजिनं दुःखं प्राप्तम् ॥ ४६ ॥ यवन इति । महाबलोऽयं यवनोऽद्य तावदस्मान्निरुन्धे निरुणद्धि अद्यास्मिन्नहनि वा श्वः परस्मिन्नहनि वा परश्वस्तदनन्तरेऽहनि वा मागधोऽप्यागमिष्यति ॥ ४७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अष्टादशे संग्रामे । आगामिनि भाविनि सति तदन्तरातन्मध्ये यवनः । प्रत्यदृश्यतमाथुराणां दृष्टिविषयोऽभूत् ॥ ४४ ॥ अप्रतिद्वन्द्वः नास्ति प्रतिद्वन्द्वस्तुल्यभटो यस्य सः । आत्मसंमितान् स्वतुल्यान् वृष्णीन् श्रुत्वा यदून्मत्वेत्यपिपाटः ॥ ४५ ॥ संकर्षणः सहायोऽनुकूलोऽस्ति अस्येति संकर्षणसहायवान् । उभयतः । कालयवनान्मागधाच्च वृजिनं कष्टम् ॥४६॥ तदेवाह द्वाभ्यां तावत्प्रथमं अद्यनिरुन्धे ॥ ४७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

रुरोधेति । नृलोके सनुष्यलोके, न विद्यते प्रतिद्वन्द्वस्तुल्यबलो यस्य तथाभूतः कालयवनः, वृष्णीन् यादवान्, आत्मसंमितान् आत्मतुल्यबलान्, श्रुत्वा, नारदमुखादिति शेषः । तिसृभिः म्लेच्छकोटिभिः सह, एत्यागम्य च, मथुरां रुरोध सर्वतो निरुद्धवान् ॥ ४४ ॥ तमिति । तं कालयवनं, दृष्ट्वा संकर्षणसहायवान् बलभद्रेण सहितः, कृष्णः, अहो यदूनां उभयतः यवनाज्जरासंधाच्च, महदतिशयितं, वृजिनं दुःखं, प्राप्तं हि । इति, अचिन्तयत् ॥ ४५ ॥ एतदेवाह । यवन इति । महदतिशयितं बलं सैन्यं यस्य सः, अयं यवनः, अद्याधुना, अस्मान् तावत् प्रथमतः, निरुन्धे निरुणद्धि । मागधो जरासन्धोऽपि, अद्यास्मिन्नहनि, वा श्वः आगामिनि दिवसे, वा परश्वः, वा आगमिष्यति ॥ ४६ ॥ आवयोरिति । अस्गेति तृतीयार्थे षष्ठी । अस्य अनेन, आवयोः युध्यतोः सतोः, जरासुतः जरासंधः, अन्तरेति शेषः । यदि, आगन्ता आगमिष्यति, तर्हि बन्धून् अस्माकमिति शेषः । वधिष्यति । अथवा बली प्रशस्तबलोऽयं जरासुतः, स्वपुरं प्रति, नेष्यते । स्वनगरं प्रापयिष्यतीत्यर्थः ॥ ४७ ॥

कृष्णप्रिया

जब अठारवां युद्ध होने जा रहा था तब महर्षि नारद जी से प्रेरित वीर कालयवन मथुरा जी समीप दिखायी पड़ा ॥ ४४ ॥ वह काल भूतल पर संग्राम में अद्वितीय माना जाता था । जब यवन ने यह बात सुनी की यदुवीर कालयवन के साथ समराङ्गण में समतुल है तब तीन करोड़ म्लेच्छों की सेना लेकर यवन ने मथुरा नगर को घेर लिया ॥ ४५ ॥ कालयवन, की यकायक जब मथुरा पर चढ़ाई देखकर भगवान् श्रीकृष्ण जी ने दाऊजी भैया के साथ परामर्श किया कि—आश्चर्य है कि अब यदुवीरों पर एवं मथुरा नगर पर जरासन्ध एवं काल ववन–ये दो दो विपत्तियाँ एक ही साथ मंडरा रही है ॥ ४६ ॥ बलिष्ठ काल यवन ने तो आज हमें चढाई कर घेर लिया है और जरासन्ध भी समीप आ पहुँचा है और आज कल या तो परसों में आ ही जायेगा ॥ ४७ ॥

आवयोर्युध्यतोरस्य यद्यागन्ता[1] जरासुतः । बन्धून्[2] हनिष्यत्यथवा नेष्यते स्वपुरं बली ॥ ४८ ॥
तस्मादद्य विधास्यामो दुर्गं द्विपददुर्गमम् । तत्र ज्ञातीन् समाधाय यवनं [3]घातयामहे ॥ ४९ ॥
इति सम्मन्त्र्य [4]दाशार्हो दुर्गं द्वादशयोजनम् । अन्तःसमुद्रे नगरं [5]कृष्णोऽद्भुतमचीकरत्[6] ॥ ५० ॥
दृश्यते यत्र हि त्वाष्ट्रं विज्ञानशिल्पनैपुणम् । रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितम् ॥ ५१ ॥
सुरद्रुमलतोद्यानविचित्रोपवनान्वितम् । हेमशृङ्गैर्दिविस्पृग्भिः स्फटिकाट्टालगोपुरैः ॥ ५२ ॥
राजतारकुटैः[7] कोष्ठैर्हेमकुम्भैरलंकृतैः । रत्नकूटैर्गृहैर्हैमैर्महामरकतस्थलैः ॥ ५३ ॥
वास्तोष्पतीनां च गृहैर्वलभीभिश्च निर्मितम् । चातुर्वर्ण्यजनाकीर्णं [8]यदुदेवगृहोल्लसत् ॥ ५४ ॥

कर्वमक्षमा

अन्वयः—अस्य, आवयोः, युध्यतोः, यदि, जरासुतः, आगन्ता, बली, बन्धून्, हनिष्यति, अथवा, स्वपुरम्, नेष्यते ॥४८॥ तस्मात्, अद्य, द्विपददुर्गमम्, दुर्गम्, विधास्यामः, तत्र, ज्ञातीन्, समाधाय, यवनम्, यातयामहे ॥ ४९ ॥ इति, दाशार्हः, कृष्णः, सम्मन्त्र्य, अन्तः समुद्रे, द्वादश यीजनम्, अद्भुतम्, दुर्मम्, नगरम्, अचीकरत् ॥ ५० ॥ यत्र, हि, रथ्याचत्वरवीथीभिः, यथावास्तु

---

१. गच्छेज्ज–विज. । २. न्हनि–वीर., वधि–श्रीधर. वंशी. जीव. । ३. मारया–वीर. । ४. भगवान्–श्रीधर. वंशो. जीव. विज. विश्व. । ५. कृत्स्ना–श्रीधर. वंशो. जोव. वीर. विश्व.: कृष्णोऽ–विज. । ६. क्लृपत्–विज. । ७. कूटकोटैः–श्रीटि.; कुटै ज्युष्टं–इति कस्यचित् । ८. यदूनां च गृहे–विज. ।

निर्मितम्, त्वाष्ट्रम्, विज्ञानशिल्पनैपुण्यम्, हि,दृश्यते ॥ ५१ ॥ विविस्पृग्भिः, हेमशृङ्गैः, अन्वितम्, स्फाटिकाट्टालगोपुरैः, अन्वितम्, सुरद्रुमलतोधानविचित्रोपवनान्विनम्, (नगरं रचयामास) आसीत् ॥ ५२ ॥ राजतारकुटैः, कोष्टैः, हेमकुम्भैः, अलङ्कृतैः, रत्नकूटैः, गृहैः, महामरकतस्थलैः, निर्मितमासीत् ॥ ५३ ॥ वास्तोष्पतीनाम्, गृहैः, च, बलभीभिः, निर्मितम्, च, चातुर्वर्ण्य जलाकीर्णम् यदुदेवगृहोल्लसत्, नगरम्, आसीत् ॥ ५४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्य अनेन ॥ ४८–४९ ॥ समुद्रमध्ये दुर्गं तन्मध्ये नगरम् । कृत्स्नाद्भुतं सर्वाश्चर्यमयम् । अचीकरत्कारयामास ॥५०॥ त्वष्टा विश्वकर्मा तदीयं शिल्पनैपुणं च क्रियाकौशलम् । तदाह सार्द्धैस्त्रिभिः । रथ्येति । रथ्या राजमार्गाः पुरतः वीथ्य उपमार्गाः पश्चिमतः उभयतोऽपि चत्वराण्यंगणानि तन्मध्ये कोष्ठास्ततोऽप्यन्तः सुवर्णभवनानि तदुपरि स्फाटिकाट्टालिकास्तदुपरि हेमकुम्भा इति बहुभूमिकम् । यथावास्तु वास्तु गृहादिनिर्माणस्थानं तदनतिक्रम्य विनिर्मितम् ॥ ५१ ॥ सुराणां द्रुमा लताश्च येषु तान्युद्यानानि विचित्रोपवनानि च तैरन्वितम् । हेममयानि शृंगाणि येषु तैः । दिविस्पृग्भिरत्युच्चैः स्फाटिका अट्टाला उपरिभूमिका गोपुराणि द्वाराणि च तैर्निर्मितमित्युत्तरेणान्वयः ॥ ५२ ॥ रजतारकुटैः रजतं च आरकुटं च पीतलोहं ताभ्यां निर्मितैः कोष्ठैरश्वशालान्नशालादिभिः । कथंभूतैः । हेमकुम्भैरलंकृतैः तथा रत्नकूटैः पद्मरागादिशिखरैः । हैमैः सौवर्णैः । महामरकतमयानि स्थलानि येषु तैर्गृहैश्च ॥ ५३ ॥ किं च नगरगृहादौ वास्तोष्पतीनां देवानां च गृहैर्बलभीभिश्चन्द्रशालिकाभिश्च निर्मितम् । यदुदेवगृहैराजगृहैरुल्लसच्छोभमानम् ॥ ५४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"छन्दसि बहुलम्" इति तृतीयार्थे षष्ठी । तदेवाह—अनेनेति । आवयोः सगणयोरिति शेषः । बन्धून् अयोद्धृंस्तत्रत्यवृद्धबालादीनिति भावः । व्रजस्थगोपांश्च तेषामवध्यत्वमनुसंधाय नेष्यत इति ॥ ४८ ॥ यतो जरासन्ध आयास्यति तस्माद्धेतोः । दुर्गमं मनुष्यागम्यम् । तत्र दुर्गे । समाधाय स्थापयित्वा । अद्यैव विधास्यामः, बहुत्वं श्रीरामस्य महत्त्वापेक्षम् । सम्यक् स्थिरतयाधाय स्थापयित्वा । घातयामह इति अन्यकर्त्रपेक्षया, रुद्रवचनपालनार्थम् । अत्र हरिवंशे त्वियमपि भगवतो हेतूक्तिः—"इयं च माथुरी भूमिरत्यगम्या परस्य तु । वृद्धिश्चैव पराऽस्माकं बलतो मित्रतस्तथा । कुमारकोट्यो याश्चेमाः पदातीनां गणाश्च ये । एषामपीह वसतां संमर्दमुपलक्षये ॥" इत्यादि । अत्रेदं विमृशामः—यादवावासान्तःपुरयोग्यसमुद्रान्तःस्थद्वादशयोजनात्मकपरागम्यद्वारकातो मथुराभूमेर्विस्तीर्णत्वान्नायं केवलयादवानधिकृत्य श्रीभगवतः परामर्शः, किन्तु निगूढोऽयमभिप्रायः—संप्रति यादवजातिकतया तदादिसाहाय्येन लीलान्तरमारब्धाः स्मः । अतः श्रीगोपानां स्वस्मिन्नेव निश्चितमज्जातिभावानां नित्यमेव वर्द्धमानैर्यादवैर्भाविनी संकीर्णता न युक्ता । दुष्टोपद्रवाऽऽशंका च तेषामप्युपस्थिता स्यात् । श्रीमदुद्धवद्वारा मदीयतत्रत्यलीलास्फोरणेन विरहदुःखसमाधानप्रायं च कृतवानस्मि तेषाम् । अतो दुष्टान्प्रति तेष्वौदासीन्यव्यंजनाय यादवानां गोपालकैरनैक्यप्रदर्शनाय च मर्त्यानुविधस्य मम विदूरगमनमेव युक्तमिति ॥ ४९ ॥ इतीत्थम् । समुद्रस्यान्तर्द्वादशयोजनं, बहिश्चाष्टादशयोजनमन्यत्र ज्ञेयम् । एवं त्रिंशद्योजनं श्रीद्वारकापुरख्यातम् । योजनञ्चोक्तम्—"अष्टभिर्यवमध्यैस्स्यादंगुलं द्वादशांगुलम् । तालं त्रितालको हस्तो हस्तौ द्वौ किष्कुरुच्यते । किष्कुद्वयं धनुर्ज्ञेयं धनुषो हि सहस्रकम् । क्रोशः क्रोशौ तु गव्यूतिर्गव्यूती द्वे तु योजनम् ।" इति । अचीकरत् विश्वकर्मणा कारितवान् आविर्भावयामास ॥ ५० ॥ यत्र नगरे । त्वष्टरि विश्वकर्मणि स्थितं त्वाष्ट्रम् । शिल्पनैपुणं शिल्पविद्यापटुत्वम् । रथ्या राजमार्गः, चत्वरमंगणम् 'चत्वरं स्थण्डिलेऽङ्गणे' इति मेदिनी । वीथी "आपणः पण्यवीथी च द्वयं वीथीति शब्दितम्" इति शाश्वतः । आपणो हट्टशून्यविक्रयमार्गः, पण्यवीथी हट्टयुतविक्रयमार्ग इति भेदः । स्वामिचरणास्तु–पुरतः पूर्वभागे राजमार्गाः, पश्चिमतः पश्चाद्भागे उपमार्गाः, उभयतोऽपि पार्श्वद्वयेऽपि अंगणानि, तन्ममध्येगणयोर्मध्ये, ततोप्यन्तः कोष्ठेषु मध्ये, सुवर्णरसलिप्तानि गृहाणि, तदुपरि स्वर्णगृहोपरि, तदुपरि स्फाटिकाट्टालिकोपरि स्वर्णकलशा इति वह्व्यो भूमिका रचनाविशेषा यत्र तत्तथेति । यथात्रास्त्विति वास्तुशास्त्रानुसारेण गृहरचनायुतम् । तथाहि—"द्वात्रिंशदष्टाधिकविंशतिश्च सिद्धा नखा भूमिपतेर्द्विजातेः । दशांशयुक्तान्यपि क्षत्रियस्य वैश्यस्य वस्त्रंगुल उज्झितानि । शूद्रस्य च स्वस्वचतुर्विभागयुक्तानि चेत्थं प्रभवन्ति भेदाः । कश्चिज्जनो भूपसमानधर्मो गृहं विदध्याद्विधिनाप्यनेन । अष्टाधिकं हस्तशतं शतं वा यन्नेत्रनन्दप्रमितं पृथुत्वे । वेदाष्टहस्तं रससप्तकं च दैर्घ्ये सपादानि भवन्ति भेदाः ।" इत्येवं गृहशुद्धिपूर्वं गृहाणि कुर्यात् । प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयम् । शयनं याम्यदिग्भागे नैर्ऋत्यां शस्त्रमन्दिरम् । प्रतीच्यां भोजनगृहं वायुभागेन्नसंग्रहम् । भाण्डारसदनं सौम्ये त्वैशान्मां देवढालयम् । पूर्वस्यां श्रीगृहं कुर्याद्वायव्यां पशुमन्दिरम् । इन्द्राग्न्योर्मथनं मध्ये याम्याग्न्योर्घृतमन्दिरम् । यमराक्षसयोर्मध्ये पुरीषत्यागमन्दिरम् । राक्षसांबुपयोर्मध्ये विद्याभ्यासस्य मन्दिरम् । तोयेशानिलयोर्मध्ये रौदनं मन्दिरं स्मृतम् । वायव्योत्तरयोर्मध्ये संभोगस्यैव मन्दिरम् । उत्तरैशानयोर्मध्ये त्वौषधागारमुच्यते । पुरन्दरेशयोर्मध्ये सर्ववस्तुसुसंग्रहम् । सदनं कारयेदेव क्रमादुक्तानि षोडश ।" इत्येवमुक्तप्रकारेण गृहादिरचनाढ्यमित्यर्थः । कृत्स्नाद्भुतत्वमेव दर्शयति–दृश्यत इति चतुष्केण । हि एव । विज्ञानं

शिल्पधीः, शिल्पाभिज्ञतेत्यर्थः । तन्नैपुण्यं हस्तक्रियासौष्ठवं दृश्यते पराकाष्ठापन्नतया विभाव्यते, इदानीं भगवत्प्रसादेन परमशक्तिलाभादिति भावः ॥ ५१ ॥ सुरद्रुमाः—सन्तानकल्पवृक्षहरिचन्दनमन्दारपारिजाताख्याः “सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् । पञ्चैते देवतरवो मन्दारः पारिजातकः ।” इत्यमरः । यद्वा—आम्रजम्बूकदम्बादयो देवतरवः “आम्रो जम्बूः कदम्बश्च बोधिः पालाशबिल्वकौ । प्लक्षोदुम्बरमाधूकौ बहुपातिपचुमन्दकौ । एते चान्ये च बहवी देववृक्षाः स्मृता बुधैः ।” इति । तथा सुरलताः—स्वर्णवल्लीमुक्तावल्लीविद्रूमवल्यादयो विष्णुक्रान्तादयो वा । “मुक्तावल्ली स्वर्णवल्ली तथा कल्पलतादयः । देववल्ल्यो बुधैः प्रोक्ता विष्णुकांतादयस्तथा ।’ इति संहितोक्तेश्च । उद्यानोपवनयोः पुष्पफलप्रधानत्वेन भेदः । यदुदेवा यदुश्रेष्ठाः श्रीकृष्णबलदेववसुदेवोग्रसेनादयः । अत्रेवं वासस्थानं ज्ञेयम्—परितस्तावत्समुद्रः, पुरतः संक्रमार्थमालिः, समुद्राभ्यन्तरे तीरे सुखविहारार्थं परितश्चत्वराणि, तदन्तर्दुर्गप्राचीरालिः, तत्कोणेषु तन्मध्येषु च रत्नकूटा यदुपरि हेमकूटाः, तदुपरि हेमकुन्ताः पताकाश्च ज्ञेयाः । दुर्गचतुर्दिक्षु गोपुराद्बहिरवलोकाय तदुपरि स्वच्छस्फाटिकाट्टालिकाः, दुर्गान्तःपुरश्चत्वराणि, तदन्तरुद्यानोपवनानि, तदुपलक्षितकूपादीनि च, तदन्तर्वास्तोष्पतिगृहाः । तदन्तर्यथाभ्यन्तरमश्वान्नगृहादयः, कोष्ठाः, तदन्तः पुरोभागे ब्राह्मणगृहाः, पणाच्छूद्रगृहाः, वामे च वैश्याः, दक्षिणे क्षत्रियगृहाः, मध्ये सुधर्मामग्रे विधाय श्रीकृष्णबलदेववसुदेवोग्रसेनगृहाः, गृहाणां मरकतस्थली, उपरि वलभ्यो हेमकुन्तादयश्च यथाशोभं सुधर्मामारभ्य यथा वीथय उपमार्गाश्च तत इति । पारिजातप्रस्थापनं तु तत्त्याग एव । यद्वा—अग्रे स्वयं भगवदानीतपारिजातादस्य न्यूनत्वेन भेदः कल्प्यः, सुरद्रूमलतोद्यानेति वर्णितत्वात् । सुधर्मायास्त्वेकत्वेन नान्या गतिरितींद्रस्तथा नाकरोदिति ज्ञेयम् । हरेर्हरये, अन्यथा प्रसह्य स्वयमेव हरेदिति विभाव्यैवेति भावः । (इति सार्द्धत्रयाऽन्वयः) ॥ ५२ ॥ “कोष्ठः कुसूले चात्मीये मध्ये कुक्षौ गृहस्य च । संग्रहस्थापनस्थाने तृणागारादिकेऽपि च ॥” इति धरणिः ॥ ५३ ॥ न केवलं मनुष्यावासशोभित तदित्याह—किञ्चेति । “वास्तोष्पतिर्बलारातौ देवमात्रे धराधरे । मुख्ये गेहे” इति निरुक्तिः । “शुद्धान्ते वलभीचन्द्रशाले सौधोद्ध्र्ववेश्मनि” इति रभसः । यदुदेवः श्रीकृष्ण उग्रसेनो वा ॥ ५४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आवयोः सगणयोरिति शेषः । बन्धून् अयोद्धृन् तत्रत्यवृद्धबालादीन् व्रजस्थगोपांश्च तेषामवध्यत्वमनुसन्धायाह—नेष्यत इति ॥ ४८ ॥ अद्यैव विधास्यामः बहुत्वं विनयेन श्रीरामाद्यपेक्षया सम्यक् स्थिरतया सुखम् आधाय स्थापयित्वा घातयामहे इत्यन्य कर्त्रपेक्षया रुद्रधरपालनार्थम् अत्र श्रीहरिवंशेत्वियमपि भगवतो हेतूक्तिः—

“इयञ्च माधुरी भूमिरल्पागम्या परस्य तु । वृद्धिश्चैव पराऽस्माकं बलतो मित्रतस्तथा ॥
कुमारकोट्यो याश्चेमाः पदातीनां गणाश्च ये । एषामपीह वसतां सम्मर्द्दमुपलक्षये” ॥

इत्यादि अत्रेदं विमृशामः यादवावासान्तःपुरीयोग्यसमुद्रान्तस्स्थ द्वादशयोजनात्मकपरागम्यद्वारकातो मथुराभूमेर्विस्तीर्णत्वान्नायं केवलयादबानधिकृत्य श्रीभगवतः परामर्शः किन्त्वयं निगूढोऽभिप्रायः सम्प्रति यादवज्ञातिकतया तदादिसाहाय्येन भूभारहरणाय लीलान्तरमारब्धाः स्मः अतः श्रीगोपानां स्वस्मिन्नेव निश्चितमज्ज्ञातिभावानां नित्यमेव वर्द्धमानैर्यादवैर्भाविनी सङ्कीर्णता न युक्ता दुष्टोपद्रवाशङ्का च तेषामप्युपस्थिता श्रीमदुद्धवद्वारा मदीयतत्रत्यनित्यलीलास्फोरणेन विरहदुःखसमाधान प्रायञ्च तेषां कृतवानस्मि ततो दुष्टान् प्रति तेषु निजौदासीन्यव्यञ्जनाय यादवानां गोपालकेन ये च मर्त्यानुविधस्य मम विदूरदुर्गगमनमेव थुक्तमिति ॥ ४९ ॥ समुद्रस्यान्तर्द्वादशयोजनं बहिश्चाष्टादशयोजनमन्यत्र ज्ञेयम् एवं त्रिंशद्योजनं श्रीद्वारकापुरं ख्यातं योजनञ्चोक्तम् “अष्टभिर्यवमध्ये स्यादङ्गुलं द्वादशाङ्गुलम् । तालं त्रितालको हस्तो हस्तौ द्वौ किष्कुरुच्यते ॥ किष्कुद्वयं धनुः प्रोक्तं धनुषो द्विसहस्रकम् । क्रोशः क्रोशौ तु गव्यूतिः गव्यूती द्वे तु योजनम्” इति अचीकरद्विश्वकर्मणा कारितवान् कृत्स्नाद्भुतमिति कृत्स्नमपि वस्त्वद्भुतं यत्र ॥ ५० ॥ कृत्स्नाद्भुतत्वमेव दर्शयति—दृश्यत इति चतुष्केण । हि एव यत्रैव विज्ञानं शिल्पधीः शिल्पाभिज्ञातेत्यर्थः । शिल्पनैपुण्यं हस्तक्रियाकौशलञ्च दृश्यते परा काष्ठापन्नतया विभाव्यते तदानीं भगवत्प्रसादेन परमशक्तिलाभादिति भावः । अन्यत्तैः तत्र तन्मध्ये कोष्ठा इत्यादिकं वक्ष्यमाणश्लोकोक्तानां संस्थानं ज्ञेयम् उद्यानोपवनयोः पुष्पफलप्रधानत्वेन भेदः आरकुटैरिति ह्रस्वत्वमार्षं चातुर्वर्ण्यं चत्वारो वर्णाः यदुदेवा यादवश्रेष्ठा; श्रीकृष्णबलदेववसुदेवोग्रसेनाः अत्रेदं वासस्थानं ज्ञेयम् परितस्तावत्समुद्रः पुरतः सङ्क्रमार्थमालिः समुद्राभ्यान्तरे तीरे सुखविहारार्थं परितश्चत्वराणि तदन्तर्दुर्गप्राचीरालिः तत्कोणेषु तन्मध्येषु च यथाशोभं रत्नकूटाः तदुपरि हेमशृङ्गाः तदुपरि हेमकुम्भाः पताकाश्च ज्ञेयाः दुर्गचतुर्द्दिक्षु गोपुराणि बहिः अवलोकाय तदुपरि स्वच्छस्फटिकभित्तिमयाट्टालिकाः दुर्गान्तः पुरश्चत्वराणि तदन्तरुद्यानोपवनानि तदुपलक्षितानि वापीकूपादीनि च तदन्तर्वास्तोष्पतिगृहाः तदन्तर्यथाभ्यन्तरमश्वान्नगृहादयः कोष्ठाः तदन्तःपुरभागे ब्राह्मणगृहाः पश्चात् शूद्रगृहाः वामे वैश्यगृहाः दक्षिणे क्षत्रियगृहाः मध्ये सुधर्म्मामग्रे विधाय श्रीकृष्णबलदेववसुदेवोग्रसेनगृहाः गृहाणामधो मरकतस्थलीः उपरि वलभ्यो हेमकुम्भादयश्च यथाशोभं सुधर्मामारभ्य रथ्या वीथयः तदुपमार्गाश्च तत इति ॥ ५१–५४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अद्यैव विधास्यामः, बहुत्वं विनयेन श्रीरामाद्यपेक्षया सम्यक् स्थिरतया सुखमाधाय स्थापयित्वा घातयामहे, श्रीरुद्रदत्तवरपालनार्थमन्येन मारयिष्याम इत्यर्थः। अत्रेदं तत्त्वम्—श्रीमथुरेयं विंशतियोजनमण्डला, तत्रापि श्रीगोपेन्द्रमहाव्रजश्रीवृन्दावनादिमयी, वयञ्च धनपरिवारविभूतिभिर्महावृद्धिं नित्यं प्राप्नुमः। तथा च श्रीहरिवंशे श्रीभगवदुक्तौ (विष्णु प० ५६।५–६)—

'इयञ्च माथुरी भूमिरल्पागम्या परस्य तु। वृद्धिश्चैव परास्माकं बलतो मित्रतस्तथा॥
कुमारकोट्यो याश्चेमाः पदातीनां गणाश्च ये। एषामपीह वसतां सम्मर्दमुपलक्षये॥' इत्यादि।

अतो बहुयोजनं वसतीस्थानमपेक्ष्यते, अत्रैव निवासेन व्रजभूमिव्याप्तिः, स्यादिति सुदूरैः (हरिवंशे विष्णु प० ३८ अ०) विकद्रूक्तप्रामाण्यैन श्रीमथुरासम्बन्धवत्यामेव कुशस्थल्याँ वसतिः कार्य्येति श्रीभगवदिच्छा जाता, तदर्थमेव तत्तन्मन्त्रणादिकमिति अत एवोक्तं भगवान् सर्वविचारकुशल इति॥ समुद्रस्यान्तर्द्वादशयोजनं बहिश्चाष्टादश योजनमेवं त्रिंशद्योजनं श्रीद्वारकापुरं ख्यातम्। योजनञ्चोक्तम्—

'अष्टभिर्यवमध्यैः स्यादङ्गुलं द्वादशाङ्गुलम्। तालं त्रितालको हस्तो हस्तौ द्वौ किष्कुरुच्यते॥
किष्कुद्वयं धनुः प्रोक्तं धनुषो द्विसहस्रकम्। क्रोशः क्रोशौ तु गव्यूर्निर्गव्यूती द्वे तु योजनम्॥ इति।

अचीकरत् विश्वकर्म्मणा कारितवान् ॥४९॥ कृत्स्नाद्भुतत्वमेव दर्शयति—दृश्यत इति चतुर्भिः। हि एव यत्रैव विज्ञानं शिल्पे धीः शिल्पाभिज्ञातेत्यर्थः। शिल्पनैपुण्यं हस्तक्रियाकौशलञ्च, विशेषेण निर्मितमिति वि-शब्दार्थस्तैर्व्यञ्जित एव। उद्यानोपवनयोः पुष्पफलप्रधानत्वेन भेदः॥ ५१॥ आरकुटैरिति ह्रस्वत्वमार्षम्। महान्ति मरकतानि येषु तानि स्थलानि येषु तैर्गृहैः, चातुर्वर्ण्यं चत्वारो वर्णास्तैराकीर्णं व्याप्तम्, अतोऽन्त्यजानां बहिर्वासो ज्ञेयः। यदुदेवः श्रीभगवान्, तस्य यदुदेवत्वेन सर्वयदुवर्गः गेहेभ्यः परमोत्तमा गृहाः अत एव तैरुल्लसत्॥ ५२–५३॥ पारिजातं प्राहिणीदिति तैर्व्याख्यातमेव। यद्वा अग्रे स्वयं श्रीभगवता स्वर्गादानेतव्यात् पारिजातादस्य न्यूतत्वेन भेदः कल्प्यः। हरेः हरिं प्रति, अन्यथा बलात् स्वयमेव हरैदिति भावः॥ ५४॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

द्विपददुर्गमं मनुष्यदुष्प्रवेशम्॥ ४९–५०॥ त्वाष्ट्रं त्वष्टृ सम्बन्धि॥ ५१–५२॥ आरकुटैः।पत्तलैः॥ ५३–५८॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पञ्चाशत्तमोऽध्यायः॥ ५०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

आवयोर्यवनस्य च मम च मिथो युध्यतोः सतोर्जरासुतो यद्यागमिष्यति स तर्ह्यस्मत्बन्धून् यदून् हनिष्यत्वथवा तान् स्वपुरं प्रति नेष्यति प्रापयिष्यति यतः स बली॥ ४८॥ अथ विचार्य्य निश्चितमाह—तस्मादिति। द्विपदैर्मनुष्यैर्दुःखेनापि गन्तुमशक्यं दुर्गं जलदुर्गं विधास्यामः करिष्यामः। तत्र दुर्गेज्ञातीन् यदून् समाधाय निधाय यवनं मारयामहे घातयामहे॥ ४९॥ इत्थं सम्मन्त्र्य विचार्य निश्चित्य भगवान् समुद्रमध्ये दुर्गं तत्र नगरञ्चाचीकरत् कारमामास विश्वकर्मणेति शेषः। नगरं विशिनष्टि—द्वाटशयोजनविस्तीर्णं कृत्स्नादद्भुतं सर्वाश्चर्यमयम्॥ ५०॥ यत्र नगरे त्वाष्ट्रं विश्वकर्मणः सम्बन्धि विज्ञानसूचकं क्रियाकौशलं दृश्यते, तदाह–सार्द्धैस्त्रिभिः रथ्येति। रथ्या राजमार्गाः पुरते वीथ्यः उपमार्गाः पुरतः पश्चिमत उभयतोऽपि चत्वराण्यङ्गणानि तन्मध्ये कोष्ठाः ततोऽप्यन्तः स्वर्णभवनानि तदुपरि स्फटिकाट्टालकास्तदुपरि हेमकुम्भा इति बहुभूमिकं यथावस्तु गृहाविनिर्माणस्थानं तदनतिक्रम्य निर्मितम्॥ ५१॥ सुराणां द्रुमाः लताश्च येषु तानि उद्यानानि विचित्राण्युपवनानि च तैरन्वितं हेममयानि शृङ्गाणि येषां तैर्दिवस्पृग्भिरत्युच्चैः स्फाटिकाट्टालका उपरि भूमिकाः गोपुराणि चत्वराणि तैः॥ ५२॥ राजतारकुटैः रजतञ्चारकुटञ्च पीतलोहं पित्तलमि यावत्, ताभ्यां निर्मितैः कोष्ठैरश्वशालान्नशालादिभिः, कथम्भूतैः हैमैः कुम्भैः स्वलङ्कृतैः तथा रत्नकूटैः पद्मरागादिशिखरैः सौवर्णैः महान्ति मरकतस्थलानि येषु तैर्गृहैश्च जुष्टं सेवितम्॥ ५३॥ किञ्च, नगरगृहादौ वास्तोष्पतीनां देवानां च गृहै बलभीभिः चन्द्रशालिकाभिश्च निर्मितं यदुदेवगृहैरुल्लसच्छोभमानम्॥ ५४॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अस्येति षष्ठी तृतीयार्थे अनेन सह चावयोर्युध्यतो॥ ४८॥ दुःखङ्गच्छत्यस्मिन्निति दुर्गं "सुदुरोरधिकरणे" इति गमेर्डः प्रत्ययः विशिनष्टि, द्विपदेति। द्वे पदे येषां ते तथा द्विपदः पदेति निपातो विवक्षितः मनुष्यैरगम्यमित्यर्थः॥ ४९–५०॥ त्वष्टुर्विश्वकर्मणो विद्यमानं त्वाष्ट्रं किं तद्विज्ञानमत्राह, शिल्पनैपुणमिति शिल्पविद्यापटुत्वं रथ्या राजमार्गः वीथीः वणिजां मार्गं यथावास्तु वास्तुलक्षणमनतिक्रम्य॥ ५१॥ दिविस्पृग्भिः "हृद्युभ्यामुपसङ्ख्यानम्" इत्यलुक्समासः॥ ५२॥ राजतैः रजतमयैररपुटैर्लोहविशेषैः क्लृप्तैः कोष्ठैरन्तर्गृहैः रत्नकूटैः रत्नशृङ्गैः॥ ५३॥ वास्तोष्पतीनां वास्तुदेवतानाम्॥ ५४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

अचीकरत् अविर्भावयामास ॥ ३१–५० ॥ दृश्यते यत्रेति ब्रह्मज्ञानेन सर्वविज्ञानवत् "यद्धर्मसूनार्वत राजसूये" इत्यादिवच्चेति भावः ॥ ५१ ॥ अतएव नित्यस्थितस्यैव तस्याविर्भाव इति दर्शितः अत एव वक्ष्यते चातुर्वर्ण्यजनाकीर्णमिति ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अत्त्य अनेन ॥ ४८–४९ ॥ समुद्रमध्ये द्वादशयोजनमिति । "अष्टभिर्यवमध्यैः स्यादङ्गुलं द्वादशाङ्गुलम् । ताले त्रितालको हस्तो हस्तो द्वौ किष्कुरुच्यते । किष्कुद्वयं धनुः प्रोक्तं धनुषो द्विसहस्रकम् । क्रोशः क्रोशो तु गव्यूतिर्गव्यूती द्वे तु योजनम् । इति तन्मध्ये नगरम् ॥ ५० ॥ त्वाष्ट्रं विज्ञानं विश्वकर्मणः पाण्डित्यं शिल्पे शिल्पकर्मणि नैपुण्यं यतस्तत्, नगरं विशिनष्टि—सार्द्धैस्त्रिभिः । रथ्याराजमार्गाः चत्वराण्यङ्गणानि वीथ्य उपमार्गाः वास्तुगृहादिनिर्माणस्थानं तमनतिक्रम्य निर्मितं राजतं च आरकुटं पीतं लोदं च ताभ्यां निर्मितैः रत्नकूटैः पद्मरागादिशिखरैः वास्तोष्पतीनां देवानां वलभीभिश्चन्द्रशालाभिः यदुदेवः श्रीकृष्णः तस्य गृहैरुत्कर्षेण लसत् ॥ ५१–५४ ॥

गूढार्थदीपिनी

अचीकरत् कारयामास । विश्वकर्मणेति शेषः ॥ ५० ॥ त्वष्टा विश्वकर्मा तस्य सम्बन्धि विज्ञानं ज्ञानसूचकं क्रियाकौशलम् । रथ्या राजमार्गाः । वास्तु ग्रहनिर्माणशास्त्रं तदनुसारेण ॥ ५१ ॥ सुरेति नगरविशेषणम् । गोपुरैः पुरद्वारैश्च निर्मितमित्युतरेणान्वयः ॥ ५२ ॥ रजतम् आरकुटं पित्तलं च ताभ्यां निर्मितैः कोष्ठैरन्नशालादिभिश्च निर्मितम् । कूटैः शिखरैः गृहैश्च निर्मितम् ॥ ५३ ॥ वास्तोष्पतीनां देवानां मन्दिरैः । यदुदेव उग्रसेनः श्रीकृष्णो वा तेषां गृहैः उल्लसदिति नगरविशेषम् ॥ ५४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अस्य अनेन ॥ ४८–४९ ॥ अन्तःसमुद्रे समुद्रमध्ये दुर्गं तन्मध्ये कृत्स्नाद्भुतं सर्वाश्चर्य्यमयं नगरं च अचीकरत् कारयामास ॥ ५० ॥ यत्र नगरे त्वष्टुर्विश्वकर्मणो विज्ञानं शिल्पनैपुण्यं क्रियाकौशलं च दृश्यते लक्ष्यते, पुरं वर्णयति—रथ्येत्यादिना, रथ्याः राजमार्गाः चत्वराण्यङ्गणानि वीथ्य उपमार्गा तैः वास्तुगृहादिनिर्माणस्थानं तमनतिक्रम्य निर्मितम् ॥ ५१ ॥ सुराणां द्रुमाः लताश्च येषु तान्युद्यानानि विचित्रोपवनानि च तैरन्वितं हेममयानि शृङ्गाणि दिविस्पृग्भिरत्युच्चैः स्फाटिकाः अट्टालाः उपरिभूमिकाः गोपुराणि च पुरद्वाराणि तैर्निर्मितमित्युत्तरेणान्वयः ॥ ५२ ॥ रजतं च आरकुटं पीतलोहं च ताभ्यां निर्मितैः कोष्ठैः अश्वशालान्नशालादिभिः तथा हेमकुम्भैरलङ्कृतैः रत्नकूटैः पद्मरागादिशिखरैः हैमैः सौवर्णैः महामरकतमयानि स्थलानि येषु तैर्गृहैश्च ॥ ५३ ॥ तथा नगरगृहादौ वास्तोष्पतीनां देवानां गृहैः वलभीभिश्चन्द्रशालिकाभिश्च निर्मितं यदुदेवगृहैरुल्लसत् ॥ ५४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

निषङ्गादिषुधेः शरान्नाराचात्तस्मिन्गृह्णन् । अथ सन्दधच्छितबाणसञ्चयं विकृष्य मुञ्चत् मुक्तेन तेन रथान्कुञ्जरवाजियूथपान्निघ्नंश्च । अलातचक्रमुल्मुकमण्डलं यद्वत्तद्वन्निरन्तरं यथा तथा भगवानदृश्यत ॥ ४९ ॥ शशाङ्काकृतिपाञ्चजन्यं शशाङ्कस्याकृती रूपमिव रूपं यस्य स चासौ पाञ्चजन्यश्च तम् । आकृतिः कथिता रूप इति विश्वः । दैत्यकुलस्य गर्भनिर्भेदनेनापचारो नाशो येन तम् । योग्यतया रवावन्वयीदम् । दैत्यकुलापचारमहारवोपेतमिति निर्गलितोऽर्थः । मुखे तद्द्वावरि निधायाशु यादवानाश्वासयत् । सबलान्कुर्वन्क्षत्रियकूटेन समूहेन घट्टितान्पुपूर पूरयामास । पपारेति वक्तव्ये पुपूरेत्यार्षः प्रयोगः ॥ ५० ॥ नृपा रिपुनृपाः कर्णनिष्ठुरं स्वश्रोत्रकठोरमाकर्ण्य क्रमेण निर्भिन्नं येषां ते तथा । बभूविरे बभूवुः । निर्भिन्नहृदयः कायानिति शेषः । बभूविरे प्रापुः । भू प्राप्तावात्मनेपदीति स्मरणादिति वा । यदुवीराश्च तदाकर्ण्येति समुच्चायकः । समुद्यतान्यायुधानि यैस्ते रणेऽनीकसयुताः सेनासमेताः नृपाञ्जन्नुः ॥ ५१ ॥ शौरिणा कत्री शार्ङ्गरवेण करणेनाप्यायितः समेधिता यदुप्रवीरा यादवश्रेष्ठाः । यदस्ति तत उच्चत्वाद्यदुरित्सृग्भाष्योक्तेर्यदुर्हरिः स प्रवीरो येषां त इति वा । चतुर्द्वारगतान्महीपतीन्सर्वशः सर्वान्परिभूय पराभाव्य शरोघैः सहसैकवाहिन एकश्चासौ वाहश्च सोऽस्त्येषामित्येकवाहिन स्वरक्षकपृष्ठवाहीनांश्चक्रुः ॥ ५२ ॥ कृष्ण कृष्ण तिष्ठेति भर्त्सयन्नब्रवीत् ॥ ५३ ॥ मण्डलीकृतकोदण्डस्तैलधौतात् शितान्निशितान्सायकान् शरान्बहून्विमुञ्चंस्तंस्तं गोविन्दोऽभ्यधावत् । आसायकं मघवादत्तवज्रमित्यृग्भाष्ये सायङ्करं लयकृत इति टीकायां च सायक इत्यपि बज्रनाम । ततः पुनरुक्तिपरिहाराय निर्वक्ति । सायङ्करमिति । सायमिति षोन्तकर्मणीत्यस्य रूपम् । सायमन्तं करोतीत्युक्तेः ॥ ५४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तर्हि उभावपि मारणीयाविति चेत्, तत्राह आवयोर्युध्यतोरिति। उभावजेयौ, अतः प्रधानपरिहारेण केवलबलहनने विलम्बो भवतीति यवनेन सह आवयोर्युध्यतोः सतोः, प्रक्रान्तस्य त्यागायोगात्, यदि मध्ये जरासन्धः चतुरः समागच्छेत्, तदा अस्मानन्यत्रासक्तान् विहाय बन्धून् वसुदेवादीन् हनिष्यति। स्वपुरं वा बद्ध्वा नेष्यति। पश्चान्मोचनार्थं बहु कर्तव्यं पतेत्। मारयितुमशल्य एवेत्याह बलीति। एवं सति यत्कर्तव्यं तदाह तस्मादिति। द्विपदाना मनुष्यमात्रस्य दुर्गमं दुर्गं विधास्याम इति। नन्वेतावदलौकिकं यः करोति, स तानेव कथमन्यथा न करोति, किमिति स्थानं त्याजयतीति चेत्? मैवम्। द्वारकादिनिर्माणे न काचिन्मर्यादा बाध्यते, अन्यत्र तु ब्राह्मणवाक्यानि बाध्यन्ते। एतदर्थमेव द्वारकानिर्माणमिति न तत्र ब्राह्मणवाक्यं प्रभविष्यति। सर्वत्रधिकप्रयत्नः साधारण्यं निराकरोतीति। अत एव पूर्वं बलीति पदम्, अत्र च द्विपदमिति। अतो ब्राह्मणा अपि द्विपदा एवेति तेषामपि स दुर्ग एव। पश्चान्निर्मये स्थाने ज्ञातीन् वसुदेवादीन् समाधाय यवनं घातयामहे, तदा विलम्बो न बाधक इति। अन्यथा भगवत्यन्यत्र गते मुचुकुन्दगुहायाम्, वसुदेवादयो भीताः खेदं प्राप्नुयुः॥ ४९॥ एवं निर्धारिते मन्त्रे यदासीत्, तदाह इति संमन्त्र्येति। वतो दाशार्हो भक्तरक्षकः। अनेन क्लिष्टकरणदोषोऽपि परिहृतः। ननु कालादिभिरनिर्मितं कथं निर्मास्यति, तथा सति कालादयो वा कथं न प्रतिबन्धं करिष्यन्तीत्याशङ्क्याह तद्दुर्गमेव करिष्यति। जलादिदुर्गाः प्रसिद्धाः। अतो नालौकिकं करिष्यति। किञ्च, कालहितमपि करिष्यतीत्याह द्वादशयोजनमिति। द्वादशात्मा हि कालः। प्रतिपक्षतया वा करिष्यति। अलौकिकत्वाच्चतुरस्रं तत्। सर्वापेक्षया विशेषं वक्तुं तत्रत्यं गुणत्रयमाह। अन्तःसमुद्र इति समुद्रमध्ये। न सा पृथिव्यां तिष्ठति, किन्तु भूमिवत् नगर्यप्यन्तरिक्षे समुद्रमध्ये जलोपरि तिष्ठति। अन्यथा नीचे स्थिता भवेत्। तत्र वैलक्षण्यं संभविष्यतीति तन्निराकरणार्थं नगरमिति। तत्रापि विशेषः अद्भुतमिति। कृष्ण इति। सदानन्दः। तेन कृतं स्थानं तत्प्रापकं भविष्यतीति ज्ञापितम्। अचीकरदिति। स्वयमेव चकार। विश्वकर्मणा कृतमित्येके, त्वाष्ट्रमिति पदात्। वस्तुतस्तु विश्वकर्मणो यावन्नैपुण्यम्, तावदत्र भगवनैव निर्मितमिति। स हि जले कर्तुं न शक्नुयात्। अन्यथा इति भगवति क्रमेण षड्गुणेष्वपि गतेषु सप्तमे दिवसे तं न प्लावयेत् समुद्रः, विश्वकर्मणो विद्यमानत्वात्। अस्तु वा विश्वकर्मणा कारितमिति। अचीकरद्विश्वकर्मणैति करणं वा यत्र नगरे त्वाष्ट्रं विज्ञानमनेकचातुर्ययुक्तं दृश्यते। शिल्पे नैपुण्यं यस्मात् विज्ञानादिति ज्ञानमायां हेतुरुक्तः। किञ्च, रथ्याचत्वरवीथीभिः सहितम्। यथावास्तु वास्तुशास्त्रसहितम्। विशेषेण निर्मितम्, चित्रादिरहितेऽपि सामान्यनिर्माणेऽपि वैशिष्ट्ययुक्तम्। दैविकं लौकिकं शास्त्रीयं च ज्ञानं तस्मिन् नगरनिर्माणे प्रतिष्ठितमिति वर्णनावधित्वं निरूपितम्। विशेषतो वर्णयति। सुरद्रुमाः पारिजातादयः। ते उद्यानेषु यत्र। उद्यानं पुष्पप्रधानम्। उपवनं फलप्रधानम्, तैरन्वितमिति सर्वत उभयेषां सम्बन्ध उक्तः। अन्तर्नगरवैशिष्ट्यमाह हेमशृङ्गैर्दिविस्पृग्भिरिति। एकविंशतिगृहोपरि सुवर्णशृङ्गाणि सुवर्णकलशस्य परितः स्थापितानि। अत एव दिवं स्पृशन्ति। तत्र निदानप्रस्तरामाह स्फाटिकेति। स्फाटिकैरेव निर्मिताः अट्टालाः गोपुराणि च। दुर्गत्वादन्नसङ्ग्रहार्थं रजतैरारकूटैश्च निर्मितानि कोष्ठानि रजतारकूटशब्दादण्। हेमकुम्भैश्च सर्वतः अलङ्कृतम्। धृतदध्याद्यर्थं राजतानि कोष्ठानि। अन्नार्थं तु पैत्तलनिर्मितानि। सर्वधातूपलक्षणपारकूटपदम्, आद्यन्तयोः रजतसुवर्णयोगपादानात्। उपरि शोभातिशयमुक्त्वा मध्ये शोभामाह रत्नकूटैर्गृहैर्हैमैरिति। सर्वत्र गृहाः रत्ननिर्मितपदकवत् सौवर्णाः। भूमिश्च मरकतशिलाभिः निर्मितेत्याह। महामारकतानि स्थलानि येष्विति॥ ५३॥ अनुप्रयुक्ता अपि धर्मसाधकाः कौतुकासाधकाश्च गृहाः सन्तीत्याह। वास्तोष्पतीनां वास्तुदेवताविपतीनामिन्द्रादीनाम्। वस्तून्यस्मिन्निति वासुदेवता भूमिः, तस्याः पतयः सर्वे लोकपालाः। चकारात् दुर्गादीनामपि। अनेन मध्ये भगवतः परित आशापालानां गृहा इत्युक्तं भवति। वलभीभिरिति सर्वत्र छजानिर्याणम्। अनेनाग्रे निर्माणक्रिया कापि नापेक्षितेति सूचितम्। किञ्च चातुर्वर्ण्यजनाकीर्णम्। चातुर्वर्ण्यैर्जनैः पूर्वमेवाकीर्णम्। तेन ते भगवत्कृता एव जना निरूपिताः। अन्यथा इतो गतानां वैद्यामिव पातो भवेत्। ते हीदानीमपि तिष्ठन्ति। अतस्तत्सन्निधानेन सर्वदा विद्यमानत्वसाम्यात् भगवत्गृहमाह यद्देवगृहेण उल्लासदिति। मध्ये भगवद्गृहम्, चतुर्दिक्षु वर्णचतुष्टयानाम्। आकीर्णमिति। किमीरितत्वं निरूपितम्॥ ५४॥

श्रीसुबोधिनी–सारः

तस्माद्धेतोरद्य इदानीं द्विपदानां मनुष्याणां दुर्गमं दुर्गं वप्रं वयं करिष्यामः तत्र दुर्गे ज्ञातीन् समाधाय निरूप्य यवनं घातयामो मुचुकुन्देन॥ ४९॥ इत्येवं संमंत्र्यान्तःसमुद्रे समुद्रमध्ये द्वादशयोजनमष्टचत्वारिंशत्क्रोशविस्तारायामं दुर्गं तन्मध्ये कृत्स्नं सर्वमद्भुतमाश्चर्यं यस्मिंस्तन्नगरं विश्वकर्मणा कारितवान् भगवान्॥ ५०॥ तद्यथा यत्र नगरे त्वष्टा विश्वकर्मा तदीयं त्वाष्ट्रं शिल्पनैपुणं क्रियाकौशलं विज्ञानं दृश्यते। यथावस्तु यथागृहं रथ्यादिभिर्विनिर्मितम्॥ ५१॥ सुराणां द्रुमा वृक्षा लताश्च येषु तानि उद्यानानि विचित्राण्युपवनानि तैरन्वितं युक्तं हेममयानि शृङ्गाणि येषु तैर्दिविस्पृग्भिरत्युच्चैः स्फाटिकाः स्फटिकमणिमया अट्टाला उपरितनभूमिका गोपुराणि पुरद्वाराणि तैर्निर्मितम्॥ ५२॥ रजतं प्रसिद्धम् आरकूटं पीतलोहं ताभ्यां निर्मितैः कोष्ठैरश्वशालान्नशालादिभिः स्वर्णकलशैरलंकृतैः तथा रत्नकूटैः पद्मरागादिगर्भैर्हैमैः सुवर्णमयः महामरकतमयानि स्थलानि येषु तैर्गृहैर्निर्मितम्

अलंकृतमिति पाठः साधुः ॥ ५३ ॥ वास्तोष्पतीनामिन्द्रादिदेवानां च गृहैर्मंदिरैः वलभीभिश्चद्रशालिकाभिश्च निर्मितम् । चातुर्वर्ण्येन जनेनाकीर्णं व्याप्तं यदुदेवस्योग्रसेनस्य गृहै राजस्थानैरुल्लसच्छोभमानम् ॥ ५४ ॥

विवरणटिप्पणी

दृश्यते इत्यत्र । वर्णनावधित्वमिति । वास्तुशास्त्रे यथा वर्णितम् । तादृशं निर्मितमित्युक्त्या शास्त्रवर्णनमवधिर्यस्य तादृशत्वं निर्माणस्य निरूपितम् । अग्रे । ते उद्यानेषु यत्रेति । यत्र उद्यानेषु ते सन्ति । तथा च सुरद्रुमलतायुक्तान्युद्यानानि विचित्राण्युपवनानि च तैरन्वितमित्यर्थः । एकविंशतिगृहोपरीति । यथावास्तु इत्युक्तत्वात्तत्रोपर्युपर्येकविंशतिप्राकारपर्यन्तं गृहा निरूपिताः तथात्रापीति भावः । दिवमिति । तच्छास्त्रोक्तत्वादत्राप्येवमुक्तम् । निदानेति । यदुपर्यन्ये गृहा भवन्ति ते मूलकारणभूताः प्रस्तराः स्फटिकमया इत्यर्थः । अग्रे । वर्णचतुष्टयानामिति । वर्णचतुष्टयमपि चतुर्दिक्षु । अतो बहुवचनम् ॥ ५४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यत एवमुभयतो दुःखं तस्मात् द्विपदैर्मनुष्यैर्दुर्गमं गन्तुमशक्यं दुर्गमद्यैव विधास्यामः करिष्यामः । तत्र दुर्गे ज्ञातीन् यदून् समाधाय यवनं घातयामहे । एवमुभयतोऽपि यदूनां कष्टं न स्यादित्याशयः ॥ ४९ ॥ भगवान् सङ्कर्षणेन सहेति सम्मन्त्र्य विचार्य अन्तःसमुद्रे समुद्रमध्ये दुर्गं तत्र चकृत्स्नाद्भुतं सर्वाश्चर्यमयं द्वादशयोजनविस्तीर्णं नगरं चाचीकरत् कारयामास विश्वकर्मणेति शेषः ॥ ५० ॥ यत्र नगरे हि त्वाष्ट्रं त्वष्टा विश्वकर्मा तस्य सम्बन्धि विज्ञानं ज्ञानसूचकं शिल्पनैपुणं क्रियाकौशलं दृश्यते । तदेव दर्शयति–रथ्येति चतुर्भिः । रथ्या राजमार्गाः, चत्वराण्यङ्गणानि, वीथ्यः उपमार्गाः, तैर्यथावास्तु वास्तु गृहादिनिर्माणस्थानं तदनतिक्रम्य विनिर्मितम् ॥ ५१ ॥ सुराणां द्रुमा लताश्च येषु तानि उद्यानानि वाटिकाश्च विचित्राणि उपवनानि समीपवनानि च तैरन्वितम् । हेममयानि शृङ्गाणि येषां तैर्दिविस्पृग्भिः अत्युच्चैः स्फाटिका अट्टाला उपरिभूमिकाः गोपुराणि पुरद्वाराणि तैश्च निर्मितमित्युत्तरेणान्वयः ॥ ५२ ॥ राजतारकुटैः रजतं च आरकुटं पित्तलं च ताभ्यां निर्मितैः कोष्ठैः अन्नशालाश्वशालादिभिश्च निर्मितम् । कोष्ठानि विशिनष्टि—हेमकुम्भैरलङ्कृतैरिति । तथा रत्नकूटैः पद्मरागादिशिखरैः हैमैः सौवर्णैः महामरकतस्थलानि येषु तैर्गृहैश्च निर्मितम् ॥ ५३ ॥ किञ्च नगरगृहादौ वास्तोष्पतीनां देवानां च गृहैर्वलभीभिश्चन्द्रशालिकाभिश्च निर्मितम् ब्राह्मणादिचातुर्वर्ण्यजनैराकीर्णं व्याप्तम् तथा यदुदेवस्य उग्रसेनस्य गृहैरुल्लसत् शोभमानम् ॥ ५४ ॥

अन्वितार्थप्रकाशिका

तस्मादिति ॥ यत एवमुभयतो दुःखं तस्मात् द्विपदैर्मनुष्यैर्दुर्गमं गन्तुमशक्यं दुर्गमद्यैव विधास्यामः करिष्यामः । तत्र दुर्गे ज्ञातीन् यदून् समाधाय यवनं मुचुकुन्दद्वारा घातयामहे । श्रीरुद्रवरपालनाय स्वयं मारणं तु अनुचितम् ॥ ४९ ॥ इतीति ॥ भगवान् सङ्कर्षणेन सहेति संमन्त्र्य विचार्य अन्तः समुद्रे समुद्रमध्ये दुर्गमचीकरत् कारयामास । तत्र च कृत्स्नमपि वस्तु अद्भुतं सर्वाश्चर्यमयं यत्र तत् द्वादशयोजनविस्तीर्णं नगरं चाचीकरत् । विश्वकर्मणेति शेषः । "अष्टभिर्यवमध्यैः स्यादङ्गुलं द्वादशाङ्गुलः ॥ बितस्तिस्तद्द्वयं हस्तो हस्तौ द्वौ किष्कुरुच्यते ॥ किष्कुद्वयं धनुः प्रोक्तं धनुषो द्विसहस्रकम् ॥ क्रोशः क्रोशौ तु गव्यूतिर्गव्यूती द्वे तु योजनम् ॥" इति अत्र द्वादशयोजनं नगरं बहिश्च दुर्गमष्टादशयोजनम् । एवं त्रिंशद्योजनं द्वारकापुरम् ॥ ५० ॥ नगरं विशिनष्टि—दृश्यते इति ॥ यत्र नगरे त्वाष्ट्रं त्वष्टा विश्वकर्मा तस्य संबन्धिविज्ञानं ज्ञानसूचकं शिल्पनैपुणं क्रियाकौशलं दृश्यते "रथ्या चत्वरवीथिभिः" रथ्या राजमार्गाः पुरतः वीथ्य उपमार्गाः पश्चिमतः चत्वराण्यङ्गणान्युभयतः रथ्यादिभिर्यथा वास्तु वास्तुगृहादिनिर्माणस्थानं तदनतिक्रम्य निर्मितम् ॥ ५१ ॥ सुरेति ॥ सुराणां द्रुमा लताश्च येषु तानि उद्यानानि वाटिकाश्च विचित्राणि उपवनानि समीपवनानि च तैरन्वितं हेममयानि शृङ्गाणि येषां तैर्दिविस्पृग्भिः अत्युच्चैः स्फाटिका अट्टाला उपरिभूमिकाः गोपुराणि पुरद्वाराणि तैश्च निर्मितमित्युत्तरेणान्वयः । अन्वितमिति समस्तादपि छित्त्वा वा ॥ ५२ ॥ राजतेति ॥ "हेमकुम्भैरलंकृतैः" इति कोष्ठविशेषणम् । राजतारकुटैः रजतं च आरकूटं पित्तलं च तद्विकारैः ताभ्यां निर्मितैः कोष्ठैः अन्नशालाश्वशालादिभिश्च निर्मितं तथा रत्नकूटैः पद्मरागादिशिखरैः हैमैः सौवर्णैः महामरकतमयानि स्थलानि येषु तैर्गृहैश्च विनिर्मितम् ॥ ५३ ॥ किंच—वास्तोष्पतीनामिति ॥ नगरगृहादौ वास्तोष्पतीनां देवानां च गृहैर्बलभीभिश्चन्द्रशालिकाभिश्च निर्मितं ब्राह्मणादिचातुर्वर्ण्यजनैराकीर्णं व्याप्तं तथा यदुषु देवाः श्रेष्ठाः कृष्णरामवसुदेवोग्रसेनास्तेषां गृहैरुल्लसत् शोभमानम् । अत्रैवं रचना । परितस्तावत्समुद्रः तदभ्यन्तरे तीरे सुखविहारार्थं परितश्चत्वराणि तदन्तर्दुर्गप्राचीराणि तस्य मध्ये मध्ये रत्नकूटाः तदुपरि हेमशिखराणि तदुपरि हेमकुम्भाः दुर्गचतुर्दिक्षु गोपुराणि तदुपरि स्फाटिकभित्तिमयाट्टालिकाः दुर्गान्तः पुनश्चत्वराणि तत उद्यानोपवने तत्र वापीकूपादि तदन्तः सुरालयाः तदन्तर्यथासन्निधि अश्वान्नगृहाद्याः तदन्तरग्रे विप्राणां गृहाः पश्चाच्छूद्राणां वामे वैश्यानां दक्षिणे क्षत्रियाणां मध्ये सुधर्मामध्ये मिलित्वा श्रीकृष्णादिचतुर्णां गृहाः गृहमध्ये मरकतस्थल्यः उपरि बलमीहेमकुम्भादय इति ॥ ५४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इति संमन्त्र्य उभौ विचार्यकृष्णः अन्तःसमुद्रे समुद्रमध्ये दुर्गं तत्र । कृत्स्नाऽद्भुतं समग्नाश्चर्यमयं त्वष्ट्राऽद्भूतमिति पाठे तु त्वष्ट्रा विश्वकर्मणा अद्भुतं सर्वोत्तमं नगरं अचीकरत् कारयाम्बभूव ॥ ५० ॥ त्वष्टुर्विश्वकर्मण इदं त्वाष्ट्रं शिल्पस्य हस्तक्रियाया नैपुणं चातुर्यं यस्मिन् तत् विज्ञानं बुद्धिसामर्थ्यं यत्र पुरे दृश्यते । रथ्या अग्नतोराजमार्गाः वीथ्यो वामदक्षिणत उपमार्गाः उभयतः । चत्वराणि गृहां गणानि यथा वास्तु ब्राह्मणादीनां गृहादिनिर्माणरीतिमनतिक्रम्य निर्मितं ॥ ५१ ॥ सुराणां द्रुमालताश्च येषु तानि उद्यानानि पुष्पप्रधानगृहसमीपवाटिकाः विचित्रोपवनानि नगराद्बहिः फलप्रधानवाटिकाश्च तैरन्वितं दिवि स्पृग्भिः बहुच्चैः हेममिश्राणि शृंगाणि अग्रभागा येषां तैः स्फाटिकाः स्फटिकमणिभिः रचिता अट्टालाहर्म्योपरितनभूमिकाः तथाभूतानि गोपुरद्वाराणि अन्यद्वाराणि च तैर्निर्मितमित्युत्तरेण संबंधः ॥ ५२ ॥ राजतारकूटैः रजतं रौप्यं च आरकूटं पीतधातुश्च ताभ्यां रचितैः कोष्ठैः अन्नशालाहयशालादिभिः कीदृशैः सुवर्णकुम्भैः कृत्वा अलंकृतैः तथारत्नकुटैः पद्मरागादिमणिशिखरैः । महामरकत-मयानि इन्द्रनीलमणिमयानि स्थलानि येषु तैः हैमैः कांचनमयैः गृहैश्चनिर्मितं ॥५३॥ पुरगेहादौ वास्तोः पतीनां सुराणां गृहैर्मंदिरैश्च वलभीभिश्चंद्रशालिकाभिः । गृहाच्छादनाग्रभागैरित्यर्थः । निर्मितं यदूनां मध्ये देवाः श्रीकृष्णारामाद्याः श्रेष्ठ्यादवास्तेषां गृहैः उल्लसत् प्रकाशमानं नगरं । अचीकरदितिसंबन्धनीयम् ॥ ५४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति । इतीत्थं, सम्मन्त्र्य विचार्य निश्चित्येत्यर्थः । भगवान् महैश्वर्ययुक्तः श्रीकृष्णः, अन्तःसमुद्रे समुद्रमध्ये, दुर्गं दुर्गमकोट्टं, द्वादशयोजनं द्वादशयोजनविस्तीर्णं, कृत्स्नानि समग्राण्यद्भुतान्याश्चर्याणि तस्मिंस्तथाभूतं, नगरं अचीकरत् कारयामास । विश्वकर्मणेति शेषः ॥ ४९ ॥ दृश्यते इति । यत्र नगरे, त्वाष्ट्रं विश्वकर्मणः सम्बन्धि, विज्ञानं विज्ञानसूचकं शिल्पनैपुणं क्रियाकौशल्यं, दृश्यते हि । तदाह सार्द्धैस्त्रिभिः । रथ्या च चत्वराणि च वीथ्यश्च ताभिः, यथावास्तु वास्तुर्गृहादिनिर्माणस्थानं तमनतिक्रम्य, विनिर्मितं, अत्र रथ्या राजमार्गाः, वीथ्य उपमार्गाः, चत्वाराण्यङ्गणानि, तद्युक्तभवनोपेतमिति ॥ ५० ॥ सुरद्रुमेति । सुराणां द्रुमाः कल्पवृक्षाः पारिजातादयः लताः कल्पलताश्च येषु तानि उद्यानानि विचित्राण्युपवनानि च तैरन्वितम् । हेममयानि शृङ्गाणि येषां तैः, दिविस्पृग्भिरत्युच्चैः, स्फाटिकाः स्फटिकमणिकृताः अट्टाला उपरितनभूमिकाः गोपुराणि द्वाराणि च तैः, निर्मितमिति तृतीयेनान्वयः ॥ ५१ ॥ राजतेति । रजतं रूप्यं आरकूटं पित्तलं च ताभ्यां निर्मिता राजतारकूटास्तैः, हेमकुम्भैः, अलङ्कृतैः कोष्ठैः अश्वशालान्नशालादिभिः, तथा रत्नकूटैः पद्मरागादिशिखरैः, हैमैः सौवर्णैः, महामरकतमयानि स्थलानि येषु तैः, गृहैश्च, विनिर्मितमित्यनेनान्वयः । उक्तविधैतद्गृहाणां मध्ये कोष्ठाः ततोऽप्यन्तः स्वर्णभवनानि तदुपरि स्फटिकाट्टालकाः तदुपरि हेमकुम्भा इति बहुभूषितमिति ॥ ५२ ॥ वास्तोष्पतीनामिति । किं च, नगरद्वारादाविति शेषः । वास्तोष्पतीनां वास्तुदेवतानां, गृहैः वलभीभिश्चन्द्रशालाभिश्च, निर्मितं, यदुदेवगृहैः राजगृहैरुल्लसत् शोभमानं, चातुर्वर्ण्यजनैराकीर्णं व्याप्तं च ॥ ५३ ॥ सुधर्मामिति । यत्र यस्यां, अवस्थितः मर्त्यो जनः मर्त्यधर्मैः अशनापिपासाशोकमोहजरामरणादिभिश्चापि, न युज्यते । तथाविधां, सुधर्मां सुधर्माख्यां सभां, पारिजातं च, महेन्द्रः, हरेर्हरये इत्यर्थः । प्राहिणोत् । शुकपरीक्षित्संवादात्पूर्वभावित्वाद्भूत-निर्देशः ॥ ५४ ॥

कृष्णप्रिया

इसलिये हम आज एक ऐसा किला बनायेंगे कि जहाँ किसी भी मनुष्य का प्रवेश होना दुःशक्य हो । पुनः उस किले में हमारे पारिवारिकजन-स्वजन आदि को पहुँचा दै और कालयवन का आसानी से मृत्यु करायेंगे ॥ ४९ ॥ श्रीकृष्णचन्द्रजी दाऊदयाल भैया से ऐसा परामर्श करके महासागर के मध्य में एक दुर्गम और दिव्य नगर बनवाया, जिस नगर में सर्व सर्वोत्कृष्ट सामग्री थी और इस नगर का क्षेत्रफल बारह योजन (अड़तालीस कोस) था ॥ ५० ॥ नगर को वस्तुओं में और सामग्रीओं में वास्तोपति का विज्ञान एवं शिल्पकलाचातुर्य का दर्शन हो रहा था । नगर निर्माण में वासुशास्त्र विधान अनुसार बड़े-बड़े राजपथ चौराहों छोटी-मोटी गलियाँ का स्थान-स्थान पर विभाजन किया था ॥ ५१ ॥ नगर में रमणीय नयन रम्य उद्यान बनाये गये थे, कलाप्रचुर विविध उपवन भी थे । विशेष करके उछाल में एवं नगर में देवतरुवर देवलताएँ लह-लहा रही थी । सुवर्ण निर्मित अतिशय ऊँचे शिखर आकाश मण्डल को छूते थे । श्वेतवर्ण स्फटिक मणियों की अटारियाँ थी । अति ऊँचे रमणीय दरवाजे नगर शोभा को बैठाते थे ॥ ५२ ॥ धान्य रक्षा के लिये बड़े-ब्रड़े रजत और पीतल के कोठे बनाये गये थे । नगर हवेलियाँ सुवर्ण की बनायी गयी थी । महलों के शिखरों पर कला कौशल्य पूर्ण बने हुए सुवर्ण कलश सजे हुए थे । राजभवनों के शिखर रत्न-निर्मित थे और गच पन्ने की बनार्यी थी वह भली-भाँति सोहानी थी । इस नये नगर में विश्वकर्मा के मन्दिर भी विशिष्ट रचनाओं से सम्पन्न थे मन्दिरों पर रमणीय छज्जे भी रचे गये । चतुर्वण प्रजाजनों का नगर में निवास था और यदुकुल शिरोमणि महाराज उग्रसेनजी श्रीवसुदेवजी श्रीबलभद्रजी एवं भगवान श्रीकृष्ण के राजमहल जगमगाते थे ॥ ५४ ॥

सुधर्मां पारिजातं च महेन्द्रः प्राहिणोद्धरेः । यत्र चावस्थितो मर्त्यो मर्त्यधर्मैर्न [1]युज्यते ॥ ५५ ॥
[2]श्यामैककर्णान् वरुणो हयाञ्छुक्लान् मनोजवान् । [3]अष्टौ निधिपतिः कोशान् लोकपालो[4] निजोदयान्॥
[5]यद् यद् भगवता दत्तमाधिपत्यं स्वसिद्धये । सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ॥ ५७ ॥
तत्र योगप्रभावेण नीत्वा [6]सर्वजनं हरिः ।
[7]प्रजापालेन रामेण कृष्णः समनुमन्त्रितः । निर्जगाम पुरद्वारात् पद्ममाली निरायुधः ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे[8] दशमस्कन्धे[9] [10]दुर्गनिवेशनं नाम [11]पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

कर्दमक्षमा

अन्वयः—महेन्द्रः, हरेः, सुधर्माम्, च, पारिजातम्, प्राहिणोत्, च, यत्र, अनस्थितः, मर्त्यः, मर्त्यधनैः, न, युज्यते ॥५५॥ वरुणः, शुक्लान्, श्यामैककर्णान्, मनोजवान्, हयान्, प्राहिणोत्, निधिपतिः, अष्टौ, कोशान्, प्राहिणोत्, लोकपालः, निजोदयान्, प्राहिणोन्, ॥ ५६ ॥ हे नप ! भगवता, स्वसिद्धये, यद्, यद्, आधिपत्यम्, दत्तम्, भूमिगते, हरौ, सर्वम्, प्रत्यर्पयामासुः ॥ ५७ ॥ हरिः, तत्र, योगप्रभावेण, सर्वजनम्, नीत्वा, प्रजापालेन, रामेण, समनुमन्त्रितः, पद्ममाली, निरायुधः, कृष्णः, पुरद्वारात्, निर्जगाम ॥ ५८ ॥

इति पञ्चाशत्तमाध्यायस्यान्वयाः समाप्ताः ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

पारिजातं च प्राहिणोत्प्रस्थापयामासेति शुकपरीक्षित्संवादात्पूर्वभावित्वाद्भूतनिर्देशः । मर्त्यधर्मैः क्षुत्पिपासादिषड्र्मिभिः ॥५५॥ निधिपतिः कुबेरः अष्टौ कोशान्निधीन् । "पद्मश्चैव महापद्मो कुन्दकूर्मौ तथौदकः । नीलो मुकुन्दः शंखश्च निधयोऽष्टौ प्रकीर्तिताः" इति प्रसिद्धान् । निजोदयान्निजविभूतीः ॥ ५६ ॥ अन्ये च सिद्धादयो भगवता स्वाधिकारसिद्धये यद्यदाधिपत्यं दत्तमासीत्तत्सर्वं प्रत्यर्पयामासुरिति ॥ ५७ ॥ यथा कालयवनो न वेत्ति न चासौ जनस्तथा योगप्रभावेण नीत्वा त्वमत्र स्थित्वा प्रजाः पालयाहं पलायिष्य इति समनुमंत्रितः कृतानुमन्त्र इत्यर्थः ॥ ५८ ॥

इति श्रीमद्भा० म० दशमस्कंधोत्तरार्धे भावार्थदीपिकायां श्री० टीकायां पंचाशत्तमोऽध्यायः ॥ ५० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'स्यात्सुधर्मा देवसभा' इत्यमरः । पारिजातं वांछितदं वृक्षम् । यत्र सुधर्मायाम् । सुधर्मां पारिजातं च पराजितः सन्देवराजः श्रीकृष्णाय ददौ न तु प्रीत्येति । "अधिक्रमंत्यंघ्रिभिराहृतां बलात्सभां सुधर्मां सुरसत्तमोचिताम् । निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरन्ति" इत्युक्तेः, "पारिजातं तदुत्पाट्य आरोप्य च गरुत्मति । सेन्द्रान्देवान्विनिर्जित्य" इति वक्ष्यमाणत्वाच्च । अत एव प्राहिणोदित्युक्तं न तु समर्पयामासेति ॥ ५५ ॥ हयान् सहस्रसंख्यान् "ददौ सहस्रसंख्यातानश्वान्देवाय तोयराट्" इति पुराणान्तरात् । औदकः कुन्दः खर्वः, यद्वा—तन्नामैव । क्वचित्तु नव निधयोऽपि—"महापद्मश्च पद्मश्च शंखो मकरकच्छपौ । मुकुंदकुंदनीलाश्च खर्वश्च निधयो नव ॥" इति शब्दार्णवात् ॥ ५६ ॥ सिद्धा देवविशेषाः, आदिना गन्धर्वकिंपुरुषादयश्च । आधिपत्यमधिपतित्वापादकं गायनाद्यैश्वर्यम् । प्रत्यर्पयामासुर्निवेदयामासुः, गायनाद्यैस्तोषयामासुरिति भावः । हरौ क्रीडार्थं निजाशेषविभूतिसमाहरणकौतुकिनि भगवति, यतः भूमिगते तादृशविनोदार्थमेव पृथिव्यामवतीर्णे । एवं परमकौतुकेन संबोधनम्—नृपेति । यथा भवादृशां नृपाणामपि विभूतयो विनोदार्था एव तथा तस्यापि परमनृपतेः परमविभूतयो विनोदायैवेति संबुद्ध्यभिप्रायः । विशेषस्तु हरिवंशे दृश्यः ॥ ५७ ॥ तत्र नगरे । नीत्वा प्रापय्य । यद्वा—योगस्य प्रभावः सामर्थ्यं मथुरास्थिताखिलनिजनिजपदार्थराशेर्द्वारकायां भवनं तेनेत्यर्थः । अत्र मथुरायाम् । इत्यर्थ इति—उभयोः पलायने प्रजास्त्रस्ता भविष्यंतीति भावः । पुरद्वारान्मथुराद्वारतः । योगोऽचिंत्यैश्वर्यम्, तस्य प्रभावेण माहात्म्येन । तथा च पाद्मोत्तरखण्डे—"सुषुप्तान्मथुरायां तु पौरांस्तत्र

---

१. वि यु–वीर. विध. । २. यत्प्रियं देवदेवस्य विष्णोः क्षीरोदवासिनः–विजयेऽन्यत्रचाधिकम् । ३. ददौ सहस्रसंख्याताम् देवदेवाय तोयराट्–विजयेऽन्यत्र । ४. रत्नपूर्णानविक्षयान्–विज. । ५. तथाऽन्ये लोकपालाश्च ददुःस्वाधिकृतं धनम् । ६. स्वान् भगवान्–श्रीधर. टि. । ७. प्रत्यागत्याय–वीर. ; मधुरायाश्च–विज ; मथुरामेत्य–इति कस्यचित् । ८. पारमहंस्यां संहितायां–प्रा. पा. । ९. उत्तरार्धे–प्रा. पा. । १०. नास्ति–प्रा. पा. । ११. त्रिपञ्चाशत्–विज. ।

जनार्दनः । उद्धृत्य सहसा रात्रौ द्वारकायां न्यवेशयत् ॥ प्रबुद्धास्ते जनाः सर्वे पुत्रदारसमन्विताः । हैमहर्म्यतलाविष्टा विस्मयं परमं ययुः ॥" इति । हरिरिति तथा नयनात् । त्वमत्र स्थित्वा प्रजाः पालयेति तैर्यद्व्याख्यातं तत्तु द्वारकानीतप्रजाभ्योऽवशिष्ट-बहिरङ्गप्रजागतमेव ज्ञेयम्, निजपार्श्वरक्षितसैन्यगतमेव वा । यद्वा—अस्य यादवाऽवध्यत्वान्मा शंकां कृथाः, त्वमत्र स्थित्वा पुरं पालय मुचकुन्देनैनमहं घातयिष्यामीत्येव मंत्रो ज्ञेयः । सम्यगनुरूपश्च मन्त्रः समनुमन्त्रः स जातोऽस्येति तारकादित्वादितच् । पद्ममालीति नारदोक्तलक्षणापेक्षया । निरायुध इति पलायनमननार्थम् ॥ ५८ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे उत्तरार्द्धे पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सुधर्म्मामिति युग्मकम् । पारिजातं प्राहिणोदिति तैर्व्याख्यातं तत्र प्रस्थापनं नाम परित्याग एव । ज्ञेयः यद्वाग्रे स्वयं श्रीभगवता स्वर्गादानीय पारिजातादस्य न्यूनत्वेन भेदः कल्प्यः सुरद्रुमलतोद्यानेति वर्णिततत्त्वात् सुधर्म्मायास्त्वेकत्वेन नान्या गतिरितीन्द्रस्था नाकरोदिति ज्ञेयम् हरेर्हरयेऽन्यथा बलात् स्वयमेव हरेदिति विभाव्यैवेति भावः । लोकपाला अन्येऽपि ॥ ५५–५६ ॥ हरौ क्रीडार्थं निजाशेषविभूतिसमाहरणकौतुकिनि भगवति यतः भूमिगते तादृशविनोदार्थमेव पृथिव्यामवतीर्णे एवं परमकौतुकेन नृपेति श्रीद्वारकानिर्माणादिविस्तारः (विधिः) श्रीहरिवंशे दृश्यः ॥ ५७ ॥ योगोऽचिन्त्यैश्वर्य्यं तस्य प्रभावेण माहात्म्येन तथा च पाद्मोत्तरखण्डे—

"सुषुप्तान्मथुरायां तु पौरांस्तत्र जनार्द्दनः । उद्धृत्य सहसा रात्रौ द्वारकायां न्यवेशयत् ॥
प्रबुद्धास्ते जनाः सर्वे पुत्रदारसमन्विताः । हेमहर्म्यतले विष्टा निस्मयं परमं ययुः" ॥ इति

हरिरिति तथानयनात् त्वमत्र स्थित्वा प्रजाः पालयेति तैर्यत् व्याख्यातं तत्तु द्वारकानीतप्रजाभ्योऽवशिष्टबहिरङ्गप्रजागतमेव ज्ञेयं निजपार्श्वरक्षितसैन्यगतमेव वा । यद्वाऽस्य यादवैरवध्यत्वान्माशङ्कां कृथाः त्वमत्र स्थित्वा पुरं पालय अहन्तु मुचुकुन्देन एनं घातयिष्यामीत्येव मन्त्रो ज्ञेयः । रामेण सह सम्यगनुरूपश्च मन्त्रः सोस्यसञ्जात इति तारकादित्वादितच् । अत्र सर्वजनं हरिरितिपाठे स्वान् भगवान् हरिरिति क्वचित् । मथुरामेत्येति पाठे प्रजापालनेति क्वचित् पूर्व्वत्र द्वारकाशिर्माणार्थं तव गमनं योगप्रभावेणैव वा ज्ञेयम् पद्ममालीति श्रीनारदोक्तलक्षणापेक्षया निरायुध इति पलायनमननार्थम् ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषण्यां पञ्चशत्तमोऽध्यायः ॥ ५० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

लोकपाला अन्ये श्रीब्रह्मरुद्रादयः । भगवता परमेश्वरेण तेनैव हरौ क्रीडार्थं निजाशेषविभूतिसमाहरणपरे भगवति । कुतः भूमिगते अपूर्वविनोदार्थमेव पृथिव्यामवतीर्णे । एवं परमाश्चर्य्येण हर्षभरोदयेन वा सम्बोधयति—नृपेति । श्रीद्वारकानिर्म्माणादिविस्तारः श्रीहरिवंशाद्विज्ञेयोऽत्र न विस्तरभयान्न लिख्यते ॥ ५५–५६ ॥ योगोऽचिन्त्यैश्वर्य्यं तस्य प्रभावेण माहात्म्येन, यद्वा, योगेन यः प्रमाणः सामर्थ्यविशेषस्तेन नीत्वा स्वस्वगृहे रात्रौ निद्रितानामलक्षितं तथैव तत्र नयननं ज्ञेयम् । तथा च पाद्मोत्तरखण्डे–

'सुषुप्तान् मथुरायान्तु पौरांस्तत्र जनार्द्दनः । उद्धृत्य सहसा रात्रौ द्वारकायां न्यवेशयत् ॥
प्रबुद्धास्ते जनाः सर्व्वे पुत्रदारसमन्विताः । हेमाहर्म्यतले विष्टा विस्मयं परमं ययुः ॥'

हरिरिति तथा तत्तदानेन, तत्तदज्ञातत्वेन तत्र सद्यो नयनात् । त्वमत्र स्थित्वा प्रजा पालयेति तैर्यदुक्तम्; तत्तु द्वारकानीतप्रजाभ्योऽवशिष्टा इति ज्ञेयम् । यद्वा, अस्य यादवैरवध्यत्वान्माशंकां कृथाः । मुचुकुन्देनैनं घातयिष्यामीति कृतानुमन्त्रः । पद्ममानीति दूरतो यवनेन लक्षयितुम्, किंवा श्रीनारदोक्तलक्षणापेक्षया। । निरायुध इति शस्त्रत्यागेन पलायनं मत्वा तथैव पृष्ठतो धावतस्तस्य श्रीमुचुकुन्दगुहायां नयनार्थम् ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीवृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सुधर्मां नाम सभां पारिजातं च महेन्द्रो हरये प्राहिणोत् प्रस्थापयामासेति शुकपरीक्षित्सम्वादात्पूर्वभावित्वाद्भूतनिर्देशः सुधर्मां विशिनष्टि–यत्रेति । मर्त्योऽपि यत्र सुधर्मायां स्थितो मर्त्यधर्मैरशनायापिपासाशोकमोहजरामरणादिभिर्न युज्यते ॥ ५५ ॥ वरुणस्तु श्यामः एककर्णो येषां तान् सर्वतः शुक्लान् मनोजवान् अश्वान्प्राहिणोदित्यनुषङ्गः निधिपतिः कुबेरस्त्वष्टौ कोशान्निधीन्—

"पद्मश्चैव महापद्मो मत्स्यः कूर्मस्तथापरः । नीलो मुकुन्दः शङ्खश्च निधयोऽष्टौ प्रकीर्तिताः" ॥

इत्युक्तान् प्राहिणोत् ॥ ५६ ॥ तथाऽन्ये च लोकपालाः निजोदयान्निजविभूतीः तथान्ये च सिद्धादयो यद्यत्स्वाधिकारसिद्धये भगवता दत्तमाधिपत्यं तत्सर्वं भगवति भूमिगते भूमाववतीर्णे सति तस्मै प्रत्यर्पयामासुः ॥ ५७ ॥ तत्रेति । यथा कालयवनो माथुराश्च जना न जानीयुस्तथा योगप्रभावेन योगामायात्मिकाश्चर्यशक्तिप्रभावेन माथुरं सर्वं जनं तत्र दुर्गे नीत्वा प्रापय्य पुनरागत्य अथ रामेणानुमन्त्रितः आलोचितो भगवान् पद्ममालाधरो निरायुधश्च भूत्वा पुरद्वारात् निष्क्रान्तवान् ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मर्त्यधर्मैर्जरादिलक्षणैः ॥ ५५ ॥ क्षीरोदशायिनो विष्णोर्यत्प्रियं हृद्यं तदपि ददौ० । निधिपतिः कुबेरः अष्टौ कोशान्निधीन् अविक्षयानव्ययान् ॥ ५६ ॥ स्वाधिकृतं स्वकीयत्वेनाभिमतम् । क्षीरोदधिमथने हरिणा दत्तम् ॥ ५७ ॥ योगप्रभावेण मथुरास्थितपदार्थराशिर्यथा द्वारकास्थितो भवति तथा करणसामर्थ्येन रामेण समनुमन्त्रितः सहितः ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

(विजयध्वजरीत्या त्रिपञ्चाशत्तमः ॥)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पारिजातं च प्राहिणोदिति शुकपरीक्षित्सम्वादात् पूर्वभूतत्वाद्भूतनिर्देशः ॥ ५५ ॥ निधिपतिः कुबेरः कोशान् निधीन्—पद्मश्चैव महापद्मो मत्स्यः कूर्मस्तथौदकः । नीलो मुकुन्दः शङ्खश्च निधयोऽष्टौ प्रकीर्तिताः । इति निजोदयान् स्वीयसम्पत्तीः ॥ ५६—५७ ॥ योगो योगमाया तत्प्रभावेन तत्प्रकारः पाद्मोत्तरखण्डे यथा ।

सुषुप्तान् मथुरायां तु पौरांस्तत्र जनार्द्दनः । उद्धृत्य सहसा रात्रौ द्वारकायां न्यवेशयत् ॥
प्रबुद्धास्ते जनाः सर्वे पुत्रदारसमन्विताः । हैमहर्म्यतले विष्टा विस्मयं परमं ययुः ॥ इति

रामेण सह समनुमन्त्रितः त्वमत्रैव मुहूर्त्तं तिष्ठ अहमनया युक्त्या इमं घातयिष्ये इति कृतमन्त्रेण इत्यर्थ ॥ ५८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमे सङ्गतः पञ्चाशत्तमः सङ्गतस्सताम् ॥ ५० ॥

गूढार्थदीपिनी

प्राहिणोत् प्रस्थापयमास । हरेः हरये । मर्त्यधर्मैः क्षुत्पिपादिभिः ॥ ५५ ॥ लोकपालो वरुणः निजोदयान् निजविभूतीः प्राहिणोदित्यनुषङ्गः ॥ ५६ ॥ स्वसिद्धये स्वाधिकारसिद्धये ॥ ५७ ॥ तत्रेति सार्द्धम् । समनुमन्त्रितः त्वमत्र पुरं पालय अहं तु एनं मुचुकुन्देन घातयिष्यामिति कृतानुमन्त्रः । सम्यगनुरूपो मन्त्रः समनुमन्त्रः संजातोऽस्येति तारकादित्वादितच् ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्ये पूर्वार्धे गूढार्थदीपिन्यां पञ्चाशत्तमोऽध्यायः ।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सुधर्मां देवसभां पारिजातं च देवद्रुमं प्राहिणोत् प्रस्थापयामासेति शुकपरीक्षित्संवादात्पूर्वभूतत्वाद्भूतनिर्देशः ॥ ५५ ॥ कोशान् निधीन्—

"पद्मश्चैव महापद्मो मत्स्यः कूर्मस्तथौदकः । नीलो मुकुन्दः शङ्खश्च निधयोऽष्टौ प्रकीर्तिताः" ॥ इति

प्रसिद्धान् अन्येऽपि लोकपालाः निजोदयान् निजविभूतीः ॥ ५६ ॥ अन्ये च सिद्धादयः यत्स्वाधिकारसिद्धये आधिपत्यं भगवता दत्तं तत्तत्सर्वं प्रत्यर्पयामासुः ॥ ५७ ॥ तत्र योगप्रभावेनेति योगः नरलोकानुरूपो मौहूर्त्तिकस्तत्प्रभावेन तत्प्रकारः हरिवंशे दर्शितः—

"एतस्मिन्नन्तरे चैव यदूनां नन्दिवर्द्धनः । केशवः पुनरेवाह यादवान् सत्यसङ्गरः ॥
अद्यैव दिवसः पुण्यो निर्याम; सबलानुगाः । ततो निश्चक्रमुः सर्वे यादवाः कृष्णशासनात् ॥
ओघा इव समुद्रस्य बलौघप्रतिनादिताः । प्रगृह्य ते कलत्राणि वसुदेवपुरोगमाः ॥
सुसन्नद्धैर्गजैर्मत्तै रथैरश्वैश्च दंशिता; । आहत्य दुन्दुभी; सर्वे सधना ज्ञातिवान्धवाः ॥
निर्ययुः यादवाः सर्वे मथुरामपहाय वै" ॥

इत्यादिना—

निवेश्य द्वारकां राजन् ! वृष्णीनां स्वस्य चैव ह । पदातिः पुरुषव्याघ्रो बाहुप्रहरणस्तदा ॥
आजगाम महायोगी मथुरां मधुसूदनः ।

इत्यन्तेन । योगो योगमाया तत्प्रभावेन वा युज्यते इतियागः सङ्कल्पस्तेन स्वसङ्कल्पप्रभावेन वा तत्प्रकारः पाद्मोत्तरखण्डे दर्शितः—

"सुपुप्तान्मथुरायां तु पौरांस्तत्र जनार्दनः । उद्धृत्य सहसा रात्रौ द्वारकायां न्यवेशयत् ॥
प्रबुद्धास्ते जनाः सर्वे पुत्रदारसमन्विताः । हैमहर्म्यतले विष्टा विस्मयम्परमं ययुः" ॥ इति ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चाशत्तमाध्यार्थप्रकाशः ॥ ५० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

चतुर्भिः शरैश्चतुरस्तुरगान् ॥ ५५ ॥ दशशरान् ॥ ५६ ॥ साधु साध्विति पूजयन् । भो भो चैद्य महेष्वास वीरोऽसि बलत्रांश्चासि । महेष्वासेत्युक्तौ धानुष्कतामात्रप्रतीतिः स्यादेकेनैवासीत्यनेनैव पूर्तौ वीरोऽसि बलवानिति चैकपद्येऽसिनापि बलवानसि वीरश्चासीत्यर्थविशेषं ध्वनयितुं पुनरसिपदं यथा समस्तं भवेच्च तथा समव्यदिति मन्तव्यम् ॥ ५७ ॥ धनुष्मतो भावो धानुष्मत्त्वं तदेव धानुष्मत्त्वं मेऽपि स्वयं साक्षात्पश्य ॥ ५८ ॥ यौगपद्येनैकदेवमिलित्वा प्रत्येकश इत्याशुगैः पञ्चभिरित्यनेनान्वितं वीप्सासमर्थं भवति । तास्तान्पञ्चभिः सायकैर्विद्ध्वा ॥ ५९ ॥ पञ्चकाशुगविनियोगं प्रपञ्चयति ॥ सारथिमिति । एकैकं नृपतीस्त्रिभिस्त्रिभिः शरैः रणे ॥ ६० ॥ त्रयाणां सायकानां काये निकाय्यमाह ॥ वक्षस्यास्ये ललाटे चेति । ततोऽनन्तरं त्रिशतां तत्सङ्ख्यानां राज्ञां त्रिंशत्कर्मूकं तत्सङ्ख्यं धनुः ॥ ६१ ॥ त्रिशद्भिः सायकैस्त्रिशद्राजमध्येऽसावपीति तद्धनुञ्छित्वा त्रिभिः शरैः ॥ ६२ ॥ ध्वजं मुकुटछत्रैश्चकर्त । प्रहासस्तु मुकुटच्छेदवच्छिरच्छेदोऽपि कर्तुं शक्यं किन्तु कालान्तरै भवत्वित्युक्षितमिति भावोऽवसेयः ॥ ६३ ॥ आकर्णान्तं कर्णप्रान्तपर्यन्तं तेन कृष्णेन शरताडितराजन्यकटकं विभ्रान्तम् ॥ ६४ ॥ शैलोपरि विद्यमानश्चासौ द्रुमश्च तस्मिन्विद्यमाना च सा लतावल्ली कालान्तो हि प्रलयकालिको मारुतो मारुतोद्धूता च सा सा च तयोपमा यस्य तत् । हताश्वरयसारथिस्त्रातारं रक्षकं नागच्छन्नाप ॥ ६५ ॥ विस्फूर्जयन् टङ्कारयन् उग्रपौरुष उग्राण्यत्युग्रं पौरुषं यस्य सः ॥ ६६ ॥ निर्भिन्नकुम्भा दलितशिरस्का अनीकशः सङ्घशः शरै रुग्णा मग्नाः कन्धरा ग्रीवा येषां ते तथा नायका रथिकाः पदातयः पतयः ॥ ६७ ॥ सञ्छिद्यमानाश्च ते द्विपदे भवाजिनश्च तेषां सेनाङ्गत्वादेकवद्भावे चैकेका व्यक्तिरित्यपि मायादतस्तमुद्गणं गन्तव्यम् । अङ्गभङ्गप्रसूतः शतशोऽसृगापका रुधिरसरितो विशेपकेन रणमण्डलस्य तदापणसारूप्यमाह । भुजा एवाहयः सर्पा यासु ताः पुरुषशीर्षाण्येव कच्छपाः कुर्मा यासु ता हता द्विपा एव द्वीपा गतम् । हया एव ग्रहा हतद्विपद्वीपैर्हयग्रहैश्चाकुला व्याप्ताः ॥ ६८ ॥ करा एवोरवो मीना यासु ता नरकेशशैवला नराणां केशा एव शैवलानि जलाञ्चलानि यासु ताः शैवलं पद्मकाष्ठेऽपि जलन्वित इति विश्वः । धनूश्चेव तरङ्गा यासु ताश्च ता आयुधान्येव गुल्मास्तैः सङ्कुला आस्फूर्जितैर्ध्वनिविशेषैरावृत्तैनणैरन्यत्राभ्भासां भ्रमैर्भयानका भीतिप्रदा महामणिप्रवेकमरणात्मशर्करा महामणिप्रवेका अत्युत्तममणय आभरणानि चाश्मानः शर्कराः क्षुद्रपाषाणाश्च यासु ताः क्रामिकोऽन्वयः॥६९॥ भीरूणां भयावहा मनस्विनां धीराणां हर्षवहाः परस्परमरीनृते तथा मुसलेन दुर्मदानरीन्निघ्नता । अपरमेयतेजसा बलेन मृधे प्रवर्तिता इत्यन्वयः । परस्परं कृष्णेन रामेणेति पस्परं वा ॥ ६० ॥ अङ्ग दे राजन् ! अर्णवदुर्गं भैरवं च तद्बलं दुरन्तपारं दुःशब्दः प्रतिषेधे । दुर्न विद्यतेऽन्तेऽपि परो यस्य तत् । अन्तः प्रान्तेऽन्तिक इति विश्वः । अन्तरालं च पारं परतटं दुर्न विद्येते यस्येति वा । मगधेन्द्रपालितं बलं रामकृष्णाभ्यां क्षयं प्रणीतम् । कियानप्यायासो नास तयोरित्याह । जगदीशयोर्वसुदेवपुत्रयोः परं केवलं तद्विक्रीडितं लीलैवेति ॥ ७१ ॥ ग्रन्थकृन्मन्दामन्दरधरवद्वलयमपि निरवध्यधिकं जगतो जानीयुर्भवेयुश्च दुष्प्रज्ञा इति तदुद्दिधीरिया विविच्याच्युतगुण एवायं मयोपचारतः प्राङ्निर्देशः कृत इति वक्ति ॥ स्थितीति । भुवनत्रयस्य स्थित्युद्भवान्तम् सर्वो द्वन्द्व इत्येकवद्भाव उत्तरपदलोपी वा समासः । पालनोत्पत्तिनाशान्समहितैः करोति स्वलीलयेत्यनायासेनेत्याह । अनन्तगुणः प्राग्जगदींशत्वेनप्रशक्तस्यानन्तस्य गुणा येनेति वा । अनन्तो गुणोऽप्रधानं यस्मादिति वा । तम्य कृष्णस्य परपक्षनिग्रहाश्चित्रं न । तर्हि वर्णनं कुत इत्यत यथाऽपीति । मर्त्याननु विधा प्रकारो यस्य स तस्य तत् । युद्धादिकं वर्ण्यते ॥ ७२ ॥ अवशिष्टेषु हतेभ्य एकेन स्वेन रथेन शौरिणमाप ॥ ७३ ॥ बलेन शाले इति तौ ॥ ७४ ॥ शतगुणं शतधारं बहुवारमिति यावत् ॥ ७५ ॥ व्यंसयित्वा मृधा वृथा ॥ ७६ ॥ रथे पोषयित्वा । करणमीरयति । मुसलेनेति । क्षुब्धः क्षुमिता रथश्च तौ निहत्य ताडयित्वा मारयित्वा क्षुब्धो यथा मथ्नन्नपि स्वयं निस्सङ्गस्तथा सज्जमान इति लुप्तोपमा वा । क्षुब्धेत्यादिनिपातितः शब्दो मन्थनदण्डवाची । हतान्यनीकानि यस्य स चासाववशिष्टा असवो यस्य च तम् ॥ ७७–७८ ॥ वारुणमानुषैः पाशैर्बध्यमानं गोविन्दो वारयामास । तेन जीवितेन कार्यं चिकिर्षया तद्द्वारेण भूमारहरणरूपकार्यकरणेच्छया कारयमास ॥ ७९ ॥ मुक्तो जीवेति विसृष्टो राजभिर्विद्रुतमिलितैर्वाभिरितः वारितो नेत्रयोरिति शेष इत्यप्यर्थः । श्लोकद्वयं प्रक्षिप्तमिति सम्प्रदायविदः । अक्षतं बलं सेना यस्य सः ॥ ८१ ॥ त्रिदशैः कर्तृभिः कुसुमैः कर्णविकीर्यमाणोऽनुमोदित्तश्च

मधुरैस्तन्नगरागारैः ॥ ८२ ॥ उपगीयमानो विजयो यस्य सः मैर्यञ्च तूर्यणि च तानि कीदृशानि वीणाभिः सहिता वेणुमृदङ्गा येषां तानि। अतो न मृदङ्गो न बोधे। प्रभौ पुरं प्रविशति नेदुः ॥ ८३–८४ ॥ ब्रह्मघोषः स्वाध्यायध्वनिः कौतुकेनोत्सवेन हर्षेण वा। उत्सवे नर्महर्षयोरिति विश्वः। आसमन्ताद्बद्धानि तोरणानि यस्यां सा ताम् ॥ ८५ ॥ निचीयमानो विकीर्यमाणो विवेशेति विपरिणतानुषङ्गः प्रीत्योत्कलितानि च तानि लोचनानि च तैर्निरीक्ष्यमाणः ॥ ८६ ॥ अनन्तं बहु। अबद्धं तथैव राशीकृतं वा यदुराजायोग्रसेनाय ॥ ८७ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं भगवता स्थाने निर्मिते, विशेषतो निर्माणे कृते, पारिजातादीनामनन्यत्वप्रतिष्ठा गमिष्यतीति लोकपाला सर्वे स्वस्वसमृद्धिं प्रेषितवन्त इत्याह सुधर्मामिति त्रिभिः। यदग्रे पारिजातहरणम्, तन्मतान्तरभाषया निरूपितम्, तदग्रे विस्तरेण वक्ष्यामः। सुधर्मा देवसभा। नवरत्ननिर्मितेव भूमिरूपा काचित् देवता सुधर्मेत्युच्यते। यत्रोपवेशनमात्रेणैव धर्मो धर्मफलं च भवतीति। चकारादन्येऽपि सुरद्रुमाः। इन्द्रः सिंहासनादिकं च प्रस्थापितबानिति उभयोर्माहात्म्यं वर्णयति यत्र चेति। यत्र सुधर्मायाम्, चकारात् पारिजाता धर्मश्च। अनेन समीपे विद्यमानः सर्वदा नियतमरणधर्मापि तैः स्वाभाविकैः मर्त्यधर्मैः न युज्यते। अनेन पूर्वद षपरिहारोऽप्युक्तः। गुणास्तु सुधर्मापदेनैवोक्ताः। अन्यामपि सम्भृतिमाह श्यामैककर्णानिति। एकः कर्णः श्यामः दक्षिणः। शिष्टः सर्वोऽपि कुन्दसन्निभः। उच्चैः श्रवस एतद्वैलक्षण्यम्। अयं स्वर्गः कर्म चेति उभयबोधनार्थ प्रवृत्तिशास्त्रस्थाने श्यामता निरूपिता। ते चाश्वाः सैन्धवा एवेति ज्ञापयितुं वरुणेन प्रस्थापितमित्युक्तम्। अन्यत्र वर्णान्तरसम्भावना स्यादिति तन्निवृत्त्यर्थं शुक्ला इति। अव एव तेषां श्लाघ्य इति शुक्लाश्च ते मनोजवाश्चेत्युक्तम्। शुक्ले जवाभावमाशङ्क्य समास उक्तः। निधिपतित्वादष्टौ निधीन् प्रेषितवानिति गम्यते। अष्टौ लोकपालाश्च कोशान् भण्डारवस्तूनि। निजस्य स्वस्य स्वस्य अभ्युदयांश्च। ननु स्वयमनेकसुकृतेन प्राप्तं भोगसाधनमधिकारज्ञापकं च किमिति दत्तवन्त इत्याकाङ्क्षायामाह यद्यद्भगवता दत्तमिति। न हि तानि वस्तूनि स्वधर्मोपार्जितानि, किन्तु भगवता दत्तानि। यतस्तदाधिपत्यम्, ईश्वरेणैव ह्याधिपत्यं दीयते। तथापि प्रतिदाने को हेतुरिति चेत्, तत्राह स्वसिद्धय इति। स्वस्य सिद्धये। अधिकारो हीश्चरेच्छयैव भवति। सा च ज्ञातुमशक्येति यथा तन्नियतं भवति, तथोपायः कर्तव्यः, तद्भगवति दान एवाक्षयं भवति। अतः स्वस्य धनस्य अधिकारस्य वा सिद्धये सम्यङ्निष्पत्त्यर्थं सर्वं प्रत्यर्पयामासुः। ननु भगवता तत्कथं ग्राह्यमिति चेत्, तत्राह हरौ भूमिगत इति। भूमिरपि दत्ता ब्रह्मणे मानवे वा। पुनर्भक्तोद्धारार्थं स्वयमप्यागतः। तन्न्यायेन सर्वामपि समृद्धिं भक्तेभ्यो दातुं प्रदर्शयितुं वा अपेक्षेतेति प्रत्यर्पणमुचितम्। एतदभिज्ञानाय नृपेति सम्बोधनम् ॥ ५५–५६ ॥ यदर्थमेतन्निर्माणं तदाह तत्रेति। अणिमादयो हि योगस्य सहजफलानि। इदं तु वक्ष्यमाणं योगस्यानुभावस्य फलम्। यथास्थितान् शयानान् सर्वानेव तेषां दुःखनिराकरणार्थं तत्र द्वारकायां नीत्वा स्वयं पुनरागतः। तत्रत्यप्रजानां देशबासिनां दुःखनिवृत्त्यर्थं बलभद्रं निरूप्य प्रजापालने अङ्गीकृते तेन प्रजापालने वस्तुतोऽपि रामेण रत्युत्पादकेन कृष्णः स्वयं सदानन्दः नातः परमत्र मथुरायां स्थेयमिति ज्ञापयन्निव साधनानुमतिं गृहीत्वा फलरूपः ॥ ५७ ॥ ततो निवृत्त इत्याह निर्जगामेति। नितरां गमनं नित्यसन्निधिरूपेणापि ततो निर्गत इति ज्ञापयितुम्। नित्यक्रियारूपेण तु वर्तत इति न काप्यनुपपत्तिः। पुरद्वारादिति निर्गमनं सर्वजनीनं भवत्विति। निर्गच्छता भगवता द्वयं ज्ञापितमिति विशेषणद्वयमाह पद्ममाली निरायुध इति। ततः कीर्तिर्नीता, रक्षा तु कृतेति। एवं निर्गमनस्य प्रयोजनमग्रे स्पष्टं भविष्यति ॥ ५८ ॥

इति श्रीभागवतसुवोधिन्यां श्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे प्रथमाध्यायविवरणम् ॥ १ ॥

श्रीसुबोधिनी–सारः

सुधर्मां सभां पारिजातं कल्पवृक्षं च हरेर्हरये महेन्द्रः शक्रः प्रैषयत् यत्र यस्यां सभायां आस्थितो मर्त्यो मर्त्यधर्मैः क्षुत्पिपासादिभिर्नार्द्यते ॥ ५५ ॥ शुक्लान् श्वेतवर्णान् मन इव जवो वेगो येषां तान् श्याम एकः कर्णो येषां तान् हयान् अश्वान् वरुणः प्रैषयत्। निजोदयान्स्वविभूतीरष्टौ कोशान् निधीन् "पद्मश्चैव महापद्मो मत्स्यकूर्मौ तथौदकः। नीलो मुकुंदः शंखश्च निधयोष्टौ प्रकीर्त्तिताः" इत्युक्तानणिमादीन् वा निधीनां पतिर्लोकपालः कुबेरः प्रैषयत् ॥५६॥ सर्वे सर्वं समर्पयन्नित्याह। स्वसिद्धये स्वाधिकारनिष्पत्त्यर्थं भगवता यद्यदाधिपत्यं दत्तं तत्तत्सर्वं प्रत्यर्पयांचक्रुः। कदेत्यत आह। हरौ भूमिगते नगरनिर्माणभूप्रदेशं गते सति हे नृप ॥ ५७ ॥ तत्र नगरे योगस्य प्रभावेण सर्वजनं नीत्वा संधाय प्रजापालेन त्वमत्र स्थितः प्रजाः पालयेतिरामेण कृतानुमंत्रः पद्ममाली निरायुधः शस्त्ररहितो हरिः पुरद्वारान्मथुरातो निश्चक्राम ॥ ५८ ॥

इति श्रीमद्भा० दशम० उत्त० सुबोधिन्यां टीकायां पंचाशोऽध्यायः ॥ ५० ॥

विवरणटिप्पणी

श्यामैककर्णानित्यत्र । उच्चैःश्रवस इति । स सर्वोऽपि कुन्दसन्निभः । एतद्वैलक्षण्यमित्यर्थः । अयमिति । एकः कर्णः प्रवृत्तिशास्त्ररूपः, एको निवृत्तिशास्त्ररूपः । तत्रायं वामः प्रवृत्तिशास्त्ररूपः कर्णः स्वर्गरूपः, तत्साधनकर्मरूपश्च । उभयोरपि दोषशङ्काकलुषितत्वाच्छ्यामत्वमित्यर्थः । निर्जगामेत्यत्र । रक्षा त्विति । एतत्प्रकरणीयलीलायाः प्रद्युम्नचरित्रत्वाद्बन्धुरक्षार्थमायुधग्रहणम् । स्थानदानेन रक्षायास्तु कृतत्वान्निरायुधो निर्गतः । तथा च निरायुधत्वेन रक्षाकरणं ज्ञापितमित्यर्थः ।। ५८ ।।

प्रथमाध्यायव्याख्या समाप्ता ।।

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

सुधर्माख्यां सभां पारिजाताख्यं वृक्षं च हरेः हरये महेन्द्रः प्राहिणोत् प्रस्थापयामास । सभां विशिनष्टि—यत्रेति । यत्र सभायां स्थितो मर्त्यो मनुष्यो मर्त्यधर्मः क्षुत्पिपासाशोकमोहजरामरणादिभिर्न युज्यते ।। ५५ ।। वरुणस्तु श्याम एकः कर्णो येषां तान् सर्वतः शुक्लान् मनोवत् जवो वेगो येषां तान् हयान् प्राहिणोदित्यनुषङ्गः । निधिपतिः कुबेरः अष्टौ कोशान् "पद्मश्चैव महापद्मो मत्स्यः कूर्मस्तथौदकः । नीलो मुकुन्दः शङ्खश्च निधयोऽष्टौ प्रकीर्तिताः" इत्युक्तान् निधीन् प्राहिणोत् । तथाऽन्ये च लोकपाला निजोदयान् निजविभूतीन् प्रस्थापितवन्तः ।। ५६ ।। 'चक्रवर्तिनि खण्डमण्डलेश्वराः स्वस्मिन् विद्यमानं उत्तमं वस्तु समर्पयन्त्येव तत्तु तव विदितम्' इति सूचयन् सम्बोधयति—नृपेति । अन्ये च सिद्धादयो यद्यदाधिपत्यं विभूतिविशेषं भगवता दत्तं तत्सर्वं हरौ भूमिं गते सति स्वसिद्धये स्वाधिकारसिद्ध्यर्थं स्वाधिकारनिश्चलतासिद्ध्यर्थं तस्मै प्रत्यर्पयामासुरित्यन्वयः ।। ५७ ।। यथा कालयवनो माथुरा जनाश्च न विदुस्तथा योगस्य योगमायाख्याचिन्त्यशक्तेः प्रभावेण सर्वं स्वकीयं जनं तत्र द्वारकायां नीत्वा प्रापय्य प्रजापालेन रामेण सह समनुमन्त्रितः 'त्वमत्र स्थित्वा विशिष्टाः प्रजाः पालय, अहं पलायिष्ये' इति कृतानुमन्त्रः पद्ममाली निरायुधः आयुधरहित एव कृष्णः पुरद्वारान्निर्जगामेत्यन्वयः । 'एवं पुरनिर्माणादौ किं प्रयोजनं' तत्राह—हरिरिति । स्वाश्रितजनदुःखहरणशीलत्वात् तेषां दुःखनिवृत्त्यर्थमित्याशयः । द्वारकानयनप्रकारः पाद्मोत्तरखण्डे उक्तः—"सुषुप्तान् मथुरायां तु पौरांस्तत्र जनार्दनः । उद्धृत्य सहसा रात्रौ द्वारकायां न्यवेशयत् ।। प्रबुद्धास्ते जनाः सर्वे पुत्रदारसमन्विताः । हेमहर्म्यतले विष्टा विस्मयं परमं ययुः" इति । तथा भगवतः पलायनकारणमपि "कदाचित् गार्ग्यः शाल्येन त्वं षण्ढः इत्युक्तः, तदा यादवैरुपहसितः सोऽसौ क्रुद्धः सन् श्रीमहेशं प्रसाद्य यदुभीषणपुत्रं वरं लब्धवान्, ततश्च यवनेन्द्रेण अपुत्रेण स्वक्षेत्रे पुत्रोत्पादनाय प्रार्थितः स गार्ग्यः कालयवनमजीजनत् इति । श्रीकृष्णः श्रीमहादेवदत्तवरसत्यतासिद्ध्यर्थं पलायितः इति" पुराणान्तरप्रसिद्धं ज्ञेयम् ।। ५८ ।।

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ।। १ ।।
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीकाबालप्रबोधिनी ।। २ ।।
रचिता पञ्चाशत्तमो राजसानां निरोधने । दशमेऽगाज्जरासन्धयुद्धादिविनिरूपकः ।। ३ ।।

अन्वितार्थप्रकाशिका

सुधर्मामिति । यत्र च अवस्थितो मर्त्यो मनुष्यो मर्त्यधर्मैः क्षुत्पिपासाशोकमोहजरामरणादिभिर्न युज्यते तां सुधर्माख्यां देवताविशेषाधिष्ठितां सभां पारिजातं च हरेः हरये महेन्द्रः प्राहिणोत् त्यक्तवान् । शुकपरीक्षित्संवादात्पूर्वभावित्वाद्भूतनिर्देशः । यद्वा । किञ्चिन्न्यूनगुणं पारिजातं प्राहिणोत् प्रास्थापयत् । मुख्यपारिजातं तु हरिर्बलाद्धरिष्यति ।। ५५ ।। श्यामेति । वरुणस्तु श्यामः एकः कर्णो येषां तान् सर्वतः शुक्लान् मनोवत् जवो वेगो येषां तान् हयान् प्राहिणोदित्यनुषङ्गः । निधिपतिः कुबेरः अष्टौ कोशान् "पद्मश्चैव महापद्मो मत्स्यः कूर्मस्तथापरः । नीलो मुकुन्दः शङ्खश्च निधयोऽष्टौ प्रकीर्तिताः ।" इत्युक्तान् निधीन् प्राहिणोत् । तथाऽन्ये च लोकपाला निजोदयान् निजविभूतीः प्रस्थापितवन्तः । लोकपाल इत्येकत्वपाठे अन्यो लोकपाल इति ।। ५६ ।। यद्यदिति । हे नृप ! अन्ये च सिद्धादयः यद्यदाधिपत्यं विभूतिविशेषं भगवता दत्तं तत्सर्वं हरौ भूमिं गते सति स्वसिद्धये स्वाधिकारनिश्चलतासिद्ध्यर्थं तस्मै प्रत्यर्पयामासुः ।। ५७ ।। तत्रेति सार्द्धम् । यथा कालयवनो माथुराश्च न विदुस्तथा योगस्य योगमायाख्याचिन्त्यशक्तेः प्रभावेण सर्वं स्वकीयं जनं तत्र द्वारकायां नीत्वा प्रापय्य पाद्मोत्तरखण्डे "सुषुप्तान् मथुरायां तु पौरांस्तावज्जनार्दनः । उद्धृत्य सहसा रात्रौ द्वारकायां न्यवेशयत् ।। प्रबुद्धास्ते जनाः सर्वे पुत्रदारसमन्विताः । हैमहर्म्यतले विष्टा विस्मयं परमं ययुः ।" इतिप्रजापालेन रामेण समनुमन्त्रितः त्वमत्र स्थित्वा प्रजाः पालयाहं पलायिष्ये ततो यादवैरवश्यमेनं मुचुकुन्देन घातयिष्यामीति कृतानुमन्त्रः पद्ममाला निरायुधः आयुधरहित एव हरिः भक्तदुःखहरः कृष्णः पुरद्वारान्निर्जगाम । पद्ममालावत्त्वं नारदोक्तलक्षणापेक्षया निरायुधत्वं पलायनसौकर्यार्थम् ।। ५८ ।।

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्कप्रकाशिकायां पञ्चाशोऽध्यायः ।। ५० ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पारिजातं सामान्यपारिजातवृक्षकलापम् । यत्र सुधर्मायां ॥ ५५ ॥ हरेः हरये निधिपतिः कुबेरः कोशान् निधीन् लोकपालाः । निजोदयान् स्वस्वसमृधीः प्राहिण्वन् प्रेषयामासुः ॥ ५६ ॥ येऽन्येऽधिकारिदेवास्तेऽपि स्वसिद्धये स्वाधिकारनिष्पत्तये भगवतायद्यदाधिपत्यं दत्तमभूत् त तत्तत्सर्वं ॥ ५७ ॥ हरियोगप्रभावेण यागैश्वर्येण सर्वजनं तत्र द्वारिकायां नीत्वा तदुक्तं पाद्मे सुषुप्तान् मथुरायां तु पौरांस्तत्रजनार्दनः । उद्धृत्य सहसा रात्रौं द्वारकायां न्यवेशयेत् । प्रबुद्धास्तेजनाः सर्वे पुत्रदारसमन्विताः हैमहर्म्यतले विष्ठा विस्मयं परमं ययुरिति रामं प्रति मथुरायां त्वं स्थित्वा प्रजाःपालयातिरामं प्रत्युक्ते सति तथाऽहं करिष्यामीरिदत्तोतरेण प्रजापालेन रामेण सहसं मनुमन्त्रितः कृतविचार इत्यर्थः मथुरामेत्यरामेणेत्यपि पाठः । यादवैरवध्यं यवनं मुचुकुन्देन घातयितुं पुरद्वारान्नगरगोपुराद्बर्हिनिर्जगाम ॥ ५८ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकानतकोटिजनसंसारसमुद्रोद्वारकदर्शनभजनकर्त्तृजनब्रह्मपुरारिस्वधामदर्शकसज्जनपद्मविकाशनाधर्मध्वांतनाशकदिनमणिगुरुराजेंद्राश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढाऽर्कप्रकाशके पुराणार्क श्रीमद्भागवतस्यदशमस्कन्धव्याख्यानेद्वारकानिवेशननामपंचाशत्तमोऽध्यायः ॥ ५० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

श्यामेति । वरुणः तु, श्यामः कृष्णवर्णः एकः कर्णो येषां तान्, शुक्लान् श्वेतवर्णान्, सनोजवान् हयान् प्राहिणोदित्यस्यानुषङ्गः । निधिपतिः कुबेरस्तु, अष्टौ कोशान् निधीन्, 'पद्मश्चैव महापद्मो मत्स्यकूर्मो तथौदकः । नीलो मुकुन्दः शङ्खश्च निधयोऽष्टौ प्रकीर्त्तिताः इति प्रसिद्धान्, प्राहिणोत् । तथा, लोकपाला अपि, निजोदयान् निजविभूतीः, प्राहिण्वन् ॥ ५५ ॥ यद्यदिति । अन्ये सिद्धादयश्चापि, भगवता स्वसिद्धये स्वाधिकारसिद्ध्यर्थं, यत् यत्, आधिपत्यं, दत्तं आसीत्, तत् तत् सर्वं, हे नृप, हरौ श्रीहरिकृष्णभगवति, भूमिगते भूमाववतीर्णे सति, तस्मै हरये, प्रत्यर्पयामासुः ॥ ५६ ॥ तत्रेति ॥ यथा कालयवनः माथुरा जनाश्च न जानीयुरिति शेषः । तथा, योगप्रभावेण योगमायात्मिकाश्चर्यस्वशक्तिप्रभावेण, हरिः, सर्वजनं, तत्र दुर्गे, नीत्वा दुर्गं प्रापय्येत्यर्थः । प्रजापालेन प्रजाः पालयता, रामेण,समनुमन्त्रितः, हे आर्य अविदितैतत् पुरीयरथ्याप्रतोल्यादिकाः प्रजाः रथ्यादिप्रदर्शनपूर्वमत्र स्थित्वा पालय, अहं मथुरामेत्य यवनेन वीक्षितस्तदग्रत एव पलायिष्ये, तं च रैवताद्रिगुहाप्रसुप्तमुचुकुन्ददृशा भस्मसात् कारयित्वा मुचुकुन्दमनुगृह्य पुनः जरासंधवेष्टितां मथुरां गमिष्यामि, त्वमपि पुनस्तत्रागच्छेः तत आवां नृचेष्टां स्वीकृत्य जरासन्धाग्रतः पलायनं करिष्याव इति कृतानुमन्त्र इत्यर्थः । कृष्णः, पद्ममाली पद्ममालाधरः, निरायुधः आयुधधारणरहितः भूत्वा, पुरद्वारात् निर्जगाम । यदा गार्ग्यः श्यालेन षण्ढ इत्युक्तस्तदा यादवैरुपहसिते क्रुद्धोऽसौ श्रीमहेशं प्रसाद्य यदुभीषणं पुत्रं वरं लब्धवानेवं वरं लब्ध्वा आगच्छन् सोऽपुत्रेण यवनेन्द्रेण स्वक्षेत्रे पुत्रोत्पादनाय प्राथितः संस्तत्क्षेत्रे कालयवनमजीजनदिति पुराणे प्रसिद्धं, तत् सत्यं कर्त्तुं, निष्कान्तवान् ॥ ५७ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्धन्धे उत्तरार्द्धे पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

कृष्णप्रिया

महाराज इस दिव्य नगर में भक्ति निष्ठा से महाराज इन्द्र ने भगवान श्रीकृष्ण की सेवा में पारिजात वृक्ष एवं सुधर्मा सभा को भेज दिया । राजन् दिव्यश्री इस सभा में विराजमान विराजमान सदस्यों को भूव-तरस आदि पाञ्चभौतिक देह धर्म छू नहीं सकते थे ॥ ५५ ॥ राजन् इस नगर में श्रीवरुणदेव ने श्याम वर्ण वाले विपुल संख्या में अब भेज दिये थे । अश्वों की चाल गज जैसी थी । निधिपति भगवान कुबेर ने अपनी आठ निधियाँ भगवान की सेवा में भेज दी और अन्य लोकपालों ने अपनी अपनी विभूतियाँ भगवान् की सेवा में भेजी ॥ ५६ ॥ राजन् भगवान् श्रीकृष्ण ने सर्व लोकपालों को अपने-अपने अधिकारों के निर्वाह के लिये जो-जो सिद्धियाँ और विभूतियाँ सर्मपित की थी । राजन् भगवान् श्रीकृष्ण भूतल पर जब लीला विस्तार के लिये पधारे तब लोकपालों ने सर्व सम्पत्तियाँ निज नाथ को सर्मपित कर दी ॥ ५७ ॥ सागर में दिव्यपुर निर्माण के बाद भगवान् श्रीकृष्णने अपने परिवारजन-स्वजन-सम्बन्धिजन सर्व प्रजाजन को अपनी अचिन्त्य माया शक्ति से श्रीद्वारिकाजी में पहुँचा दिया । अवशिष्ट प्रजाजन के सरक्षणार्थ श्रीबलभद्रजी को मथुराजी में रहने का निवेदन किया और अपने अस्त्र-शस्त्र लिये बिना अकेले नगर के मुख्य द्वार से बाहर निकले ॥ ५८ ॥

श्रीमद्भागवत दशमस्कन्ध उत्तरार्द्ध में श्रीद्वारिका निर्माण प्रवेश कथन का निरूपण करणे वाला ५० अध्याय का भाषान्तर समाप्त ॥

◆

अथैकपञ्चाशत्तमोऽध्यायः

श्लोकाः	अनु.	वंश.	मि. उ.	मालि.	उ.	उ, अ.	अ. अ.	श्लो. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
६४	५१	३	६	१	८	५०	४४	२२८४	२३७८	७४।	२

श्रीशुक उवाच

तं विलोक्य विनिष्क्रान्तमुज्जिहानमिवोडुपम् । दर्शनीयतमं श्यामं पीतकौशेयवाससम् ॥ १ ॥
श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् । पृथुदीर्घचतुर्बाहुं नवकञ्जारुणेक्षणम् ॥ २ ॥
नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितम् । मुखारविन्दं बिभ्राण स्फुरन्मकरकुण्डलम् ॥ ३ ॥
वासुदेवोह्ययमिति पुमाञ्छ्रीवत्सलाञ्छनः । चतुर्भुजोऽरविन्दाक्षो वनमाल्यतिसुन्दरः ॥ ४ ॥

कर्वमक्षमा

अन्वयः—श्रीशुक उवाच—उज्जिहानम्, उडुपम्, इव, (पूर्वस्यांदिशि उदीयमानम् पूर्णचन्द्रम् इव) दर्शनीयम्, श्यामम्, पीतकौशेयवाससम्, श्रीवत्सवक्षसम्, भ्राजत्कौस्तुभामुक्तकन्धरम्, पृथुदीर्घचतुर्बाहुम्, नवकञ्जारुणेदाणम्, नित्यप्रमुदितम्, श्रीमत्सुकपोलम्, शुचिस्मितम्, मुखारविन्दंबिभ्राणम्, स्फुरन्मकरकुण्डलम्, विनिष्क्रान्तम्, तम्, विलोक्य, श्रीवत्सलाञ्छनः, चतुर्भुजः, अरविन्दाक्षः, वनमाली ॥ १–४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एकपंचाशत्तमेऽहन्मुचुकुन्ददृशा हरिः । यवनं मुचुकुन्देन स्तुतः सन्नन्वकंपत ॥ १ ॥
यवनेन्द्रसुतात्कालयवनाद्यदुभीषणात् । हरिर्हरगिरः स्वैरं पालनायापलायत ॥ २ ॥

यदा गार्ग्यः श्यालेन षंढ इत्युक्तस्तदा यादवैरुपहसिते क्रुद्धोऽसौ श्रीमहेशं प्रसाद्य यदुभीषणं पुत्रं वरं लब्धवान् । ततश्च यवनेन्द्रेणापुत्रेण स्वक्षेत्रे पुत्रोत्पादनाय प्रार्थितो गार्ग्यः कालयवनमजीजनदिति पुराणेप्रसिद्धम् । पुरद्वारान्निष्क्रान्तम् । उज्जिहानमुद्गच्छन्तम् ॥ १–२ ॥ नित्यप्रमुदितमित्यादि मुखारविंदविशेषणम् ॥ ३–४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मुचकुन्दो राजा, तद्दृशा दृष्ट्या (१) । यदून्भीषयते भययुक्तान्करोतीति तथा तस्मात् । हरगिरः शिववाचः (२) । पुराणे विष्णुपुराणे प्रसिद्धम् । तथाहि—"गार्ग्यं गोष्ठ्यां द्विजं श्यालः षंढ इत्युक्तवान्यदा । यदूनां सन्निधौ सर्वे जहसुर्यादवास्तदा ॥ सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम् । आराधयन्महादेवं सोऽयश्चूर्णमभक्षयत् ॥ ददौ वरं तु संतुष्टो वर्षे हि द्वादशे शिवः । संयोजयामास च तं यवनेशो ह्यनात्मजः ॥ तद्योषित्संगमाच्चास्य पुत्रोऽभूदलिसन्निभः । तं कालयवनं नाम राजानं प्राहुरुत्तमाः ॥" इति । गार्ग्यः शैशिरायणः । श्यालोऽपि यादवपुरोहितः, स च हस्तेन गार्ग्यलिंगं चालयन्यदोत्थानं न ददर्श तदा 'गार्ग्यः षंढः' इति प्रोवाचेत्यर्थः । तं कृष्णम् । उज्जिहीत इत्युज्जिहानस्तम् 'ओ–हाङ्–गतौ' शानच् ॥ तमिति षट्कम् । विनिष्क्रान्तमित्यादि–विशब्देन सम्यङ्निष्क्रम एव तस्य निश्चयोऽभूदिति ध्वनितम् । उज्जिहानमित्यादिना श्रीकृष्णमाधुर्यवर्णनं स्वप्रेमतस्तत्स्वभाववर्णनापेक्षयैव न तु यवनस्यानुभवापेक्षया, तत्र सति वैराऽसंभवात् "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीगीतोक्तेश्च । यथा तिक्तादिरुचिस्वभावाः खंडादिमाधुर्यं नानुमोदन्ते इति तद्ग्रहणाभास एव तेषां, तद्वत्तदेवमहो पश्यंतोपि न पश्यन्तीति भावः ॥ १ ॥ "आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत्" इत्यमरः । कौस्तुभेनामुक्ता पिनद्धा कन्धरा यस्य तम् ॥ पृथुदीर्घचतुर्बाहुमिति श्रीनारदोपदेशानुसारेणोदयात्, तेन तथोपदेशश्च विलक्षणलिङ्गेन शीघ्रमसौ निश्चिनोत्विति । नवकंज इवारुणे ईक्षणे नेत्रे यस्य तम् 'अव्यक्तरागस्त्वरुणः' इत्यमरः ॥ २ ॥ सच्चिदानन्दस्वरूपत्वान्नित्यप्रमुदितमिति । श्रीमत्कांतियुक्तम् । प्रशंसायां मतुप् । सुकपोलमित्यवयवसौष्ठवोपलक्षणम् । शुचिस्मितमिति विलासस्य स्फुरदित्यादिवेषस्य ॥ ३ ॥ अय प्रत्यक्षदृश्यः । द्वयोरन्वयः । षट्केऽपि वासुदेव इति सार्धमवांतरमन्वितम् । इत्येतैर्लक्षणैर्वासुदेव एवायमिति भवितुमर्हति नान्य इति संबन्धः । इति शब्दो वासुदेवपरामर्शकः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तमिति षट्कम् । विनिष्क्रान्तमिति विशब्देन सम्यक् निष्क्रम एव तस्य निश्चयोऽभूदिति ज्ञापितम् उज्जिहानमित्यादिना श्रीकृष्णमाधुर्य्यवर्णनं स्वप्रेमतस्तत्स्वभाववर्णनापेक्षययैव नतु यवनस्यानुभावापेक्षया तत्र सति वैरासम्भवात् "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीगीताभ्यश्च यथातिक्तादिरुचि स्वभावाः खण्डादिमाधुर्य्यं नानुमोदन्त इति तद्ग्रहणाभास एव तेषां तद्वत् तदेवमहो पश्यन्तोऽपि न पश्यन्तीति भावः । पृथुदीर्घचतुर्बाहुमिति श्रीनारदोपदेशानुसारेणोदयात् तेन तथोपदेशश्च विलक्षणलिङ्गेन शीघ्रं निश्चिनोत्यसाविति नवकञ्जे इव अरुणे ईक्षणे यस्य तं "अव्यक्तरागस्त्वरुणः" इत्यमरः । श्रीमत्कान्तियुक्तं प्रशंसायां मतुप् सुकपोलमित्यवयवसौष्ठवस्योपलक्षणं शुचिस्मितमिति विलासस्य स्फुरदित्यादिवेषस्य षट्केऽपि वासुदेव इति सार्द्धमवान्तरमन्वितम् इति एतैर्लक्षणैर्वासुदेव एवायं भवितुमर्हति नत्वन्य इति सम्बन्धः लक्षणान्येवाह–पुमानित्यादिना । तस्मान्निरायुध इति इतीति वासुदेव इत्यादिपरामर्शकं प्रकर्षेण लीलाविशेषेण च आ ईषद्द्रुतगत्या द्रवन्तं जिघृक्षुरिति तस्यगर्वितत्वं दुरापमित्युपहासास्पदत्वं च व्यञ्जितम् ॥ १–६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विशेषेण एकाकितया पद्भ्यामेव लीलागत्या निष्क्रान्तं सन्तम्, उज्जिहानमुडुपमिवेति—मनोनयनाह्लादक-तेजोमण्डलव्याप्तत्वम्, अतो दूरतोऽपि सम्यग् दृश्यत्वञ्चोक्तम्, दर्शनीयतमं परममहासुन्दरं तमेव दर्शयति—श्याममित्यादिविशेषणैः ॥ १ ॥ पृथुदीर्घचतुर्बाहुमिति श्रीनारदेन तादृशरूपस्यैव सदा दृश्यमानतया यवनं प्रति तथैवोक्त्या तस्मिन् तादृशपरिस्फूर्त्तेः । दृश्यमानतया पवनं प्रति तथैवोक्त्या तस्मिन् तादृशपरिस्फूर्त्तेः । नवकञ्जवरुणे ईक्षणे यस्य तमिति केवलमारुण्ये उक्तेऽपि नवशब्दादि–बलेन विशालत्वप्रसन्नत्वादिकं ज्ञेयमेव, तयोस्तत्तन्नित्यत्वात् । नित्यं प्रकर्षेण मुदितमिति सदा सुप्रसन्नतोक्ता, अत एव श्रीमत् सर्वशोभायुक्तम्, श्रीमत्त्वे हेत्वन्तरमप्याह—सुकपोलमित्यादिविशेषणैस्त्रिभिः । बिभ्राणं दधतमपि तत्तद्विशेषणविशिष्टत्वे तात्पर्य्यम्, किंवा प्रकटयन्तमित्यर्थः । हि एव, वासुदेवः श्रीवसुदेवनन्दन एव श्रीवत्सलाञ्छनत्वादीन्यसाधारणलक्षणानि । वनमालीति—पूर्वोक्तपद्मगालाया एवापादतललम्बितत्वार्दति सुन्दर इति पूर्वोक्तमनुक्तञ्च परमसौन्दर्य्यं संगृह्णाति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

उज्जिहानम् उद्गच्छन्तम् ॥ १—३५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दुष्कृन्निग्रहसाध्वनुग्रहावेकेन भगवच्चेष्टितेन दर्शयन् कथाशेषमाह–तमित्यादिना । पुरद्वाराद्विनिष्क्रान्तं तं श्रीकृष्णमवलोक्य नारदोक्तैरेतैर्लक्षणैरयं पुमान् वासुदेवो नान्यो भवितुमर्हत्ययं च निरायुधोऽनेन पद्भ्यामेव चलन्निरायुधश्चाहं योत्स्यामीति निश्चित्य पराङ्मुखं प्राद्रवन्तं तम् अन्वधावदित्यन्वयः तं कथंभूतम् ? उज्जिहानं उद्गच्छन्तम् उडुपं चन्द्रमिव स्थितमतीव दर्शनीयं पीते कौशेये वाससी यस्य तम् ॥ १ ॥ श्रीवत्सो वक्षसि यस्य भ्राजता कौस्तुभेनाऽऽमुक्ता बद्धा अलङ्कृतेति यावत् सा ग्रीवा यस्य पृथवः पीनाः दीर्घाः चत्वारो बाहवो यस्य नवकञ्ज इवारुणे ईक्षणे यस्य तम् ॥ २ ॥ नित्यप्रमुदितेत्यादि । मुखारविन्दविशेषणं श्रीमत्सौन्दर्य्यसम्पद्वच्छोभनौ कपोलौ यस्मिन् शुचि विशुद्धं स्मितं यस्मिन् स्फुरन्ती मकराकारे कुण्डले यस्मिन् तथाभूतं मुखारविन्दं बिभ्राणम् ॥ ३ ॥ श्रीवत्सो लाञ्छनं चिह्नं यस्य चत्वारो भुजा यस्य अरविन्दे इवाक्षिणी यस्य वनमालाऽस्यास्तीति तथा व्रीह्यादित्वान्मत्वर्थीयः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उज्जिहानमुद्यन्तम् ॥ १–५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

उज्जिहान इत्यादिना श्रीकृष्णमाधुर्य्यवर्णनं स्वप्रेमतस्तत्स्वभाववर्णनापेक्षैव येन तु यवनस्यानुभावापेक्षया तत्र वैरासम्भवात् अतस्तिक्तादिस्वभावानां खण्डादिचर्व्वणदेवेदं ज्ञेयम् ॥ १—७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एकपञ्चाशत्तमे श्रीमुचुकुन्दो दृशाऽदहत् । यवनं तुष्टुवे कृष्णं स तुष्टोऽस्मै वरं ददौ ॥

उज्जिहानमुद्गच्छतं प्रकटितमपि अन्यैर्यथायोगमास्वाद्यमानमपि भगवन्माधुर्य्यमसुरा वैरभावादेवानुभवितुं चक्षुर्भ्यां पश्यन्तोऽपि न शक्नुवन्तीति ज्ञापयितुं दर्शनीयेत्यादिना सौन्दर्यं वर्णितं प्राद्रवन्तं पलायमानम् ॥ १–६ ॥

गूढार्थदीपिनी

यवनं दग्धवानेकपञ्चाशत्तम ईश्वरः । मुचुकुन्ददृशा तेन स्तुतस्तस्मै वरानदात् ॥ १ ॥

तमिति षट्कम् । तं कृष्णम् विनिष्क्रान्तम् उज्जिहीते इति उज्जिहानस्तम् उद्यन्तं चन्द्रमिव । ओहाङ्गतौ शानच् । भ्राजता कौस्तुभेन आयुक्ता बद्धा ग्रीवा यस्य । नित्यैत्यादि पञ्च विशेषणानि मुखारविन्दस्य । श्रीमत् इत्यत्र प्रशंसायां मतुप् । वासुदेव इति सार्द्धम् । श्रीवत्सेति द्विरुक्तिरावेशात् । पराङ्मुखं पृष्ठं दर्शयन्तम् ॥ १–६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एकपञ्चाशत्तमे कालयवनस्य प्रतिकूलभक्तस्य हरितद्भक्तद्विषो वधो मुचुकुन्दे हरिभक्ते भगवदनुग्रहश्च वर्ण्यते–तं विलोक्येति । तं श्रीकृष्णं पुराद्विनिष्क्रान्तम् विलोक्य नारदप्रोक्तैर्लक्षणैरयं पुमान् वासुदेवः अयं च निरायुधः । अतोऽहमपि पद्भ्यां चलन् अनेन निरायुध एव योत्स्ये इति निश्चित्य तं पराङ्मुखं प्राद्रवन्तमन्वधावदिति षण्णामन्वयः दर्शनीयः क्षरो देहादिः दर्शनीयतरो क्षरो जीवः । दर्शनीयतमः पुरुषोत्तमस्तम् ॥ १ ॥ श्रीवत्सो वक्षसि यस्य तं भ्राजता कौस्तुभेन आमुक्ता बद्धा कन्धरा यस्य तम् ॥ २ ॥ नित्यप्रमुदितं मुखारविन्दं बिभ्राणम् ॥ ३–६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ तृतीये मासि । पद्न्निति मासशब्दस्य मासित्यादेशः ॥ १ ॥ मत्स्यसहितान्नालवान् ॥ २ ॥ कुलिन्दादिदेशान् ॥ ३ ॥ मद्रान्मद्राधिपान् ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

निग्रहं प्रथमेऽध्याये निरूप्य हरिणा कृतम् । द्वितीयेऽनुग्रहं प्राह मुचुकुन्दाय यत्कृतम् ॥ १ ॥
तामसी हननाख्या हि राजसी नगरोद्यमा । सात्त्विकी नयनाख्या च निर्गुणा निर्गमस्तथा ॥ २ ॥
निर्गुणस्य निमित्तत्वं न तु कर्तृत्वमीर्यते । प्रबोधो मरणं चैव संवादश्च यथाक्रमात् ॥ ३ ॥
स्तुतिश्च निर्गुणा प्रोक्ता तदग्रे हि फलिष्यति ।
अतो निर्गुणलीलात्र द्वितीये विनिरूप्यते । क्रिया भगवतो द्वेधा गुणेषु स्वे यतः स्थिता ॥ ४ ॥

पूर्वाध्यायान्ते तत्त्वान् परित्यज्य केवलं तं व्यामोहयितुं कीर्तिमयीं वनमालां बिभ्रत् निर्गत इत्युक्तम्, कालयवनस्य मुक्त्यर्थं नारदोपदेशं गृहीतवतः साक्षात्कारः । ततस्तदनुसरणम्, ततो दृष्ट्या ज्ञानरूपेण ज्ञानाग्निना संघातनाशश्च निरूप्यते । निर्गुणक्रियाया मोक्षपर्यवसानात् । परं तस्य काल एव मुक्तिरिति निरूपयितुं द्वादशभिर्निरूप्यते तं विलोक्येति । तं विलोक्य वासुदेवोऽयमिति निश्चित्य, तं जिघृक्षुरन्वधावदिति षष्ठेन सम्बन्धः । तत्रादौ त्रिभिस्तदृष्टं रूपं वर्णयति । पञ्चदशकलापूर्णमिव तावद्भिर्विशेषणैः । अतः प्रथमतः चन्द्रदृष्टान्तेनैव निरूपयति । विशेषेण निष्क्रान्तम्, यथा उदयाद्रेश्चन्द्रः, न तु राहोर्मुखात्, नापि मेघेभ्यः । तथा भगवानपि न मारयितुं, नापि भयमुत्पादयितुं, भयेन वेति तदाह उज्जिहानमिति । प्रथमदर्शनापेक्षया द्वितीयदर्शने अधिककान्तियुक्तः प्रतीयत इति । ननु विशेषकान्तिप्रदर्शनं किमर्थमित्याशङ्क्याह उडुपमिवेति । चन्द्रो हि नक्षत्राणां रक्षमः । यदि तत्तन्नक्षत्रे न गच्छेत्, गत्वा वा तं न प्रकाशयेत्, स्वरूपतः फलतश्च, तदा नक्षत्राणां वैयर्थ्यमेव स्यात् । तथा भगवान् नारदादीनां रक्षार्थं तदुपदिष्टेषु स्वानुभावं ख्यापयितुं प्रतिक्षणं रूपवैशिष्ट्यं प्रकाशितवानित्यर्थः । किञ्च, तस्मिन् दृष्टे युद्धार्थं समागतानां क्रोधः कदाचिद्भवेत्, ततश्चासन्मत्या मोक्षो न भवेदिति भगवात्स्वस्वरूपं सुन्दरत्वेनैव प्रकाशितवानित्याह दर्शनीयतममिति । दर्शनीयोऽतिसुन्दरः । अत्याश्चर्यं हि परस्मै प्रदर्श्यते । स्वस्यापि पुनः पुनर्द्रष्टव्यो भवति । श्याममिति । रसात्मकता निरूपिता । सर्ववेदयुक्तत्वमाह पीतकोशेयवाससमिति । नग्नान्न मुक्तिरिति वैदिकः सिद्धान्तः । ‘आद्यन्तमध्ये बद्धो हि वेदेनामृतमश्नुत’ इति ।

कच्छाशिखोपवीतानि बन्धनान्याह वेदतः ।

पीतवर्णं कौशेयं वासो यस्येति । वेदो यज्ञो देवाश्च पदत्रयेण परिगृहीताः । छन्दोमयं पीतमिति । कौशेयं क्षौमम् । ‘सौम्यं वै क्षौम’मिति श्रुतेः । सर्वदैवत्यं वास इति च । अन्यथा पीताम्बरमित्येव ब्रूयात् । भगवदीयं हि न प्राकृतप्रकृतिकं भवतीति विशेषणवैयर्थ्यं च ॥ एवं धर्मरूपतां निरूप्य अर्थरूपतामाह श्रीवत्सवक्षमिति । श्रीवत्सो वक्षसि यस्येति । दक्षिणावर्तरोमरेखायां सुवर्णरेखावत्तेजोविशेषः श्रीवत्सशब्देनोच्यते । वक्षसि जीवः सन्निहित इति तत्रैव भगवता अर्थः स्थापितः सुतराम् । दक्षिणः स्तनो धर्मो भवतीति धर्मप्रतिष्ठित एवार्थो भगवता परिगृहीतः । अत एव तत्र जीवप्रतिषापाह । भ्राजत्कौस्तुभेनामुक्ता कन्धरा यस्येति । ‘पुरुषः काममय’ इति कामस्तन्निरूपणेन निरूपितः । मोक्षस्तु स्वेनैव दीयत इति प्रसङ्गादन्यदानमपि चतुर्भुजत्वेन

निरूपयति पृथुदीर्घेति । पृथवो दीर्घाः चत्वारो भुजा यस्येति । कृपया ज्ञानमपि प्रयच्छतीति ज्ञापनार्थमाह नवकञ्जारुणेक्षणमिति । नवकमलवदरुणे ईक्षणे यस्य । नूतनत्वेन कालाग्रासः, कञ्जत्वेन सात्त्विकता, अरुणत्वेन राजसता च, ईक्षणस्य निरूपिता । तेन सरसा सदया ज्ञानदृष्टिर्भगवदीया भक्तिं साधयतीति पञ्चमोऽपि पुरुषार्थो निरूपितः । प्रार्थनावसर इति ख्यापयति नित्यप्रमुदितमिति । एवं सर्वपुरुषार्थदातारं भगवन्तं निरूप्य, मुखारविन्दमपि पञ्चभिर्विशेषणैः विशिष्टं पञ्चपर्वविद्यारूपं स्वतन्त्रभक्तिमार्गत्वेन निरूपयन्नाह श्रीमदिति । मुखारविन्दं बिभ्राणमिति भगवद्विशेषणम् । स मार्गो भगवतैव स्थाप्यत इति ख्यापयितुम् । तदपि श्रीयुक्तं भवति परमसुन्दरम् । भगवानिव । सुष्ठु कपोले यस्येति । प्रवृत्तिनिवृत्तिप्रकारेणापि रसानुभवस्थानयुक्तम् । शुचि शुद्धं स्मितं यस्मिन्निति । सेवनार्थमेव समीचीनं मोहं सम्पादयति, नान्यथेति निरूपितम् । स्फुरन्ती मकरसदृशे कुण्डले यस्येति । बर्हिर्निर्गमने ग्रासार्थं स्थापिताविव मकरतुल्यौ वेदौ निरूपितौ । मोक्षदित्सया गच्छन् भगवन्मार्गं भक्तिमार्गं च स्थापयतीति निरूपितम् ॥ ३ ॥ एतादृशो भगवानेव भवतीति नारदशिक्षया ज्ञातवानित्याह वासुदेवो ह्ययमिति । सत्त्वे आविर्भूतः मोक्षदाता वा अयमेव वासुदेव इति निश्चयं कृतवान् । कथं निश्चय इत्याशङ्क्य असाधारणानि षड्गुणरूपाणि षड्विशेषणान्याह । इतीति निश्चयार्थः । यतः पुमान्, न तु प्रकृतिः । दिव्यदृष्ट्या पश्यतीति सर्वजगतः प्राकृतत्वं, भगवतः पुरुषत्वं च, दृष्टवान् । अनेनैश्वर्यमपि निरूपितम् । 'विष्णोस्तु त्रीणि रूपाणी'ति वात्क्यात् तेषां पुरुषरूपत्वं न बाधकम्, प्रत्युत मूलस्य पुरुषत्वे तेषां पुरुषरूपत्वमुपपद्यत इति साधकत्वमेव । श्रीवत्सो लाञ्छनं यस्येति । क्रियाशक्तिः पूर्णा वीर्यत्वेन निरूपिता । भगवत्येव सा यतः । ततो यशो निरूपयन् सर्वपुरुषार्थदातृत्वे तद्भवतीति चतुर्भुजत्वमाह । ततो दृष्ट्यैव तापहारकत्वं भक्तिप्रदत्वेन निरूपयति अरविन्दाक्ष इति । रविव्यतिरिक्तान् सर्वानेव द्युति खण्डयति । महातेजस्विनमेव स्थापयतीति तादृशमक्षि निरूपयन् श्रियं भक्तिं च निरूपितवान् । वनमालां अन्तः प्रवेश्य ज्ञानवत्तिष्ठतीति ज्ञाननिरूपणेन पूर्णता निरूपिता । अतिसुन्दरः सर्वथा कल्मषाभावात् । देशपरित्याग एव हि वैराग्यमिति । अतः कारणात् वासुदेव इति निश्चयः ॥ ४ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । उज्जिहातं उद्गच्छन्तमुडुपं चन्द्रमिव विनिष्क्रान्तं दर्शनीयतममतिसुन्दरं श्यामं श्यामवर्णं घनश्यामं वा पीताम्बरम् ॥ १ ॥ श्रीवत्सो वक्षसि यस्य भ्राजता कौस्तुभेनामुक्ता व्याप्ता कन्धरा यस्य पृथवो दीर्घाश्चत्वारो बाहवो यस्य नवकञ्जवत् अरुणे ईक्षणे यस्य तम् ॥ २ ॥ नित्यप्रमुदितं सदोज्जृंभितं श्रीमन्तौ सुष्ठु कपोलौ यस्मिन् शुचि स्मितं यस्मिन् तत् स्फुरंती मकराकारे कुण्डले यस्मिंस्तन्मुखारविंदं बिभ्राणं तं श्रीकृष्णं विलोक्य दृष्ट्वा श्रीवत्सचिह्नः पद्मनेत्रो वनमाली अतिरम्यः चतुर्भुजो वासुदेवः पुमानयमिति एवं भवितुमर्हति ॥ ३–४ ॥

विवरणटिप्पणी

द्वितीयेऽध्याये । निर्गुणस्येति । निर्गुणस्वरूपस्य कर्तृत्वाभावान्निर्गमलीलाविष्टस्य स्वरूपस्य यवनवधे निमित्तत्वम्, नतु वधकर्तृत्वमित्यर्थः । अत्रापि लीलाचतुष्टयमित्याशयेनाहुः प्रबोधः इति । मुचुकुन्दस्य जागरणं यवनस्य मरणं मुचुकुन्देन भगवतः सम्वादश्च सात्त्विकतामसराजसा इत्यर्थः । तदग्रे हीति । निर्गुणस्वरूपेण मुचुकुन्दस्य दत्तं मोक्षलक्षणं फलं जन्मान्तरे फलिष्यतीत्यर्थः । अत इति । पूर्वाध्यायोक्ता निर्गुणलीला न फलपर्यवसायिनी, अतोऽविशेषाल्लीलाचतुष्टयमपि तत्राध्याद्यार्थः । अत्र तु निर्गुणलीला मोक्षलक्षणं फलं फलिष्यति । अतः फलसम्बन्धादत्र निर्गुणलीलैवाध्यार्थ इत्यर्थः । गुणेष्विति । गुणेषु स्थिता सगुणा । स्वे स्वरूपे स्थिता निर्गुणेत्यर्थः । तत्त्वानीति । चतुर्णामायुधानां तत्वरूपत्वान्निरायुधपदेन तत्त्वपरित्याग उक्त इति भावः । एतदाशयेनैव निर्गमलीलाया निर्गुणत्वमुक्तमिति भावः । परं तस्येति । ये च प्रलम्बेत्यत्र यवनस्य मुक्तिर्निरूपिता । परन्तु कालरूपे एवेत्यर्थः । तं विलोक्येत्यत्र । नारदादीनामिति । वाक्यस्येतिशेषः । उडुरक्षार्थं चन्द्र इव नारदादिवाक्यरक्षार्थं भगवानागतः । अतस्तस्योडुषु गमनमिव भगवतो नारदवाक्यानुगमनमिति भावः । सौम्यं वै क्षौममिति । सौम्यं सोमलतासम्बन्धि यज्ञार्हमित्यर्थः । बहिर्गमन इति । मुखस्य भक्तिरूपत्वेन भक्तिमार्गाद्बर्हिर्निर्गमने वेदग्रासः कालाधीनत्वं भवतीत्यर्थ । कपोलयोः प्रवृत्तिनिवृत्तित्वस्योक्तत्वात्तत्र स्थितयोः कुण्डलयोर्वेदत्वमुक्तम् । भगवन्मार्गमिति । भगवत्त्वं ब्रह्मभावस्तत्साधकं मार्गं सांख्ययोगमार्गमित्यर्थः । कुण्डलयोः साङ्ख्ययोगरूपत्वादिति भावः । भक्तिमार्गमिति । मुखस्य भक्तिरूपत्वादिति भावः । ननु 'विष्णोस्त्वि'तिवाक्यादक्षरस्य पुरुषत्वम्, नतु पुरुषोत्तमस्येत्याशङ्क्याहुः विष्णोस्त्विवति । इतिवाक्यात्तेषां रूपाणां पुरुषत्वं पुरुषोत्तमस्य पुरुषत्वे बाधकं न, किन्तु मूलस्य पुरुषोत्तमस्य पुरुषत्वात्तेषामपि पुरुषत्वं जातमिति साधकत्वमेव तस्येत्यर्थः ।

गोस्वामीश्रीगिरधरलालकृता बालप्रबोधिनी

एकपञ्चाशत्तमे तु यवनस्य वधस्तथा । संस्तुतो मुचुकुन्देन कृष्ण इति निरूप्यते ॥ १ ॥

दुष्टनिग्रहसाध्वनुग्रहाविवेकेनैव भगवच्चरितेन दर्शयन्नग्रिमकथामाह—तमित्यादिना । पुरद्वाराद्विनिष्क्रान्तं निसृतं तं कृष्णमवलोक्य "नारदोक्तैर्लक्षणैरयमेव पुमान् वासुदेवो भवितुमर्हति, न ततोऽन्यो भवितुमर्हति, अयं च निरायुधः पद्भ्यामेव

चलति, अतोऽहमपि निरायुधः पद्भ्यामेव चलन्ननेन सह योत्स्योमि" इति निश्चित्य पराङ्मुखं प्राद्रवन्तं तं जिघृक्षुः यवनः अन्वधावदिति षण्णामन्वयः। नारदोक्तानि लक्षणान्येन दर्शयति—उज्जिहानं उद्गच्छन्तमुडुपं चन्द्रमिव दर्शनीयतमं अतिसुन्दरम्, श्यामम्, पीते कौशेये वाससी यस्य तम् ॥ १ ॥ श्रीवत्सो दक्षिणावर्तरोमरेखायां सुवर्णरेखावत्तेजोविशेषो वक्षसि यस्य तम्। भ्राजत्कौस्तुभेनामुक्ता बद्धा अलङ्कृता कन्धरा ग्रीवा यस्य तम्। पृथवः पीना दीर्घाश्चत्वारो बाहवो यस्य तम्। नवकञ्ज इव अरुणे ईक्षणे यस्य तम् ॥ २ ॥ 'नित्यप्रमुदितम्' इत्यादि मुखारविन्दविशेषणम्। श्रीमती सौन्दर्यातिशययुक्ते सुष्ठु कपोले यस्य तत्, शुचि शुद्धं निर्विकारं स्मितं यस्य यस्मिन् वा तत्, स्फुरती मकराकारे कुण्डले यस्मिंस्तथाभूतं मुखारविन्दं बिभ्राणम् ॥ ३ ॥ 'श्रीवत्सो लाञ्छनं चिह्नं यस्य' इत्यादिविशेषणद्विरुक्तिर्वक्तृभेदाच्च क्रियाभेदाच्च न दोषायेति ज्ञेयम् ॥ ४–५ ॥

अन्वितार्थप्रकाशिका

एकपञ्चाशत्तमे तु घातनं यवनेशितुः। मुचुकुन्दानुग्रहश्च तत्र श्लोकाः शरारयः (६५) ॥
अष्टोवाचेति (८) पादोना द्वासप्ततिरनुष्टुभः (७१॥।) ॥ ५१ ॥

तमिति षट्कम् ॥ तदन्तर्गन्तं वासुदेव इति सार्द्धम् ॥ तं पुराद्विनिष्कान्तं निःसृतम् उज्जिहानम् उद्गच्छन्तमुडुपं दर्शनीयतममतिसुन्दरं श्यामं पीते कौशेये वाससो यस्य तं श्रीवत्सो दक्षिणावर्तरोमरेखायां सुवर्णरेखावत्तेजोविशेषो वक्षसि यस्य तं भ्राजत्कौस्तुभेनामुक्ता बद्धा अलंकृता कन्धरा ग्रीवा यस्य तं पृथवः पीना दीर्घाश्चत्वारो बाहवो यस्य तं नवकञ्जे इवारुणे ईक्षणे यस्य तं नित्यप्रमुदितमित्यादिपञ्चविशेषणविशिष्टं मुखारविन्दं बिभ्राणं तं श्रीकृष्णं विलोक्य श्रीवत्सलाञ्छनः चतुर्भुजः अरविन्दाक्षः वनमाली अतिसुन्दरः अयमेव पुपान् नारदोक्तैर्लक्षणैर्वासुदेवो भवितुमर्हति। ततोऽन्यो न भवितुमर्हति। अयं च निरायुधः पद्भ्यामेव चलति अतोऽहमपि निरायुधः पद्भ्यामेव चलन्ननेन सह यौत्स्ये। इति निश्चित्य पराङ्मुखं प्राद्रवन्तं योगिनामपि दुरापं तं कृष्णं जिघृक्षुर्यवनः अन्वघावत्। श्रीवत्सलाञ्छन इत्यादिद्विरुक्तिर्वक्तृभेदात् क्रियाभेदाच्च न दोषाय ॥ १–६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीमेकपंचाशत्तमेऽध्याये मुचुकुन्देन यवनघातनं। मुचुकुन्दस्तुतिश्च हरेर्मुचुकुन्दो परिप्रसादश्चनिरूप्यतेगार्ग्यः ॥
श्यालेनषंटस्त्वमित्युक्तो यदुभिस्तदा। हसिते कोपवान् विप्रोमहादेवमतोषायत् ॥ १ ॥
रुद्राद्वरं लब्धवान्सपुत्रं यादवभीषणं। अपुत्रयवनेन्द्रेणार्थितो गार्ग्योवरंसुतम् ॥ २ ॥
तत्क्षेत्रे कालयवनमजीजनदतः प्रभुः हरिर्म्लेछाद्धरगिरां। पालनायापलायतेति पुराणे विख्यातं ॥ ३ ॥

तं विलोक्येति पुरोडुपं चंद्रमिवोज्जिहानं उद्गच्छन्तं ॥ १ ॥ भ्राजन् शोभमानः कौस्तुभ आमुक्तोबद्धः। कंधरायां ग्रीवायां यस्य तं ॥ २ ॥ नित्यप्रमुदितमित्यादिविशेषणविशिष्टं मुखारविंदं बिभ्राणं तं श्रीकृष्णं विलोक्येति पूर्वेणान्वयः ॥ ३ ॥ नारदप्रोक्तैः दृष्टेर्लक्षणैरयं पुमान् वासुदेव एवास्ति अन्यो भवितुं नाऽर्हतीति द्वितीयेनान्वयः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मुचुकुन्ददृशा कृष्णो यवनं न्यहनत् स्तुतः। सन्नेकाधिकपञ्चाशत्तमे तेनान्वकम्पत ॥ १ ॥

दुष्कृतनिग्रहसाध्वनुग्रहावेकेत भगवच्चेष्टितेन दर्शयन् कथाविशेषमाह तत्रादौ श्लोकषट्कस्येकान्वयः ॥ तमिति ॥ श्रीवत्सेति ॥ नित्येति ॥ वासुदेव इति ॥ लक्षणैरिति ॥ इतीति विनिष्क्रान्तः, पुरद्वारादिति शेषः। उज्जिहानमुद्गच्छन्तं, उडुपं चन्द्रमिव स्थितं, दर्शनीगतममतीव दर्शनीयं, श्यामं घनवत् कृष्णवर्णं, पीते कौशेये वाससी यस्य तं, श्रीवत्सो वक्षसि यस्य तं, भ्राजत् कौस्तुभेनामुक्ता बद्धाऽलंकृतेति यावत्। सा कन्धरा ग्रीवा यस्य तं, पृथवः पीनाः दीर्घाः चत्वारो बाहवो यस्य तं नवकञ्जे नवीनकमले इव अरुणै रक्ते ईक्षणी लोचने यस्य तं, नित्यप्रदितमित्यादीनि चत्वारि मुखारविन्दविशेषणादिति। तत्र नित्यप्रमुदितं नित्यदा प्रमोदसंयुतं, श्रीमन्तौ सौन्दर्यपद्युतौ सुशोभनौ कपोलौ वस्मिंस्तत्, च विशुद्धं स्मितं यस्मिंस्तत्, स्फुरती मकराकारे कुण्डले यस्मिंस्तथाभूतं, मुखारविन्दं, बिभ्राणं, तं श्रीकृष्णं, यवनः विलोक्य, नारदप्रोक्तैः एतैः लक्षणः, श्रीवत्सो लाञ्छनं चिह्नं यस्य सः, चत्वारो भुजा यस्य सः, अरविन्दे कमले इवाक्षिणी यस्य सः, वनमालास्यास्तीति वनसाली, ब्रीह्यादित्वादनिर्मत्वर्थीय। अतिसुन्दरः, वासुदेवः पुमान्, अयं हि एव। अन्यः भवितुं, न अर्हति। इति निश्चित्य, अयं च निरायुधः पद्भ्यामेव चलन्, अतोऽदृमपि, निरायुधः पद्भ्यां चलन् संश्च, अनेन वासुदेवेन सह, योत्स्यामि। इति च, निश्चित्य पराङ्मुखं प्राद्रवन्तं योगिनां अपि, दुरापं तं वासुदेवं जिघृक्षुः ग्रहीतुमिच्छुः सन्, अन्वधावत् ॥ १–६ ॥

कृष्णप्रिया

श्रीशुकदेवजी कहते हैं—महाराज परीक्षित्! भगवान् श्रीकृष्ण मथुरापुरी के मुख्य द्वार से जब बाहर पधारे तब ऐसा दर्शनीय दृश्य बना कि पूर्वदिशा से चन्द्रोदय हो रहा हो। भगवान का श्यामल कोमल श्रीअङ्ग अत्यन्त दर्शनीय था उस पर

प्रियतम प्रभु ने पीत कौशेय वस्त्र धारण किया था जिसकी शोभा निराली थी। वक्षःस्थलपर श्रीवत्सलाञ्छन शोभा प्राप्त कर रहा था और कण्ठ में कौस्तुभमणि जगमगा रही थी, लम्बी एवं कुछ बड़ी नाथ की चार भुजाएँ थी, फिर देखिये कि ताजे खिले हुए कमल के सदृश रतनारे रमणीय कोमल नयन थे। श्रीकृष्ण का मुखारविन्द नित्य प्रसन्न एवं आनन्दपूर्ण, सौन्दर्यपूर्ण श्रेष्ठ छटादार दोनों कपोल थे, स्मितहास्य मधुर और मङ्गल मय था, दोनों कानों में तेजोमय मकराकृति कुण्डलों को धारण किये थे। भगवान का रमणीय दर्शन पाते ही कालयवन ने निश्चय कर लिया कि अवश्य यही श्रीकृष्ण वासुदेव भगवान है। महर्षि नारद जी ने भगवान के जो जो लक्षण बताये थे वे सर्व इसमें मिल रहे हैं। यह श्रीवत्सलाञ्छन है, चतुर्भुज है, अरविन्द नेत्र है, गले में वैजयन्ती माला भी है और सुन्दरता की तो सीमा ही है ॥ १-४ ॥

लक्षणैर्नारदप्रोक्तैर्नान्यो भवितुमर्हति। निरायुधश्चलन्[1] पद्भ्यां योत्स्येऽनेन निरायुधः ॥ ५ ॥
इति निश्चित्य यवनः प्राद्रवन्तं पराङ्मुखम्। अन्वधावज्जिघृक्षुस्तं दुरापमपि योगिनाम् ॥ ६ ॥
हस्तप्राप्तमिवात्मानं[2] हरिणा स पदे पदे। नीतो दर्शयता दूरं यवनेशोऽद्रिकन्दरम् ॥ ७ ॥
पलायनं यदुकुले जातस्य तव नोचितम्। इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—पद्भ्याम्, निरायुधः, चरन्, अयम्, पुमान्, नारदोक्तैः, लक्षणैः, वासुदेवः, हि, अन्यः, भवितुम्, न, अर्हति, इति, निश्चित्य, यवनः, पराङ्मुखम्, प्राद्रवन्तम्, योगिनाम्, अपि, दुरापम्, तम्, जिघृक्षुः, अन्वधावत् ॥ ५-६ ॥ हरिणा, पदे, पदे, आत्मानम्, हस्तप्राप्तम्, इव, दर्शयता, सः, यवनेशः, दूरम्, अद्रिकन्दरम्, नीतः ॥ ७ ॥ यदुकुले, जातस्य, तव, पलायनम्, न, उचितम्, इति, क्षिपन्, अनुगतः, अहताशुभः, एवम्, न, प्राप ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नारदोक्तैस्तैर्लक्षणैरयं पुमान्वासुदेव एव नान्यो भवितुमर्हति। अयं च निरायुधोऽतोऽनेन पद्भ्यामेव चरन्निरायुधोऽहं योत्स्यामीति निश्चित्य तं पराङ्मुखं प्राद्रवतमन्वधावदित्यन्वयः ॥५-६॥ आत्मानं हस्तप्राप्तमिव दर्शयता दूरं नीत इत्यन्वयः ॥७॥ अहताशुभोऽक्षीणकर्मा ॥ ८-९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

लक्षणैश्चिह्नैः 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरः। यतोऽयं निरायुधोऽतो हेतोः ॥ ५ ॥ इतीत्थम्। पराङ्मुखं पृष्ठं दर्शयन्तम्। तं श्रीकृष्णम्। जिघृक्षुर्ग्रहीतुमिच्छुः ॥ प्रकर्षेण लीलाविशेषेण आ ईषत् द्रुतगत्या चलन्तं जिघृक्षुरिति तस्य गर्वितत्वम्। दुरापमित्युपहासास्पदत्वं व्यंजितम् ॥ ६ ॥ स कालयवनः ॥ तत्रापि भगवतश्चातुर्यं दर्शयति—हस्तेत्यादि ॥ ७ ॥ अशुभमत्र भगवद्ग्रहणाऽयोग्यतापादकमात्रमेव ग्राह्यं न सर्वम्, अथाऽनेकजन्मसंचितसुकृतपुजेनाऽप्राप्यं श्रीकृष्णदर्शनं तस्य न भवेत् "बहुजन्मविपाकेन सम्यग्योगसमाधिना। द्रष्टुं यतन्ते यतयः शून्यागारेषु यत्पदम् ॥" इति कर्दमोक्तेः, "यत्पादपांशुर्बहुजन्मकृच्छ्र-धृतात्मभियोगिभिरप्यगम्यः" इत्युक्तेश्च। इतीत्थम्। क्षिपन्निदम्। प्राप पस्पर्श ॥ तथाप्यप्राप्यं स्थिरीकर्तुं पुरुषमाह—पलायनमिति। यदुकुल इति यादवानां सुप्रसिद्धमहावीर्यवत्त्वादिति भावः। हताऽशुभ इति—अस्यापातप्रतीत्यर्थता चेत्तर्हि तदप्राप्तौ हताशुभ इत्यस्य हेतुत्वं वक्तुं महदेवानुचितम्। यवनस्यास्य यदि भाग्यमप्रतिहतमभविष्यत्तर्हि सोऽयं तच्छन्नुर्हस्तगतश्चाभविष्यदिति शोचन्प्रतिपत्त्याविरुद्धमतिकृत्त्वप्रतिपत्तेः। न च यवनस्य मुक्तिक्रियातिपत्त्या शोचनमिदमिति वक्तव्यम्, तन्मुक्तेरनन्तरं भावित्वात्। तच्च 'ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः' इत्यादौ द्वितीयस्कंधाभिधानात्। न च प्रसिद्धाऽऽशुभहानिमात्रेण तत्प्राप्तियोग्यता वक्तव्या, 'यत्पादपांर्बहुकृच्छ्रधृतात्मभिर्योगिभिरप्यगम्यः' इत्यत्राऽसंमतत्वात्, 'भक्त्याहमेकया ग्राह्यः' इति लक्षणसाधनन्तरस्वप्रतिपन्नत्वाच्च। तस्मात् 'अपरे हतपाप्मानो व्यजनैः' इत्यत्र हतपाप्मतया समस्तेन तटस्थेन प्रतिपक्षेण भावेन रहितायां परमभक्तावेव तात्पर्यावसानम्। तत्राप्यहतशुभतायास्तद्विरुद्धभाव एव पर्यवसितिरितीत्थमेव साक्षात् प्राप्त्यभावे हेतुता गम्यते, यथा व्रजेश्वरी पश्चाद्धावन्ती तं पराद्रवन्तमपि प्राप्तवत्येव तथा सोऽप्ययं कथं प्राप्तुयादित्यभिप्रायात् ॥ ८ ॥

श्रीमज्जीवगोस्वामीकृता वैष्णवतोषिणी

श्रीभगवतस्तु तत्रापि चातुर्य्यं दर्शयति—हस्तेति। पदे पदे दर्शयता ॥ ७ ॥ तथाप्यप्राप्यं विलोक्य स्थिरीकर्त्तुं परुषमाह—पलायनमिति। यदुकुल इति। यादवानां सुप्रसिद्धमहावीरत्वादिति भावः क्षिपन्नुपलभमानः अनुगतम् अनुगच्छन्नपि न प्रकर्षेण स्पर्शेनापि तत्र हेतुः। अहताशुभ इति, अस्यापातप्रतीतार्थता चेत्तर्हि तदप्राप्तौ हेतुत्वं वक्तुं महदेवानुचित्तं यवनस्यास्य यदि

---

[1] चरन्—वीर.। [2] प्राप्य—प्रा. पा.।

भाग्यमप्रतिहतमभविष्यच्च तर्हि सोऽयं तच्छत्रुर्हस्तगतश्चाभविष्यदिति शोचन् प्रतिपत्त्या विरुद्धमतिकृत्वप्रतिपत्तेः। न च यवनस्य मुक्तिक्रिया प्रपत्या शोचनमिदमिति वक्तव्यं तन्मुक्तेरनन्तरभावित्वात् तच्च "येच प्रलम्बखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः" इत्यादेर्द्वितीयस्कंधेऽभिधानात् नच प्रसिद्धाशुभहानिमात्रेण तत्प्राप्तियोग्यता वक्तव्या "यत्पादपांसुर्बहुजन्मकृच्छ्रतोधृतात्मभिर्योगिभिरप्यलभ्यस्" इत्यात्रासम्मतत्वात् "भक्त्याहमेकया ग्राह्यः" इति विलक्षणसाधनान्तरस्य प्रतिपन्नत्वाच्च तस्मादपरे हतपाप्मानो "व्यजनैः समवीजयन्" इत्यत्र हतपाप्मा तया यथा समस्तेन तटस्थेन प्रतिपक्षेण भावेन रहितायां परमभक्तावेव पर्य्यवसानं तथात्राप्यहताशुभातायास्तद्विरुद्धभाव एव पर्य्यवसितिरितीत्थमेव साक्षात्तत्प्राप्त्यभावे हेतुता गम्यते यथा श्रीव्रजेश्वरी पश्चाद्धावन्ती तं पराद्रवन्तमपि प्राप्तवत्येव तथासोऽप्ययं कथं प्राप्नुयादित्यभिप्रायात् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

'इति' एतैर्लक्षणैरित्यन्वयः। यद्वा, नान्यो भवितुमर्हतीति तथा निरायुधमित्यादिकञ्च, निश्चित्येति प्रकर्षेण लीलाविशेषेण आ ईषद्द्रुतगत्या चलन्तम्, जिघृक्षुरिति निजमहागर्वादिना स्वग्राह्यत्वमननात्, योगिनामपि दुरापम्, पदभ्यामन्वधावदिति परममज्ञत्वमेवोक्तम् ॥ ५-६ ॥ हस्तप्राप्तमिव दर्शयतेति तदाश्वासाय, अन्यथा निराशतया, निवृत्तिसम्भवात्। यवनानामीशोऽपि ॥ ७ ॥ तथाप्यप्राप्यं विलोक्य स्थिरीकर्त्तु परुषमाह—पलायनमिति, यदुकुल इति यादवानां सुप्रसिद्धमहावीरत्वादिति भावः। क्षिपन् भर्त्सयन्, न प्रकर्षेण स्पर्शनादिना आप, यतोऽहताशुभस्तत्स्पर्शादिवाधकदोषाक्षयादित्यर्थः। दर्शनादिना तस्य मुक्तिर्जातैव; तथा च द्वितीयस्कन्धे श्रीब्रह्मणोक्तम् (भा० २।७।३४)—'ये च प्रलम्बरवदर्दुरकेश्यरिष्ट,-मल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः' इत्यादि ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवंविधैर्नारदप्रोक्तैर्लिङ्गैर्वासुदेव एवायमित्यन्वयः ॥ ५ ॥ इतीति। इत्थं निश्चित्य यवनः पलायमानं पराङ्मुखं च भगवन्तं गृहीतुम् इच्छुरन्वधावत् तस्य दुष्प्राप्यतां वक्तुं विशिनष्टि योगिनामपि दुरापं योगविशुद्धमनसामपि दुर्ग्राह्यम् ॥ ६ ॥ हस्तेति। प्रतिपदमात्मानं हस्तप्राप्तमिव दर्शयतो भगवता दूरं नीतः स यवनाधीशोऽन्ततोऽद्रिकन्दरं प्रापित इत्यर्थः ॥ ७ ॥ यदुकुले जातस्य तव पलायनमनुचितमित्येवं क्षिपन्नभिभवन्नाशुगतोऽपि यवन एनं भगवन्तं न प्राप तत्र कारणं वदंस्तं विशिनष्टि—अहताशुभोऽक्षीणदुष्कृतः ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

जिघृक्षुर्ग्रहणेच्छुः ॥ ६ ॥ दूरमद्रिकन्दरं प्रति नीतः पदेपदे हस्तप्राप्तमिवात्मानं दर्शयित्वेति शेषः। दर्शयता आत्मानमिति शेषः ॥ ७ ॥ अहताशुभः अनष्टपापः ॥ ८-१२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

अनुगतः अनुगच्छन्नपि न प्रकर्षेण स्पर्शेनापि यस्मादहताशुभः तत्स्पर्शबाधकापराधाक्षयादित्यर्थः ॥ ८-९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आत्मानं हस्तप्राप्तमिव दर्शयता दूरं नीत इत्यन्वयः ॥ ७-८ ॥

गूढार्थदीपिनी

आत्मानं हस्तप्राप्तमिव दर्शयता हरिणा स यवनेशः दूरं नीत इत्यन्वयः ॥ ७ ॥ क्षिपन् निन्दन् इत्यावेशात् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पदेपदे आत्मानं हस्तप्राप्तमिव दर्शयता हरिणा स दूरं दूरे वर्तमानमद्रिकन्दरं नीतः ॥७॥ क्षिपन् अभिभवन् अहताशुभः अक्षीणदुष्कृतः ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अक्षौहिणिगणैः। संज्ञात्वाङ्ङीपो ह्रस्वः ॥ ५ ॥ आकर्षन्निवेत्यनेन तेषामुत्साहाभावेऽप्यनिर्वाहेन समूहानामगतिरिति ध्वनयति ॥ ६ ॥ महता स्कन्धावावेण शिविजैण ॥ ७ ॥ न्यरमन्न्यरमत ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

किञ्च, लक्षणैरिति। नारदोक्तैः वासुदेवादन्यो भवितुं नार्हति। पुराणान्तरादत्र कथानुसन्धेया। गतो हि नारदः कालयवनमाह। यादवाः त्वत्सदृशाः इति, परं कृष्णोरक्षकः, स च सर्वथा ज्ञातुमेवाशक्यः, कुतो जय्यः। कथमशक्य इत्याकाङ्क्षायां

नूतनान्यनेकानि रूपाणि सम्पादयतीत्युक्त्वाह 'तं त्वं न ज्ञास्यसी'ति। ततो विशेषजिज्ञासायां लक्षणानि निरूपितवान्। स एकाकी निरायुधः अयुध्यमानः सर्वाभरणभूषितः पदातिर्निर्गमिष्यतीति। तं यः सायुधः अश्वाद्यारूढोनुगच्छेत्, तं पापं प्रसर्पेदिति। कालयवनस्यापि स्वपापादेव भयं, नान्यन इति निरूपितम्, अतोऽस्मिन्नारदोक्तलक्षणानि वर्तन्त इति वासुदेवश्च। तर्हि किं करिष्यसीत्याशङ्कायामाह निरायुध इति। यतोऽयं निरायुधः पद्भ्यां च चलन् गच्छति, अतोऽहमपि निरायुध एव गमिष्यामि, पद्भ्यामेव चलन्, ततो योत्स्ये मल्लप्रकारेण। अनेन सह युद्धार्थमेव यतः समागतमिति। अहमपि निरायुधः, अयमपीति ॥ ५ ॥ इतीति। एवं निश्चित्य पराङ्मुखमपि भगवन्तं प्राद्रवत्। नारदो हि हितप्रश्ने उक्तवान्। यथा भगवान् करोति, तथा कर्तव्यमिति, तदा ते जयः जीवनं च भविष्यतीति। तदनेनान्यथाबुद्धम्। भगवान् पराङ्मुखः, अयं भगवत्सम्मुखो भूत्वा मर्णं कृतवानिति। वाक्याज्ञाने हेतुमाह यवन इति। जातिदोषात् न ज्ञातवानित्यर्थः। यदि गच्छति भगवति तूष्णीमयं तिष्ठेत्, बलभद्रेण वा युद्धं कुर्यात्, तदा जयो भवेदपि, भगवांश्च सम्मुखमागच्छेत्, तथागमने प्रयोजनाभावात्, अतः पराङ्मुखमपि भगवन्तं प्राद्रवन्तं जिघृक्षुः सन्स्वयमन्वधावत्। ननु जिघृक्षया गमनमुचितमेवेत्याशङ्क्याह योगिनामपि दुरापतिमिति। अत्र प्रमाणं तमिति। तथैव प्रसिद्धम् ॥ ६ ॥ ननु कियद्दूरं गत्वा अप्राप्तौ कथं न निवृत्त इति चेत्, तत्राह हस्तप्राप्तमिवेति। स हि हरिणा नीतः। तर्हि वञ्चयतीति कथं न ज्ञातवान्, तत्राह। पदे पदे हस्तप्राप्तमात्मानं भगवन्तं मन्यमान इति। हस्तमात्रगमनानन्तरं भगवान् प्राप्यत इति स जानन् गतः। नहि कश्चिद्धस्तमात्रादुदासीनो भवति। अत आकाङ्क्षा न निवृत्ता। यदा हि प्राणी क्रियया आत्मानं प्राप्स्यामीति मन्यते स हि भ्रान्त एव भवति। ननु भगवता वा किमर्थं नीत इति चेत्, तत्राह हरिणेति। स हि हरिः। तस्याप्यविद्या हर्तव्या, मुचुकुन्दस्य च निद्रेति। भगवान् हि यः स्वात्मानमनुसरति, तन्नोपेक्षत इति, पदे पदे तथा बुद्धिमुत्पादितवान्। तदाह दर्शयतेति। पदे पदे आत्मानं हस्तप्राप्तं दर्शयता। उभयत्रापीदं वाक्यं युज्यते। अतो गन्तुर्नेतुश्च इच्छाया अनिवृत्तत्वात् दूरं नीतः। ततः अद्रेः कन्दरा यत्र तत्स्थानमपि नीतः। नन्वेतावत्यपि दूरे अप्राप्तिश्चेत्, तदा नीतिशास्त्रविचारेणापि 'शिथिलाश्च सुबद्धाश्चे'ति न्यायेन कथं न निवृत्त इति चेत्, तत्राह यवनेश इति। दुष्टानां स्वामी न नीतिज्ञः। मथुरातो दशयोजनान्ते धवलपुरमिति प्रसिद्धमिदानीम्, पूर्वं तु आसीत् मुचुकुन्दगुहा ॥ ७ ॥ क्रियया प्राप्त्यभावमाशङ्क्य, जपादिनेव वचनाद्भगवान् प्राप्तव्य इति मत्वा, मध्ये वचनमप्युक्तवानित्याह पलायनं यदुकुल इति। यदुर्हि धर्मात्मा। अन्यथा अस्मत्सदृशत्वेन कथमुक्तो भवेत्। तादृशवंशे जातस्य सर्वागम्यस्यापि अवतारधर्मानुसरणमुचितमिति पलायनमनुचितमित्यर्थः। ननु भगवान् कथमेतद्वाक्यं न गृहीतवान्, तत्राह इति क्षिपन्ननुगत इति। स हि न यथार्थतया वदति, किन्तु तिरस्कारार्थं वदतीति। यदुकुले तस्य श्रद्धाभावात् किं तस्याग्रे यदुकुलप्रतिष्ठारक्षणेनेति युक्तमेव भगवतस्तद्वाक्यानङ्गीकरणम्। अत एव नैनं प्राप। अन्यथा भगवदनुगमने भगवान् प्राप्तः स्यात्। तेन वचनेन पापमपि जातमित्याह अहताशुभ इति। यतः अशुभमपि न निवृत्तम्, अतो न प्राप। पूर्वाशुभमिति केचित्। तद्भगवद्दर्शनेनानुगमनेन च निवर्त्यत एवेत्युपेक्षणीयम्। आहतः अशुभेनेति वा। वाक्यजनितपापेन पृष्ठतस्ताडितः न भगवन्तं प्रापेत्यर्थ ॥ ८ ॥

श्रीसुबोधिनी-सारः

नारदेन प्रोक्तैर्लक्षणैः अन्यो न। कर्त्तव्यं चिंतयति। अयं निरायुधो विशस्त्रः पद्भ्यां चलन् अस्ति अतोऽनेन निरायुधोऽहं योत्स्यामि ॥ ५ ॥ इति निश्चित्य विमुखं पलायमानं योगिनामपि दुरापं तं श्रीकृष्णं जिघृक्षुर्ग्रहीतुमिच्छुर्यवनः पृष्ठतोऽगमत् तत्र शिववरप्रदानं हेतुरिति हरिवंशे प्रसिद्धम् ॥ ६ ॥ हस्तेन प्राप्तमिवात्मानं स्वमूर्त्तिं दर्शयता हरिणा पदेपदे प्रतिपदं स यवनानामीशो दूरं गिरेः कन्दरां नीतः ॥ ७ ॥ यदोः कुले जातस्य तव पलायनं नोचितं न युक्तमिति क्षिपन् आक्षेपम् अनुगतः पृष्ठतो यातोऽपि न हतानि अशुभानि पापानि यस्य स यवन एनं कृष्णं न प्राप ॥ ८ ॥

विवरणटिप्पणी

पलायनमित्यत्र। न निवृत्तमिति। वचनेन जायमानमशुभं भगवदनुगमनेन प्रतिबद्धमित्यर्थः। आहत इति। तदा 'उपसर्जनं पूर्वं'मित्यनेन पूर्वप्रयोगच्छान्दसत्वान्न जात इति ज्ञेयम्। फले निमित्तमिति। निमित्तमेव, नतु जनक इत्यर्थः। तद्भगवतीति। तद्भगवद्व्यापारनिमित्तकं वधरूपं फलं भगवति प्रतिष्टे सति यवने फलितमिति हेतोर्यवनस्यापि प्रवेशमाहेत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'भगवतो योगिभिरपि दुर्ग्राह्यत्वात्तदनुधावनं तस्य दुर्मुखत्वसूचकमेव' इत्याशयेनाह—दुरापमिति ॥ ६ ॥ प्रतिपदमात्मानं हस्तप्राप्तमिव दर्शयता हरिणा स यवनेशो दूरमद्रिकन्दरं प्रति नीत इत्यन्वयः ॥ ७ ॥ 'यदुकुले जातस्य तव पलायनमनुचितम्' इत्येवं क्षिपन् वचसाभिभवन्ननुगतोऽपि यवन एनं भगवत्तं नैव प्राप। तत्र हेतुमाह—अहताशुभ इति, अक्षीणपाप इत्यर्थः। इत्यर्थः। तदासक्त्या विशुद्धचित्तस्यैव भगवत्प्राप्तिः, नान्यस्य। अयं च शत्रुभावेनापि न भगवदासक्तः, अतः सदोप एवेत्याशयः॥८॥

अन्वितार्थप्रकाशिका

हस्तेति ॥ पदे पदे प्रतिपदमात्मानं हस्तप्राप्तमिव दर्शयता हरिणा स यवनेशो दूरमद्रिकन्दरं प्रति नीतः पलायनं चेदं श्रीशिववरपालनाय ॥ ७ ॥ पलायनमिति ॥ यदुकुले जातस्य तव पलायनं न उचितमित्येवं क्षिपन् वचसाऽभिभवन् वस्तुतस्तु इदं तव पलायनं न भवति । किन्तु यदुकुले जातस्य यादवावध्यत्वरूपं महेश्वरं पालयतो विधानान्तरेण शत्रुपराभवञ्चिकीर्षतस्तवोचितं संप्रति योग्यमेवेदमिति क्षिपन् द्रुतं गन्तुं प्रेरयन् अनुगतोऽपि न हतमशुभं भगवत्स्पर्शादिलाभप्रतिबन्धकं दुरितं यस्य मुक्तिप्रतिबन्धकं तु दुरितं भगवद्दर्शनादेव नष्टम् । मल्लेभकंसयवना इत्यादिना तन्मुक्तेरुक्तत्वात् । अत एनं भगवन्तं स्प्रष्टुं न प्राप ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पद्भ्यां चलन् निरायुधोऽयमस्ति अतोऽहमपि अनेन कृष्णेन सह पद्भ्यां चलन् निरायुध एवयोत्स्यामि ॥ ५ ॥ तं कृष्णं जिघृक्षुः गृहीतुमिच्छुः पराङ्मुखं युद्धात्प्रतिमुखं ॥ ६ ॥ आत्मानं श्रीमूर्त्तिं हस्तप्राप्तं ग्राह्यतया करगतमिव पदे पदे दर्शयता हरिणा स यवनेशः दूरं अद्रिकन्दरं रैवताचलगुहां प्रतिनीतः प्रापितः ॥ ७ ॥ क्षिपतिरकुर्वन् । अहताशुभः । अक्षीणपापः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हस्तेति ॥ पदे पदे प्रतिपदं, आत्मानम्, इव, दर्शयता हरिणा भगवता, दूरं नीतः सः, यवनेशः अद्रिकन्दरं रैवताचलगुहां, प्रापित इति शेषः ॥ ७ ॥ पलायनमिति ॥ यदुकुले जातस्य तव, पलायनं, उचितं योग्यं, न भवति । इत्येवं, क्षिपन् अनुभर्त्सयन्, अनुगतः सन्नपि, यतः सः, अहताशुभः अक्षीणकर्मा, अतः एनं कृष्णं, न प्राप ॥ ८ ॥

कृष्णप्रिया

श्री नारदजी के निर्दिष्ट चिह्न इसी स्वरूप में सुस्पष्ट है यह स्वयं एकाकी है निरायुध है विना उपानह नंगे पाँव किसी दिशा की ओर चल पड़े हैं इसलिये मैं भी इसके निरायुध युद्ध करूँगा। ऐसा निर्णय करके कालयवन, बड़े समर्थ योगिजनों के लिये भी जो अगम्य है केवल कृपैक गम्य है वैसे श्रीकृष्ण भगवान के पीछे-पीछे दौड़ने लगा ॥ ५-६ ॥ चतुर शिरोमणि चतुर्भुज भगवान कृष्णचन्द्र भी जैसे उनके हाथ में आ रहा हूँ ऐसी स्थिति को दिखाते हुए लीला पुरुषोत्तम दौड़ने की लीला से श्रीहरि कालयवन को दूर सुदूर धवलपुर के समीप मुकुन्द राजा को अद्रिकन्दरा में ले गये ॥ ७ ॥ भगवान श्रीकृष्ण जी के पीछे दौड़ता कालयवन बार-बार आक्षेप करता कह रहा था कि अरे वीर पुरुष ? आप यदुवीरों के वीर कुल के जाये हो, खुद भी वीर हो आपके लिये रण संग्राम को छोड़कर कायरों की तरह भागना योग्य नहीं है। फिर भी भगवान दौड़ते ही रहे थे कारण यह था कि अभी भी उसके अशुभ निःशेष नहीं हुए थे इसलिये भगवान पा नहीं सका था ॥ ८ ॥

एवं क्षिप्तोऽपि भगवान् प्राविशद् गिरिकन्दरम् । सोऽपि प्रविष्टस्तत्रान्यं शयानं ददृशे नरम् ॥ ९ ॥
नन्वसौ दूरमानीय शेते मामिह साधुवत् । इति मत्वाच्युतं मूढस्तं पदा समताडयत् ॥ १० ॥
स उत्थाय चिरं सुप्तः शनैरुन्मील्य लोचने । दिशो विलोकयन् पार्श्वे तमद्राक्षीदवस्थितम् ॥ ११ ॥
स तावत्तस्य रुष्टस्य दृष्टिपातेन भारत । देहजेनाग्निना दग्धो भस्मसादभवत् क्षणात् ॥ १२ ॥

कर्दमक्षमा

अन्वयः—एवम्, क्षिप्तः, अपि, भगवान्, गिरिकन्दरत्, प्राविशत्, सः, अपि प्रविष्टः, त, शयानम्, अन्यम्, नरम्, ददृशेः ॥ ९ ॥ ननु, असौ, माम् , इह, दूरम्, आनीय, साधुवत्, शेते, इति, मूढः, तम्, अच्युतम्, मत्वा, पदा, समताडयत् ॥१०॥ चिरम्, सुप्तः, उत्थाय, शनैः, लोचने, उन्मील्य, दिंशः, अवलोकयन् सः, अवस्थितम्, तम्, अद्राक्षीत् ॥ ११ ॥ भारत ? रुष्टस्य, तस्य दृष्टिपातेन, तावत्, देहजेन, अग्निना, दग्धः, सः, क्षणात्, भस्मसात्, अभवत् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तं शयानमच्युतं मत्वाऽताडयदिति ॥ १०-११ ॥ तस्य क्रुद्धस्य दृष्टिपातेन संदीप्तो यः स्वदेहजोऽग्निस्तेन ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवम् 'पलायनं यदुकुले' इत्युक्तरीत्या । सोऽपि यवनोऽपि । तत्राद्रिकन्दरे । भगवान् सर्वज्ञः गिरिगुह्यान्तःशायिमुचुचुन्दस्य प्रभावं भक्तिं च जानन्नित्यर्थः । प्राविशदिति प्रविश्य मुचुकुन्दस्य शिरःप्रदेशेऽतिष्ठदिति ज्ञेयम् । तथा च हरिवंशे—"शिरस्थाने तु राजर्षेर्मुचुकुन्दस्य केशवः । संदर्शनपथं मुक्त्वा तस्थौ बुद्धिमतां वरः ॥" इति । कालयवनस्य तत्रावकाशाय प्रथमतः स्वगोपनाय चेति भावः । अन्यमेव ददृशे न तु तत्रैव स्थितं भगवन्तम् ॥९॥ असौ कृष्णः । इह कन्दरे । ननु वितर्के । अच्युतमिति ततोऽन्यत्र भगवत्प्रयाणस्य तेनाऽमननाभिप्रायेण । नन्वनुगम्यमानः सद्यः कथं सुप्यादिति विचारयोग्योऽप्यसौ दृष्टचतुर्भुजत्वादिरूपादत्यन्तविलक्षणं नरं दृष्ट्वाऽप्यच्युतं कथममन्यत तत्राह—मूढः गुहातमसो व्याप्त्या क्रोधादिना च हततत्तद्विचार इत्यर्थः ॥१०॥

स शयानो मुचुकुन्दः । उन्मील्योद्घाट्य । तं यवनम् । चिरमिति वैवस्वतमन्वन्तरादाद्यचतुर्युगे त्रेतायां जातस्य तस्य सम्राजो देवसाहाय्यात् । शनैरिति बलान्निद्राभंगेन घूर्णाव्याप्तत्वात् ॥ ११ ॥ स यवनः । तस्य मुचुकुन्दस्य । स्वदेहजो यवनदेहजः । यावदद्राक्षीत्तावदेव दर्शनसमकालता दाहस्योक्ता, क्षणादिति च भस्मसाद्भवने शीघ्रता । भारतेति महावंशजातत्वेन महावंश्यानां तादृशप्रभावे न किमप्यद्भुतं मन्तव्यम्, यथा भरतवंशजशन्तन्वादिभिः स्वपुत्रभीष्मादिभ्यः स्वेच्छामरणादिकमपि दत्तं तथा मुचुकुन्देनापि स्वनेत्राग्निना भस्मसात्कृतो यवनदेहो दग्धो देवादिवरस्तूपलक्षणमिति बादरायणेर्मतम् । अत एव स नात्र प्रस्तूयते । 'स्वपन्तं यो गुहामध्ये' इत्येतदग्रे पद्यं तु विगीतमसंलग्नश्च । श्रीपराशरवैशंपायनमते तु वरादेव तत् । तथा च विष्णुपुराणे—"प्रोक्तश्च देवैः संसुप्तं यस्त्वामुत्थापयिष्यति । देहजेनाग्निना सद्यः स तु भस्मीभविष्यति ॥" इति । हरिवंशे च देवेषु तत्प्रार्थने—"स्वपन्तं बोधयेद्यो मां तं दहेयमहं सुराः । चक्षुषा क्रोधदीप्तेन एवमाह पुनःपुनः ॥ एवमस्त्विति तं शक्र उवाच त्रिदशैः सह ।" इति । अनेन निद्राप्रार्थनमिदं यावद्भगवद्दर्शनं भविष्यति तावन्मम निद्रैव समीचीना न तु जागरणमित्यभिप्रायेण । जागरणहेतुदाहप्रार्थना च पूर्ववदमुष्य भक्तोऽपि मां न जागरयेदित्यभिप्रायेण ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भगवान् सर्वज्ञः गिरिगुहान्तशायिमुचुकुन्दस्य प्रभावं भक्तिं च जानन्नित्यर्थः । प्राविशदिति प्रविश्य मुचुकुन्दस्य शिरः प्रदेशेऽतिष्ठदिति ज्ञेयम्, तथा च श्रीहरिवंशे ।

शिरःस्थानेतु राजर्षे मुचुकुन्दस्य केशवः । सन्दर्शनपथं मुक्त्वा तस्थौ बुद्धिमतां वरः ॥ इति ।

कालवनस्य तत्रावकाशाय प्रथमतः स्वगोपनाय चेति भावः अन्यमेव ददृशे नतु तत्रैव स्थितं भगवन्तम् ॥ ९ ॥ ननु अनुगम्यमानः सद्यः कथं तथा सुप्यादिति विचारयोग्योऽप्यसौ दृष्टचतुर्भुजत्वादिरूपादत्यन्तविलक्षणरूपं नरं दृष्ट्वाऽप्यच्युतं कथममन्यत ? तत्राह—मूढः गुहातमसा व्याप्ता क्रोधादिना च हततत्तद्विचार इत्यर्थः ॥ १० ॥ चिरमिति वैवस्वतमन्वन्तराछ्चसुर्युगे त्रेतायां जातस्य तस्य साम्राज्ये देवसाहाय्यात् शनेरिति बलान्निद्राशङ्गेन घूर्णाव्याप्तत्वात् ॥ ११ ॥ यावदद्रक्षीत्तावदेवेति दाहस्य दर्शनसमकालतोक्ता क्षणादिति च भस्मसाद्भवने शीघ्रता भारतेति महावंशजातेन भवता इति महावंश्यानां तादृशप्रभावे किमप्याश्चर्यं न मन्तव्यमिति अतस्तस्येति तस्य महापुरुषस्य क्रोधदृष्ट्यग्निनैव दग्धः देवादिवरस्तूपलक्षणमिति श्रीवादरायणेर्मतम् अत एव स नात्र प्रस्तूयते "स्वपन्तं यो गुहामध्ये" इत्येतदग्रे पद्यं तु विगीतमसंलग्नं च श्रीपराशरवैशस्पायनमते तु वरादेव तत् तथा च श्रीविष्णुपुराणे—

प्रोक्तश्च देवैः संसुप्तं यस्त्वामुत्थापयिष्यति । देहजेनाग्निना सद्यः स तु भस्मीभविष्यति इति ॥

श्रीहरिवंशे च देवेषु तत्प्रार्थने—

प्रसुप्तं बोधयेद्यो मां ते दहेयमहं सुराः । चक्षुषा क्रोधदीप्तेन एवमाह पुनः पुनः ॥

एवमस्त्विति तं शक्र उवाच त्रिदशैः सह । इति अनेन स्वनिद्राप्रार्थनमिदं भगवद्दर्शनं यावदद्भविष्यति तावन्मम निद्रैव समीचीना न तु जागरणमित्यभिप्रायेण जागरणहेतुमाह प्रार्थना च पूर्ववदसुरसेनानाशनार्थमसौ भक्तोऽपि मां न जागरयेदित्यभिप्रायेण ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवान् सर्व्वज्ञो गिरिगुहान्तःशायि—श्रीमुचुकुन्दस्य प्रभावं भक्तिञ्च जानन्नित्यर्थः । प्राविशदिति प्रविश्य श्रीमुचुकुन्दस्य शिरः प्रदेशेऽतिष्ठदिति ज्ञेयम् । तथा च श्रीहरिवंशे (विष्णु० पु० ५७।५०)—'शिरः स्थाने तु राजर्षेर्मुचुकुन्दस्य केशवः । सन्दर्शनपथं मुक्त्वा तस्थौ बुद्धिमतां वरः ।' इति । अन्यमेव ददृशे, न तु तत्रैव स्थितमपि श्रीभगवन्तम् ॥ ९ ॥ ननु वितर्के, असौ श्रीवासुदेवः; साधुर्निर्द्दोषस्तद्वत्, तस्यैव निश्चिन्ततया निद्रासुखसम्भवात् । अच्युतमिति ततोऽन्यत्र श्रीभगवत्प्रयाणस्यं तेनामननाभिप्रायेण । ननु धावित्वा स्वयमनुगम्यमानोऽसौ सद्यः कथं तथा सुप्यादित्यविचार्य्य कथञ्च पूर्व्वं साक्षाद्दृष्टस्य श्रीचतुर्भुजत्वादिरूपस्यात्यन्तविलक्षणं नरं दृष्ट्वाप्यच्युततममन्यत तत्राह—मूढो गुहातमसा व्याप्तः, किंवा क्रोधादिना हततत्तद्विचार इत्यर्थः । अतः सम्यग् दृडमताज्ञयत् ॥ १० ॥ चिरमिति—बहुतराणि चतुर्युगानि ज्ञेयानि, चतुर्विंशतितमयुगेऽवतीर्णस्य श्रीरघुनाथस्य पूर्वपूर्व्वत्वात्, तथा एतद्वैवस्वत—मन्वन्तराचतुर्युगे त्रेतायां जातस्य तस्य साम्राज्ये देवसाहाय्यात्, शनैरिति बलान्निद्राभंगेन घूर्णाव्याप्तत्वात् ॥ ११ ॥ तावदिति वाक्यालङ्कारे, किंवा यावदद्राक्षीत्तावदेवेति । दाहस्य दर्शनसमकालतोक्ता, क्षणादिति च भस्मसाद्भवने शीघ्रता । एवं तस्य प्रभावभरो दर्शितः । च–कारात् महदपराधविशेषेण चेत्यर्थः । हे अनघेति निष्पापाणां महात्मनां भवादृशामीदृशः प्रभावः स्यादेवेति भावः । भारतेति पाठे महावंशजातेन भवता महावंश्वानां तादृशप्रभावे किमप्याश्चर्यं न मन्तव्यम् । अतः क्रुद्धस्येति तस्य महापुरुषस्य क्रोधदृष्ट्यग्निनैव दग्धः, न देवादिवरेणेति श्रीवादरायणेर्मतम् । अतएव

(भा० १०।५१।२१) स्वपन्तं यो गुहामध्ये इत्येतदग्रे पद्यं विगीतं ज्ञेयम्; श्रीपराशरवैशम्पायनयोर्मते तु देव-वरादेव; तथा च श्रीविष्णुपुराणे (५।२३।२२)—'प्रोक्तश्च देवैः संसुप्तं यस्त्वामुत्थापयिष्यति। देहजेनाग्निना सद्यः स तु भस्मीभविष्यति ॥' इति; श्रीहरिवंशे च देवेषु तत्प्रार्थने (विष्णु पु० ५७।४५–४६)—

'प्रसुप्तं बोधयेद्यो मां तं दहेयमहं सुराः। चक्षुषा क्रोधदीप्तेन एवमाह पुनः पुनः ॥
एवमस्त्विति तं शत्रु उवाच त्रिदशैः सह ॥' इति ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

भगवांस्त्वित्थं क्षिप्तोऽपि तूष्णीं गिरिकन्दरं प्राविशत् स तु यवनस्तत्र गिरिकन्दरे प्रविष्टस्तत्रान्यं शयानं कञ्चित्पुरुषमद्राक्षीत् ॥ ९ ॥ तं शयानं पुरुषमसौ वासुदेवो मामित्थं दूरमानीय साधुवदधुना तूष्णीं शेते नूनमसौ श्रीकृष्ण एवेति मूढस्सन्नच्युतमेव मत्वा तं पदा पादेनाताडयत् ॥ १० ॥ स ताडितः पुरुष उत्थाय चिरं सुप्तः हेतुगर्भमिदं तत्त्वात् शनैर्लोचने उन्मील्य दिशोऽवलोकयन् पार्श्वस्थितं यवनं ददर्श ॥११॥ हे भारत ! स यवनः रुष्टस्य क्रुद्धस्य तस्य पुंसः दृष्टिपातेन सन्दीप्तो यः स्वदेहजोऽग्निस्तेन तावत्तदैव क्षणाद्भस्मीबभूव ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मूढः हतविचारः ॥ १०–१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सोऽपि कालयवनोऽपि अन्यं नरं ददर्श ॥ ९–११ ॥ तस्य क्रुद्धस्य दृष्टिपातेन सन्दीप्तो यः स्वदेहजोऽग्निस्तेनेति तथैव तद्वरप्रार्थनात्तद्वरदानाच्च तथा हरिवंशे—

"प्रसुप्तं बोधयेद्यो मां तं दहेयमहं सुराः !। चक्षुषा क्रोधदीप्तेन एवमाह पुनः पुनः" ॥ इति

अत्र निद्राप्रार्थनमिदं वृद्धगर्गोक्तकृष्णदर्शनं यावद्भविष्यति तावन्निद्रैव मम सुखाय न तु जागरः तद्दर्शनसमुत्कण्ठस्य मम बहुतरचतुर्युगावच्छिन्नकालो जागरेण यापयितुमशक्यः निद्रया तु तत्त्वानपि कालः क्षणप्राय एव भविष्यतीत्यभिप्रायेण क्रोधकरणकदाहप्रार्थनं तु शक्रं भीषयितुमेवान्यथा स्ववैरिघातनार्थं पुनरपि तं शक्रो जागरयेदित्यभिप्रायेण, ततश्च तद्वरो विष्णुपुराणे यथा—

"प्रोक्तश्च देवैः संसुप्तं यस्त्वामुत्थापयिष्यति। देहजेनाग्निना सद्यः स तु भस्मीभविष्यति" ॥ इति ॥ १२ ॥

गूढार्थदीपिनी

सोऽपि यवनोऽपि। तत्र कन्दरे शयानम् ॥९॥ असौ कृष्णः ननु वितर्के ॥१०॥ स शयानो मुचुकुन्दः। तं यवनम् ॥११॥ स यवनः। तस्य मुचुकुन्दस्य ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सोऽपि यवनेन्द्रोऽपि प्रविष्टः सन् अन्यं नरं ददृशे अद्राक्षीत् ॥ ९ ॥ तं पुरुषमच्युतं श्रीकृष्णं मत्वा ॥१०–११॥ हे भारत ! स यवनेन्द्रः रुष्टस्य तस्य पुरुषस्य दृष्टिपातेन सन्दीप्तो यः स्वदेहजोग्निस्तेन क्षणाद्भस्मसादभवत् तथा हरिवंशे—

"प्रसुप्तं बोधयेद्यो मां तं दहेयमहं सुराः। चक्षुषा क्रोधदीप्तेन एवमाह पुनः पुनः" ॥ इति

वैष्णवे च देवानां वाक्यम्।

"सुषुप्तं नो वरेणाऽथ यस्त्वामुत्थापयिष्यति। देहजेनाग्निना सद्यः स तु भस्मीभविष्यति" ॥ इति ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सङ्कर्षणादिभिरित्यादिपदेन कनिष्ठानां बलतो ज्येष्ठानां कृष्णतो मन्त्रिणां ग्रहणम्। वसुदेवेत्यादिना स्ववर्यवर्णानां मन्त्रिणां च ग्रहणमिति विवेको ज्ञेयः। यद्वा सङ्कर्षणादिभिर्विहितमन्त्राबहिःपातार्थमित एहीति स्वसमीपं प्रति सम्यक्कर्षणं छोटिकावादनं पृष्टस्फालनं चेत्येतदादिभिर्वसुदेवसारणादिभिरित्यर्थः ॥ ९ ॥ निर्धारिता क्रियोत्तरकार्यं कार्यं येन सः। उषसि तत्रापि सूर्येऽनुदिते जाग्रतां सति प्रकाशेऽजाग्रतां निद्रायाः किञ्चित्तमसि च निकृतिरुपरि निकृत्यापतितव्यमिति शिक्षयितुं ततानैवं श्रीनाथो न त्वशक्ततथेति मन्तव्यम् ॥ १० ॥ चतुरङ्गिणीमङ्गचतुष्कवतीम् ॥ ११ ॥ वामेनादक्षिणेन ॥ १२ ॥ सेनया सहेत्यत्रेव पूर्वत्रापि

सम्बन्धनीयम् । सर्वेषां निद्रितत्त्वाद्वस्तुतोऽग्रे ॥ १३ ॥ पादातिभिः पदतीनां समूहः पादातं तस्य समूह इत्यण् । पादातं पत्तिसंहतिरित्यमरः । तदस्ति येषामिति नान्तः शब्दः अन्यथाऽज्यतिभ्यामितीणि पादस्य पदाज्यातिगोपहतेष्विति पदादेशे पदातिरितीदन्ततया स्यादिति भावः । सर्वे विधयश्छन्दसि विकल्प्यन्त इति निर्गलो मार्ग इति वा । नारब्धमधुना युद्धमिति विश्रब्धो विश्वस्ता । सुखं यथा तथा रमतेऽरमत ॥ १५ ॥ अर्के सूर्ये उदयाद्रिं समारोहति सति विहगेषु नीडस्थेष्वेव कुलायस्थेष्वेव बहिरबहुमहस्कत्वाद्विहायसः ॥ १६ ॥ दुर्जयमितरैः ॥ १७ ॥ अबद्धं वैराणं पल्याणं खलीनं वा येषां ते तथा । श्रेणी पङ्क्तिस्तया बद्धा हया वाजिनः कुञ्जरा अपि । अनारोपितमुपरिभागानर्पितं पञ्जरं येषां ते । रूप उपरिभाग इति धातुः । सुभद्रां रथमारोप्येत्यादिवच्चेति द्वितीयतात्पर्योक्तेः । वाहनमाहितादिति निपातितो वाहनशब्दः ॥ १८ ॥ अनादत्तान्यस्वीकृतानि प्रहरणानि यैस्ते तथाऽबद्धमूर्धजाः शिरोरुहा यैस्ते । अप्रविष्टान्यात्मनो देहान्वर्माणि येषां ते । अनारूढानि वाहनानि यैस्ते ॥ १९ ॥ अबद्धास्तुरगा येषां ते सर्वतः सर्वत्रानुद्धृता अनुच्छ्रिता ध्वजा येषां त इति वा पीतवाससः पीताम्बरस्य मगधेन्द्रस्य सेनायाः प्रदेशे तत्काले दशेयमवर्तिष्ठेति भावः ॥२०॥ त्रिदिक्षु तिस्रश्च ता दिशश्च तास्वापतितं तत्सैन्यं राजमण्डलमुत्थितं स दृष्ट्वा । मण्डलं त्रिष्वित्युक्तेः । शक्यं स दृष्ट्वा राजमण्डल इति मण्डयितुं तथाऽपि सर्वथा तेषु न पौरुषमिति द्योतयितुं मण्डलमित्युक्तिरिति तात्पर्यं ज्ञेयम् । कर्तव्यताविषये मूढं सदित्येवं विभ्रान्तम् । भावे क्तः । बभ्रामानवस्थानं समपद्यत प्रापत् ॥ २१ ॥ रणे केचिद्भटा अरीन्प्रति समापेतुरपतन् निद्रया द्रावयन्त्या समापेतुरपतन्निति वा । अभिसस्रुरभ्यसरन् ॥ २२ ॥ विभिन्नानि कलिङ्गस्य वर्मश्चैद्यश्चैद्यस्य लिङ्ग इति । विभिन्नानि वर्माणि येषां ते । अप्रविष्टात्मवर्माण इत्युक्तिस्वारस्यमेवं चेद्भविष्यति । त्वया स्थापितान्यपि तानि विभिन्नानि येषां त इति वा । क्रोधोरिक्तान्यरुणानीक्षणानि येषां ते ॥ २३ ॥ अपल्याणानखलीनान् । विमलं यशो लेभिरे प्रापुः । रणोपस्करणं तत्साधनमायुधादि ॥ २४ ॥ गहनं कान्तारं केचिदम्भस्तम्भनज्ञा वनं जलं विविशुः । विजयस्वेत्यब्रुवंश्च ॥ २५ ॥ स गोविन्दो रण उद्यमो येषां तान् रणोद्यमेन सहितानिति वा सरणे रणान्निस्सरणे उद्यमो येषामिति वा ॥ २६ ॥ मागधं मगधस्वामिकं बलमर्दयदर्दयामास ॥ २८ ॥ व्यथिता त्रस्यमाना क्षणमात्रं दिशो दश दुद्राव ॥ २९ ॥ वार्ष्णेयः सात्यकिः पञ्चयोजनं विशेषणसमासः । मागधं गतम् । सैन्यं निहत्य जयी सन्व्यावर्तत ॥ ३० ॥ मतङ्गजान् गजान् सोपस्करास्तोमराङ्कुशा येषां तान्निनाय यद्यन्मतं तत्सर्वं निनायेति नीतवान् ॥ ३१ ॥ हेमाम्बररत्नमिश्रितानि छत्राण्यनेकवालव्यजनानि पट्टेन क्षामेण सहितं च तदङ्गदं चांशुकानि सूक्ष्मवस्त्राणि । अंशुकं सूक्ष्मवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोरिति विश्वः ॥ ३२ ॥ अवरोधः शुद्धान्तोऽगणितान्पदार्थानिति शेषः । अवरोधस्तिरोधाने शुद्धान्ते राजवेश्मनीति विश्वः । कंसभिदा कृष्णेन नियोजितो रणार्जितं रणसम्पादितं यदुप्रवीरायोग्रसेनाय । एवमादिधनं न्यवेदयत् ॥ ३३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे पञ्चाशोऽध्यायः ॥ ५० ॥

॥ हरिः ॐ ॥ यो रणश्लाघी तेन माधवेन परैरपराजितोऽपि पराजित इत्यावृत्त्याऽन्वयः । तुरणेन पलायनत्वरणेन श्लाघीति वा ॥ १ ॥ विशेषकेणाह ॥ तमिति । मृतोर्वरितक्षितिपतिततिवृतं दानवेश्वरो बाणः ॥ २ ॥ वारकान्ताकदम्बैर्वेश्यासमूहैः ॥ ३ ॥ पताका येषां सन्तीति पताका इति यथायथं ध्वजछत्रादिविशेषणम् । तेन न पताका वैजयन्त्यां च सौभाग्यां वा ध्वजेऽपि च । पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियामिति विश्वामरादिशंसितलिङ्गभङ्ग इति ज्ञेयम् । माङ्गल्यैर्मङ्गल्यस्य श्वेतागुरोरिमे माङ्गल्यास्तत्परिमलैर्मल्लिकादिपरिमलैरिति वा । मङ्गल्यं मल्लिगन्धि यत् मङ्गल्यं दधिमङ्गल्योर्मङ्गली रोचनायां च प्रियङ्गुशतपुष्पयोरधः पुष्पेत्याद्यमरयुक्तोपयुक्तविश्वौ । मङ्गलातोद्यादिभिर्मङ्गलयौतकैरिति वा ॥ ४ ॥ तथायातं मित्रं जरासन्धमाकर्ण्य बाहुसहस्रवान्बाण उपतस्थे । एवमन्वयने उपाच्चेत्युक्तादकर्मकात्तिष्ठतेरात्मनेपदता सङ्गच्छत इति ज्ञेयम् ॥ ५ ॥ परस्परं दृष्ट्वा ततः परस्परं सत्कारानन्तरं ॥ ६ ॥ गोपेन तमधर्मत्वमेव व्यक्तं वक्ति ॥ रात्राविति । चौर्यमेव प्रतापः प्रभावस्तेन ॥ ७ ॥ तुरङ्गमागतम् ॥ ८ ॥ द्वन्द्वेन नियुद्धेन समे असुखं दुःखं चेति मया येषां ते तैः ॥ ९ ॥ प्रवेशयित्वा प्रवेश्य ॥ १० ॥ सत्क्रियां सम्माननम् । तत्साधनमभिधत्ते ॥ भोजनेति । भोजनमामकीनसत्कुर्वेतानित्युक्त्वा कारयामासेत्यन्वयः ॥ ११ ॥ दर्शनेन कौतुकं येन पदार्थेन स दृष्टो येन स तद् । कदाऽप्यदृष्टं दृष्टवन्तमिति यावत् । जाग्रद्दशायां कदाऽप्यदृष्टं दृष्टं दर्शनस्य स्वप्नस्य तत्सम्बन्धि कौतुकमिवाद्भुतं येनेति वा । दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिष्विति विश्वः ॥१२॥ सह नृपैरासीनमाभाष्य । सादरमित्यनुपचारतां वचनस्य ध्वनयति ॥ १३ ॥ हे जरासन्ध महामते । इदं वक्ष्यमाणं निबोध जानीहि मया मृषा न कथ्यते । एते गजा इमे चाश्वा इदं राज्यं इमाः प्रजाश्चेतीदं प्रात्यक्षिकं विश्वं त्वदधीनं त्वन्निघ्नम् । अन्यदन्तर्वस्तु धनादिकं विद्यते तदपि त्वदधीनम् ॥ १४ ॥ इत्युक्त्वा गजानां षष्टिसाहस्रम् । स्वार्थिकोऽणिति केचित् । शतमानेत्यादिनाणे । रथानां नियुतो लक्षम् ॥ १५ ॥ मनोमारुतरंहसां मनोवन्मारुतवच्च रंहो येषां ते तथा तेषां केषाञ्चिन्नावनिस्पर्शः केषाञ्चितत्स्पर्शश्चेति विशेषद्योतनाय निदर्शनद्वयमिति केचित् । मारुतं निःशब्दं मनसो रंह इव रंहो येषां तेषामिति वा शब्देऽरिसमुद्बोधः स्यादिति तथाभ्यासवतां तुरगाणां प्रयुतं दशलक्षम् ॥१६॥ मायासङ्ग्रामः कपटयुद्धानि । आत्मना धृत्या साम्यं येषां ते आत्मसाम्याः स्वस्यात्मसाम्यास्तेषां त्रिशतम् ॥ १७ ॥ असङ्ख्यातं भाण्डानि पात्राणि राज्याभरणानि वा राशिम् । भाण्डं भूषणमात्रेऽपि भाण्डं मूलवणिग्धने । नदीपात्रे तुरङ्गाणां भूषणे भाजनेऽपि

चेति विश्वः ॥ १८ ॥ मन्त्रिणौ स्वामात्यौ ॥ १९ ॥ साहाय्यार्थमित्युक्त्या नन्दनन्दनविषये कथं जेष्यत्येताविति मन्दसन्देहमङ्कूरितं श्रीशुकः पारवश्येन पराकुर्वन्स्वरसनां व्यापारयते ॥ क्वेति । सुरासुरसङ्घातसंहरणपटुर्लयलवे वराकौ विधवासुतौ । वराको विधवासुत इति वचनात् ॥ २० ॥ विष्णुशक्तिमजानन्तो भूपाला विनिशिष्णव इति मागधेन प्रचोदिताः परं रणोद्योगं भूयश्चक्रुरिति योजना ॥ २१ ॥ अनेकभूपालाश्च तुरङ्गवलं च तैरन्वितः कतिपयैर्दिनैरल्पवासरैः ॥ २२ ॥ दीर्घिका वाप्य उप समीपे वनं जलं येषां तान्युद्यानानि च तैः सालैर्वृक्षैस्तालैर्वा । सालः पादपमात्रे स्यात्प्राकारे शङ्कुकद्रुमे ताले वेति विश्वः ॥ २३ ॥ कुन्ताद्यास्तु गताः कर्षणानि क्षेपिण्यः सन्नाहभेरीराहवदुन्दुभीन् सन्नाद्य वादयित्वा ॥ २४ ॥ अनीकं पर्तिर्निर्जग्मतुर्मथुराया निर्गत्य बहिरागत्य च ॥ २७ ॥ क्षत्रियैः शत्रुसम्बन्धिभिः ॥ २८ ॥ मायायां तत्सृष्टौ कुशलौ । तदेव व्यनक्ति ॥ मायया वृष्णिभिः सहेति । बहुवचनमाद्यर्थे । वृष्ण्यादिभिः । वृष्णिभिरिति पाठः सुन्दरः ॥ २९ ॥ विज्ञानास्त्रेण निमिषान्तरेऽपास्य निराकृत्य ॥ ३० ॥ आहवलालसौ समरतृष्णायुक्तौ ॥ ३१ ॥ आभ्यां कुभाण्डकूपकर्णाभ्यां सुघोरं रणं कुरुतम् । कुरुतामिति पाठे भवन्तौ वर्तमानकाले युवां कुरुतामित्यर्थः । सम्प्रतीदानीं शतसम्मितैर्बहुत्वेन गणितैर्विश्वात्मनस्तदन्तर्यामिणस्तत्स्वामिनो वा छिन्नपुष्कराश्छिन्नानि पुष्कराणि शुण्डानि येषां ते कुन्ताश्छिन्नाः कन्धरा ग्रीवा येषां ते तथा छिन्नबन्धना इति विशीर्णास्तैः पुष्पिताः । तारकादीतच् । किंशुकाः पालाशवृक्षाः । कङ्कश्छद्मद्विजे ख्यातो लोहपृष्ठकृतान्तयोरिति विश्वः । बर्हिणो मयूरास्तत्पक्षा वासांसि येषां ते शरगणाः स्वर्णस्य पुङ्खा येषां तथाऽयोमुखेऽग्रभागे येषां ते । एकैकस्मिन्भटे दशदश तथैकैकस्मिन्नश्वे शतंशतम् ॥ ३६ ॥ रथे रथे च साहस्रं गतम् । यद्वा सहस्रपरिमाणमस्येति साहस्रं तत्सङ्घस्तदस्य परिमाषमित्यर्थे । शतमानविंशतिकसहस्रवसनादित्यण् । गजे गजे प्रतिगजम् । अयुतं दशसहस्रम् । एवं परानीके परसेनायां शरगणा अदृश्यन्त ॥ ३७ ॥ क्रोडचिह्नेन वराहध्वजेन ॥ ३८ ॥ महाकाञ्चनमयस्तालः कूबरो युगन्धरश्च यस्मिंस्तं दूरादालक्ष्य रंहसा सङ्गम्य गदी हलायुधं प्राह ॥ ३९ ॥ येन मुसलेनाहितानाहवे जेतुमिच्छसि तन्मुसलं राम आदत्स्व गृहाण त्वयि यावद्गदां न प्रहरामि तन्मध्ये तव बाह्वोर्बलं मे आशु दर्शय ॥ ४० ॥ युगक्षये प्रलयकाले सूर्यसुतो यमो दण्डमिवादाय ॥४१॥ हलायुधः सहस्रकृत्वो रिपुदर्पहारिणं मुसलं मुसलः किसलायत इत्यादेः पुल्लिङ्गोऽपि मुसलशब्दः । तूलोपलशालकमलमुसलेति लिङ्गानुशासने पुंसि चेत्युक्तेः । धूमस्याङ्कुरस्योद्गारो वमनमस्येति णिनिर्वा तम् । चिक्षेप व्यनदच्च हरिः सिंहो यथा तथा क्षुब्धे क्षुण्णे क्षणेन स्वयं जरासुतो व्यंसितो वञ्चितः कालायसी कृष्णायोविकृतां गिरिकूटेन शिखरेणोपमा यस्याः सा तां गुर्वी बिभ्रत् गुर्वीमुर्वी पदा चालयन् बलमभ्यगात् । पद्भ्यां नीतिवित्वमेव ध्वन्यते । गुर्वीमयः सारमयीमिति पर्यायतोऽनुवादः । गदां गद्यते व्यक्तं स्तुत्यत इति गदा तां गदाम् । अतो न गदातिरेको गदनीयः । अश्मकुट्टनिभान्यप्यङ्गानि द्यति खण्डयतीत्यङ्गदेति वा । अश्मानं कुट्टयतीत्यश्मकुट्टोऽयःसारस्तत्सन्निभां रामो वामेन स्वहस्तेन जगृहे । अनेनास्मत्सुन्दर्या धर्तुं शक्या त्वद्गदेत्युपजहास राम इति ध्वन्यते ॥ ४७ ॥ विसृत्य प्रक्षिप्य तूर्णं मागधमुरस्याहत्य बलिनमाश्लिष्ट जग्राह ॥ ४८ ॥ पद्भ्यां स्वचरणाभ्यां कुक्षौ तत्कण्ठं मागधकण्ठं चकार ॥ ४९ ॥ निपततोस्तयो राममागधयोर्मध्ये उपरि जरासुतस्योपरि अमितविक्रम उपचारतः ॥ ५० ॥ भूय जगृहतुः ॥ ५१ ॥ उरसा उरो वक्षसा वक्षो निकटस्थान्समीपवर्तिपादपान् तं रामं कामपालो हलायुधो जत्रुणि गलतले । सन्धीतस्यैव जत्रूणीत्यमरः । अंसे स्कन्धे भुजयोः । शङ्खे चेति पाठे शङ्खो निध्यन्तरे कम्बुललाटास्थिनखेषु चेति विश्वाल्ललाटास्थिषु वा नखेषु वेत्यर्थः । ऊराविति चेन्दुसङ्ग इत्यर्थः । जानौ जानुनि जायते । वृसनिजनिचरीति अप् । जनिवध्योश्चेति न प्रवर्तते । उणित्यनुबन्धद्वयसामर्थ्यात् । जानुः अर्धर्चादिः । अस्त्रियामिति त्रिभिः सम्बन्ध्यते । रात्रौ जानुर्दिवा भानुरित्यादेः । जठरे उदरे वक्षस्युरसि । एकैकस्थानेऽनेकशः प्रजहार ॥ ५५ ॥ कन्धरे कन्धरायां हे कन्धर इति सम्बोध्य प्रजहारेति वा मुखे तथा ललाटे चुबुके । अधस्ताच्चुबुकमित्युक्तेरोष्ठाधःप्रदेशः । स मानी । सममिति वचनादत्रानुक्तमङ्गं ततस्तत्रानुक्तमतः सङ्ग्राह्यमिति सूचयति समं युगपदिति वा । रणसंविग्ना एतद्युद्धभीताः स्वयं निवृत्तकदनोद्यमा आसन्नं समीपवर्तिनिधनं मरणं यस्य तमिति च । मागधेश्वरं मन्वानास्तन्वानाः सङ्गरमासन् । सह किञ्चित्सेनः शैनेयो गतः किल तत्र किमभूदित्यतस्तां कथां कथयति ॥ सात्यकिरिति । बाणमंत्रिणा कुभाण्डेन त्रिभिर्बाणैः समर्पितस्ताडितः ॥ ५९ ॥ नाराचान् शरविशेषान् ॥ ६० ॥ दैत्यस्य बाणस्य मन्त्रिणोऽमात्यस्य सेनायाम् । अत्राशुगैरित्यस्यशीघ्रगामिभिरित्यर्थः ॥ ६१ ॥ कुभाण्ड इत्यपि नाम भारते हरिवंशे । एवमुक्ते तु वचने कुभाण्डेन महात्मना । तथेत्याह कुभाण्डमिति निरवकाशयुक्तेः ॥६२॥ पञ्चानां विषयानाह । नाभावित्यादिना ॥ ६३ ॥ तस्य कुभाण्डस्य रणात्तं तूर्णमपोवाहापानयत् । प्रसक्तः सङ्गतः समराङ्गणात् गतम् । कुभाण्डमालोक्य तथा प्राणसंशयं च गतमालोक्य समराङ्गणात्कृतवर्माणं विसृज्यापायादपगतः । प्राणसंशयं गतमात्मानं च । इत उपर्यवस्थाने ममापीयं दुर्दशैकेति विलोक्यालोच्यापायादेष्यतोपायादिति वा । भूपतिं जरासन्धमनापृच्छ्यापृष्ट्वाऽत एव मागधेनाविसृष्टावनाज्ञप्तौ तेनैव येन पथा गतौ तेनैव प्रत्यङ्गशोणितं जग्मतू रक्तमिति शोणितं तदाख्यं पुरं च ॥ ६६ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे एकपञ्चाशोऽध्यायः ॥ १०–५१ ॥

॥ हरिः ॐ ॥ राजपुत्रा नृपसत्तमेत्याभ्यां परम्परया राजपुत्रा इति न भाव्यं भीतैस्तथाऽपि भीता इति प्रतिपक्षिबलिष्ठतामिव तवैतादृशी दशा कदाऽपि नायाता विद्वानेव विजानाति विद्वज्जनपरिश्रममिति त्वमेतन्न जानीष इति च ध्वनयति ॥ १ ॥ दानवी

बाणसम्बन्धिनी धरणीपतीन् राज्ञः श्रान्ताकृष्णं युद्ध्यन्तं च दृष्ट्वा रामस्य बलस्य बलं ववृधे ॥ २ ॥ स हलायुध ऐच्छत् मौलौ चूडायाम् । मौलिः किरीटे धम्मिल्ले कङ्कालद्रुमचूडयोरिति विश्वः ॥ ३ ॥ ततः । हे राम । भवता जरासुतो न वध्यो रणात्सुखी निवर्तस्वेति स्फुटमन्तरिक्षे घनघोषघर्घरां तद्वद्गम्भीराम् । गाम्भीर्ये नूपुरारावे घर्घरः समुदाहृत इति, घर्घरस्तु चलद्वारि वारिदध्वान इति विश्वः । घनघोषाज्जायमानो घर्घरो गलज्जलारावस्तद्वद्विद्यमानामिति वा विशदा च सा शरीरिणी च वायुसम्बन्धिनीम् । वैशद्यं चार्थप्रतिभासो यथा भवेच्छ्रुतवतां तथेति मन्तव्यम् । विशदवत्क्षीरमाधुर्यवन्मधुरा च साऽशरीरिणी च तामिति । विशदं क्षीरमाधुर्यमित्युक्तेः । वाणी शुश्रावाश्रृणोत् ॥ ४ ॥ बली हलायुधस्तद्वच आकर्ण्य श्रुत्वा विसृज्य जरासन्धं रथमास्थाय रणाङ्गणात् ब्रह्मर्षिसिद्धसङ्घैर्मागधसूतवन्दिभिष्टुतो न्यवर्तत निववृते ॥ ५ ॥ नम्रः पराजयजातलज्जया कन्धरो यस्य स युद्धाभितैर्नृपैस्समन्वितो युक्तः समनुभिर्मनुभिर्मन्त्रैर्गुप्तालोचनैः सहिता इति समनवस्तैरित इति वा । सामर्थ्यात्समनुपदार्थस्य नृपपदार्थे तादात्म्यसम्बन्धेनान्वयः । समनुभी राजभिरित इति । आगमार्थः वरस्य चेति कथालक्षणटीकायां परस्येत्येतत्सामर्थ्यादागमशब्देन सम्बध्यत इत्युक्तेः । हतावशिष्टेनेत्युक्तावन्नशेषैः किं क्रियतामित्यादिवदवशिष्टस्य बहुलताभायान्न तथेति बोधयितुमल्पे त्यजल्पदिति ज्ञेयम् ॥ ६ ॥ सपत्नान् रिपून्भूपान्कांश्चिद्विद्राव्य सुबहून्हत्वा ॥ ७ ॥ महाविद्यै बंहुज्ञैर्यैरसन्तुष्टैः सेनागमनसमयेऽन्वीयमानस्तैरेव सन्तुष्टैर्महावित्सर्वज्ञोऽन्वीयमान इति वा ॥ ८ ॥ अत एव मधुरां मनोज्ञां मधुरां तन्नाम्नीम् ॥ ९ ॥ दीपैरङ्कुरैश्च दीपाङ्कुरैदीपकलिकाभिरिति वा स्त्रीभिस्तथा प्रासादसंस्थितैर्बलिष्ठैर्वृद्धैः पुरुषैश्च पुष्पैर्लाजाञ्जलिभिर्भ्रष्टव्रीह्याञ्जलिभिः कीर्यमाणो व्यराजत ॥ १० ॥ अनुलेपनशब्दः करणे ल्युडन्त इति पुंल्लिङ्गः । उपलिप्यतेऽनेनेति गन्धादिस्तम् ॥ ११ ॥ प्रियङ्करा गतम् । माधवाभ्यां रामकृष्णाभ्याम् ॥ १२ ॥ धीमतेत्युभयविशेषणम् ॥ १३ ॥ शक्र इवेत्येकवचनेन यदि द्वौ स्यातां शक्रौ तदा समौ स्यातामिति स्वोक्तितात्पर्यं ध्वनयामासेति वा । बलान्तर्गतस्य शुक्लकेशस्य श्रीकृष्णस्य च तादात्म्यमेव चेति ज्ञेयम् ॥ १४ ॥ अक्रूरः प्रमुखे सम्मुखे येषां तैरुग्रसेनोद्धवमुखैरुग्रशेनादिभिः । उग्रायां क्रूरायां सेनायां सत्यामार्गतायां ये उद्धवोपेतं मुखास्तैरक्रूरप्रमुखैरक्रूरादिभिरिति वा । इदं द्वारत्वादक्रूरपुरस्कृतिः । नेनोऽतिरेकतो मुखमङ्ग इति ध्येयम् । सम्भाष्यालोच्येति यावत् ॥ १५ ॥ मधुरां मधुरायाः । षट्सु द्वितीयेति स्मरणात्पञ्चम्यर्थे द्वितीया ॥ १६ ॥ रामानुगतः स श्रीमान् ॥ १७ ॥ गिरौ महेन्द्रे तत्रापि वनोद्देशे वृक्षमूलनिवासिनं जटामण्डलमण्डितं कञ्चनं मुनिं ददर्श ॥ १८ ॥ प्रावृणमेकमेकं परिधानीयमिति चीरकृष्णाजिनयोर्धरतोतितम् ॥ १९ ॥ फलमूलकृत आहारो यस्य तम् । लोकदृष्ट्या फलमूलकृत आहारोऽस्मिन्कर्मणि तद्यथा भवति तथा शिष्यशतैर्वृतमिति वाऽन्वयः । फलमूलाहारवच्छिष्यकर्तृकवरणं तेन युत इत्यर्थः ॥ २० ॥ प्रमाणं चक्रतुर्वीरौ यथान्यायमिति श्लोके नम्यत्वं भार्गवस्य नन्तृता च कृष्णस्य तेनोच्चत्वं भृगुजातस्य शौरेर्नीचता साऽपि न चेतसा चिन्तयितुं योग्योत्तरत्र नमस्ते पुण्डरीकाक्षेति कृष्णस्य नम्यता नन्तृता च जामदग्न्यस्येत्युक्तेरनिर्णयस्तयोर्भेद एवादौ वासुदेवः सङ्कर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मो वराहो नरसिंहो वामनो रामो रामः कृष्णोः बुद्धः कल्किरहं शतधेत्यादिबाधितो न च तादात्म्ये नम्यत्वादिः सम्भवतात्यतः प्रमाणेन तात्पर्यमाह । सर्वेति । सर्वावतारैरभिन्नः समा शक्तिर्यस्य स तथा स्वयं हरिः पूज्यपूजनीयोच्चम् । द्वन्द्वैकवद्भावः । भावप्रधानश्च । पूज्यत्वं पूजकत्वमेतत्प्रयोजकमुच्चत्वं नोचत्वं च तानि । अत्र यथाक्रममुच्चनीचमिति यद्यपि वक्तव्यम् । कथमुक्तावप्यभेदे किमित्येवं व्यत्ययस्योक्तिः । पाठक्रमादर्थक्रमो गरीयानित्युक्तेरुक्तप्रकारेणान्वयार्थो ज्ञेयौ । अखण्डैकरसोऽपि ज्ञानधनोऽपि विष्णुर्दुरात्मनां मोहाय तत्र तत्रावतारेषु दर्शयेत् । हीति विद्धवन्मुग्धवच्चैव केशवो वेदनार्तवदित्येकस्मिन्नपि दुरात्मनां मोहाय दर्शयेदित्वाद्यर्थविशेषं सूचयति । इति षाड्गुण्योक्तेर्न नम्यनन्तृभाषोऽपीदं बाधितुमलमिति भावः । वीरौ धीरः प्रेरकरहित एकश्च वीरो विवद्गरुडवद्धीर ईर्यश्चैको वीरोऽपरश्चेति वीरौ यथान्यायमतन्द्रितौ निरालस्यौ प्रमाणं चक्रतुः । अनन्तरं कृष्णो भगवान् तं मुनिपुङ्गवमिदमुवाच ॥ २१ ॥ हे भार्गव श्रीमंस्ते नमः । वक्तारो नाननुयोक्तारं प्रति लोका नायं नायको यदूनामप्राक्षीन्नोत्तरमूचे कश्चित्किञ्च पूर्वं वञ्चनमुनिपुङ्गवमित्यरूपनामवित्त्वं चोक्तं प्रतीयतेऽतः कथं जामदग्न्यभार्गवेत्युक्तिरित्यतोऽत एव कञ्चनेत्यादिकं कञ्चन विलासं जानीहीति भाव उपसंहार एवमीरणेन ज्ञेयः स्मृतौ । आवां ते श्रवणं श्रोत्रं क्वचिद्गतौ किम् ॥ २२ ॥ मुखं चेक्षणे चोत्फुल्लानि यस्य सः ॥२३॥ हे यदुश्रेष्ठ । त आगतं स्वागतं समीचीनमागमनम् । भगवन्तमधोक्षजं यदुषूत्पन्नं त्वामहं जाने ॥२४॥ कार्याणां कारणं कर्तारं पूर्वं जगतामादिपूरुषमित्यनन्यथासिद्धनियतपूर्वभावस्य तत्प्रयोजकस्योक्तिः । तस्मै साग्रजाय महात्मने ते नमः । विश्वे च लोकाश्च तेषामेकस्वरूपभूतं कं सुखं मौक्तम् । तस्यारण मुख्यावास तद्दातरिति यावत् । विश्वस्य योग्यजगतो लोको रोचमानः को वा वैकुण्ठे लोकस्तस्यैककारणतत्सुखव्यक्तिहेताविति वा । प्राग्बृहद्भाष्यमुदाहृतमनुसन्धेयम् ॥ २५ ॥ प्राज्ञोऽप्यज्ञवत्पृच्छति ॥ किमर्थमिति । तावपि तथैवाहतुरित्याह ॥ इत्युक्ताविति ॥ २६ ॥ दुर्गहेतोरितराशक्यस्थाननिमित्तम् । इच्छाव इति पाङ्क्तः पाठः । इच्छाम इति पाठेऽस्मदोर्द्वयोश्चेति वयमिच्छाम इति बहुवचनं ज्ञेयम् ॥ २७ ॥ तद्वचनसंवलितलपितस्य तात्पर्यमेकस्मिन्पर्यवसायवन्दर्शयति ॥ एवमस्तु महाबाहाविति । तन्मूले गोमन्तदाधःप्रदेशे सृगालवासुदेवेन त्वज्ज्येष्ठेन । स युवां न सहिष्यति गतम् ॥२८॥ तं सृगालवासुदेवं सर्वज्ञं तमनुज्ञाप्य दक्षिणामुखे जग्मतुः ॥ २९ ॥ अभ्रङ्कषा महाद्रुमाः । अभ्राणि मेघान् अभ्रमम्बरं वा कषन्तीति ते द्रुमा यस्मिंस्तम् । सर्वकूलाभ्रकरीषेषु कष इति खच् । खित्यनव्ययस्येति ह्रस्वे मुम् । ददर्शतुर्ददृशतुः ॥ ३० ॥ तुङ्गतोरणं तुङ्गानि तोरणानि यस्मिंस्तत् तुङ्गतस्तुङ्गत्वतः । अरणं युद्धानास्पदमिति वा । विचित्रप्राकारहर्म्यप्रासादगोपुरम् ॥३१॥

शङ्खचक्रगदाधरः शङ्खमाध्मापयामास दध्मौ ॥ ३२ ॥ सृगालो वासुदेवेत्याख्या यस्य सः । व्यासो व्यासेन निर्दिशन्गोमायुसमतां तस्य स्पष्टयामासेति ज्ञेयम् । प्रत्ययादभ्युच्चयौ । पादातिः गतम् ॥ ३३ ॥ तदनीकं तदीयं सैन्यम् ॥ ३४ ॥ पदातिनौ पदाभ्यामन्योन्यमतः सञ्चारोऽनयोरस्तीति तौ नीरयत्वात् ॥ ३५ ॥ वेला तीरं वरुणालयं समुद्रम् । रथिनमित्यनेन सद्योद्धृसम्प्रदायानभिज्ञतां ध्वनयति ॥ ३६ ॥ वासुदेवसुतावन्योन्यं वधस्य काङ्क्षाऽनयोरस्तीति । काङ्क्षत इति णिनिर्वा ॥ ३७ ॥ मुकुटेन किरीटेनोज्ज्वलं प्रकाशमानम् ॥ ३८ ॥ सर्वतो दिशं दुद्रुदुः ॥ ३९ ॥ प्रियो जामात्रादिर्यथा तथा पूजितौ तद्गजाश्वरथानीकं च कोशादिधनसञ्चयं कोशादौ विद्यमानो यो धनसञ्चयस्तम् । तदीयैः सृगालवासुदेवसम्बन्धिभिर्भृत्याश्च तेऽपूरुषा नराश्च तैर्भृत्या उदरस्मरणार्थमपूरुषाः परम्परागतां इति यावत् ॥ ४०–४१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

हरिः ॐ ॥ सालः सर्जस्तालस्तृणराजो तमालः कालस्कन्धस्तैराढ्यं सम्पन्नं प्रियालो राजादनोऽशोको वञ्चुलः ततं सालं सर्जं सूरयस्तृणराजस्तालः कथ्यते कालस्कन्धस्तमालः स्यात् राजादनः प्रियालः स्यात् वञ्चुलोऽशोक उच्यते इत्यभिधानात् । कदम्बौ हरिप्रियो निम्बः पिचुमन्दः । पिचुमन्दस्तु निम्बः स्यात् । हिन्तालो वनक्रमुको नागो नागकेशरः पूगः क्रमुकः पुन्नागः सुरर्वाणकः ॥ प्लवगैराकम्पिता द्रुमा यस्मिंस्स तं फलभारेण नताः स्कन्धा येषां ते तैर्भारैर्नारिकेलैर्लाङ्गलिभिः । नारिकेलस्तु लाङ्गलीत्यमरः । विराजितं विभिः पक्षिभिश्च राजितमित्यपि नारीकेलैः सहितमिति तदाऽर्थः ॥ २–३ ॥ प्रस्रवणैर्निर्झरैरुपेतं युक्तम् ॥ ४ ॥ अथ प्रवर्षणनामके शृङ्गेऽत एव प्रवर्षणेति नाम ॥ ५ ॥ दिशो दश पश्यन्तौ । अत्युच्चत्वात्तदवलोकनं सम्भवतीति मन्तव्यम् ॥ ६ ॥ एतस्मिन्नेव काले तु क्षीरोदे सागरोत्तम इत्यारभ्य हृतं दानववीरेणेत्यन्तपद्येषु क्षीरसमुद्रस्थभगवत्समीपवर्तिता बलेरुच्यते । न च मुक्तैकगम्यस्य बलिसङ्गिता सम्भावनार्हा कथञ्चिदपि । कथन्तरां कर्मजदेवो देवोत्तमस्य मस्ते यः पदमदीधरतस्य स्तेयकर्म कथन्तमाम् । विद्रावितदोषस्याजमनिन्द्रमिति श्रुतेर्निद्रेस्यतो माहात्म्यवचनेन तात्पर्यं विवक्षुर्बलिर्यस्थले वर्तत न तन्मुक्तस्थानमिति वक्तुं स्थानस्थितिमादावाह ॥ बहूनीति । कृष्णस्य हरेः क्षीरसागरे स्थाननतानि स्थानसमूहा बहूनि बहवः स्थानत्वेन जातानि प्राप्तानि कृतानीति यावत् । बहूनि तत्र मुक्तगम्यानि कानिचित् । देवाश्चेद्गच्छेयुः किमित्यत आह ॥ नेति । अमुक्तैस्त्रिदशैरपि न गन्तुं शक्यानि अथान्यानि कानिचिदन्यैरमुक्तैर्गम्यानि क्वचिद्भागान्तरे कानिचित्सन्ति । तत्रामुक्तस्थाने देवा योगीन्द्रा अन्ये भक्ताश्च जनार्दन इति पाठे विष्णौ भव इत्यन्वयः । द्वितीयान्तपाठेऽर्चयन्तीत्यनेनान्वयः । गत्वा देवेशं जनार्दनमर्चयन्ति तत्क्वचिद्बलिः । आगमाद्द्वितीयमपाकरोति ॥ तस्येति । तत्र तदानीमसुरावेशात्पापबुद्धिरजायत । एतेनौपाधिकोऽयम्भावो देवस्यापि बलेरित्युक्तं भवति । तृतीयमपाकरोति ॥ तद्व्यक्तयेऽर्थमिति । तदसुरा वेशव्यक्त्यर्थमव्ययो जगन्नाथः सुप्तवच्छिश्ये । वनितानटनमाटीकत हरिरेवमिति सूचयति । सुप्तिरेव किन्न स्यादित्यत आह ॥ अव्यय इति । अविः सूर्योऽयतेऽयं चक्षुद्वारेत्यव्ययः । नित्यजागर इत्यर्थः । पापया । अर्श आद्यच् । पापमस्या अस्तीति तथा बुद्ध्या प्रभोः किरीटमहरत् । स्वशिरश्चरणकरणरूपा मुकुटापहारोऽन्याय्यः भगवानपि येन प्रागबन्धयत्तेनैव तत्पराभवः कार्य इति विनतातनयं प्रत्युङ्क्तैज्जय इत्याह ॥ तमिति । गरुडः त बलिं जित्वा तत्तदपि हृत्वाऽऽव्रजन्गोमन्तं ददृशे तत्र च दृष्ट्वा कृष्णं तस्य शिरसि किरीटममुचत् । प्रभुरियत्कार्यपर्याप्तशक्तिः ॥ तत्तश्चायं पद्यानामर्थः । सागरश्रेष्ठे क्षीरोदे देवदेवस्य निवासेऽमुक्तगम्ये ॥ ७ ॥ वैरोचन इति पितुर्गुणा इति स्मारयति रत्नचित्रम् ॥ ८ ॥ रत्नानि तद्गणानां च भणति ॥ इन्द्रानीलेति । पद्मरागाश्च महेन कान्त्याऽलीलानि सितानि मुक्ताफलानि च तैर्विराजितम् । अतो नेन्द्रनीलपुनरुक्तता ॥९॥ पुष्परागप्रबालैराढ्यं दिव्यकाञ्चनं निष्टप्ताष्टापदं तेन निर्मितं पुरपालकस्तत्पालनविनियुक्तः ॥ १० ॥ अन्तरे भूरध्रे पाताल इति यावत् । अन्तरं तु पराधीन भेदे रन्ध्र इति विश्वः ॥ ११ ॥ रत्ननिचयं बहुव्रीहिः ॥ १२ ॥ तस्य मूर्ध्नि शिरसि तं कृष्णम् ॥ १३ ॥ तदा दुग्धाब्धौ संसृतिस्थैः सुराद्यैः पूजां प्राप्तुं स्थानमेषां च योग्यम् । मुक्तस्थानादाप नारायणोऽजो बलिश्चागात्तत्र सन्द्रष्टुमीशम् । तत्रासुरावेशमनुष्य विष्णुः सन्दर्शयन्सुप्तिहीनोऽपि नित्यम् । संसुप्तवच्छिश्य उदारकर्मा संज्ञायै देवानां मुखमीक्ष्याप्रमेयः । देवाश्च तद्भावविदोऽस्तिलाश्च निमीलिताक्षाः शयनेषु शिश्यिरे । तदा बलिस्तस्य विष्णोः किरीटमादायागाज्जहसुः सर्वे देवाः । ब्रह्मादिभिः सर्वदेवैः समेते ब्रह्मादिभिर्हासमाने सुपर्णः । गत्वा पातालं युधि जित्वा बलिं च किरीटमादायाभ्ययाद्यत्र कृष्णः । तत्तस्य शीर्ष्णि प्रतिमुच्य नत्वा खगः स्तुत्वा देवदेवं रमेशम् । स्मृत आगच्छत्येव विसर्जितोऽमुना ययौ दुग्धाब्धिं यत्र नारायणोऽसौ । किरीटं तत्कृष्णमूर्ध्नि प्रविष्टं तत्तुल्यमासीत्तस्य रूपेष्वभेदात् । यदिच्छया चैव नारायणस्य शीर्ष्णेऽप्यासीत्तस्य रूपेष्वभेदादित्यादिश्रीमदुक्तेर्विशेषो ज्ञेयः । मेलकोठ्यामिदानीं तदेव देवमुकुटं ववर्तीति किं वदन्ती ॥ १३ ॥ वेदशिरोवेदितगुणकत्वेन हरिं नमति ॥ नमो नम इति । मद्वदन्यनमस्या त्वयाऽनुष्ठिता चेत्किं वैशिष्ट्यं ममेत्यत आह ॥ अनम इति । नाराय त्वद्भिन्नसङ्घाय अनमः स्वतन्त्रतया नमनाभावोऽस्त्वित्यर्थः । तुभ्यं नमः । नमो नम इत्यादरेणोक्तिर्वा । कारणेनैव पुरुषस्तस्मै नारायणायाखिलात्पुत्रादेः प्रियाय । प्रस्तुतकार्यकारित्वेन स्तौति ॥ सुरारीति । णाय सुखात्मकाय णश्च निर्वृत्तिवाचक इत्यादेः । न बहिरेव रक्षकः किन्त्वखिलकर्मणां साक्षीत्यन्तः स्थित्वा द्रष्टा नारायणाय नाम्ना नारायणाय गुणाश्रयायेति वा ॥ १४ ॥ हिरण्यगर्भत्वमुपेत्य मूल इति मूले कमलभवतादात्म्यमुष्यत इति प्रतीयते तां मानानुतो विवक्षितमर्थं

प्रदर्श्य शमयति ॥ ब्रह्मस्थ इति । स्वातन्त्र्यं तद्गतस्थं च शब्दवृत्तेर्हि कारणमितीरणाद्ब्रह्मणि तिष्ठतीति ब्रह्मस्थः ब्रह्मेति नाम यस्यासौ तथा। ब्रह्मादिस्थ इत्युक्तौ सर्वसङ्ग्रहे लघुनैव भविष्यति रुद्रस्थ इत्युक्तिः स्वतन्त्रकार्यद्वयापप्रथानुगुण्येन तत्रापि यावती कण्डूतिस्तावत्कण्डूयनमिति रुद्रग्रहणमिति मन्तव्यम् । तत्स्थतावत्स्यातन्त्र्यमप्याह ॥ तयोरपीति । स्वमेवेति तथैक इति स्वस्यान्यनियम्यताया इव जगतो नियामकान्तरसाहित्या अपि परासो ज्ञेयः । स्कन्दोक्तेर्न तादात्म्यमर्थ इत्यर्थः ॥ ततश्चायं मूलार्थः मूले जगदादौ हिरण्यगर्भ त्वं तन्नियामकत्वात्तत्स्थात्तच्छदवाच्यत्वमुपेत्याशेषं भुवनं सृजति । नारायणात्मन् स एष त्वं परिपासि अन्ते शिवात्मन् भगवन्भवान् भूयो जहार च । तस्मै नम इत्यतीतेन वोत्तरेण वाऽन्वयः ॥ १५ ॥ उपसंहरति ॥ तमिति । यदोर्वंशकरं तद्वंशविस्तारकारकं भुवनेऽवतीर्णं वृषाकपिम् । हरविष्णू वृषाकपीत्यमरः । अहं जाने । अहं हि यतस्तव भृत्यो वैनतेयः । एतेन यन्माता विनता तत्पुत्रत्वान्नाहमप्रवण इति ध्वन्यते । किमित्यव्ययं कां क्रियां करवाणि हे देव तां ब्रूहि । सेवायां कस्याञ्चिद्विनियोज्येति भावः । हे भृत्य स्तवविदानां मृत्यानां स्तवः स्तोत्रं यस्येति वा । वृषाकपिरिति षष्ठे स्पष्टम् । वृषाकपिः पुमान्कृष्णे शङ्करे जातवेदसीति भानुः ॥ १६ ॥ इत्युक्त्वा जानुनी गतम् । धरणी तत्र कृत्वादेऽग्रतो हरिर्धुरि प्राञ्जलिः संस्तस्थौ ॥ १७ ॥ तद्वैनोरसा शिरसा दृष्ट्वेत्युक्तेर्यन्नतं तत् उत्तममङ्गं शिरो दोर्भ्यां षस्पर्श । तदित्यव्ययं षष्ठ्यर्थे । तस्योत्तममङ्गमिति वा ॥ १८ ॥ भद्र मङ्गलात्मन् । इदानीं गच्छ मया यथाकामं स्मृत एहि यथाकामं गच्छेति वाऽन्वयः ॥ १९ ॥ पीतकौशेयं वासो नीलं च ययोस्तौ नीलाम्बरत्वात् औपाधिकं कदाचित्कं पीताम्बरं वा तस्येति । पीतनिर्झरवारिणीति पाठः सरलः । तत्र करवीरपुर्याम् ॥ २० ॥ महत्या सेनया तत्र सङ्गृहीतया ॥ २१ ॥ शृगालं दुरात्मतानुबन्धेन क्रोधविह्वलः ॥ २२ ॥ सप्ताहं दिनसप्तकं गतम् ॥ २३ ॥ बहुभिर्हतावशिष्टैः । धर्मज्ञावित्यनेन पश्चाद्गत्वा पलायनविलयनकर्तारो वध्या इति धर्ममर्मज्ञावित्याह ॥ २४ ॥ सप्तदशकृत्व इति पदमेकम् । मुमागमो वा । निन्दुर्वा । तत्र किञ्चिन्न न्यूनतेति सूचयति । एवं सप्तदशवारं कृत्वसुजन्तः शब्दः । तावती त्रयविंशत्यात्माक्षौहिणीबलं यस्य सः । कृष्णपालितैर्यदुभिर्मागधो राजा युयुधे । कृष्णतेजसा मुख्येन वृष्णिभिस्तद्बलमक्षिण्वताहीयत ॥ २६ ॥ त्यक्तो जीवेति मुक्तः । अष्टादशमेऽष्टादशे । मट् स्वार्थे । आगमिनि सङ्ग्रामे एष्यति तदन्तरा तन्मध्ये ॥ २७ ॥ नारदेन देवताकार्यविदा विदा च तदायुषः प्रेषितः । अत्र हरिवंशशंसिता कथाऽप्यनुसन्धेया । तथा हि तप्त्वा सुदारुणं घोरं तपः परमदुश्चरम् । गर्गः । एवमस्त्विति रुद्रो प्रददौ मुनये सुतम् । एवं गर्गस्य तनयः । यथा वदति राजेन्द्र मगधाधिपतिर्नृपः । तथाऽहं सम्प्रवक्ष्यामि श्रूयतां यवनाधिपेति । साल्वः । इत्येवं नरपतिभास्करप्रणीतं वाक्यं ते कथितं मया हितं नृपाणाम् । तत्सर्वं सह सचिवैर्विमृश्य बुद्ध्या प्रयुक्तं कुल मनुजेन्द्र आत्मनेष्टम् । यवनः । धन्योऽस्म्यनुगृहीतोऽस्मि सफलं जीवितं च मे । हुत्वाऽग्निं विधिवद्राजा कृतकौतुकमङ्गलः । प्रस्थानं कृतवान्सम्यग्जेतुकामो जनार्दनमित्यादिना नन्दकुमारमारकः । कुमारो गर्गेन वृतो हरवरतो जातश्च । तमाज्ञापयामास ससाल्वतः सहनृपो जरासुतः । तथाऽत्रापि नारदप्रेषितो वीर इतीरणाच्चाकस्मादिति कस्मादीरणं श्रीधरीय इति न जानीमः । कृष्णेन दूततो घटघटितसर्पप्रेषणं तेन च पिपीलिकापूरणेन मारणं च तस्येति चानुसन्धेया । तथा हि तत्रैव । अपयाने मतिं कृत्वा दूतं तस्मै ससर्ज ह । ततः कुम्भे महासर्पं भिन्नाञ्जनचयोपमम् । घोरमाशीविषं कृष्णं कृष्णः प्राक्षेपयत्तदा । ततस्तं मुद्रयित्वा तु स्वेन दूतेन हारयत् । निदर्शनार्थं गोविन्दः कृष्णसर्पोपमः कृष्ण इति । तत्कालयवनो बुद्ध्या त्रासनं यादवैः कृतम् । पिपीलिकाभिश्चण्डाभिः पूरयामास तं घटम् । स सर्पो बहुलैस्तीक्ष्णः सर्वतस्तैः पिपीलकैः । भक्ष्यमाणः किलाङ्गेषु भस्मीभूतोऽभवत्तदा । तं मुद्रयित्वा तु घटं तथैव यवनाधिपः । प्रेषयामास कृष्णाय बाहुल्यमुपदर्शयन् । वासुदेवस्तु तं दृष्ट्वा स्वयोगं विहिनं प्रभुरिति । आचार्यवर्या अपि । स कृष्णः पन्नगं घटे निधाय केशवोऽर्पयत् । निरायुधोऽप्यहं क्षमो निहन्तुमप्रियानिति । घटं पिपीलिकागणैः प्रपूर्य यावनोऽर्पयेत् । बहुत्वतो विशोष्य इत्यहि मृतं व्यदर्शयत् । किमत्र सत्यमित्यहं प्रदर्शयिष्य इत्यजः । उदीर्य दूतमभ्ययादिति जगदुः । काञ्चनशङ्कां तन्वते । हरेरवन्ध्यसन्धत्वे कथमिदं दन्दशूकहिंसनं तेन तदन्वथात्वमिति । तत्रैदमुत्तरं मन्वते च । कृष्णवर्णतश्चूर्णयाम्यहमेक एवानेकान् । बहिः । अन्तश्चान्तरङ्गिकभावं वापसाद्यनासज्जणेनाहेर्वलो बहिः कालयवनकालने तव बलस्य शक्त इति सूचयामास । कृष्णेऽहिर्वाऽहिशयो वेत्यविवेकेन हरवरयथार्थतां पौत्र इत्यादि यदुदेव इति प्रसङ्गसङ्गतमिदमुक्तमिति ज्ञेयम् । तिसृभिर्म्लेच्छकोटिभिः सह मधुरां रुरोध । तदहन्तामाह ॥ नृलोके स्वयमप्रतिद्वय इति । आत्मसम्मितान्वृष्णीन् श्रुत्वा तमागतं यवनं दृष्ट्वा सङ्कर्षणसहायवान्कृष्णोऽचिन्तयत् ॥ २८-२९ ॥ वृजिनं दुःखम् । व्रजिन वृजिनं दुःखमिति बृहद्भाष्योक्तेः । उभयतो भयं प्रकाशयति । यवनो निरुद्धेऽस्मान्नय श्वो वा परश्वो वा मागधो महाबलोऽन्येति । लोकानुकृतिरत्रोत्तरत्र चेति ज्ञेयम् ॥ ३० ॥ अस्यानेन यवनेन युध्यतोः सतोर्यदि जरासुत आगच्छेत् ॥ ३१ ॥ बन्धून्वधिष्यति बहुवारं पराभूतिरूपा । अथवा स्वपुरं नेष्यते खेदयितुम् । बल्यस्मत्परोक्षं बलवान् । द्विपदं दुर्गमं पदशब्दोऽयम् । द्वे पदे येषां तद्दुर्गमं दुर्गं विधास्यामः । आलस्यादभूतं विर्षमित्युक्तेरद्येत्युक्तिः ॥ ३२ ॥ तत्र दुर्गे ज्ञातीन्वसुदेवादीन्समाधाय निधाय भीतानां समाधनमपि कृत्वेत्यर्थः । यवनं घातयामहे । अनेन हन्ताऽन्योऽस्ति । अतो हतिमेतस्य कारयाम इति ध्वनयति ॥ ३३ ॥ अन्तःसमुद्रगतं यत्र त्वष्ठुर्विश्वकर्मणः सम्बन्धि शिल्पनैपुणं करव्यापारकौशलं दृश्यते । विज्ञानं च महदिति दृश्यते उद्यत इति वा । अचीक्लृपत्कारयामास ॥ ३४ ॥ रथ्या रथादिमार्गा वीथ्य उपमार्गा यथावस्तु तत्तत्पदार्थलक्षणानुसारेण यथावस्तु स्वशक्त्यनुसारेणेति वा शक्तं वस्त्विति भण्यत इत्युक्तेः । सुरेति द्रुमलतान्वयि । तद्युतान्युद्यानानि विचित्राण्युपवनानि तैरन्वितम् । उद्याने महति बिचित्रोपवनैर-

वान्तरैरन्वितमिति वा ॥ ३५ ॥ दिवस्पृग्भिस्तावदुच्चैर्धनुः सहस्रोर्ध्वभागदिवस्पृग्भिर्वा । मातूक्ता । स्फाटिकानि स्फाटिकानि स्फटिकविकृतानि च तानि चाट्टालगोपुराणि च तै राजतारकूटैलोहविशेषैः कोष्ठैरन्तर्गृहैर्हैमैः कलशैरिति शेषः ॥ ३६ ॥ रत्नकूटैस्तच्छृङ्गैर्महामरकतस्थलैर्वास्तोष्पतीनां वास्तोर्गृहक्षेत्रस्य पतयोऽधिष्ठातारः । वास्तोष्पतिगृहमेधाच्छेति निपातनादलुक्त्वं चेत्येके । वस्तुतस्त्विणः परत्वात्कस्कादिषु चेति षत्वं ज्ञेयम् । बलभीभिश्चद्रशालाभिः ॥ ३७ ॥ चतुर्वर्ण्येति स्वार्थे ष्यञ् । सुधर्मा शर्मतः सभां पारिजातं शक्तशक्तिर्मशम् । अन्यथा सत्यभामाप्रार्थनं तदुत्पाट्यानयनादिकं सङ्गतेतरस्यात् । प्राहिणोत्प्रेषयामास॥३८॥ यत्र सुधर्मायां मर्त्यैर्धर्मैर्जरादिभिर्वियुज्यते वियुक्तो भवति । क्षीरोदवासिनो देवदेवस्य विष्णोर्यत्प्रियं तत्सर्वं प्राहिणोत् ॥ ३९ ॥ निधतोयराणीरनायकः ॥ ४० ॥ निधिपतिर्धनदोऽष्टौ निधीन् । पद्मश्चैव महापद्मो मत्स्यकूर्मौ तथौदकः । नीलो मुकुन्दः शङ्खश्च निधयोऽष्टौ प्रकीर्तिता इति कीर्तनात् महापद्मपद्मयोरेकीकरणेन महापद्मश्च पद्मश्च शङ्खो मकरकच्छयौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नवैति वाऽमरोक्तानष्टौ निधीन् । श्रीमुकुन्दे निधिनिधौ सति किं मुकुन्दनिधनेति तदप्रेषणेष्टकसम्पत्तेरिति केचित् । केचिच्चैकस्मिन्न प्रहितेऽपि तत्कार्यं यथा भविष्यति तथेतरेषामप्रेषणेऽपि हरिशक्तितः सर्वकार्यं भविष्यत्येव तथाऽपि सेवार्थमेव तत्प्रेषणमिति द्योतयितुमेकत्यागेनाष्टेति स्पष्टोक्तिरिति भावं भावयन्ति । अपरे तु नाम्ना शिखण्डिव्रजमित्यादिवन्खर्वेति ह्रस्वम् । स्वल्पमित्यर्थकं भवन्न महत्त्वोपयोगि भवेदिति तत्त्याग इति वर्णयन्ति । अविक्षयान्विक्षयरहितान् । व्यये कियति सति कृतेऽप्यव्ययान् स्वाभिमतिमत्तया भगवत्कृतम् । अभिमतिमदलाभे स्वेषामाधिक्रन्मानसपीडाकारि । स्वमनःपूर्वकं कृतम् । सम्पादितमिति वा । आधिर्मनोवरूथं चेति तृतीयतात्पर्यात् ॥ ४१ ॥ यद्यस्याधिपत्यं भगवता दत्तं तत्सर्वं हरौ भूमिगतेऽर्पयामासुः । तदर्पयामासुः । तदर्पणफलं लयति । स्वसिद्धये स्वस्वरूपलाभाय स्वं ज्ञातावात्मधनयोः सिद्धिनिष्पतिलाभयोरिति विषेषो ॥ ४२ ॥ रामेण सम्यगनुमन्त्रितं येन स मथुरायाः सकाशात्तत्रयोगप्रभावेन नीत्वा प्रस्थाप्य रामं च मथुरापालने नियुज्य स्वयं पद्ममाली निरायुधः पुरद्वारान्निर्जगाम ॥ ४३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

हरिः ॐ ॥ उज्जिहानमुद्यन्तमुडुपं नक्षत्रत्रातारं श्यामं वर्णतो वयतश्च ॥ १ ॥ कौस्तुभाख्यरत्नसम्यक्सम्बद्धग्रीवम् । नवकञ्जरुणेक्षणमिति कृष्णस्य वा मुखारविन्दस्य वा विशेषणम् ॥ २ ॥ नित्यप्रमुदितं सदा सन्तुष्टं श्रीमन्तौ सुशोमनौ कपोलौ यस्य तच्छुचिस्मितं मुखारविन्दं बिभ्राणं दधन्तं स्फुरन्मकरकुण्डलमिदमपि तथा ॥ ७ ॥ श्रीवत्सलाञ्छनः पुमानयं वासुदेव एव । नारदप्रोक्तैर्लक्षणैरित्यनुवादेन नारदप्रेषित इत्यत्र लक्षणान्युक्त्वा प्रेषयामासेति वाद ऊह्यः ॥ ४ ॥ धर्मज्ञतां स्फोरयति ॥ निरायुध इत्यादिना ॥ ५ ॥ पराङ्मुखं न तु पराजयात् अनारब्धत्वाद्युद्धस्य । योगिनां दुरापमित्यनेनाविज्ञत्वं यवनस्य प्रकटयामास ॥६॥ आत्मानं स्वं पदे पदे हस्तप्राप्तमिव दर्शयता हरिणा दूरमद्रिकन्दरं नीतः । इदानीं धरिष्यामीत्याशामुत्पाद्य दूरं तं चकर्षेत्यर्थः॥७॥ यदुकुले जातस्य तव पलायनं नोचितमिति वाचा क्षिपैतिरस्कुर्वन् । अहतमनष्टमशुभं यस्य स एनं न प्राप ॥ ८ ॥ एवं वाचाः क्षिप्तो भगवान् अद्रिकन्दरमेव प्राविशत् । सोऽपि यवनोऽपि तत्र गिरिकन्दरे शयानमन्यं नरं ददृशे । वस्तुस्थितिकथनमिदम् ॥ ९ ॥ अस्मिन्नुत्पन्नकृष्णभ्रमो मनस्येवमालोच्य स्वमरणानुगुणं कार्यमकरोदित्याह ॥ नन्विति । असौ कृष्णो मां दूरमानीय साधुरिव शेत इत्यच्युतं मत्वा तं पदा समताडयत् । ताडनादिकमेतत्कारणकमित्याह ॥ मूढ इति ॥१०॥ चिरं सुप्त इति शनैर्लोचने उन्मील्य दिशो विलोकयन्पार्श्वे एव स्थितमद्राक्षीत् ॥११॥ सः कालयवनो यावत्तस्य रुष्टस्य को वा मामनागसमताडयत्पदेति कुपितस्य दृष्टिपातेन हेतुना देहजेन स्वदेहादेव जातवेदसाऽग्निना दग्धस्तावदेव क्षणाद्भस्मसादभवत् ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवान् पुनर्वराहो हिरण्याक्षवाक्यमिव सर्वसमर्थोऽपि, कार्यगौरवं मन्यमानोऽपि, न निवृत्त इत्याह एवं क्षिप्तोऽपीति । 'वधानुकल्पः स्वद्रोहे भक्तद्रोहे वधः स्मृत' इति वधानुकल्पमेव कर्तुं गिरिकन्दरं प्राविशत् । एतावानेव भगवद्व्यापारः निर्गुणो फिलि निमित्तमिति ज्ञापयितुं निरूपितः । तद्भगवषि फलितमित्याह सोऽपि प्रविष्ट इति । यदा भगवान् गिरिकन्दरं प्राविशत्, तदा सोऽपि प्रविष्टः । प्रवेशानन्तरं तस्य भ्रमो जात इत्याह तत्रान्यं शयानं नरं ददृश इति । नरत्वमेव तत्र प्रतीतम्, नत्वन्यलक्षण्यम् । यद्यपि ससामग्रीकः शेते, तथापि पूर्वमेव शयनार्थं सामग्रीं प्रेषयित्वा पश्चादागत्य शयनं कृतवानिति तस्य बुद्धिः ॥ ९ ॥ ननु भगवान् शयनार्थं चेदागतः, तदा तवागमनमनुचितमिति सुतरामतिक्रमोऽनुचित इत्याशङ्क्य, तस्य भ्रान्तस्याभिप्रायमाह नन्वसाविति । स्वयमागच्छतु नाम, कथं नोक्तवान् शयनार्थं गच्छामीति, युद्धं वा न करिष्यामीति । यो हि यमनुधावति, तस्यानिषेधे 'अप्रतिषिद्धमनुमतं भवती'ति न्यायेन दूरे गत्वा युद्धं करिष्यतीत्यभिप्रायो भवति । निकटे ससहायो बलवान् भवतीति । तस्मादेवं भ्रमं जनयित्वा एतावद्दूरमानीय, युद्धमप्यकृत्वा, साधुवत् शेते । यो हि वञ्चयति, स साधुः । असाधोरनिद्राणस्योत्थापनं न दोषायेति दुर्बुद्धिः शयानं भगवन्तं मत्वा पदा समताडयत् । पादयोर्व्यथा जनितेति, महांश्चातिक्रमो भवत्विति । शयानोद्बोधनं पादताडनमतिक्रमार्थमच्युतबुद्धिश्चेति त्रयो दोषाः । ननु महानयं महतश्चोपदेशं प्राप्य कथमेवं दुर्बुद्धिर्जात इति चेत्,

तत्राह मूढ इति । स्वभावतो मूढः । अच्युत इति तद्बुद्ध्या ताडितत्वान्महतोऽपि पादप्रहारे न राज्ञः कश्चिदपकारो जात इति सूचितम् ॥ १० ॥ ततो यज्जातं तदाह स उत्थायेति । पादप्रहारेण चिरं सुप्तोप्युत्थाय सर्वा दिशो विलोकयन् पार्श्वे तं कालयवनमद्राक्षीत् । स नु प्रथमतः तत्प्रतिकलां दिशं दृष्टवान्, ततः क्रमेण दृष्टिं प्रसारयन् द्वितीयपार्श्वे अवस्थितमुत्थितं पश्चाद्ददृशे ॥११॥ ततः कोऽयमिति प्रश्नात्पूर्वमेव दर्शनमात्रेणैव स भस्मसाज्जात इत्याह स तावत्तस्य रुष्टस्येति । निरपराधस्ताडित इति तस्य क्रोधः । अतो रुष्टस्य तस्य दृष्टिपातेन निमित्तेन कालयवनदेहस्थित एवाग्निः काष्ठस्थितो वह्निर्वह्निस्पर्शेनेव प्रादुर्भूतः । ततो देहजेनैवाग्निना दग्धः सन् क्षणमात्रेणैव भस्मसादभवत् । बहिःस्थितोऽग्निः दवानल इवाल्पमेव दहेत्, पलायनं वा कुर्यात् । अतः स्थितोग्निरिति सर्वव्यापारं दूरीकृत्य भस्मसादेव कृतवान् ॥ १२ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । एवं तेन क्षिप्तोपि भगवान् गिरिकंदरं पर्वतगुहां नीतः सोऽपि यवनः प्रविष्टस्तत्र स्थाने शयानम् अन्यं नरं ददर्श ॥ ९ ॥ मां दूरमानीयासौ इह साधुवत् शेते ननु निश्चितम् इत्येवमच्युतं कृष्णं तं मत्वा मूढो यवनः पदा पादेनाऽहन् ॥ १० ॥ चिरं बहुकालेन सुप्तः स पुरुष उत्थाय शनैर्लोचने नेत्रे उन्मील्य दिशोऽवलोकमानः पार्श्वे समीपेऽवस्थितं तं यवनमद्राक्षीत् सेक्षत ॥११॥ रुष्टस्य क्रुद्धस्य तस्य सुप्तोत्थितस्य पुंसो दृष्टिपातेनोद्भूतेन देहजेनाग्निना तावत् साकल्येन स यवनः क्षणात् तत्कालं भस्मसादभवत् भस्मीभूतोऽभवत् हे भारत ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भगवांस्तु एवं क्षिप्तोऽपि तेन मुचुकुन्दं प्रबोधयितुं मुचुकुन्ददृष्ट्यैवैनं भस्मीकर्तुं च तूष्णीमेव गिरिकन्दरं प्राविशत् । स यवनोऽपि तत्र गिरिकन्दरे प्रविष्टः सन्नन्यं शयानं कञ्चिन्नरमद्राक्षीत् ॥ ९ ॥ ननु अवधारणे । असौ वासुदेव एव मां दूरमानीय इह गुहायां साधुवत् शेते इति तं सुप्तं नरं अच्युतं कृष्णं मत्वा स मूढः पदा पादेन समताडयदित्यन्वयः ॥ १० ॥ स चिरं सुप्तताडितः पुरुष उत्थाय शनैर्लोचने उन्मील्य सर्वा दिशो विलोकयन् स्वपार्श्वे स्थितं तं कालयवनमद्राक्षीत् इत्यन्वयः ॥ ११ ॥ हे भारत ! स यवनः रुष्टस्य निद्राभङ्गात् क्रुद्धस्य तस्य पुंसस्तावद्दृष्टिपातेन सन्दीप्तो यस्तद्देहजोऽग्निस्तेन दग्धः संस्तत्क्षणादेव भस्मसात् अभवत् ॥ १२ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ एवं क्षिप्तोऽपि भगवात् मुचुकुन्ददृष्ट्या तं भस्मीकर्तुं तूष्णीमेव गिरिकन्दरं प्राविशत् । प्रविश्य च मुचुकुन्दशिरःप्रदेशेऽतिष्ठदिति हरिवंशे । स यवनोऽपि तत्र गिरिकन्दरे प्रविष्टः सन्नन्यं शयानं कञ्चिन्नरं ददृशे । तद्भर्थः ॥ ९ ॥ नन्विति ॥ नन्ववधारणे । असौ वासुदेव एव मां दूरमानीयेह गुहायां साधुवत् शेते इति तं सुप्तं नरमच्युतं कृष्णं मत्वा स मूढः पदा पादेन समताडयत् ॥ १० ॥ स इति ॥ स चिरं सुप्तस्ताडितः पुरुष उत्थाय शनैर्लोचने चोन्मील्य सर्वा दिशो विलोकयन् स्वपार्श्वेऽवस्थितं तं कालयवनमद्राक्षीत् ॥ ११ ॥ स इति ॥ हे भारत ! स यवनः रुष्टस्य निद्राभङ्गात् क्रुद्धस्य तस्य पुंसस्तावद्दृष्टिपातेन सन्दीप्तो यस्तद्देहजोऽग्निस्तेन दग्धः संस्तत्क्षणादेव भस्मसादभवत् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स यवनोऽपि ददृशे ददर्श ॥९॥ मां दूरमानीय साधुवत् शेते इति तं मुचुकुंदसंज्ञं नरं हरिं मत्वा ॥ १० ॥ स मुचुकुंदाभिधः पुरुषः तं यवनं ॥११॥ रुष्टस्य क्रुद्धस्य मुचुकुंदनाम्नो नरस्य दृष्टिपातेन स यवनः सद्यः स्वस्य देहजेनाग्निनादग्धः सन् ॥१२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ भगवांस्तु, एवं इत्थं, तेन क्षिप्तः सन्नपि, तूष्णीं गिरिकन्दरं रैवतगिरिगुहां, प्राविशत् । स यवनोऽपि, तत्र प्रविष्टः सन्, शयानं अन्यं कंचित्, नरं पुरुषं, ददृशे अद्राक्षीत् ॥ ९ ॥ नन्विति ॥ असौ वासुदेवः, मां इत्थं इह दूरम्, आनीय, साधुवत् अधुना तूष्णीं, शेते नूनम् । इति कृतविचारः मूढः यवनः, तं शयानं पुरुषम्, अच्युतं कृष्णं मत्वा, पदा पादेन समताडयत् ॥ १० ॥ सः इति ॥ स तत्ताडितः पुरुषः, उत्थाय चिरं सुप्तः, हेतुगर्भमिदम् । तत्त्वात् शनैः लोचने उन्मील्य, दिशः विलोकयन् सन्, पार्श्वे अवस्थितं, तं यवनं, अद्राक्षीद्ददर्श ॥ ११ ॥ स इति ॥ हे भारत, सः यवनः, रुष्टस्य क्रुद्धस्य, तस्य पुंसः, तावत्तत्क्षणजेन, दृष्टिपातेन देहजेन अग्निना, तद्दृष्टिपातसंदीप्ततद्देहजवह्निनेत्यर्थः । दग्धः सन्, क्षणात् भस्मसात्, अभवत् ॥ १२ ॥

कृष्णप्रिया

कालयवन आक्षेप करता ही रहा और श्रीकृष्ण प्रभु उस अद्रि कन्दरा में प्रविष्ट हो ही गये । कालयवन भी भगवान के पीछे गुफा में घुसा । यवनने उस कन्दरा में सोते हुए किसी एक अन्य मनुष्य को देखा ॥ ९ ॥ सोये हुए मनुष्य को देखकर

ऐसा सोचा कि 'देखो तो सही यह' मुझे इस रीति से यहाँ तक खींच लाया और स्वयं अनजान बनकर सीधे मनुष्य के समान सो रहा है। ऐसा सोचकर उस मूढ ने–जड़मति ने कसकर उसको–भगवान् कृष्ण को एक लात लगाई ॥ १० ॥ सुचिर समय से सोया हुआ यह पुरुष पाँव की ठोकर लगने से जाग गया और धीरे-धीरे अपनी आँख खोली। वह चारों ओर देखने लगा, मुझे किसने जगाया? क्यूं जगाया? ऐसा सोचते ही खड़ा हुआ कालयवन को देखा ॥ ११ ॥ हे भरतकुलदीपक राजन्! इस प्रकार ठोकर लगाकर जगाये हुए और नींद भंग हो जाने से रुष्ट हुए मुचुकुन्द राजा की दृष्टि से उत्पन्न हुई उनके देह की अग्नि से क्षणमात्र में भस्मसात् हो गया ॥ १२ ॥

[1]राजोवाच

को नाम स पुमान्? ब्रह्मन्! कस्य किंवीर्य? एव च। कस्माद् गुहां [2]गतः शिश्ये? किन्तेजो? [3]यवनार्दनः ॥१३॥

श्रीशुक उवाच

स इक्ष्वाकुकुले जातो मान्धातृतनयो महान्। मुचुकुन्द इति ख्यातो ब्रह्मण्यः सत्यसङ्गरः ॥१४॥
स याचितः सुरगणैरिन्द्राद्यैरात्मरक्षणे। असुरेभ्यः परित्रस्तैस्तद्रक्षां सोऽकरोच्चिरम् ॥१५॥
लब्ध्वा गुहं ते स्वःपालं मुचुकुन्दमथाब्रुवन्। राजन् विरमतां कृच्छ्राद् भवान् नः परिपालनात् ॥१६॥

कर्वमक्षमा

अन्वयः—राजोवाच—हे ब्रह्मन्! यवनार्दनः, सः, पुमान्, कः, नाम? कस्य? च, किम्वीर्यः एव? कस्माद्, गुहाम्, गतः, शिष्ये? किन्तेजः? ॥१३॥ श्रीशुक उवाच—सः, इक्ष्वाकुकुले, जातः, मान्धातृतनयः, महान्, ब्रह्मण्यः, सत्यसङ्गरः, मुचुकुन्दः, इति, ख्यातः ॥ १४ ॥ असुरेभ्यः, परित्रस्तैः, इन्द्राद्यैः, सुरगणैः, आत्मरक्षणे, याचितः सः चिरम्, तद्रक्षाम्, अकरोत् ॥ १५ ॥ अथ ते, गुहम्, स्वःपालम्, लब्ध्वा, मुचुकुन्दम्, अब्रुवन्, राजन्, नः, परिपालनात्, कृच्छान्, भवान् विरमताम् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यवनमर्दयति हिनस्तीति तथा स कस्य वंश्यः? किंवीर्यः? कीदृक्प्रभाववान्? किंतेजः? कस्य वीर्यम्? पुत्र इत्यर्थः। शिश्ये अशयिष्ट ॥१३॥ सत्यः संगरो युद्धं प्रतिज्ञा वा यस्य सः ॥१४–१५॥ गुहं कार्तिकेयम्। स्वःपालं स्वर्गपालकं सेनान्यम् ॥१६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सोऽद्रिकन्दरशायी। नामेति प्रसिद्धम्। वंश्यो वंशोद्भवः। किं वीर्यं यस्य स तथा। कस्य तेजः किंतेजः? इत्यर्थ इति–तेजःशब्दोदितवीर्यपदेन पुत्रो लक्ष्यते, सूत्रशाटिकान्यायेनेति भावः। 'तेजो वीर्येऽनले सूर्ये चन्द्रशंपोडुषु ग्रहे। प्रतापदीप्तिपुत्रेषु' इति नाममालोक्तेः पुत्रवाचको वा तेजःशब्द इति। को नाम? किन्नामेत्यर्थः। यद्वा–नाम प्राकाश्ये कः केन जात्यादिना प्रसिद्धः किंनाम? किंजातिरित्यर्थः ॥ १३ ॥ सोऽद्रिकन्दरशायी। 'संगरो युधि चापत्तौ प्रतिज्ञायां विषे ध्वनौ। शमीफले क्रियाकारे तथा मित्रकलत्रयोः।' इति निरुक्तिः। महान् महाभागवतः ॥ १४ ॥ स मुचुकुन्दः। तद्रक्षां सुरगणरक्षाम्। आत्मरक्षणे निमित्ते। चिरं कतिचिच्चतुर्युगानि ॥१५॥ ते सुरगणाः। अथ सेनानीप्राप्त्युत्तरम्। कृच्छ्रात् कृष्टसाध्यात्। अथ कात्स्न्र्येन। कृच्छ्राद् दुःखैकरूपात् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

को नाम? किं नामेत्यर्थः। यद्वा, नाम प्रकाश्ये कः केन जात्यादिना प्रसिद्धः? किंजातिः? किं नाम? चेत्यर्थः ॥१३॥ महान् महाभागवतः ॥ १४ ॥ आत्मरक्षणे निमित्ते याचितः चिरं कतिचिच्चतुर्युगाणि ॥१५॥ अथ कार्त्स्न्र्ये कृच्छ्रात् दुःखैकरूपात् ॥१६॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

को नाम? किं नामेत्यर्थः; यद्वा कः किंजातिः? किंनामा? इत्यस्यैवार्थद्वयञ्चेत्यर्थः; नाम प्राकाश्ये, केन जात्यादिना प्रसिद्धः? इत्यर्थः। एव समुच्चये, कस्माद्वा? अन्यत्तैर्व्याख्यातम्। यद्वा, कस्य पुत्रः? किंतेजः? मूर्त्तं तेज एव किम्? ॥ १३ ॥ युवनाश्वपुत्रो मान्धाता इक्ष्वाकोरूनविंशकः, तस्य तनयो महान् भगवद्भक्त्यादिगुणैर्लोकेषु श्रेष्ठ इत्यर्थः। (भा० ९।६।३८)

---

१. परीक्षिदु–प्रा. पा.। २. मुहायतः–विज. : ३. किंतेजा–वीर. ; किं तेजो यवनार्दन–विज.।

'पुरुकुत्समन्वन्तरीयं मुचुकुन्दञ्च योगिनम्' इति नवमस्कन्धे मान्धातृपुत्रोत्पत्तिप्रसंगे तस्य भक्तियोगवत्त्वमुक्तमेव ॥१४॥ आत्मरक्षणे निमित्ते याचितः, आद्यशब्देन वरुणादयः, तेषां रक्षाम्, चिरं कानिचिच्चतुर्युगानि ॥ १५ ॥ अथ गुहकर्तृकरक्षणादनन्तरम्, किंवा, गुहलब्धे, हे राजन्निति भवानिति च परमादरात्, कृच्छ्राद् दुःखरूपात् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्र शयानस्य पुरुषस्य कुलनामवीर्यशयनकारणादिबुभुत्सया पृच्छति राजा—को नामेति ? हे ब्रह्मन् ! स यवनार्दनो यवनस्य हन्ता शयानः को वा नाम ? किं तस्य नामधेयमित्यर्थः । कस्य सम्बन्धी ? कस्य कुले जातः ? किं कीदृशं वीर्यं ? यस्य सः कस्मात्कारणाद् गुहां प्राप्तः शेते स्म ? किं कीदृशं तेजो यस्य स तथाभूतः ? ॥१३॥ तत्रोत्तरमाह मुनिः—स इति नवभिः । ब्रह्मणि ब्रह्मकुले साधुः ब्रह्मण्यः । सत्यो धर्म्यः सङ्गरो युद्धं यस्य सः ॥ १४ ॥ स इति । स च मुचुकुन्दः असुरेभ्यो भीतैरिन्द्राद्यैर्देवैरात्मनो रक्षणे निमित्ते सहायत्वेन याचितश्चिरं तेषां रक्षामकरोत् ॥ १५ ॥ तदा ते देवाः गुहं कार्तिकेयं स्वःपालं स्वर्गपालकं सेनान्यं लब्ध्वा ऽथ मुचकुन्दमब्रुवन् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कस्य पुत्र इति शेषः । यवनमर्दितवान् हिंसितवान् ॥ १३–१४ ॥ तेषां सुराणां रक्षाम् ॥१५॥ स्वःपालं स्वर्गरक्षाकरं । परिपालनाज्जातात्कृच्छ्रात् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कस्य वंश्यः ? किम्वीर्यः ? किं प्रभावः ? किं तेजः ? कस्य वीर्यं कस्य पुत्रः ? इत्यर्थः ॥१३–१५॥ गुहं कार्त्तिकेयम् ॥१६–१७॥

गूढार्थदीपिनी

नामेति प्रसिद्धे । कस्य वंश्यः ? किंवीर्यः किंप्रभावः ? किंतेजः कस्य पुत्रः ? 'तेजो वीर्ये' इति नाममाला ॥ १३ ॥ सङ्गरो युद्धं प्रतिज्ञा वा ॥ १४ ॥ स मुचुकुन्दः । रक्षणे निमित्ते ॥ १५ ॥ गुहं कार्तिकेयम् । स्वःपालं स्वर्गपालं सेनापतिम् । नः परिपालनाद् यत् कृच्छ्रं कष्टं तस्मात् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे ब्रह्मन् । स यवनमर्दयति हिनस्तीति तथा यवनहन्ता कस्य वंश्यः ? किंवीर्यः ? किंप्रभावः ? किंतेजः ? कस्य वीर्यं ? कस्यापत्यमित्यर्थः ॥१३॥ सत्यो धर्म्यः सङ्गरो युद्धं यस्य सः ॥१४–१५॥ गुहं कार्तिकेयं स्वःपालं स्वर्गपालं सेनान्यं लब्ध्वा ॥१६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

राजा श्रुततदेतद्व्यापारस्तत्स्वरूपादिकं पृच्छति मुनिमित्याह ॥ राजेति । स पुमान् लोचनानलनिर्मूलितकालयवनो नामैव प्रसिद्धः कः किन्नामा ? जातिर्वा । कस्य पुत्रः ? किं वीर्यः ? किं कीदृग्वीर्यं यस्य सः । गुहां गतः कस्माच्छिश्ये ? किं तेजो यवनार्दन इति पाठे यवनमर्दयतीति तत्तेजः किं ? किं रूपमित्यर्थः । किन्तेजो यवनार्दनः ? इति पाठे यवनार्दनो यो दृष्टिर्वा तज्जो जातवेदाः किं तेजः ? इत्युद्देश्यविधेयभावेनान्वयः । यद्वा पदमेकम् । यवनमर्दयतीति यवनार्दनं यस्य स पुमान्क इत्यन्वयः ॥१३॥ शुकः परीक्षित्प्रश्नान्परिहरति ॥ स इति इक्ष्वाकुकुले जातः क्षत्रियजातीयः । कस्येत्युत्तरयति ॥ मान्धातृतनय इति । किन्नामेति परिहरति ॥ मुचकुन्द इति ख्यात इति । ब्रह्मण्यो ब्रह्मणि हरौ ब्राह्मणजातौ वा साधुर्ब्रह्मण्यस्तत्पूजापरः । उत्तरकथोपयोगिमाहात्म्यङ्कुरयति ॥ सत्यसङ्गर इति । प्रामाणिकयुद्धः सत्यप्रतिज्ञो वा । अथ सप्रतिज्ञाजिसंविदेत्यमरः ॥ १५ ॥ कस्माच्छिश्ये ? किन्तेजः ? इत्यादिकं वक्तुं तदुपोद्घातं रचयति ॥ स इति । इन्द्राद्यैः सुरगणैरात्मरक्षणेऽसुरेभ्यः परित्रस्तैर्याचितः । एतादृशं किमिति मतिमन्तो देवाः समुद्रे प्लवन्गातो निर्भाग्यकरमदीधर्रदिति नीत्याऽदीधरन्नित्यतो न तथाऽयमित्यप्याह ॥ येति । या इह कार्यपर्यवसायकसम्पदाचितः सम्यक्सम्बद्ध इति देवोमिति । चिरं तद्रक्षामकरोत ॥ १५ ॥ ते देवाः स्वस्वगृहान्प्रति व्यूहादीन् लब्ध्वा । गुहं स्वःपालं लब्ध्वेति पाठे गुहं षण्मुखं स्वःपालं स्वर्गरक्षक लब्ध्वा प्राप्येत्यर्थः । एवञ्च स्वःपालं मुचुकुन्दं चाथाब्रुवन् । हे राजन्नः परिपालनादेतज्जातकृच्छ्राद्भवानितः परं विरमतात् । व्याङ्परिभ्यो रम इति परस्मैपदता । विरमतादिति पाठे विपूर्वकत्वे परस्मैपदताभाव आर्षः । विश्रमं यातु ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

प्रकृते भगवता यवनोऽयं यथाकथञ्चिन्मारित इति विवक्षितत्वाद्विशेषं न कथयिष्यतीत्याशङ्क्य सावधानं च शृणोतीति ख्यापयितुं राजा तं पृच्छति को नामेति ? प्रसिद्ध्याऽज्ञानं वारयति । 'अन्य'मिति पुल्लिङ्गात् पुंस्त्वं ज्ञातमेव । अन्ये पञ्चार्था ज्ञातव्याः !

नामसम्बन्धरूपाणि निमित्तं शयने तथा। दाहकत्वं दृष्टिमात्राद् ब्रह्मविज्ज्ञास्यते परः ॥ १ ॥

कस्य सम्बन्धी ? किं वीर्यं यस्य, अन्यथा एकाकी सिंहादिसम्भाविते देशे कथं शयीत ? कस्माद्वा हेतोः उत्तमस्थानेषु विद्यमानेषु गुहां गतः शेते ? किं वा तस्य तेजः ? किं तेजो यस्येति किंतेजाः ? यतो यवनार्दनो जातः ? अग्निसूर्यादीनामपि नैवंविधं तेजः सम्भवति। यवनपदेन तस्यापि महत्त्वमुक्तम्। विशेषतो वक्तव्यैवैषा कथेति ॥ १३ ॥ एतदर्थमेव भगवानागत इति तस्य विशेषमाह **स इक्ष्वाकुकुल इति सप्तभिः**। भगवत्त्वमग्रे तस्य भविष्यतीति भगवत्कथैवैषेति ज्ञापयितुं च; अन्यथा भगवद्व्यतिरिक्तकथा न श्रोतव्येति श्रोतॄणां विरक्तिः स्यात्। इक्ष्वाकोः कुले जातः। मनोः पुत्राणां मध्ये मुख्य इक्ष्वाकुः। मान्धाता चायोनिजः, केवलपुंसवनजलाज्जातः। अप्राकृतबीजजोऽपि स्वरूपतोऽपि महान्। कुलोत्कर्षः पितुरुत्कर्षः स्वरूपोत्कर्षश्चोक्तः। तस्य नामोत्कर्षमाह **मुचुकुन्द** इति। **ख्यात** इति। तस्य वैदिकं सहजं च धर्ममाह **ब्रह्मण्यः सत्यसङ्गर** इति। ब्राह्मणानां हितश्चेत्सर्वोऽपि वैदिको धर्मः सेत्स्यति। सत्यः सङ्गरो युद्धं यस्य ॥ १४ ॥ एवं षड्गुणयुक्त इति इन्द्राद्यैरात्मरक्षणे स याचितः। अनेन भगवत्तुल्यतैव निरूपिता। स्वरूपतो लोकतः कार्यतश्च गुणानामुत्कर्षो निरूपितः। **संसारा**द्भीताः महापुरुषमिव प्रार्थितवन्तो भविष्यन्तीत्याशङ्क्याह-**असुरेभ्यः परित्रस्तै**रिति। ये हि देवानपि मारयन्ति, तानपि मारयित्वा, रक्षां कृतवानित्याह **तद्रक्षा**मिति। दैत्यानां पलायने पुनरागमनशङ्का भवतीति चिरकालं रक्षामकरोत्। यावदिन्द्रादयोऽतिपुष्टाः। क्षत्रियस्यायमेव धर्मः यज्ञादेरप्यधिक उक्तः ॥ १५ ॥ सा च रक्षा पर्यवसानपरा जातेति रक्षाया अवधित्वं निरूपयन्नाह **लब्ध्वा गुह**मिति। कार्तिकेयश्चेदुत्पन्नः, पश्चात्तारकादयो हता इति तस्य सेनापतित्वे जाते पश्चाद्विरामं प्रार्थयामासुः। अनेनास्य रयिन्यायेन स्वार्थाभावः सूचितः। **अथ** स्वस्थाः सन्तः भिन्नप्रक्रमेण राजानमब्रुवन्। पूर्वं भीताः, इदानीं सन्तुष्टा इति भिन्नः प्रक्रमः। तेषां वाक्यान्याह **राजन्निति**। क्रियमाणमादौ व्यावर्तयन्ति। नोऽस्माकं परिपालनरूपात् कृच्छ्राद् विरमतामिति। यद्यपि स्वर्गे स्थितः, तथापि भोगाभावात् सर्वदा युद्धकरणाच्च क्लेश एव ॥ १६ ॥

श्रीसुबोधिनीसारः

राजोक्तिः। हे ब्रह्मन् स पुमान् को नाम ? कस्य वंश्यः ? किंवीर्यः ? कीदृक् तेजस्वी ? किं तेजः ? कस्य पुत्रः ? यवनमर्दयति हिनस्तीति तथा कस्माद्धेतोर्गुहांगतः=कंदरां प्राप्तः शिश्येऽशयिष्ट ॥१३॥ शुकोक्तिः। इक्ष्वाकोः कुले जातः मांधातुस्तनयः पुत्रो महान् प्रसिद्धः स मुचुकुन्द इति उक्तः ब्रह्मणे साधुः सत्यः संगरो युद्धं प्रतिज्ञा वा यस्य सः ॥ १४ ॥ परैभ्यः शत्रुभ्यो दैत्येभ्यः परित्रस्तैर्भीतैरिन्द्राद्यैर्देवगणै रात्मपालनार्थं याचितः स प्रार्थितः। तेषां रक्षां स मुचुकुन्दः चिरं बहुकालमकरोत् ॥ १५ ॥ स्वःपालं स्वर्गरक्षकं गुहं स्वामिकार्तिकेयं लब्ध्वा प्राप्य ते देवा मुचुकुन्दमवदन्। हे राजन् ! नोऽस्माकं परिपालनात्कृच्छ्रात् कष्टात् भवान् विरमतां निवर्त्तताम् ॥ १६ ॥

विवरणटिप्पणी

को नामेत्यत्र। ब्रह्मविद् ज्ञास्यते इति। पर उत्कृष्टो ब्रह्मविदिदं सर्वं ज्ञास्यते। अतो ब्रह्मन्निति सम्बोधनमुक्तमिति शेषः।

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

तद्वीर्येण विस्मितो राजा पृच्छति—को नामेति। 'तव तु न किञ्चिदज्ञातम्' इति सूचयन् सम्बोधयति—ब्रह्मन्निति। स पुमान् को नाम ? किं तस्य नामधेयमित्यर्थः। कस्य कुले जातः ? किंवीर्यः ? कस्य पुत्रः ? किंतेजः कीदृक्प्रभाववान् ?। 'अद्भुतश्चास्य प्रभावः, दृष्टिमात्रेणैव यवनं भस्मीकृतवान्' इत्याह—यवनार्दन इति। स एवंप्रभावोऽपि कस्मात् कारणाद् गुहां प्रविष्टः शिश्ये अशयिष्ट ? ॥ १३ ॥ एवं पृष्टः उत्तरमाह—स इति। गुणैर्महान्, ब्रह्मण्यः ब्राह्मणभक्तः, सत्यः धर्म्यः सङ्गरो युद्धं यस्य सः ॥ १४ ॥ तथाशयनप्रसङ्गमाह—स इति। स मुचुकुन्दः असुरेभ्यो भीतैरिन्द्राद्यैः देवैरात्मसंरक्षणे निमित्ते सहायत्वेन याचितः संस्तेषां चिरं रक्षामकरोत् ॥ १५ ॥ अथ ते देवाः गुहं कार्तिकेयं स्वःपालं स्वर्गपालं सेनान्यं लब्ध्वा मुचुकुन्दमब्रुवन्। तदुक्तिमेवाह—राजन्निति सार्द्धैश्चतुर्भिः। हे राजन् ! नोऽस्माकं परिपालनात्मकात् कष्टात् भवान् विरमतां विरामं करोतु ॥ १६ ॥

अन्वितार्थप्रकाशिका

को नामेति। हे ब्रह्मन् ! यवनार्दनः यवनहिंसकः स पुमान् कः किंजातीयः ? नाम च तस्य किं ? कस्य कुले जातः ? किंवीर्यः ? कस्य पुत्रः ? तस्य किं कीदृक् तेजः प्रभावः ? कस्मात् कारणात् गुहां गतः प्रविष्टः शिश्ये अशयिष्ट? ॥१३॥ स इति। स इक्ष्वाकुकुले जातः मान्धातृतनयः गुणैर्महान् नाम्ना मुचुकुन्द इति ख्यातः ब्रह्मण्यः ब्राह्मणभक्तः सत्यः धर्म्यः सङ्गरो युद्धं प्रतिज्ञा वा यस्य तादृश आसीत् ॥ १४ ॥ स इति। सः मुचुकुन्दः असुरेभ्यः परित्रस्तैः सुरगणैरिन्द्राद्यैः देवैरात्मरक्षणे निमित्ते सहायत्वेन याचितः सन् चिरं तेषां रक्षामकरोत् ॥ १५ ॥ लब्ध्वेति। अथ ते देवाः गुहं कार्तिकेयं स्वःपालं स्वर्गपालं सेनान्यं लब्ध्वा मुचुकुन्दमब्रुवन्। हे राजन् ! नोऽस्माकं परिपालनात्मकात् कृच्छ्रात् कष्टाद् भवान् विरमतां विरमतु। तद्भावः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

को नाम किंसंज्ञः ? इत्यर्थः । कस्य वंशजोस्ति ? किंवीर्यः ? कस्यवीर्यं यस्य सः किंवीर्यः ? कस्य सुतः ? इत्यर्थः । किंतेजः ? कीदृक्तेजः प्रभावो यस्य सः । नपुंसकत्वमार्षं । कुतः यतो यवनमर्द्दयति हंतीति तथाभूतः ॥ १३ ॥ सत्यः संगरः संग्रामः प्रतिज्ञा वा यस्य सः ॥ १४ ॥ चिरं कतिचिच्चतुर्युगानि ॥ १५ ॥ स्वःपालं स्वर्गरक्षकं गुहं स्वामिकुमारं लब्ध्वा ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्र शयानपुरुषस्य कुलनामवीर्यशयनकारणानि बुभुत्सया पृच्छति राजा । को नामेति । हे ब्रह्मन्, यवनार्द्दनः यवनस्य हन्ता, सः शयानः पुमान्, को नाम ? को वा ? तस्य नामधेयं किमित्यर्थः । कस्य, कस्य सम्बन्धी ? कस्य कुले जातश्चेत्यर्थः । किं कीदृशं वीर्यं यस्य सः किंवीर्यः ? कीदृक्प्रभाववानित्यर्थः । किंतेजः, ? कस्य वीर्यं ? कस्य पुत्रः इत्यर्थः । गुहां गतः सन् एव, कस्माद्धेतोः, शिश्ये च ? ॥ १३ ॥ तत्रोत्तरमाह मुनिः स इति नवभिः । स इति । ब्रह्मणि ब्रह्मकुले साधुर्ब्रह्मण्यः, सत्यो धर्म्यः संगरो युद्धं यस्य सः, स पुमान्, मुचुकुन्दः इति ख्यातः, मुचुकुन्द इति नाम्ना प्रसिद्ध इत्यर्थः । इक्ष्वाकुकुले जातः । मांधातृतनयः मांधातुर्नृपस्य सुत इत्यर्थः । अत एव, महान् ॥ १४ ॥ स इति । स एवंभूतोऽयं नृपः, असुरेभ्यः परित्रस्तैः भीतैः, इन्द्राद्यैः सुरगणैः, आत्मरक्षणे स्वरक्षणे निमित्ते, याचितः । सहायत्वेनेति शेषः । अभूत् । ततः, स मुचुकुन्दो नृपः, चिरं बहुकालपर्यन्तं तद्रक्षां देवानां परित्राणकरोत् । इति द्वयोरेकसम्बन्धः ॥ १५ ॥ लब्ध्वेति । ततः ते देवाः, गुहं कार्त्तिकेयं, स्वःपालं स्वर्गपालकं सेनान्यमित्यर्थः । लब्ध्वा, अथानन्तरं, मुचुकुन्दब्रुवन् । हे राजन्, नोऽस्माकं परिपालनात् परिपालनात्मकात्, कृच्छ्राच्छ्रमात्, भवान् विरमतां विरामं प्राप्नोतु ॥ १६ ॥

कृष्णप्रिया

महाराजा ने पूछा भगवन् ! जिसके केवल दृष्टिपात से कालयवन भस्मसात् हो गया वह पुरुष कौन था ? किस वंश का था ? उसमें कैसी शक्ति थी ? एवं किसका पुत्र था ? और कृपा करके यह भी बताईए कि वह अद्रिकन्दरा में जाकर क्यों सो रहा था ? ॥ १३ ॥ श्रीशुकाचार्य महाराज कहते हैं—राजन् परीक्षित् ! वे श्रीइक्ष्वाकुवंश के ख्यात नाम महाराजा मान्धाता के पुत्र राजा मुचुकुन्द थे । वे मुचुकुन्द ब्रह्मण्यदेव-ब्राह्मणों के परमभक्त सत्यप्रतिज्ञ, समर विजेता यशस्वी थे ॥ १४ ॥ असुरों के त्रास से संत्रस्त इन्द्रादि देवों ने अपने संरक्षण के लिये महाराजा मुचुकुन्द जी से प्रार्थना की तब कृपालु राजा ने चिरकाल पर्यन्त देवों की देवलोकों की रक्षा की ॥ १५ ॥ राजन् दीर्घकाल के बाद देववरों को भगवान् स्वामि कार्तिकेय जी प्राप्त हो गये तब उनको अपने संरक्षक बनाये और देवों ने श्रीमुचुकुन्द राजाजी को निवेदन किया कि महाराज ? आपने बहुत परिश्रम लेकर चिरकाल पर्यन्त हमारी रक्षा की अब आप विश्राम कीजिये ॥ १६ ॥

नरलोकं[1] परित्यज्य राज्यं [2]निहतकण्टकम् । अस्मान् पालयतो वीर कामास्ते सर्व उज्झिताः ॥ १७ ॥
सुता महिष्यो भवतो ज्ञातयोऽमात्यमन्त्रिणः । प्रजाश्च तुल्यकालीना[3] नाधुना सन्ति कालिताः ॥ १८ ॥
कालो बलीयान् बलिनां भगवानीश्वरोऽव्ययः । प्रजाः कालयते क्रीडन् पशुपालो यथा पशून् ॥ १९ ॥
वरं [4]वरय भद्रं ते ऋते कैवल्य[5]मात्मनः । एक एवेश्वरस्तस्य भगवान् विष्णुरव्ययः ॥ २० ॥

कर्दमक्षमा

अन्वयः—वीर ! हतकण्टकम्, राज्यम्, च, नरलोकम्, अस्मान्, पालयता, ते, सर्वे, कामाः, उज्झिताः ॥ १७ ॥ भवतः सुताः, महिष्यः, ज्ञातयः, अमात्यमन्त्रिणः, च, तुल्यकालीनाः, च, प्रजाः, कालिताः, अधुना. न, सन्ति ॥ १८ ॥ राजन् ! कालः, बलिनाम्, बलीयान्, भगवान्, ईश्वरः, अव्ययः, पशुपालः, यथा, पशून्, तथा, क्रीडन्, (कालः) प्रजाः, कालयते ॥ १९ ॥ राजन् ! आत्मनः, कैवल्यम्, ऋते, वरम्, वरय, ते, भद्रम्, भगवान्, अव्ययः, विष्णुः, एक, एव, तस्य, ईश्वरः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उज्झितास्त्यक्ता गता इत्यर्थः ॥ १७ ॥ किं च सुता इति । तुल्यकालीयास्त्वत्समानकालीनाः । कालिता विचालिता ॥ १८ ॥ मत्प्रजाः कोऽन्यः कालयेदिति चेदत आहुः । काल इति । कालयते इतस्ततश्चालयति ॥ १९ ॥ तस्य कैवल्यस्य ॥ २०–२१ ॥

---

[1] लोके–श्रीधर. वंशी. विश्व. शुक. सु. ; लोकं–वीर. विज. । [2] निहत–श्रीधर. वंशी. जीव. विज. विश्व. । [3] कालीना–विज. ; कालीया–श्रीधर. वंशी. जीव. वीर. विश्व. शुक. ; तुल्यकलिना–श्रीधर. टि. । [4] वृणीष्व–श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।, [5] मात्मनः–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति-त्यक्तगतवस्तुनोर्वियुक्तत्वेन समानार्थकत्वात्त्यक्तगतपदे पर्यायै ॥ १७ ॥ अन्यदाह-किञ्चेति । अमात्याः समीपवर्तिनः । कालेनेति शेषः । विचालिता लोकान्तरं नीताः । यद्वा-कालो मृत्युर्जातो येषां ते तारकादित्वादितच् । अमात्याः पार्षदा मन्त्रिणश्च ॥ १८ ॥ बलगर्वितः प्राह-मत्प्रजा इति । कः कालः-भगवानिति । तमपि युद्धेन जेष्यामीति चेदाह-ईश्वर इति । अहमपि तादृश इति चेदाह-अव्यय इति । स्वरूपतोऽवयवतो गुणतश्च नाशरहित इत्यर्थः । भगवानिति श्रीनारायणशक्तित्वेन तदभेदात् । अत एवेश्वरो नियन्ता । न व्येतीत्यव्ययः अनाद्यंतप्रवाहः । कालयतेऽन्यत्र नयति । ननु किमर्थं तत्राह-क्रीडन्, तस्य तादृश्येव क्रीडेत्यर्थः । इति तस्य बलीयस्त्वातिशयो दर्शितः । पशुपाल इति तेषु तस्य स्वाच्छन्द्ये दृष्टान्तः ॥ १९ ॥ कैवल्यं मोक्षम् । ऋते विना । मुक्तिः कैवल्यनिर्वाण-' इत्यमरः । एको विष्णुरेवेति विशेष्यसम्बद्धान्ययोगव्यवच्छेदार्थकैवकारेण पार्थ एव धनुर्धर इतिवत्पार्थादन्यत्र धनुर्धरत्वस्येव विष्णोरन्यत्र कैवल्यप्रदत्वस्य योगो व्यवच्छिद्यत इति । 'आरोग्यं भास्करादिच्छेन्मोक्षमिच्छेज्जनार्दनात्' इति, भवपाशाच्च मोक्षकः । 'विष्णुरेव परं ब्रह्म' इति च स्मृतेः, 'कृष्णं विना नैव सृतिं तरन्ति' इति श्रीधरोक्तेश्च । यानि च-'या मुक्तिहेतुरविचिंत्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्वसारैः । मोक्षार्थिभिः-' इत्यादीन्यन्य देवताभजनस्य मोक्षबोधकवाक्यानि तान्यपि विष्णुभक्तिं द्वारीकृत्यैवेति ज्ञेयं हरिवंशीयघण्टाकर्णाख्यानतः, अन्यथा स कथं शिवेन विष्णुपार्श्वे प्रेषितः, प्रसिद्धं चैतद्धरिवंशे । नन्वत्रैवकारस्यैकशब्देन सम्बन्धो न तु विष्णुशब्देनेति चेदत्राह-'पाठक्रमादर्थक्रमो बलीयान्' इति 'अग्निहोत्रं जुहोति, यवागूः पचति' इतिवत्, 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादिवद्वेत्यलं प्रपंचेन । भद्रं ते इति सामान्यतस्तावत्तव मंगलं भूयात् । विशेषस्तु वरं वृणीष्वेत्यर्थः । कैवल्यं संसारनिवृत्तिपूर्वकं परमपदप्राप्तिम् । विष्णुरेवैक ईश्वरः प्रदानसमर्थः । तत्र हेतुः-भगवान् सर्वशक्तिसम्पन्नः । असंख्येभ्यस्तदादिदानेप्यव्ययो न त्वस्मदादिवदल्पशक्तियुक्तः । तपआदिव्ययेन सव्ययो वा ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कामाः विषयाः राज्यं चेति पाठे राज्यानीति क्वचित् पाठः ॥१७॥ अमात्याः पार्षदाः मन्त्रिणस्तद्विशेषाश्च तुल्यकालीना इति क्वचित् ॥ १८ ॥ भगवानिति श्रीनारायणशक्तित्वेन तदभेदात् अत एवेश्वरः नियन्ता । न व्येतीत्यव्ययः अनाद्यनन्तप्रवाहः कालयते अन्यत्र नयति । ननु किमर्थम् ? तत्राह-क्रीडन् तादृश्येव तस्य क्रीडेत्यर्थः । इति तस्य बलीयस्त्वातिशयो दर्शितः । पशुपाल इति तेषु तस्य स्वाच्छन्द्ये दृष्टान्तः ॥ १९ ॥ भद्रं तं सामान्यतस्तावन्मङ्गलं तव भूयात् विशेषतस्तु वरं वृणीष्वेत्यर्थः । कैवल्यं संसारनिवृत्तिपूर्वकं परमपदप्राप्तिं विष्णुरेवैक ईश्वरः प्रदानसमर्थः; तत्र हेतुः भगवान् सर्वशक्तियुक्तः असङ्ख्येभ्यस्तदादिदानेप्यव्ययः नत्वस्मदादिवदल्पशक्तिः तप आदिव्ययेन सव्ययो वा ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कामा विषयोपभोगाः । हे वीरेति—सर्व्वसामर्थ्ययुक्तस्य तवैतद्युक्तमेवेति भावः । अतएव स्नेहविशेषेण त इत्युक्तिः एवमग्रेऽप्यूह्यम् । ते त्वयेति वा ॥ १७ ॥ अमात्य-मन्त्रिण इत्यत्र करोद्ग्रहणमन्त्रप्रदानादिना भेदः कल्प्यः, अधुना न सन्तीत्यत्र हेतुः—कालिता देहान्तरं प्रापिता इत्यर्थः, यद्वा, संहृताः ॥ १८ ॥ बलिनां सर्व्वेषां मध्ये बलीयस्त्वे हेतुर्भगवान् श्रीनारायण इत्यंशांशिनोरभेदाभिप्रायेण, अतएवेश्वरः सर्व्वशक्तिमान्, न व्येतीत्यव्ययश्च अनन्तत्वात् । कालयते अन्यत्र नयति । ननु तत् किमर्थम् ? तत्राह—क्रीडन् क्रीडितुमिति । तादृश्येव तस्य क्रीडेत्यर्थः, यद्वा, न च तस्य तत्र कोऽपि श्रमोऽस्तीति बलीयस्त्वमेव दर्शयति—क्रीडन् लीलयैवेत्यर्थः । क्रीडया पशुपालो यथा पशून् समाहरति, तद्वत्; पशुपाल इति तेषु तस्य स्वामित्वेन स्वाच्छन्द्यमात्रमभिप्रेतम् ॥ १९ ॥ भद्रं तेऽस्त्विति परमसन्तोषात्; यद्वा, सदा मंगलमेव, तव तथाप्यद्य अधुना नोऽस्मान् वरमभीष्टं वृणीष्व; यद्वा, भद्रमुत्तमं ते वरं त्वत्सम्मतं वरं वृणीष्व, कैवल्यं मोक्षं श्रीकृष्णपादाब्जैकान्तित्वं वा विना, भगवान् सर्व्वैश्वर्य्ययुक्तो विष्णुरेवैक ईश्वरः प्रदानसमर्थः स्वामी वा, कैवल्यस्य तदधीनत्वात्, यत आत्मदानेनापि न व्येतीत्यव्ययः; विष्णुरिति बहिरन्तर्व्यापकतया बाह्यान्तरभावादि-सम्पादनशक्त्या कैवल्यप्रदानसामर्थ्याभिप्रायेण ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह—राजन्निति, सार्द्धैश्चतुर्भिः । हे राजन् ! नोऽस्माकं परिपालनात्मकात् कृच्छ्राच्छ्रमाद्भवान् विरमतां विरामं प्राप्नोतु । हे वीर ! शत्रुरहितं राज्यं नरलोकं च त्यक्त्वा केवलमस्मान्पालयतस्ते कर्त्तरि शेषे षष्ठी । त्वया सर्वे कामा भोगा उज्झितास्त्यक्ताः ॥ १७ ॥ किञ्च, तव सुतादयः त्वत्तुल्यकालीनाः प्रजाश्च कालिताः कालवशीकृताः अधुना न सन्ति, किन्तु कालवशङ्गता मृता इति यावत् ॥ १८ ॥ कोऽसौ मत्तो बलीयान् कालो नामेति शङ्कायामाब्रह्मस्तम्बपर्यन्तकृत्स्नजगतः कालवश्यतां बलीयस्त्वं च वक्तुं कालो नाम नेश्वरात्पृथग्भूतः किन्तु कालशरीरक ईश्वर एव कलयतीत्याहुः—काल इति । कालः कालशरीरकः

अव्ययः कालकृतनाशादिविकाररहित ईश्वरः सर्वनियन्ता भगवान् स्वयं क्रीडन् प्रजाः कालयते वशीकरोति, यथा पशुपालः पशून् वशीकरोति तद्वत् ॥ १९ ॥ वरमिति । अतस्त्वम् अद्य नोऽस्मान्प्रति वरमभिमतं वरय तर्हि मुक्तिं प्रयच्छतेत्यत्राहुः—ऋते कैवल्यमिति । कैवल्यं प्रकृतिसम्बन्धराहित्यं मुक्तिम् इति यावत् ततोऽन्यं वरं वरयेत्यर्थः कैवल्यस्यावरणीयत्वे हेतुं प्राह—एक एवेति । तस्य कैवल्यस्येश्वरः अधिपतिर्दातेति यावत् भगवान् विष्णुरेक एव अतो न वयं कैवल्यं दातुं प्रभव इति भावः ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उज्झितास्त्यक्ताः ॥ १७ ॥ तुल्यकालीनास्तत्समानकालजाताः कालिताः कालेन विनाशिता ॥१८॥ कालयते उभयपदी । काल कः ? इति तत्राह—भगवानिति । अव्यय स्वरूपतोऽवयवतो गुणतोपि नाशरहितः ॥ १९–२६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

काल इति भगवान् नारायणशक्तित्वेन तदभेदात् कैवल्यम् । संसारनिवृत्तिपूर्वकपरपदप्राप्तिः ॥ १९–२७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कालिताश्चालिताः ॥ १८ ॥ केन कालिता इत्यत आहुः—काल इति ॥ १९ ॥ तस्य कैवल्यस्य दातेत्यर्थः ॥ २०–२२ ॥

गूढार्थदीपिनी

उज्झिताः त्यक्ताः ॥१७॥ अमात्याः समीपवर्तिनः । कालिता मारिताः कालेनेति शेषः ॥१८॥ कालयते चालयति ॥१९॥ नोऽस्माकं सकाशाद् वरमिति योज्यम् । ईश्वरो दाता ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उज्झिताः त्यक्ता गता इत्यर्थः ॥ १७ ॥ तव सुतादयः तुल्यकालीनाः त्वत्समानकालीना न सन्ति; यतः कालिताः विचालिताः कालेन नष्टा इत्यर्थः ॥ १८ ॥ कालः प्रजाः कालयते इतस्ततश्चालयति । ननु, जडस्यैतत्कथं सङ्गच्छते ? इत्यत आह—भगवानिति । शक्तिशक्तिमतोरभेदनिर्देशः कालशक्त्या भगवानेव सर्वाः प्रजा इतस्तस्तश्चालयतीत्यर्थः ॥१९॥ तस्य कैवल्यस्य दाता भगवान् विष्णुरेव हरिवंशेऽपि ‘मुक्तिः प्रदाता सर्वेषां विष्णुरेव न संशयः’ इति ॥ २०–२१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

निहतकण्टकं राज्यं परित्यज्य नरलोकं च परित्यज्यास्मान्पालयतस्तव सर्वे कामा उज्झितास्त्यक्ताः ॥१७॥ कामांस्तानेव विशदयन्ति ॥ सुता इति । महिष्यो भार्याः; ज्ञातयो बान्धवाः; अमात्याश्च ते मन्त्रिण आलोचनपराश्च । सामान्यविशेषभाव इत्यन्ये । तुल्यकालीनाः समसमयवर्तिन्यः प्रजाश्चाधुना न सन्ति कालिताः संहृताः ॥ १८ ॥ बलिनां मध्ये कालो बलीयान् । ईयसुन्निर्धारणषष्ठीलब्धाऽतिबलतोपपादकः । पुरुतमं पुरूणामित्यृग्भाष्यटीकोक्तप्रकारेण स्वार्थे वेयसुन् । बलिनामित्यस्येश्वर इत्यनेनान्वयो वा । क्रीडन्स्वयमव्यय इति क्रीडेयर्मिति । प्रजाः कालयते । णिचश्चेत्यात्मनेपदम् । यथा पशुपालः स्वावसरे तान्भक्षयति तथेति । अनेन कालः कालनकर्तेव न पालयितेति निरस्तम् । पलानां मांसानामयं तत्कामुकः । योग्यतया पश्वित्यस्य सम्बन्धे पशुमांसापेक्षावान्पशून्यथेति वा । पलमेव पालं वा । पलं च माषमांसयोरिति विश्वः । पशूनां पालं यस्यापेक्षणीयर्मिति सः । पशवश्चाजाद्याः । पशुपालो यथा पशून्न कालयते न तथाऽयमिति व्यतिरेक इति केऽपि । कालयत इत्यनेन तस्मै नम इत्यपि सूचयति ॥ १९ ॥ हे राजन्वरं वृणीष्व वरय । ते भद्रमस्तु । यर्हि देयो दयातो वरो हन्त तर्हि दिशतु मुक्तिमिति न वदेति मुखं बध्नन्ति ॥ ऋत इति । आत्मान इति षष्ठ्यन्तं सत्स्वस्येत्यर्थकं द्वितीयाबहुवचनं सदस्मान्वरयेत्यर्थकं चेति ज्ञेयम् । कैवल्यमपवर्गमृते । ज्ञानसूर्यमृते नान्यस्य स्वातन्त्र्यं तद्वितरण इतीरयन्ति । तस्य कैवल्यस्यैक एव विष्णुर्भगवानव्यय ईश्वरः समर्थः । न समर्थास्तद्दाने वयमिति भावः ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

न केवलं देहक्लेशः अस्मत्परिपालने, किन्तु सर्वस्वमपि तव नष्टमित्याहुः नरलोकं परित्यज्येति द्वाभ्याम् । भोगो भोगसाधनानि च गतानीति । जन्मभूमिः सहजा च सर्वेषां सुखदा । अतो नरलोकपरित्यागोऽपि दुःखहेतुर्भवति । हतकण्टकं च राज्यमिति । शूरत्वात् अज्येष्ठत्वेऽपि एतदधीनमेव राज्यमित्यस्मिन्नेव भोगः प्रतिष्ठितः । एवं सर्वथाऽनिषिद्धं भोगं परित्यज्य अस्मानेव पालयतः ते सर्व एव कामा उज्झिताः त्वया सर्वेऽपि कामास्त्यक्ताः । तत्र हेतुः वीरेति । वीररसप्रधानः नान्यं कामं सुखत्वेन मन्यत इति । एतत्कीर्तनं महानुपकारः त्वयास्मासु कृत इति ज्ञापनार्थम् । दैहिका अपि निवृत्ता इत्याह सुता महिष्य इति । दिवसस्य स्वर्गे वर्षात्मकत्वात् तस्य कालाज्ञानम्, यथा ब्रह्मसभायां गतस्य रैवतस्य । अतो ज्ञापयन्ति–महिष्यः स्त्रियः, ज्ञातयो भ्रात्रादयः, अमात्याः सेवकप्रभवः, मन्त्रिणश्च । एते राज्यसंबन्धिन उभये तुल्यकालीनाः । प्रजा मित्राणि । अधुना ते तत्र

न सन्ति, यतः कालिताः कालेन भक्षिताः। अनेन तत्र गन्तव्यमिति शङ्का निवर्तिता ॥ १७–१८ ॥ तर्हि भवद्भिः कथं तेषां रक्षा न कृता, देवा ह्यायुषः प्रभवो भवन्तीत्याशङ्कयाह कालो बलीयानिति। बलिनां वाय्वासन्यगुणानां मध्ये। ततोऽपि बलीयान्। तत्र हेतुर्भगवानिति। ननु धर्मे क्रियमाणे अक्लिष्टकर्मा भगवान् कथमस्मदीयान् भक्षितवानित्याशङ्कयाह ईश्वर इति। नहीश्वरे नियमोऽस्ति। तर्हि भगवान् भक्तस्य कथमेवं कृतवानित्याशङ्कयाह अव्यय इति। अक्षरात्मा सः। न तु पुरुषोत्तमात्मा। तेन न तस्य भक्तपक्षपातः। पक्षपातेऽपि अव्ययमेव पदं दास्यतीति पुत्रादीन् दूरीकृतवान्। तस्यायमेव स्वभाव इत्याह। क्रीडन्नपि प्रजाः कालयत इति। स हि यतस्ततः विक्षिप्तान् स्वस्मिंश्चानयति, स्वगृहे रोधयति। तस्मिन् दोषबुद्धिर्भविष्यतीति दृष्टान्तमाहुः पशुपालो यथा पशूनिति। बहिःस्थिताः पशवोऽपि व्याघ्रादिभिर्हन्यन्त इति; तथा कालोऽपि बहुकालं बहिस्थिताः उत्पथा भविष्यन्तीति बहिर्न स्थापयति। अतः अशक्यप्रतिकारात्ते गताः ॥ १९ ॥ तस्य मनःसन्तोषार्थं वरं वरयेत्याहुः। ननु कालश्चेन्मामपि ग्रहीष्यति, तदा किं वरेणेत्याशङ्क्य अप्रार्थितमपि कालाग्रासं तुभ्यं दास्याम इति सूचयन्त आहुः भद्रं त इति। ते भद्रमेव, न कालग्रासोऽनिच्छत इत्यर्थः। तर्हि कालजयानन्तरं मोक्षो दीयतामित्याशङ्कयाहुः ऋते कैवल्यमिति। वयं हि संघातस्वामिनो देवास्तत्त्वांशाः। अतोऽस्माकं नात्मन्यधिकारः। कैवल्यं चात्मनः, देहादेस्तु कैवल्यमपुरुषार्थत्वादप्रार्थ्यम्। यद्यप्याधिदैविकाश्चेत्सर्वे निवृत्ता भवेयुः, तदा केवलता सिध्यतीति, कैवल्यमपि देवाधीनमेव, प्राणिनां दुःखनिवृत्तिरभिप्रेता, न परमानन्दप्राप्तिः, 'आत्मलाभान्न परं विद्यते, इत्यादिश्रुतिभिश्च सिद्धत्वाच्चात्मनः प्राप्ताप्राप्तविवेकेन स्मृतिन्यायेन कैवल्यमपि देवाधीनं भवति; तथापि भगवदाज्ञया प्रवृत्तिस्वभावा एवैते, प्रवृत्तावेव यथाभिलषितं दातुं समर्थाः। न तु स्वतो निवृत्तौ। तथा सतीश्वरस्यापराधो भवेत्। भगवदानन्दो वा रूढ्या कैवल्यम् आनन्दाभिव्यक्तिर्वा। अतः कैवल्यव्यतिरिक्तं प्रार्थनीयम्। आत्मपदाच्चात्महितातिरिक्तं च प्रार्थनीयमिति सूचितम्। तर्हि कैवल्यसिद्धिः कथमित्याशङ्क्य तत्प्रभुं निर्दिशन्ति एक एवेति। तस्यात्मकैवल्यस्य एक एव प्रभुः। सर्वं सर्वेभ्यो दत्वा आत्मार्थं तत्स्थापितवानिति। यतो भगवान्, स्वतःसिद्धान्यैश्वर्यादीनीति। ननु तमसः परस्तात्पुरुषोत्तमो विद्यमानः अनधिकारित्वात् कथमात्मार्थे तत्स्थापितवान्। तथा सति कस्यापि मोक्षो न स्यादित्याशङ्कयाह विष्णुरिति। स एवात्र मोक्षं दातुं विष्णुरिति प्रसिद्धः। ततो विष्णोर्भगवत्त्वमधिकाररूपत्वं भगवत्त्वं चेति द्वयमुक्तम्। तेन कालातिक्रमोऽपि भवतीति सूचयितुमाहुः अव्यय इति। स व्ययरहितः। अनेन तस्य निरपेक्षतापि सूचिता। अनेन पालनाधिकारेऽपि निवृत्तिमपि कारयिष्यतीति बोधितम्। तेन देवानां कैवल्यादाने तस्य च कैवल्यदाने हेतुरप्युक्तः। अनुक्तमप्यत्रापेक्षितमर्थादुक्तं ज्ञातव्यम् ॥ २० ॥

श्रीसुबोधिनीसारः

मर्त्यलोके निहताः कंटकास्तत्तुल्याः शत्रवो यस्मिन् तत् राज्यं परित्यज्यास्मान् पालयतः ते तव सर्वे कामा भोगा उज्झिता गताः। षष्ठी कर्तृतृतीयार्थे वा ॥ १७ ॥ तथाहि। 'पुत्रा राज्यः कुटुंबीया अमात्या मंत्रिणस्तव। तत्कालीनाः प्रजा नष्टा कालेन संति नाधुना' ॥ १८ ॥ बलिनां बलीयान् कालो भगवानव्ययोऽखण्ड ईश्वरः प्रभुः क्रीडन् सन् प्रजाः कालयते इतस्ततश्चालयति गोपः पशूनिव ॥ १९ ॥ ते तव भद्रं कल्याणम् अद्याधुना नोऽस्मत्तो वरं त्वं वृणुष्व कैवल्यं मोक्षमृते विना तस्य मोक्षस्यैको भगवान् अव्ययो विष्णुर्वेश्वरः स्वामी तद्दाताऽन्यो नास्तीति भावः ॥ २० ॥

विवरणटिप्पणी

वरं वरयेत्यत्र। तर्हीति। एतस्यैव विवरणं कालेति ॥ २० ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

हे वीर! निहतकण्टकं शत्रुरहितं राज्यं नरलोकं च परित्यज्य केवलमस्मान् परिपालयतस्ते तव पालयता त्वया सर्वे कामा भोगा उज्झितास्त्यक्ताः ॥ १७ ॥ 'न केवलं भोगहानिः, किंतु स्वजनवियोगोऽपि जातः' इत्याह—भवतः सुतादयस्तुल्यकालीनाः त्वत्समानकालीनाः प्रजाश्च कालिताः कालेन चालिता मृता इति, अधुना न सन्ति ॥ १८ ॥ कालस्य प्राबल्यमाह—काल इति। सर्वेषामपि बलिनां मध्ये कालो बलीयान्, अत एव क्रीडन् अनायासेनैव प्रजाः कालयते इतस्ततश्चालयति ॥ तत्र दृष्टान्तमाह—पशुपालो यथा पशून् कालयते तथेति। 'तर्हि तन्नियामकोऽन्यः स्यात्' इत्याशङ्कयाह—अव्यय इति। स्वयं पारवश्यरहित इत्यर्थः। तत्र हेतुमाह—ईश्वरः सर्वनियन्ता भगवानिति ॥ १९ ॥ एवं राज्ञ उपकारमुक्त्वा वरं ददति—ते तव भद्रं भवतु। वरं स्वाभिमतं वृणीष्व। 'एवं चेत्तर्हि कालातीतं मोक्षमेव प्रयच्छत' इत्यत्राहुः—ऋते कैवल्यमिति। मोक्षंविना वरान्तरं वरयेत्यर्थः। तत्र हेतुमाह—तस्य मोक्षस्येश्वरः अधिपतिर्दाता भगवान् विष्णुरेक एव। तत्रापि हेतुमाह—अव्यय इति। कालादिपारवश्यरहित इत्यर्थः। अतः कालकर्मादिपरवशा वयं न मोक्षप्रदाने समर्था इति भावः ॥ २० ॥

अन्वितार्थप्रकाशिका

नरेति ॥ हे वीर! निहतकण्टकं शत्रुरहितं राज्यं नरलोकं च परित्यज्य केवलमस्मान् पालयतस्ते तव सर्वे कामाः उज्झिता गताः ॥ १७ ॥ सुता इति ॥ भवतः सुताः महिष्यः ज्ञातयः अमात्या मन्त्रिणश्चेत्यमात्यमन्त्रिणोः कर्म-मन्त्रसहायतया

भेदः कल्प्यः। तुल्यकालीयाः त्वत्समानकाले भवाः। आर्षश्छप्रत्ययः। प्रजाश्च कालिताः कालेन चालिताः मृता अतः अधुना न सन्ति ॥ १८ ॥ काल इति ॥ सर्वेषामपि बलिनां मध्ये कालो बलीयान् भगवान् ईश्वरः अव्ययश्च अत एव क्रीडन् अनायासेनैव प्रजाः कालयते चालयति। यथा पशुपालः पशून् कालयते तथेति ॥१९॥ वरमिति ॥ ते तव भद्रं भवतु अद्य नः अस्माकं सकाशात् कैवल्यं मोक्षम् ऋते विना वरं वृणीष्व। तस्य मोक्षस्य ईश्वरः दाने समर्थस्तु एको भगवान् अव्ययः विष्णुरेव न वयमिति। अत्र प्रकरणे 'स्वपन्तं यस्तु वै मध्ये बोधयेत्त्वामचेतनः। स त्वया दृष्टमात्रस्तु भस्मीभवतु तत्क्षणात् ॥' इति 'निद्रामेव ततो वव्रे स राजा श्रमकर्षितः ॥ यः कश्चिन्मम निद्राया भङ्गं कुर्यात्सुरोत्तमाः ॥ स हि भस्मीभवेदाशु तथोक्तश्च सुरैस्तदा' इति च प्रक्षिप्तं सार्द्धश्लोकद्वयम् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कामा विषया उज्झिताः विनाशं प्राप्ता इत्यर्थः ॥ १७ ॥ तदेवाह सुता इति अमात्याः राज्यकार्यकर्त्तारः। मंत्रिणो राज्यविचारे सहायकाश्चेति भेदेन द्विविधाः प्रधानाः। तुल्यकालीयाः तव समानकालोत्पन्नाः। कालिताः नाशिताः; अतो न संति ॥ १८ ॥ ननु मम प्रजानाशकः कोस्तीति ? चेत्तत्राहुः काल इति कालयते यत्र तत्र चालयते ॥१९॥ नोस्मत्तः कैवल्यम् ऋते। कैवल्यमात्मन इत्यपि पाठः। तस्य कैवल्यस्य ईश्वरः प्रदाता ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नरलोकमिति। हे वीर, निहतकण्टकं शत्रुरहितं, राज्यं, नरलोकं च परित्यज्य, केवलं अस्मान् पालयतः ते तव। कर्त्तरि षष्ठी। त्वया इत्यर्थः। सर्वे कामा भोगाः, उज्झिताः त्यक्ताः ॥ १७ ॥ सुता इति। किं च हे राजन्, भवतः, सुताः पुत्राः, महिष्यो राज्ञ्यः, ज्ञातयः, अमात्याः, मन्त्रिणश्च, तुल्यकालीयाः, प्रजाश्च कालिताः कालवशीकृताः, अधुना न सन्ति। कालवशं गततया मृता इत्यर्थः। त्वं त्वस्मल्लोकस्थतयाऽस्मत्समानायुर्भोगवशतया प्राणान् धारयसे इति भावः। 'यो यं लोकं व्रजेल्लोकस्तत्रत्यायुर्भुगप्यसौ' इति भविष्योक्तेः ॥ १८ ॥ कोऽसौ मत्तोऽपि बलीयान् कालो नामेति शङ्कायामाब्रह्मस्तम्बपर्यन्तकृत्स्नजगतः कालवश्यतां कालस्य बलीयस्त्वं च वक्तुं कालो नाम नेश्वरात् पृथग्भूतः, किं तु कालशरीरक ईश्वर एव कालयतीत्याहुः। काल इति। कालः कालशरीरकः, अव्ययः कालकृतनाशादिविकाररहितः, ईश्वरः सर्वनियन्ता, भगवान् स्वयं परमेश्वरः, क्रीडन् सन्, प्रजाः जनान्, पशुपालः पशून् यथा वशीकरोति, तद्वत्। कालयते वशीकरोति ॥ १९ ॥ एवं कालबलवत्तामुक्त्वा वक्तव्यमाहुः। वरमिति। हे राजन्, अद्य नोऽस्मान् प्रति कैवल्यम् ऋते, प्रकृतिसंबन्धराहित्यतारूपां कैवल्यपर्यायां मुक्तिं विनेत्यर्थः। वरमभिमतवरं, वृणीष्व वरय। ते भद्रम्, अस्तु। मम मुक्तिरेवाभीष्टास्ति ततस्तामेव प्रयच्छतेति विवक्षमाणमालक्ष्याहुः। तस्य मुक्त्यपरपर्यायकैवल्यस्म, प्रदाता त्विति शेषः। अव्ययः अविनाशी, विष्णुरन्तरात्मा, भगवान् एकः ईश्वरः परमेश्वर एव। अतो न वयं कैवल्यं दातुं प्रभव इति भावः ॥ २० ॥

कृष्णप्रिया

हे वीर महापुरुष ! हमारे रक्षण के लिये आपने भूमण्डल का अपना निष्कण्टक साम्राज्य छोड़ दिया, एवं सर्व प्रकार के सुख भोग कामनाओं का भी त्याग किया ॥ १७ ॥ राजन् ! और एक तिवेदन सुनें ! आज भूतल पर आपका परिवार पुत्र पौत्र रानियाँ स्वजन, बन्धुजन, अमात्य, मन्त्री एवं आपके राज्यकाल के प्रजा में से भी कोई नहीं रहा है सर्व लोक काल के कवल बन गये है ॥ १८ ॥ राजन् काल बलवानों में से सबसे अधिक वलिष्ठ है। काल स्वयं अविनाशी नित्य समर्थ और भगवत्स्वरूप है। राजन् जैसे पशुपाल पशुओं को अपने वश में रखते हैं, वैसे ही काल भी सारे लोक को आसानी से अपने अधीन रखता है ॥ १९ ॥ राजन् ! आपका सर्व विध मङ्गल हो। आप अभीष्ट वरदान हमसे माँग लीजिये। राजन् केवल कैवल्य को छोड़कर आपको सब कुछ हम दे सकते हैं। मोक्षप्रदानशक्ति तो अविनाशी विष्णु भगवान की ही है ॥ २० ॥

[1]एवमुक्तः स वै देवानभिवन्द्य महायशाः। अशयिष्ट गुहाविष्टो निद्रया देवदत्तया ॥ २१ ॥
[2]स्वापं यातं यस्तु मध्ये बोधयेत्त्वामचेतनः। स त्वया दृष्टमात्रस्तु भस्मीभवतु तत्क्षणात् ॥ २२ ॥
यवने भस्मसान्नीते[3] भगवान् सात्वतर्षभः। आत्मानं दर्शयामास मुचुकुन्दाय धीमते ॥ २३ ॥
तमालोक्य घनश्यामं पीतकौशेयवाससम्। श्रीवत्सवक्षसं भ्राजत्कौस्तुभेन विराजितम् ॥ २४ ॥

---

[1] अथाचत गुहाविष्टो निद्रां तु बहुकालिकाम्। तथेत्युक्ते तु तैर्देवैर्मुचुकुन्दो महामनाः ॥–विजयेऽधिकः।
निद्रामेव ततो वव्रे स राजा श्रमकर्शितः। यः कश्चिन्मम निद्राया भङ्गं कुर्यात्सुरोत्तमाः ॥
स हि भस्मीभवेदाशु तथोक्तैश्च सुरैस्तदा। कुत्रचिदुपरिनिर्दिष्टश्लोकस्थाने अयं सार्धैकः श्लोको दृश्यते।

[2] अयं श्लोको नास्ति–प्रा. पा. विज.; ''स्वापयन्तं'' प्रा. पा.; प्रति बोधयति त्वां वै स्वपन्तं यस्त्वचेतनः। स त्वया दृष्टिमात्रेण–वीर.। [3] भस्मतां–वीर.।

कर्दमक्षमा

अन्वयः—एवम्, उक्तः, सः, महायशाः, देवान्, अभिवन्द्य, देवदत्तया, निद्रया, गुहाविष्टः, वै, अशयिष्ट ॥ २१ ॥ यः, तु, अचेतनः, स्वापम्, यातम्, त्वाम्, बोधयेत्, स, त्वया, दृष्टमात्रः, तु, तत्क्षणात्, भस्मीभवतु ॥ २२ ॥ यवने, भस्मसात्, नीते, सात्वतर्षभः, भगवान्, धीमते, मुचुकुन्दाय, आत्मानम्, दर्शयामास ॥२३॥ पीतकौशेयवाससम्, श्रीवत्सवक्षसम्, भ्राजत्, कौस्तुभेन विराजितम् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गुहायां प्रविष्टः शेते स्म ॥ २२–२५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमुक्तरीत्या । स मुचुकुन्दः । (तदा देववरदानकाले । शुभाम् अन्ते हरिदर्शनाच्छुभीकरीम् । यथा ते तव ईप्सितमेवं तथास्त्वित्यर्थः । इह पाठानां बहुत्वादयं पाठः श्रेयान् । तथाहि–‘अयाचत तदा निद्रामनयोपद्रवां शुभाम् । अस्त्वेवं राजराजंस्ते कुरु निद्रां यथेप्सितम् ।’ इति । महायशा इत्यस्यायं भावः—विष्णुरेवैकः कैवल्यदाता चेत्तर्हि तैरन्यैर्वा किम्, प्रत्युतान्यदर्शनमप्ययोग्यमतस्तद्दर्शनं यावत्तत्प्रियतममथुरांतिके विविक्ते सुप्तमेवाह्यमिति निद्राया एव वरणान् सर्वतो महायशो वितताननेति । निद्रया तदनुमोदनाद्वरत्वेन दत्तया । तच्छयनगुहा तु मथुरामंडलस्य दक्षिणसीमायां धवलपुरमध्ये लोकप्रसिद्धा । या तु मथुरापरिक्रमप्रसंगे श्रीवाराहदेवेन पुर्यन्तरेवोक्ता सा तदनुकारिदेवालय एव ज्ञेया । ‘यशोदालयवद्गिरिगह्वरे’ इति वक्ष्यमाणात् ॥ २१ ॥ स बोधयिता) ॥ २२–२३ ॥ भस्मसान्नीते भूते । ‘भस्मतां नीते’ इति पाठः प्राक्तनो मे प्रतिभाति लेखकप्रमादात्तास्थाने सेति जातम् । धीमते तद्भक्त्येकनिष्ठत्वात्प्रशस्तबुद्धये ॥ २४ ॥ तं कृष्णम् । तत्सौंदर्यविशेषाकृष्टचित्तः पुनर्मुचुकुंद भाग्यं प्रशंसागर्भं वर्णयति–तमिति चतुष्केण । भ्राजता तद्वक्षोलब्धकांतिविशेषेण कौस्तुभेन विराजितम्, विशब्दो भूषणांतरापेक्षया ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महायशा इत्यस्यायं भावः श्रीविष्णुरेवैकः कैवल्यदाता चेत्तर्ह्येतैरन्यैर्वा किं प्रत्युतान्यदर्शनमप्ययोग्यम् अतस्तदर्शनं यावत्तत्प्रियतमश्रीमथुरान्तिके विविक्ते स्वप्तुमेवार्हामीति निद्राया एव वरणात् सर्वतो महायशो वितताननेति एवं देवैरपि तदनुमोदनाद्वयरत्वेन दत्तया तच्छयनगुहा तु श्रीमथुरामण्डलस्य दक्षिणसीमायां धवलपुरगिरिमध्ये लोकप्रसिद्धा या तु सथुरापरिक्रमप्रसङ्गे श्रीवराहदेवेन पुर्य्यान्तिरेवोक्ता सा तदनुकारिदेवालय एव ज्ञेयः श्रीयशोदालयवत् गिरिगह्वर इति वक्ष्यमाणात् ॥ २१–२३ ॥ धीमते तद्भक्त्येकनिष्ठत्वात्प्रशस्तबुद्धये ॥ २४ ॥ तत्सौन्दर्यविशेषाकृष्टचित्तः पुनर्मुचुकुन्दभाग्यप्रशंसासागर्भं वर्णयति–तमिति चतुष्केण । भ्राजता भ्राजमाणेन तद्वक्षोलब्धकान्तिविशेषेण कौस्तुभेन विराजितं बिशब्दो भूषणान्तरापेक्षया पूर्वोक्ता पद्ममालैवापाद्रलम्बित्वेन वनमालेति पूर्वं निर्दिष्टा सम्प्रत्यस्मिन् गर्गोपदेशानुसारेण वैजयन्ती तया स्फुरदिति ज्ञेयम् इयन्तु पञ्चवर्णपुष्पा इति सर्वतद्भूषणानां भगवद्वदनन्तरूपत्वं व्यञ्जितम् अपीच्यं सुन्दरतरं वयो नवयौवनरूपं यस्य तम् ॥ २५–२७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अभितो वन्दित्वा, तेषां शुद्धभावोक्त्या भगवद्भक्त्या च साष्टांगं मुहुर्बहुधा प्रणम्येत्यर्थः । ‘महायशाः’ इत्ययं भावः–श्रीविष्णुरेवैकः कैवल्यदाता चेत्तर्ह्येतैरन्यैर्वा किं प्रयोजनम्, अन्यदर्शनमप्ययोग्यम्, अतस्तद्दर्शनं यावत्तावत् प्रियतमश्रीमथुरान्तिके विविक्ते स्वप्तुमेवार्हामीति निद्रामेव देवेभ्योऽवृणीतेति सर्वतो महायशो वितताननेति । एवं देवैस्तदनुमोदनाद्वरत्वेन दत्तयेति । वै प्रसिद्धौ, एतत् सर्वं सुविख्यातमेवेत्यर्थः । तच्छयनगुहा च श्रीमथुरामण्डलस्य दक्षिणसीमायां धवलपुरीयगिरिमध्ये लोकप्रसिद्धा, या च श्रीमथुराप्रदक्षिणप्रसंगे पुर्य्यन्तरेव श्रीवराहेण भगवतोक्ता, सापि कल्पान्तरव्यवस्थया घटेतैवेति दिक् ॥ २१ ॥ सात्वतर्षभो यदुकुलश्रेष्ठो यो भगवान् परमेश्वर इति परमभक्तवात्सल्यादिकमभिप्रेतम् । किञ्च, धीमते निजभक्त्येकनिष्ठायेत्यर्थः । अत आत्मानं दर्शयामास, प्रकटोऽभूदित्यर्थः । पुरा यथा श्रीनारदोक्तरूपेण यवनोऽसौ तं ददर्श, तथा वृद्धगर्गाद्युक्तानुसारेणं तादृशरूपं श्रीमुचुकुन्दायाप्यदर्शयदित्यभिप्रायेण ॥ २२ ॥ तत्सौन्दर्य्यविशेषाकृष्टचेतस्त्वेन च पुनरपि विशेषतो वर्णयति–तमिति त्रिभिः । विराजितमिति सदा स्वतो राजत एव, विशेषणतया शोभितमित्यर्थः ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमिति । देवैस्तर्हि बहुकालमनिद्रस्य मम शयनार्थंनिर्जनं प्रदेशं प्रदर्शयतेत्युक्तैरित्यर्थसामर्थ्यादत्र शेषो बोद्धव्यः स्वपतं यस्त्विति वक्ष्यमाणोक्तप्रकारेणोक्तो महायशाः स मुचुकुन्दो देवैः प्रदर्शितायां तस्यां गुहायां प्रविष्टः देवैर्दत्तया विघ्नानुपहतीकृतया निद्रया अध्ययनेन वसतीतिवद्धेत्वर्थे तृतीया अशयिष्ट शायितवान्निमित्तभूतया वा ॥ २१–२२ ॥ एवं शब्दविवक्षितं

प्रकारमाह–स्वपन्तमिति । अचेतनोऽजानन्यः कश्चित्स्वपन्तं शयानं त्वां प्रतिबोधयति जाग्रदवस्थां प्रापयिष्यति सपुमांस्त्वया कर्त्रा दृष्टिमात्रेण करणेन त्वद्दृष्टिप्रसरणमात्रेणेति पदद्वयफलितोऽर्थः तत्क्षणादेव भत्क्षणादेन भस्मीभवत्विति ॥ २३ ॥ प्रश्नस्योत्तरमुक्त्वा कथामाह–यवन इत्यादिना, भ्रस्मसान्नीते भस्मतां प्रापिते सति सात्वतर्षभो भगवान् श्रीकृष्णः धीमते मुचुकुन्दायात्मानं दर्शयामास ॥ २४ ॥ तमिति । तस्य भगवतस्तेजसा धर्षितः अबिभूतः अत एव शङ्कितः कस्येदं तेज इत्यादि शङ्कमानः तेजसा दुर्द्धर्षम् अधृष्यमिव स्थितं तं भगवन्तं शनकैरवलोक्य महती विपुलाबुद्धिर्यस्य स राजा मुचुकुन्दः पर्यपृच्छदिति सम्बन्धः । तं कथम्भूतम् ? घनमिव श्यामं पीतकौशेय वाससी यस्य श्रीवत्सो वक्षसि यस्य तं भ्राजता कौस्तुभेन विराजितम् ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

आत्मनस्तु बहुकालिकीं बहुकालभोग्याम् ॥ ० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वपन्तमिति पद्यं न सर्वसम्मतम् ॥ २३–२७ ॥

गूढार्थदीपिनी

भस्मतां नीते इत्येव पाठः प्राक्तनः लेखकभ्रमात्तास्थाने सेति जातम् इति वंशीधरी ॥ २२ ॥ तमिति चतुष्कम् राजा तमालोक्य शंकितः सन् पर्यपृच्छदिति चतुर्थेनान्वयः । वैजयन्ती पञ्चरत्नमाला । अपीच्यं त्वति सुन्दरे । वयो यौवनम् । मृगेन्द्रस्य सिंहस्येव उदारः पराभवजनकः । विक्रमो यस्य धर्षितोऽभिभूतः । दुर्धर्षम् अपराभाव्यम् ॥ २३–२६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अशयिष्ट शेते स्म ॥ २२–२७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं देवैरुक्तः सर्वदेवानभिवाद्य नमस्कृत्य गुहाविष्टः सन् बहुकालजां बहुकालभवां निद्रां कुर्यामित्ययाचिष्ट ययाचे ॥२१॥ तथेति तैर्देवैरुक्तो महामना मुचुकुन्दो गुहाविष्टोऽशयिष्ट । अत्रैकश्लोक उत्सन्नः । [यः कश्चिन्मम निद्राया भङ्गं कुर्यात्सुरोत्तमाः । स तु भस्मीभवेदाशु तथोक्तश्च सुरैः सह ॥] स्वायन्तं यस्तु मध्ये बोधयेत्त्वामचेतनः । स त्वया दृष्टमात्रस्तु भस्मीभवतु तत्क्षणादिति श्लोकस्यैतद्याचनश्लोकपूर्वकत्वावश्यम्भावात् । तत्त्यागे सर्वत्यागोऽस्तु । हरिवंशशंसितरीत्या कथाया ज्ञातुं शक्यत्वात् । तथा हि हरिवंशे । पुरा देवासुरे युद्धे कृतकर्मा महाबलः । वरेण छन्दितो देवैर्निद्रामेव गृहीतवान् । श्रान्तस्य तस्य वागेत्रं तदा प्रादुरभूत्किल । प्रसुप्तं बोधयेद्यो मां तद्दहेऽयमहं सुराः । चक्षुषा क्रोधदीप्तेनेत्येवमाह पुनः पुनः । एवमस्त्विति तं शक्र उवाच त्रिदशैः सह । स सुरैरभ्यनुज्ञातो मानुषं लोकमागतः । स पर्वतगुहां काञ्चित्प्रविश्य श्रमकर्षितः । सुष्वाप कालमेतं वै यावत्कृष्णस्य दर्शनम् । तत्सर्वं वासुदेवस्य नारदेन निवेदितम् । वरदानं च देवेभ्यस्तेजस्तस्य च भूपतेः । अनुगम्यमानः कृष्णस्तु तेन म्लेञ्छेन शत्रुणा । तां गुहां मुचुकुन्दस्य प्रविवेश विनीतवत् । शिरस्थाने तु राजर्षेर्मुचकुन्दस्य केशवः । सन्दर्शनपथं त्यक्त्वा तस्थौ बुद्धिमतां वर इति । निद्रया देवदत्तया वरसम्पदा यवने भस्मसान्नीते भस्माधीने तद्रूप इति यावत् । सात्वतर्षभो भगवान् हे मुचुकुन्देत्यात्मानं तं दर्शयामासेत्यन्वयः । गतिबुद्धीत्यादेः । अयधीरिति गतबुद्धीरिति मतोयधीमतस्तस्मिन्पवन इत्यन्वयः । विवक्षाभावे मुचुकुन्दाय धीमते आत्मानं दर्शयामासेत्यन्वय इति वा ॥ २३ ॥ महाबुद्धिस्तं पर्यपृच्छदित्यनेनान्वय इति विशेषकम् । घनवच्छ्यामः ॥ २४ ॥ यावद्वनमाल्या ॥ २५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्र स विष्णुः कथं प्राप्तव्य इत्याशङ्कायाम्, सोऽवतरिष्यति मोक्षमेव दातुम्, तदा तस्य अनुवृत्तौ तदाज्ञाकरणे वा मुक्तिर्भविष्यतीति प्रतिवचने, कदा अवतरिष्यतीति पुनर्जिज्ञासायाम्, अष्टाविंशतितमे युगे अवतरिष्यतीत्यभिज्ञाय, तावत्पर्यन्तं तूष्णीस्थितौ कामादयः क्षुत्पिपासादयश्च बाधका भविष्यन्तीति, समाधावप्येतद्दुःखमिति, सुषुप्तिसमाध्योः तुल्यश्चानन्दानुभव इति, फलदाता विष्णुरेवेति योगादीनमप्रयोजकत्वात्, प्रयत्नाधिक्येन क्लेशसम्भवाच्च. सुषुप्तिमेव प्रार्थयामास । ततो देवाः स्वकीयां निद्रां ददुः । ते ह्यस्वप्नाः । अर्थात्सुषुप्तिरेव भवतीति वरत्वेन निद्रां प्राप्य, तत्र विघ्नकर्ता दर्शनमात्रेणैव भस्मसाद्भविष्यतीत्यपि वरं प्राप्य, अष्टाविंशतियुगपर्यन्तं निद्रां कृतवानित्याह **अशयिष्टे**ति । गुहायां शीतवाताद्युपद्रवाभावात् तत्राविष्टः **अशयिष्ट** निद्रां कृतवान् ॥ २१ ॥ एवं प्रासङ्गिकमुक्त्वा प्रस्तुतमाह **यवन** इति । देवानामभिवन्दनं तत्प्रत्याशया स्थितत्वं भगवन्माहात्म्यश्रवणेन श्रद्धा चेति गुणत्रयं तस्य दृष्ट्वा, भक्तहितमपि प्रसङ्गात्तत्कृतं ज्ञात्वा, यवने भस्मसान्नीते, भगवान् सर्वज्ञः सर्वसमर्थश्च सात्वतानामृषभः स्वामी तादृशाय चेत् कृपां न कुर्यात्, तदा भक्तानां दुःखमपि भवेदिति भक्तहितकारित्वं स्वतन्त्रत्वं चावलम्बितवानित्याशयेनाह **सात्वतर्षभ** इति । तत्र प्रथमं हितचर्यामाह **आत्मानं दर्शयामासे**ति । ननु प्राकृताय सर्वसाधनं

परित्यज्य निद्राणाय कथमात्मानं दर्शितवानित्याशङ्क्याह **मुचुकुन्दायेति**। सर्वत्र उकारः दोषाभावसूचकः। मकारः पुरुष आनन्दः, मुदं (मुद्) वा परमानन्दः। चु शब्देन निर्दुष्टं चैतन्यम्। कुशब्देन निर्दुष्टः सदंशः। सच्चिदानन्दरूपं पूर्वं ज्ञानादिद्वारा लोकेभ्यो दत्तवानिति तादृशाय स्वरूपं प्रदर्शनीयमेव। ज्ञापनं नापेक्ष्यत इति, विरुद्धं वा न मंस्यत इत्यत आह **धीमत** इति। स हि बुद्धिमान्। पूर्वोपदेशमपि स्मरतीत्यपि सूचितम् ॥ २२ ॥ ततो यज्जातं तदाह **तमालोक्येति** चतुर्भिः। तमालोक्य पर्यपृच्छदिति चतुर्थेन संबन्धः। तस्य कालातिक्रमेण मोक्षसिद्ध्यर्थं भगवन्तं वर्णयति त्रयोदशधा, तावद्भिर्विशेषणैः। **घनश्याम**मित्यादिभिः। केवलरसात्मकत्वे दुःखसहितसुखं न पुरुषार्थत्वायेति घनश्यामता निरूपिता। मेघवत् श्यामः, स हि तापहारको भवति। क्रियाफलदाता आप्यायकश्च। एवं गुणत्रयसहितो रसः भगवान् फलरूपो निर्दिष्टः। संसारं निवर्तयन् कर्म च सफलं कुर्वन् परमानन्ददाता पीतकौशेयवासमिति व्याख्यातम्। एवं प्रमेयप्रमाणरूपं निरूप्य तेनैव मोक्षधर्मौ सूचयित्वा अर्थकामावाह **श्रीवत्सयुक्तं** वक्षो यस्य भ्राजत्कौस्तुभेन विराजितश्च ॥ २३ ॥

श्रीसुबोधिनी–सारः

एवमुक्तो महायशाः पुण्यकीर्त्तिः स मुचुकुन्दो देवानभिवंद्य प्रणम्य गुहां गतो देवैर्दत्तया निद्रयाशयिष्ट चिरमसुप्तत्वात् ॥ २१ ॥ स्वापं यातं प्राप्तं त्वां मध्येन्तराऽचेतनो मूढो निरीश्वरो वा यस्तु उत्थापयेत् त्वया दृष्टमात्रोऽवलोकित एव सद्यः भस्मीभवतु ॥ २२ ॥ प्रकृतमनुसरति। यवने भस्मसात्कृते भगवान्कृष्णो धीमते विवेकिने मुचुकुन्दायात्मानं स्वरूपं दर्शयामास ॥ २३ ॥ घनश्यामं पीताम्बरं श्रीवत्सो वक्षसि यस्य तम् भ्राजता कौस्तुभेन विराजितं शोभमानम् ॥ २४ ॥

विवरणटिप्पणी

तमालोक्येत्यत्र। अन्त्यविशेषणे उदारपदसूचितं मोक्षपर्यवसायित्वं त्रयोदशः प्रकारः ॥ २३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अत्रापेक्षितः शेषोः ज्ञेयः। एवं देवैरुक्तः स महायशाराजा मुचुकुन्दः चिरप्रजागरश्रान्तन्वात् देवानभिवन्द्य निद्रां याचितवान्। ततश्च देवदत्तया निद्रया गुहाविष्टः सन् स अशयिष्ट इत्यन्वयः ॥ २१ ॥ निद्राप्रदानप्रकारं दर्शयति–स्वपन्तमिति। यस्त्वचेतनः अजानन् मध्ये स्वत उत्थानात् पूर्वं स्वपन्तं शयानं त्वां प्रतिबोधयेत्, स त्वया दृष्टमात्र एव तत्क्षणाद्भस्मीभवत्वित्यन्वयः। तुशब्दोऽवधारणे। वै निश्चये। अयं श्लोकः क्वचिन्नास्ति ॥ २२ ॥ एवं प्रासङ्गिकमुक्त्वा प्रस्तुतमाह–यवन इति। एवं यवने भस्मसान्नीते भस्मतां प्रापिते सति सात्वतर्षभः भक्तपालको भगवान् कृष्णः धीमते विवेकिने मुचुकुन्दाय आत्मानं दर्शयामास ॥ २३ ॥ राजा मुचुकुन्दस्तमालोक्य शनकैः पर्यपृच्छदित्यन्वयः। एवंप्रश्ने हेतुमाह—शङ्कित इति। 'अतितेजस्वी कोऽयं' इति शङ्कायुक्त इत्यर्थः। तत्रापि हेतुमाह—तस्य तेजसा धर्षितः अभिभूत इत्मर्थः। एवं सत्यपि प्रश्ने हेतुमाह–महाबुद्धिरिति, विवेकीत्यर्थः। शङ्काहेतुत्वेनैव भगवतोऽलौकिकं स्वरूपमपि वर्णयति—घन इव श्यामम्। पीते कौशेये कीटनिर्मितकोशजनिततन्तुनिर्मिते वाससी यस्य तम्। श्रीवत्सो दक्षिणावर्तरोमरेखायां सुवर्णवत्तेजो विशेषो वक्षसि यस्य तम्। भ्राजता प्रकाशमानेन कौस्तुभेन विराजितम् ॥ २४ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ एवं देवैरुक्तः स महायशाः मुचुकुन्दः देवानभिवन्द्य निद्रां याचितवानिति शेषः। ततश्च देवदत्तया निद्रया गुहामाविष्टः सन् अशयिष्ट। अत्र निद्राप्रार्थनमिदं वृद्धगर्गोक्तकृष्णदर्शनं यावद्भविष्यति तावन्निद्रैव मम सुखाय न तु जागरः। भगवद्दर्शनोत्कण्ठितस्य मम बहुचतुर्युगावच्छिन्नः कालो जागरेण यापयितुमशक्यः। निद्रया तु स कालः क्षणप्राय एव भविष्यतीति जागरयितुर्दाहप्रार्थनं तु शक्रं भीषयितुमेव। अन्यथा पुनरपि दैत्यवधार्थं शक्रो जागरयेत् इति। तच्छयनगुहा तु मथुरामण्डलस्य दक्षिणसीमायां धवलपुरगिरिमध्ये प्रसिद्धा ॥ २१ ॥ यवन इति ॥ एवं यवने भस्मसान्नीते भस्मतां प्रापिते सति क्रुभ्वादि योगं विना। सातिरार्षः। सात्वतर्षभः भक्तपालको भगवान् कृष्णः धीमते विवेकिने मुचुकुन्दाय आत्मानं दर्शयामास ॥ २२ ॥ तमिति चतुष्कम् ॥ घनश्यामं पीतकौशेयवाससं श्रीवत्सवक्षसं भ्राजता भ्राजमानेन कौस्तुभेन विराजितम्। शता आर्षः ॥ २३ ॥

श्रीगोपालानन्वमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गुहायामाविष्ठः प्रविष्ठः अशयिष्ठशिश्ये ॥ २१–२४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति तर्हि बहुकालमनिद्रस्य मम शयनार्थं निर्जनं प्रदेशं प्रदर्शयतेत्युक्तैरिति शेषः। देवैः, एवं वक्ष्यमाणश्लोकोक्तप्रकारेण, उक्तः महायशाः, स मुचुकुन्दः, देवान् अभिवन्द्य, गुहाविष्टः देवैः प्रदर्शितायां रैवताद्रिगुहायां प्रबिष्टः सन्नित्यर्थः देवदत्तया देवैः प्रदत्तया निद्रया, अध्ययनेन वसतीतिवद्धेत्वर्थे तृतीया। अशयिष्ट शेते स्म ॥ २१ ॥ एवंशब्दविवक्षितप्रकारमाह।

स्वपन्तमिति । अचेतनोऽजानन्, यः कश्चित्, स्वपन्तं शयानं, त्वां तु, मध्ये बोधयिष्यति त्वां जाग्रदवस्थां प्रापयिष्यतीत्यर्थः । स पुमान्, त्वया कर्त्रा, दृष्टिमात्रेण करणेन, त्वदृष्टिप्रसरणमात्रेणेति पदद्वयफलितोऽर्थः । तत्क्षणादेव, भस्मीभवतु । इति श्लोकद्वयस्यैवमेकसम्बन्धः ॥ २२ ॥ प्रश्नस्योत्तरमुक्त्वा प्रकृतां कथामाह । यवन इति । यवने कालयवने, भस्मसात् नीते, भस्मभावं गमिते सतीत्यर्थः । सात्त्वतर्षभः यादवश्रेष्ठः, भगवान् श्रीकृष्णः धीमते महामतये, मुचुकुन्दाय, आत्मानं दर्शयामास ॥ २३ ॥ तमिति । चतुर्भुजमिति । प्रेक्षणीयमिति । पर्यपृच्छदिति । तस्य भगवतः, तेजसा धर्षितः अभिभूतः । अत एव, शङ्कितः कस्येदं तेज इत्याशङ्कमानः, महती विपुला बुद्धिर्यस्य सः, राजा मुचुकुन्दः, तेजसा दुर्द्धर्षं इव मध्यस्थमिव स्थितमित्यर्थः । तं भगवन्तं, शनकैः आलोक्य पर्यपृच्छत् । कथंभूतं तम् । घनवत् श्यामस्तं, पीते कौशेये वाससी यस्य तं, श्रीवत्सो वक्षसि यस्य तं भ्राजच्चासौ कौस्तुभश्च तेन, विराजितं, चत्वारो भुजा यस्य तं, वैजयन्त्या मालया, रोचमानं च, चारु सुन्दरं प्रसन्नं च वदनं मुखं यस्य तं, स्फुरती मकराकारे कुण्डले यस्य तं, त्रिलोकस्य प्रेक्षणीयं दर्शनीयं, सुन्दरतममिति यावत् । अनुरागस्मिताभ्यां सहिते इति सानुरागस्मिते ईक्षणे नयने यस्य तं, अपीच्यं सुन्दरं वयो यस्य तं, मत्तस्य मृगेन्द्रस्य सिंहस्येवोदारो विक्रमः पराक्रमः पादविक्षेपो वा यस्य तं, पर्यपृच्छदिति चतुर्णामेकान्वयः ॥ २४–२७ ॥

कृष्णप्रिया

महायशा महाराज मुचुकुन्दजी ने देववरों के वचनों का श्रवण करके उनकी वन्दना की और चिरकाल से परिश्रान्त मुचुकुन्दजी ने केवल निद्रा का ही वर माँगा । पुनः देवों से वरदान प्राप्तकर नींद से भरकर राजा अद्रिकन्दरा में जाकर सो गये ॥ २१ ॥ राजा के प्रस्थान अवसर पर देववरों ने कह दिया था कि मुचुकुन्द महाराज ! यदि आप के निद्राकाल में कोई मूढ जन आप को मध्य में जगायेगा तो वह आपकी दृष्टि पड़ते ही उसी क्षण में भस्मीभूत होगा ॥ २२ ॥ राजन् ! कालयवन जब भस्म हो चुका तब सात्वतकुलशिरोमणि भगवान् श्रीकृष्ण ने भक्तिसम्पन्न बुद्धिमान् मुचुकुन्द राजा को अपना दर्शन दिया ॥२३॥ महाराज मुचुकुन्द ने भगवान का दर्शन किया तब भगवान का स्वरूप कैसा था ? मुकुन्द भगवान का श्रीविग्रह वर्षाकालीन मेघ के समान श्याम था नाथ ने दुकूल पीताम्बर धारण किये हुए थे । वक्षःस्थल में श्रीवत्सलाञ्छन था । कण्ठ में विराजती तेजोमय कौस्तुभमणि अपनी दिव्यकान्ति चारों ओर विखेर रही है ॥ २४ ॥

चतुर्भुजं रोचमानं वैजयन्त्या च मालया । चारुप्रसन्नवदनं स्फुरन्मकरकुण्डलम् ॥ २५ ॥
प्रेक्षणीयं त्रिलोकस्य[1] सानुरागस्मितेक्षणम्[2] । [3]अपीच्यवयसं मत्तमृगेन्द्रोदारविक्रमम् ॥ २६ ॥
पर्यपृच्छन्महाबुद्धिस्तेजसा तस्य [4]धर्षितः । शङ्कितः शनकै राजा दुर्धर्षमिव तेजसा ॥ २७ ॥

मुचुकुन्द उवाच

को भवानिह सम्प्राप्तो विपिने गिरिगह्वरे । पद्भ्यां पद्मपलाशाभ्यां विचरस्युरुकण्टके ॥ २८ ॥

कर्वमक्षमा

अन्वयः—चतुर्भुजम्, च, वैजयन्त्या, मालया; रोचमानम्, चारुप्रसन्नवदनम्, स्फुरन्मकरकुण्डलम् ॥ २५ ॥ त्रिलोकस्य, प्रेक्षणीयम्, सानुरागस्मितेक्षणम्, अपीच्यवयसम्, मत्तमृगेन्द्रोदारविक्रमम् तम्, आलोक्य ॥ २६ ॥ तस्य, तेजसा, धर्षितः, तेजसा, दुर्धषम्, इव, शङ्कितः, महाबुद्धिः, राजा, शनकैः, पर्यपृच्छत् ॥ २७ ॥ मुचुकुन्द उवाच–इह, विपिने, गिरिगह्वरे, सम्प्राप्तः, पद्मपलाशाभ्याम्, पद्भ्याम्, उरुकण्टके, विचरसि, कः, भवान् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

धर्षितोऽभिभतः । दुर्धर्षमप्रधृष्यम् ॥ २८ ॥ विपिनेऽरण्ये तत्रापि गिरेर्गह्वरे दुष्प्रवेशस्थाने तत्राप्युरुकंटके पद्मपलाशसदृशाभ्यां पद्भ्यां विचरसीति ॥ २९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं कृष्णम् ॥ तत्सौंदर्यविशेषाकृष्टचित्तः पुनर्मुचुकुंद भाग्यं प्रशंसागर्भं वर्णयति—तमिति चतुष्केण । भ्राजता तद्वक्षोलब्धकांतिविशेषेण कौस्तुभेन विराजितम्, विशब्दो भूषणांतरापेक्षया ॥ २५ ॥ वैजयन्ती पंचरत्नमाला ॥ पद्ममालैव पूर्वोक्ता

---

[1] नृलोकस्य–श्रीधर. वंशी. जीव. विश्व. ; त्रिलो–वीर. विज. । [2] स्मितेक्षितम्–प्रा. पा. । [3] अपीता–प्रा. पा. ।
[4] बिस्मितः–विज. ।

वनमालेति पूर्वं निर्दिष्टा संप्रत्यस्मिन् गर्गोपदेशानुसारेण वैजयन्ती तया स्फुरदिति ज्ञेयम् । इयं तु पञ्चवर्णपुष्पेति सर्वतस्तद्भूपणानां भगवदनंतरूपत्वं व्यञ्जितम् ॥ २६ ॥ अपीच्यवयसं शोभमानयौवनम् ॥ अपीच्यं सुन्दरतरं वयो नवयौवनं यस्य तम् ॥ २७ ॥ तस्य कृष्णस्य । अधृष्यमानभिभाव्यम् ॥ महाबुद्धिरिति–श्रीभगवद्द्वेषेण नायमन्यो मां भ्रमयति मद्विधधर्पकप्रभावत्वाभावादन्यस्येति विचारसमर्थप्रज्ञ इत्यर्थः । बुद्धेर्महत्त्वहेतुरपि प्रह्लादस्येव भक्ति बलमेव वेति वाक्यालंकारः ॥ २८ ॥ तत्राप्यरण्येऽपि । तत्रापि दुःप्रवेशस्थानेऽपि । 'अरण्यं विपिनं गहनं काननं वनम्' इत्यमरः । "गुहा गहनदंभेषु निकुंजे गह्वरः स्मृतः" इति कोशान्तरम् ॥ विपिने निर्जने ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

राजा तस्य तेजसा धर्षितः सन् शनकै पर्य्यपृच्छत् यतो महाबुद्धिरिति श्रीभगवद्द्वेषेण नायमन्यो मां भ्रमयति मद्विधधर्षकर्षकप्रभाववत्वादन्यस्येति विचारसमर्थप्रज्ञ इत्यर्थः । अत एव शङ्कितः क्रमशः खण्डनाय प्रथमं नानावितर्कं कृतवानित्यर्थः । शनकैरित्यत्र हेतुः, तेजसा हेतुना दुर्द्धर्षं प्रश्नविषयमपि कर्तुं दुःशकम् तमिति शेषः । इवेति वाक्यालङ्कारे तथापि परि सर्वतोभावेनेति महाबुद्धित्वादेवेति भावः । महत्त्वञ्चात्र श्रीप्रह्लादस्येव भक्तिबलं ज्ञेयम् ॥ २८ ॥ प्रश्नमेवाह–को भवान् इत्यादिद्वाभ्याम् । तैर्व्याख्यातं च तत्रोरुकण्टक इत्यनन्तरं सम्प्राप्त इति तत्रापि पद्मेत्यादियोज्यं पद्भ्यामित्यादिना स्नेहो व्यञ्जितः प्रभावश्च तर्कितः ॥ २९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

रोचमानं सूर्य्यकोटिवत् प्रकाशमानम्, यद्वा, तदीयमनोनयनादिभ्यो रुचिं जनयन्तम्, पञ्चवर्णपुष्पा वैजयन्ती, तया विशिष्टम्, किंवा तयैव रोचमानं शोभमानम्, पूर्वोक्तपद्ममालैव बृद्धगर्गाद्युक्तापेक्षया तस्मिन् वैजयन्तीतयाऽस्फुरदिति ज्ञेयम् । चारुचिबुकादि-ललाटान्ताशेषांगैर्मनोहरं प्रसन्नं च सदास्येरत्वादिना वदनं यस्य तं त्रिलोकस्य जगतः प्रेक्षणीयम् । एवमनुक्तमन्यदपि सौन्दर्य्यं संगृहीतम्, अनुरागेण यत् स्मितं तत्सहितमीक्षणमवलोकनं यस्य तम्, यद्वा, सानुरागस्मिते, सदा कृपया स्मेरे इत्यर्थः, किंवा अनु पश्चात् प्रान्ते राग आरुण्यं स्मितं च स्मेरता सदा सुप्रसन्नतेत्यर्थः, ताभ्यां सहिते ईक्षणे नेत्रे यस्य, अपीच्यं सुन्दरतरं वयो नवयौवनरूपं यस्य तम्, मत्तमृगेन्द्रादप्युदारो विक्रमो यस्य तम्, इति महाबलिष्ठतासिद्धभुजमध्यवक्षःस्थलादिसौन्दर्य्यविशेषः सूचितः ॥ २४–२५ ॥ महाबुद्धिरपि तेजसा धर्षितः, शंकितश्च भीतः सन्, अत एव शनैः परि सर्व्वतोभावेन गद्गदादिपर्य्याकुलवाक्यतया वा पृच्छत् । ननु सोऽपि तद्भक्तो महाप्रभावः, कुतस्तादृशोऽभूत् ? तत्राह—तेजसा स्वस्य प्रभावेण पराक्रमेण वा दुर्द्धर्षमभिभवितुमशक्यमित्यर्थः; यद्वा, सूर्य्यादितेजसापि दुर्द्धर्षमिति महातेजस्वितोक्ता । तेजसा धर्षित इत्यादावयं हेतुः । इवेति लोकोक्तिरीत्याऽनधिकार्थम्; यद्वा, तस्यैव तेजसा दुर्द्धर्षं प्रष्टुमशक्यमित्यर्थः, तथाप्यपृच्छत्, यतो महाबुद्धिर्गम्भीराशयः, प्रश्नं विनास्य तत्त्वाज्ञानेन भक्तिविशेषानुदयान्मे सर्व्वजन्मकर्म्मादिकं विफलमेव स्यात्, विशेषतोऽस्य वाक्यामृतञ्च पिबानीत्यादिकं विचारयन्नित्यर्थः ॥ २६ ॥ संप्राप्तः साक्षादागतः । एतच्च तव योग्यं न स्यादिति भक्तिविशेषेण वदंस्तस्य जगद्वैलक्षण्यं वक्तुमादौ पदाब्जयोः सुकोमलत्वेऽपि कण्टकावेध्यत्वादिकमाह—विपिन इत्यादिना । यद्वा, तस्य सौन्दर्य्यसौकुमार्य्यादिभिराकृष्टोऽतिस्निह्यन्नाह—पद्भ्यामिति । एतच्च तैरेव व्यक्तीकृतम्; विचरसि परिभ्रमसि ॥ २७ ॥

श्रीमद्वीरराधवाचार्यकृता भागवतचन्द्रचन्द्रिका

वैजयन्त्या वनमालया शोभमानं च विराजितमित्युक्तसमुच्चयार्थश्चशब्दः अनुक्ताभरणान्तरसमुच्चयार्थो वा चारु सुन्दरं प्रसन्नं च वदनं यस्य तम् ॥ २६ ॥ त्रिलोकस्य प्रेक्षणीयं दर्शनीयं सुन्दरतमम् इति यावत् । अपीच्यं सुन्दरम् वयो यस्य तं प्रादुर्भूतवयसमिति भावः । मत्तस्य सिंहस्येवोदारो विक्रमः पराक्रमः पादविक्षेपो यस्य तम् ॥ २७–२८ ॥ तं प्रश्नमेवाह—क इत्यादिना वयन्त्वित्यतः प्राक्तनेन । इह सम्प्राप्तो भवान् कः ? किं देवः ? उत मानुषः ? इहेति विवक्षितमाह—विपिने अरण्ये तत्रापि गिरिगह्वरे दुष्प्रवेशस्थाने तत्राप्युरूणि कण्टकानि यस्मिस्तस्मिन् पद्मपलाशसदृशाभ्यां पद्भ्यां विचरसि ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

त्रिलोकस्य मध्ये दर्शनीयगुणम् ॥ २७ ॥ अतितेजसा अधिकतेजसा ॥ २८ ॥ गिरिगह्वरे प्रवेष्टुमशक्ये ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

शक्तितः क्रमशः खण्डनाय प्रथमं नानावितर्कं कृतवानित्यर्थः ॥ २८–३९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शङ्कितः किमयमीश्वर एव वेत्यागताशङ्कः दुर्द्धर्षमधृष्यम् इवेति वाक्यालङ्कारे ॥२८॥ पद्मपलाशतुल्यां पद्भ्याम् ॥२९-३०॥

गूढार्थदीपिनी

यस्त्वं गह्वरे दुर्गमे विपिने विचरसि स भवान् क इत्यन्वयः । उरूणि बहूनि कण्टकानि यस्मिन् ॥ २७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

धर्षितः अभिभूतः शङ्कितः किमयं भगवाविति भगवानिति जातशङ्कः दुर्द्धर्षमधृष्यं श्रीकृष्णं पर्य्यपृच्छत् इवेति वाक्यालङ्कारे ॥ २८–२९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्रिलोकस्य प्रेक्षणीयं दृश्यम् । कृत्यानां कर्तरि वेति षष्ठी । त्रिलोकस्य मध्ये दर्शनीयमिति वा । अपीच्यवयसं गतम् ॥ २६ ॥ तस्यातितेजसा तेजांस्यतिक्रम्य विद्यमानं तेन तेजसाऽपूर्वेण शङ्कितः झटिति प्रष्टं संशयः शनकैर्दुर्धर्पं पर्यपृच्छत्॥२७॥ उरुकण्टके गिरिगह्वरे पद्मपलाशाभ्यां पद्भ्यां विचरसि भवान्कान्तिमानिह सम्प्राप्तस्त्वं कः । इह स एः मन्मयस्य हंसोपहासो यथा प्राप्त इति वा । मन्मथव्यथाजनकसौन्दर्यवानिति तात्पर्यम् । दीप्तिर्भाभश्चेत्यनेकार्थध्वनिपदमञ्जरी ॥ २८ ॥ तेजस्विनां तेजः समुदितं किंस्वित् भगवान्विभावसुरग्निः किं स्वित् सूर्यः सोमश्चन्द्रश्चन्द्रशेखरो वा । उमया सहितः सोम इति विग्रहः । अपरो लोकपालो नाकपालादिर्वा ॥ २९ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं चतुर्विधपुरुषार्थरूपं निरूप्य तद्दातृत्वमप्याह **चतुर्भुज**मिति । सेवमानेभ्यः तान् प्रयच्छतीति । प्रथमतः प्रवृत्तिसिद्ध्यर्थं कीर्तेरुपयोगमाह **वैजयन्त्या मालया रोचमान**मिति । कीर्त्या रुच्युत्पादकः । वैजयन्तीपदेन कीर्तेः सानुभावत्वमुक्तम् । एवं सोपपत्तिकं सर्वपुरुषार्थदातृत्वं निरूप्य भक्तिदातृत्वमाह । चारु प्रसन्नं वदनं यस्य । अत्रापि चारुत्वं मनोहरत्वम्, प्रसादः फलसाधकः, साधनफलसहिता भक्तिरत्र निरूपिता । **स्फुरन्मकरकुण्डल**मिति । पूर्ववत्तत्र प्रवृत्तिनिवृत्तिशास्त्रे अङ्गभूते निरूपिते ॥ २४ ॥ एवं शास्त्रीयोत्कर्षमुक्त्वा लोकोत्कर्षमाह **प्रेक्षणीयं त्रिलोकस्ये**ति । लोको हि दृष्टमेव मन्यते, लौकिकः, त्रिलोकस्यापि स एव प्रेक्षणीय इति नान्यः केनचित्स्वीकर्तव्यः । तेषां दृष्ट्या प्रवृत्तौ फलसिद्धिमाह **सानुरागस्मितेक्षण**मिति । अनुरागपूर्वकं स्मितपूर्वकमीक्षणं यस्येति । **अनुरागे**ति सकलं (सफलं) काम्यं, कर्म, **स्मित**मित्यल्पमोहा भक्तिः । ईक्षणं ज्ञानम् । तेन त्रितयमपि भगवान् प्रयच्छतीति सूचितम् । पुरुषाणामेवं साधनफलान्युक्त्वा स्त्रीणामाह **अपीच्यवयस**मिति । प्रियः स्त्रीणामपीच्य इति परमप्रीतिविषयं वयो यस्य । तेन तासां प्रवृत्तिरुक्ता । फलमाह **मत्तमृगेन्द्रोदारविक्रम**मिति । मत्तो यो मृगेन्द्रः सिंहः । न हि सिंहाक्रान्तं सिंहगृहं कश्चित्प्रवेष्टुमर्हति । न केवलं संबन्धमात्रेण पाति, किन्तु उदारः यथेष्टं मनःपूर्तिपर्यन्तं विक्रमः पराक्रमः तासामभीष्टो यस्य । उदारत्वात् । मोक्षपर्यवसायित्वमपि सूचितम् ॥ २५ ॥ एवं वैदिकलौकिकैः सर्वैरेव विशेषेण मृग्यः भगवानेक एव फलसाधनरूप इति तादृशं दृष्ट्वा, प्रपत्त्यर्थं संवादेन परिचयं कृत्वा, पश्चाद्भजनीय इति प्रथमतः पृच्छति **पर्यपृच्छ**दिति । नन्वेवं भावः कथं वर्ण्यते, अज्ञात्वैव लौकिकन्यायेन कथं न पृष्टवानित्याशङ्क्याह **महाबुद्धि**रिति । महती तस्य बुद्धिरतिचतुरः । एतदर्थमेव सुषुप्तिं साधयित्वा स्थितः । किञ्च । तेजसा तस्य धर्षितः । भगवत्तेजसा पराहतः स ह्यात्मानं जानाति, इन्द्रादिभ्योऽप्यधिकतेजस्विनम् । स चेत्तस्य तेजसा तिरस्कृतः, तदा कथं (न) जानीयादयं पुरुषोत्तम इति । तस्मात्परिचयार्थं प्रश्नः । ननु प्रश्नोऽपि कथं पुरुषोत्तमे सम्भवतीत्याशङ्क्याह **शङ्कितः शनकैरिति** । प्रश्नेऽपि शङ्कां प्राप्तवानेव । तथापि समागतो भगवानित्यल्पं धाष्ट्र्यमवलम्ब्य शनैरपृच्छत् । किञ्च । राजा नीतिमपि जानाति । महांश्च राजसगुणोऽपि तस्य धाष्ट्र्ये सहाय इति केचित् । **तेजसा दुर्धर्षमिवे**ति । भगवन्तं दृष्ट्वा राजत्वेऽपि तत्तेजसा दुर्धर्ष इति शनैरेवोक्तवान्, विज्ञापनापूर्वकम् । आयुधानि सेवकाः सामग्री च न दृष्टेति । स्वयमपि राजेति इवेत्युक्तम् । अन्यथा पादयोरेव पतेत् । भगवान् वा तथा सन्देहविषयमात्मानं प्रकाशितवानितीवशब्दः ॥ २६ ॥ प्रश्नमाह को भवानिति अष्टभिः । प्रश्ने हेतून् वदति । अन्यथा कृत्रिमत्वमाशङ्क्येतेति । स्ववृत्तान्तमपि कथयति । भगवतोऽपि स्ववृत्तान्तकथनार्थम् । अष्टैश्वर्यं भगवति सिद्धम् । तथा सति विशेषाज्ञाने प्रतिपत्तिरयुक्तेति, स्वयं च फलार्थो न भवतीत्यष्टभिः प्रश्नः । प्रश्नत्रयं निरूपयति, स्वरूपक्रियाप्रकाराणाम्, तत्र विरोधख्यापनार्थम् । एतादृशं रूपं सहजं भवत्येव, कृत्रिममन्येषामपि भवतीति को भवानिति स्वरूपप्रश्नः । अस्तु वा विशेषः । एतादृशे विपिने अरण्ये, तत्रापि गिरिसंबन्धेन गह्वरे स्थाने, कथं संप्राप्त इति क्रियाप्रयोजनः प्रश्नः । **पद्भ्यां पद्मपलाशाभ्या**मिति प्रकारप्रश्नः । इयं हि भूमिरसंस्कृतेति उरूणि कण्टकानि भवन्ति । पलाशपत्रादपि कोमलाभ्यां पद्भ्यां तादृशस्थाने विचलनं महत्कार्यव्यतिरेकेण न भवतीति किं तादृशं महत्कार्यमिति प्रकारप्रयोजनप्रश्नः ॥ २७ ॥

श्रीसुबोधिनीसारः

चतुर्भुजं वैजयंत्या मालया रोचमानं तल्लक्षणं ब्रह्मांडपुराणे—

"शुक्तिः शंखो गजः क्रोडः फणी मत्स्यश्च दर्दुरः। वेणुरेते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः ॥ १ ॥
एतदुत्पन्नमुक्तानां माला भगवतश्च या। तां विदू राजशार्दूल वैजयंतीति नामतः ॥ २ ॥"

चारु सुरम्यं प्रसन्नं वदनं मुखं यस्य तम् स्फुरंती मकराकारे कुंडले यस्य तम् ॥ २५ ॥ मनुष्यलोकस्य दर्शनीयं सानुरागं सप्रेमस्मितम् ईक्षणे यस्य तम् अपीच्यं मनोहरं वयोऽवस्था यस्य तम्। मत्तो यो मृगेंद्रः सिंहस्तद्वदुदारो विक्रमो यस्य तम् आलोक्य दृष्ट्वा महाज्ञानी तस्य कृष्णस्य तेजसा धर्षितस्तिरस्कृतः शंकितो राजा मुचुकुंदः तेजसा दुर्धर्षमप्रधृष्य इव तं पर्यपृच्छत् शनैः ॥ २६-२७ ॥ इह संप्राप्तः समायातो भवान् कः। विपिने वने गिरेर्गह्वरे दुर्गमस्थाने उरुकंटके बहुदुःखदे पद्मपत्राभ्यां पद्भ्यां त्वं विचरसि ॥ २८ ॥

विवरणटिप्पणी

को भवानित्यत्र। प्रश्नहेतूनिति। स्वरूपक्रियाप्रकारहेतूनित्यर्थः। अन्यथेति। हेतुज्ञानाभावे चतुर्भुजादिरूपस्य कृत्रिमत्वं शङ्केत। अन्य एव कश्चिदेवं रूपं संपाद्य समागत इति स्यादित्यर्थः। तथासतीति। अष्टैश्वर्ये भगवति सिद्धे सति अयं भगवानेव कृत्रिमो वेति विशेषज्ञानाभावे तस्य प्रपत्तिरयुक्ता। स्वयं च भगवान् फलार्थी न। मुचुकुन्दात्किञ्चिद्याचयितुं नागतः। अतः कृत्रिमत्वमपि न संभवतीत्युत्कटकोटिकः संशयः। तथा च प्रश्नस्याष्टविधैश्वर्यविशेषज्ञानार्थकत्वादष्टभिः प्रश्न इत्यर्थः।

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

वैजयन्त्या बहुवर्णपुष्पनिर्मितया मालया च रोचमानम्। अनुक्ताभरणान्तरसमुच्चयार्थश्चकारः। चारु सुन्दरं प्रसन्नं च वदनं यस्य तम्। स्फुरती मकराकारे कुण्डले यस्य तम् ॥ २५ ॥ सानुरागं स्मितमीक्षणं यस्य तम्। अपीच्यं अति सुन्दरं वयो यस्य तम्। मत्तस्य मृगेन्द्रस्य सिंहस्येव उदारो विक्रमो गतिर्यस्य तम्। अत एव नृलोकस्य प्रेक्षणीयम् ॥ २६ ॥ स्वतेजसा दुर्धर्षम्, अभिभवितुमशक्यमेव। इवशब्दः एवकारार्थः ॥ २७ ॥ तत्प्रश्नमेवाह—क इत्यादिना। य इह पद्भ्यां विचरसि स भवान् त्वं क इति सम्बन्धः। 'अत्र तव विचरणमसम्भावितम्' इति सूचयन् चरणं विशिंषन्निहशब्दार्थमाह—पद्मपलाशसदृशाभ्यां पद्भ्यां विपिने अरण्ये, तत्रापि गिरिभिर्गह्वरे दुःप्रवेशस्थाने, तत्राप्युरूणि कण्टकानि यस्मिन् ॥ २८ ॥

अन्वितार्थप्रकाशिका

चतुर्भुजं वैजयन्त्या बहुवर्णपुष्पनिर्मितया मालया च रोचमानम्। अनुक्ताभरणान्तरसमुच्चयार्थश्चकारः। चारु सुन्दरं प्रसन्नं च वदनं यस्य तं स्फुरती मकराकारे कुण्डले यस्य तम् ॥ २४ ॥ नृलोकस्य प्रेक्षणीयं दर्शनयोग्यं सानुरागं स्मितमीक्षणं च यस्य तम्। अपीच्यं अतिसुन्दरं वयो यस्य तं मत्तस्य मृगेन्द्रस्य सिंहस्येव उदारः श्रेष्ठः विक्रमो गतिर्यस्य तम् ॥ २५ ॥ स्वतेजसा दुर्धर्षम् अभिभवितुमशक्यमेव। इवशब्दः एवकारार्थः। तं श्रीकृष्णमालोक्य तस्य तेजसा धर्षितः शङ्कितश्च महाबुद्धी राजा मुचकुन्दः शनकैः पर्यपृच्छत् ॥ २६ ॥ क इति ॥ यस्त्वं विपिने अरण्ये तत्रापि गिरेर्गह्वरे दुष्प्रवेशस्थाने तत्राप्युरूणि कण्टकानि यस्मिन् तस्मिन् इह स्थाने संप्राप्तः पद्मपलाशसदृशाभ्यां पद्भ्यां विचरसि स भवान् कः ॥ २७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अपीच्यंसुदरं वयो यौवनं यस्य तं मत्तश्चासौ मृगेन्द्रः सिंहश्च तद्वदुदारो विक्रमो यस्य तं ॥२५॥ तेजसा धर्षितः परिभूतः दुर्धर्षं प्रष्टुमशक्यमिव स्थितं ॥ २६ ॥ विपिने वने तत्रापि गिरेर्गह्वरे दुर्गमस्थाने। तत्रापि उरुकंटके। तत्रापि पद्मदलोपमाभ्यां पद्भ्यां त्वं विचरसि इह प्राप्तो भवान् कोस्ति ॥ २७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रश्नमेवाह क इत्यादिना वयमित्यतः प्राक्तनेन ग्रन्थेन। क इति। इह सम्प्राप्तः, भवान् कः, किं देव उत वा मानुषः। इहेति विवक्षितमाह। विपिने अरण्ये, तत्रापि गिरिगह्वरे दुष्प्रवेशस्थाने, तत्रापि उरुकण्टके प्रचुरकण्टकवति प्रदेशे, पद्मपलाशाभ्यां कमलदलकोमलाभ्यां, पद्भ्यां पादाभ्यां, विचरसि। एवंविधस्य तेऽत्र विचरणं न घटत इति भावः ॥ २८ ॥

कृष्णप्रिया

नाथ चतुर्भुज हैं। चरण कमलों को चुमती वैजयन्ती माला गले में विराजमान थी। भगवान का मुखारविन्द अत्यन्त प्रसन्न और सौन्दर्य पूर्ण है। श्रीहरि के कर्णो में मकराकृत कर्णपूर जगमगा रहे हैं। अधरों पर स्नेहमयी कृपामयी मुस्कुराहट दीख रही है और नजरों की चितवन स्नेह की सुभग वर्षा कर रही है। भगवान् की चाल नवयुवा दर्शनीय सिंह किशोर की स्मृति करा रही है। परम विक्रम परिपूर्ण प्रभु का दर्शन से अत्यन्त आश्चर्य चकित बने हुए मुचुकुन्द राजा मुग्ध बन गये।

यद्यपि राजा विचक्षण मेधावी धीर गम्भीर पुरुष थे फिर भी भगवान का लोकोत्तर दिव्य श्रीविग्रह के दर्शन से आश्चर्य विभोर हो गये। प्रियतम प्रभुजी के तेज से आकर्षित चित्त मनीषी मुचुकुन्दजी अप्रतिम तेज से क्षणभर शंकित होकर नाथ को पूछने लगे ॥ २४-२५-२७-२७ ॥ राजा मुकुकुन्दजी ने कहा धृष्टता के लिये क्षमा करें! आप श्रीमान् कौन है? कण्टकों से भरे घोर इस जंगल में कमल-कोमल सुकुमार चरणों से विचर रहे हो। कहिये? इस गिरि कन्दरा में पधारने का क्या आशय है ॥ २८ ॥

किंस्वित्तेजस्विनां तेजो भगवान्[1] वा विभावसुः । सूर्यः सोमो महेन्द्रो वा लोकपालोऽपरोऽपि वा ॥२९॥
मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभम् । यद् [2]बाधसे गुहाध्वान्तं प्रदीपः प्रभया यथा ॥ ३० ॥
शुश्रूषतामव्यलीकमस्माकं नरपुङ्गव । स्वजन्म कर्म गोत्रं वा कथ्यतां यदि रोचते ॥ ३१ ॥
वयं [3]च पुरुषव्याघ्र ऐक्ष्वाकाः क्षत्रबन्धवः । मुचुकुन्द इति ख्यातो[4] यौवनाश्वात्मजः प्रभो ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—तेजस्विनाम्, तेजः, किंस्विद्, भगवान्, विभावसुः! सूर्यः! सोमः! महेन्द्रः! वा, लोकपालः! अपि, वा, अपरः, वा! ॥ २९ ॥ अथवा, त्वाम्, त्रयाणाम्, देवानाम्, पुरुषर्षभम्, मन्ये, यथा, प्रदीपः, प्रभया, तथा, यद्, गुहाध्वान्तम्, प्रभया, बाधसे ॥३०॥ हे नरपुङ्गव? अव्यलीकम्, अस्माकम्, स्वजन्म, कर्म, गोत्रम्, शुश्रूषताम्, यदि वा, रोचते, कथ्यताम् ॥३१॥ हे पुरुषव्याघ्र? वयम्, च, ऐक्ष्वाकाः, क्षत्रबन्धनः, हे प्रभो? यौवनाश्वात्मजः, मुचुकुन्द, इति, ख्यातः ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तेजोमूर्तिः प्रभावो दीप्तिर्वा ॥ ३० ॥ सर्वत्रापरितोषादाह। मन्य इति। पुरुषर्षभं श्रीविष्णुम्। गुहाध्वांतमंतस्तमः ॥ ३१-३२ ॥ वयं त्विति वंश्याभिप्रायेण बहुवचनम्। तेष्वहं मुचुकुंद इति प्रोक्त इति। युवनाश्वो मांधातुः पिताऽतो मांधाता यौवनाश्वः ॥ ३३-३८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तेजस्विनां ज्योतिष्मतां सूर्यादीनां पुंजीभूतमेकं तेजः। किं स्विदिति वितर्के। स्वामी तु तेजो मूर्तिः मूर्तिमत् प्रभावः प्रतापः, दीप्तिः प्रकाशः। विकल्पत्रयं तु तेजस्यवयवासंभवात्तथा प्रभावस्यापि चरमपक्षः साधीयान्। अपरः कुबेरादिः ॥ स्विद्वितर्के। किं तेजस्विनामखिलानां सूर्यादीनां पुंजीभूतं तेजः, अपितु नेत्यर्थः। तदपेक्षया तावतोप्यल्पप्रमाणत्वादिति भावः। एवमुत्तरत्रापि। टीकायां तेजोमूर्तिः तेजः शब्दो हि न मूर्तिवाची "तेजो बले च दीप्तौ च तेजो धाम्नि पराक्रमे। प्रभाव रेतसोश्च" इत्येतावन्त एवार्था विश्वप्रकाशादौ दर्शिताः। 'मूर्तः' इति निष्ठान्तो वा पाठः। तस्य प्रभावदीप्ताभ्यां प्रत्येकमन्वय इति महा भूततेजोंशरूपम्। तत्तेजोऽपि कियदित्याह—भगवान् भगवद्विभूतिरूपो महाभूततेजोऽधिष्ठातृरूपो देवो विभावसुरपि नेत्यर्थः। त्रयीतनुत्वेन तेजोऽपि महिष्ठम्। अन्यत्तद्वितर्क्य तमप्यल्पप्रमाणत्वेन खण्डयति-सूर्य इति। तेषामतापहारकत्वमनाह्लादकत्वञ्चाशंक्य चन्द्रं वितर्क्य तमपि खण्डयति-महेन्द्रः, तत्तत्सर्वदेवानामधिपोऽपि। ततोऽन्यत्रात्यतमनस्व्याह—लोकेति। वा शब्दः कटाक्षे ॥३०॥ सर्वत्र सर्वपक्षेषु। अन्तस्तमः अन्तःकरणाऽज्ञानम् "यो वेद निहितं गुहायाम्" इत्यत्र गुहापदमंतःकरणपरम्। प्रदीपो गुहान्तर्वर्त्ति ध्वान्तं यथेति ॥ तेभ्य ऊर्ध्वमपि विविच्याह—मन्य इति। त्रयाणां मध्ये पुरुषर्षभं विष्णुत्वमारभ्य महाभगवत्तापर्यंतवैभवत्त्वात्। सर्वपुरुषश्रेष्ठो यस्तं गुहयोर्बाह्याभ्यन्तरयोर्गिरिकन्दरहृद्रूपयोस्तमः यथा स्वं ध्वान्तं दुःखं च प्रभया तेजसा प्रदीप इवेति शश्वत्सर्वानुभूतत्वेन दृष्टांतितं न तु योग्यत्वेन ॥ ३१ ॥ अव्यलीकं सत्यम्। शुश्रूषतां श्रोतुमिच्छताम्। गोत्रं नाम वंशप्रवर्तकश्च "गोत्रं संभाव्यबोधे च काननक्षेत्रवर्त्मसु। कुलाख्ययोर्गिरौः पुंसि भूगोरक्षकयोस्त्रियाम् ॥" इति निरुक्तिः। नरपुंगवेति भूमिस्पर्शादिमनुष्यलीलाभिप्रायेण। अत एवाव्यलीकं निजप्रियं त्वज्जन्मामिशुश्रूषतामस्माकं सकाशे कथ्यतां भवतेति शेषः। तदनुक्तिः कर्मणि प्रयोगश्च गौरवेण 'व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि' इति विश्वः। गोत्रं नाम। यद्वा—अव्यलीकं निष्कपटं कथ्यतामित्यन्वयः। वा समुच्चये, विकल्पे वा। गुह्यत्वेप्येकतरमपि कथ्यतामित्यर्थः। यदि रोचत इति विनयोक्तिः ॥ ३२ ॥ पुरुषव्याघ्र पुरुषश्रेष्ठ "व्याघ्रः स्यांत्पुसि शार्दूले रक्तैरंडकरंडयोः। श्रेष्ठे नरादुत्तरस्थः कंटकार्यां तु योषिति ॥" इति मेदिनी। ऐक्ष्वाका इक्ष्वाकुकुलजाः ॥ अहो महत्तमस्य जन्मादिप्रश्ने नीचकस्य का शक्तिः, कथं वा तेन नीचे तत्कथ्यतामत आत्मनः समर्पणार्थमात्मन एव जन्मादिकं कथयेयं तत्प्रसंगादसौ स्वयमपि तत्कथयेच्च, यतो नरलील इति गूढाभिप्रायेणाह—वयमिति। तुशब्दो निजाल्पतामननाद्भिन्नोपक्रमे। ऐक्ष्वाका इक्ष्वाकव इत्यर्थः। क्षत्रबंधवो नीचक्षत्रिया इत्यपि विनयभावात् ॥ ३३ ॥

---

१. भगवांस्त्वं-वीर. विज.। २. यद् भाससे-विज.। ३. चयं तु-श्रीधर वंशी. जीव. वीर. विज. विश्व. शुक.; वयं च इह विख्याताः-प्रा. पा.। ४. प्रोक्तो-श्रीधर. वंशी. जीव. विज. विश्व.; ख्यातो-वीर।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वित् विनर्के। किं तेजस्विनामखिलानां पुञ्जीभूतं तेजः ? अपि तु नेत्यर्थः। तदपेक्षया तावतोऽप्यल्पप्रमाणत्वादिति भावः। एवमुत्तरत्रापि। अत्र टीकायां तेजोमूर्त्तिरिति तेजोरूपा मूर्त्तिरित्यर्थः। प्रभावो दीप्तिर्वेति, तच्च तेजः प्रभाव उच्यते दीप्तिर्वेत्यर्थः। तेजःशब्दो हि न मूर्त्तिवाची 'तेजो बले च दीप्तौ च तेजो धाम्नि पराक्रमे। प्रभावरेतसोश्च' इत्येतावन्त एवार्था विश्वप्रकाशादौ दर्शिताः। मूर्त्तिरित्यत्र मूर्त्त इति निष्ठान्तो वा पाठः; तस्य प्रभावदीप्ताभ्यां प्रत्येकमन्वय इति महाभूततेजोंशरूपं तत्तेजोऽपि कियदित्याह—भगवान् भगवद्विभूतिरूपो महाभूततेजोऽधिष्ठातृदेवो विभावसुरपि नेत्यर्थः। त्रयीतनुत्वेन ततोऽपि महिष्ठमन्यत्तद्वितर्क्य; तमप्यल्पप्रमाणत्वेन खण्डयति-सूर्य इति। तेषामतापहारकत्वमनाह्लादकत्वं चाशङ्क्य चन्द्रं वितर्क्य; तमपि तथा खण्डयति—सोम इति। प्रभावार्थमालम्ब्य महेन्द्रमपि तथा खण्डयति महेन्द्रस्तत्तत्सर्वदेवानामधिपोऽपि ततोऽन्यत्रात्यन्तमनास्त्वयाह—लोकेति। वाशब्दः कटाक्षे॥ २९॥ तेभ्य ऊद्ध्र्वमपि विविच्याह—मन्ये इति। त्रयाणां मध्ये पुरुषर्षभं विष्णुत्वमारभ्य महाभगवत्तापर्यन्तवैभवत्वात् सर्वपुरुषश्रेष्ठो यस्तं गुहयोः बाह्याभ्यन्तरयोः गिरिकन्दरहृद्रूपयोर्ध्वान्तं यथा स्वमन्धकारं दुःखं च प्रभया तेजसा प्रदीप इवेति शश्वत् सर्वानुभूतत्वेन दृष्टान्तितं न तु योग्यत्वेन॥ ३०॥ नरपुङ्गवेति भूमिस्पर्शादिमनुष्यलीलाभिप्रायेण अत एवाव्यलीकं निजप्रियं त्वज्जन्मादिशुश्रूषतामस्माकं सकाशे कथ्यतां भवतेति शेषः। तदनुक्तिः कर्मणिप्रयोगश्च गौरवेण 'व्यलीकमप्रियाकार्य्यवैलक्ष्येष्वपि' इति विश्वः। गोत्रं नाम यद्वा अव्यलीकं निष्कपटं कथ्यतामित्यन्वयः। वा समुच्चये। यद्वा, विकल्पे गुह्यत्वेप्येकतरमपि कथ्यतामित्यर्थः। यदि रोचत इति विनयोक्तिः॥ ३१॥ अहो महत्तमस्य जन्मादिपश्ने नीचस्य का शक्तिः ? कथं वा तेन नीचे तत्कथ्यताम् ? अतः आत्मनः समर्पणार्थमात्मन एव जन्मादिकं कथयेयं तत्प्रसङ्गादसौ स्वयमपि तत्कथयेच्च यतो नरलील इति गूढाभिप्रायेणाह—वयमिति। तुशब्दो निजाल्पतामननाद्भिन्नोपक्रमे। ऐक्ष्वाकाः इक्ष्वाकव इत्यर्थः। क्षत्रबन्धवो नीचक्षत्रिया इत्यपि विनयभावात्॥ ३२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तेजः किं साकारं स्यादिति पक्षान्तरमाह—भगवानिति। तस्यापि श्रीभगवद्विभूतित्वेन सर्व्वशक्तिमत्वात्, एवमिदमग्रेऽप्यनुवर्त्तयितव्यम्। अपि किमपरः श्रीब्रह्मा श्रीरुद्रो वेत्यर्थः॥२९॥ त्रयाणां मध्ये पुरुषोऽन्तर्य्यामी चासौ, अतएव ऋषभः श्रेष्ठश्च, तं श्रीविष्णुमित्यर्थः। गुहयोर्बाह्यान्तरयोर्गिरिकन्दरहृद्रूपयोस्तमः, तत्रान्तरं तमोवाधनं सद्यस्तत्सद्बुद्ध्यादिप्रकाशात्। एकदेशस्थस्यापि व्यापकत्वे दृष्टान्तः—प्रदीप इति; प्रभयेति तथा व्यापकत्वसिद्ध्यर्थम्॥ ३०॥ चतुर्भुजत्वादिकं साक्षात् पश्यन्नपि 'नहि देवा भुवं स्पृशन्ति' इत्यादिकमनुस्मरन् भूचरत्वादिना श्रीविष्णुत्वं निश्चेतुमशक्नुवन् लोकातीतरूपं मनुष्यं मन्यमानः सम्बोधयति—नरपुंगवेति। मनुष्यश्रेष्ठत्वादेव अव्यलीकं निजप्रियं तज्जन्मादि शुश्रूयताम्, तथा च विश्वः—'व्यलीकमप्रियाकार्य्यवैलक्ष्येष्वपि' इति; यद्वा, अव्यलीकं निष्कपटं कथ्यतामित्यन्वयः। अस्माकमिति बहुत्वं तत्सन्दर्शनादिनात्मनो बहुमानात्। वा समुच्चये; यद्वा, विकल्पे, गुह्यत्वेन जन्म न कथ्यते चेत्तर्हि किं करोषि ? किंवा अधुना चिकीर्षसीति ? कर्म कथ्यताम्। तदपि चेन्न कथ्यते, तर्हि गोत्रं नामैव कथ्यतामित्यर्थः। तदपि यदि ते रोचते, तर्हीति परमविनयोक्तिः॥ ३१॥ अहो महत्तमस्य जन्मादिप्रश्ने नीचस्य का शक्तिः ? परमधाष्टर्यापत्तिरेव, कथं वा तेन नीचे तत् कथ्यताम्, अत आत्मन एव जन्मादिकं कथयेयम्, तत्प्रसंगाद्वा स्वयमपि निजं तत् कथयेदिति गूढाभिप्रायेणाह-वयमिति। तु-शब्दो निजाल्पतामननाद् भिन्नोपक्रमे, ऐक्ष्वाका इक्ष्वाकव इत्यर्थः। क्षत्रबन्धवो नीचक्षत्रिया इत्यपि विनयभरात्, यौवनाश्वो युवनाश्वपुत्रो मान्धाता, तस्य नामाग्रहणं गुरुत्वात्, तस्यात्मनः पुत्रः। हे पुरुषव्याघ्रेति ऐक्ष्वाकत्वेनास्माकं नरश्रेष्ठत्वेऽपि भवानेव सर्व्वथा सर्वश्रेष्ठतम इति भावः। तत्र हेतुत्वेन सम्बोधयति—प्रभो इति, प्रभावविशेषादिति भावः॥ ३२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किंस्विदिति। किं वा त्वं तेजस्विनां यत्तेजस्तदेव मूर्त्तीभूतः किं वा भगवान् विभावसुरग्निः ? अथवा सूर्यः ? यद्वा, सोमेन्द्रयोरन्यतमः ? उत वरुणादन्यतमो लोकपालः॥ २९॥ सर्वत्रापरितोषादाह—मन्य इति। देवानाम् इन्द्रादीनामपि देवा ये ब्रह्मविष्णुरुद्रास्तेषां त्रयाणां मध्ये यः पुरुषोत्तमो भगवांस्तं त्वामहं मन्ये, कुतः ? यद्यस्माद्गुहाध्वान्तं हृदयगुहास्थमपि ध्वान्तमज्ञानं च बाधसे विधुनोषि यथा दीपः स्वप्रभया अन्धन्तमः तद्वत्॥ ३०॥ शुश्रूषतामिति। यद्यपि चतुर्भुजत्वादिलिङ्गैः परमात्मासाधारणैः पुरुषर्षभं मन्ये इति पुरुषोत्तमत्वं निश्चित्य नरपुङ्गवेति सम्बोधनानुपपत्तिः; तथापि पुनस्तथैव द्विभुजत्वाद्विशिष्टरूपेणावस्थितं तमवलोक्य तथा सम्बोधितं नरशब्दस्य पुरुषमात्रपरत्वं वा स्वस्य जन्म कर्म गोत्रं वाशब्दश्चार्थकः श्रोतुमिच्छतामस्माकमव्यलीकं निष्कपटं यथा तथा कथ्यतां यदि रोचते न वयं विधातुं प्रभव इति भावः॥ ३१॥ तर्हि तत्र जन्मादिकं कथयेत्यत आह—वयन्त्विति। वयमिति वश्याभिप्रायकं बहुवचनम्। हे पुरुषव्याघ्र! तावद्वयं क्षत्त्रबन्धवः क्षत्रेण वर्णेन

बध्यन्ते इति क्षत्त्रबन्धवः क्षत्रिया इत्यर्थः; तत्राप्यैक्ष्वाकाः इक्ष्वाकुवंश्याः 'दाण्डिनायन' ६।४।१७४) सूत्रे निपातनात्साधुः। बहुषु लुगभाव आर्षः। तत्राप्यहं यौवनाश्वात्मजः युवनाश्वस्यापत्यं यौवनाश्वो मान्धाता तस्यात्मज; पुत्रः मुचुकुन्द इति ख्यातः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तेजस्विनां ज्य तिष्मतां पुञ्जीभूतमेकं तेजः किंस्वित् सामान्योक्तं विशिनष्टि—भगवानिति ॥ २९ ॥ त्रयाणां ब्रह्मविष्णुशिवानां मध्ये पुरुषर्षभं पुरुषश्रेष्ठं विष्णुं मन्ये यदिति, गुहाध्वान्तमित्युपलक्षणं ब्रह्माण्डगुहाव्यापितिमिरमपि प्रदीपो गृहान्तर्वर्त्तिज्योतीरूपं परं न गृह्यते किन्तु सूर्योपि ॥ ३० ॥ अव्यलीकं सत्यं शुश्रूषतां श्रोतुकामानाम् ॥ ३१ ॥ ऐक्ष्वाका इक्ष्वाकुकुले जाताः ॥ ३२–३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गुह्योर्गिरिकन्दरमदन्तः करणयोर्ध्वान्तं तमस्तच्चान्धकारमविद्यां च प्रदीपो मणिमयः ज्ञानमयश्च ॥३०॥ शुश्रूषतामिति बहुवचने स्वगौरवप्रख्यापनं तत् प्रतिवचनश्रवणार्थमेव स्वस्य निकृष्टत्वे प्रत्युत्तरानर्हत्वात् ॥ ३१ ॥ तदपि मौनमालक्ष्य स्वोत्कर्षमपि व्यञ्जयन् तं परिचाययति वयन्त्विति। क्षत्रबन्धव इति स्वस्य निकर्षो निरहङ्कारित्वज्ञापनया प्रकर्ष एब ॥ ३२–३४ ॥

गूढार्थदीपिनी

स्वित् वितर्के। अपरः कुबेरादिः ॥ २९ ॥ ऋषभमुत्तमं श्रीविष्णुम्। गुहाध्वान्तं हृदयाज्ञानम् ॥ ३० ॥ अस्माकमिति शेषे षष्ठी। अन्यलीकं सत्यं सत्यं कथ्यताम्। गोत्रं नाम। यद्वा अन्यलीकं निष्कपटं शुश्रूषतामित्यत्रान्वेति ॥ ३१ ॥ ऐक्ष्वाका इक्ष्वाकुवंशीयाः। 'दाण्डिनायन' इत्यादिना निपातः। यौवनाश्वो युवनाश्वपुत्रो मान्धाता। क्षत्रबन्धवा क्षत्रियाधमा अपि इति विनयात् ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुरुषर्षभं पुरुषोत्तमम् ॥ ३० ॥ देवानां त्रयाणां पुरुषर्षभं त्वां मन्ये इत्यनेन पुरुषात्तमसम्भावनामात्रमुक्त्वाऽथ नरश्रेष्ठमात्रदृष्ट्या तज्जन्मादि पृच्छति—शुश्रूषतामिति। बहुवचनेन कुलतः पराक्रमतश्च स्वस्यापि नरश्रेष्ठत्वं दर्शितम् हे नरपुङ्गव ! नरश्रेष्ठ ! स्वजन्मादिकं कथ्यताम् ॥३१॥ यदि तव जन्मादिकथने कश्चित् सङ्कोचस्तर्हि अस्माकं शृण्वित्याशयेनाह—वयं त्विति। अत्र बहुवचनम् इक्ष्वाकुवंश्याभिप्रायेण। तेष्वहं मुचुकुन्द इति। निरभिमानत्वं क्षत्रबन्धव इत्यनेन द्योत्यते ॥ ३२–३८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सहसैवं वितर्क्य सर्वत्रारुचिमान्निष्कृष्य वक्ति ॥ मन्य इति। हे देव देवानां त्रयाणां हरिहरहिरण्यगर्भाणां मध्ये पुरुषर्षभं पुरुषं श्रेष्ठं विष्णुं मन्ये। स्वमननमन्यथाऽनुपपत्त्योपोद्बलयति ॥ यदिति। प्रदीपः प्रमया यथा दृष्यन्तं परिहरति तथा यद्यतो गुहाण्वान्तं गुहायामध्वान्ताभावो यथा तथा भाससे। न विष्णोरन्यस्यैवं विधं मानं सम्भवत्यतस्त्वं स एवेति भावः। गुहाया अ अध्वान्तं मार्गान्तप्रदेशपर्यन्तं भाससे इति वा। हृदयगुहाध्वान्तमज्ञानं यथा न तथा भाससे। त्वद्दर्शनमात्रेणेयान्विमर्शो मम जात इति भावः। यद्वाधस इति पाठः सरलो विरलार्थश्च ॥ ३० ॥ शुश्रूषतां श्रोतुमिच्छूनामव्यलीकमनृतं सत्यमिति यावत्। स्वजन्म तत्कर्म गोत्रं वा यदि रोचते तुभ्यं मां प्रति वक्तव्यमिति तर्हि कथ्यताम् ॥ ३१ ॥ अहं तु मम सर्वं वच्मि त्वं कः ? प्रवदेति प्रश्नतः प्राक् स्वस्वरूपादिकं स्वयमेवाह ॥ वयं त्विति ॥ पुरुषव्याघ्र ऐक्ष्वाका इत्यत्र विवक्षाभावान्न वृद्धिः। पुरुषव्याघ्रे त्वयि विज्ञापयाम इति विशेणान्वयो वा। ऐक्ष्वाका इक्ष्वाकुकुलजा बहुत्वे तद्राजलुगभाव आर्षः। दाण्डिनायननिपातितश्चैक्ष्वाकशब्दः। क्षत्रवन्धवः क्षत्रियास्तत्रापि युवनाश्वापत्यं मान्धाता तदपत्यमहमिति यौवनाश्वात्मजो मुचकुन्द इति प्रोक्तः। यद्यप्यनुशासनसिद्धं वयन्त्विति बहुवचनं तथाऽपि प्रतीयेताहं तातेन नाहं तादृश इति पुनरेकवचनतो वक्ति। मुचुकुन्द इत्यादिना ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तर्केण जानीहीत्याशङ्कायां तर्कानाह **किं स्वित्तेजस्विना**मिति द्वयेन। आदावहमेव वितर्के। सर्वेषामेव तेजस्विनां तेजः एकीभूतमेतदिति। अथवा। यत्पूर्वं कारणत्वेन तेजः सृष्टं 'तत्तेजोऽसृजते'ति, तद्वा तेजो भगवान्। जगत्कारणत्वात् तस्य भगवत्त्वम्, तेनाप्यापः सृष्टा इति। अथवा। त्वं विभावसुरग्निः मूर्तीभूतः। सर्वस्यापि तेजसः एकीभावे कारणाज्ञानात् द्वितीयः पक्षः। ततो मूलभूतस्य अत्रागमनासम्भवात् तदधिष्ठातृदेवताप्रश्नः। एवमाधिभौतिकादिभेदेन विकल्पत्रयम्। त्रितयमप्येतत् राजसमिति। सात्त्विकं त्रितयमाह **सूर्यः सोमो महेन्द्रो** वेति। एक एव सूर्यो देवतेति 'सूर्य आत्मा जगतस्तस्थुषश्चे'ति 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायण' इति च सूर्यो भवितुमर्हति। चतुर्भुजत्वदर्शनात्। ततोऽपि शीतरश्मिरमृतमयः सुन्दर इति सोमः। ततोऽप्यैश्वर्यदर्शनान्महेन्द्रो भविष्यसि। एवं सात्त्विकभेदानुक्त्वा मनुष्याकृतिमिव पश्यन् तृतीयं गुणं कल्पयन्निव तत्रोत्तमं

सम्भावनया निरूपयति **अपरो वा लोकपाल** इति । (अग्नि) वायुवरुणादीनामन्यतमः । ते हि लोकरक्षार्थं परिभ्रमन्ति । वेत्यस्य पक्षस्यानादरे ॥ २९ ॥ एवं कार्यकारणरूपाणि सम्भाव्य तान् पूर्वपक्षे निधाय; परमकारणरूपं पुरुषोत्तमं तं सम्भावयति—**मन्ये त्वा**मिति । देवानामपि देवानां ब्रह्मविष्णुशिवानां मध्ये पुरुषर्षभं विष्णुं त्वां मन्ये । तेषां वा **पुरुषर्षभः** । तेषां पुरुषः स्वराट् नारायणः । तस्याप्यृषभः पुरुषोत्तम इति वा । श्रद्धयैवं कल्पयतीत्याशङ्क्य; तत्र साधिकामन्यथानुपपत्तिमाह **यद्बाधस** इति । गुहान्धकारः न केनापि दूरीकृतः, उत्पत्तिशिष्टः सः । यो हि व्यवधायकं न मन्यते, तेन दूरीकर्तुं शक्यः । अतः पूर्वोक्तानां भगवत्तेजःसहितानामपि नात्र पराक्रमः । मूर्तीभूतानां तु बहुधा समागतानां गुहाध्वान्तनिराकरणं न दृष्टमिति, य एवास्माभिर्न दृष्टः पूर्वम्, स भगवान् भवितुमर्हतीति निश्चीयते । किञ्च । प्रदीपोऽप्यग्निर्भगवत्सहितोऽप्येवंविधप्रभायुक्तो न भवति । एकैव हि तत्र भगवच्छक्तिः । दीपे तु शक्तिद्वयम् । अत एव कारीषाद्दारुमयाच्च दीपस्य प्रभा महती, स्नेहाग्निस्थानाग्निसंयोगैः । 'वर्तिका अग्निस्थानं अग्नेस्तूषाधान'मिति श्रुतेः । 'एतद्वा अग्नेस्तेजो यद्धृत'मिति घृतमपि तथा । अग्निश्च तत्र संयुक्त इति । अतस्तस्य प्रभा कलिकामात्रस्यापि सर्वगृहव्यापिनी भवति । तथा **भवत्तेजः** गुहाभ्यन्तरस्थानं यत्कदापि न दृष्टं तद्दर्शयतीति पुरुषोत्तम एव भवितुमर्हसि । उत्कृष्टप्रभा व्यवहार्या दृष्टान्तत्वेनाभिमतेति दीपो दृष्टान्तः । अथवा । त्वमेव प्रकृष्टो दीपः, यतः स्वया प्रभया ध्वान्तं बाधस इति । अदृष्टपूर्वत्वेन पुरुषोत्तमत्वसिद्धिः ॥ २९ ॥ तर्हि ज्ञात्वा कथं प्रश्न इति चेत् ? तत्राह **शुश्रूषता**मिति । व्यलीकं सन्देहः, तद्रहितं यथा भवति तथा श्रोतुमिच्छास्माकम् । असमानत्वान्न संभाष्यस्त्वमित्याशङ्क्याह **नरपुङ्गवे**ति । नराकृतिर्दृश्यत इति । संव्यवहार्या नरा इति वयमपि संव्यवहार्याः । नराकृतित्वं च सहेतुकं प्रतिभातीति विशेषान् पृच्छति **स्वजन्म कर्म गोत्रं वेति** । स्वस्य जन्म किंरूपं, कथं प्रादुर्भूत इति कारणप्रश्नः । **कर्मे**ति प्रयोजनप्रश्नः । **गोत्र**मिति कस्मिन्वंशे प्रादुर्भाव इति वंशप्रश्नः । **वे**ति अन्यदपि वक्तव्यमित्यभिप्रायसूचकम् । एवं गुणत्रयस्वभावमिव पृष्ट्वा स्वस्य नियोजकत्वाभावायाह **कथ्यतां यदि रोचत** इति ॥ ३० ॥ नरत्वेऽपि तुल्या एव संभाष्या इत्याशङ्क्य स्वजन्मकर्मगोत्राणि निरूपयति त्रिभिः । **वयं चे**ति । चकारोऽर्थविशेषे । वयमपि नात्यन्तं हीना असम्भाष्याः । **किन्त्वैक्ष्वाकाः** इक्ष्वाकुषु जनपदेषु आविर्भूताः । जनपदशब्दादित्यञ् दांडिनायनेति निपातनादुकारलोपः । अतो देशेन कुलेन च प्रसिद्धिरुक्ता । **पुरुषव्याघ्रे**ति । पुरुषश्रेष्ठो मन्यत इति लौकिकन्यायेनापि विश्वासार्थमुक्तम् । **क्षत्रबन्धव** इति गर्वपरिहारः । पितृपितामहयोः स्वस्य च नामाह **मुचुकुन्द इति ख्यात** इति । प्रसिद्धिरपि सत्कीर्तिमत्त्वेन निरूपिता । युवनाश्वः पितामहः, यौवनाश्वो मान्धाता पिता, तस्यात्मज इत्यौरसः । **प्रभो** इति संबोधनं नियन्तरि अन्यथाकथनाभावाय । तादृशस्यात्रागमने हेतुं वदन् स्वपौरुषमपि ख्यापयति ॥ ३१ ॥

श्रीसुबोधिनीसारः

तेजस्विनां तेजः किं स्वित् इति वितर्के भगवान् विभावसुरग्निर्वा सूर्यश्चंद्र इंद्रो वाऽपरोऽन्यो लोकपालो वा ॥ २९ ॥ स्वमनीषितमाह । हे देव त्रयाणां देवानां ब्रह्मविष्णुशिवानां मध्ये पुरुषोत्तमं त्वामहं मन्ये । यद् यस्माद् गुहाया ध्वांतं तमो बाधसे निरस्यसि । प्रदीपः प्रभया दीप्त्या इव ॥ २९ ॥ हे नरपुंगव श्रोतुमिच्छतामस्माकम् अव्यलीकं निष्कपटं यथा भवति तथा स्वजन्म कर्म गोत्रं वा त्वयोच्यतां यदि रोचते तर्हि ॥ ३० ॥ आत्मनस्तावद् ब्रूते हे पुरुषव्याघ्र ! इक्ष्वाकुवंश्या राजानो वयं स्मः । अहं तु यौवनाश्वस्यात्मजः पुत्रो मुचुकुन्द इत्युक्तः । हे प्रभो ॥ ३१ ॥

विवरणटिप्पणी

मन्ये त्वामित्यत्र । यो **हि व्यवधायक**मिति । सूर्यादीनां तेजो भित्त्यादिव्यवधाने प्रतिबद्धं भवतीत्यर्थः । **भगवत्सहितोपी**ति । यज्ञात्मको भगवानग्नौ तिष्ठति । अत एव यज्ञपुरुषस्य ततः प्रादुर्भाव उक्तः । तथा च भगवद्युक्तोपीत्यर्थः । **एकैवेति** । तेज एवेत्यर्थः । **शक्तिद्वय**मिति । तेजः प्रभा चेत्यर्थः । **कारीषा**दिति । कारीषं ज्वाल्यते, दारु च ज्वाल्यते, उभयविधादपि प्रकाशकादित्यर्थः । **दीपस्ये**ति । वार्तिकामयस्येत्यर्थः । **अतस्तस्ये**ति । शक्तिद्वयस्य विद्यमानत्वादित्यर्थः । **प्रभया स्वये**ति पाठपक्षे आहुः **अथवे**ति ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किंशब्दार्थमेव विकल्प्य पृच्छति—किंस्विदिति । विभावसुः अग्निः । सोमश्चन्द्रः । अपरो लोकपालो वरुणाद्यन्यतमः ॥ २९ ॥ एवं विकल्प्य तेषु सर्वेष्वपरितोषात् स्वनिश्चितमाह—मन्ये इति । देवानामिन्द्रादीनामपि देवा ये ब्रह्मविष्णुरुद्रास्तेषां त्रयाणां मध्ये यः पुरुषर्षभः पुरुषोत्तमो भगवान् विष्णुस्तं त्वामहमन्ये । तत्र हेतुमाह—यदिति । यत् यस्मात् गुहाध्वान्तं गिरिगुहागतं तमः स्वप्रभया प्रदीप इव बाधसे विधुनोषि ॥ ३० ॥ हे नरपुङ्गव पुरुषोत्तम ! शुश्रूषतां श्रोतुमिच्छतामस्माकं अव्यलीकं निष्कपटं यथा भवति तथा स्वजन्म गोत्रं च कथ्यतामित्यन्वयः । 'वयं तु त्वां नियोक्तुं न प्रभव' इति सूचयन्नाह—यदि रोचत इति । बहुवचनं स्वगौरवख्यापनार्थम्, तेनोत्तरार्हत्वं सूचयति ॥ ३१ ॥ उत्तरयोग्यत्वमेव सूचयन् स्ववंशादिकमाह—वयं

त्विति । वयमिति वंशाभिप्रायकं बहुवचनम् । हे पुरुषव्याघ्र पुरुषश्रेष्ठ ! वयं तु क्षत्रबन्धवः क्षत्रेण वर्णेन बध्यन्ते सम्बध्यन्ते इति क्षत्रबन्धवः क्षत्रियाः, तत्राप्यैक्ष्वाकाः इक्ष्वाकुवंश्याः ! 'तवाग्रेऽन्यथाकथनं तु नोचितम्' इति सूचयन् सम्बोधयति–प्रभो इति । तत्राप्यहं यौवनाश्वात्मजः युवनाश्वस्य अपत्यं यौवनाश्वो मान्धाता, तस्यात्मजः पुत्रो मुचुकुन्द इति नाम्ना प्रोक्तः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

किस्विदिति ॥ किं स्विद्वितर्के तेजस्विनां सूर्यादीनां सर्वेषां पुञ्जीभूतं तेजः मूर्तिः प्रभावो दीप्तिर्वा किं तेजोधिष्ठाता भगवान् विभावसुरग्निर्वा किम् एवं सूर्यः सोमो महेन्द्रो वा अपरो लोकपालो वरुणाद्यन्यतमोऽपि वा ॥ २८ ॥ सर्वं विविच्याह— मन्ये इति ॥ देवानामिन्द्रादीनामपि देवा ये ब्रह्मविष्णुरुद्रास्तेषां त्रयाणां मध्ये यः पुरुषर्षभः पुरुषोत्तमो भगवान् विष्णुस्तं त्वामहं मन्ये । यद् यस्माद् गुहाध्वान्तं गिरिगुहागतं हृद्गुहागतं च ध्वान्तं तमो दुःखं च स्वप्रभया तेजसा ज्ञानेन च प्रदीप इव बाधसे विधुनोषि ॥ २९ ॥ शुश्रूषतामिति ॥ हे नरपुङ्गव पुरुषोत्तम ! यदि रोचते तर्हि शुश्रूषतां श्रोतुमिच्छताम् । आर्षः शता । अस्माकं शेषे षष्ठी । अव्यलीकं निष्कपटं यथा भवति तथा स्वजन्म कर्म गोत्रं च कथ्यताम् ॥ ३० ॥ वयमिति ॥ हे पुरुषव्याघ्र पुरुषश्रेष्ठ ! हे प्रभो ! वयं तु क्षत्रबन्धवः क्षत्रियाणां बन्धव इति वंश्याभिप्रायेण बहुवचनम् । तत्राप्यैक्ष्वाकाः इक्ष्वाकुवंश्याः 'दाण्डिनायन' इत्यादिना निपातः । तत्राप्यहं यौवनाश्वात्मजः युवनाश्वस्यापत्यं यौवनाश्चो मान्धाता तस्यात्मजः पुत्रो मुचुकुन्द इति नाम्ना प्रोक्तः ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सकलानां तेजस्विनां पुंजीभूतं तेजः किमसि ? वा विभावसुरनलस्त्वमसि ॥ २८ ॥ तेभ्योप्यधिकं विचिंत्याह मन्य इति । पुरुषर्षभं श्रीहरिम् ॥ २९ ॥ शुश्रूषतां श्रोतुमिच्छतां अव्यलीकं सत्यं ॥ ३० ॥ ऐक्ष्वाकाः । इक्ष्वाकुवंशोत्पन्नाः क्षत्रियाः । बहुवचनं तु वंशाऽऽभिप्रायेण । तेष्वहं मुचुकुंद इति नाम्ना प्रोक्तो विख्यातः ॥ ३१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कि स्विदिति । भवान् तेजस्विनां तेजः, अस्ति किंस्वित् ?। मूर्तं तेजस्विनां तेजस्त्वमसि किमित्यर्थः । वा अथवा, अपरः कश्चित्, लोकपालः । वरुणाद्यन्यतमो भवान् लोकपालो भवति किं ? वेत्यर्थः ॥ २९ ॥ सर्वत्रापरितोषादाह । मन्य इति । देवानामिन्द्रादीनामपि, देवा ब्रह्मविष्णुरुद्रास्तेषां, त्रयाणां मध्ये, पुरुषर्षभो यः पुरुषोत्तमो भगवांस्तं, त्वांमहं मन्ये । कुतः यद्यस्मात्, प्रदीपः प्रभया यथा, तद्वत् गुहाध्वान्तं बाधसे । गुहाध्वान्तनाशनेन न तव दीपोपमानत्वं हृदयकुहरगानादिध्वान्तं स्वप्रभया नाशयतस्तव तु ततोऽतीव विलक्षणत्वादिति भावः ॥ ३० ॥ शुश्रूषतामिति । हे नरपुङ्गव नरेषु श्रेष्ठ, स्वजन्मकर्मगोत्रं तव यस्मिन् कुले जन्म, यानि चारित्राणि, यन्नाम चेत्यर्थः । शुश्रूषतां श्रोतुमिच्छतामस्माकम्, अव्यलीकं यथा तथा, यदि वा रोचते, तर्हि, कथ्यताम् । एतत् कथनं विधापयितुं वयं न प्रभव इति भावः । यद्यपि चतुर्भुजत्वादिलिङ्गैः परमात्मसाधारणैः पुरुषर्षभं मन्ये, इति पुरुषोत्तमत्वं निश्चित्य पुनरत्र नरपुङ्गवेति सम्बोधनं कृतं तदनुपपत्तिः, तथापि भगवता वसुदेवदेवक्योरिवादौ चतुर्भुजतया स्वदर्शनं विधाप्य; ततो द्विजभुजरूपेण दर्शनं कारितं, ततस्तस्य तथाविवक्षया तथा सम्बोधितमिति द्विधेक्षणान्नानुपपत्तिः । यद्वा । पुरुषोत्तमनरपुङ्गवशब्दयोः समानार्थत्वादेवमुपपद्यत एव ॥ ३१ ॥ तर्हि त्वमादौ तव जन्मादिकं कथयेत्यत आह । वयमिति । वंश्याभिप्रायकं बहुवचनम् । हे पुरुषव्याघ्र, वयं तु, क्षत्त्रेण वर्णेन बद्धयन्ते, इति क्षत्त्रबन्धवः । क्षात्रेत्यर्थः । तत्रापि, ऐक्ष्वाकाः इक्ष्वाकुवंश्याः, 'दाण्डिनायन'—इत्यादि सूत्रे निपातनात् साधुः । तत्रापि. हे प्रभो, अहं यौवनाश्वस्यात्मजः युवनाश्वो मांधातुः पिता; अतो मांधाता यौवनाश्वस्तस्यापत्यमहमित्यर्थः । मुचुकुन्दः इति प्रोक्तः विख्यातः ॥ ३२ ॥

कृष्णप्रिया

क्या समस्त तेजस्वियों के पुञ्जीभूत आप कोई तेजोमूर्ति तो नहीं हो । नाथ ! कहिये साक्षात् अग्निनारायण हो ! अथवा तो सूर्य नारायण ! पूर्णचन्द्र ! देवराज इन्द्र ! या तो लोकपाल विशेष हो ॥ २९ ॥ महाराज ! मेरा तो यह मन्तव्य है कि ब्रह्मा विष्णु महेश्वर इन तीन देवताओं के और अन्य समस्त देवों के आराध्य देव साक्षात् नारायण है । जैसे तेजोमय दीपक अंधेरे को दूर कर देता है वैसे ही आप अपने श्री अङ्गों के दिव्यतेज से इस गुहा के अंधेरे को नष्ट कर रहे हैं ॥ ३० ॥ यदि नाथ ! आपका मन माने तो कृपया हमें अपना जन्म, कर्म और गोत्र बतलाइये; क्योंकि हम श्रवण के लिये सचमुच समुत्सुक है ॥ ३१ ॥ नाथ ! मैं क्षुद्र जीव; मेरा परिचय दे रहा हूँ, मैं इक्ष्वाकुवंशज हूँ, क्षत्रिय हूँ; मेरा नाम मुचुकुन्द है; और महाराजा युवनाश्व के कुलनन्दन मान्धाता राजा का पुत्र हूँ ॥ ३२ ॥

[1]चिरप्रजागरश्रान्तो [2]निद्रयोपहतेन्द्रियः । शयेऽस्मिन् विजने कामं केनाप्युत्थापितोऽधुना ॥ ३३ ॥
सोऽपि भस्मीकृतो नूनमात्मी [3]येनैव पाप्मना । अनन्तरं भवाञ्छ्रीमान्[4] लक्षितोऽमित्र[5]शासनः ॥ ३४ ॥
तेजसा तेऽविषह्येण भूरि [6]द्रष्टुं न शक्नुमः । [7]हतौजसो महाभाग माननीयोऽसि देहिनाम् ॥ ३५ ॥
एवं सम्भाषितो राज्ञा भगवान् भूतभावनः । प्रत्याह प्रहसन् वाण्या मेघना[8]दगभीरया ॥ ३६ ॥

कर्दमक्षमा

अन्वयः - चिरप्रजागरश्रान्तः, निद्रया, उपहतेन्द्रियः, अस्मिन्, विजने, कामं शये, अधुना, केन अपि उत्थापितः ॥३३॥ सः अपि, आत्मीयेन, एव, पाप्मना, नूनम्, भस्मीभूतः, अनन्तरम्, अमित्रशासनः, भवान्, श्रीमान्, लक्षितः ॥ ३४ ॥ अविषह्येण, ते, तेजसा, हतौजसः, भूरि, द्रष्टुम्, न शक्नुमः, हे, महाभाग ! देहिनाम्, माननीयः, असि ॥ ३५ ॥ एवम्, राज्ञा, सम्भाषितः, भूतभावनः, भगवान् मेघनादगभीरया, वाण्या, प्रहसन्, प्रत्याह ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

शये अशयिषि, वर्तमानसमीपे भूते लट् ॥ एवं जन्म नाम च कथयित्वा विनयादिना स्वस्यान्तरं भावं गोपयन्बाह्यं शयनकारणं कथयन्निजकर्माह—चिरेति । प्रजागरकारणाऽकथनञ्च विनयादेव ॥ ३३ ॥ आत्मीयेन तदीयेनैव । अमित्रशातनेति पादप्रहर्तृयवननाशनाभिप्रायेण ॥ नूनं वितर्के । आत्मीयेनैवेति स्वापराधः परिहृतो विनयश्च व्यंजितः । स्वस्यापराधाऽभावं परमभाग्यदशां च व्यंजयति—अनंतरमिति । 'श्रीमन्' इति-वा पाठः । भगवतैव निजशत्रुरसौ बुद्ध्या घातित इत्यपि बुद्धमित्याशयेनाह—अमित्रं शास्ति दंडयतीति तथा । 'अमित्रशातनः' इति पाठेऽपि स एवार्थः ॥ ३४ ॥ हतौजसो नष्टतेजसः । महैस्तेजोभिरासमंताद्भज्यते सेव्यत इति महाभाग, अतितेजस्विन्नित्यर्थः । अत एव माननीयोसीति ॥ तव तेजसा हतमोजो येषां तथाभूता वयं, भुवि किमर्थमत्रागतोऽसि किं वाधुना करिष्यसीत्यादिकं बहु प्रष्टुं न शक्नुमः । वक्तुमिति वक्तव्ये हतौजस्त्वादेव भावावरणाशक्तेः प्रष्टुमित्युक्तम् । 'द्रष्टुम्' इति पाठे द्रष्टुमिति कुतो वक्तुं प्रष्टुं वेत्यर्थः । एतावत्तु निर्णीतमित्याह—देहिनां ब्रह्मादीनां माननीयोसि । तच्च युक्तमेवेति संबोधयति—महल्लोकोत्तरं भागं माहात्म्यसमूहो यस्य हे तथाविधेति । भगशब्दात्समूहेऽण् प्रत्ययः ॥ ३५ ॥ एवमुक्तविधया । संभावितः पूजितः 'संभावितार्चितौ समौ' इति धरणिः । मेघनादा चासौ गभीरा निम्नार्था तया 'निम्नं गभीरं गंभीरम्' इत्यमरः ॥ अनुकंपया भूतमात्रं भावयति पालयितुं प्रवृत्तः किमुत तादृशमिति तत्राह । अतएव प्रहसन्निति, स्वभावानुवादः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं जन्म नाम च कथयित्वा विनयादिना स्वस्यान्तरं भावं गोपयन् बाह्यं शयनकारणं कथयन् निजकर्माऽऽह-चिरेति । प्रजागरकारणाकथनं च विनयादेव ॥ ३३ ॥ नूनं वितर्के आत्मीयेनैवेति स्वापराधः परिहृतः विनयश्च व्यञ्जितः स्वस्यापराधाभावो परसभाग्यदशां च व्यञ्जयति, अनन्तरमिति । श्रीमानिति श्रीमन्निति वा पाठः भवतैव निजशत्रुरसौ बुद्ध्या घातित इत्यपि बुद्ध इत्याशयेनाह—अमित्रं शास्ति दण्डयतीति तथा सः । अमित्रशातन इति पाठेऽपि स एवार्थः ॥ ३४ ॥ तव तेजसा हतम् ओजः प्रभावो येषां तथाभूताः वयं भूरि किमर्थमत्रागतोऽसि ? कुत्र वा यास्यसि ? किं वाऽधुना करिष्यसि ? इत्यादिकं बहु प्रष्टुं न शक्नुमः वक्तुमिति वक्तव्ये हतौजस्त्वादेव भावावरणाशक्तेः प्रष्टुमित्युक्तम् द्रष्टुमिति पाठे द्रष्टुमपि कुतो वक्तुं प्रष्टुं वेत्यर्थः । एतावत्तु निर्णीतमित्याह-देहिनां ब्रह्मादीनामपि माननीयोऽसीति । तच्च युक्तमेवेति सम्बोधयति-महत् लोकोत्तर भागं माहात्म्यसमूहो यस्य हे तथाविधेति भगशब्दात्समूहेऽण्प्रत्ययः ॥ ३५ ॥ अनुकम्पया भूतमात्रं भावयितुं पालयितुं प्रवृत्तः किमुत तादृशमिति तथा अत एव प्रहसन् । मेघेति स्वभावानुवादः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं जन्म नाम च कथयित्वा विनयादिना स्वस्यान्तरभावं गोपयन्, बाह्यं ज्ञापयन्, शयनकारणं कथयन् निजकर्माह—चिरेति । प्रजागरकारणाकथनञ्च विनयादेव, उपहतानि उपद्रुतानि इन्द्रियाणि यस्य सः । कामं यथेष्टम्, 'शये' इत्यात्मनो विषयभोगाद्यपेक्षा नास्तीति ज्ञापितम्, काममित्येव सुष्ठु बोधयति—अधुनैवेति । चिरनिद्रायामपि न कदाचित् पूर्वं विघ्नो जात इत्यर्थः ॥ ३३ ॥ नूनं वितर्के, आत्मीयेनैवेति निजापराधः परिहृतः, विनयो वा व्यञ्जितः, अनन्तरं सद्य एव श्रीमान् लक्ष्मीधरो

---

१. चिरं-विज. । २. निद्रयाऽ-वीर. विज. । ३. त्मने-प्रा. पा. । ४. श्रीमल्ल-श्रीधर. टि. । ५. शातन-श्रीधर. वंश. जीव. विश्व. ; शासनः-वीर. विज. ; नाशनः-प्रा. पा. । ६. प्रष्टुं-श्रीधर. टि. । ७. ततो वै त्वं-च. पु. टि. । ८. ह्लाद-विज. ।

भगवानिति प्राग्लक्षणैर्बुद्धः, श्रीमान् सर्वशोभायुक्तो लक्षितः । अहो मम भाग्यमिति भावः । 'श्रीमन्' इति क्वचित् पाठः । तदापि स एवार्थः । तदनन्तरं भवलक्षणाच्च भवतैव निजशत्रुरसौ बुद्धया घातित इत्यपि बुद्धमित्याशयेनाह—अमित्रं शस्ति दण्डयतीति तथा सः । पाठान्तरेऽपि स एवार्थः ॥ ३४ ॥ ननु भक्तवत्सलस्य मम सन्तोषार्थमन्यदपि निजवृत्तं कथयेति चेत्तत्राह—तेजसेति । तव तेजसा हतमोजः प्रभावो येषां तथाभूताः सन्तः, भूरि किमर्थमत्रागतोऽसि ? कुत्र वा यास्यसि ? किं वाऽधुना करिष्यसीत्यादिकं बहुलं प्रष्टुमपि न शक्नुमः, किं पुनः स्ववृतं कथयितुमित्यर्थः । पाठान्तरे बहुकालं द्रष्टुमपि न शक्नुमः । कुतः ? प्रष्टुं कथयितुं वेति । अतः केवलं त्वद्भक्तिरेव कार्य्येत्याह—देहिनां सर्वजीवानां माननीयोऽसीति । महत् लोकोत्तरं भागं माहात्म्यसमूहो यस्येति माहात्म्यार्थ-भग-शब्दात् समूहार्थेऽण्प्रत्ययः ॥ ३५ ॥ भक्तवात्सल्येन श्रीभगवांस्त्वात्मानमगोपयन्नुत्तरं ददावित्याह—एवमिति । उक्तप्रकारेण सुष्ठु भाषितो भूतभावितो भूतभावनः स्वभावत एव सर्वजीवपालकः, तत्रापि भगवान् भक्तवात्सल्याद्यशेषगुण-प्रकटकः, अतः प्रत्याह, प्रहसन् स्मयमानः श्रीमुखप्रसत्तिस्वभावादेव, तस्मिन् प्रसादविशेषाद्वा । मेघेत्यपि स्वभावादेव हर्षविशेषोदयेनाधुना तद्विशेषाद्वा, यद्वा, स्वस्य श्रीविष्णुत्वबोधनाय । तथा च श्रीविष्णुपुराणे (५।२३।२७) तस्य तन्निर्ह्रादे श्रीमुचुकुन्द-वाक्यम् 'तथाहि सजलाम्भोद-नादधीरतरं तव । वाक्यम्' इति ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ऐश्वर्यप्रसरणेन समर्थतेजसा हतौजसो वयं न शक्नुम इत्यन्वयः ॥ ३६–३८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

चिरं बहुकालं प्रजागरेण श्रान्तः; अत एव निद्रयोपहतान्यभिभूतानीन्द्रियाणि यस्य सोऽहमस्मिन्निर्जने देशे कामं यथेच्छं शये शयतिवानस्मि । अधुना केनापि केनचिदुत्थापितश्च ॥३३॥ यो मामुत्थापितवान् सोऽपि स्वीयेनैव पापेन हेतुना नूनं भस्मीकृतः; अस्मद्दृष्टिप्रसारस्तु निमित्तमात्रमिति भावः । अनन्तरम् अस्य भस्मीभावादनन्तरममित्रशातनः शत्रूणां शास्ता श्रीमान् भवाँल्लक्षितः दृष्टः मयेतिशेषः ॥ ३४ ॥ सोढुमशक्येन त्वतेजसाभिभूतदृष्टयो वयं त्वां भूरि चिरं प्रष्टुं न शक्नुमः महाभाग हे भगवन् ! हतमोजः सामर्थ्यं येषां तेषां कर्म सङ्कुचितज्ञानात्मकसामर्थ्यानामशानां मादृशां देहिनां माननीयोऽसि पूज्योऽसि भजनीयोऽसीति यावत् ॥ ३५ ॥ एवमिति । राज्ञा मुचुकुन्देनैवमुक्तो भगवान् प्रहसन् मेघगर्जितवद्गम्भीरया गिरा प्रत्युवाच ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हतौजसः नष्टतेजसः ॥ ३५ ॥ ह्लादः निःस्वनः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अमित्रशासनेति मन्ये मद्द्वारेण त्वयैव स्वशत्रुर्घातित इति भावः ॥ ३४–३६ ॥

गूढार्थदीपिनी

उपहतानि व्याकुलानि । कामं यथेच्छं शये अशयिषि । भूते लट् ॥ ३३ ॥ शातनः नाशकः ॥ ३४ ॥ भूरि चिरम् अधिकं वा ॥ ३५ ॥ सम्भाषितः पृष्टः । संभावित इति पाठे पूजितः ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

चिरं प्रजागरेण रणकरणक्षणे कामं यथेच्छं शये । अधुना केनापि पुरुषेणोत्थापितः ॥ ३३ ॥ आत्मीयेन पाप्मनैव सोऽपि मदुत्थापको भस्मीकृतोऽनन्तरममित्रशासनः श्रीमान्भवाँल्लक्षितः ॥ ३४ ॥ अविषह्येण ते तेजसा त्वां भूरि द्रष्टुं हतौजसो हतं नष्टं तेजो नायनं येषां ते तथा सन्तो विस्पष्टं द्रष्टुं न शक्नुमः । बहुवचनेन मादृशा बहवोऽसमर्था इति ध्वनयति । अतो देहिनां प्रशस्त-शरीरवतां सतां माननीयस्त्वमसि । लोकचेष्टकत्वं देहिनां मननीयश्श्रेष्ठः कोऽसीति ? वा ॥ ३५ ॥ एव राज्ञा सम्भाषितो भूतभावनो भगवान् । तं प्रति प्रहसन्मेघानां ह्लादो निर्ह्लादस्तद्वद्गभीरया वाण्याऽऽह प्रति सम्यगाहेति वा । तृतीयस्कन्धे प्रत्यङ्कमुख्याङ्कित-मन्दराणीति श्लोकतात्पर्यटीकायां ब्रह्मा प्रत्यङ्कवान्विष्णुः सम्यग्लक्षणवत्तम इति तन्त्रमालायां प्रतिशब्दः सम्यगर्थ इत्युक्तेः प्रतिशब्दः सम्यगर्थकः । प्रति तदाभिमुख्येन स्थितः । यथोक्तं तु प्रतिनरमित्यृग्भाष्यटीकयोः प्रतिः प्रतिरथश्च प्रतिरयमुपसर्गः । उपसर्गाश्च सति क्रियावचने तत्सम्बन्धिनो भवन्ति । असति ससाधनं क्रियामाहुः । तुविर्महाश्चासौ प्रतिः प्रतिस्थश्चेतीति । प्रत्याहेत्यखण्डतायां झटिति निराहेत्येव भायान्न भातव्यं तथेति व्याकृतिरे मिति ज्ञेयम् ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

चिरप्रजागर इति । बहुकालं देवरक्षार्थं चिरप्रजागरो जातः । ततः श्रमोऽपि जातः । ततो निद्रयोपहतानीन्द्रियाणि च जातानि । अतो निद्रोपभोगार्थं विजनेऽस्मिन् स्थाने शये, यथा न केनापि उत्थाप्येत । अयं देववत्तनिद्रया शयनं करोमीति न

कथयति । तथा सति ध्यानतपःप्रभृति सर्वं परित्यज्य तामस्यवस्था किमित्यङ्गीकृतेत्युपालभ्यः स्यात् । तदर्थं स्वखेदमेव वर्णयति । अतः **कामं** यथेष्टं शये । अत्रापि कश्चिदागत्योत्थानं कारितवानित्याह **केनाप्युत्थापितोऽधुनेति ।** स्वापराधशान्त्यर्थं तदज्ञानकथनम् । तस्य च दण्डो मया न कृतः, किन्तु स्वपापेनैव जात इत्याह **सोऽपि भस्मीकृत** इति । **आत्मीयेनैव** स्वकृतेनैव पापेन । 'न शयानं प्रबोधये'दिति निषेधोल्लङ्घनेन भस्मीकृतः । **नूनमिति** नात्र कोऽप्यस्मदपराध इति निरूपितम् । तदनन्तरमेव भवद्दर्शनं जातमित्यतोऽपि हेतोः न ममापराधः । अन्यथा तव दर्शनं न स्यात् । एतदर्थमेव पुनर्भगवन्तं वर्णयति **श्रीमानिति** । सर्वसौन्दर्ययुक्तः लक्ष्मीवांश्च । **अमित्रशासन** इति । शत्रुमारकस्त्वमेवेति त्वयैवायं प्रायेण मारितः ॥ ३३ ॥ तर्हि यथैतावन्निर्णीतम्, तथा जन्मकर्माण्यपि योगबलेनैव कथं न निर्णीयन्ते ? इत्याशङ्क्याह **तेजसा तेऽविषह्येणेति** । **अविषह्येण** निकटेऽपि स्थातुमशक्येन ते तेजसा भूरि पुनः पुनः द्रष्टुमपि न शक्नुमः : तस्य निदानजिज्ञासा दूरापास्तेति । अन्तर्दृष्ट्या द्रष्टव्यमित्याह **हतौजस** इति । हे महाभाग ते तेजसैव हतम् ओजः मनःशक्तिर्येषाम् । अतो दूरापास्तैव योगेन चिन्तनकथा । अन्यज्ज्ञातमस्तु न वा, द्वयं ज्ञायत इत्याह । हे महाभाग देहिनां च त्वं माननीय इति । त्रैलोक्यादधिकं भाग्यं दृश्यते । अत एव देहग्रहणमात्रेणैव अवश्यमिष्टमपेक्षितमिति सर्वेष्टपूरकः त्वं सर्वेषामेव माननीयः पूज्यः सेव्यश्चेत्यर्थः ॥ ३४ ॥ एवं तस्य विज्ञापितमाकर्ण्य तदर्थमेव समागत इति तत्रोत्तरमुक्तवानित्याह **एवं सम्भाषित** इति । सम्यक् भाषितः । राज्ञेति सोऽपि महान्, राजप्रश्ने चावश्यमुत्तरं देयमिति निरूपितम् । भगवांश्च निरूपित एत्रोत्तरे तस्य कृतार्थता भविष्यतीति जानाति । अतस्तथोत्तरं दत्तवान् । यद्यपि प्रकारान्तरेणापि तदुद्धारं कर्तुं शक्तः, तथापि तत्कृपयापि तथोक्तवानित्याह **भूतभावन** इति । **प्रहसन्निति** विशेषेण मोहितवान् । तर्ह्यहितकारी स्यादित्याशङ्क्याह **मेघनादगभीरयेति** । मेघनादादपि अधिकगम्भीरया सर्वथा तापनाशिकया ॥ ३५ ॥

श्रीसुबोधिनीसारः

चिरं प्रजागरेण श्रांतः । निद्रया उपहतानींद्रियाणि यस्य सोहं विजने निर्जनेऽस्मिन् वने कामं स्वैरं शये । केनाप्यधुना उत्थापितः ॥ ३२ ॥ कासावित्यत आह स्वीयेन पापेनैव सोपि उद्‌बोधयिता भस्मीभूतः अनन्तरं तत्क्षणे एव श्रीमान् शत्रुहंता भवान् लक्षितो दृष्टवानसि ॥ ३४ ॥ ते तवाविषह्येण सोढुमशक्येन तेजसा भूरि बहु द्रष्टुं वयं न समर्थाः स्मः; यतो हतौजसस्तिरस्कृतदीप्तयः । हे महाभाग देहिनां माननीयोसि पूज्योसि ॥ ३५ ॥ एवं राज्ञा मुचुकुन्देन संभाषितो भूतपालको भगवान् प्रहसन् सन् मेघशब्दगम्भीरया वाण्या प्रत्याह ॥ ३६ ॥

गोस्वामिश्रीगिरधरलालकृता बालप्रबोधिनी

सोऽहं देवैः प्रार्थितः तेषां रक्षां कुर्वन् चिरप्रजागरेण श्रान्तः निद्रयाभिभूतानीन्द्रियाणि यस्य सोऽस्मिन् विजने देशे कामं यथेच्छं शये शयितवान् केनाप्यधुनोत्थापितोऽस्मि ॥ ३३ ॥ यो मामुत्थापयितवान् सोऽपि स्वीयेनैव पापेन 'शयानं न प्रतिबोधयेत्' इति वाक्योल्लङ्घनजनितेन नूनं भस्मीकृतः, अस्मदृष्टिप्रसादस्तु निमित्तमात्रमित्याशयः । तदनन्तरं च श्रीमान् भवान् लक्षितो मया दृष्टः । 'त्वयैव अनेन उपायेन स नाशितः' इति सूचयन्नाह—अमित्रशातन इति, शत्रूणां शास्ता ॥ ३४ ॥ महान् भागो भक्तानां भोगो यस्मात्तत्सम्बोधनं हे महाभागेति । वयं तु भूरि चिरं त्वां द्रष्टुमपि न शक्नुमः । तत्र हेतुमाह—ते तव अविषह्येण सोढुमशक्येन तेजसा हतमोजः दर्शनसामर्थ्यं येषां ते इति, अतो देहिनां मादृशां त्वं माननीयोऽसि इति ॥ ३५ ॥ राज्ञा मुचुकुन्देन भगवानेवं सम्यक् सत्कारपूर्वकं भाषितः पृष्टः सन् प्रहसन् मेघगर्जितवद्‌गभीरया वाण्या तं प्रत्याहेत्यन्वयः । एवं कृपयोत्तरदाने हेतुं सूचयन्नाह—भूतभावन इति । भक्तजनपालक इत्यर्थः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

चिरेति । सोऽहं देवैः प्रार्थितः तेषां रक्षां कुर्वन् चिरप्रजागरेण श्रान्तः निद्रगा उपहतान्यभिभूतानींन्द्रियाणि यस्य सोऽस्मिन् विजने देशे कामं यथेच्छं शये शयितवान् केनाप्यधुनोत्थापितोऽस्मि ॥ ३२ ॥ सोऽपीति । यो मामुत्थापितवान् सोऽपि आत्मीयेन स्वीयेनैव पापेन शयानं न प्रबोधयेदिति वाक्योल्लङ्घनजनितेन नूनं भस्मीकृतः । मद्दृष्टिप्रपातस्तु निमित्तमात्रमित्याशयः । तदनन्तरं च अमित्राणां शातनो नाशकः श्रीमान् भवान् लक्षितः ॥ ३३ ॥ तेजसेति । हे महाभाग ! ते तव अविषह्येण तेजसा हतमोजा दर्शनसामर्थ्यं येषां ते वयं तु भूरि चिरं त्वां द्रष्टुमपि न शक्नुमः । कुतस्तत्त्वतो ज्ञातुं तथापि त्वं देहिनाम्माननीयोऽसीत्येतावदेव ज्ञायते ॥ ३४ ॥ एवमिति । राज्ञा मुचुकुन्देन भूतभावनः भगवानेवं सम्यक् सत्कारपूर्वकं भाषितः पृष्टः सन् प्रहसन् मेघस्य नादो गर्जितं तद्वद् गभीरया वाण्या तं प्रत्याह स्म ॥ ३५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विजने जनवर्जितस्थाने कामं यथेच्छं शये ॥ ३२ ॥ अमित्रशातनः शत्रुनाशनः ॥ ३३ ॥ हतौजसो वयम् ॥ ३४-३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चिरेति ॥ चिरं बहुकालं यः प्रजागरस्तेन श्रान्तः अत एव, निद्रया उपहतान्यभिहतानि इन्द्रियाणि यस्य सोऽहं, अस्मिन् विजने निर्जने देशे, कामं, शये शयितवानस्मि । अधुना, केनापि केनचित्पुरुषेणेत्यर्थः । उत्थापितश्च ॥ ३३ ॥ सोऽपीति । यो मामुत्थापितवान्, सोऽपीत्यर्थः । आत्मीयेन स्वीयेनैव, पाप्मना पापेन हेतुना, नूनं भस्मीकृतः । अस्मद्दृष्टिप्रसारस्तु निमित्तमात्रमिति भावः । अनन्तरं तस्य भस्मीभावादनन्तरमित्यर्थः । अमित्रशातनः शत्रूणां शास्ता, श्रीमान् भवान्, लक्षितो मया दृष्टः ॥ ३४ ॥ तेजसेति । अविषह्येण सोढुमशक्येन, ते तव, तेजसा, हृतमोजः सामर्थ्यं येषां ते, अभिभूतदृष्टयो वयमित्यर्थः । त्वामिति शेषः । भूरि चिरं, द्रष्टुं, न शक्नुमः । हे महाभाग भगवन्, देहिनां कर्मसंकुचितज्ञानात्मकसामर्थ्यानामज्ञानां मादृशां शरीरिणामित्यर्थः । माननीयः, असि । पूज्योऽसि भजनीयोऽसीति यावत् ॥ ३५ ॥ एवमिति ॥ राज्ञा मुचुकुन्देन, एवमुक्तप्रकारेण, संभाषित उक्तः, भूतभावनो जगत्स्रष्टा, भगवान्, प्रहसन् सन्, मेघनादगभीरया मेघगर्जितवद्गभीरतायुतया, वाण्या वाचा, प्रत्याह प्रत्युवाच ॥ ३६ ॥

कृष्णप्रिया

चिरकाल के प्रजागर के कारण मैं थक गया था । निद्रा ने मेरी समग्र इन्द्रियों की सम्पूर्ण शक्ति छीन ली थी । नींद ने मुझे बेकाम बना दिया था । विश्राम के लिये मैं इस विजन में गुफा के एकान्त स्थल में अकेला अचिंत वन सो रहा था, किसी अनजान मनुष्य ने मुझे अभी जगा दिया ॥ ३३ ॥ वह खुदी के पापों से ही खुद भस्म हो गया है इतना मेरा ख्याल है । आगे की बात में शत्रु विनाशक सर्व सुन्दर आपने मुझे दर्शन दिया ॥ ३४ ॥ नाथ आप सर्व के सर्वथा सम्माननीय है । आपका लोकोत्तर दिव्य और असह्य तेज से मेरी बुद्धि और शक्ति कुण्ठित हो गई है । मैं सुदीर्घ काल तक आपको देख भी नहीं सकता ॥ ३५ ॥ प्राणीमात्र के मङ्गल कर्त्ता भगवान् श्रीकृष्ण ने राजा मुचुकन्द की वार्ता सुनी और सस्मित मुख से मेघनाद गम्भीर वाणी से मुचुकुन्द को कहा ॥ ३६ ॥

श्रीभगवानुवाच

जन्मकर्माभिधानानि सन्ति मेऽङ्ग सहस्रशः । न शक्यन्तेऽनुसंख्यातुमनन्तत्वान्म[1]यापि हि ॥ ३७ ॥
[2]क्वचिद् रजांसि विममे पार्थिवान्युरुजन्मभिः । गुणकर्माभिधानानि न मे जन्मानि कर्हिचित् ॥ ३८ ॥
कालत्रयोपपन्नानि जन्मकर्माणि मे नृप । अनुक्रमन्तो नैवान्तं गच्छन्ति परमर्षयः ॥ ३९ ॥
तथाप्यद्यतनान्यङ्ग शृणुष्व गदतो मम ।
विज्ञापितो विरञ्चेन[3] पुराहं धर्मगुप्तये । भूमेर्भारायमाणानामसुराणां क्षयाय च ॥ ४० ॥

कवंमक्षमा

अन्वयः -श्रीभगवान् उवाच—अङ्ग ! जन्मकर्माभिधानि, मे, सहस्रशः, सन्ति, अनन्तत्वात्, मया, अपि, हि, अनुसंख्यातुम्, न, शक्यन्ते ॥ ३७ ॥ क्वचित्, उरुजन्मभिः, पार्थिवानि, रजांसि, विममे, कर्हिचित्, मे, गुणकर्माभिधानि, जन्मानि, न, विममे ॥ ३८ ॥ हे नृप ? परमर्षयः, कालत्रयोपपन्नानि, मे, जन्मकर्माणि, अनुक्रमन्तः, न, एव, अन्तम्, गच्छन्ति ॥ ३९ ॥ अङ्ग तथा, अपि, अद्यतनानि मम, गदतः, शृणुष्व; पुरा, अहम्, विरञ्चेन धर्मगुप्तये, च, भूमेः, भारायमाणानाम्, असुराणाम्, क्षयाय, विज्ञापितः ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

क्वचित्कदाचित्कश्चिद्यद्यपि रजांस्यपि विममे गणितवांस्तथापि जन्मानि कर्माणि न विमिमीते ॥ ३९-४२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मयापीति मत्कर्तृकसंख्याकत्वेप्यनंतत्वहानिः स्यादिति भावः । नैतावता मत्सार्वज्ञ्यमपि त्रपते, सतोऽज्ञानस्यैव सार्वज्ञ्यनाशकत्वादिति । तानि च सहस्राणि अनुसंख्यातुं संख्यानसदृशमपि कर्तुम् 'अनु हीने सहार्थे च पश्चात्सादृश्ययोरनु' इति विश्वः । हि निश्चितम् ॥३७॥ अनंतत्वमाह—कश्चिदिति । चिदव्ययमत्रावधारणे ज्ञेयम्, तथा च को ब्रह्मैव सर्वस्रष्टृत्वात् ॥३८-३९॥ तथापि पार्थिवरजोगणकत्वेपि । स एवोरुजन्मभिरपि, स्वामिना जायत इति जन्मानि कर्माणीत्यर्थः कृतः । किंभूतानि—गुणाः कर्माणि

---

१. ममापि-विज. । २. कश्चिद्-विज. । ३. विरिञ्चेन-श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. ।

जन्मान्यभिधानानि नामानि च विद्यंते येषु तानीत्यर्थः। इह मत्वर्थीयोच्। 'जन्म स्याज्जनने देहे वंशे स्थाने च कर्मणि' इति निरुक्तिः। 'कर्म व्याप्ये क्रियायां च जनने मरणेऽपि च' इति च। विपूर्वात् 'माङ्–माने' अस्माल्लँडर्थे लिंट्। विममे = विमिमीते। तथापि मे जन्मानि न विमिमीत इत्यर्थः। कीदृशानि ? गुणैः कर्मभिश्चाभिधानानि नामानि यत्र तादृशानि। टीकायां तु जन्मानीति कर्माण्युपलक्षयत्युत्तरानुरोधात्। न मे जन्मानीत्यन्वय इति चित्सुखः ॥ ३९ ॥ अनुक्रमन्तो नितरां गणयन्तः। परमर्षयो वशिष्ठादयः। कालेति सार्द्धकम्। कालत्रय उपपन्नानि सिद्धानि, भूते वा भविष्यति वा वर्तमाने वा कानिचिदपीत्यर्थः। कर्माणीति गुणनाम्नामुपलक्षणम्। अनुक्रमन्तः क्रमेण गणयन्तो न गच्छन्ति 'यतो वाचो निर्वर्तन्ते' इत्यादेः। एव निर्धारणे। परमर्षयो वेदांता अपि। तथापि भगवदनुरोधेनाद्यतनानि सांप्रतिकानि परमदुरूहाण्यपि गदतो मम कथयतो मत्तः सकाशाच्छृणुष्वमात्रं न तत्त्वतो वा परिणामतो ज्ञातुमिच्छेत्यर्थः ॥ ४० ॥ यद्यपि नान्तं गच्छन्ति तथापि। अद्यतनान्याधुनिकानि। भारायमाणानां भारवदाचरताम् 'कर्तुः क्यङ्–' इति क्यङ्। विज्ञापित इति सार्द्धकम्। धर्मगुप्तये साधूनां रक्षणायेत्यर्थः ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तानि च सहस्राणि अनुसङ्ख्यातुं सङ्ख्यातसदृशमपि कर्त्तुम् 'अनु हीने सहार्थे च पश्चात्सादृश्ययोरपि' इति विश्वः हि निश्चितम् ॥ ३८ ॥ विममे विमिमीते तथापि मे जन्मानि न विमिमीतेत्यर्थः। कीदृशानि ? गुणैः कर्मभिश्चाभिधानानि नामानि यत्र तादृशानि। टीकायां जन्मानीति कर्माण्युपलक्षयति–उत्तरानुरोधात् न मे जन्मानीत्यन्वय इति चित्सुखः ॥ ३९ ॥ कालेति सार्द्धकम्। कालत्रये उपपन्नानि सिद्धानि भूते वा भविष्यति वा वर्त्तमाने वा कानिचिदपीत्यर्थः। कर्माणीति गुणनाम्नामुपलक्षणम्। अनुक्रमन्तः क्रमेण गणयन्तः न गच्छन्ति 'यतो वाचो निवर्तन्ते' इत्यादेः एव निर्द्धारणे परमर्षयः वेदान्ता अपि तथापि भवदनुरोधेनाद्यतनानि साम्प्रतानि परमदुरूहाण्यपि गदतो मम कथयतो मत्तः सकाशाच्छृणुष्वमात्रं न तु तत्त्वतः परिमाणतो वा ज्ञातुमिच्छेत्यर्थः ॥ ४० ॥ विज्ञापित इति सार्द्धकम्। धर्मगुप्तये साधूनां रक्षणायेत्यर्थः ॥ ४१ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अंगेति सादरसम्बोधने। अनु सादृश्ये, तथा च विश्वः—'अनु हीने सहार्थे च पश्चात् सादृश्ययोरपि' इति। केनचिद्रज आदि–दृष्टान्तेनापि सङ्ख्यातुम्, हि निश्चितम्। ननु तर्हि सर्वशक्तिमत्त्वमाहात्म्यहानिः स्यात् ? तत्राह—अनन्तत्वादिति। खपुष्पाद्यज्ञानेन सर्व्वज्ञस्य ज्ञानाहानेरिति भावः ॥ ३६ ॥ 'विममे' इति सम्भावनायामतीतप्रत्यय आर्षः, विमिमीतेत्यर्थः। कर्म्मादिवद् गुणानामप्यानन्त्येनापृष्टानामपि प्रसंगात्तेषां कथनं ज्ञेयम्। गुणादीनीति लेख्ये जन्मानीत्यादिकं लेखकभ्रमात्। यद्वा, अत्र मूलपाठान्तरमनुसन्धेयम्। तच्च न मे जन्मानीत्यन्वय इति व्याख्या चित्सुखस्यापि सम्मता, अन्यथा यथावस्थितपाठे तादृशलिखनानुपयोगः स्यादिति दिक् ॥ ३७ ॥ कालत्रये उपपन्नानि सिद्धानि भूतानि वर्त्तमानानि भविष्याणि चेत्यर्थः। जन्मकर्म्माण्यपि किं पुनर्गुणनामानि, तेषां ततोऽप्याधिक्यादित्यर्थः। तत्र (भा० १०।१४।७) 'गुणात्मनस्तेऽपि गुणान् विमातुम्' इत्यादिवचनतो गुणानां तत् प्रसिद्धमेव, गुणकर्म्मोत्थत्वान्नाम्नामपि तत् सुसिद्धमेव, जन्मनामप्यानन्त्यं काले काले बहुधाविर्भावात्, एकस्यैव रूपस्य च वैविध्याद् बाहुल्याच्च, तत्र च कालस्यानन्त्यादिति दिक्। अनुक्रमन्तः क्रमेण गणयन्तः, न गच्छन्ति नाद्यापि यान्ति, एव निर्धारणे, परमर्षयो भृग्वादयोऽपि। हे नृपेति सद्राजत्वेन परमर्षीणामपि समागमात् त्वयैतद्विज्ञायत एवेति भावः ॥ ३८ ॥ अद्यतनानि आधुनिकानि, पञ्चमार्थे षष्ठी, गदतो मत्तः सकाशादिति श्रद्धावधानाद्यर्थम्, विशेषेण क्षीरसागरतीरे श्रीरुद्र-भूम्यादिभिः सह विविधनियमपूर्वकोपस्थानादिना ज्ञापितः। धर्म्मगुप्तय इति साधूनां पालनं सिद्धमेव ॥ ३९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीम्

क्वचिज्जन्मभिः उपलक्षितः रजांसि लोकान् ॥ ३९–४२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

उक्तिमेवाह–जन्मेत्यादिना, इत्युक्त इत्यतः प्राक्तनेन। तावद्यत्पृष्टं स्वजन्मकर्मेत्यादि तस्योत्तरमाह—जन्मेति। अङ्ग हे मुचुकुन्द ! मम जन्मादीनि सहस्रशः सन्ति अतस्तान्यत्राधुना मयाऽपि सङ्ख्यातुम् एतावन्तीति परिच्छिद्य वक्तुं न शक्यन्ते। ननु किमनादिसंसरणशीलैरस्मदादिभिरिव विस्मृतत्वान्न शक्यन्ते ? इत्याशङ्कावारणायानन्तत्वान्ममापीत्युक्तम्। अयं भावः—यद्यपि भवज्जन्मादीनि कर्मसङ्कुचितज्ञानैर्भवद्भिर्विस्मृतत्वाद्बहुत्वाच्च न सङ्ख्यातुं शक्यन्ते, तथापि सर्वज्ञेन मया तु शक्यन्त एवास्मज्जन्मादीनि त्वानन्त्यत्वान्नैव शक्यन्ते। नचैवं सर्वज्ञत्वहानिरानन्त्यानामानन्त्यज्ञानमेव हि सर्वज्ञत्वावहं, न तु तेषां परिच्छिन्नत्वज्ञानं तस्यायथार्थत्वेनाज्ञत्वावहत्वादिति ॥ ३८ ॥ दुःसङ्ख्येयत्वमेवोपपादयति–क्वचिदिति। यद्यपि क्वचित् कदाचित् कश्चित्सूक्ष्मबुद्धिमान् बहुभिः जन्मभिः पृथिव्याः सम्बन्धीनि रजांसि विममे गणयेत्तथापि मम गुणकर्माभिधानानि न विममे न गणयितुं शक्नुयादित्यर्थः। 'विष्णोर्नुकं वीर्याणि प्रावोचं यः पार्थिवानि विममे रजांसि' इति श्रुत्यर्थोऽत्रानुसंहितः ॥ ३९ ॥ तथाहि परमर्षयः

पराशरवैशम्पायनशौनकादयः कालत्रयोपपन्नानि कालत्रयोपयुक्तानि कालत्रयगोचराणि इति यावत् जन्मानि कर्माणि च अनुक्रमन्तः अनु वर्णयन्तोऽद्याप्यन्तं पारं नैवं गच्छन्ति ॥ ४० ॥ यद्यप्येवं तथाप्यङ्ग हे मुचुकुन्द ! अद्यतनान्याधुनिकानि मम जन्मादीनि गदतो मत्तः शृणु धर्मपरित्राणार्थं भूमेर्भारभूतानामसुराणामासुरसम्पत्त्याभिजातानां क्षयाय च ब्रह्मणा प्रार्थितोऽहं यदुकुले तत्राप्यानकदुन्दुभेर्वसुदेवस्य गृहे गृहिण्यामिति भावः। अवतीर्णवानस्मि ज्ञानशक्त्यादिस्वस्वभावमजहदेव जात इत्यवतीर्णशब्दप्रयोगाभिप्रायः। एवमाधुनिकं जन्म प्रोक्तम्। अथ नामधेयमाह–वदन्तीति। वसुदेवसुत इत्यस्य हेतुत्वद्योतको हिशब्दः वसुदेवसुतत्वाद्वासुदेवेति वदन्ति। सन्धिरार्षः। प्रातिपदिकमात्रानुवादो वा। तस्यैव नामधेयत्वात्प्रदर्शनीयत्वाद्विभक्तेः साधुत्वार्थत्वाच्च ॥ ४१-४२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मातुं सङ्ख्यातु न शक्यन्ते, कुतः ? अनन्तत्वात् अतोऽनन्तानामनन्ता इत्येव परिसंख्यानमन्यथानन्तत्वहानिः ॥ ३८ ॥ अनन्तत्वमाह—कश्चिदिति। कश्चित् क इव ब्रह्मेव सोऽपि मे जन्मानि गुणकर्माभिधानानि न विममे ॥ ३९ ॥ अनुक्रमन्तः निरन्तरं पठन्तः ॥ ४० ॥ भारायमाणानां भरवदाचरतां 'कर्तुः क्यङ् सलोपश्च' (३।१।११) इति पाणिनिः ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

परमनिरहङ्कारित्वेपि मद्भवचनश्रवणार्थमेव स्वोत्कर्षमसौ द्योतयत्यतोऽहमपि परमनिरहङ्कारोऽपि निजमुखेनैवास्मै स्वोत्कर्षमभिधास्यामि 'ये यथा मां प्रपद्यन्ते' इति मदुक्तेरिति विमृश्याह—जन्मेति ॥३८॥ विममे कश्चिद् गणयामास ॥३९-४४॥

गूढार्थदीपिनी

अङ्ग हे राजन्। अनुसंख्यातुं गणयितुम् ॥ ३६ ॥ क्वचित्कदाचित्कश्चित्। यद्यपि रजःकणान् विमिमीते गणयति लँडर्थे लिट्। उरुभिर्बहुभिः ॥ ३७ ॥ कालत्रयसम्बन्धीनि। अनुक्रमन्तो गणयन्तः। अन्तं पारम् न गच्छन्ति। परमर्षयो वसिष्ठादयः ॥ ३८ ॥ तथापीति अर्द्धम् ॥ ३९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

क्वचित् कदाचित् कश्चिदुरुजन्मभिः यद्यपि रजांसि विममे गणितवान् तथापि मे गुणादीनि न विमिमीते, तथा च श्रुतिः 'विष्णोर्नु कं वीर्य्याणि प्रावोचं यः पार्थिवानि विममे रजांसि' इति ॥ ३९-४२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वजन्म कर्म गोत्रं वा कथ्यतां यदि रोचत इत्युत्तरयति ॥ जन्मेति। जन्मानि कर्माण्यभिधानानि च। अङ्ग मुचकुन्द ! सहस्रशोऽपराणि सन्ति। तव जन्मादीयताज्ञा वर्ततेति। नेत्याह—नेति। न शक्यन्ते तु मातुं शक्यन्ते नु व्यातुमिति च पाठौ। सख्यं भजतो मातुं सङ्ख्यातु मातुमित्यर्थः। कुतोऽनन्तत्वात् ममापि हि। न ह्यनन्तमन्यान्प्रति यत्तन्नानन्तमनन्तप्रतीतिः सम्भवति। उक्तं चैकादशतात्पर्ये—अनन्तमिति वेत्तीशस्त्वनन्तवत्तथा। अनन्तस्य तु सङ्ख्याने न तु सर्वज्ञता भवेदित्यादि। मेङ्गेत्यत्र मा इङ्गेति छेदः। सङ्ख्यातुं मा इङ्ग न गच्छ प्रयत्नं न कुर्विति यावदिति वा। अतो म इत्यस्य ममेत्यस्य वाऽऽवृत्त्या च सम्भवे एकस्यातिरेक इति निरस्तम् ॥ ३७ ॥ विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसीति श्रुतिफक्किकामर्थतः सङ्गृह्य कथयति—कश्चिदिति। कश्चित्पुमानुरुजन्मभिः पार्थिवानि रजांसि धूलीर्विममे गणयाञ्चकार। सोऽपि मे मम गुणकर्माभिधानानि जन्मानि च कर्हिचिदपि न विममीते। यदा कदाचिद्येन केनापि रजःकणगणनं कर्तुं शक्यं न मम गुणकर्मादिगणनमिति भावः। स्वजन्मकर्मगोत्रं वेति मुचुकुन्दप्रार्थनायां जन्मकर्माभिधानानि सन्ति मे। जन्मकर्माणि मे नृपेति पूर्वोत्तरस्ववाक्ययोश्च जन्मनां कर्मादित्वेनोक्तावपि मध्ये गुणकर्माभिधानानि न जन्मानीति तेषां कर्माद्यनन्तरोदाहरणेन न जननानीति भगवद्भाव इत्यवधेयम् ॥ ३८ ॥ कालत्रयोपपन्नानि युगत्रयसम्बद्धानि मे मम जन्मानि कर्माणि परमर्षयो महाज्ञाना अनुक्रमन्तो निरन्तरं वक्तुमुद्यता अपि नान्तं गच्छन्ति न पारयन्ति ॥ ३९ ॥ तर्हि प्रष्टुर्ममैवाविवेक इति न वद, किञ्चिद्वच्मीति वक्ति—तथाऽपीति। अद्यतनान्येतत्कालभवानि गदतो मम सकाशाच्छृणुष्व धर्मगुप्तये तद्रक्षायै ॥ सैवं सिध्यतीत्याह ॥ भूमेरिति ॥ ४० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

भगवद्वाक्यान्याह—जन्मेति **अर्धाधिकाष्टभिः**। तदुक्तं भगवानर्धमेव फलं तस्य दास्यामीति ज्ञापितवानिति। आदौ यत्नेन पृष्टं 'जन्मकर्माभिधानानि वदे'ति, तत्र कानि वक्तव्यानीत्याकाङ्क्षामिव वदन् आदौ जन्मनामसङ्ख्यातत्वमाह—**मे जन्मकर्माभिधानानि सहस्रशः सन्तीति**। नन्विदानीन्तनेषु पृष्टेषु किमिति व्यधिकरणमुत्तरं दत्तवान् ? ततश्चायं प्रतारक एव, न भगवानिति शङ्का च स्यादिति चेत् ? सत्यम्। भगवान् प्रथमतः स्वरूपे ज्ञाते जन्मकर्माभिधानानि ज्ञातव्यानीति मन्यते। अतः

स्वरूपं वदन् स्वभावं ख्यापयितुं जन्मान्याह—**ब्रह्मे**ति स्वरूपं वक्तव्यम्। तस्य कथं जन्मेत्याकाङ्क्षायां भक्तिप्रतिपादकोऽपि स भवतीति भक्तिसिद्ध्यर्थं कर्माणि करिष्यन्, भक्तिपरिपालनार्थं कर्माणि च करिष्यन् बहून्येवावतरणानि करोतीति वक्तव्यम्। तस्मिन्ननुक्ते तस्य बोधनार्थमुक्तमप्यनुक्तं स्यात्। अतः सुष्ठूक्तं **मे जन्मकर्माभिधानानि सहस्रशः सन्ती**ति। अङ्गेत्यप्रतारणाय संबोधनम्। सन्तीत्यनेन सर्वेषामेव **विद्यमानता** निरूपिता। सर्वद्वीपेषु विद्यमानानां वा सहस्रत्वमुच्यते। तर्हि भक्तिसाधकत्वात्तानि कथयेत्याशङ्क्याह **न शक्यन्तेऽनुसंख्यातु**मिति। आनुपूर्व्येण संख्यातुं मयापि न शक्यन्ते ॥ ३३ ॥ तदेवासङ्ख्याततत्वेनोपपादयति, अज्ञानव्यावृत्त्यर्थम्, **क्वचिद्रजांसी**ति। कदाचित्पार्थिवान्यपि रजांसि कश्चिद्विममे। अहं वा। उरुजन्मभिरपि विमानं संभवत्यन्यस्य। यद्येकमेव ब्रह्म पर्यायेण सर्वेषु ब्रह्माण्डेष्ववतरति, तदा तत्रत्यानां परमाणूनां सृज्योपयोगित्वेन गणनां करोति। अन्यथा अव्यवस्था स्तात्। ततश्च ब्रह्मणा गणयितुं शक्याः। मयापि सृष्ट्यादौ ज्ञानपूर्वकं सृजामीति गणितुं शक्या एव। **क्वचि**ति। सृष्टिविशेषे। गुणकर्माभिधानानि मदीयानि तु कदाचिदपि गणयितुं न शक्यानि। एकस्मिन् जन्मनि कोटिशः कर्माणि नामानि च भवन्ति। एकस्मिन् दिवसे ब्रह्माण्डकोटिषु द्वीपादिदेशविशेषेषु कोटिशो जन्मानि भवन्ति। अतः अपरिमितत्वात् जन्मादीनां परिगणनाभावो युक्तः ॥ ३७ ॥ बहुभिर्मिलितैर्गणना भविष्यतीत्याशङ्क्याह **कालत्रयोपपन्नानी**ति। भूतान्येव बहूनि वर्तन्ते, भविष्याणि च। म इति ब्रह्मणः। जीवो हि परिच्छिन्नः, एकदा एकस्मिन् देशे एकं देहं गृह्णाति, स देहः शतवर्षाणि तिष्ठति, भगवतस्तु देहाभावात्स्वरूपं यथासुखं प्रदर्शयतीति एकस्मिन्नपि क्षणे बहुभिर्बहुधा दृश्यत इति अनेकरूपाणि भवन्ति। चलने च मायाजवनिकायाः स्थलान्तरे उद्गमस्य भिन्नत्वाच्चलनमात्रेणैवानेकानि रूपाणि भवन्ति। स ह्याकाशशरीरः सर्वतःपाणिपादान्तत्वेन, मूर्त्यानन्त्यात् अनन्तरूपत्वं युक्तमेव। अत आह भगवान्—कालत्रयोपपन्नानि मदीयानि **अनुक्रमन्तः** आनुपूर्व्येण गणनां कुर्वाणा अन्तं न गच्छन्तीति। नृपेति संबोधनं महत्त्वेन वञ्चनाभावाय। तत्रापि कालत्रयस्य योग्यानीति कर्मणामानन्त्यम्। कालत्रयस्य उपमर्दनसमर्थानि नामानीति कालत्रये उपपन्नान्यनन्तान्येव ॥ ३८ ॥ एवं त्रीभिः स्वस्य ब्रह्मत्वं निरूप्य धर्माणामपि ब्रह्मत्वेनानन्त्यमुक्त्वा अवक्तव्यत्वमुपपाद्य तथापि राजकृपया राज्ञो दुर्ज्ञेयमपि वक्ष्यामीत्यमिप्रायेणाह **तथापी**ति। अद्यतनानि जन्मकर्माभिधानानि शृणुष्व। यद्यपि त्वां प्रति न वक्ष्यामि, तथापि मे गदतः सतः त्वया सावधानतया श्रोतव्यम्। आदौ जन्महेतुमाह। स एव पृष्ट इति। पुरा विरिञ्चेन विज्ञापितः ब्रह्मणा प्रार्थितः सन् धर्मरक्षा कर्तव्येति। भूमेर्भारायमाणानामसुराणां क्षयार्थं च। अनेन द्वयं गृहीतम्। भूमिमारहरणमसुराणां **क्षयश्चे**ति। चकाराद्भक्तिसिद्ध्यर्थं च ॥ ३९ ॥

श्रीसुबोधिनीसारः

श्रीकृष्णोक्तिः। हे अंग मे मम जन्मकर्मनामानि सहस्रशोनंतानि संति। मयापि अनुसंख्यातुं गणितुं न शक्यंते हि युक्तम् अनंतत्वात् ॥३७॥ बहुजन्मभिः क्वचित् समये पार्थिवान् पृथिवीसंबंधीनि रजांसि रेणून् विममे गणितवान्। मे मम गुणकर्मनामानि जन्मानि कदापि न विममे न विगणयति ॥ ३८ ॥ हे नृप कालत्रयेणोपपन्नानि युक्तानि मे मम जन्मकर्माणि अनुक्रमंतो गणयंतः परमर्षयोप्यंतं न यांति ॥ ३९ ॥ तथाप्यसंख्याततत्वादगणितत्वेपि हे अंग अद्यतनानि वर्त्तमानकालीयानि नामानि गदतो मम मत्तः त्वं शृणु। पुरा पूर्वं धर्मरक्षार्थं भूमेः पृथिव्या भाररूपाणामसुराणां क्षयाय च नाशार्थं विरिंचेन ब्रह्मणा विज्ञापितः प्रार्थितोहम् ॥४०॥

विवरणटिप्पणी

जन्मकर्मेत्यत्र। **अर्धमेवे**ति। अष्टभिः कृतस्य प्रश्नस्याष्टमिरुत्तरं जातम्। फलदानप्रतिपादक एकः श्लोकोऽतः परमपेक्षितः, तत्रार्घ एवोक्त इत्यर्थः **स्व** भावमिति। अनन्तरूपेण भवनमित्यर्थः। **जन्मान्याहे**ति। जन्मनां बहुत्वमाहेत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र 'स्वजन्म कर्म गोत्रं वा कथ्यताम्' इति यदुक्तं तत्राह—जन्मेति। 'परमकृपाविषयत्वान्नात्र प्रतारणा काचित्' इत्याशयेन सम्बोधयति—अङ्गे ति। मे मम जन्मानि कर्माणि अभिधानानि नामानि च सहस्रशः असङ्ख्यानि सन्ति, अतः अनन्तत्वात् मयापि सङ्ख्यातुं गणयितुं नैव शक्यन्ते। एवकारार्थे हिशब्दः। न चैवं सर्वज्ञत्वहानिः। अनन्तानां अनन्ततया ज्ञानमेव सर्वज्ञत्वावहम्, नतु परिच्छिन्नतया अज्ञानम्, तस्य यथार्थत्वेन अज्ञत्वावहत्वात् ॥ ३७ ॥ असङ्ख्यत्वमेवोपपादयति—क्वचिदिति। कदाचित् कश्चित् सूक्ष्मदर्शी बहुभिर्जन्मभिः पार्थिवानि पृथिव्याः सम्बन्धीनि रजांसि विममे गणितवान् गणयेदपि मे मम गुणान् कर्माणि अभिधानानि जन्माति च कर्हिचिदपि न गणयितुं शक्नुयादिति ॥ ३८ ॥ 'नृपत्वेन सूक्ष्मबुद्धित्वात्त्वयापि विचारणीयम्' इत्याशयेन सम्बोधयति—नृपेति। नात्र गोप्यं किञ्चित्, प्रसिद्धत्वात्। परमर्षयः नारदादयोपि कालत्रयोपपन्नानि भूतादिकालत्रयसम्बघीनि मम जन्मानि कर्माणि चानुक्रमन्तोऽनुक्रमेण वर्णयन्तोऽद्याप्यन्तं पारं नैव गच्छन्ति ॥ ३९ ॥ यद्यपि कालत्रयोपपन्नानि जन्मादीनि वर्णयितुमशक्यानि, तथापि हे अङ्ग ! अद्यतनानि आधुनिकानि मम जन्मादीनि गदतो मत्तः शृणु। **एवं वर्णनं प्रतिज्ञाय वर्णयति–धर्मस्य गुप्तये संरक्षणार्थं तथा भूमेर्भारभूतानामसुराणामसुरसम्पत्त्यभिजातानां क्षयाय च**

विरिञ्चेन ब्रह्मणा पुरा विज्ञापितः प्रार्थितोऽहं यदुकुले, तत्राप्यानकदुन्दुभेर्वसुदेवस्य गृहेऽवतीर्णोऽस्मीति द्वयोरन्वयः। अवतारशब्देन ज्ञानबलादिस्वाभाविकशक्तिपूर्णत्वं सूचयति ॥ ४०–४१ ॥

अन्वितार्थप्रकाशिका

जन्मेति ॥ अङ्ग हे राजन् ! मे मम जन्मानि कर्माणि अभिधानानि नामानि च सहस्रशः असंख्यानि सन्ति। अतः अनन्तत्वात् मयापि अनुसंख्यातुं गणयितुं नु इति च्छेदो वा नैव शक्यन्ते। एवकारार्थे हिशब्दः। न चैवं सर्वज्ञत्वहानिः, अनन्तानाम् अनन्ततया ज्ञानमेव सर्वज्ञत्वावहं न तु परिच्छिन्नतया ज्ञानं तस्यायथार्थत्वेन अज्ञत्वावहत्वात् ॥ ३६ ॥ क्वचिदिति ॥ क्वचित् कदाचित्कश्चित्सूक्ष्मदर्शी उरुभिर्बहुभिर्जन्मभिः पार्थिवानि पृथिव्याः संबन्धीनि रजांसि विममे गणितवान् गणयेदपि। किन्तु मे मम गुणान् कर्माणि अभिधानानि नामानि जन्मानि च कर्हिचिदपि न गणयितुं शक्नुयात्। यद्वा। गुणैः कर्मभिश्चाभिधानानि नामानि यत्र तादृशानि जन्मानि ॥ ३७ ॥ कालेति ॥ हे नृप ! परमर्षयः नारदादयोऽपि कालत्रयोपपन्नानि भूतादिकालत्रयसंबन्धीनि मम जन्मानि कर्माणि चानुक्रमन्तोऽनुक्रमेण वर्णयन्तः। दीर्घाभाव आर्षः। अद्याप्यन्तं पारं नैव गच्छन्ति ॥ ३८ ॥ तथापीति अर्द्धम् ॥ अङ्ग हे राजन् ! तथापि अद्यतनानि आधुनिकानि मम जन्मादीनि गदतो मत्तः शृणुष्व। तन्नार्षः ॥ ३९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्वचित्कदाचित् कश्चिज्जनः रजांस्यपि विममे अगणयत् तथापि गुणैः कर्मभिश्चाभिधानानि येषु तानि मे जन्मानि तु कर्हिचिदपि न गणयेत् ॥ ३७ ॥ अनुक्रमंतः अनुक्रमेण गणयंतः ॥ ३८–४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह जन्मेत्यादिना इत्युक्त इत्यतः प्राक्तनेन ग्रन्थेन। तावद्यत् पृष्टं स्वजन्मकर्मेत्यादि तस्योत्तरमाह—जन्मेति ॥ अङ्ग हे मुचुकुन्द, मे मम, जन्मानि च कर्माणि चाभिधानानि च तानि, सहस्रशो बहुशः सन्ति। अतस्तान्यधुनेति शेषः। मयापि, संख्यातुमेतावन्तीति परिच्छिद्य वक्तुमित्यर्थः। न शक्यन्ते। नु एव। ननु किमनादिसंसरणशीलैरस्मदादिभिरिव विस्मृतत्वान्न शक्यन्त इत्याशङ्कावारणायाह—अनन्तत्वात् हि एव। ननु यद्यपि भगवज्जन्मादीनि कर्मसंकुचितज्ञानैर्जीवैस्तु स्वधर्मभूतज्ञानतिरोहिततया विस्मृतस्मृतित्वतो बहुत्वाच्च संख्यातुमशक्यानि सन्त्वेव सर्वदाऽलुप्तज्ञानतयाऽखण्डितस्मृतिप्रवाहेण भगवता संख्यातुं न शक्यन्ते इति यदभिहितं तदयुक्तवत् प्रतिभाति, जीववदज्ञताप्राप्तेरिति कैश्चिदत्र तर्क्यते तदयुक्तं, यदन्तवत् स्यात्तदन्तानवगम एवाज्ञतामापादयति न त्वनन्तस्यान्तस्यानवगमः। यथावस्थितवस्तुविषयज्ञानस्यैव सर्वज्ञत्वावहत्वादपरिच्छिन्नस्य परिच्छिन्नत्वज्ञानस्याज्ञत्वावहत्वाच्चातो नैतावता भगवतः सर्वज्ञत्वभङ्गः शङ्क्य इति ॥ ३७ ॥ भगवज्जन्मादेर्दुःसंख्यत्वमेवोपपादयति—क्वचिदिति ॥ क्वचित् यद्यपि, कदाचित् कश्चित् सूक्ष्मबुद्धिमानित्यर्थः। उरुजन्मभिर्बहुजन्मभिः, पार्थिवानि पृथिव्याः संबन्धीनि, रजांसि रेणून्, विममे गणयेदित्यर्थः। तथापि, मे मम, जन्मानि गुणाश्च कर्माणि च अभिधानानि च तानि, कर्हिचित् न विममे। गणयितुं न शक्नुयादित्यर्थः। 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि' इति श्रुत्यर्थोऽत्रानुसंहितः ॥ ३८ ॥ कालेति ॥ हे अनघ, नृपेति क्वचित् पाठः। परमर्षयः पराशरवैशंपायनादयः, कालत्रयोपपन्नानि कालत्रययुक्तानि कालत्रयगोचराणीति यावत्। मे मम, जन्मकर्माणि जन्मानि कर्माणि चेत्यर्थः। अनुक्रमन्तोऽनुवर्णयन्तः सन्तोऽपि, अन्तं पारं, नैव गच्छन्ति ॥ ३९ ॥ तथापीति। भूमेरिति च। तथापि यद्यप्येवं तथापीत्यर्थः। अङ्ग हे मुचुकुन्द, अद्यतनान्याधुनिकानि, मम जन्मादीनि इति शेषः। गदतः कथयतो मत्तः, शृणुष्व आकर्णय। पुरा, अहं धर्मगुप्तये धर्मपरित्राणार्थं, भूमेः, भारायमाणानां, भूभारभूतानामित्यर्थः। असुराणामासुरसंपत्त्याभिजातानां, क्षयाय च, विरिञ्चेन ब्रह्मणा, विज्ञापितः प्रार्थितः सन् ॥ ४० ॥

कृष्णप्रिया

भगवान श्रीकृष्ण ने कहा कि—राजन् मुचुकुन्द ! मेरे अनन्तजन्म असंख्य नाम एवं कर्म है। ये सब अनन्त होने से मैं भी स्वयं उनकी संख्या नहीं बता सकता ॥ ३७ ॥ राजन् यह बात शायद शक्य होगी कि कोई पुरुष अपने अनेक जन्मों में पृथिवी के छोटे-छोटे रेणुओं की गणना कर सकता है फिर भी मेरे जन्म गुण कर्म नामों की गिनती किसी भी हालत में नहीं कर सकता ॥ ३८ ॥ मरीचि नारद सनत्कुमारादि महर्षि वृन्द मेरे त्रिकाल सिद्ध जन्म कर्म और गुणों का गान कर सकते हैं लेकिन उनका पार नहीं पाते ॥ ३९ ॥ मुचुकन्द ! यद्यपि ऐसा होने पर भी स्नेहवश अपने वर्तमान जन्म कर्म, एवं नामों का निरूपण करता हूँ सुनो बाबा ! एक बार ब्रह्माजी ने मुझसे कहा कि महाराज ! धर्म का रक्षण करें और जो असुरों का भार धरणी पर बढ़ गया है तो कृपया दूर कीजिये ॥ ४० ॥

अवतीर्णो यदुकुले गृहे आनकदुन्दुभेः । वदन्ति वासुदेवेति वसुदेवसुतं हि माम् ॥ ४१ ॥
कालनेमिर्हतः कंसः प्रलम्बाद्याश्च [1]सद्द्विषः । अयं च यवनो दग्धो राजंस्ते तिग्मचक्षुषा ॥ ४२ ॥
सोऽहं तवानुग्रहार्थं गुहामेतामुपागतः । प्रार्थितः प्रचुरं पूर्वं त्वयाहं भक्तवत्सलः ॥ ४३ ॥
वरान् वृणीष्व राजर्षे सर्वान् कामान् ददामि ते । मां प्रपन्नो जनः कश्चिन्न भूयोऽर्हति शोचितुम् ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—यदुकुले, आनकदुन्दुभेः, गृहे, अवतीर्णः । माम्, वसुदेवसुतम्, वासुदेव, इति, वदन्ति ॥ ४१ ॥ हे राजन् ! कालनेमिः, कंसः, हतः, च, प्रलम्बाद्याः, सद्द्विषः, हताः, अयम्, यवनः, ते, तिग्मचक्षुषा, दग्धः ॥ ४२ ॥ भक्तवत्सलः, अहम्, त्वया, पूर्वम्, प्रचुरम्, प्रार्थितः, सः, अहम्, तेन, अनुग्रहार्थम्, एताम्, गुहाम्, उपागतः ॥ ४३ ॥ राजर्षे ! वरान्, वृणीष्व, ते, सर्वान्, कामान्, ददामि, माम्, प्रपन्नः, कश्चित्, जनः, भूयः, शोचितुम्, न, अर्हति ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ते तिग्मचक्षुषा निमित्तेन मयैव दग्धः ॥ ४२–४३ ॥ अपूर्णोऽहमिति शोचितुम् । यद्वा अन्यैर्दत्तेषु वरेषु क्षीयमाणेषु यथा शोचति नैवं मा प्रपन्नाः, मद्दत्तवराणामक्षय्यत्वादिति भावः ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गृहे=भार्यायाम् । प्रवृत्तिनिमित्तमाह–वसुदेवेति । आदौ जन्माह—अवतीर्ण इति । नामाह–बदन्तीत्यर्द्धकेन । वासुदेवेति 'सह सुपा' इति सामान्यतः समासः । ननु 'असन्ति तत्र भूतानि' इत्यादिना तव नामेदं पूर्वमपि प्रसिद्धमेव—सत्यम्, किन्तु मध्ये मध्ये तिरोभूतेन प्रवृत्तिविशेषेणाधुनिकमिव प्रतीयत इत्याह—वसुदेवसुतमिति । हि प्रसिद्धौ । श्रीरामादिष्वनेकेष्वपि तत्पुत्रेषु सत्सु प्राधान्यान्मय्येव तत्प्रसिद्धिरित्यर्थः ॥ ४२ ॥ कालनेमिरिति प्राग्जन्माभिप्रायेण । सद्द्विषः सतां द्वेष्टारः । मया हताः, प्रलम्ब आदिर्येषामघधेनुकादीनां ते तथा । अतद्गुणसंविज्ञानबहुव्रीहिणा प्रलम्बरहिता इत्यर्थः । तिग्मचक्षुषा कोपाग्निना । कर्माह—कालनेमिरिति । मयेति शेषः ॥ ४३ ॥ पूर्वं पुरा जन्मनि । न च तद्धननार्थमेवागतोस्म्यन्यथापि तस्य शक्यत्वात्, किन्तु त्वत्कृतार्थमेवेत्याशयेनाह—स इति । तादृशमाहात्म्योऽप्यहमुप दाक्षिण्येनागतः । 'उप सामीप्यदाक्षिण्यदोषाख्यानात्ययेष्वपि' इति विश्वः । प्रचुरं यथा स्यात्तथा प्रकर्षेण शुद्धभावादिनार्थितः द्रष्टुं याचितो वांछित इत्यर्थः ॥ ४४ ॥ 'अपूर्णोऽहमधन्योऽहमसुखी जन्मवानिति' इत्यर्द्धश्लोकः पुस्तकांतरे लभ्यते, इह स्वामिचरणैस्तत्प्रतीकोच्चारणेन स्वीकृतः प्रतीयते । सर्वेश्वरदत्तापहारित्वाभावमाह—यद्वेति । अन्यैर्मद्भिन्नैर्देवतांतरैः । इति भाव इति—'विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम् । तेषामाशिष ईश तदनु विनश्यन्ति यथा राजकुलम्' इति चित्रकेतूक्तेर्भगवद्दत्तवराणामेवाक्षयित्वमन्यदत्तानां क्षयित्वश्रवणादित्याशयः । हे राजर्षे इति—राज्ञ ऋषेश्च योग्यान्सर्वानपीति भावः । प्रपन्नः शरणागतोऽपि, किं पुनर्भक्तिमांस्त्वादृश इत्यर्थः । न भूय इति । तस्मात्तुच्छो वरो न मृग्य इति गूढोऽभिप्रायः ॥ ४५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आदौ जन्माह—अवतीर्ण इति । नामाह—वदन्यीत्यर्द्धकेन वासुदेवेतीति । 'सह सुपा' (२।१।४) इति सामान्यः समासः । ननु, वसन्ति तत्र भूतानि' इत्यादिना तव नामेदं पूर्वमपि प्रसिद्धमेव सत्यं किन्तु मध्ये मध्ये तिरोभूतेन प्रवृत्तिनिमित्तविशेषेणाधुनिकमिव प्रतीयत इत्याह—वसुदेवसुतमिति । हि प्रसिद्धौ श्रीरामादिष्वन्येष्वपि तत्पुत्रेषु सत्सु प्राधान्यान्मय्येव तत्प्रसिद्धिरित्यर्थः ॥ ४२ ॥ कर्माह—कालनेमिरिति मयेति शेषः ॥४३॥ न च तद्धननार्थमेवागतोस्मि अन्यथाऽपि तस्य शक्यत्वात् किन्तु त्वत्कृपार्थमेवेत्याशयेनाह—स इति । तादृशमाहात्म्योप्यहम् उप दाक्षिण्येनागतः 'उप सामीप्यदाक्षिण्यदोषाख्यानात्ययेष्वपि' इति विश्वः । प्रचुरं यथा स्यात्तथा प्रकर्षेण शुद्धभावादिनाऽर्थितः द्रष्टुं याचितः वाञ्छित इत्यर्थः ॥ ४४ ॥ हे राजर्षे इति राज्ञ ऋषेश्च योग्यान् सर्वानेवेति भावः । प्रपन्नः शरणागतोऽपि किं पुनर्भक्तिमांस्त्वादृश इत्यर्थः । न भूय इति । तस्मात्तुच्छो वरो न मृग्य इति तु निगूढो भावः ॥ ४५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आदौ जन्माह—अवतीर्ण इति । स्वयमेव साक्षादागतोऽस्मि, न तु गर्भवासादिनोत्पन्नोऽस्मीत्यर्थः । आनकदुन्दुभेरिति देवकृतोत्सवेन तस्य प्रसिद्धिं माहात्म्यञ्च सूचयति । नामाह–वदन्तीति । हे वासुदेवेति वदन्ति लोकाः । ननु चित्ताधिष्ठातृत्वादिना

---

[1] वि–बीर. ।

पूर्वमपि नामेदं वर्त्तत एव, तत्राह—वसुदेवसुतमिति। तत्सुतत्वेनैवैतन्नाम्नः सुप्रसिद्धेरित्यर्थः। इत्यद्यतनता तन्नाम्नः सम्यगर्थता च दर्शिता। हि एव, मामेव, श्रीरामादीनां तत्पुत्रत्वेन तन्नामसम्भवेऽपि पितृस्नेहाधिक्यादिना मय्येव तत्प्रसिद्धेः। श्रीकृष्णदामोदर-गोविन्दादिगोकुलसम्बन्धि-नामानि गुह्यत्वान्नोक्तानि। अत एव तस्य तज्जन्मनि तच्छ्रवणायोग्यत्वेन योग्यजन्मान्तरावाप्तिः, श्रीभगवतैवाग्रे वक्ष्यते। एवमग्रेऽपि कर्म्मोक्तौ श्रीगोकुलचरितमनुक्त्वा केवलं दुष्टहननमेवोच्यत इति ॥ ४० ॥ कर्म्माह—कालनेमिरिति। महादैत्यत्वहनने कारणम्—सतः साधून् द्विषन्तीति सद्द्विषः। राजन् हे बुद्ध्यादिना राजमानेति त्वया तद्बुध्यत एवेति भावः, यद्वा, श्रीरुद्रवरादिना प्रकाशमान इति स्वस्यावध्यत्वं सूचितम् ॥ ४१ ॥ न चैतदर्थमेवावगतोऽस्मि, केनचिदन्येनाप्युपायेन तद्धननसुसिद्धेः, किन्तु त्वदर्थमेवेत्याशयेनागमनमुख्यप्रयोजनमाह—स इति। तादृशमाहात्म्योऽप्यहमुप दाक्षिण्येनागतः, 'उप सामीप्यदाक्षिण्यदोषाख्यानात्ययेषु च' इति विश्वः। प्रचुरं यथा स्यात्तथा प्रकर्षेण शुद्धभावादिनार्थितो द्रष्टुं याचितो वाञ्छित इत्यर्थः। यतो भक्तवत्सलः, दर्शनमात्रेणैव भक्ताशेषमनोरथपूरणाद्भक्तार्थ सर्वार्थकत्वाच्चेत्यर्थः। यद्वा, अस्य पूर्वार्द्धे नान्वयः ॥४२॥ हे राजर्षे! इति सर्वकामदानपात्रतोक्ता। अतो राज्ञ ऋषेश्च योग्यान् सर्वानेवेति भावः। प्रपन्नः शरणागतत्वमात्रेणाप्याश्रितः, कश्चिदपि, किं पुनर्भक्तिमांस्त्वादृश इत्यर्थः। भूयः पुनर्वरप्राप्तेः पश्चात्, अन्यत्तैर्व्याख्यातम्, यद्वा, पश्चात् कदाचित् कथञ्चित् किञ्चिदपि तव दुःखं नास्त्येव, तथापीहामुत्रापि सुखार्थं वृणीष्व। तत्र हेतुः—राजर्षे इति! तव राजत्वेन ऋषित्वेन च लोकद्वयसुखोपभोगयोग्यत्वादित्यर्थः ॥ ४३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अयंचेति ते तिग्मचक्षुषा उपकरणभूतेन मयैव दग्ध इत्यर्थः ॥ ४३–४६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथाधुनिकानि कर्माण्याह—कालनेमिरिति। हे राजंस्तव तिग्मेन तीक्ष्णेन चक्षुषा निमित्तेन मयैवायं यवनो दग्धः धर्मगुप्त्याद्यर्थं प्राथितत्वाद्युक्त्यैव तदुपयुक्तसार्वज्ञत्वसर्वशक्तित्वादिगुणानामुक्तप्रायत्वान्न पृथग्गुणोक्तिः ॥ ४३ ॥ तर्हीह किमर्थमागतः? इत्यत्राह—सोहमिति। स उक्तविधोहं त्वामनुग्रहीतुम् इमां गुहां प्रति समुपागतः। तर्हि सर्वानपि जनान् किं नानुगृह्णासीत्यत आत्मानं विशिनष्टि—भक्तवत्सल इति। नाहं भक्त इत्यतो विशिनष्टि–पुरा जन्मनि त्वया अहं प्रचुरं यथा तथा प्रार्थित आराधतिः ॥ ४४ ॥ कोऽसावनुग्रहः? इत्यत आह–वरानिति। हे राजर्षे! ते तुभ्यं सर्वान् काम्यन्त इति कामास्तानिष्टान् ददामि। नन्वित्थं प्रचोदितेन मया देवाः प्रत्याख्याता इति सर्वज्ञः त्वं किं न जानासीत्यत्राह–मामिति। भूयः पुनः शोचितुं संसत्तुं नार्हति किन्तु मुक्तिमेवार्हतीति भावः। मुक्तिन्दास्याम्येव किन्तु ततोन्येपि यदि कामा प्रार्थ्यास्तानपि प्रार्थयस्वेति भावः ॥ ४५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

गुहे भार्यालक्षणे निमित्तं कथयति–वसुदेवेति ॥ ४२ ॥ तिग्मचक्षुषा चण्डनेत्राग्निना ॥ ४३–४६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

शोचितुं नार्हतीत्यन्यैर्दत्तेषु वरेषु क्षीयमाणेषु सत्सु यथा शोचति नैवं मां प्रपन्नः मद्दत्तवराणामक्षयत्वादिति भावः॥४५॥

गूढार्थदीपनी

भारायमाणानां भारवदाचरताम्। 'कर्तुः क्यङ्–' इति क्यङ्। गृहे = भार्यायाम् ॥४०॥ वासुदेवेति सुप्सुपेति समासः। पूर्वं यः कालनेमिः स कंसः। प्रलम्ब आदिर्येषान्ते एव धेनुकादयो न तु प्रलम्बस्तस्य वलदेवकृतहननादित्यतद्गुणसंविज्ञानो बहुव्रीहिः ॥ ४१ ॥ चक्षुषा निमित्तेन मयैवेति योज्यम् ॥ ४२ ॥ प्रार्थित इति सार्द्धम्। द्रष्टुमिति शेषः ॥ ४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ते तिग्मचक्षुषा निमित्तेन मयैव दग्धः ॥ ४३–४५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आनकदुन्दुभेर्गृहे – भार्यायाम्। आनकदुन्दुभेर्गृहे गदतो गदनामकात्पुरा पूर्वमेवावतीर्ण इत्यन्वयः (?) गदाग्रज इत्यर्थः ॥ नामापि सनिरुक्तिकं वक्ति—वदन्तीति ॥ वासुदेवेति। वसुदेवसुतं तत्त्वाद्वदन्ति। हीति पुराणान्तरनिर्वचनसूचकम् ॥ ४१ ॥ कालनेमिः प्राक् कंस इदानीं प्रलम्बाद्या सद्द्विषः सद्वैरिणः। अनेन बलोऽपि मद्बलत एवावधीत्प्रलम्बमिति ध्वन्यते। तिग्मचक्षुषा तदग्निना सोऽहं तव त्वदुपरि ॥ ४२ ॥ मम तव चानुबन्धः प्राचीनो वर्तत इत्याह—प्रार्थित इति। भक्तवत्सलोऽहं त्वया पूर्वं प्रचुरं यथा तथा प्रार्थितः ॥ ४३ ॥ वरानुत्तमान्कामान्वृणीष्व तान्सर्वांस्ते ददामि। मां प्रपन्नो जनो भूयः शोचितुं नार्हति सः। मां सम्पदं प्रपन्न एवेत्यावृत्त्याऽन्वयः ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदुकुले इति गोत्रमुक्तम् । आनकदुन्दुभेर्गृह इति विशेषोऽप्युक्तः । नामाह **वदन्ति वासुदेवे**ति । सन्त्येव बहूनि नामानि, एकस्यापि, एकस्यापि नाम्नः बहून्येव निर्वचनानि सन्ति, तथापि एकं नाम एकप्रकारनिर्वचनं लोका वदन्ति । **वासुदेवे**ति नाम । वसुदेवसुतमिति निर्वचनम् । हीति युक्तश्चायमर्थः । यतो मां वदन्ति । मया च तथा कृतमिति ॥ ४० ॥ कर्माण्याह **कालनेमिर्हत** इति । कंसो मातुल इति तस्य हननं निषिद्धमिति पूर्वं स कालनेमिः स्थित इत्युक्तम् । प्रलम्बादयोऽपि हताः, यतस्ते सद्द्विषः । अनेन सद्रक्षार्थं प्रलम्बादयो हताः, न तु तेषां हनने स्वतन्त्रं कार्यमस्तीति भावः । प्रकृतकृत्यं द्विरूपमाह—**अय**मिति । तत्र यवनः ते तिग्मचक्षुषा वाणप्रायेण करणेन मयैव दग्धः । चकारः कर्तृसमुच्चयार्थः । **राजन्नि**ति संबोधनं तथैव सम्मत्यर्थम् ॥ ४१ ॥ द्वितीयं भक्तिलक्षणं धर्मलक्षणं वा प्रयोजनमाह—सोऽहमिति । अनेकार्थेऽवतीर्णो यतोऽहं अतस्तवाप्यनुग्रहः कर्तव्य इति एतां गुहामुपागतः । अन्यथा प्रकारान्तरेण भ्रममुत्पाद्य कालयवन एवात्रानीतः स्यात् । ततश्च स्वयमेव स भस्मीभवेत् । अतस्त्वदर्थमेवास्मिन् सङ्कटे देशेऽपि समागतः । तत्र हेतुः **प्रार्थितः प्रचुरं पूर्व**मिति । बहुवारं पूर्वंजन्मसु त्वयाऽहं प्रार्थितः । अनेन यत्सामर्थ्यं त्वयीदानीमुपलभ्यते, तत्केवलं मदनुभावेनेत्यपि ज्ञापितम् । तथापि स्वक्लेशेनाप्यागमने स्वस्यासाधारणं धर्ममाह **भक्तवत्सल** इति अहं स्वभावतो भक्तवत्सलः ॥ ४२ ॥ आगतस्य प्रयोजनमाह **वरान् वृणीष्वे**ति । ये वरणीयाः तवाभीष्टाः तान् बहूनपि वृणीष्व । यतस्त्वं **राजर्षिः** राजा च ऋषिश्च, राजधर्मं वैदिकं च धर्मं कृतवानिति । अहं पुनः ते अस्मिन् जन्मनि सर्वानेव कामान् दास्यामि, न तु मोक्षमिति भावः । तर्हि किं वरेणेत्याशङ्क्याह **मां प्रपन्न** इति । यस्तु शरणागतः, स भूयः शोचितुं नार्हति । यस्मिन् जन्मनि प्रपद्यते, तस्मिन् जन्मनि कश्चिच्छोचितुमर्हति, न सर्वः । अतः सर्वेषां शोकः प्रपत्तिमात्रेण निवर्तते, अजनश्च भवति । जनश्चेत् मदिच्छया, तथापि भूयः शोचितुं नार्हति । एष विकल्पः राज्ञ एवार्थे । अतः कामितं सर्वमेव दास्यामि मुक्तिमपि एकजन्मव्यवधानेनेति भावः ॥ ४३ ॥

श्रीसुबोधिनीसारः

यदूनां कुले वसुदेवस्य गृहेऽवतीर्णोऽस्मि । तेन वसुदेवस्य सुतं मां वासुदेवेति वदन्ति हि युक्तम् ॥ ४१ ॥ येन कालनेमिः पूर्वजन्मनि । इह तु कंसो हतः । सतां द्विषः शत्रवः प्रलंबाद्या निहताः । हे राजन् ! ते तव तिग्मचक्षुषा घोरदृष्ट्यायं यवनो दग्धः ॥ ४२ ॥ तव कृपार्थम् एतां गुहां सोहमुपागतः प्राप्तोस्मि । तत्र हेतुः । प्रचुरं बहुशो यथा भवति तथा त्वया पूर्वं भक्तवत्सलोहं प्रार्थितोस्मि ॥ ४३ ॥ हे राजर्षे वरान् त्वं वृणीष्व । सर्वान् कामान् वांछितपदार्थान् ते तुभ्यं ददामि । मां प्रपन्नः शरणं गतः कश्चिज्जनो भूयः पुनः शोचितुं नार्हति ॥ ४४ ॥

विवरणटिप्पणी

अयं च यवन इत्यास्याभासे । **द्विरूपमाहेति** । धर्मरक्षारूपं भूमारहरणरूपं चेत्यर्थः । **विमोहितोऽय**मित्यत्र स्वसमानेति । गृहेपि सुखसमान एव प्रकार इत्याकारकज्ञानजन्येत्यर्थः ॥ ४६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सहेतुकं जन्म उक्त्वा नामधेयमाह–वदन्तीति । हि शब्दो हेतुत्वद्योतकः । वसुदेवसुतत्वादेव मां वासुदेवेति वदन्ति । सन्धिरार्षः । अथाधुनिकानि कर्माण्याह—कालनेमिरिति । कंसरूपेण जातः कालनेम्याख्योऽसुरो मया हतः, तथा सद्द्विषः सतां धर्मवर्तिनां द्वेषिणः प्रलम्बाद्या दैत्याश्च धर्मरक्षार्थं मया हताः ॥ ४२ ॥ 'इयं च राजनीतिः' इति सूचयन् सम्बोधयति—राजन्निति । अयं च कालयवनस्ते तव तिग्मेन तीक्ष्णेन चक्षुषा निमित्तेन सर्वोपायविदा मयैव दग्धः । अत्र कण्टकादिविशिष्टस्थाने आगमनकारणमाह—स इति । स उक्तविधः परमेश्वरोऽहं तवानुग्रहार्थमेतां गुतामुपागतः ॥ ४३ ॥ अनुग्रहे हेतुमाह—पूर्वं प्रचुरं यथा भवति तथा त्वया प्रार्थितः समाराधित इति । 'न चाहं भक्तमुपेक्षितुं शक्नोमि' इति सूचयन्नाह—भक्तवत्सल इति । 'त्वं वरदानपात्रामोसि' इति सूचयन् सम्बोधयति—राजर्षे इति । त्वं च मत्तो वरान् उत्कृष्टान् स्वाभिलषितान् वृणीष्व कामान् विषयान् याचयस्व, अहं च ते तुभ्यं सर्वान् दान् ददामि दास्यामि । मां प्रपन्नो यः कोपि जनो भूयः 'अपूर्णोहम्' इति शोचितुं नार्हति, मत्प्रसादेन तं प्रति धर्मादीनां सुलभत्वादित्याशयः ॥ ४४ ॥

अन्वितार्थप्रकाशिका

विज्ञापित इति सार्द्धम् ॥ धर्मस्य गुप्तये संरक्षणार्थं तथा भूमेर्भारायमाणानां भारभूतानाम् असुराणां क्षयाय च विरिञ्चेन ब्रह्मणा पुरा विज्ञापितः प्रार्थितोऽहं यदुकुले तत्राप्यानकदुन्दुभेर्वसुदेवस्य गृहेऽवतीर्णोऽस्मि ॥ ४० ॥ वदन्तीति ॥ हि यतः वसुदेवसुतत्वादेव मां वासुदेवेति वदन्ति । सुप्सुपेति समासः । तथा मया कंसरूपः कालनेमिः तन्नामा असुरः हतः । सद्द्विषः सतां द्वेषिणः प्रलम्बाद्याश्च हताः ॥ ४१ ॥ अयमिति ॥ हे राजन् ! अयं च कालयवनस्ते तव तिग्मेन तीक्ष्णेन चक्षुषा निमित्तेन सर्वोपायविदा

मयैव दग्धः । स ईश्वरोऽहं तवानुग्रहार्थमेतां गुहामुपागतः ॥ ४२ ॥ प्रार्थित इति सार्द्धम् ॥ भक्तवत्सलोऽहं पूर्वं प्रचुरं यथा स्यात्तथा त्वया प्रार्थितः समाराधतः । अतः हे राजर्षे ! त्वं वरान् वृणीष्व । अहं ते तुभ्यं सर्वान् कामान् ददामि दास्यामि । मां प्रपन्नो यः कश्चित् कोऽपि जनो भूयः अपूर्णोऽहमिति शोचितुं नार्हति । यद्वा । अन्यैर्दत्तेषु वरेषु यथा क्षयवशाच्छोचति तथा मां प्रपन्नः शोचितुं नार्हति । मद्दत्तवराणामक्षयत्वात् ॥ ४३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कंसो हतः मयेति शेषः ॥ ४१–४२ ॥ प्रचुरं बहुतरम् ॥ ४३–४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यदुकुले, तत्रापि आनकदुन्दुभेर्वसुदेवस्य, गृहे गृहिण्यामित्यर्थः । 'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते' इति स्मृतेः । अवतीर्णः अवतीर्णवान् अस्मि । ज्ञानशक्त्यादिस्वस्वभावमजहदेव जात इत्यवतीर्णशब्दप्रयोजनाभिप्रायः । अन्यथा समुत्पन्न इत्येव ब्रूयात् । इति द्वयोरेकान्वयः ॥ ४१ ॥ एवमाधुनिकं जन्म प्रोक्तमथ नामधेयमाह । वदन्तीति । वसुदेवसुतं हि, हेतुत्वद्योतको हिशब्दः । वसुदेवसुतत्वादित्यर्थः । मां, वासुदेवः इति, वदन्ति । इतिनाऽभिहिते कर्मणि प्रथमा । संधिरार्षः । अथाधुनिकानि कर्माणि प्राह । कालनेमिः कालनेमिनाम्नोऽसुरस्यैवावताररूपः, कंसः, हतः, सद्द्विषः साधुजनद्वेष्टारः, प्रलम्बाद्या असुराश्च हताः मया व्यापादिता इत्यर्थः ॥ ४२ ॥ अयं चेति । हे राजन्, ते तव, तिग्मचक्षुषा तीक्ष्णेन चक्षुर्निमित्तेन मयैवेत्यर्थः । अयं यवनश्च, दग्धः । धर्मगुप्त्याद्यर्थं प्रार्थितत्वाद्युक्त्यैव तदुपयुक्तसार्वज्ञ्यसर्वशक्तित्वादिगुणानामुक्तप्रायत्वान्न पृथगुक्तिः । तर्हीह किमर्थमागत ? इत्यत्राह–स उक्तविधोऽहं तव अनुग्रार्थं त्वामनुग्रहीतुमित्यर्थः । एतामिमां, गुहामुपागतः । तर्हि सर्वानपि जनान् किं नानुगृह्णासीत्यत आह–भक्तवत्सलः अहं, त्वया, पूर्वं पूर्वजन्मनि, प्रचुरं यथा तथा, प्रार्थित आराधितः । मम भक्तवत्सलत्वात्तव च पूर्वजन्मनि मद्भक्तत्वात्त्वामनुग्रहीतुमहमत्रागत इति भावः ॥ ४३ ॥ कोऽसावनुग्रह ? इत्यत आह–वरानिति । हे राजर्षे ! ते तुभ्यं, काम्यन्ते इति कामास्तान्, इष्टानित्यर्थः । सर्वान्, वरान् ददामि । अतः, वृणीष्व । नन्वित्थं प्रचोदितेन मया देवाः प्रत्याख्यातास्तत् सर्वज्ञस्त्वं किं न जानासीत्यत्राह–मामिति । मां, प्रपन्नः कश्चिदपि जनः, भूयः पुनः, शोचितुं संसत्तुं, न अर्हति । किं तु मुक्तिमेवार्हतीत्यर्थः । मुक्तिं तु दास्याम्येव किं तु ततोऽन्येऽपि कामा यदि प्रार्थ्यास्तानपि प्रार्थयस्वेति भावः ॥ ४४ ॥

कृष्णप्रिया

भैया ! मैंने ब्रह्माजी प्रार्थना से यदुकूल में श्रीवसुदेवजी के यहाँ अवतार लिया है । अब मैं वसुदेवजी का पुत्र हूँ इसलिये सर्वलोग वासुदेव कहते हैं ॥ ४१ ॥ सुनो बाबा ! भूतलपर कालनेमि कंस के रूप में आया था मैंने उस असुर का संहार किया है । साथ में उसके वध के पूर्व साधुओं के द्रोही पूतना तृणावर्त प्रलम्ब आदि असुरों का भी विनाश कर चुका हूँ । राजन् यह जो भस्म हो गया वह काल यवन था । सुनो ! मेरी ही सूचना से अथवा प्रेरणा से तुम्हारी दृष्टि पड़ते ही भस्म हो गया है ॥ ४२ ॥ राजन् मुचुकुन्द तुम मुझे प्रिय हो इसलिये तुमपर अनुकम्पा करने के लिये ही मैं इस गुफा में आया हुँ । भैया इस जन्म के पूर्व में भी तुमने मेरी बहुत आराधना की है और स्वभाव भक्तवत्सल होने के कारण मैं आया हूँ ॥ ४३ ॥ भैया मुचुकुन्द ! हे राजर्षे ! जो कुछ कामना हो विना संकोच माँग लो । राजन् जो भी इच्छा लालसा अभिलाषायें होंगी सर्व पूर्ण करूँगा । जो जीव मेरी शरण आता है उसके लिये मैं काम पूरक हूँ । उसके लिये कोई इच्छा अपूर्ण नहीं रहती, जिसके लिये वह चिन्ता करे ॥ ४४ ॥

श्रीशुक उवाच

इत्युक्तस्तं प्रणम्याह मुचुकुन्दो मुदान्वितः । ज्ञात्वा नारायणं देवं गर्गवाक्यमनुस्मरन् ॥ ४५ ॥

मुचुकुन्द उवाच

विमोहितोऽयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् ।
सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित् पुरुषश्च वञ्चितः ॥ ४६ ॥
लब्ध्वा जनो दुर्लभमत्र मानुषं कथञ्चि[१]दव्यङ्गमयत्नतोऽनघ ।
पादारविन्दं न भजत्यसन्मतिर्गृहान्धकूपे पतितो यथा पशुः ॥ ४७ ॥
ममैष कालोऽजित निष्फलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः ।
मर्त्यात्मबुद्धेः सुतदारकोशभू[२]ष्वासज्जमानस्य दुरन्तचिन्तया ॥ ४८ ॥

---

१. दप्यङ्ग–वीर. विज. । २. कोशेष्वा–विज. ।

कर्दमक्षमा

अन्वयः—श्रीशुकः उवाच—इति उक्तः, मुचुकुन्दः, मुदान्वितः, तम्, नारायणम्, देवम्, ज्ञात्वा, गर्गवाक्यम्, अनुस्मरन् तम्, प्रणम्य, आह ॥ ४५ ॥ मुचुकुन्दः उवाच—हे ईश ! त्वदीयया, मायया, विमोहितः, अयम्, जनः, पुरुषः, च, योषित्, वञ्चितः, अनर्थदृक्, दुःखप्रभवेषु गुहेषु, सुखाय, सज्जते, किन्तु, त्वाम्, न, भजति ॥ ४६ ॥ हे अनघ ! अयम्, जनः, अयत्नतः, कथञ्चित्, अत्र अव्यङ्गम्, दुर्लभम्, मानुषम्, लब्ध्वा, असन्मतिः, गुहान्धकूपे, पतितः, यथा, पशुः तथा, पादारविन्दं न भजति ॥४७॥ हे अजित ! सुतदारकोशभूषु, आसज्जमानस्य, मर्त्यात्मबुद्धेः, राज्यश्रिया, उन्नद्धमदस्य, भूपतेः, दुरन्तचिन्तया, मम, एषः, कालः निष्फलः गतः ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अष्टाविंशतितमे युगे भगवानवतरिष्यतीति वृद्धगर्गवाक्यमनुस्मरन्नित्यर्थः ॥ ४५ ॥ त्वद्भक्तिरेव केवलं दुर्लभा । कामास्तु तुच्छा न वरणयोग्या इत्याशयेनाभक्तानां संसारमष्टभिः प्रपंचयंस्तौति । विमोहित इति । हे ईश योषित्पुरुषश्चेति द्विविधोऽप्ययं जनस्त्वदीयया मायया विमोहितोऽतोऽनर्थदृक् । अनर्थे संसारे दृक् दृष्टिर्यस्यासौ । यद्वा । अर्थं परमार्थस्वरूपं त्वां न पश्यतीति तथा । अतस्त्वां न भजति । किं तु परस्परं वंचितः सन्सुखेच्छया दुःखानामेव प्रभवो येषु तेषु गृहेष्वेव सज्जत इति ॥ ४६ ॥ किं च कामसुखं सुकरादिष्वपि संभवति । भगवद्भजनं तु न मानुषजन्मव्यतिरेकेणेति मानुषत्वं प्राप्य त्वामभजन्नतिमूढ इत्याह । लब्ध्वेति । अत्र कर्मभूमौ । अव्यंगमविकलांगम् । किं च । असति विषयसुखे मतिर्यस्य सः । गृहमेवांधकूपस्तस्मिन्निपतितः । यथा पशुस्तृणलुब्धोंऽधकूपे पततीति ॥ ४७ ॥ न केवलमस्य जनस्येयं गतिः । किं तु ममापि तथैवेत्याह । ममैष इति । मर्त्ये शरीरे आत्मबुद्धिर्यस्य तस्य ममात एव सुतादिष्वासज्जमानस्य ॥ ४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतीत्थम् । तं कृष्णम् । अष्टाविंशतितमे वैवस्वतमन्वन्तरगताष्टाविंशतितमावृत्त्या गते द्वापरे युग इत्यर्थः । वृद्धगर्गवाक्यं गर्गेण तस्मै प्रोक्तं वाक्यमिति पुराणान्तरात् । इत्यर्थ इति—गर्गपदेन वृद्धगर्गो ग्राह्य इति ज्ञेयम् ॥ ४६ ॥ भगवद्भक्तेर्दौर्लभ्यं द्योतयन्कामानामनर्थहेतुतामाह—त्वद्भक्तिरित्यादिना । यतो विमोहितोऽतो हेतोः । अनर्थमनर्थहेतुं सांसारिकविषयसुखं पश्यतीति तथा । अतोऽनर्थदृक्त्वात् । परस्परं पुरुषेण स्त्रीवंचिता, स्त्रिया च पुरुषः, निजनिजकपटेनेति ज्ञेयम् । सज्जते आसक्तो भवति । त्वदीययेति दुर्लंघ्यत्वमभिप्रेतम् । अयमिति—एतच्च प्रत्यक्षमेवेत्यर्थः । गृहेषु तत्संबंधिपुत्रधनादिषु चासक्तो भवति । न च साक्षाद्दुःखेऽपि कदाचिन्निर्विण्णः स्यात्, रत्यादिना प्रतारितत्वादित्याह—वञ्चित इति ॥ ४७ ॥ विषयसुखसौलभ्येऽपि हरिभजनं दुर्लभमित्याह—किञ्चेति । अत्यनर्थमाह—किञ्चेति । तथायमपि विषयलुब्ध इत्यर्थः । अहो द्वित्रिवराटकमूल्येनाऽज्ञश्चिन्तामणिं विक्रीणातीत्याह—लब्ध्वेति । अनघ हे यत्किंचिद्भजनेन सर्वदुःखनिवर्तक । कथंचित् पूर्वादृष्टेन । पादारविंदं त्वदीयमिति प्रकरणबलात्साक्षादनुक्तिः । संभ्रमेणाऽयत्नतो न भजति अप्रयासेन तस्य यद्भजनं तदपि न कुरुते । अभजने हेतुः—यथा पशुस्तथैवासंमतः विवेकरहितः, अतो गृहांधकूपे पतितश्च भवति ॥ ४८ ॥ स्वस्यापि तथात्वमाह—नेति । एष एतच्छरीरसंबंधी । अजित सर्वेश्वर । उन्नद्धमुच्छृङ्खलम् । अत एव अनात्मबुद्धित्वादेव । दुष्टोंतः परिणामा येषां ते दुरन्ता विषयास्तेषां चिंतया संपादनेच्छया । यमहं निन्दामि स चाहमेवेत्याह—ममेति विश्वनाथः । मम तु तत्राऽविशेष इत्याह—ममेति । एष बहुयुगलक्षणः । निष्फलत्वे हेतुः—अजित हे मद्विधबहिर्मुखावशीकृत । भक्तिविघ्ने हेतुः—भूपतेः सर्वपृथ्वीशाभिमानिनः । अतो राज्यश्रियोन्नद्धः संवृद्धो मदो यस्य तस्य । यत एव मर्त्यात्मबुद्धेः, यत एव च सुतादिष्वप्यासज्यमानस्य तत्रापि 'इदमद्य मया लब्धम्' इत्याद्युक्तदुरंतचिन्तयाऽपारचिंतनेन, यद्वा—दुःखमते यस्यास्तया तादृशचिन्तया । अतो न केवलं निष्फलत्वं किन्तु दुःखदत्वमपीति भावः ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति एतदुक्तः सन् गर्गवाक्यमनुस्मरन् तं नारायणं देवं स्वयं भगवन्तं कृष्णं ज्ञात्वा सुष्ठु निश्चित्य मुदाऽन्वितः प्रणम्य साष्टाङ्गं नत्वाऽऽह ॥ ४६ ॥ त्वदीययेति दुर्लङ्घत्वमभिप्रेतम् अयमिति एतच्च प्रत्यक्षमेवेत्यर्थः । गृहेषु तेषु तत्सम्बन्धिपुत्रधनादियु च सज्जते आसक्तो भवति न च साक्षात् दुःखेपि कदाचिन्निर्विण्णः स्यात् रत्यादिना प्रतारणादित्याह—वञ्चित इति ॥ ४७ ॥ मानुषं मानुष्यम् अनघ हे यत्किचिद्भजनेन सर्वदुःखनिवर्त्तक ! कथञ्चित्पूर्वादृष्टेन लब्ध्वा पादारविन्दं त्वदीयमिति प्रकरणबलात् साक्षादनुक्तिः सम्भ्रमेण अयत्नतो न भजति अप्रयासेन तस्य तद्भजनं तदपि न कुरुते अभजने हेतुः यथा पशुस्तथैवासन्मतिः विवेकरहितः अतो गृहान्धकूपे पतितश्च भवति ॥४८॥ मम तु तत्र विशेष इत्याह ममेति—एष बहुयुगलक्षणः निष्फलत्वे हेतुः, अजित, हे मद्विधबहिर्मुखावशीकृत ! भक्तिविघ्ने हेतुः भूपतेः सर्वपृथ्वीशाभिमानिनः, अतो राज्यश्रिया उन्नद्धः सम्वृद्धो मदो यस्य तस्य अतो मर्त्यात्मबुद्धेः, अत एव च सुतादिष्वप्यासज्जमानस्य तत्रापि "इदमद्य मया लब्धम्" इत्याद्युक्तदुरन्तचिन्तया अपारचिन्तनेन । यद्वा, दुःखमन्ते यस्यास्तया तादृशचिन्तया अतो न केवलं निष्फलत्वं किं तु दुःखदत्वमपीति भावः ॥ ४९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

'इति' एतदुक्तः सन् गर्गवाक्यमनुस्मरन् तं नारायणं ज्ञात्वा मुदान्वितः प्रणम्य साष्टांगं नत्वाह। अत एव देवं द्योतमानम् ॥ ४४ ॥ ईश हे परमेश्वर ! त्वदीययेति मायाया अपि महाशक्तित्वेन दुर्लङ्घ्यत्वमभिप्रेतम् । अत एव विशेषेण मोहितः, अयमिति—एतच्च प्रत्यक्षमेवेत्यर्थः । यद्वा, सर्व्वोऽप्ययं जनो जीवो गृहेषु तत्सम्बन्धिपुत्रधनादिषु सज्जते आसक्तो भवति, न च साक्षाद्दुःखेऽपि कदापि निर्व्विण्णः स्यात्, रत्यादिना प्रतारणादित्याह—वञ्चित इति । अन्यत्तैर्व्याख्यातम् । यद्वा, अयं सत्कुलजन्मापि मल्लक्षणो जनो निर्व्वेदेन देहादौ निरभिमानत्वादहमित्यस्याप्रयोगः । अनर्थदृक् विषयदृष्टिः, योषित् पुरुषो मर्त्यः, च अपि, योषिद्भिर्गृहैर्वा वञ्चितोऽपि । अन्यत् समानम् ॥ ४५ ॥ मानुषं मनुष्यं नृदेहमित्यर्थः । अनघ ! हे भजनमात्रेण सर्व्वदुःखनिवर्त्तक ! कथञ्चित् पूर्व्वादृष्टेन त्वदिच्छया वा, अत एवायत्नतो लब्ध्वापि; यद्वा, कथञ्चिदप्ययत्नतोऽप्रयासेनापि न भजति, पादारविन्दं त्वदीयमिति प्रकरणबलात् । यद्वा, अरविन्दरूपकेण स्वत एव त्वदीयत्वबोधनात् साक्षात्तदनुक्तिर्भक्तिविशेषेण । पतितो भवति किंवा वर्त्तमानेऽप्यतीतनिर्द्देशः, पातनिर्द्धारात् । अन्यत्तैर्व्याख्यातम् । यद्वा, अभजने हेतुः—यथा पशुस्तथा असन्मतिर्विवेकरहितः, अतो गृहान्धकूपे पतितः सन् । पक्षान्तरे जनोऽयं मल्लक्षणः; अर्थः पूर्व्ववत् ॥४६॥ एष बहुयुगलक्षणः, यद्वा, त्वदवतरणेन सर्व्वोत्तमोऽयम्, यद्वा, द्वापरशेषरूपः । अजित ! हे कालावशीकृत ! यद्वा, निष्फलत्वे हेतुः—अजितेति, भक्त्या त्वदवशोकरणादिति भावः । किञ्च, राज्यश्रियेत्यादि भूपतेः सर्व्वपृथ्वीस्वाम्यभिमानिनः, अतो राज्यश्रियोन्नद्धः संवृद्धो मदो यस्य तस्य, अत एव मर्त्त्यात्मबुद्धेः, विपरीतो वा हेतुहेतुमद्भावः । दुरन्तचिन्तया सुतादिपोषणाद्यर्थमनन्तचिन्तया (गी० १६।१३) 'इदमद्य मया लब्धम्' इत्याद्युक्तदुरन्तया अपारचिन्तनेन, यद्वा, दुःखमन्ते यस्यास्तया चिन्तया । एवमन्यतोऽधिकमात्मनः कालनिष्फलत्वमुक्तम् । पक्षान्तरे—अतोऽयं मल्लक्षणो जनः पदारविन्दं न भजति, अतो निष्फल एव गतः । न च केवलं त्वदभजननिष्फल एव, किन्तु साम्राज्यादिना दुःखदोऽपि वृत्त इत्याह—राज्येति ॥ ४७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

योषित्पुरुषश्च योषिदात्मकः पुरुषात्मकश्च लोक इत्यर्थः ॥ ४७–५० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीति । इतीत्थम्भगवतोक्तो मुचुकुन्दः तं श्रीकृष्णं तदेवं तत्रापि नारायणं ज्ञात्वा तदुक्तिभिरिति शेषः । गर्गस्य वृद्धगर्गऋषेर्वाक्यमष्टाविंशतितमे युगे भगवान् वसुदेवगृहेऽवतरिष्यतीत्येवम्विधमनुस्मरंश्च मुदा हर्षेण युक्तः प्रणम्योवाच ॥ ४६ ॥ उक्तिमेवाह—विमोहित इत्यादित्रयोदशश्लोकात्मिकां यदुक्तं "वरान् वृणीष्व राजर्षे सर्वान् कामान् ददामि ते" इति तस्योत्तरोपयुक्तमाह—विमोहित इति । विषयाभिलाषेणैव निदानेनेदृशसंसृतिरूपानर्थं प्राप्तोऽहं भूयो विषयानेव वरयेति चोदयता त्वया वञ्चितः स्यामतो भक्तवञ्चनं तवानुचितमिति मैवं वादीरित्यभिप्रायः । हे ईश ! त्वदीयया मायया विमोहितो योऽयं मत्प्रभृतिर्योषिच्च योषिदात्मकः पुरुषात्मकश्चेत्यर्थः । जनस्त्वां निरतिशयपुरुषार्थभूतं न भजति किन्तु स्वानर्थविषये दृग्बुद्धिर्यस्य तथाभूतः वस्तुतोऽनर्थहेतुमप्यर्थवन्मन्यमानः प्रभवन्त्येभ्य इति प्रभवाः दुःखस्य प्रभवाः तेषु दुःखैकनिदानेषु गृहेषु सुखलेशाभासप्रभवेषु सुखाय सज्जते सक्तो भवति स जनः पूर्वमेव त्वया वञ्चित इत्यर्थः ॥ ४७ ॥ नन्वित्थं जनं वञ्चयन्नहं निर्घृणो विषमश्च किमित्यत आह, लब्ध्वेति । हे अनघ ! न विद्यते यद्भजनादघं तथाभूतेत्यर्थः अयत्नतः स्वप्रयत्नमन्तरेणापि केवलमनुजिघृक्षैकस्वभावत्वत्सङ्कल्पादेव हेतोरत्र कर्मक्षेत्रे दुर्लभमपि मानुषमङ्गं शरीरं त्वदाराधनोपयुक्तं प्राप्याप्ययं जनस्त्वत्पादारविन्दं निरतिशयपुरुषार्थरूपं तत्प्राप्त्युपायभूतं च न भजति । किन्त्वसन्मतिः प्रकृतिपरिणामात्मकदेह एव मतिरात्माभिमानो यस्य तथाभूतः केवलं गृहमेवान्धकूपः तस्मिन् पतितो भवति यथा पशुरजानंस्तृणावृते कूपे जिघृक्षया गतस्तत्र पतितो भवति तद्वत् नह्येतावता तव वैषम्यादिकमापादयितुमुचितं केवलमनुजिघृक्षयैव स्वाराधनोपयुक्तकरणकलेवरादिप्रदानादिति भावः ॥ ४८ ॥ जनसामान्योद्देशेनोक्तमर्थं स्वस्मिन् पर्यवसाययति-ममेति । हे अजित ! एष भूतः कालो मम निष्फलो गतः मया निष्फला नीत इत्यर्थ । कथम्भूतस्य राज्यश्रियोन्नद्धः प्रभूतमदो यस्य दुष्टा विषयाभिलाषिणी मतिर्यस्य तत्र मर्त्ये मरणशीले देहे आत्मेति बुद्धिर्यस्य न केवलं मर्त्यात्मबुद्धेरेव किन्तु सुतादिषु तद्रक्षणपोषणादिविषयया पारचिन्तया आसज्जमानस्याऽऽसक्तस्याहङ्कारममकारयुक्तस्येति पदद्वयफलितोऽर्थः । तत्र कोशो धनागारम् ॥ ४९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

अनर्थदृक् स्वपुरुषार्थदर्शी न भवतीत्यर्थः । यद्वा, अनर्थं संसारमर्थं पश्यतीति दुःखप्रभवेषु दुःखहेतुषु पुरुषेण वञ्चिता योषित् तया पुनः पुरुषश्च वञ्चितः ॥ ४७ ॥ मायया मोहितत्वमुपपादयति–लब्ध्वेति । अत्र कर्मभूमौ मानुषमङ्गं देहम् असत्सु विषयेषु मतिर्यस्य स तथा अन्धकूपे पतितः पशुर्यथा स्वरूपं न भजति तथा गृहलक्षणान्धकूपे ॥ ४८ ॥ मर्त्यात्मबुद्धेर्देहात्मबुद्धेः ॥ ४९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

अष्टाविंशतितमे युगे भगवानवतरिष्यति तं त्वं द्रक्ष्यसीति बृहद्गर्गवाक्यमनुस्मरन्नित्यर्थः ॥ ४६ ॥ त्वद्भक्तिं परिहाय कामा यतः व्रियन्ते एषैव तव मायेत्याशयेनाह—विमोहित इति । योषिच्च जनः पुरुषश्च जनो वञ्चित इत्यन्वयः ॥ ४७ ॥ अहो द्वित्रिवराटिकामूल्येनाज्ञश्चिन्तामणिम्विक्रीणातीत्याह—लब्ध्वेति । अत्र भारतभूमौ अव्यङ्गमविकलाङ्गम् ॥ ४८ ॥ यमहं निन्दामि स चाहमेवेत्याह—ममेति । मर्त्ये शरीरे एव आत्मबुद्धिर्यस्य तस्य ॥ ४९ ॥

गूढार्थदीपिनी

गर्गवाक्यम् । द्वापरे भगवानवतरिष्यति त्वं च द्रक्ष्यसीत्येवंरूपम् ॥ ४४ ॥ अनर्थे संसारे दृक् दृष्टिर्यस्य । वञ्चितः परस्परं निजनिजकपटेन । सज्जते आसक्तो भवति ॥ ४५ ॥ अत्र कर्मभूमौ । कथञ्चित् भगवदनुग्रहेण । अव्यङ्गं पूर्णाङ्गम् । असति विषयसुखे । यथा पशुस्तृणलुब्धः सन् कूपे पतति ॥ ४६ ॥ उन्नद्धः संवृद्धः । आसज्जमानस्य आसक्तस्य । दुरन्ता अपारा ॥ ४७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

जन्मकर्माभिधानानीत्यादिभगवद्वाक्येन तं भगगन्तं नारायणं देवम् ज्ञात्वा अष्टाविंशतितमे युगे भगवानवतरिष्यतीति बृहद्गर्गवाक्यमनुस्मरन् मुदा हर्षेण युक्तः प्रणम्य आह ॥ ४६ ॥ वरान् वृणीष्वेति यदुक्तं तत्र प्राकृतपदार्थविषयकं वरं न कामये तव भक्तिमेव कामये इति वक्तुं तत्र कारणं दर्शयितुं प्राकृतपदार्थाशक्तेः संसारहेतुत्वं भगवद्भक्तेः मोक्षहेतुत्वं चाह–विमोहित इति नवभिः । हे ईश ! योषित् पुरुषश्चेत्युभयविधो जनः त्वदीयया मायया प्रकृत्या मोहितः, अनर्थे अनात्मनि देहे ह्यस्वकीये गृहादौ च दृक् अहन्तारूपा ममतारूपा च दृष्टिर्यस्य सः त्वां मुक्तिप्रदं न भजति अन्योन्यवञ्चितः सुखाय अत्यल्पसुखाय जैह्व्यौपस्थ्यानन्दाय दुःखानां तापत्रयाणां प्रभवेषु गृहेषु सज्जते ॥ ४७ ॥ अत्र त्वत्पादारविन्दभजनार्हे मनुष्यलोके अव्यङ्गमविकलाङ्गं भवत्पादारविन्दभजनार्हं मानुषं शरीरं लब्ध्वापि असति दुष्टे विषये मतिर्यस्य सः पादारविन्दं न भजति किन्तु तृणजिघृक्षया पशुर्यथा कूपे पतति तद्वद्विषयजिघृक्षया गृहान्धकूपे पतितो भवति ॥ ४८ ॥ आस्तामन्यस्य जनस्य कथाऽहमपि त्वन्मायामोहितोऽस्मीत्याह—ममेत्यादिना । मर्त्ये मरणधर्मिणि शरीरे आत्मबुद्धिर्यस्य तस्य ॥ ४९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गर्गवाक्यं स्वं प्रति प्रागुक्तं मुकुन्दमुचकुन्दसंवादो हरिभक्त्यङ्कुरप्ररोहकः श्रोतॄणामिति मतिमान्स एवं वासुदेवमुवाचेत्याह ॥ ४५ ॥ मुचुकुन्द उवाचेति । हे ईश अयं मनस्त्वदीयया त्वदधीनप्रकृतिरूपिण्या तवेच्छारूपिण्या च विमोहितः सन् त्वां न भजति । अर्थमर्थत इत्यर्थः । स्वप्राप्यस्तं पश्यति सोऽर्थदृक् स नेत्यनर्थदृक् । नित्यपुमर्थभूतत्वदनवलोकक इत्यर्थः । अनर्थमर्थान्यं संसारादिकं पश्यतीति वा । सुखाय तत्प्राप्त्यर्थं दुःखप्रभवेषु दुःखस्य प्रभव उत्पत्तिर्येभ्यस्तेषु गृहेषु, जन इत्युक्तविभजनं करोति । योषित्पुरुषश्चेति । पुरुषेण वञ्चित इत्युचितविपरिणामेनान्वेति । वञ्चितो योषिद्वंचितः पुरुष इति योषित्पुरुषः पुरुषापदेशो योषिदधीरत्वात् । दुःखसाधनेषु सुखसाधनताभ्रमजनककर्मणा वञ्चितः सज्जते न धीरः पुमानित्ययं भामिनी सम इति वा ॥ ४६ ॥ मुख्यया त्वदिच्छयाऽमुख्यया प्रकृत्या निमित्तेन स्वकर्मणा च विमोहित इत्युक्तं मोहितत्वं विशदयति । लब्ध्वेति । हे अनघ ! जनोऽयत्नतः प्रयत्नं विना कथञ्चित्केनाप्येकेन सुकर्मणा । अत्र संसारेऽसारे दुलभं दुष्प्रापं मानुषं मङ्गलं लब्ध्वाऽप्यसन्मतिः सत्त्वं यद्भिन्नत्वादसद्विषयजातं तत्र मतिर्यस्य गृहरूपान्धकूपे पतितः पशुः स्वोत्तारकर्मचक्षाणोऽपि तत्र तृणादिचरणतो भवति तथा पादारविन्दं त्यजति ॥४७॥ स्वानुभूतं भूतनाथं प्रति विज्ञापयति ॥ ममेति । हेऽजित । एष एतावान्कालो राजश्रियोन्नद्धो मदो हन्ता यस्य स तस्य । भूपतेर्मर्त्ये शरीरे आत्मन इति ममेति बुद्धिर्यस्य तस्य । सुतदारकोशेष्वासज्जमानस्य मम दुरन्ता चैतत्पोषादिविषयिणी च सा चिन्ता च तया निष्फलो गतः । न नित्यं फलं सम्पादितमित्यर्थः ॥ ४८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं वचनेन यदर्थं स्वयं स्थितः स एवायमिति निश्चित्य स्तोत्रं कर्तुमियेषेत्याह **इत्युक्त** इति । भगवता वरं प्रार्थयेत्युक्तः स्तुत्वैव वरः प्रार्थनीय इति तं प्रणम्य स्तुतिमाह । यतोऽयं **मुचुकुन्दः** प्रसिद्धः, मुदा चान्तरन्वितो जातः । भगवद्वाक्येन संतोषोऽप्येका भगवत्स्तुतिः । तदा गर्गवाक्यमनुस्मरन्, भगवद्वाक्येन तस्यापि स्मरणे जाते, नारायणोऽयमिति निश्चित्य, स्तोत्रं कृतवान् । अनेन नारायणः पुरुष एव ज्ञातः न तु पुरुषोत्तमः । अथवा पुरुषमेव पुरुषोत्तमं मन्यते । भगवद्वाक्यं गर्गवाक्यस्मारकत्वेन जातमिति न फलसिद्धिः । अनेनैवाभिप्रायेण भगवतापि 'कामान् ददामी'त्युक्तम् ॥ ४४ ॥ भगवन्तं स्तौति त्रयोदशभिः **विमोहित** इति । अत्र द्वादशधा कालो निरूप्यते । तदतिक्रमार्थं च एकेन भगवत्प्रपत्तिरिति । तत्र कालेन सर्वे व्यामोहिता इति प्रथमं तामसराजससात्त्विकान् मुग्धान् गणयति त्रिभिः । तत्राप्याद्येन तामसमोहो निरूप्यते । अयं जनः त्वदीयया मायया विशेषेण मोहितः ।

ननु कालेनैव मोहितोऽस्तु, किं भगवन्मायाविमोहनेनेत्यत आह **ईशे**ति । भवानेवेशः । तेन कालरूपो भूत्वा तान् विमोहयसीत्युक्तं भवति । अन्येनैतावत्कर्तुं न शक्यत इति । न ह्यन्यः भगवद्भजनं निवारयितुं शक्नोति । अपराधी स्यात् । अन्ये व्यामोहाः कालकृता भवन्तु नाम, भगवद्भजनहेतुः कालो भगवानेव । तदाह यतस्त्वां **न भजती**ति । ननु परमानन्दे कथं विचारकाणामप्रवृत्तिरिति चेत्, तत्राह **अनर्थदृ**गिति । अनर्थ एव दृष्टिर्यस्य । यद्धि पश्यति, तज्जानाति, उभयं चेत्पश्येत्, तारतम्यं च जानीयात्, अयं त्वनर्थमेव पश्यति । ननु सर्वोऽपि दुःखान्निवर्तते, सुखार्थे प्रवर्तते, सुखदुःखे चात्मानुभववेद्ये, अतः कथमनर्थदर्शनमिति चेत्, तत्राह **सुखाय दुःखप्रभवेषु सज्जत** इति । प्रवृत्तिस्तु स्वसमानप्रकारज्ञानजन्यैव, परं तज्ज्ञानं भ्रान्तम्, तेन फले विपर्ययः । यद्दुःखस्थानम्, यतोदुःखमेवोत्पद्यते, तत्र सुखं भविष्यतीति, यतः प्रवर्तते, तत्राप्यासज्जते, तत्स्थानं निर्दिशति **गृहेष्व**ति । दुःखप्रभवत्वमुपपत्त्योपपादयति **योषित्पुरुषश्चे**ति । गृहे हि द्वयमेवास्ति । द्वयमप्यन्योन्यतः सुखापेक्षम् । यद्येकस्मिन् सुखं भवेत्, तत्रापि पुष्कलम् , तदा ह्यन्यस्मै प्रयच्छेत् , इतरेतराश्रयं कार्यं च न सिध्यत्येव । अतस्तयोर्दुःखमेव सहजम् ,तदनुवृत्तौ दुःखमेव भवेत् । न हि नद्यामग्निः प्राप्यते । नन्वनुभूयते सुखं कथमिति चेत्, तत्राह **वञ्चित** इति । केनचिद्वञ्चितः सुखं मन्यते । न हि युक्तिबाधितं प्रमाणबाधितं च क्वचित्सुखं भवति । अनुभवस्तु भ्रान्तानुभवतुल्यः । अतो लौकिके युक्तिबाधितं न प्रमाणम्, वैदिके श्रुतिरेव प्रमाणमिति । अन्योन्यसुखापेक्षित्वेन प्रवृत्तेः सुखाभावस्तत्र सिद्धः । 'पुन्नाम्नो नरकान्त्रायत' इति वाक्यात् पुरुषशब्देन नरक उच्यते, योषिच्छब्देन च सुतरां नरकम्, 'शालावृकाणां हृदयान्येता' इति 'स सोमो नातिष्ठते'त्यादि श्रुतिभिः स्त्रीणां निन्दाश्रवणात् । 'प्रजापतिरमृतमानन्द इत्युपस्थ' इति उपासनार्थं निरूपितम् । लोकप्रतिपन्नं दृष्टान्तीकर्तुं वा । आविर्भूते वा रसे तद्भवति । गृहत्वादेव परिच्छिन्नत्वान्न रसाविर्भावः । उभयोः परिगणनायाः कृतत्वात्तत्रेतराभावः सिद्धः । यत उभयोः सुखं भवेत् । चकारात्तदपत्यानि च । ते च व्याघ्रवत्तायामेव सुखेप्सवः । अतो युक्तिप्रमाणाभ्यां बाधादन्योन्यप्रवृत्तौ वञ्चित एव । समुदाये च तां निराकर्तुं वञ्चित इत्येकवचनम् ॥ ४५ ॥ एवं गृहासक्तस्य तामसस्य वञ्चनामुक्त्वा शास्त्रादिरतस्यापि विवेकिनोऽपि राजसस्य वञ्चितत्वमाह **लब्ध्वा जनो दुर्लभ**मिति । विवेकसहितं मानुषमपि देहं प्राप्य कथञ्चिन्महता कष्टेन । **अव्यङ्गं** सर्वाङ्गसहितं सर्वेन्द्रियसहितं सर्वबुद्धिसहितं च महता शास्त्रप्रयासेन, जनत्वात्सर्वदा जायमानः, विशिष्टं कदाचिदेव प्राप्नोतीति । तादृशमपि प्राप्य भगवन्तं न भजतीति असन्मतिरेव । प्राप्तसामग्र्या अन्यथा उपयोगाभावात् । इन्द्रियाणामुपयोगोनुपयोगश्च पूर्वं निरूपितः । 'बिले वतोरुक्रमविक्रमान्ये' 'सा वाग्यया तस्य गुणान् गृणीत' इति च । अतो भगवत्पादारविन्दाभजने असन्मतिरेव भवति । असन्मतित्वाद्वा अभजनम् । अत एव गृहान्धकूपे पतति । उपर्युद्गमाभावात् । तत्र च पदार्थदर्शनाभावात् अन्धकूपत्वम् । विवेकी कूपेऽपि पतितः कदाचिदुपायेनोद्गच्छति । तदपि नास्तीति दृष्टान्तमाह यथा पशुरिति । पशुश्च तत्र व्याकुलोऽपि भवति । यतोऽधिकमेव दुःखं प्राप्नोति । निर्गमनोपायं च न वेद ॥ ४६ ॥ एवं राजसानां दूषणमुक्त्वा सात्त्विकानामपि स्वदृष्टान्तेन दूषणमाह **ममैष काल** इति । **एष** इति पूर्वमनुभूतः । म सर्वोऽपि शोकेन पुर एवावतिष्ठते । **अजिते**ति संबोधनम् । न कालेन भवान् जितः, वयं तु जिता इति स्वदुःखनिवेदनमप्युक्तम् । कालो हि पुरुषस्य पुरुषार्थसाधने हेतुर्भवति । तदभावे निष्फल एव गतः । ननु विवेकयुक्तो भवान्, कथमेवं वदतीत्याशङ्क्याह **राज्यश्रियोन्नद्धमदस्ये**ति । राज्यश्रिया परमोन्मादजनिकया उन्नद्धो मदो यस्य । ननु राज्यश्रियाः मदजनकत्वे को हेतुः, तत्राह **भूपते**रिति । सर्वे हि दोषा भूमौ भवन्ति, न स्वर्गे, नापि पाताले । तस्याश्च पतिः तद्दोषेण दूषित एव भवति । अतो दोषसंबन्धात् सज्वरस्यान्नभोजनमिव श्रियापि बुद्धिनाश एव भवति । **मर्त्यात्मबुद्धे**रिति । मर्त्ये मरणधर्मके शरीरे आत्मबुद्धिर्यस्य । पापं तु भूपतित्वजनितमल्पम्, आत्मनोन्यथाज्ञानं तु महत्पापम् । 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणे'ति वाक्यात् । नित्यं चात्मानं बुद्ध्या मारयतीति मर्त्यपदेन वधदोषोऽपि सूचितः । किञ्च । **सुतदारकोशभूषु** आसमन्तात्सज्जमानोऽपि जातः । ममतामपि भवदीयेषु अकृत्वा पुत्रादिषु चतुर्षु कृतवान् । तत्राप्यासक्तिम्, तत्रापि तेषां तत्संबन्धेनात्मनश्च सहस्रचिन्तायुक्तः, तदीयान् पोषयिष्यामि, तच्छत्रून्मारयिष्यामीत्यादि दुरन्ता चिन्ता । यस्या अन्तोऽग्रिमफलं नरकपात इति । एवं त्रिदोषेण अहमपि मग्नः । आयुषो निष्फलता मर्त्यात्मबुद्धिः, पुत्रादिष्वासक्तिश्चेति । एकैकमप्यनर्थायेति न्यायेन चतुष्टयमुक्तम् ॥ ४७ ॥

श्रीसुबोधिनीसारः

शुकोक्तिः । इत्येवमुक्तो मुचुकुंदो मुदा हर्षेणान्वितः तं प्रणम्याह । नारायणं देवं ज्ञात्वा अष्टाविंशे युगे विष्णुरवतरिष्यतीति वृद्धगर्गवाक्यं चिंतयन् ॥ ४५ ॥ हे ईश त्वदीयया मायया विमोहितो योषित् स्त्री पुरुषश्चेति द्विविधोऽनर्थे संसारे दृक् दृष्टिर्यस्य सोयं जनस्त्वां न भजति किं तु वंचितः सुखार्थं दुःखानां प्रभव उत्पत्तिर्येषु तेषु गृहेषु सज्जते रजति ॥ ४६ ॥ दुर्लभं दुष्प्रापम् अव्यंगं व्यंगरहितं मानुषं कथंचित्केनापि प्रकारेणायत्नतः स्वतो लब्ध्वा प्राप्यात्र भरतखंडे ते पादारविंदं न भजति । असत्सु मिथ्यापदार्थेषु मतिः सत्यधीर्यस्य स गृहमेवांधकूपस्तस्मिन् पतितः पशुरिव हे अनघ ॥ ४७ ॥ गतं शोचति । हे अजित । राज्यस्य श्रिया लक्ष्म्योन्नद्धो मदो यस्य मर्त्ये देहे आत्मबुद्धिर्यस्य तस्यानंतर्चितया पुत्रस्त्रीकोशभूमिषु आसज्जमानस्य भूपते राज्ञो **मम एष कालो निष्फलो गतः** ॥ ४८ ॥

विवरणटिप्पणी

विमोहि**तोऽय**मित्यत्र । **स्वसमानेति** । गृहेपि सुखसमान एव प्रकार इत्याकारकज्ञानजन्येत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्येवं भगवतोक्तः, अतस्तद्वचनादेव गर्गस्य ऋषेर्वाक्यं 'अष्टाविंशतितमे युगे भगवान् वसुवेवगृहेऽवतरिष्यति' इत्येवविधमनुस्मरन् तं कृष्णं नारायणं देवं ज्ञात्वा मुदान्वितो हर्षेण पूर्णो मुचुकुन्दस्तं प्रणम्याहेत्यन्वयः ॥ ४५ ॥ तदुक्तीरेव दर्शयति—विमोहित इति त्रयोदशभिः । 'त्वन्मायामोहितस्य पुनर्वरदानवचनेन प्रलोभनं परमेश्वरस्यानुचितमेव' इत्याशयेन सम्बोधयति–ईशेति । अयं मत्प्रभृतिसर्वोऽपि योषिदात्मकः पुरुषात्मकश्च जनस्त्वदीयया मायया विमोहितः । मोहमेव प्रपञ्चयति–अनर्थदृगिति । अर्थं परमपुरुषार्थभूतं परमार्थभूतं परमानन्दस्वरूपं त्वां न पश्यति इति तथा, अत एव त्वां न भजति । किंतु परस्परं वञ्चितः सन् सुखेच्छया दुःखान्येव प्रभवन्ति येषु ते दुःखप्रभवास्तेषु गृहेष्वेव सज्जते आसक्तो भवति ॥ ४६ ॥ 'तव दर्शनादि लब्धवतो मम संसारो न युक्तः, सर्वपापनिवर्त्तकत्वात्' इत्याशयेन सम्बोधयति—अनघेति । अयतनतः-अनायासेन कथञ्चित् भवदनुग्रहेण अव्यङ्गं अविकलाङ्गं अन्तःकरणेन्द्रियादियुक्तं भजनयोग्यं मानुषं शरीरं अत्र भूमौ भारते वर्षे लब्ध्वाप्यसन्मतिः असती दुष्टा क्रान्ता विषयव्याप्ता मतिर्यस्य स जनो भवत्पादारविन्दं न भजति, किन्तु गृह एवान्धकूपस्तस्मिन् पतितो भवति । तन्न युक्तम्, विषयसुखस्य श्वसूकरादिसाधारणत्वात् नरकादिदुःखहेतुत्वाच्च । तत्र दृष्टान्तमाह—यथा पशुरिति । पशुर्यथा तृणलोभेनान्धकारयुक्ते कूपे पतति तद्वदित्यर्थः । 'गृहासक्तस्य न किञ्चित्सुखम्' इति सूचयितुमन्धत्वम् । 'ततो निःसरणमशक्यम्' इति सूचयितुं कूपत्वम् । 'विवेकी कथंचिन्निःसरति, अपि न विषयासक्तः' ममेति । इति सूचयितुं पशुतुल्यत्वं चोक्तम् ॥ ४७ ॥ एवं जनसामान्योद्देशेन उक्तमर्थं स्वस्मिन् पर्यवसाययति । 'त्वमेवैकः कालकर्मस्वभावादिभिर्न वशीकृतः, 'अन्योऽपि त्वत्कृपयैव तद्वशाद्विमुच्यते नान्यथा' इति सूचयन् सम्बोधयति—अजितेति । कालो हि पुरुषस्य पुरुषार्थसाधने हेतुः । पुरुषार्थासिद्धौ च कालस्य निष्फलत्वम् । मम तु न त्वद्भजनादिपुरुषार्थः सिद्धः, अत एष भूतः कालो मम निष्फलो गतः मया निष्फलो नीत इत्यर्थः । 'कुतः पुरुषार्थप्रयत्नो न कृत' इत्यपेक्षायामाह—सुतदारकोशभूषु आसज्जमानस्य तद्रक्षणपोषणादिविषया दुरन्ता अपारा चिन्ता तया निष्फलो गतः, चिन्ताकुलचित्तस्य पुरुषार्थानुसन्धानाभावात् । कदाचिदनुसन्धाने सत्यप्यवकाशाभावाच्चेत्याशयः । कोशो धनागारम् । पुरुषार्थाननुसन्धाने हेत्वन्तरमप्याह—राज्यश्रिया उन्नद्धः प्रभूतो मदो यस्य तस्येति । तत्र हेतुमाह—भूपतेरिति । 'एवं सर्वथानर्थः कथम्' इत्यपेक्षायां "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणा" इति श्रुत्युक्तं सर्वानर्थमूलं दोषमाह—मर्त्यात्मबुद्धेरिति । मर्त्ये मरणशीले देहे आत्मा इति बुद्धिर्यस्य तस्येत्यर्थः ॥ ४८ ॥

अन्वितार्थप्रकाशिका

इत्युक्त इति ॥ इत्येवं भगवतोक्तः अतस्तद्वचनादेव वृद्धगर्गस्य ऋषेर्वाक्यम् अष्टाविंशतितमे युगे भगवान् वसुदेवगृहेऽवतरिष्यति । तं त्वं द्रक्ष्यसीत्येवं विधमनुस्मरन् तं कृष्णं नारायणं देवं ज्ञात्वा मुदान्वितो हर्षेण पूर्णो मुचुकुन्दस्तं प्रणम्याह स्म ॥ ४४ ॥ भक्तिरेव वरणीया नतु कामा इत्याशयेनाभक्तानां संसारं वदन् स्तौति–विमोहित इति ॥ हे ईश ! योषित्पुरुषश्चेति द्विविधोऽप्ययं जनः त्वदीयया मायया विमोहितोऽनर्थदृक् अनर्थे संसारे दृक् दृष्टिर्यस्यासौ । यद्वा । अर्थं परमार्थस्वरूपं त्वां न भजति किं तु परस्परं वञ्चितः सन् सुखाय सुखं लब्धुं दुःखानामेव प्रभवो येषु तेषु गृहेष्वेव सज्जते ॥ ४५ ॥ लब्ध्वेति ॥ हे अनघ ! अयत्नतः अनायासेन कथं चित् भवदनुग्रहेण दुर्लभम् अव्यङ्गम् अविकलाङ्गम् अन्तःकरणेन्द्रियादियुक्तं भजनयोग्यं प्रत्यङ्गमित्यपि पाठः । मानुषं शरीरम् अत्र भूमौ भारते वर्षे लब्ध्वाऽप्यसन्मतिः असती दुष्टा विषयव्याप्ता मतिर्यस्य स जनो भवत्पादारविन्दं न भजति किं तु गृह एवान्धकूपस्तस्मिन्पतितो भवति । पशुर्यथा तृणलोभेनान्धकारयुक्तेकूपे पतति तद्वत् यमहं निन्दामि स चाहमेवेत्याह—ममेति ॥ हे अजित ! राज्यश्रिया उन्नद्धः प्रभूतो मदो यस्य तस्य भुवः पतेर्मर्त्ये मरणशीले देहे आत्मा इति बुद्धिर्यस्य तस्य दुरन्तया चिन्तया पोषणादिविषयया सुतदारकोशभूषु आसज्जमानस्य आसक्तस्य मम एषः भूतः कालो निष्फल एव गतः ॥ ४६–४७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अष्टाविंशतिमे युगे भगवानवतरिष्यतीति वृद्धगर्गवाक्यमनुस्मरन् युगे कलियुगे ॥ ४५ ॥ इदानीं सांसारिकजनं निंदयन्नष्टभिर्हरिं स्तौति विमोहित इत्यादिना । हे ईश अयं योषित् पुरुषश्चेति द्विविधो जनः मायया विमोहितः । अतः, अन्योऽन्यं वंचितः अतोऽनर्थदृक् अनर्थे प्रयोजनशून्ये प्राकृतवस्तूनि दृक् दृष्टिर्यस्यासौ । यद्वा । अर्थं परमपुरुषार्थरूपं तवोपासनं पश्यतीत्यर्थदृक् तथाभूतो न भवतीत्यनर्थदृक् । अतस्त्वां न भजति । तर्हि किं करोति तत्राह दुःखानां नानाविधक्लेशानां प्रभवो येषु तेषु गृहेषु सुखाय सुखप्राप्तये एव सज्जते सक्तो भवति ॥ ४६ ॥ किंच स्त्रीसुखं तु पश्वादिष्वप्यस्ति त्वदुपासनं तु मानुषतनुं विना न भवति

अतो मनुष्यदेहप्राप्तौ सत्यामपि यस्त्वां न भजति स दुर्मतिरित्याह लब्ध्वेति । अत्र भारते अव्यंगं सर्वांगसंपन्नं यथा पशुस्तथा असति कामसुखे मतिर्यस्य सः । अतो गृहमेवांधकूपस्तत्र पतितः ॥४७॥ अहमपि तथाविध इत्याह ममेति हे अजित देवदैत्यैरजेय । मर्त्योमरणधर्मात्मकदेहे आत्मा अहमिति बुद्धिर्यस्य तस्य राज्यलक्ष्म्या उन्नद्धमदस्यात्यंतमदांधस्य अत एव सुतादिष्वत्यासक्तस्य मम ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति । इतीत्थं, उक्तो भगवताऽभिहितः, मुचुकुन्दः, तं श्रीकृष्णं, देवं तत्रापि, नारायणं ज्ञात्वा, तदुक्तिभिरिति शेषः । गर्गवाक्यमष्टाविंशतितमे कलौ युगे भगवान् वसुदेवगृहेऽवतरिष्यतीत्येवंविधं वृद्धगर्गस्य ऋषेर्वाक्यं, अनुस्मरन् सन्, मुदा हर्षेण, अन्वितो युक्तः, प्रणम्य, आहोवाच ॥ ४५ ॥ तत्र यदुक्तं 'वरान् वृणीष्व राजर्षे सर्वान् कामान् ददामि ते' इति तत् सत्यं, परं तु विषयाभिलाषेणैव निदानेनेदृशसंसृतिरूपानर्थमहं भूयः प्राप्तस्तान्विषयानेव वरयेति चोदयता त्वया पुनः कामवरणं प्रति लालसोत्पादनं कृतं तेन यदि कामयाचनं कुर्यां, तर्हि सर्वथाऽहं त्वत्कृतवञ्चनवान् स्यां, मोक्षदस्य तव चैवं वञ्चनमनुचितमिति मादृशान् प्रति कामवरणमेव मा वादीस्त्वद्भक्तिरेव केवलं दुर्लभा, कामास्तु तुच्छा अतो न वरणयोग्या इत्यभिप्रयन् भगवदभक्तानां संसारमष्टभिः प्रपञ्चयन् स्तौति । विमोहित इति । हे ईश, त्वदीयया मायया, विमोहितः यः. अयं मत्प्रभृतिः, योषित्, पुरुषश्चेति द्वयात्मकः जनः, त्वां निरतिशयपुरुषार्थभूतं, भवन्तं, न भजति । किं तु अनर्थे स्वानर्थभूते विषय एव दृक् बुद्धिर्यस्य तथाभूतः सन्, वस्तुतोऽनर्थहेतुमप्यर्थवन्मन्यमानः सन्, इत्यर्थः । प्रभवन्त्येभ्य इति प्रभवा दुःखस्य प्रभवास्तेषु, दुःखैकनिदानेष्वित्यर्थः । गृहेषु, सुखाय सज्जते सक्तो भवति । अतः सः, वञ्चितः । त्वया पूर्वमेव वञ्चित इत्यर्थः । परमेश्वरस्य तव कामदानेन वञ्चितवञ्चनं युक्तमिति भावः ॥ ४६ ॥ नन्वित्थं जनं वञ्चयन्नहं निर्घृणो विषमश्च किमित्यत आह । लब्ध्वेति । हे अनघ, न विद्यते यद्भजनादघमिति तथाभूतेत्यर्थः । अयत्नतः स्वप्रयत्नमन्तरेणापि, केवलमनुजिघृक्षैकस्वभावस्य तव संकल्पाद्धेतोरेवेत्यर्थः । अत्र कर्मक्षेत्रे भरतखण्डे, दुर्लभमुद्यमकोटिभिरपि दुष्प्रापं, अव्यङ्गमविकलाङ्गं, मानुषं मनुष्यसंबन्धि, त्वदाराधनोपयुक्तं शरीरं, अयत्नतः शरीरं, अयत्नतः प्रयासं विनैव, कथंचित् लब्ध्वा प्राप्यापि, अयं जनः, पादारविन्दं निरतिशयपुरुषार्थसाधनभूतं तव चरणकमलं न सेवते । किं तु असति प्रकृतिपरिणामात्मके देहे एव मतिरात्माभिमानो यस्य तथाभूतः सन्, केवलं गृहमेव विषयतृणाच्छादितोऽन्धकूपस्तस्मिन्, पशुः यथा तथा, पतितः । यथा पशुस्तृणाद्यैराच्छादितत्वात् कूपमजानंस्तृणबुभुक्षया तत्र गतस्तत्र निपतति, तद्वदयमपि विषयतृणलिप्सया पतित इत्यर्थः । केवलमनुजिघृक्षयैव स्वाराधनोपयुक्तकरणकलेवरादिप्रदातृत्वादवञ्चके त्वयि कथंचिदपि नैर्घृण्यवैषम्यादिसंभवो नास्त्येत्येव, तेन त्वया दयादत्तं नृजन्म लब्ध्वा त्वामभजन्मूढः कामसुखस्य श्वशूकरादिष्वपि संभवाद्भगवद्भजनस्य तु मनुष्यजन्मन्येव संभवादिति भावः ॥ ४७ ॥ जनसामान्येनोक्तमर्थं स्वस्मिन् पर्यवसाययति । ममेति । हे अजित, राज्यश्रिया, उन्नद्धः प्रभूतो मदो यस्य तस्य, दुष्टा विषयाभिलाषिणी मतिर्यस्य तस्य, मर्त्ये मरणशीले देहे, आत्मेति बुद्धिर्यस्य तस्य, सुताश्च दाराश्च कोशश्च भूश्च तेषु, आसज्जमानस्य आसक्तस्य अहंकारममकारयुक्तस्येत्यर्थः । मम एषः भूतः, कालः, दुरन्तचिन्तया सुतादिरक्षणपोषणादिविषययाऽपारचिन्तया, निष्फलः गतः । मया निष्फलो नीत इत्यर्थः । सुताः पुत्राः, दाराः स्त्रियः, कोशो धनागारम् ॥ ४८ ॥

कृष्णप्रिया

श्रीशुकाचार्य जी कहने लगे कि राजन् ! जब भगवान् श्रीकृष्ण ने अनुग्रह कर अपना स्वरूप परिचय दिया तब महाराज मुचुकुन्द को महर्षि गर्ग जी का वचन स्मरण पथ में आया कि यही भगवान् पूर्ण पुरुषोत्तम हैं जो यदुवंश में प्रकट होने वाले थे आनन्दोल्लक्षित होकर राजा मुचुकुन्द श्री ठाकुरजी के श्रीचरणों में प्रणाम करके भगवान का गुणगान करने लगे ॥ ४५ ॥ हे नाथ ! संसार के सर्व जन आपकी माया से मुग्ध बन गये हैं इसलिये आपके श्रीचरणों की सेवा से विमुख हो रहे हैं। नश्वर पदार्थों के सुखों को नित्यसुख मानकर दुःख ही जिसका परिणाम है वैसे व्यर्थ कर्मों में ही लगे रहे हैं। स्त्री एवं पुरुष दोनों ही ठगे जा रहे हैं और गृह संसार सुख में ही लुब्ध बन चुके हैं ॥ ४६ ॥ हे पुण्यपुञ्ज, हे संसार से सर्वथा पर ! यह भूतल-भूमि सर्वथा पुण्यभूमि है इस पवित्र भूमि में मानव शरीर की प्राप्ति अति दुर्लभ है इसमें सर्वाङ्ग सुभग और सेवोपयोगी शरीर अनायास ही मिला । यदि इतनी नाथ की अहैतुकी कृपा और सर्वविध भजन सुविधा के रहने पर भी नश्वर संसार सुखों में ही–तुच्छ विषयों में ही जीवन खो दिया और श्रीहरि के श्री चरण कमलों की सेवा न किया उसने तो, तृण लोभ से पशु जैसे जल रहित अन्धकूप में पड गिरा वैसे वह जीव मोहान्ध कूप में गिर गया ॥ ४७ ॥ महाराज ! हे अजित ! राज्यलक्ष्मी के मद से एवं भूपति पद मद से पागल बने हुए मेरा सारा जीवन निष्फल गया । मैं आज पर्यन्त नश्वर देह को नित्य स्वरूप आत्म स्वरूप समझ कर पुत्र-पत्नी कोश सम्पत्ति पृथ्वी आदि पदार्थों में ही आसक्त रहा उन वस्तुओं को प्राप्त करने की रक्षण की बहाने की चिन्ता में लगा रहा ॥ ४८ ॥

कलेवरेऽस्मिन् घटकुड्यसन्निभे निरूढमानो नरदेव इत्यहम् ।
वृतो रथेभाश्वपदात्यनीकपैर्गां [1]पर्यटंस्त्वागणयन् सुदुर्मदः ॥ ४९ ॥
प्रमत्तमुच्चैरितिकृत्यचिन्तया प्रवृद्धलोभं विषयेषु लालसम् ।
त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमन्तकः ॥ ५० ॥
पुरा रथैर्हेमपरिष्कृतैश्चरन् मतङ्गजैर्वा नरदेवसंज्ञितः ।
स एव कालेन दुरत्ययेन [2]ते कलेवरो विट्कृमिभस्मसंज्ञितः ॥ ५१ ॥
निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवन्दितः ।
गृहेषु मैथुन्यसुखेषु[3] योषितां क्रीडामृगः पूरुष ईश [4]नीयते ॥ ५२ ॥

कर्दमक्षमा

अन्वयः—घटकुड्यसन्निभे, अस्मिन्, कलेवरे अहम्, नरदेव, इति, निरूढमानः, रथेभाश्वपदात्यनीकपैः, वृतः, त्वाम्, अगणयन्, सुदुर्मदः, गाम्, पर्यटन् ॥ ४९ ॥ इतिकृत्यचिन्तया, उच्चैः, प्रमत्तम्, प्रवृद्ध लोभम्, विषयेषु, लालसम्, क्षुल्लेलिहानः अहिः, आखुम्, इव, अप्रमत्तः, त्वम्, अन्तकः, सहसा, अभिपद्यसे ॥ ५० ॥ पुरा नरदेवसंज्ञितः हेमपरिष्कृतैः, रथैः, वा, मतङ्गजैः, चरन्, स, एव कलेवरः, ते, दुरत्ययेन, कालेन, विट्कृमिभस्मसंज्ञितः, भविष्यति ॥ ५१ ॥ हे ईश ! अभूतविग्रहः, दिक् चक्रम्, निर्जित्य, वरासनस्थः, समराजवन्दितः, पूरुषः, मैथुन्यसुखेषु, गृहेषु, योषिताम्, क्रीडामृगः, नीयते ॥ ५२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उन्नद्धमदत्वं प्रपंचयति । कलेवर इति । घटकुड्यादिसदृशे दृश्येऽनात्मनि यत एवं सुदुर्मदोऽभवम् । अतो ममैष कालो निष्फलो गत इति ॥ ५० ॥ त्वामगणयंतं त्वमाक्रमसीत्याह । प्रमत्तमिति । प्रमत्तमनवहितम् । त्वामंतकमविगणय्य देहादिष्वासक्तमिति यावत् । कुतः प्रमत्तम् । इतिकृत्यचिंतया एवमेवं करणीयमिति मनोरथपरंपरया मनोरथे भग्नेऽपि विषयेषु लालसमुत्सुकम् । प्राप्तेऽपि पुनः प्रवृद्धो लोभस्तृष्णा यस्य तमंतकस्त्वमभिपद्यसेऽभिभवसीत्यर्थः । क्षुधा सृक्किणी लेलिहानोऽहिराखुं मूषकमिवेति ॥ ५१ ॥ किं च कालात्मना त्वयाऽभिपन्नो देह एवं भवतीत्याह । पुरेति । श्वसृगालादिभिर्भक्षितो विट्संज्ञितस्तैरभक्षितः कृमिसंज्ञितो दग्धो भस्मसंज्ञितो भवति इति बुद्ध्या विचार्यैवं भूतशरीरे ममतां कुर्वंतो जना हरिं नाराधयन्ति ते आत्मनि शत्रुभूता ज्ञेयाः सततम् । यतः "योनेः सहस्राणि बहूनि गत्वा दुःखेन लब्ध्वाऽपि च मानुषत्वम् ॥ सुखावहं ये न भजन्ति विष्णुं ते वै मनुष्यात्मनि शत्रुभूताः" इति ॥ ५२ ॥ किं च अंतकप्राप्तेः प्रागपि दिग्विजयिनो राज्ञोऽपि पारतंत्र्यदुःखं तदवस्थमेवेत्याह । निर्जित्येति । अभूतविग्रहोऽविद्यमानसंग्रामः । पूर्वं ये समाना राजानस्तै राजभिर्वंदितोऽपि मिथुनीभावः सुरतमेव परं सुखं येषु तेषु योषितां गृहेषु क्रीडामृग इव इतस्ततो नीयते ॥ ५३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कले शुके वरा स्थितिर्यस्य तत्कलेवरम् । अलुक्समासः । "वरा प्रोक्ता शतावर्षा सुभगास्थितिभक्तिषु' इति धरणिधरोक्तेः । घटकुड्यसन्निभे निपभित्त्यादितुल्ये आदिपदमुपलक्षणलब्धमिति स्वामिचरणाभिप्रायः ॥ अस्मिन्सर्वदोषास्पदे । अगणयन् विस्मरणादिभिरनाद्रियमाणः ॥ ५० ॥ उत्सुकमुत्कंठावन्तम् । प्राप्तेऽपि—विषये इत्यर्थः । लेलिहान आसास्वादानः उं'दुरुर्मूषिकोऽप्याखुः' इत्यमरः ॥ त्वामभजन्तं जनं त्वत्स्वरूपः काल एवं ग्रसेदित्याह—प्रमत्तं विषयासक्तत्वेन त्वत्स्मरणादाववधानरहितम् । प्रवृद्धलोभं तेषां भोगादनुपरतम् । कालरूपेणान्तयतीत्यंतकस्त्वमित्यभेदोक्तिः । कालशक्तेस्तव भजनं भयेनापि युक्तमिति विवक्षया सहसा तर्कमतिक्रम्याभिपद्यसे आभिमुख्येन सर्वतो वा प्राप्नोषि । दृष्टान्ते विशेषणानि समानानि ॥५१॥ अन्यदाह—किञ्चेति । अभिपन्नो ग्रस्तः । तैः श्वशृगालाद्यैः । यतः उक्तं ग्रंथान्तरे—योनेरिति । सुखावहं स्वर्गापवर्गदम् । दुरत्ययेनानिक्रांतुमशक्येन । ते तत्रांशभूतेनेत्यर्थः । 'प्रभावं पौरुपं प्राहुः कालम्' इत्याद्युक्तेः । कलेवर इति पुंस्त्वमार्षम् ॥ ५२ ॥ अन्यदाह—किञ्चेति । अंतकप्राप्तेर्मरणात् । तस्मिन्नतिष्ठत इति तदवस्थम् । दिशां चक्रं मंडलं दिक्चक्रम् । समा विद्यावयःकुलदानैर्ये तुल्याः । नीयते प्राप्यते ॥ कामिमात्रस्य जीवने मरणेऽपि सुखं नास्तीति वदन्नादावैहिककामिनः साम्राज्येऽपि पराधीनतादुःखमाह—निर्जित्येति द्वाभ्याम् । वरासनस्थो महासिंहासनस्थः । योषिद्भिस्तद्दास्यादिभिश्च । गृहेषु विविधान्तःपुरेषु । क्रीडामृगो भवन्नीयते । हे ईश सर्वेषां त्वन्मायाधीनत्वादिति भावः ॥ ५३ ॥

---

१. स्त्वामगणय्यदु—वीर. विज. । २. चेल्क—वीर ; वै—विज. । ३. परेषु—विज. । ४. गी—विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अस्मिन् सर्वदोषास्पदे अगणयन् विस्मरणादिभिरनाद्रियमाणः ॥ ५० ॥ तादृशचिन्तायाः पर्यवसानदशां व्यञ्जयति—प्रमत्तमिति । उच्चैः प्रमत्तं त्वयि स्मरणादौ चावधानरहितम् अतः प्राप्तेषु विषयेषु प्रबुद्धलोभं तेषां भोगादनुपरतम् अप्राप्तेषु तु तेषु लालसां च तदीप्साभराकुलं कालरूपेणान्तयसीत्यन्तकस्त्वम् अभेदोक्तिः कालशक्तेस्तव भजनं भयेनापि युक्तमिति विवक्षया सहसा तर्कमतिक्रम्य अभिपद्यसे आभिमुख्येन सर्वतो वा प्राप्नोषि दृष्टान्तेऽपि विशेषणानि समानानि ॥५१॥ मरणे चात्यन्तघृणाकरं कलेवरं स्यादिति समुखविकारमाह—पुरेति । यश्चरन्नासीत् स एव अत्र पुंस्त्वमार्षं ते तव प्रभावरूपेण कालेन ॥५२॥ कामिमात्रस्य जीवने मरणेऽपि सुखं नास्तीति वदन्नादावैहिककामिनः साम्राज्येऽपि पराधीनतादुःखमाह—निर्जित्येति, द्वाभ्याम् । वरासनस्थः महासिंहासने स्थितः नीयते योषिद्भिस्तद्दास्यादिभिरपि हे ईशेति सर्वेषां त्वन्मायाधीनत्वादिति भावः ॥ ५३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अस्मिन्नचेतनत्वेन घटादितुल्यतया सर्वैः साक्षादनुभूयमाने, किंवा सर्व्वदोषास्पदे देहे च रथादिभिर्वृतो वेष्टित इति तेषां बाहुल्यं सूचितम्, अतः परितोऽटन् गच्छन् इतस्ततः सर्वत्र परिभ्रमन्नित्यर्थः । तत्र रथादयः सेनायाश्चत्वार्य्यङ्गानि, अनीकपाः सेनापतयः, रथादीनां यथोत्तरं वेष्टने नैकट्याधिक्यात्तत्तत्क्रमेण निर्द्देशः । अगणयन् विस्मरणादिना नाद्रियमाणः ॥ ४८ ॥ सुदुर्म्मदत्वेऽपि मरणमवश्यमेव, तदप्यकस्मादेव स्यादित्याह—प्रमत्तमिति । उच्चैरतिशयेन प्रमत्तं कालरूपेणान्तयसीत्यन्तकस्त्वमप्रमत्तो निजकृत्ये सदा सावधानः, सहसा सद्य एव अतर्कितं वा, अभिपद्यसे मारयसीत्यर्थः । अप्रमत्ततया सहसाभिपत्तौ दृष्टान्तः—क्षुदिति, अनेनाप्रमत्तत्वं सहसापत्तिश्च तस्य दर्शितम् । अन्यत्तैर्व्याख्यातम् । यद्वा, उच्चैः प्रमत्तं त्वयि स्वमरणादौ वावधानरहितम्, अत एव विषयेषु प्रवृद्धलोभम्, प्राप्तौ सत्यां तेषां भोगादनुपरतं तेष्वेव लालसमप्राप्तौ सदा तदीप्साभराकुलम् । अन्यत् समानम् ॥ ४९ ॥ मरणे चात्यन्तघृणाकरं कलेवरं स्यादिति समुखविकारमाह—पुरेति । यश्चरन्नासीत्, स एव, अत्र पुंस्त्वमार्षम् । इत्यत्यन्तविरोधस्थानतोक्ता । दुरत्ययेन यागयोगादिना केनचित् प्रयासेनाप्यपरिहार्य्येण । कुतः ? ते त्वदीयेन त्वदंशत्वादित्यर्थः ॥ ५० ॥ जीवनेऽपि साम्राज्यसम्पत्तावपि सुखं नास्त्येवेति द्वाभ्यां वदन्नादौ विषयभोगे पराधीनतादुःखमाह—निर्जित्येति । वरासनस्थो महासिंहासने स्थितः, नीयते योषिद्भिस्तद्दासदास्यादिभिर्वा । हे ईशेति सर्व्वेषां तन्मायाधीनत्वादिति भावः ॥ ५१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीम्

त्वमप्रमत्त इति अन्तकरूपस्त्वमप्रमत्तोऽभिपद्यते इत्यर्थः । क्षुल्लेलिहानः क्षुधा लोलजिह्वः ॥ ५१-५२ ॥ अभूतविग्रहः असञ्जातयुद्धः ॥ ५३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

उन्नद्धमदत्वमेव प्रपञ्चयति—कलेवर इति । घटकुड्यसदृशे जडे अस्मिन् कलेवरे रूढमूलः मानः आत्माभिमानो यस्य सोऽहं नरदेव इत्यभिमन्यमान इति शेषः । रथाश्वेभाश्वाश्वाश्च पदातयश्च तेषामनीकानि सैन्यानि तानि पान्तीति तथा तैः परिवृतो गां भूमिं पर्यटन् त्वामगणय्य तुच्छीकृत्य दुर्मद आसमिति शेषः ॥ ५० ॥ त्वामगणयन्तम् इत्थं दुर्मदं मां त्वं कालरूपेणाक्रमसीत्याह, प्रमत्तमिति । इतिकृत्यचिन्तया एवमेवं कर्त्तव्यम् इति मनोरथपरम्परया नितरां प्रवृद्धः लोभो यस्य तं विषयेषु शब्दादिषु लालसमासक्तचित्तं प्रमत्तं स्वहितानभिज्ञं मां त्वमप्रमत्तः, अन्तं करोतीत्यन्तकः विनाशहेतुः कालरूपो भूत्वाऽभिपद्यसे आकर्षसि ग्रससीति यावत्, यथा क्षुधा बुभुक्षया लेलिहान आस्वादमानः क्षुधा लोलजिह्व इति यावत्, यङ्लुङन्ताल्लिहेः कर्मणि लटः शानजादेशः अहिः सर्प आखुं मूषकमापद्यते तद्वत् ॥ ५१ ॥ नन्वतिदुर्ल्लभकल्याणतमं नरदेवशरीरं प्राप्यापि किमिति तन्निन्दयसीत्याशङ्कायामन्ततः कालाभिपन्नस्य तस्य गतिं पश्येत्यभिप्रायेणाह—पुरेति । पुरा तावत्स्वर्णालङ्कारालङ्कृतैः रथैर्गजैर्वा सञ्चरन् यो नरदेवसंज्ञितः नरदेव संज्ञाऽस्य सञ्जातेति तथा तारकादित्वादितच् स एव देहः दुरतिक्रमणीयेन कालेनाभिपन्नश्च तावत् श्वशृगालादिभिर्भक्षितो विट्संज्ञितः तैरभक्षितश्चेत् कृमिसञ्ज्ञितः दग्धश्चेद्भस्मसञ्ज्ञितः भवतीत्यर्थः ॥ ५२ ॥ "सर्वस्येशानः" इति श्रुत्युक्तविविधसर्ववस्त्वपेक्षस्वातन्त्र्यं त्वामविगणय्य स्वतन्त्रं मन्यमानस्य मम निर्हृनिप्रतियोगिकपारतन्त्र्यमवर्जनीयमेवासीदित्याद्यभिप्रेत्याह–निर्जित्येति । दिक्चक्रं दिङ्मण्डलं निर्जित्याभूतोऽसम्भावितः विग्रहो विरोधो यस्य तथाभूतः असम्भावितप्रतिपक्ष इत्यर्थः । वरासनस्थः सार्वभौमासनाधिष्ठितः ये पूर्वं समास्तुल्या राजानः तैरपि वन्दितः पुरुषः हे ईश ! मैथुनमेव सुखं येषु तेषु गृहेषु योषितां स्त्रीणां केवलं क्रीडामृगः । क्रीडार्थं पोषितो वानरादिरिव नीयत इतस्ततश्चाल्यते इत्यर्थः । पुरुष इति पारोक्ष्यनिर्देशः सर्वदिग्विजयपुरुषाभिप्रायः ॥ ५३ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

देहात्मबुद्धित्वं दर्शयति—कलेवर इति । दुरन्तविषयचिन्तया दुष्टो मदो विद्याभिजनलक्षणो यस्य स तथा ॥ ५० ॥ धनादिनिमित्तमदस्य दुष्टत्वं कथमत्राह—प्रमत्तमिति । क्षुधा जिह्वया सृक्किणी लेलिहन् ॥ ५१ ॥ किमत्र प्रमाणमित्यतः प्रत्यक्ष-

मेवेत्याह—पुरेति । यो देहः पुरा नरदेवसञ्ज्ञितः स एव देहो दुरत्ययेन कालेन विट्कृमिभस्मसञ्ज्ञितो भवतीति शेषः श्वादिभक्षितो विष्ठासंज्ञितो भवति अदग्धः कृमिसञ्ज्ञितः दग्धः भस्मसञ्ज्ञित इति विशेषः ॥ ५२ ॥ इदं च लज्जाकरमित्याह—निर्जित्येति । दिक्चक्रं दिङ्मण्डलम् अभूतविग्रहः अजातयुद्धः वयसा कुलेन दानेन विद्यया च समै राजभिर्वन्दितः बहिरेवंविधः पुरुषो मैथुन्यपरेषु ग्राम्यसुखमात्ररतेषु योषितां क्रीडामृगो नीयत इत्यन्वयः ॥ ५३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसंदर्भः

कालत्रयोपपन्नानि भूतो वा भविष्यति वा वर्त्तमाने वा कानिचिदपीत्यर्थः ॥ ४०-५४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कुड्यं भित्तिः यतोऽहं सुदर्मदोऽभूवम् अत एष कालो निष्फलो गत इति पूर्वेणान्वयः ॥ ५० ॥ त्वामभजन्तं जनं त्वत्स्वरूपः काल एवं ग्रसेदित्याह—प्रमत्तं विषयासक्तत्वेन त्वय्यनवहितम् इतिकृत्यमेवमेवङ्करणीयमिति तच्चिन्तया विषयेषु प्रवृद्धलोभं मनोरथे भग्नेऽपि लालसं विषयेषूत्सुकम् अन्तकः कालरूपी त्वं तु अप्रमत्तः सावधान एवाभिपद्यसे अभिभवसि क्षुधा सृक्किणी लेलिहानोऽहिराखुं मूषकं यथाभिपद्यते तथा ॥ ५१ ॥ कालग्रस्तो देह एवं भवेदित्याह—पुरेति । यो रथैर्मतङ्गजैर्वा चरन् नरदेवनामा शोभित आसीत् स एव देहः विट्कृमिभस्मनामा बीभत्सितो भवतीत्यर्थः ॥ ५२ ॥ एवं स्वसजातीयजनस्य नरदेवत्वं विट्कृमित्वं कालभेदगतमुक्तं दिग्विजयित्वं योषित्क्रीडामृगत्वं तु समकालगतमेवेत्याह—निर्जित्येति । अभूतविग्रहः निवृत्तसङ्ग्रामकृच्छ्र इत्यर्थः । पूर्वं ये समास्तैः राजभिर्वन्दितोऽपि पुरुषः योषितां क्रीडामृगो भवन् । गृहेषु विविधान्तःपुरेषु नीयते योषिद्भिस्तद्दास्यादिभिर्वेति शेषः ॥ ५३ ॥

गूढार्थदीपिनी

अस्मिन् नरदेवोऽहमिति निरूढाभिमानो गां भूमिं पर्यटन् त्वामपि अगणयन् अनाद्रियमाणः सुदुर्मदोऽभवम् अतो निष्फलो गत इति पूर्वेणान्वयः । कुड्यं भित्तिः । सन्निभे सदृशे ॥ ४८ ॥ उच्चैरतिशयेन प्रमत्तमेनं जनम् अप्रमत्तस्त्वं सहसा अकस्मादेव अभिपद्यसे ग्रससे । अहिर्यथा मूषकम् । लेलिहानो लोलजिह्व इत्यर्थः ॥४९॥ चरन् विचरन् । श्वादिभिर्भक्षितो विष्ठेति । अभक्षितः कृमिरिति । दग्धो भस्मेति । दुरत्ययेन दुरतिक्रमणीयेन ॥ ५० ॥ दिक्चक्रं दिङ्मण्डलम् । अभूतविग्रहोऽसंभावितसंग्रामः । पूर्वं ये समास्तैः वन्दितः । क्रीडामृगो वानर इव नीयते इतस्ततश्चाल्यते । वरासनं सिंहासनम् ॥ ५१ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

घटकुड्यसन्निभे घटभित्तिसदृशे जडे अनात्मभूते कलेवरे अहं नरदेव इति निरूपमाणः गां भूमिं पर्यटन् त्वामगणयम् दुर्मदोऽभूवमिति शेषः ॥ ५० ॥ किञ्च, इतिकृत्यचिन्तया इदं कृतमिदं करिष्ये इति लोकप्रसिद्धकृत्यचिन्तया उच्चैरत्यन्तं प्रमत्तमनवहितं माम् अप्रमत्तस्तदनुरूपनिग्रहानुग्रहादौ सदा सावधानः, अन्तं तत्तत्काम्यकर्मफलसमाप्तिं करोतीति तथाभूतस्त्वमभिपद्यसे अभिभवसीत्यर्थः क्षुधा सृक्किणी, लेलिहानः अहिः आखुं मूषकमिव ॥ ५१ ॥ यः कलेवरः नरदेवसंज्ञित आसीत्स एव ते तव शक्तिभूतेन कालेन श्वादिभक्षितो विट्संज्ञितस्तैरभक्षितः कृमिसंज्ञितो दग्धो भस्मसंज्ञितो भवति तादृशकलेवराशक्त्या त्वामभजतां धिगिति भावः ॥ ५२ ॥ किञ्च, दिक्चक्रं दिङ्मण्डलं निर्जित्य स्वप्रतापेन निष्कण्टकं कृत्वा अभूतविग्रहः अविद्यमानविग्रहः समराजवन्दितः समैः समसुखदुःखैः स्वकीयैराजभिर्वन्दितः एवं त्वदाराधनावसरं प्राप्यापि योषितां क्रीडामृगस्सन् मैथुनसुखेषु गृहेषु नीयते ताभिरिति शेषः । दुःखोदर्कं गृहं कलत्रादिपरवशानां त्वाभजतां धिगिति भावः ॥ ५३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

घटसन्निभे कुड्यसन्निभे घटैरेव विना मृदमेकस्योपर्येकस्थापनेन निर्मिते कुड्य इति वा । अनेन तीव्रव्रजनं ध्वनयति । कलेवरे शरीरेऽहं नरदेवो नृप इति निरूढो दृढो मानो मनःसमुन्नतिरहन्ता वा तद्वानहम् । रथेभाश्वपदात्यनीकपैर्वृतस्त्वामगणय्याविगणय्य । ल्यप् छान्दसः । दुर्मदो मां भूमिं पर्यटन् त्वागणयन्सुदुर्मद इति च पठन्ति । स च निश्शठः पाठः । य एवंविधस्तस्य मम कालो निष्फलो गत इत्यतीतेनान्वयः ॥ ४९ ॥ इतिकृत्यचिन्तया । एवमनुष्ठाने स्वस्वकीयहितं विहितं स्यादित्यादिचिन्तया । उच्चैः प्रवृद्धलोभं विषयेषु लालसं तृष्णावन्तं विषयेषु प्राप्तेषु सत्सु प्रमत्त उच्चैः स्वस्वरूपातिरेकेण लब्धैर्विषयैः प्रमत्त इति वा । सहसा मदतर्कणेन हे सहस अप्रमत्त त्वं प्रतिपद्यसे । अप्रमत्तस्य तवाभिपत्तिर्मां प्रमत्तं प्रति भवति भगवन्नेवमिति निदर्शनं दर्शयति । क्षुधा लेलिहानो द्वे सृक्किण्यौ । अन्तको नाशकोऽहिराखुमिव मूषकमिवेति । स यथाऽऽखुं ग्रसति तथा त्वमप्रमत्तः प्रमत्तं मामभिपद्यसे । अत्र विशेषणीभूतमदादिनाशो ज्ञेयः ॥ ५० ॥ हेमपरिष्कृतै रथैर्मतङ्गजैश्चरन् मत्तवशाश्चरन्निति वा । नरदेवेति

शंसितो यो देहः स एव कालेन दुरत्ययेनात्येतुमशक्येन कलेवरः कलेवरम् । अथ कलेवरं गात्रमितत्यमरात्कलेवरम् । हलदन्तादिति सप्तम्या अलुक् । सारमेयादिभुक्तश्चेद्विट्संज्ञितः । अदग्धोऽभक्षितश्च क्रृमिसंज्ञितो भवति दग्धश्च भस्मसंज्ञितो भवति कालमूलत इयतीदशां यातीति ॥५१॥ सहस्राश्वनायको गृहगृहिणीकार्पाससिचयप्रचयकृदितिवदेतादृशः प्रागेतादृशो मृगदृशां पुरत इतीरयति । निर्जित्येति । अभूतविग्रहोऽजातार्विदिक्चक्रं निर्जित्य परासनस्थः समराजैर्वन्दितश्चेदपि कदाचिदेवमपि भवतीत्याह । समरेऽजयं यथा भवति तथाऽऽदितः परैः खण्डित इति वा । पूरुषो मैथुन्यपरेषु मैथुयं ग्रामधर्मस्तदेव परं येषां ते तेषु गृहेषु योषितां क्रीडामृगो लीलामृगः कपिरिति यावत् । गीयते तस्यैतस्य च न तिलतुल्यव्यत्यास इति भावः । यो मैथुनी तन्निरत इति तद्वान् । अपरेषु पुरुषो गीयते । योषितां गृहेषु क्रीडामृगो गीयत इति वा ॥ ५२ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं त्रिविधानामपि मोहमुक्त्वा विशेषतः स्वस्य परमं दोषत्रयमाह कलेवरेऽस्मिन्निति त्रिभिः । कालेन ग्रासोऽत्र निरूप्यते । तत्र कालस्य दोषाभावाय स्वदोषं निमित्तत्वेन निरूपयति **कलेबर** इति । अस्मिन् कलेवरे शरीरे निरूढमानः सन् सुदुर्मदो भूत्वा त्वामगणयन् जातोऽस्मि, तदा त्वं अन्तको भूत्वा अभिपद्यस इति द्वयोः संबन्धः । भगवतो ग्रासे षट् दोषाः अस्मदीया निमित्तभूताः । आदौ **कलेबरं** कले कलने कालभक्षणे वरमुत्कृष्टम् । कालः प्रथमतस्तदेव भक्षयति मृत्पाषाणादिभ्यः । अत एव प्रस्तरादयः चिरस्थायिनः, कलेवरमाशुतरविनाशि । न हि कालस्य भक्ष्ये तत्त्वेनैव कृते स्वस्याभिमानः सुखदायी भवति । किञ्च । **अस्मिन्निति** शयानः स्वकीयो देहः प्रदर्शितः । असंस्कृतो मृतप्रायः । अनेन स्वतोऽपि दोष उक्तः । परिच्छेदाचेतनत्वे निरूपयति । यथा घटः जलानयनार्थमुपयुज्यते, तच्च जलमन्यत्र विनियुज्यते, तथा कर्माणि संपाद्यन्ते, पुनस्तानि यत्र क्वचिद्विनियुज्यन्त इति । तादृशस्य केवलं कर्मसाधनभूनस्य आत्मतया स्वीकारः अत्यतं कुमतिफलम् । किञ्च । कुड्यसन्निभं भवेत् । कुड्ये गृहे यथा कश्चित्तिष्ठति, तथा कियत्कालस्थित्यर्थं भगवता कृतम् । एवमधिकरणत्वेन करणत्वेन आत्मनो भेदे प्रतीयमानेऽपि पुनस्तत्र **निरूढमानः** नितरां रूडो मानोऽभिमानोऽहमेवेति यस्य । अयमेकः पञ्चपर्वात्मको महान् दोषः । द्वितीयमाह **नरदेवेति** । नरत्वमेव सन्दिग्धम्, कुतोऽमेध्यभाण्डस्य देवत्वम् । नराणां देवः पूज्यो राजा । **इतीति** निश्चयार्थे । अहमित्यनुभवः प्रमाणम् । अतोऽत्र **पर्वत्रयं** निरूपितम् । तृतीयं दोषमाह **वृत** इति । रथादिभिश्चतुर्भिः सेनाङ्गैः सहितं यदनीकं सेना तेषां रक्षकैः सेनापतिभिः वेष्टितः । ते हि दुष्टाः घातुकाः । तैः सहित इति दुःसङ्गो निरूपितः । भूभाररूपं चतुर्थं दोषमाह । **गां पर्यटन्निति** । नतु भूमौ कश्चन पुरुषार्थः साध्यते, किन्तु भूमिमेव परितः, अटते । महान्तं दोषमाह पञ्चमं **त्वामगणयन्निति** । यदधीनं सर्वं स एव न गण्यत इति । सुष्ठु दुष्टो मदो यस्येति स्वाज्ञानमपि । एवं षड्भिर्दोषैर्व्याप्तं कालो भक्षयतीत्याह **प्रमत्तमिति** । एते षट् दोषाः सहजाः । ते च मिलिताः शीघ्रं फलपर्यवसायित्रिदोषमुत्पादयन्तीति निरूप्यते । उच्चैरितिकृत्यचिन्तया प्रमादः प्रवृद्धो लोभः । विषयलालसेति । तुल्यत्वाभावाय भगवतो दोषत्रयाभावश्च निरूप्यते । अप्रमत्तः क्षुल्लेलिहानः लोभरहितः विषयलालसारहितत्वाय सहसाभिपद्यस इति । यो हि विषयलालसः स कार्ये शिथिलप्रयत्नो भवति, भोगाभिनिवेशात्, क्रियाभोगयोर्विरोधात् । तस्य दोषाभावाय दृष्टान्तः प्रमत्तः असावधानः स्वार्थे । तत्र यद्यप्यज्ञानमपि हेतुः, तथापि दोषान्तरमप्याह **उच्चैरितिकृत्यचिन्तयेति** । इत्येतावन्निश्चयेन कर्तव्यमिति । एवं वा कर्तव्यमिति । **उच्चै**रिति सर्वापेक्षया इदमेवावश्यकम् । तत्रापि यदि कार्यमुपस्थितं भवेत्, तदा दोषो वा न भवेत् । तदपि नास्तीत्याह **चिन्तयेति** । चिन्तामात्रमेव । अनेनान्तःकरणं तत्रैव व्यापृतमिति । भगवता आत्मार्थमन्तःस्थापितं बहिर्विनियुक्तमिति महानेवापराधो निरूपितः । अयमसिद्धार्थसाधनरूप इति सिद्धार्थे भिन्नं–दोषमाह । प्रकर्षेण वृद्धो लोभो यस्येति । उपभोगार्थं हि तस्य सम्पादनं तदपि कृत्वा स्थापयत्येव, नोपभुङ्क्ते । किञ्च भुक्त्वापि तद्गतवैरस्यं ज्ञात्वापि पुनर्लालसो भवति । विषं यान्तीति विषयाः । विषं हि मारकं मृत्युमुखम्, तत्र स्वयं गच्छन्तः स्वभक्तमपि नयन्ति । एकोऽपि नयेत्, किं पुनर्बहव इति बहुवचनम् । यद्यपि भगवत इतिकृत्यचिन्ता वर्तते, अन्यथा न मारयेत्, तथापि न प्रमत्तः । अत एव हेतुर्वतत इति साध्यप्राप्तौ निषेधः । **सहसेति** । यदैव दोषत्रयोद्भवः, तदैव प्रतीकारकरणात् । पूर्वमेव क्वापि पलायनाभावायाभीति । कालस्य रूपमहिरिति । आखुश्च लीलाकर्ता, अन्यस्य भक्ष्यरूपं शरीरं गृहीत्वा सर्वदा सर्वापकाराय व्यापृतो भवति । ननु राज्ञोऽयं धर्मः परिपालनं कर्तव्यम्, तदर्थं शत्रवश्च मारणीयाः, तदर्थं चतुरङ्गबलसङ्ग्रहः, प्राणिनां हितार्थे धनग्रहणम्, कर्मफलभोगार्थं च विषयलालसेति गुणभूता एवैते किमिति दोषत्वेन गण्यन्ते इत्याशङ्क्याह **पुरा रथै**रिति । सत्यमेवं भवेत्, यद्ययं देहो देवो भवेत्, पूर्वं रथादिभिः चरन्नपि, राजत्वेन सम्मानितोऽपि, कलेवरो देहो विट्कृमिभस्मसंज्ञामेव लभते । मृतदेहस्य त्रिधा विनियोगः । काकादिभिर्भक्षिते विट्, शीर्णं सत् कृमयो वा भवन्ति, दाहे भस्म वा भवति । तामसराजससात्त्विकभावा निरूपिताः । अतः पर्यवसाने दुष्टत्वात् वृथाभिमानो दोषायैवेत्यर्थः ॥ ४८–५० ॥ एवं फलतः दोषानुक्त्वा क्रियातोऽपि त्रैविध्यमाह **निर्जित्य दिक्चक्र**मिति त्रिभिः । राजधर्माणां तामसत्वं, कर्मणां राजसत्वं, सत्सङ्गस्य सात्त्विकमिति विविच्य कर्मस्वरूपकथने वस्तुविवेको निरूपितो भवति । साधनप्रतिपादकाश्चैते त्रयः । तत्र राजत्वस्य स्त्रीसेवकत्वं भवति इत्यधोगतिः फलत्वेन निरूपिता । साधारणानां स्त्री दास्यमपि करोति । राज्ञां तु तत्सम्भावनाभावात् स्वयमेव दासो भवतीति तुल्यगतिरपि

नास्तीत्युक्तम् । आदौ **दिक्चक्रं** सप्तद्वीपवतीं भूमिं **निर्जित्य** वशीकृत्य, महता प्रयासेन तत्साधयित्वा, ततोऽपि महता कालेन अभूतविग्रहो भवति, न भूतः भवनयोग्यो विग्रहो यस्येति । ततः स्वस्थो भूत्वा बरासनस्थो भवति । ततः समराजभिः वन्दितः । एवं चतुर्धाप्युत्कर्षं प्राप्य चतुर्धापकर्षं प्राप्नोतीत्याह **गृहेष्विति** । योषितां गृहेषु बहुषु, एको बहुषु दासो **भवतीति** वैयग्र्यम् । **मैथुन्यपरेष्विति** । आन्तरोऽपि व्ययः । **क्रीडामृग** इति बाह्यसर्वनिवेदनम् । **मृग** इति । विद्यमानादप्यधिकपदार्थसाधकत्वमिति । परलोकनाशश्च । स्वयं पुरुषः सर्वसमर्थः, **ईशेति** निवेदनार्थं सम्बोधनम् । **ईयत** इति । प्रमाणं नात्र तिरोहितं किञ्चिदित्यर्थः ॥ ५१ ॥

श्रीसुबोधिनीसारः

घटकुड्याभ्यां संनिभे तुल्ये दृश्यत्वादनात्मत्वात् अस्मिन्कलेवरे शरीरे नराणां देव इति क्षीरस्वामी नरेषु देव इवेति भट्टिः । इति निरूढमान उत्पन्नगर्वोऽहं रथगजाश्वपतिसेनापतिभिर्वृतः त्वा त्वामगणयन् सुदुर्मदो गां पृथिवीं पर्यटन् आर्षं क्रियापदं व्यचरम् ॥ ४९ ॥ इति कृत्यमेवं कर्त्तव्यम् तस्य चिंतया प्रवृद्धो लोभो यस्य तमुच्चैः प्रमत्तं विषयेषु लालसमुत्सुकम् अप्रमत्तोंऽतकः कालरूपस्त्वं सहसाऽकस्मादभिपद्यसे प्राप्नोषि ग्रससीति वा क्षुधा लेलिहानः सृक्विणी सास्वद्यमानोऽहिः सर्प आखुं मूषकमिव ॥५०॥ पुरा पूर्वं हेम्ना सुवर्णेन परिष्कृतैरलंकृतैरथैर्मतंगजैर्हस्तिभिर्वा नरदेव इति संज्ञा यस्य जातास्तीति यश्चरन् चेष्टते स एव कलेवरः दुरत्ययेनानिवार्येण कालेन ते त्वया तद्रूपत्वात् कृमिविट्भस्मानीति संज्ञा जातास्तीति तथा भवति ॥ ५१ ॥ राज्ञोपि दुःखमित्याह दिशां चक्रं मंडलं निर्जित्याभूतविग्रहो निर्वैरः सम्राट्त्वात् वरमासनं राज्यपदं तत्र स्थितः समैरात्मतुल्यैराजभिर्वन्दितः नमस्कृतः मैथुन्यं मिथुनीभाव एव सुखं येषु तेषु गृहेषु योषितां स्त्रीणां क्रीडामृग इव वश्यः पुरुष इतस्ततश्चाल्यते हे ईश ॥ ५२ ॥

विवरणटिप्पणी

कलेवरेऽस्मिन्नित्यस्याभासात्पूर्वं **चतुष्टय**मिति । वक्ष्यमाणं दोषत्रयं चतुर्थो दोषो ज्ञेयः । **दोषत्रयमाहेति** । मानं मदं भगवदवगणनां चाहेत्यर्थ । व्याख्याने **स्वदोष**मिति । अवगणनाया मुख्यदोषत्वादेकवचनम् । **निर्जित्ये**त्यत्र । **मृग इतीति** । **मृगयत** इति मृगः । अधिकमन्वेषतीत्यर्थः ।

इति द्वितीयाध्यायव्याख्या ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उन्नद्धमदत्वमेव प्रपञ्चयति—कलेवर इति । परभोगसम्पादकत्वेन भौतिकत्वेनाशुविनाशित्वेन मलसङ्ग्राहकत्वादिना च घटकुड्यसदृशेऽस्मिन् कलेवरे देहे नरदेवो राजा इत्येवं निरूढाभिमानोऽहं त्वा त्वां कालरूपमगणयन् **रथाश्च इभाश्च गजाश्च** अश्वाश्च पदातयश्च तेषामनीकानि सैन्यानि तानि पान्तीति तथा तैर्वृतो गां भूमिं पर्यटन् दुष्टो मदो यस्य तथाभूतो जातः, अतो ममैष कालो निष्फलो गत इति पूर्वेणैवान्वयः ॥ ४९ ॥ 'त्वद्विमुखविषयिणं तु त्वमेव कालरूपेण ग्रससि' इत्याह—प्रमत्तमिति । इतिकृत्यचिन्तया 'इत्येवमिदं कर्तव्यम्' इति चिन्तया उच्चैरतिशयेन प्रमत्तं स्वकर्तव्यभवद्भजनानुसन्धानशून्यं जनमप्रमत्तः सावधानस्तत्तत्प्राणिकर्मभोगसमाप्तिमनुसन्दधानः अन्तकः कालरूपस्त्वं सहसा अकस्मादेव अभिपद्यसे बलाद्ग्रससीत्यन्वयः । इति कृत्यचिन्तायां हेतुमाह—विषयेषु लालसमिति । शब्दादिविषयेषु लालसा अभिलाषो यस्य तमित्यर्थः । ननु 'तत्तद्विषयप्राप्त्या तत्तत्कामनानिवृत्तौ इति कृत्यचिन्तापि निवर्तेतेति, तदा सावधानता स्यादेव' इत्याशङ्कानिरासार्थं विशेषणान्तरमाह—प्रवृद्धलोभमिति । तत्तद्विषयलाभेऽपि प्रवृद्धो लोभस्तृष्णा यस्य तम् । "लोभस्यान्तं न ययुर्जित्वा भुक्त्वा दिशो दश" इति वचनाल्लोभस्यान्ताभावान्न कदापि तस्य सावधानता सम्भवतीति भावः । कालाभिभवे दृष्टान्तमाह—क्षुल्लेलिहान इति । यथाऽन्नराशिं दृष्ट्वा मनोरथाकुलं तत आकृष्य स्वबिले अन्नसञ्चयं कुर्वन्तमन्नमुखमाखुं मूषकं मध्य एव क्षुधा लेलिहानो जिह्वयोष्ठप्रान्तौ स्पृशन् अहिः सर्पोऽभिपद्यते गिलति "इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ असौ मया हतः शत्रुर्हनिष्ये चापरानपि" इत्यादिमनोरथव्याकुलं त्वमभिपद्यसे इत्यर्थः ॥ ५० ॥ 'कालात्मना त्वयाऽभिपन्नो देह एवं भवति' इत्याह पुरेति । पुरा जीवदवस्थायां हेमपरिष्कृतैः सुवर्णालङ्कारालङ्कृतै रथैर्गजैर्वा संचरन् यो नरदेवसंज्ञितो भवति स एव कलेवरो दुरत्ययेन दुरतिक्रमणीयेन ते त्वया कालरूपेण अभिपन्नः शृगालादिभिर्भक्षितो विट्संज्ञितः, तैरभक्षितो दग्धश्चेत् भस्मसंज्ञितः भवति । एवंभूते देहे ममतां कुर्वन्तो ये जनास्त्वां न भजन्ति ते आत्मनि शत्रुभूताः । तदुक्तं—"योनेः सहस्राणि बहूनि गत्वा दुःखेन लब्ध्वापि च मानुषत्वम् । सुखावहं ये न भजन्ति विष्णुं ते वै मनुष्यात्मनि शत्रुभूता" इति ॥ ५१ ॥ 'किञ्च मरणात् प्रागपि चक्रवर्त्तिनोपि पारतन्त्र्यदुःखं तु तदवस्थमेव' इत्याह—निर्जित्येति । दिक्चक्रं दिङ्मण्डलं निर्जित्य अभूतः–असम्भावितः विग्रहो विरोधो यस्य तथाभूतः असम्भावितप्रतिपक्षः, अत एव वरासनस्थः सार्वभौमासनाधिष्ठितः, अत एव ये पूर्वं समास्तुल्या राजानस्तैरपि वन्दितोऽपि पुरुषः हे ईश ! मैथुन्यमेव सुखं येषु तेषु गृहेषु योषितां स्त्रीणां तु क्रीडामृगः वानर **इव** नीयते इतस्ततश्चाल्यते इत्यर्थः ॥ ५२ ॥

अन्वितार्थप्रकाशिका

कलेवर इति ॥ दृश्यत्वानात्मत्वादिना घटः कुड्यं भित्तिः तेन सन्निभे सदृशेऽस्मिन्कलेवरे देहे नरदेवो राजा इत्येवं निरूढाभिमानोऽहं त्वा त्वां कालरूपमगणयन् रथाश्च इभाश्च गजाश्च अश्वाश्च पदातयश्च तेषामनीकानि सैन्यानि तानि पान्तीति तथा तैर्वृतो गां भूमिं पर्यटन् दुष्टो मदो यस्य तथाभूतो जातः अतो ममैष कालो निष्फलो गतः ॥ ४८ ॥ प्रमत्तमिति ॥ कृत्यचिन्तया इदम् एवं कर्तव्यमित्यादिचिन्तया उच्चैरतिशयेन प्रमत्तं प्रवृद्धलोभं विषयेषु लालसमतिस्पृहावन्तं जनमप्रमत्तः सावधानस्तत्तत्प्राणिकर्मभोगसमाप्तिमनुसन्दधानः अन्तकः कालरूपस्त्वं सहसा अकस्मादेवाभिपद्यसे बलाद् ग्रससे । यथा क्षुधा सृक्किणी लेलिहानोऽहिराखुं मूषकं ग्रसते तद्वत् ॥ ४९ ॥ पुरेति ॥ पुरा जीवदवस्थायां हेमपरिष्कृतैः सुवर्णालङ्कारालङ्कृतैः रथैर्मतङ्गजैर्वा चरन् यो नरदेवसंज्ञितो भवति स एव कलेवरः । पुंस्त्वमार्षमिति तोषिणी । दुरत्ययेन दुरतिक्रमणीयेन ते त्वया कालरूपेणाभिपन्नः सृगालादिभिर्भक्षितो विट्संज्ञितः तैरभक्षितो न जग्धश्चेत् कृमिसंज्ञितो दग्धश्चेद्भस्मसंज्ञितो भवति ॥ ५० ॥ निर्जित्येति ॥ हे ईश ! दिक्चक्रं दिङ्मण्डलं निर्जित्य अभूतः असम्भावितः विग्रहो विरोधी शत्रुवर्गः यस्य तथाभूतः असम्भावितसंग्रामो वा । अत एव वरासनस्थः सार्वभौमासनाधिष्ठितः अत एव पूर्वं समास्तुल्या राजानस्तैरपि वन्दितोऽपि पुरुषः मैथुन्यमेव सुखं येषु तेषु गृहेषु योषितां स्त्रीणां तु क्रीडामृगः वानर इव नीयत इतस्ततश्चाल्यते ॥ ५१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदेवात्यंतमदांधत्वमाह कलेवर इति घटकुड्यादितुल्ये अनाच्छादितभित्तिकादिवत् क्षणभंगुरे । अहं नरदेवः चक्रवर्त्ति राजा इति नितरां प्राप्ताभिमानः । रथादिचतुरंगसैन्यपैर्वृतः, अतः सुदुर्मदः त्वां कालनियामकमगणयन् सन् गां भूमिं पर्यटन् पर्यटामि स्म ॥ ४९ ॥ दुरंतं चितापरिणामं प्रकटयन्नाह । प्रमत्तमिति । इति कृत्यचिंतया इदमेवं करणीयं इदमेवं करणीयमिति विचारेण । उच्चैः प्रमत्तम् अत्यंतासावधानम् । अतो धने प्रवृद्धलोभम् । एवं कुतः यतो विषयेषु लालसं सतृष्णम् । अंतकस्त्वम् अप्रमत्तः सन् सहसाभिपद्यसे प्राप्नोषि । अत्र दृष्टांतमाह क्षुल्लेलिहानः क्षुधा ओष्ठप्रांतभागौ लेलिहानः । अहिः सर्पः, आखुं मूषकमिवेति ॥५०॥ मरणे च सति कलेवरमतिगर्ह्यं स्यादित्याह पुरेति । सुवर्णालंकृतैरथादिभिर्यश्च रत्नभूत् स एव कलेवरः पुंस्त्वमत्रार्षं ते तव त्वदीयेन कालेन जीवाद्वियोजितः सन् भक्षणाभक्षणदहनैः विटादिसंज्ञितः ॥ ५१ ॥ विषयाभिलाषुकस्य जीवनेपि सुखं नास्तीत्याह द्वाभ्यां निर्जित्येति । आदौ दिशां चक्रं प्राच्यादिदिङ्मण्डलं वर्त्तं निर्जित्य पश्चादभूतविग्रहो निवृत्तयुद्धः वरासनस्थः सार्वभौमासनस्थः, अत एव पूर्वं ये समास्तुल्या राजानस्तैर्वंदितोपि मैथुन्यं स्त्रीपुरुषयोः परस्परसुखं परं प्रधानं येषु तेषु योषितां गृहेषु क्रीडाया मृगो मर्कट इव पुरुषः, इतस्ततो नीयते ताभिर्योषिद्भिस्तद्दासीभिरपि ॥ ५२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उन्नद्धमदत्वमेव प्रपञ्चयति । कलेवर इति । घटश्च कुड्यं च ताभ्यां संनिभस्तस्मिन्, घटकुड्यादिसदृशतया जडे इत्यर्थः । अस्मिन् कलेवरे देहे, निरूढः प्रसृतमूलः मान आत्माभिमानो यस्य सः, अहं नरदेवः इति, अभिमन्यमान इति शेषः । रथाश्च इभाश्च अश्वाश्च पदातयश्च तस्यानीकानि सैन्यानि तेषां पाः पतयस्तैः, वृतः परिवृतः, गां भूमिं, पर्यटन् त्वाम्, अगणय्य तुच्छीकृत्य, दुर्मदः, आसमिति शेषः ॥ ४९ ॥ इत्थं त्वामगणयन्तं दुर्मदं मां त्वं कालरूपेणाक्रमसीत्याह । प्रमत्त इति । इतिकृत्यचिन्तया एवमेवं कर्त्तव्यमिति मनोरथपरंपरया, प्रवृद्धो नितरां वृद्धिं प्राप्तः लोभो यस्य तं विषयेषु लालसं शब्दादिष्वासक्तचित्तं, उच्चैः प्रमत्तं अतिशयेन स्वहितानभिज्ञं, मां त्वम् अप्रमत्तः, अन्तं करोतीत्यन्तकः विनाशहेतुकालरूपः, भूत्वा क्षुधा बुभुक्षया लेलिहान आस्वादमानः, क्षुधालोलजिह्व इति यावत् । यङन्ताल्लिहेः कर्मणि लटः शानजादेशः । अहिः सर्पः, आखुं मूषकम् इव सहसाऽकस्मादेव, अभिपद्यसे ॥ ५० ॥ नन्वतिदुर्लभकल्याणतरनरदेवशरीरं प्राप्यापि किमिति तन्निन्दसीत्याशङ्कायामन्ततः कालाभिपन्नस्य तस्य गतिं पश्येत्यभिप्रायेणाह । पुरेति । पुरा तावत् हेमपरिष्कृतैः स्वर्णालंकारालंकृतैः, रथैः मतंगजैः स्वर्णपरिष्कृतहस्तिभिर्वा चरन्, नरदेव इति संज्ञाऽस्य संजातेति तथाभूतः, तारकादित्वादितच् । सः एव, कलेवरो देहः, ते त्वत्संबन्धिना, दुरत्ययेन दुरतिक्रमणीयेन, कालेन अभिपन्नः स्याच्चेत्तदा, विट्कृमिभस्मसंज्ञितः, भवति । श्वशृगालादिर्भक्षितः सन्, विट्संज्ञितः । यदा तैरभक्षितोऽदग्धः स्याच्चेत्कृमिसंज्ञितः । दग्धश्चेद्भस्मसंज्ञितो भवति ॥ ५१ ॥ किं चान्तकप्राप्तेः प्रागपि दिग्विजयिनोऽपि राज्ञोऽपि विषयाभिलाषुकस्य स्त्र्यधीनतया पारतन्त्र्यदुःखं तदवस्थमेवेत्याह । निर्जित्येति । दिक्चक्रं दिङ्मण्डलं निर्जित्य, अभूतोऽसंभावितो विग्रहो विरोधो यस्य तथाभूतः असंभावितप्रतिपक्ष इत्यर्थः । वरासनस्थः सार्वभौमासनाधिष्ठितः, समराजवन्दितः ये पूर्वं समास्तुल्या राजानस्तैरपि वन्दितः, पुरुषः हे ईश, मैथुन्यमेव सुखं येषु तेषु, गृहेषु योषितां स्त्रीणां, केवलं, क्रीडामृगः क्रीडार्थं योषिद्भिः पोषितो वानरादिः इव, नीयते इतस्ततश्चाल्यते । योषिद्भिरेवेति शेषः । पुरुष इति पारोक्ष्यनिर्देशः कृतदिग्विजयसर्वपुरुषाभिप्रायकः ॥ ५२ ॥

कृष्णप्रिया

मिट्टी की दिवाल एवं मिट्टी के घड़े जैसा इस पाञ्चभौतिक देह में मैं दृढ अभिमान कर बैठा और मैं नरपति हूँ पृथ्वीपति हूँ ऐसे अभिमान में लदा था इससे रथ हाथी अश्व पैदल से बनी चतुरङ्गिणी सेना एवं सेनापतियों से घिरा हुआ अत्यन्त मदान्ध होकर आपकी अवहेलना करता भूतल में भटकता ही रहा ॥ ४९ ॥ भगवन् ! क्या कहूँ ? मैं महान् गाफल था, मैंने यह किया और यह अवशिष्ट रहा अब मैं यह करूँगा इस प्रकार की व्यर्थ कार्यों की ब्यर्थ चिन्ता में काल गुमाया । लेकिन काल सावध एवं सक्रिय था, लोभ से घिरा हुआ और विषयों में लंपट गाफल जीव को सदा सावधकाल जो आपका ही स्वरूप है वह तो, जैसे भूखा और खुराक खाने के लिये जीभ लपलपाता सर्प गाफल चूहे को दबोच लेता है वैसे यकायक विषयासक्त गाफल जीव को पकड़ लेता है ॥ ५० ॥ जो कलेवर है जो अजगर जैसा आयुष्य गिलने में निपुण है ऐसा शरीर की एक मृत्यु के पीछे पशुओं पक्षियाँ के खाने से मल-विष्ठा संज्ञा बनेगी, यदि शरीर को मिट्टी में गाड़ दिया तो सड़ जाने पर कीड़ा बनेगा और अग्नि से काया जलायी गयी तब भस्म संज्ञा होने वाली है ऐसे नश्वर शरीर में मैं चक्रवर्ती हूँ ऐसी पामर मति से सुवर्ण रथों में, एवं सजाये हुए गजराजों पर चढ़कर घूमता रहा लेकिन ऐसे दिव्य शरीर से हरि भजन हरि सेवा न की यही दुर्भाग्य है ॥ ५१ ॥ हे ईश ! समस्त दिशाओं पर विजय पाकर, मेरे समकक्ष और कोई सम व वीर है नहीं ऐसा अप्रतिम वीर बनकर, सम्राट् के सिंहासन पर बैठकर, अपने समकक्ष नरपतियों के पराजित होने के कारण नित्य चरणों में प्रणामों को प्राप्त करने वाला, असाधारण वीर पुरुष वनिताओं के विषय सुखों के लिये गृह विलासों में लुब्ध होकर वनिताओं के हाथ का खिलौना बन जाता है और उनका पालतू पशु बन जाता है इससे अधिक अधोदशा और क्या हो सकती है ॥ ५२ ॥

करोति कर्माणि तपस्सुनिष्ठितो निवृत्तभोगस्तदपेक्षया [1]ददत् ।
पुनश्च [2]भूयेयमहं स्वराडिति प्रवृद्धतर्षो न सुखाय कल्पते ॥ ५३ ॥
भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ।
सत्संगमो यर्हि तदेव सद्गतौ परावरेशे त्वयि जायते [3]मतिः ॥ ५४ ॥
मन्ये ममानुग्रह ईश ते कृतो राज्यानुबन्धापगमो यदृच्छया ।
यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षद्भिरखण्डभूमिपैः ॥ ५५ ॥
न [4]कामयेऽहं तव पादसेवनादकिञ्चनप्रार्थ्यतमाद् वरं विभो ।
आराध्य कस्त्वां ह्यपवर्गदं हरे वृणीत आर्यो वरमात्मबन्धनम् ॥ ५६ ॥

कर्दमक्षमा

अन्वयः—निवृत्तभोगः, तद्, अपेक्षया, ददत्, (दानादि कुर्वन्) तपःसु, निष्ठितः, कर्माणि, करोति, प्रवृद्धतर्षः, अहम्, पुनः, स्वराट् , भूयेयम्, इति, प्रवृद्धतर्षः, सुखाय, न, कल्पते ॥ ५३ ॥ हे, अच्युत ! भ्रमतः, जनस्य, यदा, सत्समागमः, भवेत्, तर्हि सत्सङ्गमः तदा, एव, सद्गतौ, परावरेशे, मतिः, जायते ॥ ५४ ॥ हे ईश ! वनम्, विविक्षद्भिः, साधुभिः, अखण्डभूमिपैः, एकचर्यया यः, राज्यानुवन्धापगमः प्रार्थ्यते, (सः) यदृच्छया, कृतः (हे ईश) ते कृतः, मम, अनुग्रहः मन्ये ॥ ५५ ॥ हे हरे ! अकिञ्चनप्रार्थ्यतमात्, तव, पादसेवनात्, अन्यम्, वरम्, न, कामये, हे विभो ! अपवर्गदम्, हि, त्वाम्, आराध्य, कः, आर्यः आत्मवन्धनम्, वरम्, वृणीत ? ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं च तत्रातितृष्णाकुलस्य न भोगक्षणः कश्चिदस्तीत्याह । करोतीति । तपस्यधःशयनब्रह्मचर्यादौ सुनिष्ठितः पुनश्च स्वराडिंद्रः स्यामिति । यद्वा जन्मांतरेष्वेवमेव चक्रवर्ती स्यामिति ॥ ५४ ॥ तदेवमष्टभिः श्लोकैरीशबहिर्मुखानां संसारं प्रपंच्य भक्त्या तन्निवृत्तिक्रममाह । भवापवर्ग इति । भो अच्युत भ्रमतः संसरतो जनस्य यदा त्वदनुग्रहेण भवस्य बन्धस्यापवर्गोंतो भवेत्प्राप्तकालः स्यात्तदा सतां संगमो भवेत् । यदा च सत्संगमो भवेत्तदा सर्वसंगनिवृत्त्या कार्यकारणनियन्तरि त्वयि भक्तिर्भवति । ततो मुच्यत इत्यर्थः ॥ ५५ ॥ मम तु सत्संगमात्पूर्वमेव यो राज्यादिसंगविच्छेदो जातः सोऽयं त्वया महाननुग्रहः कृत इत्याह ।

---

[1]. सकृत्–च. पु. टि । [2]. भूयास–वीर ; भूयायमहीशराधसे–विज. । [3]. रतिः–श्रीधरः टि. । [4]. ऽन्यं श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. ।

मन्य इति । ते त्वया साधुभिर्विवेकिभिस्तपसे वनं विविक्षद्भिः प्रवेष्टुमिच्छद्भिः स्वयं त्यक्तुमलभमानैः प्रार्थ्यत इति ॥ ५६ ॥ तदेवं विषयसेवामार्गं च विविच्य वरान् वृणीष्वेति यदुक्तं तत्रोत्तरमाह । न कामय इति । अकिंचना निवृत्ताभिमानाः । आर्यो विवेकी ॥ ५७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अभक्तस्य कर्मादि कुंजरशौचवदित्याह—किञ्चेति । तत्र वर्तित्वे । कर्माणि स्वाराज्यदानि । निवृत्ता गता भोगा यस्मात्स तथा । तेषां भोगानां सजातीयभोगेच्छयाददत्, धनानीति शेषः । स्वर्गस्य कर्मभूमित्वाऽभावात्कर्मांतराऽसंभवेन सुखांतरोत्पादकत्वं नास्तीत्यत आह—यद्वेति । "यस्य मूर्धनि दृश्येत विना छत्रेण भूपतेः । पद्मानुकारिणी छाया तमाहुश्चक्रवर्तिनम् ॥" इति नीलकण्ठः । प्रवृद्धतर्ष उद्रिक्ततृष्णः । सुखाय मुक्तिसुखाय । धर्ममाचरतोऽपि पारलौकिककामिनोऽपि सदा दुःखमेवेत्याह–करोतीति । अत्र विश्वनाथस्तु—स्वामभजतो विषयभोगो यथा निन्द्यस्तथा विषयभोगाभावोऽपि निन्द्य इत्याह—करोतीति । कर्माणि व्रतयज्ञादीनि । तपस्तु निष्ठितत्वान्निवृत्तविषयभोगोऽपि ! तस्य भोगस्यैवापेक्षया ददद्विविधदानं कुर्वन् । यद्वा—कर्मसांगतार्थं दक्षिणां ददत् । एवमैहिकमर्थक्षयादिदुःखं सूचितम् । सुखाय न कल्पते योग्योऽपि न भवति । एवं स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिरित्यादिन्यायेनेन्द्रत्वेऽपि सुखाभावात्पारलौकिकमपि दर्शितम् । श्रीविष्णुपुराणे चास्यैव स्तुतौ "देवलोकगतिं प्राप्तो नाथदेवगणोऽपि हि । मतः साहाय्यकामोऽभूच्छाश्वती कुत्र निर्वृतिः" इति ॥ ५४ ॥ तदिति वाक्यालंकारे । तन्निवृत्तिक्रमं संसारनिवृत्तिक्रमम् । "स्यादपवर्गस्त्यागे मोक्षे कार्यावसानसाफल्ये" इति मेदिनी । तदा भवापवर्गपूर्वकाले । इत्यर्थ इति–भक्त्यवांतरव्यापारीभूतज्ञानावाप्त्या मुक्तो भवतीत्यर्थः । तर्हि कदा भद्रं स्यात्तत्राह—भवेति । यदा भवेत् सर्वज्ञैः संभावितो भवति तर्हि सत्संगमोऽपि विवेकिभिः संभाव्यत इत्यर्थः । यद्वा—अतिशयोक्तिनाम्नोऽलंकारस्य चतुर्थोऽयं भेदः । यथोक्तं तद्विवृतौ—"चतुर्थी सा कारणस्य गदितु शीघ्रकामिताम् । या हि कार्यस्य पूर्वोक्तिः" इति । तस्माद्यर्हि भवापवर्गः शीघ्रमेव भवेदित्यर्थः । यतः सत्संगम इत्यादि ! यतस्त्वयि मतौ च जातायां भवापवर्गस्याप्यवराभिचारः स्यादित्याह । एवकारान्नान्यदा कदापीत्यर्थः । अच्युतेति सम्बोध्य तत्र त्वमच्युतो भवसीति भावः । ननु मत्कृपां विना सत्संगोऽपि न स्यादिति सैवास्त्वादिकारणं तत्राह–संत एव गतिराश्रयो यस्य तस्मिन् । 'स्वेच्छामयस्य' इति 'अहं भक्तपराधीनः' इति सदिच्छयैव तत्र प्रवर्तते । न तु स्वतः, अतः सापि तदनुगतैवेति भावः । सतां गतावित्यस्मिन्नर्थेऽपि असतां गतिः 'प्रार्थितः प्रचुरं पूर्वं त्वयाहम्' इति भवदुक्तरीत्या ययाऽसौ भवापवर्गदाता त्वं लब्ध इति भावः । मतिरिति । 'रतिः' इति च पाठः । समर्थ एव सत्संगमेन रत्यंकुररूपैव मतिर्जायत इति ॥ ५५ ॥ निजभाग्यं श्लाघते—मम त्वित्यादिना । राज्यस्य तदनुबन्धकस्य सम्पादकस्य कोशादेश्चापगमस्त्यागः । 'एक एव चरेद्भिक्षुः' इत्युक्तेरेकाकिचरणेच्छया । अखण्डभूमिपैः सार्वभौमैः । ततस्तदारभ्यैव मयि त्वदनुग्रहो लक्षित इत्याह—मन्य इति । हे ईश 'मूकं करोति वाचालम्' इति न्यायेन हे दुर्घटघटनापटो । राज्यानुबन्धस्य राजत्वासक्तेरपगमो यस्मात्तादृशोऽनुग्रहस्ते त्वयैव यदृच्छया स्वैरितया कृत इति तर्कयामि "त्रैवर्गिकाऽयासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्रः । ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोचरोन्यैः ।" इति वृत्रोक्तेः, "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः" इति स्वयं भगवदुक्तेश्च । योऽनुग्रहोऽखंडभूमिपैरपि मृग्यते किं पुनर्भारतवर्षैकदेशपतिभिरित्यर्थः । एकचर्यया एकांतनिष्ठया । तेषां कथं वनविवक्षा स्यात्तत्राह—साधुभिः विवेकेनासन्निष्ठात्यागिभिरित्यर्थः ॥ ५६ ॥ तत्र तयोर्द्वयोः । आतमबन्धनमात्मनः संसारकारणम् । अतः पादसेवनात्साक्षाद्विविधपरिचर्याया अन्यं वरं वरणीयार्थं न कामये, तदेव कामय इत्यर्थः । कुतः—अकिञ्चना मुक्तिपर्यंतमर्थं तुच्छीकृत्य भक्तास्तैरपि प्रार्थ्यतमात् । प्रार्थ्या भक्तिः, प्रार्थ्यतरं दर्शनं, प्रार्थ्यतमं पादसेवनं, तस्मात्सर्वपुरुषार्थत आधिक्यमुक्तं तदेव हि योग्यमित्याशयेन सम्बोधयति—विभो हे सर्वपुरुषार्थाधिकसुखदानसमर्थ । आराध्य प्रार्थ्य सेवित्वा वा । अपवर्गो भक्तिः । तथा च पञ्चमस्कन्धे—"यथा वर्णविधानमपवर्गश्च भवति योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणे" इति । यद्वा—मुक्तिं कथं न वृणुषे, तत्राह—आराध्येति । वरमीषत्प्रियेऽव्ययम् । आराध्य कस्त्वा मुक्तिप्रदं सन्तं वृणीत वरमात्मबन्धनमेव वृणीतेत्यर्थः । अहं तु मोक्षेऽपि निरपेक्षः कथं तं वृणुयामिति भावः ॥ ५७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

धर्ममाचरतोऽपि पारलौकिककामिनोऽपि सदा दुःखमेवेत्याह, करोतीति । कर्माणि व्रतयज्ञादीनि तपस्सुनिष्ठितत्वान्निवृत्तविषयभोगोऽपि तस्य भोगस्यैवापेक्षया ददत् विविधदानं कुर्वन् यद्वा, कर्मसाङ्गतार्थं दक्षिणां ददत् एवमैहिकमर्थक्षयादिदुःखं सूचितं सुखाय न कल्पते न योग्यो भवति एवं स्वर्गेऽपि पातभीतस्य "क्षयिष्णोर्नास्ति निर्वृत्तिः" इत्यादिन्यायेनेन्द्रत्वेपि सुखाभावात् पारलौकिकमपि दर्शितम् विष्णुपुराणे चास्यैव स्तुतौ—

"देवलोकगतिं प्राप्तो नाथ देवगणोऽपि हि । मत्तः साहाय्यकामोऽभूच्छाश्वती कुत्र निर्वृतिः ॥" इति ॥ ५४ ॥

तर्हि कदा भद्रं स्यात्तत्राह—भवेति । यदा भवेत्सर्वज्ञैः सम्भावितो भवति तर्हि सत्सङ्गमोऽपि विवेकिभिः सम्भाव्यत इत्यर्थः । यद्वा, अतिशयोक्तिनाम्नोलङ्कारस्य चतुर्थोऽयं भेदः यथोक्तं तद्विवृतौ—

"चतुर्थी सा कारणस्य गदितुं शीघ्रकामिता । या हि कार्य्यस्य पूर्वोक्तिः"—

इति तस्माद्यर्हि सत्सङ्गमो भवेत्तर्हि भवापवर्गः शीघ्रमेव भवेदित्यर्थः । यतः सत्सङ्गम इत्यादि यतस्त्वयि मतौ च जातायां भवापवर्गस्याव्यभिचारः स्यादित्याह—तदेवैति । एवकारान्नान्यदा कदापीत्यर्थः । अच्युतेति सम्बोध्य तत्र त्वमप्यच्युतो भवसीति भावः । ननु, मत्कृपां विना सत्सङ्गमोऽपि न स्यादिति सैवास्त्वादिकारणं तत्राह—सन्त एव गतिराश्रयो यस्य तस्मिन् स्वेच्छामयस्येति "अहम्भक्तपराधीनः" इति सदिच्छयैव तत्र सर्वं प्रवर्त्तते न तु स्वतः ततः साऽपि तदनुगतैवेति भावः । सतां गतौ इत्यस्मिन्नर्थेऽप्यसताङ्गतिर्न भवसीति भावः पूर्वपूर्वेण सत्तापरपस्यसत्त्वे निष्पादित एव सा प्रवर्त्तते न तु पूर्वं "स्वयं समुत्तीर्य" इत्यादेः ततः प्रथमतः सत्सङ्गमेनैव त्वन्मतिः स्यादिति भावः, तत्र हेतुः परावरेशे परेषामवरेषां च ज्ञानाद्यनधीने अतो ममापि श्रीगर्गसङ्गमादेव त्वन्मतिर्जाता प्रार्थितः प्रचुरं पूर्वं त्वयाऽहमिति भवदुक्तरीत्या ययाऽसौ भवापवर्गदाता त्वं लब्ध इति भावः, मतिरिति रतिरिति च पाठः समर्थ एव सत्सङ्गमेन रत्यङ्कुररूपैव मतिर्जायत इति ॥ ५५ ॥ ततस्तदारभ्यैव मयि त्वदनुग्रहो लक्षित इत्याह—मन्य इति । हे ईश ! "मूकं करोति वाचालम्" इत्यादिन्यायेन हे दुर्घटघटनापटो ! राज्यानुबन्धस्य राजत्वासक्तेरपगमो यस्मात्तादृशोऽनुग्रहः ते त्वयैव यदृच्छया स्वैरितया कृत इति तर्कयामि योऽनुग्रह एकचर्यया एकान्तनिष्ठया अखण्डभूमिपैरपि मृग्यते किं पुनर्भारतवर्षैकदेशपतिभिरित्यर्थः । तेषां कथं वनविविक्षा स्यात्तत्राह—साधुभिः विवेकेनासन्निष्ठात्यागिभिरित्यर्थः ॥ ५६ ॥ अतः पादसेवनात् साक्षाद्विविधपरिचर्य्यया अन्यं वरं वरणीयार्थं न कामये तदेव कामय इत्यर्थः । कुतः ? अकिञ्चनाः मुक्तिपर्यन्तमर्थं तुच्छीकृत्य भक्ताः तैरपि प्रार्थ्यतमात् प्रार्थ्या भक्तिः प्रार्थ्यतरं दर्शनं प्रार्थ्यतमं पादसेवनं तस्मात् इति सर्वपुरुषार्थत आधिक्यमुक्तं तदेव हि योग्यमित्याशयेन सम्बोधयति विभो हे ! पुरुषार्थाधिकसुखदानसमर्थ सर्व आराध्य प्राप्य सेवित्वा वा अपवर्गो भक्तिः तथा च पञ्चमस्कन्धे यथा वर्णविधानमपवर्गश्च भवति योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्ते निलयने वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षण इति यद्वा मुक्तिं कथं न वृणुषे ? तत्राह—आराध्येति । वरमीषत् प्रियेऽव्ययम् आराध्य सेवित्वा वा कस्त्वामपवर्गदं मुक्तिप्रदं सन्तं वृणीत वरमात्मबन्धनमेव वृणीतेत्यर्थः ॥ ५७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

धर्म्ममाचरतोऽपि कामिनः सदा दुःखमेवेत्याह—करोतीति कर्म्माणि व्रतयज्ञादीनि, तपःसुनिष्ठितत्वान्निवृत्तविषयभोगोऽपि, तस्य भोगस्यैवापेक्षया तत्संगतार्थं दक्षिणादिना धनं ददत् । एवमर्थक्षयादिदुःखञ्च सूचितम् ! सुखाय न कल्पते, न योग्यो भवति स्वर्गेऽपि पातभीतस्य 'क्षयिष्णोर्नास्ति निर्वृतिः' इत्यादि, न्यायेनेन्द्रत्वेऽपि सुखाभावादित्यर्थ । तथा च श्रीविष्णुपुराणेऽस्यैव स्तुतौ (५।२३।४०)—'देवलोकगतिं प्राप्तो नाथ देवगणोऽपि हि । मत्तः साहाय्यकामोऽभूच्छाश्वती कुत्र निर्वृत्तिः ॥' इति ॥ ५२ ॥ यदा भवापवर्गः सम्भाव्यः स्यात्तदा सत्संगमेन कृतार्थः स्यादित्याह—भवेति । भवस्य संसारदुःखस्यापवर्गो नाशो भवेदिति सम्भावनायां सप्तमी, जनस्य कस्यचिज्जीवस्य सद्भिस्त्वद्भक्तैः समागमः संगतिः, हे अच्युतेति त्वत्कृतनिर्बन्धस्य च्युतिराहित्यादिति भावः । यद्वा, गृहाद्यासक्तिलक्षणस्यापवर्गः परित्यागः; यद्वा, भवोऽभ्युदयस्तद्रूपोऽपवर्गो मोक्षः श्रीवैकुण्ठलोक इत्यर्थः । अच्युतस्य तव ये सन्तः किंवा अच्युता भक्तिमार्गाच्युतिरहिता ये सन्तस्तैः, यद्वा, अच्युतः स्थिरः सत्समागमः, एवेति, अन्यथा कथञ्चित् कदाचिदपि न जायत इत्यर्थः । यद्वा, तस्मिन् क्षणे, कुतः ? सतां गतौ गम्ये, तव सत्संगमैकवश्यत्वात्, तथा चैकादशस्कन्धे श्रीभगवद्वाक्यम् (भा० ११।१२।१)—'न रोधयति मां योगः, इत्यादि । तदपि कुतः ? परश्चतुर्वर्गश्रेष्ठो मोक्षोऽप्यवरोऽपकृष्टो यस्या भक्तेस्तदीशे भक्त्येकप्राप्यत्वादित्यर्थः । यद्वा, परावराणामुच्चनीचानां श्रीब्रह्मादिस्तत्वर्यन्तामामीशे स्वामिन्यपि सतामेव गतौ । 'रतिः' इति पाठे भक्तिरित्यर्थः संसारनिवृत्तौ सत्यां सत्संगमेन त्वयि इतिः स्यादित्यर्थः ॥ ५३ ॥ अतस्त्वयानुग्रहः कृत इति मन्ये । कथम् ? तदाह—राज्ये राजत्वे राज्य–तत्सम्बन्धिसुतादारादौ वा, अनुबन्धस्य आसक्तेः प्रकृतानुसरणस्य वा अपगमो यदृच्छयाऽयत्नोऽभूदिति । यद्वा, राज्यानुबन्धस्यापगमो यस्मात् सः । हे ईशेति निजैश्वर्यादेव, न च मम योग्यत्वादिति भावः । योऽनुग्रह एकचर्य्यया परमभक्त्या, अखण्डभूमिपैरित्यशेषभोगसम्पत्त्या विवेकयोग्यतोक्ता । यद्वा, अखण्डभूमिपैरपि, किं पुनर्भारतवर्षैकदेशपतिभिरित्यर्थः । तेषां कथं वनविविक्षा स्यात् ? तत्राह—साधुभिः सद्भिरिति ॥ ५४ ॥ अतः पादसेवनात् साक्षाद्विविधपरिचर्य्याया अन्यं वरं वरणीयार्थं न कामये, तदेव कामय इत्यर्थः, कुतः ? अकिञ्चना मुक्ता भक्ता वा तैरपि प्रार्थ्यतमात्, प्रार्थ्या भक्तिः, प्रार्थ्यतरं दर्शनम्, प्रार्थ्यतमं पादसेवनं तस्मात्, इति सर्वपुरुषार्थाधिक्यमुक्तम् । तदेव हि योग्यामित्याशयेन सम्बोधयति—विभो हे प्रभो ! इति दासस्य स्वामिपादसेवैकयोग्यत्वादित्यर्थः । आराध्य प्राप्य सेवित्वा वा, अपवर्गो भक्तिः, तथा च पञ्चमस्कन्धे भारतवर्षवर्णनान्ते (भा० ५।१९।१८-५९)–'यथावर्णविधानमपवर्गश्च भवति, योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने वासुदेवेऽनन्य नमित्तभक्तियोगलक्षणः' इति । यद्वा, अपकृष्टो वर्गश्चतुर्वर्गो यस्मात् पादसेवनात्तद्दातारमात्मानं बध्नाति सुखलोपेन इष्टविधातेन वा यन्त्रयतीति तथा तम् । हरे ! हे सर्वबन्धहर ! हे मनोहरेति वा ॥ ५५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तदपेक्षया भोगेच्छया ॥ ५४ ॥ भवापवर्गः संसारनाशः तदा भवेत् आसनः स्यात् तर्हि तदा ॥ ५५ ॥ भूमिपैराजर्षिभिः ॥ ५६–५७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, भोग्यभोगोपकरणादिसमृद्धान् राजगृहान् दुःखप्रभवेषु मैथुनसुखेष्विति चेत्येवं कथं निन्दसीत्यतस्तत्र सुखाभावमाह—करोतीति । पुनश्च जन्मान्तरेपि स्वराट् सार्वभौमो भूयासम् इतीत्थं प्रवृद्धः तर्षः तृष्णा यस्य तथाभूतः तपस्सु जन्मान्तरीयसार्वभौमसाधनेषु तपस्सु तपस्स्वधःशयनब्रह्मचर्य्यादिषु निष्ठितः सञ्जातनिष्ठः अत एव निवृत्तो भोगो यस्य तथाभूतः तदपेक्षया भाविजन्मभोगापेक्षया दधद्विभ्राणः तपांसीति विपरिणतेनान्वयः । कर्माणि वर्त्तमानदेहभोगार्थानि भोजानादिकर्माणि करोति इत्थम्भूतोसौ न सुखाय कल्पते न सुखी भवति किन्तु दुःख्येवेति भावः । यद्वैवमन्वयः तावद्राजशरीरप्राप्तिसाधनानि कर्माणि करोति ततो दधद्राजशरीरमिति शेषः । निवृत्तभोगः तपःसुनिष्ठतस्तदपेक्षया तद्धेतुभूतः स्वराट् स्याम् इति प्रवृद्धस्तर्षो यस्य तथाभूतः न सुखाय कल्पत इति ॥ ५४ ॥ तर्हि कदा सुखाय कल्पत इत्यत आह—भवापवर्ग इति । एवं संसृतौ भ्रमतः पुंसो भवापवर्गः संसारान्तः भवनिवृत्तिर्मुक्तिरिति यावत् स यदा भवेदासन्नः स्यात्तदैवायं जनः सुखाय कल्पत इति पूर्वेण सम्बन्धः । कदा तर्हि भवापवर्गो भवेदित्यत आह—तर्हीति । हे अच्युत ! अस्य संसरतो जनस्य यर्हि यदा यस्मिन् जन्मनि सत्समागमः सद्भिर्भागवतैः समागमः सङ्गतिः सहवास इति यावत् तदा भवापवर्गः नहि (किं) सत्समागमः साक्षाद्भवापवर्गसाधनभूतः (न) किन्तु त्वद्भक्तिजनानादिप्रणाड्येत्याह—सत्सङ्गम इति । यदा हि सत्सङ्गमः तर्ह्येव परे इन्द्रादय अपरे अवमा यस्मात्तस्य चतुर्मुखस्यापि ईशे नियन्तरि सतां गतौ त्वत्प्राप्त्युपायभूते त्वयि मतिर्भक्त्यात्मिका बुद्धिर्जायते उत्पद्यते ॥ ५५ ॥ यदुक्तं सोहं तवानुग्राहार्थं "गुहामेतामुपागतः" इति तत्सत्यमेव किन्तु पूर्वमेव देहानुबन्ध्यपनयनेन लिङ्गेन त्वयाऽनुगृहीतोऽहम् इति मन्य इत्यभिप्रेत्याह—मन्य इति । हे ईश ! यदृच्छया त्रिदशसाहाय्यकृत्यव्याजेन राज्यरूपो योऽनुबन्धः पाशस्तस्यापगमोपायः, इत्येष महांस्त्वयैवानुग्रहः कृत इति मन्ये तस्यानुग्रहप्रयुक्तत्वे हेतुं वदन् तमेव राज्यानुबन्धापगमं विशिनष्टि—य इति । यो राज्यानुबन्धापनयः साधुभिर्विवेकिभिः तपसे वनं प्रवेष्टुम् इच्छद्भिः सार्वभौमैरेकचर्य्या एकचर्य्यार्थम् एका (शि) कित्वेन सञ्चारार्थं प्रार्थ्यते ॥ ५६ ॥ तदेवं प्रतिवचनोपयुक्तार्थः, उक्तः, अथ साक्षात्प्रतिवचनमाह—न कामय इति । हे विभो ! अकिञ्चनैरनन्यप्रयोजनैरेकान्तिभिरतितरां प्रार्थनीयात् तव पादसेवनादन्यं वरं न कामयेऽन्यो मदिष्टो वरणीयोऽर्थ एव नास्तीत्यभिप्रायः । आर्यः श्रेष्ठो विवेकी चेत्को वा पुमान् साक्षान्मुक्तिप्रदं त्वामाराध्याऽऽराधनेन प्रसन्नीकृत्य केवलमात्मा बध्यते येन तदात्मबन्धनं शब्दाविषयजालं वृणति वृणुयान्मूर्खश्चेद्वृणीत इत्यर्थः ॥ ५७ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

त्वद्भक्तिरहितस्य पुंसः कर्मकरणं गजस्नानतुल्यमिति भावेनाह—करोतीति । हे महीश ! निवृत्तभोगः तदपेक्षया तेषां भोगानां सजातीयभोगेच्छया सुनिष्ठितस्तद्योग्यदेवतापूजासु नितरां स्थिरो यः कर्माणि तदनुगुणं तपश्च करोति स पुनश्च धनादि ददत् भूयाय भूयसे महतो राधसे सम्पदे प्रवृद्धतर्षः अत्युद्रिक्ततृष्णः सुखाय न कल्पत इत्यन्वयः सुखं नाम मुक्तिलक्षणम् ॥ ५४ ॥ तर्हि कदा मोक्षः स्यादत्राह—भवेति । हे अच्युत ! नानायोनिषु भ्रमतो जनस्य यदा सत्सङ्गमः तर्हि तदा भवापवर्गः स्यात् भगवज्ज्ञानफलं मोक्षः कथमन्यतः स्यादिति तत्राह—सत्सङ्गम इति । यर्हि यदा सत्सङ्गमः स्यात्तदैव त्वयि श्रवणादिलक्षणः सङ्गमः स्यात् तस्मात्परावरेशे मुक्तामुक्तस्वामिनि त्वयि मतिस्त्वत्प्रसादजनकं ज्ञानं स्यात् ॥ ५५ ॥ अतो ज्ञानद्वारा सत्सङ्गमो मुक्तिसाधनमसत्सङ्गमोऽनर्थहेतुरिति गृहादिसङ्गत्यागः सत्सङ्गहेतुरित्याशयेनाह–मन्य इति । ते त्वया राज्यानुबन्धापगमः राज्यस्य तदनुबन्धकस्य कोशादेश्चापगमस्त्यागः एकचर्यया "एक एव चरेद्भिक्षुः" इति वचनात् एकाकित्वेन चरणम् अखण्डभूमिपैः सार्वभौमैः विविक्षद्भिः प्रवेष्टुमिच्छद्भिः ॥५६॥ फलितमाह—नेति । आर्यो ज्ञानी आत्मनः स्वस्य बन्धनं संसारकारणं वरम् ॥५७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

भवापवर्गः अत्र यदा सत्सङ्गमो भवेत् इत्यादावतिशयोक्तिनामालङ्कारो ज्ञेयः यथोक्तं "कार्यकारणयोर्यश्च पौर्व्वापर्य्याविपर्य्ययोः । विज्ञेयातिशयोक्तिः स्यात्" सेति व्याख्याति च कारणस्य शीघ्रकारितां वक्तुं कार्य्यस्य पूर्व्वानुक्तौ चतुर्थीति यद्वा यदा भवेत् सर्वज्ञैः सम्भावितो भवति तर्हि सत्सङ्गमोऽपि विवेकिभिः सम्भाव्यत इत्यर्थः यतः सत्सङ्गमो इत्यादि ॥ ५५–५६ ॥ न कामय इति वरमित्यव्ययमीषत् प्रिये अपवर्गदं सन्तं त्वां को वृणीत न कोऽपि किन्तु वरमात्मबन्धनमेव वृणीतेत्यर्थः व्याख्यान्तरे वरमिति पुनरुक्तं स्यात् वृणीतेत्यनेनैवार्थप्राप्तेः ॥ ५७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्वामभजतो विषयभोगो यथा निन्द्यस्तथा विषयभोगाभावोऽपि निन्द्य इत्याह—करोतीति । तपसि अधश्शयनब्रह्मचार्यादौ सुनिष्ठितः पुनश्च स्वराडिन्द्रश्चक्रवर्ती वा ॥ ५४ ॥ तर्हि सर्वदुःखोपशमनी परमसुखमयी भक्तिरेव कदा भवेदित्यत आह—भवेति । हे अच्युत ! भ्रमतो जीवस्य यदा भवापवर्गो भवबन्धस्य नाशः स्यात्तदा सत्सङ्गमः अनुग्राहकसाधुसङ्गो भवेत् यर्हि सत्सङ्गमस्तदैवेत्येवकारान्नान्यदा कदापीत्यर्थः । अत्र यर्हि तर्हि इति स्थूलकालमवलम्ब्यैवोक्तिः सूक्ष्मकालमवलम्ब्य तु सत्समागमभवापवर्गयोः कारणकार्य्ययोः पौर्वापर्य्यमवश्यमेव वक्तुमुचितं तदपि तद्विपर्य्ययेणोक्तिः कार्य्यस्यातिशैघ्र्यबोधिन्यतिशयोक्तिश्चतुर्थी ज्ञेया अत्र सद्‌गताविवत्यस्य वैष्णवतोषिण्यां व्याख्या यथा । ननु, मत्कृपां विना सत्सङ्गमोपि न स्यादित्यतो मत्कृपैवादिकारणमस्तु तत्राह, सन्त एव गतिराश्रयो यस्य तस्मिन् स्वेच्छामयस्येति "अहं भक्तपराधीनः" इत्यादेः सदिच्छयैव, तच्च सर्वं प्रवर्त्तते न स्वत इति बुध्यते अतस्त्वत्कृपापि सदनुगतैवेति भावः । सतां गताविवत्यस्मिन्नर्थेऽप्यसताङ्गतिर्न भवतीति पूर्वपूर्वेण सतां परपरस्य सत्त्वे निष्पादित एव त्वत्कृपा प्रवर्त्तते न तु पूर्वं स्वयं समुत्तीर्य्येत्यादेरित्येषा ॥ ५५ ॥ मम तु त्वद्भक्तगर्गसङ्गानन्तरमकस्मादेव यो राज्यादिसङ्गविच्छेदो जातः स तवैवानुग्रहादित्यहं जानामीत्याह—मन्य इति ।

"त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्रः । ततोऽनुमेयो भगवत्प्रसादो यो दुर्ल्लभोऽकिञ्चनगोचरोऽन्यैः" ॥

इति श्रीवृत्रोक्तेः यो राज्यानुबन्धोपगमः साधुभिर्भूमिपैः प्रार्थ्यते एकचर्य्यया एकचारित्वेन निर्विघ्नत्वदीयध्यानभक्तिसिद्ध्यर्थमिति भावः ॥ ५६ ॥ वरान् वृणीष्वेति यदुक्तं तत्रोत्तरमाह—नेति । अकिञ्चनैः प्रार्थ्या भक्तिः प्रार्थ्यतरः प्रेमा प्रार्थ्यतमं पादसेवनं तस्मात् । अन्यं मोक्षमपि न कामये किमुतान्यान् वरान् । अपवर्गदं भक्तियोगप्रदं पञ्चमस्कन्धे अपवर्गशब्देन भक्तियोगोक्तेः अथ वा दृष्टान्तमपि कैमुत्येनैवाह हि अप्यर्थे अपवर्गदं मोक्षार्थित्वात् मोक्षप्रदमपि त्वाम्, आराध्य कः खलु विवेकी आत्मनो बन्धनं वरं त्वया दित्सितमपि वृणीत अहं तु मोक्षेऽपि निरपेक्षः कथं तद् वृणुयामिति भावः ॥ ५७ ॥

गूढार्थदीपिनी

तदपेक्षया भोगापेक्षया । स्वराट् इन्द्रः । पुनर्जन्मान्तरे चक्रवर्ती वा । तर्षस्तृष्णा यस्य सः । न कल्पते न समर्थो भवति ॥ ५२ ॥ हे अच्युत ! भ्रमतः पुंसः यदाभवस्यांतो भवेत् तन्निवृत्तिकालः प्राप्तः स्यात् । तर्हि तदा सतां समागमः सङ्गमः भवेत् । मतिर्भक्तिः । परं कारणमवरं कार्यं तयोरीशे नियन्तरि त्वयि ॥ ५३ ॥ राज्यानुबन्धो राज्यासक्तिस्तस्या अपगमः त्यागः यदृच्छयाऽकस्मादभूत् इत्येष ते त्वया कृतः । योऽपगमः । एकचर्यया एकान्तनिष्ठया अखण्डभूमिपैः सार्वभौमैरपि प्रार्थ्यते ॥ ५४ ॥ अकिञ्चनैर्भक्तैः । पादसेवनादन्यं वरं नेत्यन्वयः । क आर्यो विवेकी वर्णाते । बन्धनं संसारकारणम् ॥ ५५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

देहगेहाद्यासक्तो भगवद्विमुखो निन्द्य इत्युक्तमथ देहगेहाद्यर्थकसाधनपरोपि निन्द्य एवेत्याह—करोतीति । स्वराडिन्द्रः चक्रवर्ती वा स्यामिति प्रवृद्धतर्षः तदपेक्षया भाविस्वराडभावापेक्षया ददत् दानानि कुर्वन् तपस्सु विविधेषु निष्ठितः कर्माणि काम्यानि करोति यः सोऽपि सुखाय न कल्पते परमानन्दयोग्यो भवति जन्ममरणप्रवाहलक्षणं संसारमेव प्राप्नोतीत्यर्थः ॥ ५४ ॥ तर्हि कदा संसारनिवृत्तिः परमानन्दप्राप्तिश्च स्यादत्राह—भवापवर्ग इति । हे अच्युत ! भ्रमतः संसरतः यदा सत्समागमस्तर्हि भवस्य संसारस्य अपवर्गोऽतो भवेत् यतः यर्हि सत्सङ्गमः तदैव सतां गतौ गम्यते इति गतिः मुमुक्षुप्राप्ये त्वयि मतिर्जायते प्रथमं सत्समागमस्ततः परमानन्दे प्राप्ये मतिस्ततः संसारनिवृत्तिस्तदन्तरं परमानन्दप्राप्तिरित्यर्थः ॥५५॥ एवं देहगेहादिप्राकृतपदार्थाशक्ते संसारहेतुत्वं भगवद्भक्तेर्भगवत्प्राप्तिहेतुत्वं चोक्त्वाथ स्वस्य लब्धभगवदनुग्रहत्वं सम्भावयन् प्राकृतदेहगेहादौ वैराग्यं च दर्शयन् भगवद्भक्तिरूपं वरं वृणीते–मन्ये इति द्वाभ्याम् । यः, एकचर्यया एकचारित्वेन त्वद्ध्याननिष्ठापादकभावेन वनं विविक्षद्भिः साधुर्भिभूमिपैः प्रार्थ्यते स मम राज्यानुबन्धापगमः राज्यरूपानुबन्धस्य पाशस्य अपगमः, अपायः यदृच्छयाऽभूत् एष ते त्वया कृतः अनुग्रह इति मन्ये ॥ ५६ ॥ अकिञ्चनैर्निरभिमानिभिः प्रार्थ्यमानत्वात् अन्यत् ऐहिकामुष्मिकं देहगेहादिरूपम् न कामये पादसेवनरूपं वरमेव कामय इत्यर्थः आराध्य अनुकूलीकृत्य आर्यो विवेकी ॥ ५७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्वत्वदितरसुरामक्तकृतं कर्म निष्फलमिति लपति ॥ करोतीति । हे महीश धरावर । कश्चिदधिकारी निवृत्तभोगो निवृत्ता सहसा गता अप्राप्ता इति यावत् । भोगा यस्य सः । यदा तदा तदपेक्षया तद्भोगकामनया तपः प्रागालोचनं करोत्यनन्तरं कर्माणि तत्फलोपलम्भककाम्यकर्माणि करोति । नानादरेणेतीरयति ॥ सुनिष्ठितस्तत्रैव स्थिरान्तर इति । धनादिकं तत्साहितीकृद्भ्यो ददत्सन् पुनश्च भूयः शब्दपर्यायो भूयःशब्दः । भूयसे राधसे सिद्ध्ये तदर्थं प्रवृद्धतर्ष एधमानधनाद्यभिलाषस्तच्चिन्तया स्वान्तः

सुखाय न कल्पते । महीशानां राधसे तत्सम्पदर्थमिति वा पुनश्च भूयेयमहं स्वराडिति पठन्ति स च स्फुटार्थः । हे कल्प समर्थ श्रीहरे । ते सुखाय त्वद्देयमौक्तसुखाय स न कर्माणि करोतीत्याद्यन्वयो वा । न कल्पत इत्यावृत्त्याऽन्वयो वा । अनिवृत्तभोगोऽनिवृत्ततदिच्छस्तदपेक्षया पुनर्द्विगुणधनापेक्षया धनं ददिति वा ॥ ५३ ॥ तर्हि कथङ्कारमेतत्संसारकारागारापहारो राजन्नित्यतो वक्ति । भवापवर्ग इति । यो भ्रमतो यर्हि हे अच्युत सत्समागम उपदेशकदैशिकसहवासो भवेदच्युते भगवति सन्तस्त्वद्रता वा तेषां समागम इति वा । व्याप्तिं दर्शयितुमनूद्य वक्ति । सत्सङ्गमो यर्हीति । तदैव तद्गतौ तद्गतिरूपे परावरेशे मुक्तामुक्तप्रेरके स्वामिनि वा त्वयि मतिजायते सा यर्हि जायते तदा भवापवर्गः । अत्रापवर्गशब्दस्त्यागमात्रार्थकः । भवत्यागो मोक्षः स्यात् । ग्रहकल्लोलेऽपवर्गस्त्यागमोक्षयोरिति विश्वः । अन्यथा भवपदमभवं भजत इति ज्ञेयम् । नान्यः पन्था इत्यादेः । एतावत्स्तुत्वा प्रस्तुतं स्वाशयं विशदयन्वृणीष्वेत्युत्तरयति कैश्चित् श्लोकैः ॥ मन्य इति । अखण्डभूमिपैरखण्डभूमण्डलेशैरेकचर्यया । एक एव चरेद्भिक्षुरित्यादेः । सन्न्यासधर्मेणैकनिष्ठया वा विविक्षुद्भिर्भवनं प्रवेष्टुमिच्छुद्भिः । इच्छा क्वचित्तदकरणमिति विविक्षुद्भिरित्युक्तिरिति ध्येयम् । विविक्षुशब्दपर्यायोऽयं विविक्षुच्छन्दः । अखण्डप्रकृतिः । विविक्षुद्भिरिति पाठे विविक्षेति धातुस्ततः कर्तरि शतेति ज्ञेयम् । विशिष्टा क्षुद्विगता येभ्यस्तैरित्यर्थान्तरं द्योतयितुं चैवं पाठः । साधुभिर्यः प्रार्थ्यते स यदृच्छया राज्यानुबन्धापगमो राज्यस्यानुबन्धस्य तदनुबन्धस्य कोशादेश्चापगमो राज्या पङ्क्तिशः क्रमादनुबन्धस्य कलत्रपुत्रमित्राद्यनुबन्धस्यापगमोऽपहारः । ईश ते त्वया मम ममोपर्यनुग्रहः कृत इति मन्य इत्यन्वयः । हे अमा अपरिच्छिन्न । एवमनुगृहीतारो नान्य इति मन्य इत्यप्याह । अनुग्रहे एतादृशे कृतः कर्तृत्वेन सन्प्रतिपन्ना जीव मा ईश ते न समर्था भवन्तीति । हरे विभो । तत्र पादसेवनादन्यं वरं न कामये नेच्छामि । तदर्थनं न मयैकलेन क्रियते किन्तु सन्ति ते सन्त इत्याह । अकिञ्चन प्रार्थतमान्न विद्यते किञ्चन त्वद्व्यतिरिक्तं येषां तैः प्रार्थ्यतमादत्यर्थनीयादिति । क आर्यो बुद्ध्याऽपवर्गदं त्वामाराध्यात्मबन्धनं वरं दुर्विषयं वृणीते । हीत्येकान्तानां न कस्यचिदित्यादिमानप्रसिद्धिद्योतकम् ॥ ५६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं लौकिकवैयर्थ्यमुक्त्वा वैदिकवैयर्थ्यमाह **करोति कर्माणी**ति । यस्तु राज्यं प्राप्य विषयभोगं करोति, सोऽधम एव, ततोऽप्यधमो यस्तपः करोति, तत्रापि यत्तपः काम्यम्, पुनस्तादृशमेव राज्यं सम्पादयति । प्राप्तं राज्यं न समीचीनं क्षयिष्णिवति हि स प्रवर्तते । यदपि तेन कर्मणा साध्यम्, तदपि तादृशमेवेति प्राप्तं परित्यज्य कष्टेनापि तादृशं साधयन् भ्रान्त एव । नानाविधानि च कर्माणि करोति । तपस्सु नितरां स्थितः सन् तदर्थं निवृत्तभोगश्च । ननु ततोप्यधिकापेक्षया उत्कर्षापेक्षया वा करोतीति चेत्, तत्राह **तदपेक्षये**ति । ततोऽधिकस्याश्रुतत्वाददृष्टत्वाच्च रस एव न जायते । अतस्तदर्थमेव करोतीत्याह **तदपेक्षया तदेवाददद**दिति । सकृद्भ्रान्तस्य द्वितीयपर्याये भ्रमो निवर्तिष्यत इत्याशङ्क्याह **पुनश्च भूयेय**मिति । वारंवारमपि राज्यं प्राप्य तदेव भूयेयमिति । कामनाया नियतत्वात् न सुखाय कल्पते । ननु सजातीयोत्कर्षः सर्वेषामेवापेक्षित इति तस्यैव कथमादानमिति चेत् । **स्वरा**डिति । ब्रह्माण्डाधिपत्यमपि कामयन् प्रवृद्धतर्ष एव भवति । नहि तृष्णायां विद्यमानायां सुखमस्ति, आकाङ्क्षाया दुःखात्मकत्वात् । अत उत्कृष्टमपि वाञ्छन् सुखोपभोगार्थं न समर्थो भवतीत्यर्थः ॥ ५२ ॥ एवं कर्मफलं निन्दित्वा कामनाभावं स्तोतुं सात्त्विकस्य कर्मणः ग्राह्यत्वेन स्तुतिमाह **भवापपर्ग इति ।** यदा भगवदिच्छया भवापवर्गो भवत्, तदा ससाधनेच्छायां जनस्य सत्समागमो भवेत् । सद्भिः सह सम्यगागमः बोध्यबोधकभावसंबन्धः । **भ्रमत** इति नानाविधयोनिषु भ्रमणजनितक्लेशः भगवत्कृपायां हेतुरुक्तः । अथवा । भवापवर्गस्थानानि कानिचिज्जन्मानि सन्ति । योगिकुले महतां कुले वा जन्मानि । तत्रापि गतस्य न स्वत एव मुक्तिः, किन्तु सत्सङ्गादेव । शरीरसन्ताने सत्सङ्गसमानकालीन एव देहः, अपवर्गशब्दार्थ इति मानुषदेहवत्तन्निरूप्यते । तद्व्याख्यास्यते ‘दुर्लभो मानुषो देह’ इत्यत्र । अत एव तर्ह्येव सत्समागम इत्याह **तर्ही**ति । योग्यतायां वा । **अच्युते**ति संबोधनात् तदीयानां सतामभावेन न विलम्ब इत्युक्तम् । तस्य च सङ्गस्य दृष्टद्वारैव पुरुषार्थपर्यवसायित्वं वदन् आह **सत्सङ्गमो यर्ही**ति । यर्हि सत्सङ्गमः, तदैव त्वयि मतिर्जायते । भगवानक्लिष्टकर्मेति न स्वार्थं कञ्चित्प्रवर्तयति । कालकर्मादयश्च बाधका एव । अतो भक्तव्यतिरेकेण न कोऽपि भगवन्मतिं सम्पादयति । तेषां तत्सम्पादनमावश्यकमित्यत्र हेतुमाह **सद्गता**विति । सतां स एव गतिरिति । ते साध्यत्वेन साधनत्वेन फलत्वेन च भगवन्तमेव जानन्तीति तत्सन्निधिमात्रेणैव भगवति मतिर्भवति । ततः किं स्यादत आह **परावरेश** इति । **परे** कालादयः, **अवरे** कर्मादयः, तेषां फलदाने स एव नियामक इति सर्वमेव फलं ततो भवतीत्यर्थः ॥ ५३ ॥ अनेन अस्माकं सर्वाणि साधनानि सिद्धानीत्युक्तं भवति, साधनार्थं प्रवृत्त्यभावश्च सूचितः । अतो गर्गवाक्यप्रामाण्यादपि कृपा विधेयेत्यभिप्रायः साधनप्रकरणे निरूपितः । फलं निरूपयति त्रिभिः । **मन्य** इति । फलं हि त्रिविधम्, राज्यं कामाः भगवांश्चेति । तत्र द्वयं निषेधति तत्रापि राज्यस्य दोषरूपत्वं स्वानुभवसिद्धमिति दैवाज्जातां तन्निवृत्तिमभिनन्दति **मन्य** इति । सर्वस्य कारणं स भगवानेवेति । ते त्वया कृतः राज्यानुबन्धापगमः स्वत एव राज्यसम्बन्धनिवृत्तिः ममानुग्रह एवायं भगवता कृत इत्यहं मन्ये । **यदृच्छये**ति । कारणाभावेनैव जात इति भगवत्कृत एव । भगवांश्च हितार्थमेव करोतीति निर्धारः । ननु राज्यस्य इष्टसाधनस्य निवृत्तिः कथं फलम्, अनिष्टानुबन्धित्वं तु स्वदोषात्, न तु स्वत एव राज्यमनिष्टहेतुः, अन्नमिव ज्वरि-

तस्यैव तदनिष्टजनकम्, तथोद्धतस्यैव स्वभावतामसस्यानिष्टजनकमिति चेत्, तत्राह **यः प्रार्थ्यत** इति। साधवोऽपि राज्यं यतस्त्यजन्ति, अतो ज्ञायते राज्यं स्वभावदुष्टमिति। अन्यथा सतां तेषां भगवद्भजनसाधनमपि राज्यं भवतीति तत्परित्यागेच्छा न स्यात्। किञ्च। प्रार्थ्यते सः। साधूनां कर्मसाध्योऽपि न भवति, अतोऽशक्यप्रतीकारः, अत एतदर्थं भगवानेव प्रार्थ्यते। प्रार्थनापि न केवलं मानसी वाचनिकी वा, किन्तु कायिकीत्याह **एकचर्ययेति**। एकाकिचरणपूर्वकं वनं विवक्षद्भिः प्रार्थ्यते। सर्वं परित्यज्य एकाकी भूत्वा वनं प्रविशन्नपि राज्याद्बिभेति। विद्यमाने सम्बन्धे शत्रवः परलोकाधिकारिणो वा पीडयिष्यन्तीति। अल्पं राज्यमिति हीनतुल्यत्वात्कदाचित्परित्यागमाशङ्क्याह **अखण्डभूमिपैरि**ति। अखण्डां भुवं पान्तीति सप्तद्वीपाधिपतयः। अतः संबन्धनिवृत्तिर्ममाभीष्टमेव ॥ ५४ ॥ कामनान्तरं व्यावर्तयति **न कामयेऽन्यमि**ति। एकं कामये, यत्तव पादसेवनम्, एतत्साधकं च, अन्यत्तु एतद्व्यतिरिक्तं एतदसाधकं या न कामये। ननु को विशेषः, एकं शास्त्रस्तुतम्, अपरं च लोकप्रतीतिसिद्धम्, अत उभयोस्तुल्यत्वादत्याग्रहेणान्यनिषेधे को हेतुरिति चेत्, तत्राह **अकिञ्चनप्रार्थ्यतमा**दिति। धनिनां कदाचिद्धनस्य विद्यमानत्वात् अन्याकाङ्क्षापि भवति। अकिञ्चनानां तु उभयाभावात् लौकिकत्वाद्धनापेक्षायाश्च नियतत्वात् तत्परित्यज्य यत्केवलं चरणसेवैव प्रार्थ्यते। तत्रापि परमेष्टत्वेन दीयमानमप्यन्यदगृहीत्वा, असाध्यमपि प्रार्थयन्त इति प्रार्थ्यतमत्वम्। क्लेशेनाप्रार्थितत्वं वारयति **वरमि**ति। दातुरसामर्थ्यादपि तथात्वं वारयति **विभो** इति। ननु ते भ्रान्तो भवन्तु, तेषां तथा वा रुचिः, तथापि विषये को दोष इति चेत्, तत्राह **आराध्य कस्त्वामि**ति। त्वामाराध्य को वा वरं वृणीत। कर्मवशादागतं अनभिप्रेतमप्यनुभूयते, भगवन्तं त्वाराध्य दुर्लभमेव प्रार्थनीयम्। तत्रापि विरुद्धं कथं प्रार्थनीयमित्युभयथा विरोधमाह। अपवर्गदं भवन्तमात्मबन्धनं वरमिति। यो हि यं सेवते, स तत्सम्बन्धं लोकयोः प्राप्नोति। तत्र मोक्षात्मा भगवान्, अन्यत्संसारात्मकमिति। ननु तर्हि मोक्षो ज्ञानं वा प्रार्थनीयं स्यात्, नतु पादसेवनमिति चेत्। सत्यम्। ज्ञानं हि कैवल्यमेव साधयति। मोक्षोऽपि कैवल्यरूपश्चेत्, तथापि न पुरुषार्थः, भगवत्प्राप्तिरूपश्चेत्, तदा एकरसतामापन्नः भगवानेव भवतीति अस्य पृथगनुभवो न स्यात्। अतः परमानन्दः सन् योऽनुभूयते तदेकं चरणोवासनमेव। असाधनं साध्यं न सिध्यतीति साधनत्वेन वा प्रार्थनमित्येके ॥ ५५ ॥

श्रीसुबोधिनीसारः

तृष्णार्दितस्य न सुखं कदाचिदित्याह। तपसि स्वधर्मादौ सुनिष्ठितः कर्माणि करोति। त्यक्तभोगः तदपेक्षया राज्येच्छया ददत् दानं कुर्वन् पुनरग्रिमजन्मनि अहं स्वराट् चक्रवर्त्ती भूयेयं स्यामिति प्रवृद्धः तर्षस्तृष्णा यस्य स सुखाय नार्हति ॥ ५३ ॥ एवं बहिर्मुखानां संसृतिमुक्त्वा भक्तानां तन्निवृत्तिप्रकारमाह। हे अच्युत भ्रमतः संसारतो जनस्य यर्हि भवस्य बंधस्यापवर्गोऽतो मोक्षो भवेत्तर्हि सतां समागमः यदा सद्भिः संगमः तदैव पराणामवराणामीशे सतां गतौ त्वयि मतिर्जायते। रतिर्मतिर्भक्तिरनुक्रमेणेति भावः ॥ ५४ ॥ मम राज्यमेवानुबंधस्तस्याऽपगमो निवृत्तिर्यदृच्छयेति ते त्वयानुग्रहः कृतोस्ति हे ईश वनं गंतुमिच्छद्भिः सार्वभौमैः साधुभिरेकचर्यया एकांतसेवया योऽनुग्रहः प्रार्थ्यते ॥ ५५ ॥ अकिंचनैः प्रार्थ्यतमात्तव पादसेवनात् अन्यं किंचन वरं न कामये नेच्छामि। हे विभो हे हरे अपवर्गदं मोक्षदं त्वामाराध्य संसेव्यात्मनो बंधनं वरं क आर्यः श्रेष्ठो वृणीत याचेति हि युक्तम् ॥ ५६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'दरिद्राणां भवतु गृहेषु दुःखं भोगसामग्र्यभावात्, धनाढ्यानां तु भोगसामग्रीसत्त्वात् ततः सुखं स्यादेव, कथं सामान्यतो गृहस्य दुःखप्रभवत्वमुच्यते' इत्याशङ्क्य 'विषयभोगेच्छाकुलचित्तानां भ्रान्तानां भोगोऽपि न सिद्ध्यति' इत्याह—करोतीति। राजादिशरीरं दधदपि सुखाय न कल्पते सुखमनुभवितुं समर्थो न भवति। तत्र हेतुमाह—निवृत्तभोग इति। तत्रापि हेतुमाह—पुनश्चाहं स्वराट् सार्वभौमो भूयेयं भूयासमिति। तस्य सार्वभौमराज्यस्यापेक्षया प्राप्तीच्छया तपःसु अधःशयनब्रह्मचर्यव्रतादिषु निष्ठितः नितरां स्थितः सन् सार्वभौमसाधनभूतानि कर्माणि करोतीत्यन्वयः। तत्रापि हेतुमाह—प्रवृद्धतर्ष इति। प्रवृद्धः तर्षः भोगेच्छा यस्य सः ॥ ५३ ॥ एवमष्टभिः श्लोकैर्भगवद्विमुखानां संसारं प्रपञ्च्य तद्भक्तानां संसारनिवृत्तिक्रममाह—भवापवर्ग इति। न च्यवन्ते भक्ता यस्य तत्सम्बोधनं हे अच्युत ! भ्रमतः संसरतो जनस्य यदा भवस्य संसारस्य अपवर्गः विनाशः, आसन्नो भवेत् तदा सद्भिः त्वद्भक्तैः सह समागमः सम्मेलनं भवति। यदैव सत्समागमो भवति तदैव तदुपदेशादिना सद्गतौ सद्भिः प्राप्ये अपरे कालकर्मस्वभावादयः, अवरे तदधीना ब्रह्मादयः, तेषामीशे नियन्तरि त्वयि मतिः प्रेमलक्षणा भक्तिर्जायते ॥ ५४ ॥ मम तु इतः प्रागेव ते त्वया महाननुग्रहः कृतः इत्यहं मन्ये। तत्रौचित्यं सामर्थ्यं च सूचयन् सम्बोधयति—ईशेति। 'कोऽसौ अनुग्रह' इत्यपेक्षायामाह—यदृच्छया अनायासेनैव राज्यरूपो योऽनुबन्धः पाशः तस्यापगमः अपायः, इति। 'कथं राज्यापगमस्य ममानुग्रहत्वम्' इत्युपेक्षायां अन्यथा तस्य दुर्लभत्वमाह—य इति। यो राज्यानुबन्धापगमः, एकचर्यया एकाकीसञ्चरणपूर्वकं वनं विविक्षद्भिस्तपसे वनं प्रवेष्टुमिच्छद्भिः, अखण्डभूमिपैः सार्वभौमैरपि राजभिस्त्वत्तो प्रार्थ्यते। 'विषयाविष्टचित्तानां तु एतत्प्रार्थनापि दुर्लभा' इति सूचयन्नाह—साधुभिरिति। विवेकिभिः सदाचारनिष्ठैरित्यर्थः ॥ ५५ ॥ तदेवं विषयसेवामार्गं च विविच्य वरान् वृणीष्व' इति यदुक्तं तत्रोत्तरमाह—न कामये इति। सर्वदानसामर्थ्यं द्योतयन् सम्बोधयति—विभो इति। तथापि 'भक्तदुःखहरणशीलत्वान्मम संसारदुःखनिवृत्तिरेव कार्या, न संसारबन्ध' इति सूचयन् पुनः सम्बोधयति—हरे इति। तव पादसेवायाः, अन्यं वरं न कामये न

इच्छामि । 'तदेव दुर्लभम्, न विषयभोग' इत्याशयेनाह—अकिञ्चनैस्त्यक्तसर्वभोगैरपि प्रार्थ्यतमात् प्रार्थनीयादिति । विषयभोगदोषमाह—अपवर्गदं मोक्षप्रदं त्वामाराध्य आराधनेन प्रसन्नीकृत्य आर्यो विवेकी चेत् को वा पुमान् आत्माऽनुबध्यते येन तत् शब्दादिविषयजालं वृणीते वृणुयादिति । हि शब्दो निश्चये ॥ ५६ ॥

अन्वितार्थप्रकाशिका

करोतीति ॥ तपःसु ब्रह्मचर्यव्रतादिषु निष्ठितः नितरां स्थितः, अतः निवृत्तभोगः तदपेक्षया भोगापेक्षयाददत् दानादि कुर्वन् जनः कर्माणि करोति ततः पुनश्चाहं स्वराट् इन्द्रः जन्मान्तरे चक्रवर्ती वा भूयेयं भूयासम् आर्षः प्रयोग इति प्रवृद्धतर्षः जनः सुखाय न कल्पते सुखमनुभवितुं न शक्नोति ॥ ५२ ॥ एवं बहिर्मुखानां संसरणमुक्त्वा तन्निवृत्तिकालमाह—भवेति ॥ हे अच्युत ! भ्रमतः संसरतो जनस्य यदा सतां समागमो मेलनं भवति तर्हि भवापवर्गः संसारनिवृत्तिर्भवेत् । तत्र हेतुः । यतः यर्हि यदैव सत्सङ्गमो भवति तदैव तदुपदेशादिना सद्गतौ सद्भिः प्राप्ये परे कालादयः अवरे देवाद्यास्तेषामीशे त्वयि मतिः प्रेमभक्तिः जायते ॥ ५३ ॥ मन्य इति ॥ हे ईश ! यदृच्छया अनायासेनैव राज्यरूपो योऽनुबन्धः पाशः तस्यापगमो जात इति मम त्वितः प्रागेव ते त्वया महान् अनुग्रहः कृतः इति मन्ये । यो राज्यानुबन्धापगमः साधुभिः एकचर्यया एकाकिसंचरणपूर्वकं वनं विविक्षद्भिस्तपसे वनं प्रवेष्टुमिच्छद्भिः अखण्डभूमिपैः सार्वभौमैरपि राजभिस्त्वत्तः प्रार्थ्यते । नेति ॥ हे विभो ! हे हरे ! अकिञ्चनैः त्यक्तसर्वभोगैरपि प्रार्थ्यतमात् तव पादसेवनात् तत्र प्रार्थ्या भक्तिः प्रार्थ्यतरं दर्शनं प्रार्थ्यतमं साक्षात् पादसेवनं तस्मात् अन्यं वरं न कामये । हि यतः अपवर्गदं मोक्षप्रदं भक्तिप्रदं वा त्वामाराध्य आराधनेन प्रसन्नीकृत्य आर्यो विवेकी चेत्को वा पुमान् आत्मनो बन्धनं त्वया दित्सितमपि विषयजातं वरं वृणीते वृणुयात् । अहं तु मोक्षमप्यनिच्छन् कथन्तरां वृणुयाम् ॥ ५४–५५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

किं च करोतीति तपसि चांद्रायणादौ सुनिश्चितस्तदपेक्षया तस्य राज्यादेः अपेक्षया ईच्छया निवृत्तभोगः सन् दानादि ददत् । पुनश्च स्वराट् सार्वभौमः पुरंदरो वाहं भूयासं स्याम् इति । प्रवृद्धतर्षो जनः सुखाय न कल्पते ॥५३॥ इदानीं पंचभिर्जनानां संसारावृत्तिप्रकारमाह भवापवर्ग इत्यादिना । हे अच्युत संसारे भ्रमतो जनस्य यदा यर्हि सतां समागमो भवेत्तर्हि भवापवर्गो जन्ममरणनाशः शीघ्रमेव भवेदित्यर्थः सत्समागमे नान्यदपि स्यादित्याह । यर्हि सत्संगमस्तर्ह्येव सतां गतौ आश्रये प्राप्ये । पराणां अक्षरसंज्ञयोक्तानां मुक्तपुरुषाणां अवराणां क्षरसंज्ञयोक्तानां बद्धजीवानां चेशे नियामके त्वयि पुरुषोत्तमे मतिः । अत्युत्कृष्टस्नेहयुक्ताबुद्धिर्जायते ॥ ५४ ॥ मम तु राज्यवियोग एव तवानुग्रह इत्याहं मन्ये इति । ईश दुर्घटघटनापटो । यदृच्छया दैवेच्छेया राज्यबंधनस्यापगमो नाशो यस्मात् सोऽनुग्रहस्ते त्वयैव कृत इत्यहं मन्ये यश्च अनुग्रहः साधुभिः सारासारविवेकिभिः । अतः, एकचर्यया ध्यानायैकाकिगमनेन वनं विविक्षद्भिः प्रवेष्टुमिच्छद्भिः अखंडभूमिपैः भरतादिचक्रवर्त्तिभिः प्रार्थ्यते ॥ ५४ ॥ संसारक्लेशं भगवत्सुखं च विचार्य वरान् वृणीष्वेति यत्कथितं तस्योत्तरं वदति नेति । नास्ति किंचन आत्मस्वरूपव्यतिरिक्तं किमपि येषां तैरकिंचनैरपि प्रार्थ्यतमात् अन्यं वरं । त्वाम्, आराध्य आत्मबंधनं राज्यादिप्राकृतसुखरूपं वरं को वृणीत वृणुयात् ॥५५॥ रजआदिगुणैरनुबध्यंते इति तां गुणमयदेहभोगस्थानैश्वर्यादिरूपाः सर्वा आशिषो मनोरथान् । विसृज्य । हे ईश निरंजनं निर्दोषं अतो निर्गुणं प्रकृतिगुणातीतम् । परं बद्धमुक्तेभ्यः श्रेष्ठम् । अतोऽद्वयं स्वरूपस्वभावगुणपार्षदादिभिर्नास्ति द्वितीयस्तुल्यो यस्य तम् । न तत्समश्चाप्यधिकश्च दृश्यते इति श्रुतेः ज्ञप्तिमात्रं ज्ञानघनमूर्त्ति । पुरुषमनादिसिद्धदिव्यपुरुषविग्रहम् । त्वां पुरुषोत्तमं व्रजामि अहं प्राप्तोस्मि ॥५६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु नार्पत्यान् भोगान् किमेवं निन्दसि सर्वैरभीप्सितानिति चेत्तान् प्राप्यातितृष्णाकुलस्य न कश्चिद्भोगक्षणोऽस्तीत्याह । करोतीति ॥ इमे राज्यादयः, पूर्वजन्मोपार्जितसुकृतेन तु लब्धाः, इति शेषः । परं तु, पुनश्च पुनरपि जन्मान्तरेऽपीत्यर्थः । स्वराट् इन्द्रः, भूयासं स्यां, इति यद्वा सार्वभौमश्चक्रवर्त्ती स्यां इति, प्रवृद्धस्तर्षस्तृष्णा यस्य सः पुमान्, दधत् सांप्रतं भोगान् दधानः सन्नपि, तदपेक्षया अधिकतयैव तल्लब्धीच्छया, निवृत्तास्त्यक्ताः भोगाः, संप्राप्ता भोगा, येन सः, तपःसु जन्मान्तरीयसार्वभौमतादिसाधनेषु, तपश्चरणेषु अधःशयनब्रह्मचर्यसेवनादिष्वित्यर्थः । निष्ठितः संजातनिष्ठः सन्, कर्माणि करोति । अतः भोगान् लब्ध्वापीति शेषः । सुखाय पूर्वोपार्जितसुकृतफलरूपलब्धभोगादिसेवनसुखानुभवाय, न कल्पते समर्थो न भवति ॥ ५३ ॥ तदेवमष्टभिः श्लोकैरीशबहिर्मुखानां संसारं प्रपञ्च्य भक्त्या संसृतिनिवृत्तिं सूचयन्, यदा साक्षाद्भगवत्तज्जनसंबन्धस्तदैव सुखाय कल्पत इत्याह भवापवर्ग इति ॥ भ्रमत उक्तरीत्या संसारे भ्रममाणस्य, जनस्य पुंसः, यदा त्वदनुग्रहेणेति शेषः । भवापवर्गः संसरणस्यान्तः, भवेत् प्राप्तकालः स्यात्, तर्हि तदा, अच्युतश्च सन्तश्च तेषां समागमः, सह संवासः, भवेत्, तस्मिन् काले प्रादुर्भूतस्य भगवतस्तत्संबन्धवन्तो ये सन्तश्च तेषां समागमः स्यादित्यर्थः । अच्युतेति संबोधनं वा । यर्हि यदा, सत्संगमः, तदैव परे इन्द्रादयः अवरे अवमा यस्मात्तस्य चतुर्मुखस्यापीशो नियन्ता तस्मिन्, सद्गतौ सतां शरणभूते त्वयि, मच्चक्षुर्विषये भवतीत्यर्थः । मतिः त्वद्भक्त्याचरणात्मिका धीः, जायते । तथा च शिक्षापञ्चकेऽभियुक्ताः 'सकलजनविमोचनैकहेतुर्भुवनगुरुः कृपया यदा मुकुन्दः ।

प्रकटितकरुणार्द्ररम्यमूर्त्तिर्मिलति तदेव भवप्रवाहमुक्तिः' इत्यादि । 'यावत् स्युस्तेऽत्र सन्तोऽर्च्चास्त्वयैवास्थापितास्तथा । त्वच्छास्त्राणि तथेह त्वं जाने साक्षादिह स्थितः । तवार्च्चा नैष्ठिकैर्जुष्टा धर्मिष्ठाः साधवस्तथा । न गौणश्चागमो धर्मो भवेद्यावदिह प्रभो । तावदेवावताराणां कारणं पुरुषोत्तमः । साक्षात्त्वं वर्त्तसे लोके जानामीत्थं दयानिधे इति चाभियुक्तोक्तेः । एतदर्थप्रपञ्चः सत्सङ्गिजीवनाभिहितन्यग्रोधपत्तनीयवादिसदसि मुक्तानन्दमुनिकृत तत् प्रश्नोत्तरतः हरिदिग्विजयगतैतत् प्रकरणतश्च सविस्तरं बोध्यः ॥ ५४ ॥ यदुक्तं 'तवानुग्रहार्थं गुहामेतामुपागत' इति तत्सत्यमेव देहानुबन्धापनयनेन लिङ्गेन पूर्वत एव त्वयाऽनुगृहीत इत्यहं मन्य इत्यभिप्रायेणाह मन्य इति ॥ हे ईश, यदृच्छया त्रिदशसाहाय्यव्याजेन, राज्यरूपो योऽनुबन्धः पाशस्तस्य अपगमः अपायः, एषः ते त्वया, कृतः मम अनुग्रहः, इति अहं मन्ये । राज्यानुबन्धापगमस्यानुग्रहप्रयुक्तत्वे हेतुं वदन् तमेव विशिनष्टि । यो राज्यानुबन्धापगमः, साधुभिर्विवेकिभिः, तपसे इति शेषः । वनं, विविक्षद्भिः प्रवेष्टुमिच्छद्भिः, अखण्डभूमिपैः सार्वभौमैः, एकचर्यया एकाकित्वेन संचारार्थमित्यर्थः । प्रार्थ्यते । स्वयं त्यक्तुमलभमानैः संप्रार्थ्यत इति भावः ॥ ५५ ॥ तदेवं विषयसेवामार्गं भगवत्सेवामार्गं च विविच्य वरान् वृणीष्वेति यदुक्तं तत्रोत्तरमाह ॥ न कामय इति ॥ हे विभो, अकिंचनैरनन्यप्रयोजनैरेकान्तिभिः प्रार्थ्यतमादतितरां प्रार्थनीयात् , तव पादसेवनात्, अन्यं वरं, न कामये । उपादिष्टादन्यो वरणीयोऽर्थ एव नास्तीत्यभिप्रायः । आर्यः श्रेष्ठः, विवेकी चेदित्यर्थः । को वा पुमान्, अपवर्गदं साक्षान्मुक्तिप्रदं, त्वां निष्कारणापारकरुणं भवन्तम्, आराध्य आराधनेन प्रसन्नीकृत्य, केवलं, आत्मा अनुबद्ध्यते येन तमात्मबन्धनं शब्दादिविषयजालरूपं वरं, वृणीत वृणुयात् । मूर्खश्चेद्वृणीते इत्यर्थः ॥ ५६ ॥

कृष्णप्रिया

मनुष्य तपश्चर्यादि करता है लेकिन लक्ष्य यह है कि मैं अब दूसरे जन्म में एक अजोड़ सम्राट् बन जाऊँ ऐसे अज्ञान से विषय सुखों का त्याग करके दान पुण्य सत्कर्म तप ध्यान उपासना आदि करता लेकिन उसकी तृष्णायें तो बढ़ रही है वह कितना सत्कर्म करे लेकिन वह कभी सुख नहीं पाता, कारण कि वह संतुष्ट नहीं है एवं भगवत् चरणों का भक्त नहीं है ॥ ५३ ॥ हे अच्युत प्रभो हे निजानन्द निरतनाथ ! जीव तो सनातन काल से जन्म मृत्यु की श्रेणी में चक्कर ले रहा है । कभी भगवान की कृपा से उस चक्कर से मुक्त होने का मौका आ जाता है तब उसे सत्समागम हो जाता है और जैसे सत्सङ्ग मिला वैसे ही मुक्ति में मति हो जाती है और स्थावर जङ्गम, इहलोक परलोक के स्वामी आप की सेवा में उस पुण्यात्मा की पुण्य मति अत्यन्त स्थिरता से लग जाती है ॥ ५४ ॥ श्री मुचुकुन्दजी दैन्यभाव से निवेदन करते हैं कि हे नाथ ? मेरा निश्चित मन्तव्य है कि आपने मुझ पर अनुकम्पा की अमृतवर्षा की, क्योंकि अनायास ही मेरा साम्राज्य बन्धन टूट गया । हे नारायण ! नारायण परायण सन्त स्वभाव वाले चक्रवर्ती राजा लोग भी अपना साम्राज्य का त्याग कर एकान्त मे हरिभजन करने की उत्तम भावना से जब वन में जा रहते हैं और मोह ममता के बन्धनों से मुक्त होने के आपके श्रीचरणों में प्रार्थना करते रहते हैं वह बन्धन आपकी अनुकम्पा से अनायास छूट गया ॥ ५५ ॥ हे विभो ! हे कृपालो ! आपके श्री चरणों की सेवा से अतिरिक्त कोई वरदान की अभिलाषा नहीं है । नाथ सेवा का महत्व इसलिये है कि जो अकिंचन भक्तजन है अथवा संग्रह से सर्वथा पर है वे लोग भी आपके पादसरोज सेवन की ही लालसा रखते हैं । हे हरे हे दयानिधे ? परमपद देने वाले या निजपाद पद्मपराग में अनुराग देने वाले आपकी सेवा करके ऐसा कौन भगवदीयजन होगा कि संसार के बन्धनों में विषयों की लालसा करें ॥ ५६ ॥

तस्माद् विमृज्याशिष ईश सर्वतो रजस्तमःसत्त्वगुणानुबन्धनाः ।
निरञ्जनं निर्गुणमद्वयं परं त्वां ज्ञप्तिमात्रं पुरुषं व्रजाम्यहम् ॥ ५७ ॥
चिरमिह वृजिनार्तस्तप्यमानोऽनुतापै[1]रवितृषषडमित्रोऽलब्धशान्तिः कथञ्चित् ।
शरणद समुपेतस्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि माऽऽपन्नमीश ॥ ५८ ॥

श्रीभगवानुवाच

सार्वभौम महाभाग[2] मतिस्ते विमलोर्जिता । वरैः प्रलोभितस्यापि न कामैर्विहता यतः ॥ ५९ ॥
प्रलोभितो वरैर्यत्त्वमप्रदाय विद्धि तत् । न धीर्मय्येकभक्तानामाशीर्भिर्भिद्यते क्वचित् ॥ ६० ॥

कर्दमक्षमा

अन्वयः—हे ईश ! तस्मात्, अहम् रजस्तमःसत्वगुणानुबन्धनाः, आशिषः, सर्वतः, विसृज्य, निरञ्जनम्, निर्गुणम्, अद्वयम्, ज्ञप्तिमात्रम्, परम्, पुरुषम्, त्वाम्, (अहम्) व्रजामि ॥ ५७ ॥ हे शरणद ! इह, चिरम्, वृजिनार्तः-अनुतापैः, तप्यमानः,

---

[1] अविदित–वीर.; अवितृष उरुकृच्छ्रे–विज. । [2] राज–श्रीधर. वंशी वीर. विज जीव विश्व. ।

अवितृषषडमित्र:, अलब्धशान्ति:, कथञ्चित्, हे परात्मन् ! अभयम्, अमृतम्, अशोकम्, त्वत्, पदाब्जम्–आपन्नम्, मा, हे ईश ! पाहि ॥ ५८ ॥ श्रीभगवान्, उवाच– हे सार्वभौम ! हे महाभाग ! ते, मतिः, ऊर्जिता, यत:, वरै:, प्रलोभितस्य, अपि, कामै:, न, विहता ॥ ५९ ॥ यत्, त्वम्, वरै:, प्रलोभित:, तत्, अप्रमादाय, विद्धि, मयि, एकान्तभक्तानाम्, धी:, आशीभि:, क्वचित्, न, भिद्यते ॥ ६० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रजस्तमः सत्त्वगुणैरनुबध्यन्त इति यथा ता आशिष ऐश्वर्यादिशत्रुमारणादिधर्मादिरूपा विसृज्य परं पुरुषमीश्वरं ज्ञप्तिमात्रं ज्ञानघनम् । कुतः । निरञ्जनम् । तत्कुतः । निर्गुणम् । तदपि कुतः । अद्वयम् । अत एव अक्षरं त्वां शरणं व्रजामीति ॥ ५८ ॥ भुंक्ष्व तावद्भोगान्कैवल्यं तु करस्थमेवेति पुनर्वरैः प्रलोभयंतं श्रीकृष्णं पादोपग्रहणेन प्रार्थयते । चिरमिति । वृजिनैः कर्मफलैरार्तः पुनस्तद्वासनाभिस्तप्यमानस्तथाऽप्यवितृषषडमित्रः । तृडेव तृषा तृष्णा । न विगततृषाः षडमित्राः शत्रव इन्द्रियलक्षणा यस्य सः । अत एवालब्धशांतिः कथंचिद्दैववशेन लब्धशांतिरिति वा । शरणं स्वज्ञानं तद्ददातीति तथा । हे शरणद समुपेतः प्राप्तोहम् । अशोकत्वे हेतुः । अभयम् । तत्रापि हेतुः । ऋतं सत्यम् । आपन्नमापदाव्याप्तं पाहीति ॥५९–६०॥ अप्रमादाय प्रमादाय न भवत्येव । कुत इत्यत आह । न धीरिति । एकांतभक्तानां धीराशीर्भिः प्राप्ताभिरपि न भिद्यते नासज्जत इत्यर्थः ॥ ६१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तर्हि किं करोषीत्यत आह—तस्मादिति । यतो वराणां बन्धकत्वं तस्माद्धेतोः । तथाभूता मानुषराक्षसदैवीर्वाऽऽशिषो मनोरथास्संपदो वा 'स्यात्संपदिच्छयोराशीः' इति निरुक्तिः । ज्ञानघनत्वे हेतुमाशंकते–कुत इति । निरञ्जनं निरुपाधिम् । अत्रापि हेतुमाशंकते—कुत इति । तदपि निर्गुणमपि कुतो द्वैत वर्जितम् । अत एव द्वैतवर्जितत्वादेव । आशिषः फलानि । सर्वश इति पादसेवनविरुद्धो मोक्षोऽपि निरस्तः "सर्वतः" इति पाठेऽपि स एवार्थः । तस्यापि ज्ञानहेतुसत्त्वगुणानुबंधनत्वात्, सेवायास्तु नैर्गुण्यहेतुकत्वात् । 'सात्त्विक्याध्यात्मिकी श्रद्धा' इत्यादौ 'मत्सेवायां तु निर्गुणा इति श्रीभगवदुक्तेः । अन्यत्तैः । तत्र त्वामित्येतदाकारेणाऽविर्भवन्तमित्यर्थः । तं च 'परं सत्यं परं धीमहि', इति, 'आद्योबतारः पुरुषः परस्य' इति, 'कृष्णस्तु भगवान्स्वयम्' इत्यादिदृष्ट्या स्वयं भगवन्तमित्यर्थः । पुरुषमीश्वरमिति–"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति गीतादृष्ट्यांतर्याम्याकारेण परमात्माख्यमित्यर्थः । ज्ञप्तिमात्रमिति–'ज्ञानमात्रं परं ब्रह्म' इति दृष्ट्या चिन्मात्राकारेण सर्वत्र ब्रह्माख्यमित्यर्थः । तदुक्तम्—'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इति । तदेवमाविर्भावत्रयात्मके मयातीतत्वमाह–कुत इत्यादिना । तत्र त्रिधापि निरंजनमुपाधिं विना स्वरूपेणैव तथा तथा स्थितं, भगवत्त्वे परमात्मत्त्वेऽपि निर्गुणं निर्गता प्राकृतेभ्यो गुणेभ्यः गुणाः स्वरूपशक्तिवृत्तिरूपा ऐश्वर्यादयो यस्य तम् । मध्यपदलोपी समासः । 'मां भजन्ति गुणाः सर्वे' इत्यादौ 'साम्यासंगादयो गुणाः' इति श्रीभगवदुक्तेः । अद्वयं सजातीयविजातीयभेदरहितम् । ज्ञप्तिमात्रत्वेऽपि स्वरूपशक्तिर्यत्किंचिदुपलभ्यते, ईक्षितृत्वस्य स्वाभाविकतयाऽवश्यं मंतव्यत्वात् । तदुक्तम्—"ईक्षतेर्नाशब्दम्" इत्यत्र भाष्यकृद्भिर्ज्ञानस्वरूपस्य तस्य ज्ञानसाधनापेक्षा नास्ति प्रकाशस्वरूपवस्तुनः प्रकाशसाधनापेक्षाभावादिति भगवत्त्वे परमात्मत्वे च स्पष्टमेव सा श्रूयते—"न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।" इति, 'अपाणिपादो जवनो ग्रहीता' इति च । विग्रहश्च "यमेवैष वृणुते तेन लभ्यस्तथैष आत्मा वृणुते तनूं स्वाम्" इति । यद्वा–निरंजनं नितरां रंजकम्, निर्गुणं निःशेषेण गुणयत्युत्तरोत्तरं भक्तिविस्तारेण वर्धयतीति तम्, अद्वयं प्रतिद्वन्द्विशून्यम्, ज्ञप्तिश्चिदेकलक्षणं ब्रह्माख्यं वस्त्वपि मात्रांशो यस्य तम्, सच्चिदानन्दरूममनंतशक्ति पुरुषाकारं त्वामेतमित्यर्थः । व्रजामि सेव्यत्वेनाऽऽसादयामि । शेषं पूर्ववत् ॥ ५८ ॥ तद्वासनाभिः कर्मफलवासनाभिः । तथापि कर्मवासनातप्यमानत्वेपि । अत एवाऽतृप्तेंद्रियारातित्वादेव । अरुच्या न पक्षांतरमत्र तत्राप्यभयत्वे सत्यस्य भयाभावप्रसिद्धेः । अतोऽधुना कथमपि मामुपेक्षितुं नार्हसि किन्तु सर्वतो रक्षेति सदैन्यमर्थयते–चिरमिति । इह संसारे । वृजिनैः पापभोगैरार्तः, अनुतापैः पुण्यभोगक्षये शोकैस्तप्यमानः कथंचिदपि न लब्ध्वा शांतिश्चित्तस्थैर्यं सुखं वा येन सः । यद्वा–कथंचित्प्रयत्नाभावादनिरूप्येण केनचित्कारणेन सम्यक्प्रत्यक्षतया तथापि उप समीपे इतः प्राप्तः, तच्च तव योग्यमित्याह—हे शरणद । 'आर्तानां शरणं त्वहम्' इत्यादिस्वप्रतिज्ञापेक्षया स्वाश्रयदायक । न च वक्तव्यं तद्भक्तिवशादिति भक्तेरपि प्रवर्तकस्त्वमेवेत्याशयेन सम्बोधयति—परमात्मन्निति । अतोऽधुना निजपादाब्जमाहात्म्यानुरूपमेव दातुमर्हसि न त्वन्यदित्याशयेन पादाब्जं विशिनष्टि—पदैस्त्रिभिः । अतः पाहि निजसेवकत्वेन पालाय । तच्च केवलं दीनवात्सल्यादेवेत्याशयेन पुनराह–आपन्नमिति । तत्र च त्वमेवैकः समर्थ इत्याह–ईशेति ॥ ५९ ॥ ऊर्जिताऽत्युच्चा । तत्र हेतुः—वरैरित्यादि । हे सार्वभौमेष्वपि महाराज इत्यत्यन्तादरात्पौनरुक्त्यं वा हे सार्वभौम महाराजेति । ततः परमेश्वरस्यापीदृशं वचनमित्यहो सौशील्यमिति भावः । विमला संसारवासनाशून्या, ऊर्जिता प्रखररसविदग्धेत्यर्थः । तत्र हेतुः–प्रकर्षेण मां प्रपन्नो जन

इत्याद्युक्तयुक्त्या लोभितस्यापि कामैः साम्राज्याद्यैर्मोक्षपर्यन्तैर्मद्भक्त्या काम्यमानैरर्थैर्न विहता किन्तु तस्यामेव बद्धस्पृहा जातेत्यर्थः। ऊर्जिता चालयितुशक्यत्वाद्बलवती ॥ ६० ॥ तत्प्रलोभनम्। एवं कुतः प्रामादाभावाय कुतो ज्ञायते। इत्यत इत्यत्र। इत्यर्थ इति—विषयसंग एव बुद्धिभेद इति भावः। अप्रमादाय अप्रमादं दर्शयितुमन्योपासकानिति "क्रियार्थोपपदस्य—" इत्यादिना चतुर्थी। एतद्दर्शनायैव प्रलोभितोऽसीति भावः ॥ ६१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आशिषः फलानि सर्वश इति पादसेवनविरुद्धो मोक्षोपि निरस्तः सर्वत इति पाठे स एवार्थः तस्यापि ज्ञानहेतुसत्त्वगुणानुबन्धत्वात् सेवायास्तु नैर्गुण्यहेतुकत्वात् सात्त्विकाध्यात्मिकी श्रद्धेत्यादौ मत्सेवायां तु निर्गुणेति श्रीभगवदुक्तेः, अन्यत्तैः तत्र त्वामिति एतदाकारेणाविर्भवन्तमित्यर्थः। तं च सत्यं परं धीमहीति आद्योऽवतारः पुरुषः परस्येति कृष्णस्तु भगवान् स्वयमिति दृष्ट्या स्वयं भगवन्तमित्यर्थः। पुरुषमीश्वरमिति "विष्टभ्याहमिदं कृत्स्नमेकांशेन" इति गीतादृष्ट्यान्तर्य्यामिस्याकारेण परमात्माख्यमित्यर्थः ज्ञप्तिमात्रमिति ज्ञानमात्रं परं ब्रह्मेति दृष्ट्या चिन्मात्राकारेण सर्वत्र ब्रह्माख्यमित्यर्थः। तदुक्तं "ब्रह्मेतिपरमात्मेति भगवानिति शब्द्यते" तदेवमाविर्भावत्रयात्मत्वेपि मायातीतत्वमाह—कुत इत्यादिना तत्र त्रिधापि निरञ्जनम् उपाधिं विना स्वरूपेणैव तथा तथास्थितं भगवत्त्वे परमात्मत्वेऽपि निर्गुणं निर्गता गुणेभ्यः प्राकृतेभ्यो गुणाः स्वरूपशक्तिवृत्तिरूपा ऐश्वर्य्यादयो यस्य तं मध्यपदलोपः "मां भजन्ति गुणाः सर्वे" इत्यादौ साम्यासङ्गादयोऽगुणा इति श्रीभगवदुक्तेः अद्वयं सजातीयविजातीयभेदरहितं ज्ञप्तिमात्रत्वेपि स्वरूपशक्तिर्यतिकिञ्चिदुपलभ्यते ईक्षितृत्वस्य स्वाभाविकतयावश्यम्मन्तव्यत्वात् तदुक्तम् "ईक्षतेर्नाशब्दम्"। १।१।५ इत्यत्र भाष्यकृद्भिः ज्ञानस्वरूपस्य तस्य ज्ञानसाधनापेक्षा नास्ति प्रकाशस्वरूपवस्तुनः प्रकाशसाधनापेक्षाभावादिति भगवत्त्वे परमात्मत्वे च स्पष्टमेव सा श्रूयते। "न तस्य कार्य्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति "अपाणिपादो जवनो ग्रहीतः" इति च विग्रहश्च "यमेवैष वृणुते तेन लभ्यस्तस्यैव आत्मा विवृणुते तनुं स्वाम्" इति यद्वा निरञ्जनं नितरां रञ्जकं निर्गुणं निःशेषेण भूषयति उत्तरोत्तरं भक्तिविस्तारेण गुणयति वर्द्धयतीति तम् अद्वयं प्रतिद्वन्द्वशून्यं ज्ञप्तिश्चिदेकलक्षणं ब्रह्माख्यं वस्त्वपि मात्रा अंशो यस्य तं सच्चिदानन्दस्वरूपमनन्तशक्तिपुरुषाकारं त्वामेतमित्यर्थः। व्रजामि सेव्यत्वेनासादयामि शेषं पूर्ववत् ॥ ५८ ॥ अतोऽधुना कथमपि मामुपेक्षितुं नार्हसि किन्तु सर्वतो रक्षेति सदैन्यमर्थयते—चिरमिति। इह संसारे वृजिनैः पापभोगैरार्त्त अनुतापैः पुण्यभोगक्षये शोकैस्तप्यमानः कथञ्चिदपि न लब्धा शान्तिश्चित्तस्थैर्य्यं सुखं वा येन सः यद्वा कथञ्चित् प्रयत्नाभावादनिरूप्येण केनापि कारणेन सम्यक्प्रत्यक्षतया तत्रापि उपसमीपे इतः प्राप्तः तच्च तव योग्यमित्याह—हे शरणद! "आर्तानां शरणं त्वहम्" इत्यादिस्वप्रतिज्ञापेक्षया स्वाश्रयदायक, नच वक्तव्यं त्वद्भक्तिवशादिति भक्तेरपि प्रवृत्तर्कस्त्वमेवेत्याशयेन सम्बोधयति, परमात्मन्निति, अतोऽधुना निजपादाब्जमाहात्म्यानुरूपमेव दातुमर्हसि न त्वन्यदित्याशयेन पादाब्जं विशिनष्टि–पदैस्त्रिभिः। अतः पाहि निजसेवकत्वेन पालय तच्च केवलं दीनवात्सल्यादेवेति दैन्येन पुनराह आपन्नमिति। तत्र च त्वमेवैकः समर्थ इत्याह हे ईशेति ॥५९॥ हे सार्वभौमेष्वपि महाराज! हे सार्वभौम महाराजेत्यत्यन्तादरात् पौनरुक्त्यं वा ततः परमेश्वरस्यापीदृशं वचनमित्यहो सौशील्यमिति भावः, विमला संसारवासनाशून्या उर्जिता प्रखरा रसविदग्धेत्यर्थः तत्र हेतुः प्रकर्षेण मां प्रपन्नो जन इत्याद्युक्तयुक्त्या लोभितस्यापि कामैः साम्राज्यादिमोक्षपर्यन्तैर्मद्भक्त्या काम्यमानैरर्थैर्न विहता किं तु तस्यामेव बद्धस्पृहा जातेत्यर्थः ॥ ६० ॥ प्रलोभित इति तैर्व्याख्यातं तत्र प्रमादश्चिन्तान्तरं तथा न भवत्येवेत्यनन्तरम् इति तद्विद्धीति शेषः एकान्तभक्तानामुपासनान्तरकामनानन्तरशून्यानाम् आशिर्भिः कामनाभिः (कर्त्रीभिः) न भिद्यते न प्रविश्यते तासु नासज्जत इत्यर्थः। एतद्दर्शनायैव प्रलोभितोसीति भावः, अप्रमादाय अप्रमादभावाय ॥६१॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आशिषः फलानि, सर्वश इत्यनेन मोक्षोऽपि निरस्त एव, तस्यापि ज्ञाने हेतुः—सत्त्वगुणानुबन्धनात्त्वामद्वयमेकमेव व्रजामि, आश्रयामि, कुतः? परं पुरुषं परमेश्वरं श्रीपुरुषोतमं वा, अत एव निःशेषा गुणा यस्मिन् तम्, यद्वा, निःशेषेण गुणयति उत्तरोत्तरं भक्तिविस्तारणेन बर्द्धयतीति तथा तम्, अत एव नितरां रञ्जयतीति तथा तम्, तत्प्रकारविज्ञापनापेक्षा च नास्तीत्याह ज्ञप्तिमात्रमिति, ज्ञानघनविग्रहत्वादित्यर्थः। अहं व्रजामि, अन्यस्त्वाशिषो गृह्णातु नामेत्यर्थः। यद्वा, दीर्घाशाबद्धहृदयोऽहम्। एवमहमिति लेख्ये टीकायामत एवाक्षरमिति लेखकभ्रमात्। ननु यदर्थमाश्रयसि, तन्ममादेयम्, तत्राह—ईश हे सर्वप्रदानसमर्थेति, यद्वा, किमन्यवेद्यविज्ञाप्यादधिकमपि त्वं जानास्येवेत्याह—ज्ञप्तिमात्रमिति। प्रार्थितादधिकमपि दातुं शक्नोषीत्याह—हे ईशेति। अन्यत् समानम् ॥ ५६ ॥ अतोऽधुना कथमपि मामुपेक्षितुं नार्हसि, किन्तु सर्वतोऽनिष्टाद्रक्षेति सदैन्यं प्रार्थयते—चिरमिति। इह संसारेऽस्मिन् जन्मनि वा, वृजिनैः पापभोगैरार्तः, अनुतापैः पुण्यभोगक्षये शोकैस्तप्यमानश्च, यद्वा, वृजिनैः पापकर्म्मभिरार्त्तः पुण्यकर्माणामपि क्षयिष्णुफलत्वादिश्रवणादनुतापैस्तपैस्तप्यमान इत्यर्थः। यद्वा, वृजिनैः पूर्वपापैरार्त्तः पुनश्चाधुनानुतापैः कामादिकृतैस्तप्यमान इति बाह्यान्तरदुःखमुक्तम्। कथञ्चिदपि त लब्धाशान्तिश्चित्तस्थैर्य्यं सुखं वा येन सः, यद्वा, कथञ्चित् स्वप्रयासाभावा-

दिना निजरूपप्रकाशनाद्यनिर्वचनीयप्रकारेण वा सम्यक् प्रत्यक्षत्वेन तत्रापि उप समीपे इतः प्राप्तः, तच्च तदनुग्रहप्रभावादेवेत्याशयेन सम्बोधयति—शरणद ! 'आर्त्तानां शरणं त्वहम्' इत्यादि–स्वप्रतिज्ञापेक्षया स्वाश्रयदायक, न च वक्तव्यं त्वद्भक्तिवशादिति भक्तेरपि प्रवर्त्तकस्त्वमेवेत्याशयेन सम्बोधयति—परात्मन्निति। अन्तर्य्यामितया सर्वत्र प्रवर्त्तकेत्यर्थः। अतोऽधुना निजपादाब्जमाहात्म्यानुरूपमेव दातुमर्हसि, न त्वन्यदित्याशयेन पादाब्जं विशिनष्टि पदैस्त्रिभिः। अतः कालभयव्याप्तं पारमेष्ठ्यादिपदमसत्यमणिमाद्यैश्वर्य्यञ्च भक्तजनसंगात्तुच्छत्वज्ञानेन पश्चाच्छोककरं मोक्षमपि दातुं नार्हसीति भावः। अतः पाहि, त्वत्प्राप्तिविघ्नादिसर्वापद्भ्योऽनिष्टाद्वा रक्ष, तच्च केवलं दीनवात्सल्यादेवेत्याह—आपन्नमिति। एतच्च प्राक् 'वृजिनार्तः' इत्यादिनोक्त्वापि परमार्त्योक्तम्। तत्र च त्वमेवैकः समर्थ इत्याह—हे ईशेति, यद्वा, अभयमित्यादिकं क्रियाविशेषणम्, पुनर्यथा संसारभयं शोकश्च न स्यात्, सत्यञ्च यथा स्यात्तथा पाहीत्यर्थः। न चाप्रियं कथञ्चिद्दातुमर्हसीत्याह—परात्मन् हे परमप्रियतमेति। परमात्मतया परमप्रियतमत्वञ्च चतुर्द्दशाध्यायान्तादौ बहुशो निरूपितमेव। अवश्यञ्च शरणागतं रक्षितुमर्हसीत्याह—आपन्नं प्रपन्नमिति। न चाधमं प्रतीदृशानुग्रहेण कुतोऽपि तव लज्जाशंकादिकं सम्भवेदित्याह—ईश, हे परमस्वतन्त्रेत्येषा दिक्॥ ५७॥ सार्वभौम ! हे अखण्डपृथ्वीपते ! अतो महाराज ! हे चक्रवर्त्तिन् ! किंवा सर्वसम्पत्त्यान्तर्बहिश्च परमप्रकाशमान ! यद्वा, सार्वभौमेषु महाराज ! अन्यत् समानम्। पाठान्तरे महाभाग्ययुक्तेत्यर्थः। विमला कामादिदोषरहिता ऊर्ज्जिता च गभीरा प्रखरा वा प्रकर्षेण (भा० १०।५१।४३) 'मां प्रपन्नो जनः' इत्याद्युक्तयुक्त्या लोभितस्यापि, काम्यन्त इति कामा विषयभोगादयस्तैः, यद्वा, मद्व्यतिरिक्तकामैर्न विहता नोपहता न क्षोभितेत्यर्थः॥ ५८॥ प्रमादोऽनर्थः प्रकृष्टमतता वा, क्वचित् कदाचिदपि प्राप्तैरपि तैः प्रमादो न भवतीत्यर्थः अन्यतैर्व्याख्यातम्। यद्वा, अप्रमादाय सदा वरोपेक्षायामवधानार्थम्, यत एकान्तभक्तानामेव धीर्न भिद्यते न प्रविश्यते, अतस्तवैकान्तभक्त्यभावेन पश्चात् कदाचित् कथञ्चिदपि न भिद्यतामित्येतदर्थमित्यर्थः॥ ५९॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

निरञ्जनं सुखदुःखरहितम्। निर्गुणं गुणत्रयरहितम् अद्वयं द्वितीयरहितं समाभ्यधिकरहितत्वात्। ईश्वरद्वित्वं हि नास्ति। ज्ञप्तिमात्रं क्वचिदपि जडत्वरहितम्॥ ५८॥ ऋतं पूर्वैरभिगतं सत्यं नित्यं वा॥ ५९–६१॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यस्मात्त्वत्पादारविन्दसेवनमेव प्रार्थनीयं तस्मात् हे ईश ! सर्वतः सर्वाः आशिषः रजस्तमस्सत्त्वगुणैः रजआदिगुणकार्यैः कामक्रोधादिभिरनुबध्यन्ते पृष्ठतः सम्बध्यन्तः इति तथा कामक्रोधाद्युत्तरफलका इत्यर्थः। आशिषः कामान् विसृज्याहं त्वां व्रजामि "व्रज गतौ" गत्यर्था बुद्ध्यर्थाः त्वत्प्राप्त्युप्रायत्वेन त्वामध्यवस्यामीत्यर्थः। शरण्यस्य तस्य जीवतुल्यत्ववारणाय तं विशिनष्टि–निरञ्जनं पुण्यपापसम्बन्धरहितं प्रकृतिपारवश्यरूपाञ्जनरहितं वा। ननु, किमहं मुक्तजीवः ? नेत्याह—निर्गुणं कदापि गुणत्रयसम्बन्धरहितम् अनेन बद्धदशायां गुणत्रयतत्कार्य्यरागादिसम्बन्धवन्मुक्तव्यावृत्तिः तर्हि किं नित्यसिद्धः ?। नेत्याह–अद्वयं द्वित्वरहितं समाभ्यधिकरहितं तत्सत्त्वेहीश्वरद्वित्वप्रसङ्गः अतः समाभ्यधिकराहित्यादीश्वरद्वित्वं नास्ति नित्यसिद्धस्तु समाभ्यधिकवानिति तद्व्यावृत्तिरतःपरं सर्वोत्कृष्टं सौलभ्याभावे केवलं परत्वं न शरण्यत्वप्रयोजकमतस्सौलभ्यमाह—पुरुषम्पुरुषरूपेण यदुषु वर्तमानमिति भावः। दिव्यात्मस्वरूपं निर्दिशति–ज्ञप्तिमात्रमिति। मात्रशब्देन क्वचिदपि जडत्वव्यावृत्तिः ज्ञानैकस्वरूपम् इत्यर्थः। अत्र पुरुषपदसौलभ्य (तालभ्य) मन्येषामपि वात्सल्यादिशरण्यतोपयुक्तगुणानामुपलक्षणम्॥ ५८॥ इत्थं शरणं प्रतिपद्याथात्मनः कार्पण्यनिवेदनपूर्वकं रक्षां प्रार्थयते–चिरमिति। इह संसारे उरुभिर्विपुलैः तापराध्यात्मिकादिभिस्तप्यमानोऽत एव चिरं वृजिनेन दुःखेनार्त्तः पीडितः अविजिताः षडमित्राः शत्रवो मनःषष्ठानीन्द्रियाणि येन सः, अवितृषषडमित्र इति पाठे विगता तृषा येषां ते वितृषाः अवितृषाः ते षडमित्रा यस्येत्यर्थः। अत एवालब्धा शान्तिर्मनःप्रसादो येन तथा भूतोऽहं हे शरणद ! कथञ्चित्त्वत्सङ्कल्पादिवशेन त्वत्पदाब्जं समुपेतः शरणं गतवान् पादाब्जं कथम्भूतं न विद्यते भयं संसारो यस्मात् अत एव न विद्यते शोको यस्मात् ऋतं सत्यं नित्यं वानेन स्वर्गयागादिसाध्यसाधनवैलक्षण्यमुक्तं हे परमात्मन् ! हे सर्वनियन्तः, इत्थमापन्नमापदाव्याप्तमधुना प्रपन्नं मां पाहि संसृतिभयात्त्रायस्व॥ ५९॥ एवं विज्ञापितः प्राह—भगवान् सार्वभौमेत्यादिना। यावत्समाप्ति। तव मतिर्विमला रागादिमलरहिता ऊर्ज्जिता बलवती निवृत्तिधर्म एव दृढेत्यर्थः। कुतः ? यतः वरैः हेतुभिः प्रलोभं प्रापितस्यापि तव मतिः कामैर्विषयैर्न विहता न विहन्यते॥ ६०॥ वरैः प्रलोभित इति यत्तदप्रमादाय विद्धि बुद्धेरप्रमादार्थं विजानीहि। ननु, प्रलोभनात्कदाचिद्बुद्धिप्रमादोऽपि स्यात्ततश्च भ्रश्येदत आह—न धीरिति। मय्येकभक्तानामनन्यप्रयोजनभक्तानां मतिः क्वचित्कदाचिदपि आशीर्भिः कामैः न भिद्यते न विहन्यते॥ ६१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

तर्हि किं करोषीति तत्राह—तस्मादिति। आशिषः स्वर्गादिसंपदः रजसा मानुषः तमसा राक्षसादिः सत्त्वेन देवादिः ज्ञप्तिमात्रं ज्ञानघनम्॥ ५८॥ अधुना कर्तव्यं किं तत्राह—चिरमिति। वृजिनार्तः दुःखक्लिष्टः एतदेव विवृणोति तप्यमान इति

अवितृषः सतृष्णा उरुकृच्छ्रविषये कथञ्चिल्लब्धशान्तिः लब्धेमोक्षः प्राप्तत्याग इत्यर्थः । ऋतं शश्वदेकप्रकारं पन्नं संसारकूपे पतितम् उरुकृच्छ्रे वृजिनार्त इति वा ॥ ५९–६० ॥ वरैः प्रलोभित इति यत्तदप्रमादाय विद्धि नैतच्चित्रमित्याशयेनाह—नेति ॥ ६१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

आशिषः फलानि सर्व्वश इति मोक्षोऽपि निरस्तः तस्यापि ज्ञानहेतुसत्त्वगुणानुबन्धनत्वात् सेवायास्तु नैर्गुणहेतुकत्वात् सात्त्विक्याध्यात्मिकी श्रद्धेत्यादौ मत्सेवायान्तु निर्गुणेति श्रीभगवदुक्तेः ज्ञप्तिमात्रं ज्ञानघनं सच्चिदानन्दविग्रहमित्यर्थः निरञ्जनम् उपाधिं विना स्वरूपणैव तथास्थितं निर्गुणं निर्गता गुणेभ्यः प्राकृता गुणा यस्य तं मध्यपदलोपः, अद्वयं प्रकृतिसम्बन्धरहितम् ॥ ५८–६३ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तस्मादित्यादि । हे ईश ! ईश्वर ! तस्माद्धेतोः सर्वा आशिषः सर्वविषयसुखान्युत्सृज्य त्वां पुरुषं पुरुषोत्तमं व्रजामि शरणं यामीत्यर्थः । आशिषः कीदृशीः ? व्रजस्तमः सत्वगुणानुबन्धनाः । न केवलं गुणानुबन्धत्वादाशिष एवोत्सृज्य, निर्गुणं निरञ्जनमद्वयं यन्निर्विशेषं ब्रह्मेति तदप्युत्सृज्य तदनुसन्धानमप्यकृत्वेत्यर्थः । त्वदाराधनेनैव तल्लब्धिरित्यादि ज्ञप्तिमात्रं ज्ञानमात्रं ज्ञानमेव मात्रांशो यस्य ज्ञानमिति यत् तदपि तवैवांश इति त्वदाश्रयेणैव तल्लब्धेः । किमिति पृथङ् निराकार भावनयेति भावः ॥ ५७ ॥ अतस्त्वत्पादाब्जमेवानुगतोऽस्मीत्याह—चिरमिहेत्यादि । हे शरणद ! त्वत्पदाब्जं समुपेतोऽहम्, मा पाहि भक्तरूपेण मां रक्ष, मा मोक्षं दाः । शरणमाश्रयं ददातीति तथा शरणं गृहं द्यतीति वा गृहबन्धच्छेदकेत्यर्थः । शरणं गृहरक्षित्रोः इत्यमरसिंहः ॥ ५८ ॥ भगवानपि तथैवान्वमोदतेत्याह—प्रलोभित इत्यादि । वरैः प्रलोभितोऽपि यत्त्वमप्रमादाय प्रमत्तो नाभूरित्यर्थः । विद्धि जानीहि तत् । मय्येकान्तभक्तानां धीराशीर्भिः क्वचिदपि न भिद्यते । तेन त्वमेकान्तभक्तोऽसि । तस्मात्मत्पदाब्जं विना नान्यन्मोक्षाधिकमपि यदभिलषसि तत्तदुचितमेवेति वाक्यार्थः ॥५९॥ व्यतिरकं दोषमाह—युञ्जानानामित्यादि । अभक्तानां प्राणायामादिभिर्मनो युञ्जानानामाप्यक्षीणवासनं मनः पुनरुत्थितं दृश्यते मद्भक्तानां तु मनो मयि लीनत्वान्न पुनरुत्तिष्ठतीति वाक्यार्थः ॥ ६० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तस्मादित्यादि । आत्मबन्धन वरं को वृणीते, न कोऽपीत्यर्थः । तस्माद्धेतो, सर्वा आशिषः सुखानि विसृज्य किम्भूता आशिष रजस्तम इत्यादि—केवलमाशिषमुत्सृज्य, निरञ्जनं निर्गुणं ज्ञप्तिमात्रं यद्ब्रह्म तदपि विसृज्य, परं केवलं त्वां पुरुषं पुरुषोत्तमं व्रजामि प्राप्नोमीत्यर्थः ॥ ५७ ॥ अतस्त्वत्पदाब्जं समुपेतोऽहं हे शरणद ! मां पाहि । भक्तरूपेण मां रक्षः, कैवल्यं मा दाः ॥ ५८ ॥ भगवानपि तथैवान्वमोदत "न धीरेकान्तभक्तानामाशीर्भिर्भिद्यते क्वचित्" क्वचिदाशीभिर्मोक्षप्रभृतिभिः ॥ ५९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

स्वस्य सर्वकामनिस्पृहं स्पृष्टीकृत्याह–तस्मादिति । सर्वशः सर्वा एव सर्वत इति पाठेपि स एवार्थः रजस्तमःसत्त्वगुणैरनुबध्यन्त इति ताः तेन ज्ञानहेतुसत्त्वगुणानुबन्धिनीमुक्तिरपि विसृष्टा गुणत्रयातीता पादसेवनात्मिका भक्तिरेव प्रार्थिता श्रीमद्गीतास्वेकादशे च भक्तेरेव त्रिगुणातीतत्वश्रवणात् त्वां पुरुषं व्रजामि प्राप्नुयामित्यर्थः । ननु, पुरुषाकारम्मां मायाशरणं ब्रह्मेति केचिदाचक्षते तत्राह निरञ्जनम् अञ्जनमुपाधिस्तद्रहितं यतो निर्गुणं ननु च सत्यं निर्गुण एवास्मि इदं मदीयं वपुस्तु गुणमयमेव वदन्तीत्यत आह अद्वयं त्वन्त्वद्वपुश्च न भिन्नं त्वमेव त्वद्वपुरित्यर्थः । तर्हि वपुरिदं किं स्वरूपं तत्राह ज्ञप्तिमात्रं चित्स्वरूषं ब्रह्मैवेत्यर्थः । गुणमयजगतोऽपि त्वच्छक्तिमयत्वेन त्वद्भिन्नत्वाभावादद्वयम् । स्वरूपशक्त्या तु ज्ञप्तिमात्रं पुरुषम् ॥ ५८ ॥ भुङ्क्ष्व तावत् भोगान् तदन्ते साक्षात् पादसेवनं तु ते दास्याम्येवेति पुनर्वरैः प्रलोभयन्तं श्रीकृष्णं पादोपग्रहणेन प्रार्थयते, चिरमिति । वृजिनैः सङ्ग्रामे शक्रवैरिजिगीषालक्षणैरुपद्रवैरेवार्तः हरिहरि एतावद्दिनानि भगवन्तं नाभजमित्यनुतापैस्तप्यमानः विषयभोगे प्रस्तुते सत्यवितृषषडमित्रः विगततृष्णानि मे षडिन्द्रियाणि न भवन्ति कथञ्चित् स्वकृतेनान्यदत्तेन विवेकेनाप्यलब्धशान्तिः तेन त्वद्दत्तेष्वपि भोगेष्वेवनमेव पुनरप्यहं भविष्यामि विषयभोगस्य स्वभाव एवायं तस्मात् मा देहि भोगानिति द्योतितम् । हे परात्मन् ! अन्तर्यामिन् ! सर्वं त्वं जानास्येवेति भावः । अभयमृतमशोकमिति पदाब्जस्य विशेषणत्रयेण अन्यत्र मानुषसम्पत्तौ रोगविपक्षादिभयं, दिव्यसम्पत्तौ अचिरस्थायित्वलक्षणमनृतत्वं, ब्राह्मसम्पत्तौ त्वत्पादसेवनवञ्चितत्वलक्षणः शोक इत्यलन्ताभिरिति द्योतितं तस्मान्मा माम् आपन्नमापद्ग्रस्तं पाहि स्वपादाब्ज एव रक्षेत्यर्थः ॥ ५९ ॥ ऊर्जिता चालयितुमशक्यत्वाद्बलवती ॥ ६० ॥ अप्रमादाय तवाप्रमादं द्रष्टुमन्योपासकान् दर्शयितुमिति वा "क्रियार्थोपपदस्य" (२।३।१४) इत्यादिना चतुर्थी यतो धीरित्यादि ॥ ६१ ॥

गूढार्थदीपिनी

वृजिनैः पापभोगैः । अनुतापैः पुण्यभोगक्षयैः । न वितृषा न तृप्ता षडिन्द्रियलक्षणा शत्रवो यस्य । कथञ्चिल्लब्धशान्तिरिति वा तत् समुपेतः प्राप्तोऽहम् । तस्य विशेषणत्रयम् । आपन्नम् आपद्ग्रस्तं मां पाहीति । मालिनी वृत्तम् ॥ ५७ ॥ विमला निर्वासना। ऊर्जिता बलवती च ते मतिः । कामैर्विषयै न विहता नाकृष्टा ॥ ५८ ॥ अप्रमादाय अनासक्तिं दर्शयितुम् । आशीर्भि न भिद्यये न चाल्यते ॥ ५९ ॥ पुञ्जानानां निरोधार्थं प्रयतमानानाम् । उत्थितं विषयासक्तं दृश्यते ॥ ६० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु, मम पादसेवनेन तव को लाभ इत्यत आह—तस्मादितितस्मात्तव पादसेवनात् रज आदिगुणैरनुबध्यन्ते इति तथा ताः आशिषः कामान् सर्वतो विसृज्य निरञ्जनो भूत्वा निरञ्जनं सर्वदा सर्वप्राकृताञ्जनवर्जितं यतो निर्गुणं प्राकृतगुणशून्यम् अद्वयं निरतिशयं सर्वात्मानं ज्ञप्तयो ज्ञानस्वरूपा जीवाः मात्राः अंशा यस्य तं मुक्तोपसृप्यं ज्ञप्तिमात्रं ज्ञानैकस्वरूपमिति पुरुषं श्रीमन्मङ्गलविग्रहयुक्तं त्वां व्रजामि प्राप्नुयामि ॥ ५८ ॥ भगवत्कृपां विना सर्वसाधनस्यानुष्ठितस्यापि स्वातन्त्र्येण फलदत्वाभावात् स्वदैन्यं निवेदयत् त्वच्चरणशरणङ्गतं मां भगवन् पाहीति प्रार्थयते—चिरमिति । इह संसारे अनुतापैःआध्यात्मिकादिभिस्तप्यमानः । अत एव वृजिनैर्दुखैरार्तः न विगता तृषा येषां ते अवितृषा ते षट् मनः षष्ठानीन्द्रियाण्यमित्राः यस्य सः अत एव अलब्धशान्तिः एवम्भूतोऽहं हे शरणद ! त्वत्पदाब्जं शरणम् । कथञ्चित्समुपेतोस्मि अतो हे ईश ! आपन्नं आपदाव्याप्तं मां पाहि ॥ ५९ ॥ विमला रागादिमलरहिता ऊर्जिता सुदृढा चालयितुमशक्या ॥ ६० ॥ त्वं वरैः प्रलोभित इति यत् तदप्रमादाय अप्रमादख्यापनाय विद्धि जानीहि आशीर्भिः प्राप्ताभिरपि न भिद्यते न सज्जते दीयमानाभिर्वा न भिद्यते न चाल्यते इत्यर्थः ॥ ६१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तस्माद्रजस्तमःसत्त्वगुणानुबन्धनाः । मानुष्यो राजस्यस्तामस्यो राक्षसाद्याः सात्त्विक्यो दैव्यो यास्तास्तद्गुणानुबन्धनास्तदनुबन्धवतीराशिषः सर्वशः सर्वा विसृज्य निरञ्जनं निर्दुष्टं निर्गुणं सत्त्वादिगुणरहितं भिन्नगुणरहितं वा । अव्ययं परं ज्ञप्तिमात्रं ज्ञानघनं पुरुषं व्रजामि शरणम् ॥ ५७ ॥ चिरमिह नानायोनौ वृजिनमार्तः सम्यक् प्राप्त इत्यनुतापैः सांसारिकतापसाधनैस्तप्यमानोऽहं कथञ्चित्केनचित्सुकृतेनाबितृषो न विद्यते विविधा तृषा यस्य स उरुकृच्छ्रे भविष्यद्बहुकष्टे संसारे लब्धा शान्तिरितः परं न मम संसारः स्यादित्युपरतिर्येन सः । हे ईश शरणद परमात्मन् । अभयमृतं शाश्वतकमशोकं स्वयं शोकराहित्येनेतरशोकपरिहारकत्वेन चाशोकं त्वत्पादाब्जं समुपेतः संसारे पन्नं पतितं मां पाहि ॥ ५८ ॥ वरैः कामैरुत्तमैः काम्यैः प्रलोभितस्यापि यतो न विहिता ततो हे सार्वभौम गतम् । सर्वोर्वीश महाराज । विमलौर्जितोद्रिक्ता च ते मतिः ॥५९॥ यद्यतो मय्येकभक्तानां मुख्यदासानामाशीर्भिर्धीः क्वचिदपि न भिद्यते तस्माद्वरैः प्रलोभितोऽपि तद्वरोपदेशनमप्रमादायैवेति विद्धि जानीहीति केचित् । वस्तुतस्तु वित् हीति छेदः । पूर्वोत्तरग्रन्थस्वारस्यात् ॥ ६० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अत उत्कृष्टप्रार्थनार्थं प्रथमतः शरणं गच्छामीत्याह **तस्माद्वि**सृज्येति । हे ईश समर्थ, सर्वतः अन्तर्बहिः सर्वं विसृज्य, त्वां ज्ञप्तिमात्रं शरणं व्रजामि । सर्वेषां परित्यागार्थं त्रिगुणत्वमाह **रजस्तमःसत्त्वगुणानुबन्धना** इति । रजःप्रभृतीनां बन्धकत्वाय गुणानुबन्धत्वमुक्तम् । अनिच्छतोऽपि बन्धहेतव इति तत्सम्वन्धमात्रेण तथात्वाय अनुपदप्रयोगः । ननु भगवानपि स्मार्तानां मते सोपाधिक इति तत्रापि रजःप्राप्तिरेवेत्याशङ्क्याह **निरञ्जन**मिति । **अञ्जन**मुपाधिः प्रकृत्यादिः, तद्रहितो निरुपाधिः, ततः किमत आह निर्गुणमिति । सोपाधिक एव सगुणो भवति। नतु निरुपाधिक इति । ननु भगवान् पूर्वं केवल एव स्वभोगार्थं स्वेच्छया प्रकृतिगुणांश्चोत्पादितवान्, अतः कथं त्वदर्थेऽपि तन्न करिष्यतीत्याशङ्क्याह **अद्वय**मिति । द्वयरहितो भेदरहितः । यो हि भेदार्थं यतते, तं प्रति तथा सम्पादयति, अहं तु न तथेति मां प्रति न सम्पादयिष्यतीति भावः । स स्वतन्त्र इति वक्तुमाह परमिति । अन्यशङ्कां वारयति त्वामिति । ननु तथापि त्वं गुणमय इति त्वदधिकारानुसारेण तथैव करिष्यतीति चेत्, तत्राह **ज्ञप्तिमात्र**मिति । तादृशस्य शरणागमनं न सम्भवतीति पुरुषरूपतामाह । **शरण**मिति पाठे अर्थात् पुरुषरूपमेवेति त्वांपदात् ज्ञातव्यम् । पुरुषपदे तु त्वां व्रजामीत्यर्थात् शरणमिति ज्ञातव्यम् ॥ ५६ ॥ एवं शरणागतः स्वरक्षां प्रार्थयते **चिरमिहे**ति । सङ्घातातपीडितः असमर्थः तत्पीडापरिहाराय रक्षां प्रार्थयते । नत्वन्यस्मात् । तदर्थं बाधकानि गणयति । चिरं वृजिनैर्दुःखैरार्तः, अनुतापैस्तप्यमानोऽपि जातः। अनुतापा नियता आध्यात्मिकादयः । अग्रेऽपि तापजनकान् दोषानाह **अवितृषषडमित्र** इति । पूर्वत्र प्रवाहे तु षडिन्द्रियाण्यमित्राणि न वितृष्णानि । तस्मात् शत्रुभिः पीडितः । ते भक्षयिष्यन्तीति शङ्कया प्रार्थना । नन्विन्द्रियोपरत्यभावे व्यर्थं सर्वमिति चेत्, रक्षितोऽपि यदीन्द्रियहितमेव कुर्यात्, तदा किं रक्षयेत्यत आह **लब्धशान्ति**रिति । कथञ्चिदन्तःकरणमुपरतमित्यर्थः । त्वं च शरणप्रदः, अहं च सम्यगुपेतः, तत्रापि त्वत्पदाब्जसेवकत्वेन । **परात्मन्नि**ति । जीवानां स्वामी भगवानिति शरणगमनं नायुक्तमिति भावः । गुणत्रयपीडितस्य पीडानिवारकं भगवति गुणत्रयमाह **अभयमृतमशोक**मिति । सत्त्वगुणाभावात् भयाभावः । अत एवान्यं

च पालयितुं शक्तः । ऋतत्वात् रजसः अभावः, रजःसम्बन्धेन **शुद्धं** भवतीति, ऋतता युक्तैव । **अशोकमिति तमसा** शोकः । **आपन्न**मिति रक्षायां हेतुः । **ईशेति** सामर्थ्यम् ॥ ५७ ॥ ततो भगवान् वृथा शयनं कृतवानिति, तं तपसि प्रवर्तयितुं मर्यादारक्षार्थं च प्रार्थितदानमाह **सार्वभौमे**ति षड्भिः । सार्वभौमत्वेन तस्य भाग्याभिनन्दनमुक्तम् । महाभागेति अग्रिमसिद्ध्यर्थं च भाग्यमुक्तम् । तव मतिर्विमला ऊर्जिता च । सांसारिकधर्मनिवृत्त्या विमलत्वम्, भगवत्परत्वेन ऊर्जितत्वं चेति । भगवदाज्ञोल्लङ्घने भगवान् कथं संतुष्ट इत्याशङ्कां निवारयितुमाह **वरैः प्रलोभितस्यापी**ति । सर्वान् कामान् ददामीति यदुक्तम्, तत्केवलं लोभप्रदर्शनार्थम्, तेषु तव रुचिरस्ति नवेति, तदिदानीमवगतं नास्तीति, यतः कामैर्न विहता बुद्धिः । अत एव विमलत्वमूर्जितत्वमिति सम्बन्धः ॥ ५८ ॥ ननु स्वामिना कथमेवं प्रलोभ्यते, तत्राह **प्रलोभित** इति । यदपि वरैस्त्वं प्रलोभितः, तदप्यप्रमादायैव, भगवदीयस्य कदाचिदिच्छा स्यात् विषया न दृष्टा इति, तदन्यदत्तैर्विषयैः स्वाभाविकैर्वा इष्टं न भवतीति मयैव दीयन्ते, ततो विषयभोगः प्रमादाभावश्च सिध्यति । **विद्धी**ति । नात्र सन्देहो विधेयः । हेत्वन्तरमप्याह **न धीर्मय्येकभक्ताना**मिति । एकभक्ताः एकस्यैव भक्ताः, न मार्गान्तरप्रेप्सवः, किन्तु भक्ता एवेति वा । आशीर्भिर्वरप्राप्ताभिः, तत्रापि भगवतः सकाशात् । क्वचिदित्यस्य पक्षस्याव्यभिचारः उक्तः ॥५९॥

श्रीसुबोधिनीसारः

तस्माद्धेतोः हे ईश रजस्तमःसत्त्वान्येव गुणास्तैरनुबध्यंते इत्येवंभूता आशिषश्चिततसिद्धिरूपाः सर्वतः सर्वप्रकारेण विसृज्य त्यक्त्वाऽद्वयम् एकं निरंजनमुपाधिरहितं निर्गुणं ज्ञप्तिमात्रं ज्ञानघनं परं पुरुषं त्वां शरणमहमुपैमि ॥ ५७ ॥ इह संसारे चिरं बहुतिथं वृजिनेन दुःखेन ऋतो व्याप्तः पीडितो वानु पश्चात्तापैरध्यात्मादिभिः तप्यमानः न विगता तृषा येषां तानि षडिन्द्रियाण्यमित्राणि शत्रवो यस्य सः न लब्धा शांतिर्येन कथंचित् दैवात्प्राप्तशांतिर्वाहम् अभयं मोक्षरूपं सत्यम् ऋतं तव पदाब्जं पादपद्मं समुपेतः प्राप्तोस्मि । हे शरणद हे परात्मन् हे ईश आपन्नम् आपद्ग्रस्तं मा मां त्वं पाहि रक्ष ॥५८॥ श्रीकृष्णोक्तिः । हे सार्वभौम ! हे महाराज । ते तव मतिर्धीर्विमला शुद्धोर्जिता सत्त्वोद्रिक्ता । यतो वरैः प्रलोभितस्यापि तव बुद्धिः कामैर्न विहता न चलिता ॥५९॥ नहि पिष्टपेषणवत्प्रलोभनं मिथ्येत्याह । मया वरैर्यस्त्वं प्रलोभितोसीति तत् अप्रमादाय निवृत्त्यर्थं विद्धि जानीहि । मयि एकभक्तानां धीर्बुद्धिराशीर्भिः क्वचिन्न भिद्यते न पृथक् क्रियते ॥ ६० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्माद्बन्धनरूपत्वात् हे ईश ! सर्वतः सर्वाः आशिषः सर्वान् विषयान् विसृज्य त्यक्त्वाऽहं त्वां शरणं व्रजामीत्यन्वयः । बन्धहेतुत्वे हेतुं सूचयन्नाह—रज इति । प्राकृतै रजआदिभिर्गुणैरनुबध्यन्ते विसृज्यन्ते इति तथा, रजआदिकार्यरूपा इत्यर्थः । भगवतः शरणयोग्यत्वं दर्शयन्नाह—परं पुरुषमिति । पुरुषोत्तममित्यर्थः । तत्र हेतुमाह—अद्वयमिति । समाभ्यधिकरहितमित्यर्थ । तत्रापि हेतुमाह—निरञ्जनमिति । पुण्यपापरागलोभादिसर्वदोषरहितमित्यर्थः । तत्रापि हेतुमाह—निर्गुणमिति । प्राकृतगुणपारतन्त्र्यरहितमित्यर्थः । तत्रापिहेतुमाह—ज्ञप्तिमात्रमिति । ज्ञानैकस्वरूपमित्यर्थः ॥ ५७ ॥ एवं शरणमागत्य आत्मनः कार्पण्यनिवेदनपूर्वकं रक्षां प्रार्थयते—चिरमिति । हे **शरणद** आश्रयप्रद ! 'तव अविदितं किञ्चिन्नास्ति' इत्याशयेन सम्बोधयति—परात्मन्निति । हे अन्तर्यामिन् ! रक्षायां सामर्थ्यं द्योतयन् सम्बोधयति—ईशेति । इह संसारे अनुतापैः आध्यात्मिकादिदुःखैश्चिरं तप्यमानः । तापहेतुमाह—वृजिनार्त इति । वृजिनैः पापैः पीडित इत्यर्थः । पापहेतुं सूचयन्नाह—अवितृषषडमित्र इति । तृडेव तृषा तृष्णा, न विगता तृषां येषां ते अवितृषाः षट् अमित्राणि शत्रवः निषिद्धाचरणपापोत्पत्तिद्वारा दुःखहेतवो मनःषष्ठानि इन्द्रियाणि यस्य सः, अत एव न लब्धा शान्तिः कामक्रोधादिराहित्येन मनःप्रसादो येन सः, कथञ्चिदन्तर्यामिणस्तव प्रेरणया त्वत्पदाब्जं समुपेतः शरणं प्राप्तः, स्तमापन्नं आपदा व्याप्तं मां पाहि संसारदुःखात्त्रायस्व । 'त्वच्चरणशरणानां संसारदुःखनिवृत्तिरेव युक्ता' इत्याशयेन चरणं विशिनष्टि—अभयमिति । न भयं यस्मात्, शरणागतभयनिवर्तकमित्यर्थः । अशोकं शोकनिवर्तकम् ऋतं सत्यफलरूपमित्यर्थः ॥ ५८ ॥ एवं सम्प्रार्थित आह—हे सार्वभौम हे महाराज ! तव मतिर्विमला रागलोभादिमलरहिता, अत एव ऊर्जिता परमार्थदर्शने समर्था । यतो वरैः प्रलोभितस्यापि तव बुद्धिः कामैर्विषयैर्न विहता नाकृष्टा ॥ ५९ ॥ ननु 'सर्वज्ञस्त्वं निराकाङ्क्षं ज्ञात्वापि किमिति मां प्रलोभितवान् ?' तत्राह—प्रलोभित इति । यत्त्वं मया वरैः प्रलोभितस्तत् प्रलोभनमप्रमादाय लोके भक्तस्य बुद्धेरप्रमादमनासक्तिं दर्शयितुं विद्धि जानीहीत्यन्वयः । एतदेवाभिनयेनाह—नेति । मय्येकान्तभक्तानां धीराशीर्भिर्विषयैर्न भिद्यते, मत्तः पृथक्कृता न भवतीत्यर्थः ॥ ६० ॥

अन्वितार्थप्रकाशिका

तस्मादिति ॥ हे ईश ! तस्मात् तवैव प्राप्यत्वात् रजस्तमःसत्त्वैर्गुणैरनुबध्यन्ते संसृज्यन्ते इति । तथा आशिषः ऐश्वर्यशत्रुनाशधर्मादिरूपाः सर्वतो विसृज्य इति पादसेवनान्तराभूतो मोक्षोऽपि निरस्तः । निरञ्जनं निर्गुणम् अद्वयं परं पुरुषमीश्वरं ज्ञप्तिमात्रं ज्ञानघनं त्वां शरणं व्रजामि ॥ ५६ ॥ ननु भुङ्क्ष्व भोगान् प्रेमपादसेवनमपि ते दास्याम्येवेति वरैः प्रलोभयन्तं पादोप-

सङ्ग्रहेण प्रार्थयते—चिरमिति ॥ शरणं स्वज्ञानं ददातीति हे शरणद ! हे परात्मन् ! हे ईश ! इह संसारे चिरं वृजिनैः कर्मफलैरार्त्तः पुनश्च अनुतापैस्तद्वासनाभिस्तप्यमानस्तथापि अवितृषषडमित्रः तृडेव तृषा तृष्णा न विगततृषाः षडमित्रा शत्रव इन्द्रियलक्षणा यस्य सः तत एवालब्धशान्तिः अतः कथञ्चिद्दैववशेन लब्धशान्तिर्वा अहम् अभयम् ऋतं सत्यम् अशोकं त्वत्पदाब्जं समुपेतः, अतः, आपन्नम् आपद्व्याप्तं मां पाहि ॥ ५७ ॥ सार्वभौम ! हे महाराज ! तव मतिर्विमला रागलोभादिमलरहिता अत एव ऊर्जिता परमार्थदर्शने समर्था यतो वरैः प्रलोभितस्यापि तव बुद्धिः कामैः साम्राज्यादिमोक्षान्तैर्न विहता नाकृष्टा ॥ ५८ ॥ प्रलोभित इति ॥ यत्त्वं मया वरैः प्रलोभितस्तत् प्रलोभनप्रमादाय लोके भक्तस्य बुद्धेरप्रमादमनासक्तिं दर्शयितुं विद्धि जानीहि। यतः मय्येकान्तभक्तानां धीः प्राप्ताभिरप्याशीर्भिर्विषयैः क्वचिदपि न भिद्यते नासज्जते ॥ ५२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अतोऽधुनाकथंचिदपि मामुपेक्षितुं नार्हसीति सदैन्यं प्रार्थयते चिरमिति। हे परात्मन् सर्वोत्कृष्टमूर्त्ते इह संसारे चिरं वृजिनैर्नानाविधदुःखैरार्त्तः पीडितः। अनुतापैराध्यात्माधिभूताधिदैवैस्त्रितापैस्तप्यमानः। अवितृषाः स तृष्णाः षट् इंद्रियाख्या अमित्रा-रिपवो यस्य सः अत एव अलब्धशांतिः। कथंचिल्लब्धशांतिरिरितिवाहे शरणद ऋतं नित्यं सत्यम्। अभयं भयनिवर्त्तकम्। अशोकं शोकनिवर्त्तकम्। त्वत्पदाब्जं समुपेतः प्राप्तोऽस्मि। अतः। हे ईश समर्थ आपन्नमापद्ग्रस्तं मां त्वं पाहि ॥ ५७ ॥ ऊर्ज्जिताज्ञानवैराग्यशोभिता ॥ ५८ ॥ तत्प्रलोभनं। अप्रमादाय तव सावधानत्वाय विद्धिनयातनायेत्यर्थः। यतो मय्येकभक्तानामेकांतभक्तानां धीर्बुद्धिः। आशीर्भिः प्राकृतसुखप्रापकाशीर्वादरूपवरैः। क्वचित्कर्हिचिदपि न भिद्यते ॥ ५९ ॥ युंजानानां वशीकुर्वाणानाम्। उत्थितं विषयार्थमुद्युक्तम् ॥ ६० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्मादिति। यस्मात्तव पादारविन्दसेवनमेव प्रार्थनीयं तस्मादित्यर्थः। सर्वतः सर्वा, रजश्च तमश्च सत्त्वं च तानि च ते गुणास्तैः, रजआदिगुणकार्यैः, कामक्रोधादिभिः सह, अनुबद्धयन्ते पृष्ठतः संसृज्यन्ते इति रजस्तमःसत्त्वगुणानुबन्धनाः कामक्रोधाद्युत्तरफलका इत्यर्थः। आशिषः कामान्, हे ईश, विसृज्य परित्यज्य, अहं, निरञ्जनं पुण्यपापरहितं प्रकृतिपारवश्यरूपाञ्जनरहितं वा। ननु किमहं मुक्तजीवो नेत्याह। अद्वयं द्वित्वरहितं, समाभ्यधिकरहितमित्यर्थः। सर्वोत्कृष्टं, पुरुषं पुरुषाकारं, प्राकृततावारणायाह। ज्ञप्तिमात्रं ज्ञानैकस्वरूपं, निर्गुणं प्राकृतगुणवर्ज्जितं, त्वां व्रजामि। शरणमिति शेषः ॥ ५७ ॥ इत्थं शरणं प्रतिपद्यात्मनः कार्पण्यनिवेदनपूर्वकं रक्षां प्रार्थयते। चिरमिति। इह संसारे, चिरं बहुकालं, वृजिनैः कर्मफलभोगैरार्त्तः, अनुतापैस्तद्वासनाभिः, तप्यमानः, पाठान्तरे, उरवो विपुलास्तापा आध्यात्मिकादयस्तैः, तप्यमानः, संधिरार्षः। अविजिताः षडमित्राः मनःषष्ठेन्द्रियरूपाः शत्रवो येन सः, अवितृषषडमित्र इति पाठे, न विगता तृषा येषां तेऽवितृषाः षडमित्रा यस्य सः, अत एव, न लब्धा शान्तिर्मनः प्रसादो येन तथाभूतोऽहं, हे शरणद, कथंचित् त्वत्संकल्पादिवशतः, न विद्यते भयं संसरणभीतिर्यस्मात्, न विद्यते शोको यस्मात्, ऋतं, सत्यं नित्यं वा, त्वत्पदाब्जं त्वच्चरणकमलं, समुपेतः शरणं संप्राप्तः, अस्मि। अतः, हे परात्मन् सर्वनियन्तः, हे ईश, आपन्नमापदा व्याप्तं, मा मां, पाहि संसृतिभयात्त्रायस्व ॥ ५८ ॥ एवं विज्ञापितः प्राह भगवान् सार्वभौमेत्यादिना यावदध्यायसमाप्ति। सार्वभौमेति। हे सार्वभौम, महाराज, यतः वरैर्हेतुभिः, प्रलोभितस्य प्रलोभं प्रापितस्यापि, ते तव, मतिः विमला रागादिमलरहिता, ऊर्जिता बलवती निवृत्तिधर्मदृढा सतीत्यर्थः। कामैर्विषयैः, न विहता न विहन्यते इत्यर्थः ॥ ५९ ॥ प्रलोभित इति। हे राजन्, त्वं वरैः प्रलोभित इति यत्, तत् अप्रमादाय, विद्धि। बुद्धेरप्रमादार्थं जानीहीत्यर्थः। ननु प्रलोभनात् कदाचिद्बुद्धिप्रमादोऽपि स्यात्ततश्च भ्रश्येदत आह नेति। मयि, एकभक्तानां ममानन्यभक्तजनानामित्यर्थः। धीर्मतिः, क्वचित् कदाचिदपि, आशीर्भिः कामैः, न भिद्यते न विहन्यते ॥ ६० ॥

कृष्णप्रिया

हे ईश इसलिये सत्त्वगुण तमोगुण रजोगुण से जुड़ी हुई सारी कामनाओं का त्याग कर केवलानन्द स्वरूप, निरञ्जन, गुणातीत, अद्वितीय, चित् स्वरूप पूर्ण पुरुषोत्तम आपकी ही शरण आया हूँ ॥ ५७ ॥ हे कृपासिन्धो ? सुचिर काल से कर्मफलों के भोगों से उब गया हूँ—थक गया हूँ और त्रिविध या विविध तापों से संतप्त बना हूँ, और काम क्रोध लोभ मद मोह मत्सर नाम के षड् रिपु कभी शान्त नहीं होते हैं उनकी भोग लालसा बढ़ती ही रही है, किसी भी उपाय से एक पल भी मुझे शान्ति नहीं मिली इसलिये अब हे शरणागत वत्सल ! हे परात्मन् ! आप के अभय, अमृतमय, आनन्दमय चरण कमलों की शरण में आया हूँ। हे विश्वपते हे दयानिधे ! अब शरणागत का संरक्षण कीजिये ॥ ५८ ॥ भगवान् श्रीकृष्ण ने कहा—हे सार्वभौम ? हे सम्राट् ! हे महाराज तुम्हारी बुद्धि श्रेष्ठ है और विशुद्ध हैं मैंने वार वार वरदान देने का प्रलोभन दिया लेकिन निश्चल मति होने के कारण कामनाओं के अधीन न हुई ॥ ५९ ॥ बार बार वरदान देने का जो मैंने प्रलोभन दिया वह भैया आपके निश्चय अचल करने के लिये और सावधान बनाने के लिये। जो मेरे अनन्य भक्त होते हैं उनकी मति कभी भौतिक भोगों की ओर नहीं टलती और वासनाओं में नहीं भटकती ॥ ६० ॥

[1]युञ्जानानामभ[2]क्तानां प्राणायामादिभिर्मनः । अक्षीणवासनं राजन् दृश्यते [3]क्वचिदुत्थितम् ॥ ६१ ॥
विचरस्व महीं कामं मय्यावेशितमानसः । [4]अस्त्वेव नित्यदा तुभ्यं भक्तिर्मय्यनपायिनी ॥ ६२ ॥
[5]क्षात्रधर्मस्थितो जन्तून् न्यवधीर्मृगयादिभिः । समाहितस्तत्तपसा जह्यघं [6]मदपाश्रयः ॥ ६३ ॥
जन्मन्यनन्तरे राजन् सर्वभूतसुहृत्तमः । भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलम् ॥ ६४ ॥

इति श्रीमद्भागवते महापुराणे[7] दशमस्कन्धे[8] [9]मुचुकुन्दस्तुतिर्नामैक[10]पञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

कर्दमक्षमा

अन्वयः—राजन् ! प्राणायामादिभिः, युञ्जानानाम्, अभक्तानाम्, अक्षीणवासनम्, मनः, क्वचित्, उत्थितम्, दृश्यते ॥ ६१ ॥ राजन् ! मयि, आवेशितमानसः, कामम्, महीम्, विचरस्व, तुभ्यम्, मयि, अनपायिनी, भक्तिः, नित्यदा, एव, अस्ति ॥ ६२ ॥ क्षात्रधर्मश्रितः, मृगयादिभिः, जन्तून्, व्यवधीः, तद्, अघम्, तपसा, समाहितः, मदपाश्रयः, जहि ॥ ६३ ॥ हे राजन् ! अनन्तरे, जन्मनि, त्वम्, सर्वभूतसुहृत्तमः, द्विजवरः भूत्वा, माम्, केवलम्, उप, एष्यसि ॥ ६४ ॥

इति एकपञ्चाशत्तमाध्यायस्यान्वयाः समाप्ताः ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्यतिरेकमाह । युञ्जानानामिति । उत्थितं विषयाभिमुखम् ॥ ६२ ॥ तुभ्यं तव ॥ ६३ ॥ युक्त्याभासेन भीषयंस्तपसि लोकसंग्रहे प्रवर्तयसि । क्षात्त्रधर्मेति ॥ ६४–६५ ॥

इति श्रीमद्भा० म० दशमस्कंधे उत्तरार्धे श्री० भावार्थदीपिकायामेकपंचाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

व्यतिरेकं बुद्धिरेकं युञ्जानानामपि न क्षीणा दुष्कर्मवासना यस्मिंस्तत्तथा । अन्योपासकानां तु प्रमादो भवत्येवेत्याह—युंजानानामिति । अभक्तानां मद्भक्तभिन्नानां योगिनां ज्ञानिनां चेत्यर्थः ॥ ६२ ॥ अनपायिनी जन्मांतरेऽप्यपायहीना । अस्त्वेव भविष्यत्येव (यादादीनां तुबादीनाञ्च कालविशेषाकथनेऽपि भविष्यत्कालो बोध्य इत्युक्तमाकरे) । इतः परं कृतकृत्य एव त्वमित्याह—विचरस्वेति ॥ ६३ ॥ युक्तिस्तूचितार्था तद्भिन्नो युक्त्याभासः, न हि भगवद्दर्शिनः पापानि कदापि तिष्ठतीत्यतो नेयं युक्तिः किन्तु तदाभास एवेत्याशयः । लोकसंग्रहे तन्निमित्तम् । निमित्ते सप्तमी । क्षात्रधर्मे राजधर्मे । आदिना प्रमादोऽपि राज्ञां भवतीति तद्ग्रहः । तज्जन्तुवधोत्थम् । अघं पापम् । हा हा अतः परमपि मां स्वसंगाद्वियोजयितुमिच्छसि, मैवं मैवमिति तस्य महोत्कंठामालक्ष्य भगवता विचारितम्—अयमस्मिन्नवतारे स्वसंगे नेतुमनर्हः, मदीयलीलापरिकरा हि द्वापरांतर्भवा उद्धवाक्रूरादयो युधिष्ठिरार्जुनादयश्च इममेतन्मन्वन्तरप्रथमसमयभवमतिप्राचीनं दृष्ट्वा–अहो कोऽयमतिस्थूलतमोऽतिदीर्घतमोऽस्मदननुरूपो मानुष इत्युक्त्वा हसिष्यन्ति, तथा संप्रत्येव जरासंधात्पलायनलीलायां तथाग्रिमासु रुक्मिणीहरणादिलीलासु जरासंधादिभिः शाल्वादिभिश्च संग्रामे नायं मत्संगानुरूपो भवितुमर्हति, अयं तान्मद्विपक्षान्मशकानिव करतलाभ्यामेव घृष्ट्वा वधिष्यतीत्यत इमं संगाद्विमोचयितुं कां युक्तिं करोमीति विचिन्त्य केवलमलीकोक्तिमयं तत्प्रत्यायकं किमप्याह—क्षात्रेति ॥ ६४ ॥ तत्त्वमाह—जन्मनीति । अनंतरे एतद्देहपातानन्तरभाविनि । सर्वभूतसुहृत्तम इत्यनेन सर्वाऽभयप्रदानलक्षणः संन्यासो लक्ष्यते । आत्यन्तिकमुक्तिहेत्वौपनिषदात्मसाक्षात्कारोषयोगिपारिव्राज्ययोग्यत्वात्सर्वतनुषु प्रायो ब्राह्मणतनुरेव चरमदेहत्वान्मत्प्राप्तियोग्या नान्येति सूचयन्नाह—भूत्वेत्यादि । द्विजवरो ब्राह्मणः 'प्रव्रज्या ब्राह्मणस्यैव' इत्येवकारेणान्यवर्णस्य तद्व्यवच्छेद इत्युक्तं हारीतस्मृतौ । उपैष्यसीति "ब्रह्मैव सन्ब्रह्माप्येति" इति श्रुतेर्ब्रह्म भूत्वा ब्रह्म प्राप्नोतीति प्रतीयते । तथा च—"ब्रह्म ब्राह्मण आत्मना" इति श्रुतेः, "अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि" इति स्मृतेश्च ब्राह्मणो ब्रह्मैवाऽतो ब्रह्मैव सन् अपरोक्षात्मज्ञानवान्ब्राह्मणजातिर्भूत्वा ब्रह्म परमात्मानं प्राप्नोतीत्यर्थ इति श्रुत्यर्थो भगवता ध्वनितः । यत्तु 'स एष साधो चरमो भवानाम्' इत्युद्धवं प्रत्युक्तं श्रीकृष्णेन, तदपि निजभक्तानां देहत्यागसमलक्षणमेव ब्राह्मण्यं संपाद्य निजशक्त्या मोक्षदानपरमिति ध्येयम्, अन्यथा भूत्वा द्विजवर इत्युक्तिर्व्याकुप्येतेति । ननु तर्हि त्वत्संगी कदा भविष्यामीत्यत आह—जन्मनीति । अतः परं तत्र मद्धाम वैकुंठं यास्यस्येव स्ववैरिभ्योऽप्यस्मिन्नवतारे मोक्षं वैकुण्ठवासश्च ददामि किं पुनस्तुभ्यं परमभक्ताय, किंचावतारान्तरे च त्वां संगिनं लीलापरिकरं करिष्यामि,

---

१. ज्ञानिनामेक–विज. । २. युक्ता–प्रा. पा. । ३. पुनरु–श्र धर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. । ४. अस्त्येव–श्रीधर. टि. । ५. क्षत्रधर्मे–वीर. ; क्षत्रधर्म–विज. । ६. मदु–श्रीधर वंशी. जीव. वीर. विश्व ; मामुपा–विज. । ७. पारमहंस्यां संहितायां–प्रा. पा. । ८. उत्तरार्द्धे । ९. न्धे यवनवधो मुचुकुन्दस्तव एक । १०. चतुःपञ्चाशत्तमो–विज. ।

यदा त्वां स्वञ्च समकालमेवाऽविर्भावयिष्यामीत्यनंतरे जन्मनि मम च तव चेत्यर्थः। सर्वभूतानामुपकारकत्वात्, यथायोगं विद्याप्रदानाच्च। सुहृत्तमो द्विजवरः परमादरणीयो विप्रो भूत्वा मां केवलं वैराग्यत्वान्निष्परिग्रहं समेष्यसि, मत्संग एव स्थास्यसींत्यर्थः ॥ ६५ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे उत्तरार्द्धे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मार्ग्गांतरे तु कामत्यागयत्नवतामपि प्रमादः स्यादित्याह—युञ्जानानामिति। समादधानानां क्रमात्तादृशनिष्ठाजनकस्य भक्तिमात्रस्याभावादेव न क्षीणा विषयादिवासना यस्य तत् ॥६२॥ इतः परं कृतकृत्य एव त्वमित्याह—विचरस्वेति। मय्यावेशितमानसस्त्वं कामं यथेष्टं विचरस्व विहर यतः अस्त्वेवेति अस्त्येवेति पाठे यथास्ति तथैवास्तीत्यर्थः ॥ ६३ ॥ क्षात्रेति तैरवतारितं तत्र भीषयन्निति सहजसौशील्येन तद्गुणमनूद्य पुनरतिकारुण्यात् स्वस्मिन्। तस्य प्रेमविशेषसम्पादकोत्कण्ठावर्द्धनार्थं कालविलम्बनेनेति भावः, आनुषङ्गिकप्रयोजनमाह—लोकसङ्ग्रह इति। अतः भीषयन्नित्यार्ष इव प्रयोग आर्षानुगामित्वादिति ज्ञेयम् यद्वा, तदर्थमेव कृत्यशेषाभासं प्रदर्शयन्नाह, क्षात्रेति। तपसा मयि चित्तैकाग्रेण अघं मूर्ज्जितां तादृशवासनाम् ॥ ६४ ॥ तथैवाह—जन्मनीति। उत्तरपक्षे तथैव प्रारब्धादिति भावः त्वदभीष्टं मामेव केवलं न तु त्वदनभीष्टं विभूत्यादिकमपि उप सामीप्ये नैष्यसि प्राप्स्यसि साक्षाद्विचित्रमत्परिचर्य्यां करिष्यसीत्यर्थः ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न च वक्तव्यम्, अष्टांगयोगेन मनःसमाधानादाशीभिर्धीर्न भेद्येति, एकान्तभक्त्यभावादित्याह—युञ्जानानामिति। अभक्तानां भक्तिरहितानाम्, यद्वा, त्यक्तान्नानामपि भक्त्यभावादेव न क्षीणा विषयादिवासना यस्य तत्, राजन्निति त्वयेदं बुध्यत एवेत्यर्थः। यद्वा, जन्मन्यस्मिन् राजत्वेन राजधर्म्मापेक्षया चिरं देवरक्षया च दीर्घनिद्रयाप्येकान्तभक्तिर्न सम्पन्नास्तीति भावः। अत एव जन्मान्तरावाप्तिर्वक्ष्यते, भक्तिस्तु तस्य भात्येव, सा च, (१४ श० श्लो०) 'महान्' इत्यादौ प्राक् व्यञ्जितैव; अन्यथा श्रीभगवत्तादृशानुग्रहासम्भवः स्यादिति दिक् ॥ ६० ॥ ननु कथमेकान्तभक्तिः स्यादित्यपेक्षायामादिशति—विचरस्वेति। मय्यावेशितमानसः सन् कामं यथेष्टं मत्पादसेवासिद्ध्यनुसारेण, अत एव विशेषेण एकाकित्वादिना मद्भक्तसंगमसंकीर्तनादिना वा, चरस्व; ततश्च अनपायिनी एकान्तित्वादनवच्छिन्ना अहैतुकी वा भक्तिरस्ति, भवत्येवेत्यर्थः। पाठान्तरे एवमस्त्विति वरस्तादृशविचरणेनाप्येकान्तभक्तेः सुदुर्लभत्वात् ॥ ६१ ॥ तत्रादौ तावत् तपश्चरेत्यघक्षपणव्याजेनादिशति—क्षात्रेति। अनेन निर्द्दयत्वमुक्तम्, वस्तुतस्त्वघराहित्यमेव, क्षत्रियस्य तद्विहितत्वात्। जन्तून् जीवान्, आदिशब्दाद् युद्धादयः। एवं सर्व्वभूतसौहृदाभावेनैकान्तिकभक्त्ययोग्यत्वञ्च सूचितम्। तपसा वानप्रस्थधर्म्मेण समाहितः कृतचित्तस्थैर्य्यः, अतो मदपाश्रयस्तपोऽर्पणादिना मदेकशरणः सन्। अयं भावः—एकान्तभक्त्यभावेनाधुना साक्षान्मत्पादसेवायोग्यता नास्ति, कलिकालेऽस्मिन् महीविचरणञ्च मनःक्षोभकरम्, तदधुना लोकसंगत्यागेन कुत्रापि निर्जनेऽस्य स्थितिरेवास्य हिताय स्यात्, तत्र यथाधिकारं तप एवोचितं तदर्पणादिना च मदाराधनमपि स्वतः फलिष्यत्येवेत्यघक्षयप्रयोजनव्याजेन तप आदिशामीति ॥ ६२ ॥ एवं जन्मान्तरे एकान्तभक्तत्वसम्पत्त्या तवाभीष्टं सेत्स्यतीत्याह—जन्मनीति। अनन्तरे अव्यवहिते, हे राजन्निति क्षत्रियत्वेन, तत्र च राज्येन, तद्वासनानुसारेणाधुना सर्व्वभूतसुहृत्तमत्वाभावः सूचितः। द्विजवरो ब्राह्मण इति तस्यैव स्वभावतः सुहृत्तमत्वसिद्धेः। तत्र सर्वभूतानां सुहृत् ज्ञानी, सुहृत्तरो भक्तः, सुहृत्तम एकान्तभक्तः, सहजकारुण्यभरेण भक्तिविस्तारणादिना निरुपाधिसर्व्वोपकारसहजकारुण्यभरेण भक्तिविस्तारणादिना निरुपाधिसर्व्वोपकारपरत्वात्। तथा चोक्तं श्रीभगवतैव 'सुतरां मत्कृतात्मनाम्' इति। एवमेकान्तित्वमेवाभिप्रेतम्। यद्वा, द्विजेषु विप्रेषु वरः श्रेष्ठ एकान्तभक्तत्वात्, अत एव राजन् राजमानः, सर्व्वभूतसुहृत्तमश्च। वै एव, अतो मामेव केवलमेकम्, न तु मद्विभूत्यादिकम्; यद्वा क्रीड़ाविशेषेणैकान्ते एकाकितया वर्त्तमानमपि उप सामीप्येन, एष्यसि प्राप्स्यसि, साक्षान्मद्विचित्रपरिचर्य्यां करिष्यसीत्यर्थः। अथवा तस्य पादसेवैकवाञ्छया तथा न धीरित्यादिभगवदुक्त्या चैकान्तभक्तत्वं गम्यत एव, अन्यथा कृपाकोमलशीलस्य विनयाद्यशेषगुणनिधेर्भक्तं प्रति साक्षादेकान्तभक्ततत्वाभावोक्तेरघटनात्। ततश्च (भा० ११।१९।३६) 'तपो मन्निष्ठता बुद्धेः' इति स्वनिष्ठतार्थमेव तथोक्तम्, भक्तेरात्यन्तिकशोधकत्वात्। जन्मान्तरे द्विजवरत्वञ्च (भा०१०।५१।४७) 'ममैष काल' इत्यादिना राजत्वस्य दोषोद्घाटेनैव विप्रजन्मनोऽभिप्रेतत्वात्। किंवा श्रीनारदादिवन्महाभागवतोत्तमतामाहात्म्यविशेषसिद्ध्यर्थं महाभागवतोत्तमलक्षणं चोक्तं पद्मपुराणोत्तरखण्डे—'तापादिपञ्चसंस्कारी नवेज्याकर्मकारकः। अर्थपञ्चकविद्विप्रो महाभागवतोत्तमः ॥' इति। अस्यार्थः श्रीभगवद्भक्तिविलास-टीकातो ज्ञेयः। एतदनुसारेणोक्ततत्तदर्थश्चोह्यः। तत्र च भक्तिरस्ति वर्त्तत एव, अतः कामं विचरस्वेति, अन्यत् स्पष्टमेव। स्वामिपादानां ब्याख्यानुसारेण तत्र तत्र प्रथमपक्षे

व्याख्यातमपि गोकुलसम्बन्धिनामाद्यकथनञ्च, तस्य श्रीनारायणज्ञानेन तदैश्वर्य्यश्रवणेनैव विश्वासोत्पत्तेः। तथेश्वर-दृष्टि-मति-युक्तेरविशेषमयगुह्यप्रकाशनायोग्यत्वाच्चेति दिक् ॥ ६४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यामेकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

उत्थितं विषयेषु प्रवृत्तम् ॥ ६२–६३ ॥ मृगयादिभिः लोकरक्षाऽनुपयुक्तव्यापारैः ॥ ६४–६५ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अभक्तानां तु भिद्यत एवेत्याह—युञ्जानानामिति। प्राणायामादिभिरुपायैर्युञ्जानानां नियुञ्जानानाम्मनोनियमनं कुर्वतां तु मन अक्षीणवासनम् अक्षीणा वासना यस्य तत् हेतुगर्भमिदं तत्त्वात्। क्वचिद्विषये कदाचिद्वा उत्थितं विषयप्रवणं दृश्यते ॥ ६२ ॥ विचरस्वेति मय्यावेशितं मानसं येन तथाभूतस्त्वं महीं कामं यथेच्छं विचरस्व नित्यम् अनपायिनी भक्तिस्त्वस्त्येव तथानुगृह्णामीति भावः ॥ ६३ ॥ ननु, भक्त्यैकलभ्यो भवांस्तामन्तरेणाप्यधुना प्रत्यक्षितः किमिति मुक्तिं विलम्बयसीति विदिततदभिप्रायः प्राह—क्षत्रेति। क्षत्रवर्णोचितधर्मनिष्ठो मृगयादिभिर्लोकरक्षानुपयुक्तमृगयादिव्यापारैर्जन्तून् हतवानसि ततस्त्वमहमेवापाश्रयः संश्रयो यस्य सः मद्भक्तिनिष्ठः संस्तपसा मत्प्राप्तिप्रतिबन्धनिवर्तकेन भक्तियोगोत्पत्तिप्रतिबन्धकनिवर्त्तकेन वा तपसा तज्जन्तुवधप्रयुक्तं पापं जह्यपनय प्रत्यक्षितपरमात्मनामप्यघे प्रारब्धे तपसानुभवेन वा विनाशिते सत्येव परमात्मप्राप्तिरिति भावः ॥ ६४ ॥ कदा तर्ह्यघक्षयः त्वत्प्राप्तिश्चेत्यत आह—जन्मनीति। अनन्तरे एतज्जन्माव्यवहितोत्तरजन्मनि त्वं द्विजश्रेष्ठो भूत्वा सर्वभूतसौहार्द्दवान् समः कृत्स्नं जगद्ब्रह्मात्मकं पश्यंश्च केवलं प्रकृतिमण्डलात्परतः स्थितं मामुपैष्यसि प्राप्स्यसि वै नूनम् ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

क्षीणा दुष्कर्मवासना यस्मिन्तत्तथा उत्थितं विषयाभिमुखम् ॥६२–६४॥ केवलं मां "केवलो निर्गुणश्च" इति श्रुतेः ॥६५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥
(विजयध्वजरीत्या चतुःपञ्चाशत्तमः ५४)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

त्वदभीष्टं मामेव केवलं नतु त्वदभीष्टं विभूत्यादिकमपि उपसेवार्थं सामीप्ये नेष्यामि ॥ ६४–६५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

तस्मात् त्वया यदभिलषितम्, तदेवास्त्वित्याह—अस्त्येवमित्यादि। भक्तिर्मय्यनपायिनीति, अनपायिनी कैवल्यनिरपेक्षिणी ॥ ६१–६२ ॥ भूत्वा द्विजवर इत्यादि। द्विजवरस्त्वं क्षत्रियश्रेष्ठस्त्वं भूत्वा उत्पत्य स्थितः अचिरादचिरेणैव मामवाप्स्यसि अवापः अतीतार्थे भविष्यत्प्रयोगः। यद्वा, हे द्विज! क्षत्रिय! त्वं वरो भूत्वा अप्राकृतो भूत्वा प्राप्स्यसि इदानीं तु प्राप्तवानसि किन्त्वयं ते देहः प्राकृतः ॥ ६३ ॥

इति श्रीदशमे श्रीवृहत्क्रमसन्दर्भे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

व्यतिरेके दोषमाह—युञ्जानानामभक्तानामित्यादि–प्रार्थितं प्रत्यनुमोदयन्नाह—अस्त्वेवमित्यादि। अनपायिनीति कैवल्यनिरपेक्षिणी ॥ ६२–६३ ॥

इत्येकपञ्चाशोऽध्यायः ॥ ५१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अन्योपासकानां तु प्रमादो भवत्येवेत्याह—युञ्जानानामिति। अभक्तानां मद्भक्तभिन्नानां योगिनां ज्ञानिनां चेत्यर्थः। प्राणायामशमदमादिभिः, उत्थितं विषयाभिमुखं भवति ॥ ६२ ॥ तुभ्यमिति पूर्वमधुनापि विशेषतो दत्तैव ॥ ६३ ॥ हा हा अतः परमपि मां स्वमङ्गाद्वियोजयितुमिच्छामि मैवं मैवमिति तस्य महोत्कण्ठामालक्ष्य भगवता विचारितम् अयमस्मिन्नवतारे स्वसङ्गे

नेतुमनर्हः मदीयलीलापरिकरा हि द्वापरान्तर्भवा उद्धवाक्रूरादयो युधिष्ठिरार्ज्जुनादयश्च इममेतन्मन्वंतरप्रथमसमयभवमतिप्राचीनं दृष्ट्वा अहो कोऽयमतिदीर्घतमोऽतिस्थूलतमो अस्मदननुरूपो मानुष इत्युक्त्वा हसिष्यन्ति तथा सम्पत्येव जरासन्धात् पलायनलीलायां तथाग्रिमासु रुक्मिणीहरणादिलीलासु जरासन्धादिभिः शाल्वादिभिश्च सङ्ग्रामे नायं त्वसंगानुरूपो भवितुमर्हति अयं हि तान् मद्विपक्षान् मशकानिव करतलाभ्यामेव धृष्ट्वा वधिष्यन्तीत्यत इमं स्वसङ्गाद्वियोजयितुं कां युक्तिं करोमीति विचिन्त्य केवलमलीकोक्तिमयं तत् प्रत्यायकं किमप्याह—क्षात्रेति ॥ ६४ ॥ ननु, तर्हि त्वत्सङ्गी कदा भविष्यामीत्यत आह—जन्मनीति । अयमर्थः अतः परं देहान्ते त्वं मद्धाम वैकुण्ठं यास्यस्येव स्ववैरिभ्योऽप्यस्मिन्नवतारे मोक्षं वैकुण्ठवासं च ददामि किं पुनस्तुभ्यं परमभक्ताय किं त्ववतारान्तरे त्वां स्वसङ्गिनं लीलापरिकरं च करिष्यामि यदा त्वां स्वं च तुल्यकाल एवाभिर्भावयिष्यामीति अनन्तरे जन्मनि मम च तव चेत्यर्थः सर्वभूतानामुपकारकत्वात् यथायोगं विद्याप्रदानाच्च सुहृत्तमः द्विजवरः परमादरणीयो विप्रो भूत्वा मां केवलं वैराग्यत्वान्निष्परिग्रहमुपैष्यसि मत्सङ्गे एव स्थास्यसीत्यर्थः ॥ ६५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । एकपञ्चाशत्तमोऽयं दशमेऽजनि सङ्गतः ॥ ५१ ॥

गूढार्थदीपिनी

कामं यथेच्छम् । तुभ्यं तव ॥ ६१ ॥ तत् अघं जन्तुवधोत्थं पापम् ॥ ६२ ॥ अनन्तरे आगमिनि । केवलमद्वितीयं मामुपैष्यसि ॥ ६३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्ये उत्तरार्धे गूढार्थदीपिन्यामेकपञ्चाशत्तमोऽध्यायः ।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उत्थितं विषये प्रवृत्तम् ॥ ६२ ॥ तुभ्यं तव ॥ ६४ ॥ केवलमनुपमं प्रकृतिमण्डलात् परतः स्थितम् ॥ ६५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकपञ्चाशत्तमाध्यार्थप्रकाशः ॥ ५१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एकभक्तानां ज्ञानिनामेके **मुख्याश्च** ते **भक्ताश्च** तेषां ज्ञानवतां प्राणायामादिभिर्मनःक्षीणवासनं क्षीणा वासना यस्य तत्सत् । हे राजन् क्वचिद्विषये उत्थितं तदभिमुखमिति यावत् ॥ ६१ ॥ हे स्व महीं काममिच्छानुसारं मय्यावेशितमानसो विचर नित्यदाऽनपायिनी भक्तिस्तुभ्यं तव मय्येवास्तु । मय्यावेशितमानसो मय गतौ मय्यो गम्य इति आवेशितं मानसं यस्य स इति वा । मयीति पुनर्वचनं दार्ढ्यार्थं वा ॥ ६२ ॥ क्षत्रधर्मस्थितो नित्यं जन्तून्प्राणिनो मृगयादिभिर्भवानवधीत् । तत्तद्वधजमघं तपसा समाहितो मामुपाश्रितो जहि गमय ॥ ६३ ॥ मधुनाथाधुनाऽपि भ्रामणमेव किमित्यतो वक्ति । अनन्तरे जन्मनि सर्वभूतसमो द्विजवरो विप्रो भूत्वा केवलमनन्यसदृशत्वाच्च केवलोऽसौ हरिः स्मृत इति चतुर्थतात्पर्योक्तेरसदृशं मामुपेष्यसीति । द्विजवरस्त्वं सर्वभूतसमो भूत्वेति वा ॥ ६४ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे चतुःपञ्चाशोऽध्यायः ॥ १०–५४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं भोगमोक्षावविरुद्धौ भगवन्मार्ग एव, नत्वन्यत्रेति वदन् पक्षान्तरं दूषयति **युञ्जानाना**मिति । भक्तिमार्गव्यतिरेकेण केवलानामभक्तानां प्राणायामादिभिर्मनो युञ्जानानां मनोनिरोधार्थं यतमानानां क्वचिदुत्थितं दृश्यते, यथा सौभरिप्रभृतीनाम्, तत्र हेतुः **अक्षीणवासन**मिति । **राज**न्निति सम्बोधनं वासनाक्षयाभावानुभवार्थम् । भक्त्या तु वासना क्षीयते । तत्र अलौकिकप्रकारं वारयितुं कामा दीयन्ते, तदुपद्रवाभावश्च संपाद्यत इति, भगवता भक्तिमार्गः स्तुतः ॥ ६० ॥ एवं स्तुत्वा तन्मार्गे प्रविष्टस्य भयाभावः सिद्ध एवेति वदन् कामविहारं बोधयति **विचरस्वे**ति । यतो महांस्त्वमतोऽन्यथा विहारः स्वत एव निवृत्तः । किञ्च । मय्यावेशितमानसः सन् विचरस्व । कीदृशी जगति भगवल्लीलेति जिज्ञासुरिव । चरणसेवामेव प्रार्थये, नान्यदिति **यदुक्तम्**, तत्राह **अस्त्वेवे**ति । अत्र भक्तिदानं नापेक्ष्यते, त्वयि भक्तिः सहजैवास्ति । उत्कर्षोऽपि भक्तेः सहज एवेत्याह **अनपायिनी**ति । **नित्यदे**ति च । देशकालवस्तुपरिच्छेदा निवारिताः । अपायः स्वतो देशतश्च । यद्यपि कालनिषेधोऽप्यायाति, तथापि निषेधमात्रपरत्वाभावाय निमित्तभूतः कालः तव भक्तेरनुगुण इति ज्ञापनार्थं **नित्यदे**त्युक्तम् । **तुभ्य**मिति । सम्प्रदानत्वेनैव पूर्वं दानं सूचितम् । **मय्यनपायिनी**ति वा । मद्विषयिणी मत्कृपया वा । अग्रेऽपि न निवर्तिष्यत इति वरदानम् ॥ ६१ ॥ ननु सायुज्यं कुतो न दीयत इत्याशङ्क्याह क्षात्रधर्मस्थित इति । क्षत्रियाणां धर्मः जातिप्रयुक्तो घोरो द्विविधः । बुद्धे भ्रातरमपि हन्यात् । पापर्द्धौ पलायमानानपि मृगान् हन्यात् । अतस्तस्य दोषस्य परिहारः कर्तव्यः । **जन्तू**निनि । तेषामपराधाभावः सूचितः । आदिशब्देन भ्रममुत्पाद्य मारणं, वागुरादिना वा । तस्य निराकरणोपायमाह **समाहित** इति । जितेन्द्रियान्तःकरणः सन् तत्पापं तपसा जहि । ननु तपस्यपि पापं श्रूयते, कियान्वार्थः स्वपरद्रुहा धर्मेण, 'मां चैवान्तःशरीरस्थ'मित्यादिवाक्यैः, तत्राह **मदपाश्रय** इति । मामेवाश्रित्य तपःकरणे अन्तर्म-

क्लेशजननाभावात् न तपो दोषो भविष्यतीति भावः ॥ ६२ ॥ ततो यद्भाव्यं तदाह **जन्मन्यनन्तर** इति। अनन्तरे जन्मनि त्वं द्विजवरो भविष्यसि, उत्कृष्टकुले जन्म प्राप्स्यसि। तत्रापि सर्वभूतसुहृत्तमो भविष्यसि, न तु प्रवृत्तिपरः। ततः केवलं मामुपैष्यसि। अन्यथा पुरुषेषु कालरूपे वा लयो भवेत्। लीलासहिते। ततो लीलार्थं पुनरागमने आगमनमपि स्यात्। केवले पुरुषोत्तमे तु आगमनशङ्काभावः। अस्य च प्रमाणे श्रद्धा महती स्थितेति पुष्टिमार्गे न योजितवान्। मर्यादायां ब्राह्मणस्यैव मुक्तिः। तत्रापि कैवल्यमिति। 'ये यथा मां प्रपद्यन्त' इति सिद्धान्तान्न कोऽपि दोषः ॥ ६३ ॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे द्वितीयाध्यायविवरणम् ॥ २ ॥

श्रीसुबोधिनीसारः

बहिर्मुखानां लक्षणमाह। प्राणायामादिभिर्युञ्जानानां योगं कुर्वाणानामभक्तानां मन उत्थितं विषयाभिमुखं सवासनं पुनर्दृश्यते। हे राजन् ॥ ६१ ॥ उपदिशति। मयि युक्तचित्तस्त्वं कामं स्वैरं महीं विचरस्व। तुभ्यं तव नित्यदा मय्यखंडा भक्तिरस्त्येव ॥ ६२ ॥ पूर्वं क्षत्रियधर्ममाश्रितस्त्वं मृगयादिभिर्जन्तून् मृगादीन् न्यवधीः न्यहः तदघं पापं मदाश्रितः सावधानः तपसा जहि नाशय। हि युक्तं लोकाचारात् ॥ ६३ ॥ अनंतरेऽग्रिमे जन्मनि सर्वभूतानां सुहृत्तमः द्विजवरो ब्राह्मणोत्तमो भूत्वा त्वं केवलं शुद्धमद्वयं पूर्णं मां प्राप्स्यसि वै एव ॥ ६४ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायामेकपंचाशत्तमोऽध्यायः ॥ ५१ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'अभक्तानां तु भिद्यते एव' इति व्यतिरेकमाह—युञ्जानानामिति। 'त्वयाप्येतज्ज्ञायत एव' इत्याशयेन सम्बोधयति—राजन्निति। अभक्तानां तु प्राणायामादिभिर्युञ्जानानां निरोधार्थं प्रयतमानानामपि मनः क्वचित् कदाचिदुत्थितं विषयाभिमुखं दृश्यते। तत्र हेतुमाह—अक्षीणवासनमिति ॥ ६१ ॥ तुभ्यं तव तु अनपायिनी अव्यभिचारिणी भक्तिर्मयि नित्यदा सर्वदा अस्त्येव, अतः कृतार्थत्वात् मयि आवेशितं मानसं येन तथाभूतस्त्वं कामं यथेच्छं महीं विचरस्व ॥ ६२ ॥ 'एवं विचरतोऽपि मम त्वत्प्राप्तिः कदा कथं वा स्यात्' इत्यपेक्षायां प्रतिबन्धकनिवृत्त्युपकथनपूर्वकं तदाह—क्षात्रेति द्वयेन। क्षात्रधर्मे राज्ये स्थितः सन् लोकरक्षानुपयुक्तमृगयादिव्यापारैः त्वं जन्तून् न्यवधीः हतवान् असि, अतः अहमेवाश्रयो यस्य तथाभूतः समाहितो जितेन्द्रियश्च सन् तत् मृगयाजनितमघं पापं जहि अपनयेत्यन्वयः ॥ ६३ ॥ ततश्च हे राजन्! अनन्तरे एतज्जन्माव्यवहिते जन्मनि त्वं सर्वभूतानां सुहृत्तमः सौहार्दयुक्तो द्विजवरश्च भूत्वा केवलं प्रकृतिकार्यातीतं परमानन्दस्वरूपं मामेवोपैष्यसि प्राप्स्यसि। वै अवधारणे ॥ ६४ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीकाबालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने। एकपञ्चाशत्तमे तु मुचुकुन्दस्तुतिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

युञ्जानानामिति ॥ हे राजन्! अभक्तानां तु प्राणायामादिभिर्वुञ्जानानां निरोधार्थं प्रयतमानानामपि मनः यतः अक्षीणवासनं अतः क्वचिदुत्थितं विषयाभिमुखं दृश्यते ॥ ६० ॥ विचरस्वेति ॥ तुभ्यं तव तु अनपायिनी अव्यभिचारिणी भक्तिर्मयि नित्यदा सर्वदा। दा आर्षः। अस्त्येवातः कृतार्थत्वात् मयि आवेशितं मानसं येन तथाभूतस्त्वं कामं यथेच्छं महीं विचरस्व। तङार्षः ॥ ६१ ॥ क्षात्रेति ॥ क्षात्रधर्मे राज्ये स्थितः सन् लोकरक्षानुपयुक्तमृगयादिव्यापारैस्त्वं जन्तून्न्यवधीर्हतवान् असि। अतः अहमेवाश्रयो यस्य तथाभूतः समाहितो जितेन्द्रियश्च संस्तत् मृगयादिजनितमघं पापवासनां जहि अपनय ॥ ६२ ॥ जन्मनीति ॥ हे राजन्! अनन्तरे एतज्जन्माव्यवहिते जन्मनि त्वं सर्वभूतानां सुहृत्तमः सौहार्दयुक्तो द्विजवरश्च भूत्वा केवलमद्वयं मामेवोपैष्यसि तथैव प्रारब्धात् इति भावः ॥ ६३ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् दशमस्यैकपञ्चाशे व्यधाद्गङ्गासहायकः ॥
इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायामेकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तुभ्यं तव ॥ ६१ ॥ स्वस्मिन्नात्यंतिकप्रेमप्राप्त्यर्थं तस्य कृत्यशेषं दर्शयन्नाह क्षात्रधर्म इति त्वं न्यवधीः हतवान् ॥ ६२ ॥ अनंतरे इतो द्वितीये ॥ ६३ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंध व्याख्याने मुचुकुन्दस्तुतिर्नामैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अभक्तानां तु भिद्यत एवेत्याह। युञ्जानानामिति। हे राजन्, प्राणायामादिभिः, उपायैः युञ्जानानां मनोनियमनं कुर्वतां, अभक्तानां मनः, अक्षीणा वासना यस्य तत्, हेतुगर्भमिदं तत्त्वात् क्वचिद्विषये कदाचिद्वा, उत्थितं विषयप्रवणतां प्राप्तं, दृश्यते ॥ ६१ ॥ विचरस्वेति। मय्यावेशितं मानसं येन तथाभूतस्त्वं, महीं कामं विचरस्व। तुभ्यं तव, नित्यदा मयि, अनपायिनी भक्तिः, अस्त्वेव। तथाऽनुगृह्णामीति भावः ॥ ६२ ॥ ननु भक्त्यैकलभ्यो भगवांस्त्वं तु तामन्तरेणाप्यधुना प्रत्यक्षितः किमिति मुक्तिं विलम्वयसीति विदिततदभिप्रायः प्राह। क्षात्त्रेति। जन्मनीति। हे राजन्, त्वं क्षात्त्रधर्मस्थितः क्षत्त्रवर्णोचितधर्मनिष्ठः सन्, मृगयादिभिः लोकरक्षाऽनुपयुक्तमृगयादिव्यापारैः, जन्तून् प्राणिनः, अवधीर्हतवानसि, ततः त्वं समाहितः मन्मूर्त्तिध्यानैकनिष्ठः सन्, तपसा तत् अघं, मम सम्यक्प्राप्तिप्रतिबन्धकं पापं, जह्यानय। अनेन स्वस्याहिंसाधर्मशीलत्वमहिंस्रप्राणिप्रियत्वं च सूचितम्। केनचिज्जन्मान्तरीयसुकृतेन प्रत्यक्षभगवत्संबन्धं प्राप्तानामपि वज्रलेखावत्सुदृढतत्स्वरूपानिश्चयत्वतः कारणगताघशेषसद्भावात्तत्तद्भक्त्या तपसा चापनोदेनैवानिवार्या परमात्मप्राप्तिरिति भावः। कदा तर्हि मम तथा वर्त्तमानस्य तव प्राप्तिः स्यात्तत्राह। हे राजन्, अनन्तरे जन्मनि, सर्वभूतसुहृत्तमः, द्विजवरो मयरामाख्यया प्रसिद्धो ब्राह्मणोत्तमः, भूत्वा, त्वं मदुपाश्रयः धृतहरिकृष्णावतारस्य मम कृतसमाश्रयः सन्, केवलं प्रकृतिमण्डलात्परस्थितं, मां वै मामेव, उपेष्यसि प्राप्स्यसि। इति द्वयोरेकान्वयः ॥ ६३–६४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्द्धे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

कृष्णप्रिया

राजन् मुचुकुन्द ! प्राणायामादि सिद्ध साधनों से मन को ब्रह्म में संलग्न करने के योगादि वल करने पर भी यदि भक्ति का आश्रय न लिया और मन की वासनाएँ क्षीण न हुई तब निरुद्ध मन पुनः चलित हो जाता है ॥ ६१ ॥ भैया ! तुम्हारा मुझे सर्मपित कर दो मनो भावनाओं को मुझमें लगादो फिर निर्भय बनकर यथेच्छ भूतल पर विचरते रहो मैं वरदान देता हूँ कि विषय लालसा से मुक्त आपकी अविचल एवं विमल भक्ति मुझमें रहेगी ॥ ६२ ॥ राजन् क्षत्रिय के धर्मों का पालन करते कभी-कभी आपने मृगया के अवसर पर धर्म रक्षा के लिये पशुओं का वध किया है। भैया ? अब मेरा आश्रय लेकर सावधान रहकर सुदृढ तपश्चर्या के आश्रय से उन पापों का मार्जन कर दीजिये ॥ ६३ ॥ मुचुकुन्द ? अब पुनर्जन्म में आप विप्र बनेंगे। प्राणीमात्र के हितकर स्वजन बनेंगे और निश्चय रूप से आनन्दमात्र करपाद मुखोदरादि मुझे प्राप्त करेंगे यह मेरा अनुग्रह और वरदान है ॥ ६४ ॥

श्रीमद्भागवत दशमस्कन्ध उत्तरार्द्ध में मुचुकुन्द महाराज की स्तुति निरूपण करनेवाला ५१ मा अध्याय का हिन्दी भाषान्तर समाप्त।

* * *

अथ द्विपञ्चाशत्तमोऽध्यायः

श्लोकाः	अनु.	ब.	उ.	उ. अ.	अ. अ.	श्लो. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४४	३७	७	५	२७	४४	१५७६	१६४७	५१।	७

श्रीशुक उवाच

इत्थं सोऽनुगृहीतोऽङ्ग कृष्णेनेक्ष्वाकुनन्दनः । तं परिक्रम्य संनम्य निश्चक्राम गुहामुखात् ॥ १ ॥
स वीक्ष्य क्षुल्लकान् मर्त्यान् पशून् वीरुद्वनस्पतीन् । मत्वा कलियुगं प्राप्तं जगाम दिशमुत्तराम् ॥ २ ॥
तपःश्रद्धायुतो [1]धीरो निःसङ्गो मुक्तसंशयः । समाधाय मनः कृष्णे प्राविशद् गन्धमादनम् ॥ ३ ॥
बदर्याश्रममासाद्य [2]नरनारायणालयम् । सर्वद्वन्द्वसहः शान्तस्तपसाऽऽराधयद्धरिम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच, अङ्ग ? इत्थम्, कृष्णेन, अनुगृहीतः, सः, इक्ष्वाकुनन्दनः, तम्, परिक्रम्य, संनम्य, गुहामुखात्, निश्चक्राम ॥ १ ॥ सः, क्षुल्लकान्, मर्त्यान्, पशून्, वीरुद्वनस्पतीन्, वीक्ष्य, कलियुगम्, प्राप्तम्, मत्वा, उत्तराम्, दिशम्, जगाम ॥ २ ॥ तपःश्रद्धायुतः, मुक्तसंशयः, निःसङ्गः, धीरः, कृष्णे, मनः, समाधाय गन्धमादनम्, प्राविशत् ॥ ३ ॥ सर्वद्वन्द्वसहः, शान्तः, नरनारायणालयम्, बदर्याश्रमम्, आसाद्य, तपसा, हरिम्, आराधयत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

द्विपञ्चाशत्तमे धावन्भयादिव गतः पुरीम् । अन्वमोदत सन्देशं रुक्मिण्या द्विजवर्णितम् ॥ १ ॥

क्षुल्लकानल्पप्रमाणान् ॥ १–२ ॥ तपसि श्रद्धायुतः ॥ ३ ॥ तत्र च बदर्याश्रमम् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इवेनात्रापि भयाभाव एवोक्तः। पुरीं द्वारवतीम्। अन्वमोदत स्वीचकार (१) इत्थं सार्वभौमेत्याद्युक्त्या। स मुचुकुन्दः। इक्ष्वाकून्नन्दयतीति तथा। तं कृष्णम् ॥ १ ॥ स मुचुकुन्दः। 'क्षुल्लकस्त्रिषु नीचेल्पे' इति मेदिनी। गुणतः प्रमाणतश्चाल्पप्रमाणानित्यर्थः उत्तरामिति नरनारायणाश्रमाभिप्रायेण, तत्र हि कलिर्न प्रभवतीति। यद्यपि "यावत्सपादपद्माभ्यां स्पृशन्नास्ते रमापतिः। तावत्कलिस्तु पृथिवीं पराक्रान्तुं न चाशकत्।" इति द्वादशोक्तानुसारेण श्रीकृष्णप्राकट्ये तत्रापि तत्प्रभावो नासीत्तथापि चिरं तत्प्राकट्यं न स्यादित्यभिप्रायेण तथा कृतमिति ज्ञेयम् ॥ २ ॥ मुक्तसंशयः कृष्णबोधितत्वात्सर्वसंशयहीनः। धीरो विवेकनिपुणः। अतो मुक्तसंशयः शास्त्रादिभिः कृतपरमनिश्चयः। अतो निःसंगः अन्योपासनाफलाऽऽकांक्षारहितः। यद्वा—मुक्तसंशयत्वादेव तपसि भगवदेकाग्रचित्तत्वे श्रद्धायुक्तः। अत एव निस्संगः। अतः कृष्णे मनः समाधिनिष्टं कृत्वा प्रकर्षेण सर्वोत्कृष्टप्रकारेणाविशत् ॥ ३ ॥ तत्र च गंधमादनेऽपि। बदरीभिर्घोंटाभिरुपलक्षित आश्रमो बदर्याश्रमस्तम्। नरनारायणयोरालय आश्रयो यस्मिंस्तम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्णेन साक्षात् स्वयं भगवतानुऽगृहीतः अतः इक्ष्वाकुकुलनन्दनः सम्यक् साष्टाङ्गं बहुशो नत्वा एवमस्य पूर्वमेव निष्क्रामणं श्रीभगवदाज्ञया महादरेण शैघ्रयात् श्रीभगवता च स्वसङ्गेनानिष्क्रामणं तस्य तद्योग्यतानवाप्तेः प्रथममेव निष्क्रामणञ्च स्वोपदिष्टस्य शीघ्रानुष्ठानबोधायेति ज्ञेयम् ॥ १ ॥ वीरुधो वनस्पतींश्च उत्तरामिति श्रीनरनारायणाश्रमगमनस्याभिप्रायेण तत्र हि कलिर्न प्रभवतीति यद्यपि—

"यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः। तावत्कलिर्वै पृथिवीं पराक्रान्तुं न चाशकत् ॥"

इति द्वादशोक्तानुसारेण श्रीकृष्णप्राकट्ये तत्रापि तत्प्रभावो नासीत् तथापि चिरं तत्प्राकट्यं न स्यादित्यभिप्रायेण तथा कृतमिति ज्ञेयम् ॥ २ ॥ धीरः विवेकनिपुणः अतो मुक्तसंशयः शास्त्रादिभिः कृतपरमनिश्चयः अतो निःसङ्गः अन्योपासनाफला-

---

[1] वीरो–प्रा. पा. । [2] णाश्रमम्–विज. ।

काङ्क्षारहितः। यद्वा, मुक्तसंशयत्वादेव तपसि भगवदेकाग्रचित्तत्वे श्रद्धायुक्तः अत एवात्र निःसङ्गः अतः कृष्णे मनः समाधिनिष्ठं कृत्वेत्यर्थः। अथवा तपसि भगवत्येव चित्तैकाग्रे श्रद्धायुतः सादरः अतः कृष्णे स्वयं भगवति तस्मिन्नेव मनः सम्यक् तदेकनिष्ठत्वेनाधाय अत एव प्रकर्षेण सर्वोत्कृष्टप्रकारेणाविशत् ॥ ३ ॥ बदर्य्याश्रमेऽपि नरनारायणालयमासाद्येत्यर्थः। यद्वा, नरनारायणयोरालयः आश्रमो यस्मिन् तम् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णेन साक्षाद्भगवतानुगृहीतः, अतः इक्ष्वाकुकुलनन्दनः, सम्यक् साष्टांगं बहुशो नत्वा ॥ १ ॥ क्षुल्लकान् अतिह्रस्वान् वीरुधो वनस्पतींश्च। उत्तरामिति महाशीतादिना विवक्तत्वेन महात्मभिः प्रायः सेवितत्वात् ॥ २ ॥ धीरो विवेकी, दुःखेऽपि धैर्य्यवान् वा, निःसंगो बाह्यान्तरसम्बन्धरहितः सुखनिस्पृहा वा, मुक्तसंशयः श्रीकृष्णपादाब्जभक्तौ कृतविश्वासो दृढनिश्चयो वा, विशेषणानामेषामुत्तरोत्तरस्मिन् हेतुत्वमूह्यम्। अतः कृष्णे परमानन्दघनमनोहरमूर्त्तौ मनः समाधाय स्थिरीकृत्य किंवा सम्यक् तदेकनिष्ठत्वेनाधाय निधाय, अत एव प्रकर्षेण सर्वोत्कृष्टप्रकारेणाविशत् ॥ ३ ॥ तत्र च नरनारायणालयमासाद्येत्यर्थः। यद्वा, नरनारायणयोरालय आश्रमो यस्मिंस्तम्। अयं तपसे तत्र गमने मुख्यो हेतुः, तपःप्रवर्त्तकयोः साक्षात् श्रीकृष्णावतारयोस्तयोस्तत्र साक्षाद्वृत्तेः, सर्वाणि द्वन्द्वानि शीतोष्णादीनि सहत इति तथा सः, अत एव शान्तोऽनुद्विग्नचित्तः सन्, हरिमिति तस्य तपोदुःखादिहरणान्मनोहरणाद्वा ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीम्

क्षुल्लकान्। अल्पपरिमाणान् ॥ १–१५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अथावशिष्टं मुचुकुन्दवृत्तान्तमित्थं मुचुकुन्दमनुज्ञाप्यानुगृहीतवतो भगवतोऽनन्तरचेष्टितं चाह—इत्थमिति। अङ्ग हे राजन्! श्रीकृष्णेनेत्थमनुगृहीतो मुचुकुन्दस्तं श्रीकृष्णं प्रदक्षिणीकृत्य प्रणम्य च गुहाद्वारान्निर्गतवान् ॥ १ ॥ स मुचुकुन्दः क्षुल्लकानल्पपरिमाणान् मर्त्यादीनवलोक्य कलियुगं प्राप्तं विज्ञायोत्तरां दिशं प्रतिजगाम तपस इति शेषः ॥ २ ॥ धीरो जितेन्द्रियः देहतदनुबन्ध्यादिष्वासक्तिरहितः मुक्तसंशयः सेत्स्यामि वा न वेत्येवंविधो येन सः श्रद्धायुतः कर्त्तव्यविषयत्वरायुक्तः कृष्णे भगवति स्वमनः सम्यगाधाय स्थिरीकृत्य गन्धमादनं पर्वतं प्राविशत् ॥ ३ ॥ तत्रापि बदर्याश्रमं नरनारायणयोरालयं स्थानं प्राप्य सर्वाणि द्वन्द्वानि शीतोष्णादीनि सहत इति तथा शान्तः जितमनाः हरिमाश्रितबन्धहरं भगवन्तं तपसाऽऽराधयामास ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

इक्ष्वाकोर्वंशं नन्दयतीति इक्ष्वाकुनन्दनः सन्नम्य सम्यङ् नत्वा ॥ १ ॥ क्षुल्लकान्। गुणतः परिमाणतश्चाल्पमानान् ॥२॥ इदं तत्त्वमुतातत्त्वमिदमिति संशयो मुक्तो येन स तथा ॥ ३–४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

द्विपञ्चाशत्तमे वैरिदुर्लक्ष्यत्वं हरेर्गिरेः। प्रवर्षणस्य दाहश्च भैष्मीसन्देशवाक्श्रुतिः ॥ १ ॥

प्राप्तम् आसन्नत्वात् प्राप्तप्रायमित्यर्थः ॥ २–४ ॥

गूढार्थदीपिनी

द्विपञ्चाशतमे धावन् गतः कृष्णः प्रवर्षणम्। तद्दाहात्स्वपुरीं यातो भैष्मीसन्देशमश्रृणोत् ॥ १ ॥

अङ्ग हे राजन्! स मुचुकुन्दः। मुखात् द्वारात् ॥ १ ॥ क्षुल्लकान् अल्पप्रमाणान्। 'क्षुल्लकस्त्रिषु नीचेऽल्पे' इति मेदिनी ॥ २ ॥ तपसि कृष्णाराधने। गन्धमादनं पर्वतम् ॥ ३ ॥ द्वन्द्वं शीतोष्णादि सहते ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

द्विपंचाशत्तमे मुचुकुन्दस्य श्रीकृष्णाराधनपरत्वं श्रीकृष्णस्य म्लेच्छवधप्रवर्षणगिरिप्रवेशजरासन्धविमोहनं द्वारवतीप्रवेशरुक्मिणीसन्देशश्रवणादिचरितं च वर्ण्यते तत्र तावन्मुचुकुन्दवृत्तं वर्णयति–इत्थमिति चतुर्भिः ॥ १ ॥ मर्त्यादीन् क्षुल्लकान् अल्पपरिमाणान् प्राप्तं प्राप्तप्रायम् ॥ २ ॥ तपसि कृष्णाराधनप्रधाने श्रद्धायुतः ॥ ३–४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ इक्ष्वाकून्नन्दयतीति स तथा येन कृष्णेनेत्यमनुगृहीतो अङ्ग परीक्षित्। तं कृष्णं परिक्रम्य तथा सन्नम्य प्रणम्य गुहामुखात्तद्द्वारान्निश्चक्राम ॥ १ ॥ क्षुल्लकान्परिमाणादितो ह्रस्वान्मर्त्यास्तथा पशून्वीरुद्वनस्पतीत्येवमादीन्क्षुल्लकांश्च वीक्ष्य कलियुगं प्राप्तं मत्वोत्तरां दिशं जगाम। कदा सुप्तः कदोत्थित इति तु त्रेतायुगे प्रसुप्तोऽसि विदितो मेऽसि नारदात्। इदं

कलियुगं विद्धि किमन्यत्करवाणि ते । मम शत्रुस्त्वया दग्धो देवदत्तवरो नृप । अवध्यो यो मया सङ्ख्ये भवेद्वर्षशतैरपि । इत्युक्तः स तु कृष्णेन निर्जगाम गुहामुखात् । अन्वीयमानः कृष्णेन कृतकार्येण धीमता । ततो ददर्श पृथिवीमावृतां ह्रस्वकैर्नरैः । अल्पोत्साहैरल्पबलैरल्पवीर्यपराक्रमैः । परेणाधिष्ठितं राज्यं दृष्ट्वा केवल आत्मना । ततो विसृज्य गोविन्दं प्रविवेश महावनमित्यादि हरिवंशशंसनेन ज्ञातव्यम् ॥ २ ॥ तपश्च श्रद्धा च ताभ्यां तपसि श्रद्धा तस्य वा युक्तो वीर ईरयतीतीरो विरीरो यस्य स भगवत्प्रेरित इति यावत् । निःसङ्गो मुक्तसंशयो भगवदुपदिष्टे मार्गे यथार्थत्वायथार्थतत्वमतिरहितो यथार्थज्ञानवानेवेत्यर्थः । कृष्णे मनस्समाधाय गन्धमादनं प्राविशत् ॥ ३ ॥ बदर्याश्रममासाद्य प्राप्य तत्रापि नरनारायणाश्रमं चासाद्य नरनारायणाश्रमं तद्रूपं बदर्याश्रममासाद्येति वा । नरनारायणाभ्यामेवाश्रमः संसारश्रमाभावो यत्र तं बदर्याश्रममिति वा सर्वद्वन्द्वसहः शान्तस्त्यक्तकोपस्तपसा हरिमाराधयत् ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

पुरुषानुग्रहं पूर्वमुक्त्वा भगवता कृतम् । स्त्रीषु तं विस्तरेणाह रूपत्रयविभेदतः ॥ १ ॥
अनुग्रहः कालतुल्यस्ततो द्वादशधोदितः । तत्र मुख्या तु लक्ष्मीः स्यात्तस्यां त्रेधा हरेः कृपा ॥ २ ॥
मानसेनाथ कायेन वेदेनेति निरूप्यते । गान्धर्वो मानसः प्रोक्तो दूरत्वाद्वचनाभिधा ॥ ३ ॥
कृष्णानुग्रहयुक्तानां कृतार्थत्वे ततः परम् । स्त्रीणां मुक्तिर्निरूप्येति मुचुकुन्दतपःकथा ॥ ४ ॥
प्रसङ्गात्तामसानां हि वधो देवहिताय हि । पलायनं लीलयैव सोऽप्यनुग्रह ईर्यते ॥ ५ ॥
सात्त्विके राजसे चैव तामसे च हरेः कृपा । इति दर्शयितुं राज्ञो वृत्तं लक्ष्म्याः शिवस्य च ॥ ६ ॥

तृतीयेऽध्याये अनुग्रहनिरूपणप्रस्तावैर्मुचुकुन्दस्य शिवस्य लक्ष्म्याश्च हितं कृतवानिति निरूप्यते । कायिकवाचिकमानसिकभेदेन । प्रथमं सात्त्विके भगवान् मुचुकुन्दे कृपां कृतवानिति तस्य भगवद्वाक्येन तपःकरणमुच्यते इत्थमिति **चतुर्भिः** । एवं प्रकारेण भगवता अनुगृहीतः मुचुकुन्दः तपोनिमित्तं गुहातो निर्गतः । भगवदनुग्रहव्यतिरेकेण भगवद्वाक्ये श्रद्धा न भवतीति भगवदनुग्रहः कारणत्वेनोच्यते । **इक्ष्वाकुनन्दन** इति । इक्ष्वाकुरत्यन्तं भक्त इति तद्वंश्योऽयमिति कृपाया हेतुत्वेनोक्तम् । ततस्तं भगवन्तं कृष्णं **परिक्रम्य** प्रदक्षिणीकृत्य, ततः सम्यङ्नत्वा, साष्टाङ्गं प्रणम्य पूर्वमेव शयनस्थानात् गुहामुखे प्रकाशयुक्ते स्थित इति ततोऽपि निश्चक्राम ॥ १ ॥ ततस्तपः क्वचित्कर्तव्यमिति विचार्य, भारतखण्ड एव चतुर्युगधर्माणां प्रवृत्तिरिति विरुद्धकालयुक्ते देशे तपो न कर्तव्यमिति वर्षान्तरं गन्तुं उत्तरदेशं गत इत्याह **स वीक्ष्येति** । स हि सत्ययुगे शयनं कर्तुं प्रवृत्तः, कलियुगे उत्थितः । यदैव भगवता मथुरा त्यक्ता, तदैव कलिः प्रवृत्त इति मुख्यः सिद्धान्तः । 'पञ्चविंशे वर्षे कलिरायास्यती'त्येव विनिश्चित्य, भरतखण्डं परित्यज्य, समुद्रमध्ये द्वारकां कृतवान् । ततो भगवति तत्र गते कलिः सम्यक् प्रविष्टः । कालाभिमानिनी देवता तु भगवति स्वस्थानं गते समायास्यति । अयं विचारो द्वादशे कर्तव्यः । कलिस्त्वियदानीं प्रविष्टः । सन्ध्यासमयोऽयं वा । मध्यकाल एवाग्रे निर्णय इति कालस्य प्रवृत्तौ नियतं हेतुं दृष्टवानित्याह । स मुचुकुन्दः **क्षुल्लकान्** अल्पप्रमाणान् कालेन ह्रासं प्राप्तान् **मर्त्यान्**मनुष्यान् । अनेन तेषां मरणमपि शीघ्रं कालेनेति सूचितम् । **वीरुधः** लतागुल्मादीन् वनस्पतीन्, वृक्षानपि चतुर्विधानल्पायुःप्रमाणाभ्यां ह्रासयुक्तान् विलोक्य, कलेरेवायं धर्म इति असाधारणत्वाद्विनिश्चित्य उत्तरां दिशं जगाम ॥ २ ॥ ततो विधानपूर्वकमिमं देशमतिक्रम्य गत इत्याह **तपःश्रद्धायुत** इति । **तपः** सर्वेन्द्रियनिग्रहः, **श्रद्धा** च भगवद्वाक्ये, ताभ्यां युतः, दृष्ट्वापि विषयान् विघ्नत्वेन प्राप्तान्वा न व्यामुग्धः, किन्तु धीर एव जातः । ततो गच्छन् राजेति यं कञ्चिदनुवर्तमानमपि परित्यज्य, निःसङ्ग एव सन्, शरीररक्षादौ मुक्तसंशयः, इतस्ततो दर्शनाद्यर्थं विक्षिप्तमपि मनः कृष्णे समाधाय गन्धमादनपर्वतं प्राविशत् । गरुडगङ्गातः उत्तरे भागे बदरिकाश्रमपर्यन्तं सर्वोऽपि पर्वतो गन्धमादनः ॥ ३ ॥ ततस्तत्रापि बदर्याश्रममासाद्य, यत्र नरनारायणयोरालयं तत्र शीतादिबाधा महतीति तन्निवृत्त्यर्थं यत्नकरणे तपो न युज्यत इति तदर्थमाह **सर्वद्वन्द्वसह** इति । अन्तरपि शान्तः । तपसा हरिमाराधयत् । हरिपदेन यथैव तस्य तपसा आराधनं सिध्यति, तथैव कृतवानिति लक्ष्यते ॥ ४ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । इत्थमेवं कृष्णेनानुगृहीतः स इक्ष्वाकुनंदनो मुचुकुंदस्तं श्रीकृष्णं प्रदक्षिणीकृत्य संनम्य प्रणम्याष्टांगैर्गुहाया मुखान्निर्गतः ॥ १ ॥ क्षुल्लकानल्पप्रमाणान् अतितुच्छान् मनुष्यान् पशून् वृक्षान् वीक्ष्य दृष्ट्वा प्राप्तं कलियुगं मत्वोत्तरां दिशं स मुचुकुंदो ययौ ॥ २ ॥ तपसि श्रद्धया युतो धीरो निःसंग एकाकी निष्कामः त्यक्तसंदेहः कृष्णे मनः समाधाय समावेश्य गंधमादनं पर्वतं प्राविशत् ॥ ३ ॥ नरनारायणयोरालयं स्थानं बदर्याश्रममासाद्य प्राप्य सर्वाणि द्वंद्वानि शीतोष्णादीनि सहत इति तथा शांतस्तपसा हरिम् आराधयत् ॥ ४ ॥

विवरणटिप्पणी

तृतीयेऽध्याये । रूपत्रयेति । रुक्मिणीजाम्बवतीसत्यभामेतिरूपत्रयेऽनुग्रहः साधनप्रकरणे निरूपित इत्यर्थः । **अनुग्रह** इति । मुचुकुन्दे कृतोऽनुग्रहः कालसापेक्षो, नतु कालमतिक्रम्य कृतस्ततो हेतोर्मुचुकुन्देन द्वादशश्लोकैः प्रार्थ्यत्वेनोदितः, त्रयोदशे

श्लोके तु शरणगमनकथनेन स्वरक्षा प्रार्थिता, नानुग्रहः प्रार्थित इति भावः। **तत्रे**ति। स्त्रीष्वित्यर्थः। **वेदेने**ति। वाचेत्यर्थः। मानसे गान्धर्वविवाहे 'श्रुत्वा गुणा'निति वाक्यकथने हेतुमाहुः **दूरत्वा**दिति। लक्ष्म्याः शिवस्य चेत्यत्र क्रमो न विवक्षित इति ज्ञेयम्। **राज्ञः**। मुचुकुन्दस्येत्यर्थः। जरासन्धात्पलायनं शिववरदानात्। अतः शिवहितमेव पलायनमिति भावः।

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

द्विपञ्चाशत्तमे कृष्णः रुक्मिण्या द्विजवर्णितम्। अन्वमोदत सन्देशमित्येतद्विनिरूप्यते ॥ १ ॥

अथावशिष्टं मुचुकुन्दवृत्तान्तमाह—इत्थमिति। अङ्ग हे राजन्! स इक्ष्वाकुनन्दनो मुचुकुन्दः इत्थमुक्तप्रकारेण कृष्णेनानुगृहीतः तं कृष्णं प्रदक्षिणीकृत्य प्रणम्य च गुहाद्वाराद्बहिर्निश्चक्राम निर्गतवान् ॥ १ ॥ ततश्च मुचुकुन्दः क्षुल्लकान् अल्पपरिमाणान् मर्त्यादीन् वीक्ष्य ततश्च कलियुगं प्राप्तं आसन्नत्वेन प्राप्तप्रायं मत्वा उत्तरां दिशं प्रति तपः कर्तुं जगाम 'एषा वै देवमनुष्याणां शान्ता दिक्' इति श्रुतेः तत्र कलिदोषप्रवृत्त्यभावात्तत्र गत इति ज्ञेयम् ॥ २ ॥ 'तत्रापि कुत्र गतः कथंभूतश्च' इत्यत आह—तपसि श्रद्धायुक्तः, धीरो जितेन्द्रियः, देहतदनुबन्धिपुत्रादिषु निःसङ्गः आसक्तिरहितः, मुक्तसंशयः भगवद्वचनविश्वासात् स्वकृतार्थतायां संशयरहितः, स्वमनः कृष्णे समाधाय स्थिरीकृत्य गन्धमादनाख्यं पर्वतं प्राविशत् ॥ ३ ॥ तत्रापि बदर्याश्रमं तत्रापि नरनारायणयोरालयं स्थानं प्राप्य सर्वाणि द्वन्द्वानि शीतोष्णादीनि सहते इति तत्र तथा शान्तः कामक्रोधादिभी रहितः हरिं भगवन्तं तपसा आराधयामास ॥ ४ ॥

अन्वितार्थप्रकाशिका

द्विपञ्चाशत्तमे कृष्णो द्वारकां प्राप रुक्मिणीम्। विवोढुं स्वीचकारात्र श्लोका जलधिवार्द्धयः (४४) ॥

उवाचपञ्चकं (५) साङ्घ्रिनववेदा (४९।) अनुष्टुभः ॥ ५२ ॥

इत्थमिति। अङ्ग हे राजन्! स इक्ष्वाकुनन्दनो मुचुकुन्दः इत्थमुक्तप्रकारेण कृष्णेनानुगृहीतः तं कृष्णं परिक्रम्य प्रदक्षिणीकृत्य सन्नम्य प्रणम्य च गुहाया मुखात् द्वाराद्बहिर्निश्चक्राम। भगवन्निर्गमात्पूर्वमेव निर्गतवान् ॥ १ ॥ स इति। स मुचुकुन्दः क्षुल्लकान् अल्पपरिमाणान् मर्त्यादीन् वीक्ष्य ततश्च कलियुगं प्राप्तम् आसन्नत्वेन प्राप्तप्रायं मत्वा उत्तरां दिशं प्रति तपः कर्तुं जगाम ॥ २ ॥ तप इति। तपसि श्रद्धायुक्तः धीरो जितेन्द्रियः देहादिषु निःसङ्गः आसक्तिरहितः मुक्तसंशयः स्वकृतार्थतायां संशयरहितः स्वमनः कृष्णे समाधाय स्थिरीकृत्य गन्धमादनाख्यं पर्वतं प्राविशत् ॥३॥ बदरीति बदर्याश्रमं तत्रापि नरनारायणयोरालयं स्थानमासाद्य प्राप्य सर्वाणि द्वन्द्वानि शीतोष्णादीनि सहत इति तथा शान्तः कामक्रोधादिभी रहितः हरिं भगवन्तं तपसाऽऽराधयामास ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं द्विपंचाशत्तमेऽध्याये मुचुकुंदस्य बदरिकाश्रमगमनं श्रीकृष्णस्य पुनर्मथुरागमनं च वातितयवनसैन्यहननं च रामकृष्णयोर्जरासंधभयादिव पलायनं च हरिणा रुक्मिणीप्रेषितपत्रश्रवणं च वर्ण्यते। इत्थमिति ॥ १ ॥ क्षुल्लकान् लघुप्रमाणान् ॥ २ ॥ तपसि श्रद्धायुतः मानुष्यमूर्तौ हरौ मुक्तसंशयः ॥ ३ ॥ गंधमादनं नरनारायणालयम् ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

धावन् भयादिव पुरीं द्विपञ्चाशत्तमे गतः। अन्वमोदत रुक्मिण्याः संदेशं द्विजवर्णितम् ॥ १ ॥

इत्थमिति ॥ अङ्ग हे राजन्, कृष्णेन इत्थं अनुगृहीतः इक्ष्वाकुनन्दनः इक्ष्वाकुकुलजानन्दजनकः, स मुचुकुन्दः, तं कृष्णं परिक्रम्य प्रदक्षिणीकृत्य, संनम्य प्रणम्थ च, गुहामुखात् गुहाद्वारात्, निश्चक्राम निर्गतवान् ॥ १ ॥ स वीक्ष्येति ॥ स मुचुकुन्दः, क्षुल्लकानल्पपरिमाणान्, मर्त्यान् मनुष्यान्, पशून् गवादींश्चतुष्पदान्, वीरुधः लताश्च वनस्पतयो वृक्षाश्च तान्, वीक्ष्यावलोक्य, कलियुगं प्राप्तं मत्वा विज्ञाय, उत्तरां दिशं, जगाम। तपस इति शेषः ॥ २ ॥ तप इति ॥ धीरो धृतिमान्, वीर इति पाठे जितेन्द्रियः, निःसङ्गः देहतदनुबन्ध्यादिष्वासक्तिरहितः, मुक्तास्त्यक्ताः संशया येन सः, तपसि या श्रद्धा तया युतः युक्तः सन्, कृष्णे मनः, समाधाय स्थिरीकृत्य, गन्धमादनाख्यं पर्वतं, प्राविशत् ॥ ३ ॥ बदर्याश्रममिति ॥ तत्रापि बदर्याश्रमं, तत्रापि नरनारायणालयं नरनारायणस्थानं, आसाद्य प्राप्य, सर्वाणि द्वन्द्वानि शीतोष्णादीनि सहते इति तथाभूतः, शान्तः जितमनाः सन्, हरिं संसृतिबन्धहरं भगवन्तं, तपसा आराधयत् आराधयामास ॥ ४ ॥

कृष्णप्रिया

द्वारकागमन, श्रीबलरामजी का विवाह तथा श्रीकृष्ण के पास रुक्मिणीजी का सन्देशा लेकर ब्राह्मण का आना।

श्रीशुकदेवजी कहते हैं—प्यारे परीक्षित्! भगवान् श्रीकृष्ण ने इस प्रकार इक्ष्वाकुनन्दन राजा मुचुकुन्द पर अनुग्रह किया। अब उन्होंने भगवान् की परिक्रमा की, उन्हें नमस्कार किया और गुफा से बाहर निकले ॥ १ ॥ उन्होंने बाहर आकर

देखा कि सब-के-सब मनुष्य, पशु, लता और वृक्ष-वनस्पति पहले की अपेक्षा बहुत छोटे-छोटे आकार के हो गये हैं। इससे यह जानकर कि कलियुग आ गया, वे उत्तर दिशाकी ओर चल दिये ॥ २ ॥ महाराज मुचुकुन्द तपस्या, श्रद्धा, धैर्य तथा अनासक्ति से युक्त एवं संशय-सन्देह से मुक्त थे। वे अपना चित्त भगवान् श्रीकृष्ण में लगाकर गन्धमादन पर्वत पर जा पहुँचे ॥ ३ ॥ भगवान् नर-नारायण के नित्य निवास स्थान बदरिकाश्रम में जाकर बड़े शान्तभाव से गर्मी-सर्दी आदि द्वन्द्व सहते हुए वे तपस्या के द्वारा भगवान् की आराधना करने लगे ॥ ४ ॥

भगवान् पुनराव्रज्य [1]पुरीं यवनवेष्टिताम् । हत्वा म्लेच्छबलं निन्ये तदीयं द्वारकां धनम् ॥ ५ ॥
नीयमाने धने गोभिर्नृभिश्चाच्युतचोदितैः । आजगाम जरासंधस्त्रयोविंशत्यनीकपः ॥ ६ ॥
[2]विलोक्य वेगरभसं रिपुसैन्यस्य माधवौ । [3]मनुष्यचेष्टामापन्नौ राजन् दुद्रुवतुर्द्रुतम् ॥ ७ ॥
विहाय वित्तं प्रचुरमभीतौ भीरुभीतवत् । पद्भ्यां पद्मपलाशाभ्यां चेरतुर्बहुयोजनम् ॥ ८ ॥
पलायमानौ तौ दृष्ट्वा मागधः प्रहसन् बली । अन्वधावद् रथानीकैरीशयोरप्रमाणवित् ॥ ९ ॥

कर्दमक्षमा

अन्वयः—भगवान्, यवनवेष्टिताम्, पुरीम्, पुनः, आव्रज्य, म्लेच्छबलम्, हत्वा, तदीयम् धनम्, द्वारकाम्, निन्ये ॥ ५ ॥ अच्युतचोदितैः, नृभिः, गोभिः, धने, नीयमाने, त्रयोविंशत्यनीकपः, जरासंधः, आजगाम ॥ ६ ॥ राजन् ! माधवौ, रिपुसैन्यस्य, वेगरभसम्, विलोक्य, मनुष्यचेष्टाम्, आपन्नौ, द्रुतम्, दुद्रुवतुः ॥ ७ ॥ अभीतौ, भीरुभीतवत्, प्रचुरम्, वित्तम्, विहाय, पद्मपलाशाभ्याम्, पद्भ्याम् बहुयोजनम्, चेरतुः ॥ ८ ॥ बली, मागधः, तौ, पलायमानौ, दृष्ट्वा, ईशयोः, अप्रमाणवित्, प्रहसन्, रथानीकैः, अन्वधावत् ॥ ९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

निन्ये नयन्मार्गे चलति स्म ॥ ५–६ ॥ वेगरभसं वेगोद्रेकम् ॥ ७ ॥ भीरुभीतवद्भीरोरपि भीतवत् अतिभीतवदित्यर्थः । चेलतुः पलायेताम् । बहुयोजनं देशम् ॥ ८ ॥ अप्रमाणवित् प्रमाणमियत्ता तन्न वेत्तीति तथा ॥ ९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रकृतमनुसरति–भगवानिति । तदीयं यवनाहृतम् । निन्ये नेतुमुपचक्रमे ॥ ५ ॥ गोभिस्तद्युक्ताऽनोभिः । चादुष्ट्रादिभिश्च ॥ ६ ॥ वेगाधिक्यं, वेगरभसम् । यद्वा—नामैकदेशन्यायेन वे शब्देन वेदो ग्राह्यस्तं वयं गायन्तीति वेगा ब्राह्मणास्तेषां रभसं युद्धसंरंभं रिपुसैन्यस्य जरासन्धसैन्यस्य मध्ये विलोक्येत्यन्वयः । यद्वा—रपंत्यनिष्टं शापादि दुष्टेषु, शुश्रूषुषु वरांश्चेति रिपवो विप्राः । "रपेरस्येत्" । 'रप–परिभाषणे' । तेषां सैन्यस्येति सप्तदशकृत्वः पराभूतेन जरासंधेन कथंचिन्मम जयो मदग्रतो युद्धं त्यक्त्वा रामकृष्णपलायनं वा यथा भवेत्तथा यूयं कुरुतेति पृष्टा ब्राह्मणास्तमूचुः–जयस्तु तव नो भावी परन्तु वयं तव

---

[1] मधुरां यवनावृतां–वीर. ; मधुरां यवनाहृतां–विज. ; मथुरां यवने हते–प्रा. पा. ।

[2] ततो राजा जरासन्धः कालान्तानलसंनिभः । विधाय मकरव्यूहं रथनागाश्वपत्तिमत् ॥ १ ॥
अन्तश्चकार गोविन्दं व्यूहस्य निमिषान्तरे ।
ततो विलोक्य गोविन्दो वृक्षमुत्पाट्य रंहसा । गजान्रथान्हयान्युद्धे पोषयामास दुर्मदः ॥ २ ॥
कृष्णेन हन्यमानास्ते वृक्षेण रिपुकुञ्जराः । पेतुर्गतासवो भूमौ वज्रनुन्ना इवाद्रयः ॥ ३ ॥
रथाश्च रथिभिर्युक्ताः सतुरङ्गाः सचोदकाः । निष्पिष्टा इव न क्वापि दृश्यन्ते कुरुसत्तम ॥ ४ ॥
रामस्तु मुष्टिना चाजौ कुञ्जरान्मदशालिनः । जघान कुपितः शैलान्वज्रेणेव सुरेश्वरः ॥ ५ ॥
राममुष्टिप्रहारेण विकीर्णस्यन्दना नृप । न व्यदृश्यन्त भूपृष्ठे चूर्णिताः शीर्णपर्णवत् ॥ ६ ॥
यवनस्य धनं विश्वं गच्छन्तं द्वारकामनु ।
निहत्य यादवान्विश्वांस्तद्गृहीत्वा जरासुतः । अभ्यवर्तत सङ्ग्रामे रामकृष्णौ कुरूद्वह ॥ ७ ॥]
विजयेऽधिकाः ।

[3] तं चापतन्तमालोक्य सहितं सबलैर्नृपैः ।
कीर्यमाणौ शरौघेण वृष्ट्येव कीरपोतकौ । विरथौ विप्रहरणौ विवर्माणौ विसैनिकौ ॥ १ ॥
(१) विजयेऽधिकः ।

सैनिका भूत्वा गच्छामः, स श्रीकृष्णोऽस्मानप्रहार्यान्मत्वा पलायिष्यते, एवं तयोः पलायनं भावि न केवलं त्वत्तस्तदपीति स्पष्टं संहितायाम् । यच्चोक्तम्—"आततायिनमायांतमपि वेदांतपारगम् । जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवेत् ।" इति तदत्र न संगच्छते, तेषां भगवत्पलायनेच्छावत्त्वेन जिघांसाऽभावात् । माधवौ क्रीडाविशेषार्थं मधुकुले जातौ रामकृष्णौ । मथुरायां पुरा रक्षितेन रामेण संगतेः । आपन्नौ स्वीकृतवन्तौ । तथोक्तं वैष्णवे—"मनुष्यधर्मशीलस्य लीला सा जगतः पतेः । अस्त्राण्यनेकरूपाणि यदरातिषु मुंचति । मनसैव जगत्सृष्टिसंहारं च करोति यः । तस्यारिपक्षक्षपणे कियानुद्यमविस्तरः । तथापि ये मनुष्याणां धर्मास्तदनुवर्तनम् । कुर्वन्बलवता सन्धिं हीनैर्युद्धं करोत्यसौ । साम चोपप्रदानं च तथा भेदं प्रदर्शयन् । करोति दण्डपातञ्च क्वचिदेव पलायनम् । मनुष्यदेहिनां चेष्टामित्येवमनुवर्तते । लीला जगत्पतेस्तस्य छन्दतस्संप्रवर्तते ।" इति । हे राजन्निति—राजनीतिवित्त्वं सर्वं जानास्येवेति भावः ॥ ७ ॥ इत्यर्थ इति—वतिर्भीभीतत्वाभावमाह । विहाय विशेषेण पुनर्लिप्साराहित्येन हित्वा । कुतः-प्रचुरं वित्तस्य प्राचुर्याच्छत्रोर्लोभनेन विलम्बनायेत्यर्थः । पद्मपलाशाभ्यामिति भये सत्यतिकोमलांगोऽपि पादत्राणादिरहितोऽपि पलायत इति द्योतनाय, तस्य तु भयराहित्यं वतिनैवोक्तामिति ॥ ८ ॥ इयत्ताऽन्तः । अत्र प्रमाणं विभुत्वम्, बलादिभिरपरिच्छेद्यत्वमिति यावत् । अन्वधावदित्यादिना तस्य तद्धनग्रहणं निरस्तमतस्तद्धनं श्रीद्वारकायामेवायातमिति ज्ञेयम् । तदुक्तं हरिवंशे—"निवेदयामास ततो नराधिपे तदुग्रसेने प्रतिपूर्णमानसः । जनार्दनो द्वारवतीं च तां पुरीमशोभयत्तेव धनेन भूरिणा ।" इति ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मथुरां यवने हते इति पुरीं यवनवेष्टितामिति पाठद्वयम् ॥ ५ ॥ चकारादुष्ट्रादिभिश्च तदीयैरेव प्रतिवारं त्रयोविंशतिसङ्ख्यानामक्षौहिणीनां न तु न्यूनाधिकानां सङ्ग्रहस्तस्य राजभ्यस्तावत्तावत्सैन्यादाननिर्णयात् ॥ ६ ॥ माधवौ क्रीडाविशेषार्थं मधुकुले जातौ श्रीरामकृष्णौ मथुरायां पुरा रक्षितेन श्रीरामेण सङ्गतेः आपन्नौ स्वीकृतवन्तौ तथाच श्रीविष्णुपुराणे—

"मनुष्यधर्मशीलस्य लीला सा जगतः पतेः । अस्त्राण्यनेकरूपाणि यदरातिषु मुञ्चति ॥
मनसैव जगत्सृष्टिं संहारं च करोति यः । तस्यारिपक्षक्षपणे कियानुद्यमविस्तरः ॥
तथापि ये मनुष्याणां धर्मास्तदनुवर्त्तनम् । कुर्वन् बलवता सन्धिं हीनैर्युद्धङ्करोत्यसौ ॥
सामं चोपप्रदानं च तथा भेदं प्रदर्शयन् । करोति दण्डपातं च क्वचिदेव पलायनम् ॥
मनुष्यदेहिनां चेष्टामित्येवमनुवर्त्तते । लीला जगत्पतेस्तस्य छन्दतः सम्प्रवर्त्तते ॥"

इति । हे राजन्निति महाकौतुकात्सम्बोधयति ॥ ७ ॥ विशेषेण पुनर्लिप्साराहित्येनेव हित्वा कुतः ? प्रचुरं वित्तस्य प्राचुर्य्यात् शत्रोर्लोभनेन विलम्बनायेत्यर्थः । यद्वा, प्रचुरमपि अभीतावपि भीरुभीतवदिति महाभीतो यथा पलायते तथेवैत्यर्थः । अत एव पद्मपलाशाभ्यामपीति दुःखोक्तिः ॥ ८ ॥ अत्र प्रमाणं विभुत्वं बलादिभिरपरिच्छेद्यत्वमिति यावत् अनुपश्चादधावदित्यादिना तस्य तद्धनग्रहणं निरस्तम् अतस्तद्धनं श्रीद्वारकायामायातमेव ज्ञेयं तथा च श्रीहरिवंशे—

"निवेदयामास ततो नराधिपे । तदुग्रसेने परिपूर्णमानसः ॥
जनार्द्दनो द्वारवतीं तदा (च तां) पुरीमशोभयत्तेन धनेन भूरिणा ॥" इति ॥ ९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवान् सर्वशक्तिमान् श्रीकृष्णः, 'यवने हते' इत्यनाथत्वादिना तदीयम्लेच्छसेनाहननस्य सुकरतया शीघ्रत्वमभिप्रेतम् निन्ये नेतुमादिशत् ॥ ५ ॥ नृभिर्भारवाहिभिः, चकारादुष्ट्रादिभिश्च, तदीयैरेव । तत्र हेतुः—अच्युतेन आज्ञाच्युतिरहितेन भगवता चोदितैः, तदाज्ञाया अवश्यपाल्यत्वादित्यर्थः ॥ ६ ॥ माधवौ क्रीडाविशेषार्थं मधुकुले जातौ श्रीरामकृष्णौ, श्रीमथुरायामागतस्य सतो भगवतः, पुरो तस्यां सम्मन्त्र्य रक्षितेन श्रीरामेण सह संगतेः, द्रुतं तत्क्षणमेव दुद्रुवतुः, वेगेन धावित्वा पलायेताम् । कुतः ? मनुष्यचेष्टामापन्नौ स्वीकृतवन्तौ, मनुष्यक्रीडापरत्वादित्यर्थः । तथा च श्रीविष्णुपुराणे (५।२२।१४-१८)—

'मनुष्यधर्म्मशीलस्य लीला सा जगतः पतेः । अस्त्राण्यनेकरूपाणि यदरातिषु मुञ्चति ॥
मनसैव जगत्सृष्टिं संहारञ्च करोति यः । तस्यारिपक्षक्षपणे कियानुद्यम विस्तरः ॥
तथापि यो मनुष्याणां धर्म्मस्तमनुवर्त्तते । कुर्वन् बलवता सन्धिं हीनैर्युद्धं करोत्यसौ ॥
साम चोपप्रदानञ्च तथा भेदं प्रदर्शयन् । करोति दण्डपातञ्च क्वचिदेव पलायनम् ॥
मनुष्यदेहिनां चेष्टामित्येवमनुवर्ततेः । लीला जगत्पतेस्तस्यच्छन्दतः संप्रवर्त्तते ॥ इति ॥

हे राजन्निति कदाचिज्जीयते, कदाचित् पलायते चेत्येवं नीति व्यवहारो भवता ज्ञायत एवेति भावः, किंवा महाकौतुकात् सम्बोधयति ॥ ७ ॥ विशेषेण पुनर्लिप्साराहित्येन हित्वा । कुतः ? प्रचुरं वित्तस्य प्राचुर्य्यात् शत्रोर्लोभनेन विलम्बायेत्यर्थः । यद्वा, प्रचुरमपि अभीतावपि भीरुभीतवदिति महाभीतो यथा पलायते, तथैवेत्यर्थः । अत एव पद्मपलाशरूपाभ्यामपीयं शोकोक्तिः । बहुयोजनमिति श्रीमधुरातोऽतिदूरे अर्बुदाचलत्वेन प्रवर्षणाद्रेः प्रसिद्धेः ॥ ८ ॥ बलं त्रयोविंशत्यक्षौहिणीसंख्यं सैन्यं

शक्तिर्वा तद्वान्, अतः प्रहसन् उच्चैर्हसन्, किंवा अहो अद्भुतं वीरत्वं क्षत्रियत्वं चेत्यादिप्रकारेणोपहसन्, स्वैरनीकैश्चात्मसैन्यैः, यद्वा, स्वानामनीकैः समूहैः, अन्येषामनुधावनाशक्तेः। ईशयोः सर्वशक्ति युक्तयोस्तयोः प्रमाणमियत्ता तत्त्वमित्यर्थः। अनु पश्चादधावदित्यादिना तस्य तद्धनग्रहणं निरस्तम्, अतस्तद्धनं श्रीद्वारकायामायातमेवेति ज्ञेयम्। तथा च श्रीहरिवंशे (विष्णु. प. ५७।७०)—'निवेदयामास ततो नराधिपे, तदुग्रसेने प्रतिपूर्णमानसः। जनार्द्दनो द्वारवतीञ्च तां पुरीमशोभयत्तेन धनेन भूरिणा' इति ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ मुचुकुन्दानुग्रहोत्तरं भगवच्चेष्टितमाह—भगवानित्यादिना यवनैरावृतां मथुरामागत्य म्लेच्छानां बलं हत्वा। तदीयं म्लेच्छसम्बन्धि सर्वं धनं द्वारकां प्रतिनिन्ये प्रापयामास ॥ ५ ॥ अच्युतेन चोदितैर्नृभिः कर्तृभिर्गोभिः साधनैर्धने नीयमाने सति पूर्ववत्त्रयं विंशत्यक्षौहिणीसेनाधिपतिर्जरासन्ध आजगाम ॥६॥ माधवौ रामकृष्णौ जरासन्धसैन्यस्य वेगरभसं वेगोद्रेकम् अवलोक्य मनुष्यचेष्टां प्राप्तौ चिकीर्षन्तौ हेतुगर्भं वा तत्त्वात् हे राजन्! द्रुतं त्वरितं यथा तथा द्रुद्रुवतुः पलायितवन्तौ ॥ ७ ॥ तदेवाह, विहायेति। प्रचुरं प्रभूतं यावनं वित्तं विहाय भीतादपि भीतवत् पद्मपत्रसदृशाभ्यां पद्भ्यां बहुयोजनं देशं चेरतुर्जग्मतुः ॥ ८ ॥ मागधो जरासन्धस्तौ दृष्ट्वा बली स्वबलोपेतः दैहिकबलोपेतो वा ईशयो रामकृष्णयोरप्रमाणवित् ईशयोः प्रमाणं स्वरूपरूपगुणानन्त्यरूपं तन्न वेत्तीति तथाभूतः रथानीकै रथिकसैन्यैः सहान्वधावदनुदुद्राव ॥ ९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रकृतमनुसरति—भगवानिति। यवनेनाहृतमानीतम् ॥ ५ ॥ त्रयोविंशत्यनीकप; त्रयोविंशदक्षौहिणीपतिः ॥ ६ ॥ रथनागाश्वपत्तिमदिति क्रियाविशेषणं रथादिमन्तमिति व्यत्ययेन वा योज्यम् (क) दुर्मदो यथा जन्तून्हन्ति तथा लुप्तोपमम् (ख) अद्रयो गिरयः "अद्रयोऽर्कगिरिद्रुमाः" इति (ग) सतुरङ्गाः सचोदकाः ससादिनः निष्पिष्टाः हताः (घ-च) यादवैर्द्वारकां गच्छन्तं नीयमानं यवनस्य विश्वं धनं दृष्ट्वा अनुद्रुत्य यादवान्निहत्य निर्जित्य (छ) वेगरभसं योगसम्भ्रमम् ॥ ७-८ ॥ प्रमाणं ज्ञानबलेयत्तां न वेत्तीति अप्रमाणवित् ॥ ९-क ॥ गोमन्तं पर्वतमारुह्य ॥ ख ॥ प्रवर्षणाख्यं तस्य शृङ्गमापतुरिति शेषः। तत्र शृङ्गे आसतुः उपविविशतुः ॥ ग-१० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मनुष्यचेष्टामापन्नौ नतु मनुष्यत्वम्, यद्वा, मनुष्यवद् या चेष्टा या मा श्रीस्तामापन्नौ समासोऽत्र विकल्पितः ॥ ८-१५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निन्ये नेतुमुपचक्रमे ॥५-६॥ वेगरभसं वेगोद्रेकम् ॥७॥ मनुष्यचेष्टामापन्नाविति तस्य स्वभाव एवोक्तः नतु पलायनेऽयमेव सिद्धान्तः मनुष्यचेष्टामापन्नत्वेऽपि बहुशः सर्वज्ञत्वसर्वशक्तित्वदर्शनात् तत्र प्रियजनस्य कस्याप्यभावान्नापि प्रेममौग्ध्यं च व्याख्यातुं शक्यं नापि भयस्यानुकरणमेवैतदिति व्याख्येयं खिद्यति धीर्विदामपीत्युद्धवोक्तेः तस्माद् दुर्गाश्रयोऽथारिभयात् पलायनमित्युद्धव एव तमेव दृष्ट्वास्य सिद्धान्तं ज्ञास्यतीति ज्ञेयम् अभीताविति भयाभावः प्राप्तः भीरू भयशीलावन्यौ जनौ भीतौ यथा स्यातां तथा भीताविति भयं च प्राप्तमिति विरोध एवोक्तः ॥ ८ ॥ अप्रमाणवित् प्रमाणमियत्ता तन्न वेत्तीति तथा ॥ ९-११ ॥

गूढार्थदीपिनी

बलं सैन्यम्। तदीयं यवनाहृतम् धनं निन्ये नेतुमुपचक्रमे ॥ ५ ॥ गोभिर्वृषयुक्तशकटैः ॥६॥ वेगरभसं वेगाधिक्यम् ॥७॥ भीरुशब्दोऽत्यर्थकः ॥ ८ ॥ रथानीकैः रथिकसैन्यैः। प्रमाणं बलप्रमाणम् ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

निन्ये नृभिर्गोभिश्च नेतुमुपचक्रमे ॥ ५-६ ॥ वेगरभसं वेगोद्रेकम् जरासन्धविमोहनार्थं मनुष्यचेष्टाम् आपन्नौ अनुकुर्वन्तौ द्रुतं त्वरितं यथा तथा दुद्रुवतुः पलायितवन्तौ ॥ ७ ॥ तदेव प्रपञ्चयति—विहायेति। भीरुभीतवत् भीरोरपि भीतो यथा कश्चित्तद्वत् बहुयोजनं देशं चेरतुः जग्मतुः ॥ ८ ॥ जरासन्धविमोहमाह—पलायमानौ दृष्ट्वा प्रहसन् अन्वधावत् इयं लीला स्वोत्सृष्टजरासन्धवधकर्तॄणां स्वभक्तानां पाण्डवानां शौर्यख्यापनार्था तत्समानीतसैन्यस्य भूभारस्य तु संहृतत्वात् ॥ ९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यवनाहृतं तेनानीतं म्लेच्छबलं सर्वं हित्वा तदीयं धनं द्वारकां निन्ये ॥ ५ ॥ बलस्य जाते निधने च नृभिरच्युतचोदितैर्गोभिर्वृषभैर्नीयमाने सति त्रयोविंशत्यनीकं त्रयोविंशत्यक्षौहिणीसेनां पातीति स तथा। जरासन्ध आजगाम ॥ ६ ॥ कालान्ताग्निः

प्रलयानलो रथनागाश्वपत्तिमत् बलमित्यनुषज्यते । मकरव्यूहवद्ग्रहो यस्य तद्विधाय गोविन्दं व्यूहस्यान्तर्निमिषान्तरे चकार । रंहसा वेगेन दुर्मदो युद्धे ॥ ८ ॥ वज्रनुन्ना अद्रयः पर्वता इव ॥ ९ ॥ तुरङ्गसहिताः सचोदकाः सूतसहिताः ॥ १० ॥ मदेन शालन्त इति मदशालिनः ॥ शीर्णपर्णवद्विचूर्णिता भूपृष्टे विकीर्णाः सन्तो न व्यदृश्यन्त ॥ १२ ॥ द्वारकामनुगच्छन्तं गच्छत् ॥१३॥ अभि सान्मुख्येनावर्तत रिपुसैन्यस्य वेगरभसं वेगाटोपम् ॥ १४ ॥ सबलैः ससेनैः करिपोतकौ गजशिशू ॥ १५ ॥ राजन् दुद्रुवतुः । एतत्तात्पर्य स्वयं मूलकृदाह । मनुष्याणां चेष्टामापन्नौ प्राप्ताविति । नावापात्प्राप्तेति द्रुतं दुद्रुवतुरित्यन्वयः ॥ १६ ॥ प्रचुरं वित्तं विहाय यादवान्हत्वा नीतं तद्विहाय तदाशां त्यक्त्वेति यावत् । स्वभावतोऽभीतौ भीरुभीताविव भयवद्भ्योऽपि भयवन्ताविवातिशयेन भीताविवित्यर्थः ॥ १७ ॥ प्रहसन्नुपहसन्सन् रथानीकैः सहान्वधावत् । तन्मौख्ये मुखयति । ईशयोः प्रमाणं बलादीयत्तां वेत्तीति सः । स न भवतीति तथा ॥ १८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं तस्य व्यवस्थामुक्त्वा भगवतोऽपि द्वारकायां गमनमाह भगवानिति दशभिः । मध्ये तामसस्य शिवस्य ब्राह्मणानां वाक्यं कृतवानिति निरूप्यते । यवनवधानन्तरं भगवान् पुनर्मथुरामाव्रज्य, यवनैर्वेष्टितां दृष्ट्वा, मथुरानिमित्तं म्लेच्छबलं हत्वा, तदीयं धनं हतानां मुकुटादिरूपं द्वारकां निन्ये ॥ ५ ॥ **नीयमाने** इति । वृथैव धनं न परित्याज्यमिति, राज्ञे देयमिति. यवनधनं च न ग्राह्यमित्युभयं साधयितुं किञ्चिद्दूरं गृहीत्वा गतवानित्यर्थः । तत्शकटस्था एव वाहकाः पदातयो बलीवर्दाश्च । ते सर्वे भगवता प्रेरिताः जरासन्धस्य सुखार्थम् । जये हि किञ्चित्प्राप्यत इति तस्मै दानार्थं नीतवन्तः । एतस्मिन्समये भगवदिच्छयैव समागतो जरासन्धः त्रयोविंशत्यक्षौहिणीयुतः । अधिकानयने सर्वोऽपि प्राकृतः क्षीणो भवेदिति । प्रकृतिं परित्यज्य प्राकृतं सर्वमेव गृहीत्वा समायातीति ख्यापनार्थं सर्वत्र त्रयोविंशत्यक्षौहिण्य उच्यन्ते ॥ ६ ॥ ते च सर्वे लब्धवराः, पूर्वापेक्षयापि वेगवन्त इति । 'देवानां वाक्यं परिपालनीयं मनुष्यैरिति **मनुष्यचेष्टामापन्नौ**, मनुष्यभावस्वीकारे हि ब्राह्मणवाक्यं शिववाक्यं च माननीयं भवति । भागवते चास्याकथनं लोकव्यामोहनार्थम् । राजन्निति स्नेहेन संबोधनं भ्रमानुत्पादनार्थम् । द्रुतं यथा भवति, तथा दुद्रुवतुः पलायितवन्तौ ॥ ७ ॥ **विहायेति** । भारवाहकास्तु गन्तुमसमर्था इति तान्विहायैव, प्रचुरमपि वित्तं विहाय, अभीतावप्यैतौ भीतेभ्योऽपि भीताविव रथाश्वादिकमपि यवनवधात्प्राप्तं विसृज्य, पद्भ्यामेव भूमिसुखार्थं पद्मपलाशतुल्याभ्यां बहुयोजनं चेरतुः चित्रकूटमार्गेण गतौ ॥ ८ ॥ ततो मागधोऽपि भगवल्लीलामज्ञात्वा वरेण दृप्तः पृष्ठतोन्वगमदित्याह **पलायमानाविति** । **तौ** रामकृष्णौ । ननु बहुवारं धृत्वा मुक्तः, तयोर्बलं जानन्नपि कथं तत्सङ्गे गत इति चेत्, तत्राह **मागध** इति । देशदोषेण नष्टमतिरित्यर्थः । ततः प्रहसन् बलसहितः सेनासहितः अन्वधावत्, **रथानीकैः** सहेति ये शीघ्रगामिनो रथास्तानारुह्य तादृशैः सह गत इत्यर्थः । अनेन रथानां सेनायाश्च महान् क्लेशो निरूपितः । स क्लेशः सार्थको भविष्यतीत्याशङ्क्याह **ईशयोरप्रमाणविदिति** । कृष्णरामयोः प्रमाणं सामर्थ्यमादरणीयत्वं वा । तौ हि ब्राह्मणादिवाक्यं प्रमाणीकृत्य भगवान् गच्छति, न त्वशक्तः सन् इति भगवत्प्रमाणं न ज्ञातवान् । ईशयोरिति पूर्णा शक्तिर्विभक्तेति एकस्याप्यनङ्गीकारे विप्रादीनां वाक्यमप्रमाणं भवेदिति उभाभ्यां तत्प्रमाणीकृतमित्यर्थ ॥ ९ ॥

श्रीसुबोधिनीसारः

प्रकृतमाह । यवनैर्वेष्टितां रुद्धां पुरीं मथुरां पुनराव्रज्यागत्य म्लेच्छानां बलं सैन्यं त्रिकोटिरूपं हत्वा तदीयं तेषामिदं धनं द्वारकां निन्ये भगवान् प्रैषयत् ॥ ५ ॥ गोभिर्वृषभैर्नृभिः मनुष्यैः चाच्छकटादिभिः अच्युतेन कृष्णेन चोदितैः प्रेरितैर्धने नीयमाने द्वारकां प्राप्यमाने सति त्रयोविंशत्यनीकपः विकृत्यक्षौहिणीसर्वसेनास्वामी तेन प्रत्यागमनं त्रयोविंशत्यक्षौहिणीसहित इत्यपास्तम् । अक्षौहिणीभिर्विंशत्या तिसृभिरिति प्रथमागमने उक्तं तत्सर्वबलसंख्यासूचनार्थमिति गुरुचरणाः । जरासंध आजगाम ॥ ६ ॥ रिपोः शत्रोः सैन्यस्य वेगरभसं त्वरागमनं विलोक्य दृष्ट्वा मनुष्यलीलां प्राप्तौ माधवौ रामकृष्णौ द्रुतं शीघ्रं पलायांचक्रतुः । तत्र ब्रह्मणो वरदानं हेतुरिति पुराणांतरं हे राजन् ॥ ७ ॥ प्रचुरं भूरि वित्तं धनं विहाय त्यक्त्वा मार्गेऽभीतौ निर्भयौ अपि भीरोः कातरादपि भीतवत् पद्मपत्राभ्यां पद्भ्यां बहुयोजनं चेलतुः परिबभ्रमतुः ॥ ८ ॥ पलायमानौ तौ रामकृष्णौ दृष्ट्वा बली मागधो जरासंधः प्रहसन् ईशयोरीश्वरयोरप्रमाणवित् बलानभिज्ञो रथसैन्यैरन्वयात् ॥ ९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'मुचुकुन्दानुग्रहानन्तरं भगवान् किं कृतवान्' इत्यापेक्षायामाह– भगवानिति । भगवान् यवनैरावेष्टितां पुरीं मथुरां पुनरागत्य म्लेच्छानां बलं सैन्यं हत्वा तदीयं धनं भूषणादिकं द्वारकां प्रति निन्ये नेतुमुद्युक्तो बभूव ॥ ५ ॥ अच्युतेन कृष्णेन चोदितैर्नृभिः कर्तृभिः गोभिः साधनैर्धने नीयमाने सति त्रयोविंशत्यक्षौहिणीसैन्याधिपतिर्जरासन्ध आजगाम ॥ ६ ॥ त्वरितं यथा भवति तथा दुद्रुवतुः पलायितवन्तावित्यन्वयः । ननु 'समर्थौ कथं पलायितवन्तौ' तत्राह—मनुष्यचेष्टामापन्नौ स्वीकृतवन्ताविति ॥ ७ ॥ पलायनप्रकारमाह—विहायेति । नीयमानं यावनं प्रचुरं बहु वित्तं विहाय भीरोरपि भीतवत् पद्मपत्रसदृशाभ्यां

पद्भ्यां बहुयोजनं चेलतुः ॥ ८ ॥ मागधो जरासन्धः तौ पलायमानौ दृष्ट्वा प्रहसन् रथानीकैः रथिकसैन्यैः सह अन्वधावत् । प्रहासे हेतुमाह—बलीति । अनुधावने हेतुमाह—ईशयोरिति । रामकृष्णयोः प्रमाणं प्रभावं न वेत्तीति तथा सः ॥ ९ ॥

अन्वितार्थप्रकाशिका

भगवानिति । भगवान् यवनैरावेष्टितां पुरीं मथुरां पुनरागत्य म्लेच्छानां बलं सैन्यं हत्वा तदीयं धनं भूषणादिकं द्वारकां प्रति निन्ये नेतुमुद्युक्तो बभूव ॥ ५ ॥ नीयमान इति । अच्युतेन कृष्णेन चोदितैर्नृभिः कर्तृभिः गोभिः साधनैर्धने नीयमाने सति त्रयोविंशत्यक्षौहिणीसेन्यातिधिपतिर्जरासन्ध आजगाम । विलोक्येति । हे राजन् ! रिपुसैन्यस्य वेगरभसं वेगोद्रेकम् अवलोक्य मनुष्ययोग्यां चेष्टां चातुर्यक्रियामापन्नौ माधवौ रामकृष्णौ द्रुतं त्वरितं यथा भवति तथा दुद्रुवतुः पलायितवन्तौ । मनुष्यचेष्टामित्यादेर्वस्तुतोऽयं भगवतोऽभिप्रायः येषां रक्षार्थं मया योद्धव्यं ते ज्ञातिसंबन्धिप्रमुखा द्वारकां प्रापिता एव । अधुना केवलाभ्यां मागधबलनाशने कृते हतोत्साहो जरासन्धो रुक्मिणीविवाहे मां योधयितुं नागमिष्यत्येव । अधुना पराजयाभासे प्रदर्शिते तु उत्साहवशाद् रुक्मिणीविवाहेऽपि आगमिष्यत्येव । एवं सति तत्र सर्वेषां प्रतिपक्षभूपानां युगपदेव सम्मेलने एकदैव सर्वान् जेष्यामीति व्यापारलाघवं वीरेषु कीर्तिः मत्पराक्रमदर्शनेव रुक्मिणीहर्षो बैरिणां युगपदुत्साहभङ्गश्चेति कार्यचतुष्कसम्पत्तिः ॥ ६–७ ॥ विहायेति । नीयमानं यावनं प्रचुरं बहुवित्तं विहाय भीरोरपि भीतवत् अतिभीतवदित्यर्थः । पद्मपलाशसदृशाभ्यां पद्भ्यां बहुयोजनं देशं चेलतुः पलायेताम् ॥ ८ ॥ पलायमानाविति । बली ईशयो रामकृष्णयोः प्रमाणमियत्तां प्रभावं वा न वेत्ति तादृशो मागधः जरासन्धः तौ पलायमानौ दृष्ट्वा प्रहसन् रथानीकैः रथिकसैन्यैः सहान्वधावत् । अस्यानीकैः सह पृष्ठतो धावनात्तद्धनं निर्विघ्नं द्वारकां नीतमिति ज्ञेयम् ॥ ९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुरीं मथुराम् ॥ ५ ॥ अच्युतेन नोदितैः प्रेरितः ॥ ६ ॥ श्रीहरिकृष्णाय नमोनमः । वेगरभसं वेगाधिक्यं मनुष्यचेष्टां आपन्नौ स्वीकृतवंतौ । तथा विष्णुपुराणे ॥ मनसैव जगत्सृष्टिं संहारं च करोति यः । तस्यारिपक्षक्षपणे कियानुद्यमविस्तरः ॥ कुर्वन् बलवता संधिं हीनैर्युद्धं करोत्यसौ साम चोपप्रदानं च तथा भेदं प्रदर्शयन् । करोति दंडपातं च क्वचिदेव पलायनम् ॥ मनुष्यदेहिनां चेष्टामित्येवमनुवर्त्तते इति ॥ हे राजन् द्रुतं शीघ्रम् ॥७॥ प्रचुरं बहुलं भीरोर्भयशीलादपि भीतवत् ॥ भीरुनरवत् ॥ चेलतुः पलायतः स्म ॥ ८ ॥ प्रमाणं सामर्थ्यप्रमाणं वेत्तीति प्रमाणवित् ॥ तथा भूतो न भवति अप्रमाणवित् ॥ ९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ मुचुकुन्दानुग्रहोत्तरवर्त्ति भगवच्चेष्टितमाह ॥ भगवानिति ॥ अथ भगवान्, पुनः यवनवेष्टितां पुरीं मथुरां, आव्रज्यागत्य, म्लेच्छबलं हत्वा, तदीयं म्लेच्छसैन्यसंबन्धि, धनं द्वारिकां, निन्ये प्रापयामास ॥ ५ ॥ नीयमान इति ॥ अच्युतचोदितैर्भगवता संप्रेरितैः, नृभिः कर्तृभिः, गोभिः करणैः, धने नीयमाने द्वारिकां प्रापितप्राये सति, त्रयोविंशत्यनीकपः त्रयोविंशत्यक्षौहिणी सेनाधिपः जरासंधः, आजगाम ॥ ६ ॥ विलोक्येति ॥ हे राजन्, माधवौ रामकृष्णौ, रिपुसैन्यस्य जरासंधसैन्यस्य, वेगरभसं वेगोद्रेकं, विलोक्यावलोक्य, मनुष्यचेष्टां आपन्नौ प्राप्तौ सन्तौ, द्रुतं त्वरितं यथा तथेत्यर्थः । दुद्रुवतुः पलायितवन्तौ । नृणां चेष्टां चिकीर्षन्ताविति पाठे, चिकीर्षन्ताविति हेतुगर्भम् । तत्त्वात्, द्रुतं दुद्रुवतुः ॥ ७ ॥ तदेवाह ॥ विहायेति ॥ प्रचुरं प्रभूतं, वित्तं म्लेच्छसैनीयस्वापतेयं, विहाय नीतावशिष्टं परित्यज्य, अभीतौ सन्तावपि, भीरुभीतवत् भीरोरपि भीतवत् अतिभीतदित्यर्थः । पद्मपलाशाभ्यां पद्मपत्रसमानाभ्यां पद्भ्यां, बहुयोजनं अपरिमितयोजनान्वितदेशं चेलतुर्जग्मतुः ॥ ८ ॥ पलायमानाविति ॥ बली स्वसैन्योपेतः दैहिकबलोपेतो वा मागधो जरासंधः, तौ रामकृष्णौ, पलायमानौ दृष्ट्वा, ईशयोरीश्वरयोः रामकृष्णयोः, यतः अप्रमाणवित् स्वरूपगुणचारित्र्यानन्तताऽनभिज्ञः । अत एव, प्रहसन् सन्, रथानीकैः रथिकसैन्यैः सह, अन्वधावदनुदुद्राव ॥ ९ ॥

कृष्णप्रिया

इधर भगवान् श्रीकृष्ण मथुरापुरी में लौट आये। अब तक कालयवन की सेना ने उसे घेर रक्खा था । अब उन्होंने म्लेच्छों की सेना का संहार किया और उसका सारा धन छीनकर द्वारका को ले चले ॥ ५ ॥ जिस समय भगवान् श्रीकृष्ण के आज्ञानुसार मनुष्यों और बैलों पर वह धन ले जाया जाने लगा, उसी समय मगधराज जरासन्ध फिर (अठारहवीं बार) तेईस अक्षौहिणी सेना लेकर आ धमका ॥ ६ ॥ परीक्षित् ! शत्रु-सेना का प्रबल वेग देखकर भगवान् श्रीकृष्ण और बलराम मनुष्यों की-सी लीला करते हुए उसके सामने से बड़ी फुर्ती के साथ भाग निकले ॥ ७ ॥ उनके मनमें तनिक भी भय न था । फिर भी मानो अत्यन्त भयभीत हो गये हों—इस प्रकार का नाट्य करते हुए, वह सब-का-सब धन वहीं छोड़कर अनेक योजनों तक वे अपने कमलदल के समान सुकोमल चरणों से ही—पैदल भागते चले गये ॥ ८ ॥ जब महाबली मगधराज जरासन्ध ने देखा कि श्रीकृष्ण और बलराम तो भाग रहे हैं, तब वह हँसने लगा और अपनी रथ-सेना के साथ उनका पीछा करने लगा । उसे भगवान् श्रीकृष्ण और बलरामजी के ऐश्वर्य, प्रभाव आदि का ज्ञान न था ॥ ९ ॥

प्रद्रुत्य[1] दूरं संश्रान्तौ तुङ्गमारुहतां गिरिम् । प्रवर्षणाख्यं भगवान् नित्यदा यत्र वर्षति ॥ १० ॥
गिरौ निलीनावाज्ञाय नाधिगम्य पदं नृप । ददाह गिरिमेधोभिः समन्तादग्निमुत्सृजन् ॥ ११ ॥
[2]तत [3]उत्पत्य तरसा दह्यमानतटादुभौ । दशैकयोजनोत्तुङ्गान्निपेततुरधो भुवि ॥ १२ ॥
अलक्ष्यमाणौ रिपुणा सानुगेन यदूत्तमौ । [5]स्वपुरं पुनरायातौ समुद्रपरिखां नृप ॥ १३ ॥

कर्दमक्षमा

अन्वयः—दूरम्, प्रद्रुत्य, संश्रान्तौ, यत्र, भगवान्, (पर्जन्यः) नित्यदा, वर्षति, प्रवर्षणाख्यम्, तुङ्गम्, गिरिम्, आरुहताम् ॥ १० ॥ हे नृप ! गिरौ, निलीनौ आज्ञाय, पदम्, नाधिगम्य, समन्तात्, अग्निम्, उत्सृजन्, एधोभिः, गिरिम्, ददाह ॥११॥ ततः, उभौ, दह्यमानतटात् दशैकयोजनोत्तुङ्गात्, तरसा, उत्पत्य, भुवि, अधः, निपेततुः ॥ १२ ॥ नृप ? सानुगेन, रिपुणा, अलक्ष्यमाणौ, यदूत्तमौ, समुद्रपरिखाम्, स्वपुरम्, पुनः, आयातौ ॥ १३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तुंगमेकादशयोजनोन्नतम् । प्रकर्षेण वर्षत्यस्मिन्निति प्रवर्षण इत्याख्या यस्य तम् । तदाह । भगवानिति । भगवानिन्द्रः ॥ १० ॥ तत्र विचिन्वन्नपि तयोः पदं निलयस्थानमनधिगम्य ॥११॥ ततो गिरेः दश चैकं च योजनानि तावदुत्तुंगान्मागधसंरोधदेशमतिक्रम्य परतोऽधो निपेततुः ॥ १२-१४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गिरिं गोमन्तम् "तावारुरुहतुर्वीरौ गोमंतमुदिते रवौ" इति हरिवंशोक्तेः । प्रवर्षणाख्यमिति गिरेरग्निदाहशंका निरस्ता ॥ १० ॥ निलीनौ गुप्तौ । पदं पादचिह्नम् । ततोऽग्रेऽनधिगम्य । एधोभिः काष्ठैः 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः ॥ निलीनौ तृणगुल्मादिषु तिरोहितौ । तयोः पादचिह्नमन्यत्राऽप्राप्येति हेतुः । ददाह दग्धुमारेभे । नृप इति बहुजनाधीशत्वेन सामर्थ्यं तत्र दर्शितम् ॥ ११ ॥ उभौ रामकृष्णौ ॥ दह्यमानः तटः प्रान्तभागो यस्य तस्मात् । अधो गिरेस्तत्रापि भुवि न तु कण्टकजलादौ । अनेन निःशब्दत्वेन च सुदूरे तयोः सुखपतनं पक्षिवदभिप्रेतम् ॥ १२ ॥ रिपुणा जरासंधेन । स्वपुरं द्वारकाम् । समुद्रः परिखा खातनदी यस्यास्ताम् । "खेयं तु परिखाधारस्त्वंभसां यत्र धारणम्" इत्यमरः ॥ अलक्ष्यमाणाविति धूमावृतसर्वदिक्त्वात् । रिपुणेति । रिपुत्वात्सावधानेनापीत्यर्थः । सानुगेन महासैन्येनापि सह । यदूत्तमाविति यादवान्नन्दयन्ताविति भावः । नृपेति नृपाणां क्रूरस्वभावादिति भावः ॥ १३ ॥

---

[1] द्रौ-विजये न स्तः । [2] एते षोडश विजयेऽधिकाः ।

प्रहृत्य वीरौ विश्रान्तौ करवीरपुरे निशि । तावारुहतुर्वीरौ गोमन्तमुदिते रवौ ॥ १ ॥
सिद्धचारणगन्धर्वविद्याधरनिषेवितम् । आरुह्य शैवं गोमन्तं रामकृष्णौ त्वरान्वितौ ॥ २ ॥
प्रवर्षणाख्यं तच्छृङ्गं यत्राब्दा नित्यवर्षिणः । तत्र तावासतू राजन् फलमूलाशनौ सुखम् ॥ ३ ॥
जरासन्धस्तु दुष्टात्मा तावनुद्रुत्य माधवौ । रुरोध शैलं गोमन्तं महत्या सेनया वृतः ॥ ४ ॥
स भूपालान्समाहूय स्वानुगान्युद्धदुर्मदान् । कलिङ्गं कुञ्जरपतिं सुराष्ट्राधिपतिं तथा ॥ ५ ॥
जयद्रथं सिन्धुपतिं सोमदत्तं च कौरवम् । गान्धारराजं शकुनिं वैदर्भं रुक्मिमेव च ॥ ६ ॥
सुदक्षिणं च कांभोजं विराटं मत्स्यभूपतिम् । एतानाज्ञापयामास पूर्वस्यां दिशि भूपतीन् ॥ ७ ॥
पाञ्चालराजं द्रुपदं दमघोषं च चेदिपम् । ब्रह्मदत्तं च साल्वेशमेकलव्यं निषादपम् ॥ ८ ॥
बाह्लीकं च कुरुश्रेष्ठं युधामन्युं च दुर्जयम् । विन्दानुविन्दावावन्त्यौ काशिराजं च पौण्ड्रकम् ॥ ९ ॥
आज्ञापयामास नृपानेतान्वीरो जरासुतः । गिरिं गोमन्तमारोढुं दक्षिणस्यां दिशि प्रभो ॥ १० ॥
द्रुमं किंपुरुषाधीशं दन्तवक्त्रं सहानुजम् । वीरं विदेहराजानं भूरिश्रवसमेव च ॥ ११ ॥
करूशेशं बृहच्चापं दाशार्णं च शतध्वजम् । शैब्यं सुवीरराजानं दरदं च महारथम् ॥ १२ ॥
एतान्महीपतीन्राजन् जरासन्धोऽमितद्युतिः । प्राह गोमन्तमारोढुं पश्चिमस्यां दिशि द्रुतम् ॥ १३ ॥
त्रिगर्तं च सुशर्माणं बलिनं वेणुदारिणम् । कुलिन्दं च महासत्वं केकयानपि भूपतोन् ॥ १४ ॥
शिशुपालं च भूपालं भीष्मकं चापि दुर्जयम् । पुरस्कृत्यारुरोहाशु कौबेर्यां मागधो दिशि ॥ १५
एवं गोमन्तमारुह्य सर्वर्तुफलपादपम् ।
विचित्य तत्र सर्वत्राप्यधः शृङ्गात्प्रवर्षणात् । चिच्छिदुः सकलान्वृक्षान्नापश्यन्राममाधवौ ॥ १६ ॥

[3] उत्प्लुत्य-वीर. विज. । [4] मानात्तु तावुभौ-विज. । [5] पुरीं-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रवर्षणाख्यमिति तद्गिरेरग्निदाहशङ्कापि निरस्ता ॥ १० ॥ नाधिगम्येति तैर्व्याख्यातम् । यद्वा, आज्ञायेत्यत्र हेतुः तयोः पदं पादचिह्नमन्यत्राप्राप्येति ददाह दग्धुमारेभे नृप इति तत्र शक्त्यतिशयः सूचितः ॥ ११ ॥ दह्यमानं तटं प्रान्तभागमात्रं यस्य तस्मात् अधो गिरेः तत्रापि भूप्रदेशे न तु कण्टकजलादौ अनेन निःशब्देन च सुदूरे तयोः सुखपतनमभिप्रेतम् ॥ १२ ॥ अलक्ष्यमाणाविति धूमावृतसर्वदिक्त्वात् रिपुणेति । रिपुत्वात्सावधानेनापीत्यर्थः । तत्रापि सानुगेन महासैन्येनापि सह यदूत्तमाविति यादवानन्दयन्ताविति भावः ॥ १३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रकर्षेण सुकोमलतरपादगत्यैव, द्रुत्वा वेगतो धावनेन गत्वा, अतः सुष्ठु श्रान्तौ सन्तौ, सु-शब्देन श्रान्तत्वस्यापि लीलाविशेषकृतत्वाच्छोभनत्वमेव सूच्यते । गिर्य्यारोहणे हेतुः—तुंगमिति । किञ्च, प्रवर्षणाख्यमित्यादि । एवं तद्गिरेरग्निदाहशंकापि निरस्ता ॥ १० ॥ गिरौ तस्मिन्नेव नितरां परमादृश्यत्वेन लीनौ, आ सम्यक् ज्ञात्वा तस्मात्तयोर्निष्क्रमचिह्नादर्शनात्, मृगखयादिहर्षकोलाहलादिना तत्र प्रवेशलक्षणाच्च, नाधिगम्येति तैर्व्याख्यातम् । यद्वा, आज्ञायेत्यत्र हेतुः—तयोः पदं कुत्राप्यप्राप्येति, समन्तादष्टदिक्षु उत्सृजन् दूरतः क्षिपन् ददाह दग्धुमारेभे । नृप इति बहुतरात्ममनुष्यैराज्ञाप्य तत्राग्निं प्रक्षिप्तवानिति भावः ॥ ११ ॥ तरसा वेगेन, उत्प्लुत्य उच्चैः कुर्द्दित्वा, दह्यमानं तटं प्रान्तभागमात्रं यस्य तस्मात्, अधो गिरेः, तत्रापि भूप्रदेशे । अनेन निःशब्देन च सुदूरे तयोः सुखपतनमभिप्रेतम् । तच्च तैर्व्यञ्जितमेव ॥ १२ ॥ रिपुणेति—वैरेण सदा तयोरन्वेषणपरत्वमभिप्रेतम् । तथाप्यलक्ष्यमाणौ केनचिदपि लक्षणेनाज्ञायमानौ, सानुगेस्वयं निजानुगैरपीत्यर्थः । वस्तुतस्तु रिपुत्वेनालक्ष्यत्वं युक्तमेवेति भावः । यदुत्तमाविति यादवानां सुखाद्यर्थमिति भावः । स्वपुरीं स्वयं निर्म्मितां पुरीं द्वारकां समुद्रपरिखमिति जरासन्धाद्यगम्यत्वमुक्तम् । हे नृपेति प्रहर्षोदयात् ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तौ रामकृष्णौ प्रद्रुत्य पलायित्वा श्रान्तौ तुङ्गमुन्नतं प्रवर्षणाख्यं गिरिमारूढवन्तौ । आख्याया अन्वर्थमाह, भगवान्पर्जन्यो यत्र गिरौ नित्यदा वर्षति प्रकृष्टं नित्यमस्मिन्वर्षतीति प्रवर्षणः अधिकरणे ल्युट् ॥ १० ॥ स जरासन्धः हे नृप ! पदं रामकृष्णयोः पादाङ्कितं तत्र तत्र भूप्रदेशमधिगम्यावलोक्य तेन लिङ्गेन गिरौ विलीनावन्तर्हितावाज्ञाय अनुमाय नाधिगम्येति पाठे तत्र विचिन्वन्नपि तयोः पदं नियतस्थानमज्ञात्वा केवलं तत्र विलीनौ ज्ञात्वा तं गिरिसर्वतो दशयोजनम् एधोभिः काष्ठैश्चितिं कारयित्वेति शेषः, तत्राग्निमुत्सृजत् ददाह ॥ ११ ॥ तदा दह्यमानानि तटानि यस्य तस्माद्गिरेरुत्प्लुत्य दशैकं च योजनानि यानि तावत्तुङ्गाद्गिरेर्मागधसंरोधदेशमतिक्रम्य परतोऽधो निपेततुः ॥ १२ ॥ ततो रिपुणा मागधेनाऽदृश्यमाणौ रामकृष्णौ समुद्र एव परिखा यस्यास्तां पुरीं द्वारकां प्रति पुनराजग्मतुः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एधोभिः काष्ठैः ॥ ११-१२ ॥ समुद्र एव परिखा खातं नदी यस्याः सा तथा ॥ १३-१४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

ततो गिरेः दश च एकं च यानि तावत्तुङ्गात् अधः मागधसैन्यसंरोधदेशमतिक्रम्य परतो निपेततुः ॥ १२-१४ ॥

गूढार्थदीपिनी

आरुहतां बाहुलकाच्च्लेरङ् । भगवान् इन्द्रः ॥ १० ॥ निलीनौ तिरोहितौ । पदं निलयस्थानम् । एधोभिः काष्ठैः गिरिं वेष्टयित्वा । उत्सृजन् प्रक्षिपन् ॥ ११ ॥ ततो गिरेः सकाशात् । तटः प्रान्तभागः ॥ १२ ॥ स्वपुरं द्वारकाम् ॥ १३-१४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवानिन्द्रः ॥ १० ॥ पदं प्रवेशस्थानम् ॥ ११ ॥ दश चैकञ्च यानि योजनानि तावदुत्तुङ्गात् ॥ १२-१४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वीरौ दूरमित्यपि पाठौ । निशि करवीरपुरे विश्रान्तौ विश्रामं प्राप्तौ रवावुदिते सति ॥ १९ ॥ त्वरान्वितौ गोमन्तं शैलमारुह्य ॥ २० ॥ तस्य शृङ्गं तत्र सुखमासतुः ॥ २१ ॥ तौ माधवापनुद्रुत्य स्वयं महत्या सेनया वृतः स रुरोध ॥ २२ ॥ स्वमनुगच्छन्तीति स्वानुगास्तान् कुञ्जरपतिं नरकम् ॥ २३ ॥ सिन्धुपतिर्जयद्रथमित्येकाधिकरण्यम् । तथैव कौरवं सोमदत्तमिति । एवमुत्तरत्रापि योग्यस्थले ॥ २४ ॥ एतान्भूपतीन्पूर्वस्यां दिशि आज्ञापयामास ॥ २५ ॥ निषादस्वामिनम् ॥ २६ ॥ दुर्जयानिति

यथायोग्यान्वयि ॥ २७ ॥ आरोढुमित्येतदत्रैव पूर्वत्राप्यन्वेति ॥ २८ ॥ सहानुजं सविडूरथं विदेहराजानम् । समासान्तो विधिरनित्य इति न टच् ॥ २९ ॥ दरदं नाम्ना ॥ ३० ॥ अमितद्युतिः पराक्रमभ्रमसमय इति ॥ ३१ ॥ वेणुदारिणं राजानम् ॥ ३२ ॥ मागधः स्वयम् ॥ ३३ ॥ सर्वर्तुफलपादपम् । एकस्मिनृतावपि । विचिन्त्य मृगयित्वा ॥ ३४ ॥ नापश्यत् । गिरावेव यत्र कुत्रचिद्विलीनौ । आज्ञाय ज्ञात्वा पदं तत्स्थलं नाधिगम्याज्ञात्वा ॥ ३५ ॥ एधोभिः काष्ठैः । मुख्यकर्तृविवक्षयोत्सृजन् ददाहेत्येकवचनम् ॥ ३६ ॥ दशैकयोजनोत्तुङ्गादेकादशयोजनोंच्छ्रिताच्छृङ्गात्सानुगेन भृत्येन सानुस्थेनेति वा । लक्ष्यमाणावधोभुवि निपेततुः ॥ ३७ ॥ समुद्र एव परिखा यस्याः सा तां स्वेषां पूस्तां स्वपूराम् । समुद्रपरिखमिति पाठे पुरशब्द इति ज्ञेयम् ॥ ३८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो रामकृष्णौ पर्वतेन प्रार्थितवरौ तत्प्रियार्थं तुङ्गं गिरिमारुहताम् । स हि पर्वतः सर्वदा शीतेन व्याप्तः, भगवन्तं शीतनिवृत्त्यर्थं विज्ञापयामास । तत्र हि न कदाचिदपि सूर्याग्निसम्बन्धः । मेघानां तत्प्रियं स्थानम् । अतो मेघाच्छन्न एव तिष्ठतीति न सूर्यसम्बन्धः । **बर्षतीति** नाग्निसम्बन्धः । ततो **भगवान् पूर्वं** तस्मै वरं दत्तवान्, अहमागत्य ते शीतं निवारयिष्यामीति । ततो भगवतः अद्भुतकर्मत्वं प्रतिपादयितुं श्रान्तिमुक्त्वा पर्वतारोहणं वदति **प्रद्रुत्येति** । न हि कश्चिद्दूरं प्रद्रुत्य तुङ्गं गिरिमारोहति । उच्चारोहणं ह्यश्रान्तमपि श्रमयति, **भगवतः** सहस्रोपायानां विद्यमानत्वात् निलीय स्थित्यर्थं किं पर्वतारोहणमुच्चस्थानमपेक्षते, प्रत्युत उच्चस्थितं सर्वोऽपि पश्यति, अतोऽत्र **भगवतः** अद्भुतलीलां कथयन् विरोधप्रकारेण कथयति । **दूरं प्रद्रुत्य** धावनं कृत्वा सम्यक् श्रान्तौ जातौ । नहीशयोः शीघ्रगमनं श्रमो वा सम्भवति । तत्रापि तुङ्गमत्युच्चं गिरिम् आरुहतां गुप्ततया । तत्रारोहणप्रयोजनमाह **प्रवर्षणाख्यमिति** । प्रकर्षेण वर्षणं यत्रेति । रूढिभ्रमव्युदासाय स्वयमेव योगं प्रदर्शयति भगवान् नित्यदा यत्र वर्षतीति । तत्र हि सर्वदा **भगवान्** वर्षति । मेघा हि कदाचित् क्वचिद्वर्षन्ति, तेषामधिष्ठातृरूपो भगवान् विष्णुः । 'पर्वतानामधिपति'रिति श्रुतेः । स्वयमेव तत्र वर्षति, अन्यथा लोके वृष्टिप्रवृत्तिर्न स्यात् ॥ १० ॥ ततो भ्रान्तस्य जरासन्धस्य कृत्यमाह गिराविति । पर्वतारोहणे कैश्चित् दृष्ट एव, तत्रापि अग्रे न गत इत्यत्र विचारमपि कृतवानित्याह **नाधिगम्येति** । ततः पर्वतादग्रे **पदं** गमनचिह्नं **नाधिगम्य** अप्राप्य । दाहे भगवता हेतुः सम्पादितः स सत्य एव जात इति वक्तुं तस्य निलीनाविति ज्ञानमुत्पादितम् । ततो दाहार्थमेव तथा प्रयत्नः कृत इति सत्यसङ्कल्पस्य भगवतः इच्छया गिरिमेधोभिर्ददाह । सर्वत्र वृक्षान् छित्त्वा परितस्तृणादिना दाहं कारितवान् ॥ ११ ॥ ततो भगवान् पर्वतप्रार्थितं विधाय ततोऽग्रे गत इत्याह **तत उत्पत्येति** । **तरसा** शीघ्रमेव यावदग्निः प्रज्वलति, भगवति विद्यमाने अग्निः पर्वतं न दहेदिति । न तु दाहभयात् । दह्यमानाः तटाः यस्य । सर्वत्र दाहे उद्भूते उभौ पूर्णशक्तिर्भगवान् **दशैकयोजनोत्तुङ्गादिति** । एकादशयोजनं स उत्तुङ्गः, तत उभावपि अधः पर्वतस्य प्रस्तरभागमपि परित्यज्य भूभागे निपेततुः । केचित्तु अतिदाहे पुनः पर्वतप्रार्थनायां तं भूमौ नेतुम् उपर्युत्थाय पादपीडनेन तं भूमौ प्रवेशयन्नेव स्वयं दूरे गत इत्याहुः ॥ १२ ॥ ततः पुनरपि तस्य प्रवृत्तिः स्यादिति पूर्वमपि स्वेच्छयैव स प्रवृत्त इति ज्ञापयन् तेनालक्ष्यमाणावेव द्वारकां गतौ । तत्र न भगवता कश्चनाधिकः प्रयत्नः कृतः । स मा पश्यत्विति । किन्तु स्वदोषेणैव स न दृष्टवानिति ख्यापयितुमाह **रिपुणेति** । दुष्टबुद्ध्यैव न दृष्टवान्, तत्सम्बन्धादन्यैरपि न दृष्टमिति **सानुगेनेत्युक्तम्** । ननु कार्यस्य सर्वस्यापि कृतत्वात् श्वेतद्वीपादावेव कुतो न गतौ, द्वारकागमने को हेतुरिति चेत्, तत्राह **यदूत्तमाविति** । अन्यथा यदुकुले अवतारं न कुर्यात् अतो यादवहितार्थं स्वपुरं यातौ । **पुनरायाताविति**त्यनेन पूर्वमुभावपि स्वयं गत्वा तान् स्थापितवन्ताविति विज्ञायते । तस्य भिन्नद्वीपत्वं कलिप्रवेशाभावाय निरूपयन्नाह **समुद्रपरिखामिति** । समुद्र एव परिखा यस्येति । विस्तारोऽप्यनेन सूचितः **नृपेति**त्यप्रतारणाय संबोधनम् ॥१३॥

श्रीसुबोधिनी–सारः

दूरं प्रद्रुत्य पलाय्य संश्रांतौ खेदयुक्तौ तुंगम् एकादशयोजनोत्सेधं गिरिं पर्वतं प्रवर्षणनामानमारुहताम् आरोहणं कृतवंतौ गिरेर्निरुक्तिमाह । भगवान्मेघो नित्यदा सदा यत्र वर्षति ॥ १० ॥ पदे चरणचिह्ने नाधिगम्याऽप्राप्यालक्ष्यगिरौ निलीनौ इति ज्ञात्वा समंताच्चतुर्दिशं संततमग्निमुद्दीपयन् एधोभिः काष्ठैर्गिरिं पर्वतं ददाह हे नृप ॥ ११ ॥ तत एकादशयोजनोत्तुंगात् दह्यमानं तटं यस्य तस्माद्गिरेः उत्पत्य तरसा वेगेनाधो भुवि तौ निपेततुः ॥१२॥ सानुगेन सभृत्येन रिपुणा जरासंधेनालक्ष्यमाणौ न ज्ञायमानौ यदूत्तमौ तौ समुद्रः परिखा यस्यास्तां स्वपुरं द्वारकां पुनरागतौ हे नृप ॥ १३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दूरं प्रद्रुत्य पलायित्वा सुश्रान्तौ रामकृष्णौ तुङ्गमत्युन्नतं प्रवर्षणाख्यं गिरिमारुहताम् । प्रवर्षणाख्याया अन्वर्थमाह— भगवान् पर्जन्यो यत्र गिरौ नित्यदा वर्षतीति ॥ १० ॥ हे नृप ! जरासन्धस्तौ गिरौ निलीनावाज्ञाय तत्र विचिन्वन्नपि तयोः पदं निलयस्थानमनधिगम्य अज्ञात्वा तद्दाहार्थं एधोभिः काष्ठैर्गिरिं समन्ताद्वेष्टयित्वा अग्निमुत्सृजन् काष्ठेषु प्रक्षिपन् ददाहेत्यन्वयः ॥११॥ दह्यमानानि तटानि यस्य तस्मात् दश चैकं च यानि योजनानि तावदुत्तुङ्गात्ततो गिरेः सकाशात् उभौ तरसा वेगेन उत्प्लुत्य

मागधसंरोधमतिक्रम्य परतोऽधो भुवि भूमौ निपेततुः ॥ १२ ॥ 'भगवतो राजकार्यमप्यद्भुतम्' इति सूचयन् सम्बोधयति—नृपेति सानुगेन अनुगैः सैन्यैः सहितेन रिपुणा जरासन्धेन अलक्ष्यमाणौ यदूत्तमौ रामकृष्णौ समुद्र एव परिखा यस्यास्तां पुरीं द्वारकां प्रति पुनरायातावित्यन्वयः ॥ १३ ॥

अन्वितार्थप्रकाशिका

प्रद्रुत्येति । दूरं प्रद्रुत्य पलाय्य सुश्रान्तौ रामकृष्णौ तुङ्गमत्युन्नतं प्रकर्षेण वर्षत्यस्मिन्निति प्रवर्षणाख्यम् अग्निदाहशङ्काशून्यं गिरिमारुहताम् । छान्दसश्च्लेरङ् । भगवान् पर्जन्यो यत्र गिरौ नित्यदा वर्षति ॥ १० ॥ गिराविति । हे नृप ! जरासन्धस्तौ रामकृष्णौ गिरौ निलीनावाज्ञाय तत्र विचिन्वन्नपि तयोः पदं निलयस्थानमनधिगम्य अज्ञात्वा । यद्वा । गिरेरन्यत्र तयोः पदचिह्नं नाधिगम्य अतः गिरावेव क्वचिन्निलीनावन्तर्हितावाज्ञायेति तद्दाहार्थम् एधोभिः काष्ठैर्गिरिं समन्ताद्वेष्टयित्वा अग्निमुत्सृजन् काष्ठेषु प्रक्षिपन् ददाह ॥ ११ ॥ तत इति । दह्यमानं तटं प्रान्तभागमात्रं यस्य तस्मात् दश चैकं च यानि योजनानि तावदुत्तुङ्गात्ततो गिरेः सकाशात्तरसा वेगेन उत्प्लुत्य मागधसंरोधदेशमतिक्रम्य परतोऽधो भुवि भूमौ निपेततुः ॥ १२ ॥ अलक्ष्यमाणाविति ॥ हे नृप ! सानुगेन अनुगैः सैन्यैः सहितेन रिपुणा जरासन्धेनालक्ष्यमाणौ यदूत्तमौ रामकृष्णौ समुद्र एव परिखा यस्यास्तां पुरीं द्वारकां प्रति पुनरायातौ ॥ १३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रकर्षेण वर्षत्यस्मिन्निति प्रवर्षण इत्याख्यायस्य तम् । भगवान् इंद्रः ॥ १० ॥ आज्ञाय ज्ञात्वा । पदं तयोर्गुप्तस्थितिस्थानं नाधिगम्याप्राप्य । एधोभिः काष्ठैः ॥ ११ ॥ दह्यमानास्तटाः सर्वतः । प्रांतभागा यस्य तस्मात् । दश चैकं च यानि योजनानि तावत्प्रमाणोत्तुंगादुच्चात् ततः पर्वतादुभौ रामकृष्णौ सैन्यरुद्धदेशात्परतोऽधोभुवि निपेततुः ॥ १२ ॥ सानुगेन सानीकेन स्वपुरं द्वारिकाम् ॥ १३–१४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रद्रुत्येति ॥ ताविति शेषः । रामकृष्णावित्यर्थः । दूरं, प्रद्रुत्य पलायित्वा, संश्रान्तौ, सन्तौ, तुङ्गमत्युच्चं, गिरिं गोमन्तपर्वतं, आरुहतां, ततोऽपि, प्रवर्षणाख्यं तच्छिखरमिति शेषः आरुहताम् । कथंभूतं तदित्यत्राह । यत्र प्रवर्षणाख्ये गोमन्तशिखरे, भगवान् पर्जन्यः, नित्यदा वर्षति ॥ १० ॥ गिराविति ॥ हे राजन्, नृपो जरासंधः, गिरौ पर्वते निलीनौ आज्ञाय, तत्रापि पदं तयोर्निलयनस्थानं, न अधिगम्य, समन्तात्पर्वतस्य सर्वतः अग्निं उत्सृजन्, गिरिं एधोभिः काष्ठैः, ददाह । गिरेः परितो दशदशयोजनकाष्ठचितिं कारयित्वा तत्राग्निं प्रदीप्य गिरिं ददाहेत्यर्थ ॥ ११ ॥ तत इति ॥ ततस्तदा, दह्यमानात् दशैकयोजनोत्तुङ्गात् तटात् गिरेः प्रदेशविशेषात्, उभावपि, तरसा उत्पत्य मागधसंरुद्धप्रदेशमतिक्रम्येति शेषः । भुवि अधः, निपेततुः ॥ १२ ॥ अलक्ष्यमाणाविति ॥ हे नृप, ततः यदूत्तमौ रामकृष्णौ, सानुगेनानुगैः सहितेन, रिपुणा मागधेन, अलक्ष्यमाणौ अदृश्यमानौ सन्तौ, समुद्रपरिखां परिखीभूतसागरां, स्वपुरीं द्वारिकां, पुनः भूयः, आयातौ संप्राप्तौ ॥ १३ ॥

कृष्णप्रिया

बहुत दूरतक दौड़ने के कारण दोनों भाई कुछ थक से गये । अब वे बहुत ऊँचे प्रवर्षण पर्वत पर चढ़ गये । उस पर्वत का 'प्रवर्षण' नाम इसलिये पड़ा था । कि वहाँ सदा ही मेघ वर्षा किया करते थे ।। १० ।। परीक्षित् जब जरासन्ध ने देखा कि वे दोनों पहाड़ में छिप गये और बहुत ढूंढने पर भी पता न चला, तब उसने ईंधन से भरे हुए प्रवर्षण पर्वत के चारों ओर आग लगवाकर उसे जला दिया ॥ ११ ॥ जब भगवान् ने देखा कि पर्वत के छोर जलने लगे हैं, तब दोनों भाई जरासन्ध की सेना के घेरे को लाँघते हुए बड़े बेग से उस ग्यारह योजन (चौवालीस कोस) ऊँचे पर्वत से एकदम नीचे धरती पर कूद आये ॥ १२ ॥ राजन् ! उन्हें जरासन्ध ने अथवा उसके किसी सैनिक ने देखा नहीं और वे दोनों भाई वहाँ से चलकर फिर अपनी समुद्र से घिरी हुई द्वारिका पुरी में चले आये ॥ १३ ॥

सोऽपि दग्धाविति मृषा मन्वानौ बलकेशवौ । बलमाकृष्य सुमहन्मगधान् मागधो ययौ ॥ १४ ॥
[1]आनर्ताधिपतिः श्रीमान् रैवतो रेवतीं सुताम् । ब्रह्मणा चोदितः प्रादाद् बलायेति पुरोदितम् ॥ १५ ॥
[2]भगवानपि गोविन्द उपयेमे कुरूद्वह । वैदर्भीं भीष्मकसुतां [3]श्रियो मात्रां स्वयंवरे ॥ १६ ॥
प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान् । पश्यतां [4]सर्वलोकानां तार्क्ष्यपुत्रः सुधामिव ॥ १७ ॥

राजोवाच

भगवान् भीष्मकसुतां रुक्मिणीं रुचिराननाम् । राक्षसेन [5]विधानेन उपयेम इति श्रुतम् ॥ १८ ॥
भगवञ्छ्रोतुमिच्छामि कृष्णस्यामिततेजसः । यथा मागधशाल्वादीन् [6]जित्वा कन्यामुपाहरत ॥ १९ ॥
ब्रह्मन्[7] कृष्णकथाः[8] पुण्या माध्वीर्लोकमलापहाः । को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः ॥ २० ॥

---

[1] एतेऽधिकाः विजये–अष्टादशे तु ।

अष्टादशे तु संग्रामे जित्वा यादवसत्तमौ ।
दृप्तः स्वराष्ट्रे न्यवसज्जितदिङ्मंडलो नृप । माधवौ तु महात्मानौ प्रविश्य द्वारकां पुरीम् ॥ १ ॥
स्तूयमानौ दिवारात्रं सूतमागधबंदिभिः । वृत्तावानंदबहुलैर्बंधुभिः सुखमूषतुः ॥ २ ॥

इति पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीशुक उवाच—

कदाचिद्देवकीपुत्रो रामशैनेयसंयुतः । सेव्यमानः सभायां वै नानादेशेश्वरैर्नृपैः ॥ १ ॥
पांचालराजं द्रुपदं बालैः कुंतीसुतैर्मृधे । बद्धं शुश्राव कौरव्य ब्राह्मणैः सत्रयाजिभिः ॥ २ ॥
तच्छ्रुत्वाहृष्टहृदयः कृतवर्माणमच्युतः । नगरं हस्तिनपुरं प्रेषयामास वेदितुम् ॥ ३ ॥
स गत्वा हस्तिनपुरं वृद्धं कुरुपितामहम् । ददर्श द्रोणविदुरधृतराष्ट्रकृपैर्वृतम् ॥ ४ ॥
युधिष्ठिरं च राजानं चतुर्भिर्भ्रातृभिर्वृतम् । सभाजयामास भृशं कुंतीं च हृदिकात्मजः ॥ ५ ॥
युधिष्ठिरोऽपि पप्रच्छ सानुगं कंसमर्दनम् । हतं च कालयवनं जरासंधं च निर्जितम् ॥ ६ ॥
वासुदेवं च निहतं करवीरपुरेश्वरम् । द्वारवत्याश्च करणं नगर्या वरुणालये ॥ ७ ॥
हतौ च हंसडिभकौ ब्रह्मदत्तं च दुर्जयम् । श्रुत्वा हार्दिक्यवचनाद्यथार्थेन युधिष्ठिरः ॥ ८ ॥
मेने त्रैलोक्यसाम्राज्यं स्वहस्तगतमक्षयम् । सभाजितश्च हार्दिक्यः सुखसंभाषणादिभिः ॥ ९ ॥
पांडुपुत्रैस्तथा कुंत्या सौहार्दस्नुतबाष्पया । हार्दिक्यस्ताननुज्ञाप्य बांधवान् पृथया सह ॥ १० ॥
मातृष्वसेयान्धर्मज्ञानभिवाद्य यथावयः । गांगेयेनाभ्यनुज्ञातो धृतराष्ट्रेण चानघ ॥ ११ ॥
विदूरेणांगराजेन द्रोणेन च कृपेण च । प्राज्ञेनाचार्यपुत्रेण तथा दुर्योधनेन च ॥ १२ ॥
कृतवर्माभ्यनुज्ञातो निर्गत्य गजसाह्वयात् । द्वारकां वृष्णिनिलयामाजगाम दिनात्यये ॥ १३ ॥
स प्रविश्य सभां दिव्यामनेकनृपसेविताम् । दृष्ट्वा गोविंदमासीनं कांचने परमासने ॥ १४ ॥
बीजच्चामरसंघातसहितं वनमालिनम् । आचचष्टेऽखिलं तस्य यथादृष्टं यथाश्रुतम् ॥ १५ ॥
वृत्तांतं कौरवेयाणां नगरे गजसाह्वये । तदाकर्ण्य हरिः सर्वं वृत्तांतं जगदीश्वरः ॥ १६ ॥
पौरुषं पांडुपुत्राणां बभूवानंदनिर्भरः ॥ १७ ॥

इति षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

[2] एतेऽधिका विजये—

राजोवाच—

रेवतो नाम राजासौ ब्रह्मणा चोदितः कथम् । तदहं श्रोतुमिच्छामि विस्तरेण महामुने ॥ १ ॥

श्रीशुक उवाच—

रेवतो नाम राजाऽऽसीत्पुरा धर्मार्थतत्त्ववित् । रेवती नाम तस्यैका जज्ञे कन्या यशस्विनी ॥ २ ॥
स ब्रह्माणं ययौ प्रष्टुं कस्मै दास्यामि तामिति । अदत्वा याच्यमानोऽपि नानाजनपदेश्वरैः ॥ ३ ॥

कर्दमक्षमा

अन्वयः—सः, मागधः, बलकेशवौ, मृषा, दग्धौ, इति, मन्वानः, सुमहत्, बलम्, आकृष्य, मगधान्, ययौ ॥ १४ ॥ आनर्ताऽधिपतिः, श्रीमान्, रैवतः, ब्रह्मणा, चोदितः, रेवतीम्, सुताम्, बलाय, प्रादात्, इति, पुरा, उदितम् ॥ १५ ॥ हे, कुरूद्वह ? भगवान्, गोविन्दः, अपि, स्वयंवरे श्रियः, मात्राम्, भीष्मकसुताम्, वैदर्भीम्, उपयेमे ॥ १६ ॥ तार्क्ष्यपुत्र, सुधाम्, इव, चैद्यपक्षगान् शाल्यादीन्, राज्ञः तरसा, प्रमथ्य, सर्वलोकानाम्, पश्यताम्, उपयेमे ॥१७॥ राजा उवाच—भगवान्, रुचिराननाम्, भीष्मकसुताम् रुक्मिणीम्, राक्षसेन, विधिना, उपयेमे, इति श्रुतम् ॥ १८ ॥ भगवन्, अमिततेजसः, कृष्णस्य, यथा, मागधशाल्यादीन्, जित्वा, कन्याम्, उपाहरत्, तत्, श्रोतुम्, इच्छामि ॥१९॥ ब्रह्मन्, श्रुतज्ञः, कः, नु, नित्यनूतना, माध्वीः, लोकमलापहाः, पुण्याः,कृष्णकथाः शृण्वानः, तृप्येत ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीकृष्णस्य विवाहान्निरूपयितुं बलदेवविवाहं नवमस्कन्धोक्तमनुस्मारयति । आनर्तेति ॥ १५ ॥ मात्रां कलाम् ॥ १६ ॥ गरुडो यथा देवान्प्रमथ्य सुधामहरत्तथेति ॥ १७ ॥ 'राक्षसो युद्धहरणाद्' इति स्मृतेः राज्ञः प्रमथ्येति च त्वदुक्त्या राक्षसेन विधानेनोपयेमे परिणीतवानिति श्रुतं पूर्वमेव वा ॥ १८ ॥ सामान्यत एव श्रुतम् । विशेषं तु श्रोतुमिच्छामि ॥ १९ ॥ श्रवणौत्सुक्यमाविष्करोति । ब्रह्मन्निति । पुण्या महाफला माध्वीः श्रुतिसुखाः लोकस्य मलापहाश्च शृण्वानः शृण्वन्नित्यर्थः । श्रुतज्ञः श्रुतसारवित् । नित्यनूतनाः प्रतिक्षणमाश्चर्यवत्प्रतीयमानाः ॥ २०-२४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सोऽपि जरासंधोऽपि । बलकेशवाविति सामर्थ्यमुक्तम् । सुमहदिति तदा सर्वस्यापि भगवदुपेक्षितत्वात् । उपेक्षा च रुक्मिणीहरणपराक्रमकौतुकपोषणार्थं तत्साक्षादरिवर्गनिर्जयेन तस्याः प्रहर्षार्थञ्च ज्ञेयम् । ननु कथं महापावनान्माथुरानेव स्वराज्यत्वेन गृहीत्वा नोवास तत्राह—मागधः नीचदेश्यानां तत्रैवाभिरुचेरिति भावः । तदेवं पलायनेऽपि जयो दर्शितः, अनेकमहारथादिभिरनुगन्तुमशक्यत्वात्सर्वानतिक्रम्योत्प्लुतत्वाच्च ॥ १४ ॥ कथांतरमाह । यद्यपि "सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहम्" इति गार्ग्योक्तेः परिवेत्त्रादिशंका रौहिणेयत्वाद्बलस्य दैविकेयत्वाच्च कृष्णस्य सोदर्यत्वाभावान्नास्ति तथापि योगमायाकृष्टदेवकीगर्भत एव बलस्य रोहिणीगर्भाविशात्सोदर्यत्वमप्यायातीत्यतस्तद्वारणाय पूर्वोक्तं स्मारयति—आनर्तेति । पुरा नवमस्कन्धे । श्रीमान् ब्रह्मलोकगमनेन सप्तविंशतिचतुर्युगेष्वतीतेष्वपि सर्वसंपत्तिमानिति योगादिबलं सूचयति । अतः प्रकर्षेणाऽदात् । रैवतो रेवतसुतः ककुद्मी ॥ १५ ॥ अपिना यथा बल उपयेमे तथा भगवानित्युपमा द्योत्यते । 'मात्रांशे वित्तमानयोः' इति कोशात् । भगवानिति युग्मकम् । भगवान् स्वयंभगवान् । तथातथा नित्यविहारी श्रीकृष्णः । तदानीञ्च गोविंदः गां पृथ्वीं विन्दतीति क्रीडाविशेषार्थं तस्यामवतीर्ण इत्यर्थः । अतः श्रियो मात्रां माति प्रविशत्यस्यां सर्वमिति परिपूर्णां मूर्ति भगवद्वद्देवाऽवतरितुमर्हत्वात् । तथा च श्रीविष्णुपुराणे—"एवं यथा जगत्स्वामी देवदेवो जनार्दनः । अवतारं करोत्येषा तथा श्रीस्तु सहायिनी ।" इति । अत एव वक्ष्यते—सदृशीमिति । उपयेमे विवाहलीलया निकटं नियाय । अपिः पूर्वोक्तसमुच्चये । यद्वा—गोविंदो गोकुलेन्द्रो गोकुलवर्तिगोपीविरहेणान्तःखिन्न इत्यर्थः । यथैवोद्धवं प्रति निजकरुणाबाष्पमुद्गिरति—'गच्छोद्धव व्रजम्' इत्यादिभिः, यथैवोद्गिरिष्यति

सभायां ब्रह्मणस्तत्र गन्धर्वौ द्वौ हाहाहूहू । तस्मिन्नगायतां काले ग्राममूर्च्छाविचक्षणौ ॥ ४ ॥
राजाऽतिष्ठद्बहिः किंचित्तद्विरामप्रतीक्षया । गीतावसाने पप्रच्छ प्रणिपत्य पितामहम् ॥ ५ ॥
एषा मे भगवन्कन्या कस्मै दास्य इमामिति । तं प्राह पद्मभूः कस्ते राजपुत्रो विरोचते ॥ ६ ॥
तत्रान्यांश्च महीपालानाचक्ष्वेति कुरूद्वह । ततस्तान्त्रे बतः प्राह भूपालान्विषयेश्वरान् ॥ ७ ॥
स तानाकर्ण्य नृपतीन्प्रहस्योवाच रेवतम् । युगानि तु बहून्यत्र गतानि तव भूपते ॥ ८ ॥
क्षणमात्रमिवाश्राव्यं शृण्वतो गीतमेतयोः । क्वेदानीं तव ते भूपाः सुतायाः सदृशा वराः ॥ ९ ॥
इदानीं राजशार्दूल यदुवंशविवर्धनौ । वसुदेवगृहे जातौ रामकृष्णाह्वयौ प्रभू ॥ १० ॥
तत्र सङ्कर्षणायेमां कन्यां यच्छस्व भूपते ।
इत्युक्तस्तेन भूपालस्तं प्रणम्य पुरं गतः । रामाय प्रददौ कन्यां रूपिणीं बाहुशालिने ॥ ११ ॥
तामादियुगसंभूतां दीर्घदेहां महाभुजः । आकृष्य लाङ्गलेनांसे समां चक्रे हलायुधः ॥ १२ ॥

३. इन्दिरांशां–विज. । ४. भूतानां–विज. । ५. विवाहेन–वीर. विज. । ६. जित्वैकः पुनरागमत्–वीर. ; जित्वात्पारमागमत्–विज. । ७. रुक्मिण्याः ग्रहणं पाणौः प्रमथ्याऽन्यान्स्वयंवरे–म. पु. टि. । ८. विष्णु–विज. ।

सर्वप्रकटलीलान्तेऽपि—'तास्ताः क्षपाः प्रेष्ठतमेन नीताः' इत्यादिभिः, तादृशः सन्नुपयेमे। कुतः—श्रियो मात्रामंशं मूर्तिभेदमिति यावत्। ततश्च 'श्रियः कान्ताः कान्तः' इत्याद्यनुसारेण गोपीनामपि श्रीत्वात्। 'नायं श्रियोंग उ नितान्तरतेः प्रसादः' इत्याद्यनुसारेण प्रसिद्धश्रीतोप्युत्कृष्टतमत्वेनैव कुरुषु पांडुशब्दवच्छ्रीषु गोपीति नामांतरप्राप्तत्वात्तदैकतत्त्वादित्यर्थः। तास्वपि मुख्यायाः श्रीराधाया एव मात्रमिति वा। "ज्ञातीन्वो द्रष्टुमेष्यायो विधाय सुहृदां सुखम्" इति भगवदुक्त्यनुसारेण यादवादिनिजगणविशेषसुखार्थमपि तादृशीमेव स्वीचकारेति भावः। एवमेवोक्तं पाद्मकार्तिकमाहात्म्ये—"कैशोरे गोपकन्यास्ता यौवने राजकन्यकाः" इति। स्कान्दादौ च—"रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने" इति। तथा शक्तिवैचित्रबोधनार्थमाह—भगवानिति। यद्वा—यो गोविन्दः "मां केशवो गदया प्रातरव्याद्गोविन्द आसंगवमात्तवेणुः" इति नारायणवर्माद्यनुसारेण तथा नित्यविहारी सोऽपि वैदर्भीमुपयेमे, तत्कथं तत्राह—भगवान्, अचिंत्यशक्त्या तत्र चात्र च प्रकाशवान्। यथैव सांत्विता उद्धवद्वारा व्रजदेव्य इति भावः। स्वयंवर इति हरिवंशोक्तं तद्वृत्तं स्मारयति। ततश्च स्वयंवरे निवृत्ते भगवदुक्त्या शिशुपालाय दातुं निश्चितायास्तस्या महार्तिवैयग्र्येण संदेशादिना हरणादिकं वृत्तमिति। यद्वा—स्वयमेव वैदर्भ्या पुरोहितपुत्रप्रेषणेन वरः पतित्वेन श्रीकृष्णवरणं तस्मिन्॥ १६॥ तरसा बलेन 'तरो बले च रोगे च' इति मेदिनी। तरसा सद्यः। प्रमथ्य निर्जित्य। जरासंधस्य मुख्यत्वेऽपि शाल्वादित्वं शाल्वस्यैव प्रथमं युद्धप्रवृत्त्येति ज्ञेयम्। तच्च हरिवंशे व्यक्तम्। पक्षगान् सहायान्। 'तार्क्ष्यौ कश्यपसौपर्णौ' इति कोशात्॥ १७॥ पूर्वमेव तृतीयस्कन्धे। वा अथवा। राक्षसेनेति वीरप्रशस्यत्वेन योग्यतैव विवक्षिता। रुचिराननां श्रीकृष्णस्यापि मनोहरमुखीमिति महासौन्दर्यमुक्तम्॥ १८॥ सामान्यत आपाततः। विशेषं विस्तारम्। प्रकारांतरेण प्राप्तुं शक्याया अपि हरणलीला कौतुकार्थैवेति तत्त्वम्॥१९॥ माध्वीर्मधुराः 'माध्वी मधुरमद्ययोः' इति निरुक्तिः। शृण्वानः आर्षत्वाच्छानच्। कथारूपे सुखसाध्या अपि पुण्याः सर्वधर्ममूलरूपाः। को धर्मार्थी तावच्छृण्वंस्तृप्येत। तथा माध्वीः परममधुररसरूपाः कोऽर्थार्थी शृण्वंस्तृप्येत। तथा लोकमात्रस्य मलस्य पापाद्यविद्यातद्दोषस्य हंत्रीः को मोक्षार्थी शृण्वंस्तृप्येत। तथा नित्यनूतनाः 'सतामयं सारभृताम्' इत्यादिन्यायेन प्रतिपदं प्रोन्मीलत्प्रेमानन्ददाः को वा भक्त्यर्थी शृण्वंस्तृप्येत। शृणुवान् श्रवणमात्रं लभमानः श्रुतज्ञः यदि तत्तत्तात्पर्यवेत्तेत्यर्थः। अवधिरमात्रो वा॥ २०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

बलकेशवाविति सामर्थ्यसूचकं सुमहदिति तदा सर्वस्यापि श्रीभगवदुपेक्षितत्वात् उपेक्षा च रुक्मिणीहरणपराक्रमकौतुकपोषणार्थं तत्साक्षादरिवर्गनिर्जयेन तस्याः प्रहर्षार्थश्चेति ज्ञेयम्। ननु, कथं महापावनान् माथुरानेवं स्वराज्यत्वेन गृहीत्वा नोवास तत्राह—मागधः नीचदेश्यानां तत्रैवाभिरुचेरिति भावः। तदेवं पलायनेऽपि जयो दर्शितः अनेकसहस्रैर्महारथादिभिरनुगन्तुमशक्यत्वात् सर्वांस्तानतिक्रम्योत्प्लुतत्वाच्च॥ १४॥ श्रीमान् ब्रह्मलोकगमनेन सप्तविंशतिचतुर्युगेष्वतीतेष्वपि सर्वसम्पत्तिमान् इति योगादिबलं सूचयति, अतः प्रकर्षेणादात् रैवतो रेवतसुतः ककुद्मी॥ १५॥ भगेति युग्मकं भगवान् स्वयं भगवान् तथा तथा नित्यविहारी श्रीकृष्णः तदानीं च गोविन्दः गां पृथिवीं विन्दतीति क्रीडाविशेषार्थं तस्यामवतीर्ण इत्यर्थः। अतः श्रियो मात्रां माति प्रविशत्यस्यां सर्वमिति परिपूर्णां मूर्त्ति भगवद्वदेवावतरीतुमर्हत्त्वात् तथा च श्रीविष्णुपुराणे "एवं यथा जगत्स्वामी देवदेवो जनार्द्दनः अवतारं करोत्येषा तथा श्रीस्तत्सहायिनी" इनि। अत एव वक्ष्यते सदृशीमिति उपयेमे विवाहलीलया निकटे निनाय, अपिः पूर्वोक्तसमुच्चये। यद्वा, गोविन्दो गोकुलेन्द्रः गोकुलचक्रवर्त्तिगोपीजनविरहेणान्तःखिन्न इत्यर्थः। यथैव श्रीमदुद्धवं प्रति निजकरुणावाष्पमुद्गिरति स्म गच्छोद्धव व्रजमित्यादिभिः यथैवोद्गिरिष्यति सर्वप्रकटलीलान्तेऽपि "तास्ताः प्रेष्ठतमेन नीताः" इत्यादिभिः तादृशः सन्नप्युपयेमे कुतः? श्रियो मात्राम् अंशं मूर्त्तिभेदम् इति यावत्। ततश्च "श्रियः कान्ताः कान्तः" इत्याद्यनुसारेण गोपीनामपि श्रीत्वात् "नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः" इत्याद्यनुसारेण प्रसिद्धश्रीतोप्युत्कृष्टतमत्वेनैव कुरुषु पाण्डवशब्दवच्छ्रीषु गोपीति नामान्तरप्राप्तत्वात् तदेकतत्त्वादित्यर्थः, तास्वपि मुख्याया श्रीराधाया एव मात्रामिति वा "ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम्" इति श्रीभगवदुक्त्यनुसारेण यादवादिनिजगणविशेषसुखार्थमपि तादृशीमेव स्वीचकारेति भावः। एवमेवोक्तं पाद्मकार्तिकमाहात्म्ये "कैशोरे गोपकन्यास्ता यौवने राजकन्यकाः" इति। स्कान्दादौ च "रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने" इति तथा शक्तिवैचित्रीबोधनार्थमाह-भगवानिति। यद्वा, यो गोविन्दः "मां केशवो गदया प्रातरव्याद्गोविन्दः आसङ्गवमात्तवेणुः" इति नारायणवर्माद्यनुसारेण तथा नित्यविहारी सोऽपि वैदर्भीमुपयेमे तत्कथं? तत्राह—भगवानचिन्त्यशक्त्या तत्र चात्र च युगपत्प्रकाशवान् यथैव सान्त्विता उद्धवद्वारा व्रजदेव्य इति भावः। स्वयंवर इति श्रीहरिवंशोक्तं तद्वृत्तं स्मारयति—ततश्च श्रीभगवदुक्त्या स्वयम्वरे निवृत्ते शिशुपालाय दातुं निश्चितताया तस्या महार्त्तिवैयग्र्येण सन्देशादिना हरणादिकं वृत्तमिति। यद्वा, स्वयमेव वैदर्भ्या पुरोहितपुत्रप्रेषणेन वरः पतित्वेन श्रीकृष्णवरणं तस्मिन्॥ १६॥ तरसा सद्यः प्रमथ्य निर्जित्य जरासन्धस्य मुख्यत्वेपि शाल्वादित्वं सर्वै राजभिः श्रीकृष्णप्रपत्तौ सम्मतायामपि शाल्वस्यैव वाचा युद्धप्रवृत्त्या तत्र तस्यैव मुख्यत्वात् तच्च श्रीहरिवंशे व्यक्तं चैद्यस्य पक्षगान् सहायान् सर्वलोकानामन्येषां पश्यतामित्यनादरे षष्ठी इति राज्ञामतिलज्जादिकं बाधयति तार्क्ष्यः कश्यपः॥ १७॥ राक्षसेनेति वीरैः प्रशस्यत्वाद्योग्येनैवेति विवक्षितं रुचिराननाम् अर्थात् श्रीकृष्णवदेवेति। यद्वा, श्रीकृष्णस्यापि

मनोहरमुखीमिति महासौन्दर्य्यमुपलक्षयति—ततः श्रीकृष्णेन विवाहसौष्ठवं च सम्मतम् ॥ १८ ॥ यथोपाहरत् तथा तत्प्रकारं श्रोतुमिच्छामः, अत एव निर्गलितार्थस्तैर्व्याख्यातो विशेषतस्त्विति। अमिततेजसोऽपि इति सद्यः संहर्त्तु शक्तावपि कौतुकेन मधुरलीलाभिप्रेता ॥ १९ ॥ कथारूपत्वेन सुखसाध्या अपि पुण्याः सर्वधर्ममूलरूपाः को धर्मार्थी तावच्छृण्वंस्तृप्येत् यथा माध्वीः परममधुररसार्थरूपाः कोऽर्थार्थी कामार्थी वा शृण्वंस्तृप्येत् तथा लोकमात्राणां मलस्य पापाद्यविद्यान्तदोषस्यापहन्त्रीः को मोक्षार्थी शृण्वंस्तृप्येत् तथा नित्यनूतनाः "सतामयं सारभृतां निसर्गः" इत्यादिन्यायेन प्रतिपदं प्रोन्मीलत्प्रेमानन्दः को वा भक्त्यर्थी शृण्वंस्तृप्येत् शृण्वन्निति श्रवणमात्रेण लभमान इत्यर्थः। श्रुतज्ञ इति यदि तत्तत्तात्पर्य्यं वेदेत्यर्थः अवधिरमात्र इति वा ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ब्रलकेशवाविति (भा० १०।८।१२) 'बलाधिक्याद्बलं विदुः' इत्यनेन। तथा कश्च ईशश्च वयते स्वमहिम्ना छन्दयतीति केशव इति। तस्य साक्षात्परमेश्वरत्वेनाद्यत्वमभिप्रेतम्। अत एव मृषेति सुमहदिति तदानीं सर्वस्यापि श्रीभगवदुपेक्षितत्वात्। उपेक्षा च श्रीरुक्मिण्या विवाहकौतुके तत्साक्षादरिवर्गनिर्ज्जयेन तस्याः प्रहर्षणार्थमिति दिक् ॥ १४ ॥ श्रीमान् श्रीब्रह्मलोकगमनादिसर्वसम्पत्तियुक्तः, यद्वा, तत्र गमनेन सप्तविंशतिचतुर्युगेष्वतीतेष्वपि जराद्यभावेन सर्व्वशोभावान्, रैवतो रेवतसुतः ककुद्मी, तथा च नवमस्कन्धे (९।३।२९)—'ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः' इत्यादि। प्रकर्षेण परमभक्त्यादिना अदात् ॥१५॥ अयं तद्वदभगवान् साक्षाच्छ्रीनारायणः, पुनश्च गोविन्दो गां पृथ्वीं विन्दतीति क्रीड़ाविशेषार्थं मनुष्यरूपेण तस्यामवतीर्ण इत्यर्थः। अवतीर्णायास्तस्या विवाहे हेतुः। अपि पूर्वोक्त-समुच्चये, यद्वा, गोविन्दो गोकुलेन्द्रोऽपि गोकुलवर्त्ति-श्रीगोपीजनविरहेण खिन्नोऽपीत्यर्थः। तथाप्युपयेमे, कुतः ? भगवान् भक्तजनविषयक-कारुण्याद्यशेषगुणयुक्तः, तेन (भा० १०।५२।४३) 'यर्ह्यम्बुजाक्ष न लभेय भवत्प्रसादं, जह्यामसून्' इति वैदर्भ्या दुःखश्रवणेन तत्र कारुण्यात्तद्भक्तियन्त्रितत्वादिति भावः। तच्च भवत्पितामहेषु कुरुकुलश्रेष्ठेषु पाण्डवेषु तस्य दौत्य-सारथ्य-वीरासनादिकं सुप्रसिद्धम्। तच्च कुरुकुलोद्भवेन भवता ज्ञायत एवेति सम्बोधयति—कुरूद्वहेति। तस्या भक्तिहेतुं दर्शयति–वैदर्भीमित्यादिना। तत्र विदर्भदेशजामिति पाण्डित्यादिसद्गुणयुक्तत्वम्, भीष्मकः सत्क्षत्रियः स देशस्य राजा महासाधुस्तस्य सुतेति सत्कुलजन्माद्युक्तम्, किञ्च, श्रियो लक्ष्म्या मात्रां मूर्त्तिमित्यर्थः। यद्वा, अकारप्रश्लेषेण—न मीयते कथञ्चिदपि परिमातुं न शक्यत इत्यमात्रा ताम्, सौन्दर्य्यादिना लक्ष्मीतोऽप्यपरिमेयामित्यर्थः। श्रीभगवतोऽत्र निजाशेषैश्वर्य्यप्रकटनेन तयापि तदनुसारेण निजाशेषरूपगुणादिप्रकटनात्, स्वयम्वरे सतीति तल्लक्षणेऽत्रानुक्तेऽपि श्रीहरिवंशोक्तं तद्वृत्तं स्मारयति। तच्च तत्रैव सुव्यक्तमित्यत्र न विस्तारितम्। ततश्च श्रीभगवदुक्त्या स्वयम्बरे निवृत्ते शिशुपालाय दातुं निश्चितायास्तस्या महार्त्तिवैयग्र्येण सन्देशादिना हरणादिकं वृत्तमिति सर्वं सुसंगतमेवेति दिक्। यद्वा, स्वयमेव वैदर्भ्याः पुरोहितपुत्रादिप्रेषणेन वरः पतित्वेन श्रीकृष्णवरणं तस्मिन्, इति भक्तिलक्षणञ्चोक्तम्। वस्तुतस्तु श्रीवादरायणेः प्रणयकोपतः शोकाभिव्यञ्जिका हृद्वृत्तिरियम्। तथा हि गोविन्द इति गोकुललोकापेक्षया, तथा (भा० १०।४१।१७) 'आयास्ये' इति, (भा० १०।२२।२५) 'मयानुमोदितः सोऽसौ सत्यो भवितुमर्हति' इत्यादि-स्वोक्तापेक्षया चान्यपरिग्रहायोऽयतोक्तैव, तथाप्युपयेमे। कुतः ? भगवान् परमस्वतन्त्रः, अकृतोऽपि को नाम तस्य नियन्तास्त्विति भावः। तरसा सद्यः, प्रमथ्य बलहननादिना निर्जित्य, साल्वादीनिति जरासन्धस्य मुख्यत्वेऽपि साल्वादित्वम्—सर्व्वै राजभिः श्रीकृष्णप्रपत्तौ सम्मतायामपि साल्वस्यैव वाक्याद् युद्धप्रवृत्त्या, तत्र तस्यैव मुख्यत्वात्। तच्च श्रीहरिवंशे व्यक्तमेव। बाहुल्यभयादत्र न विस्तार्य्यते। चैद्यस्य शिशुपालस्य पक्षकान् सहायान्—स्वार्थे कः, पाठान्तरेऽपि स एवार्थः। सर्वलोकानामन्येषां पश्यतामित्यनादरे षष्ठी। यद्वा, सप्तम्यर्थे सर्वलोकेषु पश्यत्सु सात्स्वित्यर्थः। एवं राजकुलमध्यतः साक्षाद्धरणेन परमशौर्य्यप्रागलभ्यादिकमुक्तम्। यद्वा, राज्ञां प्रमथनं च सर्वलोकसाक्षादेवेति तेषामतिलज्जादिकं बोधयति—पश्यतामिति। तार्क्षः कश्यपः ॥१६-१७। एवं सामान्यतोऽतिसङ्क्षेपेण श्रुत्वा भक्त्या विशेषेण विस्तरशः श्रोतुमिच्छन् पृच्छति भगवानिति सर्वशक्तिमान्, अत एव राक्षसेन विधानेन प्रकारेण, वीराणां तादृशविवाहस्यैव प्रशस्यत्वात्। रुचिराननामिति सर्वसौन्दर्य्यमुपलक्षयति ॥१८॥ यथाहरत्तथा तत्प्रकारं श्रोतुमिच्छामः, बहुत्वं विनयेन, सर्वेषां संगिनां संग्रहात्। श्रवणेच्छायां हेतुः कृष्णस्य, तच्च त्वया ज्ञायत एवेत्याह—भगबन् सर्वज्ञेति निजेष्टदेवस्य परमानन्दघनस्य वा, किञ्च, अमिततेजसोऽनन्तप्रभावस्य, अतस्तेन नूनं तत्र मधुरमधुरपराक्रमो दर्शित इति भावः। यद्वा, अमिततेजसोऽपि कृष्णस्य परमकौतुकशीलस्येति सद्यः संहर्त्तुं शक्तावपि कौतुकेन मधुरलीलाभिप्रेता ॥१९॥ कृष्णस्य सर्वचित्ताकर्षकस्य कथा इति तत्कथानामपि तादृशत्वमभिप्रेतम्, तदेव दर्शयति विशेषणैश्चतुर्भिः। तत्र पुण्याः पुण्यजनिका मनोरमा वा, तथा च विश्वः—'पुण्यं मनोज्ञेऽभिहितम्' इति। लोकानां सर्वजीवानां चतुर्द्दशभुवनानां वा, मलं सवासनपापम्, अप दूरतो घ्नन्तीति तथा ताः, अतः कस्तृप्येत्, अपि तु न कोऽपीत्यर्थः। नु वितर्के, मुहुः श्रवणेनापि न कदाचित् तृप्तिः स्यादित्याह—नित्येति। तथापि श्रोतुः पशुवद्विवेकाभावेन सम्भवेदित्याशंक्याह–श्रुतज्ञः शास्त्रार्थतत्त्ववित् आकर्णितार्थरसवेत्ता वा, तथा चोक्तं प्रथमस्कन्धे (१।१।१९)—'यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे' इति तत्र च मच्चित्तवृत्तिस्त्वया ज्ञायत एवेति सम्बोधयति—ब्रह्मन्निति ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीम्

मात्राम् अंशम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

सोऽपि मागधोऽपि रामकृष्णौ दग्धाविति मृषा यथा तथा मन्वानो बलं सैन्यमाकृष्यादाय मागधान्देशान्प्रत्याजगाम ॥१४॥ अथ श्रीकृष्णस्य विवाहान्निरूपयितुकामस्तावद्बलभद्रविवाहं नवमस्कन्धोक्तमनुस्मरति—आनर्तेति । स्पष्टोऽर्थः ॥ १५ ॥ अथ भगवद्विवाहान्निरूपयितुकामस्तावद्रुक्मिणीकल्याणं तद्विस्तरबुभुत्सामुत्थापयन्सङ्ग्रहेणाह—भगवानपीति द्वाभ्याम् । हे कुरूद्वह ! श्रियो लक्ष्म्या मात्रामंशभूतां भीष्मकस्य राज्ञः सुतां वैदर्भीं यथा तार्क्ष्यंपुत्रो गरुडः सुधामाजहार तद्वत् स्वयंवरे सर्वभूतानां पश्यतां सतां चैद्यपक्षापातिनः सर्वाञ्छाल्वादीन् राज्ञः क्षत्रियान्तरसा बलेन प्रमथ्यालोड्याभिभूयेति यावत् आहृतामिति शेषः उपयेम इत्यन्वयः ॥ १६–१७ ॥ तत्र तद्विस्तरबुभुत्सया पृच्छति राजा भगवानिति, रुचिरं सुन्दरमाननं यस्यास्ताम् उपयेमे विवाहितवानिति श्रुतं मयेति शेषः । त्वन्मुखादधुना श्रुतम् इति भावः । नियुध्यानीताया विवाहो राक्षसविवाहः "राक्षसो युद्धहरणात्" इति स्मृतेः । यद्वा, युद्धे हरणमेव राक्षसो विवाहः तथापि च राक्षसेन विवाहेन हेतुभूतेन पश्चाद्यथावदुपयेम इत्यर्थः ॥ १८ ॥ भगवानिति यथा येन प्रकारेण मागधादीनेक एव सन् जित्वा पुनरागमत् वैदर्भीमादायेति शेषः । तममिततेजसः कृष्णस्य जयागमनादिप्रकारं श्रोतुम् इच्छामि ॥ १९ ॥ आत्मनः श्रवणौत्सुक्यम् आविष्करोति—ब्रह्मन्निति । हे ब्रह्मन् ! श्रीकृष्णस्य कथाः पुण्याः शृण्वतां वदत्तां च पुण्यावहाः माध्वीः श्रुतिसुखावहाः न केवलं पुण्या एव अपि तु शृण्वतो गदतश्च जनस्य मलापहाः पापघ्नीश्चाऽतस्ताः श्रुतज्ञः श्रोत्रेन्द्रियविषयसुखसारासारविवेकी चेत्को वा पुमान् शृण्वान् उपधादीर्घश्चार्षः न सेवेत तश्श्रुज्ञश्चेत्सर्वोऽपि सेवेतेत्यर्थः सत्यं सेवेतेति सकृच्छ्रुत्वा पुनर्न सेवेतेत्यतस्ता विशिनष्टि–नित्यनूतना इति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

"परापूर्वेषां सङ्ख्यां वृणक्ति वितर्तुराणो अपरेभिरेति" इत्यादिश्रुत्यर्थं दीपकन्यायेन । दर्शयत्यस्मिन्नध्याये तत्र श्रीकृष्णो युद्धे कुन्तीसुतैर्बद्धं पाञ्चालभूपतिं श्रुत्वा हृष्टस्तद्वृत्तान्तविवित्सयातत्समीपे कृतवर्माणं प्रेषयामासेति कथयति, कदाचिदिति ॥ क ॥ ब्राह्मणैरुक्तम् ॥ ख ॥ वासुदेवं शृगालनामानं वरुणालये समुद्रे ॥ छ ॥ आनन्दनिर्भरः आनन्दपूर्णो बभूवेत्यनेन पूर्णानन्दत्वं सदातनं न कादाचित्कमिति सूचयति "भू सत्तायाम्" इति धातोः सत्तायाः सदातनत्वादिति ॥ त ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे विजध्वजतीर्थकृतपदरत्नावल्याम् षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

अनित्यत्वात्संसारो हेयस्तदर्थं कामक्रोधादिनिलयाद्देहात्सम्विदेवाहर्तव्येति दर्शनायोत्तराध्यायत्रयस्य प्रारम्भः आनर्तविषयाधिपतिः ॥ १५–१८ ॥ धर्मार्थो धर्मविषयो विष्णुस्तस्य तत्त्वं वेत्तीति धर्मस्य अर्थस्य च तत्त्वं वेत्तीति धर्मस्यार्थस्य तत्त्वं हरिविषयत्वलक्षणं वेत्तीति वा ॥ ख ॥ येयं मम कन्या तां प्रति याचकत्वसम्भवात् कुतो न दत्तेत्यत्राह—अदत्त्वेति । ब्रह्मणः सर्वस्य गुरुत्वान् गुर्वनुज्ञापूर्वकं क्रियमाणं सर्वं फलवदित्यभिसन्धाय याचकेभ्यो न दत्तेति भावः ॥ ग ॥ तत्र तस्मिन्नवसरे ग्राममूर्च्छाविचक्षणौ सप्तस्वरगानविशेषविदग्धौ स्वराणां मण्डलं ग्रामः आरोहावरोहः मूर्च्छा सप्तस्वरास्त्रयो ग्रामा एकविंशतिमूर्च्छना इति भरतः ॥ घ ॥ अल्पार्थे किञ्चिदित्यव्ययम् अल्पकालमित्यर्थः ॥ ङ ॥ त्वदभीष्टवरो नास्ति तदानींतनकालीयानामतीतत्वादिति ब्रह्मा वक्ति, तं प्राहेति ॥ च ॥ तव ते तुभ्यं मनुष्यस्य सुबहूनि युगानि क्षणमात्रमिव गतानीति तत्र निमित्तमाह—आश्राव्यमिति ॥ ज–झ ॥ तर्हि किं कर्त्तव्यमिति तत्राह—इदानीमिति ॥ ञ ॥ आदियुगं कृतं नाम ॥ ठ ॥ तेषां पारं यथा तस्य हरेर्विवाहलक्षणं चरितं श्रोतुमिच्छामि ॥ १९ ॥ माध्वीः मधुराः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मात्रामिति माति प्रविशत्यस्यां सर्वमिति भगवद्वदेवावतरीतुमर्हत्वेन परिपूर्णाम्मूर्त्ति यद्वा, गोविन्दो गोकुलेन्द्रः गोकुलवर्त्तिगोपीविरहेणान्तःखिन्न इत्यर्थः । तादृशः सन्नुपयेमे कुतः श्रियो मात्रामंशं मूर्त्तिभेदमिति यावत् ततश्च "श्रियः कान्ताकान्तः परम पुरुषः" इत्याद्यनुसारेण गोपीनामपि श्रीत्वात् तदेकतत्त्वादित्यर्थः । तास्वपि मुख्यायाः श्रीराधाया एव मात्रामिति वा "ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम्" इति भगवदुक्तेर्यादवादिनिजगणसुखार्थमपि तादृशीमेव स्वीचकारेति भावः। एवमेवोक्तं पाद्मे कार्त्तिकमाहात्म्ये "कैशोरे गोपकन्यास्ता यौवने राजकन्यकाः" इति । स्कान्दादौ च "रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने" इति । यद्वा, यो गोविन्दः गोकुलेन्द्रत्वेन नित्यविहारी सोऽपि वैदर्भीमुपयेमे तत्कथं तत्राह ॥ १६–१७ ॥ भगवान् अचिन्त्यशक्त्या तत्र चात्र च युगपत् प्रकाशवान् यथैव सान्त्विता उद्धवद्वारा व्रजदेव्य इति भावः । स्वयं द्विजप्रेषणेन वरणं वरः तस्मिन् सदृशीं स्वरूपशक्तित्वात् अत एव मनो दधे । यद्वा, सदृशीं तादृशबुद्ध्यादिभिर्लक्षणै राधाद्येकात्मकत्वादिति भावः ॥ १८–२४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

वैदर्भीं भीष्मकसुतामित्यादि । श्रियो मात्रां श्रियो लक्ष्म्याः पूरणीम् ॥ १७–२३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

श्रियो मात्रां पूरणीम् ॥ १७–२३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

श्रीकृष्णस्य विवाहान् वक्तुं प्रथमं बलदेवविवाहं नवमस्कन्धोक्तमनुस्मारयति—आनर्तेति । रैवतः रेवतसुतः ककुद्मी ॥ १५ ॥ मात्रां मूलभूतं सूक्ष्मस्वरूपं तस्य मात्रा गुणः शब्दः इति वत् कृष्णस्य स्वयं भगवत्त्वे तस्या अपि स्वयं लक्ष्मीत्वौचित्यात् ॥ १६–१७ ॥ राक्षसेन "राक्षसो युद्धहरणात्" इति स्मृतेः ॥१८–१९॥ माध्वीर्मधुराः श्रृणुवान् श्रृण्वन्नित्यर्थः ॥२०–२५ ॥

गूढार्थदीपिनी

रैवतो रेवतपुत्रः ककुद्मी । पुरा नवमस्कन्धे ॥ १५ ॥ भगवानिति युग्मम् । माति प्रविशति सर्वं विश्वमस्यामिति मात्रां परिपूर्णां मूर्तिम् । 'रुक्मिणी कृष्णजन्मनि' इति विष्णुपुराणाच्च । तरसा बलेन । तरो बले च वेगे च इति मेदिनी । तार्क्ष्यपुत्रः कश्यपपुत्रो गरुडः । 'तार्क्ष्यौ गरुडकश्यपौ' इत्यमरः । प्रमथ्य निर्जित्य ॥ १६–१७ ॥ राक्षसो 'युद्धहरणात्' इति स्मृतेः । उपयेमे परिणीतवान् ॥ १८–१९ ॥ माध्वोः अतीवमधुराः ॥ २०–२१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रथमं ज्येष्ठत्वाद्बलस्य विवाहमाह—आनर्त्ताधिपतिरिति । रैवतो रेवतपुत्रः ककुद्मी ॥ १५ ॥
श्रियो मात्रामिति
"एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्" "स वै किलायं पुरुषः पुरातनो य एक आसीत्"
"एष वै भगवान्साक्षादाद्यो नारायणः पुमान्"

इत्याद्युक्तेः श्रीकृष्णः स्वयं भगवान् तस्य "एष प्रपन्नवरदो रमयात्मशक्त्या" इत्युक्तेः । शक्तिभूता स्वयं लक्ष्मीरेवाविर्भवितु योग्या अतः श्रियः रुक्मिण्याः स्वयं लक्ष्म्याः स्वयंवरे "मात्रा कर्णविभूषायां वित्तमाने परिच्छदे" इति कोशान्यात्रान्निजवित्तभूतां भीष्मकगृहेऽवतीर्णां स्वयं लक्ष्मीमित्यर्थः । तथा च श्रुतिः "कृष्णात्मिका जगत्कर्त्री मूलप्रकृतिरुक्मिणी" इति । कृष्णात्मिका शक्तितद्वतोरभेदात् जगत्कर्त्री जगद्धेतुभूतश्रीकृष्णान्तर्गतत्वात् मूलप्रकृतिः मूले जगत्कारणे कृष्णे प्रकृतिः स्वभावो निष्ठा यस्याः सा ऐश्वर्याभिष्ठात्री स्वयं लक्ष्मी रुक्मिणीत्यर्थः । रूकारात्पूर्वस्येवर्णस्य ह्रस्वत्वं छान्दसमिति श्रुत्यर्थः—

"सोपश्रुत्य मुकुन्दस्य रूपवीर्यगुणश्रियः गृहागतैर्गीयमानास्तं मेने सदृशं पतिम् ।
तां बुद्धिलक्षणौदार्यरूपशीलगुणाश्रयां कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे" ॥ इति ।

परस्परसादृश्यस्य वक्ष्यमाणत्वात् एवं भूतां स्वयं लक्ष्मीं ज्येष्ठभ्रातृविवाहानन्तरं भगवानपि स्वयं भगवानप्युपयेमे इति सिद्धान्तः ॥ १६ ॥ तार्क्ष्यपुत्रो गरुडो यथा देवान् प्रमथ्य सुधामहरत्तद्वत् सुधाहरणप्रकारः आदिपर्वणि द्रष्टव्यः ॥ १७ ॥ प्रमथ्य तरसा राज्ञः इति त्वदुक्त्या भगवान् राक्षसेन विधानेन क्षत्रियधर्मप्रधानेन रुक्मिणीमुपयेमे परिणीतवान् इति श्रुतम् ॥१८॥ माध्वीः श्रुतिसुखाः ॥ २०–२३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मृषा मन्वानो जानन् ॥३९॥ जित्वेव भ्रमतो दृप्तोऽहङ्कृतः ॥४०॥ आनन्दो बहुलो येषां ते तैर्वृतौ सुखं यथा तथोषतुः । अत्रालक्ष्यमाणावित्युक्तिश्च दग्धा इति मृषा मन्वान इति च करवीरराजहननस्य पूर्वमुक्तिर्हरिवंशे तौ नगादाप्लुतौ दृष्ट्वेत्यारभ्य करवीरपुरं वीर गच्छामः सबलानुगा इति गर्भीकृत्य नगरीं मधुरापुरीं प्राप्तावित्यन्तेनोक्तिश्च कल्पभेदतः प्रवृत्ता इति न विरोधः । आचार्या भारततात्पर्यनिर्णये भारतमनुसृत्योचुः ॥ ४१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे पञ्चपञ्चाशोऽध्यायः ॥ १०–५५ ॥

॥ हरिः ॐ ॥ भक्तवत्सलः श्रीदेव इति वेदयितुं पाण्डवकृतं विजयताण्डवं द्रुपदनृपविषये श्रुत्वा तन्मर्म ज्ञापयितुमाज्ञापयामास कृतवर्माणमत्रस्थतत्र गन्तुमित्यर्थो निरूप्यतेऽस्मिन्नध्याये । नानादेशानामीश्वरास्तैर्नानाप्रकारा आदेशा आज्ञाविशेषास्तेषामीश्वरैस्तदधिकृतैरिति वा ॥ १ ॥ सत्रयाजिभिः सत्रे याजयितुं शीलं येषां तैर्ब्राह्मणैस्तन्मुखतः ॥ २ ॥ हृष्टं हृदयमन्तःकरणं यस्य स नगरमनामयं यथा विदितं च प्रेषयामास । गरो व्याधाविति विश्वः ॥ ३ ॥ कुरुपितामहं भीष्मम् ॥ ४ ॥ राजानं भाविनं तथा ॥ ५ ॥ सानुगं गोमन्तसानुगं सभृत्यं वा हतं घातितम् ॥ ६ ॥ वासुदेवं श्रृगालं वरुणालये समुद्रे ॥ ७ ॥ हंसडिभिकौ हतौ

तथा ब्रह्मदत्तं च हतम् । यथार्थेन यथार्थतया हतौ हतमित्यनुवादेन वादः कथं देवेन विप्रर्षे तौ हंसडिभिकौ हतावित्यारभ्य गदेन चापि सहितो वासुदेवः पुरीं ययावित्यन्तेन बहुना ग्रन्थेन हरिवंशे । तथा जनार्दनः स नामतो रमेशपादसंश्रय इत्यारभ्यासप्तदशाध्यायावशानं महाभारततात्पर्यनिर्णये च शंसितरीत्या ज्ञेयः । त्रैलोक्यसाम्राजमक्षयं स्वहस्तगतं मेने । तत्र निमित्तमप्यनेनैवाह । मेने लक्ष्मीनाथे त्रैलोक्यसाम्राजमक्षय्यं स्वहस्तगतं कुर्वति सतीति । तदायत्तं चेन्मदायत्तमेवेति भाव इति । सुखसम्भाषणादिभिः कुशलालापादिभिः ॥ ९ ॥ सौहार्दश्रुतबाष्पया कुन्त्या सभाजित इत्यन्वयः । मातृष्वसुः पुत्रास्तान् गतम् ॥ १० ॥ गाङ्गेयेन भीष्मेण गतम् ॥ ११ ॥ अङ्गराजः कर्ण आचार्यपुत्रोऽश्वत्थामा ॥ १२ ॥ दिनात्यये सायंसमये ॥ १३ ॥ सभां सुधर्माम् ॥ १४ ॥ बीजष्वामराणां सङ्घातः सङ्घस्तेन सहितं गजसाह्वये गतम् ॥ १५ ॥ आनन्दनिर्भरो बभूव बभूवेवालोकनतस्तथा दर्शयामासेति यावत् ॥ १६ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे षट्पञ्चाशोऽध्यायः ॥ १०–५६ ॥

॥ हरिः ॐ ॥ आनर्तादेशाः पुरा नवमे मयोदितमिति विशेषविवक्षावान्बीजावापं चकार कारुणिको बादरायणिरिति सूचयति ॥ १ ॥ ब्रह्मण एतस्य क्व दर्शनं कथं चाज्ञा राज्ञस्तस्य दानं कथमिति राजा पृच्छतीत्याह ॥ राजेति । अर्थादुक्तप्रायं शब्दतो वदेति विस्तरेणेत्यनेन द्योतयति ॥ २ ॥ यशश्विनी तथा भाविनी । धर्मश्चार्थश्च धर्माथौ ताभ्यां सह काममोक्षौ तौ वेत्तीति धमार्थतत्त्ववित् । चतुर्विधपुरुषार्थज्ञानीत्यर्थः ॥ ३ ॥ नानाजनपदेश्वरैर्याच्यमानोऽप्यदत्वा तां कस्मै दास्यामीति प्रष्टुं ब्रह्माणं ययावित्यन्वयः ॥ ४ ॥ हाहाहूहू द्वौ गन्धर्वौ तत्र सभायां तस्मिन्काले स्वराणां मण्डलं ग्रामो मूर्छना मूर्छा आरोहावरोहरूपा सप्तस्वरास्तयो ग्रामा एकविंशतिमूर्छना इति भरतः ॥ ५ ॥ किञ्चिदल्पकालं तस्य गीतस्य विरामोऽवसानं तत्प्रतीक्षया बहिरतिष्ठत् ॥ ६ ॥ ते तुभ्यं मां प्रत्येव कुतः प्रश्न इत्यत आह । दास्य इति । तव दास्ये स्थितोऽहं दास्ये दासीत्वे कस्मै दास्यामीति वा । यो विरोचते तमेकं तथा दृष्टान् श्रुताश्चावनीशान्वदेति तं पद्मभूः प्राह । तान्विषयेश्वरान्देशाधीशान् ॥ ७ ॥ स धाता तान्तैवतोक्तानाकर्ण्य प्रहस्य । हासस्तु तेषां कुलस्य कालव्याकुलतया । भूपतेरिति भूपत इति च युक्तौ पाठौ । सुबहूनि युगानि गतानि ॥ ८ ॥ अश्राव्यं मानुषैरेतयोर्गीतं शृण्वतः क्षणमात्रमिव गतानि । सुतायाः सदृशा वरास्ते भूपा इदानीं क्व न सन्ति त इत्यर्थः ॥९॥ तर्हि गुणार्हितायाः कन्यायाः का गतिः कमलोद्भवेत्यत आह । इदानीमिति । यदुवंशाभिवृद्धिकरौ गृहं महिषी ॥१०॥ तत्र तयोर्मध्ये सङ्कर्षणायेमां कन्यां यच्छस्व तेन धात्रा तं प्रणम्य । यत्र तत्स्थानम् । बहुशालिन इत्युत्तरकार्योपयोगिशक्ततां व्यक्तीकर्तुम् ॥ ११ ॥ आदियुगसम्भूतामिति दहोन्नाहहेतुकथनम् । कृतयुगजां समां स्वकारस्य यावत्तावत्तावत्तरुण्याकारेण भाव्यं तथा चक्र इत्यर्थः । लाङ्गलेन हलेन नियतपतिपत्नीव्यतिरिक्तस्थल एव कन्या कनीयस्त्वसमयप्रचार इति ज्ञेयम् ॥ १२ ॥ अपिना न परवित्तता भगवत इत्यवगमयति । पत्नी नियता रेवतीति हरिवंशशंसितान्नीला विवादादपि न सेति ज्ञेयम् । इत्युक्त इत्यनेन ब्रह्मानुकूल्ये तु कन्याघटना भवतीत्याभाणकं तदारभ्य प्रवर्ततेति ध्वन्यते । इन्दिरांशां रमाम् ॥ १३ ॥ सर्वभूतानां पश्यतामनादृत्य तानीत्यर्थः ॥ १४ ॥ भगवान्ज्ञानादिमान् राक्षसेन विवाहेन । ननु तृतीये गान्धर्ववृत्त्या मिषतां स्वभागमित्युक्ते राक्षसेनेत्यत्रोक्तिः कथमिति चेन्न । आदिपर्वणि शाकुन्तलीये । अष्टावेव समासेन विवाहा धर्मतः स्मृताः । ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः । गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमः स्मृतः । तेषां धर्मान्यथापूर्वं मनुः स्वायम्भुवोऽब्रवीत् । प्रशस्ताश्चतुरः पूर्वान्ब्राह्मणस्योपधारय । षडानुपूर्व्याः क्षत्रस्य विद्धि धर्म्याननिन्दिते । राज्ञां तु राक्षसो युक्तो विट्शूद्रेष्वासुरः स्मृतः । पञ्चानां तु त्रयो धर्म्याद्द्वावधर्म्यौ स्मृताविह । पैशाचश्चासुरश्चैव न कर्तव्यौ कदाचन । अनेन विधिना कार्यो धर्मस्यैषा गतिः स्मृता । गन्धर्वराक्षसौ क्षत्रधर्मौ तौ मा विशङ्किथाः । पृथग्वा यदि वा मिश्रौ कर्तव्यौ नात्र संशयः । सा त्वं मम सकामस्य सकामा वरवर्णिनी । गान्धर्वेण विवाहेन भार्या भवितुमर्हसि । कण्वः । क्षत्रियस्य हि गान्धर्वो विवाहः श्रेष्ठ उच्यते । सकामायाः सकामेन निर्मन्त्रा रहसि स्मृत इत्युक्तेः । समसम्मतिर्गान्धर्वे राक्षसे च राक्षसो युद्धहरणादित्युक्तेः । पृथग्वा यदि वा मिश्रावित्युक्तेः क्वचिद्राक्षसेत्युक्तिः क्वचिच्च गान्धर्वेत्युक्तिश्च सम्भवत इति मन्तव्यम् । विवाह्यतेऽनेनेति विवाहो विधिस्तेनोपयेमे परिणीतवान् विवाहेनोपयेमे स्वीचकारेत्यर्थः । इति श्रुतं त्वन्मुखतः । तत्पारं तत्कृतान्ततुलसेनाप्रान्तमागमदाप । तत्पाते मागधाद्याः पालका यस्याः सा रमाऽगमद्वहिरित्यप्यान्तरङ्गिको भावो ज्ञेयो राज्ञः ॥ १५ ॥ श्रुतमिति त्वयैवोक्तमलमित्यतो वक्ति । ब्रह्मन्निति । माध्वीर्मधुरा लोकमलापहाः पुण्यास्तत्प्रापिका विष्णुकथाः श्रुतज्ञः शृण्वानः । ताच्छील्ये चानश् कः । तृप्येत तृप्तो भूयात् । नित्यनूतना नित्यं नवीना विशेषफलप्रदत्वात् । नवा एव नवस्य नूआदेशे तनप्प्रत्ययः वक्तव्य इति वार्तिकेन तनप् । नवीनो नूतनो नव इत्यमरः ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्य च दुर्बुद्धिमाह सोऽपीति । शब्ददोषपरिहाराय दग्धिशब्दः सप्तम्यन्तो ग्राह्यः । जरासन्धोऽपि दग्धिमध्ये प्रविष्टः । यथा भगवान् द्वारकायां प्रविष्टः, तथा सोऽपि दग्धि प्रविष्टः, परमसन्तापेन सन्तप्त इत्यर्थः । एतदपि ज्ञानकृतमेव तस्य, न क्रियया दाहो जात इति । अन्यथाग्रे पाण्डवानां यशो न स्यात् । इति **मृषा मन्वानः बलकेशवावालक्ष्य** । बलत्वात् ब्रह्मेशयोरप्यधिपतित्वाच्च तादृशौ न तथाभूताविति मृषा मन्वानो वा । अथवा । स तु दग्ध एव । अतः परं पाण्डवकीर्त्यर्थं मृषाभूतः सकलितः,

सीतावत् । ततो मृषा जरासन्धः बलत्वं केशवत्वं च मन्वानः सर्वांशेनापि नाशो भविष्यतीति विज्ञाय स्वस्य बलं सेनामाकृष्य मगधानेव ययौ । ननु स्वयं किल दग्धः, किं बलदाहेनेत्य आह सुमहदिति । सत्त्वेन महत्त्वेन च । तद्भगवदधिष्ठानमिति तत्स्थापनार्थं, ततो भगवतः, अपगमनार्थं च, मगधानेव देशान् ययौ, यतः सोऽपि मागधः. देशदोषमात्रेणावशिष्टः । **मत्वा तौ बलकेशवा**विति पाठे स एवार्थः ॥ १४ ॥ एवं तामसस्य रुद्रादेः वाक्यपरिपालनं निग्रहं वा विधाय स्त्रीणामुद्धारार्थे कृपया विवाहादिकं कृतवानिति वक्तुं ज्येष्ठस्य बलभद्रस्य विवाहमाह **आनर्ताधिपति**रिति । आनर्तदेशः द्वारकानिकटदेशः । तस्याधिपतिः रैवतः । श्रीमानिति । अमृत एव । रेवती नाम तस्य कन्या, स हि पूर्वं ब्रह्माणं प्रष्टुं गतः । ततो ब्रह्मवाक्यात् कनिष्ठायापि रामाय दत्तवान् इति पुरा **नवमस्कन्धे निरूपितम् । अस्य विचारस्तत्रैव कृतः** ॥ १५ ॥ भगवतो विवाहमाह **भगवान**पीति । ननु स्वतःसिद्धलक्ष्मीकस्य निरिन्द्रियस्य प्रयोजनाभावात्किं विवाहेनेत्याशङ्क्य परिहरति । यद्यपि **भगवान्**, तथापि **गोविन्द** इति इन्द्रादिभिरिन्द्रत्वेनाभिषिक्त इति तेषां वाक्यसिद्ध्यर्थ**मुपयेमे,** विवाहं कृतवान्, न तु गोपिकावत्परिग्रहमात्रम् । कुरूद्वहेति संबोधनं भगवत्स्वरूपज्ञानाय ननु तथापि कर्मणा उत्पादिता कर्मफलरूपा तादृशकर्मकर्त्रैव विवाह्येति कथं भगवता विवाहः कृत इति चेत्, तत्राह **वैदर्भी**मिति । विदर्भदेशे सोत्पन्ना । अतो न कर्मजनिता । किञ्च । भीष्मकस्य सुता, भीष्मं भयानकं कं सुखं यस्येति । प्रलयकर्ता महादेव एवावतीर्णः, तस्य च सुता सीता पूर्वजन्मन्यपि महादेवकन्यैव, सैवेदानीं भीष्मकाज्जाता । अतो विवाहः कर्तव्य एव । किञ्च **श्रियो मात्रा**मिति । सा हि लक्ष्म्याः मात्रा भवति अंशः, नहि तामन्यो ग्रहीतुं शक्तः । सा ह्यवतरति यथा, यथा भगवानवतरति । 'राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनी'त्यादि वाक्यात् । तत्रापि स्वयंवरे यदा सर्व एव राजान आहूताः, तदा भगवानप्याहूतः । यदा तया भगवान् वृतः, ततस्तदिच्छया विवाहं कृतवान् ॥ १६ ॥ किञ्च, **प्रमथ्य तरसा राज्ञ** इति । सर्वानेव शिशुपालादीन् **प्रथथ्य** मारयित्वा जयप्राप्तामिव तां नीतवान् । शाल्वादयोऽतिविरोधिनो बलिष्ठाश्च । तैः सह युद्धे विशेषहेतुमाह **चैद्यपक्षगा**निति । 'स्वयंवरेऽपि शिशुपालः समागतः । अतस्तद्धितार्थमपि शाल्वादयः प्रवृत्ताः । मुख्यो भगवद्विरोधी शिशुपालः । अन्येऽपि विरोधिनः यथाकथञ्चिद्भगवद्विरोधं सम्पादयितुं तत्पक्षपातिनो जाता इति । किञ्च । प्रद्युम्नादयोऽप्युत्पाद्याः । अतः कामः सङ्कटे वर्तत इति तदुत्पत्त्यर्थमप्युपयेम इत्याह **पश्यतां सर्वलोकाना**मिति । यथा मातुरापन्निवृत्त्यर्थं गरुडः अयुक्तेभ्योऽप्यमृतं दातुं प्रवृत्तः, तथा भगवानपि कामस्य दुःखनिवारणार्थं वैदर्भीम् अयुक्तामपि स्वयं गृहीतवान्, मारितवांश्चान्यान् । यद्ययुक्तमेतद्भवेत् तदा लोकाः साक्षिण इति तान् प्रमाणीकरोति । एवं सर्वप्रकारेण भगवतो विवाहो निरूपितः ॥ १७ ॥ तत्र राजा विवाहे पौरुषं श्रोतुं विशेषं पृच्छति **भगवान् भीष्मकसुता**मिति । भगवतो विवाहः बहुधा पुराणेषु श्रुतः । ततो राजा स्वयंवरविवाहात्प्रकारान्तरेण श्रुतवान्, तत्र च पौरुषमधिकमिति, तद्भवति वा नवेति सन्देहनिवृत्त्यर्थं पृच्छति । भगवत्त्वान्नाज्ञानम् । **भीष्मकसुता**मिति पितुरपि बलिष्ठता । **रुक्मिणी**मिति भगवतो मुख्यभार्येति प्रसिद्धा । ततश्च 'गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृता'विति प्रथमो विवाहो धर्म्यः कर्तव्यः । अतो धर्मित्वार्थं राक्षस एव विवाहः भगवता कृत इति स एव त्वया वक्तव्य इत्याह **राक्षसेन विधानेने**ति । **रुचिरानना**मिति तस्या मुग्धभावो निरूपितः ततश्च राक्षसे विवाहे सा कथमनुगुणा अभीतागतेत्यपि सन्देहः । 'प्रसह्य कन्याहरणं राक्षसो विधिरुच्यत' इति विधिशब्दः परस्वहरणलक्षणदोषव्यावृत्त्यर्थः । यथा विवाहः दाने अदुष्टः, एवं हरणेऽपि क्षत्रियस्येतिज्ञापनार्थः श्रुतमिति प्रमाणमुपन्यस्तम् ॥ १८ ॥ अतस्तत्र प्रकारं पृच्छति **भगवन् श्रोतुमिच्छामी**ति । अनेनाग्रे वक्ष्यमाणा कथा अध्यायत्रयात्मिका न समाधिभाषेति सूचितम् । अन्यत्र श्रुतमेव कल्पान्तरीयमपि योगानुभावेन वक्तव्यमिति प्रश्नात्, अन्यथा स्वतन्त्रवक्तुः किं पूर्वश्रुतप्रकारकथनेनेति । अतः श्रोतुरनुरोधात्कल्पान्तरीयमपि गान्धर्वराक्षसवैधभेदेन त्रिधा त्रिभिरध्यायैर्वक्ष्यति । तेनात्र प्राप्तं दूषणत्रयं परिहृतं भविष्यति । भगवान् कपटेन गत्वा अहृतां हृतवानिति, तस्या भ्रातुर्मुण्डनं कृतवानिति, बलभद्रेण बोधित इति, रुक्मिण्याश्च लज्जाभावेनापरिचितभगवत्प्रार्थनेति । एवं सति रसात्मको विवाहो न भवेत् । भक्तिरसो हि शृङ्गारादीनामुपमर्दकः । अतः समाधिभाषाविवाहः स्वयंवर एव । अन्यस्तु मतान्तरीय इति निश्चयः । ननु अप्रस्तुतं किमिति वक्ष्यतीति चेत्, तत्राह **श्रोतुमिच्छा**मीति । इच्छा पूरणीयेति तदर्थं वक्ष्यति । किञ्च, इयमपि कथा कृष्णस्य । अमितं तेजो यस्येति । पराक्रमाधिक्याच्च तद्वक्तव्यम् । क्षत्रियाणां हि क्षात्रप्रकारेण निरूपितं भगवच्चरित्रं मनोहारि भवति । तदाह । **यथा मागधशाल्वादी**निति । मागधोऽपि जयं प्राप्त इति स निरूप्यते । साल्वः सात्त्विको महाँश्च । एवं जयेन स्वभावेन च महान्तौ आदिभूतौ येषामिति जयशीलवीरजयो भगवत्कृतः श्रोतव्य इति निरूपितम् । तत्राप्येक एव स्वयं तान् जित्वा स्वयं कुशलेन पुरं द्वारकामभ्यगादिति । तदप्येकस्मिन्कल्पे, तत्सर्वथा विरुद्धं मन्वानः शुको नोक्तवान्, तदा तु भगवानपि समाहूतो गतः । वरणात्पूर्वमेव बलात्तां हृत्वा सर्वान् विनिर्जित्य एकाकी स्वयं गृहं गत इति कथा भवति । तत्र यद्यपि पौरुषं महत्, तथाप्यत्यन्तं क्लिष्टकर्मत्वं भवतीति तन्नोक्तवान् । तामसकल्पे हि तथा कथा । अत एव शिशुपालो वक्ष्यति 'समुद्रं दुर्गमाश्रित्य बाधन्त' इति अक्लिष्टकर्मत्वं च वक्तव्यम् । अतो यावता तदुपयुज्यते, तावद्वक्तव्यमिति राक्षसो विवाह उक्तः, नत्वेकाकिहरणम् । अनेनैवं ख्यापितम् । पृष्टमयुक्तं चेत् , न वक्तव्यमिति ॥ १९ ॥ ननु कथा भगवतो महती वक्तव्या, ततश्च अत्यावश्यककथैव श्रोतव्येति चेत् तत्राह **ब्रह्मन् कृष्णकथा** इति **ब्रह्म**न्निति ज्ञानमुक्तम् । कृष्णकथात्वात् कीर्तने श्रवणेऽपि वैराग्याभाव उक्तः । किञ्च । प्राणिनो हि धर्मार्थकाममोक्षेप्सवः । तत्र कृष्णकथाश्चतुर्णां प्रतिरूपा इत्याह । **पुण्या** इति धर्मरूपाः । **माध्वी**रिति कामरूपाः । लोकानां मलं

दारिद्र्यवत् कश्मलरूपं हरन्तीति **लोकमलापहाः**। एवं त्रिवर्गरूपा इति तदभीप्सुः को नु तृप्येत। **नु** इति वितर्के। न कोऽप्यत्र विरक्त इति भावः। तर्हि कथं सर्वे न प्रवर्तन्त इति चेत्, तत्राह **शृण्वान** इति। सकृच्छ्रुत्वापि निवर्तन्त इति चेत्। श्रु**तज्ञ** इति। वर्तमानप्रयोगेण निरन्तरश्रवणे प्राप्तेऽपि श्रवणरसिकोऽत्र मुख्य इति श्रुतं जानाति। रसिकत्वेनेति श्रुतज्ञ उक्तः। **रसज्ञ** इति पाठे तु स्पष्ट एव। किञ्च। **नित्यनूतनाः** अयातयामाः कालग्रासरहिताः। तेन मोक्षरूपा अपीत्युक्तम् ॥ २० ॥

श्रीसुबोधिनी–सारः

बलकेशवौ रामकृष्णौ दग्धाविति मृषा मिथ्या मन्यमानः सोऽपि जरासंधः सुमहद्बलं आकृष्य निवर्त्य संहृत्य मगधान् जगाम ॥ १४ ॥ आनर्त्तदेशपतिः श्रीमान् रैवतो रेवतसुतः ककुद्मी ब्रह्मणा नोदित आदिष्टो रेवतीं सुतां कन्यां बलाय प्रादादिति पुरा नवमस्कंधे उदितमुक्तम् ॥ १५ ॥ "रुक्मिणी मंगलं नाम श्रूयतां बहुमंगल सर्वमंगलदं पुण्यं महापातकनाशनम्।" हे कुरूद्वह श्रियो मात्रां लक्ष्म्याः कलां धाम भीष्मकस्य सुतां वैदर्भीं रुक्मिणीं गोविंदो भगवानपि उपयेमे परिणिन्ये ॥ १६ ॥ तरसा वेगेन स्वयंवरे चैद्यपक्षगान् शिशुपालपक्षगतान् शाल्वादीन् राज्ञः प्रमथ्य जित्वा सर्वलोकानां पश्यतां सतां गरुडोऽमृतमिव ॥ १७ ॥ राजप्रश्नः। सुंदरमुखीं भीष्मकस्य सुतां रुक्मिणीं भगवान्कृष्ण उपयेमे राक्षसेन विधानेन "राक्षसो युद्धहरणात्" इति धर्मशास्त्रात्। इत्यस्माभिः श्रुतम् ॥१८॥ अतुलवीर्यस्य कृष्णस्य चरितं श्रोतुमिच्छामः जरासंधशाल्वादीन् जित्वा यथा कन्यामाहृतवान् हे भगवन् ॥ १९ ॥ हे ब्रह्मन् पुण्या माध्वीर्मिष्टा लोकपापघ्नीः कृष्णस्य कथाः शृण्वानः शृण्वन् श्रुतज्ञः सारवित्को नु तृप्येतालंबुद्धिं कुर्यात्। नित्यं नूतना आश्चर्यवत्प्रतीयमानाः ॥ २० ॥

विवरणटिप्पणी

प्रमथ्येत्यस्याभासे **किञ्चे**ति। गान्धर्वत्वं स्वयं वरणादुक्तम्। राक्षसत्वमप्यस्तीति समुच्चयः। **भगवन्नि**त्यत्र। **तेनात्रे**ति। एतस्य मतान्तरत्वकथनेनात्र समाधिभाषायामिदं दूषणत्रयं नास्तीत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स मागधोऽपि 'रामकृष्णौ दग्धौ' इति मृषैव मन्वानः सुमहत् बलं सैन्यमाकृष्य आदाय मगधान् देशान् प्रतिययावित्यन्वयः ॥१४॥ अथ श्रीकृष्णस्य विवाहान्निरूपयितुकामो नवमस्कन्धोक्तं बलभद्रविवाहमनुस्मारयति–आनर्तेति। स्पष्टार्थः।१५॥ अथ भगवद्विवाहं सङ्ग्रहेणाह—भगवानपीति द्वाभ्याम्। सावधानतार्थं सम्बोधयति—कुरूद्वहेति। भगवान् गुणैः वैराग्यादिगुणैः पूर्णोऽपि गोविन्दः सर्वेषां लोकानां जनानां पश्यतामेव सतां शाल्वादीन् राज्ञः प्रमथ्य अभिभूय वैदर्भीं विदर्भदेशोत्पन्नां भीष्मकस्य राज्ञः सुतां रुक्मिणीं स्वयंवरे आहृत्य उपयेमे विवाहितवानिति द्वयोरन्वयः। एवंविवाहे हेतुमाह–श्रियो लक्ष्म्या मात्रामवतारभूतामित्यर्थः राज्ञामभिभवे हेतुमाह—चैद्यस्य शिशुपालस्य वैरिणः पक्षगानिति। अभिभूय हरणे दृष्टान्तमाह—तार्क्ष्यपुत्र इति। गरुडो यथा देवानभिभूय सुधां आहृतवांस्तथेत्यर्थः ॥ १६–१७ ॥ एवं सङ्क्षेपतः रुक्मिणीविवाहं श्रुत्वा तद्विस्तरबुभुत्सयाऽनुवादपूर्वकं तत्प्रकारं पृच्छति—भगवानिति। रुचिरं सुन्दरमाननं यस्यास्तां भीष्मकसुतां रुक्मिणीं भगवान् राक्षसेन विधानेन 'राक्षसो युद्धहरणात्' इति स्मृतेः, हरणप्रकारेण उपयेमे विवाहितवानिति तु श्रुतम् ॥ १८ ॥ सर्वज्ञत्वं सूचयन् सम्बोधयति – भगवन्निति। यथा येन प्रकारेण कृष्णो मागधादीन् जित्वा रुक्मिणीं कन्यामुपाहरत् तत् अमिततेजसः महाप्रभावस्य कृष्णस्य चरितं श्रोतुमिच्छामीत्यन्वयः। तद्वदेति शेषः ॥ १९ ॥ ननु 'सङ्क्षेपतः श्रुतवतोऽपि पुनः प्रश्नेन किम्' इत्याशङ्क्याह—ब्रह्मन्निति। 'ब्रह्मनिष्ठस्यापि तव ततस्तृप्तिर्न दृश्यते' इति सूचयन् सम्बोधयति—ब्रह्मन्निति। कृष्णकथाः शृण्वानः शृण्वन् को नु तृप्येतेत्यन्वयः। ननु 'बहवोपि ततो विरक्ता दृश्यन्ते' इत्याशङ्क्याह—श्रुतज्ञ इति। श्रुतसारवित् विवेकी। कथाश्रवणादौ ये विमुखाः ते स्वदुष्कृतेन तत्सुखानभिज्ञाः पशुतुल्या इत्याशयः। अतृप्तौ हेतून् दर्शयन् विशिनष्टि—शृण्वतां वदतां च पुण्याः परमफलहेतुपुण्यावहाः, माध्वीः श्रुतिसुखावहाः, श्रवणादिपराणां लोकानां मलापहाः पापघ्नीः नित्यनूतनाः प्रतिक्षणमाश्चर्यवत् प्रतीयमाना ॥२०॥

अन्वितार्थप्रकाशिका

स इति। स मागधोऽपि बलकेशवौ रामकृष्णौ दग्धाविति मृषैव मन्वानः सुमहत् बलं सैन्यमाकृष्य आदाय मागधान् देशान् प्रति ययौ ॥ १४ ॥ श्रीकृष्णविवाहान् वक्तुं नवमस्कन्धोक्तं रामविवाहं स्मारयति–आनर्त्तेति। आनर्तदेशाधिपतिः श्रीमान् रैवतः रेवतसुतः ककुद्मी ब्रह्मणा चोदितः सन् स्वसुतां रेवतीं बलाय प्रादात्। इति पुरा नवमस्कन्धे उदितम् ॥ १५ ॥ भगवानिति द्वयम्। हे कुरूद्वह ! भगवान् गोविन्दोऽपि सर्वेषां लोकानां जनानां पश्यतामेव सतां चैद्यपक्षगान् शाल्वादीन् राज्ञः तरसा बलेन प्रमथ्य अभिभूय जरासन्धस्य मुख्यत्वेऽपि शाल्वादित्वोक्तिः रुक्मिणीहरणोत्तरं शाल्वेनैव सर्वेषां युद्धे प्रवर्तनमिति हरिवंशोक्तेः। वैदर्भीं विदर्भदेशोत्पन्नां श्रियो लक्ष्म्याः मात्रामवतारभूतां भीष्मकस्य राज्ञः सुतां रुक्मिणीं स्वयंवरे आहृत्य उपयेमे परिणीतवान्। विवाहलीलया नीतवान् इत्यर्थः। तार्क्ष्यस्य कश्यपस्य पुत्रो गरुडो यथा देवानभिभूय सुधाम् आहृतवांस्तथा।१६-१७।

भगवानिति। रुचिरं सुन्दरमाननं यस्यास्तां भीष्मकसुतां रुक्मिणीं भगवान् राक्षसेन विधानेन "राक्षसो युद्धहरणात्" इति स्मृतेः। वीरयोग्येन हरणप्रकारेण उपयेमे इति श्रुतम्। त्वत्तः पूर्वमेव वा सामान्यतः श्रुतम् ॥ १८ ॥ भगवन्निति। यथा येन प्रकारेण कृष्णो मागधशाल्वादीन् जित्वा रुक्मिणीं कन्यामुपाहरत् तदमिततेजसो महाप्रभावस्य कृष्णस्य चरितं विशेषतः श्रोतुमिच्छामः ॥ १९ ॥ ब्रह्मन्निति। हे ब्रह्मन्! शृण्वतां वदतां च पुण्याः महाफलाः माध्वी श्रुतिसुखावहाः छान्दसो निपातः। लोकानां मलापहाः पापघ्नीः नित्यनूतनाः प्रतिक्षणमाश्चर्यवत्प्रतीयमानाः कृष्णकथाः शृण्वानः शृण्वन्। शानजार्षः चानश् वा। श्रुतज्ञो विवेकी को नाम तृप्येत। तङार्षः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्रीकृष्णोद्वाहान् वक्तुं नवमस्कंधगदितं रामोद्वाहं पुनर्दर्शयति। आनर्त्तेति ॥१५॥ श्रियो मात्रां लक्ष्म्याः पूर्णमूर्त्तिम् ॥१६॥ तार्क्ष्यस्य कश्यपस्य पुत्रः सुपर्णः सुरान् प्रमथ्य यथा सुधामहरत् तथा वैदर्भीम् ॥१७॥ राक्षसो युद्धहरणादिति स्मरणात्। विधानेन विधिना ॥ १८ ॥ पुनरधिकं श्रोतुमिच्छामि ॥१९॥ माध्वीः मधुररसाः शृण्वानः शृण्वन्। नित्यनूतनाः सदा नवीनाः ॥२०–२२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ श्रीकृष्णस्य विवाहान्निरूपयितुकामस्तावद्बलभद्रविवाहं नवमस्कन्धोक्तमनुस्मारयति। आनर्त्ताधिपतिरिति। आनर्त्ताधिपतिः। आनर्त्तदेशस्याधिपतिः, श्रीमान् रैवतः, रेवती सुतां, ब्रह्मणा चोदितः सन्, बलाय बलभद्राय, प्रादात् इति, पुरा नवमस्कन्धे, उदितमुक्तमस्ति ॥ १५ ॥ अथ रुक्मिणीविवाहस्य विस्तरतो बुभुत्सां समुत्थापमन् तं संग्रहेणाह। भगवानपीति। प्रमथ्येति च। हे कुरूद्वह, भगवान् गोविन्दः, श्रीकृष्णोऽपि, भीष्मकसुतां भीष्मकनृपस्य तनयां, श्रियो लक्ष्म्याः, मात्रामंशभूतां, वैदर्भीं रुक्मिणीमित्यर्थः। तार्क्ष्यपुत्रो गरुडः, सुधाममृतं इव, स्वयंवरे चैद्यपक्षगान् शिशुपालपक्षपातिनः, शाल्वादीन् राज्ञः तरसा बलेन, प्रमथ्याभिभूयेत्यर्थः। सर्वलोकानां पश्यतां सतां, पश्यतः नृपतिलोकाननादृत्येत्यर्थः। षष्ठी चानादरे' इति अनादरे षष्ठी। आहृत्येति शेषः। उपयेमे परिणिनायेत्यर्थः। इति द्वयोरेकान्वयः ॥ १६–१७ ॥ विस्तरत एतद्बुभुत्सया पृच्छति राजा। भगवानिति। भगवान् श्रीकृष्णः, रुचिरं सुन्दरमाननं यस्यास्तां, रुक्मिणीं रुक्मिणीसंज्ञां, भीष्मकसुतां, राक्षसेन विधानेन, नियुद्धयानीताया विवाहो राक्षसविवाहविधिः। 'राक्षसो युद्धहरणात्' इति स्मृतेः। उपयेमे इति, श्रुतम्। अधुना त्वन्मुखादिति भावः ॥ १८ ॥ भगवन्निति। हे भगवन्, यथा येन प्रकारेण, मागधश्च शाल्वश्च तावादी येषां तान्, एकः एव सन्, जित्वा, पुनः आगमत्। वैदर्भीमादायेति शेषः। अमिततेजसः कृष्णस्य, तं जयागमनप्रकारमिति शेषः। श्रोतुं, इच्छामि ॥ १९ ॥ आत्मनः श्रवणौत्सुक्यमाविष्करोति। ब्रह्मन्निति। हे ब्रह्मन्, पुण्याः शृण्वतां वदतां च पुण्यावहाः, माध्वीः श्रुतिसुखावहाः, लोकस्य शृण्वतो गदतश्च, जनस्य मलापहाः पापघ्नीश्च, कृष्णकथाः, यतः नित्यनूतनाः, अतः शृण्वानः, श्रुतज्ञः श्रोत्रेन्द्रियसुखसारासारविवेकी स्याच्चेत्, कः पुमान् न सेवेत, अपि तु सेवेतैवेत्यर्थः ॥ २० ॥

कृष्णप्रिया

यह बात मैं तुमसे पहले ही (नवम स्कन्ध में) कह चुका हूँ कि आनर्तदेश के राजा श्रीमान् रैवत जी ने अपनी रेवती नाम की कन्या ब्रह्मा जी की प्रेरणा से बलराम जी के साथ व्याह दी ॥१५॥ परीक्षित्! भगवान् श्रीकृष्ण भी स्वयंवर में आये हुए शिशुपाल और उसके पक्षपाती शाल्य आदि नरपतियों को बलपूर्वक हराकर सबके देखते-देखते, जैसे गरुड़ ने अमृत हरण किया था, वैसे ही विदर्भ देश की राजकुमारी रुक्मिणी को हर लाये और उनसे विवाह कर लिया। रुक्मिणी जी राजा भीष्मक की कन्या और स्वयं भगवती लक्ष्मी जी का अवतार थी ॥ १६–१७ ॥ राजा परीक्षित् ने पूछा—भगवन्! हमने सुना है कि भगवान् श्रीकृष्ण ने भीष्मकनन्दिनी परमसुन्दरी रुक्मिणी देवी को बलपूर्वक हरण करके राक्षस विधि से उनके साथ विवाह किया था ॥ १८ ॥ महाराज! अब मैं यह सुनना चाहता हूँ कि परम तेजस्वी भगवान् श्रीकृष्ण ने जरासन्ध, शाल्य आदि नरपतियों को जीतकर किस प्रकार रुक्मिणी हरण किया? ॥ १९ ॥ ब्रह्मर्षे! भगवन् श्रीकृष्ण की लीलाओं के सम्बन्ध में क्या कहना है? वे स्वयं तो पवित्र हैं ही, सारे जगत् का मल धो–बहाकर उसे भी पवित्र कर देने वाली हैं। उनमें ऐसी लोकोत्तर माधुरी है, जिसे दिन-रात सेवन करते रहने पर भी नित्य नया-नया रस मिलता रहता है। भला ऐसा कौन रसिक, कौन मर्मज्ञ है जो उन्हें सुनकर तृप्त न हो जाय ॥ २० ॥

श्रीशुक[1] उवाच

राजाऽऽसीद् भीष्मको नाम विदर्भाधिपतिर्महान् । तस्य पञ्चाभवन् पुत्राः कन्यैका च वरानना ॥ २१ ॥
रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनन्तरः । रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती ॥ २२ ॥
[2]सोपश्रुत्य मुकुन्दस्य रूपवीर्यगुणश्रियः । [3]गृहागतैर्गीयमानास्तं मेने सदृशं पतिम् ॥ २३ ॥
तां [4]बुद्धिलक्षणौदार्यरूपशीलगुणान्विताम् । कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे ॥ २४ ॥
बन्धूनामिच्छतां दातुं कृष्णाय भगिनीं नृप । [5]ततो निवार्य कृष्णद्विड् रुक्मी चैद्यममन्यत ॥ २५ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—विदर्भाधिपतिः, भीष्मकः, नाम, महान्, राजा, आसीत्, तस्य, पञ्च, पुत्राः, अभवन्, च, एका, वरानना, कन्यका, आसीत् ॥ २१ ॥ अग्रजः, रुक्मी, रुक्मरथः, रुक्मबाहुः, अनन्तरः, रुक्मकेशः, रुक्ममाली, एषाम्, सती, स्वसा, रुक्मिणी, आसीत् ॥ २२ ॥ सा, गृहागतैः, गीयमानाः, मुकुन्दस्य, रूपवीर्यगुणश्रियः, उपश्रुत्य, तम्, सदृशम्, पतिम्, मेने ॥ २३ ॥ च कृष्णः, बुद्धिलक्षणौदार्यरूपशीलगुणान्विताम्, सदृशीम्, भार्याम्, ताम्, सम् उद्वोढुम्, मनः, दधे ॥ २४ ॥ नृप ? कृष्णद्विड्, रुक्मी, बन्धूनाम्, कृष्णाय, दातुम्, इच्छताम्, ततः, निवार्य, भगिनीम्, चैद्यम्, अमन्यत ॥ २५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चैद्यममन्यत—तस्या वरमित्यर्थः ॥ २५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य भीष्मकस्य । 'कन्यका तु वरानना' इति पाठेऽपि तदेव तात्पर्यम् ॥ २१ ॥ तन्नामतो निर्दिशति—रुक्मीति । अग्रजो ज्येष्ठः । एषां रुक्म्यादीनाम् । अनन्तर इति सर्वत्रान्वेति क्रमजातत्वविवक्षया । सती रूपादिगुणैरुत्तमा ॥ २२ ॥ सा रुक्मिणी । रूपं स्वरूपम्, वीर्यं प्रभावः, गुणा भक्तवात्सल्यादयः, श्रियोऽलौकिकसंपदः । तं श्रीकृष्णम् । गृहागतैर्नारदादिभिः । श्रीः सम्पत् । वीर्यस्य गुणांतर्गतत्वेऽपि पृथगुक्तिः क्षत्रियत्वेन परमानन्दप्रदत्वात् । रूपादीनां पूर्वपूर्वाधिक्यमूह्यम् । उप समीप एव श्रुत्वा । कथम्—पितुर्गृहमागतैः सर्वैरेव गीयमानाः कविभिर्गीततया निबद्धत्वात्प्रीत्या मधुरस्वरेणोच्चैः कीर्त्यमानत्वात् । सदृशं योग्यम्, आत्मनस्तादृशत्वात् ॥ २३ ॥ तां रुक्मिणीम् । लक्षणानि सौभाग्यचिह्नानि । तदुक्तमनंगरंगे—"नीलांभोरुहपत्रकांतिरथ वा स्वर्णप्रभा भास्वरा भृङ्गीनीलशिरोरुहा शशिमुखी सारंगशावेक्षणा । स्याद्यस्यास्तिलजप्रसूनसदृशी नासा सुदन्तावली सुश्रोत्रा पिकभाषिणी च जलजग्रीवाथ बिम्बाधरा । चक्राद्यंकितशोणपाणिचरणा क्षामोदरी स्वल्पभुग्रंभास्तम्भमनोरमोरुयुगला श्रोण्या बृहत्यान्विता । नाभ्या चातिगभीरया गजगतिः शांताल्पनिद्रालसा शीलाढ्या सुकुमारिका नरवरैः कन्या विवाह्या शुभा ।' इति । बुद्धिः परमार्थविचारः, लक्षणं स्वीयभगवल्लक्ष्मवल्लक्ष्म औदार्यं वदान्यत्वं कुलीनत्वादिमहत्त्वं वा, शीलं सुस्वभावः, गुणाः सौकुमार्यसौरभ्यादयो लज्जादयश्च, तैराश्रियत इत्याश्रयः आश्रयणं यस्यामिति वा । च अपि । कृष्णः सर्वचित्ताकर्षकगुणो भगवानपि । बुद्ध्यादेर्गुणांतर्गतत्वेऽपि पृथगुक्तिस्तत्तद्विशेषाभिप्रायेण । अत एव सदृशीम् । अत्र च चरणचिह्नादिलक्षणानां सादृश्यं दक्षिणवामविपर्ययेणेति गम्यते, स्त्रीपुरुषाणां सामुद्रिकादौ तथा प्रशस्तत्वात् । बुद्ध्यादीनां पूर्वोत्तरानुक्रमाभावः सादृश्ये सर्वेषामेव प्राधान्यापेक्षया सम्यग्युद्धहरणादिनोद्वोढुं मनो दधे निश्चिकाय, सदाऽचिंतयद्वा । अथ वा—सदृशीं तादृशबुद्ध्यादिभिर्लक्षणै राधाद्यैकात्मत्वादिति भावः । अत एव मनोदधे एतावन्तं कालं मनोऽपिदध इति भावः ॥ २४ ॥ बन्धूनां पित्रादीनाम् । ततः कृष्णात् । कृष्णद्विट् जन्मांतरीयसंस्कारवशेन कृष्णविरोधी । इत्यर्थ इति—किममन्यतेति साकांक्षत्वाद्वरमिति शेषः कार्य इत्याशयः । बन्धूनां पित्रादीनाम्, अनादरे षष्ठी । एवं मुनींद्रेण भीष्मकस्य साधुत्वमेव दर्शितम् । ततस्तस्मात्कृष्णात्, भगिनीदानं बंधून्वा निवार्य । हे नृपेति—नृपत्वाभिमानेन तमनृपं मत्वेति भावः ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गुणैर्महान् कन्यैका रुचिरानना इति कन्यका तु वराननेति पाठे पूर्ववदेव तात्पर्यम् ॥ २१ ॥ अनन्तर इति रुक्मरथादौ सर्वत्रान्वयः । क्रमजातत्वविवक्षया सा च रुक्मिण्याः सर्वकनिष्ठात्वेन पित्रोः प्रेमपात्रत्वविवक्षया च सती रूपगुणैरुत्तमा ॥ २२ ॥

---

[1] श्रीबादरायणि–प्रा. पा. । [2] सा पश्यन्ती–वीर. । [3] मान तं–प्रा. पा. । [4] श्रयाम्–श्रीधर. वंशी. जीव. वीर. विज. ।
[5] रुक्मी निवार्य कृष्णद्विट् चैद्याय समकल्पयत्–विज. ।

श्रीः सम्पत् वीर्य्यस्य गुणान्तर्गतत्वेपि पृथगुक्तिः क्षत्रियात्वेन तस्य विशेषापेक्षया परमानन्दप्रदत्वे रूपादीनां पूर्वपूर्वाधिक्यमूह्यं ता उप समीप एव श्रुत्वा कथं पितुर्गृहमागतैः सर्वैरेव गीयमानाः कविभिर्गीततया निबद्धत्वात् प्रीत्या मधुरस्वरेणोच्चैर्वर्ण्यमानत्वाच्च सदृशं योग्यम् आत्मनस्तादृशत्वात् ॥ २३ ॥ लक्षणं स्वीयभगवल्लक्ष्मवल्लक्ष्मीलक्ष्म औदार्य्यं वदान्यत्वं कुलीनत्वादि महत्त्वं वा शीलं सुस्वभावः गुणाः सौकुमार्य्यसौरभ्यादयो लज्जादयश्च तैराश्रीयत इत्याश्रयं स्त्रीत्वमार्षं तेषामाश्रय आश्रयणं यस्यामिति (वा) च अपि कृष्णः सर्वचित्ताकर्षकगुणो भगवानपि बुद्ध्यादेर्गुणान्तर्गतत्वेऽपि पृथगुक्तिः पूर्ववत्तत्द्विशेषाभिप्रायेण अत एव सदृशीम् अत्र चरणचिह्नादिलक्षणानां सादृश्यं दक्षिणवामविपर्य्ययेणेति गम्यते स्त्रीपुरुषयोः सामुद्रकादौ तथा प्रशस्तत्वात् बुद्ध्यादीनां पूर्वोत्तरानुक्रमाभावः सादृश्ये सर्वेषामेवाऽप्राधान्याऽपेक्षया सम्यक् युद्धहरणादिनापि उद्वोढुं मनो दधे निश्चिकाय सदाऽचिन्तयद्वा अथवा सदृशीं तादृशबुद्ध्यादिभिर्लक्षणै राधाद्यैकात्मकत्वादिति भावः । अत एव मनो दधे । एतावन्तं कालं मनोऽपि न दध इति भावः ॥ २४ ॥ तथाप्यञ्जसा विवाहे हेतुमाह—बन्धूनामिति । पित्रादीनां सर्वेषाम् अनादरे षष्ठी एवं मुनीन्द्रेण भीष्मकस्य साधुत्वमेव दर्शितं तथाग्रे पुत्रस्नेहवशानुग इत्यत्र महामतिरित्यत्र च तैरपि व्याख्यास्यते ततस्तस्मात् कृष्णात् भगिनीदानं तान् बन्धून् वा निवार्य्य हे नृपेति परमाश्चर्यत्वात् ॥ २५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गुणैर्महान्, 'वरानना' इति पाठेऽपि परमसौन्दर्य्य एव तात्पर्य्यम् ॥ २१ ॥ अग्रज इति तस्य सर्वमान्यतोक्ता । अनन्तर इति तत्तन्मध्ये अन्वयेन श्रीरुक्मिण्याः सर्वकनिष्ठत्वं बोधयति । स्वसा सहोदरभगिनीं, सतीं रूपगुणैरुत्तमा ॥ २२ ॥ मुकुन्दस्य परमानन्दप्रदस्य भगवत इति तद्रूपादीनामपि तादृशत्वमभिप्रेतम् । रूपं सौन्दर्य्यम्, वीर्य्यं पराक्रमः, गुणा विविधवैदग्ध्यादयः, श्रीः सम्पत्, वीर्य्यस्य गुणान्तर्गतत्वेऽपि पृथगुक्तिः क्षत्रियत्वेन, तस्य विशेषापेक्षया परमानन्दप्रदत्वे रूपादीनामुत्तरोत्तरस्मात् पूर्व्वपूर्व्वस्याधिक्यमूह्यम् । ता उप समीप एव श्रुत्वा । कुतः ? गृहं तस्या पितुर्वा, आगतैः सर्व्वैरेव जनैर्गीयमानाः, कविभिर्गीततया निबद्धत्वात्, यद्वा, प्रीत्या मधुरस्वरेणोच्चैर्वर्ण्यमानाः, सदृशं स्वतुल्यम्, आत्मनस्तादृशत्वात् ॥ २३ ॥ लक्षणं सामुद्राद्युक्त-सत्स्त्रीलक्षणम्, औदार्य्यं वदान्यत्वम्, कुलीनत्वादिमहत्त्वं वा, शीलं सुस्वभावः, गुणाः सौकुमार्य्यसौरभ्यादयो लज्जादयश्च, तैराश्रियते इत्याश्रयाम्, च अपि, कृष्णः सर्व्वचित्ताकर्षकरूपगुणो भगवानपि बुद्ध्यादेर्गुणान्तर्गतत्वेऽपि पृथगुक्तिः पूर्व्ववत्तत्तद्विशेषाभिप्रायेण, अत एव सदृशीं बुद्ध्यादीनां पूर्व्वपूर्व्वस्मादुत्तरोत्तरस्य सादृश्येऽपेक्षाधिक्येन तत्तत्क्रमेण निर्द्देशः । सम्यग् युद्धहरणादिनोद्वोढुं मनो दधे निश्चिकाय सदाचिन्तयदिति वा ॥ २४ ॥ तथाप्यविवाहे हेतुमाह—बन्धूनामिति । पित्रादीनां सर्व्वेषाम्, अनादरे षष्ठी, एवमत्र श्रीबादरायणिना श्रीभीष्मकस्य साधुत्वमेब बोधितम्, तथाग्रे तत् (भा० १०।५३।७) 'पुत्रस्नेहवशानुगः इत्यत्र (भा० १०।५३।३४) 'महामतिः' इत्यादौ च तैरपि व्याख्यातम् । ततस्तस्मात् कृष्णाद् भगिनीं तान् बन्धून् वा निवार्य्य हे नृपेति परमाश्चर्य्यात् ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

इत्थमापृष्टो विस्तरतो वर्णयति—राजाऽऽसीदिति । विदर्भाणां देशानामधिपति महान् गुणैरिति शेषः । तस्य भीष्मकस्य सुताः पञ्च कन्यका त्वेकैव सा च वरानना आननग्रहणं सर्वावयवनामुपलक्षणं सर्वावयवसौन्दर्यशालिनीत्यर्थः ॥ २१ ॥ पुत्रान् क्रमेण निर्दिशन्कन्यकाख्यानमाह—रुक्मीति । अग्रजो रुक्मी ततः क्रमेण रुक्मरथादयः एषां रुक्म्यादीनां स्वसा भगिनी रुक्मिणी सा सती सुशीला ॥ २२ ॥ सा रुक्मिणी स्वगृहान्प्रत्यागतैर्ज्जनैर्गीयमानाः श्रीकृष्णस्य रूपसौन्दर्यवीर्यगुणा अन्ये गाम्भीर्यौदार्यादयः श्रीर्भोग्यभोगोपकरणादिसम्पत्तिः एताः पश्यन्ती शृण्वन्ती तं मुकुन्दमेवात्मनः सदृशमनुरूपं पतिं मेने ॥ २३ ॥ तथा कृष्णोऽपि गृहागतजनमुखाद् बुद्ध्यादिगुणैकतानां रुक्मिणीं श्रुत्वा आत्मनोऽनुरूपां भार्यां समुद्वोढुमुपयन्तुं मनश्चक्रे ॥ २४ ॥ एवं स्थिते रुक्मी बन्धूनां रुक्मीतरेषाम् इति शेषः । कृष्णायैव भगिनीं दातुमिच्छतां सतां हे नृप ! ततस्तां निवार्य्य कृष्णं द्वेष्टीति तथाभूतः सन् चैद्यं शिशुपालमेव भगिन्याः पतिममन्यत चैद्यायैव दातुं निश्चिकायेत्यर्थः ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

वरं मनोहरम् आननं यस्याः सा तथा ॥ २१–२३ ॥ गृहागतैर्जनैः ॥ २४–२५ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

कृष्णश्चेत्यादि । सदृशीं भार्यामिति । यथा श्रीकृष्णः स्वयं भगवान्, तथा सापि स्वयं भगवतीत्यर्थः ॥ २४–३५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कृष्णश्च सदृशीं भार्यामित्यत्र-च-कारेण पूर्वोक्तं सर्वमेवाक्षिप्यते, तच्च गृहागतैर्गीयमानत्वादि ॥ २४–३५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

भगिनीं कृष्णाय दातुमिच्छतो बन्धून् पित्रादीन् अनादृत्य स्वबलादेव ततः कृष्णात्तान्निवार्य्य रुक्मी तां दातुं वरं चैद्यम् अमन्यतेत्यन्वयः ॥ २५ ॥

गूढार्थदीपिनी

अग्रजो ज्येष्ठः । तदनन्तरोऽनुज । इति सर्वत्रान्वेति ॥ २२ ॥ सा रुक्मिणी गृहागतैर्नारदादिभिः गीयमानाः ॥ २३ ॥ समुद्वोढुम् उपयन्तुम् दधे चकार ॥ २४ ॥ बन्धूनां पित्रादीनाम् ।ताननादृत्य । ततः कृष्णाय दानात् बन्धून् निवार्य । द्विट् जन्मान्तरीयसंस्कारवशेन ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

कृष्णः स्वयं भगवान् सदृशीं स्वयं लक्ष्मीम् ॥ २४ ॥ ततः कृष्णात् बन्धून् निवार्य चैद्यं शिशुपालं वरममन्यत ॥ २५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नाम प्रसिद्धः ॥ २१ ॥ रुक्मी अग्रजः प्राथमिको येषां पञ्चानां स्वसा भगिनी ॥ २२ ॥ गृहागतैर्नारदादिभिर्गीयमाना रूपवीर्यगुणश्रियो रूपवीर्ययोरितरेषां गुणानां च श्रियः सम्पदः उपसृत्य तं सदृशं पतिं मेने ॥ २३ ॥ गृहागतैर्वर्णितां लोकदृष्ट्या बुद्धिश्च लक्षणानि चौदार्यं च रूपं च शीलं सदाचारश्चान्ये गुणाश्च तेषामाश्रयो यस्यां तां तादृशीं भार्यां प्रकाशघनामुद्वोढुं परिणेतुं कृष्णश्च मनो दधे । सकामायाः सकामेनेत्युक्तलक्षणसम्पत्ती राक्षसस्य गान्धर्वस्य विवाहस्य स्फोरिता भवत्यनेनेति ज्ञेयम् । मनो दधे ॥ २२ ॥ बन्धूनां पित्रादीनां रुक्मी निवार्य । अनेन तत्सर्वापेक्षया बलिष्ठता रुक्मिणो द्योत्यते । निवारणे कारणमीरयति । कृष्णं द्वेष्टीति कृष्णद्विडिति । तां भगिनीं बन्धूनामिति द्वितीयान्तं सत् भगिनीपदेनाप्यावृत्तमन्वेति । बन्धुभिः पित्रादिभिः । ऊनां तत्कार्याननुमतिमत्तत्कामिति बन्धुभिरूनेति तां चैद्याय शिशुपालाय समकल्पयत् तां दातुं मनश्चकारेति यावत् । अनेन स किं चकारेत्येतदप्युत्तरयति । चैद्या चैद्यस्यायसमायासं गुढोत्मा मरुतो मारुतत्वत इत्यादिवत् यकारोत्तरदीर्घलोपः । अकल्पयत्कल्पयामासेति । तथोक्तं प्राक् । यद्वा । चैद्यस्यायसं अयःसम्बन्धि शकलं चणकादिकम् । अत एवामाणकं लोहचणकानोपादातुं नापहातुं योग्या इति । तदजीर्यत्कल्पयामास । तद्भ्रातृनिवारणमवेत्य ज्ञात्वाऽसितापाङ्गी असितः कालोपाङ्गश्च कटाक्षश्च स यस्याः सा । अन्तरङ्गिको भावश्चासिते कृष्णेऽपाङ्गो यस्याः सेति । ततोऽप्यसितात्कृष्णादेवापाङ्गोऽनङ्गो यस्याः सेति ज्ञेयः । अङ्गगात्रकण्ठेभ्यो वक्तव्यमिति वृत्तिकृन्मतेन ङीष् । अथवा नासिकोदरेति चशब्दादनुक्तसमुच्चायकासंयोगोपधादपि क्वचिद्भवतीत्युक्तेः । ङीष् । आप्तमिति स्वालोचितप्रमेयाबहिः प्रकाशतां विप्रस्य प्रकटयितुम् । प्रायेण तदारभ्य वैदिकैरेव कन्याघटना इति मन्तव्यम् ॥ २५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं राज्ञः श्रवणौत्सुक्यं दृष्ट्वा स्वयोगबलेनैव दृष्टमिति अन्यतः श्रुतत्वमनुक्त्वापि कथामेवारमते **राजासीदिति** । **आसी**दित्येषा पुरावृत्तकथेति निरूपितम् । **भीष्मक** इति नाम प्रसिद्धेऽर्थे । तस्यान्यत्र स्थित्यभावाय तुल्यधर्माः सर्वे त एवेति निर्दिशति **विदर्भाधिपति**रिति । महानिति महत्त्वेन सत्वादयो गुणाः एकचत्वारिंशदतिदिष्टाः । अयमर्थः पूर्वस्माद्विशिष्टः । 'अभ्रातृमती न विवाह्ये'ति तदर्थं भगवतः पञ्चपर्वाविद्यायाः पञ्च देवाः मायाकार्यरूपाः लक्ष्म्या अप्यग्रे उत्पन्ना इति तान् निरूपयति **तस्य पञ्चाभवन्पुत्रा** इति । 'मायया मे विनिर्मिता' इति । 'रमापि रूपं वव्रे द्वितीयमिव यत्प्रवदन्ति माया'मिति लक्ष्म्या मायारूपत्वात् मायाकार्यत्वाच्चाविद्यायाः तत्सहिता माया तत्र प्रादुर्भूता । अत एव सा जीवमेव व्याप्नोतीति मायामपि जीवपरां कर्तुं रुक्मी विचारितवान् । अत एव रुक्मिण्या रुक्मिप्रभृतिषु पक्षपातः, भगवत्कृते अपरितोषश्च । स्वरूपाज्ञाने निराकृते पश्चान्निरोधः फलिष्यतीति । भगवदीयेषु तस्य प्रतिष्ठाभावाय मुण्डितवान् । तस्य भीष्मकस्य पञ्च पुत्रा अभवन्, एका च कन्या । **वरानने**ति । लोके सौन्दर्यं प्रशस्तमिति सौन्दर्यं मुग्धभावं च निरूपयन्नाह । दया च मुग्धभावे निरूपिता ॥ २१ ॥ तान् नामतो निर्दिशति **रुक्म्यग्रज** इति । कलेः स्थानं पञ्चात्मकं सुवर्णमिति तन्नामानः सर्व एव । अत एवाग्रे भगवान् वक्ष्यति 'तस्मात्प्रायेण न ह्याढ्या मां भजन्ती'ति । **अग्रजो ज्येष्ठः** रुक्मी सुवर्णसदृशः, वस्तुतो नाम तथा योगं नापेक्षते । **रुक्मरथ** इति द्वितीयः । **रुक्मबाहु**स्तृतीयः । **अनन्तर** इति त्रयाणामेकप्रकृतिकत्वम्, अन्येषां रुक्मिणासहितानां भिन्नप्रकृतिकत्वमिति त्रयाणां निरूपणानन्तरनुकम् । **अनन्तर**मिति सर्वत्र सम्बध्यते । **रुक्मकेशश्च** तुर्यः । **रुक्ममाली** पञ्चमः । एतेषां यागानुसारेणाप्यर्थः स्वयमूह्यः । एषां स्वसा एकमातृका प्रियभगिनी च रुक्मिणी । यथैते दुष्टाः, तथा सापि भविष्यतीत्याशङ्कयाह **सती**ति ॥ २२ ॥ एवं तस्या उत्पत्तिमुक्त्वा, तस्यां भगवतः, भगवति तस्याश्च, गान्धर्वं विवाहं वक्तुं स्नेहं निरूपयति **द्वाभ्याम् । सोपश्रुत्ये**ति **सा** रुक्मिणी **मुकुन्दस्य** मोक्षदातुः स्वस्यापि पुनर्जन्मनिवृत्त्यर्थं भगवद्गुणानेव शृणोति । कन्याया अपेक्षितं रूपम्, वीर्यं क्षत्रियाणाम् । विद्यास्थानीयं यशः । कुलस्थानीयां श्रीः

लक्ष्मीः शोभा च । तेन धनसमृद्धिः सर्वसमृद्धिश्च सूचिता । एवं वरे योग्यानि पञ्च रूपाण्यप्युक्तानि । अन्तःपुरस्थायाः कन्यायाः कुत एतावच्छ्रवणमित्याशङ्क्याह **गृहागतैर्गीयमाना** इति । य एव ब्राह्मणाः विद्ययोपजीविनो वा साधवो वृद्धाः सर्वत्राप्रतिहतगतयः तैः गीयमानाः श्रुत्वा, तमेव भगवन्तं आत्मनः सदृशं पतिं मेने ॥ २३ ॥ भगवानपि तां सदृशीं भार्यां मेने । तत उद्वोढुमपि मनो दधे । तस्या अपि पञ्च गुणाः । एकविकलापि न ग्राह्या भवति । आदौ बुद्धिमती अपेक्ष्यते । अन्यथा गृहं विनश्येत् । **स्त्रीलक्षण**रहिता तु सामुद्रशास्त्रविरोधिनी भाग्यरहितैव भवति । औदार्याभावे लुब्धा सर्वमेव पुरुषार्थं नाशयेत् । रूपाभावे व्यर्थो विवाहः । शीलाभावे अधर्मं जनयेत् । अतः एते पञ्चापि गुणाः लोके प्रसिद्धिमापन्नाः यस्यां भवन्ति, सा विवाह्या । अन्वयः अव्यभिचारिसम्बन्धः । कृष्णश्चेति चकारः सादृश्यार्थं भगवानपि तादृश इत्याह । अत एव सदृशी । सम्यगुद्वाहः आहूय कन्यादानरूपः । स हि शोभाकरो भवति ॥ २४ ॥ तन्न जातमित्याह **बन्धूनामिच्छतां दातु**मिति । बान्धवाः पित्रादयः कुलसम्बन्धिनः दातुमिच्छतां सताम्, यतः कृष्णः सदानन्दः, अन्ये गुणाः फलसाधकाः, अयं तु साक्षादेव फलरूप इति । तत्र रुक्मी वरत्वेन भगवन्तं निवार्य, चैद्यं शिशुपालमेवामन्यत । स्वरूपाज्ञानेन हि स्वकार्यं साधनीयम् । तत्र पूर्वजन्मनि सीतार्थमेव रावणो हतः तस्यामभिनिविष्टचित्त एव प्राणान् जहौ । अतो लोकविचारेण तस्मै देयेति भवति । भगिनीत्वादस्य प्राबल्यम् । नृपेति सम्बोधनं राज्ञे राजकन्या देयेति तस्याभिप्रायस्त्वया ज्ञायत एवेत्येतदर्थम् । ततो हेतोः कृष्णाद्वा निवार्य, यतः **कृष्णद्विट्** । न हि तस्य स्वरूपनाशको भगवान् हितो भवति । अतः शत्रूणां मध्ये मुख्य इति चैद्य एव वरत्वेन स्वीकृतः । अनेन सर्वेषामेव तत्र सम्मतिरपि जातेति सूचितम् । राजा कुलीनः, सोऽपि महानिति ॥ २५ ॥

विवरणटिप्पणी

राजासीदित्यत्र । **तस्यान्यत्रे**ति । भीष्मकस्य महादेवावतारत्वेन कर्मासम्बन्धित्वादन्यत्र स्थितिमाशङ्क्य तदभावाय तत्संसर्गिणः सर्वेऽपि तुल्यधर्मा विदर्भदेशीयत्वात्कर्मासम्बन्धिन इति विदर्भाधिपतिपदेनोक्तमित्यर्थः । **अयमर्थ** इति । पूर्वं समाधिभाषा विवाहेऽपि वैदर्भीपदेन कर्मासम्बन्धस्तत्पितुरुक्त एव । महत्त्वरूपोऽर्थोऽत्र तस्माद्विशिष्ट उक्त इत्यर्थः । अग्रे । **दया चे**ति । 'दयाया भगिनी मूर्ति'रिति वाक्याद्भ्रातृनिरूपणे तद्भगिनीत्वेन दयारूपत्वं च निरूपितमित्यर्थः ।

श्रीसुबोधिनी–सारः

शुकोक्तिः । विदर्भस्य देशस्याधिपतिः स्वामी महान् भीष्मको राजाऽभूत् नामेति पादसमाप्तौ तस्य राज्ञः पंच पुत्रा अभवन् । सुमुखी एका पुत्री चाभूत् ॥ २१ ॥ अग्रजो ज्येष्ठो रुक्मी रुक्मरथो रुक्मबाहुः अनन्तरोऽव्यवहितो रुक्मकेशो रुक्ममाली । एषां स्वसा भगिनी सती श्रेष्ठा रुक्मिणी ॥ २२ ॥ गृहमागतैर्नारदादिभिर्गीयमानाः कीर्त्यमाना मुकुन्दस्य श्रीकृष्णस्य रूपबलगुणशोभाः सम्पदो वोपश्रुत्याकर्ण्य सा रुक्मिणी तं श्रीकृष्णमेव सदृशमात्मनः तुल्यं पतिं मेने प्रतिजज्ञे ॥ २३ ॥ बुद्ध्यादिगुणांताकरां तां रुक्मिणीं सदृशीं भार्यां स्त्रीं कृष्णश्चापि समुद्वोढुं परिणेतुं चित्तं चकार ॥ २४ ॥ कृष्णाय भगिनीं दातुम् इच्छतां वन्धूनां सतां कृष्णद्विट् कृष्णशत्रुः रुक्मी ततः कृष्णान्निवार्य परिवर्ज्य चैद्यं शिशुपालममन्यत तस्या वरं प्रत्यजानीत ॥ २५ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं पृष्टस्तद्विस्तरतो वर्णयति—राजासीदिति । विदर्भदेशाधिपतिर्गुणैश्च महान् भीष्मको नाम राजाऽऽसीत् । तस्यैका कन्या, पञ्च पुत्राश्चाभवन्नित्यर्थः । 'वरानना' इति उपलक्षणम्, सर्वावयवसौन्दर्ययुक्तेत्यर्थः ॥ २१ ॥ पुत्रनामान्याह—रुक्मीति । सती सद्गुणसम्पन्ना रुक्मिणी एषां रुक्म्यादीनां स्वसा भगिनी ॥२२॥ सा रुक्मिणी स्वगृहान्प्रति आगतजनैः गीयमानाः मुकुन्दस्य रूपं सौन्दर्यम्, वीर्यं प्रभावः, गुणाः अन्ये गाम्भीर्यौदार्यादयः, श्रीर्भाग्यभोगोपकरणादिसम्पत्तिः, ता एता उपश्रुत्य तमेव मुकुन्दमात्मनः सदृशमनुरूपं पतिं मेने ॥ २३ ॥ तथा कृष्णोऽपि तां रुक्मिणीं गृहागतजनमुखात् बुद्ध्यादिगुणाश्रयभूतां श्रुत्वा आत्मनः सदृशीं भार्यां मत्वा समुद्वोढुं उपयन्तुं मनो दधे ॥ २४ ॥ एवं स्थिते अन्येषां बन्धूनां पित्रादीनां भगिनीं रुक्मिणीं कृष्णाय दातुमिच्छतां सतां हे नृप ! तान् ततो दानात् निवार्य रुक्मी चैद्यममन्यत, शिशुपालाय दातुं निश्चयं कृतवानित्यर्थः । तत्र हेतुमाह—कृष्णद्विडिति ॥ २५ ॥

अन्वितार्थप्रकाशिका

राजासीदिति । विदर्भदेशानामधिपतिर्गुणैश्च महान् भीष्मको नाम राजाऽऽसीत् । तस्य वरानना उपलक्षणतया सर्वावयवसुन्दरी एका पञ्च पुत्राश्चाभवन् ॥ २१ ॥ रुक्मीति । रुक्मी अग्रजः ज्येष्ठः तदनन्तरोऽनुजः रुक्मरथः अनन्तरशब्दोऽग्रेप्यन्वेति । तस्यानन्तरः अनुजः रुक्मबाहुः तदनुजौ रुक्मकेशो रुक्ममालीति च सती सद्गुणसंपन्ना रुक्मिणी एषां रुक्म्यादीनां स्वसा भगिनी ॥ २२ ॥ सेति । सा रुक्मिणी स्वगृहान् प्रत्यागतैर्जनैः गीयमानाः मुकुन्दस्य रूपं सौन्दर्यं प्रभावः गुणाः अन्ये गाम्भीर्यौदार्यादयः श्रीर्भोग्यभोगोपकरणादिसम्पत्तिः ता एता उपश्रुत्य तमेव मुकुन्दमात्मनः सदृशमनुरूपं पतिं मेने ॥ २३ ॥ तामिति ।

कृष्णोऽपि तां रुक्मिणीं गृहागतजनमुखात् बुद्धिलक्षणौदार्यरूपशीलगुणानामाश्रयभूताम् । स्त्रीत्वमार्षम् । तेषामाश्रयो यस्यामिति वा श्रुत्वा आत्मनः सदृशीं भार्यां मत्वा समुद्वोढुम् उपयन्तुं मनो दधे ॥ २४ ॥ बन्धूनामिति । हे नृप ! बन्धूनां पित्रादीनां कृष्णाय दातुमिच्छतां सतामपि ताननादृत्य कृष्णद्विट् रुक्मी ततो दानात् तान्निवार्य भगिनीं रुक्मिणीं दातुं चैद्यं शिशुपालं तस्या वरममन्यत ॥ २५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सा रुक्मिणी ॥ २३ ॥ कृष्णश्च कृष्णोऽपीति पाठौ ॥ २४ ॥ तस्याः वरं चैद्यममन्यत ॥ २५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थं राज्ञा पृष्टो मुनिर्विस्तरतो वर्णयति । राजाऽऽसीदिति । विदर्भाणां देशानामधिपतिः, महान्, गुणैरिति शेषः । भीष्मकः नाम, नाम्ना भीष्मक इति प्रसिद्ध इत्यर्थः । राजा नृपतिः, आसीत् । तस्य भीष्मकनृपस्य, पञ्च पुत्राः, अभवन् । वरमाननं मुखं यस्याः सा वरानना । आननग्रहणं सर्वावयवानामप्युपलक्षणम् । सर्वावयवसौन्दर्यशालिनीत्यर्थः । एकाऽन्या, कन्या च, अभवत् ॥ २१ ॥ तत्पुत्रान् क्रमेण निर्दिशन् कन्यकाख्यानमाह । रुक्मीति । तत्पुत्रेषु मध्ये, रुक्मी, अग्रजो ज्येष्ठः, रुक्मरथो द्वितीयः, रुक्मबाहुस्तृतीयः, अनन्तरस्तदव्यवहितश्चतुर्थः, रुक्मकेशः, रुक्ममाली पञ्चमः । एषां पञ्चानां, स्वसा भगिनी, सती साध्वी, रुक्मिणी षष्ठी, अभवत् ॥ २२ ॥ सेति । सा रुक्मिणी, गृहागतैः स्वगृहान् प्रत्यायातैर्जनैः, गीयमानाः मुकुन्दस्य श्रीकृष्णस्य, रूपं सौन्दर्यं च वीर्यं बलं च गुणा गाम्भीर्यौदार्यादयश्च श्रीर्भोग्यभोगोपकरणादिसंपत्तिश्च ताः, उपश्रुत्य, तं मुकुन्दं, सदृशं स्वानुरूपं, पतिं मेने ॥ २३ ॥ तामिति । कृष्णश्च स्वयं श्रीकृष्णोऽपि, तां रुक्मिणीं, स्वगृहागतजनमुखादिति शेषः । बुद्धिश्च लक्षणानि च औदार्यं च रूपं च शीलं च गुणाश्च तेषामाश्रयां स्थानभूतां, तां रुक्मिणीं, श्रुत्वेति शेषः । सदृशीमात्मनोऽनुरूपां, भार्यां, समुद्वोढुमुपयन्तुं, मनः दधे चक्रे ॥ २४ ॥ बन्धूनामिति । हे नृप, बन्धूनां रुक्मीतरेषामिति शेषः । रुक्मीतरसकलबन्धूनामित्यर्थः । श्रीकृष्णायैव, भगिनीं दातुम् इच्छतां सतां, ताननादृत्येत्यर्थः । कृष्णद्विट् रुक्मी, ततः श्रीकृष्णात्, तान् निवार्य, चैद्यं अमन्यत । चैद्यायैव दातुं निश्चिकायेत्यर्थः ॥ २५ ॥

कृष्णप्रिया

श्रीशुकदेवजी कहते हैं—परीक्षित् ! महाराज भीष्मक विदर्भदेश के अधिपति थे । उनके पाँच पुत्र और एक सुन्दरी कन्या थी ॥ २१ ॥ सबसे बड़े पुत्र का नाम था रुक्मी और चार छोटे थे—जिनके नाम थे क्रमशः रुक्मरथ, रुक्मबाहु, रुक्मकेश और रुक्ममाली । इनकी बहिन थी सती रुक्मिणी ॥ २२ ॥ जब उसने भगवान् श्रीकृष्ण के सौन्दर्य, पराक्रम, गुण और वैभव की प्रशंसा सुनी—जो उसके महल में आनेवाले अतिथि प्रायः गाया ही करते थे—तब उसने यही निश्चय किया कि भगवान् श्रीकृष्ण ही मेरे अनुरूप पति हैं ॥ २३ ॥ भगवान् श्रीकृष्ण भी समझते थे कि 'रुक्मिणी में बड़े सुन्दर-सुन्दर लक्षण हैं, वह परम बुद्धिमती है; उदारता, सौन्दर्य, शीलस्वभाव और गुणों में भी अद्वितीय है । इसलिये रुक्मिणी ही मेरे अनुरूप पत्नी है । अतः भगवान् ने रुक्मिणी जी से विवाह करने का निश्चय किया ॥ २४ ॥ रुक्मिणीजी के भाई-बन्धु भी चाहते थे कि हमारी बहिन का विवाह श्रीकृष्ण से ही हो । परन्तु रुक्मी श्रीकृष्ण से बड़ा द्वेष रखता था, उसने उन्हें विवाह करने से रोक दिया और शिशुपाल को ही अपनी बहिन के योग्य वर समझा ॥ २५ ॥

तदवेत्यासितापाङ्गी वैदर्भी दुर्मना भृशम् । विचिन्त्याप्तं द्विजं कञ्चित् कृष्णाय प्राहिणोद् द्रुतम् ॥ २६ ॥
द्वारकां स समभ्येत्य प्रतीहारैः प्रवेशितः । अपश्यदाद्यं पुरुषमासीनं काञ्चनासने ॥ २७ ॥
दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासनात् । उपवेश्यार्हयाञ्चक्रे यथाऽऽत्मानं दिवौकसः ॥ २८ ॥
तं भुक्तवन्तं विश्रान्तमुपगम्य सतां गतिः । पाणिनाभिमृशन् पादावव्यग्रस्तमपृच्छत ॥ २९ ॥
[1]कच्चिद् द्विजवरश्रेष्ठ धर्मस्ते वृद्धसम्मतः । वर्तते नातिकृच्छ्रेण संतुष्टमनसः सदा ॥ ३० ॥
संतुष्टो यर्हि वर्तेत ब्राह्मणो येन केनचित् । अहीयमानः स्वाद्धर्मात् स [2]ह्यस्याखिलकामधुक् ॥ ३१ ॥
असंतुष्टोऽसकृत्क्लेशानाप्नोत्यपि सुरेश्वरः । अकिञ्चनोऽपि संतुष्टः शेते सर्वाङ्गविज्वरः ॥ ३२ ॥

---

१. श्रीकृष्ण उवाच—च. पु. टि. । २. कर्मकृत्–प्रा. पा. । असंतुष्टः सुखं विप्र नाप्नोत्यपि–विज. ; असंतुष्टोसकृल्लोकान्–श्रीधर. वंशी. जीव. वीर. विश्व. शुक. ।

कर्दमक्षमा

अन्वयः—असितापाङ्गी, वैदर्भी, तद्, अवेत्य, भृशम्, दुर्मना, विचिन्त्य, कश्चित्, आप्तम्, द्विजम्, कृष्णाय, द्रुतम्, प्राहिणोत् ॥ २६ ॥ सः, द्वारिकाम्, सम्, अभ्येत्य, प्रतीहारैः, प्रवेशितः, काञ्चनासने, आसीनम्, आद्यम्, पुरुषम्, अपश्यत् ॥ २७ ॥ तम्, दृष्ट्वा, ब्रह्मण्यदेवः, निजासनात्, अवरुह्य, दिवौकसः यथा, आत्मानम्, तथा, उपवेश्य, अर्हयाञ्चक्रे ॥ २८ ॥ अव्यग्रः, सताम्, गतिः, भुक्तवन्तम्, विश्रान्तम्, उपगम्य, पाणिना, पादौ, अभिमृशन्, तम्, अपृच्छत ॥ २९ ॥ द्विजवरश्रेष्ठ, सन्तुष्टमनसः, ते, वृद्धसम्मतः, धर्मः, न, अतिकृच्छ्रेण, कच्चित्, सदा, वर्तते ? ॥ ३० ॥ स्वात्, धर्माद्, अहीयमानः, ब्राह्मणः, येन, केनचित्, यर्हि, संतुष्टः, वर्तेत, सः (धर्मः) हि, अस्य, अखिलकामधुक् ॥३१॥ असंतुष्टः, सुरेश्वरः, अपि, असकृत्, क्लेशान्, आप्नोति, अकिञ्चनः, अपि, संतुष्टः, सर्वाङ्गविज्वरः, शेते ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अवेत्य ज्ञात्वा । असितापांगी सुनीलकटाक्षा । कृष्णाय कृष्णमानेतुं प्रेषयामास ॥ २६ ॥ प्रतीहारैर्द्वारपालैः ॥ २७ ॥ आत्मानं श्रीकृष्णम् ॥ २८ ॥ अभिमृशन् शनैः संमर्दयन् ॥ २९–३० ॥ स धर्मोऽस्य ब्राह्मणस्याखिलकामदोग्धा भवति । यद्वा स ब्राह्मणोऽस्य विश्वस्याखिलकामधुगिति ॥३१॥ लोकानाप्नोति लोकाल्लोकांतरं पर्यटति । नैकत्र निर्वृतस्तिष्ठतीत्यर्थः । नाप्नोतीति पाठे सुरेश्वरोऽपि भूत्वा लोकान्नाप्नोत्युत्तमलोकान्प्राप्तोऽप्यप्राप्त इव क्लिश्यतीत्यर्थः । शेते सुखमास्ते इत्यर्थः । तदेवाह—सर्वेष्वंगेषु वाक्पाण्यादिषु विज्वरस्तापरहितः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् रुक्मिहार्दम् । आप्तं विश्वस्तम् "आप्तः प्राप्ते सत्यवाचि विश्वस्ते चान्यलिंगकः" इति निरुक्तिः । कृष्णायेति चतुर्थी "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति सूत्रात् ॥ असितापांगीति कातर्येण तन्मालिन्यातिशयस्मरणात् । यद्वा—असिते श्रीकृष्णे तद्वर्त्मनि अपांगं यस्याः सा । अत एव विचिंत्य लज्जादिपरित्यागेन स्वयमेव कर्तव्यं तत्सहायं च निश्चित्य । यद्वा—झटित्येव भ्रात्रादिभिर्मम दुर्विवाहे निश्चयः कृतस्तत्राद्यपर्यंतं तेन तु योगिनाऽपि सर्वं ज्ञात्वापि यदनुसंधानं न कृतं तत्कुत्राप्यन्यत्र तस्य परमासक्तिर्भवेत्, श्रूयते च गोकुले तस्य परमप्रेयस्यः, अतो निजजनन्यादिषु तदेकवरणं विना निजमरणादिकं श्रावितमप्यकिंचित्करम्, किन्तु तस्मिन्नेव तच्छ्रावितं कथंचित्सिद्धिकरम्, यतस्तेन गुणिशेखरेण प्रपन्नजनमात्रदुःखाऽसहिष्णुतया स्वदुःखमपि संव्रियत इति च श्रूयते यथा सैरंध्रीप्रसंगे । तस्मान्मया लज्जादिकं परित्यज्य दूतः संदेशश्च विधेय एव, यदि च तथापि तेन नाङ्गीक्रियेय तदा प्रथममेव प्राणाञ्जह्यामिति विचार्य ॥ २६ ॥ स रुक्मिणीप्रेषितविप्रः ॥ स दूतः । अभि आभिमुख्येनैव न तु भ्रांतिवक्रगत्या, एत्य प्राप्येति दैवानुकूल्यं दर्शितम् । प्रतीहारैरिति बहुत्वमेकैकशः । क्रमेण प्रवेशनेन द्वाराणां बाहुल्येन तेषामपि बाहुल्यात् । प्रकर्षेण स्तुत्यादिना । मार्गदर्शनेनांतः प्रवेशितः सन् । आद्यं सर्वांशिनम् । पुरुषं श्रीकृष्णमित्यर्थः काञ्चनासन इति श्याम-सुन्दरस्याधिकशोभा सूचिता ॥ २७ ॥ तं विप्रम् । अवरुह्योत्तीर्य । देवा यथा श्रीकृष्णं पूजयन्ति तथा तं कृष्ण इत्यर्थः ॥ दृष्ट्वा दूरादेवावलोक्य । अर्हणे हेतुः—ब्रह्मण्यदेवः सर्वाराध्योऽपि ब्राह्मणभक्तः, सौशील्यात्तादृश इत्यर्थः । यथेति दृष्टान्तेन परमभक्तिं बोधयति ॥ २८ ॥ तं विप्रम् । अव्यग्र एकचित्तः "व्यग्रोऽनेकमनोवृत्तौ सक्तेग्ररहितेऽन्यवत्" इति धरणिः ॥ अव्यग्रः स्वस्थचित्तः सन्नपृच्छत् । यतः सतां सद्धर्माणां गतिः प्रथमाश्रयः ॥ २९ ॥ नातिकृच्छ्रेण सुखेन ॥ द्विजवरेषु तच्छ्रेष्ठेष्वपि श्रेष्ठः । तादृशत्वे कारणान्येवं पादोन चतुर्भिर्दर्शयंस्तेषां मूलमादौ सदयप्रश्नपूर्वकं स्थापयति—धर्म इति, यज्ञादिः । वृद्धानां प्राचीनद्वादशस्वयं भ्वादिभक्तानामाधुनिकानां स्वगुरुप्रभृतीनां संमत इति धर्मस्य तावच्छुद्धता वर्तत एव, किन्तु कृच्छ्रेण नातिकृच्छ्रेणानतिदुःसंपादत्वेन वर्तत इत्येव पृच्छ्यत इत्यर्थः । दुःखं विना धर्माऽसिद्ध्या सुखेनेत्यनुक्तिः, अतिदुःखस्य चानभीष्टत्वादति शब्दः, स च वृत्त्यादेः संतताऽप्राप्यत्वादिकं बोधयति । ननूद्यमे कृते कथं तत्स्यात्तत्राह—सदा प्राप्त्यभावेऽपि संतुष्टमनस इति ॥ ३० ॥ न हि धर्मो ब्राह्मणस्यैव कामधुग्भवत्यपि तु स्वानुष्ठातृमात्रस्येत्यरुच्याह—यद्वेति । "यदृच्छालाभसंतुष्टविप्रार्चाऽखिलकामधुक्" इत्यादि पुराणात् । तत्स्तुत्यर्थं संतोषमेव स्तौति—संतुष्ट इति । यर्हि तर्ह्येवाहीयमानं ऽभ्रश्यत् । हि एव । स एव । न त्वन्यः ॥३१॥ निर्वृतो सुखी । इत्यर्थ इति—लोकान्मनुष्याल्लोकांतरं मनुष्यांतरम्, इतः किञ्चित्प्राप्स्यामीतः किंचिदितीच्छयेति भावः । 'लोको जनेऽपि भुवने' इति मेदिनी । सुरेश्वर इन्द्रः । इत्यर्थ इति—"इच्छति शती सहस्रं सहस्रापो लक्षमीहते कर्तुम् । लक्षाधिपश्च राज्यं राज्येशश्चक्रवर्तित्वम् ॥ चक्रधरोऽपि सुरत्वं सुरत्वलाभे तु सुरपतित्वं हि । सुरपतिरूर्द्ध्वगतित्वं तथापि न निवर्तते तृष्णा ॥" इति गरुडोक्तेरिति भावः । इत्यर्थ इति—दुःखितस्य निद्रानुपलब्धेरिति भावः । तदेव सुखम् ॥ अन्वयव्यतिरेकाभ्यां तदेव दर्शयति—असंतुष्ट इति । असकृदिति पुनःपुनरभीष्टसिद्धावपि संतोषानुदयात् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

असितापाङ्गीति कातर्य्येण तन्मालिन्यातिशयस्मरणात् । यद्वा, असिते श्रीकृष्णे तद्वर्त्मनि अपाङ्गं यस्याः सा अत एव विचिन्त्य लज्जादिपरित्यागेन स्वयमेव कर्त्तव्यं तत्सहायं च निश्चित्य । यद्वा, हन्त झटित्येव भ्रात्रादिभिर्मम दुर्विवाहे निश्चयः कृतः तत्राद्यपर्यन्तं तेन तु योग्येनापि सर्वं ज्ञात्वापि यदनुसन्धानं न कृतं तत् कुत्रापि अन्यत्र तस्य परमासक्तिर्भवेत् श्रूयन्ते च गोकुले परमप्रेयस्यः, अतो निजजनन्यादिषु तदेकवरणं विना निजमरणादिकं श्रावितमप्यकिञ्चित्करं किन्तु तस्मिन्नेव तत् श्रावितं कथञ्चित्सिद्धिकरं यतस्तेन गुणिशेखरेण प्रपन्नजनमात्रदुःखासहिष्णुतया स्वदुःखमपि संव्रियत इति च श्रूयते यथा सैरिन्ध्रीप्रसङ्गे तस्मान्मया लज्जादिपरित्यागेन योग्योऽसौ दूतः सन्देशश्च विधेय एव यदि च तथापि तेन नाङ्गीक्रियेय तदा प्रथममेव प्राणान् जह्यामिति विचार्य्य ॥ २६ ॥ स द्विजः अभि आभिमुख्येनैव नतु भ्रान्तिर्वक्रगत्या एत्य प्राप्येति दैवानुकूल्यं दर्शितं प्रतिहारैरिति । बहुत्वमेकैकशः क्रमेण प्रवेशनेऽपि द्वाराणां बाहुल्येन तेषामपि बाहुल्यात् प्रकर्षेण स्तुत्यादिना मार्गदर्शनेनान्तर्वेशितः सन् आद्यं सर्वांशिनं पुरुषं श्रीकृष्णमित्यर्थः । काञ्चनासन इति श्यामसुन्दरस्याधिकशोभा सूचिता ॥ २७ ॥ दृष्ट्वा दूरादेवालोक्य अर्हणे हेतुः ब्रह्मण्यदेवः सर्वाराध्योऽपि ब्रह्मण्यो ब्राह्मणभक्तः सौशील्यात्तादृश इत्यर्थः । यथेति दृष्टान्तेन परमभक्तिं बोधयति ॥ २८ ॥ अव्यग्रः आतिथ्यसिद्धयाऽन्यपरित्यागेन वा स्वस्थचित्तः सन् अपृच्छत् यतः सतां सद्धर्माणां गतिः प्रथमाश्रयः ॥२९॥ द्विजवरेषु तच्छ्रेष्ठेष्वपि श्रेष्ठः तादृशत्वे कारणान्येव पादोनचतुर्भिर्दर्शयन् तेषां मूलमादौ सदयप्रश्नपूर्वकं स्थापयति, धर्म इति यज्ञादिः वृद्धानां प्राचीनद्वादशभागवतानामाधुनिकस्वगुरुप्रभृतीनां च सम्मत इति धर्मस्य तावत् शुद्धता वर्त्तत एव किन्तु कच्चित् नातिकृच्छ्रेण अनतिदुःसम्पादत्वेन वर्त्तत इत्येव पृच्छ्यत इत्यर्थः । दुःखं विना धर्मासिद्ध्या सुखेनेत्यनुक्तिः अतिदुःखस्य चानभीष्टत्वादतिशब्दः स च वृत्त्यादेः सन्तताप्राप्यत्वादिकं बोधयति, ननूद्यमे कृते कथं तत्स्यात्तत्राह, सदाप्राप्त्यभावेऽपि सन्तुष्टमनस इति ॥ ३० ॥ तत्स्तुत्यर्थं सन्तोषमेव स्तौति–सन्तुष्ट इति । यर्हि तर्ह्येवाहीयमान अभ्रश्यन् यदीति पाठेऽपि स एवार्थः हि एव स एव न त्वन्यः ॥ ३१ ॥ अन्वयव्यतिरेकाभ्यां तदेव दर्शयति–असन्तुष्ट इति । असकृदिति पुनःपुनरभीष्टसिद्धावपि सन्तोषानुदयात् ज्वरश्चिन्तासन्तापः ॥३२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तदवेत्य भृशमत्यर्थं दुर्म्मना दुःखितचित्ता सती, असितापांगीति परमवैदग्धी सूचिता, अत एव कञ्चिद्द्विजं पुरोहितकनिष्ठपुत्रमाप्तं विचिन्त्य विचार्य्य, यद्वा, स्वाक्षरैरीदृशः पत्रं लिखित्वेमं प्रस्थापयानीति कृत्यं निश्चित्य ॥ २६ ॥ स द्विजः, सम्यङ्निर्विघ्नतयाऽभितः सर्व्वतो यादववर्गगृहप्राप्तिक्रमेण एत्य प्राप्य, प्रतिहारैरिति बहुत्वमेकैकशः क्रमेण प्रवेशनेऽपि द्वाराणां बाहुल्यात्तेषामपि बाहुल्यात् प्रकर्षेण स्तुत्यादिना मार्गदर्शनेनान्तः प्रवेशितः सन्, आद्यं श्रेष्ठं पुरुष श्रीविष्णुम्, किंवा पुरुषोत्तमं निःशेषमहापुरुषलक्षणैर्युक्तं श्रीकृष्णमित्यर्थः । काञ्चनासन इति श्यामसुन्दरस्याधिकशोभा सूचिता ॥२७॥ दृष्ट्वा दूरादालोक्यैव, अवरुह्य आसनादवतीर्य्य, अर्हयाञ्चक्रे पादप्रक्षालन-मधुपर्कार्घ्यर्पणादिना अपूजयत्, यतो ब्रह्मण्यदेवः; यथेति दृष्टान्तेनार्हणे परमभक्तिं बोधयते ॥ २८ ॥ उपगम्य समीपे गत्वा, अव्यग्र आतिथ्यसिद्ध्यान्यकृत्यत्यागेन वा, स्वस्थचित्तः सन् सम्यग्विनयपूर्व्वक-मधुरवचनादिनाच्छत्, यतः सतां साधूनां गतिराश्रयः ॥ २९ ॥ हे द्विजवरेषु विप्रेषु श्रेष्ठ, श्रेष्ठ्यकारणमेव चतुर्भिर्दर्शयन् तस्यापि मूलमादौ पृच्छति—धर्म्म इति । वृद्धानां सम्मत इति, धर्म्मस्यावश्यकृत्यता श्रीभगवत्समर्पणादिगुणाश्चोक्ताः । नातिकृच्छ्रेण अनतिकष्टेन वर्तते सिध्यति, दुःखं विना धर्म्मासिद्ध्या सुखेनेत्यनुक्तिर्दुःखस्य चानभीष्टत्वादति-शब्दः । तच्च सन्तुष्ट्यैव स्यादित्याशयेनाह—सदा दुःखकालेऽपि सन्तुष्टमनस इति ॥ ३० ॥ यर्हि तर्ह्येवाहीयमानोऽभ्रश्यन्निति सन्तुष्टेरेवावश्यकतोक्ता । 'यदि' इति पाठेऽपि स एवार्थः, हि एव स एव, न त्वयः ॥ ३१ ॥ असकृदित्यनेन कादाचित्कं सन्तुष्ट्यापि क्षेमं स्यादिति बाध्यते, किंवा, अस्य परेणान्वयः । अकिञ्चनो दरिद्रः, यतः सन्तुष्ट्यैव सर्वैरंगैर्ज्वरस्य कम्पादिभिरिव मनोवैकल्यादिलक्षणसर्व्वांशैर्विज्वरः—'चिन्ता ज्वरो मनुष्याणाम्' इत्यादि-न्यायेन चिन्तारहितः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीम्

प्रतीहारैः द्वाःस्थैः ॥ २७–३० ॥ स हि धर्मलोकान्नाप्नोति परधर्मात् क्लिश्यतीत्यर्थः ॥ ३१–३३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तद्भ्रातुर्निश्चितमालक्ष्यासितावपाङ्गौ यस्याः सा वैदर्भी दुःखितचित्ता ततो विचिन्त्यालोच्याऽऽप्तं कञ्चिद्द्विजश्रेष्ठं द्रुतं त्वरितं यथा तथा श्रीकृष्णाय प्राहिणोत् कृष्णमानेतुं प्रेषयामासेत्यर्थः । क्रियार्थोपपदस्य" (२।३।१४) इति चतुर्थी ॥ २६ ॥ स द्विजः द्वारकां प्रति गत्वा तत्र द्वारपालैरन्तःप्रवेशितः काञ्चनमये सिंहासने स्थितं जगत्कारणं पुरुषं श्रीकृष्णं ददर्श ॥ २७ ॥ किञ्च, दृष्ट्वेति । तं दृष्टवन्तं द्विजमवलोक्य ब्रह्मणि कुले साधवो ब्रह्मण्यास्तेषां मध्ये देवः दीप्यमानः श्रेष्ठ इत्यर्थः । स भगवान् निजासनात्स्वकीयसिंहासनादवरुह्याऽवतीर्य्य द्विजमुपवेश्यार्हयाञ्चक्रे पूजयामास, तत्र दृष्टान्तः यथा दिवौकस इन्द्रादय आत्मानं

श्रीकृष्णरूपिणं पूजयन्ति तद्वदित्यर्थः ॥ २८ ॥ तमिति विश्रान्तं विगताध्वश्रमं तं द्विजम् उपगम्य स्वयं सताङ्गतिः श्रेयःप्राप्त्युपायस्तत्त्वात् सद्भिरेवमनुष्ठेयम् इति प्रदर्शयन् इवेति भावः । अभिमृशन् शनैः सम्मर्द्दयन्नव्यग्रः अवहितचित्तः तं द्विजश्रेष्ठमपृच्छत् ॥ २९ ॥ प्रश्नमेव वर्णयति—कच्चिददिति षड्भिः । हे द्विजवरश्रेष्ठ ! द्विजश्रेष्ठानामपि श्रेष्ठ ! ते तव धर्म आर्यसम्मतो वर्तते कच्चित् मदिष्ट इति भावः । कोऽसावार्य्यसम्मतः त्वदिष्टश्चेत्यतो विशिनष्टि—नातिकृच्छ्रेणानतिक्लेशेनायत्नलब्धेन सदा सन्तुष्टं मनो यस्य तस्य तव धर्म्म इति पूर्वेण सम्बन्धः । सन्तोष एव ब्राह्मणस्य परमो धर्म आर्यसम्मतो मदिष्टश्चेति भावः ॥ ३० ॥ एतदेवोपपादयति–सन्तुष्ट इति । यर्हि यदा येन केनचिदयत्नलब्धेनैव देहधारणोपयुक्तेन सन्तुष्टः सन् स्वस्माद्धर्माद्वर्णाश्रमोचिताद्धर्माददहीयमानो वर्तेत, स हि नित्यसन्तोषरूपो धर्मः अस्य नित्यसन्तुष्टस्य स्वधर्मादनपेतस्य च पुंसः अखिलान्कामानिष्टार्थान् दोग्धीति तथा स्यादित्यत्र "पूर्वादिभ्यो नवभ्यो वा" (७।१।१६) इति विकल्पात्स्मादेशाभावः । अखिलकामधुगित्यनेन वृद्धसम्मतत्वं फलितं शिष्टसम्मतस्यैव धर्मस्य फलसाधनत्वाव्यभिचारात् फलसाधनत्वाध्यवसायिनामेव शिष्टत्वात् ॥ ३१ ॥ एवं सन्तोषस्य पारलौकिकसुखसाधनत्वमुक्तमथेह लोकेऽपि सुखहेतुत्वं वक्तुमसन्तोषस्योभयत्र दुःखहेतुतामाह–असन्तुष्ट इत्यर्द्धेन । सुरेश्वरोऽप्यसन्तुष्टश्चेल्लोकाननुकूलतया लोक्यन्त इति लोका आनन्दाः सुखानीति यावत् तानैहिकामुष्मिकांश्च न प्राप्नोति अकिञ्चनोऽपि यदि सन्तुष्टश्चेत्सर्वाङ्गविज्वरः कस्मिंश्चिदङ्गेऽपि तापरहितः शेते ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

असितापाङ्गी नीलकटाक्षस्थला आप्तं विश्वस्तम् ॥ २६–२८ ॥ अव्यग्रः असम्भ्रान्तः ॥ २९–३० ॥ यः स्वाद्धर्माद्दहीयमानः स्वधर्मत्यागी न स्यात् ॥ ३१ ॥ सुरेश्वरोऽप्यसन्तुष्टः सुखं नाप्नोति अकिञ्चनो दरिद्रोऽपि सन्तुष्टः अलम्बुद्धिः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सर्वाङ्गविज्वर इव निर्वृतस्तिष्ठतीत्यर्थः ॥ ३२–४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृष्णाय कृष्णमानेतुम् ॥ २६ ॥ प्रतिहारैर्द्वारपालैः ॥ २७ ॥ आत्मानं स्वं यथा देवा अर्हयन्ति ॥ २८ ॥ अभिमृशन् संवाहयन् अभ्यग्रः तद्विवाहार्थमन्तर्वैयग्रे सत्यपीति भावः ॥ २९–३० ॥ स्वीयधर्मात् अहीयमानश्च्युतिरहितः स धर्म एव ॥ ३१ ॥ लोकान् आप्नोति लोकाल्लोकान्तरं पर्य्यटति न तु निर्वृणोतीत्यर्थः । सुरेश्वर इन्द्रोऽपि भूत्वा नाप्नोतीति पाठे तृष्णाज्वरार्त्तिवशात् लोकान् प्राप्तोपि न प्राप्नोतीत्यर्थः ॥ ३२ ॥

गूढार्थदीपिनी

तत् भ्रातुर्हठम् अवेत्य ज्ञात्वा । आप्तं विश्वस्तम् । कृष्णाय कृष्णमानेतुम् । प्राहिणोत् प्रेषयामास ॥ २६ ॥ प्रतीहारैर्द्वारपालैः ॥ २७ ॥ ब्रह्मण्यो ब्राह्मणभक्तः अवरुह्य अवतीर्य । देवा यथा आत्मानं परमात्मानं श्रीकृष्णं पूजयन्ति ॥ २८ ॥ अभिमृशन् शनैः शनैः संमर्दयन् ॥ २९ ॥ नातिकृच्छ्रेण सुखेन ॥ ३० ॥ अहीयमानोऽच्यवमानः । हि एवार्थे ॥ ३१ ॥ असकृत् पुनः पुनः आप्नोति तेषु भ्रमति । नैकत्र सुखितः सन् तिष्ठतीत्यर्थः । विज्वरस्तापरहितः शेते सुखमास्ते ॥ ३२–३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तद्भ्रातुर्मतमवेत्य ज्ञात्वा असितापाङ्गी सुनीलकटाक्षी कृष्णाय कृष्णमानेतुं द्विजं प्राहिणोत् प्रेषयामास ॥ २६ ॥ प्रतीहारैः द्वारपालैः आद्यं विश्वहेतुम् ॥ २७ ॥ आत्मानं श्रीकृष्णं यथा देवाः निजासनेभ्यः अवरुह्य तदुचित आसने उपवेश्य अर्हयन्ति तद्वत् ॥ २८ ॥ अभिमृशन् संवाहयन् ॥ २९ ॥ नातिकृच्छ्रेण यदृच्छालाभेन सन्तुष्टमनसः तव वृद्धसम्मतः वर्णाश्रमोचितः धर्मः वर्तते कच्चित् ॥ ३० ॥ स्वात्स्वकीयात् धर्मात् अहीयमानः स धर्मः अस्य ब्राह्मणस्य स ब्राह्मणो वा अस्य लोकस्य अखिलकामधुक् ॥ ३१ ॥ सुरेश्वरोऽपि असन्तुष्ट असकृत् लोकान् आप्नोति लोकात् लोकान्तरमटति, सन्तुष्टस्तु अकिञ्चनो निर्धनोपि सर्वाङ्गविज्वरः शेते ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रतीहारैर्दौवारिकैः । गतम् ॥ २६ ॥ दिवौकसा देवा आत्मानं स्वं यथा तथाऽर्हयाञ्चक्रेऽपूजयत् ॥ २७ ॥ यद्यपि कन्यानिश्चयनायायातैर्वरगृहे न भोक्तव्यमिति किंवदन्ती तथाऽपि नित्यावियोगिनो रुक्मिणीकृष्णयोरयं विहार इति ध्वनयितुं भुक्तवन्तमित्युक्तिरिति ज्ञेयम् । विश्रान्तं विध्वस्ताध्वश्रमं पादौ पाणिनाऽभिमृशन् अव्यग्रोऽव्याकुलचेतास्तं विप्रमपृच्छतापृच्छत् ॥ २८ ॥ हे द्विजवरश्रेष्ठ । वृद्धसम्मतस्ते धर्मो नातिकृच्छ्रेणानायासेन वर्तते कच्चित् ॥ २९ ॥ स हि तादृशो द्विजः स्वाद्धर्माद्दहीयमानो यद्देशे वर्तते राज्ञः सर्वान्कामान्दोग्धीति स तथा ॥ ३० ॥ सुरेश्वरोऽप्यसन्तुष्टश्चेत्सुखं नाप्नोति । अकिञ्चनो दरिद्रः कियतावदैवलब्धेन

सन्तुष्टः सर्वाङ्गविज्वरः सर्वाङ्गीणोपतापरहितः शेते ॥ ३१ ॥ उक्तं यदर्थमियत्तत्पर्यवसाययति ॥ विप्रानिति । भूतसुहृञ्छ्रेष्ठाद्भूतं **विष्णुः सुहृत्तमो** येषामिति वा । यथोक्तमेकादशतात्पर्ये । सृष्टिस्थित्यादिहेतुत्वाद्भूतानि हरिरुच्यते । न तु वस्तुस्वरूपत्वात्स हि **सर्वेश्वरेश्वर** इति वस्तुतत्वत इति । शान्तानक्रोधान् असकृद् भूयो भूयः शिरसा नमस्ये ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तद्रुक्मिण्या अनभिप्रेतमिति स्वात्मानं भगवद्गामिनं कर्तुमियेषेत्याह **तदवेत्ये**ति । आदौ तन्निश्चित्य भृशं दुर्मना जाता । नन्वग्रे भगवत्प्रापकाणि कर्माणि कृत्वा भगवन्तं प्राप्स्यति, किमित्युद्वेग इति चेत् । तत्राह **वैदर्भी**ति । नास्यां कर्माण्युत्पद्यन्त इति । किञ्च । **असितापाङ्गी** परमसुन्दरी, परमसुन्दर एव युक्ता भवति, न तु जीवे कुरूपे । अतः आदौ दुर्मना भूत्वा पश्चादुपायचिन्तायां मित्रेणैवैतत्कार्यं कर्तव्यमिति विचार्य, सर्वस्य मित्रं गौर्ब्राह्मणो देवश्चेति, तत्रापि गौरज्ञा साधारणी च नात्यन्तं भगवत्पक्षपातिनी, अतो ब्राह्मण एवाप्तोऽस्मिन् कार्ये भवतीति विचिन्त्य, कञ्चिदाप्तं द्विजं गूढार्थसाधकं द्रुतं शीघ्रमेन कृष्णाय प्राहिणोत् । अर्थात् सन्देशानुक्त्वा पत्रिकां वा दत्वा ॥ २६ ॥ तस्य बहिः**कार्य**माह द्वारकां स समभ्येत्येत्यादिदशभिः स हि निर्गुणं सगुणं च कार्यं कृतवानिति शीघ्रमेव द्वारकां समभ्येत्य, पूर्वमेव भगवदुक्तैः प्रतीहारैरन्तः कृष्णसन्निधौ प्रवेशितः, कार्यं साधयितुमागतः, मध्ये स्वपुरुषार्थमपि साधितवानित्याह **अपश्य**दिति । ननु दर्शनमवान्तरकार्यमेव कुतो न भवेत्, तत्राह **आद्यं पुरुष**मिति । सर्वस्यापि पतिदर्शनं पुरुषार्थः, तत्रापि परमः पतिः भगवान्, सर्वे प्रकृतिरूपा इति पूर्वमवोचाम । तादृशो भगवान् कार्यार्थं समागतः व्यग्र एव भविष्यतीति कथं कार्यद्वयमपिसिध्येदित्याशङ्क्याह **काञ्चनासने आसीन**मिति । उपविष्टत्वादव्यग्रता । सुवर्णासने चोपविष्ट इति विषयपरिग्रहः । तेन कार्यद्वयसिद्धिरिति भावः ॥ २७ ॥ ततस्तस्य सन्माननामाह **दृष्ट्वा ब्रह्मण्यदेव** इति । प्रश्नानन्तरं सन्माननायां स्त्री निमित्तं भवेत् । आर्षज्ञानेन पूजायामपि कृत्रिमत्वसम्भावना स्यात् । ततश्च तद्दोषनिवृत्तिधर्मान्तरमेवाह **ब्रह्मण्यदेव** इति । ब्रह्मण्यश्चासौ देवश्चेति ब्राह्मणानां हितः समर्थश्च । अतो ब्राह्मणस्य अवरुह्य देवस्येव पूजां कृतवान् । तं प्रकारमाह । निजासनादवरुह्य, तत्र ब्राह्मणमुपवेश्य, अर्हयामास । प्रकारविशेषजिज्ञासायां स्वधर्ममतिदिशति । **दिवौकसो देवा यथा भगवन्त**मिति । भगवति गृहमागते इन्द्रः स्वासने भगवन्तमुपवेश्य यावती स्वसमृद्धिः तया सर्वयैव पूजयति । एवं भगवानपि सर्वसमृद्धया पूजितवान् ॥ २८ ॥ ततस्तस्य राज्ये प्रायेण धर्मो नास्तीति स्वदर्शनफलं तस्य ज्ञानमुपदिशतीत्याह **तं भुक्तवन्त**मिति । भोजनपर्यन्तं सर्वे उपचाराः कृताः । ब्राह्मणो हि मुख्यो भोजनप्रियः । ततो भोजनश्रमापनोदनादनन्तरं उपगम्य निकटे गत्वा । नन्वेवं ब्राह्मणमात्रे किमिति करोतीत्याशङ्क्याह **सतां गति**रिति । लोकशिक्षार्थमेवं करोतीत्यर्थः । ततः पाणिना पादावभिमृशन् रुक्मिण्यामासक्तिरस्ति ततो व्यग्रः प्रश्नं करिष्यतीत्याशङ्क्य अव्यग्रस्तमपृच्छतेत्याह ॥२९॥ ज्ञानमुपदिशति **कच्चिद्द्विजवरेति पञ्चभिः** । चतुर्भिस्तस्य, एकेन तद्राज्ञः । चत्वारः पुरुषार्था ब्राह्मणस्य, राज्ञः अर्थकामौ नियतौ, मोक्षो नास्त्येव, धर्मः संदिग्धः । अतः स एव पृच्छयते । आदौ तस्य धर्मं पृच्छति **कच्चिद्द्विजवरश्रेष्ठ** इति । द्विजवराणां मध्ये श्रोत्रियाणां मैत्री क्रियत इति श्रेष्ठत्वम् । अतः सर्वेषां मित्रभूतत्वात् तथा सम्बोधनम् । यद्यप्ययं धर्मो वर्तत एव, तथापि वृद्धसम्मतोऽपि परम्परया समागतः श्रौतः स्मार्तः वर्तते कच्चित् । किञ्च । स्वपरपीडया क्रियमाणः शुद्धो धर्मो न भवतीति उत्तरकाण्डानुरोधमप्यङ्गीकृत्याह **नातिकृच्छ्रेणे**ति । अतिकृच्छ्रेणधर्मोऽपि धर्मो न भवतीति । तत्रापि शुद्धमनस एव धर्मो भवति, ब्राह्मणानां मनःशुद्धिः संतोष एवेति तं पृच्छति **सदा संतुष्टमनस** इति । सदा संतुष्टं मनो यस्य ॥ अर्थं पृच्छति **संतुष्टो यर्हि वर्तेते**ति । संतोष एव ब्राह्मणानां धनं कामधेनु, नतु लोकप्रसिद्धं धनम् । **येन केनचि**दिति । कर्मवशादवश्यं जीवनार्थं प्राप्यत एव । किञ्च । तावता चेत् संतुष्टः, कर्मफलदाता संतुष्टो भवतीति । असन्तोषेऽपि क्रियमाणे नाधिकं प्रयच्छति । असन्तुष्टश्च भवतीति तत्सन्तोषार्थं **स्वधर्मादहीयमानः** सर्वमेव स्वधर्मं कुर्वन् यर्हि वर्तेत । अनेनेयं स्थितिर्दुर्लभेति सूचितम् । स एव सन्तोषः, अस्य अखिलानेव कामान् दोग्धि ॥ ३१ ॥ कामं पृच्छति **असंतुष्ट** इति । कामो हि ब्राह्मणानां बाधकः, तदभावकाम एव पुरुषार्थरूपः । एवं भावे हेतुमाह **असंतुष्टः** असकृदेव क्लेशान्प्राप्नोति । विषयाभावादि चेत् । तत्राह **सुरेश्वरोऽपी**ति । इन्द्रो हि परमैश्वर्यं प्राप्तवान् । कामे परमा काष्ठा । तादृशोऽपि यद्यसन्तुष्टः, क्लेशानेव प्राप्नोति । अत्रानुभवः प्रमाणम् । श्रुतिश्च 'प्रजापत आशया वै श्राम्यसी'ति । अन्वयव्यतिरेकाभ्यां व्यभिचारं वदन् व्यतिरेके अनुभवमाह **अकिञ्चनोऽपी**ति । किमपि माऽस्तु । सन्तुष्टश्चेत्, अत्यन्तं सुखी । कथमित्याकाङ्क्षायां हेतुमाह **शेत** इति । सुखात्मिका हि निद्रा । उभयवादिसिद्धो हेतुर्वक्तव्यः । तत्र संतुष्टः शेते, नासन्तुष्टः, प्राप्यापि राज्यम् । जागरणेऽपि हेतुमाह । सर्वाङ्गे विगतो ज्वरो यस्येति । असन्तोषे चिन्ता भवति । चिन्तायां सर्वाङ्गे तापः प्रसिद्धः ॥ ३२ ॥

श्रीसुबोधिनी–सारः

तदवेत्य ज्ञात्वाऽसितौ कृष्णावपांगौ कटाक्षौ यस्याः सा वैदर्भी रुक्मिणी भृशमत्यर्थं दुर्मना विमनस्काऽऽप्तं प्राप्तं यथार्थ वक्तारं वा द्विजं ब्राह्मणं कंचित् कृष्णाय कृष्णमानेतुं द्रुतं शीघ्रं प्रैषयत् ॥ २६ ॥ द्वारकां समभ्येत्य प्राप्य प्रतीहारैर्द्वारपालैरंतः प्रवेशितः स विप्रः सुवर्णस्यासनोपरि आसीनमाद्यं पुरुषं श्रीकृष्णमैक्षत ॥ २७ ॥ तं ब्राह्मणं दृष्ट्वा स्वासनादवरुह्यावतीर्य ब्रह्मण्य-

देवः श्रीकृष्ण आसने तमुपावेश्य पूजयाञ्चकार। दिवौकसो देवा आत्मानं स्वं विष्णुमिव ॥ २८ ॥ भुक्तवंतं कृतभोजनं विश्रांतं विखेदं तं विप्रमुपगम्य प्राप्य हस्तेन तत्पादौ संस्पृशन् सतां गतिः श्रीकृष्णो अव्यग्रः स्वस्थमनाः तमपृच्छत् ॥ २९ ॥ हे द्विजवरश्रेष्ठ सदा संतुष्टचित्तस्य ते तव वृद्धानां संमतो धर्मो नातिकृच्छ्रेण सुखेन वर्त्तते कच्चित्किम् ॥ ३० ॥ स्वाद्धर्मादहीयमानोऽच्युतो ब्राह्मणो येन केनचित्प्राप्तेन संतुष्टो यर्हि वर्त्तेत अस्य विप्रस्य स हि धर्मः सर्वकामनापूरकः ॥ ३१ ॥ इन्द्रोऽप्यसंतुष्टोऽसकृन्मुहुर्मुहुर्लोकानाप्नोति परिभ्रमते भ्रश्यति वा निष्किंचनोऽपि संतुष्टः सर्वेष्वंगेषु विज्वरस्तापरहितः शेते सुखमास्ते ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत् भ्रातुर्निश्चयमवेत्य ज्ञात्वा असितौ अपाङ्गौ नेत्रप्रान्तौ यस्याः सा वैदर्भी रुक्मिणी भृशं दुर्मनाः सुदुःखितचित्ता सती विचिन्त्य श्रीकृष्णप्राप्त्युपायं विचार्य आप्तं तत्र प्राप्तं सद्वक्तारं वा कञ्चिद्द्विजं द्रुतं त्वरितं यथा स्यात्तथा कृष्णाय कृष्णमानेतुं प्राहिणोत् प्रेषयामासेत्यर्थः ॥ २५ ॥ ततश्च स द्विजः द्वारकां समभ्येत्य सम्यगागत्य तत्रत्यैः प्रतीहारैः द्वारपालैरन्तःप्रवेशितः सन् काञ्चनमये सिंहासने आसीनम् आद्यं जगत्कारणभूतं पुरुषं श्रीकृष्णं अपश्यत् ॥ २७ ॥ ब्रह्मणि ब्राह्मणकुले साधवो भक्ता ब्रह्मण्यास्तेषां मध्ये देवः दीव्यमानः श्रेष्ठः कृष्णस्तं द्विजं निजासनादवरुह्य अवतीर्य तं तत्रासने उपवेश्य अर्हयाञ्चक्रे। तत्र दृष्टान्तमाह—यथेति। दिवौकसो देवा यथा आत्मानं श्रीकृष्णं पूजयन्ति तद्वदित्यर्थः ॥ २८ ॥ विश्रान्तं विगताध्वश्रमं भुक्तवन्तं तं द्विजं सतां सदाचारनिष्ठानां गतिः फलभूतः भगवानुपगम्य निकटमागत्य स्वपाणिना तत्पादावभिमृशन् शनै सम्मर्दयन् अव्यग्रः सावधानः सन्नपृच्छत ॥ २९ ॥ तत्प्रश्नमेव दर्शयति—कच्चिदिति। हे द्विजवरश्रेष्ठ! नातिकृच्छ्रेण अनायाससिद्धेन सदा सन्तुष्टं मनो यस्य तस्य ते तव वृद्धानां सम्मतो धर्मः कच्चिद्वर्तते? तन्मदिष्टमित्यर्थः ॥ ३० ॥ उक्तमेव स्पष्टयन् सन्तोषफलमाह—सन्तुष्ट इति। यर्हि यदा येन केनाप्ययत्नलब्धेनैव देहधारणोपयुक्तेन सन्तुष्टः स्वात् स्ववर्णाश्रमोचिताद्धर्मात् अहीयमानश्च ब्राह्मणो वर्तेत तदा स एव सन्तोषपूर्वकमनुष्ठीयमानः स्वधर्म एवास्य पुरुषस्य अखिलान् कामान् इष्टार्थान् दोग्धीति तथाभूतो भवति। हि शब्दो एवकारार्थे ॥ ३१ ॥ सन्तोषासन्तोषयोः फलमाह—सुरेश्वरः इन्द्रोऽपि असन्तुष्टश्चेदसकृल्लोकानाप्नोति लोकाल्लोकान्तरं सुखलाभार्थं पर्यटति, नैकत्र निर्वृतस्तिष्ठतीत्यर्थः। 'लोकान्नाप्नोति' इति पाठे तु उत्तमलोकान् प्राप्तोऽपि अप्राप्त इव क्लिश्यतीत्यर्थः। सन्तुष्टश्चेदकिञ्चनो भोजनाच्छादनोपयुक्तधनादिहीनोऽपि सर्वेष्वङ्गेषु विज्वरस्तापरहितः शेते सुखमास्त इत्यर्थः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

तदिति ॥ तत् भ्रातुर्दुराग्रहमनिवार्यमवेत्य ज्ञात्वा असितौ अपाङ्गौ नेत्रप्रान्तौ यस्याः सा वैदर्भी रुक्मिणी भृशं दुर्मनाः सुदुःखितचित्ता सती विचिन्त्य श्रीकृष्णप्राप्त्युपायं विचार्य आप्तं तत्र प्राप्तं सत्यवक्तारं वा कंचिद् द्विजं द्रुत त्वरितं यथा स्यात्तथा कृष्णाय कृष्णमानेतु प्राहिणोत् प्रेषयामास ॥ २६ ॥ द्वारकामिति ॥ स द्विजः द्वारकां समभ्येत्य सम्यगागत्य तत्रत्यैः प्रतिहारैः द्वारपालैरन्तः प्रवेशितः सन् काञ्चनमये सिंहासने आसीनम् आद्यं पुरुषं श्रीकृष्णम् अपश्यत् ॥ २७ ॥ दृष्ट्वेति ॥ ब्रह्मणि ब्राह्मणकुले साधवो भक्ता ब्रह्मण्यास्तेषां मध्ये देवः श्रेष्ठः कृष्णस्तं द्विजं दृष्ट्वा निजासनादवरुह्य अवतीर्य तं तत्रासने उपवेश्य अर्हयांचक्रे। दिवौकसो देवा यथात्मानं श्रीकृष्णं पूजयन्ति तद्वत् ॥ २८ ॥ तमिति ॥ विश्रान्तं विगताध्वश्रमं भुक्तवन्तं तं द्विजं सतां सदाचारनिष्ठानां गतिः फलभूता भगवानुपगम्य निकटमागत्य स्वपाणिना तत्पादावभिमृशन् शनैः संमर्दयन् अव्यग्रः विवाहार्थं वैयग्र्यसंभावनायामपि व्यग्रतारहितः सन्नपृच्छत। तदर्थः ॥ २९ ॥ कच्चिदिति ॥ हे द्विजवरश्रेष्ठ! नातिकृच्छ्रेण अनायाससिद्धेन सदा संतुष्टं मनो यस्य तस्य ते तव वृद्धानां संमतो धर्मः कच्चिद्वर्तते तन्मदिष्टमित्यर्थः ॥ ३० ॥ सन्तुष्ट इति ॥ यर्हि यदा येन केनाप्ययत्नलब्धेनैव देहधारणोपयुक्तेन सन्तुष्टः स्वात् स्ववर्णाश्रमोचितात् धर्मादहीयमानः अप्रच्यवमानश्च ब्राह्मणो वर्तेत। तदा स एव सन्तोषपूर्वकमनुष्ठीयमानः स्वधर्म एवास्य पुरुषस्य अखिलान् कामान् इष्टार्थान् दोग्धीति तथाभूतो भवति। हिरेवार्थे। यद्वा। स ब्राह्मणः अस्य विश्वस्याखिलकामधुक् ॥ ३१ ॥ असन्तुष्ट इति ॥ सुरेश्वरः इन्द्रोऽप्यसंतुष्टश्चेदसकृल्लोकान् आप्नोति लोकाल्लोकान्तरं सुखलाभार्थं पर्यटति। नैकत्र निर्वृतस्तिष्ठतीत्यर्थः। लोकान्नाप्नोतीति पाठे तूत्तमलोकान् प्राप्तोऽप्यप्राप्त इव क्लिश्यतीत्यर्थः। संतुष्टश्चेदकिञ्चनो भोजनाच्छादनोपयुक्तधनादिहीनोऽपि सर्वेष्वङ्गेषु विज्वरस्तापरहितः शेते सुखमास्ते ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदवेत्य बुद्ध्वा। असितापांगी श्यामकटाक्षी। आप्तं स्वहितजनकम्। कृष्णाय कृष्णमानेतुम् ॥ प्राहिणोत् प्रेषयति स्म ॥ २६ ॥ प्रतीहारैर्द्वाररक्षकैः ॥ २७ ॥ आत्मानं स्वमूर्तिं देवा यथा अर्च्चयन्ति स्म ॥२८॥ अभिमृशन् शनैः संवाहयन् ॥ २९ ॥ ते तव धर्मः ॥ अतिकृच्छ्रेण न वर्त्तते वा वर्त्तते ॥ ३० ॥ अहीयमानः अपतितः ॥ धर्मे स्थित इत्यर्थः। स विप्रः अस्य लोकस्य अखिलकामधुक् ॥ यद्वा स धर्मः अस्य विप्रस्य सर्वकामप्रदः ॥ ३१ ॥ सुरेश्वरोऽपि ॥ असंतुष्टः लोकानुत्तमलोकान्न आप्नोति तान् ॥ प्राप्तोऽपि असकृत् मुहुर्मुहुः क्लिश्यतीत्यर्थः। लोकानाप्नोतीति पाठे तु असकृत् लोकान् प्राप्नोति लोकं लोकं भ्रमति नैकत्र तिष्ठतीत्यर्थः। संतुष्टः सर्वेष्वंङ्गेष्विन्द्रियान्तःकरणेषु विज्वरो विगतक्लेशः शेते सुखमास्ते ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति । असितावपाङ्गौ यस्याः सा, कृष्णवर्णनेत्रप्रान्तेत्यर्थः । वैदर्भी रुक्मिणी, तत् भ्रातुर्निश्चितं, अवेत्यालक्ष्य, भृशमतिशयेन, दुर्मना दुःखितचित्ता सती, आप्तं स्निग्धं प्रामाणिकमित्यर्थः । कंचित्, द्विजं विप्रं, विचिन्त्य निश्चित्य, द्रुतं त्वरितं यथा तथा, कृष्णाय कृष्णमानेतुं, प्राहिणोत् । 'क्रियार्थोपपदस्य'—इत्यादिना चतुर्थी ॥ २६ ॥ द्वारिकामिति । स द्विजः, द्वारिकां, समभ्येत्य, प्रतीहारैः प्रवेशितः सन्, काञ्चनासने काञ्चनमये सिंहासने, आसीनम् आद्यं जगत्कारणभूतं, पुरुषं श्रीकृष्णं, अपश्यत् ददर्श । अत्र केचिदस्मात् श्लोकात् पूर्ववर्त्तिनं 'स दूरगमनात् खिन्नो विप्रो वृद्धोऽपि वाटिकाम् । समेत्य सुप्तः कृष्णेन द्वारिकां प्रापितः क्षणात्' इति श्लोकं पठन्ति तस्य प्रायोऽदर्शनान्न व्याख्यातः ॥ २७ ॥ दृष्ट्वेति । तं स्वं दृष्टवन्तं द्विजं, दृष्ट्वा अवलोक्य, ब्रह्मणि ब्राह्मणकुले साधवो ब्रह्मण्यास्तेषां मध्ये देवो दीप्यमानः श्रेष्ठ इत्यर्थः । एवंभूतो भगवान्, निजासनात् स्वकीयसिंहासनात्, अवरुह्योत्तीर्य, तत्र द्विजं उपावेश्य, यथा दिवौकस इन्द्रादयः, आत्मानं स्वं पूजयन्ति, तथा अर्हयाञ्चक्रे पूजयामास ॥ २८ ॥ तमिति । सतां गतिः साधूनामपि श्रेयःप्राप्त्युपायभूतः, हेतुगर्भमिदम् । तत्त्वात्, सद्भिरेवमनुष्ठेयमिति दर्शयन्निवेति भावः । भगवान्, भुक्तवन्तं सम्यग्विहितभोजनं, विश्रान्तं विगताध्वश्रमं, तं द्विजं, उपगम्य पाणिना स्वहस्तेन, पादौ विप्रचरणौ, अभिमृशन् शनैः संमर्द्दयन्, अव्यग्रोऽव्यवहितचित्तः सन्, तं द्विजं, अपृच्छत पृष्टवान् ॥ २९ ॥ कच्चिदिति षड्भिः श्लोकैः प्रश्नमेव वर्णयति । कच्चिदिति । हे द्विजवरश्रेष्ठ द्विजश्रेष्ठानामपि श्रेष्ठ, नातिकृच्छ्रेण अयत्नलब्धेनेत्यर्थः । सदा, संतुष्टमनसः, ते तव, धर्मः वृद्धसंमतः आर्यसंमतः, वर्त्तते कच्चित् । यतः संतोष एव ब्राह्मणस्य परमो धर्मः, आर्यसंमतः मदिष्टश्चेति भावः ॥ ३० ॥ एतदेवोपपादयति । संतुष्ट इति । ब्राह्मणः, यर्हि यदा, येन केनचित्, देहधारणोपयुक्तेनायत्नलब्धेन येन केनचित्पदार्थेनेत्यर्थः । संतुष्टः सन्, स्वात्स्वकीयात् स्ववर्णाश्रमोचितात्, धर्मात्, अहीयमानः वर्त्तेत, तर्हि स हि नित्यं संतुष्टतया वर्त्तनरूपो धर्म एव, अस्य संतुष्टस्य स्वधर्मादनपेतस्य ब्राह्मणस्य, यद्वा स ब्राह्मणः, अस्य विश्वस्य, अखिलान् समग्रान्, कामानभीष्टार्थान् दोग्धीति तथाभूतः, स्यात् । स्वादित्यत्र 'पूर्वादिभ्यो नवभ्यो वा' इति विकल्पात्स्मादेशाभावः ॥ ३१ ॥ एवं संतोषस्य पारलौकिकसुखसाधनत्वमुक्तमथेह लोकेऽपि सुखहेतुत्वं वक्तुमसंतोषस्योभयत्र दुःखहेतुतामाह । असंतुष्ट इति । सुरेश्वरः इन्द्रः भूत्वापि, असंतुष्टः स्यात् चेत्, लोकान् अपि असकृत् आप्नोति । लोकात् लोकान्तरं पर्यटति नैकत्र निर्वृतस्तिष्ठतीत्यर्थः । पाठान्तरे सुरेश्वरः भूत्वाऽपि असंतुष्टश्चेत्, लोकानुत्तमलोकान्, न प्राप्नोति । उत्तमलोकान् प्राप्तोऽपि अप्राप्त इव क्लिश्यतीत्यर्थः । यद्वा, अनुकूलतया लोक्यन्ते इति लोका आनन्दाः सुखानीति यावत् । तान् लोकान्, ऐहिकामुष्मिकांश्चानन्दान्नाप्नोतीत्यर्थः । अकिंचनः सन् अपि, यदि संतुष्टश्चेत्, सर्वाङ्गविज्वरः सर्वेष्वप्यङ्गेषु तापरहितः, शेते । सुखमास्ते इत्यर्थः ॥ ३२ ॥

कृष्णप्रिया

जब परमसुन्दरी रुक्मिणी को यह मालूम हुआ कि मेरा बड़ा भाई रुक्मी शिशुपाल के साथ मेरा विवाह करना चाहता है, तब वे बहुत उदास हो गयी । उन्होंने बहुत सोच-विचार कर एक विश्वासपात्र ब्राह्मण को तुरंत श्रीकृष्ण के पास भेजा ॥ २६ ॥ जब वे ब्राह्मण देवता द्वारकापुरी में पहुँचे, तब द्वारपाल उन्हें राजमहल के भीतर ले गये । वहाँ जाकर ब्राह्मण-देवता ने देखा कि आदि पुरुष भगवान् श्रीकृष्ण सोने के सिंहासन पर विराजमान हैं ॥ २७ ॥ ब्राह्मणों के परम भक्त भगवान् श्रीकृष्ण उन ब्राह्मण देवता को देखते ही अपने आसन से नीचे उतर गये और उन्हें अपने आसन पर बैठाकर वैसी ही पूजा की, जैसे देवता लोग उनकी (भगवान् की) किया करते हैं ॥ २८ ॥ आदर-सत्कार, कुशल-प्रश्न के अनन्तर जब ब्राह्मण देवता खा-पी चुके, आराम-विश्राम कर चुके तब संतों के परम आश्रय भगवान् श्रीकृष्ण उनके पास गये और अपने कोमल हाथों से उनके पैर सहलाते हुए बड़े शान्त भाव से पूछने लगे ॥ २९ ॥ ब्राह्मणशिरोमणे ! आपका चित्त तो सदा सर्वदा सन्तुष्ट रहता है न ? आपको अपने पूर्वपुरुषों द्वारा स्वीकृत धर्म का पालन करने में कोई कठिनाई तो नहीं होती ॥ ३० ॥ ब्राह्मण यदि जो कुछ मिल जाय, उसी में सन्तुष्ट रहे और अपने धर्म का पालन करे, उससे च्युत न हो, तो सन्तोष ही उनकी सारी कामनाएँ पूर्ण कर देता है ॥ ३१ ॥ यदि इन्द्र का पद पाकर भी किसी को सन्तोष न हो, तो उसे सुख के लिये एक लोक से दूसरे लोक में बार-बार भटकना पड़ेगा, वह कहीं भी शान्ति से बैठ नहीं सकेगा । परन्तु जिसके पास तनिक भी संग्रह-परिग्रह नहीं है, और जो उसी अवस्था में सन्तुष्ट है, वह सब प्रकार से सन्ताप रहित होकर सुख की नींद सोता है ॥ ३२ ॥

विप्रान् स्वलाभसंतुष्टान् साधून् भूतसुहृत्तमान् । निरहंकारिणः शान्तान् नमस्ये शिरसासकृत् ॥ ३३ ॥
कच्चिद् वः कुशलं ब्रह्मन् राजतो यस्य हि प्रजाः । सुखं वसन्ति विषये पाल्यमानाः स मे प्रियः ॥ ३४ ॥
यतस्त्वमागतो दुर्गं निस्तीर्येह यदिच्छया ।[1] सर्वं [2]नो ब्रूह्यगुह्यं चेत् किं कार्यं करवाम [3]ते ॥ ३५ ॥
एवं सम्पृष्टसम्प्रश्नो ब्राह्मणः परमेष्ठिना । [4]लीलागृहीतदेहेन तस्मै सर्वमवर्णयत्[5] ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—स्वलाभसंतुष्टान्, साधून्, भूतसुहृत्तमान्, निरहंकारिणः, शान्तान्, विप्रान्, असकृत्, शिरसा, नमस्ये ॥३३॥ ब्रह्मन्, वः, कुशलम्, कच्चित् ? हि, यस्य, राजतः, विषये, पाल्यमानाः, प्रजाः, सुखम्, वसन्ति, सः, मे, प्रियः ॥ ३४ ॥ यः, त्वम्, दुर्गम्, निस्तीर्य, यदिच्छया, इह, आगतः, अगुह्यम्, चेत्, सर्वम्, नः, ब्रूहि ? ते, किम्, कार्यम्, करवाम ! ॥ ३५ ॥ लीलागृहीतदेहेन, परमेष्ठिना, एवम्, सम्पृष्टसंप्रश्नः, ब्राह्मणः, तस्मै, सर्वम्, अवर्णयत् ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वलाभः स्वत एव प्राप्तो लाभ आत्मलाभो वा तेन संतुष्टान्पूर्णान्साधून् स्वधर्मनिष्ठान् ॥ ३३ ॥ **यस्य राज्ञो विषये** देशे ॥ ३४ ॥ यतः स्थानात् । यदिच्छया यत्कार्येच्छया । दुर्गं समुद्रम् ॥ ३५ ॥ संपृष्टः संप्रश्नः प्रष्टव्योऽर्थो यं सः । **परमेष्ठिना** परमेश्वरेण । बंधूनामनभिप्रेतं रुक्मिणश्चेष्टितमित्यादि सर्वम् ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वत इति तस्यार्थाश्रयणगौरवादर्थांतरमाह—आत्मेति । तेनात्मलाभेन । पूर्णांस्तृप्तान् ॥ एवं संतुष्टिमात्रेण स्वयं सुखी स्यात्तदनुगतैश्चान्यैर्गुणैः सर्वान्सुखयन्परमपूज्यः स्यादित्याह—विप्रानिति । बहुत्वं प्रत्येकनमस्कारविवक्षया । शान्तान् रागद्वेषादिरहिताँस्तत्त्वनिष्ठान्वा । एषामुत्तरोत्तरस्मिन्कैमुत्यं श्रैष्ठ्यं चोह्यम् । शिरसा न तु वाङ्मात्रेण, तच्चासकृत् । यद्वा–स्वस्य मम लाभेन संतुष्टान् । तथा चैकादशे—'मया संतुष्टमनसः' इत्यादि । यतः साधून् मद्भक्तान् 'साधवो हृदयं मह्यम्' इत्यादि नवमे । इत्येवं विशेषणानां व्यतिक्रमेण हेतुत्वादिकं ज्ञेयम् । अयं भावः–भवानीदृश एव काप्यपेक्षा नास्त्येव तथाप्यागमनेन यन्मामनुजग्राह तेनाहं वशीकृतस्त्वदाज्ञां यत्नतः संपादयिष्यामीति ॥ ३३ ॥ "नीवृज्जनपदो देशो विषयस्तूपवर्तनम्" इत्यमरः । स राजा ॥ एवमतिकृच्छ्रसाध्यत्वेऽपि संतोषात्तस्य धर्मसिद्धिं मत्वापि तद्विषेष्वतिकृच्छ्रस्यानभीष्टतया तदुपगमहेतुं राजानुग्रहं पृच्छति—कच्चिदिति । कुशलम् उपद्रवो न स्यात्साहाय्यञ्च भवेदित्यर्थः । ब्रह्मन्निति वेदवित्त्वेन राज्ञां सर्वथा पूज्यस्त्वमिति भावः ॥ ३४ ॥ दुर्गं दुःखेन गम्यम् "दुर्गं दुःखाब्धिराज्यांगकठिनेषु गिरौ तथा" इति निरुक्तिः ॥ अगुह्यं चेत्सर्वं ब्रूहीति विनयात् । किं करवाम, तदाज्ञापयेति शेषः ॥ ३५ ॥ तस्मै परमेष्ठिने । "परमेष्ठी ब्रह्मविष्णुशिवस्वामिध्रुवेषु च । द्विजोत्तमे स्वयम्भूश्च तथैव परिकीर्तितः ॥" इति कोशसारे ॥ परमेष्ठिनेति सर्वज्ञत्वमुक्तम् । तथापि प्रश्ने हेतुः—लीलेति । क्रीडार्थं प्रकटितमनुष्यदेहेन तादृश्या एव मनुष्यक्रीडाया योग्यत्वादित्यर्थः । यद्वा—लीलाभिर्गृहीतः सेवितो देहो यस्य, स्वेच्छया लीलावेशादिति भावः । सर्वमागमनकारणं धर्मनिष्पत्त्यादिकं चावर्णयत् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं सन्तुष्टिमात्रेण स्वयं सुखी स्यात् तदनुगतैर्गुणैश्चान्यैः सर्वान् सुखयन् परमपूज्यः स्यादित्याह—विप्रानिति । बहुत्वं प्रत्येकनमस्कारविवक्षया शान्तान् रागद्वेषादिरहितान् तत्त्वनिष्ठान् वा एषामुत्तरोत्तरस्मिन् कैमुत्यं श्रैष्ठ्यं वोह्यं शिरसा नतु वाङ्मात्रेण तच्चासकृत् अन्यत्तैः । यद्वा, स्वस्य मम लाभेन सन्तुष्टान् तथा चैकादशे "मया सन्तुष्टमनसः" इत्यादि यतः साधून् सद्भक्तान् "साधवो हृदयं मह्यम्" इत्यादि नवमे इत्येवं विशेषणानां व्यतिक्रमेण हेतुत्वादिकं ज्ञेयम् । अयं भावः भवानीदृश एवेति काप्यपेक्षा नास्त्येव तथाप्यागमनेन यन्मामनुजग्राह तेनाहं वशीकृतस्तवाज्ञां यत्नतः सम्पादयिष्यामीति ॥ ३३ ॥ एवमात-

---

१. यदृच्छया–विज. । २. सर्वं मे–वीर. विज. । ३. हे–वीर । ४. अयमर्धः विजये नास्ति ।

५. विदर्भाधिपतेः पुत्री रुक्मिणी तव किंकरी । विज्ञापयति ते किञ्चित्प्रस्तुतोद्वाहमंगलम् ॥ १ ॥
तथा सम्प्रेषितोऽहं ते सकाशं भीष्मकन्यया । तस्याः सन्देशमाकर्ण्य क्रियतां तदनन्तरम् ॥ २ ॥–म. पु. टि. ।
रुक्मिण्या प्रेषितस्तेहं सकाशं पुरुषोत्तम । तस्याः सन्देशमाकर्ण्य क्रियतां तदनन्तरम् ॥ १ ॥
निधाय लिखितं पत्रं पादयोः प्रणनाम तम् । तदादाय जगन्नाथः स्मितसुन्दरलोचनः ॥ २ ॥
वाचयामास धर्मात्मा सादरं स्पृहयन्निव ।

कृच्छ्रसाध्यत्वेपि सन्तोषात्तस्य धर्मसिद्धिमेव मत्वापि तद्विषेष्वतिकृच्छ्रस्य स्वानभीष्टतया तदुपागमहेतुं राजानुग्रहं पृच्छति, कच्चिदिति । कुशलं कश्चिदुपद्रवो न स्यात् साहाय्यं च भवेदित्यर्थः ॥ ३४ ॥ अगुह्यं चेत्सर्वं ब्रूहीति विनयात् किङ्करवाम तदा ज्ञापयेति शेषः । यद्वा, करवाम किमिति प्रीतिभरेण मनोरथः ॥ ३५ ॥ परमेष्ठिनेति सर्वज्ञत्वमुक्तं तथापि प्रश्ने हेतुः लीलेति क्रीडार्थं प्रकटितमनुष्यदेहेन तादृश्या एव मनुष्यक्रीडाया योग्यत्वादित्यर्थः । यद्वा, लीलाभिर्गृहीतः सेवितो देहो यस्य स्वेच्छया लीलावेशादित्यर्थः । अत एव तादृशलीलाया उपादेयत्वात्संशब्दौ च सर्वं स्वधर्मनिष्पत्त्यादिकमागमनकारणं चावर्णयत् साक्षादेव तत्र श्रीरुक्मिण्युवाचेदमित्यप्याहेत्यर्थः । पत्रिकाद्वारेति तु स्वाम्यभिप्रायः स च तस्य ब्राह्मणस्य "इत्येते गुह्यसन्देशाः" इति वक्ष्यमाणाऽनुसारेण केवलसन्देशहरत्वात् रसशास्त्रोक्तेष्वमितार्थनिसृष्टार्थपत्रहारकाख्येषु स्वेच्छया मिथुनैकतरदत्तभावतया तत्सन्देशमात्रवाहितया लब्धतत्तदाख्याक्रमेषु दूतभेदेष्वन्तिमलक्षणप्राप्ते व्याख्यानुसारेण तस्य पत्रहरण एव मुख्यत्वाच्च ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं सन्तुष्टिमात्रेण स्वयं सुखी स्यात्, गुणैश्चान्यैः सर्व्वान् सुखयन् परमपूज्यः स्यादित्याह—विप्रानिति; बहुत्वं तादृशानां सर्व्वेषामपि नमस्यत्वात्; शान्तान् रागद्वेषादि रहितान् तत्त्वनिष्ठान् वा, शिरसा, न च वाङ्मात्रेण, तच्चासकृत् कथञ्चिदपराधेऽपि तदग्रहणात् । विशेषणानामेषां पूर्व्वपूर्व्वस्योत्तरोत्तरस्मिन् हेतुत्वं यथोत्तरं श्रेष्ठ्यञ्चोह्यम्, अन्यत्तैर्व्याख्यातम् । यद्वा, स्वस्य मम लाभेन सन्तुष्टान्; तथा चैकादशस्कन्धेऽयमेव वक्ष्यति (भा० ११।१४।१३)—'मया सन्तुष्टमनसः' इत्यादि । यतः साधून् मद्भक्तानित्येवं विशेषणावां व्यतिक्रमेण हेतुत्वादिकं ज्ञेयम् । अयं भावः—भवानीदृश एव, द्विजवरश्रेष्ठत्वात्, अतः कुत्रापि भवतः काप्यपेक्षा नास्त्येव, तथाप्यत्रागमनेन यन्मामनुजग्राह, तेन भक्त्याहं वशीकृतस्तवाज्ञां यत्नतोऽवश्यमाशु सम्पादयिष्यामीति । अतः किं वक्तव्यमीदृशा विप्रा मे प्रिया इति ॥ ३३ ॥ तत्परिपालको राजापि प्रिय इति, किंवा राजभिः पाल्यमानानामेव विप्राणां धर्म्मः सिध्येदित्याशयेन पृच्छति—कच्चिदिति । राजतो राज्ञः सकाशात् कुशलं कश्चिदुपद्रवो न स्यात्, साहाय्यञ्च भवेदित्यर्थः । 'वः' इति ज्ञात्याद्यपेक्षया । हे ब्रह्मन्निति साक्षाद्वेदरूपाणां युष्माकं कुशलेनैव वेदानामपि कुशलमिति भावः । हि एव, स एव, निश्चितमिति वा ॥ ३४ ॥ 'नः' इति करवामेति च बहुत्वं विनयेन श्रीबलरामाद्यपेक्षया । अगुह्यञ्चेदिति परमविनयादेव, किं करवाम तदप्याज्ञापयेत्यर्थः, यद्वा, किं करवाम करिष्यामः, किमिति प्रीतिभरेण मनोरथः ॥ ३५ ॥ परमेष्ठिनेति सर्व्वज्ञत्वमुक्तम् । तथापि प्रश्ने हेतुः—लीलेति । क्रीड़ार्थं प्रकटितमनुष्यदेहेन, तादृश्या एव मनुष्यक्रीड़ाया योग्यत्वादित्यर्थः । यद्वा, लीलाभिर्गृहीतः सेवितो देहो यस्य, अनेन तस्य क्रीड़ाविशेषार्थे श्रीरुक्मिण्यपेक्षा सूचिता । अत एव सं-शब्दो च । एवमत्र श्रीब्राह्मण उवाचेति भक्तव्ये श्रीरुक्मिण्युवाचेत्युक्त्या ब्राह्मण एवासौ श्रीरुक्मिण्युक्तं सन्देशं पत्रपाठेन न्यवेदयदिति स्वत एव सिध्यतीति तैष्टीकायां लिखितम् ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

यस्य राज्ञः ॥ ३४-३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अथ सन्तोषस्य स्वाभिमतत्वमाह—विप्रानिति । स्वलाभेन स्वसत्तालाभेन "स्वोज्जीवनेच्छा यदि ते स्वसत्तायां स्पृहा यदि । आत्मदास्यं हरेः स्वाम्यं स्वभावं च सदा स्मरे"त्युक्तहरिदास्याद्यनुसन्धानप्रयुक्तात्मलाभेनेत्यर्थः । तेन सन्तुष्टान् साधून्परोपकारिणः देहात्माभिमानरहितान् शान्तान् जितेन्द्रियान् द्विजानहमसकृच्छिरसा नमस्ये नमस्करोमि, अतीव मदिष्टं कुर्वद्भ्यस्तेभ्यः प्रत्युपकर्त्तुमशक्तः केवलं नमस्करोमीत्यभिप्रायः ॥ ३३ ॥ हे ब्रह्मन् ! वो युष्माकं राजतः राज्ञः सकाशात्कुशलं कच्चित् यस्य राज्ञो विषये देशे प्रजाः पाल्यमानाः सुखं यथा तथा वसन्ति स राजा मम प्रियः ॥ ३४ ॥ यतो यस्माद्देशादिह दुर्गं सामुद्रजलात्मकं निस्तीर्य यदिच्छया यत्प्रयोजनेच्छया हेतुभूतया आगतः तत्सर्वमगुह्यं चेन्नोऽस्मभ्यं ब्रूहि वयं किङ्करवामहे किंकरा वयमित्यर्थः ॥३५॥ एवमिति । लीलया हेतुभूतया गृहीतो देहो येन परो मा यस्मात् तस्मिन् महिम्नि तिष्ठतीति तथाभूते "स्वे महिम्नि प्रतिष्ठित" इति श्रुतेः तेन भगवता इत्थं संपृष्टः संप्रश्नविषयो यस्य स ब्राह्मणः तस्मै श्रीकृष्णाय सर्वं पृष्टं वर्णयामास ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

स्वतो लाभो यस्य धनस्य तत्तथा तेन ॥ ३३ ॥ तस्य विषये राष्ट्रे स राजा मे प्रियः ॥ ३४ ॥ आगमनकारणं पृच्छति—यत इति । यतः कारणात्तत्सर्वं कारणम् ॥ ३५ ॥ परमेष्ठिना सर्वोत्तमेन ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

लीलागृहीतदेहेनेति । लीला-नाम्न्या देव्या गृहीत आलिङ्गितो देहो यस्य, तस्मै सर्वमवर्णयत् । इति कृष्णाज्ञया ब्राह्मणः स्वयमेव पत्रिकां पपाठेत्यर्थः । अयं भावः-श्रीकृष्णोऽपि तां प्रत्युत्सुक-चेताश्चिरत एव, तेन पत्रीवाचने आनन्दाश्रुणाक्षरदर्शनं न स्यादिति तस्मै वाचयेत्युक्तवान् श्रीभगवान् ॥ ३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

लीलागृहीतदेहेन—लीलया लीलानाम्न्या देव्या गृहीतः परिष्वक्तो देहो यस्य। तस्मै सर्वमवर्णयदिति कृष्णाज्ञया ब्राह्मणः स्वयमेव पत्रिकां पपाठेत्यर्थः। अस्यायं भावः—श्रीकृष्णोऽपि तां प्रत्युत्सुकचेताश्चिरत एव पत्री-वाचने आनन्दाश्रु कदाचिद्भवति, कदाक्षरसन्दर्शनं भवति, कदाचिद् भवति न वा, ब्राह्मणस्तारल्यं ज्ञास्यति, अतस्तस्मै वाचयेत्युक्तवान् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

स्वेनैव शिलोञ्छनादितो यो लाभस्तेनैव तुष्टान् नतु परतो लोभार्थिनः ॥ ३३ ॥ विषये देशे ॥ ३४–३५ ॥ संपृष्टः संप्रश्नो यस्य स मयि कोऽपि प्रश्नश्चेदस्ति पृच्छ्यतामित्युक्त इत्यर्थः। लीलयैव देव्या गृहीतः स्वीयत्वेनाङ्गीकृतो देहो यस्य तेन ॥ ३६ ॥

गूढार्थदीपिनी

राजतो राज्ञः सकाशात् वो युष्माकम्। यस्य राज्ञो विषये देशे ॥ ३४ ॥ दुर्गं दुर्गमं समुद्रमुल्लङ्घ्य अगुह्यं गोप्यं न चेत्तर्हि नोऽस्मभ्यम् ॥ ३५ ॥ सम्पृष्टः सम्प्रश्नः प्रष्टव्योऽर्थो यं सः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

स्वलाभः स्वजिज्ञास्यलाभः "अत्र ब्रह्म समश्नुते" इति ध्यानेन ब्रह्मप्राप्तिलक्षणस्तेन सन्तुष्टान् मद्ध्यानानन्दयुक्ततया सर्वत्र निरपेक्षान् नमस्ये अन्यथा तेभ्यः प्रत्युपकारासम्भवात् केवलं नमस्करोमि ॥ ३३ ॥ यस्य राज्ञो विषये देशे सुखं यथा तथा वसन्ति स राजा मे प्रियः ॥ ३४ ॥ यतो विषयात् यदिच्छया यस्य प्रयोजनस्येच्छया दुर्गं समुद्रं निस्तीर्य इहास्मत्समीपमागतोऽसि तत्सर्वं नोऽस्मभ्यं ब्रूहि ॥ ३५ ॥ यद्यपि "श्रीश्च ते लक्ष्मीश्च पत्न्या" वितिश्रुतेः नित्यपत्नी लक्ष्मीस्तथापि लीलया गृहीतः रुक्मिणीं पत्नीं करिष्यामीति मनसैव स्वीकृतो देहो निजपत्नीदेहो येन स तथा तेन "स्वे महिम्नि प्रतिष्ठित" इति श्रुतेः परमे सर्वोत्कृष्टे स्वे महिम्नि यद्वा "योऽस्याध्यक्षः स परमे व्योम्नि" इति श्रुतेः परमपदे निजलोके तिष्ठतीति तथा तेन सम्पृष्टसम्प्रश्नः सम्पृष्टः सम्प्रश्नः प्रष्टव्योऽर्थो यं सः तस्मै श्रीकृष्णाय सर्वं श्रीरुक्मिणीवाक्यमवर्णयत् ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे ब्रह्मन्। वो राजतः कुशलं कच्चिदिति प्रश्नमात्रं यत्र यत्र कुशलाद्यन्यतमं पदं वर्तते तत्र तत्रेति मन्तव्यम्। तथा नास्ति तत्पदम्। तत्र कुशलप्रश्न इति। यस्य विषये देशे स राजा मे प्रिय इष्टः ॥ ३३ ॥ कुत आगतिस्तदवगमयतामिति पृच्छति यत इति। यतश्चोदेति सूर्य इत्यादेर्यत इति कुत इत्यर्थे। दुर्गं निस्तीर्योल्लङ्घ्य यदृच्छया हरीच्छया यतः कुत आगतस्तत्सर्वमगुह्यं गोप्यं न चेत्तत्ते किं करवाम ब्रूहि। करणीत्याद्यनुक्त्वोक्त्वा चैवं करे स्वहस्ते न्यस्ता वामा स्त्री यस्य तत्सम्बुद्धिः। वधूसन्धानार्थमायात इति स्वज्ञानं ध्वनयामासेति ज्ञेयम्। पयोधरे हरे कामे विद्याद्वामामपि स्त्रियमिति विश्वः ॥ ३४ ॥ लिखितं पत्रं पादयोर्निधाय प्रणनाम स्वयमेव परिनिधाय रुक्मिणीस्थाने पादयोः प्रणतस्यापि नयनमिति सन्तोष्टव्यम्। लिखितमिति लेखितमित्यर्थकम्। तस्या राजप्रजात्वाच्छिक्षाक्षरेष्वपि सम्भावितेति लिखितमित्युक्तमिति वा ॥ ३५ ॥ धर्मात्मा धारकत्वाद्धरिर्धर्मस्तदात्मा तत्स्वरूपभूतः सादरमादरप्रदर्शकशब्दसहितमिति विशेषणम्। स्वयमपि स्पृहयन्निव वाचकहस्तेन राजधर्मत्वात्। सादरं यथा भवति सनिर्भयं यथा तथेति वा ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अनेनैव ब्राह्मणानां सहजमोक्षो भवतीति कैमुत्यन्यायेनाह **विप्रान्स्वलाभसंतुष्टा**निति। मोक्षे आत्मलाभो ज्ञानात्मको विशेषः। **साधून्** सदाचारान्। **भूतसुहृत्तमा**निति। ब्राह्मणानां सहज आन्तरो धर्मः सर्वसौहार्दम्, अहङ्काराभावश्चाधिकः। शान्तिर्बुद्धेः। एवं पञ्चधर्मयुक्तानहं शिरसा नमस्ये, गुरुत्वेन मानयामि व्यवहारे। किञ्चित्पठित्वा तथा करोतीति पक्षं वारयति **असकृ**दिति। सर्वदैवमित्यर्थः। यत्र मोक्षदाता एवं मन्यते, तत्र मोक्षे कः सन्देह इत्यर्थः। विशेषेण पूरका इति। षड्गुणा वा भगवत्तुल्यत्वाय निरूपिताः। ऐश्वर्ये तु न नियमेन विशेषपूरकत्वं सर्वत्र, वीर्ये न स्वलाभः, यशसि न समा दृक्, श्रिया न सर्वथा भूतसौहृदम्, ज्ञाने क्वचिदहङ्कारोऽपि वैराग्ये विक्षेपोऽपि क्वचित्सम्भवतीति षण्णामप्युत्तमत्वात् स्वत एव भगवत्त्वं च सिद्धमिति नमस्य इत्यविरुद्धम् ॥ ३३ ॥ तद्राज्ञः कुशलं पृच्छति **कच्चिद्वः कुशल**मिति। **वो** युष्माकं राजतः कुशलं कच्चित्। **ब्रह्म**न्निति अपकारेऽपि स्वतस्तूष्णींभावाय। अतिक्रमे नाशाय वा। करोति चेद्राजा सुखं किं तस्य स्यादित्याशङ्क्य, तादृशस्य फलमाह, यस्य हि प्रजाः सुखं वसन्ति, तेन परिपाल्यमानाः, स मम प्रियो भवति। अनेन सर्वमेव तस्य हितं सिध्यतीत्युक्तं भवति ॥ ३४ ॥ एवं कुशलं पृष्ट्वा प्रस्तुते त्वदुक्तं करिष्यामीत्यभिप्रायेण तत्सान्त्वनमाह **यतस्त्वमागत** इति। दुर्गं सर्वमेवातिक्रम्य यस्माद्धेतोः

त्वमागतः, तच्चेदगुह्यं तदा सर्वं ब्रूहि। किञ्चित्कार्यं साधनीयमिति चेत्, तत्किं कार्यमिति प्रश्नः। सर्वस्यापि जगतो मोक्षो देय इति चेत्। तत्राह **ते कार्यं करवामेति**। तव सर्वं कार्यं करिष्यामः, नान्यस्येति॥ ३५॥ एवं पृष्टः स्वाभिप्रायं निवेदयति **एवं संपृष्टेति**। एवं संपृष्टाः संप्रश्नाः यस्मै। ब्राह्मण इति निष्कपटः। परमेष्ठिना च। ब्रह्मणोऽपि पिता। तादृशः कथमत्रागत इत्याशङ्क्याह **लीलागृहीतदेहेनेति**। लीलया गृहीतः प्रदर्शितो देहाकारो येन। अतो ज्ञाततत्त्वायैव तस्मै सर्वमेव वृतान्तमवर्णयत्। बन्धूनामिच्छतां दातुमित्यादि॥ ३६॥

श्रीसुबोधिनीसारः

स्वलाभेन स्वतः प्राप्तेन संतुष्टान् आत्मलाभेन कृतकृत्यान् भूतानां सुहृत्तमान् परममित्रान् महदुपकारकर्तॄन् वा निर्गर्वान् साधून् विप्राञ्छांतान् असकृन्मुहुर्मुहुरहं शिरसा प्रणमामि॥ ३३॥ हे ब्रह्मन् राजतो भूपात् वो युष्माकं कुशलं मंगलं कच्चित्किम् यस्य राज्ञो विषये देशे पाल्यमानाः प्रजाः सुखं यथा स्यात्तथा वसन्ति स राजा मे मम प्रियः॥ ३४॥ यतो देशान्नगराद्वा यस्य कार्यस्येच्छया दुर्गं समुद्रं निस्तीर्य इह त्वमागतोऽसि तत्सर्वमगुह्यं न गोपनीयं चेत्तर्हि नोऽस्मान् चतुर्थी वा त्वं ब्रूहि ते तव किं कार्यं वयं करवाम साधयाम॥ ३५॥ एवं संपृष्टः संप्रश्नः प्रष्टव्योऽर्थो यं स ब्राह्मणः तस्मै श्रीकृष्णाय सर्वमकथयत्। लीलया गृहीतो देहो येन तेन परमेष्ठिना परमेश्वरेण कर्त्रा॥ ३६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सन्तोषादीनां स्वाभिमतत्वमाह—विप्रानिति। स्वलाभेन स्वतःप्राप्तेन अन्नवस्त्रादिना सन्तुष्टान्, साधून् सदाचारनिष्ठान्, भूतसुहृत्तमान् सर्वोपकारिणः, शान्तान् रागलोभादिरहितान्, तत्र हेतुः—निरहङ्कारिणः देहाद्यात्माभिमानरहितान्, एवंभूतान् विप्रानहमसकृत् पुनःपुनः शिरसा नमस्ये नमस्करोमि। अतीव मदिष्टं कुर्वद्भ्यस्तेभ्यः प्रत्युपकर्त्तुमशक्त इव केवलं नमस्करोमीत्यभिप्रायः॥ ३३॥ हे ब्रह्मन्! वो युष्माकं राजतः सकाशात् कच्चित् कुशलमस्ति? यस्य राज्ञो विषये देशे पाल्यमानाः प्रजाः सुखं यथा तथा वसन्ति स राजा मम प्रियो भवति॥ ३४॥ यतः स्थानात् यस्य प्रयोजनस्येच्छया दुर्गं समुद्रं निस्तीर्य उल्लङ्घ्य इह द्वारकायां त्वमागतोऽसि, तदगुह्यं चेत् सर्वं नोऽस्मभ्यं ब्रूहि, वयं ते किं कार्यं करवाम इत्यन्वयः॥ ३५॥ लीलया हेतुभूतया गृहीतो देहो येन तेन परमेष्ठिना परमेश्वरेण एवं सम्पृष्टः सम्प्रश्नः प्रष्टव्योऽर्थो यस्य स ब्राह्मणः तस्मै कृष्णाय सर्वबन्धूनाम् अभिप्रेतं कन्यादानं रुक्मिणा तन्निवारितमित्यादि सर्वमवर्णयत्॥ ३६॥

अन्वितार्थप्रकाशिका

विप्रानिति॥ स्वलाभेन स्वतः प्राप्तेन अन्नवस्त्रादिना आत्मरूपलाभेन वा स्वस्य मम लाभेन वा सन्तुष्टान् साधून् सदाचारनिष्ठान् भूतसुहृत्तमान् सर्वोपकारिणः शान्तान् रागलोभादिरहितान् तत्र हेतुः निरहङ्कारिणः देहाद्यात्माभिमानरहितान् एवंभूतान् विप्रानहमसकृत् पुनः पुनः शिरसा नमस्ये नमस्करोमि। तङ्नार्थः॥ ३३॥ कच्चिदिति॥ हे ब्रह्मन्! वो युष्माकं राजतः सकाशात् कच्चित्कुशलमस्ति। यस्य राज्ञो विषये देशे पाल्यमानाः प्रजाः सुखं यथा तथा वसंति स राजा मम प्रियो भवति॥३४॥ यत इति। यतः स्थानात् यस्य प्रयोजनस्येच्छया दुर्गं समुद्रं निस्तीर्य उल्लंघ्येह द्वारकायां त्वमागतोऽसि तद् अगुह्यं चेत् तदा सर्वं नोऽस्मभ्यं ब्रूहि वयं ते किं कार्यं करवाम॥ ३५॥ एवमिति। लीलया हेतुभूतया गृहीतो देहो येन तेन परमेष्ठिना परमेश्वरेण एवं संपृष्टः संप्रश्नः प्रष्टव्योऽर्थो यं सः ब्राह्मणः तस्मै कृष्णाय सर्वं बन्धूनाम् अभिप्रेतं कन्यादानं रुक्मिणा तन्निवारितमित्यादि सर्वमवर्णयत्॥ ३६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वलाभेन आत्मस्वरूपप्राप्त्या संतुष्टान् परिपूर्णान् साधून् साधुलक्षणसंपन्नान् पुरुषान्॥ ३३॥ राजतो राज्यं कुर्वतः यस्य राजन्यस्य विषये देशे॥ ३३॥ यतो ग्रामात्। यदिच्छया यत्कार्यं कर्तुमिच्छयेत्यर्थः दुर्गं सागरम्॥ निस्तीर्य तीर्त्वा॥ ३५॥ परमेष्ठिनः सर्वेश्वरेण॥ संपृष्टः संप्रश्नः प्रष्ठव्योऽर्थो यस्य सः सर्वं रुक्मिणीमनोरथादिसमग्रं वर्णयामास॥ ३६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ संतोषस्य स्वाभिमतत्वमाह। विप्रानिति। स्वलाभेन स्वस्य हरिदासत्वानुसंधानप्रयुक्तात्मलाभेन संतुष्टास्तान्, साधून् परोपकारिणः, भूतसुहृत्तमान् सुहृद्वत् सर्वभूतहितचिन्तकान्, निरहंकारिणः देहात्माभिमानरहितान्, शान्तान् जितेन्द्रियान् विप्रान् द्विजान्, अहं असकृद्वारं वारं, शिरसा नमस्ये नमस्करोमि। अतीव मदिष्टं कुर्वद्भ्यस्तेभ्यः प्रत्युपकर्त्तुमशक्तः केवलं नमस्करोमीत्यभिप्रायः॥ ३३॥ कच्चिदिति। हे ब्रह्मन्, वो युष्माकं, राजतो राज्ञः सकाशात्, कुशलं कच्चित्। यस्य राज्ञः, विषये देशे, प्रजाः पाल्यमानाः राजभिः कृतपालनाः सत्यः, सुखं यथा तथा, वसन्ति, स राजा, मे मम, प्रियः हि॥ ३४॥ यत

इति। हे ब्रह्मन्, यतो यस्माद्देशात्, इह दुर्गं सामुद्रजलात्मकं कोट्टं, निस्तीर्य, यदिच्छया यत्प्रयोजनेच्छया, आगतः त्वं, तत् सर्वं अगुह्यं चेत्, नोऽस्मभ्यं, ब्रूहि। वयं ते तव, किं कार्यं, करवाम ॥ ३५ ॥ एवमिति। लीलया हेतुभूतया गृहीतो देहो येन तेन, परमेष्ठिना स्वमहिमावस्थितेन भगवता, एवमित्थं, संपृष्टः संप्रश्नो यस्य सः, ब्राह्मणः तस्मै श्रीकृष्णाय, सर्वं अवर्णयत् बन्धूनामनभिप्रेतं रुक्मिणश्चेष्टितं वर्णयामासेत्यर्थः। 'लिखित्वा रहसि स्थित्वा स्वस्मै दत्तां स पत्रिकाम्। रुक्मिण्योन्मुद्रितां कृत्वा कृष्णायादाच्छुभाक्षराम् ॥ १ ॥ प्रेमचिह्नान्वितां कृष्णो वीक्ष्य तां करुणो द्विजम्। वाचितुं प्रैरयत् सोऽपि तदाज्ञातो ह्यवाचयत्' ॥ २ ॥ ३६ ॥

कृष्णप्रिया

जो स्वयं प्राप्त हुई वस्तु से सन्तोष कर लेते हैं, जिनका स्वभाव बड़ा ही मधुर है और जो समस्त प्राणियों के परम हितैषी, अहङ्काररहित और शान्त हैं—उन ब्राह्मणों को मैं सदा सिर झुकाकर नमस्कार करता हूँ ॥ ३३ ॥ ब्राह्मण देवता! राजा की ओर से तो आपलोगों को सब प्रकार की सुविधा है न? जिसके राज्य में प्रजा की अच्छी तरह पालन होता है और वह आनन्द से रहती है, वह राजा मुझे बहुत ही प्रिय है ॥ ३४ ॥ ब्राह्मण देवता! आप कहाँ से, किस हेतु से और किस अभिलाषा से इतना कठिन मार्ग तय करके यहाँ पधारे हैं? यदि कोई बात विशेष गोपनीय न हो तो हमसे कहिये। हम आपकी क्या सेवा करें?' ॥ ३५ ॥ परीक्षित्! लीला से ही मनुष्यरूप धारण करनेवाले भगवान् श्रीकृष्ण ने जब इस प्रकार ब्राह्मण देवता से पूछा, तब उन्होंने सारी बात कह सुनायी। इसके बाद वे भगवान् से रुक्मिणीजी का सन्देश कहने लगे ॥ ३६ ॥

श्रुत्वा गुणान् भुवनसुन्दर [1]शृण्वतां ते निर्विश्य कर्णविवरै[2] र्हरतोऽङ्गतापम्।
रूपं [3]दृशां दृशिमतामखिलार्थलाभं त्वय्यच्युताविशति चित्तमपत्रपं मे ॥ ३७ ॥
का त्वा मुकुन्द महती कुलशीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यम्।
धीरा पतिं [4]कुलवती न वृणीत कन्या काले नृसिंह नरलोकमनोऽभिरामम् ॥ ३८ ॥[5]
तन्मे भवान् खलु वृतः पतिरङ्ग जायामात्मार्पितश्च भवतोऽत्र विभो विधेहि।
मा वीरभागमभिमर्शतु चैद्य आराद् गोमायुवन्मृगपतेर्बलिमम्बुजाक्ष ॥ ३९ ॥
पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान् परेशः।
आराधितो यदि गदाग्रज एत्य पाणिं गृह्णातु मे न दमघोषसुतादयोऽन्ये ॥ ४० ॥

कर्दमक्षमा

अन्वयः—रुक्मिणी उवाच—हे भुवनसुन्दर! शृण्वताम्, कर्णविवरैः, निर्विश्य, अङ्गतापम्, हरतः, ते गुणान्, श्रुत्वा, (एवम्) दृशिमताम्, दृशाम्, अखिलार्थलाभम्, रूपम्, श्रुत्वा, हे, अच्युत! मे, अपत्रपम्, चित्तम्, त्वयि, आविशति ॥ ३७ ॥ हे, मुकुन्द, कुलशीलरूपविद्यावयोद्रविणधामभिः, आत्मतुल्यम्, त्वा, श्रुत्वा, धीरा, महती, कुलवती, कन्या, का? हे, नृसिंह! नरलोकमनोभिरामम्, काले, पतिं, न, वृणीत ॥ ३८ ॥ हे अङ्ग! तत् भवान्, मे, पतिः, वृतः, च, आत्मा, अर्पितः, हे विभो! अत्र, भवतः, आरात्, जायाम्, विधेहि! हे! अम्बुजाक्ष? मृगपतेः, वलिम्, गोमायुवत्, चैद्यः, वीरभागम्, मा, अभिमर्शतु ॥ ३९ ॥ पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिः, यदि, परेशः, भगवान्, अलम्, आराधितः, (चेत्) गदाग्रजः, एत्य, मे, पाणिम्, गृह्णातु, अन्ये, दमघोषसुतादयः, न, गृह्णन्तु ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रुक्मिण्या स्वयमेकान्ते लिखित्वा दत्तपत्रिकाम्। मुद्रामुन्मुच्य कृष्णाय प्रेमचिह्नामदर्शयत् ॥ ब्राह्मणः श्रीकृष्णानुज्ञया वाचयति। श्रुत्वेति। अयमर्थः। हे अच्युत। हे भुवनसुंदरेत्यौत्सुक्यं द्योतयति। क्व तव महिमा। क्व चाहं रूपकुलशीलादियुक्तापि। तथाऽप्यपगता त्रपा यस्मात्तन्मे चित्तं त्वय्याविशत्यासज्जते। तत्कुतस्तत्राह। शृण्वतां कर्णविवरैरंतःप्रविश्यांगतापम्। अंगेति

---

[1] सङ्गमास्ते–विज.। [2] विवरं–विज.। [3] रूपं परं भुवनमङ्गल मङ्गलं ते–विज.। [4] व्रीडावती–विज.।

[5] स त्वं मयाप्यभिवृतः पतिरिन्दिरायाः भक्तप्रियः कृपणलोकशरण्य ईशः।
मत्वैतदङ्ग तव पादसरोजदास्याः कामं कुरु प्रियतमं प्रणतास्मि तेऽङ्घ्रिम् ॥ १ ॥–विज.।

पृथक् संबोधनं वा। हरतस्तव गुणान् श्रुत्वा तथा दृशिमतां चक्षुष्मतां दृशामखिलार्थलाभात्मकं रूपं च श्रुत्वेति ॥ ३७ ॥ अहो कुलकन्यानामिदमतिधार्ट्यमिति मा शंकीरित्याह। का त्वेति। हे मुकुन्द हे नृसिंह नरश्रेष्ठ का नाम कन्या कुलवती तथा महती पुरुगुणोदारा तथा धीरा धृतिमती त्वां पतिं न वृणीत। मय्येव केयं दोषशंकेति भावः। कथं भूतम्। कुलशीलादिभिरात्मनेव तुल्यं निरुपममित्यर्थः। द्रविणं द्रव्यसंपत्। धाम प्रभावः। तथा नरलोकस्य मनसामभिरामोऽभिरमणं यस्मात्तम्। किं च काले विवाहावसरे ॥ ३८ ॥ हे विभो तत्तस्मान्मे मया भवान्खलु पतिर्वृतः आत्मा च भवतोऽर्पितः अतस्त्वमत्रागत्य मां भवतो जायां विधेहि। विपक्षे बाधकं द्योतयंत्याह। वीरभागमिति। वीरस्य तव भागं मामाराच्छीघ्रमेत्यागत्य चैद्यो माभिमर्शतु मा स्पृशतु। मृगपतेर्वलिं गोमायुवत्। गोमायुः सृगाल इवेति ॥ ३९ ॥ अनेकजन्मकृतैः सुकृतैरिदमेव भूयादिति प्रार्थयते पूर्तेति। पूर्तं कूपादि। इष्टमग्निहोत्रादि। दत्तं हिरण्यादिदानम्। नियमस्तीर्थाटनादिः। व्रतं कृच्छ्रादि ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मुद्रां लाक्षादिना योगम्। उन्मुच्चापाकृत्य। स्वाशयं प्रकाशयति—अयमर्थ इति। यस्माच्चेतसः। तत् चित्तावेशनम्। केवलमंगतापहरमेव किन्त्वन्तस्तापहरमपि हरिगुणाऽनुश्रवणमित्यस्वारस्यादाह—अंगेति ॥ रुक्मिण्युवाचेत्यप्याह पत्रद्वारेति स्वामिचरणाः, परन्तु तस्य 'इत्येते गुह्यसंदेशाः' इत्युक्तेः केवलं संदेशहरत्वमेव प्रतीयते ॥ ३७ ॥ स्वयमाशंक्य समाधत्ते–अहो इत्यादिना। इदं स्वयमेव वरान्वेषणादिकम्। अतिधार्ष्ट्यमत्यकार्यम्। कुलवती सुकुलोत्पन्ना। पुरुगुणेर्बहुगुणैः 'नीलांभोरुहपत्रकांति' इत्याद्युक्तैरुदाराऽधिका। धीरा "धीरो धैर्यान्विते स्वैरे धीरः स्यात्त्रिषु पंडिते" इति मेदिन्युक्तेर्धीमती धृतिमती च। इति भाव इति—संसृति मुक्तिदातारं निखिलगुणैर्नरश्रेष्ठं निजजनोक्तिपालनायातिक्लिष्टकारिणं वा का त्रिलोक्यन्तर्गता स्त्री या न वृणुत इति तात्पर्यम्। इत्यर्थ इति–ईश्वरांतरासंभवादिति भावः। अन्यदाह—तथेति। अभिरामो बह्वानंदः। "अत्वानंदे स्त्रीवृते चाभिरामस्त्वतिसुन्दरे', इति निरुक्तिः। समये सुभगप्राप्तिर्दुर्लभेत्याह—किञ्चेति ॥ नन्वस्तु मल्लक्षणः पुरुष एव त्रिजगत्वस्मिन्निरुपमः किं कन्यापि श्रोत्रनेत्रवती जगत्यस्मिंस्त्वमेवैकासि यत एवमन्या निर्लज्जा नेति तत्राह—केति। हे मुकुन्द मुखे कुन्दवद्धासो यस्येति मामेव हसितुं प्राप्तावसरेत्यर्थः। का महती गुणरूपवती धीरा बुद्धिमती कुलवती त्वां पतिं न वृणीत। तेन कुरूपा दुःशीला दुर्बुद्धिरनभिजातैव, अश्रृण्वती वा त्वां न वृणीतेति भावः। कीदृशम्—कुलादिभिरात्मनैव तुल्यम्। काले स्वसमय इत्यन्या अपि बह्वय एव कन्याः स्वसमय एव त्वां वरिष्यन्ति, न त्वधुनैवमत्समय इति भावः। हे नृसिंह नरश्रेष्ठ, हे सिंहवद्दुर्वशेति न मे त्वद्वशीकारे कापोच्छास्तीति भावः। तदपि नरलोकमात्रस्यैव मनोऽभिरमयसीति मन्मनसः कोऽपराध इति भावः ॥ ३८ ॥ स्वाभिमतज्ञापने सामर्थ्यं द्योतयन्त्याह—हे विभो अन्तर्यामिन्नित्यर्थः। यतोऽखिलगुणैर्वरीतुमर्होऽसि तस्माद्धेतोः। भवतोऽत्रेति व्यवहितानन्तरयोरपि छंदसि संबंधाभ्युपगतत्वेनेहात्र भवत इति वैपरीत्येन योज्यम्। अत्र भवतस्सर्वपूज्यस्येत्यर्थः। अत्र भवत इत्यपि विपरिणमय्य तुभ्यमित्यर्थः। अर्पितो दत्त इति। "अयोग्यं दातुमुद्युक्ते पित्रादौ कन्यका स्वयम्। योग्यं पतिं प्रवृण्वीत न च सा दोषभागिनी" ॥ इति वारतांतविः। यतस्तुभ्यमर्पितोऽत हेतोः। अत्र भवतः पूज्यस्यात्मनः। इत्थमकरणेऽयोग्यतामाह–विपक्ष इति। वीरस्य प्रसिद्धशौर्यस्य। भागमर्द्धांगम् "अर्द्धो वा एषः यत्पत्नी" इति श्रुतेः। मृग्यन्ते व्याधैरिति मृगाः शशश्रृगालादयस्तान्मृगान्पातयति भक्षणार्थं मारयतीति मृगपतिः सिंहः। गां विकृतां वाचं मिनोति क्षिपतीति गोमायुः 'भूरिमायगोमायुमृगधूर्तकाः' इत्यमरः ॥ एवमन्यगतेरपि स्त्रियाश्चेन्मम त्वनन्यगतेर्महानेवोभवलोकनाश आपतितः, कदाचिदीश्वरोऽसौ नाप्यवधानं कुर्यादिति किं वा—लज्जयेति व्याकुला सत्युत्तरोत्तरं क्रियात्रयेण स्पष्टमेवाह—तदिति। हे अंग, हे विभो इति मुहुः संबोधनं दैन्येन। आत्मा देहस्वाम्येव किमुत देह इत्यर्थः। भवत इति सम्प्रदानताप्राप्तावपि शेषे षष्ठी। नित्यत दयित्वाभिमानेनात्यंतदानाऽसंभवात्। अत्र सति भवतो जायां मां विधेहि यथेच्छसि तथा कुर्विति। न च किञ्चिदशक्यमित्याह–हे विभो सर्वसामर्थ्ययुक्तेति। वीरेति—अन्यथा तव वीर्यहानिप्रसक्तिरिति भावः। अत्र टीकायाम् 'एत्यागत्य' इत्युत्तरश्लोकगतस्य टीका प्रथमलेखकभ्रमाल्लिखितेति लक्ष्यते मूलाभावात्। अत आरात् समीपे वर्तमानश्चैद्य इत्यागमनशैघ्र्याय। अन्यथा ते लज्जापि स्यादिति दृष्टान्तेनाह—गोमायुवदिति। हे अम्बुजाक्षेति सतततत्सौन्दर्यस्फुरणस्वाभाव्यात्स्वदृष्ट्या मम तापं शमयेति विवक्षातश्च ॥ ३९ ॥ स्वाभिमतमाह—अनेकेत्यादिना। आदिना सत्संगग्रहः। अग्रे जयतीत्यग्रजा, गदा अग्रजा यस्य स तथेत्यनेन सायुधागमनमुक्तम्। आदिना जरासंधादिग्रहः ॥ अये महादुर्लभपुरुष त्वं नैकजन्मसुकृतलभ्यस्तस्मात्सामान्यतस्त्वत्प्राप्तिकामनया निष्कामया वा पूर्वपूर्वजन्मसु यदि मया बहूनि सुकृतानि कृतानि तदा तेषामेव फलविशेष एव भूयादिति प्रार्थयते—पूर्तेति। पूर्तेष्टदत्तैर्भगवत्संप्रदानकैः नियमैस्तीर्थस्नानादिभिः, व्रतैरेकादश्यादिभिः, देवविप्रगुर्वर्चनैर्भगवदर्चनांगैर्यदा मया भगवानलमतिशयेनाराधितस्तदा मानुष्या मे मानुष एव भगवान्गदाग्रज आगत्य पाणिं गृह्णातु, न त्वन्ये नारायणादयोपि देवा मानुषा वेत्यर्थः। दमघोषस्य तत्रादित्वनोल्लेखस्तु तद्विवाहस्य प्रस्तुतत्वादेव ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नौमि श्रीरुक्मिणीवाणीं स्ववाणीवृद्धिसिद्धये। सर्वाकर्षकनामापि चकृषे सद्रुतं यया॥

श्रुत्वेति। तैर्व्याख्यातम्। तत्राच्युतेत्यस्य भुवनसुन्दरेत्यस्य च भावः क्वेत्यादिः एवं तु पदद्वयमिदं यद्यपि दैन्यप्रतिपादकं तथापि दैन्यस्याप्यौत्सुक्यगर्भत्वादौत्सुक्यमित्युक्तम् अङ्गतापमिति। मनः प्रवेशोऽप्यङ्गोद्भवमपि तापं हरन्ति किमुत मनउद्भवमिति भावः। लाभात्मकमिति। लाभलभ्ययोरभेदाभिप्रायेण स च लाभस्यावश्यकताविवक्षयेति। यद्वा। परमकुलीनकन्यादित्वात्प्रथमतः स्वयं तादृशसन्देशे प्राप्तां लज्जां सर्वेषामेव तद्गुणरूपसमाकृष्टतासामान्येनावृण्वती दुर्वारं भावं व्यञ्जयति श्रुत्वेति। हे भुवनसुन्दर! भुवनेषु परमवैकुण्ठपर्य्यन्तेषु प्राकृतलोकेषु प्रकृत्या चाकृत्या च शोभमान सर्वाकर्षकमाधुर्य्येत्यर्थः। तत्रापि हे अच्युत नित्यमेव तादृश तव प्रकृतिशोभाभूतानां गुणानामाकृतिशोभाभूतानां रूपाणां च स्वरूपाभिन्नत्वादिति भावः। एतद्विबोधयिषयैव श्रुत्वा गुणानिति रूपमिति च गुणरूपे एवोक्ते नतु स्वरूपमपि तद्वत्पृथगिति तदेवं भुवनसुन्दरादित्वमुत्पत्तित एव तस्याः स्फुरतीत्युन्नेयं लक्ष्मीत्वेन प्राचीनसंस्कारसम्भवात् श्रवणादिविशिष्टत्वेनानुक्तत्वात् श्रुत्वा गुणानित्यादिना श्रवणविशिष्टत्वेन तूक्त्यन्तरात् तेन पौनरुक्त्यात् आविशतीत्याशब्दस्वारस्याच्च ततः प्राचीनसंस्कारतोऽश्रुतेऽपि त्वयि मम चित्तं विशत्येव श्रुते तु विशेषत इत्याह—ते तव गुणान् सर्वसुखदत्वादीन् तेष्वेकमेकमपीत्यर्थः। रूपं कान्त्यवयवसौष्ठवञ्च श्रुत्वा श्रवणपथप्राप्तिमात्रेण विशेषतोऽनुभूय मम चित्तं त्रपारहितं सत् त्वयि आ सम्यक् अनुसन्धानान्तरराहित्येन विशति मग्नं भवति कुलीनकन्यायास्तावदसङ्गतं पुरुषं मनसापि प्रवेष्टुं त्रपा जायते तत्र तु सा त्यक्तैव सम्प्रति साक्षादपि प्रार्थनं क्रियते अहो सोऽयं सर्वाकर्षणस्वभाव एवेति मम को वा दोष इति भावः। ननु स्वमनः संयम्यतां तत्राप्याह—अच्युतेति। त्वमपि तस्मात् च्युतो न भवसि कथमपि त्यक्तुमशक्यत्वादिति भावः। तदेवं त्वय्येव निवेदयितुं युक्तमिति च सर्वाकर्षकताव्यञ्जकसर्वसुखदत्वपुरस्कृतान् गुणानेव विशिषती तदेकरतेः स्वस्याकर्षणादौ कैमुत्यमापादयति—शृण्वतामिति। श्रवणेन्द्रिययुक्तमात्राणां तत्रापि श्रोतुं प्रवृत्तमात्राणामित्यर्थः—कर्णविवरैर्निविश्य तेषां विवरात्मकत्वात् गुणानां च शब्दवाहनत्वात् पुरुषप्रयत्नाभावेऽपि तद्द्वारा स्वत एव निःशेषेण प्रविश्य अन्तरमवगाह्य तापमात्रं हरतः तच्छीलानित्यर्थः। तान् श्रुत्वा वर्त्तमानाया मम चित्तं त्वय्याविशति अहो योऽसावेक एव तादृशानामनन्तानां गुणानामाश्रयः स एव साक्षादेवाश्रयितुं योग्य इत्यौत्सुक्येन सदा चिन्तयति तथा मादृशे त्वनन्यरतावत्यन्तायुक्तत्वात् कथंचिज्जातमपि तापं शीघ्रमेव ते हरिष्यन्तीत्याशां च वर्द्धयतीति सविशेषोऽर्थः। एवं गुणानिति प्रकृत्या शोभमानता व्यञ्जिता आकृत्या रूपमिति पूर्ववत्तदपि विशिनष्टि—दृशामिति। दृगिन्द्रियमात्रयुक्तानां यादृशस्तादृशस्तासामखिलार्थस्य लाभः सर्वमाधुर्य्यस्यानुभवो यस्मिन् यदन्तर्भूत इत्यर्थः। अतस्तद्विनाभूतानामान्ध्यनिर्विशेषतैवेति भावः। तच्च श्रुत्वा तिष्ठन्त्या मम चित्तं त्वय्याविशति सदैव साक्षात् अनुभवितुं वाञ्छतीति सविशेषोऽर्थः। रूपस्य पश्चादुक्तिस्तदहो चक्षुर्मात्रगम्यमपि साक्षादिवानुभवामीति क्रमेण निजभावोत्कर्षज्ञापनाय तथा रूपस्य चक्षुषाप्यनुभवः स्यादित्याधिक्यज्ञापनाय च अत एव गुणानां तापहरणत्वमेवोक्तं रूपस्य तु अखिलार्थलाभत्वमिति श्रुत्वा गुणानित्येतावदुक्त्वा वाक्यमसमाप्यैव भुवनसुन्दरेति सम्बोधनमत्यन्तवैवश्येन एवमच्युतेति च अत्र पत्युर्नामग्रहणमेतादृशनाम्नो महिमनामत्वान्न दोषायेति॥ ३७॥ नन्वेतच्छ्रवणेनान्या हसिष्यन्तीत्याशङ्क्य ताः प्रतिसेर्ष्य तं प्रति सदैन्यमाह—का त्वेति। हे मुकुन्द! सर्वेषां सर्वदुःखमुक्तिपूर्वकपरमसुखद हे नृसिंह! सर्वोर्ध्वानन्तगुणरूपत्वात्प्राकृतसर्वपुरुषश्रेष्ठ हे स्वभावेनैव तत्तद्रूपेत्यर्थः। तादृशत्वं दुर्ज्ञेयमिति चेत् प्रकटलीलया च कुलादिभिरात्मतुल्यमसमोर्ध्वं तथा नरलोकमनोभिरामं सर्वजीवमनःसुखदं च का स्त्री स्त्रीजातिः पुरुषमात्रे लुब्धस्वभावा पतित्वेन न वृणीत तत्र कन्या कुलवती महतीत्युत्तरोत्तरत्वाभावे सति क्रमान्नितरां न वृणीतां नाम स्वायोग्यत्वमननात् तत्तद्भावेऽपि धीरा का न वृणीत अपि तु दैवदग्धबुद्धिरेव न वृणीतेत्यर्थः। तत्र विवाहावसरेऽपीति धीरात्वाभावस्यातिशायिता लज्जायाश्चात्यययोग्यता व्यञ्जिता सर्वनाशापत्तेः अथवा महती धीरा कुलवती वा का कन्या न वृणीत तत्तदभिमानेन या या न वृणीत सा सा महत्यादिरेव न भवतीत्यर्थः। विवाहावसरेऽपीति तादृशगौणकाल्यमालम्ब्यापीत्यर्थः। तत्र कुलं सद्वंशावतीर्णत्वं शीलं दयालुत्ववदान्यत्वादि वयो नित्यनवयौवनशोभोद्भेदः कुलस्य सर्वाधिक्यमत्र सर्वाधिकस्य तव तत्रोदयादवगतमेव "अहो अलं श्लाघ्यतमं यदोः कुलमिति वदिति भावः। सप्तानां कुलादिमात्राणामुक्तिः प्रेयसीभावयोग्यत्वात् एवमन्येऽप्येषामन्तर्भावेण ज्ञेयाः॥ ३८॥ एवमन्यगतेरपि स्त्रियाश्चेन्मम त्वनन्यगतेर्महानेवोभयलोकनाश आपतितः कदाचिदीश्वरोऽसौ नाप्यवधानं कुर्य्यादिति किम्वा लज्जयेति व्याकुला सत्युत्तरोत्तरं क्रियात्रयेण स्पष्टमेवाह—तदिति। अङ्ग हे विभो! इति मुहुः सम्बोधनं दैत्येन आत्मा देहस्वाम्येव किमुत देह इत्यर्थः। भवत इति सम्प्रदानताप्राप्तावपि शेषे षष्ठी नित्यतदीयत्वाभिप्रायेणात्यन्तदानासम्भवात् अत्र सति भवतो जायां मां विधेहि यथेच्छसि तथा कुर्वीत नच किञ्चिदशक्यमित्याह—हे विभो! सर्वसामर्थ्ययुक्तेति वीरेति अन्यथा तव वीर्य्यहानिप्रसक्तिरिति भावः। टीकायाम् आरादिति यस्मान्निकटं निकटमागच्छन्नास्ते तस्माच्छीघ्रमागत्येत्यर्थः। इत्यागमने शैघ्र्याय अन्यथा ते लज्जापि स्यादिति दृष्टान्तेनाह—गोमायुवदिति। हे अम्बुजाक्षेति सन्ततत्सौन्दर्य्यस्फुरणस्वाभाव्यात् स्वदृष्ट्या मम तापं शमयेति विवक्षातश्च॥ ३९॥ नन्वेतन्महत्पुण्येनैव लभ्यत इत्याशङ्क्यानादिजन्मपरम्परापुण्यानि च तदर्थमेव सङ्कल्पयन्ती

सन्देशमध्ये तदपि वैयग्र्येण निक्षिपति—पूर्त्तेति । पूर्तादिभिरर्पितैः आदिशब्दात्साक्षाच्छ्रवणादिभिश्च पूर्त्तादीनां यथोत्तरमाराधने श्रैष्ठ्यं भगवान् श्रीनारायणः, अलमत्यर्थं यद्याराधितस्तर्हि । ननु परमदुर्घटमिदं कथं सिद्ध्यतु तत्राह–परेशः कर्त्तुमकर्त्तुमन्यथाकर्त्तुं च समर्थः त्वत्तोऽन्ये ये केचिन्मनुष्या देवास्त्वदंशा वा ननु दमघोषसुतस्यादित्वं तद्विवाहस्य प्रस्तुतत्वात् यदीति निश्चये एव ॥४०॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे भुवनसुन्दरेति आकृत्या प्रकृत्या च सौन्दर्य्यमुक्तम्, तत्रादौ प्रकृतिसुन्दरत्वमाह—गुणानिति भक्तवश्यतादीन्, शृण्वतामिति वर्त्तमाननिर्द्देशेन श्रवणे प्रवृत्तिमात्रेणैव सद्यस्तापहरणम्, कर्णविवरैरिति च कर्णच्छिद्राणामाकाशत्वात् स्वत एव निरन्तरसम्पूर्णसुखप्रवेशः, तेन च श्रोत्रसुखकृत्त्वं मनोव्यापकत्वञ्च, तापं संसारमहाज्वालां निजाभीष्टासिद्धिशोकं वा हरतः, वर्त्तमाननिर्द्देशेन तेषां तापहरणशीलत्वं तथा पश्चात् कदाचित् कथञ्चिज्जातस्यापि तापस्य हरणं बोध्यते । अंगेति प्रेमसम्बोधने । आकृतिसुन्दरत्वमाह—रूपमिति, दृशिमतामिति त्वद्रूपदर्शनेनैव चक्षुष्मत्वम्, अन्यथा त्वान्ध्यमेवेति भावः । अखिलस्यार्थस्य विविधाश्चर्य्यरूपदर्शनस्य लाभात्मकमिति दृशां सर्व्वरूपदर्शनस्य तदेकविषयतयात्यन्तिकत्वेनाभेदोपचारतस्तादात्म्यमुक्तम्; यद्वा, अखिलार्थानां लाभो यस्मात्तत् । सर्व्वाश्चर्य्यमयतद्रूपदर्शनेनैव सर्व्वाश्चर्य्यदर्शनसिद्धेः । संप्लुतोदके क्षुद्राणां जलाशयानां सर्व्वेषामप्यर्थसिद्धिवत् । तच्च गीतायाम् (२।४६)—'यावानर्थ उदपाने सर्व्वतः संप्लुतोदके' इत्यत्र श्रीस्वामिपादादिभिर्विवृतमेव, रूपस्य पश्चादुक्तिः स्तुतिरीत्यपेक्षया, चित्तावेशे तस्य प्राधान्याभिप्रायेण । अत एव च-काराप्रयोगः, प्राधान्यञ्च व्यक्तमेव, रूपस्य साक्षाद्दृष्ट्या स्वत एव सामीप्यसुसिद्धेः; गुणैर्दूरतोऽपि नातिविरुध्येत् । किञ्च, श्रीमदधराद्यंगानां प्रत्येकं तत्तद्रसभोगार्थं गुणतोऽपि केषाञ्चित् प्रियतमजनानामपेक्षाविशेषादिति । ननु गुणरूपोपाधिना चित्तावेशः प्रेमलक्षणहान्या न किल सम्यक्, कदाचित्तत्तदुपाध्यभावे चित्तावेशहानिदोषप्रसक्तेः, तत्राह—हे अच्युतेति । कथञ्चित् कदाचिदपि गुणरूपाभ्यां च्युतिरहितः, अत एव श्रीव्रजदेवीभिरप्युक्तम् (भा० १०।२९।३९) 'वीक्ष्यालकावृतमुखम्' इत्यादि । अन्यतैर्व्याख्यातम् । यद्वा, प्रेमोद्रेकेण परमदैन्यादाह—सर्व्वथा तद्योग्या न भवाम्येव, तथाप्यपत्रपं सुदुर्लभवस्तु–लाभे लज्जाहीनं सन्मे चित्तं त्वय्याविशति; अन्यत् समानम् । किञ्च, गूढोऽयमर्थः—श्रीरघुनाथावतारे श्रीसीतारूपाहं त्वया त्यक्तैव, तत् स्मरन्त्या अपि लज्जारहितं सत् । तत्र हेतुः—गुणान् रूपञ्च श्रुत्वेति, अधुना ततोऽप्यधिक-तत्तत्प्रकटनादित्यर्थः ॥ ३७ ॥ शीलं दयालुत्वं–वदान्यत्वादि, विद्याः—'अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । धर्म्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्द्दश ॥' इति श्रीविष्णुपुराणोक्ताः; चतुःषष्टिकलाश्च तद्वित्तमित्यर्थः । वयो नित्यनवयौवनोद्भेदः, महत्त्वादिति विशेषणानामुत्तरोत्तरस्य पूर्व्व-पूर्व्वस्मिन् हेतुत्वम् । तथा आत्मतुल्यत्वादेव नृसिंहेति, अत एव नरलोकेति यथोत्तरमेषां हेतुमत्त्वमुह्यम् । तत्र सर्व्वत्र हेतुः—मुकुन्देति । तत्र च महतीत्वेनैवात्मतुल्यस्य पतित्वेन वरणं धीरात्वेनैव, नृसिंहस्य कुलवतीत्वेन च नरलोकमनोऽभिरामस्येति यथाक्रममूह्यम् । यद्वा, तेषां व्याख्यानुसारेण कुलवतीत्वेन कुलादिभिरात्मतुल्यस्य वरणमित्येवमुत्क्रमेण किंवा त्रयाणामपि तस्या विशेषेण त्रय एव सङ्घशो हेतुत्वम् । नृसिंहत्वेन तत्रापि क्षत्रियत्वेन कुलादीनां यथोत्तरमवश्यापेक्ष्यतया तत्क्रमेण निर्द्देशः । अत एव श्रीभगवतोऽसंख्येषु गुणेषु तत्र च प्रथमस्कन्धोक्त-श्रीधरणी-विलाप-विख्यातसत्यादीनामेकोनचत्वारिंशत्तमे सत्यपि कुलादीनां सप्तानामेवात्रोक्तिः । अलंकारोक्तानां नायकस्य त्रयोदशगुणानामभिप्रायण; तथा च शृंगारतिलके—'त्यागी कुलीनः कुशलो रतेषु, कल्यः कलावित्तरुणो धनाढ्यः । भव्यः क्षमी स्थिररुचिः सुभगोऽभिमानी, स्त्रीणामतः सुभगवागिह नायकः स्यात् ॥' इति; भव्यः सुवेशः, सुभगः सुन्दर इत्यर्थः । स्थिररुचिः स्थिरप्रेमा । अत्र च शीलेनैव त्यागित्वं क्षमित्वं स्थिररुचित्वञ्च; विद्यया रतिकुशलत्वं कलावित्त्वञ्च; रूपेण भव्यत्वं सुभगत्वञ्च; धाम्ना कल्पत्वमभिमानित्वञ्च संगृहीतम् । अन्यत् स्पष्टमेव ॥ ३८ ॥ खलु निश्चितम्, अनन्यगतित्वात्, पुनरप्यंगेति वैयग्र्यात्, न चान्यदेहसम्बन्धमात्रेण, किन्तु परमार्थतश्चेत्याह—आत्मेति देही; भवत इति चतुर्थ्यां षष्ठी नित्यतदीयत्वाभिप्रायेण; यद्वा, भवत एवात्मायमर्पितश्च मयार्थात् तुभ्यमेव । न च तव किञ्चिदशक्यमित्याह—विभो, हे सर्व्वसामर्थ्ययुक्तेति । वीरेति—अन्यथा तव वीर्य्यहानिप्रसक्तिरिति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, हे वीर, भवत इत्यनुवर्त्तत एव; यद्वा, तस्यात्रैव सम्बन्धः । भवतो भागम् । आरादति तव्र्याख्यातम् । तत्र एत्येत्यधिकं लेखकभ्रमादिति । यद्वा, समीपे वर्त्तमानश्चैद्य इति जाया-विधाने शैघ्र्यमभिप्रेतम् । अन्यथा तेन लज्जापि स्यादिति दृष्टान्तेनाह—गोमायुवदिति । अस्य च भागस्य भवानेव योग्यः ॥ ३९ ॥ आदि-शब्दाद्द्वादशयमादयः, पूर्त्ताद्यर्पणेनेत्यर्थः । यद्वा, पूर्त्तादिभिरर्पितैः, आदि-शब्दात् साक्षात्तच्छ्रवणादिभिश्च, पूर्त्तादीनां यथोत्तरमाराधने श्रेष्ठ्यम् । भगवान् श्रीनारायणः, अलमत्यर्थं यद्याराधितस्तर्हि । ननु परमदुर्घटमिदं कथं सिध्यतु ? तत्राह—परेशः, कर्त्तुमकर्त्तुमन्यथाकर्त्तुञ्च समथ इत्यर्थः । गदाग्रज इति पतित्वेन साक्षान्नामग्रहणायोग्यत्वात्, अग्रजत्वेन गौरवसिद्ध्या लोके तथैव व्यवहाराच्च, इति बहिर्दृष्ट्या किंवा प्रेमविशेषेण परमेश्वरतानपेक्षया भगवद्गदाग्रजयोर्भेदोक्तिः । यद्वा, भवानित्यनुवर्त्तत एव, गदाग्रजो भवान् किंवा गदाग्रजतया यद्याराधितस्तर्हि पाणिं गृह्णातु भवान्, तत्र च लक्ष्मीरूपाया मम पाणिग्रहणं तव योग्यमेवेति सूचयति । परा लक्ष्मीस्तदीश इति विशेषतश्चाधुनावश्यमेवार्हसीत्यभिप्रायेणाह—भगवान् सर्व्वैश्वर्य्यप्रकटनपर इति । त्वत्तोऽन्ये ये केचिन्मनुष्या देवास्त्वदंशा वा, तत्र दमघोषसुतस्यादित्वं तद्विवाहस्य प्रस्तुतत्वात् । तत्र च दमं निजदान्तत्वं घोषयतीति दमघोष इति

कापट्यादिकं सूचितम् । तच्च गोमन्ते जरासन्धनिर्जयानन्तरं रथानयनादिना श्रीहरिवंशे सुव्यक्तमेव । तत्सुतत्वेनास्यापि तादृशत्वमभिप्रेतम् । अन्यत्तैर्व्याख्यातम्; यद्वा, निजाशेषसत्कर्म्मवर्गफलं त्वद्भार्य्यात्वमेवेच्छामि, न च त्वय्यन्यत् किमपीत्याह—पूर्त्तेति । इष्टं होमादि, नियमस्तीर्थस्नानादिनिष्ठा, अन्यत् समानम् ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

श्रृण्वतां कर्णविवरैर्निर्विश्य तापं हरतस्तव रूपमित्यन्वयः ॥ ३७—४२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

वर्णनमेवाह—रुक्मिण्येति । तव सकाशं समीपं प्रतिप्रेषितोऽहं हे कृष्ण ! हे माधव तस्याः संदेशं वाचिकमाकर्ण्य अनन्तरं रुक्मिण्युक्तं क्रियतां यद्वा तदनन्तरं श्रवणानन्तरं क्रियतां यथोचितमिति शेषः । एवमुक्त्वा लिखितं रुक्मिण्येति शेषः । पत्रं पादयोः भगवत इति शेषः । निधाय तं श्रीकृष्णं प्रणनाम नमस्कृतवान् ब्राह्मण इति शेषः । तत्पत्रमादाय सादरं यथा तथा वाचयामास ब्राह्मणमुखेनेति शेषः । कथंभूतो भगवान् स्मिते सुन्दरे लोचने यस्य स धर्मात्मा याचितार्थप्रदानरूपधर्मप्रवणबुद्धिमान् इत्यर्थः । स्पृहयन्निव वाचनेनैव लिङ्गेन तद्विषयकस्पृहां व्यञ्जयन्निवेत्यर्थः । अथ ब्राह्मणः श्रीकृष्णानुज्ञया वाचिकं वक्ति—श्रुत्वेति । हे भुवनसुन्दर ! अनेनौत्सुक्यं द्योतयति त्वद्गुणानेव श्रृण्वतां जनानां कर्णरन्ध्रैरन्तः प्रविश्याङ्गतापमाध्यात्मिकं तापं हरतस्ते तव गुणान् तथा दृशिमतां चक्षुष्मतां दृशामखिलार्थानामनुकूलविषयाणां लाभो यस्मात्तथाभूतं तव रूपं च श्रुत्वा हे अच्युत ! मम चित्तं निर्लज्जं यथा तथा चित्तविशेषणं वा त्वय्येवाविशति आसज्जते क्व च तव महिमा क्व चाहं रूपशीलादियुक्तापि तथाप्यपत्रपं निर्विशति इत्यभिप्रायेणापत्रपमित्युक्तम् ॥३७॥ अहो कुलकन्यानामिदमतिधाष्टर्य्यमिति मा शङ्किष्ठा इत्याह–केति । हे मुकुन्द ! हे नृसिंह ! नरश्रेष्ठ का नाम कन्या कुलवती तथा महती गुणोदारा तथा धीरा स्थिरचित्ता चेत्त्वा त्वां पतिं न वृणीत तेन न मय्येव केवलं दोषशङ्केति भावः । कथंभूतं गुणशीलादिभिरात्मनैव तुल्यं निरुपममित्यर्थः । द्रव्यं संपद्धाम तेजः प्रभावः इति यावत् तथा नरलोकस्य मनस अभिराममतीवानुकूलविषयभूतं किंच काले विवाहावसरे ॥ ३८ ॥ तन्मे इति । हे विभो ! तस्मान्मे मया भवान्खलु पतिः वृतः आत्मा च भवते तुभ्यमर्पितः अतोऽङ्ग हे कृष्ण जायां भार्यां विधेहि त्वमागत्य मामिति शेषः विपक्षे वाधकं द्योतयति अभिमर्शतु मा स्पृशतु ॥ ३९ ॥ अनेकजन्मार्जितैः सुकृतैरिदमेव मे भूयादिति प्रार्थयति पूर्तेति । पूर्त्तं स्मार्त्तं कर्म वापीकूपतटाकादिनिर्माणम् इष्टं वैदिकं यज्ञादिकर्म दत्तादयः प्रदर्शनार्थाः तत्र दत्तं दानं सत्पात्रे द्रव्यत्यागात्मकं नियमस्तीर्थस्नानादिः व्रतं कृच्छ्रादिः देवादीनां द्वन्द्वः तेषामर्चनम् आदिशब्देन भूतहितत्वदयादिसंग्रहः एभिर्यदि नूनं भगवान् आराधितः स्यात्तर्हि गदाग्रजः श्रीकृष्ण एवागत्य मम पाणिं गृह्णातु नत्वन्ये दमघोषसुतादयः गृह्णन्तु इत्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

धर्मः आत्मा स्वरूपं यस्य स तथा सुकृतविषयो वा स्पृहयन्निव कामयमान इव । हे भुवनसुन्दर ! श्रोतॄणां कर्णविवरं निर्विश्याङ्गतापं शरीरसन्तापं हरतः सम्यग्गमो व्याप्तिर्येषां ते तथा तान् स्वरूपाभिन्नान्वा ते तव गुणात् श्रुत्वा ते तव भुवनमङ्गलमङ्गलं परमुत्कृष्टं रूपं च श्रुत्वा मे चित्तं त्वय्यपत्रपमाविशति ॥ ३७ ॥ महती विशाला मनो गुणेनेति शेषः धाम तेजः कुलवती शुद्धवंशा नरलोको मुक्तामुक्तप्रपञ्चस्तस्य मनोभिरामं मनांस्यभिरमयतीति ॥ ३८ ॥ अभिवृतः आभिमुख्येन वृतः एतद्भक्तप्रियत्वादिकं पादसरोजदास्या मप यतोऽङ्घ्रि प्रणतास्मि । तत्तस्मात् हे अङ्ग ! हे अम्बुजाक्ष ! मां जायां विधेहि चशब्द एवार्थे अस्याः मे ममात्मा देहः भवतोर्ऽपित एव वीरस्य तव भागमात्मानम् आरात् दूरात् स्थातुं योग्यश्चैद्यो माऽभिमर्शतु मा स्पृशतु तत्र दृष्टान्तमाह—गोमायुवदिति । गोमायवः श्रृगालाः मृगपतेः सिंहस्य बलिमुपहारम् ॥ ३९–४० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

सोऽपि स्वयमेव वाचयामासेत्याह—श्रुत्वेत्यादि । हे अङ्ग ! अङ्गतापमित्येकमेव पदं वा, अपत्रपं चेतस्त्वयि विशति, तदनुमत्यनपेक्षया विशतीत्यत्रपत्वम् । किं कृत्वा ? श्रृण्वतां कर्णविवरैर्निर्विश्य तापं हरतस्ते तव गुणान् श्रुत्वा, हरत इति गुणविशेषयं वा । आविशतीत्ययं भावः—ते गुणाः सर्वेषां तापं हरन्ति, मम तु वर्द्धयत्येव, अतस्तव तत्वं वेत्तुं त्वयि विशतीति । तेनैवापत्रपञ्च, स्वयं प्रवेशेऽपत्रपत्वं प्रसिद्धमेव । यद्वा, त्वत्प्रवेशे सति तापो या—स्यतीति कृत्वा विशति । अतो मां प्रति स्वयंदूतीत्यवज्ञां मा कार्षीः । चेतस एवमेव स्वातन्त्र्यमिदम्, न तु ममेत्यर्थः । न केवलं गुणान् श्रुत्वा रूपञ्चेत्याह—रूपमित्यादि सुगमम् ॥ ३७ ॥ ननु महाकुल कुमारी भूत्वा कथमिदं स्वयंदूतीभावेन धाष्ट्र्यमाचरतीत्याशङ्क्याह—का त्वामित्यादि । हे मुकुन्द ! का वा कुलवती कन्या त्वां पतिं न वृणीते ? अपि तु सर्वैव, तेन मेऽयं न दोषः । ननु क्षुद्रैव तथा करोति, नैव महती च । ननु चञ्चलैव सा नाप्येवं धीरा । कीदृशं त्वाम् ? कुलशीलादिभिरात्मतुल्यं स्वसदृशं स्वोपमम् । अथवा, कन्यासम्बन्धिभिरेव कुलादिभिः स्वसदृशं कन्यासदृशम् । काले कालं प्राप्य यथासमयम् अधुना मे तथैव समयो जातः, यत्र स्वयं दौत्यमेव शोभत इति

भावः। हे नृसिह! पुरुषसिंह! नरलोकमनोऽभिरामं नरलोकानां मनोऽभिरामं यस्मात् ॥ ३८ ॥ ननु योग्यास्तावन्मां स्वयं दौत्येन वृणन्तु नाम, कथमयोग्या भवती तथा करोतीत्याशङ्क्याह—तन्मे वृत इत्यादि। हे अम्बुजाक्ष! श्रीकृष्ण! मे मया त्वं पतिर्वृत एव। अद्य व्रियसे इति न, भवतो भवते आत्मा चार्पित एव अद्यार्पित इति न। ननु कुत इदं निगद्यते? इत्याशङ्क्याह—जाया तव पत्नी मा लक्ष्मीरहमिति भावः। अहमित्यध्याहार्यम्। हे विभो! अत्र वचसि तद् विधेहि तदुचितं यद् भवति तदित्यर्थः। स्वजाया केनोपेक्ष्यते? तस्माद् यदुचितम्, तद् विधेहीत्यर्थः। किं तदुचितमित्यपेक्षयामाह—मा वीरभागेत्यादि। वीरस्य तव भागरूपां मां चैद्य आरान्निकटे माभिमर्शतु, मा स्पृशतु। मृगपतेर्बलिं गोमायुवदिति। यद्यप्यसम्भाव्यमिदम्, तथापि श्रुतिकटुत्वेनासह्यमिति कृत्वा मम वैयग्र्यम्, तेन स्वयमेव दूतः प्रेषित इत्यर्थः ॥३९॥ अतः लक्ष्मीत्वेनात्मानं प्रतिपाद्य पुनर्विचारितम्—अहो असौ स्वजनगर्वासहनः तदिदं न समीचीनं लिखितमिति तद्दोष-परिहारार्थं पुनः सविनयं यल्लिखितम् तद्-वाचयति—पूर्त्तेष्टदत्तेत्यादि। पूर्त्तं खातादि, इष्टं यज्ञं दत्तं दानम् तदादिभिर्यद्यलमत्यर्थं परेशो भगवानाराधितस्तदा गदाग्रजः श्रीकृष्णः एत्य मे मम पाणिं गृह्णातु। यद्वा, पूर्त्तेष्टादिभिरलं पर्याप्तमेतेषां नेदं फलम्, यदि परेशो भगवान् गदाग्रजः श्रीकृष्ण आराधितः श्रीरूपया ममाराधितः, तदा एत्य पाणिं गृह्णातुः; अन्यथा पूर्त्तादीनां किमीदृशं सामर्थ्यम् यदेवंविधं फलं जनयिष्यति? नैवेत्यर्थः। अतो न दमघोषसुतादयोऽन्ये; ते तुच्छाः; किं मृगपतेर्बलिं गोमायुवत् हरन्तीति पूर्वोक्तिस्वरसः ॥ ४० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

सोऽपि वाचयाञ्चकारेत्याह—श्रुत्वेति। हे अङ्ग! अङ्गतापमिति वा, अपत्रपं चेतस्त्वयि आविशति त्वदनुमत्यनपेक्षया विशतीत्यपत्रपत्वम्। शृण्वतां कर्णविवरैर्निर्विश्य तापं हरतेस्ते तव गुणान् श्रुत्वा हरत इति गुणविशेषणं वा। आविशतीत्यस्यायं भावः—ते गुणाः सर्वेषां तापं हरन्ति, मम तु वर्द्धयन्त्येव। अतस्तव तत्त्वं वेत्तुं त्वयि विशति, अतोऽपत्रपं निर्लज्जम्, स्वयं प्रवेशे तथैव योग्यम्। अथवा त्वत्प्रवेशे वा शीतलं भवतीति प्रवेशो भवतु, अतो मां प्रति स्वयंदूतीत्वस्यावज्ञां मा कार्षीः ॥ ३७ ॥ अथवा स्वयंदूतीभावोऽपि नानुचित इत्याह—का त्वेत्यादि। हे मुकुन्द! का महती महाकुलप्रसूता धीरा धैर्यशालिनी सती त्वां न वृणीत? अपि-तु सर्वैव धीरापि स्वयं-दूत्यं करोति, योग्या भवतु, न भवतु वा, भवद्विधा योग्यैव किम्? न हि न हीत्याह—कुलशीलादिभिरात्मना स्वेनैव तुल्यं त्वां प्रति का योग्या कुलादिभिरात्मनः सदृशमिति चेत्तथा न कापि; यदि कापि भवति, तदा लक्ष्मीरेव सा; सैव स्वयमेव वरीतुं योग्येति गूढो गर्वाभिव्यञ्जकोऽर्थः। तत्रापि काले एतावत्त्वं कालं नैव स्वयं दूत्यमकरवम्, अधुना कालः संप्राप्तः मद्भ्राता चैद्याय दातुमिच्छति, तस्यानुरोधेन पिता च माता च भवदन्तिकं कमपि न प्रहिणोति। अतो मयैव लिखितमिति धाष्ट्यं न चिन्त्यम्। एवञ्चेद् भवद्भ्रातृपक्षीयाः सर्वे राजानः, तत् कथममीभिः सह वैराय समर्थो भविष्यामि? तत्राह—हे नृसिंह! नृसिंह-नाम्नैव सर्वे दैत्या नङ्क्ष्यन्तीति भावः। नृसिंहत्वेन चेदुग्ररूपोऽस्मि, तदा कथं मां मृगयसे? तत्राह—नरलोक-मनोभिरामं नरादयो ये लोकास्तेषां मनोहरम् ॥३८॥ योग्यास्तावत् पतित्वेन मां वृणन्तु नाम, कथमयोग्या भवद्विधाः? तत्राह—तन्मे भवानित्यादि। हे अम्बुजाक्ष श्रीकृष्ण! मे मया भवान् खलु पतिर्वृतो व्रियसे इति न, भूत एव भवतो भवते आत्मा च अर्पितः, अद्यार्प्यत इति न, कुत इदं निगद्यते? तत्राह—अहं जाया तव पत्नी मा लक्ष्मीः, हे विभो! अत्र तद् विधेहि तदिति लक्ष्म्या जायाया यदुचितम्। ननु लक्ष्मीश्चेद्भवती, तदा कथमिदं वैयग्र्यम्? तत्राह—मा वीरेत्यादि। एष मद्भ्राता तथा न जानाति, स त्वन्यथैव चिकीर्षति, तन्माभूदिति वैयग्र्यम्; यद्यपि तन्नैव संभावि, तथापि श्रुतिकटुत्वादसह्यमिति भावः। एवं लक्ष्मीत्वेन स्वगर्वमुक्त्वा पश्चाद्विचारितम्—असौ स्वजनगर्वासहिष्णुस्तत् कथमिदं लिखितम्? इत्याशङ्क्य तद्दोषपरिहाराय पुनर्लिखितं वाचयति—पूर्त्ते इत्यादि। पूर्वत्रौत्सुक्यम्, ततो गर्वः, ततो दैन्यम्—एते पूर्वरागस्य व्यभिचारिभावाः ॥ ३९–४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

रुक्मिण्या स्वयमेकान्ते लिखित्वा दत्तपत्रिकाम्। मुद्रामुत्मुच्य कृष्णाय प्रेमचिह्नामदर्शयत्! ब्राह्मणः श्रीकृष्णाज्ञया वाचयतीति श्रीस्वामिचरणाः। नन्वदृष्टाश्रुतचरीं नृपकन्यां त्वां मह्यं वराय पत्रिकां स्वविवाहार्थं लिखन्तीं निर्लज्जां कथमङ्गीकरोमीति चेत् सत्यमहमपि स्वदुर्वशस्य स्वचित्तस्य स्वभावमेवावेदयामि तत् श्रुत्वा अपेक्षस्व उपेक्षस्व वा अनुगृहाण निगृहाण वा तत्र खलु दुर्लभस्य तव लाभालाभाभ्यां सदा सुखं जीविष्यन्त्या अद्य श्वो वा मरिष्यन्त्या मम न भयलज्जे इत्याह—श्रुत्वेति सप्तभिः। हे अच्युत! तव गुणान् रूपं च श्रुत्वा मम चित्तमपत्रपं विगतलज्जं सत् त्वयि आविशतीति मच्चित्तस्य निस्त्रपीकरणे तव गुणरूपे हेतू मम च कर्णावित्यावयोरुभयोरेव दोष इति न त्वयाहमुपालम्भनीया नापि मया त्वमुपालम्भनीय इति भावः। हे अच्युतेति मच्चित्तं निस्त्रपीभूयापि त्वय्याविशति तस्मात्त्वं च्युतो न भवसि न जाने किमपरं चिकीर्षतीति भावः। नन्वन्यस्यापि पुरुषस्य गुणरूपे प्रकृष्टे भवत एवेति स किं न दृष्यते तत्र मैवं वाच्यमिति वदन्ती प्रथमं गुणान् विशिनष्टि—शृण्वतां श्रवणवतां कन्याजनानां कर्णविवरैर्निर्विश्याङ्गतापम् अङ्गयोः स्थूलसूक्ष्मयोरुभयोरेव तापं समस्तमेव हरतो नाशयत इत्येवं भूताः गुणाः कस्यान्यस्य पुंसो वर्त्तन्ते त्वं वदेति भावः। रूपं विशिनष्टि–दृशिमतां चक्षुष्मतां जनानां दृशां दृगिन्द्रियाणाम् अखिला

अन्यूनाः श्रेष्ठा ये अर्थाः विषयाः नीलमणिनीलोत्पलादीनां कनककुङ्कुमादीनां पद्मरागवन्धूकादीनां चन्द्रकान्तचन्द्रादीनां च ये वर्णा नीलपीतरक्तशुक्लास्तेभ्यः सकाशादपि महामाधुर्यसम्बन्धी लाभो यत्र तत् रूपं त्वदीयगात्ररसनाधरनखादिसौन्दर्य्यं तस्मादेवं भूतं रूपं कस्यान्यस्य वर्तते इति भावः। अत एवानुरूपं सम्बोधयति हे भुवनसुन्दर! भुवनेषूर्ध्वाधोवर्तिषु प्राकृताप्राकृतेषु लोकेषु सुन्दर प्रकृत्या चाकृत्या च शोभमान! ॥३७॥ नन्वस्तु मल्लक्षणः पुरुष एव त्रिजगत्यस्मिन्निरुपमः किं कन्यापि श्रोत्रनेत्रवती जगत्यस्मिंस्त्वमेवैका वर्त्तसे यत एवमन्या न निर्लज्जावतीति तत्राह—का त्वेति। हे मुकुन्द! मुखे कुन्दवद्धासो यस्येति मामेव हसितुं प्राप्तावसरेत्यर्थः। का महती रूपगुणवती धीरा बुद्धिमती कुलवती त्वां पतिं न वृणीत। तेन कुरूपा दुःशीला कुबुद्धिरनभिजातैव अश्रृण्वती वा त्वां व वृणीते इति भावः। कीदृशं कुलादिभिरात्मनैव तुल्यं निरुपममित्यर्थः। काले स्वसमये इति अन्या अपि मत्तुल्याः बह्व्य एव कन्याः स्वसमय एव त्वां वरिष्यन्ति नत्वधुनैव मत्समय इति भावः। हे नृसिंह! नरश्रेष्ठ हे सिंहवद्दुर्वशेति न मे त्वद्वशीकारे कापीच्छास्तीति भावः। तदपि नरलोकमात्रस्यैव त्वं मनोऽभिरमयसीति मन्मनसः कोऽपराध इति भावः ॥ ३८ ॥ यस्मादेवं तत्तस्मात् मया भवान् पतिर्वृतः प्रथममेव नत्वधुना व्रियसे आत्मा जीवो देहश्चार्पितः। पत्रीप्रेषणं तु भवन्मनो निर्द्धारज्ञापनार्थमेव भवतोऽङ्गीकारे सतीमं पालयामि अनङ्गीकारे तु ज्वालयामि नतु कस्मैचिदपि ददामि यदि स्वयं ब्रह्माप्यागत्य स्वयं वदेदिति भावः। किन्त्वात्मानवेदनमिदं मे बलिराजवन्न निर्भावमेव किन्तु सभावमेवेत्याह—हे विभो! भवतो जायां विधेहि। यथा कश्चित् कस्मैचित् किमपि भोज्यं दत्वा इदं त्वया स्वयं भोक्तव्यमेवेति ब्रूते इत्यतो निर्भावात् स्वभावमात्मनिवेदनं प्रेमस्पर्शित्वाच्छ्रेष्ठमिति ज्ञेयम्। किञ्च स्वस्याङ्गीकारमनङ्गीकारं वा ब्राह्मणं शीघ्रं प्रेष्याहं ज्ञापनीयेत्याह–मेति। वीरस्य तव भागमिमं चैद्यो माभिमर्शतु। मयि त्वदाशया देहमिममदहन्त्यामकस्मात् चैद्य आगत्य यदि स्पृशेत् तत्क्षण एव त्वदाशायां निवृत्तायां त्वद्विरहाग्निरेवाति प्रज्वलित एनं भस्मीभूतं कुर्यादेव। किन्तु तवाप्रतिष्ठा भाविनीति मे भयमिति भावः। अप्रतिष्ठामेवाह—मृगपतेर्बलिं गोमायुः श्रृगाल इवेति। अम्बुजाक्षेति तदानीं त्वन्नयनकमलं ध्यायन्त्या मम तु देहे दह्यमानेऽपि न तापो भावीति भावः ॥ ३९ ॥ अये महादुर्लभपुरुष! त्वं नैकजन्मसुकृतलभ्यस्तस्मात् सामान्यतस्त्वत्प्राप्तिकामया निष्कामया वा यदि मया पूर्व्वपूर्व्वजन्मसु बहूनि सुकृतानि कृतानि तदा तेषामेष एव फलविशेषो भूयादिति प्रार्थयते। पूर्त्तेति। पूर्त्तैर्दत्तैर्भगवत् सम्प्रदानकैर्नियमैस्तीर्थस्नानादिभिः व्रतैरेकादश्यादिभिः देवविप्रगुर्व्वर्च्चनैर्भगवदर्च्चनाङ्गैः यदि मया भगवान् अलमतिशयेनाराधितस्तदा मानुष्या मे मानुष एव भगवान् गदाग्रजः आगत्य पाणिं गृह्णातु नत्वन्ये नारायणादयोऽपि देवा मानुषा वेत्यर्थः। दमघोषसुतस्य तत्रादित्वेनोल्लेखस्तु तद्विवाहस्य प्रस्तुतत्वादेव ॥ ४० ॥

गूढार्थदीपिनी

हे अच्युत ते गुणान् रूपं च श्रुत्वा मे चित्तमपत्रपं लज्जारहितं सत् त्वयि आविशति आसक्तं भवतीत्यन्वयः। कथंभूतान् गुणान्। श्रृण्वतां पुंसां कर्णरन्ध्रै रन्तःप्रविश्य अङ्गतापं हरतः। अङ्गेति सम्बोधनं वा। कथंभूतं रूपम् दृशिमतां चक्षुष्मताम् अभीष्टपदार्थानां लाभो यस्मात्तथाभूतम् ॥ ३७ ॥ हे मुकुन्द का नाम कुलवती कन्या त्वां पतिं न वृणीत। कथंभूतम्। कुलादिभिरात्मनैव तुल्यं निरुपमम्। पुनश्च नरलोकमात्रस्य मनोऽभिरमयतीति तथा। महती गुणवती। सिंहः श्रेष्ठः ॥ ३८ ॥ अङ्ग हे। तत् तस्मात् मे मया वृतः आत्मा देहश्च भवतः भवतेऽर्पितः। शेषे षष्ठी। अतोऽत्रागत्य मां जायां विधेहि। वीरस्य तव भागं शिशुपालः मां दूरादपि मा स्पृशतु। यथा श्रृगालः सिंहस्य बलिं न स्पृशति तद्वत् ॥ ३९ ॥ पूर्तादिभिर्यदि भगवान् अलमत्यर्थमाराधितस्तर्हि स एव मे पाणिं गृह्णातु नान्ये शिशुपालादयः। पूर्तं वापीकूपादि। इष्टं यागादि। दत्तं दानम्। नियमो गङ्गास्नानादिः। व्रतमेकादश्यादि ॥ ३० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीरुक्मिण्युवाचेति। हे भुवनसुन्दर! निरतिशयसौन्दर्यालय हे अच्युत! नित्यैश्वर्य सम्बोधनाभ्यां भगवत्याः अनावृत्तज्ञानवत्ता द्योतिता हे अङ्ग भर्तः अनेन सम्बोधनेन भगवत्याः भगवता भर्त्रा सह नित्यसम्बन्धो द्योतितः। अपगता त्रपा यस्मात्तन्मे चित्तं त्वय्याविशति श्रीमत्पुरुषोत्तमस्य स्वभर्तुः प्रार्थनायां मम का त्रपेत्यर्थः। एवं स्वभावत एव देव्याः ज्ञानातिशयः तद्वाक्येन सूच्यते। अथवावतारलीलानुरूपेण तद्वाक्येन तस्याः ज्ञानातिशयः सूच्यते गुणानुरूपं च श्रुत्वा त्वयि चित्तमाविशतीति। अनेन अन्तःपुरगताया देव्याः यस्मात्कस्माचिदपि जनात् यथा कथञ्चिदपि श्रवणेन यथावद्भगवद्गुणरूपधारणशक्तिर्द्योत्यते कथम्भूतान् गुणान् श्रृण्वतां ब्रह्मादिश्वपचपर्य्यन्तानां कर्णविवरैरन्तः प्रविश्य तापं संसारतापं हरतः। अनेन श्रीकृष्णगुणश्रवणं ब्रह्मादिश्वपचान्तजीवसंसारनिवर्तकमिति द्योत्यते। कथम्भूतं रूपं दृशिमतां सर्वेषां ब्रह्मादिश्वपचान्तानां दृशामखिलानामर्थानां लाभो यस्मात् ॥ ३७ ॥ ननु महाकुलप्रसूतायास्तवैवं लोकविरुद्धमनुचितमत आह केति। कुलवती तत्रापि धीरा धैर्य्यवती किं बहुना कुलं परिवारः शीलं सुस्वभावः रूपं सौन्दर्य्यं विद्या यथार्थज्ञानं वयोऽवस्था द्रविणं वित्तं धाम पुण्यार्जितं लोकद्वयं च तैर्महती। एवम्भूता का नाम कन्या आत्मतुल्यमनुपमम्। अतः लोकमनोऽभिरामं सर्वलोकानां मनांसि अभिरमयतीति तथा सर्वबुद्धिप्रेरकं वेदमात्रार्थ-

भूतं हे मुकुन्द ! मुक्तिप्रद हे नृसिंह ! भक्तमनोरथपूरणार्थं नृसिंपादिरूपेण कृतावतार त्वा त्वां पतिं न वृणीतेत्यन्वयः ॥ ३८ ॥ हे विभो ! सर्वव्यापक सर्वसाक्षिन् तत्तस्मान्मे मया भवान् खलु पतिर्वृतः आत्मा च भवतोर्ऽपितः अतः हे अङ्ग ! त्वमत्रागत्य मां भवतो जायां विधेहि अम्बुजाक्ष ! मृगपतेः सिंहस्य बलिं गोमायुवत् वीरस्य तव भागं माम् आरात् शीघ्रमागत्य मा अभिमर्शतु मा स्पृशतु ॥ ३९ ॥ यदि पूर्तादिभिरलमाराधितः भगवान् परेशो गदाग्रजः तर्हि मे पाणिं गृह्णातु अन्ये जीवा दमघोषसुतादयो न गृह्णन्तु तत्र कूपादिनिर्माणं स्मार्तं कर्म पूर्तं, यज्ञादि वैदिकं कर्म इष्टम् दत्तं विविधं दानम् अन्यत्स्पष्टम् ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अङ्ग हे भुवनसुन्दर । शृण्वतां त इति संगतांस्त इति च सङ्गतौ पाठौ । शृण्वतां जनानां सङ्गतांस्त्वयि सदा विद्यमानान्कर्णविवरं प्रविश्य तापं हरतस्ते गुणान् श्रुत्वा भुवनमङ्गल ते मङ्गलं रूपं च श्रुत्वा स्थितायां मे चित्तमपत्रपं निर्लज्जं त्वयि विशति । न प्रत्यावर्तयितुं शक्यमित्याह । परं यथा तथा विशतीति । भुवनमङ्गलानां मङ्गलं तन्मङ्गलत्वप्रदमिति पदमेकं बा । परन्तापमितराशक्यपरिहारं तापमिति वा । अङ्गतापमिति पदं वा । शरीरतापमित्यर्थः । भुवनमङ्गलमङ्गलमिति छेदः । भुवनस्य मं ज्ञं यद्दानं वा यस्मात्तद्गलस्य मे मङ्गलसूत्रं वा येन तदित्यान्तरङ्गिको भावो रुक्मिण्याः । अवरोपो हरतो रुद्रादङ्गतापं य आविशत्याविशत् । क्रियासम्बन्धे लट् । तेन मन्मथेनापत्रपं विशतीति वा ॥ ३७ ॥ अहा रहोगतानां कन्यानामेवमपत्रपाप्रवृत्तिः कथमिति न कथय मधुनाथ तव गुणा एवैवं त्रपापनोदं कुर्वन्ति कामगामिति विज्ञापयति । केति । हे नृसिंह मुकुन्द । नृसिंहेत्यनेन मिलितानां जरासुतादीनां गोपायुतामभिप्रेत्य न तेभ्यस्तव भयमिति ध्वनयति । कुलवती सत्कुलप्रसूता व्रीडावती साऽपि महती गुणतः कन्या का । गुणाश्च शीलं च रूपं च विद्या च वयश्च द्रविणं द्रव्यं च धाम तेजश्च तैरात्मतुल्यं स्वसमानं नान्य एतद्वानस्तीति भावः । नरलोकमनोभिरामं नरा अविनाशित्वान्मुक्ता लोका अमुक्ताश्च तेषां मनोऽभिरामयतीति तं त्वा त्वां न वृणीत न काङ्क्षेत् । किन्त्वेतन्मात्रमपेक्षितमित्याह । काल इति । अनुढायाः प्रौढायाः काले विवाहकाले । आत्मतुल्यत्वं तव प्रामाणिकमित्यध्याह । महतीगुणशीलो नारदो महत्या वीणाया गुणो ध्वनिर्येन स नारदः । महती नारदस्येत्यादेः । शीलं सदाचारस्तद्वन्तः सनकाया रूपवान्मारो विद्या सरस्वती आवया ब्रह्मा । एष ब्रह्माऽतिवृद्ध इत्यादेः । द्रविणधामा कुबेरो द्रविणवान्कुबेरो धामभिः प्रकाशात्मकैश्चन्द्रसूर्याग्न्यादिभिरात्मतुली आत्मनैव तुलाऽस्यास्तीति स तथा । शिखादिः । इति यः कथित इति शेषः । तं भगवन्तं त्वमिति वा । इन्दिरायाः पतिमित्यनेन स्वस्यास्तदात्मकतां ध्वनयन्ती गुणादिधामान्तरैरात्मनः स्वस्यास्तुल्यमित्यर्थमपि सूचयामासेत्यवसेयम् ॥ ३८ ॥ स तादृशस्त्वं मयाऽप्यभिवृतः । वरणे कारणमीरयति । इन्दिरायाः पतिर्भक्तप्रियः कृपणलोकशरण्य ईश इत्येतन्मत्वेति । अङ्ग कृष्ण प्रियतम । तव पादसरोजदास्या मम कामं कुरु । किञ्चिद्विनैतत्प्रत्यर्पणेन तव तर्पणं कर्तुं क्षमाऽहमित्याह । तेऽङ्घ्रि प्रणताऽस्मीति । अस्मीत्युत्तमपुरुषप्रयोगादहमिति लभ्यते । यद्वाऽस्मीत्येकदा तिङन्तमेकदावर्तितमहमित्यर्थेऽव्ययम् । तथा हि भारवौ । आसंसृतेरस्मि जगत्सु जातस्त्वया गतेयद्बहुमानपात्रमिति । न च तत्रापि जातोऽस्मीत्यन्वयसम्भवेन निर्धारणमिति तु । दासे कृतागसि भवत्युचितप्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये । उद्यत्कठोरपुलकाङ्कुरकंकटकाम्यैर्यत्खिद्यते तव पदं ननु सा व्यथा म इति गणव्याख्याने दूय इत्यस्य सत्त्वादस्मीत्यस्य निराबाधमहनित्यर्थकता स्वीकार्याऽन्यथा वैय्यर्थ्यादित्यभिधानादपास्तम् । खल्वितरान्प्रतिषिध्य भगवान् पतिर्वृतस्तत्त्वेन वृतोऽङ्ग विभोजायां धेहि । कुर्वित्यनुक्त्वा विधेहीत्युदीरयन्ती हे विधे त्वमपि साहितीं विधेहीति कटाक्षितो धातेति सूचयति । न मे धातेति वक्ष्यमाणानुकूल्यात् । अयमात्मा देहो भवतोर्ऽपितश्च । लग्नादिना समीपलग्नानीति न विलम्बमवलम्ब स्वान्तराया अन्तरा यास्यन्तीत्याह । मेति । चैद्य आरात्समीपे वीरभागं माऽभिमर्शतु मायम् । तव निदर्शनमाह । मृगपतेर्बलिं गोमायुरिवेति । वीरो गरुडप्रेरकस्तत्तुरगो हरिस्तस्य भागः । मा चासौ वीरभागश्च तमिति वा । रमारूपं त्वद्भागं न मृशत्वित्यन्वयः ॥ ३९ ॥ परोक्षप्रिया इव हि देवा इत्यादेः पारोक्ष्येण विज्ञापयति । पूर्तेति । एवं कूपारादि इष्टं यजनं दत्तं दानं नियमो वाङ्नियमनं व्रतं कृच्छ्रचान्द्रायणादि देवार्चनं विप्रार्चनं गुर्वर्चनमादिर्येषां तैः । भगवान्परेशो यर्ह्यलमाराधितो मया तर्हि गदाग्रज एत्य पाणिं गृह्णातु । दमघोषसुतादयोऽन्ये न गृह्णन्तु ॥ ४० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

शिष्टं सर्वमुक्त्वा रुक्मिणीवाक्यानि स्वतः पत्रिकातो वा निरूपयति **श्रुत्वा गुणानिति सप्तभिः** । षड्गुणाः भगवांश्च । एते चेत्प्रार्थ्यन्ते, तदा निष्प्रत्यूहं कार्यं भवतीति सप्तभिर्विज्ञापना । आदौ भगवन्तं धर्मिणं विज्ञापयति **श्रुत्वा गुणा**निति । त्वयि चित्तं विशतीति मनोवृत्तिं निरूपयति । आत्मा तु त्वदीय एव । इन्द्रियाणि चेदन्यपराणि भवेयुः, अन्तःकरणं शरीरं वा, तदा सर्वनाश इति विनिश्चित्येन्द्रियाणां त्वत्परत्वे मनोऽपि त्वत्परं जातमिति, शरीरमपि त्वत्परं कर्तव्यमिति ममोद्योग इति प्रघट्टकार्थः क्रमेण गुणा निरूप्यन्ते । भगवदैश्वर्यं चैतदिति सूचितम् । गुणद्वारा स्वतोऽपि चित्तवशीकरणमैश्वर्यादप्यैश्वर्यं भगवदीयानां कान्तिगुणस्वरूपाणां माहात्म्यं निरूप्यते । हे **भुवनसुन्दर** भुवनेष्वेक एव सुन्दरः । अनेन कान्त्याधिक्येन स्त्रीणां स्वतश्चित्तवृत्ति-

रुक्ता। **ते गुणान् शृण्वतां कर्णविवरैरन्तर्निर्विश्य अङ्गतापं** हरतां सताम्। रूपं च दृशिमतामखिलार्थलाभं यतः। अतस्त्वयि मे चित्तमाविशति। बहिरिन्द्रियद्वयमेव नियामकम्, अन्तरिन्द्रियस्य श्रोत्रं चक्षुश्च। श्रुतावपि 'अक्षण्वन्तः कर्णवन्त' इत्यत्र तथैव निरूपितम्। उभयेषामुपकारं त्वद्गुणाः त्वद्रूपं च करोति। तत्रैकमान्तरं तापं हरति। एकं च बहिः सर्वपुरुषार्थान् प्रयच्छति। श्रवणमात्रेऽपि क्रियमाणे प्रयत्नं विनापि त्वद्गुणाः स्वत एवान्तर्निविष्टाः। तेषामपि निवेशने प्रतिबन्धाभावायाह **कर्णविवरै**रिति। अपावृतानि कर्णरन्ध्राण्यपेक्ष्यन्ते, अन्यथा न प्रविशन्तीत्येतावत्पुरुषकर्तव्यमुपदिष्टम्। अतः कर्णविवरैः पातालविवरवत्प्रसिद्धैः अन्तर्निर्विश्य अङ्गानां तापं हरन्ति गुणाः। **अङ्गे**ति सम्बोधनं वा आत्मत्वेन। रूपं च ये दृशिमन्तः दर्शनयुक्ता येषां चक्षुःकार्यमस्ति। रूपभेदविद इति प्रथमा कक्षा। सर्वात्मना दृश्यगुणपरिज्ञानम् अन्तिमा, तेषां दृशां चक्षुषां अखिलार्थानां लाभो यस्मात्। चतुर्विधपुरुषार्थाः चक्षुषां सिध्यन्ति। चक्षुषः सूर्यभावो मोक्षः। रूपपानं कामः। रूपग्रहणमर्थः। तत्रावगाहनं धर्म इति। फलवतामेषां फलान्यप्यूह्यानि। तत्रापि पुरुषार्था न सम्पादनीयाः, किन्त्वकस्मादुपलब्धा निधय इव प्राप्यन्ते। यत्रैवं इन्द्रियाणामुपकारं त्वद्धर्माः कुर्वन्ति, तत्र चित्तमपि ममापि तथा भविष्यतीति त्वयि निर्विशति। चित्तस्य हि द्वयं प्रतिबन्धकम्, लोको वेदश्च। तत्र लोकमतिक्रम्य प्रवर्तत इत्याह **अपत्रप**मिति। अपगता त्रपा यस्मात्। लज्जा हि लोके नियामिका॥ ३७॥ वैदिकं दोषं परिहरति का त्वेति। वेदोऽपि लोकानुसारी भवतीति हि विज्ञायते। अतो लोके यदविरुद्धं सर्वथा व्यवहारे अविगीतम्, तद्वेदेऽप्यविरुद्धमिति। एतादृशोऽर्थः मयैव कृत इति चेत्, तदा विरुद्धो भवेत्, किन्तु सर्वैरेव क्रियत इतीममर्थं व्यतिरेकेण साधयते। का वा कन्या त्वां न वृणीत। सर्वस्यापि यद्यपि मोक्षोऽभिप्रेतः, तथापि स्त्रीयोनिरतिदुष्टेति तत्परित्यागार्थं स्त्रिया अत्यर्थमपेक्षितः। नन्वस्ति लोके मोक्षसाधनमिति चेत्। तत्राह **महती**ति। महत्त्वं प्राप्ता न सर्वं परित्यक्तुं शक्नोति। यथातिबद्धा। अतस्तस्या गृह एव चेन्मोक्षदाता भवति, तदैव मोक्षः सिध्येत्। किञ्च। धर्मार्थकामार्थमपि त्वमेव भजनीय इत्याह कुलेति। सप्तधर्माः समा ययोः तयोरेव विवाहः विवादश्चेति। कुलं तुल्यमपेक्ष्यते। तत्सोमवंशित्वादावयोस्तुल्यम्। तथा रूपमपि। मदर्थमेव रूपं गृहीतमिति मद्योग्यमेव भवितुमर्हति तव रूपम्। अहमपि त्वदर्थमेव रूपं गृह्णामीति ममापि तथा। वयश्च योग्यमेव। गृहमत्र पितृगृहम्। प्रसिद्धस्य पुत्रः, प्रसिद्धस्य कन्येति चतुष्टयं निर्विवादम्। लोकप्रतीत्या द्रविणमपि तुल्यम्। विद्या मातेति चिद्रूपेति वा विद्यायामपि तुल्यता। महती श्रद्धा भगवति वर्तत इति 'यो यच्छ्रद्धः स एव स' इति ऐक्यादनुरोधाद्वा। शीलमपि तुल्यम्। शीलं स्वभावः शान्तोग्रादिः, आचारो वा। उभयमप्यत्र बाह्याभ्यन्तरं ग्राह्यम्। ननु भगवान् शान्तः विलम्बेन च कार्यं करोति, माया तु सत्वरेति वैधर्म्यस्य विद्यमानत्वात् कथं तुल्यतेति चेत्। तत्राह **धीरे**ति। मयापि धैर्यमवलम्बनीयम्, भगवत्कार्यानुरोधेनेति। ननु भगवति भजने न तुल्या गुणा अपेक्ष्यन्ते, किन्तु भगवदुत्कर्षं ज्ञात्वैव प्रवर्तत इति किमिति तुल्यत्वं निरूप्यत इति चेत्। तत्राह **पति**मिति। पतित्वेन स्वीकारे तुल्यता वक्तव्या। अन्यथा दासीत्वं भवेत्। नन्वस्तु को दोष इति चेत्। तत्राह **कुलवती**ति। कुलस्थास्तथा सति खेदं प्राप्नुयुरिति भावः। किञ्च। **कन्ये**ति। अवश्यं कन्यया वरणीयः कश्चित्पतित्वेन, अवरणे स्वयं न गृह्णीयात्। मुख्यविनियोगार्थमन्याधीनां वा कुर्यात्। किञ्च। उपपत्तौ सत्यां तत्परित्यागे कारणाभाव इत्याह **काले नृसिंहे**ति। अवसरे तत्परित्यज्य अन्योच्छिष्टा भूत्वा पश्चाद्भगवदर्थं यत्ने क्रियमाणे असमञ्जसं स्यात्। अयोग्यत्वाशक्यत्वे तु न स्त इत्याह **नृसिंहे**ति। नरत्वाद्योग्यत्वम्, सिंहत्वात्समर्थत्वमिति। किञ्च। नरलोके मनसोऽयमेवाभिरामः। अतो वरणे अभिराम एव वरणीय इति योग्यत्वाद्यविचारेणापि त्वमेव वरणीय इत्यर्थः॥ ३८॥ एवं योग्यतां निरूप्य विज्ञापनामाह **तन्मे भवान्खलु वृत** इति। अत्रापि गृहे सर्वदा मयोच्यते, कृष्ण एव पतिर्मम, नान्य इति। एतत्सर्वेऽपि जानन्ति, तथापि बलात्प्रवर्तन्त इति खलुपदार्थः। किञ्च। पूर्वमपि लक्ष्मीस्वयंवरे अमृतमथने मया भवानेव वृतः सैवाहमिति भावः। उपाध्यन्तरं निवारयन्त्याह **पति**रिति। एवं स्वकृतमुक्त्वा भगवन्तं प्रार्थयते **जायां विधेही**ति। अङ्गेति स्नेहसम्बोधनम्। अन्यथा धाष्ट्र्यमनुचितं स्यात्। अङ्गस्य वा जायां विधेहि। अन्यथा भगवान् सर्वपतिरिति प्रकारान्तरेण वा जायात्वं स्यात्। जायापदेन यावानर्थः स सर्वोऽपि विधेयः। ननु भगवान् भगवच्छास्त्रविरुद्धमर्थं न गृह्णातीति कथं त्वां ग्रहीष्यतीति चेत्। तत्राह **आत्मार्पितश्चे**ति। आत्मा मदीयः संघातः तुभ्यं समर्पितः। अतो यथेष्टविनियोगे न कापि चिन्ता। चकारात्सर्वमेवास्मत्सम्बन्धि समर्पितमिति सर्वत्रैव तव कामचारः। अतस्तदपेक्षा तत्प्रतिबन्धो वा न घटत इत्युक्तं भवति। भवत एवात्मा, अतो भवते समर्पित इति नालौकिकं किञ्चित्। अङ्गीकृते शीघ्रमागमनार्थं बाधकमाह **मा वीरभाग**मिति। वीरस्यैव भागोऽहम्। शौर्येणैव लक्ष्मीः प्राप्यत इति नैव दत्ता अन्यस्य भवति। अत एव य एव शूरः, स एव राज्यमुपभुङ्क्ते। तथा सति चैद्यस्य अशूरत्वात् भोगाभावेऽपि केवलं काकवत्स्पर्शो भवेत्, तदा महतोऽपि भोगाभावाज्जन्मवैयर्थ्यम्। अनेन महती आपदा उपस्थितेति न कापि वाक्ये दूषणं मन्तव्यमिति भावः। आराद् दूरादपि अभिमानेनापीत्यर्थः। दानानन्तरं हरणे अभिमानोऽपि भवेत्। वाग्दानं तु 'अनृतं वै वाचा वदती'ति श्रुतेरप्रमाणमेव। अन्यथा पुण्यपापव्यवस्थायां वाङ्मनसस्य अप्रामाण्यं न स्यात्। एतदर्थमेव श्रुतिः प्राह 'वाङ्मनसयोरनृतत्व'मिति। ननु स जानाति मदीया त्वमिति, त्वया वा वक्तव्यः, ततः कथं स्प्रक्ष्यतीत्याशङ्क्याह **गोमायुव**दिति। त्वदनागमने मृतप्रायां मृतां वा दैवकल्पितं स्वभागं ज्ञात्वा स्प्रक्ष्यतीति भावः। नन्वेवमस्तु, को दोष इति चेत्। तत्राह **मृगपते**रिति। मरणे यद्यपि नानुपपत्तिः, तथापि तदनन्तरं

स्पर्शे महदनौचित्यम् । न हि सिंहाय तद्भक्तैः निवेदितं शृगालो भक्षयितुमर्हति । **अम्बुजाक्षेति** । दृष्ट्यैव तापनाशकत्वमुक्तम् । तेन वरणमप्ययुक्तमिति भावः ॥ ३९ ॥ एवं दृष्टसामग्र्या भगवत्प्रार्थनामुक्त्वा स्वस्य सर्वेणापि धर्मेण शपथमपि वदन्ती प्रार्थयते **पूर्तेति** । बाल्ये खातादिकं कर्तुं शक्यत इति इष्टात् पूर्वं निर्देशः । पूर्तं खातादि, इष्टं यागादि, दत्तं तुलापुरुषदानादि, नियमाः परित्यागरूपाः, व्रतानि ग्रहणरूपाणि, देवानां विप्राणां गुरूणां वार्चनानि । एवमष्टविधान्युद्दिश्य काण्डत्रयमपि संगृह्य स्मार्तपौराणिकान् धर्मानादिशब्देन संगृह्णाति । एवं सर्वैरेव धर्मैः भगवानेव चेदाराधितः, न तु कामनार्थं किञ्चिदपि विनियुक्तम्, तदा भगवान् स्वयमेत्य पाणिं गृह्णातु, केवल एव आराधित इति न दमघोषसुतादयः स्पर्शमप्यर्हन्ति । **गदाग्रज** इति विषयप्रियत्वमुक्तम् । तस्मिन् समागते कंसे हते पश्चाद्गद उत्पन्न इति भगवदाविर्भावानन्तरमपि तेन पित्रादेर्वंशः कारित इति वंशकरणे तस्येच्छा सूचिता । अत एव एत्य स्वयमागत्य पाणिं गृह्णातु इति स्वकृतधर्मेषु भारारोपः । ननु 'मद्भक्तपूजाभ्यधिके'ति भगवद्भक्तानां वा ग्रहणे को दोष इति चेत्, तत्राह **अन्य** इति । ते भगवत्प्रतिपक्षाः । अन्यथा तु दासीदासभावेनापि भजनं भवतीति नात्यन्तमाग्रहो भवेत् । अन्यथा अपघातमरणे यमादयो वा मा गृह्णन्त्विति अन्यनिषेधः ॥ ४० ॥

श्रीसुबोधिनी–सारः

मंगलं मंगलार्थं च वाचयामास ब्राह्मणः । पत्रमेकांततो दत्तं रुक्मिण्या परमंगलम् ॥ १ ॥

तत्र तद्वाक्यम् । भुवनसुन्दर हे अच्युत शृण्वतां पुंसां कर्णच्छिद्रैरंतः प्रविश्यांगतापं हरतस्ते तव गुणान् श्रुत्वा दृशिमतां चक्षुष्मतां दृशां नेत्राणां सर्वार्थप्रदं रूपं च श्रुत्वाऽपत्रपं निर्लज्जं मे मम चित्तं त्वयि प्रविशति ॥ ३७ ॥ हे मुकुन्द हे नृसिंह कुलादिभिः स्वात्मयोग्यं नरलोकस्य मनसामभिरामो यस्मिस्तं पतिं त्वा त्वां कुलवती महती पूज्या धीरा का कन्या न वृणीत काले समये ॥ ३८ ॥ हे विभो तत्तस्मान्मे मया भवान् पतिर्वृतः खलु एवात्मा च भवतोऽर्पितः अतो मां जायां पत्नीं त्वं कुरु हे अंग हे अंबुजाक्ष वीरस्य तव भागं मामत्र पुरे चैद्यः शिशुपालो मा स्पृशतु आराच्छीघ्रमागत्य समीपे वा मृगपतेः सिंहस्य बलिं गोमायुवत्सृगाल इव ॥ ३९ ॥ इदमेव भूयादिति प्रार्थयते । पूर्तेष्टदत्तानां लक्षणमुक्तं प्राक् नियमो भक्ष्यादेः व्रतं चांद्रायणादि देवब्राह्मणगुरुपूजनादि भजनश्रवणादि तैः यदि परेशो विष्णुर्भगवानाराधितः समर्चितोऽलं भृशं तर्हि एत्याऽत्रागत्य गदाग्रजः श्रीकृष्णो मे मम पाणिं हस्तं गृह्णातु । येऽन्ये दमघोषपुत्रादयस्ते न गृह्णन्तु ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

रुक्मिण्याः सन्देशं च पृथक्तया वर्णयति—श्रुत्वेति । तत्र तावत् स्वमोहं सूचयन्ती सम्बोधयति—भुवनसुन्दरेति । 'न च्यवन्ति भक्ता यस्य सोऽच्युतस्तयाविधस्य ममाङ्गीकारो युक्त एव' इति सूचयन्ती पुनः सम्बोधयति—अच्युतेति । स्वगुणान् शृण्वतां जनानां कर्णरन्ध्रैरन्तः प्रविश्य अङ्गतापं अध्यात्मिकादि दुःखं हरतः ते तव गुणान् तथा दृशिमतां चक्षुष्मतां च दृशां चक्षुणां च अखिलार्थानाम् अनुकूलविषयाणां लाभो यस्मात्तथाभूतं तव रूपं च श्रुत्वा अपत्रपं निर्लज्जं सत् मे चित्तं त्वय्येवाविशति आसज्जते ॥ ३७ ॥ 'अहो कुलकन्यायास्तवैवं धाष्टर्यं न युक्तम्' इति शङ्कीरित्याह—केति । हे मुकुन्द मुक्तिप्रद ! हे नृसिंह नरश्रेष्ठ ! का नाम कन्या कुलवती महती गुणोदारा तथा धीरा वशीकृतचित्ता गुणशीलादिभिरात्मनैव तुल्यं निरुपमं तथा नरलोकस्य मनसामभिरामोऽभिरमणं यस्मात्तमतीव प्रियं त्वा त्वां काले विवाहयोग्यसमये पतिं न वृणीत ? । अतो न केवलं मय्येवेयं दोषाशङ्केत्याशयः । कुलं महति कुले जन्म । शीलं सुस्वभावः । रूपं सौन्दर्यम् । विद्या वैदिकी, लौकिकी च । वयस्तारुण्यम् । द्रविणं धनसञ्चयः । धाम तेजः ॥ ३८ ॥ स्नेहं सूचयन्ती सम्बोधयति–अङ्गेति । 'भयशङ्का तु त्वयि नास्त्येव' इत्याशयेन पुनः सम्बोधयति—अजितेति । यस्मात् कुलशीलादिभिस्त्वं निरुपमस्तस्मात् मे मया भवान् खलु निश्चयेन पतिर्वृतः, आत्मा स्वदेहादिसङ्घातश्च भवतेऽर्पितः । अतस्त्वमत्रागत्य मां भवतो जायां भार्यां विधेहि सम्पादय । विपक्षे विलम्बे च बाधकमाह–मेति । स्वमोहे तत्सौन्दर्यं हेतुं सूचयन्ती सम्बोधयति—अम्बुजाक्षेति । वीरस्य तव भागं मां आरात् शीघ्रमागत्य चैद्यः शिशुपालो माऽभिमर्शतु मा स्पृशतु । तत्स्पर्शस्यायुक्तत्वे दृष्टान्तमाह–मृगपतेः सिंहस्य बलिं भागं गोमायुः शृगालो यथा स्पृशेत्तथेति ॥ ३९ ॥ 'अनेकजन्मार्जितसुकृतैरिदमेव फलं भवतु' इति प्रार्थयते—पूर्तेति । पूर्तं "वापीकूपतटाकादि देवतायतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयते" इति स्मार्तं कर्म, इष्टम् अग्निहोत्रादि वैदिकं कर्म, दत्तं सत्पात्रे हिरण्यादिदानम्, नियमस्तीर्थस्नानादिनियमः, व्रतं कृच्छ्रादिनियमः, व्रतं कृच्छ्रादि, देवादीनामर्चनम्, आदिशब्देन प्राणिदयादिसङ्ग्रहः । एभिर्यदि परेशः ब्रह्मादिनियन्ता भगवान् अलं मयाऽऽराधितस्तदा तेन प्रसन्नो गदाग्रजः कृष्ण एव एत्य आगत्य मम पाणिं गृह्णातु, न त्वन्ये दमघोषसुतादयो शिशुपालादयः ॥ ४० ॥

अन्वितार्थप्रकाशिका

अनया मे सप्तपद्या जातः सप्तपदीविधिः ध्रुवं भर्तेति बोधाय सप्तश्लोक्याऽर्थ्यते । हरिः रुक्मिण्या स्वयमेकान्ते लिखित्वा दत्तपत्रिकां प्रदर्श्य तां वाचयति विप्रो भगवदाज्ञया रुक्मिण्युवाचेति द्विजोक्तिः । श्रुत्वेति । हे भुवनसुन्दर ! हे अच्युत ! शृण्वतां

जनानां कर्णविवरैः कर्णरन्ध्रै रन्तः निविश्य प्रविश्याङ्गानां तापं दुःखम् अङ्गेति सम्बोधने वा हरतः ते तव गुणान् तथा दृशिमतां चक्षुष्मतां दृशां चक्षुषां च अखिलार्थानाम् अनुकूलविषयाणां लाभो यस्मात्तथाभूतं तव रूपं च श्रुत्वा क तव गुणाः काहमयोग्या तथापि अपत्रपं निर्लज्जं सन्मे चित्तं त्वय्येवाविशति आसज्जते ॥ ३७ ॥ कन्याया मम धाष्टर्यं मा शङ्कीत्याह—केति। हे मुकुन्द ! हे नृसिंह नरश्रेष्ठ ! का नाम कन्या कुलवती महती गुणोदारा तथा धीरा वशीकृतचित्ता कुलं महति कुले जन्म शीलं सुस्वभावः रूपं सौन्दर्यं विद्या वैदिकी लौकिकी च वयस्तारुण्यं द्रविणं धनसञ्चयः धाम तेजः तैः आत्मनैव तुल्यं नान्येन निरुपममित्यर्थः। तथा नरलोकस्य मनसामभिरामोऽभिमरणं यस्मात्तमतीव प्रियं त्वा त्वां काले विवाहयोग्यसमये पतिं न वृणीत अपि तु सर्वापि वृणीत। अतो मय्येव केयं दोषशङ्केति भावः। या तु त्वां न वृणीत सा नूनं कुरूपा दुःशीला कुबुद्धिरनभिजातैवेति भावः ॥ ३८ ॥ तदिति। अङ्ग हे विभो ! हे अम्बुजाक्ष ! तत्तस्मान्मे मया भवान् खलु निश्चयेन पतिर्वृतः आत्मा स्वदेहादिसंघातश्च भवतः भवतेऽर्पितः। शेषे षष्ठी। अतस्त्वमत्रागत्य मां भवतो जायां भार्यां विधेहि सम्पादय। वीरस्य तव भागं माम् आरात् शीघ्रमागत्य निकटमागतो वा चैद्यः शिशुपालो माऽभिमर्शतु मा स्पृशतु। अन्यथा ते लज्जा स्यादिति भावः। गुण आर्षः। तत्र दृष्टान्तः। मृगपते सिंहस्य बलिं भागं गोमायुः सृगालो यथा स्पृशेत्तथेति ॥ ३९ ॥ पूर्त्तेति। पूर्त्तं "वापीकूपतटाकादि देवतायतनानि च। अन्नप्रदानमारामः पूर्तमित्यभिधीयते।" इति स्मार्त्तकर्म इष्टम् अग्निहोत्रादि वैदिकं कर्म दत्तं सत्पात्रे हिरण्यादिदानं नियमस्तीर्थस्नानादि व्रतं कृच्छ्रादि देवादीनामर्चनम् आदिशब्देन प्राणिदयादिसंग्रहः एभिर्यदि परेशो गदाग्रजः भगवान् अलमत्यर्थं मयाऽऽराधितस्तदा तेन प्रसन्नो गदाग्रजो भवानेवेत्युभयान्वयः, एत्य आगत्य मम पाणिं गृह्णातु। अन्ये दमघोषसुतादयः शिशुपालादयस्तु न गृह्णन्तु ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वयं लिखित्वारह। सिक्मिण्यर्पितकाकुदम्। प्रदृश्य तं वाचयति ब्राह्मणस्त्वाज्ञया हरेः ॥ १ ॥

तदाह सप्तभिः श्रुत्वेति। हे भुवनसुंदर स्वरूपस्वभावगुणैः सर्वचित्ताकर्षकलोकोत्तरसौंदर्ययुक्त। शृण्वतां जनानां कर्णविवरैः अंतःकरणैर्निविश्य तापं हरतः, अतः अंग हे हरे। ते गुणान् सत्यशौचैश्वर्यादीन् श्रुत्वा दृशिमतां दृशां नेत्राणां अखिलार्थलाभं। तत् रूपं च श्रुत्वा। हे अच्युत अक्षयमूर्त्ते। अपत्रपं लज्जारहितं सत्। मे चित्तं स्वाभिमतानुरूपैकरूपाचिंत्यनित्याद्भुतनिरवद्यनिरतिशयौज्ज्वल्यसौंदर्यसौगंध्यसौकुमार्यलावण्ययौवनाद्यनंतस्वरूपगुणनिधौ त्वयि। आविशति सम्यक् प्रविशति ॥ ३७ ॥ अहो एतत्कुलीनकन्यानामनुचितमित्याशंक्य तन्निराकरोति केति कुलशीलेति गुणशीलेति च पाठः। कुलस्वभावादिभिः आत्मतुल्यं स्वसमानं लोकमनोभिरामं त्वां पतिं हे मुकुंद हे नृसिंह। धीरा कुलवती महती का कन्या काले विवाहकाले न वृणीत ॥ ३८ ॥ अथ व्याकुला सती क्रियात्रयेणोत्तरोत्तरं स्पष्टमेवाह तदिति तत् तस्मात्। अंग हे विभो मे मया भवान् पतिः वृतः खलु निश्चितं भवतस्तुभ्यं आत्मा देहश्चार्पितः। अतोऽत्र त्वमागत्य तव जायां पत्नीं मां विधेहि कुरु। तदन्यथाकरणमयोग्यमित्याह हे अंबुजाक्ष मृगपतेर्बलिं सिंहभागं गोमायुवत् शृगाल इव। वीरभागं वीरस्य समर्थस्य तव भागं त्वदीयां मां चैद्यः। शिशुपालः। आरात् तूर्णं समेत्य माभिमर्शतु मा स्पृशतु न गृह्णात्वित्यर्थः ॥ ३९ ॥ नन्वेतत्पुण्यैर्विना कथं स्यादित्याशंक्यानेकजन्मसुकृतान्यर्पयंती प्रार्थयते। पूर्तेति। पूर्त्तं वापीकूपतडागादि। इष्टं यज्ञकर्म। दत्तं कांचनाभ यदानादि, नियमः स्वधर्मपालनम्। व्रतं एकादशी चांद्रायणादि। दमघोषसुतः। शिशुपालस्तदादयः ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

श्रुत्वेति ॥ अङ्गति सर्वशरीरिणोऽन्तरात्मतया प्राप्नोतीति तत् संबोधने हे अङ्ग सर्वान्तरात्मन्, हे अच्युत, हे भुवनसुन्दर, शृण्वतां कर्णविवरैः निर्विश्य प्रविश्य अन्तरिति शेषः। तापं त्रिविधपरितापं, हरतो निवर्त्तयतः, ते तव, गुणान् निष्कारणापारकारुण्यादीन्, दृशिमतां चक्षुष्मतां, दृशां चक्षुषाम्, अखिलानामर्थानामनुकूलविषयाणां लाभो यस्मात्तथाविधं, रूपं त्वत्सौन्दर्यं श्रुत्वा, मे मम, चित्तं, अपत्रपं निर्लज्जं सत्, त्वयि आविशति प्रसज्जते। अत्राङ्गेति मैत्रीद्योतकं संबोधनम्। भुवनसुन्दरेत्यौत्सुक्यताद्योतकं चित्तक्षोभद्योतकं वा। यद्वा। अङ्गेति संबुद्ध्यादौ मम सर्वान्तरात्मता त्वयोक्ता स च दृश्यो न भवतीत्याशङ्कानिवृत्तये भुवनसुन्दरेति संबुद्धिरुक्ता। तया त्वं सर्वान्तरात्मा सन्नपि भुवनसुन्दरताभागसि, तथाविधं तवैश्वर्यमस्तीति द्योतितम्। नन्वेवं विधसुन्दरताभाग्वपुष्मतां च्युतीक्षणान्ममापि मत् संबन्धवत्यास्तेऽखण्डसौभाग्यताभाक्त्वनिवृत्तिः स्यादित्याशङ्कानिवृत्तये हे अच्युतेति संबुद्धिः कृता, तया चाखिलसौन्दर्यभाजस्त्वदाकृतेश्च्यवनधर्मरहितत्वादहमखण्डसौभाग्यवत्येव भविष्यामीत्यपि सूचितम्। ननु मामेवं जानासि चेल्लौकिकरूपकुलशीलादियुक्ता त्वं क, त्वदभिहितमहिमाभागहं क्वेत्यावयोरननुरूपत्वात् कथं मयि चित्तं योजयसीत्याशङ्कानिवृत्तयेऽपत्रपमिति चित्तविशेषणं कृतं तेनापत्रपाणां चेतः कस्मिन् मनोरथे न प्रवर्त्तते, अपि तु सर्वत्र प्रवर्त्तते अतो न बाधः ॥ ३७ ॥ अहो कुलजानां कन्यानामिदमतिधार्ष्ट्यमिति मा शङ्किष्ठा इत्याह ॥ का त्वेति ॥ हे मुकुन्द मुक्तिदायिन्, हे नृसिंह नरश्रेष्ठ, गुणाश्च शीलं, च रूपं च विद्या च वयश्च द्रविणं च धाम च तैः, तत्र गुणाः कारुण्यवात्सल्यौदार्यादयः, शीलं सुस्वभावत्वं, रूपं सौन्दर्यं, विद्याः कलासहिता अष्टादशापि विद्याः, वयस्तारुण्यं द्रविणं संपत्, धाम तेजः प्रभाव इति यावत्। आत्मतुल्यं आत्मनैव तुल्यं निरुपममित्यर्थः। तथा नरलोकस्य मनसोऽभिराममतीवानुकूलविषयभूतं त्वा त्वां, कुलवत्युत्कृष्टकुलोत्पन्ना, महती गुणोदारा, धीरा स्थिरचित्ता, का कन्या काले विवाहावसरे, पतिं पतिभावेनेत्यर्थः। न वृणीत। तेन न

मय्येव केवलं दोषशङ्केति भावः ॥ ३८ ॥ तदिति ॥ हे विभो तत्तस्मात्, मे मया, भवान् पतिः वृतः खलु । आत्मा च, भवतः तुभ्यम्, अर्पितः । अतः, अङ्ग हे कृष्ण, जायां, विधेहि । त्वमत्रागत्य मां हृत्वा भवतो जायां कुर्वित्यर्थः । विपक्षे बाधकं द्योतयन्त्याह । हे अम्बुजाक्ष, मृगपतेः सिंहस्य, बलिं गोमायुवत् शृगाल इव, वीरभागं वीरस्य तव भागभूतां मां, चैद्यः शिशुपालः, आराच्छीघ्रमागत्येत्यर्थः । मा अभिमर्शतु । न स्पृशत्वित्यर्थ ॥ ३९ ॥ अनेकजन्मार्जितसुकृतैरिदमेव मे भूयादिति प्रार्थयति ॥ पूर्त्तेति ॥ पूर्तं च इष्टं च दत्तं च नियमश्च व्रतानि च देवविप्रगुर्वर्चनानि च तान्यादयो येषां तैः, तत्र पूर्त्तं वापीकूपतडागादिनिर्माणात्मकं स्मार्त्तकर्म, इष्टं वैदिकं यागादिकर्म, दत्तं दानं सत्पात्रे हिरण्यादिद्रव्यत्यागात्मकं नियमस्तीर्थाटनादिसमाचरणं, व्रतानि कृच्छ्राचरणादीनि, देवादीनां द्वन्द्वः । तेषामनर्चनं यथाविधि पूजनम्, आदिशब्देन भूतहितत्वादिकसंग्रहः । एभिः यदि, परेशः परमेश्वरः भगवान् अलमतिशयेन, आराधितः स्यात् तर्हि गदाग्रजः श्रीकृष्णः एत्य तूर्णमागत्य, मे मम, पाणिं गृह्णातु । अन्ये, दमघोषप्रसुतादयः, न नैव गृह्णन्त्वित्यर्थः ॥ ४० ॥

कृष्णप्रिया

श्रीरुक्मिणी सात श्लोकों से नाथ को आत्मसमर्पण कर रही है । अथवा तो सदापदी की प्रतिज्ञा कर रहीं है । भगवान के षड् ऐश्वर्य एवं स्वयं धर्मी भगवान् के श्रीचरणों में समर्पण निष्ठा से सात श्लोकों में निवेदन है—हे त्रिलोकसुन्दर आपके लोकोत्तर गुणों का एवं सौन्दर्य का मुनिवरों के मुख कमलों से श्रवण किया । उन गुणों की यह महिमा है कि श्रोताजन के श्रवण पथ से हृदय देश में प्रविष्ट होकर सर्वाङ्ग सन्ताप-जन्मजन्मातर की जलन बुझा देते हैं और आपके रूप-सौन्दर्य नेत्रवाले आत्माओं के नेत्रों के लिये धर्म अर्थ काम मोक्ष चारों पुरुषार्थों को देनेवाला है, इन दोनों का श्रवण किया तब से हे अच्युत ! मेरा चित्त लज्जा संकोच आदि को छोड़कर आप में ही प्रविष्ट हो गया है ॥ ३७ ॥ हे मुकुन्द ! हे आनन्दमय भगवन् ! कुल-शील रूप-विद्या-अवस्था धन एवं धाम आदि दिव्य तत्व आप के आप के ही समान है अलौकिक है और अनुपम है । सारे ब्रह्माण्ड में आप ही सर्वाङ्ग सुन्दर है । ऐसी कौन विवेक शालिनी धैर्यमयी कुलवती कन्या होगी जो विवाह योग्य वय में आप को ही पति के स्वरूप में वरण करेगी ॥ ३८ ॥ हे विभो ! हे कृपानिधान ! यह समझकर आपको ही मैंने पति रूप में वरण किया है आत्म समर्पण भी मैंने आपके श्रीचरणों में किया है । आप तो मेरे हृदय में विराजमान हैं और अन्तर्यामी हैं । हे कमललोचन हे प्राणनाथ हे अङ्ग ! मैं आपकी पत्नी बन चुकी हूँ अब तो जाया बनने का मनोरथ को सफल कीजिये । अब तो यह अनुग्रह कीजिये कि जैसे सिंह का सियार छू जाय वैसे शिशुपाल कहीं मुझे दूर से भी न छू जाय । मैं तो नृसिंहजी की ही पत्नी हूँ ॥३९॥ यदि जन्म जन्मान्तर में अथवा बाल्यकाल के खेल कूद में भी आठ प्रकार के सुकृतों में "पूर्व-कूआँ वापिका आदि जल सेवा, "इष्ट" यज्ञ याग आदि, "दत्त" तुलादि रत्न सुवणादि दान "नियम" किसी पदार्थ का या आम्रादि अभीष्ट फलादि पदार्थ का त्याग "व्रत" पुंसवन पयोव्रत नक्त भोजन चातुर्मास आदि ब्रत, देवार्चन विप्रार्चन और गुरुपूजन आदि सुकृतों से पुरुषोत्तम प्रभु का आदर भक्ति से यदि समर्चन किया हो और स्वयं प्रसन्न हो तब गद कुमार के ज्येष्ठ बन्धु भगवान् श्रीकृष्ण यहाँ पधार कर मेरा पाणिग्रहण करें लेकिन शिशुपाल आदि कोई अन्य पुरुष स्वप्न में भी मेरा स्पर्श न करें ॥ ४० ॥

श्वोभाविनि त्वमजितोद्वहने विदर्भान् [1]गुप्तः समेत्य पृतनापतिभिः [2]परीतः ।
निर्मथ्य चैद्यमगधेशबलं[3]प्रसह्य मां राक्षसेन विधिनोद्वह वीर्यशुल्काम् ॥ ४१ ॥
अन्तःपुरान्तर[4]चरीमनिहत्य बन्धूंस्त्वामुद्वहे कथमिति प्रवदाम्युपायम् ।
पूर्वेद्युरस्ति महती [5]कुलदेवियात्रा यस्यां बहिर्नववधू[6]र्गिरिशामुपेयात्[7] ॥ ४२ ॥
[9]यस्याङ्घ्रिपङ्कजरजःस्नपनं महान्तो वाञ्छन्त्युमापतिरिवात्मतमोऽपहत्यै[8] ।
यर्ह्यम्बुजाक्ष न लभेय भवत्प्रसादं जह्यामसून् व्रतकृशा[10] शतजन्मभिः स्यात् ॥ ४३ ॥

[11]ब्राह्मण उवाच

इत्येते गुह्यसंदेशा यदुदेव मयाऽऽहृताः । विमृश्य [12]कर्तुं यच्चात्र क्रियतां तदनन्तरम् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे[13] दशमस्कन्धे[14] रुक्मिण्युद्वाहप्रस्तावे [15]द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

---

१. गुप्तान्–विज. । २. समेतैः । ३. मगधेन्द्र–श्रीधर. वंशी. जीव. वीर. विज. बिश्व. शुक. । ४. चरान्नवि–विज. । ५. देव–विज. । ६. गिरिजा–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. । ७. मुपेयां–वीर. । ८. निहत्यै–विज. ।

९. तत्रैत्य मां रथपदातिगजाश्वयुक्तः संमथ्य शाल्वमगधान्सहचेदिभूपान् ।
आदाय मां सहचरीभिरथो रमेशो गृह्णातु पाणिमुपनीय पुरीं स्वकीयाम् ॥–अधिक. विज. ।

१०. शाञ्छ–श्रीधर. वंशी. जीव. वीर. विश्व. शुक. सु. ; कृशा–विज. ।

११. **श्रीशुक उवाच**––इति पत्रगतं विश्वं विमृश्य मधुसूदनः । संदेशं राजकन्यायाः तं ब्राह्मणमवैक्षत ॥ अधिकः विज० ।

१२. कृत्यं–वीर० ; युक्तं–विज. । १३. पारमहंस्यां संहितायां–प्रा. पा. । १४. उत्तरार्द्धे–प्रा. पा. । १५. सप्तपञ्चाशत्तमो–विज. ।

कर्दमक्षमा

अन्वयः—हे अजित ! श्वोभाविनि, उद्वहने, त्वम्, पृतनापतिभिः, परीतः; गुप्तः, विदर्भान्, समेत्य, चैद्यमगधेन्द्रबलम्, प्रसह्य; निर्मथ्य, वीर्यशुल्काम्, माम्, राक्षसेन, विधिना, उद्वह ॥ ४१ ॥ अन्तःपुरान्तरचरीम्, त्वाम्, बन्धून्, अनिहत्य कथम्, उद्वहे ! इति चेत् ? उपायम्, प्रवदामि, पूर्वेद्युः, महती, कुलदेवियात्रा, अस्ति, यस्याम्, नववधूः, बहिः, गिरिजाम्, उपेयात् ॥ ४२ ॥ हे अम्बुजाक्ष ! उमापतिः, इव, महान्तः, आत्मतमोऽपहत्यै, यस्य, अङ्घ्रिपंकजरजः स्वपनम्, वाञ्छन्ति, यर्भि, भवत्प्रसादम्, न लभेय, स्यात्, शतजन्मर्हिः, व्रतकृशान् असून्, जह्याम् ॥ ४३ ॥ ब्राह्मण उवाच, यदुदेव ? इति, इत्येतै मुह्यसंदेशा, मया, आहृताः, अत्र विमृश्य, यत्, च कर्तुम्, तत्, अनन्तरम्, क्रियताम् ॥ ४४ ॥

इति द्विपञ्चाशत्तमाध्यायस्यान्वयाः समाप्ताः ॥ ५२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु चैद्याय बंधुभिरर्पितायां त्वयि किमधुना करणीयमित्यपेक्षायामाह । श्वोभाविनीति । हे अजित **श्वोभाविनि उद्वहने** विवाहे प्रथमं गुप्तोऽलक्षित एवागत्य पश्चात्पृतनापतिभिः परिवृतः संश्चैद्यादिबलं निर्मथ्य प्रसह्य बलाद्वीर्यं प्रभावदर्शनमेव शुल्कं वैवाहिकं देयं यस्यास्तां माम् । अनेन राक्षसविधिनोद्वहेत्युपदेशरहस्यम् ॥ ४१ ॥ ननु भवतु शिशुपालादिबलप्रमथनमंतःपुरमध्यगतायास्तव हरणे त्वद्बंधुवधोऽपि प्रसज्येतेत्यत आह । अंतःपुरेति । पुराद्बहिर्वर्तमानां गिरिजामंबिकाम् । अंबिकागृहादेव मम हरणं सुकरमिति भावः ॥ ४२ ॥ ननु किमनेनानर्थकारिणा निर्बंधेन चैद्योऽपि तावत्प्रख्यातगुणकर्मा योग्य एव वर इति तत्राह । यस्येति । हे अम्बुजाक्ष यस्य भवतोंघ्रिपंकजरजःस्नपनमात्मनस्तमसोऽपहत्यै उमापतिरिव महांतो वांछंति । तस्य भवतः प्रसादं यर्ह्यहं न लभेय न प्राप्नुयां तर्हि व्रतैरुपवासादिभिः कृशानसून्प्राणान् जह्यां त्यजेयम् । ततः किमित्यत आह । शतजन्मभिरिति । एवमेव वारंवारं जह्यां यावच्छतजन्मभिरपि तव प्रसादः स्यादिति ॥ ४३ ॥ अत्र यत्कर्तुं करणीयं तद्विमृश्य क्रियतामिति ॥४४॥

इति श्रीमद्भा० म० दशमस्कंधे उत्तरार्धे श्री० टीकायां द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विवाहार्थमागतबहुराजसु पाणिग्रहाऽसंभवसंदेहापनोदार्थमाह—चैद्यायेत्यादिना । श्वोभाविनीति—**श्वः** प्रभाते विवाहो भविष्यतीति विचार्य ततोऽग्र एवागत्येत्यर्थः । विवाहार्थं देयं वैवाहिकदेयम् । अनेन मदुक्तेन । निजाऽतिवैयग्र्येण स्वयमेवोपायमप्युपदिशति द्वाभ्याम्—**श्व** इति । गुप्तः ख्यापितैर्नामदेशभाषांतरैः केनाप्यनुपलक्षितः । सम्यगेत्यांतः प्रविश्येत्यर्थः । पृतनानां पतिभिरिति सैन्यस्य तत्पतीनां ध बाहुल्यमभिप्रेतं, तच्च स्नेहस्वाभाव्येन । तत्र तु हे अजितेति एतादृशप्रेरणसाहसे हेतुरुक्तः । तत्र मगधेशबलस्यापि निर्मथनं चैद्यसहायत्वात् । निर्मथ्येति बलस्य समुद्रत्वं ध्वन्यते । तेन च यथा पूर्वं समुद्रमुन्मथ्य मामुद्धृतवानसि तथाऽद्यापि चैद्यादिबलार्णवमुन्मथ्य मामुद्धरेति । वीर्यशुल्कामिति राक्षसविवाहस्यैव योग्यता, प्रार्थनादिनिरपेक्षता चोक्ता । कार्यसिद्धिस्त्वजितत्वादेव भविष्यतीति ॥ ४१ ॥ पुनराशंक्य समाधत्ते—नन्विति । पूर्वेद्युर्विवाहात्पूर्वस्मिन्दिने । कुलदेवानां कुलपूज्यानां पितृणां देवानां च यात्रा । नववधूरुपस्थितविवाहा कन्या । "वधूः स्त्री सारिवौषधौ । स्नुषाशटीनवोढासु भार्यापृक्कागतासु च ।" इति मेदिनी । अतोऽप्यतिव्यग्रा श्वोभाविनीत्यत्र कारणं विवृण्वती पुनर्विशेषतोप्युपदिशति—अंतःपुरस्यापि मध्यप्रकोष्ठान्तश्चरीम् । पूर्वेद्युर्विवाहदिनात्पूर्वस्मिन्दिने । कुलदेवयात्रेति तस्या आवश्यकत्वमुक्तम् । ननु पूर्वेद्युरपि कस्मिन्क्षणे भवेदिति कथं ज्ञेयं तत्राह—महती महावाद्याद्युत्सवेन सा सुव्यक्तैवेत्यर्थः । उपेयात् पूजार्थमंतिके गच्छतीति विधिरस्तीत्यर्थः ॥ ४२ ॥ पुनराशंक्य समाधत्ते—नन्वित्यादिना । निर्बंधेन हठेन 'निर्बंधो हठमुक्तयोः' इति धरणिः । तत्राक्षेपे । महान्तो ब्रह्मेन्द्रादयः । अहो अयं महादेवोऽपि भगवत्पदरजो यस्मिँस्तत्र प्रवाहे गंगारूपे स्नपनं सदा करोति, वयं देवाः कथं न तत्कुर्म इतीच्छन्ति । तस्योमापत्याद्याराध्यस्य आत्मनस्तमसोऽज्ञानस्यापहत्यै नाशाय महान्त एव न तूमा पतिरपि, तस्य तु 'ज्ञानं महेश्वरादिच्छेत्' इति स्मृतेरन्येषां ज्ञानदातृत्वेन परमज्ञानित्वम् । तत्पक्षे तु किंभूत उमापतिः—आत्मतमः साक्षाच्छ्रीकृष्णरूपः—प्रकर्षेणात्मा श्रीकृष्णरूप आत्मतमः 'आत्मा सर्वेश्वरः साक्षी' इति कृष्णसहस्रनामस्वात्मशब्दस्य पठितत्वात् । तर्हि स किमर्थं सेवते तत्राह—अपगता हतिर्नाशो यस्याः साऽपहतिर्मर्यादा तस्यै । सा च द्विधा—लौकिकी वैदिकी च । उभयविधैवाऽत्याज्या । "श्रुतिस्मृतिपुराणोक्तं लंघयेन्न कदाचन । लंघनात्प्रत्यवायी स्यात्ततोंते नरकं व्रजेत् ।" इत्युक्तेः । किञ्च—"यद्यपि स्यात्स्वयं ब्रह्मा त्रैलोक्याऽऽकर्षणक्षमः । तथापि लौकिकाचारं मनसापि न लंघयेत् ।" इति स्मृतिसारोक्तेः । सा चेत्थं बोध्या—यद्यहं श्रीहरिं न सेविष्ये तर्हि मद्भक्ता अपि तं न सेविष्यन्ते, तेन तेऽधोगामिनः स्युः "हरिभक्तिपरित्यागादन्ते नरकमाप्नुयात्" इत्युक्तेः यद्वा—तमः प्रवर्तकमपि मामल्पज्ञास्तामसं वदंति तन्निरासायाहमपि हरिभक्तिं सेवे, तेन सर्वे मां शुद्धसत्त्वमेव ज्ञास्यंति । न हि तामसः कदापि हरिं सेवते, हरो न तामस इति ज्ञापनायेत्यर्थः । ततः प्राणत्यागेन । यावत्तव प्रसादः स्यात्तावदेवमेव कुर्यां, यदा कदाचित्तवैव भार्या स्यां, नान्यस्य देवस्यापि । किमु शिशुपालस्येति भावः । स्नपनशब्देन रजसां गंगाप्रभवत्वादिना सर्वतीर्थममत्वं ध्वन्यते । यद्वा—

रजसः स्नपनं क्षालनोदकमित्यर्थः। महान्तः श्रीब्रह्माद्याः। आत्मनस्तमस्तमो गुणाधिष्ठातृत्वं तस्यापहत्यै। उमायाः पतिरिति-यथात्मारामेणापि श्रीशिवेन तद्भक्तिवशतया यत्नेनोद्वोढा सा तथा त्वयाप्यहमुद्वोढव्येति भावः। अतः परममहत्त्वेन त्वमेव योग्यः पतिर्न त्वन्यः कश्चिदिति भावः। तथा परमसौंदर्येणापीत्याह–हे अम्बुजाक्षेति। तस्येति यच्छब्दापेक्षत्वात्। भवदिति छांदस एव षष्ठ्या लुक्। यदि भवतः प्रसादं पत्नीत्वेनाङ्गीकारलक्षणं न लभेय तदा जह्यामिति "हेतुहेतुमतोर्लिङ्"। तत्र जह्यामिति कामप्रवेदने, प्रौढ्या संभावने च स्यात्। त्यागप्रकारमाह–व्रतकृशान्। शतेति–एवं कृपार्थं दुःखमरणं बोध्यते। यद्वा–स्वत एव त्वदर्थं व्रतैः कृशान्, अधुना त्वत्प्रसादाऽलब्ध्या निर्गच्छतोऽनायासेनैव जह्यामित्यर्थः। इति मरणस्य सुकरत्वमुक्तम्। ततश्चैवं शतजन्मभिरपि स्यात्। व्रतकृशेति पाठे स एवार्थः। शतशब्दोऽयमनिर्णयसंख्यात्वे। अन्यत्तैः। किन्तु स्वस्या नरकन्यालीलामाविश्योक्तिरियम्। यथा–ननु त्वं मे न पत्नी योग्यासीति कथमुद्वहेयमिति चेत्सत्यमेव, यतः श्रीब्रह्मादीनामपि सुदुर्लभ्योऽसि, क्वाहं क्षत्रियकन्या, तथापि बहुजन्मसु प्राणपरित्यागेनापि त्वदर्थं यतिष्य इत्याह–यस्येति। वांछत्येव न त्वद्यापि लभते। अतः स्यादिति संभावनायामेव लिङ्। शतजन्मभिरसून्जह्याम्, शतजन्मभिर्वा प्रसादः स्यादित्येतदर्थः। कुतः–तत्राह–हे अम्बुजाक्षेति। परममाधुर्येण मनोव्याकुलताविधानादेवेति भावः। यद्वा–नन्वहमंतर्गोपिकाविरहदूनो न करिष्याम्येव विवाहं तस्मादन्यमेव गुणरूपाभ्यां महान्तं कंचिद्वृण्वित्याशंक्योपायान्तरमपश्यन्ती दुरंतां मरणपर्यन्तां निजकृच्छ्रपरंपरामुद्दिश्य करुणयाऽधर्मभयेन च तं प्रत्यावर्तयति–यस्येति ॥ ४३ ॥ गुह्यत्वेन संदेशानां गौरवं, बहुवचनेन नानाप्रकारत्वाद्युक्तिमत्त्वं च, स्वस्य च परमविश्वसनीयत्वं निःशेषवक्तृत्वं च व्यंजितम्। तथा त्वयापि गोपनीया एवेति। अन्यथा तस्या बंधुषु लज्जाद्युत्पत्तेः। मया आहृता आनीता इति, मम तु कृत्यमेतदेवेति भावः। विमृश्येति विनयभरेण, स च सम्यक्प्रवर्तनार्थम्। वयं ब्राह्मणा ऋजव एव, सर्वोपरि बुद्धिस्तवैवेतिः भावः। तत्र गुह्यत्वे सति यदुभिर्मंत्रणं विना न स्वयं कर्तुमुत्सहे इति न वाच्यं, यतः हे यदुवर तव बुद्धिवलाधीना एव तेपीति भावः। तस्माद्युत्कर्तव्यं तत्त्वनंतरमेव क्रियतां, प्राप्तावसरत्वान्मंत्रणादिविलंबं न सहत इति भावः ॥ ४४ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे उत्तरार्द्धे द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निजातिवैयग्र्येण स्वयमेवोपायमप्युपदिशति द्वाभ्याम् श्व इति। गुप्तः ख्यापितैर्नामदेशभाषान्तरैः केनाप्यनुपलक्षितः सम्यक् एत्य अन्तः प्रविश्येत्यर्थः। पृतनानां पतिभिरिति। सैन्यस्य तत्पतीनां च वाहुल्यमभिप्रेतं तच्च स्नेहस्वाभाव्येन तत्र तु हे अजितेति एतादृशप्रेरणासाहसे हेतुरुक्तः तत्र मगधेशबलस्यापि निर्मथनं चैद्यसहायत्वात् निर्मथ्येति बलस्य समुद्रत्वं ध्वन्यते तेन च पूर्वं यथा समुद्रं निर्मथ्य मामुद्धृतवानसि तथाधुनापि चैद्यादिबलार्णवं निर्मथ्य समुद्धरेति। वीर्य्यशुल्कामिति। राक्षसविवाहस्यैव योग्यता प्रार्थनादिनिरपेक्षता चोक्ता कार्य्यसिद्धिस्त्वजितत्वादेव भविष्यतीति ॥४१॥ ततोऽप्यतिव्यग्रा श्वो भाविनीत्यत्र कारणं विवृण्वती पुनर्विशेषतोऽप्युपदिशति। अन्तःपुरस्यापि मध्यप्रकोष्ठं यत्तच्चरीमितीति अत्रेत्यर्थः। पूर्वेद्युः विवाहपूर्वदिवसे कुलदेवयात्रेति तस्या आवश्यकत्वमुक्तम्। ननु पूर्वेद्युरपि कस्मिश्च क्षणे भवेदिति कथं ज्ञेयं तत्राह—महतीति। महावाद्याद्युत्सवेन सा सुव्यक्तैवेत्यर्थः। उपेयात् पूजार्थमन्तिके आगच्छतीति विधिरस्तीत्यर्थः ॥ ४२ ॥ स्नपनशब्देन रजसां गङ्गाप्रभत्वादिना सर्वतीर्थमयत्वं ध्वन्यते। यद्वा रजसः स्नपनं क्षालनोदकमित्यर्थः। महान्तः श्रीब्रह्मादयः आत्मनस्तमः, अज्ञानं तस्य हत्यै मूलतो विनाशाय उमापतिरिवेति दृष्टान्तः तस्य गङ्गाधरत्वेन रजःस्नपनवाञ्छायाः सुप्रसिद्धत्वात् तस्य च तमस्तमोगुणाधिष्ठातृत्वं तस्यापहत्यै उमायाः पतिरिति यथात्मारामेणापि श्रीशिवेन तद्भक्तिवशतया जन्मान्तरेऽप्युमा यत्नेनोद्वोढा तथा त्वयाप्यहमुद्वोढव्येति भावः। एवं परममहत्त्वेन त्वमेव पतिर्योग्यो नत्वन्यः कश्चिदिति भावः। तथा परमसौन्दर्य्येणापीत्याह—हे अम्बुजाक्षेति। तस्येति यच्छब्दाक्षेपात् भवदिति छान्दस एव षष्ठ्या लुक् यदि भवतः प्रसादं पत्नीत्वेन स्वीकारलक्षणं न लभेय तदा जह्यामिति हेतुहेतुमतोर्लिङ् तत्र जह्यामिति कामप्रवेदने प्रौढ्या सम्भावने च स्यात् त्यागप्रकारमाह—व्रतकृशान् शतेति एवं कृपार्थं दुःखमरणं बोध्यते। यद्वा स्वत एव त्वदर्थे व्रतैः कृशान् अधुना त्वत्प्रसादालब्ध्या स्वयमेव निर्गच्छतोऽनायासेनैव जह्यामित्यर्थः। इति मरणस्य सुकरत्वमुक्तं ततश्चैवं शतजन्मभिरपि स्यादिति व्रतकृशेति पाठे स एवार्थः शतशब्दोऽयमनिर्णेयसङ्ख्यत्वे अन्यत्तैः किन्तु स्वस्या नरकन्यालीलामाविश्योक्तिरियम्। यद्वा ननु त्वमेव न पत्नीयोग्यासीति कथमुद्वहेयमिति चेत् सत्यमेव यतः श्रीब्रह्मादीनामपि दुर्लभोऽसि क्वाहं क्षत्रियकन्या तथापि बहुलजन्मसु प्राणपरित्यागेनापि त्वदर्थं यतिष्य इत्याह—यस्येति। वाञ्छन्त्येव न त्वद्यापि लभन्ते अतः सम्भावनायामेव लिङ् शतजन्मभिर्वा प्रसादः स्यादित्येतदर्थमित्यर्थः। कुतस्तदाह—हे अम्बुजाक्षेति। परममाधुर्य्येण मनोव्याकुलताविधानादेवेति भावः। अथवा। नन्वहमन्तर्गोपिकाविरहदूनो न करिष्याम्येव विवाहं तस्मादन्यमेव गुणरूपाभ्यां महान्तं कञ्चिद्वृणु इत्याशङ्क्य उपायान्तरमपश्यन्ती दुरन्तां मरणपर्य्यन्तां निजकृच्छ्रपरम्परामुद्दिश्य करुणया धर्मभयेन च तं प्रत्यावर्त्तयति—यस्येति ॥ ४३ ॥ गुह्यत्वेन सन्देशानां गौरवं बहुवचनेन नानाप्रकारत्वाद्युक्तिमत्त्वं स्वस्य च परमविश्वसनीयत्वं निःशेषवक्तृत्वं च व्यक्तं तथा त्वयापि गोपनीया एवेति। अन्यथा बन्धुषु तस्या लज्जाद्युत्पत्तेः मया आहृता

आनीता इति मम तु कृत्यमेतावदेवेति भावः। विमृश्येति। विनयभरेण स च सम्यक् प्रवर्त्तनार्थः वयं ब्राह्मणा ऋजवः सर्वोपरि बुद्धिस्तु तवैवेति भावः। तत्र गुह्यत्वे सति यदुभिर्मन्त्रणं विना न स्वयं कर्त्तुमुत्सहे इति न वाच्यं यतः हे यदुदेव ! तव बुद्धिवलाधीना एव तेऽपीति भावः। तस्माद्यत्कर्त्तव्यं तत्त्वनन्तरमेव क्रियतां प्राप्तावसरत्वान्मन्त्रणादिविलम्बं न सहत इति भावः॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्यक् एत्य अन्तः प्रविश्येत्यर्थः। पृतनापतिभिः श्रीबलदेवगदादिभिरिति सैन्यस्य तत्पतीनाञ्च बाहुल्यमभिप्रेतम्। हे अजित तवाजितत्वेऽपि 'अनिष्टाशंकीनि बन्धुहृदयानि भवन्ति इत्यादि न्यायेन भयोत्पत्तेरित्यर्थः। निःशेषेण मथित्वा विलोड्य क्षोभयित्वेत्यर्थः। किंवा निर्म्मथ्य सर्वथा संहृत्येत्यर्थः। तत्र मगधेश-बलस्यापि निर्म्मथनं चैद्यसहायत्वात्, निर्म्मथ्येत्यनेन बलस्यानन्ततया समुद्ररूपत्वं ध्वन्यते, किञ्च, पूर्वं यथा समुद्रं निर्मथ्य मामुद्धृतवानसि, तथा अधुनापि चैद्यादिबलार्णवान्तःस्थामुद्धरेति, वीर्य्यशुल्कामिति राक्षविधानस्यैव योग्यताप्रार्थनादिनिरपेक्षता चोक्ता। यद्वा, नन्वेवं महायुद्धसंकटे कथं मां प्रवर्त्तयसि ? सदा सर्वत्रैव तव विजयप्रसिद्धेरित्याह—हे अजितेति ॥ ४१ ॥ अन्तःपुरं पुरस्य मध्यम्, तस्याप्यन्तरं मध्यम्, तत्रचरीमिति पितृभ्रात्रादिबन्धुवर्गपरिवेष्टिताया हरणेऽवश्यं तैः सह युद्धे तेषां वधस्त्वत्साक्षादेव स्यादिति कथं तान् नितरां शिरश्छेदादिनाहत्वेत्यर्थ इति, अत्र प्रकर्षेण निःसंशयत्वादिना वदामि। पूर्वेद्युर्विवाहपूर्व्वदिने कुलदेवयात्रेति तस्या आवश्यकत्वमुक्तम्। ननु पूर्वेद्युरपि कस्मिन् क्षणे भवेदिति कथं ज्ञेयम् ? तत्राह—महतीति महावाद्याद्युत्सवेन सा सुव्यक्तैवेत्यर्थः। उपेयात् पूजार्थमन्तिके गच्छेत् ॥ ४२ ॥ स्नपन-शब्देन रजसां गंगाप्रभवत्वादिना सर्व्वतीर्थमयत्वं ध्वन्यते, यद्वा, रजसः स्नपनं क्षालनोदकमित्यर्थः। महान्तः श्रीब्रह्मादयः, आत्मनस्तमोऽज्ञानं तस्यापहत्यै मूलतो विनाशाय, उमापतिरिवेति दृष्टान्तः—तस्य गंगाधरत्वेन रजःस्नपनवाञ्छायाः सुप्रसिद्धत्वात्, तस्य च तमस्तमोगुणस्तदधिष्ठातृत्वात्, तस्यापहत्यै तमसो निन्द्यत्वेन तदधिष्ठातृत्व-परित्यागार्थमित्यर्थः, यद्वा, लोकशिक्षार्थं ब्रह्महत्यादिपापापहत्यै। उमायाः पतिरिति यथा योगेश्वरत्वादिना पत्न्यनपेक्षकत्वेऽपि श्रीशिवेन सती जन्मान्तरेऽप्युमानाम्नी यत्नेनोद्वोढ़ा, तथा त्वमपि मामुद्वोढुमर्हसीति भावः। किञ्च, निजकुलदेवताया उमाया अपि परमपूज्यत्वं सूचितम्। एवं परमेश्वरत्वेन त्वमेव पतिर्योग्यः, त त्वन्यः कश्चिदिति भावः। तथा परमसौन्दर्य्येणापीत्याह—हे अम्बुजाक्षेति। अतो यदि भवतः प्रसादं पत्नीत्वेन स्वीकारलक्षणं न लभेय, सम्भावनायां सप्तमी, जह्यामिति च भविष्यति। त्यागप्रकारमाह—व्रतकृशान् शतेति। अनेन कृपार्थं दुःखमरणं बोध्यते। यद्वा, स्वत एव त्वदर्थव्रतैः कृशात्, अधुना च त्वत्प्रसादालब्ध्या स्वयमेव निर्गच्छतोऽनायासेनैव जह्यामित्यर्थः। इति मरणस्य सुकरत्वमुक्तम्। व्रतकृतइति पाठे स एवार्थः। शत-शब्दोऽसंख्यत्वे। अन्यत्तैर्व्याख्यातम्। यद्वा, ननु त्वं मे न पत्नीत्वयोग्यासि, कथमुद्वहेयमिति चेत्, सत्यमेव यतः श्रीब्रह्मादीनामपि सुदुर्लभोऽसि, क्वाहं क्षत्रियकन्या, तथापि बहुजन्मसु प्राणपरित्यागेनापि तदर्थं यतिष्य इत्याह—यस्येति। वाञ्छन्त्येव, न त्वद्यापि लभन्ते, इति परमदुर्लभत्वमुक्तम्। अतो यदि न लभेय, स्यादित्यपि सम्भावनायाम्। शतजन्मभिरसून् जह्याम्, शतजन्मभिर्वा प्रसादः स्यादित्येतदर्थमित्यर्थः। कुतस्तदाह—हे अम्बुजाक्षेति, परमसुन्दरात्वादित्यर्थः। अन्यत् समानम् ॥ ४३ ॥ इत्येवं पत्रिकाद्वारा गुह्यत्वेन सन्देशानां गौरवं स्वस्य च परमविश्वसनीयत्वमुक्तम्। तथा त्वयापि गोपनीया एवेति, अन्यथा बन्धुषु तस्या लज्जाद्युत्पत्तेरिति। आहृता आनीता समर्पिता वा, न चात्मशक्त्याहृता, किन्तु त्वत्प्रभावादेवेत्याशयेन सम्बोधयति—यदुदेव ! हे निजाशेषैश्वर्य्यप्रकटनार्थं यदुकुलातीर्ण ! यादवेन्द्रेति विमृश्येति विनयभरेण, स च सम्यक् सद्यः प्रवर्तनार्थः, यद्वा, कथं कदा तत्राशु गन्तासि तद्विचार्य्येत्यर्थः। अनन्तरं शीघ्रमेव। ननु तद्विवाहकालोऽयमतिसन्निहितः, दूरदेशे च तस्मिन् शीघ्रं कथं गमनं सम्भवेत् ? यदुभिर्वा कथं गन्तुं शक्यतामित्याशंकापि यदुदेवेत्यनेनैव निरस्ता तव साक्षाद् भगवत्त्वात्त्वद्भक्तानाञ्च यदूनां सर्व्वशक्तिमत्त्वात्, न च त्वत्कृत्ये तैरसम्मतिः काचित् कार्य्या, नापि तैः सहात्र मन्त्रणापेक्षापि, यदुदेवत्वादेव। एतदर्थमेव विदर्भान्मेऽत्रागमनं तस्या मनोरथेऽस्मिन् सुसिद्धे सत्येव त्वत्पृष्टं धर्म्मादिकं सर्व्वं मे सम्पद्येतेति भावः। एवं श्रीभगवत्पृष्टानामप्युत्तरं ज्ञेयम्, किंवा सन्देशैकापेक्षया तत्तदुत्तराप्रदानमेव श्रेय इति नोत्तरितम् ॥ ४४ ॥

इति श्रीमदभागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां

श्रीदशम-टिप्पण्याद्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कथमुद्वहे इति चिन्तयन्तमुपायं वदामीत्यर्थः। शतजन्मभिः स्यां तस्य तव स्यामित्यर्थः ॥ ४३-४४ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

ननु बन्धुभिश्चैद्यायार्पितायां त्वयि किमधुना मया विधेयमित्यत्राह—श्वो भाविनीति । हे अजित ! श्वो भाविन्युद्वहने विवाहे त्वं तावद्गुप्तः अलक्षित एवागत्य ततः सेनापतिभिः परिवृतः सन् चैद्यादिबलं निर्मथ्य पराभूय प्रसह्य हठाद्वीर्यं प्रभावदर्शनमेव शुल्कं वैवाहिकं देयं यस्यास्तां मां राक्षसेन विधिनोद्वहेत्युपदेशरहस्यम् ॥ ४१ ॥ ननु भवतु शिशुपालादिबलप्रमथनमन्तःपुरगतायास्तव हरणे त्वद्बन्धुवधोऽपि प्रसज्येतेत्यत आह—अन्तरिति । अन्तःपुरमध्यचरीं त्वां बन्धूनहत्वा कथमुद्वहे इति चेत्तत्रोपायं वदामि पूर्वेद्युः विवाहदिनादिति शेषः । महती कुलदेवयात्रास्ति यस्यां यात्रायां बहिः पुरादिति शेषः नववधूरहं गिरिजामम्बिकामुपेयां गच्छेयं दर्शनार्थमिति शेषः । अम्बिकागृहादेव मम हरणं सुकरमिति भावः ॥ ४२ ॥ ननु किमनेनानर्थकारिणा निर्बन्धेन चैद्योऽपि तावत्प्रख्यातगुणकर्मा योग्य एव वर इत्यत आह—यस्येति । हे अम्बुजाक्ष ! यस्य तव भवतोऽङ्घ्रिरजोभिः स्नपनमात्मनस्तमसोऽपहत्यै उमापतिरिवान्येऽपि महान्तो वाञ्छन्ति तस्य भगवतः प्रसादं यद्यहं न लभेय न प्राप्नुयां तर्हि व्रतैरुपवासादिभिः कृशानसून् प्राणान् जह्यां त्यजेयं ततः किमित्यत आह—शतजन्मभिरपि स्यां तवाहं भार्या स्यामित्यर्थः ॥ ४३ ॥ इत्थं वाचिकं पठित्वाथ स्ववचनमप्याह—इतीति । हे यदुदेव ! इत्येवं विधाः गुह्यतमाः संदेशा मया आहृताः यदत्र कर्त्तव्यं तद्विमृश्य क्रियतां तच्च समनन्तरमेव क्रियतामिति ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

उद्वहने विवाहे श्वो भाविनि श्वः प्रभाते भविष्यति सति समेतैः पृतनापतिभिः गुप्तान् विदर्भान्समेत्य राक्षसेन विधिना बलात्कन्याहरणलक्षणेन वीर्यं शुल्कं मौल्यं यस्या सा तथा तां माम् ॥ ४१ ॥ नववधूर्दर्शनाय ॥ ४२ ॥ यथोमापतिः श्रीहरिचरणसरसिजस्तुतिं करोति तस्य तव यदि भवत्प्रसादं पूज्यानुग्रहं न लभेय तर्हि असून्प्राणान् जह्यां त्यक्ष्यामि किञ्च शतजन्मभिः व्रतकृशा तव भार्यैव स्यामित्यर्थः ॥ ४३-४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

नन्वेवमेवानुग्रहीष्यसि, मान्यथा शङ्किष्ठा इति चेच्छीघ्रमेवागन्तव्यम् । नैकाकिना च बलयुक्तेनैवेति पुनः सोत्कण्ठमाह—श्वोभाविनीत्यादि । पृतनापतिभिः परीतः एव, तत्रापि गुप्त एवालक्षित एव । लक्षिते सति राजानः सावधाना भविष्यन्ति । तत्रापि श्वोभाविनि उद्वहने उद्वाहदिनस्य पूर्वेऽहनि अन्यथात्रागत्य बहुकालावस्थानमप्यनुचितम् अकस्मादेवागत्य मां हरेत्यर्थः वीर्यमेव शुल्कं यस्यास्ताम् । एतेनात्र युक्त्यन्तरमपि नास्तीत्याह—राक्षसेन विधिना । हठाहरणरूपो हि रक्षोविधिः ॥ ४१ ॥ ननु चैद्यमगधेशबलं निर्मथ्येति यदुक्तम्, तत्र भवद्भ्रातापि तेषां सपक्षः सोऽप्युत्थास्यते, तदा सोऽपि मे बध्यः स्यात् । भ्रातृहनने तत्रापि दुःखं भविष्यतीत्याशङ्क्याह—अन्तःपुरान्तरचरीमित्यादि । बन्धून् त्वद्भ्रात्रादीननिहत्य त्वां कथमुद्वहे इति चाशङ्कसे, तदोपायं वदामीत्यर्थः । पूर्वेद्युर्विवाहदिनस्य पूर्वेऽहनि देवयात्रास्तीति नः कुलाचारः, यस्यां नववधूः नववधूत्वेन भाविनी कन्येत्यर्थः । गिरिजां पुरः बहिः स्थितां दुर्गां पूजयितुमुपैति, तेन तं समयमासाद्यैव बन्धुहननं बिनैव मां हरेत्युपदेशः ॥ ४२ ॥ ननु जातं तव भ्रातरं प्रति महती दया, स तु मे महान् विपक्षः ! कथमेवं स्वजनादिसापेक्षस्य जनस्य मल्लाभो भवेदित्याशङ्क्याह—यस्याङ्घ्रीत्यादि । यस्य तवाङ्घ्रिपङ्कजरजः स्नपनं महान्तो वाञ्छन्ति उमापतिरिव श्रीमहेश इव, हे अम्बुजाक्ष ! तस्य भवतः प्रसादं यदि न लभेयम्, तदा व्रतकृशानसून् जह्यां त्यजेयम् । अतः प्राणेभ्योऽधिको नहि स्वजनः । स चेद्भवद्विपक्षः, तदा सोऽपि हेय एव । ननु प्राणत्यागे किं भविष्यति ? तत्राह—शतजन्मभिः । जन्मानां शतेनापि स्त्री स्याम्, एव परिगृहीता भविष्यामीत्यर्थः इति (३७ श श्लो०) "श्रुत्वा" इत्यादिनाभिलाषः (३८ श-श्लो०) "का त्वा मुकुन्द" इत्यादिना मतिः (३९ श० श्लो०) "तन्मे भवान्" इत्यादिना गर्वः (४० श० श्लो०) "पूर्त्त" इत्यादिना वितर्कः (४१-श० श्लो०) "भाविनि इत्यादिना विवेकः (४२ श० श्लो०) "अन्तः पुरान्तरचरीम्" इत्यादिना पुनर्मतिः, (४३ श० श्लो०) "यस्याङ्घ्रि" इत्यादिना औत्सुक्ये विश्रान्तिः ॥ ४४ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ननु त्वदाहरणे त्वद्भ्रातरो विरोधं करिष्यन्ति, मया तेऽवश्यं घातितव्याः, तदा तव दुःखं भविष्यतीत्यादिनाशङ्कनीयम् ? तत्राह—अन्तःपुरान्तरचरीत्यादि । यद्येवमनुगृह्णासि, तदा नैकाकिनागन्तव्यम्, न च विलम्बोऽपि कार्य इत्याह—श्वो

भाविनीत्यादि । पृतनापतिभिः परीत एव सन् गुप्तः सन् प्रचारे सति एतेऽपि बहुसैन्यं करिष्यन्ति, निर्मथ्य चैद्यमगधेश-बलम्, न तु मत् पितृभ्रातृबलमिति । एतद्धि पश्चाद् भवदीयमेव भविष्यतीति स्वपक्षे ममकारं व्यनक्ति ॥ ४१-४२ ॥ ननु मद्विपक्षो भवद्भ्राता तं प्रति तव स्नेहातिरेको दृष्टः, तत्कथमेकान्तभक्तासि (इति) वदसि चेत् नैव तत् भ्राता तु न दुस्त्यजः, दुस्त्यजास्तु प्राणाः, तेऽपि त्वदुपेक्षिताश्चेत्तदा त्यक्ष्यन्ते, किं पुन भ्रातेत्याह—यस्माङ्घ्रिपङ्कजेत्यादि—हेत्यौत्कण्ठ्यो विश्रान्तिः ॥ (४४)

इति द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सत्यं कृतैः पूर्व्वसुकृतैस्त्वमङ्गीकार्य्यैव मया किन्तु चैद्याय बन्धुभिः दास्यमानायां त्वयि किमधुना करणीयमित्यपेक्षायां स्वयमेवोपायमुपदिशति—श्व इति । हे अजित ! त्वं कैरपि जेतुमशक्य इत्यर्थः । अतो निर्भयत्वात् श्वोभाविनि उद्वहने विवाहे प्रथमं स्वसैन्यरहित एव गुप्तोऽलक्षित एवागत्य कुण्डिनपुरीं प्रविश्य पश्चादेव स्वशोभाख्यापनार्थं पृतनापतिभिः परीतो भव । अन्यथैतत्पुरप्रवेशो झटिति दुष्करः । अत्रत्यैर्वीरैर्दूरादेव त्वया सह योद्धुं प्रयास्यतेऽवश्यमिति भावः । पुरप्रवेशे तु सति मया विवाहशोभा प्रेक्षणार्थमेवागतमिति वदता त्वया सह यदि वीरा योद्धुं कारणाभावादेव न प्रक्रंस्यन्ते तदा त्वया सुखेनैवाहरणीया । यदि चानिष्टाशङ्किनो योत्स्यन्त एव तदा स्वशौर्य्यमाविष्कार्यमेवेत्याह—निर्मथ्येति । समुद्रं निर्मथ्य यथा लक्ष्मीर्गृहीता तथैवेति भावः । प्रसह्य हठादेव वीर्य्यं प्रभावदर्शनमेव शुल्कं वैवाहिकदेयं यस्यास्तां माम् ॥ ४१ ॥ ननु चैवं भवतु शिशुपालादिबलप्रमथनमन्तःपुरस्थायास्तव हरणे त्वद्बन्धुवधोऽपि प्रसज्येतेत्यत आह—अन्तःपुरेति । कथमितीत्यनन्तरं ब्रूषे चेदिति शेषः । पुराद्बहिर्वर्त्तमानां गिरिजामम्बिकामम्बिकागृहादेव मम हरणं सुकरमिति भावः ॥ ४२ ॥ यदि चैवं ब्रूषे भो राजपुत्रि ! मत्प्रापकप्राचीनसुकृतानि न ते सन्ति कथं मत्प्रसादं लप्स्यसे इति तर्हि भाविनि जन्मनि त्वत्प्राप्त्यर्थमेतज्जन्मनि ब्रह्मचारिणी सती तपः करिष्ये यदि चैकजन्मतपसा न पर्य्याप्तिस्तर्हि कोटिजन्मपर्य्यन्तमपि तपः करिष्ये । मम त्वत्प्राप्त्याग्रहस्तु मया दुर्वार एव यदि च वक्ष्यसे मत्प्राप्तिप्रतिबन्धकानि बहूनि ते दुरितानि सन्तीति तर्हि तपसैव लभ्याभिस्त्वच्चरणधूलिभिस्तान्यपि ध्वंसयिष्याम्येवेत्याह—यस्य भवतोऽङ्घ्रिपङ्कजरजोभिः स्नपनम् आत्मनस्तमसोऽपहत्यै उमापतिरिव महान्तो वाञ्छन्तीत्यहमपि तपोलब्धैस्तैरेव स्नात्वा स्वदुष्कृतानि नाशयिष्यामीति भावः । भवदिति षष्ठ्या लुगार्षः । तस्य भवतो यर्हि यदि प्रसादं न लभेय तदा व्रतैरुपवासादिभिः कृशान् प्राणान् जह्यां त्यजेयं ततः किमित्यत आह—शतजन्मभिरिति । एवमेव वारं वारं जह्यां यावच्छतजन्मभिरपि तव प्रसादः स्यादिति हे अम्बुजाक्षेति तव सुन्दरनयनावलोकलिप्सैव ममैतादृशकृच्छ्रकरणे हेतुरिति भावः ॥ ४३ ॥ गुह्यसन्देशा इति । भगवन्मम शपथो न काप्येते प्रकाश्यास्तर्हि तस्या लज्जा भविष्यतीति भावः । यदुदेव इत्यत्रार्थे यदुभिरपि सह मन्त्रणा न कार्य्या । यतस्तेषामपि त्वमेव देव इति स्वयमेव स्वबुद्धया विमृश्य यत् कर्त्तुं कर्त्तव्यं तत्क्रियताम् अनन्तरमिति कार्य्यमिदं विलम्वं न सहत इति भावः ॥ ४४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । द्विपञ्चाशत्तमोऽध्यायो दशमेऽजनि सङ्गतः ॥ ५२ ॥

गूढार्थदीपिनी

हे अजित श्वो भाविनि विवाहे प्रथमं गुप्त एव विदर्भानागत्य पश्चात्सेनापतिभिः परिवृतः सन् चैद्यादीनां सैन्यं पराभूय मामुद्वह ॥४१॥ कथमुद्वहे इति शङ्कसे चेत्तर्हि । पूर्वेद्युः विवाहात्पूर्वदिने । महती महत्त्वपूर्णा । यस्यां वधूः बहिर्गिरिजामित्यन्वयः । उपेयात् गच्छेत् ॥ ४२ ॥ महान्त इन्द्रादय आत्मनोपहत्यै स्वाज्ञाननिवृत्तये यस्याङ्घ्रिरजसा स्नानं वाञ्छन्ति तस्य भवतः प्रसादमित्यन्वयः भवच्छब्दे षष्ठ्या लुक् । अत्र दृष्टान्तः—उमापतिरिव । ननूमापतिरात्मतमोपहत्यै इति व्याख्येयमन्यथा 'ज्ञानं महेश्वरादिच्छेदिति स्मृतेर्विरोधापत्तेः । अत अपहत्यै इति पृथक् पदं कार्यम् । तथा च अपगता हतिर्नाशो यस्याः सा अपहतिर्मर्यादा तद्रक्षणाय स रजःस्नपनं प्रक्षालनोदकं श्रीगङ्गारूपं न केवलं वाञ्छति अपि तु शिरसा धारयतीत्यर्थः । एतेन मद्भक्ताः अपि एवमेव हरिं सेवेरन् अन्यथा तेषां पातः स्यादिति मर्यादा व्यञ्जितेति । कथंभूतः, उमापतिः, आत्मतमः, आत्मा श्रीकृष्णः । अतिशयेन आत्मेत्यात्मतमः । श्रीकृष्णरूपः । यदि न लभेय तदा जह्यामित्यत्र 'हेतुहेतुमतोर्लिङ् । एवं कृत्वा कदापि पतिः स्यादित्यतः पूर्वपघे धीरेत्युक्तम् इति वंशीधरी ॥ ४३ ॥ आहूताः आनीताः, अत्र यत्कर्त्तुं युक्तं तत् अनन्तरं शीघ्रमेव क्रियताम् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विवाहोऽनेकप्रकारः वराद्गोमिथुनग्रहणेनार्षः बहुवित्तग्रहणे नासुरः कन्यावरयोरन्योन्यसंमतया गान्धर्वः यथाशक्तिः धनालङ्कारसहितकन्यादानं ब्राह्मः प्रमत्तेषु कन्याबन्धुषु चौर्य्येण कन्याग्रहणं पैशाचः यज्ञे कन्यादानं दैवः बहुषु वरेषु सत्सु कन्येच्छयैकस्मै तद्दानं स्वयंवरः प्रबलान्प्रमथ्य कन्याहरणं राक्षसः तत्रान्तिमौ विशेषतः क्षत्रियविषयौ तत्रापि बलात्प्रमथ्य कन्याहरणलक्षः राक्षसो विवाहः क्षत्रिवस्यातिधर्म्यः तथाह भीष्मः ।

स्वयंवरं तु राजन्याः प्रशंसन्त्युपयान्ति च । प्रमथ्य तु हृतामाहुर्ज्यायसीं धर्मवादिनः ॥ इति ।

तत्र लोकहिताय क्षत्रियकुलाविर्भूतयोः स्वयं देवीदेवयोरनुरूपं चरमं विवाहं प्रार्थयते—श्वो भाविनीति । हे अजित! श्वोभाविन्युद्वहने विवाहे प्रथमं त्वं गुप्तः, अलक्षितो विदर्भान् देशान् एत्य पश्चात्पृतनापतिभिः परीतः सन् चैद्यमगधेशबलं निर्मथ्य प्रसह्य हठात् वीर्य्यशुल्कां वीर्य्यं प्रभावदर्शनमेव शुल्कं वैवाहिकं देयं यस्यास्तां मामेवं रूपेण राक्षसेन विधिनोद्वहेति प्रार्थनारहस्यम् ॥ ४१ ॥ पूर्वेद्युः विवाहादिति शेषः । यस्यां कुलदेवयात्रायां बहिरन्तःपुरादिति शेषः, गिरिजागृहान्मम हरणं कुर्विति भावः ॥ ४२ ॥ यस्याङ्घ्रिपङ्कजरजोभिः स्नपनं स्नानमुमापतिरिव उमापतिर्यथा करोति तद्वत् महान्तो वाञ्छन्ति किमर्थम् आत्मतमसः स्वसंसारस्यापहत्यै तस्य भवतः प्रसादं यदि न लभेय न प्राप्नुयां तर्हि यावच्छतजन्मभिरपि भवत्प्रसादः स्यात्तावत् व्रतैरुपवासादिभिः कृशान् मन्दीभूतान् असून् नित्यविग्रहवत्याः जन्ममरणासंभवाच्छरीराणि जह्यामिति नोक्तं किन्तु बहुभिः प्रादुर्भावतिरोभावैः प्राणान् प्राणायामप्रकारेण गृहीत्वा त्यजेयमित्यर्थः ॥ ४३ ॥ एवं स्वयं भगवत्या वाक्यं स्वयं भगवति निवेद्य स्वेच्छया किञ्चित्प्रार्थयते-इतीति । इतिशब्दः हेतुवाचकः, एते गुह्यसन्देशाः, अतो हेतोः केवलं मयाहृताः न त्वन्यत्र प्रकाशिताः हे यदुदेव ! त्वयापि यादवेष्वपि न प्रकाशनीया इति सम्बोधनाभिप्रायः । अत्र यत्कर्तुं युक्तमिति शेषस्तत्स्वयं विमृश्य अनन्तरं शीघ्रमेव क्रियताम् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्विपञ्चाशत्तमाध्यार्थप्रकाशः ॥ ५२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

लोकरीत्या परोक्षत उक्त्वा नित्यापरोक्षीकृततत्केत्यपरोक्षतोऽपि वदति । श्व इत्यव्ययम् । ततः सप्तम्या लोपः । उषसि भाविन्यजितस्त्वं विदर्भान्देशान्पृतनापतिभिः समेतैर्गुप्तान्समेत्य चैद्यमगधेन्द्रबलं निर्मथ्य प्रसह्य बलात्कृत्य राक्षसेन विधिना वीर्यमेव शुल्कं यस्याः साः तामुद्वह । ब्राह्मे विवाहे बन्धुशीलश्रुतारोग्यानि बुद्ध्वा प्रजा सहँकर्मभ्यः प्रतिपादयेत् । शक्तिविषयेणालङ्कृत्वा । आर्षे दुहितृमते मिथुनौ गावौ देयौ । दैवे यज्ञतन्त्रँऋत्विजे प्रतिपादयेत् । सहधर्मं चरत इति । प्राजापत्यो मिथः कामान्संवर्वते स गान्धर्वः । शक्तिविषयेण द्रव्याणि दत्वा वहेरन्नासुरः । दुहितृमतः पोथयित्वा वहेत्स राक्षसः । सुप्तानां प्रमत्तानां वाऽपहरेत्स पैशाचः । तेषां त्रय आद्याः प्रशस्ताः । पूर्वः पूर्वः श्रेयानित्यापस्तम्बसूत्रेषूक्ते राक्षसं समं सम्मतिरिति च गान्धर्वपरिणयनमिदमिति ज्ञेयम् । सूत्रे त्रय आद्याः प्रशस्ता इत्युक्तिश्चतुर्थोपलक्षणपरेति ज्ञेयम् । प्रशस्ताश्चतुरः पूर्वानिति मनूक्तेः । मां रमारूपिणीं शुल्कं चावलामौल्यम् ॥ ४१ ॥ ननु सेना साऽपि सेना महती त्वं त्वन्तश्चरी कथं कथं घटनेति न वदावद वद न तव दुश्शकं किञ्चित्तथाऽप्ययमुपायो न प्रातश्चिन्तितः कान्त तमवधारयेति वक्ति । अन्तरिति । अन्तःपुरे तत्राप्यन्तरे चरतीति साऽन्तःपुरान्तरचरी । बन्धूस्तवाविहत्याहत्वा । एतेन वादोऽनुपादानुकूलो मामुद्वहेत्यत्र बन्धुवधमविधायेति प्रपूर्य प्राग्व्याख्येय इति सूचितं भवति । त्वा कथं केन प्रकारेणोद्वह इति शङ्कसे चेदिति शेषः । उपायमनायासेन मन्नयनसाधनं प्रवदामि । यद्दिने लग्नं तत्पूर्वेद्युः पूर्वदिने परम्परागतैका कुलदेवयात्रा कुलदेवतालयगमनमस्ति । चेत्किमित्यत आह । यस्यां यात्रायां नववधूर्नूतनकन्या । गिरिजां द्रष्टुं बहिरुपेयादागच्छेदिति । नादः कार्यं ज्ञातुं शक्यमित्याह । महतीति ॥ ४२ ॥ तत्र तत्समये पदातिगजाश्वयुक्तैः सह चेदिभूपान्साल्वमागधान्सम्मथ्य रमेशः सहचरीभिः परिवृतां मामादाय सहभावमात्रं सहचरीणां नानयने स्वसुतैः सार्धं भारं वहति गर्दभीत्यादिवदिति ज्ञेयम् । स्वपुरीमुपनीय च मम पाणिं गृह्णातु । आदाय समुदायो यौतकादिधनं तद्रूपिणी चासावहं च तां मामिति पदमेकं वा । तद्रूपिणी चासौ मां रमा चेति वा यौतकादिषु यद्देयं सुदायो हरणं च तत् । दायो दाने यौतकादिधने सोल्लुण्ठभाषितेति विभक्ते रस्यादिद्रव्ये दायमहर्मनीषिण इत्यमरविश्वौ । वश्यं सोपभोगयोग्यामित्यर्थः । अत आद आदायोपनीय मध्ये नान्यतरवैय्यर्थ्यशङ्केति ध्येयम् । स्वकीयामिति मामित्यस्य पुरीमित्यस्य च प्राचीनपक्षे विशेषणमिति मन्तव्यम् ॥ ४३ ॥ स्वादरकारणमनागमने करणीयं च स्वेन विज्ञापयति । यस्येति । यस्य तवाङ्घ्रिपङ्कजयोर्ज्ञानानन्ददयोः स्तवनं स्तुतिमुमापती रुद्र इव यथाऽऽत्मतमोपहत्यै स्वाज्ञानहानाय स्तवनं करोति । निदर्शनं धातारमविधाय विधाय हरं न मम त्र्यम्बकाम्बिकायात्रा शर्वादिसर्वनियन्तुस्तव भार्याया आवश्यकीति बहिरुपयानं किन्तु कान्त तव सङ्गत्या इति ध्वनयामासेति ज्ञेयम् । महान्तो वाञ्छन्ति तस्य तव भवत्प्रसादं भवन्मद्विषय इदानीं सत्तां लभमानश्चासौ प्रसादोऽनुग्रहश्च तम् । मन्नयनरूपमहं न लभेय नाप्नुयां तर्ह्यम्बुजाक्षासूञ्जह्याम् । अनेन वधूवधदोषस्तवायास्यतीति द्योतयति । यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातमित्यादेः । मम दोषो वा दोषो वा रमणिमरणे तव को लाभ इत्यत आह । व्रतकृशा शतजन्मभिर्वा स्याम् । तव भार्येति शेषः । भार्येत्याद्यनुक्त्वा कण्ठतो वैकुण्ठतवोरःस्थिता स्यामिति स्वोत्कण्ठां ध्वनयतीति ध्येयम् । व्रतकृशासून्जह्याम् । व्रतकृशा शतजन्मभिरित्यन्वयः। यस्य भवत इत्येकदेशान्वय इत्यन्ये ॥ ४४ ॥ विश्वं समस्तं सन्देशं विमृश्य तमागतम् ॥ ४५ ॥ गुह्या अन्यस्यानाख्येयाः। अत्रैतत्समय एतन्मध्ये वा । यदुक्तयनन्तरं क्रियताम् ॥ ४६ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे सप्तपञ्चाशोऽध्यायः ॥ १०-५७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

उद्वाहमात्रं प्रार्थयित्वा प्रकारमपि प्रार्थयते **श्वो भाविनी**ति स्पष्टतया समागमने कदाचित्ते गोपनं कुर्युः, लग्नात्पूर्वमेव वा शिशुपालाय प्रेषयेयुः, अविधानेन वा दद्युरिति । अतो यथा तेषु परिज्ञानं न भवति, तथैवागत्य नेया । अन्यथा उपक्रमावधि फलपर्यन्तं मध्ये कालविलम्बे शरीरपातोऽपि भवेदिति तथा प्रार्थना । देशेऽपि न पूर्वमागन्तव्यमित्याह । **श्वो भाविनि उद्वाहे ।** प्रथमतस्त्वमेकाकी गुप्तः समागत्य, पृतनाश्च भिन्नतया समानीय, तत्रापि पृतना यादवरूपैव, न तु विजातीया आनेयाः, अन्यथा मन्त्रभेदः स्यात् । पश्चात्पुरप्रवेशे तैः परीतः । अन्यथा स्वस्य चिन्ता स्यादिति । यद्यपि त्वमजितः, अथवा **अजित**त्वादेव पक्षान्तराभावात् चैद्यमगधेशयोर्बलं निर्मथ्य, मध्ये प्रतिबन्धकत्वेन स्थितमपसार्य, तदर्थं प्रसह्य, बलात्कारमपि कृत्वा मामुद्वह ! नन्वेवं सति कामार्थं भक्त्यर्थं वा विवाहो भवेत्, न धर्मार्थमित्याशङ्क्याह **राक्षसेन विधिने**ति । क्षत्रियस्य स एव धर्मः । गान्धर्वस्तु पूर्वमुक्त एव 'तन्मे भवान्खलु वृत' इत्यनेन । अतो मद्विवाहे उभयं भविष्यतीति भावः । ननु एवं हरणे परस्वादानं भवेदित्याशङ्क्याह **वीर्यशुल्का**मिति । न हि मूल्ये दत्ते परस्वादानमस्ति । क्षत्रियाणां वीर्यमेव सर्वत्र शुल्कम् । पराक्रमं कृत्वा मारयित्वा य एव हरति, तस्यैव तदिति क्षत्रियधर्मानुसारेण हरणे न परस्वादानमित्यर्थः । बाधशङ्कया प्रकारमुपदिश्य तत्रापि स्फुरितं बाधकमनूद्य परिहरति **अन्तःपुरान्तरचरी**मिति । बन्धूननिहत्य अन्तःपुरमध्ये चरणयोग्यां त्वां कथमुद्वह इति चेत् (शङ्कसे), तदापि सन्ति बहव उपायाः । तथाप्यविरुद्ध उच्यत इत्याह । प्रकर्षेण उपायं वदामीति । केनचिद्व्याजेन स्वयं बहिरागच्छेत्, भगवान्वा वेशं कृत्वा गच्छेत्, आकर्षणं वा कुर्यात्, बुद्धिं वा प्रेरयेत्, अन्यथा सर्वेषाम्, सर्वेष्वपि पक्षेषु क्लिष्टं भवेत्, पराक्रमश्च न भवेत्, तस्मादन्यदकृत्वा गौरीपूजनार्थमेव गताया हरणं कर्तव्यमिति प्रार्थना । तत्र गमनमावश्यकमित्याह । **पूर्वेद्युः** विवाहात्पूर्वदिवसे महती यात्रा वर्तते । सा अनुल्लङ्घनीया ततः । कुलदेवतायाः महतीत्यनेन दूरे गमनमुक्तम् । किमतो यद्येवमिति चेत् , तत्राह **यस्यां बहिर्नववधू**रिति । नववधूः नूतना वधूः संरक्ष्यापि लोकप्रसिद्ध्यर्थं भोगात्पूर्वं भोगयोग्या नववधूर्भवति, सा गिरिशां पार्वतीं द्रष्टुमुपेयादिति विधिः । स्वयमपि गिरीणामीशभूतेति अकारान्तात् टाप् । नित्यं संज्ञाछन्दसोरिति वा ङाप् । ततो बहिः स्थिता तत एव नेयेति भावः । अतो विवाहदिवस एव द्वारकायां विवाहो भविष्यतीति न ज्योतिःशास्त्रस्याप्यप्रामाण्यम् ॥ ४२ ॥ एवं स्वरूपप्रकारप्रार्थनां कृत्वा तदकरणे बाधकमाह **यस्याङ्घ्रिपङ्कजे**ति । यर्हि प्रसादं न लभेय, तर्हि जह्यामसून्, ननु कोऽयं निर्बन्ध इति चेत्, उत्तमफलत्वादित्याह । यस्य भगवतः अङ्घ्रिपङ्कजस्य रजसा स्नानं महान्तोऽपि, वाञ्छन्ति । तत्र निदर्शनमुमापतिः । स हि केवलं रजसा स्नानमलभमानः रजोयुक्तचरणोदकेन स्नानं करोतीति । उमापतिपदेन उमयापि वृतः शिवः । तस्यापि स एवाभिप्रेत इति तदेवोत्तमं फलम् । किञ्च । आत्मतमोपहत्यै आत्मनस्तमोगुणो गच्छत्विति । अहमपि माया त्रिगुणात्मिका, तत्रापि रुक्मिप्रभृतिभिः सह अवतीर्णेति तमःप्रधानैव । ततश्चैतत्तमश्चेन्न दूरीक्रियते, तदा पुनर्निकृष्टजन्म भविष्यतीति तदर्थं प्रयत्नोऽवश्यं कर्तव्यः तत्रायमुपायः सुगम उत्तमश्च । एतदभावे तु शरीरं वा त्यक्ष्यामि । अयं संसर्गो गच्छतीति । किञ्च । व्रतेन कृशा सती उत्तरोत्तरजन्मसु शतजन्मभिः अयमर्थः कदाचित् स्यात् । 'स्वधर्मनिष्ठः शतजन्मभि'रिति वाक्यात् **अम्बुजाक्षे**ति सम्बोधनं दृष्ट्यैव तापहारकः कथमेवं करिष्यतीति बोधनार्थम् ॥ ४३ ॥ एवं रुक्मिणीवाक्यान्युक्त्वा उपसंहरति **इत्येत** इति । गोप्या एते सन्देशाः । यदुदेवेति सम्बोधनात् विवाहः कर्तव्य इति सूचितम् । ममैवाहृता इति सुतरां गोप्यत्वम् । कदाचिदेतत्पत्रम् अन्यस्य कापट्यात् भवेदिति शङ्का स्यात्, तदर्थमाह । एतद्विमृश्य कर्तुं यच्चात्र सिध्यति, तत्क्रियताम् । चकाराद्यद्वक्तव्यम्, तदुच्यतामिति । विमर्शानन्तरं कर्तव्यम् । अथवा । तदनन्तरमेव कर्तव्यं 'किं कार्यं करवामे'त्यस्यैतदेवोत्तरमित्यर्थः ॥ ४४ ॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे तृतीयोऽध्याय ॥ ३ ॥

श्रीसुबोधिनीसारः

कर्त्तव्यमुपदिशति । हे अजित श्वोभाविनि अद्यदिनात्तृतीयेह्नि भाव्ये उद्वाहे विदर्भान् गुप्तोऽलक्षित एवेत्यागत्य पृष्टतः सेनापतिभिः परीतो व्याप्तः शिशुपालजरासंधबलं निर्मथ्य प्रसह्य बलात् वीर्यमेव शुल्कं देयं यस्यास्तां मां त्वमुद्वह गृहाणेति संकेतः । राक्षसेनापि विधिना ॥ ४१ ॥ दुर्गमध्यगतायास्तव हरणं कथमित्यत आह । तथात्वे त्वद्बंधुवधप्रसक्तेः । अंतःपुरमध्यवर्त्तिनीं त्वां बंधून् अनिहत्य नो हत्वा कथमहमुद्वहे परिणयामीति हेतोरुपायं ब्रवीमि । पूर्वेद्युर्विवाहदिनात्प्रथमदिने महती कुलदेवयात्रास्ति यस्यां यात्रायां नववधूर्बहिः पुराद् गिरिजामम्बिकां देवीमुपगच्छेत् ॥ ४२ ॥ नायं पणः स्त्रीस्वभावात् किंतु महाफललाभादित्याह । हे अंबुजाक्ष यस्य तव पादपद्मरेणुस्नानं महांतो जना देवाद्या वा वांछंति । आत्म स्तमसो मूलाज्ञानस्याऽपहत्यै निवृत्त्यर्थम् उमापतिः शिव इव त्वदलाभे मर्त्तव्यमित्याह । यदि भवतस्तव प्रसादं कृपां न लभेयं न प्राप्नुयामहं तर्हि व्रतैः कृशान् दुर्बलान् असून् प्राणान् जह्यां त्यजेयं दृढप्रत्ययमाविष्करोति । शतजन्मभिः भवत्प्रसादः स्यात् ॥ ४३ ॥ उपसंहरति । हे यदुदेव इत्येते गोप्याः संदेशा मया नीताः, अत्र कर्त्तुं कार्यं विमृश्य विचार्य यत् युक्तं तदनन्तरं क्रियतां त्वया ॥ ४४ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायां द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'बन्धुभिश्चैद्यायार्पितायां त्वयि मयाधुना किं करणीयम्' इत्यपेक्षायामाह—श्वोभाविनीति । 'भयं तु तव नास्त्येव' इति सूचयन्ती सम्बोधयति—अजितेति । 'उद्वहने विवाहे श्वोभाविनि सति त्वं प्रथमं गुप्तः, अलक्षित एव विदर्भान् देशान् समेत्य आगत्य पश्चात् पृतनापतिभिः सेनापतिभिः परीतः परिवृतः सन् चैद्यादिबलं निर्मथ्य पराभूय प्रसह्य बलात् राक्षसेन विधिना मामुद्वह, हृत्वा गृहमानीयोद्वहेत्यर्थः । 'एवं त्वत्प्राप्त्यतिरिक्तं न वैवाहिकमपेक्षितम्' इति सूचयन्त्याह—वीर्यशुल्कामिति । वीर्यं प्रभावदर्शनमेव शुल्कं वैवाहिकं देयं यस्यास्तामित्यर्थः ॥ ४१ ॥ ननु 'भवत्वेवं शिशुपालादिबलप्रमथनम्, तथापि अन्तःपुरगतायास्तव हरणे त्वद्बन्धूनां वधोपि प्रसज्येत, तदकृत्वा त्वां कथमुद्वहे' इति चेत्तत्रोपायं प्रवदामि—विवाहदिनात् पूर्वेद्युः महती कुलदेवीदर्शनार्था यात्रा अस्ति भवति, यस्यां यात्रायां नववधूः पुराद्बहिः स्थितां गिरिजां पार्वतीं द्रष्टुमुपेयात् गच्छेत् । अतः पार्वतीगृहादेव मम हरणं सुकरम्, बन्धुवधाद्यप्रसक्तेरिति भावः ॥ ४२ ॥ एवमात्मनः स्वीकारार्थं भगवन्तं सम्प्रार्थ्य तदकरणे बाधकमाह—यस्येति । 'त्वत्कृपादृष्ट्येव सन्तापनिवृत्तिः, नान्यथा' इति सूचयन्ती सम्बोधयति—अम्बुजाक्षेति । यर्हि भवतः प्रसादमहं न लभेय न प्राप्नुयां तर्हि व्रतैरुपवासादिभिः कृशान् असून् प्राणान् जह्यां त्यजेयम् । 'ततः किं स्यात्' अत आह—शतजन्मभिः स्यात् इति । यावत्तव प्रसादो न स्यात्तावदेवमेव वारं वारं प्राणान् जह्याम्, तदा शतजन्मभिरपि तु तव प्रसादः स्यादेव । ननु 'चैद्योपि तावत्प्रख्यातगुणकर्मा योग्य एव वरः, किमनेनानर्थकारिणा निर्बन्धेन' इत्याशङ्क्य तस्योत्तमफलत्वमाह—यस्य भवतोऽङ्घ्रिपङ्कजरजोभिः स्नपनं आत्मनस्तमस अज्ञानस्य अपहत्यै निवृत्त्यर्थमुमापतिरिवान्येपि महान्तो ब्रह्मादयो वाञ्छन्ति तस्येति ॥ ४३ ॥ एवं रुक्मिण्याः सन्देशानुक्त्वा स्वयमाह—इतीति । 'अत्र न यादवैः सह विचारणीयमस्ति तव स्वतन्त्रत्वात्' इति सूचयन् सम्बोधयति—यदुदेवेति । इत्येते रुक्मिण्या गुह्यसन्देशा मया आहृता आनीताः, अत्र यत् कर्तुं योग्यं तद्विमृश्य विचार्य अनन्तरं त्वरितमेव क्रियताम् ॥ ४४ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीकाबालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने । द्विपञ्चाशत्तमो यातो भैष्मीयाख्यानिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

श्व इति ॥ हे अजित ! उद्वहने विवाहे श्वो भाविनि सति त्वं प्रथमं सैन्यरहित एव गुप्तः, अलक्षित एव विदर्भान् देशान् तद्राजधानीं कुण्डिनपुरं समेत्य आगत्य पश्चादेव स्वशोभाख्यापनार्थं पृतनापतिभिः सेनापतिभिः परीतः परिवृतो भव । अन्यथैतत्पुरप्रवेशोऽतिदुष्करः अत्रत्यैर्वीरैस्त्वया सह योद्धुं चावश्यं प्रक्रंस्यते । ततश्च मम हरणमन्तरितं स्यात् । सैन्यं विना पुरप्रवेशे तु विवाहप्रेक्षणार्थमागतं त्वां मत्वा वीरैर्न योत्स्यते । ततश्च हरणं सुकरं स्यात् । यदि तु हरणसमये प्रतिपक्षाः चैद्यादिवीरा योद्धुमुद्यता भवेयुस्तदा तु चैद्यमगधेन्द्रादिबलं निर्मथ्य पराभूय यथा समुद्रं निर्मथ्य लक्ष्मीर्गृहीता तथा प्रसह्य बलात् वीर्यं प्रभाव एव शुल्कं विवाहे देयं यस्यास्तां मां राक्षसेन विधिना उद्वह हृत्वा गृहमानीयोद्वह ॥ ४१ ॥ अन्तरिति ॥ ननु अन्तःपुरस्य अन्तर्चरीं त्वां बन्धून् पितृभ्रात्रादीन् अनिहत्य कथमुद्वहे तैर्मत्कार्यविघ्ने कृते तद्वधं विना कार्यसिद्ध्यसंभवात् इति शङ्कसे चेत् तत्रोपायं प्रवदामि । विवाहदिनात् पूर्वेद्युः महती कुकदेवदर्शनार्था यात्राऽस्ति भवति । यस्यां यात्रायां नववधूः, पुराद्बहिःस्थितां गिरिजामम्बिकां द्रष्टुमुपेयात् गच्छेत् । अतः अम्बिकागृहादेव हरणे बन्धुवधप्रसक्तिर्नास्ति ॥ ४२ ॥ यस्येति ॥ हे अम्बुजाक्ष ! यस्य भवतोऽङ्घ्रिपङ्कजरजोभिः स्नपनम् आत्मनस्तमसः अज्ञानस्य अपहत्यै निवृत्त्यर्थमुमापतिरिवान्येऽपि महान्तो ब्रह्मादयो वाञ्छन्ति। इत्यहमपि तपोलब्धैस्तैरेवं स्नात्वा दुष्कृतानि नाशयिष्यामीति भावः । तस्य भवतः । षष्ठीलुगार्षः । प्रसादं यर्हि न लभेय न प्राप्नुयां तर्हि व्रतैरुपवासादिभिः कृशानसून् प्राणान् जह्यां त्यजेयम् । एवं मुहुः प्राणत्यागे शतजन्मभिरपि तु तव प्रसादः स्यादेवेति ॥ ४३ ॥ इतीति ॥ हे यदुदेव ! इत्येते रुक्मिण्या गुह्यसंदेशा मया आहृता आनीताः । अत्र यत्कर्तुं योग्यं तद्विमृश्य स्वयमेव विचार्यानन्तरं त्वरितमेव क्रियतान् । न तु अस्मिन् कार्ये यदुभिरपि मन्त्रणं कार्यम् अतिगुप्तत्वात् ॥ ४४ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्बितार्थप्रकाशिकायां द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अतिव्यग्रतया स्वयमेवोपायमप्याह द्वाभ्यां श्व इति । श्वोभाविनि आगामिदिवसभाविनि उद्वहने मत्पाणिग्रहणे । गुप्तः रुक्मिणीपाणिग्रहणायाऽऽगत इति प्रथमं सर्वैरविज्ञातः सन् । त्वं विदर्भान् समेत्य । पश्चात्पृतनापतिभिः सैन्यपैः परीतः वृतः सन् चैद्यमगधेंद्रबलं शिशुपालजरासंधसैन्यम् । निर्मथ्य हत्वा । राक्षसेन विधिनाहरणोपायेन वीर्यशुल्काम् वीर्यं सामर्थ्यमेव शुल्कं पाणिग्रहणनिमित्तं देयं धनं यस्यास्तां माम् । प्रसह्य बलादुद्वह मम पाणिग्रहणं कुर्वित्यतिरहस्यवचनं ॥ ४१ ॥ अंतःपुरस्थायास्तदहरणे त्वद्बंधुवधो भवेदिति शंकां निराकुर्वन्त्याह अंतरिति । बंधून् रुक्मीप्रमुखान् त्वद्भ्रात्रादीन् अनिहत्य । अंतःपुरांतरचरीं अगम्य राजगृहांतरस्थां त्वां कथमुद्वहे इत्युच्यते चेत्तत्राहमुपायं प्रवदामि । पूर्वेद्युः विवाहात् प्रथमदिवसे महतीकुलदेवयात्रास्ति यस्यां यात्रायां नववधूः पुराद्बहिःस्थितां गिरिशां शिवाम् । उपेयात् उपगच्छेत् । तत एव मम हरणं सुलभमिति भावः ॥४२॥ ननु त्वं मे न

योग्या पत्नीति चेत्सत्यमेवं यतोऽक्षरपुरुषादिमहामुक्तोपास्यस्त्वं क्व अत्यल्पा क्षत्रियसुताहं क्व तथापि असंख्यजन्मसु व्रताद्यैरसुपरित्यागेनापि त्वदर्थं यत्नं करिष्यामीत्याह । यस्येति हे अंबुजाक्ष हे मुक्तमनोहरकमलनयन यस्य तवांघ्रिशतपत्ररजोभिः स्नपनं स्नानं । महांतः । आत्मारामा महामुक्तानिष्कामा अपि वांछंति क इव आत्मनि स्थितं यत्तमस्तमोगुणस्तस्य अपहत्यै नाशाय । उमापतिरिव उमापति दृष्टांतः शिवस्य गंगाधरत्वेन तद्वांछायाः प्रसिद्धत्वात् । अतो भवत्प्रसादं तव पत्नीत्वेनांगीकरणं यर्हि न लभेय तर्हि व्रतकृशान् व्रतैश्चांद्रायणादिभिर्यमनियमासन प्राणायामादिभिश्च कृशान् । दुर्बलान् प्राणान् जह्यां । शतजन्मभिरेवं कृते सति तव प्रसादः स्यात् ॥ ४३ ॥ अत्र यत् कर्त्तुं कर्त्तव्यं तद्विमृश्य विचार्य । अनंतरं क्रियतां वयं ब्राह्मणा रुजवः सर्वोपरि बुद्धिस्तवेति भावः ॥ ४४ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंध व्याख्याने रुक्मिणीपत्रिकाप्रेषणंनाम द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु तव बन्धुभिश्चैद्यायार्पितायां त्वयि किमधुना मया विधेयमित्यपेक्षायामाह । श्वो भाविनीति । हे अजित, श्वो भाविनि परश्वो भाविनीत्यर्थः । अग्रिमाध्याये चतुर्थश्लोकटीकायां श्रीधरस्वामिचरणैर्व्याख्यातत्वात् । उद्वहने विवाहे, त्वं, प्रथमं, गुप्तः, अलक्षितः, एव, विदर्भान् समेत्य आगत्य, पश्चात् पृतनापतिभिः सेनापतिभिः, परीतः परिवृतः सन्, चैद्यश्च मगधेन्द्रश्च तयोर्बलं सैन्यं, निर्मथ्य पराभूय, प्रसह्य हठात्, वीर्यं प्रभावदर्शनमेव शुल्कं वैवाहिकं देयं यस्यास्तां, मां राक्षसेन विधिना, उद्वह इत्युपदेशरहस्यम् ॥ ४१ ॥ ननु भवतु शिशुपालादिबलप्रमथनमन्तःपुरगतायास्तव हरणे त्वद्बन्धुवधोऽपि प्रसज्येतेत्यत आह । अन्तःपुरेति । अन्तःपुरचरीमन्तःपुरमध्यचारिणीं, त्वां बन्धून्, अनिहत्य अहत्वा, कथम् उद्वहे, इति चेत्, उपायं प्रवदामि । पूर्वेद्युः विवाहदिनात्प्रथमदिवसे, महती कुलदेवियात्रा, अस्ति । यस्यां यात्रायां, बहिः पुरादिति शेषः । नववधूः, गिरिजामम्बिकां, उपेयात् । दर्शनार्थमिति शेषः । एवं च नववधूरहं यदाऽम्बिकादर्शनं कर्त्तुमुपेयां तदाम्बिकागृहादेव मम ग्रहणं सुकरमेवास्तीति भावः ॥ ४२ ॥ ननु किमनेनानर्थकारिणा निर्बन्धेन चैद्योऽपि तावत् प्रख्यातगुणकर्मा योग्य एव वर इत्यत आह । यस्येति । हे अम्बुजाक्ष, यस्य तव अङ्घ्रिपङ्कजरजोभिः स्नपनं, आत्मनस्तमसोऽपहतिस्तस्यै, उमापतिः शिवः, इव, अन्ये महान्तोऽपि, वाञ्छन्ति । इत्थंभूतं, भवत्प्रसादं, यर्हि यदि अहं न लभेय न प्राप्नुयां, तर्हि व्रतैरुपवासादिभिः कृशास्तान्, असून् प्राणान्, जह्याम् । ततः किमित्यत आह । शतजन्मभिरपि, स्यां तव भार्याहं भवेयमित्यर्थः ॥ ४३ ॥ इत्थं तत्पत्त्रं वाचयित्वा स्ववचनमप्याह इतीति । हे यदुदेव, इत्येवंविधाः, एते गुह्यसंदेशाः, मया आहृता आनीताः, अत्र यत्, कर्त्तुं, करणीयमित्यर्थः । तत् विमृश्य, क्रियताम् । तच्च अनन्तरं शीघ्रमेब, क्रियताम् । नात्र विलम्बो युक्त इति भावः ॥ ४४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्द्धे द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

कृष्णप्रिया

श्रीरुक्मिणी जी लग्न समय को सूचित करते निवेदन किया कि आप तो सदा विजयी ही हो और अजेय भी हैं हे नाथ हे अजित ? एक हि दिन के व्यवधान में मेरा लग्न होने वाला है अतः आप इस प्रकार से पधारिये कि आप लग्न के पूर्व मुझे अनायास ले जाय । आप गुप्त रीति से पधारिये फिर अकेले भी न पधारे आप स्वयं समर्थ एवं अजेय है फिर भी सेनापतियों संकलित चतुरङ्गिणी सेना को साथ लाइए । शिशुपाल एवं मागधजरासन्ध की सेनाओं को कुचल डालिये नष्ट भ्रष्ट कर दीजिये और मैं क्षत्रिय कन्या हूँ वीर्यशुल्का हूँ मुझे किसी का अधिकार नहीं है मैंने आपका वरण किया है इससे गान्धर्व विवाह तो हो गया है अमित पराक्रम से प्रतिलिप्सुओं की जड़ उखाड़कर आपके शरण में मेरा पाणिग्रहण कीजिये ॥ ४१ ॥ नाथ ? यदि आप यही सोचते हो कि राजकुमारियाँ तो राजभवन में अन्तःपुर के भीतर जनाने में ही रहती हैं उनके अपहरण के अवसर पर बन्धुजनों का वध करना लग्न मङ्गल में समुचित नहीं उससे व्याह न होना उचित है ऐसा करुणमय स्वभाव से न पधारे तब नाथ मैं निवेदन करती हूँ कि हमारे कुलका ऐसा विधान है कि लग्न के अगले दिन कुलदेवीजी का दर्शन करने के लिये बड़े पैमाने पर यात्रा निकलती है । उस यात्रा में कन्या को दुलहिन को नगर के बाहर गिरिजादेवी के मन्दिर में पैदल प्रस्थान करना पड़ता है ॥ ४२ ॥ हे कमललोचन श्रीकृष्ण ! उमापति भगवान् नीलकण्ठ की तरह उत्तम पुरुष भी आत्म शुद्धि के लिये आपके श्रीचरणों की धूली से स्नान करना चाहते हैं । ऐसे समर्थ एव करुणानिधान के श्रीचरणों का प्रसाद चरणों की धूली न प्राप्त कर सकी तब व्रतकृश प्राणों का त्याग करूंगी । नाथ इस कृपा को पाने के लिये अनन्त जन्म क्यों न लेने पड़े । मुझे विश्वास है कि कृपासिंधु आपका कृपा प्रसाद कभी न कभी एक दिन अवश्य मिलेगा ॥ ४३ ॥ श्री सुदेव विप्रर्षि ने कहा– हे नाथ यदुदेव ? श्रीरुक्मिणीजी के आपके श्रीचरणों में यही संगोपनीय संदेश है । आपकी सेवा में यही सन्देश लेकर आया हूँ । आप इस पर अवश्य विचार करें और यथाशीघ्र सन्देश के अनुरूप निर्णय करने की कृपा करें ॥ ४४ ॥

श्रीमद्भागवत दशमस्कन्ध निरोध लीला उत्तरार्द्ध श्रीरुक्मिणी विवाह प्रस्ताव में ५२ वाँ अध्याय सम्पूर्ण ।

अथ त्रिपञ्चाशत्तमोऽध्यायः

श्लोकाः	अनु.	वंश.	मि. उ.	वसं.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
५७	५०	१	४	२	३	१९८४	१९	४४	२०४७	६३॥।	७

श्रीशुक उवाच

वैदर्भ्याः स तु सन्देशं निशम्य यदुनन्दनः । प्रगृह्य पाणिना[1] पाणिं [2]प्रहसन्निदमब्रवीत् ॥ १ ॥

श्रीभगवानुवाच

[3]तथाहमपि तच्चित्तो निद्रां च [4]न लभे निशि । वेदाहं रुक्मिणा द्वेषान्ममोद्वाहो निवारितः ॥ २ ॥
तामानयिष्य उन्मथ्य राजन्यापसदान् मृधे । मत्परामनवद्याङ्गीमेधसो[5]ऽग्निशिखामिव ॥ ३ ॥

श्रीशुक उवाच

उद्वाहर्क्षं च विज्ञाय रुक्मिण्या मधुसूदनः । रथः संयुज्यतामाशु दारुकेत्याह सारथिम् ॥ ४ ॥

कर्दमक्षमा

अन्वय.—श्रीशुक उवाच, सः, यदुनन्दनः, तु, वैदर्भ्याः, सन्देशं, श्रुत्वा, पाणिना, पाणिम्, प्रगृह्य, प्रहसन्, इदम्, अब्रवीत् ॥ १ ॥ श्रीभगवान् उवाच—रुक्मिणा, द्वेषात्, मम, उद्वाहः, निवारितः, अहम्, वेद अहम्, अपि, तच्चित्तः, निशि च, निद्राम्, न, लभे ॥२॥ राजन्यापसदान्, मृधे, उन्मथ्य, एधसः, अग्निशिखाम्, इव, अनवद्याङ्गीम्, मत्पराम्, ताम्, आनयिष्ये ॥३॥ श्रीशुक उवाच—मधुसूदनः, रुक्मिण्याः, उद्वाहर्क्षम्, विज्ञाय, च, हे दारुक ? आशुः, रथः, संयुज्यताम्, इति सारथिम्, आह ॥४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्रिपंचाशत्तमे गत्वा विदर्भानद्भुतेहितः । रुक्मिणीमहरत्कृष्णो मिषतां द्विषतां बलात् ॥ १-१ ॥

निद्राया अलाभे कारणांतरम् । वेदेति । तया अकथितमप्यहं जानामीति ॥ २ ॥ आनयिष्यामि । राजन्यापसदान्राजसुहीनान् । उन्मथ्यानयने दृष्टांतः । एधस इति ॥ ३ ॥ उद्वाहर्क्षमिति । परश्वो रात्रौ विवाहनक्षत्रमिति विज्ञाय तस्यां रात्र्यां प्रस्थाय प्रातर्विदर्भदेशानगमत् । "श्वोभाविनि त्वमजितोद्वहने विदर्भान् गुप्तः समेत्य" इति रुक्मिणीसंदेशात् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अद्भुतेहित आश्चर्यलीलः । मिषतां पश्यताम् (१) । स कृष्णः । वैदर्भ्या विदर्भराजपुत्र्याः । तुशब्दः क्रमप्राप्तश्रीकृष्णभाववर्णनरूपे प्रकरणभेदे । तथैवाभिव्यंजयति-प्रगृह्येति । प्रकर्षेण पुलकादिप्रेमविकारेण गृहीत्वा, पाणिना चेदं पाणिग्रहणं सख्यसम्पादनाय । तच्च हार्दमपि व्यंजयितुमीषद्व्रीडासहितेन प्रहर्षेण भावविशेषेण च प्रकृष्टं हसन् । यदुनन्दन इति रुक्मिणीपरिग्रहाद्यदुकुलस्यानंदनाभिप्रायेण ॥ १ ॥ यथा रुक्मिणी मच्चित्ता तथाहमपि तस्यां चित्तं मनो यस्य स तथा । प्रथमं कारणं तच्चित्तत्त्वं द्वितीयं ममेत्यादि । सा यथा मच्चिता तथाहमपि । तल्लक्षणमाह-निद्राञ्चेति । निद्रामपि कुतोऽन्यदुपभोगादिसुखमित्यर्थः । अत्र विघटननिदानस्यापि मम ज्ञातत्वान्मया स्वत एव तत्समाधानं कार्यमित्याह-वेदेति सार्धेन ॥ २ ॥ तां रुक्मिणीम् । "स्यादपसदः प्रोषितेपि नीचे पीडाकरे तथा" इति निरुक्तिः । एधसः काष्ठात् । तामानयिष्य इति-एतावन्तं कालं तस्या एवाभिप्रायं प्रतीक्ष इति भावः । तर्हि ममानागमने भवांस्तामुपेक्षेतैव—न, तदीयमहागुणाकृष्टत्वान्ममेत्यभिप्रायेण तां विशिनष्टि—मत्परामिति पदद्वयेन । तत्परत्वे सर्वसद्गुणवत्ता सिद्धैव 'यस्यास्ति भक्तिर्भगवत्यकिंचना' इत्यादेः । 'एवं श्रुत्वा गुणान्' इत्यादिना तदुक्तनिजगुणरूपवत्तस्या अपि गुणरूपे बोधिते । उच्चैर्मथित्वेति-'निर्मथ्य,-इति तदुक्तानुसारेण तदुक्तप्रतिपालनपरता बोधिता । राजन्यापसदानिति-मुहुर्निर्जयादिनापमानेनापि लज्जाद्यभावाद्दुर्बुद्धितानपगमाच्च । मृधे इति—युद्धमध्ये साक्षादेव न तु मायांतर्द्धानादिनेत्यर्थ इति निजपराक्रमः सूचितः । एधस इति दृष्टान्तेन यज्ञियाग्निशिखावद्दारुणाच्छन्नत्वेपि

---

[1] पाणौ-वीर. । [2] द्विज-वीर. विज. । [3] यथा सा रुक्मिणी नित्यं मच्चिताऽऽस्ते सुशोभना । [4] नाध्यगमं-विज. ।
[5] मेघसोग्नेः-विज. ।

परिश्रमेणावश्योद्धार्य्यत्वं ध्वनितम् । यथैधसि वर्तमानाग्निशिखा प्रकटीभूता एध एव ज्वालयति तथैव रुक्मिप्रभृतिदुष्टराजन्यकुलेनावृता सैव तत्सर्वं ज्वालयिष्यति । अहं तु निमित्तमात्रं भविष्यामीति भावः । एवं तदशेषसंदेशोत्तरमप्यूह्यम् ॥ ३ ॥ परश्व आगामिदिनात्परदिने । यद्यपि पृतनापतिभिः परीत इति तया स्नेहस्वभावेन संदिष्टं, तथापि प्रतिवीरेष्ववज्ञया 'गुप्तः समेत्य' इति तस्या युक्तमुक्तं रक्षितुमिच्छया तस्याः स्वस्य च लोकतो लज्जया च स पुनरेकाक्येव प्रस्थित इति वक्तुमाह—उद्वाहर्क्षमित्यादित्रयस्यैकत्रैव वाक्यार्थस्तैर्दर्शितः । किञ्च—विशेषेण ज्ञात्वा बहिस्तस्माद्विप्राज्ज्योतिःशास्त्राच्च, अन्तस्तु सर्वज्ञत्वान्निश्चित्य । मधुसूदनः मूर्तिभेदैस्तत्तदुपलक्षणसर्वदैत्यकुलहर्तेत्युत्साहसाम्राज्यं दर्शितम्, भाविजयश्च सूचितः । श्लेषेण—भ्रमरो यथा पद्मिन्याः परिमले लब्धे धैर्यं कर्तुं नेष्टे, तद्वदिति द्योतितम् । सम्यगस्त्रादिपूर्णतया युज्यताम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तुशब्दः क्रमप्राप्तश्रीकृष्णभाववर्णनरूपे प्रकरणभेदे तथैवाऽभिव्यञ्जयति—प्रगृह्येति । प्रकर्षेण पुलकादिप्रेमविकारेण गृहीत्वा पाणिना चेदं पाणिग्रहणं सख्यसम्पादनाय तच्च हार्द्दमभिव्यञ्जयितुम् ईषद्व्रीडासहितेन प्रहर्षेण भावविशेषेण च प्रकृष्टं हसन् यदुनन्दन इति रुक्मिणीपरिग्रहात् यदुकुलस्यानन्दनवैशिष्ट्याऽभिप्रायेण ॥ १ ॥ सा यथा मच्चिता तथा तल्लक्षणमाह—निद्रां च निद्रामपि कुतोन्यदुपभोगादिसुखमित्यर्थः । अत्र विघटननिदानस्यापि मम ज्ञातत्वात् मया स्वत एव तत्समाधानं कर्त्तव्यमित्याह—वेदेति सार्द्धेन ॥ २ ॥ तामानयिष्य इति एतावन्तं कालं तस्या एवाभिप्रायं प्रतीक्षे इति भावः । तर्हि ममाऽनागमने भवांस्तामुपेक्षेतैव ? न तदीयमहागुणाकृष्टत्वान्ममेत्यभिप्रायेण तां विशिनष्टि—मत्परामिति, पदद्वयेन । मत्परत्वे सर्वसद्गुणवत्तासिद्धैव "यस्यास्ति भक्तिर्भगवत्यकिञ्चना" इत्यादेः । एवं "श्रुत्वा गुणान्" इत्यादिना तदुक्तनिजगुणरूपवत्तस्या अपि गुणरूपे बोधिते उच्चैर्मथित्वेति निर्मथ्येति तदुक्तानुसारेण तदुक्तप्रतिपालनपरताबोधिता, राजन्यापसदानिति मुहुर्निर्जयादिनाऽपमानेनापि लज्जाद्यभावात् दुर्बुद्धितानपगमाच्च मृधे इति युद्धमध्ये साक्षादेव न तु मायान्तर्धानादिनेत्यर्थ इति निजपराक्रमः सूचितः । एधस इति दृष्टान्तेन यज्ञीयाग्निशिखावद्दारुणा छन्नत्वेऽपि परश्रमेणावश्योद्धार्य्यत्वन्ध्वनितम्, एवं तदशेषसन्देशप्रत्युत्तरमप्यूह्यम् ॥ ३ ॥ इति दृष्टान्तेन यज्ञीयाग्निशिखावद्दारुणा छन्नत्वेऽपि परश्रमेणावश्योद्धार्य्यत्वन्ध्वनितम्, एवं तदशेषसन्देशप्रत्युत्तरमप्यूह्यम् ॥ ३ ॥ यद्यपि पृतनापतिभिः परीत इति तया स्नेहस्वभावेन सन्दिष्टं तथापि प्रतिवीरेष्ववज्ञया गुप्तः समेत्येति तस्या युक्तमुक्तं रक्षितुमिच्छया तस्याः स्वस्य च लोकतो लज्जया स पुनरेकाक्येव प्रस्थित इति वक्तुमाह—उद्वाहर्क्षमिति । इत्यादित्रयस्यैकत्रैव वाक्यार्थस्तैर्दर्शितः । किञ्च, विशेषेण ज्ञात्वा बहिस्तस्माद्विप्रात् ज्योतिःशास्त्राच्च अन्तस्तु सर्वज्ञत्वान्निश्चित्य मधुसूदनः मूर्त्तिभेदैस्तदुपलक्षणसर्वदैत्यकुलहर्त्तेत्युत्साहसाम्राज्यं दर्शितम् भाविजयश्च सूचितः । श्लेषेण भ्रमरो यथा पद्मिन्याः परिमले लब्धे धैर्यं न कर्त्तुमीष्टे तद्वदिति द्योतितम् । सम्यक् अस्त्रादिपूर्णतया युज्यताम् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तु-शब्देन श्रीरुक्मिणीतोऽपि भावाधिक्यं बोधयति । तदेवाभिव्यञ्जयति—प्रगृह्येति । प्रकर्षेण सकम्पपुलकादिप्रेमविकाराकुलत्वादिना गृहीत्वा, प्रहर्षेण भावविशेषेणैव वा प्रकृष्टं हसन् । यदुनन्दन इति श्रीरुक्मिणीपरिग्रहेच्छया यदुकुलस्यानन्दनाभिप्रायेण ॥ १ ॥ सा यथा मच्चित्ता तथा, तल्लक्षणमाह—निद्रामिति । 'च' अपि निद्रामपि, कुतोऽन्यदुपभोगादिसुखमित्यर्थः । यथा अहमपि तथा तादृशः किम् ? काक्वा, नैव, किन्तु अधिक इत्यर्थः । कुतः ? तदाह—निद्राञ्चेति, निद्राया अलाभे हेत्वन्तरमाह—वेदेति, नितरां वारितः शिशुपालेन सह विवाहनिर्णयनात् ॥२॥ तदानयनं तस्या गुणरूपाभ्यामेवाकर्षणादित्याभिप्रायेण तां विशिनष्टि—मत्परामिति पदद्वयेन । तत्परत्वेन सर्वसद्गुणवर्गसत्तासिद्धैव । एवं (भा० १०।५२।३७) 'श्रुत्वा गुणान्' इत्यादिना तदुक्तनिजगुणरूपवत् तस्या अपि गुणरूपे बोधिते । उच्चैर्मथित्वेति निर्म्मथ्येति तदुक्तानुसारेण तदुक्तप्रतिपालतपरता च बोधिता । राजन्यापसदानिति मुहुर्निर्ज्जयादिना अपमानेनापि लज्जाद्यभावाद्दुर्बुद्ध्यनपगमाच्च । 'मृधे' इति युद्धमध्ये साक्षादेव, न तु मायान्तर्द्धानादिनेत्यर्थः । इति निजपराक्रमः सूचितः । एधस इति दृष्टान्तेन दुष्टराजकुलाच्छन्नत्वं परिश्रमेणाप्यवश्यानेयत्वादिकञ्च ध्वनितम् । एवं तदशेषसन्देशप्रत्युत्तरमप्यूह्यम्, तच्च स्पष्टमेव ॥ ३ ॥ विशेषेण ज्ञात्वा ज्योतिः शास्त्रतस्ततो विप्राद्वा, सर्वज्ञत्वाद्वा निश्चित्य, यतो मधुसूदनः साक्षात् श्रीनारायणः, किंवा महादिदैत्यस्य मधोर्वधेन महावीर्य्यादिकं सूचितम् । अतो दुष्टराजवर्गमध्ये एकाकीतया गन्तव्येऽपि शंका कापि न कार्य्येति श्रीपरीक्षितमाश्वासयति—सम्यगस्त्रादिपूर्णतया महावेगगामित्वादिना च युज्यताम् । हे दारुकेति, (भा० १०।५२।४१) 'गुप्तः समेत्य' इति श्रीरुक्मिणीसन्देशात्, तदेकमात्रसारथ्येन गन्तुं निभृतं तेनैव रथयोजनार्थम् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

वैदर्भ्या इति ततः स भगवान् यदुनन्दनस्तु वैदर्भ्याः सन्देशमाकर्ण्य स्वपाणिना द्विजं पाणौ गृहीत्वोवाच ॥ १ ॥ उक्तिमेवाह—यथेति माच्च तेति निद्राया अलाभे हेतुः तथा तच्चित्तम् इत्यपि हेत्वन्तरं चाह, वेदेति मयि द्वेषाद्धेतोः रुक्मिणा ममोद्वाहो निवारित इत्यहं वेद्मि अतश्चाहं निद्रां न लभ इत्यर्थः ॥ २ ॥ अधुना तु राजन्याधमान्युद्ध उन्मथ्यानवद्यानि निर्दुष्टानि

शोभनान्यङ्गानि यस्याः अहमेव परो यस्यास्तां मच्चित्तां वा तां रुक्मिणीमानयिष्यामि उन्मथ्यानयने दृष्टान्तः एधसो दारुणोऽग्निशिखामिवेति ॥ ३ ॥ इति ब्राह्मणमुक्त्वाथ सूतमाहेत्याह—उद्वाहेति। मधुसूदनो रुक्मिण्या उद्वाहर्क्षं परश्वो रात्रौ विवाहनक्षत्रमिति विज्ञाय सारथिमाह – दारुकेति । हे दारुक ! रथः संयुज्यतामश्वैः संयुक्तः क्रियताम् इति ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मम द्वेषाद्रुक्मिणा विवाहो निवारित इतीममर्थम् अहं वेद वेद्मि ॥ १-२ ॥ एधसः काष्ठादग्नेः शिखां ज्वालाम् ॥ ३ ॥ उद्वाहर्क्षं विवाहनक्षत्रम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

कालविलम्बासहिष्णुतया न्यमीलयत् निमील्यैव स्थिता ॥ १-३० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तथाहमपीत्यादि । निद्राञ्च न लभे निशीत्यस्यायं भावः निश्युपगतां निद्रारूपां नायिकां न लभे न स्वीकरोमि। रुक्मिण्युद्वाहो यावन्न भवति, तावत्त्वमपि न मे भोग्येति निद्रामपि निरस्यामीति भावः ॥ ३-२४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

निद्राञ्च न लभे निशीत्यस्यायमर्थः—निशि उपसन्नां निद्रामुपभोग्यत्वेन न स्वीकरोमि, रुक्मिण्युद्वाहो यावन्न भवति, तावन्नान्या स्वीकार्येति निद्रारूपा नायिकापि न स्वीक्रियते ॥ १-२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्रिपञ्चाशत्तमे कृष्णो गत्वा कुण्डिनमर्चितः। भीष्मकेणाहरद्भैष्मीं देव्यर्चार्थं विनिर्गताम् ॥

रुक्मिणी कृष्णैकचित्ता बहिरन्तर्व्याकुलेवास्ति स्म स कृष्णस्तु रुक्मिण्येकचित्तत्वादन्तर्व्याकुलोपि प्रहसन् प्रहासेन स्वहर्षमाविष्कुर्वन् ॥ १ ॥ वेद वेद्मि ॥२॥ एधसोऽग्निशिखामिवेति एधसि वर्त्तमानाऽग्निशिखाप्रकटीभूता यथा एध एव ज्वालयति तथैव रुक्मिणीप्रभृतिदुष्टराजन्यकुलेनावृता सैव तत् सर्वं ज्वालयिष्यति अहं तु निमित्तमात्र भविष्यामीति भावः ॥३॥ उद्वाहर्क्षमिति परश्वो रात्रौ विवाहनक्षत्रमिति विप्रमुखाद्विज्ञाय ॥ ४ ॥

गूढार्थदीपिनी

त्रिपञ्चाशत्तमे गत्वा कुण्डिनं स्वप्रियोक्तितः। पश्यतां द्विषतां कृष्णो रुक्मिणीमहरद् बलात् ॥ १ ॥

वैदर्भ्या रुक्मिण्याः ॥ १ ॥ यथा सा मच्चित्ता तथाऽहमपि तच्चित्तः ॥ २ ॥ मृधे संग्रामे राजन्येषु अपसदान् नीचान् शिशुपालादीन् उन्मथ्य निर्जित्य तामानयिष्ये । एधसः काष्ठात् ॥ ३ ॥ उद्वाहर्क्षं विवाहनक्षत्रं परश्वो रात्रौ ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

त्रिपञ्चाशत्तमे श्रीरुक्मिणीहरणात्मिकां श्रीकृष्णलीलां वर्णयति—तत्र श्रीरुक्मिणीसन्देशश्रवणानन्तरं भगवान् किं कृतवानित्यत्राह—वैदर्भ्या इति ॥ १ ॥ वेद वेद्मि ॥२॥ आनयिष्ये आनेष्यामि काष्ठेभ्यो यथाऽग्निशिखास्वरूपादिभिरत्यन्तविलक्षणा तथा प्राकृतशरीरेभ्यो जीवेभ्यः स्वरूपविग्रहगुणादिभिः भगवती नित्याऽद्भुतविग्रहवती भगवदात्मिकाऽत्यन्तविलक्षणेत्याह—एधसोऽग्निशिखामिवेति ॥ ३ ॥ स दारुकः । अश्वानां वर्णाः पाद्मे उक्ताः—

"शैव्यस्तु शुकपत्राभः सुग्रीवो हेमपिङ्गलः । मेघपुष्पस्तु मेघाभः पाण्डुरो हि बलाहकः" ॥ इति ॥ ४-६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ । स तु कृष्णोऽपि । तं त्विति पठन्ति । पाणिना स्वस्य पाणिं द्विजस्य पाणिं द्विजस्य तं तत्त्वेन विभाव्य पाणिं गृहीत्वैवं तत्पाणिं गृह्णामीत्यसूचयच्चतुरतर इति ज्ञेयम् ॥ १ ॥ अहमपि तच्चित्तस्तन्मनस्को निशि निद्रां नाध्यगमम् । रुक्मिणा द्वेषान्ममोद्वाहो निवारित इत्यहं वेद ॥ २ ॥ राजन्यापसदांस्तान्नीचान् । उन्मथ्येत्युक्त्यनुरूपं निदर्शनमाह। एधसः काष्ठान्मथितादग्नेः शिखां यथा याज्ञिका निष्कासयन्ति तथानयिष्ये ॥ ३ ॥ उद्वाहर्क्ष्यं विवाहनक्षत्रम् ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

शतार्धे वा चतुर्थे वा भगवान् भार्ययार्थितम् । विप्रार्थितं च कृतवानिति सम्यङ् निरूप्यते ॥ १ ॥
प्रसह्य कन्याहरणमुद्योगावधि वर्ण्यते । कायवाङ्मनसामत्र ह्यैकमत्वं निरूप्यते ॥ २ ॥

पूर्वाध्यायान्ते यत्कर्तव्यम्, यद्वा वक्तव्यम्, तदुच्यतां क्रियतामिति ब्राह्मणविज्ञापना निरूपिता । ततो भगवान् तत्सन्तोषार्थं स्वमानसं वाक्यं च निरूपयितुमारम्भं कृतवानित्या **वैदर्भ्या** इति । सा ह्यत्यन्तं कुलीना भक्तिप्रधाना । यदुरपि भक्तिप्रधानः

तुशब्दः शङ्कानिवृत्त्यर्थः। नात्र शङ्का सम्भवति। यतोऽहमपि जात इति वक्ष्यति। संदेशश्चावश्यं श्रोतव्यः। इदं श्रवणं विचारपूर्वकं सादरं च। ततो ब्राह्मणः गुह्यकर्तेति तेन सह मैत्रीमिव कर्तुं पाणिना **पाणि** प्रगृह्य भार्यासम्बन्ध्ययमिति औदासीन्यं परित्यज्य प्रहसन्निदं वक्ष्यमाणमब्रवीत् ॥ १ ॥ आदौ स्वमनोवार्तामाह **तथाहमपि तच्चित्त** इति। यथा सा मच्चित्ता, एवमहमपि तच्चित्तः। अनेन सर्वाणि तस्या वाक्यानि मद्वाक्यसदृशानीति निरूपितम्। विशेषमप्याह **निद्रां** चेति। रात्रावावश्यकी निद्रा। सापि चिन्तया न जातेति। भार्येच्छया वा। नन्वेवं चिन्तायां किं कारणमित्याकाङ्क्षायामाह **वेदाहमि**ति। नात्र किञ्चित्सन्दिग्धम्। यतोऽहं वेद। सर्वगुणसम्पत्तावपि केवलं द्वेषात् रुक्मिणा एकेन ममोद्वाहः आहूय कन्यादानलक्षणः प्रयत्नेन निवारितः ॥ २ ॥ निवारितः ॥ २ ॥ एवं प्रामाण्यं मानसं चोक्त्वा प्रतिजानीते तामानयिष्य इति। भार्येति निश्चित्य न नाम गृह्णाति। प्रतिबन्धकानामल्पत्वायाह। **राजन्यापसदान्** राजन्येषु अधमान् अपगता सद् सभा येभ्य इति। क्षत्रियगोष्ठ्यां परिगणनारहिताः अधमाः। ते ह्यतिक्षुद्रा इति मारणमपेक्ष्यते, किन्तु उन्थमनमेव कर्तव्यम्। अलौकिकद्वारा निवारयति **मृध** इति। युद्धे एव तानुन्मथ्य आनयिष्यामीति भावः। एवं करणे हेतुनाह **मत्परा**मिति। 'अहं भक्तपराधीन' इति भक्तिमार्गानुसारेणापि तामानयिष्ये। **अनवद्याङ्गी**मिति निर्दुष्टत्वादपि। निर्दुष्टं हि भगवान् गृह्णातीति। अङ्गपदेन वाक्येन दोषो निरूपितः। यतः सा दत्ता। इयं धर्मोपयोगिनी भविष्यतीति राक्षसविवाहं करिष्यामीत्याह **एधसोऽग्निशिखामिवे**ति। दारुणि ज्वलन्ती अग्निशिखा नात्यतं प्रकाशमेति। सैव चेत् वर्तिसहिता भवेत्, तदा दीपरूपा अतिप्रकाशते, तथा तां प्रकाशयुक्तां करिष्यामीत्यर्थः ॥ ३ ॥ एवं वाचनिकमुक्त्वा कायिकार्थं प्रयत्नमाह **उद्वाहर्क्ष**मिति। विवाहे नक्षत्रमेव मुख्यमिति, भार्याप्रधानमिति, चन्द्रं ग्रहांश्चानुगुणान् परित्यज्यनक्षत्राणां मुख्यता निरूपिता। विवाहनक्षत्रं ब्राह्मणमुखादेव विज्ञाय रथः संयुज्यतामित्याह। सम्यक् योगो युद्धार्थः। तत्र हेतुः **रुक्मिण्या** इति। रुक्मिणो भगिनीति। सेनासङ्ग्रहाभावे स्वत एव सामर्थ्यमाह **मधुसूदन** इति। आशु संयुज्यताम्, अनेन समयः सन्निहित इति ज्ञापितम्। **दारुके**ति सम्बोधनं वैकुण्ठादागतस्य चातुर्यं भयाभावश्च प्रदर्शितः ॥ ४ ॥

विवरणटिप्पणी

तामानयिष्य इत्यस्याभासे। **प्रामाण्य**मिति। भगवद्वाक्यसादृश्यनिरूपणेन रुक्मिणीवाक्यानां प्रामाण्यमुक्तमित्यर्थः। **मानस**मिति। मनोवार्तामित्यर्थः।

श्रीसुबोधिनी–सारः

शुकोक्तिः। यदुनंदनः स कृष्णो वैदर्भ्या रुक्मिण्याः संदेशं निशम्य श्रुत्वा पाणिना स्वकरेण विप्रस्य प्राणिं प्रगृह्य प्रहसन्निदमब्रवीत्। तु सर्वाभिज्ञानं सूचनार्थम् ॥ १ ॥ यथा सा मच्चित्ता तथाहमपि तच्चित्तो निशि रात्रौ निद्रां न लभे नैमि। ममोद्वाहः परिणयो रुक्मिणा तद्भ्रात्रा निवारितो वर्जितो द्वेषाद्धेतोरित्यहं वेद ॥ २ ॥ मृधे संग्रामे राजन्यपसदान् राजाधमान् उन्मथ्य तां रुक्मिणीमानेष्यामि। स्वार्थे णिच्। अनवद्यं निर्दोषमंगं मूर्त्तिर्यस्यास्तां तत्र हेतुर्मत्यराम् "राघवत्वेऽभवत्सीता रुक्मिणी सान्यजन्मनि" इत्युक्तेः। एधसः काष्टराशेरग्निशिखां ज्वालामिव ॥ ३ ॥ शुकोक्तिः। रुक्मिण्या उद्वाहस्य ऋक्षं नक्षत्रं **विज्ञाय** ज्ञात्वा मधुसूदनः श्रीकृष्णः सारथिमित्याह। हे दारुक रथः संयुज्यतां त्वयेति ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्रिपञ्चाशत्तमे गत्वा कुण्डिनं रामसंयुतः। रुक्मिणीमहरत् कृष्ण इत्येतद्विनिरूप्यते ॥ १ ॥

स तु यदुनन्दनः कृष्णो वैदर्भ्या रुक्मिण्याः सन्देशं निशम्य स्वपाणिना द्विजस्य पाणिं प्रगृह्य प्रहसन् द्विजं प्रतीदमब्रवीदित्यन्वयः। तदुक्तिमेवाह—तथेति ॥ १ ॥ यथा सा वैदर्भी व्याकुलचित्ता तथाहमपि निशि व्याकुलतया निद्रामपि न लभे। तत्र हेतुमाह—तच्चित्त इति। निद्राया अलाभे हेत्वन्तरमप्याह—वेदेति। मद्विषयकद्वेषादेव रुक्मिणा ममोद्वाहो निवारित इति त्वया अकथितमप्यहं वेद्मि, अतोपि निद्रां न लभे इत्यर्थः ॥ २ ॥ 'अतो राजन्येष्वपसदान् अधमान् शिशुपालादीन् मृधे युद्धे उन्मथ्य अभिभूय तां रुक्मिणीमानयिष्ये। तदानयने हेतुमाह—मत्परामिति। अहमेव परो भर्तृतया सम्मतो यस्या स्ताम्। अनवद्यानि निर्दुष्टानि शोभनान्यङ्गानि यस्यास्ताम्। आनयने दृष्टान्तमाह—एधसः इति। एधसः काष्ठात् सकाशात् यथा निर्विघ्नतयाऽग्निशिखां यथा वायुर्हरति तथा एतेभ्यस्तद्धरणेऽपि प्रतिबन्धो नैव भविष्यतीत्यर्थः ॥ ३ ॥ ततश्च स मधुसुसूदनः रुक्मिण्या उद्वाहर्क्षं परश्वो रात्रौ विवाहनक्षत्रमिति विज्ञाय 'हे दारुक! आशु रथः संयुज्यतां अश्वैः संयुक्तः क्रियताम्' इति सारथिं प्रत्याह ॥४॥

अन्वितार्थप्रकाशिका

त्रिपञ्चाशत्तमे गत्वा विदर्भान् रुक्मिणी बलात्। जहार भगवांस्तत्र श्लोका (५८) अष्टशरोन्विताः ॥
उवाचेतित्रयं (३) द्वाभ्यां युक्ता (६२) षष्टिरनुष्टुभाम् ॥ ५३ ॥

वैदर्भ्या इति ॥ स तु यदुनन्दनः कृष्णो वैदर्भ्या रुक्मिण्याः संदेशं निशम्य स्वपाणिना द्विजस्य पाणिं प्रगृह्य प्रहसन् द्विजं प्रतीदमब्रवीत् ॥ १ ॥ तथेति ॥ यथा वैदर्भी व्याकुलचित्ता तथाऽहमपि तच्चित्तः सन् व्याकुलतया निशि निद्रां न लभे। मद्विषयक-

द्वेषादेव रुक्मिणा ममोद्वाहो निवारित इति त्वया अकथितमप्यहं वेद जानामि ॥ २ ॥ तामिति ॥ राजन्येष्वधमान् शिशुपालादीन् मृधे युद्धे उन्मथ्य अभिभूय अहमेव परो भर्तृतया सम्मतो यस्यास्ताम् । अनवद्यानि शोभनान्यङ्गानि यस्यास्तां रुक्मिणीम् एधसः काष्ठात् अग्निशिखां वायुरिव आनयिष्ये आनेष्ये । इडार्षः । एधसि वर्त्तमानाऽग्निशिखा प्रकटीभूता यथा एध एव ज्वालयति तथा रुक्मिप्रभृतिभिर्दुष्टैरावृता सैव सर्वान् ज्वालयिष्यत्यहं तु निमित्तमात्रं भविष्यामीति भावः ॥ ३ ॥ पूतनापतिभिः परीत इति तया संदिष्टेऽपि गुप्तः समेत्यैवानुसर्तुं तस्या लज्जावहसंदेशगोपनाय चाग्रजादीन् प्रत्यनुक्त्वैव एकाक्येव प्रस्थित इति वक्तुमाह—उद्वाहेति ॥ मधुसूदनः रुक्मिण्या उद्वाहार्थं परश्वो रात्रौ विवाहनक्षत्रमिति द्विजमुखात् विज्ञाय । हे दारुक ! आशु रथः संयुज्यताम् अश्वैः संयुक्तः क्रियतामिति सारथिं प्रत्याह स्म ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं त्रिपंचाशत्तमेऽध्याये श्रीकृष्णस्य कुंडिनपुरगमनं रुक्मिणीहरणं चोच्यते ॥ १ ॥ रुक्मिणारुक्मिणीजेष्ठभ्रात्रा। मयि द्वेषाद्धेतोः ॥ २ ॥ राजन्येषु अपसदान्निकृष्टान् । उन्मथ्यनिर्जित्य । अनवद्यांगीं निर्दोषां । एधसो मंथितकाष्टात् अग्निशिखामिव । यद्वा एधसः काष्ठस्य मंथनेनाग्निशिखामिव । यद्वा । एधस एधांसि इंधनानि उन्मथ्याग्निशिखामिव । अत्र पुंस्त्वमार्षं। तद्वच्छुद्धामित्यर्थः ॥ ३ ॥ उद्वाहर्क्षं परश्वो रजन्यां । विवाहनक्षत्रं विज्ञाय ॥ ४–६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गत्वा विदर्भान् श्रीकृष्णो द्विषतां मिषतां बलात् । रुक्मिणीमहरत्पञ्चाशत्तमे त्र्यधिके विभुः ॥ १ ॥

वैदर्भ्या इति । ततः यदुनन्दनः, स भगवान् तु वैदर्भ्याः सन्देशं, निशम्य आकर्ण्य, पाणिना स्वहस्तेन, पाणिं विप्रहस्तं **प्रगृह्य**, प्रहसन् सन्, इदं अब्रवीत् ॥ १ ॥ उक्तिमेवाह । तथेति । हे द्विज, तथा रुक्मिणीवदेव, तस्यां रुक्मिण्यां चित्तं यस्य तथाभूतः, अहं अपि, निशि निद्रां, न लभे । **रुक्मिणा**, द्वेषात् मम उद्वाहः, निवारितः, इति च, अहं वेद । निद्राया अलाभे तच्चित्तत्वं **हेतुः** । अन्यदपि वेदेति हेत्वन्तरम् ॥ २ ॥ तामिति । अधुना तु राजन्यापसदान् राजसु हीनान्, मृधे युद्धे, उन्मथ्य अनवद्यानि निर्दोषाण्यङ्गानि यस्याः तां, अहमेव परो यस्यास्तां, तां रुक्मिणीं, उन्मथ्यानयने दृष्टान्तः । एधसो दारुणः सकाशात्, अग्निशिखां वह्निज्वालां इव, आनयिष्ये ॥ ३ ॥ इति ब्राह्मणमुक्त्वा सूतमाहेत्याह । उद्वाहर्क्षमिति । मधुसूदनः सः श्रीकृष्णः, **रुक्मिण्याः**, उद्वाहर्क्षं परश्वो रात्रौ विवाहनक्षत्रं, इति विज्ञाय, हे दारुक, रथः आशु संयुज्यतामश्वैः संयुक्तः क्रियताम् । इति, **सारथिं आह** ॥ ४ ॥

कृष्णप्रिया

रुक्मिणीहरण

श्रीशुकदेव जी कहते हैं—परीक्षित् ! भगवान् श्रीकृष्ण ने विदर्भराजकुमारी रुक्मिणी जी का यह सन्देश सुनकर अपने हाथ से ब्राह्मण देवता का हाथ पकड़ लिया और हँसते हुए यों बोले ॥ १ ॥ भगवान् श्रीकृष्ण ने कहा—ब्राह्मण देवता ! जैसे विदर्भराजकुमारी मुझे चाहती है, वैसे ही मैं भी उन्हें चाहता हूँ। मेरा चित्त उन्हीं में लगा रहता है। कहाँ तक कहूँ, मुझे रात के समय नींद तक नहीं आती। मैं जानता हूँ कि रुक्मी ने द्वेषवश मेरा विवाह रोक दिया है ॥ २ ॥ परन्तु ब्राह्मण देवता ! आप देखियेगा, जैसे लकड़ियों को मथकर—एक दूसरे से रगड़कर मनुष्य उनमें से आग निकाल लेता है, वैसे ही युद्ध में उन नामधारी क्षत्रियकुलकलङ्कों को तहस-नहस करके अपने से प्रेम करने वाली परमसुन्दरी राजकुमारी को मैं निकाल लाऊँगा ॥ ३ ॥ श्रीशुकदेव जी कहते हैं—परीक्षित् ! मधुसूदन श्रीकृष्ण ने यह जानकर कि रुक्मिणी के विवाह की लग्न परसों रात्रि में ही है, सारथी को आज्ञा दी कि 'दारुक ! तनिक भी विलम्ब न करके रथ जोत लाओ' ॥ ४ ॥

स चाश्वैः [1]सैन्यसुग्रीवमेघपुष्पबलाहकैः । युक्तं रथमुपानीय तस्थौ प्राञ्जलिरग्रतः ॥ ५ ॥
आरुह्य स्यन्दनं शौरिर्द्विजमारोप्य तूर्णगैः । आनर्त्तादेकरात्रेण विदर्भानगमद्धयैः ॥ ६ ॥
राजा स कुण्डिनपतिः पुत्रस्नेहवशं गतः । शिशुपालाय स्वां कन्यां दास्यन् [2]कर्माण्यकारयत् ॥ ७ ॥
पुरं सम्मृष्टसंसिक्तमार्गरथ्याचतुष्पथम् । चित्रध्वजपताकाभिस्तोरणैः समलङ्कृतम् ॥ ८ ॥

---

१. शैव्य–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. । २. कार्याण्य–विज. ।

कर्दमक्षमा

अन्वयः—सः, च, सैन्यसुग्रीवमेघपुष्पबलाहकैः, अश्वैः, युक्तम्, रथम्, उपानीय, प्राञ्जलिः, अग्रतः, तस्थौ ॥ ५ ॥ शौरिः, द्विजम्, आरोप्य, स्यन्दनम्, आरुह्य, तूर्णगैः, अश्वैः, एकरात्रेण, आनर्ताद्, विदर्भान्, अगमत् ॥ ६ ॥ पुत्रस्नेहवशम्, गतः, कुण्डिनपतिः, सः, राजा, शिशुपालाय, स्वाम्, कन्याम्, दास्यन्, कर्माणि, अकारयत् ॥७॥ संमृष्टसंसिक्त, मार्ग, रथ्या, चतुष्पथम्, चित्रध्वजपताकाभिः, तोरणैः, समलङ्कृत ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शैव्येत्यादीनि चत्वार्यश्वनामानि ॥ ५–६ ॥ पुत्रस्य रुक्मिणः स्नेहेन तद्वशमनुगच्छतीति तथा। अनेन शिशुपालेऽनभिरुचिं द्योतयति। कर्माणि पुरालंकारपितृदेवार्चनादीनि ॥ ७ ॥ तान्येवाह। पुरमित्यादिचतुर्भिः। संमृष्टाः संसिक्ताश्च मार्गादयो यस्मिंस्तत्। चित्रा ध्वजेषु पताकास्ताभिः समलंकृतमकारयत् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स च दारुकः स चेति चेन तात्कालिकत्वं बोध्यते। सैब्येत्यत्र शैव्येति पाठः सत्संमतः। एषां वर्णो यथा पाद्मे–शैब्यश्च शुकपत्राभः सुग्रीवो हेमपिंगलः। मेघपुष्पस्तु मेघाभः पांडुरो हि बलाहकः।" इति। युक्तं संतं सुग्रीवपुष्पकं नाम रथमुप समीपे आनीय भक्त्या शिरसि बद्धत्वात्प्रकृष्टोञ्जलिर्यस्य सः ॥ ५ ॥ स्यंदनं रथम्। द्विजं रुक्मिणीप्रहितमारोप्य तस्य सुखगमनाय, तस्याः प्राणरक्षणार्थं तदंतिके प्रेषणाय च। शौरिरिति साक्षाद्भगवत्त्वेपि मनुष्यलीलत्वात्तथैव यानमुचितमिति भावः। एका चासौ रात्रिश्चेत्येक रात्रस्तेन। सन्ध्यायां रुक्मिणीसंदेशाञ्छ्रुत्वा तदानीमेव रथमारुह्य गच्छन्प्रातः कुंडिनं प्रापेत्यर्थः ॥ ६ ॥ स भीष्मकः। अनेन पुत्रस्नेहेत्यादिवचनेन। अनभिरुचिं रुच्यभावम्। स परमसाधुत्वेन प्रसिद्धोऽपि स्वां स्वाधीनामपि। अकारयत् स्वभृत्यपुरोहितादिभिः। तत्र वश इच्छा 'वशः कांतौ' इत्यमरः। तच्च मूलत एव स्पृष्टम् 'बन्धूनामिच्छताम्' इत्यादे, 'वेदाहम्' इत्यादेश्च। स्नेहशब्दात् तेन मरणवनवासाद्युद्यमः कृत इति गम्यते ॥ ७ ॥ तानि पुरालंकारादीनि। संमृष्टास्त्यक्तावस्कराः प्राक्, तदनु संसिक्ता गोमयोदकादिप्रोक्षिताः। पुरमिति युग्मकम्। मार्गः साधारण वर्त्म। रथ्या पण्यवीथिका ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स चेति च शब्देन तात्कालिकत्वं बोध्यते सैव्येत्यत्र शैव्येति पाठः सत्सम्मतः एषां वर्णो यथा पाद्मे—

"शैव्यस्तु शुकपत्राभः सुग्रीवो हेमपिङ्गलः। मेघपुष्पस्तु मेघाभः पाण्डुरो हि बलाहकः॥" इति।

युक्तं सन्तं सुग्रीवपुष्पकं नाम रथम् उप समीपे आनीय भक्त्या शिरसि बद्धत्वात्प्रकृष्टोऽञ्जलिर्यस्य सः ॥ ५ ॥ द्विजं रुक्मिण्या प्रहितमारोप्येति तस्य सुखगमनाय तस्याः प्राणरक्षार्थं शीघ्रं तदन्तिके प्रेषणाय च शौरिरिति, साक्षाद्भगवत्त्वेऽपि मनुष्यलीलत्वात्तथैव यानमुचितमिति भावः ॥ ६ ॥ स परमसाधुत्वेन प्रसिद्धोऽपि स्वां स्वाधीनामपि अकारयत् स्वभृत्यपुरोहितादिभिः पुत्रेति तैर्व्याख्यातम्। तत्र "वश इच्छा वशः कान्तौ" इत्यमरः। तच्च मूलत एव स्पष्टम् बन्धूनामिच्छतामित्यादेः वेदाहमित्यादेश्च स्नेहशब्दात् तेन मरणवनवासाद्युद्यमः कृत इति गम्यते ॥ ७ ॥ पुरमिति युग्मकम्। "मार्गः साधारणं वर्त्मरथ्या पण्यवीथिका" विरजाम्बरेति रजशब्दोऽकारान्तोपीति स्त्रीपुरुषैः प्राचीनैः विवाहोत्सवार्थमागन्तुकैश्च तथा श्रीमद्भिर्वितानादिशोभावद्भिर्गृहैश्च तादृशैर्जुष्टमकारयदिति शेषः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अश्वानां नामानि शीघ्रसुखगतये तेषां तत्तत्संज्ञाप्रसिद्ध्या नित्य-भगवदीयत्वबोधनार्थम्। तत्र शैव्येति पाठः प्रायो गौड़पुस्तकेषु, अन्यत्र च सैन्येत्येव। एषां वर्णो यथा पाद्मे 'शैव्यस्तु शुकपत्राभः सुग्रीवो हेमपिंगलः। मेघपुष्पस्तु मेघाभः पाण्डरो हि बलाहकः॥ इति, युक्तं सन्तं सुग्रीवपुष्पकं नाम रथम्, उप समीपे, उपांशुत्वेन वानीय भक्त्या शिरसि बद्धत्वात् प्रकृष्टोऽञ्जलिर्यस्य सः ॥ ५ ॥ द्विजं श्रीरुक्मिण्या प्रहितमारोप्य, तस्याः प्राणरक्षार्थं शीघ्रं तदन्तिके तस्य प्रेषणाय, शौरिरिति निजशेषैश्वर्य्यविस्तारणार्थं शूरवंशेऽवतीर्णत्वात्। तथा श्लेषेण शूरवंशभवत्वाच्च स्वत एव सर्व्वशक्तिमत्त्वमभिप्रेतम्। तथापि हयैरेवागमत्, कुतः? तूर्णगैः, तेषामपि तादृशशक्तिमत्वादिति भावः। यद्वा, शौरिरिति साक्षाद्भगवत्त्वेऽपि मनुष्यलीलापरत्वमुक्तम्, क्षत्रियवंशेऽवतीर्णत्वात्, अतो हयैरेव ॥ ६ ॥ स परमसाधुत्वेन प्रसिद्धोऽपि, स्वां स्वाधीनामपि शिशुपालाय दास्यन्। तत्र हेतुः—पुत्रेति। कुण्डिनस्य साधुवर्गव्याप्तविदर्भदेशीयराजपुरस्य पतिरिति कर्म्मनैपुण्यमुक्तम्। तदेव दर्शयति—कर्म्माणीति। अकारयत् स्वभृत्यपुरोहितादिभिः ॥ ७ ॥ संशब्दाभ्यां रेण्वाद्यपनरणेन शोधनस्य, तथा गन्धजलादिना सेकस्य सम्यक्त्वं बोध्यते। मार्ग–रथ्ययोर्वृहत्वक्षुद्रत्वादिना भेदः। तोरणैश्च सम्यगलंकृतमिति सदालंकृतमेव, तदानीन्तु सम्यक्तयेत्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततो दारुकः सैव्याद्याख्यैश्चतुर्भिः श्रेष्ठैरश्वैर्युक्तं रथम् उपसमीपमानीयाऽग्रतः पुरतः बद्धाञ्जलिस्तस्थौ ॥ ५ ॥ आरुह्येति तावत् द्विजमारोप्य ततः स्वयमपि स्यन्दनं रथमारुह्यानर्त्तात् स्वदेशाद्विदर्भान् देशान् हयैस्तुरङ्गैरेकरात्रेणाऽगमत् तस्यां रात्र्यां प्रस्थाय प्रातविदर्भदेशानगमदित्यर्थः। "श्वोभाविनि त्वमजितोद्वहने" इत्यादिरुक्मिणीसन्देशात् ॥ ६ ॥ राजेति कुण्डिनपतिर्भीष्मकः पुत्रस्य रुक्मिणः स्नेहवशं गतः पुत्रस्नेहेन तत्परतन्त्रीभूत इत्यर्थः। दास्यन् लक्षणहेत्वोरिति शत्रादेशः दातुमित्यर्थः। कर्माणि पुरालङ्कारपितृदेवार्चनादीनि कारयामास ॥ ७ ॥ कर्माण्येवाह—पुरमिति चतुर्भिः। संमृष्टाः संसिक्ताश्च मार्गादयो यस्मिंस्तच्चित्रध्वजेषु पताकाभिस्तोरणैश्च सम्यगलङ्कृतमकारयत् ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हयैर्युक्तम् ॥ ५–६ ॥ कार्याणि विवाहयोगकार्याणि अकारयत् ॥७॥ उक्तमेव स्पष्टयति—पुरमिति। प्राक्सम्मृष्टास्त्यक्तावस्कराः पश्चात्संसिक्ताः गोमयोदकादिप्रोक्षिता मार्गादयो यस्मिंस्तत्तथा ॥ ८–१० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

शैव्यादीनां वर्णो यथा पाद्मे—

"शैव्यस्तु शुकपत्राभः सुग्रीवो हेमपिङ्गलः। मेघपुष्पस्तु मेघाभः पाण्डुरो हि वलाहकः॥" इति ॥ ५ ॥

एका चासौ रात्रिश्चेत्येकरात्रस्तेन सन्ध्यायां रुक्मिणीसन्देशान् श्रुत्वा तदानीमेव रथमारुह्य गच्छन् प्रातः कुण्डिनं प्रापेत्यर्थः ॥ ६ ॥ पुत्रस्य स्नेहेन वशः अत एवानुगश्च कर्माणि पुरालङ्करणादीनि ॥ ७–८ ॥

गूढार्थदीपिनी

तूर्णमैशीघ्रयामिभिार्हवैः। एका चासौ रात्रिश्चेत्येकरात्रः ॥ ६ ॥ स भीष्मकः। दास्यम् दातुम् ॥ ७ ॥ पुरमिति युग्मम् रथ्या पण्यवीथिका। सेमृष्टाः संमृष्टाः संशोधिताः संसिक्ताश्च मार्गादयो यस्मिन्। तोरणं वन्दनमालिकाः! स्रगादीनि आविभ्रतीति तैः स्त्रीपुरुषैः जुष्टंसुसज्जितमकारणदिति क्रियाशेषः ॥ ८–९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

स भीष्मकः पुत्रस्य रुक्मिणः स्नेहेन वशः अत एवानुगः कर्माणि पुरालङ्कारपितृदेवार्चनादीनि अकारयत् कारयामास ॥ ७ ॥ कर्माण्येवाह, पुरमिति चतुर्भिः ॥ ८–१० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्राञ्जलिः स दारुकोऽग्रतस्तस्थौ। आरोप्य च द्विजवरमनन्तरं स्वयमारुह्य हयैर्युक्तंस्यन्दनम् ॥ ६ ॥ स्वां कन्यामिति पाठे न स्वलाघवम्। शिशुपालाय स्वामिति पठञ्छिशुपाललाघवं यल्लश्रुपठनीयतयाऽसूचयदिति मन्तव्यम्। कार्याणि स्वस्तिवाचनहरिद्रालेपनादीनि। तान्येव विशदयति ॥ पुरमिति ॥ ७ ॥ सम्मृष्टा अवकारादिना मार्जिता अनन्तरं संसिक्ता मलयजजलसिक्ता रथ्या महावाप्याश्चतुष्पथा मार्गचतुष्टयसङ्गमस्थानानि। चतुष्पथश्चतुर्मार्गसङ्गम इति विश्वः। यस्मिंस्तच्चित्रध्वजपताकाभिरेकजिह्वाद्विजिह्वाभिः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

शीघ्रमेव दारुककृतिमाह **स चाश्वै**रिति। यद्यपि भगवतो बहवश्चाश्वाः, रथाश्च बहवः, तथापि सारथिपदप्रयोगात् गरुडध्वज एव रथो गृहीतः तादृशोऽपि सैन्यादीनेव चतुरोश्वान् योजितवान् तेषामन्वर्थानि नामानि तत्राद्यः सैन्यरूप एव असङ्ख्यातसैन्येन यावत्कार्यम्, तावदनेनैव भवतीति। द्वितीयः सुग्रीवः, यथा वानराधिपतिः सीतासमानयने रामकार्यसाधकः, तादृशोऽयमिति, **सुग्रीव** इति। शोभना ग्रीवा यस्येति नास्य कदाचिदपि परावृत्तिः सूचिता। **मेघपुष्प**स्तृतीयः। वृष्टिवत् सर्वानेव व्याप्य पततीति। **बलाहकश्चतुर्थः**। स मेघवत्पक्षिवद्वा क्षणमध्ये समायात्यपगच्छति च एवं तै**र्युक्तं** सम्यग्योजित **रथमुपानीय** यावद्विनियोगं कृत्वा, स्वकृतं ज्ञापयन्निव अग्रतः प्राञ्जलिस्तस्थौ ॥ ५ ॥ एवं ब्राह्मणाय स्ववाक्यसामर्थ्यं दर्शितम्, ततः कुण्डिनपुरं गत इत्याह **आरुह्ये**ति। **स्यन्दन**मतिवेगगामि। **शौरि**रिति पितामहनाम्ना व्यपदेशः अलौकिकसामर्थ्यप्रकाशनाभावार्थः तमपि द्विजं तत्रैवारोप्य एकरात्रेणैव स्वदेशात्तं देशं प्रविष्टः, यथा मध्यदेशेषु न परिज्ञानं भवति अन्यथा तत्रत्यैर्ज्ञापिते रुक्मी ब्राह्मणाय भगिन्यै वा अपकारं कुर्यात्, तथैव च रुक्मिण्या प्रार्थितः ॥ ६ ॥ भगवतो नगरप्रवेशं वक्तुं नगरवर्णनार्थं भ्रमाद्राज्ञः प्रवृत्तिं निमित्तत्वेनाह—**राजाथकुण्डिनपति**रिति। राजत्वाद्भीष्मकत्वात् कुण्डिनमिति अल्पवत् नगरनाम निरूपितम्

तत्पतित्वाच्च पुत्रस्नेहवशत्वाच्च **शिशुपालाय** शिशुं बालबुद्धिमेव पालयतीति दुर्बुद्धये कन्यां दातुं कर्माणि पुरसंस्काररूपाणि **सेवकैरकारयत्** अनेन देशे भगवद्गमनेऽपि न तेषां विपरीतशङ्का कापि जातेति निरूपितम् ॥७॥ भगवत्प्रवेशार्थं पुरीं **वर्णयति—द्वाभ्याम् पुरमिति** । प्रथमतः सम्यक् मृष्टं रजोनिवारणेनोज्ज्वलीकृतम् ततः **संशिवतं** चन्दनादिभिः मार्गाः रथ्या हट्टस्थिता **चतुष्पथं** सर्वतो मार्गाः तेषु संसिक्तमित्यर्थः । एवमधः शोभा निरूपिता उपरिशोभामाह—**चित्रध्वजेति** । **त्रिविधैरपि** सम्यगलङ्कृतम् ॥ ८ ॥

श्रीसुबोधिनी–सारः

शैव्यादिनामकैश्चतुर्भिरश्वैर्वाजिभिर्युक्तं रथमुपानीय प्रांजलिः स दारुकोग्रतः **तस्थौ** ॥ ५ ॥ **शौरिः श्रीकृष्णः स्यंदनं** रथमारुह्य द्विजं ब्राह्मणमप्यारोप्य तूर्णगैः शीघ्रगामिभिर्हयैरश्वैरेकरात्रेणानर्त्ताद्द्वारकातो विदर्भानगमत् ॥६॥ कुंडिनपुरकृत्यमाह । कुंडिनस्य नगरस्य पतिः पुत्रस्य रुक्मिणः स्नेहवशं प्रेमाधीनं गतः प्राप्तः स भीष्मको राजा शिशुपालाय स्वां कन्यां रुक्मिणीं दास्यन् दातुं कर्माणि पुरालंकारपितृदेवार्चनादीनि अकारयत् ॥७॥ संमृष्टानि उज्ज्वलीकृतानि संसिक्तानि मार्गा रथ्याचतुष्पथानि यस्मिन् तत् चित्रैः ध्वजैः पताकाभिः तोरणैः समलंकृतं पुरमस्ति ॥ ८ ॥

विवरण टिप्पणी

आरुह्येत्यत्र । **ब्राह्मणायेति** । ब्राह्मणस्य तत्राभावेपि तद्गृहे उपद्रवं कुर्यादित्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

स च दारुकः शैब्याद्याख्यैश्चतुर्भिः श्रेष्ठैरश्वैर्युक्तं रथमानीय बद्धाञ्जलिः सन् अग्रतः तस्थौ । शैब्यादीनां वर्णश्च पाद्मे उक्तः—“शैब्यश्च शुकपत्राभः सुग्रीवो हेमपिङ्गलः । मेघपुष्पस्तु मेघाभः पाण्डुरो हि बलाहक” इति ॥ ५ ॥ शौरिः श्रीकृष्णो द्विजं स्यन्दनमारोप्य स्वयं चारुह्य तूर्णगैः शीघ्रगामिभिर्हयैस्तैः रथे योजितैरश्वैरेकरात्रेण विदर्भान् देशानगमत्, तस्यां रात्र्यां प्रस्थाय प्रातर्विदर्भानगमदित्यर्थः । ‘श्वोभाविनि त्वमजितोद्वहने’ इत्यादिरुक्मिणीसन्देशात् ॥ ६ ॥ स कुण्डिनदेशाधिपतिः राजा भीष्मकः स्वां कन्यां रुक्मिणीं शिशुपालाय दास्यन् दातुं कर्माणि पुरालङ्कारपितृदेवार्चनादीनि कारयामास । ‘शिशुपालाय कन्यादानं तस्य नाभिप्रेतम्, अभिप्रेतं तु कृष्णाय कन्यादानम्, तथा रुक्मिवशतया शिशुपालाय ददाति’ इति **सूचयन्नाह—पुत्रस्नेहवशं** गत इति ॥ ७ ॥ कर्माण्येवाह—पुरमिति चतुर्भिः । सम्मृष्टाः संसिक्ताश्च मार्गादयो यस्मिंस्तत् । चित्रध्वजेषु याः पताकास्ताभिस्तोरणैश्च सम्यगलङ्कृतमकारयत् ॥ ८ ॥

अन्वितार्थप्रकाशिका

स इति । स दारुकः शैब्यादिनामकैश्चतुर्भिरश्वैर्युक्तं रथमानीय बद्धाञ्जलिरग्रतस्तस्थौ । शैब्यादीनां वर्णाः पाद्मे । “शैब्यस्तु शुकपत्राभः सुग्रीवो हेमपिङ्गलः । मेघपुष्पस्तु मेघाभः पाण्डुरो हि बलाहकः ॥” इति ॥ ५ ॥ **आरुह्येति** । सन्ध्यायां रुक्मिणीसंदेशान् श्रुत्वा शौरिः श्रीकृष्णस्तदानीमेव द्विजं स्यन्दनमारोप्य स्वयं चारुह्य तूर्णगैः शीघ्रगामिभिर्हयैस्तै रथयोजितैरश्वैरेकरात्रेण विदर्भान्देशानगमत् । तस्यामेव रात्र्यां प्रस्थाय प्रातर्विदर्भानगमदित्यर्थः । “श्वो भाविनि त्वमजितोद्वहन” इत्यादिरुक्मिणीसंदेशात् ॥ ६ ॥ राजेति । स कुण्डिनपुराधिपतिः राजा भीष्मकः कृष्णाय रुक्मिणीं दातुमिच्छन्नपि पुत्रस्नेहेन वशं तदिच्छामनुगतः मरणाय वनवासाय वा तदुद्यमं दृष्ट्वेति भावः । तेन पितुः शिशुपालेऽनभिरुचिं दर्शयति । स्वां कन्यां शिशुपालाय दास्यन् दातुं कर्माणि पुरालङ्कारपितृदेवार्चनादीनि अकारयत् ॥ ७ ॥ पुरमिति द्वयम् । पुरं संमृष्टानि संसिक्तानि च मार्गरथ्याचतुष्पथानि यत्र तत् चित्रध्वजेषु याः पताकास्ताभिस्तोरणैश्च सम्यगलंकृतम् अकारयत् ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुत्रे रुक्मि संज्ञेस्नेहात्तद्वशमनुगच्छतीति तथाभूतः । कुंडिनपतिः भीष्मकः कर्माणि विनायकपूजनपुरालंकरणादीनि ॥७॥ तामेव पुरशोभामाह चतुर्भिः संमृष्टाः संसिक्ताश्चमार्गा राजमार्गाः रथ्यास्तद्वा मदक्षोपमार्गाश्च चतुष्पथानि च यस्मिन् तत् । चित्रध्वजदंडेषु पताकाभिः समलंकृतं चाकारयदिति पूर्वेणान्वयः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स चेति ॥ ततः स च स दारुकोऽपि, सैन्यसुग्रीवमेघपुष्पबलाहकैः सैन्यादिसंज्ञैः अश्वैः, युक्तं रथं उपानीय, अग्रतः प्राञ्जलिः सन्, तस्थौ ॥ ५ ॥ आरुह्येति ॥ शौरिः श्रीकृष्णः, तावत् द्विजं स्यन्दनं, आरोप्य, ततः स्वयमपि स्यन्दनं, आरुह्य, तूर्णगैः हयैः साधनैः, आनर्त्ताद्देशात्, एकरात्रेण विदर्भान् देशान्, अगमत् ॥ ६ ॥ राजेति ॥ कुण्डिनपतिः राजा, स भीष्मकः,

पुत्रस्य रुक्मिणः स्नेहवशं, गतः पुत्रस्नेहेन तत्परतन्त्रतां प्राप्तः सन्, स्वामात्मीयां, कन्यां, शिशुपालाय, दास्यन्, 'लक्षणहेत्वोः'– इति शत्रादेशः। दातुमित्यर्थः। कर्माणि पुरालंकारपितृदेवार्चनादीनि, अकारयत् ॥ ७ ॥ कर्माण्येवाह चतुर्भिः ॥ पुरमिति ॥ संमृष्टा मार्जिताः संसिक्ता जलोक्षिताश्च मार्गाः रथ्याः चतुष्पथाश्च यस्मिंस्तत्, चित्राः ध्वजेषु पताकास्ताभिः, तोरणैश्च, समलंकृतं, पुरं कुण्डिननगरं, अकारयदिति पूर्वेण संबन्धः ॥ ८ ॥

कृष्णप्रिया

दारुक भगवान् के रथ में शैव्य, सुग्रीव, मेघपुष्प और बलाहक नाम के चार घोड़े जोतकर उसे ले आया और हाथ जोड़कर भगवान् के सामने खड़ा हो गया ॥ ५ ॥ शूरनन्दन श्रीकृष्ण ब्राह्मणदेवता को पहले रथपर चढ़ाकर फिर आप भी सवार हुए और उन शीघ्रगामी घोड़ों के द्वारा एक ही रात में आनर्तदेश से विदर्भदेश में जा पहुँचे ॥ ६ ॥ कुण्डिननरेश महाराज भीष्मक अपने बड़े लड़के रुक्मी के स्नेहवश अपनी कन्या शिशुपाल को देने के लिये विवाहोत्सव की तैयारी करा रहे थे ॥ ७ ॥ नगर के राजपथ, चौराहे तथा गली-कूचे झाड़-बुहार दिये गये थे, उनपर छिड़काव किया जा चुका था। चित्र-विचित्र, रंग-विरंगी, छोटी-बड़ी झंडियाँ और पताकाएँ लगा दी गयी थीं। तोरन बाँध दिये गये थे ॥ ८ ॥

स्रग्गन्धमाल्याभरणैर्विरजोऽ[1]म्बरभूषितैः । जुष्टं स्त्रीपुरुषैः श्रीमद्गृहैरगुरुधूपितैः ॥ ९ ॥
पितॄन् देवान् समभ्यर्च्य विप्रांश्च विधिवन्नृप। भोजयित्वा यथान्यायं वाचयामास मङ्गलम् ॥१०॥
[2]सुस्नातां [3]सुदतीं[4]कन्यां कृतकौतुकमङ्गलाम्[5]। [6]अहतांशुकयुग्मेन [7]भूषितां भूषणोत्तमैः ॥११॥
चक्रुः सामर्ग्यजुर्मन्त्रैर्बध्वा रक्षां द्विजोत्तमाः। पुरोहितोऽथर्वविद्[8] वै गुहाव ग्रहशान्तये ॥१२॥

कर्दमक्षमा

अन्वयः—स्रग्गन्धमाल्याभरणैः, विर्जाम्बरभूषितैः, स्त्री-पुरुषैः, अगुरुधूपितैः, गृहैः, जुष्टम्, पुरम्, आसीत् ॥ ९ ॥ नृपः, पितॄन्, देवान्, विप्रान्, समभ्यर्च्य, च (विप्रान्) यथान्यायम्, भोजयित्वा, मङ्गलम्, वाचयामास ॥ १० ॥ सुदतीम्, सुस्नाताम्, कृतकौतुकमङ्गलाम्, कन्याम्, अहतांशुक, युग्मेन, भूषणोत्तमैः, भूषिताम्, चक्रुः ॥ ११ ॥ द्विजोत्तमाः, सामऋग्यजुर्मन्त्रैः, बध्वाः, रक्षां, चक्रुः, अथर्वविद्पुरोहितः, वै, गृहशान्तये, जुहाव ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्रग्गंधमाल्याभरणैरित्यत्र मत्वर्थो द्रष्टव्यः। यद्वा स्रग्गंधमाल्यान्याबिभ्रतीति तथा तैः। तथा विरजोंबरैर्भूषितैश्च स्त्रीपुरुषैर्जुष्टम्। तथा श्रीमद्भिर्गृहैश्च जुष्टम् ॥ ९ ॥ यथान्यायमन्यांश्च कन्यां प्रति मंगलं वाचयामास ॥ १० ॥ कृतं कौतुकेन विवाहसूत्रेण मंगलं यस्यास्ताम्। अहतं नवीनम्। भूषणोत्तमैश्च भूषिताम् ॥ ११ ॥ बध्वास्तस्याः कन्यायाः। अथर्वविदथर्वणमंत्रवित् ॥ १२–१३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मत्वर्थो द्रष्टव्य इति—स्रग्गंधमाल्याभरणवद्भिरित्यर्थो विधेय इत्यर्थः। 'ऋजुमार्गेण सिध्यतः–' इति न्यायमाश्रित्याह–यद्वेति। विरजांबरेति–रजःशब्दोदंतोपि द्विरूपकोशे—"रजश्च रजसा सार्द्धं मनश्च मनसा सह। सर्वे सांताः स्युरदंता राद्धां तितमिदं बुधैः ॥" इति। स्त्रीपुरुषैः प्राचीनैर्विवाहोत्सवार्थमागन्तुकैश्च, श्रीमद्भिर्वितानादिशोभावद्भिर्गृहैश्च जुष्टम्, अकारयदिति शेषः ॥ ९ ॥ अन्यानतिथ्यादीन्। यथान्यायं यथोचितम्। विवाहे कन्यां प्रति यन्मंगलं वाचयितुं युज्यते तदित्यर्थः। कन्यां प्रतीत्युत्तरेणान्वयः। अत्रानन्यगतया द्वितीया। बलात्प्रतीत्यध्याह्रियते, तृतीयाबलात्सहशब्दवत् ॥ १० ॥ सुदतीं कृतदंतधावनाम्। "कौतुकं विषयाभोगे हस्तसूत्रे कुतूहले। कामे ख्याते मंगले च" इति यादवः। "आबध्नाति करे सूत्रं मंगलार्थं द्वयोर्गुरुः" इति ग्रंथान्तराच्च। 'अहतं नवशुद्धयोः' इति। "अंशुकं केवले वस्त्रे सूक्ष्मवस्त्रोत्तरीययोः" इति यादवः। "पूर्वं मर्दनचीरहारतिलकं नेत्राञ्जनं कुण्डलं नासामौक्तिकपुष्पमाल्यकरणं झंकारकृन्नुपुरम्। अंके चंदनलेपनं कुचमणिक्षुद्रावलीघंटिकास्तांबूलं करकंकणं चतुरता शृंगारकाः षोडश ॥" इति कन्याया विवाहोत्सवे कार्याः। प्रसंगाद्वरस्याप्याह—"क्षौरं मर्दनशीर्षवस्त्रतिलकं गात्रेषु चित्रार्चनं कर्णे कुंडलमुद्रिका च मुकुटं पादौ च चर्मावृतौ। हस्ते शस्त्रपटाम्बरं कटिछुरीविद्याविनीतं मुखं तांबूलं सुरशीलवत्त्वगुणिताः पुंसस्त्वमी षोडश ॥" इति कौतुकरत्नाकरोक्तेः। कृतकौतुकशब्देनैतेप्युपलक्षणीया इति ॥ सुदतीं तांबूलरागापसारणेन

---

१. जांबरः भूषणैः–विज. । २. ता–विज. । ३. तो–विज. । ४. न्या–विज. । ५. ला–विज. । ६. ता–विज. । ७. आ–श्रीधरः टि. । ८. विद्भिर्जु–विज. ।

सहजप्रकाशाच्छोभमानरदाम् । "आहतं गुणितेपि स्यात्ताडिते च मृषार्थके । स्यात्पुरातनवस्त्रेऽपि नववस्त्रे वितानके ॥" इति विश्वोक्तेराहतं सद्यो यंत्रमुक्तमंशुकं ज्ञेयम् । 'अहतां–' इति पाठेपि स एवार्थः, तस्यैव मांगलिकत्वात् । "अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वयंभुवा । शस्तं तन्मांगलिक्येषु तावन्मात्रे न सर्वदा ॥" इति । यद्वा—सुस्नातामित्यादिपद्यस्य चक्रुरित्यनेनोत्तरेणैवान्वयः काकाक्षिन्यायेन ॥ ११ ॥ रक्षां चक्रुरित्यन्वयः । वै प्रसिद्धौ, अथर्ववित्त्वेन प्रसिद्धः । अथर्वमंत्राणां ग्रहशान्तौ प्राचुर्यात् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पितृदेवानिति युग्मकम् । विप्रांश्च समभ्यर्च्य भोजयित्वा च विधि वत् विधियुक्तं यथा स्यात् यथान्यायं विवाहे कन्यां प्रतियन्मङ्गलं वाचयितुं युज्यते तदित्यर्थः । कन्यां प्रतीत्युत्तरेणान्वयः अत्रानन्यगत्या द्वितीयाबलात् प्रतीत्यध्याह्रियते तृतीयाबलात् सहशब्दवत् सुदतीं ताम्बूलरागापसारणेन सहजलावण्यप्रकाशाच्छोभमानरदाम् "आहतं गुणितेऽपि स्यात्ताडित्ते च नवेऽपि च । स्यात्पुरातनवस्त्रे च" इति विश्वोक्तेः । आहतं सद्यो यन्त्रनिर्मुक्तपंशुकं ज्ञेयम् अहतेत्यपि पाठे स एवार्थः तस्यैव माङ्गलिकत्वात् यथाचोक्तम् "अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वयं भुवा । शस्तं तन्माङ्गलिक्येषु तावन्मात्रेण सर्वदा" इति । यद्वा, सुस्नातामित्यादि पद्यस्य चक्रुरित्यनेनोत्तरेणैव वान्वयः काकाक्षिन्यायेन ॥ १०–११ ॥ वै प्रसिद्धौ अथर्ववित्त्वेन प्रसिद्धः आथर्वणमन्त्राणां ग्रहशान्तौ प्राच्युर्य्यात् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विरजाम्बरेति—रज-शब्दस्याकारान्तत्वादपि; श्रीमद्भिः वितान-चामरादर्शवन्धनादिना महाशोभावद्भिर्गृहैश्च जुष्टमकारयत् । उभयत्र विशेषणे तात्पर्य्यम्, किंवा विवाहोत्सवे निमन्त्र्यानीतैः स्त्र्यादिभिर्नूतननिर्म्मितैश्च श्रीमद्गृहैरिति; यद्वा, गृहैः श्रीमत् शोभायुक्तमकारयत् ॥ ९ ॥ देवांश्च सम्यगभितोऽर्च्चयित्वा नान्दीमुखश्राद्धादिना विप्रांश्च समभ्यर्च्च्य भोजयित्वा च विधिवद्विधिर्यथा स्यात्, अस्य यथान्यायं सर्व्वैरेवान्वयः, यतो नृपो धनादिसर्व्वसम्पत्तिमानित्यर्थः । यथान्यायमिति तैर्व्याख्यातम् । यद्वा, विवाहे कन्यां प्रति यन्मंगलं वाचयितु युज्यते, तदित्यर्थः । इति तस्य सांगत्वादिना सम्यक्त्वमुक्तम् ॥ १० ॥ सुष्ठु उद्वर्त्तनाभ्यञ्जनादिना स्नाताम्, सुदतीं दन्तशोधनादिना शोभनरदां 'आहतं गुणितेऽपि स्यात्ताडिते च नवेऽपि च । स्यात् पुरातनवस्त्रे च' इति विश्वोक्तेराहतं सद्यो यन्त्रनिर्म्मुक्तमंशुकं ज्ञेयम् । अहतेति पाठेऽपि स एवार्थः, तस्यैव मांगलिकत्वात्; तथा चोक्तम्—'अहतं यन्त्रनिर्म्मुक्तं वासः प्रोक्तं स्वयम्भुवा । शस्तं तन्मांगलिक्येषु तावन्मात्रेण सर्व्वदा ॥' इति ॥ ११ ॥ द्विजोत्तमाः विप्राः पुरोहितादन्ये, वै तु, पुरोहितस्तु इत्यथर्व्वणमन्त्रवित्वादिना पूर्व्वतोऽस्य विशेष उक्तः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

स्रग्गन्धमाल्याभरणैरित्यत्र मत्वर्थीय अर्श आद्यच् द्रष्टव्यः स्रगादिमद्भिः तथा विरजोऽम्बरैश्च भूषितै स्त्रीपुरुषैर्जुष्टं तथा श्रीमद्भिरगुरुणा धूपितैश्च गृहैर्जुष्टम् ॥ ९ ॥ पितॄन् देवांश्च सम्यगभ्यर्च्य हे नृप ! सविसर्गपाठे भीष्मकः विप्रान्यथाविधि भोजयित्वा विधिवत्समभ्यर्च्यैति वा यथान्यायं भोजयित्वा रुक्मिणीं प्रति मङ्गलं वाचयामास यथान्यायमन्यांश्च कन्याः प्रति मङ्गलं वाचयामासेति वाऽर्थः ॥ १० ॥ कथम्भूतां सुस्नातामिति कृतं कौतुकेन विवाहसूत्रेण मङ्गलं यस्यास्ताम् अहतयोर्नवीनयोरंशुकयोर्युग्मेन भूषणोत्तमैश्चालङ्कृतां चक्रुरिति ॥ ११ ॥ वध्वास्तस्याः कन्याया सामादिभिर्मन्त्रैः रक्षाञ्चक्रुः अथर्वमन्त्रैःरक्षाञ्चक्रुरथर्ववित्पुरोहितः प्रतिकूलग्रहशान्त्यर्थं जुहाव ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

सुस्नाताऽभूदिति शेषः कृतं कौतुके कुतूहले महोत्सवे मङ्गलं यस्याः सा तथा । यद्वा कृतं कौतुकं हस्तसूत्रलक्षणं मङ्गलं यस्याः सा तथा "आबध्नन्ति करे सूत्रं माङ्गल्यार्थं नवस्त्रियः" इति "कौतुकं विषयाभोगे हस्तसूत्रे कुतूहले । कामे ख्याते मङ्गले च" इति यादवः । अहतांशुकयुग्मेन नूतनवस्त्रयुगलेन "अंशुकं केवले वस्त्रे सूक्ष्मवस्त्रोत्तरीययोः" इति च ॥ ११ ॥ गृहानेतान् रक्षया विवृणोमीत्याद्यथर्ववेदोक्तवित् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्रग्गन्धमाल्यानि आविभ्रतीति तैः ॥ ९ ॥ अहतं सद्यो यन्त्रनिर्मुक्तं यदंशुकयुग्मंतेन "अहतं यन्त्रनिर्मुक्तं मुक्तवासः स्वयम्भुवा । शस्तं तन्माङ्गलिक्येषु तावन्मात्रेण सर्वदा इति स्मृतेः । आहतेति पाठे स एवार्थः "आहतं गुणितेऽपि स्यात्ताडितेऽपि नवेऽपि च" इति विश्वप्रकाशात् । भूषितां चक्रुः रक्षां चक्रुरित्यावृत्त्या उभयत्राप्यन्वितम् ॥ १० ॥ अथर्ववित् आथर्वणमन्त्रवित् आथर्वणमन्त्राणां ग्रहशान्त्यादिप्राचुर्य्यात् ॥ ११–१२ ॥

गूढार्थदीपिनी

मङ्गलं स्वस्तिपाठं वाक्यामास कन्यां प्रतीत्युत्तरेणान्वेति ॥ १० ॥ कौतुकेन विवाहसूत्रेण मङ्गलं यस्याः अहतं नवीनम् वस्त्रयुग्मं तेन ॥ ११ ॥ वै प्रसिद्धार्थे अथर्ववित् अथर्वमन्त्राणां ग्रहशान्त्यर्थमुपयोगात् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृतं कौतुकेन विवाहसूत्रेण मङ्गलं यस्यास्तां कन्याम् । अहतांशुकयुग्मेन भूषणोत्तमैश्च भूषितां चक्रुरित्यग्रिमेणान्वयः अहतलक्षणं स्मृतौ "अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वयं भुवा । शस्तं तन्माङ्गलिक्येषु तावन्मात्रेण सर्वदा" इति ॥ ११ ॥ वध्वाः कन्यायाः रक्षां चापि चक्रुः अथर्ववित् आथर्वणमन्त्रवित् ॥ १२-१४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

माल्यानीह पुष्पाण्येव स्रगिति पृथमुक्तेः । अथवा स्रजो मुक्तामण्यादिमालाः । विरेजेति गतम् । अगरुधूपितैः श्रीमद्गृहैर्जुष्टमित्यन्वयः ॥ ९ ॥ विप्रान्समभ्यर्च्य भोजयित्वा चेत्यन्वयः मङ्गलं स्वस्तिवाचनम् ॥ १० ॥ कृतं कौतुकबन्धनोपयुक्तं मङ्गलं यस्याः सा । कौतुकं विवाहसूत्रं कङ्कणदोरमिति याज्ञिकाः । अथवाऽऽबध्नन्ति करें सूत्रं माङ्गल्यार्थं नवं स्त्रियः । कौतुकं विषयाभोगे हस्तसूत्रे कुतूहले । कामे ख्याते मङ्गले चेति विश्वयादवौ । अहतां शुकेति नूतनताऽभिधायिनौ शब्दौ ॥ ११ ॥ सामर्ग्यजुमन्त्रैर्द्विजोत्तमा वध्वा रक्षाञ्चक्रुः । ग्रहशान्तये पुरोहितोऽथर्ववित् ग्रहमारकमन्त्राणां तत्रैव सत्त्वात् ॥ १२ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अलङ्करणमाह—**स्रगन्धेति** । **स्त्रीपुरुषैः** गृहैश्च जुष्टमिति अनेन तस्मिन् नगरे केवला व्यावर्तिताः ये सुतराममङ्गलरूपाः, तेऽपि भूषिता इत्याह—स्रगन्धमाल्याभरणैर्युक्ताः स्रगन्धमाल्यानामेवाभरणानि येष्विति विरजानि अम्बराणि भूषणानि च येष्विति **श्रीमद्गृहेष्विति** गृहे सर्वसम्पत्तिर्निरूपिता **अगरुधूपितै**रिति विशेषसम्पत्तिः विवाहोत्सवप्रयुक्तिश्च निरूपिता ॥ ९ ॥ एवं लौकिकसमृद्धिमुक्त्वा वैदिकार्थसमृद्धिमाह—**पितॄन्देवान्समभ्यर्च्येति** । पितरो देवाश्च नान्दीमुखदेवताः सम्यक् पूजिताः, अन्यथा प्रथमत एव कन्याहरणे विवाहो विगुणः स्यात्, अतः कर्तव्यं कृतमिति वक्तव्यम् । विप्रांश्च सम्यगभ्यर्च्य पुण्याहवाचने **विधिव**दिति तेभ्यो वस्त्रालङ्करणादिदानेन नृप इति सामर्थ्यम् तेषां सन्तोषः भोजनप्रधान इति **भोजयित्वा यथान्याय**मित्युक्तम् । नान्दीमुखे विधानपूर्वकं भोजयित्वा सुमङ्गलं पुण्याहवाचनम् ॥ १० ॥ यदर्थं भगवानागतः तां देयत्वेन भूषितां चक्रुरित्याह—**सुस्नाता**मिति । मङ्गलस्नानं कारितवन्तः, ततो दन्तसंस्कारमपि शुभ्रदन्ता न द्रष्टव्येति केषाञ्चिद्देशाचारः **कन्यामित्यदत्ताम्** प्रायेण सूचित एव शिशुपालः वाङ्निश्चयोऽप्यग्र एव भविष्यति दाक्षिणात्यास्त इति विवाहपूर्वक्षण एव कन्यावरणम् कृतं कौतुकरूपं मङ्गलं यस्याम् हरिद्रया कपोलयोः रेखादिनिर्माणम् तद्विवाह एव भवति, नान्यदा वस्त्रमपि तादृशमेव परिधापितवन्त इत्याह—**अहतांशुकयुग्मेन भूषिता**मिति । अहतं तन्तूत्तारितं अच्छिन्नम् । नूतनमिति केचित् तेषां मते पाषाणे प्रहारः न हतत्वं सम्पादयतीति अनुपभुक्तमित्यन्ये अंशुकं पट्टवस्त्रम् एकं परिधापितम्, अपरं प्रावृतमिति भूषणैरपि भूषितं सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुद इति कूकुत्वार्थमलङ्करणमुक्तम् कूद्यावापृथिव्यौ कुकुत्सिते यस्याः रोदसीदानापेक्षयापि तादृक् कन्यादानं विशिष्टमिति द्योतितम् ॥ ११ ॥ तस्यां विवाहदेवतासान्निध्यमाह—**चक्रु**रिति । वेदत्रयमन्त्रैः रक्षासूत्रं बद्ध्वा द्विजोत्तमा मन्त्रद्रष्टारः ऋषयः भगवदर्थमेव यथा कोऽपि न स्पृशति दृष्टादृष्टप्रकारेण, तथा रक्षां चक्रुः । देवा हि द्विविधाः, केचन द्रुतादः, अन्ये अद्रुतादः, तत्र वाचनादिना ये अद्रुतादः ते प्रीणिताः होमेनान्येषां प्रीतिमाह—**पुरोहितोऽथर्ववि**दिति । होमे पुरोहितो मुख्यः स हि हितमेव विचारयति । अथर्वणवेदे नक्षत्रकल्पः शान्तिकल्पश्चोक्तः । अतोऽथर्ववित् शान्तिं जानाति । ये कन्यायाः भगवन्तं त्याजयित्वा नीचसम्बन्धं कारयितुमुद्युक्ताः, तेषां ग्रहाणां शान्त्यर्थं जुहाव अन्यथा ग्रहैर्वा प्रतिबन्धो भवेत् भगवांश्च नालौकिकं प्रकटीकरोति ॥ १२ ॥

श्रीसुबोधिनीसारः

स्रग् माला गंधः कुंकुमचंदनादिजः माल्यानि पुष्पाणि आभरणानि संति येषु तैर्नूतनवस्त्रालंकृतैः स्त्रीपुरुषैर्जुष्टं सेवितम् अगरुधूषितैः श्रीमद्भिः श्रीमतां वा गृहैर्जुष्टम् इति पुरविशेषणम् ॥ ९ ॥ पाठक्रमादर्थक्रमो ज्यायानिति न्यायात् विप्रान् देवान् पितॄन् समभ्यर्च्य विधानेन यथान्याय भोजयित्वा मंगलं वाचयामास ॥ १० ॥ सुस्नातां सुष्ठु दंता यस्याः सा सुदती तां कृतं कौतुकेन कंकणबंधादिना मंगलं यस्यास्ताम् "अहतं यंत्र निर्मुक्तं वासः प्रोक्तं स्वयंभुवा" इत्युक्तनूतनवस्त्रद्वयेन भूषणोत्तमैश्च भूषितां कन्यां प्रति ॥ ११ ॥ द्विजोत्तमाः विप्रश्रेष्ठास्सामर्ग्यजुषां मंत्रैर्वध्वा मंगलार्हायाः कन्याया रक्षां चक्रुः । अथर्वणमंत्रज्ञो राजपुरोहितोऽथ ब्रह्मणां शांत्यर्थं जुहाव वै एव होमं चकार ॥ १२ ॥

विवरणटिप्पणी

सुस्नातामित्यत्र । **दन्तसंस्कार**मिति । तान्बूलादिभक्षमित्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्रग्गन्धमाल्यानि आबिभ्रतीति तथा तैः तथा विरजोम्बरैर्भूषितैश्च स्त्रीपुरुषैर्जुष्टम् । तथा श्रीमद्भिः अगुरुणा धूपितैर्गृहैर्जुष्टम् ॥ ९ ॥ हे नृप ! पितृदेवान् विधिवत् समभ्यर्च्य तथा यथान्यायं यथायोग्यं विप्रान् भोजयित्वा च रुक्मिणीं प्रति मङ्गलं वाचयामास ॥ १० ॥ तथा कृतं कौतुकेन विवाहसूत्रेण मङ्गलं यस्यास्तां सुस्नातां सुदतीं कन्यां अहतयोर्नवीनयोरंशुकयोर्वस्त्रयोर्युग्मेन भूषणोत्तमैश्च भूषितां चक्रे । "अहतं वस्त्रनिर्मुक्तं वासः प्रोक्तं स्वयंभुवा । शस्तं तन्माङ्गलिकेषु तावन्मात्रेण सर्वदा" इति स्मृत्युक्तमहत्वं बोध्यम् ॥ ११ ॥ तदा च द्विजोत्तमाः सामादिभिर्मन्त्रैश्च वध्वास्तस्याः कन्यायाः रक्षां चक्रुः । अथर्वणवेदे हि नक्षत्रकल्पः शान्तिकल्पश्चोक्तः, अतः अथर्ववित् पुरोहितः प्रतिकूलग्रहशान्त्यर्थं जुहाव ॥ १२ ॥

अन्वितार्थप्रकाशिका

स्रग्गन्धमाल्यानि आबिभ्रतीति तथा तैः तथा विरजोम्बरैर्भूषितैश्च स्त्रीपुरुषैः जुष्टं तथा श्रीमद्भिः अगुरुणा धूपितैर्गृहैर्जुष्टमकारयत् ॥ ९ ॥ पितॄनिति । हे नृप ! पितॄन् नान्दीमुखान् देवांश्च विधिवत्समभ्यर्च्य तथा यथान्यायं विप्रान् भोजयित्वा च रुक्मिणीं प्रति मङ्गलं वाचयामास ॥ १० ॥ सुस्नातामिति । कृतं कौतुकेन विवाहसूत्रेण मङ्गलं यस्यास्तां सुस्नातां सुदतीं कन्याम् अहतयोर्नवीनयोरंशुकयोर्वस्त्रयोर्युग्मेन भूषणोत्तमैश्च भूषिताम् अकारयत् । "अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वयम्भुवा । शस्तं तन्माङ्गलिक्येषु तावन्मात्रं न सर्वदा ॥" इति स्मृतिः । आहतेति पाठेऽपि स एवार्थः । "आहतं गणितेऽपि स्यात्ताडितेऽपि नवेऽपि च ।" इति विश्वप्रकाशः ॥ ११ ॥ चक्रुरिति । तदा च द्विजोत्तमाः सामऋग्यजुर्मन्त्रैः वध्वा रुक्मिण्याः रक्षां चक्रुः । अथर्वमन्त्रवित् पुरोहितः प्रतिकूलग्रहशान्तये जुहाव ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्रकगंधश्च माल्यानि च आभरणानि च स्रग्गंधमाल्याभरणानि तानि संति येषां तैः अत्रमत्वर्थीयोच्प्रत्ययोज्ञातव्यः । यद्वा । स्रग्गंधमाल्यानि आबिभ्रतीति तथोक्तैः विरजोंबरैर्भूषिताः शोभितास्तैः स्त्रीपुंसैर्जुष्टं सेवितं । तथा श्रीमद्भिर्गृहैश्च सेवितं ॥९॥ यथान्यायं लोकव्यवहारमनतिक्रम्य अन्यमनुष्यानपि भोजयित्वा कन्यां प्रति मंगलं वाचयामास स्वस्तिवाचनं कारयामासः ॥१०॥ कृतं कौतुकं विवाहसूत्रबंधाख्यं मंगलं यस्यास्तां अहतेन नवीनेन वस्त्रयुग्मेन भूषणोत्तमैश्च भूषितां । अलंकृतां ॥ ११ ॥ वध्वाः तस्याः कन्यायाः अथर्ववित् । अथर्वमंत्रवेत्ता ॥ १२–१३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तद्वर्णयति ॥ स्रगिति ॥ स्रग्गन्धमाल्याभरणैः, अत्र मत्वर्थीयोऽर्श आद्यच् द्रष्टव्यः । ततः स्रगादिमद्भिरिति तदर्थः । विरजाम्बरैर्भूषितैः, स्त्री पुरुषैः, जुष्टं, तथा अगुरुणा धूपितानि तैः, श्रीमद्गृहैश्च, जुष्टं अकारयदिति संबन्धः ॥ ९ ॥ पितॄनिति ॥ नृपो भीष्मकः पितॄन् देवांश्च, विधिवत् यथाविधि, समभ्यर्च्य विप्रांश्च विधिवत् समभ्यर्च्य, यथान्यायं मङ्गले मङ्गलार्हान्नेन यथा योग्यं भोजनविधापनं न्यायस्तमनतिक्रम्येत्यर्थः । भोजयित्वा च, कन्यां प्रति, मङ्गलं च, वाचयामास ॥ १० ॥ कथंभूतां कन्यामित्यत आह ॥ सुस्नातामिति ॥ सुस्नातां सम्यक् कृतस्नानां, सुदतीं शोभनदन्तां, कृतं कौतुकेन विवाहसूत्रेण मङ्गलं यस्याः तां, अहतयोर्नवीनयोरंशुकयोर्युग्मेन, भूषणोत्तमैश्च, भूषितां अलंकृतां इति द्वयोरेकान्वयः ॥ ११ ॥ चक्रुरिति ॥ ततः द्विजोत्तमाः, वध्वास्तस्याः कन्यायाः, रक्षां, साम च ऋक् च यजुश्च तेषां संबन्धिनो ये मन्त्रास्तैः, चक्रुः । अथर्ववित् अथर्वमन्त्राभिज्ञः, पुरोहितः, ग्रहशान्तये प्रतिकूलग्रहशान्त्यर्थं, जुहावाग्नौ समिदाज्यादिना होमं चकार वै ॥ १२ ॥

कृष्णप्रिया

वहाँ के स्त्री-पुरुष पुष्पमाला, हार, इत्र-फुलेल, चन्दन, गहने और निर्मल वस्त्रों से सजे हुए थे । वहाँ के सुन्दर-सुन्दर घरों में अगर के धूप की सुगन्ध फैल रही थी ॥ ९ ॥ परीक्षित् ! राजा भीष्मक ने पितर और देवताओं का विधिपूर्वक पूजन करके ब्राह्मणों को भोजन कराया और नियमानुसार स्वस्तिवाचन भी ॥ १० ॥ सुशोभित दाँतों वाली परमसुन्दरी राजकुमारी रुक्मिणीजी को स्नान कराया गया, उनके हाथों में मङ्गलसूत्र कङ्कण पहनाये गये, कोहबर बनाया गया, दो नये-नये वस्त्र उन्हें पहनाये गये और वे उत्तम-उत्तम आभूषणों से विभूषित की गयी ॥ ११ ॥ श्रेष्ठ ब्राह्मणों ने साम, ऋक् और यजुर्वेद के मन्त्रों से उनकी रक्षा की और अथर्ववेद के विद्वान् पुरोहित ने ग्रहशान्ति के लिये हवन किया ॥ १२ ॥

हिरण्यरूप्यवासांसि तिलांश्च गुडमिश्रितान् । प्रादाद् धेनूश्च विप्रेभ्यो राजा विधिविदां वरः ॥ १३ ॥
एवं चेदिपती राजा दमघोषः सुताय वै । कारयामास मन्त्रज्ञैः सर्वमभ्युदयोचितम् ॥ १४ ॥
मदच्युद्भिर्गजानीकैः स्यन्दनैर्हेममालिभिः । पत्त्यश्वसङ्कुलैः सैन्यैः परीतः कुण्डिनं ययौ ॥ १५ ॥
तं वै विदर्भाधिपतिः समभ्येत्याभिपूज्य च । निवेशयामास मुदा [1]कल्पितावाधिवेशने ॥ १६ ॥

---

[1] तान्य–श्रीधर. वंशी. जीव. वीर. विश्व. ।

कर्दमक्षमा

अन्वयः—विधिविदाम्, वरः, राजा, विप्रेभ्यः, हिरण्यरूप्यवासांसि, गुडमिश्रि तिलान्, च, तिलान्, धेनूः, च, वत्सान्, प्रादात् ॥ १३ ॥ एवम्, चेदिपतिः, राजा, दमघोषः, सुताय, वै, मन्त्रज्ञैः, अभ्युदयोचितम्, सर्वम्, कारयामास ॥१४॥ मदच्युद्भिः, गजानीकैः, सुवर्णमालिभिः, स्यन्दनैः, पत्यश्वसंकुलैः सैन्यैः, परीतः, कुण्डिनम्, ययौ ॥ १५ ॥ विदर्भाधिपति, वै, (स्वयम्) तम्, समभ्येत्य, अभिपूज्य, च (मधुरोत्तया) मुदा, कल्पिते, आधिविशने, वै, अथवा (अकल्पिते, वाटिकायाम् वा) निवेशयामास ॥१६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अभ्युदये उचितम् ॥ १४ ॥ ततश्चतुरंगसैन्यैः परीतः कुण्डिनं भीष्मकस्य पुरं ययौ । मदं च्यवंते इति मदच्युतस्तैः स्यंदनैः रथैः हेमरचिता माला विद्यंते येषु तैः ॥ १५ ॥ कल्पितं निर्मितं यदन्यनिवेशनं तस्मिन् ॥ १६–१७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

रूप्यं रजतम् । चात्ताम्रपात्रस्थान् "पात्रे ताम्र मये स्थाप्य तिलान्हेमगुडान्वितान् । यो ददाति वेदविदे ग्रहार्तिस्तस्य नो भवेत् ।" इति दानग्रन्थोक्तेः । प्रकर्षेणाऽऽदरादिनाऽदात् । राजव्यवहारतो नात्यादृतयोरपि गुडतिलयोर्दान विधिबलादेव, सुवर्णरत्नाद्युपकरणसहितं तिलपर्वतादिकं वा । तद्दानविधिर्दानग्रंथेभ्योवसेयः ॥ १३ ॥ एवं भीष्मकवत् । मंत्रज्ञैर्विप्रैः । अभ्युदये कर्मणि उचितं नांदीश्राद्धादि "विवाहादिषु सर्वेषु संस्कारेषु च वास्तुषु । मोक्षे चाऽभ्युदयस्तीर्थयाने संपदि मंगले" इति शाश्वतः । सोपहासमाह—एवमिति । भीष्मकवदेवेत्र्थः । अस्येदं कर्म कुण्डिनपुरादनतिदूरे स्थित्वेति ज्ञेयम्, पूर्वदिनकृत्यत्वात् । तथापि तस्य स्वतो भगवत्समर्पणोत्सुकत्वात्सार्थकं बभूव । तस्य तु तत्प्रातिकूल्यात्प्रतिकूलमेवेति भावः । सुताय सुतमुद्वाहयितुम् ॥ १४ ॥ ततोऽभ्युदयकर्मकरणोत्तरम् ॥ १५ ॥ तं दमघोषम् । समभ्येत्य संमुखं गत्वा । निवेशनं गृहं वस्त्रादिरचितम् । मुदा सह यथा मुदितो भवति तथेति लौकिकता दर्शिता ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रकर्षेणाऽऽदरादिना अदात् राजव्यवहारतो नात्यादृतयोरपि तिलगुडयोर्दानं विधिवित्त्वादेव सुवर्णरत्नाद्युपकरणसहित-तिलपर्वतादिकं वा ॥ १३ ॥ सोपहासमाह—एवमिति भीष्मकवदेवेत्यर्थः । अस्येदं कर्म कुण्डिन पुरादनतिदूरे स्थित्वेति ज्ञेयम् । पूर्वदिनकृत्यत्वात् तथापि तस्य स्वतोभगवत्समर्पणोत्सुकत्वात्सार्थकं बभूव अस्य तु तत्प्रातिकूल्यात् प्रतिकूलमेवेति भावः ॥ १४ ॥ तस्य वरपितृत्वेनान्यतः सत्यप्यारम्भवैशिष्ट्ये तस्यापि वैयर्थ्यज्ञापनायाह—मदेति दमघोष इति पूर्वेणान्वयः ॥ १५ ॥ विदर्भाधिपतिर्भीष्मकः मुदा सह यथा समुदितो भवति तथा तं निवेशयामासेति लौकिकता दर्शिता । यद्वा, रुक्मी तस्यैव प्राधान्यात् मुदो विवक्षिताः ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रकर्षेण श्रद्धया पादप्रक्षालनपूर्वकयोग्यदक्षिणासाहित्यादिना अदात्, यतो विधिविदां मध्ये वरः श्रेष्ठः ॥ १३ ॥ एवमिति यथा भीष्मकस्तथैवेत्यर्थः । यतश्चेदिपतिः वै प्रसिद्धौ, इति द्वयोरपि साम्यं सूचितम् ॥ १४ ॥ तस्य वरपितृत्वेन कश्चिद्-विशेषमाह—मदेति । गजानामनीकैः समूहैः ॥ १५ ॥ विदर्भस्याधिपतिर्भीष्मको रुक्मी वा, सम्यग् वाद्यादिना दूरादग्रेऽभिमुखमेत्य अभितः पूजयित्वा च, पुनरपि वै-शब्दात् तत्तत्प्रसिद्धया तयोर्विवाहनिश्चयः सूचितः । अत एव तत्प्रकारो विस्तार्य्यवर्णितश्च । तादृशेऽपि महारम्भे तयोः श्रीभगवताग्रे वञ्चनात्, तस्य महाप्रागल्भ्यादि–माहात्म्याविशेषबोधनार्थमिति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हिरण्येति विधिविदां विधिज्ञानां वरो राजा भीष्मकः हिरण्यादीन् धेनूंश्च विप्रेभ्यः प्रादात् ॥ १३ ॥ एवं यथा रुक्मिण्यै तथा दमघोषःसुताय शिशुपालाय सर्वमभ्युदयोचितं कर्म मन्त्रज्ञैर्द्विजैः कारयामास ॥ १४ ॥ ततो मदजलानि स्रवद्भिर्गजानामनीकैर्हेम्नो माला एषां संतीति तथा तरथैः पदातिभिरश्वैश्च सङ्कुलैर्व्याप्तैः सैन्यैश्च परिवृतश्चैद्य इति शेषः । कुण्डिनं पुरं ययौ तं चैद्यं समभ्येत्याभिपूज्य च कल्पितं निर्मितं यदन्यन्निवेशनं तस्मिन्मुदा निवेशयामास ॥ १५–१६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

रूप्यं रजतम् ॥ १३ ॥ सुताय शिशुपालाय ॥ १४ ॥ पूर्वोक्तयात्राशेषं कथयति—मदच्युद्भिरिति । मदच्युद्भिः मदजलस्राविभिः ॥ १५ ॥ तदर्थं कल्पिते ऽन्यस्मिन् निवेशने गृहे ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सुताय सुतविवाहार्थम् ॥ १४ ॥ मदानां च्युत् क्षरणं येषु तैः ॥ १५–१७ ॥

गूढार्थदीपिनी

रूप्यं रजतम् । राजा भीष्मकः ॥ १३ ॥ सुताय शिशुपालाय अभ्युदयोचितं विवाहोचितं कर्म नान्दीश्राद्धादिकारयामास ॥ १४-१५ ॥ तं दमघोषम् । समभ्येत्यसंमुखं गत्वा । अन्यद् वरयोग्यम् निवेशनं तस्मिन् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मदं च्यवन्ते इति मयच्युतस्तैः ॥ १५-१७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गुडमिश्रितांस्तिलान् विधिविदां वरः स्वयम् ॥ १३ ॥ चेदिपतिर्दमघोषो राजा । अभ्युदयोचितं बहिरन्तरर्थस्तु । अभ्यवज्ञात उदयोऽनभ्युदयस्तदुचितमिति । मत्तृष्वज्ञा मन्त्रज्ञास्तैरिति च ॥ १४ ॥ स्वग्रामे कारयित्वा कुण्डिनं ययौ ॥ १५ ॥ समेत्य सम्मुखं गत्वा प्रपूज्य च कल्पितं तदर्थमन्यन्निवेशनं तस्मिन् ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

दानेन सर्वदोषनिवृत्तिरिति दानान्यपि कृतवानित्याह—**हिरण्ये**ति । हिरण्यं सुवर्णं तत्सार्वकामिकमग्निदेवत्यम् रूप्यं सोमदैवत्यम् वासश्च सर्वदैवतमिति गन्धर्वदैवतं वा तेन त्रयो भागिनः कन्याया व्यावर्तिताः तिलमोदकदानं तु सर्वदोषहरमिति गुडमिश्रितान् तिलांश्च ददौ चकारात्केवलानपि कन्यायाः सर्वसमृद्ध्यर्थं धेनूश्च प्रादात् विप्रेभ्यश्च त एव हि विशेषेण पूरकाः राजा समृद्धः विधानेन दत्तं फलपर्यवसायि भवतीति तदर्थमाह—विधिविदां श्रेष्ठ इति ॥ १३ ॥ एवं पुरं कन्यां च निर्दुष्टतया निरूप्य मध्ये निराकार्याणां वृत्तान्तमाह—**षड्भिः** । भगवद्धर्मैरेव तेषां निराकरणार्थम् प्रथमं विवाहः संस्कार इति पित्रैव तस्य संस्काराः क्रियन्त इति निरूपयति—**यथा** रुक्मिण्याः तत्पित्रा कृतम् एवं चेदिपतिरपि दमघोषः सुताय शिशुपालाय विवाहो भविष्यतीति विनिश्चयेन कारयामास तस्यापि सामर्थ्यं राजेति **दमघोष** इति दमस्य शान्तेः घोष एव, नतु तस्य दमः न हि अदान्तेन कृतं सफलं भवति । अक्षरव्यत्यासो वा, मदघोष इत्यर्थः । सिंहवत् अत उन्मादात् भगवन्तमविचार्य तथा कृतवान् अभ्युदये उचितमेव, नत्वभ्युदयम् ॥ १४ ॥ एतादृशस्य उन्मत्तसेनायुक्तस्य पुरं प्रतिगमनमाह—**मदच्युद्भि**रिति । **षाष्ठिहायनैः** मत्तगजैः सह गजानामनीकरूपत्वार्थं तथोक्तम् । सुवर्णमालायुक्तानि च स्यन्दनानिभटाः अश्वाश्च एवं चतुरङ्गसेनायुक्तः युद्धार्थमेव कुण्डिनपुरं ययौ न तु विवाहार्थम्, अन्यथा विवाहसामग्रीमपि नयेत् ॥ १५ ॥ तस्याग्रे निराकरणार्थमादौ सन्माननामाह—तं वै **विदर्भाधिपति**रिति । विदर्भदेशस्याधिपतिः विशेषानभिज्ञः, तं निश्चयेन, समभ्येत्याग्रे गत्वा, अभिपूज्य, गृहागताय यथा पूजा विधेया चकारात् विशेषाभावं च कृत्वा, मुदाहर्षेण कल्पिते अधिवेशने, नतु सहजे उत्कृष्टे आ ईषत्कल्पिते वा अकल्पिते वा वाटिकादौ स्थापितवान् ॥ १६ ॥

विवरणटिप्पणी

हिरण्यमित्यत्र । **अग्निदैवत्य**मिति । ब्राह्मणादेराकृतिगणत्वाद्दैवत्यमितिष्यञ् । तथाचाग्नौ दैवत्यं यस्येति विग्रहः । **सर्वदैवत**मिति । दैवतानि पुंसि वेत्यनुशासनाद्दैवतशब्दो देवतापर्यायः । तथा च सर्वाणि दैवतानि यस्येति विग्रहः ।

श्रीसुबोधिनीसारः

विधिविदां वरः श्रेष्ठो राजा भीष्मको विप्रेभ्यो हिरण्यादीनि गुडेन मिश्रितान् तिलांश्च धेनूर्गाः प्रादात् ॥ १३ ॥ एवं कुण्डिनपुरमहोत्सवमुत्वा चेदिपुरवृत्तं वर्णयंस्तदागमन माह द्वाभ्याम् । एवंप्रकारेण चेद्याः पतिः दमघोषो राजा सुताय पुत्रार्थं मन्त्रज्ञैर्ब्राह्मणोत्तमैः अभ्युदये विवाहे उचितं सर्वं कार्यवर्गं कारयामास वै एव ॥ १४ ॥ मदं च्यवंतीति तैर्गजानीकैर्हस्तिसेनाभिः स्वर्णमालिभिः स्यंदनै रथैः पदातितुरंगव्याप्तैः सैन्यैः परीतः आवृतः कुण्डिनं पुरं जगाम दमघोषः ॥ १५ ॥ विदर्भस्याधिपतिर्भीष्मकः समभ्येत्य सम्मुखमागत्याभिपूज्य सत्कृत्य मुदा हर्षेण कल्पितेऽन्यस्मिन् निवेशने स्थाने उत्तारयामास ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

विधिविदां शास्त्रोक्तप्रकारज्ञानां मध्ये वरः श्रेष्ठो राजा भीष्मकः हिरण्यादीन् धेनूश्च विप्रेभ्यः प्रादात् ॥ १३ ॥ यथा रुक्मिण्यै भीष्मको मङ्गलादि कारयामास एवं चेदिपतिः राजा दमघोषोऽपि सुताय शिशुपालाय यदभ्युदये विवाहे उचितं कर्म तत्सर्वं मन्त्रज्ञैर्द्विजैः कारयामास ॥ १४ ॥ हेम्नो माला येषां सन्तीति तथा तैरिति गजादिसर्वेषां विशेषणम् । मदं च्यवन्ते इति मदच्युतस्तैर्गजानामनीकैः, रथैः, पदातिभिः, अश्वैश्च सङ्कुलैर्व्याप्तैः सैन्यैः परीतः परिवृतः शिशुपालः कुण्डिनं पुरं ययौ ॥ १५ ॥ वैदर्भाधिपतिर्भीष्मको मुदा युक्तः तं शिशुपालं सम्यगभ्येत्य अग्रतो मिलित्वाऽभिपूज्य च यदन्यद्वरयोग्यं निवेशनं वासस्थानं तस्मिन्निवेशयामास ॥ १६ ॥

अन्वितार्थप्रकाशिका

हिरण्येति ॥ विधिविदां वरः राजा भीष्मकः विप्रेभ्यः हिरण्यादीनि प्रादात् । स्फुटमन्यत् ॥ १३ ॥ एवमिति । एवं भीष्मकवत् चेदिपतिः राजा दमघोषोऽपि सुताय शिशुपालविवाहार्थं यदभ्युदये विवाहे उचितं कर्म तत्सर्वं मन्त्रज्ञैर्द्विजैः कारयामास ॥ १४ ॥ मदेति ॥ हेम्नो माला येषां सन्तीति तथा तैरिति गजादिसर्वेषां विशेषणम् । मदं च्यवन्त इति मदच्युतस्तैर्गजानामनीकैः रथैः पदातिभिरश्वैश्च सङ्कुलैर्व्याप्तैः सैन्यैः परीतः परिवृतः शिशुपालः कुण्डिनं पुरं ययौ ॥ १५ ॥ तमिति । विदर्भाधिपतिर्भीष्मको मुदा युक्तः तं शिशुपालं सम्यगभ्येत्य अग्रतो मिलित्वाऽभिपूज्य च कल्पितं यदन्यद् वरयोग्यम् अन्येभ्य उत्तमं निवेशनं वासस्थानं तस्मिन्निवेशयामास ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अभ्युदयस्य स्वसमृद्धे रुचितं योग्यं ॥ १४ ॥ मदच्युद्भिर्मदस्रवद्भिः । हेमरचितामालाः संति येषु तथाभूतैः स्यंदनैः रथैः एवं चतुरंगसेनाभिः आवृतः शिशुपालः कुंडिनं तत्संज्ञं नगरं ययौ ॥ १५ ॥ कल्पितं तदर्थं निर्मितं यदन्यन्निवेशनं निवासस्थानं तस्मिन् ॥ १६–१७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हिरण्येति । ततः विधिविदां विधिज्ञानां मध्ये वरः श्रेष्ठः, राजा भीष्मकः विप्रेभ्यः द्विजेभ्यः, हिरण्यं च रूप्यं च वासांसि च तानि, गुडमिश्रितान् तिलांश्च, धेनूश्च, प्रादात् ॥१३॥ एवमिति ॥ एवं यथा रुक्मिण्यै तथेत्यर्थः । चेदिपतिः चेदिदेशाधिपतिः, दमघोषः राजा, सुताय शिशुपालाय, सर्वं अभ्युदयोचितं कर्म, मन्त्रज्ञैः द्विजैः, कारयामास वै ॥ १४ ॥ मदेति ॥ ततः, मदच्युद्भिः मदजलानि स्रवद्भिः, गजानीकैः तथा, हेम्नो माला एषां सन्तीति तैः, स्यन्दनै रथैः, पत्तयः पदातयश्च अश्वा घोटकाश्च तैः संकुलानि तैः, सैन्यैः, परीतः परिवृतः, चैद्य इति शेषः । कुण्डिनं ययौ । कुण्डिनपुरं प्राप ॥ १५ ॥ तमिति ॥ विदर्भाधिपतिः, तं चैद्यं समभ्येत्य अभिमुखं गत्वा, अभिपूज्य अभिमान्य च, कल्पितं निर्मितं यदन्यन्निवेशनं तस्मिन्; केचित्तु स्वमनसि श्रीकृष्णागमननिश्चयात् श्रीकृष्णार्थं ग्रामाद्बहिः कल्पितान्निवेशनाद्यदन्यन्निवेशनाद्यदन्यन्निवेशनं तत्रेत्याहुः । मुदा, निवेशयामास वै ॥१६॥

कृष्णप्रिया

राजा भीष्मक कुल परम्परा और शास्त्रीय विधियों के बड़े जानकार थे। उन्होंने सोना, चाँदी, वस्त्र, गुड़ मिले हुए तिल और गौएँ ब्राह्मणों को दीं ॥ १३ ॥ इसी प्रकार चेदिनरेश राजा दमघोष ने भी अपने पुत्र शिशुपाल के लिये मन्त्रज्ञ ब्राह्मणों से अपने पुत्र के विवाह-सम्बन्धी मङ्गलकृत्य कराये ॥ १४ ॥ इसके बाद वे मद चुआते हुए हाथियों, सोने की मालाओं से सजाये हुए रथों, पैदलों तथा घुड़सवारों की चतुरङ्गिणी सेना साथ लेकर कुण्डिनपुर जा पहुँचे ॥ १५ ॥ विदर्भराज भीष्मक ने आगे आकर उनका स्वागत-सत्कार और प्रथा के अनुसार अर्चन-पूजन किया। इसके बाद उन लोगों को पहले से ही निश्चित किये हुए जनवासों में आनन्दपूर्वक ठहरा दिया ॥ १६ ॥

तत्र शाल्वो जरासन्धो दन्तवक्त्रो विदूरथः । आजग्मुश्चैद्यपक्षीयाः पौण्ड्रकाद्याः सहस्रशः ॥ १७ ॥
कृष्णरामद्विषो यत्ताः कन्यां चैद्याय साधितुम् । यद्यागत्य हरेत् कृष्णो [1]रामाद्यैर्यदुभिर्वृतः ॥ १८ ॥
योत्स्यामः [2]संहतास्तेन इति निश्चितमानसाः । आजग्मुर्भूभुजः सर्वे समग्रबलवाहनाः ॥ १९ ॥
श्रुत्वैतद् [3]भगवान् रामो [4]विपक्षीयबलोद्यमम् । कृष्णं चैकं गतं हर्तुं कन्यां कलहशङ्कितः ॥ २० ॥

कर्दमक्षमा

अन्वयः—तत्र, चैद्यपक्षीयाः, कृष्णरामद्विषः, शाल्वः, जरासंधः, दन्तवक्त्रः, विदूरथः, पौण्ड्रकाद्याः, सहस्रशः, यत्ताः, यदि, रामाद्यैः, यदुभिः, वृतः, कृष्णः, यदि, आगत्य, कन्यां, हरेत्, तदा, चैद्याय, कन्याम्, साधयितुम्, तेन, संहताः, योत्स्यामः, इति निश्चितमानसाः, समग्रबलवाहनाः, सर्वे, भूभुजः, आजग्मुः ॥ १७–१९ ॥ एतत्, विपक्षीयबलोद्यमम्, श्रुत्वा, च, कन्याम्, हर्त्तुम्, एकम्, कृष्णम्, गतम्, ज्ञात्वा, कलहशङ्कितः ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यदि श्रीकृष्णो हरेदिति शंकिताः । कन्यां साधयितुमित्यर्थः ॥ १८–२१ ॥

---

१. भिः सह–प्रा. पा. । २. सहिताः सर्वे–विज. । ३. उल–वीर. । ४. नृपो–बिज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र कुण्डिनपुरे ॥ १७ ॥ यदि कदाचित् । इत्यर्थ इति–अंतर्भाविताणिजर्थोत्र ज्ञेयः । साधयितुं दापयितुमिति भावः । यत्ता उद्युक्ताः ॥ १८ ॥ संहता मिलिताः । तेन कृष्णेन । समग्रेति पाठे समग्रं सर्वांगपूर्णम् ॥ १९ ॥ एतत् वयं संहताः कृष्णेन योत्स्याम इत्येतत् । श्रूत्वेति युग्मकम् । जनपरंपरयैतत्पूर्वोक्तं श्रुत्वा । एतत्किं, तत्राह–विपक्षीयेति । तत्र पूर्वं तद्देशादागतया जनपरंपरया, उत्तरत्र तदनुमिमेऽनयातः पुरगामिन्येति ज्ञेयम् । ततः कलहे शंकितः सन् । कर्तरि क्तः, तारकादित्वादितज्वा ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्रेत्यादियुग्मकम् । यत्ता उद्युक्ताः ॥ १७–१८ ॥ योत्स्याम इत्यादि पद्यन्तेषामसम्मतं हरेदिति शङ्किता इति पूर्ववाक्येनैव सम्बध्य वाक्यसमापनात् तथापि समस्तपुस्तकेषु दृश्यमानत्वाद्व्याख्यायते तत्र यदीत्यादिसार्द्धमन्वितं समग्रं सर्वाङ्गैः पूर्णं बलं सैन्यं वाहनं च येषान्ते वाहनस्य बलान्तर्गतत्वेऽपि पृथगुक्तिः सर्वेषामेव योधानां बाहुल्ये न सवाहतत्वाभिप्रायेण समर्थबलेति क्वचित्पाठः ॥ १९ ॥ श्रुत्वेति युग्मकम् । जनपरम्परयैतत्पूर्वोक्तं श्रुत्वा एतत्किन्तमाह—विपक्षीयेत्यादि तत्र पूर्वं तद्देशादागततया जनपरम्परया उत्तरं तु तदनुमिम अनया अन्तःपुरगामिन्येति ज्ञेयम् । अतः कलहे शङ्कितः सन् कर्त्तरि क्तः तारकादित्वादितज्वा शङ्कायाः निदानमाह—भ्रातृस्नेहपरिप्लुतः तदीयतादृशसम्बन्धमाधुर्य्यमयप्रेमसिन्धौ मग्नोऽन्यानुसन्धानाऽसमर्थ इत्यर्थः । कथम्भूतोऽपि भगवान् सर्वज्ञानक्रियाशक्तियुक्तोऽपि अत एव गजादिभिश्चतुर्भिरङ्गैरुपलक्षितं यत् तेन महता बलेन सैन्येन सार्द्धं परितः प्रायः प्रहरार्द्धानन्तरं चलितोऽपि श्रीकृष्णेन सहैव विदर्भनगरे ससैन्यप्रवेशादिति शीघ्रः सन् प्रागात् इति तेन स्नेहेनेतरशक्तेरावरणेऽपि स्वानुकूलशक्तेः प्रकाशनन्दर्शितम् ऐश्वर्यज्ञानतो बन्धुभावस्याऽऽधिक्यं च अत एव भ्रातृशब्दप्रयोगः ॥२०-२१॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र कुण्डिने, पौण्ड्रकाद्या अन्ये च, आद्य-शब्दात् काशिराजादयः ॥ १७ ॥ चैद्यपक्षीयत्वे हेतुः—कृष्णरामौ द्विषन्तीति तथा ते, यत्ता उद्युक्ताः ॥ १८ ॥ योत्स्याम इत्येतत् पद्यं तेषामसम्मतं लक्ष्यते । हरेदिति शंकिता इति पूर्व्ववाक्येनैव सम्बध्य तैर्वाक्यसमापनात् । तथापि बहुलपुस्तके दृश्यमानत्वाद्व्याख्यायते । संहता अन्योन्यं सर्व्वे सम्भूयेत्यर्थः—पार्थक्येन युद्धासक्तेः, मात्सर्य्यादिना सर्व्वेषां युगपन्मुमूर्षणाद्वा, तेन कृष्णेन सह, इत्येतन्निश्चितं येन तथाभूतं मानसं येषां ते, अविवक्षितत्वादसन्धिः । समग्रं सर्व्वांगैः पूर्णं बलं सैन्यं वाहनञ्च येषां ते, वाहनस्य बलान्तर्गतत्वेऽपि पृथगुक्तिः सर्व्वेषामेव योधानां सवाहनत्वाभिप्रायेण ॥ १९ ॥ भगवान् सर्व्वशक्तियुक्तः, अतो महता बलेन सार्द्धमेव प्रकर्षेण महाद्यमादिनायात् गतः । कुतः ? कलहो विपक्षीयनृपैः सह श्रीकृष्णस्य युद्धं शंकित आशंकितो येन सः; विशेषणस्य परनिपात आर्यः; यद्वा, कलहाच्छंकितो भीतः । ननु सदा स्वयं निर्भयोऽसौ विशेषतश्च श्रीकृष्णमाहात्म्यवेत्ता कुतः शंकितः ? तत्राह—भ्रातुः स्नेहे परितः प्लुतो मग्नः, इति स्नेहस्यानन्त्येन समुद्रत्वं ध्वनितम् । अतएवेश्वज्ञानान्तर्द्धानेन केवलभ्रातृज्ञानाद्भ्रातृशब्दप्रयोगः । बलेनेत्युक्तेऽपि गजादीनां पृथगुक्तिर्बलस्य चतुरंगसम्पूर्णत्वविवक्षया । त्वरित इति प्रातरग्रे गतेनापि प्रायः श्रीकृष्णेन सहैव गमनं बोधयति । अतएवाग्रे भीष्मकेण द्वयोरेव युगपत् प्राप्तिश्रवणातिथ्यादिविधानं वक्ष्यते ॥ २०–२१ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

यद्यागत्य हरेत् तदा चैद्याय साधितुं यत्ता इत्यन्वयः ॥ १८–२१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्रेति कृष्णरामौ द्विषन्तीति तथाते चैद्यपक्षानुवर्तिनः शाल्वादयः पौण्ड्रकाद्याश्च सहस्रशः ॥ १७ ॥ यत्ताः सन्तः चैद्याय कन्यां साधयितुमाजग्मुः कथम्भूताः रामाद्यैर्यदुभिः परिवृतः श्रीकृष्ण आगत्य यदि कन्यां हरेत् तर्हि सर्वे वयं सङ्घीभूताः तेन श्रीकृष्णेन सह योत्स्यामः चैद्याय कन्यां साधयिष्याम इतीत्थं कृतो निश्चयो यैस्तथाभूताः तथा अन्ये च भूभुजो राजानः समग्राणि बलानि वाहनानि येषां तथाभूता आजग्मुरित्यर्थः ॥ १८–१९ ॥ बलवान्प्रशस्तबलसम्पन्नः रामः विपक्षीयाणां शत्रुपक्षीयाणां राज्ञां समुद्यमं प्रयत्नं श्रुत्वा कन्यामाहर्तुं गतमेकमसाहायं श्रीकृष्णं च ज्ञात्वा नूनं तत्र कलहो भविष्यतीति शङ्का सञ्जाताऽस्येति तथाभूतः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तत्र कुण्डिनपुरे ॥ १७–२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

साधितुं गाधयितुम् ॥ १८–१९ ॥ जनपरम्परयैव श्रुत्वा भगवान् सर्वज्ञत्वसर्वशक्तित्वादियुक्तोपि कलहशंकितः अवश्यभाविनि कलहे प्राप्ताशङ्कः तत्र हेतुः भ्रातृस्नेहाब्धौ सर्वतो भावेन मग्नः "अनिष्टाशङ्कीनि बन्धुजनहृदयानि भवन्ति" इति न्यायेन प्रवलितस्य स्नेहस्य सर्वज्ञत्वाद्यावरणसामर्थ्यात् ॥ २०–२२ ॥

गूढार्थदीपिनी

तत्रेति सार्द्धम् कुण्डिनपुरे । यत्ता उबुक्ताः । साधितुं साधयितुं दापयितुम् अन्तर्भावितण्यर्थं ॥ १७ ॥ यदीति सार्द्धम् संहता मिलिताः सन्तः । समग्रं सर्वाङ्गपूर्णम् ॥ १८ ॥ श्रुत्वेति युग्मम् । शङ्कितः कर्तरि क्तः । तारकादित्वादितज्वा ॥१९–२०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

साधितुं साधयितुम् ॥ १८–२१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्र मण्डिते कुण्डिने ॥ १७ ॥ यदि रामाद्यैर्यदुभिर्वृत आगत्य कृष्णो हरेदुद्योगं कुर्यात्तर्हि चैद्याय तां साधितुं साधयितुं स्वभावतः कृष्णरामद्विषो यत्ताः ॥ १८ ॥ सर्वे सहिता मिलिता योत्स्याम इति निश्चितं मानसं येषां ते समग्रेति बलवाहनद्वयविशेषणम् ॥ १९ ॥ एतेन सन्निहितेनैव भगवानैश्वर्यादिमान्यथेदानीं तथा नित्यं तस्मादेष भविष्यति। अत एतदिति प्रोक्त इति सर्वसन्निहितत्वादेतदिति वृहच्छान्दोग्यभाष्योक्तेः। विपक्षीयनृपोद्यमं श्रुत्वा विपक्षीयाश्च ते नृपाश्च तेषामुद्यमो यस्मिंस्तदेतद्वृत्तमिति वा कलहो भवेदिति शङ्कावान ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधनी

तत्रैव सर्वे दुरात्मान एकीभूता इत्याह—**तत्र शाल्व** इति। **विदूरथः** दन्तवक्त्रभ्राता चत्वारो मुख्याः गणिता अन्ये **चैद्यपक्षीयाः** आययुः **पौण्ड्रकाद्याश्च** मिथ्यावासुदेवादयोऽपि तत्रैव निविष्टाः। तेषामेकत्र स्थितौ एकं धर्ममाह – **कृष्णरामद्विष** इति। नहि तेषामागमने किञ्चिदन्यत्कृत्यमस्ति। एकाकिनो वयमसमर्थाः, केनचिन्मिषेण भगवान् जेतव्य इति चैद्ये स्वोपकारं च ख्यापयितुमरिमित्रन्यायेन समागता इत्याह। **यत्ताः** सन्तः कन्यां **चैद्याय** साधितुं समागताः। नन्वाहूय कन्या दीयते, कः सन्देह इति चेत्, तत्राह **यद्यागत्ये**ति। तेषां हृदये भगवान् तथैव ज्ञापितवान्। कृष्णो ह स्त्रीणां हितकर्तेति। रामाद्यैर्यदुभिः सहागतः यदि हरेत्, तदा योत्स्याम एव, नत्वन्यत् सामर्थ्यमस्तीति भावः इत्येवं निश्चितं मानसं येषाम् अत एव सर्वे समर्थबलवाहनाः सन्तः आजग्मुः **भूभुज** इति तेषां सा सम्पत्तिः सहजा ॥ १७–१९ ॥ एषा वार्ता सर्वजनीना जातेति ज्ञापयितुं बलभद्रादयो भगवता अनुक्ता अपि समागता इत्याह–**श्रुत्वैत**दिति द्वाभ्याम्। श्रुतस्य सत्यत्वाय **भगवा**निति **राम** इति साधनरूपः विपक्षियाः विपक्षस्य शिशुपालस्य सम्बन्धिनः तेषां बलस्योद्यमं श्रुत्वा एक एव च भगवान् कन्यां हर्तुं गत इति कलहे शङ्कां प्राप्तः। कलहो भविष्यतीति निश्चित्य महता बलेन सार्धं त्वरितः कुण्डिनं ययौ। ननु भगवति कः सन्देहो भवेत्, किमिति गत इत्याशङ्क्याह भ्रातृस्नेहेन परिप्लुत इति। लौकिकदृष्ट्या स्नेहेन च गत इत्यर्थः ॥ २०–२१ ॥

श्रीसुबोधिनी–सारः

तत्र याने शाल्वो दैत्यो जरासंधः पितृव्यो वरस्य दंतवक्रो विदूरथो भ्रातरो चैद्यस्य शिशुपालस्य पक्षीयाः पक्षगाः पौंड्रकाद्या मिथ्यावासुदेवप्रधानाः सहस्रशोऽसंख्याताश्चाययुः ॥ १७ ॥ तदागमने हेतुमाह। कृष्णरामाभ्यां द्विषन्तीति तथा चैद्याय शिशुपालाय कन्यां साधयितु रुक्मिणीं परिणाययितु यत्ताः सावधानाः रामाद्यैर्बलदेवमुख्यैर्यदुभिर्वृतो युक्तः कृष्णो यवि आगत्य कन्यां हरेत्तर्हि ॥ १८ ॥ संहताः संमिलिता वयं तेन कृष्णेन योत्स्यामो युद्धं करिष्याम एकैकस्य सामर्थ्याभावात्। इति गिश्चितचित्ताः समग्राणि बलानि वाहनानि येषां ते सर्वे भूभुजो भूपाला आजग्मुः ॥ १९ ॥ एतत् विपक्षीयानां शत्रुपक्षं गतानां नृपाणामुद्यमं नारदतः श्रुत्वा कन्यां हर्त्तुं गतमेकम् एकाकिनं कृष्णं च श्रुत्वा कलहात् शंकितो भगवान् रामो भ्रातुः स्नेहेन परिप्लुतो व्याप्तः त्वरितः सत्वरो महता बलेन सार्द्धं चतुरंगेण कुण्डिनं प्रागात् प्रायात् ॥ २०–२१ ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

कृष्णरामौ द्विषन्तीति तथा ते चैद्यपक्षानुवर्तिनः "रामाद्यैर्यदुभिर्वृतः कृष्णो यद्यागत्य कन्यां हरेत्तदा सर्वे वयं संहता मिलिताः सन्तस्तेन सह योत्स्याम" इति निश्चितं मानसं येषां ते यत्ताः सावधानतया युद्धप्रयत्नवन्तः, अत एव समग्रबलवाहनयुक्ताः शाल्वाद्याः सहस्रशो भूभुजो राजानश्चैद्याय कन्यां साधितुं तत्र कुण्डिनपुरे आजग्मुरिति त्रयाणामन्वयः ॥ १७–१९ ॥

ततश्च भगवान् रामो विपक्षीयाणां शत्रुपक्षपातिनां नृपाणामेतदुद्यमं प्रयत्नं श्रुत्वा तथा एकमसहाय्यमेव कृष्णं कन्यां हर्तुं गतं च श्रुत्वा 'तत्र कलहो भविष्यति' इति शङ्कितचित्तः भ्रातरि कृष्णे यः स्नेहस्तेन परिप्लुतो व्याप्तः, अतो गजाश्वरथपत्तिभिर्महता बलेन सैन्येन सह कुण्डिनं पुरं प्रागादिति द्वयोरन्वयः ॥ २०–२१ ॥

अन्वितार्थप्रकाशिका

तत्रेति सार्द्धम् । कृष्णरामौ द्विषन्तीति तथा ते चैद्यपक्षीयाः शिशुपालानुवर्त्तिनः यत्ताः युद्धे प्रयत्नवन्तः शाल्वजरासन्धादयः पौण्ड्रकाद्याश्च सहस्रशो राजानश्चैद्याय कन्यां साधितु साधयितुम् । णिलोप आर्षः । तत्र कुण्डिनपुरे आजग्मुः ॥ १७ ॥ यदीति रामाद्यैर्यदुभिर्वृतः कृष्णो यद्यागत्य कन्यां हरेत्तदा सर्वे वयं संहता मिलिताः सन्तस्तेन सह योत्स्यामः । तङभाव आर्षः । इति निश्चितं मानसं येषां ते समग्रबलवाहनयुक्ताः सर्वे भूभुजो राजानः आजग्मुः । योत्स्याम इनि पद्यं स्वामिपादानां न सम्मतम् । हरेदिति शङ्किताः कन्यां साधितुमिति पूर्वान्वयप्रदर्शनात् युक्तं चैतत् ॥ १८–१९ ॥ श्रुत्वेति द्वयम् । भगवान् रामो विपक्षीयाणां शत्रुपक्षपातिनां नृपाणामेतदुद्यमं प्रयत्नं जनेभ्यः श्रुत्वा तथा एकमसहायमेव कृष्णं कन्यां हर्तुं गतं च तदनुमातुरन्तःपुरजनाच्च श्रुत्वा तत्र कलहो भविष्यतीति शङ्कितचित्तः भ्रातरि कृष्णे यः स्नेहस्तेन परिप्लुतो व्याप्तोऽतो गजाश्वरथिपत्तिभिर्महता बलेन सैन्येन सह कुण्डिनं पुरं त्वरितः प्रागात् । पश्चात्प्रस्थितोऽपि कुण्डिनपुरे श्रीकृष्णेन सहैव प्राविशदिति भावः ॥ २०–२१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यत्ताः सावधानाः कृष्णो यदि आगत्य कन्यां हरेदिति जातसंदेहाः संतः तां चैद्याय साधितु साधयितु आजग्मुरिति पूर्वेण वा संबंधः ॥ १८ ॥ तेन श्रीकृष्णेन सह संहताः संगताश्चेत् वयं योत्स्याम इति निश्चितमानसाः ॥ १९ ॥ विपक्षीयाः शत्रुपक्षीया ये नृपास्तेषां उद्यमं ॥ २०–२१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्रेति । कृष्णेति । योत्स्याम इति च ॥ तत्र कुण्डिनपुरे, कृष्णरामद्विषः, चैद्यपक्षीयाः शिशुपालपक्षस्थाः, शाल्वः, जरासंधः, दन्तवक्रः, विदूरथः, पौण्ड्रकाद्याः, सहस्रशः नृपाः, चैद्याय शिशुपालाय, कन्यां साधितु स्वाधीनां कर्त्तुं, यत्ताः सावधानाः सन्तः, आजग्मुः । यदि कृष्णः, रामाद्यैः यदुभिः वृतः सन्, आगत्य हरेत्, कन्यामिति शेषः । तर्हि, सहिताः एकीभूताः सन्तः, तेन कृष्णेन सह, योत्स्यामः युद्धं करिष्यामः । इति निश्चितानि निश्चययुक्तानि मानसानि येषां तथाभूताः, समग्राणि बलानि वाहनानि च येषां तथाविधाः, अन्येऽपीति शेषः । सर्वे भूभुजो राजानश्च, आजग्मुः । इति त्रयाणामेकान्वयः ॥ १७–१९ ॥ श्रुत्वेति ॥ बलवान् प्रशस्तबलसंपन्नः रामः. एतदुक्तविधं सकलनृपवृत्तं श्रुत्वा, विपक्षीयाः शत्रवश्च ते नृपा राजानस्तेषामुद्यमः प्रयत्नस्तं च श्रुत्वा, कन्यां हर्त्तुं, गतं एकमसहायं, कृष्णं च ज्ञात्वा, नूनं तत्र कलहो भविष्यतीति शङ्का संजाताऽस्येति तथाभूतः ॥ २० ॥

कृष्णप्रिया

उस बारात में शाल्व, जरासन्ध, दन्तवक्त्र, विदूरथ और पौण्ड्रक आदि शिशुपाल के सहस्रों मित्र नरपति आये थे ॥ १७ ॥ वे सब राजा श्रीकृष्ण और बलरामजी के विरोधी थे और राजकुमारी रुक्मिणी शिशुपाल को ही मिले, इस विचार से आये थे । उन्होंने अपने-अपने मन में यह पहले से ही निश्चय कर रक्खा था कि यदि श्रीकृष्ण बलराम आदि यदुवंशियों के साथ आकर कन्या को हरने की चेष्टा करेगा तो हम सब मिलकर उससे लड़ेंगे । यही कारण था कि उन राजाओं ने अपनी-अपनी पूरी सेना और रथ, घोड़े हाथी आदि भी अपने साथ ले लिये थे ॥ १८–१९ ॥ विपक्षी राजाओं की इस तैयारी का पता भगवान् बलरामजी को लग गया और जब उन्होंने यह सुना कि भैया श्रीकृष्ण अकेले ही राजकुमारी का हरण करने के लिये चले गये हैं, तब उन्हें वहाँ लड़ाई-झगड़े की बड़ी आशङ्का हुई ॥ २० ॥

बलेन महता सार्धं भ्रातृस्नेहपरिप्लुतः । त्वरितः कुण्डिनं प्रागाद् गजाश्वरथपत्तिभिः ॥ २१ ॥
भीष्मकन्या वरारोहा काङ्क्षन्त्यागमनं हरेः । प्रत्यापत्तिमपश्यन्ती द्विजस्याचिन्तयत्तदा ॥ २२ ॥
अहो त्रियामान्तरित उद्वाहो मेऽल्पराधसः ।
नागच्छत्यरविन्दाक्षो नाहं वेद्म्यत्र कारणम् । सोऽपि नावर्ततेऽद्यापि मत्संदेशहरो द्विजः ॥ २३ ॥
अपि मय्यनवद्यात्मा दृष्ट्वा किञ्चिज्जुगुप्सितम् । मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—भ्रातृस्नेहपरिप्लुतः, गजाश्वरथपत्तिभिः, महता, बलेन, सार्धम्, त्वरितः, कुण्डिनम्, प्रागात् ॥ २१ ॥ हरेः, आगमनम्, काङ्क्षन्ती, वरारोहा, भीष्मकन्या, द्विजस्य, प्रत्यापत्तिम्, अपश्यन्ती, तदा, अचिन्तयत् ॥ २२ ॥ अहो, अल्प-

राधसः, मे उद्वाहः, त्रियामान्तरितः, अरविन्दाक्षः, न आगच्छति, अत्र, अहम्, कारणं, न वेद्मि, मत्सन्देशहरः सः, द्विजः, अपि, अद्यापि, न आवर्तते ॥ २३ ॥ अपि, अनवद्यात्मा, मत्पाणिग्रहणे, कृतोद्यमः, हि, मयि, किञ्चित्, जुगुप्सितम्, दृष्ट्वा, नूनम्, न, आयाति ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सूर्योदयात्पूर्वमेवौत्सुक्येन रुक्मिण्यचिंतयदित्याह । भीष्मकन्येति । प्रत्यापत्ति प्रत्यागमनम् ॥ २२ ॥ त्रियाम रात्रिस्तावन्मात्रेणांतरितः । अल्पराधसो मंदभाग्यायाः ॥ २३ ॥ जुगुप्सितं धाष्ट्र्यादि । अपीति शंकायाम् । नायाति हि कृतोद्यम इति । अयमर्थः । आदौ कृतोद्यमत्वात्तं न प्रस्थापितवान् । प्रस्थानावसरे च किंचिन्मयि जुगुप्सितं मत्वा प्रत्याचष्ट । अतः सोऽपि द्विजो नूनं नायातीति ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परिप्लुतो व्याप्तः "मण्डूकव्याप्तयोः प्रोक्तः परिप्लुतध्वनिर्नटे" इति निरुक्तिः । शंकाहेतुमाह–भ्रातृस्नेहेत्यादि । तदीयतादृशसम्बन्धमाधुर्यमयप्रेमसिन्धौ मग्नोन्यानुसंधानासमर्थ इत्यर्थः । कथंभूतः–भगवान् सर्वज्ञानक्रियाशक्तियुक्तोपि, अत एव गजादिभिश्चतुर्भिरंगैरुपलक्षितं यत्तेन महता बलेन सैन्येन सार्द्धं त्वरितः प्रायः प्रहरार्धानन्तरं चलितोपि श्रीकृष्णेन सहैव विदर्भनगरे ससैन्यप्रवेशादतिशीघ्रः सन्प्रागादिति । तेन स्नेहेनेतरशक्तेरावरणेऽपि स्वानुकूलशक्तेः प्रकाशनं दर्शितम् । ऐश्वर्यज्ञानतोऽपि बन्धुभावस्याधिक्यं च । अत एव भ्रातृपदप्रयोगः ॥ २१ ॥ रुक्मिण्युत्कंठामाह–सूर्योदयेत्यादिना । वरो वरणीय आरोहो जघनप्रदेशो यस्याः सा तथा "आरोहो जघने दीर्घे उच्चारोहणयोरपि" इति धरणिः । नवसंगमरसोल्लासं दर्शयितुं पुनः श्रीरुक्मिण्याः पूर्वरागविशेषोदयं वर्णयति–भीष्मेति सार्धपंचभिः । तस्यापि भाग्यं सूचयित्वा तदुचितान्तःसंस्कारोऽप्यस्तीति दर्शयति । वरः श्रेष्ठ आरोहः कांतत्वेन श्रीकृष्णस्य यो लाभस्तल्लक्षणा सर्वोर्द्ध्वभूमिकाप्राप्तिर्यस्याः सेत्येवं श्रीमन्मुनेर्विवक्षितम् । यद्वा—वरः श्रेष्ठ आरोहो नितम्बो यस्या इति वयःप्रकाशव्यंजनया भावस्यातिशयैर्योग्यतां व्यंजयति । अत एव हरेः निजमनोहरता आत्मानमपि हरिष्यतो भगवत आगमनमाकांक्षन्ती नित्यमेव वांछन्ती, संप्रति च द्विजस्य प्रत्यापत्ति तद्वृत्तिज्ञापिकामपश्यन्त्यचिन्तयच्चिन्तां प्राप ॥२२॥ "राधः स्यात्कार्यसंसिद्धौ भाग्येऽदंतोऽपि हिंसने" इति निरुक्तिः । तावन्मात्रेणरात्रिमात्रेणांतरितो व्यवहितः । अत्राऽनागमने । अहो खेदे । त्रियामाशब्दप्रयोगोल्पकालत्वविवक्षया । अल्पराधस्त्वे हेतुः—नागच्छतीति । अधुनापि न प्राप्त इत्यर्थः । "राधो राधाभाग्यसिद्धिहिंसाराधनकर्मसु" इति निरुक्तेः । तत्राल्पराधस्त्वं विना कारणान्तरं न पश्यामि तस्य सर्वशक्तिमत्त्वात्प्रपन्नपालकत्वाच्च । विप्रस्य च प्रत्यागमनाभावे तदेव कारणम् ॥ २३ ॥ धाष्ट्र्यमविनयः । आदिना कौटल्यादिग्रहः । स्वाशयमाह – अयमर्थ इति । तं विप्रम् । अतो भगवतोऽनागमनात् । सोऽपि विप्रोपि लज्जया नायातीत्यर्थः । तदेवाह—सोपीति–मय्यतिकृपालुरपि । यदि द्विजस्याप्यागमनमभविष्यत्तदा प्राणत्यागाऽत्यागयोरेकतरं निरोद्धव्यमिति भावः । जुगुप्सितं शरीरबुद्ध्यादिगतं दृष्ट्वा प्रत्याचष्ट आगमनोद्यमं त्यक्तवान् । यतोऽनवद्यो निर्दोष आत्मा देहान्तःकरणादिर्यस्य सः । मम सदोषायास्तद्भार्यानर्हत्वमिति । अतो द्विजोप्यकृतार्थो मत्प्राणत्यागभयान्नायातीति भावः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नब सङ्गमरसोल्लासन्दर्शयितुं पुनः श्रीरुक्मिण्याः पूर्वरागविशेषोदयं वर्णयति—भीष्मेति सार्द्धपञ्चभिः । भीष्मकन्येति तस्यापि भाग्यं सूचयित्वा तदुचितान्तःसंस्कारोऽप्यस्तीति दर्शयति—वरः श्रेष्ठ आरोहः कान्तत्वेन श्रीकृष्णस्य यो लोभस्तल्लक्षणा सर्वोद्र्ध्वभूमिकाप्राप्तिर्यस्याः सेत्येव श्रीमन्मुनेर्विवक्षितम् । यद्वा, वरः श्रेष्ठ आरोहः नितम्बो यस्या इति वयःप्रकाशव्यञ्जनया भावस्यातिशयैर्योग्यतां व्यञ्जयति—अत एव हरेर्निज मनो हरतः आत्मानमपि हरिष्यतो भगवत आगमनमाकाक्षन्ती नित्यमेव वाञ्छन्ती सम्प्रति च द्विजस्य प्रत्यापत्ति तद्वृत्तिज्ञापिकामपश्यन्ती अचिन्तयत् चिन्तां प्राप ॥ २२ ॥ अहो खेदे त्रियामाशब्दप्रयोगोऽल्पकालत्वविवक्षया अल्पराधस्त्वे हेतुः नागच्छति अधुनापि न प्राप्त इत्यर्थः । तत्राल्पराधस्त्वं विना तु कारणान्तरं न पश्यामि तस्य सर्वशक्तिमत्त्वात् प्रपन्नपालकत्वाच्च विप्रस्य च प्रत्यागमनाभावे तदेककारणमित्याह—सोऽपीति । मय्यतिकृपालुरपि यदि द्विजस्याऽप्याऽऽगमनमभविष्यत् तदा प्राण (रक्षण) त्यागाऽत्यागयोरेकतरं निरबोध्यमिति भावः ॥ २३ ॥ महार्त्तिस्वभावेन श्रीभगवतो द्विजस्य वाऽनागमने कारणान्तरमुद्भावयति—अपीति । हि यतः अनवद्यात्मा काठिन्यादिदोषरहितचित्तोऽपि नायाति तस्मात्तदनागमनं नूनं वितर्क्को मम किञ्चिज्जुगुप्सितमेव दृष्ट्वेत्यर्थः । (दयालुत्वादापाततः कृतोद्यमोऽपि नायातीत्यर्थः) । यद्वा, कृतोद्यम इति हरिवंशोक्तं तस्याः स्वयंवरोद्यमं श्रुत्वा श्रीकृष्णस्य मथुरातः परावृत्तं कुण्डिनपुरागमनं भावयति—यत्रेन्द्रकृते तस्य राजेन्द्राभिषेके जाते जरासन्धशिशुपालादयः सर्वे पलायिताः अतो विप्रोऽपि तत्कृत्यविलम्बादेतावत्कालं नायादिति भावः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीकृष्णस्य श्रीरुक्मिणीहरणमवश्यकृत्यमेवेति बोधयन् तस्या भावविशेषमाह—भीष्मेति सार्द्धपञ्चभिः। वरः श्रेष्ठ आरोहो नितम्बो यस्याः सा परमसुन्दरीत्यर्थः। अत एव हरेर्निजमनोहरस्य आत्मानं हरिष्यतो वा, भगवत आगमनमाकाङ्क्षन्ती प्रत्यापत्तिश्च श्रीभगवदागमनज्ञापिकामपश्यन्ती साक्षादलभमाना, तदा तस्मिन् प्रातःकालेऽचिन्तयत्। भीष्मकस्य कन्येति तस्यापि कन्याहरणार्थं श्रीकृष्णागमनाकाङ्क्षां सूचयति ॥२२॥ अहो खेदे, अल्पराधस इति श्रीभगवद्विलम्बमननात्, अधुनापि नागच्छति। अतीते वर्त्तमानः, तस्यागमनं चावश्यमपेक्ष्यमित्यभिप्रायेणाह—अरविन्दाक्ष इति सर्वसन्तापहर इत्यर्थः। अत्रानागमने कारणं न वेद्मि नावगच्छामि, तस्य सर्वशक्तिमत्वाद्भक्तवात्सल्यादिगुणवत्वाच्च। अहो परमस्वतन्त्रत्वाद्वासौ नागच्छेत्, ततश्च विप्रस्याप्रत्यागमने किं कारणमिति चिन्तयति—सोऽपीति ॥ २३ ॥ महार्त्या स्वयमेव कारणमुद्भावयति—अपीति। अनवद्यात्मा परमसुन्दरशरीरो निर्द्दोषस्वभावो वा, नूनं निश्चये, हि अपि, कृतोद्यमं ऽपि, अन्यत्तैर्व्याख्यातम्, यद्वा, अनवद्यात्मा काठिन्यादिदोषरहितचित्तोऽपि, नूनं वितर्के, हि यतो नायाति, अतोऽसौ द्विजः कृतमरणोद्यम इत्यर्थः। अमंगलत्वादव्यक्ततयानुक्तिः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

प्रत्यापत्तिं पुनरागमनम् ॥ २२ ॥ अल्पराधसः मन्दभाग्यायाः ॥ २३ ॥ जुगुप्सितम् अपराधम् ॥ २४–२९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

भ्रातरि कृष्णे स्नेहेन व्याप्तः महता विपुलेन बलेन सैन्येन सह, बलमेव प्रपञ्चयति—गजाश्वरथपत्तिभिरिति। त्वरितः सञ्जातत्वरः कुण्डिनं पुरं प्रति प्रागात् ॥ २१ ॥ ततः पूर्वमेव रुक्मिण्यौत्सुक्यादचिन्तयदित्याह—भीष्मकन्येति। हरेरामनमाकाङ्क्षमाणा द्विजस्य प्रेषितस्य प्रत्यापत्तिं प्रत्यागमनमपश्यन्ती चाऽचिन्तयत् ॥ २२ ॥ चिन्तामेवाह—अहो इति चतुर्भिः। त्रियामा रात्रिस्तावन्मात्रान्तरितो मन्दभाग्याया मम वि ाहः अरविन्दाक्षो भगवानधुनापि नागच्छति अत्रानागमने कारणमहं न वेद्मि यश्च मत्सन्देशहरः द्विजः सोऽप्यद्यापि नावर्त्तते नागच्छति ॥ २३ ॥ अपि किम्वा ऽनवद्यात्मा मुकुन्दः किञ्चिन्मयि जुगुप्सितं धार्ष्ट्यादिकमपि दृष्ट्वा मत्पाणिग्रहणे निमित्ते कृत उद्यमः प्रयत्नो येन तथाभूतोऽपि नूनं नायाति नाऽऽगच्छत्येव किमित्यर्थः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वरो वरणीय आरोहो जघनप्रदेशो यस्याः सा तथा प्रत्यापत्तिं पुनरागमनम् ॥२२॥ त्रियामान्तरितः रात्रिमात्रव्यवहितः अल्पराधसः मन्दीभूतकार्यसिद्धेः ॥ २३–२५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

सूर्योदयात् पूर्वमेवौत्सुक्यभयादिति रुक्मिण्यचिन्तयदित्याह—त्रियामा अद्यतनी रात्रिस्तयैवान्तरितः श्वस्तन्यां रात्रौ तु विवाहलग्नमेवेति भावः। अल्पराधसः मन्दभाग्यायाः ॥ २३ ॥ अपीति शङ्कायां नायाति हि कृतोद्यमः इति प्रथममत्रागन्तुमुद्यमः कृत एव अत एव विप्रमपि स्वसङ्ग एवाऽऽनेतुं न प्रथमं प्रस्थापिवान् प्रस्थानावसरे तु मयि किञ्चित् जुगुप्सितं शरीरबुद्ध्यादिगतं दृष्ट्वा प्रत्याचष्ट यतोऽनवद्यात्मा निर्दोषदेहान्तःकरणादिः मम सदोषायास्तद्भार्यात्वानर्हत्वमिति भावः। अतः सोऽपि द्विजो नूनमकृतार्थो मत्तनुत्यागभयान्नायातीति ॥ २४ ॥

गूढार्थदीपिनी

द्विजस्य प्रत्यापत्तिं प्रत्यागमनम् ॥ २१ ॥ अहो खेदे त्रियामा रात्रिस्तयैव अन्तरितो व्यवहितः अल्पराधसो मन्दभाग्यायाः। अत्रानागमने ॥ २२ ॥ सोऽपीत्यर्द्धम् ॥ २३ ॥ अपि किम् अनवद्यः निर्दोषस्वरूपः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रत्यापत्तिं प्रत्यागमनम् ॥ २२ ॥ अल्पराधसः अल्पभाग्यायाः ॥ २३–२५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वयं महता बलेन युतो गजाश्वरथपत्तिभिश्च सार्धमित्यन्वयः ॥ २१ ॥ प्रत्यापत्तिं प्रत्यागमनम् ॥ २२ ॥ अल्पराधसोऽल्पसिद्धिमत्याः पुण्यहीनाया इति तात्पर्यम्। उद्वाहस्त्रियामा रात्रिस्तन्मात्रव्यवहितः। त्रियामान्तरिता यस्य सः। त्रियामा क्षणदा क्षपेत्यमरः। अरविन्दाक्षो नागच्छति। अत्र तदनागमनकारणं न वेद्मि ॥ २३ ॥ सन्देशं गृहीत्वा तं देशं गतो विप्रोऽप्यद्यापि

नावर्ततेऽत्र किं कारणं न वेद्मीत्यन्वयः। आदरातिशयादालस्याच्चाहो वध्वां धाष्ट्यं देशान्तरपुरुषान्तरमपरिचितचरं प्रति पत्रप्रेषणं कृतवतीति जुगुप्सितं दृष्ट्वा नागातिकमगधर इत्युत्प्रेक्ष्य वक्ति। अपीति। मय्यनवद्यात्मा स्वयमिति किञ्चिज्जुगुप्सितं दृष्ट्वा मत्पाणिग्रहणे कृतोद्यमः सन्नायाति ह शोके ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं सर्वसंविधानमुक्त्वा अत्यन्ताकाङ्क्षायामेव भगवान् समायातीति रुक्मिण्याः आकाङ्क्षां निरूपयति भीष्मकन्येति सप्तभिः सार्धैः। भीष्मकन्येति न स्वातन्त्र्येण स्थातुं शक्नोति। स हि पिता भयानकः, कन्या चास्वतन्त्रा, कन्यात्वादेव लोकाविगानम्। वरारोहेति भोगयोग्यावस्था निरूपिता। तेन दानसमनन्तरमेव सर्वनाशः सूचितः। अतोऽतिदुःखिता उपायान्तरमलभमाना हरेरेव सर्वदुःखहर्तुः आगमनं काङ्क्षन्ती जाता। ततः स्वस्य प्रत्यापत्तिमपश्यन्ती तदा द्विजस्य, द्विजमचिन्तयत्। द्विजस्य वा प्रत्यापत्तिम्। प्रत्यापत्तिर्नाम स्थानात्प्रच्युतस्य पुनः स्वस्थानागमनम्। स्वयमपि भगवतः सकाशात् प्रच्युता, पुनर्भगवत्प्राप्तिमलभमाना, प्रापकं द्विजमेवाचिन्तयत् ॥ २२ ॥ तस्याश्चिन्तामाह अहो इति सार्धैस्त्रिभिः गुणेभ्योऽप्यधिकेति ख्यापयितुम्। त्रियामा रात्रिः, तयैवान्तरित उद्वाहः, एकैव रात्रिर्मध्ये वर्तत इत्यर्थः। त्रियामात्वेनाल्पकालता सूचिता। अतोऽग्रिमदिवसे महाप्रलय एवेति चिन्ता। **अल्पराधस** इति अल्पसिद्धियुक्तायाः। भाग्यसिद्धिश्चेत् महती भवेत्, तदा शीघ्रमेवेष्टसिद्धिः। सन्देहादल्पवचनम्। चिन्तायां द्वितीयां कोटिमाह **नागच्छत्यरविन्दाक्ष** इति। दृष्ट्यैव तापनाशकः। अत्र कारणमहं न वेद्मि। नन्वागमनसमयो न जातः, किमिति चिन्त्यत इति चेत्, तत्राह **सोऽपि नावर्तत** इति। आगच्छतीति ज्ञाते चिन्ता न भवेत्। आगमनकालश्च सन्निहितः। तत एकतरनिश्चये अस्वास्थ्यं वा उत्पाद्यं भवति। येन श्वो विवाहो न भवेत्। अपिशब्दादन्यो वा भगवता प्रेषितः स्यात्तेनापि वा। **अद्यापीति** सन्निहितः समयः। ननु ब्राह्मणाः कचित्तपः करिष्यन्ति, को नियमस्तेषामागमन इति चेत्, तत्राह **मत्सन्देशहर** इति। सन्देशं यो नयति, तत्रापि द्विजः सत्यवादी। द्वितीयं जन्म सत्यार्थमेवेति। तत्र स्वयमेव हेतुं कल्पयति। **अपीति** सम्भायनायाम्। भगवाननवद्यात्मा किञ्चिद्भ्रातृपक्षपातलक्षणं जुगुप्सितं दृष्ट्वा, तत्कारणभूतं पूर्वजन्मस्थितं वा मत्पाणिग्रहणे प्रथमत उद्यमं कृत्वापि, ब्राह्मणमपि स्थापयित्वा सङ्गे नेष्यामीति पश्चान्नागतः। ततो ब्राह्मणोऽपि शीघ्रमागन्तुमसमर्थः नागत इति तदाह। मत्पाणिग्रहणे कृतोद्यमोऽपि नूनं नायाति ॥ २३–२४ ॥

श्रीसुबोधिनीसारः

वरः श्रेष्ठ आरोहो यस्याः सा भीष्मस्य कन्या हरेरागमनं कांक्षंती द्विजस्य प्रेषितविप्रस्य प्रत्यापत्तिं प्रत्यागमनमपश्यंती सती तदाऽशुचत् ॥ २२ ॥ त्रियामया राज्यांतरितो व्यवहितः प्रभाते विवाहनियमात् अल्पराधसो मंदभाग्याया मे ममोद्वाहो विवाहोस्ति। पूर्वेद्युरस्ति महती कुलदेवयात्रेति संकेतितोपि अरविंदाक्षः पद्मलोचनः श्रीकृष्णो नायाति। अत्रानागमने कारणं न वेद्म्यहं न जानामि ॥ २३ ॥ मम संदेशप्रापको विप्रः सोपि अद्यापि नायाति। अपीति संभावनायाम्। अनवद्यो निर्दोष आत्मा मूर्त्तिर्यस्य स भगवान् किंचिन्मयि जुगुप्सितं निंद्यं धाष्टर्यादि दृष्ट्वा मम पाणिग्रहणे कृतोद्यमो नूनं नायाति हि युक्तम् ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'ततः पूर्वमेव रुक्मिण्यौत्सुक्यादचिन्तयत्' इत्याह—भीष्मेति। वरारोहा भीष्मककन्या हरेरागमनमाकाङ्क्षान्ती तथा प्रेषितस्य द्विजस्य प्रत्यापत्तिं प्रत्यागमनं चापश्यन्ती तदा अचिन्तयत् ॥ २२ ॥ चिन्तामेवाह—अहो इति चतुर्भिः। अल्पराधसो मन्दभाग्यायाः मे उद्वाहः त्रियामा रात्रिः तावन्मात्रान्तरितः अरविन्दाक्षः कृष्णोऽधुनापि नागच्छति, अत्रानागमने कारणमहं न वेद्मि ॥ २३ ॥ स च मत्सन्देशहरो द्विजः सोप्यद्यापि नावर्तते। अपीति सम्भावनायाम्, नूनं निश्चितमेतत्, प्रथममागमनार्थं कृतोद्यमः अतो द्विजं न प्रस्थापितवान् प्रस्थापनावसरे तु मयि किञ्चित् जुगुप्सितं धाष्ट्यादि निदिन्तं दोषं दृष्ट्वा विचिन्त्य मत्पाणिग्रहणे मत्पाणिग्रहणार्थं कृष्णो नायाति। हि यस्मात् सः अनवद्यात्मा निर्दोषपूर्णगुणस्वरूपः। अतः प्रस्थानावसरे प्रत्याख्यातत्वाद्द्विजस्याप्यागमनविलम्बो जात इत्याशयः ॥ २४ ॥

अन्वितार्थप्रकाशिका

भीष्मेति ॥ वरौ आरोहौ ऊरू यस्याः सा भीष्मककन्या हरेरागमनं काङ्क्षन्ती तथा प्रेषितस्य द्विजस्य प्रत्यापत्तिं प्रत्यागमनं चापश्यन्ती सती तदा सूर्योदयात् पूर्वमेव औत्सुक्यवशात् अचिन्तयत् ॥ २२ ॥ अहो इति चतुर्भिः। अल्पराधसो मन्दभाग्यायाः मे उद्वाहः त्रियामा अद्यतनी रात्रिः तावन्मात्रान्तरितः श्वस्तन्यां रात्रौ तु विवाहलग्नमेवेति भावः। अरविन्दाक्षः कृष्णोऽधुनापि नागच्छति अत्रानागमने कारणमहं न वेद्मि ॥ २३ ॥ सोऽपीति अर्द्धम् ॥ यश्च मत्सन्देशहरो द्विजः सोऽप्यद्यापि नावर्तते। यदि द्विज आगच्छेत्तदा प्राणरक्षणत्यागयोरेकं निश्चेष्यामीति भावः। अपीति संभावनायाम्। नूनं निश्चितम्। अनवद्यात्मा निर्दोषस्वरूपः प्रथममागमनार्थं कृतोद्यमः। अतो द्विजं सहैवानेतुं न प्रस्थापितवान्। प्रस्थानावसरे तु मयि किञ्चित्

जुगुप्सितं धाष्टर्यादिकं दोषं दृष्ट्वा विचिन्त्य प्रत्याचष्ट । मत्पाणिग्रहणे मत्पाणिग्रहणार्थं कृष्णो नायाति । यद्वा । अतः स द्विजोऽपि नूनमकृतार्थो मम तनुत्यागभयान्नायातीति ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

रुक्मिण्याः पूर्वोक्तां प्रीतिं पुनर्वर्णयति सार्द्धपंचभिः । भीष्मेत्यादिनावरारोहावरः । श्रेष्ठः । आरोहः । श्रीकृष्णप्राप्तिरूपं ऊर्ध्वभूम्यारोहणं यस्याः सा । प्रत्यापत्तिं प्रत्यागमनं ॥ २२ ॥ त्रियामारजनीतावन्मात्रः संजातोंतरोंऽतरायो यस्य सः अल्पराधसः अल्पभाग्यायाः मे ॥ २३ ॥ जुगुप्सितं निंदितं अपीति संदेहे ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बलेनेति । भ्रातृस्नेहपरिप्लुतः श्रीकृष्णे स्नेहेन व्याप्तः, अत एव महता गजाश्वरथपत्तिभिः गजादिरूपेणेत्यर्थः । बलेन सैन्येन, सार्द्धं सह, त्वरित एव, कुण्डिनं प्रागात् । इति द्वयोरेकसम्बन्धः ॥ २१ ॥ पूर्वोक्तं रुक्मिण्यौत्सुक्यं वर्णयति सार्द्धपञ्चभिः । भीष्मेति । वरः श्रेष्ठ आरोहो नितम्बो यस्याः सा वरारोहा । भीष्मकन्या रुक्मिणी, हरेः आगमनं काङ्क्षन्ती आकाङ्क्षमाणा, द्विजस्य स्वप्रेषितस्य विप्रस्य, प्रत्यापत्तिं प्रत्यागमनं अपश्यन्ती सती, तदा अचिन्तयत् चिन्तयायास ॥ २२ ॥ अहो इति । अहो अल्पराधसो मन्दभाग्यायाः, मे मम उद्वाहो विवाहः, त्रियामा रात्रिस्तदन्तरितस्तावन्मात्रान्तरायः, वर्त्तते । अरविन्दाक्षः कमलनयनो भगवान्, अधुनापि, न आगच्छति । अत्र तदनागमने, कारणं हेतुं, अहं न वेद्मि हि ॥ २३ ॥ सोऽपीति । मत्पाणिग्रहणे निमित्ते, कृत उद्यम उद्योगो येन तथाभूतः कृष्णः, आवां सहैव प्रस्थाव इति द्विजमुक्त्वा तं रक्षितवान् । अतः यः मत्संदेशहरः मम संदेशं गृहीत्वा गतः सः द्विजः अपि, अद्यापि एतावत्कालपर्यन्तमपि, न आवर्त्तते नागच्छति । ततः प्रस्थानावसरे, अनवद्यात्मा निर्दोषस्वरूपः श्रीकृष्णः अपि, मयि, किंचित् जुगुप्सितं पत्त्रलेखनादि धाष्टर्यं, दृष्ट्वा विचार्य, इह नूनं नायाति । कथमन्यथोभावपि नायायातामिति भावः ॥ २४ ॥

कृष्णप्रिया

यद्यपि वे श्रीकृष्ण का बल-विक्रम जानते थे, फिर भी भ्रातृस्नेह से उनका हृदय भर आया; वे तुरंत ही हाथी, घोड़े, रथ और पैदलों की बड़ी भारी चतुरङ्गिणी सेना साथ लेकर कुण्डिनपुर के लिये चल पड़े ॥ २१ ॥ इधर, परमसुन्दरी रुक्मिणीजी भगवान् श्रीकृष्ण के शुभागमन की प्रतीक्षा कर रही थी । उन्होंने देखा श्रीकृष्ण की तो कौन कहे, अभी ब्राह्मणदेवता भी नहीं लौटे ! वे बड़ी चिन्ता में पड़ गयीं; सोचने लगीं ॥ २२ ॥ 'अहो ! अब मुझ अभागिनी के विवाह में केवल एक रात की देरी है । परन्तु मेरे जीवन सर्वस्व कमलनयन भगवान् अब भी नहीं पधारे ! इसका क्या कारण हो सकता है, कुछ निश्चय नहीं मालूम पड़ता । यही नहीं, मेरे सन्देश ले जाने वाले ब्राह्मणदेवता भी तो अभीतक नहीं लौटे ॥ २३ ॥ इसमें सन्देह नहीं कि भगवान् श्रीकृष्ण का स्वरूप परम शुद्ध है और विशुद्ध पुरुष ही उनसे प्रेम कर सकते हैं । उन्होंने मुझमें कुछ न कुछ बुराई देखी होगी, तभी तो मेरा हाथ पकड़ने के लिये—मुझे स्वीकार करने के लिये उद्यत होकर वे यहाँ नहीं पधार रहे हैं ? ॥ २४ ॥

दुर्भगाया न मे धाता नानुकूलो महेश्वरः । देवीवा[1]विमुखा गौरी रुद्राणी[2]गिरिशा सती ॥ २५ ॥
एवं चिन्तयती बाला गोविन्दहृतमानसा । न्यमीलयत कालज्ञा नेत्रे चाश्रुकलाकुले ॥ २६ ॥
एवं वध्वाः प्रतीक्षन्त्या गोविन्दागमनं नृप । वाम ऊरुर्भुजो नेत्रमस्फुरन् [3]प्रियभाषिणः ॥ २७ ॥
अथ कृष्णविनिर्दिष्टः स एव द्विजसत्तमः । [4]अन्तःपुरचरीं देवीं राजपुत्रीं ददर्श ह ॥ २८ ॥

कर्दमक्षमा

अन्वयः—दुर्भगायाः, मे, धाता, न, अनुकूलः, महेश्वरः, न, अनुकूलः, वा, देवी, गौरी, रुद्राणी, गिरिशा, सती, विमुखा किम् ? ॥ २५ ॥ एवम्, चिन्तयती, गोविन्दहृतमानसा, कालज्ञा, बाला, अश्रुकलाकुले, नेत्रे, न्यमीलयत् ॥ २६ ॥ हे नृप ? एवम्, गोविन्दागमनम्, प्रतीक्षन्त्याः, वध्वाः, प्रियभाषिणः, वाम, ऊरुः, वामः, भुजः, वामम्, नेत्रम्, अस्फुरन् ॥ २७ ॥ अथ, कृष्णविनिर्दिष्टः, स, एव, द्विजसत्तमः, अन्तःपुरचरीम्, देवीं, राजपुत्रीम्, ददर्श, ह ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यद्वा । ततो निर्गतोऽपि श्रीकृष्णो मद्दैववैमुख्यात्कचित्प्रतिबद्धो भवेदित्याह—दुर्भगाया इति ॥ २५ ॥ कालज्ञा नाऽधुनापि गोविंदाऽऽगमनकाल इति मन्वाना किंचिदाश्वस्तचित्ता सती चिंतास्तब्धे लोचने निमीलितवतीत्यर्थः ॥ २६ ॥ प्रियभाषिणः प्रियसूचकाः ॥ २७ ॥ पुरोपवनं प्राप्तेन श्रीकृष्णेन विनिर्दिष्टः प्राप्तं मां कथयेत्यादिष्टः ॥ २८ ॥

---

१. विमुखी–वीर. । २. गिरिजा–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ३. शंसिनः–वीर. । ४. चरा–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पक्षान्तरमाह—यद्वेति। क्वचित् स्थानांतरे। प्रतिबद्धः किंचित्कार्यप्रतिबन्धरुद्धः। दुर्भगाया मन्दभाग्यायाः। धाता ब्रह्मा कृष्णो वा "धाता हिरण्यगर्भे ना पालके धारकेऽपि च" इति धरणिः। महेश्वरो रुद्रः, कृष्णो वा। पुनः कथनं विषादवशात्। देवीति—देव्यस्त्वनंतास्तासां केत्यनिर्णयादाह—गौरीति। 'गौरोरुणे सिते पीते' इत्यनेकार्थात्तत्राप्यनिश्चय एवेति चेदाह—रुद्राणीति। सामान्यविवक्षायां गंगाया अपि तत्पत्नीत्वेन संशयाऽनिस्तार एवात आह—गिरिजेति। पुनरपि नद्या अपि गिरिजात्वेन तथात्वमेवाह—सतीति। पुनरपि 'सती साध्वी पतिव्रता' इति कोशात्संशयतादवस्थ्यं ग्रंथान्तरमानेनापनेयम्। तथाहि—"सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे" इति। शैलवधूर्मेनका 'गिरिजा मेनकात्मजा' इति, कोशात्। एतादृशविशेषणविशिष्टांबिकेत्यर्थः। विमुखा पराङ्मुखा जातेत्यर्थः। पुनस्तस्यानवद्यात्मत्वेन दोषदर्शनमप्राप्य निजाल्पराधस्त्वमेव कारणं स्थापयति—दुर्भगाया इति। धाता मे नानुकूल इति—मत्प्रतिकूलत्वेन विधात्रैव क्वचिद्वर्त्मनि प्रतिबंधितः। तत्प्रातिकूल्ये हेतुर्न दृश्यते इत्यत आह—महेश्वरो वेति। कदाचिन्मत्पूजामप्राप्य कुपितः स्यादित्यर्थः। महेश्वर्यत्वात्तस्य मयि बालिकायामज्ञायां कोपो न युज्यत इति अनेन ब्रह्मरुद्रावपि तदर्थमनयोपास्यमानौ स्त इति गम्यते। अहो प्रत्यहमाराध्यमानाऽस्मत्कुलदेव्यपि गौरी विमुखा, हंतहंत कमपराधं मे सा प्राप्ता यन्मयि वैमुख्यं गता, तस्याः सांसर्गिकोयं वा दोष इत्याह—रुद्राणीति। तत्पतिः सर्वजनाश्रोदयति, सा तु मां रोदयतु नाम। हन्त ममैतावद्वैक्लव्यं प्राणजिहासापर्यंतमपि दृष्ट्वा कथं न द्रवति, तत्र पैतृकं दोषं संभावयंत्याह—गिरिजा पाषाणपुत्री कथं द्रवेदतः सा मद्देहं त्याजयिष्यत्येवेति निश्चिनोमि। यतः सती पूर्वजन्मनि स्वमपि देहं या त्यक्तवती तस्या अन्यदेहत्याजनं नाश्चर्यमिति भावः। 'गिरिशा' इति पाठे पर्वते शयाना मत्प्रार्थनां निद्राकुलत्वाद्वा न शृणोतीत्यर्थः॥ २५॥ एवमुक्तरीत्या। बालाऽस्वतंत्रा। आस्वस्थचित्ता स्थिरमानसा। स्तब्धे निष्ठुरे। गोविंद। गवामिन्द्रः श्रीमति गोकुले तादृशमाधुर्यतया वर्णितो यस्तेन हृतं मानसं यस्याः सा। अत एव बालाप्येतच्चिंतयंती अश्रूणां कला बिंदवस्तैराकुले व्याप्ते विवशे वाऽक्षिणी न्यमीलयत॥ २६॥ "वामांगस्फुरणं स्त्रीणामन्यथातो नृणां शुभम्" इति शाकुनिकाः। सूत्रशाटिकान्यायेन वध्वाः सन्निहितविवाहायाः कन्यायास्तस्याः प्रतीक्षंत्याः प्रतीक्षमाणाया ऊर्वादीनां यथोत्तरमूर्द्ध्वतापेक्षया प्रियभाषित्वे श्रैष्ठ्यम्। अस्फुरन्निति बहुत्वमेकदैव सर्वस्फुरणाभिप्रायेण। प्रियभाषिण इहैकशेषत्वेन क्लीबत्वे प्राप्तेऽपि पुंस्त्वमार्षम्॥ २७॥ अथांगस्फूर्त्युत्तरक्षणे। यो रुक्मिण्या प्रेषितः स एवेत्यर्थः। स एव योग्यत्वेन श्रीकृष्णेन निर्दिष्टो न त्वन्यः। संदेशस्तु—मां प्राप्तं कथय तामद्यैवान्वेष्यामीति प्रकारको ज्ञेयः। प्रथमं स एव द्विजसत्तमस्तां रुक्मिणीं ददर्श, न तु तं सेत्यर्थः। तत्र हेतुः—अंतःपुरचरीं विप्रवर्त्मनिरीक्षणाय तस्मिन्नितस्ततो भ्रमंतीम्, व्यग्रचित्तामित्यर्थः। कीदृशीम्—देवीं वैवाहिकालंकारमगलकर्मादिना द्योतमानाम्। ह हर्षे। विप्रकर्तृकदर्शनस्य यत्प्रथमत्वं तदुल्लेखोसौ रुक्मिकौटिल्येन संप्रति स्वस्य तद्दर्शनं भवेन्न वेति पथि तांस्तान्सूचयति तदुल्लाससूचकत्वात्॥ २८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुनस्तस्याऽनवद्यात्मत्वेन दोषदर्शनमप्यमत्वा निजाल्पराधस्त्वमेव कारणं स्थापयति—दुर्भगाया इत्यर्द्धेन। अनेन ब्रह्मरुद्रावपि तदर्थमनयोपास्यमानौ स्त इति गम्यते धातृत्वान्महेश्वरत्वात् तदुपासनेन सुभगत्वमपि जायेतेत्याशङ्क्य पक्षान्तरमाह—देवी वेति। अस्मत्कुलदेव्यपि गौरी विमुखा तदुचितभजनाभावेनेति भावः। अतस्तस्याः परमापेक्ष्याया वैमुख्येनैव तावपि नानुकुलौ जाताविति गमितं तत्र तस्या धात्राप्यपेक्ष्यत्वे कारणमाह—रुद्राणीति। महेश्वरापेक्ष्यत्वे गिरिजा सतीति सती पूर्वं दक्षजा भूत्वा पुनर्गिरिजाऽभवत् सेत्यर्थः। पूर्वं तन्निन्दाश्रवणेन प्राणव्ययात् पश्चात्तदप्राप्त्या प्राणव्ययव्यवसायात्तदुचितमेवेति भावः गिरिशेति पाठे गिरौ शयनात्तादृशतप एव लक्ष्यते एवं बहुशो रुरोदेति ज्ञेयम्। अश्रुकलाकुले इति वक्ष्यमाणात्॥ २५॥ गोविन्दो गवामिन्द्रः श्रीमति गोकुले तादृशमाधुर्य्यतया वर्णितो यः तेन हृतं मानसं यस्याः सा अत एव बालाहि—एवमोदृशं चिन्तयन्ती एवमिति शोकभरेण तादृशमन्यदपि चिन्तयदिति द्योतयति—अश्रूणां कला विन्दवः तैराकुले व्याप्तं विवशे वा जलाकुलेति पाठेऽपि स एवार्थः। अन्यत्तैः तत्र नाधुनापीत्यादिकं देवयात्रायामेव कृतावसरत्वात्॥ २६॥ वध्वाः सन्निहितविवाहाया कन्यायास्तस्याः प्रतीक्षन्त्याः प्रतीक्षमाणायाः उर्वादीनां यथोत्तरमूर्द्ध्वतापेक्षया प्रियभाषित्वे श्रैष्ठ्यम् अस्फुरन्निति बहुत्वेनैकदैव सर्वैरन्वयः। सचैकदैव स्फुरणाभिप्रायेण प्रियभाषिण इत्येकशेषत्वेन क्लीबत्वे प्राप्तेऽपि पुंस्त्वमार्षम्॥ २७॥ स एव योगत्वान्निर्दिष्टः श्रीकृष्णेन नत्वन्यः निर्देशस्तु मां प्राप्तं कथय तामद्यैव नेष्यामीतिप्रकारको ज्ञेयः। प्रथमं स एव द्विजसत्तमस्तां रुक्मिणीं ददर्श नतु सा तमित्यर्थः। तत्र हेतुः। अन्तः पुरचरीं विप्रवर्त्मनिरीक्षणाय तस्मिन्नितस्ततो भ्रमन्तीं व्यग्रचित्तामित्यर्थः। कीदृशीं ददर्श? देवीं वैवाहिकालङ्कारमङ्गलकर्मादिना द्योतमानां ददर्श ह हर्षेविप्रकर्तृकदर्शनस्य यत् प्रथमत्वं तदुल्लेखोऽसौ रुक्मिकौटिल्येन स्वस्य तद्दर्शनं सम्प्रति भवेन्नवेति पथि तान् तान् सूचयति तदुल्लाससूचकत्वात्॥ २८॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दुर्भगाया दुष्टादृष्टायाः; अयं सर्व्वत्रैव हेतुः—धातेति महेश्वर इति च। तयोः सर्व्वविघ्नविनाशनशक्तिरभिप्रेता। देवी अस्मत्कुलेष्टदेवता गौरी, पूर्व्वं श्यामापि महातपसा गौरीत्वं प्राप्तेति श्रीशिवैकप्रीतिपरतोक्ता, किंवा काठिन्यादिदोषराहित्येन विशुद्धापि रुद्राणी पतिप्राप्त्यर्थकन्यार्त्तिभराद्यभिज्ञापि। तच्च तज्जन्मद्वयेऽपीत्याशयेनाह—गिरिजेत्यादि। 'गिरिशा' इति पाठे श्रीशिवसनामकत्वेन तद्भक्तवात्सल्यादिकमभिप्रेतम्; अतः सती सर्व्वगुणैरुत्तमापीति। एवं बहुशो रुरोदेति ज्ञेयम्, 'अश्रुकलाकुले' इति वक्ष्यमाणत्वात् ॥ २५ ॥ गोविन्दो निजाशेषैश्वर्य्यविस्तारणार्थं पृथ्व्यामवतीर्णो भगवान्, अतएव तस्मिन् गतं मानसं यस्याः सा। हृतेति पाठेऽपि स एवार्थः। अतएव बालापि एवमीदृशं चिन्तयन्ती, एवमिति शोकभरेण तादृशमन्यदप्यचिन्तयदिति द्योतयति। अश्रूणां कला विन्दवो धारापाता वा, तैराकुले व्याप्ते विवशे वा; 'कुलाकुले' इति पाठेऽपि स एवार्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, परमार्त्त्या स्वयमेव पतन्तीनामश्रुकलानां निरोधार्थं न्यमीलयत्। अन्यत् समानम्। यद्वा, कालज्ञापि परमार्त्त्या नेत्रे न्यमीलयत्, मूर्च्छितेवाभूदित्यर्थः। किंवा नेत्रे निमीलयितुमैच्छत् मुमुर्षुरभवदित्यर्थः। तथा चाग्रे षष्टितमाध्याये श्रीभगवानेव वक्ष्यति (भा० १०।६०।५७)—'दूतस्त्वयार्थलभने सुविविक्तमन्त्रः, प्रस्थापितो मयि चिरायति शून्यमेतत्। मत्वा जिहास इदमंगमनन्ययोग्यम्' इति ॥ २६ ॥ वध्वाः सन्निहितविवाहायाः कन्यायास्तस्याः, प्रतीक्षन्त्या अपेक्षमाणायाः, ऊर्व्वादीनां यथोत्तरमूर्द्ध्वतापेक्षया प्रियभायित्वे श्रैष्ठ्यम्। अस्फुरन्निति बहुत्वं सद्योऽभीष्टसिद्धिसूचनार्थमेषामेकदैव स्फुरणात्; अतएव चकाराप्रयोगश्च। हे नृपेति प्रहर्षोदयात्। पक्षान्तरे—एवं प्रतीक्षन्त्या मरणमिच्छन्त्या इत्यर्थः। स्पष्टतयात्र पूर्व्ववदनुक्तिरमंगलत्वात्, महार्त्तिप्रदत्वाच्च। गोविन्दागमनं प्रति प्रियभाषिणः ॥ २७ ॥ अथ अनन्तरं सद्य एवेत्यर्थः। विशेषेण तामद्यैवानेष्यामीत्यादि–प्रतिज्ञापूर्व्वक–मधुरवचनाश्वासनादिना निर्दिष्टः सन्, द्विजेषु सन् उत्तमः, सर्व्वशास्त्राभिज्ञः, सत्तरः श्रीभगवद्भक्तः, सत्तमस्तत्प्रियतमजनस्नेहविषयः; अन्तःपुरं प्रविष्टो ददर्शेति ज्ञेयम्। अन्तःपुरचरीं विप्रवर्त्मनिरीक्षणादिवैयग्र्येणेतस्ततो भ्रमन्तीं देवीं वैवाहिकालंकार-मंगलकर्म्मादिना द्योतमानाम्, यतो राजपुत्रीम्। ह हर्षे ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किंवा धाता तु विश्वकृन्महेश्वरो दुर्भगाया मम नानूकूल एव किंवा रुद्रस्य स्त्री मम विमुखी प्रतिकूला एव ॥ २५ ॥ एवमितीत्थं चिन्तयती बाला रुक्मिणी गोविन्देन हृतं मानसं यस्याः सा कालज्ञा नाधुनापि गोविन्दागमनकाल इति मन्वानाऽश्रुविन्दुभिराकुले स्तब्धे लोचने न्यमीलयत निमीलितवती ॥ २६ ॥ हे नृप ! इत्थं गोविन्दागमनं गोविन्दागमनवार्त्ताहरं द्विजं तदागमनद्वारं च प्रतीक्षन्त्याः रुक्मिण्याः वामा उर्वादयः प्रियशंसिनः कृष्णागमनरूपप्रियसूचकाः अस्फुरन्सञ्चलितवन्त ॥ २७ ॥ अथ ततः पूर्वमात्मना प्रेषितः स एव द्विजः श्रीकृष्णेनाऽऽदिष्टोऽन्तः पुरचरीं रुक्मिणीं ददर्श ह ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

"गौरो ऽरुणे सिते पीते" इति गौरीशब्दस्याऽदन्तस्यानेकार्थवाचित्वेनानिश्चय इत्यतो रुद्राणीति सामान्यविवक्षायां गङ्गाया अपि तत्पत्नीत्वेन संशयानिस्तार इत्यतो गिरिजेति गिरिजा मेनकात्मजेत्यभिधानं नन्वभिधानस्य योगबलानुसारित्वेन प्रवृत्तर्नद्या अपि गिरिजात्वादित्यतः सतीति सती सती योगविसृष्टदेहा "तां जन्मना शैलवधू प्रपेदे" इति ध्यानकालज्ञा ॥ २६ ॥ वाम ऊरुरस्फुरत् नेत्रभुजावस्फुरतां प्रियभाषिणः अभीष्ट कार्यशंसिनः ॥ २७–२८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

देवी वा विमुखीत्यादि देवी वा विमुखी यतः प्रेपितो विप्रोऽद्यापि नायात इति काऽसौ देवी ? तत्राह—गौरी तस्याः कथं वैमुख्यं यतो रुद्रानुतोषत्वात् सापि तथा अस्ति वैमुख्ये कारणं गिरिजत्वमित्याह—गिरिजा गिरेः कठिनत्वात् नेत्याह, सतीति। सा प्रसिद्धा कोमलैव पत्यवमानदृष्ट्या सद्यः प्राणत्यागकारित्वात् सा परस्या अपि पतिलाभाय सम्मुखी, निजनाम्नामावृत्तौ समाधानम् ॥ २५ ॥ एवञ्चिन्तयन्तीत्यादि, कालज्ञा त्रिकालज्ञा श्रीत्वात् श्रीगोविन्द आयास्यति नवेति जानामीति नेत्रे निमील्य चेतसि चिन्तयामासेत्यर्थः। अश्रुकलाकुले इति अद्यापि नायात इति पूर्वदुःखेनैवाश्रुजातं कालज्ञेति तदागमनं जानन्त्यास्तदेवानन्दजमभूदिति अश्रुकलाभ्यां दुःखजानन्दजाभ्याम् आकुले नेत्रे न्यमीलयतेत्यर्थः ॥ २६ ॥ एवमित्यादि एवं गोविन्दागमनं प्रतीक्षन्त्या प्रतीक्षमाणायाः वाम ऊरुर्वामभुजो वामनेत्रम् अस्फुरन् प्रियं श्रीकृष्णं तदागमनं वा भाषितु शीलं येषाम् ॥ २७ ॥ अथेत्यादि। राजपुत्रीं ददर्शेति ब्राह्मण एवाग्रे तां ददर्श तस्या निमीलितनयनत्वात्। कृतकृत्यतया परमानन्देनाविज्ञाप्यैवान्तःपुरप्रवेशेन सर्वैरलक्षित इति ज्ञेयम्। तेन न केनापि विप्रोऽयमागत इति कथितपूर्वः सः ॥ २८–४४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

देवी वा विमुखीत्यादि। देवी वा विमुखी कासौ गौरी, तस्या वैमुख्यं संदिग्धम्, यतो रुद्राणी रुद्रभार्या तस्याशुतोषत्वात्तद्भार्याया अपि तथात्वम्। नन्वसन्दिग्धमेव वैमुख्यं तस्या यतो गिरिजा गिरेः काठिन्यात् तदुद्भवाया अपि काठिन्यमुचितं

भवति ? तत्राह—सती पूर्वं सतीति विख्याता परमकोमलैव सा, यतः पत्यवमानदृष्ट्या स्वदेहमुत्सृष्टवती सा परस्या अपि पतिलाभाय सम्मुखी-भविष्यति प्रत्युत् गुरुरपि भवित्री ॥ २५ ॥ कालज्ञा—स्वयंलक्ष्मीत्वादायास्यति न वेति जानामीति चेतसि पर्यालोचयन्ती नेत्रे न्यमीलयत्, यद्यायाति, तदा देहो रक्षणीय एव, न तु वा सती शिष्यैव भविष्यामि । अश्रुकलाकुले इत्यधुनापि नायात इति दुःखेन पूर्वमश्रुजातम, कालज्ञेत्यायास्यतीत्यवेत्य ज्ञात्वा तदेवानन्दजमेवाभूत् ॥ २६ ॥ वाममुर्वादि च स्फुरत् साक्षित्वमदात् ॥ २७ ॥ अथेत्यादि । श्रीकृष्णो मयानीत इत्यानन्दबाहुल्येन तस्य बहुमानेन चान्यादृशो जातः, पश्चादवाधमन्तःपुरप्रवेशेन निलीयमानः । आदौ स एव तां ददर्श, पश्चात् सा तं ददर्श ॥ २८-४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुनरपि बहुतरं संशयानेवाह—दुर्भगाया इति । धातामे नानुकूल इति मत्प्रतिकूलेन विधात्रैव वा वर्त्मन्येव क्वचित् स प्रतिबन्धितः तत्प्रातिकूल्ये हेतुर्न दृश्यते इति महेश्वरो वा कदाचिन्मत्पूजामप्राप्य कुपितः महैश्वर्य्यात्तस्य मयि बालिकायां निकृष्टायामज्ञायां कोपो न युज्यत इत्यहो प्रत्यहमाराध्यमानापि गौरी देवी वा विमुखा हन्त हन्त कमपराधं मे सा प्राप्ता यन्मयि वैमुख्यं गता तस्याः सांसर्गिकोऽयं वा दोष इत्याह - रुद्राणीति । तत्पतिः सर्वजनान् रोदयेत् सा तु मामिति रोदयतु नाम हन्त ममैतावद्वैक्लव्यं प्राणजिहासापर्य्यन्तमपि दृष्ट्वा कथं न द्रवति ? तत्र पैत्रिकं दोषं सम्भावयन्त्याह—गिरिजा पाषाणपुत्री कथं द्रवेत् अतः सा मद्देहं त्याजयिष्यत्येवेति निश्चिनोमि यतः सती पूर्वजन्मनि स्वयमेव देहं तत्याजेति ॥ २५ ॥ कालज्ञेति भोश्चञ्चलचित्त ! सम्प्रति तनुत्यागोपायं मा कुरु यतो नाऽधुनापि तस्याऽऽगमनकालो व्यतीतस्तस्मात्तनुत्यागात् पूर्वमधुना ध्यानेनैव तन्मुखमेकवारमवलोकयानि नाऽत्र त्वं मे प्रतिवधानेति नेत्रे न्यमीलयत मुद्रितवती ॥ २६ ॥ उ र्वादयेऽस्फुरन् प्रियभाषिणः शुभसूचकाः । एकशेषे सति पुंस्त्वमार्षम् ॥ २७ ॥ कृष्णेन विनिर्दिष्टः पुरोपवने प्राप्तं मां शीघ्रं कथयेत्यादिष्टः देवीं ध्यानप्राप्तकृष्णदर्शनानन्देन द्योतमानां ध्यानावेशोद्रेकादेव कृष्णापार्श्वम् गन्तुम् अन्तःपुराच्चरतीति तथा ताम् ॥ २८ ॥

गूढार्थदीपिनी

देवीनामनन्तत्वात् गौरीति तत्रापि गौरवर्णत्वेनानिश्चयात् रुद्राणीति तत्रापि गङ्गाप्रसक्तिरत आह गिरिजेति पुनरपि नद्याः प्रसक्तिरत आह सती नाम्नीति ॥ २५ ॥ कलाभिर्बिन्दुभिः व्याप्ते । कालः आगमनकालं ॥ २६ ॥ वध्वा इति सन्निहित विवाहत्वात् । प्रियभाषिणः शुभसूचका कृष्णागमन सूचका । एतानि एकदैवाऽस्फुरन् ॥ २७ ॥ हेति हर्षे ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु, "अहो त्रियामान्तरितः" इत्यादिसार्द्धैस्त्रिभिः श्लोकैरनुवर्णिता चिन्ता सर्वेश्वरपत्न्यां सर्वज्ञायां सर्वदेवपूज्यायां कथं युज्येत ? इत्यत आह—एवमिति । गोविन्दहृतमानसा बाला भगवदिच्छयैव बालचेष्टां गता एवं चिन्तयती सती नेत्रे न्यमीलयत निमीलितवती ॥ २६ ॥ प्रियभाषिणः मनोरथसिद्धिसूचका ॥ २७ ॥ कृष्णविनिर्दिष्टः मां प्राप्तं कथयेत्येवं तेन विनिर्दिष्टः आदिष्टः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दुर्भगाया दुर्दैवाया धाता नानुकूलस्तथा महेश्वरोऽपि नानुकूलो देवी देवता रुद्राणी रुद्रभार्या । इन्द्रेत्याद्यानुक् । गिरिजा पार्वती दत्तोत्पत्तिमत्यस्यास्मादित्यनुबन्धद्वयबोधनार्थं विशेषणद्वयम् । विमुखा एवं चिन्तवती गौरी रुक्मवर्णेति चम्पकदामगौरीतिवच्चम्पकवर्णा गौरीस्यात्प्रसूता स्त्री गौरी शुद्धोभयान्वयेत्यनेकार्थध्वनिपदमञ्जर्यामुक्तोऽर्थो ज्ञेयः । बाला गोविन्दहृतमानसा सती अश्रुकलाकुले नेत्रे कालज्ञा उत्सवलवे कस्मात्किन्नयनयोनीरानयनमिति लोकाः शङ्केरन्निति कालज्ञा न्यमीलयत । गिरिजा स्वयं रुद्राणी सती मा स्ववत्पत्या योजयतीत्याक्रोशमपि विमुखेत्यनेनोङ्खयामासेति वा ॥२५-२६॥ वाम इति सद्विपरिणतं नेत्रपदेनान्वेति । वामं नेत्रं वाम ऊरुर्वामो भुजश्चास्फुरन् अचलन् प्रियभाषिण इव तत्सूचका इत्यर्थः । प्रतीक्षन्त्याः प्रतीक्षमाणायाः ॥२७॥ अथैवं शकुनानन्तरं स एव स्वप्रेषित एव कृष्णविनिर्दिष्टश्च द्विजसत्तमोऽन्तःपुरचरीं देवीं ददर्श । राजपुत्री शार्ङ्गरवादिनाऽनन्तो राज्ञो दुहिता राजपुत्री पुत्रवन्तो वा ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु सदुष्टा अपि केचन परिगृह्यन्ते, न हि सर्वथा निर्दुष्टा भवन्ति । तथा सति कस्यापि परिग्रहो न स्यात्, इति चेत् । सत्यम् । तत्र अदृष्टादिकं प्रेरकं सम्पद्यते । मम तु तस्याप्यभाव इत्याह दुर्भगाया इति । पतिस्तु कृष्ण एव । अनागमने यथाकथञ्चित् भ्रान्तापि भूत्वा तत्र गमिष्यामि, यतो ब्रह्मा, पतित्वेन भगवन्तमेव विचारितवान्, परं दुर्भगा भविष्यामि । अतो दुर्भगात्वसम्पादकभाग्यस्य विद्यमानत्वात् धातापि नानुकूलो जातः । आनुकूल्ये तु इदानीमेब भगवानागच्छेत् । अतो दुर्भगात्वमपि

न भवेत् । ननु सौभाग्यं शिवाधीनं पार्वत्यधीनं वा, तत्राह **नानुकूलो महेश्वर** इति । देवतारूपा दुर्गा वा विमुखा । अनाराधनात् । सा हि गौरी गुरोः पत्नी, गुरुरुपदिशति, तच्छक्तिर्भाग्यं सम्पादयतीति. तमेव सम्बन्धं प्रकयटति **रुद्राणी**ति । रुद्रो हि गुरुः, स्वयमपि गिरिशा **सती**ति पातिव्रत्यबलमपि तस्याः सूचितम् ॥ २५ ॥ एवं चिन्तया कियति काले अतीते चिन्ताधिक्ये उत्पत्स्यमाने मध्ये तद्विघातकं शकुनं जातमित्याह **एवं चिन्तय**तीति । बाला मुग्धा तत्रापि गोविन्देन हृतमानसा विह्वला सती, रोदने प्रादुर्भूते कृतमङ्गलायाः तदनुचितमिति अश्रुकलाकुले नेत्रे अमीलयत् । नन्वेतादृशेऽर्थे रोदनमुचितं तत्कथं निमीलनमिति चेत्तत्राह, **कालज्ञे**ति । सा ह्ययं शुभकाल इति जानाति, ग्रहानुगुण्यात् । अतो भगवानेवाऽऽयास्यतीति निश्चित्य तथा कृतवतीत्यर्थः ॥ २६ ॥ किञ्च, न केवलं कालज्ञानेनैव तूष्णीं स्थिता, किन्त्ववयवस्फुरणेन शकुनमपि प्राप्तवतीत्याह **एवं वध्वा** इति । वधूर्विवाहसमयस्था, सर्वतो रक्षायुक्ता वा गोविन्दागमनं प्रतीक्षन्त्याः । **वाम ऊरुर्भुज** इति । वामे ऊरुः भुजः नेत्रं चास्फुरन् । वामे अङ्गे ऊर्वादित्रयस्फुरणं स्त्रीणां शुभसूचकम् । **प्रियभाषिण** इति त्रयाणां विशेषणम् । शुभसूचका इत्यर्थः । अन्यतरस्यामिति नपुंस (कै) कशेपो न भवति । अथवा प्रियभाषिणः सम्बन्धीनि एतानीति प्रियं श्रोष्यामीति भावः ॥ २७ ॥ ततस्तदनन्तरमेव ब्राह्मणः समागत इत्याह **अथे**ति । तस्य तत्समय एव समागमनं काकतालीयं चेत्, तदा भगवदर्थमेव तस्या आकाङ्क्षा निरूपितेति न स्यात्, अतस्तद्व्यावृत्त्यर्थं भगवानेव तस्मिन्समये 'ये त्यक्तलोकधर्माश्च मदर्थे' इति वाक्यात् प्रेषितवानित्याह **कृष्णविनिर्दिष्ट** इति । तद्विनिश्चयादुभयविधादपि विशेषेण समागत इति भिन्नप्रक्रमोऽप्यथशब्दः भगवतैव तथा कृत इति ज्ञापनार्थः । **द्विजसत्तम** इति अत्यन्तमन्तरङ्गो भगवद्भक्तः । अतस्तेन सर्वतापनिवृत्तिर्युक्तैव । द्विज एव मित्रम्, तथापि सन्देशहारी विशिष्टः, तथापि तत्र गतो भगवत्सख्यं प्राप्तः सत्तमो भवति । अत एवान्तःपुरचरीमपि राजपुत्रीमपि स्वयमेव ददर्श भगवच्चिन्तनाद्देवतैव तदावेशनाज्जाता यथा ब्राह्मणे धर्मत्रयम्, तथा तस्यामपि आध्यात्मिकादिधर्मत्रयं वक्तुं विशेषणत्रयम् हेत्याश्चर्ये ॥ २८ ॥

श्रीसुबोधिनी–सारः

रुष्टो धाताथ वा देवीत्याह । दुर्दुष्टो भगो भाग्यं यस्यास्तस्या मे ममोपरि धाता विधिर्नानुकूलः पराङ्मुखोऽस्ति । महेश्वरो महादेवो वा नानुकूलः गिरिजा तुषाराचलपुत्री रुद्राणी गौरी सती देवी वा विमुखा रुष्टा ॥ २५ ॥ एवं चिंतयती ध्यायती गोविंदेन हृतं मानसं चित्तं यस्याः सा बाला कालज्ञा इदानीमपि समय इति मन्वाना अश्रूणां कलाभिराकुले व्याप्ते नेत्रे न्यमीलयत ध्याननिष्ठाभूत् ॥ २६ ॥ हे नृप एवं गोविंदस्यागमनं प्रतीक्षमाणाया वध्वाः रुक्मिण्या वाम ऊरुर्वामो भुजो वामं नेत्रम् इति प्रियभाषिणः हितसूचका अस्फुरन् ॥ २७ ॥ ततः किमित्यत आह । अथ मंगले कृष्णेन विनिर्दिष्टः प्रेषितः स एव ब्राह्मणवरोंतःपुरे चरतीति तथा तां देवीं राज्ञः पुत्रीं ददर्श ह स्फुटम् ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

श्रीकृष्णस्यानागमने कारणान्तरं तर्कयति—दुर्भगाया इति । ब्रह्मादिप्रसादादेव निर्विघ्नं कार्यं भवति, अन्यथा तु विघ्नैः प्रतिहन्यते इति नियमः । तथा च कार्याभावेनेत्यनुमीयते । धाता ब्रह्मा, महेश्वरः महादेवश्च मे ममानुकूलः कार्यसाधको न भवति । वाकारश्चकारार्थे । तथा गौरी च मे विमुखा । तत्र हेतुमाह—दुर्भगाया इति । भाग्यहीनत्वात् इत्यर्थः ।। 'का सा गौरी' इत्यपेक्षायामाह—रुद्राणीति । 'तद्वैमुख्येऽपि किम्' इत्याशङ्क्याह—देवीति । 'दाम्पत्यार्थमुमां सतीम्' इत्युक्त्या पत्यर्थमाराध्यामित्यर्थः । तत्र हेतुमाह—सतीति । पतिव्रतेत्यर्थः । तत्पितृनाम सूचयन्त्याह—गिरिजेति । हिमवत्कन्येत्यर्थः ॥ २५ ॥ सा बाला रुक्मिणी एवं चिन्तयती कालज्ञा 'नाधुनापि कृष्णागमनकाल' इति मन्वाना अश्रूणां कलाभिर्बिन्दुभिराकुले लोचने न्यमीलयत् । चिन्ताया हेतुमाह—गोविन्देन हृतं मानसं यस्याः सेति ॥ २६ ॥ हे नृप ! एवं गोविन्दस्यागमनं प्रतीक्षन्त्या वध्वा रुक्मिण्याः प्रियभाषिण्यः कृष्णागमनरूपप्रियसूचका वामा ऊर्वादयः अस्फुरन् ॥ २७ ॥ अथ कृष्णेन विनिर्दिष्टः प्रस्थापितः स एव सन्देशहरो द्विजसत्तमः अन्तःपुरचरीं देवीं दीप्यमानां राजपुत्रीं रुक्मिणीं ददर्श, हेति हर्षेण ॥ २८ ॥

अन्वितार्थप्रकाशिका

यद्वा तत आगच्छन्नपि मद्भाग्यवैमुख्यात्प्रतिबद्धो भवेदित्याह—दुर्भगाया इति ॥ दुर्भगाया भाग्यहीनाया मे धाता ब्रह्मा महेश्वरः अनुकूलो नास्ति । देवी दाम्पत्यार्थमाराध्या रुद्राणी गिरिजा सती साध्वी गौरी पार्वती वा । इति चार्थे विमुखा । यद्वा । गिरिजा पाषाणपुत्री कथं दयां कुर्यात् इत्यादिदोषसम्भावना ॥ २५ ॥ एवमिति ॥ एवं चिन्तयती । नुमभावः आर्षः । गोविन्देनापहृतं मानसं यस्याः सा बाला रुक्मिणी कालज्ञानाधुनापि कृष्णागमनकाल इति मन्वाना किञ्चिदाश्वस्ता सती चिन्तास्तब्धे अश्रूणां कलाभिर्बिन्दुभिराकुले लोचने न्यमीलयत् ॥ २६ ॥ एवमिति । हे नृप ! एवं गोविन्दस्यागमनं प्रतीक्षन्त्या । शता आर्षः । वध्वाः आसन्नविवाहायाः रुक्मिण्याः प्रियभाषिणः कृष्णागमरूपप्रियसूचकाः । पुंशेष आर्षः । वामा ऊरुः भुजो नेत्रं चैतानि अस्फुरन् ॥ २७ ॥ अथेति ॥ अथ कृष्णेन विनिर्दिष्टः पुरोपवने प्राप्तं मां कथयेति सन्दिश्य प्रस्थापितः स एव सुनन्दनामा संदेशहरो द्विजसत्तमोऽन्तःपुरचरीं देवीं ध्यानप्राप्तश्रीकृष्णानन्देन दीप्यमानां राजपुत्रीं रुक्मिणीं ददर्श । हेति हर्षे ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

धाता ब्रह्मा । अनुकूलो न भवति । तथा महेश्वरः शिवोपि ॥ २५ ॥ गिरिशा गिरिजेति पाठांतरे हिमाचलपुत्री । कालज्ञा गोविंदागमनकालज्ञानवती । अश्रुकलया व्याप्ते नेत्रे ॥ २६ ॥ प्रियभाषिणः प्रियसूचकाः ॥ २७ ॥ श्रीकृष्णेन विनिर्दिष्टः आगतं मां वदेत्याज्ञप्तः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दुर्भगाया इति । किं वा धाता विश्वकृत्, दुर्भगायाः मे मम, न अनुकूलः । किं वा महेश्वरः शिवः, नानुकूलः अथ वा; सती साध्वी, गिरिजा गौरी देवी, रुद्राणी, विमुखा प्रतिकूलास्ति । तदहं न वेद्मीति भावः ॥ २५ ॥ एवमिति । एवमित्थं, चिन्तयती, बाला षोडशाब्दवयाः रुक्मिणी, गोविन्देन हृतं, मानसं यस्याः सा, कालज्ञा नाऽधुनापि गोविन्दागमनकाल इति मन्वाना सती, अश्रूणां कलाभिर्बिन्दुभिराकुले स्तब्धे, नेत्रे च, न्यमीलयत निमीलितवती ॥ २६ ॥ एवमिति । हे नृप, एवमित्थं, गोविन्दागमनं तदागमनद्वारभूतं गोविन्दवार्त्ताहरं द्विजं च, प्रतीक्षन्त्या ईक्षमाणायाः, वध्बा रुक्मिण्याः, वामः ऊरुः, भुजः, नेत्रं, इत्येते प्रियभाषिणः प्रियभाषिणः प्रियशंसिनः श्रीकृष्णागमनरूपप्रियसूचकाः सन्त इत्यर्थः । अस्फुरन् संचरितवन्तः ॥ २७ ॥ अथेति । अथ ततः पूर्वं, सः एव यः पूर्वमात्मना प्रेषितः स एव, द्विजसत्तम उत्तमो ब्राह्मणः, कृष्णविनिर्दिष्टः प्राप्तं मां कथयेति श्रीकृष्णेनादिष्टः सन्, अन्तःपुरचरीं देवीं राजपुत्रीं, ह स्फुटं यथा तथा, ददर्श रुक्मिणीं विलोकयामासेत्यर्थः ॥ २८ ॥

कृष्णप्रिया

ठीक है, मेरे भाग्य ही मन्द हैं! विधाता और भगवान् शङ्कर भी मेरे अनुकूल नहीं जान पड़ते । यह भी सम्भव है कि रुद्रपत्नी गिरिराजकुमारी सती पार्वतीजी मुझसे अप्रसन्न हों' ॥ २५ ॥ परीक्षित्! रुक्मिणीजी इसी उधेड़-बुन में पड़ी हुई थीं । उनका सम्पूर्ण मन और उनके सारे मनोभाव भक्तमनचोर भगवान् ने चुरा लिये थे । उन्होंने उन्हीं को सोचते-सोचते 'अभी समय है' ऐसा समझकर अपने आँसूभरे नेत्र बन्द कर लिये ॥ २६ ॥ परीक्षित्! इस प्रकार रुक्मिणीजी भगवान् श्रीकृष्ण के शुभागमन की प्रतीक्षा कर रही थीं! उसी समय उनकी बायीं जाँघ, भुजा और नेत्र फड़कने लगे, जो प्रियतम के आगमन का प्रिय संवाद सूचित कर रहे थे ॥ २७ ॥ इतने में ही भगवान् श्रीकृष्ण के भेजे हुए वे ब्राह्मणदेवता आ गये और उन्होंने अन्तःपुर में राजकुमारी रुक्मिणी को इस प्रकार देखा, मानो कोई ध्यानमग्न देवी हो ॥ २८ ॥

सा तं प्रहृष्टवदनमव्यग्रात्मगतिं सती । आलक्ष्य लक्षणाभिज्ञा [1]समपृच्छच्छुचिस्मिता ॥ २९ ॥
[2]तस्या आवेदयत् प्राप्तं [3]सरामं यदुनन्दनम् । उक्तं च सत्यवचनमात्मोपनयनं प्रति ॥ ३० ॥
तमागतं समाज्ञाय वैदर्भी हृष्टमानसा । न पश्यन्ती ब्राह्मणाय प्रियमन्यन्ननाम सा ॥ ३१ ॥
प्राप्तौ श्रुत्वा स्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ । अभ्ययात्तूर्यघोषेण रामकृष्णौ समर्हणैः ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—सा, लक्षणाभिज्ञा, सती, प्रहृष्टवदनम्, अव्यग्रात्मगतिम्, तम्, आलक्ष्य, शुचिस्मिता, समपृच्छत् ॥ २९ ॥ तस्यै, सरामम्, यदुनन्दनम्, प्राप्तम्, आवेदयत्, च, आत्मोपनयनम्, प्रति, उक्तम्, सत्यवचनम्, आवेदयत् ॥ ३० ॥ आगतम्, तम्, समाज्ञाय, हृष्टमानसा, सा, वैदर्भी, ब्राह्मणाय, अन्यत् प्रियम्, न पश्यन्ती, ननाम ॥ ३१ ॥ स्वदुहितुः, उद्वाहप्रेक्षणोत्सुकौ, रामकृष्णौ, प्राप्तौ, श्रुत्वा, तूर्यघोषेण, समर्हणैः, अभ्ययात् ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

न व्यग्रा आत्मनो देहस्य गतिर्यस्य तं लक्षणाभिज्ञा दूतस्य लक्षणं तत्तत्कार्यसूचकमभिजानातीति तथा ॥ २९ ॥ तस्यै प्राप्तं यदुनन्दनमावेदितवान् । तं च शशंस । आत्मोपनयनं प्रति आत्मना स्वयं श्रीकृष्णस्यानयनं प्रति तेन द्विजेन सत्यवचनं प्रोक्तमिति । आत्मनः प्राणेश्वरस्येति वा । यद्वा आत्मनस्तस्या उपनयनं प्रति श्रीकृष्णेन यदुक्तं सत्यवचनं तामानयिष्य इत्यादि तच्च शशंसावर्णयदित्यर्थः ॥ ३० ॥ तं श्रीकृष्णम् । अस्मिन्कार्ये सर्वस्वार्पणमप्यपर्याप्तमिति तदुचितं प्रियमपश्यन्ती तदा केवलं ननाम पश्चाद्बहु ददावित्यर्थः । यद्वा मां श्रियं ये नमन्ति ते तावत्सर्वसम्पदामास्पदं भवन्ति किं पुनर्मयि प्रणतायामिति ततोऽधिकमन्यत्प्रियमपश्यन्ती ननामेति ॥ ३१-३३ ॥

---

१. तम-विज. । २. आवेदयामास तस्यै सम्प्राप्तं-विज. । ३. शशंस-श्रीधर. वंशी. जीव. वीर. विश्व. शुक. ; सरामं-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सा रुक्मिणी । तं स्वादिष्टं विप्रम् । ब्यग्रा विगलिता । सती सदाचारा । सुनन्दविप्रोहं त्वत्प्रियपार्श्वादायातो मां पश्येत्युच्चैरुक्तवन्तं प्राप्तध्यानभंगा सापि तं ददर्शेत्याह—सेति । न व्यग्रा आत्मनो मनसो गतिर्यस्मात्तम् । विप्रस्य वदनहर्षदर्शनेन तस्या मनसो वैयाग्र्यं शांतमभूदित्यर्थः । यतो लक्षणं कार्यसिद्धिसूचकं दूतहर्षं स्ववामनेत्रादिस्फुरणं चाभिजानातीति सा । शुचि शुद्धं हर्षद्योतकं स्मितं यस्याः सा । पूर्वं तु दुःखेपि भावगोपनार्थं कपटस्मितैवासीदिति भावः । सती सर्वगुणैरुत्कृष्टा । सम्यक्सर्वतः क्षेममित्यादरादिनापृच्छत् । यद्वा–आत्मनां जीवानां गतिं प्राप्यं श्रीकृष्णमपृच्छत्–स कुत्रास्ते किं वाऽवददित्येवं बहुशोवदत् । 'मैत्रेयादात्मनो गतिम्' इत्यादौ श्रीकृष्णस्यैवात्मगतिपदवाच्यत्वश्रवणात् । गतिमाश्रयं वा "गतिः प्राप्ये दशायाञ्चाधारे गमनवेदने" इति कोशात् ॥ २९ ॥ तस्यै रुक्मिण्यै । आवेदितवान्कथयामास । तत् श्रीकृष्णानयनम् । शशंसः कथितवान् । परात्मवाचकत्वमेवात्मपदस्य मुख्योर्थ इत्याश्रित्याह—प्राणेश्वरस्येति । कृष्णागमनं श्रुत्वाप्युद्विग्नां वीक्ष्याह–यद्वेति । इत्यर्थ इति—तद्धृद्गतं निखिलं संशयं नुनोदेति भावः । शशंस—यदुनन्दनं विप्रस्तुष्टाव, तस्य ब्रह्मण्यत्वसौशील्यभक्तजनपालकत्वादिदर्शनादित्यर्थः ॥ ३० ॥ अपर्याप्तमप्रतिक्रियम् । तदुचितं ब्राह्मणयोग्यम् । इत्यर्थ इति–पितृगृहस्थकन्यायाः स्वातन्त्र्याभावेनाधुना मम पार्श्वे किंचित्तव योग्य देयं नास्ति, स्वतन्त्रा दास्यामीति क्षमापनार्थं ननामेति भावः । ननु तस्याः साक्षाल्लक्ष्म्यवतारत्वात्कथं स्वातंत्र्याभाव इति चेदाह–यद्वेति । ततो मत्प्रणमतेः । सा रुक्मिणी । किमस्मै पारितोषिकं ददामीति विमृशन्ती केवलं ननाम, प्रणामादन्यत्समुचितमपश्यंती, प्रणतया तु स्वस्य ऋणित्वमेव व्यंजयामास । ततश्च तदैव विप्रगृहं सार्वकालिकसर्वसम्पत्तिपूर्णं बभूव, महालक्ष्म्या अपि ऋणित्वादिति ज्ञेयम् ॥ ३१ ॥ अभ्ययादग्रे जगाम, आनयनायेत्यर्थः । स्वदुहितुरिह स्वशब्देन तस्य परमहर्षं द्योतयति । अयोग्यस्यापि स्वस्य कन्याविवाहप्रेक्षणे तयोरुत्सुकतयात्मनः परमधन्यत्वमननात्, एतां श्रीकृष्णोऽवश्यं हरिष्यतीत्येवंनिगूढभावाद्वासमर्हणैरुत्तमोद्वाहीयद्रव्यैः सहाभ्ययात् । भीष्मक इति शेषः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

शुचिस्मिता हर्षोदयात् यतो लक्षणाभिज्ञा यतः सती सर्वगुणैरुत्तमा सम्यक् सर्वतः क्षेमं किमित्यादरादिना अपृच्छन् अन्यत्तैः । यद्वा, अव्यग्रा सती आत्मनो गति श्रीकृष्णमपृच्छत् स कुत्रास्ते किं वाऽवददित्येवंऽबहुशोऽपृच्छदित्यर्थः ॥२९॥ यदून्नन्दयतीति तथा तमिति अन्यत्तैः । तत्र तच्च शशंस तुष्टाव रुक्मिणीति शेषः । ब्राह्मण इति वा अत्र तेनेति स्वयमित्यर्थः । पक्षान्तरेत्ववर्णयद्ब्राह्मण इति शेषः । यद्वा, आवेदयदित्यस्यैव विवरणं प्राप्तमित्यादि उक्तञ्चेत्यादि च ॥ ३० ॥ समाज्ञाय दृढतया ज्ञात्वा सा तथा व्यग्रा न पश्यन्तीति नञो लोपाभावः आर्षः अन्यत्तैः । तत्र पश्चाद्बहुददावित्यर्थः । द्वारकायामनन्तविभववती सत्यनन्तमेव ददत्यासीदित्यर्थः। अत्र पूर्वं यन्न ननाम तत्त्वानन्देनैव विस्मृतमिति ज्ञेयम् । यद्वा, तदीयतादृगुपकारस्य प्रत्युपकारहेतुं प्रियं स्वाभिरुचितं वस्त्वन्यदपश्यन्ती स्वपराजयं मत्वा ननामैव केवलमित्यर्थः ॥ ३१ ॥ उद्वाहेति ताभ्याँ तथैव ख्यापितत्वात् तत्तु तेनापि तदुद्वाहप्रेक्षणाय सर्वेषामाकारितत्वात् एवं गुप्तत्वं पृतनापरीतत्वं च सिद्ध्येदिति तादृशः श्रीरुक्मिणीसन्देशश्चानुगमितः स्वशब्देन तस्य परमहर्षं द्योतयति—अयोग्यस्यापि स्वस्य कन्याविवाहप्रेक्षणे तयोरुत्सुकतयात्मनः परमधन्यत्वमननात् एतां श्रीकृष्णोऽवश्यं हरिष्यत्येवेतिनिगूढभावाद्वा, समर्हणैरुत्तमपूजाद्रव्यैः सहाऽभ्ययात् भीष्मक इति शेषः ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आलक्ष्य सम्यग् दृष्ट्वा, शुचिस्मिता हर्षोदयात्, यतो लक्षणाभिज्ञा, यतः सती सर्व्वगुणैरुत्तमा, सम्यक् सर्व्वतः क्षेमं किमित्यादरादिनाऽपृच्छत्, अन्यतैर्व्याख्यातम् । यद्वा, अव्यग्रा सती आत्मनो गतिं श्रीकृष्णम्, कुत्रास्ते किंवा अवददित्येवं बहुशोऽपृच्छत् ॥ २९ ॥ यदून् नन्दयतीति तथा तमिति यदवोऽपि सर्व्वे समागतप्राया इति भावः । सत्यवचनमित्यनेन सशपथप्रतिज्ञापूर्व्वकमुक्तमिति द्योतयति । अन्यत्तैर्व्याख्यातम् । यद्वा, यदुनन्दनमेव प्रति यत् स्वयमुक्तं तथात्मनस्तस्य उप समीपे तस्यानयनं प्रति सत्यवचनञ्च शशंस ॥ ३० ॥ समाज्ञाय विविधलक्षणैर्दृढ़तया ज्ञात्वा सा श्रीकृष्णैकपरा साक्षाल्लक्ष्मीः, स्वजन्मयोग्य विदर्भदेशे जाता शास्त्रादिभिर्विदर्भराजकन्यायाः श्रीकृष्णपत्नीत्वप्रतिपादनात्, अन्यत्तैर्व्याख्यातम् । यद्वा, नमनादन्यत् प्रियमपश्यन्ती, तस्य पूर्व्वोक्तया स्वलाभसन्तुष्ट्याऽन्यत्र नैरपेक्ष्यात् । यद्वा, अन्यत् प्रसिद्धार्थवर्गाद्भिन्नमनिर्व्वचनीयं किञ्चितस्य प्रियं पश्यन्ती न ननाम, श्रीकृष्णप्रेमपरमार्थाभीप्सोस्तस्य नतिमात्रेण प्रीत्यसिद्धेः, किन्तु श्रीकृष्णप्रेमैव ददावित्यर्थः, यतः सा श्रीभगवद्भक्त्यादिप्रदानसमर्था श्रीहरिप्रियेति ख्याता । तत्रापि श्रीकृष्णवन्निजाशेषविभूतिप्रकटनार्थं विदर्भेऽवतीर्णेत्यर्थः ॥ ३१ ॥ प्राप्तौ स्वपुरान्तिकमागतौ । किमर्थम् ? तदाह—स्वेति । उद्वाहस्य प्रेक्षणे साक्षाद्दर्शने उत्सुकौ सन्तौ, शिशुपालेन सह विवाह निश्चयेन तन्मातुलेयत्वेन च तथैव लोकप्रतीतेः, अत एव श्रीकृष्णस्यैकाकितया निभृतं प्रागागमनम्, अन्यथा युद्धोद्यतेन यदुकुलेन सहागते सति हरणशंकासम्भवः, हरणाशंकायाञ्च सत्यां कन्यारक्षार्थं सन्नद्धरहितरुक्म्यादिवीरवर्गमध्यतः, किंवा बहिर्देव्यालयगमननिवारणे-

नान्तःपुरमध्यात्तद्बन्धुवधादिकं विना सुखेन हरणं न स्यात्, अत एव तस्याः सन्देशोऽपि (भा० १०।५२।४१) 'गुप्तः समेत्य' इति। विवाहप्रेक्षणार्थागमनाप्रतीतौ तु स्नेहभराकुलतयातिवेगेनागतेन प्राय एकदैव श्रीरामेण महागमनेन द्वयोरेकदैव श्रीभीष्मकेणाभिगमनादिना च श्रीकृष्णस्य तत्सन्देशानुसारेण गुप्ततया प्रागागमने वैयर्थ्यापत्तिरिति स्वशब्देन तस्य परमहर्षं द्योतयति। अयोग्यस्यापि स्वस्य कन्याविवाहप्रेक्षणे तयोरुत्सुकतया आत्मनः परमधन्यत्वमननात्, एतां श्रीकृष्णो हरिष्यत्येवेति निगूढभावाच्च। श्रीकृष्णे प्रागागतेऽपि रामस्यादौ निर्देशः। संगतयोस्तयोर्युगपदभिगमनादौ तस्याग्रजत्वापेक्षया समर्हणैरुत्तमपूजाद्रव्यैः सहाभ्ययाद्भीष्मक इति शेषः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आवेदवत् वाक्यसम्प्राप्तं कथमित्यपेक्षायां यदुनन्दनं प्राप्तं शशसेत्याह ॥३०॥ श्रुत्वेति भीष्मक इत्यध्याहारः ॥३३-३५॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

सा रुक्मिणी न व्यग्रा आत्मनो देहस्य गतिर्यस्य प्रहृष्टं वदनं यस्य तं द्विजमालक्ष्य लक्षणाभिज्ञा दूतलक्षणतत्कार्याभिज्ञाऽत एव शुचिस्मिता सती सम्यगपृच्छत् ॥ २९ ॥ तस्यै पृच्छन्त्यै रुक्मिण्यै रामेण सहितं कृष्णं प्राप्तमागतमावेदयत् शशंस आत्मोपयनं प्रति आत्मनो रुक्मिण्याः उपनयनं स्वसमीपप्रापणं प्रति भगवता यत्सत्यवचनमुक्तम्।

"तामानयिष्य उन्मथ्य राजन्यापसदान्मृधे। मत्परामनवद्याङ्गीमेधसोऽग्निशिखामिव" ॥

इत्युक्तं सत्यवचनं शशंसेत्यर्थः ॥ ३० ॥ ततस्तं श्रीकृष्णमागतं ज्ञात्वा हृष्टं मानसं यस्याः सा रुक्मिणी ब्राह्मणाय प्रत्युपकर्तुं प्रियं योग्यं वस्त्वपश्यन्ती केवलं ननाम ॥ ३१ ॥ प्राप्ताविति स्वदुहितुरुद्वाहप्रेक्षणे निमित्ते उत्सुकौ प्राप्तौ उद्वाहदिदृक्षया आगतावित्यर्थः। श्रुत्वा तूर्यघोषेण समर्हणैः पूजासाधनैश्च सह अभ्याजगाम ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अव्यग्रात्मगतिमसम्भ्रान्तनिजगमनम् ॥ २९–३४ ॥

श्रीमज्जवगोस्वामिकृतः क्रमसन्दर्भः

नमनादन्यत् प्रियमपश्यन्ती तस्य स्वयं भगवता पूर्ववर्णितया स्वलाभसन्तुष्ट्या नैरपेक्ष्यात् किन्तु स्वसाहाय्यमात्राय सापेक्षत्वात् ननाम तेन तद्वशोभावमेव स्वस्य द्योतयामासेत्यर्थः ॥ ३१–५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

सुनन्दविप्रोऽहं त्वत् प्रियपार्श्वादायातो मां पश्येत्युच्चैरुक्तवन्तं प्राप्तध्यानभङ्गा सापि तं ददर्शेत्याह—सेति। न व्यग्रा आत्मनो मनसो गतिर्यस्मात्तं विप्रस्य वदनहर्षदर्शनेन तस्या मनसो वैयग्न्यं शान्तमभूदित्यर्थः। यतो लक्षणाभिज्ञा लक्षणं कार्य्यसिद्धिसूचकं दूतहर्षं स्ववामनेत्रादिस्पन्दनम् अभिजानातीति सा शुचि शुद्धं हर्षद्योतकं स्मितं यस्याः सा पूर्वं तु दुःखेऽपि भावगोपनार्थं कपटस्मितैवासीदिति भावः ॥ २९ ॥ प्राप्तं यदुनन्दनं तस्यै आवेदयत् आत्मनः स्वस्य उपनयनं समीपप्रापणं प्रति यत् सत्यवचनमुक्तं कृष्णेन "तामानयिष्य उन्मथ्य" इत्यादि शशंस ॥ ३० ॥ किमस्मै पारितोषिकं ददामीति विमृशन्ती केवलं ननाम यतः प्रणामादन्यत् सर्वस्वार्पणमपि प्रियमस्मिन्नर्थे समुचितं न पश्यन्ती प्रणत्या तु स्वस्य ऋणित्वमेव व्यञ्जयामास ततश्च तदैवविप्रस्य गृहं सार्वकालिकसर्वसम्पत्तिपूर्णं बभूव महालक्ष्म्या अपि ऋणित्वादिति ज्ञेयम् ॥ ३१–३३ ॥

गूढार्थदीपिनी

सा रुक्मिणी। अव्यग्रा स्वस्था आत्मनो देहस्य मनसो वा गतिर्यस्य। यद्वा। अव्यग्रा सती आत्मनो गतिं श्रीकृष्णम् आलक्ष्य ॥ २९ ॥ प्राप्तं कृष्णं तस्यै आवेदयत्। तथा आत्मनो रुक्मिण्या आनयनं प्रति यदुक्तं तच्च शशंसेत्यन्वयः ॥ ३० ॥ तं श्रीकृष्णम् प्रियम् एतत्कार्योचित्तं प्रियं वस्तु पारितोषिकम् अपश्यन्ती सती केवलं ननाम। तेन विप्रगृहं तु तदैव सम्पत्तिपूर्णमभूत् प्रणत्या च तस्या ऋणित्वमेव जातमिति व्यञ्जितम् ॥ ३१ ॥ समर्हणैः पूजनद्रव्यैः सह अभ्ययात् संमुखमाजगाम ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

न व्यग्रा आत्मगतिर्यस्य तं लक्षणं साधितार्थस्य दूतस्य प्रहृष्टत्वादि अभिजानातीति तथा ॥ २९ ॥ तस्यै प्राप्तं यदुनन्दनम् आवेदयत् आत्मनः श्रीरुक्मिण्याः उपनयनं प्रति समीपानयनं प्रति यदुनन्दनेन यदुक्तं सत्यवचनम् "तामानयिष्ये उन्मथ्य" इत्यादि तच्च शशंस ॥ ३० ॥ तं श्रीकृष्णं समाज्ञाय हृष्टं मानसं यस्याः सा अन्यत् प्रियं न पश्यन्ती केवलं नमाम "यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासः" सा यदा यं प्रति प्रणता भवेत्तस्य किं वर्ण्यते भाग्यमिति भावः ॥३१॥ तूर्यघोषेण समर्हणैः पूजासाधनैश्च सहाऽभ्ययात् ॥ ३२–३३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विप्रमुखमुखनिरीक्षण एव स्वसुखमाप्तमिति मन्वाना तन्वाङ्गी तमप्राक्षीद्विप्रमिति प्राह । सेति । प्रहृष्टवदनमव्यग्रं यथा तथाऽऽत्मगतिरात्मानं प्रतिगतिर्यस्य तमालक्ष्य लक्षणानि जानातीति शुचिस्मिता तमपृच्छत् ॥ २९ ॥ का वार्तेति **पृष्टः** स तस्यै संप्राप्तं यदुनन्दनमावेदयामास । न ह्यागमनमात्रेण प्रयोजनं जातमित्यत आह । आत्मोपनयनं प्रत्यात्मनस्तवोपनयनं प्रति सत्यवचनं शपथः सत्यं तत्पूर्वकं वचनम् । उक्तं चावेदयामास । सत्यं च शपथे तथ्य इति विश्वः ॥ ३० ॥ तं कृष्णं समाज्ञाय ज्ञात्वा प्रियं ब्राह्मणायान्यद्दातुमेतदुपकृतिप्रत्युपकृतिरूपमपश्यन्ती सा ननाम ॥ ३१ ॥ स्वदुहितुर्लोकदृष्ट्या । वस्तुतस्तु सु अदुहितुरिति तदर्थः । उद्वाहप्रेक्षणौत्सुकौ तत्रैकः कन्योद्वहनोत्सुको रथोपर्यारोप्य नेतुं समग्रममालोकनोत्सुक एकस्तद्दर्शनोत्सुक इति विवेकः । समर्हणैरर्ह्यते एभिरिति तत्साधनैस्तूर्यघोषेण सहाभ्ययात् ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो यज्जातं तदाह—**सा त**मिति । कुत्र मानसचिन्तनं, कुत्र पदार्थोपस्थितिरिति तादृशं दुर्लभमिव सा तं दृष्ट्वा समपृच्छत् नन्विङ्गितज्ञानेनैव कथं न निश्चयः ? तत्राह—**प्रहृष्टवदन**मिति । ब्राह्मणे धर्मद्वयं दृष्ट्वा विवाहस्वीकारः समागमनं च लक्षितवती मुखहर्षात्स्वीकारः, शनैरागमनात्कर्तव्यान्तराभावसूचकं समागमनमिति तस्या अपि लक्षणज्ञाने हेतुद्वयमाह—**सती लक्षणाभिज्ञे**ति । पातिव्रत्यधर्मे शास्त्रानुसारेणापि ज्ञानम् तर्कितमेतन्न प्रमितमिति प्रमानिरूपणार्थे आलक्ष्यापि समपृच्छत् शुद्धं स्मितमिति हर्षात् मन्दहासः । स च ब्राह्मणं प्रति शुद्ध एव । अथवा इष्टपूरणात् लौकिकवत् स्मितं भविष्यतीति तद्व्यावृत्त्यर्थं शुद्धता निरूपिता ॥ २९ ॥ ततो ब्राह्मणस्य वचनद्वयमाह—**तस्या आवेदय**दिति । प्राप्तं भगवन्तमावेदयत् अन्यार्थमप्यागमनं सम्भवतीति तन्निवृत्त्यर्थं उक्तं च आवेदयत् **सराम**मिति कलहेऽपि शङ्काभावाय तन्मनोरथपूर्त्यै व **यदुनन्दन**मिति, तथा करणे भक्तकृपालुत्वं हेतुरुक्तः यो हि पितुराज्ञोल्लङ्घनकर्तारं भक्तत्वाद्यदुमानन्दयति, तेनैव भावेन त्वामप्यानन्दयति 'स्त्रीषु नर्मविवाहे चे'ति वाक्यात् कदाचिदसत्यमपि वदेत् तद्व्यावृत्त्यर्थमाह—**सत्यवचन**मिति । चकारात्स्वाभिप्रायनिवेदनमपि यद्भगवता कृतं तदप्युक्तत्वात्, न केवलमुद्वाहार्थम्, किन्तु उपनयनं प्रति समीपे नेष्यामीति यथाभिलषितसिद्धिः उपगमनपदेऽपि स एवार्थः ॥ ३० ॥ ततः पूर्णमनोरथा तस्मै वरं दत्तवतीत्याह–**तमागत**मिति । भगवति समागते स्वयं भगवदीयैवेति सर्वं भगवति समर्पितमिति वैदर्भीत्वादेव न कर्म ब्राह्मणस्य सफलं करिष्यति **हृष्टमानसे**ति स्वार्थं न किञ्चित्प्रार्थितवती, येन किञ्चिद्दत्वापि तुष्टो भवेत् मोक्षदातारमपि यो दत्तवान्, तस्मै किं देयमिति वैभवमपि न देयमित्याह—**ब्राह्मणाये**ति । अत एवान्यत्प्रियं नास्तीति सा ननाम नमोनम इत्येतावत्सदुपशिक्षितनीति यत्र न कोऽपि प्रतीकारः, तत्र नमस्कार इति भगवांश्च ब्रह्मण्यदेव इति ब्राह्मणनमस्कारो भगवद्भार्याया युक्त एव अनेन देयाभावे सर्वत्रैवमेव कर्तव्यमिति साधनं निरूपितम् ॥ ३१ ॥ भगवान् नगरमध्ये समागतः, ब्राह्मणोऽन्तःपुरे ततस्समागतयोः विवाहात्पूर्वकर्तव्यं वक्तव्यमिति, पितुरदाने हरणं चायुक्तमिति, प्रसह्य हरणेऽपि मातापितोर्दानमावश्यकमिति. अन्यथा न धर्म्यः स्यादिति पितुर्दानार्थं गोप्यार्थं च तादृशीं कथामाह—**प्राप्तौ श्रुत्वे**ति त्रिभिः । स्वदुहितुरुद्वाहप्रेक्षणे सम्बन्धित्वादुत्सुकौ समागताविति लोके भ्रममुत्पाद्य त्वयं दातुमेवागतः स्वदुहितुः एतौ प्राप्तौ प्रकर्षेणाप्तौ, एकः पतिरपरो भावुक इति एकस्तूद्वाहोत्सुकः, अपरः प्रेक्षणोत्सुक इति । अत एव अनाकारितावप्यागतौ लोकेऽप्युत्सुकानां नाकारणम् तथाप्यग्रिमकृत्यं कर्तव्यमिति **तूर्यघोषेण** समर्हणैः सह आभिमुख्येन गतः । शिशुपाले तु 'तं वै विदर्भाधिपति'रिति अग्रे गमनम् । ततः आभिमुख्येन सम्मुखमागतस्य यादृशी पूजा, यथाकथञ्चित्स्थापनमिति, तथा अगे सर्वेषामेव वक्ष्यति । मध्ये तु भगवतो बिशेषाकारेण यथा वराय क्रियते । गमन एव वाद्यसतितः वरतूजार्थं सम्पादितग्रव्यैः सह ॥ ३२ ॥

श्रीसुबोधिनी–सारः

न व्यग्रा सुस्थाऽऽत्मनो देहस्य गतिर्यस्य तं विकसितमुखं तं विप्रमालक्ष्य मंदस्मिता लक्षणमभिजानातीति साऽपृच्छत् ॥ २९ ॥ तस्यै रुक्मिण्यै प्राप्तं यदुनंदनं श्रीकृष्णं निवेदितवान् । आत्मनस्तस्या अर्द्धांग्यास्तवोपनयनं विवाहं प्रति उक्तं तामानयिष्य इति सत्यवचनं च शशंसोवाच ॥ ३० ॥ आगतं तं श्रीकृष्णं संबुध्य हृष्टचित्ता वैदर्भी सा रुक्मिणी ब्राह्मणाय दातुमन्यद्वस्तुजातं न पश्यंती सती स्वयं ननाम । तदधीनतानेन सूचिता ॥ ३१ ॥ स्वस्य दुहितुः पुत्र्या विवाहस्य प्रेक्षणे दर्शने उत्सुकौ ययोस्तौ रामकृष्णौ प्राप्तौ श्रुत्वाऽर्हणैः पूजोपकरणैस्सह तूर्यनादेन सन्मुखमागमत् ॥ ३२ ॥

विवरणटिप्पणी

तमागतमित्यत्र । **वैदर्भीत्वादेवेति ।** ब्राह्मणस्य कर्म तत्फलपश्चादिदानेन सफलं करिष्यतीति । न वैदर्भीत्वात्कर्मसम्बन्धाभावेन कर्मफलत्वेन पश्चादिकं न दास्यतीत्यर्थः । **स्वार्थ**मिति । हृष्टमानसत्वेनान्यापेक्षाभावात्स्वार्थमभ्युदयादिकं किञ्चिन्न प्रार्थितवती । येन तदल्पं किञ्चिदाशीर्वादेन दत्वा तद्दक्षिणात्वेन द्रव्यप्राप्तिनिश्चयाद्ब्राह्मणस्तुष्टो भवेत् । भगवदानयनपक्षे तु तादृशदातुर्दक्षिणात्वेन किं देयं भवेदित्यर्थः । **वैमबमपी**ति । ग्रामाद्याधिपत्यं वैभवम् । **तत्** 'नराणां च नराधिप'मितिवाक्याद्भगवद्विभूतित्वेन कथञ्चिद्देयं भवेत्, परं ब्राह्मणत्वात्तदपि नापेक्षत इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सा रुक्मिणी तं द्विजमालक्ष्य शुचिस्मिता सती पर्यपृच्छत् । शुचिस्मितत्वे हेतुमाह—लक्षणाभिज्ञेति । कार्यं कृतवतोऽकृतवतश्च दूतस्य लक्षणाभिज्ञा, 'अतस्तेन कार्यं कृतम्' इति ज्ञात्वा हर्षेण प्रहसितमुखी जातेत्यर्थः । तल्लक्षणमाह—प्रहृष्टं वदनं यस्य तमि । न व्यग्रा न विकृता आत्मनो देहस्य गतिश्चेष्टा यस्य तम् । कार्यासिद्धावेतद्वैपरीत्यं स्यादित्याशयः । तल्लक्षणज्ञाने हेतुमाह—सतीति । सत्यप्रतिज्ञावती भगवदेकपरतेत्यर्थः ॥ २९ ॥ तस्यै रुक्मिण्यै सरामं रामेण सहितं यदुनन्दनं कृष्णं प्राप्तमागतमावेदयत् शशंस, तथाऽऽत्मनः रुक्मिण्या उपनयनं प्रति "तामानयिष्ये उन्मथ्य राजन्यापसदान् मृधे" इति यद्भगवता उक्तं सत्यवचनं तच्चावेदयत् । 'सरामम्' इत्यत्र 'शशंस' इति पाठान्तरम् ॥ ३० ॥ तं श्रीकृष्णमागतं समाज्ञाय हृष्टं मानसं यस्याः सा वैदर्भी रुक्मिणी 'परमफलभूतं परमानन्दविग्रहं कृष्णमानीय समर्पितवतेऽस्मै ब्राह्मणाय किं पारितोषिकं ददामि' इति विमृशती प्रणामादन्यत्सर्वं स्वार्पणमपि तस्य प्रियमपश्यन्ती केवलं ननाम प्रणत्यात्मनस्तदृणित्वमेव व्यञ्जयामास । तस्य प्रियमपश्यन्तीत्यनेन तस्यापि सर्वतो वैराग्यं भगवदेकपरत्वं च सूचितम् । धनादिसम्पत्तिस्तु तस्य तत्प्रणामेन भविष्यत्येव, तस्या लक्ष्म्यवतारत्वात् ॥ ३१ ॥ स्वदुहितुरुद्वाहप्रेक्षणे उत्सुकौ रामकृष्णौ प्राप्तौ आगतौ श्रुत्वा भीष्मकः तूर्यघोषेण समर्हणैः पूजासाधनैश्च सह अभ्ययात् तत्सम्मुखमाजगाम ॥ ३२ ॥

अन्वितार्थप्रकाशिका

सेति ॥ सती लक्षणाभिज्ञा कार्यं कृतवतोऽकृतवतश्च दूतस्य लक्षणानामभिज्ञा सा रुक्मिणी प्रहृष्टं वदनं यस्येति न व्यग्रा न विकृता आत्मनो देहस्य गतिश्चेष्टा यस्य तं कार्यासिद्धावेतद्वैपरीत्यं स्यादित्याशयः । ब्राह्मणमालक्ष्य शुचिस्मिता सती समपृच्छत् । यद्वा । दूतलक्षणज्ञत्वात् अव्यग्रा सती आत्मनो गतिं कृष्णमपृच्छत् । स कास्ते किं वाऽवददित्याद्यपृच्छत् ॥ २९ ॥ तस्यै इति ॥ तस्यै रुक्मिण्यै यदुनन्दनं कृष्णं प्राप्तमागतमावेदयत् । तथात्मनः रुक्मिण्या उपनयनं समीपप्रापणं प्रति "तामानयिष्ये उन्मथ्य राजन्यापसदान्मृधे" इति यद्भगवता उक्तं सत्यवचनं तच्च शशंस । शशंसेत्यत्र सराममिति पाठान्तरम् ॥३०॥ तमिति । तं श्रीकृष्णमागतं समाज्ञाय हृष्टं मानसं यस्याः सा वैदर्भी रुक्मिणी परमफलभूतं परमानन्दविग्रहं कृष्णमानीय समर्पितवतेऽस्मै ब्राह्मणाय किं पारितोषिकं ददामीति विमृशती प्राणेभ्योऽन्यत्सर्वस्वार्पणमपि तस्य प्रियमपश्यन्ती ये मां नमन्ति ते सर्वसम्पद्भाजो भवन्ति किं पुनर्मयि प्रणतायामिति विचार्य च केवलं ननाम प्रणत्यात्मनस्तदृणित्वं तदुपकारभाराक्रान्तत्वं च व्यञ्जयामास । ब्राह्मणोऽपि सन्तोषशीलः किमपि नाकाङ्क्षत् । लक्ष्म्यवतारभूतरुक्मिणीप्रणामेन तस्य सम्पत्तिरवश्यं बभूव । लक्ष्म्या अपि तदृणित्वादिति सूचितमेव ॥ ३१ ॥ प्राप्ताविति । स्वदुहितुरुद्वाहप्रेक्षणे उत्सुकौ रामकृष्णौ प्राप्तौ आगतौ श्रुत्वा भीष्मकः तूर्यघोषेण समर्हणैः पूजासाधनैश्च सह अभ्ययात् तत्संमुखमाजगाम ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अव्यग्रा अव्याकुला आत्मनः शरीरस्य गतिर्गमनं । यस्य तं दूतलक्षणाभिज्ञासा अपृच्छत् । स अत्रायास्यति वानायास्यति किं वाऽवददित्य प्राक्षीत् ॥ २९ ॥ तस्यै रुक्मिण्यै प्राप्तं यदुनंदनं आवेदयत् । आत्मनो रुक्मिण्याः उपयनं पाणिग्रहणाय स्वपुरे आनयनं प्रति श्रीकृष्णेन यत् सत्यं वचनमुक्तं तामानयिष्ये इत्यादित । तच्च शशंस ॥ ३० ॥ ब्राह्मणाय बहुलं धनं दत्त्वाऽपि श्रीकृष्णादन्यत् प्रियमभीष्टं वस्तुसानपश्यंती सती ननाम ॥ ३१ ॥ समऽर्हणैः पूजासामग्रीभिः सह तूर्यघोषेण च सह रामकृष्णयोः सन्मुखमभ्ययादगच्छत् भीष्मक इति शेषः ॥ ३२–३३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सेति । सा रुक्मिणी, न व्यग्रा आत्मनो देहस्य गतिर्यस्य तं प्रहृष्टं वदनं मुखं यस्य तं, तं द्विजं, आलक्ष्य निरीक्ष्य, लक्षणाभिज्ञा दूतलक्षणतत्कार्याभिज्ञा, अत एव, शुचिस्मिता सती, समपृच्छत् ॥ २९ ॥ तस्या इति । तस्यै स्वं भगवदागमनमनागमनादिकं पृच्छन्त्यै रुक्मिण्यै, स द्विजः, प्राप्तं, यदुनन्दनं श्रीकृष्णं, आवेदयत् । आत्मनः स्वस्याः उपनयनं परिणयनं प्रति, भगवता 'तामानयिष्य उन्मथ्य राजन्यापसदान् मृधे' इति यत् सत्यवचनं उक्तं तच्च, शशंसावर्णयत् ॥ ३० ॥ तमिति । ततः, सा वैदर्भी रुक्मिणी, तं श्रीकृष्णं आगतं, समाज्ञाय सम्यक् ज्ञात्वा, हृष्टं मानसं यस्या सा तथाभूता ब्राह्मणाय ब्राह्मणं प्रत्युपकर्तुं, अन्यत् प्रणामविधानत इतरत्, प्रियं न पश्यन्ती अस्मिन् कार्ये सर्वस्वार्पणमपि अपर्याप्तमिति तदुचितं प्रणामतोऽन्यदनिरीक्षमाणा सतीत्यर्थः । ननाम । पश्चाद्बहु ददावित्यर्थः । यद्वा, मां श्रियं ये नमन्ति, ते तावत् सर्वसंपदामास्पदं भवन्ति, किं पुनर्मयि प्रणतायामिति ज्ञात्वा स्वयं ननामेति ॥ ३१ ॥ प्राप्ताविति । भीष्मकः, रामकृष्णौ, स्वदुहितुः स्वपुत्र्याः, उद्वाहस्य प्रेक्षणं तस्मिन्निमित्ते उत्सुकौ सन्तौ प्राप्तौ । उद्वाहदिदृक्षया समायातावित्यर्थः । श्रुत्वा, तूर्यघोषेण वादित्रध्वनिना, समर्हणैः पूजासाधनैश्च सह, अभ्ययात्तौ प्रत्यभ्याजगाम ॥ ३२ ॥

कृष्णप्रिया

सती रुक्मिणीजी ने देखा ब्राह्मणदेवता का मुख प्रफुल्लित है। उनके मन और चेहरे पर किसी प्रकार की घबड़ाहट नहीं है। वे उन्हें देखकर लक्षणों से ही समझ गयीं कि भगवान् श्रीकृष्ण आ गये। फिर प्रसन्नता से पूछा ॥ २९ ॥ तब ब्राह्मण-देवता ने निवेदन किया कि 'भगवान् श्रीकृष्ण यहाँ पधार गये हैं।' और उनकी भूरि-भूरि प्रशंसा की। यह बतलाया कि 'राजकुमारीजी! आपको ले जाने की उन्होंने सत्य प्रतिज्ञा की है' ॥ ३० ॥ भगवान् के शुभ-आगमन का समाचार सुनकर रुक्मिणीजी का हृदय आनन्दातिरेक से भर गया। उन्होंने इसके बदले में ब्राह्मण के लिये भगवान् के अतिरिक्त और कुछ प्रिय न देखकर उन्होंने केवल नमस्कार कर लिया। अर्थात् जगत् की समग्र लक्ष्मी ब्राह्मणदेवता को सौंप दी ॥ ३१ ॥ राजा भीष्मक ने सुना कि भगवान् श्रीकृष्ण और बलरामजी मेरी कन्या का विवाह देखने के लिये उत्सुकतावश यहाँ पधारे हैं। तब तुरही, भेरी आदि बाजे बजवाते हुए पूजाकी सामग्री लेकर उन्होंने उनकी अगवानी की ॥ ३२ ॥

मधुपर्कमुपानीय वासांसि [1]विरजानि सः। उपायनान्यभीष्टानि विधिवत् समपूजयत् ॥ ३३ ॥
[2]ततोनिवेशनं श्रीमदुपकल्प्य महामतिः। [3]ससैन्ययोः सानुगयोरातिथ्यं विदधे यथा ॥ ३४ ॥
एवं राजा[4] समेतानां यथावीर्यं यथावयः। यथाबलं [5]यथावित्तं सर्वैः कामैः समर्हयत् ॥ ३५ ॥
कृष्णमागतमाकर्ण्य विदर्भपुरवासिनः। आगत्य नेत्राञ्जलिभिः पपुस्तन्मुखपङ्कजम् ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—सः, मधुपर्कम्, विरजानि, वासांसि, अभीष्टानि, उपायनानि, उपानीय, विधिवत्, समपूजयत् ॥ ३३ ॥ ततः, महामतिः, श्रीमत्, निवेशनम्, उपकल्प्य, ससैन्ययोः, सानुगयोः, यथायोग्यम्, आतिथ्यम्, विदधे ॥३४॥ एवम्, समेतानाम्, राज्ञाम्, यथावीर्यम्, यथावयः, यथाबलम्, यथावित्तम्, सर्वैः, कामैः, समर्हयत् ॥ ३५ ॥ कृष्णम्, आगतम्, आकर्ण्य, विदर्भपुरवासिनः, आगत्य, नेत्राञ्जलिभिः, तन्मुखपङ्कजम्, पपुः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

महामतिरित्यनेन श्रीकृष्णो वाढं कन्यामुद्वोढुमेवागतः स्यादिति वरोचितेन विधिना समपूजयदिति सूचितम् यथा यथावत् ॥ ३४ ॥ समेतानां राज्ञां मध्ये वीर्याद्यनतिक्रम्य तं तं समर्हितवानित्यर्थः ॥ ३५ ॥ श्रीकृष्णे भाविकर्मसूचकं जनानुरागं दर्शयति। कृष्णमागतमिति त्रिभिः ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वैवाह्यवरे करणीयमाह–मधुपर्कमिति। स भीष्मकः। वासोदानमपि वरायैव "परिधास्यै यशोधास्यै" इत्यादिमन्त्रैर्वेदे प्रतिपादितम्। विधिवद्विष्टरपाद्यार्घ्याचमनीयदानादिविधिमनतिक्रम्येत्यर्थः। तान्यभिव्यञ्जयति–मध्विति ॥ ३३ ॥ तयोः रामकृष्णयोः। निवेशनं निवेशस्थानम्। श्रीमत्त्वं तस्य गृहोचितभोगसाधनादिना ज्ञेयम् ॥ ३४ ॥ एवमित्थम्। इत्यर्थ इति—महतो महन्मध्यस्थस्य मध्यममल्पस्याल्पं चार्चनादि चकारेत्यर्थः वीर्यं प्रभावः। बलं सैन्यम्। कामैरुपभोगैः ॥ ३५ ॥ भाविकर्म विवाहः। तन्मुखपंकजं कृष्णमुखारविन्दम्। तन्मुखपंकजं पपुरिति–तस्मादुच्छलितसौन्दर्यमाध्वीकमास्वादितवन्त इत्यर्थः। पेयतदाधारयोरभेदनिर्देशश्च पेयप्राचुर्यविवक्षया। किञ्च–नेत्रस्यांजलितारूपकं तत्राप्यतिशयमविच्छेदञ्च द्योतयति, तथैव पिबतां तृष्णायाश्च। तस्मादहो किन्नाम तदपूर्वं पंकजमिति भावः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तान्येवाभिव्यञ्जयंस्तत्प्रयोजनमाह—मध्विति ॥ ३३ ॥ श्रीमद्गृहपरिष्कारेणोपभोगसाधनेन च निवेशनं प्रासादादि उपकल्प्य भक्त्या समर्प्य ॥ ३४ ॥ वीर्य्यं प्रभावः बलं सैन्यं कामैरुपभोगैः ॥३५॥ तन्मुखपङ्कजं पपुरिति तस्मादुच्छलितं सौन्दर्य्यमाध्वीकमास्वादितवन्त इत्यर्थः। पेयतदाधारयोरभेदनिर्द्देशश्च पेयप्राचुर्य्यविवक्षया। किञ्च, नेत्रस्याऽञ्जलितारूपकं तत्राप्यतिशयमविच्छेदं च द्योतयति—तथैव पिबतां तृष्णायाश्च तस्मादहो कि नाम तदपूर्वं पङ्कजमिति भावः ॥ ३६ ॥

---

१. विरजांसि–श्रीधर. वंशी. जीव. शुक. ; रुचिराणि–वीर. विज. । २. तयो–श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

३. बाह्योद्याने कुण्डिनस्य यथायोगं सुविस्तृतम्। आवेद्यपूर्णं नगरं जरासन्धादिभिर्नृपैः ॥ अधिकः विजये ।

४. ज्ञां–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. । ५. वृत्तं–वीर. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तान्यभिव्यञ्जयंस्तत्प्रयोजनमाह—मध्विति । उपसमीपे आनीय, दास्येनोपायनतया वा समर्प्य, उपायनानि चान्यानि गजाश्वगजरत्नादीनि अभीष्टानि तयोरात्मनो वा प्रियाणि, संशब्दाभ्यामन्तर्जामातृभावेन पूजाविशेषं बोधयति ॥ ३३ ॥ श्रीमत्-भोज्य-पेय-वस्त्रालंकारादिसर्व्वसम्पत्तिमत्, स्फाटिकस्तम्भादिनाशेषशोभायुक्तं वा; निवेशनं प्रासादमुपकल्प्य दासभावेनैव समर्प्य, भक्त्या तयोः सर्व्वस्वामित्वमननात्तथैवातिथ्यसम्यक्त्वाद्वा; अनुगाः श्रीगद-सात्यक्युद्धवादयः, सैन्यमन्यच्चतुरंगबलम्, यथा यथावदिति परमभक्त्या नवनीतादिगोरसप्रधानोत्तमान्नपान-शय्यादि-समर्पणेनेत्यर्थः ॥ ३४ ॥ एवमनेनोद्वाहप्रेक्षणौत्सुक्यप्रकारेण समेतानां मिलितानां समग्रबलसाहित्यादिना सम्यक्त्वेनागतानां वा, वीर्य्यं प्रभावः, बलं सैन्यम्, कामैरुपभोगैः, यस्याधिकं वीर्य्यादि तस्याधिकैः कामैरधिकार्हणम्, यस्य च न्यूनं तस्य न्यूनैरेव न्यूनार्हणमित्यर्थः । इति सर्व्वेषामेव मनःपूर्त्त्या सम्यगर्हयत्; वीर्य्यादीनां यथापूर्व्वं समर्हणहेतुत्वे श्रैष्ठ्यम् ॥ ३५ ॥ कृष्णं सर्व्वचित्ताकर्षकं परमानन्दघनमूर्त्ति वा भगवन्तम्, विदर्भपुरवासिनः स्त्रीपुरुषादयः सर्व्वे जनाः, आगत्य समेत्य श्रीकृष्णान्तिकमेत्य वा, पपुरिति मुखपंकजस्य सौन्दर्य्यामृतमयत्व ध्वनितम् । अतः साक्षादेव पानं सम्भावितम् । यथा हि मधुपाः पंकजरसमासक्त्या पिबन्ति, तद्वत्, पीत्या चिरं चित्ताभिनिवेशेन ददृशुरित्यर्थः ।३६।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः स भीष्मको मधुपर्क्कादीनि समर्प्य यथाविधि सम्यगपूजयत् तत्रोपायनानि श्रेष्ठवस्तूनि ॥३३॥ महामतिर्भीष्मकः तयो रामकृष्णयोः श्रीमत्भोग्यभोगोपकरणादिसमृद्धिमत् निवेशनं गृहमुपकल्प्य सभृत्योस्ससैन्ययोश्च तयोर्यथावदातिथ्यं चक्रे ॥ ३४ ॥ इत्थमन्येषामपि सर्वेषां समुदितानां राज्ञां तत्तद्वीर्य्यवयःप्रभृत्यनुरूपं सर्वैः कामैरपूजयत् ॥ ३५ ॥ कृष्णमिति विदर्भ-पुरवासिनः कुण्डिनपुरवासिनो जनाः कृष्णमागतं श्रुत्वा इतस्ततः स्थित्वेति शेषः । तस्य कृष्णस्य मुखपङ्कजं मुखपङ्कजस्थलावण्य-सुधां नेत्ररूपैरञ्जलिभिः पपुः पीतवन्तः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

किमिति नगरप्रवेशाप्रदानं कृष्णरामयोरिति तत्राह—आवेद्येति । जरासन्धादिराजभिर्नगरं पूर्णं निबिडमनवकाश-मित्यावेद्य विज्ञाप्य ॥ ३५–४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

महामतिरित्यनेन कृष्णो वाढं कन्यामुद्वोढुमेवागतः स्यादिति स्वचेतःप्राप्ताश्वासो वरोचितेन विधिनैव समपूजयदिति सूचितम् ॥ ३४–३५ ॥ मुखपङ्कजं पपुस्तत्रत्यमपारं माधुर्य्यमेव पपुर्लक्षणया पेयप्राचुर्य्यं तथा अनेककर्त्तृकपानादेकस्यैव पङ्कज-स्याऽपरिमितमधुत्वाददभुतत्वं च व्यञ्जितम् ॥ ३६ ॥

गूढार्थदीपिनी

उपानीय समर्प्य । मधुपर्कं दधिमधुमिश्रितम् द्रव्यम् ॥ ३३ ॥ यथा यथावत् ॥३४॥ समेतानामागतानाम् ॥३५–३६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

महामतिरयमेव रुक्मिण्या वर इति ज्ञानवान् अतो यथा यथावदातिथ्यं विदधे ॥ ३४ ॥ एवमन्येषां समेतानां राज्ञां मध्ये वीर्याद्यनतिक्रम्य तं तं समर्हयत् ॥ ३५–४३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मधुपर्कमुपनीय गतम् । रुचिराणि वासांसि चोपनीयेत्यन्वयः । अभीष्टान्युपनयनानि विधिवत्समपूजयत् विधिवत्सा यस्य तं विरिञ्चता तमित्यप्यान्तरङ्गिको भावः ॥ ३३ ॥ श्रीमन्निवेशनं गृहं कुण्डिनस्य बाह्योद्यान उपकल्प्य यथायोगं सुविस्तृतं विशालम् ॥ ३४ ॥ किमन्तर्निवेशोऽनन्तस्येत्यत आह । आवेद्येति । जरासन्धादिभिर्नृपैर्नगरं पूर्णमावेद्य निरूपयित्वा यथा सम्यक् गतम् ॥ ३५ ॥ समर्हयत्समार्हयत् ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो मधुपर्कानयनम् ततो विरजानि वासांसि विरजानीति शोभार्थं दानव्यतिरेक **उक्तः** । अन्येभ्यस्तु स्वख्यापनार्थं राजसगुणाद्दीयते इति वस्त्राण्यविरजान्येव भवन्ति । नूतनानि तु प्रक्षालितानि सर्वेभ्य एव दीयन्त इति विशेषणं व्यर्थं स्यात् । अथवा कन्यां दातुं आदौ अखण्डानि शुद्धान्येव वस्त्राणि दत्तवान् यदप्यग्रे देयम्, तदपि दत्तवानित्याह **उपायनानाति**। **अभीष्टानि वरवध्वोः विधिव**दिति यथाविवाहविधि ॥ ३३ ॥ ततो निवेशनमपि **यथा** जामातुर्दीयते तादृशं **श्रीमदिति उप**

समीप एव कल्पयित्वा यथा भगवान् निकट एव रुक्मिणीसहितो भवति । ननु कथमेवं ज्ञातवान्, तत्राह **महामति**रिति । ततो वरयात्रिकाणां भोजनमपि दत्तवानित्याह **ससैन्ययो**रिति । सैन्यमसहभोजि, अनुगास्तु सहभोजिन इति आतिथ्यं प्रत्येकं धर्मबुद्ध्या आवश्यकबुद्ध्या वा ॥ ३४ ॥ तदनन्तरं तदर्थमन्येषामपि पूजां कृतवानित्याह **एवं राजे**ति । यादृशे रूपे यादृशानि वस्त्राणि यादृशं वयः तादृशवेशसम्पादकं यावच्च बलं सेना तावत्संभृत्याधिक्यम् यावच्च स्वय चित्तम् एवं यथायोग्यं चतुर्धा पूजयामास ॥ ३५ ॥ राजपत्न्या अभिरुचिरस्ति नवेति सन्देहे, तन्निराकरणार्थं सामान्यतः स्त्रीणामभीष्टता निरूप्यते **कृष्णमागत**मिति त्रिभिः, कायिकवाचिकमानसिकानुवृत्तिभेदात् । तत्र कायिकमाह—**कृष्णं** स्वभावत एव स्त्रीप्रियम् तद्गृहेऽपि गत्वा द्रष्टव्यम् । स्वगृहे समागतं कथं न पश्येदिति विदर्भपुरवासिनः सर्व एव समागत्य नेत्राञ्जलिभिस्तन्मुखपङ्कजं पपुः ॥ ३६ ॥

श्रीसुबोधिनी–सारः

मधुपर्कं दधिमधुघृतमित्येवंरूपमुपानीय समर्प्य "मधुपर्के गवालंभः" इति लोकविद्विष्टत्वान्नादरणीयः विरजांसि शुद्धानि नवानि वासांसि अभीष्टानि वांछितानि उपायनानि उपानीय निवेद्य भीष्मको विधिवत् समर्चयत् ॥ ३३ ॥ तयो रामकृष्णयोः ससैन्ययोः सभृत्ययोरातिथ्यं पाद्यार्घ्यादि यथावच्चक्रे महामतिरित्यनेन तन्मनोरथं बुद्धा तथापूजयदित्युक्तं भवति श्रीमत् उपवेशनं विश्रामस्थानं कल्पयित्वा ॥ ३४ ॥ एवं समागतानां राज्ञामातिथ्यं विदधे वीर्यादीननतिक्रम्य सर्वैः कामैरिष्टदानैः समार्चयत् ॥ ३५ ॥ आगतं कृष्णमाकर्ण्य श्रुत्वा कुंडिनपुरजना आगत्य द्रष्टुं तस्य श्रीकृष्णस्य मुखकमलं नेत्रांजलिभिः पपुः ॥३६॥

विवरण टिप्पणी

मधुपर्कमुपानीयेत्यत्र । **शोभार्थ**मिति । विरजत्वेन रजःसम्बन्धाभावात्सात्त्विकभावेन शोभार्थं भगवते समर्पितानीत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

ततश्च स भीष्मको मधुपर्कादीनि उपानीय ताभ्यां समर्प्य विधिवत् समपूजयत् । उपायनानि उत्तमवस्तूनि ॥ ३३ ॥ महामतिः परमभागवतो भीष्मकः ससैन्ययोः सेनासहितयोः सानुगयोः भृत्यादिसहितयोस्तयो रामकृष्णयोः श्रीमत् भोगोपकरणादिसमृद्धिमत् निवेशनं विश्रामस्थानमुपकल्प्य निवेद्य यथावदातिथ्यं विदधे चक्रे ॥ ३४ ॥ एवमन्येषामपि सर्वेषां समेतानां आगतानां राज्ञां तद्वीर्यवयआदियोग्यं यथा भवति तथा सर्वैः कामैस्तान् समर्हयत् ॥ ३५ ॥ विदर्भपुरवासिनो जनाः कृष्णमागतमाकर्ण्य श्रुत्वा इतस्तत आगत्य नेत्ररूपैरञ्जलिभिस्तस्य मुखपङ्कजं मुखपङ्कजस्थलावण्यसुधां पपुः, तल्लावण्यं ददृशुरित्यर्थः ।३६।

अन्वितार्थप्रकाशिका

मधुपर्कमिति ॥ स भीष्मकः मधुपर्कं विरजांसि उज्ज्वलानि वासांसि अभीष्टानि उपायनानि उत्तमवस्तूनि उपानीय समर्प्य विधिवत् समपूजयत् । एवं वरोचितमधुपर्कादिना पूजनेन भीष्मकस्यापि अभिप्रायः सूच्यते ॥ ३३ ॥ तयोरिति ॥ महामतिः नूनं श्रीकृष्ण उद्वोढुमेवागत इति विचारवान् भीष्मकः ससैन्ययोः सानुगयोश्च तयो रामकृष्णयोः श्रीमत् भोगोपकरणादिसमृद्धिमन्निवेशनं विश्रामस्थानमुपकल्प्य निवेद्य यथा यथावदातिथ्यं विदधे चक्रे ॥ ३४ ॥ एवमिति ॥ एवमन्येषां समेतानामागतानां राज्ञाम् । कर्मणि शेषे षष्ठी । यथावीर्यं यथावयः यथाबलं यथावित्तं राज्ञां वीर्यवयोबलवित्तयोग्यं यथा स्यात्तथा सर्वैः कामैः समार्हयत् । आङ्रहितः पाठः प्रायो दृश्यते स त्वार्षः ॥ ३५ ॥ कृष्णमिति ॥ विदर्भपुरवासिनो जनाः कृष्णमागतमाकर्ण्य श्रुत्वा इतस्तत आगत्य नेत्ररूपैरञ्जलिभिस्तस्य मुखपङ्कजं मुखपङ्कजलावण्यसुधां पपुः तल्लावण्यं ददृशुः ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्रीमत् शोभमाने निवेशनं वासस्थानं ॥ वस्त्रदानेन श्रीकृष्णस्य वरोचिता पूजाकृतेति सूचितं यथा यथायोग्यं ॥३४॥ समेतानां राज्ञां ॥ अत्र संगतान् ॥ राजन्यान् ॥ तेषां वीर्याद्यनतिक्रम्य पूजितवान् ॥ ३५ ॥ पुराद्बहिरागत्य ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मधुपर्कमिति ॥ ततः, स भीष्मकः, मधुपर्कं कांस्यपात्रे दधिमधुघृतानि भृत्वा अपरेण कांस्यपात्रेणाच्छादितं तत्पात्रं मधुपर्कसंज्ञं तदित्यर्थः । विरजांसि वासांसि, अभीष्टानि उपायनानि च, उपानीय समर्प्य, विधिवत् यथाविधि, समपूजयत् । तत्र उपायनानि श्रेष्ठवस्तूनि ॥३३॥ तयोरिति ॥ महामतिर्भीष्मकः, श्रीमत् भोग्यभोगोपकरणादिसमृद्धिमत् , निवेशनं गृहं, उपकल्प्य निवासार्थं समर्प्य, सानुगयोः सभृत्ययोः सभृत्ययोः, ससैन्ययोः सैन्यसहितयोश्च, तयोः रामकृष्णयोः, यथा यथावत्, आतिथ्यं, विदधे चक्रे । केचित्त्वत्र 'तयोर्निवेशनं श्रीमदुपकल्प्य महामतिः । बाह्योद्याने कुण्डिनस्य यथायोग्यं सुविस्तृतम्' इति पाठं पठन्ति । महामतिरित्यनेन श्रीकृष्णो बाढं कन्यामुद्वोढुमेवागतः स्यादिति वरोचितेन विधिना समपूजयदिति सूचितम् ॥ ३४ ॥ एवमिति ॥

एवमित्थं, समेतानां तत्र समागतानामन्येषामपि, राज्ञां, यथावीर्यं तद्वीर्यानुसारेण, यथावयस्तद्वयसोऽनुसारेण, यथाबलं तद्बलानतिक्रमेण, तत्र वीर्यं प्रभावः, बलं शारीरमोजः, यथावित्तं स्वकीयवित्तानतिक्रमेण, भीष्मकः आतिथ्यं विदधे इति शेषः। सर्वैः कामैः, समर्हयत् अपूजयच्च ॥ ३५ ॥ श्रीकृष्णे भाविकर्मसूचकं जनानुरागं दर्शयति त्रिभिः ॥ कृष्णमिति ॥ विदर्भपुरवासिनः कुण्डिनपुरवासिनो जनाः, कृष्णं आगतं, आकर्ण्य श्रुत्वा, इतस्तत इति शेषः। आगत्य, तस्य श्रीकृष्णस्य, मुखपङ्कजं श्रीकृष्णमुखपङ्कजगतलावण्यसुधामित्यर्थः। नेत्राञ्जलिभिः नेत्ररूपैरञ्जलिभिः, पपुः पीतवन्तः ॥ ३६ ॥

कृष्णप्रिया

और मधुपर्क, निर्मल वस्त्र तथा उत्तम उत्तम भेंट देकर विधिपूर्वक उनकी पूजा की ॥ ३३ ॥ भीष्मकजी बड़े बुद्धिमान् थे। भगवान् के प्रति उनकी बड़ी भक्ति थी। उन्होंने भगवान् को सेना और साथियों के सहित समस्त सामग्रियों से युक्त निवास-स्थान में ठहराया और उनका यथावत् आतिथ्य-सत्कार किया ॥ ३४ ॥ विदर्भराज भीष्मकजी के यहाँ निमन्त्रण में जितने राजा आये थे, उन्होंने उनके पराक्रम, अवस्था, बल और धन के अनुसार सारी इच्छित वस्तुएँ देकर सबका खूब सत्कार किया ॥ ३५ ॥ विदर्भदेश के नागरिकों ने जब सुना कि भगवान् कृष्ण यहाँ पधारे हैं, तब वे लोग भगवान् के निवास स्थान पर आये और अपने नयनों की अंजलि में भर-भरकर उनके वदनारविन्दका मधुर मकरन्द-रस पान करने लगे ॥ ३६ ॥

अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरा। असावप्यनवद्यात्मा भैष्म्याः समुचितः पतिः ॥ ३७ ॥
किंचित्सुचरितं यन्नस्तेन तुष्टस्त्रिलोककृत्। अनुगृह्णातु [1]गृह्णातु वैदर्भ्याः पाणिमच्युतः ॥ ३८ ॥
एवं प्रेमकलाबद्धा वदन्ति स्म पुरौकसः। कन्या चान्तःपुरात् प्रागाद् भटैर्गुप्ताम्बिकालयम् ॥ ३९ ॥
पद्भ्यां विनिर्ययौ द्रष्टुं भवान्याः पादपल्लवम्[2]। [3]सा चानुध्यायती सम्यङ्मुकुन्दचरणाम्बुजम् ॥ ४० ॥

कर्दमक्षमा

अन्वयः—रुक्मिणी, अस्य, एव, भार्या, भवितुम्, अर्हति, न, अपरा, अनवद्यात्मा, असौ, अपि, भैष्म्याः, समुचितः पतिः ॥ ३७ ॥ मः, यत्, किञ्चित्, सुचरितम्, तेन, त्रिलोककृत्, अच्युतः, तुष्टः, अनुगृह्णातु, वैदर्भ्याः, पाणिम्, गृह्णातु ॥ ३८ ॥ प्रेमकलाबद्धाः, पुरौकसः, एवम्, वदन्ति, स्मः, च, भटैः गुप्ता, कन्या, अन्तःपुरात्, आम्बिकालयम्, प्रागात् ॥ ३९ ॥ सा मुकुन्द चरणाम्बुजम्, सम्यक्, अनुध्यायती, च, भवान्याः, पादपल्लवम् द्रष्टुम् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्यैव रुक्मिण्येवार्हत्येव असावेव भैष्म्या एव समुचित एवेति षडवधारणानि। तत्रैकस्मिन्व्यतिरेकप्रदर्शनमुपलक्षणार्थम् नापरेति। न च वाक्यभेददोषः अनूद्यविधेयभेदेन विभिन्नानामेव वाक्यानां सह प्रयोगात् ग्रहं संमार्ष्टीत्यादिवदिति ॥ ३७ ॥ अयमेवानुग्रह इति निर्दिशंति—गृह्णात्विति ॥ ३८ ॥ प्रेम्णः कला लेशस्तेन बद्धा वदन्ति स्म सम्पूर्णं प्रेम तेषां हृद्येवाऽवर्ततेत्यर्थः ॥ ३९ ॥ गमनं विशिनष्टि द्वयेन। पद्भ्यामिति ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अवधारणान्यवधारणवाक्यानि। तत्र तेषु षट्स्वधारणेष्वेकस्मिन्वाक्ये व्यतिरेकस्यैवकाराभावस्य प्रदर्शनमुपलक्षणार्थसर्वेषामिति। "संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यते" इत्युक्तेर्वाक्यभेददोषः स्यादित्यत्राह–न चेति। तत्र हेतुमाह–अनुवाद्येति। तथाहि—अस्यैवेत्यनुवादः, नापरस्येति विधिः १। नापरेत्यनुवादः, रुक्मिण्येति विधिः २। अनर्हा नेत्यनुवादः, अर्हतीति विधिः ३। नैवापर इत्यनुवादः, असाविति विधिः ४। नैवा परस्या इत्यनुवादः, भैष्म्या इति विधिः ५। नैवानुचित इत्यनुवादः, उचित इति विधिः ६। इत्थमुद्देश्यविधेयभेदान्न वाक्यभेदोऽत्र। "ग्रहं संमार्ष्टि" इत्यत्र यद्यपि मार्जनरूपविधेयभेदो नास्ति तथापि 'उद्देश्यानां ग्रहाणां द्वादश ग्रहा भवन्ति' इत्युक्तेर्भेदान्न वाक्यभेदः। अत्र विशेषमाह—ग्रहं संमार्ष्टीत्यत्र द्वितीयया ग्रहस्येप्सिततमत्वेनोद्देश्यत्वात्प्रयोजनवत्त्वाच्च प्राधान्यं गम्यते। संमार्गस्तु ग्रहं प्रति गुणीभूतः 'प्रतिप्रधानं गुण आवर्तनीयः' इति न्यायात्। यावन्तो ग्रहास्तेषां सर्वेषां संमार्ग इति निश्चये सति कति ग्रहाः संमार्जनीया इति बुभुत्साया अभावात्। उद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितं यद्युच्यते, नेदमुद्देश्यगतं—किन्तु स्वयं विधेयं ग्रहं संमृज्यात्, यं संमृज्यात्तं चैकमिति तथा सति वाक्यभेदः स्यात्। तथा बुभुत्साया अभावाद्विधिना योगाच्चोद्देश्यगता संख्या न विवक्षिता। उद्देश्यगतमपि किञ्चिद्विशेषणं विवक्षितम्। यस्य विशेषणस्य विवक्षां विनोद्देश्यप्रतीतिर्न पर्यवस्यति, अतो ग्रहत्व विवक्षितं तद्विवक्षां विनोद्देश्यग्रहस्वरूपस्य ज्ञातुमशक्यत्वात्।

---

[1] वैदर्भ्यां विविधत्–प्रा. पा.। [2] पंकजम्–वीर.। [3] परिवारैः कतिपयैर्युक्तो यादवनन्दन–विज. अ।

तेन ग्रहजातीयसाधनसोमयागापूर्वार्थत्वाच्च सर्वेषु संमार्ग इति स्थितं, निरूपितं चैतन्मीमांसापरिभाषायाम्। ततश्च तयोः सर्वोत्तमयोः परस्परयोग्यतासौष्ठवदर्शनेन सर्वेषामपि चित्तमाक्रान्तम्। अत एवं वदन्ति स्मेति त्रिकेणाह—अस्यैवेति। तत्र तत्रेत्याद्यनुसारेणैव योज्यम्। अस्यैव नापरस्य, रुक्मिण्येव नापरा, अर्हत्येव न तु नार्हति, असावेव नापरः, भैष्म्या एव नापरस्याः, सम्यगेवोचितो न त्वीषदप्यनुचितमिति। वाक्यभेदः खल्वेकस्यैव वाक्यस्य भेदाय नानात्वकल्पनम्। तस्य च दोषत्वं कल्पनागौरवात्, अर्थमात्रस्यैव भेदेप्येकवाक्यस्य नानाप्रतिपाद्यत्वेन तात्पर्यनिर्णयासिद्धेः, 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति न्यायविरोधाच्च। सिद्धान्तमाह—अनूद्येति। अयमर्थः—न तावदत्रैकमेकवाक्यं कुत्रापि किमनूद्य विधीयते कुत्रापि किमपीति विभिन्नानामेव वाक्यानां वाग्मितया सह प्रयोगात्। तथाहि—अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरा इति प्रथमवाक्यं, रुक्मिण्येवास्य भार्याभवितुमर्हतीत्यादिद्वितीयमित्याद्येवकारात्। वृत्तिभेदेन वाक्यभेदे दोषं परिहरति—ग्रहमिति। 'दशापवित्रेण ग्रहं संमार्ष्टि' इति तु पूर्ववाक्यम्। दशापवित्रं वासःखण्डः, ग्रहो यज्ञीयपात्रविशेषस्तेन संमृज्यादित्यर्थः। तत्र हि ग्रहमिति द्वितीयया ग्रहस्योद्देशतया प्रयोजनवत्तया च प्राधान्यं गम्यते। ग्रहं प्रति गणः संमार्जनम् 'प्रतिप्रधानं च गुण आवर्तनीयः' इति न्यायेन तत्रोपयुक्तं सर्वं ग्रहं प्रति संमार्जनक्रियावृत्तिः कार्या, तत्रैकत्वञ्चाविवक्षितं ग्रहशब्दो ह्यत्र जातिद्वारा द्रव्यलक्षक इति सर्वोऽपि गृह्यते। किं तूक्तादन्यत्र वैयर्थ्यमिति तत्रत्येष्वेवावर्त्यत आवृत्तौ च वाक्यभेदः स्यादेव। किन्तु तत्र दोषस्यानभ्युपगमो वाक्यद्वैविध्यस्यैव न्यायसिद्धत्वात्। एवमत्रोद्देश्यतया प्रयोजनवत्तया च यद्यद्विवक्ष्यते तत्तदेव गुणभूतेन तन्निर्द्धारवाचकेनैवकारेण सम्बध्यते। यथा—प्रथमवाक्ये इदं मदीयत्वमुद्देश्यं प्रयोजनवच्च तदेवानूद्य भार्यात्वं विधीयते। द्वितीयवाक्ये रुक्मिणीत्वमुद्देश्यमित्यादि। ततो ग्रहवाक्यवदत्रापि न वाक्यभेददोष इति। सर्वत्रैवैवशब्दान्वयेन व्यञ्जितायामन्योन्ययोग्यतायां हेतुः—अनवद्यात्मेति। इदं हि द्वयोरेव विशेषणमिति ॥ ३७ ॥ पौरा ऊचुः—किञ्चिदिति। सुचरितं तपोदानादिरूपम्। तेन सुचरितेन। अयमेव पाणिग्रहणरूप एव। ततश्च रागातिशयादेयवाक्यम्–क्रिञ्चिदिति। इह पूर्वेषु च जन्मसु यत्किञ्चिदित्यर्थः। त्रिलोककृदिति परमसामर्थ्यमुक्तम्, जीवार्थ तत्सृष्टेर्दयालुत्वञ्च। अच्युत इति समरूपगुणवत्त्वम्। वैदर्भ्या इति संबंधोल्लेखः। त्रिलोमकृदच्युतयोर्भेदेनोक्तिर्नरलीलामाधुर्याक्रान्तचित्तत्वेन। ततो वैलक्षण्यस्मरणात्। वदन्ति स्म परस्परमविच्छेदेन कथयामासुरित्यर्थः ॥३८॥ इत्यर्थ इति—संपूर्णप्रेमाविर्भावे न जाने ते किं कुर्युरिति भावः। ननु रुक्म्यादिभ्यो भयं कथमत्यजंस्तत्राह–प्रेम्णः कला कलना 'कलनाकालयोः कला' इति नानार्थात्। कलना चात्र भावना 'कलिबली कवीनां कामधेनू' इत्यभ्युपगमात्। यद्वा–प्रेमकलया रुक्मिणीविषयकप्रेमवृद्ध्या। 'कला मूले प्रवृद्धौ स्याच्छिल्पादावंशमात्रके' इति मेदिनी। यद्वा–कलालेशः प्रेमा चायमनुमोदनात्मकः। स पुनरिह वरे सखीभावयोग्यः परममहानेव। तया बद्धा इति तस्याः शृङ्खलात्वं दृढत्वं च ध्वनितम्। एवं तल्लेशप्राप्त्यापि तेषामेषाऽवस्था, किमुत तासामित्यर्थः। कन्या चेति चकारात्समकालताप्रतीतिः तादृशप्रेमोत्कण्ठायोग्यमेवेदमिति सूचयति। किञ्च—पुरौकसां तादृशोक्तिश्रवणात्तस्या महाप्रीतिस्तदुक्तेर्मंगलोपश्रुतित्वादभीष्टसिद्धिञ्च द्योतयति। अत एव प्रकर्षेण चित्तप्रसादादिनाऽगात् ॥ ३९ ॥ तस्या रुक्मिण्याः। सा सम्यक्पु मुकुन्दांघ्रिमेव दध्याविति भावः। तदेव विस्तरेणाभिव्यञ्जयति–पद्भ्यामिति सार्धं चतुर्भिः। तत्राद्यद्वयं युग्मकं च। सापि तादृशमाहात्म्यापि। पद्भ्यामेव ययावत्र भवानीभक्तिरेव हेतुरित्याह—द्रष्टुमिति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च तयोः सर्वोत्तमयोः परस्परयोग्यतासौष्टवदर्शनेन सर्वेषामपि चित्तमाक्रान्तम् अत एवं वदन्ति स्मेति त्रिकेणाह—अस्यैवेति तैर्व्याख्यातं। तत्र तत्रेत्याद्यनुसारेणैवं योज्यम्, अस्यैव नापरस्य रुक्मिण्येव नापरा अर्हत्येव न तु नार्हति असावेव नापरः भैष्म्या एव नापरस्याः सम्यगेवोचितः नत्वीषदप्यनुचित इति वाक्यभेदः खल्वेकस्यैव वाक्यस्यार्थभेदाय नानात्वकल्पनं तस्य च दोषत्वं कल्पनागौरवात् अर्थमात्रस्यैव भेदेऽप्वेकवाक्यस्य नानाप्रतिपाद्यत्वेन तात्पर्य्यनिर्णयासिद्धेः 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति नयविरोधाच्च। सिद्धान्तमाह—अनूद्येति। अयमर्थः न तावदत्रैकमेव वाक्यं कुत्रापि किमप्यनूद्य विधीयते कुत्रापि किमपीति विभिन्नानामेव वाक्यानां वाग्मितया सह प्रयोगात्। तथा हि अस्यैव भार्य्या भवितुं रुक्मिण्यर्हति नापरस्येति प्रथमं वाक्यं रुक्मिण्येवास्य भार्य्या भवितुमर्हतीत्यादि द्वितीयमित्यादि, एवकारावृत्तिभेदेन वाक्यभेदे दोषं परिहरति—ग्रहमिति। दशापवित्रेण ग्रहं सम्मार्ष्टीति तु पूर्णं (पूर्व) वाक्यं दशावित्रं वासःखण्डः ग्रहो यज्ञीयपात्रविशेषः येन तं सम्मृज्यादित्यर्थः। तत्र हि ग्रहमिति द्वितीयया ग्रहस्यौद्देश्यतया प्रयोजनवत्तयां च प्राधान्यं गम्यते ग्रहं प्रति गुणः सम्मार्जनं प्रति प्रधानं च गुण आवर्त्तनीय इति न्यायेन तत्रोपयुक्तं सर्वं ग्रहं प्रति मार्जनक्रियावृत्तिः कर्त्तव्या, तत्र एकत्वं चाविवक्षितं ग्रहशब्दो ह्यत्र जातिद्वारा द्रव्यलक्षक इति सर्वोऽपि गृह्येत किन्तूपयुक्तादन्यत्र वैयर्थ्यमिति तत्रत्येष्वेवावर्त्त्यते आवृतौ च वाक्यभेदः स्यादेव किन्तु तत्र दोषस्यानभ्युपगमः वाक्य द्वै वैविध्यस्यैव न्यायसिद्धत्वात् एवमत्रोद्देश्वतया प्रयोजनवत्तया च यद्यत् प्रधानं विवक्ष्यते, तत्तदेव गुणभूतेन तन्निर्द्धारणवाचकेनैवकारेण सम्बन्ध्यते, यथा प्रथमवाक्ये इदमीयत्वमुद्देश्यं प्रयोजनवञ्च तदेवानूद्य भार्य्यात्वं विधीयते

द्वितीयवाक्ये च रुक्मिणीत्वमुद्देश्यमित्यादि, ततो ग्रहवाक्यवदत्रापि न वाक्यभेददोष इति सर्वत्रैवैवशब्दान्वयेन व्यञ्जितायामन्योन्यमनन्ययोग्यतायां हेतुः अनवद्यात्मेति इदं हि द्वयोरेव विशेषणमिति ततश्च रागातिशयोदयवाक्यम् ॥ ३७ ॥ किञ्चिदिति इह पूर्वेषु च जन्मसु यत्किञ्चिदित्यर्थः । त्रिलोककृदिति तस्य परमसामर्थ्यं द्योतितं जीवार्थं तत्सृष्टेर्दयालुत्वं च अच्युत इति समग्ररूपगुणवत्त्वं वैदर्भ्या इति स्वसम्बन्धोल्लेखः त्रिलोककृदच्युतयोर्भेदेनोक्तिः नरलीलामाधुर्य्याक्रान्तचित्तत्वेन ततो वैलक्षण्य (स्य) स्फुरणात् वदन्ति स्म परस्परमविच्छेदेन कथयामासुरित्यर्थः ॥ ३८ ॥ ननु, रुक्म्यादिभ्यो भयं कथमत्यजम् ? तत्राह—प्रेम्णः कला कलना 'कलनाकालयोः कला' इति नानार्थात् । कलना चात्र भावना 'कलिबली कवीनां कामधेनू' इत्यभ्युपगमात् । यद्वा, कलालेशः प्रेमा चायमनुमोदनात्मकः स पुनरिह वरे (रसे) सखीभावयोग्यः परममहानेव च सः तया बद्धा इति तस्या शृङ्खलात्वे तेन दार्ढ्यं च ध्वनितम् एवं तल्लेशसामान्यप्राप्त्यापि तेषामेषावस्था किमुत तासामित्यर्थः । कन्या चेति चकारात् समकालता प्रतीतिस्तादृशप्रेमोत्कण्ठायीग्यमेवेदमिति सूचयति । किञ्च, पुरौकसां तादृशोक्तिश्रवणात्तस्या महाप्रीतिं तदुक्तेर्भङ्गलोपश्रुतित्वादभीष्टासाद्धं च द्योतयति, अत एव प्रकर्षेण चित्तप्रसादादिना अगात् ॥ ३९ ॥ तदेव विस्तरेणाभिव्यञ्जयति—पद्भ्यामिति, सार्द्धचतुर्भिः । तत्राद्यद्वयं युग्मकञ्चापि सापि तादृशमाहात्म्यापि पद्भ्या मेव विनिर्ययौ तत्र भवानीभक्तिरेव हेतुरित्याह-द्रष्टुमिति । पादपल्लवमित्यपि तद्भक्त्यनुसारेणैवोक्तम् । ननु साक्षाल्लक्ष्म्यास्तस्यां कथमेतादृशी भक्तिर्युज्यते तत्राह—मुकुन्दचरणमेवाम्बुजं परमकौमल्यादिगुणतया स्फुरितं सम्यक् तन्माधुर्योपरक्तत्वेनैव अनु निरन्तरं ध्यायती ध्यावन्ती सोत्कण्ठं स्मरन्तीति नात्मनस्तस्य वा महिमांशोऽस्फुरदिति भावः ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सर्व्वत्रैव एव-शब्दान्वयेन तयोरन्योन्यमनन्ययोग्यतोक्ता । तत्र हेतुः—अनवद्यात्मेति । इदं द्वयोरपि विशेषणम्, भक्तिविशेषतो निजाशेषसुकृतार्पणेन तयोर्विवाहमिच्छन्ति ॥ ३७ ॥ किञ्चिदिति, सत्किञ्चिदिति पूर्व्वजन्मस्वपि कृतं सर्व्वमेव प्याप्नुवन्ति, तेन तुष्टः सन् त्रिलोककृत् श्रीनारायण इति तस्य परमसामर्थ्यमभिप्रेतम् । अच्युत इति समग्रगुणरूपवत्त्वम्, वैदर्भ्या इति च पूर्व्वोक्त-न्यायेन तादृशत्वमेव, त्रिलोककृदच्युतयोर्भेदेनोक्तिः, लोकानां तत्त्वाज्ञानात्, प्रेमभरोदयेनाननुसन्धानाद्वा; यद्वा, त्रिलोककृदच्युतोऽयमनुगृह्णातु । कथम् ? गृह्णातु स एवेति । ततश्च त्रिलोककृदिति दयालुत्वमभिप्रेतम् । जीवानां हितार्थमेव त्रिलोकीसृष्टेः ॥ ३८ ॥ ननु राजपुत्रवरात् रुक्मिणो जरासन्धादिभ्यश्च भयं कुतोऽत्यजन् ? तत्राह—प्रेम्णः कला वृद्धिस्तया बद्धा वशीकृताः, बद्ध-शब्देन प्रेम्णः शृङ्खलात्वं तेन च दार्ढ्यं ध्वनितम् । अतीतार्थपरोऽपि स्म-शब्दो वादेऽविच्छेदं बोधयति । च अपि, कन्यापीति पुरौकसां तादृशोक्तिश्रवणात्तस्या महाप्रीतिं मंगलवाक्यैरभीष्टसिद्धिञ्च द्योतयति, अतएव प्रकर्षेण चित्तप्रसादादिनागात् ॥ ३९ ॥ तदेव विस्तरेणाभिव्यञ्जयति–पद्भ्यामिति सार्द्धचतुर्भिः । विशेषेण निर्ययौ अन्तःपुरात्; विशब्दार्थमेव दर्शयति–सा चेति । त्वर्थे चकारः, भवानीपादपल्लवदर्शनात् मुकुन्दानुध्यानस्य विशेषं बोधयति—मुकुन्दस्य परमानन्दप्रदस्य भगवतश्चरणाम्बुजं सम्यग् यथा स्यात्, प्रेम्णा तत्सौन्दर्य्यादौ चित्ताभिनिवेशेनेत्यर्थः; यद्वा, सम्यग् गुणरूपादिनोत्तमम्, अतोऽनु निरन्तरं ध्यायन्ती ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किंचैव मित्थं प्रेमाश्रुगद्गदस्वराः सन्तः पुरौकसःपुरवासिनो जनाः ऊचुः किमिति असौ कृष्णः अनवद्यात्मा सुन्दरतरतनुः अपिशब्दो मैधवा अप्यनवद्यात्मत्वसमुच्चयार्थः समुचितोऽनुरूपः पतिः अत्राऽस्येव रुक्मिण्येवाऽर्हत्येब असावेवमैषमा एव समुचित एवेति षडवधारणानि ॥ ३७ ॥ नोऽस्माभिः किञ्चित्सुचरितं स्वनुष्ठितं यद्यस्माकं प्राचीनं पुण्यमस्तीत्यर्थः । तेन सुचरितेन तुष्टः प्रीताखिलोककृत् ब्रह्मा वैदर्भ्याः पाणिमच्युतो गृहात्वित्यनुगृह्णात्विति ॥ ३८ ॥ एवं स्थिते तदा भैष्मी कन्या भटैर्गुणां सती अन्तःपुरादम्बिकागृहं प्रति भवान्याः पादपङ्कजं द्रष्टुं पद्भ्यामेव निर्जगाम कथम्भूता सा रुक्मिणी ? मुकुन्दपदाम्बुजं सम्यग् ध्यायन्ती ॥ ३९–४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अस्यैव नापरस्य भार्य्यैव नतु भोग्या दासी रुक्मिण्येव नापरा भवितुमर्हत्येव नतु नार्हति । असावेवनान्यः भैष्म्या एव नापरस्याः सम्यगेवोचितः नत्वीषदप्यनुचित इति सप्तावधारणानि तत्रैकस्मिन् व्यतिरेकप्रदर्शनमुपलक्षणार्थं नापरेति अत्र वक्तृबाहुल्याद्वाक्यबाहुल्यमतः सप्तानामेव वाक्यनामेकत्र योजनमिदं ज्ञेयम् अत्र चास्यैव भार्य्याभवितुं रुक्मिण्यर्हति नापरस्येत्येके वदन्ति स्म अस्य भार्य्यैव भवितुं रुक्मिण्यर्हतीत्यन्ये अस्य भार्या भवितुं रुक्मिण्येवार्हति नापरेत्यपरेः एवमन्यान्यपि चत्वारि वाक्यान्यत एव वाक्यत्वस्याऽसम्भवान्न वाक्यभेददोषो ज्ञेयः । यदुक्तं 'सम्भवत्येकवाक्यत्वे वाक्यभेदो हि गौरवम्' इति ॥ ३७ ॥ यत् किञ्चित् सूचस्तिं सुकृतं चेदस्माकमस्ति तेन तुष्ट इति तत्तत् स्वस्य सुकृतमस्माभिरस्यै रुक्मिण्यै दत्तमिति भावः ॥ ३८ ॥

अत एव च एवं प्रेमकलया रुक्मिणीविषयकप्रेमप्रवृद्धया वद्धावशीभूता इत्यर्थः। 'कलामूले प्रवृद्धौ स्याच्छिल्पादवंशमात्रके' इति मेदिनी 'कलिवली कामधेनू च' इति कवयः ॥ ३९ ॥ स्वपुराद्भवान्या आलयपर्य्यन्तं नरम्रानेन सुखपालेनागत्य आलयाभ्यन्तरगतांश्चतुःपञ्चप्रकोष्टात् पद्भ्श्यामेव ययौ राजभटैर्भवान्यालयाद्बहिः सर्वदिक्षुः स्थितैः। जघ्निरे आहता वादिता इत्यर्थः ॥ ४०-४१ ॥

गूढार्थदीपिनी

अत्र पद्ये षडवधारणानि। अस्यैव रुक्मिण्येव अर्हत्येव असावेव भैष्म्या एव समुचित एवेति ॥ ३७ ॥ नोऽस्माकं **यत्** किञ्चित्सुकृतमस्ति तेन तुष्टः पाणिं गृह्णातु इत्येव नोऽस्माकम् उपर्यनुग्रहः ॥ ३८ ॥ कला भावना। गुप्ता सती ॥३९॥ **पद्भ्यामिति** युग्मम्। यतवाक् धृतमौना। मातृभिस्तत्तुल्याभिः। सन्नद्धैर्बद्धकवचैः ॥ ४०-४१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विदर्भपुरवासिन्यश्च वासिनश्च ते ॥ ३७ ॥ **भैष्म्याः** पतित्वं न परीक्षणीयं कृष्णस्य राज्ञो लवयापनेनेति स्वयं **कर्णेष्व**जपनित्याह। अस्यैवेति। अस्यैव कृष्णस्यैव रुक्मिणी भार्या भवितुमर्हति। अपरैतदितरा रमेतरेति यावत्। असावप्यनवद्यात्मा देहो यस्य सः। भैष्म्याः समुचितः पतिस्तत्प्रभृति जनवाक्ये जनार्दन इत्याभाणकं प्रसमार लोक इति ज्ञेयम् ॥ ३८ ॥ यत्किञ्चित्सुचरितं ज्ञानपूर्वकमाचरितं सत्कर्म न। किमप्यस्ति चेत्तेन त्रिलोककृत्पाणिमच्युत एतत्पाणिग्रहणार्थं सिद्धपाणिः पाणिमान् शिशुपालमच्युता येन स इति त्रिलोककृदित्यनेनान्वयः। तुष्टोऽनुगृह्णात्वनुग्रहं करोतु। किं तदनुग्रहणमिति प्रश्न उत्तरं **वैदर्भ्याः** पाणिं हस्तमच्युतो गृह्णातु। अपारसुकृतलभ्यं दर्शनमिति किञ्चिदिति न सरसमस्मदुत्तमापेक्षया किञ्चिदिति वचनं वा ॥ ३९ ॥ वदन्ति स्म स्मातीते। इत्यवदन् गुप्ता रक्षिता ॥ ४० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तेषां वाक्यमाह **अस्यैवेति**। कोऽपि कस्मैचित्प्रयच्छतु, भार्या त्वस्यैव भवितुमर्हति। अनेन स्वरूपयोग्यता निरूपिता। योग्यं योग्येन सम्बध्यत इति तेषामभिप्रायः। ननु दत्तेयमन्यस्मै, अन्या भगवते तथा सति देयेत्याशङ्कयाह **नापरेति**। अन्या तु न योग्यैव। न हि लक्ष्मीव्यतिरिक्ता भगवद्योग्या भवति। लोकश्च प्रमाणमिति। यथा दैवी वाक्, तथा वदति। अयमपि रुक्मिण्या एवार्हति। यतः **अनवद्यात्मा**। पुरुषोत्तमत्वात् निरवद्यरूपः। सा हि निर्दुष्टमेव पतिं मन्यते। भगवानीश्वरत्वेन सर्वेषामेवोचितः, पतित्वेन त्वस्या एवोचितः। यत इयं भक्तिप्रधाना ॥ ३७ ॥ एवं वाचनिकमुक्त्वा बाधकमत्र प्रवृत्तमित्याशङ्कय तन्निवारणार्थं भगवन्तं प्रार्थयन्ति **किञ्चिदिति**। यद्यस्माकं किञ्चित्सुचरितमस्ति, तेनादौ भगवान् तुष्टो भवतु। ततस्त्रिलोककर्ता स एवेति। अन्येषामपेक्षाभावात् स्वयमेवानुगृह्णात्वस्मान्। अनुग्रहानन्तरं यत्कर्तव्यं तदाहुः **गृह्णातु वैदर्भ्याः पाणिमिति**। अत्र एवमेवेति निर्बन्धहेसुमाह **अच्युत** इति। आदौ भर्ता स्वरूपती धर्मतश्च्युतिरहितौ मृग्यते, तथा भोगेऽपि। एवं तेषां प्रेमातिशयमुक्त्वा सर्वसम्मतौ मातुरपि सम्मतिर्जातेत्यभिप्रायेणोपसंहरति। **एवं प्रेमकलाबद्धाः** नानाविधस्नेहप्रकारैर्वशीकृताः वदन्ति। **स्मेति** प्रसिद्धिः प्रमाणत्वेनोक्ता। पुरवासित्वान्न मुखमुद्रणं केनापि शक्यम्। एवं सर्वामेव हरणे संभृतिमुक्त्वा पूजार्थं तस्या बहिर्निर्गमनमाह **कन्या चेति**। यथा पुरवासिभिः स्वसर्वकर्मसमर्पणेन रुक्मिणीविवाहार्थं भगवान् प्रार्थितः, एवं रुक्मिण्यपि भगवान् गृह्णात्विति महादेवं प्रार्थयितुं निर्गतेति चकारार्थः। **अन्तःपुरादिति**। गुप्तस्थानात् प्रकटस्थाने निर्गता, यथा बन्धुपीडामकृत्वा भगवान् विश्रामतया गृह्णाति। प्रकर्षेणागादिति मनः सन्तोषः प्रदर्शितः। **भटैर्गुप्तेति**। यथा तावदन्यो न स्पृशति। **अम्बिकालयमिति**। स्त्री देवता, गृहे स्त्रिय एवाध्यक्षा इति, तत्र पुरुषसम्बन्धाभावो निरूपितः। अम्बिकापदेन मातृत्वं चोक्तम् ॥३९॥ रथस्थाया ग्रहणं रथान्तरे स्थितस्य दुष्करं भवतीति पद्भ्यामेव निर्गतेत्याह **पद्भ्यामिति**। **भवान्याः पादपल्लवमिति**। लोके तद्भक्तत्वं स्वस्य ख्यापयति। अभिप्रैतार्थस्त्वन्य एव। तमेवान्तर्गतमाह **सा चानुध्यायतीति**। तत्सम्बन्धिन्यः **स्त्रियः**। सा च मुकुन्दचरणाम्बुजमेव अनुध्यायती जाता। मुकुन्दस्य मोक्षदातुरेव चरणाम्बुजम्। अनेन विशेषतो भगवदाकाङ्क्षायां हेतुरुक्तः। पितृगृहेऽपि बन्धनम्, अन्यत्रापि अवरोध एव स्थितिरिति मुकुन्दावरोधस्य मोक्षरूपत्वात्तन्न हेयम् ॥ ४० ॥

श्रीसुबोधिनी-सारः

सर्वेषामैकमत्यात् गूढा चेयं सरस्वतीतिवत् तथा भाव्यमित्याह। अस्यैवेत्येकस्मिन् निर्द्धारणमन्यत्रापि योज्यं सर्वं वाक्यं सावधारणमित्युक्तेः। तथा चायमर्थः। अस्य श्रीकृष्णस्यैव भार्या भवितुमर्हति रुक्मिण्येव नाऽपरा अर्हत्येव नानर्हा अनवद्यात्मा शुद्धसत्त्वमूर्त्तिरसौ एव नान्यः भैष्म्या एव नान्यस्याः समुचितो योग्यः पतिरेव नानुचितः ॥ ३७ ॥ नोऽस्माभिः किंचित्सुचरितं सुकृतादि कृतं तेन पुण्यादिना त्रिलोककृत् ब्रह्मा यदि तुष्टः प्रसन्नस्तदा वैदर्भ्याः रुक्मिण्याः पाणिं हस्तमच्युतो

गृह्णातु इत्यनुगृह्णातु कृपां कुरुताम् ॥ ३८ ॥ एवं प्रेम्णः कला लेशस्तेन संबद्धाः पुरवासिनो वदंति स्म ऊचुः । भटैः शूरैर्गुप्ताऽऽवृता कन्या रुक्मिणी अंतःपुरादवरोधात् अंबिकास्थानं प्रागात् प्रचलति स्म ॥ ३९ ॥ पद्भ्यां पादाभ्यां श्रीकृष्णचरणारविंदं सम्यगनुध्यायती संचितयंती सती भवान्याः पादपल्लवं द्रष्टुं विनिर्ययौ निर्जगाम ॥ ४० ॥

विवरणटिप्पणी

अस्यैवेत्यत्र । **इयं भक्तिप्रधाने**ति । भीष्मकस्य महादेवत्वेन भक्तिप्रधानत्वाद्भैष्म्या अपि तथात्व मित्यर्थः । **पद्भ्यां वितिर्यया**वित्यत्र । **अन्य एवे**ति । मुकुन्दचरणाम्बुजदर्शनमेवेत्यर्थः। **आहे**ति। ध्यानकथनेनेति शेषः। तद्ध्यानकथनेन तदर्शनस्यान्तरभिप्रेतत्वमुक्तमित्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

एवं दृष्ट्वा यदूचुस्तदाह-अस्यैवेति । रुक्मिण्येवास्य कृष्णस्य भार्या भवितुमर्हति, सौन्दर्यसौशील्यादिगुणपूर्णत्वात्। अपरा कन्या त्वस्य भार्या भवितु नार्हति, एवं विधगुणहीनत्वात् । असौ श्रीकृष्णोऽपि भैष्म्याः रुक्मिण्याः समुचितो योग्य एव पतिः । तत्र हेतुमाह—अनवद्यात्मेति । अनवद्यः कामक्रोधादिदोषरहितः आत्मा यस्य ॥ ३७ ॥ प्रेमवशात् स्वसुकृतसमर्पणेन भगवत्सम्बन्धं प्रार्थयन्ते—किञ्चिदिति । नोऽस्माकं यत्किञ्चित् सुचरितं पुण्यमस्ति तेन तुष्टः प्रीतः त्रिलोककृत् भगवाननुगृह्णातु। ‘कोसौ अनुग्रहोऽपेक्षितः ?’ तत्राहुः—**वैदर्भ्याः** पाणिमच्युतः श्रीकृष्ण एव गृह्णात्विति ॥ ३८ ॥ एवमिति स्पष्टम् ॥ ३९ ॥ तस्या गमनप्रकारमाह—पद्भ्यामिति ॥ ४० ॥

अन्वितार्थप्रकाशिका

तद्वचांस्याह—अस्यैवेति । रुक्मिण्येवास्य कृष्णस्य भार्या भवितुमर्हति । सौन्दर्यसौशील्यादिगुणपूर्णत्वात् । अपरा कन्या त्वस्य भार्या भवितु नार्हति । एवंविधगुणहीनत्वात् । अनवद्यात्मा निर्दूषणगुणपूर्णः इदं रुक्मिण्या अपि विशेषणम् । अपिरेवार्थे । असौ श्रीकृष्ण एव भैष्म्याः समुचितो योग्यः पतिः । वस्तुतोऽत्र षडवधारणघटितानां षण्णां वाक्यानां तन्त्रेण द्विरुच्चारणम्। नापरेत्येवमेकत्रैवान्यव्यावृत्तिप्रदर्शनमुपलक्षणार्थम् । तथा च रुक्मिणी चेद्भार्या भवितुमर्हति तदाऽस्यैव नान्यस्य । अस्य भार्या भवितुमर्हा रुक्मिण्येब नापरा । अस्य सा भार्या भवितुमर्हत्येव न नार्हति । अपिरेवार्थे । भैष्म्याः समुचितः षतिरसावेव नापरः असौ समुचितः पतिर्भैष्म्या एव नापरस्याः । भैष्म्या असौ पतिरुचित एव न नोचितः इति षट्वाक्यानि । तत्र प्रथमे वाक्ये रुक्मिणीनिष्ठं भार्याभवनार्हत्वमुद्दिश्य अस्यैवेतीदमीयत्वं विधीयते । एवमन्येष्वप्युद्देश्यविधेयभेदो बोध्यः । न चैवं वाक्यभेदो दोषः ग्रहं सम्मार्ष्टीतिवददोषात् । तत्र हि ग्रहं प्रधानमुद्दिश्य गुणभूतः सन्मार्गसंस्कारो विधीयते । अतः प्रतिप्रधानं गुणावृत्तिरिति न्यायेन सर्वग्रहान् प्रति सन्मार्ग आवृत्त्याऽनुष्ठेयः इत्येकत्वमविवक्षितं सम्पद्यते । ततश्च प्रतिग्रहं सन्मार्गमनुष्ठापयद्वाक्यमावर्तते। एबमत्रोद्देश्यानां भेदात्तत्र तत्र नियमविधानाय एवादिपदानामावृत्तिर्न दोषाय । चक्रवर्ती त्वत्र वक्तृबाहुल्याद्वाक्यबाहुल्यमत एकवाक्यत्वासंभवादेव वाक्यभेदो न दोषायेत्याह । किञ्चिदिति ॥ नोऽस्माकं यत्किञ्चित्सुचरितं पुण्यमस्ति तेन तुष्टः प्रीतः त्रिलोककृत् भगवाननुगृह्णातु प्रसीदतु । तेन च **वैदर्भ्याः** पाणिमच्युतः श्रीकृष्ण एव गृह्णातु । स्वसुकृतमस्माभी रुक्मिण्यै दत्तमिति भावः ॥ ३७-३८ ॥ एवमिति ॥ प्रेम्णः कलया उत्कर्षेण ‘कला मूले प्रवृद्धौ स्यात्’ इति मेदिनी । बृद्धाः पुरौकसः एवं वदन्ति स्म । कन्या च भटैर्गुप्ता सती अन्तःपुरान्निर्गत्य अम्बिकालयं प्रागात् ॥ ३९ ॥ पद्भ्यामिति द्वयम् ॥ हे राजन् । यतवाक् गृहीतमौना मातृभिः मात्रा तत्तुल्याभिः सखीभिश्च परिवारिता उद्यतानि आयुधानि यैस्तैः सन्नद्धैः बद्धकवचैरायतैः शूरैः राजभटैः कृष्णभिया रुक्मिनियुक्तैः गुप्ता सा मुकुन्दचरणाम्बुजं सम्यक् ध्यायती । नुमभाव आर्षः । भवान्याः पादपल्लवं द्रष्टुं पद्भ्यां विनिर्ययौ । स्वपुराद्भवान्यालयपर्यन्तं नरयानेन गत्वा आलयाभ्यन्तरगतांश्चतुष्पञ्चप्रकोष्ठान् पद्भ्यां ययौ ॥ ४०-११ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अपरानयोग्या अनवद्यात्मानिर्दोषमूर्त्तिः ॥ ३७ ॥ नोऽस्माकं कुंदनपुरवासिनां ॥३८॥ प्रेम्णः कलया अंशेनबद्धाः ॥३९॥ भवान्याः शिवायाः ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अस्यैवेति ॥ अस्य श्रीकृष्णस्य, रुक्मिणी एव, भार्या भवितु, अर्हति । अपरा न । भैष्म्या रुक्मिण्याः अपि, अनवद्यात्मा निर्दोषतनुः, असौ कृष्णः, समुचितो योग्यः, पतिः भवितं, अर्हति । अपरः न । अत्र अस्यैव रुक्मिण्येव अर्हत्येव असावेव भैष्म्या एव समुचित एव इति षडवधारणानि । तत्रैकस्मिन् व्यतिरेकप्रदर्शनमुपलक्षणार्थम् । तच्च नापरेति । न चैवं वाक्यभेददोषः । अनूद्यविधेयभेदेन विभिन्नानामेव वाक्यानां सहप्रयोगात् गृहं संमार्ष्टीत्यादिवत् ॥ ३७ ॥ किंचिदिति ॥ नोऽस्माभिः,

किंचित् सुचरितं सुकृतं, यद्यदि, स्वनुष्ठितं स्यादिति शेषः। आस्माकीनं प्राचीनं सुकृतं किंचिद्भवेद्यदि तर्हीत्यर्थः। तेन सुचरितेन, तुष्टः प्रीतः, त्रिलोककृत् ब्रह्मा, वैदर्म्या रुक्मिण्याः, पाणिं, अच्युतः श्रीकृष्णः, गृह्णातु इति अनुगृह्णात्वनुग्रहं करोतु ॥ ३८ ॥ एवमिति ॥ एवमित्थं प्रेमकलाबद्धाः प्रेमाश्रुगद्गदस्वराः सन्तः, पुरौकसः पुरवासिनो जनाः, वदन्ति स्म ऊचुः। एवं जनोक्तिं वर्णयित्वा मुनिः प्रकृतं वदति। तदा, कन्या च रुक्मिण्यपि, अन्तःपुरात् सकाशात् भटैर्योधैः, गुप्ता सती, अम्बिकालयं प्रागात् ॥ ३९ ॥ तस्या आगमनं विशिनष्टि द्वाभ्याम् ॥ पद्भ्यामिति ॥ किं च, सा रुक्मिणी, मुकुन्दचरणाम्बुजं, सम्यक् अनुध्यायती सती, भवान्या अम्बिकायाः, पादपङ्कजं, द्रष्टुं पद्भ्यां, विनिर्ययौ ॥ ४० ॥

कृष्णप्रिया

वे आपस में इस प्रकार बातचीत करते थे—रुक्मिणी इन्हीं की अर्द्धाङ्गीनी होने के योग्य है, और ये परम पवित्र मूर्ति श्यामसुन्दर रुक्मिणी के ही योग्य पति हैं। दूसरी कोई इनकी पत्नी होने के योग्य नहीं है ॥ ३७ ॥ यदि हमने अपने पूर्वजन्म या इस जन्म में कुछ भी सत्कर्म किया हो, तो त्रिलोक विधाता भगवान् हम पर प्रसन्न हो और ऐसी कृपा करें कि श्यामसुन्दर श्रीकृष्ण ही विदर्भराजकुमारी रुक्मिणीजी का पाणिग्रहण करें ॥ ३८ ॥ परीक्षित् ! जिस समय प्रेम-परवश होकर पुरवासी लोग परस्पर इस प्रकार बातचीत कर रहे थे, उसी समय रुक्मिणी जी अन्तःपुर से निकलकर देवी जी के मन्दिर के लिए चली। बहुत से सैनिक उनकी रक्षा में नियुक्त थे ॥ ३९ ॥ वे प्रेममूर्ति श्रीकृष्णचन्द्र के चरणकमलो का चिन्तन करती हुई भगवती भवानी के पादपल्लवों का दर्शन करने के लिये पैदल ही चली ॥ ४० ॥

यतवाङ्मातृभिः सार्धं सखीभिः परिवारिता ।
[1]गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः । मृदङ्गशङ्खपणवास्तूर्यभेर्यश्च जघ्निरे ॥ ४१ ॥
नानोपहारबलिभिर्वारमुख्याः सहस्रशः । स्रग्गन्धवस्त्राभरणैर्द्विजपत्न्यः स्वलंकृताः ॥ ४२ ॥
गायन्तश्च स्तुवन्तश्च गायका वाद्यवादकाः । परिवार्य वधूं जग्मुः सूतमागधवन्दिनः ॥ ४३ ॥
आसाद्य [2]देवीसदनं धौतपादकराम्बुजा । उपस्पृश्य शुचिः शान्ता प्रविवेशाम्बिकान्तिकम् ॥४४॥

कर्दमक्षमा

अन्वयः—यत वाक् , सखीभिः, परिवारिता, शूरैः, सन्नद्धैः, उद्यतायुधैः, राजभटैः, गुप्ता, मातृभिः, सार्धम्, पद्भ्याम्, विनिर्ययौ ॥ ४१ ॥ मृदङ्गशंखपणवाः च तूर्य भेर्यः, जघ्निरे, नानोपहारबलिभिः, सहस्रशः, वारमुख्याः, स्रग्गन्धवस्याभरणैः, स्वलंकृताः, वारपत्न्यः, गायन्तः, च, स्तुवन्तः, च, गायकाः, वाद्यवादकाः, सूतमागधबन्दिनः, वधूम्, परिवार्य, जग्मुः ॥४२–४३॥ देवीसदनम्, आसाद्य, धौतपादकराम्बुजा, उपस्पृश्य, शुचिः, शान्ता, अम्बिकालयम्, प्रविवेश ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च। मृदंगेत्यादि। जघ्निरे आहताः। वादिता इत्यर्थः ॥ ४१ ॥ वारमुख्या गणिकोत्तमाः ॥ ४२–४३ ॥ उपस्पृश्याचम्य ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतवाग्धृतमौना। यात्रोत्सवमाह—अपि चेति। इत्यर्थ इति–आहता वादिताः, वादनमेव तेषां हननं, विना ताडनं वादनाऽसंभवादिति भावः। भक्तावनुध्याने च लक्षणम्–यतवागिति। इयमेव निर्याणे विशब्दस्यार्थव्यक्तिः। तस्यास्तादृशावरणे माहात्म्येन दुर्लभतामुत्कंठिताञ्च विशेषतो व्यञ्जयन् वर्णयिष्यमाणमाकीस्मर्कश्रीकृष्णलाभं रसयितुं बीजं वपति–मातृभिरित्यादिभिः। मातृभिर्मात्रा तुल्याभिः। राजभटैः श्रीकृष्णभिया रुक्मिनियुक्तैः। अत एव शूरैः। किञ्च–सन्नद्धैर्गृहीतकवचादिभिस्तथोद्यताबुधैः। विशेषणानामेतेषां यथोत्तरं गोपनप्रकारे श्रैष्ठ्यम्। मृदंगेत्यर्द्धकम्। मृदंगा मुरजाः, पणवा अन्तस्तन्त्रीकाः, तूर्याः, 'तुर' इति प्रसिद्धाः। एते आनद्धभेदाः। भेर्यश्च सुषिरभेदा आनद्धभेदाश्चेति द्विविधाः ॥ ४१ ॥ नानेति युग्मकम्। नानाविधैरुपहारैरुपढौकनैर्बलिभिश्च नियतपूजाद्रव्यैः सह गायका गायन्तः, सूतादयश्च स्तुवंत इति विवेकः। वाद्यानां वादकाः वाद्यानि वादयन्त इति शेषः ॥ ४२ ॥ स्तुवंतो देवीम् ॥ ४३ ॥ धौतपादकरांबुजा प्रक्षालितहस्तपादा। पूर्ववद्भवानीभक्तिं विवृणोति—आसाद्येति षड्भिः। देवसदनं देव्याः प्रासादम्। महदालयांतर्गतमणिमण्डपमिति विश्वनाथः। "कुक्कुट्यादीनामण्डादिषु" इति पुंवद्भावात्, भवादीनामपि तत्र स्थितत्वेनैकशेषत्वाद्वा। शाँता समाहितचित्ता ॥ ४४ ॥

---

[1] वेत्र झर्झरहतैश्च वृद्धैः कञ्चुकिभिस्तथा। [2] देव–वीर. विज.।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भक्तावनुध्याने च लक्षणं यतवागिति, इयमेव च मिश्र्रणे विशब्दस्यार्थव्यक्ति। तस्यास्तादृशावरणमाहात्म्येन दुर्लभतामुत्कण्ठताञ्च विशेषतो व्यञ्जयन् वर्णयिष्यमाणमाकस्मिकश्रीकृष्णलाभं रसयितुं बीजं वपति—मातृभिरित्यादिभिर्मातृभिरिति। मात्रा तुल्याभिः राजभटैः श्रीकृष्णश्रिया रुक्मिनियुक्तैः अत एव शूरैः किञ्च, सन्नद्धै र्गृहीतकवचादिभिस्तथैव उद्यतायुधैः विशेषणानामेतेषां यथोत्तरं गोपनप्रकारे श्रैष्ठ्यम्। मृतङ्गेत्यर्द्धकं मृदङ्गाः मुरजाः पणवा अन्तस्तन्त्रीकाः तूर्य्याः तूर इति प्रसिद्धाः एते आनद्धभेदाः भेर्य्यश्च सुषिरभेदा आनद्धभेदाश्चेति द्विविधाः ॥ ४१ ॥ नानेति युग्मकम्। नानाविधैरुपहारैरुपढौकनैः बलिभिश्च नियतपूजाद्रव्यैः सह गायकाः गायन्तः सूतादयश्च स्तुवन्तः इति विवेचनीयं वाद्यानां वादका वाद्यानि वादयन्त इति शेषः॥४२-४३॥ पूर्ववद्भवातीभक्ति विवृणोति—आसाद्येत्यादिषड्भिः। देवसदनं देव्याः प्रासादं कुकुट्यादीनामण्डादिषु पुम्वद्भावात् भवादीनामपि तत्र स्थितत्त्वेनैकशेषत्वाद्वा शान्ता समाहितचित्ता ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यतवाग् गृहीतमौना, मातृभिरिति बहुत्वं भीष्मकस्य बहुलपत्नीकत्वात्, किंवा मातृष्वसृपितुः स्वस्रादीनां तन्मातृतुल्यानां संग्रहात्, राजभटै राज्ञो भीष्मकस्य भटैर्योधैः, राज-शब्देन राज्ञामयमेव स्वभाव इति बोध्यते; यद्वा, श्रीकृष्णभीत्या राजपुत्रेण रुक्मिणा नियुक्तैरिति ज्ञेयम्। अतएव शूरैर्युद्धसमर्थैः; किञ्च, सन्नद्धै र्गृहीतकवचादियुद्धपरिकरैः। किञ्च, उद्यतायुधैः; विशेषणानामेषां यथोत्तरं गोपनप्रकारे श्रेष्ठ्यम्। मृदंगा मुरजाः, पणवा अन्तस्तन्त्रिकाः, तूर्य्याः 'तूर' इति प्रसिद्धाः; एते आनद्धभेदाः, भेर्य्यश्च शुषिरभेदा आनद्धभेदाश्चेति द्विविधाः ॥ ४१ ॥ नानाविधैरुपहारैः फलादिभिर्वलिभिश्च गन्धपुष्पादिनियतपूजाद्रव्यैः सह, जग्मुरिति परेण सर्व्वेषामन्वयः। स्रगादिभिः सुष्ठु अलंकृताः, स्रगादीनामलंकरणे यथोत्तरं श्रेष्ठ्यम् ॥ ४२ ॥ गायका गायन्तः, सूतादयश्च स्तुवन्त इति विवेचनीयम्, वाद्यानां वादकाश्च वाद्यानि वादयन्त इत्यर्थः। यद्वा, गायकादयः सर्व्वेऽपि गायन्तः स्तुवन्तश्च, तत्र वाद्येत्यनेन वादकानां वाद्यमपि सूचितम् ॥ ४३ ॥ देवसदनं देव्याः प्रासादम्; 'देव्याः' इति पाठः स्पष्टः। शान्ता समाहितचित्ता ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उद्यतान्युद्धृतानि आयुधानि यैस्तैः सन्नद्धै रायतैः शूरैः राजभटैर्गुप्ता तदा मृदङ्गादयो जघ्निरे ताडिता (वादिता) इत्यर्थः ॥ ४१ ॥ नानाविधैरुपहारैर्नैवेद्यैर्बलिभिः पूजासाधनैश्च सह सुष्ठ्वलङ्कृताः द्विजपत्न्यः गणिकोत्तमाश्च ॥ ४२ ॥ तथा गायका गायन्तः स्तुवन्तः सूतादयः वाद्यादीनां तूर्य्यादीनां वादका वादयन्तश्चेति शेषः। वधूं कन्यां परिवार्य्य परिवेष्ट्य जग्मुः॥४३॥ आसाद्येति देवसदनमम्बिकापतिगृहमुपगम्य तत्र धौते प्रक्षालिते पादाम्बुजे कराम्बुजे च यस्याः सा उपस्पृश्याऽऽचम्याऽत एव शुचिः शान्ता समाहिताचित्ता चाम्बिकागृहं प्रविवेश ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

वेत्राणि झर्झराश्च राजाज्ञासूचकयष्टयश्च हस्तेषु येषां ते तथा तैः कञ्चुकिभिः दौरवारिकै छन्नलिङ्गैः। धौतपादकराम्बुजा प्रक्षालितपादहस्तपद्मा ॥ ४२–४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देवसदनं देव्या मन्दिरं बृहदालयान्तर्गतं मणिमण्डपं कुक्कुट्यादीनामण्डादिषु पुंवद्भाव इति पुंवत्त्वम् उपस्पृश्य आचम्य ॥ ४४ ॥

गूढार्थदीपिनी

मृदङ्गेत्यदर्धम् ॥ ४२ ॥ नानेति युग्मम्। वारमुख्या गणिकोत्तमाः। उपस्पृश्य आचम्य ॥ ४३–४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उपस्पृश्याऽऽचम्य ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भवानी हरतरुणी द्रष्टुमित्युक्त्या बहिरेवं नटनमिति सूचयति। मुकुन्दचरणाम्बुजं ध्यायती यतवाक् वाङ्नियमवती मातृभिः सार्धं मातृभिरिति बहुवचनेन प्रसवित्र्यपि पामरदृष्ट्या न सावित्रीति ध्वन्यत इति मन्तव्यम्। सखीभिश्च परिवारिता परिपूर्णवाः कलशादौ यासां तास्ताभिरिता युक्तेति वा। यद्वक्ष्यति धौतपाणिकराम्बुजेति। तदुपयुक्तमिति युक्तमेव

व्याकरणम् ॥४१–४२॥ वेत्राणि वेतसविशेषाः झर्झराश्च वाद्यभाण्डानि च पाणिषु येषां ते तैः। स झर्झरो वाद्यभाण्डे नदान्तर इति विश्वः। कञ्चुकिभिः सोविदल्लैर्मृदङ्गशङ्खपणवा येषां ते तांस्तांश्च जघ्निरेऽताडयन्। मृदङ्गाद्या **भेर्यश्च** जघ्निरेऽवाद्यन्तेति केचित् ॥ ४३ ॥ वारमुख्या वेश्याश्रेष्ठाः ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं कायमनोव्यापारौ निरूप्य वाचि व्यापाराभावमाह **यतवा**गिति। **मातृभिः सार्ध**मिति। भगवतो मनसि यथा अनौचित्यं न भवति, तदर्थमेवं कृतवती। सखीभिश्च परिवारिता। अनुमत्यर्थं हरणे पश्चात्तापाभावार्थं शोभार्थं च। बहिर्भटैर्गुप्ता। शूरैरित्यन्तःसामर्थ्यम्। **सन्नद्धैरुद्यतायुधै**रिति। स्वरक्षापरपीडार्थं साधनसम्पत्तिः। एवमावरणचतुष्टयं तस्या निरूपितम्। सर्वतो दोषाभावाय ॥ ४१ ॥ ततो मङ्गलवाद्यानामपि वादनम्, शुभनिमित्तं शकुनमपि जातमित्याह। **नानोपहारबलिभि**रिति। वारमुख्याश्च परिवार्य वधूं जग्मुरिति सम्बन्धः। नानोपहाराः भवान्यर्थे फलादयः, बलिः पूजासाधनानि, एतानि सङ्गे गतानीति पृथक् सहार्थतृतीयया ज्ञातव्यम्। वारमुख्यास्तु भिन्नाः, वराणां समूहो वारम्, वारं मुख्यं यासामिति। प्रत्यहं बहवो वराः वेश्यानामेव भवन्तीति। **सहस्रश** इति तासामुत्सवो निरूपितः। नित्यनूतनो भगवान् द्रष्टव्य इति। ब्राह्मणस्त्रियोऽप्याचारादाशीर्दानार्थं भगवदिच्छया सहैव गताः। विशेषतः पूजा तासां कर्तव्येति पूर्वमेव तासां पूजां निरूपयति **स्रग्गन्धवस्त्राभरणै**रिति। चतुर्विधैरप्यलङ्कृताः। अन्योऽपि महानुत्सवो जात इत्याह **वधूं परिवार्ये**ति। दर्शनार्थं लाभार्थं च गमनमुक्तम्। सूतादयो विद्योपजीविन उक्ताः ॥ ४३ ॥ ततो भगवान्मर्यादां स्थापयितुं पूजनन्तरमेव नेष्यामीति तूष्णीं स्थितः, तदा सा देवसदनमासाद्य निकटे गत्वा, प्रक्षालितपाणिपादा आचम्य, अन्तर्बहिः शुद्धियुक्ता सती। उद्वेगादीनां सम्भावितत्वात् तन्निषेधार्थमाह **शान्ते**ति। अन्तःशान्तियुक्ता फलं प्राप्नोतीति अम्बिकान्तिकं प्रविवेश पूजार्थम्। अत एव भागवते लौकिकसौन्दर्यकथनार्थं भाषाभेदा निरूपिताः ॥ ४४ ॥

विवरण टिप्पणी

यतवागित्यत्र। **आवरणचतुष्टय**मिति। भटत्वं शूरत्वं सन्नद्धत्वमुद्यतायुधत्वं तेषां निरूपितम्। तथाच चतुर्विधैः कृतान्यावरणानि चत्वारीत्यर्थः। **उपस्पृश्ये**त्यत्र। **अत एवे**ति। यतः समाधिभाषायां फलमन्तःशान्त्यैव, नतु लौकिकसौन्दर्यादिना। अत एव तत्कथनार्थं तत्र तत्र भिन्नैव भाषा निरूपितेत्यर्थः।

श्रीसुबोधिनीसारः

यतवाङ् मौनव्रता मातृभिः सार्धं सह सखीभिः परिवेष्टिता शूरै राजपुरुषैर्गुप्ता रक्षिता सन्नद्धैः कवचितैर्धृतशस्त्रैः मृदंगादयो ववादिरे ॥ ४१ ॥ नानाप्रकारैरुपहारैर्बलिभिः स्रग्भिर्मालाभिर्गंधैर्वस्त्रैराभरणैस्सह द्विजपत्न्यो विप्रस्त्रियः सुष्ठु अलंकृता मंडिताः वधूं रुक्मिणीं परिवार्य जग्मुः गायका गायंतो वाद्यवादकाः स्तुवंतः सूतादयो जग्मुः ॥ ४२–४३ ॥ देव्याः सदनं स्थानमासाद्य धौतपादहस्तपद्मा उपस्पृश्याचम्य शुचिः पवित्रा शांता अंबिकाया अंतिकं समीपं प्रविवेश जगाम ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यतवाक् गृहीतमौना, मातृभिः सखीभिश्च परिवारिता, उद्यतानि उद्धृतानि आयुधानि यैस्तैः सन्नद्धैः बद्धकवचैरायत्तैः शूरैः राजभटैर्गुप्ता ॥ ४१ ॥ तदा मृदङ्गादयो जघ्निरे वादिता जाताः, नानाविधैरुपहारैर्नैवेद्यैर्बलिभिरन्यैश्च पूजासाधनैः सह तानि गृहीत्वा वधूं कन्यां परिवार्य आवृत्य भृत्यादयो जग्मुरिति सार्द्धद्वयोरन्वयः। एवमेव प्रथमान्तानां सर्वेषां पदानामन्वयो बोध्यः। स्वलङ्कृता वारमुख्याः वराणां समूहो वारं तदेव मुख्यं जीविकासाधनं यासां ताः गणिकोत्तमाः सहस्रशः ॥ ४२ ॥ स्रगादिभिः स्वलङ्कृता द्विजपत्न्यः, गायकाः गायन्तः, वाद्यानां तूर्यादीनां वादकास्तान् वादयन्तश्चेति शेषः, सूतादयः स्तुवन्तश्च ॥ ४३ ॥ देवस्य महादेवस्य सदनं मन्दिरमासाद्य आगत्य तत्र धौते प्रक्षालिते पादाम्बुजे कराम्बुजे च यस्याः सा उपस्पृश्य आचम्य अत एव शुचिः शान्ता समाहितचित्ता चाम्बिकागृहं प्रविवेश ॥ ४४ ॥

अन्वितार्थप्रकाशिका

मृदङ्गेत्यर्द्धम् ॥ मृदङ्गादयो जघ्निरे वादिताः। नानेति द्वयम् ॥ नानाविधैरुपहारैर्नैवेद्यैर्बलिभिरन्यैश्च पूजासाधनैः सह तानि गृहीत्वेत्यर्थः। सहस्रशो वारमुख्याः सत्कृता वेश्याः तथा स्रगन्धवस्त्राभरणैः स्वलङ्कृता द्विजपत्न्यः गायकाः गायन्तः वाद्यानां तूर्यादीनाँ वादकास्तान् वादयन्तश्चेति शेषः। सूतमागधवन्दिनः स्तुवन्तश्च वधूं कन्यां परिवार्य आवृत्य जग्मुः ॥४२-४३॥ आसाद्येति ॥ देव्याः सदनं मन्दिरम्। देवसदनमिति पाठे कुक्कुटाण्डवत् पुंवद्भावः। यद्वा। 'भवपत्नीं भवान्तिकाम्' इत्युक्तेः। देव्याः देवानां च सदनमासाद्य आगत्य तत्र धौते प्रक्षालिते पादाम्बुजे कराम्बुजे च यस्याः सा उपस्पृश्याचम्य अत एव शुचिः शान्ता समाहितचित्ता चाम्बिकान्तिकं प्रविवेश ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मातृभिरुपमातृभिः सन्नद्धैर्धृतवर्मभिः जघ्निरे वादिता इत्यर्थः ॥ ४१ ॥ वारमुख्या गणिकोत्तमाः । नानोपहारबलिभिरुपलक्षिता द्विजपत्न्यः ॥ ४२ ॥ परिवार्य आवृत्य ॥ ४३ ॥ उपस्पृश्य आचमनं कृत्वा ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यतेति । यतवाक् मौनिनी रुक्मिणी, मातृभिः सार्द्धं सहवर्त्तमाना, सखीभिः परिवारिता, उद्यतान्युद्धृतान्यायुधानि यैस्तैः, संनद्धै रायत्तैः, शूरैः, राजभटैः, गुप्ता सती, च, विनिर्ययौ, तदा मृदङ्गाश्च शङ्खाश्च पणवाश्च तूर्याणि च भेर्यश्च ताः, जघ्निरे । ताडिता इत्यर्थः ॥ ४१ ॥ नानेति । नाना ये उपहारा नैवेद्यानि च बलयः पूजासाधनानि च तैः, सहिताः सहस्रशः, वारमुख्याः वेश्याः, स्रजश्च गन्धाश्च वस्त्राणि च आभरणानि च तैः, स्वलंकृताः द्विजपत्न्यश्च ॥ ४२ ॥ गायन्त इति । गायन्तः गायकाः, स्तुवन्तः स्तावकाश्च, वाद्यवादनं कुर्वन्तः वाद्यवादकाश्च, सूतमागधबन्दिनः, वधूं कन्यां, परिवार्य परिवेष्ट्य, जग्मुः । 'सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । बन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः' इति द्वयोरेकसम्बन्धः ॥ ४३ ॥ आसाद्येति । रुक्मिणी, देवीसदनं देव्यालयं, आसाद्योपगम्य, तत्र धौतपादकराम्वुजा प्रक्षालितपादहस्तपद्मा सती, उपस्पृश्याचम्य, शुचिः, शुद्धा, शान्ता, समाहितचित्ता सती च, अम्बिकान्तिकमम्बिकागृहं, प्रविवेश ॥ ४४ ॥

कृष्णप्रिया

वे स्वयं मौन थीं और माताएँ तथा सखी-सहेलियाँ सब ओर से उन्हें घेरे हुए थीं । शूरवीर राजसैनिक हाथों में अस्त्र-शस्त्र उठाये, कवच पहने उनकी रक्षा कर रहे थे । उस समय मृदङ्ग, शङ्ख, ढोल, तुरही और भेरी आदि बाजे बज रहे थे ॥ ४१ ॥ बहुत-सी ब्राह्मणपत्नियाँ पुष्पमाला, चन्दन आदि सुगन्ध-द्रव्य और गहने-कपड़ों से सज-धजकर साथ-साथ चल रही थीं और अनेकों प्रकार के उपहार तथा पूजन आदि की सामग्री लेकर सहस्रों श्रेष्ठ वाराङ्गनाएँ भी साथ थीं ॥ ४२ ॥ गवैये गाते जाते थे, बाजेवाले बाजे बजाते चलते थे और सूत, मागध तथा वंदीजन दुलहिन के चारों ओर जय-जयकार करते—विरद बखानते जा रहे थे ॥ ४३ ॥ देवीजी के मन्दिर में पहुँचकर रुक्मिणीजी ने अपने कमल के सदृश्य सुकोमल हाथ-पैर धोये, आचमन किया; इसके बाद बाहर-भीतर से पवित्र एवं शान्तभाव से युक्त होकर अम्बिकादेवी के मन्दिर में प्रवेश किया ॥ ४४ ॥

तां वै प्रवयसो बालां विधिज्ञा विप्रयोषितः । भवानीं वन्दयाञ्चक्रुर्भवपत्नी भवान्विताम् ॥ ४५ ॥
नमस्ये त्वाम्बिकेऽभीक्ष्णं स्वसन्तानयुतां शिवाम् । भूयात् पतिर्मे भगवान् कृष्णस्तदनुमोदताम् ॥ ४६ ॥
[1]अद्भिर्गन्धाक्षतैर्धूपै[2]र्वासः[3] स्रङ्माल्यभूषणैः । नानोपहारबलिभिः प्रदीपावलिभिः पृथक् ॥ ४७ ॥
विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत् । लवणापूपताम्बूलकण्ठसूत्रफलेक्षुभिः ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—विधिज्ञाः, प्रवयसः, विप्रयोषितः, ताम्, बालाम्, वै, भवान्विताम्, भवपत्नीम्, भवानीम्, वन्दयाञ्चक्रुः ॥४५॥ अम्बिके ? स्वसन्तानयुताम्, शिवाम्, अभीक्ष्णम्, नमस्ये, भगवान्, कृष्णः, मे, पतिः, भूयात्, तद्, अनुमोदनम् ॥ ४६ ॥ अद्भिः, गन्धाक्षतैः, धूपैः, वासः, स्रक्-माल्य-भूषणैः, नानोपहारबलिभिः, प्रदीपाबलिभिः, भवान्विताम्, भवानीम्, समपूजयत्, तथा, पतिमतीः, विप्रस्त्रियः, तैः, वस्तुभिः, तथा, लवणापूपताम्बूलकण्ठसूत्रफलेक्षुभिः, समपूजयत् ॥ ४७–४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रवयसो वृद्धाः भवान्वितामिति भवस्योपसर्जनत्वं स्त्रीकर्मोचितमुक्तम् ॥ ४५ ॥ नमस्य इति । रुक्मिण्या तदैव दृष्टोऽयं मंत्रः । स्वसंतानयुतां गणेशादिसहिताम् । आत्मारामोऽसौ कथं त्वत्पतिर्भवेदिति चेदत आह । तदनुमोदतामिति । भवती श्रीकृष्ण एव वा ॥ ४६ ॥ वाशःस्रग्गंधादिभिरंबिकां समपूजयत् ॥ ४७ ॥ तथा विप्रस्त्रियोऽपि तैर्द्रव्यैर्लवणादिभिश्च समपूजयदिति ॥४८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तां रुक्मिणीम् । उपसर्जनत्वं गौणत्वम् । स्त्रीकर्मसु स्त्रीणामेव प्राधान्यमिति द्योतनायेति भावः विधिज्ञाः स्त्रीशास्त्रकुशलाः ॥ भवानी, भवपत्नीम्, भवस्य कामसहचरीम्, धर्मसहचरीमित्यर्थः । आद्ये पुंयोगे, द्वितीये यज्ञसंयोगे ङीष्विधानात् ।

---

[1] इति सम्प्रार्थयन्ती सा देवीं देवमुमां शिवाम् । पूजयामास विधिवत् द्विजपत्नी पुरस्कृता ॥

[2] दीपै–प्रा. पा. । [3] वस्त्र–विज. ।

विप्रयोषितः पुरोहितस्त्रियः । विधिज्ञाश्शास्त्रविधिज्ञाः । पौराणिकप्रणवोज्झितैर्मूलमंत्रैः श्रीभवान्यै पाद्यादीनि समर्पयामि नम इत्यादि पूजाविधिज्ञा रुक्मिण्यंतर्गताभिप्रायज्ञा वा । भवान्वितामिति–हे भवानि त्वं यथा भवपत्नी भवान्वितासि तथैव मामपि कृष्णपत्नीं कृष्णान्वितां कुर्विति ताभिः कृष्णमालोक्य 'किञ्चित्सुचरितं यन्नः' इति प्राक्प्रार्थितत्वादिति भावः ॥ ४५ ॥ तदैव पूजनावसर एव। दृष्टो ज्ञातः, न पूर्वं पठित इत्यर्थः । आदिना कार्तिकेयग्रहः । यद्वा—संतानपदं विस्तारपरम्, तेन नंदिभृंग्यादिग्रहः । अत्राशंकते–आत्मारामेति । तत् मत्पतिभवनम् । भवती त्वम् । अनुमोदत्तामंगीकुरुताम् । तवानुमोदनेन त्वया सह तदभेदाच्छ्रीकृष्णोऽवश्यं मे पतिर्भविष्यतीति भावः । तदुक्तं कौर्मे–'न मे नारायणाद्भेदो विद्यते हि विचारतः । तन्मयाहं परं ब्रह्म स विष्णुः परमेश्वरः ॥' इति । त्वदभिन्नत्वाद्वा कृष्ण एवानुमोदतामित्यर्थः । वंदनमंत्रस्तु—नमस्य इति । आम्बिके जगन्मातः । शिवामिति–शिवेन सह समाननामगुणत्वादिना भेदाभावात्तन्नाम्ना सोऽपि लभ्यत इति व्यक्तम् । ततस्तेन सहितामित्यर्थः । एवं योग्यतां निर्दिश्य प्रार्थयते—भूयादिति । भगवान् परमोद्ध्र्वपरमैश्वर्यमाधुर्यवान् । अत एव कृष्णः सर्वचित्ताकर्षकः । किमुत तन्निष्ठाया ममेत्यर्थः । स्वसंतानयुतामिति-गणेशोऽत्र मम विघ्नं खंडयत्विति भावः । तत्तत्र । भवतीत्यनुमोदतां स एव मत्पतिर्भवत्विति संमतिमात्रमत्र दत्ताम् । सिद्धप्रायत्वान्मनोरथस्येति भावः । यद्वा–त्वदर्चनप्रभावेण कृष्ण एवेत्यौत्कंठ्यविह्वलायास्तत्स्वीकारस्यापि नातिप्रतीतेः ॥ अद्भिर्जलैः ॥ अद्भिरिति युग्मकम् । अबादीनामक्रमोक्तिः श्रीकृष्णाविष्टत्वेन तस्या मुनेर्वा पूजाक्रमविस्मृतेः । स्रक् पौष्पी, माला रत्नमयी ॥ ४७ ॥ पतिमतीर्भर्तृमत्यः । लवणपदेन सलवणपाको ग्राह्यः, केवलस्य देवार्चनोपचारेष्वप्रसिद्धेः । अपूपो बहुच्छिद्रः पाकः । कंठसूत्रमुपवीतम्, हारः कंदविशेषो वा । तदुक्तम्—"पुष्पहारे रत्नहारे ह्युपवीतेऽथ भूषणे । स्त्रीणां कंठस्य शास्त्रज्ञे पाकभेदेऽथ कुंकुमे ॥ कंठसूत्रो नाटकज्ञे फले शार्करकंदके ।" इति निरुक्तिः । केचित्तु—"कण्ठसूत्रं नागरङ्गे स्त्रीणां सौभाग्यभूषणे" इत्याहुः । लवणापूपाः कचोरिका इति केचित् । पृथगिति रुक्मिणीदेव्या विप्रस्त्रीणां च पूजाद्रव्याणां पार्थक्यं बोधयति । विप्रस्त्रीणां पृथक्त्वं च तदिष्टसिद्धये स्वयमपि पृथक्पूजनात् 'किंचित्सुचरितत्' इत्यादिवम् । अतः सम्यगपूजयत् । प्रदीपावलिभिरित्यंते महानीराजनात् । पतिमतीरित्येवंलक्षणकर्मणि पतिपुत्रवतीनामेवाधिकार इति बोधयति ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भवानीं भवपत्नीमिति भवस्य कामसहचरीं धर्मसहचरीमपीत्यर्थः । आद्ये पुंयोगमात्रे द्वितीये यज्ञसंयोगे ङीपो विधानात् इति तस्या भवस्य महाभागवतस्य परमान्तरङ्गत्वं दर्शितम् अत एव भवान्वितामेव सतीं भवान्वितामेव वन्दयाञ्चक्रुरित्यर्थः । अनेन तु वक्ष्यमाणस्य मन्त्रस्य ताभिरुपदेश्यत्वमायातीति तासामेव तद्द्रष्टृत्वं लभ्यते ॥ ४५ ॥ वन्दनमन्त्रमाह—नमस्य इति । अम्बिके, हे जगन्मातः ! शिवामिति श्रीशिवेन सह समाननामगुणत्वादिना भेदाभावात्तन्नाम्ना सोऽपि लभ्यत इति व्यक्तं ततस्तेन सहितामित्यर्थः । एवं योग्यतां निर्द्दिश्य प्रार्थयते—भूयादिति । भगवान् सर्वोद्ध्र्वपरममाधुर्य्यैश्वर्य्यवान् अत एव कृष्णः सर्वस्यैव चिताकर्षकः किमुत तदेकनिष्ठाया ममेत्यर्थः । अन्यत्तैः तत्र भवतीति भवती तु अनुमोदनमात्रं कुरुतां सिद्धप्रायत्वान्मनोरथस्येति भावः । कृष्ण एवेति उत्कण्ठया तदङ्गीकारस्यापि नातिप्रतीतेः ॥ ४६ ॥ अद्भिरिति युग्मकम् । अबादीनामक्रमेणोक्तिः श्रीकृष्णाविष्टत्वेन तस्या मुनेर्वा पूजाक्रमविस्मृतेः स्रग्माल्ययोः साधारणासाधारणत्वेन भेदो ज्ञेयः । स्रज्यते स्रक् माल्यते धार्य्यते माला मालैव माल्यमिति निरुक्तेः पृथगिति रुक्मिणी देव्या विप्रस्त्रीणाञ्च पूजाद्रव्यादीनां पार्थक्यं बोधयति विप्रस्त्रीणां पृथक्त्वञ्च तदिष्टसिद्ध्यर्थं स्वयमपि पृथक् पूजनात् किञ्चित् सुचरितमित्यादिवत् अतः सम्यगपूजयत् । प्रदीपावलिभिरित्यन्ते महानीराजनात् पतिमतीरिति लवणेति च तथाविधैः ॥ ४७–४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भवानी-शब्दोऽत्र पार्व्वतीमात्रवाचकः, भवस्य पत्नीमिति तस्या वन्दनेन तस्यापि वन्दने सिद्धे भक्त्या भवान्वितामेव वन्दयाञ्चक्रुः; यद्वा तस्याः प्रसिद्धं परमं पातिव्रत्यं सौभाग्यञ्च तादृशत्वसिद्धयेऽभिप्रेतमिति दिक् ॥ ४५ ॥ अम्बिके हे जगन्मातः ! शिवामिति—श्रीशिवेन सह सनामत्वादिना भेदाभावात्तेन सहितामित्यर्थः । यद्वा, सर्व्वमंगलकारिणीं मंगलमेवोद्दिशन्ती प्रार्थयति—भूयादिति । भगवान् परमस्वतन्त्रोऽपि, कृष्ण इति सर्व्वथा सर्व्वचित्ताकर्षक इत्यर्थः । अयं पतित्वे हेतुः । अन्यत्तैर्व्याख्यातम् । यद्वा, तत्पतित्वमनु पश्चात् मे मोदतां मयि प्रीयताम्. विवाहानन्तरं सदा सुभगा भवेयमित्यर्थः । तत् सम्भावयति—भगवान्, यतो भक्तवश्यताद्यशेषगुणप्रकटनपर इत्यर्थः ॥ ४६ ॥ अद्भिरित्यादिक्रमेणोक्तिः श्रीकृष्णाविष्टचित्ततया पूजाक्रमविस्मृतेः, स्रजः पुष्पादिमालाः, माल्यान्यन्यान्यग्रथितपुष्पाणि, पृथगिति—देव्या विप्रस्त्रीणां च पूजाद्रव्यादीनां पार्थक्यं बोधयति । अतः सम्यगपूजयत् । उपहारा नैवेद्यादयः, वलयोऽष्टदिक्षु बलिदानानि, प्रदीपावलिभिश्चान्ते महानीराजनम् । एवं पृथगसंकीर्णतयार्पणेनेत्यर्थः । पतिमतीरिति तासामेव तदनीमपेक्ष्यत्वात्, लवणेति दम्पत्योः सदा रससिद्ध्यर्थं विवाहकाले लवणादिभिर्मंगलैर्द्रव्यैः पूजाया विधेयत्वात् ॥ ४७–४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः प्रवयसो वृद्धा विधिज्ञाश्च विप्रयोषितः भवस्य पत्नीं भवेनान्वितां भवानीं प्रति तां कन्यां वन्दयाञ्चक्रुः यद्यपि भवानीमिति पुंयोगलक्षणङीपैव भवसम्बन्धलाभः, तथापि साहित्यलाभार्थं तत्रापि भवस्याप्राधान्यसूचनार्थं भवान्वितामित्युक्तं पुंयोगश्चात्र भर्त्तृभार्यासम्बन्धविशेषरूप इति द्योतयितुं भवपत्नीमिति ॥ ४५ ॥ तदा रुक्मिणी नमस्य इत्यादि मन्त्रमपूर्वमेव स्वयं पश्यन्ती तन्मुखेन स्वमनीषितं च प्रार्थयन्ती यथावत्पूजयामासेत्याह—नमस्य इति त्रिभिः । हे अम्बिके स्वसन्तानयुतां गणेशादिसहितां शिवां मङ्गलरूपां त्वाम् अभीक्ष्णं पुनः पुनः नमस्ये नमस्करोमि भगवान् कृष्णो मम पतिर्भूयादिति यत्तदनुमोदताम् अनुगृह्णातु भवतीति कर्त्तृपदाध्याहारः । यद्वा, कृष्णो मम पतिर्भूयात् कृष्ण एव तदनुमोदतामिति त्वमनुगृह्णीष्वेत्यर्थः इत्थं प्रार्थयन्ती सा रुक्मिणी द्विजपत्नीभिः पुरस्कृता पुरोऽवस्थापिता अद्भिरादिभिर्यथाविधि देवीं शिवामुमां देवं शिवं च पूजयामासेति सम्बन्धः ॥४६॥ अद्भिः शुद्धोदकैः गन्धैश्चन्दनैरक्षतैश्च वासोभिर्दिव्याम्बरैः स्रग्भिर्माल्यैर्भूषणैश्च नानाविधैरुपहारैर्नैवेद्यैर्बलिभिश्च यद्यपि "वैदर्भी भीष्मकसुतां श्रियो मात्राम्" इति लक्ष्म्यवतारत्वेन प्रोक्ता या भगवन्नित्यानपायिन्याः सर्वोत्तमाया रुक्मिण्याः केवलप्राकृतस्त्रिय इवाम्बिकावन्दनादिकमनुचितं तथापि भगवत इव तमनुव्रतय अस्या मानव्यवतारत्वाद्यद्यदाचरति श्रेष्ठ इति न्यायेन लोकानुग्रहशीलत्वाच्च तथा कृतमित्यवगन्तव्यम् ॥ ४७ ॥ ततस्तथा लवणापूपादिभिस्तैरबादिभिश्च पतिमतीर्जीवद्भर्त्तृकाः विप्रस्त्रीश्च सम्यगपूजयत् ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रवयसो वृद्धाः विधिज्ञाः स्त्रीशास्त्रकुशलाः ॥ ४५–४७ ॥ पतिमतीः भर्तृमत्यः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

भवानीमित्यादि प्रवयसः स्थविरा विप्रयोषितोऽहं पूर्विकया कयाचिदुक्तं भवानी वन्द्यताम्, कयाचिदुक्तं पत्नी वन्द्यताम्, कयाचिदुक्तं भवान्वितामिति नामद्वयम् । अन्यथा भवान्वितां भवानीमित्येव सिध्यति, भवपत्नीमिति पुनरुक्तं स्यात् । यद्वा, भवपत्नींवन्दयाञ्चक्रुः कीदृशीम् भवान्वितां सभर्त्तृकाम् । पुनः कीदृशीम् भवानीम्, भवो वृद्धिस्तमानयतीति भवानी तथाभूता सा ईर्लक्ष्मीश्चेति भवानीं ताम् 'लक्ष्मीर्वृद्धिप्रदागृहे' इति मार्कण्डेयोक्तेः ॥ ४६–५० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

भवानीं वन्दयाञ्चक्रुरित्यादि । प्रवयसः स्थविरा विप्रयोषितः अहंपूर्विकया क्याचिदुक्तं 'भवनी वन्द्यताम्', क्याचिदुक्तं 'भवपत्नी वन्द्यताम्', क्याचिदुक्तं भवान्वितामिति । अथवा 'भवपत्नीं वन्दयाञ्चक्रुः । कीदृशीम् ? भवान्वितां समर्त्तृकाम्; पुनः कीदृशीम् ? भवानीम्; भव उद्भवो वृद्धिरिति यावत्, तमानयतीति भवानी तथाभुता ईर्लक्ष्मीर्यस्यास्तां 'लक्ष्मीर्वृद्धिप्रदागृहे' इति मार्कण्डेयः । अन्यथा भव पत्नीत्वेनैव भवानीति गम्यते ॥ ४६–५० ॥

श्रीमद्विश्वनाथच्चक्रवर्तिकृता सारार्थदर्शिनी

प्रवयसो वृद्धा विप्रयोषितः पुरोहितस्त्रियः विधिज्ञाः शास्त्रविधिज्ञाः रुक्मिण्या मनोगतप्रकारज्ञाश्च भवपत्नींभवान्वितामिति हे भवानि ! त्वं यथा भवपत्नीं भवान्विता च विराजसे तथैवेमामपि कृष्णपत्नीं कृष्णन्वितां कुर्विति ताभिरपि कृष्णमालोक्य किञ्चित्सुचरितं यन्न इति प्राक्प्रार्थितत्वादिति भावः । वन्दनमन्त्रमपि ता एव तां वाचयामासुः स यथा नमस्ये इति स्वसन्तानयुतामिति त गणेशो ममात्रविघ्नं खण्डयत्विति भावः तत्तत्रभवती अनुमोदतां भवतु ते स एव पतिरिति स्वसम्मतिं दत्तमित्यर्थः ॥ ४६॥ स्रक् पौष्पी माला रत्नमयी ॥ ४७ ॥ लवणापूपः कचोरिका इति केचित् ॥ ४८ ॥

गूढार्थदीपिनी

प्रवयसो वृद्धाः पुरोहित स्त्रियः ॥ ४५ ॥ स्वसन्तानो गणेशादिः ॥ ४३ ॥ अद्भिरिति युग्मम् । अद्भिर्जलादिभिः अम्बिकां तथा तैरेव द्रव्यैर्लवणादिभिश्च विप्रस्त्रीरपि समपूजयादित्यन्वयः । लवण पूपः कचोरिकाः । कण्ठसूत्रमुपवीतम् । उपहारो नैवेद्यम् । बलिर्नारिकेलादिर्नतु छागादिः ॥ ४७–४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रवयसो वृद्धाः ॥ ४५ ॥ भगवान् मे पतिर्भूयादिति यत्तद्भवती अनुमोदतामनुगृह्णातु ॥ ४६–४७ ॥ तथा विप्रस्त्रियो यामपूजयन् ॥ ४८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गायका गतम् । गायन्तः स्तुवन्तश्च वाद्यवादकाश्च ॥ ४५ ॥ देवसदनं देवालयमासाद्य प्राप्य धौतपादकराम्बुजा प्रक्षालितचरणकरसरसिजोपस्पृश्याचम्योपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपीति विश्वः । अम्बिकान्तिकं सतीसमीपम् ॥ ४६ ॥

प्रवयसो वृद्धा विधिज्ञाः स्त्रीमर्यादाज्ञास्तां बालां भवानीं गतम्। **वन्दयाञ्चक्रुः** कृतनतिञ्चक्रुर्नमस्कारयामासुः। नमस्कारकारणमीरयति। भवेति। भवान्वितां मङ्गलान्वितामेतां पत्नीं शिशुपालस्य पशुपालस्य वेति विविच्यावचनाद्येनकेन वाऽनुष्ठितेष्टफलभोक्त्री भव भावयेति। एतेन भवानीमित्युक्त्यैव भवभामिनीत्वबोधाद्भवपत्नीत्यतिरिक्तं तथा विरुद्धमतिकृतत्वादप्रयोज्यत्वाद्यालङ्कारिकमर्यादाविपर्यासश्चेति परास्तं वेदितव्यम् ॥ ४७ ॥ आन्तरङ्गिकं रुक्मिणीभावं ग्रन्थकृद्ग्रथयति। नमस्य इति। शिवां मङ्गलरूपिणीं स्वसन्तानयुतां गणेशगुहादियुताम् ॥ ४८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो या विधिज्ञा ब्राह्मणस्त्रियो वृद्धाः भवानीं वन्दयाञ्चक्रुः। भवानीशब्दः प्राप्तपुरुषसम्बन्धायाः संज्ञामात्रम्। तेन विशेषं ख्यापयितुं **भवपत्नीमित्युक्तम्**। अथवा। इयं न महादेवस्य भोगस्त्री, तथा सति वरदातृत्वं न स्यादिति **भवपत्नीमित्युक्तम्**। यज्ञसंयोग एव पत्युर्नो **भवतीति**। तत्रापि **भवान्विता**। उद्भवात्मको हि सः सम्पूर्णो भवति। स्त्रिया सहितस्यैव सम्पूर्णत्वात् ॥ ४५ ॥ तदानीमेव भवानीनमस्कारे भगवदिच्छया मन्त्रः स्फुरित इति तं निरूपयति **नमस्ये त्वेति**। स्वसन्तानयुतां गणपत्यादिसहिताम्, शिवमपि नमस्ये। मन्त्र एव प्रार्थनामाह **भूयात्पतिर्मे भगवान्कृष्ण** इति। तदेतदनुमोदतां शिवः भवानी च। अथवा। कृष्णो वा अनुमोदताम्, न तु कोपं करोतु, अन्यदेवतानमस्कारं वा अनौचित्येन न स्वीकरोतु। लोकप्रतीतिस्तु भूयान्मे पतिरिति भिन्नम्। तत्कृष्णः अनुमोदतामिति च भिन्नम्। अन्यथा महादेवः स्वसदृशमेव कुर्यात्। तच्चान्येषामफलम्। अतः कृष्णानुमोदनं सर्वत्र वक्तव्यम् ॥ ४६ ॥ न केवलमयं नमस्कार एव मन्त्रः, किन्त्वनेन मन्त्रेण सर्वामेव पूजां कृतवतीत्याह **अद्भिरिति**। पाद्यार्घ्याचमनस्नानैः, **ततः** गन्धाक्षतैर्धूपैः, ततः पूर्वं वासःस्रङ्माल्यभूषणैः। पश्चान्निरूपणमार्द्रे देहे परिधापितानां पश्चात्त्यागार्थम्। 'अनलङ्कृता क्षणमपि न तिष्ठे'दिति अक्षतानामलङ्करणं पश्चात्। पुनः **प्रदीपावलिभिरिति** नानाविधारात्रिकाणि निरूपितानि। **पृथगिति** अग्रे पूर्वत्रापि सम्बध्यते। महादेवे भवान्यां च। तथा प्रत्येकं ब्राह्मणस्त्रीषु। अन्यथा विष्णवे दास्यति शिवः पूजितः सपरिकरः। ब्रह्मा त्ववशिष्येतेति। अतस्तत्प्रीत्यर्थं विप्रस्त्रियोऽपि पृथक् पृथक् **वस्त्रादिभिः पूजिताः**। किञ्च। विवाहे विशेषप्रकारमाह **लवणेति**। मङ्गलद्रव्याण्येतानि षट्, रसात्मकानि च। **कण्ठसूत्रं** नालसूत्रम्, फलानि नानाविधानि, इक्षवश्च खण्डशः कृताः। एकत्रैव षण्णां दानम् ॥ ४७-४८ ॥

श्रीसुबोधिनी-सारः

प्रवयसो वृद्धा विधिज्ञाः पूजनादिप्रकारं जानंत्यो विप्रस्त्रियः तां बालां राजपुत्रीं भवस्य शिवस्य पत्नीं **भवेनान्वितां** युक्तां तत्र स्थाने भवानीमंबिकां वंदयांचक्रुः प्रणामं कारयामासुः ॥ ४५ ॥ तत्र मंत्र उक्तो रुक्मिण्याः हे अम्बिके स्वसंतानैर्गणेशादिभिः युतां सहितां शिवां मंगलरूपां त्वा त्वामभीक्ष्णं मुहुर्मुहुरहं नमस्यामि। भगवान् कृष्णो मे पतिर्भूयात् तदनुमोदतां सम्पादयतु ॥ ४६ ॥ ततः पूजामाह। अद्भिर्जलैर्गन्धादिभिः समपूजयत् देवीम् पतिमतीः सौभाग्यवत्यो विप्रस्त्रियोपि तैर्द्रव्यैस्तथापूजयन्। लवणं प्रसिद्धं न तु स्वादुपर्यायः पाद्मे तथोक्तत्वात्। अपूपाः ताम्बूलम् इति प्रसिद्धम्। कण्ठसूत्रं मांगल्यदोरकम्। फलानि इक्षुदण्डः तैः ॥ ४७-४८ ॥

विवरणटिप्पणी

अद्भिरित्यत्र। **ततः पूर्वमिति**। गन्धाक्षतेभ्यः पूर्वमित्यर्थः। **पश्चादिति**। आर्द्रे देहे सम्बद्धानि वासांस्यार्द्राणि भवन्ति। अतो धूपादिना आर्द्रतां दूरीकृत्य पश्चात्तान्युत्तार्य पुनरन्यानि परिधापितानीत्यर्थः। **अक्षतानामिति**। संबन्धविवक्षया करणे षष्ठी, अक्षतानां साधकतमत्वाभावज्ञापनाय। स्नानानन्तरमार्द्रतां दूरीकृत्याभरणपरिधापनं यावद्भवति, तावदक्षतैरेवालंकरणं कृतमित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च प्रवयसो वृद्धाः विधिज्ञाः पूजाप्रकारज्ञा विप्रयोषितः पुरोहितस्त्रियः भवानीं प्रति तां बालां रुक्मिणीं वन्दयाञ्चक्रुरित्यन्वयः। 'यद्यपि भवानीपदेनैव भवसम्बन्धलाभस्तथापि सम्बन्धविशेषोऽत्र भर्तृभार्याभावात्मक'' इति द्योतयन्नाह—भवपत्नीमिति। 'भवस्यापि गौणतया तया सह नमस्कारादिपूजा कृता' इति सूचयन्नाह—भवान्वितामिति ॥ ४५ ॥ तदैव स्फुरितं मन्त्रमाह—नमस्य इति। अम्बिके ! स्वसन्तानयुतां गणेशादिसहितां शिवां मङ्गलरूपां त्वामभीक्ष्णं पुनःपुनर्नमस्ये नमस्करोमि। ''किमर्थं नमस्करोषि' तत्राह—भगवान् कृष्णो मे पतिर्भूयात् इति यत्तद्भवत्यनुमोदतामनुगृह्णातु इति ॥ ४६ ॥ एवं नमस्कारपूर्वकं वरं सम्प्रार्थ्य जलादिभिः पृथक् भवानीं भवं गणेशादीन् देवांश्चापूजयदिति सम्बन्धः। अद्भिः शुद्धोदकैः, **गन्धैश्चन्दनैश्च**, **अक्षतैः**, धूपैः, वासोभिः **वस्त्रैः**, **स्रग्भिः**, माल्यैः पुष्पैः, **भूषणैः**, नानाविधैरुपहारैर्नैवेद्यैः; बलिभिः **अन्यैश्च** नारिकेलादिभिश्च **पूजा-**

साधनैः, प्रदीपावलिभिः आरार्तिकादिभिः। न च "भीष्मकसुतां 'श्रियो मात्राम्' इति लक्ष्म्यवतारत्वेनोक्ताया भगवदाराधनैकनिष्ठायाः रुक्मिण्याः प्राकृत स्त्रिय इव अम्बिकाराधनं कथं सङ्गच्छत" इति शङ्कयम्, भगवत इव मनुष्यनाट्याङ्गीकारात्तस्य गुरुकुलवासतत्सेवाविद्याग्रहणादिवदस्या अपि स्वकुलोचितव्यवहारप्राप्तस्याम्बिकाराधनस्य सङ्गतत्वात्। "अर्चिष्यन्ति मनुष्यास्त्वां सर्वकामवरेश्वरीम्" इति स्वोक्तसत्यतासिद्ध्यर्थं भगवत्प्रेरणयापि तदाराधनसम्भवाच्च ॥ ४७ ॥ तथा तैर्लवणादिभिश्च पतिमतीर्जीवद्भर्तृका विप्रस्त्रीश्च सम्यगपूजयत् ॥ ४८ ॥

अन्वितार्थप्रकाशिका

तामिति। प्रवयसो वृद्धाः विधिज्ञाः पूजाप्रकारज्ञा विप्रयोषितः पुरोहितस्त्रियः भवेन शिवेन नित्यमन्वितां भवस्योपसर्जनत्वं श्रीकर्मोचितमुक्तं भवस्य पत्नीं भवानीं पार्वतीं भवपत्नीं भवानीमित्यनयोरैकार्थ्येऽपि पार्वत्याः पतिव्रताशिरोमणित्वप्रदर्शनाय पुनरुक्तिः। तां बालां रुक्मिणीं प्रयोज्यकर्त्रीं वन्दयांचक्रुः। तामिति अणिकर्त्तुः कर्मत्वमार्षम् ॥ ४५ ॥ तदैव स्फुरितं मन्त्रमाह—नमस्य इति ॥ हे अम्बिके ! स्वसंतानयुतां स्वः स्वार्द्धाङ्गभूतः शिवः सन्तानो गणेशादिस्तद्युतामिति वा देवीप्राधान्यं प्राग्वत्। शिवां मङ्गलरूपां त्वामभीक्ष्णं पुनः पुनर्नमस्ये नमस्करोमि। तङार्षः। भगवान् कृष्णो मे पतिर्भूयात् इति यत्तद् भवती कृष्ण एव वानुनोदतामनुगृह्णातु ॥ ४६ ॥ अद्भिरिति। अद्भिर्जलैर्गन्धादिभूषणान्तैः स्रक् पौष्पी माला रत्नमयी नानोपहारैर्वेद्यैः बलिभिश्च प्रदीपावलिभिर्महानीराजनैश्च पृथक् भवानीं भवं गणेशादींश्चापूजयत् इति शेषः ॥ ४७ ॥ विप्रेति। तथा पतिमतीः जीवद्भर्तृका प्रियस्त्रियः कर्माणि तैः अबादिभिः लवणापूपादिभिश्च रुक्मिणी समपूजयत्। लवणापूपः कचोरिका इति केचित् ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रवयसः स्थविराः भवानीं पार्वतीं ॥ ४५ ॥ स्वसंतानयुतां स्वपुत्रगणयादियुक्तां। तन्ममयाचनमनुमोदतां सफलं कुरुतामित्यर्थः। नमस्ये इति रुक्मिण्युक्तोमंत्रः ॥ ४६ ॥ मालायां ग्रथितुमर्हाणि पुष्पाणि मालानि। नानाविधैरुपहारादिभिः सा अंबिकां समपूजयदित्युत्तरेणान्वयः। तत्र उपहारा अग्ने धतुं योग्याः फलादयश्च बलयो भक्षितुं योग्यानि अन्नानि च ॥ ४७ ॥ तथा सा तैर्द्रव्यैर्लवणादिभिश्च। विप्रपत्नीः समपूजयत्तया विप्रस्त्रियः पूजिता इत्यर्थः। कंठसूत्रं श्यामाल्यमणिग्रथितं मध्यखचितसुवर्णमणिकं योषितां कंठे धार्यं सौभाग्यसूत्रं ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तामिति ॥ ततः, प्रवयसो वृद्धाः, विधिज्ञाश्च, विप्रयोषितः, भवान्वितां शिवेनान्वितां, भवपत्नीं शिवपत्नीं, भवानीमम्बिकां, बालां रुक्मिणीं, वन्दयांचक्रुः वै। यद्यपि भवानीमिति पुंयोगलक्षणङीषैव भवसंबन्धलाभस्तथापि साहित्यलाभार्थं तत्रापि भवस्य प्राधान्यसूचनार्थं भवान्वितामित्युक्तम्। पुंयोगश्चात्र भर्तृभार्यासंबन्धविशेषरूप इति द्योतयितुं भवपत्नीमिति ज्ञातव्यम् ॥ ४५ ॥ नमस्य इति ॥ हे अम्बिके, स्वसंतानयुतां गणेशादिस्वसंतानसहितां, शिवां मङ्गलरूपां, त्वां अभीक्ष्णं, नमस्ये नमस्करोमि। भगवान्, कृष्णः, मे मम, पतिः भूयात्, इति यत्, तत् अनुमोदतामनुगृह्णातु। भवतीति कर्तृपदाध्याहारः। रुक्मिण्या तदैव दृष्टोऽयं मन्त्रः ॥ ४६ ॥ अद्भिरिति ॥ ततः, रुक्मिणी, अद्भिः शुद्धोदकैः, गन्धाक्षतैर्गन्धयुक्तैरक्षतैः, धूपैः वासः स्रङ्माल्यभूषणैः, नानोपहारबलिभिः, पृथक् प्रदीपावलिभिश्च, अम्बिकां समपूजयत् ॥ ४७ ॥ विप्रस्त्रिय इति ॥ ततः, रुक्मिणी, पतिमतीः, विप्रस्त्रियः ब्राह्मणीः, तदा अम्बिकावदेव, तैरबाद्युक्तद्रव्यैः, लवणापूपताम्बूलकण्ठसूत्रफलेक्षुभिश्च, समपूजयत्। यद्वा पतिमतीः सभर्तृकाः, विप्रस्त्रियो ब्राह्मण्यः, तैर्द्रव्यैः लवणादिभिश्च, अम्बिकां, अपूजयन् ॥ ४८ ॥

कृष्णप्रिया

बहुत-सी विधि-विधान जाननेवाली बड़ी-बूढ़ी ब्राह्मणियाँ उनके साथ थी। उन्होंने भगवान् शङ्कर की अर्द्धाङ्गिनी भवानी को और भगवान् शङ्करजी को भी रुक्मिणीजी से प्रणाम करवाया ॥ ४५ ॥ रुक्मिणीजी ने भगवती से प्रार्थना की—'अम्बिका माता ! आपकी गोद में बैठे हुए आपके प्रिय पुत्र गणेशजी को तथा आपको मैं बार-बार नमस्कार करती हूँ। आप ऐसा आशीर्वाद दीजिये कि मेरी अभिलाषा पूर्ण हो। भगवान् श्रीकृष्ण ही मेरे पति हों' ॥ ४६ ॥ इसके बाद रुक्मिणीजी ने जल, गन्ध, अक्षत, धूप, वस्त्र, पुष्पमाला, हार, आभूषण, अनेकों प्रकार के नैवेद्य, भेंट और आरती आदि सामग्रियों से अम्बिका देवी की पूजा की ॥ ४७ ॥ तदनन्तर उक्त सामग्रियों से तथा नमक, पूआ, पान, कण्ठसूत्र, फल और ईख से सुहागिन ब्राह्मणियों की भी पूजा की ॥ ४८ ॥

तस्यै स्त्रियस्ताः प्रददुः [1]शेषां युयुजुराशिषः । ताभ्यो देव्यै नमश्चक्रे [2]शेषां च जगृहे वधूः ॥ ४९ ॥
[3]मुनिव्रतमथ त्यक्त्वा निश्चक्रामाम्बिकागृहात् । [4]प्रगृह्य पाणिना [5]भृत्यां रत्नमुद्रोपशोभिना[6] ॥५०॥
[7]तां देवमायामिव [8]वीरमोहिनीं सुमध्यमां कुण्डलमण्डिताननाम् ।
श्यामां नितम्बार्पितरत्नमेखलां व्यञ्जत्स्तनीं [9]कुन्तलशङ्कितेक्षणाम् ॥ ५१ ॥
शुचिस्मितां बिम्बफलाधरद्युति[10]शोणायमानद्विजकुन्दकुड्मलाम् ।
पदा चलन्तीं कलहंसगामिनीं शिञ्जत्कलानूपुरधामशोभिना[11] ।
विलोक्य वीरा मुमुहुः समागता यशस्विनस्तत्कृतहृच्छयार्दिताः ॥ ५२ ॥

कर्दमक्षमा

अन्वयः—ताः, स्त्रियः, तस्यै, शेषाः प्रपदुः, च, आशिषः, युयुजुः वधूः, तस्यै, ताभ्यः, नमश्चके, च, शेषाम्, जग्रहे ।४९। अथ, मुनि व्रतम्, त्यक्त्वा, रत्नमुद्रोपशोभिना, पाणिना, भृत्याम्, प्रगृह्य, अम्बिकागृहात्, निश्चक्राम ॥ ५० ॥ देवमायाम्, इव, वीरमोहिनीम्, सुमध्यमाम्, कुण्डलमण्डिताननाम्, श्यामाम्, नितम्बार्पितरत्नमेखलाम्, व्यञ्जत्स्तनीम्, कुन्तलशङ्किताननाम्, शुचिस्मिताम्, बिम्बफलाधर द्युति शोणायमान, द्विजकुन्द, कुण्डलाम्, कलहंसगामिनीम्, सिञ्जत् कला नूपुर धाम शोभिना, पदा चलनीम्, विलोक्य, तत्, कृतहृच्छयार्दिताः, रामागताः, वीराः, मुमुहुः ॥ ५१-५२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शेषां निर्माल्यम् ॥ ४९ ॥ मुनिव्रतं मौनम् । भृत्यां सखीम् ॥ ५० ॥ तां विलोक्य वीरा मुमुहुरिति तृतीयेनान्वयः । श्यामामजातरजस्काम् । कुन्तलेभ्यः शंकिते इव चपले ईक्षणे यस्यास्ताम् ॥ ५१ ॥ द्विजा एव कुंदानां कुड्मलानि बिम्बफलवद्योऽधरस्तस्य द्युतिभिः शोणायमानानि तानि यस्यास्ताम् । कला शोभा तद्युक्तं नूपुरं शिंजच्च तत्कलानूपुरं च तस्य धाम दीप्तिस्तेन शोभितुं शीलमस्य तेन पदा चलंतीम् ॥ ५२-५३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्यै रुक्मिण्यै । ता विप्रपत्न्यः । शेषां पुष्पमालाम् "देवार्पितार्चकप्रत्ता शेषा स्यात्पुष्प मालिका" इति संहितोक्तेः । विश्वकोशे तु-"प्रसादान्निजनिर्माल्यदाने शेषाऽनुकीर्तिता" इत्युक्तम् । ताभ्यो ब्राह्मणीभ्यो दैव्यै च । वधू रुक्मिणी ॥ ४९ ॥ अथ शेषाग्रहणोत्तरम् । 'भृत्या दासी सखी भृत्या भृत्या भृतिरिहोदिता" इति बह्वर्थवाग्विलासे । रत्नमुद्रा रत्नांगुलीयकम् ॥५०॥ तां रुक्मिणीम् । अथावसरं प्राप्य विरोधिपरिभवाय तस्याः प्रभावोऽप्याविर्बभूवेत्याह—तामिति ॥ ५१ ॥ शिंजत् शब्दं कुर्वत् 'भूषणानां तु शिञ्जितम्' इत्यमरः । बिम्बफलाधरस्य द्युतिभिः शोभायमाना द्विजा दंता एव कुन्दकुड्मलानि यस्याताम् । शिजञ्च तत्कलानूपुरमतिशिल्पनिर्मितनूपुरं तस्य धामभिः शोभिना पदा चलन्तीम् ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

देव्यै च दुर्गायै ॥ ४९ ॥ प्रगृह्येति बहुसम्मर्देन मूलतस्तु श्रीकृष्णागमनसमये सम्भ्रम वैवश्येन रत्नमुद्रां रत्नाङ्गुलीयकम् उप अधिकं शोभयितुं शीलं यस्येति शोभाविशेषवर्णनात्तत्सर्वं "यात्राच्छलेन हरयेऽर्पय्यतीं स्वशोभाम्" इत्यनुसारेण तदर्पणपरिकरत्वमेव प्राप्तमिति द्योतितं टीकायां भृत्यां सखीमिति योग्यत्वाल्लक्षणया ॥ ५० ॥ अथावसरं प्राप्य विरोधिपराभवाय तस्याः प्रभावोऽप्याविर्बभूवेत्याह—तां देवमायामिति, सार्द्धैस्त्रिभिः । तत्र तामिति सार्द्धद्वयकम् "यात्राच्छलेन हरयेऽर्पयती स्वशोभाम्" इति वक्ष्यमाणानुसारेणान्येभ्यस्तु स्वशोभामनर्पयन्तीं तां देवमायामिव 'मल्लानामशनिः' इत्यादिदिशा देवस्य भक्तेषु स्वरूपवैचित्र्याद्दीव्यतः श्रीकृष्णस्य मल्लादिषु त्वशनित्वादिप्रत्यायिकां मायामिव वीरमोहनीं वीराणां प्रतिपक्षाणां पाटान्तरे धैर्य्यभाजामपि तेषां स्वस्मिन् रूपान्तरकल्पनया तान् मोहयन्तीम् वीक्ष्य ते वीरा मुमुहुः वीरमोहनीरूपमेव वर्णयति—सुमध्यमामित्यादिना । मोहनीरूपत्वेनैव तेषां मोहो जनिष्यत इति स्पष्टयति यशस्विनो वीरत्व धीरत्वादिना ख्याता अपि तया कृतेन मोहनीरूपेण यो हृच्छयस्तेनार्दिता इत्यस्य वैयर्थ्यं स्यात् इत्ययमेवार्थो विवक्षितः ॥ ५१-५३ ॥

---

[1] शेषाः-विज. । [2] शेषाश्च । [3] सती व्रत-श्रीधर. टि. ; मौनव्रत-वीर. ।
[4] उपकण्ठे सुरेशस्य पौलोम्याश्च निकेतनम् । तौ विदर्भप्रसूतानां नृपाणां कुलदेवते ॥ १ ॥
तदन्तिकमुपागम्य शचीं सुरपतिप्रियाम् । चिराराधितपादाब्जां सा प्रणम्य विनिर्ययौ ॥ २ ॥ विजये द्वौ स्तः ।
[5] धात्रीं-विज. । [6] शोभितां-वीर. विज. । [7] धृतानेकातपत्राभ्यां वीजच्चामरसंकुलाम् ॥-विजयेऽधिकः । [8] धीर-श्रीधर. टि. । [9] कुण्डल-प्रा. पा. । [10] द्युभिः-वीर. । [11] कलं नूपुरपादशोभितां-विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रकर्षेण सादरत्वादिना ददुः, देव्यै च दुर्गायै, वधूरिति श्रीविष्णुव्यतिरिक्तदेवतानिर्म्माल्यग्रहणे निषिद्धेऽपि कन्यात्वेना दोषादिति भावः ॥ ४९ ॥ प्रकर्षेण स्नेहभरेण दृढतया गृहीत्वेति तया श्रीकृष्णप्रदर्शनार्थम्; यद्वा, भावि-श्रीकृष्णदर्शनवैवश्येन पतनशंकया, वस्तुतस्तु शोभाविशेषार्थमेव, तथा च वक्ष्यति (भा० १०।५३।५४) 'यात्राच्छलेन हरयेऽर्पयतीं स्वशोभाम्' इति रत्नमुद्रया रत्नाँगुलीयकेन विवाहे परिधार्य्येण उप सर्व्वोपरितनत्वेन शोभितुं शीलमस्येति, तथा तेनेति पाणेः परमशोभैवोक्ता।५०। देवस्य श्रीविष्णोर्मायामिव । कुतः ? मोहिनीं परमसुन्दरीं मोहिनीतुल्यां वा, हे वीर ! 'धीर' इति च पाठस्तद्धेतुत्वेन । तस्याः सौन्दर्य्यं वर्णयन् तां विशिनष्टि—सुमध्यमामित्यादि दशविशेषणैः । तत्र सुमध्यमामित्युपलक्षण सर्व्वांग सौष्ठवस्य, तच्च विस्तारितं श्रीहरिवंशे (विष्णु० ५९।३८.४१)—

श्यामावदाता स ह्यासीत् पृथुचार्व्वायतेक्षणा । ताम्रौष्ठनयनापांगी पीनोरूजघनस्तनी ॥
बृहती चारुसर्वांगी तन्वी शशिनिभानना । ताम्रतुंगनखी सुभ्रूर्नीलकुञ्चितमूर्द्धजा ॥
अत्यर्थं रूपतः कान्ता पीनश्रोणिपयोधरा । तीक्ष्ण-शुक्लैः समैर्दन्तैः प्रभासद्भिरलंकृता ॥
अनन्या प्रमदा लोके रूपेण यशसा श्रिया । रूपिणी रुक्मिणी देवी पाण्डुरक्षौमवासिनी ॥' इति ।

कुण्डलेति नितम्बेति चाशेष-भूषणानाम्, श्यामामिति वयः सन्धिः सूचितः । अत एव व्यनत्स्तनीम् । एवमंगसौष्ठव-वयोभूषणानि संक्षेपेणोद्दिश्य माधुरीं वर्णयति—कुन्तलेत्यादिना शोभितेत्यन्तेन । तत्र कुन्तलेति—लोललोचनतयावलोकमाधुरी, शुचिस्मितामितिहासमाधुरी व्यक्तैव । तदनन्तरञ्च दन्तानां वर्णनं शुचिस्मितत्वेनैव तेषामीषत्प्रकाशनात् । गतिमाधुरीमाह-पदेति नूपुरसिञ्चितसादृश्यार्थं कलशब्दप्रयोगः । विलोक्य साक्षाद्दृष्ट्वा ये समागतास्ते सर्व्व एव, वैरिनिर्जयादिना यशस्विनोऽपि श्रीरुक्मिण्यां निराशत्वाद्दुःखेन मुमुहुः । कुतः ? तेन कृष्णेन कृतो यो रुक्मिण्यां हृच्छयः कामस्तेनार्दिता वित्रस्ता इत्यर्थः । ते महाशौर्य्यादियुक्ता अपि, सर्व्वे गजाद्यारूढा अपि, विशेषेण मूढा सन्तो भूमौ पेतुः । कथम् ? उज्झितास्त्राः सन्तः । कुतः ? तस्य कृष्णस्य रुक्मिणीविषयकेनोदारेण सभावत्वादिना श्रेष्ठेन हासेन व्रीडायुक्तावलोकनेन च हृतं नाशितं चेतो येषां ते, अनेन कृष्ण-कर्त्तृकहरणनिश्चयेन क्षोभात् प्रलयः सूचितः ॥ ५१-५३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततस्ताः स्त्रियः द्विजपत्न्यः शेषां स्वपूजोपयुक्तावशिष्टां सामग्रीम् । यद्वा, शेषाशब्दस्त्रिलिङ्गो देवतोपभुक्तस्रगादिनिर्माल्यवाची तदा शेषां गौर्युपभुक्तनिर्माल्यमित्यर्थः । तस्यै रुक्मिण्यै प्रददुः अलङ्काराद्यर्थमिति शेषः । तथाऽऽशिषः युयुजुः पेठुः तदा बधू रुक्मिणी ताभ्यो द्विजपत्नीभ्यो देव्यै च नमश्चक्रे शेषां जगृहे च ॥ ४९ ॥ ततो मौनव्रतं विहाय रत्नमुद्रिकाभिरुपशोभितां भृत्यां सखीं गृहीत्वा रत्नमुद्रोपशोभितं सखीपाणिं स्वपाणिना गृहीत्वेत्यर्थः ! अम्बिकागृहान्निर्गतवती ॥ ५० ॥ तदा तां विलोक्य समागताः सर्वे प्रसिद्धाः वीरास्तद्दर्शनोदितकामातुरा मुमुहुरिति तृतीयश्लोकेनान्वयः । कथम्भूतां ? देवमायामिव सर्वाश्चर्य्यकरीं मूर्त्तिभूतां देवमायामिव स्थितामित्यर्थः । वीरान्मोहयतीति तथा तां शोभनः कृशो मध्यप्रदेशो यस्याः कुण्डलाभ्यां मण्डितमाननं यस्यास्तां श्यामामजातरजस्कां नितम्बयोः श्रोण्योरर्पिता निबद्धा रत्नमयी मेखला यस्याः व्यञ्जन्तौ यौवनप्रादुर्भावसूचकौ स्तनौ यस्याः कुन्तलेभ्यः शङ्किते इव चपले ईक्षणे यस्याः ॥ ५१ ॥ शुचिस्मितं यस्याः बिम्बफलमिव योऽधरोष्ठस्तस्य द्युभिः कान्तिभिः शोणायमाणा द्विजा दन्ता एव कुन्दानां कुड्मलानि मुकुलानि यस्यास्तां कलहंसवद्गच्छति तच्छीला तथा तां कला शोभा तद्वती नूपुरैः शिञ्जिन्ती कूजन्ती च ते कलनूपुरे च तयोर्धाम दीप्तिस्तेन शोभत इति तथोक्तेन पदा पादेन पद्भ्यामित्यर्थः चलन्तीम् ॥५२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

शेषाः अक्षताः अविशिष्टा राजस्त्रियो वा ॥ ४९ ॥ मुनिव्रतं मौनव्रतम् ॥ ५० ॥ उपकण्ठे समीपे पौलोम्याः शच्याः । दैवमायां लक्ष्मीं श्यामां द्व्यष्टवर्षां कुन्तलैरावरकैः शङ्कितमिव ईक्षणं यस्याः सा तथा ताम् ॥ ५१-५५ ॥

श्रीमज्जवगोस्वामिकृतः क्रमसन्दर्भः

देवस्य विष्णोर्मायामिव नतु मायां किन्तु स्वरूपशक्तिमेवेत्यर्थः । तर्हि कथं तस्य सादृश्यमपि ? तत्राह—मोहनीं श्रीविष्णुमिव "मल्लानामशनिः" इत्यादिवत् क्वचित् स्वरूपेण क्वचिदन्यथाभावेन च सर्वमोहनशीलाम् अत्र श्रीकृष्ण एव तु स्वरूपेण मोहनीति भावः । अथ सामान्यं वर्णयति—सुमध्यमामित्यादिना, शोभितेत्यन्तेन । कुन्तलेभ्योऽलभ्यश्रीकृष्णदर्शनविच्छेदिभ्यः शङ्किते ईक्षणे यस्यास्ताम् ॥ ५१-५३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

अथास्याः कृष्णदर्शनं वर्णयति—तामित्यादि द्वाभ्याम्। श्यामां पद्मिनीम्, तथा च 'पद्मगन्धिमुखं यस्याः सततं नव यौवनम्। रक्ताशोकं पदाघातादकालेऽपि प्रफुल्लति। मुखमाध्वीकगण्डूषैरकाले वकुलोऽपि च। कुसुमानि समाधत्ते सा श्यामा परिकीर्तिता॥ व्यञ्जत् स्तनौ नवोद्यत् कुचाम् कुन्तलेन चूर्णकुन्तलेन, शङ्किते ईक्षणे यस्याः॥ ५१–५२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

श्यामां पद्मिनीम्। "पद्मगन्धि वपुर्यस्या स्तनौ यस्याः सदोन्नतौ। ग्रीष्मकाले शिशिरता शीतकाले कदुष्णता। अकाले वञ्जुलो यस्याः पादाघातेन पुष्पेति। मुखासवैश्च वकुलः सा श्यामा परिकीर्त्यते॥ ५२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शेषां निर्माल्यम्॥ ४९॥ मुनिव्रतं मौनम्॥ ५०॥ ततश्च तां चिदानन्दमयीं भगवच्छक्तिं श्रीरुक्मिणीं भगवद्द्विषोऽसुरा मायामेव प्रतियन्ति स्मेत्याह—तामिति सार्द्धैः पादोनत्रिभिः। तां श्रीरुक्मिणीं देवमायामिव विलोक्य वीरा मुमुहुरिति तृतीयेनान्वयः। इवेत्येवार्थे मल्लानामशनिरित्यत्रायमशनिरेव नतु सुकुमारो बाल इति मल्लाः कृष्णं यथा अमंसत अशनित्वञ्च न तस्य स्वरूपमतो मल्लाद्याः स्वस्वदृग्भिस्तस्य स्वरूपमेव जगृहुः कृष्णनिष्ठं स्वरूपं स्याद्दृत्यैः सुगमं जनैरित्युक्तेः तथैव देवानामपीयं माया परममोहिनी कापि सुन्दरी नत्वियं मानुषीति तां मत्वेत्यर्थः देवमायामेव विशिनष्टि, वीरेत्यादिभिः श्यामाम्। "शीतकाले भवेदुष्णा उष्णकाले तु शीतला। स्तनौ सुकठिनौ यस्याः सा श्यामा परिकीर्त्तिता"। इत्युक्तलक्षणां व्यञ्जयन्तौ व्यक्तीभवन्तावेव स्तनौ यस्यास्तां कुन्तलेभ्यः शङ्किते इव चपले इव ईक्षणे यस्यास्ताम्॥ ५१॥ बिम्बफलाधरस्य द्युतिभिः शोणायमाना द्विजा दन्ता एव कुन्दकुड्मलानि यस्यास्तां शिञ्जच्च तत्कलानुपुरमतिशिल्पनिर्मितनुपुरञ्च तस्य धामभिर्दीप्तिभिः शोभिना पदा चलन्तीम्॥ ५२॥

गूढार्थदीपिनी

तस्यै रुक्मिण्यै। शेषां सप्रसादमालाम् आशीर्वादांश्च ददुः॥ ४९॥ मुनिव्रत मौनम्। भृत्यां सखीम्। रत्नमुद्रा रत्नाङ्गुलीयकम्॥ ५०॥ तामिति सार्द्धद्वयम्। तां रुक्मिणीं देवमामिव विलोक्य समागता वीरा मुमुहुर्मूर्च्छिता बभूवुरिति तृतीयेनान्वयः। इव एवार्थे। मध्यमः कटिभागः। श्यामां षोडशवार्षिकीम्। व्यञ्जन्तौ प्रकटयन्तौ स्तनौ यस्याः। कुन्तलैरलकैः। शुचि मोहकम्। बिम्बफलवत् योऽधरस्तस्य द्युतिभिः शोणायमाना अरुणायमाना ये द्विजा दन्ता त एव कुन्दकुड्मलानि कुन्दकुसुमकलिकाः इव यस्यास्तात् शिञ्जन्त्यः शब्दं कुर्वत्य या कलाः क्षुद्रघण्टिकास्तद्युक्तं नूपूरं तस्य धाम दीप्तिस्तेन शोभितुं शीलमस्येति तेन॥ ५२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

शेषां निर्माल्यम्॥ ४९॥ मुनिव्रतं मौनम्॥ ५०॥ तां विलोक्य वीरा मुमुहुरिति सार्द्धद्वयोरन्वयः। देवमायामिव देवस्य विष्णोः मायां सर्वाश्चर्य्यकरीं शक्तिमिव कुन्तलेभ्य शङ्किते इव चपले ईक्षणे यस्यास्ताम्॥ ५१॥ विम्बफलतुल्याऽधरस्य द्युतिभिः शोणायमाना द्विजा दन्ता एव कुन्दानां कुड्मलानि मुकुलानि यस्यास्ताम् शिञ्जच्च तत्कलानूपुरं शोभायुक्तं नूपुरं तस्य धाम दीप्तिस्तेन शोभितुं शीलं यस्य तेन पदा॥ ५२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गन्धाश्चाक्षताश्च नैर्माल्यानि मालाः पुष्पाणि च तैः। पृथक् पङ्क्तिशः॥ ४९॥ मतिमतीः सुवासिनीस्तैरक्षतगन्धादिभिः समपूजयत्॥ ५०॥ शेषा अवशिष्टा योषित आशिषो युयुजुस्ताभ्यो देव्यै च नमश्चक्रे शेषा नमनायोग्या जगृहे आलिलिङ्ग इति यावत्। वधूः शेषामिति पाठे निर्माल्यमालां जगृह इत्यर्थः। अशिष इत्यत्राक्षता इति पाठश्चालिङ्गनानुकूलः। अक्षता अरजोदर्शना इत्यर्थः॥ ५१॥ मुनिव्रतं मौनमुपकण्ठे समीपे। उपकण्ठान्तिकाभ्यर्णाभ्यग्रा इत्यमरः। उपगतः कण्ठमत्यादय इत्यतिसमासः। सुरेशस्येन्द्रस्य तथा पौलोम्याः शच्याश्च निकेतनमालयः॥ ५२॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ताश्च स्त्रियः तस्यै ददुः (दधुः)। सभर्तृकायै एव दीयते। अत एवैतल्लोके विवाहानन्तरं दानं प्रसिद्धम्। तदत्र न भविष्यतीति मातृकर्तव्यत्वाच्च मन्त्रवदेतदपि स्फुरितमिति प्रथमत एव दत्तवत्यः। अथवा। गुप्त एव भगवान् समागतः, भवानीशिवाभ्यां भगवते रुक्मिणी दत्ता, प्रार्थनायाः सफलत्वाय। एतत् अग्रिमदानकथनात् निरूप्यते। तया ताभ्यो दत्ताः। तस्यै च

ताः प्रददुः, शेषा अपि ददुः । आशिषोऽपि युयुजुः । शेषा अपि ये लवणादयो दत्ताः, तेषामंशाः प्रतिदीयन्ते । एवं विधानमुक्त्वा कर्मपूर्त्यर्थं नमस्कारमाह **ताभ्यो देव्यै नमश्चक्र** इति । शेषां ताभिर्दत्तां जगृहे, स्वग्रन्थौ स्थापितवती । एवं सर्वोऽपि विवाहोत्सवो वैधो निरूपितः । अत्र दिनत्रयं व्रतं तदपि जातमिति मन्तव्यम् ॥ ४९ ॥ अथ मौनं त्यक्त्वा सखीभिः सह यद्वक्तव्यं तदुक्त्वा अम्बिकालयान्निश्चक्राम । नितरां गमनं शीघ्रं भगवत्प्राप्त्यर्थम् । सख्यः अन्याश्च स्त्रियः व्यावर्त्तिताः । एका या भृत्या अन्तरङ्गा तां प्रगृह्य भगवद्भावेन विकला भविष्यामीति, वाह्ये तु भूमिं न पश्यतीत्यवश्यं तदीया ग्राह्या प्रदर्शिका । रत्नसहितमुद्रोपशोभितत्वं भगवता स्वमुद्रा दत्तेति ख्यापयितुम् । पूर्वावतारमुद्रां वा सूचयति ॥ ५० ॥ यद्यहं न गमिष्यामि पूर्ववदेव गतिर्भविष्यतीति, ततोऽग्रे कस्यापि दर्शनं न भविष्यतीति विवाहसमये दर्शनं न दूषणमिति सर्वे दृष्टवन्त इत्याह तामिति । यथा भगवान् रङ्गप्रवेशे बहुभिर्बहुधा दृष्टः, एवमियमपि देवमायेव वीरैर्दृष्टेत्याह **देवमायामिवे**ति । देवस्य भगवतो मायाया व्यामोहिकैषा शक्तिरागतेति सर्वैरेव निश्चितेति । तत्रापि वीरान् व्यामोहयति । अन्यथा स्वयं गत्वा न म्रियेरन् । तां वर्णयति षोडशलक्षणाम् । द्वात्रिंशल्लक्षणो भगवान्, षोडशलक्षणा सेति प्रसिद्धिः । एकं सम्बन्धादसाधारणसामर्थ्यम्, अपरं शौर्यादिनिराकरणम्, तृतीयं व्यामोहकत्वम्, चतुर्थं सुष्ठु मध्यं यस्या इति, लम्बिकावत् अमृतसम्बन्धार्थं अल्पमध्यत्वं निरूपणीयम् । अत एव न कस्यापि रससम्बन्धः । स हि रसः पुरुषेण भोक्तव्यः जिह्वयैव । तदभावात् स्वस्थितोऽपि मक्षिकासम्बन्ध इव रसोपगच्छतीति दुःखमेव लोके फलति । कुण्डलाभ्यां मण्डितमाननं यस्यामिति उपरि रसोपभोगस्थानस्य शोभा प्रदर्शिता । रसप्रदर्शके कुण्डले इति । वयोऽप्याह **श्यामा**मिति । षोडशवार्षिकी । नितम्बे अर्पिता रत्नमेखला यस्या इति रसाविर्भावकप्रस्तावे मुख्यस्थानेऽपि रसप्रकाशो निरूपितः । मध्ये रसाभिव्यक्तिमाह **व्यञ्जत्स्तनी**मिति । एवं पञ्चधर्मा रसात्मका निरूपिताः । पोषकान् सप्तधर्मानाह । कुन्तलैः शङ्किते यस्या इति । लक्षणद्वयमत्र निरूपितम् । कुन्तलानि चपला च दृष्टिरिति । मन्दहासोऽपि दोषाभावाय शुचिरूपः । श्वेतदन्तत्वं न रसाविर्भावकमिति विवाहानन्तरं च दन्तसंस्कार इति कृत्रिमसंस्काराभावेऽपि सहजैरेव धर्मैस्तथा जातमित्याह । बिम्बफलवत् यत् लोहितमधरोष्ठं तस्य द्युतिभिः कान्तिभिः शोणायमाना ये द्विजाः त एव कुन्दकुड्मलानि यस्याः । रञ्जकद्रव्यसम्बन्धापेक्षया कान्त्या राग उत्तमः । **पदा चलन्ती**मिति । एकविधं लक्षणम्, पद्भ्यां चलनं पुरुषस्य, एकेन पदा चलनं स्त्रिया इति । तत्रापि गतिः फलरूपा अफला चेति द्विधा । अयं विवेकः स्फुटलक्षणेनैव भवतीति तस्या गमनं निरूपयति । कलहंसवद्गच्छतीति । सिञ्जन्त्यः कला अन्तःस्थिताः सूक्ष्माः कणिकाः तद्युक्ते नूपुरे तयोर्धाम तेजः तेन शोभायमाना शोभिना वा ॥ ५२ ॥

श्रीसुबोधिनी–सारः

ताः स्त्रियः तस्यै रुक्मिण्यै शेषां निर्माल्यं प्रददुः आशिषो ददुः । वधू रुक्मिणी देव्यै ताभ्यः स्त्रीभ्यो नमश्चक्रे नतिं चकार शेषां च जग्राह ॥ ४९ ॥ मुनिव्रतं मौनं त्यक्त्वाथांविकामंदिरान्निश्चक्राम बहिराययौ रत्नमुद्रयोपशोभिना पाणिना हस्तेन भृत्यां सखीं दासीं प्रगृह्य ॥ ५० ॥ देवस्य मायामिव वीराणां मोहनीं सुष्ठु मध्यमं यस्यास्तां कुण्डलाभ्यां मण्डितमलंकृतमाननं यस्यास्ताम् "अप्राप्ते रजसि श्यामा संप्राप्ते वरवर्णिनी" इत्युक्तेरजातरजस्कां नितम्बेऽर्पिता न्यस्ता रत्नमयी मेखला यया तां व्यंजंतौ उद्गमं कुर्वाणौ स्तनौ यस्यास्तां कुन्तलेभ्यः केशेभ्य शंकिते इव चपले ईक्षिणे यस्यास्ताम् ॥ ५१ ॥ मंदहास्यां बिबफलवत् योऽधरस्तस्य द्युतिभिः शोणायमानानि द्विजा दंतां एव कुंदानां कुड्मलानि पुष्पाणि यस्यास्तां पादेन गच्छंतीं राजहंसगतिं सिंजत् शब्दं कुर्वत् कलया शोभया युक्तं नूपुरं तस्य धाम्ना दीप्त्या शोभिना ॥ ५२ ॥

विवरण टिप्पणी

तां देवमायामित्यत्र । **लम्बिकाव**दिति । सप्तम्यर्थे वतिः । लम्बिकायोगे सूक्ष्मां जिह्वां विधाय ब्रह्मरन्ध्रस्थममृतं योगिभिर्भुज्यते, यथा सूक्ष्मजिह्वाभावे तदमृतं भोक्तुं न शक्यते, तथा सूक्ष्ममध्याभावे एवंप्रकारकभगवद्रसोऽपि भोक्तुं न शक्यते । तत्र जिह्वाया इवात्र मध्यस्य करणतेति भावः । **अत एवे**ति । सूक्ष्ममध्याभावादेव भगवद्रससम्बन्धो योग्यतारहितस्य न जायते इत्यर्थः । दृष्टान्तं विशदयन्ति **सही**ति । **हि** यतः **स** ब्रह्मरन्ध्रस्थो रसः पुरुषेण सूक्ष्मजिह्वयैव भोक्तव्यः । तादृशरसभोगे सूक्ष्मजिह्वैव करणमित्येवकारः, तथात्रापि सूक्ष्ममध्यमेव करणमिति भावः । तदभावात्तादृशजिह्वाभावात्स्वस्य ब्रह्मरन्ध्रे स्थितोपि रसो देहनाशेऽपगच्छति, नतु कदापि भोक्तुं शक्यते । यथा मक्षिकासम्बन्धात्पूर्वं भुक्तमप्यन्नं वान्तं भवति, तथा मर्त्यदेहसम्बन्धात्स रसोप्यपगच्छतीत्यपगमनमात्रे दृष्टान्तः । तथाच यथा तादृशजिह्वाभावात्सर्वैः स रसो भोक्तुं न शक्यते, अतो दुःखमेव फलति, तथा तादृशमध्याभावात्सर्वैर्भगवद्रसोपि भोक्तुं न शक्यते, अतो दुःखमेव लोके फलतीति सम्पूर्णार्थः ।

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

ततस्ताः स्त्रियः तस्यै रुक्मिण्यै शेषां पूजोपयुक्तावशिष्टां सामग्रीं निर्माल्यसहितामलङ्काराद्यर्थं प्रददुः, सा च वधूः रुक्मिणी ताभ्यो देव्यै च नमश्चक्रे शेषां च जगृहे ॥ ४९ ॥ अथ अनन्तरं मुनिव्रतं मौनं त्यक्त्वा रत्नमुद्रिकाभिरुपशोभिना पाणिना भृत्यां सखीं प्रगृह्याम्बिकागृहान्निश्चक्राम ॥ ५० ॥ तदा तां विलोक्य समागताः यशस्विनः प्रसिद्धास्तत्कृतेन तद्दर्शनोद्भूतेन

हृच्छयेन कामेनार्दिताः पीडिताः वीरा मुमुहुरिति तृतीयश्लोकेनान्वयः। तां वर्णयति—देवस्य भगवतो मायामिव वीरान् मोहयतीति तथा ताम्। सुमध्यमां शोभनः कृशो मध्यप्रदेशो यस्यास्ताम्। कुण्डलाभ्यां मण्डितमाननं यस्यास्ताम्। श्यामां "शीतकाले भवेदुष्णा उष्णकाले सुशीतला। स्तनौ सुकठिनौ यस्याः सा श्यामा परिकीर्तिता" इति लक्षणम्। नितम्बयोः श्रोण्योरर्पिता निबद्धा रत्नमेखला यस्यास्ताम्। व्यञ्जन्तौ व्यक्तीभवन्तौ यौवनप्रादुर्भावसूचकौ स्तनौ यस्यास्ताम्। कुन्तलेभ्यः शङ्किते इव चपले ईक्षणे यस्यास्ताम् ॥ ५१ ॥ शुचि शुद्धं कामादिविकाररहितं स्वभावसिद्धं स्मितं यस्यास्ताम्। बिम्बफलमिव योऽधरोष्ठस्तस्य द्युतिभिः कान्तिभिः शोणायमाना द्विजा दन्ता एव कुन्दानां कुड्मलानि मुकुलानि यस्यास्ताम्। कलहंसवद्गच्छतीति कलहंसगामिनी ताम्। कला शोभा तद्युक्तं नूपुरं कलनूपुरं सिञ्जत् कूजच्च तत्कलनूपुरं च तस्य धाम दीप्तिस्तेन शोभितं शीलमस्य तेन पदा ईदृग्भ्यां पद्भ्यां चलन्तीं विलोक्य तत्र समागता जरासन्धादयो यशस्विनोऽपि वीरा तद्दर्शनजन्यकामेन पीडिताः सन्तो मुमुहुः ॥ ५२ ॥

अन्वितार्थप्रकाशिका

तस्यै इति। ततस्ताः स्त्रियः तस्यै रुक्मिण्यै शेषां पूजोपयुक्तावशिष्टां सामग्रीं निर्माल्यसहितामलङ्काराद्यर्थं प्रददुः आशिषश्च युयुजुः। सा च वधूः रुक्मिणी ताभ्यो देव्यै च नमश्चक्रे शेषां निर्माल्यादिरूपां च जगृहे ॥ ४९ ॥ मुनीति। अथानन्तरं मुनिव्रतं मौनं त्यक्त्वा रत्नमुद्रिकाभिरुपशोभिना पाणिना भृत्यां सखीं प्रगृह्याम्बिकागृहान्निश्चक्राम ॥ ५० ॥ तामिति सार्द्धद्वयम्। देवस्य भगवतो मायामिव वीरान्मोहयतीति तथा तां सुमध्यमां शोभनः कृशो मध्यप्रदेशो यस्यास्तां कुण्डलाभ्यां मण्डितमाननं यस्यास्तां श्यामां "शीतकाले भवेदुष्णा उष्णकाले सुशीतला। स्तनौ सुकठिनौ यस्याः सा श्यामा परिकीर्तिता।" इति लक्षणां नितम्बयोः श्रोण्योरर्पिता निबद्धा रत्नमेखला यस्यास्तां व्यञ्जन्तौ यौवनागमं प्रकटयन्तौ प्रकटीभवन्तौ वा स्तनौ यस्यास्तां कुन्तलेभ्यः शंकिते इव चपले ईक्षणे यस्यास्तां शुचि स्मितं यस्यास्तां बिम्बफलमिव योऽधरोष्ठस्तस्य द्युतिभिः कान्तिभिः शोणायमाना द्विजा दन्ता एव कुन्दानां कुड्मलानि मुकुलानि यस्यास्तां कलहंसवद्गच्छतीति कलहंसगामिनी तां कला शोभा तद्युक्तं कला शिल्पं तन्निर्मितं वा नूपुरं कलानूपुरं सिञ्जत् कूजच्च तत्कलानूपुरं च तस्य धाम दीप्तिस्तेन शोभितुं शीलमस्य तेन पदा ईदृग्भ्यां पद्भ्यां चलन्तीं तां विलोक्य समागताः यशस्विनः प्रसिद्धास्तत्कृतेन तद्दर्शनोद्भूतेन हृच्छयेन कामेनार्दिताः पीडिताः वीरा मुमुहुः। यद्वा। तत्कृतो मायाप्रतीतिजनितो यो हृच्छयस्तेनार्दिताः यथा गन्धर्वदत्ताग्निस्थालीमुर्वशीं मत्वा पुरूरवाः कामार्दितोऽभूत् तथा वीराणां हृच्छयो मायाप्रतीतिजन्य एवेति एवमग्रश्लोकेऽपि तां रुक्मिणीं देवमायामेव वीक्ष्येति ज्ञेयम् ॥ ५१-५२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ताः तस्यैशेषां अंबिकानिर्माल्यं प्रददुःसात्व वधूः शेषां प्रसादं जगृहेततः साउभयेभीनमश्चक्रे ॥ ४९ ॥ भृत्योसखीम् ५० अथ शत्रुपराभवाय वैदर्भ्याः प्रभावातिशय आविर्बभूवेति सार्द्धत्रयेणनिगदतितमिति ॥ देवस्य श्रीकृष्णस्यमायां साक्षान्मोहनशक्तिमिववर्त्तमानां वीराणां धीराणामपि मोहनीता वैदर्भीविलोक्य वीराः शूरामुमुहुरिति तृतीय श्लोकस्थ पदेनान्वयः श्यामामनुपपन्नस्तुधर्मो ॥ कुंतलैर्मुखोपर्यागतैः केशैः शंकिते इव चंचले ईक्षणे यस्यास्तां ॥ ५१ ॥ बिंबफलवद्योऽधरस्तस्यद्युतिभिः शोणायमानाद्विजादंता एव कुंदलतानां कुड्मलानि कलिकायस्यास्तां ॥ कलाशोभातत्सतिते यन्नूपुरेसिजंच्चतत्कलानूपुरं च तस्य धामकांतिस्तेन शोभा अस्ति अस्येति तथाभूतेन पदाचलंतीं ॥ ५२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्या इसि ॥ ततः, ताः, स्त्रियो ब्राह्मण्यः, तस्यै रुक्मिण्यै, शेषां निर्माल्यं, प्रददुः। ततः, आशिषश्च, युयुजुः। तदा, वधूः रुक्मिणी, ताभ्यो विप्रपत्नीभ्यः, देव्यै च, नमश्चक्रे। शेषां च, जगृहे ॥ ४९ ॥ मुनिव्रतमिति ॥ अथ, रुक्मिणी, मुनिव्रतं त्यक्त्वा विहाय, रत्नमुद्रोपशोभिना निचितरत्नोर्मिकाशोभिना, पाणिना करेण, भृत्यां स्वसखीं प्रगृह्य, अम्बिकागृहात् निश्चक्राम। स्वपाणिना सखीपाणिमादायाम्बिकामन्दिरान्निर्गतवतीत्यर्थः ॥ ५० ॥ तामिति ॥ देवमायामिव, सर्वाश्चर्यकरीं मूर्त्तिमतीं भगवन्मायामिव स्थितामित्यर्थः। वीरान् मोहयतीति तथाभूतां, सु शोभनः मध्यमो मध्यभागो यस्यास्तां कृशमध्यप्रदेशामित्यर्थः। कुण्डलाभ्यां मण्डितमाननं यस्यास्तां, श्यामामजातरजस्कां, नितम्बयोः श्रोण्योः अर्पिता निबद्धा रत्नमेखला रत्ननिचितकटिमेखला यस्यास्तां, व्यञ्जितौ यौवनप्रादुर्भावसूचकौ स्तनौ यस्यास्तां, कुन्तलेभ्यः शिरोरुहेभ्यः शङ्किते इव चञ्चले ईक्षणे यस्यास्ताम् ॥ ५१ ॥ शुचीति ॥ शुचि स्मितं यस्यास्तां, बिम्बफलमिव योऽधरोऽधरोष्ठस्तस्य द्युतिभिः शोणायमाना द्विजा दन्ता एव खुन्दानां कुड्मलानि मुकुलानि यस्यास्तां, कलहंसवद्गच्छतीति तच्छीला तां, कला शोभा तद्वत् यन्नूपुरं तस्य धाम दीप्तिस्तेन शोभते इति तेन, पदा पादेन, पद्भ्यामित्यर्थः। चलन्ती, तां विलोक्य, समायाताः यशस्विनो महाकीर्त्तिमन्तः, वीराः, तत् कृतहृच्छयार्द्दिताः, तद्दर्शनोदितकामातुराः सन्तः, मुमुहुः। इति सार्द्धयस्यैकः संबन्धः ॥ ५२ ॥

कृष्णप्रिया

तब ब्राह्मणियों ने उन्हें प्रसाद देकर आशीर्वाद दिये और दुलहिन ने ब्राह्मणियों और माता अम्बिकाको नमस्कार करके प्रसाद ग्रहण किया ॥ ४९ ॥ पूजा-अर्चाकी विधि समाप्त हो जाने पर उन्होंने मौनव्रत तोड़ दिया और रत्नजटित अँगूठी से जगमगाते हुए करकमल के द्वारा एक सहेली का हाथ पकड़कर वे गिरिजामन्दिर से बाहर निकलीं ॥ ५० ॥ परीक्षित् ! रुक्मिणीजी भगवान् की माया के समान ही बड़े-बड़े धीर वीरों को भी मोहित कर लेने वाली थी। उनका कटिभाग बहुत ही सुन्दर और पतला था। मुखमण्डल पर कुण्डलों की शोभा जगमगा रही थी। वे किशोर और तरुण अवस्था की सन्धि में स्थित थी। नितम्ब पर जड़ाऊ करधनी शोभायमान हो रही थी, वक्षःस्थल कुछ उभरे हुए थे और उनकी दृष्टि लटकती हुई अलकों के कारण कुछ चञ्चल हो रही थी ॥ ५१ ॥ उनके होठों पर मनोहर मुसकान थी। उनके दाँतों की पाँत थी तो कुन्दकली के समान परम उज्जवल, परन्तु पके हुए कुंदरू के समान लाल-लाल होठों की चमक से उस पर भी लालिमा आ गयी थी। उनके पाँवों के पायजेब चमक रहे थे और उनमें लगे हुए छोटे-छोटे धुंघरू रुनझुन-रुनझुन कर रहे थे। वे अपने सुकुमार चरण-कमलों से पैदल ही राजहंस की गति से चल रही थीं। उनकी वह अपूर्व छबि देखकर वहाँ आये हुए बड़े-बड़े यशस्वी वीर सब मोहित हो गये। कामदेव ने ही भगवान् का कार्य सिद्ध करने के लिये अपने बाणों से उनका हृदय जर्जर कर दिणा ॥ ५२ ॥

यां वीक्ष्य ते नृपतयस्तदुदारहासव्रीडावलोकहृतचेतस उज्झितास्त्राः ।
पेतुः क्षितौ गजरथाश्वगता विमूढा यात्राच्छलेन हरयेऽर्पयतीं स्वशोभाम् ॥ ५३ ॥
[1]सैवं शनैश्चलयती [2]पदपद्मकोशौ प्राप्तिं तदा भगवतः प्रसमीक्षमाणा ।
उत्सार्य वामकरजैरलकानपाङ्गैः प्राप्तान् [3]समैक्षत नृपान् ददृशेऽच्युतं सा[4] ॥ ५४ ॥
तां राजकन्यां रथमारुरुक्षतीं जहार कृष्णो द्विषतां समीक्षताम् ।
रथं समारोप्य सुपर्णलक्षणं राजन्यचक्रं परिभूय माधवः ॥ ५५ ॥
ततो ययौ रामपुरोगमैः शनैः शृगालमध्यादिव [5]भागहृद्धरिः ॥ ५६ ॥
तं मानिनः स्वाभिभवं यशःक्षयं [6]परे जरासंधवशा[7] न सेहिरे ।
अहो धिगस्मद्[8] यश आत्तधन्वनां गोपैर्हृतं केसरिणां मृगैरिव ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे[9] दशमस्कन्धे[10] रुक्मिणीहरणं[11] नाम [12]त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

कर्दमक्षमा

अन्वयः—यात्राच्छलेन, हरये, स्वशोभाम्, अर्पयतीम्, याम्, वीक्ष्य, तदुदारहासव्रीडावलोकहृतचेतसः, उज्झितास्त्राः, विमूढाः, ते, नृपतयः, क्षितौ, पेतुः, तदा, भगवतः, प्राप्तिम्, प्रसमीक्षमाणा, सा, एवम्, पदपद्मकोशौ, शनैः, चलयती, सा, वामकरजैः, अलकान्, उत्सार्य, प्राप्तान्, नृपान्, अपाङ्गैः समैक्षत, सा, अच्युतं, ददृशे ॥ ५३-५४ ॥ रथम् आरुरुक्षतीम्, ताम्, राजकन्याम्, कृष्णः, द्विषताम्, समीक्षताम्, सुपर्णलक्षणम्, रथम्, समारोप्य राजन्यचक्रम्, परिभूय, भागहृत्, हरिः, शृगाल-मध्यात्, इव, जहार, रामपुरोगमैः माधवः, ततः, शनैः, ययौ ॥ ५५ ॥ जरासन्धवशाः, परे, मानिनः, तम्, स्वयशःक्षयम्, च स्वाभिभवम्, न सेहिरे अहो, केसरिणाम्, यशः, मृगैः, इव आत्तधन्वनाम्, यशः, गोपैः, हृतम्, धिक्, अस्मत्, तत्, यशः ॥ ५७ ॥

श्रीमद्भागवत दशमस्कन्ध उत्तरार्द्ध निरोध लीलाया राजसप्रकरणस्य साधन लोला प्रकरणे श्रीरुक्मिणी हरणे
अन्वय निरूपणे ५३ वाँ अध्याय सम्पूर्ण ।

---

१. एवं-कश्चिद् । २. चल-श्रीधर. वंशी. वीर. विज. विश्व. । चरणाब्ज-श्रीधर. टि. च. पु. टि. । ३. हियैं-श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. । ४. च-वीर. । ५. नाग-विज. । ६. अयं श्लोकः अग्रिमाध्यायेऽत्राध्यायसमाप्तिः-विज. । ७. परैः-श्रीधर. टि.; मुखा-श्रीधर. टि. । ८. अस्मात्-श्रीधरादय. । ९. पारमहंस्यां संहितायां-प्रा. पा. । १०. उत्तरार्द्धे-प्रा. पा. । ११. नास्ति-प्रा. पा. । १२. अष्टपञ्चा-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

न केवलं मुमुहुः पेतुश्चेत्याह । यामिति । यात्रामिषेण हरये स्वलावण्यं समर्पयंतीं यां वीक्ष्य क्षितौ पेतुः सा तान्प्राप्तान् ह्रिया ऐक्षत तदैवाच्युतं च ददर्शेत्युत्तरेणान्वयः ॥ ५४ ॥ चलत्पद्मकोशतुल्यौ चरणौ चालयंतीम् ॥ ५५ ॥ सुपर्णलक्षणं गरुडध्वजम् । हरिः सिंहः ॥ ५६ ॥ असहमानां तेषामाक्रोशमाह । अहो धिगस्मान् । यतोऽस्माकं यशो गौपैर्हृतमिति ॥ ५७ ॥

इति श्रीमद्भा० म० दशमस्कंधे उत्तरार्धे श्री० टीकायां त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्कृतो मायाप्रतीतिजनितो यो हृच्छयः कामस्तेनार्दिताः, यथा गंधर्वदत्ताग्निस्थालीमुर्वशीमेव विलोक्य पुरूरवाः कामार्दितोभूद्यथैव तस्य काम उर्वशीज्ञानजन्य एव न तु स्थालीप्रतीतिजन्यस्तथैव वीराणां हृच्छयो मायाप्रतीतिजन्य एव न तु रुक्मिणीप्रतीतिजन्य एवेत्ययमेवार्थस्सत्संमतः, अन्यथा वीरत्वयशस्वित्वव्याघातः स्यादिति । यथाऽसुरमोहनार्थं श्रीभगवता मोहिनीरूपं दर्शितं तथात्रापि मोहिनीरूपमेव श्रीरुक्मिण्या दर्शितमिति ज्ञेयम् ॥ ५३ ॥ यां रुक्मिणीम् । यां मोहिनीरूपतया भातां वीक्ष्य नृपतयः क्षितौ पेतुः । स्वरूपतया सर्वतो विलक्षणां स्वीयां हरयेऽर्पयन्तीं, न त्वसुरेभ्य इवान्येभ्यो भातामित्यर्थः ॥ ५४ ॥ सेति सार्द्धद्वयोरन्वयः । वामकरजैः सव्यहस्तनखैः । तदा नृपेक्षणसमये । सेति भिन्नवाक्यत्वान्न पौनरुक्त्यम् । सा कृष्णं दिदृक्षमाणै प्राप्तांस्तत्राऽगतान् ह्रिया ऐक्षत । एतेऽन्ये पुरुषा इति तद्दर्शनेन लज्जाजनिष्टेति भावः । तन्मध्य एवाच्युतं स्वोक्तच्युतिवर्जितम् 'तामानयिष्ये' इत्याद्युक्तेः । किं कुर्वती–चरणावेवाब्जकोशौ तौ तस्य प्रत्यासत्तिकामनया शनैश्चालयन्ती 'चलत्पद्मकोशौ' इति पाठः स्वामिसंमतः । अत्र रूपकबलेनैव रूप्यं लभ्यत इति चरणावध्याहृतौ । अतिशयोक्तिनामालंकारस्य प्रथमभेदोयम् । यथोक्तम्–"सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते । भेदेप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्ययौ । पौर्वापर्य्या त्ययः कार्यहेत्वोः सा पञ्चधा मता ।" इति । विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिनोध्यवसाय इति । 'अच्युतं च' इति प्रायः स्वामिसंमतः पाठः । 'अच्युतं सा' इति पाठः सर्वत्र दृश्यते । अत्र पूर्वत्र सा तादृशी यत्तदोरन्वयबलात्, उत्तरत्र सा रुक्मिणी प्रकरणबलात् । अच्युतमिति–निजचित्ताच्च्युतिराहित्याभिप्रायेण । अतस्तत्परिचायनापेक्षा नास्तीति भावः ॥ ५५ ॥ तां रुक्मिणीम् । ततो राजसमूहात् । 'हरिः सिंहे कपौ हरे' इति कोशात् । रथमारुरुक्षतीं कालविलम्बाय तथा तदारोहणार्थमितस्ततश्चेष्टामात्रं कुर्वतीं न तु सहसारोहन्तीमित्यर्थः । पूर्वं तदनारोहणं देवयात्रागौरवेणेति ज्ञेयम् । समीक्षतामित्यनादरे षष्ठी । एवं परमप्रागल्भ्यं विक्रमवत्त्वं क्षिप्रकारित्वं च दर्शितम् । सुपर्णमिति–रथांतराऽऽशंकानिरासः, शोभातिशयश्चोक्तः । शनैर्ययाविति निर्भयत्वात् ॥ ५६ ॥ तं रुक्मिणीहरणरूपम् । तेषां जरासंधादीनाम् । आक्रोशं स्वपरनिंदनरूपम् । केसराः सन्ति येषां ते "केसरं हिंगुनि क्लीबं किंजल्के न स्त्रियां पुमान् । सिंहच्छटायां पुन्नागे बकुले नागकेसरे ।" इति मेदिनी । यशसः क्षयो यस्मात्तम् । परे शत्रवः, तत्रापि मानिनः । 'परैः' इति पाठः क्वचित् । 'जरासन्धवशाः' इति च । आत्तं यद्धनुस्तत्प्रशस्तत्वेन विद्यते येषामारोपितधनुष्पाणीनां राज्ञामपि । गोपैरिति बहुत्वं श्रीकृष्णानुवर्तित्वेन यदूनामपि गोपत्वध्वननात् । 'अस्मद्यशः' इति पाठश्चिन्त्यः ॥५७॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे उत्तरार्द्धे त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यामिति युग्मकम् । मोहिनीरूपतयामातां वीक्ष्य नृपतयस्तु क्षितौ पेतुः स्वरूपतया सर्वतो विलक्षणां स्वीयां शोभां तु हरयेर्पयन्तीं तत्वसुरेभ्य इवान्यतो मातामित्यर्थः ॥ ५४ ॥ एवमनेन स्वशोभार्पणप्रकारेण वामकरजैर्वामकराङ्गुलिभिरलकानुत्साय्यं भगवतस्तस्य प्राप्तिं ह्रियापाङ्गैर्मुहुरपाङ्गविक्षेपैरेव नतु साक्षान्नेत्राभ्यां प्रसमीक्षमाणा निकटे पतितान् नृपान् ऐक्षत । तदनन्तरं तु अच्युतं ददर्श किं कुर्वती चरणावेवाब्जकोशौ तौ तस्य प्रत्यासत्तिकामनया शनैश्चालयन्ती चलत्पद्मकोशाविति पाठन्तु श्रीस्वामिसम्मतः अत्र रूपकवलेनैव रूप्यं लभ्यत इति चरणावध्याहृतौ अतिशयोक्तिनाम्नोऽलङ्कारस्तु प्रथमस्तु भेदोऽयं यथोक्तम्—

> "सिद्धित्वे ध्यवसायस्यातिशयोक्तिर्निगद्यते ।
> भेदेप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपय्ययौ । पौर्वापर्य्यात्ययः कार्य्यहेत्वोः सा पञ्चधा मता" ॥

विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोध्यवसाय इति अच्युतं चेति प्रायः स्वामिसम्मतोयं पाठः अच्युतं सेति पाठस्तु सर्वत्र दृश्यते अत्र पूर्वत्र सा तादृशी यत्तदोरन्वयबलात् उत्तरत्र सा रुक्मिणी प्रकरणबलात् अच्युतमिति निजप्रतिज्ञातोच्युतेस्तथा तच्चिता च्युतिरोहित्याभिप्रायेण इत्यनेन तत्परिचायनापेक्षा निरस्ता ॥ ५५ ॥ रथमारुरुक्षन्तीं कालविलम्वाय तथा तदारोहणार्थमितस्तश्चेष्टामात्रं कुर्वन्तीं नतु सहसाऽऽरोहन्तीमित्यर्थः । पूर्वं तु तदनारोहणं देवयात्रागौरवेणेति ज्ञेयं समीक्षतां सम्यगीक्षमाणानामिति मोहापगमं सूचयति अनादरे षष्ठी । एवं परमं प्रागलूभ्यं विक्रमवत्त्वं क्षिप्रकारकत्वादिकं च दर्शितं सुपर्णलक्षणमिति

तदीयत्वप्रसिद्धया भयेन सर्वेषामापाततः स्तब्धता दर्शिता रथस्य शोभाविशेषश्च शनैरेव ययौ निर्भयत्वात् ॥ ५६ ॥ यशसः क्षयो यस्मात्तम् अर्थात्स्वस्य । यद्वा, यशसः क्षयं च परे शत्रवः तत्रापि मानिनः परैरिति पाठः क्वचित् मुखा इत्यत्र वशा इति च आत्तं यद्धनुस्तत्प्रशस्तत्वेन विद्यते येषां तेषाम् आत्तधन्विनाम् आरोपितधनुष्पाणीनां राज्ञामपि गोपैरिति च बहुत्वं श्रीकृष्णानुवर्त्तित्वेन यदूनामपि गोपत्वध्वननात् अस्मद्यश इति पाठश्चिन्त्यः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यात्रा देव्यालय गमनम्, तस्याश्छलेनेति वस्तुतो यात्राया अन्तःपुराद्बहिः श्रीभगवता हरणार्थकत्वात् स्वकीयामसाधारण शोभाम्, हरय एव, न तु तेभ्योऽर्पयन्तीं दर्शयन्तीमित्यर्थः । एवमनेन स्वशोभार्पणप्रकारेण चरणावेव सुकोमलत्वादिनाब्जकोशौ शनैश्चालयन्ती; पाठान्तरे च पद्मकोशाविति पाठे रूपकवलेन रूप्यौ चरणौ बुध्येत एव । अर्थः स एव, शनैश्चालने एवमित्येको हेतुः । अब्जकोषरूपकत्वेन मृदुत्वमन्यो हेतुः, किञ्च, भगवतः सर्व्वैश्वर्य्ययुक्तस्य श्रीकृष्णस्य प्राप्तिमागमनम्, किंवा अशेषगुणरूपवतस्यात्मना प्राप्तिं चक्षुरादिभिः साक्षाल्लब्धिं प्रकर्षेण परमौत्सुक्यादिना समीक्षमाणा अपेक्षमाणा, हेतुनामेषां यथोत्तरं श्रैष्ठ्यम् ॥ ५४ ॥ अलकानुत्सार्य्येति–सम्यक् श्रीभगवद्दर्शनार्थम्, तेन वैदग्ध्यपि सूचिता । प्राप्तान् शिशुपालसाहाय्यार्थमागतान् सर्व्वान् नृपानैक्षत, कृष्णदिदृक्षया सर्व्वतो ह्रिया अपांगक्षेपेण तानपश्यदित्यर्थः । सर्व्वतश्चालनेनैवापांगस्य बहुत्वम्; यद्वा, ह्रिया प्राप्तान् लज्जया अपमानजन्यया गृहीतान् नृपान्; यद्वा, अपांगैः सह वर्त्तमानान् तदुपरि पतितानलकानुत्सार्य्य, भगवतः प्राप्तिं कुतः कथमायातीत्येवमागमनं प्रकर्षेण नैकट्यादिना सम्यगितस्ततो दृष्टिप्रसारणेनेक्षमाणा सती नृपानितस्ततोऽग्रे पतितानैक्षत । अच्युतं च नृपवर्गवञ्चनार्थं दूरे स्थितं पश्चाद्ददर्श । ततश्च क्रियाया अपांगैरित्यस्याप्यत्रैव चान्वयः,—भावविशेषेण तथैव दृश्यत्वात् । अच्युतमिति निजधैर्य्याद्यच्युतेः, तथा तच्चित्तात् कदाचित् कथञ्चिदपि रूपगुणादिच्युतिराहित्याभिप्रायेण । इत्यनेन तत्परिचायनापेक्षा निरस्ता । रथारुरुक्षणे हेतुः—राजकन्यामिति पदभ्यां गृहगमनायोग्यत्वात्, किंवा सुकोमलपदत्वेन पुनः पादव्रजनाशक्तेरिति भावः । जहारेति—स्वयं रथादवतीर्य्य पाणिना तत्पाणिं गृहीत्वा अंके कृत्वा वेति ज्ञेयम् । सम्यगीक्षमाणानामिति मोहापगमं सूचयति; अनादरे षष्ठी । एवं परमं प्रागल्भ्यं विक्रमवत्त्वं क्षिप्रकारित्वादिकञ्च दर्शितम् । तच्च सम्भवेदेवेत्यभिप्रायेणाह—कृष्ण इति; यतः साक्षाद्भगवानित्यर्थः, यद्वा, परमाकर्षकः साक्षादेव हरणे महादक्ष इत्यर्थः ॥ ५५ ॥ सम्यगारोप्य शीघ्रं सुखं नीडान्तर्निवेश्येत्यर्थः । सुपर्णलक्षणमिति तदीयत्वप्रसिद्धया परमर्द्दन-शीघ्रगमनादिमाहात्म्यं सूचितम् । माधव इति लक्ष्मीरूपायाः श्रीरुक्मिण्याः प्राप्त्यभिप्रायेण; यद्वा, निजाशेषैश्वर्य्यप्रकटनार्थं यदुवंशे जातः, अतः परिभूय ततस्ततस्थानात् रामः पुरोगमोऽग्रगो येषां यादवानां तैः सह शनैरेव निर्ययौ, निर्भयत्वात् । तत्रानुरूपो दृष्टान्तः—शृगालेति । शृगालाबृतं स्वस्य भागं भोग्यं मांसं हरति बलादाच्छिद्य नयतीति तथा सः ॥ ५६ ॥ स्वेषामभिभत्र तिरस्कारं साक्षादेव हरणात्, स्व० शब्दस्य अग्रेऽप्यन्वयः स्वयशसः क्षयो यस्मात्तं किञ्चित् कर्त्तुमशक्त्या शौर्य्यादिप्रसिद्धिहानेः, यद्वा, स्वयशसः क्षयञ्च, शिशुपालाय कन्यासाधनोद्यमादिवैयर्थ्यात् । परे यादवेतरे सर्व्वे क्षत्रिया न सेहिरे सोढुं नाशकन्, यतो मानिनो वीराद्यभिमानवन्तः, यद्वा, परे शत्रवः, तत्रापि मानिनः, अहो खेदे, आत्तधन्वनां धनुष्पाणीनां राज्ञामपि यशोऽस्माकं गोपैर्गोरक्षार्थयष्टिमात्रग्रहणपरैर्वन्यैः करदैर्हृतम् । तच्चात्ययुक्तमेवेति दृष्टान्तमाहुः—केशरिणामिति भाग इति शेषः । यद्वा, भागहरणान्महाबलपराक्रमादियश एव हृतम् । गोपैरिति बहुत्वं श्रीकृष्णानुवर्त्तित्वेन यदुनामपि गोपत्वमननात् । अस्मद्यश इति पाठान्तरं चिन्त्यम्, समासान्तर्गतस्यास्मच्छब्दस्यातधन्वनामित्यनेन सम्बन्धासिद्धेः, अस्माकमिति च यत्तैर्व्याख्यातं तत् प्रकरणबलादेवेति दिक् ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां

श्रीदशम-टिप्पण्यात्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

हरिः सिंहः ॥ ५६–५७ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

न केवलं मुमुहुरपितु पेतुश्चेत्याह—यामिति । रथाद्यारूढास्ते नृपतयो यात्रामिषेण हरये स्वलावण्यमर्पयन्तीं यां वीक्ष्य तस्या उदारहासेन व्रीडावलोकेन च हृतानि चेतांसि येषां तेऽत एव विमूढाः अत एव च उज्झितानि त्यक्तान्यस्त्राणि यैस्ते भूमौ पेतुः ॥ ५४ ॥ सैवमिति सा रुक्मिणीत्थं पद्मकोशतुल्यौ चरणौ शनैः शनैश्चलयन्ती तत्र हेतुर्भगवतः श्रीकृष्णस्य प्राप्तिं प्रसमीक्ष-

माणावामकरनखैरलकानुत्सार्य अपाकृत्य अपाङ्गैस्तान्प्राप्तान्नृपान् ह्रिया अवैक्षत तदैवाच्युतं च ददर्श ॥ ५५ ॥ तामिति तदा कृष्णः रथमारोढुमिच्छन्तीं तां राजपुत्रीं द्विषतां चैद्यानां समीक्षतां सतां जहार ततो माधवः सुपर्णलक्षणं गरुडध्वजं रथमारोप्य रथोपस्थे आरोप्येत्यर्थः राजन्यमण्डलं परिभूय तुच्छीकृत्य रामः पुरोगमः अग्रयायी यस्य तथाभूतः शनैर्ययौ शनैरित्यनेन निर्भयत्वं सूच्यते। हरिः सिंहः सृगालमध्याद्यथा स्वभागहृक्छनैर्याति ॥ ५६ ॥ तदिति मानिनः केवलं दुरहङ्कारिणः शत्रवो जरासन्ध्यादयस्तत्कन्याहरणं स्वाभिभवं यशःक्षयं च न सेहिरे असहमानानां तेषामाक्रोशमाह—अहो इति। अस्मत्कीर्ति धिक् कुतः यतः आत्तधन्विनां धनुर्धराणाम् अस्माकं स्वमिति शेषः। गोपैरपहृतं केसरिणां सिंहानां भागो वृकैरिवेति ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नागहृद्गजहरो हरिः सिंहः ॥ ५६ ॥ यः अरिभिः कृतः तम्, के के परे ? इति तत्राह, जरासन्ध इति ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

(विजयध्वजतीर्थरीत्याऽष्टपञ्चाशत्तमः) ॥ ५८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यां वीक्ष्य इति स्वरूपेण वर्णयति—हरय इति ॥ ५४ ॥ सैवं भगवतः प्राप्तिं प्रसमीक्षमाणा समीक्षितुमारभमाणा तत्स्फूर्त्तिमयभावेन स्खलितान् सावरणातलकान् वामकरजैरुत्सार्य्य प्राप्तान् व्यवहितान् नृपानवैक्षन् ततश्च भीता सती तत्राच्युतञ्च ददृशे तच्च दर्शनं ह्रियायुक्तमित्यर्थः ॥ ५५ ॥ आरुरुक्षतीमित्येत्यर्थः ॥ ५६–५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

विलोक्येत्यादि। जगज्जनन्यां तस्यां कृतहृच्छयत्वेन मोहं प्राप्ताः, तेनैव पापेन नष्टप्राया इत्यर्थः ॥ ५३ ॥ सैवं शनैरित्यादि। चरणाब्जकोशौ अस्फुटकमलाकारौ चरणौ सुदृश्यत्वात्। वामकरजैरलकानुत्सार्य ह्या प्राप्तान् नृपानपाङ्गैरुत्सार्य अविलोक्येति यावत्। अच्युतमैक्षत श्रीकृष्णं ददर्श। पश्चात् सा ददृशे अर्थात्तेन, क्रिययैव कर्त्ताश्लिष्यते। आदौ सा तं ददर्श, पश्चात् स तामित्यन्योन्यमेवं दर्शनं जातमिति भावः ॥ ५६–५७ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

विलोक्य वीरा मुमुहुरित्यादि। जगज्जनन्यां कृतहृच्छयत्वरूपपापेनार्दिता मोहं बुद्धिनाशं प्रापुरित्यर्थः ॥ ५३ ॥ सैवमित्यादि। चरणाब्जकोषो अस्फुटकमलाकारो चरणौ सुदृश्यत्वात् श्यामालक्षणाच्च वा ॥ ५४ ॥ वामकरजैरलकानुत्सार्य ह्रिया प्राप्तान् नृपानपाङ्गैरुत्सार्य अदृष्ट्वेत्यादियावदच्युतमैक्षत, श्रीकृष्णं ददर्श, पश्चात् सा ददृशे, अर्थादच्युतेनेत्यर्थः। क्रियतामिति कर्त्ता कुर्विति कर्म आक्षिप्यत इत्यभियुक्ताः। अन्योन्य-दर्शनं जातमित्यर्थः ॥ ५६–५७ ॥

इति त्रिपञ्चाशत्तमाध्यायस्यान्वयाः समाप्ताः ॥ ५३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

तत् कृतो मायाप्रतीति जनितो योहृच्छयः कामस्तेनार्दिताः यथागन्धर्वदत्ताग्निस्थालीमुर्वशीमेव विलोक्य पुरूरवाः कामार्दितोऽभूत् यथैव तस्य काम उर्वशीज्ञानजन्य एव नतु स्थालीप्रतीतिजन्यस्तथैव वीराणां हृच्छयो मायाप्रतीतिजन्य एव नतु रुक्मिणीप्रतीतिजन्य एवेत्यतोऽन्योक्त विरुद्धोऽर्थः पराहतः ॥ ५३ ॥ न केवलं मुमुहुः पेतुश्चेत्याह—यामिति। अत्रापि श्लोके देवमायामिति पदमनुवर्त्तनीयं यां श्रीरुक्मिणी देवमायामिव वीक्ष्य ते नृपतयो मूढाः सन्तः पेतुः यां रुक्मिणी कीदृशी हरये स्वशोभामर्पयन्ती न त्वन्येभ्यः ॥ ५४ ॥ सा रुक्मिणी श्रीकृष्णं दिदृक्षमाणैव प्राप्तान् तत्रागतान् ह्रिया ऐक्षत ह्रियेत्येतेऽन्ये पुरुषा इति तद्दर्शनेन लज्जाऽजनिष्टेति भावः तन्मध्य एवाच्युतं ददृशे ददर्श यः खलु हृदयात् च्युतो न भवतीति भावः ॥ ५५–५६ ॥ असहतेषामाक्रोशमाह—अहो इति यतोऽस्माकं यशो गोपैर्हृतम् ॥ ५७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। त्रिपञ्चाशत्तमोऽध्यायो दशमेऽजनि सङ्गतः ॥ ५३ ॥

गूढार्थदीपिनी

यां वीक्ष्य ते भुवि पेतुः सा रुक्मीणित्युत्तरेणान्वयः। उदार आकर्षकः हासः व्रीडावलोकश्च तेन हृतानि आकृष्टानि चेतांसि येषां ते। उज्झितानि त्यक्तानि ॥ ५३ ॥ चलदब्जकोशाविव कोमलौ चरणौ चालयन्ती। करजैर्नखैर्विकीर्णान् अलकान्

अपसार्य ह्रिया नृपानैक्षत तदैवाच्युतं च ददृशे इति चकारस्यान्वयः। अत्रान्ते सेति पाठोऽसम्बन्धः श्रीधरासम्मतश्च ॥ ५४ ॥ तामिति सार्द्धम्। तां कन्यां जहार ततश्च शनैर्ययावित्युत्तरेणान्वयः। शनैरिति निर्भयत्वद्योतनाय। द्विषतांसमीक्षतामित्यनादरे षष्ठी। रामः पुरोगम अग्रणीर्येषां तैर्यदुभिः सह। हरिः सिंहः। सुपर्णलक्षणं गरुडध्वजम् ॥ ५५ ॥ तं रुक्मिणीहरणरूपम् स्वपराभवं परे शत्रवः न सेहिरे अहो खेदे। अस्मान् धिक् यतोऽस्माकं यशो गोपराजैर्हृतमित्यन्वयः। वयं मृगास्ते सिंहाः क्वसाम्यमित्यर्थः इति। स्तुतिः ॥ ५६ ॥

इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यां वीक्ष्यते क्षितौ पेतुः सा तानैक्षत अच्युतं च ददर्शेत्युत्तरेणान्वयः यात्राछलेन यात्रामिषेण ॥ ५३–५४ ॥ चलपद्मकोशतुल्यौ चरणौ चलयन्ती चालयन्ती ॥ ५५ ॥ तां सुपर्णलक्षणं गरुडध्वजं रथं समारोप्य माया रमा तस्या धवः पतिः ययावित्यन्वयः ॥ ५६–५७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तौ सा च स च ते विदर्भप्रसूतानां नृपाणां कुलदेवते तयोरन्तिकं समीपम् ॥ ५३ ॥ चिरमाराधिते पदाब्जे यस्याः सा ताम्। प्रणम्य निर्ययौ रत्नमुदोपशोभितेति विशेष्ये वैय्यर्थ्यं भजत्पाणिनाऽन्वेति। रत्नमुद्रोपशोभितपाणिना धात्री प्रगृह्य गृहीत्वेत्यर्थः। दीप्तानलकांद्युतिमप्रमेयमिति प्रमेयदीपिकाद्युदाहरणपूर्वकं प्रकाशितमस्माभिरनुसन्धेयम्। विभक्तिविपरिणामेनान्वयो वा। शोभितामिति द्वितीयान्तपाठे धात्र्या विशेषणम्। अनेन तस्या एतत्स्पृश्यत्वयोग्यसौभाग्यं ध्वन्यते ॥ ५४ ॥ धृतान्यनेकानि च तान्यातपत्राणि च तैराढ्या धृतानेकान्यातपत्राणि यस्याः साऽऽढ्या श्रीमतीति वा बीजद्भिश्चामरैः सङ्कुला व्याप्ता कुण्डलाभ्यां सङ्कुलं वाच्यवद्व्याप्त इति विश्वः ॥ ५५ ॥ देवमायां भगवज्जगद्बन्धकशक्तिमिव वीरमोहिनीं सुमध्यमां शोभतकटिप्रदेशां रुक्मिणीमिति च गतम्। मण्डितमाननं यस्याः सा श्यामां षोडशवार्षिकी व्यञ्जन्तौ स्तनौ यस्याः साः तां कुन्तलैः शङ्किते ईक्षणे यस्याः सा तां। चूर्णकुन्तलानां प्रसरणे नेत्रयोः शङ्कितता कुन्तान् लान्तीति कुन्तला भटास्तैः शङ्कितमीक्षणं कृष्णस्य दर्शनं यस्याः सा द्विजा दन्ता एव कुन्दलकुड्मलानि बिम्बफलवद्विद्यमानो योऽधरस्तस्य द्युतिस्तया `शोणायमानानि तानि यस्याः सा तां। पादान्तवर्णत्वात्ते गुरुत्वं भवतीति न लाघवलाघवमुक्तेरिति ज्ञेयम् ॥ ५६ ॥ पदा चलन्तीम्। यद्यपि कुलदेवयात्रा निवृत्तेति यानमारुह्य गन्तुं शक्यं तथापि मानसिकरसिकयात्रामुद्दिश्य नेतुः कमितुः सौलभ्यार्थं पदा गमनमिति ज्ञेयम्। कलहंसगामिनीं सिञ्जत्क्वणन्नूपुरपादशोभितां सिञ्जन्तौ ध्वनन्तौ कनन्तौ काशमानौ नूपुरौ गतम्। तद्युक्ताभ्यां पादाभ्यां शोभितां पादयोः शोभिता नूपुराभ्यां पादशोभितेति केचित्। वीरा अपि समागता यशस्विनो जितेन्द्रिया इति तत्कृते तन्निमित्तमुत्थितौ यो हृच्छयो मदनस्तेनार्दिताः सन्तो मुमुहुः ॥ ५७ ॥ प्राक्चये विमूढाः कथञ्चन मौढ्यरहिताः सोऽपि सुप्रसिद्धश्चासावुदारहासश्च व्रीडावलोकश्च ताभ्यां हृतं चेतो येषां ते उज्झितानि त्यक्तान्यस्त्राणि येषां ते तथा गजरथाश्वगतास्तदारूढाः क्षितौ पेतुः। यात्राछलेन यात्रापदेशेन हरये कृष्णाय स्वशोभामपर्यन्ती ॥ ५८ ॥ सैवं पदपद्मकोशौ शनैश्चलयती चलनयुक्तौ करोति। अतो न कम्पने चलिरिति मित्त्वह्रस्व इति छान्दसो ह्रस्वः। चालयति। कुत इत्यत आह। प्राप्तिमिति। भगवतः प्राप्ति प्रसमीक्षमाणा वामकरजैः। करजस्तु करञ्जे स्यान्नख इति विश्वः। वामनखैर्दक्षिणकरस्य सखीकरस्थापनाद्वामेत्युक्तिः। सुन्दरनखैरिति वा। अपाङ्गैः कटाक्षैर्ह्रिया नृपान्ददृशे ऐक्षत साऽच्युतमैक्षत ददृशे ॥ ५९ ॥ समीक्षतां द्विषतांताननादृत्य रथमारुरुक्षतीं राजकन्यां कृष्णो जहार। सुपर्णो लक्षणं ध्वजरूपं चिन्हं यस्य स तं राजन्यचक्रं तत्सङ्घं परिभूय तिरस्कृत्य ततो हरणानन्तरं रामपुरोगमैः सह शनैः श्रृगालमध्यान्नागह्लद्धस्तिहर्ता हारैः सिंह इव ययौ। त्वरातो गमने पलायित इत्यपयशः स्यात्। किं चरणरणरणिकातश्च मन्दं नन्दननन्दनोऽगादिति भावः ॥ ६० ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धेऽष्टपञ्चाशोऽध्यायः ॥ १०–५८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नन्वेतादृश्या दर्शने यदि वीराणां रस उत्पद्यते, तदा दोषः स्यात्, अनुत्पत्तौ विषयस्योत्तमता न स्यादित्युभयतःपाशा रज्जुः, तत्परिहारार्थं वीराणां द्वेधा विनियोगमाह **विलोक्येति**। आदौ तां विलोक्य वीरा मुमुहुः, माहं प्राप्ताः **समागता** इति समागमनफलमुक्तम्। मूर्च्छायामपि सुषुप्ताविव किञ्चित्सुखमिति। 'मुग्धेऽर्धसम्पत्ति'रिति न्यायाच्च। **यशस्विनः** इति। तेषां पुन्यमपि सूचितम्। अभिलाषामप्याह। तत्कृतेन हृच्छयेन अर्दिता इति। एवं चतुर्भिर्धर्मैः तावत्फलं प्राप्तवन्त इति विषयोत्कर्षो

निरूपितः। दोषाभावायाह **यां वीक्ष्येति**। यावत्तेषां रसदृष्टिर्भवेत्, तन्मध्ये निपतिता एव ते। तत्रापि हेतवः। ते हि भगवद्विमुखाः। तत्रापि नृपतयः अभिमानिनः जरासन्धादयः। तेषां बलमुत्साहशक्तिश्च रसानुभवार्थे हेतुभूतं तस्या भावैर्हृतमित्याह। तस्या उदारो यो हासः, सर्वरसदानसमर्थश्च व्रीडावलोकश्च, व्रीडा च अवलोकश्चेति वा, त्रिविधैरपि भावैः हृतचेतसो जाताः। त्रिविधं हि चित्तमिति। तदभावे युद्धाभावात्, उज्झितास्त्रा जाताः ॥ ५३ ॥ ततः क्षितौ पेतुः। पतितानां पुनरुत्थानाभावायोच्चानि स्थानान्याह **गजरथाश्वगता** इति। यद्भगवता कर्तव्यम्, तदनयैव कृतमिति निरूपणार्थमेतदुक्तम्। **विमूढा** इति पातज्ञानाभावोऽपि। नन्वेषा दुर्गेव प्रचण्डेति चेत्, तत्राह **यात्राच्छलेनेति**। हरये स्वशोभामर्पयन्तीम्। प्रसङ्गादेतज्जातम्। सा तु स्वदुःखहरणार्थं स्वशोभाभाविर्भाव्य भगवते प्रयच्छति। तत्र प्रसङ्गात् सा शोभा स्वयं ग्राह्येति अयोग्यमिच्छन्तः पतिताः न तु रुक्मिण्या पातिताः। नन्वेषा यात्रां कृत्वैव गच्छति, कथं भगवते शोभां प्रयच्छतीति चेत्, तत्राह। यतः शोभा स्वकीया, स्वयं त्वन्यदीया, अतः स्वदाने स्वापेक्षाभावेऽपि स्वकीयं देयमेवेति। अत एव तस्या भगवदन्वेषणमाह **सैवमिति**। शीघ्रगमने रथारोहणं भविष्यतीति शनैः पदपद्मकोशौ चलयती जाता, चालयती। कोशत्वान्मुकुलितत्वमुक्तम्। अनेन कियद्दूरचलनेन पादयोर्व्यथा जातेति ज्ञापयन्तीव मुकुलितपादौ स्थापयतीति गम्यते। तथा व्याजकरणे हेतुः, तदैव तस्मिन् क्षण एव भगवतः प्राप्तिं प्रसमीक्षमाणा ॥ ५४ ॥ कन्याया राजदर्शनमपि कर्तव्यं वैलक्षण्यज्ञापनायेति तद्भगवदर्थं जातमित्याह। उत्सार्य वामहस्तनखैरलकान् अपाङ्गैः प्राप्तान् नृपान् समैक्षत। ततः यदर्थं तान् दृष्टवती तमच्युतं ददर्श। नन्वपूर्वदर्शने कथं परिज्ञानमिति चेत्, तत्राह **अच्युतं सेति**। उभयोर्ज्ञापकमेकैको धर्मः। सा हि चित्रे भगवन्तं दृष्टवती, स्वप्नभ्रमेषु च। अतो रूपं दृष्टपूर्वम्। भगवान्प्यच्युतः सर्वत्रानुस्यूतः, नतु चित्रादिष्वन्यः, अत्रान्य इति। सर्वत्रैव भगवतः अच्युतत्बात्। अच्युतत्वात्। ततोऽग्रे दृष्टिर्न गतेति तमेव विलोकयन्ती यदा स्थिता, तदा सर्वैः रथारोहार्थं नियुज्यमाना जाता। तन्मध्ये भगवान् जहारेत्याह **तां राजकन्यामिति**। तामिति कृतात्मनिवेदनाम्, राजकन्याया हरणं च युक्तमिति, रथारोहे पुनः सारथ्यादेः मारणं कर्तव्यमिति, यदैव रथारोहणेच्छुर्जाता, तदैव जहार। तदा हि सर्वसमूहः अपगतो भवति। तत्र प्रतिबन्धकानां साक्षित्वं जातमित्याह **द्विषतां समीक्षतामिति**। कृष्णस्य हि स्त्रियः। हरणं हस्तेन ग्रहणमुत्तोलनमिति यावत् ॥ ५५ ॥ ततो रथं समारोप्य यथावित्यग्रेण सम्बन्धः। उपस्थितरथपरित्यागाय **सुपर्णलक्षणमिति**। तत्र वेष्टका राजन्याः सन्ति, परितश्चक्ररूपेण स्थिताः। तत्सर्वं परिभूय पराभवं प्रापयित्वा। दृष्टबलयस्त्येव, अदृष्टमपि बलं तस्यैवेति ज्ञापयन्नाह **माधव** इति। लक्ष्मीपतिर्भगवान्; इयं च लक्ष्मीः। अतो भार्येत्यस्याः परिपालने भगवतो धर्मो जातः। ते त्वनधिकारिणस्तदभिलाषिण इति तेषां पापमेव सिद्धम्। अतः पराभवो युक्त इत्यर्थः। तेषां पराभवे रक्षकाणामपि युद्धं सम्भवतीति, तेषां वधे अमङ्गलं च भवतीति, तद्दोषं परिहरन्नाह **ततो ययाविति**। **तत** इत्यव्ययनिर्देशः। तस्य स्थानस्याविकृतत्वाय न कोऽपि तत्र हत इत्यर्थः। तर्हि पुरमध्ये कियद्दूरे हननं भविष्यतीत्याशङ्क्याह **यया** विति। **या** प्रापण इति कुशलेनेष्टदेशपर्यन्तं गत इत्यर्थः। तदीयानां वा रामादीनामुपद्रवमाशङ्क्य तन्निषेधार्थमाह **रामपुरोगमै**रिति। रामो हि साधनशक्तिः पुरोगमो येषामिति सर्वेषां साधनवत्त्वं रमणात्मकत्वादमारकत्वं च सूचितम्। सम्मर्देनापि तथात्वशङ्क्याह **शनै**रिति। लोका हि नगरस्थाः त्रिचतुरान्विहाय समागता अपि लोकवदन्त्या कृष्णाय दत्ता रुक्मिणी, अतो भगवान् नयतीति सादरं प्रेक्षका एव जाता इति शनैरित्यनेन सूचितम्। ननु तत्रैव कथं सर्वसन्देहनिवृत्त्यर्थं भगवान् न स्थितः, श्वशुरादिभिः पश्चादभ्यनुज्ञातो गच्छेत्, किमिति निर्गत इत्याशङ्क्याह **शृगालमध्या**दिति। भवेदेवं यदि तत्र सन्तो भवेयुः। ते हि शृगाला दुष्टचिताः तन्मध्ये च स्वभागो न स्थापनीय। अतिरिक्तभाग एव शृगालानामिति। तत्रापि यदक्रूरमतिरिक्तं तत्साध्यानाम्, यत् क्रूरं तत् शृगालानामिति। यथाताग्निः चषालादूर्ध्वं पूपश्च साध्यानाम्, यतयश्च शृगालानामिति श्रौतो निर्णयः। न तु स्वभागस्य। किञ्च। लोकेऽपि तत् शृगालमध्ये न रक्षणीयमिति श्रौतो निर्णयः। न तु स्वभागस्य। किञ्च। लोकेऽपि तत् शृगालमध्ये न रक्षणीयमिति सिंहं दृष्टान्तीकरोति **हरि**रिति। यथा सिंहः स्वभागं हरति, तथा भगवानपि भागहृज्जातः। **भागभृ**दिति पाठे भागं बिभर्तीति। गृहीतस्य शुद्ध एव स्थाने स्थानपनमिति तत्र न स्थापितवान्, अन्यथा असुरगामि तद्भवेदिति ॥ ५६ ॥ ततो यज्जातं तदाह **तं मानिन** इति। अभिमानरक्षार्थमेव समागताः। तदुक्तम्। 'यद्यागत्य हरेत्कृष्ण' इति। तज्जातमिति स्वस्य अभिभवं तिरस्कारं यशसश्च क्षयं दृष्ट्वा। तत्रापि परैः कृतम्। नहि शत्रुकृतं सोढुं शक्यमिति। ते यदि विवाहेनापि नयेयुः, तथापि सोढुमशक्याः, किमुत बलादिति। तत्रापि जरासन्धवशाः, यैः पूर्वं जयोनुभूतः, अतो न सेहिरे, असहमाना जाताः। जरासन्धवशत्वेन यशःक्षयासहनम्, मानित्वेन स्वाभिभवासहनमिति। तत्रोभयविधं स्वनिन्दाप्रतिपादकं वाक्यमाह **अहो धिगिति**। आत्तधन्वनामस्माकं यशो धिगिति। यदि यशो भवेत् तदा यशसा भीताः नेतारो भवेयुः इति मानिनां वचनम्। जरासन्धप्रमुखाना वचनमाह **गोपैर्हृत**मिति। गोपाला हि गां हरन्ति। यस्य कस्यचित्। तत्रापि केसरिणां हृतमिति महदाश्चर्यम्। केसरी हि गां भक्षयति। गोपालाः पालयन्ति। अतः कृतं युक्तमेव, परमत्याश्चर्यमिति तेषां प्रशंसा स्वपौरुषख्यापनं च। अनेनातःपरं प्रयत्नो न कर्तव्य इत्यपि सूचितम्। कर्तव्योऽपीति अत्र हेतुमाहुः **केसरिणां मृगैरिवेति**। मृगा हि साधारणाः, केसरी मृगेन्द्रः, तत्रापि बहूनां भागोऽयमिति दृष्टान्तोऽत्र वर्तत इति नात्यन्तमाश्चर्यमिति स्वमनःसमाधानमाहुः ॥ ५७ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमलक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे चतुर्थोऽध्याय ॥ ४ ॥

विवरण टिप्पणी

अच्युतं सेत्यत्र । **उभयोरिति** । अच्युतं भगवति, सेति पदोक्तं चित्रदर्शनं च तस्यामित्यर्थः । **तं मानिन** इत्यत्र। **पदार्थः** पदार्थेनैवान्वेति नियमस्य प्रायिकत्वादात्तधन्वनामिति पदं समासान्तर्गतेनास्मच्छब्देनान्वेति ।

चतुर्थाध्यायव्याख्या समाप्ता ।

श्रीसुबोधिनी–सारः

तां रुक्मिणीं विलोक्य दृष्ट्वा तया कृतेन तत्कृते तदर्थं वा हृच्छयः कामस्तेनार्दिताः पीडिता यशस्विनः कीर्त्तिमंतो ये वीराः समागतास्ते मुमुहुर्मोहं प्रापुः ॥ ५३ ॥ किं च यां वीक्ष्य तस्या ऊदारेण हासेन व्रीडावलोकेन लज्जाप्रेक्षणेन हृतं चेतो येषां ते त्यक्तास्त्रा नृपतयो राजानो हस्तिस्थाश्वारूढास्ते क्षितौ भूमौ पेतुः । यात्राया: छलेन मिषेण हरये श्रीकृष्णाय स्वशोभां स्वचातुर्यम् अर्पयंतीं दर्शयन्तीम् ॥ ५४ ॥ एवं शनैर्मंदमंदं चलपद्मकोशतुल्यौ पादौ चालयती सती सा वधूः तदा समये तस्मिन् भगवतः प्राप्तिमागमनं प्रतीक्षमाणा वामहस्तनखैरल कान् केशान् उत्सार्य दूरीकृत्य अपांगैः कटाक्षैः प्राप्तान् नृपान् ह्रिया लज्जया ऐक्षतापश्यत् । साऽच्युतं प्राप्त ददर्श ॥ ५५ ॥ रथमारोढुमिच्छन्तीं तां राजकन्यां कृष्णो जहार । द्विषतां शत्रूणां समीक्षतां पश्यतां सतां सुपर्णस्य गरुडस्य लक्षणं चिह्नं यस्य यस्मिन् वा तं रथं समारोप्य राजन्यानां भूपानां चक्रं मंडलं परिभूय तिरस्कृत्य माधवः श्रीकृष्णो रामः पुरोगमोऽग्रेचरो येषां तैः सह शनैर्जगाम भागहृत् हरिः सिंहः शृगालमध्यात् इव ॥ ५६ ॥ वैरिणामाक्रोशमाह । यशसां कीर्त्तीनां क्षयो यस्मात्तं स्वाभिभवं स्वावज्ञां मानिनः परे शत्रव जरासंधस्य वशा अधीना नृपा न चक्षमिरे। "अहो दैवबलं बलम्" इत्युक्तेः । अस्मान् धिक् यतो हि आत्तं गृहीतं धनुर्यैस्तेषां यशो गोपैर्हृतमिति अहो चित्रमेतत् केसरिणां सिंहानां यशो मृगैरिव ॥ ५७ ॥

इति श्रीमद्भा० दशमस्कन्धे उत्तरार्द्धे सुबोधिन्यां टीकायां त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

न केवलं मुमुहुः, अपि तु गजाद्यारूढास्ते जरासन्धादयो नृपतयो यां वीक्ष्य मूढाः सन्तः क्षितौ पेतुरित्यन्वयः । तेषां मूढत्वमेव स्पष्टयति—उज्झितानि त्यक्तान्यस्त्राणि यैस्ते । तत्र हेतुमाह—तस्या उदारेण सुखदेन हासेन व्रीडापूर्वकावलोकेन च हृतानि चेतांसि येषां ते । तत्र हेतुत्वेन तच्छोभातिशयमाह—यात्राछलेनेति । 'हरिरत्रागतश्चेत् मम शोभां पश्यतु' इत्याशयेन गमनमिषेण स्वशोभां दर्शयन्तीमित्यर्थः ॥ ५३ ॥ सा रुक्मिणी तदैवं भगवतः प्राप्तिं प्रसमीक्षमाणा अत एव पद्मकोशतुल्यौ चरणौ शनैश्चलयती वामकरजैर्नखैरलकानुत्सार्य अपाकृत्य ह्रियैव प्राप्तान्नृपान् ऐक्षत, तदा च सा अच्युतं कृष्णं च ददर्श ॥ ५४ ॥ तदा श्रीकृष्णो रथमारोढुमिच्छन्तीं तां राजन्यां द्विषतां शत्रूणां चैद्यादीनां समीक्षतां समीक्षमाणानां सतां जहार । ततश्च सुपर्णलक्षणं गरुडध्वजं रथं समारोप्य राजकन्यां राजन्यानां चक्रं मण्डलं परिभूय तुच्छीकृत्य रामः पुरोगमः अग्रणीर्येषां तैर्यदुभिः सह शनैर्यायिति सार्धान्वयः । तत्र दृष्टान्तमाह—शृगालेति । स्वभागं हृत्वा हरिः सिंहो यथा सृगालमध्यान्निर्भयः शनैर्याति तथेत्यर्थः। रुक्मिण्या अपि तद्भागत्वं सूचयन्नाह—माधव इति ॥ ५५ ॥ मानिनो दुरहङ्कारिणो जरासन्धवशाः शत्रवस्तं कन्याहरणेन स्वाभिभवं स्वयशःक्षयं च न सेहिरे । असहमानानां तेषामाक्रोशमाह—अहो इति । अहो आश्चर्यं अस्मान् धिक् यशोऽस्मत्कीर्तिं च धिक् । तत्र हेतुमाह—आत्तधन्वनां धनुर्धराणामप्यस्माकं स्वं गोपैर्हृतमिति । तत्र दृष्टान्तमाह—केसरिणामिति । सिंहानां भागो यथा तुच्छैर्मृगैर्ह्रियते तथेत्यर्थः ॥ ५६ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीकाबालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने । त्रिपञ्चाशत्तमो रुक्मिण्या हरणनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

यामिति ॥ यात्राच्छलेन हरये स्वशोभाम् अर्पयतीम् । नुमभाव आर्षः । हरिरत्रागतश्चेत् मम शोभां पश्यत्विति दर्शयन्तीं राजभ्यः अदर्शयन्तीमपि यां वीक्ष्य गजरथाश्वगतास्तै जरासन्धाद्या दैत्यांशा नृपतयः तस्या उदारेण सुखदेन हासेन व्रीडापूर्वकावलोकेन च हृतानि चेतांसि येषां ते अत उज्झितास्त्रास्त्यक्तशस्त्राः विमूढाः सन्तः क्षितौ पेतुः । यामिति अग्रिमश्लोकोक्तसेत्यपेक्षया ॥ ५३ ॥ सेति ॥ सा रुक्मिणी तदैवं भगवतः प्राप्तिं प्रसमाक्षमाणा अत एव पद्मकोशतुल्यौ चरणौ शनैश्चलयती। नुमभाव आर्षः । वामहस्तस्य करजैर्नखैरलकानुत्सार्य अपाकृत्य ह्रियैव प्राप्तान्नृपान भुवि पतितान् अपाङ्गैः कटाक्षैः ऐक्षत। तदा च सा अच्युतं कृष्णं च ददर्श ॥५४॥ तामिति सार्द्धम् ॥ तदा माधवो लक्ष्मीपतिः श्रीकृष्णो रथमारोढुमिच्छतीं तां राजकन्यां

द्विषतां शत्रूणां समीक्षतां समीक्षमाणानां सतां जहार। शता आर्षः। ततश्च सुपर्णलक्षणं गरुडध्वजं रथं समारोप्य राजन्यानां चक्रं मण्डलं परिभूय तुच्छीकृत्य रामः पुरोगमः अग्रणीर्येषां तैर्यदुभिः सह शनैर्ययौ। तत्र दृष्टान्तः। स्वभागं हृत्वा हरिः सिंहो यथा शृगालमध्यान्निर्भयः शनैर्याति तथा ययौ ॥ ५५ ॥ तमिति ॥ मानिनी दुरहङ्कारिणो जरासन्धवशाः परे शत्रवस्तं कन्याहरणेन स्वाभिभवं स्वयशःक्षयं च न सेहिरे। अहो अस्मान् धिक् यतः केसरिणां सिंहानां यशो मृगैरिव आत्तधन्वनां धनुर्द्धराणामस्माकं यशः गोपैर्हृतम्। गोपै राजभिः मृगैः शरभैरिति वास्तवोऽर्थः ॥ ५६ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् गङ्गासहायो दशमत्रिपञ्चाशत्तमे व्यधात् ॥

इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायां त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तया कृतो हृच्छयः कामस्तेनार्दिताः पीडितः ते नृपतयः यां वैदर्भीं वीक्ष्य। तस्या रुक्मिण्या उदारहासादिभिः हृतज्ञानाः अतएव उज्झितास्त्राः पतितशस्त्रा संतः क्षितौ पेतुः ॥ ५३ ॥ चलपद्मकोशसदृशौ पादौ चलयती सा वामकरांगुलिभिः अलकान् उत्सार्यमुखाद्दुरीकृत्य प्राप्तान् नृपान् ह्रियैक्षत भगवतः प्राप्तिं समीक्षमाणा सती सा तदैवाच्युतं ददृशे ददर्श ॥ ५४ ॥ रथमारुरुक्षतीं तां कृष्णः समीक्षतां, समीक्षमाणानां द्विषतां सतां, जहार सुपर्णलक्षणं रथं समारोप्य। राजन्यचक्रं परिभूय च माधवः शृगालमध्यात्स्वभागहृत् हरिः सिंह इव। ततो ययौ रामपुरोगमैर्यदुवीरैश्च शनैरनुगम्य तेस्म ॥ ५५ ॥ तेषां स रोषत्वं दर्शयति तमिति। आत्तधन्वनामस्माकं यशोगोपैर्हृतं। अतोस्मान्धिक् अहो महत् कष्टं ॥ ५६ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंध व्याख्याने रुक्मिणीहरणनामा त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न केवलं मुमुहुरपि तु भूमौ पेतुश्चेत्याह। यामिति। गजरथाश्वगताः हस्तिरथाश्वारूढाः, तस्या उदारो यो हासस्तेन व्रीडावलोकेन च हृतानि चेतांसि येषां ते, अत एव, विमूढाः ते नृपतयः, यात्राच्छलेन यात्रामिषेण, हरये श्रीकृष्णाय, स्वशोभां स्वलावण्यं, अर्पयन्तीं, यां वीक्ष्य, उज्झितानि त्यक्तानि अस्त्राणि यैस्तथाभूताः सन्तः, क्षितौ भूमौ, पेतुः ॥ ५३ ॥ सैवेयमिति। एवमुक्तविधशोभायुक्ता, चलपद्मकोशौ चलायमानपद्मकोशतुल्यौ स्वचरणौ, शनैः मन्दं मन्दं, चलयती। तत्र हेतुः। तदा भगवतः श्रीकृष्णस्य, प्राप्तिं, प्रसमीक्षमाणा सा सर्वशास्त्रेषु लक्ष्मीत्वेन प्रसिद्धा, सा रुक्मिणी, वामकरजैः अलकान् किंचिन्नेत्रकोणान्तिकागतशिरोरुहान्, उत्सार्यापाकृत्य, ह्रिया, युता, सती, अपाङ्गैः, प्राप्तान् नृपान्, ऐक्षत तदैव, अच्युतं श्रीकृष्णं च, ददृशे ॥ ५४ ॥ तामिति। तदा, माधवः मधोर्गोत्रापत्यं रमापतिर्वा, कृष्णः, रथं आरुरुक्षतीमारोढुमिच्छन्तीं, राजकन्यां राजपुत्रीं, तां रुक्मिणीं, द्विषतां समीक्षतां समीक्षमाणान् द्विषतोऽनादृत्येत्यर्थः। राजन्यचक्रं राजमण्डलं, परिभूय अगणयित्वा, सुपर्णलक्षणं गरुडध्वजं, रथं समारोप्य रथोपस्थे आस्थाप्येत्यर्थः। जहार। ततः रामः पुरोगमोऽग्रयायी यस्य तथाभूतः सन्, शृगालमध्यात्, भागहृत् स्वभागहरः, हरिः सिंहः इव, शनैः ययौ। शनैरित्यनेन निर्भयत्वं सूच्यते ॥ ५५ ॥ तदिति ॥ मानिनः केवलं दुरहंकारिणः जरासंधमुखाः, परे द्विषन्त, ते नृपाः, तत् कन्याहरणं, स्वाभिभवं स्वपराभवरूपं, यशःक्षयं स्वयशःक्षयरूपं च, मत्वा, न सेहिरे। असहमानानां तेषां क्रोधमाहाहो इति। अहो अस्मान्, यशः नः कीर्त्ति च धिक्। कुतः। केसरिणां सिंहानां, स्वमिति शेषः। मृगैः इव, आत्तधन्विनामुद्यतायुधानामस्माकं, स्वं गोपैः हृतम्। कंसं छलेन व्यापाद्य क्षत्रिपतां मन्यमानं जातितो गोपं कृष्णमाश्रितैः क्षत्रियापसदैर्यादवैरपहृतमित्यर्थः ॥ ५६ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्द्धे त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

कृष्णप्रिया

रुक्मिणी जी इस प्रकार इस उत्सव यात्रा के बहाने मन्द-मन्द गति से चलकर भगवान् श्रीकृष्ण को अपना राशि-राशि सौन्दर्य निछावर कर रही थी। उन्हें देखकर और उनकी खुली मुस्कान तथा लजीली चितवन पर अपना चित्त लुटाकर वे बड़े-बड़े नरपति एवं वीर इतने मोहित और बेहोश हो गये कि उनके हाथों से **अस्त्र-शस्त्र** छूटकर गिर पड़े और वे स्वयं भी रथ, हाथी तथा घोड़ों से धरती पर आ गिरे ॥ ५३ ॥ इस प्रकार रुक्मिणी जी भगवान् श्रीकृष्ण के शुभागमन की प्रतीक्षा करती हुई अपने कमल की कली के समान सुकुमार चरणों को बहुत ही धीरे-धीरे आगे बढ़ा रही है। उन्होंने अपने बायें हाथ की अँगुलियों से मुख की ओर लटकती हुई अलकें हटायी और वहाँ आये हुए नरपतियों की ओर लजीली चितवन से देखा उसी समय उन्हें श्यामसुन्दर भगवान् श्रीकृष्ण के दर्शन हुए ॥ ५४ ॥ राजकुमारी रुक्मिणीजी रथ पर चढ़ना ही चाहती थी कि भगवान् श्रीकृष्ण ने समस्त शत्रुओं के देखते देखते उनकी भीड़ में से रुक्मिणी जी को उठा लिया और उन सैकड़ों राजाओं के सिर पर पाँव रखकर उन्हें अपने उस रथ पर बैठा लिया जिसकी ध्वजा पर गरुड का चिह्न लगा हुआ था ॥ ५५ ॥ इसके बाद जैसे सिंह सियारों के बीच में से अपना भाग ले जाय, वैसे ही रुक्मिणी जी को लेकर भगवान् श्रीकृष्ण बलराम जी आदि यदुवंशियों के साथ वहाँ से चल पड़े ॥ ५६ ॥ उस समय जरासन्ध के वशवर्ती अभिमानी राजाओं को अपना यह बड़ा भारी तिरस्कार और यश कीर्ति का नाश सहन न हुआ। वे सब-के-सब चिढ़कर कहने लगे—अहो, हमें धिक्कार है। आज हम लोग धनुष धारण करके खड़े ही रहे और ये ग्वाले, जैसे सिंह के भाग को हरिन ले जाँय, उसी प्रकार हमारा सारा यश छीन ले गये ॥ ५७ ॥

श्रीमद्भागवत दशमस्कन्ध उत्तरार्द्ध श्रीरुक्मिणीहरण ५३ वाँ अध्याय समाप्त।

* * *

अथ चतुःपञ्चाशत्तमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
६०	५७	३	३	१९८४	१८	४३	२०४५	६३॥।	५

श्रीशुक उवाच

इति सर्वे सुसंरब्धा वाहानारुह्य दंशिताः । स्वैः स्वैर्बलैः परिक्रान्ता अन्वीयुर्धृतकार्मुकाः ॥ १ ॥
तानापतत आलोक्य यादवानीकयूथपाः । [1]तस्थुस्तत्संमुखा राजन्विस्फूर्ज्य[2] स्वधनूंषि ते ॥ २ ॥
अश्वपृष्ठे गजस्कन्धे [3]रथोपस्थे च कोविदाः । मुमुचुः शरवर्षाणि [4]मेघा अद्रिष्वपो यथा ॥ ३ ॥
पत्युर्बलं शरासारैश्छन्नं वीक्ष्य सुमध्यमा । सव्रीडमैक्षत्तद्वक्त्रं [5]भयविह्वललोचना ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच इति, सर्वे, संरब्धाः, दंशिताः, घृतकार्मुकाः, स्वैः, स्वैः, बलैः, परिक्रान्ताः, वाहान्, आरुह्य, अन्वीयुः ॥ १ ॥ राजन् ! आपततः, तान्, आलोक्य, ते, यादवानीकयूथपाः, स्वधनूंषि, विस्फूर्ज्य, तत्, संमुखाः, तस्थुः ॥ २ ॥ यथा, मेघाः, अद्रिषु, आपः, तथा, कोविदाः, अश्वपृष्ठे, गजस्कन्धे, रथोपस्थे, शरवर्षाणि, मुमुचुः ॥ ३ ॥ सुमध्यमा, पत्युः, वलम्, शरासौरः, छन्नम्, वीक्ष्य, भयविह्वललोचना, सव्रीडम्, तत्, वक्त्रम्, ऐक्षत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चतुष्पंचाशत्तमे तु जित्वा राज्ञोऽरिपक्षगान् । रुक्मिणं च विरूप्याथ भैष्म्याः पाणि पुरेऽग्रहीत् ॥ १ ॥

इतीति । अहो धिगस्मानित्येवं वदंतः । सुसंरब्धाः क्रोधाविष्टाः । दंशिताः कृतसन्नाहाः । परिक्रांताः परिवृताः । अन्वीयुरन्वधावन् ॥ १ ॥ विस्फूर्ज्य टंकारयित्वा ॥ २ ॥ परेषां शराणां बाहुल्ये यादवानामचलत्वे दृष्टांतः । मेघा इति ॥ ३ ॥ ऐक्षदेक्षत ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अरिपक्षगान् शिशुपालपक्षीयान् । विरूप्य मुंडयित्वा (१) । सर्वे जरासंधादयः । वाहान् गजादीन् । धृतकार्मुका इति पूर्वं विमूढत्वेनोज्झितास्त्रतया गजादिभ्यो भूमौ पतनात् ॥ १ ॥ तान् राज्ञः । यादवानीकानां यूथानि पांति ये तथा ते बलदेवादयस्तत्संमुखा राजाभिमुखाः । त इति श्रीरामेण सहतदर्थमेव य आगता इत्यर्थः ॥ २ ॥ रथोपस्थे रथमध्ये "उपस्थः शेफसि क्रोडे तथा मदनमंदिरे" इति मेदिनी । क्रोडे मध्ये । रथोपस्थे तदुपरिस्थितनीडे । कोविदा युद्धाऽभिज्ञा जरासंधाद्याः ॥ ३ ॥ तद्वक्त्रं श्रीकृष्णमुखम् । सुमध्यमेति–लज्जयावनतमध्यत्वेन तत्र भंगुरत्वव्यक्तेः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वाहान् गजादीनारुह्येति धृतकार्मुका इति च पुरा विमूढत्वेनोज्झितास्त्रतया गजादिभ्यो भूमौ पतनात् ॥ १ ॥ इति । पूर्वमेतदर्थमेव श्रीरामेण सहागताः प्रसिद्धाश्च य इत्यर्थः स्वान्यसाधारणानि धनूंषि ॥ २ ॥ रथोपस्थे तदुपरि स्थितनीडे कोविदा युद्धाभिज्ञा जरासन्धमुखाः ॥ ३ ॥ सुमध्यमेति । लज्जया नम्रत्वेन भङ्गुरमध्यात्वव्यक्तेः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वाहान् गजादीनारुह्येति, धृतकार्म्मुका इति च, पुरा विमूढत्वेनोज्झितास्त्रतया गजादिभ्यो भूमौ पतनात् ॥ १ ॥ ते पूर्वमेव तदर्थमेव श्रीबलदेवेन सहागता ये, किंवा, महाबलपराक्रमादिना प्रसिद्धाः, किंवा, श्रीकृष्णैकप्रिया यादवालामनीकानि सैन्यानि, तेषां यूथपाः श्रीबलदेवादयः, स्वकीयान्यसाधारणानि धनूंषि । हे राजन्निति प्रहर्षात् ॥ २ ॥ रथस्योपस्थे उपरि च, अश्वपृष्ठादौ शरवर्षाणां मोचनं तेषामत्यन्तवाहुल्येन । तत्र तत्रावस्थितयोधैः सह तत्तद्व्यापनात्, अश्वादीनां यथोत्तरं वृहतया

---

१. तस्थुर्वै–विज. । २. विस्फार्य–वीर. । ३. स्थेऽस्य–श्रीधर. टि. । ४. मेघास्तोयं यथाद्रिषु–प्रा. पा. । ५. भाव–विज. ।

तेषु शरवर्षणाधिक्येन तत्तत्क्रमेण निर्देशः, मुमुचुर्नृपाः यतोऽस्त्रेषु कोविदा इति मेघसादृश्यमुपपादितम् ॥ ३ ॥ पत्युरित्यात्मनो बलस्य च रक्षणाभिप्रायेण, वीक्ष्य साक्षाद्दृष्ट्वा भयेन विह्वले अश्रुमोचनादिना आकुले चञ्चले वा लोचने यस्यास्तथाभूता सती, यतः सुमध्यमा परमोत्तमा, तादृशीनां सदा भीरुत्वात्, तत्रापि शरासारैश्छन्नं वीक्ष्य सव्रीडं यथा स्यादिति सुमध्यमात्वादेव नववीक्षणाद्वा ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथासहमानानां यदुभिः सह सङ्ग्रामं पराजयं चानुवर्णयति चतुष्पञ्चाशत्तमेन–इतीति । इत्यहो धिगित्येवं ब्रुवाणाः सर्वे सुतरां क्रोधाविष्टाः दंशिताः कवचिताश्च वाहानश्वादीनारुह्य स्वस्वबलैः परिक्रान्ताः परिवृताः धृतानि कार्मुकानि धनूषि यैस्ते अन्वीयुरन्वधावन् ॥ १ ॥ तानापततः शत्रूनवलोक्य ते यादवसैन्याधिपतयो हे राजन् ! स्वधनूंषि विस्फूर्ज्य टङ्कारयित्वा सम्मुखा उत्तस्थुः ॥ २ ॥ परेषां शराणां बाहुल्ये यादवानामल्पत्वे च दृष्टान्तः–मेघा इत्यादि मेघा यथा अद्रिषु अपो जलधारा मुञ्चन्ति तद्वदश्वपृष्ठादिषु कोविदाश्शत्रवो यादवसैन्ये शरवर्षाणि मुमुचुः ॥ ३ ॥ तदा सुमध्यमा रुक्मिणी शरैश्छन्नं भर्त्तुर्बलमवलोक्य भयेन कातरे लोचने यस्याः सा सव्रीड यथा तथा तस्य पत्युर्वक्त्रं मुखमैक्षत ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यादवानामनीकानां यूथानि समूहास्तान्पान्ति रक्षन्तीति यादवानीकयूथपाः ॥ २ ॥ अश्वपृष्ठादिषु स्थित्वा ॥ ३ ॥ आसारो वेगवान् वर्ष इति सुमध्यमा रुक्मिणी ऐक्षद्दृष्टवती ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चतुष्पञ्चाशत्तमेऽरिजयो रुक्मिविरूपता । भैष्म्याः प्रबोध उद्वाहो द्वारकायामितीर्यते ॥

विस्फूर्य टङ्कारयित्वा ॥ १–२ ॥ अद्रिष्विति । ते शरा यदूनामकिञ्चित्करा अभूवन्निति भावः ॥ ३ ॥ ऐक्षत् ऐक्षत ॥४॥

गूढार्थदीपिनी

शत्रून् जित्वा चतुष्पञ्चाशत्तमे रुक्मिमुण्डनम् । भैष्म्याः प्रसान्त्वनं पुर्यां तद्विवाहश्च वर्ण्यते ॥ १ ॥

सुसंरब्धा अतीवक्रुद्धाः । दंशिता धृतकवचाः वाहान् आरुह्य । अन्वीयुः कृष्णमन्वधावन् ॥ १ ॥ यूथपाः सेनापतयः विस्फूर्ज्य टङ्कारयित्वा तस्थुः ॥२॥ रथोपस्थे रथमध्ये ॥३॥ बलं सैन्यम् । शरासारैः शरवर्षैः छन्नं वीक्ष्य मध्यमः कटिभागः ॥४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

चतुष्पञ्चाशत्तमे श्रीरुक्मिणीहरणमसहमानानां राज्ञां पराजयं रुक्मिणो वैरूप्यकरणम् श्रीरुक्मिणीसान्त्वनार्थं श्रीबलवाक्यं श्रीरुक्मिणीविवाहोत्सवं च वर्णयति । इतीति । अहो धिगस्मानित्येवं वदन्तः सुसंरब्धाः क्रोधाविष्टाः दंशिताः संनद्धाः स्वैःस्वैर्बलैः सैन्यैः परिक्रान्ताः परिवृताः अन्वीयुः अनुजग्मुः ॥ १ ॥ विस्फूर्य टङ्कारयित्वा तेषां सन्मुखा उत्तस्थुः ॥ २–३ ॥ तद्वक्त्रं पतिमुखम् ऐक्षत् ऐक्षत ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ मानिनो निन्दिताहन्तावतो जरासन्धवशाः परे वैरिणो न स्वाभिभवं तथा यशःक्षयं च न सेहिरे । अहोऽस्मान्धिक् निन्द्यतामस्माकमित्यर्थः । केसरिणां सिंहानां मृगैरिवात्तधन्विनां नो यशो गोपैर्हृतमतो धिगिति ॥ १ ॥ दंशिताः कवचोपेताः परिक्रान्ताः परिवृताः ॥ २ ॥ यादवानीकयूथनाथाः स्वधनूंषि विस्फूर्ज्य सटङ्काराणि कृत्वा ॥ ३ ॥ कोविदास्तदुपदेशकुशलाः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यावन्निवर्तते चित्तं तदीयानां स्वभावतः । तावदन्यस्य विषयो भगवांस्तं न मन्यते ॥ १ ॥
अतो विधिविवाहार्थं तन्निराकरणं पुरा । त्रिविधानां निरूप्यं हि युद्धमुण्डनबोधनैः ॥ २ ॥
उदासीनाः स्वकीयाश्च स्वयं चेत्यत्र शत्रवः । मध्यमं भगवत्कार्यमनुकल्पो यतस्तथा ॥ ३ ॥
उत्तरार्धे पञ्चमे तु विवाहो वर्ण्यते हरेः । रुक्मिण्या सर्वभावेन तद्दोषान् विनिवर्त्य हि ॥ ४ ॥

पूर्वाध्यायान्ते स्वयशोनिन्दां कृतवन्त इत्युक्तम् । ततो यावच्छक्यं स्वपौरुषं सात्त्विकास्ते कृतवन्त इत्याह इतीति । सर्वे एव मिलिताः सुसंरब्धाः अल्पीयांसो भगवदीया इति स्वोद्यमः । भगवांश्च स्त्रीरक्षायां व्यापृत इति । अन्यथा सात्त्विकानां

विचारपूर्वकं प्रवृत्तिर्न स्यात् । सुष्ठु संरब्धाः क्रोधेन परस्परवाक्यैर्वा । ततो वाहान् रथादीन् दंशिताः बद्धकवचाः सम्भूय । युद्धे एकस्यापि भङ्गे सर्वेषां भवेदिति स्वैः स्वैर्बलैः पृथगेव परितः आक्रान्ताः, दूरादेव मारणार्थं धृतकार्मुकाः जाताः ॥ १ ॥ एवं शत्रूणामुद्योगमुक्त्वा तत्प्रतीकारार्थं भगवदीयानामप्युद्योगमाह **तानापतत** इति । **आ** सर्वतः **पततः** । अत्र विद्यमानाः सर्वे यादवानीकानां यूथपा एव, न तु कश्चित्सेनारूपः । साधारणो वा । अतस्तत्सम्मुखा एव तस्थुः आत्मीयाश्चेन्महान्तः अल्पीयांसोऽपि भवन्ति, तदापि जय इति बहूनामपि सम्मुखा जाताः । तानाकारयन्त इव स्वधनूंषि विस्फूर्ज्य जयनिनादं कृत्वा स्थिताः, यतस्ते रामादयः प्रसिद्धाः ॥ २ ॥ ततः प्रथमतः युद्धार्थं प्रवृत्ता इत्याह **अश्वपृष्ठ** इति । यत्रैव प्रहारे न कस्यापि व्यथा, **तत्रैव** तेषां शरपातो भवतीति ज्ञापनार्थं **अश्वपृष्ठ** इति । चर्मादि व्यवधायकमस्तीति । तथा गजस्कन्धेऽपि, तथा रथोपस्थे **अनुपविष्ट**भागे । कोविदा अपि । अथ वा यत्रैव पीडा सम्भवति, तत्रैव शरवृष्टिं कृतवन्तः । यतः कोविदाः । चकारात् सारथिस्थानेऽपि । प्रतीकाराकरणेऽपि न कश्चित्तेषामपकारो जात इत्यत्र दृष्टान्तमाह **मेघा अद्रिष्विति** । न दीर्यत इत्यद्रिः । अन्यथा विदारे तदीयानामपकारात् विशेषणं व्यर्थं स्यात् । तत्रापि मेघाः साधारणाः, न तु नीलाः । तत्राप्यपः, न तु धाराः ॥ ३ ॥ ततो रुक्मिण्या भयं जातम्, तद्भगवता निवारितमिति निरूप्यते । भगवान् भक्तार्थमेव सर्वं करोतीति ज्ञापनार्थम् । केवलं तेषां वधे रुक्मिण्या अप्यसम्मतौ स्वार्थमेव तत् कृतवानिति क्लिष्टकर्मता स्यात् । ततो युद्धात्पूर्वं तदाह पत्युर्बलमिति **द्वाभ्याम्** । **शराणा**मासारैः धारासम्पातैः सम्यक् छन्नम् । पत्युर्भगवतो बलं छन्नं वीक्ष्य तद्वक्त्रं सव्रीडमैक्षत । **सुमध्यमे**ति विनियोगोऽन्यथा भविष्यतीति शङ्कया, शुद्धान्तःकरणा वा । राजसगुणे हि सति शौर्यादिकं भवतीति । एतदर्थमेव भगवदीयानां सहनम् । अपूर्वदर्शनमिति सव्रीडमैक्षत । वस्तुतः सभयं द्रष्टव्यम्, तथापि तावदयं पलायनमपि कर्तुं शक्त इति । लज्जैव परं भवेदिति । उभयथापि सव्रीडमैक्षत । ततः क्षणानन्तरं भयेन विह्वले लोचने यस्याः तादृश्यपि जाता । तस्य भगवतो वक्त्रमैक्षत ॥ ४ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । इत्येवं सर्वे सुसंरब्धाः अतिक्रुद्धा दंशिता बद्धकवचा बाहानारुह्य गृहीतधनुष्काः स्वैःस्वैर्बलैः सैन्यैः परिक्रांताः परिवृता अन्वीयुः पृष्ठतो जग्मुः ॥ १ ॥ आपतत आयातांस्तानालोक्य दृष्ट्वा यादवसैन्ययूथपतयस्ते स्वेषां धनूंषि विस्फूर्याकृष्य तेषां संमुखाः तस्थुः हे राजन् ॥ २ ॥ तद्यथा । वाजिपृष्ठे हस्तिपृष्ठे रथमंचे चेति कोविदा निपुणाः शराणां वर्षाणि मुमुचुः । मेघा अद्रिषु पर्वतेष्वपो जलानीव ॥ ३ ॥ शरासारैर्बाण धारापातैः छन्नमावृतं पत्युः श्रीकृष्णस्य बलं सैन्यं वीक्ष्य दृष्ट्वा सुमध्यमा रुक्मिणी भयेन विह्वले लोचने यस्याः सा सव्रीडं सुलज्जं यथा भवति तथा तस्य हरेर्वक्त्रं मुखमैक्षताऽपश्यत् ॥ ४ ॥

विवरण टिप्पणी

पञ्चमेऽध्याये । **कारिकायाम्** । युद्धेति । **युद्धे**न जरासन्धादीनां मुण्डनेन रुक्मिणः बोधनेन रुक्मिण्यज्ञानस्य च निवारणमित्यर्थः । **स्वयं चे**ति । भगवत्कृतिमननुमोदमानः स्वात्मापि शत्रुरिति भावः । **इति सर्वे** इत्यस्याभासे । **सात्त्विका** इति । 'भो भो पुरुषशार्दूले'त्यनेन ज्ञानोपदेशस्य वक्ष्यमाणत्वा 'त्सत्वात्संजायते ज्ञान'मिति तावदंशमादाय सात्त्विकत्वमिति भावः ।

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

चतुःपञ्चाशत्तमे तु रुक्मिणोऽथ विरूपणम् । रुक्मिण्या सह चोद्वाहः कृष्णस्य विनिरूप्यते ॥ १ ॥

'तदनन्तरं किं जातम्' इत्यपेक्षायामाह—इतीति । 'अहो धिगस्मान्' इत्येवं ब्रुवाणाः सुसंरब्धाः सुतरां क्रोधिष्टाः, दंशिताः बद्धकवचाः, धृतकार्मुकाः, स्वैस्वैर्बलैः सैन्यैः परिक्रान्ताः परिवृताः, सर्वे जरासन्धादयः वाहनारुह्य अन्वीयुः कृष्णमन्वधावन् ॥ १ ॥ ततश्च हे राजन् ! तान् शत्रून् आपततः आगच्छतः आलोक्य ते यादवसैन्याधिपतयः स्वधनूंषि विस्फूर्ज्य टङ्कारयित्वा तेषां सम्मुखाः तस्थुः ॥ २ ॥ ते जरासन्धादयः कोविदा युद्धेऽतिनिपुणा अपि यत्र शरनिपाते न कस्यापि कश्चिदपकारस्तेष्वेवाश्वपृष्ठादिषु शरवर्षाणि मुमुचुः । तत्र दृष्टान्तमाह—मेघा इति । मेघा यथा अद्रिषु अपो जलधारा मुञ्चन्ति, न तेन तेषां कश्चिदपकारस्तथा तेषां शरवर्षेणापि न कश्चिद्यादवानामपकार इत्यर्थः ॥ ३ ॥ तदा सुमध्यमा कोमलचित्ता पत्युर्बलं शरासारैः शरवर्षैराच्छन्नं वीक्ष्य भयेन विह्वले लोचने यस्याः सा रुक्मिणी सव्रीडं यथा स्यात्तथा तस्य पत्युर्वक्त्रमैक्षत ॥ ४ ॥

अन्वितार्थप्रकाशिका

चतुष्पञ्चाशत्तमेऽरोञ्झित्वा श्यालं विरूप्य च । रुक्मिणीमूढवांस्तत्र श्लोकानां षष्टिरर्द्धयुक् (६०॥) ॥
उवाचेति त्रयं (३) द्वाभ्यां युक्ता षष्टिरनुष्टुभाम् (६२) ॥ ५४ ॥

इतीति ॥ अहो धिगस्मान् इत्येवं ब्रुवाणाः सुसंरब्धाः सुतरां क्रोधाविष्टाः गजादिभ्यः पूर्वं पतितास्ते वाहानारुह्य दंशिताः बद्धकवचाः पूर्वमुज्झितास्त्रत्वात् इदानीं धृतकार्मुकाः स्वैः स्वैर्बलैः सैन्यैः परिक्रान्ता परिवृताः सर्वे जरासन्धादयः

अन्वीयुः कृष्णमन्वधावन् ॥ १ ॥ तानिति ॥ हे राजन् ! तान् शत्रून् आपततः आगच्छतः आलोक्य ते यादवानीकयूथपाः यादवसैन्याधिपतयः स्वधनूंषि विस्फूर्ज्य टङ्कारयित्वा तेषां सम्मुखाः तस्थुः ॥ २ ॥ अश्वेति । कोविदाः युद्धनिपुणाः जरासन्धादयः अश्वपृष्ठे गजस्कन्धे रथोपस्थे च स्थितेषु यादवेषु शरवर्षाणि मुमुचुः । यथा मेघा अद्रिषु अपो जलानि वर्षन्ति तथेत्यर्थः । तेन यादवानां हानेरभावः सूचितः ॥ ३ ॥ पत्युरिति । तदा सुमध्या रुक्मिणी पत्युर्बलं शरासारैः शरवर्षैराच्छन्नं वीक्ष्य भयेन विह्वले लोचने यस्याः तादृशी सती सव्रीडं यथा स्यात्तथा तस्य पत्युर्वक्त्रमैक्षत् ऐक्षत । तङभाव आर्षः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ चतुःपंचाशत्तमेऽध्याये चैद्य पक्षीय राजन्य पराजयो रुक्मि वैरुप्यकरणं च द्वारकायां रुक्मिणीं पाणिग्रहणं च निगद्यते इतीति ॥ सुसंरब्धाः कोपयुक्ताः वाहान् वाहनानि ॥ दंशिताधृतवर्माणः ॥ बलैः परिक्रांता आवृताः अन्वीयुः अनुजग्मुः ॥ १ ॥ विस्फूर्ज्य उद्यम्य ॥ २ ॥ कोविदाबाण निक्षेपणे निपुणाः यादवानां निश्चलत्वे निदर्शनं मेघा इति ॥ ३ ॥ ऐक्षत् ऐक्षत ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चतुःपञ्चाशत्तमेऽथ राज्ञो जित्वाऽरिपक्षगान् । विरूप्य रुक्मिणं चापि पाणिं भैष्म्याः पुरेऽग्रहीत् ॥ १ ॥

अथैतदसहमानानां राज्ञां यदुभिः सह संग्रामं यादवकृतं तत्पराजयं चानुवर्णयति ॥ इतीति ॥ इति अहो धिगस्मानेवं ब्रुवाणाः, सुसंरब्धाः सुतरां क्रोधाविष्टाः, दंशिताः कृतसंनाहाः, वाहान् स्वस्वाश्वान्, वाहा उपलक्षणम् । स्वस्ववाहनानीत्यर्थः । आरुह्य, स्वैः स्वैः, बलैः सैन्यैः, परिक्रान्ताः परिवृताः,धृतानि कार्मुकाणि यैस्ते, कार्मुकमुपलक्षणं सर्वायुधानाम् । एवंभूताः सन्तः, अन्वीयुरन्वधावन् ॥ १ ॥ तानिति ॥ आपततः अभ्यागच्छतः, तान् शत्रून्, आलोक्य ते यादवानीकयूथपा यादवसैन्याधिपतयः, स्वधनूंषि, विस्फूर्ज्य टंकारयित्वा, हे राजन्, तत्सन्मुखाः, तस्थुः ॥ २ ॥ अश्वपृष्ठ इति ॥ कोविदा युद्धकुशलाः, सर्वे नृपाः, अश्वपृष्ठे, गजस्कन्धे, रथोपस्थे च, अश्वाद्यारूढेष्वित्यर्थः । मेघाः, अद्रिषु पर्वतेषु, अपो जलानि, यथा तथा, शरवर्षाणि, मुमुचुः । मेघा इति परेषां शराणां बाहुल्ये यादवानामल्पत्वे च दृष्टान्तः ॥ ३ ॥ पत्युरिति ॥ सुमध्यमा रुक्मिणी, पत्युः स्वस्वामिनः, श्रीकृष्णस्य, बलं सैन्यं, शरासारैः शत्रुकृतबाणवृष्टिभिः, छन्नमपवारितं वीक्ष्य, भयेन कातरे दीने, विह्वलेत्यपि पाठः । लोचने यस्यास्तथाभूता सती, तद्वक्त्रं श्रीकृष्णमुखं, सव्रीडं लज्जया सहितं यथा तथा, ऐक्षत् विलोकयामास ॥ ४ ॥

कृष्णप्रिया

श्रीशुकदेवजी महाराज ने कहा—राजन् परीक्षित् ? श्रीरुक्मिणीजी का अपहरण सुनकर सब के सब राजा अत्यन्त क्रोध से आग बबूला हो उठे, और अङ्गत्राण-अच्छुरिका पहनकर अपने-अपने बाहनों पर सवार हो गये। भगवान् की सेना परिमित थी इसलिये भगवान् श्रीरुक्मिणीजी के संरक्षण में लगे थे। शिशुपाल के पक्ष के सर्व राजा अपनी-अपनी सेना को लेकर पृथक्-पृथक् चारों ओर से भगवान श्रीकृष्ण के पीछे दौड़े ॥ १ ॥ राजन् परीक्षित् ! भगवान् यदुवर श्रीकृष्ण के सेनाधिपतियों ने देखा कि विपुल संख्या में शत्रु सैन्य हम पर चढ़ा आ रहा है यह जानकर सब राजा और सेनापतियों ने भी अपने-अपने धनुषों का टङ्कार किया और दौड़कर उन सेनापतियों के सामने डट गये ॥ २ ॥ शिशुपाल के पक्षपाती राजा जरासन्ध के सैनिक कितने अश्वों पर कितने हाथियों पर तो कई लोग रथों पर चढ़े हुए थे। वे वीर पुरुष धनुर्विद्या में निपुण थे। उन लोगों ने यदुवीरों पर इस प्रकार शर वृष्टि कर रहे थे, मान लीजिये कि सैन्य के दल, के दल जैसे मेघदल पर्वतों पर मुसलधार जल बर्षा रहे हैं ॥ ३ ॥ सुमध्यमा सौन्दर्यमयी श्रीरुक्मिणी देवी ने निरीक्षण किया कि निजनाथ यदुनाथ श्रीकृष्ण प्रभु की सेना शरवृष्टि से आच्छादित हो गयी है। तब सलज्ज नयना देवी रुक्मिणीजी ने भयाकुल नजरों से भगवान् श्रीकृष्णचन्द्र के मुखारविन्द की ओर देखा ॥ ४ ॥

प्रहस्य भगवानाह मा स्म भैर्वामलोचने । विनङ्क्ष्यत्यधुनैवैतत् तावकैः शात्रवं बलम् ॥ ५ ॥
तेषां तद्विक्रमं वीरा गदसंकर्षणादयः । अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान् रथान् ॥ ६ ॥
पेतुः शिरांसि रथिनामश्विनां गजिनां भुवि । सकुण्डलकिरीटानि सोष्णीषाणि च कोटिशः ॥ ७ ॥
हस्ताः सासिगदेष्वासाः करभा ऊरवोऽङ्घ्रयः । अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च ॥ ८ ॥

---

१. भैस्त्वं-श्रीधर. टि. ।

कर्दमक्षमा

अन्वयः—भगवान्, प्रहस्य, आह ?, हे वामलोचने !, मा, स्म, भैः, एतत्, शात्रवम्, बलम्, तावकैः, अधुना, एव, विनङ्क्ष्यति ॥ ५ ॥ गदसङ्कर्षणादयः, वीराः, तेषाम्, तत्, विक्रमम्, अमृष्यमाणाः, नाराचैः, हय गजान्, रथान्, जघ्नुः ॥ ६ ॥ कोटिशः, रथिनाम्, अश्विनाम्, गजिनाम्, सकुण्डलकिरीटानि, सोष्णीषानि, शिरांसि, भुवि, निपेतुः ॥ सासिगदेष्वासाः, हस्ताः, करभाः, उरवः, अङ्घ्रयः, च, अश्वअश्वतर, नागोष्ट्र, खरमर्त्यशिरांसि, भुवि, निपेतुः ॥ ७–८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मा स्म भैः मा भयं कुरु। हे वामलोचने वराक्षि तावकैस्त्वदीयैः ॥ ५ ॥ स चासौ विक्रमश्च तम् ॥ ६ ॥ उष्णीषाणि शिरोऽवतंसवस्त्राणि तत्सहितानि शिरांसि ॥ ७ ॥ करभाः प्रकोष्ठा ऊरुविशेषणं वा ॥ ८–९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतद्दृश्यमानम्। प्रहस्येति स्वस्य निर्भयत्वं सूचयंस्तामाश्वासयति—हे वामलोचन इति। स्त्रीस्वभावं भीरुत्वं मा स्वीकुरु, त्वं वामे शोकाश्रुराहित्यान्मनोहरे एव लोचने भविष्यतो यस्यास्तादृश्येव भविष्यसि, न त्वस्मत्पराजयेन विक्लवनेत्रा भविष्यसीति भावः। तावकैरस्माभिः। स्वेषां तदीयत्वनिर्देशस्तस्यां परमप्रणयव्यंजकः ॥ ५ ॥ तेषां राज्ञाम्। तद्विक्रममिति—कर्मधारयेण नीलोत्पलमितिवद्विक्रमस्य स्वाभाविकत्वमसूचि। गदस्याग्रोक्तिर्भक्तिविशेषेणाग्रे भवनात्। हयानामतिचंचलत्वात्प्रथमम्, ततो गजानां स्थूलशरीरत्वात्, सर्वांते पराजयपूर्णतेच्छया सर्वतोमुखानां रथानामिति क्रमनिर्देशाभिप्रायः ॥ ६ ॥ 'उष्णीषं तू शिरोवेष्टे' इति मेदिनी। शिरोवतंसवस्त्राणि शिरःशोभाकरवस्त्राणि। पेतुरिति युग्मकम् ॥ ७ ॥ ऊरुविशेषणे तु करभतुल्या इति ज्ञेयम्। हस्ता इत्युक्तेरेव करग्रहणाद्विकल्पः। अश्वतरो गर्दभादश्वायां जातः। "मणिबंधादाकनिष्ठं करस्य करभो बहिः" इत्यमरानुसारेण करैकदेशो लक्ष्यते ॥ ८–९ ॥

श्रीमज्जीवगोस्वामिकृता बैष्णबतोषिणी

प्रहस्येति। निर्भयेऽपि तस्याभयदर्शनात् तन्निरसनेच्छातश्च हे वामलोचने ! इति सम्बोधनं तदानीमात्मनि प्रथमार्पिततत्सौन्दर्यविशेषानुभवेन सुखाभिव्यक्तेः तावकैर्हेतुभिर्विनक्ष्यति स्वयमेव मरिष्यति तावकत्वनिर्देशस्तस्यां परमप्रणयव्यञ्जकः बहुत्वं स्वसैन्यस्य बाहुल्यव्यञ्जकं शत्रुबलस्यैकत्वं च स्वल्पप्रायत्वव्यञ्जकं तच्च सर्वं तस्या एवाश्वासनार्थम् ॥ ५ ॥ तद्विक्रममिति। समासेन विक्रमस्य तादृशत्वं स्वाभाविकं दर्शयति नीलोत्पलमिति अमृष्यमाणा असहमाना; गदस्यादावुक्तिर्विशेषेणाग्रे भवनात्। हयानामतिचञ्चलत्वात् प्रथमं हननं ततो गजानां स्थूलस्थूलत्बात् सर्वान्ते पराजयपूर्णतेच्छया सर्वतो मुख्यानां रथानामिति निर्देशक्रमाभिप्रायः ॥ ६ ॥ पेतुरिति युग्मकम्। रथ्यादीनां च यथा पूर्वं युद्धश्रैष्ठ्यात्तत्तत्क्रमेण शिरः पतनं कुण्डलादीनां यथा सम्भवं समुच्चयः पार्थक्यं च इति तेषामाधिक्यसूचनेन वीरेषु महत्त्वं सूचितं कोटिश इत्यस्य परत्रापि सर्वैरन्वयः। करभा इति। तैर्व्याख्यातं तत्र "मणिवन्धादाकनिष्ठं करस्य करभो बहि"रित्यनुसारेण लक्षणयैव प्रकोष्ठावचनं प्रकोष्ठस्तदुपरिभागः पक्षे क्रमनिम्नत्वात् करभा इव करभा इति ॥ ७–८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रहस्य उच्चैर्हसित्वेति तस्या भयनिरासार्थम्; तथा चोक्तं तृतीयस्कन्धे श्रीकपिलदेवेन (३।२८।३२)—'हासं हरेरवनताखिललोकतीव्र,—शोकाश्रुसागरविशोषणमत्युदारम्' इति; यतो भगवान् साक्षात् परमेश्वरः। हे वामलोचने इति भयविह्वलत्वेन नेत्रयोस्तदानीं सौन्दर्य्याधिक्यात्, तावकैस्त्वत्सम्बन्धिभिर्यादवसैन्यैर्हेतुभिर्विनङ्क्ष्यति स्वयमेव मरिष्यति, बहुत्वेन तस्याः समाश्वासनार्थं स्वसैन्यस्य बाहुल्यम्, बलमित्येकत्वेन च शत्रुसैन्यस्याल्पत्वमुक्तम् ॥ ५ ॥ तद्विक्रममुक्तं पराक्रममामृष्यमाणा असहमानाः, यतो वीराः, आदि-शब्दात् सात्यक्यक्रूर-कृतवर्म्मादयः, गदस्यादावुक्तिर्भक्तिविशेषेणाग्रे भवनात्; संकर्षणेति सर्व्वेषामेव तेषामेकत्राकर्षणात्, हयादीनां यथोत्तरं श्रैष्ठ्येन कनिष्ठानामेवाग्रे गमनात्तत्तत्क्रमेण हननम् ॥ ६ ॥ रथ्यादीनाञ्च यथापूर्व्वं युद्धे श्रेष्ठ्यात् तत्तत्क्रमेण, शिरःपतनं तत्र केषाञ्चित् सकुण्डलादीनि केषाञ्चिच्च सोष्णीयाणीति ज्ञेयम्। यद्वा, उष्णीषोपरि किरीटधारणेन सर्व्वेषामेव तानि तानीति, एवमग्रेऽपि; हस्ता इत्यादावपि; इति वीराणामलंकारादियुद्धसामग्र्यामहोत्साहादिकं सूचितम्। कोटिश इत्यस्य परत्रापि सर्व्वैरन्वयः। एवं खण्डशः पतनेन यादववीराणां युद्धनैपुण्यादिकं सूचितम्। तत्रास्यादियुक्तहस्तानां यथापूर्व्वं युद्धे नैकत्र्याधिक्येन तथा हस्तादीनां चोर्द्ध्वतया युद्धे तत्तत्क्रमेण पातः, अश्वादयस्त्रयो वाहनरूपाः, उष्ट्रादयो युद्धसाधनायुधवाहकाः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

तदा भगवान् प्रहस्य तामाह उक्तिमेवाह–मास्मेति । हे वामलोचने ! त्वं मास्म भैः भयं मा कृथाः अधुनैव त्वदीयैः सैन्यैः शात्रवं बलं विनक्ष्यति नाशमेष्यतीति ॥ ५ ॥ इति तेषां चैद्यादीनां तथा विधं विक्रममसहमाना वीरा गदादयो यादवा नाराचैर्हयादीन् जघ्नुः ॥ ६ ॥ तदा अश्विनाम् अश्वाः येषां सन्तीति ते तेषामश्वारूढानां रथिनां गजानां च कोटिशः शिरांसि कुण्डलकिरीटसहितानि उष्णीषसहितानि च भुवि निपेतुः ॥ ७ ॥ तथा खड्गगदाधनुर्भिः सहिता हस्ताश्च करभाश्च प्रकोष्ठाश्च ऊरवश्चाङ्घ्रयश्च निपेतुः करभास्तत्सदृशा ऊरव इत्यूरुविशेषणं वा तथा अश्वादीनां शिरांसि च निपेतुः तत्र नागा गजाः ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

करभाः कनिष्ठिकाया मूलप्रदेशाः गर्दभादश्वायां जातोऽश्वतरः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

प्रहस्येत्यादि । तावकैरिति स्वजनान् प्रति तदीयत्वमुद्भाव्य तस्यां सर्वसमर्पणमिव व्यञ्जयति ॥ (५–३२)

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तावकैः शात्रवं वलमिति तावकैरिति ममतोद्भावनम् ॥ ५–३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

मास्म भैः माभैषीः तावकैरस्माभिः स्वेषां तदीयत्वनिर्देशसस्यां परमप्रणयव्यञ्जकः ॥ ५ ॥ तत्तदा सचासौ विकमश्च तमिति वा ॥ ६–७ ॥ करभाः "मणिबन्धादाकनिष्ठं करस्य करभो वहि"रित्वमरः ॥ ८–१० ॥

गूढार्थदीपिनी

मा स्म भैः भयं मा कृथाः । 'बाहुलकात्' सिचः परस्य ईडभावः हल्ङ्याप् इति लोपश्च । तावकैस्त्वदीयैः सैन्यैः ॥ ५ ॥ तेषां राज्ञाम् । स चासौ विक्रमस्तम् । अमृष्यमाणाः असहमानाः । नाराचैर्बाणैः जघ्नुः ॥ ६ ॥ पेतुरिति युग्मम् । उष्णीष शिरोवेष्टनम् । इष्वासो धनुः । इषवो बाणा अस्यन्ते प्रक्षिप्यन्तेऽनेनेति । करभाः करस्याधस्ना भागाः करैकदेशाः । यद्वा हस्तिशुण्डादण्डादण्डतुल्या ऊरवः । अश्वतरः खच्चरेति प्रसिद्धः ॥ ७–८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे वामलोचने ! सुन्दराक्षि ! मा स्म भैः भयं मा कुरु तावकैर्गदसङ्कर्षणादिभिः कृत्वा ॥ ५ ॥ सचासौ विक्रमस्तममृष्यमाणा असहमानाः ॥ ६ ॥ सकुण्डलकिरीटानि कुण्डलकिरीटसहितानि उष्णीषाणि शिरोऽवतंसवस्त्राणि तैः सहितानि च शिरांसि पेतुः ॥ ७ ॥ करभाः मणिबन्धादिकनिष्ठामूलान्ता हस्तावयवा; तदुपलक्षिता मणिबन्धादुपरि हस्तभागा इत्यर्थः ।८–१०।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सव्रीडं सलज्जं तद्वक्त्रमैक्षदैक्षत शरासारैः शरधारासम्पातैर्भयविह्वललोचने यस्याः सा ॥ ५ ॥ मा भैर्भीता न भवत तावकैः शात्रवं बलमधुनैव विनङ्क्ष्यति ॥ ६ ॥ स चासौ विक्रमश्च तममृष्यमाणा असहिष्णवः ॥ ७ ॥ किरीटानि रत्नखचितानि स्वर्णात्मकानि चित्स्वोष्णोषाणि वासः शिरोवेष्टनानि । उष्णीषं तु शिरोवेष्ट इति विश्वः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः सान्त्वनमाह **प्रहस्येति** । एवं हि कामः स्वयं स्वकीयवधं कामयत इति हासेनैव मोहने तस्या भयादिकमपि निवारितम् । मनो देहश्च भगवते सन्देशार्थं प्रेषितवती, न तु वाणीम् । अन्यथा सैव रमेत । भगवानपि तथा वाणीमेवोक्तवान् यथा योग्यम् । भगवत्त्वादेव नाविश्वासः तथैव हृदये वा सम्पादितवान् । **मा स्म भै**रित्याह । प्रसिद्धिरेव सर्वत्र वर्तते भगवदीयानां भयं नास्तीति । **वामलोचन** इति । वक्रा दृष्टिर्न कर्तव्या, आहोस्वित् पुरुषमपि या जयति, तस्याः किं भयमिति । मनोहरदृष्टित्वादेव शुभं भविष्यति, त्वद्दृष्ट्या वा हता भविष्यन्तीति सम्बोधनम् । **अधुनैवे**ति । निःसन्देहः । तामात्मत्वेन गृहीत्वाह त्यक्त्वा गमनाभावाय । **तावकै**रिति । सर्वात्मकत्वविचारेऽपि उपपत्तिमाह **शात्रवं बल**मिति । शत्रवो हन्तव्या एवेति ॥ ५ ॥ एवं भगवद्वाक्येनैव ते आज्ञप्ता एव सामर्थ्ययुक्ता एव शत्रुबलं दूरीकृतवन्त इत्याह **तेषा**मिति । तादृशं पराक्रमं अमृष्यमाणाः सन्तः जघ्नुः, तादृशं पराक्रमं को वा शत्रुरुपेक्षेत । गदः सङ्कर्षणश्च आदिभूतौ येषाम् । एकः प्रविश्य मारयति, अपरस्त्वाकृष्य । इतो हीनः

कोऽपि नास्तीति तयोरादित्वम् । **नाराचै**र्बाणविशेषैः । **हयगजान् रथा**निति । त्रिविधा हता इति गणिताः । न हि महद्भिः क्षुद्रा हन्यन्ते । अतो न पत्तयः परिगणिताः ॥ ६ ॥ हननं फलपर्यवसायीति फलमाह त्रिभिः **पेतु**रिति । वधो द्विविधः, अवयविनः अवयवानां च । ततः पलायनमिति रथिनां शिरांसि निकृत्तानि रथस्थानं परित्यज्य भुवि पेतुः । तथा अश्विनां अश्वसहितानां गजसहितानां वा । खड्गयुद्धे **नैत**दाश्चर्यम्, बाणयुद्धे तु भवतीति निरूपितम् । तेषामप्रयोजकत्वं निवारयति **सकुण्डलकिरीटानीति** । उष्णीषकुण्डलकिरीटानि त्रिविधानि । **प्रायिकत्वं** व्यावर्तयितुं कोटिश इत्युक्तम् । अवयवानाह **हस्ता** इति । असियुक्ता गदायुक्ताः दक्षिणाः, इष्वासयुक्ताः वामाः, करभाः शुण्डादण्डाः, ऊरवः अङ्घ्रयश्च । सर्वेषामश्वादीनां शिरांसि च भुवि पेतुरिति सम्बन्धः । नागा हस्तिनः । पड्विधा अपि हता इत्यर्थः । चकारात् ध्वजादीनामपि भूमिपातः ॥ ८ ॥

श्रीसुबोधिनीसारः

प्रहस्येति भयाभावं सूचयन्नाह । हे वामलोचने ! मास्म भैस्त्वं भयं मा कार्षीः । एतत् शात्रवं शत्रूणां सम्बन्धि बलं तावकैः त्वदीयैरधुनाद्यैव नाशं प्राप्स्यति ॥ ५ ॥ तथा हि । येषां जरासंधादीनां तद्विक्रमं बलममृष्यमाणा असहमाना वीरा गदरामादयो नाराचैर्बाणैर्हयान् गजान् रथान् जघ्नुः ॥ ६ ॥ रथिनाम् अश्विनां गजिनां तद्वतां नृणां कोटिशोऽसंख्यातानि कुंडलमुकुटसहितानि सोष्णीषाणि शिरोवेष्टनसहितानि शिरांसि भुवि पृथिव्यां पेतुः ॥ ७ ॥ असिगदेष्वासैः खड्गगदाधनुर्भिः सहिता हस्ताः करभाः तद्बहिर्भागाः ऊरवोंघ्रयः प्रसिद्धाः । अश्वा घोटका अश्वतराः सूक्ष्माश्वाः नागा गजाः उष्ट्राः क्रमेलकाः खरा रासभा मर्त्यानां शिरांसि च पेतुः ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा भगवान् प्रहस्य तामाह । तदुक्तिमेवाह—हे वामलोचने ! त्वं मास्मभैर्भयं मा कृथाः । तत्र हेतुमाह—तावकैः त्वदीयैः सैनिकैः शात्रवं बलं अधुनैव विनङ्क्ष्यति नाशमेष्यतीति । तावकैरिति तत्स्वीकारदार्ढ्यं सूचयति ॥ ५ ॥ तेषां जरासन्धादीनां तत् तथाविधं विक्रममसहमाना गदादयो वीरा नाराचैर्बाणैर्हयादीन् जघ्नुः ॥ ६ ॥ तथा रथाद्यारूढानां सकुण्डलकिरीटानि तत्सहितानि, उष्णीषाणि शिरोवतंसवस्त्राणि सोष्णीषाणि उष्णीषसहितानि बाणादिभिश्छिन्नानि कोटिशः शिरांसि च पेतुः ॥७॥ खड्गगदाधनुर्भिः सहिता हस्ताश्च, करभाः प्रकोष्ठाश्च, उरवश्च अङ्घ्रयश्च पेतुः तथाऽश्वादीनां शिरांसि च पेतुः ॥८॥

अन्वितार्थप्रकाशिका

प्रहस्येति । तदा प्रहस्य भगवान् तामाह स्म । हे वामलोचने ! त्वं मा स्म भैर्भयं मा कृथाः । "बहुलं छन्दसि" इति सिचः परस्य ईडभावः । "हल्ङ्याप्०" इति लोपः । तावकैः त्वदीयैः सैनिकैः शात्रवं बलम् अधुनैव विनङ्क्ष्यति नाशमेष्यति । स्वेषां तदीयत्वनिर्देशस्तस्यां परमप्रणयव्यञ्जकः ॥ ५ ॥ तेषामिति । तेषां जरासन्धादीनां तत् तदा स चासौ विक्रमश्चेति वा तं विक्रमम् अमृष्यमाणा गदसङ्कर्षणादयो वीराः नाराचैर्बाणैर्हयगजान् रथान् तत्रस्थान् शत्रून् जघ्नुः ॥ ६ ॥ पेतुरिति । रथिनाम् अश्विनां गजिनां रथाद्यारूढानां सकुण्डलकिरीटानि तत्सहितानि उष्णीषाणि शिरोऽवतंसवस्त्राणि तत्सहितानि सोष्णीषाणि बाणादिभिः छिन्नानि कोटिशः शिरांसि च भुवि पेतुः ॥ ७ ॥ हस्ता इति । सासिगदेष्वासैः खड्गगदाधनुभिः सहिताः हस्ताश्च करभाः प्रकोष्ठाश्च विस्तृताः कराः ऊरुविशेषणं वा । ऊरवश्चाङ्घ्रयश्च तथा पेतुः अश्वाश्वतरादीनां शिरांसि च पेतुः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे वामलोचने चारुनयने मास्मभैः भयं मा प्राप्नुहि एतत् बलं तावकैः कृत्वा अद्यैव विनंक्ष्यति नाशं गमिष्यति ॥ ५ ॥ स प्रसिद्धश्चासौ विक्रमश्च तम् । अमृष्यमाणा असहमानाः नाराचैः शरैः ॥ ६ ॥ सोष्णीषाणि उष्णीषैः शिरोवतंसवस्त्रैः सहितानि शिरांसि पेतुः ॥ ७ ॥ इषवो बाणा अस्यैते क्षिप्यंते यैस्ते इष्वासाः । करभाः मणिबंधप्रभृत्यधोभागाः गर्दभेन अश्वायामुत्पादितः अश्वतरः ॥ ८–९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रहस्येति ॥ भगवान् प्रहस्य हासं कृत्वा, हे वामलोचने अतिसुन्दरनेत्रकमले, मा स्म भैः भयं मा कृथाः । अधुना एव, तावकैः त्वदीयैः सैन्यैः, शात्रवं शत्रुसंबन्धि, एतत्, बलं सैन्यं, विनङ्क्ष्यति नाशमेष्यति इति, आह ॥ ५ ॥ तेषामिति ॥ तेषां चैद्यादीनां, स चासौ विक्रमश्च तम्, अमृष्यमाणा असहमानाः, गदश्च संकर्षणश्च तावादी येषां ते, वीराः नाराचैः स्नुहिपत्रसमाकृतिबाणैः, हयाश्च गजाश्च तान्, रथान् जघ्नुः ॥ ६ ॥ पेतुरिति ॥ तदा अश्वाः सन्त्येषामित्यश्विनस्तेषामश्वारूढानां, रथिनां,

गजिनां च, कोटिशः शिरांसि सकुण्डलकिरीटानि कुण्डलैः किरीटैश्च सहितानि, सोष्णीषाण्युष्णीषाणि शिरोवतंसवस्त्राणि तत् सहितानि, भुवि पेतुः ॥ ७ ॥ हस्ता इति ॥ तथा सासिगदेष्वासाः असिभिः गदाभिः इष्वासैर्धनुर्भिश्च सहिताः, हस्ताः पाणयः, करभाः प्रकोष्ठाः, ऊरवः सक्थीनि, अङ्घ्रयः पादाः, करभा इत्यूरुविशेषणं वा। करभसदृशा इत्यर्थः। अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च अश्वादीनां मस्तकान्यपीत्यर्थः। पेतुः। तत्र गर्द्भेनाश्वायामुत्पादितोऽश्वतरः, नागो गजः ॥ ८ ॥

कृष्णप्रिया

कृपानिधान श्रीकृष्ण ने स्मितहास्य पुरःसर कहा कि ? हे वामलोचने ? हे प्यारीजी ? भय का कोई कारण नहीं। आपकी वीर सेना क्षण में ही हमारे शत्रुओं के सैन्य को खत्म कर डालेगी ॥ ५ ॥ इधर भगवदाज्ञा प्राप्तकर गद संकर्षण आदि यदु प्रवीर अपने शत्रुओं का पराक्रम को सह न सके श्रीगद शत्रुओं के सैन्य के भीतर घुसकर और श्रीसंकर्षणजी सैन्य में से शत्रुओं को खीचकर मारने लगे। पुनः गदादि यदु प्रवीरों अपने बाणों से शत्रुओं के हाथी, घोड़े और हाथियों पर बैठे विपक्षी एवं रथों को नष्ट भ्रष्ट करने लगे ॥ ६ ॥ यदुप्रवीरों की शर वर्षा से रथों में घोड़े पर एवं हाथियों पर बैठे शत्रु वीरों के किरीट-कुण्डल-एवं शिरस्त्राणों से देदीप्यमान करोड़ों की संख्या में मस्तक-खड्ग-गदा-एवं-धनुष्य युक्त हाथ पहुँचे जाँघें और पैर कटकर जमीन दोस्त होने लगे ॥ ७-८ ॥

हन्यमानबलानीका वृष्णिभिर्जयकाङ्क्षिभिः[1] । राजानो विमुखा जग्मुर्जरासन्धपुरःसराः ॥ ९ ॥
शिशुपालं [2]समभ्येत्य हृतदारमिवातुरम् । नष्टत्विषं गतोत्साहं शुष्यद्वदनमब्रुवन् ॥ १० ॥
भो भोः पुरुषशार्दूल दौर्मनस्यमिदं त्यज । न प्रियाप्रिययो राजन् निष्ठा देहिषु दृश्यते ॥ ११ ॥
यथा दारुमयी योषिन्नृत्यते कुहकेच्छया । एवमीश्वरतन्त्रोऽयमीहते सुखदुःखयोः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—जयकाङ्क्षिभिः, वृष्णिभिः, हन्यमानबलानीकाः, जरासन्धपुरःसराः, राजानः, विमुखाः, जग्मुः ॥ ९ ॥ हृतदारम्, इव, आतुरम्, नष्टत्विषम्, गतोत्साहम्, शुष्यद्वदनम्, शिशुपालम्, समभ्येत्य, अब्रुवन् ॥ १० ॥ भोः, भोः, पुरुषशार्दूल ! इदम्, दौर्मनस्यम्, त्यज, राजन् ? देहिषु, प्रिय-अप्रिययोः, निष्ठा, न, दृश्यते ॥ ११ ॥ यथा दारुमयी, योषित्, कुहकेच्छया, नृत्यते, एवम्, ईश्वरतन्त्रः, अपि, अयम्, (जनः) सुखदुःखयोः, ईहते ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अप्राप्तदारमेव तं हृतदारमिवातुरम् ॥ १० ॥ निष्ठा स्थैर्यम् ॥ ११ ॥ कुहको नर्तयिता तस्येच्छया दुःखेऽपीह्मानत्वेन पारवश्यं व्यक्तं दर्शितम् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नष्टत्विषं गतकांतिम्। नष्टत्विषमित्यादिना कायमनोवाचां क्रमेण शक्त्यपक्रम ऊह्यः ॥ १० ॥ दौर्मनस्यं वैमनस्यम्। निष्ठा नियतत्वम् "निष्ठोत्कर्षे व्यवस्थायां नियते नाशयाच्ञयोः" इति हलायुधः। श्रीमुनींद्रस्तेषां वाक्येनैव तानुपहसति-भोभोः इत्यादिना। वीप्सा त्वत्यार्तस्याभिमुख्यार्था। हे पुरुषशार्दूलेति-तत्पुंसो हि दौर्मनस्यं नोचितमिति भावः। देहिषु नानादेहं प्राप्तवत्सु जीवेषु। हे राजन्निति-राज्ञां पारंपर्यागतमेवेदं वृत्तं काशीराजप्रभृतिकन्यासु भीष्मादिभिस्तथाकरणादिति न शोक उचित इति भावः ॥ ११ ॥ दृष्टांतेन बोधयंत आहुः—यथेति। ईहमानत्वेन वर्तमानत्वेन। व्यक्तं प्रसिद्धम्। तच्च कुतस्तत्राह—यथेति। अयं सर्वोपि जनः। ईहते प्रवर्तते। ईश्वरः "अपाणिपादो जवनो ग्रहीता" इत्युक्तलक्षणः, "सहस्रशीर्षाः" इत्युक्तलक्षणो वेति राज्ञां भावः, एवमीश्वरमात्रज्ञाने पूर्णतदाविर्भावपरब्रह्मश्रीकृष्णवैमुख्यात्सर्वं तद्विधानं भस्मनि हुतमिति तु श्रीमुनींद्रस्य ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जयकाशिभिः जितकाशिभिः जितकाशी जिताहव इति क्षीरस्वामिवचनात् जयकाङ्क्षिभिरिति पाठः स्पष्टः ॥ ९ ॥ नष्टत्विषमित्यादिना त्विण्नाशादिना कायमनोवाचां क्रमेण शक्त्यपक्रम ऊह्यः ॥ १० ॥ श्रीमुनीन्द्रस्तेषां वाक्येनैव तमुपहसति। भोभो इत्यादिना। वीप्सा महार्त्तस्य तस्य बलादाभिमुख्यार्थं हे पुरुषशार्दूलेति सत्पुंसो दौर्मनस्यं हि न योग्यमिति भावः। देहिषु नानादेहं प्राप्तवत्सु जीवेषु तच्च त्वया बुध्यत एवेत्याहुः हे राजन्निति ॥११॥ तच्च कुतस्तत्राहुः। यथेति। योषिदिति तत्प्रतिमाया

---

१. काशिभिः-श्रीधर. टि. । २. समेत्याथ-वीर. विज. ।

एव रुचिकरत्वेन विषयिप्रवृत्तेस्तथाहि तद्व्यवहारः नृत्यते नृत्यति अयं सर्वोऽपि जनः ईहते प्रवर्त्तते दुःखस्य पश्चादुक्तिः सुखे स्वत एव प्रवर्त्तत इति चेन्न दुःखेऽपि तद्दर्शनादिति बोधयति। ईश्वरः "अपाणिपादो जवनो ग्रहीते"त्याद्युक्तलक्षणः "सहस्रशीर्षा पुरुष" इत्यादिलक्षणो वेति राज्ञां भावः। एवमीश्वरमात्रज्ञानेऽपि पूर्णातदाविर्भावनराकृति परब्रह्म श्रीकृष्णवैमुख्यात् सर्वं तद्विधानां भस्मनि हुतमिति तु मुनीन्द्रस्य ।। १२ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

जयं काशयितुं प्रकटयितुं शीलमेषामिति तथा ते, यद्वा, जयः श्रीकृष्णस्तत्प्रकाशनशीलैस्तद्भक्तवरैरित्यर्थः ।। ९ ।। अथ वृष्णिजयानन्तरं समेत्य सर्वेऽन्योन्यमेकीभूय, यद्वा, शिशुपालेन सह संगत्य तमब्रुवन्, यत आतुरं परमार्तम्। कमिव? हृतदारमिव, यथा हृतदारः कश्चिदातुरो भवति, तथाभूतमित्यर्थः। अत एव नष्टा त्विट् कान्तिर्यस्य तम्। एवं कायमनोवाचां क्रमेण शक्त्यपगम उक्तः। तत्र शुष्यदित्यनेन वाचः सिद्ध एव, नष्टत्विषमित्यादौ कैमुतिकन्यायावतारणेन यथोत्तरमातुरत्वहेतुकतायामाधिक्यं ज्ञेयम् ।। १० ।। वीप्सा महार्त्तस्य तस्य बलाद्वक्ष्यमाणश्रवणाभिमुख्यार्थम्, दौर्मनस्यं मनोदुःखं त्यज। हे पुरुषशार्दूलेति सत्पुंसां दौर्मनस्यायोग्यत्वादिति भावः। कुतः? तत्कारणस्यानित्यत्वादित्याहुः—नेति। देहिषु नानादेहं प्राप्नुवत्सु जीवेषु कदाचिदनिष्टस्य कदाचिच्चेष्टस्य प्राप्तिर्भवतीत्यर्थः। तत्रेष्टप्राप्ते पश्चादुक्तिस्तदाश्वासनार्थम्, तच्च त्वया बुध्यत एवेति सान्त्वनार्थमाहुः—हे राजन्निति ।। ११ ।। तच्च कुतः? जगदीशस्येच्छात इति वक्तुं जगतस्तदधीनत्वं सदृष्टान्तमाहुः—यथेति। योषिदिति स्त्रीणामेव नृत्ये प्राधान्यात्, नृत्यते नृत्यति, अयं सर्वोऽपि जन ईहते प्रवर्त्तते, सुखदित्सायां तस्य सत्यां सुखेहा, दुःखदित्सायाञ्च दुःखेहा, ततश्च सुखेहया प्रियस्य प्राप्तिः, दुःखेहया चाप्रियस्येत्यर्थः। दुःखस्य पश्चादुक्तिरत्यस्वातन्त्र्यबोधनार्थम्, अतः पूर्वोक्तक्रमो नापेक्षितः, ईश्वरेच्छायाञ्च कारणानुसन्धानमीश्वरत्वादेव निरस्तम्, अन्यथा स्वातन्त्र्यहान्यानीश्वरताप्रसक्तिः ।।१२।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कुहकेक्षया ।। १२–१४ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं जयकाङ्क्षिभिर्यदुभिर्हन्यमानानि बलानीकानि सैन्यसमुदाया येषां ते जरासन्धादयो राजानो विमुखाः पराङ्मुखाः सन्तो जग्मुः ।। ९ ।। ततस्ते सर्वे शिशुपालमभ्येत्याब्रुवन् कथम्भूतम् अप्राप्तदारमेव हृतदारमिवातुरं नष्टत्विषं निस्तेजस्कं गत उत्साहो यस्मात् शुष्यद्वदनं यस्य तम् ।। १० ।। उक्तिमेवाह। भो भो इति। हे पुरुषश्रेष्ठ! दौर्मनस्यं विषादं त्यज नहि सुखदुःखयोर्देहिषु स्थैर्यं दृश्यते किन्तु ते क्षणिके आगमापायिनी इति भावः ।। ११ ।। नन्वप्रतिहतपौरुषाणामस्माकमयं पराभवोऽविसह्य इत्यत आहुः। यथेति। कुहको नर्त्तकस्तस्येच्छया इच्छानुसारमित्यर्थः दारुमयी योषित्प्रतिमा नृत्यते तथायं देहिवर्गोऽपीश्वरपरतन्त्रः सुखदुःखयोरीहते सुखदुःखयोर्निमित्तभूयोश्चेष्टते सुखदुःखार्थकर्माणि करोतीत्यर्थः। नहि सुखदुःखप्रापणे स्वात्मनः स्वातन्त्र्यमस्ति अपितु सुखायैवेहमानोऽयं जनः स्वस्वकर्मानुगुणेश्वरेच्छया सुखदुःखे प्राप्नोत्यतः किं विधेयमित्यर्थः ।। १२ ।।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

आत्मनो जयकाङ्क्षिभिः जयप्रकाशकैः जयेच्छुभिर्वा ।। ९ ।। हृतदारं बलादपहृतभार्यं पुरुषम् ।। १० ।। प्रियाप्रिययोः सुखदुःखयोर्निष्ठा व्यवस्था नियतत्वं "निष्ठोत्कर्षे व्यवस्थाया"मिति ।। ११ ।। कुहकेच्छया मायिकेच्छया ।। १२ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निष्ठा स्थैर्यम् ।। ११ ।। कुहको नर्त्तयिता तस्येच्छया एवमयं जीवलोकः कदाचित् सुखे कदाचित् दुःखेऽपि ईहते चेष्टते प्रवर्त्तत इति यावत् ईश्वराधीन इतीश्वरं मानितवतामपि तेषां कृष्णवैमुख्यादेवासुरत्वम् ।। १२ ।।

गूढार्थदीपिनी

हन्यमानं बलं यस्य तथाभूतमनीकं सैन्यं येषाम् ।। ९–१० ।। दौर्मनस्यं विषादम्। देहिषु जीवेषु। निष्ठा स्थैर्यं न दृश्यते ।। ११ ।। योषित् (कठपुतली)। इति। कुहको नर्तकः। तन्त्रोऽधीनः। अयं जीवलोकः। ईहते यतते प्रवर्तते वा ।।१२।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

देहिषु प्राकृतदेहयुक्तेषु प्रियाप्रिययोरिष्टानिष्टयोर्निष्ठा स्थैर्यम् ।। ११ ।। कुहको नर्त्तयिता अयं प्रसिद्धो जनः ।। १२ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

करभाः कनिष्ठिकामूलभागोऽश्वा अश्वतरा गर्दभेन बडवायां जाताः ।। ९ ।। हन्यमानबलानीका बलवन्त्यनीकानि सेना हन्यमानानि बलानीकानि येषां ते जयकाङ्क्षिभिस्तदिच्छुभिः ।। १० ।। हृता दारा यस्य स तमिवातुरं नष्टात्विषं वातोत्साहं

शुष्यद्वदनं शिशुपालं समेत्याब्रुवन् ॥ ११ ॥ भो भो पुरुषशार्दूल । इदं दौर्मनस्यं पूर्वोक्तैर्हेतुभिरीहितं त्यज तां तुभ्यं दापयाम इति समाधिनाऽऽधि शमयन्ति किमित्यतो न किन्तु तत्त्वमुपदिश्येत्याह ॥ नेति । हे राजन् प्रियाप्रिययोर्देहिषु निष्ठा व्यवस्था नियतिर्न दृश्यते ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः पलायनमाह **हन्यमानेति** । सर्वमेव बलमनीकरूपं हन्यमानं येषाम् । एते तु **वृष्टिमेव** कृतवन्तः, नतु मारयन्ति, ते तु मारयन्ति । तत्र हेतुः **जयकाङ्क्षिभिरिति** । कन्या तु प्राप्तैव, केवलं जय एवापेक्षित इति तेषामुद्योगः । ततो राजानः स्वदेशभोगेप्सवः किं वृथा मरणेनेति सर्व एव विमुखाः कुण्डिनपुरं जग्मुः । जरासन्धः पुरःसरो येषाम् । स हि पलायने कृताभ्यासः ॥ ९ ॥ भीष्मोऽत्र न वक्तव्य इति तस्यापकाराभावाच्च शिशुपालं समभ्येत्य अविवाहेऽपि जातविवाह इव खिद्यमानो जातः । ततो मर्तुकामं विषादिना **आतुरं** विचाररहितं हृतदारं **सम्यगभ्येत्य** निकटे सान्त्वनार्थं गत्वा, शुष्यद्वदनं म्रियमाणमिव शीघ्रं सान्त्वनमब्रुवन् । शिशुपालपरिज्ञाने मरणसाधनमेव ज्ञापकम्, नत्वन्यदित्याह **नष्टत्विषमिति** । बहिः कान्त्यभावः, अन्तरुत्साहाभावः । जरासन्धो हि अत्यन्तमभ्यस्तबोधनः ॥ १० ॥ सान्त्वनवाक्यान्याह **भो भो** इति **षड्भिः** । भगवद्गुणैरेव सान्त्वनं भवतीति । अनेन तस्यापि रुक्मिण्यामभिमानो निवर्तिष्यते इति निरूपितम् । आदौ स्वास्थ्यं सम्पादयति । **भो भो** इति मूर्च्छितप्रबोधनम् । स्तुत्या माहात्म्यं हृदये समायातीति **पुरुषशार्दूले**ति सम्बोधनम् । **इदं** विवाहाभावलक्षणम् । न हि त्वदीयं किञ्चिद्गतमस्ति । अप्राप्तत्वात् । जाते विवाहे प्रियं भवेदिति यदि, तत्राह **न प्रियाप्रिययोरिति** । देहिषु सर्वदा प्रियं वा कस्यचिदप्रियं वेति **निष्ठा** निर्धारो नास्ति । तत्र देहित्वमेव हेतुः । 'दिह उपचय' इति । यदोपचयः तदा प्रियम्, अन्यदाऽप्रियमिति ॥ ११ ॥ हेत्वन्तराण्याह यथा **दारुमयी**ति । अलौकिको बोधनहेतुरयम् । **दारुमयी** योषित् विवृताङ्ग्यपि सभायां विरुद्धरसापि । कुहकस्य वञ्चकस्य । कस्याश्चिद्देवताया रूपं कृत्वा तां नर्तयित्वा स्वोदरभरणं करोति । एवमीश्वरेण सर्वोऽपि नर्त्यते स्वक्रीडार्थम् । अत ईश्वराधीन एवायं लोकः भ्रमात्सुखदुःखयोरीहते । सुखं भवतु, दुःखं मा भवत्विति । यथाकथञ्चित् प्रवृत्त्यर्थं भगवति दोषज्ञानाभावाय तथा बुद्धिमुत्पादयति ॥ १२ ॥

श्रीसुबोधिनी–सारः

जयमिच्छद्भिर्वृष्णिभिर्यादवैर्हन्यमानानि बलानि अनीकानि येषां ते जरासंधप्रधाना राजानो विमुखा युद्धात् पराङ्मुखाः पराजिता निवृत्ता इति यावत् जग्मुः ॥ ९ ॥ हृता दारा स्त्रीर्यस्य तम् आतुरमिव नष्टत्विषं मलिनं गत उत्साहो विवाहहर्षो यस्य 'शिशुपालंसमभ्येत्य संप्राप्य शुष्यद्वदनं शुष्कमुखं धृते वैवाहिकेपि तदसंपत्त्या अब्रुवन् ऊचुः ॥ १० ॥ हे पुरुषशार्दूल इदं दौर्मनस्यं मनोग्लानिं त्वं त्यज । कथमित्यतो लोकवृत्तमाह । राजन् । देहिषु प्राणिषु प्रियाप्रिययोः सुखदुःखयोर्निष्ठा स्थितिर्नालोक्यते ॥ ११ ॥ तथाहि । कुहकस्येच्छया काष्ठमयी योषित् स्त्री यथा नृत्यते एवम् ईश्वराधीनोयं लोकः सुखदुःखयोरीहते चेष्टते प्रवर्त्तते ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जयकाङ्क्षिभिर्वृष्णिभिर्हन्यमानानि बलानीकानि सैन्यसमुदाया येषां ते जरासन्धादयो राजानो विमुखाः पराङ्मुखाः सन्तो जग्मुः ॥ ९ ॥ ततश्च सर्वे शिशुपालमभ्येत्याब्रुवन् । तद्व्याकुलतां सूचयंस्तं विशिनष्टि—अप्राप्तदारत्वेपि तत्रात्यभिनिवेशात् हृतदारमिवातुरं व्याकुलम्, नष्टत्विषं निस्तेजस्कम्, गत उत्साहो यस्मात्तम्, शुष्यद्वदनं यस्य तम् ॥ १० ॥ उक्तिमेवाह—भो भोः पुरुषशार्दूल हे पुरुषश्रेष्ठ ! इदं दौर्मनस्यं विवाहनिवृत्तिजनितविषादं त्यज, यतो हे राजन् ! प्रियाप्रिययोः सुखदुःखयोर्निष्ठा स्थैर्यं देहिषु न दृश्यते ॥ ११ ॥ तत्र सदृष्टान्तं पारवश्यं हेतुमाह—यथेति । कुहको नर्तकः तस्येच्छया इच्छानुसारं दारुमयी योषित् प्रतिमा यथा नृत्यते इतस्ततो गच्छति एवमीश्वरतन्त्रः परमेश्वराधीनत्वादयं जीवोऽप्यात्मनः सुखदुःखयोः, ईहते यतते ॥ १२॥

अन्वितार्थप्रकाशिका

हन्यमानेति । जयकाङ्क्षिभिर्वृष्णिभिर्हन्यमानानि बलानीकानि सैन्यसमुदाया येषां ते जरासन्धपुरःसराः राजानो विमुखाः पराङ्मुखाः सन्तो जग्मुः ॥ ९ ॥ शिशुपालमिति ॥ अप्राप्तदारत्वेऽपि तत्रात्यभिनिवेशात् हृतदारमिवातुरं व्याकुलं नष्टत्विषं निस्तेजस्कं गत उत्साहो यस्मात्तं शुष्यद्वदनं यस्य तं शिशुपालं समभ्येत्य तेऽब्रुवन् ॥ १० ॥ भो भो इति ॥ भो भोः पुरुषशार्दूल ! हे पुरुषश्रेष्ठ ! इदं दौर्मनस्यं विवाहनिवृत्तिजनितविषादं त्यज । यतो हे राजन् ! प्रियाप्रिययोः सुखदुःखयोर्निष्ठा स्थैर्यं देहिषु न दृश्यते ॥ ११ ॥ कुहको नर्तकः तस्येच्छया इच्छानुसारेण दारुमयी योषित्प्रतिमा यथा नृत्यते । तङ्गार्थः । इतस्ततो गच्छति एवमीश्वरतन्त्रः परमेश्वराधीनत्वादयं जीवोऽप्यात्मनः सुखदुःखयोः, ईहते यतते ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अप्राप्तदारत्वात् हृतदारमिवातुरम् ॥१०॥ प्रियाप्रिययोः निष्ठा स्थिरा स्थितिः ॥११॥ कुहको नृत्यकारयिता तस्येच्छया ईश्वर तंत्र ईश्वराधीनः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हन्यमानेति । इत्थं जयकाङ्क्षिभिः वृष्णिभिर्यदुभिः, हन्यमानानि बलानीकानि सैन्यसमुदाया येषां ते, जरासन्धपुरःसराः जरासन्धादयः राजानः, विमुखाः पराङ्मुखाः सन्तः, जग्मुः ॥ ९ ॥ शिशुपालमिति । ततः जरासंधादयो राजानः, हृता दारा यस्य तमिव । अप्राप्तदारमपि हृतदारमिव स्थितमित्यर्थः । आतुरं नष्टा त्विट् दीप्तिर्यस्य तं, गत उत्साहो यस्य तं, शुष्यद्वदनं यस्य तं, शिशुपालं, समभ्येत्य, अब्रुवन् ॥ १० ॥ तदुक्तिमेवाह भो भो इति षड्भिः । भो भो इति । भो भो इति संबोधने । हे पुरुषशादर्दूल पुरुषश्रेष्ठ, इदं दौर्मनस्यं विषादं, त्यज । हे राजन् देहिषु प्रियाप्रिययोः सुखदुःखयोः, निष्ठा स्थैर्यं, न दृश्यते । किं त्वेते क्षणिके आगमापायिनी चेति भावः ॥ ११ ॥ नन्वप्रतिपौरुषाणामस्माकमयं पराभवोऽविषह्य इत्यत आह । यथेति । कुहकेच्छया कुहको नर्त्तकस्तदिच्छानुसारमित्यर्थः । दारुमयी योषित्, नृत्यते, एवं ईश्वरपरतन्त्रः ईश्वराधीनः, अयं जनः, सुखदुःखयोः ईहते सुखदुःखनिमित्तभूतयोश्चेष्टते । सुखदुःखार्थं कर्माणि करोतीत्यर्थः । न हि सुखदुःखप्रापणे स्वात्मनः स्वातन्त्र्यमस्त्यपि तु सुखायैवेहमानोऽयं जनः स्वस्वकर्मानुगुणेश्वरेच्छया सुखदुःखे प्राप्नोत्यतः किं विधेयमित्यर्थः ॥ १२ ॥

कृष्णप्रिया

विजयाभिलाषी यदुप्रवीरों ने शत्रुओं की सेनाओं को नष्ट भ्रष्ट कर डाली। वीरवर माने गये जरासन्ध आदि सभी वीर राजा पीठ दिखाकर भाग खड़े हुए ॥ ९ ॥ पागल सा शिशुपाल जिसका वाग्दान या व्याह न होने पर भी अपनी पत्नी के छिन जाने के कारण मृतप्राय ही दीख पड़ता था। शिशुपाल के चित्त में चैन न था, न उर में उत्साह था न तो काया में कान्ति थी। शिशुपाल का मुख भी सूख गया था। उसके समीप पहुँच कर उपदेश करने लगा ॥१०॥ हे पुरुषवर्य शिशुपालजी! आप चित की उदासीनता का त्याग करें। आप साधारण व्यक्ति नहीं है। इस सिद्धान्त को ध्यान में रखिये कि, कोई भी कार्य-वस्तु सर्वदा अपने मन्तव्य के या अपनी इच्छा के सानुकूल ही हो या प्रतिकूल भी हो यह मनुष्य के लिये निश्चित नहीं है। विवेकशील मनुष्य को सानुकूलता या तो प्रतिकूलता में स्वस्थ रहना चाहिये ॥ ११ ॥ राजन् जैसे काष्ठ की पुतली नर्तक की इच्छा के अनुकूल ही नृत्य करती है वैसे ही मनुष्य-प्राणी मात्र भगवदिच्छा के अनुकूल रहकर सुख या दुःख के सम्बन्ध में चेष्टा करता है ॥ १२ ॥

शौरेः सप्तदशाहं वै संयुगानि पराजितः । त्रयोविंशतिभिः सैन्यैर्जिग्य एकमहं परम् ॥ १३ ॥
तथाप्यहं न शोचामि न प्रहृष्यामि कर्हिचित् । कालेन [1]द्रव्ययुक्तेन जानन् विद्रावितं जगत् ॥ १४ ॥
अधुनापि वयं सर्वे वीरयूथपयूथपाः । पराजिताः फल्गुतन्त्रैर्यदुभिः कृष्णपालितैः ॥ १५ ॥
रिपवो जिग्युरधुना काल आत्मानुसारिणि । तदा वयं विजेष्यामो यदा [2]कालः प्रदक्षिणः ॥ १६॥[3]

कर्दमक्षमा

अन्वयः—त्रयोविंशतिभिः, सैन्यैः, अहम्, शौरेः, सप्तदश, संयुगानि, पराजितः, एकम्, परम्, अहम्, जिग्ये ॥ १३ ॥ तथा, अपि, (अहम्) द्रव्ययुक्तेन, कालेन, जगत्, विद्रावितम्, (भवति इति) जानन्, अहम्, कर्हिचित्, न शोचामि, न प्रहृष्यामि ॥ १४ ॥ अधुना, अपि, वीरयूथपयूथपाः, वयम्, सर्वे, कृष्णपालितैः, फल्गुतन्त्रैः, यदुभिः, पराजिताः ॥ १५ ॥ अधुना, काले, आत्मानुसारिणि, रिपवः, जिग्युः, किन्तु, यदा, कालः, प्रदक्षिणः, तदा, वयम्, विजेष्यामः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत्र चाहमेव दृष्टांत इत्याह जरासन्धः । शौरेरिति । कृष्णात्सकाशात् । एकं संयुगम् । परं केवलमंतिमं वा जितवाहनम् ॥ १३ ॥ दैवमदृष्टं तद्युक्तेन ॥ १४ ॥ फल्गुतंत्रैः स्वल्पसैन्यैः ॥ १५ ॥ प्रदक्षिणोऽनुकूलः स्यात् ॥ १६-२१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्र च पारवश्ये च । संयुगानि संयुगेषु सप्तदशसु । सैन्यैरक्षौहिणीभिः "एव सप्तदशकृत्वस्तावत्यक्षौहिणीबलः" इत्युक्तेः । कमेकमित्याकांक्षाशमनायाह—अतिमं वेति । एवं सहत्योक्तेपि तस्य दौर्मनस्याऽत्याग दृष्ट्वा स्वयं जरासंध एवं स्वानु-

---

१. दैव—श्रीधर. वंशी. जीव. वीर. विश्व. शुक. ; दैवयोगेन—विज. । २. दैवं प्रदक्षिणम्—श्रीधर. टि. । ३. शुक उवाच—विज. ।

भवदर्शनेन सान्त्वयति-शौरेरिति । कर्तरिषष्ठी छांदसी । शौरिणाहं त्रयोविंशाक्षौहिणीभिस्सहितोऽपि पराजितः । शूरनन्दनत्वेनेश्वरतामपह्नुवानो निंदयते । प्रौढित्वं चाह निजमानरक्षणार्थम्—एकमिति ॥ १३ ॥ यद्यपि पराजितस्तथापीत्यर्थः । तथापि पराजये न शोचामि, जये न हृष्यामि । विद्रावितं संक्षोभितम् । ननु कालस्य सर्वत्र साम्येन ततो न प्रियाऽप्रियप्राप्तिसंभवस्तत्राह-दैवेति । स्वकर्मणां वैचित्र्यादित्यर्थः । पूर्वमीश्वरेच्छैव कारणमुक्तमधुना तु दैवयुक्तः काल इति । अस्यायं भावः-जीवस्य दैवमनन्तमस्त्यनीदत्वात्, तत्रेश्वरचेष्टात्मककालविशेषो दैवविशेषमुपादत्त इति ॥ १४ ॥ 'तंत्रं परिच्छदे' इति कोशात्फल्गुतंत्रैः स्वल्पसेनापरिच्छदैः । 'फल्ग्वसारेऽभिधेयवत्' इति मेदिनी । प्रकृतज्जादुःखापलापे तत्सर्वं योजयति-अधुनापीति । संप्रति पश्येत्यर्थः । वयमिति सर्वापेक्षया । कृष्णेति मूलनामग्रहणमवज्ञासूचनार्थम् ॥ १५ ॥ "प्रदक्षिणोऽनुकूले परिक्रामेऽतिदक्षिणे ज्ञेयः" इति निरुक्तिः । आत्मनोऽनुसारिणि अनुकूले सति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं सर्वैः संहृस्योक्तेऽपि तस्य दौर्मनस्यत्यागमदृष्ट्वा स्वयं जरासन्ध एव स्वानुभवप्रदर्शनेन सान्त्वयति । शौरेरिति । त्रयोविंशत्यक्षौहिणीसंख्यैः सैन्यैः सहाहं शौरितः पराजितोऽभवं वै प्रसिद्धौ यद्वा आर्षी कर्त्तरि षष्ठी शौरिणेत्यर्थः । शूरनप्तृत्वेनेश्वरत्वं निन्दयते प्रौढत्वं च तत्रापि निजमानरक्षाय कत्थते जिग्य इति ॥ १३ ॥ तथैवाह—तथापीति । पराजयेनापि न शोचामि जयेनापि न प्रहृष्यामीत्यर्थः । कर्हिचिदित्यस्योभयत्राप्यन्वयः विद्रावितं सङ्क्षोभितम् ननु कालस्य सर्वत्र साम्येन तस्मात् प्रियाप्रियप्राप्तिः कुतः स्यात् तत्राह—दैवेति । स्वकर्मणां वैचित्र्यादित्यर्थः पूर्वमीश्वरेच्छैव कारणमुक्तम् अधुना तु दैवसंयुक्तः काल इत्यस्यायम्भावः जीवस्य दैवमनादिसिद्धत्वादनन्तमेव वर्त्तते तत्रेश्वरचेष्टात्मककालविशेषो दैवविशेषमुपादत्त इति ॥ १४ ॥ प्रकृतलज्जादुःखापलापे तत्सर्वं योजयति-अधुनापीति । सम्प्रत्यपि पश्येत्यर्थः । वयमिति । सर्वापेक्षया पुनः सर्वेषामेवैतानि वचनानीति वा कृष्णेति मूलनामग्रहणमप्यवज्ञासूचनार्थम् ॥ १५ ॥ पुनस्तत्सर्वमाश्वासने योजयति—रिपव इति । आत्मनः अनुसारिणि अनुकूले सति तज्जपादपि विशेषेण जेष्यामः वयं चेति पाठे वयमपि ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं सर्व्वैः संहृत्योक्तेऽपि तस्य दौर्मनस्यात्यागं दृष्ट्वा सर्व्वश्रेष्ठः पितृतुल्यत्वेन तस्य परमादरणीयः स्वयं जरासन्ध एव स्वानुभवप्रदर्शनेन सान्त्वयति—शौरेरिति । त्रयोविंशत्यक्षौहिणीसंख्यैः सैन्यैः सहाहं शौरितः पराजितोऽभवम्, वै प्रसिद्धौ; यद्वा, आर्षी कर्त्तरि षष्ठी, शौरिणेत्यर्थः । शूरनप्तृत्वेनेश्वरत्वं निह्नुते ॥ १३ ॥ तथापीति पराजयेनापि न शोचामि, जयेनापि न प्रहृष्यामीत्यर्थः । कर्हिचिदित्यस्योभयत्राप्यन्वयः; कर्हिचिदपि; तत्र हेतुमाह—कालेनेति । विद्रावितं संक्षोभितं जानन् सन् । ननु कालस्य सर्व्वत्र साम्येन तस्मात् प्रियाप्रियप्राप्तिः कुतः स्यादित्यपेक्षायामाह—दैवेति; स्वकर्म्मणां वैचित्र्यादित्यर्थः । तत्र देवस्येदं दैवमिति कर्म्मणामीश्वरेच्छारूपतातूचनेन पूर्व्ववत्तत्कारणानुसन्धानमपि निरस्तम् । यद्वा, दैवः सर्व्वदेवोपास्य ईश्वरस्तेन युक्तनेति कालस्यापि तदधीनत्वमुक्तम् ॥ १४ ॥ वयमिति—सर्व्वेषामेव नृपाणां संग्रहात्; यद्वा, समाश्वासनार्थं पुनः सर्व्वे सम्भूयाहुरिति ज्ञेयम् । मित्रैरित्यग्रे वक्ष्यमाणत्वात्, वीराणां यूथपास्तेषां यूथपा अपि, इति महावीरवरत्वमुक्तम्, तत्रापि कृष्णेन श्रीनन्दगोपपुत्रेण पालितैरिति स्वेभ्यो न्यूनत्वमेव बोधयन्ति ॥ १५ ॥ न च तथापि निराशैर्भाव्यम्, कालक्रमेण जयस्यापि सम्भवादित्याश्वासयन्ति—रिपव इति । आत्मनामनुसारिणि अनुकूले सति विशेषेण तेषां जयादप्युत्कृष्टतया जेष्यामः । 'हि' इति पाठे निश्चितम्, 'वयञ्च' इति पाठे 'च' अपि, वयमपि ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

फल्गुतन्त्रैः अल्पबलैः ॥ १५ ॥ प्रदक्षिणः अनुकूलः ॥ १६-२२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमीश्वरपारतन्त्र्यमुक्तं तत्र चाहमेव दृष्टान्त इत्याह जरासन्धः । शौरेरिति सप्तदशसंयुगानि युद्धानि कृत्वेति शेषः । त्रयोविंत्यक्षौहिणीकैः सैन्यैः सहितोऽप्यहं शौरेः श्रीकृष्णात्सकाशात् पराजितः सप्तदशकृत्व इति शेषः । एकं संयुगं त्वहं परं केवलं जिग्ये जितवानस्मि ॥ १३ ॥ तथापि सप्तदशकृत्वः पराजयकालेऽपि अहं कर्हिचिन्न शोचामिनापि जयकाले हृष्यामि च किं कुर्वन् दैवमदृष्टं तद्युक्तेन कालेन कालशरीरकेणेश्वरेण दैवमीश्वरस्तद्युक्तेन तदात्मकेन कालेनेति वा कृत्स्नं जगद्विद्रावितम् उपद्रुतं जानन् ॥ १४ ॥ अतोऽधुनापि वयं सर्वे वीरयूथया अपि फल्गुतन्त्रैरपि अल्पबलैरपि पराजिताः ॥ १५ ॥ रिपवस्तु आत्मानुसारिणि स्वानुकूलेकाले प्राप्ते सति जिग्मुः यदा च प्रदक्षिणोऽस्मदनुकूलः कालो भावी तदा वयमपि जेष्याम एव ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

योऽहं त्रयोविशतिभिः सैन्यैरक्षौहिणीभिः शौरेः सप्तदशसंयुगानि सप्तदशसंयुगेषु पराजितः परं पश्चात्सोऽहं तावतीभिः सम्भूयैकं सेनादिविकलं कृष्ण जिग्ये तथाप्युभयथापि एकमष्टादशमं संग्रामं वा ॥१३-१४॥ फल्गुतन्त्रै-अल्पसेनादिपरिच्छदैः ॥१५॥ प्रदक्षिणः अनुकूलः ॥ १६-१७ ॥

श्रीमज्जवगोस्वामिकृतः क्रमसन्दर्भः

पूर्वनीश्वरेच्छैव कारणमित्युक्त्वा पश्चात्कालेन दैवयुक्तेनेति कारणान्तरनिर्देश इदमभिप्रैति जीवस्य दैवमनादित्वात् अनन्तमेव वर्त्तते तत्र चेश्वरचेष्टात्मकः कालविशेषो दैवेविशेषमुपादत्त इति ॥ १४-२१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

शौरेः सकाशात् संयुगानि व्याप्य संयुगेषु वा पराजितः पराभूतः त्रयोविंशत्यक्षौहिणीसङ्ख्यैः एकं परं एकस्मिन् नन्तिम एव संयुगे जिग्ये जितवानस्मि ॥ १३ ॥ दैवमदृष्टं तद्युक्तेन विद्रावितं सङ्क्षोभितम् ॥ १४ ॥ फल्गुतन्त्रैः तुच्छपरिच्छदैः ॥ १५ ॥ प्रदक्षिणः अनुकूलः यदा स्यात् ॥ १६-१८ ॥

गूढार्थदीपिनी

संयुगानि संग्रामान् कृत्वेति शेषः । शौरेः कृष्णात् । सैन्यैः सह पराजितः परं केवलम् एकमन्तिमम् ॥ १३ ॥ दैवयुक्तेन अदृष्टप्रेरितेन कालेन विद्रावितं विचालितम् ॥ १४ ॥ फल्गुतन्त्रैः स्वल्पसैन्यैः । यूथपा महासेनापतयः ॥ १५ ॥ अनुसारिणि अनुकूले सति प्रदक्षिणोऽनुकूलः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

त्रयोविंशतिभिः सैन्यैरक्षौहिणीभिः सहितोऽहं शौरेः कृष्णात् सप्तदशसंयुगानि युद्धानि कृत्वेति शेषः पराजितः पराभूतः एकमष्टादशमं संयुगं परं केवलं जिग्ये जितवानस्मि ॥ १३ ॥ दैवं प्राक्कर्म यद्वा दैवमीश्वरस्तद्युक्तेन ॥ १४ ॥ फल्गुतन्त्रैरल्पसैन्यैः ॥ १५ ॥ जिग्युर्जितवन्तः प्रदक्षिणोऽनुकूलः ॥ १६-२२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यथा दारूमयी योषा कुहकेच्छया नटयितुः कपटिन इच्छया नृत्यते एवमीश्वरतन्त्र ईश्वराधीनः पुमान्सुखदुःखयोस्तात्साधनयोर्विषय ईहते चेष्टते । यद्यपि यथा पुमान्दारुमय इति शक्यं वक्तुं तथाऽपि न स्त्री स्वातन्त्र्यमर्हतीत्यादेः सर्वावस्थास्वप्यन्याधीनता वनिताया नियतेति बोधनार्थं योषेत्युक्तिरिति ज्ञेयम् ॥ १३ ॥ अहं सप्तदशसंयुगानि शौरेः सकाशात्पराजितस्त्रयोविंशतिभिस्तत्सङ्ख्याक्षौहिणीभिरेकमेकवारमेकलं वा परं तत उत्तरे जिग्ये ॥ १४ ॥ विचित्रा दैवीगतिरिति न शोकेन कृत्यं सहस्व मां निदर्शनीकृत्येति शंसति । तथाऽपीति । दैवयुक्तेन कालेन हरिणा जगद्द्रावितं जानन्न शोचामि कर्हिचिदपि न प्रहृष्यामि यो दैवयुक् सुदैवस्तं तेन कालेन कालयवनेन जगज्जगत्यां भूमौ विद्रावितं जानन्नपि न प्रहृष्यामीत्यप्यर्थ आन्तरङ्गिको ज्ञेयः ॥१५॥ फल्गुतन्त्रैः फल्गुतन्त्रं परिच्छदः सेनादिः । तन्त्रं परिच्छद इति विश्वः । येषां ते तैर्यदुभिः पराजिताः ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं शास्त्रीयमुक्त्वा लौकिकं स्वकीयमाह **शौरेः सप्तदशाह**मिति । सप्तदशदिवसेषु वै निश्चयेन शौरेः सम्बन्धिसंयुगानि पराजितः । द्विकर्मकोऽयं जिधातुः, अत्र । संयुगेषु वा । त्रयोविंशतिभिः सैन्यैरक्षौहिणीभिः सहित इति साधनसहितोऽपि सकृज्जयं मन्यते । तेन द्वयमपि मयानुभूतमिति निष्ठाभावः प्रत्यक्षः ॥ १३ ॥ अत एव मम शोको नास्तीत्याह **तथापी**ति । कर्हिचित् तत्स्मरणेऽपि दुहित्रादिदर्शनेऽपि । सर्वदा हर्षविषादाभावे एकमनुसन्धेयमिति । तत्स्वनिर्धारितं तस्मा उपदिशति **कालेने**ति । यदि स्वसमानैः पराजयो जयो वा भवेत्, तदा हर्षो विषादो वा कर्तव्यो भवेत् । कालस्तु तत्कर्ता, स सर्वेषामधिपतिः । किञ्च । सोऽपि द्रव्ययुक्त एव शरीरादिसहितः । विद्रावणं शरीरद्वारैव करोति । नत्वात्मनां स्वतः । तेन च जगद्विद्रावितं जानन् च शोचामीति सम्बन्धः **दैवयुक्तेने**ति पाठे कर्मवशात् सोऽपि तथा करोति । न तु तस्यापि कश्चन दोषोऽस्तीति भावः ॥१४॥ अस्तु कालान्तरबार्ता, इदानीमेव वयं सर्वे जिताः अतः पञ्चभिः सह दुःखं दुःखं न भवतीति न शोकः कर्तव्य इत्यभिप्रायेणाह **अधुनापी**ति । **वय**मिति श्लाघायाम् । सर्व एवेति सम्मत्यर्थम् । तर्ह्यप्रयोजका भविष्यन्तीति न मन्तव्यम् । वीरयूथपानामपि यूथरक्षका वयम् । सर्वदैव वयमेवंभूताः । अधुना परं पराजिताः । तेषां च न महद्बलम्, किन्तु फल्गुतन्त्रैरेव यदुभिः पराजिताः । तर्हि तेऽपि हता भविष्यन्तीत्याशङ्क्य तं मनोरथं दूरीकरोति **कृष्णपालितै**रिति । कृष्णेन पालिताः, न मारयितुं

शक्या इत्यर्थः । अनेन कृष्णात् कन्याकरणसम्भावनापि निवारिता ॥ १५ ॥ ननु किमेतदाश्चर्यमिति चेत्, तत्र हेतुमाह **रिपवो जिग्युरिति** । अधुना आत्मानुसारिणि काले देवानां हितकर्तरि रिपवो वैष्णवा जिग्युः । अस्माकं च हितकारी यदा तामसः कालो भविष्यति, राजसो वा, तदा वयं दैत्याः, चकाराद्राक्षसा अपि विजेष्यन्ति । दैत्यानां सिद्धान्ते कालः परमः, तदतिरिक्तानङ्गीकारात्तत्र प्रतिष्ठिताः ॥ १६ ॥

श्रीसुबोधिनी–सारः

स्वदृष्टांतेन शोकमपनुदति तत्पितृव्यः शौरेः कृष्णात्सकाशात्सप्तदशसंयुगान्यहं पराजितं स्मि । त्रयोविंशत्यक्षौहिणीभिः सैन्यैः सह । परमष्टादशममेकं संग्रामं जिग्ये जितवान् ॥ १३ ॥ तथाऽपि जये पराजये च कर्हिचित्कदापि नाहं शोचामि न प्रहृष्यामि । "पूर्वजन्मजनितं पुराविदः कर्मदैवमिति संप्रजक्षते" इति वचनाद्दैवं प्राक्तनमदृष्टं तद्युक्तेन कालेन विद्रावितं विचालितं जगज्जानन् सन् ॥ १४ ॥ अधुनाद्यापि वीरयूथपानामपि यूथपाः सर्वे वयं कृष्णरक्षितैः फल्गुतंत्रैर्लघुसैन्यैर्यदुभिः पराजिताः स्मः ॥ १५ ॥ आत्मनः स्वस्यानुसारिणि अनुकूले काले सत्यधुना रिपवः शत्रवः कृष्णाद्या जिग्युर्जितवंतः । तथापि न शोको युक्तः यदा कालः प्रदक्षिणः सानुकूलस्तदा वयं विजेष्यामः पुनरेतान् ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

'अत्राहमेव दृष्टान्त' इत्याह जरासन्धः—शौरेरिति । सप्तदशसंयुगानि युद्धानि कृत्वा त्रयोविंशत्यक्षौहिणिकैः सैन्यैः सहितोप्यहं शौरेः श्रीकृष्णात् पराजितः सप्तदशकृत्व इति शेषः । परं अन्तिमम् एकं संयुगं अहं जिग्ये जितवानस्मि ॥ १३ ॥ तथापि पराजये जाते विजये वा जातेऽपि अहं कर्हिचित् पराजयकाले न शोचामि, जयकाले च न हृष्यामि । तत्र हेतुमाह—दवयुक्तेन परमेश्वरप्रयुक्तेन कालेन कृत्स्नं जगद्विद्रावितं उपद्रुतं जानन् ॥ १४ ॥ फल्गुतन्त्रैः स्वल्पसैन्ययुक्तैरपि कृष्णपालितैर्यदुभिः वीरयूथपयूथपाः अपि वयं सर्वे अधुना प्रतिकूले काले पराजिताः ॥ १५ ॥ आत्मानुसारिणि स्वानुकूले काले प्राप्ते सति अधुना रिपवो यदवो जिग्युः । यदा चास्माकं प्रदक्षिणः कालः, अनुकूलः कालो भावी तदा वयमपि सर्वे विजेष्याम इत्यन्वयः ॥ १६ ॥

अन्वितार्थप्रकाशिका

शौरेरिति ॥ सप्तदश संयुगानि युद्धानि कृत्वा त्रयोविंशत्यक्षौहिणीकैः सैन्यैः सहितोऽप्यहं शौरेः श्रीकृष्णात्पराजितः सप्तदशकृत्व इति शेषः । परं केवलमत्युग्रं वा अन्तिमं वा एकं संयुगम् अहं जिग्ये जितवानस्मि । तङार्षः ॥ १३ ॥ तथापीति । तथापि दैवमदृष्टं तेन युक्तेन प्रयुक्तेन कालेन कृत्स्नं जगद्विद्रावितम् उपद्रुतं जानन् अहं कर्हिचित् पराजयकाले न शोचामि जयकाले च न हृष्यामि ॥ १४ ॥ अधुनेति । फल्गुतन्त्रैः स्वल्पसैन्ययुक्तैरपि कृष्णपालितैर्यदुभिः वीरयूथपयूथपाः अपि वयं सर्वे अधुना पराजिताः ॥ १५ ॥ रिपव इति ॥ आत्मानुसारिणि यदूनामनुकूले काले प्राप्ते सत्यधुना रिपवो यदवो जिग्युः, उत्कर्षं प्रापुः । यदा चास्माकं प्रदक्षिणः कालः, अनुकूलः भावी तदा वयमपि सर्वे विजेष्यामः । तङभाव आर्षः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अत्र जरासंधः स्वदृष्टांतेनाह शौरेरिति शौरेः कृष्णात् पराजितः पराभवं प्राप्तोऽहं परमंतिमं एकं संग्रामं जितवान् ॥१३॥ स्वधैर्यमाह तथापीति दैवं स्वप्रारब्धं तद्युक्तेन विद्रावितं संक्षोभितं ॥ १४ ॥ फल्गुतंत्रैरल्पानीकैः ॥ १५ ॥ प्रदक्षिणः सहायः स्यात् ॥ १६–१८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं तवेश्वरपारतन्त्र्यमुक्तं, तथा चात्राहमेव दृष्टान्त इत्याह जरासन्धः । शौरेरिति । सप्तदश, संयुगानि, युद्धानि, कृत्वेति शेषः । त्रयोविंशतिभिः सैन्यैः त्रयोविंशत्यक्षौहिणीकैः सैन्यैः सहितः अपि, अहं शौरेः श्रीकृष्णात् सकाशात्, पराजितः पराजयं प्राप्तः, सप्तदशकृत्व इति शेषः । परं केवलं, एकं संयुगं तु अहं जिग्ये जितनानस्मि वै ॥१३॥ तथापीति । तथापि सप्तदशकृत्वः पराजयकालेऽपि, दैवमदृष्टं तद्युक्तेन, कालेन कालशरीरकेणेश्वरेणेत्यर्थः । यद्वा दैवमीश्वरस्तद्युक्ते तदात्मकेन कालेन, कृत्स्नमिति शेषः जगत् विद्रावितमुपद्रुतं, जानन्, अहं कर्हिचित्, न शोचामि । जयकालेऽपि, न प्रहृष्यामि ॥ १४ ॥ अधुनापीति । अधुना सांप्रतमपि, वीरयूथपयूथपाः सर्वे वयं फल्गुतन्त्रैः स्वल्पसैन्यैः कृष्णपालितैः यदुभिः, पराजिताः ॥ १५ ॥ रिपव इति । आत्मानुसारिणि स्वानुकूले, काले प्राप्ते सतीति शेषः । रिपवोऽस्मच्छत्रवो यदवः, अधुना जिग्युः । यदा कालः प्रदक्षिणः, यदाऽस्मदनुकूलः कालो भावीत्यर्थः । तदा वयमपि, विजेष्यामः एव ॥ १६ ॥

कृष्णप्रिया

शिशुपाल जी आप से यह प्रसङ्ग आप को यह बात सुनिश्चित है कि तेईस-तेईस अक्षौहिणी सेनाओं के साथ सत्रह वार श्रीकृष्ण से पराजित हुआ परन्तु अन्तिम एक समर में मैंने श्रीकृष्ण पर विजय प्राप्त की ॥ १३ ॥ फिर भी इस प्रसङ्ग को लेकर मैं कभी न पराजय का शोक करता हूँ या विजय के विषय में हर्ष करता हूँ। क्योंकि विजय एवं पराजय पाञ्चभौतिक द्रव्यों से निर्मित शरीर का ही है आत्मा का नहीं। काल भगवान ही इस सचराचर जगत को झक-झोरते हिलाते चलाते रहते हैं॥ १४॥ राजन् ! सुनिये वर्तमान संग्राम में हम सब बड़े बड़े वीर सेनापतियों के नायक थे इसमें कोई भी सन्देह नहीं था। फिर भी श्रीकृष्ण से सुरक्षित यदुवीरों की अल्पसंख्या वाली सेना ने हमें हरा दिया है यह शोक का कारण नहीं है ॥ १५ ॥ अधुना हमारे शत्रुओं की ही विजय हुई कारण यह है कि साम्प्रतकाल में 'भगवान काल' उन्हीं के सानुकूल था। जब वही भगवान काल हमारे सानुकूल होगा तब हम भी उन्हें जीत लेंगे ॥ १६ ॥

एवं प्रबोधितो मित्रैश्चैद्योऽगात् सानुगः पुरम् । हतशेषाः पुनस्तेऽपि ययुः स्वं स्वं पुरं नृपाः ॥ १७ ॥
रुक्मी तु राक्षसोद्वाह कृष्णद्विडसहन् स्वसुः । पृष्ठतोऽन्वगमत् कृष्णमक्षौहिण्या वृतो बली ॥ १८ ॥
रुक्म्यमर्षी सुसंरब्धः शृण्वतां सर्वभूभुजाम् । प्रतिजज्ञे महाबाहुर्दंशितः सशरासनः ॥ १९ ॥
अहत्वा समरे कृष्णमप्रत्यूह्य[१९] च रुक्मिणीम् । कुण्डिनं न प्रवेक्ष्यामि सत्यमेतद् ब्रवीमि वः ॥ २० ॥

कर्दमक्षमा

अन्वयः—एवम्, प्रबोधितः, चैद्यः, मित्रैः, सानुगः, पुरम्, अगात्, पुनः, हतशेषाः, ते, नृपाः, अपि, स्वम्, स्वम्, पुरम्, ययुः ॥ १७ ॥ कृष्णद्विट्, बली, रुक्मी, तु स्वसुः, राक्षसोद्वाहम्, असहन्, अक्षौहिण्या, वृतः कृष्णम्, पृष्ठतः, अन्वगमत् ॥ १८ । सुसंरब्धः, अमर्षी, महाबाहुः, दंशितः, सशरासनः, रुक्मी सर्वभूभुजाम्, शृण्वताम्, प्रतिजज्ञे ॥ १९ ॥ श्रीकृष्णम्, समरे, अहत्वा, च, रुक्मिणीम्, अप्रत्यूह्य, कुण्डिनम्, न, प्रवेक्ष्यामि, वः, एतत्, सत्यम्, ब्रवीमि ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमुक्तरीत्या । हतेभ्यः शेषाः, बहवो हता इति द्योतनायैव ॥ १७ ॥ असहन्नसहमानः । आर्षत्वाच्छताऽत्र । पूर्वोक्ते युद्धारम्भे रुक्मिणो वृत्तमाह—पृष्ठतः पश्चादिति । श्रीबलदेवादिषु युद्धभारं विन्यस्य श्रीकृष्णस्य द्वारकां प्रति प्रस्थानात् । तदुक्तं हरिवंशे—"आदाय रुक्मिणीं कृष्णो जगामाशु पुरं प्रति । रामे भारं समासज्य युयुधाने च वीर्यवान् । अक्रूरे विपृथौ चापि गदे च कृतवर्मणि ! चक्रदेवे सुदेवे च सारणे च महाबले । निवृत्तशत्रो विक्रान्ते भंगकारे विदूरथे । उग्रसेनात्मजे कंके शतद्युम्ने च केशवः । राजाधिदेवे मदुरे प्रासने चित्रके तथा । अरिदान्ते बृहद्दुर्गे श्वफल्के सत्यके पृथौ । वृष्ण्यंधकेषु चान्येषु मुख्येषु मधुसूदनः ।" इति । सर्वान्वित्वर्मनि स्थितांस्तान्वंचयित्वेति ज्ञेयम् ॥ १८ ॥ दंशितो बद्धकवचः । अमर्षी असहनः । सुसंरब्धोऽतिक्रोधी । महाबाहुरिति बाहूत्थापनाभिप्रायेण ॥ १९ ॥ अप्रत्यूह्य अन्यस्मै अदत्त्वाऽनानाय्य वा । संगरे न तु मायादिना । अप्रत्यूह्यानिवर्त्य । न प्रवेक्ष्यामीति पौरजनेषु निजमुखदर्शनायोग्यत्वात्, इयं च दैवी गीर्भावित्वात् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हतेभ्यः शेषा इति बहवो हता इति द्योत्यते ॥ १७ ॥ पूर्वोक्तयुद्धारम्भे रुक्मिणो वृत्तिमाह—रुक्मी त्विति । पृष्ठतः पश्चात् पृष्ठरक्षान् विन्यस्य द्वारकां प्रति श्रीकृष्णस्य प्रस्थानात् तथाच हरिवंशे—आदाय रुक्मिणीं कृष्णो जगामाशु पुरीं प्रति । रामे भारं समासज्य युयुधाने च वीर्यवान् अक्रूरे विपृथौ चापि गदे च कृतवर्मणि । चक्रदेवे सुदेवे च सारणे च महाबले । निर्वृत्तशत्रौ विक्रान्ते भङ्गकारे विदूरथे । उग्रसेनात्मजे कङ्के शतद्युम्ने च केशवः । राजाधिदेवे मृदुरे प्रासने चित्रके तथा । अरिदान्ते बृहद्दुर्गे स्वफल्के सत्यके पृथौ । वृष्ण्यन्धकेषु चान्येषु मुख्येषु मधुसूदन इति । स्ववर्त्मनि स्थितांस्तान् वञ्चयित्वेति ज्ञेयम् ॥ १८ ॥ अमर्षी असहनः, अत एव सुसंरब्धः अतिशयेन क्रुद्धः, अत एव शृण्वतां शृण्वत्सु सर्वभूभुजां सर्वभूभृत्सु तस्य प्रतिज्ञायोग्यत्वं बोधयन् महाशूरत्वं लक्षयति—महाबाहुरिति । अनेन तदानीं बाहूत्थापनमपि ज्ञेयम्, अतः पूर्वमेव दंशित इत्यादि ॥ १९ ॥ सङ्गरे नतु मायादिना अप्रत्यूह्य अनिवर्त्य कुण्डिनं न प्रवेक्ष्यामीति पौरजनेषु निजमुखदर्शनाय अयोग्यत्वात् इयं च दैवीगीः भावित्वात् ॥ २० ॥

---

[१९] अप्रमुच्य–च. पु. टि. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रकर्षेण सन्यायाश्वासनादिना बोधितः सन् मित्रैर्हितकारिभिरिति तेषां वाक्यस्यावश्यपाल्यतोक्ता। अनुगा दमघोषादयस्तत्सहिताः, पुरं स्वम्; हतेभ्यः शेषा अवशिष्टाः, अनेन बहवो हता इति द्योत्यते ॥ १७ ॥ तु-शब्दः पूर्व्वतो विशेषे, तमेव दर्शयति—स्वसुः राक्षसोद्वाहमसहमानः, यतः कृष्णं साक्षाद्भगवन्तं द्वेष्टीति तथा सः। एवमग्रेऽपि, इति तस्य परमाबुधत्वदुष्टत्वादिकं सूचितम्। पृष्ठतः पश्चादिति श्रीबलदेवादिषु युद्धभावं विन्यस्य द्वारकां प्रति श्रीकृष्णस्य प्रस्थानात्। तथा च श्रीहरिवंशे (विष्णु० प० ५९।४७–५१)—

आदाय रुक्मिणीं कृष्णो जगामाशु पुरीं प्रति। रामे चासज्य तं भारं युयुधाने च वीर्य्यवान् ॥
अक्रूरे विपृथौ चैव गदे च कृतवर्म्मणि। चक्रदेवे सुदेवे च सारणे च महाबले ॥
निवृत्तशत्रौ विक्रान्ते भंगकारे विदूरथे। उग्रसेनात्मजे कंके शतद्युम्ने च केशवः ॥
राजाधिदेवे मृदुरे प्रसेने चित्रके तथा। अतिदान्ते बृहद्दुर्गे स्वफल्के सत्यके पृथौ ॥
वृष्ण्यन्धकेषु चान्येषु मुख्येषु मधुसूदनः ॥ इति।

अक्षौहिण्यैकया वृतः परिवृतः यद्वा, अक्षौहिणीभिर्बह्वीभिरावृतः, स्वयमपि बली युद्धसमर्थः ॥ १८ ॥ अमर्षी असहनशीलः, अत एव सुसंरब्ध इति विचारराहित्यं सूचितम्। अत एव शृण्वतां शृण्वत्सु, इति तेषां स्वस्वपुरगमनात् प्रागिति ज्ञेयम्। तस्य प्रतिज्ञायोग्यतां बोधयन् महाशूरत्वमाह; किंवा बाहुमुत्थाप्य धनुरादिस्पर्शेन शपथपूर्व्वकं प्रतिजज्ञ इति सूचयति—महेत्यादिना। संगरे युद्धमध्ये, न तु मायादिनेत्यात्ममौर्य्यं ख्यापयति ॥ १९ ॥ कृष्णं श्याममित्यसूयया, किंवा बलाद्धरणाभिप्रायेण, एवमग्रेऽपि। अप्रत्यूह्य अनानीय, इदञ्च भावित्वात् सत्यमेव तन्मुखान्निःसृतम्; कुण्डिनं पुरं न प्रवेक्ष्यामीति प्रतिज्ञाहान्यात्यन्तलज्जया पौरजनेषु निजमुखदर्शनायोग्यत्वात् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

इत्थं मित्रैर्जरासंधादिभिः बोधितः सांत्वितश्चैद्यस्स्वपुरं प्रति जगाम ततो हतशेषास्ते जरासंधादयोऽपि नृपाः स्वस्वगृहं प्रति जग्मुः ॥ १७ ॥ ततः कृष्णद्विट् रुक्मी तु स्वसुर्भगिन्या राक्षसोद्वाहमसहमानः अक्षौहिण्या सैन्येन परिवृतः कृष्णं पृष्ठतोऽन्वधावत् ॥ १८ ॥ अनुधावनात्पूर्वं तस्य संरम्भमाह—रुक्मीति। अमर्षी क्रुद्धः सुसंरब्धः सन्नद्धः तदेव प्रपञ्चयति—दंशितः कवचितः शरासनेन धनुषा सहितः सर्व्वभूभुजां शृण्वतां सतां प्रतिजज्ञे ॥ १९ ॥ प्रतिज्ञामेवाह—अहत्वेति। अप्रत्यूह्य अनाहृत्य ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

असहन्नसहमानः ॥ १८–१९ ॥ अप्रत्यूह्य अनावृत्य अन्यस्यादत्वेति वा ॥ २०–२३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

अमर्षी असहिष्णुः सुसंरब्धः अतिक्रोधः ॥ १९ ॥ अहत्वेति। भारतीपक्षे अज्ञात्वा अप्रत्यूह्य अनिवर्त्य अनिर्मोच्येति वा ॥ २०–२१ ॥

गूढार्थदीपिनी

हतेभ्यः ये शेषाः तेऽपि ॥ १७–१८ ॥ अमर्षी तद्धरणमसहमानः। सुसंरब्धः संक्रुद्धः। प्रतिजज्ञे प्रतिज्ञामकरोत् ॥ १९ ॥ अप्रत्यूह्य अनिवर्त्य। अहत्वा न किन्तु हत्वा प्राप्यैवेति वास्तवोऽर्थः ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अधुनाऽऽत्मानुसारिणि काले सति रिपवो यदवोऽस्माञ्जिग्युः। यदा तु कालः प्रदक्षिणोऽस्मदनुकूलस्तदा वयं जेष्यामः ॥१७॥ मित्रैराप्तैः ॥ १८ ॥ स्वसुर्भगिन्या राक्षसोद्वाहमसहन् गतम्। अक्षौहिण्या सेनया वृतः ॥ १९ ॥ सर्वभूभुजां गतोर्वरितानां शृण्वतां सताम्। सशराशन इति शपथपूर्वकतामावेदयति ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं स्वसिद्धान्तनिरूपणेन प्रबोधितः। मित्रैरवञ्चकैः समानव्यसनैः सह चैद्यः ससेवकः स्वपुरमगात्। तेऽपि हतशेषाः तद्गृहपर्यन्तं तत्सङ्गे गत्वा पुनः स्वं स्वं पुरं ययुः ॥१७॥ एवं सप्तदशभिः एकमुपाख्यानं साधारणानां ममताभावाय निरूपितम्। अधुना सार्धैः सप्तदशभिः रुक्मिप्रभृतीनां ममताभावाय रुक्मिण्याश्च तेषु ममताभावाय सार्धैरेव सप्तदशभिर्निरूप्यते। मध्यमं

तामसम् । अन्तिमं राजसमिति । ततो दोषत्रयापगमने भगवानष्टैश्वर्यरूपां **रुक्मिणीं** स्वीकरिष्यत्यष्टभिः । तत्र प्रथमं तामसस्योद्योगमाह **रुक्मी त्विति** । यद्यपि तत्त्वोपदेशे रुक्मी स्थितः, तत्त्वेन च सर्वे निवृत्तव्यापारा जाताः, रुक्मी तु न जात इति तु शब्दार्थः । ननु कोपराधः, य एव क्षत्रियः बलवान्नयति तस्यैव भार्या भवतीति क्षत्रियाणां स्थितिः । तत्राह **स्वसुः राक्षसोद्वाहमसहन्निति** । ये हि कुलीनाः सन्तो दुर्बलः, तत्कन्या राक्षसविधिना नीयते । स्वयं तु शूरः, अतो राक्षसविवाहोऽनुचितः । किञ्च । कृष्णद्विडयम् । अन्यश्चेन्नयेत्, न वदेदपि । द्विष्टेन नीतं न काप्युपकाराय भविष्यति । स्थापनीयं च शत्रुत्वम् । तत्सम्बन्धे सत्यशक्यमिति सम्बन्धदूरीकरणार्थं तस्य प्रवृत्तिः । कन्याहविषोस्तुल्यत्वात् । 'द्विषता हि हविर्भुक्तं नेह नान्यत्र तद्भवे'दिति वाक्यात् कन्यापि द्विषता भुक्ता न लोकद्वयोपकारिणीति तस्या भोगं वा निवारयितुं तत्प्रवृत्तिः । अत एव पृष्ठतोन्वगमत् । येनैव मार्गेण कृष्णो गतः, तेनैव मार्गेण स्वयमपि गतः । अथवा । अयं यदैव भगवान् निर्गतः, तदैव प्रचलितः, परमन्ये निवृत्ताः, अयं तु न निवृत्त इति वैलक्षण्यम् । एकयाक्षौहिण्या परिवृतः सन् गतः । ननु बहव एव गता हतोद्यमा जाताः, कथमयमेकाकी गच्छतीत्याशङ्क्याह बलीति । अयमत्यन्तं बलिष्ठः ॥ १८ ॥ अत एव महतीं प्रतिज्ञां चक्रे इत्याह **रुक्मीति** । **अमर्षी** अप्रतीकारक्रोधवान् । सुष्ठु संरब्धः युद्धार्थं कृतोद्यमः । सर्वभूभुजां शृण्वतां मध्ये प्रतिजज्ञे, प्रतिज्ञां कृतवान् । क्रोधसंरम्भान्न ज्ञातवान् । सामग्री गृहीतेति निर्भयः, निवारकाश्च न जाताः सर्वे । सहायापेक्षा तु नास्तीत्याह **महाबाहुरिति** । महती क्रियाशक्तिः यस्येत्यर्थः । ततो दंशितः बद्धकवचः सशरासनश्च ॥ १९ ॥ प्रतिज्ञामाह **अहत्वेति** । **अप्रत्यूह्येति** । रुक्मिणीमग्नितुल्यां मन्यते । यथा आयतनादग्निः बहिश्चेन्निर्गच्छति । तत्पुनरायतने व्यूह्यते, ततः **कुलादपगता** पुनः कुले व्यूह्येति भावः, नन्वेतदशक्यमिति चेत्, तत्राह **कुण्डिनं न प्रवेक्ष्यामीति** । अयमेव नियमः, यदुभयमकृत्वा कुण्डिनाप्रवेश इति । अतः कुण्डिनाप्रवेश एव तस्य फलिष्यति । अत एव विगानाभावात् निर्धारितस्यानुक्तत्वात् न पदानामन्यथार्थो वक्तव्यः । एतदहं सत्यं ब्रवीमीति शपथः ॥ २० ॥

श्रीसुबोधिनी–सारः

एवं मित्रैः सुहृद्भिः प्रबोधितो विश्वासितः सानुगः सभृत्यः चैद्यः शिशुपालः पुरं चेदीमगात् । हतेभ्यो मृतेभ्यः शेषा उर्वरिता नृपाः स्वं स्वं पुरं जग्मुः पुनस्तेपीत्यनेन जीविताशाया बलीयस्त्वं द्योतितम् ॥ १७ ॥ कृष्णद्विट् रुक्मी तु पक्षांतरे स्वसुर्भगिन्या राक्षसश्चासावुद्वाहश्चेति तमसहमानोऽक्षौहिण्या सेनया वृतो बली कृष्णं पृष्ठतोन्वगमत् ॥ १८ ॥ तत्प्रतिज्ञामाह । महाबाहुः दंशितो बद्धकवचः सधनुः सुसंरब्धोऽतिक्रुद्धोऽमर्षी असहिष्णू रुक्मी सर्वेषां भूभुजां राज्ञां शृण्वतां सतां प्रतिज्ञां चकार ॥ १९ ॥ समरे युधि कृष्णं न हत्वा रुक्मिणीमप्रत्यूह्य न मोचयित्वा कुंडिनं पुरं न प्रवेक्ष्यामि एतत्सत्यमहं ब्रवीमि वो युष्मान् प्रति ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

एवं मित्रैर्जरासन्धादिभिः प्रबोधितः सान्त्वितश्चैद्यः शिशुपालः सानुगः हतावशिष्टैर्भृत्यादिभिः सहितः स्वपुरं प्रति अगात् गतवान् । हतशेषास्ते जरासन्धादयो नृपा अपि पुनः स्वं स्वं पुरं प्रतिययुः ॥१७॥ ततो रुक्मी तु स्वसुर्भगिन्या राक्षसोद्वाहं हरणमसहमानः, अक्षौहिण्या एकाक्षौहिणीपरिमितसङ्ख्यया सेनया आवृतः पृष्ठतः कृष्णमन्वगमत् अन्वधावत् । तत्र हेतुमाह—बलीति । असहने हेतुमाह—कृष्णद्विडिति ॥ १८ ॥ अनुधावनात्पूर्वं तद्वृत्तमाह—रुक्मीति । महाबाहुर्महाबली, अमर्षी तद्धरणमसहमानः, सुसंरब्धः सङ्क्रुद्धः, दंशितः बद्धकवचः, सशरासनः धनुर्धरः, रुक्मी सर्वेषां भूभुजां राज्ञां शृण्वतां सतां प्रतिजज्ञे प्रतिज्ञामकरोत् ॥ १९ ॥ प्रतिज्ञामेवाह—अहत्वेति । समरे युद्धे रुक्मिणीमप्रत्यूह्य अनिवर्त्य । स्पष्टमन्यत् ॥ २० ॥

अन्वितार्थप्रकाशिका

एवमिति । एवं मित्रैर्जरासन्धादिभिः प्रबोधितः सान्त्वितश्चैद्यः शिशुपालः सानुगः हतावशिष्टैर्भृत्यादिभिः सहितः स्वपुरं प्रति अगात् । हतशेषास्ते जरासन्धादयो नृपा अपि पुनः स्वं स्वं पुरं प्रति ययुः ॥ १७ ॥ रुक्मीति । बली कृष्णद्विट् च रुक्मी तु स्वसुर्भगिन्या राक्षसोद्वाहं हरणमसहन् असहमान अक्षौहिण्या सेनया वृतः पृष्ठतः कृष्णमन्वगमत् अनुधावितुमैच्छत् ॥ १८ ॥ रुक्मीति । तत्र पूर्वं महाबाहुर्बली अमर्षी तद्धरणमसहमानः सुसंरब्धः संक्रुद्धः दंशितः बद्धकवचः सशरासनः धनुर्धरः रुक्मी सर्वेषां भूभुजां राज्ञां शृण्वतां सतां प्रतिजज्ञे प्रतिज्ञामकरोत् ॥ १९ ॥ अहत्वेति । समरे कृष्णमहत्वा अप्राप्य ज्ञात्वा वेति वास्तवोऽर्थः । रुक्मिणीं च अप्रत्यूह्य अनिवर्त्य कुण्डिनं न प्रवेक्ष्यामि । एतदहं वो युष्यान् प्रति सत्यं ब्रवीमि ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रतिजज्ञे प्रतिज्ञामकरोत् । दंशितः कवचयुक्तः ॥ १९ ॥ अप्रत्यूह्य नानीत्वा ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति । एवं मित्त्रैः मित्त्रताभाग्भिर्जरासंधादिभिः, प्रबोधितः सान्त्वितः, चैद्यः शिशुपालः, सानुगः स्वानुगैः सहितः, पुनः पुरं स्वनगरं, अगात् । ततः हतशेषाः, ते जरासंधादयोऽपि नृपाः, स्वं स्वं, पुरं प्रति, ययुर्जग्मुः ॥ १७ ॥ रुक्मीति । ततः बली प्रशस्तबलः, कृष्णद्विट् रुक्मी तु, स्वसुः स्वभगिन्याः, राक्षसोद्वाहं, असहन्नसहमानः, अत एव अक्षौहिण्या सेनया, वृतः परिवेष्टितः सन्, कृष्णं पृष्ठतः, अन्वगमदधावत् ॥ १८ ॥ अनुधावनात् पूर्वं तस्य संरम्भमाह । रुक्मीति । अमर्षी क्रुद्धः, सुसंरब्धः संनद्धः, योद्धुं सज्ज इत्यर्थः । तदेव प्रपञ्चयति । दंशितः कवचितः, शरासनेन धनुषा सहितः, सशरासनः, महाबाहुः, रुक्मी सर्वभूभुजां सर्वनृपाणां शृण्वतां सतां, प्रतिजज्ञे प्रतिज्ञामकरोत् ॥ १९ ॥ प्रतिज्ञामेवाह । अहत्वेति । समरे संग्रामे, कृष्णम् अहत्वा, रुक्मिणीं च, अप्रत्यूह्य अनाहृत्य च, कुण्डिनं, न प्रवेक्ष्यामि । कुण्डिनपुरे प्रवेशं न करिष्यामीत्यर्थः । एतत् वो युष्मान् प्रति, सत्यं, ब्रवीमि ॥ २० ॥

कृष्णप्रिया

राजन् परीक्षित् ! जब सब स्वजनों ने चेदिराज शिशुपाल को इस प्रकार समझाया तब वह अपने अनुयायियों के साथ निज राजधानी को लौट गया और संग्राम में जो लोग मरण से बचे थे वे वीर मित्र लोग भी अपने-अपने राजधानीओं की ओर लौट गये ॥ १७ ॥ रुक्मिणीजी का ज्येष्ठ भ्राता रुक्मी भगवान् श्रीकृष्ण का असाधारण द्वेषी था । उससे यह बात जरा भी सहन न हुई कि मेरी बहिन रुक्मिणीजी को श्रीकृष्ण हर ले जायँ एवं राक्षस विधान से बल पूर्वक उसके साथ लग्न करें। इसलिये बलवान् रुक्मी ने अपने साथ एक अक्षौहिणी सेना लेकर भगवान् श्रीकृष्ण का पीछा किया ॥ १८ ॥ महाबाहु रुक्मी रुक्मिणी हरण से क्रोध तमतमा रहा था । उसने बख्तर धारण किया और समस्त राजाओं के सामने धनुष उठाकर यह प्रतिज्ञा की और आक्रमण के लिये सज्ज हुआ ॥ १९ ॥ आक्रमण के अवसर सबके सुनते प्रण किया कि आप सर्वके समक्ष यह प्रतिज्ञा करता हूँ कि समराङ्गण में मैं श्रीकृष्णको यदि न मार सका और मेरी बहिन रुक्मिणी को न लौटा सका तब अपनी राजधानी कौण्डिनपुरी में प्रवेश नहीं करूँगा ॥ २० ॥

इत्युक्त्वा रथमारुह्य सारथिं प्राह [1]सत्वरम् । चोदयाश्वान् यतः कृष्णस्तस्य[2] मे संयुगं भवेत् ॥ २१ ॥
अद्याहं निशितैर्बाणैर्गोपालस्य सुदुर्मतेः । नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता ॥ २२ ॥
विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित् । रथेनैकेन गोविन्दं तिष्ठ [3]तिष्ठेत्यथाह्वयत् ॥ २३ ॥
[4]धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः । [5]आह चोर क्षणं तिष्ठ यदूनां कुलपांसन ॥ २४ ॥

कर्दमक्षमा

अन्वयः—इति, उक्त्वा, रथम्, आरुह्य, सारथिम्, प्राह, यतः, कृष्णः, सत्वरम्, अश्वान्, चोदय, तस्य, मे, संयुगम्, भवेत् ॥२१॥ अद्य, अहम्, सुदुर्मतेः, गोपालस्य, निशितैः, बाणैः, वीर्यमदम्, नेष्ये, येन, मे, स्वसा, प्रसभम्, हृता ॥२२॥ ईश्वरस्य, अप्रमाणवित्, कुमतिः, विकत्थमानः, एकेन, रथेन, गतः, च, गोविन्दम्, तिष्ठ, तिष्ठ, इति, अथ, आह्वयत ॥ २३ ॥ धनुः, विकृष्य, त्रिभिः, शरैः, कृष्णं, सुदृढम्, जघ्ने, च, आह, अरे यदूनाम्; कुलपांसन, क्षणम्, तिष्ठ ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गोपालस्य वेदपालकस्येति वास्तवोऽर्थः । तथा सुदुर्मतेरिति शोभनानुग्रहवती दुष्टेष्वपि मतिर्यस्य तस्येति ॥ २२-२३ ॥ यदूनां कुलपांसन कुलदूषण वस्तुतस्तु यदूनां कुलस्य पते हे अंसन स्वयं च रिपुहननचतुर । 'अंस समाघाते' इत्यस्माद्धातोः कर्तरि ल्युट् प्रत्ययो नंद्यादिविहितः ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतो यत्र । तस्य तेन । यतो यत्र द्वारकायां परमदुर्गेपि कुतस्तस्य मे मया सह संयुगं भवेत् । कामप्रवेदने लिङ्। ममेच्छेत्यर्थः । हेतौ वा, तद्भवनहेतोरित्यर्थः ॥ २१ ॥ प्रसभं हठात् । तच्च किमर्थं, तत्राह—अद्येति । नेष्ये गमयिष्यामि,

---

१. सत्वरः-श्रीधर वंशी. जीव. वीर. विज. विश्व. शुक. । २. स्तेन मे संयुगो-वीर. । ३. तिष्ठेति च ब्रुवन्-प्रा. पा.; अन्वधावत रंहसा-विज. ; त्युपाह्वयत्-वीर. ।

४. स गत्वा नर्मदां देवीं तरन्त मधुसूदनम् । आसाद्य युद्धसन्नद्धः तिष्ठ तिष्ठेति चाब्रवीत् ॥ विज. ।

५. चात्र-श्रीधर वंशी. जीव ; चारेक्षणं-विश्व. ; चोरे क्षणं-विज. ; चोर-वीर. ।

हरिष्यामीत्यर्थः। तत्त्वार्थश्चायम्—गोपालस्य तद्रूपलीलत्वेनैव प्रकाशितापूर्वसर्वैश्वर्यमाधुर्यस्यानाद्यनंतकालसिद्धवेदसिद्धसर्वमंत्रश्रेष्ठयोरष्टादशदशाक्षरयोरधिदेवस्य स्वयं भगवत इत्यर्थः। तर्हि कथं बहूनामन्यत्र प्रवृत्तिस्तत्राह—सु सुष्ठु दुरतिकृच्छ्रेण मतिर्ज्ञानं यस्य तस्य निशितैर्बाणैर्निजमेव वीर्यमदं नेष्ये गमयिष्यामि, क्षपयिष्यामीत्यर्थः। तर्हि कथं तत्र तस्य सामर्थ्यं, दर्शयति—येनेति। प्रसभं सर्वानपि राज्ञः पराभूयेत्यर्थः। म इति वीर्यमदमित्यनेनाप्यन्वितं वा ॥ २२ ॥ विकत्थमान आत्मानं श्लाघमानः। विरूपं कत्थमान आत्मानं श्लाघमानः, अतः कुमतिः, अतोऽप्रमाणवित् माहात्म्यानभिज्ञः, अत एव श्रीबलदेवं वर्त्मांतरेण वंचयित्वा एकेन रथेन सह वर्तमान एकाकिना भगवता स्वयमेवैकाकितया योद्धुं महामदेन दूरतः सर्वसैन्यपरित्यागात्। तथा च हरिवंशे—"अवस्थाप्य च तत्सैन्यं रुक्मी मदबलान्वितः। चिकीर्षुर्द्वैरथं युद्धमभ्ययान्मधुसूदनम् ।" इति। गोविंदं पृथ्व्यामवतीर्णं साक्षाद्भगवन्तमपीत्यर्थः। एवमग्रे कृष्णमित्यादिकं ज्ञेयं। तदेवं मुहुरुक्तिस्तस्यात्यंताऽबुधत्वादिबोधनार्थम् ॥ २३ ॥ अत्र संग्रामे, मत्संमुखे वा। अवज्ञया तं भृशमुत्साहयितुमिच्छया च तदाह्वानमनादृत्य प्रयांतमेव पृष्ठतो जघ्ने। यद्वा—तदाह्वानादभिमुखतया स्थितं जघ्ने। तथापि क्षणं तिष्ठेति वीरदर्पस्वभावादेवाह। अरे हे शत्रो। यद्वा—अव्ययमिदं संबोधने। वास्तवार्थेऽरे क्षणं शीघ्रदर्शनं यथा स्यात्तथा तिष्ठ "लघुक्षिप्रमरं द्रुतम्" इत्यमरः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

चोदयेति। नोदयेत्यर्थः। कुत्र यतो यत्र तत्रैव परमदुर्गद्वारकायामपीत्यर्थः ॥ २१ ॥ तच्च किमर्थं तदाह—अद्येति। नेष्ये गमयिष्यामि हरिष्यामीत्यर्थः। ननु श्रीकृष्णनिन्दामयं वाक्यं श्रीमद्भगवद्भक्तवृन्दवन्द्यश्रीचरणकमलरजःकणेन तत्र भवता वादरायणिना कथमनूदितमिति चेत्तत्राहुष्टीकाकृतो गोपालस्येत्यादि तस्येतीत्यन्तं तत्र तस्यैकदेशेऽपि यथाकथञ्चिदपि तत्स्तुतिरूपार्थसत्त्वेऽनुचितोऽत्रानुवाद इत्याशयः तत्त्वार्थश्चायं गोपालस्य तद्रूपलीलत्वेनैव प्रकाशितापूर्वसर्वैश्वर्य्यमाधुर्य्यस्य अनाद्यनन्तकालसिद्धवेदसिद्धसर्वमन्त्रश्रेष्ठयोरष्टादशदशाक्षरयोरधिदेवस्य स्वयं भगवत इत्यर्थः। तर्हि कथं बहूनामन्यत्र प्रवृत्तिस्तत्राह—सुष्ठुदुः अतिकृच्छ्रेण मतिर्ज्ञानं यस्य तस्य निशितैर्बाणैर्निजमेव वीर्य्यमदं नेष्ये गमयिष्यामि क्षपयिष्यामीत्यर्थः तत्र तस्य सामर्थ्यं दर्शयति। येनेति प्रसभं सर्वानपि राज्ञः पराभूयेत्यर्थः। मे इति वीर्य्यमदमित्यनेनाप्यन्वितं वा ॥ २२ ॥ विरूपं कत्थमानः आत्मानं श्लाघमानः अतः कुमतिः अतोऽप्रमाणवित् माहात्म्यानभिज्ञ इत्यर्थः। अत एव श्रीबलदेवं वर्त्मान्तरेण वञ्चयित्वा एकेन रथेन सह वर्त्तमानः एकाकिना श्रीभगवता स्वयमप्येकाकितया योद्धुं महामदेन दूरतः सर्वसैन्यपरित्यागात् तथाच श्रीहरिवंशे—

अवस्थाप्य च तत्सैन्यं रुक्मी मदबलान्वितः। चिकीर्षुर्द्वैरथं युद्धमभ्ययान्मधुसूदनमिति ॥

गोविन्दं पृथ्व्यामवतीर्णं साक्षाद्भगवन्तमपीत्यर्थः। एवमग्रे कृष्णमित्यादिकमपि ज्ञेयं तथैव मुहुरुक्तिस्तस्यात्यन्ताबुधत्वादिबोधनार्थम् ॥ २३ ॥ अवज्ञया तं भृशमुत्साहयितुमिच्छया च तदाह्वानमनादृत्य प्रयान्तमेव शरैः पृष्ठतो जघ्ने तथापि तथैव प्रयान्तं पुनराह यद्वा तदाह्वानादभिमुखतया स्थितं जघ्ने तथापि क्षणं तिष्ठेति वीरदर्पस्वभावादेवाह अरे हे शत्रो ! यद्वा अव्ययमिदमनादरसंबोधने वास्तवोऽर्थः अरे क्षणं शीघ्रदर्शनं यथा स्यात्तथा तिष्ठेति "लघु क्षिप्रमरं द्रुतमिति पर्य्यायात् ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्राह प्रवापेनाह, सत्वरः, सन् चोदय प्रेरय; कुत्र ? यतो यत्र तत्रैव परमदुर्गद्वारकादावपीत्यर्थः। कथम् ? तस्य मे मया सह मम च वा संयुगं भवेद्यथा तथैव, न त्वनुव्रजनादिप्रकारेणेत्यर्थः, यद्वा, किमर्थम् ? तदाह—तस्येति, भवेत् भवत्वित्येतदर्थमित्यर्थः ॥ २१ ॥ तच्च किमर्थम् ? तदाह—अद्येति। नेष्ये गमयिष्यामि हरिष्यामीत्यर्थः। तत्रार्थश्चायम्—गोपालस्य तत्तन्महामन्त्राधिदेवत्वेन प्रसिद्धस्य भगवतः, कर्म्मणि षष्ठी, तं प्रति बाणैः सह वीर्य्यमदं निजं नेष्ये प्रापयिष्यामि, भक्त्यार्पयिष्यामीत्यर्थः। यतो बलादप्याहो सम्बन्धेन मामनुजग्राहेत्याह—येनेति ॥ २२ ॥ विरूपं कत्थमान आत्मानं श्लाघमानः, यतः कुमतिः, अतोऽप्रमाणवित् माहात्म्यानभिज्ञ इत्यर्थः। अत एवैकेन रथेन सह वर्त्तमानः, एकाकिना श्रीभगवता सह स्वयमप्येकाकितया योद्धुं महामदेन दूरतः सर्व्वसैन्यपरित्यागात्। तथा च तत्रैव हरिवंशे (विष्णु. प० ६०।७)—'अवस्थाप्य च तत्सैन्यं रुक्मी मदबलान्वितः चिकीर्षुर्द्वैरथं युद्धमभ्ययान्मधुसूदनम् ॥' इति। गोविन्दं पृथ्व्यामवतीर्णं साक्षाद्भगवन्तमपीत्यर्थः। एवमग्रे कृष्णमित्यादिकमपि ज्ञेयम्, तथैव मुहुरुक्तिस्तस्यात्यन्ताबुधत्वादिबोधनार्थम् ॥ २३ ॥ अवज्ञया तदाह्वानमनादृत्य प्रयान्तमेव पृष्ठतो जघ्ने, तथाप्यवज्ञया पुनरपि प्रयाणादाह; यद्वा, तदाह्वानादभिमुखतया स्थितं जघ्ने, तथापि क्षणं तिष्ठेति वीरदर्पस्वभावादेव, अरे हे शत्रो; यद्वा, अव्ययमनादरसम्बोधने ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अप्रमाणवित्। अनन्तपरिमाणवत्त्वमजानन् वेदान्तानभिज्ञ इत्यर्थः ॥ २३–३४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीति । सत्वरः त्वरया सहितः उक्तिमेवाह—चोदयेति सार्द्धेन । यतो यत्र कृष्णस्तत्राश्वानाशु चोदय गमयेत्यर्थः । तेन कृष्णेन सह मम संयुगं संग्रामो भवेत् भवितव्यः ॥ २१ ॥ सुतरां दुर्बुद्धे गोपालस्य वीरमदं वीरोऽहमेवेत्येवंविधं मदं नेष्ये ततो नयामि त्याजयामीत्यर्थः । तत्र हेतुं वदन् विशिनष्टि । येन कृष्णेन मम भगिनी प्रसह्य नीता अपहृता ॥ २२ ॥ विकत्थमान इति । ईश्वरस्य श्रीकृष्णस्य प्रमाणम्—ज्ञानशक्तिबलादीनामनन्तपारिमाणत्वमजानन्, अत एव कुमतिरत एव चैवं विकत्थमानः प्रगल्भं भाषमाणः तिष्ठ तिष्ठेति वदन्निति शेषः उपाद्रवत् अन्वधावत् ॥ २३ ॥ धनुरिति । दृढं धनुर्विकृष्य शरान् सन्धायेति शेषः । कृष्णमुरो वक्षस्थलं जघ्ने आह च उक्तिमेवाह—क्षणमित्यादिना स्मयन्नित्यतः प्राक्तनेन । हे यदुकूलदूषक ! क्षणं तिष्ठ ममाग्रत इति शेषः, ध्वांक्षः काकः यथा हविः हृत्वा याति तथा मम स्वसारं मुषित्वा क्व यास्यसि नैल्यमयोग्यत्वं च दृष्टान्ताभिप्रेतम् ॥२४॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अरे नीचसम्बोधनं तदेव व्यनक्ति । यदूनामिति ॥ २४-२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नेष्ये । गमयिष्यामि हरिष्यामीत्यर्थः । भारतीपक्षे शोभना कृपावती दुष्टेष्वपि मतिर्यस्य तस्य निशितैर्बाणैर्वीर्यं मदं स्वपराक्रमं गर्वमदं नेष्ये यापयिष्यामि दूरीकरिष्यामीत्यर्थः ॥ २२-२३ ॥ कुलस्य पांसुकरणात् कुलपांसन ! पक्षे हे यदुकुलपालक ! हे अंसन ! रिपुघातिन् अंससमाघाते अरे क्षणं भारतीपक्षे अरे शीघ्रमीक्षणं यत्र तत् यथा स्यात्तथा तिष्ठ ॥ २४ ॥

गूढार्थदीपिनी

चोदय प्रापय । यतः यत्र कृष्णः तस्य तेन ॥ २१ ॥ गोपालस्य पशुपालकस्य नेष्ये दूरीकरिष्यामि । इति निन्दा । स्तुतिस्तु वेदपालकस्य सुष्ठु शोभना दृष्टेष्वपि मतिर्यस्य तस्य कृष्णस्य तीक्ष्णैर्बाणैर्वीर्यमदं स्वपराक्रमगर्वमहं नेष्ये क्षपयिष्यामि । प्रसभं हठात् ॥ २२ ॥ विकत्थमान आत्मानं श्लाघमानः । प्रमाणं बलस्येयत्ताम् । आह्वयत् स्पर्धाया अविवक्षणान्न तङ् ॥ २३ ॥ कुलस्य पांसुं धूलिं करोतीति कुलपांसन कुलदूषण । पांसुशब्दात्तत्करोतीति णिच् । वस्तुतस्तु हे कुलपते । हे अंसन ! शत्रुघातिन् । अंस समाघाते धातुः, इत्यस्मात् नन्दिगणत्वात्कर्तरि ल्युः । दर्शनं यथा स्यात्तथा क्षणं तिष्ठति योज्यम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीकृष्णानादरे हेतुमाह—कुमतिरिति । अत एवेश्वरस्य साक्षाद्भगवतः श्रीकृष्णस्य अप्राणवित् ॥ २३ ॥ कुलपांसन ! कुलदूषण ॥ २४-३३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

राज्ञां पुरतः कृतप्रतिज्ञैवंरूपाणीति निरूपयति । अहत्वेति । रुक्मिणीमप्रत्यूह्याप्रत्यावर्त्याविवाह्येति वा कुण्डिनं न प्रवेक्ष्यामि वः प्रति सत्यं ब्रवीमि । इति प्रतिजज्ञ इत्यन्वयः ॥ २१ ॥ सत्वरो रुक्मी सत्वरस्त्वं यतो यत्र कृष्णस्तत्राश्वांश्चोदयेति प्राह तस्य मे च संयुगं भवेत् ॥ २२ ॥ गोपालस्य पशुपालस्य वेदपालकस्येत्यन्तरर्थः । येन वीर्यमदेन तं मदं मे स्वसा प्रसभं बलाद्धृता येन कृष्णेन प्रसभं हृता तस्य मदमिति वा ॥ २३ ॥ अप्रमाणविदनियत्ताज्ञः ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः पित्राद्यभ्यनुज्ञाव्यतिरेकेणैव एवमुक्त्वा रथमारुह्य स्वसारथिं प्रति प्राह । अन्यथा स न तथा कुर्यात् । सहजद्वेषाभावात् । सत्वरमित्युभयत्र । अश्वान् प्रेरय । यतस्तस्य मे च संयुगो भवेत् । प्रार्थनायां लिङ् । यथा मम तस्य संयुगो भवति, तथा च दयेति भवेदिति विध्यर्थो वा । अपूर्वत्वात् । यतोऽयं कृष्णः स्त्रीप्रियः, अतः स्त्रियं हृतवानिति ॥ २१ ॥ गत्वा यत्कर्तव्यं तदाह **अद्याहमिति** । **निशितै**रिति । सहार्थे तृतीया । सुदुष्टेष्वपि मतिर्यस्येति । गोपालत्वं शब्दतो न दोषः, अभिप्रायतस्तथा भवति, तत्प्रकृतेनाङ्गीक्रियत इति, नान्यथा वक्तव्यम् । वीर्यजनितो यो मदः तमहं नेष्ये ग्रहीष्यामि, येन भगवता कृत्वा मदं प्राप्स्यामीत्यर्थः । पूर्वं नास्माकं गर्वः स्थितः, अधुना भगवत्सम्बन्धात् नास्मत्सदृशा वीराः सन्तीति गर्वो भविष्यति । क्षत्रियाणां वीर्यमेव महत्त्वसूचकमिति न मदमात्रं निरूपितम् । ननु भगवतो हेतुत्वं कथमित्याह **येन मे स्वसा प्रसभं हृते**ति । बलात्कारेण हरन् वीर्यं शिक्षां चोपदिष्टवान् । बाणानपि प्राप्स्यामि वीर्यमपीति । ससाधनबलप्राप्तिर्भगवदाभिमुख्यगमने फलमित्यर्थः । तत्सम्मुखमेव गन्तव्यमिति नियोगः ॥ २२ ॥ विशेषेण कत्थमानः असम्बद्धमिव भाषमाणः । भगवान् हि महत्या प्रार्थनया तां

हृतवान्, न तु बलादिति असम्बद्धता। नन्वचिन्त्यैश्वर्यं भगवतः श्रुत्वा दृष्ट्वा च कथमेवं वदतीत्याशङ्क्याह कुमतिरिति। ऊहादौ न तस्य सामर्थ्यम्। स हि सर्वमेव यथाकथञ्चिज्ज्ञातमिति भगवच्चरितं मन्यते। तत्र प्रमाणमाह **ईश्वरस्याप्रमाणविदिति**। ईश्वरस्य प्रमाणं सामर्थ्यं न जानाति। प्रमाणशब्दः आदरणीयपरोऽपि क्वचित्परिमाणवाच्यपि, प्रमाणं परिमाणमिति। यथा अत्रैव। 'विदुः प्रमाणं बलवीर्ययोर्वे'त्यत्र च। उपसर्गस्य अन्योपसर्गार्थत्वात् न नानार्थत्वं समुदायस्य। एवं दुर्बुद्धिरेकेनैव रथेन भगवत्समीपं गत्वा गोविन्दं भक्तकृपालुं सन्मात्रस्यैवेन्द्रम्, अत एव रुक्मिणीं हृत्वा गच्छन्तं तिष्ठ तिष्ठेत्यब्रवीत्। द्विरुक्तिः आदरे अधिक्षेपे वा। चकारात् स्तुतिवाक्यान्यन्यानि वा ॥ २३ ॥ तथोक्ते भगवान् स्थितः तदा यत्कृतवांस्तदाह **धनुर्विकृष्येति**। स्तुतिपक्षे मदुद्धारमकृत्वैव केवलं रुक्मिणीहरणमयुक्तमिति वाक्यानामर्थः। नन्वनधिकारी कथं कृतार्थीकर्तव्य इत्याशङ्क्य स्वाधिकारनिरूपणार्थं युद्धं प्रदर्शयतीति **धनुर्विकृष्येति**। **सुदृढमिति** सुष्ठु प्रतिज्ञायां दृढम्। भगवन्तमालक्ष्य स्वशौर्यं प्रदर्शयन्। **त्रिभिः शरैः** अर्थाल्लोकत्रयं जघ्ने। शरो ह्यपर्यावरणभूतो रसानाम्, तत्र जलस्य पृथिवी शरो भवति, अन्तरिक्षमपि वायोः, स्वरपि ब्रह्माण्डस्य, सर्वं भगवते निवेदितवानिति वा। हस्तो हि हन्तीति हस्तेन दत्तवानित्यर्थः। न केवलं सर्वस्वनिवेदनमेव कृतवान्, किन्तु वाक्यमप्युक्तवान्, अन्यथा वाचनिकं न दत्तवानिति स्यात्। **आह चार** इति। भगवन्तं प्रति विज्ञापनार्थमाह। **चारे** चरणयोग्ये हृदये सात्त्विके क्षणं तिष्ठ। ननु किं स्यात् स्थित इत्याशङ्क्याह **यदूनामिति**। यदूनां कुलं पान्तीति कुलपाः, कुलपा वा माया, तान् तां वा अंसेन क्रियाशक्त्या नयतीति तथा। ये केचन यादवानां रक्षकाः, तान् सर्वानेव वैकुण्ठं प्रापयति। अत एवं भक्तवत्सलः अस्मद्धृदयेऽपि क्षणं स्थितः, अस्मदीयान् अस्मदुपकारिणश्च वैकुण्ठं नेष्यनीति तदर्थं प्रार्थना ॥ २४ ॥

श्रीसुबोधिनीसारः

इत्येवमुक्त्वा रथमारुह्य सत्वरः सारथिं प्राह यतो यत्र कृष्णस्तत्राश्वान् नोदय प्रेरय। किमर्थमित्यत आह। तस्य कृष्णस्य मे मम संयुगं भवेदिति। तेन मे इत्येके तस्य मे मयेत्यपरे ॥ २१ ॥ येन प्रसभं बलात् मे मम स्वसा भगिनी हृता तस्य दुष्टबुद्धेर्गोपालस्य वीर्यमदं बलगर्वमद्येदानीमेव निशितैः तीक्ष्णैर्बाणैरहं नेष्ये नाशयिष्यामि ॥ २२ ॥ कुमतिः कुबुद्धिरीश्वरस्य न प्रमाणं वेत्तीति तथा। विकत्थमान आत्मानं श्लाघमानो रुक्मी एकेन रथेन तिष्ठ तिष्ठेति गोविंदमाह्वयत् आहूतवान् ॥२३॥ सुदृढं धनुर्विकृष्य त्रिभिः शरैः कृष्णं जघ्ने विव्याध आह च हे यदूनां कुलपांसन कुलाधम अत्र क्षणं तिष्ठ ॥ २४ ॥

विवरणटिप्पणी

विकत्थमान इत्यत्र। **प्रमाणमा**हेति। कुमतित्वानुमितिकरणमीश्वरप्रमाणाज्ञानमित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सत्वरः त्वरया सहितः। तदुक्तिमेवाह—चोदयेति सार्द्धेन। यतो यत्र कृष्णोऽस्ति तत्राश्वानाशु चोदय गमय। 'तत्र गमने किं प्रयोजनं' तत्राह—तेन कृष्णेन सह मे मम संयुगः सङ्ग्रामो भवेत् ॥ २१ ॥ 'युद्धेनापि किं फलम्' इत्याकाङ्क्षायामाह—अद्येति। अद्याहं गोपालस्य वनचरस्य निकृष्टस्य कृष्णस्य वीर्यप्रयुक्तं मदं निशितैस्तीक्ष्णैर्बाणैर्नेष्ये दूरीकरिष्यामि। 'तस्य कोऽपराध' इत्याकाङ्क्षायामाह—येन कृष्णेन मम स्वसा भगिनी प्रसह्य बलात् हृतेति। 'कुतः स्वयं गोपालोऽपि भूत्वा राज्ञस्तवैवमपराधं कृतवान्' इत्यपेक्षायां 'दुर्मतित्वात्' इत्याह—सुदुर्मतेरिति ॥ २२ ॥ एवं विकत्थमानः रुक्मी अथ अनन्तरमेवैकेनैव रथेनानुधावन् तिष्ठ तिष्ठेति गोविन्दमाह्वयत्। 'ततः कुतो न बिभेति स्म' तत्राह—ईश्वरस्य तस्य बलवीर्ययोः प्रमाणमियत्तां न वेत्तीति तथा **स** इति। तत्र हेतुमाह—कुमतिरिति। मन्दबुद्धिरित्यर्थः ॥ २३ ॥ सुदृढं धनुर्विकृष्य तत्र शरान् सन्धाय त्रिभिः शरैः कृष्णं जघ्ने, आह च। उक्तिमेवाह—हे यदूनां कुलपांसन कुलदूषण! क्षणं ममाग्रे तिष्ठेति ॥ २४ ॥

अन्वितार्थप्रकाशिका

इतीति। इत्युक्त्वा रथमारुह्य सत्वरः स सारथिमाह स्म। यतो यत्र कृष्णोऽस्ति तत्राश्वानाशु चोदय गमय। तेन कृष्णेन सह मे मम संयुगं संग्रामो भवेत्। तेनेत्यत्र तस्येत्यपि पाठः ॥ २१ ॥ अद्येति। अद्याहं सुदुर्मतेः गोपालस्य वनचरस्य कृष्णस्य वीर्यप्रयुक्तं मदं निशितैस्तीक्ष्णैर्नेष्ये दूरीकरिष्यामि। येन कृष्णेन मम स्वसा भगिनी प्रसभं बलात् हृतेति वस्तुतो गोपालस्य भूम्यादिपालकस्य सुतरां दुःखेन मतिर्ज्ञानं यस्य तस्य बाणैर्मदीयवीर्यं नेष्ये हारयिष्ये ॥ २२ ॥ विकत्थमान इति। विकत्थमानः स्वं श्लाघमानः कुमतिः ईश्वरस्य हरेः प्रमाणं बलस्येयत्तां न वेत्तीति तथा सः रुक्मी अथानन्तरमेवैकेनैव रथेनानुधावन् तिष्ठ तिष्ठेति गोविन्दमाह्वयत्। स्पर्द्धाया अविवक्षणान्न तङ् ॥ २३ ॥ धनुरिति। सुदृढं धनुर्विकृष्य तत्र शरान् सन्धाय अवज्ञयाऽऽत्मानमनादृत्य यान्तं कृष्णं पृष्ठतः त्रिभिः शरैः जघ्ने आह स्म च। हे अरे शत्रो! यदूनां कुलपांसन कूलदूषण। कुलं पांसुकरोति पांसुशब्दात्तत्करोति णिच्। क्षणं शीघ्रदर्शनं यथा स्यात्तथा तिष्ठ। "अरं द्रुतम्" इत्यमरः। हे यदूनां कुलपते अंसन

शत्रुहननचतुर ! अंस समाघाते नन्द्यादेर्ल्युः । कुत्रेति । हे मन्द ! ध्वाङ्क्षकाकः स यथा यज्ञे हविर्हृत्वा याति तथा मम स्वसारं मुषित्वा त्वं कुत्र यासि । मायिनः कूटयोधिनः कपटेन युद्धकर्तुः ते मदमद्याहं हरिष्ये । वस्तुतो ध्वाङ्क्षस्तद्विपरीतो नैकाक्षस्तद्विपरीतो नेकाक्षत्वपर्यवसानभूतः इन्द्र इव मुषित्वा स्वभागत्वान्न्यायेनैव लब्ध्वा कुत्र यासि भयाभावान्न क्वापि । किं च । हे मन्द स्थिर महामायाशक्ते ! कूटान् खलानस्मान् योधयसि पलायनेनास्मत्प्रोत्साहनात् तस्य तव त्वां प्रति मदं हर्षं स्वपराजयेन प्रापयिष्यामि । यद्वा । हविरिव शुद्धां मे स्वसारममुषित्वेति ध्वाङ्क्षवत्क्षुद्रोऽहमिति मदं हरिष्ये इति चान्वयः ॥ २४–२५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यतो यत्र कृष्णस्तत्रैव मे युद्धं भवेत् ॥ २१ ॥ निशितैस्तीक्ष्णैः वीर्यमदं नेष्ये हरिष्ये ॥ २२ ॥ विकत्थमान आत्मस्तुतिं कुर्वाणः, अप्रमाणवित् श्रीकृष्णस्य महत्त्वमजानन् ॥२३॥ हे यदूनां कुलं पांसन कुलदूषण । हे अरे शत्रो । क्षणं तिष्ठेत्यब्रवीत् ॥२४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति । इतीत्थं, उक्त्वा सर्वेषां पुरतः प्रोच्य, रथम् आरुह्य, सत्वरः सन्, सारथिं प्राह । उक्तिमेवाह नोदयेति सार्द्धेन । हे सूत, यतः यत्र, कृष्णः तत्र, अश्वान् नोदय गमयेत्यर्थः । मे मम, तेन कृष्णेन सह संयुगः भवेत् । भवितव्य इत्यर्थः ॥ २१ ॥ ननु स कः कृष्ण इत्यत आह । अद्येति । येन कृष्णेन, मे मम, स्वसा भगिनी, प्रसभं हठात्, हृता नीता तेन सहेति संबन्धः । ननु वीरेण तेन त्वं कथं पर्याप्तः स्यास्तत्राह । गोपालस्य न जात्याऽयं क्षत्त्रिय इति भावः । सुदुर्मतेर्गोपालत्वाद्दुर्बुद्धिमनः कृष्णस्य, वीर्यमदं, अहं अद्येव, निशितैरतितीक्ष्णैः, बाणैः, नेष्ये अपनेष्यामि । काऽस्य मदग्रे वीरत्वाभिमानितेति भावः ॥ २२ ॥ विकत्थमान इति । ईश्वरस्य श्रीकृष्णस्य, अप्रमाणवित् ज्ञानशक्तिवलानामनन्तपरिमाणत्वमजानन्, अत एव, कुमतिः अत एव, बिकत्थमानः प्रगल्भं भाषमाणः रुक्मी, तिष्ठ तिष्ठ, इति वदन्निति शेषः । एकेन रथेन, गोविन्दं, उपाद्रवदन्वधावत् ॥ २३ ॥ धनुरिति । धनुः सुदृढं यथा तथा, विकृष्य, शरान् संधायेति शेषः । त्रिभिः शरैर्बाणैः, कृष्णं जघ्ने आह च । उक्तिमेवाह क्षणमित्यादिना स्मयन्नित्यतः प्राक्तनेन ग्रन्थेन । हे यदूनां कुलपांसन यदुकुलदूषणभूत कृष्ण, अत्र ममाग्रतः, क्षणं, तिष्ठ ॥ २४ ॥

कृष्णप्रिया

महाराज परीक्षित् ! सबके सन्मुख अपना प्रण सुनाकर रुक्मी रथ पर सवार हो गया, और अपने सारथी को कहा कि जहाँ कृष्ण हो वहाँ जल्दी से जल्दी मेरा रथ ले चलो आज मेरा और कृष्ण का भीषण संग्राम होगा ॥ २१ ॥ आज मैं अपने तीक्ष्ण बाणों से दुर्मति गोपाल कृष्ण के वीर्य का बल का अहंकार को चूर्ण कर डालूंगा । उस गोपाल का साहस को तो जरा देखो कि हमारी बहिन को बलात्कार से हर ले गया है ॥ २२ ॥ राजन् परीक्षित् ? रुक्मी की मति विकृत हो गई थी । उसको भगवान का सामर्थ्य और तेजस की जानकारी नहीं थी इसलिये तो पागल की तरह या प्रमत्त की तरह बकवाद करता था । फिर एक ही रथ से श्रीकृष्ण समीप पहुँचकर श्रीगोविन्द कृष्ण को फटकार करने लगा कि ? खड़े रहो खड़े रहो कहाँ जा रहे हो ॥ २३ ॥ पुनः रुक्मी ने अपने धनुष्य को खींचकर बलपूर्वक भगवान श्रीकृष्ण को तीन तीक्ष्ण बाण मारे और कहने लगा कि मेरे सामने एक ही क्षण खड़े रहो ॥ २४ ॥

कुत्र यासि स्वसारं मे मुषित्वा ध्वाङ्क्षवद्धविः । हरिष्येऽद्य मदं मन्द मायिनः कूटयोधिनः ॥ २५ ॥
यावन्न मे हतो बाणैः शयीथा मुञ्च दारिकाम् । [1]स्मयन् कृष्णो धनुश्छित्त्वा षड्भिर्विव्याध रुक्मिणम् ॥२६॥
अष्टभिश्चतुरो वाहान् द्वाभ्यां सूतं ध्वजं त्रिभिः । स चान्यद् धनुरादाय कृष्णं विव्याध पञ्चभिः ॥ २७ ॥
तैस्ताडितः [2]शरौघैस्तु चिच्छेद धनुरच्युतः । स चान्यद् धनुरादत्त[3] तदप्यच्छिनदच्युतः[4] ॥ २८ ॥

कर्दमक्षमा

अन्वयः—ध्वाङ्क्षवत्, हविः मुषित्वा, मे, स्वसारम्, मुषित्वा, कुत्र, यासि ! हे मन्द ! मायिनः, कूटयोधिनः, अद्य, भदम्, हरिष्ये ॥ २५ ॥ मे बाणैः, यावत्, यी, हतः, न, शथाः, तावत्, दारिकाम्, मुञ्च, कृष्णः, स्मयन्, तस्य, धनुः, छित्वा, षड्भिः, रुक्मिणम्, विव्याध ॥ २६ ॥ अष्टभिः, चतुरः, वाहान्, द्वाभ्याम्, सूतम्, त्रिभिः, ध्वजम्, विव्याध, च, सः, अन्यद्, धनुः, आदाय, पञ्चभिः, बाणैः, कृष्णम्, विव्याध ॥ २७ ॥ तैः, शरोघैः, ताडितः, अच्युतः, तु, धनुः, चिच्छेद, सः, अन्यत्, धनुः, आदत्त, च अच्युतः, तद्, अपि, अच्छिनत्, ॥ २८ ॥

---

१. धनुर्विकृष्य सशरं जघ्ने कृष्णं त्रिभिः शरैः–विज. । २. शराग्रैस्तत्–बीर. । ३. पुनरन्यदुपादत्त–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. । ४. दश्ययः–श्रीधर. वंशी. जीव. वीर. विज. विश्व. ; दच्युतः–प्रा. पा. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ध्वांक्षः काकः स यथा हविर्मुष्णाति तद्वत् वस्तुतस्तु अध्वांक्षवदितिच्छेदः। सहस्राक्षवदित्यर्थः हे मंद! स्थिरेत्यर्थः ॥ २५–३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'ध्वांक्षः काके बकेऽर्थिनि' इति कोशान्न ध्वांक्षोऽर्थी याचकोऽध्वांक्षः। इंद्रस्यापि वाचकत्वे इन्द्रनामानन्वर्थता स्यादिति भाव इत्यभिप्रेत्यैव स्वामिचरणैः सहस्राक्षवदित्युक्तम्। यद्वा—अध्वेव विस्तृतान्यर्थाद्बहून्यक्षीणि यस्य स तथा। पृषोदरादित्वान्नुमार्षो वा। अर्थपदमुभयत्र व्याख्यापरम्। कूटयोधिनः छलप्रहर्तुः॥ क इव, किं मुषित्वा, तत्राह—ध्वांक्ष इव, हविर्मुषित्वेति। तत्र ध्वांक्षवदिति "हविर्होतव्यमात्रे च सर्पिष्यपि नपुंसकम्" इति मेदिनी। तत्त्वार्थस्तैर्व्याख्यातः। तत्र ध्वांक्षस्तावदेकाक्षः, नञा तद्विपरीतोऽनेकाक्षः। अनेकाक्षत्वं परमकाष्ठापन्नं सहस्राक्ष एवेति तत्र पर्यवसायितम्। एवममुषित्वा लक्ष्म्यास्त्वद्भागत्वान्न्यायेनैव लब्ध्वा कुत्र यासि न कुत्रापि गन्तुमर्हसि। भयाभावादित्यर्थः। मायिनो माहामायाशक्तेः पलायनं चेदमस्माभिर्युद्धयोग्यमेवेत्याह—कूटयोधिनः। कूटानबलानस्मान्साधु योधयतीति। अन्यथा वयमाभिमुख्येन न योत्स्यामह इति भावः। तादृशस्य तव मदं हर्व हरिष्ये, मद्विधखलनिर्जयलीलया त्वां प्रति प्रापयिष्यामीत्यर्थः। भारं ग्रामं हरतीतिवद्द्विकर्मकत्वेपि तवेति षष्ठी संबंधविवक्षया। यद्वा-हविः यज्ञसिद्धं स्वभागमिव मे स्वसारमुषित्वेति, ध्वांक्षवत्क्षुद्रोऽहमिति च योज्यम् ॥ २५ ॥ दारिकां कन्याम्। पूर्वमेव मुंचेत्यर्थः। यावदित्यर्धकम्। अत्र च मे मम बाणैर्हतः प्राप्तः सन् यावन्न शयीथास्तेषां तुच्छतां दर्शयित्वा हृतायां रुक्मिण्यां सुस्थो न भवेस्तावद्दारिकां मुंच तत्सांत्वनां त्यज, तत्सांत्वनां मुक्त्वा युद्धमेव कुर्वित्यर्थः ॥ २६ ॥ स च रुक्मी ॥ अष्टभिरिति प्रत्येकं द्वाभ्यामग्रिमपादद्वयवेधनार्थं, तत्साहचर्यात्सूतमपि द्वाभ्यां हस्तद्वयवेधनार्थम्। त्रिभिरिति—लक्षणपताकादंडानां पृथक्छेदनार्थम्। एतच्च रुक्मिण्यपेक्षया तद्वेधनमात्रं ज्ञेयम् ॥ २७ ॥ तैः पंचबाणैः। तत् तदपि ॥ अत एव ताडितोऽपि शराणामोघैः समूहैरेव धनुरेव चिच्छेद। पुनरित्यर्द्धकम्। अन्यत्ततोपि दृढतरम्। 'अव्ययम्' इत्यपि पाठः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

क इव किं मुषित्वा तत्राह—ध्वाङ्क्ष इव हविर्मुषित्वेति। तत्र ध्वाङ्क्षवदिति तत्त्वार्थस्तैर्व्याख्यातः तत्र ध्वांक्षस्तावदेकाक्षः नञा तद्विपरीतोऽनेकाक्षः अनेकाक्षत्वं पराकाष्ठापन्नं सहस्राक्ष एवेति तत्र पर्य्यवसायितम् एवममुषित्वा लक्ष्म्यास्त्वद्भागत्वात् न्यायेनैव लब्धा कुत्र यासि न कुत्रापि गन्तुमर्हसि भयाभावादित्यर्थः किञ्च मायिनो महामायाशक्तेः पलायनं चेदस्माभिर्युद्धयोग्यमेवेत्याह–कूटयोधिनः कूटान् खलान् अस्मान् साधु योधयतीति अन्यथा वयमाभिमुख्येन न योत्स्याम इति भावः। तादृशस्य च तव मदं हर्वं हरिष्ये मद्विधखलनिर्जयलीलया त्वां प्रति प्रापयिष्यामीत्यर्थ;। भारं ग्रामं हरतीतिवद्द्विकर्मकत्वेऽपि तवेति सम्बन्धविवक्षया षष्ठी यद्वा हविर्यज्ञसिद्धं स्वभागमिव मे स्वसारममुषित्वेति ध्वाङ्क्षवत् क्षुद्रोऽहमिति च योज्यम् ॥ २५ ॥ यावदित्यर्द्धकम्। अत्र च मे मम वाणैर्हतः प्राप्तः सन् यावन्न शयीथाः तेषां तुच्छतां दर्शयित्वा हृतायां सान्त्वितायां रुक्मिण्यां स्वस्थो न भवेः तावद्दारिकां मुञ्च तत्सान्त्वनां त्यज तत्सान्त्वनां मुक्त्वा युद्धमेव कुरुष्वेत्यर्थः। स्मयन् स्मयमानः पक्षद्वयेऽपि तस्य तादृशोक्तेरसंगतत्वात् मस्तकहस्तद्वयपादद्वयमध्यभागाख्यमुख्यषडङ्गवधनार्थं षड्भिः ॥ २६ ॥ अष्टभिरिति प्रत्येकं द्वाभ्यामग्रिमपादद्वयवेधनार्थं तत्साहचर्यात् सूतमपि द्वाभ्यां हस्तद्वयवेधनार्थं त्रिभिरिति लक्षणदण्डपताकानां पृथक् छेदनार्थम्। एतच्च श्रीरुक्मिण्यपेक्षया तत्तद्वेधनमात्रं ज्ञेयम् ॥ २७ ॥ अत एव ताडितोऽपि शराणामोघैः समूहैः तु एव धनुरेव चिच्छेद पुनरित्यर्द्धकम् अन्यत्ततोऽपि दृढतरम्। अच्युत इति अव्यय इति वा पाठः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मत्स्वसृमोषणं परमायोग्यमिति दृष्टान्तेनाह—ध्वाङ्क्षवदिति। तत्त्वार्थस्तैर्व्याख्यात एव। मायित्वादेव कूटं शाठ्यं तेन वोद्धुं शीलमस्येति तथा तस्य, तत्त्वार्थोऽयम्—मदं निजयर्वं हरिष्ये त्वय्यर्पयिष्यामि। कुतः? मन्देषु दुष्टेष्वपि मायिनो दयावतः, अत एव कूटयोधिनो निश्चलयोधिनः ॥ २५ ॥ अतो मम वाणैरहतो यावन्न शयीथाः, तावत् दास्यतीति दारिकां कर्त्तरीं मयि मुञ्च, मद्बाणाक्षततया शयनार्थमगत्वा मयि प्रहारं कुर्वित्यर्थः। यद्वा, तव वाणैर्हतो मे मदं यावद्धरिष्येऽपनेष्ये तावन्न शयीथा निश्चिन्तो न वर्त्तथाः, दारिकाञ्च न मुञ्च, युद्धनैश्चिन्त्यस्य तत्साधनत्यागस्य चा योग्यत्वात्। 'मे' इत्यस्यैव विशेषणं मन्देत्यादिपदद्वयम्। मन्दश्चासौ मायी चेति तथा तस्य मदेन हेतुना आत्मनो निन्दनमिदम्। स्मयम् स्मयमानः, पक्षद्वयेऽपि तस्य तादृशोक्तेरसंगतत्वात्, षड्भिरिति मस्तकादिमुख्यषडंगवेधनार्थम् ॥ २६ ॥ अष्टभिविति—प्रत्येकं द्वाभ्यां वेधनात्, त्रिभिरिति–

लक्षणपताका दण्डानां पृथक्त्वेन छेदनार्थं प्रत्येकमेकैकेन वेधनात् एतच्च श्रीरुक्मिण्यपेक्षया तत्तद्वेधनमात्रं ज्ञेयम् ॥ २७ ॥ अत एव ताडितोऽपि शरणामोघैः समूहैः, तु एव, धनुरेव चिच्छेद, अच्युत इति स्वस्थानादविचतनस्य, किं वा स्वप्रियतत्सम्बन्धिजनेषु स्नेहात् च्युतेरभिप्रायेण । एवमग्रेऽपि ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हे मन्द ! कूटयोधिनः कूटः समुदितो युध्यते तच्छीलस्तथा तस्य एकाकितया योद्धुमसमर्थस्येत्यर्थः । तव मदं हरिष्ये ॥ २५ ॥ मम वाणैर्याविद्धतो न शयीत भवान् ततः पूर्वमेव दारिकां कन्यां मुञ्च स्मयन्निति षड्भिर्वाणैरिति शेषः तथोत्तरत्रापि ॥ २६ ॥ स चेति । स रुक्मी ॥ २७ ॥ तैः रुक्मिणा प्रयुक्तैः शराग्रेस्ताडितः कृष्णः तदपि धनुश्चिच्छेद एवं पुनः पुनर्यद्यद्धनुराददे तदप्यव्ययो भगवान् चिच्छेद ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ततः पूर्वमेव मुञ्च ॥ २६–२८ ॥

श्रीमज्जवगोस्वामिकृतः क्रमसन्दर्भः

गोपालस्येति । तत्त्वार्थे तद्रूपत्वं व्यञ्जितमहैश्वर्थमिति तदादरो व्यञ्जितः ॥ ३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

ध्वाङ्क्ष काकः स यथा हविर्मुष्णाति तद्वत् पक्षे मे स्वसारं महालक्ष्मीत्वात् त्वदीयामपि त्वं मुषित्वा वा कुत्र यासि अहं स्वसारं स्वभगिनीं हरिष्ये त्वत्त्वो मोचयित्वा स्वगृहं प्रति नेष्यामि काक इव हविर्यज्ञियकाष्ठिकां ध्वङ्क्षवत् काक इव हविर्होतव्यमात्रे च सर्पिष्यपि नपुंसक"मिति मेदिनी । तस्मात् मन्दश्चासौ मायी चेति तस्य मम कपटयोधिनः मदं गर्वं द्य खण्डय ॥ २५ ॥ यावन्मे वाणैर्हतः सन् सङ्ग्रामे न शयीथास्तावद्दारिकां मुञ्च पक्षे यावदित्येवार्थे मे वाणैस्त्वमहत एव अतो दारिकां न मुञ्च "यावत्तावच्च साकल्येऽवधौ मानेऽवधारण" "इत्यमरः यावत् कात्स्न्र्येऽवधारण" इति मेदिनी । ननु दारिकया मम किं प्रयोजनं तत्राह—शयीथाः अनया सह पुष्पशय्यायामिति शेषो लज्जया नोक्तः ॥ २६–३१ ॥

गूढार्थदीपिनी

निन्दा तु स्पष्टैव । हविः यज्ञसिद्धं स्वभागमिव मे स्वसारम् अमुषित्वा न्यायेनैव लब्ध्वा कुत्र यासि न कुत्रापि भयाभावादित्यर्थः । किन्तु ध्वांक्ष काकस्तद्वत्क्षुद्रोऽहं त्वत्त एनां हरिष्ये इति मे मदं गर्वं द्य खण्डय । मन्दो मूर्खश्चासो मायी च कपटयोधी च तस्य मे इति योज्यमिति स्तुतिः । द्येति 'दीऽवखण्डने' इत्यस्मात् लोट् मध्यमपुरुयैकवचनम् ॥ २५ ॥ निन्दा स्पष्टैव । यावत् एवार्थे मे वाणैस्त्वमहत एव दारिकां न मुञ्च किन्तु अनया शयीथा पुष्पशय्यायामिति शेषः ॥ २६ ॥ स च रुक्मी ॥ २७–२८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स रुक्मीतरं तं मधुसूदनमासाद्य प्राप्य तिष्ठ तिष्ठेति चाब्रवीत् ॥ २५ ॥ अरे नीच यदूनां कुलपांसन कुलधुलीकर। अस्मन्नगरीं यदूनां यया रुक्मिण्यो नोज्झिता तां विकृष्याकृष्य कुलं चास्मत्कुलं तत्पांसनेत्यप्यन्वयः । क्षणं तिष्ठ ॥ २६ ॥ मे स्वसारं भगिनीं ध्वाङ्क्षः काको हविरिव मुषित्वा चोरयित्वा कुत्र यासि तद्धविर्मुषित्वा स्वसारमत्यसारमनुपयुक्तं कृत्वा याति तथा स्वसारं मुषित्वा सबलचौरं कृत्वा । एतेनाशक्तदुर्जनता जनार्दनस्य ध्वनयतीति वा । मायिन इव कूटयोधिनः कपटयुद्धस्य ॥ २७ ॥ यावद्युन्मध्ये मे बाणैर्हतो न शयीथा न शेषे तावद्दारिकां कन्यां मुञ्चेत्युपचा धनुर्विकृष्य ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

किञ्च, **कुव यासीति** । जीवानां स्वसा ब्रह्मानन्दो भवति । सम्बन्धमात्रं स्वांशिन आनन्द इति । नतु कदाचिदप्यनुभवः, अतः स्वसैव भवति । तां गृहीत्वा अस्मदुद्धारमकृत्वा उद्धृतानेव यादवान् उद्धतुं किमर्थं गच्छसीत्यर्थः । **मुषित्वे**ति । परोक्षं हृत्वा । जीवानां निकटेऽपि ब्रह्मानन्दः स्थितः जीवैर्न दृश्यते, अनुभवति भगवानेव । **ध्वाङ्क्षव**दिति । यथा ध्वाङ्क्षं विहाय हविर्नीयते । ध्वाङ्क्षो हविर्न भवति । अन्यत्सर्वं जगत्युत्पन्नं हविर्भवति, भगवान् सर्वयज्ञभोक्ता, तत्र सर्वे पशवः, काकं विहाय। तथा सर्वजगदुद्धारार्थमागतः मामेव विहाय कथं गच्छसीत्यात्मनो धिक्कारः । हविरपि परोक्षमेव गृह्यते । 'परोक्षप्रिया

(इव हि) देवाः प्रत्यक्षद्विष'इति । तर्हि त्वयैव काकदृष्टान्त उक्त इति त्वमग्राह्य एवेति चेत्, तत्राह **हनिष्येऽद्य मदं मन्दे**ति । मन्द मदं स्वस्मिन् दोषात्मकं यद्वशात् त्वया कृपा न विधीयते । मन्दमायिनो वा मन्दा अस्यास्तीति । अनेन माया मन्दैव क्रियते, न कार्यक्षमा भवति, कूटयोधिनो मायिनो भगवतः स कपटेनैव युद्धं करोति, वस्तुतो मुक्तिं प्रयच्छति । एतादृशे भगवति स्थिते प्रतिबन्धकत्वेन समागतं स्वधर्मं दूरीकरिष्यामीति वचनं युक्तमेव ॥ २५ ॥ तर्हि कथं त्वमुद्धर्तव्य इत्याकाङ्क्षायां ब्रह्मानन्दमस्मभ्यं प्रयच्छेत्याह **यावन्न मे हतो बाणै**रिति । मे बाणाः मन्मारकत्वेन समागतानीन्द्रियाणि तैर्यावन्न हतः, यदीन्द्रियाणि त्वद्रसं प्राप्स्यन्ति, तदा ब्रह्मानन्दं नापेक्षन्ते, तदा भक्तिमेव ग्रहीष्यन्ति, तावत्पर्यन्तं ब्रह्मानन्दो देय इत्यर्थः । यतः सा दारिका मुक्तिः संसारं विदारयिष्यति । भक्तेः पूर्वं मुक्तिप्रार्थना युक्तैव । ननु कोऽयमाग्रह इदानीमेव फलं देयमिति, तत्राह **शयीथा** इति । यावत्प्रलये सर्वं संहृत्य शयनं करिष्यसि, ततः पूर्वं मोचयेत्यर्थः । एवमुक्तो भगवान् हास्येन तं व्यामोहयन् दुरात्मायं मर्तुकामः समायातीति, स्वयं भगवान् स्त्रीणां हितकर्ता रुक्मिणी न त्याज्येति, तस्य धनुः छित्त्वा येन शरान् प्रक्षिप्तवान् तत् दूरीकृत्य, षड्भिः शरैः रुक्मिणं विव्याध । षोढा विहितो हि पुरुषः । ततः सर्वाङ्गेषु ताडितवान् ॥ २६ ॥ ततः अष्टभिः द्वाभ्यां एकैकं चतुरो वाहान् अश्वान् विव्याध । द्वाभ्यां च सूतम् । एते त्रिधा छिन्नाः पञ्चापि । ध्वजश्चतुर्धा छिन्नः । एवं साक्षात्परंपराङ्गानि सर्वाण्येव भिन्नानि । तच्छेदनार्थं प्रवृत्तेनैव वाणेन धनुश्छिन्नमिति न धनुषो भेदे पृथक् शरा उक्ताः । तदा सोऽप्यन्यत् धनुरादत्त । भगवानपि प्राणिघातकं धनुर्विहाय अन्यद्धनुर्गृहीतवानिति चकारेण ज्ञायते । तदपि आच्छिनत् ग्रहणमात्रेणैव, तत्र हेतुः **अच्युत** इति । स्वयमच्युतः, देववरप्राप्तं च धनुः । अतस्तच्छरस्य वैयर्थ्यसम्पादनात् पूर्वमेव तच्छिन्नम्, ततोऽन्यदपि गृहीतवानित्याह **पुनरन्यदुपादत्ते**ति । 'त्रिसत्या हि देवा' इति धनुषः त्रिर्ग्रहणम् ॥ २७–२८ ॥

श्रीसुबोधिनी–सारः

मे मम स्वसारं भगिनीं मुषित्वा चोरयित्वा हृत्वा वा त्वं कुत्र यासि गच्छसि हविः ध्वांक्षः काक इव हे मंद मायावतः कपटयोधिनस्ते मदं गर्वमद्याहं हरिष्यामि ॥ २५ ॥ मे मम बाणैर्हतस्त्वं यावन्न शयीथास्तावद्दारिकां कन्यां त्वं मुंच परित्यजेति कृष्णः स्मयन् ईषद्धसन् रुक्मिणो धनुः छित्त्वा रुक्मिणं षड्भिर्बाणैर्विव्याध ॥ २६ ॥ अष्टभिः चतुरोऽश्वान् द्वाभ्यां सूतं सारथिं त्रिभिर्ध्वजं विव्याध । स च रुक्मी अन्यद्द्वितीयं धनुरादाय गृहीत्वा पंचभिर्बाणैः कृष्णं विव्याध ॥ २७ ॥ तैः शराणामोघैः पूरैस्ताडितोऽच्युतो हरिः धनुः चिच्छेद । स च पुनरन्यदुपादत्ताग्रहीत् । तदप्यव्ययो भगवानच्छिनत् ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे मन्द ! ध्वाङ्क्षः काकः स यथा यज्ञे हविर्हृत्वा याति तथा मम स्वसारं मुषित्वा त्वं कुत्र यासि ? । 'स्थितौ किं करिष्यसे' तत्राह—कूटयोधिनः कूटं कपटं युद्धं कर्तुः । तत्र हेतुः—मायिनस्ते मदमद्य हरिष्ये गर्वं निराकरिष्ये ॥ २५ ॥ यावत् मम बाणैर्हतो न शयीथास्ततः पूर्वमेव दारिकां कन्यां रुक्मिणी त्वं विमुञ्च त्यज । तदा कृष्णोऽपि स्मयन् उपहसन् तस्य धनुश्छित्वा षड्भिर्बाणै रुक्मिणं विव्याध ॥ २६ ॥ अष्टभिः शरैश्चतुरो वाहान् विव्याध ताडयामास, द्वाभ्यां शराभ्यां सूतं विव्याध, त्रिभिः शरैः ध्वजं विव्याध । स रुक्मी ॥ २७ ॥ तैः रुक्मिप्रयुक्तैः शरसमूहैस्ताडितोऽच्युतः कृष्णस्तदपि धनुश्चिच्छेद । ततः पुनरन्यद्धनुः रुक्म्यु, पादत्त, तदप्यव्ययः कृष्णः अच्छिनत् ॥ २८ ॥

अन्वितार्थप्रकाशिका

यावदिति । यावत् मम बाणैर्हतो न शयीथास्ततः पूर्वमेव दारिकां कन्यां रुक्मिणीं त्वं मुञ्च त्यज । वस्तुतो मे बाणैर्न हतो न प्राप्तो यावच्छयीथाः स्वस्थो वर्तेथास्तावद्दारिकां बाणैर्मद्विदारणम् । धात्वर्थनिर्देशे ण्वुल् । मुञ्च त्यज मा कुरु मद्बाणप्राप्त्या तव व्याकुलीभावश्चासम्भवीति मां जहीति भावः । तदा कृष्णोऽपि स्मयन् उपहसन् । शता आर्षः । तस्य धनुश्छित्त्वा षड्भिर्बाणै रुक्मिणं विव्याध हस्तद्वयपादद्वयभालहृदयेषु विव्याध ॥ २६ ॥ अष्टभिरिति । कृष्णः अष्टभिः शरैश्चतुरो वाहान् विव्याध ताडयामास । द्वाभ्यां शराभ्यां सूतं विव्याध । त्रिभिः शरैः ध्वजं विव्याध । स रुक्मी च अन्यद्धनुरादाय पञ्चभिः शरैः कृष्णं विव्याध ॥ २७ ॥ तैरिति । तै रुक्मिप्रयुक्तैः शरसमूहैस्ताडितोऽच्युतः कृष्णस्तदपि धनुश्चिच्छेद । ततः पुनरन्यद्धनुः रुक्म्युपादत्त । तदप्यव्ययः कृष्ण अच्छिनत् ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ध्वांक्षः काको यथा हविर्हु तद्रव्यं मुष्णाति । तथा मे स्वसारं भगनीमुषित्वा चोरयित्वा । कूटयोधिनः कपटयुद्धकर्त्तुस्तवमदम् ॥ २५ ॥ मे बाणैर्हतो यावन्नशयीथाः स्वस्थो वर्त्तेथास्तावत् बालां मुंच ॥ २६ ॥ वाहानश्वान् ॥ २७–२८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कुत्रेति ।। हविः, ध्वाङ्क्षवत्, काकः यथा हविः हृत्वा याति तथेत्यर्थः । मे मम, स्वसारं भगिनीं, मुषित्वा चोरयित्वा, कुत्र यासि । क्व यास्यसीत्यर्थः । हे मन्द, कूटः समूहितः भूत्वा युध्यतीति तच्छीलस्तस्य, एकाकितया योद्धुमसमर्थस्येत्यर्थः । मायिनस्तव, मदं अहं अद्य हरिष्ये ।। २५ ।। यावदिति ।। मे मम, बाणैः हतः सन्, यावत् त्वं, न शयीथाः । रणभूमाविति शेषः । ततः, पूर्वमेव, दारिकां कन्यां मुञ्च । एवं विधं तद्वचनं श्रुत्वेति शेषः । स्मयन् हास्यं कुर्वन्, कृष्णः, तावदेव, धनुः तच्छरासनं, छित्वा, षड्भिः बाणैरिति शेषः । रुक्मिणं विव्याध ।। २६ ।। अष्टभिरिति ।। ततः अष्टभिः बाणैः, चतुरः वाहान् चतुरोऽप्यश्वान् द्वाभ्यां द्वाभ्यां बाणाभ्यामित्यर्थः । द्वाभ्यां बाणाभ्यां सूतं, त्रिभिर्बाणैः, ध्वजं, विव्याध, स च स रुक्म्यपि, अन्यत् धनुः, आदाय, पञ्चभिर्बाणैः, कृष्णं, विव्याध ।। २७ ।। तैरिति ।। तैः पञ्चबाणात्मकैः शरौघैः, ताडितः अच्युतः कृष्णः तु, धनुः पुनरुपात्तं तच्छरासनं चिच्छेद, रुक्मी पुनः अन्यद्धनुः, उपादत्तागृह्णात् । अव्ययः श्रीकृष्णः, तदपि अच्छिनत् ।। २८ ।।

कृष्णप्रिया

अरे यदुकुल कलङ्क ! हे यदुकुल कीर्ति को कलङ्कित करने वाले कौवा जैसे यज्ञ का हविष्य को चुराकर उड़ जाय वैसे ही हे कृष्ण ! मेरी बहिन रुक्मिणी को उठाकर कहाँ भाग जा रहा है । अरे मन्त ! महामूढ़ ! मुझे पता है कि तू बड़ा मायावी और कपट समर में परम कुशल हैं, लेकिन मैं तेरा सर्व गर्व का चूरा कर डालता हूँ ।। २५ ।। यादकर ? कृष्ण ! जब तक मेरे तीखे बाण तुमको पृथ्वी पर सुला नहीं देते उसके पहले ही, मेरी छोटी सी बहिन को धरणी पर रखकर भाग जा। भगवान् श्रीकृष्णजी ने रुक्मी के इस बकवास पर मुस्करान किया और प्रत्युत्तर में भगवान् ने उसका धनुष्य तोड़ डाला और रुक्मी पर भगवान् ने और छ बाण छोड़े ।। २६ ।। पुनः पुरुषोत्तम श्रीकृष्ण ने रुक्मी के चार अश्वों पर आठ बाण, दो बाण सारथी पर छोड़े पुनः तीन बाणों से उसकी ध्वजा को तोड़ दिया । पुनः रुक्मी ने दूसरा धनुष्य हाथ में लिया और भगवान श्रीकृष्ण को पाँच बाण मारे ।। २७ ।। रुक्मी के बाणों के लगने पर भगवान कृष्ण ने रुक्मी का दूसरा धनुष को भी काट दिया । पुनः रुक्मी ने और एक धनुष्य हाथ में लिया । लेकिन लेते ही भगवान श्रीकृष्ण ने अविनाशी प्रभुजी ने अच्युत ने उस धनुष्य को भी तोड़ दिया ।। २८ ।।

परिघं पट्टिशं शूलं चर्मासी[1] शक्तितोमरम् । यद् यदायुधमादत्त[2] तत् सर्वं सोऽच्छिनद्धरिः[3] ॥ २९ ॥
ततो रथादवप्लुत्य [4]खड्गपाणिर्जिघांसया । कृष्णमभ्यद्रवत् क्रुद्धः पतङ्ग इव पावकम् ॥ ३० ॥
तस्य चापततः खड्गं तिलशश्चर्म चेषुभिः । छित्त्वासिमादधे [5]तिग्मं [6]रुक्मिणं हन्तुमुद्यतः ॥ ३१ ॥
दृष्ट्वा भ्रातृवधोद्योगं रुक्मिणी भयविह्वला । पतित्वा पादयोर्भर्तु[7]रुवाच करुणं सती ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—परिघम्, पट्टिशम्, शूलम्, चर्मअसीशक्तितोमरान्, यद्, यद्, आयुधम्, आदत्त, तत्, सर्वम्, सः, विभुः, अच्छिनत् ।। २९ ।। ततः, क्रुद्धः, खड्गपाणिः, पतङ्गः, पावकम्, इव, रथात्, अवप्लुत्य, जिघांसया, कृष्णम्, अभ्यद्रवत् ।। ३० ।। आपततः, तस्य, खड्गम्, च, चर्म, इषुभिः, तिलशः, छित्वा, रुक्मिणम्, हन्तुम्, उद्यतः, तिग्मम्, असिम्, आदधे ।। ३१ ।। भ्रातृवधोद्योगम्, दृष्ट्वा, भयविह्वला, रुक्मिणी, भर्तुः, पादयोः, पतित्वा, सती, करुणम्, उवाच ।। ३२ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

शक्तितोमरैः सह परिघादीनि चिच्छेदेत्यर्थः । तदनु परिघादीन्याच्छिनत् । आत्तानीति शेषः । पट्टिशास्योः शूलशक्त्योश्चेषदाकारभेदः । तोमरः शूल्यभेदः । आदद्यात् आदातु समर्थ आसीदित्यर्थः । हरिर्दुष्टसंहारी ।। २९ ।। ततः शस्त्रच्छेदानन्तरम् । अभ्यद्रवदाभिमुख्येनाधावत् ।। ३० ।। तस्य रुक्मिणः । तिग्मं तीक्ष्णम् ।। ३१ ।। करुणं दीनं यथा स्यात्तथा । भ्रातुः केनापि दैवेन भ्रातृत्वं प्राप्तस्य वधोद्यमं दृष्ट्वा भयं लोकापवादात्कारुण्याद्वा तेन विह्वला । ननु तादृशदुष्टकर्मणो वधो युक्त एव, तत्राह—सती पण्डिता । अयमतिक्षुद्रः श्रीभगवति न किंचिदनिष्टं विधातुं शक्नोति, केवलमज्ञानेनैव चातकीवद्दीनोऽयं विचेष्टते, ततो ममानन्यशरणाया देहसम्बन्धधारिण्यस्मिन्नस्य दयैव युक्तेति विचारसमर्थेत्यर्थः । श्रीकृष्णस्य त्वयमभिप्रायः—मयि किमपि

---

१. चर्मासिशक्तितोमरान्–प्रा. पा. ; तोमरौ–श्रीधर. वंशी. जीव. वीर. विज. विश्व । २. दद्यात् तत्तदच्छिनदच्युतः–प्रा. पा. । ३. विभुः–विज. । ४. गृहीत्वाखड्गचर्मणी–वीर. विज. । ५. माददे–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ६. तीक्ष्णं–वीर. । ७. योः पत्युः–विज. ।

कर्तुं न समर्थोऽसाविति सत्यमेव, किन्त्वस्यां तादृशविपत्संपादकेच्छां कथमस्य सोढुं शक्नुयामित्यस्याः प्रार्थनया रक्षितप्राणस्यापि तादृशदुश्चेष्टामर्दनी परमा मनोरमा मानावहानिस्तु सदानुवर्तनी येति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदनन्तरं परिघादीनि चाच्छिनत् आत्तानीति शेषः तत्र शक्तितोमरानिति बाहुल्यापेक्षया शक्तितोमराविति पाठः क्वचित् पट्टिशास्योः शूलशक्त्योश्चेषदाकारादिभेदः तोमरः शल्यभेदः अन्यच्च बहुलं यद्यदादद्यात् आदातुं समर्थ असीदित्यर्थः। हरिर्दुष्टसंहारी तत्सर्वमच्छिनदित्येव पाठः छन्दोभङ्गोऽत्रार्षः बहुसम्प्रदायसिद्धश्चायं सम्प्रदायान्तरेषु पाठान्तराणि तु मिथो विप्रतिषिद्धानि ॥ २९ ॥ अभ्यद्रवत् आभिमुख्येनाधावत् ॥ ३० ॥ तिग्ममसिं यद्वा तेजसा तीक्ष्णमपि रुक्मिणम् ॥ ३१ ॥ भ्रातुः केनापि दैवेन साक्षाद्भ्रातृतां प्राप्तस्व वधोद्यमं दृष्ट्वा भयं लोकापवादात् कारुण्यादेव वा तेन विह्वला। ननु तादृशदुष्टकर्मणो वधो युक्त एव तत्राह–सती पण्डिता सर्वज्ञेत्यर्थः। अयमति क्षुद्रः श्रीभगवति न किञ्चिदनिष्टं विधातुं शक्नोति केवलमज्ञानेनैव वातकीव दीनोऽयं विचेष्टते ततो ममानन्यशरणाया देहसम्बन्धधारिण्यस्मिन्नस्य दयैव युक्तेति विचारसमर्थेत्यर्थः। श्रीकृष्णस्य त्वयमभिप्रायः मयि किमपि न कर्त्तुं शक्नोत्यसाविति सत्यमेव किन्त्वस्यां तादृशविपत्सम्पादकेच्छां कथमस्य सोढुं शक्नुयामित्यस्याः प्रार्थनया रक्षितप्राणस्यापि तादृशदुष्टेच्छामर्दनी परमा मनोग्लानिस्तु सदानुवर्त्तनीयेति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

शक्तितोमरमिति द्वन्द्वैक्यात्, पाठान्तरं स्पष्टम्, पट्टिशास्योः शूल-शक्त्योश्चेषदाकारादिभेदः, तोमरः शरविशेषः, एषां यथोत्तरं लघुत्वं ज्ञेयम्, क्रमेण बलहान्योत्तरोत्तरग्रहणात्। यद्यदिति बहुलमन्यदप्यादत्तेति द्योतयति; स प्रियजनपरवशो विभुरस्मत्प्रभुः, यद्वा, विभुस्तं सद्यो हन्तुं समर्थोऽप्यायुधमेवाच्छिनत् ॥ २९ ॥ ततस्तस्मादायुधच्छेदनाद्धेतोः। क्रुद्धः सन् अवप्लुत्य प्लुतगत्यावतीर्य, अभ्यद्रवदभिमुखे धावित्वागात्; तच्चात्मनाशार्थमेवेति सूचयंस्तादृशाभिद्रवणे दृष्टान्तमाह—पतंग इति ॥ ३० ॥ तिग्मनसिम्; यद्वा, तेजसा तीक्ष्णमपि रुक्मिणम् ॥ ३१ ॥ भयं लोकापवादभ्रातृवधोद्योगादेव, वा, तेन विह्वला सती। भर्त्तुरिति पादपतनयोग्यतोक्ता। करुणं यथा स्यात्, इदञ्च कृपाजननार्थं भयवैकल्यादेव वा। ननु तादृश दुष्टकर्म्मणो वधो युक्त एव, तत्राह—सती सहजदयार्द्रहृदयत्वादिसद्गुणवतीत्यर्थः। अतएव भ्रातृशब्दप्रयोगेण तस्मिंस्तस्याः स्नेहोऽपि सूचितः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः परिघादिकमपि यद्यदाददे तत्सर्वमप्यच्छिनत् ॥ २९ ॥ तत इति। खड्गः पाणौ यस्य स रुक्मी रथादवप्लुत्य हन्तुमिच्छया पतङ्गः शलभः पावकमिव कृष्णमभ्यपतत् ॥ ३० ॥ आपततस्तस्य रुक्मिणः खड्गं चर्म खेटं चेषुभिस्तिलप्रमाणशश्चिच्छेद एवं छित्वा रुक्मिणं हन्तुं निशितं खड्गमादत्त ॥ ३१ ॥ तदा भ्रातृवधार्थमुद्योगं प्रयत्नं दृष्ट्वा भयकम्पिता सती रुक्मिणी भर्तुः पादयोः पतित्वा करुणं यथा तथोवाच ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

पारिघं परिघातनं पट्टिशं लोहदण्डं शक्तितोमरैः सह चिच्छेद द्विमुखस्तोमरः ॥ २९-३३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

दृष्ट्वेत्यादि। एतदनन्तरं द्रष्टव्यम् एवमेव सतीति पण्डिता सर्वज्ञेत्यर्थः ॥ ३२-४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भगिन्याः पुरत एव भ्रातुर्वधोऽभूदिति श्रुत्वा लोका मां किं वदिष्यन्तीति भयविह्वला नतु स्नेहविह्वलेत्यत आसां पुरसुभ्रुवां लोकधर्मापेक्षासहित एव समञ्जसः प्रेमा नतु गोष्ठसुभ्रुवामिव लोकधर्मापेक्षा रहितः समर्थः प्रेमा अतिप्रबल इति ज्ञेयाः "अनन्यममता विष्णौ ममता प्रेमसङ्गते"ति प्रेमसामान्यलक्षणस्याव्याप्तिरप्यासु नाशङ्क्या रुक्मिप्रभृतिष्वासामन्तःस्नेहाभावादित्युपरिष्टादपि यथा स्थानं व्याख्येयम् ॥ ३२ ॥

गूढार्थदीपिनी

परिघो लोहबद्धो लगुडः। पट्टिशो लोहदण्डः। चर्म (ढालेति) तोमरः (गड़ासा) इति ॥ २९-३० ॥ तिग्मं तीक्ष्णम् ॥ ३१-३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अष्टाभिः । अष्टन इत्यात्वम् । चतुरः कुशल इत्यप्यर्थः ॥ २९ ॥ पञ्चभिः शरैस्तैः शरोयैरिव विद्यमानैः । अन्यथा पञ्चभिरिति कृतमिदं मुद्रणं बाधितं स्यादिति भावः । पञ्चभिस्तैरेवास्त्रशक्तितः शरौघत्वेन जातैः । यथोक्तं हरिवंशे । अथान्यद्धनुराधाय रुक्मी कृष्णजिघांसया । प्रादुश्चकार शतशो दिव्यान्यस्त्राणि वीर्यवानित्यादि ॥ ३० ॥ शक्तितोमरैः शक्तिश्च तोमराश्च गतम् । शक्तितोमरैः सह यद्यदादत्तेत्यन्वयः । शक्तितोऽमरैः सह यः समसमरमुपादत्त स इति वा तदर्थः ॥ ३१ ॥ खड्गचर्मणी गृहीत्वा ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः परिघादीन् गृहीतवान् । **चर्मासी** इति दीर्घः छान्दसः । चर्मादिपदमेकं तामरान्तम् । किं बहुना । यद्यदायुधमादधात्, देवतादिप्रेरणया, स्वतो वा, तत्सर्वमेवाच्छिनत् । एवं करणे सामर्थ्यं **विभु**रिति ॥ २९ ॥ ततोऽतियत्नेन सर्वभावेनागत इत्याह **रथादवप्लुत्ये**ति । केवलं खड्गपाणिः, न तु चर्मापि । जिघांसयेति जीवननिरपेक्षः आत्मानमेव भगवद्द्वारा मारयितुं कृष्णं परमानन्दमभ्यद्रवत् । युक्तमेव हि प्राकृतं परित्यज्य परमानन्दो ग्राह्य इति । तथापि शरीरं प्रियं सर्वस्यापीति कथं तथा समागत इति चेत्, तत्राह **पतङ्ग इव पावक**मिति । ते हि सूक्ष्माः अग्नावात्मानं पातयित्वा परमार्थदृष्ट्या कृतार्था भविष्यन्ति, बहिर्दृष्ट्या तु अग्निं मारयिष्याम इति बुद्ध्या प्रवृत्ताः स्वयं म्रियन्ते । तथायमपि प्रवृत्त इत्यर्थः ॥ ३० ॥ ततो भगवानक्लिष्टकर्मा तस्याभिलषितं कुर्वन्, 'ये यथा मां प्रपद्यन्त' इति च वाक्यं सत्यं कुर्वन्, तन्मारणार्थं प्रवृत्त इत्याह **तस्य चापतत** इति । तादृशस्यापि खड्गं चर्म च इषुभिः चिच्छेद । चर्मापि गृहीतं खड्गकोशो वा । तिलशश्छेदनं स्वशौर्यख्यापनार्थम् । तद्रुधिरमेव वा तत्र प्रवहज्जलात्मकं सत् तस्य परलोक उपतिष्ठेतेति तत्सतिलं कृतवानित्यर्थः । एवं धनुरघातकमिति निर्जीवान् छित्त्वा तद्वधार्थं खड्गं गृहीतवानित्याह **असिमादध** इति । एतस्मिन् हते जगति स्वरूपाज्ञानं निवर्तेतैव । यतोऽयं रुक्मी मुख्यो भगवद्द्विट् । अतो भगवान् तं हन्तुमुद्यतो जातः, न तु मारितवान् ॥ ३१ ॥ एवं स्वरूपाज्ञाननाशो मायाया हितकारी न भवतीति रुक्मिणी तन्निषेधार्थं प्रवृत्तेत्याह **दृष्ट्वे**ति । रुक्मिणी प्रार्थयितुमुवाच । यद्यपि दुष्टो भवति, तथापि स्वार्थं तावत्करोतीति । यदर्थं यो यतते, तेन प्रतिकर्तव्यमिति तस्या उद्योगः । तत्रापि भ्राता, तस्यापि वधोद्योगः, तत्रापि वधात्पूर्वं स्वयं दृष्टः, स्वयं च रुक्मिणी तत्सम्बन्धिनी । पश्चाद्भयेन विह्वला जाता । क्रोधे कदाचिदात्मानमपि मारयेत्, लोके चापकीर्तिर्भवेत्, बलाद्भगवन्तमाहूय भ्रातरं मारितवतीति बहव एव पक्षाः भयहेतवो वर्तन्ते । अतो भयैः कृत्वा विह्वला स्वयमपि शुष्कानना जाता । अत्यन्तं विज्ञा उपायान्तरमलभमाना मत्पतिरयमिति मर्तुः पादयोः पतित्वा उक्तवती । चरणपातेन देहेन निवारणम् । विह्वलतया मनसा निवारणम् । वाचा च निवारयति । नन्वीश्वरो भगवान्, कथमेतन्निवारितो निवर्तेति चेत्, तत्राह **करुण**मिति । करुणं यथा भवति, तथा उवाच, नतु प्रौढ्या । किञ्च । पतिव्रताया न ह्यन्य उपायोऽस्ति सर्वत्र भर्तृप्रार्थनाव्यतिरेकेण, तदाह **सती**ति ॥ ३२ ॥

श्रीसुबोधिनी–सारः

परिघादि यत् यदायुधमादत्त स रुक्मी तत्सर्वं हरिराच्छिनत् ॥ २९ ॥ ततोऽनन्तरं रथादवप्लुत्याध आगत्य क्रुद्धः खड्गपाणिर्जिघांसया हंतुमिच्छया कृष्णमभ्यद्रवत् । पतंगो जन्तुः पाव कमग्निमिव ॥ ३० ॥ आपततः तस्य खड्गं चर्म च इषुभिर्बाणैस्तिलशः छित्त्वा रुक्मिणं हंतुमुद्यतः प्रवृत्तस्तिग्मं तीक्ष्णमसिं खड्गमाददे जग्राह ॥ ३१ ॥ भ्रातुर्वधस्य हननस्योद्योगं दृष्ट्वा भयेन विह्वला सती रुक्मिणी भर्त्तुः श्रीकृष्णस्य पादयोः पतित्वा करुणं यथा भवति तथोवाच ॥ ३२ ॥

विवरणटिप्पणी

तस्य चापतत इत्यत्र । **सलिल**मिति । खड्गचर्मणोस्तिलत्वसंपादनकथनेन रुधिरस्य सलिलत्वं सूचितम् । तथा च पितृत्वे तर्पणार्थं तिलोदकं संपन्नमिति भावः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततः परिघादिकं यद्यदायुधं स रुक्म्यादत्त तत्सर्वं विभुः कृष्णः अच्छिनत् ॥ २९ ॥ ततस्तदनन्तरं खड्गः पाणौ यस्य स क्रुद्धो रुक्मी रथादवप्लुत्य जिघांसया हन्तुमिच्छया कृष्णमभ्यद्रवदित्यन्वयः । तत्र दृष्टान्तमाह—पतङ्ग इवेति । शलभो यथा पावकं नाशयितुमभिद्रवति तत्र च पतितः स्वयमेव नश्यति, तथाऽयमपि न भगवति कञ्चिदपकारं कर्तुं शक्तः, स्वयमेव विनङ्क्षयतीत्यर्थः ॥ ३० ॥ आपततः आगच्छतस्तस्य रुक्मिणः खड्गं चर्म खेटं च भगवान् इषुभिस्तिलप्रमाणशः छित्वा रुक्मिणं हन्तुमुद्यतः सन् तिग्मं तीक्ष्णमसिमाददे इत्यन्वयः ॥ ३१ ॥ तदा च भ्रातृवधार्थमुद्योगं प्रयत्नं दृष्ट्वा भयेन विह्वला सती रुक्मिणी भर्तुः पादयोः पतित्वा करुणं यथा भवति तथोवाचेत्यन्वयः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

परिघमिति । ततः परिघं पट्टिशं शूलं चर्म असिं शक्तिं तोमरं चेति यद्यदायुधं स रुक्म्यादत्त तत्सर्वं विभुः कृष्णोऽच्छिनत् । हरिरित्यपि पाठः ॥ २९ ॥ तत इति । ततः खड्गपाणिः क्रुद्धो रुक्मी रथादवप्लुत्य जिघांसया हन्तुमिच्छया पतङ्गः पावकमिव कृष्णमभ्यद्रवत् ॥ तस्येति । आपततः आगच्छतस्तस्य रुक्मिणः खड्गं चर्म खेटं च भगवान् इषुभिस्तिलप्रमाणशः छित्त्वा रुक्मिणं हन्तुमुद्यतः सन् तिग्मं तीक्ष्णमसिमादत्त ॥ ३१ ॥ दृष्ट्वेति । भ्रातृबधार्थमुद्योगं प्रयत्नं दृष्ट्वा भयेन विह्वला सती रुक्मिणी भर्तुः पादयोः पतित्वा करुणं यथा भवति तथोवाच ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अच्छिनत् चिच्छेद ॥ २९-३० ॥ उद्यतस्तत्परः अच्युत इत्यपिपाठः तिग्मं तीक्ष्णं असिं खड्गं ॥ ३१ ॥ करुणं यथा तथा ॥ ३२-३३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

परिघमिति । ततः रुक्मी परिघं परिघातनं लोहबद्धहस्तप्रमाणलगुडमित्यर्थः । पट्टिशं लोहदण्डं, शूलं प्रसिद्धं, चर्मासी फलकसहितं खड्गं, शक्तिश्च तोमरश्च तौ, एवं परिघादीनां मध्ये, यत् यत् आयुधं आदत्त अगृह्णात्, हरिः श्रीकृष्णः, सर्वं सकलमपि, तत्तदायुधं, अच्छिनत् ॥ २९ ॥ ततः खड्गः पाणौ यस्य सः, अत्र खड्गश्चर्मण उपलक्षणम् । रुक्मी, रथात् अवप्लुत्य, जिघांसया हन्तुमिच्छया, पतङ्गः शलभः, पावकमग्निं प्रति इव, क्रुद्धः सन्, कृष्णं अभ्यद्रवत् ॥ ३० ॥ तस्येति । कृष्णः आपततः अभ्यागच्छतः, तस्य च रुक्मिणोऽपि, खड्गमसिं, चर्म च, इषुभिः तिलशः, छित्त्वा, रुक्मिणं, हन्तुं, उद्यतः सन्, तिग्मं असिं, आददे ॥३१॥ दृष्ट्वेति । तदा रुक्मिणी, भ्रातृवधोद्योगं स्वभ्रातृवधप्रयत्नं दृष्ट्वा, भयविह्वला भयकम्पिता सती, भर्त्तुः श्रीकृष्णस्य, पादयोः पतित्वा, करुणं यथा तथा, उवाच ॥ ३२ ॥

कृष्णप्रिया

इस प्रकार रुक्मी ने, परिघ, पट्टिश, शूल, ढाल, तलवार, शक्ति, तोमर, आदि जितने अस्त्र-शस्त्र हाथ में उठाये उन सबको भगवान कृष्ण ने प्रहार करने के पूर्व में तोड़ दिये ॥ २९ ॥ तब निष्फल बना हुआ रुक्मी क्रुद्ध होकर हाथ में तलवार लेकर भगवान श्रीकृष्ण का वध करने की इच्छा से रथ से कूद पड़ा और इस प्रकार भगवान की ओर झपटा कि जैसे पतङ्गा अग्नि की ज्वाला की ओर लपकता हो ॥ ३० ॥ यहाँ भगवान् श्रीष्ण ने देखा कि रुक्मी मुझ पर आक्रमण करना चाहता है तब नाथ ने अपने तीव्र बाणों से रुक्मी की ढाल और तलवार को तिल-तिल करके टुकड़े करके काट दिया और रुक्मी को मार देने के लिये प्रभु ने कर कमलों में तीक्ष्ण तलवार उठायी ॥ ३१ ॥ भगवती रुक्मिणीजी ने देखा कि नाथ हाथ मे करवाल लेकर मेरे भाई रुक्मी को मारने के लिये जा रहे हैं तब स्वयं भयभीत होकर अपने निजनाथ श्रीकृष्णचन्द्रजी के श्रीचरणों में गिरकर आर्त्तनाद से निवेदन करती करुणस्वर में बोली ॥ ३२ ॥

योगेश्वराप्रमेयात्मन् देवदेव जगत्पते । हन्तुं नार्हसि कल्याण भ्रातरं मे महाभुज ॥ ३३ ॥

श्रीशुक[1] उवाच

[2]तया परित्रासविकम्पिताङ्गया [3]शुचावशुष्यन्मुखरुद्धकण्ठया ।
कातर्यविस्रंसितकेश[4]मालया गृहीतपादः करुणो न्यवर्तत ॥ ३४ ॥
चैलेन बद्ध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन् व्यरूपयत् ।
तावन्ममर्दुः[5] परसैन्यमुद्धतं[6] यदुप्रवीरा नलिनीं यथा गजाः ॥ ३५ ॥

कृष्णान्तिकमुपव्रज्य ददृशुस्तत्र रुक्मिणम् ।
तथाभूतं हतप्रायं दृष्ट्वा संकर्षणो विभुः । विमुच्य [7]बद्धं करुणो भगवान् कृष्णमब्रवीत्[8] ॥३६॥

---

१. बादरायणि-प्रा. पा. ।

२. इत्युक्त्वा जगृहे पादौ कृपया दीनभाषिणी । भ्रातरं त्रातुकामा सा कृष्णस्य जगतीपतेः ॥ विज. ।

३. शुचा च-विज. । ४. हेम-श्रीधर. वंशी. जीव. वीर. विज. । ५. तावत्समोयुर्जितशत्रुसैन्या-विज. । ६. मद्भुतं-श्रीधर. वंशी. जीव. विज. विश्व. ; मुदधुतम्-वीर. । ७. बन्धं-वीर । ८. बलभद्र उवाच-वीर ।

कर्दमक्षमा

अन्वयः—हे योगेश्वर ! हे अप्रमेयात्मन् ! हे देवदेव ! हे जगत्पते ! हे कल्याण ! हे महाभुज ! मे, भ्रातरम्, हन्तुम्, न, अर्हसि ।। ३३ ।। श्रीशुक उवाच, परित्रासविकम्पिताङ्गया, शुचा, अवशुष्यत्, मुखरुद्धकण्ठया, कातर्य,विस्रंसितकेशमालया, तया, गृहीतपादः, करुणः, न्यवर्तत ।। ३४ ।। असाधुकारिणम्, तम्, चैलेन, बध्वा, सश्मश्रुकेशम्, प्रवपन्, व्यरूपयत्, यदुप्रवीराः, गजाः, नलिनीम् यथा, तथा (यदुप्रवीराः) उद्धतम्, शरसैन्यम्, तावन्, मर्मदुः ।। ३५ ।। करुणः, विभुः, भगवान्, संकर्षणः, कृष्णान्तिकम्, उपव्रज्य, तथाभूतम्, हतप्रायम्, बद्धम्, रुक्मिणम्, दृष्ट्वा, विमुच्य, कृष्णम्, अब्रवीत् ।। ३६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

परित्रासेन विकम्पितान्यङ्गानि यस्यास्तया शुचा शोकेनावशुष्यन्मुखं यस्याः रुद्धः कण्ठो यस्याः सा च सा च । तथा कातर्येण वैक्लव्येन विस्रंसिता हेममयी माला यस्यास्तया गृहीतौ पादौ यस्य सः ।। ३४ ।। सश्मश्रुकेशं सहितानि स्थाने स्थानेऽवशिष्टानि श्मश्रूणि केशाश्च यथा भवन्ति तथा तेनैवासिना प्रवपन्मुंडयन्व्यरूपयद्विरूपमकरोत् ।। ३५ ।। तथाभूतं हतप्रायमित्युत्तर वाक्येऽप्यनुषङ्गः ।। ३६-३७ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

संबुद्धिषट्केन भगवत ऐश्वर्यं द्योतयन्ती निजभ्रातृवधानौचित्यमेवाह । योगेश्वर त्वमतर्क्यमहामहैश्वर्यः, असावीशितव्येष्वपि निकृष्टः । हे अप्रमेयात्मन्—त्वमप्रमेयस्वरूपोऽसि, अयं परिच्छिन्नेष्वप्येककीटतुल्यः । देवदेव–त्वं देवानामपि देवः, अयं त्वद्वैमुख्यान्नरेष्वप्यधमः । जगत्पते—त्वं सर्वजगत्पालकोऽतो दुष्टोऽप्ययं जगद्वर्तित्वाद्रक्षितव्य एवेति भावः । तस्मात् हे कल्याण मंगलस्वरूप, हे महाभुज प्रबलमर्दकभुज इमममंगलं भुजबलरहितं हन्तुं नार्हस्येव । मे भ्रातरमिति—अनन्यगतिकाया मे भ्रातृधर्मरहितत्वेपि तद्वल्लोकदृष्ट्या प्रतीयमानमिति भावः ।। ३३ ।। तया रुक्मिण्या । करुणो दयालुः । न्यवर्तत—वधादिति शेषः । करुणः स्वप्रतिकूलेऽतिदुष्टे स्वतनुत्यागनिमित्तीभूतेऽपि भ्रातरि ‘दयाया भगिनी मूर्तिः’ इति लोकधर्मोक्तिभयादेव दयावत्यां रुक्मिण्यां सदयः स्वभावत एव करुणो विशेषतस्तया तथाभूतया गृहीतचरणत्वाच्च ।। ३४ ।। तं रुक्मिणम् । विरूपं सौंदर्यहीनम्, विलक्षणमुण्डनादित्यर्थः । यावत्कृष्णस्तं मुमुण्ड तावदित्यर्थः । नलिनीः सरसीः । ‘नलिन्यब्जे सारसे च’ इति । पुनरपि रुक्मिणीप्रातिकूल्यं मा कार्षीदिति तद्दुर्मदनिवर्तकेन पराभवस्मारकेण दुर्लक्षणेन केनचिदंकयित्यैव तमुपेक्षांचक्रे इत्याह—चैलेनेति । तदीयेनैव शिरोवेष्टनवस्त्रेण ग्रीवायां बद्ध्वा वामहस्तेन तच्चेलाग्रद्वयं विधृत्य दक्षिणहस्तधृतेनासिनोष्णीषं दूरीकृत्य सश्मश्रुकेशं यथा स्यात् स्थानेस्थाने केशगुच्छाः श्मश्रुगुच्छाश्च यथा तिष्ठेयुस्तथा प्रकर्षेण समूलकर्तनेन रुधिरमुद्गमय्य वपन्मुंडयन् व्यरूपयत् विरूपं कृतवान् ।। ३५ । तत्र कृष्णांतिके । तथाभूतं मुण्डितम् । उत्तरवाक्ये ‘विमुच्य बद्धम्’ इत्यत्रेत्यर्थः । विमुच्य स्वयमेव स्वहस्तेन कृष्णवामहस्ताच्चेलखण्डमपसार्येत्यर्थः । तथाभूतं प्राप्तवैरूप्यादिकम् । अत एव हतप्रायम् । ननु तादृशमहापराधिनो विमोको न युक्तस्तत्राह—भगवान् सर्वज्ञः । रुक्मिणीवत्तज्जानाति तथा रुक्मिण्या दुःखं श्रीकृष्णस्य भाविलीलां चेत्यर्थः । अत एव करुणः श्रीकृष्णस्य प्रथमवैवाहिकसंबन्धाच्चेति भावः । कृष्णमित्युपलक्षणं रुक्मिणीं चेति ज्ञेयम् । लज्जाहेतो रुक्मिण्यां च कृष्णमेवाब्रवीदिति तस्यैव प्राधान्यात् ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथैवाह—योगेश्वर ! हे अतर्क्यैश्वर्य अप्रमेयात्मन् हे अपरिच्छिन्नमूर्त्ते ! अत एव हे देवदेव ! ब्रह्मादीनामप्याराध्य किञ्च जगत्पते सर्वेषामपि पालक अतः सर्वेषामपि त्वत्तस्तुच्छज्ञानबलमाहात्म्यत्वात्त्वया पालनीयत्वाच्च हन्तुं हननमात्राय नार्हस्येव तत्रापि हे कल्याणेति सर्वमङ्गलत्वात्सुतरां नार्हसि तत्रापि मे मम त्वदनन्यनाथाया भ्रातरं सुतरामेवेत्यर्थः । लीलाव्यवहारतश्च परमवीरस्त्वं नैतद्विधं क्षुद्रं हन्तुमर्हसीत्याह—महाभुजेति ।। ३३ ।। करुणस्तस्यां कृपावानित्यर्थः । यद्वा स्वभावतः करुणः विशेषतश्च तया तथाभूतया गृहीतपादः ।। ३४ ।। चैलेन तदीयेनैव शिरोवेष्टनवस्त्रेण प्रवपन् तेनैवासिनेति शेषः तच्चास्युचितक्षेपलाघवेनैव ज्ञेयम् । सश्मश्रुकेशमिति । श्मश्रुकेशाभ्यां सह वर्त्तमानं यथा स्यादित्येव विग्रहपूर्वकोऽर्थः बहुव्रीहिणैव क्रियाविशेषणत्वसिद्धेः टीकायां तु निर्गलितार्थ एव दर्शितः अत्र स इत्यध्याहार्यम् । यद्वा स श्रीकृष्णः श्मश्रुकेशमिति द्वन्द्वैक्यं व्यरूपयदिति तादृशविरूपतापि सम्भवतीति तथाच व्याख्येयं तावदिति । रुक्मिपराजयं यावदित्यर्थः । उद्धतं महासाहसादियुक्तमपि ।। ३५ ।। कृष्णान्तिकमित्यर्द्धकम् । ददृशुर्यदुप्रवीरा इत्येव ज्ञेयम् एवमत्रापि तथाभूतं हतप्रायमिति रुक्मिविशेषणत्वेन योज्यम् तथाभूतं प्राप्तवैरूप्यादिकम् अत एव हतप्रायं ननु तादृशमहापराधिनो विमोको नहि युज्यते तत्राह । भगवान् सर्वज्ञः रुक्मिणीवत् तत्तज्जानाति तथा रुक्मिण्याः दुःखं श्रीकृष्णस्य भाविलीलां चेत्यर्थः । अत एव करुणः श्रीकृष्णस्य प्रथमवैवाहिकसम्बन्धाच्चेति भावः । कृष्णमित्युपलक्षणं रुक्मिणीं चेति ज्ञेयं लज्जाहेतो रुक्मिणीं च कृष्णमेव दृष्ट्वाब्रवीदिति तस्यैव प्राधान्यात् ।। ३६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

योगेश्वर ! हे अतर्क्यैश्वर्य्य ! अप्रमेयात्मन् ! हे अपरिच्छिन्नमूर्त्ते, अतएव हे देवदेव ! श्रीब्रह्मादीनामप्याराध्य ! एवमैश्वर्य्येण स्वरूपेण पूज्यतमत्वेन च परमेश्वरत्वमुक्तम् । किञ्च, भुङ्क्ते जगत् संहरतीति भुजः, महांश्चासौ भुजश्चेति महाप्रलयकर्त्तेत्यर्थः, अतस्तुच्छातितुच्छमेनं हन्तुं नार्हस्येव । किञ्च, जगत्पालकत्वादपि नैवार्हसीत्याह—हे जगत्पते इति । नन्वत एव दुष्टोऽयं बध्यः, तत्राह—हे धर्म्मज्ञेति । बन्धुवधो न कार्य्य इति सतां धर्म्मं त्वं जानास्येवेत्यर्थः । बन्धुत्वमेव दर्शयति—मे भ्रातरमिति । 'कल्याण' इति पाठे जगन्मंगलत्वान्नार्हस्येवेत्यर्थः । अथवा आद्यसम्बोधनाभ्यामैश्वर्य्येण स्वरूपेण च दुर्ज्ञेयत्वमुक्तम्, अत एव देवादिभिरपि ज्ञातुमशक्यैः केवलं त्वं तप आदिना आराध्यस इत्याह–हे देवदेवेति । अतस्त्वां ज्ञातुमसमर्थेनानेन कृतमपराधं सर्वं क्षन्तुमर्हसीति भावः । किञ्च, महाबलत्वादतितुच्छबलमेनं हन्तुं नार्हस्येवेत्याह—महाभुजेति । अन्यत् समानम् ॥ ३३ ॥ परीत्यादिविशेषणत्रयेण महाभयशोकवैकल्यैः परमं दैन्यमुक्तम्, तत्र च यथोत्तरमेषां श्रैष्ठ्यम्, करुणस्तस्यां कृपावानित्यर्थः । यद्वा, स्वभावतः करुणो विशेषतश्च तथाभूतया तरा गृहीतपादः, अत एव न्यावर्त्तत तद्वधात् ॥ ३४ ॥ चैलेन खण्डशो विदारितेन तदीयवस्त्रेण, पाठान्तरं तेषां सम्मतम्, असिनेति व्याख्याने पर्य्याप्तेऽपि तेनेति व्याख्यानात् प्रसह्य वपन्, यतोऽसाधुकारिणं दुष्टकर्म्माचरणशीलम्, यावद्रुक्मिणो युद्धादिकं तावत्, इति तेषां परसैन्यमर्द्दनस्य श्रीकृष्णेन रुक्मि-निर्ज्जयादेश्चैकदैव समाप्त्या तेषां तेन संगति–समावेशः सिद्धः । परस्य रुक्मिणः सैन्यं तेन पुरा दूरतोऽवस्थापितमुद्धतममर्य्यादमनन्तमित्यर्थः, यद्वा, गर्वितं महासाहसादियुक्तमपि यदुपु प्रवीरा वीरोत्तमाः श्रीबलदेवादयो ममर्दुश्चूर्णयामासुः । तच्चानायासेनैवेति दृष्टान्तेन सूचयति—नलिनीमिति ॥ ३५ ॥ तथाभूतं प्रवपनादिना प्राप्तवैरूप्यादिकम्, संकर्षण इति स्नेहभरादिना श्रीकृष्णेन सहापृथग्भावाभिप्रायेण किञ्च, विसेषेणाग्रजतया भवतीति विभुः अतो विशेषेण सस्नेह वाक्यादिनामुक्त्वा । ननु तादृशमहापराधिनो विमोको न खलु युज्यते, तत्राह—करुण इति, भगवान् सर्व्वज्ञ इति, श्रीकृष्णं प्रतीदृशे परुषवाक्ये गदिते सत्येव रुक्मिणं प्रति स्नेहाभित्यक्त्या बध्वाः शोकशान्तिः स्यादित्यादिकं जानन्नित्यर्थः ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

करुणः । कृपावान् व्यरूपयत् वैरूप्यमायादयन् प्रावयत् श्मश्रुकेशशून्यमकरोत् वैरूप्यं हि वपतस्तस्मादभूदित्यर्थः ॥ ३५–३७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह—योगेश्वरेति । हे योगेश्वर ! योगनिर्वाहक योगीश्वरेति पाठे योगिहृत्कमलाभिव्यक्त तन्नियन्तश्चेत्यर्थः । योगपरिशुद्धमनोग्राह्यस्य तव स्वरूपस्वभावादिकं कथमयं देहाभिमानी विन्द्यादतोऽयं मूढः केवलमनुग्राह्य एवेति तत्सम्बोधनाभिप्रायः नन्वसाधुलोकदमनार्थमवतीर्णोऽहमेनं निगृह्णाम्येवेत्यतः सम्बोधयति हे जगत्पते ! शरणागतजगत्पालक नायं शरणागतोऽपि तु कृतापराध एवेत्यत आह मे शरणागताया मम भ्रातरं हन्तुं नार्हसीति शरण्यत्वोपयुक्तं परत्ववात्सल्यसौशील्यादिकमपि सम्बोधनेनैवाह देवानां ब्रह्मादीनामपि देव ! अप्रमेयात्मन् ! अपारवात्सल्यसौशील्यादिस्वभावस्वरूप ! लोकदृष्ट्याधुना तवैतद्वधो नोचित इति सम्बोधयति कल्याणेति । आरब्धे विवाहरूपे कल्याणेऽपरिसमाप्त एवान्तरा मद्भ्रातृबधोऽनुचित इत्यर्थः । अहो दृष्टं सखड्गस्य त्वद्भुजस्य सौन्दर्य्यमिति साक्षेपं सम्बोधयति महाभुजेति ॥ ३३ ॥ तयेति । परित्रासेन परितो भयेन विशेषतः कम्पितान्यङ्गानि यस्याः शुचा शोकेनावशुष्यन् मुखं यस्याः रुद्धः कण्ठो यस्याः सा च सा कातर्य्येण वैक्लव्येन विस्रंसिता हेममयी माला यस्याः तया रुक्मिण्या गृहीतौ पादौ यस्य सः करुणः करुणावान् न्यवर्त्तत रुक्मिबधादिति शेषः ॥ ३४ ॥ चैलेनेति । ततस्तमसाधुकारिणं रुक्मिणं चैलेन तद्वस्त्रेण बद्ध्वा सश्मश्रुकेशं सहितानि स्थाने स्थानेऽवशिष्टानि श्मश्रूणि केशाश्च यथा भवन्ति तथा तेनैवासिना प्रवपन् मुण्डयन् विरूपमकरोत् नलिनीं यथा गजा इति दृष्टान्तेनानायासो खेलनमात्रं चाभिप्रेतम् ॥ ३५ ॥ कृष्णान्तिकमिति । ददृशुर्यदुप्रवीरा इति कर्तृपदानुषङ्गः भगवान् सङ्कर्षणस्तथाभूतं विरूपतामापन्नं हतप्रायं हततुल्यं रुक्मिणं दृष्ट्वा स करुणो बन्धं विमुच्य कृष्णमब्रवीत् ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

परित्रासेन परितो भयेन कम्पितमङ्गं यस्याः सा तथा तया शुष्यन् मुखा च रुद्धकण्ठा च तया करुणः करुणाकरः।३४। प्रवपन्वपनं मुण्डनं कुर्वन् व्यरूपयत् सौन्दर्यहीनमकरोत् ॥ ३५–३६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

योगेश्वरेत्यादि । हन्तुं नार्हसि मे भ्रातरम्, मद्भ्रातृत्वमेवास्यावधे कारणम् नान्यत् किमपीति भावः । लक्ष्मीभ्रातरं कौस्तुभं वक्षसि विभर्षि कथमयं हन्तव्य इति गूढोऽभिप्रायः यतस्त्वं योगेश्वरः तेन तवैतत् कृतद्वेषेण किम् द्वेषेण योगेश्वर-

अन्वितार्थप्रकाशिका

योगेति । हे योगेश्वरेत्याद्याः षट् सम्बुद्धयः । स्वभ्रातुर्निकृष्टत्वसूचनेन वधानर्हत्वपरा तथा च त्वं योगवतामीश्वरः अयमीशितव्येष्वपि निकृष्टः त्वमप्रमेयः अयं कीटतुल्यः त्वं देवदेवोऽयं मनुष्येष्वपि त्वद्वैमुख्यादधमः त्वं जगत्पतिः अयं जगत्यप्यधमः त्वं कल्याणोऽयमकल्याणः त्वं महाभुजोऽयमबलः अत इमं मे भ्रातरं हन्तुं नार्हसि ॥ ३३ ॥ तयेति । परित्रासेन परितो भयेन विकम्पितान्यङ्गानि यस्यास्तया शुचा शोकेनावशुष्यत् मुखं यस्याः रुद्धः कण्ठो यस्याः सा च तया कातर्येण वैक्लव्येन विस्रंसिता हेममयी माला यस्यास्तया रुक्मिण्या गृहीतौ पादौ यस्य सः यतः करुणः कृपापूर्णः अतः रुक्मिवधान्न्यवर्त्तत ॥ ३४ ॥ चैलेनेति । ततः असाधुकारिणमपराधिनं तं रुक्मिणं चैलेन तद्वस्त्रेण गले भुजयोश्च बद्ध्वा वामहस्तेन तच्चैलाग्रद्वयं धृत्वा दक्षिणहस्तधृतेन असिना उष्णीषं दूरीकृत्य सश्मश्रुकेशं सहितानि स्थाने-स्थाने अवशिष्टानि श्मश्रूणिः श्मश्रुगुच्छाः केशाश्च यथा भवन्ति तथा । यद्वा । सः कृष्णः श्मश्रुकेशमिति द्वन्द्वैक्यम् । तेनैवासिना प्रवपन् मुण्डयन् व्यरूपयत् विकृतरूपमकरोत् । तावत् हस्त्यश्वादिभिरद्भुतम् । उद्धतमिति पाठे साहसादियुतमपि परस्य शत्रोस्तस्य सैन्यं यथा नलिनीं गजास्तथा यदुप्रवीरा ममर्दुः । गुण आर्षः ॥ ३५ ॥ कृष्णेति अर्द्धम् । ते यदुप्रवीराः कृष्णान्तिकम् उपव्रज्य तत्र रुक्मिणं ददृशुः । तथाभूतं हतप्रायमित्यनयोरत्राप्यपकर्षः । तथेति । विभुः करुणः दयालुः भगवान् संकर्षणः तथाभूतं विकृतरूपम् अत एव हतप्रायं मारिततुल्यं रुक्मिणं बद्धं दृष्ट्वा विमुच्य च कृष्णमब्रवीत् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

परित्रासेन विकंपितानि अङ्गानि यस्यास्तया । शुचा शोकेन अवशुष्यन् मुखं यस्याः । रुद्धः । कंठो यस्याः सा चासौ चान्वतया कातर्येण व्याकुलत्वेन विस्रंसिता विगलिता हेममयी माला यस्यास्तया गृहीतपादः ॥३४॥ चैलेन तद्वस्त्रेण । श्मश्रुकेशैः सहितं यथा तथा प्रपवन्मुंडयन् । व्यरूपयत विरूपमकरोत् नलिनीं पद्मवल्लीं ॥ ३५–३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह । योगेश्वरेति । हे योगेश्वर योगनिर्वाहक, योगीश्वरेति पाठे योगिहृत्कमलाभिव्यक्त, गोगपरिशुद्धमनोग्राह्यस्य तव स्वरूपस्वभावादिकं कथमयं देहाभिमानी विद्यादतो मूढोऽयं केवलमनुग्राह्य एवेति तत्संबोधनाभिप्रायः । नन्वसाधुलोकदमनार्थमवतीर्णोऽहमेनं निगृह्णाम्येवेत्यतः सम्बोधयति । हे जगत्पते शरणागतजगत्पालक, नायं शरणागतोऽपि तु कृतापराध एवेत्यत आह । मे मम, भ्रातरं, हन्तुं, न अर्हसि । अयं शरणागतो न भवत्यथापि शरणागताया मम भ्रातृत्वान्नैनं हन्तुं त्वं योग्य इति भावः । सांप्रतं भगवतः परत्वसौशील्यादिकमपि सम्बोधनेनैवाह । हे देवदेव देवानां ब्रह्मादीनामपि देव, हे अप्रमेयात्मन्, अपारवात्सल्यसौशील्यादिस्वभावस्वरूप, लोकदृष्ट्याऽपि अधुना तवैतद्वधो नोचित इति सम्बोधयति । हे कल्याण आरब्धे विवाहरूपेऽस्मिन् कल्याणकर्मण्यपरिसमाप्त एवान्तरा मद्भ्रातृवधो नोचित इत्यर्थः । अहो सखड्गस्य त्वद्भुजस्य सौन्दर्यं दृष्टमिति सम्बोधयति हे महाभुजेति ॥ ३३ ॥ तयेति । परित्रासेन परितो भयेन विकम्पितान्यङ्गानि यस्यास्तया, शुचा शोकेन अवशुष्यत् मुखं यस्याः रुद्धः कण्ठो यस्याः सा चासौ सा तया, कातर्येण वैक्लव्येन विस्रंसिता हेममाला सुवर्णमयी स्रग्यस्यास्तया, तया रुक्मिण्या, गृहीतौ पादौ यस्य सः, करुणः करुणावान् कृष्णः, न्यवर्त्तत । रुक्मिवधान्निवृत्तोऽभवत् ॥ ३४ ॥ चैलेनेति । ततः असाधुकारिणं स्वहननप्रवृत्तिरूपासाधुकर्मकारिणं, तं रुक्मिणं, चैलेन पट्टकाख्यतदीयवसनेनैव, बद्ध्वा, सहितानि स्थाने-स्थाने अवशिष्टानि श्मश्रूणि केशाश्च यथा भवन्ति तथेति सश्मश्रुकेशं, प्रवपन् तेनैवासिना मुण्डयन्, व्यरूपयद्विरूपमकरोत् । तावत्, यदुप्रवीरा गदसंकर्षणादयो यादवश्रेष्ठाः, गजाः, नलिनीं यथा तथा, अद्भुतं परसैन्यं, ममर्दुः । नलिनीं यथा गजा इति दृष्टान्तेनानायासः खेलनमात्रं चाभिप्रेतम् ॥ ३५ ॥ कृष्णेति । यदुवीरा इति कर्तृपदस्यानुषङ्गः । कृष्णान्तिकं उपव्रज्य, तत्र तथाभूतं चैलबद्धं विरूपितं चेत्यर्थः । अत एव, हतप्रायं रुक्मिणं, ददृशुः । ततः विभुर्महासमर्थः, संकर्षणो बलभद्रः, दृष्ट्वा तं तथाविधं कृतं विलोक्य, यतः स्वयं भगवान्, अतः, करुणः बद्धं विमुच्य, पट्टककृतं तद्बन्धनं निवर्त्त्य, कृष्णं अब्रवीत् ॥ ३६ ॥

कृष्णप्रिया

श्रीरुक्मिणीजी ने प्रभु के चरण कमलों को ग्रहण करके कहा, हे योगेश्वर ! हे देवाधिदेव ! हे जगत्पते ! हे अकल स्वरूप आप की इच्छाओं को कोई भी जान सकता नहीं है । हे महाभुज ! हे अप्रमेय बल नाथ ! हे परम कल्याण ! मेरे भैया को मारना आपके लिये योग्य नहीं है ॥ ३३ ॥ श्रीशुकदेवजी ने कहा राजन् परीक्षित ! श्रीरुक्मिणीजी के प्रत्येक अङ्ग भय के मारे थर-थर काँप रहा था । उत्कट शोक से मुखाम्बुज सुख गया था, कण्ठावरोध भी हो रहा था । विह्वलता वश एवं कातरता परवश केश बिखर गये और भयविह्वलता वश कण्ठ की माला-सुवर्णमाला रत्नमाला भी सरक गई थी श्रीठाकुरजी के श्रीचरणों को पकड़ लिये थे । भगवान तो करुणानिधान है इसलिये दया से द्रवित हो गये और रुक्मी का वध करने का विचार

मान्य इति। पश्चादपकारं करिष्यतीति चेत्, तत्राह **महाभुजे**ति। महान् भुजः क्रियाशक्तिर्यस्येति सम्बोधनेन समाधानार्थं सामर्थ्यं स्मारितम् ॥ ३३ ॥ एवं विज्ञापितः वधान्निवृत्तो वधानुकल्पं कृतवानित्याह **तया परित्रासे**ति। परित्रासेन विकम्पित-मङ्गं यस्याः। शोकेन च शुष्यन्मुखं **रुद्धश्च** कण्ठो यस्याः। कातरतया **विस्रं**सिताः केशाः मालाश्च यस्याः। गुणत्रयकार्यं तस्यां पूर्णं जातमित्युक्तं भवति। परित्रासः सत्त्वस्य, शोकस्तमसः, कातरता रजस इति। एवं विद्यमानानां गुणानामपगमात् केवलं सा दीनेति तादृश्या गृहीतपादः करुणावानेवं न्यवर्तत ॥ ३४ ॥ वधानुकल्पो हि वपनं मुख्यम्। द्रविणादानं च। स्थानान्निर्यापणं तु तेनैव प्रतिज्ञातम्। अतस्तस्यै **चैलेन** चोरवत्तं बद्ध्वा। स हि रुक्मिणीं नेतुमागत इति चोरदण्डः। तं प्रसिद्धम्। प्रसिद्धस्य तावतैव महती पीडा भवतीति। ततः असाधुकारिणं घातकं सश्मश्रुकेशं श्मश्रुकेशसहितं तं प्रकर्षेण वपन्, सेवकेन प्रेरणया विकृतरूपं कृतवान्। क्वचित्केशाः श्मश्रूणि च रक्षिताः, क्वचिन्मुण्डिताः, यथैव विकृतो भवति। प्रायेण एवंरूपः स सर्वदैव स्थितो यावन्मरणम्। अन्यथा भगवानेवं न कुर्यात्। यावद्भगवान् विरूपं करोति, तावत्तस्य परस्य शत्रोरुद्धतं सैन्यम्। न केवलमेतद्दो-षेणैव सैन्यं हतम्, किन्तु सैन्यमपि दुष्टमिति तथा कृतवन्तः। अत्रत्या अपि समर्था इत्याह **यदुप्रवीरा** इति। अनायासेन मारणे दृष्टान्तः **नलिनीं यथे**ति। बहवो वीराः गदसङ्कर्षणादयः, एका चाक्षौहिणी, अतो नलिनीमित्येकवचनम् ॥ ३५ ॥ एवं भगवत्कृतं रुक्मिनिग्रहणं निरूप्य भगवतः सकाशात् ज्येष्ठस्य बलभद्रस्य कृतं सान्त्वनमाह, सार्धैरेव सप्तदशभिः, **कृष्णान्तिक**मिति। मुख्यात्र रुक्मिणी समाधेया। मध्यमो रुक्मी। प्राकृताः सहायराजानः। अतः सेनया भगवतोऽपि कनिष्ठया ते हताः, भगवता च मध्यमः, भगवज्ज्येष्ठेन च सान्त्वनमुक्तमिति युक्तमत्र प्रकरणत्रयम्। सर्व एव तद्बलं हत्वा समागताः कृष्णान्तिकमुपव्रज्य विकृतं रुक्मिणं ददृशुः। **तथाभूत**मिति। विशेषतो न वक्तव्यम्, सोऽपि मूर्च्छितप्रायस्तिष्ठतीति। वधानुकल्पं निरूपयितुमाह **हतप्राय**मिति। विशेषतो रामस्तं तथाभूतं दृष्ट्वा सम्यक कर्षणकार्यत्वात् सशिखवपनं च कर्मानधिकारं सम्पादयतीति, तत्रापि सङ्कर्षण एव कर्तेति, भगवतः तत् कर्तव्यं न भवतीति, स्वयं सङ्कर्षणः हन्तुमपि विभुः समर्थः। भगवता वद्धं विमुच्य कृष्णमब्रवीत्। ननु कथमेवं भगवत्कृतमन्यथा कृतवान् तत्राह **करुण** इति। करुणा हि भगवता दुःखं प्रापितेष्वेव पुरुषेषु कृपया प्रतीकारार्थं यतन्ते। ननु तथापि भगवन्तं पृष्ट्वा तथा विधेयम्, किमिति स्वयमेव मोचितवान्, तत्राह **भगवा**निति। वलभद्रे आविर्भूतो भगवानेव मोचितवानित्यर्थः। एतदन्ता मध्ये सङ्कर्षणकथा, विशिष्टा त्वग्रे वक्तव्या। अत एव **कृष्णमब्रवीत्**। अत्र कृष्णपदं 'कृष्णो द्वितीयः केशवः संबभूवे'ति कृष्णपरम्, अतो ज्येष्ठत्वान्नानौचित्यम् ॥ ३६ ॥

श्रीसुबोधिनीसारः

हे योगेश्वर हे अप्रमेयात्मन् हे देवदेव हे जगद्गुरो हे कल्याण हे महाभुज मे मम भ्रातरं हंतुं त्वं नार्हसि ॥ ३३ ॥ शुक्रोक्तिः। परित्रासेन महाभयेन विकंपितान्यंगानि यस्यास्तथा शुचा शोकेनावशुष्यन्मुखं यस्या रुद्धः कण्ठो यस्याः सा च सा च तथा कातर्येण वैक्लव्येन विस्रंसिताऽधः पतिता हेम्नः सुवर्णस्य माला यस्यास्तथाभूतया तया गृहीतौ पादौ यस्य स करुणो दयालुः कृष्णो न्यवर्त्तत निवृत्तोऽभूत् ॥ ३४ ॥ असाधुकारिणं सारविघ्नं न चाचरेदिति शांतिपर्वोक्तेर्विवाहभंगकर्त्तारं तं रुक्मिणं सश्मश्रुकेशं श्मश्रुकेशैः सहितं प्रवपन् मुंडयन् विरूपमकरोत् चैलेन वस्त्रेण बद्धा तावत् अद्भुतं परसैन्यं यदुप्रवीरा ममर्दुः चूर्णी-चक्रुः नलिनीं गजा हस्तिन इव ॥ ३५ ॥ कृष्णस्यांतिकं समीपमागत्य तत्र स्थाने रुक्मिणं यादवा ददृशुः। तथाभूतं मुंडितविरूपं मृतप्रायं दृष्ट्वा विभुः समर्थो भगवान् रामः करुणो बद्धं रुक्मिणं विमुच्य कृष्णमाह ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उक्तिमेवाह—योगेश्वरेति। 'कल्याणगुणपूर्णत्वात्' इति हेतुं सूचयन्ती सम्बोधयति—हे कल्याणेति। मे भ्रातरं स्वशालं हन्तुं नार्हसि। 'जगत्पालकस्य तव जगदन्तर्गतस्यैतस्यापि पालनमेवोचितम्' इत्याशयेन सम्बोधयति—जगत्पत इति। पालने सामर्थ्यं सूचयन्ती सम्बोधयति—महाभुजेति। ननु 'अस्य पालने कृतेऽयं मामेव हन्यात्' इत्याशङ्क्य 'ब्रह्मादयो देवा अप्यमरा भवन्ति, तेषामपि पूज्ये त्वयि का तच्छङ्का' इत्याशयेन सम्बोधयति—देवदेवेति। 'यो हि ज्ञानाविषयः तत्र का हननक्रियाविषय-त्वशङ्का' इत्याशयेन सम्बोधयति—अप्रमेयात्मन्निति। 'यद्दत्तसामर्थ्येन योगिनोपि स्वच्छन्दमृत्यवो भवन्ति तत्र का मृत्युशङ्का' इत्याशयेन सम्बोधयति—योगेश्वरेति ॥ ३३ ॥ परित्रासेन परितो भयेन विकम्पितान्यङ्गानि यस्यास्तया, शुचा शोकेनावशुष्यत् मुखं यस्याः रुद्धः कंठो यस्याः सा च तया, कातर्येण वैक्लव्येन विस्रंसिता हेममयी माला यस्यास्तया रुक्मिण्या गृहीतौ पादौ यस्य सः यतः करुणः कृपापूर्णः अतः रुक्मिवधान्न्यवर्तत ॥ ३४ ॥ ततस्तं रुक्मिणं चैलेन तद्वस्त्रेण बध्वा सश्मश्रुकेशं सहितानि स्थाने स्थाने अवशिष्टानि श्मश्रूणि केशाश्च यथा भवन्ति तथा तेनैवासिना प्रवपन् मुण्डयन् व्यरूपयत् विकृतरूपमकरोत्। तावत् हस्त्यश्वादिभिरद्भुतं परस्य शत्रोस्तस्य सैन्यं यदुप्रवीरा ममर्दुः। मर्दने अनायासत्वं द्योतयन् दृष्टान्तमाह—नलिनीं यथा गजा इति। ते च कृष्णसमीपमागत्य तत्र तथाभूतं विकृतरूपं, अत एव हतप्रायं रुक्मिणं ददृशुः। सङ्कर्षणश्च तं बद्धं दृष्ट्वा बन्धनाद्वि-मुच्य श्रीकृष्णमब्रवीत्। बन्धविमोचने हेतुमाह—करुण इति। भगवदाज्ञापने ज्येष्ठत्वेन योग्यतां सूचयन्नाह—विभुरिति। 'ज्येष्ठत्वेपि भगवदाज्ञापने कथं योग्यता' इत्याशङ्क्य तदभेदमाह—भगवानिति ॥ ३५-३६ ॥

अन्वितार्थप्रकाशिका

योगेति । हे योगेश्वरेत्याद्याः षट् सम्बुद्धयः । स्वभ्रातुर्निकृष्टत्वसूचनेन वधानर्हत्वपरा तथा च त्वं योगवतामीश्वरः अयमीशितव्येष्वपि निकृष्टः त्वमप्रमेयः अयं कीटतुल्यः त्वं देवदेवोऽयं मनुष्येष्वपि त्वद्वैमुख्यादधमः त्वं जगत्पतिः अयं जगत्यप्यधमः त्वं कल्याणोऽयमकल्याणः त्वं महाभुजोऽयमबलः अत इमं मे भ्रातरं हन्तुं नार्हसि ॥ ३३ ॥ तयेति । परित्रासेन परितो भयेन विकम्पितान्यङ्गानि यस्यास्तया शुचा शोकेनावशुष्यत् मुखं यस्याः रुद्धः कण्ठो यस्याः सा च तया कातर्येण वैक्लव्येन विस्रंसिता हेममयो माला यस्यास्तया रुक्मिण्या गृहीतौ पादौ यस्य सः यतः करुणः कृपापूर्णः अतः रुक्मिवधान्न्यवर्त्तत ॥ ३४ ॥ चैलेनेति । ततः असाधुकारिणमपराधिनं तं रुक्मिणं चैलेन तद्वस्त्रेण गले भुजयोश्च बद्ध्वा वामहस्तेन तच्चैलाग्रद्वयं धृत्वा दक्षिणहस्तधृतेन असिना उष्णीषं दूरीकृत्य सश्मश्रुकेशं सहितानि स्थाने-स्थाने अवशिष्टानि श्मश्रूणिः श्मश्रुगुच्छाः केशाश्च यथा भवन्ति तथा । यद्वा । सः कृष्णः श्मश्रुकेशमिति द्वन्द्वैक्यम् । तेनैवासिना प्रवपन् मुण्डयन् व्यरूपयत् विकृतरूपमकरोत् । तावत् हस्त्यश्वादिभिरद्भुतम् । उद्धतमिति पाठे साहसादियुतमपि परस्य शत्रोस्तस्य सैन्यं यथा नलिनीं गजास्तथा यदुप्रवीरा ममर्दुः । गुण आर्षः ॥ ३५ ॥ कृष्णेति अर्द्धम् । ते यदुप्रवीराः कृष्णान्तिकम् उपव्रज्य तत्र रुक्मिणं ददृशुः । तथाभूतं हतप्रायमित्यनयोरत्राप्यपकर्षः । तथेति । विभुः करुणः दयालुः भगवान् संकर्षणः तथाभूतं विकृतरूपम् अत एव हतप्रायं मारिततुल्यं रुक्मिणं बद्धं दृष्ट्वा विमुच्य च कृष्णमब्रवीत् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

परित्रासेन विकंपितानि अङ्गानि यस्यास्तया । शुचा शोकेन अवशुष्यन् मुखं यस्याः । रुद्धः । कंठो यस्याः सा चासौ चान्वतया कातर्येण व्याकुलत्वेन विस्रंसिता विगलिता हेममयी माला यस्यास्तया गृहीतपादः ॥३४॥ चैलेन तद्वस्त्रेण । श्मश्रुकेशैः सहितं यथा तथा प्रपवन्मुंडयन् । व्यरूपयत विरूपमकरोत् नलिनीं पद्मवल्लीं ॥ ३५–३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह । योगेश्वरेति । हे योगेश्वर योगनिर्वाहक, योगीश्वरेति पाठे योगिहृत्कमलाभिव्यक्त, गोगपरिशुद्धमनोग्राह्यस्य तव स्वरूपस्वभावादिकं कथमयं देहाभिमानी विद्यादतो मूढोऽयं केवलमनुग्राह्य एवेति तत्संबोधनाभिप्रायः । नन्वसाधुलोकदमनार्थमवतीर्णोऽहमेनं निगृह्णाम्येवेत्यतः सम्बोधयति । हे जगत्पते शरणागतजगत्पालक, नायं शरणागतोऽपि तु कृतापराध एवेत्यत आह । मे मम, भ्रातरं, हन्तुं, न अर्हसि । अयं शरणागतो न भवत्यथापि शरणागताया मम भ्रातृत्वान्नैनं हन्तुं त्वं योग्य इति भावः । सांप्रतं भगवतः परत्वसौशील्यादिकमपि सम्बोधनेनैवाह । हे देवदेव देवानां ब्रह्मादीनामपि देव, हे अप्रमेयात्मन्, अपारवात्सल्यसौशील्यादिस्वभावस्वरूप, लोकदृष्ट्याऽपि अधुना तवैतद्वधो नोचित इति सम्बोधयति । हे कल्याण आरब्धे विवाहरूपेऽस्मिन् कल्याणकर्मण्यपरिसमाप्त एवान्तरा मद्भ्रातृवधो नोचित इत्यर्थः । अहो सखड्गस्य त्वद्भुजस्य सौन्दर्यं दृष्टमिति सम्बोधयति हे महाभुजेति ॥ ३३ ॥ तयेति । परित्रासेन परितो भयेन विकम्पितान्यङ्गानि यस्यास्तया, शुचा शोकेन अवशुष्यत् मुखं यस्याः रुद्धः कण्ठो यस्याः सा चासौ सा तया, कातर्येण वैक्लव्येन विस्रंसिता हेममाला सुवर्णमयी स्रग्यस्यास्तया, तया रुक्मिण्या, गृहीतौ पादौ यस्य सः, करुणः करुणावान् कृष्णः, न्यवर्त्तत । रुक्मिवधान्निवृत्तोऽभवत् ॥ ३४ ॥ चैलेनेति । ततः असाधुकारिणं स्वहननप्रवृत्तिरूपासाधुकर्मकारिणं, तं रुक्मिणं, चैलेन पट्टकाख्यतदीयवसनेनैव, बद्ध्वा, सहितानि स्थाने-स्थाने अवशिष्टानि श्मश्रूणि केशाश्च यथा भवन्ति तथेति सश्मश्रुकेशं, प्रवपन् तेनैवासिना मुण्डयन्, व्यरूपयद्विरूपमकरोत् । तावत्, यदुप्रवीरा गदसंकर्षणादयो यादवश्रेष्ठाः, गजाः, नलिनीं यथा तथा, अद्भुतं परसैन्यं, ममर्दुः । नलिनीं यथा गजा इति दृष्टान्तेनानायासः खेलनमात्रं चाभिप्रेतम् ॥ ३५ ॥ कृष्णेति । यदुवीरा इति कर्तृपदस्यानुषङ्गः । कृष्णान्तिकं उपव्रज्य, तत्र तथाभूतं चैलबद्धं विरूपितं चेत्यर्थः । अत एव, हतप्रायं रुक्मिणं, ददृशुः । ततः विभुर्महासमर्थः, संकर्षणो बलभद्रः, दृष्ट्वा तं तथाविधं कृतं विलोक्य, यतः स्वयं भगवान्, अतः, करुणः बद्धं विमुच्य, पट्टककृतं तद्बन्धनं निवर्त्य, कृष्णं अब्रवीत् ॥ ३६ ॥

कृष्णप्रिया

श्रीरुक्मिणीजी ने प्रभु के चरण कमलों को ग्रहण करके कहा, हे योगेश्वर ! हे देवाधिदेव ! हे जगत्पते ! हे अकल स्वरूप आप की इच्छाओं को कोई भी जान सकता नहीं है । हे महाभुज ! हे अप्रमेय बल नाथ ! हे परम कल्याण ! मेरे भैया को मारना आपके लिये योग्य नहीं है ॥ ३३ ॥ श्रीशुकदेवजी ने कहा राजन् परीक्षित ! श्रीरुक्मिणीजी के प्रत्येक अङ्ग भय के मारे थर-थर काँप रहा था । उत्कट शोक से मुखाम्बुज सुख गया था, कण्ठावरोध भी हो रहा था । विह्वलता वश एवं कातरता परवश केश विखर गये और भयविह्वलता वश कण्ठ की माला-सुवर्णमाला रत्नमाला भी सरक गई थी श्रीठाकुरजी के श्रीचरणों को पकड़ लिये थे । भगवान तो करुणानिधान है इसलिये दया से द्रवित हो गये और रुक्मी का वध करने का विचार

बदल दिया ॥ ३४ ॥ लेकिन रुक्मी तो अपने दुष्ट निर्णय से नहीं टला, उसने भगवान का वध करने का निर्णय नहीं बदला तब परवश होकर परम दयालु भगवान ने अनुचित कार्य तत्पर रुक्मी को उसी के दुपट्टे से बाँध दिया और उसकी दाढ़ी-मूंछ और मस्तक के कितने भाग के केशों को मूंड़कर उसे कुरुप बना दिया। इधर यदुवंशी वीरों ने उसी काल में शत्रु की सवल एवं अद्भुत सेना को नष्ट भ्रष्ट कर डाला-जैसे मदोन्मत्त हाथी कमल वन को कुचल देते हैं ॥ ३५ ॥ जब वीरवृन्द एवं श्रीसंकर्षण भगवान सैन्य नाश करके जहाँ श्रीकृष्ण विराजते थे वहाँ आ पहुँचे तब सबने दुपट्टे से बाँधे और कुरुप बनाये हुए रुक्मी को देखा। सबको अर्धमृत अवस्था सा रुक्मी दिख पड़ता था। मृतप्राय अवस्थागत रुक्मी को देखकर सर्वशक्तिमान् भगवान् संकर्षणजी को बड़ी दया आयी और उन्होंने उसके बन्धन खोलकर रुक्मी को मुक्त किया और भगवान् श्रीकृष्ण को कहने लगे ॥ ३६ ॥

असाध्विदं त्वया कृष्ण [1]कृतमस्मज्जुगुप्सितम् । वपतं श्मश्रुकेशानां वैरूप्यं सुहृदो वधः ॥ ३७ ॥
मैवास्मान् साध्व्यसूयेथा भ्रातुर्वैरूप्यचिन्तया । सुखदु[2]खदो न चान्योऽस्ति यतः स्वकृतभुक् पुमान् ॥ ३८ ॥
बन्धुर्वधार्हदोषोऽपि न [3]बन्धोर्वधमर्हति । त्याज्यः स्वेनैव दोषेण हतः किं हन्यते पुनः ॥ ३९ ॥
क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः । भ्रातापि भ्रातरं हन्याद् येन [4]घोरं तमस्ततः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—हे कृष्ण ! इदम्, असाधु, कृतम्, इदम्, कृतम्, अस्मत्, जुगुप्सितम्, श्मश्रुकेशानाम्, वपनम्, वैरूप्यम्, सुहृदः, वधः (उच्यते) ॥ ३७ ॥ हे साध्वि ! भ्रातृवैरूप्यचिन्तया, अस्मान्, मैव, असूयेथाः, सुखदुःखदः, न, अन्यः, अस्ति, च, यतः, पुमान्, स्वकृतभुक् ॥ ३८ ॥ बन्धुः, वधार्हदोषः, अपि, बन्धोः, न, वधम्, अर्हति, स्वेन, एव, दोषेण, हतः, किम्; पुनः, हन्यते ? (सः तु केवलम्) त्याज्यः ॥ ३९ ॥ भ्राता, अपि, भ्रातरम्, हन्यात्, अयम्, प्रजापतिविनिर्मित, क्षत्रियाणाम्, धर्मः, ततः, तेन, घोरम्, तमः, (भवति) ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रुक्मिणी सांत्वयति मैवास्मानिति ॥ ३८ ॥ पुनः कृष्णमाक्षिपति बंधुरिति ॥ ३९ ॥ पुनर्देवीं प्रत्याह । क्षत्रियाणामिति। येन धर्मेण भ्रातापि भ्रातरं हन्यात् । ततस्तस्माद्घोरतरोऽतिदारुणो धर्मश्च । अतः कोऽस्माकमपराध इति भावः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अस्य रुक्मिणः । इदं वपनम् । जुगुप्सितं वपनस्य नापितकर्मत्वान्नेदं क्षत्रोचित्तमिति भावः। किमर्थमाक्रोशसि मां नायं मारितवानिति चेदाह—वैरूप्यमिति । कृष्णेति केवलेन मूलनाम्ना संबोधनमग्रजोचितशुद्धवात्सल्योदयेन । तथैवास्माकं कुलतिलकीभूतभवत्कानां परमप्रतिष्ठावतां वृष्णीनां संबंधे जुगुप्सितं निंदितं कर्तुमयोग्यमित्यर्थः। किं तदित्यपेक्षायां लज्जादिना प्रागप्रकाशितमपि नीचैरिवाह—वपनमिति। न चैतदल्पं दण्डनमित्याह—वैरूप्यमिति, विरूपतापादनम्। एवं तु श्रीकृष्णोपालंभेन रुक्मिण्या एव सांत्वनमुद्देश्यं मन्संबंधेनैवैष संप्रत्युपालंभविषयो भवतीति तस्या लज्जोत्पत्तेः । तथा रुक्मिणं प्रत्यपि भर्त्सनमायाति साक्षात्तस्य तिरस्कारानुवादात् । तच्च तस्य शिक्षार्थमेव संपद्यत इति कारुण्य एव पर्यवस्यति । एवमग्रेपि ॥ ३७ ॥ अत्यः स्वेतरः। अत्र हेतुः—यत इति। एतादृशे तं प्रत्युक्तेऽपि तस्याः शोकाऽत्यागात्तामेव साक्षात्सांत्वयन्नाह—मैवेति । अस्माञ्छ्रीकृष्णादीन्मासूयेथा दोषारोपेण मा पश्य। एवेति साक्षात्तत्कारणे सत्यप्यसूयां निवारयति। चेति पक्षान्तरे । नञ् तन्निषेधे, अन्यो नास्ति किन्तु स्वयमेवेत्यर्थः। पुमान् जीवः। स्वकृतभुगिति–अस्मिन्नतिदुष्टे स्वस्य स्वभर्तुश्च प्रतिकूले कोऽयं ते वृथा स्नेह इति तां प्रत्युपालंभो ध्वनितः ॥ ३८ ॥ वधार्हो दोषो यस्य स तथापि । द्वितीयबंधुशब्दो हेत्वर्थः। यतो बंधुरतो बधं नार्हतीत्यर्थः । तर्हि किं कर्तव्यं, तत्राह—त्याज्य इति । त्यागो देशनिर्यातनादिरूपः “बंधूनां मरणं त्यागोऽनादरोऽपि तथाविधः” इति ग्रन्थांतरोक्तेः ॥ देव्याः प्रीणनार्थं श्रीकृष्णं नोंति शिक्षयन्निवाह—बंधुः श्यालः । बंधोर्भगिनीपतेः सकाशात् । त्याज्य इत्यत्यवज्ञेयत्वं दर्शयित्वा किञ्चित्कर्तुमसामर्थ्यमेव दर्शितम् । नन्ववध्यस्य वधे यावांस्तावान्वध्यस्य रक्षणे दोषः स्मर्यते, तत्राह—स्वेनैव दोषेण हतः सल्लोकबहिष्कृततासाम्येन एवं यो हतः स किं पुनर्हन्यते नैवेत्यर्थः। सोऽयमपि रुक्मिण्या अन्यत्र दानेन तद्बहिष्कृतो जात इति भावः। वैकृत्यकरणमिदं हननमेव, मरणादपि दुःखदत्वादिति भावः ॥ ३९ ॥ देवीं रुक्मिणीम् । ईदृशं कर्म किमिति क्रियत इत्यत आह—क्षत्रियाणामिति । अयं कस्तत्राह—भ्रातेति । तस्माद्भ्रात्रादिहननरूपत्वात् । इति भाव इति–“श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्” इति स्मृतेः स्वधर्माचरणं न दोषायेति तात्पर्यम् ॥ नीतिमिमां त्वदनुजो न वेत्तीति मनसा वदन्ती प्रत्याह—क्षत्रियाणामिति । भ्रातरमपि हन्यादिति शास्त्रविधिः, तत्र श्यालः खलु को वराक इति भावः ॥ ४० ॥

---

१. मत्स्य–श्रीधर. टि. । २. प्रदो नान्यो–बीर. । ३. बन्धो–वीर. ; बन्धु–विज. । ४. घोरतर–श्रीधरादयः ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्णेति केवलेन मूलनाम्ना सम्बोधनमग्रजोचितशुद्धवात्सल्योदयेन तथैवाह अस्माकं कुलतिलकीभूतभावत्कानां परमप्रतिष्ठावतां वृष्णीनां सम्बन्धे जुगुप्सितं निन्दितं कर्त्तुमयोग्यमित्यर्थः। किन्तदित्यपेक्षायां लज्जादिना प्रागप्रकाशितमपि नीचैरिवाह—वपनमिति। नचैतदल्पं दण्डनमित्याह। वैरूप्यमिति। विरूपतापादनम् एवं तु श्रीकृष्णोपालम्भने रुक्मिण्या एव सान्त्वनमुद्देश्यं मत्सम्बन्धेनैवैष सम्प्रत्युपालम्भविषयो भवतीति तस्या लज्जोत्पत्तेः तथा रुक्मिणं प्रत्यपि भर्त्सनमायाति साक्षात्तस्य तिरस्कारानुवादात् तच्च तस्य शिक्षार्थमेव सम्पद्यत इति कारुण्य एव पर्य्यवस्यति एवमग्रेऽपि ॥ ३७ ॥ एतादृशे तम्प्रत्युक्तेऽपि तस्याः शोकात्यगात्तामेव साक्षात्सान्त्वयन्नाह—मैवेति। अस्मान् श्रीकृष्णादीन् मासूयेथाः दोषारोपेण मापश्य एवेति साक्षात्तत्कारणे सत्यपि असूयां निवारयति चेति पक्षान्तरे नञ् तन्निषेधे अन्यो नास्ति किन्तु स्वयमेवेत्यर्थः। पुमान् जीवः ॥ ३८ ॥ तथापि देव्याः शोकं दृष्ट्वा तन्निरासार्थं श्रीकृष्णमाक्षिपति। बन्धुरिति। बन्धोः सकाशात् किन्तु स त्याज्यः इति तस्यात्यवज्ञेयत्वं दर्शयित्वा किञ्चित्कर्तुमसामर्थ्यमपि दर्शितं नन्ववध्यस्य वधे यावांस्तावान् वध्यस्य रक्षणे दोषः स्मर्य्यते तत्राह। स्वेनैव दोषेण हतः। सल्लोकवहिष्कृततासाम्येन एवं यो हतः स किं पुनर्हन्यते नैवेत्यर्थः। सोऽयमपि रुक्मिण्या अन्यत्र दानेन तद्वहिष्कृतो जात इति भावः। वैकृत्यकरणं त्विदं हननमेव मरणादपि दुःखदत्वादिति भावः ॥ ३९ ॥ तथापि शोकानपगमात् पुनर्देवीं स्वधर्मप्रदर्शनेन प्रबोधयति। क्षत्रियाणामिति। अयं क्षत्रियाणां धर्मः सददृष्टजनककर्त्तव्यविशेषः येन धर्मेण न्याययुद्धलक्षणेन भ्रातापि भ्रातरं हन्यात् धर्मत्वे हेतुः प्रजापतिना विनिर्मितः वेददृष्ट्या निर्दिष्ट इत्यर्थः। ततस्तस्माद्भ्रातृहननाद्धेतोर्घोरतरो धर्मश्चेति एवमेवाह—टीकायां घोरतरो धर्मश्चेति ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्ण ! हे सर्व्वसुखप्रद, अस्माकं जुगुप्सितं निन्दितं कर्त्तुमयोग्यमित्यर्थः। अस्मदिति बहुत्वेन श्रीवसुदेवादीन् संगृह्णाति। किञ्च, अन्ये कुर्व्वन्तु नाम, वयन्तु नार्हाम इति भावः; यद्वा, अस्माकं जुगुप्सितं निन्दा यस्मात्तत्; किं तदित्यपेक्षायां लज्जादिना प्रागप्रकाश्य पश्चादाह—वपनमिति। न चैतदल्पं दण्डनं किन्तु वध एवेत्याह—वैरूप्यमिति विरूपतापादनम् ॥ ३७ ॥ एतादृशे तं प्रत्युक्तेऽपि तस्याः शोकात्यागात्तामेव साक्षात् सान्त्वयन्नाह—मैवेति। अस्मानिति श्रीकृष्णादिसंग्रहात्, भ्रातुर्वैरूप्येण या चिन्ता शोकस्तया हेतुना मा सूयेथा दोषारोपणं न कुरु। एवेति साक्षात्तत्कारणे सत्यप्यसूयां निवारयति। तत्र च मा शब्देन तस्य च सर्व्वादौ निर्द्देशेनात्यन्तदार्ढ्यमापादयति च। हि यतोऽन्यो नास्ति, न भवति, किन्तु स्वयमेवेत्यर्थः। यतश्च स्वस्य कृतमेव भुङ्क्त इति तथा सः। पुमानिति पुंस एव प्राधान्यात्; यद्वा, जीवः सर्व्वोऽपीत्यर्थः ॥ ३८ ॥ तथापि देव्याः शोकं दृष्ट्वा तन्निरासार्थं पुनः श्रीकृष्णमाक्षिपति–बन्धुरिति। बन्धोः सकाशात्, किन्तु त्याज्यः स बन्धुभिः। ननु जीवन् पुनरपि महादपान्तरं कुर्य्यादित्यतो वध्य एव, तत्राह—स्वेनेति। एव-शब्देन सर्व्वथा दोषस्यान्यहेतुकत्वादिकं निरस्तम्। जीवन्मृतोऽसौ न किञ्चित् कर्त्तुं कदापि शक्नुयादिति भावः। यद्वा, हतप्रायः—अद्य श्वो वा स्वयमेव मरिष्यतीत्यर्थः। तस्मादस्मदवध्योऽयं वैरूप्यापादनेन यद्धतस्तदसाध्वेव कृतमिति भावः ॥ ३९ ॥ तथापि शोकानपगमात् पुनर्देवीं स्वधर्म्मप्रदर्शनेन प्रबोधयति—क्षत्रियाणामिति। प्रजापतिना श्रीब्रह्मणा ईश्वरेण वा विशेषेण अन्यस्मादाधिक्येन निर्म्मित इति तस्य परमपाल्यतोक्ता ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

रुक्मिणीं प्रत्याह—मैवेति ॥ ३८ ॥ बन्धोरिति पञ्चमी ॥ ३९–४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह—असाध्विति। हे कृष्ण ! असाध्वसमञ्जसं निन्दितं चेदं कर्म कृतं ननु बन्धुवध एवासाधुर्जुगुप्सितश्चेत्यतः आह—वपनमिति। सुहृदो बन्धो नाम श्मश्रुकेशवपनं वैरूप्यकरणं चेत्येष एव ॥ ३७ ॥ अथ रुक्मिणीं सान्त्वयति। मैवास्मानिति। हे साध्वि ! भ्रातृवैरूप्यप्रयुक्तया चिन्तयाऽस्मान्मासूयेथाः ननु दुःखप्रदा यूयमसूयितव्या एवेत्यत आह—सुखेति। सुखदुःखप्रदः अन्यो नास्ति कुतः यतः पुमान् स्वकृतभुक् स्वकृतकुशलाकुशलकर्मापादितसुखदुःखभुक् सुखग्रहणं दृष्टान्तार्थम् ॥ ३८ ॥ पुनः कृष्णमाक्षिपति। बन्धुरिति। वधायार्ह उचितः दोषो यस्य सोऽपि बन्धुर्वधं नार्हति किन्तु त्याज्य एव सहि तेन वधार्हेण दोषेण हत एव हतप्राय एव हतोऽपि पुनर्हन्यते किमिति ॥ ३९ ॥ भूयो रुक्मिणीं प्रत्याह। क्षत्रियाणामिति। प्रजापतिना ब्रह्मणा विनिर्मितोऽयं वधो धर्मः कोऽसौ येन धर्मेण भ्रातापि भ्रातरं हन्यात् यतश्च घोरतरः अतिदारुणः अतः कोऽस्माकमपराध इति भावः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

श्मश्रुकेशानां वपनलक्षणं वैरूप्यं सुहृदो बन्धोर्वधङ्कृतवान् ॥ ३७ ॥ इदानीं रुक्मिणीं सान्त्वयति। मैवेति। हे साध्वि ! रुक्मिणि अस्मान् प्रति स्वस्मादन्यः अत्र हेतुर्यत इति ॥ ३८ ॥ नन्वस्तु सुखादेः स्वयं हेतुरथापि बन्धोर्देहवियोगकरण-

वधो लोकाचारो न भवति जुगुप्सितत्वादिति तत्सत्यमित्याह । बन्धुरिति । वधार्हो दोषो यस्य स तथा द्वितीयबन्धुशब्दो हेत्वर्थः तत्र किङ्कर्तव्यमित्यत्राह । त्याज्य इति । त्यागो देशनिर्यातनादिलक्षणः किं त्याज्य इत्यतो मृतमारणदोषापत्तेरिति भावेनाह । हत इति ।। ३९ ।। तर्ह्येतदीदृशं कर्म किमिति क्रियत इति अतोऽयं न्यायः क्षत्रियेभ्योऽन्यत्र न क्षत्रियाणामित्याह । क्षत्रियाणामिति । कोऽसौ धर्म इत्यत्राह । भ्रातापीति । ततस्तस्माद्राजा येन कर्मणा घोरतर इत्युच्यते धर्मविषयो वाऽघोरतरो धर्म इति ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वरं वधोऽप्यस्य साधुरभविष्यदिदं खड्गेन मुण्डनं त्वतिवीभत्सितमभूदिति शोचन्त्या रुक्मिण्याः सान्त्वनार्थं बहिः कृष्णं किंचिदुपालभमानः अन्तस्तु भो भ्रातः ! समुचितकृत्यचतुरेण त्वया साध्वेव कृतमिति प्रसीदन्नेवाह । असाध्विति । सुहृदः श्यालकस्य पक्षे दुर्हृदोऽपि तस्य सुहृच्छब्दवाच्यत्वेन विपरीतव्यङ्ग्या लक्षणा ॥ ३७ ॥ तस्याः शोकापनोदार्थं विवेकमुत्पादयति । मैवेति । स्वकृतभुगिति अस्मिन्नतिदुष्टे स्वस्य भर्तुश्च प्रतिकूले कोऽयं ते वृथा स्नेह इति तां प्रत्युपालम्भश्च ध्वनितः ॥ ३८ ॥ देव्याः प्रीणनार्थं कृष्णं नीतिं शिक्षयन्निवाह । बन्धुः श्यालः बन्धोर्भगिनीपतेः सकाशात् ॥ ३९ ॥ नीतिमिमां त्वदनुजो न वेत्तीति मनसा वदन्तीं देवीं प्रत्याह । क्षत्रियाणामिति । भ्रातरमपि हन्यादिति शास्त्रविधिस्तत्र श्यालः खलु को वराक इति भावः ॥४०॥

गूढार्थदीपिनी

अस्मत् अस्माकं जुगुप्सितं नापितकर्मत्वात् । सुहृदः श्यालस्य । अत्र विपरीतलक्षणया दुर्हृद इत्यर्थः ॥ ३७ ॥ हे साध्वि । मा असूयेथा दोषदृष्ट्या न पश्य । अन्यो नास्ति किन्तु स्वयमेव ॥ ३८ ॥ बन्धोः सकाशात् ॥ ३९ ॥ येन धर्मेण भ्राताऽपि ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

देवीं सान्त्वयति । मैवेति ॥ ३८ ॥ पुनः कृष्णं प्रत्याह—बन्धुरिति ॥ ३९ ॥ पुनर्देवीं प्रत्याह—क्षत्रियाणामिति । येन धर्मेण ततो हेतोर्घोरतरः धर्मः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

परित्रासविकम्पिताङ्ग्या परित्रासया विकम्पितान्यङ्गानि यस्यास्तया शुचा शुष्यन्मुखं यस्याः सा च सा रुद्धो कण्ठो यस्याः सा तया कातर्येण विस्रंसिता हेममाला यस्याः सा तया । गृहीतपादः करुणाऽस्यास्तीति करुणयतीति करुण इति वा न्यवर्तत हननतो निवृत्तोऽभूत् । अनेन हन्तुं गत इव दर्शयामास न मनःपूर्वकं गत इति द्योत्यते । अन्यथा वन्ध्यसङ्कल्पतापत्प्राप्तिः स्यात् ॥ ३७ ॥ चैलेनांशुकेनासाधुकारिणं तं बद्ध्वा सश्मश्रुकेशं यया तथा प्रवपन्पञ्चशिखं कृत्वेति यावत् । कृत्वा पञ्चशिखं तथेति हरिवंशे शंशनात् । मुण्डनं कुर्वन् व्यरूरुपद्विरूपमकरोत् । एतदारभ्य प्रससारामाणकं कार्यमसाधु कृतं चेच्छिरः श्मश्रूणि मुण्डयेति यावत् । नलिनी गजा यथा तथा जितशत्रुसैन्या यदुप्रवीराः समीयुः ॥ ३८ ॥ कृष्णान्तिकमुपाव्रज्य तत्र तत्समीपे रुक्मिणं ददृशुः । विभुः सङ्कर्षणस्तथाभूतमिति हतप्रायं दृष्ट्वा ॥ ३९ ॥ विमुच्य स्वयं विमोच्यान्यैः । तन्मोचनरोचनमत इत्याह । करुण इति । कृष्णमब्रवीत् ॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवन्तं प्रति कृतस्याननुमोदनमाह **असाध्विदमिति** । यत् कृतं तदग्रे वक्तव्यम् । तदसाध्वेव । मरणानन्तरमेव हि सर्वक्षौरं विधीयते । किञ्च । यत्कृतं तदस्मत्कृतम्, अस्मत्तः कृतम्, वयमेव हेतवः सङ्कर्षणरूपाः । न तु स्वामिनस्तव कार्यम्, यतो जुगुप्सितमेतत् । परमार्थतोऽयमर्थः व्यवहारेऽपि यद्यप्यस्य वपनं कर्तुं युक्तम्, अयमेतदर्ह एव, तथाप्यस्मज्जुगुप्सितमस्माकं तु नोचितमित्यर्थः । अधमभक्षकायाप्युत्तमैर्नाधमं भक्ष्यं दीयते, तदेवाह **वपनं श्मश्रुकेशाना**मिति । श्मश्रूणां केशानां च सुहृदः सकाशात् वैरूप्यं वध एव । अतः सुहृत्त्वात् वधोऽनुचितः । एतदपि रुक्मिणीसान्त्वनार्थमेवेति ज्ञायते । उपसंहारबलीयस्त्वात् । उभयस्याप्रकरणित्वात् ॥ ३७ ॥ अतस्तामेव साक्षात् सान्त्वयति मैवास्मानिति । हे साध्वि । पतिव्रताया भर्तृकृतं मन्तव्यमिति धर्मः । अत एव अस्मान्सर्वानेव मासूयेथाः, दोषारोपेण मा विचारय । यद्यपि भावकचित्तमपि समीचीनम्, भाव्ये च न दोषः कोऽपि तथापि भ्रातुर्वैरूप्यचिन्तया तद्धर्मारोपात् कदाचिदसूया भवेत्, तां निवारयति । ननु लौकिकदृष्ट्या कर्तव्यैवासूया कथं जरासन्धो मुक्तः. केवलः कथमयं मुण्डित इति चेत् , तत्राह **सुखदुःखद** इति । स्वकर्मवशादेव सुखदुःखानुभवः । सङ्कर्षणो हि ज्ञानप्रधानः । अन्यथा सर्वान् (न) मारयेत् । 'नायं हन्ति न हन्यत' इति तत्र सिद्धान्तः । तथा अत्रापि कर्मणैव सर्वमिति तदनुसारेणात्रापि बोधनम् । अतोऽयं साधारण इति, सोऽपि शृणोतीति कर्ममार्ग एव बोधितः । अत एव स्वयं स्वस्य सुखदुःखदः, अन्यो न भवति

तत्र हेतुमाह **स्वकृतभु**गिति । कर्मणि स्वस्य स्वातन्त्र्यात् तत् फलमपि कर्तृगाम्येव भवति । अन्यथा कृतहानाकृताभ्यागमप्रसङ्गः ॥ ३८ ॥ एवं प्रतिबोधिते केवलमस्मदपराधमेव स्थापयति बलभद्रो, न स्वापराधमिति अतुल्यता प्रतिभाता, अतः पुनस्तां बोधयितुं भगवन्तमाह बन्धुरिति । वधमर्हति येन दोषेण तादृशो दोषो यस्य स वधार्हदोषः पुरुषः । तादृशः बन्धोः साक्षाद्वधं नार्हति । अन्यथा बन्धुत्वं न स्यात् । शत्रुरेव वधकर्ता । अयोग्यं कुर्वन् अयुक्त एव भवति । ननु यथा स्वधर्मः, स न मारणीय इति तस्यापि धर्मः, अतिक्रमो न कर्तव्य इति । स चेत् स्वधर्मं न कुर्यात्, कथमन्यः कुर्यादिति चेत्, तत्राह त्याज्य इति । वस्तुतस्तु तेन स्वधर्मस्त्यक्त इति न स्वेनापि स्वधर्मस्त्यक्तव्यः, तथा सत्युभयोरेव तुल्यता स्यात् । अथ तत्कर्म सार्थकं कर्तव्यमिति स्वोद्यमः, तत्राप्युच्यते । स्वेनैव दोषेण हतः । पुनः किमर्थं हन्यत इति । न हि तत्कर्मणा प्रेरितत्वं स्वस्य युक्तम् । तत्कर्म स्वयमेव अन्यं प्रेरयेत् । अतः कर्मणैव हतः, तदङ्गत्वे स्वस्य हानिरिति । भिन्नतया स्वयं चेन्मारयेत्, तदा पिष्टपेषणमेव भवेदिति, किं हन्यत इति प्रश्नार्थ आक्षेपार्थो वा । पिष्टापि वेदे प्रैष उक्तः । अणूनि कुरुतादिति, तस्य प्रयोजनं मेध्यत्वायेति श्रुतावेवोक्तम् । तथा अयमपि पवित्रो भवतु, मोक्षं वा प्राप्नोत्विति प्रश्नार्थो भवति । एवमेवेति चेत्, तत्राह **किं हन्यत** इति । न हन्तव्य एव, किन्तु त्याज्यः । दुष्टं हि न संस्क्रियते, अयं तु दुष्ट एवेति न संस्कारमर्हतीति भावः ॥ ३९ ॥ एवं शास्त्रार्थतः स न वध्यो भवतीति निरूप्य, लोकन्यायेनापि न वध्यत इति निरूपयति **क्षत्रियाणामयं धर्म** इति **द्वाभ्याम्** । ननु यो मारयितुमायाति, स मार्यत इति, 'जिघांसन्तं जिघांसीया'दिति लोकवेदाभ्यां हननं तस्य युक्तम्, तत्कथं निषिध्यत इति चेत्, तत्रोच्यते, किं हत इति हन्यते, अयुक्तं करोतीति वा । तत्र नाद्यः । अभावात् । प्रकृते असम्भवाच्च । अयुक्तता तु नास्तीत्याह । क्षत्रियाणामयं घोरात्मको धर्मः प्रजापतिनैव विनिर्मितः । त्रिविधा हि धर्माः, शान्तो घोरो विमूढश्चेति । तत्र शान्तो ब्राह्मणेषु स्थापितः । घोरः क्षत्रियेषु । विमूढो वैश्यशूद्रयोः । अतः अयं परिदृश्यमानः तीक्ष्णशस्त्राणि गृहीत्वा स्वप्रवृत्तिं प्रदर्शयन्निवाह । तत्र न सम्बन्धापेक्षेत्याह **भ्रातापि भ्रातरं हन्यादि**ति । नन्वेवं सत्ययं धर्म एव चेत्, तर्हि कथं घोरः स्यात्, तत्राह **येन घोरं तम** इति । ततो घोरमेव तमो भवति । अज्ञानमत्र तमः, तदपि भयानकम् । एवं कर्मणा दैत्यत्वं भवतीत्यर्थः ॥ ४० ॥

विवरण टिप्पणी

वपनं श्मश्रूकेशानामित्यत्र । **उभयस्येति** । रुक्मिणीसान्त्वनस्य भगवद्बोधनस्य च प्रकरणित्वे वाक्यभेद इति भावः । **अत** इति । अतः परमित्यर्थः । **मैवास्मानित्यत्र** । **अतोयमिति** । अयं पक्षः साधारण इत्यर्थः ।

श्रीसुबोधिनी–सारः

हे कृष्ण त्वया इदमसाधु निंद्यं कृतम् । अस्माकं जुगुप्सितमेतत् । श्मश्रूणां केशानां वपनं खण्डनं वैरूप्यं विरूपक रणं च सुहृदो वधो मृत्युरेव ।। ३७ ।। रुक्मिणीं प्रत्याह । हे साध्वि भ्रातुर्वैरूप्यस्य चिंतयास्मान् मासूयथा मानिदय यतः पुमान् जन्तुमात्रं स्वकृतं शुभाशुभं भुनक्तीति तथाऽतः सुखदुःखदोऽन्यो द्वितीयः कश्चन नास्ति ॥ ३८ ॥ पुनः कृष्णमाक्षिपति वधार्हो मरणयोग्यो दोषो यस्य स बन्धुरपि बन्धोः सकाशाद्वधं मृत्युं नार्हति । किं तु त्याज्यः स्वेन दोषेण पापेन हतः पुनः किं हन्यते ।। ३९ ।। पुनस्तां प्रत्याह । क्षत्रियाणामयं धर्मो ब्रह्मणा रचितः कोऽसौ तत्राह । भ्रातापि भ्रातरं हन्यात् येन धर्मेण ततो हेतोर्घोरतरोऽतिक्रूरः ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

तदुक्तिमेवाह—असाध्विति । हे कृष्ण ! रुक्मिश्मश्रुकेशानां वपनमिदं त्वया असाधु कर्म कृतम् । तत्र हेतुमाह—अस्माकं जुगुप्सितं निन्दितमेतत् । तत्रापि हेतुमाह—सुहृदः सम्बन्धिनो वैरूप्यकरणं वध एवेति ॥ ३७ ॥ अथ रुक्मिणीं सान्त्वयति—मेति । हे साध्वि ! भ्रातृवैरूप्यप्रयुक्तया चिन्तयाऽस्मान् मैवासूयेथा दोषारोपेण मा पश्य । ननु 'दुःखप्रदा यूयं कुतो नासूयितव्या' इत्यत आह—सुखेति । सुखदुःखप्रदः अन्यो नास्ति, यतः पुमान् प्राणिमात्रं स्वकृतभुक् स्वकृतकुशलाकुशलकर्मापादितसुखदुःखभोक्ता । अतः स्वयमेव स्वसुखदुःखहेतुरित्यर्थः ॥ ३८ ॥ पुनः कृष्णमाक्षिपति—बन्धुरिति । वधार्हः वधमर्हति येन तथाविधो दोषो यस्य तथाविधोऽपि बन्धुर्बन्धोः सकाशाद्वधं नार्हति, किंतु त्याज्य एव सः । यस्मात् स स्वेन दोषेण हत एव । अतः पुनः किं हन्यते ? स्वदोषेणापकीर्तेर्जातत्वात् हतप्रायस्य पुनर्हनने हन्तुरप्यपकीर्तिः स्यादित्यर्थः ।। ३९ ।। पुनरपि रुक्मिणीं प्रत्याह—क्षत्रियाणामिति । येन हेतुना भ्रातापि युद्धे भ्रातरं हन्यादित्ययं घोरतरः अति दारुणः क्षत्रियाणां धर्मः प्रजापतिनैव विनिर्मितस्ततो रुक्मिवधप्रवृत्तौ अस्माकं कोऽपराध इति शेषः ॥ ४० ॥

अन्वितार्थप्रकाशिका

वरं वधोऽप्यस्य साधुरभविष्यदिदं खड्गेन मुण्डनं त्वतिबीभत्सितमभूदिति शोचन्त्या रुक्मिण्याः सान्त्वनार्थं बहिः कृष्णं किंचिदुपालभमानः अन्तस्तु समुचितं स्मृत्वा प्रसीदन्नेवाह—असाध्विति ॥ हे कृष्ण ! इदं वैरूप्यकर्म त्वया असाधु कृतम् अस्माकं जुगुप्सितं चैतत् । यतः सुहृदः श्मश्रुकेशानां वपनं तज्जन्यं वैरूप्यं च सुहृदो वध एव ॥ ३७ ॥ रुक्मिणीं प्रत्याह—

मैवेति ॥ हे साध्वि ! भ्रातृवैरूप्यप्रयुक्तया चिन्तयाऽस्मान्मैवासूयेथाः दोषारोपेण मा पश्य । सुखदुःखप्रदः अन्यः नास्ति । यतः पुमान् प्राणिमात्रं स्वकृतकर्मफलभुक् । अतः स्वयमेव सुखदुःखहेतुः ॥ ३८ ॥ पुनः कृष्णमाह—बन्धुरिति ॥ वधार्हः वधमर्हति येन तथाविधो दोषो यस्य तथाविधोऽपि बन्धुः श्यालः बन्धोः भगिनीपतेः सकाशाद्वधं नार्हति किंतु त्याज्य एव सः । यस्मात्स स्वेन दोषेण हत एव अतः पुनः किं हन्यते । अतोऽस्माकमपि अनेनाकीर्तिरिति ॥ ३९ ॥ पुनर्देवीमाह—क्षत्रियाणामिति ॥ येन धर्मेण हेतुना भ्राताऽपि युद्धे भ्रातरं हन्यात् घोरतमः अतिदारुणः क्षत्रियाणां धर्मः प्रजापतिनैव विनिर्मितः ततो हेतोर्घोरतरोऽपि स धर्म एवेति वाऽन्वयः । ततो रुक्मिवधप्रवृत्तौ अस्माकं कोऽपराध इति भावः ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

किं तत् श्मश्रुकेशानां वपनं मुंडनं सुहृदः संबंधिनो वैरूप्यं वधः ॥ ३७ ॥ अथ वैदर्भीमाश्वासयति मैवेति । साध्वी वैदर्भी ॥ ३८ ॥ पुनरपि रामः कृष्णस्य शिक्षां करोति बंधुरिति वधस्य अर्हो योग्यो दोषोऽपराधो यस्य एवंभूतोऽपि बंधुः स्वसंबंधीवधं नार्हत्ति स तु त्याज्यः स्वकीयेनैव दोषेण हतः अतोऽस्माभिः किं हन्यते हतस्य पुनः किं हननमित्यर्थः ॥ ३९ ॥ पुनरपि रुक्मिणीं प्रत्याह क्षत्रियाणामिति येन धर्मेण भ्राताऽपि भ्रातरं । ततो हेतोः घोरतमः अतिदारुणो धर्मः घोरतर इत्यपि पाठः अतोऽस्माकं को दोष इति भावः ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह । असाध्विति त्रयोदशभिः । असाध्विति । हे कृष्ण, त्वया इदं कर्म, असाधु असमञ्जसं, अस्मज्जुगुप्सितमस्माकं निन्दितं च, कृतम् । ननु बन्धुवध एवासाधुर्जुगुप्सितश्च स तु मया न कृतः अत आह वपनमिति । बन्धूनां, श्मश्रुकेशानां, वपनं तत्रापि वैरूप्यं च, एष एव सुहृदः वधः, न तु शिरश्छेदनादिरेव वधो यतस्तेन तु तस्य क्षात्त्रधर्मसिद्ध्या यशःशरीरानाशादिति भावः ॥ ३७ ॥ अथ रुक्मिणीं सान्त्वयति । मैवेति । हे साध्वि, भ्रातुः वैरूप्यचिन्तया, अस्मान् मैव असूयेथाः, ननु मद्बन्धोर्दुःखप्रदा यूयमसूयितव्या एवेत्यत आह । सुखदुःखप्रदः, अन्यः, न अस्ति । कुतः यतः पुमान् स्वकृतभुक् स्वकृतकुशलाकुशलकर्मापादितसुखदुःखभुग्भवति । सुखग्रहणं दृष्टान्तार्थम् ॥ ३८ ॥ पुनः श्रीकृष्णमाक्षिपति । बन्धुरिति । वधार्हो दोषो यस्य तथाभूतोऽपि, बन्धुः, बन्धोः सकाशात्, वधं, न अर्हति । अतः त्याज्य एव । यतः, सः स्वेन बधार्हेण, दोषेण, हतो हतप्राय एव । एवं हतः सः, पुनः किं किमिति हन्यते । वीराणां मृतमारणस्य जुगुप्सितत्वस्मरणात् ॥ ३९ ॥ भूयो रुक्मिणीं प्रत्याह । क्षत्त्रियाणामिति । क्षत्त्रियाणां प्रजापतिविनिर्मितः ब्रह्मणा समुत्पादितः, अयं वधात्मकः, धर्मः । येनैवंविधेन, धर्मेण, भ्रातापि, भ्रातरं हन्यात् । ततः अयं धर्मस्तु, घोरतमोऽतिदारुणः, अस्ति । अतोऽत्र कोऽस्माकमपराध इति भावः ॥ ४० ॥

कृष्णप्रिया

हे कृपालु कृष्ण ! आपने यह योग्य नहीं किया । ऐसा अमङ्गल कार्य मङ्गल निधान आपके लिये एवं यदुवंशियों के लिये समुचित नहीं । अपने सम्बन्धी की दाढ़ी-मूछ मूंडकर उसे कुरूप बनाना यह तो एक प्रकार का वध ही है ॥ ३७ ॥ पुनः परम कृपालु संकर्षणजी, श्रीरुक्मिणीजी को सात्वना देते हुए कह रहें है कि हे साध्वी ! रुक्मिणीजी ! आपके बड़े भाई रुक्मी का रूप कुरूप बनाया यह सोचकर हम सब पर नाराज न होना और हम लोगों से बुरा न मानना । क्योंकि देवी आप तो जानती हैं कि जीव मात्र को सुख दुःख देने वाला कोई दूसरा नहीं हैं । उसे तो अपने ही कर्म का फल भोगना पड़ता है ॥ ३८ ॥ श्रीरुक्मिणीजी को आश्वासन देकर बड़े भैयाजू श्रीश्यामसुन्दरजी को शिखावन देते कह रहे हैं कि हे कृष्ण ! यदि अपना सगा सम्बन्धी वध करने योग्य अपराध करे फिर भी अपने निजी स्वजनों से उसका मारा जाना योग्य नहीं माना गया है। सम्वन्धी को छोड़ देना चाहिये । वह तो अपने दोषों एवं अपराधों से ही मर चुका है । भैया मरे हुए को क्या मारना ॥ ३९ ॥ श्रीबलभद्रजी अब श्रीरुक्मिणीजी का मनःसमाधान करते हुए तत्वनिर्देश करते हैं कि हे साध्वी ! हे देवी ! कृपया मेरे विनय को सुनिये, ब्रह्माजीने प्रजापतिजी ने क्षत्रियों का धर्म ही ऐसा बनाया है कि सोदर भाई अपने सोदर भाई को मार देता है इससे यह क्षात्रधर्म अत्यन्त कठोर एवं घोरतम है ॥ ४० ॥

राज्यस्य भूमेर्वित्तस्य [1]स्त्रियो मानस्य तेजसः । मानिनोऽन्यस्य वा हेतोः श्रीमदान्धाः क्षिपन्ति हि ॥ ४१ ॥
[2]तवेयं विषमा बुद्धिः सर्वभूतेषु दुहृदाम् । यन्मन्यसे सदाभद्रं [3]सुहृदां भद्रमक्षयम् ॥ ४२ ॥
आत्ममोहो नृणामेष कल्प्यते देवमायया । सुहृद् [4]दुर्हृदुदासीन इति देहात्ममानिनाम् ॥ ४३ ॥
एक एव परो ह्यात्मा सर्वेषामपि देहिनाम् । नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ॥ ४४ ॥

---

१. श्रियो-प्रा. । २. अयं श्लोको नास्ति-विजये । ३. यज्ञवत्-श्रीधर. वंशी. वीर. विज. । ४. शत्रुर्-विज. ।

कर्दमक्षमा

अन्वयः—राज्यस्य, भूमेः, वित्तस्य, स्त्रियः, मानस्य, तेजसः, मानिनः, वा, अन्यस्य, हेतोः, श्रीमदान्धाः, हि, क्षिपन्ति ॥ ४१ ॥ सर्वभूतेषु, दुर्हृदाम्, सदा, अभद्रम्, मन्यसे, तव, इयम्, विषमा, बुद्धिः, सुहृदाम्, अक्षयम्, भद्रम्, तवइयं-विषमाबुद्धिः ॥ ४२ ॥ "सुहृद्, दुहृद्, उदासीनः" इति देहात्ममानिनाम्, नृणाम्, एषः, आत्ममोहः, देवमायया, कल्प्यते ॥ ४३ ॥ सर्वेषाम्, एव, देहिनाम्, परः, हि, एक, एव, आत्मा, किन्तु, मूढैः, नाना, इव, गृह्यते, यथा, ज्योतिः, यथा, नभः, (एकम्, एव, भिन्नं, गृह्यते, तथा, आत्मापि, भिन्नो, गृह्यते) ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुनः श्रीकृष्णं प्रत्याह । राज्यस्येति । तथाऽप्यस्माकमेतदनुचितमिति भावः ॥ ४१ ॥ पुनर्देवीं प्रत्याह । तवेयमिति । सर्वभूतेषु दुर्हृदामहितानां भ्रातृणामज्ञवद्यद्भद्रं मन्यसे इच्छसि इयं तव विषमा असमीचीना बुद्धिः ! कुतः । यतस्तदेव सुहृदामभद्रमिति । यद्वा सर्वभूतेषु दुर्हृदामपि स्वसुहृदां भद्रमेव दंडरूपं मुंडनमभद्रं यन्मन्यसे तवेयं विषमा बुद्धिरिति । अथवा सर्वभूतेषु मध्ये दुर्हृदां शिशुपालादीनामभद्रं सुहृदां भद्रं च यन्मन्यसे तवेयं विषमा बुद्धिः समा न भवति अज्ञवदज्ञानामिव ॥ ४२ ॥ कुत इत्यत आह । आत्ममोह इति ॥ ४३ ॥ परमार्थमाह । एक एवेति । परः शुद्धः ज्योतिश्चंद्रादिर्यथोदकेषु । नभो यथा घटादिष्विति ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यद्यपि राज्याद्यर्थमग्नस्यैष्वन्यतमस्यार्थमपि क्षिपन्ति निघ्नंति, तिरस्कुर्वन्ति वा परांस्तथापीति । एतत् संबंधिवधादि । इति भाव इति—वधस्योचितत्वेऽपि वपनस्याऽनुचितत्वादित्याशयः ॥ ननु क्षत्रियो वंधु हन्तु वरं किन्तु वीभत्सितवैरूप्यवन्तं कर्तु नार्हतीति देव्याः स्वगतोक्तिमालक्ष्य तां प्रसादयितुं कृष्णमाह—राज्यादेर्हेतोर्मानिनोऽहंकारवंतस्तत्रापि श्रीमदेनांधाः क्षिपंति, तत्तद्व्यर्धातकानिति शेषः । अत्रादिना मानस्य पूजायास्तेजसः कांतेर्बलस्य वान्यस्यान्नपानादेर्ग्रहः । अस्माकं त्वेतदनुचितमनहंकारित्वेन मदांधत्वाऽभावादिति भावः ॥ ४१ ॥ भ्रातॄणां रुक्मिप्रभृतीनाम् । हेतुमाशंकते—कुत इति । सुहृदामस्माकम् । तज्जयेस्माकमभद्रमेवेति भावः । तर्हि तवापि बुद्धिर्विषमैवेति रुक्मिण्योक्षेपोत्थानादाह—यद्वेति । "परमोऽनुग्रहो दंडो भृत्येषु प्रभुणार्पितः" इति न्यायेन, 'न्याय्यो हि दंडः कृतकिल्विषे नरे' इत्युक्तेश्च । भद्रस्याभद्रमननमपि विषममेवेति भावः । "स्नेहाऽनुबंधो बन्धूनां मुनेरपि सुदुस्त्यजः" इत्युक्त्याश्रयणमप्यज्ञानां धर्म इत्याह–अथ वेति ॥ पूर्वं धर्मद्वारा देव्यां बोधितायामपि तथेदृशे श्रीकृष्णं प्रत्यवक्तव्येपि देव्याः सांत्वनार्थमुक्तम् । तस्याः शोकाऽत्यागात्तं हित्वा तामेव विवक्षितरहस्यांतर्गतेन ज्ञानोपदेशेन बोधयन्नादौ सक्रोधमाह—तवेति । सर्वभूतेषु मध्ये दुर्हृत्त्वेन प्रतीतानां केषांचिद्यदभद्रमिच्छसि तथा दुर्हृदां सुहृत्त्वेन प्रतीतानां रुक्म्यादीनां यद्भद्रमिच्छसि तथाविशेषादन्येषु तु यदौदासीन्यं कुरुषे सेयं तवाज्ञानामिव विषमा बुद्धिरिति । अर्थांतरे सुहृदामित्यपि सुहृदामित्यनेन विशेषयितव्यं, सर्वभूतेषु दुर्हृदां शत्रुत्वेन प्रतीयमानानां शिशुपालादीनां तत्साहाय्येन तु तादृशामेव सुहृदां रुक्म्यादीनामपीति । यदि तेष्वभद्रं मन्तव्यं तदेतद्विधेष्वपि तदेव मंतव्यमिति भावः । दुर्हृदां सर्वभूतेषु दुष्टमनसां शिशुपालादीनां, सुहृदां स्वबंधूनां रुक्म्यादीनां भद्रमेव कृष्णकृतं दंडनं यत्सदाऽभद्रं मन्यसे इयं तव सर्वथाविज्ञाया विषमा बुद्धिर्नोचितेति भावः ॥४२॥ अत्र हेतुमाशंकते—कुत इति । सुहृद् निरपेक्षत्वेनोपकर्ता, दुर्हृद् स्वसुखविघाती, तदुभयहीन उदासीन इति ॥ जानाम्येवेदं यदयं भ्राता मे दुष्ट एव तदप्यय बंधुभावो नापयाति किं करोमीति चेत्—सत्यम्, अप्राकृताया भवत्या एवायमविवेकोऽनुचित इत्याह । सांसारिकलोकानां त्वयं स्वाभाविको धर्म इत्याह—कश्चित्सुहृदिव कश्चित्सुहृदिव कश्चिद्दुर्हृदिवेत्यादि । एक एव वा कदाचित्सुहृदिवेत्यादि । अर्थान्तरे श्रीकुष्णप्रेमाऽऽस्वादमजानतामेवान्यत्र दौर्हृदादिस्फूर्तिः स्यादित्यत आह—आत्मेति द्वाभ्याम् । आत्मेति देह एवात्मेति मन्यमानानां नृणां न तु ज्ञानिनाम् ॥ ४३ ॥ याथार्थ्यमाह—एक एवेति । मूढैरनात्मज्ञैः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

देवीसान्त्वनार्थमेव पुनरपि श्रीकृष्णं प्रत्यपि परुषमाह—राज्यस्येति । मानस्य पूजायाः तेजसः कान्तेर्वलस्य वा अन्यस्य अन्नपानादेः मानिनः अभिमानवन्तः तत्रापि श्रीमदेनान्धाः अतः क्षिपन्ति तत्तद्व्याघातकानिति शेषः हि यस्माच्छ्रीमन्दान्धा एव क्षिपन्ति तस्मादस्मद्विधानां तादृशत्वाभावादेतदयुक्तमित्यर्थः ॥ ४१ ॥ पूर्वं धर्मद्वारा देव्यां वोधितायामपि तथा ईदृशे श्रीकृष्णं प्रत्यवक्तव्येऽपि देव्याः सान्त्वनार्थमुक्तेः तस्याः शोकात्यागात्तन्त्यक्त्का तामेव विवक्षितरहस्यार्थान्तरगर्भेण ज्ञानोपदेशेन प्रवोधयन्नादौ सक्रोधमाह—। तवेति । सर्वभूतेषु मध्ये दुर्हृत्त्वेन प्रतीतानां केषाञ्चिद्यदभद्रमिच्छसि तथा सुहृत्त्वेन प्रतीतानां केषांचिद्यद्भद्रमिच्छसि तत्पारिशेष्यादन्येषु तु यदौदासीन्यं कुरुष इत्यर्थः । सेयं तवाज्ञानामिव बिषमा बुद्धिरिति अर्थान्तरे सुहृदामित्यपि दुर्हृदामित्यनेन विशेषयितव्यं सर्वभूतेषु मध्ये दुर्हृदां शत्रुत्वेन सम्मतानां शिशुपालादीनां तत्साहाय्येन तु तादृशामेव स्वसुहृदां रुक्म्यादीनामिति यदि तेष्वभद्रं मन्तव्यं तदैतद्विधेष्वपि तदेव मन्तव्यमिति भावः ॥ ४२ ॥ कश्चित्सुहृदिव कश्चिद्दुर्हृदिवेत्यादि एक एव वा कदाचित्सुहृदिवेत्यादि अर्थान्तरे श्रीकृष्णप्रेमास्वादमजानतामेवान्यत्र सौहृद्यादिस्फूर्त्तिः स्यादित्याह—

आत्मेति द्वाभ्याम् ॥ ४३ ॥ ननु जगतो वैचित्री साक्षादेव दृश्यते तया च सुहृदादिर्घटत एव कथमुच्यते आत्ममोह इति उच्यते चिन्मात्रत्वेनैकरूपाणां जीवानां वस्तुतस्तु तद्भेदो न सम्भवतीत्याह—एक इति। एकः परमात्मांशत्वेन मिथस्तुल्यस्वरूप इत्यर्थः। भानुस्थानीयस्याचिन्त्यशक्तिमयपरमात्मनस्तटस्थांशत्वेन रश्मिपरमाणुस्थानीयत्वात्तस्य तत्र चाचिन्त्यशक्तिमयत्वादेवोभयत्रापि न कस्यापि पूर्वपक्षस्यावकाश इति ज्ञेयम् हि यतः परो देहाद्भिन्नः अतो देहस्यैव वैचित्री न त्वात्मन इति भावः। तर्हि शान्तत्वादिना विविधोऽसौ कुतः प्रतीयते अधिष्ठानस्यैव वैचित्र्यादिति सदृष्टान्तमाह। नानेति। प्रथमदृष्टान्ते बिम्बप्रतिबिम्बयोर्भेदप्रतीतेरुत्तरो दृष्टान्तः अर्थान्तरे हि यस्मात् ''आततत्वाच्च मातृत्वादात्मा हि परमो हरि''रित्युक्तेर्यः खलु सर्वेषामपि देहिनां देहाभिमानिनामेक आत्मा हरिः स एव वस्तुतस्तेषां परः श्रेष्ठः परमप्रेमयोग्य इत्यर्थः। यस्तु नाना पृथक् पृथगात्मा देहाभिमानिवर्गस्तन्मध्ये मूढैरेव पर इव स गृह्यते केषुचित् कैश्चिन्मोहविवर्त्ते प्रेमाभासमयैरेव यथास्वं तत्तद्योग्यतया प्रतीयते मात्रं तत्र दृष्टान्ता यथा रवेरेवालाभे दीपो मर्त्यैः परतया गृह्यते यथा विस्तृतेर्नभस एवालाभे उदुम्बरमशकैस्तदन्तर्गतनभस्तत्तया गृह्यते इति ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

देवीसान्त्वनार्थमेव पुनरपि श्रीकृष्णं प्रत्यतिपरुषमाह—राज्यस्येति। मानस्य पूजायाः, तेजसः कान्तेर्बलस्य वा, अन्यस्य अन्नपानादेः, राज्यादीनामुत्तरोत्तरस्य न्यूनत्वम्; ततश्च किं वक्तव्यम्, राज्यस्य हेतोरिति भूमेर्हेतोरपोत्येवं कैमुतिकन्यायमवतार्य्य व्याख्येयम्। मानिनोऽभिमानवन्तः, तत्रापि श्रीमदेनान्धाः, अतः क्षिपन्ति बन्धुनाक्षिपन्ति हि, यस्मात् श्रीमदान्धा एव क्षिपन्ति, मद्विधानान्तु तादृशत्वाभावादेतदयुक्तमिति भावः। एवं श्रीकृष्णं प्रत्युक्तानां यथोत्तरं पारुष्याधिक्यम्। किञ्च, वध्वाः शोकानपगमेन महाव्यग्रः सन् क्रमेण द्वावेव प्रति पुनः पुनराहेति ज्ञेयम् ॥ ४१ ॥ ईदृशे देव्याः सान्त्वनार्थमवाच्येऽपि श्रीकृष्णं प्रत्युक्ते तस्याः शोकात्यागात्तं त्यक्त्वा तामेव तत्त्वोपदेशेन प्रबोधयन्नादौ सक्रोधमाह—तवेति। तैर्व्याख्यातमेव। यद्वा, भद्रं साधु यथा स्यात्तथा, यत् सुहृदां भद्रं क्षेममिच्छसि। अन्यत् समानम् ॥ ४२ ॥ कश्चित् सुहृत्, कश्चन दुर्हृत् शत्रुः, कोऽप्युदासीन इत्येय आत्मनो मनसः स्वस्य वा मोहः, देवस्येश्वरस्य माययैव कल्पते प्रभवति। कुतः? देहमेवात्मानं मन्तुं शीलमेषामिति। देवमाययेति महामिथ्यात्मम्, तथापि दुर्लङ्घ्यत्वादिकञ्च मोहस्य सूचयति। यद्वा, एष साक्षाद्दृश्यमानो देवमाययात्ममोह एव सुहृदादिरित्येतत् कल्पते रचयति; अन्यत् समानम्। स्वपक्षे दुर्हृदुदासीनयोरुक्तिः प्रसंगात् दृष्टान्ततया वा ॥ ४३ ॥ ननु जगतो वैचित्री साक्षादेव दृश्यते, तया च सुहृदादिर्घटत एव, कथमुच्यते आत्ममोह एव कल्पत इति? सत्यम्, तत्त्वतो जीवानां परमेश्वरांशतया सच्चिदानन्दस्वरूपत्वेनाभिन्नत्वादित्याह—एक इति। सर्व्वेषामेव जरायुजादिभेदेन चतुर्विधानामपि देहिनां विचित्रानन्तदेहं लभमानानाम्, हि यतः, परो देहाद्भिन्नः, अतः देहस्यैव वैचित्री, न त्वात्मन इति भावः। ननु तर्हि शान्तत्वादिना विविधोऽसौ कुतः प्रतीयते? अधिष्ठानस्योपाधेर्देहस्यैव वैचित्र्यादिति सदृष्टान्तमाह—नानेति। इवेति तत्त्वत ऐक्यात्, मूढैस्तत्त्वानभिज्ञैर्देहात्ममानिभिर्वा, ज्योतिष उदकाद्युपाधीनां प्रायोपलसाध्यत्वेन स्वयमेव सदा वर्त्तमानदेहस्यासादृश्यादृष्टान्तान्तरम्, यथा नभ इति ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

क्षिपन्ति निरस्यन्ति ॥ ४१ ॥ सुहृदामाशास्यं भद्रम् असुहृदामपकारिणामपि त्वं मन्यसे आकाङ्क्षसे अतो भूतेषु बुद्धिर्विषमा नैकरूपा मन्यत इति पाठे लोके सुहृदां भद्रं च यन्मन्यते अतो विषमा बुद्धिरित्यर्थः ॥ ३२-४३ ॥ सुहृच्छत्रूदासीनविभागस्याज्ञानकल्पितत्वमुपपादयति। एक एवेति। सर्वेषामपि देहिनां जीवात्मनाम् अन्तरात्मा एक एव परः गूढतयावस्थाने दृष्टान्तमाह। यथा ज्योतिः काष्ठेष्वग्नरिवेत्यर्थः तद्गतदोषास्पर्शे दृष्टान्तमाह—यथा नभ इति। एकस्य परमात्मनो जगच्छरीरभूतमिति एकशरीरभूतपाणिपादादिषु शत्रुमित्रादिविभागोऽनुपपन्नः तथा विमूढैः परमात्मशरीरत्वानभिज्ञैः नानेव शत्रुमित्रादिविभागयुक्तमिव जगद्विज्ञायत इत्यर्थः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पुनः कृष्णं प्रत्याह—राज्यस्येति। श्रीमदेनैश्वर्य्यमदेनान्धाः विवेकरहिताः मानिनो दुरहङ्कारिणो जनाः राज्यादेरन्यस्य वा हेतोः कारणात् राज्याद्यर्थं तेभ्योऽन्यार्थं वेत्यर्थः। क्षिपन्ति हि क्षिपन्ति निरस्यन्ति बन्धूनिति शेषः। अस्माकं त्वेतदनुचितमिति भावः। तत्र मानस्य वयमेव वीरा इत्यभिमानस्य तेजसः पराभिभवनसामर्थ्यस्य ॥ ४१ ॥ सान्त्विताममपि विषण्णामेव तामालक्ष्यान्तरेण तत्त्वोपदेशमस्या विषादो न शाम्यतीति मत्वा तत्त्वमुपदिदिक्षुस्तावद्देहानुबन्धिषु सौहार्दस्य तदभद्रत्वप्रयुक्तचित्तविकारस्य चाज्ञानप्रयुक्तत्वमाह—तवेति द्वाभ्याम्। अज्ञवत् देहात्मस्वतन्त्राभिमानिवत् सदा सुहृदां भद्रं दुर्हृदामहितानामभद्रं च मन्यस इति यत् तवेयं बुद्धिः सर्वेषु भूतेषु विषयभूतेषु विषमा समा एकरूपा न भवतीत्यर्थः ॥ ४२ ॥ कुत इत्यत आह—

आत्ममोह इति। नृणामेष आत्ममोहो बुद्धिमोहो भगवन्मायया अनात्मन्यात्मबुद्धिमस्वतन्त्रे स्वातन्त्र्यबुद्धिं च कल्पयन्त्या कल्पितः कोऽसौ यो देहात्मवादिनां सुहृदित्यादिरूपः ॥ ४३ ॥ सुहृदादिविभागस्याज्ञानकल्पितत्वमेवोपपादयति । एक एवेति। सर्वेषामपि देहिनां जीवात्मनामात्मान्तरात्मा एक एव परः गूढतया अवस्थाने दृष्टान्तमाह–यथा ज्योतिरिति । यथा ज्योतिरग्निः काष्ठे मूढतयावतिष्ठते तथा परमात्मापीत्यर्थः। अवस्थितस्यापि परस्य तत्तद्वस्तुगतदोषास्पर्शे दृष्टान्तमाह—यथा नभ इति। यथा सर्वत्र व्याप्नुवत आकाशस्य न व्याप्यगतदोषस्पर्शस्तथेत्यर्थः एवं स्थिते एकस्य परमात्मनः कृत्स्नं जगच्छरीरभूतमित्येकशरीरभूतपाणिपादादिषु शत्रुमित्रादिविभागोऽनुपपन्नः मूढैः परमात्मशरीरत्वानभिज्ञैस्तु नानेव शत्रुमित्रादिविभागयुक्तमिव जगद्विज्ञायत इत्यर्थः ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ननु तर्हि सर्वः सर्वं हन्यादित्यतिप्रसङ्ग इत्यत्राह—राज्यस्येति। मानिनः देहाभिमानवन्तः अन्यस्य स्वजनस्य वा क्षिपन्ति घ्नन्ति राज्यादेः सर्वस्य हेतोरिति सम्बन्धः ॥ ४१-४२ ॥ किमत इत्यतः स्वस्य श्रीहर्यधीनत्वकल्पनामन्तरेण स्वकपोलकल्पनाबुद्धिर्भ्रम एवेत्याह—आत्मेति। देह एवात्मेति मानं ज्ञानं येषां ते तथा तेषां नृणां निरपेक्षत्वेनोपकर्त्ता सुहृत् स्वसुखनाशकर्त्ता शत्रुस्तदुभयकर्तृत्वशून्य उदासीन इत्येष आत्ममोहो मनोभ्रमः देवस्य हरेर्मायया बन्धकशक्त्या कल्प्यते ततः सुहृच्छत्रूभयोरितर उदासीन इति स्वकपोलकल्पना इत्याद्येति भावः ॥ ४३ ॥ देवः कीदृश इति तत्स्वरूपमाह—एक एवेति। आत्मा परः परमात्मा नियामक इति शेषः। नन्वेकत्वे "सच्च त्यच्चाभव"दिति नानाभावः कथमिति तत्राह। नानेति ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

देहिनां जीवानां एकः मिथस्तुल्यस्वरूपः चिद्रूपत्वात् असतामात्मनीत्यर्थात् तत्स्पर्शासमर्थेनेत्यर्थः तत्र हेतुः तस्यान्यस्य प्रसिद्धेः शक्तेस्तद्हेतुत्वात् चिद्रूपात्मकहेतुत्वात् ॥ ४४-४५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

ननु क्षत्रियो वन्धुः हन्तुं वरं किन्तु तं वीभत्सितवैरूप्यवन्तं कर्तुं नार्हतीति देव्याः स्वगतोक्तिमालक्ष्य तां प्रसादयितुं कृष्णमाह। राज्यस्येति। राज्यादेर्हेतोर्मानिनोऽहङ्कारवन्त एवान्यानाक्षिपन्ति अस्माकं त्वेतदनुचितमिति भावः ॥४१॥ नीतिरियं युद्धादन्यत्रैव युद्धे तु वैरी पराजित्य तिरस्क्रियत एवेतीयमपि नीतिरिति कृष्णस्य स्वगतोक्तिमालक्ष्य देवीं प्रत्याह तवेयमिति। सुहृदां स्वबन्धूनां रुक्मिप्रभृतीनां भद्रमेव कृष्णकृतं मुण्डनं यत् सद अभद्रं मन्यसे इयं तव विषमा बुद्धिः अज्ञवत् अज्ञानामिव तव विज्ञाया अपीत्यर्थः। कीदृशानां सर्वभूतेषु दुर्हृदां दुष्टमनसाम् ॥ ४२ ॥ जानाम्येवेदं यदयं भ्राता मे दुष्ट एव तदप्यत्र बन्धुभावो नापयाति किङ्करोमीति चेत् सत्यमप्राकृत्या भवत्या एवायमविवेकोऽनुचित इत्युच्यते सांसारिकलोकानां त्वयं स्वाभाविक एव धर्म इत्याह। आत्मेति। देहात्ममानिनां देह एवात्मेति मन्यमानानां देहात्ममानिनामेव नृणां नतु ज्ञानिनाम् ॥ ४३ ॥ देहात्ममानिनां मतं द्वाभ्यां खण्डयन् प्रथमं देहः परमात्मा न भवतीत्याह। एक इति। पर आत्मा देहिनां देहवतां जीवानां हि निश्चितमेक एव प्रेरको भवति एकस्यैवाधिष्ठानबाहुल्ये सति नानात्वे दृष्टान्तौ ज्योतिरग्निर्दारुषु नभ आकाशं घटेषु यदुक्तम् प्रथमे—

यथा ह्यवहितो वन्हिर्दारुष्वेकः स्वयोनिषु। नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥ इति ॥ ४४ ॥

गूढार्थदीपिनी

मानिनोऽहङ्कारिणः जना राज्यादिहेतोरन्यस्य हेतोर्निमितात् क्षिपन्ति तिरस्कुर्वन्ति बन्धूनिति शेषः। वयं तु न तथा अतोऽनुचितमेतत् ॥ ४१ ॥ सर्वभूतेषु दुर्हृदः शिशुपालादयस्तेषाभद्रं यत् रुक्मिप्रभृतयः सुहृदस्तेषां भद्रं च अज्ञवत् यन्मन्यसे इच्छसि इयं तव बुद्धिर्विषमा प्रातिकूला ॥ ४२ ॥ आत्मनो बुद्धेः मोहः। देह एवात्मेत्यभिमानवताम् ॥ ४३ ॥ ज्योतिश्चन्द्रादिकं यथा जलादिषु। अग्नि यथा काष्ठेषु। नभो यथा घटादिषु तद्वत् ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुनः श्रीकृष्णं प्रत्याह। राज्यस्येति। मानिनोऽहङ्कारिणः श्रीमदेनान्धाः लुप्तविवेकाः राज्यादेर्हेतोः राज्यार्थं तथा भूम्यर्थं तथा वित्तार्थं तथा स्त्र्यर्थं मानार्थं तेजः क्रोधस्तच्छान्त्यर्थम् अन्यः शरणागतादिस्तदर्थं च क्षिपन्ति निरस्यन्ति वयन्तु न मानिनः न श्रीमदान्धाः किन्तु स्वभक्तमनोरथसाधका इति भावः ॥ ४१ ॥ सर्वभूतेषु चेतनाचेतनेषु एकात्मकेषु मध्ये शिशुपालादयो दुर्हृदस्तेषामभद्रं भवतु इत्येवं दुर्हृदामभद्रं रुक्मिप्रभृतयः सुहृदस्तेषां भद्रं भवतु इत्येवं सुहृदां भद्रं च यदज्ञवत् मन्यसे इच्छसि इतीयं बुद्धिः सुज्ञायाः भगवत्याः तव विषमा अननुरूपेत्यर्थः ॥ ४२ ॥ सुहृद्दुर्हृदुदासीन इति आत्ममोहा बुद्धिमोहो देह

एवात्मा इत्येवं मानिनामज्ञानां देवस्य तव भर्तुर्मायया प्रकृत्या कल्प्यते योग्यो भवति ननु तवेति भावः ॥ ४३ ॥ कीदृशो देवः कीदृशी च तस्य माया कीदृशो देहो यत्र जीवानामात्मबुद्धिः कीदृशा जीवाः कश्च जीवदेहयोः संयोगवियोगहेतुरित्याकाङ्क्षायां देवादिकं वर्णयति । एक इत्यादित्रिभिः । सर्वेषां देहिनां जीवानामात्मा अन्तर्यामी नियन्ता तत्कर्मादिसाक्षी कर्मादिफलदः एक एव नानेव गृह्यते जीवानां मध्ये कश्चिच्छ्रेष्ठो जीव एव स किं नेत्याह-परः सर्वजीवविलक्षणः तथा च श्रुतिः "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामा" निति तत्तदन्तर्यामित्वेनेकस्यैव नानात्वमिव दर्शयन् सर्वप्रकाशकत्वं सर्वदोषास्पृष्टत्वं च दृष्टान्ताभ्यामुपपादयति । यथा ज्योतिरग्निः काष्ठादिषु यथा च नभो घटमठादिषु नानेव गृह्यते तद्वदित्यन्वयः ॥४४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे कृष्ण । त्वयेदं कृतमसाधु । तत्किमित्यत आह । श्मश्रुकेशानां वपनमितीदमस्मज्जुगुप्सितमस्माकं निन्दितमिदं वैरूप्यम् । सुहृद इत्यावृत्तषष्ठ्यन्तं प्रथमाबहुवचनं च ! सुहृदः स्वकीयस्य वधं सुहृदो वदन्तीति शेषः । कृष्णस्तु लोके लोकाः । इदं मया नानुष्ठितं चेन्नेयानि श्मश्रूणि किन्तु त्वत्प्रदर्शनीयस्थानान्तरसन्निवेशकेशास्तथा मदुक्तं न सम्पन्नं चेच्छिरो मुण्डयेति वदन्तीत्ययमपि सम्प्रति प्रतिश्रवेणायातो नोपायतस्तत्पारमिति तल्लोमतुलतां दर्शयेस्तेषां स्वयं मुण्डयन्नर्म कर्म च प्राहूणिके विहितं विश्वकर्तुर्नेदं दूषणमिति ततानानया धाट्येति नाचतुर इति । बलोऽप्यग्रज इत्येवमन्वशासदिति च ज्ञेयम् । सुहृदो वध इति पाठः सरसः ॥ ४१ ॥ हे साध्वि । भ्रातुर्वैरूप्यचिन्तयाऽस्मानेवं कृतवतोऽसूयेथाः । यतः पुमान्स्वकृते भुङ्क्त इति स तथा । ततः सुखदुःखदोऽन्यो न चास्ति । सु अकृतं नित्यमानन्दादिकं स्वकृतं स्वनिर्मितमेव भुङ्क्त इति स तथा । पुमान्पूर्णपुरुषो यस्मात्सुखदुःखदोऽन्यो न चास्ति स्वतन्त्रस्तस्य न कश्चित्प्रतिभेद इति भावः ॥ ४२ ॥ अय्यनार्य न कार्यः किल बन्धुवध इत्यतः सामान्यन्यायं क्षत्रियाणामिति विशेष्य वक्ति कैश्चिच्छ्लोकैः । वधार्हो वधयोग्यो दोषो यस्य स तादृशोऽपि बन्धुर्वधं नार्हति । तर्हि कार्यं तद्विषय इत्यत आह । त्याज्यः । कुतो धातो न कर्तव्य इत्यत आह ॥ स्वेनैवेति । स्वदोषेणैव स हतश्चेदपि किमित्यत इत इत्याह । हतः किं पुनर्हन्यते मृतमारणप्रसक्तेरिति भाव इति । न बन्धुर्बन्धुरेव न भवति । हे स्वे । नैव वधमर्हति । दोषेण हत इत्यन्वयसूचनार्थं पुनर्बन्धुरित्युक्तिः । अत एव बन्धुर्मम भ्राता कृष्णो हतः किं पुनर्हन्यत इति त्याज्यत्वमेव निरीक्ष्य तव भ्रातरमातुरं त्यक्तवानिति सूचनार्थं वा । बन्धुबन्धूकपुष्पे स्याद्बन्धुभ्रातरि वान्धव इति बिश्वः ॥ ४३ ॥ प्रजापतिना ब्रह्मणा विनिर्मितः क्षत्रियाणां धर्मा व्यंसक इत्यत आह ॥ भ्राताऽपीति । भ्रातरं एवं हन्याद्येनैतादृशकर्मणा घोरतरः क्षत्रियस्तत इति येन धर्मेण स धर्मस्ततो घोरतर इति वा । ततो ये घोरतरतमास्तेन सन्तीत्यन्वयो वा । घोरं यत्तरो वलं तेन ततः स इत्यैकपद्यं वा । तरो वले च वेगे चेति विश्वः ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु सत्यं यदि युद्धमेव कुर्यात्, तदा अशस्त्रं विरथं कृत्वा तं शत्रुस्त्यजेत्, अयं त्वसभ्यं बहु वदतीति मुखरत्वान्मारणीय एवेति चेत्, तत्राह **राज्यस्ये**ति । तेषामसभ्यवचनमपि प्रजापतिविनिर्मितमेव । तत्र साधारण्येन षट् हेतून् निर्दिशति । राज्यं चेत्कस्यचित्केनचिद्धृतं तदा स क्षत्रियः । अन्यथायं न मारयिष्यतीति । राज्ये च गते केवलं जीवनमयुक्तमिति मरणार्थं शत्रून् क्षिपन्ति । श्रीमदान्धा अपि क्षिपन्ति । पूर्वं श्रिया जातो यो मदः तेन अन्धाः विवेकरहिताः, अतः क्षेपो युक्त एव । एवं भूमेः राज्यैकदेशस्य वा । वित्तस्य धनस्य । स्त्रियोर्थे मानस्य वार्थे तेजसो वार्थे । एवं षण्णामर्थे क्षिपन्ति । तत्रापि ये मानिनः । अनुक्तसर्वहेतुसमुच्चयार्थमाह **अन्यस्य वा हेतो**रिति । युक्तश्चायमर्थः । अतोऽस्य क्षेपोऽपि युक्त एवेति न हननमुचितमिति भावः ॥४१॥ ननु न हत एव मयाप्ययम्, किमित्युपालम्भः क्रियत इति चेत्, तत्राह **तवेयं** विषमा **बुद्धि**रिति । अयं न हत इति या बुद्धिः, सा तव विषमा, न समा । यदि नापकृतः स्यात्, तदा समा स्यात् । यदि वा वधं कुर्याः, तथापि लोकन्यायेन समा स्यात् । यत्तु सुहृदां भद्रमभद्रं मन्यसे, तत्राप्यक्षयं तदभद्रं न दिनमात्रेणापगच्छति, किन्तु यावज्जीवं तिष्ठति । नन्वस्त्येव लोके विषमा बुद्धिः, को दोष इति चेत्, तत्राह । सर्वभूतेषु दुर्हृदामेव विषमा बुद्धिर्भवति, न तु तव, न वा सुहृदाम् । येषां हि चित्ते कापट्यम्, तेषामेते प्रकाराः, नतु शुद्धचित्तानामित्यर्थः । सर्वभूतेषु वा मध्ये दुर्हृदामभद्रं मन्यस इति । असुरद्विडिति वाक्यात् । दुर्हृदां वा सर्वभूतेषु लोमादिष्ववयवेषु अभद्रं मन्यस इति । भद्रं क्षौरं वा विपरीतलक्षणया अभद्रमेव । भूतानां मध्ये दुर्हृदां भद्रम्, सुहृदामभद्रम्, एतादृशमपि मुण्डनम्, तत्राप्यक्षयं त्वं मन्यस इति तव विषमा बुद्धिः । अथवा । दुर्हृदामभद्रं सुहृदां भद्रं सदा मन्यस इति । एतत्तव ब्रह्मणः अयुक्तम्, विषमा बुद्धिरित्यर्थः ॥४२॥ एवं चतुर्भिः तत्सन्तोषार्थं भगवदुपालम्भनमुक्त्वा, तावताप्यपरितुष्यमाणां ज्ञानेन बोधयति **आत्ममोह** इति सप्तभिः । भगवान् सधर्मोऽस्या बोधं कर्तुं शक्त इति ।

स्वरूपाज्ञाननानात्वे देहादीनां च शत्रुता । दोषत्रयं निरूप्यादो आत्मधर्मनिरूपणम् ॥ १ ॥
स्वप्रकाशोऽयमात्मा हि असङ्गश्च निरूप्यते । जन्मादिदोषास्त्वन्यस्य अतस्तैर्नैव दुष्यति ॥ २ ॥
असंसर्गाग्रहो भ्रान्तः दृष्टान्तैर्विनिरूप्यते । ततोपसंहृतिर्युक्ता ज्ञानेनाज्ञाननुत्तये ॥ ३ ॥

'तरति शोकमात्मवि'दिति श्रुतेः शोकतरणं ज्ञानेनैव भवतीति ज्ञानमुपदिशति। अत्र ज्ञानं देहाद्व्यतिरिक्तात्मज्ञानम्, तावतैव देहाद्यध्यासे जातो मोहः अपगच्छति। ततस्तन्निराकरणार्थं तत्सामग्रीं प्रतिपादयति **आत्ममोह** इति। आत्मनोऽयं मोहः। अज्ञानानन्तरं **दो**षे आविर्भूते या मूर्च्छा स मोह इति व्यवह्रियते। तथात्रापि आत्मनः अज्ञाने शरीराहंभावे च प्रादुर्भूते सुहृद्दुर्हृदित्यादिबुद्धिर्बोधमपि न विषयीकरोतीति मोहो भवति। स च पश्वादिषु तथा नास्तीति **नृणा**मित्युक्तम्। देवादीनां तथात्वेऽपि व्यवहाराभावान्नोक्तम्। **एष** इति प्रदर्शनम्। देवस्य भगवतो माययेति मोहकारणं माया निरूपिता। अन्यथा प्रत्यक्षादिषु श्रुत्यादिषु च प्रमाणेषु विद्यमानेषु प्रत्यहमेतस्य वृद्धिर्न स्यात्। देवानां माया नृणां दुस्तरा भवतीति, यथा नृणां माया पशूनाम्। अतो देवपदम्। सुतरामेव पुरुषोत्तममाया सर्वेषामेव दुस्तरा। मायायास्त्रिगुणत्वात् मोहेऽपि त्रिगुणतामाह **सुहृद्दुर्हृदुदासीन** इति। उदासीनः सात्त्विकः, सुहृद्राजसः। मायया यदा मोहः, तदा सर्वत्र चेन्निर्निमित्तं व्यर्थमेव ज्ञानं स्यादिति निमित्त एवैतदित्याह **इति देहात्ममानिना**मिति। अमुना प्रकारेण देहमेवात्मानं मन्यन्ते, यदा मायया अन्येन वा देहात्मबुद्धिर्दृढा भवति, तदैते दोषाः सम्भवन्ति। ततस्तेषामुपकारापकाराभ्यां इदानीमनुभूयमानो मोहः प्रादुर्भवतीति देहात्मभावो मुख्यतया निवार्य इत्यर्थः ॥ ४३ ॥ ननु देहात्मभावाभावेऽपि कथमेतद्घटते। यावता परिच्छिन्न आत्मेति करणत्वेनापि स्वीक्रियमाणे देहे उदासीनादिभेदा भवन्त्येव। अतो देहव्यतिरिक्तात्मज्ञानं व्यर्थमिति चेत्, तत्राह **एक एवे**ति। सर्वेषु देहेषु आत्मा एक एव, यतः परो नियन्ता, अन्यथा देहेन परिच्छिन्नः देहाधीनः स्यात्। अनुभूयते च देहे स्वातन्त्र्यम्, देहान्तरे स्वातन्त्र्याभावस्तु तत्रानुसन्धानाभावात्। एवमखण्डाद्वैतमाने सर्वत्रात्मबुद्धिः। अथवा। आत्मशब्देन भगवानुच्यते। तदाभासा एव जीवा इति पर एक एव। एतद्भगवति विद्यमाने विरूपणमसमञ्जसमिति विरम्यते। युक्तश्चायमर्थः। सर्वदेहेष्वेक एवात्मेति। यतोऽयमात्मा। अतति व्याप्नोतीति। अन्यथा आत्मत्वं भज्येत। अणुपरिमाणत्वे देहमपि न व्याप्येत। प्रकाशवत् गुणव्याप्तावपि चैतन्यलक्षणस्य गुणस्य सङ्कोचविकासावङ्गीकर्तव्यौ। तत्रापि नियामको देह एवेति धर्मिण एव नियामकोऽस्तु, किं धर्मनियामकत्वस्वीकारेण। यथेदं जगत् ब्रह्माण्डेनैकतामापद्यते, अन्यथा तस्यैकत्वनिर्देशो न स्यात्, तथा आत्मनिर्देशोऽपि। यथैकमेव सुवर्णं मृद्वा नानाप्रकारेण कृतिसमवेतं सद्भासते, एवमात्मापि देहादिवैलक्षण्यात् देवतिर्यङ्मनुष्यादिभावमापद्यत इति न कोऽपि दोषः। **सर्वेषामपि देहिना**मिति। यतः सर्वेऽपि देहिनः, 'दिह उपचय' इति उपचयादिमन्तः। अतो वृद्धिह्रासावात्मनः परिच्छेदेनोपपद्येत इति व्यापकत्वे अङ्गीक्रियमाणे एकेनैव चरितार्थतेति नानात्वं व्यर्थम्। 'नानात्मानो व्यवस्थात' इति स्मृतिस्तु धर्ममर्यादार्थं नानात्मत्वं स्वीकर्तव्यमिति दोषगुणव्यवस्थया इव व्यवस्थानिरूपिका। यथा पञ्चमहाभूतानि। एकश्चात्मा सर्वसङ्घातेषु तुल्यः, तथापि कश्चिच्चाण्डालः, कश्चिद्ब्राह्मण इति धर्मव्यवहारार्थमेव विभागः कल्पितः। सामग्र्यामधर्मो धर्मो वा प्रविष्टः तथा सम्पादयतीत्यपि पक्षे धर्माधर्मयोरेव नियामकं वाक्यादतिरिक्तं विषये नास्तीति व्यवस्थार्थमेव तत्कल्पना वक्तुं युक्ता। उत्क्रमादयस्तु न्यायमतेऽपि न सन्ति। भगवन्मते तु भगवत इव तस्यापि गमनागमने संभविष्यतः। तत्रापीश्वरपदप्रयोगात्। 'शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वर' इति वाक्याद्ब्रह्मवादेऽप्ययमेव सिद्धान्तः। तस्मात्सर्वत्रैक एवात्मेति युक्तम्। तर्हि कथं भेदप्रतीतिरिति चेत्, तत्राह **नानेव गृह्यते मूढै**रिति। अत्यन्ताकुशलैर्नाना गृह्यते। तैरपि क्वचिन्नानात्वं नानुभूयते, पुत्रादिषु अवयवेषु च वैलक्षण्ये भासमानेऽपि। अन्यथैको देह इति न स्यात्। अत उक्तमिवेति। तत्र स्पष्टप्रतीत्यर्थं साकारनिराकारौ दृष्टान्तयति। **यथा ज्योति**रिति साकारे। **यथा नभ** इति निराकारे। तार्णः पार्णः। घटाकाशो मठाकाश इति ॥ ४४ ॥

श्रीसुबोधिनी–सारः

कृष्णं प्रत्याह। राज्यभूमिधनस्त्रीमानतेजसोऽन्यस्य वा हेतोर्मानिनो धनमदांधाः क्षिपंति घातयन्ति परान् घ्नंति स्वान् प्राणानिति पामराः हि युक्तम् ॥ ४१ ॥ सर्वभूतेषु तव इयं बुद्धिर्विषमा न समीचीनास्ति। केत्यत आह। सुहृदां मित्राणां बन्धूनां च भद्रं कल्याणं दुर्हृदां शत्रूणां सदाऽभद्रं दुःखमित्यज्ञवत् त्वं मन्यसे इति यत् ॥ ४२ ॥ एष आत्ममोहश्चित्ताज्ञानं देवस्य मायया देहात्ममानिनां नृणां कल्पते कोऽसौ इत्यत आह। सुहृदयं दुर्हृदयमुदासीनोऽयमिति ॥ ४३ ॥ सर्वेषामपि प्राणिनामेक एव परः शुद्ध आत्मा हि मूढैर्नाना इव गृह्यते। ज्योतिः सूर्यादिरिव जलपात्रेषु नभः खं घटमठादिषु इव ॥ ४४ ॥

विवरण टिप्पणी

आत्ममोह इत्यत्र। **बोधम**पीति। बोधयतीति बोधः। कर्तरि पचाद्यच्। बोधकं वाक्यमित्यर्थः। **एक एवे**त्यत्र। व्यापकजीववादः स्मार्तः सोऽत्रोक्तः। औपनिषदोऽणुजीववादोऽसुरस्य रुक्मिणः शृण्वतो वक्तुमनुचितः। अत एव कर्ममार्गो बोधित इति पूर्वमुक्तम्। अतः पूर्वमीमांसासिद्धो व्यापकजीववादो बोध्यते। अविरोधस्तु चित्समष्टिरूपो जीवो व्यापक एक एव। व्यष्टिरूपास्त्वनेकेऽणवश्चेति। **ब्रह्मवादेप्ययमेवे**ति। स्मार्तब्रह्मवादे इत्यर्थः। **पुत्रादिष्वि**ति। यथा पुत्रादिषु, तथाऽवयवेष्वपि दीर्घह्रस्वादिवैलक्षण्यमस्तीत्यर्थः। **अन्यथे**ति। अवयवेष्वात्मभेदे इत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पुनः कृष्णं प्रत्याह—राज्यस्येति । हि यस्मात् श्रीमदेनान्धाः विवेकरहिता अत एव देहाद्यात्माभिमानिनो जना एव राज्यादीनामन्यस्य वा हेतोः निमित्तात् बन्धून् क्षिपन्ति तिरस्कुर्वन्ति। तस्मादस्माकमेतदनुचितमेवेति शेषः । मानस्य लोककर्तृकसन्मानस्य तेजसः स्वप्रभावख्यापनार्थम् ॥ ४१ ॥ पुनः श्रीकृष्णमेवाक्षिपति—तवेति । सर्वभूतेषु दुर्हृदां दुरभिप्रायाणां स्वसुहृदां स्वसम्बन्धिनां रुक्म्यादीनां अभद्रं मुण्डनादिना वैरूप्यं अज्ञानामिव यत्त्वं सदा भद्रं इष्टं मन्यसे, इयं तव बुद्धिर्विषमेत्यन्वयः ॥ ४२ ॥ एवं श्रीकृष्णे उपालब्धेऽपि रुक्मिण्याः शोकनिवृत्तिमदृष्ट्वा 'तरति शोकमात्मवित्त्वं' इति श्रुतेस्तच्छोकनिवृत्त्यर्थमात्मतत्त्वं निरूपयति—आममोह इति । देहात्ममानिनां देह एव आत्मेत्यभिमानवतां नृणां प्राणिनां सुहृत् दुर्हृत् उदासीन इत्येष आत्मनो बुद्धेर्मोह एव देवस्य भगवतो मायया कल्प्यते इत्यन्वयः ॥ ४३ ॥ उक्तं मोहमेव स्पष्टयति—एक एवेति । सर्वेषामपि देहिनामेक एवात्मा मूढैर्जनैर्नानेव गृह्यते । देहादभिन्नत्वात् तदभेदं प्रकल्प्यात्मापि शत्रुमित्रोदासीनतया व्यवह्नियते इत्यर्थः । हि यस्मात् आत्मा परो देहादेर्भिन्न एव । एकस्यैव नानाव्यवहारे दृष्टान्तद्वयमाह—ज्योतिः चन्द्रादि यथोदकभेदेन, नभो यथा घटमठादिभेदेन भिन्नतया व्यवह्नियते तथेति ॥ ४४ ॥

अन्वितार्थप्रकाशिका

पुनः कृष्णमाह—राज्यस्येति । हि यस्मात् श्रीमदेनान्धा विवेकरहिताः अभिमानिनो जना एव राज्यादीनामन्यस्य वा हेतोः निमित्तात् बन्धून् क्षिपन्ति तिरस्कुर्वन्ति तस्मादस्माकमेतदनुचितमेव ॥ ४१ ॥ पुनर्देवीमाह—तवेति । सर्वभूतेषु दुर्हृदामहितानामपि स्वसुहृदां भद्रमेव दण्डनरूपं मुण्डनमभद्रं यन्मन्यसे तवेयं बुद्धिः विषमा असमीचीना । यद्वा । सर्वभूतेषु दुर्हृदामपि भ्रातृणामज्ञवद्यद्भद्रं मन्यसे इच्छसि इयं तव विषमा बुद्धिः । यतस्तदेव सुहृदामभद्रमिति । यद्वा । यत् सर्वभूतेषु मध्ये दुर्हृदां शत्रूणां सदा अभद्रं मन्यसे इच्छसि सुहृदां च भद्रमिच्छसि सेयम् अज्ञवत् अज्ञानामिव तव विषमा बुद्धिः । यद्वा । सर्वभूतेषु मध्ये दुर्हृत्त्वेन प्रतीतानां केषांचिद्यदभद्रमिच्छति सुहृत्त्वेन प्रतीतानां च भद्रमिच्छसि परिशेषादन्येष्वौदासीन्यं कुरुषे सेयं तव विषमा बुद्धिः ॥ ४२ ॥ तत्र हेतुः—आत्मेति । देह एवात्मेति अभिमानवतां नृणां प्राणिनां सुहृत् उदासीन इत्येव आत्मनो बुद्धेर्मोह एव । देवस्य भगवतो मायया कल्प्यते ॥ ४३ ॥ एक इति । हि निश्चितं परो देहादेर्भिन्नः शुद्धो वा सर्वेषामपि देहिनामेक एवात्मा मूढैर्देहादिभेदेन नानेव गृह्यते । यथा ज्योतिश्चन्द्रादिरुदकपात्रभेदेन यदा वा नभो घटमठादिभेदेन भिन्नतया व्यवह्नियते तथा प्रतिबिम्बावच्छेदपक्षद्वयानुरोधेन दृष्टान्तद्वयम् ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हरिं प्रति पुनराह राज्यस्येति राज्यादेर्हेतोर्मानिनोजनाः अन्यान् क्षिपन्ति एतदस्माकमघटितमिति भावः ॥ ४१ ॥ पुनरपि वैदर्भी प्रत्याह तवेति । अज्ञवत्तव सर्वभूतेषु चेतनजात्याकारस्वरूपस्वभावैः समेषु सर्वक्षेत्रज्ञेषु इयं विषमा बुद्धिः यया विषमबुद्ध्यादुर्हृदां देहशत्रूणामभद्रं सुहृदां देहसंबंधिनां भद्रं मन्यसे इच्छसि एतत् हरिजनेत्वप्यघटितमिति भावः ॥ ४२ ॥ आत्मनिमोहः सुहृदादिरूपः देहे आत्मा स्वयमितिमानः अस्ति येषान्तेषां ॥ ४३ ॥ एवं देहाभिमाने दोषमुक्त्वा सांप्रतं देहं संसारहेतुतया निरूपयति देह इति ॥ द्रव्यं पंचभूतसंघातः प्राणाः इंद्रियं कलापः गुणाः शब्दादि विषयाः ॥ सत्वादयोवातदात्मको देहः अविद्यया अविद्याजनितप्रारब्धादि कर्मणा आत्मनि जीवात्मनि क्लृप्तः कृतः सन् ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पुनश्च श्रीकृष्णं प्रत्याह । राज्यस्येति । श्रीमदेनैश्वर्यमदेनान्धा विवेकरहिताः, मानिनो दुरहंकारिणो जनाः, राज्यस्य राज्यप्राप्तेर्हेतोः, भूमेर्भूमिप्राप्तेर्हेतोः, वित्तस्य धनप्राप्तेः हेतोः, स्त्रियोऽङ्गनाप्राप्तेर्हेतोः, मानस्य मानप्राप्तेर्हेतोः, तेजसस्तेजः प्राप्तेर्वा हेतोः, अन्यस्य हेतोर्वा, क्षिपन्ति निरस्यन्ति तिरस्कुर्वन्तीत्यर्थः । बन्धूनिति शेषः । हि अस्माकमेतदनुचितमिति भावः । तत्र मानस्य वयमेव वीरा इत्यभिमानस्य, तेजसः पराभिभवनसामर्थ्यस्य ॥ ४१ ॥ सान्त्वितामपि विषण्णामेव तामालक्ष्य तत्त्वोपदेशमन्तरेणास्या विषादो न शाम्यतीति मत्वा तत्त्वमुपदिदिक्षुस्तावद्देहानुबन्धिषु सौहार्दस्य तदभद्रप्रयुक्तचित्तविकारस्य च अज्ञानप्रयुक्तत्वमाह तवेति द्वाभ्याम् । तवेति । अज्ञवत् देहाभिमानिस्वतन्त्रताभिमानिवदित्यर्थः । सदा, सुहृदां, भद्रं दुर्हृदां अभद्रं, च मन्यसे इति यत्, एवंविधेयं तव, बुद्धिः सर्वभूतेषु विषयभूतेषु, विषमा असमा एकरूपा न भवतीत्यर्थः । त्वादृशीनां सर्वभूतेषु विषमबुद्धिकर्तृत्वस्यायुक्तत्वादिति भावः । यद्वा, सर्वभूतेषु, दुर्हृदां सर्वभूतशत्रुतोपेतानां भ्रातृणां, अज्ञवत् यत्, भद्रं मङ्गलं, मन्यसे इच्छसि, इयं तव बुद्धिः, विषमा असमीचीना, कुतः । यतः, तदेव सुहृदां अभद्रम् ॥ ४२ ॥ कुत इत्यत आह । आत्ममोह इति । देहात्ममानिनां, नृणां अयं, मम सुहृत्, अयं मम, दुर्हृद्, अयं उदासीनः, इत्येवंरूपः एषः, आत्ममोहो बुद्धिमोहः, देवमायया भगवन्मायया, कल्प्यते । भगवन्मायाऽनात्मन्यात्मबुद्धिं अस्वातन्त्र्ये स्वातन्त्र्यबुद्धिं च कल्पयतीत्यर्थः ॥ ४३ ॥

सुहृदादिविभागस्याज्ञानकल्पितत्वमेवोपपादयति। एक एवेति। सर्वेषां अपि, देहिनां जीवात्मनां, आत्माऽन्तरात्मा, एकः एव, परो गूढतया तेष्ववस्थितश्च भवति हि। गूढतयाऽवस्थाने दृष्टान्तमाह। ज्योतिरग्निः, यथा काष्ठेष्वग्निर्यथा गूढतयाऽवतिष्ठते तथा परमात्मापीत्यर्थः। एवं जीवेष्वन्तरात्मतयाऽवस्थितस्यापि परस्य तत्त्वतस्तद्गतदोषास्पर्शे दृष्टान्तमाह। यथा नभः आकाशः, यथा सर्वत्र व्याप्नुवत आकाशस्य व्याप्यगतदोषास्पर्शस्तथा परमात्मनोऽपि व्याप्यगतदोषास्पर्शित्वमित्यर्थः। एव स्थिते एकस्य परमात्मनः कृत्स्नं जगच्छरीरभूतमित्येकशरीरभूतेषु पाणिपादादिषु शत्रुमित्रादिविभागोऽनुपपन्न इत्यर्थः। मूढैः जगतः परमात्मशरीरत्वानभिज्ञैस्तु, नाना इव, गृह्यते। शत्रुमित्रादिविभागयुक्तमिव जगद्विज्ञायते इत्यर्थ ॥ ४४ ॥

कृष्णप्रिया

अब श्री दाऊजी श्रीकृष्णजी को कह रहे हैं—भैयाजू कृष्ण! यह तो सर्व साधारण बात है कि जो लोग ऐश्वर्य-सता आदि के नशे में अंधे बन गये हैं—वैसे अभिमानी क्षुद्रजन राज्य-भूमि-द्रव्य-द्वारा स्वमान-तेजस-और अन्य भी वस्तुओं के कारण से अपने बन्धुओं का भी तिरस्कार कर दिया करते हैं लेकिन आप तो सर्व से पर हैं और नियामक होते हुए दयालु हैं ॥ ४१ ॥ पुनः भगवान् श्रीकृष्ण को कहते हैं कि—आप तो सम दृष्टि हो कृष्ण! सर्वभूतों में आपकी तो समदृष्टि ही है। दण्ड जो किया जाता है वह भी उनके मङ्गल के लिये ही है। अपराधियों के लिये जो दण्ड विधान है वह उन पर द्वेष और वैर भाव से नहीं होता लेकिन उनकी शुद्धि के लिये औषध की तरह होते हैं। सुहृदयों के लिये भद्र किया जाता है वह पक्षपात नहीं लेकिन उनके संरक्षण के लिये ही है ॥ ४२ ॥ हे साध्वी रुक्मिणी जी! जो अविद्याधीन है और भगवान की माया से मोहित हैं वह देह को ही आत्मा मान रहे हैं। उन्हीं अज्ञानियों को ऐसा आत्ममोह होता है कि यह स्वजन और यह शत्रुजन है और यह तटस्थ उदासीन है। आप स्वयं पराशक्ति एवं पराविद्या है इसलिये आप को यह भ्रम नहीं होगा ॥ ४३ ॥ देवीजी! समस्त शरीर धारियों की आत्मा एक ही है और कार्य-कारण से एवं माया से कोई सम्बन्ध नहीं है। जल एवं घटादि की उपाधियों के भेद से जैसे सूर्य-चन्द्र प्रकाशयुक्त पदार्थ भिन्न-भिन्न दिख पड़ते हैं किन्तु है एक ही तेज प्रकाश तत्व है। उसी तरह अज्ञजन शरीर के भेद से आत्मा को भिन्न मानते हैं परन्तु सबकी आत्मा एक ही है ॥ ४४ ॥

देह आद्यन्तवानेष द्रव्यप्राणगुणात्मकः। आत्मन्यविद्यया [1]क्लृप्तः संसारयति देहिनम् ॥ ४५ ॥
[2]नात्मनोऽन्येन संयोगो [3]वियोगो वासता सति। तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः ॥ ४६ ॥
जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित्। कलानामिव [4]नैवेन्दोर्मृतिर्ह्यस्य कुहूरिव ॥ ४७ ॥
यथा शयान आत्मानं विषयान् फलमेव च। अनुभुङ्क्तेऽप्यसत्यर्थे [5]तथाऽऽप्नोत्यबुधो भवम् ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—द्रव्यप्राणगुणात्मवान्, एषः, देहः, एव, आद्यन्तवान्; अविद्यया, आत्मनि, क्लृप्तः, देहिनम्, संसारयति ॥४५॥ हे सति! यथादृक्, रूपाभ्याम्, यथा, रवेः, संयोगः, वा, वियोगः, न वर्तते, तथा, आत्मनः, असता, अन्येन (पदार्थेन) संयोगः, वा, वियोगः, न, वर्तते, तत्, प्रसिद्धेः, तत् हेतुत्वात्, व्यवह्रियते ॥ ४६ ॥ जन्मादयः, तु, विक्रियाः, यथा, कलानाम्, न, एव, इन्दोः, तथा (विकाराः) देहस्य, हि, न, क्वचित्, आत्मनः, सन्ति; यतः, अस्य, मृत्युः, कुहूः, इव ॥ ४७ ॥ यथा, शयानः, (पुरुषः) असति, अपि, अर्थे, आत्मानम्, विषयान्, च, एव, फलम्, अनुभुङ्क्ते, तथा, अबुधः (अज्ञानां) भवम्, आप्नोति ॥४८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कुतस्तर्हि न चंद्रादिवदात्मानमेकं शुद्धं प्रतीमस्तत्राह। देह इति। द्रव्यमधिभूतम्। प्राणा इन्द्रियाण्यध्यात्मम्। गुणशब्देनाधिदैवं तत्त्रितयात्मकः। देहोपाधिना शुद्धो न प्रतीयत इत्यर्थः॥ ४५ ॥ ननु देहसंबंधेनापि संसारे सति शुद्धत्वं गतमेव तत्राह। नात्मन इति। हे सति! अन्येनाधिभूतादिनाऽऽत्मनः संयोगवियोगौ न स्तः। कुतः। असतः असत्त्वादन्यस्येत्यर्थः। कुतोऽसत्त्वं तत्राह। तद्धेतुत्वादिति। तस्यान्यस्य भूतेन्द्रियादेः प्रसिद्धेः प्रकाशस्य तद्धेतुत्वादात्महेतुत्वात्। ननु देवैरधिष्ठितेभ्य इंद्रियेभ्यो भूतानां प्रतीतिः प्रसिद्धा। भूतप्रतीत्या च तत्प्रसिद्धिर्नात्मन इत्यत आह। दृग्रूपाभ्यां यथा रवेः यथा प्रकाश्यप्रकाशकत्वेन वर्तमानयोरपि चक्षूरूपयोः रवेः सकाशात्प्रसिद्धिर्द्वयोरपि तैजसत्वात्तदभेदश्च तथा भूतेंद्रियादीनां परस्परं सिद्धानामपि चैतन्याधीन एव प्रकाशस्तत्कार्यत्वाच्च तद्व्यतिरेकेणासत्त्वं चेत्यर्थः। तथा च द्वादशे वक्ष्यति। "दीपश्चक्षुश्च रूपं च ज्योतिषो न

---

१. क्षिप्तः–विज। २. ४७–४८ श्लोकौ न स्तः–विजये। ३. गश्चासतः–श्रीधर वंशी जीव. विश्व.; श्चा सता–वीर. ४. मेत्र–वीर। ९. तथात्मापि ध्रुवो भुवान्–विज.।

पृथग्भवेत् । एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् ।।" इति । यद्वा रवेः प्रसिद्धाभ्यामेव दृग्रूपाभ्यां परस्परं प्रसिद्धिर्यथा भवति तद्वदिति ।। ४६ ।। देहसंबंधाभावादेव नात्मनो जन्मादयोऽपीति वक्तुं जन्मादीनां देहधर्मत्वमाह । जन्मादयस्त्विति । कथं तर्हि जातोऽहं बालोऽहं वृद्धोऽहमित्यात्मनि जन्मादिप्रतीतिः, देहजन्मादिनैवेति सदृष्टांतमाह । कलानामिवेति । इंदोः कलानामेव जन्मादयो नैवेदोर्यथा तद्वत् यथा च कलानाशादेव कुहूरमावास्या इंदुक्षय उच्यते तद्वदस्यात्मनो देहनाशादेव मृतिव्यवहार इत्यर्थः ।। ४७ ।। नन्वात्मनो देहादिसंबंधाभावे कथं भोक्तृभोग्यभोगप्रतीतिरित्याशंक्य स्वप्नदृष्टांतेन समर्थयति । यथा शयान इति । आत्मानं भोक्तारं विषयान् भोग्यान्फलं भोगमसत्यप्यर्थेऽमुभुंक्ते तथाऽबुधः संसारं प्राप्नोति ।। ४८ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनर्हेत्वाक्षेपः—कुत इति । गुणकार्यत्वाद्देवानाम् 'सत्त्वेन सुरतां याति' इत्युक्तेः । तत्त्रितयात्मकोऽधिभूताध्यात्माधिदैवात्मकः । इत्यर्थ इति-न हि मालिन्याऽनपनयने मुकुरनैर्मल्यं प्रतीयत इति भावः । आत्मनि अधिष्ठाने रज्जुसर्पवदज्ञानकल्पितः स्वाध्यासेनात्मानं शुद्धमपि संसारयति संसारे क्षिपतीत्यर्थः । देहो जीवात्मापि न भवतीत्याह—यः सुहृद्बुद्ध्या पाल्यः, दुर्हृद्बुद्ध्या वध्यः स एष देह आद्यन्तवान् । द्रव्यमधिभूतम्, प्राणा इन्द्रियाण्यध्यात्मम्, गुणशब्देनाधिदैवम्, तत्त्रियात्मकः आत्मनि जीवेऽविद्ययैव कल्पितः रागद्वेषादिविषयीभूतः सन् देहिनं संसारवन्तं करोति ।। ४५ ।। पुनराक्षिपति—नन्विति । हेतुमाशंकते—इत्यर्थ इति । अन्यस्येत्यध्याहार्यमिति भावः । असत्त्वे हेतुमाक्षिपति—कुत इति । तत्राक्षेपे । पुनराक्षिपति—नन्विति । तत्प्रसिद्धिरिन्द्रियप्रसिद्धिः । तदभेदश्चक्षूरूपयोरभेदः । तत्कार्यत्वाच्चैतन्यकार्यत्वात् । तद्व्यतिरेकेण चैतन्यं विना तेषामसत्त्वम् । इत्यर्थ इति—विवर्तस्याधिष्ठानमन्तरेण सत्त्वानुपलब्धेः प्रसिद्धत्वात् । एतदग्रे स्फुटीभविष्यतीत्याह—तथा चेति । आत्मन एव पुनर्मुख्यं प्रकाशकत्वं न त्विन्द्रियादेरित्याह—परस्परं सिद्धिरविप्रकाशितमेव चक्षूरूपं प्रकाशयति, रविप्रकाशितमेव रूपं चक्षुः प्रकाशयतीत्यर्थः । तद्वदात्मप्रकाशिता एव देवादयो विश्वं प्रकाशयन्ति "तस्य तेजसेद्धः सूर्यस्तपति, न तत्र सूर्यो भाति, न चन्द्रो न तारकाः, नेमा विद्युतो भांति कुतोऽयमग्निः, तमेव भांतमनुभाति, सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुतेः, "येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् । यथार्कोग्निर्यथा सोमो यथर्क्षग्रहतारकाः ।।" इति स्मृतेश्च ।। संयोगो नास्ति संयोगापेक्षत्वाद्वियोगोपि नास्ति । संयोगाभावे हेतुः—असत इति । आत्मनीत्यर्थात् त्रिकालमप्यात्मनि तस्य स्पर्शाभावादित्यर्थः । तत्र हेतुः—तस्यान्यस्य प्रसिद्धेः शक्तेः । तद्धेतुत्वाच्चिद्रूपात्मकहेतुत्वात् । एवं सति तं कथं स्पृशेदित्यर्थः । रवेः राजमानदेवविशेषस्य सूर्यस्य दिवानक्तमप्यच्यवमानस्य दृग्रूपाभ्यां तल्लब्धप्रकाशाप्रकाशशक्तिभ्यां यथा स्पृश्यत्वाभावात्संयोगवियोगौ न स्तस्तद्वत् । हे सति विचक्षणे । अर्थांतरे, तदप्यस्तु नाम भवतु श्रीकृष्णनित्यलक्ष्मीरूपायां रुक्मिण्यादिना संबंध एव नास्तीत्याह—नेति । आत्मनस्तव । नन्वेतद्विधस्तन्माहात्म्यप्रसिद्धः कथमसौ न स्यात्तत्राह—सा परमलक्ष्मीरूपा त्वमेव हेतुर्यत्र तद्रूपत्वात्तस्याः प्रसिद्धिरिति । अवतरिष्यंत्यास्तव दृष्टिप्रभावोदयादेव सैषामेषा प्रसिद्धिरित्यर्थः । तर्हि मम संबंधे सति कथं संयोगवियोगौ न स्तस्तत्राह—दृग्रूपाभ्यामिति प्राञ्चः ।। ४६ ।। अन्यदाह-देहसंबंधेत्यादिना ।। नन्वेतत्कुलजाताया मम कथमेतौस्तो न स्तस्तत्राह—जन्मादय इति । यद्यात्मनो जीवस्यापि संति तदा सच्चिदानंदरूपविग्रहाया भगवत्स्वरूपशक्तेस्तव तु किमुतेति भावः । इत्यर्थ इति—"मा स्वस्य कर्मबीजेन जायते सोप्ययं पुमान् । म्रियते चामरो भ्रांत्या यथाग्निर्दारुसंयुतः ।।" इत्युक्तेरिति भावः ।। ४७ ।। जन्मादीनामात्मधर्मत्वाभावे पुनराशंकते—नन्विति अबुधोऽनात्मज्ञः ।। एवमात्मनो वस्तुतो देहलेपाभावेऽप्यतर्क्यशक्त्याऽविद्ययैत्र देहसंबंधमननात्संसार इति सदृष्टान्तमाह—यथेति । असत्यर्थे कस्मिंश्चिदपि वस्तुन्यवर्तमानेऽपि शयानः । आत्मानं च तुरगसेनादियुक्तम् । विषयान् जेतव्यदेशान् । फलं तज्जयात्स्रक्चन्दनवनितादिभोगसुखं, कदाचित्तदजयात्संबंधनताडनतिरस्कारादि चानुभुंक्तेऽनुभवति । जागरणसादृश्येन राजादिरूपेण पश्यतीत्यर्थः । तथैवाविवेकी असत्यपि देहसंबंधे देहसंबंधोत्थं सुखदुःखात्मकं संसारम् । तथा चोक्तम्–"अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते । ध्यायतो विषयानस्य स्वप्ने जागरणं यथा ।।" इति । अर्थांतरे, ननु एवं चेत्तत्त्वं तर्ह्ययं कथं श्रुत्वापि स्वभावाविष्ट एव लक्ष्यते, तत्राह—यथेति । अबुधो रुक्मी ।। ४८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

देह इति । तैर्व्याख्यातं यद्वा प्राणेन क्रिया लक्ष्यन्ते गुणा रूपरसादयः अर्थान्तरे चावस्थावेशे हेतुमाह । देह इति । एष इति रुक्मिदेहं दर्शयति एतद्विध इत्यर्थः ।। ४५ ।। संयोगो नास्ति संयोगापेक्षित्वाद्वियोगोऽपि नास्ति संयोगाभावे हेतुः असत इति आत्मनीत्यर्थात् । त्रिकालमप्यात्मनि तस्य स्पर्शाभावादित्यर्थः । तव हेतुः तस्यान्यस्य प्रसिद्धेः शक्तेस्तद्धेतुत्वात् चिद्रूपात्मैकहेतुत्वात् एवं सति तं कथं स्पृशेदित्यर्थः । तत्र दृष्टान्तः रवेराजानजदेवविशेषस्य सूर्यस्य दिवानक्तमप्यच्यवमानस्य दृग्रूपाभ्यां तल्लब्धप्रकाशनप्रकाशशक्तिभ्यां यथा स्पृश्यत्वाभावात् संयोगवियोगौ न स्तः तद्वत् हे सति ! विचक्षणे अर्थान्तरे च तदप्यस्तु नाम तव तु श्रीकृष्णनित्यलक्ष्मीरूपाया रुक्म्यादिना सम्बन्ध एव नास्तीत्याह । नेति । आत्मनस्तव नन्वेतद्विधस्तत्त-

न्माहात्म्यप्रसिद्धः कथमसन् स्यात् तत्राह—सा परमलक्ष्मीरूपा त्वमेव हेतुर्यत्र तद्रूपत्वात्तस्याः प्रसिद्धेरिति अवतरिष्यन्त्यास्तव दृष्टिप्रभावोदयादेव सैषामेषा प्रसिद्धिरित्यर्थः। तर्हि मम सम्वन्धे सति कथं संयोगवियोगौ न स्तस्तत्राह। दृग्रूपाभ्यामिति प्राग्वत् ॥ ४६ ॥ एकदेशे कलानां क्रमवृद्धिह्रासधर्मकसूर्य्यच्छाया रूपत्वं इन्द्रोस्तु स्वतो जलमण्डलरूपत्वं व्याख्यास्यते अर्थान्तरे। नन्वेतत्कुले जाताया मम कथमेतैस्तौ न स्तः तत्राह। जन्मादय इति। यद्यात्मनो जीवस्यापि न सन्ति तदा सच्चिदानन्दविग्रहाया भगवत्स्वरूपशक्तेस्तव तु किमुतेति भावः ॥४७॥ अनु जागरणसादृश्येन भुङ्क्ते अनुभवति तत्रात्मानमनुभङ्क्ते इति राजादिरूपेण पश्यतीत्यर्थः। अर्थान्तरे न चेत्तत्त्वं तर्ह्ययं कथं श्रुत्वापि स्वभावाविष्ट एव लक्ष्यते तत्राह। यथेति। अबुधोऽयं रुक्मी ॥ ४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु देहस्याचेतनत्वाच्छान्तादिस्वभावः कथम्, कथं वा परमेश्वरांशानां जीवानां विचित्रदेहप्राप्त्या संसारः ? तत्राह—देह इति। एष विविधविकारवत्त्वादिना दृश्यमानः, किंवा पाञ्चभौतिकः, इति पार्षदादि-सच्चिदानन्ददेहो व्यावर्त्तितः। चेतनेन्द्रियादिमयत्वादस्य शान्तत्वादिकमपि घटेतेति भावः। नन्विन्द्रियादीनामेव कथं चेतनत्वम् ? तत्राह—आत्मनीति, अधिष्ठानस्य चेतनस्यात्मनः सम्बन्धादित्यर्थः। अतएव आद्यन्तवान् जन्ममृत्यू लभमानः; देहाभिमानिनं जीवं संसारयति जन्मादिलक्षणसंसारं प्रापयति। अविद्ययेति तस्यापि मिथ्यात्वं सूचितम् ॥ ४५ ॥ तदेवादौ सहेतुकं सदृष्टान्तञ्चाभिव्यञ्जयति—नेति। अन्येन देहेन इन्द्रियादिनापि वा, वियोगोऽपि नास्ति,—वियोगस्य संयोगापेक्षया संयोगस्य चासत्त्वेन स्वत एव तस्याप्यसत्त्वसिद्धेः। 'आत्मन्यविद्यया क्लृप्तः' इत्यनेनैव देहस्यासत्त्वमुक्तमेव। हे सतीति यथा साध्व्या असाध्व्या सह सम्बन्धो नास्तीति भावः। तत्र दृष्टान्तः—यथा रवेर्दृग्रूपाभ्यां सह संयोग-वियोगौ न स्तः। कुतः ? तयोर्दृग्रूपयोः प्रकृष्टसिद्धे रविहेतुकत्वादेव, एतच्चात्महेतुकदेहप्रसिद्धेः सादृश्यार्थमुक्तम्। एवं तत्कार्य्यत्वेन तयोस्तद्व्यतिरेकेणासत्त्वमभिप्रेतम्। अतोऽसत्त्वादेवेत्यर्थः। आद्यन्तवानिति सूचितम् ॥ ४६ ॥ देहस्यैव जन्मादिकं सदृष्टान्तमभिव्यञ्जयति—जन्मेति, विक्रिया विकाराः—जायते, अस्ति, वर्द्धते, परिणमते, क्षीयते, नश्यतीति षट्, क्वचित् कदाचिदपि सिद्धानां लीलया जन्मादावपीत्यर्थः। ननु जन्मादौ बाल्याद्यवस्थायामिन्द्रियादिप्रवर्त्तनेन पितृत्वादिनाभिन्नत्वाद्देहस्यैव जन्मादयः सन्तु नाम, मरणे तु चैतन्याभावेनात्मैव मृत इति प्रतीयतेतराम्, तत्राह—मृतिरिति, हि अपि, मृतिरपि; यथा अमावास्यायामिन्दोर्बिम्वादर्शनादिन्दुक्षयः प्रतीयते, अन्यदा च प्रायो बिम्वदर्शनात् कलानामेव जन्मादयः प्रतीयन्ते, तथा मरणे देहाचेतनत्वेनापि देहस्यैव मृतिर्न त्वात्मन इत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, ननु अमावस्यामिन्दोरसद्भावेन मरणं लक्ष्यत एवेत्यसदृशो दृष्टान्तः, तत्राह—अस्येन्दोः कुहूः कलानां क्षय एव मृतिरिव; इवेति तत्त्वतो मृत्यभावात् ॥ ४७ ॥ अविद्ययेति सूचितमात्मना देहाभिमानेन संसारस्यापि मिथ्यात्वञ्च सदृष्टान्तमभिव्यञ्जयति—यथेति। शयानः स्वप्नं पश्यन् सर्व्वोऽपि जनः विषयांश्च, एव अपि, फलं सुखदुःखादिकमपि, अनु जागरणसादृश्येन भुङ्क्ते अनुभवति, तत्रात्मानमनुभुङ्क्त इति राजादिरूपेण पश्यतीत्यर्थः। नन्वेवञ्चेत्तर्हि तदपि सर्व्वं सत्यमस्तु ? न, तेषामसत्त्वादित्याह—अर्थे तत्तद्द्रव्ये सत्यपीति। अबुध आत्मतत्त्वानभिज्ञो जनो भवं संसारं प्राप्नोति अनुभवति। एवमज्ञानादेव जन्ममरणादिकं सर्व्वम्, न तु तत्त्वत इति तात्पर्य्यम् ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

द्रव्यप्राणगुणात्मकः पञ्चभूतज्ञानेन्द्रियगुणत्रयकार्यतत्त्वान्तरसमुदायः अविद्यया प्रकृत्या क्लृप्तः देहः संसारयति जन्मजरामरणादिदुःखं जयति देहिनां जीवात्मनामिति ॥ ४५ ॥ परमात्मनो देहसम्बन्धाधीनदुःखाद्यन्वयो नास्तीत्याह—नात्मन इति। सतीति संबुद्धिः आत्मनः परमात्मनः असता देहेन जीवस्येव संयोगवियोगौ न भवतः तत्प्रसिद्धेः देहोत्पत्तेस्तद्धेतुत्वात् परमात्मसङ्कल्पहेतुत्वात् परमात्माधारत्वात् देहः परमात्मनो न बन्धक इत्यर्थः। तदधीनेन तस्य बन्धाभावे दृष्टान्तमाह। दृग्रूपाभ्यां यथा रवेरिति। आदित्येनानुग्राह्यं चक्षुस्तेन प्रकाश्यं रूपम् उभाभ्यामादित्यस्य न संसर्गः दूरस्थत्वात् एव परमात्माधीनेन देहेन अन्तिकस्थितस्यापि दूरस्थत्वेन न तत्कृतदोषान्वय इत्यर्थः ॥ ४६ ॥ जन्मादय इति। कलानामेव जन्मादयः न चन्द्रस्य एवं पृथिव्यादितत्त्वानामेव जन्मादयः न जीवस्य मृतिरस्य कूहूरिव अस्य जीवस्य मरणं चन्द्रस्य कुहूरिवेत्यन्वयः। सा नष्टेन्दुकला पञ्चदशी कुहूश्चन्द्रस्य कलानाश इव जीवस्य देहस्य मृतिरित्यर्थः ॥ ४७ ॥ अर्थेऽसत्यपि अस्थिरेऽपि स्थिरत्वबुद्ध्या स्वप्नार्थाननुभवति जाग्रद्दशायामपि तद्वत्ध्रुवं विषयध्रुवबुद्ध्यानुभवतीत्यर्थः ॥ ४८-५२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कोऽसौ देहातिरिक्तो जीवो नाम कीदृशश्च देहश्च कीदृशः कथं च देहातिरिक्तस्यात्मनः सुखदुःखादिभोक्तृत्वमित्यत देह इति। देहस्तावद्द्रव्यप्राणगुणात्मकः। द्रव्यं पृथिव्यादिभूतपञ्चकं प्राण इन्द्रियाणि गुणाः पृथिव्यादिभूतपञ्चकगुणाः गन्धादय सत्त्वादिप्रकृतिगुणारब्धद्रव्यादितत्त्वान्तरसमुदायरूपाः आत्मा तु ज्ञानात्मक इति भावः। स च आद्यन्तवानपीत्यर्थः ॥ ४५ ॥

ननु यदि देहः स्वसम्बन्धमात्रेण जीवात्मानं संसारयेत्तर्हि परमात्मानमपि स्वसम्बन्धादेव संसारयत्वित्यत आह—नात्मन इति । हे सति ! आत्मनः परमात्मनः असता देहेन जीवपराभ्यामन्येन सह जीवस्येव संयोगवियोगाद्युत्पत्तिमरणात्मकौ न भवतः अनेन जीवस्योत्पत्तिविनाशौ नाम देहसंयोगबियोगात्मकावेवेत्युक्तं कुतस्तत्प्रसिद्धे र्देहोत्पत्तेः संयोगवियोगोत्पत्तेर्वा तद्धेतुत्वात्परमात्मसङ्कल्पहेतुकत्वात्परमात्माधीनत्वाद्देहः परमात्मनो न बन्धक इत्यर्थः । तदधीनेन तस्यबन्धाभावे दृष्टान्तमाह । दृग्रूपाभ्यां यथा रवेरिति । आदित्येनानुग्राह्यं चक्षुस्तेन प्रकाश्यश्यामादिरूपं चेत्युभाभ्यामादित्यस्य न संसर्गः दूरस्थत्वात् एवं परमात्माधीनेन देहेनान्तःस्थितस्यापि परमात्मनो दूरस्थस्येव न तत् कृतदोषाश्रयत्वमित्यर्थः ॥ ४६ ॥ आद्यन्तवानित्यनेन सूचितमात्मनो जन्माद्यभावमुपपादयति । जन्मादयस्त्विति । जन्मादयो विक्रिया विकारा देहस्यैव क्वचिदपि शरीरे स्थितस्याप्यात्मनो न सन्ति । यथा कलानामेव जन्मादयो न चन्द्रस्य तद्वत् द्रव्यादिसङ्घातात्मकदेहानामेव न जीवस्येत्यर्थः । जन्मादय इत्यादिशब्देन बाल्यादिविकारसंग्रहः तर्हि "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति" इति जीवविनाशवादिनी श्रुतिर्विरुध्येतेत्यत आह—मृतिर्ह्यस्य कुहूरिवेति अस्य जीवस्य मरणं चन्द्रस्य कुहूरिवेत्यन्वयः । नष्टेन्दुकलापञ्चदशी कुहूः यथा चन्द्रस्य कलानाशादेवामावास्या कुहूरिन्दुक्षय इति व्यपदिश्यते तद्वदस्यात्मनो देहनाशादेव मृतिरिति व्यवहार इत्यर्थः ॥ ४७ ॥ देहो देहिनं संसारयतीत्युक्तं तत्र यावदयं संसरति किम्बा तत्र कारणं देहसम्बन्ध एवेति चेन्न परमात्मनोऽपि तदविशेषात्संसारापत्तेरित्यतः सदृष्टान्तमाह । यथेति । अर्थे स्वाप्नेसत्यपि अस्थिरेऽपि शयानः पुरुषः स्थिरबुद्ध्या यावदात्मानं भोक्तारं विषयान्स्वाप्नान् विषयान् फलं तद्भोगं चानुभुङ्क्ते नतु जागर्ति सद्वद्विषयध्रुवबुद्ध्या विषयान् यावदनुभवति तथा तावदयमबुधोऽज्ञः सन् भवं संसारं प्राप्नोति नतु ततो मुच्यते प्रबुद्धस्तु मुच्यते इति भावः । स्वरूपेणात्मनो नित्यत्वेऽपि स्वप्नावस्थावैशिष्ट्यस्यानित्यत्वात्तन्नित्यत्वबुद्धिस्तदनुभवनिमित्तेत्यभिप्रायेणात्मानमित्युक्तम् ॥ ४८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

देहात्मत्वं भ्रमनिमित्तिमित्यत्र हेतुमाह । देह इति । द्रव्याणि पञ्चभूतानि पञ्च प्राणास्त्रयो गुणाः देहे आत्मा न भौतिकत्वाद्घटवदिति आत्मनि जीवे अविद्यया हरीच्छया अज्ञानेन वा देहिनं देहात्मकदर्शनं संसारयति संसारिणं करोति तत् करोतीत्युपसंख्यानमिति णिच् ॥ ४५ ॥ देहः स्वेतरवृत्तिनित्यनिष्ठाधिकरणं मेयत्वाद्घटवदिति तत्राह । यथेति शयानः स्वप्नं पश्यन्नात्मानं विषयान्फलं दुःखादिलक्षणं यथाऽनुभुङ्क्ते वासनानुगुणं भवति अर्थे विषये तदानीमसत्यप्यविद्यमानेऽपि तथात्मा जीवो ध्रुवोऽध्रुवाननित्यान् देहादीननुभुङ्क्ते इत्यन्वयः देहः स्वस्वेतरवृत्त्यनित्यनिष्ठाधिकरणमिति प्रत्यनुमानपराहतं तदनुमानमिति सन्तोष्टव्यम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

एवं सति कथं स्पृशेदित्यर्थः । तत्र दृष्टान्तः । रवेः आजानजदेवविशेषस्य दिवानक्तमप्याच्यवमानस्य दृग्रूपाभ्यां लब्धतत्प्रकाशनप्रकाशशक्तिभ्यां यथा स्पृश्यत्वाभावात् संयोगवियोगौ न स्तः तद्वत् हे सति ! विचक्षणे हे सुचिस्मिते हे प्रसन्नहृदये इत्यर्थः । तव साक्षाल्लक्ष्मीत्वान्नेषदपि तत्तत् स्पर्शः किन्तु लीलयैव त्वमित्थं व्यवहरसि मयापि तथोपदिश्यसे इति भावः।४६-६०।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

देहो जीवात्मापि न भवतीत्याह । देह इति । यः सुहृद्बुद्ध्या पाल्यः दुर्हृद्बुद्ध्या वध्यः स एष देह आद्यान्तवान् द्रव्यमधिभूतं प्राणा इन्द्रियाण्यध्यात्मं गुणशब्देनाधिदैवतं त्रितयात्मकः आत्मनि जीवे अविद्ययैव कल्पितः रागद्वेषादिविषयीभूतः सन् देहिनं संसारवन्तं करोति ॥ ४५ ॥ किन्तु जीवात्मनो देहलिप्तत्वादेव देह एव आत्मेति प्रतीतिर्भवति वस्तुतस्तु देहेन लेपस्तस्य जीवात्मनो नैवास्ति परमात्मनस्तु जीवात्मनापि लेपो नास्तीत्याह । नेति । प्रथमं जीवात्मपक्षो व्याख्यायते हे सति ! आत्मनो जीवस्य अन्येन जडेन देहेन असता आद्यन्तवत्त्वादसर्वकालस्थायिना संयोगो लेपो नास्ति संयोगाभावादेव वियोगोऽपि नास्ति कुतः तत्प्रसिद्धेः देहप्रकाशस्य तद्धेतुत्वात् जीवात्महेतुकत्वात् अतः अध्यात्मादिमयदेहस्य जीवात्मप्रकाश्यत्वात्तेन सह जीवात्मनो न लेपः नहि प्रकाशकः प्रकाश्येन क्वापि लिप्यते अथ परमात्मपक्षः आत्मनः परमात्मनः अन्येन जीवेन असता अचिरस्थायिना देहेन च न संयोयो न वियोगश्च तत्प्रसिद्धेः तयोर्जीवदेहयोः प्रकाशस्य तद्धेतुत्वात् परमात्महेतुकत्वादतः परमात्मनः स्वप्रकाशाभ्यां जीवदेहाभ्यां नैव लेपः नहि प्रकाशकः प्रकाश्यलिप्तः क्वापि भवति उभयपक्ष एव दृष्टान्तः रवेः आकाशस्थसूर्यस्य स्वेन प्रकाशिताभ्यां दृग्रूपाभ्यां दृशा चक्षुषा तत्प्रकाश्येन रूपेण च न लेपः अत एव रविस्थानीयः परमात्मा दृक्स्थानीयो जीवः रूपस्थानीयो देहः ॥ ४६ ॥ जन्मादिभिरपि संयोगाभावं वक्तुं तेषां देहधर्मत्वमाह । जन्मादय इति । कथं तर्हि जातोऽहं बालोऽहं वृद्धोऽहमित्यात्मनि जन्मादिप्रतीतिः देंहजन्मादिनैवेति सदृष्टान्तमाह—इन्दोः कलानामेव जन्मादयो नैवेन्दोरसङ्ख्य-

कलात्मकस्य यथा तद्वत् यथा चास्येन्दोः कुहूः कलाक्षय एव मृतिरुच्यते सा नष्टेन्दुकला कुहूरित्यमरः तद्वदस्यात्मनो देहनाशादेव मृतिव्यवहारः ॥ ४७ ॥ एवम "सङ्गोह्ययं पुरुष" इति श्रुतेरात्मनो वस्तुतो देहलेपाभावेऽप्यतर्क्यशक्त्या अविद्ययैव देहसम्बन्धमननात् संसार इति सदृष्टान्तमाह । यथेति । असत्यर्थे कस्मिश्चिदपि वस्तुनि वर्त्तमानेऽपि शयानः आत्मानं चतुरङ्गसेनायुक्तं विषयान् जेतव्यदेशान् फलं तज्जयान् स्रक्चन्दनवनितादिभोगसुखं कदाचिदजयात् स्वबन्धनताडनतिरस्कारादिकञ्च अनुभुङ्क्ते अनुभवति तथैवाबुधोऽविवेको भवम् असत्यपि देहसम्बन्धोत्थं सुखदुःखात्मकं संसारं यथाचोक्तम् अर्थेह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथेति ॥ ४८ ॥

गूढार्थदीपिनी

आद्यन्तवान् जन्ममरणवान् अधिभूतादिरूपो देहो देहिनं जीवं संसारयति संसारे क्षिपति । क्लृप्तः कल्पितः ॥ ४५ ॥ हे सति । अन्येन देहादिना अस्यात्मनः संयोगो वियोगश्च नास्ति । कुतः । असत जन्यस्य देहादेरसत्त्वादित्यर्थः । कुतोऽसत्त्वं तत्राह-तत्प्रसिद्धेः देहादिप्रतीतेस्तद्धेतुत्वात् आत्महेतुत्वात् अत आत्मातिरिक्तं देहादि नास्तीत्यर्थः । अत्र दृष्टान्तः–यथा दृग्रूपाभ्यां भिन्नादपि रवेः सकाशादेव तयोः प्रतीतिर्भवति नान्यथेति । अत्र रविस्थानीयः परमात्मा, दृक्स्थानीयो जीवः, रूपस्यानीयो देह इति विवेचनीयम् ॥४६॥ विक्रिया षड् विकाराः । यथा इन्दोः कलानामेव जन्मादयो नैवेन्दोस्तद्वत् । यथा च अस्य इन्दोर्मृति कलानाश एव इन्दुक्षयः कुहूरमावास्योच्यते तथा देहनाशादेवात्मनो नाशव्यवहार उच्यते इत्यर्थः ॥ ४७ ॥ अर्थे देहादिरूपे असत्यपि आत्मानं देहादिरूपं भोक्तारं विषयान् भोग्यान् शब्दादीन् फलं भोगं च अबुधोऽनात्मज्ञः । भवं संसारम् ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

माया तु अविद्या अचेतना नित्या तया आत्मा जीवः चेतनो नित्यः तस्मि "न्नघटत उद्भवः प्रकृतिपुरुषयोरजयो"रिति वक्ष्यमाणात् द्रव्यमधिभूतं प्राण इन्द्रियाण्यध्यात्मं गुणशब्देनाधिदैवं तत्त्रयात्मकः एष प्रसिद्धो देहः क्लृप्तः आत्मस्थाने आत्मत्वेन प्रवर्तित इत्यर्थः । आद्यन्तवाननित्य इत्यर्थः । स च देहिनात्मत्वेन स्वीकृतः देहिनं संसारयति संसारवन्तं करोति जातोऽस्मि मरिष्यामीत्येवं विमोहयतीत्यर्थः ॥ ४५ ॥ अविद्ययात्मनि क्लृप्त इत्यनेन मायायाः भगवन्निरपेक्षाया जीवदेहसंयोगहेतुतां प्रतीतां निराकुर्वन् सर्वेषां सूर्यादीनामपि स्वस्वप्रकाश्येन सह सम्बन्धे भगवानेव मुख्यो हेतुरित्याह–नेति । असत्कारणम् "असदेवाग्र आसीत् ततः सदजायते"ति श्रुतेः तस्मादसतः परमकारणात् अनेन यथा रवेः दृग्रूपाभ्यां सह संयोगो वियोगश्च न भवति तत्प्रसिद्धेः संयोगवियोगयोः प्रसिद्धेः तद्धेतुत्वात् कारणहेतुकत्वात् "भीषास्माद्वातः पवते भीषोदेति सूर्य" इत्यादिश्रुतेः हे सति ! एवमात्मनः जीवस्य संयोगो देहसंयोगस्तथा तद्वियोगस्तस्मादन्येन हेतुना न भवति प्रकृत्त्यादीनां स्वातन्त्र्येण तद्धेतुत्वं नास्ति स्वतन्त्रहेतुः सर्वत्र भगवानेवेति राद्धान्तः ॥ ४६ ॥ देह आद्यन्तवानित्युक्तं देहस्याद्यन्तवत्त्वं प्रपञ्चयन् नित्यस्यापि जीवस्य देहसंयोगे जातोऽयं देहवियोगे मृतोऽयमिति जन्ममरणव्यवहारं दर्शयति । जन्मादय इति । यथा कलानामेव जन्मादयो न चेन्दोः तद्वत् जन्मादयो विक्रियाः देहस्यैव नत्वात्मनः देहजन्मादिनैव जीवजन्मादय उपचर्यन्ते इत्यर्थः । यथा च कलानां मृतिरेव कुहूरमावास्या इन्दुक्षय उच्यते तद्वत् देहस्य मृतिरेवास्यात्मनः मृतिरुच्यते इत्यर्थः ॥ ४७ ॥ आत्मत्वेन स्वीकृतो देहो देहिनं संसारयतीत्युक्तमेवार्थं स्वप्नदृष्टान्तेनोपपादयति । यथेति । अर्थ "न तत्र रथा न रथयोगा" इत्यादि श्रुतेर्जाग्रद्रथाद्यर्थे तत्राविद्यमानेऽपि आत्मानं स्वप्नेऽपि कर्मविशेषफलभोगार्थं भगवता दत्तं देवादिदेहमात्मतया जीव इति गृहीतं भोक्तारं विषयान् तेनैव दत्तान् फलं भोगं यथा शयानः अनुभुङ्क्ते अनुभवति तथा अबुधो देहात्ममानी भवं संसारमाप्नोतीत्यर्थः । जाग्रत् पदार्थाः स्थूलरूपा बाह्येन्द्रियग्राह्याः स्वाप्नाः सूक्ष्मरूपा अन्तरिन्द्रियग्राह्याः इति विवेकः स्वप्नपदार्थानामपीश्वरनिर्मितत्वं वेदान्तकौस्तुभे द्रष्टव्यम् ॥ ४८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इयत्सु कार्येष्वापतितेष्वेवं कुर्वन्तोति नातिप्रसक्तिरिति वक्ति । राज्यस्येति । समुदितमेतदिति न निर्बन्धः । एकैकेनापि कारणेन मारणमभिप्रति । हेतोरिति सर्वान्वयि । राज्यस्यापरो राज्ययोग्यो भ्राता भूमेरभूयस्या वित्तस्य काचाद्यात्मकस्य श्रियो महासम्पदो मानस्य सम्माननहानिप्रसक्तौ तस्य तेजसः सामर्थ्यप्रदर्शनस्यान्यस्य वा सुन्दोपसुन्दवत्सुन्दरीजतस्य वा हेतोर्मानिनः श्रीमदान्धा दुरभिमानवन्तो मानिनस्तान्क्षिपन्ति नाशयन्ति हि सर्वानुभवसिद्धमिदमित्यर्थः ॥ ४५ ॥ सर्व सर्वेश्वरतन्त्रं स चैतत्कर्मनिमित्तीकृत्य कारयतीति मतिमतां न मोहमहिमाहतिरन्येषां तदवत्कन्दनमिति ज्ञातरहस्यामपि स्वयं लोकरीतिमनुसरन्तीमाह । आत्ममोह इति । देहात्ममानिनां देहाभिमानवतां नृणामधिकारिणामित्यर्थः । एषः अयं सुहृदयं च शत्रुरयमुदासीनोऽनुभयरूप इत्यात्ममोहो मानसभ्रमो देवमायया देवस्यैवं क्रीडतो माययेच्छया कल्पते । एतत्कर्मानुसारेणाभिमतिं दत्वा सुहृदादित्वं भासयति देव इति भावः ॥ ४६ ॥ नानेके देवि देवाः किन्तु वासुदेव एक एवेत्याह । एक एवेति । सर्वेषामपि देहिनां पर आत्मान्तर्नियामक

एक एव । न स्थानतोऽपीत्यादेः । तर्हि बहु स्यां प्रजायेय सच्च त्यच्चाभवदित्यादिबहुभाववादः कथमित्यतः पातनिकः श्रुत्यभिप्रायः । व्याप्तः स किन्तु भिन्नजगद्बहुविधतैकता चान्तर्गतस्य तस्येति सनिदर्शनमाह । **यथा ज्योतिः सूर्यादिः** प्रतिदृशमिव नैकधाऽर्कमेकं समधिगतोऽस्मि विधूतभेदमोह इत्यादेः । ऊह्यात्तर्क्यात्परः परोह्यः स चासावात्मा चेति वा । अतर्क्य इत्यर्थः । एक एव सविता यथा द्रष्टृभेदभिन्न इव तथा । यथा नभश्च घटाद्युपाधिनिबन्धनभेदवदिति तथा नानेनात्मा गृह्यते । ते च न बुधा इत्याह । मूलैरिति । यथा ज्योतिश्चन्द्रादिः क्वचिद्यथा सम्यक् क्वचिन्नभः । न विद्यते भा यस्य तत् । एकस्यैव क्वचित्प्रकाशता विप्रकाशता च क्वचिदिति भेदः प्रतीयते तथा नानेव गृह्यत इति वा ॥ ४७ ॥ नात्मतदात्मा देह इत्यत्र युक्तिं वक्ति । देह इति । द्रव्यप्राणगुणान्वितो द्रव्याणि मूलद्रव्यं प्रकृतिरवान्तराणि च भूतानि प्राणाः प्राणादयः पञ्च गुणाश्च सत्त्वाद्यास्तदन्वितो देह आद्यन्तवानुत्पत्तिमृतिसहित आत्मनि जीवेऽविद्यया भागवत्येच्छयाऽज्ञानेन वाऽऽक्षिप्तः संयोजितो देहिनमभिमानितया तद्वन्तं संसारयति संसारयुक्तं करोति । विमतो देहो न देही तदात्मा भौतिकत्वाद्घटादिवत् । न देही वा देहात्माऽभौतिकत्वात् । न देहो ह्यात्माऽऽद्यन्तवत्त्वात् । न वा देही तदात्मा नित्यत्वात् । जीवो नित्यो धातुरस्य त्वनित्य इत्यादेः । यन्नैवं तन्नैवमित्यादियुक्तयो ज्ञेयाः ॥ ४८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु तर्हि देहात्मबुद्धिः कथं गच्छतीत्याशङ्क्य वैलक्षण्यानुसन्धानेनेति आत्म**वैलक्षण्यं** देहस्य वदन् अपकारित्वमाह **देह आद्यन्तवानेष** इति । आत्मा नित्यः । यो हि देशायरिच्छिन्नः, स सुतरां कालापरिच्छिन्नः, देशापरिच्छिन्नस्य व्यापकत्वात् । अत आत्मत्वादेव कालापरिच्छेदः सिद्धः । देहस्तु आद्यन्तवानुभयावधियुक्तः, प्रागभावप्रध्वंसाविव व्यावर्तितौ । **एष** इतिति परिदृश्यमानः, मृतानामन्तः मुण्डस्योत्पत्तिरिति प्रदर्शनस्य सार्थकता अथवा विद्यमानस्य देहस्य जन्ममरणयोरदृष्टत्वात् स्वव्यतिरिक्तस्यैव प्रत्यक्षसंवादात् श्रुतेः प्रामाण्यं मन्यते यस्तं प्रत्याह **एष** इति । एवं सदातनत्वासदातनत्वाभ्यां वैलक्षण्यमुक्त्वा गुणातीतत्वसगुणत्वाभ्यां वैलक्षण्यमाह **द्रव्येति** । द्रव्यमधिभूतं, प्राणा आध्यात्मिकाः गुणा आधिदैविका इति । एत एव देहेन्द्रियदेवतारूपाः, आत्मा स्वरूपं यस्य । किञ्च । **आत्मन्यविद्यया क्लृप्त** इति । वैलक्षण्यत्रयम् । आत्मा आधारः । आधेयो देहः, सिद्ध आत्मा, स्वतः क्लृप्तो देहः, (विद्यया) अविद्यया चात्मस्थाने कृतः । आत्मा तु स्वत एव प्रवृत्त इति । अनिष्टेष्टजनकत्ववैलक्षण्यमप्याह **संसारयति देहिन**मिति । स्वस्मिन्नभिमानमात्रे आत्मानं देहः संसारे पातयति । आत्मा तु देहस्य हितमेव वाञ्छतीति । एवं षोढा वैलक्षण्यं निरूपितम् ॥ ४५ ॥ किञ्च । 'असङ्गो ह्ययं पुरुष' इति श्रुत्या आत्मनः सङ्गाभावो निरूप्यते । देहस्तु सर्वसङ्गयुक्त इति वैलक्षण्यं निरूपयितुं आत्मन एव धर्मानाह **नात्मन** इति । अस्यात्मनः अन्येन देहेन संयोगो वा वियोगो वा नास्ति । वियोगो हि संयोगपूर्वक इति संयोगे निषिद्धे अवयवभेदेन संयोगाभावः । संयोगोऽपि तिष्ठत इति सिद्धसाधनतामाशङ्क्य उभयं निषेधति, संयोगोऽपि नास्ति, वियोगोऽपि नास्ति । कदाचित्संयोगोऽपि निषिद्धो वियोगेन । ननु संयोगवियोगयोः भावाभावरूपत्वे कथमुभयाभावः, प्राप्तस्यैव नानिषेध इति न नियमः, सम्भावितस्यापि निषेधात्, तत्राह **असते**ति । असता देहेन आत्मनो न संयोगवियोगौ, यथा रज्जुसर्पयोः । न हि सर्पस्य कोऽप्यंशो रज्जौ भवति । ननु प्रत्यक्षश्रुतिभ्यां देहस्य परिदृष्टत्वात् अनुमानप्रत्यक्षश्रुतिभिः आत्मनोऽपि प्रतीतेः वैलक्षण्यस्य चोक्तत्वात् वियोग एवास्तु, कथमुभयाभाव इति चेत् । ननूक्तमसत्वादिति तदेव प्रमाणसिद्धत्वान्न भविष्यतीत्याशङ्का, तत्र हेतुमाह **तद्धेतुत्वात्तत्प्रसिद्धे**रिति । तस्य देहस्य प्रसिद्धेः उत्पत्तेर्ज्ञप्तेर्वा । आत्महेतुत्वादात्ममासैव देहो भासत इति पृथक् स्थित्यभावात् संयोगवियोगौ न भवतः । पृथक्लब्धसत्ताकावेव संयुक्तौ वियुक्तौ वा भवत इति लोकस्थितिः । अत एवोत्पत्तौ यद्यदधीनम्, तत्र न संयोगः सम्बन्धः । यथा द्रव्यगुणयोः यथा वा ज्ञप्तौ ज्ञानविषययोः, तथापि उभयोः सत्त्वात्समवायः स्वरूपं वा सम्बन्धोऽङ्गीकृतः । अत्र देहस्यासत्त्वात् अन्यतरस्य निःस्वभावत्वात् रज्जुसर्पवत् न स्वरूपसम्बन्धः । समवायोऽपि निराकरिष्यते । सर्वथापि संयोगवियोगौ तु न भवतः । प्रकाश्यप्रकाशकयोः सम्बन्धाभावाय दृष्टान्तमाह **दृग्रूपाभ्या**मिति । नेत्राधिष्ठात्री देवता यः सूर्यः तेन लब्धसत्ताकं चक्षुः विषयं गृह्णाति । न हि तेनापि तयोः संयोगवियोगौ भवतः । एतस्यार्थस्य परिज्ञानमधिकारिण एव भवतीति । न हि प्रतिबिम्बेन सह दर्पणेन वा मुखस्य कोऽपि सम्बन्धोऽस्ति । **सतीति** सम्बोधनं उक्तविश्वासाय । अनेन देहादिष्वनासक्त्यर्थं वैराग्यमपि सूचितम् । स्वासक्त्यैव तत्सिद्धिः, अन्यथा तदभाव इति ॥ ४६ ॥ ननु जननादयो हि प्रत्यक्षानुमानश्रुतिभिर्जीवस्य प्रतीयन्ते, ततश्च सङ्घातस्यैव तथात्वात् देहस्यासत्यत्वे आत्मन एव भविष्यन्तीति संयोगे निराक्रियमाणे असत्त्वहेतुना विपरीतमापतितम्, सर्वे दोषा आत्मन्येव समागता इति चेत्, तत्राह **जन्मादयस्त्व**िति । तुशब्दः पक्षं व्यावर्तयति । जननादयः देहस्यैव । येन प्रकारेण देहस्य सिद्धिः, तेनैव प्रकारेण जन्मादीनाम् । तेषां च देहसम्बन्धित्वस्य च तत एव सिद्धेः । अत उभयोरसत्त्वात् जन्मादयोऽपि देहस्यैव । योग्यं योग्येन संबध्यत इति । सर्पश्चलतीति समायाति भक्षयतीति च यथा सर्पधर्मा एव, एवं जन्मादयोऽपि देहधर्माः, यतो विक्रियाः । नह्यात्मनः सर्वविक्रियारहितस्य विक्रियाः सन्ति । **क्वचि**दिति । ज्ञानानन्तरं न सन्तीति इष्टमेवेति पक्षं व्यावर्तयति । न हि नायं सर्प इति बोधानन्तरमेव सर्पाभावः । किन्तु प्रतीतदशायामपि । तत्र ज्योतिःशास्त्रसिद्धं दृष्टान्तमाह **कलानामिवेति** । इन्दोः

कलानां पञ्चदशसङ्ख्याकानां एकेन दिनेन एकस्या नाशः, नतु चन्द्रस्य। स हि अम्मयः, सूर्यकिरणास्तत्र प्रतिबिम्बन्ते, अपगच्छन्ति चेति कालविदः। ननु सर्वोऽपि चन्द्रः अमावास्यायां क्षीयत इति नवो नवो भवति जायमान इति च कथं कलानां क्षय इति चेत्, तत्राह। अस्य जीवस्य चन्द्रस्य च कुहूरेव मृतिः। नतु कुह्वां तस्यादर्शनकृतमपि मरणम्, तथास्य काल एव मृतिः। सच कालः कदाचित्तं प्रकाशयति देहसम्बन्धेनोच्चावचेनापि, कदाचिन्नेति तस्योत्क्रान्त्यादयो निरूप्यन्ते। ननु वस्तुतस्तस्य मरणम्। मरणे उभयोर्वियोगाद्देहस्य च पृथक् स्थितत्वात् पृथङ्निराकरणप्रयासः॥ ४७॥ ननु मिथ्याभूतेन सह कदाचित्सम्बन्धो भवति। यथा रज्जुसर्पेण, देहेन तु सम्बन्धः आभूतसंप्लवमिति दृष्टान्तवैषम्यात् देहस्य सत्यत्वं आत्मनो वा सम्बन्धित्वं भवत्विति चेत्, तत्राह **यथा शयान** इति। न हि कदाचिदेव भवति यत्तदेव मिथ्या भवतीति नियमोऽस्ति कश्चित्, अपि तु सर्वदैव दृश्यमानमप्यसद्भवति। यथा यदैव शेते, तदैव असत्यप्यर्थे आत्मानं देहं विषयान् स्रक्चन्दनादीन् फलं सुखं चानुभवति। न चैतावता तेषां सत्यता भवति। 'मायामात्र'मिति सूत्रे तथा निर्णयात्। तथैव अबुधः शयान इव भवं संसारं प्राप्नोति, निद्रावदज्ञानमित्यर्थः॥ ४८॥

श्रीसुबोधिनीसारः

द्रव्यमधिभूतं प्राणा इंद्रियाण्यध्यात्मं गुणोऽधिदैवं तदात्मकस्तद्रूप एष देह आद्यंतवान् उत्पत्तिविनाशभाक् आत्मनि अविद्ययाऽज्ञानेन क्लप्तो रचितो देहिनं जीवं संसारयति संसृतिबंधेन बध्नाति॥ ४५॥ हे सति! आत्मनोऽन्येनाधिभूतादिना संयोगो वियोगश्च न कुतोऽसतोऽसत्त्वादन्यस्य तस्यान्यस्य भूतेंद्रियादेः प्रसिद्धेः प्रवृत्तेः तद्धेतुत्वादात्मतंत्रत्वात्। वस्तुतः दृग्रूपाभ्यां रवेः सकाशादिव॥ ४६॥ जन्मादयो विक्रिया विकारा देहस्यैव आत्मनः क्वचिन्न कलानामिव इंदोश्चंद्रस्य न विक्रियाः वृद्धिह्रासजन्माद्याः अस्यात्मनो मृतिस्तु कुहूरिवामावास्या यथा इंदुक्षय उच्यते तद्वत् हि युक्तम्॥ ४७॥ नन्वसंगस्यैकस्यात्मनः कथमन्यथा भानमित्यत आह। शयानः पुरुषो यथाऽऽत्मानं भोक्तारं विषयान् भोग्यान् फलं भोगं वा सत्यप्यर्थेऽनुभुंक्ते कल्पयति। तथाऽबुधोऽज्ञो भवं संसारम् आप्नोति॥ ४८॥

विवरण टिप्पणी

देह आद्यन्तेत्यत्र। **देशापरिच्छेदस्ये**ति। कालापरिच्छेदो देशापरिच्छेदव्यापको भवतीत्यर्थः। **प्रागभावे**ति। अभावः कारणं चात्रेत्यत्र वस्तुत एतयोः कारणावस्थात्वस्य व्यवस्थापनादत्रेवशब्दः। मृतानां देहानामन्तो दृश्यते। मुण्डस्यावयवादिरहितस्य देहस्य गर्भपाते उत्पत्तिर्दृश्यते। अतो न देहः सर्वदैव सावयव इति भावः॥ ४५॥ **नात्मनोऽन्येने**त्यत्र। अस्योपदेशस्य वैराग्यार्थकत्वादसुरस्य च रुक्मिणः सन्निधान्मायावादो रामेणोक्तः। 'मायिकत्वं पुराणेषु वैराग्यार्थमुदीर्यते' इति सिद्धान्तादिति भावः। **स्वासक्त्यैवे**ति। आत्मासक्त्यैव देहादिष्वनासक्तिः सिध्यति, तदभावे न सिध्यति। अत आत्मासक्त्यार्थमात्मनो देहव्यतिरेको बोध्यत इति भावः॥ ४६॥ **यथा शयान** इत्यत्र। **निद्रावदज्ञान**मिति। यथा निद्रया स्वप्नः, तथाऽज्ञानेन भवः, तथाच निद्रास्थानीयमज्ञानमबुधपदेनोक्तमिति भावः॥ ४८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

देहात्मनोर्वैलक्षण्येन भेदं स्पष्टयति—आद्यन्तवानेष देही जन्मादिसंसाररहितमपि देहिनं संसारयति। देहस्य जन्मादिमत्त्वे हेतुमाह—द्रव्याणि पृथ्व्यादि पञ्चमहाभूतानि, प्राणा इन्द्रियाणि मुख्यप्राणश्च, गुणाः शब्दादयः, तदात्मकस्तदारब्ध इति। जन्मादिसंसारहेतुत्वे हेतुमाह—अविद्यया शक्त्यात्मनि क्लृप्तः आत्मस्वरूपावरणेन तत्स्थाने प्रकाशित इति॥ ४५॥ 'एवं तर्हि देहात्मसंयोगस्य सत्त्वात् तद्विवेकेनापि कथं शोकनिवृत्तिर्मुक्तिर्वा' इत्याशङ्क्य अध्यासातिरिक्तसम्बन्धाभावमाह—नेति। असताऽऽत्मतिरिक्तसत्तारहितेनान्येन देहादिनाऽऽत्मनः संयोगो नास्ति। "असङ्गो ह्ययं पुरुष" इति श्रुतेस्तस्यासङ्गत्वस्वभावत्वात् वियोगस्य संयोगपूर्वकत्वात्संयोगाभावाद्वियोगोपि नास्ति। 'शुद्धचित्तानामेवात्मतत्त्वबोधो भवति' इति सूचयन् सम्बोधयति—सतीति। ननु 'कथमात्मव्यतिरेकेण देहादेरसत्त्वम्' इत्यपेक्षायामाह—तद्धेतुत्वात्तत्प्रतिसिद्धेरिति। तस्य देहादेः प्रसिद्धेः उत्पत्तेः प्रकाशस्य च तद्धेतुत्वात् स आत्मा हेतुर्यस्याः सा तथात्वात्। तत्र दृष्टान्तमाह—दृग्रूपाभ्यां यथा रवेरिति। यथा प्रकाश्यप्रकाशकत्वेन वर्तमानयोरपि चक्षूरूपयोः रवेः सकाशात्प्रसिद्धिः द्वयोरपि तैजसत्वात्तदभेदश्च, तथा देहेन्द्रियादीनां परस्परं प्रकाश्यप्रकाशकभावेन सिद्धानामप्यात्मचैतन्याधीन एव प्रकाशस्तत्कार्यत्वात्। तद्व्यतिरेकेणासत्त्वं चेत्यर्थः। तथा च वक्ष्यति द्वादशे—"दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथक् भवेत्॥ एवं धीः खानि मात्राश्च स्फुरन्त्यन्यतमादिति"॥ ४६॥ 'देहो आद्यन्तवान्" इति यदुक्तं तदेव दृष्टान्तेन स्पष्टयति—जन्मादय इति। जन्मादयो विक्रिया विकारा देहस्यैव भवन्ति। क्वचिद्देहे स्थितस्यापि जीवात्मनस्तेनैव भवन्ति। आदिपदेन अस्तित्ववृद्धिविपरिणामादिग्रहणम्। तत्र दृष्टान्तमाह—कलानामिति। यथा कलानां जन्मवृद्ध्यादिभिरिन्दोश्चन्द्रस्यापि जन्मादिव्यवहारः, चन्द्रस्य तु पृथक् जन्मादयो नैव भवन्ति, तथा देहजन्मादिभि-

रेवात्मनोऽपि जन्मादिव्यवहारः, न स्वतस्ते भवन्तीत्यर्थः। तथास्य जीवस्य मृतिर्मरणमपि चन्द्रस्य कुहूरिवेत्यन्वयः। नष्टेन्दुकलापञ्चदशी कुहूः। यथा चन्द्रकलानाशादेव अमावास्या कूहूरिन्दुक्षय इति व्यपदिश्यते, तद्वदात्मनो देहनाशादेव मृतिरिति व्यवहार इत्यर्थः॥ ४७॥ ननु 'आत्मनो देहादिसम्बन्धाभावे कथं भोक्तृभोग्यभोगप्रतीतिः ?' इत्याशङ्क्य स्वप्नदृष्टान्तेन समर्थयति—यथेति। देहादिसम्बन्धरूपेऽर्थे असति अविद्यमानेऽपि शयानः पुरुषः आत्मानं देहादिविशिष्टं भोक्तारं, विषयान् शब्दादीन् भोग्यान्, फलं तद्भोगं च यथा अनुभुङ्क्ते अनुभवति, तथाऽबुधः अज्ञो भवं जन्मादिसंसारं आप्नोति अनुभवति॥ ४८॥

अन्वितार्थप्रकाशिका

देह इति। द्रव्यमधिभूतं प्राणा इन्द्रियाण्यध्यात्मं गुणशब्देनाधिदैवं तत्त्रितयात्मकः अविद्यया शक्त्याऽऽत्मनि क्लृप्तः आत्मस्वरूपावरणेन तत्स्थाने प्रकाशितः आद्यन्तवानेष देहो जन्मादिसंसाररहितमपि देहिनं संसारयति। देहोपाधिना शुद्धो न प्रतीयते इति भावः॥४५॥ वस्तुतः शुद्ध एवेत्याह—नेति। हे सति ! असदात्मातिरिक्तसत्तारहितेनान्येन देहादिनाऽऽत्मनः संयोगो नास्ति। "असङ्गो ह्ययं पुरुष" इति श्रुतेः वियोगस्य संयोगपूर्वकत्वात् संयोगाभावे वियोगोऽपि नास्ति। असत इति पाठे आत्मव्यतिरेकेण देहादेरसत्त्वात् इत्यर्थः। कुतोऽसत्त्वं तत्राह। तस्य देहादेः प्रसिद्धेः उत्पत्तेः प्रकाशस्य च तद्धेतुत्वात्स आत्मा हेतुर्यस्याः सा तथात्वात्। ननु देवैरधिष्ठितेभ्यः इन्द्रियभूतानां प्रतीतिः प्रसिद्धा भूतप्रतीत्या च तत्र सिद्धिर्नान्यथेत्यत आह। यथा दृग्रूपाभ्यां प्रकाशकप्रकाश्यतया प्रसिद्धाभ्यां भिन्नादपि रवेः सकाशादेव दृग्रूपयोः प्रसिद्धिः। द्वयोरपि तैजसत्वात्तदभेदश्च। तथा देहेन्द्रियादीनां परस्परं प्रकाश्यप्रकाशकभावेन सिद्धानामप्यात्मचैतन्याधीन एव प्रकाशस्तत्कार्यत्वात् तद्व्यतिरेकेणासत्त्वं चेत्यर्थः। तथा च वक्ष्यति द्वादशे। "दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथक् भवेत्। एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात्।' इति। यद्वा। रवेः प्रसिद्धाभ्यामेव दृग्रूपाभ्यां परस्परं प्रसिद्धिर्यथा भवति तद्वदिति॥ ४६॥ जन्मेति। जन्मादयो विक्रिया देहस्यैव भवन्ति आत्मनस्तु क्वचिदपि न भवन्ति। देहजन्मादिभिरेवात्मनो जातोऽहं बालोऽहम् इत्यादिर्जन्मादिव्यवहारः। यथा कलानां जन्मवृद्ध्यादयो भवन्ति अस्य जलगोलविशेषस्य इन्दोस्तु न भवन्ति। कलाजन्मवृद्ध्यादिभिरेवेन्दोर्जन्मवृद्ध्यादि व्यवह्रियते एवं कलानामेव भयलक्षणा कुहूरमावास्या चन्द्रस्य मृतिः इन्दुक्षय इति व्यपदिश्यते॥ ४७॥ यथेति। देहादिसम्बन्धरूपेऽर्थे असति अविद्यमानेऽपि शयानः पुरुषः आत्मानं देहादिविशिष्टं भोक्तारं विषयान् शब्दादीन् भोग्यान् फलं तद्भोगं च यथाऽनुभुङ्क्ते अनुभवति तथाऽबुधः अज्ञो भवं जन्मादिसंसारं प्राप्नोति अनुभवति॥ ४८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

संसरणेपि जीवस्य शुद्धत्वमाह नेति। हे सति। अन्येन जीवाद्विलक्षणेन। असता अनित्येन स्थूलदेहेन। आत्मनो जीवस्य। संयोगो नित्यसंबंधो नास्ति। देहस्य विनाशिस्वभावात्। वियोगो नित्यसंबंधाभावश्चापि नास्ति पुनः पुनः प्राप्यत्वात्। जीवस्य तु तद्धेतुत्वात् तस्य देहस्य हेतुत्वात् कारणत्वात् जीवस्य निर्विकारित्वं शुद्धत्वं चास्तीति भावः तत्र दृष्टांतः यथा रवेः दृग्रूपाभ्यां सह नित्यसंयोगो नास्ति। रात्रावस्तगतत्वात्। नित्यवियोगोपि नास्ति पुनः पुनरुदयगतत्वात्। रवेस्तु तत्प्रसिद्धेः तयोर्दृग्रूपयोः प्रसिद्धेः प्रकाशस्य तद्धेतुत्वात् तयोर्दृग्रूपयोश्च हेतुत्वात्कारणत्वात् दृग्रूपसंयोगवियोगाभ्यां रवेरशुद्धत्वं परिणामित्वं च न भवति एवं जीवस्यापि देहयोगवियोगाभ्यां मलिनत्वं न भवतीति भावः॥ ४५॥ जीवस्य देहोत्पत्तिनाशयोर्विषयेऽविनाशित्वं सदृष्टांतमाह जन्मेति। देहस्य जन्मादयः उत्पतिवृद्धिक्षयादयो भावाः संति। तत्रात्मनो जीवस्य विक्रियाक्वचित्। कदाचिन्नास्ति। तत्र दृष्टांतः इंदोः कलानामेव जन्मादयो भावा यथा संति तद्वदिंदोर्नैव तथा सत्यपि कुहुः इंदुकलानाशरूपा अमावास्या। अस्य चंद्रस्य मृतिर्मृत्युरित्यज्ञा वदंति एवं देहनाशे जीवनाशं वदन्ति॥ ४६॥ वैदर्भीशोकनाशाय संसृतेरनित्यत्वं वदति यथेति। शयानो जनः आत्मानं स्वप्नदेहं विषयान् भोग्यार्थ्थान्। फलंभोगं च असत्य नित्येप्यर्थे सति यथानुभुंक्ते तथा अबुधः मोक्षसाधनसहितेन। जीवात्मपरमात्मज्ञानेन हीनोऽज्ञः भवं संसारं प्राप्नोति॥ ४७॥ आत्मनः शोषणं विमोहनं च यस्मित्तमज्ञानजं देहात्मनोरविवेकादुत्पन्नं शोकं तत्वज्ञानेन देहात्मविवेकेन निर्हृत्य त्यक्त्वा हे शुचिस्मिते। स्वस्थास्वस्थचित्ताभव॥ ४८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु सर्बेषामपि देहिनामित्युक्तेः कोऽसौ देहातिरिक्तो जीवो नाम कीदृशश्च तद्देहः कथं च देहातिरिक्तस्यात्मनः सुखदुःखादिभोक्तृत्वमित्यत आह। देह इति। एषः देहः, द्रव्यप्राणगुणात्मकः, तत्र द्रव्यं पृथिव्यादिभूतपञ्चकं, प्राणा इन्द्रियाणि, गुणाः तन्मात्रासंज्ञिकाः, पृथिव्यादिभूतपञ्चकीया गन्धादयो गुणाः, सत्त्वादिप्रकृतिगुणारब्धद्रव्यादितत्त्वान्तरसमुदायरूप इत्यर्थः। आद्यन्तवांश्च, आत्मा तु ज्ञानात्मक इति भावः। अविद्यया अनादिकालतः, स्वस्थाज्ञानात्मकाऽविद्ययेत्यर्थः। आत्मनि, क्लृप्तः। एवंविधोऽयं देहः, देहिनं स्वमेवात्मत्वेन मन्यमानं जीवं, संसारयति संसरणविषयं करोति॥ ४५॥ ननु देहः स्वसंबन्धमात्रेण

जीवात्मानं संसारयेत्तर्हि जीवद्वारा जीवशरीरकं परमात्मानमपि स संसारयतु इत्यत आह । नेति । हे सति, आत्मनः परमात्मनः, असता असदात्मकेन, अन्येन अन्तरा जीवसत्त्वात् स्वतो दूरवर्त्तिना पृथग्भूतेन च देहेनेत्यर्थः । संयोगः, वियोगश्च, न भवति। कुतः । तत्प्रसिद्धेः जीवानां देहोत्पत्तेः देहसंयोगवियोगोत्पत्तेर्वा, तद्धेतुत्वात् 'देहेन्द्रियमनः प्राणान् जनानामसृजत् प्रभुः' इत्युक्तेः परमात्माधीनत्वात् । परमात्माधीनत्वाद्देहो न परमात्मनो बन्धक इत्यर्थः । तदधीनत्वेन तस्य बन्धाभावे दृष्टान्तमाह दृग्रूपाभ्यां यथा रवेरिति । दृक् आदित्येनानुग्राह्यं चक्षुः चक्षुषा समीक्ष्यं रूपं च ताभ्यां दृग्रूपाभ्यां, रवेः आदित्यस्य, यथा न संसर्गः, दृग्रूपप्रकाशस्य रव्याधीनत्वात् । तद्वत् देहजीवाभ्यां परमात्मनोऽन्तस्थत्वेन संसर्गः वस्तुतः पृथग्वर्त्तित्वान्न देहकृतदोषाश्रयत्वमित्यर्थः ॥ ४६ ॥ 'देह आद्यन्तवानेष' इत्यनेनाद्यन्तवत्त्वस्य देहविषकत्वसूचनादात्मनो जन्माद्यभावमुत्पादयति । जन्मादय इति। जन्मादयः, विक्रिया विकाराः तु, देहस्य ह्येव । क्वचित् कदाचिदपि, आत्मनः न । तदन्तः स्थितवतोऽप्यात्मनः कदाचिदपि न सन्तीत्यर्थः । जन्ममरणभाक्त्कं देहस्यैव नात्मनः इत्येतदृष्टान्तप्रदर्शनेन दर्शयति । इन्दोः, कलानां उदय इति शेषः । इव, चन्द्रस्य कलोदय एव तज्जन्मस्थानीय इति भावः । अस्य चन्द्रस्य कुहूः कलानाशरूपाऽमावास्या, मृतिर्मृत्युः इव, कुहूशब्दबोधितस्तत्कलाक्षयोऽस्य मरणस्थानीय इति भावः । नैव परमार्थौ न स्त एव । एवमात्मनो देहोपलब्धिविनाशावेव जन्ममृतिव्यवहारभूतौ वस्तुतो नास्य जन्ममृत्यू इत्यर्थः ॥ ४७ ॥ देहो देहिनं संसारयतीति यदुक्तं तद्विशदयन् देहस्यासत्त्वेऽपि अज्ञानतः यावत्तत्सम्बन्धभाक्त्कं तावत् संसरणानिवृत्तिं सदृष्टान्तमाह । यथा शयान इति । यथा अर्थे स्वाप्ने पदार्थे, असत्यस्थिरेऽपि, शयानः पुमान्, स्थिरबुद्ध्या, आत्मानं भोक्तारं, विषयान् स्वप्नभोग्यान्विषयान्, फलं तद्भोगं च, अनुभुङ्क्ते यावत् स्वप्न तावज्जाग्रद्भाव इवानुभवति । तथा, अबुधोऽयमज्ञजीवः, भवं आप्नोत्येव यावदज्ञानं तावत्संसार प्राप्नोतीत्यर्थः ॥ ४८ ॥

कृष्णप्रिया

यह देह आदि और अन्त युक्त है । और वह शरीर पञ्च महाभूत, पञ्च प्राण, पञ्च तन्मात्रा, और त्रिगुणात्मक है। आत्मा में उसके अज्ञान से ही इसकी कल्पना हुई है । और वह कल्पित शरीर ही, जो उसे "मैं" समझता है उसको ही जन्म-मृत्यु के चक्कर में ले जाता है ॥ ४५ ॥ देवी रुक्मिणी जी ! नेत्र और रूप दोनों ही सूर्य के तेज से प्रकाशित होते हैं । भगवान् सूर्य ही उनका कारण है । इसलिये सूर्य के साथ नेत्र और रूप का न तो कभी वियोग होता है और न संयोग होता है । इसी प्रकार समस्त संसार की सत्ता आत्म-सत्ता के कारण जान पड़ती है इस समस्त जगत् का प्रकाशक आत्मा ही है । फिर आत्मा के साथ दूसरे असत् पदार्थों का संयोग एवं वियोग हो ही कैसे सकता है ॥ ४६ ॥ जन्म लेना, रहना, बैठना, बदलना, घटना और मरना ये सारे विकार के ही होते है आत्मा के नहीं । जैसे कृष्णपक्ष में कलाओं का क्षय होता है चन्द्र का नहीं परंतु अमावास्या के दिन लोग व्यवहार में चन्द्रमा का ही क्षय हुआ कहते-सुनते है वैसे ही जन्म-मृत्यु आदि सर्व विकार शरीर के ही होते है आत्मा के नहीं, परन्तु लोग उसे भ्रम-वश अपना अपने आत्मा का मान लेते हैं ॥ ४७ ॥ जैसे निद्रा में रहा हुआ पुरुष किसी पदार्थ के न होने पर भी स्वप्न में भोक्ता भोग्य और भोगरूप फलों का अनुभव करता है उसी प्रकार अज्ञान लोग झूठ मूठ संसार चक्र का अनुभव करते हैं ॥ ४८ ॥

तस्मादज्ञानजं [1]शोकमात्मशोषविमोहनम् । तत्त्वज्ञानेन निर्हृत्य स्वस्था भव शुचिस्मिते ॥ ४९ ॥

श्रीशुक उवाच

एवं भगवता तन्वी रामेण प्रतिबोधिता । वैमनस्यं परित्यज्य मनो बुद्ध्या समादधे ॥ ५० ॥
प्राणावशेष उत्सृष्टो [2]द्विड्भिर्हतबलप्रभः । स्मरन् विरूपकरणं वितथात्ममनोरथः ॥ ५१ ॥
[3]चक्रे भोजकटं नाम निवासाय महत् पुरम् ।
अहत्वा [4]दुर्मतिः कृष्णमप्रत्यूह्य यवीयसीम् । कुण्डिनं न प्रवेक्ष्यामीत्युक्त्वा तत्रावसद् रुषा ॥ ५२ ॥

कर्दमक्षमा

अन्वयः—हे शुचिस्मिते ! तस्मात्, अज्ञानजम्, आत्मशोष विमोहनम्, शोकम्, तत्वज्ञानेन, निहृत्य, स्वस्था भव॥४९॥ एवम्, भगवता, रामेण, प्रतिबोधिता, तन्बी, वैमनस्यम्, परित्यज्य, बुद्ध्या, मनः, समादधे ॥ ५० ॥ प्राणावशेषः द्विड्भिः, हतबलप्रभः, विरूपकरणम्, स्मरन्, वितथात्ममनोरथः शत्रुभिः, उत्सृष्टः, कृष्णम्, अहत्वा, यवीयसीम्, अप्रत्यूह्य, कुण्डिनम्, न प्रवेक्ष्यामि, इति उक्त्वा, दुर्मतिः निवासाय, भोजकटम्, नाम, महत्, पुरम्, चक्रे, तत्र, रुषा, अवसत् ॥ ५१-५२ ॥

---

१. बोध-विज. । २. रुक्मी-च. पु. टि. । ३. इदमधिकं-विज. । ४. दुर्मतिः-वीर. ; दुर्मति-श्रीधर वंशी. जीव. विज. विश्व. शुक. सु. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

आत्मानं शोषयति विमोहयति चेति तथा तम् निर्हृत्यापाकृत्य ॥ ४९ ॥ समादधे समाहितमकरोत् ॥ ५० ॥ रुक्मिणस्त्वेवं श्रुतवतो नाज्ञानं निवृत्तमिति दर्शयन्नाह—प्राणावशेष इति ॥ ५१ ॥ अहत्वा अज्ञत्वाऽदुर्मतिमिति च सत्योऽर्थः अप्रत्यूह्यानावर्त्य । अप्रतिबुध्येति तु सत्यम् । यवीयसीं स्वसारम् । यत्र विरूपितस्तत्रैवावसत् तत्र च भोजकटं नाम पुरमभवत् ॥ ५२–५४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वस्था तत्त्वज्ञा शुचिस्मित इति प्रोत्साहनार्था संबुद्धिः । अर्थद्वयमुपसंहरति–तस्मादात्मनः शोकः नीरसतापादनम् । हे शुचिस्मिते हे प्रसन्नहृदये इत्यर्थः । तव साक्षाल्लक्ष्मीत्वान्नेषदप्यज्ञानस्पर्शः किन्तु लौकिकलीलयैव त्वमित्थं व्यवहरसि मयापि तथोपदिश्यस इति भावः ॥ ४९ ॥ बुद्ध्या निश्चयात्मिकया । तथैव साप्यनुकृतवतीत्याह—एवमिति । प्रतिबोधितेत्यत्र सा तावत्स्वयमेव चिच्छक्तिरूपत्वान्नित्यं बुधैव प्रत्युत तदंशसम्बन्धादेव श्रीसंकर्षणादीनामपि बोधादिकं ततस्तेन तस्याः प्रतिबोधनं प्रतिदानरूपमेवेति प्रतिशब्दस्यार्थः ॥ ५० ॥ चित्तशुद्धिं विनोपदिष्टमपि तत्त्वं न प्रकाशत इत्याह—रुक्मिणस्त्विति । हते बलप्रभे वीर्यतेजसी यस्य स तथा । वितथो व्यर्थ आत्मनो मनोरथः "अहत्वा समरे कृष्णमप्रत्यूह्य यवीयसीम्" इत्येवंरूपोऽभिलाषो यस्य स तथा । प्राणेति युग्मकम् । पूर्वं द्विड्भिर्हृतबलप्रभः, ततो वितथात्ममनोरथः, ततो वैरूप्यपर्यन्तकरणात्प्राणमात्रावशिष्टीकृतः, तत उत्सृष्टः, पश्चाद्विरूपकरणं स्मरन्निति क्रमो ज्ञेयः । व्युत्क्रमोक्तिस्तद्वर्णनेनादरं सूचयित्वा तस्याप्यनादृतत्वं बोधयति । बलं सैन्यं वीर्यञ्च एकशेषत्वात् ॥ ५१ ॥ प्रतिज्ञाऽनिष्पत्तेस्तत्रान्यदेवपुरं रचयामास । लज्जितः पितृनगरं न जगामेत्यर्थः । उपभुंक्त इति भोजो युवराजः । यद्वा–भोजो विदर्भराजवश्यः "तत्रेश्वरेण क्रथकैशिकानां भोजेन दूतो रघवे विसृष्टः" इति रघुकाव्यात् । तस्य कटः शपथो यत्र तत् "कटः कलिंजे शपथे गजतुंडे कटावपि" इति कोशात् । सरस्वतीमते तु–भोजस्य तस्य कटः श्मशानमिव कटधूमस्य सौरभ्यमिव तद्वाचित्वात् । द्विड्भिरिति बहुवचनेन कृष्णपार्श्वात्ततः पद्भ्यां चलन्यदुसैन्यैरपि तिरस्कारभर्त्सनताडनादिभिर्विडंबित इति बोध्यते ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अर्थद्वयमुपसंहरति । तस्मादात्मनः शोषः नीरसतापादनं हे शुचिस्मिते ! हे प्रसन्नहृदये इत्यर्थः । तव साक्षाल्लक्ष्मीत्वान्नेषदप्यज्ञानस्पर्शः किन्तु लौकिकलीलयैव त्वमित्थं व्यवहरसि मयापि तथोपदिश्यस इति भावः ॥ ४९ ॥ तथैव साप्यनुकृतवतीत्याह । एवमिति । प्रतिबोधितेत्यत्र सा तावत्स्वयमेव महाचिच्छक्तिरूपत्वान्नित्यम्बुधैव प्रत्युत तदंशसम्बन्धादेव श्रीसङ्कर्षणादीनामपि बोधादिकं ततस्तेन तस्या बोधनं प्रतिदानरूपमेवेति प्रतिशब्दार्थः ॥ ५० ॥ प्राणेति सार्द्धकम् । पूर्वं द्विड्भिर्हृतबलप्रभः ततो वितथात्ममनोरथः ततो वैरूप्यपर्य्यन्तकरणात् प्राणमात्रावशिष्टीकृतः तत उत्सृष्टः पश्चाद्विरूपकरणं स्मरन्निति क्रमो ज्ञेयः व्युत्क्रमोक्तिभिस्तद्वर्जनेऽनादरं सूचयित्वा तस्याप्यनावृतत्वं बोधयति बलं सैन्यं वीर्य्यं च एकशेषत्वात् उपभुङ्क्ते इति भोजो युवराजः यद्वा भोजो विदर्भराजवंश्यः "तत्रेश्वरेण क्रथकैशिकानां भोजेन दूतो रघवे विसृष्ट" इति रघुवंशकाव्यात् तस्य कटः शपथो यत्र तत् "कटः कलिङ्गे शपथे गजगण्डे कटाव"पीति नानार्थत्वात् सरस्वतीमते तु भोजस्य तस्य कटः श्मशानमिव "कटधूमस्य सौरभ्य"मिति तद्वाचित्वात् ॥ ५१ ॥ पुरा कृतं शपथमेव दर्शयति । अहत्वेति । अप्रत्यूह्येति दीर्घमध्यत्वमार्षम् ॥५२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आत्मनः शोषो नीरसतापादनम्, न चेदं केवलम्, किन्तु विशेषतो मोहनञ्च, बुद्ध्यादि–सर्व्वविनाशकमित्यर्थः । तत्त्वज्ञानेन उक्तेन किंवा स्वतस्त्वयि विराजमानेनैव, शुचि शुद्धं स्मितं यस्यास्तत्सम्बोधनम् । शुचिस्मितत्वात् त्वं सदा प्रसन्नहृदयैवेति तत्त्वतस्तव शोको नास्तीति बुध्यत एव, तथापि मया यदोद्धत्यं कृतं तत् क्षन्तव्यमिति भावः । यद्वा, सदा निर्म्मलचित्तत्वाच्छुचिस्मिते ! श्रीकृष्णे स्वस्था अभिनिविष्टचित्ता भव, साक्षात्तथानुक्तिर्धार्ष्ट्यपरिहारार्थम् ॥ ४९ ॥ तन्वीति शोकेन कार्श्यात् किंवा कृशमध्यत्वादिना परमसौन्दर्य्यात्, अयं प्रयिबोधने हेतुः, अन्यथा शोकेन सौन्दर्य्यक्षयात् । प्रति प्रत्यक्षं बोधिता शिक्षिता, यतो भगवता सर्व्वज्ञेन श्रीकृष्णाभिप्रायादिकं जानतेत्यर्थः । रामेणेति प्रतिबोधनेन तस्याः सुखजननाभिप्रायेण । समादधे प्रेम्णा श्रीकृष्णे नितरामर्पितवतीत्यर्थः ॥ ५० ॥ प्राण एवावशेषोऽवशिष्टो यस्य सः, यतो हतं बलं सैन्यं सामर्थ्यं वा प्रभावस्तेजो यस्य सः, वितथो मिथ्याभूत आत्मनो मनोरथः श्रीकृष्णजिगीषादिर्यस्य सः, विशेषणानामेषां यथोत्तरं पुरनिर्म्माणहेतुत्वे श्रैष्ठ्यम् । महत् श्रीभीष्मकपुरतो वृहत्तरम्, भोजेभ्यो यादवेभ्यः कटः शपथो यत्र, यदूनां जयाय शपथकरणात्;—'कटः किलिञ्जे शपथे गजगण्डे करावपि' इति कोषः । वस्तुतस्तु भोजनां यादवानामक्रूरादीनां भक्तवराणां कटः, अतितुच्छत्वात् तृणासनप्रायमित्यर्थः ॥ ५१ ॥ यवीयसीं कनिष्ठभगिनीमिति तस्यां स्नेहविशेषं सूचयति । स च श्रीप्रद्युम्न–रुक्मवती–विवाहादिनाग्रे व्यक्तो भावी । तादृशदुरवस्थाप्राप्तस्यापि तादृशोक्तौ हेतुः—रुषेति; क्रोधेन पूर्व्वापरसर्व्वविचारानुदयादित्यर्थः ॥ ५२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अप्रत्यूह्य पुनरानयनमकृत्वा ॥ ५२–५३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उपसंहरति । तस्मादिति । तस्मात्तत्त्वदृशेरीदृशत्वात् आत्मानं मानसं शोषयत्वभास्वरयति विमोहयति चेति तथा तमज्ञानप्रभवं मोहं सुहृद्दुर्हृदुदासीन इत्येवं विधं मोहं तत्त्वज्ञानेन कृत्स्नस्य जगतः परमात्मशरीरकत्वज्ञानेन निर्हृत्यापाकृत्य हे शुचिस्मिते ! स्वस्था स्वस्मिन्स्थिता ज्ञानानन्दस्वरूपात्मविमर्शनपरा भव सुस्थेति पाठे निर्विषादा भवेत्यर्थः ॥ ४९ ॥ एवमिति तन्वी रुक्मिण्येवं प्रतिबोधिता वैमनस्यं दुःखं त्यक्त्वा बुद्ध्या तत्त्वनिर्णयात्मिकया मनः सङ्कल्पविकल्पात्मकं समाहितवती ॥५०॥ रुक्मिणस्त्वेवं श्रुतवतोऽपि नाज्ञानं निवृत्तमिति सूचयन्नाह । प्राणेति । रुक्मी तु द्विड्भिः शत्रुभिर्हृतं बलं प्रभा तेजश्च यस्य सः अत एव प्राणमात्रावशिष्टस्त्यक्तश्च वितथो व्यर्थः स्वमनोरथो यस्य सः आत्मनः स्वस्य विरूपकरणं कृष्णकर्तृकमिति शेषः स्मरन् भोजकटाख्यं विपुलं पुरं चक्रे ॥ ५१ ॥ तत्रेत्थं सङ्कल्पयामसेत्याह । अहत्वेति । दुर्म्मतिः रुक्मी यवीयसीं कनीयसीं कन्यां रुक्मिणीमप्रत्यूह्यानावर्त्य कुण्डिनपुरं न प्रवेक्ष्यामीति प्रतिज्ञाय रुषा क्रोधेन तत्र भोजकटेन्यवसत् ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

उपसंहरति । तस्मादिति ॥ ४९ ॥ बुद्ध्या कदाप्यतिरोहितज्ञानेन ॥ ५० ॥ रुक्मी तत्र किञ्चकारेति तत्राह । प्राणेति ॥ **५१** ॥ अप्रत्यूह्य अनिवर्तयित्वा यवीयसीमनुजाम् ॥ ५२–५३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

अहत्वा दुर्मतिमित्यादि । दुर्मतिं दुरवगाह्यमतिम्, अदुर्मतिं वा ॥ ५२–५९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अहत्वा दुर्मतिं दुरवगाह्यमतिम् ॥ ५२–५९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यस्मादेवं तस्मात् स्वस्था स्वभावस्था भव हे शुचिस्मिते ! मुखस्य स्वाभाविकीं प्रफुल्लतां प्रकाशय न त्वं प्राकृती सांसारिकी वधूरिति भावः ॥ ४९ ॥ लोका मां किं वदिष्यन्तीति वैमनस्यं चिन्तां समादधे समाहितमकरोत् ॥ ५० ॥ द्विड्भिरित्यनेन कृष्णपार्श्वात्ततः पद्भ्यां चलन् यदुसैन्यैरपि तिरस्कारभर्त्सनताडनादिभिः सविडम्बित इति बुध्यते ॥ ५१ ॥ दुःखं भुङ्क्ते इति भोजो रुक्मी तस्य कटः शपथो यत्र तत् "कटे कलिङ्गे शपथे गजदण्डे कटावपि" इति नानार्थात् तत्र स्वविरूपीकरणप्रदेशे ॥ ५२–५३ ॥

गूढार्थदीपिनी

आत्मानं शोषयति कृशीकरोति विमोहयतीति । निर्हृत्य दूरीकृत्य ॥ ४९ ॥ तन्वी रुक्मिणी । विमनसो भावः वैमनस्य शोकम् । समादधे सुस्थिरमकरोत् ॥ ५० ॥ प्राणेति सार्द्धम् । उत्सृष्टः त्यक्तः । वितथो व्यर्थः ॥ ५१ ॥ यवीयसीं कनिष्ठाम् । अप्रत्यूह्य अनिवर्त्य ॥ ५२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे शुचिस्मिते ! आत्मानं शोषयति विमोहयति चेति तथा तम् लीलासौष्ठवार्थं विडम्बितं निर्हृत्य अपाकृत्य ॥४९–५४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

जाग्रद्दशापन्नो जीवः कर्तोपलभ्यते भोक्ता चेति कथं कथय स्वातन्त्र्यं न जीवस्येति । यदि तस्य स्वातन्त्र्यं कथमेक एव परो ह्यात्मेत्युक्तिरित्यतोऽनुगुणनिदर्शनं दर्शयित्वा तद्विषयास्थिरतां व्युत्पाद्यैक एवेत्युक्तं निर्धारयितुमाह ॥ यथेति । शयानः सुप्त आत्मानमनुभुङ्क्ते जानाति विषयाञ्छन्दादीननुभुङ्क्ते फलं सुखदुःखादिकं चानुभुङ्क्ते वासनात्मकं सर्वमनुभुङ्क्ते । तदा जाग्रत्कालिकेऽर्थेऽसत्यविद्यमानेऽपि । न तत्र रथा इत्यादेः । तथा जाग्रदात्माऽप्यध्रुवानर्थात्स्वयं ध्रुवः सन्ननुभुङ्क्ते । तत्र यथा तथाऽत्रापि भोजयितैको विषयाश्च यथा प्रागग्रे नोपलभ्यन्ते तथैतेऽप्यस्थिरा इति भावः । तदविद्याक्षेपस्त्रैवर्णिकानां कथञ्चिद्वैदिकमार्गप्रवर्तनाद्भगवदनुग्रहेण भवेच्छूद्रादीनां कथं तत्क्षेप उपायाभावादित्यतोऽप्याह ॥ यथेति । यो ध्रुवो नित्यो वेदादिस्तद्रूपेऽर्थे सत्यपि तत्राधिकाराभावेऽपीति यावत् । आत्मा । ए भगवत्यात्मा मनो यस्य सोऽधिकारी त्रैवर्णिको यथाऽऽमानं स्वामिनं ध्रुवान्विषयान्फलं मोक्षरूपमनुभुङ्क्ते तथा शयानः शूद्रोऽप्यात्मा भगवन्मानसः । उपलक्षणमेतत् । त्रिवर्णपरिचर्यावान्ध्रुवान्विष-

यादनिनुभुङ्क्त इति । त्रैवर्णिकाःसञ्चरन्तो वेदमार्गप्रवर्तनात् । शयानः शूद्र उद्दिष्टो वेदकर्माप्रवर्तनादित्येकादशतात्पर्योक्तेः । ध्रुवो विष्णुर्ध्रुवाननुभुङ्क्ते भोजयतीति योजयन्ति ॥ ४९ ॥ उपसंहरति ॥ तस्मादिति । जीवस्य स्वातन्त्र्याभावादभावाच्च विषयस्थैर्यस्याज्ञानाज्जायत इत्यज्ञानजं शोकम् । तत्कार्यमप्याह ॥ आत्मेति । आत्मनो बोधो ज्ञानं तद्विमोहयति तस्य विमोहनं यस्मादिति वा । स्वार्थमविषयीकुर्वन्तमिति यावत् । तत्त्वज्ञानेन मदुपदेशोज्जृम्भितेन निर्हृत्य परिहृत्य शुचिस्मिते स्वस्था भ्रातृवैरूप्यचिन्तादिरहिता भव ॥ ५० ॥ भगवता रामेणैवं प्रतिबोधिता तन्वी बुद्ध्या वैमनस्थं दुर्मनस्कतां परित्यज्य मनः स्वोचितकार्योचित्यात्तथा समाददे गृहीतवती स्वाधीनं चक्र इति यावत् । समादध इति पाठे समाहितमतनोदित्यर्थः ॥ ५१ ॥ रुक्मिण्या सह रूक्मवर्णे गते रुक्मी किमकरोदित्यत आह ॥ प्राणावशेष इति । अवशिष्यन्त इत्यवशेषाः प्राणा एषावशेषा यस्य स सन् द्विड्भिर्ये भैष्म्याः परिरम्भणं चकमिरे तेषां भुजांश्चिच्छेदुर्ये वा तन्मुखचन्द्रचुम्बनरुचिं तेषां शिरांसि द्विषां ये तल्पे शयनं तया सह खला लोका अम्बया सङ्गरे प्रेतैः सार्धमशीशपन्हरिभटा इति कर्मकृद्भिर्जीवेत्युत्सृष्टस्त्यक्तः । हते गते बलप्रभे यस्य स विरूपकरणं स्मरन्वितथो व्यर्थीभूत आत्मा मनोरथो यस्य स तथा भोजकरं नाम महत्पुरं । द्वे पदे । निवासाय चक्रे ॥ ५२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतो अज्ञानेनैव देहप्रतीतेः देहस्य च मिथ्यात्वात् देहसम्बन्ध एव आत्मनः परिच्छेदप्रतीतिः, परिच्छेदे एव च शत्रुमित्रादिप्रतीतिरिति, परम्पराया **अज्ञानमेव** मूलमिति तत्त्वज्ञानेन तन्निराकरणं कर्त्तव्यमित्याह **तस्मादि**ति । शोकस्तु विषमबुद्धिजन्य इति अज्ञानकृत एव । शोकस्य परित्यागाय दोषद्वयमाह । आत्मनोऽन्तःकरणस्य शोषो विमोहनं च यस्मादिति । ततः अत्यपकारित्वात्तदज्ञानं तत्त्वज्ञानेन निर्हृत्य स्वस्था भवेत्युपदेशः, प्रार्थना वा । **शुचिस्मित** इति । सहज एव तव प्रसाद इति कृत्रिमनिराकरणं नात्यन्तं क्लेशेन कर्तव्यमिति सूचितम् ॥ ४९ ॥ एवमुपदिष्टज्ञानं भगवत्सान्निध्यात्फलितमित्याह **एवं भगव**तेति । ननु भगवत्सिद्धान्तं परित्यज्य ज्ञानसिद्धान्तः किमिति बोधितः, तत्राह **तन्वी**ति । **भगवा**निति च । न हि भगवान् विरुद्धं स्वसिद्धान्तं कथयति । मुक्तानामेव तत्राधिकारात् । इयं च तन्वी विषयपरा । रामश्च साधनपरः । अतो हेतुत्रयस्यापि तथात्वात् ज्ञानेनैव प्रतिबोधिता । ज्ञानस्य च प्रयोजनं तस्यां वैमनस्यपरित्यागमात्रं जातम्, भगवति या दोषबुद्धिः स्थिता, सा गता । ततः विक्षिप्तं मनः बुद्ध्या समाहितमपि कृतवती । एको भगवद्विषयको दोषः । अपरो विक्षेपेण तस्या एव दुःखदः । उभयनिवृत्तिर्ज्ञानफलम् ।५०। एवं रुक्मिण्याः समाधानमुक्त्वा रुक्मिणः परित्याग एव उभयेषां सुखदो भवतीति तत्परित्यागमाह **प्राणावशेष** इति । बलभद्रेण मोचनेऽप्यसहायात् अन्येन मारणं संभवतीति द्विड्भिरुत्सृष्ट उक्तः । हतं बलं प्रभा च यस्य । द्विड्भिरेव । तस्यान्यद्विस्मृतम्, विरूपकरणं तु स्मरति । जातेऽपि विरूपे यदि स्वाभिलषितः कश्चित्सिध्येत्, तदा न तथा खिन्नो भवेत् । किन्तु वितथः आत्मनो मनोरथो यस्य । तथापि स्वप्रतिज्ञां नान्यथा कृतवान् । भगवता हि तस्य भगिनी परिगृहीतेति ॥ ५१ ॥ अत एव कुण्डिनपुरं परित्यज्य अन्यत्रैव स्थित इत्याह **अहत्वे**ति । यतोऽयं दुर्मतिः, अतस्तत्रैवावसत्, यत्र मुण्डितः । भोजा हि मृतकर्पटग्राहकाः । जात्यपकर्षे भोजाद्यवन इति यवनात्पूर्वं निरूपितः । तस्य कट इति मरणपर्यन्तं तत्रैव स्थास्यामीति तस्य ग्रामस्य नाम भोजकटमिति कृतवान् । यद्यपि न कोऽपि पुरुषार्थः, नह्यसत्प्रतिज्ञाया अपालने **कश्च**न दोषोऽस्ति, तथापि भ्रातृत्वाद्रोषेण तत्रैव स्थितः ॥ ५२ ॥

श्रीसुबोधिनी–सारः

तस्माद्धेतोरात्मानं शोषयति विमोहयतीति तथा तमज्ञानाज्जातं शोकं तत्त्वज्ञानेन निर्हृत्य दूरीकृत्य स्वस्था भव हे शुचिस्मिते ॥ ४९ ॥ शुकोक्तिः । तन्वी रुक्मिणी भगवता रामेणैवं प्रतिबोधिता वैमनस्यं मनोव्यथां परित्यज्य बुद्ध्या मनः सुस्थं चकार ॥ ५० ॥ प्राण एवावशेषो यस्य स उत्सृष्टस्त्यक्तः द्विड्भिः शत्रुभिर्हते बलप्रभे यस्य स वितथो मिथ्यात्मनो मनोरथो यस्य स विरूपकरणं मुंडनं स्मरन् चिंतयन् सन् भोजकटं नाम पुरं चक्रे दुर्मतिं कुबुद्धि कृष्णमहत्वा यवीयसीं कनिष्ठां भगिनीम् अप्रत्यूह्य न मोचयित्वा कुंडिनं न प्रवेक्ष्यामीत्युक्त्वा रुषा क्रोधेन तत्रावसत् । भोजकटे पुरे निवासमकरोत् ॥ ५१-५२ ॥

विवरणटिप्पणी

एवं भगवतेत्यस्याभासे । **भगवत्सान्निध्या**दिति । इदमपि ज्ञानमसुरसंनिधाने न फलति । तेषां देहात्मवादित्वस्य छान्दोग्ये व्यवस्थापनात् । तथापि भगवत्सान्निध्यात्फलितमित्यर्थः । व्याख्याने । **भगवत्सिद्धान्त**मिति । 'अखण्डं कृष्णवत्सर्व'मिति सिद्धान्तमित्यर्थः । **ज्ञानसिद्धान्त** इति । 'असत्यमप्रतिष्ठं ते' इति वाक्योक्तं सर्वस्यासत्त्वेन ज्ञानं तत्सिद्धान्त इत्यर्थः । व्याख्याने **एक** इति । वैमनस्यमित्यर्थः । **अपर** इति । मनोविक्षेप इत्यर्थः ।

इति पञ्चमाध्यायव्याख्या समाप्ता ।

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

उपदेशमुपसंहरति—तस्मादिति । 'तव शान्तिरेव युक्ता' इत्याशयेन सम्बोधयति—हे शुचिस्मितेति । यस्मादज्ञानमूलकमेव शोकादि तस्मादात्मज्ञानेन अज्ञानजं शोकं निर्हृत्य अपाकृत्य स्वस्था शान्तचित्ता भवेत्यन्वयः । 'शान्त्यभावे सुखं न स्यात्' इत्याशयेन शोकं विशिनष्टि—आत्मानमन्तःकरणं शोषयति कृशीकरोति, तथा विमोहयति शत्रुमित्रादिभ्रान्तिमुत्पादयति चेति तथा तमिति ॥ ४९ ॥ तन्वी सुकुमाराङ्गी रुक्मिणी एवं रामेण प्रतिबोधिता सती रुक्मिवैरूप्यनिमित्तं वैमनस्यं शोकं परित्यज्य बुद्ध्या विवेकात्मिकया मनःसङ्कल्पविकल्पात्मकं समादधे समाहितवती । श्रीरामोपदेशस्य साफल्ये हेतुमाह—भगवतेति ॥ ५० ॥ रुक्मिणस्तु आत्मतत्त्वं श्रुतवतोऽप्यज्ञानं न निवृत्तम्, अतो यत्कृतवांस्तदाह—प्राणेति । द्विड्भिः शत्रुभिः कृष्णादियदुभिः हतं बलं प्रभा तेजश्च यस्य सः, अत एव प्राणमात्रमवशेषो यस्य सः, तैरेव उत्सृष्टः वशीकृत्य त्यक्तः, अत एव वितथः अपूर्ण आत्मनो मनोरथो यस्य सः, स्वविरूपकरणं स्मरन्, अत एव रुषा क्रोधेन 'दुर्मतिं कृष्णमहत्वा यवीयसीं कनिष्ठां रुक्मिणीमप्रत्यूह्य अनावर्त्य कुण्डिनं पुरं न प्रवेक्ष्यामि' इत्युक्त्वा प्रतिज्ञाय यत्र विरूपितः तत्रैव भोजकटं नाम महत् विपुलं स्वनिवासाय पुरं चक्रे तत्रैवावसत् इति सार्धद्वयान्वयः ॥ ५१–५२ ॥

अन्वितार्थप्रकाशिका

तस्मादिति । हे शुचिस्मिते ! यस्मादज्ञानमूलकमेव शोकादि तस्मात् आत्मानमन्तःकरणं शोषयति कृशीकरोति तथा विमोहयति तम् अज्ञानजं शोकम् आत्मतत्त्वं ज्ञानेन निर्हृत्य अपाकृत्य स्वस्था शान्तचित्ता भव ॥ ४९ ॥ एवमिति । तन्वी सुकुमाराङ्गी रुक्मिणी भगवता रामेण प्रतिबोधिता सती रुक्मिवैरूप्यनिमित्तं वैमनस्यं शोकं परित्यज्य बुद्ध्या विवेकात्मिकया मनः संकल्पविकल्पात्मकं समादधे समाहितवती ॥ ५० ॥ रुक्मिणस्तु एवं श्रुतवतोऽपि नाज्ञानं निवृत्तमित्याह—प्राणेति सार्द्धम् । द्विड्भिः शत्रुभिः कृष्णादियदुभिः हतं बलं प्रभा तेजश्च यस्य सः अत एव प्राणमात्रमवशेषो यस्य सः तैरेव उत्सृष्टः वशीकृत्य त्यक्तः अत एव वितथः अपूर्णः आत्मनो मनोरथो यस्य सः स्वविरूपकरणं स्मरन् तत्रैव विरूपीकरणप्रदेशे भोजकटं नाम महत् विपुलं पुरं स्वनिवासाय चक्रे । भोजस्य विदर्भराजस्य दुःखभोक्तुर्वा कटः शपथो यत्रेति व्युत्पत्तेः । "कटः किलिञ्जे शपथे" इति नानार्थात् ॥ ५१ ॥ शपथमाह–अहत्वेति । दुर्मतिं कृष्णमहत्वा यवीयसीं कनिष्ठां रुक्मिणीमप्रत्यूह्य अप्रत्यावर्त्य कुण्डिनं पुरं न प्रवेक्ष्यामीति रुषा उक्त्वा प्रतिज्ञाय वस्तुतः अहत्वा अज्ञात्वा अदुर्मतिमिति च्छेदः । अप्रत्यूह्य विघ्नितामकृत्वा इत्युक्त्वा तत्रैवावसत् ॥ ५२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तन्वी रुक्मिणी वैमनस्य ह्रदासिन्यं । समादधे समाहितं चकार ॥४९॥ उत्सृष्टस्त्यक्तः वितथः मिथ्याजातः स्वमनोरथो यस्य सः ॥ ५० ॥ अप्रत्यूह्य न आनीय । तत्र भोजकटं पुरं कृत्वा अवसत् ॥ ५१ ॥ पुरं द्वारकां ॥ ५२–५३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उपसंहरति । तस्मादिति । तस्मात् ज्ञानदृशा सांसारिकसंबन्धादेरसत्यत्वाद्धेतोः, आत्मानं मानसं शोषयत्यभास्वरयति मोहयति चेति आत्मशोषविमोहनस्तं अज्ञानजं शोकं, तत्त्वज्ञानेन कृत्स्नस्य जगतः परमात्मशरीरकत्वज्ञानेन, निर्हृत्यापाकृत्य, हे शुचिस्मिते, स्वस्था स्वस्मिन् स्थितज्ञानानन्दस्वरूपात्मविमर्शनपरा भव । पाठान्तरे निर्विषादा भवेत्यर्थः ॥ ४९ ॥ एवमिति । तन्वी रुक्मिणी, एवं भगवता रामेण, प्रतिबोधिता सती, वैमनस्यं दुःखं, परित्यज्य त्यक्त्वा, बुद्ध्या तत्त्वनिर्णयात्मिकया मत्या, मनः संकल्पविकल्पात्मकं मानसं, समादधे समाहितवती ॥ ५० ॥ प्राणावशेष इति । द्विड्भिः शत्रुभिः हते बलप्रभे बलतेजसी यस्य सः, प्राणावशेषः, उत्सृष्टः । वितथो व्यर्थः आत्ममनोरथः स्वमनोरथो यस्य सः, रुक्मी, विरूपकरणं श्रीकृष्णकर्त्तृकस्वकीयश्मश्रुवपनादिकं स्मरन् सन्, निवासाय स्वनिवासार्थं, महत् भोजकटं नाम पुरं, चक्रे ॥ ५१ ॥ अहत्वेति । दुर्मतिः रुक्मी, कृष्णं अहत्वा, यवीयसीं मत्कनिष्ठभगिनीं रुक्मिणीं, अप्रत्यूह्य अनावर्त्य, कुण्डिनं न प्रवेक्ष्यामि, इति, उक्त्वा, पुरान्निःसृतत्वात्तदसिद्धेर्हेतोः, रुषा तत्र भोजकटे, अवसत् ॥ ५२ ॥

कृष्णप्रिया

इसलिये हे साध्वी रुक्मिणी जी ! अज्ञान के कारण होने वाले इस शोक का त्याग कीजिये । यह शोक अन्तःकरण को मूर्च्छित कर देता है । मोहित कर देता है । इसलिये इसे छोड़कर आप अपने स्वरूप में स्थित हो जाईए ॥ ४९ ॥ श्रीशुक्राचार्यजी ने कहा राजन् परीक्षित् ! जब परमज्ञानी बलभद्रजी ने इस प्रकार तत्त्वज्ञान से आत्म-रहस्य समझाया तब कोमलाङ्गी देवी रुक्मिणी जी ने मन में प्रकट हुआ वैमनस्य-भाव निश्चयात्मिका स्थित-प्रज्ञा से हटा दिया ॥ ५० ॥ राजन् रुक्मी का

नाश हो गया था, केवल प्राण ही अवशिष्ट थे। केवल श्वास ही ले रहा था। मन की समस्त कामनाओं का ध्वंस हो गया था। पुनः शत्रुओं ने अपमानित करके जीवन दान दिया था और विकृत स्वरूप बनाने की व्यथा को विसर नहीं सकता था तब रुक्मि ने अपने पण को सत्य करने का मार्ग निकाता ॥ ५१ ॥ उसकी दो प्रतिज्ञायें था, 'कुमति कृष्ण को मारे विना और अपनी छोटी बहिन को लौटाये विना मैं कुण्डिनपुर में प्रवेश नहीं करूंगा'' इन वचनों की रक्षा के लिये और अपने निवास के लिये भोजकट नाम का एक बड़ा नगर वसाया। और क्रोध-युक्त उसी पुरी में रहने लगा ॥ ५२ ॥

[1]भगवान् भीष्मकसुतामेवं निर्जित्य भूमिपान्। पुरमानीय विधिवदुपयेमे [2]कुरूद्वह ॥ ५३ ॥
तदा महोत्सवो [3]नृणां यदुपुर्यां गृहे गृहे। अभूदनन्यभावानां कृष्णे यदुपतौ नृप ॥ ५४ ॥
नरा [4]नार्यः प्रमुदिताः प्रमृष्टमणिकुण्डलाः। पारिबर्हमुपाजह्रु[5] [6]वरयोश्चित्रवाससोः ॥ ५५ ॥
सा वृष्णिपुर्युत्तमितेन्द्रकेतुभिर्विचित्रमाल्याम्बररत्नतोरणैः।
बभौ [7]प्रतिद्वार्युपक्लृप्तमङ्गलैरापूर्णकुम्भागुरुधूपदीपकैः ॥ ५६ ॥

कर्दमक्षमा

अन्वयः—हे कुरूद्वह ? भूमिपान्, निर्जित्य, भगवान्, भीष्मक, सुताम्, पुरम्, आनीय, एवम्, विधिवत्, उपयेमे ॥५३॥ हे नृप ! तदा यदुपुर्याम्, गृहे, गृहे, यदुपतौ, श्रीकृष्णे, अनन्य, भावानाम्, महोत्सवः, अभूत् ॥ ५४ ॥ प्रमुदिताः, प्रमृष्टमणि कुण्डलाः, वरयोः, चित्र, वाससोः, पारिबर्हम् उपाजह्रुः ॥ ५५ ॥ उत्तभितेन्द्रकेतुभिः, विचित्रमाल्याम्बररत्नतोरणैः, प्रतिद्वारि उपक्लृप्तमङ्गलैः, आपूर्णकुम्भागुरुधूपदीपकैः, सा, वृष्णिपुरी, वभौ ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वरयोर्वरवध्वोः। पारिबर्हं देयमुपस्करम् ॥ ५५ ॥ उत्तभितैरिद्रकेतुभिर्ध्वजविशेषैः। उपक्लृप्तानि मंगलानि लाजांकुरपुष्पप्रकरादीनि तैः ॥ ५६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुरं द्वारकाम्। जयतेर्द्विकर्मकत्वात्कर्मद्वयम्। तान्पराभवंस्तामाच्छिद्येत्यर्थः ॥ ५३ ॥ तदा विवाहावसरे। कृष्णे अन्यः शत्रुरिति भावरहितानां निरतिशयभक्तियुक्तानां वा ॥ ५४ ॥ वरयोरिति—"पुमान् स्त्रिया" इत्येकशेषः ॥ ५५ ॥ सा द्वारका। उत्तभितैरुत्क्षिप्तैः। "पञ्चवर्णा वैजयन्ती इन्द्रध्वज इतीरितः। पीतो नीलः सितो रक्तो हरितः पञ्चवर्णकाः॥" इत्युक्तलक्षणैरिंद्रध्वजैः। यद्वा—"चतुरस्रं ध्वजाकारं राजद्वारे प्रतिष्ठितम्। शक्रध्वजमिति प्राहुः पौरलोकसुखावहम्॥" इत्युक्तलक्षणो ध्वज उत्तभितो येषु तैः—"एवं यः कुरुते यात्रामिद्रकेतोर्युधिष्ठिर। पर्जन्यः कालवर्षी स्यात्तस्य राज्ये न संशयः॥" इति भविष्योत्तरोक्तेः ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जयतेर्द्विकर्मकत्वात्कर्मद्वयं तान् पराभवन् तामाच्छिद्येत्यर्थः तत्रानीयोपयेम इत्यनेन भीष्मकसुतामित्वस्य मुख्यस्यैवान्वयः ॥५३॥ गृहे गृह इति अत्र हेतुः न विद्यते श्रीकृष्णादन्यस्मिन् भावः प्रेमा येषाम् ॥५४॥ वरयोर्वरवध्वोरिति स्वस्रोरितिवत् चित्रं नानावर्णं वासो ययोरिति बिवाहे शोभाविशेष उक्तः ॥५५॥ सेति युग्मकम् मालादीनां तोरणानि तैः; उप आधिक्येन शोभिता ॥ ५६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवानिति दुष्टनृपवर्गनिर्जयादिना निजैश्वर्य्यप्रकटनाभिप्रायेण, भीष्मकस्य सुतामिति स्नेहादिना पश्चाद्विवाहसामग्रीसहितस्य तस्यागमनं सूचयति। अतोऽग्रे विदर्भाणामपि द्वारकामध्ये मोदो वक्ष्यते। अत एव विधिर्विवाहे यः प्रकारस्तदनुसारेण। ननु कथमुपयेमे, तद्विस्तार्य्य कथ्यतामित्यपेक्षायामाह—हे कुरूद्वहेति, महाक्षत्रिय कुलोद्भवत्वात्तत् त्वं जानास्येवेति भावः॥५३॥ महान् वैकुण्ठादप्यधिक उत्सवो गीतवाद्याद्यानन्दकर्मविशेषः, नृणां सर्वेषामेव मनुष्याणाम्, यदुपुर्य्यामिति तत्र यदुनां प्राधान्यात्

---

[1] यत्र भोजकटं नाम निवासायाभवन् पुरम्–विज. च. पु. टि.। [2] यदू–विज.। [3] राजन्–प्रा. पा.। [4] नार्यश्च–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक.। [5] निन्यु–वीर.। [6] वेषयोः। [7] युक्त–विज.।

'गृहे गृहे' इति प्रत्येकं सर्वेष्वपि गृहेष्वित्यर्थः। यतः कृष्णे साक्षाद्भगवति सर्व्वचित्ताकर्षके वा, न विद्यतेऽन्यत् फलापेक्षादिकं यस्मिंस्तादृशो भावो भक्तिर्येषां तेषाम्। कुतः? यदुपतौ यदुकुलपालनद्वारा निजाशेषैश्वर्य्यप्रकटनादित्यर्थः। यद्वा, यदुपुर्य्यां महोत्सवेऽयं हेतुः, यद्वा, यादवेन्द्रत्वेन ज्ञानान्न चेश्वरत्वादिनेत्यर्थः, यद्वा, न विद्यते श्रीकृष्णादन्यस्मिन् भावः प्रेमा येषाम्, एकान्तिनामित्यर्थः। हे नृपेति प्रहर्षोदयात्, यद्वा, निजप्रभु-नवविवाहे तेषां तादृगुत्सवो युक्त एव, तच्च त्वया नृपत्वेन बुध्यत एवेति भावः ॥ ५४ ॥ प्र–शब्दाभ्यामन्यकालतस्तत्र तत्रोत्कर्षं बोधयति। पाठान्तरे वरयोरिति तथा चित्रं तैल-हरिद्रादिना मनोहरं वासो ययोरिति विवाहलक्षणमुक्तम्। अत उप समीप एव, किंवा उपायनत्वेनाजह्रुरर्पयामासुः, यद्वा, वरयोः सर्वथा सर्वश्रेष्ठयोरिति तद्योग्यत्वेन पारिवर्हस्यापि श्रैष्ठ्यं सूचितम्। किञ्च, चित्रमद्भुतं वासो ययोरिति तत्रापि बहुलचित्रवासांसीति भावः ॥ ५५ ॥ सा सर्वसम्पत्तिमयी तन्महोत्सवमण्डिता वा, अनिर्व्वचनीयमाहात्म्या वा विचित्रैः स्थाने स्थाने विन्यस्तैर्माल्यादिभिः, यद्वा, विचित्राणि माल्यादीनां तोरणानि, तैर्बभौ अशोभत ॥ ५६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

उत्तभितैः स्थापितैः उपक्लृप्तमङ्गलैः क्लृप्तमङ्गलद्रव्यर्दीपैश्च ॥ ५६–६० ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

भगवानिति। पुरं प्रति प्रापय्य यदूद्वहो भगवान् यथाविधि विवाहितवान् ॥ ५३ ॥ तदेति। तदा उद्वाहदिनेष्वित्यर्थः। उत्सवो बभूव कथंभूतानां यदुपतौ कृष्णे अनन्यभावानाम् एकान्तस्नेहानाम् ॥ ५४ ॥ नरा इति। प्रमृष्टानि निर्मलीकृतानि मणिमयकुण्डलानि येषां यासां च ते ताश्च वरयोर्बरवध्वोः देयं पारिबर्हमुपस्करमानिन्युः ॥ ५५ ॥ तत्कालिकीं पुरीमालक्षयति—सेति। उत्तभितैरुद्धृत्य प्रतिबद्धैरिन्द्रकेतुभिः ध्वजकेतुविक्षेषैर्विचित्रैर्माल्यादिभिश्च गृहाणां द्वारे द्वारे उपक्लृप्तानि मङ्गलानि लाजाङ्कुरपुष्पकुटकादीनि तैश्च समन्तात् पूर्णैः कुम्भैरगुरुधूपैश्च बृष्णीनां सा पुरी द्वारका बभौ ॥ ५६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यदुत कृष्णे अनन्यभावानाम् अन्यः शत्रुरिति भावरहितानां निरतिशयभक्तियुक्तानामित्यर्थः ॥ ५४–५५ ॥ उत्तभितेन्द्रकेतुभिः उत्क्षिप्तेन्द्रध्वजैः ॥ ५६–५७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अनन्यो एकान्तभावस्तद्वताम् ॥ ५४ ॥ वरयोर्वरवध्वोः ॥ ५५ ॥ उत्तम्भितैरत्युच्चैस्तम्भैरिवोन्नमितैरिन्द्रकेतुभिरिन्द्रपुरस्पर्शिपताकायुक्तैः ॥ ५६ ॥

गूढार्थदीपिनी

निर्जित्य। जयतेः द्विकर्मकत्वात्कर्मद्वयम्। भीष्मकसुतामानीयेति योज्यं वा। उपयेमे विवाहितवान् ॥ ५३ ॥ तदा विवाहावसरे। कृष्णे अनन्येति योज्यम् ॥ ५४ ॥ प्रमृष्टानि परिष्कृतानि मणिमयानि कुण्डलानि येषां ते। पारिबर्हं कन्यादेयद्रव्यम् समर्पयामासु। वरयोर्वरवध्वोः। 'पुमान् स्त्रिया' इत्येकशेषः ॥ ५५ ॥ सा वृष्णिपुरी द्वारका बभौ। कैः। उत्तभितैरत्युच्चैः इन्द्रकेतुभिरिव ध्वजैः इन्द्रदेवताकैर्वा। विचित्रैर्माल्यादिभिश्च। उपक्लृप्तैः स्थापितैर्माङ्गलिकैर्जलपूर्णघटादिभिश्च। माल्यानि पुष्पाणि तोरणानि वन्दनमालिकाः ॥ ५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

वरयोर्वरवध्वोर्देयं पारिबर्हमुपस्करम् उपानिन्युः ॥ ५५ ॥ तदा उत्तभितैरिन्द्रकेतुभिः ध्वजविशेषैः विचित्रैर्माल्यादिभिश्च प्रतिद्वारि उपक्लृप्तानि मङ्गलानि लाजाङ्कुरपुष्पपुटकादीति तैः आपूर्णकुम्भागुरुधूपदीपकैश्च बभौ ॥ ५६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कुत इत्यत इत इत्याह। अहृत्येति। तत्र रुषाऽवसत् ॥ ५३ ॥ एवं भूमिपतीन्निर्जित्य रुक्मिणीं पुरीं द्वारकामानीय विधिवदुपयेमे ॥ ५४ ॥ गृहे-गृहे प्रतिगृहं यादृशी मयि भक्तिः स्यात्तादृश्यन्यत्र नैव चेत्। अनन्यभक्तिर्विज्ञेयेत्युक्तेर्यदुपतावन्यसदृशो भावो भक्तिः स नास्ति येषां तेऽनन्यभावास्तेषां महानुत्सवो यदुपुर्यभिभूत् ॥ ५५ ॥ वरा च वरश्चैवमेव सुवाससी च सुवासाश्च तयोः पारिबर्हं विवाहानेहसि प्राहुणिकैर्देयं तत्रैव प्राक्तनप्राहुणिका रुक्मिणीसम्बन्धिन इति तद्दत्तस्य पारिबर्हता। सामान्यतो राज्ञो देयवस्तुनोऽपि नाम। पारिबर्हं तु राजार्हवस्तुन्यपि परिच्छद इति विश्वः ॥ ५६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो भगवतः कृत्यमाह **भगवा**निति। यदा सर्वथा निर्दुष्टा सर्वैस्त्यक्तममत्वा, तदापि भगवान् वीर्यशुल्केन विवाहं कर्तुम्, एवं प्रकारेण भूमिपान् निर्जित्य, गान्धर्वन्यायेन तामगृहीत्वा, उपनयनवत् विवाहस्यापि संस्कारत्वात् सर्वसम्मत्यर्थं **स्व**पुरीमानीय **उपयेमे**, विधानपूर्वकं विवाहं **कृत**वान्। क्षत्रियाः प्रायेणैवं न कुर्वन्तीति **भगवान**पि न कृतवानेव। किन्तु सद्बुद्ध्यर्थं वदतीति शङ्का स्यात्, तत्परिहरति संबोधनेन **कुरूद्वहे**ति ॥ ५३ ॥ सर्वेषां सम्मत्या विवाहः कृत इत्यत्र निदर्शनार्थं महोत्सवमाह **तदा महोत्सव** इति। नृणामिति न केवलं बन्धूनाम्, अपि तु सर्वेषामेवेत्याह। यदुपुर्यां द्वारकायाम्, तत्र न कोऽपि विसम्मत इत्यर्थः। यादवानामपि वैमनस्यं परस्परं संभवतीति तदर्थमाह **अनन्यभावाना**मिति। ननु यादवा उद्धताः स्वभावतः, कथमनन्यभावा जाता इत्याशङ्क्याह **कृष्णे यदुपता**विति। यदा यादवानां भगवान्पतिर्जातः, तदा ते तथा जाता इत्यर्थः। **नृपेति** सम्बोधनं विश्वासार्थम्। यथा भवान् जात इति ॥ ५४ ॥ भगवता पारिबर्हमस्मिन्विवाहे न प्राप्तमिति, तदभावे विवाहशोभा च न तथेति तदर्थमाह **नरा नार्यः प्रमुदिता** इति। स्वयमलङ्कृताः पूर्णाः **वरयोश्चित्रवाससोः अलङ्कृतयो**रपि पारिबर्हमुपाजह्रुः। ननु नियमाभावत् किमिति तथा कृतवन्त इति चेत्, तत्राह **वरयो**रिति। वरयोस्तथा कर्तव्यमेवेति। यथैव दाक्षिणात्याचारः ।५५। विवाह एव प्रथममुपस्थित इति, अकस्माच्च भगवानागत इति विशेषतस्तदर्थमलङ्करणाभावेऽपि स्वभावत एवालङ्कृतेत्याह **सा वृष्णिपुरी**ति। सा द्वारका उत्तभितैः ऊर्ध्वं स्थापितैरिन्द्रादप्युच्चैः स्वर्गपर्यन्तं गतैः केतुभिः ध्वजचिह्नै रन्यैश्च बभौ। अथवा। इन्द्रकेतुः पारिजातः, सुधर्मादिश्च, अन्ये च कल्पवृक्षाः। विचित्राणि माल्यानि अम्बराणि रत्नमयानि तोरणानि च स्वभावत एव। विशेषतोऽपि प्रतिद्वारि उपक्लृप्तानि मङ्गलानि। आपूर्णाः कुम्भाः अगुरुधूपाः दीपाश्च। एवमुपरि मध्ये अधश्च निवासस्थानानां शोभा निरूपिता ॥ ५६ ॥

श्रीसुबोधिनी–सारः

एवं भूमिपान् राज्ञो निर्जित्य भीष्मकस्य सुतां रुक्मिणीं पुरं द्वारकामानीय विधिवत् उपयेमे परिणिन्ये भगवान् हे कुरूद्वह ॥ ५३ ॥ तदा विवाह समये यदुपुर्यां द्वारकायां गृहेगृहे प्रतिगृहं महोत्सवोऽभूत्। नान्यस्मिन् भावो येषां तेषां नृणां यदुपतौ कृष्णे सति हे नृप ॥ ५४ ॥ प्रमृष्टानि उज्ज्वलानि मणिमयानि कुण्डलानि येषां ते नरा नार्यः स्त्रियश्च मुदिता हर्षिताश्चित्रवाससोर्वरवध्वोः षष्ठी चतुर्थ्यर्थे पारिवर्हं देयं कुंडिनभोजकटाभ्यामुपानिन्युः ॥ ५५ ॥ उत्तभितैरत्युच्चैरिंद्रकेतुभिर्ध्वजविशेषैः विचित्रैर्माल्यादिभिः प्रतिद्वारि उपक्लृप्तैर्न्यस्तैर्मंगलैरापूर्णकलशादिभिः सा वृष्णिपुरी बभौ शुशुभे ॥ ५६ ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

कुरूद्वह हे परीक्षित् ! भगवान् कृष्ण एवं युधि भूमिपान् निर्जित्य भीष्मकसुतां रुक्मिणीं स्वपुरमानीय विधिवद्यथाविधानं उपयेमे विवाहितवान् ॥ ५३ ॥ तदा विवाहदिने कृष्णे अनन्यभावानां निरुपाधिस्नेहवतां नृणां यदुपुर्यां द्वारकायां गृहे गृहे महानुत्सवोऽभूदित्यन्वयः। 'तत्र तथास्नेहः कथम्' इत्यपेक्षायां 'पालकत्वात्' इति हेतुं सूचयन्नाह—यदुपताविति। 'राजगृहोत्सवे प्रजागृहेऽप्युत्सवो भवतीति तवानुभवसिद्धम्' इति सूचयन् सम्बोधयति—नृपेति ॥ ५४ ॥ प्रमृष्टानि निर्मलीकृतानि मणिमयानि कुण्डलानि येषां यासां च ताश्च प्रमुदिता नरा नार्यश्च चित्रे वाससी ययोस्तयोर्वरयोर्वरवध्वोः पारिबर्हं विवाहे देयमुपस्करमुपाजह्रुः समर्पयामासुः ॥ ५५ ॥ तात्कालिकीं पुरीं वर्णयति—सेति। उत्तम्भितैरुद्धृत्य प्रतिबद्धैः इन्द्रकेतुभिर्ध्वजविशेषैर्विचित्रैर्मालादिभिश्च प्रतिद्वारि गृहाणां द्वारे द्वारे उपक्लृप्तानि स्थापितानि यानि मङ्गलानि लाजाङ्कुरपुष्पपुटकादीनि तैश्च आ समन्तात् पूर्णैः कुम्भैरगुरुधूपैश्च दीपैश्च सा वृष्णीनां पुरी द्वारका बभावित्यन्वयः ॥ ५६ ॥

अन्वितार्थप्रकाशिका

भगवानिति। हे **कुरूद्वह परीक्षित्** ! भगवान् कृष्ण एवं युधि **भूमिपान्** निर्जित्य भीष्मकसुतां रुक्मिणीं स्वपुरमानीय विधिवद्यथाविधानं विवाहहोमादिना उपयेमे विवाहितवान्। यद्वा। भूमिपान् भीष्मकसुतां निर्जित्येति जयतेर्द्विकर्मकत्वात्कर्मद्वयम् ॥ ५३ ॥ तदेति। हे नृप ! तदा विवाहदिने यदुपतौ कृष्णे अनन्यभावानां निरुपाधिस्नेहवतां नृणां यदुपुर्यां द्वारकायां गृहे गृहे महानुत्सवोऽभूत् ॥ ५४ ॥ नरा इति। प्रमृष्टानि निर्मलीकृतानि मणिमयानि कुण्डलानि येषां यासां च ते च ताश्च प्रमुदिता नरा नार्यश्च चित्रे वाससी ययोस्तयोर्वरयोर्वरवध्वोः स्वस्रोरितिवत् पारिबर्हं देयमुपस्करमुपाजह्रुः समर्पयामासुः। सेति। उत्तभितैरुद्धृत्य प्रतिबद्धैः अत्युच्चस्तम्भैरिवोन्नमितैर्वा इन्द्रकेतुभिर्ध्वजविशेषैः इन्द्रपुरस्पर्शिपताकायुक्तैरित्यन्ये। विचित्रैर्माल्यादिभिश्च प्रतिद्वारि गृहाणां द्वारे-द्वारे उपक्लृप्तानि स्थापितानि यानि मङ्गलानि लाजाङ्कुरपुष्पपुटकादीनि तैश्च तथा आसमंतात्पूर्णैः कुम्भैरगुरुधूपैश्च दीपैश्च सा वृष्णीनां पुरी द्वारका बभौ ॥ ५५–५६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वस्रोरितिवत् बरयोरिति द्विवचनेन वरवध्वोर्ग्रहणं। पारिबर्हं देयमुपस्करं ॥ ५४ ॥ उत्तभितैरुच्छ्रितैः इंद्रकेतुभिर्ध्वजविशेषैः उपक्लृप्तानि च तानि मंगलानि लाजांकुरसुमनोविकरादीनि च तैः सा बभौ ॥ ५५ ॥ आहूताः प्रेष्ठाः प्रियाये भूभुजो राजानस्तेषां गजैः सिक्तमार्ग्गपरामृष्टा उच्छ्रिताः रंभाश्च पूगाश्च तैरुपशोभिता ॥ ५६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवानिति ॥ भगवान् श्रीकृष्णः, युधि भूमिपान्, निर्जित्य, भीष्मकसुतां रुक्मिणीं, पुरं द्वारिकां, आनीय, हे कुरूद्वह, विधिवत् उपयेमे ॥ ५३ ॥ तदेति ॥ तदा, हे नृप, यदुपतौ कृष्णे, अनन्यभावानामेकान्तस्नेहानां नृणां यदुपुर्यां, गृहे गृहे, महोत्सवः, अभूत् ॥ ५४ ॥ नरा इति ॥ प्रमृष्टानि निर्मलीकृतानि मणिमयकुण्डलानि येषां यासां च ते ताश्च, नराः नार्यश्च, चित्रवाससोः परिधृतविचित्रवसनयोः, वरयोर्वधूवरयोः, मुदिताः सन्तः सत्यश्च, पारिवर्हमुपस्करं, उपाजह्रुरानिन्युः ॥ ५५ ॥ तात्कालिकीं पुरशोभां वर्णयति ॥ सेति ॥ उत्तभिता उद्धृत्य प्रतिबद्धा ये इन्द्रकेतवो ध्वजविशेषास्तैः, विचित्राणां माल्यानामम्बराणां रत्नानां च यानि तोरणानि तैः, प्रतिद्वारि गृहाणां द्वारि द्वारीत्यर्थः। उपक्लृप्तानि यानि मङ्गलानि तैः, आपूर्णकुम्भाश्च अगुरुधूपाश्च दीपकाश्च तैश्च, सा वृष्णिपुरी द्वारिका, बभौ। विचित्रमाल्यावररत्नतोरणैरिति पाठे विचित्रमाल्येति पुरी विशेषणम् विकीर्णविचित्रमाल्येति तदर्थः ॥ ५६ ॥

कृष्णप्रिया

महाराज परीक्षित्! भगवान् द्वारकानाथ श्रीकृष्ण ने समस्त राजाओं को परास्त करके भीष्मक-राजकुमारी श्रीरुक्मिणीजी को द्वारिका में पधराकर उनका शास्त्रोक्त विधि से पाणिग्रहण किया ॥ ५३ ॥ राजन् परीक्षित्! पाणिग्रहण मङ्गल पर्व के अवसर पर द्वारिका नगर में घर-घर उत्साह, आनन्द, उल्लास से महान् महोत्सव मनाया। ऐसा क्यों न हो? द्वारिका पुरी के समस्त लोगों का यदुराज भगवान् श्रीकृष्ण के प्रति अनन्य प्रेम था ॥५४॥ श्रीकृष्ण प्रभु के पाणिग्रहण प्रसङ्ग पर द्वारिका के नरनारी जनों ने मणिरत्नों के जाज्वल्यमान कर्णपूर धारण किये हुए थे। आनन्द-प्रमोद से भरे नरनारियों ने विविध प्रकार के वस्त्रों से समलङ्कृत दूल्हा एव दुलहिनको पुष्कल प्रमाण में भेंट की सामग्रियों को उपायन में समर्पित की ॥५५॥ उस मङ्गल अवसर पर श्रीद्वारिकापुरी की अपूर्व शोभा बनी थी। भुवनों पर, देवालयों पर बड़ी-बड़ी ध्वजाएँ बहुत ऊँचे तक फहरा रही थी। स्थान-स्थान पर चित्र-विचित्र मालाएँ, वस्त्र एवं मणिरत्न के तोरण बँधे हुए थे। द्वारिका नगरी के द्वार-द्वार पर दूर्वा-खील आदि मङ्गलमय सामग्रियाँ सजायी गयी थी। जल भरे मङ्गल कलश, अरगजा और धूप की सुगन्ध एवं दीपमालाओं से अलौकिक शोभा हो रही थी ॥ ५६ ॥

सिक्तमार्गा मदच्युद्भिराहूतप्रेष्ठभूभुजाम्। गजैर्द्वास्सु [1]परामृष्टरम्भापूगोपशोभिता ॥ ५७ ॥
कुरुसृञ्जयकैकेयविदर्भयदुकुन्तयः। मिथो मुमुदिरे [2]तस्मिन् संभ्रमात् परिधावताम्[3] ॥ ५८ ॥
रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः। राजानो राजकन्याश्च बभूवुर्[4]भृशं विस्मिताः ॥ ५९ ॥
द्वारकायामभूद् राजन् महामोदः पुरौकसाम्। रुक्मिण्या[5] रमयोपेतं [6]दृष्ट्वा कृष्णं श्रियः पतिम् ॥ ६० ॥

इति श्रीमद्भागवते महापुराणे[7] दशमस्कन्धे[8] रुक्मिण्युद्वाहे[9] [10]चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

कर्दमक्षमा

अन्वयः—आहूतप्रेष्ठभूभुजाम्, मदच्युद्भिः, गजैः, सिक्तमार्गा, द्वास्सु, परामृष्टरम्भापूगोपशोभिता, सा, पुरी, बभौ ॥ ५७ ॥ कुरुसृञ्जयकैकेयविदर्भयदुकुन्तयः, तस्मिन् (उत्सवे) परिधावताम्, सम्भ्रमात्, मिथः, मुमुदिरे ॥ ५८ ॥ ततः ततः, गीयमानम्, रुक्मिण्याः, हरणम्, श्रुत्वा, राजानः, च, राजकन्याः, भृशम्, विस्मिताः, बभूवुः ॥ ५९ ॥ हे राजन्! श्रियः, पतिम्, कृष्णम्, रुक्मिण्या, रमया, उपेतम्, दृष्ट्वा, द्वारिकायाम्, पुरौकसाम्, महामोदः, अभूत् ॥ ६० ॥

श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे ५४ अध्यायस्यान्वयाः समाप्ताः।

---

१. वास्तुपरामृष्टा–विज.; द्वार्षु–वीर। २. मध्ये–वीर.! ३. धावतः–विज.। ४. भृशविस्मिताः–श्रीधर. वंशी. जीव. वीर विज. विश्व. शुक.। ५. णी–विज.। ६–तां–विज.। ७. पारमहंस्यां संहितायां–प्रा. पा.। ८. उत्तरार्द्धे–प्रा. पा.। ९. रुक्मिण्युद्वाहोत्सवोनाम। १०. एकोनषष्टि–विज.!

श्रीधरस्वामिविरचिता भावार्थदीपिका

आहूताः प्रेष्ठा भूभुजस्तेषां गजैः परामृष्टाः उच्छ्रिता रंभाश्च पूगाश्च तैरुपशोभिता यद्वा तैरेव गजैः परामृष्टाः संस्पृष्टा **रंभाश्च पूगाश्च** तैरुपशोभिता ।। ५७ ।। संभ्रमादौत्सुक्यात्परिधावतां बन्धूनां मध्ये मिथः समेत्य मुदं प्रापुः ॥ ५८–६० ॥

इति श्रीमद्भा० म० दशमस्कन्धे उत्तरार्धे श्री० टीकायां चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

“परामृष्टो विचारे च स्पर्शनोच्छ्रितयोरपि” इति निरुक्तिः । सिक्तमार्गेति **पृथग्विशेषणम्** । हस्तिकर्तृकसर्वतस्सेकासंभवं मत्वाह–यद्वेति ।। ५७ ।। परिधावतामितस्तत आनन्दोद्रेकात्परिभ्रमताम् । प्रेष्ठभूभुज एवाह–कुरवो भीष्मधृतराष्ट्रपांडवादयः, सृंजया द्रुपदाद्याः, कैकेयाः संतर्दनादयः, विदर्भा इति कन्यास्नेहात्, क्षत्रियेषु तादृशहरणस्य प्रशस्यत्वेन पूर्वमेव च श्रीकृष्णस्य स्वाभिरुचितत्वेन योग्यवरलाभात्प्रायः श्रीबलदेवादिभिर्मुनिजनादिद्वारा बोधयित्वा तेषामानीतत्वेनासंकोचाच्च श्रीभीष्मकादीनामप्यागमनं बोध्यते । ते च भीष्मकक्रथकैशिकादयः, यदव उग्रसेनादयस्तदभेदान्नन्दादयोपि । तथोक्तं पाद्मोत्तरखण्डे—“नन्दगोपोथ गोपालैर्गोपवृद्धैः समागतः । स्वलंकृताभिर्योषिद्भिर्यशोदापि समागता ।” इति । तत्र ते रुक्मिणीहरणतः प्रागेव भगवता सम्प्रार्थ्य नीता इति बोध्यम् ।। ५८ ।। ततस्ततस्तत्रतत्र । राज्ञां विस्मयस्तु बहुष्वेककर्तृककन्याहरणात् । राजकन्यानां त्वहो मातापित्रनुमतिं विना कथं मेलनसंकेतः कृत इत्यर्थः ॥ ५९ ॥ रमया लक्ष्मीरूपया । श्रियः सर्वाश्रयभूतायाः परमलक्ष्म्याः पतिम् ।। ६० ।।

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे उत्तरार्द्धे चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सिक्तेति । तैर्व्याख्यातं तत्र प्रथमपक्षे मदच्युद्भिर्गजैः सिक्तमार्गा स्थाने स्थाने गजानां मदक्षरणात् उच्छ्रिता उद्ध्र्वतया स्थापिता रोपिता लोकैरित्यर्थः । तैरेवेति यैरेव सिक्तमार्गास्तैरेव संस्पृष्टा इत्यनेनामुपघातद्योतनाद्गजानां मत्तत्वेऽपि सुवशत्वं तले विलसद्भिस्तैरम्भादीनामत्युच्छ्रितत्वं शोभमानत्वं च व्यञ्जितम् ॥ ५७ ॥ प्रेष्ठभूभुज एव प्रायो निर्दिशंस्तेषामन्योऽन्यसङ्गत्या प्रहर्षोदयमाह—कुर्विति । कुरवः श्रीभीष्मधृतराष्ट्रपाण्डवादयः सृञ्जयाः द्रुपदाद्याः कैकेयाः सन्तर्दनादयः विदर्भा इति कन्यास्नेहात् क्षत्रियेषु तादृशहरणस्य प्रशस्यत्वेन पूर्वमेव च श्रीकृष्णस्य स्वाभिरुचितत्वेन योग्यवरलाभात् प्रायः श्रीबलदेवादिभिर्मुनिजनादिद्वारा बोधयित्वा तेषामानीतत्वेनासङ्कोचाच्च श्रीभीष्मकादीनामप्यागमनं बोध्यते ते च भीष्मकक्रथकैशिकादयः यदव उग्रसेनादयः तदभेदाच्छ्रीनन्दादयोऽपीत्येके तथा पाद्मोत्तरखण्डे ।

नन्दगोपोऽथ गोपालैर्गोपवृद्धैः समागतः । स्वलङ्कृताभिर्योषिद्भिर्यशोदापि समागतेति ॥

अत्राभिप्रायविशेषेण पूर्वमेव श्रीव्रजेश्वरस्य सम्मतिप्रार्थना कंसवधानन्तरं “ज्ञातीन् वो द्रष्टुमेष्यात्मो विधाय सुहृदां सुख”मित्यत्रैव सूचिता कुन्तयः कुन्तिभोजाद्याः परितः तद्विवाहयोग्यस्वस्वप्रयोजनार्थमितस्ततो धावताम् ॥ ५८ ॥ ततस्ततः स्वस्वदेशे भृशमत्यर्थं विस्मिताः तेन प्रकारेण हरणात् तत्र सतामाकाङ्क्षाजनिष्ट असतां तु भयमिति विशेषो ज्ञेयः ॥ ५९ ॥ विवाहानन्तरं च द्वयोः सुखसङ्गतिदर्शनात् द्वारकावासिनः सर्वे परमानन्दतुन्दिलाः बभूबुरित्याह । द्वारकायामिति । कृष्णं स्वयं भगवन्तम् अतः श्रियः सर्वाश्रयभूतायाः परमलक्ष्म्याः पतिमिति तस्मै तादृशी श्रीरवश्यमपेक्षत इति भावः । सा चाधुना मिलितैवेत्याह । रमयेति । तस्यापि रमणहेतुत्वेन तन्नाम्न्या अतो महान् मोदः सर्वोत्कृष्टान्दोऽभूत् ॥ ६० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

परामृष्टास्तत्तत्फलभक्षणाद्यर्थं संस्पृष्टा धृता वा, स्थाने स्थाने रोपिता रम्भादयस्तैरुप चतुर्दिक्षु किंवा स्वतः शोभमानामपि तैराधिक्येन शोभितामित्यर्थः । अनेन गजानामप्युत्तमाहारसिद्धिः, रम्भादीनामपि तैरमर्द्यत्वादिना बृहत्वदृढत्वादिकं मंगलसूचकत्वञ्च बोधितम् । अन्यत्तैर्व्याख्यातम् । तत्र प्रथमपक्षे मदच्युद्भिर्गजैः सिक्तमार्गाः,—स्थाने स्थाने गजानां मदक्षरणात् । पक्षान्तरे च गन्धजलादिभिः सिक्तमार्गा इति; यद्वा, गजैरित्यस्योभयतोऽप्यनुषंगः ।। ५७ ॥ प्रेष्ठभूततयैव प्रायो निर्दिशन् तेषामन्योन्यसंगत्या प्रहर्षोदयमाहुः—कुर्व्विति । कुरवः श्रीभीष्म-धृतराष्ट्र-पाण्डवादयः, सृञ्जया द्रुपदाद्याः, कैकेयाः सन्तर्द्दनादयः, विदर्भाः श्रीभीष्मकक्रथकैशिकादयः, यदव उग्रसेनादयः, तदभेदाच्छ्रीनन्दादयश्च, तथा च पाद्मोत्तरखण्डे—‘नन्दगोपोऽथ गोपालैर्गोपवृद्धैः समागतः । स्वलंकृताभिर्योषिद्भिर्यशोदापि समागता ।।’ इति । कुन्तयः कुन्तिभोजाद्याः, परितः स्वस्वप्रयोजनार्थमित-

स्ततो धावतां श्रीवसुदेव–बलदेवादीनाम् । एवं विवाहविधेः परिपूर्णतोद्दिष्टा ॥ ५८ ॥ ततस्ततः स्थाने स्थाने सर्व्वत्रैवेत्यर्थः । किंवा स्वस्वदेश इति तृशमत्यर्थः विस्मिताः, तेन प्रकारेण हरणात्; अतोऽस्माभिः कन्याः स्वयमेव श्रीकृष्णाय दातव्या इति राज्ञां स एव अतिर्वरणीय इति तत्कन्यानां चेच्छा अभूदिति ज्ञेयम् ॥ ५९ ॥ विवाहानन्तरञ्च द्वयोः सुखसंगतिदर्शनाद्द्वारकावासिनः परमानन्दिता बभूवुरित्याह—द्वारकायामिति । पुरौकसामिति तेषां तत्र सदा निवासेन नित्यनिकटावस्थितया सन्दर्शनप्राप्त्या, किंवा भक्तिविशेषेण मोदविशेषाभिप्रायेण कृष्णं साक्षाद्भगवन्तम्, अतः श्रियः लक्ष्म्याः पतिमिति तस्मै श्रीरवश्यमपेक्ष्यत इति भावः । सा चाधुना मिलितेवेत्याह—रमयेति । अतो महान् सर्व्वोत्कृष्टो मोदोऽभूत्, श्रीकृष्णस्य योग्यपत्नीसंयोगसुखसिद्धेः, हे राजन्निति तद्वार्त्ताश्रवणोदितप्रहर्षेण राजमानस्य तस्य तथैव सम्बोधनात्; यद्वा, राजमानो महामोदः ॥ ६० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सिक्तेति । आहूता ये ये प्रेष्ठा भूभुजो नृपास्तेषां तेषां सम्बन्धिभिर्मदोदकं स्रवद्भिः गजैः सिक्ता गजमदोदकैः सिक्ता इत्यर्थः । ते मार्गा वीथयो यस्यां सा तथा द्वार्षु परामृष्टा उच्छ्रिता रम्भाः कदल्यः ताभिः पूगैश्चोपशोभिता अलङ्कृता च वभौ॥५७॥ कुर्विति । सम्भ्रमादौत्सुक्यात् परितो वीथीषु धावतां सञ्चरतां बन्धूनां मध्ये कुर्वादयो मिथः समेत्य मुदं प्राप्ताः ॥ ५८ ॥ रुक्मिण्या हरणमिति । ततस्ततस्तत्र तत्र देशेषु गीयमानं रुक्मिण्यानयनात्मकं भगवच्चेष्टितं श्रुत्वा नितरां विस्मिता बभूवुः ॥ ५९ ॥ द्वारकायामिति । हे राजन् ! रमया लक्ष्म्यवताररूपया रुक्मिण्या सहितं श्रियः पतिं श्रीकृष्णं दृष्ट्वा पुरवासिनां महान्मोदो बभूव ॥६०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

आहूतप्रेष्ठभूभुजाङ्गजैर्जुष्टेति शेषः वास्तुपरामृष्टा गृहदेवतासंयुक्ता यद्वा वास्तुपरामृष्टा त्यक्तरजोगृहा ॥ ५७ ॥ तस्मिन्नगरे परिधावत इतस्ततो धावन्तः ॥ ५८–६० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥
(विजयध्वजतीर्थरीत्या एकोनषष्टितमः) ॥ ५८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

दृष्ट्वा कृष्णमित्यादि । श्रियः पतिमिति । श्रीपतित्वं प्रकटयति—रुक्मिण्या रमयोपेतमिति ॥ ६० ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

दृष्ट्वा कृष्णं श्रियः पतिमिति-श्रीपतित्वं प्रकटयति रुक्मिण्या रमयोपेतमिति ॥ ६० ॥

इति चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

मदच्युद्भिराहूतप्रेष्ठभूभुजां गजैर्द्वार्षु परामृष्टरम्भापूगोपशोभिता ॥ ५७ ॥ परिधावतां बन्धूनां मध्ये मिथः समेत्य ॥ ५८–६० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । चतुष्पञ्चाशत्तमोऽध्यायो दशमेऽजनि सङ्गतः ॥ ५४ ॥

गूढार्थदीपिनी

प्रमृष्टानि परिष्कृतानि मणिमयानि कुण्डलानि येषां ते । पारिबर्हं कन्यादेयद्रव्यम् समर्पयामासु । वरयोर्वरवध्वोः । 'पुमान् स्त्रिया' इत्येकशेषः ॥ ५५ ॥ सा वृष्णपुरी द्वारका वभौ । कैः उत्तभितैरत्युच्चैः इन्द्रकेतुभिरिव ध्वजैः इन्द्रदेवताकैर्वा । विचित्रैर्माल्यादिभिश्च । उपक्लृप्तैः स्थापितैर्माङ्गलिकैर्जलपूर्णघटादिभिश्च । माल्यानि पुष्पाणि तोरणानि बन्दनमालिकाः ॥५६॥ सिक्तमार्गा पुरी । यद्वा तैरेव गजैः परामृष्टैर्गृहीतैः रम्भादिभिः शोभिता ॥५७॥ तस्मिन् महोत्सवे । सम्भ्रमादौत्सुक्यात्परिधानतां मध्ये कुर्वादयः ॥ ५८ ॥ ततस्ततः तत्र तत्र ॥ ५९ ॥ रमया लक्ष्मीरूपया ॥ ६० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

आहूताः प्रेष्ठा ये भूभुजस्तेषां मदच्युद्भिर्गजैः संसिक्तमार्गा द्वार्षु परामृष्टा उच्छ्रिता रम्भाश्च पूगाश्च तैरुपशोभिता॥५७॥ तस्मिन्महोत्सवे सम्भ्रमादौत्सुक्यात् परितो धावतां बन्धूनां मध्ये कुर्वादयो मिथः समेत्य मुमुदिरे मुदं प्रापुः ॥ ५८–६० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उत्तभिता उपरि स्थापिताश्च ते ध्वजाः केतवः तैः । उतभितेति गतम् । अम्बरतोरणै रत्नतोरणैश्च प्रतिद्वारि सर्वद्वारेषूपयुक्तानि मङ्गलान्यङ्कुरलाजादीनि तैरापूर्णकुम्भैरगुरुधूपैर्दीपैश्च सा पुरी बभौ शुशुभे ॥ ५७ ॥ आहूतप्रेष्ठभूभुजां मदच्युद्भिर्दानोदकस्राविभिर्गजैः सिक्तो मार्गो यस्याः सा दानोदसिक्तमार्गेति यावत् । मदच्युत्पदस्वारस्यात् । वास्तूनि परामृष्टानि पराभिः कर्मकर्त्रीभिरामृष्टान्यलं शोभितानि यस्यां सा रम्भापूगस्तत्सङ्घास्तैरुपशोभिता रम्भापूगाः क्रमुकास्तैरुपशोभितेति वा ॥ ५८ ॥ परिधावतोऽन्तर्द्रुवं भ्रमतः सम्भ्रमादादरात् । अन्तर्णीतप्यर्थो वा धावच्छब्दः । धावयतः सम्भ्रमात्परस्परं मुमुदिरे । तस्मिन्समये वा पुर इति वा ॥ ५९ ॥ राजानः सामर्थ्यमसमं कृष्णस्येति तत्कन्याश्च वयं धन्याः स पतिश्चेदिति विस्मिताः ॥ ६० ॥ श्रियः पतिमित्युक्त्या रुक्मिण्याः श्रीत्वं निरणायि ॥ ६१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे एकोनषष्ठिरऽध्यायः ॥ १०–५९ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

मार्गाणामाह **सिक्तमार्गा** इति । आहूता ये प्रेष्ठाः प्रियतमा राजानः तेषां मदच्युद्भिः गजगण्डनिःसृतमदैरेव सिक्तमार्गा जाता । अतो विशेषतः सम्मार्जनादौ नावकाशो जात इत्यर्थः । द्वारि तु कृतमित्याह **द्वाःस्विति** । परामृष्टाः परितः स्थापिताः ये रम्भादयः तैरुपशोभिता । जाते (ति) विवाहे पश्चादानीय कृतमिति परामर्शः । षड्विधा अपि क्षत्रिया अन्योन्यवैरं विहाय स्वभावतो द्वेषयुक्ता अपि रुक्मिण्या सहिते भगवति मिथो मुमुदिरे । कौरवा दुर्योधनादयः, सृञ्जयाः पाण्डवाः, पाञ्चाला वा धृष्टद्युम्नादयः । ते ह्युभये अन्योन्यवैरिणः । कैकेया विदर्भाश्च । तथा यादवाः कुन्तयश्च । ते त्रिविधा अपि परस्परविरोधिनः परस्परमेव मुमुदिरे । किञ्च । संभ्रमात्परिधावतां सम्बन्धिनोऽपि जाताः । उत्सवसंभृतिकरणार्थं तदीयाः सर्व एव व्यापृता जाता इत्यर्थः ॥ ५८ ॥ न केवलं यदुपुर्यामेव सम्भ्रमः, किन्तु सर्वत्रैव लोके संभ्रमो जात इत्याह **रुक्मिण्याहरणं श्रुत्वे**ति । आश्चर्यहरणं भगवत्कृतं श्रुत्वा इतस्ततो गीयमानम्, सर्वत्र श्रुतत्वात् असम्भावनारहितम् । राजानो विस्मिता जाताः, कथमेवं हृतमिति । राजकन्याश्च विस्मिताः । अस्मानपि नेष्यतीति ॥ ५९ ॥ एवं विशिष्टानां परमोत्सवमुक्त्वा साधारणानामपि परमोत्सवमाह **द्वारकाया**मिति । पुरौकसः साधारणाः नगरवासिनः नगरव्यापार एव निमग्नाः । तेषामपि महान्मोदो जातः । यद्यपि तेषां विवेको नास्ति, तथापि वस्तुसामर्थ्यादिव ते तथा जाताः । तदाह । रुक्मिण्या रमया लक्ष्म्या उपेतं सहितं कृष्णम्, स्त्रीणामेव हितार्थे अवतीर्णम्, श्रियः पतिं दृष्ट्वेति । नित्यं हरिः श्रीसहितः । आविर्भावस्तु केवलस्यैवेति पुरवासिनां नित्यं स्त्रीप्रधानानां तथा मोदो न भवेत् । अधुना तु पूर्णशक्तिरेकत्रैव जातेति महानेव मोदः संतोषो जातः ॥ ६० ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे पञ्चमोऽध्यायः ॥ ५ ॥

श्रीसुबोधिनीसारः

आहूता विवाहोत्सवार्थं ये प्रेष्ठा भूभुजो नृपास्तेषां मदच्युद्भिर्मदस्रवद्भिर्गजैः सिक्ता मार्गा यस्याः सा द्वाःसु परामृष्टैराबद्धै रंभापूगैरुपशोभिता ॥ ५७ ॥ तस्मिन्मंगले संभ्रमात् परिधावतां बंधूनां मध्ये कुर्वादिदेशीया मिथो मुमुदिरे परस्परं जहृषुः ॥ ५८ ॥ ततस्ततः स्थाने गीयमानं रुक्मिण्याहरणं श्रुत्वा राजानः तत्कन्याश्च भृशमत्यर्थं विस्मिता बभूवुः ॥ ५९ ॥ हे राजन् ! रमया लक्ष्मीरूपया रुक्मिण्योपेतं युक्तं श्रियः पतिं कृष्णं दृष्ट्वा पुरौकसां पुरवासिनां जनानां द्वारकायां महामोदोऽभूत् ॥ ६० ॥

इति श्रीमद्भा० दशमस्कन्धे उत्तरार्द्धे सुबोधिन्यां टीकायां चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आहूता आहूता ये प्रेष्ठा भूभुजो राजानस्तेषां सम्बन्धिभिर्मदच्युद्भिर्मदादेकं स्रवद्भिर्गजैः सिक्ता मार्गा यस्यां सा, तथा द्वास्सु परामृष्टा उच्छ्रिता रम्भाः कदल्यस्ताभिः पूगैश्चोपशोभिता अलङ्कृता च वभावित्यन्वयः ।! ५७ ॥ सम्भ्रमात् औत्सुक्यात् परितो मार्गे धावतां बन्धूनां मध्ये तस्मिन् पुरे कुर्वादयो मिथः समेत्य मुमुदिरे मुदं प्रापुः ॥ ५८ ॥ ततस्ततस्तत्रतत्र देशेषु सूतादिभिर्गीयमानं रुक्मिण्या हरणात्मकं भगवच्चेष्टितं श्रुत्वा राजादयोऽतिविस्मिता बभूवुः ॥५९॥ 'राजवृत्तमेमिव' इति सूचयन्

सम्बोधयति—हे राजन्निति । रमया लक्ष्म्या अवताररूपया रुक्मिण्या उपेतं सहितं श्रियः पतिं श्रीकृष्णं दृष्ट्वा पुरौकसां पुरवासिनां महान् मोदो बभूव ॥ ६० ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीकाबालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने । चतुःपञ्चाशत्तमोऽगाद्रुक्मिवैरूप्यबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

सिक्तेति ॥ आहृता आहुता ये श्रेष्ठाः भूभुजो राजानस्तेषां संबन्धिभिर्मदच्युद्भिर्मदोदकं स्रवद्भिर्गजैः सिक्ता मार्गा यस्यां सा तथा । द्वाःसु परामृष्टा उच्छ्रिताः । यद्वा । तैरेव गजैः परामृष्टाः स्पृष्टा शुण्डाग्रेण धृता वा रम्भाः कदल्यस्ताभिः पूगैश्चोपशोभिता अलंकृता च बभौ । एतेन गजानां मदेऽपि सौम्यता उक्ता ॥ ५७ ॥ कुर्विति । संभ्रमात् औत्सुक्यात् परितो मार्गे धावतां बन्धूनां मध्ये तस्मिन्पुरे कुरुसृञ्जयाद्या बन्धुविशेषाः मिथः समेत्य मुमुदिरे मुदं प्रापुः । अत्र कुरवः भीष्मपाण्डवाद्याः विदर्भा इति रामाद्यैर्मुनिजनादिद्वारा विबोध्यानीताः भीष्मकक्रथकैशिकादयः यदवो नन्दादयोऽपीत्येके । "नन्दगोपोऽथ गोपालैर्गोपवृद्धैः समागतः ॥ स्वलंकृताभिर्गोपीभिर्यशोदाऽपि समागता ॥" इति पाद्मात् ॥ ५८ ॥ रुक्मिण्या इति ॥ ततस्ततस्तत्र तत्र देशेषु सूतादिभिर्गीयमानं रुक्मिण्याहरणात्मकं भगवच्चेष्टितं श्रुत्वा राजानः राजकन्याश्च भृशं विस्मिता बभूवुः ॥ ५९ ॥ द्वारकायामिति । हे राजन् ! रमया लक्ष्म्यवताररूपया रुक्मिण्योपेतं सहितं श्रियः पतिं श्रीकृष्णं दृष्ट्वा द्वारकायां पुरौकसां पुरवासिनां महान्मोदो बभूव ॥ ६० ॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

संभ्रमात् अतिस्नेहभरात् परिधावतां संबंधिनां मध्ये कुर्वादयः मिथः परस्परं संगत्य । मुमुदिरे हर्षं प्राप्ताः ॥५७–५८॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने रुक्मिणीपाणिग्रहणनाम चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सिक्तमार्गेति । आहूता ये प्रेष्ठा भूभुजो नृपास्तेषां सम्बन्धिभिः, मदच्युद्भिः मदोदकं स्रवद्भिः गजैः सिक्ताः मदोदकैः संसिक्ताः, मार्गा यस्यां सा, तथा द्वाःसु, परामृष्टा उच्छ्रिता रम्भाः कदल्यस्ताभिः पूगैश्च उपशोभिता सती, बभौ ॥ ५७ ॥ कुर्विति । संभ्रमादौत्सुक्यात्, तस्मिन् पुरे, परिधावतां वीथीषु संचरतां, बन्धूनां मध्ये इति शेषः । कुरवश्च सृञ्जयाश्च कैकेयाश्च विदर्भाश्च यदवः कुन्तयश्च ते, मिथः परस्परं, समेत्येति शेषः । मुमुदिरे मुदं प्रापुः ॥ ५८ ॥ रुक्मिण्या इति । ततस्ततः, तेषु तेषु देशेष्वित्यर्थः । गीयमानं बन्दिजनगीयमानं, रुक्मिण्याः हरणं, रुक्मिण्यानयनात्मकं भगवच्चेष्टितमित्यर्थः । श्रुत्वा, राजानः, राजकन्याश्च, भृशविस्मिताः नितरां विस्मययुताः, बभूवुः ॥ ५९ ॥ द्वारकायामिति । हे राजन्, रमया लक्ष्म्यवताररूपया, रुक्मिण्या, उपेयं सहितं, श्रियो लक्ष्म्याः, पतिं कृष्णं दृष्ट्वा, द्वारकायां वर्त्तमानानां पुरौकसां पुरवासिनां, महामोदः, महानानन्दः अभूत् बभूव ॥ ६० ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्द्धे चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

कृष्णप्रिया

अपने सुहृन्मित्र नरपति वृन्द निमन्त्रित किया गया था । पधारे हुए राजाओं के मतवाले हाथियों के मद गन्ध से द्वारिका के राजमार्ग एवं गलियों का छिड़काव हो रहा था । प्रत्येक द्वार पर कदली के खंभे और सुपारी के वृक्ष रोपे थे । उनसे विलक्षण शोभा बनी थी ॥ ५७ ॥ इस मङ्गल महोत्सव पर पधारे हुए आप्तजनों की कुतूहल वश इधर-उधर धूम-धाम करते हुए बन्धुजनों में कुरु-सृञ्जय-कैकेय-विदर्भ-यदु-और कुन्ति आदि वंशो के आप्तजन आपस में आनन्द मना रहे थे ॥ ५८ ॥ जहाँ तहाँ श्रीरुक्मिणी हरण की गाथा गायी जा रही थी । उस अद्भुत गाथा को सुनकर राजा एवं राजकन्याएँ अत्यन्त आश्चर्यचकित हो रहे थे ॥ ५९ ॥ महाराज परीक्षित ! साक्षात् श्रीमयी श्रीदेवीजी को श्रीरुक्मिणीजी के स्वरूप में साक्षात् श्रीपति भगवान श्रीकृष्ण के साथ देखकर द्वारिकावासी नर-नारियों को परमानन्द हुआ ॥ ६० ॥

श्रीमद्भागवत निरोधलीला दशमस्कन्ध उत्तरार्द्ध में श्रीरुक्मिणी विवाह में ५४ वाँ अध्याय का भाषान्तर समाप्त ।

◆

अथ पञ्चपञ्चाशत्तमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४०	३८	१	१	२	१३३६	११	१९	१३९६	४१।।।	

[1]श्रीशुक उवाच

[2]कामस्तु वासुदेवांशो दग्धः प्राग् रुद्रमन्युना । देहोपपत्तये भूयस्तमेव प्रत्यपद्यत ॥ १ ॥
स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः । प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुः ॥ २ ॥
तं शम्बरः कामरूपी हृत्वा तोकमनिर्दशम् । स विदित्वाऽऽत्मनः शत्रुं प्रास्योदन्वत्यगाद् गृहम् ॥ ३ ॥
तं निर्जगार बलवान् मीनः[3] सोऽप्यपरैः सह । धृतो जालेन महता गृहीतो मत्स्यजीविभिः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—प्राक्, रुद्रमन्युना, दग्धः, वासुदेवांशः, कामः, तु, देहोपपत्तये, तमेव, प्रत्यपद्यत ॥ १ ॥ कृष्णवीर्यसमुद्भवः–स एव–वैदर्भ्याम्, जातः, पितुः–सर्वथा, अनवमः, प्रद्युम्नः, इति, विख्यातः ॥ २ ॥ कामरूपी, सः, शम्बरः, तम्, आत्मनः, शत्रुम्, विदित्वा अनिर्दशम्, तोकम्, हृत्वा, उदन्वति, प्रास्य, गृहम्, अगात् ॥ ३ ॥ तम्, बलवान्, मीनः, निर्जगार, ततः, सः, अपि, अपरैः, सह मत्स्यजीविभिः, महता, जालेन, गृहीतः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पंचपंचाशत्तमे तु प्रद्युम्नोऽजनि कृष्णतः । शंबरेण हृतः सोऽथ हत्वा तं कान्तयाऽगमत् ॥ १ ॥
प्रद्युम्नहानिलाभाद्यैः शंबराहरणादिना । कुटुम्बिनामपत्यादिसुखदुःखमसूसुचत् ॥ २ ॥

जाम्बवत्यादिविवाहेभ्यः प्रागेव प्रद्युम्नजन्म ततो विवाहास्ततः शंबरागारात्प्रद्युम्नप्रत्यागमनम् । अतः पुत्रकथनप्रस्तावेऽपि प्रथमं प्रद्युम्नस्य जातमात्रस्य शंबरेण हरणं निरूप्यते । प्रत्यागमनं तूत्तरकालीनमपि कथापर्यवसानायात्रोक्तमिति वासुदेवाधिष्ठितचित्तप्रभवत्वाद्वासुदेवांशः सृष्टिहेतुत्वाच्च देहोपपत्तये देहप्राप्तये ॥ १ ॥ अनवमोऽन्यूनः ॥ २ ॥ स प्रसिद्धः कामशत्रुः शंबरस्तमात्मनः शत्रुं विदित्वा हृत्वा समुद्रे प्रास्य प्रक्षिप्य गृहमगादिति ॥ ३ ॥ निर्जगार गिलितवान् ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अजनि उद्भूतः । स प्रद्युम्नः । शम्बरेण तन्नामकाऽसुरेण (१) । अपत्यादिप्राप्त्या सुखं, तद्धान्या च दुःखम् (२) । ततः प्रद्युम्नजन्मोत्तरम् । ततो विवाहेभ्योऽनन्तरम् । यतोऽन्यविवाहेभ्यः प्राक् जन्मातो हेतोः । पुत्रोक्तिप्रसंगे प्राप्ते सति उत्तरकालिकं जांबवत्यादिविवाहेभ्यः पाश्चात्त्यमपि । पर्यवसानं समाप्तिः । "आत्मा वै पुत्रनामासि" इति श्रुतेः, "स एष भगवान्द्रोणः प्रजारूपेण वर्तते" इत्यादिश्रवणाच्च । तत्रांशत्वारोप उपचार एव । चित्ताधिष्ठितवासुदेवप्रभवात्सर्वेपि वासुदेवास्स्युः सर्वचित्तेषु तस्याधिष्ठितत्वादित्यरुच्याऽऽह । वासुदेवस्यैव कंजोद्भावनादिद्वारा सृष्टिहेतुत्वादिति भावः । प्राक्तारकतापितेन्द्रार्थितकामेन तपस्स्थितरुद्रसेवनार्थाऽऽगतहिमालयात्मजांगस्पर्शनप्रेरितरुद्रस्य वीर्यं पातितं, तेन क्रुद्धरुद्रेण स्वतृतीयनेत्राग्निना कामो दग्धः, पुनस्तद्भार्यया रत्या स्तुतो रुद्रस्तस्यै वरं ददौ—तव पतिः पुनः कृष्णवीर्येण रुक्मिण्यामाविर्भविष्यति स च त्वामेव

---

[1] बादरायणि–प्रा. पा. ।

[2] **शुक उवाच—**

आराध्य देवदेवेशं शंकरं लोकशंकरम् । तपसा तोषयित्वा तं कैलासगिरिवासिनम् ॥ १ ॥
रुक्मिण्यां तनयं लेभे दग्धं कामं पुनर्हरिः । वीरं प्रद्युम्ननामानं रूपौदार्यगुणान्वितम् ॥ २ ॥

राजोवाच—

पुत्रार्थमीश्वरं दृष्ट्वा स्वयं लब्धवरो हरिः । अवाप कीदृशं पुत्रं किं नामानं वदस्व मे ॥ ३ ॥ विजये ।

[3] मत्स्यः–प्रा. पा. ।

पुनः प्राप्स्यतीति पुराणान्तरे स्पष्टम् । कामस्त्वित्यादावेवं विवेचनीयम्—श्रुतिपञ्चरात्रादौ खलु वासुदेवसंकर्षणानिरुद्धाः, ते चेश्वराविर्भावा नित्याः, प्राकृतकामस्त्विन्द्रभृत्यत्वेनैवैकादशादौ प्रसिद्धः । वासुदेवादयोऽपि द्विविधाः–देवलीलाः, मनुष्यलीलाश्च । तत्र पूर्वे–नारायणव्यूहस्तवादौ बहुविधाः, अपरे च श्रीकृष्णाद्याख्याः । तत्र पुराणादावुपासनायां तेभ्यो भेदेनोक्तास्ते च नित्याः। यथा श्रीगोपालतापन्यां श्रीमथुराप्रसंगे–"यात्रासौ संस्थितः कृष्णस्त्रिभिश्शक्त्या समाहितः । रामाऽनिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः ।" इति । तस्मात्प्राकृतकामस्य भगवद्व्यूहत्वाऽसंभवादयमर्थः । तुशब्दो भिन्नोपक्रमे । वासुदेवस्य श्रीकृष्णादिलक्षणांशः रौक्मिणेयादिलक्षणः प्रद्युम्नरूपो यत्रेति तस्मिन्नसावंशेन कलयाविष्ट इत्यर्थः । प्रद्युम्नविभूतिरूप इत्यर्थः स कामो रुद्रमन्युना पूर्वं दग्धोऽतो देहोपपत्तये तमेव प्रद्युम्नमेव प्रत्यपद्यत । देहस्योपपत्तिर्नाम रुद्रेणानंगताविधानेन स्वतः प्राप्त्यसंभवात् । सामीप्येनान्यप्रसंगतोऽपि तत्प्राप्तिस्तदर्थं तमुपास्य तत्सायुज्यं प्राप्तवानित्यर्थः । भूयःशब्देन स कामाख्यो जीवस्तस्मादेवाविर्भूत इति गमितम् । अर्थांतरन्तु न संगच्छते वासुदेवांशो दग्ध इति श्रीभागवतमतविरोधात् । संकल्पविकल्पकात्मकान्मनस एव कामप्रभवात्, न तु धारणमात्रात्मकाच्चित्तात् । तथा स च कामो मनोविकार रूप एव, स तु तद्दैवतारूप इति विचारणासिद्धेः कष्टतापत्तेश्च ॥ १ ॥ स एव यो रुद्रेण दग्धः । 'न्यूने नोचेऽवमो मतः' इति निरुक्तिः । स एव काम एव । प्रद्युम्न इति विख्यातो लोके प्रथामेव प्राप्तः, वस्तुतस्तु सच्चिदानन्दविग्रहः प्रद्युम्नः प्रद्युम्न एव तृतीयो व्यूहः, न तु कामो नाम केवलं जीवविशेष एव । तदुक्तं श्रीगोपालतापिन्याम्—"यत्रासौ०" इति । प्रथमे नारदोपास्यमन्त्रोऽपि । यथा—"नमस्तस्मै भगवते कृष्णायाऽकुण्ठमेधसे । प्रद्युम्नायाऽनिरुद्धाय नमः संकर्षणाय च ।" इति । अत्रापि श्लोके पितुः श्रीकृष्णात्सर्वतः सर्वप्रकारेणैवाऽन्यूनः न हीन्द्रभृत्यः प्राकृतः काम एवं व्याख्यातुमुचितस्तस्मात्तस्मिन्प्रद्युम्ने तदिच्छया संप्रविश्य स्थिते । भगवति जगदिवेत्येव श्रीनन्दादिष्वपि श्रीद्रोणादीनां स्थितिर्व्याख्येया ॥ २ ॥ तं प्रद्युम्नम् । तोकम् "सद्योजातशिशौ तोकोऽपत्ये तुच्छे तथा ध्वनौ" इति धरणिः । उदन्वति समुद्रे । अत्र श्रीकृष्णस्य लीलाकौतुकं वर्णयति–तमित्यादिना यावदध्यायसमाप्ति । कामरूपीति–मायया धात्र्यादिरूपेणेत्यर्थः । अनिर्दशमिति—षष्ठेह्नीत्यर्थः । तदुक्तं वैष्णवे—"षष्ठेऽह्नि जातमात्रं तु प्रद्युम्नं सूतिकागृहात् । ममैष हन्तेति मुने हृतवान्कालशम्बरः ।" इति विदित्वा दुष्टशम्बरवधेच्छोर्नारदच्छत्रुं हनिष्यन्तम् । अत्रायमभिसन्धिर्हरिवंशे—"विदितं तच्च कृष्णस्य देवमायानुवर्तिनः । ततो न निगृहीतः स दानवो यद्धदुर्मदः ।" इति ॥ ३ ॥ तं प्रद्युम्नम् । स येन निर्गरितः । जालेन सिचा बृतः संस्यूतः । मत्स्यजीविभिर्दाशैः । विचित्रलीलाचिकीर्षोर्भगवत इच्छयैव गिलितवान्न तु प्रद्युम्नान्मीनो वलवानिति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कामस्त्वित्यादावेवं विवेचनीयं श्रुतिपञ्चरात्रादौ खलु वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाः प्रसिद्धाः ते चेश्वराविर्भावा नित्याः प्राकृतकामस्त्विन्द्रभृत्यत्वेनैकादशादौ प्रसिद्धः वासुदेवादयस्तु द्विविधाः देवलीलामनुष्यलीलाश्च तत्र पूर्वे नारायणव्यूहस्तवादौ बहुविधाः अपरे च श्रीकृष्णाद्याख्याः तत्रपुराणादावुपासनायां तेभ्यो भेदेनोक्ताः ते च नित्याः यथा श्रीगोपालतापन्यां श्रीमथुराप्रसङ्गे—

यत्रासौ संस्थितः कृष्णस्त्रिभिः शक्त्या समाहितः । रामानिरुद्धप्रद्युम्नैरुक्मिण्या सहितो विभुरिति ॥

तस्मात्प्राकृतकामस्य भगवद्व्यूहत्वासम्भवादयमर्थः । तुशब्दोभिन्नोपक्रमे वासुदेवस्य श्रीकृष्णादिलक्षणस्यांशः रौक्मिणेयादिलक्षणः प्रद्युम्नरूपो यत्रेति तस्मिन्नसावंशेन कलया विष्ट इत्यर्थः प्रद्युम्नविभूतिरूपः स कामो रुद्रमन्युना पूर्वंदग्धः अतो देहोपपत्तये तं श्रीवासुदेवांशं श्रीप्रद्युम्नमेव प्रत्यपद्यत देहस्य उपपत्तिर्नाम रुद्रेणानङ्गताविधानेन स्वतः प्राप्त्यसम्भवात् सामीप्येनान्यप्रसङ्गतोऽपि तत्प्राप्तिः तदर्थं तमुपास्य तत्सायुज्यं प्राप्तवानित्यर्थः । भूयःशब्देन स कामाख्यो जीवस्तस्मादाविर्भूत इति गमितम् अर्थान्तरं तु न सङ्गच्छते वासुदेवांशो दग्ध इति श्रीभागवतमतविरोधात् सङ्कल्पविकल्पात्मकान्मनस एव कामस्य प्रभवो न तु धारणमात्रात्मकात् चित्तात् तथा च कामो मनोविकाररूप एव स तु तद्देवतारूप इति विचारणासिद्धेः कष्टतापत्तेश्च ॥ १ ॥ तदेवं यः कृष्णवीर्य्यसमुद्भवः प्रतिकल्पं श्रीकृष्णांशाविर्भावी प्रद्युम्न इति विख्यातश्चतुर्व्यूहे प्रसिद्धः स एव वैदर्भ्यां जातः प्रादुर्भूतः प्राकृतकामस्य तु तत्र सायुज्यमेवेति भावः । तत्र हेतुः । सर्वत इति ॥ २ ॥ अत्र श्रीकृष्णलीलाकौतुकं वर्णयति । तमित्यादिना यावत्समाप्ति । कामरूपीति । मायया धात्र्यादिरूपेणेत्यर्थः । अनिर्दशमिति षष्ठेऽह्नीत्यर्थः । तथा च श्रीविष्णुपुराणे–

षष्ठेऽह्नि जातमात्रं तु प्रद्युम्नं सूतिकागृहात् । ममैष हन्तेति मुने ! हृतवान् कालशम्बरः ॥ इति ।

विदित्वेति । दुष्टशम्बरवधेच्छोः श्रीनारदात्कस्माच्चिदादेशिनो वा शत्रुं हनिष्यन्तम् अत्रायमभिसन्धिः श्रीहरिवंशे—

विदितं तच्च कृष्णस्य देवमायानुवर्त्तिनः । ततो न निगृहीतः स दानवो युद्धदुर्मदः ।। इति ॥ ३ ॥

बलवानिति । श्रीभगवदिच्छयैव तदानीं प्रकाशितालपशक्ति श्रीप्रद्युम्नमतिक्रम्यापि शक्त्यतिशयोदयादित्यर्थः । एवमग्रे महतेति च स मीनः अपिशब्देन तादृशबलवानपि ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तु शब्दो भिन्नोपक्रमे, श्रीभगवत्पुत्रेत्यादिना रसभेदात्, यद्वा, विशेषेऽनंगस्याप्यंगोत्पादनेन श्रीभगवतो माहात्म्यविशेषात्, वासुदेवस्य चतुर्व्यूहादिभूतस्यावेशावतारत्वाद्वासुदेवांशः कामः। प्रद्युम्नांश इति वक्तव्ये वासुदेवांश इति तयोरभेदाभिप्रायेण। रुद्रस्य मन्युना काम एव प्राग् दग्धः, तमंशिनं तृतीयव्यूहं प्रद्युम्नमेव भूयः पुनः प्रत्यपद्यत, तस्मिन् लयं प्राप्त इत्यर्थः। किमर्थम् ? स्वदेहोत्तमोत्पत्तये। स एव प्रद्युम्न एव कामस्य लयस्थानभूतो वैदर्भ्यां जात इत्यग्रे वक्ष्यते। अन्यत्तैर्व्याख्यातम्। यद्वा, श्रीवसुदेवनन्दनस्यांशो रूपगुणादिना परममहामादकस्य तस्य तच्छक्तिमहार्णवैकबिन्दुमात्रावेशेन कामस्य जगन्मादकतासिद्धेः, अतो वस्तुतः श्रीभगवानेवायं महामदनः, अत एव 'ध्यायेन्मदनगोपालम्' इत्यादिना त्रैलोक्यसम्मोहन-तन्त्रादौ श्रीभगवानयं मदनगोपाल उच्यते। अन्यत् समानम् ॥ १ ॥ स एव साक्षात्, न त्वंशेनेत्यर्थः। यतः कृष्णस्य साक्षाद्भगवतो वीर्य्यात् सम्यगुद्भवो यस्य सः, औरसः पुत्र इत्यर्थः। यद्वा, वीर्य्यं शक्तिविशेषः, अयं श्रीरुद्रमन्युदग्धस्यापि तथा वासुदेवे लीनस्यापि पुनः प्रादुर्भावे हेतुः। एवं तस्यापि पूर्व्वतोऽत्र माहात्म्यभरः सूचितः। अत एव सर्वतः सर्वथाऽनवमः तत्त्वतस्तु चतुर्व्यूहैकतमोऽयं भगवान् श्रीप्रद्युम्नः। कामदेवेऽस्यैव शक्त्यावेशो लीलाविशेषार्थम्। श्रीभगवतस्तस्य पृथक् प्रादुर्भवतस्तद्वन्निजांशेन कामदेवेन सह सम्पूर्णतयावतरणात्तेन च तस्य दग्धस्यापि देहोत्पत्त्या स एव जात इत्युक्तम्। अतः श्रीप्रद्युम्नस्यैव तस्य मुख्यतया तन्नाम्नैव विशेषतः प्रसिद्धत्वादुक्तम्, विशेषेण ख्यात इति सिद्धान्तश्चायं श्रीभागवतामृतोत्तरखण्डे विवृतोऽस्त्येव ॥ २ ॥ तन्माहात्म्यमेव दर्शयति—तमित्यादिना यावत्समाप्ति। शं स्मरणमंगलं स्वयमेव वृणोतीति शम्बरः, अत एव तं प्रद्युम्नं हृत्वा, कामरूपीति मायया धात्र्यादिरूपेणेत्यर्थः, हरणसामर्थ्यमुक्तम्, अनिर्दशमनिर्गतदशदिनम्, अत एव लोकमतिबालकम्, तथा च श्रीविष्णुपुराणे (५।२७।२)—'षष्ठेऽह्नि जातमात्रन्तु प्रद्युम्नं सूतिकागृहात्। ममैव हन्तेति मुने हृतवान् कालशम्बरः ॥' इति, विदित्वेति दुष्टसम्बरवधेच्छोः श्रीनारदात् कस्माच्चिदादेशिनो वा, प्रास्य दूरतोऽतिगभीरे यत्नतो बलात् क्षिप्त्वा, इत्यादिकं सर्वं श्रीप्रद्युम्नमाहात्म्यार्थं श्रीभगवदिच्छयैवेति ज्ञेयम्। अन्यथा कथमपि तदसम्भवः, अत एवोक्तं श्रीहरिवंशे (विष्णु० प० १०४।४)—'विदितं तच्च कृष्णस्य देवमायानुवर्त्तिनः। ततो न निगृहीतः स दानवो युद्धदुर्म्मदः ॥' इति ॥ ३ ॥ बलवानिति श्रीभगवदिच्छयैव, शक्त्यतिशयोदयादित्यर्थः। एवमग्रे महतेति च। स च मीनः, न च मीनगर्भेऽपि स्थित इत्यभिप्रायेणापि-शब्दः, उक्तसमुच्चये वा, किंवा तादृशबलवानपि अपरैर्मीनैः सहेति तस्य शम्बरोपायनार्थत्वमुक्तम् अन्यथैकलत्वे मीनाहारैर्धीवरैस्तैः स एव भक्षितः स्यात्। अत एवोक्तं मत्स्यजीविभिरिति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कामस्तु वासुदेवांश इति विशेषणं भाविजन्मप्रभृतिसम्बन्धादिनोक्तमतः चतुर्व्यूहेषु तृतीयव्यूहत्वमुच्यते कामसाम्यञ्च तद्विभूतित्वनिबन्धनम् ॥ १-२ ॥ अनिर्दशम्। दशाहानतीतम् ॥ ३-३९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं भगवतो रुक्मिणीविवाहः सविस्तरमनुवर्णितः अथ जाम्बवत्यादिविवाहान् विवक्षुस्तेभ्यः प्रागेव प्रद्युम्नजन्मेति तदनुवर्णयति पञ्चपञ्चाशत्तमेन। काम इत्यादिना। यद्यपि शम्बरात्प्रत्यागमनादिकन्तु विवाहेभ्यः पाश्चात्यं तथापि कथापर्यवसानायात्रोक्तमिति द्रष्टव्यम्। कामस्त्विति। कामो मन्मथः तस्य वासुदेवांश इति विशेषणेन भाविजन्मप्रभृतिसम्बन्धः कीर्तितः वासुदेवविभूतित्वाद्वासुदेवांशः अत एव पुनर्देहोपपत्तये देहसंयोगाय तमेव वासुदेवमेव प्रत्यपद्यतेत्युक्तं प्रत्यपद्यत भगवत्तनुमाश्रित्यावत्तस्थे इत्यर्थः। अनेन चतुर्व्यूहेषु तृतीयव्यूहविभूतित्वमुच्यते नामसाम्यं च तद्विभूतित्वनिबन्धनमेव ॥ १ ॥ स एव। काम एव कृष्णस्य भगवतो वीर्यात्सङ्कल्परूपज्ञानात्मकात्समुद्भवो यस्य सः वैदर्भ्यां रुक्मिण्यां जातः प्रद्युम्न इति विख्यातोऽभिहितः सर्वतः सर्वप्रकारेण पितुरनवमोऽन्यूनः तुल्य इत्यर्थः ॥ २ ॥ तमिति। स प्रसिद्धः कामशत्रुः शम्बरः तं प्रद्युम्नमात्मनः स्वस्य शत्रुं विदित्वा नारदमुखादिति शेषः। अनिर्दशमनतीतदशाहं तोकं शिशुं कामरूपी सन् हृत्वा उदन्वति समुद्रे प्रास्य क्षिप्त्वा गृहं प्रत्यगात् ॥ ३ ॥ तं शिशुं कश्चिद्बलवान्मीनो मत्स्यो निर्जगार निगीर्णवान् ततः कदाचिन्मत्स्यजीविभिर्दाशैः सोऽपि मीनोऽन्यपरैर्मीनैः सह महता जालेन वृतः आवृतो गृहीतश्च ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कामस्त्विति द्वयम् ॥ १-२६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

कृष्णवीर्यसमुद्भव इत्यादि। कृष्णस्य वीर्य्यमिव वीर्य्यं यस्य मध्यपदलोपी समासः। समुद्भवः सम्यक् प्रादुर्भावो यस्य स तथा, पुनः कर्मधारयः। अतएव पितुरनवमः अन्यथा चिदानन्दविग्रहस्य वीर्य्यमनुचितमिति ॥ २-२६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कृष्णवीर्य समुद्भवः; कृष्णवीर्यमिव वीर्यं यस्य मध्यपदलोपी समासः। कृष्णवीर्यः समुद्भवः प्रादुर्भावो यस्य, अतएव पितुरनवमः, अन्यथा चिदानन्द-विग्रहस्य वीर्यमनुचितमिति ॥ ३–२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पञ्चपञ्चाशत्तमे तु प्रद्युम्नो रुक्मिणीसुतः। शम्बरेण हृतस्तं स हत्वागात् सप्रियः पितॄन् ॥

जाम्बवत्यादिविवाहेभ्यः प्रागेव प्रद्युम्नजन्म ततो विवाहाः ततः शम्बरागारात् प्रद्युम्नप्रत्यागमनमिति क्रमो ज्ञेयः अत्र तु प्रद्युम्नस्य जन्मनि कथिते तच्चरितमपि सर्वं कथनीयमिति कथितम् अत्र स्वयं भगवतो नित्यलीलापरिकराणां प्रपञ्चे प्राकट्यं खलु भगवदिच्छया स्वस्मिन् प्रविष्टानां स्वस्वविभूतीनामेव प्रथामाश्रित्य दृश्यते नतु साक्षात् स्वस्वप्रथया बहिर्मुखानां नानावादानामुत्थानाभावार्थं भक्तियोगसिद्धान्तस्य रहस्यत्वरक्षणार्थं च "परोक्षवादा ऋषयः परोक्षं च मम प्रिय"मिति भगवदुक्तेः यथा द्रोण एव नन्दोऽभूत् धरैव यशोदा वसुदेव उद्धवः इन्द्र एवार्जुनः यम एव विदुरः गुह एव शाम्ब इत्येवं किं बहुना स्वयं भगवतोऽपि स्वप्रविष्टस्वांशप्रथयैव जन्म यथा वैकुण्ठनाथ एवागत्य वसुदेवगृहे जातः क्वचिद्वामनः एव क्वचिदृषिर्नारायण एव क्षीरोदनाथ एवेत्येवं तस्य तृतीयो व्यूहो यः प्रद्युम्नस्तस्यापि स्वप्रविष्टप्राकृतकन्दर्पाख्यस्वविभूतिप्रथयैवाभिर्भावमाह। कामस्त्विति। वासुदेवांशः "प्रजनश्चास्मि कन्दर्प" इति गीतोक्तेर्वासुदेवविभूतिरित्यर्थः। देहस्य उपपत्तिः स्वाश्रयश्रीप्रद्युम्नदेहप्रविष्टत्वेनैव या प्राप्तिस्तस्यै तमेव विचित्रलीलानिधेस्तस्यैवेच्छया तं प्रत्यपद्यत नतु स्वशक्त्यैव तं प्रापेत्यर्थः ॥ १ ॥ स एव। काम एव प्रद्युम्न इति विख्यातः लोके प्रथामेव प्राप्तः वस्तुतस्तु सच्चिदानन्दविग्रहः प्रद्युम्न एव तृतीयो व्यूहः नतु कामो नाम केवलजीवविशेष एव यदुक्तं श्रीगोपालतापनीश्रुतौ—

यत्रासौ संस्थितः कृष्णस्त्रिभिः शक्त्या समाहितः। रामानिरुद्धप्रद्युम्न रुक्मिण्या सहितो विभुरिति ॥

प्रथमे च नारदोपास्यमन्त्रो यथा -

नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे। प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय चेति ॥

अत्रापि श्लोके पितुः कृष्णात् सर्वतः सर्वप्रकारेणैव अनवमः अन्यूनः नहीन्द्रभृत्यः प्राकृतः काम एवं व्याख्यातुमुचितस्तस्मात्तस्मिन् प्रद्युम्ने तदिच्छया स प्रविश्य स्थितो भगवति जगदिवेत्येवं श्रीनन्दादिष्वपि श्रीद्रोणादीनां स्थितिर्व्याख्येया ॥ २ ॥ अनिर्दशमिति। विष्णुपुराणदृष्ट्या षष्ठेऽह्नीत्यर्थः। विदित्वेति। तद्वधेच्छोः श्रीनारदात् ॥ ३ ॥ निर्जगार। गिलितवानिति विचित्रलीलाचिकीर्षोर्भगवत एवेच्छया नतु प्रद्युम्नादपि मीनो वलवानिति ॥ ४ ॥

गूढार्थदीपिनी

पञ्चापञ्चाशत्तमे तु प्रद्युम्नः कृष्णतोऽभवत्। शम्बरेण हृतः सोऽयं तं हत्वा स्वपुरीमगात् ॥ १ ॥

वासुदेवाधिष्ठितचित्तप्रभवत्वात् वासुदेवांशः। तमेव वासुदेवांशं प्रद्युम्नमेव। देहस्य उपपत्तये प्राप्तये ॥ १ ॥ स काम एव। अनवमोऽन्यूनः। 'न्यूने नीचेऽवमो मतः इति निरुक्तिः ॥ २ ॥ तोकं शिशुम् अनिर्दशं षष्ठेऽह्नि। उदन्वति समुद्रे प्रास्य प्रक्षिप्य ॥ ३ ॥ निर्जगार निगिलितवान्। वृतो बद्धः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रुक्मिण्याः सर्वासु मुख्यत्वात्ताभ्यः तस्याः प्रथमं विवाह उक्तः इदानीं तस्यां पञ्चपञ्चाशत्तमे प्रद्युम्नस्य जन्म शम्बरवधादिकर्म च निरूप्यते। वासुदेवस्यांशो विभूतिः अत एव भूयो देहोपपत्तये तमेव प्रत्यपद्यत तृतीयव्यूहे—

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च। प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥

इत्याद्युक्तेः सर्वोपास्ये वासुदेवान्तर्गते प्रद्युम्ने प्रविष्ट इत्यर्थः ॥ १ ॥ स च प्रद्युम्नाश्रितत्वात्प्रद्युम्न इति विख्यातोऽत एव अनवमः अन्यूनः ॥ २ ॥ प्रास्य। प्रक्षिप्य ॥ ३ ॥ निर्जगार। गिलितवान् ॥ ४–५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ लोके लोकानामपयशश्च्युतिं श्रवणादितः कुर्वदच्युतापयशश्शामकं चरितं विवक्षुः परीक्षित्प्रश्नबीजमेकेन श्लोकेन समस्य समग्रं वदन्ननुवदति। सत्राजिदिति। कृतं किल्बिषं येन स कृतापराध इति यावत्। श्यमन्तकेन मणिना द्युरत्नसम्पादिततन्नामकरत्नेन। सत्रेति विश्लिष्टं शब्दानुशासनपदसमस्तशब्दशब्दवदनुवर्तते। सत्रा सह गतम्। उद्यम्योद्धृत्य

दत्तवान् ।। १ ।। अकारान्तस्तकारान्तश्चेति पर्यायशब्दौ तद्वाचकौ। किं किल्बिषमकरोत् श्यमन्तको मणिश्च कुतः कस्मादायातः कस्मात्किं कारणं हरेः सुता दत्तेति। मम किल्बिषं सन्देहहेतुभूतं मनोमलं ब्रह्मंस्त्वं हेरेरेवापहरेः पूर्णत्वाद्योग्यतामनुसृत्येति वाऽन्वयः ।। २ ।। **सूर्यभक्तस्य सूर्यो** ह्योषधिविशेषः स एव भक्तमन्नं यस्य स तस्य। **सूर्यः** स्यादोषधावपीति विश्वः। भवतं गतं। एतेन स्वभक्तस्येति वक्तव्यं **सूर्यभक्तस्ये**त्युक्तं कथमिति किञ्चिच्छङ्कनं परिहृतं तदशनं चोक्तमिति मन्तव्यम्। सत्राजितः परमः सखा **सूर्यः** प्रीतः श्यमन्तकमणिं तस्मै प्रादात्। तुष्टः स सत्राजिदित्युत्तरेणान्वयः। अतो न प्रीतातिरेकः ।। ३ ।। तेजसा सत्राजिदिति नोपलक्षितोऽपरिचितैरप्यज्ञात इत्यर्थः ।। ४ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

निरूपितो भगवतो भार्यामास्तु परिग्रहः। षष्ठाध्याये तु पुत्रस्य स्वीकारोऽत्र निरूप्यते ।। १ ।।
लोके हि पुत्रभार्याणां सम्बन्धे स्याद्धि संसृतिः। दुष्टभावेषु संसृष्टास्त्वत्र कृष्णेन मोचिताः ।। २ ।।
न चापि भगवान् कृष्णः कमप्यत्र निवारयेत्। भागिनं यत्र यो भागी निवृत्ते हरिसाद्भवेत् ।। ३ ।।
अतः शम्बरनिर्मुक्तः पुत्रो जात इतीर्यते। पुत्रत्वं च न कालादेः किन्तु स्वेच्छात एव हि ।। ४ ।।
तादृशस्य हि जीवस्य ततः कामकथोच्यते।

पूर्वाध्यायैः भार्येच्छया भगवता भार्या कृता। अत्रापि पुत्रेच्छया भगवता कामः पुत्रः कृत इत्याह **कामस्त्विति**। कामस्योत्पत्तिर्न घटते, कामेन हि भार्यायां प्रवृत्तिः। तत आत्मानं प्रति स्वस्याकारणत्वात्कामोत्पत्तिरसङ्गतेत्याशङ्क्य तुशब्देन निराकरोति। तत्र हेतुमाह **वासुदेवांश** इति। स हि न जीवः, किन्तु वासुदेवस्यैव मोक्षदातुः। प्रपत्तिविघटनाय कामो माया च अंशद्वयं विनिर्गतम्, पुरुषे स्त्रियां च प्रतिष्ठितं जगद्व्यामोहयति, यथैव न प्रपन्नो भवति। स तु सर्वान् व्यामोहयन् मुख्याधिकारिणं महादेवमपि व्यामोहयितुं प्रवृत्तः। ततो रुत् रोगान् सर्वेषामेव द्रावयतीति सर्वरोगनिवारकः काममपि रोगं मत्वा क्रोधेन ददाह। ततः प्रभृति नोद्गतः कामो लोके प्रवृत्तः अधिष्ठाता शक्तिरहितो जात इति। नापि मोक्षदाता भगवानवतीर्णः। यत्रायं विघ्नं वा कुर्यात्। यदा पुनः कृष्ण आविर्भूतः, तदा अक्षयं देहं सम्पादयितुं यथा रुद्रो न दहेत्, तदर्थं तं भगवन्तमेव देहोपपत्तये प्रत्यपद्यत, सदेह एव ततो निर्गमिष्यामीति, पुनस्तत्र प्रविष्टः। स हि गोपिकाद्वारा कृष्णे समागतः। ते हि प्रथमं पुरुषरूपाः स्थिताः, पश्चात् स्त्रीत्वे जाते तत्र प्रवेशमलभमानः तद्द्वारा भगवति प्रविष्टः, तासां स्वभावतः पुरुषत्वात् तत उत्पत्तिमलभमानः। यदैव रुक्मिणी संबद्धा, तदैव तस्यां जात इत्याह **स एव जात** इति। वैदर्भी भक्तिप्रधानेति। भगवतो वीर्यमत्र क्रियाशक्तिः, नत्वन्नमयम्। क्रिया हि सतो भवति। चिद्रूपः स्वयम्। सदंशमेवापेक्षते। सदंशे निर्गलितं रूपं क्रियाशक्तिरिति क्रियाशक्तौ आविर्भूतः। तदुक्तम्। कृष्णवीर्ये समुद्भवो यस्येति। एवकारो जीवान्तरप्रवेशाभावाय। अत एव लोके प्रद्युम्न इति विख्यातः। प्रकर्षेण द्युम्नं यस्मादिति। रुक्मिण्यंशसम्बन्धात् आनन्दांशोऽपि तत्र सिद्धः। उत्पादकश्च प्रद्युम्न इति तस्याभिलषितमेव नाम जातमित्युक्तम्। एवमपि भगवदिच्छया चेन्नानुगता स्यात्, तदा अक्षयदेहो न भविष्यतीति भगवत्सारूप्यं प्राप्तवानित्याह **पितुः सर्वतोऽनवम** इति। अवमः क्षयः, केनाप्यंशेन अन्यून इत्यर्थः ।। २ ।। एतन्मध्ये नारदेन शम्बरो बोधितः। यावदयं निर्दशो न भवति, तावन्मारणीयः। अन्यथा भगवद्धस्तस्पर्शे अवध्यो भविष्यतीति। स हि कामस्य शत्रुः। यदा सर्वेषामेव भागो निर्मुक्तो भवति, तदैव भगवान् पुत्रत्वेन ग्रहीष्यतीति। एवमुक्तस्य शम्बरस्य वृत्तान्तमाह। **कामरूपी** स्त्रीरूपेणान्तः प्रविष्टः। कामरूपमस्मिन्वर्तत इति सजातीयेन सजातीयो हृत इति न रक्षकैर्देवैः स रक्षितः। अत एवानिर्दशं दशाहात्पूर्वमेव तोकं बालकं हृत्वा। न निर्गतानि दशाहानि यस्येति। अहः शब्दस्य लोपः। हरणे हेतुमाह **आत्मनः शत्रुं विदित्वेति**। वाक्यान्तरान्नारदादित्यध्यवसेयम्। उदन्वति समुद्रे प्रास्य गृहमगात्, गृहं गतः। बालो हि न मारणीय इति। कालेनानुपभुक्तः सर्वस्याप्यादरणीयो भवतीति प्राकृतं तं मत्वा समुद्रे क्षिप्तः, स्वयमेव समुद्रो भक्षयिष्यतीति समुद्रे प्रक्षिप्तवान् ।। ३ ।। ततः समुद्रो विपरीतं कर्तुं मत्स्यग्रासं कारयित्वा तस्यैव गृहं प्रेषयामासेति निरूपयति **तं निर्जगार बलवा**निति। स हि सचेतनो बालकः। गिलने प्रतिबन्धं करोतीति तदर्थमाह **बलवा**निति। सोऽपि मीनैरपरैर्दुर्बलैर्मीनैः सह तदीयैः महता जालेन गृहीतः। ततोऽपि जालस्य महत्त्वं बलवत्त्वं च। मत्स्यजीविभिरिति तेषां तदुद्यमः सहजः। अतो नात्र अधिकः प्रयासो निरूपणीयः ।। ४ ।।

विवरणटिप्पणी

षष्ठेऽध्याये। कारिकासु। पुत्रत्वं चेति। हि यतस्तादृशस्य प्रद्युम्नसदृशस्य जीवस्य पुत्रत्वं कालादेर्हेतोर्न संभवति, किन्तु **स्वेच्छातः** प्रद्युम्नेच्छात एवेत्यर्थः। **कामस्त्वि**त्यत्र। **सदेह एवेति**। दग्धदेहः कामो भगवतः सकाशात्सदेहो भूत्वा ततो निर्गमिष्यामीति पुनर्भगवति प्रविष्टः। अत एव तद्देहे भगवत्सारूप्यमिति भावः। वासुदेवांशत्वात्पूर्वमपि तत्रैव स्थितः। ततो निर्गतो दग्धः पुनस्तत्र प्रविष्ट इति पुनःपदम्। प्रवेशप्रकारमाहुः **गोपिकाद्वारेति**। विवृण्वन्ति। ते हीति। अग्निकुमाराणां पुरुष-

त्वात्तेषु कामः स्थितः। कामः पुरुषेषु, माया स्त्रीष्विति व्यवस्थापनात्तेषां स्त्रीत्वे जाते तत्र स्थितिमलभमानस्तद्द्वारा भगवति प्रविष्टः। तत्र यदा रुक्मिणी संबद्धा, तदा तद्द्वारा निर्गतः। श्रुतिरूपप्रभृतिषु च रमणेपि पतित्वसंबन्धपुरःसरं प्रथमं रुक्मिण्या एव स्वीकार इत्याशयेनाहुः **संबद्**धेति। 'पतिं मे कुर्वि'ति प्रार्थनादग्निकुमारेषु पतित्वसंबन्धं संभाव्य तेषां पुरुषत्वान्न ततो निर्गमनमित्युक्तमिति भावः। **स एव जात** इत्यत्र। **सतो भवतो**ति। शक्तिरिति शेषः। सदंशस्य शक्तिः क्रियेत्यर्थः। **स्वय**मिति। कामः स्वयं चिद्रूपो, देहस्य सदंशत्वात्सदंशसंबन्धे सदेहो भवति। अतः सदंशमपेक्षते। तथा चैतद्देहो भगवत्सदंशः। अतोऽत्र भगवद्भ्रमं वक्ष्यति 'कृष्णं मत्वे'त्यनेन।

श्रीसुबोधिनी–सारः

शुकोक्तिः। वासुदेवस्यांशो विभूतिः "प्रजनश्चास्मि कंदर्पः" इत्युक्तेः। कामस्तु प्राक् पूर्वं रुद्रस्य शिवस्य मन्युना क्रोधेन दग्ध इति वाल्मीकीयादिकांडे कथा देहोपपत्तये शरीरप्राप्तये तमेव वासुदेवं भूयः पुनः प्राप्तोऽभूत् ॥ १ ॥ स एव कामो वैदर्भ्यां रुक्मिण्यां जातः कृष्णस्य वीर्यात्समुद्भवो यस्य स प्रद्युम्न इति विख्यातः सर्वप्रकारेण पितुः श्रीकृष्णादनवमोऽन्यूनस्तुल्यः ॥ २ ॥ न निर्गतो दशभ्यो दिनेभ्य इत्यनिर्दशस्तं कामम् आत्मनः शत्रुं वैरिणं विदित्वा ज्ञात्वा तोकं बालं हृत्वा कामरूपी स्वेच्छामूर्त्तिः स प्रसिद्धः शंबरोऽसुर उदन्वति समुद्रे प्रास्य क्षिप्त्वा गृहमगात् ॥ ३ ॥ तं बालं बलवान् मीनो निर्जगार सोपि मीनोऽपरैरन्यैर्मत्स्यैः सह महता जालेन वृतो मत्स्यजीविभिः कैवर्त्तैर्गृहीतः ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पञ्चपञ्चाशत्तमे तु रुक्मिण्यां कामरूपिणः। श्रीकृष्णतः समुत्पत्तिः प्रद्युम्नस्य निरूप्यते ॥ १ ॥

जाम्बवत्यादिविवाहेभ्यः प्रागेव प्रद्युम्नो जात इति तत्पूर्ववृत्तान्तकथनपूर्वकजन्मादि निरूपयति—कामस्त्विति। तुशब्देन जीवसाम्यं वारयति। वासुदेवाधिष्ठितचित्तप्रभवात् सृष्टिहेतुत्वाच्च वासुदेवांशः प्राक् पूर्वजन्मनि रुद्रस्य मन्युना क्रोधेन दग्धः कामो भूयः पुनः देहोपपत्तये देहलाभाय तं वासुदेवं कृष्णमेव प्रत्यपद्यत प्रविश्यावतस्थे ॥ १ ॥ स काम एव कृष्णस्य वीर्यात्सम्यगुद्भवो यस्य सः वैदर्भ्यां रुक्मिण्यां जातः प्रद्युम्न इति विख्यातः कथितः। सर्वतः सौन्दर्याकृत्यालापादिभिः सर्वैर्गुणैः पितुरनवमः अन्यूनः, तुल्य इत्यर्थः ॥ २ ॥ स कामशत्रुतया प्रसिद्धः शम्बरस्तं प्रद्युम्नं आत्मनः शत्रुं कामं नारदमुखात् विदित्वा अनिर्दशं अनतीतदशाहं तोकं शिशुमेव हृत्वा उदन्वति समुद्रे प्रास्य क्षिप्त्वा गृहं प्रत्यगात्। ननु 'अन्तःपुरात्तस्य हरणं कथं सम्भवति ?' इत्याशङ्क्याह—कामरूपीति। अलक्षितरूपान्तरेणेत्याशयः ॥ तं च शिशुं कश्चिद्बलवान् मीनो मत्स्यो निर्जगार निगीर्णवान्। ततो मत्स्यजीविभिर्मत्स्यान् धृत्वा विक्रीय जीवद्भिः दाशैः अपरैः मत्स्यैः सह महता जालेन सोपि मत्स्यो वृतो गृहीतश्च ॥ ३-४ ॥

अन्वितार्थप्रकाशिका

पञ्चपञ्चाशत्तमेऽहन्प्रद्युम्नः शम्बरासुरम्। द्वारकां रत्या सहागाच्छ्लोकाः सार्द्धाः खसिन्धवः (४०)।
द्वे (२) उवाचेति पादोना हस्तवेदा (४१।।।) अनुष्टुभः ॥ ५५ ॥

जाम्बवत्यादिविवाहेभ्यः पूर्वमेव प्रद्युम्नजन्म ततो विवाहः ततः शम्बरागारात्प्रद्युम्नप्रत्यागमनम्। अत्र पुत्रकथनप्रस्तावेऽपि जातमात्रस्य प्रद्युम्नस्य शम्बरेण हरणं निरूप्यते। प्रत्यागमनं तु उत्तरकालिकमपि। कथापर्यवसानायात्रोक्तम्—काम इति। वासुदेवाधिष्ठितचित्तप्रभवत्वात् सृष्टिहेतुत्वाच्च वासुदेवांशः। यद्वा। वासुदेवस्यांशः प्रद्युम्नरूपो विद्यते यत्र सः प्रद्युम्नविभूतिरूपः कामः इन्द्रभृत्यत्वेन एकादशादिषु प्रसिद्धः प्राकृतकामः प्राक् पूर्वजन्मनि रुद्रस्य मन्युना क्रोधेन दग्धः अनङ्गतां विधाय स्वतो देहप्राप्तावसमर्थः कृतः। अतो भूयः पुनर्देहोपपत्तयेऽन्यप्रसङ्गतो देहलाभाय तं वासुदेवं कृष्णमेवतं वासुदेवांशं प्रद्युम्नमेव वा प्रत्यपद्यत प्रविश्यावतस्थे। तमुपास्य तत्र सायुज्यं प्रापेति वा। अत्र स्वयं भगवतो। नित्यलीलापरिकराणां प्रपञ्चे प्राकट्यं खलु भगवदिच्छया स्वस्मिन् प्रविष्टानां स्वविभूतीनामेव प्रथामाश्रित्य दृश्यते। ननु साक्षात् स्वस्वप्रथया बहिर्मुखानां नानावादानामुत्खाताभावार्थं भक्तियोगसिद्धान्तस्य रहस्यत्वरक्षणार्थं च परोक्षवादा ऋषयः। "परोक्षं च मम प्रियम्" इति भगवदुक्तेः। द्रोण एव नन्दोऽभूत्। धरैव यशोदा वसुदेवोद्धवः इन्द्र एवार्जुनः यम एव विदुरः गुह एव साम्ब इत्येवम्। किं बहुना स्वयं भगवतोऽपि स्वप्रविष्टस्वांशप्रथयैव जन्म। यथा वैकुण्ठनाथ एवागत्य वसुदेवगृहे जातः इत्यादि एवं तस्य तृतीयो व्यूहो यः प्रद्युम्नस्तस्यापि स्वप्रविष्टप्राकृतकन्दर्पाख्यविभूतिप्रथयैवायमाविर्भाव उक्तः नत्वसौ कन्दर्पाख्यः ॥ १ ॥ स इति। य एव कृष्णस्य वीर्यात्सम्यगुद्भवो यस्य सः प्रद्युम्न इति व्यूहेषु विख्यातः कथितः। स एव वैदर्भ्यां रुक्मिण्यां जातः। प्राकृतकामस्तु सायुज्यादेव जात इति भावः। तत्र हेतुः सर्वतः सौन्दर्याकृत्यालापादिभिः सर्वैर्गुणैः पितुरनवमः अन्यूनः तुल्यः ॥ २ ॥

तमिति । सः कामशत्रुतया प्रसिद्धः शम्बरः कामरूपी अलक्षितरूपान्तरधारी सन् तं प्रद्युम्नम् आत्मनः शत्रुं कामं शम्बरवधेच्छोर्नारदस्य मुखात् विदित्वा अनिर्दशम् अनतीतदशाहं तोकं शिशुमेव विष्णुपुराणरीत्या जन्मतः षष्ठेऽह्नि हृत्वा उदन्वति समुद्रे प्रास्य क्षिप्त्वा गृहं प्रत्यागात् ॥ ३ ॥ तं च शिशुं कश्चिद् बलवान् मीनो मत्स्यो निर्जगार निगीर्णवान् । इदमपि विचित्रलीलाचिकीर्षोर्भगवत एवेच्छया नतु मीनोऽपि कामाद्बली ततो मत्स्यजीविभिर्धीवरैः अपरैः मत्स्यैः सह महता जालेन स मत्स्योऽपि वृतो गृहीतश्च ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं पंचपंचाशत्तमेऽध्याये प्रद्युम्नोत्पत्तिं तस्य शंबरासुरकृतहरणं च प्रद्युम्नकृतशंबरहननं च रतिप्रद्युम्नयोर्द्वारिकागमनं च निरूपयति ॥ वासुदेस्य अंशः प्रद्युम्नरूपोऽस्त्यस्मिन्निति तथाभूतः प्रद्युम्नस्य विभूतिरूप इत्यर्थः स च प्रद्युम्नस्योपासकः कामदेवः एकादशस्कंधे इन्द्रभृत्यः प्रद्युम्नस्योपासकश्चोक्तः रुद्रमन्युना प्राग्दग्धः सकामः प्रद्युम्नसायुज्यतां प्राप्तः सन् ॥ भूयो देहोत्पत्तये प्रद्युम्नेन स हतं श्रीकृष्णमेव प्रत्यपद्यत ॥ अनंतकोटिब्रह्मांडपालकस्य पुरुषोत्तमसगुणावतारस्य प्रद्युम्नस्येंद्रभृत्यरुद्रदग्धत्वसंभावादयमेवार्थो निःशंकतया बोध्यः ॥ १ ॥ पितुरनवमः श्रीकृष्णस्य सदृशः ॥ २ ॥ सः कामरिपुतया विख्यातः शंबरः आत्मनः स्वस्य शत्रुं तं प्रद्युम्नं विदित्वा कामरूपीयथेष्टरूपधारकः हृत्वा अनिर्दशं निर्गतानि जन्मतो दशदिनानि यस्य तथाभूतो न भवतीति तं ॥ षष्ठे क्रीत्यर्थो विष्णुपुराणप्रसिद्धेः ॥ उदन्वति जलधौ प्रास्य क्षिप्त्वा ॥ ३ ॥ तं निर्जगार गिलितवात् ॥ सोपि बलवानपि अपरैर्मीनैः सह जालेन वृतः ॥ सन् गृहीतः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रद्युम्नः कृष्णतो जातः शम्बरेण हृतः स तु । पञ्चपञ्चाशत्तमेऽसौ तं हत्वा कान्तयाऽगमत् ॥ १ ॥

इत्थं भगवतो रुक्मिणीविवाहः सविस्तरमनुवर्णितोऽथ जाम्बवत्यादिविवाहान्विवक्षुस्तेभ्यः प्रागेव प्रद्युम्नजन्मेति तदनुवर्णयति ॥ काम इति ॥ यद्यपि जाम्बवत्यादिविवाहेभ्यः प्रागेव प्रद्युम्नजन्म ततोऽन्ये विवाहाः ततः शम्बरागारात् प्रद्युम्नप्रत्यागमनमतः पुत्रकथाप्रस्तावेऽपि प्रथमं प्रद्युम्नस्य जन्मोक्तमस्ति, ततः जातमात्रस्य तस्य शम्बरेण हरणमत्र निरूप्यते प्रत्यागमनं तूत्तरकालिकमपि कथापर्यवसानायात्रोक्तमिति बोध्यम् । वासुदेवांशः वासुदेवविभूतिरूपः, कामो मन्मथः, प्राक् , रुद्रमन्युना, दग्धः अभवत् । स च, भूयः पुनः देहोपपत्तये देहसंयोगाय, तं वासुदेवं एव, प्रत्यपद्यत । भगवत्तनुमाश्रित्यास्थादित्यर्थः ॥ १ ॥ स एवेति ॥ स कामः एव कृष्णस्य भगवतो वीर्यात् समुद्भवो यस्य सः, एवंभूतः सन्, वैदर्भ्यां रुक्मिण्यां जातः एव । प्रद्युम्नः इति विख्यातश्च, सर्वतः सर्वप्रकारेण, पितुः अनवमः । अन्यूनः तुल्य आसीदित्यर्थः ॥ २ ॥ तमिति ॥ सः कामशत्रुतया प्रसिद्धः, शम्बरः शम्बरनामाऽसुरः, कामरूपी सन्, तं प्रद्युम्नं आत्मनः स्वस्य, शत्रुं विदित्वा, नारदमुखादिति शेषः । अनिर्दशमनतीतदशाहं, तोकं शिशुं, हृत्वा, उदन्वति समुद्रे, प्रास्य क्षिप्त्वा, गृहं प्रति, अगात् ॥ ३ ॥ तमिति ॥ तं शिशुं कश्चित् बलवान्, मीनो मत्स्यः, निर्जगार निगीर्णवान् । ततः, कदाचित् मत्स्यजीविभिर्दाशैः, स शिशुगिलो मीनः अपि, अपरैः, मीनैः सह, महता जालेन, वृतः गृहीतश्च ॥ ४ ॥

कृष्णप्रिया

श्रीशुकदेवजी ने वचन वर्षा की—राजन् परीक्षित् ! भगवान् कामदेव श्रीवासुदेवजी के ही अंश हैं । पूर्व में भगवान् महारुद्र की नेत्राग्नि से भस्म हो गये थे । वे पुनः देह प्राप्ति के लिये अपने अंशी भगवान् श्रीकृष्णजी के आश्रित बने ॥ १ ॥ वे ही कामदेव पुनः भगवान् श्रीकृष्ण के द्वारा श्रीरुक्मिणीजी के गर्भ से उत्पन्न हुए और प्रद्युम्न नाम से विश्व में प्रसिद्ध हुए । सौन्दर्य-वीर्य-सौशील्य-आदि श्रेष्ठ गुणों में भगवान् श्रीकृष्ण के समान थे ॥ २ ॥ प्रद्युम्नजी अभी दस दिन के भी न थे कि कामरूपी शम्बरासुर वेष बदल कर सूतिका गृह से उन्हें ले गया और महासागर में फेंककर अपने घर लौट गया ॥ ३ ॥ शम्बर को श्रीनारदजी से जानकारी मिली थी कि यह मेरा भावी शत्रु है । समुद्र में बालक प्रद्युम्नजी को एक बड़ा मच्छ निगल गया । पुनः मछुओं ने अपने बड़े जाल में फँसाकर दूसरी मछलियों के साथ उस मच्छ को पकड़ लिया ॥ ४ ॥

तं शम्बराय कैवर्ता उपाजह्रुरुपायनम् । सूदा महानसं नीत्वावद्यन्[1] स्वधितिनाद्भुतम् ॥ ५ ॥
दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन् ।
नारदोऽकथयत् सर्वं तस्याः शङ्कितचेतसः । बालस्य तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनम् ॥ ६ ॥
सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी । पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती ॥ ७ ॥
निरूपिता शम्बरेण सा [2]सूपौदनसाधने । [3]कामदेवं शिशुं बुद्ध्वा चक्रे स्नेहं [4]सदार्भके ॥ ८ ॥

---

१. वध्यन्–च. पु. टि. । २. सूदौ–वीर. । ३. सा च तं सुन्दरवरं विलोकय मुदितानना–च. पु. टि. । ४. तदा–श्रीधर. वंशी. जीव. वीर. विश्व. शुक. सु. ।

कर्दमक्षमा

अन्वयः—कैवर्त्ताः, शम्बराय, तम्, उपायनम्, उपाजह्रुः, सूदाः, महानसम्, नीत्वा, स्वधितिना, अवधन्, तद्, उदरे, अद्भुतम्, बालम्, दृष्ट्वा, मायावत्यै, न्यवेदयन् ॥ ५ ॥ नारदः, शङ्कितचेतसः, तस्याः, बालस्य, तत्वम्, उत्पत्तिम्, मत्स्योदरनिवेशनम्, सर्वम्, अकथयत् ॥ ६ ॥ सा, वै, कामस्य, पत्नी, रतिः, नाम, यशस्विनी, निर्दग्धदेहस्य, देहोत्पत्तिम्, प्रतीक्षती, आसीत् ॥ ७ ॥ शम्बरेण, सूपौदनसाधने, सा, निरूपिता, आसीत्, शिशुम्, कामदेवम्, बुद्ध्वा, तदा, अर्भके, स्नेहम् चक्रे ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वधितिना शस्त्रिकया अवद्यन्नवाद्यन् खंडितवन्तः ॥ ५ ॥ तत्त्वं कामोऽयं तव भर्त्ता ते। उत्पत्तिं श्रीकृष्णाद्रुक्मिण्यामुत्पन्न इति ॥ ६ ॥ यशस्विनी पतिव्रता भर्तृदेहप्राप्तिं प्रतीक्षमाणा ॥ ७ ॥ तं शिशुं कामदेवं बुद्ध्वा विज्ञाय ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं मत्स्यम्। कैवर्ता धीवराः 'कैवर्ते दाशधीवरौ' इति कोशात्। उपायनभूतं ददुः। सूदा आंधसिकाः "सूदस्तु कथितः सूपकारे च व्यञ्जनान्तरे" इति मेदिनी। "बहुशर्करके ग्रामे गेहे पाकस्थले पुमान्। महानस इति प्रोक्ते" इति निरुक्तिः। "कुठारे छुरिकायां च स्वधितिः परिकीर्तिता" इति कोशांतरात्। द्रुतं शीघ्रम्। अवपूर्वात् 'दो–अवखण्डने' अतो लङ्, अडभावस्त्वार्षः। तमित्यर्धकम्। उपजह्रुरित्युक्तेऽप्युपायनमिति पौनरुक्त्यं तद्वैशिष्ट्यापेक्षया। अद्भुतत्वं बृहत्त्वादि। तस्यैवोपायनत्वे हेतुरयमेव। तत्र तन्निजविद्याप्रकाशनेन तन्नाम्नैव ख्यातायै रत्यै अर्पयामासुः तस्याः सूदाधिपत्वात् ॥ ५ ॥ मायावत्यै महादेवप्रसादावाप्तानेकमायाज्ञानवत्यै रत्यपरपर्यायायै। तस्या रत्याः। तत्त्वं याथार्थ्यम्। शंकितचेतसः बालोऽयमतिसुन्दरो मत्पतितुल्यरूपः कथं मत्स्यगर्भे जातः, अन्य एवोत्पन्नश्चेत्कथमत्र न मृतः, अतो देववरोऽयं कश्चिन्मद्भर्त्तैव वा स्यादित्याद्याशंकायुक्तं चेतो यस्यास्तस्याः। सर्वमित्येव विवृणोति—बालस्येति, मत्स्योदरनिवेशनं च प्रवेशकारणम्। अत्र तस्या भर्तुः कामस्य तृतीयव्यूहेनाभेदोक्तिः, किरणस्य सूर्येणेव। सा च मायावत्याः शोकापनोदाय मेलनाय च। सापि निजपत्यभेदेन श्रीप्रद्युम्नमुपासितवत्यस्ति 'गोपीनां तत्पतीनां च' इत्यादिरीत्या। न च तस्या व्रतभंगः, अयञ्च स्पर्शमणिन्यायेन तामात्मयोग्यां चकार स्वीचकार च। श्रीमदनिरुद्धमातैव तु तस्य साक्षाच्छक्तिरिति ज्ञेयम् ॥ ६ ॥ सा चेति युग्मकम्। अत्रेयमाख्यायिका मात्स्ये—शिवेन भस्मीकृते कामे रतिस्तद्देहोत्पादनाय चिरं तमुपासितवती। शंबरोऽपि तमुपासीन आसीत्। तत्र दृष्टायां तस्यां शम्बरेण मुहुः शिवात्सैव वव्रे। ततश्चोपासनावशेन तेन रतिरूचे—याह्यस्य सदनं तत्रैव तवेष्टसिद्धिर्भविष्यति, मद्दत्तमहाविद्याप्रभावेण तव व्रतभंगोपि न भविष्यतीति। तथा विष्णुपुराणे रुक्मिणीं प्रति नारदः—"इयं मायावती भार्या तनयस्यास्य ते सती। शम्बरस्य न भार्येयं श्रूयतामत्र कारणम्। मन्मथे तु गते नाशं तदुद्भवपरायणा। शंबरं मोहयामास मायारूपेण मोहिनी। व्यवायाद्युपभोगेषु रूपं मायामयं शुभम्। दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा।" इति। इत्थं हरिवंशेपि ॥ ७ ॥ सूपौदनस्य साधने संस्कारे, आधिपत्ये वा "संस्कारे ह्याधिपत्येपि साधनं परिकीर्तितम्" 'रूपो व्यञ्जनसूदयोः' इति मेदिनी। तदा नारदकथनावसरादारभ्य। सूपौदनसाधने तदाधिपत्ये। तदुक्तं वैष्णवे—"कारयामास सूदानामाधिपत्यमनिंदिता" इति। स्नेहं प्रेमविलासम्। स्नेहाऽऽचरणप्रकारश्च हरिवंशे—'धात्र्यास्तं सा समर्पयत्' इति, "रसायनोपयोगैश्च शीघ्रमेव व्यवर्धयत्" इति। एवं तस्या एव मायया शंबरोपि तं बालं न परिचितवानिति ज्ञेयम्। तदा 'सदा' इति वा पाठः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तमित्यर्द्धकम् उपाजह्रुरित्युक्तेऽपि उपायनमिति पौनरुक्त्यं तद्वैशिष्ट्यापेक्षया अद्भुतत्वं बृहत्त्वादिना तस्यैवोपायनत्वे च हेतुरयमेव मायावत्यै तत्र तन्निजविद्याप्रकाशनेन तन्नाम्नैव ख्यातायै रत्यै अर्पयामासुः तस्याः सूदाधिपत्यात् ॥ ५ ॥ शङ्कितचेतसः। बालोऽयमतिसुन्दरः मत्पतितुल्यरूपः कथं मत्स्यगर्भे जातः अन्यत्र वोत्पन्नश्चेत् कथमत्र न मृतः अतो देववरोऽयं कश्चिन्मद्भर्त्तैव वा स्यादित्याशङ्कायुक्तं चेतो यस्यास्तस्याः सर्वमित्येव विवृणोति। बालस्येति। मत्स्योदरे निवेशनं प्रवेशकारणमन्यत्तैः। अत्र तस्या भर्त्तुः कामस्य तृतीयव्यूहेनाभेदोक्तिः किरणस्य सूर्य्येणेव सा च मायावत्याः शोकापनुत्तये मेलनाय च अतः साऽपि निजपत्यभेदेन श्रीप्रद्युम्नमुपासितवत्यस्ति "गोपीनां तत्पतीनां चे"त्यादिरीत्या न च तस्या व्रतभङ्गः अयं च स्पर्शमणिन्यायेन तामात्मयोग्यां चकार स्वीचकार च श्रीमदनिरुद्धमातैव तु तस्य साक्षाच्छक्तिरिति ज्ञेयम् ॥ ६ ॥ सा चेति युग्मकम्। अत्रेयमाख्यायिका मात्स्ये श्रीशिवेन भस्मीकृते कामे रतिस्तद्देहोत्पादनाय चिरं तमुपासितवती शम्बरश्च वरान्तराय तमुपासीन आसीत् तत्र दृष्टायां तस्यां तेन श्रीशिवान्मुहुः सैव वव्रे ततश्चोपासनावशेन तेन रतिरूचे याह्यस्य सङ्गे तत्रैव तव सिद्धिर्भविष्यतीति यशस्विनीति पुनस्तथा निजपतिप्राप्तिशम्बरवञ्चनादिना तथा च विष्णुपुराणे श्रीरुक्मिणीदेवीं प्रति श्रीनारदोक्तौ—

इयं मायावती भार्य्या तनयस्यास्य ते सति ! । शम्बरस्य न भार्य्येयं श्रूयतामत्र कारणम् ॥
मन्मथे तु गते नाशं तदुद्भवपरायणा । शम्बरं मोहयामास मायारूपेण मोहिनी ॥
व्यवायाद्युपभोगेषु रूपं मायामयं शुभम् । दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणेति ॥

ईदृशं हरिवंशेऽपि ॥७॥ सूपौदनसाधने तदाधिपत्ये तथाच श्रीविष्णुपुराणे “कारयामास सूदानामाधिपत्यमनिन्दिते”ति स्नेहं प्रेमविलासं स्नेहाचरणप्रकारश्चोक्तः श्रीहरिवंशे धात्र्यास्तं सा समर्पयदिति “रसायनोपयोगैश्च शीघ्रमेव व्यवर्धयदि”ति एवं तस्या एव मायया शम्बरोऽपि तं बालं न परिचितवानिति ज्ञेयं तदा सदेति वा पाठः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

द्रुतमिति सद्यः शम्बरभोगसुखार्थम्, पाठान्तरे बृहत्त्वबलवत्त्वादिनाऽन्यमीनतो विलक्षणम् ॥ ५ ॥ मायावत्यै मायया शम्बरमोहनाद्विविधाद्भुतमायावित्त्वाद्वा तन्नाम्नैव ख्यातायै रत्यै न्यवेदयन् अर्पयामासुः तस्याः सूदाधिपत्यात् । शंकितम्—बालोऽयमतिसुन्दरो मत्पतितुल्यरूपः कथं मत्स्यगर्भे जातः, अन्यत्र वोत्पन्नश्चेत् कथमत्र न मृतः, अतो देववरोऽयं कश्चिन्मद्भर्त्तैव वा स्यादित्याद्याशंकायुक्तं चेतो यस्यास्तस्याः, सर्व्वमित्येव विवृणोति—बालस्येति । मत्स्योदरे निवेशनं च प्रवेशकारणम् ॥ ६ ॥ त्वर्थे च, शब्दः, शम्बरतो भेदात्, वै प्रसिद्धौ, यशस्विनीति शम्बरपत्नीत्वादिकं निरस्तम् । निःशेषेण भस्मसात्तया दग्धदेहस्यापि देहस्योत्पत्तिमात्मनो दाहाभावात्, कामदेवत्वेन सदा सर्व्वेषां हृद्यनंगरूपेण वर्त्तमानत्वाच्च; प्रतीक्षमाणा शम्बरगृहेऽवसदिति शेषः । तच्च श्रीनारदस्य श्रीरुद्रस्य वा प्रसादात्, देवतात्वेन स्वज्ञान-प्रभावादेव वेति ज्ञेयम् । यशस्विनीत्वादेव केवलसूपस्य ओदनस्य च भक्तसाधने पाचन एव निरूपिता नियुक्ता,—तयोः सदा परमोत्तमतयापेक्ष्यत्वात्, किंवा उपलक्षणमेतत्, सर्व्वपाकाधिकार एव निरूपिता, तथा च श्रीविष्णुपुराणे (५।२७।६)—‘कारयामास सूदानामाधिपत्यमनिन्दिता’ इति श्रीपराशरादि–मते च शम्बरस्य भार्य्यात्वेन स्थितापि तत्संगरहितैवासीत् । तथा च श्रीविष्णुपुराणे (५।२७।२६–२८) श्रीरुक्मिणीदेवीं प्रति श्रीनारदोक्तौ—

‘इयं मायावती भार्य्या तनयस्यास्य ते सती । शम्बरस्य न भार्य्येयं श्रूयतामत्र कारणम् ॥
मन्मथे तु गते नाशं तदुद्भवपरायणा । शम्बरं मोहयामास मायारूपेण रूपिणी ॥
व्यवायाद्युपभोगेपु रूपं मायामयं शुभम् । दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा ॥’ इति;

ईदृशं श्रीहरिवंशेऽपि । स्नेहं प्रेमविलासम्, स्नेहाचरणप्रकारश्चोक्तः श्रीहरिवंशे (विष्णु० प० १०४।१३)—‘धात्र्यास्तं सा समर्पयत् । रसायनप्रयोगैश्च शीघ्रमेव व्यवर्द्धयत्’ इति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कैवर्त्ताः । दाशास्तं महामीनं शम्वरायोपायनमुपाजह्रुः समर्पयामासुः ततः सूदाः पाचकाः छेत्तारो वा महानसं पाकगृहं प्रति तं मीनं प्राप्य स्वधितिना शस्त्रविशेषेणावद्यन् खण्डितवन्तः ॥ ५ ॥ तदा तस्य मत्स्यस्योदरेऽद्भुतं बालं दृष्ट्वा तं मायावत्यै रत्यै मन्मथपत्न्यै रत्याख्यायै शम्बरेण प्रसह्याहृत्य महानसेस्थापितायै न्यवेदयन् कोऽसावयं बाल इति मम भर्तेव स्थितः किं वा स एवायमित्येवं शङ्कितं चेतो यस्यास्तस्या मायावत्याः नारदः तत्सर्वं कथयामास किं तत्सर्वं यदकथयत्तत्राह । बालस्येति । तत्त्वम् याथात्म्यं काम एवायमित्येवं विधं मत्स्योदरनिवेशनादिकं चेति सर्वमकथयत् ॥ ६ ॥ सा चेति । सा शम्बरेण सूदैः सहोदनसाधने पाकगृहे निरूपिता सूदानां परिचारकतया स्थापिता मायावती पत्युः कामस्य देहोत्पत्तिं प्रतीक्षमाणा स्थिता सती तं शिशुं नारदमुखात्कामदेवं ज्ञात्वा तस्मिन्नर्भके सदाविच्छिन्नं स्नेहं चक्रे ॥ ७–८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अवद्यन् अवाद्यन् खण्डितवन्तः ॥ ५ ॥ सर्वं कामोऽयं तव भर्त्तेति ॥ ६ ॥ देहोपपत्तिमिति । मात्स्ये कथा भस्मीभूते देहे सति रतिस्तद्देहप्राप्त्यर्थं शिवमाराधयामास शम्बरश्चागतो वरान्तराय शिवस्तुष्टः प्रथमं वरं वृण्विति शम्बरं प्रत्याह स्म स च रतिं दृष्ट्वा कामार्त्तस्तामेव वव्रे ततः शिवो रुदतीं रतिं साश्वासमाह याह्यस्य सङ्गे तत्रैव ते वाञ्छितसिद्धिर्भाविनीति ततो रतिर्माययैव शम्बरं मोहयित्वा स्पर्शरहितैव तद्गृहे मायावत्यभिधाना तस्थौ ॥ ७–९ ॥

गूढार्थदीपिनी

तं मत्स्यम् । कैवर्ता धीवराः । उपायनभूतं समर्पयामासुः । स्वधितिना छुरिकया । अवाद्यन् खण्डितवन्तः ॥ ५ ॥ दृष्ट्वेति सार्द्धम् । मायावती कामपत्नी रतिः तत्त्वं रहस्यं तव भर्ताऽयमिति ॥ ६ ॥ सा चेति युग्मम् । सूयौदनस्य साधने आधिपत्ये ॥ ७–८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अवद्यन् । अवाद्यन् खण्डितवन्तः स्वधितिना शस्त्रिकया ॥ ५–९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मुष्टाऽपहृता दृष्टिर्येषां ते तथा जनाः सूर्य आयातः किमिति संशयग्रस्ता अक्षैर्दुरोदरैर्दीव्यते क्रीडते ॥ ५ ॥ अरविन्दाक्ष कमलनयन । अरविन्दौ विधुरवी अक्षिणी यस्य स इत्यागमानुबन्धसूचनं वा ॥ ६ ॥ गभस्तिचक्रेण करनिकुरुम्बेन तिग्मरुक् तीक्ष्णप्रकाशः ॥ ७ ॥ स कुत आगच्छेदित्यतस्तव माहात्म्यमीदृगित्याहुः । नन्विति । विबुधर्षभा अपि ते मार्गं त्रिलोक्यामिच्छन्ति ननु निश्चयो यदुषु गूढं त्वामज्ञात्वा दिदृक्षुरजः सूर्योऽजाय लोकत्रयभावनायेति वचनात् । योऽजस्तं त्वां द्रष्टुमिति वाऽन्वयः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः शम्बरः कैवर्तानामधिपतिः प्राप्तमहामत्स्यैः कैवर्तैः स मत्स्यः तस्मै दत्त इत्याह **तं शम्बराये**ति । उपायनमुत्कृष्टोपहारम् । सोऽप्यविचार्यैव सूदेभ्यः पाचकेभ्यो घातकेभ्यो वा दत्तवान् । सूदाः पुनः महानसं स्थानं नीत्वा अवद्यन् । ततः अद्भुतं बालकं तस्य **उदरे** दृष्ट्वा मायावत्यै न्यवेदयन् । सा हि रतिः कामस्य भार्या आसीत् । ततो दग्धे कामे तद्भार्या यदा शम्बरेण नीयते, तदा माया तस्यां प्रविष्टा । तदा मायावतीति नाम प्राप्तवती । सा च तेन प्रतिक्षणं मायया मोहितेन पाकाध्यक्षा निरूपिता । ततो बालकः मायावत्या दृष्टः । कोऽप्ययं कपटेन मां ग्रहीष्यतीति भयाच्छङ्कितचित्ता जाता, ततो नारदः पुनरागत्य तां बोधितवानित्याह **नारदोऽकथय**दिति । बालस्य तत्त्वं कामत्वं उत्पत्तिं कृष्णान्नारदप्रेरणया शम्बरद्वारा मत्स्योदरनिवेशनम् । ततोऽत्रागमनं तु स्पष्टमेवेति त्रयमुक्तम् । सात्त्विकं राजसं तामसं च । यद्ययं मत्स्योदरे न निविष्टः स्यात्, तदाग्रे भगवतः कामात् स्त्रीविवाहा अयुक्ताः स्युः ॥ ६ ॥ ततस्तया ज्ञात्वा स गृहीत इति वक्तुं तस्याः स्वरूपमाह **सा चे**ति । तस्याः आकाङ्क्षित एवायं स्थितः । चकारस्त्वर्थसमुच्चयार्थः । नारदः अकथयत् । साप्याकाङ्क्षायुक्तेति । कामस्यैव पत्नी, न तु कामेन यस्य कस्यचित् । **रति**रिति तस्या नामेति प्रसिद्धिः । अनेन लोकेऽपि तस्या निन्दाभाव उक्तः । यथा कामः पुरुषेषु, तथा रतिः स्त्रीषु प्रतिष्ठितेति प्रसिद्धिः । किञ्च । **यशस्विनी** प्राप्तयशाः । अतो यशःसम्बन्धात् नापकीर्तिसम्भावना । नन्वेतादृशी भर्तृमरणे वैधव्यधर्मपरिपालनाय योग्या कथं रूपान्तरस्थपतिं गृहीतवती, तत्राह **पत्युर्निर्दग्धदेहस्ये**ति । न हि पतिर्मृतोऽस्ति । अन्यथा जगदुत्पत्तिरेव न स्यात् । किन्तु देह एव दग्धः, तस्योत्पत्तिमेव प्रतीक्षते ॥ ७ ॥ तस्यास्तत्रागमने हेतुमाह **निरूपिते**ति । सूपौदनानां पाचने । सा हि मायां जानाति सूपकाराणाम् । तन्माया प्राणहारिणी भवतीति तद्रक्षार्थं पाकस्थाने नियुक्ता । अनेन भक्ष्यभोज्यादिसम्पत्तिः तस्याः सिद्धा । लोकाः तस्याः पुत्रत्वेन तं जानन्ति । सा तु न पुत्रत्वेन तं प्रति पालितवती, अपि तु काममेव बुद्ध्वा, तत्रापि देवं पतिं शिशुत्वेन समागतम्, अर्भके स्नेहं चक्रे ॥ ८ ॥

श्रीसुबोधिनीसारः

कैवर्त्तास्ते शंबरार्थं तं मत्स्यमुपायनं बलिं समर्पयामासुः सूदाः पाचका महानसं भोजनागारं नीत्वा स्वधितिना शस्त्रेणाद्भुतं मीनमवद्यन् चिच्छिदुः अडभाव आर्षः ॥ ५ ॥ तस्य मत्स्यस्योदरे बालं दृष्ट्वा मायावत्यै तद्गृहाधिष्ठात्र्यै न्यवेदयन् समर्पयांचक्रुः कोयमिति शंकितचित्तायै तस्यै नारदः सर्वम् अकथयत् किमित्यत आह । तत्त्वं कामोयं तव भर्त्ता इति उत्पत्तिं श्रीकृष्णाद्रुक्मिण्यां जन्म शंबरेण समुद्रप्रक्षेपान्मत्स्यस्योदरे निवेशनमिति ॥ ६ ॥ का सेत्यत आह । सा च यशस्विनी कामस्य रतिर्नाम पत्नी वै एव निर्दग्धो देहो यस्य तस्य पत्युः देहोत्पत्तिं पुनर्जन्म प्रतीक्षमाणा ॥ ७ ॥ शंबरेण सूपोदनयोः साधने निरूपिता सा रतिः शिशुं बालं कामदेवं बुद्धा ज्ञात्वा तदाऽर्भके बाले स्नेहं चक्रे ॥ ८ ॥

विवरण टिप्पणी

पत्युरित्यत्र । **देह एवे**ति । एवकारस्य दग्धपदेनान्वयः । दग्ध एव ज्वलन्नेव तिष्ठति, न तु भस्मीभूत इतीतरवैलक्षण्यम् । अतो न मृत इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कैवर्तास्ते दानास्तं महामत्स्यं शम्बराय उपायनमुपाजह्रुः समर्पयामासुः । ततश्च सूदाः छेत्तारः पाचकास्तमद्भुतं मत्स्यं महानसं पाकगृहं प्रति नीत्वा स्वधितिना शस्त्रविशेषेण अवद्यन् खण्डितवन्तः ॥ ५ ॥ तदा तस्य मत्स्यस्योदरेऽद्भुतं बालं दृष्ट्वा प्रगृह्य मायावत्यै न्यवेदयन् समर्पयामासुः । 'कोसौ अयं बाल' इति शङ्कितं चेतो यस्यास्तस्या मायावत्या नारदो बालस्य

तत्त्वं कामदेवस्वरूपत्वं कृष्णाद्रुक्मिण्यामुत्पत्तिं शम्बराहरणादि मत्स्योदरप्रवेशप्रकारं च सर्वमकथयदित्यन्वयः ॥ ६ ॥ सा च मायावती वै निश्चयेन कामस्य पत्नी रतिर्नाम प्रसिद्धा रुद्रक्रोधेन निर्दग्धदेहस्य पत्युर्देहोत्पत्तिं प्रतीक्ष्यमाणा। तत्र हेतुः—यशस्विनी पतिव्रता ॥ ७ ॥ सा च शम्बरेण सूपादिसाधने निरूपिता तं शिशुं नारदमुखात् कामदेवं बुद्धा तदा तस्मिन्नर्भके स्नेहं चक्रे ॥ ८ ॥

अन्वितार्थप्रकाशिका

तमिति ॥ कैवर्तास्ते दाशास्तं महामत्स्यं शम्बराय उपायनमुपाजह्रुः समर्पयामासुः। ततश्च सूदाः पाचकास्तमद्भुतं मत्स्यं महानसं पाकगृहं प्रति नीत्वा स्वधितिना शस्त्रिकयाऽवद्यन् खण्डितवन्तः। अडभाव आर्षः। अवाद्यन्निति काचित्कः पाठस्तु साधुरेव ॥ ५ ॥ दृष्ट्वेति ॥ तदा तस्य मत्स्यस्योदरेऽद्भुतं बालं दृष्ट्वा प्रगृह्य मायावत्यै न्यवेदयन् समर्पयामासुः। कोऽसावयं बाल इति शङ्कितं चेतो यस्यास्तस्याः। मायावत्या नारदो बालस्य तत्त्वं कामदेवस्वरूपत्वं कृष्णाद्रुक्मिण्यामुत्पत्तिं शम्बराहरणादिकं मत्स्योदरप्रवेशप्रकारं च सर्वमकथयत्। कामोऽयं तव भर्वेति प्रद्युम्नमेव तद्भर्त्रभेदेनाकथयत् सापि स्वपत्यभेदेनैव तमुपासांचक्रे ॥ ६ ॥ सा चेति ॥ सा च यशस्विनी पतिव्रता मायावती वै निश्चयेन कामस्य पत्नी रतिर्नाम प्रसिद्धा। रुद्रक्रोधेन निर्दग्धदेहस्य पत्युर्देहोत्पत्तिं प्रतीक्षती प्रतीक्षमाणा आसीत्। शता नुमभावश्चार्षः। एवं हि मात्स्ये कथा। कामस्य देहे भस्मीभूते सति रतिस्तद्देहप्राप्त्यर्थं शिवमाराधयामास। शम्बरश्च गतो वरान्तराय शिवस्तुष्टः प्रथमं वरं वृणु इति शम्बरं प्रत्याह स्म। स च रतिं दृष्ट्वा कामार्तस्तामेव वव्रे। ततः शिवो रुदतीं रतिं साश्वासमाह। या ह्यस्य सङ्गेन तत्रैव ते वाञ्छितसिद्धिर्भविष्यतीति। ततो रतिर्माययैव शम्बरं मोहयित्वा स्पर्शरहितैव तद्गृहे मायावत्यभिधानात्तस्थौ ॥ ७ ॥ निरूपितेति ॥ सा च शम्बरेण सूपौदनसाधने निरूपिता। तं शिशुं नारदमुखात्कामदेवं बुद्ध्वा तदा तस्मिन्नर्भके स्नेहं चक्रे ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तं मीनं सूदाः पाककारकाः महानसंपाकस्थानं नीत्वा स्वधितिना असिपुत्रिकया। अवद्यन्। अवाद्यन् विदारितवंतः ॥५॥ मायावत्यै रत्यै शंकितचेतसः कोयमतिसुंदरो नूनं मत्पतिरेव स्यादिति शंकयुक्तं चेतो यस्यास्तस्याः बालस्य तत्त्वमुत्पत्तिं च अयं तव पतिः प्रद्युम्नाभेदेन कामः कृष्णाद्वैदर्भ्यामुत्पन्नश्चेति सर्वमकथयत् ॥ ६ ॥ यशस्विनी पातिव्रत्यधर्मयशोयुक्ता ॥ ७–८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ कैवर्त्ता दाशाः, तं महामीनं, शम्बराय, उपायनं, उपाजह्रुः समर्पयामासुः। ततः, सूदास्तत्पाचकाच्छेत्तारो वा, महानसं पाकगृहं प्रति, नीत्वा तं मीनं पाकगृहं प्रापय्येत्यर्थः। स्वधितिना कुठाराख्यशस्त्रविशेषेण, 'द्वयोः कुठारः स्वधितिः' इत्यमरः। अवद्यन् खण्डितवन्तः। तदा, तदुदरे मत्स्यस्य जठरे, अद्भुतं बालं, दृष्ट्वा तं बालं, मायावत्यै मन्मथपत्न्यै रत्यै, न्यवेदयन्। मायावती शम्बरस्य महानसाध्यक्षस्त्रीत्यन्ये ॥ ५ ॥ नारद इति ॥ शङ्कितं चेतो यस्यास्तस्याः, मम भर्त्तेव स्थितोऽयं बालः कः स्यात्, स एव किं वाऽसाविति शङ्कितचित्ताया इत्यर्थः। तस्याः, पुरः नारदः, सर्वं अकथयत्। सर्वं किं तदकथयत्तत्राह। बालस्य, तत्त्वं याथात्म्यं, काम एवायमित्येवंविधं याथार्थ्यमित्यर्थः। उत्पत्तिं श्रीकृष्णतो रुक्मिण्यां रूद्भमुद्भवं, मत्स्योदरनिवेशनं, एतस्य जन्मदिनात् षष्ठेऽह्नि शम्बरकृतमाहरणं, तत् कृतं समुद्रे प्रक्षेपणं, तस्य मत्स्यकृतं गिलनं, मत्स्यस्य कैवर्त्तजालपतनं तस्य शम्बरायोपायनत्वेन प्रदानादिकमित्यर्थः ॥ ६ ॥ सा चेति ॥ सा च मायावत्यपि, यशस्विनी प्रशस्तयशोयुक्ता, कामस्य वै कामस्यैवेत्यर्थः। पत्नी भार्या, रतिः नाम, रतिनाम्ना प्रसिद्धेत्यर्थः। निर्दग्धदेहस्य क्रोधाग्निना शिवेन निर्दग्धशरीरस्य, पत्युः स्वस्वामिनः कामस्य, देहोत्पत्तिं, स्वप्रार्थितशिववचनविश्वासादिति शेषः। प्रतीक्षती, अभूत् ॥ ७ ॥ निरूपितेति ॥ सोक्तविधा रतिः, शम्बरेण सूपौदनसाधने पाकगृहे, निरूपिता सूदैः सह स्थापिता। सूदानामाधिपत्यतयाऽऽस्थापिता सतीत्यर्थः। 'कारयामास' सूदानामाधिपत्यमनिन्दिता' इति विष्णुपुराणोक्तेः। कामदेवं स्वीकृतदेहं स्वपतिं काममित्यर्थः। शिशुं बालं बुद्ध्वा, तदर्भके अर्भकतावति तस्मिन् कामे इत्यर्थः। स्नेहं प्रीतिं चक्रे। तदार्भके इत्यपि पाठः। सदा इत्यपि पाठः। एकत्र तस्मिन् कालेऽन्यत्र सर्वस्मिन् काले इति तदर्थः ॥ ८ ॥

कृष्णप्रिया

पुनः मच्छुओं ने उसे ले जाकर शम्बरासुर को भेंट रूप में दिया। शम्बरासुर के सूद लोग उस अद्भुत मच्छको उड़ाकर पाक घर में ले आये और छुरिका से सावधान होकर काटने लगे ॥ ६ ॥ सूदों ने मत्स्य के उदर में अद्भुत बालक देखकर शम्वरासुर की रसोई दासी मायावती को समर्पित किया। मायावती के मन में बड़ा संशय हुआ। तब देवर्षि नारदजी ने पधारकर बालक का वृत्तान्त बताते हुए कहा कि बालक कामदेव है। श्रीकृष्ण भगवान की पत्नी श्रीरुक्मिणी देवीजी के गर्भ से जन्म लिया है। मत्स्य के उदर से जन्म लिया है और तुम्हारे पतिदेव हैं यह सब वृत्तान्त बताकर श्रीनारजी पधार

गये ॥ ६ ॥ महाराज ! शम्बरासुर के पाकालय की अध्यक्षा मायावती कामदेव की यशस्विनी पत्नी स्वयं रतिदेवी ही थी। भगवान शङ्करजी के तृतीय नेत्राग्नि से जिस दिन कामदेव की काया भस्म बन गयी थी उसी दिन से रति देवी कामदेव पति की प्रतीक्षा करती थी। काम का कभी नाश होता ही नहीं यदि काम का नाश हो जाय तब सृष्टि ही नहीं हो सकती थी। वही यशस्विनी पतिव्रता सती रति, पति की प्रतीक्षा करती शम्बरासुर के पाक गृह नियामिका बनकर रही थी। भगवान शङ्कर के वचन से कामदेव को पुनः देह प्राप्ति की प्रतीक्षा में रही थी ॥ ७ ॥ जब श्रीनारदजी के वचनामृत से जब से ज्ञात हुआ कि यह प्रद्युम्न श्रीकामदेव ही है और श्रीकृष्ण भगवान के पुत्र बनकर पधार गये है तब प्रसन्न चित्त से रतिदेवी पतिभाव से प्रद्युम्नजी में प्रेम कर रही थी ॥ ८ ॥

नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः। जनयामास नारीणां वीक्षन्तीनां च विभ्रमम् ॥ ९ ॥

सा तं पतिं पद्मदलायतेक्षणं प्रलम्बबाहुं नरलोकसुन्दरम्।
सव्रीडहासोत्तभित[1] भ्रुवेक्षती प्रीत्योपतस्थे रतिरङ्ग[2] सौरतैः ॥ १० ॥

तामाह भगवान् कार्ष्णिर्मातस्ते मतिरन्यथा। मातृभावमतिक्रम्य वर्तते कामिनी[3] यथा ॥ ११ ॥

रतिरुवाच

भवान् नारायणसुतः शम्बरेणाहृतो गृहात्। अहं ते दयिता[4] पत्नी रतिः कामो भवान् प्रभो ॥१२॥

कर्दमक्षमा

अन्वयः—न, अतिदीर्घेण, कालेन, रूढयौवनः, सः, कार्ष्णी, वीक्षन्तीनाम्, नारीणाम्, च (रत्यै) विभ्रमम्, जनयामास ॥ ९ ॥ हे अङ्ग ! सा, रतिः, पद्मपलायतेक्षणम्, प्रलम्बबाहुम्, नरलोकसुन्दरम्, प्रीत्या, सव्रीडहासोत्तभितभ्रुवा, ईक्षती, सौरतैः, उपतस्थे ॥ १० ॥ ताम्, भगवान्, कार्ष्णिः, आह, हे मातः ! ते, मतिः, अन्यथा भाति, यतः, हि, मातृभावम्, अतिक्रम्य, यथा, कामिनी, वर्तसे ॥ ११ ॥ रतिः, उवाच, भवान्, नारायणसुतः, प्रभो ! नारायणगृहात्, भवान्, शम्बरेण, हृतः, अहम्, ते, दयिता, पत्नी, रतिः, भवान्, कामः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विभ्रमं सम्मोहम् ॥ ९ ॥ अङ्ग हे राजन्। सौरतैर्भावैरुपतस्थेऽभजत् ॥ १०-११ ॥ अधिकृता पत्नीत्यत्र हेतुः रतिरहं भवान्काम इति ॥ १२-१३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स प्रद्युम्नः। कृष्णस्यापत्यं कार्ष्णिः। रूढं प्रादुर्भूतं यौवनं यस्य स तथा। विभ्रमं मनोधिकारम्, देवाद्यन्यतमोयमिति विशिष्टभ्रमं वा। नातिदीर्घेणेति—पौगंड एवेत्यर्थः। रूढमुद्भिन्नं यौवनं यस्य सः, यतः कार्ष्णिः श्रीकृष्णस्यैव पुत्रः। तस्यापि तथैव तारुण्यादिति भावः। च अपि वीक्ष्यमाणानामपि किम्पुनः संभाषणादि कुर्वतीनामित्यर्थः। विभ्रमं भावविशेषम्। किं वा-विशिष्टं भ्रममुन्मादमित्यर्थः ॥ ९ ॥ सा मायावती। तं प्रद्युम्नम्। सौरतैः सुरतोद्दीपकैरात्मसर्वस्वैः सेवयामास। कानि तत्सर्वस्वानीत्यत आह—सव्रीडेति। पूर्वतो विशिष्टताभिप्रायेण तं पदत्रयेण वर्णयति। तत्र पद्मेति सर्वसौंदर्योपलक्षणम्। प्रलंबेति महाबलिष्ठत्वसूचकम्। इत्युभयथा नरलोके भूलोके, जीवलोके वा सुन्दरमत एव प्रीत्योपतस्थे। कैः-सव्रीड्हासेनोत्तभिता नर्तिता या भ्रूस्तयोपलक्षितैः सौरतैर्भावैः। अत्रेदं तत्त्वम्—अद्य वा श्वो वा सर्वं तत्त्वमस्मै ज्ञापयित्वैव सौरतान्भावान्प्रकाशयिष्यामीति विचारवत्या एव तस्या दैवाद्रहसि विज्ञापनात्पूर्वमेव कामवैवश्यात्ते भावाः स्वयमेवोद्भूता इति ॥ १० ॥ तां मायावतीम्। यतो मातृभावमतिक्रम्य कामिनीव पत्नीव त्वं वर्तसेऽतस्ते मतिरन्यथा मा नेत्यर्थः श्रेयान्। उत्तानार्थस्वीकारे तु भगवानिति पदमनर्थकं स्यात्, त्रिकालज्ञेष्वेव भगवत्प्रयोगदर्शनादिति भावः। भगवान् सर्वज्ञानादिसंपन्नोऽपि तद्विपरीतवदाह ऊचे। यतः कार्ष्णिः कृष्णपुत्रत्वात्तदभिरुचितनरलीला इत्यर्थः। मातरिति मातृत्वबुद्धेः। तथा च हरिवंशे—"धात्र्याः सकाशात्स च तां शृण्वन्रुक्मिणिनंदनः। मायावतीमविज्ञानान्मेने तामेव मातरम् ॥" इति। एवं धात्र्या एव तादृशं मतं न तु तस्या इत्येकांत एव धात्र्या जातबुद्धये तस्मै तत्कथितम्। ततो बाल्याभासं विना पूर्वन्तु मातरिति संबोधनं तेन नाचरितं, ततः संप्रति क्रोधादेवाचरितमिति

---

[1] हासोत्तमविभ्रमेक्षितै-विज.। [2] रात्मनो धनैः-विज.। [3] जीव मे-विज.। [4] धिकृता-श्रीधर. वंशी. जीव. विज. विश्व. शुक. सु.; दयिता-वीर.।

ज्ञेयम् । वास्तवार्थस्तु—अतो भावात्तेऽन्यथा मतिर्मा भवत्विति शेषः । यतस्त्वं मातृभावमतिक्रम्यैव वर्तसे यथा यथावदेव कामिनी मत्कान्तैवेति ॥ ११ ॥ तदेवाह—भवानिति । अधिकृता पूर्वदेहे स्वीकृता वधूत्तमेत्यर्थः । तत्स्फुटयति—रतिरहमिति । नारायणेति तस्य सर्वाश्रयत्वं व्यनक्ति । गृहात् सूतिकाऽऽगारात् । अधिकृता त्वदधिकारतुल्या, इत्यात्मनस्तन्नित्यपत्नीत्वं द्योतितम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नातिदीर्घेणेति । पौगण्ड एवेत्यर्थः । रूढमुद्भिन्नं यौवनं यस्य सः यतः कार्ष्णिः श्रीकृष्णस्य पुत्रः तस्यापि तथैव तारुण्यादिति भावः । च अपि वीक्षमाणानामपि किं पुनः सम्भाषणादिकुर्वतीनामित्यर्थः । विभ्रमं भावविशेषं किं वा विशिष्टभ्रममुन्मादमित्यर्थः ॥ ९ ॥ पूर्वतो विशिष्टताभिप्रायेण तं वर्णयति पदत्रयेण । तत्र पद्मेति सर्वसौन्दर्य्योपलक्षणं प्रलम्बेति महावलिष्ठत्वसूचकमित्युभयथा नरलोके भूर्लोके जीवलोके वा सुन्दरम् अत एव प्रीत्योपतस्थे कैः सव्रीडेन हासेन उत्तम्भिता नर्त्तिता या भ्रूः तयोपलक्षितैः सौरतैः अत्र सव्रीडेत्यनेन हासस्य मन्दत्वमप्युक्तम् ॥ १० ॥ भगवान् । सर्वज्ञानादिसम्पन्नोऽपि तद्विपरीतवदाह ऊचे इत्यर्थः । यतः कार्ष्णिः कृष्णपुत्रत्वात्तद्वदेवाभिरुचितनरलील इत्यर्थः । मातरिति मातृत्वबुद्धेः तथा च हरिवंशे—धात्र्याः सकाशात्स च तां शृण्वन् रुक्मिणिनन्दनः । मायावतीमविज्ञानान्मेने स्वामेव मातरमिति । एवं धात्र्या एव तादृशं मतं नतु तस्या इत्येकान्त एव धात्र्या जातबुद्धये तस्मै तत्कथितं ततो बाल्याभ्यासं विना पूर्वं तु मातरिति सम्बोधनं तेन नाचरितं ततः सम्प्रति क्रोधादेवाचरितमिति ज्ञेयम् । अन्यथा अन्यप्रकारेण वर्त्तते लज्जयादौ तां मतिमनभिव्यज्य पश्चाद्विवृणोति । मात्रिति । वास्तवार्थस्तु अतो भावात्ते तवान्यथा मतिर्मा भवत्विति शेषः । यतः कामिनी मत्कान्तैव त्वं मातृभावमतिक्रम्य यद्वर्तसे तद्यथावदेवेति ॥ ११ ॥ नारायणेति । तस्य सर्वाश्रयत्वं व्यनक्ति गृहात् सूतिकागारात् अधिकृता त्वदधिकारतुल्या इत्यात्मनस्तन्नित्यपत्नीत्वं द्योतितम् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नातिदीर्घेण बाल्य एवेत्यर्थः । रूढमुद्भिन्नं यौवनं यस्य सः, यतः कार्ष्णिः श्रीकृष्णस्य पुत्रः; तस्यापि बाल्य एव तारुण्यात्; च अपि, वीक्षमाणानामपि, किं पुनः सम्भाषणादि कुर्व्वतीनामित्यर्थः । विभ्रमं भावविशेषम्, किंवा विशिष्टभ्रममुन्मादमित्यर्थः ॥ ९ ॥ पतिं पतिभावेनेक्षमाणा, पूर्व्वतो विशिष्टताभिप्रायेण तं विशिनष्टि पदत्रयेण । तत्र पद्मेति सर्व्वसौन्दर्य्योपलक्षणार्थम्; प्रलम्बेति च महाबलिष्ठत्वं सूचितम् । इत्युभयथा नरलोके मर्त्त्ये जीवलोके वा सुन्दरम्; अतएव प्रीत्या हर्षेण प्रेम्णा वोपतस्थे । कैः ? सव्रीडेन हासेन उत्तम्भिता नर्त्तिता या भ्रूस्तया सह सौरतैः, यतो रतिः कामदेवपत्नी परमविदग्धा साक्षाद्रतिरूपा; अन्यतैर्व्याख्यातम् । यद्वा, रतौ कामक्रीडायां रंगो रागो येभ्यस्तैः सौरतैः सुरतानुगुणव्यापारैः ॥ १० ॥ भगवान् परमाभिज्ञ इति, तस्या भावविशेषं लक्षयन्नित्यर्थः । कार्ष्णिरिति तादृशभाववत्यामपि तस्यां कामो न जातं, पितृवत् सद्धर्म्मपरत्वादिति भावः । यद्वा, भगवान् तस्यास्तादृग्भावेऽपि धैर्य्ययुक्तः, यतः कार्ष्णिः, मातरिति स्नेहपालनादिना तस्यामेव तस्य मातृत्वबुद्धेः । तथा च श्रीहरिवंशे (विष्णु० प० १०४।१४)—'धात्र्याः सकाशात् स च तां शृण्वन् रुक्मिणीनन्दनः । मायावतीमविज्ञानान्मेने स्वामिव मातरम् ॥' इति । अन्यथा अन्यप्रकाश दृश्यते, लज्जयादौ तामनभिव्यज्य पश्चाद्विवृणोति—मात्रिति । कामिनी पत्नी, कामेन भजमाना स्त्री वा ॥ ११ ॥ नारायणेति श्रीकृष्णस्य साक्षाद्भगवत्त्वं बोधयति, गृहात् सूतिकागारात्, अधिकृता कामाधिकारप्राप्ता, इत्यात्मनस्तन्नित्यपत्नीत्वं द्योतितम्, अतएव सम्बोधयति—प्रभो हे स्वामिन्निति ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स कार्ष्णिः कृष्णस्यापत्यं प्रद्युम्नः नातिदीर्घेणाल्पेनैव कालेन रूढं प्राप्तं यौवनं यस्य सः विभ्रमं सम्मोहं जनयामास ॥ ९ ॥ सेति । अङ्ग हेराजन् ! सा मायावती तं प्रद्युम्नं रूढयौवनं प्रीत्या सौरतैर्भावैरुपतस्थे अभजत्कथंभूता व्रीडया सहितो यो हास्तेन उत्तम्भिते भ्रुवौ यस्यास्तया दृशेति विशेष्यस्याध्याहारः ईक्षतीक्षमाणा ॥ १० ॥ तथा भगवान् कार्ष्णिस्तां मायावतीमाह उक्तिमेवाह हे मातरिति-तव मतिरन्यथा विपरीता वभूव अन्यथात्वमेव दर्शयति । मातृभावमिति । कामिनी पुंश्चली यथा तद्वत् ॥ ११ ॥ एवमुक्ता प्राह रतिः । भवानिति चतुर्भि; । नारायणस्य श्रीकृष्णस्य सुतः एवं चेत्तद्गृह एव किं न वसामि इत्यत आह । शम्वरेणेति । गृहान्नारायणस्य गृहात्तवाहं दयिता प्रियतमा पत्नी ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

उत्तम्भिता नर्त्तिता या भ्रूस्तया उपलक्षितैः सौरतैर्भावैः अत्रैदं तत्त्वं अद्य वा श्वो वा सर्वं तत्त्वमस्मै ज्ञापयित्वैव सौरतान् प्रभावान् प्रकाशयिष्यामीति विचारितवत्या एव तस्या दैवाद्रहसि विज्ञापनात् पूर्वमेव कामवैवश्यात् ते भावाः स्वयमेवोद्भूता इति ॥ १० ॥ भगवानिति । सार्वज्ञ्यादिगुणयुक्तोऽपि लीलानिधेः कृष्णस्यैवेच्छया सार्वज्ञ्याद्यावरणात्तथोवाचेत्यर्थः । वास्तवार्थस्तु

अतो भावात्तेऽन्यथा मतिर्मा भवत्विति शेषः यतस्त्वं मातृभावमतिक्रम्यैव वर्त्तसे यथा यथावत् कामिनी मत्कान्तैवेति ॥ ११ ॥ अहं पत्नी तं कामदेवमेव मत्वोक्तिस्तेन प्रद्युम्नेनापि स्पर्शमणिन्यायेनैव स्वस्पर्शेन सा स्वकान्ता कृता वस्तुतस्तु अनिरुद्धमातेव तस्य स्वशक्तिरिति श्रीवैष्णवतोषणी ॥ १२–१८ ॥

गूढार्थदीपिनी

रूढं प्रकटितम् । विभ्रमं सम्मोहम् उन्मादं वा ॥ ९ ॥ अङ्ग हे राजन् सा रतिः सौरतैः सुरतसम्बन्धिभावैस्तमुपतस्थेऽभजदित्यन्वयः । कीदृशी । व्रीडासहितहासेन उत्तभिते नर्तिते भ्रुवौ यस्यास्तया दृशा तमीक्षती ॥ १० ॥ कार्ष्णिः कृष्णपुत्रः । अन्यथा विपरीता । यथा पुंश्चली तथा वर्तसे व्यवहरसि ॥ ११ ॥ अधिकृता अधिकारप्राप्ता ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विभ्रमं संमोहम् ॥ १० ॥ अङ्ग हे राजन् ! उपतस्थे अभजत् ॥ ११–१२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

असूर्यं सूर्यत्वेन वदन्तीति बाला मूर्खास्तेषां । न चेद्रविरयमरविन्दाक्षेयती द्युतिः कथमन्यस्येत्यतः कथयति ॥ मणिना ज्वलन्निति ॥ ९ ॥ कृतं कौतुकं मङ्गलं येन तद्गृहं विप्रैः ॥ १० ॥ दिने दिने प्रतिदिनं पञ्चविंशतितुलात्मक एको भारस्तदष्टकमष्टौ भारान्सृजति । यद्वा विंशतितुलात्मक एको भारश्चतुर्भिर्व्रीहिभिर्गुञ्जा गुञ्जान्पञ्च पणं पणान् । अष्टौ धरणमष्टौ च कर्षतश्च चतुरं पलं । तुलापञ्चशते प्राहुर्भारः स्याद्विंशतिस्तुला इत्युक्तः । भारस्तु विविधे स्वर्णपलानामयुतद्वय इति विश्वः । दुःसाध्या भिक्षा येषां ते दुर्भिक्षा विशेषणाभावाद्विशिष्टाभावः । मारीकिण्याद्यरिष्टानि भाव्यशुभसूचकानि सर्वेऽपि व्याधयो रोगाः ॥ ११ ॥ मायिनः कपटिनो यद्राष्ट्रे यस्मिन्देशे मणिरभ्यर्चितस्तस्मिन्देशे एते न सन्ति न प्रादुष्येयुः क्वापि कदाचित् शौरिणा कृष्णेन यदुराजायोग्रसेनार्थं याचितः ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततोऽल्पेनैव कालेन मत्स्योदरसम्बन्धात् भगवत्सम्बन्धाच्च सप्तम एव वर्षे यौवनं प्रादुर्भूतमित्याह **नातिदीर्घेण कालेने**ति । षोडशे वर्षे यौवनप्रादुर्भावः, कस्यचित् द्वादशे, कस्यचिदष्टम एव । अयं नातिदीर्घः कालः । यतः कार्ष्णिः पितुः पुत्रः । रूढं यौवनं यस्य । तदा वीक्षन्तीनां विभ्रमं जनयामास । युवतीनां यदा मनोवृत्तिः, तदा सर्वजनीनं यौवनम् । अन्यथा अलौकिकमेव यौवनं स्यात् । किंबहुना वीक्षन्तीनां देवस्त्रीणामपि जनयामास ॥ ९ ॥ ततः पतित्वात् चिरमभिलषितत्वात् यौवनविलम्बाच्च प्राप्ते यौवने तमुपतस्थे । एतदग्रिमकार्यार्थं निरूप्यते **पद्मदलायतेक्षण**मिति । कामोद्बोधकत्वात् कामत्वाच्च । तस्याः सङ्गाभावेन स्थातुमशक्तिमाह **प्रलम्बबाहु**मिति । उपगूहनसामर्थ्यं सर्वाङ्गसुखत्वाय । **नरलोकसुन्दर**मिति । तादृशे मोह उचित एवेति हेतुरुक्तः स्वभावोद्गिरणार्थम् । प्रथमतो व्रीडा नवसङ्गमं भावयति । ततो जाते रसे हासः । उभाभ्यामुत्तम्भिता या भ्रूः । सङ्गेच्छां पातिव्रत्यं च कटाक्षदर्शनेन सूचयन्ती प्रीत्या उपतस्थे । इदमुपस्थानं न देवताराधनमिव, किन्तु सौरतैः सुरतभावैः, यत इयं रतिः । ततः प्रद्युम्नः क्रियाशक्त्यैवाविर्भूत इति ज्ञानाभावस्तस्य प्रकाश्यते भगवद्वैलक्षण्याय । अन्यथा तुल्यतैव स्यात् । यदि ज्ञानशक्तिरपि भवेत् ॥ १० ॥ **तामाहे**ति । भगवान् धर्मपरः, यतः कार्ष्णिः । मर्यादार्थमवतीर्णः । सदानन्दाङ्कुरोऽपि सदानन्द एवेति अपेक्षाभावाद्वा तथोक्तवान् । **मात**रिति सम्बोधनात् अज्ञानम् । व्यवहारे तथात्वात् । अनेन कामस्य धर्मविरोधित्वं सहजं निरूपितम् । अन्यथा मातृपदमुच्चार्य पश्चात्तस्यां सङ्गं न कुर्यात् । लौकिकी भाषेयमिति न पारमार्थिको विरोधः । माता हि मानं पालयति स्वस्य अन्यस्य च । न हि विवृतेष्वङ्गेषु मानं तिष्ठति । अतः सर्वप्राणिनामेव माता संरक्ष्या । अतो मातृभावं परित्यज्य गुप्तं कामं दूरीकृत्य यथा कामिनी प्रकटकामा तद्वद्वर्तस इति ॥ ११ ॥ तदा तिरोहितज्ञानमेनं मत्वा अज्ञानादुक्तमनुक्तमिति बोधयति **भवान्नारायणसुत** इति । स हि शम्बरं पितरं तां च मातरं मन्यते । तन्निषेधार्थमाह **नारायणसुत** इति । एकनिषेधेनैव इतरस्य सिद्धत्वात् । स्वरूपं चाग्रे वक्तव्यमिति निरूपयति । नारायणपुत्रः कथमत्रागत इत्यत्रोपपत्तिमाह **गृहाच्छम्बरेण हृत** इति । साधारण्यपि धात्री मातृवदेव परिपाल्येति चेत्, तत्राह **अहं ते दयिता पत्नी**ति । दयितात्वाल्लोकतस्त्यागं नार्हति । पत्नीत्वान्न वेदतः । तथापि लोके प्रसिद्ध्यभावात् कथमेवमिति चेत्, तत्राह **रति**रिति । भवांश्च काम इति ॥ १२ ॥

श्रीसुबोधिनी–सारः

नातिदीर्घेणाल्पेन कालेन प्राप्तयौवनः सः कार्ष्णिः कृष्णपुत्रः वीक्षंतीनां पश्यंतीनां नारीणां विभ्रमं संमोहं जनयामास ॥ ९ ॥ पद्मस्य दलवत् पत्रवदायते विशाले ईक्षणे नेत्रे यस्य तं प्रलंबौ बाहू यस्य तं नरलोके सुंदरं तं पतिं सव्रीडेन सलज्जेन हासेन उत्तभितोज्जृभिता या भ्रूस्तया ईक्षती प्रेक्षमाणा सती रतिः सौरतैर्भावैः कामकेलिभिः प्रीत्योपतस्थे सिषेवे हे अंग ॥ १० ॥

भगवान् कार्ष्णिः प्रद्युम्नः तां स्त्रीमाह हे मातः "यौ पोषकौ तौ पितरौ प्रदिष्टौ" इत्युक्तेः । ते तव मतिर्बुद्धिरन्यथा विपरीतास्ति । कथमित्यत आह । मातुर्भावमतिक्रम्योल्लंघ्य कामिनी भार्या यथा वर्त्तते तथा त्वं वर्त्तसे यद्वाऽतस्ते मतिरन्यथा इति योजना ।११। रति वाक्यम् । नारायणस्य श्रीकृष्णस्य सुतः पुत्रो भवान् सूतिगृहाच्छंबरेणाऽऽहृतः आनीतः । हे प्रभो अहं ते तवाऽधिकृता पत्नी रतिरस्मि भवान् कामदेवोस्ति ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नातिदीर्घेण अल्पेनैव कालेन रूढं प्राप्तं यौवनं यस्य सः कार्ष्णिः कृष्णस्यापत्यं प्रद्युम्नः स्वसौन्दर्यादिगुणैः पश्यन्तीनां नारीणां विभ्रमं सम्मोहं जनयामास ॥ ९ ॥ 'परमविवेकित्वेन अस्मदादितुल्यत्वात्तव चित्तविकाराशङ्काभावादेतद्रहस्यं कथयामि' इति सूचयन् सम्बोधयति—अङ्गेति । पद्मदलवदायते ईक्षणे यस्य तम्, प्रलम्बौ बाहू यस्य तम्, नरलोकेषु सुन्दरं तं रूढयौवनं पतिं प्रद्युम्नं व्रीडया सहितो यो हासस्तेन उत्तम्भिते भ्रुवौ यस्याः तया दृशा ईक्षती ईक्षमाणा सा मायावत्याख्या रतिः प्रीत्या सौरतैर्भावैरुपतस्थे अभजत् ॥ १० ॥ तदा च भगवान्, कार्ष्णिः प्रद्युम्नस्तां मायावतीमाह । तदुक्तिमाह—हे मातः ! तव मतिरन्यथा विपरीता दृश्यते । वैपरीत्यमेव दर्शयति—मातृभावमतिक्रम्य परित्यज्य कामिनी पुंश्चली यथा तथा वर्तसे इति ॥११॥ एवमुक्ता रतिराह–भवान्नारायणस्य कृष्णस्य सुतः शम्बराख्येनासुरेण तद्गृहादाहृतः, हे प्रभो ! अहं च ते तवाधिकृता अधिकारप्राप्ता पत्नी । तत्र हेतुमाह—रतिर्नाम्न्यहम्, भवान् कामश्चेति ॥ १२ ॥

अन्वितार्थप्रकाशिका

नेति ॥ नातिदीर्घेण अल्पेनैव कालेन पौगण्ड एवेत्यर्थः । रूढं प्राप्तं यौवनं यस्य सः कार्ष्णिः कृष्णस्यापत्यं प्रद्युम्नः स्वसौन्दर्यादिगुणैः पश्यन्तीनां नारीणां विभ्रमं संमोहं जनयामास ॥ ९ ॥ सेति ॥ अङ्ग हे राजन् ! पद्मदलवदायते ईक्षणे यस्य तं प्रलम्बौ बाहू यस्य तं नरलोकेषु सुन्दरं तं रूढयौवनं पतिं प्रद्युम्नं व्रीडया सहितो यो हासस्तेन उत्तभिते भ्रुवौ यस्याः तया दृशा ईक्षती ईक्षमाणा । प्राग्वदार्थः । सा मायावत्याख्या रतिः प्रोत्या सौरतैर्भावैरुपतस्थे अभजत् ॥ १० ॥ तामिति । भगवान् सर्वज्ञोऽपि कार्ष्णिः प्रद्युम्नस्तां मायावतीमाह स्म । हे मातःतव मतिरन्यथा विपरीता दृश्यते । मातृभावमतिक्रम्य परित्यज्य कामिनी पुंश्चली यथा तथा वर्तसे । इदं वचश्च लीलानिधेः कृष्णस्येच्छया प्रद्युम्नस्य सर्वज्ञत्वावरणात् । वस्तुतः अतः भावात्ते मतिरन्यथा मा भवतु । यतस्त्वं यथा यथावत् कामिन्येव अतः मातृभावमतिक्रम्यैव वर्तसे ॥ ११ ॥ भवानिति । भवान्नारायणस्य कृष्णस्य सुतः शम्बराख्येनासुरेण तद्गृहादाहृतः । हे प्रभो ! अहं च ते तवाधिकृताधिकारप्राप्ता पत्नी रतिर्नाम भवान्कामश्च । अहं पत्नीति तं कामदेवं मत्वोक्तिः । प्रद्युम्नेनापि स्पर्शमणिन्यानैव स्वस्पर्शेन सा स्वकान्ता कृता । वस्तुतोऽनिरुद्धमाता तस्य शक्तिरिति तोषिणी ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कार्ष्णिः कृष्णपुत्रः । विभ्रमं मोहं ॥ ९ ॥ सव्रीडहासेन उत्तभिता उन्नतायाः भ्रूस्तया । अंग हे राजन् । सौरतैः । कामाविर्भावचेष्टाभिः उपतस्थे सिषेवे ॥ १० ॥ अतिक्रम्योल्लंघ्य ॥ ११ ॥ अधिकृता त्वदधिकारतुल्यायतो रतिरहं भवान् काम इति ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नातीति । कार्ष्णिः कृष्णस्यापत्यं स प्रद्युम्नः, नातिदीर्घेण कालेन, रूढं प्राप्तं यौवनं यस्य तथाभूतः सन्, वीक्षन्तीनां स्वं निरीक्षमाणानां, नारीणां, विभ्रमं च संमोहमपि, जनयामास ॥ ९ ॥ सेति । अङ्ग हे राजन्, सा रतिर्मायावती, पद्मदले इवायते दीर्घे ईक्षणे नयने यस्य तं, प्रलम्बावाजानुलम्बिनौ बाहू यस्य तं, नरलोकेषु सुन्दरस्तं, पतिं स्वासाधारणस्वामिनं, तं प्रद्युम्नं, व्रीडया सहितो यो हासस्तेनोत्तभिते भ्रुवौ यस्यास्तया, दृशेति विशेष्यस्याध्याहारः । प्रीत्या, ईक्षतीक्षमाणा सती, सौरतैः सुरतसंबन्धिभिर्भावैः, उपतस्थेऽभजत् ॥ १० ॥ तामिति । भगवान् कार्ष्णिः कृष्णसूनुः, तां मायावतीं, आह । हे मातः, ते तव मतिः अन्यथा विपरीता, कथं बभूवेति शेषः । अन्यथात्वमेव दर्शयति । मातृभावं मातुः स्वभावं, अतिक्रम्य कामिनी यथा तथा, वर्त्तसे । पत्नीं प्रति मातरिति संबुद्धयोच्चारणं लोकेऽशोभनमिति केचिदेवं व्याख्यां कुर्वन्ति । त्वं सौरतैः, उपस्थिताऽसि । अतः ते तव, मतिः अन्यथा मा भवतु । इति, भगवान् तां मायावतीं, आह । ननु किं मन्मतेरन्यथात्वं तत्राह । त्वं मम पोषिकाहं तव पोष्य इत्येवंरूपं मातृभावं, अतिक्रम्योल्लङ्घ्य, कामिनी पुंश्चली, यथा तद्वत्, वर्त्तसे । इदं त्वन्मतेरन्यथात्वमिति सम्बन्धः ॥ ११ ॥ एवमुक्ता रतिः प्राह भवानिति चतुर्भिः । भवानिति । भवान् नारायणसुतः श्रीकृष्णपुत्रः, एवं चेद्गृह एव किं न वसामीत्यत आह । गृहात्तद्भवनात्, शम्बरेण, आहृतः । हे प्रभो, अहं ते तव, दयितातिप्रिया, पत्नी, भवामि । भवान् कामः, भवति ॥ १२ ॥

कृष्णप्रिया

श्रीकृष्ण भगवान के कुमार श्री प्रद्युम्न जी अल्प दिनों में ही युवावस्था में आ पहुँचे और श्री प्रद्युम्न जी का रूप-लावण्य-सौन्दर्य भगवान श्रीकृष्ण के सदृश होने से जो ललनाएँ इनकी नजर करती उतने में उनके हृदय में श्रृङ्गार-रस का प्रादुर्भाव हो जाता था ॥ ९ ॥ श्री प्रद्युम्न जी के रूप-लावण्य के लिये क्या कहा जाय ! पद्मदल के सदृश कोमल विशाल एवं रसाल नेत्र थे, घूटनों पर्यन्त लम्बी-लम्बी भुजाएँ और नरलोक सुन्दर श्री विग्रह-अङ्ग था। सौन्दर्यमयी रति देवी, लज्जा-मधुर हास्य भरी नजरों से प्रद्युम्न कुमार की ओर देखती थी एवं रससभर दाम्पत्य भाव को अभिव्यक्त करती सेवा शुश्रूषा कर रही थी। तब श्री वासुदेव नन्दन भगवान श्रीप्रद्युम्न कुमार जी ने श्रीरति के भावों में परिवर्तन देखकर कहा कि हे दवी आप तो मेरी मां के समान हो और आपका भाव व्यवहार मति आदि मुझे उलटे मालूम लगते हैं। आपकी मति में यह परिवर्तन कैसे आया ! मैं दिन-प्रतिदिन देख रहा हूँ कि आप मातृ-वात्सल्य को छोड़कर पत्नी के समान श्रृङ्गार भय हाव-भाव दिखा रही हो। स्पष्ट कीजिये क्या है ॥ ११ ॥ श्रीरति देवी ने पति देव को निवेदन किया कि ! हे नाथ ! आप साक्षात् श्रीनारायण स्वरूप भगवान श्रीकृष्ण के सुकुमार सुपूत हो। यह शम्बरासुर आपको श्रीरुक्मिणीजी के सूतिका घर से चुरा लाया और आपको सागर में पटक दिये थे। आप स्वयं साक्षात् कामदेव हो और मैं आपकी नित्य को धर्माङ्गिनी पत्नी रति हूँ ॥ १२ ॥

एष त्वानिर्दशं सिन्धावक्षिपच्छम्बरोऽसुरः। मत्स्योऽग्रसीत्तदुदरादिह प्राप्तो भवान् प्रभो ॥ १३ ॥
तमिमं जहि दुर्धर्षं दुर्जयं शत्रुमात्मनः। मायाशतविदं त्वं च मायाभिर्मोहनादिभिः ॥ १४ ॥
परिशोचति ते माता कुररीव[1] गतप्रजा। पुत्रस्नेहाकुला दीना विवत्सा गौरिवातुरा ॥ १५ ॥
प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने। मायवती महामायां सर्वमायाविनाशिनीम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—हे प्रभो ! अनिर्दशम्, त्वा, एषः, शम्बरः, असुरः, सिन्धौ, अक्षिपत्, (ततः त्वाम्) मत्स्यः, अग्रसीत्, हे प्रभो ! तद्, उदरात्, भवान्, इह, प्राप्तः ॥ १३ ॥ मायाशतविदम्, दुर्मर्षम्, दुर्जयम्, तम्, इमम्, आत्मनः, शत्रुम्, त्वम्, मोहनादिभिः, मायाभिः, जय, च, जहि ॥ १४ ॥ गतप्रजा, पुत्रस्नेहाकुला, दीना, विवत्सा, गौः, इव, आतुरा, ते, माता, कुररी, इव, परिशोचति ॥ १५ ॥ एवम्, प्रभाष्य, मायावती, महात्मने, प्रद्युम्नाय, सर्वमायाविनाशिनीम्, महामायाम्, विधाम्, ददौ ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दुर्जयत्वे हेतुः मायाशतविदमिति। कथं तर्हि हंतव्यस्तत्राह—मायाभिरिति ॥ १४ ॥ नचात्र विलम्बः कार्य इत्याह—परिशोचति रोदितीत्यर्थः ॥ १५–१८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एष यद्गृहेऽहमधुना तिष्ठामीत्येषपदार्थः। तदुदरान्मत्स्योदरात्। कथं हृत इत्यपेक्षायां तं प्रकारं कथयन्ती कोपं जनयति–एष इति ॥ १३ ॥ तं शंबरम्। इमं साक्षादत्रैव वर्तमानम्। दुर्धर्षं कृच्छ्रेणैव व्यप्रयितुं शक्यम्, अतः सुतरां दुर्जयम्। हननञ्च योग्यमेव शत्रुत्वादित्याह–आत्मनः स्वस्य शत्रुं क्लेष्टारम्। आदिना शोषणादय आग्नेयादयो वा ॥ १४ ॥ 'उत्क्रोश-कुररौ समौ' इत्यमरः। इत्यर्थ इति–पर्युपसर्गवशाच्छोचते रोदनार्थत्वं परस्मैपदित्वं चेति भावः। पुत्रस्नेहोत्थो मातुः प्रसिद्धो यश्चित्तद्रवविशेषस्तेनाकुला—किं कर्तव्यं कथं मे पुत्रदर्शनं स्यादित्येवं मूढा, अत एवातुरा व्याधितैव शोकरोगग्रस्ता तत एव दीना परिक्षीणा तत एव परितः सर्वत्रैव शोचति सरोदनं विलपतीत्यर्थः। तत्र हताशत्वांशे दृष्टान्तः–गतप्रजा कुररीवेति, कुररी पक्षिविशेषभार्या। धृताशत्वांशे गौरिवेति। पूर्वा हि स्वबालकनाशे पूर्ववत्तदाहारं नाहरति किन्तु रोदित्येव, उत्तरा तु मृतमपि स्तनं पाययितुमुद्यच्छतीति ॥ १५ ॥ एवमुक्तविधया। महामायामतिप्रबलां विद्याम्, तदर्थमेव तत्पार्श्वे रुद्रेण न्यस्ता, न तु ततो विद्यास्वीकारेण तत्र गुरुत्वं संभावनीयं निजन्यासाऽऽदानेपि तत्स्वीकारेऽतिप्रसंगात्। प्रकर्षेण सोत्साहोत्तेजनादिना भाषित्वा। तस्यास्तद्दित्सायां हेतुः—महात्मने, अल्पवयस्त्वेपि प्रकाशितबलबुद्धित्वेन तद्योग्यायेत्यर्थः। यद्वा—गंभीराय प्रकाशितनिज-प्रभावाय। विनाशिनीमिति णिन्यंतः पाठः, क्वचिल्ल्युडंतोपि ॥ १६ ॥

---

१. कुरङ्गीव मृत–विज।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कथं हृत इत्यपेक्षायां तत्प्रकारं कथयन्ती कोपं जनयति। एष इति ॥ १३ ॥ इमं साक्षादत्रैव वर्त्तमानं दुर्धर्षं कृच्छ्रेणैव व्यग्रयितुं शक्यम् अतः सुतरां दुर्जयं हननं च योग्यमेवेत्याह। आत्मनः शत्रुमिति। आदिशब्दाच्छोषणादयः आग्नेयादयो वा ॥ १४ ॥ पुत्रस्नेहाख्यो मातुः प्रसिद्धो यश्चित्तद्रवविशेषस्तेनाकुला किं कर्त्तव्यमिति मूढा तत एवातुरा व्याधितेव तत एव दीना अति दुःखिता तत एव परित सर्वत्रैव शोचति सरोदनं विलपतीत्यर्थः। तत्र हताशत्वांशे दृष्टान्तः गजप्रजा कुररीवेति धृताशत्वांशे गौरिवेति पूर्वा हि स्वबालकनाशे पूर्ववत्तदाहारं नाहरति किन्तु रोदित्येव उत्तरा तु मृतं गतमपि स्तनं पाययितुमुद्यच्छतीति॥१५॥ प्रकर्षेणोत्साहोत्तेजनादिना भाषित्वा तस्यास्तद्दित्सायां हेतुः महात्मने अल्पवयस्त्वेऽपि प्रकाशितवलवुद्धित्वेन तद्योग्यायेत्यर्थः यद्वा गम्भीराय अप्रकाशितनिजप्रभावायेत्यर्थः। विनाशिनीमिति णिन्यन्तः पाठः क्वचिल्युडन्तोऽपि ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कथं हृत इत्यपेक्षायां तत्प्रकारं कथयन्ती कोपं जनयति—एष इति। ननु कुतोऽक्षिपत्? तत्राह—असुरः स्वभावतो देवशत्रुत्वादित्यर्थः। तत्र च शम्बरो महामायित्वेन दैत्येषु श्रेष्ठः, किंवा कामशत्रुतया प्रसिद्ध इत्यर्थः। इह महानसे अन्तःपुरे वा; ‘प्रभो’ इति पुनरपि सम्बोधनं स्वामित्व-दार्ढ्यार्थम्, किंवा प्रार्थ्यशम्वरवधसामर्थ्यमुद्भावयति ॥ १३ ॥ इमं साक्षादत्रैव वर्त्तमानं दुर्द्धर्षमभिभवितुमशक्यम्, यतो दुर्ज्जयम्; हननञ्च योग्यमेवेत्याह—आत्मनः शत्रुमिति। आदि-शब्दात् शोषणादय आग्नेयादयो वा ॥ १४ ॥ गता नष्टा त्रपा लोकलज्जा यस्याः सा, पाठान्तरेऽपगतपुत्रा। ननु तादृशे भर्त्तरि विराजमाने तादृशशोचनमयुक्तम्, तत्राह—पुत्रेति। अतएव दीना त्यक्तभोगसुखा, आतुरा च विचारादिरहिता। तत्र दृष्टान्तः—नष्टवत्सा सौरिवेति, कुररीवेति च परिशोचने। अन्यत्तैर्व्याख्यातम्। यद्वा, परितः सदा सर्व्वत्र महार्त्त्या करुणस्वरेण शोचति विलपति, न केवलं परिशोचति परमदुरवस्थाञ्च प्राप्तेत्याह—पुत्रेति। आतुरा रोदनपरवशाभूदित्येवं वाक्यद्वये दृष्टान्तद्वयम्, इत्यत्यन्तमुत्तेजितः ॥ १५ ॥ एवमीदृशं प्रकर्षेण सभावोत्तेजनादिना भाषित्वा, महात्मने महाबुद्धय इति तद्विद्यायोग्यतोक्ता। मायावतीति शम्वरतोऽप्यधिकमायावित्वाभिप्रायेण, अतएव महामायाख्यामतएव सर्व्वासां शम्बरादिज्ञातानां मायानां विनाशनशीलामिति। पाठान्तरेऽपि स एवार्थः। यद्वा, महात्मनेऽपरिच्छिन्नशक्तये, माया मोहस्तद्वती, सर्व्वविद्यावतेऽपि केवलं प्रेममोहेन ददावित्यर्थः। अन्यत् समानम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एषः। शम्वरोऽसुरोऽनतीतदशाहमेव त्वां समुद्रे पातयामास हे प्रभो! समर्थ ॥ १३ ॥ तमात्मनः शत्रुं शम्वरं जहि दुर्जयत्वे हेतुः मायाशतविदमिति। कथं तर्हि हन्तव्यस्तत्राह। मायाभिरिति। मोहनमादिर्यासां ताभिर्मायाभिर्मयोपदेक्ष्यमाणाभिरिति शेषः ॥ १४ ॥ न चात्र विलम्बः कार्य्य इत्याह। परिशोचतीति। तव माता रुक्मिणी हता विनष्टा अदृष्टेति यावत् प्रजा पुत्रो यस्या सा कुरङ्गीव हरिणीव शोचति किंच पुत्रस्नेहेनातुरा विवत्सा विनष्टवत्सा अत एवातुरा गौर्यथा तद्वत् ॥ १५ ॥ प्रभाष्येति सर्वाः शत्रोः सम्बधिनीर्मायाः विनाशयतीति तथा तां मायां मोहनादिमायात्मिकां विद्यां ददौ ॥ १६ ॥

गूढार्थदीपिनी

त्वा त्वाम् अनिर्दशम् अनतीतदशदिनमेव ॥ १३ ॥ दूर्धर्षं दूरतिक्रमणीयम्। अत एव भायाभिः ॥ १४ ॥ कुररी पक्षिणीव। परीत्युपसर्गवशात् शोचते रोदनार्थं परस्मैपदित्वं च लक्ष्यते ॥ १५ ॥ मायां मन्त्रात्मिकां विद्याम् ॥ १६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अर्थकामुको निरन्तरं तदतिसृज्य सुवर्णकामुकः प्राग्या कर्तव्यत्वेनातर्कयदिदमेव कर्तव्यमित्यूहितवाननन्तरं नैव प्रादात्प्रतिमुच्याबाध्य ॥ १३ ॥ प्रसेनो नाम्ना तद्भ्राता व्यचरच्चचार मृगयां गतमाच्छिद्यापहृत्य केसरी सिंहः ॥ १४ ॥ बिलं स्वावासं सोऽपि जाम्बवानपि क्रीडनं क्रीडासाधनम् ॥ १५ ॥ पर्यतप्यत सन्तप्तोऽभूत्। ततश्चैवमूहितवानित्याह ॥ प्राय इति॥१६॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

कामस्य कथमत्र शत्रुगृहे स्थितिरिति, तत्राह एष त्वेति। एष त्वामिति। असुरत्वात्तथाकरणम्। मत्स्यो हि स्वज्ञातिघाती। तदुदरादिह प्राप्त इत्यनेन सोऽपि हतो निरूपितः ॥ १३ ॥ शम्बरः परमवशिष्यते, अतस्तं जहीत्याह तमिममिति। सावधानत्वाय तस्य गुणानाह **दुर्धर्षं दुर्जयं शत्रुं मायाशतविद**मिति। दुर्धर्षत्वात् न लौकिककोपायेन मारयितुं शक्यः। अनेन विषदानादिप्रकारा अपि व्यावर्तिताः। दुर्जयत्वात् क्षत्रियधर्मेणापि मारयितुमशक्यः। शत्रुत्वान्नोपेक्षणीयः। **आत्मन** इति।

घातादेव निवर्तते, नान्यथेति सूचितम्। तर्हि **अलौकिकयुद्धेन** मारणीय इति पक्षं निवारयति **मायाशतविद**मिति। तर्ह्यवध्यः कथं मारणीय इति चेत्, तत्रोपायमाह। **त्वं च मायाभिर्मोहनादिभिः** सहितः **इमं जहि**। आदौ मोहय, ततस्तन्मायाः प्रतियोगिमायाभिर्दूरीकुरु। असुराणां हि माया भगवानिति, 'तस्मादेवं वित् सर्वैरेव प्रकारैः उपासीते'ति उपासनायास्तुल्यत्वात्। अनेकधोपासकस्य विशिष्टत्वाच्च मोहनादिभिर्मायाभिस्तन्मायादूरीकरणं युक्तमेव ॥ १४ ॥ ननु यथा ममाज्ञानम्, एवं तस्यापीति ज्ञाने सत्येव अपकारित्वात्, न मारणीय इति चेत्, तत्राह परिशोचतीति माता हि दयापात्रम्, अतस्तद्दुःखदूरीकरणार्थं मारणीय एवेति भावः। **ते माते**ति सम्भावनया वदति। तस्या **रुक्मिणीत्वं** वा **वैदर्भीत्वं** वा न शोकनिवारकमिति तन्नोक्तम्। **कुररी** विवेकरहिता, सा रात्रौ शोचति। अनेन निद्राभावोऽपि **सूचितः**। गतप्रजेति शोकहेतुः। गता केनचिदपहृता प्रजा यस्याः। नष्टायां पुनरावृत्तिशङ्काभावात्तथा न शोकः। सापि प्रजा पुत्ररूपेति नान्तःशोकमात्रं जनयति, किन्तु सर्वदेहेन्द्रियाणां सर्वक्रियाराहित्यमपि करोतीत्याह पुत्रस्नेहाकुलेति। पुत्रस्नेहोऽत्यन्तं व्याकुलतां सम्पादयतीति लोकप्रसिद्धिः। किञ्च। पितृभ्रात्रादिभिः विरोधात् परित्यक्ता। एवं बन्धुविरोधेन मातृपक्षसहायाभावात् दीना पुत्रेणैव समाहिता भवति। अतस्तदर्थमपि गन्तव्यमित्यर्थः। किञ्च। विवाहप्रभृतिमनःपरितोषाभावात् जाते पुत्रे पित्रादयः मानयेरन्। तस्मिन्नपि गते चिन्तया आतुरा अपि भविष्यतीत्याह **आतुरे**ति। आतुरो ज्वरी। विवेकेन सर्वसमाधानं भविष्यतीति चेत्। तत्र दृष्टान्तमाह **गौरिवे**ति। वत्साभावे यथा गौः। तस्या हि न क्वापि ममता, सर्वा ममता वत्स एव भवति। अन्येषां तु विभक्ता ममता भवति। अतो गौर्दृष्टान्तीक्रियते सर्वत्र। इयं च सर्वतो ममतामाकृष्य त्वय्येव स्थापितवतीति गोतुल्या भवति। एवं निरूपणमात्रेण कार्यं न सिध्यतीति। एवं प्रभाष्य विद्यामपि ददौ। स्त्रीदत्ताया विद्यायाः तदैव सिद्धिः। प्रद्युम्नो हि विद्याग्रहणयोग्यः, नाम्नैव प्रसिद्धत्वात्। महात्मन इति विद्या फलिष्यतीति सूचितम्। सा विद्या स्वस्मिन्नागता मायैवेति ज्ञापयितुं मायावतीत्युक्तम्। दैत्यादीनामिव माया साधारणी भविष्यतीति तद्व्यावृत्त्यर्थमाह महामायामिति। इयं हि सर्वानेव भगवदंशान् व्यामोहयितुं प्रवृत्ता महामाया। ननु दैत्यानां भगवानेव माया भवतीति कथमस्या महामायात्वम्, तत्राह **सर्वमायाविनाशिनी**मिति। तत्र हि स्वल्पाभिव्यक्तिः स्वधेत्यादाविव, परव्यामोहार्थं तद्रूपो भूत्वा पालयति। न तु तेषां मोक्षं प्रयच्छति। अतो बाधकेषु जीवचैतन्यमिव तदपि तिरोभूतमिति सर्वमायाविनाशित्वम् ॥ १६ ॥

श्रीसुबोधिनी–सारः

अनिर्दशं त्वा त्वाम् शंबरोऽसुरः सिंधौ समुद्रेऽक्षिपत् मत्स्यस्त्वामग्रसीत् तस्योदरादिहात्र भवान् प्राप्तः हे प्रभो ॥ १३ ॥ दुर्जयं दुर्धर्षमसह्यं मायाशतज्ञातारं तम् इमं शंबरमात्मनस्तव शत्रुं त्वं जहि मारय मोहनादिभिर्मायाभिः ॥ १४ ॥ गता प्रजा यस्याः सा ते तव माता रुक्मिणी कुररीव शोचति पुत्रस्य स्नेहेनाकुला व्याप्ता दीना विवत्सा वत्सहीना गौरिवातुरा दुःखिता ॥ १५ ॥ एवं प्रभाष्य संबोध्य मायावती महात्मने प्रद्युम्नाय सर्वमायानां विनाशिनीं महामायां विद्यां ददौ ॥ १६ ॥

विवरणटिप्पणी

परिशोचतीत्यस्यभासे। **एवं तस्यापि**। इति हेतोर्न मारणीय इति संबन्धः। तत्र हेतुः **ज्ञाने** सत्येवापकारित्वादिति। व्याख्याने। **तस्या** इति। मातुः रुक्मिणीत्वे उक्ते रुक्मसंबन्धेन सर्वसंपत्तियुक्तत्वात्तथाशोको न संभाव्येत। वैदर्भीत्वे वा उक्ते भक्तिप्रधानत्वाच्छोको न संभाव्येत। अतो मातेत्येव सामान्यत उक्तम्, न तु विशेषः कश्चनोक्त इत्यर्थः। प्रभाष्यैवमित्यत्र। **स्त्रीदत्ताया** इति। **स्त्री** हि सुहृत्तमा आत्मनोऽर्धं **च भवति**। अतस्तद्दत्ताया विद्याया दानसमये एव सिद्धिर्भवतीत्यर्थः। अतः स्त्रिया कथितं शीघ्रमेव हृदयारूढं भवतीति लोकेऽपि **प्रसिद्धिः**। अनेकधोपासकस्य विशिष्टत्वमनुपदमुक्तम्। तादृशोपासनासिद्धेयं मायेत्याशयेनाहुः **इयं ही**ति। **भगवदंशान्**। मायारूपस्य भगवतः अंशानित्यर्थः। **स्वधेत्यादाविवे**ति। यथा स्वधाकारेण कव्ये दत्ते भगवान् पितृरूपो भूत्वा तं पुत्रं पालयति, न तु भगवान् प्रकट इति तावता तेषां पुत्राणां मोक्षं प्रयच्छति, संघातात्मबुद्धिं वा नाशयति। तथा फट्जहीत्यादिशब्दैरुपासने कृते अन्यव्यामोहार्थं मायारूपो भूत्वा भक्तं पालयति, न तु मायान्तरं नाशयति, तावत्कार्यार्थमेव प्राकट्यादित्यर्थ। **अत** इति। यथा **बाधकेषु दैत्येषु** विद्यमानमपि जीवनिष्ठं भगवदंशत्वरूपं चैतन्यं तिरोभूतं जीवनातिरिक्तकर्मज्ञानादिकार्यासंपादकम्, अतो जीवत्वस्य तुल्यत्वेऽपि तेषामधर्मे एव रुचिः। दैवेषु तु भगवदंशत्वस्य प्रकटत्वात्सर्वकार्यसिद्धिः। तथा शम्बरमायायां विद्यमानमपि भगवत्त्वं तिरोभूतं पालनातिरिक्तमायान्तरविनाशादिकार्यासंपादकम्, अतो मायात्वस्य तुल्यत्वेपि पालनमात्रमेव संपादयति। प्रद्युम्नमायायां तु भगवत्त्वस्य प्रकटत्वात्सर्वकार्यसिद्धिः। अतोऽस्य जयः। प्रद्युम्ने तथा प्राकट्ये हेतुस्त्वनेकधोपासकत्वं पूर्वमुक्तम्। शम्बरमायायाः पालनमात्रकर्तृत्वेपि प्रद्युम्नमायया तस्या एव नाशान्न पालनमपि संपन्नमिति भावः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तर्हि इह कथं प्राप्त' इत्यपेक्षायामाह—एष इति। एष शम्बराख्योऽसुरः अनिर्दशं अनतीतदशदिनमेव त्वामाहृत्य समुद्रे अक्षिपत् प्रक्षिप्तवान्। तत्र च त्वां मत्स्योऽग्रसीत्। स मत्स्यो मत्स्यजोविभिरत्रानीतः, तस्योदरात् भवानिह प्राप्तः।

'हे प्रभो' इति संबोधनेन तस्य तद्धनने सामर्थ्यं सूचयति ॥ १३ ॥ मोहनादिभिर्मायाभिर्मोहयित्वा तमिममात्मशत्रुं शम्बरं त्वं जहीत्यन्वयः। 'तदुपेक्षा च न युक्ता' इत्याशयेनाह—दुर्धर्षमिति। अभिभवितुमशक्यमित्यर्थः। तत्र हेतुमाह—दुर्जयमिति। तत्रापि हेतुमाह—मायाशतविदमिति ॥ १४ ॥ 'न चात्र विलम्बः कार्य' इत्याशयेनाह—परिशोचतीति। ते तव माता परिशोचति रोदिति। तत्र हेतुमाह—दीनेति। तत्र हेतुमाह—पुत्रस्नेहेनाकुलेति। तत्रापि हेतुमाह—गतेति। गता हृता प्रजा पुत्रो यस्याः सा ॥ स्वरपूर्वकरोदने दृष्टान्तमाह—कुररी पक्षिणी इवेति। पुत्रवियोगेन व्याकुलतायां दृष्टान्तमाह—विवत्सेति। विवत्सा आतुरा गौर्यथेति तद्वदिति ॥ १५ ॥ मायावती एवं प्रभाष्य महात्मने महाप्रभाववतेऽपि प्रद्युम्नाय विद्यां ददावित्यन्वयः। 'कासौ विद्या' इत्यपेक्षायामाह—सर्वाः शत्रोर्माया विनाशयतीति तथा तां मायामिति ॥ १६ ॥

अन्वितार्थप्रकाशिका

एष इति ॥ हे प्रभो ! एष शम्बराख्योऽसुरः अनिर्दशम् अनतीतदशदिनमेव त्वामाहृत्य समुद्रे प्रक्षिप्तवान्। तत्र च त्वां मत्स्योऽग्रसीत्। तङ्भाव आर्षः। स मत्स्यो मत्स्यजीविभिरत्रानीतस्तस्योदरात् भवानिह प्राप्तः ॥ १३ ॥ तमिति ॥ दुर्द्धर्षं दुर्जयं मायाशतविदं च तमिममात्मनः शत्रुं शम्बरं मोहनादिभिर्मायाभिर्मोहयित्वा त्वं जहि ॥ १४ ॥ परिशोचतीति ॥ दीना पुत्रस्नेहेन आकुला गता प्रजा पुत्रो यस्या सा ते तव माता कुररी पक्षिणी इव विवत्सा आतुरा गौरिव च त्वां परिशोचति ॥ १५ ॥ प्रभाष्येति ॥ मायावती एवं प्रभाष्य महात्मने महाप्रभाववतेऽपि प्रद्युम्नाय सर्वासां शत्रोर्मायानां विनाशिनीं महामायारूपां विद्यां ददौ ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनिर्दशं दशदिनात्पूर्वकालिकं त्वा त्वां ॥ १३ ॥ दुर्द्धर्षं कृच्छ्रेणाकुलीकर्त्तुं शक्यं। यतो मायाशतविदं अतो दुर्जयं। हननोपायमाह मायाभिरिति ॥ १४ ॥ कुररी टिटिभा ॥ १५ ॥ दैवीं विद्यां। तां च कीदृशीं सर्वेषामासुरराक्षसभैरवादीनां मायाविनाशिनीं ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एष इति। एषः शम्बरः, असुरः, त्वा त्वां, अनिर्द्दशमनतीतदशाहं जन्मतोऽतीतपञ्चदिनमित्यर्थः। तथा विष्णुपुराणे पञ्चमेंऽशे 'षष्ठेऽह्नि जातमात्रं तु प्रद्युम्नं सूतिकागृहात्। ममैष हन्तेति मुने हृतवान् कालशम्बरः' इति। एतट्टीकायां 'कालशम्बरः कृष्णवर्णो मृत्युतुल्यो वा शम्बरः' इति। सिन्धौ समुद्रे, अक्षिपत्। तत्र मत्स्यः, अग्रहीत्। हे प्रभो, भवान् तदुदरात् मत्स्यजठरात्, इह प्राप्तः ॥ १३ ॥ तमिति ॥ आत्मनस्तव, दुर्जयं, दुर्धर्षं, शत्रुं, मायाशतविदं, तं, इमं शम्बरं, मयोपदेक्ष्यमाणाभिः इति शेषः। मोहनादिभिः, मायाभिः, त्वं च त्वमपि, जहि ॥ १४ ॥ न चात्र विलम्बः कार्य इत्याह। परिशोचतीति। ते तव, माता रुक्मिणी, गतप्रजा, कुरङ्गी हरिणी इव, परिशोचति। किं च पुत्रस्नेहाकुला पुत्रस्नेहेनातुरा, अत एव दीना, सा विवत्सा, अत एव, आतुरा गौः इव, वर्त्तते ॥ १५ ॥ प्रभाष्येति। मायावती एवं, प्रभाष्य प्रद्युम्नं प्रत्युक्त्वा, महात्मने प्रद्युम्नाय, सर्वाः शत्रोः संबन्धिन्यः सकला अपि मायाः, विनाशयतीति तां, महामायां मोहनशोषणद्रावणहेतुं महामायात्मिकां, विद्यां, ददौ ॥१६॥

कृष्णप्रिया

प्राणनाथ ! आप दस दिन के भी न थे तब इस शम्बरासुर ने आपको आया के वेष धारण कर सूतिका गृह में प्रवेश कर वहाँ से चुराकर सागर में पटक कर अपने निवास में आ गया। सागर में एक विशालकाय मत्स्य आपको निगल गया और धीमरों ने जाल में फसे मत्य को लाकर यहाँ पाक-शाला में दिया पुनः मुझे आप प्राप्त हुये यह सम्पूर्ण जो नारदजी से अवगत किया वह मैंने आपको बताया ॥ १३ ॥ नाथ ! यह शम्बासुर विविध प्रकार की माया का जानकार है। इस शम्बरासुर को जीतना या तो अपने वश करना अधिक तर कठिन है। अब आप अपने शत्रु शम्बरासुर को विशिष्ट प्रकार की मोहन संमोहन नाम की मायाओं से नष्ट कर दीजिए ॥ १४ ॥ प्रियतम ! निज संतान आपके खो जाने से आपकी वात्सल्यमयी जननी श्रीरुक्मिणीजी सुत-स्नेह से अत्यन्त आकुल-व्याकुल हो रही हैं। नाथ ! दीन-दुःखिनी जननी, बछड़ा खो जाने पर बेचारी गाय की तरह और बच्चा गुमाने पर कुररी पक्षिणी की तरह रो रही हैं ॥ १५ ॥ मायावती रति देवी ने इस प्रकार सर्व इतिहास सुनाकर परमशक्ति सम्पन्न श्री प्रद्युम्नजी को महामाया नाम की दिव्य माया विद्या सिखायी। यह विद्या ऐसी थी जो असुरों की सर्वविधमायाओं का नाश कर देती है ॥ १६ ॥

स च शम्बरमभ्येत्य संयुगाय समाह्वयत् । [1]अविषह्यैस्तमाक्षेपैः क्षिपन् सञ्जनयन् कलिम् ॥ १७ ॥
[2]सोऽधिक्षिप्तो दुर्वचोभिः पादाहत इवोरगः । निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः ॥ १८ ॥
गदामाविध्य तरसा प्रद्युम्नाय महात्मने । प्रक्षिप्य व्यनदन्नादं वज्रनिर्घो[3]षनिष्ठुरम् ॥ १९ ॥
तामापतन्तीं भगवान् प्रद्युम्नो गदया गदाम् । अपास्य शत्रवे क्रुद्धः प्राहिणोत् स्वगदां [4]नदन् ॥ २० ॥

कर्दमक्षमा

अन्वयः—सः, च, शम्बरम्, अभ्येत्य, अविषह्यैः, आक्षेपैः, तम्, क्षिपन्, कलिम्, संजनयन्, संयुगायसमाह्वयत् ॥ १७ ॥ पादाहतः, उरगः, इव, दुर्वचोभिः, अधिक्षिप्तः, सः, अमर्षात्, ताम्रलोचनः गदापाणिः निश्चक्राम ॥ १७ ॥ गदाम्, आविध्य, तरसा, महात्मने, प्रद्युम्नाय, प्रक्षिप्य, वज्रनिर्घोषनिष्ठुरम्, नादम्, व्युनदत् ॥ १९ ॥ भगवान्, प्रद्युम्नः, आपतन्तीम्, ताम्, गदाम्, गदया, अपास्य, क्रुद्धः नदन्, स्वगदाम्, शत्रवे, प्राहिणोत् ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वज्रस्य निष्पेषनिर्घाते यथा निष्ठुरस्तीव्रो नादो भवति तथाभूतं नादं व्यनदत् सामान्यविशेषतया व्याप्यव्यापकत्वभावेन पाकं पचतीतिवत् अतिनिष्ठुरं नादमकरोदित्यर्थः ॥ १९–२० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स च ज्ञातविद्यः प्रद्युम्नः । तं शंबरम् । आक्षेपैर्भर्त्सनावाक्यैः । "आक्षेपो भर्त्सनाकृष्टिकाव्यालंकृतिषु स्मृतः" इति मेदिनी । क्षिपंस्तिरस्कुर्वन् । सम्यगुच्चत्वादिनाह्वयत् । आक्षेपैर्निदावाक्यैः । सम्यक् तन्मरणपर्यंततया । जनयन् जनयितुम् ॥१७॥ स शंबरः ॥ १८ ॥ 'स्फूर्जथुर्वज्रनिष्पेषः' इति हलायुधः । इत्यर्थ इति–सामान्यं पाको बहुव्यापकत्वात्, विशेष ओदनमल्पव्यापकत्वात् । तत्र यथौदनस्य व्याप्यत्वं पाकस्य व्यापकत्वमेवमत्राप्यतिनिष्ठुरस्य व्याप्यत्वं, नादस्य व्यापकत्वमिति भावः । वज्रनिष्पेषस्य नादमिव निष्ठुरं वज्रनिष्पेषनिष्ठुरम् । मध्यमपदलोपी समासः । व्यापकत्वं क्रियाया व्याप्यत्वं तु कर्मणः । अकरोदिति—सर्वेषां धातूनामंतर्भूतकृञर्थत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायेन कृञर्थमात्रपर्यवसानाच्च ॥ १९ ॥ तां गदाम् । अपास्य निवर्त्य । अपास्य प्रत्यक् क्षिप्त्वा । नृपेति–यथा त्वं नृपालनार्थं दुष्टान् गदापातैर्हंसि तथायमपि । तस्माद्दुष्टदैत्याँल्लोकरक्षार्थमेव वस्तुतस्तस्मै गदां प्राहिणोदिति भावः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्यगुच्चत्वादिना आह्वयत् आक्षेपैर्निन्दावाक्यैः क्षिपन् तिरस्कुर्वन् सम्यक् तन्मरणपर्य्यन्ततया जनयन् जनयितुम् ।१७। सोऽधीतिस्पष्टं सोऽभीति पाठः क्वचित् ॥ १८ ॥ आविध्य भ्रामयित्वा महानात्मा धृतिर्यस्य तस्मै विशेषेण नदनमेव व्यञ्जयति वज्रेति अन्यत्तैः तत्र वज्रनिष्पेषनिष्ठुरमिति मध्यपदलोपी समासः वज्रनिष्पेषस्य नादमिव निष्ठुरमिति तथा व्यापकत्वं क्रियाया व्याप्यत्वं तु कर्मणः तथा अकरोदिति सर्वेषां धातूनामन्तर्भूतकृञर्थत्वात् उक्तार्थानामप्रयोग इति न्यायेन कृञर्थमात्रपर्य्यवसानाच्चेति ज्ञेयं निष्पेषशब्देन कथं चिन्निर्घोषो वा वाच्यते ॥ १९ ॥ अपास्य प्रत्यक् क्षिप्त्वा अत्र नदन्नित्यत्र नृपेति क्वचित्पाठः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

'च' अपि, सोऽपि, अभिमुखमेत्य सम्यगुच्चतीक्ष्णस्वरादिना आह्वयत् । अविषह्यैः परमासह्यैरित्यर्थः, क्षिपन् दुर्वाक्यैर्गालिं ददत् । किमर्थम् ? कलिं कलहम्, सम्यङ्मरणपर्य्यवसानतया जनयन् जनयितुम् ॥ १७ ॥ पदेन हतः प्रहृत उरग इव, अमर्षात् क्रोधात् ताम्रे संरक्ते लोचने यस्य सः, यद्वा, पदा हतोऽहिर्यथा क्रोधादुन्नमितफणो रक्ताक्षो विलान्निष्क्रामति, तथा गृहान्निश्चक्रामेत्यर्थः ॥ १८ ॥ आविध्य भ्रामयित्वा, प्रकर्षेण बलादिना क्षिप्त्वा, महानात्मा धृतिर्यस्य तस्मा इति निर्भयत्वादिकं सूचितम् । विशेषणानदत्, वि-शब्दार्थमेव व्यञ्जयति–वज्रेति । अन्यत्तैर्व्याख्यातम् । यद्वा, वज्रस्य निष्पेषादपि निष्ठुरम् ॥१९॥ भगवान् सर्वशक्तिमान्, अपास्य पश्चात् क्षिप्त्वा ॥ २० ॥

---

१. अवष्टभ्योष्टमा–विज. । २. सोपि सोभि पाठौ श्रीधर. टि. । ३. निष्पेष–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. ।
४. नृप–श्रीधर. वंशी. जीव. शुक. सु.; स्वगदां नदन्–वीर.; स गदां नदन्–विज. ।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततः स च प्रद्युम्नः संयुगाय युद्धार्थं समाहूतवान् किं कुर्वन्सोढुमशक्यैरधिक्षेपैस्तं शम्बरं क्षिपन् परिभवन् कलिं कलहं जनयंश्च ॥ १७ ॥ स इति । स शम्बरः पादेन ताडितः सर्प इव दुर्वचोभिरधिक्षेपैरधितप्तः अत एव क्रोधात्ताम्रे लोचने यस्य गदा पाणौ यस्य सः निश्चक्राम ॥ १८ ॥ तरसा बलेन गदामाविध्य भ्रामयित्वा प्रक्षिप्य प्रयुज्य वज्रस्याशनेर्निष्पेषे निर्घाते यथा निष्ठुरस्तीव्रो नादो भवति तथाभूतं नादं व्यनदच्चकार पाकं पचतीति वदयं निर्देशः ॥ १९ ॥ तामिति । प्रद्युम्नः स्वगदया तां शम्बरप्रयुक्तामाकाशे आपतन्तीं गदामपास्य निरस्य स इव स्वयमपि नदन् शत्रवे शम्बराय स्वगदां प्रायुङ्क्त ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निष्पेषो निर्घातः । वचनमवोचदितिवन्नादमनददितिसिद्धम् ॥ १९–२० ॥

गूढार्थदीपिनी

स च प्रद्युम्नः । संयुगाय युद्धार्थम् । आक्षेपैर्भर्त्सनावाक्यैः । क्षिपन् तिरस्कुर्वन् । कलिं कलहं जनयन् जनयितुम् ॥१७-१८॥ आविध्य भ्रामयित्वा । तरसा वेगेन । वज्रनिष्पेषो वज्रपातस्तद्वत् कठोरम् । व्यनदत् चकार । पाकं पचतीतिवदयं निर्देशः ॥१९॥ गदाम् अपास्य प्रत्यक् क्षिप्त्वा । प्राहिणोत् चिक्षेप ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आविध्य भ्रामयित्वा वज्रस्य निष्पेषे निर्घाते यथा निष्ठुरस्तीव्रो नादो भवति तथा भूतं नादं व्यनदत् वचनमवोचदितिवदयं निर्देशः ॥ १९–२० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कृष्णेन मणितृष्णेन वनं गतो मम भ्राता हत इत्युक्तवानिति शेषः । तच्छ्रुत्वा जनाः कर्णे कर्णे प्रतिकर्णमजयन् । ननु दुर्भिक्षमारीत्यादिमहामहिमवति रत्ने सति कण्ठे सति कथं सिंहो हिंसितवांस्तमिति चेत् । सत्यं । हरिद्रोहाभावे तथैव यात्राभङ्गो भगवतोऽनेनाचरित इति विशेषशक्तिशक्त्युपपत्तेः । शुचिष्मता सदा धार्यं रत्नमेतन्महोत्तमं । सत्राजित्तत्क्षणेनैतदशुचि हन्ति मानवं । अश्वारूढो शुचिश्चासौ हतः सिंहेन तत्क्षणादिति व्रतार्कोक्तेरशुचित्वादनुपपन्नं तद्धनतं सति तस्मिन्नपीति वा ज्ञेयम् । आत्मनि लिप्तं दुर्यशो माष्टुं नागरैः सहानीय रत्नं स्थापितवानित्यपवादान्तरप्रच्यावनार्थं नागरैः सह गमनमिति गन्तव्यम् ॥ १७–१८ ॥ तं सिंहं । अन्धयति स्वप्रविष्टमित्यन्धस्तमसाऽन्धकारेश्चावृत्तं प्रथा बहिरवस्थाप्यैक एव विवेश ॥१९॥ अर्भकान्तिके जाम्बवतोऽन्तिकेऽवस्थे गतम् ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः प्राप्तविद्यः अक्लिष्टकर्मा ज्ञापयित्वैव मारयिष्यामीति विद्याप्राबल्यं वक्तुमाह्वानमाह **स च शम्बर**मिति । चकारात्तद्गतो भगवान् । पूर्वक्रियया समुच्चयं वा आह । तथा सति विद्याग्रहणं तन्मारणार्थमेवेति फलिष्यति । **अभ्येत्य** निकटे गत्वा । शङ्काभावो निरूपितः । व्याजेन प्रवर्तनं वारयति **संयुगाय समाह्वयदिति** । बालवाक्यं मत्वा न प्रवर्तेतेति अधिक्षेपमप्याह **अविषह्यै**रिति ! तं प्रसिद्धम् । प्रसिद्धो ह्यल्पमप्याक्षेपं न सहते । तत्रापि नान्यदीयमनुवदति, किन्तु स्वयमेव क्षिपति । स्नेहात्पुत्रादयोऽपि कदाचिदेवं कुर्वन्तीति तद्व्यावृत्त्यर्थमाह **संजनयन्कलि**मिति । कलहमुत्पादयन् । अहं प्रद्युम्नः कामः, त्वं शत्रुः, त्वां मारयिष्यामीत्यादिवाक्यान्युक्तवानित्यर्थः ॥ १७ ॥ ततो युद्धार्थं प्रवृत्त इत्याह **सोऽधिक्षिप्त** इति । यथा तस्मिन् स्नेहः, एवं द्वेषोऽपीति कथं प्रवृत्तिरित्याशङ्क्य आक्षेपस्य दुष्टत्वमाह **दुर्वचोभि**रिति । दुर्वचोभिराक्षिप्तः पितापि पुत्रं मारयतीति कृत्रिमत्वे जाते कथं न प्रवर्तेतेत्यर्थः । ननु मृत्युरयमिति विशेषेण समागत इति भयात् कथं न निवृत्तः, तत्राह **पादाहत इवोरग** इति । दीर्घरोषः सर्पः मरणमप्यङ्गीकरोति, न तु निवर्तत इति । तस्य हि क्रोध एव परिपाल्यः, नत्वन्ये । तत एकेन सह एकेनैव युद्धं कर्तव्यमिति गदापाणिरेव निर्गतः । नापि बद्धकवचः, नापि ससहायः । तथा निर्गमने हेतु**रमर्षात्ताम्रलोचन** इति । क्रोधवशान्न किञ्चिज्ज्ञातवान् । दृष्टिरपि ताम्रेति दृष्ट्वापि न ज्ञातवान् ॥ १८ ॥ ततः प्रथमत एव स्वयं मारणार्थं प्रवृत्त इत्याह **गदामाविध्ये**ति क्रोधवशान्महतीमपि गदामुत्तोल्य भ्रामयित्वा वा । तरसा यावन्न सावधानो भवति । अनेन अपराधादपि तस्य पराजय एवेति सूचितम् । **महात्मन** इति । तस्य पलायनाद्यभावः सूचितः । प्रक्षेपमात्रेणैव मारित इति मत्वा व्यनदत् । मूर्च्छितस्य तेन नादेन सुतरां मरणं भवतीति ज्ञापयितुं विशिनष्टि **वज्रनिर्घोषनिष्ठुर**मिति । वज्रस्य नितरां घोषः पातसमय-

शब्दः । ततोऽपि निष्ठुरमिति ॥ १९ ॥ एतादृशोऽप्युद्यमः व्यर्थो जातः (इति) प्रद्युम्नस्य पराक्रमेणेत्याह **तामापतन्ती**मिति । स्वगदया तां गदामपास्य आगच्छन्तीं दूरादेव मारयित्वा ततः क्रुद्धः सन् तद्वत्स्वयमपि नदन् । शत्रुर्मारणीय एवेति, अन्यथा मारयिष्यती वा स्वगदां प्राहिणोत् । **भगवा**नित्येतत्सामर्थ्यहेतुः । भगवत्कार्यत्वादावेशित्वाद्वा भगवान् ॥ २० ॥

श्रीसुबोधिनी–सारः

स च प्रद्युम्नः शंबरमभ्येत्य प्राप्य संयुगाय संग्रामाय समाह्वयत् समाह्वानमकरोत् अविषह्यैः सोढुमशक्यैराक्षेपैर्दुर्वचोभिस्तं क्षिपन् पराभवन् कलिं कलहं संजनयन्समुत्पादयन् सन् ॥ १७ ॥ दुर्वचोभिः कुवाक्यैरधिक्षिप्तो धिक्कृतः पदाहत उरगः सर्प इवाऽमर्षात्क्रोधात्ताम्रवल्लोचनं यस्य स शंबरो गदापाणिर्योद्धुं निश्चक्राम निर्गतोऽभूत् ॥ १८ ॥ गदामाविध्य भ्रामयित्वा तरसा वेगेन महात्मने प्रद्युम्नाय प्रक्षिप्य प्रयुज्य वज्रस्य निष्पेषः पतनं तद्वन्निष्ठुरं तीव्रं नादं व्यनदत् ॥ १९ ॥ आपतंतीं तां गदां भगवान् प्रद्युम्नः स्वगदयाऽपास्य निवर्त्य क्रुद्धः शत्रवे शत्रुं हंतुं स्वगदां प्राहिणोत् प्राक्षिपत् हे नृप ॥ २० ॥

विवरण टिप्पणी

सोऽधिक्षिप्त इत्यत्र । **यथा तस्मि**न्निति । तथाच स्नेहसम एव द्वेषो वर्तते, नत्वधिकः । अत उभयोः समत्वात्स्नेहं बाधित्वा द्वेषकार्यमेव कथं जातमित्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स च प्रद्युम्नस्तं शम्बरमभ्येत्य अविषह्यैः सोढुमशक्यैराक्षेपैस्तिरस्कारवचनैः क्षिपन् अभिभवन् कलिं कलहं च जनयन् संयुगाय युद्धार्थं समाह्वयदित्यन्वयः ॥ १७ ॥ दुर्वचोभिरधिक्षिप्तस्तिरस्कृतः, अमर्षेण तिरस्कारासहनेन क्रोधेन ताम्रे रक्ते लोचने यस्य सः, गदा पाणौ यस्य सः, शम्बरो युद्धार्थं गृहान्निश्चक्रामेत्यन्वयः । क्रोधाविष्टत्वे दृष्टान्तमाह—पदाहत उरग इवेति ॥१८॥ तरसा वेगेन गदामाविध्य भ्रामयित्वा प्रद्युम्नं हन्तुं प्रक्षिप्य वज्रस्याशनेर्निष्पेषे निर्घाते यथा निष्ठुरस्तीव्रो नादो भवति तथाभूतं नादं व्यनदच्चकार । पाकं पचतीतिवत् सामान्यविशेषतयाऽयं निर्देशः ॥ 'तया प्रद्युम्नस्यापकारो भयं च नास्ति' इति सूचयन्नाह—महात्मन इति ॥ १९ ॥ भगवान् प्रद्युम्नोऽपि आपतन्तीं आगच्छन्ती तां शम्बरप्रयुक्तां गदां स्वगदया अपास्य निरस्य हे नृप ! क्रुद्धः सन् शत्रवे शम्बराय स्वगदां प्राहिणोत् प्रायुङ्क्त ॥ २० ॥

अन्वितार्थप्रकाशिका

स चेति ॥ स च प्रद्युम्नः तं शम्बरमभ्येत्य अविषह्यैः सोढुमशक्यैराक्षेपैस्तिरस्कारवचनैः क्षिपन् अभिभवन् कलिं कलहं च संजनयन् संयुगाय युद्धार्थं समाह्वयत् । स्पर्द्धाया अविवक्षणान्न तङ् ॥ १७ ॥ स इति ॥ दुर्वचोभिरधिक्षिप्तस्तिरस्कृतः अमर्षेण तिरस्कारासहनेन क्रोधेन ताम्रे रक्ते लोचने यस्य सः गदा पाणौ यस्य सः शम्बरः पदाहत उरग इव युद्धार्थं गृहान्निश्चक्राम ।१८। गदामिति ॥ महात्मने प्रद्युम्नाय तरसा वेगेन गदामाविध्य भ्रामयित्वा प्रक्षिप्य वज्रस्याशनेर्निष्पेषे निर्घाते यथा निष्ठुरस्तीव्रो नादो भवति तथाभूतं नादं व्यनदत् । ओदनपाकं पचतीतिवत् वचनमवोचदितिवच्च सामान्यविशेषतयाऽयं निर्देशः । अतः अकरोदित्यर्थः । उक्तार्थानामप्रयोग इति न्यायेन नदतेः कृञर्थमात्रे पर्यवसानात् ॥ १९ ॥ तामिति ॥ भगवान् प्रद्युम्नोऽपि आपतन्तीम् आगच्छन्तीं तां शम्बरप्रयुक्तां गदां स्वगदया अपास्य निरस्य हे नृप ! क्रुद्धः सन् शत्रवे शम्बराय स्वगदां प्राहिणोत् प्रायुङ्क्त ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आक्षेपैस्तिरस्कारैः ॥ १७ ॥ ताम्रलोचनो रक्तनेत्रः ॥ १८ ॥ आविध्य भ्रामयित्वा वज्रस्य निष्पेषः पतनशब्दस्तद्वन्निष्ठुरं कठोरं नादं व्यनदत् शब्दं चकारेत्यर्थः । पाकं पचतीतिवत् । करणार्थो त्रनदति धातुरस्ति ॥ १९ ॥ अपास्य दूरीकृत्य ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स चेति ॥ ततः, स च प्रद्युम्नोऽपि, शम्बरं, अभ्येत्य, तं शम्बरं, अविषह्यैः सोढुमशक्यैः, आक्षेपैस्तिरस्कारवचनैः, क्षिपंस्तिरस्कुर्वन्, कलिं कलहं, संजनयन् संश्च, संयुगाय संग्रामं कर्त्तुं, समाह्वयत् ॥ १७ ॥ स इति ॥ दुर्वचोभिः अधिक्षिप्तः अत एव, पदा पादेन, आहतस्ताडितः, उरगः सर्पः इव, क्रुद्धः स शम्बरः, अमर्षात् संजातात् क्रोधात्ताम्रे रक्तवर्णे लोचने यस्य सः, गदा पाणौ यस्य तथाभूतः संश्च, निश्चक्राम युद्धं कर्त्तुं स्वगृहान्निष्क्रान्तवान् ॥ १८ ॥ गदामिति ॥ सः गदां, तरसा आविद्ध्य भ्रामयित्वा, महात्मने प्रद्युम्नाय, महात्मानं प्रद्युम्नं हन्तुमित्यर्थः । प्रक्षिप्य बलात् क्षिप्त्वा, वज्रस्याशनेर्निष्पेषे निर्घाते यथा

निष्ठुरस्तीव्रो नादो भवति तथाभूतं, नादं, व्यनदत् । सामान्यविशेषतया व्याप्यव्यापकत्वं पाकं पचतीतिवत् । अतिनिष्ठुरं नादमकरोदित्यर्थः ॥ १९ ॥ तामिति ॥ भगवान्, प्रद्युम्नः, आपतन्तीमाकाशमार्गेण आगच्छन्तीं, तां शम्बरप्रयुक्तां, गदां गदया स्वकीयया गदया अपास्य निरस्य, क्रुद्धः स इव स्वयमपि नदन्नेवेति शेषः । शत्रवे शम्बराय, हे नृप, स्वगदां प्राहिणोत् प्रायुङ्क्त ॥ २० ॥

कृष्णप्रिया

श्रीरति देवी जी से परामर्श करने के बाद श्रीप्रद्युम्न जी शम्बरासुर के समीप पहुँचे और कटुशब्दों से तिरस्कार करने लगे । आशय यह था कि आविष्ट शम्बरासुर किसी भी प्रकार से संघर्ष में आ जाय । इतने से भी प्रद्युम्न जी को संतोष नहीं था पुनः संग्राम के लिये भी शम्बर को आह्वान किया ॥ १७ ॥ श्री प्रद्युम्नजी के तिरस्कार को नही सहता और पडकार को स्वीकारता शम्बरासुर तिल-मिला उठा । जैसे किसी ने विषैले नाग को पैरों से कोई ठुकरा दे और साँप जैसे तिल-मिला उठे । शम्बरासुर की आँखे क्रोध से आरक्त बन गई और हाथ में गदा उठाकर घर से मैदान में आ गया ॥ १८ ॥ पुनः शम्बरासुर ने गदा को गोल गोल आकाश में घुमायी और जोर से वीर प्रद्युम्नजी के उपर चला दी । गदा को चलाते समय शम्बर ने अत्यन्त कर्कश सिंहगर्जना की, मानो वज्रपात हो रहा हो ॥ १९ ॥ महाराज परीक्षित ! सर्व समर्थ भगवान् श्रीप्रद्युम्न जी ने देखा कि शम्बर की गदा अत्यन्त वेग से अपनी ओर आ रही है, तब प्रद्युम्न जी ने अपनी गदा के प्रहार से उसकी गदा जमीन पर गिरा दी और अत्यन्त रुष्ट होकर अपनी गदा शम्बरासुर पर वेग से चलायी ॥ २० ॥

स च मायां समाश्रित्य दैतेयीं मयदर्शिताम् । मुमुचेऽस्त्र[1]मयं वर्षं कार्ष्णौ वैहायसोऽसुरः ॥ २१ ॥
बाध्यमानोऽ[2]स्त्रवर्षेण रौक्मिणेयो महारथः[3] । सत्त्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीम् ॥ २२ ॥
ततो [4]गौह्यकगान्धर्वपैशाचोरगराक्षसीः । प्रायुङ्क्त शतशो दैत्यः कार्ष्णिर्व्यधमयत् स ताः ॥ २३ ॥
निशातमसिमुद्यम्य सकिरीटं सकुण्डलम् । शम्बरस्य शिरः कायात् [5]ताम्रश्मश्र्वोजसाहरत् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—सः, च, असुरः, मयदर्शिताम् , दैतेयीम्, मायाम्, समाश्रित्य, वैहायसः, (शम्बरः) कार्ष्णौ, अस्ममयम्, वर्षम्, मुमुचे ॥ २१ ॥ अस्मवर्षेण, बाध्यमानः, महारथः, रौक्मिणेयः, सर्वमायोपमर्दिनीम्, सत्त्वात्मिकाम्, महाविद्याम्, मुमोच ॥ २२ ॥ ततः, सः, दैत्यः, गौह्यक, गान्धर्व, पैशाचोरग राक्षसीः, शतशः, (मायाः) प्रायुङ्क्त, सः, कार्ष्णिः, ताः, व्यधमत् ॥ २३ ॥ ततः भगवान्, कार्ष्णिः, निशातम्, असिम्, उद्यम्य, शम्बरस्य, कायात्, सकिरीटम्, सकुण्डलम्, च ताम्रश्मश्रु, शिरः, ओजसा, अहरत् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वैहायस आकाशे स्थितः ॥ २१ ॥ सत्त्वात्मिकां सत्त्वगुणमयीं प्रायुंक्तेत्युत्तरस्यानुषंगः ॥२२॥ ता मायाः व्यधमयद्व्यनाशयत् ॥ २३ ॥ ताम्राणि श्मश्रूणि यस्मिंस्तत् । ओजसा बलेन ॥ २४–२५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स च शंबरः । दैतेयीं दैत्यकुलदेवतामिव वर्तमानाम् ॥ मायां परोक्षत्वादिमाश्रित्य वैहायसः सन्नेव प्रद्युम्नगदामवञ्चयदिति सूचितम् । अश्ममयं शिलाप्रचुरम् । तदुक्तं हरिवंशे—"भस्मीभूते वृक्षवर्गे शिलासंघानवर्षयत्" इति ॥ २१ ॥ सत्त्वगुणमयीं बलज्ञाननिधिं विष्णुदेवताकाम् । महाविद्यां विज्ञानास्त्रसंज्ञाम् । उत्तरस्याग्रिमश्लोकस्थक्रियापदस्य । अनुषङ्ग आनयनम् । बाध्येति युग्मकम् । महारथो वीरवर्गश्रेष्ठः ॥ २२ ॥ ततो रौक्मिणेयकर्तृकास्त्रसंधानोत्तरम् । स कार्ष्णिः ॥ गौह्यकेत्यादौ प्रथमं सामान्यतो निर्दिष्टानां स्त्रीप्रत्ययं विनैव द्वंन्द्वः, पश्चान्मायाविशेषणत्वेन स्त्रीत्वे विवक्षिते समस्तात्स्त्रीप्रत्ययो ज्ञेयः । शतश इति गौह्यकादीनामेवावृत्तिर्व्यक्ता । यद्वा—अन्या अपि शतशो मायाः । ताश्च हरिवंशे—"ततो मायां परां चक्रे देवशत्रुः प्रतापवान् । सिंहान्व्याघ्रान्वराहांश्च तरक्षूनृक्षवानरान् ॥ वारणान्वारिदप्रख्याल्लयानुष्ट्रान्विशां पते ।" इत्यादिना गौह्यकादीनां यथोत्तरं हिंस्रत्वेन श्रेष्ठ्यम् । स्म प्रसिद्धौ । ताः सर्वाः, यतः कार्ष्णिः 'मायिमायिनि' इत्युक्तेर्मायाविव्यामोहकश्रीकृष्णात्मजे का प्राकृतमायागणनेति भावः । अस्याग्रेप्यनुवृत्तिर्ज्ञेया ॥ २३ ॥ श्मश्रूणि मुखरोमाणि ॥ आहरत् दूरीचकार ॥ २४ ॥

---

१. चेऽश्म–वीर. ; निर्ममेऽश्म–विज. । २. नोऽश्म–वीर. विज. । ३. बलः–वीर. । ४. मोहकरीं मायां पिशाचोरगरक्षसाम् । ५. श्मश्रोर्जहारतत्–वीर. ; ताम्रश्मश्रु जहार तत्–विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्वर्थे चशब्दः मयेन दर्शितां प्रवर्त्तितां सम्यक् परोक्षत्वादिना आश्रित्य अत एव वैहायसः सन् एवं श्रीप्रद्युम्नगदावञ्चनं सूचितम् अश्ममयं शिलाप्रचुरं तथा च श्रीहरिवंशे—

भस्मीभूते वृक्षवर्षे शिलासङ्घानवर्षयदिति । अतोऽश्ममयमिति पाठोऽसम्मतः ॥ २१ ॥

वाध्येति युग्मकम् महारथः वीरवर्गश्रेष्ठः ॥ २२ ॥ गौह्यकेत्यादौ प्रथमं सामान्यतो निर्द्दिष्टानां स्त्रीप्रत्ययं विनैव द्वन्द्वः पश्चान्मायाविशेषणत्वेन स्त्रीत्वे विवक्षिते समस्तात्स्त्रीप्रत्ययो ज्ञेयः "शतशः इति" गौह्यकादीनामेवावृत्तिर्व्यक्ता यद्वा अन्या अपि मायाः शतश इत्यर्थः । ताश्चोक्ताः श्रीहरिवंशे—

ततो मायां परां चक्रे देवशत्रुः प्रतापवान् । सिंहान् व्याघ्रान् वराहांश्च तरक्षूनृक्षवानरान् ॥

वारणान् वारिदप्रख्यान् हयानुष्ट्रान् विशाम्पत इत्यादिना गौह्यकादीनां यथोत्तरं हिंसकत्वेन श्रैष्ठ्यस्य प्रसिद्धौ ताः सर्वाः यतः कार्ष्णिः अस्याग्रेऽप्यनुवृत्तिः ॥ २३ ॥ कायादहरत् दूरीचकार ताम्रश्मश्रिवति घोरत्वादिकं सूचितम् किरीटादिसहितमिति हरणे लाघवं कौतुकञ्च ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

त्वर्थे च-शब्दः, श्रीप्रद्युम्नप्रहितगदावञ्चनं सूचयति—मयेन दर्शितां प्रकटितामिति माहात्म्यं तस्याः सूचितम्, सम्यक् परोक्षत्वादिना आश्रित्य, अतएव वैहायसः, सन् अश्ममयं वर्षं वृष्टिवदसंख्यं शिलाजातं मुमुचेऽक्षिपत् । तथा च श्रीहरिवंशे (विष्णु० प० १०६।१४)—'भस्मीभूते वृक्षवर्षे शिलासङ्घानवर्षयत्' इति । अतः पाठान्तरमसंगतमिव, शिलावर्षस्यैव मायिकत्वात् ॥ २१ ॥ महारथो वीरवर्गश्रेष्ठः, यतो रुक्मिणीगर्भजातः, इत्माश्मवर्षबाधा परिहृता, सर्व्वासामेव मायानामुपमर्द्दनीमिति तयाश्मवर्षमाया निरस्तेति बोधयति—शतश इति । गौह्यकादीनां प्रत्येकं बहुधा बहुशः प्रयोगञ्च; यद्वा, अन्या अपि मायाः शतश इत्यर्थः; ताश्चोक्ताः श्रीहरिवंशे (विष्णु-प० १०६।१५-१६)—'ततो मायां परां चक्रे देवशत्रुः प्रतापवान् । सिंहान् व्याघ्रान् वराहांश्च तरक्षूनृक्षवानरान् । वारणान् वारिदप्रख्यान् हयानुष्ट्रान् विशास्यते ।' इत्यादिना गौह्यकादीनां यथोत्तरं हिंस्रत्वे श्रैष्ठ्यम् । स्म प्रसिद्धौ, ताः सर्व्वाः, यतः कार्ष्णिः; अस्याग्रेऽपि पद्यत्रयेऽनुवृत्तिः ॥ २२-२३ ॥ कायादहरत्, दूरत उच्चैः पातयामासेत्यर्थः । ताम्रश्मश्रिवति महादैत्यत्वेन घोरत्वादिकं सूचितम् । किरीटादिसहितमिति हरणे महावेगादिकञ्च, अन्यथा तस्य तत्रैवादूरे पातसम्भवात्; यद्वा, शम्बरस्य महावीरत्वं युद्धोत्साहभरेणैव तत्तत्परिधानात् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

स च शम्बरः मयेन दैत्यदानवाचार्य्येण दर्शितामुपदिष्टां मायामन्तर्धानाद्यात्मिकामाश्रित्य वैहायसः आकाशे स्थितः कार्ष्णौ प्रद्युम्ने शिलामयं वर्षं मुमुचे ॥ २१ ॥ तदा रौक्मिणेयः प्रद्युम्नः शिलावर्षेण वाध्यमानस्ताड्यमानः सत्त्वात्मिकां सत्त्वगुणमयीं मायां महाविद्याख्यां सर्वासुरमायोपघातिनीं प्रायुङ्क्तेत्युत्तरस्यापकर्षः ॥ २२ ॥ ततः पुनर्दैत्यः गुह्यकानां सम्बन्धिनीं तथा गन्धर्वादिसम्बन्धिनीं च मायां प्रायुङ्क्त कार्ष्णिस्तु ताः सर्वा मायाः व्यधमयत् व्यनाशयत् ॥ २३ ॥ ततः निशितं खड्गमुद्धृत्य निर्माय ताम्राणि श्मश्रूणि यस्य तस्य शम्बरस्य कायात्सकिरीटं सकुण्डलं च शिरो जहार पातयामासेर्थः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वैहायसः आकाशचारी ॥ २१ ॥ सत्त्वात्मिकां विद्यां प्रायुङ्क्तेत्युत्तरस्यानुषङ्गः ॥ २२-२७ ॥

गूढार्थदीपिनी

विहायसि आकाशे स्थितः सन् ॥२१॥ वाध्यमानेति युग्मम् । मायां प्रायुङ्क्तेत्युत्तरेणान्वेति । ता मायाः रुक्मिणीपुत्रः । व्यधमयत् व्यनाशयत् । धमधातोः सौत्राण्णिच् अमन्तत्वान्मित्त्वम् ॥ २२-२३ ॥ निशातं तीक्ष्णम् । कायात् शिरः अहरत् पृथक् कृतवान् । ओजसा बलेन ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वैहायसः खेचरः ॥ २१ ॥ महाविद्यां प्रायुङ्क्त इत्युत्तरस्यानुषङ्गः ॥ २२ ॥ व्यधमयद्व्यनाशयद् ॥ २३ ॥ ओजसा बलेन ॥ २४-२८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

धात्री उपमाता भीतवद्भीता गतं । मदनज्वरदाहार्ता दृष्ट्वा तं कमलेक्षणमुवाच ललिता बाला गम्यतां गम्यतामिति । रत्नं गृहीत्वा वेगेन यावच्छेते तु जाम्बवान् इत्याकर्ण्य हसञ्छौरिः शंखं दध्मौ प्रतापवान् । आकर्ण्य सहसोत्थायेति व्रताकोक्तिः

कृष्णकृष्णतोपायपरोपायान्तरमिदमिति न विरोधः । धात्र्या कुमारमित्यादिर्हरिवंशेऽपि **समीकृतोऽनेवेति** ज्ञेयम् ॥ २१ ॥ कुपित इति नानुभाववित् प्राकृतं कञ्चनपुरुषं मत्वा तेन कृष्णेन सह सुयुधे ॥२२॥ अयुधाश्मद्रुमैः **शिलाभिर्द्रुमैः** । आयुधस्थानेऽस्मद्रुमैरिति वा । व्रव्यार्थे मांसार्थे ॥ २३ ॥ अविश्रमं विश्रामरहितं यथा निरन्तरमिति यावत् ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो लौकिकेन जयाभावमाशङ्क्य मायया भगवद्रूपया युद्धं **करिष्यामीति प्रवृत्त** इत्याह **स च** मायामिति । दैतेयी-त्यनेन भगवत्त्वमुक्तम् । सम्यगाश्रयणं मनःपूर्वकं भक्त्या । **मयदर्शिता**मिति । **सिद्धादुपदेशः सफलो भवती**ति ज्ञापनार्थः । ततः अदृश्यः सन् **अस्त्रमयमाग्नेयाद्यस्त्र**समूहं कार्ष्णौ प्रद्युम्ने स्वयं विहायसि आकाश **एव स्थितः वैहायसः** । असुराणामन्तरिक्षेऽपि गतिरस्तीति सूचयितुं **तथोक्तम्** ॥ २१ ॥ ततो मायाया भगवत्त्वात् काचित्पींडा **जातेत्याह बाध्यमानोऽस्त्रबर्षणे**पि गतिरस्तीति सूचयितुं तथोक्तम् ॥ २१ ॥ ततो मायाया भगवत्त्वात् काचित्पीडा जातेत्याह **बाध्यमानोऽस्त्रवर्षणेति** । हीनत्वं सम्पादयितुं **रौक्मिणेय** इत्युक्तम् । **नहि कृष्णपुत्रे** बाधा सम्भवतीति । तथापि महारथः **क्षत्रियजातित्वेन** प्राप्तसामर्थ्यः सत्त्वात्मिकां प्रति-स्पर्धिनीं विद्यारूपां तया **साक्षादुपदिष्टां** समाश्रित्य स्वयमप्यस्त्रमयं वर्षं **मुमुचे** इति **सम्बन्धः** ॥ २२ ॥ **ततस्तेनापि** बह्व्यो मायाः प्रदर्शिता इत्याह तत इति । पञ्चैता **अङ्गमायाः** तेन हि साङ्गो **भगवान्** सेवित **इति विज्ञायते । गन्धर्वा अपि दैत्यपक्षपातिनः** । तेषामवान्तरभेदाः सन्तीत्याह **प्रायुङ्क्त शतश** इति । सर्वासामपि सकृदेव **निराकरणं कृतवानित्याह । कार्ष्णिः** सः पूर्वप्राप्तमायः ता व्यधमयत् ॥ २३ ॥ **ततः पौरुषद्वये**ऽपि नष्टे तं मारितवानित्याह **निशातमिति । यथा श्येने दृष्टे पक्षिणो** लीयन्ते, तथा तस्मिन् दृष्टे शम्बरो लीनो जात इति । निष्प्रभं तं स्वेच्छया असिमुद्यम्य **किरीटकुण्डलसहितं परित** उपरि **च शोभायुक्तमधो**ऽपि दुर्धर्षं ताम्रश्मश्रुः ओजसा अहरत् । छित्त्वा नीतवानित्यर्थः ॥ २४ ॥

श्रीसुबोधिनी–सारः

स च शंबरोऽसुरो **वैहायसो** विहायसे खे स्थितो मयेन दर्शितां दैतेयीं **मायां समाश्रित्य कार्ष्णौ** प्रद्युम्नोपरि अस्त्रमयं वर्षं मुमोच ॥ २१ ॥ **अस्त्रवर्षेण** बाध्यमानः पीड्यमानो रुक्मिण्याः पुत्रो **महारथः सर्वमायानिवारिणीं** सत्त्वात्मिकां महाविद्यां प्रायुंक्तेत्युत्तरेणान्वयः ॥ २२ ॥ ततोनंतरं गुह्यकगंधर्वपिशाचोरगराक्षसानां **मायाः शतशो दैत्यः** शंबरः प्रायुंक्त स कार्ष्णिः कृष्णस्यापत्यं ताः सर्वा माया व्यधमन्नाशयामास ॥ २३ ॥ निशातं तीक्ष्णमसिं खड्गम् **उद्यम्योद्धृत्य सकिरीटं** सकुंडलं ताम्रवत् श्मश्रूणि यस्मिंस्तत् शंबरस्य शिरः कायात् पृथक् कृतवान् ओजसा बलेन ॥ २४ ॥

विवरणटिप्पणी

स च मायामित्यत्र । **भगवत्त्वमुक्त**मिति । मायाया इति शेषः । **दैत्यानां** माया, 'मायेत्यसुरा' इति श्रुतेर्भगवद्रूपेति भावः । **बाध्यमान** इत्यत्र । मायोपदेशे सर्वमायाविनाशिनीमित्युक्तम् । **अत्रापि तद्विशेषणकथनात्सैवेयं** मायेत्याशयेनाहुः तया **साक्षादि**ति । तस्या मायावतीत्वात्साक्षात्तदुपदेशे मायापि साक्षादेव समायाति, न तु मन्त्राद्यपेक्षेति भावः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स च शम्बरोऽसुरो मयेन दैत्यदानवाचार्येण दर्शितामुपदिष्टां मायामन्तर्धानाद्यात्मिकामाश्रित्य वैहायसः आकाशे स्थितः सन् कार्ष्णौ प्रद्युम्नेऽश्ममयं शिलामयं वर्षं मुमुचे अकरोत् ॥ २१ ॥ तदा **च रौक्मिणेयः प्रद्युम्नः** शिलावर्षेण बाध्य-मानस्ताड्यमानोऽपि सर्वासुरमायोपमर्दिनीं सत्त्वात्मिकां महाविद्यां प्रायुङ्क्तेत्युत्तरस्यानुषङ्ग । तदापि तस्य भयाभावं सूचयन्नाह—**महारथ** इति ॥ २२ ॥ ततश्च पुनर्दैत्यः शम्बरः गुह्यकादीनां **सम्बधिनीः शतशो मायाः** प्रायुंक्त, स कार्ष्णिः प्रद्युम्नश्च ताः सर्वा माया **व्यधमयत्** व्यनाशयत् ॥ २३ ॥ ततश्च निशातं **तीक्ष्णमसिमुद्यम्य उद्धृत्य** ताम्राणि रक्तानि श्मश्रूणि यस्मिंस्तत् सकिरीटं सकुण्डलं च शम्बरस्य शिरः कायादोजसा बलेन आहरत् छित्वा पातयामासेत्यर्थः ॥ २४ ॥

अन्वितार्थप्रकाशिका

स चेति ॥ **स च** शम्बरोऽसुरः दैतेयीम् आसुरीं मयेन दैत्यदानवाचार्येण दर्शितामुपदिष्टां मायामन्तर्धानाद्यात्मिका-माश्रित्य **वैहायसः** तिरोभूय आकाशे स्थितः सन् कार्ष्णौ प्रद्युम्नेऽश्ममयं **शिलामयम्** । **अस्त्रमयमित्यपि** पाठः । वर्षं मुमुचे अकरोत् ॥ २१ ॥ बाध्यमान इति ॥ महारथः रौक्मिणेयः प्रद्युम्नः **अश्मवर्षेण शिलावर्षेण । अस्त्रेति च पाठः** । बाध्यमानस्ताड्य-मानोऽपि सर्वासुरमायोपमर्दिनीं सत्त्वात्मिकां महाविद्यां प्रायुङ्क्तेत्युत्तरस्यापकर्षः ॥ २२ ॥ **तत इति** ॥ पुनर्दैत्यः **शम्बरः** गौह्यक-गान्धर्वपैशाचोरगराक्षसीः गुह्यकादिसम्बन्धिनीः आदौ **गौह्यकादीनां** सामान्यतो **नपुंसकानां द्वन्द्वः** । ततो मायाविशेषणत्वेन समस्तान् । ङीप् बस्तुतस्त्वार्षः पुंवद्भावः । शतशो मायाः प्रायुङ्क्त । स **कार्ष्णिः प्रद्युम्नश्च** ताः सर्वा माया व्यधमयत् व्यनाशयत् ।

धमतेः सौत्राण्णिच् अमन्तत्वान्मित्त्वम् ॥ २३ ॥ निशातमिति । निशातं तीक्ष्णमसिमुद्यम्य ताम्राणि रक्तानि श्मश्रूणि यस्मिस्तत् सकिरीटं सकुण्डलं च शम्बरस्य शिरः कायादोजसा बलेन आहरत् छित्वा पातयामासेत्यर्थः ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वैहायसो विहायसि गगने स्थितः ॥ २१–२२ ॥ सत्त्वात्मिकां सत्त्वगुणमयीं दैवी प्रायुंक्तेत्युत्तरेणान्वयः । गौह्यकी च गांधवी च पैशाची च ऊरगी च राक्षसी चेति द्वंद्वे कृते ऊरगां तेषु गौह्यकादिषु पुंवद्भाव आर्षः । ताः सर्वामायाः । कार्ष्णिः श्रीकृष्णसुतः व्यधमयत् नाशयामास ॥ २३ ॥ ताम्राणि श्मश्रूणि यस्मिन् तथाभूतं । शिरः उजसाबलेन ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति । असुरः स च स शम्बरोऽपि, मयदर्शितां दैत्यदानवाचार्येण मयनाम्नाऽसुरेणोपदिष्टां, दैतेयीं दैत्यसंबन्धिनीं, मायामन्तर्धानाद्यात्मिकां, समाश्रित्य, वैहायस आकाशे स्थितः सन्, कार्ष्णौ कृष्णपुत्रे प्रद्युम्ने, अश्ममयं शिलामयं, वर्षं, मुमुचे ॥ २१ ॥ बाध्यमान इति । अश्मवर्षेण शिलावृष्ट्या, बाध्यमानस्ताड्यमानः, महारथः रौक्मिणेयो रुक्मिण्याः सूनुः, प्रद्युम्नः, सर्वमायोपमर्द्दिनीं सर्वासुरमायोपघातिनीं, सत्त्वात्मिकां सत्त्वमयीं, महाविद्यां महाविद्याख्यां मायां, प्रायुङ्क्तेत्युत्तरश्लोकस्थक्रियाया अनुषङ्गः ॥ २२ ॥ तत इति । ततः, सः दैत्यः, गौह्यकगान्धर्वपैशाचोरगराक्षसीः गौह्यकादिसम्बन्धिनीः, शतशः, मायाः, प्रायुङ्क्त । ताः, कार्ष्णिः प्रद्युम्नः, व्यधमयत् व्यनाशयत् ॥ २३ ॥ निशातमिति । ततः, प्रद्युम्नः, निशातं तीक्ष्णं, असि खड्गं, उद्यम्य, सकिरीटं, सकुण्डलं, ताम्राणि श्मश्रूणि यस्मिस्तत्, शम्बरस्य शिरः, ओजसा, कायाद्देहात्, अहरत् पातयामासेत्यर्थः ॥ २४ ॥

कृष्णप्रिया

श्री प्रद्युम्न जी ने जब गदा चलायी तब शम्बरासुर मायावी मयदानव ने बतलायी हुई आसुरी माया का आश्रय लिया और आकाश में चला गया और आकाश प्रदेश से ही श्री प्रद्युम्न जी पर अस्त्र शस्त्रों की भारी वर्षा करने लगा। महारथी प्रद्युम्न महान् वीर थे शम्बरासुर शस्त्रास्त्र वृष्टि से प्रद्युम्न जी को पीड़ा देने लगा तब परम गम्भीर कार्ष्णि ने आसुरी समस्त मायाओं को शान्त करने वाली एवं परास्त करने वाली सत्वमयी महामाया का प्रयोग किया ॥ २२ ॥ तब शम्बरासुर ने यक्ष-गन्धर्व-पिशाच-नाग-और राक्षसों की सैकड़ों मायाओं का प्रयोग किया तब भगवान् श्रीकृष्ण के वीर तनय श्री प्रद्युम्न कुमार जी ने अपनी महाविद्या से उन सब मायाओं का सम्पूर्ण नाश किया ॥ २३ ॥ पुनः वीरवर प्रद्युम्न जी ने अपने करकमलों में अतितीक्ष्ण तलवार उठायी और शम्बरासुर का किरीट कुण्डलों से सुशोभित मस्तक धड़ से काटकर अलग कर दिया जो रक्त वर्ण वाली दाढी एवं मूछों से भयंकर दीख पड़ता था ॥ २४ ॥

आकीर्यमाणो [1]दिविजैः स्तुवद्भिः कुसुमोत्करैः । भार्ययाम्बरचारिण्या पुरं नीतो विहायसा ॥ २५ ॥
अन्तःपुरवरं राजन् ललनाशत[2]संकुलम् । विवेश पत्न्या गगनाद् विद्युतेव बलाहकः ॥ २६ ॥
तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससम् । प्रलम्बबाहुं ताम्राक्षं सुस्मितं रुचिराननम् ॥ २७ ॥
[3]अलंकृतमुखाम्भोजं नीलवक्रालकालिभिः । कृष्णं मत्वा स्त्रियो [4]ह्रीता निलिल्युस्तत्र तत्र ह ॥ २८ ॥

कर्दमक्षमा

अन्वयः—हे राजन् ! स्तुवद्भिः, दिविजैः, कुसुमोत्करैः, आकीर्यमाणः, आकाशचारिण्या, भार्यया, विहायसा, पुरम्, नीतः, गगनात्, विद्युता, बलाहकः, इव, पत्न्या, सह, ललनाशतसंकुलम्, अन्तःपुरवरम्, विवेश ॥ २५–२६ ॥ जलदश्यामम्, पीतकौशेयवाससम्, प्रलम्बबाहुम्, ताम्राक्षम्, सुस्मितम्, नीलवक्रालकादिभिः, अलंकृतमुखाम्भोजम्, रुचिराननम्, तम्, दृष्ट्वा, कृष्णम्, मत्वा, स्त्रियः, ह्रीताः, तत्र, तत्र, ह, निलिल्युः ॥ २७–२८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विद्युता सह बलाहको मेघ इव ॥ २६–२७ ॥ नीलाश्च नक्राश्च येऽलकास्त एवालयस्तैः ह्रीता लज्जिताः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दिविजैः देवैः । भार्यया रत्या निजमायाबलेन पुरं द्वारकां नीतः प्रापितः ॥ २५ ॥ अंतःपुरेषु वरं श्रेष्ठम् । अंतःपुरेषु वरं श्रीपट्टमहिषीप्रधानरुक्मिणीगृहम् । हे राजन्निति—यथा भवादृशराजगृहमतीवसुंदरस्त्रीशतसंकुलं भवति तद्वत्तदपीति

---

१. विवुधैः—वीर. । २. रत्न—वीर. । ३. स्वलं—श्रीधर. वंशी. जीव. विश्व. शु. क. सु.; अलं—वीर. विज. । ४. भीता—विज. ।

भावः ।। २६ ।। तं प्रद्युम्नम् । तमिति युग्मकम् । श्रीकृष्णमननाय तत्सादृश्यं जलदेत्यादिसप्तपदैराह । ताम्रे रक्तवर्णे अक्षिणी यस्य तम्, अब्जदलवत्प्रान्तरक्तनेत्रम् 'पद्मदलायतेक्षणम्' इति प्रागुक्तेः ।। २७ ।। तत्रतत्रेतस्ततः । निलिल्युरंर्तर्हिता बभूवुः । निलिल्युर्निलीना वभूवुः, गृहकोणादिषु गुप्ता बभूवुरिति यावत् ।। २८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

दिविजैर्देवैः कर्तृभिः पुष्पसमूहैः करणैः आकीर्य्यमाणः व्याप्यमानः भार्य्यया मायावत्या अम्बरचारिण्येति देवस्वभाव उक्तः अतो विहायसा आकाशमार्गेण पुरं द्वारकां नीतः ।। २५ ।। अन्तःपुरेषु वरं श्रेष्ठं भगवदीयत्वात् सर्वमहिषीवरश्रीरुक्मिणीसम्बन्धात् तत्रापि विशिष्टं पत्न्या रत्या सह ।। २६ ।। तं दृष्ट्वेति युग्मकम् । श्रीकृष्णमननाय तत्सादृश्यमाह । जलदेत्यादि सप्तभिः पदैः ताम्रे रक्तवर्णे अक्षिणी यस्य तम् अब्जदलवत् प्रान्तरक्तनेत्रमित्यर्थः ।। २७ ।। पद्मदलायतेक्षणमिति प्रायुक्तेः ह विस्मये ।। २८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दिविजैः कर्त्तृभिः, पुष्पसमूहैः कृत्वा आ सम्यक् कीर्य्यमाणो व्याप्यमानः, भार्य्यया मायावत्या, अम्वरचारिण्येति देवस्बभाव उक्तः, अतो विहायसा आकाशमार्गेण पुरं द्वारकां नीतः ।। २५ ।। अन्तःपुरेषु वरं श्रेष्ठं श्रीभगवदीयत्वात्, किंवा सर्व्वमहिषीश्रेष्ठश्रीरुक्मिणीसम्बन्धात्, अतएव ललनानां परमसुन्दरांगनानां श्रीकृष्णमहिषीणामन्यासां वा श्रीरुक्मिणीसख्यादीनां शतैः संकुलं व्याप्तम्, पत्न्या रत्या सह हे राजन्निति प्रहर्षोदयात्, किंवा राजमानः सन् श्यामगौरवर्णयोस्तयोराकाशतः सहसा प्रवेशे दृष्टान्तः—विद्युतेवेति ।। २६ ।। श्रीकृष्णमननाय तत्सादृश्यमाह—जलदेत्यादिसप्तपदैः । तत्र जलद-शब्देन सजल–नवमेघोऽभिप्रेतः, तेन सुश्यामतोक्ता; ताम्राक्षं प्रान्तरक्ताब्जपत्रतुल्याक्षमिति ज्ञेयम्, पद्मदलायतेक्षणमिति प्रागुक्तेः; रुचिराननमित्यनेन श्रीनासाद्यवयवानां सौन्दर्य्यं तथा सुकोमलगण्डत्वादिना पूर्व्वोक्तरूढयौवनानुसारेण नवयौवनोद्भेदश्च सूचित एव; तथा च श्रीविष्णुपुराणे (५।२७।२१) श्रीरुक्मिणीदेव्युक्तौ—'धन्यायाः खलु पुत्रोऽयं वर्त्तते नवयौवने' इति; ईदृशं श्रीहरिवंशेऽपि सुष्ठु कुण्डलादिभ्योऽपि विशेषेणालंकृतं मुखाम्भोजं यस्य तम्, अम्भोजालिरूपकाभ्यां भृंगव्याप्ताब्जवच्छोभा ध्वनिता, विशेषणानामेषां यथोत्तरं श्रीकृष्णमनेन श्रैष्ठ्यम् । श्रीकृष्णमननाय तादृशान्यसौन्दर्य्यादौ वर्णयितुमपेक्ष्येऽप्येतावदेव वर्णनं श्रीकृष्णेन तस्यासाधारणत्वात्, किंवा एतावतैव तन्मननपूर्त्तेः । यद्वा, जलदेति वर्णादेः शोभा व्यञ्जितैव; पीतेति सर्व्वस्यालंकारस्य, प्रलम्बेत्यवयववर्गसौष्ठवस्य, ताम्रेति सौन्दर्य्यस्य. सुस्मितमिति माधुर्य्यस्य, रुचिरेति सांग-श्रीमुखसहजसौन्दर्य्यविशेषस्य वयसश्चोपलक्षणम् ।। २७ ।। स्वलंकृतेति अलककुण्डलादिद्वारा श्रीमुखशोभाविशेषापेक्षयेति; स्त्रियः श्रीमहिष्याद्यास्तत्र तत्र स्थाने स्थाने नितरां लिल्युः । कुतः ? ह्रीता लज्जिताः, ह विस्मये, स्फुटमिति वा ।। २८ ।।

श्रीमद्वीरराघवाचार्यंकृता भागवतचन्द्रचन्द्रिका

आकीर्य्यमाण इति । स्तुवद्भिर्विविधैर्देवैः कर्तृभिः कुसुमोत्करैः कुसुमाञ्जलिभिः कुसुमजालैर्वा आकीर्य्यमाणः प्रद्युम्नः अम्बरे स्वयं चरति अन्यांश्च चारयति तच्छीला तथा तया भार्यया कर्त्र्या विहायसा आकाशमार्गेण पुरीं द्वारकां प्रति नीतः ।। २५ ।। तत्र हेराजन् ! ललनाः स्त्रिय एव रत्नानि तैः सङ्कुलम् अन्तःपुरश्रेष्ठं पत्न्या सह प्रविवेश यथा विद्युता सह वलाहको नीलमेघस्तद्वत् ।। २६ ।। तमिति । तं प्रविष्टं प्रद्युम्नं दृष्ट्वा स्त्रियः कृष्णमेव मत्वा लज्जितास्तत्र तत्र निलिल्युः कृष्णं मत्वेत्यत्र हेतुं वदन् कृष्णासाधारणैर्धर्मैर्विशिनष्टि । जलदश्याममित्यादि । प्रलम्बौ दीर्घौ बाहू यस्य तं नीला वक्राश्च येऽलकास्त एवालयस्तैरलंकृतं मुखाम्भोजं यस्य तम् ।। २७–२८ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ताम्रे रक्तवर्ण अक्षिणी यस्य तम् अब्जवत् प्रान्तरक्तवर्णाश्रमित्यर्थः ।। २७–३९ ।।

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

तं दृष्ट्वेत्यादि कृष्णाकारत्वात्, अतः श्रीकृष्णो द्वारकायामन्तःपुरे द्विभुज एवेति । कृष्णभानत्वे हेतुः—जलदश्याममित्यादि—विशेषणानि ।। २७ ।। अतः कृष्ण एष इति मत्वान्तःपुरस्थिताः स्त्रियो दासीप्रभृतयस्तत्र तत्र निलिल्युर्लीना वभूवुः । कुतः ? इत्याह—ह्रीता लज्जिताः । एतेन श्रीकृष्णस्य नित्यकिशोरत्वम् ।। २९–३९ ।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तं दृष्ट्वा जलदश्याममित्यादि । कृष्णाकारं कृष्णसदृशम्, यतो जलदश्यामम्, अत एव तं कृष्ण एष इति मत्वा ह्रीता लज्जिताः सत्यः स्त्रियः श्रीरुक्मिणी-परिचारिकास्तु तत्रैव निलिल्युः । एतेन श्रीकृष्णस्य सदाकिशोरत्वं व्यज्यते ।। २९–३९ ।।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

ह्रीताः लज्जिताः ॥ २८ ॥

गूढार्थदीपिनी

दिविजैः देवैः । **आकीर्यमाण** आच्छाद्यमानः । **उत्करैः** समूहैः ॥ २५ ॥ **बलाहको** मेघः ॥ २६ ॥ तमिति युग्मम् । नीला **वक्राश्च** अलका एव अलयस्तैः । तत्र तत्र इतस्ततः । हेति संकोचे । **ह्रीता** लज्जिताः ॥ २७-२८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ननु व्रतार्के एकविंशद्दिनं **यावद्बाहुप्रहरणो** विभुरित्येकविंशद्दिनोक्तिरत्र त्वष्टाविंशाहमित्युक्तिः कथमिति चेन्न । नागरगमनं सप्तमे दिने नैकविंशाहोक्तिस्तत्रात्र तु सह तत्सप्तकेनाष्टाविंशाहोक्तिरिति सङ्ख्यासाम्यसम्भवात् । द्वारकावासिनः सर्वे गतास्ते सप्तमे दिन इति तत्रैवोक्तेः । **बाहुभ्यामेव** गोविन्दो दिवसानेकविंशतिमित्यादिर्हरिवंशोऽपि व्याख्यातोऽनेनेति ज्ञेयम् । निष्पिष्टान्यङ्गस्योरूणि **बन्धनानि शिरस्थानानि यस्य सः क्षीणं** सत्त्वं बलं यस्य सः **स्विन्नं गात्रं वपुर्यस्य** सोऽतिविस्मितो मामेवं विलष्टं कुर्वन्न विष्ण्वन्यः स्यादिति ॥ २५ ॥ ज्ञातं **प्रमेयं विज्ञापयति** । जाने त्वामिति । सर्वभूतानां प्राण ओजोऽवष्टम्भः सहः सहनं बलं तत्प्रापकं पुराणपुरुषं **प्रभविष्णुं जगदुत्पादशीलमधीश्वरं** विष्णुं जाने ॥ २६ ॥ **विश्वसृजां** ब्रह्मादीनां सृष्टानामेषामधिपः पालयिता कलयतां संहर्तृत्वेन त्वया **स्थापितानां कालः** संहारक आत्मनां जीवानामात्मा पर उत्तमात्मा ॥ २७ ॥ स्वोपास्यदशस्यन्दननन्दनात्मतया नन्दनन्दनमभिनन्दयन्नाह । **यस्येति** । यस्य रामस्येषदुत्कलितोऽल्पमङ्कूरितो रोषः प्रदर्शनमात्रमभिप्रेतं तेनाविर्भूता ये **कटाक्षमोक्षास्तैः क्षुभिताश्चलिता नक्रास्तिमिङ्गिलाश्च** यस्मिन्सोऽब्धिरकूपारो वर्त्म **मार्गमदिशद्ददौ** । **स्वयशस्तद्रूपः सेतुः** कृतः । सकारान्तानामकारान्ततेति **पक्षे स्वयशसे** तदर्थमिति वा । **लङ्का** चोत्कलिता हनुमद्द्वारा रात्रिसङ्ग्रामे कपिभिश्च **रक्षश्शिरांसीषुक्षतानि** भुवि **पेतुः** ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एतत्कर्म न **विगीतमिति विज्ञापयितुं** देवानां सम्माननामाह **आकीर्यमाण** इति । आकीरणं सर्वत्र वृष्टिः । कायिके वाचनिके चोक्ते । **अर्थान्मानसिकमुक्तमिति सर्वथा देवानामादर** उक्तः । ततो मायावत्या अम्बरचारिण्या विहायसा आकाशमार्गेण प्रद्युम्नो द्वारकां नीतः । **आदौ भगवद्गृहे पुत्रत्वे सिद्धे पश्चादन्यत्र** पुत्रत्वं सिध्यत्विति । पुरशब्देन **अन्तः**पुरमप्युच्यते । कृष्णान्तःपुरं नीतवती प्रद्युम्नस्य परिज्ञापनार्थम् ॥ २५ ॥ **अन्तःपुरेषु वरम्** । ललनाशतैः संकुलम् । **विद्युतेव बलाहक** इति शोभा दोषाभावश्चोक्तः । आकाशमार्गेण प्रवेशे **विचारोऽपि न जातः** । आधिदैविकास्तु जानन्तीति न विरोधं कुर्वन्ति । पत्न्या सह प्रवेशात् लौकिकोऽपि न दोषः ॥ २६ ॥ **ततोऽन्तःपुरं प्रविष्टस्य** विचारमाह तं दृष्ट्वेत्यष्टभिः । सर्वासां त्रिभिर्विचारः, रुक्मिण्याः पञ्चभिः । साधारणीनां विचारे हेतुं वक्तुं **प्रथमतो** मोहमाह । अन्तःपुरे यावन्तो जनाः, सुतरां स्त्रियः, तं प्रद्युम्नं भगवत्सदृशं दृष्ट्वा, कृष्णं मत्वा, **प्रथमतः** ह्रीताः लज्जिताः सत्यः **कृष्णस्य स्त्रियो** निलिल्युः । ता हि स्वच्छन्दं क्रीडमाना; स्थिताः । अतो भगवान् दृष्टवानिति लज्जा । भगवत्समानतां **वक्तुं विशेषणान्याह जलदश्याम**मित्यादिना । भगवान् षड्गुणसहितः, स्वयमयमपि सप्तधा समान इति । श्रीवत्स**कौस्तुभौ विना अन्यस्योपलक्षणं** वर्णनम् । जलदश्याममिति रूपतुल्यता । आकृतिस्तु पुत्रत्वादेव समाना भवति । पीतपट्टाम्बरमिति **परिच्छदतुल्यता । प्रलम्बबाहु**र्मिति स्त्रीणां सम्यक् ज्ञातावयवतुल्यता । **ताम्राक्ष**मिति अनौचित्यात् क्रुद्ध इव स ज्ञातः । इदं **वैलक्षण्यमग्रे वक्ष्यति** । सुस्मितमिति । तासां भाव्यो धर्मः । रुचिरमाननमिति सर्वोत्कृष्टशोभा । अलङ्कृतं मुखाम्भोजं यस्य । नीलैर्वक्रैरलकादिभिः, **आदिशब्देन** कुण्डलकिरीटादिभिः, किं वहुना **भगवदीया** सर्वा सामग्री ग्राह्या । मुखं हि सर्वेषां भेदजनकम् । तदेव तुल्यं **जातमिति भ्र**मो युक्तः । यत्र क्वचिल्लीना इति निलीय दर्शनं सम्भवतीति निरूपितम् ॥२८॥

श्रीसुबोधिनीसारः

स्तुवद्भिः स्तुतिं **कुर्वद्भिर्दिविजैर्देवैः** कुसुमानां पुष्पाणामुत्करैर्वृंदैराकीर्यमाण आच्छाद्यमानोंबरचारिण्या भार्यया स्त्रिया विहायसाऽऽकाशमार्गेण **पुरीं द्वारकां** नीतः ॥ २५ ॥ हे राजन् ललनानां स्त्रीणां **शतैः** संकुलं व्याप्तम् अंतःपुरोत्तमं पत्न्या भार्यया सह विवेश **गगनादाकाशाद्विद्युता सह बलाहको मेघ इव** ॥ २६ ॥ जलदो मेघस्तद्वत् श्यामं पीतांबरं सुदीर्घबाहुं शोणनेत्रं सुष्ठुस्मितयुक्तमर्शआदित्वादच् **सुंदरमुखम्** ॥ २७ ॥ नीला **वक्राः** कुटिला येऽलकादयस्तैः सुष्ठु अलंकृतं मुखांभोजं मुखपद्मं यस्य तं प्रद्युम्नं कृष्णं मत्वा **स्त्रियो ह्रीता लज्जिताः** तत्र तत्र निलिल्युः ह स्फुटम् ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

स्तुवद्भिर्दिविजैर्देवैः **कुसुमोत्करैः** पुष्पाञ्जलिभिराकीर्यमाणः आच्छाद्यमानः प्रद्युम्नः **अम्बरे** आकाशे स्वयं चरति अन्यांश्च चारयतीति तच्छीलया **भार्यया मायावत्या** विहायसा आकाशमार्गेण पुरंप्रति नीतः प्रापित इत्यन्वयः ॥ २५ ॥ ततश्च

हे राजन् ! यथा विद्युता सह बलाहको नीलमेघो गगनादवतीर्य प्रविशेत्तथा पत्न्या सह ललनानामुत्तमस्त्रीणां शतैः शङ्कुलं व्याप्तं अन्तःपुरश्रेष्ठं विवेशेत्यन्वयः ॥ २६ ॥ तदा तं प्रद्युम्नं दृष्ट्वा कृष्णं मत्वा ह्रीता लज्जिताः स्त्रियस्तत्र तत्र निलिल्युरिति द्वयोरन्वयः । कृष्णाभिमाने कृष्णासाधारणगुणान् हेतुत्वेन दर्शयति—जलदो मेघस्तद्वत् श्यामम् । पीते कौशेये कीटविशेषरचितकोशजनिततन्तुनिर्मिते वाससी यस्य तम् । प्रलम्बौ बाहू यस्य तम् । ताम्राक्षं रक्तनेत्रम् । सुस्मितं मन्दहासयुक्तम् । रुचिरं स्वत एवातिसुन्दरमाननं यस्य तम् ॥ २७ ॥ नीला वक्राश्च ये अलकास्त एवालयः, तैः स्वलङ्कृतं मुखाम्भोजं यस्य तम् । 'एवं सर्वथा श्रीकृष्णसादृश्यमाश्चर्यमेव' इति द्योतयति—हेति ॥ २८ ॥

अन्वितार्थप्रकाशिका

आकीर्यमाण इति ॥ स्तुवद्भिः दिविजैर्देवैः कुसुमोत्करैः पुष्पाञ्जलिभिराकीर्यमाणः आच्छाद्यमानः प्रद्युम्नः अम्बरे आकाशे स्वयं चरति अन्यांश्च चारयतीति तच्छीलया भार्यया मायावत्या विहायसा आकाशमार्गेण पुरं प्रति नीतः प्रापितः ॥२५॥ अन्तरिति । हे राजन् ! यथा विद्युता सह बलाहको नीलमेघो गगनादवतीर्य प्रविशेत्तथा पत्न्या सह ललनानामुत्तमस्त्रीणां शतैः सङ्कुलं व्याप्तं श्रीकृष्णस्य अन्तःपुरेषु वरं श्रेष्ठं रुक्मिणीगृहं विवेश ॥ २६ ॥ तमिति द्वयम् ॥ जलदो मेघः तम् इव श्यामं पीते कौशेये कीटविशेषरचितकोशजनिततन्तुनिर्मिते वाससी यस्य तं प्रलम्बौ बाहू यस्य तं ताम्राक्षं रक्तनेत्रं सुस्मितं मन्दहासयुक्तं रुचिरं स्वत एवातिसुन्दरमाननं यस्य तं नीला वक्राश्च ये अलकास्त एवालयास्तैः स्वलंकृतं मुखाम्भोजं यस्य तं प्रद्युम्नं दृष्ट्वा कृष्णं मत्वा ह्रीता लज्जिताः स्त्रियस्तत्र तत्र निलिल्युरिति ॥ २७–२८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दिविजैः देवैः कुसुमोत्करैः पुष्पसमूहैः विहायसा आकाशमार्गण पुरं द्वारावतीं ॥ २५ ॥ विद्युता सह बलाहकः । वारिवाहकः पयोद इव ॥२६–२७॥ नीलाः श्यामाश्च वक्राश्च ये अलकास्त एवालयो भ्रंगास्तैः कृष्णं मत्वा ह्रीताः लज्जां प्राप्ताः ॥२८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आकीर्यमाण इति । ततः स्तुवद्भिः, दिविजैर्देवैः कर्त्तृभिः कुसुमोत्करैः कुसुमाञ्जलिभिः कुसुमजालैर्वा करणैः आकीर्यमाणः प्रद्युम्नः, अम्बरे स्वयं चरत्यन्यांश्च चारयति तच्छीला तया, भार्यया रत्या कर्त्र्या, विहायसाऽऽकाशमार्गेण, पुरीं द्वारिकां, नीतः प्रापितः ॥ २५ ॥ अन्तःपुरेति । हे राजन्, तत्र ललनाः स्त्रिय एव रत्नानि तैः संकुलं, ललनाशतसंकुलमित्यपि पाठः । अन्तःपुरं, विद्युता सह वर्त्तमानः, बलाहको मेघः इव, प्रद्युम्नः गगनात्, सकाशात्, पत्न्या सह, विवेश ॥ २६ ॥ तमिति स्वलंकृतमिति च । जलदश्यामं, पीतकौशेयवाससं, प्रलम्बबाहुं, ताम्राक्षं रक्तनयनं, सुस्मितं मन्दहाससहितं, रुचिराननं सुन्दरवदनं, नीला वक्राश्च ये अलकास्त एवालयस्तैः स्वलंकृतमुखाम्भोजं, तं प्रविष्टं प्रद्युम्नं, दृष्ट्वा, श्रीकृष्णं, मत्वा च ह्रीता लज्जिताः, स्त्रियो भगवदङ्गनाः, ह स्फुटमेव, तत्र तत्र, निलिल्युः । इति द्वयोरेकसम्बन्धः ॥ २७–२८ ॥

कृष्णप्रिया

विजयी वीर प्रद्युम्न जी पर देव लोगों ने प्रसन्नता प्रकट करते हुए पुष्प वर्षा की, एवं प्रद्युम्नजी का यशोगान करने लगे और आकाश मार्ग से विमान द्वारा अथवा दिव्य गति द्वारा निजाङ्गना श्रीरति देवी के साथ श्री प्रद्युम्न जी को द्वारिकानाथ की दिव्य पुरी में ले गयी ॥ २५ ॥ महाराज परीक्षित् ! आकाश मार्ग से मेघश्याम सांवरे वर प्रद्युम्न जी के साथ गौर वर्णिनी रतिदेवी प्रस्थान कर रहे थे तब तो ऐसा रमणीय दृश्य बना कि मान लीजिये बिजली के साथ मेघ का युगल जा रहा हो। श्यामसुन्दर द्वारिकाधीश भगवान् श्रीकृष्ण के अन्तःपुर में प्रवेश किया जहाँ वर वर्णिनी सैकड़ों रमणियाँ निवास करती थी।२६। अन्तःपुर वासिनी नारियों ने देखा कि इस पुरुष का श्रीअङ्ग वर्षा कालीन मेघ के समान साँवरा था और पीतवर्ण का कौशेय धारण किया था, दो भुजाएँ घुटनों तक लंबी थी, रतनारे नेत्र युगल थे और मुख सरोज पर घुंघराली एवं नीली अलकावली इस प्रकार सुशोभित हो रही हैं मानो भौंरे खेल रहें हो और मुख पर मन्द मन्द मुसकान की अनूठी छटा चित्त चुरा लेती थी। श्रीकृष्णचन्द्र की सर्व अर्धाङ्गनाएँ प्रद्युम्न जी को श्रीकृष्ण मानकर सकुचा गयीं और घरों में लुक-छिप गयीं ॥ २७–२८ ॥

[1]अवधार्य शनैरीषद्वैलक्षण्येन योषितः । उपजग्मुः प्रमुदिताः सस्त्रीरत्नं [2]शुचिस्मिताः ॥ २९ ॥
अथ तत्रासितापाङ्गी वैदर्भी वल्गुभाषिणी । अस्मरत् स्वसुतं नष्टं स्नेहस्नुतपयोधरा ॥ ३० ॥
को न्वयं नरवैदूर्यः कस्य वा कमलेक्षणः । धृतः कया वा जठरे केयं [3]लब्धा त्वनेन वा ॥ ३१ ॥
मम [4]चाप्यात्मजो नष्टो नीतो यः सूतीका [5]गृहात् । एतत्तुल्य [6]वयोरूपो यदि जीवति कुत्रचित् ॥ ३२ ॥

---

१. उप–विज. । २. सुवि–श्रीधर. वंशी. जीव. शुक. सु. ; शुचि–वीर. बिज. । ३. क्वेयं–वीर. ; कया लब्धोऽथक्तेन वा–विज. । ४. ममास।वा–वोर. । ५. लयात्–प्रा. पा. । ६. सम–बिज. ।

कर्दमक्षमा

अन्वयः--शनैः, शनैः, इषत्, वैलक्षण्येन, अवधार्य, शुचिस्मिताः, प्रमुदिताः, योषितः, सस्त्रीरत्नम्, प्रद्युम्नम्, उपजग्मुः ॥ २९ ॥ अथ, तत्र, असितापाङ्गी, वल्गुभाषिणी, वैदर्भी, नष्टम्, स्वसुतम्, अस्मरत्, ततः, स्नेहस्नुतपयोधरा, जाता ॥ ३० ॥ अयम्, नरवैडूर्यः, कः, नुः ? वा, कमलेक्षणः, कस्य ? कया, बा, जठरे, धृतः ? वा, अनेन, तु, लब्धा, इयम्, का वा ॥ ३१ ॥ मम, अपि, आत्मजः, यः, सूतिकागृहात्, नोतः, च, नष्टः, यदि, कुत्रचित्, जीवति, चेत्, एतत्, तुल्यवयोरूपः, भवेत् ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीकृष्णो न भवतीत्यवधार्य स्त्रीषु रत्नं श्रेष्ठा रतिस्तत्सहितम् ॥ २९-३० ॥ सुतं स्मरन्त्याह। कोन्वयमिति नरवैदूर्यः पुरुषश्रेष्ठः ॥ ३१ ॥ एतेन तुल्यं वयो रूपं च यस्य स भवेदिति ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वैलक्षण्येन कृष्णलक्षणविपरीत लक्षणेन। ईषद्वैलक्षण्यं वर्णादिशोभातः किंचिन्न्यूनत्वम्, वयसश्च तादृशभावनिरीक्षणादिराहित्यैर्विनयिदृष्टत्वादिकञ्च, तेनावधार्य उप समीप आजग्मुः। प्रकर्षेण मुदिताः श्रीकृष्णस्वरूपस्वाभाव्यात्। सुविस्मिताश्चान्यत्र तदसंभवात्। स्त्रीति सामान्यनिर्देशस्तत्पत्नीत्वज्ञानरहितानां तासामभिप्रायेणः। रत्नत्वनिर्देशस्तत्स्पर्शेन तादृशीत्वप्राप्तेः ॥ २९ ॥ अथ स्त्रीसमागमोत्तरम्। तत्र स्त्रीषु। असितापांगी नीलरुचिनेत्रांता। अथ समागमोत्तरमेव। तत्र तासु पश्यंतीषु मध्ये। असितापांगीति विलोकनसौंदर्यस्य, वल्गुभाषिणीति भाषणसौंदर्यस्याभिप्रायेण। अस्मरत्सारूप्यदर्शनेनानुसंदधे। स्वशब्देन स्नेहाधिक्यमुक्तम्। तदेवाह—स्नेहेति। चिरातीतत्वेऽपि स्नुतपयोधराऽभूत् ॥ ३० ॥ अनेन नरश्रेष्ठेन, नराकारवैदूर्यमणिवद्दीप्यमानेन वा ॥ ३१ ॥ प्रकारांतरेण शंकते—ममेति। नष्टोऽदर्शनं गतः। अपि संभावनायाम्। यदि कुत्रापि जीवेत्तदैतत्तुल्यवयोरूपो भवेदित्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ईषद्वैलक्षण्यं वर्णादिशोभातः किञ्चिन्न्यूनत्वं वयश्च तथा तादृशभावनिरीक्षणादिराहित्यै विनयिदृष्टित्वादिकं च तेनावधार्य्य उपसमीपे जग्मुः प्रकर्षेण मुदिताः श्रीकृष्णसारूप्यस्वाभाव्यात् शुचिस्मिताश्च अन्यत्र तदसम्भवात् स्त्रीति सामान्यनिर्देशस्तत्पत्नीत्वज्ञानोदयरहितानां तासामभिप्रायेण रत्नत्वनिर्द्देशः तत्स्पर्शेन तादृशीत्वप्राप्तेः ॥ २९ ॥ अथ समागमादनन्तरमेव तत्र तासु पश्यन्तीषु मध्ये असितापाङ्गीति बिलोकनसौन्दर्य्यस्य वल्गुभाषिणीति भाषणसौन्दर्य्यस्याभिप्रायेण अस्मरत् सारूप्यदर्शनेनानुसन्दधे स्वशब्देनात्यन्तस्नेहविषयतोक्ता अत एव चिरकालेऽतीतेऽपि स्नेहस्नुतपयोधरा सती ॥ ३० ॥ नरवैदूर्यः नरेषु स इव श्रेष्ठः कस्य पुत्रो वा ॥ ३१ ॥ नष्टः अदर्शनं गतः अपि सम्भावनायां यदि कुत्रापि जीवेत् तदैतत्तुल्यवयो भवेदित्यर्थः ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ईषद्वैलक्षण्यं श्रीभगवतो वर्णादिशोभायाः सकाशात् किञ्चिन्न्यूनत्वम्; पुत्रत्वेऽपि प्रतिबिम्बरूपत्वात्। यद्वा, तद्वत्सभावनिरीक्षणादिराहित्यं विशेषतस्तासु विनयादिदृष्ट्या नम्रमुखत्वादिकञ्च तेनावधार्य्य, शनैरिति प्रायो द्वयोः समरूपतया धैर्य्यादिना शीघ्रतदीयभावानभिव्यक्त्या वा, किंवा तासामेव सहजवात्सल्य-लज्जादिना सुबुद्ध्यस्फूर्त्त्या सद्यो निश्चयाशक्तेः, उप समीपे जग्मुः, प्रकर्षेण मुदिताः--वात्सल्यभावविशेषोदयात् श्रीकृष्णसारूप्यदर्शनाद्वा, सुविस्मिताश्च, अकस्मात्तत्रागमनात्, स्वप्रभुसारूप्याच्च, स्त्रीरत्नमिति तदानीं तासु तस्यास्तत्पत्नीत्वाज्ञानाभिप्रायेण ॥ २९ ॥ अथ समीपगमनानन्तरमेव, तत्र तासु मध्ये, तस्मिन् वा स्थाने, असितापांगीति स्नेहेनेयदीक्षणस्य, वल्गुभाषिणीति च सुन्दरभाषणस्याभिप्रायेण, तच्च को न्वयमित्यादिना व्यक्तं भावि। स्व-शब्देनात्यन्तस्नेहविषयतोक्ता, अत एव चिरकालेऽतीतेऽपि स्नेहेन स्नुतपयोधरा सती स्मरणेनैव स्नुतपयोधरत्वे जातेऽपि तथाभूतास्मरदिति स्मरणक्षरणयोरेककालता स्नेहभरविवक्षयाभिप्रेता। यद्वा, दर्शनमात्रेणैव स्नेहस्नुतपयोधरा सती, यद्वा, ततश्च स्नेहस्नुतपयोधराभूदिति पृथग् वाक्यम् ॥ ३० ॥ नु वितर्के, नरवैदूर्य्यत्वमेवोद्दिशति--कमलेक्षण इति। एतच्चाशेषमहापुरुषलक्षणस्योपलक्षणम्, कस्य पुत्रो वा जठरे धृत इति पितुः सकाशान्मातुः स्नेहाधिक्येन विशेषं सूचयति ॥ ३१ ॥ तुल्यतया स्वपुत्रस्य स्मारणेन स्नेहाकृष्टचित्तोद्भावयति--ममेति। नष्टोऽदर्शनं गतः, यतो नीतः; केनचित् नेतुरज्ञानात्तदनिर्द्देशः। अपि सम्भावनायाम्, स यदि कुत्रापि जीवेत्, तदैव तुल्यवयोरूपो भवेदित्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततस्ता योषितः शनैरीषद्वैलक्षण्येन श्रीवत्साद्यभावरूपेणेति भावः अवधार्य्य कृष्णो न भवत्ययमिति निश्चित्य स्त्रीरत्नेन सहितं प्रद्युम्नमुपजग्मुः समीपमाजग्मुः ॥ २९ ॥ अथ तत्रेति बल्गु सुन्दरं यथा तथा भाषते इति तथा सा वैदर्भी रुक्मिणी नष्टं

सुतमस्मरत् स्नेहेन स्नुतौ तरलौ पयोधरौ यस्याः इत्थं प्राहेति शेषः ॥ ३० ॥ उक्तिमेवाह । कोन्विति पञ्चभिः । अयं नर एव वैडूर्यः पुरुषरत्नमित्यर्थः कोनु को वा कस्य वा सम्बन्धी पुत्र इति यावत् कया स्त्रिया जठरे धृतः कस्याः पुत्र इत्यर्थः । अनेनेयं स्त्री क लब्धा ॥ ३१ ॥ योऽसौ ममात्मनः सूतिकागृहान्नीतो नष्टोऽदृष्टश्च स एवायं किम्वेत्यर्थः । एतेन तुल्यं वयो रूपं च यस्य सोऽस्मत्पुत्रः कच्चिद्यदि जीवति ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृष्णो न भवतीत्यवधार्य तमिति पूर्वस्याऽनुषङ्गः ॥ २९-३० ॥ नरवैडूर्य्यः पुरुषश्रेष्ठः कस्य पुत्रः ॥ ३१ ॥ नीतो बालग्रहेण ॥ ३२-३९ ॥

गूढार्थदीपिनी

अवधार्य नायं **कृष्ण इति** निश्चित्य । स्त्रीरत्नं रतिः ॥ २९ ॥ वल्गु मधुरम् ॥ ३० ॥ **वैदूर्यः** नीलमणिद्दीप्यमानः । **कस्य पुत्र इति** शेषः ॥ ३१ ॥ **एतेन तुल्यं वयो रूपं च यस्य** सः तथा भवेत् ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्त्रीषु रत्नं श्रेष्ठा रतिस्तत्सहितम् ॥ २९-३० ॥ नरेषु वैडूर्यः श्रेष्ठः ॥ ३१ ॥ एतेन तुल्ये वयोरूपे यस्य सः यदि जीवति तर्हि कच्चिद्भवति ॥ ३२-३९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इति विज्ञातं विज्ञानं ज्ञानात्मकं ब्रह्म येन स तमृक्षराजानं । समासान्तबिधेरनित्यत्वान्न टच् । तं प्रति अच्युतो व्याजहार ॥ २९ ॥ शंकरेण करेण तमभिमृश्य मेघगम्भीरया गिरा व्याजहार ॥ ३० ॥ वयं हे ऋक्षपते ऋक्षपत इति वा आत्मनो मिथ्याभिशापं प्रमृजन् । किं प्रयुक्तस्त्वमभिशापयुक्त इत्यत आह । अमुना मणिनेति । वयमिति बहुवचनं रामादिरूपाणां संङ्ग्रहार्थम् । मृजन्नित्येकवचनं च तेषामैक्यसूचनार्थमिति बोध्यम् । यद्वा नागरैः सहागमनाद्वयमित्युक्तिस्तथाऽन्तश्चैक एव विवेशापयशश्चैकमात्रस्येत्येकवचनेन च सम्भवति ॥ ३१ ॥ स्वां दुहितरं जाम्बवतीं नाम्ना कन्यां दीप्तिमतीं कन्यामविवाहितां सहमणिमिति कन्याविशेषणं स जाम्बवान्कृष्णायोपजहार ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो जिज्ञासायां भगवतः किञ्चिदाधिक्यं श्रीवत्सादिकं च दृष्ट्वा ईषद्वैलक्षण्येन साक्षाद्भगवानयं न भवतीति निश्चित्य, तत्तुल्यत्वेन तदीयत्वं च निश्चित्य, पुत्र एवायं भविष्यतीति प्रमुदिताः सत्यः स्त्रीरत्नसहितं तं द्रष्टुं सर्वा एव योषितः समागताः । शुचि स्मितं यासामिति तासां भावान्तरं निवारितम् ॥ २९ ॥ तत्र रुक्मिण्यपि समागता, तासां तस्याश्च पूर्वोक्ता धर्मास्तुल्याः । विशेषं वक्तुं प्रक्रियान्तरमारभते **अथेति** । भगवत्पुत्रो भवतीति सम्भावनया सिद्धम् । तासां त्वस्मत्पुत्रो न भवतीति निश्चयः । अस्यास्तु सन्देह इति भिन्नः प्रक्रमः । ननु पुत्रत्वे निर्धारिते पश्चात्स्वस्याः अन्यस्या वेति विचारो युक्त इत्याशङ्क्य, भगवत्पुत्रत्वं निर्धारयितुं एकहेलया स्वस्या अपि प्रथमतः सादृश्यं ज्ञातवतीत्याह । **तत्र** स्त्रीसमूहे, असितापाङ्गी शोभनदर्शना, असिते कृष्णे वा अपाङ्गौ यस्या इति, तेन ज्ञानदृष्टिरस्याः अन्यापेक्षया विलक्षणेति इयमेव सादृश्येन पुत्रं स्मृतवती, यतो **वैदर्भी** अत्यन्तं भक्ता । अन्तःकरणदेहयोः उत्तमत्वमुक्त्वा मध्ये वाचोऽप्युत्तमतामाह । अन्यथा कायवाङ्मनसां एकमतुल्यं स्यादिति । वल्गु भाषत इति वल्गुभाषिणी । सादृश्येन संस्कार उद्बुद्ध इति स्वसुतं नष्टमस्मरत् । यद्यप्यत्यन्तशिशोः स्थूलस्यापि नावयवादिसाधारण्यम्, तथापि तस्याः त्रिविधोऽप्युत्कर्ष उक्त इति तादृशस्यैव वृद्धावयं भावो भवतीति निश्चित्य स्वसुतं नष्टमस्मरत् । स्नेहेन स्नुतौ पयोधरौ यस्या इति । आधिभौतिकस्य देहस्य आधिदैविकस्यापि तत्सम्पादकस्य संवादो निरूपितः ॥ ३० ॥ एतदीयाश्चत्वारो धर्मा निरूप्यन्ते । आन्तर एको, वाह्यास्त्रयः । आदौ परिदृश्यमानं सम्भावयति **को न्वयमिति** । **नु** इति वितर्के । अयं कः, देवादिषु मध्ये क इत्यर्थः । वैडूर्यमणिः श्यामपीतो भवति । अयं नीलमेघश्यामोऽपि तया सहितस्तत्कान्त्या वैडूर्यतुल्यो जातः । वैडूर्यमणिश्चेत्, नराकारः सहज एवोत्पन्नो भवेत् । सोऽपि चेतनो भवेत्, तदा प्रद्युम्नतुल्यः स्यादिति मत्वाह **नरवैडूर्य इति** । ननु कस्यचिद्वंशे एतादृशा एवोत्पद्यन्ते, यथा देशविशेषे पाषाणा हीरकरूपा भवन्ति, तस्मान्नाश्चर्यमिति चेत्, तत्राह **कस्य वेति** । को वा एतादृशः यस्यायं पुत्रो भवेत् । कमलेक्षणत्वान्न स्थावरस्य । स्त्रिया अपि भावोऽस्मिन् दृश्यत इति न स्थावराज्जातः । नापि मानसः, नापि केवलात् पुरुषात् । अतः का वा तादृशपुरुषयोग्येति तां भावयति **कया वा जठरे धृत** इति । अस्तु वा इयं भार्या एतद्योग्या, कथमनेनोपलब्धेत्याह **केयं लब्धेति** । अनेनापि इयं का लब्धा ।

वेत्यनादरे । रुक्मिणीहृदये सा न सम्यग्भातीति । पूर्वजन्मसम्बन्धिनीति ॥ ३१ ॥ एतद्दर्शनेन स्वपुत्रस्मरणात् सादृश्यमेव स्मारकमिति सादृश्यमुपपादयति । **मम चापीति** । यथा कस्याश्चिदयं पुत्रः, एवं ममापि पुत्रः एतादृशो भवतीति । **आत्मज** इति गर्भाज्जातः । भिन्नतया विद्यमानं चारुदेष्णमन्यं वा तुल्यतया निरूपयतीत्याशङ्क्य व्यावर्तयति **नष्ट** इति । तर्हि मृतस्य कथं तुल्यतेत्याशङ्क्याह **नीत** इति । अयं नाशः अदर्शनार्थः । सूतिकागृहादित्यनिर्देश एव केनचिन्नीतः । तर्हि कथं रक्षसा घातकेनान्येन वा नीतः । तुल्यो भविष्यतीति चेत्, तत्राह **यदि जीवति कुत्रचि**दिति । तदा एतत्तुल्यं वयो रूपं च यस्य तादृशो **भवेत्** । एतावता स्वपुत्रस्य सम्भावनजीवितस्य एतत्तुल्यता निरूपिता ॥ ३२ ॥

श्रीसुबोधिनीसारः

शनैः ईषत्किंचिद्वैलक्षण्येन श्रीवत्साद्यभावेन योषितः स्त्रियोवधार्य निश्चित्य प्रहर्षिता अतिविस्मिताः स्त्रीरत्नेन सहितमुपजग्मुः आययुः ॥ २९ ॥ अथेति मंगले असितापांगी कृष्णकटाक्षी वल्गुभाषिणी मधुरवाणी वैदर्भी रुक्मिणी स्नेहेन प्रेम्णा स्नुतौ क्षरंतौ पयोधरौ स्तनौ यस्याः सा नष्टं स्वपुत्रं तत्रास्मरत् ॥ ३० ॥ नरवैदूर्यः पुरुषरत्नोयं कः कमलेक्षणः कस्यायं कया वा जठरे उदरे धृतः अनेन पुंसा इयं का वा उपलब्धा प्राप्ता ॥ ३१ ॥ ममाप्यात्मजः पुत्रो नष्टो यः सूतिकाभवनात्केनचिन्नीतः कुत्रचित् स च यदि जीवति तर्हि एतस्य तुल्यं वयो रूपं यस्य स तथा ॥ ३२ ॥

विवरणटिप्पणी

अथ **तत्रे**त्यत्र । **आधिदैविकस्यापीति** । पयोधरावाधिभौतिको देहः । स्नेहः स्तन्यसंपादक आधिदैविकः, तस्यापीत्यर्थः ।

इति षष्ठाध्यायव्याख्या ।

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

ततश्च ता योषितः शनैरीषद्वैलक्षण्येन श्रीवत्सकौस्तुभाद्यभावरूपेणावधार्य कृष्णो न भवतीति निश्चित्य प्रमुदिताः सुविस्मिताश्च सत्यः स्त्रीरत्नसहितं प्रद्युम्नमुपजग्मुः समीपमाजग्मुः ॥ २९ ॥ अथ तद्दर्शनानन्तरं तत्रान्तःपुरे रुक्मिणी वैदर्भी नष्टं स्वसुतमस्मरत्, सादृश्यस्य स्मारकत्वात् । स्पष्टमन्यत् ॥ ३० ॥ ततश्चाह—को न्विति पञ्चभिः । नरवैदूर्यः पुरुषश्रेष्ठः कस्य वा पुत्रः ? अनेन लब्धेयं स्त्री च का ? ॥ ३१ ॥ ममापि यः आत्मजः सूतिकागृहात् केनापि नीतः अपहृतः, अत एव नष्टः अदर्शनं गतः यदि कुत्रचिज्जीवति तदेतेन तुल्यं वयो रूपं च यस्य तथाभूतः स्यादित्यन्वयः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

अवधार्येति ॥ ता योषितः शनैरीषद्वैलक्षण्येन श्रीवत्सकौस्तुभाद्यभावरूपेणावधार्य कृष्णो न भवतीति निश्चित्य प्रमुदिताश्च सत्यः स्त्रीषु रत्नं श्रेष्ठा रतिस्तत्सहितं प्रद्युम्नमुपजग्मुः समीपमाजग्मुः ॥ २९ ॥ अथेति ॥ अथ तत्रान्तःपुरे असितापाङ्गी वल्गुभाषिणी स्नेहस्नुतपयोधरा वैदर्भी नष्टं स्वसुतमस्मरत् सादृश्यस्य स्मारकत्वात् ॥ ३० ॥ को न्विति ॥ अयं कमलेक्षणो नरवैदूर्यः पुरुषश्रेष्ठः को नु कस्य वा पुत्रः कया वा जठरे धृतः अनेन लब्धा इयं स्त्री च का वा ॥ ३१ ॥ ममेति ॥ ममापि यः आत्मजः सूतिकागृहात् केनापि बालग्रहेण नीतः अपहृतः अत एव नष्टः अदर्शनं गतः यदि कुत्रचिज्जीवति तदेतेन तुल्यं वयो रूपं च यस्य तथाभूतः स्यात् ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नायं कृष्ण इत्यवधार्य निश्चित्य सस्त्रीरत्नं स्त्रीषु रत्नवत् शोभमाना रतिस्तत्सहितं ॥ २९-३० ॥ स्मृत स्वसुता रुक्मिण्याह कोन्विति अयं नरवैदूर्यो नरवरः । कस्य पुत्रः ॥ ३१ ॥ सूतिकागृहात् योनितः यदि कुत्रचित् जीवति तर्हि एतेन तुल्यं वयोरूपं च यस्य तथाभूतः स्यात् ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अवधार्येति । शुचिस्मिताः, ता योषितः, सस्त्रीरत्नं स्त्रीरत्नसहितं, तं, ईषद्वैलक्षण्येन, श्रीवत्साद्यभावरूपेणेति भावः । अवधार्य श्रीकृष्णो न भवत्ययमिति निश्चित्य, प्रमुदिताः सत्यः, शनैः उपजग्मुः तत्समीपं ययुः ॥ २९ ॥ अथेति ॥ अथ, तत्र वल्गुभाषिणी असितापाङ्गी वैदर्भी रुक्मिणी, स्नेहस्नुतपयोधरा सती, नष्टं, सूतिकागृहादिति शेषः । स्वसुतं, अस्मरत् ॥ ३० ॥ सुतं स्मरन्ती रुक्मिण्याह । को न्वयमिति पञ्चभिः । क इति । नरवैदूर्यः नराकारवैदूर्यरत्नमिव शोभमानः, अयं कः नु स्यात् । कमलेक्षणः कमलनयनः, अयं कस्य वा पुत्रः स्यात् । अयं जठरे उदरे, कया स्त्रिया, वा धृतः स्यात् । कस्याः पुत्र इत्यर्थः । अनेन. इयं स्त्री तु, क्व वा लब्धा भवेत् ॥ ३१ ॥ ममेति । किं च सूतिकागृहात्, नीतः गृहीतः, केनचिदिति शेषः । अत एव, नष्टः सः, मम आत्मजः पुत्रः अपि, यदि कुत्रचित् जीवति वा, तर्हि, एतेन तुल्यं वयो रूपं च यस्य तथाभूतः, भवेत् ॥ ३२ ॥

कृष्णप्रिया

पुनः कुछ समय के बाद स्त्रियों को यह मालूम हो गया कि ये श्रीकृष्ण नहीं हैं क्योंकि भगवान कृष्ण की अपेक्षा इनमें कुछ विलक्षणता है। तब अन्तःपुर नारियाँ अत्यन्त आश्चर्य एवं आनन्द से भरकर इस दिव्य दम्पती के समीप आ गयी ॥२९॥ अब राजन् परीक्षित ! यहाँ श्यामलोचना वामनयना मधुर-भाषिणी भगवती रुक्मिणी जी आ पहुँची। इस दिव्य नवीन युगल को देखते ही उन्हें अपने दस दिन के खोये हुए पुत्र की याद आयो वात्सल्य स्नेह उमड़ पड़ा और स्तनों से दूध झरने लगा ॥ ३० ॥ श्री रुक्मिणीजी मन में सोचने लगी कि यह नररत्न कौन है। यह कमल लोचन किसका सुपुत्र है ? किस भाग्य-शालिनी अम्मा ने अपने गर्भ में धारण किया होगा ? और इस पुण्य पुरुष की पत्नी होने का परम सौभाग्य प्राप्त करने वाली पुण्यमयी नारी कौन होगी ? ॥ ३१ ॥ रुक्मिणीजी सोच रही थी कि मेरा भी एक केवल दस दिन का नन्हा सा शिशु खो गया था। न जाने कौन उसे प्रसूतिका गृह से चुरा के ले गया होगा। यदि बालक कहीं भी जीवित होगा तो उसका वय स्वरूप इसी के समान हुआ होगा ॥ ३२ ॥

कथं त्वनेन संप्राप्तं सारूप्यं शार्ङ्गधन्वनः। आकृत्यावयवैर्गत्या स्वरहासावलोकनैः ॥ ३३ ॥
स एव वा[1] भवेन्नूनं यो मे गर्भे [2]घृतोऽर्भकः। अमुष्मिन् प्रीतिरधिका वामः स्फुरति मे भुजः ॥ ३४ ॥
एवं मीमांसमानायां वैदर्भ्यां देवकीसुतः। [3]देवक्यानकदुन्दुभ्यामुत्तमश्लोक आगमत् ॥ ३५ ॥
[4]विज्ञातार्थोऽपि भगवांस्तूष्णीमास जनार्दनः। नारदोऽकथयत् सर्वं शम्बराहरणादिकम् ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—अनेन, आकृत्या, अवयवैः, गत्या, स्वर, हासावलोकनैः, शार्ङ्गधन्वनः, सारूप्यम्, कथम्, सम्प्राप्तम् ? वा, यः, मे गर्भे, धृतः, अर्भकः सः, एव नूनम्, भवेत्, अमुष्मिन्, अधिका, प्रीतिः, भवति, मे, वामः भुजः, स्फुरति ॥ ३३–३४ ॥ एवम् वैदर्भ्याम्, मीमांसमानायाम्, देवक्यानकदुन्दुभ्याम्, सह, उत्तमश्लोकः, देवकीसुतः, आगमत् ॥ ३५ ॥ भगवान्, जनार्दनः, विज्ञातार्थः, अपि, तूष्णीम्, आस, तदा, नारदः, शम्बराहरणादिकम्, सर्वम्, अकथयत् ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्य स्वपुत्रत्वं संभावयंत्याह—कथं त्विति ॥ ३३ ॥ तदेवाधिकं संभावयति, स एवेति ॥ ३४ ॥ देवक्यानकदुंदुभ्यां देवक्यानकदुंदुभिभ्यामित्यर्थः ॥ ३५–३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य समागतनरश्रेष्ठस्य। भावयंती चिंतयंती। सारूप्यं सादृश्यम्। स्वरोऽत्र शब्दः। आकृत्याऽनुरूपपुष्टिशोभिताखिलदेहाकारविशेषेण, अवयवैस्तदनुरूपैरेव चरणाद्यंगैः, गत्याऽऽकाशादुत्तीर्य्य कियत्पदन्यासात्, स्वरैर्गंभीरशब्दैः, हासावलोकने प्रसिद्धे एव। समीपागतान्मात्रादीन्प्रति प्रश्नादिभिः स्वरादयोप्यवगता इत्यूह्यम् ॥ ३३ ॥ तदेव स्वपुत्रत्वम्। नूनं निश्चयः। निश्चयद्योतकं शकुनमाह—वाम इति। अधिकेति—स्वस्य जगन्मातृत्वेन सर्वेष्वप्यर्भकेषु सामान्यतः प्रीतिं द्योतयति ॥ ३४ ॥ एवमित्थम्। मीमांसमानायां विचारयंत्याम्। श्रीदेवक्यादिभ्यां सहागमनं प्रायस्तदानीं तद्गृहगमनात्। उद्गतं तमोऽज्ञानं यस्मात्तादृशः श्लोको यशो यस्य। श्रीरुक्मिण्यादीनां तद्विषयकाऽज्ञाननिरासार्थमिति भावः ॥ ३५ ॥ विज्ञातार्थः ज्ञातसर्वतत्त्वः। मातापितृसमक्षं स्वयं लज्जया नाऽकथयदिति भावः। आदिना कथांतरग्रहः। तथाहि—रुद्रेण कामे दग्धे तत्प्राप्त्यर्थं रतिस्तपसा रुद्रमाराधयामास। शंबरोऽपि कामं दग्धमाकर्ण्य रतिलिप्सया रुद्रमाराधयामास। युगपत्तयोस्तपस्समाप्तौ रुद्रो वरं दातुमुभयत्र जगाम। रत्या तु मत्पतिर्मां प्राप्नोत्विति प्रार्थितो महादेवस्तस्यै कृष्णपुत्रो भूत्वा त्वत्पतिस्त्वां प्राप्स्यतीत्युवाच। शंबरस्तु रतिर्मां प्राप्नोत्विति प्रार्थितवान्, तस्मै तथास्त्वित्युक्त्वा गन्तुकामं रुद्रं रतिरुवाच—भगवन्कथं वैपरीत्यं कृतमेवं मास्त्वित्युक्तः पुनस्तस्यै नानाविद्या मोहवतीरुपदिदेश। त्वमाभिर्मायाभिरेनं मोहयिष्यसि, न त्वनेन तव संयोगो भविष्यति, त्वत्पतिरेव त्वां प्राप्स्यतीति न तु मदुक्तिर्व्यर्थेति पुराणांतरादवसेयम्। एतां च विद्यां प्राप्ताय निजपतये उपदेक्ष्यत्यनयैव विद्यया स एनं मारयिष्यतीति। इतः परं सार्द्धश्लोकत्रयं—'नारद उवाच। एष ते तनयः' इत्यारभ्य 'स्नुषेयं तव शोभन' इत्यन्तं प्रक्षिप्तमप्यस्ति

---

[1]. भगवान्नूनं–वीर. । [2]. गर्भगतो–वीर. ।

[3]. देवकी वसुदेवाभ्यां नारदेन महात्मना। अन्यैश्च यादवश्रेष्ठैरुत्तमश्लोक आविशत् ॥

[4]. विदि–विज. ।

क्वचित्पुस्तकेषु । विज्ञातार्थत्वेऽपि तूष्णीमासने हेतुः—जनानर्दयति याचयति लीलावैचित्र्येण सर्वेषां सुखप्रदः लज्जया मातृपितृसंनिधौ स्वयन्न किंचिदूचे नरलीलत्वादिति भावः । अन्यथा चिरं शोचंत्याः श्रीरुक्मिणीदेव्यास्तस्मिन्नसूयापि संभवेत् । अकस्मान्नारदागमनं श्रीकृष्णेच्छयैव ज्ञेयम् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तु विस्मये सम्यक् प्राप्तिमेव दर्शयति—आकृत्येति । प्रांशुतानुरूपपुष्टिशोभिताखिलदेहाकारविशेषेण अवयवैस्तदनुरूपैरेव श्रीचरणाद्यङ्गैः गत्येति आकाशादुत्तीर्य्य कियत् पदन्यासात् स्वरेति समीपगतान् प्रतिमात्रादितत्त्वप्रश्नादित्यूह्यम् ॥३३॥ अधिकेति । स्वस्य जगन्मातृत्त्वेन सर्वेष्वप्यर्भकेषु सामान्यतः प्रीतिं द्योतयति ॥ ३४ ॥ श्रीदेवक्यादिभ्यां सहागमनं प्रायस्तदानीं तद्गृहगमनात् उद्गतं तमः अज्ञानं यस्मात्तादृशः श्लोको यस्य श्रीरुक्मिण्यादीनामज्ञाननिरासार्थमिति भावः ॥ ३५ ॥ विज्ञातार्थत्वेऽपि तूष्णीमासने हेतुःजनानर्द्दयति याचयतीति लीलावैचित्र्येण सर्वेषां सुखप्रद इत्यर्थः । अन्यथा चिरं शोचन्त्याः श्रीरुक्मिणीदेव्यास्तस्मिन्नसूयापि सम्भवेत् अकस्मान्नारदास्यागमनं श्रीकृष्णेच्छयैव ज्ञेयम् ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तु विस्मये; पाठान्तरे—नु वितर्के, सम्यक् प्राप्तम्, सम्यक्त्वमेव दर्शयति—आकृत्येति । प्रांशुतानुरूपपुष्टिशोभिताकारेण अवयवैस्तदनुरूपैरेव श्रीचरणाद्यंगैः; गत्येति शनैरीषदग्रेऽभिसरणात्, किंवा अत्राकाशादागमने लीलया भूमौ कियत्पादन्यासात्, स्वरेति च पत्नीं प्रति मात्रादितत्त्वप्रश्नादित्यूह्यम्, शार्ङ्गधन्वन इति तस्यापि शार्ङ्गपाणित्वमभिप्रैति; यद्वा, महावीरत्वं तेन च तस्यापि महाबलिष्ठत्वादिकम् ॥ ३३ ॥ वा वितर्के, नूनं निश्चयेनेत्यर्थः । प्रीतिर्वात्सल्यम्, अधिकेति जगन्मातृत्वेन सर्व्वेष्वप्यर्भकेषु सामान्यतः प्रीतिं द्योतयति; किञ्च, वाम इति । एतत् सर्व्वं हृद्येवाभाषतेति ज्ञेयम्, अन्यथा तच्छ्रवणात्तेनाभिगम्य स्वपरिचयं दत्त्वा मातृपादवन्दनादिकं कृतं स्यात्; यद्वा, व्यक्तमुक्तेऽपि सहसागन्तुकत्वेन शंकादिना सद्यः किमपि वक्तुं कर्त्तुञ्च न शक्तमिति बोद्धव्यम् ॥ ३४ ॥ एवमीदृशं मीमांसमानायां विचारयन्त्यां देवकीसुतत्वादेव देवक्यानकदुन्दुभिभ्यां सह तयोः प्रहर्षार्थम्, यत उत्तमः श्लोको बन्धुवात्सल्यादियशो यस्य सः; यद्वा, उद्गतं तमोऽज्ञानं यस्मात्तादृशः श्लोको यस्य; श्रीरुक्मिण्यादीनामज्ञाननिरासार्थमिति भावः ॥ ३५ ॥ विशेषेणापरोक्षत्वादिना ज्ञातोऽर्थस्तत्तत्त्वं येन सः, वर्त्तमानेऽप्यतीतत्वं तत्पूर्व्वकालस्य तन्निर्द्धारस्य वापेक्षया, यतो भगवान्; किञ्च, जनान् दुष्टदैत्यादीनर्द्दयति हिनस्तीति तथा सः शम्बरवधार्थं तेनैव तथा कृतत्वादिति भावः । तथापि तूष्णीमास, स्वस्य तत्तत्त्वाज्ञानबोधनार्थम्, अन्यथा चिरं शोचन्त्याः श्रीरुक्मिणीदेव्यास्तस्मिन्नसूयासम्भवात्, प्रागनुक्तागमनोऽपि नारदः सर्व्वज्ञत्वेन श्रीकृष्णप्रियत्वेन च काले स्वयमेवाकाशमार्गेणागत इति ज्ञेयम्; किंवा (भा० ११।२।१) 'गोविन्दभुजगुप्तायां द्वारकायां कुरूद्वह । अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ।' इत्युक्त्या सदैव तस्य श्रीकृष्णसाहित्यप्रसिद्ध्या पृथगागमनं नोक्तम् । शम्बरेणाहरणं नयनम्; यद्वा, आ सम्यक् समुद्रान्तः प्रक्षेपणादिना हरणम्, आदि-शब्दात् तद्वधं मायावतीतत्त्ववृत्तादिकञ्च ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्य स्वपुत्रत्वं सम्भावयन्त्या—कथमिति ॥ ३३ ॥ निश्चिनोति—स एवेति । यो भगवान् कृष्णांशभूतो मम गर्भगतः स एवायं नूनं ध्रुवं स एवायं भवेदिति पाठान्तरं तत्र हेतुः अमुष्मिन्नस्मिन्मम प्रीतिरधिका भवति मम वामो भुजश्च स्फुरति सञ्चलति अन्यथैतत् न घटेतेति भावः ॥ ३४ ॥ इत्थं वैदर्भ्यां मीमासमानायां तर्कयन्त्यां सत्यामुत्तमश्लोको भगवान् देवकीवसुदेवाभ्यां सह तत्राऽऽजगाम ॥ ३५ ॥ विज्ञातोऽध्यवसितः अर्थः इतरसंशयविषयीकृतोऽर्थो येन तथाभूतोऽपि तूष्णीमास तदा नारदः शम्बराहरणादिकं सर्वमकथयत् ॥ ३६ ॥

गूढार्थदीपिनी

भगवतः सारूप्यं समानरूपत्वम् । स्वरः शब्दः ॥ ३३-३४ ॥ मीमांसमानायां तर्कयन्त्याम् दुन्दुभिभ्यां भिलोप आर्षः ॥ ३५-३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

जनाः द्वारकाप्रजाः शौरेर्निर्गमनदृष्ट्वा द्वादशाहानि प्रतीक्ष्य साप्तदिन्या एव द्वादशाह तया भानं शोकतो मासशब्देनाहान्युच्यन्ते । तथा हि भारत इत्यादि प्रथमस्कन्धोक्तरीत्या ज्ञेयम् । अत एवाचार्यैर्बहून्यहानीत्युदीरणं कृतं । दुःखितास्ते जनाः पुरं द्वारकां विभुदुःखिताः सन्तो द्वादशहानि तेपुः कृष्णदृष्टिमुद्दिश्य तपश्चक्रुरिति वा । अं भगवन्तं शरणं ययुरिति वा ॥३३॥ निशम्यागतनागरजनैः श्रुत्वा बिलादनिर्गतं कृष्णमुद्दिश्याशोचन् शुशुचुः ॥ ३४ ॥ उपतस्थुः सकर्मकत्वेऽपि देवदेवविषये देव्या न देवी

त्वमिति उपाद्देवपूजेति न तङ् । वा लिप्सायामित्युक्तेः परस्मैपदं वा । अर्चयाञ्चक्रुः ॥ ३५ ॥ तेषां द्वारकागाराणां देव्या उपस्थानं सेवा तस्मात्प्रत्यादिष्टा देवीदत्ताश्च ता आशिषोऽभवन् । तत्फलं लपति । प्रादुर्बभूवेति । सिद्धार्थोऽपयशसः श्यामकश्यमन्तकाप्तिरूपसम्पन्नप्रयोजनः सदारो दारैः सहितश्च हर्षयन्द्वारकौकसः प्रादुर्बभूव ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतः परं भेदं निराकृत्य स एवायं भवितुं युक्त इति विशेषं निरूपयति द्वाभ्याम् । **कथं त्वनेने**ति । अस्तु वा अयमुत्तमः । तथापि शार्ङ्गधन्वनः सारूप्यं तदपुत्रत्वे कथमनेन संप्राप्तम् । **शार्ङ्गधन्वन** इत्यनेन ज्याघाताः भगवतो निरूपिताः । ते अस्मिन्नपि दृश्यन्त इति कायवाङ्मनोभिस्तुल्य इति । समानान् षड्धर्मानाह **आकृत्या अवयवैः** गत्येति । अवयवावयविकार्याणि तुल्यानि निरूपितानि । स्वरो वाचिकः, हासावलोकनं मानसं भावसूचकमिति । एतत्तु भेदे न घटत इति स एवायं वा भविष्यतीति संभावयति । **नूनं** निश्चयेन । **यो** भगवत्पुत्रः, तत्रापि यो मया गर्भे धृतः । ननु भगवाननेकपत्नीक इति द्वीपान्तरे देशान्तरे वा भगवतः सकाशात्कस्यांचिज्जातो भवतु, ततः सर्वमुपपद्यत इति, कथं त्वया जठरे धृतो भविष्यतीत्याशङ्क्याह **वाम स्फुरति मे भुज** इति । वामभुजस्फुरणमत्यन्तप्रियस्य समालिङ्गनं सूचयति । येन परमानन्दो भवति, तादृशः पुत्र एव ॥ ३३–३४ ॥ एवं तस्मिन् स्वपुत्रत्वं निश्चित्यापि सम्यक् लोकतोऽपरिज्ञाने तथा व्यवहारः कर्तुं न शक्यत इति संदिहाना इव स्थिता । ततो भगवान् निश्चयार्थं सर्वैः सह समागत इति वदति **एव**मिति । यतोऽयं देवकीसुतः भक्तहितकारी, सुतरां स्त्रीणाम्, रुक्मिणी च भक्ता, सा च मीमांसमाना **क्लेशेनैवं** स्थिता । अतस्तद्दुःखनिराकरणार्थं पुत्रत्वेन स्वीकारे पित्रादयः प्रयोजका इति देवक्या आनकदुन्दुभिना च सहितः समागतः । यतोऽयमुत्तमश्लोकः । अन्यथा वाच्यता भवेदिति । अत्र भीतिपतितं अक्षरच्युतकालङ्कारं बोधयति । यथा राक्षो रक्ताक्ष इति । अयं च पुत्रः च्युत एव स्थानात्पुनः प्राप्त इति सूचयितुं **आ सर्वैः** सह अगमत् ॥ ३५ ॥ आगत्यापि स्वयं कथने बहिर्मुखाः लोभं सम्पादयेयुरिति तूष्णीं स्थित इत्याह **विज्ञातार्थोपी**ति । ज्ञाने **भगवा**निति हेतुः । तूष्णींभावे **जनार्दन** इति । सहि जनानामविद्यामर्दयतीति । निन्दायां तु तेषामविद्या न गमिष्यतीति । तदा भगवदिच्छया नारदः समागत्योक्तवानित्याह **नारदोऽकथयत्सर्व**मिति । स्वकृतमेवेति दोषपरिहारोऽप्यनेन कृतः । शम्बरस्य आहरणमारभ्य समागमनपर्यन्तं सर्वमुक्तवान् ॥ ३६ ॥

श्रीसुबोधिनी–सारः

मीमांसते आकृत्याकारेणावयवैरंगैः गत्या स्वरेण हासेनावलोकनेन शार्ङ्गधन्वनः श्रीकृष्णस्य सारूप्यमनेन कथं प्राप्तम् ॥ ३३ ॥ संभावयति । योर्भको बालो मे मया गर्भे धृतः स एवायं नूनं भवेत् वा तत्र हेतुः । अमुष्मिन् नरे मेऽधिका प्रीतिः वामो भुजः स्फुरतीति ॥ ३४ ॥ एवंप्रकारेण वैदर्भ्यां रुक्मिण्यां विचारयंत्यां सत्यां देवकीवसुदेवाभ्यां सहोत्तमश्लोकः पुण्यकीर्तिर्देवक्याः सुतः श्रीकृष्ण आयात् । देवक्यानकदुंदुभिभ्यामिति वक्तव्ये वर्णलोप आर्षः शिक्षायां तथोक्तेः ॥ ३५ ॥ विज्ञातोर्थो येन सोपि जनार्दनो भगवान् तूष्णीमासीत् तदैव तत्रागत्य नारदः शंबराहरणादिकं सर्वं वृत्तांतमकथयत् ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्य स्वपुत्रत्वमेव सम्भावयति—कथमिति द्वयेन । योऽर्भको मया गर्भे धृतः स एवावायं भवेत् नूनं निश्चितमेतत्, नात्र संशयः । तत्र हेतुमाह—अन्यथा आकृत्यादिभिः शाङ्र्गधन्वनः श्रीकृष्णस्य सारूप्यमनेन कथं सम्प्राप्तमित्यन्वयः । तुशब्दोन्यथार्थे । तत्रैवान्यमपि हेतुद्वयमाह—अस्मिन्निति । अस्मिन् मम प्रीतिरधिका भवति, तथा मम वामो भुजश्च स्फुरति सञ्चलति । अन्यथैतन्न स्यादित्याशयः ॥ ३३–३४ ॥ वैदर्भ्यां रुक्मिण्यामेवं मीमांसमानायां तर्कयत्यां सत्यां देवक्यानकदुन्दुभ्यां देवक्यानकदुन्दुभिभ्यां सह उत्तमश्लोकः पुण्यकीर्तिर्देवकीसुतः श्रीकृष्णस्तत्रागमत् ॥ ३५ ॥ ननु 'सर्वज्ञत्वात् भगवान् प्रद्युम्नहरणादिकं कथं न ज्ञातवान् ?' तत्राह—विज्ञातेति । विज्ञातः अर्थः प्रद्युम्नहरणादिरूपो येन तथाभूतोऽपि भगवान् शम्बरं हत्वा तमानेतुं समर्थोपि कृष्णस्तूष्णीमासीत् । तत्र हेतुमाह—जनार्दन इति । जनानां दुःखमर्दयतीति तथा । स्वदृष्टान्तेन कुटुम्बिजनानां पुत्रवियोगादौ सन्तोषार्थम्, अन्यथा तन्न स्यादित्याशयः । तत्समये आगतो नारदः सर्वमकथयत् ॥ ३६ ॥

अन्वितार्थप्रकाशिका

कथमिति ॥ आकृत्या प्रांशुत्वादिकया अवयवैः आजानुबाहुत्वाद्यैः गत्यादिभिश्च शार्ङ्गधन्वनः श्रीकृष्णस्य सारूप्यं समानरूपत्वमनेन कथं संप्राप्तम् ॥ ३३ ॥ स इति ॥ योऽर्भको मया गर्भे धृतः स एव वायं नूनं निश्चितं भवेत् । यतः अमुष्मिन्मम प्रीतिरधिका भवति तथा मम वामो भुजश्च स्फुरति सञ्चलति ॥ ३४ ॥ एवमिति ॥ वैदर्भ्याम् एवं मीमांसमानायां तर्कयन्त्यां सत्यां देवक्यानकदुन्दुभ्यां देवक्यानकदुन्दुभिभ्याम् । भिलोप आर्षः । स उत्तमश्लोकः पुण्यकीर्तिर्देवकीसुतः श्रीकृष्णस्तत्रागमत् ॥ ३५ ॥ विज्ञातेति ॥ विज्ञातोऽर्थः प्रद्युम्नहरणादिरूपो येन तथाभूतोऽपि जनार्दनः भगवान् शम्बरं हत्वा तमानेतुं समर्थोऽपि पूर्वं तूष्णीमास अन्यदेव्यादीनामसूयादिभयात् ततः तत्समये आगतो नारदः शम्बराहरणादिकं सर्वमकथयत् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्मिन् स्वपुत्रत्वं शंकयंती सत्याह द्वाभ्यां कथमिति ॥ ३३ ॥ स एवेति ॥ ३४ ॥ मीमांसमानायां विचार्यमाणायां सत्यां देवकीवसुदेवाभ्यां सह । आनकदुंदुभ्यामित्यत्र भिलोप आर्षः ॥३५॥ विज्ञातार्थ इति जनैर्भक्तजनैरद्यते याच्यते स्वसुखायेति जनार्द्दनः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्य स्वपुत्रत्वं संभावयन्त्याह ।। कथमिति ॥ आकृत्या अवयवैः गत्या, स्वरश्च हासश्च अवलोकनानि च तैः, शाङ्र्गधन्वनः श्रीकृष्णस्य, सारूप्यं तु, अनेन कथं संप्राप्त स्यात् !! ३३ ॥ निश्चिनोति ॥ स एवेति ॥ यः अर्भकः, मे मया, गर्भे धृतः सः, अयं एव, नूनं भवेत् । तत्र हेतुमाह । अमुष्मिन् प्रीतिः मे मम, अधिका जायते । वामः मम भुजः अपि, स्फुरति संचलति । अन्यथैतन्न घटेतेति भावः ॥ ३४ ।। एवमिति ।। एवमित्थं, वैदर्भ्यां रुक्मिण्यां, मीमांसमानायां तर्कयन्त्यां सत्यां, उत्तमश्लोक उत्तमकीर्त्तिः, देवकीसुतः श्रीकृष्णः, देवक्यानकदुन्दुभ्यां देवक्यानकदुन्दुभिभ्यामित्यर्थः । सह, आगमत् तत्रागच्छत् । आनकदुन्दुभिभ्यामिति वक्तव्ये 'विनापि प्रत्ययं पूर्वोत्तरयोर्वा लोपः, इति वार्त्तिकालम्बाद्भि इत्यस्य लोपः । अहश्च रात्रिश्चेत्यहोरात्रमिति वक्तव्येहोरेतिवत् । तथा च निरुक्तिः । 'होरेत्यहोरात्रपदस्य विज्ञा वदन्ति पूर्वापरवर्णलोपात्' इति । आर्षो वा भिलोपः।३५। विज्ञातेति ॥ विज्ञातोऽध्यवसितोऽर्थ इतरसंशयविषयीभूतोऽर्थो येन तथाभूतः अपि, जनार्द्दनः भगवान् श्रीकृष्णः, तूष्णीं आस । तदा नारदः शम्बराहरणादिकं सर्वं, अकथयत् ।। ३६ ॥

कृष्णप्रिया

मुझे परमआश्चर्य हो रहा है और मैं हैरान हूँ कि इसे भगवान् श्यामसुन्दर श्रीकृष्ण के समान रूप-रेखा अङ्ग-प्रत्यङ्गो की गठन, चाल-ढाल, मुसकान, चितवन, और बोल-चाल कहाँ से मिली होगी ? ॥ ३३ ॥ मानो न मानो मेरा मन तो यह मान रहा है कि यह वही बालक है, मैंने जिसे अपने गर्भ में धारण किया था । क्योंकि स्वभाव से ही मेरा वात्सल्य इसके प्रति ढल रहा है उछल रहा है फिर मेरी बायीं बाँह और बायीं भौंह फड़क रही है ॥ ३४ ॥ भगवती श्रीरुक्मिणीजी जब इस प्रकार सोच रही थी और संशय झूले में झूल रही थी, उसी अवसर पर उत्तमश्लोक भगवान श्रीकृष्ण अपने मातृचरण और पितृचरण श्रीदेवकीजी एवं आनक दुन्दुभिजी के साथ वहाँ पधारे !! ३५ ॥ भगवान तो सर्वज्ञ हैं और सब कुछ जानते भी हैं लेकिन कुछ नहीं बोले चुप-चाप देखते ही रहे । इतने में ही श्रीनारजी वहाँ आ पहुँचे और उन्होंने ही शम्बरासुर का सारा वृत्तान्त सुनाया ॥ ३६ ॥

तच्छ्रुत्वा महदाश्चर्यं कृष्णान्तःपुरयोषितः । [1]अभ्यनन्दन् बहूनब्दान् नष्टं [2]मृतमिवागतम् ॥ ३७ ॥
देवकी वसुदेवश्च कृष्णरामौ तथा स्त्रियः । दम्पती तौ परिष्वज्य रुक्मिणी च ययुर्मुदम् ॥ ३८ ॥
नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः । अहो मृत [3]इवायातो वालो दिष्ट्येति हाब्रुवन् ॥ ३९ ॥
यं वै मुहुः [4]पितृसरूपनिजेशभावास्तन्मातरो यदभजन् रहरूढभावाः ।
चित्रं न तत् खलु रमास्पदविम्बविम्बे[5] कामे [6]स्मरेऽक्षिविषये किमुतान्यनार्यः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे[7] दशमस्कन्धे[8] [9]प्रद्युम्नोत्पत्तिनिरूपणं नाम [10]पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

कर्दमक्षमा

अन्वयः—तत्, महद्, आश्चर्यम्, श्रुत्वा, अन्तःपुरयोषितः, बहून्, अब्दान्, नष्टम्, मृतम्, आगतम्, इव, अभ्यनन्दन् ॥ ३७ ॥ देवकी, च, वसुदेवः, कृष्णरामौ, तथा, स्त्रियः, च, रुक्मिणी, तौ, परिष्वज्य, मुदम्, ययुः ॥ ३८ ॥ अहो ! नष्टम्, प्रद्युम्नम्, आयातम्, आकर्ण्य, द्वारकौकसः, अहो, वालः, मृतः, इव, आयातः, इति, दिष्टया, ह, अब्रुवन् ॥ ३९ ॥ यम्, वै, मातरः, पितृसरूपनिजेशभावाः, मुहुः, रहरूढभावाः, यद्, अभजन्, तत्, स्मरे, अक्षिविषये, कामे, रमास्पदविम्बविम्बे, जाते, चित्रम्, न, यदि, कृष्णार्धनाङ्गनानामेषास्थितिः, तर्हि, अन्यनार्यः, मुग्धा, भवेयुस्तत्र, किमुत, आश्चर्यम् ॥ ४० ॥

श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे पञ्चपञ्चाशत्तमाध्यायस्यान्वयाः समाप्ताः ॥ ५५ ॥

---

[1] विजये नास्ति । [2] पुनरिबा । [3] इहा–वीर. । [4] मनसिजार्द्रहृदोरुभावः–विज. ; रह ऊढ–श्रीधर. टि. । [5] भूते–विज. । [6] अक्ष–श्रीधर. टि. । [7] पारमहंस्यां संहितायां–प्रा. पा. । [8] न्धेशम्बरवधः । [9] उत्तरार्द्धे–प्रा. पा. । [10] अथ षष्ठितमो–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अतिसौंदर्येण प्रद्युम्नं वर्णयति—यमिति। पिता श्रीकृष्णस्तत्सदृशे प्रद्युम्ने निज आत्मीय ईशो भर्तेति भावो भावना यासां तास्तन्मातरः कृष्णपत्न्योऽपि रहसि निरूढभावाः सत्यो यमभजन्निति यत्तन्न खलु चित्रं कथं सति ? स्मरे स्मर्यमाणत्वेनैव क्षोभके कामेऽक्षिविषये सति किंच रमास्पदं श्रीकृष्णस्तस्य बिंबं श्रीमूर्तिस्तस्य बिंबे प्रतिबिंबे पुत्रे तदा किन्नु वक्तव्यमन्यनाय भेजुरिति ॥ ४० ॥

इति श्रीमद्भागवते दशमस्कन्ध उत्तरार्धे श्री० टीकायां पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न्नतारदोक्तम्। बहूनब्दानिति "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया। अभ्यनंदन्प्रीणयामासुः। महदाश्चर्यं महाश्चर्यम्। अभ्यनन्दन् वक्ष्यमाणरीत्या सच्चक्रुः, प्रद्युम्नमिति शेषः ॥ ३७ ॥ तौ दम्पती रतिप्रद्युम्नौ। देवक्याः प्रागुक्तिः पितामहीत्वेन स्नेहविशेषात्। रामस्य पश्चादुक्तिः पश्चादेवागमनात्। स्त्रियः श्रीमहिष्यः। श्रीरुक्मिण्याः, सर्वान्ते निर्देशश्चिरपरिष्वंगार्थं पश्चात्स्थितत्वात्। किं वा—स्नेहविवशत्वेन किंचिद्विलम्बात् ॥ ३८ ॥ इति ह इत्थम्। अहो आनन्दे। हेति पुरातनकथापरामर्शकम् ॥३९॥ तत्सरूपे तत्समानरूपे। भर्ता श्रीकृष्ण इति। तन्मातरः, प्रद्युम्नमातरः बहुत्वं समात्रपेक्ष्यम्। रहसि एकान्ते। निरूढो जातो भावः सात्त्विकसंज्ञः 'स्तम्भः स्वेदोथ रोमाञ्चः' इत्याद्युक्तलक्षणो यासां तास्तथा। अन्यच्चित्राभावकारणमाह—किञ्चेति। "बिंबोऽस्त्री मंडलसमप्रतिमामुखलक्ष्मसु। प्रतिरूपे प्रतिकृतौ तथा स्याद्बिबिकाफले।" इति यादवः। मम त्वित्थं प्रति भाति— तन्मातरो रुक्मिण्याद्या यं वीक्ष्य यच्चित्रमाश्चर्यमभजंस्तन्मुहुर्न किं त्वेकवारं तद्दर्शनक्षण एव। क सति—स्मरे स्मर्यमाणशरीरेऽक्षविषये सति। अहो स्मरणशरीरोऽयं कामः कथमस्मद्दृग्विषयो जात इत्याश्चर्यं प्रापुरित्यर्थः। किम्भूताः— रहस्त्यक्तो रूढो भावः कृष्णोऽयमित्येवंरूपोऽभिप्रायो याभिस्तारहरूढभावाः। यद्वा—यं वीक्ष्य रूढभावा जातप्रीतयस्सत्यो रह ऐकान्त्यमभजन्निलीना बभूवुः। रह इह सलोप आर्षः। यथाश्रुतार्थस्तु विगीत इव प्रतिभातीति। प्रद्युम्नसौंदर्यं वर्णयति—यं मुहुर्विलोक्य पितृसरूपात् पितुः श्रीकृष्णस्य समानसौंदर्याद्धेतोर्निजेशस्य श्रीकृष्णस्य भावो भावना "कथं त्वनेन सम्प्राप्तं सारूप्यं शार्ङ्गधन्वनः। आकृत्यावयवैः" इत्यादि चिन्तनं यासां ताः। तन्मातरः श्रीरुक्मिण्येव, गौरवेण बहुत्वम्, तदंतःपुरे कृष्णपत्नीनामन्यासामागमनायोग्यत्वात्। रहे रहसि तत्परिचयात्पूर्वमेव रूढ उद्भूतो भावो वात्सल्यमयी प्रीतिर्यासां ताः, 'अमुष्मिन्प्रीतिरधिका' इत्युक्तेः। "स एव वा भवेन्नूनं वामः स्फुरति मे भुजः" इति निश्चयान्ते सति सन्देहे यत् अभजन् गात्रावलोकनमस्तकाघ्राणपाणितलकरणकगात्रमार्जनादिनाऽनुवृत्तिमकुर्वंस्तद्यासां मातॄणां तस्मिन्प्रद्युम्ने न चित्रम्। कीदृशे—रमास्पदं सर्वशोभानिकेतनं यद्बिम्बं श्रीकृष्णगात्रं तस्य बिम्बे प्रतिबिम्बरूपे, तथाभूतस्यान्यस्य त्रिभुवनेप्यभावादेव तस्य कृष्णपुत्रत्वनिश्चयात्तथाभूतस्वानुभवाच्चेति भावः। किञ्च—तन्मातॄणामेव तस्मिस्तादृशो भावो न त्वन्यासामित्याह—कामे स्मरे स्मरत्यस्मादिति स्मरस्तस्मिन्। कांतस्मरणहेतोर्यस्य परोक्षत्वेऽपि कामोद्भावकत्वं तस्मिन्नक्षिविषये तु सति, उत तथार्थेऽन्यनार्यस्तथा किं भवितुं शक्नुवन्ति अपि नैव, यतः क्षोभमेव प्राप्नुवन्तीत्यर्थः ॥ ४० ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे उत्तरार्द्धे पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महदाश्चर्यं महाश्चर्यमित्यर्थः। अभ्यनन्दन् वक्ष्यमाणरीत्या सच्चक्रुः प्रद्युम्नमिति शेषः। तं च मृतमिव नष्टमदर्शनं प्राप्तं सन्तं पुनरागतं मत्वेत्यर्थः। कृष्णेति तत्सम्बन्धित्वेन तासां महिमानं दर्शयित्वा तदभिनन्दनं चमत्कारितम् ॥ ३७ ॥ देवक्याः प्रागुक्तिः पितामहित्वेन स्नेहविशेषात् रामस्य पश्चादुक्तिः पश्चादेवागमनात् स्त्रियः श्रीमहिष्यः श्रीरुक्मिण्याः सर्वान्ते निर्देशश्चिरपरिष्वङ्गार्थं पश्चात्स्थितत्वात् किम्वा स्नेहविवशत्वेनाशक्त्या किञ्चिद्विलम्बनात् किम्वा तौ प्रति पुरतः सर्वेषां प्रसादनेच्छयेति ॥३८॥ द्वारकावासिनश्च सर्वे एव परमहृष्टा बभूवुरित्याह—नष्टमितीति हेत्यव्ययम्पुरातनकथापरामर्षकम् ॥३९॥ यमिति तैर्व्याख्यातं तत्र रहो भजनं नाम भ्रान्त्या तन्निकटगमनमात्रं विवक्षितं श्रीसङ्कर्षणस्य पुनः श्रीवृन्दावनगतस्य विहारे गोपीनामन्यासामेव स्वीकरिष्यमाणत्वात् श्रीप्रद्युम्नस्य भ्रमाद्यभावान्मातृभ्रान्त्या मायावत्या अपि परित्यागाच्च ततश्चायमेवार्थः यं प्रद्युम्नं विरहेण श्रीकृष्णविरहेण रूढो विवृद्धाभावस्तत्प्रेमा यासां तथाभूताः सत्यस्तन्मातरः तस्य सपत्नीमातरो मुहुरभजन् द्रष्टुमागच्छन् मातृशब्देन तावन्मात्रपर्य्यवसानात् तदेवं यदभजन् तन्न चित्रं कथं पितुः श्रीकृष्णस्य सारूप्येण निजेशस्य श्रीकृष्णस्यैव भावःस्फूर्त्तिर्यासां तास्तथा तत्साक्षात्कारसादृश्यलालसयेत्यर्थः। अत्र कान्तादिशब्दमदत्वा ईशशब्दप्रदानं तेन हेतुना स्फुरत्यपि श्रीकृष्णे ईशभाव एवाऽस्फुरत् नतु कान्तभावः तदुद्दीपनतायामयोग्यत्वात्पुत्रस्येति द्योतयति तदेवमन्या नार्य्यो

यदभजन् तत्किमुत सुष्ठ्वेव कान्तभावेनैवेत्यर्थः। "बलवत्सुष्ठुकिमुत" इत्यमरः। अत्र हेतवो रामेत्यादीनि पदानीति अथवा कृष्णं मत्वा स्त्रियो ह्रीता निलिल्युस्तत्र तत्र हेत्येव योजयति यमिति नवमस्य चतुर्थे यविष्ठं व्यभजन् दायमिति वद्द्वितीयया प्रतीत्यध्याहार्य्यं प्राप्येति वा पितृसरूपनिजेशभावाः सत्यस्तन्मातरो रहोऽभजन् ह्रिया निलिल्युरित्यर्थः। रहेत्यार्षं पदं रह ऊढभावा इत्यपि क्वचित् ईशशब्दः पूर्ववत् ननु, कथं कान्तभावो न जातः तत्राह रूढभावाः अव्यभिचारिश्रीकृष्णरतयः तदेवं यद्रहोऽभजन् तन्न चित्रं यद्येवं तदप्येकांशेन सवलितमतयो जातास्तदा रामेत्यादिलक्षणे अक्षविषये सति उत अपि अन्यनार्य्यः तद्भावरहितस्त्रियोऽपि किं किंरहोऽभजन् किन्तु तमेवाभजन् भावहावादिभिरसेवन्तेति अक्षेति अक्षीति वा पाठः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णस्य साक्षात्परमेश्वरस्यान्तःपुरे या योषितस्ताः सर्व्वा इति सखी-दास्यादीनामानन्त्यमुक्तम्, अभ्यनन्दन्प्रद्युम्नं साधु साध्वित्यादिना प्रशशंसुः, यद्वा, प्राप्येति शेषः। अभितोऽनन्दन् अहृष्यन् ॥ ३७ ॥ देवक्याः प्रागुक्तिः पितामहीत्वेन वसुदेवतोऽपि स्नेहे विशेषात्, रामस्य पश्चादुक्तिः पश्चादेव तेभ्यस्तदागमनात् स्त्रियः श्रीमहिष्यः, रुक्मिण्याः सर्वान्ते निर्द्देशश्चिरपरिष्वंगार्थं पश्चात् स्थितत्वात्, किंवा स्नेहविवशत्वेनाशक्त्या किञ्चिद्विलम्बात्, किंवा स्नेहभरस्वभावादेवेति ॥ ३८ ॥ द्वारकावासिनश्च सर्व्व एव लोकाः परमहृष्टा बभूवुरित्याह—नष्टमिति। अहो आश्चर्य्ये, ह हर्षे, दिष्ट्या अहो भाग्यमस्माकमित्यर्थः। बाल इति नवतरुणेऽपि तस्मिन् तेषां स्नेहभरेण शिशुतादृष्टेः, यद्वा, बाल्ये नष्टत्वाभिप्रायेण ॥ ३९ ॥ यमित्यस्य तं प्रद्युम्नमिति पूर्व्वेण, किंवा तमन्यनार्य्यो भजेयुरिति किमुतेत्यन्वयः, वै प्रसिद्धौ, मुहुरिति संशयादिना पुनः पुनश्चित्ते निर्वर्त्तितेऽपि निजभर्तृसारूप्यदर्शनेन पुनः पुनस्तत्प्रवृत्तेः, रहेत्यदन्तत्वमार्षम्, अभजन् कामयामासुः, प्रागनुक्तमपीदं ह्रीता इति पूर्वोक्तलज्जया कामसूचनात्, किंवा प्रमुदिततयोपगमनादूह्यम्, किंवा अत्रोक्तिप्रामाण्येन तन्मन्तव्यमिति दिक्। खलु निश्चये, अक्ष-विषये चक्षुरिन्द्रियगोचरे सति, अक्ष-शब्देन दर्शनेऽभिनिवेशः सूचितः। अक्षीति पाठो वा। एवमपि तासां पातिव्रत्याहानिम्, चित्रेति रमेति च बोधयत्येव, इति तासां परममाहात्म्यमुक्तम्, तथा श्रीभगवतश्च तत्सारूप्येणापि तासामपि भावोत्पादनात्। तथा श्रीप्रद्युम्नस्यापि, तच्च स्पष्टमेव, तत्र च मुख्ये। हेतुः—रमेत्येव, अत एव तैरपि किञ्चेत्यादिना तत्पश्चाद्व्याख्यातम् अन्यत्तैर्व्यञ्जितमेव। यद्वा, अकारप्रश्लेषेण कामरहितेऽपि स्मरे, अथवा श्रीप्रद्युम्नमाहात्म्य-द्वारा श्रीमहिषीणामेव धैर्य्यादि–माहात्म्यमन्तेऽनुवर्णयति–यमिति। अकारप्रश्लेषेण न तिष्ठति स्मरः स्मरणं भद्राभद्रानुसन्धानं यस्मात्तादृशे कामे, तत्रापि रमास्पदबिम्बबिम्बे श्रीकृष्णसदृशरूपे अक्षविषये दृष्टे सति पितृसरूपनिजेशभावा अपि, यद्वा, तादृशकामेऽक्षविषये सत्यपि, तथा तत एव पितृसरूपनिजेशभावा अपि रहसि रूढभावाः सत्यो नाभजन्निति यत्तत् किं खलु चित्रम्, अपि तु नैव, यतस्तन्मातरः, उत अपि, अन्यनार्य्योऽपि यन्न भेजुस्तदपि किं चित्रम्, अपि तु नैव, मातॄणां सखीत्वादिना मातृतुल्यत्वादित्यर्थः। अन्यत् समानम् ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पितृस्वरूपनिजेशभावाः पितृसाम्यानिजभर्तृबुद्धिसहिताः तन्मातरः कृष्णस्य पत्न्यः मसृणितदृशः कामवशात् स्निग्धदृष्टय अभवन्नित्यर्थः। रमास्पदविम्बविम्बे भगवद्विग्रहसदृशे ॥ ४० ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तन्नारदकथितं महदाश्चर्य्यं श्रुत्वा कृष्णान्तःपुरस्त्रियो देवक्यादयश्च मृतं प्रेतं पुनरागतमिव बहूनब्दान् वत्सरान् नष्टमदृष्टं सम्प्रति दृष्टं दृष्ट्वेति शेषः अभ्यनन्दन् ॥ ३७ ॥ तौ दम्पती देवकीवसुदेवौ रुक्मिणी च परिष्वज्य प्रद्युम्नमिति शेषः। नष्टं प्रद्युम्नमायातमित्यस्यापकर्षो वा मुदं ययुः ॥ ३८ ॥ नष्टमिति द्वारकौकसो द्वारकावस्थायिनो जना इत्थमब्रुवन् किमिति अहो मृतो बालः पुनरिहायातः दिष्ट्या अयमानन्द इति ॥ ३९ ॥ सौन्दर्य्यातिशयेन प्रद्युम्नं वर्णयति—यमिति। पिता श्रीकृष्णः तत्सरूपतया निज आत्मीय ईशः भर्त्तेति भावो भावना यासां ताः पितृसारूप्यान्निजभर्तृबुद्धिसहिता इत्यर्थः। तन्मातरः कृष्णपत्न्यः रहसि निरूढभावाः सत्यः यमभजन्निति यत्तन्न खलु चित्रं 'तन्मातरो मनसिजार्द्रदृशोबभूवुः इतिपाठे ताः कृष्णपत्न्यः यं प्रद्युम्नं दृष्ट्वेति शेषः। कामवशात् स्निग्धदृष्टयोऽभवन्निति यन्नैतच्चित्रमिति सम्बन्धः। स्मरे स्मर्यमाणत्वेनैव क्षोभके कामेऽक्षिविषये सति किञ्च रमायाः आस्पदं श्रीकृष्णस्तस्य बिम्बं मूर्त्तिः तस्य बिम्बे प्रतिबिम्बे भगवद्विग्रहसदृशे पुत्रे सतीत्यर्थः। तत् किमु वक्तव्यं यदन्या नार्य्यो भजेयुरिति ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यं वै इत्यादि ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

यं वै इत्यादि । यं प्रद्युम्नं वीक्ष्येत्यध्याहार्यम् । दास्योऽपि यं दृष्ट्वा कृष्णं मत्वा तत्र तत्र निलिल्युस्तं दृष्ट्वा तन्मातरस्तद्विमातरो यद्रहो निर्जनस्थलमभजन्, आत्मानं गोपयामासुः। रूढभावा कृष्णोऽयमागत इति जातव्रीडादिभावाः। कुतः ? इत्याह पितृस्वरूपनिजेशभावाः पितुः श्रीकृष्णस्य समानं रूपं तेन या निजेश इति भा भानं तामवन्तीति तथा, 'अव रक्षणपालने' कर्मण्यण् कृष्णोऽयमागत इति वा यत्र यथास्थिता आसन् तास्तथास्थिता एव ततः सकाशाद्व्रीडया रहसि लीना इत्यर्थः। तन्न चित्रम् । कुतः ? इत्याह—रमास्पदविम्बेत्यादि । रमास्पदं रमाचिह्नं बिम्बं यस्य स तथा, लक्ष्मीरक्षा इत्यर्थः । तस्य श्रीकृष्णस्य बिम्बे प्रतिबिम्बे किमुतान्यनार्यः पूर्वोक्ताः स्त्रियो दासीप्रभृतयो यं दृष्ट्वा तद्विमातरोऽपि कृष्णबुद्ध्या सङ्कोचेनाभ्यन्तरं गत्वा लीना अभूवन्, तं दृष्ट्वा दास्यादयो यत्तत्र तत्र निलिन्युः तत् किमुतेति पूर्वश्लोकार्थसमावेशः। रह इति विसर्गलोपश्छान्दसः। यद्वा, पितृस्वरूपनिजेशभावाः पितृसदृशाः श्रीकृष्णसदृशा निजा आत्मीया ये ईशभावा ऐश्वर्याणि यं प्रद्युम्नमभजन्, तन्मा चित्रम् । तन्मातरः तन्मा उल्लङ्घ्य तत्राप्रतीतिं मा गा इति परीक्षितं प्रति श्रीशुकदेवोक्तिः। 'तॄ प्लवनतरणयोः' इति सिपि रूपम्, मा योगेऽडागमाभावः। कीदृशाः ? रहरूढभावाः रहस्त्यागः 'रह त्यागे' इति पचाद्यच् । रहेण अनङ्गत्वत्यागेन रूढाः पुनः प्ररूढा या भा शोभा तामवन्तीति तथा । यद्वा, हे पितृस्वरूप ! अभिमन्युसदृश ! हे परीक्षित् ! निजेशभावा उच्चाटनादि-पञ्चेषुत्वादीन्यैश्वर्यादीनि । तत्र निदर्शनमाह—स्मरेऽक्षिविषये अक्षिगोचरेऽन्यना अन्यपुरुषः किमुतार्य आदरणीयः नैवादरणीय इत्यर्थः। कामे कमनीये; अथवा, काम इति विशेष्यं पदम्, स्मर इति विशेषणम्; स्मृतिविषये सतीत्यर्थः ॥ ४० ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

यं वै मुहुरित्यादि । यं प्रद्युम्नं वीक्ष्येत्यध्याहार्यम् । तन्मातरः कृष्णोऽयमिति मत्वा यद्रहः रहस्थलमभजन्, तन्न चित्रम्; (२८ श-श्लो०) "निलिल्युस्तत्र तत्र ह" इत्यादि यदुक्तम्, तस्यायं प्रपञ्चः। रूढभावा जात-व्रीडादि-व्यभिचारिभावाः। कुतः ? इत्याह—पितृ-सरूप निजेशभावाः, पितुः श्रीकृष्णस्य समानं रूपं सरूपं तेन निजेशः श्रीकृष्ण एष इति भावो यासाम् । 'रह' इति विसर्गलोपश्छान्दसः । तन्न चित्रम् । कुतः ? तत्राह—रमास्पदविम्बबिम्बे रमाया आश्रयभूतं बिम्बं प्रतिबिम्बो लक्ष्म यत्र तस्य श्रीकृष्णस्य विम्ब इव छायेव यस्तस्मिन् । अन्यनार्यो रहसि यद्विलीयन्ति तत् किमिति । यद्वा, यं प्रद्युम्नं निरीक्ष्य तन्मातरः सत्यभामाद्या यद्व्रीडादि अभजन्, तन्नचित्रमिति रहरूढभावाः—रहो विरहः, 'रह त्यागे' इत्यस्मात् सिद्धेः, तेन रूढभावा यस्मा कृष्णादर्शनेन तं प्रद्युम्नं दृष्ट्वा अनिभालनेन कृष्ण एवागतोऽयमिति कृत्वा या यथास्थितास्ता एव सङ्कोचेन व्रीडादि अभजन् । यदिति व्रीडया सङ्कोचेन चानिर्वाच्यं यत् किमपि । यद्वा, यं प्रद्युम्नं पितृसरूपनिजेशभावा निजैश्वर्याणि यदभजन्, तन्मातरः तन्मा तल्लङ्घ्येः, 'तॄ प्लवन तरणयोः' इति सौ रूपम्, तत्राप्रतीतिं मा गा इति परीक्षितं प्रति शुकोक्तिः । हे पितृसरूप ! अभिमन्युसदृश इति परीक्षित्-सम्बोधनं वा । निजेशभावा उच्चाटनादि पञ्चेषु न तादृशान्यैश्वर्याणि । कीदृशाः ? रहस्त्यागो रहे अनङ्गत्वत्यागे रूढा या भाः कान्तयस्ता अवन्तीति तथा तस्मिन् कामे तन्न चित्रम् । तत्र निदर्शनामाह—स्मरे अक्षिविषये अन्यन्ना अन्यपुरुषः किमुत आश्चर्य आदरणीयो भवति, नैवेत्यर्थः। स्मरे स्मर्यमाणे अनङ्गत्वेन प्रतीयमाने अक्षिविषये साक्षाद्भूते सतीति वा ॥ ४० ॥

इति पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

प्रद्युम्नस्य सौदर्य्यं वर्णयति—यं मुहुर्विलोक्य पितृसरूपात् पितुः श्रीकृष्णस्य समानसौन्दर्य्याद्धेतोर्निजेशस्य श्रीकृष्णस्य भावो भावना "कथं त्वनेन सम्प्राप्तं सारूप्यं शार्ङ्गधन्वनः। आकृत्यावयवैः" इत्यादि चिन्तनं यासां ताः तन्मातरः श्रीरुक्मिण्येव गौरवेण बहुत्वं तदन्तःपुरे कृष्णा पत्नीनामन्यासामागमनाऽयोगात् रहो रहसि तत्परिचयात् पूर्वमेव रूढ उद्भूतो भावो वात्सल्यमयी प्रीतिर्यासां ताः यदुक्तं "अमुष्मिन् प्रीतिरधिका" इति तदा च "स एव वा भवेन्नूनं वामः स्फुरति मे भुजः" इति निश्चयान्ते सन्देहे सति यत् अभजन् गात्रावलोकनमस्तकाघ्राणपाणितलकरणकगात्रमार्जनादित्यनुवृत्तिमकुर्वन् तत् तासां मातॄणां तस्मिन् प्रद्युम्ने न चित्रं कीदृशे रमास्पदं सर्वशोभानिकेतनं यद्बिम्बं श्रीकृष्णगात्रं तस्य बिम्बे प्रतिबिम्बरूपे

तथाभूतस्यान्यस्य त्रिभुवनेऽप्यभावादेव तस्य कृष्णपुत्रत्वनिश्चयात्तथाभूतस्वानुभवाच्चेति भावः । किञ्च, तन्मातृणामेव तस्मिस्तादृशो भावो नत्वन्यासामित्याह—कामे स्मरे स्मरत्यस्मादिति स्मरस्तस्मिन् कान्तस्मरणहेतोर्यस्य परोक्षत्वेपि कामोद्भावकत्वं तस्मिन्नक्षिविषये तु सति उतेति तथेत्यर्थे अन्यनार्य्यः किं तथा भवितुं शक्नुवन्ति अपितु नैव यतः क्षोभमेव प्राप्नुवन्तीत्यर्थः ॥ ४० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । पञ्चपञ्चाशत्तमोऽयं दशमेऽजनि सङ्गतः ॥ ५५ ॥

गूढार्थदीपिनी

नारदोऽकस्मादागत्य अब्दान् 'अत्यन्तसंयोगे द्वितीया' । नष्टमदृष्टं तमागतं प्रद्युम्नमभ्यनन्दन् सच्चक्रुः ॥ ३७ ॥ दम्पती रतिप्रद्युम्नौ ॥ ३८ ॥ दिष्ट्या भद्रं जातम् । इति ह इत्थम् ॥ ३९ ॥ वै एवार्थे । यं प्रद्युम्नं तन्मातरो यत्पतित्वेन अभजन् तत्खलु चित्रमाश्चर्यं नास्ति । कुतः । पितृसरूपे सदृशे प्रद्युम्ने निजेशभावः पतिभावो यासान्ताः । अत एव रह एकान्ते रूढो दृढः भावः कामवासना यासाम् । कुत एतत् । कामेऽक्षिविषये सति । स्मरे स्मरणमात्रतः क्षोभके । कथंभूते । रमास्पदं श्रीकृष्णस्तस्य बिम्बं विग्रहस्तस्य प्रतिबिम्बे पुत्रे । अन्यनार्यः भेजुरिति किमुत वक्तव्यम् । यद्वा रहस्त्यक्तो रूढो भावः कृष्णोऽयमिति याभिस्ताः । रह त्यागे धातुः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्ध पारमहंस्यो संहितायाम् उत्तरार्द्धे गूढार्थदीपिन्यां पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पितृसरूपे श्रीकृष्णसमसौन्दर्ये प्रद्युम्ने निजेश एव पुत्रात्मना जात इति भावोभक्तिर्यासां ताः "आत्मा वै पुत्रनामासीति" श्रुतेः । तन्मातरो रुक्मिण्याद्या अपि रहसि एकान्ते रूढो निरूढो भावो भक्तिर्यासां ता यं मुहुरभजन् दध्युरिति यत्तन्न चित्रम्, तदा किन्तु वक्तव्यं रमाया आस्पदं श्रीकृष्णगात्रं तस्य बिम्बे रूपान्तरे स्मरे स्मरणार्हे कामे काम्यते उपासकैरिति कामः तुतीयव्यूहस्तस्मिन् अक्षिविषये सति अन्यनार्य्यो भेजुरिति ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मृतं तमिव पत्न्या सह मणिग्रीवं मणिग्रीवायां यस्य तं चक्रपाणिं मणिना युक्ता ग्रीवा यस्य तं वा ॥ ३७ ॥ राजा उग्रसेन आख्यायोक्त्वा तस्मै सत्राजिते ॥ ३८ ॥ स्वेन पाप्मना हर्य्युपर्यपवादस्थापनजेनानुतप्यन्पश्चात्तापं भजन्स्वभवनमगमत् ॥ ३९ ॥ ते देवदेवविषयेऽनुष्ठितं स्वाघमनुध्यायन् बलवता कृष्णेन सह विग्रहेणाकुल आत्मरजः स्वदोषं कथं मृजामि । अच्युतः कथं वा प्रसीदेत् ॥ ४० ॥ मह्यं मम साधु मङ्गलं जनो मां न शपेत् । अदीर्घदर्शनं जाल्मं द्रविणलोलुपं रत्नदेयस्वापतेयलोलुपम् ॥ ४१ ॥ दुहितरं तस्मै दास्ये । इयमपि तद्योग्येत्याह । स्त्रीरत्नमिति । यदर्थमियाननर्थस्तदपि दास्य इत्याह । रत्नमेव चेति । अयमुपायः समीचीनोऽन्यथैतदिना ॥ ४२ ॥ एवं बुद्ध्या व्यवसितो व्यवसायं निश्चयं प्राप्तः सत्राजित्स्वसुतां स्वपुत्रीं । आन्तरङ्गिको भावस्तु सु असुताऽयोनिजेति । तां मणिं च स्वयमनितरबोधितः स्वयमतिशुभदेवं निमित्तीकृत्येति वा । कृष्णाय तामुपाजहारार्पयत् ॥ ४३ ॥ शीलरूपौदार्यगुणान्वितामिति बहुबाहुजयाचनाहेतूक्तिः ॥ ४४ ॥ मणिं न साक्षान्न प्रतीच्छामो वयं हि वयं तु फलभागिनो भाराष्टकाष्टापदमात्रयोग्यः ॥ ४५ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे षष्टितमोऽध्यायः ॥ १०-६० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नारदवाक्यं हि सर्वेषामेव संमतम्, ततः सर्वैरङ्गीकर्तव्यमिति सापत्न्यात् कृष्णस्त्रियो रुक्मिणीव्यतिरिक्ताः प्रथममङ्गीकृतवत्य इत्याह **तच्छ्रुत्वेति** । राजस्य एताः । **महदाश्चर्यं श्रुत्वेति** । कथं मत्स्यभक्षितस्य जीवनम्, सम्पूर्णावयवत्वं च, कथं वा विशसने अक्षतत्वम्, समुद्रप्रक्षेपे वा अमरणमिति । तासामनङ्गीकारे बाधकमाह **कृष्णान्तःपुरयोषित** इति । स्वरयाप्येवं पुत्रस्य नयने अन्या अप्यङ्गीकारं न कुर्युरिति भावः । अभ्यनन्दन् । अयं पुत्रो भवति अस्माकमिति । सापत्न्यभावेन दोषदर्शिन्यो न जाताः । किञ्च । परमस्नेहेन अभितः आनन्दयुक्ता अपि जाताः । तत्र हेतुः । बहूनब्दान् बहुवर्षपर्यन्तं नष्टमदृष्टमिति । अत्यन्तसंयोगे द्वितीया । न केवलं चिरकालदर्शनमेव तत्र हेतुः, किन्तु मृतश्चेदायाति शीघ्रमेव, तदापि महानानन्दो भवतीति, मृतं पश्चात्स्वस्थमागतं यथा सादरं लोका अभिनन्दनं कुर्वन्ति । देहे विद्यमान एव जीवने अभिनन्दनम् ॥ ३७ ॥ सात्त्विकानामभिनन्दनमाह **देवकीति** । तथा **स्त्रियः** सात्त्विक्यः तौ दम्पती मायावती प्रद्युम्नश्च परिष्वज्य पुत्रत्वात् पुत्रवधूत्वाच्च मुद ययुः । रुक्मिणी चेति भिन्नतया निरूपणं सर्वेषां यावत्सुखं तावदेकस्या एव जातमिति ज्ञापनार्थम् ॥ ३८ ॥ साधारणानां तामसानां

सम्मतिमाह **नष्टं प्रद्युम्नमायात**मिति। तेषां विपरीतभावनाभावाय वचनमाह **अहो मृत इवायात** इति। लौकिकभाषायामश्लीलवचनं न दोषाय। हेत्याश्चर्ये। अहो इति च। गमनागमनयोरुभयत्राश्चर्यमाह ॥ ३९ ॥ कामस्य महता प्रयासेन देहग्रहणे फलं जातं नवेति सन्देहं निराकर्तुमाह **यं वै मुहुः**रिति। पितृसरूपतया पितुः समानं यद्रूपं **तेन** कृत्वा निजेशभावाः, कृष्ण एवायमिति बुद्धियुक्ताः। निजेशः कृष्णः। तस्य मातरोऽपि ऊढभावाः सत्यः तद्दर्शनेन उद्गतकामाः रहः एकान्तमभजन्। निलीना जाताः। एतच्चित्रं न। रमाया आस्पदरूपं यद्बिम्बं भगवान् श्रीनिवासः तस्य बिम्बं कार्यं प्रतिबिम्ब इति यावत्। बिम्बवदेव प्रतिबिम्बेऽपि बुद्धिर्भवतीति न कोऽपि दोषः। रमास्पदपदं लक्ष्म्या अपि तत्र प्रदर्शनार्थम्। तेन लक्ष्मीश्चेत्तत्र, वयं कथं नेति तासां भ्रमे हेतुर्मुख्यो निरूपितः। किञ्च, **कामे** कामात् सर्वं सम्भवति। किञ्च। स्मरे अक्षविषये सति स्मृत एवानर्थं करोति, किमुत प्रत्यक्षविषयः। यत्र भगवत्स्त्रीणामेवैषा व्यवस्था, तत्रान्यनारीणां कामोद्बोधः कि वक्तव्य इत्यर्थः। एवं कामस्य सर्वलोकेषु प्रतिष्ठितत्वमुक्तम्। स्त्रीषु प्रतिष्ठितः सुखहेतुर्भवति, न तु पुरुषेष्विति तथोक्तम् ॥ ४० ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे षष्ठोऽध्यायः ॥ ६ ॥

श्रीसुबोधिनीसारः

तन्महदाश्चर्यं श्रुत्वा कृष्णस्यांतःपुरस्त्रियो बहूनब्दान् नष्टं मृतमागतमिवाभ्यनंदन् प्राशंसन् ॥ ३७ ॥ देवकी वसुदेवः कृष्णरामौ रुक्मिणी च तथा स्त्रियोऽन्याः तौ दंपती स्त्रीपुरुषौ परिष्वज्यालिंग्य मुदं हर्षं ययुः प्रापुः ॥ ३८ ॥ नष्टमायातं प्रद्युम्नम् आकर्ण्य श्रुत्वा द्वारकावासिनो जना मृत इव बाल आयातोऽहो आश्चर्यं दिष्ट्या मंगलमित्यब्रुवन् ह स्फुटम् ॥ ३९ ॥ तल्लावण्यमाह। पिता श्रीकृष्णस्तस्य सरूपे तुल्यरूपे प्रद्युम्ने निजः स्वीय ईशः भर्ता श्रीकृष्णोयमिति भावो भावना यासां ताः तस्य मातरो रुक्मिण्याद्या रहसि एकांते रूढो दृढो भावः प्रीतिर्यासां ता यत् यदा यं प्रद्युम्नं मुहुरभजन् वै एव तत् खलु न चित्रं नाश्चर्यं रमास्पदो विष्णुस्तस्य विम्वं श्रीमूर्त्तिस्तस्य बिम्बे पुत्रे स्मरे स्मरणमात्रेणैव क्षोभके कामेऽक्षिविषये नेत्रगोचरे अन्यनार्य परस्त्रियो यमभजन्निति किमुत वक्तव्यम् ॥ ४० ॥

इति श्रीमद्भा० दशमस्कन्धे उत्तरार्द्धे सुबोधिन्यां टीकायां पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

तन्नारदकथितं महदाश्चर्यं मत्स्यभक्षितस्यापि जीवनं सम्पूर्णावयवत्वं च विशसनेऽप्यक्षतत्वं शम्बरहननादिकं श्रुत्वा बहूनब्दान् बहुवर्षपर्यन्तं नष्टमदृष्टं पुनर्मृतमागतमिव प्रद्युम्नं दृष्ट्वा कृष्णान्तःपुरयोषितोऽभ्यनन्दन्नित्यन्वयः ॥ ३७ ॥ देवक्याद-यस्तौ दम्पती यथोचितं परिष्वज्य मुदं हर्षं ययुः ॥ ३८ ॥ द्वारकौकसो द्वारकावासिनो जना नष्टं प्रद्युम्नमायातमाकर्ण्य श्रुत्वा अहो आश्चर्यम्, अयं बालो यथा कश्चिन्मृतः पुनरागच्छेत्तथा आयातः दिष्ट्या तेन महानानन्दो जातः इति ह स्पष्टमब्रुवन् ॥ ३९ ॥ सौन्दर्यातिशयेन प्रद्युम्नं वर्णयति—यमिति। पिता श्रीकृष्णस्तत्सरूपे प्रद्युम्नेऽपि निजः आत्मीयः ईशो भर्तेति भावो भावना यासां ताः ता मातरः कृष्णपत्न्योऽपि रूढभावा उद्भूतकामाः सत्यो रहसि यं मुहुरभजन्निति यत् तत् तस्मिन्न खलु चित्रं आश्चर्यं नैव भवति। तत्र हेतुद्वयमाह —स्मरे स्मर्यमाणत्वेनैव क्षोभके कामे अक्षविषये अक्षाणामिन्द्रियाणां विषये सति किञ्च रमास्पदं श्रीकृष्णः तस्य बिम्बं श्रीमूर्तिः तस्य बिम्बे प्रतिबिम्बे पुत्रे इति यदि मातर एवं मुमुहुस्तदाऽन्यनार्यो मुमुहुरिति किं वक्तव्यम् ॥ ४० ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीकाबालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने। पञ्चपञ्चाशत्तमोगात् प्रद्युम्नोत्पत्तिबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

तदिति ॥ तन्नारदकथितं महदाश्चर्यं मत्स्यभक्षितस्यापि जीवनं सम्पूर्णावयवत्वं च विशसनेऽप्यक्षतत्वं शम्बरहननादिकं च श्रुत्वा बहूनब्दान्बहुवर्षपर्यन्तं नष्टमदृष्टं पुनर्मृतमागतमिव प्रद्युम्नं दृष्ट्वा कृष्णान्तःपुरयोषितोऽभ्यनन्दन् ॥ ३७ ॥ देवकीति ॥ देवकी वसुदेवश्चेत्याद्याः तथा अन्याः स्त्रियः तौ दम्पती यथोचितं परिष्वज्य मुदं ययुः ॥ ३८ ॥ नष्टमिति ॥ द्वारकौकसो द्वारकावासिनो जना नष्टं प्रद्युम्नमायातमाकर्ण्य श्रुत्वा अहो आश्चर्यमयं बालो यथा कश्चिन्मृतः पुनरागच्छेत्तथा आयातः। दिष्ट्या तेन महानानन्दो जातः इति ह स्पष्टमब्रुवन् ॥ ३९ ॥ यमिति। यं मुहुर्विलोक्य पिता श्रीकृष्णस्तत्सरूपात् समानसौन्दर्याद्धेतोः निजेशो भगवान् तस्य भावो भावना कथं त्वनेन संप्राप्तं सारूप्यं शार्ङ्गधन्वन इत्यादिचिन्तनं यासां तास्ताः तन्मातरः प्रद्युम्नमातरः रुक्मिण्याद्या कृष्णपत्न्योऽपि रहः रहसि निलीनाः तत्परिचयात्पूर्वमेव च तस्य रूढो भावो वात्सल्यम्

अमुष्मिन् प्रीतिरधिकेत्यादिर्यासां ताः तत्तश्च "स एव वा भवेन्नूनं वामः स्फुरति मे भुजः।" इति निश्चये सति यम् अभजन् सास्रावलोकमस्तकघ्राणादिजनन्युचितमकुर्वन्निति यत् तत् तासां मातॄणां तस्मिन् खलु चित्रमाश्चर्यं नैव भवति। एवं सति रमास्पदं श्रीकृष्णः तस्य बिम्बं शरीरं तस्य बिम्बभूते पुत्रे प्रद्युम्ने चित्रन्न भवति तथाभूतस्यान्यस्य त्रिभुवनेऽप्यभावादेव तस्य कृष्णपुत्रत्वनिश्चयात् मातृभिन्नानां स्त्रीणां तु तादृशो भावो न सम्भवतीत्याह। स्मरे स्मर्यमाणत्वेनैव क्षोभके कामे अक्षविषये अक्षाणामिन्द्रियाणां विषये सति उत तथेत्यर्थे अन्यनार्यः किं तथाभवितुं शक्नुवन्ति अपि तु नैव। यतः क्षोभमेव प्राप्नुवन्ति। ईदृशः एवार्थः समञ्जसः। अर्थान्तरं तु वैरस्यावहत्वात्त्याज्यम्। रहरूढेत्यत्र रेफलोपाद्यार्षं रह ऊढेति च पाठः॥ ४०॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां पञ्चपञ्चाशत्तमोऽध्यायः॥ ५५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

बहूनब्दान् बहूनि वर्षाणि तत्पर्यंतं नष्टं पुत्रं मृतं पुनरागतमिव ज्ञात्वा अभ्यनंदन् प्राप्तानंदा बभूवुः॥ ३७॥ देवकीति दंपती रति प्रद्युम्नौ॥ ३८॥ नष्टमिति दिष्ट्या भाग्येनेति॥ ३९॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने प्रद्युम्नाहरणागमननामा पञ्चपञ्चाशत्तमोऽध्यायः॥ ५५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति। तन्नारदकथितं, महत् आश्चर्यं श्रुत्वा, कृष्णान्तःपुरयोषितः देवक्यादयः सर्वा अन्तःपुरस्थाः स्त्रिय इत्यर्थः। बहून् अब्दान् नष्टमदृष्टं, संप्रति दृष्ट्वेति शेषः। मृतं पुनः आगतं इव, अभ्यनन्दन्॥ ३७॥ देवकीति। देवकी, वसुदेवः, कृष्णरामौ च, तथा स्त्रियः, रुक्मिणी च, तौ दम्पती, परिष्वज्य यथायथं परिरभ्य, मुदं ययुः॥ ३८॥ नष्टमिति। द्वारकौकसः द्वारकावासिनो जनाः, नष्टं प्रद्युम्नं, आयातं, आकर्ण्य, अहो अयं बालः मृतः इव, आयातः। दिष्ट्या आनन्दस्तेन नो जातः इति ह एवमेव अब्रुवन्॥ ३९॥ सौन्दर्यातिशयेन प्रद्युम्नं वर्णयति। यमिति। पिता श्रीकृष्णस्तस्य सरूपं समानरूपता तेन निज आत्मीय ईशो भर्त्ता इति भावो भावना यासां ताः, पितृसारूप्येक्षया निजभर्तृबुद्धिसहिता इत्यर्थः। तन्मातरः श्रीकृष्णपत्न्यः यं मुहुः निरीक्ष्येति शेषः। भूयो दृष्ट्वापीत्यर्थः। वै। रूढभावाः श्रीकृष्णोऽयमिति स्फुटाशयाः सत्यः, रहः अभजन्। निलिल्युरित्यर्थः। इति यत् तत्, रमास्पदं श्रीकृष्णस्तस्य बिम्बं श्रीमूर्त्तिस्तस्य बिम्बे प्रतिनिधीभूते, स्मरे स्मर्यमाणत्वेनैव क्षोभजनके, कामे, अक्षविषये सति, चित्रं न खलु। यदा तन्मातरस्तत्र रूढभावा जातास्तदेति शेषः। अन्यनार्योऽन्या अङ्गनाः, तत्र रूढभावाः स्युः, तत्र किमुत किं वक्तव्यमित्यर्थः। अत्र द्वयोर्बिम्बशब्दयोरुपादानान्न प्रतिबिम्बार्थः सादृश्यताबोधकः प्रतिकृतिरूपार्थस्यैव वक्तव्यत्वात्। शम्बराहरणोक्त्यात्र प्रद्युम्नहानिलाभतः। आपत्ये सुखदुःखे हि सूचिते स्तः कुटुम्बिनाम्॥ ४०॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्द्धे पञ्चपञ्चाशत्तमोऽध्यायः॥ ५५॥

कृष्णप्रिया

श्रीनारदजीके मुखारविन्द से सारा इतिवृत्त-आश्चर्यमयी घटना सुनकर श्रीकृष्ण भगवान् के अन्तःपुर की स्त्रियाँ चकित हो गयीं और सुदीर्घकाल पर्यन्त खोये रहने के बाद लौटे हुए श्रीप्रद्युम्नजी से इस प्रकार प्यार करने लगी कि मृतोपलब्ध या अभिनव प्रसूत पुत्र से प्यार कर रही हो॥ ३७॥ देवकीजी, वसुदेवजी, भगवान् श्रीकृष्ण, बलभद्रजी रुक्मिणीजी और सर्व गृहिणियाँ उस नव-दम्पति को हृदय से लगाकर बहुत ही आनन्दित हुए॥३८॥ अब द्वारिकावासी नर-नारियों को यह ज्ञात हुआ कि खोये हुए प्रद्युम्नजी लौट आये हैं। तब वे आपस में वार्ता करने लगे कि–अहो कैसे सौभाग्य की बात है कि यह बालक मर कर पुनः लौट आया॥ ३९॥ राजन् परीक्षित्। श्रीप्रद्युम्नजी का स्वरूप-वर्ण आदि भगवान श्रीकृष्ण से इतना मिलता-जुलता था कि प्रद्युम्नजी को देखकर उनकी माताएँ भी उन्हें अपना पतिदेव श्रीकृष्ण समझकर मधुर भाव में मग्न हो जाती थी और उनके सामने से हटकर एकान्त में चली जाती थी श्रीकृष्ण भगवान् प्रतिबिम्ब स्वरूप कामावतार भगवान् प्रद्युम्न को देखकर ऐसा होना कोई आश्चर्य की बात नहीं है। फिर उन्हें देखकर दूसरी स्त्रियों की विचित्रदशा हो जाती थी इसमें कहना ही क्या है॥ ४०॥

श्रीमद्भागवत दशमस्कन्ध उत्तरार्द्ध निरोधलीला के भाषान्तर में ५५ वाँ अध्याय समाप्त।

◆

अथ [1]षट्पञ्चाशत्तमोऽध्यायः

श्लोकाः	अनु.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४५	४४	१	४	१४८०	२२	४३	१५४५	४८।	१

श्रीशुक उवाच

सत्राजितः[2] स्वतनयां कृष्णाय कृतकिल्बिषः । स्यमन्तकेन मणिना स्वयमुद्यम्य दत्तवान् ॥ १ ॥

राजोवाच

सत्राजितः किमकरोद् ब्रह्मन् कृष्णस्य किल्बिषम् । स्यमन्तकः कुतस्तस्य कस्माद् दत्ता सुता हरेः ॥ २ ॥

श्रीशुक उवाच

आसीत् सत्राजितः सूर्यो भक्तस्य[3] परमः सखा[4] । प्रीतस्तस्मै मणिं प्रादात्[5] सूर्यस्तुष्टः स्यमन्तकम् ॥ ३ ॥
स तं बिभ्रन् मणिं कण्ठे भ्राजमानो यथा रविः । प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः ॥ ४ ॥

---

१. विजयमते अयं षष्टितमोऽध्यायः । २. सत्राजित्तनयां तन्वीं—विज. । ३. कश्च—वीर. । ४. दा—वीर. । ५. स च तुष्टा—श्रीधर. ।

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—कृतकिल्बिषः, सत्राजितः, कृष्णाय, स्वतनयाम्, स्वयम्, उद्यम्य, स्यमन्तकेन, मणिना, सह, दत्तवान् ॥ १ ॥ राजोवाच—हे ब्रह्मन् ! सत्राजितः, कृष्णस्य, किम्, किल्बिषम्, अकरोत् ?, तस्य, स्यमन्तकः, मणिः, कुतः, हरेः, सुता, कस्माद् दत्ता ? ॥ २ ॥ श्रीशुक उवाच—सत्राजितः (सूर्यस्य) परमः, भक्तः, आसीत्, तस्य, सूर्यः, परमः, सखा, आसीत्, प्रीतः, सूर्यः, प्रीतः, सन्, तुष्टः, सन्, तस्मै, स्यमन्तकम्, मणिम्, अदात् ॥ ३ ॥ राजन् ! सः, तम्, मणिम्, कण्ठे, बिभ्रत्, यथा, रविः, इव, भ्राजमानः, द्वारिकाम्, प्रविष्टः, तेजसा, नोपलक्षितः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

षट्पञ्चाशत्तमे मिथ्याऽभियोगे मणिमाहरत् । कन्यां जाम्बवतः प्राप कृष्णः सत्राजितस्ततः ॥ १ ॥
पुत्रादिकामसौख्यस्य निष्ठामुक्त्वाऽतिचञ्चलाम् । अर्थस्यानर्थतामाह स्यमन्तहरणादिना ॥ २ ॥

सत्यभामाजाम्बवत्योर्विवाहप्रस्तावाय स्यमन्तकाख्यानमाह—सत्राजित इति । सत्राजित इत्यकारान्तः क्वचिच्च तकारान्तोऽप्यन्वयानुसारेण द्रष्टव्यः कृतापराधस्तच्छान्तये स्वयमेवोद्यमं कृत्वा मणिना सह प्रादादिति ॥ १–२ ॥ भक्तस्य सत्राजितः सूर्यः स्वाम्यपि सखेवाऽऽसीदित्यर्थः । स च तुष्टस्तस्मै स्यमन्तकन्नाम मणिं प्रादात् प्रीतः स्निग्धः ॥ ३ ॥ नोपलक्षितः सत्राजितोऽसावित्यविज्ञातः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मिथ्याभियोगे मिथ्याभिशापे (१) । निष्ठां सुस्थितिम् । स्यमन्तो मणिविशेषः (२) । 'प्रस्तावः स्तवने प्रोक्तं प्रकृते वस्तुनि' इति निरुक्तिः । सत्रेण हिरण्यादिदानलक्षणतपसा सूर्ये स्थितं मणिमाजितवानतः सत्राजिदिति नाम । अकारान्तपक्षे तु सत्रे सदादाने न केनापि जित इत्यर्थः । ''यज्ञभेदे सदादाने शत्रमाच्छादने वने'' इति यादवः । तच्छान्तयेऽपराधनिवृत्त्यर्थं स्वयमुद्यमं कृत्वा याचनादिपरप्रेरणामन्तरेण । कृष्णाय सर्वचित्ताकर्षकाय इति तस्याः पूर्वरागोऽसूचि ॥ १ ॥ तस्य सत्राजितः । कुतः, प्राप्त इति शेषः । हरेरिति चतुर्थीविषये षष्ठी, नातीच्छया दानात् ॥ २ ॥ इत्यर्थ इति–परमभक्त्या वशीकृतः सूर्यस्तेन सख्यं कृतवानित्याशयः । स च सूर्यः । तस्मै सत्राजिते । सखा उपासनासातत्येन सदा हितकारी । तत्रापि प्रीतः उपासनाविशेषेण तदा प्रीतिविशेषवान्सन् । प्रदानप्रकारस्तु श्रीहरिवंशे—'तस्योपतिष्ठतः सूर्यं विवस्वानग्रतः स्थितः । अस्पष्टमूर्तिर्भगवांस्तेजोमण्डलवान्प्रभुः । अथ राजा विवस्वन्तमुवाच स्थितमग्रतः । यथैव व्योम्नि पश्यामि सदा त्वां ज्योतिषां पते । तेजोमण्डलिनं देवं तथैव पुरतः स्थितम् । को विशेषो मे त्वत्तः सख्येनोपगतस्य वै । एतच्छ्रुत्वा स भगवान्मणिरत्नं स्यमन्तकम् । स्वकण्ठादवमुच्यैनमेकांते न्यस्तवान्विभुः । ततो विग्रहवन्तं तं ददर्श नृपतिस्तदा । प्रीतिमानथ तं दृष्ट्वा मुहूर्तं कृतवान्कथाम् । तमाह प्रश्रितो

भूयो विवस्वंतं स सत्रजित् । लोकानुद्भासयस्येतान्येन त्वं सततं प्रभो । तदेतन्मणिरत्नं मे भगवान्दातुमर्हसि । ततः स्यमन्तकर्मणि दत्तवांस्तस्य भास्करः ।'' इति । 'लोकानुद्भासयस्येतान्येन' इति सत्राजितोऽज्ञानमयोक्तिरेव, तस्य स्वासाधारणतेजसैव प्रकाशकत्वं न तु मणितेजसेति, अन्यथा तद्दानोत्तरं जगदांध्यप्रसंगः स्यादिति भावः । किञ्च—मणिदानमपि—"हरिः सुदर्शनं चक्रं समुत्पाद्य स्वचक्रतः'' इति मार्कण्डेयोक्तन्यायेनैव, न हि स्वासाधारणं देवालंकरणं मनुष्येण धर्तुं शक्यत इति ज्ञेयम् ॥ ३ ॥ स सत्राजित् । तं मणिम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

टीकायां पुत्रादीति शम्बरविषयकमुन्नेयं श्रीप्रद्युम्ने तस्य पुत्रत्वमननात् वस्तुतस्त्वेवमाभाष्यं तन्मातर इत्युक्तम् कथं ताः परिणीता इत्यपेक्षायामादौ प्रियतमायाः श्रीसत्यभामाया विवाहमाह—सत्राजित इति । स्वतनयामिति स्वशब्देनान्यापेक्षा निरस्ता स्वतः स्वयमेव उद्यम्य कृष्णाय सर्वचित्ताकर्षकायेति तस्यास्तु सुतरामाकर्षणमिति पूर्वरागोपि सूचितः श्रीजाम्बवत्या विवाहः पूर्वोऽप्येतत्प्रसङ्गेनैव जातत्वेन प्रेमगौणत्वेन च पूर्वं प्रस्तुतः ॥१॥ कुतः सकाशाद्बभूव ? इत्याह—हरेरिति । चतुर्थीविषये षष्ठीनातीच्छयादानात् ॥ २ ॥ सखा उपासनासातत्येन सदा हितकारी तत्रापि प्रीतः सन् उपासनाविशेषेण तदा प्रीतिविशेषवानित्यर्थः । प्रदानप्राकारः श्रीहरिवंशे—

"तस्योपतिष्ठतः सूर्यं विवस्वानग्रतः स्थितः । अस्पष्टमूर्त्तिभगवान् तेजोमण्डलवान् प्रभुः ॥
अथ राजा विवस्वन्तमुवाच स्थितमग्रतः । यथैव व्योम्नि पश्यामि सदा त्वां ज्योतिषाम्पते ! ॥
तेजोमण्डलिनं देवं तथैव पुरतः स्थितम् । को विशेषोऽस्ति मे त्वत्तः सख्येनोपगतस्य वै ॥
एतच्छ्रुत्वा स भगवान् मणिरत्नं स्यमन्तकम् । स्वकण्ठादवमुच्यैनमेकान्ते न्यस्तवान् विभुः ॥
ततो विग्रहवन्तं तं ददर्श नृपतिस्तदा । प्रीतिमानथ तं दृष्ट्वा मुहूर्त्तं कृतवान् कथाम् ॥
तमाह प्रश्रितो भूयो विवस्वन्तं स सत्रजित् । लोकानुद्भासयस्येतान् येन त्वं सततं प्रभो ! ॥
तदेतन्मणिरत्नं मे भगवन् ! दातुमर्हसि । ततः स्यमन्तकमणिं दत्तवांस्तस्य भास्करः'' ॥ इति ।

अत्र लोकानुद्भासयस्येतान् येनेति सत्राजितस्याज्ञानमयमेव वचनमिति च ज्ञेयम् ॥ ३ ॥ अपरिचितः सन् प्रविष्टः । यद्वा, प्रविष्टोऽपि न परिचितः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तन्मातर इत्युक्तम्, कथं ताः परिणीता इत्यपेक्षायामादौ प्रियतमायाः श्रीसत्यभामाया विवाहमाह—सत्राजित इति । स्व-शब्देन अन्यापेक्षा निरस्ता, अतः स्वयमेवोद्यम्य, यद्वा, निजधनरूपां तनयां तदेकापत्यत्वात् । कृष्णाय सर्व्वचित्ताकर्षकायेति तस्या अपि तत्पतित्वेच्छा सूचिता । आदौ ज्येष्ठायाः श्रीजाम्बवत्या विवाहे वक्तुं योग्येऽप्यस्या विवाहोक्तिरेतद्विवाहकारणमपि प्रसंगादेव तद्विवाहसिद्धेः तच्चाग्रे व्यक्तं भावि । यद्वा, अस्यां श्रीभगवतः प्रेमविशेषात् ॥ १ ॥ कृष्णस्य साक्षाद्भगवतोऽपि कस्माद्धेतोः । ननु कृतकिल्विष इति हेतुरुक्त एव, तत्राह—हरेरिति, पूर्वदोषहरत्वेन तस्मिन्न कोऽप्यपराधस्तिष्ठत्, तत् कस्माद्दत्तेति भावः । तच्च सर्व्वं भवता ज्ञायत एवेत्यभिप्रायेण सम्बोधयति—ब्रह्मन्निति ॥ २ ॥ सखा हितकारी सख्यमेव दर्शयति—प्रीत इति । स्वभावादेव तस्मिन् स्निग्धः पुनश्चोपस्थानादिना तुष्टः सन् प्रकर्षेण स्वयं तत्कण्ठार्पणादिनादात् । तद्विशेषः श्रीहरिवंशे (विष्णु० प० ३८।१६-२२)—

'तस्योपतिष्ठतः सूर्यं विवस्वानग्रतः स्थितः । अस्पष्टमूर्त्तिर्भगवांस्तेजोमण्डलवान् प्रभुः ॥
अथ राजा विवस्वन्तमुवाच स्थितमग्रतः । यथैवं व्योम्नि पश्यामि सदा त्वां ज्योतिषां पते ॥
तेजोमण्डलिनं देवं तथैव पुरतः स्थितम् । को विशेषोऽस्ति मे त्वत्तः सख्येनोपागतस्य वै ॥
एतच्छ्रुत्वा स भगवान् मणिरत्नं स्यमन्तकम् । स्वकण्ठादवमुच्यैनमेकान्ते न्यस्तवान् विभुः ॥
ततो विग्रहवन्तं तं ददर्श नृपतिस्तदा । प्रीतिमानथ तं दृष्ट्वा मुहूर्तं कृतवान् कथाम् ॥
तमाह प्रश्रितो भूयो विवस्वन्तं स सत्रजित् । लोकानुद्भासयस्येतान् येन त्वं सततं प्रभो ॥
तदेतन्मणिरत्नं मे भगवन् दातुमर्हसि । ततः स्यामन्तकर्मणि दत्तवांस्तस्य भास्करः ॥' इति ॥

नोपलक्षितोऽनुपलक्ष्यमाण इत्यर्थः । अतीतत्वं श्रीशुकपरीक्षित्-संवादतः प्राक्तनत्वात्, किंवा तन्निर्द्वाराभिप्रायेण, राजन्निति विस्मयात् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ सत्यभामाजाम्बवत्योर्विवाहं वर्णयितुकामस्तद्विस्तरं पिपृच्छिषामुत्पादयितुमाह—सत्राजित इति । सत्राजित इत्यकारान्तः क्वचित्तकारान्तोपि अन्वयानुसारेण दृष्टव्यः तत्राकारान्तः कर्त्तरिक्तान्तः सत्रेणासम्मताज्जितः जितवान् सर्वोत्कर्षेण

वर्त्तितवानिति तथा सच तावत्कृतं किल्विषमपराधो येन तथाभूतस्यमन्तकाख्येन मणिना सह स्वतनयां सत्यभामां कृष्णायोद्यम्योद्धृत्य ददौ ॥ १ ॥ तत्र लब्धप्रश्नोऽवसरः पृच्छति राजा—सत्राजित इति । हे ब्रह्मन् ! तावत्सत्राजित्किं किल्विषमपराधमकरोत् तस्य सत्राजितस्य स्यमन्तकः कुतः कस्माल्लब्धः कस्माद्धेतोः सुता च हरेर्हरये दत्तेति पृष्टः ॥ २ ॥ सविस्तरमनुवर्णयितुं तावदुपोद्घातमाह—आसीदिति । सत्राजिताख्यः कश्चिद्राजा सदा परमः सूर्यभक्तः आसीत् सूर्यस्तुष्टः भक्त्येति शेषः । तस्मै सत्राजिताय स्यमन्तकाख्यं मणिं ददौ ॥ ३ ॥ स सत्राजितस्तं मणिं कण्ठे बिभ्राणः रविरिव भ्राजमानः हे राजन् ! मणितेजसा अनुपलक्षितशरीरो द्वारकां **प्रविष्टः** ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

त्रिविक्रमावतारस्य निरपेक्षभक्तानुकम्पिनो यदुनन्दनस्य एतज्जन्मानुष्ठितकर्मनिमित्तदुर्यशः शमनहेतुविक्रममनुक्रामति—अस्मिन्नध्याये तत्र परीक्षितः प्रश्नबीजमुत्थापयति—सत्राजिदिति । सत्रेण हिरण्यादिदानलक्षणतपसा सूर्यस्थितं हरिं जितवान्वशीकृतवानित्यतः सत्राजिदिति नाम लब्धवान् "यज्ञभेदे सदादाने सत्रमाच्छादने वने" इति कृतकिल्विषः कृतापराधः मणिना सह स्वयमुद्यम्य याचनादिपरप्रेरणामन्तरेण मत्कन्यां तुभ्यं दास्यामीति वचनादिप्रयत्नं विधाय सत्राजितोऽन्तरात्मा सत्रविषये अजित इति वा ॥ १-२ ॥ भक्तस्य सत्राजितः सखा ॥ ३ ॥ तेजसाऽर्चिषा नोपलक्षितो न दृष्टः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

षट्पञ्चाशत्तमे लब्धकलङ्कोऽगान्मणीहृया । लभे जाम्बवतः कन्यां कृष्णः सत्राजितस्ततः ॥

सत्राजित इत्यकारान्तः क्वचित्तकारान्तश्च द्रष्टव्यः ॥ १ ॥ हरेः हरये ॥ २ ॥ भक्तस्य सत्राजितः सूर्यः स्वाम्यपि प्रीतः सखा प्रियसख आसीदित्यर्थः ॥ ३ ॥ नोपलक्षितः सत्राजितोऽसावित्यविज्ञातः ॥ ४-५ ॥

गूढार्थदीपिनी

षट्पञ्चाशत्तमे नेतुं मणिं मिथ्याकलङ्कतः । गतो जाम्बवतीं लेभे सत्यभामां च माधवः ॥ १ ॥

सत्राजित इत्यकारान्तः क्वचित्तकारान्तश्च । सत्रे दाने न केनापि जित इत्यकारान्तः । सत्रेण दानलक्षणतपसा मणिमाजितवानिति तकारान्तश्च । उद्यम्य परप्रेरणां विनैव ॥ १ ॥ कुतः प्राप्तः । हरेः हरये ॥ २ ॥ भक्तस्य सत्राजितः सखेवासीदिति व्याख्येयम् ॥ ३ ॥ नोपलक्षितो न ज्ञातः सत्राजितोऽयमिति ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

षटपञ्चाशत्तमे श्रीभूदेव्या विवाहमुपक्रम्य स्यमन्तकमणिकथां जाम्बवत्याः प्रसङ्गात् विवाहमुक्त्वा श्रीभूदेव्या विवाहमाह— सत्राजित इति । सत्रैः आसमन्ताज्जितः लब्धजयः सत्राजितोऽकारान्तः क्तान्तत्वात् क्वचिदन्वयानुसारेण तकारान्तोऽपि ॥ १ ॥ हरेः हरये ॥ २ ॥ भक्तस्य सत्राजितः सूर्यः परमः स्वाम्यपि प्रीतः प्रसन्नः सन्सखा आसीत् स च तुष्टस्तस्मै स्यमन्तकं नाम मणिं प्रादादित्यन्वयः ॥ ३ ॥ नोपलक्षितः सत्राजितत्वेन नैव विज्ञातः ॥ ४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सप्तमे कामतः प्रोक्तो विवाहस्तामसः परः । सात्त्विकश्च प्रसङ्गेन क्लेशेनोभे निवारिते ॥ १ ॥
क्लेशापनोदनार्थाय चौर्यमत्र निरूप्यते । वाचिकं कायिकं चैव कायेन वचनेन च ॥ २ ॥
सम्बन्धी च तथा भक्तः स्वापराधापनुत्तये । सत्यभामा जाम्बवती ताभ्यां सम्यक् निरूपिते ॥ ३ ॥
गुणा एतास्ततोऽग्रे तु विद्यारूपा निरूपिताः । एवमष्टौ महिष्यो हि सात्त्विक्यस्तु ततः पराः ॥ ४ ॥
विवाहाः सप्त कामेन कृपया तु सहस्रशः । विधितस्त्वेक एवोक्तो द्वयोरत्र निरूप्यते ॥ ५ ॥

रुक्मिण्या विवाहं पुत्रसम्पत्तिं चोक्त्वा, निमित्तवशात् सत्यभामाया विवाहमाह **सत्राजित** इति । सत्राजित्शब्दः तकारान्तः । अकारान्तोऽपि । सत्रान् रक्षकसहितानपि जयतीत्यर्थे क्विप् । सत्राणां जितं यस्मादिति क्तान्तेन बहुव्रीहौ अदन्तता भवति । एतदधीन एव महतामपि जय इति द्वितीयोर्थः । स्वतनयां स्वयमुद्यम्य दत्तवानिति । अप्रार्थितः अनभिप्रेतश्च । तथापि दाने हेतुः **कृतकिल्बिष** इति । कृतापराधः । तदपराधदूरीकरणार्थं स्यमन्तकेन मणिना सह । यत्कृते अपराधः तदपराधनिमित्तं दण्डार्थं कन्यां च दत्तवान् । संक्षेपकथेयमिति केचित् । वस्तुतस्तु न समाधिभाषा । नह्युदारलीलावतः अपकीर्त्यादिकं समाधिकार्यं भवति । भक्तिसाधकानामेव चरित्राणां वक्तव्यत्वात् । **कृतकिल्बिष** इति । यथाकथञ्चिदपराधोऽपि सम्भवति । अतोऽनभि-

प्रेतत्वेन कल्पान्तरत्वेन वा अवचनम्। वस्तुतः सत्यभामा सरस्वत्यंशा भूम्यंशा वेति तस्या विवाहार्थं तथोद्योगः **भगवतैव** कृतः। स्वीकारोऽत्र वक्तव्यो राजसानाम्, तदर्थं स्त्रीप्रकरणे सत्यभामादीनां परिग्रहमात्रमत्र वक्तव्यम् ॥ १ ॥ नन्वाकाङ्क्षापूरणाभावात् संक्षेपपरत्वमेव कुतो न भवतीति चेत्। मैवम्। मित्रविन्दाविवाहवद्यावदुक्तेनैव आकाङ्क्षानिवृत्तिसम्भवात्। विशेषं पृच्छति। **सत्राजित** इति। **ब्रह्मन्**निति ज्ञानार्थम्। कृष्णस्य सदानन्दस्य कथं वा कोऽप्यपराधं कुर्यात्। **तत्रापि पालकस्य**। अपराधनिमित्तः **स्यमन्तको** वा भगवद्भक्तानां कुतः। देवतान्तरभजनात् तथात्वे कथं वा तस्य निरोधे सम्बन्ध इति प्रश्नाभिप्रायः। विरुद्धानामपकारकरणं युक्तम्। तथा सति तेषां सर्वस्वेन सह कन्यादानं चायुक्तम्, तस्मात् कथमयमुभयात्मक इति। कस्माद्धेतोः सुतां दत्तवान्। कन्यापि सूर्यादेव प्राप्ता वरलब्धा, न तु तस्य औरसी, भगवान् नन्दपुत्र इव तस्यापि कन्येति पुराणान्तरव्यवस्था। अत एव यादवानां विवाहदोषो न शङ्कनीयः। अत्रापि 'स्त्रीरत्नं रत्नमेव चे'ति वाक्यात् देवादेव प्राप्तमिति लक्ष्यते। भगवानपि अक्लिष्टकर्मा सगोत्रापक्षे विवाहं न कुर्यात् ॥ २ ॥ विस्तरेण वक्तुं कथामारभते **आसीदिति**। स्वतन्त्रकथेयमित्यप्यासीदित्यनेन सूचितम्। सत्राजित आसीदिति भिन्नं वाक्यम्। तस्य महत्त्वं ख्यापयितुमाह। सूर्योऽपि भक्तस्य परमः सखा आसीदिति। भक्तस्य सख्यं शीघ्रं प्रयच्छतीति सूर्यस्य स्वभावो वर्णितः। अनेन सूर्यः परमदयालुः, अल्पेऽपि **भजने** बहु प्रयच्छतीति निरूपितम्। ततो यज्जातं तदाह **प्रीतस्तस्मै मणिं प्रादा**दिति। मणिः स्यमन्तकः। **कुत्रत्यो** मणिरित्याकाङ्क्षायामाह **सूर्य** इति। स हि मणिं सूते। सर्वमेव सूर्यात्प्रभूतमिति तस्य मणिमात्रप्रसवे न दूषणम्। **तदर्थमेव** मणिरुत्पादित इति लक्ष्यते। यतः **प्रीतः**, तस्य भक्त्या संतुष्टः, स्यमन्तकमुत्पादितवान्। उत्पाद्यापि ततोऽपि प्रीतः प्रकर्षेणादात्। तस्मिन् सामर्थ्यं स्थापयित्वा अदात्। प्रकर्षेणैव दानात् भोगार्थं भोगसाधनसम्पादनार्थं च तज्जातमिति लक्ष्यते ॥ ३ ॥ अतस्तस्य प्रथमतो भोगमाह **स तं बिभ्रद**िति। स्वतेजस्तस्मिन्स्थापितमिति तद्धारणेन सूर्य एव धृतः। अत एव तत्प्रभावाद्यथा रविः, तथा भ्राजमानो जातः। स चेदन्यत्र तिष्ठेत्, न काप्यनुपपत्तिर्भवेत्। सूर्यश्च रक्षको भवेत्। स पुनस्तद्गृहीत्वा द्वारकास्थितान् भक्तान् वञ्चयन्निव समागतः। ततः सूर्येण उपेक्षित इत्यभिप्रायं वक्तुं तस्य द्वारकाप्रवेशमाह **प्रविष्टो द्वारका**मिति। **राजन्**निति सम्बोधनमन्यविषये अन्यो रक्षां न करोतीति ज्ञापयितुम्। तस्य मनोरथः सिद्ध इत्याह **तेजसा नोपलक्षित** इति ॥ ४ ॥

श्रीसुबोधिनी-सारः

तन्मातर इत्युक्तत्वादन्यविवाहानाह श्रीशुकः। कृतं किल्विषं पापं येन स सत्राजितः तांतोऽदंतश्च। स्वतनयामात्मपुत्रीं स्यमंतकेन मणिना सह स्वयमुद्यम्य उद्यमं कृत्वा कृष्णाय दत्तवान् ॥ १ ॥ राजप्रश्नः। हे ब्रह्मन् सत्राजितः कृष्णस्य किं किल्विषमपराधमकरोत् तस्य स्यमंतको मणिः कुत आगतः हरेर्हरये सुता कन्या कस्माद्धेतोर्दत्ता ॥ २ ॥ शुकोक्तिः। भक्तस्य सत्राजितः सूर्यः परमः सखासीत् प्रीतः स्निग्धः अच्। सूर्यः तुष्टः प्रसन्नस्तस्मै सत्राजिते स्यमंतकं मणिं प्रादात् ॥ ३ ॥ तं मणिं कंठे विभ्रत् दधत् सन् यथा रविस्तथा भ्राजमानः स सत्राजित् द्वारकायां प्रविष्टः तेजसा न ज्ञातः केनापि हे राजन् ॥ ४ ॥

विवरणटिप्पणी

सप्तमेऽध्याये। **कारिकायाम्**। **सप्तमे** इति। जाम्बवतीविवाहस्तामसः। **परः** सत्यभामाविवाहः सात्त्विकः। सच चौर्यप्रसङ्गेन प्रोक्त इत्यर्थः। तथाच रुक्मिणीविवाहस्य परिशेषादेव राजसत्वं सिद्धमिति भावः। रुक्मिणीजाम्बवतीविवाहयोरपि भगवत्परिग्रहत्वेन सात्त्विकत्वे संभवति तथात्वाभावे हेतुमाहुः **क्लेशेने**ति। **उभे** रुक्मिणीजाम्बवत्यौ क्लेशेन पितृगृहान्निवारिते, क्लेशं कृत्वा पितृगृहात्स्वगृहमानीते। अतो न तद्विवाहयोः सात्त्विकत्वम्, किन्तु सत्यभामायामाहूय दानेन क्लेशाभावात्तद्विवाहस्यैव सात्त्विकत्वमित्यर्थः। **चौर्यमत्रे**ति। सत्मभामाविवाहप्रकरणे क्लेशापनोदनार्थाय चौर्यं निरूप्यते। अतः क्लेशाभावात्सात्त्विकत्वमित्यर्थः। **वाचिक**मिति। सत्राजितोक्तं वाचिकं मिथ्याभिशापं, कायेन स्वयं बिले गत्वा युद्धं कृत्वा कायिकं च, शतधनोः सकाशात् मणिग्रहणरूपं मिथ्याभिशापं अक्रूरमानीय तद्बोधकेन वचनेन निवारितवानिति शेषः। क्रमेणाध्यायद्वयेन द्वयमपि निवारितवानित्यर्थः। **सम्बन्धी चे**ति। 'एतादृशः सत्राजित्स्वापराधापनुत्तये सत्यभामां दत्तवानितिशेषः। **सत्यभामे**ति। इयं जाम्बवती च एते उभे भार्ये। ताभ्यां वाचिककायिकमिथ्याभिशापाभ्यां हेतुभूताभ्यां विवाहिते निरूपिते इत्यर्थः।' **गुणा एता** इति। एता रुक्मिणीजाम्बवतीसत्यभामाः **गुणरूपा** रजस्तमःसत्त्वरूपा इत्यर्थः। **द्वयोरत्रे**ति। द्वयोर्विवाहः अत्र चौर्यप्रकरणे निरूप्यत इत्यर्थः। **सत्राजित** इत्यत्र। **त्रायन्ती**तित्राः। त्रैधातुः कर्तरि क्विप्। आदेच इत्यनेन आत्वम्। पुल्लिङ्ग आकारान्तः शब्दः। त्राभिः सहिताः सत्राः स्त्रीत्वाभावाद्गोरिति ह्रस्वो न। तान् जयतीति सत्राजिदिति व्युत्पत्तिमभिप्रेत्याहुः **सत्रा**निति। अव्युत्पत्तिपक्षे धातुत्वाभावात् आतो धातोरित्यालोपो नेत्यभिप्रेत्य सत्रानित्युक्तम्। एतत्पक्षाश्रयणं सिद्धान्तकौमुद्यां 'पुमः खय्यम्परे' इति सूत्रे स्फुटम्। **न समाधिभाषे**ति। विस्तर इति शेषः। प्रथमश्लोकमात्रं समाधिभाषा। विस्तरस्तु लौकिकीभाषा। तयोरपि समाधिपोषकत्वात्कथनमित्यादिकं निबन्धे व्युत्पादितमेव। **परिग्रहमात्र**मिति। मात्रपदेन विस्तरव्यावृत्तिः। अत एव रुक्मिणीविवाहविस्तरोपि न समाधिभाषेति पूर्वमुक्तम्। **प्रश्नश्लोके**। **तत्रापि पालकस्ये**ति। कृष्णो द्वारिकां निर्माय सर्वान्पालितवांस्तादृशस्य, नत्वन्ययादवसदृशस्येत्यर्थः। **अत्रापी**ति। भागवतेऽपीत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

षड्युक्पञ्चाशत्तमे च अध्याये सत्यभामया । जाम्बवत्या च कृष्णस्य विवाहो विनिरूप्यते ॥ १ ॥

जाम्बवत्यादिविवाहेभ्यः प्रागेव प्रद्युम्नजन्म, ततो विवाहाः, ततः शम्बरागारात् प्रद्युम्नस्यागमनमिति क्रमः । तथा-चोत्तरकालीनमपि प्रद्युम्नागमनं कथापर्यवसानाय पूर्वमेव निरूप्य जाम्बवत्यादिविवाहप्रस्तावाय स्यमन्तकाख्यानमाह—सत्राजित इति । सत्राजितशब्दः क्वचिदकारान्तः, क्वचित्तकारान्तश्चान्वयानुसारेण द्रष्टव्यः । सत्राजितः स्यमन्तकाख्येन मणिना सह स्वतनयां सत्यभामां स्वयमयाचित एव उद्यम्य उद्यमं कृत्वा कृष्णाय दत्तवान् । एवं दाने हेतुमाह—कृतकिल्बिष इति ॥ १ ॥ एवं सङ्क्षेपतः सत्यभामाविवाहं श्रुत्वा तद्विस्तारं पृच्छति—सत्राजित इति । 'तव नाज्ञातं किञ्चित्, अतो वक्तव्यम्' इत्याशयेन सम्बोधयति—हे ब्रह्मन् ! सत्राजितः कृष्णस्य किं किल्बिषमपराधं कृतवान् अकरोत् ? तस्य सत्राजितस्य स्यमन्तको मणिः कुतः प्राप्तः ? तेन हरेः हरये कस्माद्धेतोः सुता दत्ता ? कन्यादाने स्वकृतापराधशान्तिरेव हेतुर्वाऽन्योऽपि कश्चिद्धेतुरस्तीत्यर्थः ॥ २ ॥ एवं पृष्टः शुक उत्तरमाह—आसीदिति । भक्तस्य सत्राजितः परमः पूज्यः स्वाम्यपि सूर्यः सखा आसीत् । स च सूर्यस्तद्भक्त्या सन्तुष्टः, अत एव प्रीतस्तस्मै सत्राजिताय स्यमन्तकाख्यं मणिं प्रादात् ॥ ३ ॥ स च सत्राजितस्तं मणिं कण्ठे बिभ्राणस्तत्तेजसा रविरिव भ्राजमानः प्रकाशमानः अत एव नोपलक्षितः सत्राजित इत्यज्ञात एव द्वारकां प्रविष्टः । 'मणिप्रभावाद्राजतोऽपि तस्य तेजोतिशयो जात' इति सूचयन् सम्बोधयति—राजन्निति ॥ ४ ॥

अन्वितार्थप्रकाशिका

षट्पञ्चाशत्तमे प्राप हरिर्मण्यभियोगतः । ऋक्षसत्राजितोः पुत्र्यौ श्लोकाः सार्द्धाः शराब्धयः (४५॥) ॥
चत्वार्युवाचेति (४) साङ्घ्रितर्कवेदा (४६।) अनुष्टुभः ॥ ५६ ॥

अथ प्रकृतमनुसरन् प्रद्युम्नजन्मानन्तरभाविजाम्बवत्यादिविवाहप्रस्तावाय स्यमन्तकाख्यानमाह—सत्राजित इति ॥ सत्रा सहैव सर्वेषु जित उत्कर्षं प्राप्त इति अकर्मकात्कर्तरि क्तः । सत्रविषये अन्यैरजित इति वा सत्राजितशब्दः क्वचिदकारान्तः । क्वचित् सत्रा सहैव युगपच्छत्रून् जयतीति क्विपा तकारान्तः । कृतकिल्बिषः कृतापराधः सत्राजितः स्यमन्तकाख्येन मणिना सह स्वतनयां सत्यभामां स्वयमयाचत । एवं उद्यम्य उद्यमं कृत्वा कृष्णाय दत्तवान् ॥ १ ॥ सत्राजित इति ॥ हे ब्रह्मन् ! सत्राजितः कृष्णस्य किं किल्बिषमपराधं कृतवानकरोत् । तस्य सत्राजितस्य स्यमन्तको मणिः कुतः प्राप्तः । तेन हरेः हरये कस्माद्धेतोः सुता दत्ता ॥ २ ॥ आसीदिति ॥ भक्तस्य सत्राजितः परमः पूज्यः स्वाम्यपि सूर्यः प्रीतः प्रियः स्निग्धः सखा इव आसीत् । स च सूर्यस्तद्भक्त्या सन्तुष्टस्तस्मै सत्राजिताय स्यमन्तकाख्यं मणिं प्रादात् ॥ ३ ॥ स इति ॥ हे राजन् ! स च सत्राजितः तं मणिं कण्ठे बिभ्रत् तत्तेजसा रविरिव भ्राजमानः प्रकाशमान अत एव नोपलक्षितः सत्राजित इत्यज्ञात एव द्वारकां प्रविष्टः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं षट्पञ्चाशत्तमोऽध्याये सत्यभामापाणिग्रहणप्रकारं कृष्णे मणिग्रहणोद्देशप्राप्तापकीर्त्तिदूरीकरणं च जाम्बवती पाणिग्रहणप्रकारं च विवृणोति ॥ सत्राजित इति अयं च शब्दः क्वच्चिदकारान्तः क्वचिच्चतकारान्तोपि ज्ञेयः स कृष्णे कृतकिल्विषः कृतापराधः सन् ॥ स्वयमुद्यम्य विवाहोद्योगं कृत्वा स्वापराधनिवृत्तये मन्तकेन मणिना सह स्वतनयां सत्यभामां कृष्णाय दत्तवान् सत्यभामादीनां विवाहचरित्रं प्रद्युम्नागमनात्प्राग्ज्ञेयं ॥ १ ॥ किल्विषमपराधं कुतः सकाशात्तस्य स्यमन्तको बभूव हरेर्हरये ॥ २ ॥ सत्राजितसंज्ञस्य प्रीतः सन् सखामित्रतुल्य आसीत् ॥ भक्त्यातुष्टः सूर्यः ॥ ३ ॥ नोपलक्षितः ॥ अयं सत्राजिदिति न ज्ञातो जनैरिति शेषः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मिथ्याभियोगे षट्पञ्चाशत्तमे मणिमाहरन् । कृष्णो जाम्बवतः कन्यां प्राप सत्राजितस्य च ॥ १ ॥
उक्त्वातिचञ्चलां निष्ठां पुत्रादिकामसौख्यजाम् । आहार्थस्याप्यनर्थत्वं हरणेन मणेरिह ॥ २ ॥

सत्यभामाजाम्बवत्योर्विवाहौ वर्णयितुकामस्तद्विस्तरपिपृच्छिषामुत्पादयितुमाह । सत्राजित इति । सत्राजित इत्यकारान्तः क्वचित्तकारान्तोऽप्यन्वयानुसारेण द्रष्टव्यः । तत्राकारान्तः कर्त्तरिक्तप्रत्यये सत्येव । सत्रेणासमन्ताज्जितवानिति सत्राजिदिति क्विपि तान्तः । कृतं किल्बिषमपराधो येन तथाभूतः । सत्राजितः स्यमन्तकेन मणिना सह, स्वयं उद्यम्य, स्वत एवोद्यमं कृत्वेत्यर्थः । स्वतनयां सत्यभामां, कृष्णाय दत्तवान् ॥ १ ॥ तत्र लब्धावसरो राजा पृच्छति । सत्राजित इति । हे ब्रह्मन्, सत्राजितः कृष्णस्य, किं किल्बिषं अकरोत् । तस्य सत्राजितस्य, स्यमन्तकः मणिः कुतः । मणिरनेन कस्माल्लब्ध इत्यर्थः । कस्माद्धेतोः, हरेः श्रीकृष्णस्य, सुता पुत्री, दत्ता । कुतो हेतोर्हरयेऽनेन सुतार्पणं कृतमित्यर्थः ॥ २ ॥ इति पृष्टः

सविस्तरमनुवर्णयितुं तावदुपोद्घातमाह । आसीदिति । भक्तस्य सत्राजितः, सूर्यः स्वामी सन्नपि, प्रीतः स्निग्धः, परमः सखा, आसीत् । स च सूर्यः, तुष्टस्तस्यातिशयितां स्वभक्तिं निरीक्ष्य प्रसन्नतां प्राप्तः, तस्मै, स्यमन्तकं मणिं, प्रादात् ॥ ३ ॥ स इति । स सत्राजितः, तं सूर्यदत्तं, मणिं स्यमन्तकं, कण्ठे बिभ्रद्बिभ्राणः, अत एव रविः यथा, सूर्य इवेत्यर्थः । भ्राजमानः अत एव, तेजसा न उपलक्षितः तेजसोऽधिकत्वतोऽनुपलक्षितशरीरः सन्, हे राजन्, द्वारकां प्रविष्टः ॥ ४ ॥

कृष्णप्रिया

श्रीशुकदेव जी महाराज ने कहा ! महाराज परीक्षित ! भगवान पर मिथ्या कलङ्क लगाने वाले सत्राजित ने अपने दोष एवं अपराध का संमार्जन करने के लिये अपनी सुशील तनया श्री सत्यभामा जी का भगवान श्रीकृष्ण से पाणि ग्रहण कराया ॥१॥ श्री परीक्षित राजा ने प्रश्न किया महाराज शुकाचार्य जी ! सत्राजित् ने भगवान श्रीकृष्ण का कौन अपराध किया था ? और स्यमन्तक मणि कहां से प्राप्त की ! और अपनी पुत्री सत्यभामा श्रीहरि को क्यों दी ? यह प्रसङ्ग कृपया कहिये ॥ २ ॥ श्रीशुकदेव जी महाराज ने कहा राजन् ! श्री सत्राजित यादव श्री सूर्यनारायण का अनन्य भक्त था । एवं सत्राजित की पराभक्ति से सूर्य भगवान् सत्राजित के उत्तम सखा बन गये थे । भगवान् सूर्य ने प्रसन्न होकर सत्राजित यादव को स्यमन्तक मणि सर्मापित की ॥ ३ ॥ सत्राजित तेजोमय मणि को कण्ठ में धारण कर द्वारिका पुरी में आ रहा था । मणि की कान्ति से वह सूर्य समान दीख पड़ता था । राजन् मणि पहनकर सत्राजित ने द्वारिका में प्रवेश किया तब मणि के दिव्य तेज से नगर जन पहिचान न सके ॥ ४ ॥

तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः । दीव्यतेऽक्षैर्भगवते शशंसुः सूर्यशङ्किताः ॥ ५ ॥
नारायण नमस्तेऽस्तु शङ्खचक्रगदाधर । दामोदरारविन्दाक्ष गोविन्द यदुनन्दन ॥ ६ ॥
एष आयाति सविता त्वां दिदृक्षुर्जगत्पते । मुष्णन् गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः[६] ॥ ७ ॥
[७]नन्वन्विच्छन्ति ते मार्गं त्रिलोक्यां विबुधर्षभाः । ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ॥ ८ ॥

कर्दमक्षमा

अन्वयः—जनाः, तम्, दूरात्, विलोक्य, तेजसा, मृष्टदृष्टयः, सूर्यशङ्किताः, अक्षौ, दीव्यते, कृष्णाय, शशंसुः ॥ ५ ॥ नारायण ! शङ्खचक्रगदाधर ! दामोदर, अरविन्दाक्ष गोविन्द यदुनन्दन ! ते, नमः, अस्तु ॥ ६ ॥ हे जगत्पते ! एष तिग्मांशुः, सविता, गभस्तिचक्रेण, नृणाम्, चक्षूंषि, मुष्णन्, त्वाम्, दिदृक्षुः, आयाति ॥ ७ ॥ हे प्रभो ! विबुधर्षभा–त्रिलोक्याम्, ते, मार्गम् इच्छन्ति, ननु यदुषु, अद्य गूढम्, त्वाम्, ज्ञात्वा, अजः, सूर्यः, ब्रह्मा, त्वाम्, दृष्टुम्, याति ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दीव्यते क्रीडते । सूर्योऽयमिति शङ्किताः सन्तः कथयामासुरिति ॥ ५ ॥ सूर्यं नमस्कारार्थमागतं कल्पयत्वोद्रिक्तभक्तीनां सम्बोधनानि नारायणेत्यादीनि ॥ ६ ॥ गभस्तिचक्रेण रश्मिजालेन मुष्णन्प्रतिघ्नन् तिग्मास्तीक्ष्णा गावो रश्मयो यस्य सः ॥७॥ न चेदमघटमानमित्याहुः—नन्विति । अन्विच्छन्ति मृगयन्ते अजः सूर्यः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं मणिग्रीवं सत्राजितम् । मुष्टदृष्टयो हृतदृष्टयः ॥ अक्षक्रीडा हि नरविडम्बनमेव लोकचमत्कारार्थेति ध्येयम् ॥ ५ ॥ देवा अप्येतद्दर्शनार्थं भूमावायांत्यतोऽयमेव सर्वेश्वर इति हेतोरत्यन्तसंजातभक्तीनां द्वारकावासिनामित्यर्थः । नारायण सर्वादिकारण । दामोदरेति भक्ताभीष्टदानार्थमकार्यमपि करोतीत्याशयवती संबुद्धिः ॥ सामान्यतस्ता कत्वरूपैश्वर्यलीलाभिः स्तुवन्ति पदद्वयेन । नारायण हे सर्वजीवाश्रयत्वात्सर्वपरमस्वरूपैश्वर्य, तादृशत्वादेव लीलयापि दुष्टशिक्षयैव शंखादिधर । अथ विशेषतो गोकुलप्रकाशितप्रेमवश्यत्वलीलाभिः स्तुवन्ति–पदत्रयेण । दामोदर स्वजनवश्यतयोदरेंगीकृतदामबन्धन । हे अरविन्दाक्ष परमसुन्दरेत्यर्थः । हे गोविंद गोचारणोपलक्षिततत्तन्महालीलाप्रकाशक । एवं तत्रतत्र प्रायो निगूढ एव त्वं संप्रति तु कृपाभरस्तव किं वर्ण्य इत्याशयेनाहुः—हे यदुनंदनेति । यदूनानन्दयन्सभामध्ये साक्षाद्भासीति भावः ॥ ६ ॥ 'दृग्दृष्टिदीधिती' इत्यादिना गोपदं रश्मिवाचकमप्युक्तम् ॥ अतो हे जगत्पते त्वां दिदृक्षुरायाति । अल्पदर्शनेऽस्य दूरतोपि स्वतः सिद्धत्वेन नाति सुखदत्वेन चास्पृहणीयत्वात् । त्वद्दर्शनस्य तु त्वदुपासनयैव साध्यत्वेन सर्वोद्ध्र्वसुखदत्वेन च परमस्पृहणीयत्वादिति भावः । ननु नैष सूर्य इत्याशंक्य तल्लक्षणमाहुः—मुष्णन्निति, यतस्तिग्मगुः ॥ ७ ॥ एतन्न संगच्छत इति चेदत्राहुः—न चेति । 'अजाय लोमत्रयभावनाय' इति

---

[६] दृक्–विज. । [७] अन्विच्छन्ति हि–बीर. ।

भविष्योत्तरोक्तेरजशब्दः सूर्येऽपि प्रयुज्यते ॥ त्रिलोक्यां ये विबुधर्षभा ब्रह्मादयस्ते सर्वे मार्गं प्राप्त्युपायमेवान्विच्छन्ति, प्राप्तिस्तु दूरे। ननु निश्चये। एवं गूढमपि त्वामद्याधुना यदुषु साक्षाद्वर्तमानं ज्ञात्वा कुतोऽपि भाग्यान्निश्चित्य। ननु ब्रह्मादयश्चेदन्विच्छंति सूर्यः कस्तत्राहुः—अजः द्वादशात्मत्वेन विश्वैकात्मा, तदधिष्ठानत्वेन तदभेदेनोपास्यो वा, अयमनादित्वान्न जायत इत्यजो वेदो वा, त्रयीमय इत्यर्थः। अतोऽसौ तु विशेषत इति भावः। प्रभोऽस्मदीश्वर। अहो भाग्यं त्वदीयानामस्माकमिति भावः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अक्षैः क्रीडत इति नरलीलाकौतुकित्वमुत्कण्ठया स्मृतं नरलीलत्वादेव प्राकृतजानानां तथा चमत्कारोऽपि युज्यत इति भावः ॥ ५ ॥ समान्यतस्तावत् स्वरूपैश्वर्य्यलीलाभिः स्तुवन्ति पदद्वयेन नारायण हे सर्वजीवाश्रत्वात्सर्वपरमस्वरूपैश्वर्य ! तादृशत्वादेव लीलयापि दुष्टशिक्षायै शङ्खादिधर ! अथ विशेषतो गोकुलप्रकाशितप्रेमवश्यत्वसौन्दर्यलीलाभिः स्तुवन्ति पदत्रयेण दामोदर स्वजनवश्यतयोदरेऽङ्गीकृतदामबन्धन ! हे अरविन्दाक्ष ! परमसुन्दरेत्यर्थः हे गोविन्द ! गोचारणोपलक्षित ! तत्तन्महालीलाप्रकाशक ! एवं तत्र तत्र प्रायोनिगूढ एव त्वं सम्प्रति तु कृपाभरस्तवकिम्वर्ण्य इत्याशयेनाहुः—हे यदुनन्दनेति। यदूनानन्दयन् सभामध्ये साक्षाद्भासीति भावः ॥ ६ ॥ अतो हे जगत्पते ! त्वां दिदृक्षुरायाति अन्यदर्शनस्य दूरतोपि स्वतः सिद्धत्वेन नातिसुखदत्वेन चास्पृहणीयत्वात् त्वद्दर्शनस्य तु त्वदुपासनयैव साध्यत्वेन सर्वोर्द्ध्वसुखदत्वेन च परमस्पृहणीयत्वादिति भावः। ननु, नैष सूर्य्य इत्याशङ्क्य तल्लक्षणमाहुः मुष्णन्निति यतस्तिग्मगुः ॥ ७ ॥ त्रिलोक्यां ये विबुधर्षभा ब्रह्मादयस्ते सर्वे मार्गं प्राप्त्युपायमेवान्विच्छन्ति प्राप्तिस्तु दूरे। ननु निश्चये एवं गूढमपि त्वां अद्याधुना यदुषु सक्षाद्वर्त्तमानं ज्ञात्वा कुतोऽपि भाग्यान्निश्चित्य। ननु, ब्रह्मादयश्चेदन्विच्छन्ति सूर्य्यः कस्तत्राहुः अजः द्वादशात्मत्वेन विश्वैकात्मा तदधिष्ठानत्वेन तदभेदेनोपास्यो वायम् अनादित्वान्न जायत इत्यजो वेदो वा त्रयीमय इत्यर्थः अतोऽसौ तु विशेषज्ञ इति भावः। प्रभो ! अस्मदीश्वर ! अहो भाग्यं त्वदीयानामस्माकमिति भावः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अक्षैः कृत्वा भगवत्त्वात् परम-नैश्चिन्त्येन महाकौतुकित्वेन वा, सभामध्ये प्रियजनैः सह क्रीड़तेऽपि भगवते सर्व्वज्ञायापि शशंसुः। तत्र हेतुः—सूर्य्येति ॥ ५ ॥ नारायण ! हे सर्व्वजीवाश्रय, तथापि दैत्यादिदुष्टशास्तये शङ्खादिधर ! किञ्च, दामोदर ! भक्तवश्यतयोदरेऽङ्गीकृतदामबन्धनेति। एवं गुणमुद्दिश्य रूपमाहुः—अरविन्दाक्ष ! हे परमसुन्दरेत्यर्थः। एवं परमदुर्लभोऽपि त्वमधुना कृपाभरेण सुलभोऽसीत्यभिप्रायेणाहुः—गोविन्द ! हे पृथ्व्यामवतीर्णेत्यर्थः। तत्रापि हे यदुनन्दनेति यदुनानन्दयन् सभामध्ये सदा साक्षाद्भासीति भावः। यद्वा, गोकुलेन्द्रेति परमदुर्लभतैवोक्ता, तत्र कस्याप्यन्यस्य स्थित्यशक्तेः। अधुना च सुलभोऽसीत्याहुः—यदुनन्दनेति ॥ ६ ॥ अतस्त्वां दिदृक्षुः। ननु स्वप्रयोजनं विहायागन्तुं नार्हति ? तत्राहुः—हे 'जगत्पते' इति। वस्तुतः प्रकाशनादिना जगत्त्वयैव रक्ष्यते, तत् किं तेनेति भावः। यद्वा, निजप्रभुदर्शनमेव मुख्यप्रयोजनमिति, किंवा प्रभुप्रसादादेव स्वार्थसिद्धेरिति। ननु नैष सूर्य्य इत्याशंक्य तल्लक्षणमाहुः—मुष्णन्निति; यतस्तिग्मगुः ॥ ७ ॥ त्रिलोक्यां ये विबुधर्षभा देवश्रेष्ठाः श्रीब्रह्मादयस्ते सर्व्वे मार्गं प्राप्त्युपायमेवान्विच्छन्ति। ननु निश्चये; यद्वा, त्रिलोकीमध्येऽन्विच्छन्ति, तत्रत्य-सुखभोगानादरेण निरन्तरं वाञ्छन्तीत्यर्थः, इति महादौर्लभ्यमेवोद्दिष्टम्। एवं गूढमपि त्वामद्याधुना यदुषु साक्षाद्वर्त्तमानं ज्ञात्वा। आगमने योग्यतामाह—स्वयमेव नित्यमाविर्भवतीत्यजो नित्यत्वादिना सर्व्वदेवश्रेष्ठत्वादिति भावः। प्रभो हे अस्मदीश्वर ! अहो भाग्यं त्वदीयानामस्माकमिति भावः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तं प्रविष्टमवलोक्य जना दूरादेव तस्य तेजसा मुष्टाः अपहृता अभिभूताः दृष्टयो येषां ते सूर्योऽयमिति शङ्किताः सन्तः अक्षैर्दीव्यते क्रीडां कुर्वाणाय भगवते श्रीकृष्णाय शशंसुः कथयामासुः ॥ ५ ॥ नमस्कर्त्तुमागतं सूर्य्यं सम्भाव्य भक्त्युद्रेकेण भगवन्तं सम्बोधयन्ति, नारायणेति ॥ ६ ॥ एष इति एष इत्यागच्छतो रूपप्रदर्शनपरं सविता सूर्य्यस्त्वां द्रष्टमिच्छुः हे जगत्पते ! आयाति कथम्भूतः तिग्मास्तीव्रा गावो रश्मयो यस्य सः गभस्तिचक्रेण रश्मिजालेन नृणां चक्षूंषि मुष्णन् प्रतिघ्नन् न चैतदघटमानमित्याहुः ॥ ७ ॥ अन्विच्छन्ति हीति विबुधर्षभा देवश्रेष्ठास्त्रिलोक्यां तव मार्गमन्विच्छन्ति अन्वेषयन्ति त्वं यद्रूपगुणकर्मकः तथाभूतं त्वां द्रष्टुमिच्छन्तीत्यर्थः। अतोऽधुना यदुषु गूढं गृहीतयदुवेषं त्वां ज्ञात्वा हे प्रभो ! अयं सूर्यः आयाति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अक्षैर्देवनाङ्गैर्दीव्यते द्यूतक्रीडां कुर्वते ॥ ५–६ ॥ गभस्तिचक्रेण रश्मिमण्डलेन तिग्मरुक् सूर्यः ॥ ७ ॥ विबुधर्षभाः देवश्रेष्ठाः त्रिलोक्यान्ते मार्गमन्विच्छन्ति मृगयन्ते। ननु, तेष्वजः सूर्यः अद्य यदुषु गुह्यं ज्ञात्वा दृष्टुं यात्या याति अजाय लोकत्रयभावनायेति वचनात् ॥ ८–९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

त्रयीमयत्वादजः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

द्यूतक्रीडाविष्टं भगवन्तं नामकीर्त्तनैरवधारयन्ति नारायणेति ॥ ६ ॥ गभस्तिचक्रेण किरणजालेन ॥ ७ ॥ मनुष्यं मां सूर्य्यो देवः किं दिदृक्षते ? इति मावादीरित्याह— ननु निश्चितम् अन्वेषयन्ति अजः सूर्य्यः ॥ ८-१० ॥

गूढार्थदीपिनी

मुष्टा पिहिता । दीव्यते क्रीडते । सूर्योऽयमिति ॥ ५-६ ॥ गभस्तिचक्रेण किरणसमूहेन । तिग्मगुः तिग्माः तीक्ष्णा गावः किरणाः यस्य सः ॥ ७ ॥ अन्विच्छन्ति अन्वेषयन्ति । अजः सूर्यः । अकारो वासुदेवस्तस्माज्जातत्वात् ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सूर्यशङ्किताः प्रसिद्धः सूर्य एवायाति स किमपि प्रयोजनं कृष्णे निवेदयितुमाहोस्वित् श्रीकृष्णचरणस्पर्शमात्रं कर्तुमित्येवं सूय जातशङ्काः शशंसुः कथयामासुः ॥ ५-६ ॥ तिग्मगुः तिग्मास्तीक्ष्णाः गावो गभस्तयो यस्य सः ॥ ७ ॥ अन्विच्छन्ति अन्वेषयन्ति अजः सूर्यः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्य प्रभावः सर्वजनीनो जात इति वक्तुं लोकानां भ्रममाह **तं विलोक्येति** । निकटे ज्ञायेतापि । दूरादेव तत्रापि तेजसा **मुष्टदृष्टयः** । स्वस्वामिनः स्थाने महान्तोऽपि समायान्तीति संतोषात् भगवत्स्थाने समागताः । भगवानपि अन्यासक्तः नास्य सन्माननं करिष्यति, ततोऽयं अस्मान् विलम्बितः तेजसा पीडयिष्यतीति, सूर्यात् शङ्किताः लौकिकव्यसनरूपे द्यूते अक्षैर्दीव्यते भगवते शशंसुः । शतमक्षान् विजानातीति मध्येऽधिदेवन एव सभ्ये अक्षक्रीडेति विमर्शः । अन्यथा धर्मस्थापनार्थमवतीर्णः कथमक्षक्रीडां कुर्यात् । मुख्यं हि तदधर्मस्थानमिति । सूर्यस्य समागमनं बाधितं मत्वाह **भगवत** इति ॥ ५ ॥ सूर्यागमनेन स्वतोपि ज्ञातमहत्त्वाः स्तुत्वा भगवन्तं विज्ञापयन्ति **नारायणे**तित्रिभिः । नारायणपदं सूर्यान्तर्यामी नारायण इति तस्मिन्नागते अन्तर्यामिप्रेरणव्यतिरेकेण कार्यं न सिद्ध्यतीति विज्ञापनार्थं सूर्यागमनं सम्भवतीति हेतुरुक्तः । अतस्ते नमः । नमस्कारमात्रं वा अस्मत्साध्यमिति । **शङ्खचक्रगदाधरे**ति । शेषशायिनं नारायणं व्यावर्तयति । नारायणत्वं वा स्थापयन्ति । **दामोदरेति** भक्तकृपालुत्वम्, तादृशस्यात्रागमने हेतुरुक्तः । **अरविन्दाक्षे**ति । समागतस्य तापापनोदनं कार्यमुक्तम् । गोविन्देति तथाकरणे आवश्यकत्वम् । यतोऽयमिन्द्रो जातः । किञ्च, **यदुनन्दने**ति तदर्थमेवावतीर्णः ! अत एवात्र बहु कार्यं तवास्तीति स्वत आगमनाभावात् स्वयमागत इत्याहुः **एष आयाती**ति । आगतस्य विज्ञाप्यमस्तीत्याहुः सवितेति । प्रसवितायम् । सांप्रतं च भगवान् लीलया च तिष्ठतीति तदनुगुणप्रसवार्थं प्रष्टुमागत इत्यर्थ । प्रश्नस्तु दूतद्वारापि सम्भवतीति विशेषमाहुः **त्वां दिदृक्षु**रिति । स्नेहाभावेऽपि दर्शनमावश्यकमित्यत्र हेतुमाहुः **जगत्पत** इति । स्वस्य निवेदने हेतुं वदन्त आहुः **मुष्णन्गभस्तिचक्रे**णेति । दूरे स्थितस्य गभस्तयोऽल्पीयांसः समायान्ति, निकटे तु गभस्तिचक्रेण पीडयति । नृणामित्यल्पसत्त्वता । तर्ह्ययं दोषो निवारणीय इत्याशङ्क्य तस्य स्वाभाविकोऽयमित्याह **नृणां चक्षूंषि तिग्मगु**रिति । ज्ञानप्रदो भगवान् अत्र समागतः । ज्ञानसाधनमेव दूरीकरोतीति प्रतिविधेयः । ननु तथापि भवन्तोन्तरङ्गाः, तान्निवारयतेति चेत्, तत्राह **नन्वन्विच्छन्ती**ति । देवाः समागच्छन्तः कथं वारणीयाः, तत्रापि स्वप्रभुं द्रष्टुम्, तत्रापि विबुधर्षभाः । किञ्च । अद्य यदुषु गूढं ज्ञात्वा समागताः । तत्र यदि कश्चिन्निवारणं कुर्यात्, तदा अनेनैव प्रतार्यत इति तमेव मारयेयुः । ननु तथापि सूर्यो नायास्यति, स हि सर्वदा व्यापृतः, तत्राह **द्रष्टुं वायात्यज** इति । ब्रह्मा वा द्रष्टुमायाति । अवतीर्णस्य रूपान्तरस्वीकरणेनान्यथात्वे पूर्वव्यवहारोऽनुचित इत्याशङ्क्याह **प्रभो** इति । हे सर्वसमर्थ ॥ ८ ॥

श्रीसुबोधिनीसारः

तं सत्राजितं दूराद्विलोक्य तेजसा मुष्टा दृष्टयो येषां ते जनाः सूर्योयमिति शंकिताः अक्षैः पाशकैर्दीव्यते क्रीडते रममाणाय भगवते विजिज्ञपुः ॥ ५ ॥ हे नारायण ते तुभ्यं नमोस्तु शेषं स्पष्टम् ॥ ६ ॥ हे जगत्पते गभस्तिचक्रेण किरणमंडलेन नृणां चक्षूंषि मुष्णन् नेत्राण्यावृण्वान एष तिग्मगुः सवितार्कः त्वां दिदृक्षुर्द्रष्टुमिच्छुरागच्छति ॥ ७ ॥ युक्तमित्यूचुः । ननु निश्चयेन त्रिलोक्यां विबुधर्षभा देवोत्तमास्ते तव मार्गमन्विच्छन्ति मृगयन्ते यदुषु गूढम् त्वाम् अद्य इदानीं ज्ञात्वा द्रष्टुमजः सूर्यो याति एति हे प्रभो ॥ ८ ॥

विवरणटिप्पणी

तं विलोक्येत्यत्र । शतमक्षानिति । शतमध्ये सभायोग्येऽधिदेवनेऽक्षक्रीडा **निषिद्धा नेति** विमर्श इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तं प्रविष्टं सत्राजितं द्वारकावासिनो जना दूरादेव विलोक्य तस्य तेजसा मुष्टा अभिभूता दृष्टयो येषां ते 'सूर्योऽयम्' इति शङ्किताः सन्तः अक्षैर्दीव्यते क्रीडां कुर्वाणाय भगवते श्रीकृष्णाय शशंसुः कथयामासुः ॥ ५ ॥ तद्विज्ञापनप्रकारमाह—नारायणेति त्रिभिः । सर्वकारणत्वेन सर्वाराध्यत्वं सूचयन्त आहुः—हे नारायण ! तुभ्यं नमोऽस्तु । 'रक्षकत्वेनापि सर्वाराध्यस्त्वम्' इत्याशयेनाहुः—हे शङ्खचक्रगदाधर ! तुभ्यं नमोऽस्तु । 'भक्तवत्सलतयापि त्वं सर्वाराध्य' इत्याहुः—हे दामोदर ! तुभ्यं नमोऽस्तु । 'त्वत्कृपादृष्ट्यैव सन्तापनिवृत्तिः, नान्यथा' इत्याशयेनाहुः—हे अरविन्दाक्ष ! तुभ्यं नमोऽस्तु । 'अचिन्त्यैश्वर्यत्वेनापि त्वं संसेव्य' इत्याहुः—हे गोविन्द ! तुभ्यं नमोऽस्तु । 'अस्माकं यादवानां तु त्वमेवावलम्ब' इत्याशयेनाहुः—हे यदुनन्दन ! तुभ्यं नमोऽस्तु ॥६॥ 'त्वद्दर्शनादिकमेवोचितम्, पालकत्वात्' इत्याशयेन सम्बोधयति—हे जगत्पते ! त्वां दिदृक्षुः द्रष्टुमिच्छुः एष सविता सूर्यः आयाति । तदागमनेन स्वाभिभवं दर्शयन्ति—गभस्तिचक्रेण रश्मिसमूहेन नृणां चक्षूंषि मुष्णन् प्रतिघ्नन् । तत्र हेतुमाहुः—तिग्मगुरिति । तिग्मास्तीक्ष्णाः दुःसहा गावो रश्मयो यस्य सः ॥ ७ ॥ 'न चैतदघटमानम्' इत्याशयेनाहुः—नन्विति । निश्चितमेवैतत्, विबुधर्षभाः देवश्रेष्ठाः ब्रह्मादयस्त्रिलोक्यां तव मार्गं पदवीमन्विच्छन्ति अन्वेषयन्ति । अतोऽधुना यदुषु गूढं गृहीतयदुवेषं ज्ञात्वा हे प्रभो ! अजः सूर्यस्त्वां द्रष्टुमायाति ॥ ८ ॥

अन्वितार्थप्रकाशिका

तमिति । तं प्रविष्टं सत्राजितं द्वारकावासिनो जना दूरादेव विलोक्य तस्य तेजसा मुष्टा अभिभूता दृष्टयो येषां ते सूर्योऽयमिति शङ्किताः सन्तः अक्षैर्दीव्यते क्रीडते भगवते श्रीकृष्णाय शशंसुः कथयामासुः ॥ ५ ॥ नारायणेति । सूर्यं नमस्कारार्थमागतं मत्वोद्रिक्तभक्तीनां सम्बोधनानि हे नारायणेत्यादीनि ते तुभ्यं नमोऽस्तु ॥ ६ ॥ एष इति । हे जगत्पते ! गभस्तिचक्रेण रश्मिसमूहेन नृणां चक्षूंषि मुष्णन् प्रतिघ्नन् तिग्मास्तीक्ष्णाः दुःसहा गावो रश्मयो यस्य स त्वां दिदृक्षुः द्रष्टुमिच्छुः एष सविता सूर्यः आयाति ॥ ७ ॥ नन्विति । ननु निश्चितम् विबुधर्षभाः देवश्रेष्ठाः ब्रह्मादयस्त्रिलोक्यां तव मार्गं पदवीमन्विच्छन्ति अन्वेषयन्ति । अतोऽधुना यदुषु गूढं गृहीतयदुवेषं ज्ञात्वा हे प्रभो ! अजः सूर्यस्त्वां द्रष्टुमायाति ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मुष्टदृष्टयोहृतनेत्रप्रसाराः सूर्यशंकिताः सूर्योऽयमिति संजातशंकाः संतः अक्षैः पाशैः दीव्यते रममाणापहरये ॥ ५-६ ॥ तिग्मगुः तीक्ष्णरश्मिः गभस्तिचक्रेण किरणनिकरेण मुष्णन् चोरयन् ॥ ७ ॥ न चेदमसंभावितमित्याहुः मार्गमन्विच्छंति अन्वेषयंति । त्वां दृष्टुं अजो भानुरायाति ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति । जनाः, दूरात् तं विलोक्य, तेजसा मुष्टा अपहृता अभिभूता इत्यर्थः । दृष्टयो येषां ते, अतएव सूर्यशङ्किताः सूर्योऽयमिति संजातशङ्काः सन्तः, अक्षैः पाशकैः, दीव्यते क्रीडां कुर्वाणाय, भगवते श्रीकृष्णाय, शशंसुः कथयामासुः ॥ ५ ॥ नमस्कर्त्तुमागतं सूर्यं संभाव्य भक्त्युद्रेकेण भगवन्तं सम्बोधयन्तो जनाः सम्बोधयन्ति । नारायणेति । हे नारायण, हे शङ्खचक्रगदाधर, हे दामोदर, हे अरविन्दाक्ष, हे गोविन्द, हे यदुनन्दन, ते तुभ्यं नमः अस्तु ॥ ६ ॥ एष इति । एष इत्यागच्छतो रूपादर्शनपरं, हे जगत्पते, यतः, तिग्मास्तीक्ष्णा गावो रश्मयो यस्य सः, अतः, गभस्तिचक्रेण रश्मिजालेन, नृणां चक्षूंषि, मुष्णन् प्रतिघ्नन्, सविता स्वयं सूर्यः, त्वां दिदृक्षुः सन्, आयाति ॥ ७ ॥ न चैतदप्रमाणमित्याहुः । नन्विति । हे प्रभो, विबुधर्षभा देवश्रेष्ठाः, त्रिलोक्यां ते तव, मार्गं, अन्विच्छन्ति अन्वेषयन्ति । त्वं यद्रूपगुणकर्मस्तथाभूतं त्वां द्रष्टुमिच्छन्तीत्यर्थः । अतः, अद्य अधुना, यदुषु गूढं गृहीतयदुवेषं, त्वा त्वां, ज्ञात्वा, अयं सूर्यः, द्रष्टुं आयाति ननु । अयमित्यत्राज इति पाठे 'अजाय लोकत्रयभावनाय' इति सूर्यवर्णनदर्शनादजः सूर्य इत्यर्थो बोद्धव्यः ॥ ८ ॥

कृष्णप्रिया

नागरिकजनों के नेत्र दूर से ही देखकर चौंधिया गये । उन लोगों ने माना कि सूर्य भगवान् भगवान् श्रीकृष्ण के दर्शन के लिये आ रहे हैं । भगवान् अपने मित्रों से चौसर खेल रहे थे । वे लोग नाथ के समीप जाकर निवेदन करने लगे । उन सबके चित्त में ऐसा लगा कि सूर्य ही आ रहे हैं ॥ ५ ॥ द्वारिकाजन निवेदन कर रहे हैं—शङ्ख चक्र गदाधारी हे श्रीकृष्ण ! हे नारायण ! हे दामोदर ! हे कमलनेत्र ! हे गोविन्द ! हे यदुनन्दन ! ॥ ६ ॥ यह भगवान् सूर्यनारायण आप जगन्नाथ के दर्शन के लिये पधार रहे हैं । वह अपनी तेजोमय किरणों से नागरिक जनों के नेत्रों को चौंधियाते पधारते हैं । मालूम होता है कि प्रचण्ड रश्मि भगवान् सूर्य नारायण ही आपके दर्शनार्थ यहाँ पधारते हैं ॥ ७ ॥ भगवन् ! देवाधिदेव लोक त्रय लोक में आप

कहाँ विराजमान हैं इसकी खोज कर रहे हैं। आपके दर्शन के लिये आतुर हैं किन्तु पाते नहीं है। आप यदुवंश में गुप्त स्वरूप से विराजमान हैं यह मानकर भगवान् सूर्य स्वयं दर्शन के लिये आ रहे हैं ॥ ८ ॥

श्रीशुक उवाच

निशम्य बालवचनं प्रहस्याम्बुजलोचनः। प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ॥ ९ ॥
सत्राजित् स्वगृहं श्रीमत् कृतकौतुकमङ्गलम्। प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत् ॥ १० ॥
दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो।
दुर्भिक्षमार्यरिष्टानि [1]सर्पाधिव्याधयोऽशुभाः। न सन्ति मायिनस्तत्र [2]यत्रास्तेऽभ्यर्चितो मणिः॥ ११ ॥
स याचितो [3]मणिं क्वापि यदुराजाय शौरिणा। नैवार्थकामुकः प्रादाद् याच्ञाभङ्गमतर्कयन् ॥ १२ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—राजन्! अम्बुजलोचनः, बालवचनम् (निर्दोषवचनम्) निशम्य, प्रहस्य, प्राह, असौ, रविः देवः, न, किन्तु, मणिना, ज्वलन्, सत्राजित्, समायाति ॥ ९ ॥ सत्राजित्, कृतकौतुक तोरणम्, श्रीमत्, स्वगृहम्, प्रविश्य, विप्रैः, देवसदने, मणिम्, न्यवेशयत् ॥ १० ॥ हे प्रभो! यत्र, मणिः, आस्ते, अर्चितः, स मणिः, दिने, दिने, अष्टौ, स्वर्णभारान्, सः, सृजति, पुनः, यत्र, आस्ते, तत्र, दुर्भिक्षमार्यरिष्टानि, सर्पाधिव्याधयः, अशुभाः, तत्र, न, सन्ति; तत्र मायिनः, न, सन्ति ॥ ११ ॥ क्वापि, शौरिणा, सः मणिः, यदुराजाय याचितः, किन्तु, अर्थकामुकः सः, सत्राजित्, मणिम्, नैव, प्रादात्, पुनः याच्ञा भङ्गम्, अतर्कयत् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

बालानामज्ञानां वचनम् ज्वलन् विद्योतमानः ॥ ९ ॥ कृतानि कौतुकेनोत्सवेन मंगलानि यस्मिंस्तत् विप्रैः कृत्वा ॥ १० ॥ भारप्रमाणं च। "चतुर्भिर्व्रीहिभिर्गुञ्जं गुञ्जान्पञ्च पणं पणान्। अष्टौ धरणमष्टौ च कर्षन्तांश्चतुरः पलम् ॥ तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुलाः" इति। मारीनामाकालमृत्युः अरिष्टमभद्रम् अशुभा दुःखहेतवः ॥ ११ ॥ क्वापि कदाचित् अनेन भगवत्यसमर्प्य स्वयमग्रभोजिनः सर्वानिष्टनिर्वतकमप्यनिष्टहेतुरेव भवतीति सूचितम् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'बालोऽज्ञे दुर्बले शिशौ' इति कोशात् ॥ प्रहस्य स्मित्वा। प्रेति प्रारंभे। तत एवेषद्दृष्टिप्रसारणाभिप्रायेणोक्तम्—अम्बुजलोचन इति। अतः प्रकर्षेण स्मितावलोकनादिनाह—देव इति। देवोपि कश्चिन्न भवति किन्तु मनुष्य एव, तत्रापि सत्राजिदिति। अत्र श्रीमत्कौस्तुभे विद्यमानेऽपि श्रीभगवत्तत्तदिच्छानुसारेण प्रकाशादिति ज्ञेयम्। बालानामिति असूर्ये सूर्यबुद्धेः श्रीकृष्णे चैतावन्तं कालमीश्वरत्वानवगमात्, सूर्यागमनमात्रसंभावनया कोलाहलाच्च ॥ ९ ॥ गृहांतर्गते देवागारे न्यवेशयत्प्रतिष्ठापयामास। श्रीमत् श्रीद्वारकांतर्वर्तित्वेन स्वत एव संपद्युक्तम्। देवसदने निजेष्टदेवसूर्यार्चास्थाने। विप्रैः प्रयोज्यकर्तृभिः। न्यवेशयदुत्तमपीठे पूजार्थं स्थापयामास ॥ १० ॥ स मणिः। अकालमृत्युः—योगवासिष्ठोत्पत्तिप्रकरणैकोनसप्ततितमाध्याये उक्तः। तथाहि—"विषूचिकाभिधाना सा नाम्नाप्यन्यायबाधिका" इति। अस्या मन्त्रो हि-ॐ ह्रीं ह्रां रीं रां विष्णुशक्तये नमः, ॐ नमो भगवति विष्णुशक्ति एनाम् ॐ हरहर नयनय पचपच मथमथ उत्सादय दूरे कुरु स्वाहा हिमवन्तं गच्छ जीव सः सः सः चन्द्रमण्डलं गतोसि स्वाहा" इति मन्त्री मंत्रं न्यस्य वामकरोदरे "मार्जयेदातुराकारं तेन हस्तेन संयतः। हिमशैलाभिमुख्येन विद्रुतां तां विचिन्तयेत्। कर्कटीकर्कशाक्रन्दां मन्त्रमुद्गरमर्दिताम्। आतुरं चिन्तयेच्चन्द्रे रसायनहृदिस्थितम् ॥ अजरामरणं युक्तं मुक्तं सर्वाधिविभ्रमैः। साधको हि शुचिर्भूत्वा स्वाचांतः सुसमाहितः ॥ क्रमेणानेन सकलां प्रोच्छिनत्ति विषूचिकाम्।" इति। कालं विना मृत्योरसंभवादेतन्न संभवतीत्यत आह—सत्यपि वर्तितैले वायुना दीपनिर्वापणवदकालमृत्युरस्ति, दीपावशिष्टवर्तितैलयोरागामिदिनोपयोगवदकालमृत्युमृतस्यायुरवशिष्टमागामिजन्मांतरे पुनस्तेनैव भुज्यतेऽन्यथा "अकालमृत्युहरणं सर्वव्याधिविनाशनम्" इत्यादिविष्णुचरणामृतपानमंत्रादेरनाप्तोक्तिता स्यादिति। तत्र स्थाने ॥ दिन इत्यर्धकम्। हे प्रभो भगवद्भक्तिसम्पदां भवादृशां तु न तदादिसंपदादरो यदृच्छया तदुपपत्तौ पूर्ववद्भगवत्येव समर्प्यत इति भावः। मारी नाम नगरग्रामादिषु प्रचुरलोकानां दिनं दिनं मृत्युकारो ग्रहविशेषः। मायिनः कपटिनः। अभितोऽर्चितः सन्नन्यथा तु नैव, अन्यथानिष्टं करोतीत्यर्थः।

---

१. सर्वाधि–वीर. ; सर्वेऽपि–विज. । २. यद्राष्ट्रे–विज. । ३. मणिः विज. ।

तच्चाग्रे व्यक्तं भावि ॥ ११ ॥ स सत्राजित् । मणिं प्रति । यदुराजायोग्रसेनाय दातुम् । शौरिणा कृष्णेन । अतर्कयत् प्राकाशयत् । 'तर्क-प्रकाशपृच्छकारणभाषासु' चौरादिकः ॥ यदुराजायोग्रसेनार्थं राजैकयोग्यत्वात्, न त्वात्मार्थं तत्र निरपेक्षत्वात् । कुत्रापि याचित एव न तु भेदादिना जिघृक्षितः । शौरिणेति शूरयशोविस्तारकस्य तस्य तद्योग्यमेवेति भावः । अर्थे धन एव न तु धर्मादौ कामुकः । अत एव श्रीभगवद्याञ्चाभंगेन दोषमविचारयन् । अयम्भावः—उत्तमद्रव्यत्वेन प्राक् स्वयमेवोद्यम्य दातुं योग्यं, तत्रापि तेन साक्षाद्याचितमपि नादात्, अतो महाऽनर्थः फलिष्यति, तच्चापश्यन् । एवशब्देन वारंवारमपि याचनायामदानं द्योत्यते । प्रशब्देन यदा याच्यते तदा तेनाप्युपयुज्यतामिति किञ्चित्स्वीकारमिषेण वंचना च ज्ञाप्यते ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रहस्य स्मित्वा प्रेति प्रारम्भे नत एवेषद्दृष्टिप्रसारणाभिप्रायेणोऽक्तम् अम्बुजलोचन इति अत एव प्रकर्षेण स्मितावलोकनादिनाह—देव इति । देवोऽपि कश्चिन्न भवति किन्तु मनुष्य एव तत्रापि सत्राजिदित्यर्थः । अथ श्रीमति कौस्तुभे विद्यमानेऽपि चमत्काराय श्रीभगवद्वन्तस्य तदिच्छानुरूपप्रकाशादिति ज्ञेयम्, अन्यत्तैः; तत्र बालानामज्ञानामिति असूर्य्ये सूर्य्यबुद्धेः श्रीकृष्णे चैतावन्तं कालमीश्वरत्वानऽवगमात् सूर्य्यागमनमात्रसम्भावनया कोलाहलाच्च ॥ ९ ॥ श्रीमत्स्वत एव सम्पत्तियुक्तं द्वारकान्तर्वर्त्तित्वात् देवसदने निजेष्टदेवसूर्य्यार्च्चागृहे विप्रैः प्रयोज्यकर्तृभिः न्यवेशयत् उत्तमपीठे पूजार्थं स्थापयामास ॥ १० ॥ दिन इत्यर्द्धकं हे प्रभो ! इति भगवद्भक्तिसम्पदां भवादृशां तु न तदादिसम्पदादरः यदृच्छया वा तदुपसत्तौ पूर्ववत् भगवत्वेव समर्प्यत इति भावः मारीनाम नगरग्रामादिषु प्रचुरलोकानां दिनं दिनम्मृत्युकरो ग्रहविशेषः । मायिनः सर्वे कपटिनः अभितोऽर्चितः सन्निति अन्यथा तु नैव अथचानिष्टङ्करोतीत्यर्थः तच्चाग्रे व्यक्तं भावि ॥ ११ ॥ यदुराजाय उग्रसेनार्थं राजैकयोग्यत्वात् नत्वात्मार्थं तत्र निरपेक्षत्वात् त(कु)त्रापि याचित एव नतु भेदादिना जिघृक्षितः शौरिणेति शूरयशोविस्तारकस्य तस्य तद्योग्यमेवेति भावः अर्थे धन एव नतु धर्मादौ कामुकः अत एव श्रीभगवद्याच्ञाभङ्गेन दोषमविचारयन् अयं भावः उत्तमद्रव्यत्वेन प्राक् स्वयमेवोद्यम्य दातुं योग्यं तत्रापि तेन साक्षादेव याचितमपिनादात् अतो महाननर्थः फलिष्यति तं चापश्यन्निति एवशब्देन वारं वारमपियाचनायामदानं बोध्यते प्रशब्देन यदा याच्यते तदा तेनाप्युपयुज्यतामिति किञ्चित्स्वीकारमिषेण वञ्चना च ज्ञाप्यते ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रहस्य स्मित्वा, तत एवेषद्दृष्टिप्रसारणाभिप्रायेणोक्तम्-अम्बुजलोचन इति । अतएव प्रकर्षेण स्मितावलोकादिनाह—असौ युष्माभिरुक्तोऽयं देव इति । देवोऽपि कश्चिन्न भवति, किन्तु मनुष्य एव, तत्रापि सत्राजिदित्यर्थः । ननु सत्राजिदीदृशः कथं वृत्तः ? तत्राह—मणिनेति; सूर्य्यदत्तेनेति शेषः । अन्यत्तैर्व्याख्यातम् । यद्वा, बालानां शिशूनां वचनमिति पूर्व्वोक्ता जना बाला एव ज्ञेयाः, अन्येषां द्वारकावासिनां तेषामज्ञवत्तादृशोक्त्यसम्भवात् ॥ ९ ॥ श्रीमान् मणिनाधिकं शोभमान इत्यर्थः । श्रीमदिति पाठान्तरे स्वत एव सर्व्वसम्पत्तियुक्तम्; द्वारकान्तर्वर्त्तित्वाद्देव सदने निजेष्टदेव-सूर्य्यार्च्चागृहे न्यवेशयत्, उत्तमपीठादौ सम्यक् स्थापयामास ॥ १० ॥ हे प्रभो ! इति श्रीभगवद्भक्तानां भवादृशामपि तादृक् सामर्थ्यं भात्येवेति भावः । मायिनो राक्षसादयो दुष्टजना वा, अभितोऽर्च्चितः सन्निति, अन्यथा तु नैव, अथवा अनिष्टं करोतीत्यर्थः । तच्चाग्रे व्यक्तं भावि ॥ ११ ॥ यदुराजाय उग्रसेनार्थं राजैकयोग्यत्वात्; किञ्च, शौरिणा मातामहत्वात् स्नेहाच्चेति भावः । श्लेषेण बलान्नेतुं शक्तेनापीत्यर्थः । अर्थे धन एव, न तु धर्म्मादौ कामुकः, अतएव श्रीभगवद्याञ्चाभङ्गेन दोषमविचारयन् । अयं भावः—उत्तमद्रव्यत्वेन प्राक् स्वयमेवोद्यम्य दातुं योग्यम्, तत्रापि तेन साक्षादेव याचितमपि नादात्, अतो महाननर्थः फलिष्यति; तच्चापश्यन्निति एव-प्र-शब्दाभ्यामदानस्य दार्ढ्यं बोध्यते, तेन च श्रीभगवद्वञ्चनार्थं प्रसेनाय ददाविति ज्ञेयम् । तथा च श्रीविष्णुपुराणे (४।१३।१७)—'सत्राजितोऽप्यच्युतो मां याचिष्यतीत्यवगम्य रत्नलोभात् स्वभ्रात्रे प्रसेनाय तद्रत्नमदात्' इति ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

निशम्येति बालानामागच्छतो याथात्म्याऽनभिज्ञानां वचनमाकर्ण्य प्रहस्याह । उक्तिमाह—नासाविति । असावागच्छन्न देवो रविः सूर्य्यः किन्तु सत्राजित् कुतस्तस्येदृशं तेज इत्यतो विशिनष्टि—मणिना स्यमन्तकेन ज्वलन् विद्योतमान आयाति ॥९॥ कीदृशस्तस्य मणेः प्रभाव इति जिज्ञासुं राजानं प्रत्याह मुनिः-सत्राजिदिति । अस्य "सूर्याल्लब्धमणिः" इत्यादिः श्रीमान् भाग्यवान्सत्राजित्कृतानि कौतुकेनोत्सवेन मङ्गलानि यस्मिन् तत्स्वगृहं प्रविश्य देवतागृहे विप्रैः प्रयोज्यकर्तृभिर्मणिं न्यवेशयत् ॥ १० ॥ सच मणिर्हे प्रभो, राजन् ! प्रतिदिनमष्टौ स्वर्णभारान्सृजतिअसूत भारः प्रमाणविशेषस्तथाहि—"चतुर्भिर्व्रीहिभिर्गुञ्जं गुञ्जान् पञ्च पणं पणान् । अष्टौ धरणमष्टौ तान्कर्षं तांश्चतुरः पलम् । तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुलाः" इति । किञ्च,

दुर्भिक्षेति। मारीनामालमृत्युः अरिष्टमभद्रं दुःखहेतवः आत्मनः पीडा व्याध्यादयो रोगाः मायिनो वञ्चकाश्चोरा इति यावत् यस्मिन् राज्ये स मणिरर्च्चितः स्यात्तत्र कदाचिदपि दुर्भिक्षादयो न सन्ति ॥ ११ ॥ क्वापि कदाचित् यदुराजायोग्रसेनार्थं शौरिणा मणिं प्रति याचितो अपि स सत्राजित् अर्थकामुकः हेतुगर्भमिदं तत्त्वात् याञ्चाभङ्गं याञ्चावैय्यर्थ्यं अविचारयन्नेव नैव ददौ ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गृहे देवसदनै देवस्थाने न्यवेशयत् प्रतिष्ठितवान् ॥ १० ॥ पञ्चविंशतितुलात्मको भारः तानष्टौ भारान्सृजति ददाति मारी अकालमृत्यु अरिष्टं मृत्युचिह्नम् ॥ ११ ॥ क्वापि कदाचित् अतर्कयत् अनिरूपयत् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रहस्य प्र इति प्रारम्भेस्मित्वेत्यर्थः ॥ ९ ॥ सत्रमिति कौस्तुभस्य श्रीभगवत्तदिच्छानुरूपा मर्यादा प्रकाशादतिशयो योज्यम् ॥ १०–४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भारप्रमाणं यथा—"चतुर्भिर्व्रीहिभिर्गुञ्जं गुञ्जान् पञ्च पणं पणान्। अष्टौ धरणमष्टौ च कर्षं तांश्चतुरः पलम्। तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुलाः" इति। मारी अकालमृत्युः ॥ ११ ॥ यदुराज उग्रसेनस्तदर्थं याञ्चाभङ्गम् अतर्कयन् भगवद्याञ्चाभङ्गेन दोषमविचारयन् भगवत्यसमर्प्य स्वयमग्रभोजिनः सर्वानिष्टनिवर्त्तकमपि वस्तु सर्वानिष्टहेतुर्भवति किम्पुनः स्वयं प्रार्थयमानेपि तस्मिन्नसमर्प्येति सूचितम् ॥ १२ ॥

गूढार्थदीपिनी

बालानामज्ञानम्। 'बालोऽज्ञे' इति हैमः ॥ ९ ॥ श्रीमत् प्रशंसायां मतुम्। कृतं कौतुकेनोत्सवेन मङ्गलं स्वस्तिवाचनं यस्मिन्। न्यवेशयत् प्रतिष्ठापयामास। विप्रैः कृत्वा ॥ १० ॥ दिने इति सार्द्धम्। अष्टौ स्वर्णभारान् 'भारः स्याद्विंशतिस्तुलाः' तस्याश्चाष्टगुणितत्वे षष्ट्यधिकैकशततुला १६० तुलाः इत्यायाति। मारी विषूचिका ॥ ११ ॥ यदुराजाय उग्रसेनाय। भङ्गं भङ्गजन्यदोषमविचारयन् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ज्वलन् विद्योतमानः ॥ ९ ॥ विप्रैः कृत्वा ॥ १० ॥ भारप्रमाणम्—चतुर्भिर्व्रीहिभिर्गुञ्जं गुञ्जान् पञ्च पणं पणान्। अष्टौ धरणमष्टौ तान् कर्षं तांश्चतुरः पलम्। तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुलाः" इति ॥११॥ मारी अकालमृत्युः ॥ १२–१३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदा भगवान् कर्म न परित्याज्यमिति स्वयं तथैव स्थितः प्रजानां मोहं दूरीकृतवानित्याह **निशम्येति**। बालानां अज्ञानां वचनम्। ते हि स्वोत्कर्षमेव विचारयन्ति। नतु निमित्तम्। तथैतेऽपि स्वोत्कर्षत्वेन मदुत्कर्षमेव भावयन्ति। ततो यं कञ्चन समागच्छन्तं महत्त्वेन मत्सम्बन्धित्वेन च कल्पयन्ति। तस्मात् स्वोत्कर्षपरान् अज्ञान् दृष्ट्वा प्रहस्य दृष्ट्यैव तेभ्यः सुखं दत्तवानित्याह **अम्बुजलोचन** इति। असौ देवरूपो रविर्न भवति, किन्तु स्वेस्तेजो। रविभक्तश्चायं भवति, तेन देवपदं संगच्छते, किन्तु सत्राजिदयम्। कथमेवं जात इति चेत्, तत्राह **मणिना ज्वलन्निति** ॥ ९ ॥ मणिना तस्य भोगमुक्त्वा अर्थसम्पत्तिमाह **सत्राजित्स्वगृह**मिति। भगवत्कृपया पूर्वमेव श्रीमत्कृतानि कौतुकानि मङ्गलानि च यत्र। अनेन धर्मकामौ निरूपितौ। एवं स्वतःसिद्धत्रिवर्गं गृहं प्रविश्य तत्र भक्त्यतिशयात् देवसदने देवपूजागृहे दैत्यानां प्रवेशाभावाय विप्रैः सह मन्त्रपूर्वकं मणिं न्यवेशयत्। नितरां स्थापितवान् ॥ १० ॥ स्थापितस्य फलमाह दिने दिने इति। पञ्चमणमात्रं भारः, चत्वारिंशद्धरणानि मण उच्यते मानविशेषः। ते चाष्टौ। चत्वारिंशन्मणान् सुवर्णस्य प्रत्यहं सृजति। सविता हि तस्य मूलम्। अतोऽयमपि प्रसविता। **प्रभो** इति सम्बोधनं तदाकाङ्क्षाभावाय। न केवलमिष्टसाधकत्वम्, किन्त्वनिष्टनिवारकत्वमपीत्याह **दुर्भिक्षेति**। अनावृष्टिकृतं दुर्भिक्षम्। **मारी** शीतलादिदेवाधिष्ठितव्याधिमरणम्। अरिष्टान्यन्यानि आधिव्याधिहेतुभूतानि। आधिव्याधयश्च। अशुभाः स्वप्नादयोऽपि। मायिनो राक्षसाः पूतनादयः। यत्रायमभ्यर्चितो मणिस्तिष्ठति, तत्र नैते भवन्तीति मणेर्दृष्टादृष्टसामर्थ्यं निरूपितम् ॥ ११ ॥ अयोग्ये महान् धर्मो न युक्त इति विचार्य भगवान् अनेन मणिना सत्राजितो नाशो भविष्यतीति, स्वपुरे च नाशो न युक्त इति, देवान्तराणामत्र सामर्थ्याभावात् तत्प्रसादोऽपि व्यर्थ इति, तस्य लोकद्वयेष्टसिद्ध्यर्थं यावद्द्रव्यं तत उत्पद्यते, तावद्ग्रामादिद्वारा तस्मै दापयित्वा, उग्रसेनाय मणिं दापयितुं सत्राजितं प्रति किञ्चिदुक्तवानित्याह **स याचित** इति। **क्वापीति**। कियत्कालं प्रयच्छ।

यावता मृत्युरपगच्छति । ततः स्वयमेव ग्राह्यमिति भगवदभिप्रायो बोधितः । ननु तस्यैव मृत्युर्भविष्यतीत्याशङ्क्याह **यदुराजायेति** । शौरिणेति सामर्थ्यं दापने निरूपितम् । लौकिकपक्षपातश्च । तथापि न दत्तवानित्याह **नैवार्थकामुक** इति । स ह्यर्थमेव कामयते सिद्धम्, न तु मृत्युनिराकरणमपि, अतो न प्रादात् । यथैवायं न याचते, तथोपायं च विचारितवान् । सूर्यो वक्तव्यः, तद्द्वारा उपद्रवश्च कारणीयः, ततो न याचिष्यतीति याञ्चाभङ्गं तर्कितवान् ॥ १२ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः । बालानामज्ञानां वचनं निशम्य श्रुत्वा प्रहस्य अंबुजलोचनः पद्मनेत्रो हरिः प्राह असौ रविर्वोर्द न किंतु मणिना ज्वलन्सत्राजित् अस्ति ॥ ९ ॥ कृतानि कौतुकेन मंगलानि यस्मिस्तत् श्रीमत् स्वस्य गृहं सत्राजित्प्रविश्य देवस्य सदने मंदिरे विप्रैर्मणिं स्थापितवान् ॥ १० ॥ मणिगुणानाह । हे प्रभो दिनेदिने प्रतिदिनं स मणिरष्टौ स्वर्णभारान्सृजति । तन्मानमुक्तं चरके "सिद्धार्थैरष्टसंख्यैर्यव इह गदितस्तैश्चतुर्भिश्च गुंजा षड्भिस्ताभिश्च माषो जलधिभिरभितष्टंककस्तौ च कोलः । कर्षः शुक्तिः पलं च प्रसृतिकुडवकौ माणिका प्रस्थकश्च प्राग्भ्यां द्वाभ्यां क्रमेण स्युरथ हरिकरैः प्रस्थकैराढकः स्यात् । द्रोणः स्यात्तैश्चतुर्भिर्युगलमथ तयोस्तर्पकस्तौ वहस्तद्वेदैः खारी तुला स्यात्पलशतमथ तद्विशतिर्भार एकः" ॥ १ ॥ यत्र स्थाने देशे च पूजितो मणिरास्ते तत्र दुर्भिक्षं मारी अकालमृत्युः अरिष्टानि न संति सर्पा आधयो व्याधयोऽशुभा दुःखदा न संति मायिनो न संति क्वापि प्रसंगे शौरिणा श्रीकृष्णेन याचितोऽर्थलुब्धः स सत्राजिन्मणिं यदुराजायोग्रसेनार्थं न प्रादात् सूक्तस्य हरेः याञ्चाया भंगं नाशमचिंतयन् सन् ॥ ११–१२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कृतं कौतुकेन मङ्गलं यस्मिन् अत एव श्रीमत् स्वगृहं सत्राजित् प्रविश्य विप्रैः प्रयोज्य कर्तृभिः कृत्वा देवसदने मणिं न्यवेशयत् ॥ १० ॥ मणिप्रभावमाह—दिने दिने इति । भारप्रमाणं तु—"चतुर्भिर्व्रीहिभिर्गुञ्जं गुञ्जान् पञ्च पणं पणान् । अष्टौ धरणमष्टौ तान् कर्षं तांश्चतुरः पलम् । तुलां पलशतं प्राहुर्भारः स्याद्विशतिस्तुलाः" इति । पञ्चपणमात्रः भार इति सुबोधिन्यामुक्तम् । अभ्यर्चितो मणिर्यत्रास्ते तत्र दुर्भिक्षादयो न सन्ति न भवन्ति । दुर्भिक्षोऽनावृष्टिप्रयुक्तोऽन्नाद्यलाभः । मारीनाम्नी कालमृत्युहेतुभूता देवता । अरिष्टं गृहादिपीडा । सर्पाः । आधिर्मनःपीडा । व्याधयो रोगाः । अशुभाश्चान्येऽपि दुःखहेतवः । मायिनो दैत्यादयश्चोराश्च ॥ ११ ॥ स सत्राजित् क्वापि कदाचित् शौरिणा श्रीकृष्णेन यदुराजाय ईदृक्प्रभावस्य मणे राजनिकटस्थितिरेव युक्तेति मत्वा उग्रसेनार्थं मणिंप्रति याचितोऽपि भगवतो याच्ञाभङ्गमतर्कयन् आज्ञोल्लङ्घनानर्थमननुसन्दधानो मणिं नैव प्रादात् इत्यन्वयः । तत्र हेतुमाह—अर्थकामुक इति । तज्जनितसुवर्णाद्यभिलाषित्वादित्यर्थः ॥ १२ ॥

अन्वितार्थप्रकाशिका

निशम्येति । बालानामागच्छतस्तत्त्वजानतां वचनं निशम्य श्रुत्वाऽम्बुजलोचनः श्रीकृष्णः प्रहस्य प्राह स्म । असौ रविर्देवो न भवति किं तु स्यमन्तकेन मणिना ज्वलन् विद्योतमानः सत्राजित् अस्ति । तदा भगवदिच्छया भगवत्कण्ठकौस्तुभप्रकाशसंवरणमभूत् ॥ ९ ॥ सत्राजिदिति । कृतं कौतुकेन मङ्गलं यस्मिन् अत एव श्रीमत्स्वगृहं सत्राजित् प्रविश्य विप्रैः प्रयोज्यकर्तृभिः कृत्वा देवसदने स्वेष्टदेवसूर्यमन्दिरे मणिं न्यवेशयत् पीठे स्थापितवान् ॥ १० ॥ दिने इत्यर्द्धम् ॥ हे प्रभो राजन् ! स मणिः दिने दिने अष्टौ स्वर्णभारान् सृजति । "चतुर्भिर्व्रीहिभिर्गुञ्जा गुञ्जाः पञ्च पणं पणान् ॥ अष्टौ धरणमष्टौ तान् कर्षं तांश्चतुरः पलम् ॥ तुलां पलशतं प्राहुर्भारः स्याद्विशतिस्तुलाः ।" अत्राष्टगुञ्जो माषो द्वादशमाषस्तोलश्चतुर्विंशतितोलः शेटकश्चत्वारिंशच्छेटको मणक इति महाराष्ट्रादिदेशीयप्राकृतमानरीत्याऽमरसिंहमतेन षण्मणकः सप्तत्रिंशच्छेटकाः अष्टादश तोलका अष्टौ माषाश्चेति भारप्रमाणम् । स्वामिमते तु सप्तविंशतिर्मणका एकत्रिंशच्छेटकास्तोलद्वयमष्टौ माषाश्चेति । काशीनाथः एवमशीतितोलकात्मकशेटकेन साम्प्रतिकाङ्गरेजादिरीतिः कल्प्या । दुर्भिक्षेति । अभ्यर्चितो मणिर्यत्रास्ते तत्र दुर्भिक्षोऽनावृष्टप्रयुक्तोऽन्नाद्यलाभः मारी बहूनां जनानां नित्यमकालमृत्युः अरिष्टं ग्रहादिपीडा सर्पाः आधिर्मनःपीडा व्याधयो रोगा अशुभाश्चान्येऽपि दुःखहेतोः मायिनो दैत्यादयश्चोराश्च न सन्ति न भवन्ति । स इति । स सत्राजित् क्वापि कदाचित् शौरिणा श्रीकृष्णेन यदुराजाय ईदृक्प्रभावस्य मणे राजनिकटस्थितिरेव युक्तेति मत्वा उग्रसेनार्थं मणिं प्रतियाचितोऽपि अर्थकामुकः लोभी भगवता याञ्चाभङ्गमतर्कयन् आज्ञाल्लङ्घनानर्थमननुसंदधानो मणिं नैव प्रादात् एतेन भगवत्यसमर्प्य स्वयमग्रभोजनः सर्वानिष्टनिवर्तकमपि अनिष्टहेतुरेव भवतीति सूचितम् ॥ ११–१२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

बालानामबुधानां वचनं ज्वलन् सूर्यवत्प्रकाशमानः ॥ ९ ॥ कृतं कौतुकेन उत्साहेन मंगलं चित्रादिशोभा यस्मिन् तत् स्वगृहं प्रविश्य देवस्थाने विप्रैः प्रयोज्य कर्तृभिः ॥ १० ॥ हे प्रभो ईश्वरभक्त्या समर्थ । भारप्रमाणे श्लोकः चतुर्भिर्व्रीहिभिर्गुञ्जं

गुंजान्पंचपणंपणान् । अष्टौ धरणमष्टौ च कर्षतांश्चतुरः पलम् । तुलांपलशतं प्राहुर्भारः स्याद्विंशतिस्तुला इति गुंजां त्रयेणैकवल्लः द्वात्रिंशद्वल्लैश्च । एकतोलः एकोनत्रिंशद्वलैश्च ॥ २९ ॥ एकरूप्यसंज्ञः एकचत्वारिंशद्रूप्यसंज्ञैश्च ॥ ४१ ॥ एकशेटकः एवं चत्वारिंशच्छेठकैश्च ॥ ४० ॥ एकमणकोबोध्यः अनेन गुंजादिमानेन भारः कथ्यते । स त्रिपादसप्तदशमणकाः सद्विपादसप्तशेटकाश्च सप्ततोलश्च सार्द्धैकवल्लश्च एकगुंजश्च इत्येतावत् गुर्ज्जरीयरीत्या भारप्रमाणं भारस्यांकाः ॥१७॥ ७ ॥ ७ ॥ १ ॥ १ ॥ इत्येकभारः मारीनामाऽकालमरणं । अरिष्टमभद्रं । सर्व्वाः नागाः अशुभाः दुःखजनकाः ॥ ११ ॥ एतदादयो मायिनस्तत्र न संति । अभ्यर्चितः पूजितः याच्ञा भंगं भगवद्याचनाभंगदोषं अतर्कयन् अविचारयन् भगवत्यसमर्पणेन शुभदोप्यशुभदो भविष्यतीति भावः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निशम्येति । बालानामागच्छतो याथात्म्यानभिज्ञानां वचनं बालवचनं, निशम्याकर्ण्यः, प्रहस्य हासं कृत्वा, अम्बुजलोचनः कमलनयनः भगवान्, हे जनाः, असौ रविः देवः, न । मणिना स्यमन्तकाख्येन सूर्यभक्तत्वात् सूर्यदत्तेन मणिना ज्वलन् सत्त्राजिदयं भवति इति, प्राह ॥ ९ ॥ कीदृशस्तस्य मणेः प्रभाव इति जिज्ञासुं राजानं प्रत्याह मुनिः । सत्त्राजिदिति । श्रीमान् भाग्यवान्, सत्राजित्, कृतानि कौतुकेनोत्सवेन मङ्गलानि यस्मितत्, स्वगृहं प्रविश्य, देवसदने स्वगृहवर्त्तिनि देवतागृहे, विप्रैः प्रयोज्यकर्त्तृभिः, मणिं न्यवेशयत् । हे प्रभो हे राजन्, स मणिः, दिने दिने प्रतिदिनं, अष्टौ स्वर्णभारान्, सृजति । भारः प्रमाणविशेषः । तथा हि 'चतुर्भिर्व्रीहिभिर्गुञ्जा गुञ्जाः पञ्च पणं पणान् । अष्टौ धरणमष्टौ तान् कर्षं तांश्चतुरः पलम् । तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुलाः' इति ॥ १० ॥ दुर्भिक्षेति । किं च यत्र मणिरयं स्यमन्तकः, अभ्यर्चितः सम्यक् कृतपूजनः, आस्ते तिष्ठति, तत्र दुर्भिक्षमन्नादेर्महर्घता, मारीनामाऽकालमृत्युः, अरिष्टमभद्रं, एतेषां द्वन्द्वः । सर्पाधिव्याधयः सर्पदंशः आधिर्मनःपीडा, व्याधयो रोगाः, मायिनो वञ्चकाश्चोरा इति यावत् । इत्यादयः, अशुभाः, दुःखहेतवः, न सन्ति । नैव भवेयुरित्यर्थः ॥ ११ ॥ स इति । यदुराजायोग्रसेनार्थं, मणिं प्रति, क्वापि कदाचित्, शौरिणा श्रीकृष्णेन, स सत्राजित्, याचितः तथापि, अर्थकामुकः । हेतुगर्भमिदं, तत्त्वात्, याञ्चाभङ्गं, अतर्कयन् अनिरूपयन् अविचारयन्नित्यर्थः । नैव, प्रादात् । अनेन भगवत्यसमर्प्य स्वयमग्रभोजिनः सर्वानिष्टनिवर्त्तकमपि अनिष्टहेतुरेव भवतीति सूचितम् ॥ १२ ॥

कृष्णप्रिया

श्रीशुकाचार्य जी ने कहा—राजन् ! कमलनयन भगवान् श्रीकृष्ण ने बालकों जैसी निर्दोष वाणी सुनकर मन्दस्मित करके कहा कि हे यादववृन्द श्रवण कीजिये यह भगवान् सूर्य नहीं है लेकिन यह तो सूर्य भक्त सत्राजित् है । सूर्य भगवान् के अनुग्रह से समर्पण की स्यमन्तक मणि की यह तेजस्विनी कान्तिके कारण सूर्य समान दीख रहा है । वह मणि उसके कण्ठ में हैं ॥ ९ ॥ श्रीसत्राजित् स्यमन्तक मणि को लेकर अपने समृद्ध भवन में गये । आप्त वृन्द में सूर्योपासन कर और मणि लेकर भुवन में पधारे हुए सत्राजित के पधारने के निमित्त महान् महोत्सव मनाया । श्रीसत्राजित ने विप्रवर्यों को निमन्त्रित करके अपने देवमन्दिर में मणि को प्रतिष्ठित की राजन् परीक्षित् यह स्यमन्तक मणि प्रतिदिन आठ भार सुवर्ण दिया करती थी । जहाँ यह मणि विराजती थी वहाँ पर दुष्काल-अनावृष्टि-महामारी-ग्रहपीडा-सर्पभय-मानसिक-एवं कायिक तनाव बिमारियों-एवं मायाविओं के मन्त्र प्रभाव-और उनके उपद्रव आदि किसी भी प्रकार का अमङ्गल नहीं होता था ॥ १० ॥ चतुर्भिर्व्रीहिभिर्गुञ्जं गुञ्जान् पञ्चपणं पणान् । अष्टौ धरणमष्टौ च कर्षं तांश्चतुरः पलम् ॥ तुलां पलशतं प्राहुर्भारः स्याद् विंशतिस्तुलाः ॥ चार व्रीहि-धान की एक भुजा बनती है । और पांच गुञ्जा का एक पण होता है । आठ पण का एक धरण और आठ धरण का एक कर्ष होता है । चार कर्ष का एक पल और दो पल की एक तुला और वीस तुला का एक भार होता है ॥ ११ ॥ राजन् एक कृपानिधान श्रीकृष्ण ने प्रसङ्ग वश सत्राजित को सद्भाव से जताया कि भैया सत्राजित् ! आपकी यह मणि महाराज उग्रसेन को समर्पण करें तो अच्छा । लेकिन अर्थलालसु सत्राजित ने भगवान् श्रीकृष्ण की आज्ञा का पालन नहीं किया । उसने कम से कम यह नहीं सोचा कि भगवान के मार्गदर्शन में कुछ रहस्य होगा ॥ १२ ॥

तमेकदा मणिं कण्ठे प्रतिमुच्य महाप्रभम् । प्रसेनो हयमारुह्य मृगयां व्यचरद् वने ॥ १३ ॥
प्रसेनं सहयं हत्वा मणिमाच्छिद्य केसरी । [1]गिरिं विशञ्जाम्बवता निहतो मणिमिच्छता ॥ १४ ॥
सोऽपि चक्रे कुमारस्य मणिं क्रीडनकं बिले । अपश्यन् भ्रातरं भ्राता सत्राजित् पर्यतप्यत ॥ १५ ॥
प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः । भ्राता ममेति तच्छ्रुत्वा कर्णे कर्णेऽजपञ्जनाः ॥ १६ ॥

---

[1] बिलं–विजं ।

कर्दमक्षमा

अन्वयः—एकदा, प्रसेनः (सत्राजिद्भ्राता) महाप्रभम्, तम्, मणिम्, कण्ठे, प्रतिमुच्य, हयम्, आरुह्य, वने, मृगयाम्, व्यचरत् ॥१३॥ केसरी, सहयम्, प्रसेनम्, हत्वा, मणिम्, आच्छिद्य, गिरिम्, विशन्, मणिम्, इच्छता, जाम्बवता, निहतः ॥१४॥ सः (जाम्बवान्) अपि, बिले, मणिम्, कुमारस्य, क्रीडनकम्, चक्रे, भ्राता, सत्राजित्, भ्रातरम्, प्रसेनम्, अपश्यन्, पर्यतप्यत ॥१५॥ मम, भ्राता, मणिग्रीवः, वनम्, गतः, प्रायः, कृष्णेन, निहतः, तत्, श्रुत्वा, जनः, कर्णे, कर्णे, अजपत् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेव दर्शयितुमाह । तमेकदेति । प्रतिमुच्य बद्धा । प्रसेनः सत्राजिद्भ्राता ॥ १३ ॥ आच्छिद्य आकृष्य गृहीत्वा ॥१४-१५ ॥ अजपन्नुपांशु अवोचन् ॥ १६-२२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेवाऽनिष्टहेतुत्वम् । प्रतिमुच्य प्रतिपूर्वो मुचिर्बंधने । स च श्रीभगवद्वंचनार्थमेव प्रसेनाय ददाविति । तदुक्तं वैष्णवे-सत्राजितोऽप्यच्युतो मां याचिष्यतीत्यवगम्य रत्नलोभात्स्वभ्रात्रे प्रसेनाय तद्रत्नमदादिति । अत एव प्रसेनः सर्वतोऽप्रतीत्या स्वरक्षणार्थं च तं स्वर्णसंपुटाद्याच्छन्नं कंठ एव प्रतिमुच्य तत्प्रभावज्ञ एकाक्यपि वनादौ गच्छतीति भावः ॥ १३ ॥ जांबवता ऋक्षराजेन । हत्वेति हिंस्रस्वभावत्वात् । महामणिमाच्छिद्येति महाधनस्वभावत्वात्, मूषिकादौ दृश्यते ॥ १४ ॥ सोऽपि जांववानपि क्रीडनकं क्रीडासाधनम् । सोपीत्यर्द्धकम् । कुमारस्य बिले गुहांतर्वर्तमानस्य सुकुमाराख्यस्य स्वपुत्रस्य क्रीडनकं बालक्रीडासाधनं चक्रे । अपश्यन्निति सार्धकम् । प्रायो वितर्के । तेन प्रभुत्वेपि या प्रार्थना कृता तस्या भंगादेव पर्यतप्यतेति भावः ॥ १५ ॥ तत् सत्राजिद्वचनम् । उपांशु नीचैः यथा कथनसमयेऽन्यो न शृणुयादित्यर्थः । जनास्तदनुवर्तिन एव नागरिका न तु सर्वे, प्रथमस्कन्धे तेषां परमभक्तिवर्णनात् 'नताः स्म ते नाथ पदारविंदम्' इत्यादिभिः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सच श्रीभगवद्वचनार्थमेव प्रसेनाय ददाविति ज्ञेयं तथा च श्रीविष्णुपुराणे सत्राजितोऽप्यच्युतो मां याचिष्यतीत्यवगम्य रत्नलोभात् स्वभ्रात्रे प्रसेनाय तद्रत्नमदादिति अत एव प्रसेनः सर्वतोऽप्रतीत्या स्वरिरक्षिषया च तं स्वर्णसम्पुटाद्यच्छन्नं कण्ठ एव प्रतिमुच्य एकदा मृगयायां विशेषेण परमाशक्तित एकाकित्वादिनाऽप्यचरत् ॥ १३ ॥ हत्वेति हिंस्रस्वभावत्वात् मणिमाच्छिद्येति महाधनस्वभावत्वात् मूषकादौ हि तथा दृश्यते ॥ १४ ॥ सोऽपीत्यर्द्धकम् बिले गिरिगुहान्तर्वर्त्तमानस्य कुमारस्य स्वपुत्रस्य सुकुमाराख्यस्य क्रीडनकं बाल्यक्रीडासाधनम् पश्यन्निति सार्द्धकम् ॥ १५ ॥ प्रायो वितर्के तेन प्रभुत्वेऽपि या प्रार्थना कृता तस्या भङ्गादिति भावः । जनास्तदनुवर्तिन एव नागरिकाः न तु सर्वे प्रथमस्कन्धे तेषां परमभक्तिवर्णनात् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतएव प्रसेनस्तं कण्ठे प्रतिमुच्य, एकदा मृगयां विशेषेण परमासक्त्या एकाकित्वादिनाचरत् ॥ १३ ॥ महाप्रभावत्वेनैवाश्चर्य्येण हत्वा नितरां नखैः खण्डशो विदारणादिना हतः ॥ १४ ॥ बिले गिरिगुहान्तर्वर्त्तमानस्य कुमारस्य स्वपुत्रस्य सुकुमाराख्यस्य क्रीडनकं बाल्यक्रीड़ासाधनम् ॥ १५ ॥ भ्रातरम्, भ्रातेत्यन्योन्यं स्नेहः सूचितः, अतोऽपश्यन्नेव परितोऽतप्यत अशोचत्; प्राय इति प्रभुत्वान्मणिप्रार्थनाच्च नितरां शिरश्छेदादिना हतः; जनास्तदनुवर्त्तिनो नागरिकाः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवं स्थिते महती प्रभा दीप्तिर्यस्य तं मणिमेकदा प्रसेनः सत्राजिद्भ्राता कण्ठे प्रतिमुच्य बद्ध्वा अश्वमारुह्य वने मृगयां व्यचरत् ॥ १३ ॥ तदा कश्चित्केसरी सिंहः साश्वं प्रसेनं हत्वा मणिमाच्छिद्याऽऽकृष्य गृहीत्वा गिरिं प्रविशन् आत्मानं दृष्टवता मणिमिच्छता जाम्वता ऋक्षराजेन हतः ॥ १४ ॥ सोऽपि जाम्ववानपि बिले स्वनिवासभूते गिरिबिले तं मणिं स्वकुमारस्य क्रीडनकं क्रीडासाधनं चक्रे । भ्राता सत्राजित् भ्रातरं प्रसेनं मणिं चापश्यन् पर्यतप्यत परितप्याऽऽहेत्यर्थः ॥ १५ ॥ उक्तिमेवाह-प्राय इति । मणिः ग्रीवायां यस्य स मम भ्राता वनं प्रति गतस्तत्र प्रायो बहुधा ध्रुवमिति यावत् कृष्णेनैव हत इत्येतद्वचो जनः श्रुत्वा कर्णे कर्णेऽजपदुपांश्ववोचत् ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रतिमुच्य बद्ध्वा ॥ १३ ॥ आच्छिद्य स्वीकृत्य ॥ १४ ॥ क्रीडनकं लीलासाधनम् ॥ १५ ॥ शौरेर्याच्ञाभङ्गदोषादिदमनर्थजातमभूत् अन्यथा मणिमाहात्म्यस्तवनं व्यर्थमिति तात्पर्यमवगन्तव्यं मणिः ग्रीवायां यस्य स तथा मम भ्राता कृष्णेन निहत इति यत्तच्छ्रुत्वा ॥ १६-१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

प्रतिमुच्य बद्ध्वा ॥१३॥ आच्छिद्य आकृष्य ॥१४-१५॥ जनास्तत्सवासनादुष्टा एव अजपन् उपांश्ववोचन् ॥ १६-१९ ॥

गूढार्थदीपिनी

प्रतिमुच्य बद्ध्वा । प्रसेनः सत्राजिद्भ्राता । मृगयामुद्दिश्य ॥ १३ ॥ आच्छिद्य बलाद् गृहीत्वा ॥ १४ ॥ सोऽपीत्यर्द्धम् । क्रीडनकं क्रडासाधनम् । बिले गुहायाम् । १५ ॥ अपश्यन्निति सार्द्धम् । प्रायो वितर्के । कर्णे कर्णेऽजपन् शनैः शनैरवोचन् ॥१६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रसेनः सत्राजिद्भ्राता प्रतिमुच्य बद्ध्वा ॥ १३ ॥ आच्छिद्य आकृष्य ॥ १४-१५ ॥ जनाः दुष्टाः अजपन् उपांश्ववोचन् ॥ १६-२२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं दोषद्वयं तस्य निरूपितम् । आज्ञोल्लङ्घनमपकारचिन्तनं चेति । तत्र स्वस्यैवापकारो जातः । आज्ञाभङ्गफलं मृत्युरपि जात इत्यध्यायद्वयेन निरूप्यते । एतादृशोऽपि मणिः भगवद्भावरहितः अनर्थपर्यवसायी जात इति निरूपयन् भगवदाज्ञोल्लङ्घनात् तदीयानां बुद्धिरेव दुष्टा जातेति, पूज्यमपि मणिं सत्राजिन्मात्रपरिधेयं च, भक्तस्यैव भगवद्धर्मा उपकारिण इति सामान्यं तं मणिं ज्ञात्वा प्रसेनोऽपि तत्प्रतिष्ठार्थं तद्भ्राता कण्ठे उन्मुच्य गतवानित्याह **तमेकदे**ति । कण्ठे मणिं प्रतिमुच्य एतत्प्रभया मृगा अन्धा भविष्यन्ति, ततो धर्तव्या इति, महाप्रभं सूर्यवत्प्रकाशमानम्, **प्रसेनः** प्रकृष्टसेनायुक्तोऽपि एकाकी हयमारुह्य मृगयां कर्तुं व्यचरत् । मृगा यान्त्यस्यामिति मृगनाशिका राजलोला मृगया, तामुद्दिश्य वने व्यचरत् ॥ १३ ॥ महाप्रभत्वात् असहिष्णुः सिंहः तं हत्वा मणिं नीतवानित्याह **प्रसेन**मिति । अलौकिकेनोपायेन न मृगा हन्तव्याः, भगवांस्तेषु नालौकिकं दत्तवानिति, मृगयैव तदर्थं निर्मिता । तेषां वधं मणिना चिन्तयन् तेनैव स्वमृत्युं प्राप्तवान् । स मणिर्देवरूप इति क्रुद्धो मणिर्यत्रैव स्थितः, तमेव घातयतीति परम्परया बहूनां वध उच्यते । हयसहितं प्रसेनं हत्वा मणिः केसरिणा गृहीतः । सोऽपि निकृष्टस्थाने मणिं नयन् गिरिं विविक्षन् कन्दरां प्रविशन् जाम्बवता निहतः । ननु महान् सः, किमिति सिंहं हतवान्, तत्राह **मणिमिच्छते**ति । अहतः सिंहो मणिं न मुञ्चतीति ॥ १४ ॥ तस्य मणेः प्रयोजनमाह **सोऽपि चक्र** इति । बिले स्वस्थानविवरे कुमारस्यातिबालकस्य (स्थाने) क्रीडनकं क्रीडासाधनं चक्रे । एतावदेकेनैव दिनेन निर्वृत्तम् । ततो भ्रातुरन्वेषणार्थं सत्राजिता मनुष्याः प्रस्थापिताः । ततो न काप्युपलब्धः । ततो भ्रातृस्नेहात् भ्रातरमपश्यन् सत्राजित्पर्यतप्यत । मणिरपि गतो, भ्रातापि गत इति ॥ १५ ॥ ततः किं जातमिति विचारे भ्रातुरिवास्यापि दुर्बुद्धिरुत्पन्नेत्याह **प्रायः कृष्णेने**ति । अयमपि गतः । भगवान् स्वतोऽन्येन वा स्वयमपि मृगयां गतो मारितवानिति । **प्राय** इत्युत्कटा कोटिः । कृष्ण एव समर्थो मणिगुणान् दूरीकर्तुम् । हेतुश्चाप्यस्ति । मणिः पूर्वं याचित इति, वने च मारणे न कोऽपि ज्ञास्यतीति । एवं निश्चित्य भगवति क्लिष्टमारोपितवान् । ननु केनापि नोच्यते, कथं त्वं कल्पयसीत्याशङ्क्याह **भ्राता ममे**ति । मम तु प्रिय इत्यहं ब्रवीमि, अन्यः किमर्थं वक्ष्यतीति भावः । तद्गृहे उक्तं भार्यादिस्थाने, पश्चात्कर्णे कर्णे समागतमजपत् । मन्त्रवत् शनैः भगवत्कीर्तिमुक्तवान् । यतो जनः, नह्यल्पेन दोषेण जन्ममरणादिकं प्राप्नोति ॥ १६ ॥

श्रीसुबोधिनीसारः

महदतिक्रमः सद्यः फलत्यहो इति दर्शयति । एकस्मिन्काले महाप्रभं तं मणिं कंठे प्रतिमुच्य निक्षिप्य बद्ध्वा प्रसेनः सत्राजिद्भ्राता हयमश्वमारुह्य वने मृगयां व्यचरत् ॥ १३ ॥ सहयं साश्वं प्रसेनं हत्वा मणिमाच्छिद्याकृष्य गिरिं पर्वतं विशन् केसरी सिंहो मणिमिच्छता जांबवता निहतः तत्र बीजं सूर्येणोक्तं देवीभागवते । "शुचिष्मता सदा धार्यं रत्नमेतन्महोत्तमम् । सत्राजित्तत्क्षणेनैतदशुचिं हंति मानवम्" इति सिंहोपि न पशुरिति । इति हरिवंशे ॥ १४ ॥ सोपि जांबवान् बिले विवरे मणिं कुमारस्य बालकस्य क्रीडनकं षिदुकं चक्रे भ्रातरं प्रसेनमपश्यन् भ्राता सत्राजित् परितप्तोऽभूत् ॥ १५ ॥ मणिर्ग्रीवायां यस्य स मम भ्राता वनं गतः प्रायो बाहुल्येन कृष्णेन निहतः तच्छ्रुत्वा जनाः कर्णे कर्णे प्रतिकर्णमजपन् "षट्कर्णो भ्रश्यते मंत्रः" इत्युक्तेः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

'भगवत्यसमर्प्य स्वयमग्रतोभोजिनस्तद्विमुखस्य सर्वानिष्टनिवर्तकमप्यनिष्टहेतुरेव भवति' इति सूचयन् भगवदाज्ञोल्लङ्घनफलमाह—तमित्यादिना । महती प्रभा दीप्तिर्यस्य तं मणिमेकदा प्रसेनः सत्राजिद्भ्राता कण्ठे प्रतिमुच्य बद्ध्वा हयमारुह्य

वने मृगयां व्यचरत् ॥ १३ ॥ तदा कश्चन केसरी सिंहः सहयं प्रसेनं हत्वा मणिमाच्छिद्य आकृष्य गृहीत्वा गिरिं प्रविशन् मणिमिच्छता जाम्बवता ऋक्षराजेन निहत इत्यन्वयः ॥ १४ ॥ स जाम्बवताऽपि बिले स्वनिवासस्थाने गिरिकन्दरायां तं मणिं स्वकुमारस्य क्रीडनकं क्रीडासाधनं चक्रे । तदा भ्राता सत्राजित् भ्रातरं समणिं प्रसेनमपश्यन् पर्यतप्यत ॥ १५ ॥ परितप्तश्चाह—प्राय इति । मम भ्राता प्रायः ध्रुवं कृष्णेन निहतः । तत्र हेतुमाह—मणिग्रीव इति । पूर्वं कृष्णेन मणिर्याचितः, मया च न दत्तः । इदानीं मणिर्ग्रीवायां यस्य तथाभूत एव वनं गतः, अतो मणिलोभेन कृष्णेनैव निहत इत्यर्थः । इत्येवंभूतं तद्वचः श्रुत्वा द्वारकावासिजनाः कर्णे कर्णे अजपन् उपांश्ववोचन् ॥ १६ ॥

अन्वितार्थप्रकाशिका

तदेव दर्शयितुमाह—तमिति । महती प्रभा दीप्तिर्यस्य तं मणिमेकदा प्रसेनः सत्राजिद्भ्राता कण्ठे प्रतिमुच्य बद्ध्वा हयमारुह्य वने मृगयां व्यचरत् ॥ १३ ॥ प्रसेनमिति । कश्चन केसरी सिंह सहयं प्रसेनं हत्वा मणिमाच्छिद्य आकृष्य गृहीत्वा गिरिं प्रविशन् मणिमिच्छता जाम्बवता ऋक्षराजेन निहतः । सिंहेन मणिग्रहणं चोत्तमद्रव्यस्वाभाव्यात् मूषकादौ स्वर्णादिहरणदर्शनात् ॥ १४ ॥ स इति । स जाम्बवानपि बिले स्वनिवासस्थाने गिरिकन्दरायां तं मणिं कुमारस्य कुमाराख्यस्येति तोषिणी । क्रीडनकं क्रीडासाधनं चक्रे । तदा भ्राता सत्राजित् भ्रातरं समणिं प्रसेनमपश्यन् पर्यतप्यत ॥ १५ ॥ प्राय इति । पूर्वं कृष्णेन मणिर्याचितः मया च न दत्तः । इदानीं मणिर्ग्रीवायां यस्य तथाभूत एव मम भ्राता वनं गतः । अतो मणिलोभेन प्रायः ध्रुवं कृष्णेनैव निहतः । इत्येवंभूतं तस्य सत्राजितो वचः श्रुत्वा द्वारकावासिनो दुर्वासनावन्तः केचित् जनाः कर्णे कर्णे अजपन् उपांश्ववोचन् ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कंठे प्रतिमुच्य आबध्यप्रसेनः सत्राजितसहोदरः ॥ १३ ॥ आच्छिद्य गृहीत्वा ॥ १४–१५ ॥ अजपन्नवोचन् ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेव दर्शयितुमाह ॥ तमिति ॥ एकदा कदाचित्, प्रसेनः सत्राजिद्भ्राता. महती प्रभा दीप्तिर्यस्य तं, तं मणिं कण्ठे, प्रतिबद्ध्य, हयमश्वं, आरुह्य वने, मृगयां व्यचरत् । मृगयां विधातुमगच्छदित्यर्थः ॥ १३ ॥ प्रसेनमिति ॥ तदा, कश्चित् केसरी सिंहः, सहयं साश्वं, प्रसेनं, हत्वा, मणिं, आच्छिद्याकृष्य गृहीत्वेत्यर्थः । गिरिं, विशन् प्रविशन् सन्, मणिं, इच्छता जाम्बवता ऋक्षराजेन, हतः ॥१४॥ सोऽपीति ॥ स जाम्बवान् अपि, बिले स्वनिवासभूते गिरिबिले. मणिं कुमारस्य स्वपुत्रस्य, क्रीडनकं क्रीडासाधनं, चक्रे । भ्राता प्रसेनबन्धुः सत्राजित्, भ्रातरं प्रसेनं, अपश्यन् मणिं चेति शेषः । पर्यतप्यत परितप्तः सन्नाहेत्यर्थः ॥ १५ ॥ प्राय इति ॥ मणिर्ग्रीवायां यस्य सः, वनं गतः, मम भ्राता प्रसेनः प्रायः बहुधा ध्रुवमिति यावत् । कृष्णेन, निहतः । इति तद्वचः, जनाः, श्रुत्वा, कर्णे कर्णे, अजपन् उपांश्ववोचन् ॥ १६ ॥

कृष्णप्रिया

यह मणि सामान्य मनुष्यको धारण करने योग्य न था । और सत्राजित की मृत्यु निवारण के लिये जब तक अमङ्गल काल दूर न हो जाय तब तक राजा उग्रसेन को देने के लिये कहा था । आज उसी मणि को अपने गले में बांध कर भाई प्रसेन ने अश्वारोहण किया और मृगया करने के लिये वन में प्रस्थान किया ॥ १३ ॥ उस वन में अश्वसहित प्रसेन को सिंह ने मार दिया और मणि लेकर चल पड़ा । वह केसरी मणि लेकर गुहा में प्रवेश करता तब ही मणि की लालसा से श्रीजाम्बवान ने सिंह का शिकार किया ॥ १४ ॥ जाम्बवान्जी अपनी गुफा में गये वहाँ जाकर जाम्बवान ने अपने बच्चे को खेलने के लिये दे दी । यहाँ द्वारिका में प्रसेन के न लौटने से सत्राजिन को अत्यन्त दुःख हुआ ॥ १५ ॥ सत्राजित सबको कहने लगा अधिकतर सम्भावना है कि श्रीकृष्ण ने ही मेरे भाई प्रसेन को मार दिया होगा । क्योंकि प्रसेन मणिको कण्ठ में पहनकर वन में गया था । सत्राजित की इस वार्ता को सुनकर द्वारिका निवासी लोग परस्पर काना-फूंसी करने लगे ॥ १६ ॥

भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनः[1] । मार्ष्टुं प्रसेनपदवीमन्वपद्यत नागरैः ॥ १७ ॥
हतं प्रसेनमश्वं च वीक्ष्य केसरिणा वने । तं चाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जनाः ॥ १८ ॥
ऋक्षराजबिलं भीममन्धेन तमसाऽऽवृतम् । एको विवेश भगवानवस्थाप्य बहिः प्रजाः ॥ १९ ॥
तत्र दृष्ट्वा मणिश्रेष्ठं बालक्रीडनकं कृतम् । हर्तुं कृतमतिस्तस्मिन्नवतस्थेऽर्भकान्तिके ॥ २० ॥

---

१. मात्मनि–श्रीधर. वंशी. जीव. वीर. विज. विश्व शुक. सु. ।

कर्दमक्षमा

अन्वयः—भगवान्, आत्मनि, लिप्तम्, तद्, दुर्यशः, मार्ष्टुम्, नागरैः, सह, प्रसेनपदवीम्, अन्वपद्यत ॥ १७ ॥ जनाः, प्रसेनम्, अश्वम्, च, केसरिणा, हतम्, वीक्ष्य, च, तम्, केसरिणम्, आदिपृष्ठे, ऋक्षेण, निहतम्, ददृशुः ॥ १८ ॥ अन्धेन, तमसा आवृतम्, भीमम्, ऋक्षराजविलम्, भगवान्, प्रजाः, वहिः स्थाप्य, एकः, विवेश ॥ १९ ॥ तम्, मणिश्रेष्ठम्, बालक्रीडनकम्, दृष्ट्वा, हर्तुम्, कृतमति, तस्मिन्, अर्भकान्तिके, अवतस्थे ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

लिप्तं लग्नम् । मार्ष्टुं शोधयितुं, द्रष्टुमिति यावत् । भगवान सर्वसद्यशोयुक्तः । लोकपरम्परया उद्धवमुखेन श्रुत्वा । नागरैस्तैरेवानुव्रजत् ॥ १७ ॥ तं केसरिणम् । अद्रेर्ऋक्षवतः । पृष्ट उपरि । जनास्त एव ददृशुरित्यपवादतो विशुद्धिस्ततोऽभूदिति भावः ॥ बिलं वासस्थानं गुहाम् "बिलं छिद्रे गुहायां च पुमानुच्चैःश्रवोहये" इति मेदिनी । तथापि सत्राजितह्लेपणाद्यर्थरत्नमादातुमृक्षपदान्यनुगच्छंस्तं बिलं प्राप्त इति प्राह—ऋक्षेति । अन्धेनांधीकारकेण तत ऋक्षसम्बन्धित्वाच्च भयानकमत एव बर्हिबिलद्वारे प्रजा नागरजनानवस्थाप्य, यतो भगवान् परमदयादिगुणसागर इत्यर्थः ॥ १९ ॥ तत्र बिले । बालस्य क्रोडनकं कृतम् । तदुक्तं हरिवंशे—"सिंह प्रसेनमवधीत्सिंहो जांबवता हतः । सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः ।" इत्येवं वदन्ती धात्री बालं क्रीडयतीति । अयमेव श्लोको धर्मशास्त्रतिथिनिर्णये भाद्रसितचतुर्थीचंद्रदर्शनदोषशांतये एकविंशत्यावृत्त्या पठनीयत्वेनोक्तः । तस्मिन्बिले । अर्भकांतिके बालसमीपे । तत्र बिले । हर्तुं छलेन ग्रहीतुम् । अवतस्थेऽवसरप्रतीक्षां चक्रे ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भगवान् सकलसद्यशोयुक्तः उपश्रुत्य लोकपरम्परया श्रीमदुद्धवादिमुखेन श्रुत्वा नागरैस्तैरेवाऽन्वव्रजत् ॥१७॥ विशेषेण साक्षात्तल्लक्षणनिर्द्धारणेनेक्षित्वा तं केसरिणं अद्रेर्ऋक्षवतः पृष्ठे उपरि जनास्त एव ददृशुरित्यपवादतो विशुद्धिस्ततोऽभूदिति भावः ॥ १८ ॥ तथाऽपि विशेषतः सत्राजितह्रेपनाद्यर्थं रत्नमादातुमृक्षपदान्यनुगच्छंस्तं बिलं प्राप्त इत्याह—ऋक्षेति । अन्धेन अन्धीकारकेण तत ऋक्षसम्बन्धित्वाच्च भयानकम् अत एव बर्हिबिलद्वारे प्रजाः नागरजनानावस्थाप्य यतो भगवान् परमदयादिगुणसागर इत्यर्थः ॥ १९ ॥ तत्र बिलं तं मणिश्रेष्ठं बालक्रीडनकं यथा स्यात्तथा कृतं दृष्ट्वा हर्त्तुं छलेन गृहीतुं तस्मिन्नेवार्भकान्तिके स्थानविशेषेऽवतस्थे अन्वेषणाद्विरम्याऽवसरप्रतीक्षां चक्र इत्यर्थः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवान् सर्व्वसद्यशोयुक्तः, उप श्रीमदुद्धवादिमुखेन समीपे श्रुत्वा नागरैरन्वपद्यत अन्वव्रजत् ॥ १७ ॥ विशेषेण साक्षात्तल्लक्षणादिनिर्द्धारेणेक्षित्वा तं केशरिणमद्रेः ऋक्षवतः पृष्ठे उपरि; जना ददृशुरिति जनापवादतो विशुद्धिस्ततोऽभूदिति भावः ॥ १८ ॥ तथापि रत्नार्थमृक्षपदान्यनुगच्छंस्तद्बिलं प्राप्त इत्याह—ऋक्षेति । अन्धेन दृष्टिलोपकेन निविडेन व्याप्तम्, अतो भीमम्, अतएव बर्हिविलद्वारे प्रजा नागरजनानवस्थाप्य, यतो भगवान् परमदयालुरित्यर्थः ॥ १९ ॥ तत्र बिले दृष्ट्वा, हर्तुं बलादाच्छेत्तुम्, तस्मिन् विल एवावतस्थे । अन्वयभेदादपौनरुक्त्यम् । यद्वा, तस्मिन् विचित्रक्रीड़नकादिनानिर्वचनीयेऽर्भकान्तिके ॥२०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

क्रमेण भगवानपि तद्वच आकर्ण्य आत्मनि स्वस्मिन् दुर्यशो लिप्तं भावे क्तः दुर्यशोलेपं प्रमार्ष्टुम् अपोहितु नागरैर्जनैः सह प्रसेनपदवीम् अन्वपद्यत अन्वगच्छत् ॥१७॥ हतमिति केसरिणं चाद्रिपृष्ठे ऋक्षेन जाम्बवता निहतं ददृशुः ॥१८॥ ऋक्षराजबिलमिति, ततस्तत्र बिलद्वारे प्रजाःनागरान् जनानवस्थाप्य भगवानेकोऽसहाय एव तद्बिलम्प्रति विवेश ॥ १९ ॥ तत्रेति, तत्र बिले क्रीडनकं क्रीडासाधनं यथा तथा कृतं मणिश्रेष्ठं दृष्ट्वा हर्त्तुं कृता निश्चिता मतिर्येन स तस्मिन् अर्भकसमीपे उपतस्थे ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ऋक्षेण जाम्बवता ॥ १८–२३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

बालस्य क्रीडनः यतः तथाभूतं ज्ञात्वा ॥ २० ॥

गूढार्थदीपिनी

दुर्यशो मार्ष्टुं शाधयितुम् । लिप्तं लग्नम् ॥ १७ ॥ तं केसरिणम् ॥ १८ ॥ अन्धेन गाढेन ॥ १९ ॥ तत्र बिले । अवतस्थेऽवसरप्रतीक्षां चक्रे ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

पूर्वं भगवान् विदितवृत्तान्तोऽपि लोकन्यायेनैव व्यवहरन् स्वयमपि श्रुत्वा आप्तमुखात् तत्प्रतीकारार्थं यत्नं कृतवानित्याह भगवानिति । तद्वृत्तान्तं श्रुत्वा आप्तमुखात् अकस्माद्वा उपश्रुत्य । उपश्रुतिः सर्वानेव ज्ञापयति । ततस्तत्प्रतीकारार्थं प्रवृत्त इति वक्तुं निराकरणीयत्वे हेतुमाह **दुर्यशो लिप्त**मिति । दुर्यशस आलिप्तमालेपनं लेपवदुपर्यपि प्रतिभासनम् । **आत्मन** इति । यदि भगवान् न दूरीकुर्यात्, सर्वेषामात्मा स्वयमिति तद्दोषे कस्यापि मुक्तिर्न भवेत् । अतो युक्तमेव तन्निराकरणम् । तल्लोकन्यायेनैव कर्तव्यमिति प्रसेनपदवीं नागरैः पदमार्गाभिज्ञैः तद्गतमार्गमन्वपद्यत । तेनैव मार्गेण स्वयं नागरैः सह गतः । अन्यथा लोकः कृत्रिमं जानीयात् ॥ १७ ॥ ततस्तं दृष्टवानित्याह **हतं प्रसेन**मिति । केसरिनखानां चिह्नदर्शनात् केसरिणैव हतं ज्ञातवन्तः । ततो मणिरप्यस्मै देय इति, यादवः स्वगोत्रजो मारित इति, पदाभिज्ञैरेव केसरिमार्गमन्वगमत् । तं चापि अद्रिपृष्ठे पर्वतोपरि निहतं ददृशुः सर्व एव जनाः । तत्रापि ऋक्षेण ऋक्षपदचिह्नैस्तज्ज्ञानम् ॥ १८ ॥ ऋक्षान्वेषणार्थं भगवान् प्रवृत्त इत्याह ऋक्षराजबिलमिति । यद्यपि भगवान् भक्तार्थमेव तत्र प्रविष्टः, तथापि लोके मण्यर्थं कष्टमपि कृतवानिति ज्ञापयितुं तस्मिन्बिले प्रविष्टः । ननु ऋक्षः प्राकृतः पशुः, भगवांस्तत्र किमर्थं गत इत्याशङ्क्याह **राजे**ति । ऋक्षाणां राजा महानेव भवति । तत्रान्यस्य प्रवेशाभावाय विशिनष्टि **भीममन्धेन तमसावृत**मिति । अन्तःकरणस्य इन्द्रियाणां च प्रवृत्त्यभावाय विशेषणद्वयम् । अन्धतमः कदापि सूर्यतेजोरहितम् । अनेन मणिनापि तत्र प्रकाशो न कृत इति सूचितम् । अतो भगवान् अन्यान् स्थापयित्वा दयावन्तमिवात्मानं ज्ञापयित्वा । साधारणत्वादसमर्थत्वादनियामकत्वाच्च ताभिर्भगवन्निवारणं न कृतमिति ज्ञापयितुं प्रजापदम् । साधारणास्तु ततो निवृत्ता इति ज्ञापयितुं प्रजानामेवावस्थापनमाह । प्रायश्चित्तमेकेनैव कर्तव्यमिति मर्यादां पालयन्निव भगवानेक एव प्रविष्टः । यादवा अपि भगवदिच्छया अकीर्त्यापि शङ्किता न सङ्गे गताः ॥ १९ ॥ तत्र प्रविष्टस्य मणिदर्शनमाह **तत्र दृष्ट्वे**ति । यद्यपि तत्र नागलोकमणयः अन्येऽपि दिव्याः सन्ति, ततः स्यमन्तकपरिज्ञानं कठिनम्, तथापि स्वत एवोत्तममिति लौकिकेनापि प्रकारेण ज्ञातुं शक्यमिति ज्ञापयितुं **मणिश्रेष्ठ**मित्युक्तम् । तथापि मणिः गुप्त एव स्थाने स्थाप्यत इति भगवान् लौकिकप्रकारेण कथं दृष्टवान्, तत्राह **बालक्रीडनक**मिति । बालस्य क्रीडार्थमुपरि निबद्धमित्यर्थः । पुराणान्तरे तु स्यमन्तकमणिज्ञापकं वाक्यमपि श्रुतवानित्युक्तम् । तत्र धात्री बालं लालयन्ती आह । 'सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः । सुकुमारक मा रोदीस्तव ह्येष स्यमन्तक' इति । अतो लौकिकेनापि प्रकारेण ज्ञात्वा अपकीर्तिनिराकरणार्थमिदं हर्तव्यमिति स्वाभाविकं चैतस्य न भवतीति, उपयोगश्च तथा नास्तीति, बालप्रबोधो वर्णमात्रेणापि भवतीति, पूजाभावात् धनप्रसवो नास्तीति, सुवर्णेनाप्युपयोगाभाव इति, अक्लिष्टकर्मापि पामरा न प्रष्टव्या इति स्वयमेव हर्तुं कृतमतिर्जातः । ततो मत्यैव सर्वा सामग्री अक्लिष्टत्वाय सम्पादितेत्याह । आदौ भगवान् अर्भकान्तिके तूष्णीं कियत्कालमवतस्थे, न तु गृहीत्वा ततो निर्गतः । चौर्यादिना जीवन् अपथप्रवृत्तः महानपि भक्तोऽपि विषयासङ्गात् प्राकृतो जातः । अतस्तत्सम्बन्धात् तदीया अपि प्राकृता एव जाताः ॥ २० ॥

श्रीसुबोधिनी–सारः

आत्मनि स्वस्मिन् लिप्तं तद्दुर्यशो मिथ्याकलंकं श्रुत्वा मार्ष्टुं शुद्ध्यर्थं प्रसेनस्य पदवीं मार्गं नागरैर्नगरीस्थजनैः सह भगवानन्वगमत् ॥ १७ ॥ वने केसरिणा लेयेन हतं प्रसेनमश्वं च वीक्ष्य दृष्ट्वा ऋक्षेण भल्लूकेनाद्रेः पृष्ठे निहतं तं सिंहं जना ददृशुः ॥ १८ ॥ अंधेन तमसा गाढेनांधकारेणावृतं व्याप्तम् ऋक्षराजस्य जांबवतो बिलं भीमं शतयोजनविस्तृतत्वात् प्रजा बहिरवस्थाप्य एको भगवान् विवेश । एतेन "सुखे सर्वे न वै कस्यापदि के स्वार्थतत्पराः" इति लोके व्यवहारः सूचितः ॥ १९ ॥ तत्र बिले बालस्य क्रीडनकं कृतं मणिश्रेष्ठं स्यमंतकं दृष्ट्वा हर्तुं कृतबुद्धिः तस्मिन् मणौ अर्भकस्य बालकस्यांतिके समीपेऽवतस्थे ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

क्रमेण भगवानपि तद्वच उपश्रुत्य आत्मनि स्वस्मिन् लिप्तं दुर्यशो मार्ष्टुं अपोहितुं नागरैर्जनैः सह प्रसेनस्य पदवीमन्वपद्यत अन्वेषणार्थमन्वगमत् ॥ १७ ॥ हतमिति स्पष्टम् । तं केसरिणं चाद्रिपृष्ठे ऋक्षेण जाम्बवता निहतं जना ददृशुः ॥ १८ ॥ ततो बहिर्बिलद्वारे प्रजाः नागरान् जनानवस्थाप्य भगवानेक एव ऋक्षराजबिलं विवेश । अन्यप्रवेशाशक्यत्वं तत्र हेतुं द्योतयन्नाह—भीममिति । तत्र हेतुमाह—अन्धेन गाढेन तमसा वृतमिति ॥ १९ ॥ तत्र बिले बालस्य क्रीडनकं क्रीडासाधनं कृतं मणिश्रेष्ठं दृष्ट्वा हर्तुं कृता निश्चिता मतिर्येन स भगवान् तस्मिन् बिले अर्भकस्यान्तिके समीपेऽवतस्थे ॥ २० ॥

अन्वितार्थप्रकाशिका

भगवानिति ॥ **क्रमेण** भगवानपि तद्वच उपश्रुत्य आत्मनि स्वस्मिन् लिप्तं दुर्यशो मार्ष्टुम् अपोहितुं नागरैर्नगरभवैर्जनैः सह प्रसेनस्य पदवीमन्वपद्यत अन्वेषणार्थमन्वगमत् ॥ १७ ॥ हतमिति ॥ **वने केसरिणा** हतं प्रसेनमश्वं च दृष्ट्वा तं केसरिणं

चाद्रिपृष्ठे ऋक्षवन्नाम्नोऽद्रेरुपरि ऋक्षेण जाम्बवता निहतं जना ददृशुः। जनास्तत्रेत्यपवादशुद्धिः ॥ १८ ॥ ऋक्षेति ॥ ततो बहिर्बिलद्वारे प्रजाः नागरान् जनानवस्थाप्य भगवानेक एव अन्धेन गाढेन तमसा वृतमतो भीमम् ऋक्षराजबिलं विवेश ॥ १९ ॥ तत्रेति ॥ तत्र बिले बालस्य क्रीडनकं क्रीडासाधनं कृतं मणिश्रेष्ठं दृष्ट्वा हर्तुं कृता निश्चिता मतिर्येन स भगवान् तस्मिन् बिले अर्भकस्यान्तिके समीपेऽवतस्थे ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

लिप्तं प्राप्तं प्रसेनस्य सत्राजिद्भ्रातुः पदवीं मार्गं ॥ १७–२२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवानिति ॥ भगवान् श्रीकृष्णः, तद्वचः उपश्रुत्याकर्ण्य, आत्मनि स्वस्मिन्, लिप्तं, भावे क्तः। दुर्यशः, मार्ष्टुमपोहितुं, नागरैः नगरस्थजनैः सह, प्रसेनपदवीं, अन्वपद्यत अन्वगच्छत् ॥ १७ ॥ हतमिति ॥ वने केसरिणा सिंहेन, हतं प्रसेनं, अश्वं च वीक्ष्य, तं प्रसेनाश्वयोर्हन्तारं केसरिणं च, अद्रिपृष्ठे अद्रेः पृष्ठप्रदेशे, ऋक्षेण जाम्बवता, निहत प्रजाः, ददृशुः ॥ १८ ॥ ऋक्षेति ॥ भगवान् श्रीकृष्णः, प्रजाः, बहिः अवस्थाप्य, भीममतिभयंकरं, अन्धेन तमसा, गाढध्वान्तेनेत्यर्थः। आवृतं ऋक्षराजबिलं, एकः स्वयमेकाक्येव, विवेश ॥ १९ ॥ तत्रेति ॥ तत्र बिले बालक्रीडनकं कृतं, मणिश्रेष्ठं, दृष्ट्वा, हर्त्तुं, मण्याहरणं कर्त्तुं कृतमतिः भगवान्, तस्मिन् बिले अर्भकान्तिके, अवतस्थे ॥ २० ॥

कृष्णप्रिया

यह काना-फूंसी भगवान् श्रीकृष्ण ने सुना कि यह प्रसेन वध का कलङ्क टीका मेरे ही सर पर लगाया है, तब इस अपवाद के संशोधन के ही निमित्त नगर के सभ्यजनों को साथ में लेकर प्रसेन की पद्वी को ढूंढने के लिये वन में पधारे ॥१७॥ वन में खोजते-खोजते सर्व सभ्यजनों ने अपने नेत्रों से देखा कि इस घोर जंगल में किसी केसरी ने प्रसेन यादव का और अश्व का वध कर दिया है। अब वे सब सभ्य जन सिंह की पद्वी को देखते हुए वन में आगे बढ़े तब इन सब सभ्यजनों ने देखा की पर्वत पर किसी एक रींछ ने सिंह का शिकार कर दिया है ॥ १८ ॥ भगवान श्रीकृष्ण सभ्यों के साथ ऋक्षराज की तलास में चले। वहाँ अन्धकार से परिपूर्ण ऋक्षराज जाम्बवानजी की भयङ्कर गुफा देखी। प्रभु ने सब सभ्यों को बाहर ठहराये और इस भयानक बिल में भगवान अकेले ही गये ॥ १९ ॥ जाम्बवानजी की गुफा में भगवान पहुँचे तब वहाँ देखा कि यह स्यमन्तक मणि तो बच्चों का खिलौना बन गयी थी। बच्चों के खिलौना स्वरूप मणि को लेने भगवान मणि के समीप पहुँचे ॥ २० ॥

तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत्। तच्छ्रुत्वाभ्यद्रवत् क्रुद्धो जाम्बवान् बलिनां वरः ॥ २१ ॥
स वै भगवता तेन युयुधे स्वामिनाऽऽत्मनः। पुरुषं प्राकृतं मत्वा कुपितो नानुभाववित् ॥ २२ ॥
द्वन्द्वयुद्धं सुतुमुलमुभयोर्विजिगीषतोः। आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव ॥ २३ ॥
आसीत्तदष्टाविंशाहमितरेतरमुष्टिभिः। वज्रनिष्पेषपरुषैरविश्रममहर्निशम् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—तम्, अपूर्वम्, नरम्, दृष्ट्वा, भीतवत्, धात्री, चुक्रोश, तत्, श्रुत्वा, बलिनाम्, वरः, क्रुद्धः, जाम्बवान्, अभ्यद्रवत् ॥ २१ ॥ कुपितः, न, अनुभाववित्, कुपितः, सः, "सत्राजित्", प्राकृतं, पुरुषम्, मत्वा, सः, आत्मनः, स्वामिना, भगवता, सह, युयुधे ॥ २२ ॥ क्रव्यार्थे, विजिगीषतोः, श्येनयोः, इव, आयुधाश्मद्रुमैः, दोर्भिः, विजिगीषतोः, उभयोः, वज्रनिष्पेषपरुषैः, इतरेतर, मुष्टिभिः, अष्टाविंशाहम्, अविश्रमम्, अहर्निशम्, सुतुमुलम्, द्वन्द्वयुद्धम्, आसीत् ॥ २३–२४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

क्रव्यार्थे आमिषार्थं ॥ २३ ॥ अष्टाविंशाहम् अष्ट च विंशतिश्चाहानि दिनानि यस्मिंस्तदष्टाविंशाहम्। विंशतिशब्दे तिलोप आर्षः। वज्रस्य निष्पेषो निर्घातस्तद्वत्परुषैर्निष्ठुरैः ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं श्रीकृष्णम्। अपूर्वमदृष्टपूर्वम्। यद्वा—ओऽकारः पूर्वो यस्य नाम्नस्तमच्युतमनंतं वेत्यर्थः। धात्र्युपमाता माता वा "धात्री जनन्यामलकी वसुमत्युपमातृषु" इति मेदिनी। तद् धात्र्याक्रोशवचः। बलिनां वरो रामरावणयुद्धेऽपि युद्धे तृप्तत्वात्। नरं तत्राप्यपूर्वं वीर्यशोभादिभिरद्भुतम्। वतिप्रयोग आगंतुकतया शंकास्पदत्वेऽपि सौम्यदर्शनत्वेनातिभयानुत्थानात्। अभ्यद्रवद्वेगेनागतः। वस्तुतस्तु न भीता तद्दर्शनस्वाभावेनैवानंदोदयादिति विश्वनाथः ॥ २१ ॥ स जांबवान्। तेन श्रीकृष्णेन। स्वामिनेति

पूर्वावताराभिप्रायेण। प्राकृतं मत्वा कुपित इति। केशिचाणूरकंसजरासंधादिभिरल्पबलैर्भगवतो युद्धसुखं क्वापि नाभूदतः समवलेन स्वभृत्येन तेन सह युयुत्सोर्भगवतो युद्धसुखसिद्ध्यर्थमेव तद्भक्ताय जांबवते पूर्वं रावणसेनाभिरपि सम्यग्वीररससुखमप्राप्तवते तत्सुखपूर्तिदानार्थं लीलाशक्त्या योगमायाद्वारा भक्तमपि जांबवन्तं प्रति तन्माधुर्यावरणं ज्ञेयम् ॥ २२ ॥ 'क्रव्यं मांसपिशाचयोः' इति कोशात्। द्वंद्वेति युग्मकम्। तद्द्वंद्वयुद्धमष्टाविंशाहमासीदित्यन्वयः। सुतुमुलमत्यंतसंकुलं, हननविरामरहितमित्यर्थः। यतो विशेषतो जिगीषतोः। अत्र भगवतो लीलाकौतुकाज्जिगीषा, जांबवतश्च महाबलिष्ठत्वाभिमानादिति ज्ञेयम्। दोर्भिरिति प्रत्येकभुजद्वयात् ॥ २३ ॥ तत् द्वंद्वयुद्धम्। अविश्रमं निरंतरम्। इतरेतरमुष्टिभिश्चेति च शब्द अध्याहार्यः। बहुदिनयुद्धेनायुधानां क्षयाज्जयाऽसिद्ध्या तेष्वनादराद्वा ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नरं तत्राप्यपूर्वं वीर्य्यसौन्दर्य्या (शोभा) दिभिरद्भुतं रतिप्रयोग आगन्तुकतया शङ्कास्पदत्वेऽपि सौम्यदर्शनत्वे ज्ञातिभयानुत्थानात् आभिमुख्येनाद्रवत् वेगेनागतः ॥ २१ ॥ तेनांशतः श्रीरामादिरूपेण पुरुषं नराकारब्रह्मरूपं तं प्राकृतं मायिकं मत्वा यतो नानुभाववित् तत्प्रभावानुसन्धानरहितः कुतः कुपितः क्रोधेन विचारलोपात् ॥ २२ ॥ द्वन्द्वेति युग्मकम् तद्द्वन्द्वयुद्धमष्टाविंशाहमासीदित्यन्वयः सुतुमुलमत्यन्तसङ्कुलं हननविरामरहितमित्यर्थः। यतो विशेषेण जिगीषतोः तत्र श्रीभगवतो लीलाकौतुकाज्जिगीषा जाम्बवतश्च महावलिष्ठताभिमानादिति ज्ञेयं दोर्भिरिति प्रत्येकभुजद्वयात् इतरेतरमुष्टिभिश्चेति च शब्द आहार्य्यः बहुदिनयुद्धेनायुधादीनां क्षयात् जयाऽसिद्ध्या तेष्वनादराद्वा अहर्निशं तत्राप्यविश्रमम् अविरतम् ॥ २३–२४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अपूर्वमदृष्टपूर्वमद्भुतं वा, सर्वथा सर्वतो वैलक्षण्यात्। भीतवदिति जाम्बवत्प्रभावेण वस्तुतो भयाभावात्, यद्वा, लौकिकोक्तिरीत्यानधिकार्थता, भीता सती, क्रुद्धः सन् अभिमुखेऽद्रवत्, वेगेनागतः, यतो बलिनां मध्ये वरः ॥ २१ ॥ तेन श्रीकृष्णेन, अनेनेति पाठेऽपि स एवार्थः। वै अपि, भगवता सर्व्वैश्वर्य्ययुक्तेनापि आत्मनः स्वामिनापि, स्वभावतो वैष्णवत्वाद्विशेषतश्च श्रीरघुनाथावतारे बहुसेवनात् प्राकृतं लौकिकं मत्वा, यतः कुपितः, यतो नानुभाववित् तत्प्रभावानभिज्ञः, यद्वा, यतस्तत्प्रभावानुसन्धानरहितः ; कुतः ? कुपितः क्रोधेन विचारलोपात् ॥ २२ ॥ सुतुमुलमत्यन्तसंकुलम्, यतो विशेषेण जिगीषतोः, तत्र श्रीभगवतो लीलाकौतुकात्, जिगीषा जाम्बवतश्च महाबलिष्ठाभिमानादिति ज्ञेयम्। दोर्भिरित्युभयोः प्रत्येकं भुजद्वयात्, आयुधादीनां पूर्व पूर्वस्य क्षयेणोत्तरोत्तरत्र प्रवृत्त्या तत्तत्क्रमेण निर्देशः, तत् द्वन्द्वयुद्धम्, मुष्टिभिरिति बहुदिनयुद्धेनायुधादीनां क्षयात् जयासिद्ध्या तेष्वनादराद्वा, किंवा युद्धावेशेनान्योन्यमतिसंलग्नत्वात्। अहर्निशं तत्राप्यविश्रममविरतं तेन भोजनपानादि-राहित्यं सूचितम् ॥ २३–२४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तमिति तमुपस्थितमदृष्टपूर्वं नरं दृष्ट्वा भीतवद्धात्री उपमाता चुक्रोश तच्छ्रुत्वेति तदाक्रोशनम् अभ्यद्रवत् अभ्यधावत् ॥ २१ ॥ स वै जाम्बवान् नानुभाववित् भगवत्प्रभावमजानन् अत एव तं केवलं प्राकृतं लौकिकं पुरुषमेव मत्वा आत्मनः स्वस्य स्वामिनापि तेन भगवता सह युयुधे अयुध्यत ॥ २२ ॥ द्वन्द्वयुद्धमिति। विजिगीषतोर्जेतुमिच्छतोर्दोर्भिर्भुजैर्यथाक्रव्यार्थे आमिषार्थं श्येनयोर्युद्धं भवति तद्वत् ॥ २३ ॥ आसीदिति इतरेतरयोरन्योन्ययोर्मुष्टिभिर्वज्रनिष्पेषा वज्रनिर्घातस्तद्वत्निष्ठुरैस्तद्द्वन्द्वयुद्धम्, न विद्यते बिभ्रमो यस्मिन् तद्यथा तथा अहर्निशमष्टाविंशतिदिनान्यासीत् ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अविश्रमं निरन्तरम् ॥ २४–२५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

तमपूर्वं नरं दृष्ट्वेत्यादि। अपूर्वं नरं नराकारत्वेऽपि अनरमित्यर्थः ॥ २१–३५ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

तमपूर्वं नरं दृष्ट्वेत्यादि। अपूर्वनरं नराकारत्वेऽप्यनरमित्यर्थः ॥ २१–३५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तमपूर्वं नरं नरमीश्वरमिति यावत् ॥ २१–३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भीतवच्चुक्रोशेति हरेर्जिहीर्षामिवालक्ष्येत्यर्थः। वस्तुतस्तु न भीता तद्दर्शनस्वभावेनैवानन्दोदयात् ॥ २१ ॥ प्राकृतं मत्वा कुपित इति। केशिचाणूरकंसजरासन्धादिभिरल्पबलैर्भगवतो युद्धसुखं क्वापि नाभूदतः समबलेन स्वभृत्येन तेन सह युयुत्सोर्भगवतो युद्धसुखसिद्ध्यर्थमेव तद्भक्ताय जाम्बवतेऽपि पूर्वं रावणसेनाभिरपि सम्यग्वीररससुखमप्राप्तवते तत्सुखपूर्त्तिदानार्थं लीलाशक्त्या योगमायाद्वारा भक्तमपि जाम्बवन्तं प्रति तन्माधुर्यावरणं ज्ञेयम् ॥ २२ ॥ क्रव्यार्थे आमिषार्थे ॥ २३ ॥ अष्टविंशाहमित्यार्षम् अष्टविंशतिदिनानि व्याप्य रात्रिष्वपि युद्धप्राप्त्यर्थमाह–अहर्निशमिति। तत्रापि क्षणमात्रस्यापि विश्रामस्याभावार्थमाह— अविश्रममिति। निष्पेषो निर्घातः ॥ २४ ॥

गूढार्थदीपिनी

धात्री उपमाता ॥ २१–२२ ॥ द्वन्द्वेति युग्मम्। क्रव्यार्थे मांसार्थे। श्येनो बाजाख्यः पक्षी। अविश्रमं निरन्तरम्। वज्रनिष्पेषो वज्रपातस्तद्वत् कठोरैः ॥ २३–२४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

क्रव्यार्थे आमिषार्थे श्येनयोर्यथा भवति तथा तयोः ॥ २३ ॥ अष्टविंशाहं अष्ट च विंशतिश्च अहानि दिनानि यस्मिंस्तत् विंशतिशब्दे तिलोप आर्षः न विद्यते विश्रमो यस्मिन् तत् वज्रस्य निष्पेषो निर्घातस्तद्वत् परुषैर्निष्ठुरै ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतो भगवन्तं दृष्ट्वा सद्बुद्ध्यभावात् विषयाभिनिवेशाच्च विचारमकृत्वापि आक्रोशं कृतवतीत्याह **तमपूर्व**मिति। देवादीनामन्यतरश्चेद्वाक्स्तम्भनादिकमपि कुर्यादिति। तदभावात् भगवतो विलष्टकर्मत्वं ज्ञात्वा नरोऽयमिति ज्ञातवती। आकृतिवचनो वा नरशब्दः। स्वस्थस्याप्याक्रोशो भवतीति तद्व्यावृत्त्यर्थं पुत्रं वा मारयिष्यतीति बुद्ध्या जाम्बवानपि महानिति तथा भयाभावात् भीतवत् चुक्रोश। यतो धात्री बालकरक्षापरा। ततोऽन्तःकार्यान्तरव्यापृतोऽपि तद्वाक्यं श्रुत्वा समागत इत्याह **तच्छ्रुत्वे**ति। मदायतनेऽपि मण्यर्थं कः समागत इति क्रोधः। **जाम्बवा**निति नाम्ना प्रसिद्धो रामायणे बुद्धिविशेषे, तादृशोऽप्यविचार्य समागतः। तत्र हेतुर्बलाभिमान इति अभिप्रायेणाह **बलिनां वर** इति। बलिभिरपि वरणीय इत्यर्थः ॥ २१ ॥ एतादृशोऽपि कालादिवशादज्ञो भूत्वा भगवता सह युद्धं कृतवानित्याह **स वा** इति। स्वयमपि प्रसिद्धः, तथा कुर्वन् लोके अपकीर्तिमपि प्राप्स्यतीति सूचितम्। तत्रापि वै निश्चयेन। शारीरेण जीवस्याराध्यो भगवान्। तत्राप्यात्मनः स्वामिना स्वस्यैवोपास्यरूपेण। तत्कथमित्याकाङ्क्षायामाह **तेने**ति। रघुनाथेन। कृष्ण एव रघुनाथः, तामेव सर्वां सामग्रीं गृहीत्वा समागत इति। स एव लक्ष्मणो बलः। सैव सीता रुक्मिणी। ते वानरा यादवाः, सैवायोध्या द्वारका, सैव सरयूर्गोमतीति। तर्हि कथं युयुधे तत्राह **पुरुष**मिति। प्राकृतं पुरुषं मत्वा प्रकृत्यधिष्ठातारम्, न तु पुरुषोत्तमम्। ननु महतः कथमेतादृशमज्ञानमिति चेत्, तत्राह **कुपितो नानुभाववि**दिति। दृष्ट्वा क्रोधवशात् अलौकिकत्वं न ज्ञातवान्। पूर्वं तु कृतो गोवर्धनादेरनुभावो न श्रुतः। सत्सङ्गाभावात् बिलेशयत्वाच्च। अतोऽनुभावानभिज्ञत्वात् कोपावेशाच्च स्वामित्वेनाज्ञात्वा युयुधे। अक्लिष्टकर्मा च भगवान्। अनुक्त्वैव स्वयं युद्धं कृतवान्। भगवत उत्तरार्धलीलायां प्रकृतिः कालादयश्चासहमाना जाताः। तेषां पीडार्थं, पुरुषं परित्यज्य सप्तविंशति तत्त्वानि, यथा काठिन्यं जहति, तथा मुष्टिप्रहारैः सेवककृतैः चलने पादाविव कोमलानि कृतानीत्येके। चिरकालं मल्लयुद्धाकाङ्क्षया तथा कृतमित्यन्ये। रामावतारे हि तस्मै वरो दत्तो रामेण 'त्वदाराधनां ग्रहीष्यामो'ति। पुनस्तेन विज्ञापनायां कृतायां बलं मदीयं व्यर्थं जायत इति। ततो भगवान् बुद्धिमिदानीं प्रकटीकुरु, बलं पश्चात्प्रकटीकरिष्यसीत्याह। नहि कश्चिज्जीवस्त्वत्पराक्रमं सोढुं शक्त इति। अतस्तत्र स्थापितां ज्ञानशक्तिं पूर्वावतारे गृहीत्वा इदानीं बलशक्तिमपि गृह्णन् पूजां गृहीत्वा तं मुक्तं करिष्यतीति तथा भगवदुद्योगः ॥ २२ ॥ ग्रहादिवशाज्जयो न जायत इति कदाचित्तस्य शङ्का स्यात्, अतस्तन्निराकरणार्थं सर्वेष्वेव नक्षत्रेषु युद्धं निरन्तरं कृतवानित्याह **द्वन्द्वयुद्ध**मिति। उभयोरेव युद्धं द्वन्द्वयुद्धं सम्यक् प्रकारेण, न तु नटवदभिनयमात्रेण। तुमुलमाधिकम्। प्रहारे सर्वबलविनियोगस्तुमुलता। **उभयोर्विजिगीषतो**रिति तथा करणे हेतुः। शीघ्रमेव प्रहारेण व्यथितः। युद्धं त्यजत्विति जेतुमिच्छा अज्ञानाज्जाम्बवतः। जित एव जानातीति ज्ञापनार्थं भगवतः। तत्र युद्धसाधनान्यनेकान्याह **आयुधै**रिति। आदौ नानाविधान्यायुधानि। महाशूरत्वात् भगवतेऽपि दत्वा युद्धं करोतीत्येके। यदेवायुधं जाम्बवान् गृह्णाति, तज्जातीयमेव भगवानाविर्भावयतीत्यपरे। यदेव प्रक्षिपति, तदेव गृहीत्वा तेन प्रहरतीति वस्तुस्थितिः। अश्मानस्तु सुलभाः, द्रुमाश्च। सर्वेष्वेव भग्नेषु पश्चाद्दोर्भिः। नन्वस्य युद्धस्य का विधिरिति चेत्, तत्र दृष्टान्तमाह **क्रव्यार्थे श्येनयोरिवे**ति। क्रव्यस्थानीयः स्यमन्तको मणिः, श्येनो वै वयसां बलिष्ठो भवति। यावत्स्यमन्तकप्राप्तिः, तावद्युद्धमित्यर्थः। अत्यावश्यकमाग्रहं च जनयतीति क्रव्यतुल्यता। क्रव्यमुत्कृष्टमपक्वं मांसं सर्वथा जीवनार्थमपेक्षितम्, तथा लोकापवादनिराकरणार्थं भगवतोऽपेक्षितम्।

तस्यापि भास्वरं जयेन प्राप्तमिति मोहादपेक्षितम्। क्षुत्पीडा च श्येनजातीयस्य गोमायोश्च नास्तीति बहूनर्थान् तुल्यान् दृष्ट्वा श्येनौ दृष्टान्तीकृतौ ॥ २३ ॥ एवं युद्धस्य कालमाह **आसीत्तदष्टाविंशाह**मिति। अष्टाविंशे दिवसे ज्ञानं जातमिति तदपि दिनं फलरूपं युद्धमध्ये गृहीतम्। इतरेतरमुष्टिभिः वज्रनिष्पेषादपि परुषैस्तद्युद्धं मध्ये विश्रामरहितम्। अहर्निशमिति ऐहिकावश्यककालकृतोऽपि विश्रामो नास्तीति सूचयति। भगवांस्तावत् प्रहारं करोति, यावत्स करोति, सोऽपि बलरूपो भवतीति वज्रनिष्पेषादपि तत्प्रहारः परुषः। अतस्तुल्यत्वात् न विरमणम्, नाप्येकस्य पराजयः। भक्तत्वाद्भगवतो न मारणीयः। भगवांस्त्वशक्य एव। अत्र काचिद्विरुद्धा कथा। महामायोपस्थानस्याग्रे निरूपितत्वात् तेन विरोधादुपेक्षणीया। कल्पान्तरीयेत्यन्ये समादधुः ततः कालकृतं तस्य बलमिति सप्तविंशात्मके काले अतीते। प्राकृतबलपक्षेऽपि अष्टाविंशतिप्रकारं तद्बलमिति ॥ २४ ॥

श्रीसुबोधिनी–सारः

अपूर्वं नूतनं तं नरं दृष्ट्वा धात्री बालपोषिकोपमाता भीतेव चुक्रोशाक्रोशं कृतवती। तदा क्रोशं श्रुत्वा बलिनां वरः **श्रेष्ठः क्रुद्धो** जांबवान् अभ्यागमत् ॥ २१ ॥ आत्मनः स्वामिना तेन भगवता स जांबवान् युयोध प्राकृतं पुरुषं मत्वा कुपितो न तस्यानुभाववित् ॥ २२ ॥ विजेतुमिच्छतोरुभयोः कृष्णजांबवतोर्द्वयोः सुतुमुलं संकीर्णं द्वंद्वयुद्धम् आसीत्। क्रव्यार्थं मांसार्थे श्येनयोः पक्षिणोरिव आयुधैः शस्त्रैरश्मभिः पाषाणैः द्रुमैर्वृक्षैर्दोर्भिर्हस्तैः ॥ २३ ॥ तदवधिमाह वज्रस्य निष्पेषो निर्घातस्तद्वत् परुषैर्निष्ठुरैरितरेतरमुष्टिभिरहर्निशं रात्रिदिनम् अविश्रमं निरंतरम् अष्टाविंशाहं यावत् तत् युद्धमासीत् ॥ २४ ॥

विवरणटिप्पणी

स वै भगवतेत्यत्र। **उत्तरार्धलीलाया**मिति। लोकधर्मपुरस्कारेणात्र लीलायां क्रियमाणायां लोकधर्मानुसरणं प्रकृतिः। सप्तविंशतिनक्षत्रात्मकः कालः, आदिपदेन **कर्मस्वभावौ च**। एते असहमाना जाता इत्यर्थः। **तेषा**मिति। भगवता सेवके कृतैः सप्तविंशतितत्त्वकाठिन्यत्यागहेतुभिर्मुष्टिप्रहारैस्तत्त्वानां पीडार्थं युद्धं कृतवानिति पूर्वेण सम्बन्धः। **अतस्तत्रे**ति। तत्रावतारे जाम्बवता ज्ञापितां शक्तिं सातामित्यर्थः। जनकानां ज्ञानप्रधानत्वात्सीतायाश्च तदन्वयस्थत्वाज्ज्ञानशक्तित्वमिति भावः। **ग्रहादिवशा**दिति श्लोकद्वयस्याभास इति ज्ञेयम्। **द्वन्द्वे**त्यत्र। **जित एवे**ति। मया जितो मदीय एव मत्स्वरूपं जानातीत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अपूर्वं अदृष्टपूर्वं नरं तं कृष्णं दृष्ट्वा भीतवत् धात्रीं तन्माता चुक्रोश ॥ 'स्वस्वामिनि जाम्बवति महाबलिस्वाभिमानाद्वस्तुतस्तस्यापि भयं नास्तिः' इति सूचयितुं वतिप्रयोगः। तत्तस्या आक्रोशनं श्रुत्वा क्रुद्धो जाम्बवान् अभ्यद्रवत् अभ्याजगाम। क्रोधे आगमने च हेतुमाह—बलिनां वरः अतिबलवान् इति ॥ २१ ॥ स वै महाबलवत्तया प्रसिद्धो जाम्बवान् क्रुद्धः सन् तेन भगवता सह युयुधे। 'तेन सह युद्धं तस्यात्यन्तमनुचितम्' इत्याशयेनाह—आत्मनः स्वस्य स्वामिनेति। श्रीरामावतारे तस्य तत्सेवकत्वादित्याशयः। 'तर्हि किमिति युयुधे' तत्राह—प्राकृतं लौकिकं पुरुषं च मत्वा इति। 'तथाऽभिमानोऽपि कथम् ? गोवर्धनोद्धरणादितत्प्रभावस्य प्रसिद्धत्वात्' इत्याशङ्क्याह—नानुभावविदिति। तत्प्रभावमजानन्नित्यर्थः ॥ २२ ॥ उभयोस्तयोः सुतुमुलं असङ्कुचितं घोरं द्वन्द्वयुद्धं आसीदित्यन्वयः। 'विजिगीषतोर्जेतुमिच्छतोः' इति तुमुलत्वे हेतुरुक्तः। तत्र साधनान्याह—आयुधैर्गदादिभिः। अश्मभिः पाषाणैः। द्रुमैः। दोर्भिः भुजैः। वज्रस्य निष्पेषो निर्घातस्तद्वत्परुषैर्निष्ठुरैः इतरेतरयोर्मुष्टिभिश्चेति। तदवध्यपेक्षायां तद्दर्शयंस्तुमुलत्वं स्पष्टयति—अविश्रमं न विद्यते विश्रामो यस्मिंस्तत् अहर्निशं अष्टाविंशाहं अष्टाविंशतिदिनपर्यन्तमिति। तत्र दृष्टान्तमाह–क्रव्यार्थे इति। **मांसार्थं यथा** श्येनयोर्युद्धं भवति तथाऽनयोरपि मण्यर्थे युद्धमभूदित्यर्थः ॥२३–२४॥

अन्वितार्थप्रकाशिका

तमिति ॥ अपूर्वं अदृष्टपूर्वं नरं तं कृष्णं दृष्ट्वा भीतवत् धात्री तन्माता हरेर्मणिजिहीर्षामालक्ष्य चुक्रोश। तत्तस्या आक्रोशवचनं श्रुत्वा क्रुद्धो बलिनां वरः जाम्बवान् अभ्यद्रवत् अभ्याजगाम ॥ २१ ॥ स इति ॥ स वै प्रसिद्धो जाम्बवान् कुपितः सन् नानुभाववित् तत्प्रभावमजानन् प्राकृतं लौकिकं पुरुषं मत्वा आत्मनः स्वामिना तेन भगवता सह युयुधे। जरासन्धादिभिरल्पबलैर्युद्धं सुखं क्वापि नाभूदतः समबलेन स्वभृत्येन युयुत्सोर्भगवतो लीलयैवेदं युद्धम् ॥ २२ ॥ द्वन्द्वेति युग्मम् ॥ विजिगीषतोः विजेतुमिच्छतोः। आर्षः शता। उभयोस्तयोः आयुधैर्गदादिभिः अश्मभिः पाषाणैः द्रुमैः दोर्भिर्भुजैः वज्रस्य निष्पेषो निर्घातस्तद्वत्परुषैर्निष्ठुरैः इतरेतरयोर्मुष्टिभिश्चेति अविश्रमं न विद्यते विश्रामो यस्मिंस्तत् अहर्निशम् अष्टाविंशाहम् अष्टाविंशतिदिनपर्यन्तम्। तिशब्दलोप आर्षः। **सुतुमुलम्** असङ्कुचितं घोरं **द्वन्द्वयुद्धम्** आसीत्। **क्रव्यार्थे** मांसार्थं यथा श्येनयोर्युद्धं भवति तथाऽनयोरपि मण्यर्थे **युद्धमभूत्** ॥ २३–२४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्रव्यार्थे मांसार्थे ॥ २३ ॥ वज्रस्य निष्पेषः पातस्तद्वत् पुरुषैः कठोरैः अष्टौ च विंशतिश्चाहानि दिवसा यस्मिंस्तत् ॥ अष्टविंशत्यहं अत्र तिलोप आर्षः तत् युद्धं आसीत् ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति । धात्री कुमारस्योपमाता, तं तत्रावस्थितं, अपूर्वमदृष्टपूर्वं, नरं दृष्ट्वा, भीतवत्, चुक्रोश । तत्तद्धात्र्याः आक्रोशनं श्रुत्वा, क्रुद्धः, बलिनां वरः, जाम्बवान्, अभ्यद्रवदभ्यधावत् ॥ २१ ॥ स वा इति । स जाम्बवान्, यतोऽस्य नानुभाववित् प्रभावमजानन्, अत एव, कुपितः, प्राकृतं पुरुषं मत्वा, आत्मनः स्वस्य, स्वामिना तेन, भगवता, युयुधे वै ॥ २२ ॥ द्वन्द्वयुद्धमिति । विजिगीषतोर्जेतुमिच्छतोः, उभयोः, द्वन्द्वयुद्धं, क्रव्यार्थे आमिषार्थं, श्येनयोः पक्षिविशेषयोः इव, आयुधाश्मद्रुमैः दोर्भिर्भुजैश्च, सुतुमुलं, अभूत् ॥ २३ ॥ आसीदिति । वज्रनिष्पेषो वज्रनिर्घातस्तद्वत् परुषैर्निष्ठुरैः, इतरेतरयोरन्योन्ययोर्मुष्टिभिः, तत् द्वन्द्वयुद्धं, न विद्यते विश्रमो विश्रामो यस्मिंस्तद्यथा तथा, अहर्निशं रात्रिदिवं, अष्टाविंशाहमष्टाविंशतिदिनानि, अत्यन्तसंयोगे द्वितीया । आसीत् ॥ २४ ॥

कृष्णप्रिया

अपरिचित एवं अपूर्व पुरुष को देख गुफा में रहने वाली और बच्चों को संभालने वाली आया भय-चकित होकर चौंक उठी । उसका चित्कार सुनकर बलिष्ठ ऋक्षराजजाम्बवान अत्यन्त क्रुद्ध बनकर जहाँ श्रीकृष्ण थे वहाँ आ गये ॥ २१ ॥ राजन् ! क्रोध से जाम्बवान की विवेक मति नष्ट हो गयी । भगवान की महिमा का परिचय न था । भगवान अपने स्वामी है, यदि यह ज्ञान होता तब तो दण्डवत् करता लेकिन सामान्य मनुष्य मानकर भगवान से युद्ध करने लगा ॥ २२ ॥ राजन् ! किसी मांस के छोटे टुकड़े के लिये दो बाज पक्षी परस्पर संग्राम खेले उसी तरह परस्पर जीतने की कामना से जाम्बवान् और भगवान् श्रीकृष्ण युद्ध करने लगे । प्रथम शस्त्रास्त्रों से युद्ध किया पुनः जमीन से वृक्षों को उखाड़कर फेंकने लगे और अन्त में द्वन्द्व युद्ध करने लगे ॥ २३ ॥ परीक्षित्--महाराज ! क्या कहें ! वज्र प्रहार से भी अतिशय कठोर घूसों से भगवान् और जाम्बवान अट्ठाईस दिन पर्यन्त बिना विश्राम के अहोरात्र युद्ध करते रहे ॥

कृष्णमुष्टिविनिष्पातनिष्पिष्टाङ्गोरुबन्धनः । क्षीणसत्त्वः स्विन्नगात्रस्तमाहातीव विस्मितः ॥ २५ ॥
जाने त्वां सर्वभूतानां प्राण ओजः सहो बलम् । विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरम् ॥ २६ ॥
त्वं हि विश्वसृजां स्रष्टा [1]सृज्यानामपि यच्च सत् । कालः कलयतामीशः पर आत्मा तथाऽऽत्मनाम् ॥ २७ ॥
यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत् क्षुभितनक्रतिमिङ्गिलोऽब्धिः ।
सेतु कृतः स्वयश [2]उज्ज्वलिता च लङ्का रक्षःशिरांसि भुवि पेतुरिषुक्षतानि ॥ २८ ॥

कर्दमक्षमा

अन्वयः—कृष्ण, मुष्टि, विनिष्पात, निष्पिष्टाङ्गोरु, बन्धनः, क्षीणसत्वः, स्विन्नगात्रः, अतीव, विस्मितः, तम्, आह॥२५॥ अहम्, त्वाम्, सर्वभूतानाम्, प्राणः, ओजः, सहः, बलम्, अधीश्वरम्, प्रभविष्णुम्, पुराणपुरुषम्, विष्णुम्, जाने ॥ २६ ॥ त्वम्, हि, विश्वसृजाम्, स्रष्टा, च, सृज्यानाम्, अपि, यत्, च सत्, कल्प्यताम्, ईशः, कालः, तथा, आत्मनाम्, परमात्मा ॥ २७ ॥ यस्य, इषत्, उत्कलितरोष कटाक्षमोक्षै, क्षुभितनक्रतिमिङ्गलः, अब्धिः, वर्म, आदिशत्, सेतुः, कृतः, स्वयशसा, लङ्का, उज्ज्वलिता, च, इषुक्षतानि, रक्षः शिरांसि, भुवि पेतुः ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीकृष्णस्य मुष्टीनां विनिष्पातैराघातैर्निष्पिष्टानि श्लथान्यंगानामुरूणि बन्धनानि सन्धिस्थानानि यस्य सः ॥ २५ ॥ लोके को वाऽयं मत्तो बलीयानिति विस्मितः सन्विमृश्याह—जान इति । सर्वभूतानां यः प्राणस्तत्र यदोजः सहो बलं च इन्द्रियहृदयदेहबलानि तत्सर्वं त्वमित्यहं जाने कथं तथात्वमत आह, विष्णुमित्यादि ॥ २६ ॥ पुराणत्वे हेतुः त्वं हीति स्रष्टा निमित्तम् यच्च सदुपादानम् अतः पुराणम् प्रभविष्णुत्वे हेतुः काल इति अधीश्वरस्त्वमप्यत एवेत्याह—ईशः पर इति । न च तटस्थ इत्याह आत्मनामात्मेति ॥ २७ ॥ यत एवंभूतोऽतो ममेष्टदैवतं रघुनाथ एव त्वमित्याह, यस्येति । ईषदुत्कलित

---

१. सृष्टामधिपो वसन्–विज. । २. यशसो वीर. ।

उद्दीपितो यो रोषस्तेन ये कटाक्षमोक्षास्तैः क्षुभिता नक्रा ग्राहास्तिमिंगिला महामत्स्याश्च यस्मिन् सोऽब्धिर्वर्त्म मार्गमादिशद्दत्तवांस्तथाऽपि तस्मिन् येन त्वया स्वयश एव सेतुः कृतः उज्ज्वलिता च दग्धा यस्येषुभिः क्षतानि छिन्नानि रक्षसो दशग्रीवस्य शिरांसि भुवि पेतुः स एव त्वमिति जाने ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं श्रीकृष्णम् । मत्तोऽधिकबलः कोऽयमिति हेतोरतीव विस्मितः । विशब्दनिःशब्दाभ्यामूरुशब्देन च मर्मप्रहारोऽद्योति । अतीवेति रघुनाथेऽपि प्रकटतादृशशक्त्यदृष्टेः ॥ २५ ॥ विमृश्य विचार्य । तत्र च प्राणे प्राणकार्यत्वात्सहादीनाम् । तथात्वं प्राणादिरूपत्वम् । विष्णुत्वमाकाशादेरपि तत्राह—पुराणेति । तथात्वं शेषस्यास्तीत्यत्र आह—प्रभविष्णुमिति । तथात्वं ब्रह्मणोऽस्तीत्यत आह—अधीश्वरमिति । "यो ब्रह्माणं विदधाति पूर्वम्" इत्यादिश्रुतेः । प्रभविष्णुमचिन्त्यशक्तिम् । अधीश्वरं सर्वनियन्तारम् । यद्वा—महाबलिष्ठतामनुभूयादौ परमशक्तिकत्वेनैव स्तौति—जान इति । ज्ञानगोचरीकुर्वन्नस्मि । कथं तदाह—सर्वेति । प्राणादीनां तच्छक्त्येकविभवत्वादभेदोपचार इति व्यष्ट्यन्तर्यामिपुरुषत्वं दर्शितम्, विष्णुं तत्तत्सर्वव्यापकमिति समष्टौ, पुराणपुरुषमिति प्रकृतौ च, प्रभविष्णुं ततोपि महाप्रभावमिति परमव्योमाधिपत्यम्, अधीश्वरं सर्वोपरीशनशीलमिति स्वयं भगवत्त्वमिति ॥ २६ ॥ तदेवाह—त्वं हीति । अतो भिन्ननिमित्तोपादानरूपत्वात् । अतएव कालरूपत्वादेव । तच्च परेशत्वादि न तटस्थ । पृथग्नेत्याह—आत्मेति । आत्मनां चेतना नामात्मा स्वरूपभूतः "एको देवः सर्वभूतेषु गूढः" इत्यादिश्रुतेः । विश्वसृजां ब्रह्मादीनामपि स्रष्टाऽहं तु ब्रह्मसृष्टः, तैः सृष्टानां विश्वेषां यत्सत्कारणं तत्त्वमेव न तु ते विश्वस्रष्टारोऽपि ब्रह्मादयोऽपि विश्वस्य कारणमतः पिष्टपेषणन्यायेनैव ते विश्वस्रष्टार इति भावः । अत एवोक्तं ब्रह्मणा—'सृजां सृजामि सृष्टोऽहम्' इत्यादि । कलयतां संहर्तॄणामन्तकादीनामपि कालः संहर्ता । ईशस्तत्र समर्थः । अहं त्वंतकसंहार्यस्तथात्मनां जीवानां पर आत्माऽहं त्वेको जीव एव ॥ २७ ॥ एवम्भूतः पूर्वोक्तविशिष्टोऽतो हेतोः कटाक्षमोक्षा नेत्रांतपाताः । तिमिः शतयोजनो मत्स्यस्तं गिलतीति तथा । तथापि मार्गप्रदाने कृतेपि । येन रामेण । तस्मिन्नब्धौ । स्वयशः तद्धेतुभूतस्तद्रूपो वा । उद्देश्यगतत्वाल्लिंगमविवक्षितमजहल्लिंगत्वात्समासेऽपि लिंगविपर्ययाभावः । रक्षसो रावणस्यान्येषां वा ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विशब्देन निःशब्दाभ्यामुरुशब्देन च मर्मप्रहारो द्योतितः अतीवेति श्रीरघुनाथेऽपि प्रकटतादृशशक्त्याद्यदृष्टेः ॥ २५ ॥ प्रभविष्णुमचिन्त्यशक्तिम् अधीश्वरं सर्वनियन्तारम् अन्यत्तैः । यद्वा, महाबलिष्ठतामनुभूयादौ परमशक्तिकत्वेनैव स्तौति, जान इति । ज्ञानगोचरोकुर्वन्नस्मि कथं तदाह—सर्वेति । प्राणादीनां तच्छक्त्येकविभावत्वादभेदोपचारः इति व्यष्ट्यन्तर्यामिपुरुषत्वं दर्शितं विष्णुं तत्तत्सर्व (शक्ति) व्यापकमिति समष्टौ पुराणपुरुषमिति प्रकृतौ च प्रभविष्णुं ततोऽपि महाप्रभावमिति परमव्योमाधिपतित्वम् अधीश्वरं सर्वोपरीशनशीलमिति स्वयं भगवत्वमिति ॥ २६ ॥ त्वं हीति तैर्व्याख्यातम् । यद्वा, सर्वेत्यत्र हेतुः सृष्टानामिति विष्णुमित्यत्र तच्च आत्मेति च पुराणेत्यत्र सर्वमेव प्रभविष्णुमित्यत्र च अधीश्वरमित्यत्र काल इत्यादि पर आत्मा मूलस्वरूपः अथ वा पूर्वपद्यस्य द्वितीयपक्षे तत्पञ्चविधत्वं क्रमेणोपपादयति, हि यस्मात् त्वं विश्वसृजां सूत्रादीनां जडत्वेन मृतप्रायाणां स्रष्टा उद्बोधक इत्यर्थः । तथा सृष्टानां ब्रह्मादीनां यच्चोपादानं समष्ट्यन्तर्यामी पद्मनाभः स त्वं तथा कलयताम् एकैकब्रह्माण्डप्रवर्त्तकानां सर्वेषामपि तेषां यः कालः प्रवर्त्तकः स त्वं तथा तादृशप्रभविष्णुत्वात्पर ईशः तथा आत्मनां जीवेश्वररूपाणाम् आत्मा परमांशी स्वयं भगवान् ॥ २७ ॥ उज्ज्वलिता दग्धा इति श्रीहनुमत्कृतत्वेऽपि तस्यैव प्रभावात् । यद्वा, दाहिता अन्यत्तैः । यद्वा, अतो मद्विधदुर्विधदयालुः श्रीरघुनाथोऽपि त्वमेवेत्याह—यस्येषदिति । रक्षसां रावणादीनां शिरांसि ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वि-शब्देन निः-शब्दाभ्यामुरु-शब्देन च मर्म्मप्रहारो द्योतितः । अतः क्षीणं सत्त्वं बलं यस्य सः; किञ्च, स्विन्नानि गात्राणि यस्य सः, अत्यन्तश्रमाद्भक्त्या सात्त्विकभावोदयाद्वा । अतीवेति श्रीरघुनाथेऽपि प्रकट-तादृश-शक्त्यदृष्टेः ॥ २५ ॥ महाबलिष्ठतामनुभूयादौ परमशक्तिमत्त्वेनैव स्तौति—जान इति, सदा जानन्नेवास्मीत्यर्थः । यद्वा, ज्ञातवान्, अतीते वर्त्तमाना, सदा ज्ञानानुवृत्तिविवक्षया । कथम् ? तदाह—सर्व्वेति । सर्व्वेषां भूतानां जीवानां प्राणः देहधारकोऽन्तर्वायुः, जीवनं वा, ओजआदिकञ्च तेषां तच्छक्त्येकाद्भवत्वादभेदोपचारः । विष्णुमिति उक्त-न्यायेन निजशक्त्या सर्व्वव्यापनाभिप्रायेण, अतः पुराणपुरुषं श्रीब्रह्मादीनामप्यादौ वर्त्तमानमित्यर्थः, इति विष्णुत्वेन प्रसिद्धः श्रीवामनो व्यावर्त्तितः । अतएव प्रभविष्णुं सदा नवनवमहाप्रभावयुक्तमित्यर्थः । अतएवाधीश्वरं श्रीब्रह्मादीनामपि नियन्तारम्; विशेषणानामेषां यथोत्तरं महाशक्तिमत्वे श्रैष्ठ्यमूह्यम् ॥२६॥ एवमग्रेऽपि, हि एव, त्वमेव यत इति वा, विश्वसृजां श्रीब्रह्मादीनां महदादीनां वा, सत् कारणम्, ब्रह्म कलयतां वशीकुर्व्वतां मध्ये कालः, अतएव पर ईशः परमेश्वरः, तथेति समुच्चये, यत आत्मनां जीवानां पर आत्मा अन्तर्य्यामीत्यर्थः ॥ २७ ॥ उज्ज्वलितेति

श्रीहनूमत्कृतत्वेऽपि तस्यैव प्रभावात्; यद्वा, दाहिता किंवा दग्धवह्निनाशितेत्यर्थः। यद्यपि श्रीरघुनाथस्य परमपि चरितमस्ति, तथापि श्रीभगवद्वीर्य्यातिशयानुभवेन विक्रमविशेषापेक्षयैतदेवोक्तमिति। अन्यत्तैर्व्याख्यातम्। यद्वा, रक्षसां रावणकुम्भकर्णादीनां शिरांसीति ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ओजः प्रवृत्तिसामर्थ्यं सहो वेगः बलन्धारणसामर्थ्यम् प्राणादीनां निर्वाहकमित्यर्थः ॥ २६ ॥ (अर्वाधः अन्तः आशिषाम् आज्ञाष्टसिद्धीनाम्) फलभागिनः दुर्भिक्षादिशन्तिफलभागिनः ॥ २७–४५ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पञ्चषष्टाशत्तमोऽध्यायः ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

श्रीकृष्णेति श्रीकृष्णस्य मुष्टीनां निर्घातैर्निष्पातैर्निष्पिष्टानि विश्लथान्यङ्गान्युरूणिबन्धनानि सन्धिस्थानानि यस्यः सः अत एव क्षीणबलः अत एव स्विन्नं प्रस्वेदयुक्तं गात्रं यस्य सः कदापि मद्बलविनाशो न दृष्टः अहोऽधुना मृतप्रायोऽभवमित्येवमतीव विस्मितः ॥२५॥ ततो विमृशंस्तङ्कृष्णमाह—उक्तिमेवाह—जाने इति त्रिभिः। त्वां जाने कथम्भूतम् ओजः प्रवृत्तिसामर्थ्यं सहो वेगः बलं धारणसामर्थ्यं प्राणादीनान्निर्बाहकमित्यर्थः। पुराणपुरुषं जगत्कारणपुरुषं प्रभविष्णुं जगद्रूपेण प्रभवनशीलं समर्थीभवनशीलं वा कारणत्वोपयुक्तमावज्ञसार्वशक्त्यादियुक्तमित्यर्थः। अधीश्वरं सर्वान्तरात्मानं तत्र देवताविशेषनिर्धारणाय विष्णुमिति॥२६॥ पुराणपुरुषत्वे हेतुं वदन् विशिनष्टि—त्वं हीति। विश्वसृजां महदादिपृथिव्यन्तानां तत्त्वानां स्रष्टा अनेन निमित्तकारणत्वमुक्तम् उपादानत्वमाह—सृज्यानां महदादीनां यत्सदुपादानकारणं तदपि त्वमेव उपादानत्वप्रयुक्तं सार्वात्म्यमाह–काल इति। कालयतां परिच्छिन्दतां सर्वं स्ववशीकुर्वतामिति यावत् तेषां य ईशः प्रभुः कालः सोऽपि त्वमेव तच्छरीरक इत्यर्थः। तथा आत्मनां जीवानां परमात्मा अन्तः प्रविश्य प्रशासनेन धर्त्ता व्याप्यगतदोषैरस्पृष्टश्च जीवशरीरकश्चेत्यर्थ ॥ २७ ॥ यत एवम्भूतस्ततो ममेष्टदैवतं श्रीरघुनाथ एव त्वमित्याह—यस्येति। यस्य रघुपतेरीषदुकलित उद्दीपितः यो रोषस्तेन ये कटाक्षमोक्षास्तैः क्षुभिताः नक्रा ग्रहाः तिमिङ्गिला महामत्स्याश्च यस्मिन्सोऽब्धिः वर्त्म मार्गमदिशत् दत्तवान् येन स्वयशसा अध्ययनेन वसतीतिवद्धेत्वर्थे तृतीया स्वकीर्त्यर्थं सेतुः कृतो निर्मितः येन च लङ्कोज्ज्वलिता दग्धा यस्य चेषुभिः क्षतानि छिन्नानि रक्षसो दशकण्ठस्य शिरांसि भुवि पेतुः स त्वमिति जान इत्यन्वयः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सर्वभूतानां प्राणादिप्रदं प्राणः प्राणनं चेष्टाशक्तिः ओजः अवष्टम्भशक्तिः सहः शरीरसामर्थ्यं बलं स्थौल्यम् ॥ २६ ॥ सृष्टानामधिपः सृष्टेषु वसन्कालः संहर्त्ता आत्मनां चेतनानां परः आत्मा परमचेतनः “नित्यो नित्यानाम्” इति श्रुतिः ॥ २७ ॥ उत्कलितेन उन्नतेन रोषेण जातैः कटाक्षमोक्षैर्नेत्रान्तपातैः क्षोभिता नक्रास्तिमिङ्गिलाश्च यस्मिन्स तथा स्वयशोरूपः उज्ज्वलिता दग्धा इषुक्षतानि शरच्छिन्नानि ॥ २८–२९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

निष्पिष्टानि अङ्गानां उरूणि बन्धनानि सन्धिस्थानानि यस्य सः मत्तोऽधिकबलो मत्प्रभुं श्रीरामं विना नान्य इति प्राचोननिर्द्धारादय किं स एवेत्यतिविस्मितः सन् विमृश्य निश्चित्याऽऽह ॥ २५ ॥ सर्वभूतानामनन्तकोटिब्रह्माण्डवर्त्तिनां यः प्राण एकत्रैव पुञ्जीभूतो यदि स्यात् तद्विशेषश्च ओजः सहो बलं पृथक् पृथगिन्द्रियमनोदेहसामर्थ्यञ्च यद्येकीकृतं भवेत् तदपि तद्विभूतित्वात्त्वामेवाहं जान इत्यत एकस्य भूतस्य मम बलेन तद्बलम् पतङ्गेन गरुड इव कथं वार्यतामिति भावः। विष्णुं सर्वव्यापकम् अहन्तु व्याप्यः एकः पुराणपुरुषम् अहमर्वाचीनपुरुषः प्रभविष्णुमहं प्रभावहीनः अधीश्वरम् अहमीशितव्यः ॥ २६ ॥ विश्वसृजां ब्रह्मादीनामपि स्रष्टा अहन्तु ब्रह्मसृष्टः तैः सृष्टानामपि विश्वेषां यत् सत् कारणं तत् त्वमेव नतु ते विश्वस्रष्टारोऽपि ब्रह्मादयोपि विश्वस्य कारणमतः पिष्टपेषन्यायेनैव ते विश्वस्रष्टार इति भावः। कलयतां संहर्त्तॄणामन्तकादीनामपि कालः संहर्त्ता ईशस्तत्र समर्थः अहं त्वन्तकसंहार्यः तथा आत्मनां जीवानां पर आत्मा अहन्त्वेको जीव एव ॥ २७ ॥ ईषदुत्कलित उद्दीपितो यो रोषस्तेन ये कटाक्षमोक्षस्तैः क्षुभिता नक्रास्तिमिङ्गिलाश्च यस्मिन् सोऽब्धिः वर्त्म अदिशत् ददौ तथापि तस्मिन् येन स्वयश एव सेतुः कृतः उत्कर्षेण ज्वलिता दग्धा येन इषुभिः क्षतानि स एव मत्प्रभुस्त्वमिति जाने ॥ २८ ॥

गूढार्थदीपिनी

उरुबन्धनानि सन्धिस्थानानि यस्य। सत्त्वं बलम्। स्विन्नं स्वेदयुक्तम् ॥२५॥ प्राणे यत् ओज आदि तत्सर्वं त्वमित्यहं त्वाम् जाने। इन्द्रियमनोदेहशक्तय इति क्रमेणार्थाः। प्रभविष्णुं सर्वसमर्थम् ॥ २६ ॥ विश्वसृजां महदादीनां स्रष्टा निमित्तम्।

सृज्यानां कार्याणां यत् सत् उपादानम् तच्च त्वम् । कलयतां संहर्तृणाम् कालः त्वम् । आत्मनां जीवानाम् आत्मा च त्वम् ॥२७॥ अब्धिः समुद्रः यस्य यस्मै रामाय वर्त्म मार्गमदिशत् दत्तवान् लङ्कां गन्तुम् । किञ्च येन स्वयशोरूपः सेतुः कृतः । इषुभिः बाणैः क्षतानि छिन्नानि शिरांसि भुवि पेतुः स एव त्वमित्यहं जाने इत्यन्वयः । कथंभूतोऽब्धिः । यस्य ईषदुद्दीपितरोपेण ये कटाक्षमोक्षास्तैः क्षुभिताः नक्रादयो यस्मिन् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदा श्रीकृष्णमुष्टीनां निर्घातैर्निष्पिष्टानि अङ्गानामुरूणि बन्धनानि यस्य सः क्षीणं सत्त्वं बलं यस्य सः अहो तद्भक्तोप्यहं साक्षाद्भगवन्तमागतं ज्ञातवान् किन्तु अज्ञानात्स्वामिनं हन्तुं प्रवृतोस्मि अतो मुष्ट्याघातैः शनैः प्रबोधितोस्मि इति विस्मितः तम्भगवन्तमाह ॥ २५ ॥ "सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम" ॥ इत्येवं प्रकर्षेण अणिति शब्दं करोतीति प्राणः तस्य सम्बोधने हेभक्तवत्सल ! अविवक्षितत्वात्सन्ध्यभावः त्वामहं विष्णुं निजस्वामिनं जाने कथम्भूतं पुराणपुरुषं विश्वहेतुम् अत एव सर्वभूतानाम् ओजःसहोबलम् इन्द्रियहृदयदेहसामर्थ्यम् सर्वकार्यकारण ! त्वया सह योद्धुमहं कियान् यथा महोदधिना तद्विप्रुडिति भावः ॥ २६ ॥ विश्वहेतुत्वमुपपादयति—त्वंहीति । विश्वसृजां विश्वकारणानामपि महदादीनां स्रष्टा निर्माता त्वमसि अनेन निमित्तकारणत्वमुक्तम् । उपादानकारणत्वमाह—सृज्यानां महदादीनां यत्सत् उपादानकारणं तत्त्वमेवासीति कलयत कालानां कालस्त्वमसि बहुवचनं परमाण्वादिरूपाणां कालभेदानामभिप्रायेण "ज्ञः कालकालः' इतिश्रुतेः ॥ २७ ॥ यस्य ईषदुत्कलितेन किञ्चिदुद्दीपितेन रोषेण ये कटाक्ष मोक्षास्तैः क्षुभिता नक्रा ग्रहास्तिमिङ्गिलाः महामत्स्याश्च यस्मिन्सोब्धिर्वर्त्मादिशत् दत्तवान् तथापि येन तस्मिन् सेतुः कृतः स्वयशश्च कृतमिति लिङ्गव्यत्ययेनान्वयः लङ्का चोज्ज्वलिता दग्धा यस्येषुभिः क्षतानि छिन्नानि रक्षसो रावणस्य शिरांसि निपेतुः तं त्वां जाने इत्यन्वयः ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदैव पुरुषप्रकारः समागतः, तदैव तस्य विवेक उत्पन्न इत्याह **कृष्णमुष्टी**ति । तस्य क्षीणेऽपि बले भगवतो बलं न क्षीणमिति । पश्चादल्पप्रहारैरपि निष्पिष्टाङ्गः । अङ्गानां चोरुबन्धनानि यस्य । विशीर्णसर्वावयवो जात इत्यर्थः । हस्तपादादयो भग्नाः । ततः अशक्तः जिज्ञासायां प्रवृत्त इति वक्तुं बाह्याभ्यन्तराशक्तिमाह **क्षीणसत्त्वः स्विन्नगात्र** इति । अन्तःकरणे विवेकधैर्ये क्षीणे, गात्रेषु प्रस्वेदेन शरीरमपि क्षीणम्, निष्पीडितमिवाभूत् । ततो विस्मितो जातः । विचारे क्रियमाणे समागमनादिभिः प्राकृतधर्मैर्जीवत्वे ज्ञाते स्वसमानबलतैव कस्यापि नास्ति । ततोऽधिकबलः कथं जात इत्याश्चर्यम् । भगवत्त्वे वा कथमेवंरूपेणागत इति उभयत्र विरोधादतीव विस्मितो जातः ॥ २५ ॥ ततो विरोधपरिहारे विचार्यमाणे लीलयापि प्राकृतवच्चेष्टा भवतीति निश्चित्य बलस्य प्रत्यक्षसिद्धत्वाच्च भगवानेवायमिति ज्ञात्वा स्वस्य पराजयः नातीव मनःपीडां करोतीति ज्ञापयन् भगवन्तं स्तौति **जान** इति **त्रिभिः** ।

राजसैः सात्त्विकैश्चैव तामसैस्तन्निभैर्गुणैः । सम्पूर्णैः सहितो विष्णुर्भगवानेव नान्यथा ॥ १ ॥

कथं निवृत्त इत्याकाङ्क्षायां ज्ञात्वा निवृत्त इत्याह **जान** इति । ज्ञानमार्गानुसारेणापि ज्ञानं सम्भवतीत्यत आह **त्वा**मिति । त्वामहं जाने । तत्र प्रकारानाह **सर्वभूतानां प्राण ओजः सहो बल**मिति । **प्राण** आसन्यः, तस्य कार्य**मोजः** इन्द्रियशक्तिः । **सहो**न्तःकरणस्य । **बलं** शरीरस्य । एवं सर्वप्राणिषु बलात्मा कार्यकारणभेदेन विभक्तवीर्य आसन्यस्त्वमेव । एवं नरोत्तमत्वमुक्त्वा पुरुषोत्तमत्वमाह **विष्णु**मिति । विष्णुरधिकार्यपि भवतीति तावन्मात्रतां निराकर्तुं विशेषमाह **पुराणपुरुष**मिति । पुरुषोत्तमम् । किञ्च । तादृशोऽपि प्रभविष्णुः । लोकमुद्भावयति । प्रकर्षेण भावयति वा । किञ्च । **अधीश्वरं** सर्वनियन्तारं कालरूपम् । पूर्वं क्रियाशक्तिर्निरूपिता चतुर्धा रूपभेदेन । इदानीं ज्ञानशक्तिर्निरूप्यते चतुर्धा, ज्ञानं च चतुर्विधम् । नियामकमेकम्, इष्टसाधनतां ज्ञापयित्वा प्रवर्तकं द्वितीयम्, ततः फलदातृत्वेन स्थितं तृतीयम्, ततो निर्वाहकसर्वरूपं चतुर्थम् । तद्विष्णुपदेन प्रत्यवरोहक्रमेण अन्यैः पदैश्च निरूपितम् ॥ २६ ॥ एवं पूर्णक्रियाज्ञानशक्तिमत्त्वेन भगवन्तं निरूप्य तस्य जगज्जन्मादिमोक्षान्तकार्याणि चत्वारि निरूपयति **त्वं ही**ति । श्रुतयः सम्मत्यर्थं गृहीताः । विश्वसृजां तत्त्वानामपि त्वं स्रष्टा । सृज्यानामपि घटादीनां सत्स्वरूपं भवानेव । अनेन स्थितिरुक्ता । कलयतां कालमहादेवयमादीनामपि त्वं काल उपसंहारकर्ता । एवं सृष्टिस्थितिप्रलयानुक्त्वा मोक्षदातृत्वमाह **परमात्मे**ति । आत्मनां सर्वेषामेव जीवानां परमात्मा फलरूपः । सायुज्यस्थानमिति यावत् । तथात्मनां वा परमात्मत्वेन सेवमानानां परमात्मा मोक्षदाता । अथवा । भगवतः सर्वत्वं वक्तुं सदंशस्योत्पत्त्यादिजनकत्वेन स्वरूपं भगवानित्युक्त्वा, चिदंशमपि भगवानेवात्मेति वदन्, आत्मत्वेनैव स्वरूपता सिद्धेति तन्नियामकान्तर्यामिरूपत्वेन भगवन्तं निरूपयति **परे**ति ॥ २७ ॥ एवं मूलकार्यरूपे निरूप्य य एव रामो मम स्वामी, स एव भवानिति वक्तुं रामावतारपौरुषमाह **यस्येष**दिति । ईषदुत्कलितः पुष्पप्रायः क्रोधः, तत्रापि ऊर्ध्वं कलिकामात्रं जातः, सोऽपि मनस्येवेत्याह **कटाक्षमोक्षै**रिति । अल्पीयसि क्रोधे

मनसि जाते दृष्टिस्तादृशी जाता । सापि न संपूर्णा, किन्तु कटाक्षरूपा, ते च पुनः दृष्ट्यवयवाः मोक्षरूपा इति ज्ञापयितुं कटाक्षाणां मोक्षा निरूपिताः । अल्पजीवाश्चेतनाः तैर्भीता भविष्यन्तीति किं वक्तव्यम् । ततः अब्धिरपि वर्त्म आदिशत् । मदुपरि मार्गं कृत्वा गच्छन्त्वित्युक्तवान् । ननु देय एव मार्गः, कथमुपायमुपदिष्टवानित्याह **क्षुभितनक्रतिमिङ्गिल** इति । नक्राणां तिमिङ्गिलानां च क्षोभं दृष्ट्वा तथोक्तवानित्यर्थः । अब्धिश्च आपो धीयन्ते अस्मिन्निति तासां निरन्तरमुत्पत्तिर्बाधिता स्यात् । अतो मर्यादारक्षार्थमपि तथोक्तवान् । अप्स्वभावः भगवत्कृतः । तेनान्यथाकर्तुं न शक्यत इति मार्ग एव कर्तव्य इति भगवानेव प्रार्थितः । अन्तरिक्षेणापि गमनेन गत्वा मारयितुं शक्यम्, तथा सति राक्षसैस्तुल्यता भविष्यतीति अलौकिके कर्तव्ये प्रस्तराणामेव समुद्रे प्लवनं निरूपितम्, न वानराणामिति भगवता सेतुः कृत इत्याह । क्रमेण चरित्रत्रयं निरूप्यते । सेतुबन्धो राजसः, दाहः सात्त्विकः, रक्षसां वधश्च शिष्ट इति । जलाग्न्यासन्यानां निमित्तत्वात् सत्त्वादिक्रमो वा । स्वयशसा लङ्का उज्ज्वलितति । ऊर्ध्वं ज्वलिता ज्वालिता उज्ज्वलीकृता वा । अनेनैतत् ज्ञापितम्, रघुनाथेनैव लङ्का प्रकाशितेति । अन्यथा लङ्कां को जानीयात् । नह्यन्यानि राक्षसस्थानानि लोके प्रसिद्धानि । इषुभिः क्षतानि स्वयमेव भूमौ पेतुः । क्षतमात्रेणैव भगवत्सामर्थ्यादेव पतितानि ॥ २८ ॥

श्रीसुबोधिनीसारः

कृष्णस्य मुष्टीनां विनिष्पातैः प्रहारैर्निष्पिष्टानि चूर्णीकृतानि अंगानामूरूणि बहूनि बन्धनानि संधिस्थानानि यस्य स क्षीणबलः स्विन्नगात्रः स्वेदव्याप्तशरीरो जांबवानतीव विस्मितस्तं श्रीकृष्णमाह ॥ २५ ॥ सर्वप्राणिनां प्राण ओजः सहो बलम् इन्द्रियमनोदेहबलरूपं त्वां पुराणपुरुषं प्रभविष्णुम् उत्पादकमधीश्वरं सर्वनियंतारं विष्णुं जाने वेद्म्यहम् ॥ २६ ॥ विश्वसृजां महदादीनां प्रजापतीनां च स्रष्टा त्वं हि निमित्तमेव सृज्यानामपि मध्ये यच्च सत् तत्त्वं कलयतामीशः कालस्त्वं तथात्मनां पर आत्मा त्वमसि ॥ २७ ॥ यस्येषत्किंचिदुत्कलित उद्दीपितो यो रोषस्तेन कटाक्षस्य मोक्षास्तैः क्षुभिता नक्रा ग्राहास्तिमिंगिला महामत्स्याश्च यस्मिन् सोऽब्धिः समुद्रः सेतुः कृतः स्वयशः कीर्तिरूपः वर्त्म मार्गमदिशत् अदात् लंका च उज्ज्वलिता दग्धा ईषुभिर्बाणैः क्षतानि छिन्नानि रक्षसां शिरांसि भुवि पेतुः ॥ २८ ॥

विवरणटिप्पणी

जाने त्वामित्यत्र । **नरोत्तमत्व**मिति । देहोत्तमत्वमित्यर्थः । **पुरुषोत्तमत्व**मिति । आत्मोत्तमत्वमित्यर्थः । तज्ज्ञानानुसारेणात्र देहदेहिनोर्भेद उक्तः । **प्रत्यवरोहे**ति । विपरीतक्रमेणेत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कृष्णमुष्टीनां निष्पातैर्निष्पिष्टानि अङ्गानि उरूणि बन्धनानि सन्धिबन्धनानि च यस्य सः, अत एव क्षीणं सत्त्वं बलं धैर्यं च यस्य सः, अत एव स्विन्नं प्रस्वेदयुक्तं गात्रं यस्य सः, अत एव कदापि मम बलक्षयो न दृष्टः स इदानीं कथं जात इत्यतीव बिस्मितः आश्चर्यं प्राप्तश्च तं कृष्णमाह ॥ २५ ॥ जाने इति त्रिभिः । 'मा कथंभूतं जानासि' इत्यपेक्षायामाह—सर्वभूतानां यः प्राणः, ओजः इन्द्रियशक्तिः, सहः अन्तःकरणशक्तिः, बलं शरीरसामर्थ्यम्, एतत्सर्वं त्वमिति जाने इति । 'किञ्च विष्ण्वादिरूपं त्वां जाने' इत्याह—विष्णुं व्यापकं सर्वपालकं च । पुराणपुरुषमिति । सर्वस्रष्टारं निमित्तकारणमित्यर्थः । प्रभविष्णुं प्रभवनशीलं उपादानं अधीश्वरं सर्वनियन्तारं सर्वोपसंहारकर्तारं च ॥ २६ ॥ उक्तमेव स्पष्टयति—त्वमिति । 'हि' इत्यनेन शास्त्रप्रसिद्धिं सूचयति । विश्वसृजां महदादीनां ब्रह्मादीनां च स्रष्टा निमित्तम्, सृज्यानां महदादीनां यत् सत् परमार्थभूत उपादानं तच्च त्वम् । कलयतां नियामकानां नाशकानामपि ईशो नियन्त्रादिरूपः कालः त्वम् । 'एवं महदादीनां भगवदुपादानकत्वेपि जीवानामन्योपादानकत्वं स्यात्, शङ्कां वारयति—तथा महदादिवदात्मनां जीवानामप्यात्मा उपादानमिति । 'एवं सर्वोपादानत्वे विकारित्वं स्यात्' इत्याशङ्क्याह—पर इति । 'असंगो ह्ययं पुरुष' इति श्रुतेः ॥ २७ ॥ किञ्च—यस्येति । यस्येषदुत्कलित उद्दीपितो यो रोषस्तेन ये कटाक्षमोक्षास्तैः क्षुभिता नक्रा ग्राहास्तिमिङ्गिला महामत्स्याश्च यस्मिन् सोऽब्धिः समुद्रो यस्मै वर्त्म मार्गमादिशत् दत्तवान्, तथापि स्वयशोविस्ताराय तस्मिन्येन सेतुः कृतः, येन च लङ्का उज्ज्वलिता दग्धा, दग्धा, यस्य चेषुभिः क्षतानि छिन्नानि रक्षसां रावणादीनां शिरांसि भुवि पेतुः स मम स्वामी श्रीरघुनाथ एव त्वमिति जाने इत्यन्वयः । तथा च दासस्य ममावज्ञालक्षणमपराधं क्षमस्व कर्तव्यां सेवां चादिशेत्यन्वयः ॥ २८ ॥

अन्वितार्थप्रकाशिका

कृष्णेति । कृष्णस्य मुष्टीनां विनिष्पातैः आघातैर्निष्पिष्टानि श्लथानि अङ्गानाम् उरूणि बन्धनानि सन्धिस्थानानि यस्य सः अत एव क्षीणं सत्त्वं बलं धैर्यं च यस्य सः अत एव स्विन्नं प्रस्वेदयुक्तं गात्रं यस्य सः अत एव कदापि मम बलक्षयो न दृष्टः । स इदानीं कथं जात इत्यतीव विस्मितः आश्चर्यं प्राप्तश्च तं कृष्णमाह स्म ॥ २५ ॥ जाने इति । त्वां सर्वभूतानां यः

प्राणः ओज इन्द्रियशक्तिः सहः अन्तःकरणशक्तिः बलं शरीरसामर्थ्यं तत्सर्वं त्वमित्यहं जाने। अतः विष्णुं व्यापकं सर्वपालकं च पुराणपुरुषमिति सर्वस्रष्टारं निमित्तकारणमित्यर्थः। प्रभविष्णुं प्रभवनशीलम्। उपादानम् अधीश्वरं सर्वनियन्तारं सर्वोपसंहारकर्तारं च त्वां जाने ॥ २६ ॥ त्वमिति। त्वं हि विश्वसृजां महदादीनां ब्रह्मादीनां च स्रष्टा निमित्तं सृज्यानां महदादीनां यत् सत् परमार्थभूतम् उपादानं तच्च त्वं कलयतां नियामकानां नाशकानामपि ईशो नियन्त्रादिरूपः कालः त्वं तथा आत्मनां जीवानामपि आत्मा उपादानं परः असङ्गश्च ॥ २७ ॥ यस्येति। यस्य तव ईषदुत्कलित उद्दीपितो यो रोषस्तेन ये कटाक्षमोक्षास्तैः क्षुभिता नक्रा ग्राहास्तिमिङ्गिला महामत्स्याश्च यस्मिन्सोऽब्धिः समुद्रो यस्मै तुभ्यं वर्त्म मार्गमादिशत् दत्तवान्। तथापि स्वयशोरूपः तस्मिन्समुद्रे येन त्वया सेतुः कृतः। येन च लङ्का उज्ज्वलिता दाहिता यस्य चेषुभिः क्षतानि छिन्नानि रक्षसां रावणादीनां शिरांसि भुवि पेतुः स मम स्वामी श्रीरघुनाथ एव त्वम्। अतो ममापराधं क्षमस्व कर्तव्यां सेवां चादिश ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृष्णस्य मुष्टीनां विनिष्पातैः ॥ अतितरां पातनैः विनिष्पिष्टानि शिथिलानि अंगानां उरुणि बंधनानि संधिस्थानानि यस्य सः ॥ २५ ॥ जान इति ॥ सर्वभूतानां प्राणे स्थितं प्राणाधीनं ऊर्जः स हो बलं इंद्रियांतः करणदेह सामर्थ्यरूपं त्वां जाने कथं भूतं प्रभविष्णुं प्रभवति जनकल्याणाय देवमनुष्यादिष्ववतारैः प्रादुर्भवतीत्येवंशीलं स्तं ॥ २६ ॥ विश्वस्रजां ब्रह्मादीनां स्रष्टासृज्यानां स्रष्टुं योग्यानाम ॥ पियत्सत् सन् सप्त उत्पादकस्त्वमसि। कलयतां प्रवर्त्तकानां सर्वेषामपीशो नियामकः कालस्त्वमसि आत्मनां चेतनवृंदानां परः श्रेष्ठ आत्मा परमात्मा त्वमेवासि ॥ २७ ॥ अतो ममेष्टदेवो रामचंद्र एव त्वमित्याह यस्येति ॥ यस्य तव ईषदुत्कलितेनोत्पन्नेन ऐषेण ये कटाक्षमोस्तैः क्षुभिता नक्राग्नाहास्तिमिंगिला महामस्याश्च यस्मिन्सोब्धिः समुद्रः तुभ्यं मार्गं अदिशद्ददौ यः सेतुस्त्वया कृतः अधुनापित देवस्वयंशोऽस्ति येन त्वया लंका च उज्ज्वलिता सम्यग्दग्ध्वा भस्मीकृता ॥ तवेषुणाकृतानि छिन्नानि रावणादीनां शिरांसि भुवि पेतुः सत्वमेवेत्यहं जाने इति पूर्वेण संबंधः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्णेति ॥ कृष्णस्य मुष्टीनां ये विनिर्घाता निष्पातास्तैर्निष्पिष्टानि श्लथानि अङ्गानामुरूणि बन्धनानि संधिस्थानानि यस्य सः, अत एव, क्षीणं सत्त्वं बलं यस्य सः, अत एव, स्विन्नं प्रस्वेदयुक्तं गात्रं यस्य सः, अतीवविस्मितः कदापि मद्बलनाशो न दृष्टोऽहो अधुनाहं मृतप्रायोऽभवमित्येवमतीवविस्मययुक्त इत्यर्थः। तं श्रीकृष्णं, आह ॥ २५ ॥ ततो विमृशंस्तं श्रीकृष्णमाह जाने इति त्रिभिः ॥ जाने इति ॥ त्वां सर्वभूतानां, प्राणः, ओजः, सहः, बलं, सर्वभूतप्राणादिनिर्वाहकमित्यर्थः। तत्र प्राणः प्रसिद्धः, ओजःसहोबलानि इन्द्रियहृदयदेहबलानि। पुराणपुरुषं जगत् कारणं पुरुषं, प्रभविष्णुं समर्थीभवनशीलं, कारणत्वोपयुक्तसार्वज्ञसर्वशक्त्यादियुक्तमित्यर्थः। अधीश्वरं सर्वान्तरात्मानं, अत एव विष्णुं जाने ॥ २६ ॥ पुराणपुरुषत्वे हेतुं वदन् विशिनष्टि ॥ त्वं हीति ॥ त्वं हि त्वमेव, विश्वसृजां महदादिपृथिव्यन्तानां तत्त्वानां, स्रष्टा, अनेन निमित्तकारणत्वमुक्तम्। उपादानकारणत्वमाह ॥ सृज्यानां महदादीनां मध्येऽपि, यत् सदुपादानकारणं, तदपि, त्वमेव। कलयतां परिच्छिन्दतां, सर्वं स्ववशीकुर्वतामिति यावत्। यः ईशः प्रभुः, कालः च, सोऽपि त्वमेव, कालोऽपि त्वच्छरीरक इत्यर्थः। तथा, आत्मनां, जीवानां परः आत्मा अन्तः प्रविश्य प्रशासनेन धर्त्ता, व्याप्यगतदोषैरस्पृष्टो जीवशरीरकश्चेत्यर्थः। त्वमेव ॥ २७ ॥ यत एवंभूतस्ततो ममेष्टदैवतं श्रीरघुनाथ एव त्वमित्याह ॥ यस्येति ॥ यस्य रघुपतेः, ईषदुत्कलित ईषदुद्दीपितो यो रोषस्तेन ये कटाक्षमोक्षास्तैः, क्षुभिता नक्रा ग्राहास्तिमिङ्गिला महामत्स्याश्च यस्मिन् सः, अब्धिः समुद्रः, वर्त्म मार्गं, अदिशद्दत्तवान्। तथापि, येन स्वयशसा स्वकीर्त्यर्थं, अध्ययनेन वसतीतिवद्धेत्वर्थे तृतीया। सेतुः कृतः निर्मितः। येन लङ्का च, उज्वलिता दग्धा, यस्य इषुभिः क्षतानि छिन्नानि रक्षसो दशकण्ठस्य शिरांसि, भुवि पेतुः। स त्वमेव जात इति शेषः ॥ २८ ॥

कृष्णप्रिया

अन्ततोगत्वा भगवान श्रीकृष्ण के जोरदार घूंसों की चोट से जाम्बवान के शरीर की प्रत्येक गाँठ टूट-फूट गई नष्ट भ्रष्ट हो गई। जाम्बवान निरुत्साह बन गया। उनकी काया पसोने से लथ-पथ बन गयी। पुनः अत्यन्त आश्चर्य चकित होकर भगवान् श्रीकृष्ण की स्तुति करने लगा ॥ २५ ॥ जाम्बवान जी को श्री ठाकुरजी के श्रीअङ्गो के स्पर्श होने से स्वरूप जाना और स्तुति करने लगे! नाथ आपकी कृपा से मैंने आपको पहिचाने, आप प्रत्यक्ष विष्णु है, आप पुराण पुरुष है, समस्त ब्रह्माण्ड के आप ही कारण है एवं सर्व समर्थ ईश्वर है। आप सर्व प्राणियों के स्वामी सबके प्राण मनोबल, इन्द्रियबल, शरीरबल एवं सर्वस्व है ॥ २६ ॥ आप विश्व के रचयिता है एवं ब्रह्माजी आदि के भी विधाता है। बनाये हुए समस्त पदार्थों में आप ही सत्तास्वरूप से विराजमान है। विश्व के नियामक काल के भी आप नियन्ता है। प्रत्येक प्राणियों के भिन्न-भिन्न देहों

में विराजमान अन्तरात्माओं के परम आत्मा भी आप ही है ॥ २७ ॥ श्रीजाम्बवान जी ने निजनाथ श्रीरघुनाथ जी को पहिचान गये एवं रघुवर की अनुभूत महिमा का गान करने लगे कि हे नाथ मैंने निज नेत्रों से देखा था कि, आपने अपने नेत्रों में तनिक सा रोष भाव रखकर वक्र नजर से सागर की ओर देखा इतने से महासागर के भीतर रहने वाले बड़े-बड़े नक्र नाक-घड़ियाल एवं मगरमच्छ सब क्षुब्ध हो गये थे, और समुद्र ने प्रसन्न होकर आपका मार्ग दे दिया। तब आपने सागर पर सेतु बंधन किया, वह सेतुबंधन आपकी समुज्ज्वल कीर्ति पताका थी। सेतु बंधन के साथ ही आपने लङ्का का विध्वंस कर दिया। रणसंग्राम भयानक बना और आपके क्षीण वाणों से कटे हुए राक्षसों के सिर धरणी पर लुण्ठन करते थे। यही मेरे रघुनाथ आज यदुनाथ स्वरूप में दर्शन दे रहे हैं ॥ २८ ॥

इति विज्ञातविज्ञानमृक्षराजानमच्युतः। व्याजहार महाराज भगवान् देवकीसुतः ॥ २९ ॥
अभिमृश्यारविन्दाक्षः पाणिना शंकरेण तम्। कृपया परया भक्तं 'प्रेगम्भीरया गिरा ॥ ३० ॥
मणिहेतोरिह प्राप्ता वयमृक्षपते बिलम्। मिथ्याभिशापं प्रमृजन्नात्मनो मणिनामुना ॥ ३१ ॥
इत्युक्तः स्वां दुहितरं कन्यां जाम्बवतीं मुदा। अर्हणार्थं स मणिना कृष्णायोपजहार ह ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—अरविन्दाक्षः अच्युतः—भगवान्-देवकीसुतः, इति, विज्ञातविज्ञानम्, ऋक्षराजानम्, व्याजहार, महाराज! हे ऋक्षराज "इति, संबोध्य"—शङ्करेण, पाणिना, तम्, अभिमृश्य, तम्, भक्तम्, मेघगम्भीरया, गिरा, व्याजहार ॥ २९-३० ॥ हे ऋक्षपते! अमुना-मणिना, आत्मनः, प्राप्त, मिथ्याभिशापम्, प्रमृजन्, मणिहेतोः वयम् इह बिलम्, प्राप्ताः ॥ ३१ ॥ श्रीशुक उवाच—भगवता, इति, उक्तः सः जाम्बवान्, मुदा स्वाम्, दुहितरम्, जाम्बवतीम्, अर्हणार्थम्, मणिना, सह, ह, कृष्णाय उपजहार ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इति विज्ञातं विज्ञानं येन तं विज्ञानशब्दः करणसाधनः कर्मसाधनो वा ऋक्षराजं प्रत्युक्तवान् ॥ २९-३० ॥ वयं बहवो बिलद्वारं प्राप्तास्तत्र मिथ्याभिशापममुना मणिना प्रमृजन् प्रमार्ष्टुमहमंतर्बिलमिह प्राप्त इत्यर्थः ॥ ३१ ॥ सहमणिना समर्पयामास ॥ ३२-३४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतीत्थम्। करणे साधनेऽर्थे साध्यत इति तथा, तत्र विज्ञायतेऽनेनेति विज्ञानं शास्त्रश्रवणादि, विज्ञायते यत्तद्विज्ञानं ज्ञेयं वस्तु ब्रह्मस्वरूपमयं च कर्मसाधनः। अच्युत इति तादृशयुद्धादौ जातेऽपि तस्मिन्वात्सल्याव्यभिचाराभिप्रायेण। यतो देवकी सुतो भगवान् केवलस्वजनरक्षार्थमेव देवक्यामवतीर्ण इति भावः। महाराजेति भवादृशां तदनुभूतमेवेति भावः ॥ २९ ॥ तमृक्षराजम्। शंकरेण सुखकरेण। अरविंदाक्ष इति-प्रसन्नस्निग्धदृष्ट्याऽवलोकयन्निति भावः। तत्र विज्ञानमित्यत्र करणपक्षे पूर्ववरप्रदानादि ज्ञेयं, कर्मपक्षे विज्ञातं विशेषादनुभूतं विज्ञानं स्ववैभवं भगवत्तत्त्वं वा येन ॥ ३० ॥ बिलं बिलद्वारम्। तत्र तेषु। इत्यर्थ इति—ममैव मिथ्याभिशापो न सर्वेषां तेनाहमत्रागतो नान्ये इत्याशयः। भगवंस्तव मिथ्याभिशापः कथमिति जांबवदाक्षेपं स्कान्दवाक्येनोत्तारयति—"मया भाद्रपदे शुक्लचतुर्थ्यां चन्द्रदर्शनम्। गोष्पदांबुनि वै राजन्कृतं दिवमपश्यता।" इति। नारदापि—"त्वया भाद्रपदे शुक्लचतुर्थ्यां चन्द्रदर्शनम्। कृतं येनेह भगवन्वृथा शापमवाप्तवान्।" इति। किञ्च—"येन भाद्रद्वितीयायां दृष्टश्चन्द्रो हरे सिते। तस्य दोषो न भवति चतुर्थीदर्शनोद्भवः।" इति। ननु स एव तद्दिने कथं चन्द्रो दर्शनार्हो नेति चेदाह—भाद्रसितचतुर्थ्यां पंकस्खलितं गणेशं दृष्ट्वा चंद्रो जहास। तं च गणेशो यस्त्वामद्य द्रक्ष्यति स मिथ्याभिशप्तो भविष्यतीति शशाप। अतस्तद्दिने दर्शनानर्हता चंद्रोऽवापेति सति तद्दर्शने तद्दिन इष्टकाप्रक्षेपादिना कस्माच्चिद्गालीग्रहणादि कुर्यात्तेनापि तद्दोषशांतिरित्युक्तं पुराणांतर इत्यलमतिप्रसंगेन ॥३१॥ इतीत्थं भगवतोक्तः। अर्हणार्थं गृहागतभगवदर्चननिमित्तम्। यत्तु पाद्मे सृष्टिखण्डे जांबवत्कर्तृकप्रसेनवधादि, तथा श्रीकृष्णकर्तृकजांबवतश्चक्रेण वधादि, तत्सर्वं कल्पांतरविषयं, न त्वेतत्कल्पीयकृष्णावतारविषयम्। यद्वा-शं कल्याणं करोतीति शंकरं सुदर्शनं चक्रम् "येये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन। तेते गता विष्णुपुरीम्" इत्याद्युक्तेः। शंकरमस्त्यस्मिन्निति शंकरस्तेन पाणिना हस्तेनाभिमृश्य मर्दयित्वेत्यर्थः। तस्मै तुष्टेन भगवता वरं वरयेत्युक्तम्, तेन चोक्तम्-चक्रेण मे मृत्युं कारयेति। ततश्च रत्नग्रहणकन्योद्वाहानंतरं तथैव कृतं भगवतेति, अन्यथाभिस्पृश्येत्येवं ब्रूयान्न त्वभिमृश्येति। स्वामिति—नरकन्यारूपत्वेऽपि तदीयत्वबोधनार्थम्, ऋक्षत्वेऽपि देवपुत्रतया नानारूपधृत्या तत्सं-

---

१. मेघ-वीर. बिज. । २. सहर्माण-विज. ।

भवात् । जांबवतीमिति तस्य स्नेहाधिक्यतया तन्नाम्नैव ख्याताम् । माथुरहरिवंशे चेदमाख्यानमस्तीति श्रूयते-पूर्वं श्रीरामावतार एव कन्येयं जातासीत्तस्मा एव जांबवान्दातुमैच्छत् । स चोचे-एकपत्नीव्रतधरेऽस्मिन्नवतारे ममैतन्न घटत इति श्रीकृष्णावतारे घटिष्यते, किन्तु बहुदिनं तपस्यां कुरु, ततः स श्रीगोवर्द्धने चिरं तपस्तप्त्वा तमभीष्टं प्रापेति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इतीति युग्मकम् ऋक्षराजानमित्यार्षम् अच्युत इति तादृशयुद्धादौ जातेऽपि तस्मिन् वात्सल्याव्यभिचाराभिप्रायेण यतो देवकीसुतो भगवान् हे महाराजेति भवादृशान्तदनुभूतमेवेति भावः अतः कृपया परयाऽभिमृश्य सर्वाङ्गेषु स्पृष्ट्वा यतो भक्तं शङ्करणेति सद्य एव युद्धश्रमादिदुःखहरणपूर्वकं सुखं कृतमित्यर्थः अरविन्दाक्ष इति प्रसन्नस्निग्धदृष्ट्याऽवलोकयन्निति भावः । मेघेति श्रीमुनीन्द्रस्य तद्वचनस्वरमाधुर्य्यस्मरणोत्कण्ठा अन्यत्तैः तत्र विज्ञानमित्यस्य करणपक्षे पूर्वपूर्वतदनुगतिरुच्यते कर्मपक्षे विज्ञातं विशेषादनुभूतं विज्ञानं स्ववैभवं येन । यद्वा, (स्वेन) विज्ञातं स्वविषयविविधज्ञानं यस्य तमिति ॥ २९–३० ॥ इह बिलद्वारदेशे प्रमृजन् सिंहहतप्रसेनादिदर्शनेन मृष्टमपि प्रकर्षेण मार्ष्टुमित्यर्थः । इदं च वाक्यं श्रीभगवता किञ्चिद्विचारितमपि पौनरुक्त्यभिया सङ्क्षेपेण प्रथितमत्रेति ज्ञेयम् ॥ ३१ ॥ स्वामिति नरकन्यारूपत्वेऽपि तदीयत्वबोधनार्थम् ऋक्षत्वेऽपि देवपुत्रतया नानारूपधृत्या तत्सम्भवात् कन्यामपरिणायितां जाम्बवतीमिति तस्य स्नेहभरविषयतया तन्नाम्नैव ख्यातं माथुरहरिवंशे चेदमाख्यानमस्तीति श्रूयते पूर्वं श्रीरामचन्द्रावतार एव कन्येयं जाताऽऽसीत् तस्मा एव जाम्बवान् दातुमैच्छत् स चोक्तवान् एकपत्नी ब्रतधरे ममैतदवतारे न घटत इति श्रीकृष्णावतारे घटेत किन्तु बहुदिनं तपस्यां कुरु ततश्च तत्स्मृत्वा कालान्तरे चिरं श्रीगोवर्धने तपस्तप्त्वा तमभीष्टं प्रापेति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अच्युत इति तादृशयुद्धादिनापि तस्मिन् वात्सल्याच्युत्यभिप्रायेण, यतो भगवान् भक्तवात्सल्याद्यशेषगुणप्रकटनपर इत्यर्थः । यतो देवकीसुतः । हे महाराजेति भवादृशां महतां तदनुभूतमेवेति भावः ॥ २९ ॥ अतः परया कृपया अभिमृश्य सर्वांगेषु स्पृष्ट्वा, यतो भक्तं शंकरेणेति सद्य एव युद्धश्रमादिदुःखहरणपूर्वकसुखं कृतमित्यर्थः । अरविन्दाक्ष इति प्रसन्नस्निग्धदृष्ट्यावलोकयन्निति भावः । मेघेति स्वभावादेव किंवा तत्प्रहर्षार्थं भगवत्त्वबोधनाथ, किंवा स्नेहभरेण गिरो गाम्भीर्य्यविशेषात् ॥ ३० ॥ इदं पर्वते देशे वा, अमुना अनेन मणिना प्रकर्षेण मृजन्नित्येनं नीत्वैतत्स्वामिने दातुमिच्छामीति भावः ॥ ३१ ॥ स्वामिति नारीरूपत्वेऽपि तदीयत्वबोधनार्थं ऋक्षत्वेऽपि देवपुत्रतया तत्सम्भवात्, कन्यामपरिणायितां जाम्बवतीमिति तस्य स्नेहभरविषयतया तन्नाम्नैव ख्याताम्, किंवा तेनैव तथाकृत-तत्संज्ञकामित्यर्थः । केचित्तु पुराणान्तरप्रसिद्धा गन्धर्वकन्येति वदन्ति, उपजहार दास्येन बलितया समर्पयामास ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीति इत्थं विज्ञातं विज्ञानं विज्ञेयं येन तमृक्षराजानं अनित्यत्वादार्षत्वाद्वा "राजाह" इति समासान्ताभावः । व्यजहारोवाच ॥ २९ ॥ कथमित्यत आह—अभिमृश्येति । शङ्करेण सुखकरेण पाणिना भक्तं तमृक्षराजमभितः संस्पृश्य परया निरतिशयया कृपयोपलक्षितः मेघध्वनिवद्गम्भीरया गिरा प्राह ॥ ३० ॥ उक्तिमेवाह—मणिहेतोरिति । हे ऋक्षपते ! मण्यर्थमिह बिलं प्रति वयमागताः अवाप्तसमस्तकामस्य तव किं मणिनेत्यत आह मिथ्येति अमुना मणिना हेतुना आत्मनो मम यो मिथ्याभिशापः मिथ्यापवादः प्रसक्तस्तममुना मणिनैव विमृजन् लक्षणहेत्वोरिति शत्रादेशः विमार्ष्टुमपनेतुमिति यावत् विमृजन्नहमागत इति शाब्दयोजना ॥ ३१ ॥ इतीति इत्थमुक्तः स जाम्बवान् समणिना मणिना सह स प्रसिद्धः जाम्बवान् मणिना सहेति वा जाम्बवतीमुपायनार्थं कृष्णाय समर्पयामास ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

शङ्करेण सुखकरेण ॥ २९–३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

विज्ञातं स्वयमेवाऽनुभूतं विशिष्टज्ञानं भगवत्तत्वं येन तम् ऋक्षराजं शङ्करेण पाणिना स्पृष्ट्वेति । भक्तस्य तस्य अङ्गव्यथा उपशमिता ॥२९॥ वयं बहव एव बिलं प्राप्तास्तत्राऽहमिह प्रविष्ट इति शेषः प्रमृजन् प्रमार्ष्टुम् ॥ ३० ॥ मणिना सह ॥ ३१–३५ ॥

गूढार्थदीपिनी

विज्ञायतेऽनेनेति विज्ञायते यत्तत् विज्ञानं ज्ञेयं वस्तु भगवत्स्वरूपम् येन तम् । विज्ञानशब्दः करणसाधनः कर्मसाधनो वा ॥ २९ ॥ अभिमृश्य संस्पृश्य । शङ्करेण सुखकरेण ॥३०॥ बिलद्वारं तु वयं बहवः प्राप्तास्तत्र अभिशापं कलङ्कं प्रमृजन् प्रमार्ष्टुमन्तर्बिलमिह अहमेक एव प्राप्तः इत्यन्वयः ॥ ३१ ॥ मणिना सह उपजहार समर्पितवान् । ह हर्षेण ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

विज्ञातं विज्ञानं विशिष्टं ज्ञानं भगवत्तत्त्वं येन तम् ऋक्षराजानम् "राजाहः सखीभ्यष्टच्" इति टजभावः समासान्तविधेरनित्यत्वात् व्याजहारोक्तवान् ॥ २९ ॥ हे ऋक्षपते ! वयं बहवो मणिहेतोर्बिलं प्राप्तास्तत्र मिथ्याभिशापममुना मणिना प्रमृजन् प्रमार्ष्टुमिह बिलमध्ये प्राप्तोऽहमिति शेषः ॥३०॥ स जाम्बवान् मणिना सह जाम्बवतीम् उपजहार समर्पयामास ॥३१–३५॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं कृते स्तोत्रे भग्नसर्वाङ्गं यथापूर्वं कृत्वा भगवानुवाचेत्याह इतीति । विशेषेण ज्ञातं विशेषज्ञानं यस्य, स्वभावतोऽपि महान्तमृक्षराजानम् अच्युतः सर्वतः धर्मा अपि तस्य तथेति । एतत्प्रयोजनमुत्तरश्लोके वक्तव्यम् । तत्कृतपीडाभावाय वा । **व्याजहार** स्पष्टमुक्तवान् । निदितत्वात् कदाचित् व्याजेनापि वदेत् । अत एतदुक्तम् । **महाराजे**ति संबोधनं सेवकापराधापरिगणनज्ञापनार्थम् । ननु कथं स्पष्टं वचनं कथं वा नाज्ञापितवानित्याह **भगवान**निति । सर्वसमर्थः । तादृशोऽपि देवकीसुतो भक्तकृपालुः । अतो युक्तमेवास्य स्पष्टवचनमिति भावः ॥ २९ ॥ वचनात्पूर्वमेव तस्य हितं च कृतवानित्याह **अभिमृश्ये**ति । तस्याभिमर्शोऽपि सकृत् कृतो नित्यं तिष्ठति । सामान्यस्यैव वाभिमर्शः सुखकरो भवति तत्क्षणम्, किं वक्तव्यमानन्दमयस्य । तत्रापि यस्मिन् क्षणे स निष्पादितः, ततःप्रभृति तथैवानुवर्तत इति पूर्वावस्थां ततोऽप्यधिकां वा प्राप्तवान् । मानसीं व्यथां दूरीकर्तुमाह **अरविन्दाक्ष** इति । दृष्ट्यैव सर्वसुखदायी । **शंकरेण पाणिने**ति । तस्मिन्नतिशयाधानमप्युक्तम् । येनाग्रे सद्बुद्धिरप्युत्पद्यत इति । एवं कायेन मनसा च सान्त्वनं कृत्वा वचसापि सान्त्वनमाह **मेघगम्भीरये**ति । मेधा हि शब्दत एव भाविवृष्टिं सूचयन्तः चिन्तादिसर्वतापहारका भवन्ति । तथाप्यनुचितं कथमुक्तवानित्याशङ्क्याह **कृपया परये**ति । अनेन वा मानसं सान्त्वनम् । तमिति तथा स्तोत्रकर्तारं सान्त्वनोचितम् । त्रिविधसान्त्वनेऽपि हेतुर्भक्तमिति ॥ ३० ॥ वाक्यमाह मणिहेतोरिति । अत्रागमने मणिरेव हेतुः । **मणिं** नेतुमागताः । बहुवचनं पूर्वदृष्टसर्वसाहित्यं सूचयति । हेतुशब्दो वा निमित्तवाची । मणिनिमित्तं वयं समागता इत्यर्थः । **ऋक्षपत** इति । ज्ञात्वैवागमनं निरूपितम् । अन्यथा बिले समागमनं न स्यात् । मणेरपि प्रयोजनमाह **मिथ्याभिशापं प्रमृज**न्निति । एतद्विस्तरेणोक्तमिति लक्ष्यते । **मिथ्याभिशापः** अकृतापकीर्तिकीर्तनम् । लोकाः अतत्त्वविद इति । दृष्टिमेव मन्यन्त इति । अमुना मणिना अभिशापं प्रमृजन् इहागत इति सम्बन्धः । यद्यपि अग्रे मिथ्याभिशापापगमः, तथापि क्रिया प्रारब्धेति वर्तमानप्रयोग एव युक्तः । एकवचनं तु मिथ्याभिशाप एकस्यैवेति । **आत्मन** इत्यवश्यकता । अन्यथा भक्तोद्धारो न सम्भवतीति भावः ॥ ३१ ॥ एवं स्वाभिप्राये निरुक्ते कथं देयमिति विचार्य तावन्मात्रे दत्ते स्वस्य सेवकत्वं न सिध्यति, याचितं सर्व एव प्रयच्छतीति स्वकन्यां च दत्तवानित्याह **इत्युक्त** इति । जाम्बवतः अपत्यं जाम्बवती, अनेन पालिता कन्या न भवतीति सूचितम् । ऋक्षाणां विधानान्तराभावात् दानमेव कृतवान् । सापि ततः पूर्वं कन्या अदत्तैव स्थिता । **मुदे**ति भाग्यं जातमिति । भगवानपि पूजितः, कन्यायाः वरोऽपि प्राप्त इति । ततस्तस्या एव कन्यायाः दानसमये अर्हणार्थं मणिमपि दत्तवान् । एतद्द्वयमपि न कुशोदकपूर्वकं प्रादात्, किन्तु **उपजहार** समीपे आनीय स्थापितवानित्यर्थः ॥ ३२ ॥

श्रीसुबोधिनी–सारः

इत्येवं विज्ञातं विज्ञानं स्वरूपं येन तम् ऋक्षराजानं जांबवंतं भगवान् देवकीसुतो व्याजहारोवाच हे महाराज ॥ २९ ॥ **अरविंदाक्षः पद्मनेत्रः** शंकरेण पाणिना आनन्दकारिणा हस्तेन तं भक्तमभिमृश्य संस्पृश्य परया कृपया प्रेम्णा गम्भीरया सांद्रया **गिरा** वाचा ॥ ३० ॥ हे ऋक्षपते मणिहेतोरिह वयं प्राप्ताः तत्रापि आत्मनो मिथ्याभिशापम् अमुना मणिना प्रमृजन् प्रमार्ष्टुं हेतौ **शतृ बिलमेकोऽहं** प्रातः ॥ ३१ ॥ **इत्युक्तः** स जांबवान् स्वां दुहितरं पुत्रीं कन्यां जांबवतीं मणिना सहार्हणार्थं कृष्णाय निवेदया**मास ह प्रसिद्धम्** एतेन **विवाहः** सूचितः ॥ ३२ ॥

विवरणटिप्पणी

अभिमृश्येत्यस्याभासे । **वचनात्पूर्वमेवे**ति । पाठे एवं क्रमाभावेपि अभिमृश्येतिक्त्वाप्रत्ययनेन पूर्वकालस्य बोधितत्वादिति भावः । **व्याख्याने तथाप्यनुचि**तमिति । अपराधकर्तुः सान्त्वनमनुचितमित्यर्थः । **मणिहेतो**रित्यत्र । इति **लक्ष्यते** इति । विस्तरेण कथनं विनाकाङ्क्षा तिष्ठेदेवेति भावः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे महाराज ! इत्येवं विज्ञातं विज्ञानं चिदानन्दरूपं स्वतत्त्वं येन तमृक्षराजानं देवकीसुतः कृष्णो व्याजहार उक्तवान् । **तस्य** युद्धप्रयुक्तश्रमादिराहित्यमाह—अच्युत इति । तत्र हेतुमाह—भगवानिति ॥ २९ ॥ स्वमुष्टिप्रहारेण निष्पिष्टाङ्गत्वात् **प्रथमं** तत्पीडानिवृत्त्यर्थं शङ्करेण सुखकरेण पाणिना तमभिमृश्य संस्पृश्य मेघध्वनिवद्गम्भीरया वाचा व्याजहारेत्यन्वयः ।

'मेघगम्भीरया' इत्यनेन श्रवणद्वारा वाचाप्यानन्दं पूरितवानिति दर्शितम्। 'दृष्ट्यापि तत्सन्तापं हृत्वा सुखं दत्तवान्' इति सूचयन्नाह—अरविन्दाक्ष इति। एवं सर्वथा तस्मा आनन्ददाने हेतुमाह—परया कृपया पूर्ण इति शेषः। तत्र हेतुमाह—भक्तमिति ॥ ३० ॥ तदुक्ति दर्शयति—हे ऋक्षपते! मण्यर्थमिह बिलं वयं प्राप्ता आगताः। बहिष्ठजनाभिप्रायेण बहुवचनम्। 'भगवत्त्वेनावाप्तसमस्तकामस्य तव मणिना किम्' अत आह—मिथ्येति। अमुना मणिना हेतुना आत्मनो मम यो मिथ्याभिशापः मिथ्यापवादः प्रसक्तस्तममुनैव प्रमृजन् अपनेतुमिहागताः ॥ ३१ ॥ भगवता इत्येत्युक्तो मुदा युक्तः स जाम्बवानर्हणार्थं सेवार्थं मणिना सह स्वां दुहितरं सुतां कृष्णायोपजहार समर्पयामास। ननु 'ऋक्षस्य सुतापि तत्स्वरूपैव, कथं भगवद्विवाहयोग्या स्यात्' इत्याशङ्क्याह—कन्यां जाम्बवत्याख्यामिति। भगवत्कृपायास्तद्भक्तेश्चाश्चर्यं सूचयन्नाह—हेति ॥ ३२ ॥

अन्वितार्थप्रकाशिका

इतीति युग्मम् ॥ हे महाराज! इत्येवं विज्ञातं विज्ञानं चिदानन्दरूपं स्वतत्त्वं येन तं भक्तमृक्षराजानम्। टजभाव आर्षः। अच्युतः अरविन्दाक्षो भगवान् देवकीसुतः परया कृपया तत्पीडानिवृत्त्यर्थं शङ्करेण सुखकरेण पाणिना तमभिमृश्य संस्पृश्य मेघध्वनिवद् गम्भीरया गिरा वाचा व्याजहार उक्तवान् ॥ २९–३० ॥ मणीति ॥ हे ऋक्षपते! वयं बहवः मणिहेतोः बिलं बिलद्वारं प्राप्ताः। तत्राहमेकः अमुना मणिना हेतुना आत्मनो मम यो मिथ्याभिशापः मिथ्यापवादः प्रसक्तस्तममुनैव प्रमृजन् प्रमार्ष्टुम् इहान्तर्बिलं प्राप्त इति शेषः ॥ ३१ ॥ इतीति ॥ इति ॥ भगवता उक्तः स जाम्बवान् अर्हणार्थं मणिना सह जाम्बवत्याख्यां कन्यां स्वां दुहितरं मुदा कृष्णयोपजहार ह समर्पयामास। जाम्बवती च श्रीरामावतार एव जाताऽऽसीत्। श्रीरामाय दित्सिताऽप्येकपत्नीव्रतेन तेनास्वीकृता चिरं तपस्तप्त्वेदानीं तं प्रापेति पुराणान्तरे ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इति विज्ञातं बुद्धं विज्ञानं भगवत्स्वरूपस्य यथार्थबोधो येन तं ऋक्षराजं व्याजहार उवाच ॥ २९ ॥ अभिमृश्य स्पृष्ट्वा। अरविंदाक्षो भक्तप्रेक्षणाय प्रफुल्लनेत्रः ॥ ३० ॥ मणीति वयं बहवोजनाः हे ऋक्षपते ॥ आत्मनः स्वस्य अमुना मणिना मिथ्याभिशापं प्रमृजन् प्रमार्ष्टुं निवर्त्तयितुमहमेको बिलमध्ये प्राप्त इत्यर्थः ॥ ३१ ॥ उपजहार ददौ ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं, विज्ञातं विज्ञानं विज्ञेयं येन तं, ऋक्षराजानं जाम्बवन्तं, अनित्यत्वादार्षत्वाद्वा 'राजाह'—इति समासान्ताभावः। देवकीसुतः, अच्युतः, भगवान् श्रीकृष्णः, हे महाराज, व्याजहार ॥ २९ ॥ अभिमृश्येति ॥ शंकरेण सुखकरेण, पाणिना हस्तेन, भक्तं, तं ऋक्षराजं, अरविन्दाक्षः कमलनयनो भगवान्, अभिमृश्याभितः संस्पृश्य, परया निरतिशयया, कृपया उपलक्षितः सन्, मेघगम्भीरया मेघध्वनिवद्गम्भीरया, गिरा, व्याजहारेति पूर्वेण संबन्धः ॥ ३० ॥ उक्तिमेवाह। मणिहेतोरिति। हे ऋक्षपते, वयं मणिहेतोर्मण्यर्थं, इह गिरौ, बिलं बिलद्वारं, बहवः प्राप्ताः। अवाप्तसमस्तकामस्य तव किं मणिनेत्यत आह मिथ्येति। अमुना, मणिना हेतुना, आत्मनो मम, मिथ्याभिशापं मणिना हेतुना संप्राप्तं मिथ्यापवादमित्यर्थः। विमृजन्नेतत्प्रदर्शनेन मार्ष्टुमिच्छन्, अहं तेषां मध्य एक एवेहागतोऽस्मीति योजनीयम् ॥३१॥ इतींत्थं इति। इतीत्थं, उक्तः श्रीकृष्णेनाभिहितः, स जाम्बवान्, मुदा जाम्बवतीं, कन्यामनूढां, स्वां, दुहितरं मणिना सह, अर्हणार्थमुपायनार्थं, कृष्णाय ह स्फुटं यथा तथा, उपजहार समर्पयामास ॥ ३२ ॥

कृष्णप्रिया

महाराज परीक्षित! श्रीऋक्षराज श्रीजाम्बवानजी ने श्रीरघुनाथजी को अच्छी तरह से जब जान लिया तब कृपा लोचन देवकीनन्दन श्रीअच्युत भगवान ने अपने मङ्गलमय करकमल से श्रीजाम्बवानजी के श्री अङ्ग का स्पर्श किया, सारी तन-मन जीवन की वेदना विसरायी और अरविन्द लोचन भगवान् श्रीकृष्ण करुणा एवं अमीमयी प्रेमगम्भीर वाणी से निजदास जाम्बवानजी को कहने लगे ॥ २९–३० ॥ श्रीकृष्ण प्रभु ने कहा कि भैया जाम्बवानजी! स्यमन्तक मणि के कारण ही आप की गुफा में आप के समीप आये हैं। इस मणि के कारण मुझे लगे हुए जूड़े कलङ्क को मिटाना चाहता हूँ ॥ ३१ ॥ करुणा निधान भगवान् श्रीकृष्ण के वचनामृतों का श्रवण करके परमानन्द से पूर्णानन्द श्रीकृष्णजी का समर्चन किया पुनः अपनी कुलवती श्रीजाम्बवती कुमारी के साथ स्यमन्तक मणि भगवान के श्रीचरणों में समर्पण किया ॥ ३२ ॥

[1]अदृष्ट्वा निर्गमं शौरेः प्रविष्टस्य बिलं जनाः । प्रतीक्ष्य द्वादशाहानि दुःखिताः स्वपुरं ययुः ॥ ३३ ॥
निशम्य देवकी देवी रुक्मिण्यानकदुन्दुभिः । सुहृदो ज्ञातयोऽशोचन् बिलात् कृष्णमनिर्गतम् ॥ ३४ ॥
सत्राजितं शपन्तस्ते दुःखिता द्वारकौकसः । उपतस्थुर्महामायां दुर्गां कृष्णोपलब्धये ॥ ३५ ॥
तेषां तु देव्युपस्थानात् प्रत्यादिष्टाशिषा[2] स च । प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन् हरिः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—जनाः, बिलम्, प्रविष्टस्य, शौरेः, निर्गमम्, अदृष्ट्वा, द्वादश, अहानि, प्रतीक्ष्य, दुःखिताः, स्वपुरम्, ययुः ॥३३॥ देवकी, देवीरुक्मिणी च, आनकदुन्दुभिः, सुहृदः, ज्ञातयः, कृष्णम्, अनिर्गतम्, निशम्य, अशोचन् ॥ ३४ ॥ दुःखिताः, ते, द्वारिकौकसः, सत्राजितम्, शपन्तः, कृष्णोपलब्धये, महामायाम्, दुर्गाम्, उपतस्थुः ॥ ३५ ॥ तेषाम्, तु, देव्युपस्थानात्, प्रत्यादिष्टाशिषा, सिद्धार्थः, सदारः, स च (यज्ञरूपः) हरिः, सदारः, प्रादुर्बभूव ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीकृष्णप्राप्तये चंद्रभागां नाम दुर्गामभजन् ॥ ३५ ॥ स च कृष्णस्तेषां प्रादूर्बभूव आसव इति पाठे असव इंद्रियाणि तेषां प्रेष्ठ इत्यर्थः । कदा देव्या उपस्थानात् तया तान्प्रति आदिष्टा दत्ता या आशीः कृष्णं द्रक्ष्यथेति तया सहैव ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रतीक्ष्य बिलद्वारे स्थित्वा ॥ शौरेरिति—वसुदेवादीनां मय्यत्र प्रविष्टे दुःखं स्यादतस्तत्र विलंबो न घटत इति भावः । जनाः सत्राजिन्नागरिकाः । कृष्णेऽत्यंतप्रेमाऽभावाद्बिलप्रवेशमकृत्वैव पुरं ययुः ॥ ३३ ॥ अशोचन् शोकसंतप्ता आसन् ॥ ३४ ॥ ते जनाः । शपंतो निन्दन्तः । चंद्रेण भज्यते सेव्यत इति तथा ताम् । "नृणां बंधं वधं घोरं पुत्रनाशं धनक्षयम् । व्याधिमृत्युभयं दुर्गा पूजिता शमयिष्यति ॥" इति हरिवंशोक्तेः, 'दुर्गे स्मृता हरसि भीतिमशेषजंतोः' इति मार्कण्डेयाच्च ॥ उपतस्थुरिति भगवद्बल्लीलावेशादेव । उपलब्धये शीघ्रं प्राप्तये ॥ ३५ ॥ तेषां देवीमुपतिष्ठतां मध्ये । 'आशिषाऽऽसवः इति पाठे । इत्यर्थ इति—यथा प्रियेण धनेनाषींद्रियाणि रक्षंति तद्दानेन च न ददति 'लक्षं ते दास्यामि निजमेकनेत्रं देहि' इति श्रुत्वापि धनमगृहीत्वा तन्न ददति प्रेष्ठत्वात्, तद्वद्द्वारकावासिनां श्रीकृष्णोऽपीति भावः । कदा प्रादुर्बभूवेति चेदाह—देव्या इति । तया देव्या । तान् सेवमानान् । तयाऽऽशिषा । सहैव तत्क्षणमेव । सिद्धार्थः मणिसहितः ॥ देव्या प्रत्यक्षीभूय प्रत्यदिष्टा दत्ता या आशीः 'कृष्ण आगतप्रायः' इति । तया आशिषा सहैव । असव इति हरेर्विशेषणम् । असवः प्राणतुल्यः 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरः । सिद्धोऽर्थो मण्यानयनजांबवदनुग्रहश्रीजांबवतीपरिग्रहसत्राजितह्वेपणादिरूपो लीलाप्रयोजनं यस्य स तथा ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

शौरेरिति श्रीवसुदेवाद्यपेक्षया तत्र विलम्बो न सम्भवेत् इत्यभिप्रायेणेति भावः । जनास्ते सत्राजिन्नागराः अतो द्वारकावासिस्वाभाव्येन दुःखिता अपि सन्तो नात्यन्तरङ्गत्वात् स्वीयमेव पुरं ययुः न तु तद्बिलमित्यर्थः ॥ ३३ ॥ देवीत्युभयत्र सम्बन्धः परमपूज्येत्यर्थः । तच्च परमप्रेमाधिक्यात् परमशक्तिरूपत्वाच्च आनकेत्यादौ प्रेम्ण ऊनोनतयाऽनुक्रमः सुहृदः सम्बधिनः सखायो वा ॥ ३४ ॥ उपतस्थुरिति च भगवद्वल्लौकिकलीलावेशादेव उपलब्धये अचिरादेव प्राप्तये ॥ ३५ ॥ तुशब्दो विशेषे देव्युपस्थानादन्येषां न प्रादुर्भवति "देवान् देवयजो यान्ति" इत्यादेः तेषां पुनः देव्युपस्थानात् हरिः प्रादुर्बभूवेत्यर्थः । तेषु तदाद्याराधनस्य लौकिकलीलामयश्रीकृष्णप्रेमरसैकविलासत्वात् देव्या अपि तत्सम्बन्धेन योग्यतालब्धेरितिभावः । सहेति यदाशीर्दत्ता तदैवेत्यर्थः सिद्धोऽर्थः मण्यानयनजाम्बवदनुग्रहश्रीजाम्बवतीपरिग्रहसत्राजितह्रेपणादिरूपं तादृशलीलाप्रयोजनं यस्य सः अत एव सदारः प्रादुर्बभूवेति आविर्भाववच्छीघ्रागमनात् तच्च गरुडारोहणेनेति सम्भाव्यम् अन्यत्तैः तत्र हरिरित्यस्यैव व्याख्या स च श्रीकृष्ण इति ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

शौरेरिति श्रीवसुदेवाद्यपेक्षया । तत्र चिरावस्थितिर्न सम्भवतीति भावः । अतो दुःखिता दुःखभरेण विचारापगमादित्यर्थः, अतः स्वकीयामेव पुरम्, न तु तद्बिलमित्यर्थः ॥ ३३ ॥ देवी ईश्वरी महिषीत्यर्थः; सुहृदः सम्बन्धिनः सखायो वा,

---

[1] ततोऽन्यैश्च मणिश्रेष्ठैः पूजितो भक्तवत्सलः । तस्मै ददौ परां मुक्तिं पुनरावृत्तिवर्जिताम् ॥ विज. ।
अन्यैस्स मणिमुख्यैश्च पूजितो भक्तवत्सलः । ददौ तस्मै परां मुक्तिं प्रीत्या जाम्बवतो हरिः ॥ च. पु. टि. ।

[2] शिषां वीर; विषां भवन्—विज. ।

कृष्णं सर्व्वचित्ताकर्षकमिति महाशोकः सूचितः ॥ ३४ ॥ ते देवक्यादयः श्रीकृष्णैकजीवना वा, सर्व्वे जनाः कृष्णस्याखण्डानन्दघनमूर्त्तेः, उप समीपे अचिरादेव लब्धये, महामायामिति तत्र तस्याः सामर्थ्यं सम्भावयति, भगवत एव शक्तिविशेषरूपत्वात् ॥३५॥ तु इव. उपस्थानादिव, वस्तुतस्तेषु स्नेहभरेणाशु स्वयमेव प्रादुर्भावात् सिद्धोऽर्थः। मण्यानयन-श्रीजाम्बवदनुग्रह-जाम्बवती-परिग्रहादिप्रयोजनं यस्य सः, अतएव सदारः। एवं श्रीजाम्बवतीपरिग्रहाद्यर्थमेव सत्राजिद्द्वारा निजापवादः स्वयमेवोत्थापित इति द्योतयति—प्रादुर्बभूवेति। वस्तुतः सदा द्वारकायां विद्यमानत्वात्, केवलं क्रीडाविशेषार्थमेव कदाचिदाच्छन्नत्वात्, किंवा आविर्भाववत् सहसा शीघ्रागमनात्, हरिरिति तेषां शोकहरणस्य किंवा सदारत्वादिना हर्षणेन मनोहरणस्याभिप्रायेण। अन्यत्तैर्व्याख्यातम् । तत्र हरिरित्यस्यैवं व्याख्या श्रीकृष्ण इति । यद्वा, तदनुसारेण हरिरित्यत्र पाठान्तरमनुसन्धेयम् ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततोऽन्यैश्च मणिश्रेष्ठैः पूजितो भक्तवत्सलो भगवान् तस्मै जाम्बवते परामुत्कृष्टां पुनरावृत्तिरहितां मुक्तिं ददौ दास्यामीति सङ्कल्पितवानित्यर्थः। तदैव ददाविति वा। अदृष्ट्वेति बिलं प्रविष्टस्य शौरेः पुनर्निर्गमनमदृष्ट्वा द्वारस्थाः जना द्वादशदिनानि प्रतीक्ष्य दुःखिताः पुरं द्वारकां जग्मुः ॥ ३३ ॥ निशम्येति देवक्यादयो बिलादनिर्गतं कृष्णं श्रुत्वा अशोचन् ते दुःखिताः सन्तः सत्राजितं शपन्तः कृष्णप्राप्तये महामायां दुर्गाम् उपतस्थुः अभजन् ॥ ३४-३५ ॥ तेषामिति स च कृष्णस्तेषां प्रादुर्बभूव कदा तस्या देव्या उपस्थानात् तया तान्प्रति आदिष्टा आशिषः श्रीकृष्णं द्रक्ष्यथेत्येवंविधाः येषां तेषां सतां कथम्भूतः सिद्धः साधितोर्थः मण्यानयनरूपं प्रयोजनं यस्य सः सदारः जाम्बवतीसहितः अत एव हर्षयन् ॥ ३६ ॥

श्रीबिजयध्वजतीर्थकृता पदरत्नावली

उपतस्थुः अभजन् ॥ ३५ ॥ ततः किमभूदत्राह—तेषामिति। हरिस्तेषां प्रादुर्बभूवेत्यन्वयः देव्या उपस्थानान्निषेवणात्प्रत्यादिष्टाशिषाम् अभ्यागताभ्युदयानां भवन्पूज्यः सिद्धार्थः नित्यलब्धप्रयोजनः प्रत्यादिष्टाशिषः इति पाठे ये प्रथमं नष्टकृष्णाख्याशिषोऽभवन् तेषां तुशब्दो हेत्वर्थः देव्युपस्थानाद्धेतोरित्यर्थः अनेनापदि प्राप्तायां देवताशरणं कर्त्तव्यमित्युक्तं भवति।३६-३७।

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

तेषामित्यादि, प्रत्यादिष्टाशिषा सह प्रादुर्बभूव यदैवाशीरभूत् तदैव प्रादुर्बभूवेत्यर्थः अतस्तदाशीरपेक्षानासीदित्यर्थः ॥ ३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

प्रत्यादिष्टाशिषा सह प्रादुर्बभूव, यदैवाशीरभूत्, तदैव प्रादुरभूदिति तुल्ययोगितायामाशिषः पूर्वभावित्वाभावान्न कारणत्वम् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देव्या प्रत्यादिष्टा प्रत्यक्षीभूय दत्ता या आशीः कृष्ण आयातप्राय इति तया सहैव आशिषासव इति पाठे असव इति हरेर्विशेषणम् प्राणतुल्य इत्यर्थः ॥ ३६ ॥

गूढार्थदीपिनी

शपन्तो निन्दन्तः। उपतस्थुः आराधयामासुः ॥ ३५ ॥ देव्या प्रत्यक्षीभूय तान् प्रति आदिष्टया दत्तया आशिषा आशीर्वादेन सह सः हरिः प्रादुर्बभूव ॥ ३६-३७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तेषां द्वारकौकसां देव्याः उपस्थानात् अर्चनस्थानात् प्रति आदिष्टा दत्ता या आशीः श्रीकृष्णं द्रक्ष्यथेति तयैव सह तत्क्षणमेव हरिः भक्तार्तिहरः तान् हर्षयन् प्रादुर्बभूव ॥ ३६-३८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमन्तःस्थितिमुक्त्वा बहिःस्थितिमाह **अदृष्ट्वा** निर्गममिति त्रिभिः। प्रविष्टो हि तस्मिन्नेव दिवसे समायास्यतीति तत्रत्या बहिःस्थिताः निरन्तराकाङ्क्षया भोजनादिरहिताः द्वादशदिवसपर्यन्तं स्थित्वा द्वादशाङ्गेष्वपि क्षीणेषु जना विवेकरहिताः भगवानपि शौरिरिति विशेषतस्तत्प्रभावानभिज्ञाः दुःखिताः सन्तः द्वादशाहानि प्रतीक्ष्य स्वपुरं ययुः। 'संवत्सरप्रतिमा वै द्वादशरात्रय' इति। ततो येऽपि नागताः, तेऽपि द्वारकायां स्थिताः भवन्निर्गमाभावं श्रुत्वा दुःखिता जाता इत्याह **निशम्येति**।

स्त्रीणामविवेको भूयानिति । तत्रापि पुत्रस्नेहो महानिति देवक्यादिक्रम उक्तः । त्रयो मुख्याः । अन्येऽपि सुहृदः सम्बन्धिनः ज्ञातयो गोत्रिणश्च बिलादनिर्गतं कृष्णं श्रुत्वा अशोचन् । वस्तुतत्त्वानभिज्ञाः । कृष्णो हि भक्तहितार्थमेवावतीर्णः । कथं विलम्बं कृतवानिति । एवं सर्वेषां शोकं राजसं दुःखमुक्त्वा तामसं सात्त्विकं चाह **सत्राजितं शपन्तस्त** इति । दुरात्मायं सत्राजित्, प्रसेनवन्म्रियतामिति । एवं शापे हेतुः **दुःखिता** इति । दुःखेऽपि विशिष्टो हेतुः **द्वारकौकस** इति । मथुरां परित्यज्य देशप्रान्ते द्वारकायां स्थिताः कृष्णैकशरणाः भगवत्यनागते दुःखिता भवन्तीति युक्तमित्यर्थः । द्वारकावासित्वेन तेषां शापोऽपि सत्राजिति फलिष्यतीति सूचितम् । सात्त्विकं दुःखमाह **उपतस्थुर्महामायामिति** । माया हि भगवदुद्गमे प्रतिबन्धिका भवति । भगवांश्च तस्यै वरं दत्तवान् 'अर्चिष्यन्ती'ति । अतो भगवता दत्तो वरः अवश्यं तेनैव सत्यः कर्तव्य इति देवतान्तरभजनापेक्षया भगवदाविर्भावार्थं दुर्गैवानुसन्धेया ॥ ३५ ॥ एवं भक्तानां त्रिविधं दुःखं दृष्ट्वा स्वयमाविर्भावं कुर्वन्नेव कृतकार्यः अर्धमासव्रते कृत एव स्वयमाविर्भूतः, स्ववाक्यमपि सत्यं कृतवानित्याह **तेषां तु देव्युपस्थानादिति** । प्रत्यादिष्टाः आशिषा सह असवो येन तादृशो भगवान् स्वयमेव समागतः । असुशब्दात् समासान्तः अच्प्रत्ययः । आशिषेत्यलुक् तृतीयायाः । प्रत्यादिष्टमुपदिष्टम् । प्रतिरानुगुण्ये । देव्युपस्थानात् या आशीः तया सह भगवान् प्राणानपि दत्तवानिति । अथवा । देव्युपस्थानात् प्रत्यादिष्टाशिषा कृत्वा दुर्गाया आशीर्वादेन सवो यज्ञरूपः प्रादुर्भूतः । **प्रत्यादिष्टाशिषां सवेति** पाठश्चिन्त्यः । राजानं प्रति वा । वो युष्माकं भक्तानां स कार्यकर्ता सिद्धार्थः सन् प्रादुर्भूत इति । दुर्गाया वा आशीर्निराकृत्य प्रत्यादिष्टाशिषा कृत्वा स्वयमेव सर्वकामपूरको यज्ञः प्रादुर्भूतः । सिद्धार्थः स्यमन्तकसहितः । सदारः स्त्रीसहितोऽपि । **हर्षयन् हरिरिति** । हृष्टः सर्वाभरणभूषितः । भोजनादिना च पुष्टो, नतु ग्लानियुक्तः । यतो हरिः सर्वदुःखहर्ता ॥ ३६ ॥

श्रीसुबोधिनी—सारः

बिलं प्रविष्टस्य शौरेः श्रीकृष्णस्य निर्गमं प्रत्यावर्तनमदृष्ट्वा द्वादशाऽहानि दिनानि यावत् प्रतीक्ष्य दुःखिता जनाः स्वपुरं द्वारकामाजग्मुः ॥३३॥ बिलादनिर्गतं न निःसृतं कृष्णं निशम्य श्रुत्वा देवी देवकी रुक्मिणी वसुदेवोऽन्ये सुहृदोऽशोचन् चिन्ताग्रस्ता बभूवुः ॥ ३४ ॥ दुःखितास्ते द्वारकावासिनः सत्राजितं शपंतो धिक्कुर्वतः कृष्णस्योपलब्धये प्राप्त्यर्थं दुर्गां चंद्रभागां देवीमुपतस्थुः आराधयांबभूवुः । महामायामित्यनेनेष्टदाने सामर्थ्यं सूचितम् ॥ ३५ ॥ देव्या उपस्थानात् प्रत्यादिष्टा दत्ता या आशीः कृष्णं द्रक्ष्यथेति तया सह स हरिः सदारः सस्त्रीकः सिद्धार्थः प्राप्तमनोरथः हर्षयन् तेषां प्रादुर्बभूव ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

बहिष्ठजनानां वृत्तमाह—अदृष्ट्वेति । जना द्वादशाहानि प्रतीक्ष्यापि बिलं प्रविष्टस्य शौरेः कृष्णस्य निर्गममदृष्ट्वा दुखिताः सन्तः स्वपुरं द्वारकां ययुरित्यन्वयः ॥ ३३ ॥ तन्मुखात् कृष्णं बिलादनिर्गतं निशम्य श्रुत्वा देवक्यादयोऽशोचन्नित्यन्वयः ॥ ३४ ॥ किञ्च दुःखिता द्वारकावासिनः 'म्रियतामयं दुरात्मा' इति सत्राजितं शपन्तः कृष्णोपलब्धये महामायां भगवच्छक्तिं दुर्गामुतस्थुः स्तोत्रनमस्कारपूजादिभिराराधयामासुरित्यन्वयः ॥ ३५ ॥ तेषां द्वारकावासिनां देव्या उपस्थानात् आराधनात्तया तान्प्रति आदिष्टा दत्ता या आशीः कृष्णं द्रक्ष्यथेति तया सह झटित्येव सिद्धार्थो लब्धमणिः सदारो जाम्बवतीसहितो हर्षयन् हरिः प्रादुर्बभूवेत्यन्वयः । 'असव' इति पाठे असव इन्द्रियाणि तेषां प्रेष्ठ इत्यर्थः । स च इति च्छेदे यज्ञरूप इत्यर्थः । भवदाविर्भावार्थं देवतान्तराराधनापेक्षायां देव्याराधनमेव कर्तव्यम् । "अर्चिष्यन्ति मनुष्यास्त्वां सर्वकामवरेश्वरीम्" इति स्वदत्तवरस्य भगवतैव यथार्थत्वसम्पादनस्यावश्यकत्वात् । गोपकुमारिकाणां रुक्मिण्या द्वारकौकसां च तदाराधनेन भगवत्प्राप्तिलक्षणदुर्लभफलस्य जातत्वाच्चेति ध्येयम् । सुबोधिन्यामप्येतत् स्पष्टमुक्तम् ॥ ३६ ॥

अन्वितार्थप्रकाशिका

अदृष्ट्वेति ॥ जना द्वादशाहानि प्रतीक्ष्यापि बिलं प्रविष्टस्य शौरेः कृष्णस्य निर्गममदृष्ट्वा दुःखिताः सन्तः स्वपुरं द्वारकां ययुः ॥ ३३ ॥ निशम्येति ॥ तेषां मुखात् कृष्णं बिलादनिर्गतं निशम्य देवी देवकी रुक्मिणी आनकदुन्दुभिः सुहृदः ज्ञातयश्च अशोचन् ॥ ३४ ॥ सत्राजितमिति ॥ दुःखिता द्वारकौकसः द्वारकावासिनो म्रियतामयं दुरात्मेति सत्राजितं शपन्तः कृष्णोपलब्धये महामायां भगवच्छक्तिं चन्द्रभागां नाम दुर्गामुपतस्थुः आराधयामासुः । तङभाव आर्षः । आशिषासव इति पाठे असव इति हरेर्विशेषणम् । प्राणतुल्य इत्यर्थः । स्वामिनस्तु आसव इति चिच्छिदुः । असव इन्द्रियाणि तेषां प्रेष्ठ इति ॥ ३५ ॥ तेषामिति ॥ तेषां द्वारकावासिनां देव्या उपस्थानात् आराधनात्तया तान्प्रत्यादिष्टा दत्ता या आशीः कृष्णं द्रक्ष्यथेति तया सह झटित्येव सिद्धार्थो लब्धमणिः सदारो जाम्बतीसहितो हर्षयन् हरिः प्रादुर्बभूव ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निर्गमं पुनरागमनं ॥ ३३–३५ ॥ तया दुर्गया प्रत्यादिष्टा दत्ताया आशीराशीर्वादस्तया सह हरिः **प्रादुर्बभूव** ॥३६–३८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः, अन्यैः, मणिश्रेष्ठैश्च, पूजितो जाम्बवता कृतार्हणः, भक्तवत्सलः श्रीकृष्णः, तस्मै जाम्बवते, पुनरावृत्तिवर्जितां, परां मुक्तिं, ददौ ॥ ३३ ॥ अदृष्ट्वेति ॥ बिलं प्रविष्टस्य, शौरेः श्रीकृष्णस्य, निर्गमं बिलात् पुनर्निर्गमनं, द्वादशाहानि प्रतीक्ष्यापि, अदृष्ट्वा, जना द्वारिकावासिनो लोकाः, दुःखिताः सन्तः, स्वपुरं ययुः ॥ ३४ ॥ निशम्येति । देवी देवकी, रुक्मिणी, आनकदुन्दुभिर्वसुदेवः, सुहृदः, ज्ञातयः, बिलात् अनिर्गतमबहिर्यातं, कृष्णं निशम्य, श्रुत्वा, अशोचन् शोकं चक्रुः ॥ ३५ ॥ सत्राजितमिति । दुःखिताः बिलतः कृष्णानिर्गमजन्यदुःखार्त्ताः, ते द्वारकौकसो जनाः, सत्राजितं शपन्तः सन्तः, कृष्णोपलब्धये श्रीकृष्णप्राप्त्यर्थं, दुर्गां दुर्गाख्यां, महामायां, उपतस्थुरभजन् ॥ ३६ ॥

कृष्णप्रिया

राजन् इधर गुफा के बाहर श्रीकृष्ण भगवान् जिन सभ्यों को बैठाये थे उन स्वजनों ने बारह दिन पर्यन्त बाहर बैठकर प्रतीक्षा की लेकिन जब पुरुषोत्तम बाहर नहीं आये तब खिन्न होकर वे वहाँ से द्वारिकापुरी की ओर प्रस्थान कर गये ॥ ३३ ॥ द्वारिका में विराजमान माता देवकीजी एवं पितृचरण वसुदेवजी आनक दुदुंभि जी, एवं परिजन परिवारजन परिचरजन स्वजन श्रीरुक्मिणीजी देवी आदि सर्व प्रभु गुफा से बाहर नहीं आये यह व्यथित वृत्तान्त सुनकर अधिकतर व्यथित बन गये ॥ ३४ ॥ इस दुःखद समाचार से सर्व-द्वारिकाजन अत्यंत वेदनायुक्त होकर सत्राजित को भला-बुरा सुनाने लगे पुनः श्रीकृष्ण चन्द्र भगवान् की प्राप्ति के लिये जगदम्बिका भगवती जी की आराधना करने लगे ॥ ३५ ॥ द्वारिका के प्रजाजन की आराधना से भगवती अम्बा प्रसन्न हुई और आशीर्वाद प्रदान किया। इधर भगवान् श्रीकृष्ण उसी अवसर सर्व समक्ष स्यमन्तकमणि एवं नववधू जाम्बवती के साथ सफल संकल्प होकर स्वजन वृन्द को संतुष्ट करते हुए प्रकट हो गये ॥ ३६ ॥

उपलभ्य हृषीकेशं मृतं पुनरिवागतम् । सह पत्न्या मणिग्रीवं सर्वे जातमहोत्सवाः ॥ ३७ ॥
सत्राजितं समाहूय सभायां राजसंनिधौ । प्राप्तिं चाख्याय भगवान् मणिं तस्मै न्यवेदयत् ॥ ३८ ॥
स चातिव्रीडितो रत्नं गृहीत्वावाङ्मुखस्ततः । [1]अनुतप्यमानो भवनमगमत् स्वेन पाप्मना ॥ ३९ ॥
सोऽनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः । कथं मृजाम्यात्मरजः प्रसीदेद्[2] वाच्युतः कथम् ॥ ४० ॥

कर्दमक्षमा

अन्वयः–मृतम्, पुन, आगतम्, इव, सहपत्न्या, हृषीकेशम्, मणिग्रीवम्, उपलभ्य, जातमहोत्सवाः, सर्वे, अभवन् ॥३७॥ सभायाम्, सत्राजितम्, समाहूय, सभायाम्, राजसन्निधौ, च, मणिप्राप्तिम्, आख्याय (राजसन्निधौ) भगवान्, तस्मै, मणिम्, न्यवेदयत् ॥ ३८ ॥ स, च, अतिव्रीडितः, रत्नम्, गृहीत्वा, स्वेन, एव, पाप्मना, अनुतप्यमानः, अवाङ्मुखः, स्वभवनम्, अगमत् ॥ ३९ ॥ बलवद्, विग्रहाकुलः, सः, तद्, एव, अघम्, अनुध्यायन्, आत्मरजः, कथम्, मृजामि, च, अच्युतः, कथम्, प्रसीदेत्, इति, चिन्तयामास ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

लोके जनाः कथंचिन्मृतं बन्धुं पुनरागतमुपलभंते तद्वदुपलभ्य सर्वे जातमहोत्सवा आसन्निति ॥ ३७–३८ ॥ पाप्मनाऽपराधेनानुतप्यमानः ॥ ३९ ॥ अघं दोषम् आत्मनो रजोमलमपराधमिति ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्र मृतमिवेति लुप्तोपमा बोध्या । यद्वा–मृतेर्मृतिस्थानादागतं मृतं तद्धिताणो वैकल्पिकणित्त्वाद्वृद्ध्यभाव इतो लोपे च रूपम् । हृषीकाणामीशं तमंतरेणाचेतनत्वप्रायाभिप्रायेण । मणिग्रीवमिति स्वभक्तेन जांबवता स्वकन्यादानसमये ग्रीवायां मणिधारणात् ॥ ३७ ॥ प्राप्तिं महायुद्धद्वारा । तस्मै सत्राजिते । पूर्वमुग्रसेनार्थं प्रार्थितेऽपि तस्मिंस्तस्य लिप्साराहित्यबोधनाय न्यवेदयदर्पयामास । यतो भगवान् सर्वैश्वर्यपूर्णतया तदादिषु नैरपेक्ष्यादिति भावः ॥३८॥ स च सत्राजित् । अवाङ्मुखोऽधोमुखः । ततः कृष्णात् । रत्नं मणिम् । अपराधेन मिथ्याभिशापकथनरूपेण । अनुतप्यमानः पश्चात्तापं कुर्वन् ॥ ३९ ॥ स सत्राजित् । तदेव मिथ्योक्तिलक्षणम् । बलवता श्रीभगवता तदीयैर्बलवद्भिर्वा विग्रहो मिथ्यापवादोत्थापनेन विरोधस्तेनाकुलश्चिन्तातोऽभूत् ॥ ४० ॥

---

१. अनुतप्यन् स्वभवने–विज.; सन्तप्य–प्रा. पा. । २. देदच्यु ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हृषीकाणामीशमिति तमन्तरेणाचेतनत्वप्रायताभिप्रायेण मणिग्रीवमित्यस्यान्ते निर्द्देशस्तद्ग्रीवत्वस्य सुष्ठुहर्षविषादादिकारित्वेन सर्वपर्य्यायकत्वात् ॥ ३७ ॥ सम्यक् यत्नत आहूय सभामध्ये तत्र च राज्ञ उग्रसेनस्य राज्ञां वा सन्निधौ मिथ्यापवादमार्जनार्थं सर्वलोकप्रहर्षणार्थं च सर्वप्रजासु तद्वृत्तप्रख्यापनाय तथा स्वयं प्रागुग्रसेनार्थं प्रार्थितेऽपि तस्मिस्तस्य लिप्साराहित्यबोधनाय न्यवेदयत् अर्पयामास यतो भगवान् सर्वैश्वर्य्यपूर्णतया तदादिषु नैरपेक्ष्यादिति भावः ॥ ३८ ॥ त्वर्थे चकारः सर्वेष्वन्येषु प्रकृष्टेष्वपि तस्याऽनुतापेन भेदात् ततस्तस्याः सभातः स्वेन स्वीयेनैवेति श्रीभगवतस्स्नेहस्तस्मिन्नवमानादिकम् निरस्तम् ॥ ३९ ॥ स इत्यर्द्धकम् । अनु निरन्तरं ध्यायन् एवशब्देन महार्घतया नितरां तदन्यचिन्ताराहित्यं बोध्यते बलवता श्रीभगवता किं वा बलवद्भिस्तदीयैर्विग्रहः मिथ्यापवादोत्थापनेन विरोधस्तेनाकुलश्चिन्ताव्याकुलोऽभूदिति ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हृषीकाणामीशमिति सर्वेन्द्रियोत्सवप्रवर्त्तनाभिप्रायेण, जातमहोत्सवा बभूवुः, मणिग्रोवमित्यस्यान्ते निर्द्देशः, मिथ्यापवाद-मार्ज्जनादिना श्रीकृष्ण-प्रीत्युत्पादनेन महोत्सवाधिक्यात् ॥ ३७ ॥ सम्यगाप्तजनप्रेषणादिना आहूय, सभामध्ये तत्र च राज्ञ उग्रसेनस्य राज्ञां वा सन्निधाविति मिथ्यापवादमार्ज्जनार्थं सर्व्वलोकप्रहर्षणार्थञ्च सर्व्वप्रजासु तद्वृत्तप्रख्यापनाय । तथा स्वयं प्रागुग्रसेनार्थं प्रार्थितेऽपि तस्मिस्तस्य लिप्साराहित्यबोधनार्थमिति न्यवेदयदर्पयामास, यतो भगवान् सर्व्वैश्वर्य्यपूर्णतया तस्मिन् नैरपेक्ष्यादिति भावः ॥ ३८ ॥ त्वर्थे चकारः, सर्वेष्वन्येषु प्रहृष्टेष्वपि तस्यानुतापेन भेदात्, ततस्तस्याः सभायाः सकाशात् स्वेन स्वकीये नैवेति श्रीभगवतस्तस्मिन्नवमानादिकं निरस्तम् ॥ ३९ ॥ अनु निरन्तरं ध्यायन्, एव-शब्देन महाघतया तदन्यचिन्ताराहित्यं बोध्यते । बलवता श्रीभगवता, किंवा बलवद्भिस्तदीयैर्विग्रहो मिथ्यापवादोत्थापनेन विरोधस्तेनाकुलः सन् कथमित्यादिकञ्चानुध्यायन्, अच्युत इति सदा प्रसादाच्च्युतिरहितः सन्निति भावः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

उपलभ्येति यथा लोके जना मृतं बन्धुं पुनरागतमुपलभन्ते तद्वद्धृषीकेशं तत्रापि पत्न्या सहितं मणिग्रीवायां यस्य तमुपलभ्य सर्वे जातमहोत्सवा आसन् ॥ ३७ ॥ सत्राजितमिति राज्ञ उग्रसेनस्य सन्निधौ प्राप्ति मणिलाभप्रकारमाख्याय तस्मै सत्राजिते मणिं न्यवेदयदर्पयामास ॥ ३८ ॥ सचेति स्वेन पाप्मना याञ्चावैफल्यकरणमिथ्यापवादापादनादिरूपेणानुतप्यमानः स्वगृहं जगाम ॥ ३९ ॥ स सत्राजित्तमेवार्थमपराधरूपमनुचिन्तयन् अघमिति च पाठः बलवता भगवता सह यो विग्रहो विरोधस्तेनाकुलश्च चिन्तयामासेति शेषः । चिन्ताप्रकारमेवाह—कथमिति सार्द्धेन, आत्मरजः स्वापराधं मृजाम्यपनयामि कथं वा अच्युतः प्रसन्नो भवेत् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

आख्यायोक्त्वा ॥ ३८ ॥ स्वेन पाप्मनानुतप्यन्पश्चात्तापं कुर्वन् ॥ ३९–४० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

उपलभ्येत्यादि । हृषीके इन्द्रिये जातित्वादेकवचनम् हृषीके मृते नष्टं शं कल्याणं पुनरागतमिव तम् पत्न्या सह जाम्बवत्या सह ॥ ३७–४५ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

उपलभ्य हृषीकेशमिति हृषीके इन्द्रिये जातावेकवचनम्, नष्टं शं कल्याणं पुनरागतमिवेत्यर्थः ॥ ३८–४५ ॥

इति षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मणिग्रीवमिति स्वभक्तेन जाम्बवता स्वकन्यासम्प्रदानसमये ग्रीवाय मणिधारणात् ॥ ३७–३८ ॥ अनुतप्यमानोऽनुतपन् ॥ ३९ ॥ बलवद्भिर्भगवदीयैः सह विग्रहः विरोधस्तेनाकुलोऽभूत् । अनुध्यानमाह—कथमिति सार्द्धद्वयेन ॥ ४०–४४ ॥

गूढार्थदीपिनी

न्यवेदयत् अर्पितवान् ॥ ३८ ॥ अवाङ्मुखोऽधोमुखः ततः राजसभातः पाप्मना अपराधेन ॥ ३९ ॥ स इत्यर्द्धम् । स सत्राजित् । तदेव मिथ्योक्तिलक्षणम् । अघं दोषम् ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पाप्मना अपराधेन अनुतप्यमानः अनुतपन् ॥ ३९ ॥ आत्मनो रजो मलमपराधम् ॥ ४०-४१ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः परमानन्दो जात इत्याह **उपलभ्येति**। असभ्यो दृष्टान्तो लौकिकभाषायां न दोषाय। श्वशुरेणैव स मणिः कण्ठे निबद्धः। अतस्तदनुरोधेन मणिः स्वकीय एवेति ज्ञापयन् स्त्रीसहितो मणिग्रीवः स्वयमागतः। न केवलं समागमने अपकीर्त्यभावः, किन्तु निरोधोऽप्यनेन जात इत्याह **सर्वे जातमहोत्सवा** इति। हृषीकेशत्वात्तथैव तेषु प्रेरितवान् ॥ ३७ ॥ एवमपि प्राप्य उपक्रमबलीयस्त्वार्थं समानयनार्थं प्रक्रान्त इति सत्राजितायैव दत्तवानित्याह **सत्राजितमिति**। यदादौ भगवान् विचारयति, तदेव करोति। आदौ च तस्य स्यमन्तक इति प्रवृत्तः। न केनाप्युपायेन स्वकीयं मन्यते। अत एवाग्रेऽपि न ग्रहीष्यति। निबन्धे त्वन्योऽपि हेतुरुक्तः।

सर्वात्मनान्यहृदयं न गृह्णाति हरिः स्वयम्। सर्वात्मनाऽप्रपन्नं च नाशायेव सुयोधनम् ॥ १ ॥ इति।

सभायामाह्वानम्। पश्चाद्दुरात्मा अन्यथा वक्ष्यतीति, लज्जां च जनयितुम्, तत्रापि राजसन्निधौ निर्भयम्। यथा राजापि न ग्रहीष्यतीत्याज्ञापयितुं वा। प्राप्त्युपायं प्रकारं वा सम्यगुक्त्वा तत्सत्तां दूरीकृत्य मणिं तस्मै न्यवेदयत्। यतो भगवान् स्वेच्छो, मारयितुं वा, न कोऽपि ज्ञातवान् किमर्थं दत्तवानिति। निवेदनं 'तवेदमानीतं गृहाणे'ति। ततस्तस्य कृत्यमाह **स चातिव्रीडित** इति **पञ्चभिः**। लोभाद्दण्डभयाच्च गृहीत्वा लज्जितो जातः। लोके अपकीर्तिमुत्पादितवानिति अवाङ्मुखो जातः। **ततः** पूर्वोक्तादेव हेतोः अपकीर्तिजननात्। अनुतापोऽपि तत एव। अतोऽस्य प्रायश्चित्ते परलोकशुद्धिर्भविष्यतीति ज्ञापितम्। न कोऽपि तस्य बन्धुरिति कमप्यपृष्ट्वा स्वभवनमेवागमत्। ननु रत्नं प्राप्य संतोषे कर्तव्ये कथमनुताप इति चेत्, तत्राह **स्वेन पाप्मनेति**। **देवान्तरप्रसादापेक्षया भगवदपराधो महानिति** ॥ ३९ ॥ बलवता विग्रहे आकुलः सन् तमेवार्थमनुध्यायन् जात इत्याह **सोऽनुध्यायन्निति**। अयत्नेनापि स एवार्थः ध्यातो भवति। यद्यपि विग्रहः स्वयं न कृतः, नापि करिष्यति, भगवानपि न करोति, तथापि भगवदीयैः बलवद्भिः सह विग्रहः संभविष्यतीति व्याकुलता। अयं दोषस्तदापगच्छेत्, यदि भगवान् प्रसन्नो भवेत्। तदेव विचारयति **कथं मृजामीति**। स हि देवोपासक इति तस्य प्रायश्चित्ते मतिः। **रजः** पापम्। अच्युतस्य सर्वथा नित्यधर्मस्य अवश्यंभाविनरके हेतुभूतापराधस्य कृतत्वात् तत्प्रसाद एव तदपगम इति **प्रसीदेद्वाच्युतः कथमिति** विचारयति ॥ ४० ॥

श्रीसुबोधिनीसारः

मृतमिव पुनरागतं पत्न्या स्त्रिया सह मणिकंठं हृषीकेशं श्रीकृष्णमुपलभ्य प्राप्य दृष्ट्वा इत्यन्ये सर्वे जातानंदा बभूवुः।३७। सभायां सत्राजितं समाहूय राज्ञ उग्रसेनस्य संनिधौ प्राप्तिं मणेराख्यायोक्त्वा तस्मै सत्राजिते भगवान्मणिं न्यवेदयत् अदात् ॥३८॥ रत्नं मणिं गृहीत्वाऽवाङ्मुखोऽधोवक्त्रः स च सत्राजिदतिव्रीडितः सुलज्जितः स्वेन पाप्मना दोषेणानुतप्यमानो भवनं गृहमगात्तदा ॥ ३८ तदेवाघम् अपराधम् अनुध्यायन्संचिंतयन् बलवता श्रीकृष्णेन यो विग्रहो विरोधस्तेनाकुलो व्यग्रः सोहमात्मनो रजः पापकीर्तिं कथं मृजामि शोधयामि अच्युतो हरिः कथं प्रसीदेद्वा ॥ ४० ॥

विवरणटिप्पणी

सत्राजितमित्यत्र। **सर्वात्मने**ति। अन्यस्य हृदयं यत्र तादृशं वस्तु सर्वात्मना सर्वांशेन न गृह्णाति। अतो मणिर्न गृहीतः। सत्राजिदपि स्वकीयत्वेन न गृहीतः, सर्वथा प्रपत्त्यभावादित्याहुः **सर्वात्मने**ति। सर्वात्मना अप्रपन्नं च न गृह्णाति यत इत्यर्थः। तत्र दृष्टान्तः **नाशायेवे**ति। नाशाय इव इति च्छेदः। साहाय्ययाचनार्थमागतमपि सुयोधनं नाशाय अकल्पयदिति शेषः। नत्वर्जुनवत्स्वकीयत्वेनागृह्णात्तथेत्यर्थः। **नाशायैव कलिं यथे**ति पाठेऽपि दुर्योधनस्य कलिरूपत्वादेक एवार्थः। **प्राप्त्युपाय**मिति। बिले गमनमित्यर्थः। **प्रकारं** युद्धमित्यर्थः। **सोऽनुध्यायन्नि**त्यत्र। **तमेवे**त्येवकारस्यार्थमाहुः **अयत्नेनापी**ति।

इति सप्तमाध्यायव्याख्या।

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

लोके यथा मृतं बन्धुं पुनरागतमुपलभ्य जना जातमहोत्सवा भवन्ति तथा पत्न्या सहागतं मणिग्रीवं हृषीकेशं सर्वेन्द्रियप्रवर्तकं श्रीकृष्णमुपलभ्य सर्वे द्वारकावासिनो जना जातमहोत्सवा आसन्निति शेषेणान्वयः ॥ ३७ ॥ भगवान् श्रीकृष्णः सभायां राज्ञ उग्रसेनस्य सन्निधौ सत्राजितं समाहूय प्राप्तिं मणिप्राप्तिप्रकारं चाख्याय तस्मै सत्राजिते मणिं न्यवेदयत् अर्पयामास ॥ ३८ ॥ स च सत्राजितः स्वेन पाप्मना भगवदाज्ञोल्लङ्घनमिथ्यापवादापादनरूपेण अतिव्रीडितः, अत एव अवाङ्मुखः अनुतप्यमानः

ततः राजसभान्तः स्वभवनमभ्यगमदित्यन्वयः ।। ३९ ।। बलवता भगवता सह यो विग्रहो विरोधस्तेनाकुलः स सत्राजित् तदेवाघं स्वकृतापराधं अनुध्यायन् तथा आत्मरजः स्वापराधं कथं मृजामि कथमपनयामि ? अच्युतः कृष्णः कथं वा प्रसीदेत् प्रसन्नो भवेत् ? ।। ४० ।।

अन्वितार्थप्रकाशिका

उपलभ्येति । लोके यथा मृतं बन्धुं पुनरागतमुपलभ्य जना जातमहोत्सवा भवन्ति तथा पत्न्या सहागतं मणिग्रीवं हृषीकेशं श्रीकृष्णमुपलभ्य सर्वे द्वारकावासिनो जना जातमहोत्सवा आसन् ।। २७ ।। सत्राजितमिति । भगवान् श्रीकृष्णः सभायां राज्ञ उग्रसेनस्य सन्निधौ सत्राजितं समाहूय प्राप्तिं मणिप्राप्तिप्रकारं चाख्याय तस्मै सत्राजिते मणिं न्यवेदयत् अर्पयामास ।। ३८ ।। स चेति । स च सत्राजितः स्वेन पाप्मना भगवदाज्ञोल्लङ्घनमिथ्यापवादापादनरूपेणातिव्रीडितः अतः एवावाङ्मुखः अनुतप्यमानः रत्नं गृहीत्वा ततः राजसभातः स्वभवनमभ्यगमत् ।। ३९ ।। स इति अर्द्धम् । स सत्राजित् तदेवाघं स्वकृतापराधम् अनुध्यायन् बलवता बलवद्भिर्भवत्पक्षगैर्वा सह यो विग्रहो विरोधस्तेनाकुलोऽभूदिति शेषः ।। ४० ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अवाङ्मुखोऽधोमुखः स्वकीयेन पाप्मना । कृष्णे मिथ्याभिशापदानरूपेण दोषेण ।। ३९ ।। अघं अपराधं । आत्मनः स्वस्य रजोदोषं ।। ४० ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तेषामिति । सिद्धः साधितः अर्थो मण्यानयनरूपं प्रयोजनं येन सः, सदारोऽङ्गनासहितः, हरिः श्रीकृष्णः, देव्युपस्थानाद्धेतोः, प्रत्यादिष्टा तया आदिष्टा दत्ता या आशीः, कृष्णं द्रक्ष्यथेत्येवंरूपा तया सह, तेषां तु तेषां जनानां पुरत एवेत्यर्थः । हर्षयंस्तानानन्दयन् सन्नेव, प्रादुर्बभूव ।। ३७ ।। उपलभ्येति । मृत्वा पुनः इह आगतं तत्रापि, पत्न्या सह आगतं, मणिः ग्रीवायां यस्य तं हृषीकेशं श्रीकृष्णं, उपलभ्य सर्वे जनाः, जातमहोत्सवाः, आसन् । लोके यथा जनाः मृतं बन्धुं पुनरागतं सन्तमुपलभ्य संजातमहोत्सवा भवन्ति तद्वत् एतेऽभवन्नित्यर्थः ।। ३८ ।। सत्राजितमिति । भगवान् श्रीकृष्णः, सभायां राजसंनिधौ, सत्राजितं समाहूय, प्राप्तिं मणिलाभप्रकारं, आख्याय च, तस्मै सत्राजिताय, मणिं न्यवेदयत् समर्पयामास ।। ३९ ।। स चेति । स्वेनात्मीयेन, पाप्मना मिथ्यापवादारोपणरूपाघेन, अनुतप्यमानः, स च सत्राजिदपि, व्रीडितः संजातलज्जः, अत एव, अवाङ्मुखो न्यग्वदनः सन्, ततो राजसदसः सकाशात्, भवनं स्वगृहं, अगमत् ।। ४० ।।

कृष्णप्रिया

श्रीजाम्बवती देवी एवं स्यमन्तकमणि के साथ प्रकट हुए भगवान् श्रीकृष्ण का दर्शन पाकर सर्व स्वजन परमानन्द की अनुभूति करने लगे और महोत्सव मनाने लगे ।। ३७ ।। पुन पूर्ण-कृपालु पूर्ण-पुरुषोत्तम श्रीकृष्ण ने राजसभा में जहाँ उग्रसेनजी विराजमान थे वहाँ श्रीसत्राजितजी को बुलाया । सर्व समक्ष भगवान श्रीकृष्ण ने मणि का साङ्गोपाङ्ग सुनाया और स्यमन्तक मणि उनके करकमलों में पधराया ।। ३८ ।। श्रीसत्राजित लज्जित हो गये । स्यमन्तक मणि ले ली किन्तु उनका मुख नीचे की ओर हो गया । अपने अपराध पर पूर्णतया परिताप करने लगा । शिथिल-चित्त एवं दीन-चित्त परिश्रम से अपने निवास पहुँचे ।। ३९ ।। अपनी नजरों के सामने निरन्तर अपना अपराध दीख पड़ता था भगवान् के सामने या बलवान के साथ अपराध करने के कारण सतत् भयभीत रहता था । अपराध समार्जन करे इसके लिये दिन रात उपाय खोजता रहा था । भगवान श्रीकृष्ण कैसे प्रसन्न हो यह चिन्तन था ।। ४० ।।

किं कृत्वा साधु मह्यं स्यान्न शपेद् वा जनो यथा । अदीर्घदर्शनं क्षुद्रं मूढं[1] द्रविणलोलुपम् ।। ४१ ।।
दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च । उपायोऽयं समीचीनस्तस्य शान्तिर्न चान्यथा ।। ४२ ।।
एवं व्यवसितो बुद्ध्या सत्राजित् स्वसुतां शुभाम् । मणिं च स्वयमुद्यम्य कृष्णायोपजहार ह ।। ४३ ।।
तां[2] सत्यभामां भगवानुपयेमे यथाविधि । बहुभिर्याचितां शीलरूपौदार्यगुणान्विताम् ।। ४४ ।।
भगवानाह न मणिं प्रतीच्छामो वयं [3]नृप । [4]तवास्तां देवभक्तस्य[5] वयं च फलभागिनः ।। ४५ ।।

इति श्रीमद्भागवते महापुराणे[6] दशमस्कन्धे[7] स्यमन्तकोपाख्याने [8]षट्पञ्चाशत्तमोऽध्यायः ।। ५६ ।।

---

१. मूढं मांधिग्–वीर. ; धिङ्मां मूढं–विज. । २. तां–विज.; सः–श्रीधर. टि. । ३. तव–प्रा. पा. । ४. भवांस्तु–प्रा. पा. ; तवास्तु–विज. । ५. श्च–प्रा. पा. । ६. पारमहंस्यां संहितायां–प्रा. पा. । ७. न्धे स्यमन्तकाहरणं–प्रा. पा. ; न्धे उत्तरार्द्धे स्य–प्रा. पा. । ८. षष्ठितमोऽध्यायः–विज. ।

कर्दमक्षमा

अन्वयः—किम्, कृत्वा, मह्यम्, साधु, स्यात्, जनः, यथा, अदीर्घदर्शनम्, अर्थलोलुपम्, मूढम्, क्षुद्रम्, मह्यम्, कथम्, न, शपेत्, इति चिन्तयामास ॥ ४१ ॥ तस्मै, स्त्रीरत्नम्, दुहितरम्, च, रत्नम्, एव, दास्ये, अयम्, उपायः, समीचीनः, तस्य, अन्यथा, शान्तिः, न, भविष्यति ॥ ४२ ॥ एवम्, बुद्ध्या, व्यवसितः, सत्राजित्, शुभाम्, स्वसुताम्, च, मणिम्, स्वयम्, उद्यम्य, कृष्णाय, उपजहार, ह ॥ ४३ ॥ भगवान्, बहुभिः, याचिताम्, शीलरूपौदार्यगुणान्विताम्, ताम्, सत्यभामाम्, यथाविधि, उपयेमे ॥ ४४ ॥ नृप ! भगवान्, आह—सत्राजित् ! वयम्, मणिम्, न, प्रतीच्छामः, अयम्, मणिः, देवभक्तस्य, तव, अस्तु, च, वयम्, फलभागिनः, भविष्यामः ॥ ४५ ॥

इति श्रीभागवते दशमस्कन्धे निरोधलीलायामुत्तरार्द्धे सत्यभामापरिणये षट्पञ्चाशत्तमाऽध्याये अन्वयाः समाप्ताः ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किं कृत्वा कस्मिन्कृते इत्यर्थः । साधु भद्रम् । अदीर्घदर्शनमविचारकं माम् । क्षुद्रं कृपणं मूढं मंदमतिम् ॥ ४१ ॥ एवं ध्यायन्नुपायं निश्चिनोति—दास्य इति । स्त्रीरत्नं दुहितरं तावद्दास्यामि तदनन्तरं पारिबर्हत्वेन रत्नमपीति ॥ ४२-४३ ॥ बहुभिः कृतवर्मादिभिः ॥ ४४ ॥ मणिं न प्रतीच्छामो न स्वीकुर्मः देवः सूर्यस्तद्भक्तस्येति कटाक्षः फलभागिन इति तवापुत्रत्वात्त्वदीयं धनमस्माकमेवेति गूढोऽभिप्रायः ॥ ४५ ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे श्री० टीकायां षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति—उभयोरव्ययत्वाद्यथेच्छमर्थ इति भावः । मह्यं मम । अविचारकं भविष्यज्ज्ञानहीनम् । अनुध्यानमाह—सार्धद्वयेन ॥ ४१ ॥ एवमुक्तरीत्या । तावदादौ । तस्य अपराधस्य, कृष्णस्य, वा । ननु त्वद्दुहित्रा कथं तस्य प्रसादस्स्याद्येन शांतिर्भवेदित्यत आह—स्त्रीरत्नमिति । रत्नञ्च स्यमंतकम् । तस्याच्युतस्य । शांतिश्च दुःखोपशमः । किं वा-मदपराधस्य शांतिरुपशमः, अन्यथा मरणादिनापि प्रकारेण नैव शांतिः ॥ ४२ ॥ एवम् इति । स्वसुतां सत्यभामाम् । एतावल्लीलापरिपाटीफलं मुख्यमेतदेवेत्याह—एवं कथमित्यादिप्रकारेण । वसितः कृतनिश्चयः । शुभां सर्वोत्तमाम् । श्रीवसुदेवादिषु प्रार्थनयोद्यमं कृत्वा उपजहार ददौ ॥ ४३ ॥ उपयेमे विवाहितवान् । सत्यभामाख्यां यथाविध्युपयेम इति जांबवतीमपि गृहमानीयोपयेमे, किन्तु तद्वत्पितृकुलाभावान्न तदीयोचित क्रियेति भावः । तस्या वैशिष्ट्यमाह—बहुभिरिति । तत्र हेतुः—शीलं सुस्वभावः, शीलरूपयोरौदार्यं महत्त्वं, तेन तदनुगतैरन्यैर्विनयादिगुणैश्चान्विताम् । बहुभिरिति वक्ष्यमाणस्य कृतवर्मादिभिर्वैरस्य कारणं ध्वनितम् ॥४४॥ कटाक्ष इति—न हि देवभक्ता असत्यवादिनोऽतिलुब्धाश्च सन्तीति भावः । हरिवंशे तु तस्य पुत्रा ये उक्तास्तदन्तसूचनायोक्तम्—वयं न फलभागिन इति, कल्पांतरापेक्षा हरिवंशोक्तिः । वयमिति—बलदेवाद्यपेक्षयास्माकं कोऽपि न गृह्णीयादित्यर्थः । हे नृपेति—तेनैव निजजनान्पालयेति कटाक्षः । फलभागिन इति भवतो मणिना यत्फलं दृष्टमदृष्टं वा श्रेयो भवेत्तत्परमांतरंगत्वादस्मास्वपि पर्यवस्येदिति वाक्यार्थः ॥ ४५ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे उत्तरार्द्धे षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अनुध्यानमेवाह—कथमित्यादिसार्द्धद्वयेन । तत्र प्रथमं सार्द्धकम् अच्युतः स्वभावादच्युतत्वेन तत्संज्ञः जनः सर्वलोकः शापयोग्यतामनुध्यायति—अदीर्घेति । मामिति शेषः । तत्र तावदेतादृशं रत्नं मर्त्यैरस्माभिर्ग्राह्यमेव नेत्याह—अदीर्घेति, लब्धं च श्रीभगवत्येव समर्पयितुं योग्यमित्याह—क्षुद्रमिति । हन्त तेन स्वयं प्रार्थितेऽपि तस्मिन् विमुखोऽभवं आपतिते चानर्थे तमेवादूषयमित्याह—मूढमिति । सर्वत्र हेतुः द्रविणलोलुपमिति ॥ ४१ ॥ ननु, त्वद्दुहित्रा कथं तस्य प्रसादः स्याद्येन शान्तिर्भवेदित्यत आह—स्त्रीरत्नमिति । रत्नं च स्यमन्तकं तस्याच्युतस्य शान्तिश्च दुःखोपशमः किं वा तस्य मदपराधस्य शान्तिरुपशमः अन्यथाऽन्येन मरणादिनाऽपि प्रकारेण नैव शान्तिः ॥ ४२ ॥ एतावल्लीलापरिपाटीफलम् मुख्यमेतदेवेत्याह—एवमिति एवं कथमित्यादिप्रकारेण व्यवसितः कृतनिश्चयः शुभां सर्वथोत्तमां श्रीवसुदेवादिषु प्रार्थनयोद्यमं कृत्वा उपजहार स इत्यत्रोपजहारेति पाठः क्वचित् ॥ ४३ ॥ सत्यभामाख्यां यथा विध्युपयेम इति जाम्बवतीमपि गृहमानीयोपयेमे किं तु तद्वत् पितृकुलाभावान्न तदीयोचितक्रियेति भावः । तस्य वैशिष्ट्यमप्याह—बहुभिरिति । तत्र हेतुः शीलं सुस्वभावः शीलरूपयोरौदार्य्यं महत्त्वं तेन तदनुगतैर्गुणैश्चान्यैरन्वितां बहुभिर्याचितामिति वक्ष्यमाणस्य कृतवर्मादिभिः सह वैरस्य कारणमपि ध्वनितम् ॥ ४४ ॥ वयमिति बलदेवाद्यपेक्षया अस्माकं कोऽपि न गृह्णीयादित्यर्थः । हे नृपेति एतेनैव निजजनान् पालयेति कटाक्षः फलभागिन इति भवतो मणिना यत्फलं दृष्टमदृष्टं वा श्रेयो भवेत् तत्परमान्तरङ्गत्वात् अस्मास्वपि पर्य्यवस्येदिति वाच्योऽर्थः व्यङ्ग्यस्तु तैरुद्दिष्ट एव ॥४५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

जनः सर्व्वलोकः शापयोग्यतामनुध्यायति—अदीर्घेति। विशेषणानामेषां यथोत्तरं शापहेतुत्वे श्रैष्ठ्यम्, यद्वा, पूर्वपूर्वस्मिन्नुत्तरोत्तरस्य हेतुत्वमूह्यम् ॥ ४१ ॥ ननु त्वद्दुहित्रा कथं तस्य प्रसादः स्यात्, येन शान्तिर्भवेदित्यत आह—स्त्रीरत्नमिति। रत्नञ्च स्यमन्तकम्, तस्याच्युतस्य शान्तिः सुखम्, किंवा तस्य मदपराधस्य शान्तिरुपशमः, अन्यथा अन्येन मरणादिनापि प्रकारेण नैव शान्तिः ॥ ४२ ॥ व्यवसितः कृतनिश्चयः, शुभां सर्व्वथोत्तमाम्, स्वयमेवोद्यम्य श्रीवसुदेवादिषु बहुधा काकुप्रार्थनयोद्यमं कृत्वा ज्ञातित्वेन मणिसम्बन्धादिना वा तस्यां श्रीभगवत्प्रार्थनाद्यभावात् स महापराधी ॥ ४३ ॥ सत्यभामाख्याम्, भगवानशेषैश्वर्य्ययुक्तः, अत एव तां यथाविध्युपयेमे, अनेन श्रीजाम्बवत्या विवाहः, त्वरया द्वारकागमनात्, यद्वा, तत्प्रीतये तद्विलान्तरेव शीघ्रविवाहेन श्रीदेवक्याद्यभावाद्यथाविधि न सम्पन्न इति सूच्यते। तस्यां श्रीभगवद्योग्यतां प्रदर्शयन्माहात्म्यमाह—बहुभिरिति। तत्र हेतुः—शीलेति, औदार्य्यं वदान्यत्वम्, यद्वा, शीलरूपयोरौदार्य्यं महत्त्वम्, तेन गुणैश्चान्यैरन्विताम्, बहुभिर्याचितामिति वक्ष्यमाणस्य कृतवर्म्मादिभिः सह वैरस्य कारणमपि ध्वनितम् ॥ ४४ ॥ वयमिति श्रीबलदेवाद्यपेक्षया, अस्माकं कोऽपि न गृह्णीयादित्यर्थः, यद्वा, मण्यनपेक्षायां निजगौरवात्, अग्रे च सर्वफलभागितायाम्, हे नृपेति एतेनैव निजजनान् पालयेति कटाक्षः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किं कृत्वा कस्मिन्कर्मणि कृत इत्यर्थः। साधु भद्रं स्यात् कथं च मां जनो न शपेत् मां धिक् अहं निन्द्य इत्यर्थः। तत्र हेतुं वदन्नात्मानं विशिनष्टि, अदीर्घदर्शनं दूरविचारानभिज्ञं मूढं मन्दमतिं वित्तैकासक्तम् ॥ ४१ ॥ इत्थं विचार्य निश्चिनोति—दास्य इति। स्त्रीरत्नं दुहितरं रत्नं स्यमन्तकं च कृष्णाय दास्ये दास्यामि अन्यथा यदि न दास्ये इत्यर्थः तस्य कृष्णस्य शान्तिश्चित्तसमाधिर्न भवेत् ॥ ४२ ॥ एवमिति बुद्ध्या व्यवसितः निश्चिन्वन् शुभां शुभलक्षण स्वसुतां सत्यभामां मणिं स्यमन्तकं च उद्यम्योद्धृत्यादाय वा कृष्णाय समर्पयामास ॥ ४३ ॥ तामिति उपयेमे विवाहितवान् कथम्भूतां बहुभिः कृतवर्मशतधन्वादिभिर्याचितां रूपादिभिरन्वितां च तत्र रूपं सौष्ठवं शीलं सुस्वभावः गुणा आदिमकरुणादयः ॥ ४४ ॥ भगवानिति—उक्तिमेवाह नमणिमिति। हे नृप! सत्राजित! मणिं न प्रतीच्छामः न प्रतिगृह्णीमः किं तु स्त्रीरत्नमेव प्रतीच्छामः देवभक्तस्य सवितृभक्तस्य तवैव मणिरास्तां तिष्ठतु वयं तु केवलं फलभागिनः दुर्भिक्षादिशान्तिरूपफलभागिनः यद्वा, तवापुत्रत्वात्त्वदीयन्धनमस्माकमेवेत्यन्ततः फलभागिन इत्यर्थः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मह्यं मम अदीर्घदर्शनं भविष्यज्ज्ञानहीनम् ॥ ४१ ॥ तस्य पापस्य ॥ ४२–४४ ॥ फलभागिनः प्रयोजनांशमेव स्वीकुर्मः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

(विजयध्वजतीर्थरीत्या षष्टितमः) ॥ ६० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

देवः सूर्यस्तद्भक्तस्य। फलभागिन इति तवापुत्रत्वात्त्वदीयं धनमस्माकमेवेति न्यायो ध्वनितः ॥ ४५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। षट्पञ्चाशत्तमोऽध्यायो दशमेऽजनि सङ्गतः ॥ ५६ ॥

गूढार्थदीपिनी

कथमिति सार्द्धम्। आत्मरजः स्वापराधम्। मह्यं मम। साधु भद्रम्। अदीर्घदर्शनं परिणामाविदम् ॥ ४१ ॥ पारिबर्हत्वेन रत्नं स्यमन्तकमपि ॥ ४२ ॥ व्यवसितः कृतनिश्चयः। उपजहार समर्पयामास ॥ ४३ ॥ बहुभिः कृतवर्मादिभिः। उपयेमे विवाहितवान् ॥ ४० ॥ न प्रतीच्छामो न गृह्णीमः। फलभागिन इति। तवापुत्रत्वात्त्वदीयं धनमस्माकमेवेति गूढाभिसन्धिः ॥४५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तस्याऽपराधस्य ॥ ४२ ॥ उपजहार समर्पयामास ॥ ४३ ॥ बहुभिः कृतवर्मादिभिः ॥४४॥ न प्रतीच्छामः न स्वीकुर्मः देवभक्तस्य सूर्यभक्तस्य तवास्ताम् फलभागिनश्च वयमेव त्वदीयत्वादेवेति भावः ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यथा वाक्येन अपकीर्तिर्जाता । अधुना क्रियया कथं कीर्तिर्भविष्यतीति तदाह **किं कृत्वे**ति । मास्तु वा कीर्तिः, जनो लोकः **यथा न शपेत्** । शापे हेतुर्वाग्दोष एव मम, न त्वन्यदिति । स्वदोषाननुवदति **अदीर्घदर्शन**मिति । स्यमन्तकेन वचनेन वा इष्टमनिष्टं वा भविष्यतीति दीर्घदर्शनं कर्तव्यम्, तन्न कृतमिति सात्त्विको दोषः । तत्रापि हेतुः **क्षुद्र**मिति । अल्पोऽहं राजसः । महान्तो हि गम्भीरा भवन्ति । किञ्च । प्रथमवाक्योल्लङ्घनमेव मम दोषः पतितः । तत्र हेतुः **द्रविणलोलुप**मिति ॥ ४१ ॥ एवं दोषत्रये कः प्रतीकार इति चिन्तायां क्रियमाणायां निमित्तभूतो मणिरेव देय इति स्वस्य स्फुरितः । तदा सूर्यः । न मणिर्देयः, अपि तु देयत्वात् कन्यैव देयेति । तर्ह्युभयं देयम्, तथा सति भगवानपि संतुष्टो, लोका अपि न वाच्यं वदिष्यन्ति इति निश्चित्य, स्वाध्यवसायमाह **दास्ये दुहितर**मिति । **तस्मै** प्रसिद्धाय । सर्वथा ग्रहीष्यतीत्यत्र हेतुः **स्त्रीरत्न**मिति । यथा जाम्बवान् कायिकमपराधं कृत्वापि मणिं दुहितरं च दत्वा कृतार्थो जातः, एवमहमपि भविष्यामीत्यभिप्रायेणाह **रत्नमेव चे**ति । नन्वन्यः भक्तिमार्गानुसारी उपायः कथं न क्रियते, तत्राह **उपायोऽयं समीचीन** इति । व्यवहारे अस्मिन्नर्थे अयमेवोपायः समीचीनः, अन्यथा तस्य शान्तिर्न भविष्यतीति । स्वस्यार्धदुर्बुद्धिः, भवेदेवं यदि भगवान् (न) मणिं गृह्णीयात्, सर्वथा प्रपन्नता च न कृतेति ॥४२॥ न केवलमेवं विचारितवान्, किन्तु कृतवानित्याह **एवं व्यवसित** इति । बुद्ध्यैव, न तु कश्चित्पृष्टः । **शुभां** शोभनरूपाम् । विवाहे समलङ्कृतां स्वयं गृहे नीत्वा दोषपरिहाराय कृष्णाय सदानन्दरूपाय उपजहार । हेत्याश्चर्यं, कथमेवं कृतवानिति ॥ ४३ ॥ ततो भगवानेकं गृहीतवान्, एकं नेत्याह द्वाभ्याम् । **तां सत्यभामा**मिति । सत्येनैव भासत इति सत्यरूपा कान्तिरूपा च । यद्यपि तेन निवेदनमेव कृतम्, तथापि स्वयं यथाविधि उपयेमे । अन्यथा अन्यस्मै देया पतिष्यतीति । तत्र हेतुः **बहुभिर्याचिता**मिति । सा हि पूर्वमन्यस्मै सन्दिग्धा प्रतिश्रुता । अतो विवादास्पदेति यथाविध्येव विवाहः कर्तुमुचितः । किञ्च । गुणा अपि तस्यां सन्तीत्याह **शीले**ति । शीलमन्तःकरणधर्म इन्द्रियाणां वा क्रियारूपम् । रूपं शरीरस्य । औदार्यमन्तःकरणस्य । एवमुत्कृष्टैर्गुणैरन्विताम् ॥ ४४ ॥ एकं गृहीत्वा द्वितीयं प्रत्याचष्टे **भगवानाहे**ति । ईश्वरत्वान्नात्र संनियोगशिष्टन्यायो वक्तुं शक्यः । **न मणिं प्रतीच्छाम** इति । विवाहे तु अहमेव प्रयोजकः । मणौ तु सर्वसम्मतिरपेक्ष्यत इति । अत एव **वय**मिति बहुवचनम् । **नृपे**ति परीक्षित्संबोधनं **भगवानाहे**ति वाक्ये संबध्यते, न तु भगवदुक्ते । राजानो हि तथा वदन्तीति ज्ञापनाय । किञ्च । द्वयं समर्पितम् । तत्रैकं ममास्तु, एकं च तवास्त्वित्याह **तवास्त्वि**ति । तत्र हेतुः **देवभक्तस्ये**ति । अन्यथा सूर्यः क्रोधं करिष्यतीति भावः । तथापि निवेदितं कथं त्यज्यत इत्याशङ्क्याह **वयं च फलभागिन** इति । मणिफलमस्माकमपि भविष्यति । श्वशुरस्य धनसम्पत्तौ जामातैव भोक्ता भवतीति । चकारात् कश्चित्समुच्चितः । सत्राजितस्तु स्वात्मानं समुच्चिनोतीति प्रत्ययः । भगवदभिप्रायस्त्वक्रूरः । तस्मै पूर्वं तेन कन्या प्रतिश्रुता । उभयग्रहणे तस्य दुःखं भविष्यतीति भक्तहितं भक्तिमार्गं च सत्यं कर्तुं तथोक्तवानित्यर्थः ॥ ४५ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे सप्तमोऽध्यायः ॥ ७ ॥

श्रीसुबोधिनी–सारः

किं कृत्वा मह्यं मम साधु भद्रं स्यात् अदीर्घम् अल्पं दर्शनं ज्ञानं यस्य तं क्षुद्रं कृपणं द्रविणे धने लोलुपं लुब्धं मूढं मां यथा जनो न निंदेत् ॥ ४१ ॥ उपायं निश्चित्याह । तस्मै श्रीकृष्णाय स्त्रीरत्नं दुहितरं पुत्रीं रत्नं मणिं चाहं दास्यामि अयमुपायः समीचीनः साधुः तस्य दोषस्यान्यथा प्रकारांतरेण शांतिर्न च ॥ ४२ ॥ एवं व्यवसितः कृतनिश्चयो बुद्ध्या सत्राजित शुभां कल्याणीं स्वसुतां स्वकन्यां मणिं च स्वयमुद्यम्य पुरुषार्थं कृत्वा कृष्णाय समर्पयामास ह स्फुटम् ॥ ४३ ॥ शीलादिसंपन्नां बहुभिर्याचितां संप्रार्थितां तां सत्यभामां भगवान् यथाविधि उपयेमे परिणिन्ये ॥ ४४ ॥ हे नृप मणिं वयं न प्रतीच्छामो नेच्छामः देवस्यार्कस्य भक्तस्य तव स मणिरास्तां वयं फलभोक्तारः स्म इत्यनेन सत्राजितोनपत्यत्वं सूचितम् ॥ ४५ ॥

इति श्रीमद्भा० दशमस्कन्धे उत्तरार्द्धे सुबोधिन्यां टीकायां षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किं कृत्वा मह्यं मम साधु भद्रं स्यात् ? अदीर्घदर्शिनं अग्रिमफलानभिज्ञं क्षुद्रं कृपणं मूढं मन्दमतिं द्रविणलोलुपं वित्तासक्तं मां जनो वा यथा न शपेत् न निन्देत् स उपायः क इति च ध्यायन् ॥ ४१ ॥ तस्मै कृष्णाय स्त्रीरत्नं स्वदुहितरं रत्नं

स्यमन्तकं च दास्ये दास्यामि । अवमेव समीचीनो विरोधशान्त्युपायः, अन्यथा एतद्दानं विना तस्य विरोधस्य शान्तिर्न भविष्यति ॥ ४२ ॥ बुद्ध्या एवं व्यवसितः कृतनिश्चयः सन् शुभां शुभलक्षणसम्पन्नां स्वसुतां सत्यभामां मणिं च स्वयमेव उद्यम्य उद्यमं कृत्वा कृष्णाय उपजहार समर्पयमास । भगवल्लीलाया आश्चर्यं सूचयति—हेति ॥ ४३ ॥ बहुभिः कृतवर्मशतधन्वादिभिर्याचितामपि तां सत्यभामां भगवान् यथाविधि विवाहविधानरीत्या उपयेमे विवाहितवान् । याचने विवाहे च हेतुमाह—शीलादिगुणैरन्वितामिति । शीलं सुस्वभावः, रूपं सौन्दर्यम्, औदार्यं मुक्तहस्तता ॥ ४४ ॥ परिक्षितं सम्बोधयति—हे नृपेति । वयं मणिं न प्रतीच्छामः न स्वीकुर्मः, देवः सूर्यस्तद्भक्तस्य तवैव मणिरास्तां तिष्ठतु, तव च अपुत्रत्वात् तत्फलधनभागिनस्तु वयमेवेति सत्राजितं प्रति भगवान् आहेत्यन्वयः ॥ ४५ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीकाबालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने । षट्पञ्चाशत्तमोऽगाद्वृत्तिं च सत्यभामया ॥
कृष्णस्य जाम्बवत्या च विवाहस्य निरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

कथमिति सार्द्धम् । अहम् आत्मरजः स्वापराधं कथं मृजामि कथमपनयामि । श आर्षः । अच्युतः कृष्णः कथं वा प्रसीदेत् प्रसन्नो भवेत् । किं कृत्वा कस्मिन् कृते मह्यं मम साधु भद्रं स्यात् । समानकर्तृकताभावः सोढव्यः । अदीर्घदर्शनम् अग्रिमफलानभिज्ञं क्षुद्रं कृपणं मूढं मन्दमतिं द्रविणलोलुपं वित्तसक्तं मां जनो वा यथा न शपेत् न निन्देत् तथा किं कार्यम् ॥ ४१ ॥ दास्य इति । तस्मै कृष्णाय स्त्रीरत्नं स्वदुहितरं तत्पारिबर्हत्वेन रत्नं स्यमन्तकं च दास्ये दास्यामि । अयमेव समीचीनो विरोधशान्त्युपायः । अन्यथा एतद्दानं विना तस्य विरोधस्य शान्तिर्न भविष्यति ॥ ४२ ॥ एवमिति । बुद्ध्या एवं व्यवसितः कृतनिश्चयः सन् शुभां शुभलक्षणसम्पन्नां स्वसुतां सत्यभामां मणिं च स्वयमेव उद्यम्य उद्यमं कृत्वा कृष्णाय उपजहार समर्पयामास ॥ ४३ ॥ तामिति । बहुभिः कृतवर्मशतधन्वादिभिर्याचितामपि शीलरूपौदार्यगुणान्वितां स्त्यभामां भगवान् यथाविधि विवाहविधानरीत्या उपयेमे विवाहितवान् । एवं जाम्बवतीमपि गृहमानीयोपयेमे इति ज्ञेयम् ॥ ४४ ॥ भगवानिति । हे नृप ! भगवान् सत्राजितमाह स्म वयं मणिं न प्रतीच्छामः न स्वीकुर्मः । देवः सूर्यस्तद्भक्तस्येति कटाक्षः । तवैव मणिरास्तां तिष्ठतु । तव चापुत्रत्वात् तत्फलभागिनस्तु वयमेवेति ॥ ४५ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्षुद्रमल्पमतिं ॥ मूढं मूर्खं ॥ ४१ ॥ इत्थं चिंतयित्वा तच्छमनोपायं निश्चिनोति दास्ये इति स्त्रीरत्नं सत्यभामां स्वकन्यां पारिबर्हत्वेन रत्नं स्यमंतकमपि तस्यापराधस्य ॥४२॥ उद्यम्य विवाहोद्यमं कृत्वा उपजहार ददौ ॥४३॥ बहुभिः कृतवर्माद्यैः ॥४४॥ मणिं न प्रतीच्छामो नांगीकुर्मः देवभक्तस्य सूर्योपासकस्य तवगेहे ॥ आस्तां वयं च फलभागिनः । तववसुताभावात् तावकस्य मणिजन्यधनरूपफलस्य भागिनो भोक्तारः ॥ ४५ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने स्यमंतकोपाख्याने सत्यभामोद्वाहनामा षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति ॥ वलवद्विग्रहाकुलः, स सत्राजित्, तत् स्वकृतं, अघं पापमेव तमेवार्थमित्यपि पाठः । अनुध्यायन्, आत्मरजः स्वापराधं, कथं मृजामि । अच्युतो वा श्रीकृष्णोऽपि, कथं प्रसीदेत्, इति चिन्तयामासेति शेषः ॥ ४१ ॥ किं कृत्वेति ॥ किं कृत्वा कस्मिन् कर्मणि कृते सतीत्यर्थः । मह्यं मम, साधु भद्रं स्यात् । अदीर्घदर्शनं दूरविचारानभिज्ञं, मूढं मन्दमतिं, द्रविणलोलुपं वित्तोपार्जनैकासक्तं, अत एव, क्षुद्रमतिक्षुद्रतोपेतं, मां जनः, यथा वा, न शपेत् । तत् कथं स्यादिति शेषः ॥ ४२ ॥ इत्थं विचार्य निश्चिनोति ॥ दास्य इति ॥ तस्मै श्रीकृष्णाय, स्त्रीरत्नं स्त्रीजातिषु रत्नरूपां, दुहितरं पुत्रीं, रत्नं मणिं च, दास्ये एव । अयं उपायः, समीचीनः । अन्यथा प्रकारान्तरेण, तस्य मत्कृताघस्य, शान्तिः, न च न भवेदेव ॥ ४३ ॥ एवमिति ॥ एवमित्थं, बुद्ध्या व्यवसितः कृतनिश्चयः, सत्राजित्, शुभां शुभलक्षणान्वितां, स्वसुतां सत्यभामां, मणिं स्यमन्तकं च, स्वयं उद्यम्य प्रदातुमुद्योगं कृत्वा, कृष्णाय, ह स्फुटं यथा तथैव, उपजहार अर्पयामास ॥४४॥ तामिति ॥ भगवान् श्रीकृष्णः, बहुभिः कृतवर्मशतधन्वप्रभृतिभिः, याचितां शीलरूपौदार्यगुणान्वितां, तत्र शीलं सुस्वभावः, रूपं सौष्ठवं, औदार्यं महामनस्त्वं, गुणा आर्जवकरुणादयः ।

तां सत्यभामां, यथाविधि, उपयेमे विवाहितवान् ।। ४५ ।। तदानीं सत्राजिति मणिमर्पयितुमुद्युक्ते सति, भगवान् यदाह तदाह ।। भगवानिति ।। हे नृप सत्राजित, सोपहासमिदम् । वयं मणिं न प्रतीच्छामः । अयं देवभक्तस्य सूर्यभक्तस्य, एतत् कटाक्षवचनम् । तव, आस्ताम् । वयं च वयं तु, फलभागिनः । तवापुत्रत्वात्त्वदीयं धनमस्माकमेवेति गूढोऽभिप्रायः इति, भगवान् कृष्णः, आह ।। ४६ ।।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्द्धे षट्पञ्चाशत्तमोऽध्यायः ।। ५६ ।।

कृष्णप्रिया

सत्राजित इस निर्णय पर आ गया कि मेरी सर्वाङ्गसुन्दर एवं कन्यारत्न कन्या सत्यभामा एवं स्यमन्तक दो दिव्यरत्न नररत्न देवाधिदेव श्रीवासुदेव श्रीकृष्ण के श्रीचरणों में समर्पित कर दूं। यह ही सर्वश्रेष्ठ उपाय है और अपराध-सम्मार्जन इससे हो सकता है और कोई उत्तम उपाय नहीं है ।।४२।। विवेकशील सत्राजित ने ऐसा सुदृढ निश्चय किया, स्वयं ही प्रयत्न किया और अपने दिव्यकन्या और मणिरत्न अपने साथ लिये और सानुनय सदैन्य सानुराग श्रीकृष्ण भगवान को समर्पित कर दिये ।। ४३ ।। श्री सत्यभामाजी सुशील अत्यन्त सुन्दर, परमोदार, सद्‌गुणसम्पन्न एवं मधुर स्वभाववाली श्रेष्ठ कन्या थी। बहुत लोग सत्यभामा को पाने के लिये लालायित थे एवं अभ्यर्थना भी कर चुके थे। लेकिन सत्यभामा भूमि का अवतार थी श्रीः भूः एवं लीला भगवान की पत्नियाँ थी। इस लिये यह व्याह हो तो सकता था। भगवान ने विधि पुरःसर पाणिग्रहण किया ।। ४४ ।। राजन् परीक्षित् भगवान् श्रीकृष्ण ने सत्राजित से कहा कि सत्राजित जी हम मणि ग्रहण नहीं करेंगे। आप सूर्य भगवान के परम भक्त हैं इसलिये यह मणि आप के ही समीप रहे। मणि से उत्पन्न होने वाले सुवर्ण को जनमङ्गल के लिये देते रहे आप आनन्द से रहिये एवं आप का नित्य मङ्गल हो। आप हमारे हैं ।। ४५ ।।

श्रीमद्‌भागवत दशमस्कन्ध उत्तरार्द्ध निरोधलीला के भाषान्तर में ५६ वाँ अध्याय समाप्त।

* * *

अथ[1] सप्तपञ्चाशत्तमोऽध्यायः

श्लोकाः	अनु.	प्रह.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४२	४१	१	१	१३८०	६	४५	१४३१	४४॥	७

श्रीशुक उवाच

विज्ञातार्थोऽपि गोविन्दो दग्धानाकर्ण्य पाण्डवान् । कुन्तीं च कुल्यकरणे सहरामो ययौ कुरून् ॥ १ ॥
भीष्मं कृपं सविदुरं गान्धारीं द्रोणमेव च । तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः ॥ २ ॥
[3]लब्ध्वैतदन्तरं राजन् शतधन्वानमूचतुः । अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते ॥ ३ ॥
योऽस्मभ्यं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः । कृष्णायादान्न सत्राजित् कस्माद् भ्रातरमन्वियात् ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—विज्ञातार्थः अपि गोविन्दः, कुन्तीम्, च पाण्डवान्, दग्धान्, आकर्ण्य, कुल्यकरणे, सहराम, कुरून् ययौ ॥ १ ॥ सविदुरम्, भीष्मम्, कृपम्, गान्धारीम्, च, एव, द्रोणम्, तुल्यदुःखौ, सगम्य, हा, कष्टम्, इति, ह, ऊचतुः ॥ २ ॥ हे राजन्! एतद्, अन्तरम्, लब्ध्वा, अक्रूरकृतवर्माणौ, शतधन्वानम्, ऊचतुः, कस्मात्, मणिः, न, गृह्यते ॥ ३ ॥ यः,सत्राजित्, अस्मभ्यम्, कन्यारत्नम्, संप्रतिश्रुत्य, नः, विगर्ह्य, कृष्णाय, अदात्, सः कस्मात्, भ्रातरम्, न, **अन्वियात्** ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सप्तपंचाशत्तमे तु पुनः शतधनोर्वधे । प्राप्तं स्म दुर्यशो मार्ष्टि कृष्णोऽक्रूराहृतान्मणेः ॥ १ ॥
अक्रूरमुररीकृत्य मणेः पात्रमथाच्युतः । उपामंत्र्य तमेकांते सरामोऽगाद्व्रजाह्वयम् ॥ २ ॥

सत्राजितः श्रीकृष्णाज्ञाभंगफलं व्यक्तीकर्तुमाह—विज्ञातार्थोऽपीति । पांडवा बिलद्वारेण जतुगृहान्निर्गता इत्येवं विज्ञातोऽर्थो येन सः कुंतीं च दग्धामाकर्ण्य कुल्यकरणे कुलोचितसंव्यवहारार्थम् ॥ १ ॥ अन्येषां तद्दाहदुःखाभावाद्भीष्मादीन्संगम्येत्युक्तम् ॥ २–३ ॥ ननु जीवन्सत्राजित्कथं मणिं दास्यति तत्रोचतुः योऽस्मभ्यमिति । भ्रातरं प्रसेनं मृतं कस्मान्नान्वियान्नानुगच्छेत् म्रियतामित्यर्थः ॥ ४–५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अक्रूरादाहृत आनीतोक्रूराहृतस्तस्मात् (१) उररीकृत्यांगीकृत्य । अथ मणिसमर्पणोत्तरम् । तमक्रूरम् । उपामन्त्र्य कथयित्वा—मणिस्त्वया ग्रहीतव्यः शतधन्वन इति तेन संविदं कृत्येत्यर्थः (२) । कुल्यं शवदाहोत्तरं तद्दुःखजिहासया तद्गृहगमनं, तस्य करणे तन्निमित्तमित्यर्थः । "कुल्यं स्यात्कीकसे मांसे मृतगेहगतौ तथा" इति कोशात् ॥ अध्यायार्थे स्वामिभिरुक्तमक्रूरमुररीकृत्येति । तस्यायमर्थः—उररीकृत्य मनसांगीकृत्य । अथैकांते । सराम उपामन्त्र्य हस्तिनापुरवृत्तांतमन्त्रेण निश्चित्येति । अन्यथार्थत्वे तद्दुर्यशोमार्जनतात्पर्यस्यास्य प्रकरणस्य प्रत्युत तदाधिक्यप्रतिपादनप्रतिपत्तेः । गा इंद्रियाणि ईशत्वेन बिन्दतीति गोविन्दशब्दो विज्ञापने हेतुः । कुल्यकरण इति तादृशक्रीडार्थमिति सिद्धान्तः ॥ १ ॥ अन्येषां दुर्योधनादीनाम् । तेषां पाण्डवानां दाहे दुःखाभावात् । संबंधित्वात्तुल्यदुःखौ रामकृष्णौ । सविदुरं भीष्मं सव्यसनत्वादेकत्र स्थितेः । भीष्मस्य सर्वात्मीयत्वेन प्रथमोक्तिः । भीष्मादिभिः सह तुल्यं दुःखं दुःखानुकरणं ययोस्तौ, यथा विदुरस्य ॥२॥ एतत् कृष्णगमनलक्षणम् । अन्तरमवकाशम् ॥ एतदन्तरमिति—संप्रति रामकृष्णौ द्वारकायां नस्त इत्यधुनैव सत्राजितं हत्वा मणिर्ग्रहीतुं शक्यः, तत्रावाभ्यां त्वमेव शूरोऽतस्त्वयैव हन्यताम्, तस्य दुःशीलत्वात्कस्मान्मणिर्न गृह्यत इति ॥ ३ ॥ एतादृशं रत्नं जीवता दातुमशक्यमित्याशंकते—नन्विति । तत्राक्षेपे । इत्यर्थ इति—तं मारयित्वा मणिर्ग्रहीतव्य इत्यर्थः । प्रतिश्रुत्य दातुमंगीकृत्य । यतः कन्यारत्नं कन्याश्रेष्ठत्वेनास्य तदभिलाषास्पदत्वादिति भावः । विशेषेण गर्हयित्वा दोषारोपेण तिरस्कृत्य । कृष्णायेति मूलनामग्रहणमवज्ञयः । कन्या-

---

१. एक षष्टितमो–बिज. । २. कष्टान्–वीरः, समदुःखौ समाषम्य–विज. । ३. ज्ञात्वा वीर. ।

रत्नमिति तदप्राप्त्या महाधिश्च सूच्यते। कस्माद्भ्रातरमित्यादिशापव्याजवचनस्यायं भावः—अपुत्रस्यास्य भ्राता मृतोऽतोऽसहायस्यास्य हनने, हते चास्मिन्कस्मादपि भयं नास्त्येव। दायदाभावेन च मणिस्तदीय एव तस्माद्धन्यतामिति। श्रीभगवद्भक्तवरस्याऽक्रूरस्येदृशोक्तिर्नूनं श्रीगाकुलजनकोपात्, कृतवर्मणश्च भोजत्वेन तत्संगाभिदोषात्। अन्ये तु मन्यन्ते—श्रीभगवन्मिथ्यापवादोत्थापके सत्राजिति महाक्रोधेनैव भागवतवराभ्यामक्रूरकृतवर्मभ्यां शतधन्वप्रवर्तनार्थं तादृशमुक्तमिति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अध्यायार्थस्तैरेव व्याख्यातः तत्राक्रूरमुररीकृत्येत्यस्यायमेवार्थः तमक्रूरमुररीकृत्य मनस्यङ्गीकृत्य अथानन्तरं स राम एकान्ते उपमन्त्र्य हस्तिनापुरवृत्तं मन्त्रेण निश्चित्येति अन्यथार्थत्वे तद्दुर्यशोमार्जनतात्पर्यस्याऽस्य प्रकरणस्य प्रत्युत तदाधिक्य-प्रतिपादनप्रतिपत्तेः गा इन्द्रियाणि ईशत्वेन विन्दतीति गोविन्दशब्दो विज्ञाने हेतुः कुल्यकरण इति तादृशक्रीडार्थमिति सिद्धान्तः एवं स्वजनरमणाभिप्रायेणैवोक्तं राम इति ॥ १ ॥ सविदुरं भीष्मं सवासनत्वादेकत्र स्थितेः कृष्णाय वा तद्दिने दैवात्सङ्गतेः भीष्मादिक्रमोऽयं श्रीभीष्मस्य सर्वादरणीयत्वेन प्रथमं मिलितत्वात् अन्येषां तद्वर्त्मक्रमप्राप्तत्वादुन्नेयः भीष्मादिभिः सह तुल्यं दुःखं तदनुकरणं ययोस्तौ यथा विदुरस्य अतस्तान् समागम्य हस्पष्टम् उच्चैरित्यर्थः ॥ २ ॥ अन्तरमवकाशं शतधन्वानमिति तस्याऽतिदुःशीलत्वात् न गृह्यते त्वया ॥ ३ ॥ बहुभिर्याचितामिति पूर्वमुक्तमधुना तु योऽस्मभ्यं सम्प्रतिश्रुत्येत्युच्यते तस्मात्पूर्वमेभिर्याचिताऽपि नादायि सम्प्रति तु शरणार्थिना दीयमानाऽपि सा नामीभिर्यद्यपि स्वीकृता तथाऽपीर्ष्यया प्राहतुर्योऽस्मभ्यमिति। अस्मभ्यमिति शतधन्वापेक्षया बहुत्वं सम्यक् वारं वारं प्रतिश्रुत्य दातुमङ्गीकृत्य यतः कन्यारत्नं कन्याश्रेष्ठत्वेनास्मदभिलाषास्पदत्वादिति भावः। तथापि नोऽस्मान् विशेषेण गर्हयित्वा दोषारोपेण तिरस्कृत्य कृष्णायेति मूलनामग्रहणमवज्ञया बहुत्वेन प्रत्येकं सम्प्रतिश्रवणे शाठ्यं सूचितम्। तथा कन्यारत्नमिति तदप्राप्त्या महाधिश्च सूच्यते कस्माद्भ्रातरं नान्वियादिति शापव्याजवचनस्यायं भावः अपुत्रस्यास्य भ्राता मृतोऽस्त्येव अतोऽसहायस्यास्य हनने हते चाऽस्मिन् कस्मादपि दायादाभावेन च मणिस्तदीय एव भवेत् तस्माद्धन्यतामिति श्रीभगवद्भक्तवरस्यास्याक्रूरस्येदृश्युक्तिर्नूनं श्रीगोकुलजनकोपात् कृतवर्मणश्च भोजत्वेन तत्सङ्गादिदोषात् अन्ये तु मन्यन्ते श्रीभगवन्मिथ्यापवादोत्थापके सत्राजिति महाक्रोधेनैव भागवतवराभ्यामप्यक्रूरकृतवर्मभ्यां शतधन्वप्रवर्त्तनार्थं तादृशमुक्तमित्यर्थः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विज्ञातार्थत्वे हेतुः—गोविन्दो गा इन्द्रियाणि ईशत्वेन विन्दतीति तथा स इति सर्व्वान्तर्य्यामित्वादित्यर्थः। एवं स्वजनरमणाभिप्रायेणोक्तम्—राम इति। कुल्यकरणार्थं यानेऽप्ययमेव हेतुर्द्रष्टव्यः। गवामिन्द्रो गोविन्द इति गो-पालनादिना भक्तवात्सल्यात्। एवं पाण्डवानां हितार्थमपि यानं ज्ञेयम् ॥ १ ॥ दाहदार्ढ्यख्यापनेन महाहिंस्रेषु दुर्य्योधनादिषु तेषां जीवनवार्त्तानुसन्धानयत्नशैथिल्यसिद्धेः; एव अपि, उक्तसमुच्चये चकाराद् धृतराष्ट्रादिकञ्च सविदुरमिति भीष्म-कृपयोः सान्त्वनाद्यर्थं ताभ्यां तस्य साहित्यात्, भक्तत्वेन समागमे गौणत्वाद्वा; भीष्मादिभिः सह तुल्यं दुःखं ययोस्तौ, अतस्तान् समागम्य, ह स्पष्टम्, उच्चैरित्यर्थः। भीष्मादीनां यथापूर्व्वं वयआदिना श्रेष्ठतया तत्तत्क्रमेण समागमः, तत्र द्रोणादपि गान्धार्य्याः श्रैष्ठ्यम्, तस्य कृपात् पश्चादागत्य नवीनतयागन्तुकत्वेन न्यूनत्वात् ॥ २ ॥ अन्तरमवकाशम्, शतधन्वानमिति तस्य दुःशीलत्वात्। किंवा सत्राजिता प्रतिश्रुतपुत्र्यदानेन तस्य द्वयोत्पत्तेः। न गृह्यते त्वया ॥ ४ ॥ अस्मभ्यमिति शतधन्वापेक्षया बहुत्वम्, सम्यग् वाङ्-निबन्धादिना प्रतिश्रुत्य दातुमंगीकृत्य, यतः कन्यारत्नं कन्याश्रेष्ठत्वेनास्मद्योग्यत्वादिति भावः। तथापि नोऽस्मान् विशेषेण गर्हयित्वा अदानावमानतः, किंवा श्रीकृष्णे विराजति सति किमन्यैरित्येवं वाक्यैः कृष्णाय श्यामकान्तये इति भावः। बहुत्वेन प्रत्येकं सम्प्रतिश्रवेण शाठ्यमपि, तथा कन्यारत्नमिति तदप्राप्त्या महाधिश्च सूच्यते। कस्मात् भ्रातरं नान्वियादित्यस्यायं भावः—अपुत्रस्यास्य भ्राता च मृतोऽस्त्येव, अतोऽसहायस्यस्य हनने हते चास्मिन् कस्मादपि भयं नास्त्येव; दायादाभावेन च मणिस्तवदीय एवाभूदिति श्रीभगवद्भक्तवरस्याप्यक्रूरस्येदृश्युक्तिः, गोकुलजनानाश्वासनेन सहसा त्वरया ततः श्रीकृष्ण-नयनेन तस्मिन् श्रीभगवदेकजीवनानां श्रीगोपीनामीषदवज्ञास्पर्शात्, कृतवर्म्मणश्च भोजत्वेन तत्संगादिदोषात्। यद्वा, भगवतः पितृव्ये भक्तवरे गोकुलाधिकरणतद्दर्शनैकार्थसेवितदुष्टकंसे कृतसिद्ध–तत्तन्मनोरथकुले तथा (भा० १०।३८।८) 'यद्गोपिकानां कुचकुंकमाञ्चितम्' इति, (भा० १०।३८।१७) 'यद्वा विहारे व्रजयोषितां श्रमं, स्पर्शेन सौगन्धिकगन्ध्यपानुदत्' इत्यादिभावनया सुव्यक्त-श्रीगोपीविषयक-भक्तिविशेषे कंसवधादिना स्वभक्त-यदुकुलहितार्थं स्वेच्छया श्रीभगवतो गमने गौणनिमित्तमात्रत्वेन भगवतीनां तासामवज्ञा न किल सम्भवेत्। अतो ज्ञेयमिदं श्रीभगवन्मिथ्यापवादोत्थापके सत्राजिति महाक्रोधेन भागवतवराभ्यामक्रूरकृतवर्म्माभ्यां तद्वधे कन्यावाप्त्याद्यर्थसत्राजित्प्रियंकर-तदपवादानुमोदक-दुर्बुद्धिशतधन्वप्रवर्त्तनार्थं शतधन्वनोऽपि वधार्थमिति दिक्। मव्यभीप्सा त्वक्रूरस्य नास्तीत्यग्रे व्यक्तं भाव्येव ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कस्मात् भ्रातरं नान्वियात् कस्मान्न म्रियेत् ॥ ४–११ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

फलभागिन इत्युक्तं तदेव दर्शयितुं मणिकथाशेषमाह—सप्तपञ्चाशत्तमेन, विज्ञातार्थ इत्यादिना। विज्ञातः विदितोऽर्थः पाण्डवा बिलद्वारेण जतुगृहान्निर्गता इत्येवंविधोऽर्थो येन तथाभूतोऽपि केवलं प्राकृतलोक इव पाण्डवान् कुन्तीं च दग्धान् जतुगृहेष्विति शेषः। आकर्ण्य कुल्यकरणे कुलोचितसम्व्यवहारार्थं रामेण सहितः कुरून् देशान् ययौ ॥ १ ॥ भीष्मं कृपमिति पाण्डवेतरेषां जतुगृहदुःखाभावात् भीष्मादीन् समागम्येत्युक्तं तुल्यकष्टानात्मना तुल्यदुःखान् हा कष्टं दुःखं प्राप्तमित्येवं तान्प्रत्यूचतुः सान्त्वयामासतुः ॥ २ ॥ ज्ञात्वेति तदाऽक्रूरकृतवर्माणौ भगवानधुनाऽत्र नास्ति अयमेवावसर इत्येवमन्तरं समयं ज्ञात्वा हे राजन्! शतधन्वानमूचतुः उक्तिमेवाह—मणिरित्यादिना सपादेन। न गृह्यते त्वयेति शेषः॥ ३ ॥ ग्राह्यत्वे हेतुः य इति यः सत्राजित्कन्यारत्नं सत्यभामामस्मभ्यं प्रतिश्रुत्यदास्यामीति प्रतिज्ञाय नोऽस्मान् विगर्ह्यानादृत्य कृष्णायादात् ददौ अतो मणिर्ग्राह्य इति भावः। ननु, जीवन्सत्राजित्कथं मणिं दास्यतीत्यत्रोचतुः नेत्यादि सत्राजित्कस्माद्धेतोर्भ्रातरं प्रसेनं नान्वियात् नानुगच्छेत् हन्तव्य एव स इत्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अज्ञानिनां तमः प्राप्तिसाधनं ज्ञानिनां भगवद्भक्त्युद्रेककारणं लोकविडम्बनार्थं भगवच्चरितविशेषं पूर्वाध्यायार्थबीजं निरूपयत्यस्मिन्नध्याये अपिना सन्देहं निवारयति—कुल्यं शवदहनान्तरं तद्दुःखजिहासया तद्गृहगमनं तस्य करणे तन्निमित्तीकृत्येत्यर्थः ॥ १–२ ॥ अन्तरमवकाशम् ॥ ३ ॥ भ्रातरं प्रसेनमन्वियात् अनुगतः स्यात् मृतोऽस्तु तं हन्मीत्यर्थः ॥ ४–५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

योऽस्मभ्यमिति परमभागवतस्याप्यक्रूरस्येदृश्युक्तिर्नूनं गोकुलजनकोपात् कृतवर्मणश्च भोजत्वेन कंससङ्गदोषात् ॥१–६॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सप्तपञ्चाशत्तमे तु वधः शत्राजितो हतः। शतधन्वा तु कृष्णेनाऽक्रूरात् प्राप्तो मणिस्ततः ॥
स्वाधारकं पालकोऽपि हन्यात् कृष्णावमाननात्। इति विज्ञापयामास मणिः सत्राजितो वधात् ॥

पाण्डवा बिलद्वारेण जतुगृहान्निर्गता इति विज्ञातोऽर्थो येन स कुन्तीं च दग्धामाकर्ण्य कुल्यकरणे कुलोचितव्यवहारार्थम् ॥ १–२ ॥ एतदन्तरमिति सम्प्रति रामकृष्णौ द्वारकायां नस्त इत्यधुनैव सत्राजितं हत्वा मणिर्ग्रहीतुं शक्यः तत्रावाभ्यां सकाशात् त्वमेव शूर इति त्वयैवायं हन्यताम् ॥ ३ ॥ तत्र सत्राजितोऽपराधमाहतुः—योऽस्मभ्यमिति। बहुभिर्याचितामिति पूर्वोक्तैरेभिः पूर्वं सा प्रत्येकं प्रार्थिता तेनाऽपि दातुं प्रतिश्रुता आसीदिति गम्यते भ्रातरं प्रसेनं मृतं कस्मान्नान्वियात् अपि त्वनुगच्छेदेव म्रियतामित्यर्थः। अत्र भगवन्मिथ्या एवादोत्थापके सत्राजिति महाक्रोधेनैव भक्तप्रवराभ्यामक्रूरकृतवर्मभ्यां तद्वधे शतधन्वप्रवर्त्तनार्थमेव तादृशमुक्तमिति प्राञ्चः ॥ ४ ॥

गूढार्थदीपिनी

वधे शतधनोः सप्तपञ्चाशत्तम ईश्वरः। मार्ष्टि दोषं पुनर्जातमक्रूरानीतसन्मणेः ॥ १ ॥

लाक्षाभवने पाण्डवा न दग्धा इत्येवंरूपोऽर्थो विज्ञातो येन सः। कुन्तीं च दग्धामाकर्ण्य। कुल्यं मृतगेहगमनं तस्य करणे तन्निमितम् ॥ १–२ ॥ अन्तरभवसरम् ॥ ३ ॥ यः सत्राजित् संप्रतिश्रुत्य दातुं प्रातिज्ञाय नः विगर्ह्य अनादृत्य। भ्रातरं मृतं प्रसेनं कथं नानुगच्छेत् अपि तु म्रियेतैवेत्यर्थः ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं लोकैरारोपित्तं दुर्यशो भगवता सुनयेन निराकृतमित्युक्तमथ सप्तपञ्चाशत्तमे मणिकथाऽशेषं दर्शयन् भगवता पुनः प्राप्तं दुर्यशो निराकृतमित्याह—विज्ञातार्थोऽपीति। मातृसहिताः पाण्डवाः बिलद्वारेण जतुगृहान्निर्गताः इत्येवं विज्ञातोऽर्थो येन सः कुन्तीं च दग्धामाकर्ण्य कुलस्य कुलोचितव्यवहारस्य करणे ॥ १ ॥ धृतराष्ट्रादीनां तद्दाहदुःखाभावाद्भीष्मादीन् सङ्गम्य इत्युक्तम् ॥ २ ॥ दुष्टसङ्गः साधुमपि विमोहयतीति सूचयितुमाह—अक्रूरकृतवर्माणाविति। अकार्ये शतधनोः प्रयोजको मुख्यः कृतवर्मा इति भावः ॥ ३ ॥ भ्रातरं प्रसेनं नान्वियात् नानुगच्छेत् ॥ ४–५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ अधिकारभेदेन तमोमुक्तिहेतुभूतं किञ्चित्लोकमनुकुर्वतो लोके यस्य चरितं विवक्षुर्मन्दसन्देहसदलनाय तस्यावसरमर्पितरत्नादावेव वक्ष्यमाणतात्पर्यं सूचयन्ववक्तीति वक्ति। श्रीशुक इति। विज्ञातार्थो विज्ञातोऽर्थो येन स तथा सर्वज्ञः

पाण्डवान्दग्धानाकर्ण्य श्रुत्वा कुन्ती च दग्धामिति विपरिणतमन्वेति। कुल्यकरणे शवदाहानन्तरमुर्वरितहितार्थ **तद्गेहं** गत्वा दुःखहापनवचनं कुल्यः। कुलोद्भवे कुलस्यातिहितेऽपि चेति विश्वः। **सहरामः कुरून्ययौ**। अग्रजत्वेन वा तव **विनेय** एतादृशं इति दर्शयितुं वा हलिना सहानयनमिति ज्ञेयम् ॥ १ ॥ सविदुरं भीष्मं नृपं धार्तराष्ट्रं वा समदुःखो समं दुःखं **ययोस्तौ**। इदं नटनमिति सम्यगदुःखावित्यप्यन्तरर्थः। हा हा **कष्टमित्यूचतुः** ॥ २ ॥ एतदन्तरमेतदवकाशं लब्ध्वा **रामकृष्णौ ग्रामान्तरगता**-विति लब्धावकाशावक्रूरकृतवर्माणौ सासुरावेशौ शतधन्वानं तन्नामानं कञ्चिद्यादवं मणिः स्यमंतकः कस्मान्न गृह्यते ग्रहाण ॥ ३ ॥ कोऽपराधस्तदनुष्ठित इत्युपरोधोऽनुष्ठेय इत्यत आहतुः। य इति। अस्मभ्यं प्रातिस्विकतया त्रिभ्यः कन्यारत्नं दास्य इति प्रतिज्ञाय नश्चोन्विगर्ह्य निन्दयित्वाऽनादृत्येति यावत्। यस्मात्कृष्णायादाद्ददौ तस्माद्भ्रातरं प्रसेनमन्विन्यान्मृतः स्यात्। घातनं कर्तव्य-मित्यूचतुरित्यन्वयः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

निरोधो मानरूपोऽत्र सप्तभिर्विनिरूपितः। मेयरूपश्च तावद्भिः प्रमेयबलमुच्यते ॥ १ ॥
अपकारिषु भक्तेषु तथा साधारणेषु च। फलप्रकरणं ह्येतत्तेन तादृङ् निरूप्यते ॥ २ ॥
कामः फलं यथा पूर्वं क्रोधस्त्वत्र तथा फलम्। राजसानां विशेषेण जयस्त्वत्र फलिष्यति ॥ ३ ॥
हरिधर्मैश्च हरिणा बलभद्रेण यादवैः। जयो निरूप्यते लोके निरोधात्मा हि राजसः ॥ ४ ॥
तत्राष्टमे तथाध्याये कृष्णेच्छाया जयस्त्रिधा। सत्राजिच्छतधन्वा च अक्रूरश्च जितास्तथा ॥ ५ ॥

पूर्वाध्यायान्ते भगवता मणिर्न गृहीत इत्युक्तम्। तस्य फलमत्र निरूप्यते। देवतान्तरे कृता बुद्धिः जीवन्तं निरोधयितुं न प्रयच्छतीति निरोधाधिकार्यपि सत्राजित् स्वदेहं परित्यज्य मणिद्वारा भक्ते स्थितः संसारे भगवत्पादरूपेषु वाराणस्यादिषु निरुद्ध इत्युच्यते। तत्र प्रथमं तस्य पूर्वदेहत्यागार्थं प्रस्तावनामाह **विज्ञातार्थोऽपीति** द्वाभ्याम्। विद्यमाने भगवति भगवद्धर्माणां प्रयोजकता न स्यादिति, लोकाश्च दुष्टाः अन्यथा कल्पयिष्यन्तीति भगवान् द्वारकां परित्यज्य हस्तिनापुरं गतो बलभद्रश्चेतीर्यते। न हि पाण्डववैरिषु भगवान् भक्तानां विधिमुखेन हितं कुर्वाणः किं गच्छति। न हि मुख्येषु गतेषु तत्सम्बन्धिष्वदुःखितेषु गमनं कुलाचारो भवति। सर्वमज्ञात्वा गत इत्याशङ्क्याह **विज्ञातार्थोऽपीति**। विशेषेण ज्ञातः लाक्षागृहात् यथा पाण्डवा निर्गताः, यथा वा एकचक्रे गताः, तत्र ब्राह्मणवेषेण भिक्षावृत्त्या च यथा तिष्ठन्ति, यथा वा पञ्चपुत्रा काचिच्छबरी लाक्षागृहे दग्धा, तद्भ्रमात् लोकाः पाण्डवाः कुन्ती च दग्धेति वदन्ति, इदं प्रमेयमर्थः। विज्ञातः अर्थो येनेति। अन्यथा कौरवेषु सन्देहः स्यात्, यदि भगवान् न गच्छेत्, भगवतैवान्यत्र स्थापिता इति। अतोऽज्ञाननाट्यं कर्तव्यम्, अन्यथा पाण्डवनाशार्थं पुनर्यत्नं कुर्युः। यतो भगवान् गोविन्दः, सतामिन्द्रो रक्षकः। अतः पाण्डवरक्षार्थं **दग्धानाकर्ण्य**। **अदग्धानिति** मुख्योर्थः। यतः पाण्डवाः पितुः पुत्राः। मातृपुत्रा एव दग्धा भवन्ति। कुन्तीं च दग्धां श्रुत्वा। कुल्यकरणे कुलधर्मसंरक्षार्थम्। बन्धुषु मृतेषु अवशिष्टानां तत्सम्बन्धिनां दर्शनार्थं दूरस्था गच्छन्तीति। अनेन तेषामपि निरोधार्थं भगवान् गत इति सूच्यते। कुरून् हस्तिनापुरम्। केवले भगवति कस्यचित्सन्देहोऽपि भवेत्। बलभद्रसहिते न भवतीति **सहराम** इत्युक्तम्। गतयोः सम्प्रश्नमाह **भीष्म**मिति। नृपो धृतराष्ट्रः। त्रयः सात्त्विकराजसतामसाः स्त्रीब्राह्मणाश्च जन्मोत्कर्षापकर्षौ। प्रत्येकमुपागम्य हा कष्टमित्यूचतुः। एतादृशं वचन-माश्चर्यमिति हेत्युक्तम् ॥ २ ॥ यदर्थमेतदुक्तं तदाह **लब्ध्वैतदन्तर**मिति चतुर्भिः। अक्रूरः द्वारकाया अवेक्षकः, दिवसे न्यायकर्ता धर्माधिकारी। कृतवर्मा तु रात्रावेवक्षकः, कोटिवारक इति प्रसिद्धः। शतधन्वा तु साहसी असाध्यसाधतः तयोराज्ञाकर्ता। स चौर्येण सर्वं कर्तुं समर्थः। त्रयोऽपि यादवाः भगवति विद्यमाने, बलभद्रे वा, अन्यायं कर्तुमसमर्थाः, भगवति ग्रामान्तरं गते, **एतदन्तरं** छिद्रं **लब्ध्वा**। **राजन्निति** तथा परिज्ञानात्सम्बोधनम्। शतधन्वानं वक्ष्यमाणमूचतुः। तयोर्वाक्यमाह **मणि कस्मान्न गृह्यत** इति सपादश्लोकेन ॥ ३ ॥ न केवलं मणिमात्रं ग्राह्यम्, मारणीयोऽपीत्याह **योऽस्मभ्य**मिति। भगवदपराधकरणात् मणि-ग्रहणे भगवतश्च मणिरिति न हेतुर्वक्तव्यः। भगवच्छ्वशुरोऽयमिति मारणे हेतुर्वक्तव्य एव। अवश्यं तेन कन्यारत्नं देयत्वेन प्रतिज्ञातम्, तदभावे रत्नरत्नं वा तस्माद् ग्राह्यम्। अस्मान् निन्दित्वा एते न वराः समीचीना इति भगवते दत्तवान्। तत्र निन्दायामवश्यं मारणीयः क्षत्रियधर्मपरैः। भगवते च दत्तवानिति गुप्तया मारणीयः। यथा भगवता याचितं मणिं भगवते अदत्वा भ्रात्रे दत्तवान्। ततः समणिः भ्राता, हिनस्तीति सिंहेन विपाटितः। एवं कन्यादानप्रसङ्गेन स्वकीयोऽपि मणिः भगवता तस्मै दत्त इति समणिः सत्राजित् कस्माद्धेतोर्भ्रातरं नान्वियात्। अपित्वनुगमनमेवोचितम्। सत्यभामा मणिश्च तुल्यौ याचने। अस्माभिः सत्यभामा याचिता, भगवता मणिर्याचितः। उभयोरपि याचितं न दत्तवान्, निन्दां चोभयोः कृतवान्। ततो निन्दा-नन्तरं मणिर्यत्रैव तिष्ठति, स एव प्रसेनपदवीं गच्छतीति तस्य भ्रातृसहगमनं युक्तमित्यर्थः। ताभ्यां लौकिकभाषया निरूपितोऽप्यर्थः सरस्वत्या परमार्थ एव निरुक्तः। येन प्रसेनो हतः, सोऽप्यन्येन हत इति जानन्तावपि मूर्खं शतधन्वानं स्वस्याप्यसम्मतमूचतुः। अन्यथा स्वयमेव तथा कुर्याताम् ॥ ४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

श्रीहरिः । **अष्टमेऽध्याये** । उत्तरार्धे लोकधर्मपुरस्कारेण लीलाकरणात् तत्रापि फलप्रकरणारम्भाध्यायस्य भाषान्तरत्वात् पूर्वार्धोक्तप्रमाणप्रमेयप्रकरणाभ्यां सङ्गतिर्न भवेदित्याशङ्क्य तयोरपि भाषयोः समाधिपोषकत्वात् ताभ्यां सहैव प्रकरणविभाग इत्याशयेन पूर्वार्धोक्तप्रकरणद्वयमनुवदन्ति **निरोध** इति । साधनप्रकरणस्य तूत्तरार्धे एवोक्तत्वान्नासङ्गतिशङ्केति न तदनूदितमिति भावः। **प्रमेयेति** । अपकारिणो द्विविधाः। भक्ताः अक्रूरादयः। अन्ये साधारणाः । अतः परमुभयेषु प्रमेयबलमुच्यते इत्यर्थः । तत्र हेतुः **फलेति** । हि यतः एतत् फलप्रकरणम्, फलं त्वत्र स्वरूपबललभ्यम्, न साधनाधीनम्, तेन हेतुना तादृक् बलं निरूप्यत इत्यर्थः। **काम** इति । पूर्वं तामसप्रकरणे यथा कामलीला निरूपिता, तथात्र क्रोधलीला निरूप्यते इत्यर्थः । फलतीति फलम्, फलसम्पादकमित्यर्थः हरिधर्मैरिति । एकेन त्रिभिः एकेन द्वाभ्यां चेत्यध्यायविभागः । **भीष्मं** नृपमित्यत्र। **जन्मोत्कर्षापकर्षा**विति । नात्र क्रमो विवक्षितः । तथा च जन्मापकर्षः स्त्रियां गान्धार्याम् । जन्मोत्कर्षो ब्राह्मणे द्रोणे इत्यर्थः । **योऽस्मभ्य**मित्यत्र । ततः समणिरिति । हिनस्तीति सिंहपदनिरुक्तिः । शतधन्वापि हिंसकत्वात् तत्तुल्य इति ज्ञापनार्था ।

श्रीसुबोधिनीसारः

शुकोक्तिः । सुरंगमार्गेण लाक्षाभवनात् मात्रा सह पांडवा निर्गता इति विज्ञातोऽर्थो येन सोपि गोविंदो लोकमुखाद्दग्धान् पांडवान्कुंतीं चाकर्ण्य श्रुत्वा कुल्याकरणे कुलोचितसंव्यवहारार्थं कुरून् ययौ जगाम सहरामः ।। १ ।। भीष्मादीन्संगम्य मिलित्वाऽन्येषां तद्दहनदुःखाभावान तुल्यं तत्समानं दुःखं ययोस्तौ रामकृष्णौ हा कष्टमिति ह ऊचतुः ।। २ ।। श्रीकृष्णाज्ञाभंगकर्तुः सत्राजितः फलं व्यक्तीकुर्वन्नाह एतत् । अंतरं छिद्रं लब्ध्वाऽक्रूरकृतवर्माणौ शतधन्वानं यादवविशेषमूचतुः मणिः स्यमंतकाख्यस्त्वया कस्माद्धेतोर्न गृह्यते सत्राजितः सकाशात् ।। ३ ।। यः सत्राजित् कन्यारत्नमस्मभ्यं संप्रतिश्रुत्य वाचा दत्त्वा नोऽस्मान् विगर्ह्य निंदित्वा तत्कन्यारत्नं सत्यभामां कृष्णायादात् स भ्रातरं मृतं प्रसेनं कस्मान्नान्वियात् नानुगच्छेत् म्रियतामित्यर्थः ।। ४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सप्तपञ्चाशत्तमे तु लिप्तमात्मनि दुर्यशः । दर्शयित्वा मणिं कृष्णो ममार्जेति निरूप्यते ।। १ ।।

"यदि सत्राजितः सकाशात् भगवता मणिर्गृहीतः स्यात्तदा तदाज्ञोल्लङ्घनदोषो निवृत्तः स्यात्, तत्फलं च तस्य न स्यात्, अतो विषयासक्तानां भगवद्विमुखानामर्थोऽप्यनर्थकर एव भवतीति तत्फलं व्यक्तीकर्तुं भगवान् मणिं न गृहीतवान्" इति तत्फलं दर्शयन्नाह—विज्ञातार्थ इति । विज्ञातः 'पाण्डवा बिलद्वारेण जतुग्रहान्निर्गताः, न दग्धा' इत्येवंविधोऽर्थो येन तथाभूतोऽपि गोविन्दो कृष्णः लोकमुखात् पाण्डवान् कुन्तीं च जतुगृहे दग्धानाकर्ण्य श्रुत्वा कुल्यकरणे कुलोचितव्यवहारार्थं रामेण सहितः कुरून् देशान् तन्मध्यस्थं हस्तिनापुरं ययौ ।। ३ ।। भीष्मादिदुःखेन तुल्यं दुःखं ययोस्तथाभूतौ भूत्वा रामकृष्णौ दुर्योधनादीनां तद्दाहदुःखाभावात् भीष्मादीन् सङ्गम्य 'हा कष्टं महद्दुःखं जातम्' इत्यूचतुः ।। २ ।। राजवृत्तस्य कपटबहुत्वात् अनर्थकारित्वं सूचयन् सम्बोधयति—राजन्निति । श्रीकृष्णोऽधुना नास्त्यतः सत्राजिद्वधः सुकर इत्येतदन्तरं समयं लब्ध्वाऽक्रूरकृतवर्माणौ शतधन्वानमूचतुः । तदुक्तिमेवाह—मणिरिति सपादेन । सत्राजितः सकाशात् त्वया मणिः कस्मान्न गृह्यते ?।। ३ ।। ननु 'जीवतस्ततो मणिग्रहणं कथं सम्भवति, इति चेत्तर्हि तस्य कोऽपराध' इत्यपेक्षायामाह—ये इति । यः सत्राजित् अस्मभ्यं सम्प्रतिश्रुत्य 'सत्यभामां दास्यामि' इति प्रतिज्ञाय नोऽस्मान् विगर्ह्य अनादृत्य तां कन्यारत्नं कृष्णायादात् स सत्राजित् कस्माद्धेतोर्भ्रातरं प्रसेनं नान्वियात् नानुगच्छेत् ? हन्तव्य एव स इत्यर्थः ।। ४ ।।

अन्वितार्थप्रकाशिका

सप्तपञ्चाशत्तमे तु कृत्वा शतधनोर्वधम् । मणिजं दुर्यशोऽमार्क्षीत् श्लोकाः सार्द्धा द्विवार्द्धयः (४२।।) ।।
उवाचेत्येकं (१) सपादा गुणवेदाः (४३।) अनुष्टुभः ।। ५७ ।।

विज्ञातेति ।। विज्ञातः पाण्डवा बिलद्वारेण जतुगृहान्निर्गता न दग्धा इत्येवंविधोऽर्थो येन तथाभूतोऽपि गोविन्दो लोकमुखात्पाण्डवान्कुन्तीं च जतुगृहे दग्धानाकर्ण्य श्रुत्वा कुल्यकरणे कुलोचितव्यवहारार्थं रामेण सहितः कुरून्देशान् तन्मध्यस्थहस्तिनापुरं ययौ ।। १ ।। भीष्मादिदुःखेन तुल्यं दुःखं ययोस्तथाभूतौ भूत्वा रामकृष्णौ दुर्योधनादीनां तद्दाहदुःखाभावात् भीष्मं सविदुरं कृपं गान्धारीं द्रोणं च सङ्गम्य हा कष्टं जातमित्यूचतुः ।। २ ।। लब्ध्वेति ।। हे राजन् ! श्रीकृष्णोऽधुना नास्त्यतः सत्राजिद्वधः सुकर इत्येतदन्तरं समयं लब्ध्वा अक्रूरकृतवर्माणौ शतधन्वानमूचतुः । तस्य दैत्यांशत्वेन दुःशीलत्वात् सत्राजितः सकाशात् त्वया मणिः कस्मान्न गृह्यते ।। ३ ।। य इति ।। यः सत्राजित् अस्मभ्यं प्रतिश्रुत्य सत्यभामां दास्यामीति प्रतिज्ञाय नोऽस्मान् विगर्ह्य अनादृत्य तम् कन्यारत्नं कृष्णायादात् । स सत्राजित्कस्माद्धेतोः भ्रातरं प्रसेनं नान्वियात् नानुगच्छेत् । हन्तव्य एव स

इत्यर्थः । तत्रास्मदपेक्षया त्वमेव शूर इति त्वयैवायं हन्यताम् । अत्र बहुभिर्याचितामिति पूर्वोक्तैरेभिः पूर्वं सा प्रत्येकं प्रार्थिता तेनापि दातुं प्रतिश्रुता आसीदिति गम्यते । अत्र भगवन्मिथ्यापवादके सत्राजिते क्रोधेनैव भक्तप्रवराभ्यामक्रूरकृतवर्मभ्यां तद्वधप्रवर्त्तनार्थमेव तादृशमुक्तमिति प्राञ्चः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं सप्तपंचाशत्तमेऽध्याये हरेर्हस्तिनापुरगमनं शतधन्वनाकृतसत्राजितमरणं तन्निमित्तं तद्धननं च पुनर्मणिनिमित्तप्राप्ताभिशापमार्ज्जनं च निगद्यते तत्रादौ श्रीकृष्णाज्ञाभंगफलं स्पष्टयितुमिदमाख्यानमाह विज्ञातार्थोपीति लाक्षागेहात् पांडवाबिलाध्वनानिर्गता इत्यर्थो विज्ञातो येन सः कुंतीं च दग्धां । कुल्यकरणे कुलघटितव्यवहारकरणनिमित्ते ॥ १–२ ॥ एतदंतरं अवकाशं त्वया न गृह्यते ॥ ३ ॥ पूर्वमेभिः कृतवर्मादिभिः सा कन्या याचितापि सत्राजितेन नादायि ततः श्रीकृष्णे मिथ्याभिशापदोषात्प्राप्तबलवद्वैरेण शरणार्थिना तेनैतेभ्यः सा कन्या प्रतिश्रुतेति ज्ञेयं तेन पूर्वत्र बहुभिः कन्यायाचनमात्रस्योक्तत्वेन न विरोधः नोऽस्मान् विगर्ह्य निंदयित्वा भ्रातरं मृतं प्रसेनं कस्मान्नान्वियात् नानुगच्छेत् । हन्यतामितिभावः ॥ ४–५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सप्तपञ्चाशत्तमे तु वधे शतधनोः पुनः । दुर्यशो मार्ष्टि संप्राप्तं कृष्णोऽक्रूरहृतान्मणेः ॥ १ ॥

सत्राजितः श्रीकृष्णाज्ञाभङ्गफलं व्यक्तीकुर्वन् वयं तु फलभागिन इति यदुक्तं तदेव दर्शयितुं मणिकथाशेषमाह विज्ञातार्थ इत्यादिना । विज्ञातेति । विज्ञातः विबुद्धः अर्थः पाण्डवा बिलद्वारेण जतुगृहान्निर्गता इत्येवंविधोऽर्थो येन तथाभूतोऽपि, गोविन्दः, भगवान् श्रीकृष्णः, पाण्डवान्, कुन्तीं च, दग्धान् जतुगृहेष्विति शेषः । आकर्ण्य, कुल्यकरणे कुलोचितसंव्यवहारार्थं, सहरामो रामसहितः, कुरून् देशान्, ययौ ॥ १ ॥ भीष्ममिति । भीष्मं शान्तनवं, कृपं कृपाचार्यं, गान्धारीं, सविदुरं विदुरसहितं, द्रोणं द्रोणाचार्यं च, इत्येतान्, तुल्यदुःखानात्मना तुल्यकष्टान्, समागम्य एव, हा इति खेदे । कष्टं प्राप्तं इत्येवं, ह स्फुटं, ऊचतुः । अन्येषां तद्वाहदुःखाभावाद्भीष्मादीन् संगम्येत्युक्तम् ॥ २ ॥ अत्रावसरे द्वारकायां यद्वृत्तं तदाह लब्ध्वेति । हे राजन्, एतत् अन्तरं, लब्ध्वा भगवानधुनाऽत्र नास्त्यतोऽयमेवावसर इत्येवंभूतं समयं ज्ञात्वेत्यर्थः । ज्ञात्वेत्यपि पाठः । अक्रूरकृतवर्माणौ, शतधन्वानं, ऊचतुः । उक्तिमेवाह मणिरित्यादिना सपादेन । मणिः, कस्मात् त्वयेति शेषः । न गृह्यते ॥ ३ ॥ ननु जीवन् सत्राजित् कथं मणिं दास्यति तत्रोचतुः । य इति । यः सत्राजित्, कन्यारत्नं सत्यभामां, अस्मभ्यं संप्रतिश्रुत्य दास्यामीति प्रतिज्ञाय, नोऽस्मान्, विगर्ह्य अनादृत्य, कृष्णाय, अदाद्ददौ । ततः, स सत्राजित्, भ्रातरं मृतं प्रसेनं, कस्मात् न अन्वियात् नानुगच्छेत् । म्रियतामित्यर्थः । एनं हत्वा त्वया मणिर्ग्राह्य इति भावः ॥ ४ ॥

कृष्णप्रिया

स्यमन्तक मणि का हरण अक्रूरजी का काशी निवास एवं पुनरागमन—श्रीशुकदेव जी महर्षि कहते है—राजन् परीक्षित् ! भगवान् श्रीकृष्ण यद्यपि अच्छी तरह से अभिज्ञ है कि लाक्षागृह में पाण्डव जले नहीं है फिर भी सहैतुक कुलरीति के व्यवहारों की रक्षा के लिये ज्येष्ठ बन्धु श्रीबलभद्र जी के साथ हस्तिनापुर गये ॥ १ ॥ हस्तिनापुर में श्रीभीष्मपितामह जी श्रीकृपाचार्य जी विदुरजी के साथ गान्धारीजी को एवं अन्य वन्धुजनों को मिलकर समवेदना को व्यक्त करते हुए कहने लगे कि हाय हाय अरे अरे यह तो असह्य शिर पर आ पड़ी ॥ २ ॥ जब बलभद्रजी के साथ लौकिक व्यवहार के लिये भगवान् हस्तिनापुर गये तव द्वारिकापुर में अक्रूरजी एवं कृतवर्मा को मौका मिला और उन दोनों ने शतधन्वा को बहलाया कि भला अब अवसर है बदला लेने का तब सत्राजित् से स्यमन्तकमणि क्यों नहीं छीन लेते हो ॥ ३ ॥ याद होगा कि सत्राजित् अपनी स्त्रीरत्न कन्या सत्यभामा का विवाह हमसे करने का वचन दिया था लेकिन हमारा अनादर एवं तिरस्कार करके सत्यभामा का व्याह कृष्ण के साथ कर दिया तो सत्राजित् भी अपने भाई प्रसेन की तरह क्यों न यमपुरी में चला जाय ॥ ४ ॥

एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः । शयानमवधील्लोभात् स पापः क्षीणजीवितः ॥ ५ ॥
स्त्रीणां विक्रोशमानानां क्रन्दन्तीनामनाथवत् । हत्वा पशून् सौनिकवन्मणिमादाय जग्मिवान् ॥ ६ ॥
सत्यभामा च पितरं हतं वीक्ष्य शुचा[1]ऽर्दिता । व्यलपत्तात तातेति हा हतास्मीति मुह्यती ॥ ७ ॥
तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयम् । कृष्णाय विदितार्थाय [2]तमाऽऽचख्यौ पितुर्वधम् ॥ ८ ॥

---

१. पि–श्रीधर. वंशी. जीव. वीर. विज. शुक. सु. । २. तत्रा–वीर तप्ता–श्रीधर. वंशी. जीव. वीर. विज. बिश्व. शुक. सु. ।

कर्दमक्षमा

अन्वयः—एवम्, ताभ्याम्, भिन्नमतिः, क्षीणजीवितः, सः पापः असत्तमः, लोभात्, शयानम्, अवधीत् ॥ ५ ॥ विक्रोशमानानाम्, अनाथवत्, स्त्रीणाम्, क्रन्दन्तीनाम्, सौनिकवत्, पशून्, हत्वा, मणिम्, आदाय, जग्मिवान् ॥ ६ ॥ पितरम्, हतम्, वीक्ष्य, शुचार्दिता, सत्यभामा, मुह्यती, हा तात ! हा तात हता अस्मि, इति व्यलपत् ॥ ७ ॥ मृतम्, पितरम्, तैलद्रोण्याम्, प्रास्य, गजसाह्वयम्, जगाम, विदितार्थाय कृष्णाय, तम्, पितुर्वधम्, आचख्यौ ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

जग्मिवान् जगाम ॥ ६-११ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमित्थम् । ताभ्यामक्रूरकृतवर्मभ्याम् । स शतधन्वा । भिन्ना सन्मार्गतः पृथक्कृता मतिर्यस्य सः यतोऽसत्तमः यदुवंशजोपि कंसवदसुरस्वभावः । पापः सत्संगान्निजस्वभावावरणेऽपि प्रबल पापवासनावशीभूतः । अतः क्षीणजीवितोऽपि । यद्वा—क्षीणजीवितत्वादेव 'प्रायः सत्पुरुषो विनाशसमये बुद्ध्या परित्यज्यते' इत्यभियुक्तोस्तस्य तद्वधे प्रवृत्तिरिति ज्ञेयम् ॥ ५ ॥ सौनिकवन्मारकवत्, राक्षसवदित्यर्थः । सूना हिंसास्थानं विद्यतेऽस्येति सौनिकः ॥ ६-७ ॥ "द्रोणी काष्ठांबुवाहिन्यां गवादिन्यां च नीवृति । कूपोपकंठपानार्थक्लृप्तयंत्रेपि च स्मृता ।" इति धरणिः । प्रास्य निक्षिप्य । तैलद्रोण्यामिति । दाहानंतरमवश्यकृत्यस्य तच्छ्राद्धादिकर्मणस्तदानीमशक्यत्वात् । किं वा-भगवता तस्य जिजीवयिषया । यद्वा—भगवतः शोकक्रोधजननाय तत्प्रदर्शनार्थम् । प्रास्य प्रक्षिप्य ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भिन्ना सन्मार्गतः पृथक् कृता मतिर्यस्य स यतोऽसत्तमः, यदुवंशजोऽपि कंसादिवदसुरस्वभावः तत्र च पापः तत्सङ्गान्निजस्वभावावरणेऽपि प्रबलपापवासनावशीभूतः अतः क्षीणजीवितोऽपि जातः अतः शयानमपि मणिलोभादवधीत् ॥ ५ ॥ तदेव दर्शयति स्त्रीणामिति अनादरे षष्ठी ॥ ६ ॥ वीक्ष्येति तच्छ्रुत्वा तत्र गमनात् शुचा शोकेन अर्पिता व्याप्ता दिशाशब्दवच्छुचाशब्दो वा तस्यामर्पिता केनचिदिव दैवेन वा क्षिप्तेत्यर्थः मुह्यन्ती स्नेहेन पितृदोषादिकमविचारयन्तीत्यर्थः यद्वा अन्तरान्तरमूर्च्छां भजन्ती हेतुस्त्वत्र तत्तल्लीलारसवैचित्रीरचयित्री लीलाशक्तिरेव गम्या ॥ ७ ॥ तैलद्रोण्यां प्रास्येति दाहानन्तरमवश्यकृत्यस्य तच्छ्राद्धादिकर्मणस्तदानीमशक्यत्वात् किं वा श्रीभगवता तस्य जिजीविषया किं वा श्रीभगवतः शोकक्रोधजननाय तत्प्रदर्शनार्थं विदितोर्थः प्रसेनाद्यस्थानविनियुक्तमणित्वेनावश्यं भाविफलं येन तस्मै ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भिन्ना सन्मार्गतः पृथक्कृता मतिर्यस्य सः, यतोऽसत्तमो महादुष्टः, कुतः ? पापः क्रूरचित्तः पापरतो वा, यतः क्षीणजीवितो यदुकुलजातोऽपि सन्निहित-मृत्युत्वात्तादृशोऽभूदिति भावः । यद्वा, भिन्नमतित्वादसत्तमः पापश्च सन्, यद्वा, स्वभावत एवासत्तमः, यतः पापः, पुनश्च ताभ्यां भिन्नमतिः । किञ्च, क्षीणजीवितोऽतः शयानमपि मणिलोभादवधीत् ॥ ५ ॥ असत्तमत्वादिकमेव दर्शयति—स्त्रीणामिति, अनादरे षष्ठी, किंवा सप्तम्यर्थे, विक्रोशन्तीष्वपि अनाथवदिति वस्तुतो भगवत्सनाथत्वात्, पशून् व्याध इवेति पापत्वे दृष्टान्तः ॥ ६ ॥ वीक्ष्येति तदानीं तस्यास्तद्गृहेऽवस्थानात्, किंवा मृतस्य तस्य स्त्रीभिस्तत्साक्षान्नयनात्, शुचा शोकेनार्पिता व्याप्ता मुह्यन्ती स्नेहेन पितृदोषादिकमविचारयन्तीत्यर्थः । यद्वा, अन्तरान्तरा मूर्च्छां भजन्ती ॥ ७ ॥ तैलद्रोण्यां प्रास्येति दाहानन्तरमवश्यकृत्यस्य तच्छ्राद्धादिकर्म्मणस्तदानीमशक्यत्वात्, किंवा श्रीभगवता तस्य जिजीवयिषया, किंवा श्रीभगवतः शोक-क्रोधजननाय तत्प्रदर्शनार्थं कृष्णाय साक्षाद्भगवते, अतो विदितोऽर्थः सर्वप्रयोजनं येन तस्मै, तदिच्छयैव तत्तदुद्भूतेः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

एवमिति इत्थं ताभ्यामक्रूरकृतवर्मभ्यां भिन्ना भेदिता मतिर्यस्य सोऽसत्तमः पापात्मा शतधन्वा क्षीणजीवितः हेतुगर्भमिदन्तत्त्वात् लोभान्मणिलोभाच्छयानं सत्राजितं हतवान् ॥ ५ ॥ स्त्रीणामिति यथा सौनिकः पशुहिंसकः पशुं हन्ति तद्वद्धत्वा अनाथवत् स्त्रीणां सत्राजिन्नारीणां विक्रोशन्तीनामाक्रोशन्तीनां रुदन्तीनां च सतीनामेव मणिमादाय जगाम ॥ ६ ॥ सत्यभामेति शुचा शोकेनार्पिता व्याप्ता मुह्यती मध्ये मध्ये मूर्च्छां प्राप्नुवन्ती व्यलपत् विलापनप्रकारमेवाह-तात तातेति । हा हतास्मीति ॥७॥ ततो मृतं पितरं तैलद्रोण्यां तैलकटाहे प्रास्य निधाय हस्तिनापुरं जगाम तत्रागत्य विज्ञातपितृमरणरूपार्थायाप्यजानत इव स्थिताय कृष्णाय पितुर्वधं शतधन्वकृतमाचख्यौ ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

क्रन्दन्तीनां वैक्लव्यस्वरं कुर्वतीनां सौनिकवन्मारकवत् राक्षसवदित्यर्थः ॥ ६–७ ॥ प्रास्य निक्षिप्य ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वीक्ष्येति श्रीसत्यभामायाः शोकोऽयं लीलाशक्त्यैव स्वरसम्पादनोत्थापित इति ज्ञेयम् । एवमग्रे श्रीरामादीनां कोपादिकमपि ॥ ७–४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे सप्तपञ्चाशत्तमोऽध्यायः ॥ **५७** ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भिन्नमतिः प्रतारितबुद्धिः असत्तम इति शतधन्वा मूलत एव कुबुद्धिः सत्राजिति बद्धवैरश्च ॥ ५–७ ॥ तैलद्रोण्यां प्रास्येति यस्या भर्त्ता परमेश्वरः सा तद्द्वारा स्वतातं कथं नाजीवयिष्यदिति लोकोक्त्यैव जगाम न तु कृष्णप्रातिकूल्ये सत्राजिति तस्या वस्तुतः स्नेहः कृष्णाय कृष्णमपि तापयुक्तोक्त्या तप्तेति यथाऽहं तप्ता तथा त्वमपि तापमेवाभिनयेति ज्ञापयन्तीति भावः ॥ ८ ॥

गूढार्थदीपिनी

भिन्ना धर्माद्भ्रंशिता मतिर्यस्य ॥ ५ ॥ क्रन्दन्तीनां विलपन्तीनाम् । सौनिको हिंसकः सूना वधस्थानं विद्यतेऽस्येति विग्रहः । शुचा शोकेन व्याप्ता ॥ ६–७ ॥ तैलद्रोण्यां नौकाकारपात्रे । कटाहे वा । मृतं प्रास्य निक्षिप्य ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

जग्मिवान् जगाम ॥ ६–१२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ताभ्यामक्रूरकृतवर्माभ्यां भिन्ना मतिर्बुद्धिर्यस्य स स्वभावत एतादृशत्वात्कार्यमेतद्रुरुच इत्याह । असत्तम इति । कुतोऽपत्तमः स इत्यत आह । स पाप इति । शयानं सत्राजितं सति मणौ रात्रौ सत्राजिन्मारणं कथमिति चेत्सत्यम् । प्रतिज्ञादानेः शक्तिसम्भवात्स्वस्वत्वाभावाद्वा । योऽस्मभ्यं सम्प्रतिश्रुत्य कृष्णायोपजहार सः । वयं तु फलभागिन इत्युक्तेः । पूर्वं लोभाद्रत्नगार्ध्यादत्युत्कटस्तैन्यर्यायेन च सन्निहितं फलमिति लपति । क्षीणजीवित इति । क्षीणप्राण एषन्नजात् ॥ ५ ॥ विक्रोशमानानां शयानान्पुरुषानाकारयन्तीनां तयाऽऽक्रन्दतीनां रुदतीनामनाथवदिति कृष्णव्यधिकरणतया पशून्हत्वा सौनिकवत्सूनाकार इव पशूनां मांसादिकं गृह्णाति तथा मणिमादाय जग्मिवान् गतः ॥ ६ ॥ शुचा शोकेन शुचेति टाबन्तत पक्ष ऐकपद्यं वा । मुह्यतीव ॥ ७ ॥ तैलयुक्तद्रोण्यां पात्रे काष्ठमये गतं । गजसाह्वयं गतं । तप्ता सती विदितार्थाय । एवं सुधन्वना श्वशुरासुहरणं कृतमिति विज्ञातवतेऽपि पितुर्वधमाचख्यौ ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु शतधन्वापि विचक्षणः कथमेवं कृतवानित्याशङ्क्याह एवं **भिन्नमति**रिति । ताभ्यां भिन्ना नाशिता मतिर्यस्य । मणिरेव ग्राह्य इति तत्प्ररोचनया बुद्धिरुत्पन्ना । ततोग्रे भाव्यर्थे बुद्धिस्तावता नष्टेति विचारसमर्था न जाता । उभौ तौ बहुधा च भ्रामयतः । भ्रामणमग्रिमार्थमेव । तौ हि जानीतः । मणिसम्बन्धेन मरणं भविष्यतीति । अतो न मण्यर्थिनौ । अयं तु मण्यर्थी । अतः **असत्तमः** । तावुभावसदसत्तरौ । अयमसत्तम इति । अन्यथा युद्धं कृत्वापि मारयेत् । किन्तु शयानमेवावधीत् । तत्रापि लोभात् न तु तेन सह वैरम् । ननु कथमेवं बुद्धिरुत्पन्ना, द्वारकावासिनो भगवदीयविषये स्थितस्य, तत्राह स पाप इति । स शतधन्वा पापः, देवानां मध्ये अधमोऽप्येकः, यथा कलिः । ततश्चायमधर्मरूप इति तथा कृतवान् । किञ्च । **क्षीणजीवित** इति । तस्य जीवितमल्पमेव । एतदर्थमेव तस्यावतार इति ॥ ५ ॥ यदि हननमात्रमेव कुर्यात्, तदाप्यन्यप्रेरितः, तथा कृतवानिति तथा नास्य दोषो भवेत्, किन्त्वधिकमपि कृतवानित्याह **स्त्रीणा**मिति । विशेषेण क्रोशमानानां सतीनाम् । ता अपि नाथरहिता एव हत्वा ताडयित्वा वा मणिमादाय **जग्मिवान्** पलायितः । दयादाक्षिण्याद्यभावार्थं दृष्टान्तः सौनिकवदिति । निरन्तरं सूनाकर्ता सौनिकः, पशून् हत्वा तन्मांसविक्रेता । यथा काष्ठच्छेदकस्य न वृक्षेषु दया, तथा तस्यापि । अर्चितस्यापि मणेः अनिष्टहेतुत्वं प्रतिपादितम् । अत्र प्रकरणे प्रमेयबलमिति न पूर्वाध्यायवाक्यैर्विरोधः ॥ ६ ॥ तस्मिन् गते भगवद्गृहेऽपि स्थिता सत्यभामा उपश्रुतिमिव श्रुत्वा, पितृगृहे समागता, पितरं हतं वीक्ष्य शोकेन पीडिता, **तात तातेति व्यलपत्** । यथा स्त्रीभिराक्रोशः कृतः, एवं सत्यभामयापि कृत इति समुच्चयार्थश्चकारः । भर्तृवधे तासां यावद्दुःखम्, पितृवधेऽपि तावत्कृतमित्यर्थः । तासामुभयं स्वनाशो भर्तृनाशश्चेति

तुल्यत्वाभावात् कथं समुच्चय इत्याशङ्क्य, अत्रापि द्वयमाह **तात तातेति** । **हा हतास्मीति** च । ननु कथमेवं स्वयमहता **तथोक्तवती**, तत्राह **मुह्यतीति** । मोहं प्राप्ता मृतकल्पा सत्यमेव तथोक्तवतीत्यर्थः ॥७॥ भगवद्विरोधात् तस्य शीघ्रं पारलौकिकी क्रियापि न जातेति वक्तुं सत्यभामाया उद्योगमाह तैलद्रोण्यामिति । इयं देवदत्तपुत्रिकाप्रायेति पुरुषप्रकृतिर्भवति । **यतोऽभ्रातृमती** । **अतो** धर्मतः अविवाह्यापि स्त्रीरत्नत्वाद्गृहीता । अतः पुरुषवदेव तस्याश्चरित्रम् । द्रोणी कुसूलवत् कुतूवत् कटाहवद्वा आयसी ताम्रनिर्मिता वा । मरणपर्यन्तं विलापः । ततो मृतस्य तैलद्रोण्यां प्रक्षेपः । स्वयमपि गजसाह्वयं जगाम । तत्र गतो भगवान् मृतानामनुसन्धानं करोतीति । **गजसाह्वयमिति** प्रसिद्धस्थानत्वात् तत्र गमनं न सन्देहमावहति । तत्र भगवद्विज्ञापनार्थमेव गतेति तदाह **कृष्णायेति** । भ्रान्तेयमिति ज्ञापनार्थं **विदितार्थायेति** । तं तादृशप्रकारापन्नम् । **पितुर्वधमिति** । आवश्यकत्वान्न दोषायेत्यर्थः॥८॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

स्त्रीणामित्यत्र । **विरोध** इति । अर्चनं विहाय कण्ठे बन्धनात् प्रसेनस्यानिष्टम्, अत्र त्वर्चित एव तिष्ठतीति कथमनिष्टं जातमिति विरोध इत्यर्थः । **वाक्यैः** 'दुर्भिक्षमार्यरिष्टानी'ति वाक्यैरित्यर्थः ।

श्रीसुबोधिनी—सारः

एवं ताभ्यामक्रूरकृतवर्मभ्यां भिन्ना मतिर्यस्य सोऽसत्तमो नीचः शतधनुः पापः क्षीणजीवितोऽल्पायुर्लोभाद्धेतोः शयानं सत्राजितमवधीत् अहन् ॥ ५ ॥ अनाथवत्स्त्रीणां विक्रोशमानानां क्रन्दंतीनां रुदन्तीनां सतीनां पशून्सौनिकवत् वधक इव हत्वा मणिं गृहीत्वा जगाम ॥ ६ ॥ हतं पितरं वीक्ष्य दृष्ट्वा शुचा शोकेनार्पिता व्याप्ता सत्यभामा हा हतास्मीति मुह्यती मोहं यांती हे ताततातेति विलापमकरोत् ॥ ७ ॥ मृतं तातं तैलस्य द्रोण्यां प्रास्य क्षिप्त्वा हस्तिनापुरं ययौ । विदितो ज्ञातोऽर्थो येन तस्मै कृष्णाय तप्ता दुःखिताः पितुर्वधं मृतिमाचख्यौ उवाच ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं ताभ्यामक्रूरकृतवर्मभ्यां भिन्ना धर्मपथाद्भ्रंशिता मतिर्यस्य सः शतधन्वा लोभात् शयानमेव सत्राजितमवधीदित्यन्वयः । 'एवं ताभ्यां प्रेरितस्यापि कथं मतिभेद' इत्यपेक्षायां 'दुर्बुद्धित्वात्' इत्याह—असत्तम इति । तत्रापि पापाधिक्यं हेतुमाह—पाप इति । 'अयं च मतिभेदस्तस्य मरणपर्यवसायी' इत्याशयेनाह—क्षीणजीवित इति ॥ ५ ॥ यथा सौनिकः पशुहिंसकः पशून् हन्ति तद्वत्तं हत्वा अनाथवत् स्त्रीणां विक्रोशन्तीनां रुदन्तीनां च सतीनां मणिमादाय जग्मिवान् जगाम । नाथस्य भगवतो जामातृत्वेन वर्तमानत्वाद्वतिप्रयोगः ॥ ६ ॥ सत्यभामा च पितरं हतं वीक्ष्य शुचा शोकेन अर्दिता व्याप्ता मुह्यती मध्ये मध्ये मूर्च्छां प्राप्नुवती तात तातेति हा हस्तास्मीति च व्यलपदित्यन्वयः ॥ ७ ॥ ततो मृतं पितरं तैलद्रोण्यां तैलपूर्णकटाहे प्रास्य निधाय गजसाह्वयं गजेन सहितं आह्वयं नाम यस्य तत् हस्तिनापुरं जगाम । विदितार्थाय सर्वज्ञायापि कृष्णाय पितुर्वधमाचख्यौ कथितवती ॥ ८ ॥

अन्वितार्थप्रकाशिका

एवमिति । एवं ताभ्यामक्रूरकृतवर्मभ्यां भिन्ना धर्मपथाद् भ्रंशिता मतिर्यस्य स असत्तमः मूलत एव कुबुद्धिः सत्राजिति बद्धवैरश्च क्षीणजीवितः शतधन्वा लोभात् शयानमेव सत्राजितमवधीत् ॥ ५ ॥ स्त्रीणामिति ॥ यथा सौनिकः पशुहिंसकः पशून्हन्ति तद्वत्तं हत्वा अनाथवत् स्त्रीणां विक्रोशमानानाम् । शानजार्षः चानश् वा । कर्मव्यतिहारविवक्षा वा । क्रन्दन्तीनां मणिमादाय जग्मिवान् जगाम ॥६॥ सत्यभामेति । सत्यभामा च पितरं हतं वीक्ष्य शुचा शोकेन अर्पिता व्याप्ता मुह्यती मध्ये मूर्छां प्राप्नुवती । नुमभाव आर्षः । तात तातेति हा हतास्मीति व्यलपत् ॥ ७ ॥ तैलेति ॥ ततस्तप्ता दुःखिता सत्यभामा मृतं पितरं तैलपूर्णकटाहे प्रास्य निधाय कृष्णो जीवयिष्यतीत्याशया गजसाह्वयं गजेन सहित आह्वयो नाम यस्य तत् हस्तिनापुरं जगाम । विदितार्थाय सर्वज्ञायापि कृष्णाय पितुर्वधमाचख्यौ कथितवती ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सौनिकवत् पशुघातिवत् जग्मिवान् गतवान् ॥ ६ ॥ शुचार्पिता शोकेन व्याप्ता ॥ ७ ॥ प्रास्य निक्षिप्य । गजसाह्वयं हस्तिनापुरं ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति । एवं ताभ्यामक्रूरकृतवर्मभ्यां, भिन्नमतिः असत्तमः, स शतधन्वा, क्षीणजीवितः, अतः, पापः पापकर्मप्रसक्तः सन्, लोभात् मणेरिति शेषः । शयानं, सत्राजितं, अवधीत् ॥ ५ ॥ स्त्रीणामिति । पशून्, सौनिकवत्, सौनिकः यथा

पशून् हन्ति तद्वदित्यर्थः । हत्वा सत्राजितं व्यापाद्य, विक्रोशमानानां रोदनादिकुर्वाणानां, अनाथवत्, क्रन्दन्तीनां वैक्लव्यस्वरं कुर्वतीनां, स्त्रीणां, उक्तविधाः स्त्रीरनादृत्येत्यर्थः । मणि आदाय, जग्मिवान् ॥ ६ ॥ सत्यभामेति । सत्यभामा च सत्यभामापि, पितरं हतं वीक्ष्य, शुचा शोकेन, अर्पिता व्याप्ता, इति हेतोः, मुह्यती, हा इति खेदे । हे तात, हता अस्मि इति, व्यलपत् ॥ ७ ॥ तैलद्रोण्यामिति । सत्यभामा, मृतं पितरं तैलद्रोण्यां प्रास्य तैलकटाहे निधायेत्मर्थः । गजसाह्वयं हस्तिनापुरं जगाम । तत्र तप्ता परितापयुता सती, विदितार्थाय विज्ञाततत्पितृमरणत्वेपि अज्ञातवत् स्थितायेत्यर्थः । कृष्णाय, पितुः स्वजनकस्य, वधं आचख्यौ शतधन्वना मत्पिता हत इति कथयामासेत्यर्थः ॥ ८ ॥

कृष्णप्रिया

शतधन्वा स्वयं खल एवं पापमति था उसकी मृत्यु भी शिर पर नाच रही थी पुनः अक्रूर एवं कृतवर्मा ने उसको बहकाया था इसलिये शतधन्वा अक्रूर और कृतवर्मा की वार्ता में फस गया और दुष्ट शतधन्वा ने स्यमन्तक मणि के लोभ में आकर सत्राजित के प्राण ले लिये ॥ ५ ॥ जब शतधन्वा यह अतिक्रूर कार्य कर रहा था तब अन्तःपुर नारियाँ अनाथ की नांई भरसक रोने लगी और चिल्लाने लगी परन्तु शतधन्वा ने उनके रुदन की ओर स्वल्प भी ध्यान न दिया और जैसे कसाई पशुओं का वध कर देता है वैसे शतधन्वा सत्राजित् को मारकर मणि लेकर वहाँ से भाग गया ॥ ६ ॥ सत्यभामा जी ने निजपितृचरण सत्राजित का अपनी नजरों से क्रूर वध को देखा तब अत्यन्त शोकवश बनकर हे पिताजी, हे प्रिय पिताजी मैं ही मारी गयी—इस प्रकार वार वार पुकार कर विलाप करने लगी । विलाप करती पुत्री सत्यभामा जी बेहोश हो जाती थी और जब चेतना आती तब पुनः पुनः विलाप करती रहती थी ॥ ७ ॥ कुछ स्वस्थता पाकर पिता जी की काया को तैल के कड़ाहे में रखवाकर और स्वयं हस्तिनापुर गयीं । उन्होंने वहाँ जाकर भगवान् श्रीकृष्ण को दुःख के साथ अपने पिताजी की क्रूर हत्या का समाचार सुनाया ॥ ८ ॥

तदाकर्ण्येश्वरौ राजन्ननुसृत्य नृलोकताम् । अहो नः परमं कष्टमित्यस्राक्षौ विलेपतुः ॥ ९ ॥
आगत्य भगवांस्तात[1] सभार्यः साग्रजः पुरम् । शतधन्वानमारेभे हन्तुं हर्तुं मणिं ततः ॥ १० ॥
[2]सोऽपि कृष्णोद्यमं ज्ञात्वा भीतः प्राणपरीप्सया । [3]साहाय्ये कृतवर्माणमयाचत स चाब्रवीत् ॥ ११ ॥
नाहमीश्वरयोः कुर्यां हेलनं रामकृष्णयोः । को नु क्षेमाय [4]कल्प्येत तयोर्वृजिनमाचरन् ॥ १२ ॥

कर्दमक्षमा

अन्वयः—राजन् ! ईश्वरौ, तद्, आकर्ण्य, नृलोकताम्, अनुसृत्य, अहो, नः परमम्, कष्टम्, इति, अश्राक्षौ, विलेपतुः ॥ ९ ॥ तात ! सभार्यः, साग्रजः, भगवान्, पुरम्, आगत्य, मणिम्, हर्तुम्, च शतधन्वानं हन्तुम्, आरेभे ॥ १० ॥ सः, अपि, कृष्णोद्यमं ज्ञात्वा, भीतः प्राणपरीप्सया, कृतवर्माणम्, साहाय्ये, अयाचत, सः च, अहम्, ईश्वरयोः, रामकृष्णयोः हेलनम्, न, कुर्याम्, इति अब्रवीत् । तयोः, वृजिनम्, आचरन्, कः, नु, क्षेमाय, कल्प्येत ॥ ११-१२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हेलनं प्रतिकूलम् । वृजिनमपराधम् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तच्छ्वशुरमरणम् । ईश्वरौ लोकातीतावपि नृलोकतां बन्धुवियोगे रोदनादिमनुष्यधर्ममनुसृत्य तल्लीलत्वात्, अन्यथा त्वतोवानौचित्यमेव । विलापमाह—अहो खेदे । न इति वसुदेवाद्यपेक्षया । परममिति बन्धुवरस्य शयानस्य धनाद्यर्थं चौरेण वधात् , लोके लज्जाद्युद्भवाच्चेत्येतत्प्रकारेण । हे राजन्निति—तस्येदृशी नरलीलामाधुरी त्वया बुध्यत एव ज्ञानेन राजमानत्वादिति भावः ॥ ९ ॥ तस्माद्धस्तिनापुरतः । ततः शतधन्वनः आरेभे-शतधन्वनः कृतवर्मादिसाहाय्यम् 'वाससो व्यचिनो-

---

१. तस्मात्-श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु. ।

२. ततः पाञ्चालनगराद्याज्ञसेन्याः स्वयं वरम् । घुष्यता यज्ञसेनेन प्रेषितो दूत आगतः ॥
आहूतस्तेन गोविन्दो गत्वा पाञ्चालके पुरे । ददर्श साग्रजस्तत्र किशोरान् पाण्डुनन्दनान् ॥
अदृष्टपूर्वान्सुव्यक्तं ब्रह्मरूपधरान्नृप । तैर्विद्धलक्ष्यैः पौरुष्यप्रतिलब्धमनोरथैः ॥
कुंभकारस्य शालायां समागम्याभिवन्द्य च । पितृष्वसामनुज्ञाप्य राजानं च युधिष्ठिरम् ॥ विजये.

३. य्यं—वीर. । ४. ल्पे—श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक. ।

न्मणिम्' इति वक्ष्यमाणाद्भगवानपि प्रियजनप्रेमवशनरलीलावेशेन गूढपुरुषादिद्वारा ज्ञात्वा साहाय्यार्थं बन्धुवर्गसमाहरणोद्यमं कृतवान् । तच्च शतधन्वानं विद्राव्य तमेकाकिनं हन्तुमित्यूह्यमित्यग्रे व्यक्तीभविष्यति ॥ १० ॥ सोपि शतधन्वापि । साहाय्ये सहायनिमित्तम् । स च कृतवर्मा । प्राणस्य जीवनस्यैव न तु यशोधर्मादेः, परितोक्षतदेहत्वादिना सर्वतोभावेनेप्सया गतप्रायस्य प्राप्तुमिच्छया । प्राक्कृतवर्मणो याचनं सेनाध्यक्षत्वात्, अक्रूरस्य परमभक्तत्वेन साहाय्ये संशयाच्च ॥ ११ ॥ तयो रामकृष्णयोः । अहमित्यन्यः करोतु नाम, अहं न कुर्यामिति भावः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ईश्वरौ लोकातीतावपि नृलोकतां बन्धुवियोगे रोदनादिमनुष्यधर्ममनुसृत्य तल्लीलत्वात् अन्यथा त्वनौचित्यमतीवेति विलापमाह—अहो खेदे न इति वसुदेवाद्यपेक्षया परममिति बन्धुवरस्य शयानस्य धनार्थं चौरेण वधात् तेन लोके लज्जाद्युद्भवाच्च इत्येतत्प्रकारेण हे राजन्निति तस्येदृशी नरलीलामाधुरी त्वया बुध्यत एवेति भावः ॥ ९ ॥ आरेभे शतधन्वनः कृतवर्मादिसाहाय्यं वाससोर्व्यर्चिनोन्मणिमिति वक्ष्यमाणाद्भगवानपि प्रियजनप्रेमवशनरलीलावेशेन गूढपुरुषादिद्वारा ज्ञात्वा स्वसाहाय्यार्थं सबन्धुवर्गसमाहरणादिनोद्यमं कृतवान् तच्च शतधन्वानं विद्राव्य तमेकाकिनं हन्तुमित्यूह्यम् अग्रेऽपि व्यक्तीभावि ॥ १० ॥ प्राणस्य जीवनस्यैव न तु यशोधर्मादेः परितः अक्षतत्वादिना सर्वतोभावेनेप्यसा गतप्रायस्य प्राप्तुमिच्छया प्राक्कृतवर्मणो याचनं सेनाध्यक्षत्वात् अक्रूरस्य परमभक्तत्वेन साहाय्ये संशयाच्च ॥ ११ ॥ अहमिति अन्यः करोतु नाम अहं तु न कुर्य्यामिति भावः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ईश्वरौ लोकातीतावपि नृलोकतां बन्धुवियोगे रोदनादिमनुष्यधर्म्ममनुसृत्य, यद्वा, साक्षादीश्वरत्वात् सर्वत्र समौ शोकादिरहितावपि कारुण्यादिनिजाशेषगुणविस्तरणाय मनुष्यलोकेऽवतीर्य्य, अत एव वात्सल्याद्विलेपतुः । कष्टम्, अहो खेदे, 'नः' इति श्रीवसुदेवाद्यपेक्षया, परममिति बन्धुवरस्य शयानस्य धनाद्यर्थं वैरिणा वधात् तेन लोके लज्जाद्युद्भवाच्च, इत्येतत्प्रकारेण, हे राजन्निति सुहृद्दुःखकातरयोस्तयोस्तादृशं सम्भवेदेवेति विस्मयो न कार्य्य इति । यद्वा, तत् सर्वं श्रीसत्यभामाप्रीत्यर्थमिति त्वया बुध्यत एवेति भावः ॥ ९ ॥ तस्माद् गजाह्वयात् पुरमागम्य भगवान् दुष्टदण्डार्थं साक्षादवतीर्णः परमेश्वरः, आरेभे शतधन्वनः कृतवर्म्मादिसाहाय्येन आत्मनोऽपि साहाय्यार्थं स्वबन्धुवर्ग-समाहरणादिनोद्यमं कृतवान्, वस्तुतस्तु क्रूरपक्षपातेन मणिवार्त्ताच्छादनार्थं दूरे रहसि शतधन्वनो वधाय निजोद्यमख्यापनेन तदपसारणार्थम् । अत एवाप्युक्तम्–भगवान् भक्तवात्सल्याद्यशेषगुणयुक्त इति । कृष्णस्य युद्धार्थं स्वजनाद्याकर्षकस्योद्यममिति साग्रजत्वेऽपि दुष्टदण्डार्थं तस्यैवोद्यमे प्राधान्यात्तथा तस्मादेव तस्य भयाच्च ॥ १० ॥ प्राणस्य जीवनस्यैव, न तु यशोधर्म्मादेः, परितोऽक्षतदेहत्वादिना सर्वतोभावेन, ईप्सया गतप्रायस्य प्राप्तुमिच्छया, तत्प्रवर्त्तनेऽक्रूरस्य मुख्यतायामपि प्राक् कृतवर्म्माणं प्रति याचनं सेनाध्यक्षत्वेन तस्य सामर्थ्यविशेषमननात्, किंवा अक्रूरस्य परमभक्तत्वेन साहाय्ये संशयात् ॥ ११ ॥ अहमिति—अन्यः करोतु नाम, अहन्तु न कुर्य्यामित्यर्थः । कुतः ? ईश्वरयोः सर्वशक्तिमतोः, अत एव युद्धादिना रमत इति रामः, वैरिणां सद्योजीवनाद्याकर्षणाच्च कृष्णस्तयोरिति भावः । कोऽन्यः कल्पेत योग्यो भवेत् ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

हेलनमपराधम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तद्यथाऽऽख्यानं श्रुत्वा हे राजन् ! ईश्वरौ रामकृष्णौ नृलोकतामनुसृत्य नरचेष्टामभिनयन्तावित्यर्थः । अस्राक्षौ अश्रुपूर्णनेत्रौ अहो नोऽस्माकं परममनवधिकं कष्टं दुःखं प्राप्तमित्येवं विलेपतुः विलपितवन्तौ ॥ ९ ॥ ततः ससत्यभामः साग्रजश्च भगवान् पुरं द्वारकामागत्य शतधन्वानं हन्तुं ततःशतधन्वनो मणिं हत्तुं चारेभे,उद्युक्तवान् ॥ १० ॥ सोपि शतधन्वापि कृष्णस्योद्यममुद्योगमाकर्ण्य प्राणपरीप्सया प्राणरिरक्षिषया कृतवर्माणं साहाय्यं सहायार्थमयाचत स च कृतवर्माऽब्रवीत् ॥ ११ ॥ उक्तिमेवाह—नाहमिति द्वाभ्याम् । हेलनं प्रातिकूल्यं न कुर्य्यां तत्र हेतुमाह कोन्विति तयोरामकृष्णयोर्वृजिनमपराधं कुर्वन् को नु पुमान् क्षेमाय कल्पेत क्षेमं प्राप्नुयादित्यर्थः । न कोपीति भावः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अस्राक्षौ अश्रुजलकलिलेक्षणौ ॥ ९-११ ॥ याज्ञसेन्याः द्रौपद्याः (क-ख) ब्रह्मरूपधरान्ब्राह्मणवेषं बिभ्राणान् पौरुषेण पराक्रमेण प्रतिलब्धो मनोरथो येषां ते तथा तैः (ग) पितृष्वसां पितृष्वसारं कुन्तीम् (घ) वृजिनमपराधम् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्तस्या वचनं श्रुत्वा अश्रुपातं विना विलापं चाभिनिन्यतुर्लोकसमाधानार्थमित्यर्थः ॥ ९ ॥ ततश्च सा आगत्य जीवयितुमशक्तावेव सास्रं विलेपतुरिति स्वबन्धूनवददिति ज्ञेयम् ॥ १०-११ ॥ नाहमित्ययं भावः मया सत्राजिद्वध एव भवान् प्रवर्त्तितो न तु भगवत्प्रातिकूल्ये त्वं तु त्वं यदि शरणं न यियाससि तर्हि त्वमिव किमहमपि तत्प्रतिकूलो बुभूषामीति ॥ १२ ॥

गूढार्थदीपिनी

अस्राक्षौ अश्रूपूर्णनेत्रौ विलेपतुः ॥ ९ ॥ भार्या सत्यभामा ॥ १० ॥ परीप्सया रक्षणेच्छया ॥ ११ ॥ हेलनं प्रतिकूलम् । वृजिनमपराधम् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नृलोकतां नृलोकं । स्वार्थे तल् । नृलोकतानुकरणता स्थेम्ने । अस्राक्षता नटनज्ञाने चेश्वराविति हेतूक्तिः । आ ईषदस्रैर्युक्तान्यक्षीणि ययोस्तौ सन्तौ विलेपतुः । इत्यस्राक्षाविति च पठन्ति ॥ ९ ॥ भार्यया सह साग्रजः सबलः शतधन्वानं हन्तुं मणिं हर्तुं चारेभे ॥ १० ॥ यज्ञसेनेति द्रुपदनामान्तरम् । तत्पुत्र्या द्रौपद्याः स्वयंवरं घुष्यता यज्ञसेनेन प्रेषितो दूत आगतः ॥११॥ किशोरांस्तद्वयसः ॥ १२ ॥ ब्रह्मरूपधरान् अदृष्टरूपधरान् । यद्यपीत्यूचिवान्सह मरुत्तनयार्जुनाभ्यां प्रायात्पुरीं च सहदेवयुतः स्वकीयामित्यादिना त्रयाणां दृष्टत्वं कृष्णतो ज्ञानावाप्तिश्चाचार्यैरुक्ता तथाप्युर्वरिताभ्यां द्वाभ्यामदृष्टाभ्यां सह नृभाव इत्यादिशक्तिरिति वा । ब्रह्मरूपधरत्वे न दृष्टपूर्वत्वं वेत्यदृष्टरूपानित्युक्तिः सम्भवतीति मन्तव्यम् । यद्वाऽदृष्टौ पूर्वौ येषु पञ्च सूतान् । पूर्वत्वं च व्यूहद्विकस्य धर्मनकुलयोरिति ज्ञेयम् । यद्वानिमान इति भाष्योत्तराममितत्वेनेति व्याख्यानवन्नभः पूर्वेत्यनेनान्वयः । ततश्च दृष्टश्चापूर्वौ चादृष्टपूर्वाः । अपूर्वावदृष्टाविति यावत् । नन्वेवं तर्हि मणिमञ्जर्यामित्युक्त्वा भीमपार्थाभ्याम् । पूजयन्तौ हरिं पार्थाविति द्वयोरेव ग्रहणं कथमिति चेत् । सत्यम् । तथा भगवदुपदेशविधत्वाद्द्वयोर्ग्रहणम् । सहदेवस्यातथात्वात्तदनुक्तिः । सुव्यक्तम् । नृपाद्विद्धं लक्ष्यं यैस्तैः । पौरुष्येण प्रतिलब्धो मनो यैस्तैः ॥ १३ ॥ कुम्भं करोतीति कुम्भकारस्तस्य शाला तस्यां समागम्य मिलित्वाऽभिवन्द्य च पितृष्वसां । आर्षष्टाबन्तशब्दः । राजानं युधिष्ठिरं चानुज्ञाप्य ॥ १४ ॥ प्राणपरीप्सया जीवनेच्छया ॥ १५ ॥ साहाय्ये तदर्थमीश्वरयो रामकृष्णयोः । हेलनमनादरम् ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यथा ज्ञात्वा न किञ्चित्कृतवान्, एवं श्रुत्वापि न करिष्यतीत्याशङ्क्य, लौकिकं प्रतीकारं च कृतवानित्याह **तदाकर्ण्येति द्वाभ्याम्** । ईश्वरावपि लीलार्थं नृलोकमनुसृत्य श्वशुरमारणात् दुहितेव स्वयमपि विलापं कृतवन्तौ । यथा तस्याः कष्टं तथा कष्टमूचतुः । केवलं वाचनिकत्वव्युदासाय **अस्राक्षौ** । पूर्णा शक्तिः तथा करोतीति ज्ञापयितुं द्विवचनम् । उद्योगमाह **आगत्येति** । अन्यद्वारा कार्यकरणमौदासीन्यद्योतकमिति स्वयमेवागत्य कृतवान् । **भगवानिति** सामर्थ्यमुपायज्ञानं च । **तातेति** राज्ञः सम्बोधनं विश्वासाय । गुप्ततया समागतो भविष्यतीत्याशङ्क्याह **सभार्यः साग्रज** इति । **पुरं** द्वारकामेव । नतु मध्ये स्थित्वा उपायेन बन्धनं विचारितवात् । ततः शतधन्वानं हन्तुम् । हननस्य प्रयोजनं **मणिं हर्तु**मिति । स हि जीवन् न ददाति । अतो हत्वैव ग्राह्यः । अत्र द्वयं न प्रयोजनम्, हननं ग्रहणं च । किन्तु ग्रहणार्थमेव हननम् । अन्यप्रेरितो हतवानिति । **भगवदिच्छापीति** न वधमर्हति, नापि तद्वंश्यो भगवान्, येन हन्तारं हन्यात् । उभौ च तुल्यौ । कृतस्य करणं नास्तीति शतधनोर्हननेऽपि न सत्राजिज्जीवनम् । अत एवाग्रे भगवद्वाक्यं घटते । 'वृथा हतः शतधनु'रिति । शतधनुःशब्दः सकारान्तः, उकारान्तोऽपि । सत्राजिद्वत् । द्विःस्वभावेनैव द्विःस्वभावो मारित इति ज्ञापयितुं द्विविधः प्रयोगः । सत्राजितो द्विस्वभावत्वं निन्दाकरणात् पश्चात्तापकरणाच्च निरूपितम् । अस्यापि हनने निर्भयत्वमग्रे पलायनेन सभयत्वं च निरूपयिष्यति । ततः शतधनुषः अयमारम्भः ध्रियतां बध्यतामिति स्पष्टमाज्ञापनरूपः ॥ १० ॥ ततो राजकीयाः तन्निग्रहार्थं प्रवृत्ताः, एवं सति शतधनुषः कृत्यमाह **सोऽपिति** । योऽयं राजद्वारा निग्रहः श्रूयते, स भगवत्कृत एवेति निश्चितवान् । अतः कृष्णोद्यमं ज्ञात्वा पूर्वं साधारणत्वेन ब्रह्मत्वेन वा सम्बन्धेन वा ज्ञात्वा निर्भयः । इदानीं पक्षपातिनं ज्ञात्वा भीतो जातः । चौरस्य चौर्यादेव स्वत्वमुत्पद्यते । तस्मिन् हते शत्रुजयन्यायेन यो हन्यात्, तस्य भवति । अन्यथा तस्मिन् विद्यमाने परस्वापहार एव भवति । अतो भगवान् हत्वैव ग्रहीष्यतीति निश्चित्य, **प्राणपरीप्सया** सर्वतः प्राणा रक्षणीया इति, अहत्वा दुष्टान् न ग्रहीष्यतीति, चौरवच्च मरणं न प्रशस्तमिति, स्वयमसहायः कृतवर्माणं यादवं सहायत्वेन प्रार्थितवानित्याह **साहाय्ये कृतवर्माणमयाचते**ति । अस्य याचनवाक्यानि स्पष्टानीति नोदाहृतानि । **स चाब्रवीदिति** चकारेण सूचितानि ॥ ११ ॥ स कृतवर्मा महान् यादवः, भारते युद्धे कौरवपक्षपाती, बहुकार्यं तस्यास्तीति, स्वाभिलषितं सिद्धमेवेति, मणिं चायं न प्रयच्छतीति, उदासीनः सन् भगवत्पक्षपातेन वाक्यान्याह **नाहमीश्वरयो**रिति । फलं तु न तव, नापि मम, किन्तु हेलनं कर्तुं शक्यम्, यथा त्वं करोषि, तदपि न कर्तव्यम् । यतः कृष्णरामौ न लौकिकौ, तत्रापीश्वरौ दृष्टादृष्टलौकिका-

लौकिकफलदानसमर्थौ। अहं चैकः स्वानुभवेन तुच्छश्च। **रामकृष्णयो**रिति नाम्नैव प्रसिद्धिरुक्ता। ननु भवानपि यादवः शूरो महारथश्च, तत्कथं बिभेषीत्याशङ्क्याह **को नु क्षेमाये**ति। **नु** इति वितर्के। यावन्तो भगवदपराधकर्तारः, ते सर्व एव क्षेमात् प्रच्युता दृष्टाः। भविष्योतः परं को वा कल्प्येत, भूतवदेव भविष्यस्यापि निर्णयात्। **नु** इति निश्चये। तत्रापि तयोः पूर्णशक्तिमति भगवति आचरन्नेव भगवता अहतोऽपि चिन्तयैव म्लानो भवतीति साधनफलयोः समानकालत्वं निरूपयन् वर्तमानप्रयोगं कृतवान्॥ १२॥

श्रीसुबोधिनीसारः

तत् मरणमाकर्ण्य श्रुत्वा ईश्वरौ रामकृष्णौ नृलोकतां मनुष्यभावमनुसृत्याश्रित्यास्रौश्रुभिर्युक्ते अक्षिणी ययोस्तौ विलेपतुर्विलापं चक्रतुरहो नोस्माकं परमं कष्टं महद्दुःखमिति॥ ९॥ साग्रजः सरामः सभार्यः सस्त्रीको भगवान् तस्माद्धस्तिनापुरात् पुरं द्वारकामागत्य शतधन्वानं हंतुमारेभे उद्यमं चक्रे ततः सकाशान्मणिं हर्तुमानेतुम्॥ १०॥ कृष्णस्योद्यमं मारणोपायं ज्ञात्वा बुद्ध्वा प्राणपरीप्सया जीवनेच्छया भीतः सोपि शतधनुः साहाय्ये रक्षानिमित्तं कृतवर्माणमयाचत स च कृतवर्माह॥ ११॥ ईश्वरयो रामकृष्णयोर्हेलनमपराधं नाहं कुर्यां तत्र हेतुः। तयोर्द्वयोर्वृजिनं दुःखमाचरन् कुर्वन् को नु क्षेमाय कल्याणाय कल्पते युज्यते॥ १२॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

हे राजन्। तत् सत्राजिन्मरणमाकर्ण्य ईश्वरावपि रामकृष्णौ नृलोकतामनुसृत्य नरलीलामभिनयन्तौ अस्राक्षौ अश्रुपूर्णनेत्रौ अहो नोऽस्माकं परमं कष्टं दुःखं प्राप्तमित्येवं विलेपतुरित्यन्वयः॥ ९॥ सभार्यः सत्यभामासहितः साग्रजः बलभद्रसहितश्च भगवान् कृष्णस्तस्मात् हस्तिनापुरात् पुरं द्वारकामागत्य अतः शतधन्वनो मणिं हर्तुं तं शतधन्वानं, हन्तुमारेभे उद्युक्तो बभूव॥ १०॥ स शतधन्वापि कृष्णस्योद्यमं स्ववधोद्योगं ज्ञात्वा प्राणपरीप्सया प्राणरक्षणेच्छया कृतवर्माणं साहाय्ये अयाचत, स च कृतवर्मा अब्रवीत्॥ ११॥ किमब्रवीत्तदाह—नाहमिति द्वाभ्याम्। अहं रामकृष्णयोर्हेलनं प्रतिकूलं न कुर्याम्। तत्र हेतुमाह—क इति। तयोर्वृजिनमपराधमाचरन् कुर्वन् को नु पुमान् क्षेमाय कल्पेत क्षेमं प्राप्नुयादित्यर्थः। तत्रापि हेतुमाह—ईश्वरयोरिति॥ १२॥

अन्वितार्थप्रकाशिका

तदेति॥ हे राजन्! तत्सत्राजिन्मरणमाकर्ण्य ईश्वरावपि रामकृष्णौ नृलोकतामनुसृत्य नरलीलामभिनयन्तौ अस्राक्षौ अश्रुपूर्णनेत्रौ अहो नोऽस्माकं परमं कष्टं दुःखं प्राप्तमित्येवं विलेपतुः॥ ९॥ आगत्येति॥ सभार्यः सत्यभामासहितः साग्रजः बलभद्रसहितश्च भगवान् कृष्णस्तस्मात् हस्तिनापुरात् पुरं द्वारकामागत्य ततः शतधन्वनो मणिं हर्तुं तं शतधन्वानं हन्तुं चारेभे उद्युक्तो बभूव॥ १०॥ सोऽपीति॥ स शतधन्वाऽपि कृष्णस्योद्यमं स्ववधोद्योगं ज्ञात्वा प्राणपरीप्सया प्राणरक्षणेच्छया कृतवर्माणं साहाय्ये अयाचत स कृतवर्मा अब्रवीत्॥ ११॥ नाहमिति॥ अहम् ईश्वरयोः रामकृष्णयोः हेलनं प्रतिकूलं न कुर्यां तयोर्वृजिनमपराधमाचरन् कुर्वन्को नु पुमान् क्षेमाय कल्पेत क्षेमं प्राप्नुयात्। अयं भावः। मया सत्राजिद्वध एव भवान् प्रवर्तितो नतु भगवत्प्रातिकूल्ये। त्वं तु यदि तं शरणं न यियाससि तर्हि त्वमिव किमहमपि तत्प्रतिकूलो बुभूषेयम् इति॥ १२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्राक्षौ अश्रुव्याप्तनेत्रौ॥ ९॥ तस्मात् गजाह्वयात्॥ १०॥ साहाय्ये रक्षणकर्तृत्वे॥ ११॥ हेलनं अपराधं। वृजिनं प्रतिकूलाचरणं॥ १२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति॥ हे राजन्, तत् आकर्ण्य यथाख्यातं श्रुत्वा, ईश्वरौ रामकृष्णौ, नृलोकतां अनुसृत्य, नरचेष्टामभिनयन्तौ सन्तावित्यर्थः। अस्राक्षावश्रुपूर्णनयनौ सन्तौ च, अहो नोऽस्माकं परममनवधिकं, कष्टं दुःखं, प्राप्तं इत्येवं विलेपतुः विलपितवन्तौ॥ ९॥ आगत्येति॥ भगवान् श्रीकृष्णः, सभार्यः सत्यभामासहितः, साग्रजो बलभद्रसहितः संश्च, तस्माद्गजाह्वयात्, पुरं द्वारकां आगत्य, शतधन्वानं हन्तुं, ततः मणिं हर्तुं च, आरेभे। उद्युक्तवानित्यर्थः॥१०॥ सोऽपीति॥ स शतधन्वापि, कृष्णोद्यमं श्रीकृष्णारब्धं स्ववधोद्योगं, ज्ञात्वा समाकर्ण्य, भीतः सन्, प्राणपरीप्सया प्राणरिरक्षया, कृतवर्माणं साहाय्ये, अयाचत। तदा स च स कृतवर्मापि, अब्रवीत्तं कथयामास॥ ११॥ उक्तिमेवाह नाहमिति द्वाभ्याम्॥ नाहमिति॥ हे शतधन्वन्, अहं ईश्वरयोः, रामकृष्णयोः, हेलनं प्रातिकूल्यं, न कुर्याम्। कुतः। तयोः, वृजिनमपराधं, आचरन् कुर्वन्, को नु पुमान्, क्षेमाय कल्पेत क्षेमं प्राप्नुयादित्यर्थः। न कोऽपीति भावः॥ १२॥

कृष्णप्रिया

राजन् ! करुणानिधान सर्वसमर्थ श्रीकृष्ण भगवान् और श्रीबलभद्रजी ने सर्ववृत्तान्त श्रवण किया एवं साधारण मनुष्य के जैसी लीला करते हुए अश्रुभरे नेत्रों से रुदन करते हुए कहने लगे कि अरेरे यकायक हमलोगों पर अकल्प्य विपत्ति आ गयी ॥ ९ ॥ तदन्तर भगवान् श्रीकृष्ण श्रीसत्यभामाजी और बलभद्रजी के साथ हस्तिनापुर से द्वारिकाजी लौट आये पुनः शतधन्वा को मारने का और उससे मणि लौटाने का प्रयत्न करने लगे ॥ १० ॥ राजन् ! शतधन्वा को ख्याल आया कि भगवान् श्रीकृष्ण मुझे मारने का उद्योग कर रहे हैं तब वह अत्यंत भयभीत बना और अपने प्राणों की रक्षा की सहाय के लिये कृतवर्मा से निवेदन किया तब कृतवर्मा ने कहा ॥११॥ कृतवर्मा कहने लगा कि-भगवान् श्रीकृष्ण और बलभद्रजी सर्वशक्तिमान् ईश्वर हैं। मेरा सामर्थ्य उनका सामना करने का नहीं है। भला इस भूतल में ऐसा कौन व्यक्ति है जो व्यक्ति इन दोनों के साथ वैर बाँधकर इस लोक और परलोक में क्षेम कुशल से रह सके ॥ १२ ॥

कंसः [1]सहानुगोऽपीतो यद्द्वेषात्त्याजितः श्रिया। जरासंधः सप्तदश संयुगान् विरथो गतः ॥ १३ ॥
प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत। सोऽप्याह को विरुध्येत [2]विदित्वेश्वरयोर्बलम् ॥ १४ ॥
य[3] इदं [4]मायया विश्वं सृजत्यवति हन्ति च। चेष्टां विश्वसृजो यस्य न विदुर्मोहिताजया ॥ १५ ॥
यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना। दधार लीलया बाल उच्छिलीन्ध्रमिवार्भकः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—यत्, द्वेषात्, सहानुगः, कंसः, श्रिया, त्याजितः, अपि, ईतः, जरासंधः, सप्तदश, संयुगान्, विरथः, गतः ॥ १३ ॥ प्रत्याख्यातः, सः, शतधन्वा, च, अक्रूरम्, पार्ष्णिग्राहम्, अयाचत, सः, अपि, आह, ईश्वरयोः, बलम्, विदित्वा, कः, विरुध्येत ॥ १४ ॥ यः, इदम्, विश्वम्, मायया, सृजति, अवति, च, हन्ति, यस्य, अजया, मोहिताः, विश्वसृजः, चेष्टाम्, न, विदुः ॥ १५ ॥ यः, सप्तहायनः, बालः, अर्भकः, उच्छिलीन्ध्रम्, इव, शैलम्, उत्पाट्य, एकेन, पाणिना, दधार ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपीतो मृतः सप्तदशसंख्याकान् संयुगान् ॥ १३-१४ ॥ तौ रामकृष्णावेकमेव तत्त्वमित्यभिप्रेत्याऽऽह—य इदमिति। अजया मायया मोहिताजयेति संधिरार्षः ॥ १५-१७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"पानाभावे च मरणेऽपीतः पीतेतरे गते" इति निरुक्तिः। तद्द्वेषाद्धेतोः श्रिया संपत्त्या हेतुकर्त्र्या त्याजितः स्वयमेव स इत्यर्थः। तस्यास्तत्र तथैव स्थितिस्तस्यैव त्वपगतिरिति ॥ १३ ॥ प्रत्याख्यातो निराकृतः। स शतधन्वा, कृतवर्मणेति शेषः। पार्ष्णिग्रहं पृष्ठदेशे रक्षितारम्। सोऽक्रूरः। "पार्ष्णिः सैन्यस्य पृष्ठे स्यात्पश्चात्पदजिगीषयोः" इति विश्वः। पार्ष्णिग्राहम् सहायम् ॥ १४ ॥ यः कृष्णः। यस्य कृष्णस्य। तत्रेश्वरो नाम एक एव स्यादिति रामस्यापि कृष्णान्तर्भावविवक्षयैकत्वेनाह—य इति त्रिभिः। इदं विचित्रानताश्चर्यमयम्। लीलयाऽनायासेनेत्यर्थः। तच्च किमर्थमिति केपि ज्ञातुं नेशांचक्रिर इत्याह—चेष्टामिति। तत्र चेष्टामीहाम्, तत्तदभिप्रायमित्यर्थः। यस्येत्यस्याऽजयेत्यनेनाप्यन्वयः। अत एतामपि चेष्टां को जानीयादिति भावः ॥ १५ ॥ इहापि तादृशः प्रत्ययो दृश्यतामित्याह—य इति। लीलया सप्तहायनत्वादेव। बालः आविष्कृतबाल्यानुरूपाकारादिस्तथापि दधार तत्रापि शैलं शिलामयमिति मृदाद्यभावेन महागुरुत्वं शिलानां खण्डशः पृथक् कृत्वा धारणाशक्यत्वादिकं चाभिप्रेतम्। तथाप्युत्पाट्य मूलतो भूतलादुद्धृत्य तत्राप्येकेन वामेनैव पाणिना तत्रापि लीलयानायासेन। तत्र दृष्टान्तमनुरूपमाह—उच्छिलींध्रमिवार्भक इति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तद्द्वेषाद्धेतोः श्रिया सम्पत्त्याहेतुकर्त्र्या जितः स्वयमेव स इत्यर्थः तस्यास्तत्र तथैव स्थितस्यैव त्वपगतिरिति ॥ १३ ॥ पार्ष्णिग्राहं साहाय्यमित्यर्थः ॥ १४ ॥ तत्रेश्वरो नामैक एव स्यादिति रामस्यापि श्रीकृष्णान्तर्भावविवक्षयैकत्वेनाह। य इति

---

[1] गोयेतो-वीर.; नुगो वीरो-विज. । [2] द्वानी॰ श्रीधर. वंशी. जीव. वीर. विज. ।

[3] यं कैलासाश्रयः शंभुर्ननाम शिरसा हरिम्। यो हंसडिभकौ युद्धे जितवान् वरदुर्मदौ ॥
आशीविषो महानागो येन निर्वासितो ह्रदात्। -विज. ।

[4] ययाा-विज. ।

त्रिभिः । इदं विचित्रानन्ताश्चर्य्यमयं लीलया अनायासेनेत्यर्थः । तच्च किमर्थमिति केऽपि ज्ञातुं नेशाञ्चक्रिरे इत्याह । चेष्टामिति । तत्र चेष्टामीहामिच्छां तत्तदभिप्रायमिति यावत् यस्येत्यस्याजयेत्यनेनाप्यन्वयः अत एतामपि चेष्टां को जानीयादिति भावः ॥१५॥ इहापि तादृशः प्रभावो दृश्यतामित्याह—य इति । जन्मादिलीलया सप्तहायनत्वादेव बालः आविष्कृतबाल्यानुरूपाकारादिः तथापि दधार तत्रापि शैलं शिलामयं इति मृदाद्यभावेन महागुरुत्वं शिलानां खण्डशः पृथक्कृत्वा धरणाशक्यत्वादिकं चाभिप्रेतं तथाऽप्युत्पाट्य मूलतो भूतलादुद्धृत्य तत्राप्येकेन वामेनैव पाणिना तत्रापि लीलया अत्रानुरूपो दृष्टान्तः उच्छिलीन्ध्रमिवार्भक इति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यस्मिन् ययोर्वा द्वेषाद्धेतोः, श्रिया धर्म्मादिसम्पत्त्या त्याजितस्त्यक्तः सन्, यद्वा कृष्णेन श्रिया त्याजितो हापितः, पादस्यास्य परेणाप्यनुषंगः ॥ १३ ॥ पार्ष्णिग्राहं साहाय्यमित्यर्थः; ईश्वरयोर्जगदीशयोः ॥ १४ ॥ ननु ईश्वर एक एव स्यादिति द्वित्वेनेश्वरत्वहानिरित्याशंकां परिहरन्नैश्वर्य्यमेव दर्शयति—य इति । द्वयोरप्यैक्योक्त्या ईश्वरत्वं साधितमेव, इदं विचित्रानन्ताश्चर्य्यमयम्, लीलया अनायासेन तच्च किमर्थमिति केऽपि ज्ञातुं नेशाञ्चक्रिरे इत्याह—चेष्टामिति । चरितमपि एतावदीदृशं चेति विश्वसृजः श्रीब्रह्मादयोऽपि न विदुः, किं पुनस्तत्प्रयोजनमित्यर्थः । यद्वा, इच्छां तत्तदभिप्रायमित्यर्थः । यस्येत्यस्याजयेत्यनेनाप्यन्वयः । न जायते नोत्पद्यते, किन्तु सदैव वर्त्तते इत्यजातयेति मोहस्यापि सदातनत्वमभिप्रेतम् । किमर्थं त्वया सत्राजिद्घातितः, किमर्थं वा मणिं मयि स्थापयितुमिच्छसीत्यादिकां तल्लीलां कोऽपि ज्ञातुं न शक्नुयादिति भावः ॥ १५ ॥ अहो सृष्ट्यादिचेष्टां न विदुरिति किं वक्तव्यम्, तस्य सम्प्रति सर्व्वसाक्षात् स्वयं श्रीगोवर्द्धनधारणप्रकारादिकमपि केनापि ज्ञातुं न शक्यत इति । यद्वा, ननु ईश्वरत्वे तथास्ताम्, अधुना तु यादवत्वांगीकारात्तेन सह यादवानामस्माकं विरोधो घटेतैव ? न, अत्रैवाशेषैश्वर्य्यप्रकटनादित्याह—य इति । सप्तहायनत्वादेवार्भक इति बाल्यानुरूपाकारादि सूचितम्, तथापि दधार, तत्रापि शैलं शिलामयमिति मृदाद्यभावेन महागुरुत्वं शिलानां खण्डशः पृथक्त्वाद्धारणाशक्यत्वादिकञ्चाभिप्रेतम् । तत्राप्युत्पाट्य मूलतो भूतलादुद्धृत्य, तत्राप्येकेन वामेनैव पाणिना, तत्रापि लीलया अत्रानुरूपो दृष्टान्तः—बाल इति ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

शिलीन्ध्रं कोटरोत्थच्छत्राकम् ॥ १६–२८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किन्त्वयेत्थं दृष्टमित्यत्रोदाहरणमात्रमाह—कंस इति । यत्र श्रीकृष्णे द्वेषाद्धेतोः श्रिया राज्यश्रिया प्राणैश्चेति शेषः त्याजितः तथा जरासन्धोऽपि सप्तदशसङ्ख्याकात्सङ्ग्रामात् विरथः शरीरमात्रावशिष्टो गतः ॥ १३ ॥ इत्थं तेन प्रत्याख्यातस्ततोऽक्रूरसाहायमयाचत सोऽपीति । सोऽप्यक्रूरोऽपि उक्तिमेवाह—क इत्यादिना आत्मने नम इत्यन्तेन ईश्वरयोरामकृष्णयोर्बलं जानको वा पुमान् विरुध्येत ईश्वराभ्यामिति शेषः ॥ १४ ॥ भगवतो बलं ववतु तावत्तस्य कृत्स्नजगदुदयविभवलयलीलत्वमाह—य इति । अवति रक्षति अजः सृज्यगतजन्मादिस्पर्शरहितः एवं विधेन को वा विरुध्येतेति भावः सर्वेऽप्येवं किं न विदुरित्यत आह—चेष्टामिति । यस्य भगवतोऽजया मायया मोहितास्तस्य चेष्टां विश्वसृष्ट्यादिरूपां न विदुः मोहिता जयेत्यत्र सन्धिरार्षः ॥ १५ ॥ बलं प्रपञ्चयति—य इति । यो भगवान् बालस्तत्रापि सप्तवर्षवयाः सन्नेव शैलं गोवर्द्धनमेकेन पाणिनोत्पाट्य लीलया दधार यथार्भकः शिलीन्ध्रमुत्पाट्य धरति तद्वत् शिलीन्ध्रं भूतालकुसुमम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अपराधकार्यत्वे निमित्तानि कथयति । कंस इति ॥ १३ ॥ प्रत्याख्यातो निराकृतः कृतवर्मणेति शेषः पार्ष्णिग्राहं पृष्ठबलम् ॥ १४–१५ ॥ उच्छिलीन्ध्रं छत्राकम् ॥ १६–१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अपीतो मृतः अप्ययशब्दस्यामरणार्थकत्वात् श्रिया त्याजितः त्यक्तः यद्वा हत इह यत् द्वेषात् स्वविषयकाद्धेतोः कंसः श्रिया त्याजितः सप्तदशानां संयुगानां समाहारस्तस्मात् ॥ १३ ॥ एवं कृतवर्मणा प्रत्याख्यातः ॥ १४ ॥ रामकृष्णावेकमेव तत्त्वमित्यभिप्रेत्याह–य इति मोहिता अजया इति सन्धिरार्षः ॥ १५–१७ ॥

गूढार्थदीपिनी

अपीतो मृतः । 'मरणेऽपीतः' इति निरुक्तेः । सप्तदशानां संयुगानां समाहारस्तस्मात् इति पञ्चम्यन्तपाठ एव सुकरः॥१३॥ प्रत्याख्यातो निराकृतः स शतधन्वा । पार्ष्णिग्राहं पृष्ठरक्षकम् साहाय्यमित्यर्थः अयाचत । बलं विद्वान् जानन् ॥ १४ ॥ चेष्टामभिप्रायम् । विश्वसृजो ब्रह्मादयः ॥ १५ ॥ यो बालः कृष्णः दधार । उच्छिलीन्ध्रं छत्राकम् ॥ १६–१७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अपीतो मृतः ॥ १३–१४ ॥ मोहिताजयेति सन्धिरार्षः ॥ १५–१८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तयोर्वृजिनं तोदनम्। आचरकुर्वन् को नु पुमान्क्षेमाय कल्पेत्। न कोऽपीति। कोपिनि तस्मिन्न क्षेमो स्यामिति भावः। मृतपराजितनिदर्शनप्रदर्शनेन साहाय्यानाचरणमुपोद्बलयति। कंस इति। द्वेषायस्मिन्द्वेषाद्यस्य द्वेषाद्वा श्रिया त्याजितः श्रीरत्र यथासम्भवं प्राणसम्यच्च। सप्तदशसंख्यसंख्यतः। तद्विधाय विरथः सन्मतः। एमं कृतवर्मणा प्रत्याख्यातो नाहं तव साहाय्यं कुर्यामिति निराकृतः। अक्रूरं पार्ष्णिग्राहं सहकारिणमयाचत ॥ १७–१८ ॥ ईश्वरयोर्बलं विद्वान् कः पुमांस्ताभ्यां सह विरुद्धयेत विरोधं कुर्यात्। ईश्वरयोरिति वचनेन प्रतीतं साम्यं पराकर्तु विविच्याच्युतस्य स्वोपास्यशेषात्मकबलस्य च महात्म्यमाह। यमिति। ननु सती सत्यलोकाधिक एतदधिके विधौ हरपरिग्रहः किमर्थमिति चेत्सत्यम्। दुरुद्धरा तव शङ्का चेदपि गुरुकरुणायाः किमसुसाधम्। कैलासं प्रति सतीसहितो गत्वा तपश्च कृत्वा हरवरतः प्रद्युम्नमापेति वृत्तं लोकनटनं घटिते न वास्तविकमिति बोधयितुं यद्विषये प्रथा तन्नमस्यतास्योक्ता चेतसा शाम्यतीति त्रिनेत्रग्रहः। कैलासाश्रयः शम्भुर्हरो यं हरिं शिरशा ननाम। यं बलं कैलासाश्रयः शम्भुरिति नाम्ना सहितं शिरश्च तेन तन्मात्रेण तद्दिनेति यावत्। अहरिं हारैभिन्नं वदन्तीति शेषः। स अहेत्यनुवृत्तिर्वा। स तद्योजन इत्यतो रुद्र एव भावी शेषो रुद्रतादशायां तन्नाम शिरश्च तावन्नेति शेषः ॥ १९ ॥ वरदुर्मदौ हरवरदुर्मदौ। य आगः कृतवान्यश्च महानाशीविषः कालियो यश्चासहान इति। बलपक्षे हृदासिर्वासितः। अन्यथाऽन्यतरवैय्यर्थ्यं स्फुटप्रतिभासं यथाकथञ्चित्समाधिस्त्वगतिकागतिः ॥ २० ॥ यः कृष्णो लीलया विश्वं सृजत्यवति हन्ति च यस्य चेष्टया मोहिता विश्वसृजः प्रजापतयोऽपि तां चेष्टां न विदुरिति। य इदं विश्वं समग्रं जगल्लीलया धरतीति शेषः ॥ २१ ॥ यः सप्तहायनः शैल गोवर्धनमुत्पाट्याभर्क उच्छिलीन्ध्रं गतम्। एकेन पाणिना दधार एकेन शीर्ष्णाऽर्भक उच्छिलीन्ध्रमिव दधारेत्यपरत्र। सहस्रमूर्ध्नोऽस्य बतैकमूर्धनीत्याचार्योक्तेः ॥ २२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्र निदर्शनमाह कंस इति। महान् स राजा, तादृशोऽपि तयोर्वृजिनमाचरन्, **सहानुगो** भ्रातृसहितोऽपि, अपीतः अप्ययं प्राप्तः। अपीति प्रलयार्थे। अप्युपसर्गपूर्वक इण् धातुः। कर्तरि क्तः। अपिरप्ययः तमित इति। श्रिया वा अपीतः अपगतः अपसारितः भगवतैव च, द्वेषाद्वा। एकमुदाहरणं नार्थं निश्चाययतीति व्याजरहितां क्रियाशक्तिं भगवतो निरूपयति **जरासन्ध** इति। सप्तदश युद्धानि कृत्वा आलक्ष्य, यद्द्वेषात्त्याजित इति वा अनुवर्तते। संयुगान् त्याजितः विरथो भूत्वा गतः स्वगृहम्। सप्तम्यर्थे वा द्वितीया ॥ १३ ॥ कृतवर्मा भगवत्प्रतिकूलस्वभाव इति प्रथमं स याचितः। स चेदुत्तरं दत्तवान्, तदा तमुदासीनं मत्वा, सत्राजिद्वधः अक्रूरस्यैव सर्वथाभीष्ट इति उपकारकर्तारमात्मानं मत्वा, भगवद्भक्तमपि अक्रूरं युद्धे क्रियमाणे भङ्गे पश्चात्पृष्ठपूरकत्वेन याचनं कृतवानित्याह **प्रत्याख्यात** इति। चकारात्तत्पक्षपातिनोऽन्येऽपि तेन प्रत्याख्याताः। स पूर्वोक्तः कृतोपकारः। अक्रूरं भक्तं नाम्ना हितकारित्वमपि बोधितम्। पार्ष्णिग्राहः पृष्ठपूरकः। पूर्ववदेव याचनवचनानि नोक्तानि। सोऽपि स्वकार्यस्य सिद्धत्वात् भगवदसम्मतिं ज्ञात्वा प्रत्याचष्ट इत्याह **सोऽप्याहेति** सार्धैस्त्रिभिः। **अपिशब्दात्** पूर्वः कृतवर्मा गृहीतः। तेन प्रत्याख्यानं सिद्धम्। तद्वदेवाहेति। अग्रे त्वयापि विरोधो न कर्तव्य इति युद्धान्निवर्तयितुं भगवन्माहात्म्यमाह को विरुध्येतेति। को वा विरोधमाचरेत्। अज्ञः करोतु नाम, ईश्वरयोर्बलं विदित्वा प्रत्यक्षशब्दाभ्यामवगत्य, पूर्णशक्तेर्भगवतः विरोधं कोऽपि न करोतीत्युपदेशः ॥ १४ ॥ आदौ श्रुतं माहात्म्यमाह य इदमिति। भगवतः सामर्थ्यं तस्यानन्यत्वं च प्रतिपाद्यते। माया सर्वभवनसामर्थ्यम्, शक्तिर्वा काचित्, अप्रयोजिका, तामपि करणत्वेन स्वीकृत्य इदं सर्वमेव जगत् उत्पादयति पालयति नाशयति च। एवमन्योऽपि करिष्यतीत्याशङ्क्य कैमुतिकन्यायेन परिहरति चेष्टामिति। भगवांस्त्वेतल्लीलयैव करोति, अन्यैः कर्तव्यमिति दूरापास्तम्। भगवत्क्रियामात्रमपि न जानन्ति, किं करोति कथं करोतीति। क्रियाशक्तिर्वा निष्पन्नापि सर्वं निष्पादयन्त्यपि किमात्मिकैवति न विदुः। तत्र हेतुः अजया प्रकृत्या मोहिता इति। यदि ते जानीयुः, तदा कथमात्मवञ्चनामङ्गीकुर्युः। ये अजयापि मोहिता भवन्ति, ते अजा एव, सर्वैरेव हन्यमानाः स्वरक्षायामेवाशक्ताः कथं सृष्टिं करिष्यन्तीति भावः ॥ १५ ॥ एवं श्रुतिसिद्धमुक्त्वा प्रत्यक्षसिद्धमाह यः **सप्तहायन** इति। जरासन्धादिजयस्त्वतिदेशेनैव प्राप्तः। अलौकिकस्तु वक्तव्यः। तत्र पर्वतोद्धरणं लोके अत्याश्चर्यमिति, वयःप्रकारादीनां सुतरामत्याश्चर्यहेतुत्वमुच्यते। **सप्तहायनः** सप्तवार्षिकः, तत्रापि शैलं गोवर्धनमेकेन पाणिना उत्पाट्य दधारेति। मन्दरधारणादप्यधिकः प्रयत्न उक्तः। एकेनैव पाणिना दधार, तत्र तु पृष्ठेनेति विशेषान्तरम्। लीलया अङ्गुल्यादिषु वेणुनादानुगुणतया स्थापयन् दधारेति तृतीयो विशेषः। एतदपि धारणं न गोकुलसंरक्षार्थम्, अन्यथा साधनपरतन्त्रः स्यात्, इन्द्रभयाद्वा तथा कृतवानित्यपि शङ्केत, किन्तु लीलयैव कृतवानिति वक्तुं दृष्टान्तमाह **उच्छिलीन्ध्रमिवेति**। छत्राकमिव अर्भको बालकः ॥ १६ ॥

श्रीसुबोधिनी–सारः

तद्यथा सहानुगः पूतनादिसहितः कंसो ययोर्द्वेषात् विरोधात् श्रिया राजलक्ष्म्या त्याजितोऽपीतो मृतश्च सप्तदशसंयुगान् यावज्जरासंधो विरथो गतः पद्भ्यां यातः ॥ १३ ॥ प्रत्याख्यातः कृतवर्मणा दत्तोत्तरः स च शतधनुरक्रूरं पार्ष्णिग्राहं रक्षकमयाचत सोक्रूरोप्याह ईश्वरयोर्बलं विद्वान् जानन् को विरोधं कुर्यात् ॥ १४ ॥ यो लीलया विश्वमिदं सृजति रक्षति हंति च अजया मायया मोहिताः संधिरार्षः । विश्वसृजो जगत्कर्त्तारोपि यस्य चेष्टां न विदुः ॥ १५ ॥ सप्तवर्षो यो बाल एकेन हस्तेन शैलं गोवर्द्धनम् उत्पाट्य लीलया दधार अर्भको बाल उच्छिलींध्रं छत्राकारमुद्भिदमिव ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्प्रतिकूलफलं दर्शयति—कंस इति । यस्य कृष्णस्य द्वेषात् अनुगैर्भ्रातृभिश्च सहितः कंसः राज्यश्रिया त्याजितः सन् पीतः अप्ययं नाशं प्राप्तः । तथा जरासन्धोऽपि सप्तदशसङ्ख्याकात् सङ्ग्रामात् विरथः शरीरमात्रावशिष्टो गतः ॥ १३ ॥ एवं कृतवर्मणा प्रत्याख्यातः शतधन्वा अक्रूरं पार्ष्णिग्राहं साहाय्यमयाचत, तदा सोऽक्रूरोपि ईश्वरयो रामकृष्णयोर्बलं विद्वान् जानन् को वा पुमान् ताभ्यां विरुध्येतेत्याहेत्यन्वयः ॥ १४ ॥ तस्य बलं प्रदर्शयंस्तावज्जगज्जननादिलीलामाह—य इति । यो लीलया अनायासेन सङ्कल्पमात्रेणैव इदं विश्वं सृजति, अवति रक्षति, हन्ति च । यस्य च चेष्टां विश्वसृजो ब्रह्मादयोऽपि न विदुः । तत्र हेतुमाह—अजया तन्मायया मोहिता इति । अत्र सन्धिरार्षः ॥ १५ ॥ यश्च सप्तहायनः सप्तवर्षीयो बालः एकेनैव पाणिना शैलं गोवर्धनमुत्पाट्य लीलया अनायासेनैव दधारेत्यन्वयः । तत्र दृष्टान्तमाह—यथाऽर्भको बाल उच्छिलीन्ध्रं छत्राकं धरति तथेति ॥ १६ ॥

अन्वितार्थप्रकाशिका

कंस इति ॥ यस्य कृष्णस्य द्वेषात् अनुगैर्भ्रातृभिश्च सहितः कंसः राज्यश्रिया त्याजितः सन्नपीतः अप्ययं नाशं प्राप्तः तथा जरासन्धोऽपि सप्तदशसंख्याकान्संयुगान्सङ्ग्रामान् कृत्वा विरथः शरीरमात्रावशिष्टो गतः । अत्र सप्तदशानां संयुगानां समाहारस्तस्मादिति विवृण्वतश्चक्रवर्तिनः पञ्चम्यन्तपाठः सम्मतः ॥ १३ ॥ प्रतीति ॥ एवं कृतवर्मणा प्रत्याख्यातः शतधन्वाऽक्रूरं पार्ष्णिग्राहं साहाय्यमयाचत । तदा सोऽक्रूरोऽपि ईश्वरयो रामकृष्णयोर्बलं विद्वान् जानन् को वा पुमांस्ताभ्यां विरुध्येतेत्याह स्म ॥ १४ ॥ य इति ॥ यो लीलया एवेदं विश्वं सृजत्यवति हन्ति च यस्य च चेष्टाम् अजया तन्मायया मोहिताः विश्वसृजो ब्रह्मादयोऽपि न विदुः । सन्धिरार्षः ॥ १५ ॥ य इति ॥ यश्च सप्तहायनः बाल एव एकेनैव पाणिना शैलं गोवर्धनमुत्पाट्य लीलया एव यथार्भको बाल उच्छिलीन्ध्रं छत्राकं धरति तथा दधार ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अपीतो मृतः सप्तदशसंयुगात् सप्तदशसंख्याकसंग्रामात् ।।१३।। श्रीकृष्णे प्रत्याख्यातः अहं न रक्षामीति कृतवर्मणोक्तः सन् । स च शतधन्वा । पार्ष्णिग्राहं सहायं ॥ १४ ॥ विश्वसृजो ब्रह्मादयः मोहिता जयेति संधिरार्षः ॥ १५ ॥ उच्छिलींध्रं छत्राकं ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं त्वयेत्थं दृष्टमित्यत्रोदाहरणमात्रमाह । कंस इति । यद्द्वेषाद्यस्मिन् श्रीकृष्णे द्वेषाचरणाद्धेतोः कंसः, सहानुगोऽनुगैः सहितः, सहानुज इत्यपि पाठस्तत्पक्षेऽनुजैर्भ्रातृभिः सहितः, अपीतो मृतः । जरासंधः, श्रिया अजेयया लक्ष्म्या, त्याजितः सन्, सप्तदशसंयुगान्, विरथः, शरीरमात्रावशिष्टः, गतः स्वदेशान् प्रति यातः । तदपराधमहं न करिष्यामीति भावः ॥ १३ ॥ प्रत्याख्यात इति । इत्थं, प्रत्याख्यातः निराकृतः, कृतवर्मणेति शेषः । स च स शतधन्वापि, अक्रूरं पार्ष्णिग्राहं, अयाचत । सोऽक्रूरोऽपि, ईश्वरयोः बलं, विद्वान् जानन्, कः विरुद्ध्येत ईश्वराभ्यामिति शेषः । इति, आह ॥ १४ ॥ भगवतो बलं वक्तुं तावत्तस्य कृत्स्नजगदुदयविभवलयलीलत्वमाह । य इति । यो भगवान् लीलया, इदं विश्वं, सृजति, अवति, हन्ति च । एवंविधस्य यस्य भगवतः, चेष्टां विश्वसृष्ट्यादिरूपां, अजयाऽस्यैव मायया, मोहिताः, विश्वसृजोऽपि, न विदुर्नैव जानन्ति । मोहिताजयेति सन्धिरार्षः ॥ १५ ॥ सांप्रतं भगवद्बलं प्रपञ्चयति । य इति । यो भगवान्, बालः तत्रापि, सप्तहायनः सप्तवर्षवयाः सन्नेव, शैलं गोवर्द्धनाचलं, एकेन पाणिना, उत्पाट्य, अर्भकः उच्छिलीन्ध्रं इव, लीलया, दधार । शिलीन्ध्रश्छत्राकारोऽल्प उद्भिज्जविशेषः ॥ १६ ॥

कृष्णप्रिया

भैया आप अच्छी तरह से जानते हो कि भगवान् श्रीकृष्ण से द्वेष करने से कंस राजलक्ष्मी को खो बैठा और अपने परिवार के साथ मारा गया । जरासन्ध परम वीर था फिर भी भगवान् श्रीकृष्ण के सामने ठहर न सका वह सत्रह वार संग्राम

ं परास्त होकर रथ रहित बनकर अपनी राजधानी को लौट गया ॥ १३ ॥ जब शतधन्वा को कृतवर्मा ने इस प्रकार स्पष्ट ना कहो तब शतधन्वा ने अक्रूरजी से सहायता की याचना किया श्री अक्रूरजी भी कहा सुनो सखा ? ऐसा कौन मन्दमति होगा कि जो सर्वसमर्थ भगवान् श्रीकृष्ण और बलभद्रजी के बल एवं ऐश्वर्य को जानकर भी उनसे साथ विग्रह करे ॥ १४ ॥ भाई शतधन्वा ! जो भगवान् श्रीकृष्ण रमत मात्र में, पलक मात्र में इस ब्रह्माण्ड का निर्माण-सर्जन-संरक्षण-एवं संहार करते है पुनः यह पूर्णपुरुषोत्तम कब और क्या करना चाहते है इस विषय को भगवन्माया से मोहित ब्रह्मादि देव भी जान नहीं सकते है। राजन् ! आप तो जानते हो कि सप्तवर्षीय बालक श्रीकृष्ण ने एक हस्त से गिरिराज गोवर्द्धन जी को भूमि से उखाड़ लिया छोटे छोटे बालक बरसाती छत्ते को उखाड़कर अपने कर में रख लेते हैं वैसे ही रमत रमत में सात दिन पर्यन्त अपने कर-सरोज में उठाये रखा ॥ १६ ॥

नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे । अनन्तायादिभूताय कूटस्थायात्मने नमः ॥ १७ ॥
प्रत्याख्यातः स तेनापि शतधन्वा महामणिम् । तस्मिन् न्यस्याश्वमारुह्य शतयोजनगं ययौ ॥ १८ ॥
गरुडध्वजमारुह्य रथं रामजनार्दनौ । अन्वयातां महावेगैरश्वै राजन् गुरुद्रुहम् ॥ १९ ॥
मिथिलाया [1]उपवने विसृज्य पतितं हयम् । पद्भ्यामधावत्[2] संत्रस्तः कृष्णोऽप्यन्वद्रवद् रुषा ॥ २० ॥

कर्दमक्षमा

अन्वयः—तस्मै, अनन्ताय, आदिभूताय, कूटस्थाय, आत्मने, अद्भुतकर्मणे, कृष्णाय, भगवते नमः ॥ १७ ॥ सः शतधन्वा, तेन, अपि, प्रत्याख्यातः, तस्मिन्, महामणिम् न्यस्य, शतयोजनगम्, अश्वम्, आरुह्य, ययौ ॥ १८ ॥ राजन् ! राम-जनार्दनौ, गरुडध्वजम्, रथम्, आरुह्य, गुरुद्रुहम्, महावेगैः अश्वैः, अन्वयाताम् ॥ २० ॥ मिथिलायाः, उपवने, पतितम्, हयम्, विसृज्य, संत्रस्तः शतधन्वा, पद्भ्याम् अन्वद्रवत्, कृष्ण अपि रूषा अन्वद्रवत् ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अन्तर्यामिकृष्णनियुक्तस्तस्मिन्नक्रूरे मणिं न्यस्य ययावपलायत ॥ १८ ॥ गुरुः श्वशुरस्तद्धन्तारम् ॥ १९ ॥ शतयोजन-मात्रगामित्वात्ततः परं गंतुमशक्तस्तत्र पतितः तं हयं विसृज्य ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत एवाद्भुत कर्मणे तस्मै नमः। अद्भुतत्वे हेतुः-कृष्णाय नराकृतिपरब्रह्मणे। अतो भगवते सर्वैश्वर्यपूर्णाय। अत एवानन्तायांतरहिताय सदा वर्तमानायानादय इत्यर्थः। किञ्च—मध्ये सृष्ट्यादावपि विकाररहितत्वाकूटस्थाय। यत आत्मने सर्वांतर्यामिणे। एवं भक्त्युद्रेकेण साष्टांगं प्रणमन्पुरप्याह—नम इति ॥ १७ ॥ स शतधन्वा। तेनाक्रूरेण। महामणिमिति तेना-धार्यत्वं, सत्तमेनैव धार्यत्वं च सूचयति। अतोऽक्रूरं सत्तमं मत्वा तस्मिन्नेव न्यस्य न्यासरूपेण स्थापयित्वेति स्वात्मनोऽपि स्वधने ममत्वाधिक्यं दर्शितम्। विष्णुपुराणे तु–'वडवामाह्य' इत्युक्तम्, अत्राश्वमिति सामान्यनिर्देशो ज्ञेयः। शतयोजनगामित्वं तस्य स्वभावत एव, विपत्तौ तु बहुशतयोजनसामर्थ्यमपि ज्ञेयम्। अतो द्वारकातो मिथिलोपवनपर्यंतमतिकष्टेन गत्वा तत्रैव मृत इति वक्ष्यते ॥ १८ ॥ अष्टादशसु गुरुषु श्वशुरस्य गणितत्वाच्छ्वशुरोपि गुरुरेवेति बृहन्नारदीये। गरुडध्वजमिति—साक्षाद्गरुड एवोड्डीन इति लोकोत्प्रेक्षितमित्यर्थः ॥ १९ ॥ मिथिलाया नगर्याः। अन्वद्रवत् रथं हित्वा पश्चादधावत्, वीराणां तथैव न्यायात्। ननु पलायमानानुद्रवणमन्याय्यं तत्राह—रुषा, गुरुद्रुहि न्याय्यत्वादित्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत एवाद्भुतकर्मणे तस्मै नमः अद्भुतकर्मत्वे हेतुः कृष्णाय नराकृतिपरब्रह्मणे अतो भगवते सर्वैश्वर्य्यपूर्णाय अत एवानन्ताय अन्तरहिताय किं च सर्वेषामादौ भूताय सदा वर्त्तमानाय अनादय इत्यर्थः। किं च कूटस्थाय मध्ये सृष्ट्यादावपि विकाररहिताय यत आत्मने सर्वान्तर्यामिणे एवम्भक्त्युद्रेकेण साष्टाङ्गं प्रणमन् पुनरप्याह—नम इति ॥ १७ ॥ महामणिमिति तेनाधार्य्यत्वं सत्तमेनैव धार्य्यत्वं सूचयति अतोऽक्रूरं सत्तमं मत्वा तस्मिन्नेव न्यस्य न्यासरूपेण धृत्वा श्रीविष्णुपुराणे बडवामा-रुह्येत्युक्तत्वादत्राश्वमिति सामान्यनिर्देशो ज्ञेयः ॥१८॥ गरुडध्वजमिति साक्षाद्गरुड एवायमुड्डीन इति लोकोत्प्रेक्षितमित्यर्थः ॥१९॥ अन्वद्रवत् रथमुत्सृज्य पश्चादधावत् वीराणां तथैव न्यायात् ननु पलायमानानुद्रवणमप्यन्याय्यं तत्राह—रुषा गुरुद्रुहि तादृश-रोषस्य न्याय्यत्वादित्यर्थः ॥ २० ॥

---

[1] मुप–श्रीधर. बंशी. जीव. वीर. विज. विश्व. शुक. मु. । [2] धावत–वीर. विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत एवाद्भुतकर्म्मणे तस्मै नमः, अद्भुतकर्म्मत्वे हेतुः—कृष्णाय नराकृति–परब्रह्मणे, अतो भगवते सर्वैश्वर्य्यपूर्णाय, अत एवानन्ताय अन्तररहिताय। किञ्च, सर्व्वेषामादौ भूताय सदा वर्त्तमानाय अनादय इत्यर्थः। किञ्च, कूटस्थाय मध्ये सृष्ट्यादावपि विकाररहिताय, यत आत्मने सर्व्वान्तर्य्यामिणे। एवं भक्त्युद्रेकेण साष्टांगं प्रणमन् पुनरप्याह—नम इति ॥ १७ ॥ सोऽक्रूरादिप्रेरणया मणिलोभेन वा पापे प्रवृत्तोऽपि यः, महामणिमिति–तेनाधार्य्यत्वं सत्तमेनैव धार्य्यत्वं सूचयति अतोऽक्रूरस्य भगवति भक्त्यतिरेकं श्रुत्वा तं सत्तमं मत्वा तस्मिन्नेव न्यस्य न्यासरूपेण धृत्वा। अक्रूरेण तत्स्वीकारस्तु श्रीभगवदाज्ञयैवेति श्रीस्वामिपादैर्व्याख्यातमेव। सा च साधुवरेण भक्त्या तस्मिन् धृते सफलं स्यादन्यथा तु विपरीतमेवेति लोकहितार्थं ज्ञेया ॥१८॥ गरुड़ध्वजमिति—रथस्य गरुड़वद्वेगः सूचितः। राम इति—दुष्टवधोद्यमेन सुहृदां रमणात्। जनार्द्दन इति—दुष्टजनस्यार्द्दने प्रवृत्तेः, किंवा तदर्थं निजजनैः प्रार्थनादिति भावः। गुरुद्रुहमिति—तद्वधार्थं तथानुयानं युक्तमेवेत्यर्थः। तच्छ्रवणेन प्रहर्षाद्राजमानं श्रीपरीक्षितं दृष्ट्वा तथैव सम्बोधयति—राजन्निति ॥ १९ ॥ हयपतनात् सम्यक् त्रस्तः सन्नधावत्, अपि-शब्दात् पद्भ्यामेवान्वद्रवत्, पश्चादधावदिति ज्ञेयम्। पदातेः पदतिनैवानुद्रवणस्य वीरवरेषु योग्यत्वात्। ननु सन्त्रस्तस्य जवेन पलायमानस्योपेक्षैवोचिता, न त्वनुद्रवणम्, तत्राह—रुषा वन्धुवधादिना रोषोदयादित्यर्थः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अतः स केवलं नमस्कार्य एवेत्यभिप्रयन्नमस्करोति—नम इति। भगवते षाड्गुण्यपूर्णाय अतएवाद्भुतममानुषमदैवं च कर्म यस्य तस्मै अनन्तायापरिच्छेद्यस्वरूपस्वभावायादिभूताय जगत्कारणभूताय कूटस्थाय स्वरूपतः स्वभावतश्च निर्विकाराय आत्मने सर्वान्तरात्मने कृष्णाय तस्मै नमो नमः ॥ १७ ॥ प्रत्याख्यात इति। तेनाक्रूरेणाप्येवं प्रत्याख्यातः स शतधन्वा महामणिं तस्मिन्नक्रूरे न्यस्य निधायाक्रूराधीनं कृत्वेत्यर्थः शतयोजनगं शतयोजनगन्तव्यदेशं ययौ ॥ १८ ॥ तदा गरुडो ध्वजे यस्मिन् तं रथमारुह्य हे राजन्महावेगैरश्वैर्गमनसाधनैः गुरुद्रुहं श्वसुरहन्तारं शतधन्वानमन्वयातामन्वगच्छताम् ॥ १९ ॥ मिथिलायामिति शतयोजनमात्रगामित्वात्ततः परं गन्तुमशक्तं पतितं हयमश्वं विसृज्य सन्त्रस्तः पद्भ्यामधावदेवं धावन्तं शतधन्वानं रुषा भगवानप्यन्वधावत् ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

शतयोजनगं शतयोजनगमनसमर्थम् ॥ १८ ॥ गरुडो ध्वजे यस्य स तथा तं रथम् ॥ १९ ॥ मिथिलानगर्याः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

न्यस्य न्यासरूपेण स्थापयित्वेति स्वात्मनोऽपि स्वधने ममत्वाधिक्यं दर्शितं शतयोजनगामित्वं तस्य स्वभाव एव विपत्प्राप्तत्वे तु बहुशतयोजनगमनसामर्थ्यमपि ज्ञेयम् अतो द्वारकातो मिथिलोपवनपर्य्यन्तमतिकष्टेन गत्वा तत्रैवाश्वो मृत इति वक्ष्यते ॥ १८ ॥ गुरुद्रुहं श्वसुरहन्तारम् ॥ १९–२० ॥

गूढार्थदीपिनी

तस्मिन् अक्रूरे ॥ १८ ॥ गुरुः श्वशुरः सत्राजित् तद्धन्तारं शतधन्वानम् ॥ १९–२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

गुरुद्रुहं श्वसुरहन्तारम् ॥ १९ ॥ पतितमिति स्वभावतः शतयोजनगोऽपि आपदि ततोऽप्यधिकवलात्सम्वाहितोऽतो मिथिलाया उपवने पतितस्तं विसृज्य पद्भ्यामधावत् ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तस्मै अद्भुतकर्मणे कृष्णाय नमः। अनन्तायानिर्मुक्तायादिभूताय कारणभूताय कूटस्थाय निर्विकारायात्मने सर्वान्तर्यामिणे नमो नमः। अनन्ताय शेषाय च नमः। अत एव विशकलय्य नमोद्विर्वचनं सम्भवदिति मन्तव्यम् ॥ २३ ॥ शतधन्वा तेनाप्यक्रूरेणापि महामणिं तस्मिन्नक्रूरे न्यस्य शतयोजनमेकस्मिन्नन्हि। अश्वमारुह्य ययौ। वृतार्के आरुह्य वडवां वेणान्ममार बडबा तदेति। तथा महाभारततात्पर्यनिर्णये। आरुह्य चाश्वमित्युक्तेश्च। अत्राश्वमित्युक्तिः पुंवच्छक्तियुक्त्येति मन्तव्यम्। पुल्लिङ्गेनोच्यते स्त्री च पुंवच्छक्तिमती यत इत्यादेः ॥ २४ ॥ गरुडो ध्वजे यस्य तम्। गुरुः श्वशुरः पञ्चमो गुरुरित्युक्तेः। श्वशुरद्रोहवन्तम् ॥ २५ ॥ पतितं मत्वा। व्रतार्कमहाभारतनिर्णययोः शतयोजनमात्रेण ममार बडबा तदा शतयोजनानां दिनेन गत्वा मृतायां बडबायां तदैवेत्यादि। सन्त्रस्तो भीतः पदातिधर्मज्ञत्वात्। तिग्मनेमिना तीक्ष्णधारेण वाससोः परीधानोत्तरीययोर्मणिं स्यमन्तकं व्यचिनोन्मार्गयामास ॥ २६–२७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं माहात्म्यमुक्त्वा कृतं स्वापराधं दूरीकर्तुं भगवन्तं नमस्यति **नमस्तस्मै भगवत** इति । अचिन्त्यैश्वर्यत्वात् अन्यथाज्ञात्वा कृतोपराधः, अतः क्षन्तव्य इति । **कृष्णायेति** । भक्तहितार्थमेवावतीर्णत्वमुक्तम् । किञ्च । भगवदिच्छा एतादृशीति हतः सत्राजित्, तदधुना विपरीतमापतितम्, अनुग्रहं कुर्वन् निग्रहं करोति । एतद्वा विपरीतम् । तदाह **अद्भुतकर्मणे** इति । **अशक्यः** प्रतीकार इति वक्तुमाह **आदिभूतायेति** । न कस्याप्यपराधोऽपीति सूचितम् । **कूटस्थायेति** दोषाभावः । न केनाप्यपराधः कर्तुं शक्य इत्यपि सूचितम् । परमामुपपत्तिमाह सर्वदोषपरिहाराय **आत्मने नम** इति । एवं तेनापि सर्वथा युद्धं निवारयितुं प्रत्याख्यातः पलायनप्रेप्सुः स मणिर्यत्र क्वापि वधं प्राप्स्यतीति मणिं तस्मिन् स्थापयित्वा शतयोजनगं सैन्धवमश्वमारुह्य **ययौ** ॥ १८॥ ग्रामाद्रात्रावेव निर्गतः । न्यासो न देय इति ज्ञापितम् । तस्मिन् मृते तदीयाः प्राप्स्यन्तीति नान्यो भगवते मणिं प्रयच्छति, महामणित्वात् दातुमपि न शक्यः । अद्भुतकर्मत्वान्न ग्रहीष्यतीत्यपि सूचितम् । अतः स्थापयित्वैव पलायनमेवोचितम् । ततो लोके पलायितः शतधन्वा एकेन दिनेन शतयोजनानि गत इति द्वितीयदिवसे लोकवार्ता निर्गता, तदा भगवान् यत् कृतवांस्तदाह **गरुडध्वजमारुह्येति** । तस्मिन्नेव दिवसे चेद्गच्छेत्, तदा निकट एवोपलम्भः स्यात् । द्वितीये दिवसे मध्याह्ने निर्गतः । तावता स योजनानां शतद्वयमतिक्रम्य गतः । भगवान् पुनः रथान्तरं शीघ्रगामि न भवतीति, अलौकिकं च न कर्तव्यमिति, गरुडध्वजमेव रथमारुह्य एकस्मिन्नेव सर्वसामग्रीं गृहीत्वा, प्रमाणाद्यपेक्षां परित्यज्य, रामजनार्दनौ ससाधनपूर्णप्रयत्नौ **महावेगैः** अश्वैः सैन्यादिभिः कृत्वा अन्वयाताम्, पृष्ठतो मारणार्थमनुगतौ । अवश्यं तथागमने हेतुः **गुरुद्रुहमिति** । गुरुः श्वशुरः पञ्चानां मध्ये गणितः । तस्मै द्रोहं कृतवानिति । **राजन्नित्यालस्याभावाय** शौर्यं कथयन् सम्बोधयति । गुरुद्रोहकथनेनान्यदपि सूचितम् । 'प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवि'दिति पक्षः परिहृतः ॥ १९ ॥ तावता सः मिथिलानगरपर्यन्तं गत इति तत्र मारित इति वक्तुं तस्योपलम्भमाह **मिथिलाया** इति । अतिदूरगमनात् हयस्य श्रमात् पातः । ततः पद्भ्यां धावनम् । ततो भगवानपि रथेनानुगमनं निषिद्धमिति स्वयमपि पदातिरेव भूत्वानुगत इत्याह **कृष्णोऽपीति** ॥ २० ॥

श्रीसुबोधिनीसारः

आश्चर्यकर्मणे भगवते कृष्णाय तस्मै नमः अनंताय सर्वकारणाय निर्विकारायात्मने नमः ॥ १७ ॥ तेनाक्रूरेणापि प्रत्याख्यातः स शतधन्वा महामणिं स्यमंतकं तस्मिन्नक्रूरे न्यस्य संस्थाप्य "धनस्य ग्राहिणः सर्वे नात्मानं घ्नंति केवलम्" इति नीतेः । शतयोजनगामिनमश्वमारुह्य ययौ द्वारकातो जगाम ॥ १८ ॥ गरुडो ध्वजे यस्य तं रथं रामष्णावारुह्य महावेगैर्मनोजवैरश्वैर्गुरुद्रुहं श्वशुरघातिनमन्वगच्छताम् हे राजन् ॥ १९ ॥ मिथिलाया उपवने पतितं मृतं हयमश्वं विसृज्य त्यक्त्वा संत्रस्तोतिभीतः पद्भ्यामधावत् कृष्णोपि पद्भ्यामेव रुषा क्रोधेनान्वद्रवत् अन्वयात् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

"अतः स केवलं नमस्कार्य एव' इत्यभिप्रायेण नमस्करोति—नम इति । **भगवते** ऐश्वर्यादिषड्गुणपूर्णाय, **अत एव** अद्भुतं देवमनुष्यादिष्वसम्भावितं कर्म यस्य तस्मै, अनन्तायापरिच्छिन्नाय, आदिभूताय सर्वकारणाय, कूटस्थाय स्वरूपतः स्वभावतश्च निर्विकाराय, आत्मने सर्वान्तरात्मने, तस्मै पूर्वोक्ताय कृष्णाय नमो नम इति त्रयाणामन्वयः ॥ १७ ॥ तेनाक्रूरेणाप्येवं प्रत्याख्यातः स शतधन्वा महामणिं तस्मिन्नक्रूरे न्यस्य अक्रूराधीनं कृत्वा शतयोजनं गच्छतीति तथाभूतमश्वमारुह्य ययौ अपलायत् ॥ १८ ॥ तदाह—हे राजन् ! गरुडो ध्वजे यस्य तं रथमारुह्य रामकृष्णौ महावेगैरश्वैर्गुरुद्रुहं श्वशुरहन्तारं शतधन्वानं अन्वयातां अन्वगच्छताम् ॥ १९ ॥ शतयोजनमात्रगामित्वात्ततः परं गन्तुमशक्तं मिथिलाया उपवने पतितं हयं विसृज्य सन्त्रस्तः शतधन्वा पद्भ्यामधावत् । कृष्णोऽपि रुषा क्रोधेन तमन्वद्रवत् ॥ २० ॥

अन्वितार्थप्रकाशिका

नम इति ॥ स्पष्टम् ॥ १७ ॥ प्रतीति ॥ तेनाक्रूरेणाप्येवं प्रत्याख्यातः स शतधन्वा महामणिं तस्मिन्नक्रूरे न्यस्य अक्रूराधीनं कृत्वा शतयोजनं गच्छतीति तथाभूतमश्वमारुह्य ययौ अपलायत । शतयोजनगामित्वं तदश्वस्य स्वभाव एव । विपदि तु बहुयोजनगमनसामर्थ्यमपि ज्ञेयम् । अतो द्वारकातो मिथिलोपवनपर्यन्तमतिक्रमेण गत्वाऽश्वो मृत इति वक्ष्यते ॥ १८ ॥ गरुडेति ॥ हे राजन् ! गरुडो ध्वजे यस्य तं रथमारुह्य रामजनार्दनौ महावेगैरश्वैर्गुरुद्रुहं श्वशुरहन्तारं शतधन्वानम् अन्वयाताम् अन्वगच्छताम् ॥ १९ ॥ मिथिलाया इति ॥ शतयोजनमात्रगामित्वात् । ततः परं गन्तुमशक्तं मिथिलाया उपवने पतितं हयं विसृज्य सन्त्रस्तः शतधन्वा पद्भ्यामधावत् । कृष्णोऽपि रुषा क्रोधेन तमन्वद्रवत् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कूटस्थाय कूटं पर्वतशिखरं तद्वत् तिष्ठति सांसारिकसुखदुःखेष्वचलतया स्थितो भवतीति तथाभूताय केनाप्यपराभूतायेत्यर्थः। आत्मने परमात्माने ॥ १७ ॥ तस्मिन्नक्रूरे न्यस्य न्यासरूपेण धृत्वा ॥१८॥ गुरुद्रुहं श्वशुरहंतारं ॥१९॥ मिथिलाया जनकपुरस्य ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ततः स केवलं नमस्कार्य एवेत्यभिप्रायेण नमस्करोति। नम इति। भगवते षाड्गुण्यपूर्णाय, अद्भुतममानुषमदैवं च कर्म यस्य तस्मै, अनन्ताय अपरिच्छेद्यस्वरूपस्वभावादिकाय, आदिभूताय जगत् कारणभूताय, कूटस्थाय स्वरूपस्वभावतश्च निर्विकाराय, आत्मने सर्वान्तरात्मने, तस्मै, कृष्णाय नमः नमः ॥ १७ ॥ प्रत्याख्यात इति ॥ तेनाक्रूरेणापि, प्रत्याख्यातः सः, शतधन्वा, महामणिं तस्मिन्नक्रूरे, न्यस्य निधायाक्रूराधीनं कृत्वेत्यर्थः। शतयोजनगं अश्वं आरुह्य, ययौ। केचित्त्वत्रान्तर्यामिकृष्णनियुक्तस्तस्मिन्नक्रूरे मणिं न्यस्यापलायतेत्यूचुः ॥ १८ ॥ गरुडध्वजमिति ॥ तदा, गरुडो ध्वजे यस्य तं, महावेगैः, अश्वैः, योजितमिति शेषः। रथं, आरुह्य, रामजनार्दनौ, हे राजन्, गुरुद्रुहं श्वशुरहन्तारं शतधन्वानं, अन्वयातां तत्पश्चादगच्छताम्॥१९॥ मिथिलाया इति ॥ शतयोजनमात्रगामित्वात् ततः परं गन्तुमशक्तत्वात्, मिथिलायाः उपवने, पतितं हयमश्वं, विसृज्य, संत्रस्तः सन्, पद्भ्यां स्वपादाभ्यां, अधावत्। एवं धावन्तं शतधन्वानं, रुषा हेतुना, कृष्णः स्वयं श्रीकृष्णोऽपि, अन्वद्रवत्तत्पश्चाद्धावदित्यर्थः ॥ २० ॥

कृष्णप्रिया

भैया मैं तो उन पूर्णपुरुषोत्तम भगवान के श्रीचरणों को नित्य नमस्कार करता हूँ। श्रीकृष्ण चरित्र अत्यंत अद्भुत है, वे तो अनादि अनन्त एकरस एवं आत्मस्वरूप है। केवल उनको नमस्कार ही करते रहें ॥ १७ ॥ शतधन्वा को जब श्रीअक्रूर जी ने भी स्पष्ट उत्तर दिया तब निराश शतधन्वा ने निरुपाय बनकर स्यमन्तकमणि को श्री अक्रूरजी के समीप कर स्वयं चार सौ कोस पर्यन्त अविश्रान्त दौड़ने वाले अश्वपर सवार होकर वेगीली गति से दौड़ पड़ा ॥ १८ ॥ राजन् परीक्षित्! भगवान् श्रीकृष्ण एवं श्रीबलरामजी भी अपने वेगीले गरुडध्वज पर सवार हुए और अतिशीघ्र गतिवाले अश्वों से जुड़े हुए रथपर चढ़कर और ध्वजा फहराकर अपने पितृतुल्य श्वसुर सत्राजित का वध करने वाले शतधन्वा के पीछे दौड़ गए ॥ १९ ॥ शतधन्वा का अश्व थक पड़ा और मर गया। मिथिलापुर पर्यन्त तो दौड़ आया था। शतधन्वा भी भयभीत बना था। मरे अश्व को वहीं मिथिला के उद्यान के निकट छोड़ दिया। रोषान्विष्ट श्रीकृष्ण भी शतधन्वा के पीछे दौड़े ॥ २० ॥

पदातेर्भगवांस्तस्य पदातिस्तिग्मनेमिना। चक्रेण शिर उत्कृत्य वाससोऽव्यचिनोन्मणिम् ॥ २१ ॥
अलब्धमणिरागत्य कृष्ण आहाग्रजान्तिकम्। वृथा हतः शतधनुर्मणिस्तत्र न विद्यते ॥ २२ ॥
तत आह बलो नूनं स मणिः शतधन्वना। कस्मिंश्चित् पुरुषे न्यस्त[1]स्तमन्वेष पुरं व्रज ॥ २३ ॥
अहं विदेहमिच्छामि द्रष्टुं प्रियतमं मम। इत्युक्त्वा मिथिलां राजन् विवेश यदुनन्दनः ॥ २४ ॥

कर्दमक्षमा

अन्वयः—पदातेः, तस्य, पदातिः, भगवान्, तिग्मनेमिना, चक्रेण, तस्य, शिरः, उत्कृत्य, वाससोः, मणिम्, व्यचिनोत् ॥ २१ ॥ अलब्धमणिः, कृष्णः, अग्रजान्तिकम्, आगत्य, आह, शतधनुः, वृथा, हतः, तत्र, मणिः, न, विद्यते ॥ २२ ॥ बलः, तत, आह, नूनम्, शतधन्वना, सः, मणिः, नूनम्, कस्मिंश्चित्, पुरुषे, न्यस्तः, पुरम्, व्रज, तम्, अन्वेष ॥ २३ ॥ राजन्! मम, प्रियतमम्, विदेहम्, द्रष्टुम्, इच्छामि, इति, उक्त्वा, यदुनन्दनः, मिथिलाम्, विवेश ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्यचिनोन्मृगयामास। अक्रूरे मणिरस्तीति सर्वज्ञतया विदित्वाऽपि रामवंचनाय तथा कृतवानिति भावः ॥२१-२२॥ अन्वेषान्विच्छ ॥ २३ ॥ सर्वज्ञस्यैवं विचेष्टितं मद्वंचनायेति मत्वा गूढमन्युराह। अहमिति ॥ २४ ॥

---

[1] न्वेष्टुं-वीरं; न्वेषत्-बिज.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पद्भ्यामातिर्गमनं यस्य स पदातिः। तस्य शतधन्वनः। तिग्मनेमिना चण्डधारेण। इति भाव इति-जानन्नेवायमेतन्मारणार्थमेवात्रागत इति रामो मदुपरि क्रुद्धो मा भवेदतोऽजानन्निववर्षस्त्रयोर्मणेरन्वेषणं चकारेति तात्पर्यम् ॥ अतो धावतोऽपि 'भगवान्' इति पाठे सर्वज्ञोऽपि अक्रूरे मणिरस्तीति सर्वज्ञतया ज्ञात्वापि दूरात्पश्यतो रामस्यैव मोहनाय व्यचिनोत्। तन्मोहनं च—स्वस्माद्वियुक्तस्य तस्य स्वप्रिये बहुलाश्वे नृपे कृपाभरप्रापणार्थमिति ज्ञेयम् ॥२१॥ तत्र शतधन्वनि ॥ अग्रजस्यांतिकमागत्य वृथा हत इति गूढपुरुषाणामन्यथात्वं व्यञ्जितम् ॥ २२ ॥ उदासीनो बलस्तदाऽऽचरणेन किञ्चित्कुपित इत्याह तत इति। ततः शतधनुषो वधानन्तरम्। तं मणिम्, पुरुषं वा। अन्विच्छ मार्गय ॥ नूनमित्यादि प्रणयकोपवाक्यम्। कस्मिंश्चिदिति-योग्यत्वादक्रूर एव तर्कित इति ॥ २३ ॥ अधुना त्वया सार्द्धं न गच्छामीत्याह—सर्वज्ञस्येति ॥ यस्य मणेः संबंधेन तादृशं कलंकं लब्धा बिलप्रवेशाद्यनेन कृतं तस्मै मणये तादृशमपि व्यवहारवन्तमक्रूरमयं। ज्ञात्वापि तत्पक्षपातं न त्यक्ष्यति तत्सम्बन्धेन च पुनर्लोकापत्रादञ्च प्राप्स्यत्यसाविति मया दुःखसन्दग्धेन सन्निधानं न शक्यत इत्यभिप्रेत्य प्रणयकोपं व्यनक्ति—अहमिति। यदुनंदन इति—यादवानन्दनार्थं द्वारकां गन्तुमर्होपीत्यर्थः। विदेहमिति—अहं त्वदीयद्वारकामपि न यास्यामि, त्वं स्वप्रियायै मणिं स्वच्छन्देनैव देहीति भावः। हे राजन्निति श्रीभगवल्लीलाश्रवणेन राजमानत्वात् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अतो धावतोऽपि भगवानिति पाठे सर्वज्ञोऽपि व्यचिनोत् दूरतः पश्यतः श्रीरामस्य वञ्चनाय इति भावः। प्रियजनप्रेममयनरलीलाकौतुकेच्छावेशमयरुषा श्रीरामाग्रतो नानीय मणिवृत्तान्तमपृष्ट्वैव चोत्कर्त्तनं ज्ञेयं शतधन्वनि स्वरोषातिशयव्यञ्जनार्थम् अत्रायमभिसन्धिः अक्रूरे स्वभक्तेऽपि दुःसङ्गदुरनुसन्धानदर्शनात् किञ्चित्कालपरित्यागातङ्कनादिलक्षणशासनेच्छा भगवत आसीत् सङ्कोचतः सा च न साक्षादात्मकर्तृका अत एवाऽऽत्मनो भक्तमनोरथपरिपूरणस्वभावत्वाच्च तस्यैव च मणियोग्यत्वात्तस्मै मणिदित्साऽप्यवर्त्तत अत एव चेममभिप्रायम् रहसि मणिं लब्ध्वा स्वयमेवासौ पलायतां पश्चाद्विचारयितव्यम् आपाततः श्रुते तद्वृत्तान्ते मदग्रजेनान्येन च तस्मिन् दुःखं प्राप्स्यते ततः सर्वं विश्रृङ्खलं भविष्यतोति ॥ २१ ॥ अग्रजस्यान्तिकमागत्य वृथा हत इति गूढरुषा दीनमन्यथात्वं व्यञ्जितम् ॥ २२ ॥ नूनमित्यादिकं प्रणयकोपवाक्यं कस्मिंश्चिदिति योग्यत्वादक्रूर एव तर्कितः अन्वेष अन्विच्छ ॥ २३ ॥ यस्य मणेः सम्बन्धेन तादृशं कलङ्कं लब्ध्वा विलप्रवेशाद्यनेन कृतं तस्मै मणये तादृशमपि व्यवहरन्तमक्रूरं मद्वज्ज्ञात्वाऽपि नूनं तत्पक्षपातं न त्यक्ष्यति तत्सम्बन्धेन पुनर्लोकापवादं च प्राप्स्यत्यसाविति मया दुःखदग्धेन सन्निधातुन्न शक्यत इत्यभिप्रेत्य प्रणयकोपं व्यनक्ति। अहमिति। यदुनन्दन इति यादवानन्दनार्थं द्वारकायाङ्गन्तुमर्होऽपीत्यर्थः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतो धावतोऽपि पाठान्तरे सर्व्वज्ञोऽपि व्यचिनोत्, उत्कृत्य दूरादेवोच्चैश्छित्त्वा, रुषैव किंवा अक्रूरपक्षपातेनाग्रजवञ्चनाय शतधन्वमुखतो मणिवृत्तान्तश्रवणादिबोधनार्थम् ॥ २१ ॥ अग्रजस्यान्तिकमागत्य आहेत्यस्य कर्म्मपदाप्रयोगः साक्षादग्रज-वञ्चनायोग्यतया स्वयमेव भाषणात्, अतएवाग्रजशब्दः तत्र तस्मिन् ॥ २२ ॥ ततस्तत्पश्चादिति अक्रूरपक्षपातेन श्रीभगवता स्वस्य वञ्चनया महाधिना क्षणविलम्बात्, बल इति स्नेहबलाधिक्यादन्तः कुपितः सन्निति भावः। नूनं वितर्के, पुरुषे तवैव भक्तवर इत्यर्थः। इत्यादिकं सर्व्वं प्रणयकोपादेव ॥ २३ ॥ मम प्रियतममिति त्वत्प्रियतमं त्वं गत्वा पश्येति भावः। किञ्च, प्रियास्त्वद्भक्ता यादवास्तेभ्योऽप्यधिकप्रियं वैदेहानां प्रायो ज्ञानपरत्वात् त्वत्कृतोपेक्षयाधुना भक्तान् विहाय ज्ञानिनामेव संगं करिष्य इति, यदुनन्दन इति यादवानन्दनार्थं द्वारकायामागन्तुमर्होऽपीति; हे राजन्निति च भक्तिमतां भगवति प्रणयकोपपरिपाटी त्वया बुध्यत एवेति भावः; यद्वा, अन्तःप्रणयकोपभरात्तेजसा राजमान ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पदातिरिति तिग्मनेमिना तीक्ष्णधारेण चक्रधारेण तस्य शिर उत्कृत्य छित्वा तस्य वाससोरन्तरीयोत्तरीययोर्मणिं व्यचिनोत् मृगयामास अक्रूरे मणिरस्तीति सर्वज्ञतया विदित्वापि रामवञ्चनार्थं तथा कृतवानित्यर्थः ॥ २१ ॥ तदाह— अलब्धमणिरिति तं लब्धो मणिर्येन तथाभूत अग्रजान्तिकमागत्योवाच उक्तिमेवाह—वृथेति। तत्र शतधन्वनि ॥ २२ ॥ एवं वञ्चितोऽपि स बलो बलभद्रः सर्वज्ञत्वात् तं कृष्णमाह—नूनमिति। नूनं कस्मिंश्चित्पुरुषे स मणिर्न्यस्तः अतस्तमन्वेष्टुं स्वपुरं द्वारकां गच्छेति ॥२३॥ ततः पुनः सर्वज्ञेनैवं चेष्टितं मद्वञ्चनायेति गूढमन्युराह—अहमिदि वैदेहं जनकम् इतीति। हे राजन्! यदुनन्दनो बलभद्रः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पद्भ्यामातिः सततं गमनं यस्य स तथा तस्य तिग्मनेमिना चण्डधाराग्रेण व्यचिनोत् अन्वेषणं कृतवान् ॥ २१-२२ ॥ अन्बेषन् मार्गणं कुर्वन् ॥ २३-२४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ज्ञाताक्रूरस्थापिततत्कोऽपि बलप्रयुक्तापयशोऽपि स्वस्य मार्जयितुमार्जयामासेमां रीतिमिति ज्ञेयम् ॥ २७ ॥ अग्रजस्यान्तिमं समीपं वृथा हतोऽस्मिन्हते न हतः सत्राजिद्भवत्युज्जीवित इति रत्नालाभाच्च वृथेत्युक्तिः शतधनुशतधन्वाशब्दौ पर्यायावित्येवमुक्तम् ॥ २८ ॥ ततो नात्र रत्नमिति कृष्णवचनानन्तरम् । बल आह । अन्तर्वचनं कृतं कृष्णेनेत्यङ्कुरितरोषो बहिः किञ्चिद्विधाय सारथिं बोधयन्पथ्यन्तरं वक्ति । नूनमिति । स मणिः शतधन्वना कस्मिंश्चित्पुरुषे न्यस्तो नूनं निश्चयः तं पुरुषमन्वेषं कुर्वन्पुरं व्रज । तदाकर्ण्य महारोषादुवाच वचनं बलः । कपटी त्वं सदा कृष्ण लोभी पापी सुनिश्चितम् । अर्थाय स्वजनं हंसि कस्त्वा बन्धुः समाश्रयेत् । अनेकशपथैः कृष्णो बलदेवं प्रसादयन् । सोऽपि धिक्कष्टमित्युक्त्वा ययौ वैदर्भमण्डलमित्यादि व्रतार्के । श्यमन्तकार्थे रामोऽपि कृष्णस्य विमनाऽभवदिति च्छिन्नभक्तगणनाग्रस्ता श्रीमतामुक्तेश्च ॥ २९ ॥ इच्छानिमित्तमाह । मम प्रियतरमिति ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अक्रूरे मणिरस्तीति सर्वज्ञतया ज्ञात्वाऽपि दूरात् पश्यतो रामस्यैव मोहनार्थं व्यचिनोत् तन्मोहनं च स्वस्माद्वियुक्तस्य तस्य स्वप्रिये बहुलाश्वे नृपे कृपाभरप्रापणार्थमिति ज्ञेयम् ॥ २१-२२ ॥ अन्वेष अन्वेषय ॥ २३ ॥ सर्वज्ञस्यैवं चेष्टितं मद्वञ्चनायैवेति मत्वा तन्मोहितत्वादेव तं प्रति गूढमन्युराह—अहमिति । त्वदीयद्वारकामप्यहं न यास्यामि त्वं स्वप्रियायै मणिं स्वच्छन्दनैव देहीति भावः ॥ २४ ॥

गूढार्थदीपिनी

तिग्मनेमिना तीक्ष्णधारेण शिरः उत्कृत्य छित्वा । व्यचिनोत् अन्वेषयामास ॥ २१-२२ ॥ अन्वेषय ॥ २३-२४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्य गुरुद्रुहः शिरः उत्कृत्य च्छित्वा व्यचिनोत् मृगयामास सर्वज्ञस्यापि लीलावशात्तथैवोचितत्वात् ॥२१-२२॥ मणिस्तत्र विद्यते इति भगवतोक्तम् अक्रूर अस्तीति वक्तुं तु लीलायामनौचित्यत्वात् अथ बलोऽपि भगवदनुरूपमाह—कस्मिंश्चित्पुरुषे न्यस्तमन्वेष अन्विच्छेति ॥ २३-२५ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स्वयमपि पदातिः तस्य पदातेः तिग्मनेमिना अप्रतिहतेन सुदर्शनेन शिरस्तस्योत्कृत्य, धावनसमय एव शरीरं धावमानमेव स्थितम् । शिरस्तु छिन्नमिति । **भगवानिति** मोक्षदानार्थं तथा कृतवानिति निरूपितम् । अत एव **भगवानद्भुतकर्मा** बलभद्रः पश्यतीति तत्र मण्यभावं ज्ञात्वापि वाससोः **व्यचिनोत्**, विवेचनेन अन्वेषणं कृतवान् ॥ २१ ॥ बलभद्रविचारेण स मारित इति ज्ञात्वापि भगवांस्तथा कृतवान् । मण्यर्थमेव मारणमिति बलभद्रविचारः । सर्वथा मारणीय इति भगवतः । लोकवद्बलभद्रः बहुविधानि वाक्यानि श्रुत्वा मणिसद्भाव एव तस्यापराधं जानीयात् । अन्यथा लोकोन्यथापि वदतीति विश्वासं न कुर्यादत आह भगवान् । अलब्धमणिरग्रजान्तिकमागत्य वृथा हतः शतधनुरिति । सर्वज्ञत्वे भगवतोऽपराधः स्यात् । ज्ञात्वैवान्यत्र गत इति । सर्वकर्तृत्वमपि सर्वज्ञत्वे भविष्यतीति सुतरामेवापराधः स्यात् । ततोऽज्ञाननाट्यं कर्तव्यम् । **अहतो वृथेत्यपि** वाक्यं भवति । गुरुद्रोहात् हत एव सार्थको भवतीति । अन्यथा अकृतनिर्वेशो भवेत् । मणिस्तु न विद्यत इत्युभयत्र समानम् ॥ २२ ॥ ततो बलभद्र एव युक्त्यभिज्ञः भगवन्तमाहेत्याह **तत आह बल** इति । **नून**मिति तस्य वाक्यम् । अवश्यं मणिरन्वेष्टव्यः । यदि तत् स्थाने नास्ति, तदा नूनं स मणिः **शतधन्वना,** शतधन्वन्शब्दः कस्मिंश्चित्पुरुषे, न तु खाते, भार्यादौ वा । पुरुषपदेन महानेव कश्चित्सूचितः । **न्यस्तः** न्यासप्रकारेण स्थापितः । ततः किं विधेयमित्याकाङ्क्षायामाह **तमन्वेष्टुं पुरं व्रजेति** । नतु स्वगृहे गन्तव्यम्, कार्यं न जातमिति ॥२३॥ स्वस्यान्यथा विनियोगमाह **अहं विदेहमिच्छामीति** । भूभारहरणार्थमुभौ समागतौ । लोकाश्च द्विस्वभावाः । यद्युभावप्येकासक्तौ स्याताम्, तदा पक्षान्तरे बलातिशयं दृष्ट्वा अपरो निवर्तेत, तदनुगुणो वा भवेत् । ततो भूमिभारस्तदवस्थ इति फले उभौ विरुद्धस्वभावौ जातौ । अतो दुर्योधनशिक्षार्थं बलो विदेहनगरे गच्छन् भगवन्तं द्वारकां प्रेषितवान् । इतःप्रभृत्येवोभयोः शक्तिर्विभक्ता । असम्मतिलीलाप्यन्योन्यं प्रदर्श्यते । अत एवाग्रे भगवद्वाक्यम् । 'किन्तु मामग्रजः सम्यक् न प्रत्येति मणिं प्रती'ति । ईश्वरशक्त्योर्विभक्तत्वात् तद्भक्तानामपि बुद्धि-

विभक्तेति अक्रूरभीष्मादीनां भगवद्भिन्नशीलत्वं वर्णितम् । अन्यथोभयविधाः न निरुद्धा भवन्तीति । अतो बलभद्रप्रकारेण ये निरुद्धाः, ते भगवतो नानुगुणाः । भगवता निरुद्धाश्च न बलभद्रानुगुणा इति । अनयोर्विभागे शास्त्रमपि विभक्तमिति ज्ञापयितुं **विदेह**पदम् । ज्ञाननिष्ठाः प्रियाः बलपक्षे । भक्तिनिष्ठाश्चापरत्रेति । क्रियाज्ञानशक्ती एकत्र । भक्तिपरमानन्दावपरत्र । अत एव विदेहः प्रियतमः । ततस्तन्निकटे गत्वा तद्दर्शनार्थं समुत्सुको जातः । ज्ञानपक्षे वेदमार्गो नात्यन्तमादरणीय इति गरुडध्वजो रथः भगवतैव गृहीतः । बलस्तु रथान्तरं समारुह्य पद्भ्यां वा गत इति निश्चीयते । बलभद्रो नियोगकर्तेति तस्यैव चरित्रं प्रथममाह **इत्युक्त्वेति** त्रिभिः । **मिथिला** नाम मथनाज्जातेति, न निर्मितेति कर्मज्ञानोद्भवस्तस्यां सूचितः । **यदुनन्दन** इति तदर्थमेव भगवदवतार इति तथाकरणमुचितमिति ज्ञापितम् ॥ २४ ॥

श्रीसुबोधिनीसारः

पदातेस्तस्य शतधन्वनः शिरस्तीक्ष्णधारेण चक्रेण उत्कृत्य छित्वा पदातिर्भगवान् वाससोर्वस्त्रयोर्मणिं व्यचिनोत् अमार्गयत् ॥ २१ ॥ अलब्धः अप्राप्तो मणिर्येन स कृष्ण आगत्याग्रजस्य रामस्यांतिकं समीपम् आह शतधनुर्वृथा निष्फलं हतः तत्र तस्मिन् शतधनुषि मणिर्नास्ति ॥ २२ ॥ ततोनंतरं बलदेव आह स मणिः शतधन्वना कस्मिंश्चित् पुरुषे नूनं निश्चयेन न्यस्तः स्थापितः तं मणिं पुरुषं वा त्वमन्वेष मृगय पुरं व्रज द्वारकां याहि ॥ २३ ॥ मम प्रियतमं विदेहं राजानं द्रष्टुमहमिच्छामि इत्युक्त्वा यदुनंदनो रामो मिथिलां विवेश हे राजन् ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पदातिः पद्भ्यां गच्छन्नेव भगवांस्तस्य पदातेः शतधन्वनस्तिग्मनेमिना तीक्ष्णधारेण चक्रेण शिर उत्कृत्य छित्वा तस्य वाससोरन्तरीययोर्मणिं व्यचिनोत् मृगयामास ॥२१॥ न लब्धो मणिर्येन स कृष्णः अग्रजस्य बलभद्रस्य अन्तिकमागत्याह । तदुक्तिमेवाह—वृथेति ॥ २२ ॥ ततश्च बलः कृष्णमाह । तदुक्तिमाह—नूनमिति । शतधन्वना कस्मिंश्चित् पुरुषे स मणिर्न्यस्त इति नूनं निश्चितम्, अतस्तं मणिमन्वेषपुरं व्रज अन्वेष्टुं द्वारकां गच्छ ॥ २३ ॥ अहं तु वैदेहं जनकं द्रष्टुमिच्छामि । तत्र हेतुमाह—मम प्रियतरमिति । ततश्च हे राजन् ! यदुनन्दनो बलभद्रः कृष्णं प्रतीत्युक्त्वा मिथिलां पुरीं विवेश ॥ २४ ॥

अन्वितार्थप्रकाशिका

पदातेरिति ॥ पदातिः पद्भ्यां गच्छन्नेव भगवांस्तस्य पदातेः शतधन्वनस्तिग्मनेमिना तीक्ष्णधारेण चक्रेण शिर उत्कृत्य च्छित्वा तस्य वाससोरन्तरीययोर्मणिं व्यचिनोत् मृगयामास । एतच्च रामवञ्चनाय अयमाशयः । स्वभक्तेऽक्रूरे दुःसङ्गेन दुष्कर्मप्रेरणदर्शनात् कञ्चित्कालं त्यागरूपशासनेच्छास्वभक्तत्वान्मणिलिप्सा च भगवत आसीत् । तावन्मात्रशासनं विकर्मप्रेरकाय मणिदानं चाग्रजो नानुमन्येतेत्यतो माज्ञासीदेव अयमक्रूरश्च मणिं गृहीत्वा ततश्च सर्वं स्वसंकल्पितं भविष्यतीति ॥ २१ ॥ अलब्धेति ॥ न लब्धो मणिर्येन स कृष्णः अग्रजस्य बलभद्रस्यान्तिकमागत्याह स्म । शतधनुर्वृथैव हतः । चारैर्मृषैवोक्तमिति भावः । यतस्तत्र मणिर्न विद्यते ॥ २२ ॥ तत इति ॥ ततश्च बलः सर्वज्ञस्यैवं विचेष्टितं मद्वञ्चनायेति गूढमन्युः कृष्णमाह स्म । शतधन्वना कस्मिंश्चित्पुरुषे स मणिर्न्यस्त इति नूनं निश्चितम् । अतस्तं मणिमन्वेष पुरं व्रज अन्वेष्टुं द्वारकां गच्छ । अन्वेषेत्यार्षम् ॥ २३ ॥ अहमिति ॥ अहं तु मम प्रियतरं विदेहं जनकं द्रष्टुमिच्छामि । ततश्च हे राजन् ! यदुनन्दनो बलभद्रः कृष्णं प्रतीत्युक्त्वा मिथिलां पुरीं विवेश ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पदातेः । पद्भ्यां गच्छतस्तस्य शतधन्वनः । तीक्ष्णधारेण उत्कृत्य छित्वा । वाससोर्वस्त्रयोः । व्यचिनोत् अन्वेषयामास सर्वज्ञस्य भगवत एतच्चरित्रं मनुष्यनाट्यदर्शनाय भवति ॥ २१-२२ ॥ तं अन्वेषतस्यान्वेषणं कुरु ॥ २३ ॥ यदुनंदनो रामः मणिरस्ति तथापि मम न दर्शित इति भ्रमेण रोषं व्यंजयन्मिथिलांग इति हरिवंशादौ प्रसिद्धिः अत्रापि न प्राप्तेति मणिं प्रतीत्यग्रे वक्ष्यते ॥ २४-२५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पदातेरिति ॥ पदातिः, भगवान्, वध्यं पदातिं विलोक्य धर्माश्रयः स्वयं कृष्णः पादाभ्यां गच्छन् सन्नित्यर्थः । पदातेः पादाभ्यां गच्छतः तस्य शतधन्वनः, शिरः, तिग्मनेमिना तीक्ष्णधारेण, चक्रेण, उत्कृत्य छित्वा, तस्य वाससोर्वस्त्रयोः, मणिं व्यचिनोन्मृगयामास । अत्र केचिदक्रूरे मणिरस्तीति सर्वज्ञतया विदित्वापि रामवञ्चनार्थं तथा कृतवानिति भाव इत्यर्थाभ्यामूचुस्तद्विचारार्हमस्ति । सदा स्वहितंकररामवञ्चनस्यानर्हत्वात् । ततो नूनं नाट्यानुकरणमेतदित्येव वक्तुं युक्तमत्र ॥२१॥ अलब्धेति ।

कृष्णः, अलब्धमणिः सन्, अग्रजान्तिकं आगत्य, शतधनुः, वृथा हतः । तत्र शतधन्वनि, मणिः न विद्यते इति, आह ॥ २२ ॥ तत इति ॥ ततः, बलः, शतधन्वना, सः मणिः, कस्मिंश्चित्पुरुषे, न्यस्तः स्यात् नूनम् । ततः तं मणिं, अन्वेष पुरं व्रज, इति आह ॥ २३ ॥ गूढान्तर्मन्युः कृष्णं प्रति भूय आह । अहं मम, प्रियतरं विदेहं, द्रष्टुं इच्छामि । इति उक्त्वा, हे राजन्, यदुनन्दनो बलः, मिथिलां विवेश ॥ २४ ॥

कृष्णप्रिया

शतधन्वा जब पैदल ही भाग रहा था तब नीति जानने एवं मानने वाले भगवान् श्रीकृष्ण भी उसके पीछे पैदल ही दौड़े । प्रभु ने तेजोली धारवाले सुदर्शन चक्र से उसका मस्तक उतार लिया और उसके वस्त्रों में स्यमन्तक मणि ढूंढा ॥२१॥ वस्त्रों में ढूंढने पर जब मणि न मिली तब भगवान् ने अपने बड़े भाई बलभद्रजी के समीप आकर कहा कि भैयाजू शतधन्वा को व्यर्थ मारा स्यमन्तक मणि उसके समीप न थी ॥ २२ ॥ श्रीबलभद्रजी ने कहा कि निश्चित बात है कि शतधन्वा ने स्यमन्तकमणि को किसी न किसी के पास रखी होगी आप द्वारिका जाओ मणि का पता लगाओ ॥ २३ ॥ मैं अपने प्रिय सुहृद महाराज विदेहजी को देखना चाहता हूँ आप जानते हैं कि वे मेरे निकट के मित्र हैं । राजन् परीक्षित् ! ऐसा कहकर यदुवंश शिरोमणि श्रीबलभद्रजी मिथिला नगरी में पधार गये ॥ २४ ॥

तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः । अर्हयामास विधिवदर्हणीयं[1] समर्हणैः ॥ २५ ॥
उवास तस्यां कतिचिन्मिथिलायां समा विभुः ।
[2]मानितः प्रीतियुक्तेन जनकेन महात्मना । ततोऽशिक्षद् गदां काले धार्तराष्ट्रः सुयोधनः ॥ २६ ॥
केशवो द्वारकामेत्य निधनं शतधन्वनः । अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद् विभुः ॥ २७ ॥
ततः स कारयामास [3]क्रियां बन्धोर्हतस्य[4] वै । [5]साकं सुहृद्भिर्भगवान् या याः स्युः साम्परायिकाः ॥२८॥

कर्दमक्षमा

अन्वयः—प्रीतमानसः, मैथिलः, तम्, दृष्ट्वा, सहसा, उत्थाय, अर्हणीयम्, समर्हणैः, विधिवत्, अर्हयामास ॥ २५ ॥ प्रीतियुक्तेन, महात्मना, जनकेन, मानितः, धार्तराष्ट्रः, सुयोधनः, ततः, गदाम्, काले, अशिक्षत् ॥ २६ ॥ प्रियायाः, प्रियकृत्, विभुः, केशवः, द्वारिकाम्, एत्य, शतधन्वनः, निधनम्, च, मणेः, अप्राप्तिम्, प्राह ॥ २७ ॥ ततः, सः, भगवान्, हतस्य, बन्धोः, याः, याः, साम्परायिकाः, क्रियाः, स्युः सुहृद्भिः, साकम्, कारयामास ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कतिचित्समाः संवत्सरान् प्रासंगिमाह । तत इति ॥ २६ ॥ सत्यभामामप्यवंचयदिति सूचयन्नाह केशव इति ॥२७॥ बन्धोः सत्राजितः । सांपरायिकाः पारलौकिक्यः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं बलम् । अर्हणीयं पूजनीयम् । सहसेत्याकस्मिकैकाकितया गमनात् । 'अर्हण्यं वै' इति पाठेपि स एवार्थः । समर्हणैरुत्तमपूजाद्रव्यैः ॥ २५ ॥ प्रासंगिकं प्रसंगायातम् । ततो बलदेवात् । काले श्रीकृष्णतो रुष्टैकांतागतत्वान्निजावसरे । धार्तराष्ट्र इति–दुर्मंत्रदक्षस्य पितुः प्रेरणादित्यर्थः । मानित इत्यस्य विभुरित्यनेनैवान्वयः । योग्यत्वात्तदेवाह—महान् श्रीकृष्णे तत्प्रियगण चैव गतत्वात्सर्वोत्कृष्ट आत्मा मनो यस्य तेन ॥ २६ ॥ मण्यप्राप्तिकथनेन तस्या अपि वंचनमेव । प्रियायाः प्रियकृदिति–आयुरभावादेव त्वत्पिता जीवयितुमशक्यः किन्तु त्वत्पितृहंता मया स्वहस्तेन हत इति प्रियां प्रत्युक्तेः । केशव इति–तथा शीघ्रगतौ वीर्यसूचनं, ब्रह्मेशवशकारित्वाद्धेलया हततादृशकेशित्वाद्वा । प्राह प्रकर्षेण दूरधावनाद्यभिव्यंजनेनाह । यतो विभुरपि प्रेमवशत्वात्प्रियायाः प्रियकृदिति तोषिणी ॥ २७ ॥ ततो द्वारकाप्राप्त्युत्तरम् । कारयामास श्रीसत्यभामयेति । वै प्रसिद्धौ । यायास्तास्ताः । हतस्य चौरेण । शस्त्रहतेरनुरूपास्तत्प्रायश्चित्तपूर्विका इत्यर्थः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सहसेत्यकस्मात् एकाकितयैवाऽऽगमनात् अर्हण्यम् अर्हणयोग्यं वै प्रसिद्धौ अर्हणीयमिति पाठे स एवार्थः समर्हणैः उत्तमपूजाद्रव्यैः ॥ २५ ॥ उवासेति सार्द्धकम् । तस्यां स्वभक्तपालितायां विभुरीश्वरः सन् काले तस्य श्रीकृष्णतो रुष्टैकान्ता-

---

१. र्हणं वै–च पु. टि.; र्हण्यं वै त–प्रा. पा । २. पूर्वार्द्धौ व्यत्यस्तौ–विज । ३. यां–विज. । ४. मृ–विज. । ५. सार्द्ध–प्रा. पा. ।

गतत्वान्निजावसरे धार्त्तराष्ट्र इति दुर्मन्त्रदक्षस्य पितुः प्रेरणादित्यर्थः। मानित इत्यस्य विभुरित्यनेनैवान्वयः। योग्यत्वात् तदेवाह—महात्मना महान् श्रीकृष्णे तत्प्रियगण एव च गतत्वात्सर्वोत्कृष्ट आत्मा यस्य तेनेति ॥ २६ ॥ केशव इति तथा शीघ्रगतौ वीर्य्यसूचनं ब्रह्मेशवशीकारित्वात् हेलया हततादृशकेशित्वाद्वा प्रकर्षेण दूरधावनाद्यभिव्यञ्जनेनाह—यतो विभुरपि प्रेमवशत्वात् प्रियायां प्रियकृत् ॥ २७ ॥ ततस्तदनन्तरमेव कारयामास श्रीसत्यभामयेति वै प्रसिद्धौ यायास्ताः सर्वा एव तत्र च हतस्येति **चौरेण शस्त्रहतेरनुरूपा** इत्यर्थः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सहसेत्यकस्मादेवागमनादर्हण्यमर्हणयोग्यम्, वै प्रसिद्धौ, अर्हणीयमिति पाठेऽपि स एवार्थः। समर्हणैरुत्तमपूजाद्रव्यैः ॥ २५ ॥ तस्यां प्रायो भक्तिरहितायामपि विशेषेणाग्रजतया भवतीति विभुः श्रीकृष्णाग्रजोऽपि; यद्वा, तस्यां तादृशार्हणप्रापिकायां विभुस्तत्रत्येश्वरः सन्नित्यर्थः। ततस्तस्मादन्तः कोपेन तस्य मिथिलावासाद्धेतोस्तत्पश्चाद्वा शीघ्रं तत्तत्त्वं ज्ञातुमशक्तेः काले द्वयोर्भ्रात्रोर्भेदावसरं प्राप्येत्यर्थः। यद्वा, शिक्षायोग्यावसरे धार्त्तराष्ट्र इति दुर्मन्त्रदक्षस्य पितुः प्रेरणात्, सुयोधन इति च सुखेन योद्धुमिति भावः। महात्मना ज्ञानपरतया सर्व्वत्र समदृष्टिना, अतएव प्रीतियुक्तेन सता मानित आदृतः सन् अग्रे वक्ष्यमाणाच्छ्रीभगवद्गन्तव्यान्मैथिलादयं कश्चिदन्यः, किंवा श्रीबलदेवप्रसादबलात् कालेनास्यैव भक्तिवृद्ध्यायमेव स इति ज्ञेयम् ॥ २६ ॥ केशवः साक्षात् परमेश्वरः, तत्र च विभुर्निजाशेषैश्वर्य्यविस्तारणेन सर्व्वव्यापकः, अतएव प्रियायाः श्रीरुक्मिणीजाम्बवतीभ्यामपि वल्लभायाः श्रीसत्यभामायाः प्रियं कुर्व्वन्, तां प्रति शतधन्वनो वधं प्रकर्षेण दूरधावनाद्यभिव्यञ्जनेनाह। यद्वा, प्रियकृदपि मणेरप्राप्तिमपि प्राह, यतो विशेषेण प्रियाभ्योऽप्याधिक्येन भक्तेषु भवतीति तथा सः, भक्तवात्सल्येनाक्रूरपक्षपातादिति भावः। यद्वा, मायया जगद्व्यापकः, प्रियाया अपि वञ्चनात्, इयं श्रीवादरायणेर्भावविशेषेणासूयोक्तिरिति ॥ २७ ॥ ततस्तदनन्तरमेव कारयामास श्रीसत्यभामया पुरोहितेन वा, वै प्रसिद्धौ, या यास्ताः सर्व्वा एव, तत्र च हतस्य **चौरेण शस्त्रहतेरनुरूपा** इत्यर्थः। यतो भगवान् परमदयालुः; यद्वा, सद्धर्म्मप्रवर्त्तनाद्यर्थमवतीर्णः, अतो लोकशिक्षार्थमिति भावः। यद्वा, भगवानपि कुतः? बन्धोर्बन्धुवात्सल्यादिति भावः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मैथिलो जनकस्तं रामं दृष्ट्वा प्रीतमानसस्सहसा उत्थाय पूजार्हं राममर्हणैः पूजासाधनैः यथाविधि पूजयामास ॥ २५ ॥ उवासेति विभू रामः कतिचित्समाः वत्सरानुषितवान् प्रासङ्गिकमाह—तत इति। धृतराष्ट्रस्यापत्यं सुयोधनस्तदा गृहीतवानित्यर्थः। सुयोधनं विशिनष्टि—मानित इति ॥ २६ ॥ सत्यभामामप्यवञ्च यदित्याह—केशव इति। एत्यागत्य शतधन्वनो निधनं वधं मणेरलाभं च प्रियायाः सत्यभामायाः प्राह—प्रियकृत्प्रियङ्कुर्वन्निव ॥ २७ ॥ तत इति सुहृद्भिः सहितो भगवान् हतस्य बन्धोः श्वशुरस्य सत्राजितस्य क्रिया उत्तरक्रियाः कारयामास कास्ताः याः कारयामासेत्यत्राह—या याः क्रियाः साम्परायिकाः परलोकहेतवः ता इत्यर्थः ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अर्हण्यं पूज्यम् ॥ २५ ॥ काले कृष्णवियोगसमये ॥ २६-२७ ॥ बन्धो सत्राजितः साम्परायिकाः प्रेतविषयाः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मानित इत्यस्य विभुरित्यनेनैवान्वयः ॥ २६ ॥ प्रियायाः प्रियकृदिति आयुरभावादेव त्वत्पिता जीवयितुमशक्यः किं तु त्वत्पितृहन्ता मया स्वहस्तेन हत इति प्रियां प्रत्युक्तेः ॥ २७ ॥ बन्धोः सत्राजितः ॥ २८ ॥

गूढार्थदीपिनी

उवासेति सार्द्धम्। समाः संवत्सरान् ॥ २६-२७ ॥ बन्धोः सत्राजितः। वै प्रसिद्धार्थे। साम्परायिकाः पारलौकिक्यः यायास्तास्ताः सर्वाः इति योज्यम् ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

समाः सम्वत्सरान् ॥ २६-२७ ॥ बन्धोः श्वशुरस्य साम्परायिकाः पारलौकिकाः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सहसा दृष्ट्वा। एकाकिनस्तत्रापि पदा गमनात्पुरावाप्तेरवार्तावितिरभूद्भूपतेरिति सहसेत्यनेन ध्वन्यते। अर्हणीयं समर्हणैः पूजासाधनैः ॥ ३१ ॥ तस्यां मिथिलायां समाः संवत्सरान्पञ्च। अविश्वासात्स तु सक्रोध एव ययौ विदेहानवसत्पञ्च चाब्दानिति श्रीमदुक्तेः। काले हरिविरसताविरहसमये ततो बलाद्गदां तद्विद्यां धार्तराष्ट्रः सुयोधनोऽशिक्षदशिक्षतोपादत्त ॥३२॥

प्रियायाः प्रियकृत् । शतधन्वमारणेन मृतस्य बन्धोर्बन्धुभिः साकं सार्धं साकं सदुःखं यया तथा ॥ ३३ ॥ या या इति पदमेकम् । साम्परायिकाः साम्परायिक्यो मोक्षहेतवः क्रियास्तास्ताः कारयामास ॥ ३४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो राजकर्तृकमभिनन्दनमाह **तं दृष्ट्वेति**। अतिप्रियत्वात् न ज्ञापयित्वा गतः। अतोऽन्तःप्रवेशानन्तरमेव दर्शनानन्तरमेव राजा ज्ञातवानिति **दृष्ट्वा सहसोत्थाये**त्युक्तम् । यतो **मैथिलः**। दर्शनेनैव प्रीतं मानसं यस्य । एवं देहेन्द्रियान्तःकरणस्थितिरुक्ता। ततस्तस्य कार्यमाह **अर्हयामासे**ति। विधिप्रधान इति विधिवत्पूजां चक्रे। कस्मिन्नप्यंशे पुष्टिर्नास्तीति ज्ञापयितुं **अर्हणीय**मित्युक्तम् । रामः सर्वैरेव अर्हणीयः, साधनपुरःसरम्, ब्रह्मरूपत्वात् । **समर्हणैः** सम्यगर्हणयोग्यैः शुद्धैः द्रव्यादिभिः ॥२५॥ एवं पूजानन्तरं तस्य प्रत्यागमनं सम्भाव्य तन्निषेधार्थमाह **उवासेति**। राजगृहे स्थितिव्यावृत्त्यर्थं **तस्या**मिति। **कतिचित्समा** इति वर्षत्रयं किञ्चिदधिकं वा । **मर्यादानगरी सेति** स्थितौ न कोऽप्युद्वेगः। तत्र तावत्कालं स्थितौ परदेशवासादिक्लेशो भवेदित्याशङ्क्याह **विभुरिति**। स्थितेः प्रयोजनमाह **ततोऽशिक्ष**दिति। **धार्तराष्ट्रः** पितुः पुत्रः समर्थः, दुर्योधनोऽपि भगवदिच्छया सुयोधनः, सुष्ठु योधनं यस्येति। दुर्योधनपदं यौगिकं मन्यमानः तन्निषेधार्थं विपरीतं प्रयुङ्क्ते। रूढं पदमिति लोके बोधयन्। अतो ज्ञानक्रियाशक्ती तस्य न पुष्टे इति बलभद्रात् गदामशिक्षत्। **काले** गदाशिक्षणयोग्ये समये। अत्यन्तं पुष्टस्तरुणः गदायां योग्यः। यस्मिन् काले प्रहारः शुष्को भवति, न पूयादिकं सम्पादयति, नाड्यश्च विशवलिता न भवन्ति, स शरदादिः षण्मासः। तस्मिन् काले गदामशिक्षत् । तस्यापि विदेशवासे उद्वेगाभावायाह **मानितः प्रीतियुक्तेने**ति। यतो जनकः जननात्, अत उत्कृष्टजन्मा, तं कुलीनं मर्यादावन्तमङ्गीकृतवान्। बलभद्रसम्बन्धादपि प्रीतिः। स्वभावतोऽपि महात्मा । य एव गृहमागतः, तमाराधयतीति । अतः प्रकारत्रयेण मानितः कायिकादिक्लेशाभावात् **अशिक्षत्**। शिक्षया गदां ज्ञातवानित्यर्थः ॥ २६ ॥ मर्यादारूपं भगवच्चरित्रमुक्त्वा, पुष्टिरूपमाह **केशव** इति। उत्पादकनाशकयोः तुल्यप्रकारेण फलं प्रयच्छतीति पुष्टिस्थो भवति। द्वारकां रथेनागत्य सत्यभामादीनां सुखार्थं शतधन्वनो निधनम्। तदीयानां सुखार्थं च मणेरप्राप्तिमाह। ननु सर्वेश्वरः विधिकर इव किमिति स्वकृतं निरूपितवानित्याशङ्क्याह **प्रियायाः प्रियकृ**दिति। एतदप्ययुक्तमिति चेत्। तत्राह **विभुरि**ति। सर्वं कर्तुं समर्थः। नैतावता काचित् क्षतिरिति भावः। उभयमपि प्रियायाः प्रियार्थमुक्तवान्। कथं मण्यप्राप्तिः प्रियमित्याशङ्क्य, सामर्थ्यं वा उक्तम् ॥ २७ ॥ वैरानुबन्धः आमृत्योरिति शतधनुर्वधानन्तरं प्रीतायां सत्यभामायां पश्चात्कारयामास यत्कर्तव्यमित्याह **तत** इति। **बन्धोः** श्वशुरस्य विप्रद्वारा कारणम्। **साकं सुहृद्भि**रित्यादिलौकिककथनं परलोकेऽपि तस्य नालौकिकं किञ्चित्करोतीति ज्ञापयितुम्। **भगवा**निति तत्र महती सम्भृतिः सूचिता। **सुहृद्भि**रिति। तत्करणे सर्वेषामावश्यकता च। **या याः स्यु**रिति। विधौ आवश्यका अनावश्यकाश्च फलार्थाः सर्वा एव संगृहीताः ॥ २८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

ततोऽशिक्षदित्यत्र । **अतो ज्ञाने**ति । **अत** इत्यस्याशिक्षदित्यनेनान्वयः। सुयोधनत्वाद्धेतोरशिक्षदित्यर्थः।

श्रीसुबोधिनी—सारः

तं रामं दृष्ट्वा सहसा शीघ्रमुत्थाय प्रसन्नचित्तो मैथिलो जनकोऽर्हणीयं पूज्यं विधानतः समर्हणैः पाद्यादिभिरर्चयामास तस्यां मिथिलायां कतिचित्समाः त्रिवर्षं विभुर्बल उवास ॥ २५ ॥ ततोंतरे रामात्काले समये धृतराष्ट्रस्य पुत्रो दुर्योधनो महात्मना प्रीतियुक्तेन जनकेन मानितः सत्कृतो गदामशिक्षत् ॥ २६ ॥ प्रियायाः सत्यभामायाः प्रियकृत् विभुः प्रभुः केशवः श्रीकृष्णो द्वारकामेत्यागत्य शतधन्वनो निधनं मृत्युं मणेरप्राप्तिं च प्राह ॥ २७ ॥ ततोनन्तरं सांपरायिकाः पारलौकिका याः याः क्रियाः स्युः तां तां क्रियां स कृष्णो हतस्य बन्धोः सत्राजितः कारयामास सुहृद्भिः सार्द्धं सह ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तं रामं दृष्ट्वा प्रीतमानसो मैथिलः सहसोत्थाय अर्हणीयं पूजार्हं तं रामं समर्हणैः पूजासाधनैः पाद्यार्घस्रक्चन्दनादिभिः यथाविधि पूजयामासेत्यन्वयः ॥ २५ ॥ विभुः स्वतन्त्रः सन्मानयोग्यश्च बलभद्रो जनकेन मानितः कतिचित्समाः दिवसान् मिथिलायामुवास। तत्र निवासप्रयोजनमाह—तत इति। रामात् धृतराष्ट्रपुत्रः सुयोधनः काले लब्धेऽवसरे गदां गदायुद्धमशिक्षत् ॥ २६ ॥ केशवः कृष्णो द्वारकामेत्य आगत्य शतधन्वनो निधनं मरणं मणेरप्राप्तिं च प्रियायाः सत्यभामायाः प्राह। ननु 'सर्वज्ञत्वादक्रूरे मणिरस्तीति जानन्नपि किमर्थं शतधन्वानं हतवान्, रामसत्यभामयोश्चान्यथैव कथितवान्' इत्याशङ्क्याह—प्रियकृदिति। स्वभक्तायाक्रूराय मणिदानस्येष्टत्वात्तथा कथने तयोर्वैमनस्यं स्यात्, अतस्तत्प्रीत्यर्थमेवं कृतवानित्याशयः। विभुः सर्वथा सर्वकरणे समर्थः ॥ २७ ॥ ततश्च या याः साम्परायिकाः परलोकहितकारिण्यः क्रियाः स्युर्भवन्ति ताः हतस्य बन्धोः श्वशुरस्य सत्राजितस्य सुहृद्भिर्भगवान् कारयामासेत्यन्वयः ॥ २८ ॥

अन्वितार्थप्रकाशिका

तमिति । तं दृष्ट्वा प्रीतमानसो मैथिलः सहसोत्थाय अर्हणीयं पूजार्हं तं रामं समर्हणैः पूजासाधनैः पाद्यार्घस्रक्चन्दनादिभिर्यथाविधि पूजयामास ॥ २५ ॥ उवासेति सार्द्धम् । विभुः स्वतन्त्रः सम्मानयोग्यश्च बलभद्रो महात्मना प्रीतियुक्तेन जनकेन मानितः कतिचित्समाः संवत्सरान् तस्यां मिथिलायामुवास । ततः रामात् धृतराष्ट्रपुत्रः सुयोधनः तस्मिन् काले लब्धेऽवसरे गदां गदायुद्धमशिक्षत् । तङभाव आर्षः ॥ २६ ॥ केशव इति । प्रियायाः प्रियकृत् तत्पितृहन्तुर्हन्ता केशवः कृष्णो द्वारकामेत्य आगत्य शतधन्वनो निधनं मरणं मणेरप्राप्तिं च प्रियायाः सत्यभामायाः प्राह स्म । आयुरभावादेव त्वत्पिता जीवयितुमशक्यः । किन्तु त्वत्पितृहन्ता मया स्वहस्तेन हत इति प्रियां प्रत्युक्तिः ॥ २७ ॥ तत इति । ततश्च याः याः साम्परायिकाः परलोकहितकारिण्यः क्रियाः स्युर्भवन्ति ता हतस्य बन्धोः श्वशुरस्य सत्राजितस्य सुहृद्भिर्भगवान् कारयामास ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कचितित्समावर्षाणि । ततो रामात् दुर्योधनः । गदां गदायुद्धप्रकारमशिक्षत् ॥ २६ ॥ प्रासंगिकमाह केशव इति ॥२७॥ हतस्य बंधोः श्वशुरस्य याः याः सांपरापिकाः क्रियाः ऊर्ध्वदैहिककर्माणि ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ तं बलभद्रं, दृष्ट्वा, प्रीतमानसः प्रसन्नमनाः, मैथिलो जनकः, सहसा उत्थाय, अर्हणीयं पूजार्हं रामं, समर्हणैः पूजासाधनैः, विधिवद्यथाविधि, अर्हयामास पूजयामास ॥ २५ ॥ उवासेति ॥ विभू रामः, प्रीतियुक्तेन महात्मना, जनकेन, मानितः सन्, तस्यां मिथिलायां, कतिचित् समाः वर्षत्रयपर्यन्तमित्यर्थः । उवास । तथा च विष्णुपुराणे 'वर्षत्रयान्ते च बभ्रूग्रसेनप्रभृतिभिर्यादवैर्न तद्रत्नं कृष्णेनापहृतमिति कृतावगतिभिर्विदेहपुरीं गत्वा बलदेवं संप्रत्याय्य द्वारकामानीत' इति । प्रासङ्गिकमाह तत इति । काले तस्मिन् काले, धार्त्तराष्ट्रो धृतराष्ट्रपुत्रः, सुयोधनो दुर्योधनः, ततो रामात्, गदां गदाधारणविद्यां, अशिक्षत् । गृहीतवानित्यर्थः ॥ २६ ॥ केशव इति ॥ विभुः, केशवः श्रीकृष्णः, द्वारकां एत्य, प्रियायाः सत्यभामायाः, प्रियकृत्सन्, शतधन्वनः निधनं, मणेः, अप्राप्तिं च, प्राह । प्रियायाः पुरतः, कथयामासेत्यर्थः ॥ २७ ॥ तत इति ॥ ततः, सः भगवान् श्रीकृष्णः, सुहृद्भिः साकं, हतस्य मृतस्य, बन्धोः श्वशुरस्य, याः याः, सांपरायिकाः, पारलौकिकाः क्रियाः उत्तरक्रिया इत्यर्थः । तास्ताः, कारयामास ॥ २८ ॥

कृष्णप्रिया

जब जनकनाथ को बधाई मिली कि समर्चनीय श्रीयदुकुल भूषण श्री बलराम जी महाराज निजभवन पधार रहे हैं तब वे आनन्द विभोर हृदय हो गये। एकाएक अपने आसन से खड़े हो गये और विविध प्रकार की समर्चन सामग्रियों से समर्चन किया ॥ २५ ॥ राजन् परीक्षित् ! इस तरह श्रीबलराम जी मिथिला जी पधारे और कई वर्षों तक मिथिलाजी में ही रहे। महामना महाराज मिथिलेश जी ने बड़े प्रेम एवं सम्मान से बलराम जी को रखा। इस अवसर पर धृतराष्ट्र पुत्र दुर्योधन ने बलभद्र जी से गदा युद्ध की शिक्षा का सम्पादन किया ॥ २६ ॥ प्रियतमा श्रीसत्यभामा जी का प्रिय कार्य करने वाले भगवान् श्रीकृष्ण शतधन्वा का वध करके द्वारिका जी लौट आये, देवी सत्यभामा जी को सारा वृत्तान्त सुनाया और स्यमन्तक मणि शतधन्वा के पास न निकली यह कथा सुनायी ॥ २७ ॥ पुनः भगवान ने सद्गत श्रीसत्राजित जी के सारे और्ध्व दैहिक श्राद्धादि संस्कार उनके गोत्रज बन्धुजनों के द्वारा करवाये, जिन संस्कारों से मृतात्मा का परलोक सुधरता है ॥ २८ ॥

अक्रूरः कृतवर्मा च श्रुत्वा शतधनोर्वधम् । व्यूषतुर्भयवित्रस्तौ द्वारकायाः प्रयोजकौ ॥ २९ ॥
अक्रूरे प्रोषितेऽरिष्टान्यासन् वै द्वारकौकसाम् । शारीरा मानसास्तापा मुहुर्दैविकभौतिकाः ॥ ३० ॥[1]

कर्दमक्षमा

अन्वयः—प्रयोजकौ, अक्रूरः, च, कृतवर्मा, शतधनोः, वधम्, श्रुत्वा, भयवित्रस्तौ, द्वारकायाः, व्यूषतुः ॥ २९ ॥ अक्रूरे, प्रोषिते, द्वारकौकसाम्, मुहुः, शारीराः, मानसाः, तापाः, दैविकभौतिकाः वै, अरिष्टानि, मुहुः, आसन् ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

व्यूषतुर्द्वारकायाः सकाशात्क्वापि पलायितौ प्रयोजकौ मणिहरणे शतधन्वनः प्रवर्तकौ तत्राक्रूरः कृष्णानुमतेनैव गतः कृतवर्मा तु भक्तपक्षपातप्राकट्यभयादिवोपेक्षित इति गम्यते कथमन्यथा सर्वज्ञेश्वरवंचनं तयोः संभवतीति ॥ २९ ॥ तदेवं

---

[1] ततोऽपृच्छद्धरिर्वृद्धानुग्रसेनपुरोगमान् । कस्मादिहाऽरिष्टान्यासन्महता सुचिरेण नः ॥ विज. ।

वाराणस्यां दानपतिसमाख्यया मणिहस्तेऽक्रूरे रुक्मवेदिकैर्महाध्वरैर्यजमाने निवसति पुनः श्रीकृष्णेनैव प्रस्थापितोऽक्रूर इति कर्णे कर्णे जपति जने सत्यभामारामादीनामप्यविश्वासे जनसंग्रहायाक्रूरं समाहूय साक्षेपं श्रीकृष्णः प्राह—इदं च भगवन्मतं संगोप्य केचन ऋषयोऽन्यत्कारणमक्रूरानयने वर्णयन्ति तद्यथाश्रुतं दूषयितुमनुवदति अक्रूरे प्रोषित इति ॥ ३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र तयोर्मध्ये । गम्यते ज्ञायते । तयोरक्रूरकृतवर्मणोः । शतधनुर्वधश्रवणेनातिभीताविति विशब्दार्थः ॥ २९ ॥ तदेवमित्थम् । वाराणस्यां काश्याम् । रुक्मवेदिकैर्हेमरचितवेदिकायुक्तैः । महाध्वरैर्महायज्ञैः । निवसति सति । तत् कारणम् । अरिष्टान्यरिष्टसूचकानि । तदेवं व्रजदेव्यपराधफलमिदमक्रूरस्य, यद्बहुवर्षपर्यंतं कृष्णविच्छेददुःखानुभवस्तद्विपक्षजनसंघट्टे काशीपुरे वासश्च, "उवास तस्यां कतिचिन्मिथिलायां समा विभुः" इत्युक्तेर्यावंत्येव वर्षाणि मिथिलायां बलदेवोऽवसत्तावंत्येवाक्रूरोऽपि वाराणस्याम्, तस्याञ्च तस्य रुक्मवेदिकनानायज्ञान् ब्राह्मणेभ्यो बहुदानख्यातिं च श्रुत्वा कृष्णेनैव प्रस्थापितोऽक्रूर इति कर्णेकर्णे जपति जने सति सत्यभामारामादीनामप्यविश्वासे सति पुनरप्युद्भूतं स्वस्मिन्कलंकं मार्ष्टुं द्वारकास्थलोकद्वारैवाऽक्रूरानयनकारणानि भगवतैव सृष्टानि–नानारिष्टानीति । तत्त्वं तदबुद्ध्वा द्वारकाया अरिष्टदर्शनं कालवशादेवोद्भूतमिति वदतां मुनीनां मतमनूद्य दूषयति–अक्रूर इति द्वाभ्याम् ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पूर्वं यादवत्वेन ज्ञयं न हन्यादिति किञ्चिद्विश्वासयुक्तौ इदानीं तद्वधश्रवणेनाधिकभीताविति विशब्दार्थः ॥ २९ ॥ अक्रूर इति युग्मकम् । अरिष्टा भूकम्पादयः पुंस्त्वमार्षम् अरिष्टानीति पाठः सिद्ध एव तापाश्चासन् तत्र शारीरा मानसा इति द्विभेदा आध्यात्मिकाः दैविका भौतिकाश्चेति त्रिविधाः ॥ ३० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वधं श्रुत्वेति यादवत्वेन श्रीभगवांस्तं न हन्यादिति पूर्व्वं हृदि कृतवन्तौ स्तः, अधुना च श्रुत्वा मरणभयेन विशेषतत्रस्तौ सत्राजिद्वधे शतधन्वनः प्रेरणात् प्रागेव त्रस्तौ, इदानीं तद्वधश्रवणेनाधिकभीताविति वि-शब्दार्थः ॥ २९ ॥ अरिष्टा भूकम्पादयः, पुंस्त्वमार्षम्, अरिष्टानीति पाठः सिद्ध एव; वै च तापाश्च; यद्वा, अरिष्टा अशुभानि, तान्येवाह—शारीरा मानसा इत्याद्याध्यात्मिका उक्ताः । एवं त्रिविधाः, वै अपि, द्वारकौकसामपि ॥ ३० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

व्यूषतुः प्रोषितौ प्रयोजकौ वधकर्त्तुः प्रेरकौ ॥ २९ ॥ प्रागुदाहृतं स्यमन्तकमाहात्म्यम् ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अक्रूर इति प्रयोजकौ मणिहरणार्थं शतधन्वनः प्रवर्त्तकौ हेतुगर्भमिदं तत्त्वात् भयेन वित्रस्तौ कृतवेपथू द्वारकायां सकाशात् व्यूषतुः प्रोषितवन्तौ तत्राक्रूरः कृष्णानुमत एव गतः कृतवर्मा तु भक्तपक्षपातप्राकट्यभयादेवोपेक्षित इति गम्यते कथमन्यथा सर्वज्ञेश्वरवञ्चनं तयोः सम्भवति ॥ २९ ॥ तदेवं वाराणस्यां दानपतिसमाख्यया मणिहस्ते क्रूरे रुक्मवेदिकैर्महाध्वरैर्यजमाने निवसति सति कृष्णेनैव प्रस्थापितोऽक्रूर इति कर्णे कर्णे जपति सति जने सत्यभामादीनामप्यविश्वासे जनसङ्ग्रहायाक्रूरमाह्वय साक्षेपं कृष्णः प्रार्थितवानिति इदञ्च भगवन्मतं सङ्गोप्य केचन ऋषयोऽक्रूरानयने कारणान्तरमनुवर्णयन्ति तद्दूषयितुमनुवदति मुनिः अक्रूरे प्रोषित इति प्रोषिते देशान्तरं गते सति द्वारकास्थानां जनानां शारीरा मानसा इत्याध्यात्मिकतापकीर्त्तनम् । तत्र शारीरा व्याधयः मानसा आधयः दैविका इत्याधिदैविकतापोक्तिः भौतिका इति त्वाधिभौतिकस्य ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतापदरत्नावली

व्यूषतुः प्रयोजकौ शतधन्वनः प्रेरकौ ॥ २९-३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

व्यूषतुः द्वारकायाः सकाशात् क्वाऽपि पलायितौ यतः प्रयोजकौ सत्राजिद्वधे शतधन्वनः प्रवर्त्तकौ ॥ २९ ॥ तदेवं व्रजदेव्यपराधफलमिदमक्रूरस्य यद्बहुवर्षपर्यन्तं कृष्णविच्छेददुःखानुभवः तद्विपक्षजनसङ्घट्टैः काशीपुरं वासश्च "उवास तस्यां कतिचिन्मिथिलायां समाविभुः" इत्युक्तेर्यावन्त्येव वर्षाणि मिथिलायां बलदेवोऽसत्तावन्त्येवाक्रूरोऽपि वाराणस्यां तस्यां च तस्य रुक्मवेदिकनानायज्ञान् ब्राह्मणेभ्यो बहुदानख्यातिं च श्रुत्वा कृष्णेनैव प्रस्थापितोऽक्रूर इति कर्णे कर्णे जपति जने सत्यभामारामादीनामप्यविश्वासे सति पुनरप्युद्भूतं स्वस्मिन् कलङ्कं मार्ष्टुं द्वारकास्थलोकद्वारैवाक्रूरानयनकारणानि भगवतैव

सृष्टानि नानाऽरिष्टानीति तत्त्वम् तद्बुद्ध्वा द्वारकायामरिष्टदर्शनं कालवशादेवोद्भूतमिति वदतां मुनीनां मतमनूद्य **दूषयति— अक्रूरे** इति द्वाभ्याम् । एके वैशम्पायनादयः प्राक् स्वयमुक्तमपि विस्मृत्याऽननुसन्धायेत्यर्थः । मुनेरेकस्यापि निवासे सति तत्प्रभावात् ग्रामेऽरिष्टदर्शनं न भवेत् मुनीनां सर्वेषामपि वासो यत्र तस्य श्रीकृष्णस्य निवासे सति किमरिष्टदर्शनमेकमपि घटेत ? **नैव घटेतेत्यर्थः** ॥ ३०–३१ ॥

गूढार्थदीपिनी

प्रयोजकौ मणिहरणे प्रवर्तकौ । व्यूषतुः ततः पलायितौ ॥ २९ ॥ **अक्रूर इति युग्मम्** । प्रोषिते परदेशं गते शरीराः तापा व्याधयः । मानसा आधयश्च क्रमेण । देविका अनावृष्ट्यादय । भौतिकाः सर्पादिजन्याः आसन् ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रयोजकौ प्रवर्त्तकौ शतधन्वन इति शेषः । द्वारकायाः सकाशात् व्यूषतुः ॥ २९ ॥ **एवं मणिहरणशत्राजितवधरूपदोषयोगाच्छतधनुर्हृतः** बलाख्यस्वावतारद्वारा भूभारहरणे निमित्तभूतो दुर्योधनश्च प्रबलीकृतः तत्साहाय्यार्थं कृतवर्मा च प्रेषितः अक्रूरश्च परमभागवतोऽपि ताभ्यां मित्रतां नीतः उक्तप्रकारेण मणिं प्राप्य कृतापराधमात्मानं मत्वा भगवन्तं द्रष्टुमक्षमो भयात्काश्यां गत्वा कृष्णप्रीत्यर्थं यज्ञादिपरो जातस्तदा कृष्णप्रेषित समणिरक्रूरोऽन्यत्र वर्तते इति यत्र तत्र लोके प्रजल्पमाने भक्तवत्सलतया लोकापवादनिराकरणेच्छया वाऽक्रूरमाहूय मणिप्राकट्यं कृत्वा तस्मै दत्तवानिति मतमज्ञात्वा केचिदृषयः कारणान्तरमक्रूरानयने वर्णयन्ति बालभाषितवदुपहासास्पदं तद्वाक्यमनुवदति, अक्रूरे इति । प्रागुदाहृतं भगवन्माहात्म्यम् विस्मृत्य केचित् अक्रूरे प्रोषिते सति अरिष्टान्यासन्नित्युपदिशन्ति तन्मतं दूषयति, अहो मुनीनां वासो यस्मिन् तस्य श्रीकृष्णस्य निवासे सति अक्रूरापगममात्रेण अरिष्टदर्शनं किं घटेत ? नैव घटेतेत्यर्थः ॥ ३०–३१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शतधन्वतो माधवतो वधं श्रुत्वा प्रयोजको मणिः कस्मान्न गृह्यत इति मणिहरणाविति प्रयोजकौ । **भयाच्छतधन्वभूतात्स्वयं** वित्रस्तौ द्वारकाया व्यूषतुः प्रवासं चक्रतुः ॥ ३५ ॥ अक्रूरे **प्रेषिते सति** द्वारकौकसाम् । शारीराः शरीरसम्बन्धिन्यस्तापा ज्वराद्युद्भवा मनस्तापा दैविका अशन्युल्कापाता भौतिका भूभ्रान्त्यादय इत्यरिष्टान्यासन् वै प्रसिद्धौ । **न यादृच्छिकानि** तानीत्याह । मुहुरिति ॥ ३६ ॥ तत एवमनिष्टदर्शनानन्तरमुग्रसेनपुरोगमान्वृद्धान् । कृष्णः कस्माद्धेतोरिह द्वारकायां सुचिरेण कालेन महतां च आसन्नित्यपृच्छत् ॥ ३७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो बलभद्रवाक्यान्मण्यन्वेषणार्थं प्रवृत्तः, लोकतोऽपि अक्रूरकृतवर्मणोः कृत्यमेतदिति ज्ञात्वा, यदैव लोकानुरोधेन तयोर्निग्रहः प्राप्तः, तदैव भगवदिच्छया तयोर्बुद्धिः पलायनपरा जातेत्याह **अक्रूर इति** । शतधनोर्वधं श्रुत्वा स्वस्यापि तदन्तःपातित्वात् मणिमारणावेव प्रयोजकाविति भगवत्प्रयत्नात्पूर्वमेव **भगवच्छक्तेर्विभक्तत्वात्** भयवित्रस्तौ **व्यूषतुः** । मिषेण परदेशे निर्गतौ । तयोर्निर्गमनमात्रेणैव पलायनं सर्वजनीनं जातमिति तौ विशिनष्टि **द्वारकायाः प्रयोजकाविति** । एको लोकतः, अपरो वेदतश्चावेक्षकौ कोटिवारकधर्माध्यक्षौ ॥ २९ ॥ भगवानेवात्रार्थे निमित्तमिति साधनशक्तिः भगवतान्यत्र स्थापितेति प्रयोजकमणिबलभद्राणां दुष्टनिवारणयत्नसाधनसम्पादकानामाधिभौतिकादीनामन्यत्र गमने फलरूपस्यैव भगवतो विद्यमानत्वेऽपि सर्वेषां द्वारकावासिनां पीडा उत्पन्नेत्याह **अक्रूरे प्रोषिते** इति । अक्रूरमात्रस्य प्रयोजकत्वं लोकसिद्धम् । सर्वो हि लोकः आधिभौतिक एव व्यवस्थितः । तत्रापि विद्यमानेषु साधनेषु तापदर्शनाल्लौकिकं कृतवर्माणं परित्यज्य धर्माध्यक्षमक्रूरमेव प्रयोजकं सर्वोऽपि मन्यते । द्वारकौकसां निश्चयेन सर्वेषां **तापाः** पीडाः शारीरा मानसाः व्याध्याधिरूपाः मुहुरासन् । आध्यात्मिका एते गणिताः । आधिभौतिका आधिदैविकाश्च पुनस्तापा अभवन् । इयं लौकिकी भाषेति नात्र कोऽपि विरोधः शङ्कनीयः । सर्वमेवोत्तरार्धं न समाधिभाषेत्येके । **मुहुरिति** वारंवारम् । ज्ञानादिना प्रतीकारे कृतेऽपि पुनः पुनर्जायन्त इति । तेऽपि पुनः शरीरे मनस्येव च दुःखं जनयन्तीति तद्विशेषणत्वेनोक्ताः ॥ ३० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

अक्रूर इत्यत्र । **मणिमारणे एवेति** । मणिः सत्राजिन्मारणं च प्रयोजकम् । निग्रहे हेतुरित्यर्थः । **अक्रूरे प्रोषिते** इत्यत्र । **सर्वमेवेति** । उत्तरार्धे लोकधर्मपुरस्कारेण लीलाकरणात् सर्वमेव लौकिकी भाषेति तदाशयः । वस्तुतस्तु सर्वत्र लोक-

धर्मपुरस्कारो लोकवत् पुत्रभार्यादिसाहित्येन लीला । स्वरूपेण लौकिकत्वं तु क्वचिदेवेति तावत्येव लौकिकी भाषेत्याशयेनाहुः एके इति ।

श्रीसुबोधिनीसारः

शतधन्वनो वधं मृत्युं श्रुत्वाऽक्रूरः कृतवर्मा च द्वौ भयाद्वित्रस्तौ कंपितौ द्वारकायाः प्रयोजकौ गुप्तिकारिणौ मणिहरणे शतधनुषः प्रवर्त्तकौ वा द्वारकातो व्यूषतुर्निर्जग्मुः ॥ २९ ॥ अक्रूरे प्रोषिते परदेशं गते सति द्वारकावासिनां जनानाम् अरिष्टानि आसन् वै एव मुहुरसकृत् तद्यथा शारीरा दैहिका मानसाः चित्तजा दैविका भौतिकाश्च तापा दुःखानि ॥ ३० ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

अक्रूरः कृतवर्मा च द्वौ शतधनुर्वधं श्रुत्वा भयेन सन्त्रस्तौ द्वारकायाः सकाशात् व्यूषतुः देशान्तरं गतौ । भये हेतुमाह–प्रयोजकाविति । सत्राजितवधे मणिहरणार्थं शतधन्वनः प्रवर्तकावित्यर्थः ॥ २९ ॥ अत्र परमतमुपन्यस्यति—अक्रूर इति । वैशब्दोऽवधारणे । अक्रूरे प्रोषिते निमित्ते एव द्वारकावासिनामरिष्टान्यासन् । तान्यरिष्टानि स्पष्टयति—शारीरा इति । शारीरास्तापा व्याधयः, मानसाः आधयः, दैविकाः देवकर्तृकाः अनावृष्ट्यादयः, भौतिकाः सर्पमनुष्यादिजन्याः ॥ ३० ॥

अन्वितार्थप्रकाशिका

अक्रूर इति ॥ प्रयोजकौ सत्राजितवधेन मणिहरणार्थं शतधन्वनः प्रवर्तकौ अक्रूरः कृतवर्मा च द्वौ शतधनुर्वधं श्रुत्वा भयेन संत्रस्तौ द्वारकायाः सकाशात् व्यूषतुः देशान्तरं गतौ । तत्राक्रूरः कृष्णानुमतेनैव गतः । कृतवर्मा तु भक्तपक्षपातप्राकट्यभयादिवोपेक्षितः इति गम्यते । कथमन्यथा सर्वज्ञेश्वरवञ्चनं तयोः सम्भवतीति ॥ २९ ॥ तदेवं वाराणस्यां दानपतिसमाख्यया मणिहस्तेऽक्रूरे रुक्मवेदिकैर्महाध्वरैर्यजमाने निवसति पुनः श्रीकृष्णेनैव प्रस्थापितोऽक्रूर इति कर्णे कर्णे जपति जने सत्यभामारामादीनामप्यविश्वासे जनसंग्रहायाक्रूरं समाहूय साक्षेपं श्रीकृष्णः प्राह स्म । इदं च भगवन्मतं संगोप्य केचन ऋषयोऽन्यत्कारणमक्रूरानयने वदन्ति । तद्यथा श्रुतं दूषयितुमनुवदति—अक्रूर इति ॥ वैशब्दोऽवधारणे अक्रूरे प्रोषिते निमित्ते एव द्वारकौकसां द्वारकावासिनामरिष्टानि दुर्निमित्तानि तथा तत्सूचिता शारीरास्तापा व्याधयः मानसाः आधयः दैविका देवकर्तृका अनावृष्ट्यादयः भौतिकाः सर्पमनुष्यादिजन्याश्च तापाः मुहुः आसन् ॥ ३० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रयोजकौ शतधन्वनः प्रेरकौ । द्वारकायाः सकाशात् व्युषतुः अन्यत्र वासं चक्रतुः ॥ २९ ॥ अक्रूरे प्रोषिते देशांतरंगते सति अरिष्टानि कष्टानि ॥ ३० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अक्रूर इति । ततः, प्रयोजकौ मणिहरणार्थं शतधन्वनः प्रवर्त्तकौ, हेतुगर्भमिदम् । तत्त्वात्, अक्रूरः, कृतवर्मा च, शतधनोर्वधं शतधन्वनो भगवत्कृतं वधं श्रुत्वा, भयसंत्रस्तौ मारणत्रासयुक्तौ सन्त, द्वारकायाः सकाशात्, व्यूषतुः प्रोषितवन्तौ ॥२९॥ अत्र केचित्तत्राक्रूरः श्रीकृष्णानुमतत एव गतः, कृतवर्मा तु भक्तपक्षपातप्राकट्यभयादेवोपेक्षित इति मन्यन्ते । कथमन्यथा सर्वथेश्वरवञ्चनं तयोः संभवतीत्याहुस्तद्विष्णुपुराणेन सहासंगतत्वादनादरणीयमेव । तदेवं वाराणस्यां दानपतिसमाख्यया मणिहस्तेऽक्रूरे रुक्मवेदिकैर्महाध्वरैर्यजमाने निवसति सति, श्रीकृष्णेन प्रस्थापितोऽक्रूर इति कर्णे कर्णे जने जपति सति, सत्यभामादीनामप्यविश्वासे जनसंग्रहायाक्रूरमाहूय साक्षेपं श्रीकृष्णः प्रार्थितवानिदं परमार्थं भगवन्मतं संगोप्य, ये च ऋषयोऽक्रूरानयने कारणान्तरमनुवर्णयन्ति तद्दूषयितुमनुवदति मुनिः । अक्रूर इति । अक्रूरे, प्रोषिते सति देशान्तरं गते सति, द्वारकौकसां द्वारकावासिनां जनानां, अरिष्टानि अरिष्टकर्त्तारः, शारीराः मानसाश्च, तापाः, दैविकभौतिकाश्च तापाः, मुहुः आसन् वै । तत्र शारीरा मानसा इत्याध्यात्मिकतापानुकीर्त्तनम् । तत्र शारीरा व्याधयः, मानसा आधयः । दैविका इत्याधिदैविकतापोक्तिः । भौतिका इत्याधिभौतिकतापोक्तिः ॥ ३० ॥

कृष्णप्रिया

अक्रूर एवं कृतवर्मा ने शतधन्वा को सत्राजित के वध के लिये उत्तेजित किया था इसलिये वे डरते थे । जब उन्होंने जाना कि भगवान ने शतधन्वा के प्राण ले लिये है तब अत्यन्त भयभीत हो गये और प्राण रक्षा के लिये द्वारिका से निकल पड़े ॥ २९ ॥ राजन् ! श्री अक्रूर जी के द्वारिका से चले जाने से द्वारिका में शारीरिक व्याधि मानसिक उपाधि चिन्ता एवं ग्रहपीड़ा आदि अनिष्ट एवं अरिष्ट हो रहे हैं ऐसा कुछ द्वारिका के प्रजाजन मानते थे लेकिन लोक मानस के लिये क्या कहना ॥३०॥

इत्यङ्गोपदिशन्त्येके विस्मृत्य प्रागुपाहृतम । मुनिवासनिवासे किं घटेतारिष्टदर्शनम् ॥ ३१ ॥
देवेऽवर्षति काशीशःश्वफल्कायागताय[1] वै । स्वसुतां गान्दिनीं प्रादात् ततोऽवर्षत्[2] स्म काशिषु॥ ३२ ॥
तत्सुतस्तत्प्रभावोऽसावक्रूरो यत्र [3]यत्र ह । देवोऽभिवर्षते तत्र नोपतापा न मारिकाः ॥ ३३ ॥
इति वृद्धवचः श्रुत्वा नैतावदिह कारणम् । इति [4]मत्वा समानाय्य[5] प्राहाक्रूरं जनार्दनः ॥ ३४ ॥
[6]पूजयित्वाभिभाष्यैनं कथयित्वाप्रियाः कथाः । विज्ञाताखिलचित्तज्ञः[7] स्मयमान उवाच ह ॥ ३५ ॥
ननु दानपते न्यस्तस्त्वय्यास्ते[8] शतधन्वना । स्यमन्तको मणिः श्रीमान् विदितः पूर्वमेव नः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—अङ्ग ! प्राग् , उदाहृतम्, विस्मृत्य, एके, इति, उपदिशन्ति, मुनिवासनिवासे, किम्, अरिष्टदर्शनम्, घटेत ? ॥ ३१ ॥ देवे, अवर्षति, काशीशः, आगताय, श्वफल्काय, गान्दिनीम्, स्वसुताम्, अदात्, ततः, काशिषु, अवर्षत्, स्म ॥ ३२ ॥ तत्, सुतः, असौ, अक्रूरः, तत्प्रभावः, ह. यत्र यत्र, तत्र, देव, अभिवर्षते, तत्र, उपतापाः, न मारिकाः, न ॥ ३३ ॥ इति, वृद्धवचः, श्रुत्वा, इह, एतावद्, न, कारणम्, इति, मत्वा, अक्रूरम्, समाम्नाय्य, जनार्दनः, प्राह ॥ ३४ ॥ एनम्, पूजयित्वा, अभिभाष्य, प्रियाः, कथाः, कथयित्वा, विज्ञाताखिलचित्तज्ञ स्मयमानः, कृष्णः, (एनम्, अक्रूरम्) ह उवाच ॥ ३५ ॥ हे दानपते ! शतधन्वना, श्रीमान्, स्यमन्तकः, मणिः, ननु, त्वयि, न्यस्तः आस्ते, नः, पूर्वम्, एव, विदितः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दूषयति—इतीति । अंग हे राजन् । श्रीकृष्णमाहात्म्यं विस्मृत्येति तदेवाऽऽह—मुनिवासनिवास इति । मुनीनां वासो यस्मिन्स श्रीकृष्णस्तस्य निवासे सत्यक्रूरापगममात्रेणारिष्टदर्शनं किं घटेत ? तदिच्छां विना न घटेतेत्यर्थः ॥ ३१ ॥ पुनस्तन्मतमेवानुवर्णयति—देव इति । काशिषु देशेषु देवेमघवत्यवर्षति सति ॥ ३२–३३ ॥ इत्येवंभूतमक्रूरमहिमप्रतिपादनपरं वृद्धानां वाक्यं श्रुत्वा सत्यमेवं तथाऽप्येतावदेव कारणं न भवति किंतु मणेरप्यपगम इति मत्वेत्येतद्वृत्तं परमतम् ॥ ३४ ॥ विज्ञातमखिलं येन स चासावत एव चित्तज्ञश्च । अयं भावः महाभागवतस्यास्य मया दत्तेऽपि मणावपेक्षा नास्त्येव यस्मादाहूतो मणिना सहैवागत इति ज्ञात्वेति ॥ ३५–३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेव दूषणमेव । इत्यर्थ इति–न हि सूर्ये तपति तमोनिरासाय दीपः प्रज्वाल्यत इति न्यायेन भगवदिच्छैव प्रबला, यतः सत्यपि तस्मिन्कारणांतरकल्पनेति भावः । एके वैशंपायनादयः । प्राक्स्वयमुक्तमपि विस्मृत्याननुसंधायेत्यर्थः । मुनेरेकस्यापि निवासे सति तत्प्रभावाद्ग्रामेऽरिष्टदर्शनं न भवेत्, मुनीनां सर्वेषामपि वासो यत्र तस्य श्रीकृष्णस्य निवासे सति किमदर्शनमेकमपि घटेत, नैवेत्यर्थः ॥३१॥ तन्मतं मुन्यंतरमतम् । श्वफल्कायाक्रूरपित्रे । ततो गांदिनीदानेन श्वफल्कपूजया । काशिषु काशिदेशेषु । देव इत्यादित्रिकम्, तृतीयपद्यगेनेति शब्देनान्वयात् । तत्कन्यार्थमेव काश्यामागताय । तां नित्यगोदानेन चिरकालजन्मना प्रसिद्धम् । अतः स्वीयामसाधारणीं सुताम् । प्रकर्षेण बहुलोपस्कारादिनाऽदात् । अतो मातामहसंबंधेनैवाक्रूरस्तत्र गत इति ज्ञेयम् ॥ ३२ ॥ तत्सुतः श्वफल्कसुतः । तस्य श्वफल्कस्येव प्रभावो यस्य स तत्प्रभावः । उपतापः क्लेशः ॥ ३३ ॥ इति मत्वा तैस्सह विशेषतो विचार्येत्यर्थः । यद्वा—व्याजाय स्वयमुत्थापितारिष्टत्वाद्वृद्धोपदेशग्रहणमिदं न परमतम् 'इत्यंगोपदिशंत्येके' इत्यत्रैव तत्समाप्तिः स्पष्टा । ततश्च नैतावदिति–किन्तु तद्व्याजाय ममैवेच्छा कारणमिति स्वमनसि विचार्येत्यर्थः । सम्यक्परमादरेणानाय्य स्वयमुदासीनो भवन्सर्वयादवसमाह्वानद्वारैवागमय्येति णिजर्थः ॥ ३४ ॥ अत एव विज्ञाताखिलत्वादेव । अत्राकूतमाह—अयं भाव इत्यादिना । पूर्वोक्तमेव विशिनष्टि–पूजयित्वेति । अभिभाष्य कुशलप्रश्नादिना संभाष्य । प्रियाः भक्तिभक्तादिमाहात्म्यपराः, तस्य श्रीवसुदेवाद्यानुकूल्यार्थकं सनिकटसशंकस्थितितद्वधांतः प्रयत्नतदाज्ञाव्याजव्रजगमनस्वदर्शनानन्यतद्वधार्थस्वनयनादिरूपा, तथापि सांप्रतं दैवविघटनानुशोचनरूपाश्च । ह हर्षे । स्मयमान इति मणिज्ञानबोधनार्थनिगूढभावात् ॥ ३५ ॥ ननु निश्चये । नोऽस्माकम् । अत्रार्थे त्वां किं पृच्छामि, जानाम्येवेत्याह—नन्विति । श्रीमान् सर्वसंपत्तियुक्तस्तत्प्रदत्वात् । यतो महादीप्तिमानतस्त्वया यत्नतश्चिरं निह्नोतुं न शक्य इति भावः । न चाधुनैव संभाव्यत एव, प्रागेव ज्ञातत्वादित्याह—विदित इति । शतधन्ववधात्पूर्वत एव त्वय्यस्तीति नोऽस्माकं सर्वेषामेव ज्ञातः ॥ ३६ ॥

---

१. गां–बिज. । २. त्स–वीर. । ३. तत्र सः–विज. । ४. इति दूतैस्तमानीय–वीर. ; इति दूतैः समानीय–विज. । ५. रामाक्रूरौ–विज. । ६. अक्रूरं मानयत् कृष्णः–विज । ७. तत्वज्ञः–बिज. । ८. त्वय्यसौ–विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एके वैशम्पायनादयः प्राक् स्वयमुक्तमपि विस्मृत्य पश्चादननुसन्धाय मुनीति मुनेः कस्यचिदेकस्यापि वासे न घटेत तत्रापि मुनीनां सर्वेषां वासस्याश्रयस्य भगवतो नितरां नित्यतया वासे इत्यर्थः। अरिष्टस्यैकस्य दर्शनमपि किं पुनर्बहूनां विविधानां प्राप्तिरित्यर्थः। अन्यत्तैः तत्र तदिच्छामित्यनेन किन्त्वक्रूरानयनव्याजाय स्वयमेवोत्थापितान्यरिष्टानीति ज्ञापितम् ॥ ३१ ॥ देव इत्यादित्रिकम्। तृतीयश्लोकादिस्थेनेति शब्देनान्वयात् तत्कन्यार्थमेव काश्यामागताय तां नित्यगोदानेन चिरकालजन्मना प्रसिद्धाम् अत एव स्वसुतां स्वीयाम् असाधारणीं सुतां प्रकर्षेण बहुलोपस्करदानादिनाऽदात् अतो मातामहसम्बन्धादेवाक्रूरस्तत्र गत इति ज्ञेयम्। इति मत्वा तैः समं विशेषतो विचार्य्येत्यर्थः। यद्वा, व्याजाय स्वयमुत्थापितारिष्टत्वाद्वृद्धोपदेशग्रहणमिदं न परमतम् इत्यङ्गोपदिशन्त्येक इत्यत्रैव तत्समाप्तिः स्पष्टा ततश्च नैतावदिति किं तु तद्व्याजाय ममेच्छैव कारणमिति स्वमनसि विभाव्येत्यर्थः। सम्यक् परमादरेण आनाय्य स्वयमुदासीनो भवन् सर्वयादवसमाह्वानद्वारैवागमय्येति णिच्प्रत्ययार्थः ॥ ३२–३४ ॥ पूर्वोक्तमेव विशिनष्टि—पूजयित्वेति। अभिभाष्य कुशलप्रश्नादिना सम्भाष्य प्रिया भक्तिभक्तादिमाहात्म्यपरा एतस्य श्रीवसुदेवाद्यानुकूल्यार्थकंसनिकटं सशङ्कस्थिततद्वधार्थान्तःप्रयत्नतदाज्ञाव्याजव्रजगमनस्वदर्शनानन्दतद्वधार्थस्वाऽऽनयनादिरूपास्तथाऽपि साम्प्रतं दैवविघटनानुशोचनरूपाश्च ह हर्षे स्मयमान इति स्वस्य मणिज्ञानबोधनार्थनिगूढभावात् ॥ ३५ ॥ श्रीमान् सर्वसम्पत्तियुक्तः तत्प्रदत्वात्। यद्वा, महादीप्तिमान् अतस्त्वया यत्नतश्चिरं निह्नोतुं न शक्यत इति भावः न चाधुनैव सम्भाव्यत एव प्रागेव ज्ञातत्वादित्याह—विदित इति। शतधन्ववधा (नन्तरं) त्प्रागपि त्वय्यस्तीति नोऽस्माकं सर्वेषामेव ज्ञातः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एके श्रीवैशम्पायनादयः, प्राक् स्वयमुक्तमपि विस्मृत्य पश्चादनुसन्धाय; मुनीति मुनेः कस्यचिदेकस्य वासेनापि न घटेत, तत्रापि मुनीनां सर्व्वेषां वासस्थानस्य भगवतो नितरां वास इत्यर्थः। अरिष्टस्यैकस्य दर्शनमपि, किं पुनर्विविधानां बहूनां तेषां प्राप्तिरित्यर्थः ॥ ३१ ॥ तत्कन्यार्थमेव काश्यामागताय तां नित्यगोदानेन चिरकालजन्मना प्रसिद्धाम्, अतएव स्वकीयामसाधारणां सुतां प्रकर्षेण बहुलोपस्करदानादिनादात्, अतो मातामहसम्बन्धादेवाक्रूरस्तत्र गत इति ज्ञेयम् ॥ ३२ ॥ तस्यैव प्रभावो यस्य सः, असौ सर्व्वलोकहिताचरणत्वादिना प्रसिद्धः, ह एव, यत्र यत्रैवास्ते, तत्र तत्र देशे अभितो वर्षति, इन्द्र इति शेषः। देव इति पाठः स्पष्टः ॥ ३३ ॥ दूतैरिति बहुत्वं पुनः पुनः किंवा विश्वासार्थमेकदैव बहूनां प्रेषणात्, परमाप्तत्वेन गौरवाद्वा, सम्यक् परमादरेण सभायामानाय्य, समाहूयेति पाठेऽपि स एवार्थः। जनैः स्वभक्तैरर्ह्यते द्रष्टुं सदा याच्यत इति तद्दर्शनेऽक्रूरस्यापि चिरमुत्कण्ठता जातास्तीति, किंवा स्वजनानां प्रार्थनादिति भावः। अक्रूरमिति अन्तःकापट्याभावात्, तच्चाग्रे व्यक्तं भावि, अतः प्रकर्षेणाह ॥ ३४ ॥ तदेवोक्तपोषन्यायेन प्रपञ्चयति—पूजयित्वेति। अभिभाष्य कुशलप्रश्नादिना सम्भाष्य, प्रिया भक्ति-भक्तादिमाहात्म्यपरा इत्यर्थः। ह हर्षे, तत्सर्व्वप्रीत्या मणिप्रदानार्थमाश्वासनाय, किंवा भक्तवरसमागमप्रहर्षात्, स्मयमान इति स्वस्य मणिज्ञानबोधनार्थं निगूढभावात्, वस्तुतस्तु स्वयमेव कृतेऽपि तत्तदर्थे स्वस्य तादृशोक्त्या स्वयमेवोद्यतो हासस्य सम्वरणेनापीषदुदयात् ॥ ३५ ॥ ननु स्नेहसम्बोधने निश्चये वा, हे दानपते इत्यादरात्; यद्वा महामहादानपङ्क्तया मणिस्त्वय्येवेति भावः। तच्चाग्रे व्यक्तीकरिष्यते, को नाम न्यस्त इत्यपेक्षायामादौ लज्जादिनानभिव्यज्यापि पश्चादाह—स्यमन्तकेति। मण्यन्तरं व्यावर्त्तितम्। पाठान्तरे—ननु स्यमन्तको नाम किं कश्चिज्जनः, नेत्याह—मणिरिति। श्रीमान् सर्व्वसम्पत्तियुक्त इति, तत्त्वतस्तस्मादेव तत्सिद्धया तदेकहेतुत्वेनाभेदोपचारः। यद्वा, महादीप्तिमान्, अतस्त्वया यत्नतश्चिरं निह्नोतुं न शक्य इति भावः। न चाधुनानुमानेन कल्प्यते प्रागेव ज्ञातत्वादित्याह—विदिति इति। शतधन्ववधात् प्रागपि त्वय्यस्तीति नोऽस्माकं सर्व्वेषामेव ज्ञातः, विदितमिति पाठो वा, एतच्चास्माभिर्ज्ञायत एवेत्यर्थः। इत्यादि—सर्व्वोक्तिः स्वस्याक्रूरविषयकपक्षपाताच्छादनचातुर्य्यात् ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

इतिशब्दो वक्ष्यमाणप्रकानिरासः निकटे अक्रूरनिवाससमीपेऽपि ॥ ३१–३४ ॥ अखिलचित्तज्ञा सर्वाभिप्रायज्ञाः पुरुषा येन विज्ञाता स विज्ञाताऽखिलचित्तज्ञः बुद्धिमतां पुरुषाणां मार्गं जानाति इत्यर्थः ॥ ३५–३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीति अस्यातोऽक्रूरमानयामासेत्यादिः एवमन्ये ऋषय उपदिशन्तीत्यनुवादः अथ तद्दूषयति—अङ्गेति। अङ्ग हे राजन्! प्रागुदाहृतं श्रीकृष्णमाहात्म्यं यत्र यत्र भगवानवसन्न तत्र तापत्रयसम्भावनेत्येवम्बिधं विस्मृत्येत्थमुपदिशन्तीत्यर्थः। तदेवाह, मुनिवासनिवास इति। मुनीनां स्वनिवासदेशेषु तापत्रयनिवर्त्तकानां वासस्याश्रयभूतस्य श्रीकृष्णस्य निवासे सत्यनिष्ट-

दर्शनं दुःखोत्प्रेक्षणं दुःखसम्भावनाऽपीति यावत् किं घटेत ? न घटत एवेत्यर्थः ॥ ३१ ॥ अथान्यदपि ऋषिमतं दूषयितुमनुवदति—देव इत्यादिना श्रुत्वेत्यन्तेन । श्रुत्वेत्यनन्तरमतोऽक्रूरमानयामासेति शेषः । वृद्धवचः प्रदर्शनमेव देव इत्यादिना इतीत्यन्तेन, पुरा किल काशिषु काशीदेशेषु देवे पर्जन्येऽवर्षति सति तद्देशाधिपतिस्तत्राऽऽगताय श्वफल्काय स्वसुतां गान्दिनीं ददौ ततः स पर्जन्यः तद्देशेष्ववर्षत् ॥ ३२ ॥ तत्सुतः श्वफल्कस्य सुतः तत्प्रभावः पितृतुल्यप्रभावोऽक्रूरो यत्र यत्र वसति तत्र तत्र देवोऽभिवर्षते न तत्रोपतापा मारिका अपमृत्युहेतवश्च सन्ति ॥३३॥ इत्येवंविधं वृद्धानां वचः आकर्ण्याक्रूरमानयामासेति तद्दूषयति—नैतावदिति । सत्यमेवं तथाऽपि एतावदेवाक्रूरावस्थानमात्रमेव तत्र वृष्टावुपतापाद्यभावे च न कारणं किं तु मण्यवस्थानं चेति इति दूतैरिति इत्येवं सति अक्रूरे देशान्तरस्थे सतीत्यर्थः । दूतैरक्रूरं सम्यगानीय प्राह स्वाभिमतमानयनकारणं तु वक्ष्यमाणेन "किं तु मामग्रजः सम्यक् न प्रत्येति मणिं प्रति" इति भगवद्वचनेनैव स्फुटीभविष्यतीति अत्र नोक्तम् । यद्वाऽद्भुतचेष्टितो भगवान् अक्रूरानयनार्थं व्याजेन स्वनिवासभूतायामपि द्वारकायां, तापत्रयमुत्पाद्य अङ्ग हे आर्य्य ! हे सत्यभामे ! अहोऽक्रूरे प्रोषिते खति अत्र तापा उपस्थिताः तथा ह्यन्ये जनाः प्राङ्मयोदाहृतं मणिप्रभावमविस्मृत्यैवमुपदिशन्ति मुनिर्मननशीलोऽक्रूरस्तस्य मणियुक्तस्य निवासस्तन्निवासे तत्समीपनिवासदेशेऽपि मणियुक्ताक्रूरनिवाससमीपदेशेऽप्यरिष्टदर्शनं न घटत एवेत्युक्त्वा तथैव देव इत्यादिरूपं वृद्धवचनं श्रुत्वा अक्रूराऽवस्थानमेव न कारणं किं तु मणेरपीत्येवं रामादिविश्वासार्थं वृद्धवचश्च विमृश्य दूतैरक्रूरमानयामासेत्याह—अक्रूर इत्यादिभिः पञ्चभिः । अस्मिन् पक्षे अविस्मृत्येति छेदः । अरिष्टदर्शनमित्यस्यानन्तरमित्युक्त्वेति शेषः । देवोऽभिवर्षते तत्रेत्यस्य काशीदेशेष्वित्यर्थः ॥ ३४ ॥ कथमित्यत आह—पूजयित्वेति । एनमक्रूरमभिभाष्य सम्बोध्य विज्ञाताखिलचित्तज्ञः सर्वाभिप्रायज्ञा ये पुरुषाः ते येन विज्ञाताः स तथा बुद्धिमत् पुरुषान्तर्गतवेदी महाभागवतस्यास्य मया दत्तोऽपि मणावपेक्षा नास्त्येव तस्मादाहृतो मणिना सहैवागत इति जानन्नित्यर्थः ॥ ३५ ॥ उक्तिमेवाह—नन्विति चतुर्भिः । हे दानपते ! अक्रूरस्यैवेदं नामान्तरं स्यमन्तकमणिः शतधन्वना त्वयि निहितः अधुना आस्ते च नोऽस्माकं पूर्वमेव शतधन्वनो वधात्प्रागेव विदितः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

इतिशब्दः प्रकारवचनः अङ्गेति सम्बोधनम् एके केचित् पूर्वपुरुषैरुक्तं पुराणवचनमुपदिशन्ति प्रवदन्ति कथमिति तत्राह, गदा भृत इति । श्रीकृष्णस्य निवासनिकटे अरिष्टदर्शनमशुभदर्शनं घटेत ? किञ्च न घटेत ॥ ३१ ॥ स्वराष्ट्रे देवे पर्जन्येऽवर्षति काशीशः काशिराजः स्वराष्ट्रे प्रत्यागताय श्वफल्काय अक्रूरपित्रे गां स्वविषयभूमिं नाम्ना गान्दिनीं स्वसुतां च प्रादात्॥३२॥ किमनेनेति तत्राह—तत्सुत इति । तत्प्रभावः श्वफल्कप्रभावः अतोऽक्रूरो यत्र देशे तत्र देवोऽभिवर्षति तस्मिन्देशे उपतापादयो न भवन्ति ॥ ३३ ॥ अवर्षणादिसम्भवेऽन्यच्च निमित्तमस्तीति भावेनोच्यते नैतावदिति इह अवर्षणादावेतावदक्रूरप्रवासनमेव कारणं न भवति किन्तु स्यमन्तकगमनञ्च कारणमिति च वृद्धवचः श्रुत्वाऽक्रूरं च रामं च समानीयाऽऽनयित्वा ॥ ३४-३६ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

अक्रूरे प्रोषिते इत्यादि । अक्रूरे प्रोषिते यच्छारीरादयस्तापा आसन्निति केचिदनभियुक्ता उपदिशन्ति, तत् प्रागुदाहृतं पूर्वोक्तं श्रीकृष्ण-महिमानं विस्मृत्य अतएव तेऽनभियुक्ताः । तत्रोपपत्तिमाह—मुनिवासनिवास इत्यादि । मुनीनां वास आश्रयो यः श्रीकृष्णस्तस्य वासे किमरिष्टदर्शनं घटेत, नैवेत्यर्थः । मुनयः परमभागवता यत्र तिष्ठन्ति, तत्रैतन्न घटते । तेषां निवासस्य निवासे पुनः कथमिति भावः ॥ ३०-३५ ॥ स्यमन्तक इत्यादि । विदितः पूर्वमेव, न इति नोऽस्माभिः सर्वज्ञशिरोमणिभिरेव, न तु केनापि कथित इति भावः ॥ ३६-३७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अक्रूरे प्रोषिते यदवशिष्टमभूत्, तत् केचिदेवं वदन्तीत्युक्तम् वस्तुतस्तु न तत्, तत्राह—मुनिवास-निवास इत्यादि ॥ ३१-३५ ॥ 'विदितः पूर्वमेव नः' इति न केनापि कथितमिति न मम ज्ञाने सामर्थ्याद्भवानेव जानाति, पूर्वशब्दश्रुत्या पूर्वदर्शितं निजवैभवं स्मारयति ॥ ३६-३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देवे इन्द्रे अवर्षति सति काशीषु तत्सुतोऽक्रूर इत्यतो मातामहसम्बन्धादेवाक्रूरः काशीं जगामेति ज्ञेयम् । इति अक्रूरागमने वृद्धानां वचनं श्रुत्वा इह एतावदेव न कारणम् किं तु ममेच्छैवेत्यन्तर्मत्वा काशीतः अक्रूरं समानाय्य ॥ ३२-३४ ॥ विज्ञाताविशः विज्ञत्वादेवाऽखिलचितज्ञः नतु केवलमन्तर्यामित्वादेवेति भावः । अन्तर्यामी हि अखिलचितानां ज्ञाता कृष्णस्त्वखिलान्तर्यामिणामपि ज्ञाता भवति तस्याक्रूरचित्तज्ञानं किं चित्रमिति भावः । अतः स्मयमान इति न त्वं सत्राजिति कृतवैरः नापि

मणेश्चौरः नापि धनलुब्धस्त्वं तु मत्परमभक्त एवेति त्वन्मनः किमहं न जानामि त्वदन्तर्यामिणमप्यहं जानामि कथं मत्तस्त्वं **विभेषीति भावः** ॥ ३५ ॥ अत्रार्थे त्वां किं पृच्छामि जानाम्येवेत्याह—नन्विति ॥ ३६ ॥

गूढार्थदीपिनी

अङ्ग हे राजन्। एके वैशम्पायनादयः। प्रागुक्तं श्रीकृष्णमाहात्म्यम्। मुनीनां वासो यस्मिन् स श्रीकृष्णः तस्य निवासे ॥ ३१ ॥ अन्यदपि मुनिमतं दूषयितुमनुवदति—देव इति। श्वफल्काय अक्रूरपित्रे। ततो दानात् अनवर्षत् स्मेत्याश्चर्ये ॥ ३२–३३ ॥ एतावत् मणिसहिताक्रूरप्रवासनमेव न किन्तु ममेच्छैव ॥ ३४ ॥ अभिभाष्य संबोध्य ह हर्षेण विज्ञाता विज्ञः ॥ ३५ ॥ ननु निश्चये। नोऽस्माकम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अक्रूरस्य तादृशप्रभावे हेतुं दर्शयितुं तन्मतमेवानुवदति, देव इति द्वाभ्याम् ॥ ३२–३३ ॥ इतीति जनार्दनः यथा एके उपदिशन्ति इतीत्थं तदानीन्तनानां केषाञ्चिद्वृद्धानामपि वचो वाक्यं श्रुत्वा इह अरिष्टागमे एतावत् अक्रूरापगममात्रं कारणं न भवति किं तु ममेच्छेति मत्वा काशीतः समानीय अक्रूरं प्राह ॥ ३४ ॥ प्राहाऽक्रूरमित्येतत्प्रपञ्चयति, पूजयित्वेति ॥ ३५–३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कृष्णपृष्टानां मध्ये केचन विपश्चितः। पुराणवचनमेवमुपदिशन्तीत्याहुः। इतीति। अङ्ग कृष्ण। एके विस्मिताः। कथमिति तत्राह। गदाभुतस्तव निवासनिकटे निवाससमीपे किंवाऽरिष्टं घटेत न किमपीत्युपदिशन्ति। एक अङ्ग हे परीक्षित्। गदाभृतो निवासनिकटेऽरिष्टदर्शनं घटेत वा **किन्न** घटेतेति विस्मिता उपदिशन्तीति योजना वा ॥ ३८ ॥ तथाऽपि श्रुतं किञ्चित्पुरावृत्तं वक्ष्याम इति वदन्ति ॥ देव इति। इन्द्रेऽवर्षति सति काशीशः काशीराजो गां यादृच्छया स्वभूमिमागताय श्वफल्कायाक्रूरपित्रे स्वसुतां गान्दिनीनाम्नीं प्रादात्। ततः कन्याप्रदानानन्तरं काशीषु देशेष्ववर्षत् स्म स्मृतिसिद्धमिदम् ॥ ३९ ॥ ननु महिष्याः सर्पिर्विपुलं चेन्महिषस्य किमायातमिति न हि पितुः पाण्डित्येनेति नीत्या तत्तनयस्य किमायातमित्यत आहुः। तत्सुत इति। तस्य श्वफल्कस्य सुतोऽक्रूरस्तत्प्रभावस्तस्य प्रभाव इव प्रभावो यस्य सः। यत्राक्रूरस्तत्र स देवोऽभिवर्षते। तत्र नोपतापो न मारिका डाकिन्याद्या न भवन्ति ॥ ४० ॥ इति वृद्धानां वचः श्रुत्वा नैतावदेवारिष्टावाप्तौ कारणं किन्तु मणिगमनं तथा मय्यवञ्चके वञ्चकतामतिमग्रजस्येत्यादिकं चेति। दूतै रामाक्रूरौ समानीयाकारयित्वा पूर्वमक्रूराकारणं चेत्पुनः कृष्णो रहस्येवं बोधयामासेति बलः सन्दिह्येतेति रामाक्रूरावित्युक्त्वा प्राग्राम आजगाम ग्राममनन्तरमक्रूर इति चागतितरतमता ध्वन्यते ॥४१॥ कृष्णोऽक्रूरं मानयन् प्रियाः कथाः कथयित्वा विज्ञाताखिलतत्त्वज्ञोऽखिलं तत्त्वं सुधन्वरहस्यं जानातीति सोऽखिलतत्त्वज्ञोऽक्रूरो विज्ञातो येन सः। अखिलास्त्रयश्च ते तत्त्वज्ञाः कृतवर्माक्रूरशतधन्वानस्ते विज्ञाता येन स इति वा। अत एव स्मयमान उवाच ॥ ४२ ॥ हे दानपते। त्वयि शतधन्वनाऽसौ श्यमन्तको मणिः श्रीमान्न्यस्त इति पूर्वमेव नो विदितो ननु निश्चयः ॥ ४३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

पूर्ववत्पुनर्लोके विपरीततया कीर्तिर्जातेत्याह **इत्यङ्गेति**। यो हि मणिं गृहीत्वा पलायते, तं स्तौति लोकः। यो न गृह्णाति निर्लेपः, तं निन्दतीति लोकः। अतो निन्दां पूर्वाध्याये निरूप्य, स्तुतिमत्र निरूपयति। **इति** एवं जाते। अङ्ग हे राजन्। **एके** अभिज्ञाभिमानिनः परमार्थदर्शिनोऽपि **प्रागुदाहृतं** भगवतो वीर्यविभागं मणिसामर्थ्यं वा **विस्मृत्य** स्वयं **भ्रान्ताः सन्तः** एकदेशे पर्यवसितमतयः अन्यानुपदिशन्ति। उभयत्रापि भगवदिच्छा प्रयोजिका, विस्मरणे उपदेशेऽपि। तेषामुपदेशमाह **मुनिवासेति सार्धाभ्याम्**। मुनिरयमक्रूरः, तस्य वासरूपे निवासे स्थितौ, कृत्वा चिदभिमानेन मुनिस्तिष्ठतीत्यर्थः। तत्र अरिष्टदर्शनं न घटेत। तस्य मुनित्वमुपपादयन्ति **देवेऽवर्षतीति**। पूर्वं काशिराजः अवर्षति देवे अनावृष्ट्या पीडितः श्वफल्काय प्रसङ्गादेवागताय स्वसुतां महादेवादिवाक्यात् गान्दिनीं प्रादात्। ततः **काशिषु** काशीप्रदेशेषु देवो वर्षति स्म। **स्मेति** प्रसिद्धे। अवर्षदिति। किमतो यद्येवम्, तत्राह **तत्सुत** इति। वर्षपर्यन्तं प्रत्यहं गोदाने क्रियमाणे अपुत्रस्य काशिराजस्य कन्या संजाता। ततो द्वादशवर्षपर्यन्तं पुनरेकैकां गां तस्या हस्ते दापितवान्। तादृशी गान्दिनी। तस्याः सुतः। श्वफल्कसुतो वा। तयोर्यावान् प्रभावः तावत्प्रभावयुक्तो भवितुमर्हति। **असाविति**। तथैव दृश्यते। आविर्भूतो वा। तत्राधिकभक्तौ भगवांस्तद्रूपेण भासत इति न काप्यनुपपत्तिः। यत्र यत्राक्रूरः अर्थात्तिष्ठतीति पूर्वोक्तन्यायेन तत्र देवोभिवर्षत इति पितृसामर्थ्यसम्बन्धः। **नोपपाता** इति मातृसामर्थ्यम्। भक्त्या उपलब्धत्वात् तस्याः साधारणोऽपि प्रभावः अतिरिक्तः, तमाह **न मारिका** इति। तामस्यः पूतनादिशक्तयो मारिकाः। सात्त्विके भगवद्भक्ते न सन्निहिता भवन्तीति युक्तमेव। **उपपाताः** पातकान्युत्पाता वा। गोदानस्य तथा प्रभावो निरूपित इति। हेत्याश्चर्ये। प्रभावोऽपि कथं कार्ये संजात इति, तत्राप्युभयोः, ततोऽपि विशिष्टश्चेति ॥ ३३ ॥ ननु

विद्यमाने भगवति अन्योत्कर्षवचनानि भ्रान्तानीति चेत्, तत्राह **इति वृद्धवचः श्रुत्वेति** । वृद्धा आदरणीयाः यथोपश्रुतिः पूर्वं पश्चाद्भगवता श्रुता, तथेदमपि श्रुत्वा तद्दोषनिराकरणार्थं प्रयत्नः कर्तव्यः । तत्र लोका अर्धं भ्रान्ता बलभद्रं मणिं च कारणत्वेन न जानन्तीति, भगवान् पुनः विमृश्यकारी तथैव कृतवानित्यङ्गीकारे दोषः स्यादिति, पूर्णमेव कारणं मत्वा समाधानं कृतवानिति वक्तुमाह **नैतावदिह कारणमिति** । इह आध्यात्मिकादितापेषु एतावदेव न कारणम्, किन्तु अन्यदप्यस्तीति तदनुक्त्वा इति निश्चित्य, सम्यक् चिन्तयित्वा दूतैः अक्रूरं समानाय्य, अमारणार्थमभयं दत्वा, **जनार्दनो** लोकानामविद्यादिसर्वदुःखनाशकः मणिं प्रकटयितुं तमाहेति सम्बन्धः । स ह्यक्रूरः काशिषु प्रयागे च मरणं निश्चित्य तीर्थमाश्रित्य स्थितः । यदि भगवान् शतधन्वानमिव मारयिष्यति, तदात्रैव प्रयागादौ मारयत्विति परलोकप्रेप्सुः । भगवांश्च क्लिष्टं न करोतीति, मणिमन्यथापि दास्यतीति, तथापि सत्यभामाप्रतिनिधित्वेन अक्रूरायैव मणिर्देय इति भगवान्निश्चित्य मौशलेनैव तं मारयितुं तथा कृतवान् । नह्यस्मत्स्वामी जीवैर्निश्चिते ज्ञाते वा प्राकृत इव तन्मन्तुं गृह्णाति । सात्यकिरिव प्रायोपविष्टं मारयति । तक्षक इव वा भक्षयति । मृत्युरिव वा हन्ति । तस्मादक्लिष्टकर्मा भगवान् समाहूयैव प्राह ॥ ३४ ॥ किञ्च । **पूजयित्वा** पितृव्यत्वेन । **अभिभाष्य** साधु समागतोऽसीति कुशलप्रश्नं कृत्वा । ततो यथा मनः परितुष्टं भाति, तथा प्रियाः कथाश्चोक्त्वा शरीरेन्द्रियान्तःकरणानां त्रिविधसत्कारेण सुखं दत्त्वा । याचिते प्रदर्शयिष्यतीति निश्चित्य । तत्र हेतुमाह **विज्ञाताखिलचित्तज्ञ** इति । एतज्ज्ञानमेवाक्रूरस्य प्रदर्शनाद्यङ्गीकारे हेतुरिति तन्निरूपितम् । भक्तो भूत्वा पूर्वं मार्गपांसुष्वपि विलुठन् इदानीं सङ्गवशादेवं जात इति **स्मयमानः** । हेत्याश्चर्ये । यस्माद्यो बिभेति, यो वा दण्ड्यः, स प्रसादपात्रमिव परिभाष्यत इति ॥ ३१ ॥ भगवद्वाक्यमाह **ननु दानपते** इति चतुर्भिः । **दानपतिर्**दानाध्यक्षः सर्वधर्मसूक्ष्मज्ञः । अनेन गोपनमनङ्गीकारोऽन्यथा वदनं च व्यावर्तितम् । **न्यस्तः** त्वयि स्थापितः। आस्तेऽद्यापि तव स्थाने । शतधन्वनैव, नतु तदीयैः । **स्यमन्तको** मणिः प्रसिद्धः । तस्य नाशादिकं न सम्भवतीत्याह **श्रीमा**निति । सर्वदा श्रीमत्त्वात् नापद्रूपं नाशादिकं प्राप्नोति । पूर्वोक्तार्थेषु प्रमाणमाह **विदित** इति । इदानीं वेदकं भ्रान्तं भविष्यतीति तन्निवारणार्थमाह । **पूर्वमेव नोऽ**स्माभिः **विदित** इति ॥ ३६ ॥

श्रीसुबोधिनी–सारः

हे अंग एके श्रुतभाषापराः प्राक् पूर्वम् उदाहृतमुक्तं श्रीकृष्णप्रभावं विस्मृत्य इत्युपदिशंति एवमाहुः तद्दूषयति मुनीनां वासस्य निवासे परमाश्रयभूते श्रीकृष्णे सति अरिष्टानां दर्शनं घटेत किं संभवेत् किम् अपि तु न संभवेत् तदिच्छया सर्वं जातमिति भावः ॥ ३१ ॥ किं च देवे मेघेऽवर्षति सति काश्या ईशो राजा आगताय श्वफल्काय स्वसुतामात्मपुत्रीं "दिनेदिने गोदानादुगांदिनी" इति प्रसिद्धं हरिवंशे तां प्रादात्ततोनंतरं काशिषु देशेषु अवर्षत् स्म प्रसिद्धम् ॥ ३२ ॥ तस्य सुतोसौ अक्रूरः तत्प्रभावः स एव प्रभावो यस्येति यत्रयत्र देशेस्ति तत्र देवो मेघो वर्षति उपतापा अध्यात्मादयो न मारिका अकालमरणहेतवो न ॥ ३३ ॥ इति वृद्धानां वचः श्रुत्वा एतावदियदेव कारणं न किं तु मणिलाभो रामप्रसन्नता जनप्रतीतिरिति मत्वा विचार्याक्रूरं समानाय्य जनार्दनः प्राह ॥ ३४ ॥ पूजयित्वा सत्कृत्य प्रियाः कथाः कथयित्वा विज्ञातमखिलं सर्वं येन स चासौ चित्तज्ञश्चेति कृष्णः स्मयमान ईषद्धसन् अभिभाष्य संबोध्यैनमक्रूरमुवाच ह स्फुटम् ॥ ३५ ॥ हे दानपते ! इति संबोधनं गूढाभिप्रायार्थं श्रीमान् स्यमंतको मणिः शतधन्वा त्वयि न्यस्त आस्ते वर्त्तते नोस्माभिः पूर्वमेव विदितो ज्ञातः ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

परमतं दूषयति—इतीति । 'त्वयाप्येतन्नाङ्गीकर्तव्यम्, अस्मत्पक्षपातित्वात्' इति सूचयन् सम्बोधयति—अङ्गेति । प्राग्यन्मयोक्तं श्रीकृष्णमाहात्म्यं तद्विस्मृत्येत्येवमेके उपदिशन्ति तत् मुनीनां वासो यस्मिन् स मुनिवासः श्रीकृष्णस्तस्य विवासे सति अक्रूरापगमनमात्रेण अरिष्टदर्शनं किं घटेत ? तदिच्छां विना न घटेतेत्यर्थः ॥ ३१ ॥ पुनस्तन्मतमेव दर्शयति—देव इति । काशिषु काशिदेशेषु देवे पर्जन्ये अवर्षति सति काशीशस्तद्देशाधिपतिः तत्रागताय श्वफल्काय स्वसुतां गान्दिनीं प्रादात्, ततः कन्यादानात्तद्देशेषु पर्जन्योऽवर्षत् । वै प्रसिद्धौ । स्मेत्याश्चर्ये ॥ ३२ ॥ असौ तस्य श्वफल्कस्य सुतोऽक्रूरोपि तत्तुल्यप्रभावः, अतः स यत्र यत्र वसति तत्र देवोऽभिवर्षति । शारीराद्युपतापाः मारिका अकालमृत्युहेतवश्च न भवन्ति । अतस्तत्प्रवासेनैव एवमुत्पाता भवन्ति । हेत्यवधारणे ॥ ३३ ॥ परमतमुपन्यस्य स्वमतमाह—इतीति । यद्यपीह उत्पाते एतावत् अक्रूरापगममात्रं कारणं न भवति, तथापि इत्येवंभूतं अक्रूरमहिमाप्रतिपादकं धृद्धाभिमानिनां वचः श्रुत्वा 'सत्यमेवम्' इति मत्वा दूतैरक्रूरं समानाय्य जनार्दनः श्रीकृष्णः प्राहेत्यन्वयः ॥ ३४ ॥ प्रश्नप्रकारमाह—पूजयित्वेति । आगतमेनमक्रूरं प्रथमं पूजयित्वा तथाऽन्याः प्रियाः कथाः कथयित्वा अभिभाष्य सम्बोध्य स्मयमानः हसन्मुखो हर्षेण उवाचेत्यन्वयः । हर्षे हेतुमाह—विज्ञाताखिलचित्तज्ञ इति । विज्ञातमखिलं येन स विज्ञाताखिलः, अत एव चित्तगतमपि जानातीति चित्तज्ञः स चासौ स मणिं गृहीत्वा मणिदानार्थमागतस्य अक्रूरस्य स्वस्मिन् भक्त्यतिरेकं ज्ञात्वा सन्तोषेण हृष्ट इत्याशयः ॥ ३५ ॥ तदुक्तिमेवाह–नन्विति चतुर्भिः । 'मणिप्रदानं तव युक्तमेव' इत्याशयेन सम्बोधयति—दानपते इति । ननु निश्चितमेतत् शतधन्वना न्यस्तः स्यमन्तको मणिस्त्वय्यास्ते स च नोऽस्माकं पूर्वमेव बिदितः । तत्र हेतुः—श्रीमानिति । सुवर्णोत्पत्त्यादिप्रभाववानित्यर्थः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

तन्मतं दूषयति--इतीति ॥ अङ्ग हे राजन् ! प्रागुदाहृतं पूर्वं यन्मयोक्तं श्रीकृष्णमाहात्म्यं तद्विस्मृत्यैवमेके वैशम्पायनादयः उपदिशन्ति तत् मुनीनां वासो यस्मिन्सः मुनिवासः श्रीकृष्णस्तस्य निवासे सति एकस्य मुनेर्निवासेऽप्यरिष्टदर्शनं न भवति किं पुनः सर्वनिवासस्य निवासे सतीत्यर्थः। अक्रूरापगमनमात्रेणारिष्टदर्शनं किं घटेत तदिच्छां विना न घटेत ॥ ३१ ॥ पुनस्तन्मतमेव दर्शयति--देव इति ॥ काशिषु काशिदेशेषु देवे पर्जन्ये अवर्षति सति काशीशस्तद्देशाधिपतिः तत्रागताय श्वफल्काय स्वसुतां गान्दिनीं प्रादात्ततः कन्यादानात्तद्देशेषु पर्जन्योऽवर्षत् ॥ ३२ ॥ तदिति ॥ असौ तस्य श्वफल्कस्य सुतोऽक्रूरोऽपि तत्तुल्यप्रभावः अतः स यत्र यत्र वसति तत्र देवोऽभिवर्षति। शारीराद्युपतापाः मारिका अकालमृत्युहेतवश्च न भवन्ति। अतस्तत्प्रवासेनैवैवमुत्पाता भवन्ति ॥ ३३ ॥ इतीति ॥ इत्येवंभूतम् अक्रूरमहिमप्रतिपादकं वृद्धाभिमानिनां वचः श्रुत्वा सत्यमेवं तथापीह उत्पाते एतावत् अक्रूरापगममात्रं कारणं न भवति। किन्तु मणेरप्यपगम इति मत्वेत्येतदन्तं परमतम् इति मत्वा दूतैरक्रूरं समानाय्य जनार्दनः श्रीकृष्णः प्राह स्म ॥ ३४ ॥ पूजयित्वेति ॥ विज्ञातमखिलं येन स विज्ञाताखिलः स चासौ चित्तज्ञः साक्षी चेति स भगवान्। अयं भावः। महाभागवतस्यास्य मया दत्तेऽपि मणावपेक्षा नास्त्येव। यत आहूतो मणिना सहैवागतः इति ज्ञात्वा आगतमेनमक्रूरं प्रथमं पूजयित्वा तथाऽन्याः प्रियाः कथाः कथयित्वा अभिभाष्य संबोध्य स्मयमानः हसन्मुखो हर्षेण उवाच ॥ ३५ ॥ नन्विति ॥ हे दानपते ! ननु निश्चितं शतधन्वना न्यस्तः श्रीमान् सुवर्णोत्पत्त्यादिप्रभाववान् स्यमन्तको मणिः त्वय्यास्ते। स च नोऽस्माकं पूर्वमेव विदितः ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इतीति। अंग हे परीक्षित् प्रागुदाहृतं श्रीकृष्णमाहात्म्यं विस्मृत्यैके लोका इत्येवमुपदिशंति कथयंति। तथाहि मुनिनां वासो ध्यानेन निवसनं यस्मिन्स मुनिवासः श्रीकृष्णस्तस्य निवासे सति अन्यत्राक्रूरगमनमात्रेणरिष्टदर्शनं कि घटेत न घटेतेत्यर्थः एवमसंभवेप्यक्रूरस्य द्वारकायामानयनार्थं श्रीकृष्णेनैवैतत्सर्वं दर्शितमिति भावः ॥ ३१ ॥ काशीशः काशिपतिः देवे मेघे अवर्षति सति। काश्यामागताय श्वफल्काय अक्रूरपित्रे ततः प्रदानात् सः अवर्षत् ववृषे। काशिष्विति बहुवचनं देशाऽभिप्रायेण ॥३२-३३॥ इति इत्थमक्रूरमाहात्म्यपरं वृद्धवचः श्रुत्वापि एतावत् वृद्धवचनमेवेहाक्रूरानयने कारणं हेतुर्न भवति किंतु मदिच्छैव कारणमस्ति। इति स्वेच्छाऽनुकूलं वृद्धवचो मत्वा जनार्द्दनः। अक्रूरं समानाय्य दूतेन समाहूय प्राह ॥ ३४ ॥ प्राहेत्युक्तं यत्तत्प्रकर्षेण विवृणोति पूजयित्वेति अभिभाष्य भोदानपते इत्यादि श्रेष्ठत्ववचनैः संबोधनं कृत्वा। विज्ञातं बुद्धं अखिलं भूतभविष्यादिसर्वं येन स चासौ अतएव चित्तज्ञश्च ॥ ३५ ॥ न्यास्तो न्यासेन दत्तो मणिः। त्वयि तव समीपे आस्ते तेनाऽस्माभिः पूर्वमेव विदितो ज्ञातः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ अङ्ग हे राजन्, इतीत्थं, एके केचनः ऋषयः प्राक् उदाहृतं श्रीकृष्णमाहात्म्यमिति शेषः। विस्मृत्य, उपदिशन्ति, तर्त्तकितं अरिष्टदर्शनं, मुनीनां स्वनिवासदेशेषु तापत्रयनिवर्त्तकानामृषीणां वास आश्रयभूतः, श्रीकृष्णस्तस्य निवासे सति, किं घटेत न घटेतैवेत्यर्थः ॥३१॥ अथान्यदपि ऋषिमतं दूषयति देव इत्यादिनैकश्लोकेन ॥ देव इति। पुरा, देवे पर्जन्ये, अवर्षति सति, काशीशः काशीपतिर्नृपः, तत्र स्वपुरे, आगताय, श्वफल्काय, गान्दिनीं स्वसुतां, प्रादात्। ततः, काशिषु पर्जन्य इति शेषः। अवर्षत् स्म वै ॥ ३२ ॥ तत्सुत इति ॥ तत्सुतः श्वफल्कस्य सुतः, तत्प्रभावः पितृतुल्यप्रभावः, असौ, अक्रूरः, यत्र यत्र वसति, तत्र तत्र, देवः अभिवर्षते हि। मारिकाः अपमृत्युहेतवः, उपतापाश्च, न। यत्र सः स्यात्तत्र न स्युरेवेत्यर्थः ॥३३॥ इतीति ॥ इत्येवंविधं, वृद्धवचः वृद्धानां वचनं, श्रुत्वा आकर्ण्य, भगवानक्रूरमानयामासेति शेषः। एतद्दूषयति। इहाक्रूरानयने, एतावत् मायाद्युपद्रवप्रशमनादिकं, कारणं न, किं तु इति हेतोः, स्वमिथ्यापवादनिवृत्तेः स्वपत्नीभ्रात्रोर्हृद्गतशङ्कानिवृत्तेर्हेतोश्चेत्यर्थः। जनार्द्दनः श्रीकृष्णः, दूतैः, अक्रूरं समानीय, प्राह ॥३४॥ एतदेव स्फुटमाह ॥ पूजयित्वेति ॥ विज्ञातमखिलं येन स चासौ चित्तज्ञश्च भगवान् एनमक्रूरं, अभिभाष्य हे अक्रूरेति संबोध्य, पूजयित्वा प्रथमतोऽतीव सत्कृत्य, प्रियाः कथाः, कथयित्वा, स्मयमानः, सन्, ह स्फुटं, उवाच ॥ ३५ ॥ उक्तिमेवाह नन्विति चतुर्भिः ॥ नन्विति ॥ हे दानपते, एतदक्रूरस्यैव नामान्तरम्। श्रीमान् स्यमन्तकः मणिः, शतधन्वना त्वयि, न्यस्तः आस्ते। सः, नोऽस्माकं पूर्वं शतधन्वनः वधात् प्रागेव, विदितः, अस्ति ननु ॥ ३६ ॥

कृष्णप्रिया

इनको यह अनुसन्धान नहीं है कि भला भगवान् श्रीकृष्ण में समस्तदेव ऋषिमुनि तीर्थ ग्रह आदि मङ्गल तत्व विराजते हैं वैसे पुरुषोत्तम के रहने पर क्या द्वारिकाजी में उपद्रवों की सम्भावना होगी ? कि अक्रूरजी के चले जाने पर अनिष्ट हो रहे हैं यह समझा जाय ॥ ३१ ॥ महाराज परीक्षित् ! लोक वार्ता के लिये क्या कहा जाय ? इस अवसर पर द्वारिका जी में रहने वाले कई बुजुर्ग लोग परस्पर यह बात करते थे कि—एक बार काशी नृप के राज्य में दुष्काल पड़ा, वर्षा न हुई थी तब

अक्रूरजी के पितृचरण श्वफल्कजी काशी में पधारे थे उनको अपनी पुत्री गांदिनी व्याह दी तब सारे महामारी आदि उपद्रव शान्त हो गये एवं खूब वर्षा भी हो गयी और काशी में कुशलता हुई। उनके पुत्र अक्रूरजी भी जहाँ रहते हैं वहाँ अच्छी तरह से वर्षा होती है और कोई उपद्रव नहीं, कष्ट संभावित नही इस लोकचर्चा को सुनकर भगवान् हंसते रहे और भक्तवत्सलता के नाते भक्त की प्रतिष्ठा को बढ़ाने के लिये एवं अक्रूरजी के यशोवृद्धि के लिये एवं बड़े भाई श्रीबलभद्रजी को भी बड़प्पन देने के लिये दोनों को बुलाने के लिये मिथिलाजी और वाराणसी में बुलावा भेजा और इन दोनों के पधारने पर वर्षा भी करवाई ऐसे प्रभु भक्तवत्सल है ॥ ३२-३४ ॥ अक्रूरजी के काशी से द्वारिका में एवं मिथिलाजी से बलभद्रजी के पधारने पर दोनों का खूब स्वागत किया-सत्कार किया मधुर वार्तालाप स्नेहगोष्ठी करके सम्भाषण किया। भगवान् श्रीकृष्ण प्रत्येक भक्तजन के चित्त के प्रत्येक संकल्प जानते हैं। अक्रूर की उर गाथा जानकर मुसकराते हुए अक्रूरजी से कहा कि चाचाजी ! आप महादानी हैं धर्म के संरक्षक हैं मुझे यह भी जानकारी है कि शतधन्वा बड़ी तेजस्विनी प्रभावमयी स्यमन्तकमणि आप के करकमलों में रख गये हैं ॥ ३५-३६ ॥

सत्राजितोऽनपत्यत्वाद् गृह्णीयुर्दुहितुः सुताः । [1]दायं निनीयापः पिण्डान् [2]विमुच्यर्णं च शेषितम् ॥ ३७ ॥
तथापि [3]दुर्धरस्त्वन्यैस्त्वय्यास्तां [4]सुव्रते मणिः । किंतु मामग्रजः सम्यङ् न प्रत्येति मणिं प्रति ॥ ३८ ॥
दर्शयस्व महाभाग बन्धूनां शान्तिमावह । अव्युच्छिन्ना मखास्तेऽद्य वर्तन्ते रुक्मवेदयः ॥ ३९ ॥
एवं सामभिरारब्धः [5]श्वफल्कतनयो मणिम् । आदाय वाससाच्छन्नं ददौ सूर्यसमप्रभम् ॥ ४० ॥

कर्दमक्षमा

अन्वयः—सत्राजितः, अनपत्यत्वात्, पिण्डान्, आपः, निनीय, च, ऋणम्, विमुच्य, दुहितुः, सुताः, शेषितम्, दायम्, निनीयुः ॥ ३७ ॥ तथापि, अन्यैः, दुर्धरः, तु, मणिः, त्वयि, सुव्रते, आस्ताम्, किन्तु, अग्रजः, मणिम्, प्रति, माम्, न, सम्यङ्, न, प्रत्येति ॥ ३८ ॥ हे महाभाग ! अतो, मणिं, दर्शयस्व, तेन, बन्धूनां, शान्तिं, आवह, यतः, रुक्मवेदयः, अव्युच्छिन्नाः, मखाः, ते, अद्य, वर्तन्ते ॥ ३९ ॥ एवम्, सामभिः, आलब्धः, श्वफल्कतनयः, वाससा, आच्छन्नं, सूर्यसमप्रभम्, मणिम्, आदाय, (कृष्णाय) ददौ ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततः किमत आह—सत्राजित इति । अपः पिंडांश्च निनीय दत्त्वा ऋणं च विमुच्यापाकृत्य शेषितमवशिष्टं दायं दुहितुः सत्यभामायाः सुता गृह्णीयुरिति शास्त्रम् । तथा च स्मरति—"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुता गोत्रजा बन्धु-शिष्यसब्रह्मचारिणः" इति ॥ ३७ ॥ अग्रजोऽपि न प्रत्येति न विश्वसितीति ॥ ३८ ॥ नास्तीति न वक्तव्यम् यतोऽव्युच्छिन्नाः संतता मखा वर्तन्त इति ॥ ३९ ॥ आलब्ध उक्तो हृदि स्पृष्ट इति वा ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो विदितात् । दायं भागम् । शास्त्रं याज्ञवल्क्यः । तथा च स्मरन्ति-सामश्रवआदयः । पत्नी त्वव्यभिचारिणी । तदभावे दुहितरः, ता अप्यनूढा एव । तदभावे पितरौ यदि माता भवेत्तदा माता, तदभावे पिता । तयोरभावे भ्रातरः, तेऽपि सोदरा एव, एव, तदभावे भिन्नोदरा अपि । तदभावे भ्रातृपुत्राः । तदभावे गोत्रजाः, पितामही, सपिंडाः, समानोदकाश्च । पितामह्या अभावे सपिंडाः सप्तपुरुषावधयः । तदभावे समानोदकाश्च चतुर्दशपुरुषावधयः । ततः परे गोत्रजा इति विवेकः । गोत्रजाभावे बन्धवः, ते च त्रिधा—आत्मबन्धवः पितृबन्धवो मातृबन्धवश्च । तथाहि—"आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः । आत्ममातुलपुत्राश्च विज्ञेया आत्मबन्धवः । पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुस्सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः । मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः । मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः ।" इति । तत्र चांतरंगत्वात्प्रथममात्मबन्धवो धनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो ज्ञेयः । बन्धूनामभावे आचार्य इति, तदभावे शिष्याः । आचार्यः श्लोकानुक्तोपि "पुत्राभावे यः प्रत्यासन्नस्सपिंडस्तदभावे आचार्य आचार्याभोंवतेवासी" इत्यापस्तंबस्मरणात् । शिष्याभावे सब्रह्मचारी धनभाक्, येन सहैकस्मादाचार्यादुपनयनाध्ययनतदर्थज्ञानप्राप्तिः स सब्रह्मचारी । तदभावे ब्राह्मणद्रव्यं यः कश्चिच्छ्रोत्रियो गृह्णीयात् "श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्" इति गौतमस्मरणात् । तदभावे

---

१. दानं-वीर. । २. च्यर्णमशेषतः-विज. । ३. रोऽह्यन्यै-विज. । ४. प्रापितो-विज. । ५. रारब्धः-विज. ।

ब्राह्मणमात्रम् "सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः" इति मनूक्तेः। ब्राह्मणद्रव्यं राजा न कदापि गृह्णीयात्। "अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः" इति मनूक्तेः। "ब्राह्मणार्थस्य तन्नाशे दायादश्चेति कश्चन। ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोन्यथा ॥" इति नारदोक्तेश्च। क्षत्रियादिधनं सब्रह्मचारिपर्यंतानामभावे राजा हरेन्न ब्राह्मणः। "इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः" इत्येतत्सर्वं द्वादशविधपुत्राभावे ज्ञेयम्। शूद्रापुत्रं विनेत्यलमति प्रसंगेन। अक्रूरस्य सर्वेषामन्येषां च सम्प्रति विप्रतिपत्तिनिरसनार्थमाह—सत्रेति। अनपत्यत्वादिति कन्यांतरमपि निरस्तम्। सत्राजितः पत्नीनां तु सहमरणं ज्ञेयम् ॥ ३७ ॥ यद्यपि शास्त्रतोऽस्मानेवायाति तथापीति। अन्यैस्त्वदितरैः। दुर्धरः त्वत्तुल्यवदान्यत्वाभाद्धर्तुमशक्यः। तदुक्तम्—"अदातुर्नचिरं लक्ष्मीस्तिष्ठतीति विदुर्बुधाः" इत्युक्तेः। यद्येवं तर्हि किमर्थं तमिच्छसीति चेदाह—किन्त्विति। तथापीत्यर्द्धकम्। हि एव। सुव्रते ब्रह्मचर्यादिनिष्ठत्वादधिकारिण्यपि त्वय्यास्तांमात्रम्, तेन सर्वेषामस्माकमरिष्टनाशादिना हिताय भविष्यतीति मणौ सर्वेषां साधारण्यं विज्ञाप्य श्रीसंकर्षणादितर्किताः स्वेन तस्मै दानेच्छाप्याच्छादिता। किन्त्विति सार्द्धकम्। किन्तु दर्शयस्वमात्रं, यतो—मामिति। तदेवं सहसा मणिप्रकाशनार्थमेव तमुद्वेजितवान्, न तु संकर्षणस्यापि तथा भाव इति मनसि वितर्कितवान्, "तत आह बलो नूनं स मणिः शतधन्वना। कस्मिश्चित्पुरुषे न्यस्तः" इत्युक्तत्वात्। कस्मिश्चिदित्यक्रूर एवेति गूढोभिप्रायः। तन्नामग्रहणं यथा शतधन्वकर्तृकसत्राजिद्वधोऽवगतस्तथा तत्कृतं शतधन्वनि दुर्मंत्रदानमयम् 'योऽस्मभ्यं संप्रतिश्रुत्य कन्यारत्नम्' इति वचनं चावगतमिति तस्मै रोषात्, तथापि तत्पक्षपातमुंचंतं स्वानुजं प्रति प्रणयरोषाच्च। तत्र मणिं प्रति मणिर्मयि नास्तीति न प्रत्येति सम्यगिति। यद्यपि दानयज्ञादिना त्वय्याशंकते तथापि स्वदूरे शतधन्वनो मारणाद्विनयाच्च मय्यपीत्यर्थो वचसि ज्ञेयः। सम्यक् न प्रत्येति मदिच्छां ज्ञात्वैव त्वं मणिमादाय पलायितवानिति मन्यते। इत्यर्थस्तु मनसि ज्ञेयः। तत्र पूर्वार्थस्तु—परार्थस्य नातिदुष्टताव्यञ्जनाय च निर्दिष्टः॥ ३८ ॥ शान्ति प्रशमम्। महाभागेति—महान् भागो मद्भक्तिप्राप्त्यांशो वा यस्य तत्संबोधनमिति तव मरणापेक्षा नास्तीति भावः। यतो बहूनां बलदेवादीनामस्माकं शान्ति मण्यर्थमन्योन्यकलहोपरतिम् आवह सम्यक्प्रापय। अद्याऽधुनापि श्रीबलदेवश्चायं मिथिलातः पूर्वमानीतः। तथा च श्रीहरिवंशे—"प्रत्याय्य तु ततो रामो वृष्ण्यंधकमहारथैः। आनीतो द्वारकामेव कृष्णेन च महात्मना।" इति ॥ ३९ ॥ आलभेरुक्त्यर्थाऽप्रसिद्धि मत्वाह—हृदीति। श्वफल्कतनय इति—महानुभावमुनिपुत्रत्वेन तत्र सलज्जत्वं तस्य सूचितम्। सूर्यसमप्रभमत एव वाससाच्छन्नमेव ददौ ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अक्रूरस्य सर्वेषामन्येषां च सम्प्रति विप्रतिपत्तिनिरसनार्थमाह—सत्रेति। अनपत्यत्वादिति कन्यान्तरमपि निरस्तं (यद्यपि स्मृतिवाक्येषु पुत्रपत्न्यभावे तद्भागिन्यो दुहितर एव न तु तत्पुत्रास्तथाऽपि तत्र श्रीसत्यभामाया निरपेक्षतया पुत्राणामेव तथा नियोजनं सम्भाव्य तत्सुता गृह्णीयुरित्युक्तम्) सत्राजितः पत्नीनां तु सह मरणं ज्ञेयम् ॥ ३७ ॥ तथापीत्यर्द्धकं हि एव सुव्रते ब्रह्मचर्यादिनिष्ठत्वादधिकारिण्यपि त्वय्यास्ताम्मात्रं तेन सर्वेषामस्माकमरिष्टनाशादिना हिताय भविष्यतीति मणौ सर्वसाधारणत्वं विज्ञाप्य श्रीसङ्कर्षणादितर्किता स्वेन तस्मै दानेच्छाप्याच्छादिता। किन्विति सार्द्धकम्, किं तु दर्शयस्वमात्रं यतो मामिति तदेवं सहसा मणिप्रकाशनार्थमेव तमुद्योजितवान् न तु सङ्कर्षणस्यापि तथा भाव इति मनसि वितर्कितवान् "तत आह बलो नूनं स मणिः शतधन्वना, कस्मिश्चित् पुरुषे न्यस्तः" इत्युक्तत्वात् कस्मिश्चिदित्यक्रूर एव गूढोऽभिप्रायः तन्नामाग्रहणं तु यथा शतधन्वकर्तृकः सत्राजिद्वधोऽवगतस्तथा तत्कर्तृकं शतधन्वनि दुर्मन्त्रदानमयं "योऽस्मभ्यं सम्प्रतिश्रुत्य कन्यारत्नम्" इति वचनं चावगतमिति तस्मै रोषात् तथापि तत्पक्षपातममुञ्चन्तं स्वानुजं प्रति प्रणयरोषाच्च तत्र मणिं प्रति मणिर्मयि नास्तीति न प्रत्येति सम्यगिति। यद्यपि दानयज्ञादिना त्वय्याशङ्कते तथाऽपि स्वदूरे शतधन्वनो मारणाद्विचयनाच्च मय्यपीत्यर्थो वचसि ज्ञेयः। सम्यङ् न प्रत्येतीति मदिच्छां ज्ञात्वैव त्वं (१) मणिमादायापगतवानिति मन्यत इत्यर्थस्तु मनसि ज्ञेयः। तत्र पूर्वार्थस्तु परार्थस्य नातिदुष्टता व्यञ्जनाय च निर्दिष्टः महाभागेति महाभागो मद्भक्तिभाग्यं प्राप्यांशो वा यस्य तत्सम्बोधनम् इति तव मरणावपेक्षा नास्तीति भावः। अतो (२) बन्धूनां बलदेवादीनामस्माकं शांति मण्यर्थमन्योन्यकलहोपरतिम् आवह सम्यक् प्रापय अद्य अधुनापि श्रीबलदेवश्च मिथिलातः पूर्वं समानीतः तथा च श्रीहरिवंशे—

"प्रत्याय्य तु ततो रामो वृष्ण्यन्धकमहारथैः। आनीतो द्वारकामेव कृष्णेन च महात्मना ॥" इति ॥ ३८-३९ ॥

श्वफल्कतनय इति महानुभावमुनिपुत्रत्वेन सलज्जत्वं तस्य सूचितम् सूर्य्यसमप्रभम् अत एव वाससा छन्नमेव ददौ ॥४०॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अनपत्यत्वादिति कन्यान्तरमपि निरस्तम् ॥ ३७ ॥ हि एव, त्वय्येवास्ताम्, यतः सुव्रते ब्रह्मचर्य्यादिनिष्ठे निजनियमपालनपरे वा, अत एव लोकहितार्थं तस्मिन्नेव तन्मणिधारणे श्रीभगवदिच्छा प्रागेव जातास्तीति व्याख्यातमेव, मणिं प्रति मणिर्मयि नास्तीति न प्रत्येति, सम्यगिति मद्भक्ते त्वयि मणेर्वृत्त्या मय्येव तन्मननात्, श्रीबलदेवस्य तादृशभावाभावेऽपि तादृगुक्तिः

केवलमक्रूरेण मणिप्रदर्शनार्थम्, अतः श्रीबलदेवस्तदानीं मिथिलातस्तत्रागतोऽस्तीति ज्ञेयम्। तथा च श्रीहरिवंशे (विष्णु. प. ४०-२९)—'प्रस्थाप्य तु ततो रामो वृष्ण्यन्धकमहारथैः। आनीतो द्वारकामेव कृष्णेन च महात्मना ॥' इति ॥ ३८ ॥ महान् भागो तद्भक्तिभाग्यं प्राप्त्यांशो वा यस्य तत्सम्बोधनमिति तव मणावपेक्षा नास्तीति भावः। अतो दर्शयस्व दर्शनमात्रं कारय, न तु दानम्, यतस्त्वय्येव स्थास्यतीति भावः। तर्हि किमर्थम्? तदाह—बन्धूनामिति। शान्तिं मण्यर्थमन्योन्यकलहोपरतिं सुखं वा, आवह सम्यक् प्रापय, अद्य अधुनापि ॥ ३९ ॥ श्वफल्कतनय इति मुनिपुत्रत्वेनापि मण्यनपेक्षत्वं तथा भगवदभिप्रायाभिज्ञत्वञ्च तस्य सूचितम्। अतो वाससा परिहितवस्त्राञ्चलेनान्येन वा केनचिदाच्छन्नमादाय वस्त्रमपनीय हस्ताभ्यां गृहीत्वा ददौ, श्रीकृष्णहस्तेऽर्पयामास। सूर्य्यसमप्रभमिति आच्छादनापगमेन सूर्य्यवद्दीप्यमानमिति भावः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

दायमित्यादि–अपो निनीयेति उदकक्रियादिशास्त्रार्थोपलक्षणम् अर्थानामृणापाकरणस्य यावदपेक्षितं रिक्तं सर्वं दायंगृह्णीयुरित्यर्थः ॥ ३७–३९ ॥ आलब्ध उपालब्धः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

ततः किमत आह—सत्राजित इति। अनपत्यत्वादपुत्रकत्वात् तस्य दुहितुः सुता दौहित्रास्तस्य अपस्तिलोदकानि पिण्डांश्च निनीय दत्त्वा ऋणं विमुच्याऽपाकृत्यावशेषितं सर्वं दायं रिक्थं गृह्णीयुः ऋणापाकरणे यावदपेक्षितं तदतिरिक्तं सर्वमपुत्रस्य धनं दौहित्रा गृह्णीयुरित्ययं शास्त्रार्थ इत्यर्थः ॥ ३७ ॥ तथापीति तथाऽपि एवं शास्त्रार्थेऽपि मणिस्त्वय्येवास्तां तवैव तिष्ठतु न तु तदौहित्रैर्गृह्यते इत्यर्थः। तत्र हेतुं वदन् मणिमक्रूरञ्च विशिनष्टि–अन्यैर्धर्त्तुमशक्यः सुव्रते शोभनं व्रतमाचारो यस्मिन्स्तस्मिन् त्वयि किन्त्वग्रजो रामः मणिं प्रतिसम्यङ् न प्रत्येति न विश्वसिति मणिमहं तिरोधापितवानित्याशङ्कते इति भावः ॥ ३८ ॥ अतो हे महाभाग्यवन्! दर्शयस्व मणिमिति शेषः शान्तिं चित्तसमाधिमावह सम्पादय नास्तीति मा वोच इत्याह—अविच्छिन्ना इति। यतस्ते स्वर्णवेदयः सन्तता मखा यज्ञाश्च वर्त्तन्ते प्रवर्त्तन्तेऽतोऽस्त्येवेत्यनुमिनोमीत्यर्थः ॥ ३९ ॥ एवमिति इत्थं सामोक्तिभिरालब्धः हृदि स्पृष्टः ददौ कृष्णायेति शेषः ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

किं कृत्वा स्वीकुर्युरिति तत्राह—निनीयेति। अपः पिण्डांश्च निनीय दत्त्वा अशेषतः पित्रादिविषयमृणं च विमुच्य गृह्णीयुरिति पूर्वेणान्वयः ॥ ३७ ॥ तर्हि तथास्त्विति नेत्याह—किन्त्विति। प्रत्येति विश्वासं करोति "प्रत्ययस्तु ख्यातिरन्ध्रविश्वासाधीनहेतुषु" इति ॥ ३८ ॥ शान्तिं "मङ्गलं शान्तिः प्रशममङ्गले" इति वर्तन्ते तथेति शेषः। रुक्मवेदयः सुवर्णमेखलाः ॥ ३९ ॥ आरब्धः उक्तः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

किन्तु मामग्रज इति सङ्कर्षणः स्वयमीश्वरोऽपि न प्रत्येतीति भगवत एव सर्वज्ञशिरोमणित्वं द्योत्यम् ॥ ३९–४२ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

किन्तु ममाग्रजः सम्यङ् न प्रत्येति तस्यांशभूतस्याप्यसर्वज्ञत्वमिति ॥ ३८–४२ ॥

इति सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सत्राजितोऽनपत्यत्वात् अपुत्रत्वात् स्त्रीणां च सहमरणात् दुहितुः सत्यभामाया मणिनिरपेक्षत्वात् तत्सुता एव दायं दायरूपं मणिं गृह्णीयुः अपः पिण्डांश्च निनीय मातामहाय दत्त्वा शेषितमवशिष्टं ऋणं च विमुच्य (विमोच्य) संशोध्य तथा च स्मरन्ति—

"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुता गोत्रजा बन्धुः शिष्याः स ब्रह्मचारिणः" ॥ इति ॥ ३८ ॥

त्वयि मणिरस्तीत्यत्रत्याः सर्वे एव जानन्ति तत्र लिङ्गम् अव्युच्छिन्नाः सन्तता मखा वर्त्तन्त इति ॥ ३९ ॥ आलब्ध उपालब्धः स्वपाणिना स्पृष्टः ॥ ४०–४१ ॥

गूढार्थदीपिनी

पिण्डांश्च निनीय दत्त्वा ऋणं च अपाकृत्य अवशेषितं सर्वं दायं धनं दौहित्रा गृह्णीयुरिति धर्मशास्त्रम् ॥ ३७ ॥ तथापीत्यर्द्धम्। सुव्रतेऽधिकारिणि त्वय्येव आस्ते ॥ ३८ ॥ किन्त्विति सार्द्धम्। मां प्रति न प्रत्येति न विश्वसिति किन्तु अनेनैव

तिरोधापित इति बलः शङ्कत इत्यर्थः । आवह प्रापय । रुक्मवेदयः सुवर्णरचितवेदियुक्ता ॥ ३९ ॥ सामभिः सान्त्वनावाक्ये । आलब्धः प्रोत्साहितः । स्वपाणिना स्पृष्टो वा सूर्यसमेति अत एव वाससेति योज्यम् ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

मृतस्य सत्राजितोऽनपत्यत्वात्तत्कलत्राणां सह मरणाच्च अपः पिंडांश्च निनीय दत्त्वा ऋणं च विमुच्यापाकृत्य शेषितमवशिष्टं दायं दुहितुः सत्यभामायाः सुता गृह्णीयुः—

"पत्नी दुहितरश्चैव पितरो भ्रातरस्तथा । तत्सुता गोत्रजा बन्धुः शिष्याः स ब्रह्मचारिणः" ॥

इति स्मृतेः ॥ ३७ ॥ परमसुव्रतो बलो मणिं गृह्णीतु अत्राह—अग्रजोऽपि मणिं न प्रत्येति प्रत्यादातुं नेच्छति अतस्त्वय्येवास्तामिति भावः किं तु केवलं मां प्रति सम्यक् दर्शयस्व बन्धुमध्ये मणिं दृष्ट्वा पुनर्दास्यामि तदा क गतो मणिरित्येवं शोचतां बन्धूनां शान्तिर्भविष्यतीत्याशयेनाह—बन्धूनां शान्तिमावहेति । त्वय्येव मणिरस्तीति हेतुरस्तीति हेतुना साधयति, अव्युच्छिन्ना इति ॥ ३८–३९ ॥ आलब्ध उक्तः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

रामाशां त्याजयन्योजयंश्च रामाशां तामपि पर्यायतो विपर्यासयन्नाह ॥ सत्राजित इति ॥ अनपत्यादिति । न विद्यतेऽत्रापत्यं पुमपत्येव ग्राह्यम् । स्त्र्यपत्यभूतसत्यभामाया अध्यक्षसिद्धत्वात् । यस्य तस्य भावस्तत्तस्मात् । दुहितुः पुत्र्याः सुताः गृह्णीयुः ग्रहणेतिकर्तव्यतामाह ॥ निनीयेति । अपस्तिलजलपिण्डांश्च निनीय दत्वा तदृणं विमुच्याशेषतो यावन्तो वर्तन्ते तावन्त इत्यशेषा अशेषतोऽशेषं देयं तद्वित्तं । तथा ह्युक्तम् । पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुता गोत्रजा बन्धुः शिष्याः सब्रह्मचारिण इति । सत्यभामायास्तत्पुत्राणां चैत इत्यत्र त इति मन्तव्यम् । तथाऽपि धर्मशास्त्राचारे च सत्यपि । अन्यैस्तदितरैर्दुर्धर इति प्रापितः । इदानीं सभां प्रत्यानीतोऽसौ मणिः । मया त्वामेव प्रापितः प्रत्यर्पितस्त्वय्येवास्ताम् । ननु हरिवंशे सत्राजितो दशत्वासन्भार्यास्तासां शतं सुताः । ख्यातिमन्तस्त्रयस्तेषां भङ्गकारास्तु पूर्वजाः । वीरो वामपतिश्चैव उवास्वाबाश्च सप्रियः । कुमार्यश्चापि तिस्रो वै दिक्षु ख्याता नरर्षभ । सत्यभामा तमस्त्रीणां व्रतीनां च दृढव्रता । तथा पद्मवती चैव भार्या कृष्णस्य ता ददौ । सभाक्षो भङ्गकारात्तु नादेयश्चेत्यादिना । सूतशतस्य तथा । तथा तत्पौत्रादीन्कन्याद्वयस्य सत्यभामेतरस्य कृष्णपत्नीत्वस्य चोक्तेः कथं सत्राजिदनपत्यता कथन्तरां षोडशसहस्राष्टोत्तरशततोदरिणादत्रान्यत्र मानासम्भव इति चेत् । अत्र केचित्कल्पभेदेन सापत्यत्वानपत्यत्वादिकं ग्रन्थद्वन्द्वानुरूप्येणेति न्यरूरुपन् । अपरे तु ते च पुत्रा जघन्यजा इति नैतद्दायमादाय जीवनार्हा न पिण्डावापयोग्या इति भागवतेऽनपत्यत्वाद्युक्तिरिति जगदुः । अन्ये मन्यन्ते भागवते भगवानायुक्तिरप्युपपन्यस्तेति प्रक्षिप्ताः श्लोका भारत इति । वस्तुतस्तु सन्तु सुताः सुते च द्वे । तथाऽपि यदा माधवोपर्यारोपितवान्स्वभ्रातृहतां तत्क्षण एव पुंसामिव वोद्वाहानन्तरं स्त्रीद्वयस्याकार्यकारितया मरणस्य स्वस्य च सत्यभामावितरणपुण्यवन्ततया मरणस्य च सम्भवादनपत्यता साम्भाविनीत्यशेषाविरोध इति दिक् ॥४४॥ आनयनं पुनर्नयनं च कुत इत्यतो वक्ति ॥ किन्त्विति । मामग्रजो मणिं प्रति तमुद्दिश्य सम्यङ्न प्रत्येति न विश्वसिति । प्रत्ययस्तु ख्यातिरन्ध्रविश्वासाधीनहेतुष्विति यादवः । हे महाभाग तं दर्शयस्व । तेन च बन्धूनां बलाबलपक्षपातीनां शान्ति प्रशमं मङ्गलं वां वह प्रापय ॥ ४५ ॥ मयि सर्वज्ञातरि यज्ञपतावाज्ञापयति नेति न वक्तुं क्षमः स्याः किञ्च त्वं तु सदाध्वराऽध्वरतस्ततो नानृतं त्वया वक्तव्यम् । प्रथमपञ्चकषष्ठखण्डे ऋतं वाच दीक्षा सत्यं दीक्षा तस्माद्दीक्षितेन सत्यमेव वदितव्यमित्यारभ्य सत्योत्तरा हैवास्य वागुदिता भवतीत्यन्तेन दीक्षितेन सत्यमेव वदितव्यमित्युक्तेस्त्वया यथार्थमेव वक्तव्यमनृतवचने प्रत्यवेया इति शपथं स्थापयन्निव वक्ति ॥ अव्युच्छिन्ना इति । रुक्मवेदयः सुवर्णवेदिकोपेतास्ते मखा आद्याद्यपि अव्युच्छिन्ना वर्तन्ते । एवं सामभिः समाधानवचनैरारब्ध उद्यमितः । आरम्भस्तु त्वरायां स्यादुद्यमे वधदर्पयोरिति विश्वः । सूर्यसमा प्रभा यस्य स तं ज्ञातिभ्यो दर्शयित्वा । आत्मनो रजोऽपवादात्मकं मलम् ॥ ४७ ॥ मार्जयामासाशोधयत् । तदर्थं मणिनिमित्तं प्रोष्य प्रवासं कृत्वाऽऽगत इति । विवक्षाभावात्सन्ध्यभावः । अहं योग्य इति मन्वानस्तं चकमे कामयामास । स्वात्मना स्वमनसा पितृधनमुचितमिति मन्वाना ॥ ४८–४९ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तर्हि तदेव कथं न याचित इति चेत्, तत्राह **सत्राजितोऽनपत्यत्वादिति** । याचनमधिकारिणो भवति । यः पिण्डदः स रिक्थहारीति । तत्रैतावत्कालं सत्यभामाया नापत्यान्युत्पन्नानि । स त्वनपत्यः अभ्राता च । मणिस्तु तस्य । तं पुनः दुहितुः सुताः गृह्णीयुः । तत्र साधारणं न्यायमाह **दायं निनीयेति** । अन्यथैतदपि स्वेच्छेति स्यात् । **दायं धनं गृह्णीयुरिति** पूर्वेणैव सम्बन्धः । आमरणं तस्यैव धनम् । मरणानन्तरमपि पुत्राद्यभावे अपः पिण्डान् निनीय ऋणं च विमुच्य **शेषित**मवशिष्टम् । शेषभागिति पाठे यो निनीय भवति, स शेषभाग्भवतीति । निःस्वामिकं तु द्रव्यं राजगामि भवति । चोरं हत्वापि यो वस्तुतो

न भागी, स न द्रव्यं प्राप्नोति परिज्ञातम् । उत्पन्न एव दायभाग्भवतीति न व्यवहितज्ञातेः दायभाक्त्वमिति केचित् । दायं वा साक्षात्स्वामिनि गते तत्स्वामिनमन्वेषमाणं परम्परया शाखामूलपर्यन्तं गत्वा तुल्यतया तच्छाखासु निविशति । यं कञ्चिद्वा सर्वानुमत्या पिन्डदातारम् । एवं श्लोकद्वयेन भेदो दण्डश्च उक्तः । भेदावेव वा ॥ ३७ ॥ सामदाने आह **तथापीति द्वाभ्याम् ।** अन्यैर्दुर्धरोऽयमिति त्वय्येवास्ताम् । स हि **लौकिके** अलौकिको न तिष्ठति । य एव कर्मादिमार्गैः अपवृत्तैः लौकिकत्वं न सम्पद्यते । अपवृत्तकर्मा लौकिको भवतीति कादाचित्कव्रतोऽपि समयभेदेन लौकिक एव । तर्हि मयि कथं तिष्ठेदित्याशङ्क्याह **सुव्रत** इति । सुष्ठु **व्रतं** यस्य । त्वं हि सर्वदा नियतव्रतः । एवं दानमुक्त्वा सामाह **किन्त्विति** । परमेकदा दर्शयस्व । साम हि समता, उभयोरैक्यम् । तथा सति यथा स्वकार्ये मणेर्विनियोगः, एवमस्मत्कार्येऽपि विनियोगो युक्त इति । अप्रदर्शनपक्षे **अग्रजो** बलभद्रः **मणिं प्रति** मणिविषये **मां न** सम्यक् **प्रत्येति,** किन्तु सकपटं मन्यते ॥ ३८ ॥ अतो यथा जाम्बवता अपकीर्तिनिराकरणार्थं मणिर्दत्तः, एवं त्वयापि प्रदर्शनीय इत्याह **दर्शयस्वेति** । **महाभागेति** भाग्ये विद्यमाने मणिर्न गच्छतीति । अस्मद्विश्वासाभावेऽपि भाग्यविश्वासो वा कर्तव्य इति भावः । अनेनान्योऽप्युपकारो भविष्यतीत्याह **बन्धूनां शान्तिमावहेति** । बन्धुषु मध्ये कलह उत्पन्नः । केचिन्मत्सङ्घट्टिनः, अपरे रामस्येति । प्रदर्शने तु सन्देहाभावात् न कलहः । **अव्युच्छिन्नेत्यर्धं** विगीतमाहुः । मणिरस्तीत्यत्र लौकिकं प्रमाणम् । काश्यादिषु **रुक्मवेदयः** सुवर्णेष्टकानिर्मिताग्निसहिताः **मखाः** द्वादशाहादयः **अव्युच्छिन्ना** निरन्तरं प्रवृत्ताः यतस्ते वर्तन्त इति ॥ ३९ ॥ एकेनाप्युपायेन स इष्टं कुर्यात्, किमुत चतुर्भिरिति स भगवदुक्तं कृतवानित्याह **एवं सामभिरिति** । **साम**शब्देन भेददण्डदानान्यपि संगृह्यन्ते । पर्यवसितं सामैवेति तदेवोक्तम् । **आलब्धः** स्पृष्टः मारित इव लज्जितः वशीकृतश्च । **श्वफल्कतनयो** महतः पुत्रः । भगवते वाससा च्छन्नं **सूर्यसमप्रभं ददौ** । **आदायेत्य**नेन अन्यतो ग्रहणं लक्ष्यते । **अर्थात्** कृतवर्मणः स्थाने तत् स्थितमिति लक्ष्यते । प्रत्यक्षदाने लज्जा भवतीति वाससा च्छन्नं ददौ । तथैव स्थापितमिति ज्ञापयितुम् । अन्यथा तज्जनितं सुवर्णमपि निवेदनीयं स्यात् । तेन प्रदर्शनार्थं न दत्तम्, किन्तु सर्वथैव दत्तमिति दानप्रकारादवसीयते । **सूर्यसमप्रभमिति** दाने दातुर्ग्रहीतुश्च प्रत्यक्षतो दर्शनमपि न भवेदिति सूचितम् । अनुपहतशक्ति वा ॥ ४० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

दायं निनीयेत्यत्र । **उत्पन्न एवेति** । औरस एव पुत्रः सम्पूर्णदायभाक् भवति । व्यवहितो दौहित्रादिः । ज्ञातो ज्ञातिसम्बन्धी । एतादृशे तु सम्पूर्णदायभाक्त्वं नास्ति, किन्तु पिण्डदानादिक्रियानन्तरमृणमोकानन्तरं च यावदवशिष्यते, तावद्भाक्त्वमित्यर्थः । **तथापीत्यत्र** । **अपवृत्तैरिति** । अपकृष्टं वृत्तं स्थितिर्येषाम् । अपकृष्टैरित्यर्थः । **इत्यष्टमाध्यायव्याख्या ।**

श्रीसुबोधिनी–सारः

किं चाऽपोंजलीन् पिंडांश्च निनीय श्राद्धं दत्त्वा ऋणं पैतृकादि विमुच्यापाकृत्य शेषितं दायं दुहितुः सत्यभामायाः सुताः पुत्रा गृह्णीयुरिति शास्त्रीयः पंथाः । सत्राजितोऽनपत्यत्वादपुत्रत्वात् हरिवंशीयवाक्यैकताकरणे तु अल्पार्थो नञ् बोध्यः॥३७॥ तथाप्येवं सत्यपि अन्यैर्मलिनैर्लंपटैर्दुर्द्धरो धर्त्तुमशक्यो मणिः सुव्रते त्वयि आस्तां तिष्ठतु किं तु मामग्रजो रामोपि मणिं प्रति सम्यक् न प्रत्येति विश्वासं न करोति ॥ ३८ ॥ हे महाभाग ! इत्यनेन मणौ तवेच्छा नास्तीति सूचितम् । दर्शयस्व मणिं बंधूनां शांतिमावह कुरु नास्ति मणिरिति न वाच्यम् । काश्यां स्वर्णवेदयोऽव्युच्छिन्नाः संतता मखा यज्ञा अद्य ते वर्तंते तं विना तदनुपपत्तेः ॥ ३९ ॥ सामभिरुपायैरालब्धो विश्वसितः श्वफल्कस्य तनयः पुत्रोऽक्रूरो वाससा वस्त्रेणाच्छन्नं सुगोपितं सूर्यतुल्यकांति मणिम् आदाय निष्कास्य कृष्णाय ददौ ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'मणिरस्ति, ततः किं' तत्राह—सत्राजित इति । अनपत्यत्वात् अपुत्रकत्वात् सत्राजितो दुहितुः सत्यभामायाः सुताः अपस्तिलोदकानि पिण्डांश्च निनीय दत्त्वा ऋणं विमुच्य अपाकृत्य अवशेषितं दायं धनं गृह्णीयुः । तथा च शास्त्रम्—"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुता गोत्रजा बन्धुः शिष्याः सब्रह्मचारिणः" इति ॥ ३७ ॥ तथापि शास्त्रतो मत्पुत्रग्राह्यत्वेऽपि मणिस्त्वय्यास्ताम् । तत्र हेतुमाह—अन्यैर्दुर्धर इति । 'त्वं च तद्धारणयोग्य' इत्याह—सुव्रत इति । किं त्वग्रजो रामो मणिं प्रति मां सम्यक् न प्रत्येति न विश्वसिति 'अनेन मणिस्तिरोधायित' इति शङ्कत इत्यर्थः । शङ्कावचनं च ग्रन्थाद्बहिर्द्रष्टव्यम् ॥ ३८ ॥ 'तवैतद्युक्तमेव' इत्याशयेन सम्बोधयति—महाभागेति । अतो मणिं दर्शय, तेन बन्धूनां शान्तिं चित्तसमाधानमावह सम्पादय, मणिर्नास्तीति मा वोचः । यतः रुक्मवेदयः अव्युच्छिन्नाः सन्तता मखास्तेऽद्य वर्तन्ते, अतो मणिरिदानीमपि त्वय्यस्तीति अनुमिनोमीत्यर्थः ॥ ३९ ॥ एवं सामभिः सामोक्तिभिः आलब्ध उक्तः श्वफल्कतनयोऽक्रूरो वाससाच्छन्नं मणिमादाय कृष्णाय ददौ । मणिप्रभावमाह—सूर्यसमप्रभमिति ॥ ४० ॥

अन्वितार्थप्रकाशिका

सत्राजित इति । अनपत्यत्वात् अपुत्रकत्वात् सत्राजितो दुहितुः सत्यभामायाः सुताः अपस्तिलोदकानि **पिण्डांश्च** निनीय दत्त्वा ऋणं विमुच्य अपाकृत्यावशेषितं दायं धनं गृह्णीयुः । तथा च शास्त्रम् । "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।

तत्सुता गोत्रजा बन्धुशिष्याः सब्रह्मचारिणः'' इति ॥ ३७ ॥ तथापीति । तथापि शास्त्रतो मत्पुत्रग्राह्यत्वेऽपि अन्यैर्दुर्धरः धारणायोग्यः स मणिः सुव्रतधारणया त्वय्येवास्तां किं त्वग्रजो रामो मणिं प्रति मां सम्यक् न प्रत्येति न विश्वसिति । अनेन मणिस्तिरोधापित इति शङ्कत इत्यर्थः । शङ्कावचनं च ग्रन्थद्बहिर्द्रष्टव्यम् ॥ ३८ ॥ दर्शयस्वेति । हे महाभाग ! अतो मणिं दर्शयस्व । तेन बन्धूनां शान्तिं चित्तसमाधानमावह सम्पादय । मणिर्नास्तीति मा वोचः । यतः रुक्मवेदयः स्वर्णरचितवेदियुक्ताः अव्युच्छिन्नाः सन्तता मखास्तेऽद्य वर्तन्ते । अतो मणिरिदानीमपि त्वय्यस्तीति रामश्चेतः पूर्वं मिथिलातः समानीत इति हरिवंशे ॥ ३९ ॥ एवमिति । एवं सामभिः सामोक्तिभिः आलब्ध उक्तः हृदि स्पृष्टो वा वशीकृतो वा श्वफल्कतनयोऽक्रूरो वाससाच्छन्नं सूर्यसमप्रभं मणिमादाय कृष्णाय ददौ ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सत्राजितस्य अयः पिंडांश्च निनीय समर्प्य । ऋणं च विमुच्य शेषितं अवशिष्टं दायं मातामहधनं । अनपत्यत्वादित्यनेन अन्यापि सुता नास्तीति बोध्यं ॥ ३७ ॥ न प्रत्येति न विश्वसिति ॥ ३८ ॥ ननु मम समीपे नास्तीत्युच्यते चेत्तत्राह अव्युच्छिना इति । अव्युच्छिन्ना अखंडिता मखाः वर्त्तंते आलब्धो वशतां नीतः ॥ ३९ ॥ रजो मिथ्याभिशापं विमृज्य नाशयित्वा । तस्मै अक्रूराय भूयो मणिं प्रत्यर्पयत् ददौ ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ततः किमत आह ॥ सत्राजित इति ॥ सत्राजितः, अनपत्यत्वात्, तस्य दुहितुः पुत्र्याः, सुताः, पुत्राः, तस्य अपस्तिलोदकानि, पिण्डांश्च निनीय दत्त्वा, ऋणं विमुच्यापकृत्य च, शेषितं दायं विभक्तव्यपितृद्रव्यं, गृह्णीयुः । ऋणापकरणे यादवपेक्षितं तदतिरिक्तं सर्वमपुत्रस्य धनं दौहित्रा गृह्णीयुरित्ययं शास्त्रार्थ इत्यर्थः ॥ ३७ ॥ तथापीति ॥ तथापि एवंभूतशास्त्रार्थे सत्यपि, अन्यैः दुर्धरः मणिः, सुव्रते त्वय्येव, आस्ताम् । न तु दौहित्रैर्गृह्यते इत्यर्थः । किं तु अग्रजो रामः, मणिं प्रति, मां सम्यक् न प्रत्येति विश्वसिति । मणिं कृष्णस्तिरोधापितवानिति शङ्कते इति भावः ॥ ३८ ॥ दर्शयस्वेति । अतः, हे महाभाग, दर्शयस्व । मणिमिति शेषः । बन्धूनां, शान्तिं चित्तसमाधिं च, आवह संपादय, नास्तीति मा वोचः । यतः, ते तव, रुक्मवेदयः स्वर्णवेदिकाः, मखा यज्ञाः, अद्याऽद्यापि, अव्युच्छिन्नाः संतताः, वर्त्तन्ते ॥ ३९ ॥ एवमिति ॥ एवमित्थं सामभिः सामोक्तिभिः, आलब्ध उक्तः हृदि स्पृष्ट इति वा । श्वफल्कतनयोऽक्रूरः, वाससा छन्नं मणिं, आदाय, सूर्यसमप्रभं तं मणिं, ददौ कृष्णायेति शेषः ॥ ४० ॥

कृष्णप्रिया

आप अच्छी तरह से जानते हैं कि सत्राजित्जी को पुत्र प्रजा नहीं है इसलिये सत्राजित् की पुत्री और पुत्री के पुत्र उनके नाती ही सत्राजितजी को तिलाञ्जलि एवं पिण्ड दान करेंगे और पितृऋण चुकायेंगे और जो कुछ अवशिष्ट रहेगा उस सम्पत्ति के उत्तराधिकारी बनेंगे ॥ ३७ ॥ इस प्रकार धार्मिक नियमानुसार उनका द्रव्यादि एव स्यमन्तक मणि भी सत्यभामा जी के पुत्रों को मिलनी चाहिये फिर भी वह स्यमन्तक मणि भले आपके पास ही रहे कारण आप परम पवित्र व्रतनिष्ठ एवं पुण्यात्मा हैं दूसरे जन के लिये इस स्यमन्तक मणिको यह घटना कठिन है फिर भी हमारे शिर पर एक कठिन समस्या आ पड़ी है कि श्रीबलभद्रजी भैया स्यमन्तक के विषय में मेरी बात पर पूर्ण विश्वस्त नहीं हैं ॥ ३८ ॥ हे महाभाग ! हे पूज्यवर ! हे अक्रूरजी ! मेरा आपसे विनम्र निवेदन है कि आप कृपया स्यमन्तक मणि सबको दिखाकर हमारे बड़े भाई ज्ञानिजन बन्धुजन स्वजन एवं कुटुम्बी जन का सन्देह दूर कीजिये एवं काशी में जो इस मणि के प्रताप से सुवर्णमयी वेदी वाले यज्ञ हो रहे हैं वे अखण्ड रहें ॥३९॥ राजन् परीक्षित् ! भगवान् श्रीकृष्ण ने इस प्रकार श्रीअक्रूरजी को स्नेह से सद्भाव से एवं समादर से बात समझायी तब श्री अक्रूरजी ने वसा में समाच्छित मणि निकाली और दैन्य से भगवान श्रीकृष्ण को समर्पित की ॥४०॥

स्यमन्तकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः । [1]विमृज्य मणिना भूयस्तस्मै प्रत्यर्पयत् प्रभुः ॥ ४१ ॥
[2]यस्त्वेतद् भगवत ईश्वरस्य विष्णोर्वीर्याढ्य[3] वृजिनहरं सुमङ्गलं च ।
आख्यानं पठति शृणोत्यनुस्मरेद् वा दुष्कीर्तिं दुरितमपोह्य याति शान्तिम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे[5] स्यमन्तकोपाख्याने [6]सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

---

१. इदं नास्ति—बिजये. ।

२. मार्जयामास लोकेशः अभिभाष्य हलायुधम् । दृष्ट्वामणिं हलधरस्तदर्थं प्रोष्य आगतः ॥
योग्योहमिति मन्वानश्चक्रमे कुरुपुङ्गव । सत्यभामा पितृधनं मन्वाना स्वात्मनोचितम् ॥
गृहीतुमैच्छद्विस्रब्धं हरेश्चित्तमजानती । जाम्बवत्यापिशुल्कार्थं पित्रा दत्तं ममेति ह ॥
स्पृहां चक्रे मणौ तस्मिन् सर्वं विज्ञाय माधवः । अक्रूरस्य करे भूयो मणिं प्रत्यर्पयद् विभुः ॥

३. रव्यं—विज. । ४. पारमहंस्यां संहितायां—प्रा. पा. । ५. न्धे सम—न्ध उत्तरार्द्धे—प्रा. पा. । ६. एकषष्टितमो—विज. ।

कर्दमक्षमा

अन्वयः—प्रभु, (श्रीकृष्णः) ज्ञातिभ्यः, स्यमन्तकं, दर्शयित्वा, मणिना, आत्मनः, रजः, विमृज्य, भूयः तस्मै, प्रत्यर्पयत् ॥ ४१ ॥ यस्तु, भगवतः, ईश्वरस्य, विष्णोः, वीर्याढ्यं, बृजिनहरं, सुमङ्गलं, च, एतत्, आख्यानम्, पठति, शृणोति, वा, अनुस्मरेत् (सः आत्मनः) दुष्कीर्ति, दरितं, च, अपोह्य, शान्तिं, याति ॥ ४२ ॥

इति श्रीभागवते दशमस्कन्धे निरोधलीलायामुत्तरार्द्धे स्यमन्तकोपाख्याने सप्तपञ्चाशत्तमाऽध्याये अन्वयाः समाप्ताः ॥ ५७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रजो मिथ्याभिशापं संमृज्य अन्यैर्दुर्धर इत्यादिमिषेण प्रीत्या भूयस्तस्मै प्रत्यर्पितवानिति ॥ ४१ ॥ दुष्कीर्ति तन्मूलं दुरितं चेति ॥ ४२ ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे श्री० टीकायां सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ज्ञातिभ्यो बलदेवादिभ्यः । तस्मै अक्रूराय ॥ ज्ञातिभ्यो यादवान्प्रति मणिना हेतुना यद्रजः रजोमार्जनञ्चात्र सोऽयमक्रूरः स्वेच्छयैव मणिमपहृतवान्न तु ममेच्छया, तथाप्यधुना यदस्मै तत्समर्पणं तत्खल्वस्यैव योग्यत्वादिति व्यञ्जनया ज्ञेयम् । यतो विभुः, भक्तगणपरिपालनसमर्थः । यदुकुलहितार्थं तथाकरोदिति भावः । यद्वा—साक्षादीश्वरोपि इत्येतत्साधुभिः कार्यमिति लोकशिक्षणार्थमिति भावः । ततःप्रभृति तन्मणिमक्रूरो व्यक्तं कंठे निधाय बभ्रामेति श्रीहरिवंशे—"स कृष्णहस्तात्संप्राप्तं मणिरत्नं स्यमन्तकम् । आबध्य गांदिनोपुत्रो विचचारांशुमानिव ॥" इति ॥ ४१ ॥ दुष्कीर्तिं मिथ्याभिशापादिरूपाम् । तन्मूलं दुष्कीर्तिं कारणम् । अपोह्य त्यक्त्वा । शान्तिं क्लेशानां संसारस्य वा ॥ श्रीभगवतस्तदेवं सर्वं लीलाकौतुकमेव न तु पारवश्यमयम् यतः यस्त्वेतदिति । भगवतः पूर्णैश्वर्यप्राकट्यस्य श्रीकृष्णस्य । अत एवेश्वरस्य सर्वं कर्तुं समर्थस्य । अत एव विष्णोः, निजशक्त्या सर्वव्यापकस्य । अत एव वीर्येणाद्भुतचरितेन आढ्यमाख्यानं कथाम् । वृजिनहरं संसारदुःखनाशनम् । सुमंगलं भगवद्भक्तिवर्धनादिना महामंगलकरम् । अनुश्रवणानन्तरं तद्द्वयाभावे स्मरेद्वा । अपोह्य हित्वा । शान्तिं चित्तप्रसादं सुखं वा प्राप्नोति ॥ ४२ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे उत्तरार्द्धे सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ज्ञातिभ्यो यादवान् प्रति मणिना हेतुना यद्रजः रजो विमार्जनं चात्र सोऽयमक्रूरः स्वेच्छयैव मणिमपह्नुतवान्नतु ममेच्छया तथाऽप्यधुना यदस्मै तत्समर्पणं तत् खल्वस्यैव योग्यत्वादिति व्यञ्जनया ज्ञेयम् । यतो विभुर्भक्तगणपरिपालनसमर्थः यदुकुलहितार्थं तथाऽकरोदिति भावः । यद्वा, साक्षादीश्वरोऽपि इत्येतत्साधुभिः कार्य्यमिति लोकशिक्षार्थमिति भावः । ततःप्रभृति तन्मणिमक्रूरो व्यक्तं कण्ठे निधाय बभ्रामेति श्रीहरिवंशे—

"स कृष्णहस्तात् सम्प्राप्तं मणिरत्नं स्यमन्तकम् । आवध्य गान्दिनीपुत्रो विचचारांशुमानिव ॥" इति ॥ ४१ ॥

तदेवं श्रीभगवतः सर्वमिदं लीलाकौतुकमेव न तु पारवश्यमयं यतः यस्त्वेतदिति भगवतः पूर्णैश्वर्य्यप्राकट्यस्य श्रीकृष्णस्य अत एवेश्वरस्य सर्वं कर्त्तुं समर्थस्य अत एव विष्णोर्निजशक्त्या सर्वव्यापकस्य अत एव वीर्य्येणाद्भुतचरितेनाढ्यमाख्यानं कथां वृजिनहरं संसारदुःखनाशकं सुमङ्गलं श्रीभगवद्भक्तिवर्द्धनादिना महामङ्गलकरं च अनुश्रवणानन्तरं तद्द्वयाभावे स्मरेद्वा अपोह्य हित्वा शान्तिं चित्तप्रसादं सुखं वा श्रीकृष्णनिष्ठबुद्धिं वा प्राप्नोति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ज्ञातिभ्यो यादवान् प्रति, मणिना हेतुना यद्रजः, यद्वा, साक्षादीश्वरोऽपि इत्येतत् साधुभिः कार्य्यमिति लोकशिक्षार्थमिति भावः । ततः प्रभृति तन्मणिमक्रूरो व्यक्तं कण्ठे निधाय बभ्रामेति ज्ञेयम् । तथा च श्रीहरिवंशे (विष्णु० प० ३९।४०)—'स कृष्णहस्तात् सम्प्राप्तं मणिरत्नं स्यमन्तकम् । आबध्य गान्दिनीपुत्रो विचचारांशुमानिव ।' इति । एवं श्रीभगवत इव तद्भक्तवराणामपि लोकहितार्थं प्रवृत्त्या धनानर्थतां दर्शयितुं सत्राजिदादयः सर्व्वे ते तथाऽचेष्टन्तेति ज्ञेयम् । अन्यथा भक्तवराणां यादवानां तेषां तत्तदसम्भवः । अतः सत्राजिद्वधादिकमपि मायिकमेवेति तत्त्वम् । सिद्धान्तोऽयं श्रीभागवतामृतोत्तरखण्डे विवृतोऽस्त्येव ॥ ४१ ॥ इयञ्च मिथ्यापवादमार्ज्जनार्थका श्रीभगवतो लीला कथमपि केनापि सेविता सर्व्वा-

शुभं हरति, मंगलञ्च करोतीत्याह—य इति । तु-शब्दो भिन्नोपक्रमे, वाक्यालंकारे वा; भगवतः सर्व्वैश्वर्य्ययुक्तस्य श्रीकृष्णस्य, अतएव ईश्वरस्य सर्व्वं कर्त्तुं समर्थस्य, अतएव विष्णोर्निजशक्त्या सर्व्वव्यापकस्य, अतएव वीर्य्येणाद्भुतचरितेनाढ्यमाख्यानं कथा, वृजिनहरं संसारदुःखनाशकं सुमंगलं श्रीभगवद्भक्ति-वर्द्धनादिना महामंगलकरञ्च; यद्वा, सुखकरं सुखरूपञ्चेत्यर्थः । अनुश्रवणानन्तरं गौणत्वेनापि वा स्मरेत् । पठनादीनां यथोत्तरमयत्नसाध्यतापेक्षया वा-शब्दः, अपोह्य हित्वा, शान्तिं चित्तप्रसादं सुखं वा प्राप्नोति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

रजः दोषम् ॥ ४१-४२ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स्यमन्तकमिति विभुः श्रीकृष्णो ज्ञातिभ्यो रामादिभ्यः आत्मनः स्वस्य रजः मिथ्याभिशापं प्रमृज्य अपास्य पाणिना स्वहस्तेनैव पुनस्तस्मै अक्रूराय मणिं प्रत्यर्पयत् ददौ ॥ ४१ ॥ उक्ताख्यानकथनश्रवणस्मरणादिफलं वदन्निगमयति—यस्त्विति । विष्णोर्वीर्येण प्रभावप्रकाशनेनाढ्यं युक्तं वदताम् शृण्वतां स्मरतां च पापहरम् अनेनानिष्टनिवर्त्तकत्वमुक्तम् सुमङ्गलं मङ्गलावहं चेत्यनेनेष्टप्रापकत्वं यः पुमानेवम्विधमाख्यानम् वदेत् शृणुयादनुस्मरेद्वा स दुष्कीर्त्तिं दुरितं च निरस्य मनः शान्तिं मुक्तसाधनभूताम् याति प्राप्नोति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

श्रीमद्विजयध्वजतीर्थकृतापदरत्नावली

रजो मिथ्यावादलक्षणां धूलिम् ॥ ४१ ॥ तदर्थं मणिनिमित्तम् (क) स्वात्मना इति तृतीया षष्ठ्यर्थे (ख) स्नेहाद्विस्रब्धं विश्वस्तम् (ग-घ) फलमाह—य इति । शान्तिं मुक्तिम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

(श्रीविजयध्वजतीर्थरीत्या एकषष्टितमः) ॥ ६१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

दुष्कीर्त्तिं तन्मूलं दुरितं च ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । सप्तपञ्चाशत्तमोऽयं दशमेऽजनि सङ्गतः ॥ ५७ ॥

गूढार्थदीपिनी

ज्ञातिभ्यो बलदेवादिभ्यः । रजो मिथ्यादोषं प्रमृज्य । तस्मै अक्रूराय ॥४१॥ सुमङ्गलं परममङ्गलमयम् एतदाख्यानम् यस्तु पठति शृणोति अनुस्मरति वा स दुष्कीर्त्तिं तन्मूलं दुरितं पापं च त्यक्त्वा शान्तिं याति । वृजिनं दुःखम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णानुमत्यैव मणिहरणादिकं जातमिति लोकारोपितं दुर्यशोरूपं रजः प्रमृज्य ॥ ४१-४२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरेश्चित्तमजानती अजानतीव तं गृहीतुमैच्छत । जाम्बवत्यपि तस्मिन्मणौ स्पृहाञ्चक्र इत्यन्वयः । ननु न सत्या कृष्णावाञ्छितं किञ्चिदिच्छेत्तथाऽपि तस्यायोग्य इत्याह कृष्ण इति श्रीमदाचार्योक्तिस्तर्हि विरुद्धाऽऽसीदिति चेन्न । वस्तुस्थितिकथनपरा सेयं तु विडम्बनालम्बिनीति किञ्चित्समाधिसम्भवात् । यद्वा सत्यभामेत्यारभ्य स्पृहाञ्चक्रे मणाविति पर्यन्तं जाम्बवतीचर्योक्तेः ।

तथा हि **तदन्वयार्थौ**। सत्यभामायाः पिता तस्य धनं परमार्थतः स्वात्मना स्वमनसा सा सत्यभामा गृहीतुमैच्छच्चेदुचितमिति विस्रब्धमन्तर्मन्वाना जाम्बवती हरेश्चित्तमजानती मम पिता शुल्कार्थं दत्तमिति तद्धनरूपे मणौ स्पृहाञ्चक्र इति विवक्षित्वाऽऽचार्यास्तथोचुरिति मनस्यानेयम् ॥ ५० ॥ सर्वं रामादिहृदि स्थितं विज्ञाय कुलकलहाकुलो भूपः पुनरक्रूरस्य करे प्रत्यर्पयत्प्रत्यार्पयत् ॥ **५१** ॥ श्रवणादितः स्यात्फलमिति लपति। योऽधिकारीश्वरस्येशेभ्योऽपि वरस्य **भगवतो** विष्णोर्वृजिनहरं **सुमङ्गलं** वीर्याख्यं **पराक्रमख्यापकमाख्यानं** श्रृणोति पठत्यनुस्मरेद्वा स दुष्कीर्तिं दुरितं चापोह्य शान्ति शान्तिर्मोक्षोऽथ **निर्वाणमित्यभि**धानान्मोक्षं याति। अत्र भक्तितस्तमभावेन शान्तौ तरतमभाव इति तत्त्रये समानाऽपि **श्रवणपाठानुस्मरसम्मता** चेति ध्येयम् ॥ **५२** ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे एकषष्ठिरध्यायः ॥ १०–६१ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

भगवांस्तु प्रतिदानार्थमेव गृहीतवानिति कार्यं कृत्वा तस्मै दत्तवानित्याह स्यमन्तकमिति। ज्ञातिभ्यो गोत्रजेभ्यो विवदमानेभ्यः। आत्मनो रजोऽपकीर्तिं विमृज्य मार्जयित्वा। अनेनाग्रिमकार्ये लेपदानाविव पूर्वरङ्गः कृत इति लक्ष्यते। भगवति दोषारोपाभावे हि सर्वे उद्धर्तुं शक्या इति। अतः स्वकार्यं कृत्वा तस्मै प्रत्यर्पयत्। भूय इत्यनेन पूर्वमपि सत्यभामास्थानीयं मणिं दत्तवानिति लक्ष्यते। **विभुः** समर्थः। तस्मै दत्त्वापि तं दण्डयितुमिति। अपेक्षाभावाद्वा ॥ ४१ ॥ एवमध्यायद्वये लौकिकी भाषा निरूपितेति साक्षादुपयोगाभावात् श्रवणे फलमाह **यस्त्वेत**दिति। एतदाख्यानम्। अत्राख्याने त्रिविधा लीला वर्तत इति ज्ञापयितुं भगवतो नामत्रयम्। भगवत्त्वाच्छास्त्रार्थत्वम्, ईश्वरत्वादावश्यकत्वम्, विष्णुत्वात्पापनाशकत्वमिति। चरित्रेऽपि गुणत्रयमाह **वीर्याढ्यं वृजिनहरं सुमङ्गलं चे**ति। भक्तिजनकं पापनाशकं पुण्यसम्पादकं च। चकाराज्ज्ञानप्रदम्। तत्र क्रियामपि त्रिविधामाह **पठति श्रृणोत्यनुस्मरेद्वे**ति। श्रवणकीर्तनस्मरणानि विकल्पेन विधीयन्ते। समुच्चयेन च। चकारादन्येषु फलेषु विकल्पः, भक्तौ समुच्चय इति। पूर्वमुक्तं फलमपि त्रिविधमाह **दुष्कीर्तिं दुरितमपोह्य याति शान्ति**मिति। दुष्कीर्तिर्बाह्या। दुरितमान्तरम्। दोषद्वयं परिहृत्य लयविक्षेपजनकाभावात् **शान्तिं** मनसः समवस्थानं ज्ञानं वा यातीति भक्त्यङ्गत्वेनैतच्छ्रोतव्यमिति निरूपितम् ॥ ४२ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां **दशमस्कन्धविवरणे उत्तरार्धेऽष्टमोऽध्यायः** ॥ ८ ॥

श्रीसुबोधिनीसारः

स्यमंतकं मणिं ज्ञातिभ्यो दर्शयित्वात्मनो रजो मिथ्यादोषं मणिना विमृज्य निवर्त्य प्रभुर्भगवान् भूयः पुनः तस्मै अक्रूराय मणिं समर्पयत् एतेन रामागमनमपि सूचितम् ॥ ४१ ॥ भगवत ईश्वरस्य विष्णोर्वीर्यैराढ्यं युक्तं वृजिनहरं दुःखहरं सुमंगलमेतदाख्यानं यः पठति श्रृणोति अनुस्मरेद्वा स दुष्कीर्त्तिमपयशो दुरितं पापमपोह्य दूरीकृत्य शान्तिं शुद्धिमुपैति ॥ ४२ ॥

इति श्रीमद्भा० दशमस्कन्धे उत्तरार्द्धे सुबोधिन्यां टीकायां शप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

प्रभुः स्वतन्त्रः श्रीकृष्णः ज्ञातिभ्यो रामादिभ्यः स्यमन्तकं मणिं दर्शयित्वा तेन मणिनाऽऽत्मनो रजः मिथ्याभिशापं प्रमृज्य भूयस्तस्मै अक्रूराय मणिं प्रत्यर्पयत् ददौ ॥ ४१ ॥ उक्ताख्यानकीर्त्तनादेः फलं वदन्निगमयति—यस्त्विति। यस्तु पुमान् एतदाख्यानं पठति श्रृणोत्यनुस्मरेत् वा स आत्मनः दुष्कीर्तिं तन्मूलं दुरितं पापं चापोह्य निरस्य शान्तिं याति जीवन्मुक्तो भवतीत्यन्वयः। तत्र हेतुमाह—वृजिनहरमिति। दुष्कीर्त्याद्यनिष्टहेतुपापनिवारकमित्यर्थः। सुमङ्गलं चेन्निखिलेष्टहेतुपुण्यजनकमित्यर्थः। तत्रापि हेतुमाह—विष्णोर्वीर्येण प्रभावेणाढ्यं युक्तमित्यर्थः। विष्णोर्वीर्यस्याप्येवंप्रभावत्वे हेतुमाह—ईश्वरस्येति। ईश्वरत्वे हेतुमाह—भगवत इति ॥ ४२ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीकाबालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने। शप्तपञ्चाशत्तमोऽगाद्दुर्यशोमार्गशोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

स्यमन्तकमिति ॥ प्रभुः श्रीकृष्णः ज्ञातिभ्यो रामादिभ्यः स्यमन्तकमणिं दर्शयित्वा तेन मणिनाऽऽत्मनो रजः मिथ्याभिशापं प्रमृज्य भूयस्तस्मै अक्रूराय मणिं प्रत्यर्पयत् ददौ ॥ ४१ ॥ यस्त्विति ॥ यस्तु पुमान् भगवतः ईश्वरस्य विष्णोः वीर्येणाढ्यं

वृजिनहरं सुमङ्गलं च एतदाख्यानं पठति शृणोत्यनुस्मरेत् वा सः आत्मनः दुष्कीर्ति तन्मूलं दुरितं पापं चापोह्य निरस्य शान्ति याति ॥ ४२ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वीर्याढ्यं पराक्रमयुक्तं दुरितं पापं । अपोह्य त्यक्त्वा ॥ ४१ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने स्यमंतकोपाख्यानं नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्यमन्तकमिति ॥ प्रभुः श्रीकृष्णः, ज्ञातिभ्यो रामादिभ्यः, स्यमन्तकं दर्शयित्वा, मणिना आत्मनः, रजो मिथ्याभिशापं, विमृज्य अपास्य, पाठान्तरे, आत्मनः रजः, विमृज्य, पाणिना स्वहस्तेनैव, भूयः, तस्मै अक्रूराय, प्रत्यर्पयत् ददौ ॥ ४१ ॥ उक्ताख्यानकथनश्रवणस्मरणादिफलं वदन्निगमयति । यस्त्विति ॥ भगवतः, ईश्वरस्य, विष्णोः वीर्याढ्यं प्रभावप्रकाशनेन शोभमानमित्यर्थः । वृजिनहरं वदतां स्मरतां च पापहरं अनेनानिष्टनिवर्त्तकत्वमुक्तम् । सुमङ्गलं तु मङ्गलावहं च, अनेनेष्टप्रापकत्वमुक्तम् । एवंविधं, एतत् आख्यानं, यः पठति, शृणोति, अनुस्मरेद्वा, सः, दुष्कीर्त्ति दुरितं च, अपोह्य निरस्य शान्ति मुक्तिसाधनभूतमुपशमं च, याति प्राप्नोति ॥ ४२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्द्धे सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण ने स्यमन्तक मणि ज्ञातिजन स्वजन एवं आप्तजन को दिखाई, अपवाद का निवारण किया फिर स्वयं समीप में रखने के लिये समर्थ होने पर भी भक्तवर अक्रूरजी के कर कमलो में समर्पण किया ॥ ४१ ॥ सर्व समर्थ एवं परम कारुणिक भगवान् श्रीकृष्ण के ऐश्वर्यों से सर्वथा परिपूर्ण पुण्यतम यह चरित्र समस्त पापों अपराधों और दुष्कलङ्कों का निवारण करने वाला और कल्याणमय मङ्गलमय है । भक्तिभाव से इस आख्यान का श्रवण-कीर्तन-स्मरण एवं पठन करने वाला सज्जन सर्वविध कलङ्कों से और अपयश से मुक्त होकर परमानन्द को प्राप्त करता है ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे निरोधलीलायां दशमस्कन्धे उत्तरार्द्धे अनुवादे ५७ सप्तपञ्चाशत्तमोऽध्यायः ।

◆ ◆

[1]अथाष्टपञ्चाशत्तमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
५८	५४	३	१	६	१९२८	३५	४५	२००८	६२।।	

श्रीशुक[2] उवाच

एकदा पाण्डवान् द्रष्टुं प्रतीतान् पुरुषोत्तमः । इन्द्रप्रस्थं गतः श्रीमान् युयुधानादिभिर्वृतः ॥ १ ॥
दृष्ट्वा तमागतं पार्था मुकुन्दमखिलेश्वरम् । उत्तस्थुर्युगपद्वीराः [3]प्राणा मुख्यमिवागतम् ॥ २ ॥
परिष्वज्याच्युतं वीरा अङ्गसङ्गहतैनसः । सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ॥ ३ ॥
युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवन्दनम् । फाल्गुनं परिरभ्याथ यमाभ्यां [4]चाभिवन्दितः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—एकदा, प्रतीतान्, पाण्डवान्, द्रष्टुम्, युयुधानादिभिः वृत्तः श्रीमान् पुरुषोत्तमः इन्द्रप्रस्थं गतः ॥ १ ॥ वीराः, पार्थाः, अखिलेश्वरं, तं, आगतं, दृष्ट्वा, मुख्यं, आगतं, (विलोक्यः) प्राणा, इव, युगपत्, उत्तस्थुः । वीराः अच्युतं परिष्वज्य तस्य अङ्गसङ्गहतैनसः सानुरागं स्मितं, वक्त्रं वीक्ष्य मुदं ययुः ॥३॥ पुरुषोत्तमः, युधिष्ठिरस्य, भीमस्य, पादाभिवन्दनं कृत्वा, फाल्गुनं, परिरभ्य, अथ, यमाभ्यां, च, अभिवन्दितः बभूव ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अष्टपञ्चाशत्तमे तु कृष्णः पञ्चकरेऽग्रहीत् । कालिंदीं मित्रविंदां च सत्यां भद्रां च लक्ष्मणाम् ॥ १ ॥
कालिंदीं निजलाभाय तपः परमुपेयुषीम् । परिणेष्यन्प्रियावासमिंद्रप्रस्थमथागमत् ॥ २ ॥

प्रतीतान्नष्टानपि द्रुपदगृहे पुनः सर्वैर्दृष्टान् । युयुधानः सात्यकिः ॥ १ ॥ प्राणा इंद्रियाणि मुख्यं पंचवृत्ति प्राणमिव ॥ २–३ ॥ ज्येष्ठयोः प्रणामं कृत्वा समेनालिंगितः कनिष्ठाभ्यामभिवन्दितो बभूव ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पञ्च–भार्या इति शेषः । ता नामतो निर्दिशति–कालिन्दीमित्यादिना (१) निजस्य श्रीकृष्णस्य लाभाय । प्रियाणामर्जुनादीनामावासो यस्मिस्तम् (२) । "प्रतीतः सादरे ज्ञाते हृष्टप्रख्यातयोस्त्रिषु" इति मेदिनी । शौर्यादिगुणेन प्रख्यातान् कोविदान् । वा–भगवद्भक्त्याऽभरणेन भूषितान् "प्रतीतो भूषिते ख्याते ज्ञाते प्रत्यर्थिते बुधे" इति यादवः । एवं प्रासंगिकं समाप्य प्राग्वक्तुमारब्धाञ्छ्रीभगवतो विवाहानेव पुनर्वक्ष्यन्नादौ कालिंदीविवाहं वक्तुमारभते–एकदेति । पुरुषोत्तम इति भक्तवात्सल्यवत्त्वात् ॥ तं कृष्णम् । अखिलेश्वरमपि स्वगृह आगतं शैघ्र्यात्, न तु पूर्वश्रुतागमनम् । मुकुन्दमिति दर्शनमात्रेण सर्वदुःखमोचनपूर्वकपरमानन्दप्रदानात् । अतो दृष्ट्वैव युगपदासनादुत्तस्थुः । यतः पितृष्वसृष्वपि परमस्निग्धायाः पृथायाः पुत्राः वीरा इति शीघ्रोत्थाने वैशिष्ट्यं दर्शितम् । इंद्रियाणि तद्गोलकानि । प्राणं महौषधादिप्रभावेणागतं, पुनर्देहे संचरितम् ॥ २ ॥ तस्य कृष्णस्य । अच्युतमिति चिरपरिष्वंगे परमानन्ददाने च च्युतिरहितम् । एनस्तदप्राप्तिजं दुःखम् । वक्त्रमेव वीक्ष्य मुदं प्राप्तास्तत्रापि सानुरागस्मितम् ॥ ३ ॥ ज्येष्ठयोर्युधिष्ठिरभीमयोः । समेनार्जुनेन । कनिष्ठाभ्यां नकुलसहदेवाभ्याम् । तदेवमुभयेप्यानन्दात्स्वस्वव्यवहारं विस्मृत्य पुनः सावधानतया तमकुर्वन्नित्याह–युधीति । पादयोरभिवन्दनं शिरसा पादस्पर्शनपूर्वकं प्रणामम् । श्रीकृष्णार्जुनयो रोहिणीफाल्गुनजिन्मत्वेन ज्येष्ठकनिष्ठयोरपि सख्यमेव समव्यवहारे हेतुरिति ध्येयम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं प्रासङ्गिकं समाप्य प्राग्वक्तुमारब्धान् श्रीभगवतो विवाहानेव पुनर्वक्ष्यन्नादौ श्रीकालिन्दीविवाहं वक्तुमारभते एकदेति । प्रतीतान् सर्वत्र पुनरागतत्वेन विख्यातान् सतः श्रीमान् महासमृद्ध्या शोभमानः यतो युयुधानादिभिर्महासैन्यैः वृतः सन् पुरुषोत्तम इति तदुचितभक्तवात्सल्यादिकं सूचितम् । सात्यकेर्मुख्यत्वं पाण्डवप्रियत्वात् ॥ १ ॥ अखिलेश्वरमपि स्वगृहे

---

१. अथ द्विषष्टितमो–विज. । २. बादरायणि–प्रा. पा. । ३. प्राणं–विज. । ४. वादि–श्रीधर. टि. ।

आगतं शीघ्रमागमनान्न तु पूर्वं श्रुत्वा गमनं मुकुन्दमिति दर्शनमात्रेणैव सर्वदुःखमोचनपूर्वकपरमानन्दप्रदानात् अतो दृष्ट्वैव युगपदासनादुत्तस्थुः यतः पार्थाः पितृस्वसृष्वपि परमस्निग्धायाः पृथायाः पुत्राः वीरा इति शीघ्रोत्थाने वैशिष्ट्यं दर्शितम् प्राणा इन्द्रियाणि तद्गोलकानीत्यर्थः। प्राणम् महौषध्यादिप्रभावेणागतम् पुनर्देहे सञ्चरितम् ॥ २ ॥ वीरा इति पूर्ववत् अच्युतमिति चिरपरिष्वङ्गे परमानन्दप्रदाने च च्युतिराहित्याभिप्रायेण एनस्तदप्राप्तिजं दुःखं वक्त्रमेव वीक्ष्य मुदं प्राप्ताः तत्रापि साऽनुरागस्मितमित्यर्थः ॥ ३ ॥ तदेवमुभयेऽप्यानन्दात् स्वस्वव्यवहारं विस्मृत्य पुनः सावधानतया तमकुर्वन्नित्याह—युधीति। फाल्गुनम्परिरभ्य स्थितः सन् यमाभ्यामभिवन्दितो बभूवेत्यर्थः। अभिवादित इति पाठे स एवार्थः पादयोरभिवन्दनं शिरसा पादस्पर्शनपूर्वकं प्रणाममित्यर्थः। श्रीकृष्णाऽर्जुनयोरोहिणीफाल्गुनी—जन्मत्वेन ज्येष्ठकनिष्ठयोरपि, सख्यमेव समत्वव्यवहारे हेतुरिति ज्ञेयम् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं प्रासंगिकं समाप्य प्राग्वक्तुमारब्धान् श्रीभगवतो विवाहानेव पुनर्वक्ष्यन्नादौ श्रीकालिन्दीविवाहं वक्तुमारभते—एकदेति। तदेवाभिव्यञ्जयति—प्रतीतानिति। यदा प्रतीतास्तदेत्यर्थः। पुरुषोत्तम इति—भक्तवात्सल्याद्यशेष-सत्पुरुषगुणवत्त्वं सूचयति, अतो द्रष्टुं गतः। इन्द्रप्रस्थमिति प्राक् हस्तिनापुरे सहैवावस्थानाद् दुष्टदुर्य्योधनादिभिर्हिंस्यमानानां तेषां द्रुपदगृहे श्रीद्रौपदीविवाहानन्तरं श्रीभीष्माज्ञया धृतराष्ट्रेणानाय्य राज्यार्द्धप्रदानेनेन्द्रप्रस्थ एव निवासात्, इत्याद्यशेषवृत्तमादिपर्व्वणि विस्तरशो व्यक्तमित्यत्र न विवृतम्। श्रीमान् महासमृद्ध्या शोभमानः सन् चिरमाप्तदुःखानां तेषां सर्व्वसमृद्धिं प्रदातुमिति भावः। सात्यकेर्मुख्यत्वं पाशुवप्रियत्वात्, श्रीबलदेवेनासाहित्यञ्च ज्ञेयम्। तस्य दुर्य्योधनगुरुत्वादिना पाण्डवेषु स्नेहविशेषाभावात्, श्रीकालिन्दीपरिग्रहादौ तत्संगानुपयोगाद्वा। अन्यत्तैर्व्याख्यातम्। यद्वा, इन्द्रप्रस्थं प्रति इतान् प्राप्तान्, ततस्ततो निवृत्त्यागतान् वा ॥ १ ॥ अखिलेश्वरमपि स्वगृहे आगतं मुकुन्दमिति दर्शनमात्रेणैव परमानन्दप्रदानात्, अतो दृष्ट्वैव युगपदासनादुत्तस्थुः; किंवा चिराप्राप्त्या मृता इवाधुनाऽजीवन्नित्यर्थः, यतः पार्थाः पैतृष्वसेयाः, तत्रापि वीरा भक्तौ महासमर्थाः, अप्राप्यावाप्त्या। युगपदुत्थाने दृष्टान्तः—प्राणा इति, उपघातादिना लीनतया गतप्रायं पुनरागतं प्राणं प्राप्य यथोत्तिष्ठन्ति चेष्टन्ते, तद्वदित्यर्थः ॥२॥ परिष्वज्यालिग्य, यतो वीरा भक्तिशूराः; अच्युतमिति तेषामिव परिष्वंगे, किंवा परमानन्दप्रदाने; यद्वा, परिष्वंगेऽभिनिवेशेन तेषां वक्षःस्थलाच्च्युतिराहित्याभिप्रायेण, एनः सांसारिकं तदप्राप्तिजं वा दुःखम्, अनुरागेण यत् स्मितं तत्सहितमिति तेन स्वविषयक-कृपातिरेकमननात् सहजसौन्दर्य्यविशेषाद्वा मुदं प्रापुः। एवं सर्व्वदुःखहानिर्महासुखावाप्तिश्चोक्ता ॥ ३ ॥ एवं प्रेमसम्भ्रमेणालिंगनमात्रं कृतवतस्तानाशीर्व्वादादिव्यवहारेऽशक्तान् किंवा विनयादिना तत्राप्रवर्त्तमानान् विलोक्य स्वयमेव लोकशिक्षार्थं सदाचारमपालयदित्याह—युधिष्ठिरस्येति। पादयोरभिवन्दनं शिरसा पादस्पर्शनपूर्व्वक-प्रणाममित्यर्थः। अथ ज्येष्ठयोः पादाभिवन्दनात् पश्चादेव फाल्गुनं परिरभ्य, न तु तस्मिन् स्नेहविशेषेणादावित्यर्थः ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

प्राणा इन्द्रियाणि मुख्यम् पञ्चवृत्तिप्राणम् ॥ २-१२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ भगवतः कालिन्दीमित्रविन्दानाग्नजितीभद्रालक्ष्मणानां विवाहं वर्णयत्यष्टपञ्चाशत्तमेन। तावत्कालिन्दीविवाहोपोद्घातमाह—एकदेत्यादिना। अथोपयेम इत्यतः प्राक्तनेन प्रतीतान्नष्टानिति श्रुतानपि पुनर्द्रुपदगृहे सर्वैर्दृष्टान् पाण्डवान् द्रष्टुं युयुधानः सात्यकिः आदिर्येषां तैर्यदुभिः परिवृतः इन्द्रप्रस्थं ययौ ॥ १ ॥ दृष्ट्वेति पृथायाः कुन्त्या अपत्यानि वीरा युधिष्ठिरादयस्तमागतं कृष्णं दृष्ट्वा युगपदुत्तस्थुः यथा प्राणा इन्द्रियाणि आगतं मुख्यं पञ्चवृत्तिप्राणमनूत्तिष्ठन्ति तद्वत् ॥ २ ॥ परिष्वज्येति—प्रीतास्तमच्युतमालिङ्ग्य अच्युतस्याङ्गसङ्गेन हतान्येनांसि पापानि येषान्ते पार्थाः तस्यानुरागेण सहितं स्मितं यस्मिंस्तन्मुखमवलोक्य मुदं हर्षं प्रापुः ॥ ३ ॥ युधिष्ठिरस्येति—पादाभिवन्दनं कृत्वा तयोरधिकवयस्कत्वादिति भावः। फाल्गुनमर्जुनं परिष्वज्याऽऽलिङ्ग्य तस्य तुल्यवयस्कत्वात् यमाभ्यां यमलाभ्यां नकुलसहदेवाभ्यामभिवादितः नमस्कृतः तयोर्न्यूनवयस्कत्वादिति भावः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

तत्तदधिकारिणां तत्तद्योग्यगुणोपसंहारार्थं भक्तवात्सल्यादिविशेषं कथयति कतिपयेष्वध्यायेषु तत्रादौ हरेर्भक्तवात्सल्यं दर्शयितुमाह—एकदेति। एकदा कस्मिंश्चिदवसरे प्रतीतान् शौर्यादिगुणेन प्रख्यातान् कोविदान्वा भगवद्भक्त्याभरणेन भूषितान्वा "प्रतीतोभूषिते ख्याते ज्ञाने प्रत्यर्थिते बुधे" इति यादवः "प्रतीताः प्रथितख्यातीवत्तविज्ञातकोविदाः" इत्यमरः ॥ १ ॥ मुकुन्दं मुक्तिप्रदं शरीरं प्रत्यागतं प्रविष्टं मुख्यप्राणं दृष्ट्वा चक्षुरादीन्द्रियाणि यथोत्तिष्ठन्ति ॥ २ ॥ अच्युतस्याङ्गसङ्गेन ॥ ३-४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

एनस्तदप्राप्तजं दुःखम् ॥ ३-६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अष्टपञ्चाशत्तमे तु पाण्डून् प्रेक्ष्यापपञ्चसः । कालिन्दीमित्रविन्दाश्रीसत्याभद्राः सलक्ष्मणाः ॥

प्रतीतान्नष्टानपि द्रुपद्रुपदगेहे पुनः सर्वैर्दृष्टान् युयुधानः सात्यकिः ॥ १ ॥ प्राणा इन्द्रियाणि मुख्यं पञ्चवृत्तिं प्राणमिव ॥ २-३ ॥ अभिवादितः कृष्णस्तस्थौ ॥ ४ ॥

गूढार्थदीपिनी

अष्टपञ्चाशत्तमे तु कन्याः पञ्चाऽग्रहीद्धरिः । कालिन्दीं मित्रविन्दां च सत्यां भद्रां च लक्ष्मणाम् ॥ १ ॥

प्रतीतान् द्रुपदगेहे ज्ञातान् । प्रतोतः सादरे ज्ञाते इति मेदिनी । युयुधानः सात्यकिः ॥ १ ॥ युगपत् एककालावच्छेदेन । मुख्यं प्राणम् आगतं यथा प्राणा इन्द्रियाणि सक्रियाणि भवन्ति ॥ २ ॥ हतम् एनोऽत्र दुःखम् येषाम् ॥ ३ ॥ फाल्गुनमर्जुनम् फाल्गुनीनक्षत्रे जातत्वात् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अष्टपञ्चाशत्तमे कालिन्दीमित्रविन्दासत्याभद्रालक्ष्मणानां भगवानुद्वाहं कृतवानित्याह—एकदेति । प्रतीतान् जतुवेश्मनि नष्टाः इत्येवं श्रुतानपि द्रौपदीस्वयम्बरे पुनः सर्वैः दृष्टान् इन्द्रप्रस्थे लब्धराज्यान् युयुधानः सात्यकिः ॥ १ ॥ प्राणा इन्द्रियाणि मुख्यं पञ्चवृत्तिम् ॥ २-४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ सर्वदा भक्तपरवान्हरिरिति प्रतिपाद्यतेऽत्र । तत्रादौ पाण्डवानां नष्टोज्जीवदृष्टितुष्टिमानिव द्रष्टुमगमदिन्द्रप्रस्थमिति वक्ति ॥ एकदेति । प्रतीतान्प्राग्लाक्षागृहदाहतो हता इति मतान् इदानीं च प्रख्यातिमतः सन्तीति प्रमितानिति यावत् । प्रतीतः शारदे ज्ञाते प्रतीतः ख्यातदृष्टयोः । वाच्यवत्स्यात्प्रतीतं तु प्रोषितेऽपि मृतेऽपि चेति विश्वः । प्रतीतो भूषिते ज्ञाने ख्याते प्रत्यर्थिते बुध इति यादवः । प्रतीतः प्रथितः ख्याते वित्तविज्ञानकोविदा इत्यमरः । युयुधानः सात्यकिरादिर्येषां तैर्युतः ॥१॥ पार्थाः पृथासम्बन्धिनस्तत्पुत्रा इति यावत् । तमागतं मुकुन्दमखिलेश्वरं दृष्ट्वा । तमागतमित्यखण्डं पदम् । तमाया गतं गतिर्येन स चन्द्रस्तद्वद्विद्यमानं युगपदेकदैव । प्राणा इन्द्रियाणि मुख्यप्राणमागतं शरीरान्तर्निविष्टं द्रष्ट्वा यथोत्तिष्ठन्ति तथोत्तस्थुः । वीरा इति क्वाचित्के पाठे चेन्द्रियाणीति शेषः । यद्वा वीरा इति पाठोऽपि स एवार्थः । विविधा ईरा वीराः पञ्चप्राणा इति ॥२॥ अङ्गसङ्गेन हतमेनः पापं येषां ते तथा वीराः पञ्चाप्यविशेषेणाच्युतं कृष्णं परिष्वज्यालिङ्ग्याच्युतं दृढं यथा तथेति वा । सानुरागस्मितमनुरागः स्नेहस्तद्धेतुकं यत्स्मितं तेन सहितं तद्वक्त्रं च वीक्ष्य मुदं ययुः ॥ ३ ॥ बहुतिथं दर्शने सति परवशत आश्लेषमुक्त्वा क्रामिकमभिवन्दनमाह ॥ युधिष्ठिरस्येति । युधिष्ठिरस्य धर्मस्य भीमस्य तथा प्रदर्शनमात्रं नाभिमर्शनं । शुद्धे भागवते धर्मे निरतो यद्वृकोदर इत्यादेः । लोके लोकैरेवमनुष्ठेयमिति शिक्षणार्थमेवमपि कृतिः । फाल्गुनमर्जुनं परिरभ्य । अथार्जुनाज्जैष्ठ्यात्स्नेहविशेषात्परिरभ्यास्थितो कृष्णोऽथानन्तरमभिवन्दितस्तेनार्जुनेनेति शेषः । यथोक्तं भारते वनपर्वणि । अर्जुनात्केशवो ज्येष्ठः षड्भिर्मासैर्महाभुज इति । यमाभ्यामभिवन्दितो नमस्कृतः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नवमे पञ्चकन्यानां विद्यापर्वस्वरूपतः । विवाहः प्रोच्यते सम्यक् कृष्णेनाशेषमुक्तये ॥ १ ॥
मायासम्बन्धदोषेण क्रोधः कामस्तथापरः । निराकृतः सर्वमुक्त्यै विद्याफलमतः परम् ॥ २ ॥
त्रैलोक्यसुखदानं च मायादोषनिवारणम् । द्वाभ्यां तथैव सर्वेषां राजसे पूर्णता ततः ॥ ३ ॥
विद्यायाः सूर्यमुख्यत्वात्प्रथमा दुहिता रवेः । विपक्षनिग्रहात्मत्वात् द्वितीया सोमवंजा ॥ ४ ॥
मार्गद्वयं हितार्थाय द्वयं स्वीकृतवान् हरिः । भक्तानभक्तानालक्ष्य तृतीया सूर्यवंशजा ॥ ५ ॥
भक्तिरूपा प्रयत्नेन याचयित्वा स्वयं गतः । व्यसनानि निराकृत्य तदुद्वाहं चकार ह ॥ ६ ॥
अग्रे बाधास्तु भक्तेन ह्यर्जुनेन निराकृताः । ज्ञानभक्त्योरतो भूयान् पर्वणोरुद्यमः कृतः ॥ ७ ॥
धर्मस्नेहौ तयोरङ्गं मध्यमो लौकिकः स्मृतः । द्वयोः स्वतन्त्रतासिद्ध्यै जीवानां तु ततो द्विधा ॥ ८ ॥
भक्तिज्ञानफले कृष्णः पुंसां स्त्रीणां चकार ह । अतो दत्तां स्वयं दत्तामक्लेशक्लेशभावनात् ॥ ९ ॥
उपयेमे स्वयं कृष्णस्तासु सर्वं प्रतिष्ठितम् । ततः सर्वकलाभिस्तु हरिः पूर्णो निरूप्यते ॥ १० ॥
सषष्ठो भगवानेवं निःसन्दिग्धो निरूपितः ।

तत्र प्रथमविवाहे तत्त्वानि भगवांश्च व्यापृत इति नवविंशतिश्लोकैर्विवाहो निरूप्यते। तत्र भक्तिकर्मणी ज्ञाने अङ्गभूते इति निरूपयितुं द्वादशभिर्भक्तिं पञ्चभिः कर्म च निरूपयति। ततो भक्तद्वारा दशभिस्तद्ग्रहणम्, प्रसङ्गाद्भक्तोपकारश्च। भक्तोद्धारार्थं यतमान एव ज्ञानशक्तिं गृह्णातीति वक्तुं पाण्डवानां स्थाने भगवान् गत इत्याह **एकदे**ति। प्रतीतान् निश्चितान् राधावेधे वा दृष्टान्। तथापि तत्र तदा न प्रकटीभूता इति पश्चाद्गतः। प्रतीतिस्तु सन्देहाभावायैव। लोके प्रज्ञातान्। **पुरुषोत्तम** इति तान् सर्वान् पुत्रत्वेन निरूपयति। तेनावेक्षार्थं गमनं युक्तमेव। इन्द्रप्रस्थे तावता तैः स्थानं लब्धम्, नारदोपदेशतः भीष्मादिभिरेव दत्तम्। ननु तदानीमेव तत्र गताः पाण्डवा असाधनाश्च स्वार्थमेव सामग्रीरहिताः किं भगवदर्थे सम्पादयिष्यन्तीत्याशङ्क्याह **श्रीमा**निति। स्वयमेव सर्वसाधनलक्ष्मीयुक्तः। तेषां साधनसम्पादनार्थमेव गतः। अतएव महाशूरैः सुबुद्धिभिर्युयुधानादिभिर्वृतः। **युयुधानः** सात्यकिः। स तत्रार्जुनशिष्यो भविष्यति। भगवांश्च विश्वकर्मादिभिर्गृहादिकं सम्पादयिष्यतीति। एतदर्थं भगवद्गमनम्। बहुपुरुषैः सम्पादितगृहतुल्यम्, अन्यथा तद्गृहं न भवेत्। उत्कर्षश्च सम्पादनीयः॥ १॥ एवं भक्तार्थं भगवद्गमने भक्तानां कृत्यमाह **दृष्ट्वा तमागत**मिति द्वाभ्याम्। आगमनसम्भावनापि न स्थिता। अकस्मादागत एव पार्थाः स्वयं राजानः पृथायाः भक्तायाः पुत्राः। अत एवाग्रे तस्या भक्तिं वक्ष्यति त्रिभिः। भगवांश्च मुकुन्दः। अनेनेष्टदो निरूपितः। अखिलेश्वरत्वादावश्यकः। अतो युगपदेव सर्वे उत्तस्थुः। **वीरा** इति तेषां स्वधर्मो निरूपितः। अन्यस्तु भगवत्परो न भवतीति। स्वतः परम्परातश्च उत्तमाः भगवति परं स्नेहं प्राप्तवन्त इति दृष्टान्तेनाह **प्राणा मुख्यमिवागत**मिति। इन्द्रियाण्या सन्यमागतमिव। तेषां तन्मूलकमेव सर्वमिति। एवं सर्वात्मना तदीयत्वमुपपाद्य तादृशानकर्तव्यमाह **परिष्वज्ये**ति। भगवदालिङ्गनं निरन्तरमेव स्थास्यतीति **अच्युत**मिति। भगवतस्तथात्वज्ञानं स्वधर्मादिवेति वक्तुं पुन**र्वीरा** इति। अङ्गसङ्गेनैव हतमेनो येषाम्। उत्तरार्थं पापक्षयः आनुषङ्गिको जात इति निरूपितम्। अतएव भगवतः सानुरागस्मितं वक्त्रं दृष्ट्वा तदेव पुरुषार्थत्वेन मन्यमानाः मुदं ययुः। एतावदेव भक्तकार्यम्॥ ३॥ ततो लौकिकं भगवान् कृतवानित्याह **युधिष्ठिरस्ये**ति। अन्यथा शत्रुमारणादिकं न कुर्युः। तत उत्कर्षश्च न स्यात्। अतो व्यामोहार्थं स्वयमात्मानं लौकिकं प्रदर्शितवान्। युधिष्ठिरभीमौ ज्येष्ठौ। अर्जुनः समः। अन्यौ कनिष्ठौ। ज्येष्ठयोर्नमस्कारः। समस्यालिङ्गनं सम्भाषणं च। अन्ययोर्नमस्कारानन्तरमाशिषः। तदुक्तं क्रमेणैव। पादाभिवन्दनादाचारो निरूपितः सम्बन्धकृतः। **अथ** यमाभ्यामिति वा, समानकालेऽपि सम्भवतीति धर्मव्यवस्थां निरूपयितुमानन्तर्यमुक्तम्। आन्तरोऽयं सुहृदिति ज्ञापयितुम्॥ ४॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

नवमे। मायेति। माया रुक्मिणी, तत्सम्बन्धरूपदोषेण भगवति कामः क्रोधस्तथापरो लोभश्च प्राप्तः, स निराकृतः। क्रमो न विवक्षितः। भगवति कामः पुत्राद्यभिलाषो नास्ति। तथा सति नारदादिसर्वसंमतिं विनैव प्रद्युम्नं गृह्णीयात्। तथा क्रोधोपि नास्ति। तथा सति जाम्बवति प्रसादं न कुर्यात्। लोभोपि नास्ति। तथासति मणिं स्वयमेव गृह्णीयात्। एवं त्रिभिरध्यायैर्दोषत्रयाभाव उक्तः। अतः परं विद्यारूपं फलं निरूप्यते। तथा सति निर्दोषगुणत्वं भगवति सेत्स्यतीति भावः। ततो दशमाध्याये त्रैलोक्यै यत्सुखं तद्दानम्। ततो द्वाभ्यां मायाया रुक्मिण्या दोषनिवारणम्। तत्रान्तरदोषनिवारणमाद्येन। द्वितीयेन बाह्यदोषस्य रुक्मिणो निवारणम्। ततः सर्वेषां दोषनिवारणं तथैव द्वाभ्यामेवेत्यर्थः। कालिन्दी ज्ञानरूपा। मित्रविन्दा तपोरूपेत्यादिनिबन्धाज्ज्ञेयम्। भक्तानिति। 'भक्त्या मामभिजानाती'तिवाक्याद्भक्तानालक्ष्य ज्ञानमार्गः। भक्तिरहितानालक्ष्य तपोमार्ग इत्यर्थः। **तृतीये**ति। इयं भक्तिरूपा। अतः स्वयं गतः सन् याचयित्वा व्यसनानि निराकृत्य तदुद्वाहं चकारेत्यर्थः। अत्रेयं भक्तिरूपेत्युक्तम्। निबन्धे लक्ष्मणा भक्तिरूपा। नाग्नजिती योगात्मिकेति निरूपितम्। तत्र विकल्पो ज्ञेयः। **अत** इति। यतोऽत्र भगवतो भूयान् पक्षः। अतो हेतोर्ज्ञानभक्तिरूपयोः पर्वणोः कालिन्दीनाग्नजितीविवाहयोर्भूयानुद्यमो विस्तारः कृतः। **धर्मे**ति। कालिन्दी विष्णुं वरेण्यं ज्ञात्वा धर्मबुद्ध्या वृतवती। नाग्नजिती स्नेहेन वृतवतीत्यर्थः। **मध्यम** इति। मित्रवृन्दाविवाहो लौकिकभावयुक्त इत्यर्थः। **द्वयो**रिति। द्वयोर्ज्ञानभक्त्योः सम्बन्धिजीवानां ज्ञानिनां भक्तानां च स्वतन्त्रतासिद्ध्यै मध्ये लौकिको विवाह उक्त इति पूर्वेण सम्बन्धः। मध्ये तत्कथनेनोभयोर्विच्छेदः कृतः। तेनोभयोः स्वतन्त्रता, नत्वङ्गाङ्गिभाव इति सूचितमित्यर्थः। ततस्तदनन्तरं कृष्णः भक्तिर्ज्ञानं च फलं ययोस्तादृशे योगसाङ्ख्ये पुंसां स्त्रीणां चोभयत्रोभयं चकार। अतो हेतोर्दत्तां पित्रेतिशेषः। पित्रा दत्तां साङ्ख्यरूपां भद्रां स्वयमेव स्वयंवरे दत्तां योगरूपां लक्ष्मणामुपयेमे इत्यर्थः। **अक्लेशे**ति। ल्यब्लोपे पञ्चमीयम्। तथा च क्लेशभावनमक्लेशरूपक्रियां प्राप्य भद्रामुपयेमे। मध्ये युद्धकथनात् क्लेशभावनं प्राप्य लक्ष्मणामुपयेम इत्यर्थः। अत्र नाग्नजित्या भक्तिरूपत्वकथनाल्लक्ष्मणाया योगरूपत्वमिति ज्ञेयम्। **अत** इति। विद्यायाः पञ्चविद्याया अपि सिद्धत्वादित्यर्थः। **सषष्ठ** इति। इमाः पञ्च स्वयं षष्ठः। एवं सति षड्विधत्वात् निःसंदिग्धो भगवानेव निरूपितो जात इत्यर्थः। **दृष्ट्वे**त्यत्र। **परं स्नेह**मिति। आगतमात्रेण सहसोत्थानं स्नेहकार्यम्। तथा च स्नेहं स्नेहकार्यमित्यर्थः।

श्रीसुबोधिनी–सारः

शुकोक्तिः। एकस्मिन् काले प्रतीतान् द्रुपदस्वयंवरे विख्यातान् विख्यातान् मत्स्यवेधनद्रौपदीविवाहादिना पांडवान् द्रष्टुं श्रीमानित्यनेन तत्पुरनिर्माणसंपत्तिसंपादनं सूच्यते युयुधानः सात्यकिस्तदादिभिर्वृतः पुरुषोत्तमः श्रीकृष्ण इन्द्रप्रस्थं गतः ॥१॥ अखिलेश्वरं सर्वनियंतारम् आगतं मुकुंदं तं दृष्ट्वा वीराः पार्थां युगपत्सहैवोत्तस्थुः आगतं मुख्यं प्राणं दृष्ट्वा प्राणा इन्द्रियाणीव ॥२॥ अच्युतं श्रीकृष्णं परिष्वज्य मिलित्वा अंगस्य तन्मूर्तेः संगादासर्वतो हतान्येनांसि पापानि येषां ते वीराः पांडवा अनुरागः प्रीतिः स्मितं मंदहासस्ताभ्यां सहितं तस्य कृष्णस्य मुखं वीक्ष्य दृष्ट्वा मुदं ययुर्हर्षं प्रापुः ॥ ३ ॥ युधिष्ठिरस्य पादयोरभिवंदनं प्रणामं कृत्वा ज्येष्ठत्वात् फाल्गुनमर्जुनं परिरभ्यालिंग्य सखित्वात् अथानंतरं यमाभ्यां नकुलसहदेवाभ्यां चाभिवंदितः कृतप्रणामः स्वयमासीत् कनिष्ठत्वात् ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अष्टपञ्चाशत्तमे तु कृष्णस्योद्वाहपञ्चकम् । कालिन्दीमित्रविन्दादिभिः साकं विनिरूप्यते ॥ १ ॥

तत्र तावत् कालिन्दीविवाहोपोद्घातमाह—एकदेत्यादिना । प्रतीतान् नष्टानिति श्रुतानपि पुनर्द्रुपदगृहे सर्वैर्दृष्टान् पाण्डवान् द्रष्टुं युयुधानः सात्यकिः आदिर्येषां तैर्यदुभिः परिवृतः श्रीमान् शोभातिशययुक्तः पुरुषोत्तमः कृष्णः एकदा इन्द्रप्रस्थं गत इत्यन्वयः ॥ १ ॥ पार्थाः पृथापुत्राः वीरा युधिष्ठिरादयस्तं मुकुन्दं मुक्तिदातारं कृष्णमागतं दृष्ट्वा युगपदेकदैवोपतस्थुः । तत्र दृष्टान्तमाह—प्राणा इति । यथा मुख्यं पञ्चवृत्तिकं प्राणं विना प्राणा इन्द्रियाणि प्रथमं मूर्छितानि भवन्ति, तमागतं दृष्ट्वा च युगपत् सचेष्टानि भवन्ति, तद्वदित्यर्थः । मुक्तिप्रदत्वे हेतुमाह—अखिलानां सर्वेषां ब्रह्मादीनामपि ईश्वरं नियन्तारमिति ॥ २ ॥ उत्थिताः सन्तो यत् कृतवन्तस्तदाह—परिष्वज्येति । वीरा युधिष्ठिरादयः अच्युतं स्वरूपतो गुणतश्च च्युतिरहितं श्रीकृष्णं परिष्वज्य आलिङ्ग्य तस्य वक्त्रं मुखं च वीक्ष्य मुदं ययुः हर्षं पापुः । 'कीदृशस्य मुखस्य दर्शनं तेषां हर्षजनकं जातम्' इत्यपेक्षायामाह—अनुरागेण सहितं स्मितं मन्दहासो यस्मिंस्तदिति । 'पापिनां तद्दर्शनाद्यानन्दो न भवति' इत्याशयेनाह—तस्य अङ्गसङ्गेन हतान्येनांसि पापानि येषां त इति ॥ ३ ॥ युधिष्ठिरभीमयोरधिकवयस्कत्वात् पादाभिवन्दनं कृत्वा फाल्गुनस्य अर्जुनस्य तुल्यवयस्कत्वात्तं परिरभ्य आलिङ्ग्य अथ अनन्तरं नकुलसहदेवयोर्न्यूनवयस्कत्वात्ताभ्यां यमाभ्यां यमलाभ्यामभिवादितो बभूव ॥ ४ ॥

अन्वितार्थप्रकाशिका

अष्टपञ्चाशत्तमे तु कालिन्दीप्रमुखा हरिः । पञ्चोदुबाह तच्छ्लोकाः कथिता गजमार्गणाः (५८) ।
षडुवाचेत्यथो पादयुक्ता षष्टिरनुष्टुभः (६०।) ॥ ५८ ॥

एकदेति ॥ प्रतीतान् लाक्षागृहे नष्टा इति श्रुतानपि पुनर्द्रुपदगृहे सर्वैर्दृष्टान् पाण्डवान् द्रष्टुं युयुधानः सात्यकिः आदिर्येषां तैर्यदुभिः परिवृतः श्रीमान् शोभातिशययुक्तः पुरुषोत्तमः कृष्णः एकदा इन्द्रप्रस्थं गतः ॥ १ ॥ दृष्ट्वेति ॥ वीराः पार्थाः तम् अखिलेश्वरं मुकुन्दमागतं दृष्ट्वा युगपदेव उत्तस्थुः । तत्र दृष्टान्तः । यथा मुख्यं पञ्चवृत्तिकं प्राणमागतं दृष्ट्वा प्राणा इन्द्रियाणि युगपत्सचेष्टानि भवन्ति तथा ॥ २ ॥ परिष्वज्येति ॥ वीराः पाण्डवाः अच्युतं परिष्वज्य तस्याङ्गस्य सङ्गेन हतान्येनांसि पापानि येषां तादृशाः सन्तः सानुरागं स्मितं यस्मिंस्तत् तस्य अच्युतस्य वक्त्रं वीक्ष्य मुदं ययुः ॥ ३ ॥ युधिष्ठिरस्येति ॥ युधिष्ठिरस्य भीमस्य च ज्येष्ठत्वात्पादाभिवन्दनं कृत्वा फाल्गुनस्यार्जुनस्य तुल्यवयस्कत्वात्तं परिरभ्य नकुलसहदेवयोः कनिष्ठत्वात् ताभ्यां यमाभ्यां यमलाभ्यामभिवादितो बभूव । रोहिण्यां श्रीकृष्णः "फल्गुन्यामर्जुनो जातः" इति अष्टभिर्दिनैः श्रीकृष्णस्य ज्यैष्ठ्येऽपि सख्यात्समत्वेन व्यवहारः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीमष्टपंचाशत्तमेऽध्याये हरिकृतं पंचानां कालिंदीमित्रविंदानाग्नजिती भद्रालक्ष्मणानां पाणिग्रहणं निरूप्यते एकदेति प्रतीतान् सर्वत्रपुनरागतत्वेन प्रसिद्धान् । युयुधानः सात्यकिस्तत्प्रभृतिभिः सैन्यैः ॥ १ ॥ प्राणा इंद्रियाणि आगतं मुख्यं सजीवं प्राणं प्राप्येव ॥ २ ॥ अंगसंगेन हतानि एनांसिदर्शनविरोधिपापानि येषां ते तस्य श्रीकृष्णस्य ॥ ३ ॥ फाल्गुनमर्ज्जुनं यमाभ्यां कनिष्ठाभ्यां नकुलसहदेवाभ्यां ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

करे पञ्चाग्रहीत् कृष्णोऽष्टपञ्चाशत्तमे क्रमात् । कालिन्दीं मित्रविन्दां च सत्यां भद्रां च लक्ष्मणाम् ॥ १ ॥
कालिन्दीमात्मलाभाय तपन्तीं तप उत्तमम् । वरिष्यंस्तत्प्रियावासमिन्द्रप्रस्थमगाद्धरिः ॥ २ ॥

तत्रादौ कालिन्दीविवाहोपोद्घातमाह एकदेत्यादिनाऽथोपयेम इत्यतः प्राक्तनेन ग्रन्थेन । एकदेति । एकदा कदाचित्, श्रीमान् पुरुषोत्तमः श्रीकृष्णः, प्रतीतान् लाक्षागृहे नष्टान् श्रुतानपि, पुनर्द्रुपदगेहे सर्वैर्दृष्टानित्यर्थः । पाण्डवान् द्रष्टुं, युयुधानादिभिः

सात्यकिप्रभृतियदुभिः, वृतः परिवृतः सन्, इन्द्रप्रस्थं **गतः ययावित्यर्थः** ॥ १ ॥ दृष्ट्वेति ॥ पृथायाः कुन्त्या अपत्यानि पार्थाः, वीरा युधिष्ठिरादयो वीरपुरुषाः, अखिलेश्वरं मुकुन्दं, तं श्रीकृष्णं, आगतं दृष्ट्वा, प्राणा इन्द्रियाणि, आगतं, मुख्यं पञ्चवृत्तिप्राणं इव, इन्द्रियाण्यागतं मुख्यप्राणं दृष्ट्वा, यथाऽभ्युत्तिष्ठन्ति तद्वदित्यर्थः । युगपत्, उत्तस्थुः ॥ २ ॥ परिष्वज्येति । वीराः युधिष्ठिरादयः, अच्युतं श्रीकृष्णं, परिष्वज्यालिङ्ग्य, अङ्गसङ्गेन अच्युताङ्गसङ्गेन हतान्येनासि पापानि येषां तथाभूताः सन्तः, तस्याच्युतस्य, सानुरागमनुरागेण सहितं स्मितं यस्मिंस्तत्, वक्त्रं मुखं, वीक्ष्य अवलोक्य, मुदं हर्षं, ययुः प्रापुः ॥ ३ ॥ युधिष्ठिरस्येति ॥ अथ, अच्युतः युधिष्ठिरस्य, भीमस्य, पादाभिवन्दनं कृत्वा, तयोः स्ववयसोऽधिकवयस्कत्वादिति भावः । फाल्गुनमर्जुनं, परिरभ्य परिष्वज्य, तस्य तुल्यवयस्कत्वात् । यमाभ्यां यमलाभ्यां नकुलसहदेवाभ्यां, अभिवन्दितः नमस्कृतः । तयोर्न्यूनवयस्कत्वादिति भावः ॥ ४ ॥

कृष्णप्रिया

श्रीशुकदेव जी कहते हैं—परीक्षित् ! अब पाण्डवों का पता चल गया था कि वे लाक्षाभवन में जले नहीं है। एक बार भगवान् श्रीकृष्ण उनसे मिलने के लिये इन्द्रप्रस्थ पधारे। उनके साथ सात्यकि आदि बहुत-से यदुवंशी भी थे ॥ १ ॥ जब वीर पाण्डवों ने देखा कि सर्वेश्वर भगवान् श्रीकृष्ण पधारे हैं तो जैसे प्राण का सञ्चार होने पर सभी इन्द्रियाँ सचेत हो जाती है, वैसे ही वे सब-के-सब एक साथ उठ खड़े हुए ॥ २ ॥ वीर पाण्डवों ने भगवान् श्रीकृष्ण का आलिङ्गन किया, उनके अङ्ग-सङ्ग से इनके सारे पाप ताप धुल गये। भगवान् की प्रेमभरी मुसकराहट से सुशोभित मुख-सुषमा देखकर वे आनन्द में मग्न हो गये ॥ ३ ॥ भगवान् श्रीकृष्ण ने युधिष्ठिर और भीमसेन के चरणों में प्रणाम किया और अर्जुन को हृदय से लगाया। नकुल और सहदेव ने भगवान् के चरणों की वन्दना की ॥ ४ ॥

परमासन[1] आसीनं कृष्णा कृष्णमनिन्दिता । नवोढा व्रीडिता किंचिच्छनैरेत्यभ्यवन्दत ॥ ५ ॥
तथैव सात्वकिः पार्थैः पूजितश्चाभिवन्दितः[2] । निषसादासनेऽन्ये[3] च पूजिताः पर्युपासत[4] ॥ ६ ॥

पृथां समागत्य कृताभिवादनस्तयातिहार्दार्द्रदृशाभिरम्भितः[5] ।
आपृष्टवांस्तां[6] कुशलं सहस्नुषां पितृष्वसारं परिपृष्टबान्धवः ॥ ७ ॥

तमाह प्रेमवैक्लव्यरुद्ध[7]कण्ठाश्रुलोचना । स्मरन्तीतान् बहून् क्लेशान् क्लेशापायात्मदर्शनम् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—परमासने, आसीनं, कृष्णम्, अनिन्दिता, नवोढा, व्रीडिता, कृष्णा, किञ्चिच्छनैः, एत्य, अभ्यवन्दत ॥ ५ ॥ यथा, कृष्णः, तथा, एव, सात्यकिः, पूजितः, अभिवन्दितः, च, आसने, निषसाद । अन्ये, च, पार्थैः, पूजिताः, कृष्णं, परि-उपासत ॥ ६ ॥ पृथां, समागत्य, तया, अतिहार्देन, आर्द्रदृशा, कृताभिवादनः, स, अभिरम्भितः, तया, परिपृष्टाः, बान्धवाः, यस्य, सः, (कृष्णः) सहस्नुषाम्, पितृस्वसारं, ताम्, अपृष्टवान् ॥ ७ ॥ प्रेम्णा, वैक्लव्येन, रुद्धः, कण्ठो, यस्याः, अश्रुलोचना, कुन्ती, तान्, बहुक्लेशान्, स्मरन्ती, क्लेशापायात्मदर्शनं, तं, आह ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृष्णा द्रौपदी । बहुभार्या सत्यपि निन्दारहिता पार्थैर्नवमचिरमूढा परिणीता ॥ ५-६ ॥ अतिहार्देन स्नेहेनार्द्रे सजले दृशौ यस्यास्तया परिष्वक्तः । तया परिपृष्टा बांधवा यस्य सः ॥ ७ ॥ प्रेम्णा वैक्लव्यं तेन रुद्धः कंठो यस्याः क्लेशापाये आत्मनि दर्शनं यस्य तम् । भजतां क्लेशापायाय आत्मानं दर्शयतीति वा ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृष्णा द्रौपदी । नवोढा सद्यो विवाहिता । परमे राजासनतोपि श्रेष्ठे । कृष्णा कृष्णमिति सनामतयापि मैत्री दर्शिता ॥ ५ ॥ यथा कृष्णस्तथैवेत्यर्थः । पर्युपासत स्वस्वासन उपविष्टा बभूवुः । परितश्चतुर्दिक्षु, उप समीपे आसिता उपविष्टाः । पूजितैर्नमस्कृतैः ॥ ६ ॥ तया पृथया । तां पृथाम् । पतीनामेकस्मिन्नप्यन्तःपुरे लब्धांतरविभागे श्रीद्रौपदी निवसतीति तस्मिन्नेवाकस्मादागतस्य श्रीकृष्णस्य तेषां मेलनानन्तरमेव तया मेलनं वर्णितम् । अथ तत्संलग्नांतःपुरान्तरे गमनपूर्वकं तत्र

---

१. नमा–प्रा. पा. । २. नन्दितः–श्रीधर. टि. । ३. ने रम्ये–प्रा. पा. । ४. ते–विज. । ५. वीक्षितः–प्रा. पा. । ६. तत्कु–विज । ७. बद्ध–प्रा. पा. ।

स्थितया श्रीकुन्त्या मेलनमाह-पृथामिति । कृतमभिवादनममुकोऽहं नमस्करोमीत्येवंविधिना प्रणामो येन सः । आ सम्यक्पृष्टवान् परिपृष्टा बांधवा भ्रात्रादयो येन सः । यद्वा—परिपृष्टा बांधवा यस्माच्छ्रीकुन्त्या स तथा । सहस्नुषामिति नवोढात्वेन तामपृष्ट्वा तस्या एव प्रष्टुं योग्यत्वात् । तं कृष्णम् । तान्बुद्धिस्थान् जतुगृहादावनुभूतान् । पूर्वव्याख्याने हरेर्भक्तोपेक्षाप्रतीतेरर्थांतरमाह—भजतामिति । प्रेमवैक्लव्ये हेतुः—स्मरंतीति । तान् प्रसिद्धान् दुर्योधनकृतविषदानादीन् । बहून्क्लेशान्स्मरंती तमाहेत्यन्वयः । वस्तुतस्तु—तेषां यद्दुःखं जातं तद्दैन्यहर्षादिव्यभिचारिभावैः स्थायिभावं वर्धयितुं लीलाशक्त्यैव कृतमिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

परमे राजासनतोऽपि श्रेष्ठे (श्रीकृष्णस्यैवोपवेशाय निर्माप्य स्थापिते) आसीनं सन्तम् एवं तेऽपि श्रीभगवदाज्ञया स्वस्वासने उपविविशुरिति ज्ञेयम् कृष्णा कृष्णमिति सनामतयाऽपि मैत्री दर्शिता किञ्चिदभिमुखमागत्य तत्रापि शनैः ॥ ५ ॥ यथा श्रीकृष्णः पूजितस्तथैव पूजित आतिथ्यविधिना अभिनन्दितः अनुमोदितागमनादिकः अभिवन्दितः इति क्वचित्पाठः परितश्चतुर्दिक्षु उप समीपे आसतोपविष्टाः ॥ ६ ॥ पतीनामेकस्मिन्नप्यन्तःपुरे लब्धाऽवान्तरविभागे श्रीद्रौपदी निवसतीति तस्मिन्नेवाकस्माद्गतस्य श्रीभगवतस्तेषां मिलनानन्तरमेव तया मिलनं वर्णितम् । अथ तत्संल्लग्नान्तःपुरान्तरे गमनपूर्वकं तत्र स्थितया श्रीकुन्त्या मिलनमाह—पृथां समागत्येति । कृतम् अभिवादनं अमुकोऽहं नमस्करोमीत्येवंविधिना प्रणामो येन सः आ सम्यक् पृष्टवान् यतः पितृस्वसारम् अत एव परिपृष्टा निजबान्धवा भ्रात्रादयो यं सः सहस्नुषां द्रौपद्या सहितामिति नवोढात्वेन तामपृष्ट्वा तस्या एव प्रष्टुं योग्यत्वात् ॥ ७ ॥ प्रेमवैक्लव्ये हेतुः स्मरन्तीति तान् प्रसिद्धान् दुर्योधनकृतविषदानादीन् बहून् क्लेशान् स्मरन्ती तमाहेत्यन्वयः । क्लेशेति तैर्व्याख्यातम् तत्र प्रथमपक्षे आत्मनि चित्तेऽपीत्यर्थः । उभयत्रापि पक्षे मुनेस्तेषां तत्तद्दुःखजातं स्मृत्वा श्रीभगवन्तं प्रति प्रणयोपालम्भ इव वस्तुतस्तु यत्तेषां दुःखं जातम् उद्देश्यहर्षादिव्यभिचारिभावैः स्थायिभावं वर्द्धयितुं विचित्रगत्या लीलाशक्त्यैव कृतमिति भावः ॥ ८ ॥ तान् दुर्य्योधनकृतविषदानादीन् बहून् क्लेशान् स्मरन्ती तत्र तत्र च क्लेशानामपायो यस्मात्तद्रूपमात्मनि मनसि दर्शनं यस्य तादृशं तं स्मरन्ती प्रेमवैक्लव्येत्यादिरूपा सती तमाहेत्यन्वयः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

परमे राजासनतोऽपि श्रेष्ठे आसीनं सन्तम्, एवं तेऽपि स्वस्वासने उपविविशुरिति ज्ञेयम् । कृष्णा कृष्णमिति सनामतया सख्यं सूचितम् । तथा भक्त्या तया श्रीकृष्णस्य तेन च प्रेम्णा तस्याचित्ताकर्षणञ्च नवोढात्वादेव साध्वीस्वभावाद्वा किञ्चिद्व्रीडिता, किञ्चिदिति कामभावाभावेन व्रीडाविशेषाभावात्, तद्दर्शनस्वभावेन वा धैर्य्यहान्या सम्यग् व्रीडारक्षणाशक्तेः । यद्वा, अस्य परेणान्वयः । व्रीडितत्वादेव शनैरभ्येत्य अग्रे गत्वा किञ्चित् पादस्पर्शनादिना अभितः सपञ्चांगमवन्दत ॥ ५ ॥ तथैवेति यथा श्रीकृष्णः पूजितस्तेनैव प्रकारेणेति पूर्वानुक्तमपि तत्पूजनमेतस्मादेव ज्ञेयम् । यद्वा, यथा परिष्वक्तस्तथैव परिष्वज्येत्यर्थः । पूजित आतिथ्यविधिना अभिनन्दितश्च, स्वागतादिना अनुमोदितागमनादिक इत्यर्थः । यद्वा, स्तुत्यादिना अभित आनन्दितो हर्षितश्च पर्य्युपासितश्च । वीजनादिना सेविता निषेदुः, यद्वा, परितश्चतुर्दिक्षु उप समीपे आसिता उपवेशिताः ॥ ६ ॥ प्राग् वक्तुं योग्यमपि श्रीकुन्त्याः समागमादिकं स्नेहभरवैक्लव्येन आगन्तुमशक्तायास्तस्याः श्रीभगवतैव पश्चात् सभागमनादिनान्त्यत्वात्, किंवा सूचीकटाहन्यायेन विस्तारापेक्षया आदावनुक्त्वा पश्चादाह—पृथामिति । कृतमभिवादनं 'अमुकोऽहं नमस्करोमि' इत्येवम्विधिना प्रणामो येन सः, आ सम्यक् पृष्टवान्, यतः पितृष्वसारम्, अत एव परितः पृष्टा बान्धवास्तेषां कुशलं यस्य, यद्वा परिपृष्टा निजबान्धवा भ्रात्रादयो यं सः । सहस्नुषां द्रौपद्या सहितामिति नवोढात्वेन लज्जादिना प्रागपृष्टायास्तस्याः पश्चाच्छ्रीकुन्त्या साहित्ये सत्येव प्रष्टुं योग्यत्वात् ॥ ७ ॥ प्रेमवैक्लव्ये हेतुः—स्मरन्तीति । ताननिर्व्वचनीयान् श्रीभीमविषभक्षणादीन् तद्बन्धुनां तादृशक्लेशस्मरणेनातिदैन्यादयात् । किञ्च, क्लेशापाये सत्यधुना राज्यादिप्राप्तौ सत्यमेव, न तु क्लेशमध्ये आत्मानं दर्शितवन्तमित्यर्थः । यद्वा, क्लेशापायात्मनो दर्शनादधुना अन्ये क्लेशाः पुनर्न भविष्यन्तीति प्रहर्षोदयात् । ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

परमासनमिति कृष्णा द्रौपदी नवोढा नवमचिरमूढा विवाहिता अत एव किञ्चिद्व्रीडिता सती शनैरागत्यकृष्णमभ्यवन्दत ननाम ॥ ५ ॥ तथैवेति यथा कृष्णस्तथा सात्यकिश्च यथायोग्यं पूजितो बहुमतोऽभिवन्दितश्च निषसादोपविष्टवान् तथाऽन्ये च यादवः पार्थैः पूजिताः कृष्णं परित उपासत ॥ ६ ॥ ततश्च भगवान् पृथां कुन्तीं समभ्येत्य कृतमभिवन्दनम् येन सः अतिस्नेहेनार्द्रे सजले दृशौ यस्यास्तया पृथयाऽभिरम्भितः परिष्वक्तः पितृभगिन्या पृथया परिपृष्टाः कुशलप्रश्नविषया बान्धवा बसुदेवादयो यस्य सः सहस्नुषां पुत्रभार्यासहितां तां पृथामापृष्टवान् कुशलं पप्रच्छ ॥ ७ ॥ तमिति प्रेम्णा वैक्लव्यमधार्ष्ट्यं तेन रुद्धः कण्ठो यस्याः सा अश्रूणि लोचनयोर्यस्याः साः पृथा तान् भूतपूर्वान् क्लेशान् स्मरन्ती क्लेशापायायाऽऽत्मानन्दर्शयतीति तथा तं कृष्णमाह ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कृष्णा द्रौपदी ॥ ५-६ ॥ तस्यै कृताभिवन्दनः अभिरम्भितः आलिङ्गितः परिपृष्टवान्धवस्तयेति शेषः ॥ ७ ॥ क्लेशापायात्मदर्शनं क्लेशनाशकरस्वरूपदर्शनं जतुगृहादावनुभूतांस्तांश्च बहून् क्लेशान् स्मरन्ती तं कृष्णमाहेत्यन्वयः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सहस्नुषामित्यतो मिलनमपि तयोरेकदैव ज्ञेयम् विस्तरापेक्षया तु श्रीकुन्त्या मिलनं पश्चाद्वर्णितमिति ॥ ७-२२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कृष्णा द्रौपदी नाम्ना मित्रत्वं सूचितम् । व्रीडिता किञ्चिदौत्सुक्यस्य गरीयस्त्वमुक्तं भवति, औत्सुक्ये व्रीडा वाधिता भवति ॥ ६-२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृष्णा द्रौपदी ॥ ५ ॥ पूजितैर्नमस्कृतैः अन्ये च कृष्णसङ्गिनो निषेदुः ॥ ६ ॥ तत्रैवात्यौत्सुक्येन द्रष्टुमायान्तीमालक्ष्य स्वासनादुत्थाय द्रुतं तस्याः समीपमागत्य अभिवादनं चकार अति हार्द्देन अतिप्रेम्णा आर्द्रे दृशौ यस्यास्तया "प्रेमा ना प्रियता हार्द्दम्" इत्यमरः । अभिरम्भितः कोटिप्राणैस्त्वन्मुखच्छविं निर्मञ्छयामीत्युक्त्वा समस्तकाघ्राणमालिङ्गतः परिपृष्टा बान्धवा यस्य सः ॥ ७ ॥ क्लेशानाम् अपायो नाश आत्मदर्शनेनाङ्गदर्शनेनैव यस्य तम् ॥ ८ ॥

गूढार्थदीपिनी

कृष्णा द्रौपदी शनैः कृष्णमेत्य । किञ्चित् व्रीडिता अनिन्दिता बहूनां भार्याऽपि निन्दारहिता । नवोढा सद्यो विवाहिता ॥ ५ ॥ कृष्ण पर्य्युपासत परित उपविष्टाः ॥ ६ ॥ अतिहार्देन स्नेहेन आर्द्रे सजले दृशौ नेत्रे यस्यास्तया कुन्त्या अभिरम्भित आलिङ्गितः । परिपृष्टा वान्धवा भ्रातरः वसुदेवादयो यस्येति कृष्णविशेषणम् ॥ ७ ॥ वैक्लव्यं व्याकुलत्वम् । क्लेशापायाय नाशाय आत्मानं दर्शयतीति तथा ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णा द्रौपदी नवोढा नवमचिरमूढा परिणीता ॥ ५ ॥ अन्ये च यादवाः पार्थैः पूजिताः पर्य्युपासत कृष्णं परित उपासत ॥ ६ ॥ अतिहार्देन स्नेहोद्रेकेन आर्द्रे सजले दृशौ यस्यास्तया ॥ ७ ॥ क्लेशानामपायो यस्मात् तदात्मदर्शनमात्मनि ध्यानम् यस्य तं यद्ध्यानमात्रेण क्लेशनाशस्तं साक्षात्संस्थितमाह ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

परमासने आसीनं कृष्णम् । अनिन्दिता प्रपञ्चातीतपञ्चभर्तृमत्यप्यपरनारीवदनिन्दनार्हा । न केवलं किन्त्वहल्यादौ द्रौपदीत्यादिना स्वस्मरणपातकनिपातहेतुरिति चानुसन्धातव्यम् । व्रीडिता तत्र हेतुर्नवोढेति । किञ्चिच्छनैरतिमन्दमेत्य प्राप्याभ्यवन्दत ॥ ५ ॥ अभिवन्दितः कनिष्ठैरन्ये च सहागताः ॥ ६ ॥ कृतमभिवन्दनं येन सः । तया कुन्त्याऽतिहार्ददशाऽतिहार्देन बहुस्नेहेन । प्रेमाना प्रियसौहार्दप्रेमस्नेह इत्यमरः । हृदयस्य कर्म । युवाद्यण् । हृदयस्य हृल्लेखेति हृदादेशः । आर्द्रा क्लिन्ना च सा हृच्च तया करणेन । बहुव्रीहिणा सामानाधिकरण्यं वा । अभिरम्भितः । अत्र परिरम्भणमनुक्षणं ज्ञेयम् । द्वितीयपक्षे तयालिङ्गित इत्यर्थः परिपृष्टबान्धवो माधवस्तया स्वयं सहस्नुषां स्नुषयासहितां पितृष्वसारं वसुदेवभगिनीम् । तत्स्वज्ञातमेव कुशलं परिपृष्टवान् । पितृष्वसारं पितृषु धृतराष्ट्रभीष्मादिषु । असुरोऽन्याय्यं च परिपृष्टवानित्यप्यर्थः ॥ ७ ॥ प्रेम्णा दर्शनजेन निमित्तेन यद्वैक्लव्यं विह्लता तेन रुद्धः सम्भाषणाद्यननुकूलः कण्ठो यस्याः सा च साश्रूणि लोचनयोर्यस्याः सा च तान् । जतुगेहदाहादिप्रसक्तिप्रसक्तान् क्लेशान्स्मरन्तो कुन्ती । क्लेशानामपायो नाशो येन तद्दर्शनं यस्य स तं कृष्णं प्रति प्राह ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदानीमर्जुनेनोढाया नमस्कारमाह परमासन आसीनमिति । अनेन सर्वपूजानन्तरं पश्चाद्दास्येनात्मनिवेदनं कुर्वाणेव समागतेति सूचितम् । आसीनमव्यग्रम् । तस्यां कृपादृष्ट्यर्थमुक्तम् । एतदर्थं तस्याः सनामत्वेन योग्यतामाह कृष्णेति । 'यो यच्छ्रद्धः स एव स' इति भगवान् कृष्णः पञ्चात्मकः, शब्दार्थशक्तिभक्तक्रीडाधारभूतः । अतो व्यासो भगवान् कालिन्दी अर्जुनो द्रौपदी चेति । नन्वेषा परिग्रहाधिक्याद्दुष्टा कथमेवं प्रपन्ना, तत्राह अनिन्दितेति । दोषो नास्त्येव । निन्दापि नास्तीति । सम्बन्धाभावाच्च तथेत्याह नवोढेति । विधिसम्बन्धाद्वा । अत एव किञ्चिद्व्रीडिता । स्त्रीस्वभावोऽपि शनैरागमनं धार्ष्ट्याभावं सूचयति ॥५॥ सहगतानां

पुरस्कारं वक्तुं सात्यकेराह **तथैवेति** । यथा भगवान् पूजितः, एवं भगवद्भक्ता अपि पूजिताः । यतस्ते पार्थाः । सम्बन्धश्च तुल्य इति, साधु समागतमित्यभिनन्दनम् । ज्ञानशक्तिरत्र प्रकटीकर्तव्येति सोऽप्यासन एवोपविष्टः । अन्ये च पूजिताः । आसनेषूपविष्टाः, परं भगवन्तं परित उपासत ॥ ६ ॥ पृथायाः स्तोत्रं वक्तुं प्रथममन्यान्यमनुवृत्तिमाह पृथामिति । भगवान् पृथां **समागत्य** पृथानिकटे गत्वा कृताभिवादनो जातः । तया च अतिहार्देन आर्द्रा दृष्टिर्यस्याः । करुणया भक्त्या च आर्द्रा भवति दृष्टिः । ततोऽपि अतिहार्दा लौकिकसम्बन्धेन स्नेहयुक्ता आर्द्रा भवति । ततस्तया परिरम्भितः । कुशलमापृष्टवान् । स्वयं च पृष्ट इति लौकिकी भाषा भगवत्कृता स्थिरा जातेति निरूपितम् ॥ ७ ॥ तस्याः स्तोत्रार्थं प्रवृत्तिमाह तमाहेति । प्रेम्णा वैक्लव्यम् । अन्तःकरणस्य तादृशं प्रेम । तेन रुद्धकण्ठता शरीरवैक्लव्यम् । अश्रूणि लोचने यस्या इतोन्द्रियवैक्लव्यम् । किञ्च । स्वस्थानामपि भवत्यैवं भवति । इयं तु बहुक्लेशापन्ना तांश्च स्मरतीत्याह **स्मरन्ती** तानिति । बहूनेव क्लेशान् स्मरन्ती । क्लेशनिवृत्त्यर्थं प्रार्थयिष्यतीत्याशङ्क्याह **क्लेशापायात्मदर्शन**मिति । क्लेशानामपायो नाशो यस्मात् तादृशं स्वरूपस्य दर्शनमेव यस्येति । दर्शनेनैव क्लेशनिवृत्तौ तदर्थं न प्रार्थना ॥ ८ ॥

श्रीसुबोधिनी-सारः

परमासने सिंहासने आसीनं कृष्णं कृष्णा द्रौपदी नवोढा सद्यःपरिणीता अनिंदिता निर्दोषा पतिपंचकत्वेपि व्यासवरेण कन्यात्वात् किंचिद्व्रीडिता लज्जिता शनैरेत्यागत्यानमत् ॥ ५ ॥ यथा कृष्णस्तथा एव सात्यकिः पार्थैः पृथापुत्रैः पूजितोऽभिवंदितश्चासने निषसाद तस्थौ अन्ये च पूजिताः सर्वे पर्युपासिताः सर्वत उपविष्टाः ॥ ६ ॥ पृथां कुंतीं संप्राप्यातिहार्देन गाढप्रेम्णाऽऽर्द्रे सजले दृशौ नेत्रे यस्यास्तया कुंत्या परिपृष्टा बांधवा यस्य यस्मै यं वेत्यन्ये कृतमभिवादनं येन तस्यै स कृष्णोभिरंभितः परिष्वक्तः सहस्नुषां पुत्रवधूसहिताम् पितुः स्वसारं भगिनीं तां कुंतीं कुशलमपृच्छत् ॥ ७ ॥ प्रेम्णा वैक्लव्यं तेन रुद्धः कंठो यस्या अश्रूणि लोचनयोर्यस्याः सा कुंती तान् बहून् क्लेशान् दुःखानि स्मरंती सती क्लेशस्यापाये नाशे आत्मानं दर्शयतीति यद्वा क्लेशा अविद्यास्मिता रागद्वेषाभिनिवेशाः पंच तेषामपायो विनाशहेतुरात्मदर्शनं ज्ञानं यस्येति तं श्रीकृष्णमाह ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ परमासने उत्तमसिंहासने आसीन कृष्णं शनैरेत्य आगत्य कृष्णा अभ्यवन्दत । शनैरागमने हेतुमाह—किञ्चित् व्रीडिता लज्जितेति । लज्जायां हेतुमाह—नवोढेति । अचिरं विवाहितेत्यर्थः । तथापि तस्याः पञ्चभर्तृकत्वं दोषमाशङ्क्याह—अनिन्दितेति ॥ ५ ॥ यथा कृष्णः पूजितस्तथैव सात्यकिः पार्थैः पूजितोऽभिवन्दितश्चासने निषसाद । तथाऽन्ये च यादवाः पार्थैः पूजिताः कृष्णं परित उपासत ॥ ६ ॥ पृथां कुन्तीं समागत्य कृतं अभिवन्दनं येन सः, अतिस्नेहेन आर्द्रे सजले दृशौ यस्यास्तया पृथया अभिरम्भितः परिष्वक्तः, तया परिपृष्टाः कुशलप्रश्नविषयीकृतां बान्धवा वसुदेवादयो यस्य सः कृष्णः सहस्नुषां पुत्रभार्यासहितां पितृष्वसारं तां कुन्तीं कुशलमापृष्टवानित्यन्वयः ॥ ७ ॥ प्रेम्णा वैक्लव्यं व्याकुलत्वं तेन रुद्धः कण्ठो यस्याः सा, अश्रूणि लोचनयोर्यस्याः सा तान् भूतपूर्वान् क्लेशान् स्मरन्ती क्लेशानामपायाय विनाशाय आत्मानं दर्शयतीति तथाभूतं तं कृष्णमाहं ॥ ८ ॥

अन्वितार्थप्रकाशिका

परमेति ॥ परमासने उत्तमसिंहासने आसीनं कृष्णं शनैरेत्यागत्य बहुभार्यापि अनिन्दिता नवोढा किञ्चिद् व्रीडिता कृष्णा द्रौपदी अभ्यवन्दत ॥ ५ ॥ तथेति ॥ यथा कृष्णः पूजितस्तथैव सात्यकिः पार्थैः पूजितोऽभिवन्दितश्चासने निषसाद । तथाऽन्ये च यदवः पार्थैः पूजिता कृष्णं परित उपासत ॥६॥ पृथामिति । पृथां कुन्तीं समागत्य कृतम् अभिवादनं येन सः अतिहार्देन स्नेहेन आर्द्रे सजले दृशौ यस्यास्तया पृथया अभिरम्भितः परिष्वक्तः तया परिपृष्टा कुशलप्रश्नविषयीकृताः बान्धवा वसुदेवादयो यस्य सः कृष्णः सहस्नुषां पुत्रभार्यासहितां पितृस्वसारं तां कुन्तीं कुशलमापृष्टवान् ॥ ७ ॥ तमिति ॥ प्रेम्णा वैक्लव्यं व्याकुलत्वं तेन रुद्धः कण्ठो यस्याः सा अश्रूणि लोचनयोः यस्याः सा कुन्ती तान् भूतपूर्वान् बहून् क्लेशान् स्मरन्ती क्लेशानामपाये विनाशे आत्मनि दर्शनं यस्य सः क्लेशानामपायो यस्मात्तादृशमात्मनि दर्शनं यस्येति वा भजतां क्लेशापाये क्लेशानामपायाय वा आत्मानं दर्शयतीति तथाभूतं वा तं कृष्णमाह स्म ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृष्णा द्रौपदी । अनिंदिता पंचानां पत्नी सत्यपिनिर्दोषा नवोढा नवीनविवाहिता ॥ ५-६ ॥ पृथां कुंती अतिहार्देनातिप्रेम्णा आर्द्रे साश्रुणी दृशौ नेत्रे यस्यास्तयाऽभिरंभित आलिंगितः परिपृष्टाः सुखितया पृष्टाः बांधवा वसुदेवाद्या यस्य सः । श्रीकृष्णः सहस्नुषां द्रौपदीसहितां पितृभगिनीं तां पृथां प्रतिकुशलं आपृष्टवान् ॥ ७ ॥ प्रेमवैक्लव्येन स्नेहवैवश्येन रुद्धः कंठो यस्याः क्लेशानां अपायाय नाशाय आत्मानं स्वं दर्शयतीति तं श्रीकृष्णं ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

परमेति । अनिन्दिता सुलक्षणा, नवोढा नवमचिरमूढा विवाहिता, कृष्णा द्रौपदी, परमासने आसीनमुपविष्टं, कृष्णं, किंचित् व्रीडिता सती, शनैः, एत्यागत्य, अभ्यवन्दत ननाम ॥ तथैवेति । यथा श्रीकृष्णस्तथैव, सात्यकिश्च, पार्थैः, अभिवन्दितः पूजितः सन्, आसने निषसाद । अन्ये यदवश्च, पार्थैः पूजिताः सन्तः, कृष्णं परि परितः, उपासत ॥ ६ ॥ पृथामिति । ततः, भगवान् पृथां कुन्तीं, समागत्य समभ्येत्य, कृतमभिवादनं येन सः, अतिहार्दार्द्रे अतिस्नेहेन सजले दृशौ यस्यास्तया, तया पृथया, अभिरम्भितः परिष्वक्तः । परिपृष्टाः पितृष्वस्रा कुशलप्रश्नं पृष्टाः बान्धवा वसुदेवादयो यस्य तथाभूतः सन्, सहस्नुषां पुत्रभार्यासहितां, पितृष्वसारं, तां पृथां, कुशलं आपृष्टवान् ॥ ७ ॥ तमिति । प्रेम्णा वैक्लव्यमधाष्टर्यं तेन रुद्धः कण्ठो यस्याः सा, अश्रूणि लोचनयोर्यस्याः सा पृथा, तान् भूतपूर्वान्, बहून् क्लेशान्, स्मरन्ती सती, क्लेशापायात्मदर्शनं क्लेशनाशकरस्वरूपदर्शनं, तं श्रीकृष्णं आह ॥ ८ ॥

कृष्णप्रिया

जब भगवान् श्रीकृष्ण श्रेष्ठ सिंहासन पर विराजमान हो गये; तब परमसुन्दरी श्यामवर्णा, द्रौपदी, जो नवविवाहिता होने के कारण तनिक लजा रही थी, धीरे-धीरे भगवान् श्रीकृष्ण के पास आयी और उन्हें प्रणाम किया ॥ ५ ॥ पाण्डवों ने भगवान् श्रीकृष्ण के समान ही वीर सात्यकि का भी स्वागत-सत्कार और अभिवन्दन-नन्दन किया । वे एक आसन पर बैठ गये । दूसरे यदुवंशियों का भी यथा-योग्य सत्कार किया गया तथा वे भी श्रीकृष्ण के चारो ओर आसनों पर बैठ गये ॥ ६ ॥ इसके बाद भगवान् श्रीकृष्ण अपनी फुआ कुन्ती के पास गये और उनके चरणों में प्रणाम किया । कुन्तीजी ने अत्यन्त स्नेहवश उन्हें अपने हृदय से लगा लिया । उस समय उनके नेत्रों में प्रेम के आँसू छलक आये । कुन्तीजी ने श्रीकृस्ण से अपने भाई-बन्धुओं की कुशम-क्षेम पूछी और भगवान् ने भी उनका यथोचित उत्तर देकर उनसे उनकी पुत्रवधू द्रौपदी और स्वयं उनका कुशल-मङ्गल पूछा ॥ ७ ॥ उस समय प्रेम की विह्वलता से कुन्तीजी का गला रुँध गया था, नेत्रों से आँसू बह रहे थे । भगवान् के पूछने पर उन्हें अपने पहले के क्लेश-दर-क्लेश याद आने लगे और वे अपने को बहुत सम्हालकर, जिनका दर्शन समस्त क्लेशों का अन्त करने के लिये ही हुआ करता है, उन भगवान् श्रीकृष्ण से कहने लगी ॥ ८ ॥

तदैव कुशलं नोऽभूत्[1] सनाथास्ते कृता वयम् । ज्ञातीन्[2] नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया॥ ९ ॥
[3]न तेऽस्ति [4]स्वपरभ्रान्तिर्विश्वस्य सुहृदात्मनः । तथापि स्मरतां [5]शश्वत् क्लेशान् हंसि हृदि स्थितः ॥ १० ॥

युधिष्ठिर[6] उवाच

किं न आचरितं श्रेयो न वेदाहमधीश्वर । योगेश्वराणां दुर्दर्शो यन्नो दृष्टः कुमेधसाम् ॥ ११ ॥
इति वै वार्षिकान् मासान् राज्ञा सोऽभ्यर्थितः सुखम् । जनयन् नयनानन्दमिन्द्रप्रस्थौकसां विभुः[7] ॥ १२ ॥

कर्दमक्षमा

अन्वयः—तदा, ज्ञातीन्, नः, स्मरता, त्वया, एव, वयं, सनाथाः पक्षे हे कृष्ण, मे भ्राता, प्रेषितः, तदैव न कुशलं अभूत् ॥ ७ ॥ विश्वस्य, सुहृदात्मनः, ते, स्वपर, भ्रान्तिः न, अस्ति, तथापि, स्मरतां, हृदि शश्वत् स्थितः, क्लेशान्, हंसि ॥१०॥ हे अधीश्वरः नः, किं, श्रेयः, आचरितं, इति, अहं, न, वेद, यत्, योगेश्वराणां, दुर्दर्शः, त्वम्, कुमेधसाम्, दृष्ट, असि ॥ ११ ॥ इति, राज्ञा, अभ्यर्थितः, विभुः, इन्द्र, प्रस्थौकसां, नयनानन्दं, जनयन् वार्षिकान्, मासान्, सुखम् उवास इति यावत् ॥ १२ ॥

---

[1] नोऽभूद्यत्सनाथाः–विज. । [2] ज्ञातुं–विज. ।

[3] पाञ्चालेषु स्थितानस्मान्स्वयंवरकृते तदा । अनुस्मृत्यागतो यस्त्व तेन स्मासं सुयोषिता ॥ १ ॥
इत्युक्तायां तदा कुन्त्यां प्राह योगेश्वरः स्वयम् । पाञ्चालेषु स्थितानेत्य सुतांस्ते छद्मरूपिणः ॥ २ ॥
कुंभकारस्य शालायामुषितान्सह भार्यया । दृष्ट्वा गतोऽहं दिवसे तस्मिन्नेवाविलंबितः ॥ ३ ॥
निहन्तुं शतधन्वानं सत्यभामापितुर्द्रुहम् । शतधन्विनि दुर्बुद्धौ हते सीरधरोग्रजः ॥ ४ ॥
कुपितो मामनादृत्य विदेहान्विमना ययौ । एतावन्तं महाकालं तदागमनकाङ्क्षया ॥ ५ ॥
पुरएवावसं क्वापि नागच्छं कार्ययन्त्रितः । इत्येवंवादिनं कुन्ती प्राह स्नेहपरिप्लुता ॥ ६ ॥

[4] स्वः पर इति–विज. । [5] सर्वान्–विज. । [6] विजये नास्ति । [7] प्रभुः प्रा. पा. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ज्ञातीन् बंधून् नोऽस्मान् यदा भ्राताऽक्रूरः प्रेषितः ॥ ९ । ज्ञातीनिति वचनात्प्राप्तं मोहं वारयन्ती स्तौति । न तेऽस्तीति । तत्र हेतुः विश्वस्येति सुहृच्च आत्मा च तस्य हंसि नाशयसि ॥ १० ॥ कुमेधसां विषयासक्तचित्तानां दृष्टोऽसि ॥११॥ सुखमवसदिति शेषः । सुखमभ्यर्थित इति वा क्रियासमाप्तिः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भक्तानुपेक्षां हरेराह—तदैवेति । यदाऽक्रूरः प्रेषितस्तदैवेत्यन्वयः । त्वयैवाऽस्माकं कुशलं पूर्वं जातमित्याह—तदैवेति । तत्त्वया नोस्मान् ज्ञातीन्स्मरता पाल्यत्वेन लब्धान्यादवानिव भावयता मे मम भ्राता प्रेषितः । तच्च तव युक्तमेवेत्याह—हे कृष्णेति । भक्तवात्सल्यादशेषगुणप्रकटनपरत्वेन प्रसिद्ध इत्यर्थः ॥ ९ ॥ मोहमज्ञानम्, यद्यपि ते नास्ति तथापीति योज्यम् । तत्र स्वपरभ्रांत्यभावे । तदेवाभिव्यंजयंतीश्वरत्वेन सर्वत्र समस्याऽपि तस्य भक्तेष्वेवानुग्रहविशेषं दर्शयति—नेति । विश्वस्य यः सुहृत् स्वभावत एव ज्ञानक्रियाशक्तिदानेन हितकारी यत आत्मा परमात्मा तस्य यद्यपि स्वपरभ्रांतिः-अयं बंधुरयं शत्रुरिति भ्रमो नास्ति, स्मरतां कारुण्यादिगुणमयत्वेन भावयतां हृदि स्थितः प्रकटिततत्तद्गुणत्वात्तेषामेव प्रकटतया हृदि स्थितः ज्ञातः सन् शश्वन्मुहुः क्लेशान्हंसि, अंधेष्वपि तत्तदृष्ट्यादिप्रवर्तनया सूर्यस्य स्वभावत उपकारित्वेऽपि चक्षुष्मत्तमःखंडनवत् ॥ १० ॥ नोऽस्माभिः । "युष्मदस्मदोः षष्ठीचतुर्थी द्वितीयास्थयोः-" इति विपरीतनिर्देशादन्यासु विभक्तिष्वपि वान्नावादयस्स्युरिति तृतीयाबहुवचनस्य नसादेशः ॥ एवं मात्रोक्तं भक्तवात्सल्यं श्रुत्वा विनयादिना स्वस्य भक्तत्वममन्यमानो दैन्यमवलंब्य दीनवात्सल्यं वर्णयति-किमिति, कतरत् । नोऽस्माभिः पूर्वजन्मस्वाचरितं श्रेयस्तत् यद्यस्मान्नोऽस्माकमपि दृष्टस्त्वं, दृशेर्बुद्ध्यर्थत्वाद्वर्तमाने क्तः । अस्माभिर्दृश्यत इत्यर्थः । कीदृशानाम्—कुमेधसां, भक्तिमात्रहीनानामित्यर्थः । कीदृशोऽपि दृष्टः—भक्तियोगेश्वराणामपि चिरेण दृश्योपि । अतः केवलदीनवात्सल्येनैव दृष्ट इति भावः । तदेवाह—हे अधीश्वर परमस्वतंत्र । यद्वा—अधियां मादृग्दीनानामपि परिपालक ॥ ११ ॥ इति संल्लापे । वार्षिकान् वर्षाकालसंबंधिनः । स कृष्णः । "अक्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेत् । इष्टस्यार्थस्य संसिद्धौ को विद्वान्यत्नमाचरेत् ॥" इति न्यायेन क्रियाशेषीकरणयत्नं विनैवेहेष्टसिद्धेस्तन्न कार्यमित्याह—सुखमिति । राज्ञा स प्रभुः सुखं प्रतिवार्षिकान्मासानभ्यर्थितः प्रार्थितः । किं भूतं सुखम्—नयनयोरानंदो येन तत्तथा, यावद्वर्षाकालं दर्शनं प्रति प्रार्थित इति भावः ॥ टीकाद्वितीयपक्षे सुखमभ्यर्थित इह अर्थेर्याच्यर्थत्वेन द्विकर्मकत्वं राजा धनं याचित इतिवत् । ततश्च वार्षिकान्मासाव्याप्य तद्वासने सुखप्राप्तये निवेदित इत्यर्थः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्वयैवास्माकं कुशलमिति पूर्वमेव ज्ञातमित्याह—तदैवेति ते त्वया नः अस्मान् ज्ञातीन् स्मरता पाल्यत्वेन लब्धान् यादवानिव भावयता मे मम भ्राता भ्रातृत्वेन परमस्निग्धः प्रेषितः तच्च तव युक्तमेवेत्याह—हेकृष्णेति । भक्त भात्सल्याद्यशेषगुणप्रकटनपरत्वेन प्रसिद्ध इत्यर्थः ॥ ९ तदेवाभिव्यञ्जयन्तीश्वरत्वेन सर्वत्र समस्यापि तस्य भक्तेष्वेवानुग्रहविशेषं दर्शयति—नेति । विश्वस्य यः सुहृत् स्वभावत एव ज्ञानक्रियाशक्तिदानेन हितकारी यत आत्मा परमात्मा तस्य यद्यपि स्वपरभ्रान्तिर्न सम्भवति तथापि स्मरतां कारुण्यादिगुणगणमयत्वेन भावयतां हृदिस्थितः प्रकटिततत्तद्गुणत्वात्तेषामेव प्रकटतया हृदि स्थितत्वेन मतः सन् शश्वन्मुहुः क्लेशान् हंसि अन्धेष्वपि तत्तद्दृष्टत्वादिप्रवर्त्तनया सूर्यस्य स्वभावत उपकारकत्वेऽपि चक्षुष्मत्सु तमःखडनवत् ॥ १० ॥ एवंमात्रोक्तं भक्तवात्सल्यं श्रुत्वा विनयादिना निजम्भक्तत्वममन्यमानो दैन्यमवलम्ब्य दीनवात्सल्यं वर्णयन्नाह—किमिति । कतरत् नोऽस्माभिः पूर्वजन्मस्वाचरितं श्रेयस्तत् यद्यस्मान्नोऽस्माकमपि दृष्टस्त्वं दृशेर्बुद्ध्यर्थत्वाद्वर्त्तमाने क्तः अस्माभिर्दृश्य स इत्यर्थः । कीदृशानां कुमेधसां भक्तिमात्रहीनानामित्यर्थः । कीदृशोऽपि दृष्टः भक्तियोगेश्वराणामपि चिरेणैव दृश्योऽपि अतः केवलं त्वद्दीनवात्सल्येनैव दृष्ट इति भावः । तदेवाह—हे अधीश्वर ! परमस्वतन्त्र ! यद्वा, अधियां दीनानामप्यस्माकं परिपालक ! ॥ ११ ॥ विभुरपि प्रभुरिति क्वचित्पाठः टीकाया द्वितीयपक्षे सुखमभ्यर्थित इति याच्यार्थत्वादर्थेर्द्विकर्मकत्वं राजा धनं याचित इतिवत् ततश्च वार्षिकान् मासान् व्याप्य तद्वासेन सुखप्राप्तये निवेदित इत्यर्थः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ते ते क्लेशाश्च त्वदनुग्रहेणैवातिक्रान्ता इत्याशयेनाह—तदैवेति । ते त्वया, ज्ञातीनिति त्वद्बान्धवत्वायोग्यानपि बान्धवत्वेन स्मरतेत्यर्थः । भ्रातेति—परमस्निग्ध इति भावः । तच्च तव युक्तमेवेत्याह—हे कृष्णेति, भक्तवात्सल्याद्यशेषगुणप्रकटनात् ॥ ९ ॥ तदेवाभिव्यञ्जयन्तीश्वरत्वेन सर्व्वत्र समस्यापि भक्तेष्वेवानुग्रहमाह—नेति । आत्मा अन्तर्य्यामी ईश्वर इति यावत् । स्मरतां सकृत् स्मरणे प्रवर्त्तमानानामपि सदा हृदि स्थितोऽतिसन्निहितः सन्, अतएव शश्वत् पुनः पुनर्हंसि । शश्वदिति संसारक्लेशानां सदैवागमात् । अन्यत्तैर्व्याख्यातम् । यद्वा, विश्वस्य सुहृदात्मनोऽपि स्वो भक्तः, परोऽभक्त इति भ्रान्तिर्भ्रमणं

मुहुर्मनोगतिस्तव नास्ति किम् ?—काका, अपि तु अस्त्येवेत्यर्थः। यतोऽन्तर्य्यामितया सर्व्वेषां हृदि स्थितोऽपि, अपि एव, स्मरतामेव, न त्वभक्तानाम्, किंवा स्मरतामपि स्मरणमात्रलक्षणमपि किं पुनर्नवविधां भक्तिं कुर्व्वतामित्यर्थः। तथा तेनानिर्व्वचनीयप्रकारेण समूलोत्पाटनादिना, हंसीति भक्तिहीनानान्तु न हंस्येवेति सिद्धमेव ॥ १० ॥ एवं मात्रोक्तं भक्तवात्सल्यं श्रुत्वा विनयादिना निजभक्तत्वममन्यमानो दैन्यमवलम्व्य दीनवात्सल्यं वर्णयन्नाह—किमिति। कतरत् नोऽस्माभिः पूर्व्वजन्मस्वाचरितमहं धर्म्मपुत्रः सर्व्वज्येष्ठोऽपि न वेद। यद्वा, अन्यो जानातु नाम, अहन्तु न वेद्मीति ज्ञानाभिमानिनः प्रत्युपहासः। कुतः ? अधीश्वर हे परमस्वतन्त्र ! अतो योगः समाधिस्तस्मिन्, ईश्वराणां समर्थानामपि दुर्द्दर्शो हृद्यप्यदृश्यः; यद्वा, हे अधियां दीनानामप्यस्माकमीश्वर ! परिपालक ! किंवा हे अधिकनिजैश्वर्य्यप्रकटक ! भक्तियोगेश्वराणामपि दुःखेनैव दृश्यः, अचिराप्राप्त्या महादैन्योत्पत्त्यैव दृश्यत्वात्, तथापि कुमेधसां भक्तिहीनानामपि नोऽस्माकं सर्व्वेषाम्, कर्त्तरि षष्ठी, अस्माभिर्यद्येन दृष्टस्तच्छ्रेयो न वेद्मि, भक्तियोगाधिकश्रेयोऽभावात्. अतः केवलं त्वद्दीनवात्सल्येनैव दृष्ट इति भावः ॥ ११ ॥ इति एवमभ्यर्थितः, वै अपि, वार्षिकानपि इन्द्रप्रस्थवासिनां सर्व्वेषामेव जनानां नयनयोरानन्दं साक्षात्तत्सौन्दर्य्यावलोकनात्, यतः प्रभुः—विश्वस्यानन्दने समर्थः, यद्वा, अभ्यर्थने हेतुः—निजेश्वर इति ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तिमेवाह—तदेवेति। नोऽस्माकं कुशलमभूत्तथा ते त्वया वयं सनाथाश्च कृताः कदा यदा ज्ञातीन् बन्धून्नोऽस्मान् स्मरता त्वया मम भ्राताऽक्रूरः प्रेषितः ॥ ९ ॥ ज्ञातीत्यनेन प्राप्तां ममतां वारयितुमाह—नेति। ते तव स्वः पर इति च भ्रान्तिर्नास्ति तत्र हेतुर्विश्वस्येति, जगतः सुहृच्चात्मान्तरात्मा च तस्य कथं तर्हि युष्मान्स्मरामीत्यत आह—तथाऽपीति। स्वपरभ्रान्त्यभावेऽपि स्मरतां भक्तानां हृदि स्थितस्त्वं शश्वत्सदा क्लेशान् हंसि नाशयति ॥ १० ॥ अथ युधिष्ठिरः प्राह–किमिति। हे अधीश्वर ! नोऽस्माभिः किं पुण्यमाचरितं कृतम् इति न वेद्मि कृतं पुण्यमीदृशम् इति न वेद्मि किं तु सामान्यतो महत्पुण्यं कृतमेवेति तु वेद्मीति भावः। कुतः यद्यस्माद्योगीश्वराणामपि द्रष्टुमशक्यो भवान् कुमेधसां विषयासक्तचित्तानामस्माकं दृष्टः ॥ ११ ॥ इतीति, इतीत्थं राज्ञा युधिष्ठिरेणाभ्यर्थितो बहुमतः स भगवान् वार्षिकान्मासान् सुखं यथा तथा न्यवसदिति शेषः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतापदरत्नावली

किमत्राह—तदेवेति। हे कृष्ण ! यद्यदा स्मरतां नो वृत्तं ज्ञातुं त्वया यदा मे भ्राताऽक्रूरः प्रेषितः तदैवास्माकं कुशलमभूदित्यन्वयः। कथमेतदत्राह—यदिति। यदित्युत्तरत्रापि सम्बध्यते हेतुत्वेन अस्मत्कुशलं स्मरता त्वया सनाथाः स्वामिवन्तः कृता इति यत्पाण्डवानामुपद्रवो न कर्तव्यः यतस्ते कृष्णनाथा अस्मान् घ्नन्तीति ॥ ९ ॥ किञ्च यदा स्वयम्बरकृते पाञ्चालेषु स्थितानस्माननुस्मृत्य यस्त्वमागतः तदा तेन त्वया त्वद्गुणानुसंस्मृत्याहं सुखोषिता आसम् इत्यन्वयः (क) इदानीमागमनविलम्बः किमिति कृत इति कुन्त्या हार्दशङ्कां परिहरन्नाह—इतीति (ख-ग) सोरधरो हलधरः बलभद्र इत्यर्थः (घ–ङ) कार्ययन्त्रितः कार्यवशः ईश्वरस्य तव इदं वचनं लोकचेष्टाऽनुसारि न तु तथ्यमिति भावेन प्रतिवक्ति इतीति (च) स्वः स्वकीयः परः परकीयः शत्रुपक्षभवः शत्रुमित्रविभागाभावे जनार्दनो मुरारिर्मधुसूदनः पार्थसारथिरित्यादीनि नामानि विक्रमनिमित्तानि कथमत्राह—तथापीति ॥ १० ॥ इति संलापे वार्षिकान्वर्षाकालसम्बन्धिनः राज्ञाऽभ्यर्चितः उवासेति शेषः ॥ ११–१३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

भ्राता अक्रूरः ॥ ९ ॥ परमेश्वरस्य का वाऽहं वराकीत्यैश्वर्यमनुसन्धायाह—नेति, विश्वस्य सुहृच्च आत्मा तस्य तव अयं बन्धुरयं शत्रुरिति स्वपरभ्रमो नास्ति यद्यपि तथापि स्मरतां स्वभक्तानाम् ॥ १०–११ ॥ सुखमवसदिति शेषः ॥ १२ ॥

गूढार्थदीपिनी

ते त्वया यदा भ्राता अक्रूरः ॥ ९ ॥ स्वकीयः परकीय इति भ्रान्तिर्भ्रमः ॥ १० ॥ नोऽस्माभिः किं श्रेयः पुण्यं कर्म। कुत्सितेषु विषयेषु मेधा येषाम्। कर्तरि षष्ठी ॥ ११ ॥ इति वै इत्येवम्। वार्षिकान् चतुर्मासान्। सुखमवसदिति शेषः। अभ्यर्थित इति वा ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भ्राता अक्रूरः ॥ ९ ॥ परमेश्वरस्यास्य का वाऽहं वराकीत्यैश्वर्यमनुसन्धायाह—नेति। विश्वस्य सुहृच्च आत्मा उपादानहेतुश्च च तस्य तव अयं बन्धुरिति अयं शत्रुरिति स्वपरभेदो नास्ति यद्यपि तथापि स्मरतां स्वभक्तानाम् ॥ १०–११ ॥ सुखम् अवसदिति शेषः ॥ १२–१४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यदा त्वां स्मरतां नः कुशलं ज्ञातुं त्वया मे भ्राताऽक्रूरः प्रेषितस्तदैव कुशलमभूत्। यद्यतो विचारणात्सनाथा वयं कृताः। यद्यदा च वयं सनाथाः कृतास्तदैव कुशलमभूदित्यन्वयो वा ॥ ९ ॥ किञ्च यदा स्वयंवरकृते तदर्थं पाञ्चालेषु तद्देशेषु स्थितानस्मान्यस्त्वमनुसृत्यागतस्तेनाहं तत्पश्चात् सुखोषिता आसं स्म। त्वदागमनं स्मृत्वेति वा। इत्येवं प्रकारेणोक्तम्। भावे क्तः। उक्तिर्यस्याः सा तस्यां कुन्त्यां सत्याम्। धातोरर्थांतरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेत्युक्तेः कर्मणो वाक्यरूपस्य प्रसिद्धेरविवक्षणाद्वाऽकर्मकत्वाद्गत्यर्थेति कर्तरि क्तो वा। उक्तायामुक्तवत्यां योगेश्वरः स्वयं प्राह। इयान्विलम्बः कुतोऽवलम्बितो दीनबन्धुनेत्यम्ब न वद किञ्चिदत्यावश्यकं प्रयोजनमवतिष्ठ तन्निवृत्य तत्क्षण एव त्वन्निरीक्षणायायात इति किञ्चित्स्मारयन्ननुभूतानुवादेन समाधत्ते। पाञ्चालेष्विति। ते सुतान् छद्मना। रूपं विप्राणामेषामस्तीति ते तथा तान् भार्यया द्रौपद्या सह कुम्भकारस्य शालायामुषितान्दृष्ट्वा तस्मिन्नेव दिवसेऽविलम्बितस्त्वरावानहं गतः ॥ ११-१२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवता वयं कृतार्था इति इदमेव भगवत्स्तोत्रम्। तत्कृतकरिष्यमाणभेदेन द्विविधं निरूपयति **तदैवेति** द्वाभ्याम्। यदैवास्मान् स्मृतवान्, तदैव नः कुशलमभूत्। चिन्ताभावायाह। सनाथा अपि त्वया वयं कृताः। नाथ एव काले स्मरतीति। वयमिति श्लाघायाम्। एतस्याभिज्ञापकमक्रूरप्रेषणमित्याह **ज्ञातीन्नः स्मरतेति**। 'येनोपशान्तिर्भूताना'मित्यत्र तथा निरूपितम्। **कृष्णे**ति तदर्थमेवावतार उक्तः। सर्वसंरक्षार्थं भ्राता प्रेषितः। अनेन भ्रात्रपेक्षयापि तवैव स्नेहाधिक्यात्। नेदं दैहिकन्यायेन कृतार्थकरणम्, सन्निहितो बन्धुरेव प्रेषणीय इति लौकिकरक्षापि सूचिता। एवं स्वरक्षकत्वेन प्राप्तं वैषम्यं परिहरति **न तेऽस्तीति**। **स्वः** स्वकीयः, **परः** शत्रुः। एतदभावे हेतुमाह **भ्रान्तिरिति**। इयं **बुद्धिर्भ्रान्ते**ति नास्तीत्यर्थः। तत्र हेतुत्रयमाह **विश्वस्य सुहृदात्मन** इति। दैहिके विचार्यमाणे त्वमेव विश्वम्, अन्तःकरणे तु सुहृत् सर्वस्यापि भगवान्, वस्तुविचारे त्वात्मैव। अतो भावत्रयेऽपि भगवतो वैषम्यबुद्धिर्न सम्भवतीत्यर्थः। तर्हि कथं विषमकार्यमित्यत आह **तथापीति**। ये केचित्स्मरन्ति, तेषां हृदये स्थितः क्लेशसमानाधिकरणो न भवतीति। अग्निस्तृणमिव **क्लेशान्** हंसि। अतो भावनाकार्यमेव क्लेशहननम्। तदपि स्वाभाविकमेव ॥ ९-१० ॥ ततो राजापि स्तोत्रं कृतवानित्याह **किं न** इति। तस्यापि स्वाभिनन्दनेनैव स्तुतिः। स हि सर्वं कर्मफलमेव जानाति। अतो भगवद्दर्शनमपि महाफलमिति साधनं कल्पयति। नोऽस्माभिः अस्माकं वा श्रेयः आचरितमस्ति। एतत्परिज्ञाने निरन्तरदर्शनार्थं निरन्तरं तत्कर्तव्यमिति पृच्छन्निव स्वाज्ञानमाह **न वेदाह**मिति। अधीश्वरत्वात् अन्तःकरणस्वामित्वात् भगवानेव जानाति। दर्शनस्य महाफलत्वमाह **योगेश्वराणामपि दुर्दर्श** इति। स्वस्यातथात्वमाह **कुमेधसामिति** ॥ ११ ॥ एवं सर्वैः स्तुतः तेषां हितार्थं कियत्कालं तत्रैव स्थित इत्याह **इतीति**। सर्वत्र विद्यमानोऽपि निश्चयेन तत्र स्थितः सर्वजनीनः। वार्षिका मासाश्चत्वारः। अनेन निद्रायामागतायां भक्तहृदये शयानः स्थित इति सूचितम्। लोकेऽपि वर्षायां गमनागमनौ न सुकरौ। तत्रापि युधिष्ठिरेणाभ्यर्थितः। तदर्थं इन्द्रप्रस्थौकसां च नयनानन्दं जनयन्। एकया क्रियया फलत्रयं साधयतीति विभुत्वं हेतुत्वेन प्रदर्शितम्। यतोऽयं लोको भ्रान्तः ॥ १२ ॥

श्रीसुबोधिनी-सारः

ज्ञातीन् बंधून्नोऽस्मान्स्मरता त्वया मे मह्यं यदा भ्राता अक्रूरः प्रेषितः हे कृष्ण ! तदैव नोऽस्माकं कुशलम् अभूज्जातं ते त्वया वयं सनाथाः कृताः ॥ ९ ॥ विश्वस्य सुहृदात्मनस्ते स्वपरेति भ्रांतिर्नास्ति तथापि स्मरतां भक्तानां हृदि स्थितस्त्वं शश्वन्निरंतरं क्लेशान् हंसि ॥ १० ॥ युधिष्ठिरोक्तिः। हे अधीश्वर नोऽस्माभिः किं श्रेयो मंगलमाचरितं कृतम् इत्यहं न वेद न जानामि योगेश्वराणां दुर्दर्शस्त्वं कुमेधसां दुर्बुद्धीनां नोऽस्माकं दृष्टोऽसि 'कर्त्तरि षष्ठी' ॥ ११ ॥ इत्येवं राज्ञा युधिष्ठिरेणाभ्यर्थितः संयाचितः स विभुः श्रीकृष्ण इंद्रप्रस्थवासिनां नेत्रानदं कुर्वन् वार्षिकान्मासान्सुखमवसदिति शेषः ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह—तदेति त्रिभिः। यदा ज्ञातीन् बन्धून् नोऽस्मान् स्मरता त्वया अस्मद्वृत्तज्ञानाय मम भ्राता अक्रूरः प्रेषितः तदेव नोऽस्माकं कुशलमभूत्, तथा ते त्वया वयं सनाथाः सस्वामिनश्च कृता इत्यन्वयः ॥ ९ ॥ ननु 'ज्ञातीन्' इत्यनेन 'किं ममापि जीववन्मोहं वदसि' इत्याशङ्क्याह—नेति। ते तव 'स्वः पर' इति भ्रान्तिर्नास्ति। तत्र हेतुमाह-विश्वस्य जगतः सुहृच्चासावात्मा च यस्तस्येति। 'कथं तर्हि क्लेशापायात्मदर्शनत्वम्, कथं वा युष्मत्स्मरणम्' तत्राह—तथापीति। स्वपरभ्रान्त्यभावे विस्मरतां भक्तानां हृदीशश्च सर्वदा स्थितः सन् क्लेशान् हंसि नाशयसि ॥ १० ॥ नोऽस्माभिः किं श्रेय आचरितं पुण्यं कृतमित्यहं न वेद न जानामि। किं कृतमिति विशेषतो ज्ञानाभावेऽपि किञ्चिन्महत्पुण्यं कृतमिति सामान्यतस्तु जानाम्येव। एवं पुण्यानुमाने हेतुमाह—यत् यस्मात् योगेश्वराणामारूढयोगानामपि द्रष्टुमशक्यो भवान् कुमेधसां विषयासक्तचित्तानां

नोऽस्माकं दृष्टो दृष्टिगोचरो जातः। दुर्दर्शत्वेऽन्तर्यामित्वं हेतुं वदन् सम्बोधयति—अधीश्वरेति ॥ ११ ॥ इत्येवं राज्ञा युधिष्ठिरेण अभ्यर्थितः स्तुतिपूजादिपूर्वकं सम्प्रार्थितो विभुः स्वतन्त्रः स श्रीकृष्णः इन्द्रप्रस्थवासिनां नयनानन्दं जनयन् वार्षिकान् वर्षोपलक्षितान् चतुरो मासान् सुखं यथा भवति तथा तत्रावासेति शेषः ॥ १२ ॥

अन्वितार्थप्रकाशिका

तदेति ॥ यदा ज्ञातीन् बन्धून् नोऽस्मान् स्मरता त्वयाऽस्मद्वृत्तज्ञानाय मम भ्राता अक्रूरः प्रेषितः। तदैव नोऽस्माकं कुशलमभूत् तथा ते त्वया वयं सनाथाः सस्वामिनश्च कृताः ॥ ९ ॥ नेति ॥ विश्वस्य जगतः सुहृच्चासावात्मा यस्तस्य ते तव स्वः पर इति भ्रान्तिर्नास्ति तथापि स्मरतां भक्तानां हृदि शश्वत् सर्वदा स्थितः सन् क्लेशान् हंसि नाशयसि ॥ १० ॥ किं न इति ॥ हे अधीश्वर ! नोऽस्माभिः किं श्रेय आचरितं पुण्यं कृतमित्यहं विशेषतो नो वेद न जानामि। किंतु सामान्यत एव जानामि। यत् यस्मात् योगेश्वराणामपि दुर्दर्शः त्वं कुमेधसां विषयासक्तचित्तानाम्। असिजार्षः। दृष्टोऽसि दृश्यस इत्यर्थः। बुद्ध्यर्थत्वाद्वर्तमाने क्तः। अत एव कर्त्तरि षष्ठी ॥ ११ ॥ इतीति। इत्येवं राज्ञा युधिष्ठिरेणाभ्यर्थितः सम्प्रार्थितो विभुः स श्रीकृष्णः इन्द्रप्रस्थौकसां तद्वासिनां नयनानन्दं जनयन् वार्षिकान्वर्षोपलक्षितान् चतुरो मासान् सुखं यथा भवति तथा तत्रोवासेति शेषः। सुखमभ्यर्थित इति वा क्रियासमाप्तिः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नोऽस्माकं तदैव कुशलमभूत्। नोऽस्मान् बंधून् स्मरता त्वया यदा भ्राताऽक्रूरः प्रेषितः ॥ ९ ॥ स्वः स्वकीयः परः परकीयश्चेति भ्रांतिस्तव नास्ति तत्र हेतुगर्भं विशेषणं विश्वस्य सुहृत् मित्रवद्रक्षकश्चासावात्मा अंतर्यामी च तस्य तव तथापि स्मरतां हृदि स्थितस्त्वं ॥ १० ॥ यद्यस्मात् कुमेधसां राज्याद्यासक्तचितानां नोऽस्माकं दृष्टः त्वमस्माभिर्दृश्यसे इत्यर्थः ॥ ११ ॥ अभ्यर्थितः प्रार्थितः सुखमवसदिति शेषः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह। तदैवेति। हे कृष्ण, यदा ज्ञातीन् बन्धून्, नोऽस्मान्, स्मरता त्वया, मे मम, भ्राताऽक्रूरः प्रेषितः। तदैव, ते त्वया, वयं सनाथाः कृताः। तथा, तत आरभ्येति शेषः। नोऽस्माकं, कुशलमपि, अभूत् ॥ ९ ॥ ज्ञातीत्यनेन प्राप्तां ममतां वारयितुमाह। नेति। हे कृष्ण, विश्वस्य जगतः, सुहृच्चासावात्मान्तरात्मा च तस्य, ते तव, स्वपरभ्रान्तिः अयं स्वः अयं च पर इत्येवंभूतो भ्रम इत्यर्थः। न अस्ति। तथापि स्वपरभ्रान्त्यभावेऽपि, स्मरतां भक्तानां, हृदि स्थितः, त्वं, शश्वत् सदा, क्लेशान्, हंसि नाशयसि ॥ १० ॥ अथ युधिष्ठिर आह। किमिति। हे अधीश्वर, नोऽस्माभिः, किं श्रेयः पुण्यं, आचरितं कृतम्। तत् अहं, न वेद। सामान्यतो महत्पुण्यं किंचित् कृतं भवेदेवेति तु वेद्मीति भावः। यद्यस्मात्, योगेश्वराणामपि, दुर्दर्शः सम्यक् द्रष्टुमशक्यः भवान्, कुमेधसां विषयासक्तचित्तानां, नोऽस्माकं, दृष्टः, त्वद्दर्शनमेव किंचिन्मदीयं प्राक्तनं सुकृतमावेदयतीति भावः ॥ ११ ॥ इतीति। इतीत्थं, राज्ञा युधिष्ठिरेण, अभ्यर्थितः बहुमतः विभुः, सः श्रीकृष्णः, वार्षिकान् वर्षाकालसंबन्धिनः मासान् इन्द्रप्रस्थौकसां नयनानन्दं जनयन् सन् सुखं यथा तथा, न्यवसदिति शेषः वै। अधिकरणतामिन्द्रप्रस्थौकसामितिपदमावेदयति ॥ १२ ॥

कृष्णप्रिया

श्रीकृष्ण ! जिस समय तुमने हमलोगों को अपना कुटुम्बी, सम्बन्धी समझकर स्मरण किया और हमारा कुशल-मङ्गल जानने के लिये भाई अक्रूर को भेजा, उसी समय हमारा कल्याण हो गया, हम अनाथों को तुमने सनाथ कर दिया ॥९॥ मैं जानती हूँ कि तुम सम्पूर्ण जगत् के परम हितैषी सुहृद् और आत्मा हो। यह अपना है और यह पराया, इस प्रकार की भ्रान्ति तुम्हारे अंदर नहीं है। ऐसा होनेपर भी श्रीकृष्ण ! जो सदा तुम्हें स्मरण करते हैं, उनके हृदय में आकर तुम बैठ जाते हो और उनकी क्लेश-परम्परा को सदा के लिये मिटा देते हो ॥ १० ॥ युधिष्ठिरजी ने कहा—सर्वेश्वर श्रीकृष्ण ! हमें इस बात का पता नहीं है कि हमने अपने पूर्वजन्मों में या इस जन्म में कौन-सा कल्याण-साधन किया है ? आपका दर्शन बड़े-बड़े योगेश्वर भी बड़ी कठिनता से प्राप्त कर पाते हैं और हम कुटुम्बियों को घर बैठे ही आपके दर्शन हो रहे हैं ॥ ११ ॥ राजा युधिष्ठिर ने इस प्रकार भगवान् का खूब सम्मान किया और कुछ दिन वहीं रहने की प्रार्थना की। इसपर भगवान् श्रीकृष्ण इन्द्रप्रस्थ के नर-नारियों को अपनी रूपमाधुरी से नयनानन्द का दान करते हुए बरसात के चार महीनों तक सुखपूर्वक वहीं रहे ॥ १२ ॥

एकदा रथमारुह्य विजयो वानरध्वजम् । गाण्डीवं धनुरादाय तूणौ चाक्षयसायकौ ॥ १३ ॥
साकं कृष्णेन संनद्धो विहर्तुं[1] विपिनं[2] महत् । बहुव्यालमृगाकीर्णं प्राविशत् परवीरहा ॥ १४ ॥
तत्राविध्यच्छरैर्व्याघ्रान् सूकरान् महिषान् रुरून् । शरभान् गवयान् खड्गान् हरिणाञ्छशशल्लकान् ॥ १५ ॥
तान् निन्युः किंकरा राज्ञे मेध्यान् पर्वण्युपागते । [3]तृट्परीतः परिश्रान्तो बीभत्सुर्यमुनामगात् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—एकदा, विजयो, वानरध्वजं, रथं, आरूह्य, गाण्डीवं, धनुः, अक्षयसायकौ, तूणौ, च, आदाय, वनं, प्राविशत्, इति, परेण, अन्वयः ॥ १३ ॥ परवीरहा, सन्नद्धः, कृष्णेन, साकं, बहुव्यालमृगाकीर्णम्, गहनं, वनं, विहर्तुं, प्राविशत् ॥ १४ ॥ तत्र, व्याघ्रान्, सूकरान्, महिषान्, रुरून्, शरभान्, गवयान्, खड्गान्, हरिणान्, शशशल्लकान्, शरैः, अविध्यत् ॥ १५ ॥ तान्, मृगान्, पर्वणि, उपागते, राज्ञे, किङ्कराः, निन्युः । वीभत्सुः, तृट्परितः, परिश्रान्तः- यमुनाम्, अगात् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कालिंदीदर्शनप्रसंगमाह । एकदेति । अक्षयाः सायका ययोस्तौ तूणौ इषुधी ॥ १३-१५ ॥ राज्ञे युधिष्ठिराय मेध्यान्कर्मार्हान्, बीभत्सुरर्जुनः ॥ १६-१७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एकदा कदाचित् । विजयोऽर्जुनः "विजयः स्याज्जये पार्थे स्त्रियां तिथ्यंतरे स्मृतः" इति मेदिनी । 'तूणी नील्यां निषङ्गे ना' इति च । एकदेति युग्मकम् । एकदा खांडवदाहानन्तरम् । तदानीमेवार्जुनस्य गांडीवादिलाभात् । तथाप्यत्रोक्तिः सुखविहारप्रसंगात् । वानरः श्रीहनुमान् ॥ १३ ॥ विपिनं गम्भीरमशब्दं वा "अशब्दे विपिनं प्रोक्तं वनगम्भीरयोरपि" इति धरणिः ॥ १४ ॥ तत्र वने । विशेषतो घ्राणनशीलान् व्याघ्रानिति सूकरविशेषणं तन्मांसस्याभक्ष्यत्वात् । यद्वा—हिंसकत्वात्तानविध्यन्न तूपयोगार्थम् । महिषान् वन्यानेव । रुरून् कृष्णमृगान् 'रुरुः कृष्णमृगे दैत्ये' इति धरणिः । शरभानष्टापदान् । खड्गान् गंडकान् । शल्लकान् शल्यान् "शरभोष्टा पदमृगे करभे वानरांतरे" इति मेदिन्यादौ । "खड्गो गण्डक शृङ्गासिबुद्धभेदेषु गंडके" इति मेदिनी । रुरवो मृगविशेषाः । शरभा अष्टापदाः । गवया गोसदृशाः । खड्गा गंडकाः ॥ १५ ॥ तान् व्याघ्रादीन् । पर्वणि श्राद्धोचिते यज्ञोचिते काले । "बीभत्सुर्नाऽर्जुने क्रूरघृणात्मविकृतौ त्रिषु" इति मेदिनी । तेषु मेध्याः कर्मार्हास्तान् राज्ञे राजानं याजयितुं निन्युः । राज्ञ इति—राज्ञि तस्य धर्मत्वादिति भावः । ये त्वमेध्या व्यालाद्यास्तेषां दुश्चेष्टानां मारणेनान्येषां कृतार्थता स्यादित्यभिप्रायेण ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एकदेति युग्मकम् एकदा खण्डवदाहाद्यनन्तरं तदानीमेवार्जुनस्य गाडीवादिलाभात् तथाप्यत्रोक्तिः सुखविहारप्रसङ्गात् ॥ १३—१४ ॥ रुरवः मृगविशेषाः शरभाः अष्टापदाः गवयः गोसदृशाः खड्गा गण्डकाः ॥ १५ ॥ मेध्यानिति तेषु ये मेध्यास्तान् राज्ञे राजानं याजयितुं निन्युः राज्ञ इति राज्ञि तस्य धर्मत्वादिति भावः । ये त्वमेध्या व्यालास्तेषां दुश्चेष्टानां मारणेनान्येषां दुर्मरणातिक्रमः स्वकृतेन तु तेन तेषामपि कृतार्थता स्यादित्यभिप्रायेण ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एकदेति खाण्डवदाहानन्तरं ज्ञेयम्, तदानीमेवार्ज्जुनस्य गाण्डीवादिलाभात् । तथाप्यत्रोक्तिः सुखविहारप्रसंगादिति दिक् । विशेषेण जयतीति विजय इत्यन्वर्थसंज्ञत्वमेव दर्शयन् रथादीनामपि जैत्रत्वं बोधयति—वानरध्वजमित्यादिविशेषणैः । वानरः श्रीहनुमान्, गां पृथ्वीं डीवयति नादयति शब्दयतीति गाण्डीवम्, सन्नद्धो बद्धकवचादिः, महद्विस्तीर्णं निविड़म् वेत्यर्थः । कृष्णेन सख्यादिना निजचित्ताकर्षकेण भगवता साकम्, अतएव प्रकर्षेणाविशत् । एवमेकमेव रथमारूह्य द्वयोरपि प्रवेशो ज्ञेयः । अतएव तस्य भयाभवं सामर्थ्यञ्च सूचयन्नाह—परेति । किंवा परवीरहननशक्तिं दर्शयन्निति भावः । एवं विजय-

---

[1] विजनं—वीर । [2] वनम्—श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु ; महत्-बृहत्—श्रीधर. टि. । [3] ततः क्षुत्तृट्-परिश्रान्तो—वीर. ।

त्वमेव साधितम् । रुरवः क्रूरमृगविशेषाः, शरभा अष्टापदाः, गवया गोसदृशाः, खड्गा गण्डकाः, अन्ये प्रसिद्धाः ॥ १५ ॥ किंकरास्तस्य राज्ञो वा सेवकाः, मेध्यानिति व्याघ्रादि व्यष्वच्छेदार्थम्, न च स्वयं भक्षयितुं किन्तु पार्व्वणश्राद्धार्थमित्याह—पर्व्वणीति । राज्ञ इति राजधर्म्मत्वादिति भावः । तृषा परीतो व्याप्तः, यतः परितः श्रान्तः, बीभत्सुरिति दुष्टकर्मनिन्दनाभिप्रायेण, अतः श्रीकालिन्द्यां तस्य कामो निरस्तः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

गाण्डीवं धनुरादायेतीदं वक्ष्यमाणकथायाः पाश्चात्यं वृत्तं खाण्डवदाहात्पूर्वं गाण्डीवप्राप्त्यनुपपत्तेः ॥ १३-१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

कालिन्दीदर्शनप्रसङ्गमाह—एकदा तदैकदा विजयोऽर्जुनः वानरो हनुमत्प्रतिकृतिध्वजे यस्मिस्तं रथमारुह्याक्षया अक्षीणास्सायका ययोस्तौ तूणाविषुधी चादाय ॥१३॥ सन्नद्धः कवचितः कृष्णेन सहितो विहर्तुं निर्जनं वनं प्राविशत् व्यालाः सर्पा गजा वा इदं वक्ष्यमाणकथायाः "यदा च कृष्णः सन्दिष्टः" इत्यादिकायाः पाश्चात्यवृत्तान्तः खाण्डवदहनात् पूर्वङ्गाण्डीवप्राप्त्यनुपपत्तेः ॥ १४ ॥ तत्रेति तत्र वने शरैर्व्याघ्रादीनविध्यज्जघान ॥ १५ ॥ तानिति तत्र मेध्यान्कर्मार्हान्मृगान् राज्ञे युधिष्ठिराय किंकरा निन्युः प्रापयामासुः भक्षणार्थशङ्कां व्युदस्यति—पर्वण्युपागत इति । पर्वप्रयुक्तकर्मण्युपस्थिते सतीत्यर्थः । ततः क्षुत्तृड्भ्यामशनापिपासाभ्याम् परिश्रान्तो बीभत्सुरर्जुनः यमुनां जगाम ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विपिनं गम्भीरम् ॥ १४ ॥ महिषान्वनमहिषान् रुरून्कृष्णमृगान् शरभानष्टपदान् खड्गान्मृगविशेषान् हरिणान्सामान्यमृगान् शल्यकान् शललान् ॥ १५ ॥ राज्ञे युधिष्ठिराय पर्वणि श्राद्धोचिते यजनकाले वा ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एकदेति खाण्डवदाहाद्यनन्तरम् तदानीमेवार्जुनस्य गाण्डीवादिलाभात् ॥ १३-१५ ॥ मेध्यांस्तेषु कर्मार्हान् राज्ञे राजानं याजयितुं निन्यु; बीभत्सुरर्जुनः ॥ १६-१७ ॥

गूढार्थदीपिनी

एकदेति युग्मम् । विजयोऽर्जुनः । तूणौ इषुधी । साकं सह । सन्नद्धो धृतकवचः । गहनं दुर्गमम् । विपिनमिति पाठे गम्भीरम् । व्यालो दुष्टगजः मृगसाहचर्यात् ॥ १३-१४ ॥ तत्र वने । रुरुः कृष्णमृगे दैत्ये इति धरणिः । शरभोऽष्टापदः व्याघ्रहन्ता । गवया गोसदृशाः खड्गाः गेंडा इति ॥ १५ ॥ तान् व्याघ्रादीन् । व्याघ्रमांसस्याभक्ष्यत्वात्परहिंसकत्वात्ते हता इत्यवधेयम् । वीभत्सुः अर्जुनः । मेध्यान् कर्मार्हान् राज्ञे राजानं याजयितुम् ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मेध्यान् कर्मार्हान् ॥ १५ ॥ बीभत्सुरर्ज्जुन; ॥ १६-२१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इयत्त्वराकारणं किमित्यत आह । सत्मभामापितुस्तस्मै द्रुह्यतीति ध्रुक् तं शतधन्वानं निहन्तुं शतधन्वनि दुर्बुद्धौ हते सति । धरतीति धरः सीरस्य धरः सीरधरः ! सीरस्तिग्मकरे हल इति विश्वः । हलधरोऽग्रजः कुपितो मामनादृत्य विमनाः सन्विदेहान्देशान्ययौ । कुतो विमनस्कतेत्यतोऽप्याह । बुद्धौ मयि मणिस्तेयविषयिण्यां विपरीतं मतौ प्रादुर्भूतायामिति । एतावन्तं महाकालं पञ्चसंवत्सरात्मकं तदागमनकाङ्क्षया । तस्य बलस्य ॥ १३ ॥ पुर एव द्वारकायामेव । पुरः एव सर्वेषां पुरोऽग्र एवापवादतोदनार्थमवसमिति वा । कार्ययंत्रितः कार्याधीनः क्वापि नागच्छम् । एवं वादिनं स्नेहपरिप्लुता तद्रसार्द्रा कुन्तीति प्राह । इति वादिनमेवं प्राहेति वा ॥ १४ ॥ शतधन्वनः परत्वं सत्यभामादीनां स्वकीयत्वं च तत्कर्मानुरोधेन न तु तव विषमसमत्वादितः । किञ्च जनानां स्मृतित उद्धर्तुमियं लीलेत्यालपति । न त इति । विश्वस्य जगतः सुहृदात्मनोऽनिमित्तोपकारिस्वामिनस्ते स्वः पर इति योग्यता विना नास्ति विश्वस्य विश्वासं कृत्या न ते नमस्कर्तरि सुहृच्छोभनमनस्कः स्वात्मनः स्वामिनस्ते स्वः स्वकीयस्तदाऽस्ति । अस्ति स्वं शाश्वतं धनं यस्य सोऽस्ति स्वः । यस्यासुहृदात्मनः सुहृद्भिन्नजीवस्य विश्वसिसि जगदात्मकवदाचारसि स पर इति वा योजना । तथाऽपि तव वैषम्याद्यभावेऽपि स्मरतां स्मरन्त्यश्च स्मरन्तश्च स्मरतां । मधुमथनकंसहिंसकेत्यादिनामानि हृदिस्थितः सर्वान्क्लेशान्हंसि ॥ १५ ॥ वार्षिकान्मासांश्चतुरो राज्ञा धर्मेणाभ्यर्चितः सुसुखं यथा तथा इन्द्रप्रस्थौकसां नयनानन्दं जनयन् इति सङ्कथयन्कथा उवासेति शेषः ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं भक्तिमुक्त्वा कर्माह **एकदे**ति। मासचतुष्टयमध्य एव अष्टकाद्यर्थं आखेटकार्थं गमनम्। वानरध्वजो रथोर्जुनस्य। एतत्प्राप्तिमप्यग्रे वक्ष्यति। इदानीमसाधन इति शक्त्या सहितस्तथा भवतीति विवाहानन्तरं परिग्रहानन्तरं वा तद्वक्ष्यति। वानरो हनूमान् ध्वजे यस्येति। तेषु भगवत्कृपा महती निरूपिता। गाण्डीवमप्यग्नेः सकाशादेव प्राप्तम्। तूणीरौ च अक्षयसायकौ। तत एव प्राप्तं त्रिविधमेतत्। कृष्णेन सह भावः सर्वेषामयातयामत्वाय। फलसाधनयुक्तता वा। **सन्नद्धो** बद्धकवचः। पुनरपि युद्धं संभविष्यतीति पूर्वयुद्धं जातमप्यग्रे निरूप्यते। अन्यथा विवाहस्य प्राधान्यं न स्यात्। भगवदैच्छिकोऽयं पदार्थक्रम इति न वैपरीत्यम्। प्रथमं खाण्डवदाहः, पश्चात्स्त्रीप्राप्तिरिति। विचारितं तु तथा, कृतं त्वत्रोच्यते **विहर्तु**मिति। तदेवाह **बहुव्यालमृगाकीर्ण**मिति। व्याला दुष्टाः, मृगा अदुष्टाः, सावरणा निरावरणाश्चेति कर्मबन्धो निवारितः। **महद्विपिन**मिति। मृगयारूपा क्रीडा तत्रानन्ता भवतीति वा। उभयान्हन्तीत्युत्कर्षः। तेषां मारणे सामर्थ्यमाह **परवीरहे**ति। शत्रूणां विवेकपूर्वकं युद्धं कुर्वतामपि यो वीरहा ॥ १३–१४ ॥ अतस्तत्र गतः पञ्चविधान् द्विविधानपि मारितवानित्याह **तत्राविध्य**दिति। शरैर्न तु कपटैः। व्याघ्रा महिषा रुरवश्च त्रयो दुष्टत्वेन मारणीयाः। तेषां चर्मनखाद्युपयोगः। शल्यका अपि कठिना इति तैः सहोक्ताः। परं भक्ष्याः। शरभादयश्च षट्। तत्र शरभगवयावभक्ष्यौ। शूकरश्चेत्पूर्वमुक्तः, तदापि भक्ष्यः। पञ्च भक्ष्याः, पञ्चाभक्ष्याश्चेति दश निरूपिताः ॥१५॥ तत्रोत्तमानां कर्मोपयोगमाह **तान्निन्यु**रिति। किङ्करा इति महिषगर्दभादिभिस्तन्नयनप्रतिषेधः। यतो मेध्याः। तत्रापि पर्वण्यष्टकादावुपस्थिते ॥ १६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

कृतं त्विति पूर्वं कालिन्दीप्राप्तिः, पश्चाद्गाण्डीवादिप्राप्तिः। अधुना तु गाण्डीवादिकं भगवदिच्छासिद्धं गुप्तं तादृग्जनवेद्यम्। इदमेव पश्चादग्निद्वारा प्रकटतया दापयिष्यति। 'निमित्तमात्रं भव सव्यसाचि'न्निति न्यायोऽनुसंधातव्यः।

श्रीसुबोधिनी–सारः

एकदा वानरो हनूमान् ध्वजे यस्य तं रथम् आरुह्य गांडीवं धनुः अक्षया अनंताः सायका ययोस्तौ तूणौ इषुधी आदाय विजयोर्जुनः कृष्णेन साकं सह सनद्धः धृतकवचो विहर्तुं क्रीडितुं बहुभिर्व्यालैर्मृगैराकीर्णं गहनं वनं प्राविशत् यतः परवीरहा एतेन निर्भयत्वमुक्तम् ॥ १३–१४ ॥ तत्र वने शरैर्व्याघ्रादीन् विध्यत् अहन् ॥ १५ ॥ पर्वणि उपागते प्राप्ते सति तान् हतान् मेध्यान् पशून् किंकरा भृत्या राज्ञे युधिष्ठिराय निन्युः प्रापयांबभूवुः तृषापरीतो व्याप्तः परिश्रांतः खिन्नो बीभत्सुरर्जुनो यमुनामगात् ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कालिन्दीदर्शनप्रसङ्गमाह—एकदेति। परवीरहा परशत्रुपक्षनाशकर्ता विजयोऽर्जुनः वानरो हनुमत्प्रतिकृतिर्ध्वजे यस्मिंस्तथाभूतं रथमारुह्य गाण्डीवाख्यं धनुः अक्षय्याः अक्षीणाः सायका ययोस्तौ तूणीरौ इषुधी चादाय सन्नद्धो बद्धकवचः कृष्णेन सहितो विहर्तुं मृगयां कर्तुं चरितुं बहुव्यालमृगाकीर्णं विपिनं वनं प्राविशदिति द्वयोरन्वयः ॥ १३–१४ ॥ तत्र वने व्याघ्रादीन् शरैरविध्यत् जघान ॥ १५ ॥ तत्र मेध्यान् कर्मार्हान् तान् मृगान् पर्वण्युपागते पर्वयुक्ताष्टकाश्राद्धादिकर्मण्युपस्थिते सति राज्ञे युधिष्ठिराय किङ्करा निन्युः प्रापयामासुः। ततः तृषा पिपासया परीतो व्याप्तः परिश्रान्तश्च बीभत्सुः अर्जुनो यमुनामगात् ॥ १६ ॥

अन्वितार्थप्रकाशिका

एकदेति युग्मम्। एकदा खाण्डवदाहानन्तरं तत्रैवार्जुनस्य गाण्डीवादिलाभात् परवीरहा परशत्रुपक्षनाशकर्त्ता विजयोऽर्जुनः वानरो हनुमत्प्रतिकृतिर्ध्वजे यस्य तथाभूतं रथमारुह्य गाण्डीवाख्यं धनुः अक्षयाः अक्षीणाः सायका ययोस्तौ तूणी इषुधी चादाय सन्नद्धो बद्धकवचः कृष्णेन सहितो विहर्तुं मृगयां कर्त्तुं बहुव्यालमृगाकीर्णं विपिनं वनं प्राविशत् ॥ १३–१४ ॥ तत्रेति ॥ तत्र वने व्याघ्रादीन् शरैरविध्यत् जघान। शरभा अष्टापदाः खड्गा गण्डकाः ॥ १५ ॥ तानिति ॥ तत्र मेध्यान् कर्मार्हान् तान्मृगान् पर्वण्युपागते पर्वयुक्ताष्टकाश्राद्धादिकर्मण्युपस्थिते सति राज्ञे युधिष्ठिराय किङ्करा निन्युः प्रापयामासुः। अमेध्या व्याघ्रादयः परहिंसकत्वाद्धता इति भावः। ततः तृषा पिपासया परीतो व्याप्तः परिश्रान्तश्च बीभत्सुः अर्जुनो यमुनामगात् ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अक्षयसायकौ अक्षयबाणौ तूणौ निषंगौ ॥ १३ ॥ सन्नद्धो धृतवर्मा। व्यालः सर्प्पः ॥ १४ ॥ तत्र महावने। हिंस्रेभ्यो व्याघ्रादिभ्यः दुर्बलान् हरिणादीन्। अवन् रक्षन्सन्। सुचिरं क्रीडित्वा। तृट्परीतस्तृषाव्याकुलः बीभत्सुरर्ज्जुनः ॥ १५ ॥ विशदं निर्मलं जलं उपस्पृश्य पादप्रक्षालनपूर्वकमाचम्य ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कालिन्दीदर्शनप्रसङ्गमाह। एकदेति। साकमिति च। एकदा कदाचित्, परवीरहा, विजयोऽर्जुनः, अक्षयसायकौ तूणौ गाण्डीवं धनुश्च, आदाय, वानरध्वजं हनुमत्केतुकं, रथं आरुह्य संनद्धः कवचितः सन्, कृष्णेन साकं, विहर्तुं, बहुव्यालमृगाकीर्णं; निर्जनं वनं, प्राविशत्। इति द्वयोरेकान्वयः ॥ १३–१४ ॥ स्वस्य परवीरहत्वात् स्वीकृतवीरभावैर्व्याघ्रादिभिः कृतां वननिर्जनतां विलोक्य वने जनसंचरणकरणकामो विजयस्तत्र यदकरोत्तदाह। तत्रेति। तत्र वने, शरैः व्याघ्रान् जनान्मारयतः शार्दूलान्, सूकरानुद्धतवनवराहान्, महिषानुच्छृङ्खलवनसैरिभान् रुरूनत्युद्धतकृष्णमृगान् जनान्मारयतोऽष्टपदान्, गवयान् उक्तविधगोसदृशपशुविशेषान्, खड्गानुक्तविधमृगविशेषान्, हरिणान्, शशान् शल्लकांश्च, अविद्धयत्। तत्र व्याघ्रादिहननान्तरापतितत्वेन हरिणान् शशांश्च हतवान्। शल्लकांस्त्वौद्धत्येन शल्लैर्जनघ्नत्वेन हतवानित्यर्थः ॥ १५ ॥ तानिति। पर्वणि, उपागते, किंकराः राजकिंकराः, मेध्यान् तद्गतदुर्बलार्द्रनेक्षया हननार्हान् बुद्ध्वा हतानित्यर्थः। 'मेधृ संगमे च चाद्धिसायाम्' इति धातो रूपम्। तान् व्याघ्रादीन्, राज्ञे, निन्युः। न भक्षणार्थं किं तु पर्वोपागतराज्ञः राजानं च स्वकृतदुर्बलावनं दर्शयितुमर्जुनाज्ञया ते निन्युरिति भावः। ततः तृट्परीतः परिश्रान्तः, क्वचित्तु ततः क्षुत्तृट्परिश्रान्त इत्यपि पाठः। बीभत्सुरर्जुनः, यमुनां अगात् ॥ १६ ॥

कृष्णप्रिया

परीक्षित्! एक बार वीरशिरोमणि अर्जुन ने गाण्डीव धनुष और अक्षय बाणवाले दो तरकस लिये तथा भगवान् श्रीकृष्ण के साथ कवच पहनकर अपने उस रथ पर सवार हुए, जिस पर बानर-चिह्न से चिह्नित ध्वजा लगी हुई थी। इसके बाद विपक्षी वीरों का नाश करने वाले अर्जुन उस गहन वन में शिकार खेलने गये, जो बहुत से सिंह बाघ आदि भयङ्कर जानवरों से भरा हुआ था ॥ १३–१४ ॥ वहाँ उन्होंने बहुत-से बाघ, सूअर, भैंसे, काले हरिन, शरभ, गवय (नीलापन लिये हुए भूरे रंग का एक बड़ा हिरन), गैंडे, हरिन, खरगोश और शल्लक (साही) आदि पशुओं पर अपने बाणों का निशाना लगाया ॥ १५ ॥ उनमें से जो यज्ञ के योग्य थे, उन्हें सेवकगण पर्व का समय जानकर राजा युधिष्ठिर के पास ले गये। अर्जुन शिकार खेलते-खेलते थक गये थे। अब वे प्यास लगने पर यमुना जी के किनारे गये ॥ १६ ॥

तत्रोपस्पृश्य [1]विशदं पीत्वा वारि महारथौ। कृष्णौ ददृशतुः कन्यां चरन्तीं चारुदर्शनाम् ॥ १७ ॥
तामासाद्य वरारोहां [2]सुद्विजां रुचिराननाम्। पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमाम् ॥ १८ ॥
का त्वं कस्यासि सुश्रोणि [3]कुतोऽवा किं चिकीर्षसि। मन्ये त्वां पतिमिच्छन्तीं[4] सर्वं कथय शोभने ॥ १९ ॥

कालिन्द्युवाच

अहं देवस्य सवितुर्दुहिता पतिमिच्छती। विष्णुं वरेण्यं वरदं तपः परममास्थिता ॥ २० ॥

कर्दमक्षमा

अन्वयः—महारथौ, कृष्णौ, तत्र, उपस्पृश्य, विशदं, वारि पीत्वा, चारुदर्शनां, चरन्तीं, कन्यां, ददृशतुः ॥ १७ ॥ सख्या, प्रेषितः, फाल्गुनः, वरारोहां, सुद्विजां, रुचिराननां, प्रमदोत्तमां, आसाद्य, पप्रच्छ ॥ १८ ॥ हे सुश्रोणि, त्वं, काऽसि, कस्याऽसि, कुतो, आगतासि, किंचिकीर्षसि, अहंतु, त्वां, पतिं, इच्छन्तीं, शोभने, अतः, सर्वं, कथय ॥ १९ ॥ कालिन्दी उवाच, अहं, देवस्य, सवितुः, दुहिता, वरेण्यं, वरदं, विष्णुं, पतिमिच्छती, परमं, तपः, आस्थित, अस्मीतियावत् ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सख्या श्रीकृष्णेन ॥ १८–२० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र यमुनायाम्। कन्यां दीप्तामुत्पन्नरजसं पतिमिच्छन्तीम्। "अनवाप्तपतिः कन्या जातवीर्या वरार्थिनी" इत्युत्पलः। महान् रथो ययोस्तौ, तच्च रथारोहणे दूराद्ददृशुरिति भावः। चरंतीमिति—रथादिशब्दं श्रुत्वा स्वगोपनायेतस्ततो भ्रमंतीम्। यद्वा—तपश्चरन्तीम्, तप इति शेषः। तच्च श्रीकृष्णमनःप्रणिधानरूपं ज्ञेयम्, उभयथापि कन्याकर्तृकदर्शनं तद्द्वयेन जातमिति

---

१. सलिलं पीत्वा मृष्टमविप्रभम्–विज. । २. सुदतीं–विज. । ३. तोऽसि किं–श्रीधर. वंशी. जीव. विश्व. शुक. सु ; कुतो वा–वीर विज. । ४. कन्ये–वीर ; कन्यां–विज. ।

परस्परदर्शनं नोक्तम् । कृष्णाविति सनामत्वे नाप्यन्योन्यं सख्येन चित्ताकर्षणात् । दृश्यत इति दर्शनं रूपं, चारु तद्यस्यास्तां परमसुन्दरीमित्यर्थः ॥ १७ ॥ तां कालिंदीम् । तदेवाभिव्यंजयन्विशिनष्टि—वरेत्यादिना । अनुक्तमन्यदपि सौंदर्यमुद्दिशति—प्रमदासूत्तमामिति । सख्या प्रेषितः सन्नेव, न तु स्वयं तत्कामेनेत्यर्थः । तत्र सखिशब्दप्रयोगेण श्रीकृष्णस्याप्यसंकोचो दर्शितः । एवं रथादवरुह्य गत इति च ज्ञेयम् । तस्य प्रेषणञ्च स्वपत्नीत्वकामनया, अन्यथा स्वयमेवागमिष्यदिति भावः ॥ १८ ॥ कस्य पुत्र्यसि । का देवी मनुष्यादीनां मध्ये कतमा, किंनाम्नी चेत्यर्थः । कस्य वा पुत्र्यसि । अत्र कुतः स्थानादागतासीति कुत्र तिष्ठसीत्यर्थः । यद्वा—कस्माद्धेतोः किं कर्तुमिच्छसीत्यर्थः । कन्यामपरिणीतामत एव पतिमिच्छन्तीं मन्ये । सुश्रोणीत्यत्र हे परमसुन्दरीत्येव विवक्षितम् । भगिनीशब्दे स्वसृत्वमात्रस्यैव रूढ्या तत्र तावन्मात्रस्य प्रतीतेः । वरारोहाशब्दस्याप्येवमेव गतिः कार्या । शोभने हे परमगुणवति, इत्यतः स्वानुरूपपरमसौन्दर्यादियुक्तमेव पतिमिच्छसीति भावः । कथय तत्सर्वं मया पृष्टं प्रत्युत्तरय । कन्यामित्यत्र 'सर्वम्' इति पाठः क्वचित् । यद्वा—हे शोभने इति शोभनप्रकारेण कथयितुमर्हसीति भावः ॥ १९ ॥ वरेण्यं प्रार्थनीयम् । तत्र मदभीष्टादन्योऽयं पुरुष इत्याशंक्य सहसैव स्वाभिलषितं व्यनक्ति—अहमिति । देवस्येत्यादरे । तथापि देव्यस्मीति भावः । विष्णुं निजैश्वर्येण सर्वव्यापकम्, अतो वरेण्यं सर्वश्रेष्ठम्, अतो वरदं सर्वाभीष्टदम्, अतस्तमेव पतिमिच्छती ॥२०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महान् रथो ययोस्तौ उच्चरथारोहणेन दूराद्ददृशतुरिति भावः चरन्तीमिति रथादिशब्दं श्रुत्वा स्वगोपनाय तत इतो भ्रमन्तीं यद्वा चरतीं तप इति शेषः । तच्च श्रीकृष्णे मनःप्रणिधानरूपं ज्ञेयम् उभयथाऽपि कन्याकर्तृकं दर्शनं तद्द्वयेन जातमिति परस्परन्दर्शनं नोक्तं कृष्णाविति सनामत्वेनाप्यन्योन्यसख्येन चित्ताकर्षणात् दृश्यते इति दर्शनं रूपं चारु तद्यस्यास्तां परमसुन्दरीमित्यर्थः ॥ १७ ॥ तदेवाभिव्यञ्जयन् विशिनष्टि–वरेत्यादिना । अनुक्तमन्यदपि सौन्दर्यमुद्दिशति प्रमदासूत्तमामिति सख्या प्रेषितः सन्नेव न तु स्वयं तत्कामेनेत्यर्थः । तत्र सखिशब्दप्रयोगेण श्रीकृष्णस्याप्यसङ्कोचो दर्शितः एवं रथादवरुह्य गत इति तस्य प्रेषणं च स्वपत्नीत्वकामनया अन्यथा स्वयमेवाऽगमिष्यदिति भावः ॥ १८ ॥ का देवी मानुष्यादीनां मध्ये कतमा किं नाम्नी चेत्यर्थः कस्य वा पुत्र्यसि कुतः कस्मात्स्थानात् अत्रागताऽसीति कुत्र तिष्ठसीदित्यर्थः । यद्वा, कस्माद्धेतोः किं कर्त्तुमिच्छसीत्यर्थः कन्यामपरिणीताम् अत एव पतिमिच्छन्तीं मन्ये सुश्रोणीत्यत्रपरमसुन्दरीत्येव विवक्षितं भगिनीशब्दे स्वसृत्वमात्रस्येव रूप्या तत्र तावन्मात्रस्य प्रतोतेः वरारोहाशब्दस्याप्येषैव गतिः कर्तव्या शोभने, हे परमगुणवतीत्यतः स्वानुरूपपरमसौन्दर्य्यादियुक्तं पतिमिच्छतीति भावः । कथय तत्सर्वं मया पृष्टं प्रत्युत्तरय कन्यामित्यत्र सर्वमिति पाठः क्वचित् । यद्वा, हे शोभने ! इति शोभनप्रकारेण कथयितुमर्हसीति भावः ॥ १९ ॥ तत्र मदभीष्टादन्याऽयं पुरुष इत्याशङ्क्य सहसैव स्वाभिलषितं व्यनक्ति–अहमिति । देवस्येत्यादरे तथाऽपि देव्यस्मीति भावः । विष्णुं निजैश्वर्य्येण सर्वव्यापकम् अतो वरेण्यं सर्वश्रेष्ठम् अतो वरदं सर्वाभीष्टदम् अतस्तमेव पतिमिच्छती ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

महान् रथो ययोस्तौ उच्चरथारोहणेन दूराद्ददृशतुरिति भावः । चरन्तीं तप इति शेषः । किंवा पुष्पाद्यर्थं तदागमनापेक्षयैव वा, यमुनातीरे भ्रमन्तीम् । कृष्णाविति सनामत्वेनाप्यन्योन्यं सख्येन चित्ताकर्षणात्; दृश्यत इति दर्शनं रूपं चारु तद्यस्यास्तां परमसुन्दरीमित्यर्थः ॥ १७ ॥ तदेवाभिव्यञ्जयन् विशिनष्टि—वरेत्यादिना । तत्र च वरारोहत्वादेवोक्तिस्तद्विशेषापेक्षया; अनुक्तमन्यदपि सौन्दर्य्यादिकमुद्दिशति—प्रमदासुत्तमामिति । सख्या प्रेषितः सन्नेव, न तु स्वयं तत्कामेनेत्यर्थः । यतः फाल्गुनः फल्गु तुच्छकर्म्म न यस्मिन्नित्यर्थः । एवं रथादवरुह्य गत इति च ज्ञेयम् ॥ १८ ॥ का देवी, मनुष्यादीनां मध्ये कतमा, किं—नाम्नी चेत्यर्थः । कुतः कस्मात् स्थानादत्रागतासीति किंवा कुत्र तिष्ठसीत्यर्थः; यद्वा, कस्माद्धेतोः, किं कर्त्तुमिच्छसीति वा, कन्यामपरिणीतामतएव पतिमिच्छन्तीं मन्ये । सुश्रोणि ! हे परमसुन्दरीति, शोभने ! हे सर्व्वसद्गुणवतीत्यतः स्वानुरूपं परमसौन्दर्य्यादि–युक्तं पतिमिच्छसीति भावः । कथय तत् सर्व्वं मया पृष्ट प्रत्युत्तरय; यद्वा, हे शोभन इति शोभनप्रकारेण कथयितुमर्हसीति भावः ॥ १९ ॥ देवस्येति देव्यस्मीति भावः । विष्णुमिति च निजैश्वर्य्येण सर्व्वव्यापकमिति, अतो वरेण्यं सर्व्वश्रेष्ठम्, अतो वरदं सर्व्वाभीष्टदम्, अतस्तमेव पतिमिच्छन्ती ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सख्या कृष्णेन ॥ १९–५८ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उपस्पृश्य स्नात्वा महारथौ कृष्णार्जुनौ विशदं निर्मलं जलं पीत्वा चारु सुन्दरं दृश्यत इति तथा तां चरन्तीं काञ्चित्कन्यां ददृशतुः ॥ १७ ॥ तामिति सख्या कृष्णेन प्रेषितः फाल्गुनोऽर्जुनः शोभना द्विजा दन्ता यस्या रुचिरमाननं यस्यास्तां वर-

माकाङ्क्षमाणामिव स्थितां पप्रच्छ ॥ १८ ॥ प्रश्नमेवाह—कात्वमिति । त्वं कस्याऽसि कस्य सम्बन्धिन्यासि किं कर्त्तुमिच्छसि अहं तु पतिमिच्छन्तीं कन्यां त्वां मन्ये हे शोभने ! कथय ॥ १९ ॥ उत्तरमाह-अहमिति त्रिभिः सवितुरादित्यस्य दुहितेति कस्यासीत्यस्योत्तरं किं चिकीर्षसीत्यस्योत्तरमाह—वरेण्यं विष्णुं पतिं कामयमाना परमं तप आस्थिता ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कृष्णौ यादवेन्द्रार्जुनौ ॥ १७ ॥ सख्या कृष्णेन ॥ १८ ॥ **कन्यां** दीप्तामुत्पन्नरजसम् अत एव पतिं कामयमानां "कन-दीप्तौ" इति धातुः "अनवाप्तपतिः कन्याजातवीर्यावरार्थिनी" इत्युत्पलमाला ॥ १९ ॥ **वरेण्यं** प्रार्थनीयम् ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सख्या कृष्णेन प्रेषित इति कालिन्द्या स्वस्मिन्नेव निष्ठामर्जुनमावेदयितुम् ॥ १८-१९ ॥ **वरेण्यमिति** यो ह्यतिसुन्दरो विष्णुस्तमेव पतिं वरदं मदभीष्टसम्पादकम् ॥ २० ॥

गूढार्थदीपिनी

उपस्पृश्य आचम्य । **विशदं** स्वच्छम् । **चरन्ती** तपश्चरन्तीम् । दृश्यत इति **दर्शनं** रूपम् **कृष्णौ** कृष्णार्जुनौ ॥ १७॥ **आरोहौ** उरू । **द्विधा** दन्ताः । सख्या श्रीकृष्णेन ॥ १८ ॥ **कस्य** पुत्री ॥ १९ ॥ **वरेण्यं** वरणीयम् ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विजयोऽर्जुनो वानरध्वजं हनुमत्केतुं रथमारुह्य गाण्डीवं धनुरादाय तथाऽक्षयसायकौ अक्षयाः सायका वाणा ययोस्ता**विषुधी** चादाय ॥१७॥ कृष्णेन साकं सह सन्नबद्धो विहर्तुं बहुव्यालाः सर्पा मृगाश्च तैराकीर्णं व्याप्तमिति विपिनं कम्पनं कम्पकम्। वेट् । प्रयुपन इति वेः प्ररूपत्वपक्षे विपितुर्हि ब्योर्ह्रस्वश्चेतीनन् । विशेषेण पियन्त्यत्रेति भानुः । वनमिति वनं सम्भजनीयं शूरैः। विपिनं काननमिति वा **परवीरहा** प्राविशत् ॥ १८ ॥ आविध्यद्विव्याध व्याघ्रादयोऽष्टमे स्पष्टाः । रुतून्सारङ्गान् सारङ्गः कुञ्जरः ख्यात इत्यनेकार्थध्वनिपदमञ्जरी । सारङ्गा वनगजा हरिणाः कृष्णसारा अतो न पुनरुक्तिः ॥ १९ ॥ मेध्यान्पवित्रान् पर्वणि श्रद्धादिकर्मोचिते कालविशेष उपगते इति । तृषापरीत इति श्रान्तो बीभत्सुरर्जुनो यमुनामगात् ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्र सङ्गे मृगा इव कन्याप्युपलब्धेत्याह **तत्रोपस्पृश्येति**। उपस्पर्शनं स्नानम् । ततः पानम् । विशदत्वात् न जलानयनसङ्ग्रहः । **महारथाविति** स्त्रीदर्शने न शङ्का । उभावपि कृष्णाविति भगवत्तेज एव विभक्तमिति न दर्शने दूषणम्, कन्यात्वाच्च । तत्रापि **चरन्ती** यमुनातीरे परिभ्रमन्ती भगवन्तं द्रष्टुमागता । चारु दर्शनं यस्या इति सापि पश्यतीति निरूपितम्। तेन प्रश्नादिकं न विरुद्धमिति भावः ॥ १७ ॥ भोग्यरूपा सेति लौकिकन्यायेनैव ग्राह्येति स्वयं गते अर्जुनस्य वैमनस्यं स्यादिति शक्तिः समा स्थापितेति भगवतैव अर्जुनः प्रेषितः पप्रच्छ । वरारोहात्वात् कालो विलम्बं न सहते । **सुद्विजामिति** लक्षणानि निरूपितानि । **रुचिराननामिति** रसवत्त्वम् । सख्या प्रेषणान्न कपटकरणम् । फाल्गुनो जितेन्द्रियश्च । पञ्चाप्सरउद्धारे फाल्गुने अनन्तशयने पञ्चाप्सरसां तत्स्पर्शेन मुक्तिप्रतिपादनात्, तथात्रापि तत्सम्भाषणात् सा भगवन्तं प्राप्स्यतीति तद्वचनं न दूषणम्। न वदिष्यतीत्याशङ्क्याह **प्रमदोत्तमामिति**। प्रकृष्टेन मदो यासाम्, ता एव वदन्ति । तासामपीयमुत्तमा ॥ १८ ॥ **का त्वमिति** प्रश्नचतुष्टयम् । स्वरूपतः का देवनारी, अन्या वा काचिदिति । **कस्यासीति** सम्बन्धी पित्रादिः पृष्टः । **सुश्रोणीति** सम्बोधनम्। अत्र स्थितिरयुक्तेति सूचितम् । कुतो वात्र समागतेति । दैवगत्या समागमने दोषाभावार्थं **किं चिकीर्षसीति** स्थिरतया पृच्छ्यते। यतो नेयमुद्विग्ना, नाप्यन्यत्र गन्तुमिच्छती । अतस्तपस्यादिकं चिकीर्षितं पृष्टम् । तत्स्वस्य हितकारि न भवतीति स्वहितं सम्भावनया पृच्छति **मन्य** इति । पञ्चापि प्रश्ना वक्तव्याः । अन्यथा परिग्रहो न युक्त इति । **सर्वं कथय शोभने** इति तस्या भयाभावः, स्वस्य प्रीतिरपि सूचिता ॥१९॥ अतः कालिन्दी तन्निषेधार्थं भगवन्तमेव वरिष्यामीति पृष्टानर्थानाह **अहं देवरयेति**। देवतात्वाज्ज्ञातिरुक्ता । सवितृत्वात् तत्र नासम्भावना । दुहितृत्वाद्द्वैयैव । अतो न कस्याप्यपराधः सम्भाषणे । त्वत्कल्पितमपि सत्यमेवेत्याह पतिमिच्छतीति । तद्वारणार्थमाह **विष्णुमिति** । तत्र हेतुः **वरेण्यमिति** । सर्वैरेव वरणीयो भगवान् । तत्रापि हेतुः **वरदमिति** । वरं ददातीति वरणीयो वरः । तेन आत्मदस्त्वर्थादुक्तम् । 'किमर्थमागते'त्यस्य 'किं चिकीर्षसी'त्यत्र च उत्तरमाह **तपः परममास्थितेति** । **परमं** शीघ्रफलपर्यवसायि । **आस्थितेति** फलप्राप्तेः पूर्वं न निवृत्तिः सूचिता ॥ २० ॥

श्रीसुबोधिनी-सारः

तत्र यमुनायां **विशदं** निर्मलं वारि जलमुपस्पृश्य पीत्वा महारथौ **कृष्णौ द्वौ** चारु सुन्दरं दर्शनं यस्यास्तां चरन्तीं **कन्यां ददर्शतुः** ॥ १७ ॥ वरः श्रेष्ठ आरोहो यस्याः सुष्ठु द्विजा दन्ता यस्याः रुचिरमाननं मुखं यस्यास्तां प्रमदोत्तमां स्त्रीरत्नं

तां सख्या श्रीकृष्णेन प्रेषितः फाल्गुनोऽर्जुन आसाद्य प्राप्य पप्रच्छ ॥ १८ ॥ हे सुश्रोणि त्वं कासि कस्यासि कुत आगतासि किं कर्त्तुमिच्छसि पतिमिच्छन्तीं त्वामहं मन्ये हे शोभने ! सर्वं त्वं कथय वर्णय ॥ १९ ॥ कालिंद्याह । देवस्य सवितुः सूर्यस्य दुहिता पुत्री वरदमिष्टदं वरेण्यं विष्णुं पतिमिच्छन्ती परमं तप आस्थितास्मि तपः सम्पादयामीत्यर्थः ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

महारथौ कृष्णौ कृष्णार्जुनौ तत्र यमुनायामुपस्पृश्य स्नात्वा विशदं निर्मलं वारि जलं पीत्वा चारु सुन्दरं दृश्यते इति दर्शनं शरीरं यस्यास्तां तत्र तीरे विचरन्तीं कन्यां ददर्शतुरित्यन्वयः ॥ १७ ॥ सख्या श्रीकृष्णेन प्रेषितः फाल्गुनोऽर्जुनस्तां प्रमदोत्तमां स्त्रीश्रेष्ठामासाद्य पप्रच्छेत्यन्वयः । प्रमदोत्तमत्वमुपपादयंस्तां विशिनष्टि—वरौ श्रेष्ठौ आरोहौ उरू यस्यास्ताम् । शोभना द्विजा दन्ता यस्यास्ताम् । रुचिरं सुन्दरमाननं यस्यास्ताम् ॥ १८ ॥ प्रश्नमेवाह—का त्वमिति । तस्यां त्वप्रीतिं सूचयन् सम्बोधयति—हे सुश्रोणि । 'त्वं का' इति स्वरूपजातिनामादिप्रश्नः । 'कस्यासि' इति पित्रादिसम्बन्धिप्रश्नः । 'कुतो वाऽत्र समागता' इति निवासस्थानादिप्रश्नः । 'अत्रागता च त्वं किं चिकीर्षसि' इति प्रयोजनप्रश्नः । अहं तु त्वां पतिमिच्छन्तीं मन्ये, अतः त्वं सर्वं कथय । 'तव चात्र वने विचरणं न युक्तम्' इत्याशयेन सम्बोधयति—शोभने इति ॥ १९ ॥ एवं पृष्टा 'कस्य' इत्यस्योत्तरमाह—अहं देवस्य सवितुः सूर्यस्य दुहितेति । 'किं चिकीर्षसि' इत्यस्योत्तरमाह—विष्णुं पतिमिच्छती कामयमाना परमं तप आस्थिता इति । विष्णोरेव पतितया स्वीकारे हेतुमाह—वरेण्यमिति । वरेण्यं योग्यमित्यर्थः । तत्रापि हेतुमाह—वरदमिति । वरान् कामान् ददातीति तथा तम् ॥ २० ॥

अन्वितार्थप्रकाशिका

तत्रेति ॥ महारथौ कृष्णौ कृष्णार्जुनौ तत्र यमुनायामुपस्पृश्य आचम्य स्नात्वा च विशदं निर्मलं वारि जलं पीत्वा चारु सुन्दरं दृश्यते इति दर्शनं शरीरं यस्यास्तां तत्र तीरे विचरन्तीं कन्यां ददर्शतुः । गुण आर्षः । ददृशतुरिति पाठो वा ॥ १७ ॥ तामिति ॥ सख्या श्रीकृष्णेन प्रेषितः फाल्गुनः अर्जुनः वरौ श्रेष्ठौ आरोहौ ऊरू यस्यास्तां शोभना द्विजा दन्ता यस्यास्तां रुचिरं सुन्दरमाननं यस्यास्तां प्रमदोत्तमामासाद्य पप्रच्छ ॥ १८ ॥ केति ॥ हे सुश्रोणि ! हे शोभने ! त्वं काऽसि कस्याऽसि कुतो वा आगताऽसि किंच चिकीर्षसि । अहं तु त्वां पतिमिच्छन्तीं मन्ये । अतः त्वं सर्वं कथय । अत्र वरारोहासुश्रोण्यादिशब्दे रूढ्या सौन्दर्यस्यैव प्रतीतिर्नतु योगेन भावविरुद्धावयवार्थस्य यथा भगिनीपदे स्वसृमात्रार्थस्य एवं सुभगादिशब्देषूह्यम् ॥ १९ ॥ मदभीष्टाऽन्योऽयमिति ज्ञात्वा सहसैव स्वेष्टमाह—अहमिति । अहं देवस्य सवितुः सूर्यस्य दुहिता वरेण्यं वरणीयं वरदं विष्णुं पतिमिच्छती कामयमाना परमं तप आस्थिता ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सुद्विजां सुदतीं । सख्या श्रीकृष्णेन प्रेषितः फाल्गुनोर्ज्जुनः ॥ १७ ॥ कस्यासि कस्य त्वं पुत्री । हे सुश्रोणि कमनीयनितंबं । कुतः वागता ॥ १८ ॥ सवितुः सूर्यस्य । वरेण्यं श्रेष्ठं । अतस्तं पतिमिच्छती ॥ १९ ॥ अनाथानां संश्रयः शरणं ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्रेति । तत्र, यमुनायां उपस्पृश्य स्नात्वा, महारथौ, कृष्णौ श्रीकृष्णार्जुनौ, विशदं निर्मलं वारि जलं पीत्वा, चरन्तीं तत्र विचरन्तीं, चारुदर्शनां, कन्यां ददृशतुः ॥ १७ ॥ तामिति । ततः, सख्या श्रीकृष्णेन, प्रेषितः फाल्गुनोऽर्जुनः, वरारोहां श्रेष्ठनितम्बां, सुद्विजां शोभनदन्तां, रुचिराननां सुन्दरवदनां, प्रमदोत्तमां, तां आसाद्य, पप्रच्छ ॥ १८ ॥ प्रश्नमेवाह । केति । हे सुश्रोणि, त्वं का असि । कस्य असि । कस्य संबन्धिनी भवसीत्यर्थः । कुतः वा कुतः स्थानादत्रागतासीत्यर्थः । किं चिकीर्षसि किं कर्त्तुमिच्छसि । शोभने हे शोभनगुणयुते, त्वां पतिं इच्छन्तीं, मन्ये । अतः, सर्वं कथय । यथार्थतया अस्मत्पुरो वदेत्यर्थः ॥ १९ ॥ सा तदुत्तरमाह त्रिभिः । अहमिति । अहं सवितुः देवस्य, दुहिता । इति कस्यासीत्यस्योत्तरम् । किं चिकीर्षसीत्यस्योत्तरमाह । वरेण्यं वरणीयं, वरदं स्वानां वरप्रदं, विष्णुं पतिं इच्छती सर्वथा कामयमाना सती, परमं तपः, आस्थिता अस्मीति शेषः ॥ २० ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण और अर्जुन दोनों महारथियों ने यमुनाजी में हाथ-पैर धोकर उनका निर्मल जल पीया और देखा कि एक परमसुन्दरी कन्या वहाँ तपस्या कर रही है ॥ १७ ॥ उस श्रेष्ठ सुन्दरी की जंघा, दाँत और मुख अत्यन्त सुन्दर थे। अपने प्रिय मित्र श्रीकृष्ण के भेजने पर अर्जुन ने उसके पास जाकर पूछा ॥ १८ ॥ 'सुन्दरी ! तुम कौन हो ? किसकी पुत्री हो ? कहाँ से आयी हो ? और क्या करना चाहती हो ? मैं ऐसा समझता हूँ कि तुम अपने योग्य पति चाह रही हो । हे कल्याणि ! तुम अपनी सारी बात बतलाओ' ॥ १९ ॥ कालिन्दी ने कहा—'मैं भगवान् सूर्यदेव की पुत्री हूँ । मैं सर्वश्रेष्ठ वरदानी भगवान् विष्णु को पति के रूप में प्राप्त करना चाहती हूँ और इसीलिये यह कठोर तपस्या कर रही हूँ ॥ २० ॥

नान्यं पतिं वृणे वीर [1]तमृते श्रीनिकेतनम् । तुष्यतां मे स भगवान् मुकुन्दोऽनाथसंश्रयः[2] ॥ २१ ॥
कालिन्दीति समाख्याता वसामि यमुनाजले । निर्मिते भवने पित्रा यावदच्युतदर्शनम् ॥ २२ ॥
तथावदद् गुडाकेशो वासुदेवाय सोऽपि ताम् । रथमारोप्य तद् विद्वान् धर्मराजमुपागमत् ॥ २३ ॥
यदैव[3] कृष्णः संदिष्टः पार्थानां परमाद्भुतम् । कारयामास नगरं विचित्रं विश्वकर्मणा ॥ २४ ॥

कर्दमक्षमा

अन्वयः—हे, वीर, तं, श्रीनिकेतनं, ऋते, अन्यं, पतिं, न, वृणे । सः, अनाथसंश्रयः, भगवान्, मुकुन्दः, मे, तुष्यताम् ॥ २१ ॥ कालिन्दी, इति, नाम्ना, समाख्याता, अच्युतदर्शनयावत्, यमुनाजले, पित्रा, निर्मित, भवने, वसामि ॥ २२ ॥ गुडाकेशः, वासुदेवाय, तथा, अवदत् । सः, अपि, तद्विद्वान्, ताम्, रथं, आरोप्य, धर्मराजं, उपागमत् ॥ २३ ॥ यदैव, सन्दिष्टः, कृष्णः, तदैव, विश्वकर्मणा, पार्थानां, परमाद्भुतं, विचित्रं, नगरं, कारयामास ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अयं मां कामयेदित्याशंकायामाह । नान्यमिति ॥ २१–२२ ॥ आदावेव तद्विद्वान् ॥२३॥ प्रसंगात्तत्तत्कालीनं चरित्रांतरमाह—यदैवेति । पार्थैर्यदेव संदिष्टो विज्ञापितः श्रीकृष्णस्तदैव तेषां विश्वकर्मणा देवशिल्पिना नगरं कारयामास ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अनाथसंश्रयो दीनदयालुः । श्रीनिकेतनं प्रेमभरेण सदा लक्ष्मीं बिभ्रतमपीत्यर्थः । यद्वा—श्रिय आश्रयम्, सापि यमाश्रितवती तं वा का न वृणीतेति । यद्वा—श्रियः सर्वस्याः संपदो निकेतनमिति ब्रह्मरुद्रादयोऽपि व्यावर्तिताः । वीर हे धर्मशूरेति । अन्यकामां त्वं नैवेच्छसीति भावः । नन्वसौ दुर्लभः ! सत्यम्, दीनवात्सल्यात्स्वीकरोत्वित्याह—तुष्यतामिति । स विष्णुर्यतो भगवान् कारुण्याद्यशेषगणयुक्तः । अत एव मुकुन्दः सर्वदुःखविमोचकः । किञ्च—अनाथजनस्य नाथ्यांतरशून्यस्य संश्रयः शरणम् । यद्वा—भगवान् परमेश्वरोपि तुष्यतु यतोनाथसंश्रयः । ननु तस्मिन्नेव कुत ईदृशाग्रहस्तत्राह—मुकुंदः, अनन्यकामित्वात्तस्मादेव ममापि मोचनं भविष्यतीति भावः । यद्वा—भगवानशेषैश्वर्यप्रकटनपरः श्रीकृष्ण इत्यर्थः । य एवानाथसंश्रयो मुकुंदोऽसुराणामपि गतिप्रदत्वात्, श्रीवैकुंठनाथादयोपि व्यावर्तिताः । अनेन क्वचिदेत्तद्विरुद्धोयमयमिति संवादश्च परिहृतः । 'एवं वदंति राजर्षे' इत्यादिवत् । किञ्च—यमुनेयं खलु द्विविधया मूर्त्या वर्तते—भगवत्प्रेयसीत्वेन साक्षाद्रूपया, सागरपत्नीत्वेनाभासरूपया च । यथैव श्रीद्वारकायां वर्तमानापि श्रीबलदेवेनाकृष्यमाणापि तं तुष्टावेति वक्ष्यते । तत आभासांशेनापि यदि स्यात्तथा धर्मरक्षार्थमवतीर्णतया लोकान्तरविभीषिकार्थमेव तत्प्रपञ्चितमिति ज्ञेयम् ॥ २१ ॥ कलिं द्यति खंडयतीति कालिंदो विष्णुः । 'यशः कलिमलापहम्' इत्युक्तेः । तस्येयं प्रिया कालिंदी । 'कालिदमनकारकः' इति संमोहनोक्तेः कालिशब्दोपि कालियपरः, तं दयते पालयति गरुडादिति वा । कालिंदाद्गिरेरुद्भूता वा कालिंदी नदी, तस्यां वासाद्वा तन्नाम्नी । पित्रा सूर्येण । भवने गृहवदाधारे ॥ एवं जात्यादिकं तत्पृष्टं कथयित्वा नामाह—कालिंदीति । यमुनाहं सममेकपर्यायं यथा स्यात्तथा ख्याता सती जले निजप्रभावमये वसामि । ननु जले वासस्तव मत्स्यानामिव सर्वत्र चरंत्याः स्यात्तत्राह—निर्मित इति । जल एव कयापि विद्यया पित्रा श्रीरविदेवेन निर्मिते भवन इति । तस्य केनाप्यतवर्यत्वं स्वेच्छया सर्वत्र संचारित्वं च व्यंजितम् । स्नेहन भवनस्योत्तमत्वं च सूचितम् । तथापि तस्मिन्मम मोहो नास्तीत्याह—यावदिति । अच्युतस्य 'न मे भक्तः प्रणश्यति' इति स्वप्रतिज्ञातच्युतिरहितस्य भगवतो दर्शनं तत्कर्तृकांगीकारं यावत्तावंतमेव कालं व्याप्येत्यर्थः । अत एव दर्शने सति तपःफलसिद्धया नानेन मम प्रयोजनमिति भावः ॥ २२ ॥ यथा कालिंदी ऊचे तथा गुडाकेशो जितनिद्रो वक्रकेशो वाऽर्जुनः । सोऽपि वासुदेवोपि । तत् कालिंदीवृत्तम् ॥ रथमारोप्येति—अयि सुंदरि वरेण्ये विष्णुरहमेवेत्यतः स्वपित्रुपदिष्टमदीयध्यानस्य स्वीयशुद्धहृदयोत्थभावस्य च प्रामाण्यादेव त्वं मां परिचिन्वित्युक्त्वा तस्या रथारुरुक्षामुत्पाद्यैवेति भावः । तां गृहीत्वा रथमारुह्येत्यनुक्तेः । तद्विद्वानिति पूर्वमेव तदर्थं गत इति भावः । धर्मराजमिति-धर्मज्ञतया तेनापि सर्वमबुध्यतैवेति भावः ॥ २३ ॥ नगरमिंद्रप्रस्थावांतरमेव ॥ धर्मराजादीनां सर्वेषां प्रकारान्तरेण हितमाचरदिति पूर्वकथामाह—यदेति चतुर्भिः । तत्रायं क्रमः—पूर्वं नगररचनं, ततः खांडवदाहः, ततः सभाहरणं, ततः कालिंदीलाभः । एवशब्देन पार्थवाग्वश्यत्वं तस्य बोधयति । परमाद्भुतत्वे हेतुः—विचित्रम्, चतुर्दशभुवनवर्तिविविधशोभाढ्यमित्यर्थः ॥ २४ ॥

---

[1] स्मृते पुरुषमीश्वरम्–प्रा. पा. । [2] वत्सलः–विज. । [3] यथैव–प्रा. पा.; वसंस्तत्रहृषीकेशः शक्रप्रस्थे यथा सुखम् विज. ।
विश्वकर्माणमाहूय शिल्पविद्या विशारदम् ॥ १ ॥
अद्भुतं कारयामास नगरं धर्मसूनवे । सप्रासाद पुरद्वारगोपुराट्टालतोरणम् ॥ २ ॥
पुरन्दरपुरप्रस्थयं स्वानां प्रियचिकीर्षया । अथपार्थैरनुज्ञातः सुहृद्भिः स्वजनान्वितः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीनिकेतनं प्रेमभरेण सदा वक्षसि लक्ष्मीं बिभ्रतमपीत्यर्थः यद्वा श्रिय आश्रयं साऽपि यमाश्रितवती तं वा का न वृणीतेति यद्वा, श्रियःसर्वस्याः सम्पदो निकेतनम् इति ब्रह्मरुद्रादयो व्यवर्त्तिताः वीर ! हे धर्मशूरेति अन्यकामा त्वं नैवेच्छसीति भावः नन्वसौ दुर्ल्लभः सत्यं दीनवात्सल्यात् स्वीकरोत्वित्याह तुष्यतामिति, स विष्णुर्यतो भगवान् कारुण्याद्यशेषगुणयुक्तः अत एव मुकुन्दः सर्वदुःखविमोचकः किं च अनाथजनस्य नाथान्तरशून्यस्य जनस्य संश्रयः शरणं यद्वा, भगवान् परमेश्वरोऽपि तुष्यतु यतोऽनाथसंश्रयः। ननु, तस्मिन्नेव कुत ईदृशाग्रहस्तत्राह—मुकुन्दः अनन्यकामत्वात्तस्मादेव ममाधिमोचनं भविष्यतीति भावः। यद्वा, भगवान् अशेषैश्वर्य्यप्रकटनपरः श्रीकृष्ण इत्यर्थः। य एवानाथसंश्रयो मुकुन्दः असुराणामपि गतिप्रदत्वात् (इति) श्रीवैकुण्ठनाथादयोऽपि व्यावर्त्तिताः अनेन क्वचिदेतद्विरुद्धो यमयमीसम्वादश्च परिहृतः एवं वदन्ति राजर्षे इत्यादिवत् किं च श्रीयमुनेयं खलु द्विविधया मूर्त्या वर्त्तते भगवत्प्रेयसीत्वेन साक्षाद्रूपतया सागरपत्नीत्वेनाभासरूपतया च यथैव श्रीद्वारकायां वर्त्तमानापि श्रीबलदेवेनाकृष्यमाणा तं तुष्टावेति वक्ष्यते तत आभासांशेनापि यदि स्यात्तदा धर्मरक्षार्थमवतीर्णतया लोकान्तरविभीषिकार्थमेव तत्प्रपञ्चितमिति ज्ञेयम् ॥ २१ ॥ एवं जात्यादिकं तत् पृष्टं कथयित्वा नामाह—कालिन्दीति। यमुनाहं सममेकपर्यायं यथा स्यात्तथा ख्याता सती जले निजप्रभावमये वसामि। ननु, जले वासस्तव मत्स्या इव सर्वत्र सञ्चरन्त्याः स्यात्तत्राह—निर्मित इति। जल एव कयापि विद्यया पित्रा श्रीरविदेवेन निर्मिते भवने इति तस्य केनाप्यतर्क्यत्वं स्वेच्छया सर्वत्र सञ्चारित्वं च व्यञ्जितं स्नेहेन भवनस्योत्तमत्वं च सूचितं तथापि तस्मिन्मम मोहो नास्तीत्याह—यावदिति। अच्युतस्य न मे भक्तः प्रणश्यतीति स्वप्रतिज्ञातश्च्युतिरहितस्य भगवतो दर्शनं तत्कर्तृकाङ्गीकारं यावत्तावत्तमेव कालं व्याप्य इत्यर्थः। अत एव दर्शने सति तपः फलसिद्ध्यानानेन मे प्रयोजनमिति भावः ॥ २२ ॥ तद्विद्वानिति पूर्वमेव तदर्थं गत इति भावः। धर्मराजमिति धर्मज्ञतया तेनापि सर्वमबुद्ध्यतैवेति भावः ॥ २३ ॥ धर्मराजादीनां च तेषां सर्वेषां प्रकारान्तरेण हितमाचरदिति पूर्वकथामाह—यदेति चतुर्भिः। अत्रायं क्रमः पूर्वं नगररचनं ततः खाण्डवदाहः ततः सभाहरणं ततः कालिन्दीलाभ इति, एवशब्देन पार्थवाग्वश्यत्वं तस्य बाधयति परमाद्भुतत्वे हेतुः विचित्रं चतुर्दशभुवनवर्तिविविधशोभाढ्यमित्यर्थः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीनिकेतनं प्रेमभरेण सदा वक्षसि लक्ष्मीं बिभ्रतमपीत्यर्थः; यद्वा, वरणे हेतुः—श्रियः सर्व्वस्याः सम्पदः शोभाया वा निकेतनमिति श्रीब्रह्मरुद्रादयो व्यावर्त्तिताः। वीर ! हे धर्म्मशूरेति अन्यकामां त्वं नैवेच्छसीति भावः। नन्वसौ सुदुर्लभः, सत्यम्, दीनवात्सल्यात् स्वीकरोत्वित्याह—तुष्यतामिति। स विष्णुस्तुष्यतु, यतो भगवान् कारुण्याद्यशेषगुणयुक्तः, अतएव मुकुन्दः परमानन्ददाता; किञ्च, अनाथजनस्य संश्रयः शरणम्; यद्वा, भगवान् परमेश्वरोऽपि तुष्यतु, यतोऽनाथसंश्रयः, ननु तस्मिन्नेव कुत ईदृशाग्रहः ? तत्राह—मुकुन्द इति। यद्वा, सोऽवतारी मुकुन्दस्तुष्यतु, इत्यवतारा व्यावर्त्तिताः। कथम्भूतः ? भगवानशेषैश्वर्य्यप्रकटनपरः श्रीकृष्ण इत्यर्थः, इति श्रीवैकुण्ठनाथोऽपि व्यावर्त्तितः। अतएवानाथसंश्रयः ॥ २१ ॥ एवं जात्यादिकं तत्पृष्टं कथयित्वा नामाह—कालिन्दीति। अनेन गिरिवरकलिन्दस्यापि वाक्पुत्रीत्वम्, तथा सम्यगाख्यातेति कृष्णादि-नामान्तरस्य गौणत्वञ्च सूचितम्। ननु सा हि श्रीयमुनाप्रवाहाधिष्ठातृदेवता, सत्यम्। सैवाहमित्याशयेनाह—वसामीति। ननु जलान्तर्वासः कथं घटेत ? तत्राह—निर्म्मित इति। कुत इत्यस्योत्तरमिदमपि ज्ञेयम्। पित्रेति देववरत्वेन जलेऽपि तन्निर्म्माणसामर्थ्यम्, तथा स्नेहेन भवनस्योत्तमत्वञ्च सूचितम्, तथापि तस्मिन् मम मोहो नास्तीत्याह—यावदिति। अच्युतस्य (गी० ९।३१) 'न मे भक्त प्रणश्यति' इत्यादि स्वप्रतिज्ञातश्च्युतिरहितस्य भगवतः, अतएव दर्शने सति तपःफलसिद्ध्या नान्येन मे प्रयोजनमिति भावः ॥ २२ ॥ यथा तयोक्तं तथैवावदत्। कुतः ? गुडाका निद्रालक्षणा माया, तदीशो जितमाय इत्यर्थः, निष्कपटत्वादिति। किञ्च, वसुदेवनन्दनाय मातुलेयत्वेन स्नेहविशेषाच्चेति भावः। तद्विद्वानित्ययं भावः—मदेकनिष्ठैया सख्येऽर्ज्जुनायापि दातुं तथा बहुलवनितापरिग्रहेण लोके कामुकतादोषस्पर्शेऽप्युपेक्षितुं न योग्यैवेत्यादि सर्व्वमादावर्ज्जुनं प्रेष्य सर्व्वान् जनान् प्रतिबोधयेयमिति तत्प्रेषणे प्रागेव विचारणादिति, धर्म्मराजमिति धर्म्मज्ञतया तेनापि तत् सर्व्वं बुध्येतैवेति भावः ॥ २३ ॥ धर्म्मराजादीनाञ्च तेषां सर्व्वेषां प्रकारान्तरेण हितमाचरदित्याह—यदेति चतुर्भिः। एव-शब्देन पार्थवागवश्यत्वं तस्य बोधयति, कृष्णः साक्षाद्भगवान्, अतो विश्वकर्म्मणा कृत्वा कारयामास। परमाद्भुतमत्यनिर्व्वचनीयं सर्व्वलोकातीतं वा, यतो विचित्रं चतुर्द्दशभुवनवर्त्ति-विविधशोभाढ्यमित्यर्थः। इतीन्द्रादिपुरीतोऽपि वैशिष्ट्यं द्योतितम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

बहुषु सत्सु किं विशेषेण विष्णुमेव कामयस इत्यत आह—नान्यमिति। हे वीर ! तं विष्णुमृते विनाऽन्यं न वृणे तत्र हेतुं वदन्ती तं विशिनष्टि, श्रियो निकेतनमाश्रयं श्रीर्हि सर्वोत्तमं तमेवाश्रितवत्यतोऽहमपि तमेव वृण इति भावः। दुर्लभः स

कथं त्वदिच्छामात्रेण लभ्यत इत्यत आह—तुष्यतामिति । तत्र हेतुरनाथानामनन्यनाथानां संश्रयः ॥ २१ ॥ अथ का त्वम् इत्यस्योत्तरमाह—कालिन्दीति । पित्रा सवित्रा यावदच्युतस्य श्रीकृष्णस्य दर्शनं तावन्निवसामि ॥ २२ ॥ तथेति । गुडाकेशोऽर्जुनः वासुदेवार्थं तां कन्यां रथमारोप्य तद्भगवदभिप्रेतं जानन् ॥ २३ ॥ अथार्जुनाय गाण्डीवादिप्रदानात्मकं भगवच्चेष्टितमाह—यदेति । सन्दिष्ट आदिष्टः पार्थैरिति विभक्तिविपरिणामः कृष्णः प्रयोजककर्ता विश्वकर्मणा प्रयोज्य कर्त्रा विचित्रं नानाविधशिल्पोपेतमत्याश्चर्य्यं नगरं पार्थानामावासार्थं कारयामास ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतापदरत्नावली

अनाथवत्सलः ॥२१—२४॥ गुडाकेशः घनकेशः जितनिद्रो वा यथा कालिन्दी ऊचे तथा सोपि वासुदेवाय ॥२३-३०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यावदच्युतदर्शनमिति तत्कर्तृकाङ्गीकारपर्यन्तमित्यर्थः ॥ २३-२४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

यदैवेति । लब्धकल्यः कदाचिदत्रैव कतिचिद्दिनानि तिष्ठतीति तद्वासयोग्यं न भवत्येतत् पुरम् तदिदं विज्ञापयामः—द्वारकातुल्यामत्रापि पुरं विश्वकर्मा सम्पादयत्विति तेनादिष्टो यदैव तदैव कारयामासेत्यर्थः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तस्माच्छङ्कमाना स्वनिष्ठां व्यतिरेकेणापि ज्ञापयन्त्याह—नान्यमिति । अनाथसंश्रय इति स एव नाथः स्वभक्तजनरक्षक इति विश्वासादेवाहमबलापि निर्जने वसन्त्यपि पुरुषान्तरान्न बिभेमीति भावः ॥ २१ ॥ समाख्यातेति सूर्यस्य कन्यां मां को न जानातीति स्वप्रभावं च ज्ञापयति—पित्रा निर्मिते भवने इति । पितुः सूर्यस्याप्यहम्—मतिवात्सल्यपात्रीति मत्प्रातिकूल्ये को नाम प्रभवेदिति भावः ॥ २२ ॥ रथमारोप्येति । अयि सुन्दरि ! वरेण्यो विष्णुरहमेवेत्यतः स्वपित्रुपदिष्टमदीयध्यानस्य स्वीयशुद्धहृदयोत्थभावस्य च प्रमाण्यादेव त्वं मां परिचिन्वित्युक्त्या तस्या रथारुरुक्षामुत्पाद्यैवेति भावः । तां गृहीत्वा रथमारुह्येत्यनुक्तेः तद्विद्वानित्यादावेव तदर्थं गत इति भावः ॥ २३ ॥ यदैवेत्यत्रायं क्रमः पूर्वं नगररचनाः ततः खाण्डवदाहः ततः सभाहरणं ततः कालिन्दीलाभ इति सन्दिष्टः पार्थैर्यदेव विज्ञापितस्तदैवेत्यर्थः ॥ २४ ॥

गूढार्थदीपिनी

मे ममोपरि तुष्यताम् ॥ २१ ॥ कलिन्दगिरेरुद्भूतत्वात्-कालिन्दी यमुना तस्यां निवासात्सापि तन्नाम्नी ॥ २२ ॥ गुडाकेशौ जितनिद्रोऽर्जुनः । तत् कालिन्दीवृत्तं जानन् ॥ २३ ॥ पार्थैर्यदैव सन्दिष्टः प्रार्थितस्तदैव ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यमुनैव कालिन्दीति समाख्याता जले स्वाधिष्ठिते ॥ २२ तद्विद्वान् स्वप्राप्त्यर्थमादावेव तत्प्रवृत्तिज्ञः ॥ २३ ॥ सन्दिष्ट इति जतुवेश्मतो विनिर्मुक्तैः द्रौपदीस्वयम्बरे प्रतीतैः पाण्डवधार्तराष्ट्रविरोधनिवृत्तये धृतराष्ट्रेण राज्यभागं दत्वा इन्द्रप्रस्थेः प्रेषितैः पाण्डवैः अस्मद्वासार्थं नगररचनां कुरु इत्येवं विज्ञापित इत्यर्थः ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उपस्पृश्यादावाचम्य मृष्टस्य मणेरिन्द्रनीलस्य प्रभेव प्रभा यस्य तज्जलमिति शेषः । विशदं यथेच्छं बहुलं पीत्वा विशदं क्षीरमधुरसमरसमिति तद्वद्विद्यमानं बा । विशदं क्षीरमाधुर्यमिति सुधाभिधानात् । यथेच्छादिपदम् विहायैतत्स्थापनं न स्वतन्त्रेच्छस्येति न्यायतः किन्त्वमुमप्यर्थं सूचयितुमिति मन्तव्यम् । कृष्णौ वासुदेवार्जुनौ चारुदर्शनात्तत्तीरे चरन्तीं कन्यां ददृशतुः ॥२१॥ वरारोहामुत्तुङ्गोत्सङ्गां सुदतीं शोभनरदनां सख्या कृष्णेन फल्गुनोऽर्जुनः फल्गु यथा तथा विचार्य नः कथयेति सख्या प्रेषित इत्यप्यन्वयः ॥ २२ ॥ कस्यासि सुता कुतः कारणादसि किं कर्तुमिच्छसि त्वां पतिमिच्छन्तीं कन्यां मन्ये । अनवाप्तपतिः कन्या जातवीर्या वरार्थिनीत्युत्पलमाला ॥ २३ ॥ आदावन्ववायो बोधनीय इति द्वितीयस्योत्तरमीरयति ॥ अहमिति । सवितुर्देवस्य । सूर्यादिपदमनिबन्धानो निबन्धानश्च सवितृपदं तस्याः पालकपितृत्वनिवारणमुखेन साक्षात्पितृत्वं बोधयामासेति ज्ञेयम् । अहं दुहिता पुत्री । कुलसमीचीनतां भाविकार्योपयुक्तामुक्त्वा मन्ये त्वामित्यर्जुन त्वन्मननं मम मनोनुकूलमित्यनुमत्या वक्ति । पतिमिच्छतीति । वरेण्यं वरणीयं विष्णुं पतिमिच्छन्ती परमं तप आस्थिता ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सर्वस्यापि विष्णुत्वात् तादृशसुखदानसमर्थः । लोकन्यायेन तद्विभूतिः वरणीयोऽपि भवतीति, अन्येषां ततो हीनानां वरदानसमर्थोऽपि कश्चिद्भविष्यति, कश्चिदात्मानं वा तथा मन्यत इत्याशङ्क्य निषेधति नान्यं पतिं वृण इति । भक्तिदातारं

भगवद्दातारं वा तत्त्वेन वृणे, नतु पतित्वेन। वीरेति धर्मसम्बोधनाद्बलात्पक्षो निवारितः। **अवीरे**ति वा स निराकृतः। स चेत् स्वसायुज्यं प्रापयित्वा तथाभूताय प्रयच्छति, तदा परं न जान इत्यभिप्रायेणाह **तमृत** इति। तस्य परिज्ञाने नियमे च हेतुमाह श्री**निकेतन**मिति। लक्ष्म्या स एव वृत इति लक्ष्मीसहितो वा। श्रीवत्साङ्को भगवानिति तस्य परिज्ञानम्। ननु भगवान् 'नाहं वेदै'रिति वाक्यात् तपसा न सिद्धो भविष्यतीति चेत्, तत्राह **तुष्यता**मिति। स हि वरदो भवति। तत्रेदमेव प्रथमं याचे तुष्यतामिति। ततस्तुष्टे अन्यद्याच इत्यभिप्रायः। मे मह्यम् प्रति। यतः सः लक्ष्म्या अपि प्रसन्नः। ननु वाक्यं वाधकमिति चेत्, तत्राह भगवानिति। ईश्वरत्वान्न नियम्यः कस्यचित्। नन्वीश्वरस्यैवैतद्वाक्यमिति चेत्, तत्राह **मुकुन्द** इति। यदि निषिद्धानां साधनानां प्रयोजकता न स्यात् भगवत्प्रसादे, तदा कस्यापि मोक्षो न सिध्येत्। अतः स्वतन्त्रभक्तिविषयं तादृशरूपदर्शनविषयं वा तद्वाक्यमिति मन्तव्यम्। किञ्च। मास्त्वस्मत्साधनम्, स स्वधर्मविचारेणापि सन्तुष्टो भवत्वित्याह **अनाथसंश्रय** इति। येषां न कोऽपि नाथः, तेषां सम्यगाश्रयो भवति, दीनदयालुत्वात्। अन्यो मा तुष्यतामिति निषेधार्थं वा। नात्र संशय इति वा भवति॥ २१॥ नामस्थानादीन्याह **कालिन्दी**तीति। कलिन्दपर्वते तद्रूपेण समागतात् सूर्याज्जातेति पार्वत्या इव ममापि नियम इति सूचितम्। **वसामि यमुनाजल** इति दुर्गस्थितिरुक्ता। अनेन यमुनायास्तस्याश्च भेदः प्रदर्शितः। पर्वतभावापन्नादियमाधिदैविकी कालिन्दीत्येव नाम्ना विश्रुता उत्पन्ना। सा तु यममुत्पाद्य पश्चात्। तद्दोषपरिहारार्थं यमुनामुत्पादितवान्। उभयोरैक्यात् आधिदैविकाधिभौतिकवत् स्थितत्वात् लोके अभेदेन प्रयोगः। नापि तपतीवत् शापान्नदीत्वम्, पूर्वमेव नदीरूपस्य विद्यमानत्वात्। नाप्याध्यात्मिकं देवतारूपम्, तथा सति यमुनापरित्यागासम्भवात्। अनुग्रहनिग्रहयोरेव तदभिव्यक्तेश्च। सर्वथा च भेदकं सूर्यतनयात्वात् लोके प्रसिद्ध्यभावाच्च नास्तीत्याधिदैविकत्वं कल्प्यते। अत्रैव स्थितौ नियामकमाह **निर्मिते भवने** पित्रेति। सूर्येण यमुनाजले भवनं निर्माय भगवदर्थं स्थापिता। अतो यावदच्युतदर्शनं यत्र स्थास्यामि, ततो भगवद्गृहं गमिष्यामि, नतु भगवानत्र स्थाप्यः। अत्रैव स्थितायाः परिग्रहो वा न नियम्यते॥ २२॥ एवं तस्याः संवादेन रूपमवगत्य यथार्थमेवावददित्याह तथावददिति। तत्र हेतु **गुडाकेश** इति। गुडाकाया निद्रायाः व्यामोहिकायाः ईश इति। सोऽपि मोक्षदाता। वासुदेवः तस्यास्तं निर्बन्धं दूरीकुर्वन् तां रथमारोप्य तमर्थं यथार्थं विद्वान् निदर्शनरूपं धर्मनिर्णायकं वा धर्मराजमुपागमत्॥ २३॥ एवं साधनशक्तिसिद्ध्यर्थं तां गृहीत्वा पश्चात् भक्तार्थं विश्वकर्मादीनाज्ञापयदित्याह **यदैव कृष्ण** इति। नायं तस्य कृतिनिर्बन्धः। यदैव मनसा वा तत्कृत्वा समानीय वा स्थितः सन् पाण्डवैः संदिष्टः। भगवत्कर्तव्यमेव संदेशनियमेन ज्ञापितवान्। तदैव परमाद्भुतं नगरं विश्वकर्मणा कारयामास। भगवानपि मनसा सृजेत्, ततश्च तत्र दोषा न प्रभविष्यन्तीति, गर्वाद्यभावे दुर्योधनादीनां निराकरणं न भवतीति विश्वकर्मणैव कारयामास॥ २४॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

नान्यं पतिमित्यत्र। **स्वसायुज्य**मिति। 'नरः स्वावेशधारक' इति वाक्यान्नरे स्थितं स्वांशं स्वस्मिन् वानीयेत्यर्थः। **तथाभूताये**ति। भगवति प्रविष्टायांशायेत्यर्थः। पूर्वमर्जुनो निराकृतः। तत्स्थित एवांशो भगवति प्रविष्टश्चेत् तमंशं वृणेपि, न तु तमृते इति मूलार्थः। कालिन्दीत्यत्र। **कालिन्दपर्वते** इति। सूर्यः पर्वतरूपेण कलिन्दे समागतः। तथा च मातृस्थानीयः कलिन्दः पिता पर्वतभावापन्नः सूर्यः। पर्वतयोरचेतनत्वेपि हिमवतः पार्वत्युत्पत्तिरिव 'अभिमानिव्यपदेशस्त्वि'तिन्यायेन तदुत्पत्तिरप्युपपद्यते। **पर्वतभावापन्ना**दिति। एतादृशात् सूर्यादुत्पन्नेत्यन्वयः। स त्विति। देवरूपः सूर्य इत्यर्थः। पर्वतरूपात् सूर्यात् कालिन्दी जातेति व्युदासार्थं तु शब्दः। आधिदैविकत्वं स्थापयन्ति **सर्वथा** चेति।

श्रीसुबोधिनीसारः

श्रीनिकेतनं लक्ष्मीपतिं तं हरिमृते विनाऽन्यं पतिं न वृणे नांगीकरोमि अनाथं निराधारं संश्रयतीति भजतीति तथा मुकुंदो भगवान् मे ममोपरि तुष्यतां प्रसीदतु॥ २१॥ यमुनाहं कालिंदीति समाख्याता प्रसिद्धिं गता जले वसामि पित्रा सूर्येण निर्मिते रचिते भवने मंदिरेऽच्युतस्य दर्शनं यावत्॥ २२॥ गुडाकेशोर्जुनो वासुदेवाय तथावदत्। सोपि कृष्णः तद्विद्वान् तां वेत्तीति तथा रथं तामारोप्य धर्मराजं युधिष्ठिरमुपायात्॥ २३॥ यदैव पार्थैः संदिष्टो विज्ञापितः कृष्णस्तदैव पार्थानां युधिष्ठिरादीनां षष्ठी चतुर्थ्यर्थे तदर्थं विचित्रं नगरं विश्वकर्मणा निमित्तेन कारयामास॥ २४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'अन्योऽपि कश्चिद्वीरो वरदाने समर्थः स्यादेव, तर्हि स एव वरणीय' इत्याशङ्क्याह—नेति। 'वीरत्वं तु मम नापेक्षितम्' इति सूचयन्ती सम्बोधयति—वीरेति। तं विष्णुमृते नान्यं पतिमहं वृणे। एवं निर्बन्धे हेतुमाह—श्रियो लक्ष्म्या निकेतनं आश्रयमिति। स्त्रीषूत्तमा हि श्रीः सर्वोत्तमत्वेन पतितया तमेव वृतवती, अतोहमपि तमेव वृणे इत्याशयः। ननु 'स तु दुर्लभः' कथं तपसापि लभ्यते' इत्याशङ्क्याह—स मुकुन्दो भगवान् मे तुष्यतामिति। तत्र हेतुमाह—अनाथानामनाश्रयाणां संश्रय आश्रय इति॥ २१॥ 'का त्वम्' इत्यस्योत्तरमाह—कालिन्दीति समाख्यातेति। स्थानमाह—यावदच्युतस्य कृष्णस्य दर्शनं प्राप्तिस्तावद्यमुनाजले तत्रापि पित्रा निर्मिते भवने वसामीति॥ २२॥ गुडाका निद्रा तस्या ईशो निर्जितनिद्रः अर्जुनः आगत्य

यथा कालिन्द्या उक्तं तथा वासुदेवायावदत् । स वासुदेवः कृष्णोपि तद्विद्वान् स्वप्राप्त्यर्थं तप आचरणं जानन् तां रथमारोप्य धर्मराजं युधिष्ठिरं प्रति हस्तिनापुरमागमत् ॥२३॥ प्रसङ्गाद्भगवतो भक्तवश्यतां सूचयन्नन्यानि तच्चरितान्याह—यदैवेत्यादिना। पार्थैर्यदैव सन्दिष्टः 'नगरं नास्ति तत्संपादय' इति विज्ञापितः श्रीकृष्णः प्रयोजककर्ता तदैव विश्वकर्मणा प्रयोज्यकर्त्रा पार्थानामावासार्थं परमाद्भुतं अत्याश्चर्यजनकं विचित्रं नानाविधशिल्पोपशोभितं नगरं कारयामास ॥ २४ ॥

अन्वितार्थप्रकाशिका

नेति ॥ हे वीर ! तं श्रीनिकेतनमृते विना अन्यं पतिं न वृणे। सः अनाथानां संश्रयः शरणभूतो भगवान्मुकुन्दो मे ममोपरि तुष्यताम् । तङ्गार्थः ॥ २१ ॥ कालिन्दीति ॥ कालिन्दीति नाम्ना समाख्याता यावदच्युतस्य कृष्णस्य दर्शनं प्राप्तिस्तावद्यमुनाजले तत्रापि पित्रा निर्मिते भवने वसामि ॥ २२ ॥ तथेति ॥ गुडाका निद्रा तस्या ईशो निर्जितनिद्रः अर्जुनः आगत्य यथा कालिन्द्योक्तं तथा वासुदेवायावदत् । स वासुदेवः कृष्णोऽपि आदावेव तद्विद्वान् स्वप्राप्त्यर्थं तप आचरणं जानन् वरेण्यो विष्णुरहमेव स्वपित्रुपदिष्टप्रत्यभिज्ञया ज्ञातुमर्हसीत्युक्तया तया परिचितः सन् तां रथमारोप्य धर्मराजं युधिष्ठिरं प्रति हस्तिनापुरमागमत् ॥ २३ ॥ प्रसङ्गात्तत्कालभवं चरित्रान्तरमाह—यदेति ॥ अत्रायं क्रमः पूर्वं नगररचनं ततः खाण्डवदाहः ततः सभाहरणं ततः कालिन्दीलाभः इति पार्थैः यदैव सन्दिष्टः नगरं नास्ति तत्सम्पादयेति विज्ञापितः श्रीकृष्णः प्रयोजककर्ता तदैव विश्वकर्मणा प्रयोज्यकर्त्रा पार्थानामावासार्थं परमाद्भुतं विचित्रं नानाविधशिल्पोपशोभितं नगरं कारयामास ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

समाख्याता प्रसिद्धा । पित्रा सूर्येण निर्मिते यमुनाजले एव भवने गृहे ॥२१॥ स वासुदेवोऽपि तद्विद्वान् तत्कथितमादावेव जानन् ॥ २२ ॥ प्रसंगात्पूर्वकालिकमेतच्चरित्रमाह यदेति चतुर्भिः। अत्रायं क्रमः। पूर्वं इन्द्रप्रस्थानगररचना ततः खांडववनदाहस्ततः सुधर्मासभाकरणं ततः कालिंदीलाभ इति यदेवयार्थैः। संदिष्टो विज्ञापितो हरिस्तदैव विश्वकर्मणा सुरशिल्पिना तेषां नगरं कारयामास ॥ २३ ॥ तदेवाह भगवानिति खांडवं इंद्रवनं ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नान्यमिति ॥ हे वीर, श्रीनिकेतनं श्रिय एकाश्रयं, तं विष्णुं ऋते, अन्यं पतिं, न वृणे। श्रीर्हि सर्वोत्तमं तमेवाश्रितवत्यतोऽहमपि तमेव वृणे इति भावः। दुर्लभः स कथं त्वदिच्छामात्रेण लभ्यतेऽत आह तुष्यतामिति। अनाथसंश्रयः अनाथनाथः, मुकुन्दः सः भगवान्, मे मम तुष्यताम् । अनाथसंश्रयत्वात् दुर्लभोऽपि स एव प्रीतो भविष्यतीत्यर्थः ॥ २१ ॥ अथ का त्वमित्यस्योत्तरमाह । कालिन्दी इति, समाख्याता अस्मि । यमुनाजले पित्रा निर्मिते भवने, यावदच्युतदर्शनं कृष्णदर्शनपर्यन्तं, वसामि ॥२२॥ तथेति गुडाकेशोऽर्जुनः, वासुदेवाय श्रीकृष्णाय, तथा तदुक्तप्रकारेण, अवदत् । तद्विद्वान् तज्जानन्, स कृष्णः अपि, तां रथं आरोप्य, धर्मराजं युधिष्ठिरं, उपागमत् ॥ २३ ॥ अथार्जुनाय गाण्डीवादिप्रदानात्मकं भगवच्चेष्टितमाह। तत्रायं क्रमः। पूर्वमिन्द्रप्रस्थनगररचना, ततः खाण्डववनदाहः, ततः सभाकरणं, ततः कालिन्दीलाभ इति ॥ यदेति ॥ यदैव, कृष्णः, पार्थैरिति विभक्तिविपरिणामः। संदिष्ट आदिष्टः, तदा पार्थानां निवासार्थमिति शेषः। विश्वकर्मणा प्रयोज्यकर्त्रा, विचित्रं नानाविधशिल्पोपेतं, परमाद्भुतमत्याश्चर्यजनकं नगरं, कारयामास विधापयामास ॥ २४ ॥

कृष्णप्रिया

हे वीर अर्जुन ! मैं लक्ष्मी के परम आश्रय भगवान् को छोड़कर और किसी को अपना पति नहीं बना सकती । अनाथों के एकमात्र सहारे, प्रेम वितरण करने वाले भगवान् श्रीकृष्ण मुझपर प्रसन्न हों ॥ २१ ॥ मेरा नाम है कालिन्दी । यमुनाजल में मेरे पिता सूर्य ने मेरे लिये एक भवन भी बनवा दिया है । उसी में मैं रहती हूँ । जब तक भगवान् का दर्शन न होगा, मैं यहीं रहूँगी' ॥ २२ ॥ अर्जुन ने जाकर भगवान् श्रीकृष्ण से सारी बातें कहीं । वे तो पहले से ही यह सब कुछ जानते थे, अब उन्होंने कालिन्दी को अपने रथ पर बैठा लिया और धर्मराज युधिष्ठिर के पास ले आये ॥ २३ ॥ इसके बाद पाण्डवों की प्रार्थना से भगवान् श्रीकृष्ण ने पाण्डवों के रहने के लिये एक अत्यन्त अद्भुत और विचित्र नगर विश्वकर्मा के द्वारा बनवा दिया ॥ २४ ॥

भगवांस्तत्र निवसन् स्वानां [1]प्रियचिकीर्षयन् । [2]अग्नये खाण्डवं दातुमर्जुनस्यास सारथिः ॥ २५ ॥
सोऽग्निस्तुष्टो धनुरदाद्धयाञ्छ्वेतान् रथं नृप । अर्जुनायाक्षयौ तूणौ वर्म चाभेद्यमस्त्रिभिः ॥ २६ ॥
मयश्च मोचितो वह्नेः सभां सख्य उपाहरत् । यस्मिन् दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः[3] ॥ २७ ॥
[4]स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः । [5]आययौ द्वारकां भूयः सात्यकिप्रमुखैर्वृतः ॥ २८ ॥

---

१. प्रियचिकीर्षया—श्रीधर. वंशी. जीव. । २. अग्रिमे सार्धपञ्च श्लोकाः न सन्ति विज. । ३. मति—वीरः । ४. अथ पार्थैरनुज्ञातः सुहृद्भिः स्वजनान्वितः—विज. । ५. प्र—प्रा पा. ।

कर्दमक्षमा

अन्वयः—भगवान्, स्वानां, प्रियचिकीर्षया, तत्र, निवसन्, अग्नये, खाण्डवं, दातुं, अर्जुनस्य, सारथिः, आसः ॥ २५ ॥ हे, नृप, सः, अग्निः, तुष्टः, अर्जुनाय, धनुः, श्वेतान्, हयान्, रथं, अक्षयौ, तूणौ, अस्त्रिभिः, अभेद्यं, वर्म, च, अदात् ॥२६॥ वह्नेः, मोचितः, मयश्च, सख्ये, सभां, उपाहरत्, यस्मिन्, दुर्योधनस्य, जलस्थलयोः, दृशेर्भ्रमः, आसीत् ॥ २७ ॥ तेन, समनुज्ञातः, सुहृद्भिश्च, अनुमोदितः, सः, सात्यकि, प्रमुखैः, वृतः, भूयः, द्वारकां, आययौ ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किञ्च भगवान्निरतिशयैश्वर्यगुणवानप्यर्जुनस्य धनुरादिलाभाय सारथिरास खांडवं नामेंद्रस्य वनम् ॥२५॥ अक्षयावक्षयसायकौ ॥ २५ ॥ खांडवदाहकाद्वह्नेः सख्ये अर्जुनाय यस्मिन्निति सामान्यतो निर्देशः यस्यामित्यर्थः। जलस्थलयोर्दृशेर्दृष्टेर्भ्रमः। यद्वा जले स्थलवत् दृक् दृष्टिर्यस्मिस्तज्जलस्थलदृक् तस्मिन् भ्रम आसीदिति ॥ २७-२८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न केवलं नगरमेव कारयामास, किन्तु बहुचित्रशस्त्रसभाद्यपि दापयामासेत्याह—किञ्चेति। तत्र नगरे ॥ २५ ॥ यस्मै खांडवं दत्तं स इत्यर्थः। धनुर्गांडीवम्। चर्माच्छूरिका ॥ स उपभुक्तखांडवः। हे नृपेति पितामहस्य तत्तल्लाभेन प्रहर्षात्। यद्वा—हे नृपेति तव नृपत्वमपि तत्प्रभावादेवेति भावः। अग्निरेव कृष्णाय चक्रमप्यादादित्यन्यत्र प्रसिद्धेरत्र नोक्तम् ॥ २६ ॥ सामान्यतः यत्रेत्यर्थः। प्रथमसमासेऽधिकरणं भ्रमस्य न ज्ञायतेऽत आह—यद्वेति। जलस्थलदृक् सभैकदेशस्तत्र भ्रम इत्यर्थः। मोचितो भगवता ॥ २७ ॥ स कृष्णः। तेन युधिष्ठिरेण ॥ एवं पूर्ववृत्तमुक्त्वा कालिंद्यानयनोत्तरं वृत्तमाह—स इति। तेन धर्मराजेन सम्यगनुज्ञातः बारंबारं जिगमिषन्नपि महास्निग्धस्य तस्यानुज्ञामनत्यंतां बुद्ध्वा पूर्वं न चचाल। अधुना श्रीकालिंदीविवाहापेक्षया तां प्राप्तः सन्निति स शब्दार्थः। सुहृद्भिरर्जुनादिभिः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नितरां चिरं सुखं वसन् टीकायामर्जुनस्येत्यादिकमग्नये खाण्डवं दातुमित्यस्योपलक्षणत्वगमकम् ॥ २५ ॥ सोऽग्निरित्यनेन श्रीकृष्णाय चक्रमदादित्यन्यत्र च प्रसिद्धमप्यत्र नोक्तं स उपभुक्तखाण्डवः। नृपेति पितामहस्य तत्तल्लाभेन तस्य प्रहर्षात् ॥ २६ ॥ मोचितो भगवता ॥ २७ ॥ एवं पूर्ववृत्तमुक्त्वा पुनरावृत्य श्रीकालिन्द्यानयनानन्तरं वृत्तमाह—स इति। तेन धर्मराजेन सम्यगनुज्ञातः बारम्बारं जिगमिषन्नपि महास्निग्धस्य तस्यानुद्यामनत्यन्तां बुद्ध्वा पूर्वं न चचाल अधुना श्रीकालिन्दीविवाहापेक्षया तां प्राप्तः सन्निति संशब्दार्थः सुहृद्भिरर्जुनादिभिः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र नगरे, नितरां चिरं सुखं वसन् ॥ २५ ॥ स उपभुक्तखाण्डवः, रथञ्च श्वेतं श्वेतवर्णश्रीहनूमद्ध्वजबहुलमुक्तामालादिभूषितत्वात्, हे नृपेति पितामहस्य तत्तल्लाभेन प्रहर्षात् ॥ २६ ॥ मोचितो भगवता, अतोऽर्ज्जुनस्तस्यापि सखा तस्मै, किञ्च, भगवतः सख्ये, यद्वा, पाण्डवैः सह सख्ये निमित्ते उपाहरत् उपस्कृत्यार्पयामास, इति सुधर्मातोऽपि विशेषः सूचितः। तमेवाह—यस्मिन्निति ॥ २७ ॥ तेन धर्म्मराजेन सम्यगनुज्ञातो बारम्बारं जिगमिषन्नपि महास्निग्धस्य तस्य मनोदुःखेनैवानुज्ञां बुद्धानागत्याधुना सुखेन तां प्राप्तः सन्निति सं-शब्दार्थः। सुहृद्भिरर्ज्जुनादिभिः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदा स्वानां प्रियं कर्तुम् इच्छया तत्र नगरे निवसन्नग्नयै खाण्डवं नाम वनं दातुमर्जुनस्य सारथिर्बभूव ॥ २५ ॥ स इति। स दग्धखाण्डवोऽग्निरत एव तुष्टः हे नृप ! अर्जुनाय धनुरादीन् ददौ अस्त्रिभिरस्त्रधारिभिरभेद्यं वर्म कवचम् ॥ २६ ॥ मयश्चेति। मयः खाण्डववनवासी वह्नेः सकाशान्मोचितः सख्ये अर्जुनाय सभामुपाहरद्ददौ तां विशिनष्टि यस्यामिति यस्यां सभायां जलस्थलदृशि (मति) भ्रमः जले स्थलबुद्धिः; स्थले जलबुद्धिरित्येवंविधो यो भ्रमः स बभूवेति ॥ २७ ॥ स इति। स कृष्णस्तेनार्जुनेन समनुज्ञातः सुहृद्भिर्युधिष्ठिरादिभिरनुमोदितश्च भूयः पुनः ॥ २८ ॥

मज्जीवगोस्वामिकृतक्रमसंदर्भः

भगवानिति। अत्र तु क्रमोऽयं पूर्वं खाण्डवदाहस्तः कालिन्दीलाभः ततो नगरनिर्म्माणं ततः सभोपहार इति खाण्डवदाहानन्तरमेवाग्नेः सकाशात्तद्रथादिप्राप्तेः ॥ २५—३२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ते तु निष्पन्ने पुरे तदैव आसन् इत्याह—भगवांस्तत्र निवसन्नित्यादि ॥ २५–४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अर्जुनस्य धनुरादिलाभाय सारथिरास अभूत् खाण्डवं नामेन्द्रस्य वनम् ॥ २५–२६ ॥ सख्ये खाण्डवदाहकवह्नेर्मित्रायार्जुनाय यस्मिन् यस्याम् ॥ २७–२९ ॥

गूढार्थदीपिनी

खाण्डवमिन्द्रवनम् । इन्द्रप्रस्थस्यावान्तरमेतत् ॥२५॥ वर्म कवचम् । अस्त्रिभिः अस्त्रधारिभिः ॥२५॥ सख्ये अर्जुनाय । यस्मिन् सभास्थले । जलस्थलयोर्दृशेर्दृष्टेर्भ्रमः ॥ २७ ॥ स कृष्णः । तेन युधिष्ठिरेण ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

खाण्डवमिन्द्रवनम् ॥ २५ ॥ धनुरदादिति प्रथमं पाण्डवान् द्रष्टुमिन्द्रप्रस्थं भगवान् प्राप्तस्ततो नगरं कारयामास ततोऽर्ज्जुनस्य धनुरादिलाभाय अग्नये खाण्डव दातुं सारथिरभूत् तदाऽग्निर्धनुर्गाण्डीवं रथं वानरध्वजम् अक्षयौ अक्षयसायकौ तूणौ चादात् तदनन्तरं कालिन्दीलाभः इति क्रमो ज्ञेयः अन्यथा "एकदा रथमास्थाय विजयो वानरध्वजम् । गाण्डीवं धनुरादाय" इत्याद्युक्तिरनुपपन्ना स्यात् ॥ २६ ॥ मयः खाण्डवदाहकाद्वन्हेः अर्जुनेन मोचित; सख्ये अर्जुनाय यस्मिन् सभारूपे स्थाने कथम्भूते जले स्थलवद्दृक् दृष्टिर्यस्मिन् दुर्योधनस्य राजसूये आगतस्य भ्रमोऽभूत् ॥ २७–२८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तं श्रीनिकेतनमृते हे वीर अन्यं पतिं न वृणे न कामये । अनाथवत्सलो भगवान्स मुकुन्दस्तुष्यताम् ॥ २५ ॥ का त्वमित्यस्य किन्नाम्नीत्यर्थ इति मत्वा तत्स्वनामाह । कालिन्दीतीति । पित्रा निर्मिते भवने यावद्यदाऽच्युतदर्शनं भवेदिति वसामि ॥ २६ ॥ यथा साऽवदत्तथैव गुडाकेशो विद्रावितनिद्रो गुडवत्सम्यक् स्निग्धकेश इति वाऽर्जुनो वासुदेवायावदत् । सोऽपि तां कालिन्दीं तद्विद्वान्स्वाप्तिहेतुतपश्चरणं जानन् रथमारोप्य धर्मराजमुपागमत् । पुरं कुन्तीमित्याद्यवदन्धर्मराजमिति शुकः कालिन्द्या यमात्यकधर्मराजस्य चानुबन्धं स्मारयामासेति तात्पर्यमवसेयम् । तद्भगिनी ह्येषेति ॥ २७ ॥ तत्र शक्रप्रस्थे ॥ २८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

विश्वकर्मापि भगवदुपयोगाभावे ज्ञाते न सम्यङ्करोतीति भगवांस्तत्र निवसन्नेव कारयामासेति पूर्वार्धमुभयत्र संबध्यते । तर्हि स्थितिः स्वार्थापि भविष्यतीत्याशङ्क्याह **स्वानामेव प्रियं चिकीर्षयन्** । न केवलं स्थानमुत्कृष्टं दापितवान्, किन्तु साधनान्यपीत्याह **अग्नये खाण्डवं दातु**मिति । भगवांस्तत्र निवसन्नित्यनुवर्तते । अन्यथा अग्निरपि संतुष्टो न भवेत् । भगवान् भक्तानां हितार्थं गुणभावमपि प्राप्तवानिति वक्तु**मर्जुनस्य सारथिरास**ेत्युक्तम् ॥ २५ ॥ गुप्ततयापि स्थित्वा अर्जुननाम्नैव इन्द्रादिजयं करिष्यामीति भगवदध्यवसायं ज्ञात्वा अग्निरप्यर्जुने संतुष्टो जात इत्याह **सोऽग्निस्तुष्ट** इति । अग्नेः पञ्चाङ्गानि पञ्चापि दत्तवान् । 'धनुर्यज्ञादुत्पन्नमिषवश्च यज्ञजन्मा ही'ति श्रुतेः । श्वेताः हयाः सात्त्विकाः मथनादुद्भूताः आग्नेया एव । अक्षयतूणीरादपि साहचर्यादाग्नेयौ । सर्वैरेवास्त्रिभिरभेद्यं वर्म दैवत्यमपि 'अग्निः सर्वा देवता' इत्याग्नेयमेव ॥ २६ ॥ अन्यदपि दापितवानित्याह **मयश्च मोचित** इति । अत्राशेषविशेषकथा भारतादनुसन्धेया । वह्नेर्मोचितो मयः सख्ये सभामुपाहरत् । भगवता मोचितः भगवते स्वकार्यं दातुमयुक्तम्, भगवति न प्रभवतीति च, उपकारश्च कर्तव्यः, अतः साक्षाद्दातुमशक्तः सख्ये अर्जुनायोपाहरत् । सख्ये दत्तं च भगवान् मन्यते । यद्यप्यर्जुनः सखा, तथापि तत्सम्बन्धात् राज्ञे दत्तमिति । तस्या उपयोगमाह **यस्या**मिति । जले स्थलभ्रमः, स्थले च जलभ्रम इति । वस्तुनि न भ्रमः, किन्तु दृश्येव ॥ २७ ॥ एवं मुख्यशक्त्या ऐश्वर्यरूपया स्वरूपज्ञानरूपया वा यावत्कर्तव्यं तत्कृत्वा तावत्तामात्मसादकृत्वा अन्यथा सर्वात्मना अन्योपकारो न भवतीति तस्या विवाहं कर्तुं भगवान् द्वारकां गत इत्यह **स तेने**ति । **सोऽर्जुनः** सखा राजा वा । **तेन** मयेनार्जुनेन वा सम्यगनुज्ञातः स्वस्य कृतकार्यत्वं ज्ञात्वा सर्वैरेव बन्धुभिर्गमनं कृतं चानुमोदितः, चकाराद्दैवैरपि । स्वकृतं सर्वजनीनं जातमिति ज्ञापयितुमेतदुक्तम् । **यैः** सह गतः तैः सह पुनरागत इति । **कृत्यैव** ते कृतार्थाः कृता इति न सहायार्थं तेषामुपयोगः कर्तव्य इति सूचितम् । अतः सात्यकिप्रभृतयस्तत्र न विनियुक्ताः । नयनानयने तु विवाहस्य प्रामाणिकत्वज्ञापके ॥ २८ ॥

श्रीसुबोधिनी–सारः

तत्र नगरे स्वानां भक्तानां पांडवानां प्रियकरणेच्छया भगवानवसत् श्वेतकियज्ञे भूरिघृतभक्षणादजीर्णगदग्रस्तायाग्नये खांडवमिंद्रस्य वनं दातुं भक्षयितुम् अर्जुनस्य सारथिरास बभूव ॥ २५ ॥ हे नृप सोग्निस्तुष्टोर्जुनाय धनुर्गांडीवं श्वेतान् हया

अश्वान् रथम् अक्षयौ तूणौ निषंगौ अस्त्रिभिरभेद्यमच्छेद्यं वर्म कवचं चादात् ॥ २६ ॥ वह्नेर्मोचितो मयो दैत्यः सख्येर्जुनाय सभामुपाहरन्निर्माय समार्पयत् यस्मिन् यस्यां तथा पाठो वैदिकत्वेनाधिकफलार्थः। जलस्थलयोर्दृशि दर्शने दुर्योधनस्य भ्रम आसीत् भ्रांतिरभवत् । इदं च कालिंदीगमनात्प्राक्तनमन्यथा "गांडीवं धनुरादाय" इत्यसंगतं स्यात् ॥ २७ ॥ तेन राज्ञा धर्मसुतेन समनुज्ञातो याहीति दत्ताज्ञः सुहृद्भिर्मित्रैरनुमोदितः स श्रीकृष्णसात्यकिप्रधानैर्वृतो भूयः पुनर्द्वारकामाययौ आजगाम ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

चरितान्तरमाह—भगवानिति । निरतिशयैश्वर्यादिगुणपूर्णोऽपि स्वानां स्वभक्तानां पाण्डवानां प्रियं कर्तुमिच्छया तत्र हस्तिनापुरे निवसन् अर्जुनस्य धनुरादिलाभाय अग्नये खाण्डवं वनं दातुमर्जुनस्य सारथिरास बभूव ॥ २५ ॥ स च दग्धखाण्डवोऽग्निः, अत एव तुष्टः सन् हे नृप ! अर्जुनाय धनुरादीनदात् । धनुरादिलाभश्च कालिन्दीलाभात् पूर्वमेव बोध्यः, 'गाण्डीवं धनुरादाय' इत्युक्तत्वात् । अस्त्रिभिरस्त्रधारिभिरभेद्यं वर्म कवचम् ॥ २६ ॥ खाण्डववने स्थितो मयाख्यो दानवानां शिल्पाचार्यो वनदाहकाद्वह्नेः सकाशात् भगवता मोचितः रक्षितः, अतस्तत्सख्ये अर्जुनाय सभां कृत्वा उपाहरत् ददौ । तां विशिनष्टि—यस्मिन्निति । यस्मिन्निति सामान्यतो निर्देशः । यस्यां सभायां जलास्थलदृशि भ्रमः जले स्थलदृष्टिः, स्थले च जलदृष्टिः, इत्येवंविधो भ्रमः आसीत् ॥ २७ ॥ ततश्च तेनार्जुनेन समनुज्ञातः अन्यैश्च सुहृद्भिः युधिष्ठिरादिभिरनुमोदितः स कृष्णः सात्यक्यादिभिः सहितो भूयो द्वारकामाययौ इत्यन्वयः ॥ २८ ॥

अन्वितार्थप्रकाशिका

भगवानिति ।। भगवान् स्वानां स्वभक्तानां प्रियचिकीर्षया प्रियं कर्तुमिच्छया तत्र हस्तिनापुरे निवसन् अग्नये खाण्डवं तन्नामकमिन्द्रवनं दातुम् अर्जुनस्य सारथिः साहाय्यकृदास ॥ २५ ॥ स इति ।। हे नृप ! स चाग्निः खाण्डवदाहाङ्गीकारेण तुष्टः अर्जुनाय गाण्डीवं धनुः श्वेतान् हयान् रथम् अक्षयौ अक्षयसायकौ तूणौ अस्त्रिभिः अस्त्रधरैरभेद्यं वर्म कवचं चादात् । एतानि खाण्डवदाहात् पूर्वमेवाग्निना दत्तानि ॥ २६ ॥ मय इति ॥ खाण्डववने स्थितो मयाख्यो दानवानां शिल्पाचार्यो वनदाहकाद्वह्नेः सकाशात् मोचितः रक्षितः अतस्तत्र सख्ये खाण्डवदाहकवह्नेः सख्ये वा अर्जुनाय सभां कृत्वा उपाहरत् ददौ । यस्मिन्निति सामान्यतो निर्देशः । यस्यां सभायां दुर्योधनस्य जलस्थलयोर्दृशोर्दृष्टेभ्रमः । यद्वा । जले स्थलदृक् स्थलज्ञानं यत्र तत्र सभायां भ्रमः आसीत् ॥ २७ ॥ स इति ॥ तेनार्जुनेन समनुज्ञातः अन्यैः स्वसुहृद्भिः युधिष्ठिरादिभिरनुमोदितः स कृष्णः सात्यकिप्रमुखैर्वृतः सात्यक्यादिभिः सहितो भूयो द्वारकामाययौ । पूर्वं मुहुर्जिगमिषन्नपि क्लेशेनाननुज्ञातत्वान्न ययौ । अधुना कालिन्दीविवाहाद्यावश्यकमालोच्य सम्यगनुज्ञातो ययौ ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अक्षयौ सदा बाणपूर्णौ । तूणौ शरधी ॥ २५ ॥ वह्नेरिंद्रवनदाहकाग्नेर्मोचितः सख्ये अर्ज्जुनाय उपाहरत् दत्तवान् । यस्मिन् यस्यां सभायां । जलं च स्थलं का च भूमिश्च तयोः दृशोर्भ्रमः जले स्थलं भाति स्थले जलं च भातीति वैपरीत्य आसीत् ॥ २६ ॥ इत्थं पूर्ववृत्तांतमुक्त्वा सांप्रतं कालिद्यानयनोत्तरवृत्तांतमाह स इति तेन युधिष्ठरेण समनुज्ञात आज्ञप्तः सुहृद्भिरर्ज्जुनादिभिः ॥ २७ ॥ सुपुण्ये विवाहोक्ते ऋतुः कालः ऋक्षं नक्षत्रं च यस्मिस्तथाभूते ऊर्ज्जितैरव्यादिग्रहबलयुक्ते दिने ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवानिति ॥ तदा, स्वानां प्रियचिकीर्षया निजजनानां प्रियं कर्त्तुमिच्छयेत्यर्थः। तत्र नगरे, निवसन् भगवान्, अग्नये खाण्डवं खान्डवं नाम वनं, दातुं अर्जुनस्य सारथिः, आस बभूव ॥ २५ ॥ स इति ॥ स दग्धखाण्डवः अग्निः, हे नृप, तुष्टः सन्, अर्जुनाय, धनुः गाण्डीवं नाम शरासनं, श्वेतान् हयान्, रथं, अक्षयौ बाणक्षयवर्जितौ, तूणाविषुधी, अस्त्रिभिरस्त्रधारिभिरपि, अभेद्यं वर्म कवचं च, अदात् ॥ २६ ॥ मयश्चेति ॥ मयः खाण्डववनवासी दानवः, वह्नेः सकाशात्, मोचितः । अत एव, सख्येऽर्जुनाय, सभां उपाहरत् ददौ । यस्यां सभायां, दुर्योधनस्य, जलस्थलदृशि भ्रमः जले स्थलवद्बुद्धिः, स्थले जलवद्बुद्धिरित्येवविधो दृग्गतो भ्रमः, आसीत् ॥ २७ ॥ स तेनेति ॥ स श्रीकृष्णः, तेन अर्जुननेन, समनुज्ञातः, सुहृद्भिर्युधिष्ठिरादिभिः, अनुमोदितः कृतानुमोदनः, सात्यकिप्रमुखैः, वृतः संश्च, भूयः पुनः, द्वारकां आययौ ॥ २८ ॥

कृष्णप्रिया

भगवान् इस बार पाण्डवों को आनन्द देने और उनका हित करने के लिये वहाँ बहुत दिनों तक रहे । इसी बीच अग्निदेव को खाण्डव-वन दिलाने के लिये वे अर्जुन के सारथी भी बने ॥ २५ ॥ खाण्डव-वन का भोजन मिल जाने से अग्निदेव

बहुत प्रसन्न हुए। उन्होंने अर्जुन को गाण्डीव धनुष, चार श्वेत घोड़े, एक रथ, दो अटूट बाणों वाले तरकस और एक ऐसा कवच दिया, जिसे कोई अस्त्रशस्त्रधारी भेद न सके ॥ २६ ॥ खाण्डव-दाह के समय अर्जुन ने मय दानव को जलने से बचा लिया था। इसलिये उसने अर्जुन से मित्रता करके उनके लिये एक परम अद्भुत सभा बना दी। उसी सभा में दुर्योधन को जल में स्थल और स्थल में जल का भ्रम हो गया था ॥ २७ ॥ कुछ दिनों के बाद भगवान् श्रीकृष्ण अर्जुन की अनुमति एवं अन्य सम्बन्धियों का अनुमोदन प्राप्त करके सात्यकि आदि के साथ द्वारका लौट आये ॥ २८ ॥

अथोपयेमे कालिन्दीं [1]सुपुण्यत्वृक्ष ऊर्जिते। [2]वितन्वन् परमानन्दं स्वानां परममङ्गलम् ॥ २९ ॥
विन्दानुविन्दावावन्त्यौ दुर्योधनवशानुगौ। स्वयंबरे स्वभगिनीं [3]कृष्णे सक्तां न्यषेधताम् ॥ ३० ॥
राजाधिदेव्यास्तनयां मित्रविन्दां पितृष्वसुः। प्रसह्य हृतवान् कृष्णो राजन् राज्ञां प्रपश्यताम् ॥ ३१ ॥
नग्नजिन्नाम कौरव्य [4]आसीद् राजातिधार्मिकः। तस्य सत्याभवत् कन्या [5] देवी नाग्नजिती नृप ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—सुपुण्यः, अथ, ऋक्ष, ऊर्जिते, परममङ्गलं, स्वानां, परमानन्दं, वितन्वन्, कालिन्दीं, उपयेमे ॥ २९ ॥ आवन्त्यौ, विन्दानुविन्दौ, दुर्योधनवशानुगौ, स्वयंवरे, कृष्णे, सक्तां, स्वभगिनीं, न्यषेधताम् ॥३०॥ हे राजन्, कृष्णः, पितृष्वसुः, राजाधिदेव्याः, तनयां, मित्रविन्दां, राज्ञां, प्रपश्यतामेव, प्रसह्य, हृतवान् ॥ ३१ ॥ हे नृप, अतिधार्मिकः, कौशल्यः, नग्नजिन्नाम, राजा, आसीत्, तस्य, नाग्नजिती, इतिनाम्नी, देवी, कान्तिमती, सत्या, (नामकन्या) अभवत् ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सुपुण्य ऋतुः ऋक्षं च यस्मिन् ॥ २९ ॥ पंचमं मित्रविंदाविवाहमाह—विंदाविति द्वाभ्याम्। आवंत्यावंत्याराजानौ ॥ ३०–३१ ॥ षष्ठमाह। नग्नजिदिति। कौशल्योऽयोध्यापतिस्तस्य सत्या नाम कन्याऽभवदासीत् देवी कांतिमती नाग्नजितीति पितृनाम्ना प्रसिद्धेत्यर्थः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ द्वारकाप्राप्तेरनन्तरम्। ऊर्जितेऽतिबलवति, काले इत्यर्थः। सुपुण्ये विवाहादिप्रशस्ते, ऋतौ वसन्तादौ, ऋक्षे च रोहिण्यादौ च द्वंद्वैक्यम्। तत्राप्यूर्जिते ऋतौ, रविशुद्ध्यादियुक्ते, ऋक्षे तु संपदाद्येकतरे, शुभचन्द्रे शुभग्रहयुक्ते दृष्टे च विहित इत्यर्थः। स्वत एव परममंगलोपि इति लोकशिक्षार्थमेव तत्तदपेक्षेति भावः। यद्वा–परममंगलम्। तत्प्रभावेण स्वयमेव सर्वमंगलोपसत्तेरित्यर्थः ॥ २९ ॥ दुर्योधनस्य वशानुगौ प्रियानुगौ। 'त्रिष्वायत्ते वशोऽभीष्टे' इति निरुक्तिः। स्वयंवरेपि कृष्णे सक्तां न्यषेधताम् ॥ ३० ॥ पितृष्वसुः वसुदेवभगिन्या राजाधिदेवीतिनामवत्याः। पितृष्वसुरिति–यदुवंशे स्वसम्बन्धिविवाहस्याचारप्राप्तत्वान्न दोष इति भावः। यद्वा–हरिवंशोक्तरीत्या यदुवंशो द्विधा–सौरश्चांद्रश्च, तदग्रे वर्णयिष्यामः। किञ्च–कृष्ण "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति रीत्या कृष्यमाणचित्तत्वादपि तन्नामेत्यर्थः। शिबिदेशोद्भवत्वादस्या एव शैब्येति नाम। अत एवाग्रे कुरुक्षेत्रे यात्रायां श्रीद्रौपदीप्रश्ने शैब्य इति सबोधनं, व्याख्यातश्च तैः–शैब्या मित्रविन्देति ॥ ३१ ॥ विवाहांतरमाह—नग्नजिदिति। "वेदो हि सर्वलोकानां वस्त्रवद्रक्षकः स्मृतः। तद्धीनः प्रोच्यते नग्नस्तज्जेता नग्नजिन्मतः। इत्यन्वर्थनामा। तत्र हेतुः–अतिधार्मिक इति। इत्यर्थ इति–न तु तस्या इदं नामेति भावः। अतिधार्मिको भगवद्धर्मपर इत्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सुपण्ये विवाहायातिप्रशस्ते ऋतौ ऋक्षे च द्वन्द्वैक्यं तत्रापि ऊर्जिते ऋतौ रविशुद्ध्यादियुक्ते ऋक्षे तु सम्पदाद्येकतरे शुभचन्द्रे शुभग्रहयुक्तदृष्टे च विहित इत्यर्थः। स्वत एव परममङ्गलोपि इति लोकशिक्षार्थमेव तत्तदपेक्षेति भावः। यद्वा, परममङ्गलः तत्प्रभावेन स्वयमेव सर्वमङ्गलोपसत्तेरित्यर्थः ॥ २९ ॥ स्वयंवरेऽपि कृष्णे सक्ताम् आसक्तां न्यषेधताम् ॥ ३० ॥ पितृष्वसुरिति यदुवंशे स्वसम्बन्धिविवाहस्याचारप्राप्तत्वात् न दोष इति भावः। किञ्च कृष्णः "ये यथा मां प्रपद्यन्ते" इति रीत्या कृष्यमाणचित्तत्वादपि तन्नामेत्यर्थः। शिबिदेशोद्भवत्वादस्या एव शैव्येति नाम अत एवाग्रे कुरुक्षेत्रयात्रायां श्रीद्रौपदीप्रश्ने शैव्येति सम्बोधनं व्याख्यातं च तैः शैन्ये मित्रविन्दे इति ॥ ३१ ॥ अतिधार्मिकः श्रीभगवद्धर्मपर इत्यर्थः ॥ ३२ ॥

---

१. पुण्ये नक्षत्रे–विज.। २. रूपयौवनसम्पन्नां मनोनयननन्दिनीम्–विजये। ३. कृष्णकामां–विज.। ४. कौसल्य–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. सु.। ५. राजन् नीलेति चाह्वया–विज.।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ आगमनानन्तरमेव, मांगल्ये वा, तदेवाभिव्यञ्जयति—सुपुण्येति। ऊर्ज्जिते सुपुण्येष्वपि विवाहानुकूले, यद्वा, सुपुण्यस्य ऋतोर्ऋक्षे ऊर्ज्जिते बलवति, स्वत एव परममंगलोऽपि, इति लोकशिक्षार्थमुत्तरायणे माघाद्यपेक्षणम्, यद्वा, आग्रहायणे एव वार्षिक—चातुर्म्मास्यात्ययेन मार्गे मासि द्वारकागमनात्तदानीमेव तत्तत्सम्पत्तेः, यतः परममंगलः तत्प्रभावेण स्वयमेव सर्व्व-मंगलोपसत्तेरित्यर्थः। स्वानां श्रीश्रीवसुदेवादीनां परममानन्दं विशेषेण तन्वन् विस्तारयन् सदानन्दं विस्तारयत्येव, अधुना तु श्रीकालिन्दीविवाहेन परमं विशेषेण तं विस्तारयन्नित्यर्थः॥ २९॥ स्वयम्वरेऽपि कृष्णे सक्तामासक्तां न्यषेधतां श्रीकृष्णेन सह विवाहाद्वारयामासतुः, यद्वा, स्वयम्बर इत्यस्य हृतवानिति परेणान्वयः, यद्वा, स्वयंतया वरणे न्यषेधताम्, तां प्रति तन्निषिषिधतुरित्यर्थः। कुतः? दुर्य्योधनस्य वशानुगौ इच्छानुसारिणौ, अतएव पितृष्वसुरपि तनयां हृतवान्, यतः कृष्णः प्रियजन-प्रेम्णाकृष्यमाणचित्त इत्यर्थः॥ ३०॥ हे राजन्निति स्वभक्तानुग्रहेण प्रहर्षोदयात्, किं वा राजमानः सन्, अतो राज्ञां सर्व्वेषां प्रकर्षेण पश्यतामेव, सप्तम्यां षष्ठी, पश्यत्सु सत्स्वेव, अनादरे षष्ठी वा, शिविदेशोद्भवत्वादस्या एव शैव्येत्यपि नाम, अतएवाग्रे कुरुक्षेत्रयात्रायां श्रीद्रौपदीप्रश्ने 'शैव्ये' इति सम्बोधनम्। व्याख्यातञ्च तैः—'शैव्ये मित्रविन्दे' इति। अतिधार्म्मिकः श्रीभगव-द्धर्म्मपर इत्यर्थः। अत एव नग्नान् जैनानपि जयति स्ववशे करोतीति नग्नजिदित्यन्वर्थनामत्वम्। हे नृपेति राजकन्यायाः सौन्दर्य्यसौशील्यादिकं भवता ज्ञायत एवेति मया किं तद्वर्ण्यमिति भावः॥ ३२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथेति। ऊर्जिते ग्रहबलवति सुपुण्यमनुकूलमृक्षं नक्षत्रं यस्मिंस्तस्मिन् सुमुहूर्ते स्वानां द्वारकौकसां परममानन्दं विस्तारयन् परमं मङ्गलं यस्य सः विवाहितवान्॥ २९॥ अथ पञ्चमं मित्रविन्दाविवाहं प्रस्तौति—विन्दानुविन्दाविति। आवन्त्याववन्तिराजौ दुर्योधनवशं दुर्योधनाधीनतामनुगच्छत इति तथा तौ न्यषेधताम् न्यवारयताम्॥ ३०॥ राजाधिदेव्या इति। तथा भगवान् पितृष्वसुः स्वपितृभगिन्याः राजाधिदेव्यास्तनयां राज्ञां पश्यतां सतामेव हे राजन्! प्रसह्य हृतवान्॥ ३१॥ अथ षष्ठं नाग्नजितीविवाहमनुवर्णयति—नग्नजिन्नामेति। कौ (स) शल्यः कोसलदेशाधिपतिरयोध्याधिपतिरिति यावत् तस्य देवी कान्तिमती च सत्या नामकन्या अभूत् अन्वर्थकनामान्तरमप्याह—नाग्नजितीति। नग्नजितोऽपत्यं स्त्रीति तथा हे नृप!॥ ३२॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

राजाधिदेव्याः राजाधिदेवीतिनामधेयायाः॥ ३१॥ नीलेत्याह्वयो नाम यस्याः सा नीलेत्याह्वया "आ प्रसह्यः स्मृतौ वाक्येष्यास्तु सन्तापकोपयोः" इति यादवः॥ ३२॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

पञ्चमं मित्रविन्दाविवाहमाह—विन्देति द्वाभ्याम्। आवात्यौ अवन्तीभूपालौ॥ ३०-३१॥ षष्ठमाह—नग्नजिदिति। कौशल्यः अयोध्याधिपतिः सत्येति संज्ञा॥ ३२॥

गूढार्थदीपिनी

सुपुण्यो विवाहयोग्यो ऋतुः ऋक्षं नक्षत्रं रोहिण्यादि च यस्मिन्। ऊर्जिते ग्रहबलवति मुहूर्ते परम् मङ्गलं निर्विघ्नं यथा स्यात्तथा उपयेमे इत्यन्वयः॥ २९॥ पञ्चमं विवाहमाह—विन्देति, आवन्त्यौ अवन्तिदेशराजानौ॥ ३०॥ पितृष्वसुर्वसु-देवभगिन्याः राजाधिदेवीनाम्न्याः शिविदेशोद्भवत्वादस्याः शैव्यापि नाम। यदुवंशे स्वसम्बन्धिविवाहस्य लोकाचारप्राप्तत्वान्न-दोषः। यद्वा। हरिवंशे यदुवंशस्य चन्द्रवंशे सूर्यवंशे च वर्णनाद् परस्परं भिन्नवंशं स्वीकृत्य विवाहे न काप्यनुपपत्तिः॥ ३१॥ षष्ठमाह—कौशल्योऽयोध्यापतिः॥ ३२-३३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सुपुण्यः ऋतु ऋक्षं च यस्मिन् तस्मिन् ऊर्जिते बलवति मुहूर्ते॥ २९॥ आवन्त्यौ अवन्तीराजानौ॥ ३०-३२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

धर्मसूनवे तदर्थम्॥ २९॥ पुरन्दरपूरस्यामरावत्याः प्रख्या शोभा यस्य तत्। स्वानां द्वारकागाराणाम्॥ ३०॥ सुहृद्भिः पार्थैरित्येकाधिकरण्यम्। स्वजनाश्च कालिन्द्याद्याः सात्यकिप्रमुखैरिति तत्पृथग्वचनात्। पुण्ये ऊर्जिते उच्चस्थाने

स्थितगुर्वादिग्रहे ऊर्जिते **शुभनक्षत्रे उपयेमे** परिणिनाय ॥ ३१ ॥ मनोनयननन्दिनीमित्यनेन स्वपितृत्वानत्वान्नयननन्दनं युक्ततरमिति ध्वन्यते। ध्वन्यते च स्वभर्तृमूलपुरुषस्थानत्वान्मनोनन्दनमिति। उभयकुलनन्दनीति परमार्थः। शशिसूर्यनेत्रम्। चन्द्रमा मनसो जात इत्यादेर्मनः सोम उदाहृत इत्यादिश्च। स्वानां **परममङ्गलं तथा** परमानन्दं च वितन्वन्विस्तारयन्नुपयेम इत्यन्वयः ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतः सर्वसम्मतां पश्चात्तामुपयेम इत्याह अथेति। सुष्टु पुण्ये नक्षत्रे। ऊर्जिते सर्वग्रहानुगणे। पुण्यनक्षत्रं वैदिकम्। ऊर्जितत्वं ज्योतिशास्त्रप्रशस्तत्वम्। वितन्वन् परमानन्दमिति सर्वेषां सम्मतिरुक्ता, रुक्मिणीप्रभृतीनामपि। किञ्च। विवाहमात्रेण न सुखं दत्तवान्, किन्तु स्वरूपतोऽपि परममङ्गलरूपः। अतो **विशिष्टः फलदायी** जात इत्यर्थः ॥२९॥ विवाहान्तरमाह द्वाभ्याम्, विन्दानुविन्दाविति। द्वितीयपक्षस्थेयम्। तानप्युद्धर्तुं भगवान् गृह्णाति। मित्रविन्दाया अवन्तिदेशे **स्थितिः**। तत्रैव स्वयंवरः। तत्र दुर्योधनादयोऽपि गताः। **भगवांश्च**। ततः स्वयंवरणप्रस्तावे दूराद्भगवन्तं दृष्ट्वा निकटे स्थितौ भ्रातरावाह 'मया कृष्णो वरणीय' इति। **ततस्तौ तस्या आसक्तिं च ज्ञातवन्तौ**। तयोर्विचारेण दुर्योधनो वरणीय इति। यतस्तस्यैव **वशावनुगौ च**। यथा रुक्मी। स्वभगिनो स्वोदरेति न तत्रान्यं प्रतिबन्धं कर्तुं शक्तः। **न्यषेधताम्**। भगवत्सम्मुखे विलम्बमानाम्। ततः अपसार्य दुर्योधनसमीपे नेतुं प्रवृत्तावित्यर्थः। ततो भगवानेतज्ज्ञात्वा तौ दूरीकृत्य रथवेगेन शीघ्रमागत्य तां जहारेत्याह **राजाधिदेव्या** इति। राजाधिदेवी **वसुदेय**भगिनी नवमे निरूपिता। सा तु लोकन्यायेन मातुलकन्यावत् भाग एव भवति। अतो न दानापेक्षा। कन्यायां परमन्यासक्तायां ग्राह्या नवेति विचारः। सापि राजस्वधिकं दीव्यतीति भगवन्तमेव मन्यते। कन्यापि मित्राण्येव विन्दतीति नानभिप्रेतं प्राप्नोति। **पितृष्वसु**रिति कुलद्वयेऽपि तस्या विवाहः सम्मत इति बोधितम्। प्रसह्येति भ्रातृभ्यामाच्छिद्य। यतः कृष्णः **स्त्रीणां हितकर्ता**। अन्ये च राजानः साक्षिणो जाताः तेनायं विवाहः सर्वसम्मतः सर्वसाक्षिकश्च। संबोधनं च तादृशम्। सम्मतमिति सम्मत्यर्थम् ॥ ३१ ॥ तृतीयं विवाहमाह भक्तिरूपम्, नग्नजिदिति चतुर्विंशतिभिः। ज्ञाने सर्वे विरोधिनः, भक्तौ प्रकृतिरेवेति व्यसनान्येवात्र बाधकानीति तान्येकेन रूपेण दूरीकर्तुमशक्यानीति सप्तविधा साधनशक्तिरुक्ता। अन्यथा त्रिभिरेव प्रेमसम्पत्तौ पादसेवनादीनां वैयर्थ्यमेव स्यात्। सख्यात्मनिवेदने च भगवता स्वधर्मस्थापनार्थं क्रियेते। तत्कृत्वा भगवत्तुल्यः पश्चाद्व्यसनानि समूलं दूरीकरोतीति ज्ञापयितुं स्वयं भगवानत्र सप्त रूपाणि करिष्यति। इयं च भक्तिः पाषण्डे न भवतीति ज्ञापयितुं नग्नजिद्राज्ञः कन्यात्वेन सा निरूप्यते। नग्नान् वेदरहितान् जयतीति। अत एव प्रसिद्धः। त्वमपि कौरव्यः। कौरववंशे उत्पन्नः **विश्वासं करिष्यतीति**। न केवलं विपक्षानेव दूरीकरोति, किन्तु श्रौतस्मार्तादिसर्वधर्मपरः। **अतिधार्मिकः**। स्वरूपतोऽपि महान् राजा। तस्य गुणत्रयमपि समीचीनमिति तत उत्पन्ना नाग्नजितीत्याह तस्येति। कौसल्येति पाठे कोसलदेशाधिपतिरयोध्याराजा। सत्येति नाम। स्वरूपतः फलतः साधनतश्चेयं भक्तिः सत्येति। अत एव वेदविरुद्धमतेषु अधमेषु कर्मविहीनेषु भक्तिः सत्या न भवतीति द्योतितम्। उत्कर्षवादा एवातोऽन्यथा। अन्यथा भक्तिशास्त्रं व्यर्थमेव स्यात्! सहस्रशो भगवदंशा दृष्टप्रत्ययान्यपि सम्पादयन्तीति शास्त्रे अनुक्ता भक्तिः न भक्तिरिति। भगवत्साक्षात्कारात्पूर्वमेवैषा व्यवस्था। सा च देवतारूपा अलौकिकी कन्या न कमपि भगवदंशं गृहीत्वा स्थिता। असाधारणी मूलभूतेनैव ग्राह्या, न केवलम्, यतो भक्तिः प्राप्यते, स एव वेदानुसारी। किन्तु यत्रापि तिष्ठति, तेनापि तथा भाव्यमिति नाग्नजितीत्युक्तम्। पितुरनुसारिणी, न मातुरिति ज्ञापयितुं च। 'धन्या पितृमुखी कन्या' इति वाक्यात्। नृपेति स्नेहार्थं सम्बोधनमनासक्त्यर्थं च ॥ ३२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

विन्दानुविन्दावित्यत्र। **द्वितीये**ति। अभक्तदुर्योधनादिपक्षस्थेत्यर्थः। **नग्न**जिदित्यत्र **ज्ञाने** सर्वे इति। प्रापञ्चिकाः सर्व एव पदार्था ज्ञाने विरोधिनः। भक्तौ तु प्रकृतिरेव विरोधिनी। अतोत्र गोवृषाः सप्तव्यसनात्मका बाधकत्वेनोक्ता इत्यर्थः। 'क्षुत्पिपासे तथा रोगाः कर्माणि द्विविधानि च। लोकोपद्रवरूपाणि चत्वार्यावश्यकानि हि। द्यूतं पानं **स्त्रियश्चे**ति त्रीण्यनावश्यकानि ही'ति सप्तव्यसनानि। **अन्यथे**ति सप्तव्यसनानां बाधकत्वाभावे इत्यर्थः। तथा च दास्यान्तैः सप्तभिर्व्यसननिराकृतौ सख्यात्मनिवेदने भगवता संपाद्येते इत्यर्थः। **उत्कर्षवादा** इति। अधमेषु भक्तिकथनमसत्यापि भक्तिरुद्धर्तुं शक्तेति भक्त्युत्कर्षसूचनार्थमित्यर्थः। **अन्यथे**ति। अधमेष्वपि भक्तेः सत्यत्वे भक्तौ सदाचारशासनं व्यर्थं स्यात्। **सहस्रश** इति। दृष्टः प्रत्यक्षविषयः प्रत्ययोनुभावो येषां तादृशनि रूपाणि भगवदंशाः संपादयन्ति। नीचयोनिषु जाता अपि भक्तिप्राबल्यादनुभावं प्रदर्शयन्ति। परन्तु सा भक्तिः सत्या सदाचारसिद्ध न भवतीति पूर्वेणान्वयः।

श्रीसुबोधिनीसारः

ऊर्जिते गुणसमृद्धे सुपुण्य ऋतुर्ऋक्षं च यस्मिन् तस्मिन्काले कालिंदीमुपयेमे परिणीतवान्। स्वानां परमं मंगलं यस्मिस्तं परमानन्दं वितन्वन् विस्तारयन् सन् ॥ २९ ॥ विंदोनुविंद इति द्वौ आवंत्यौ उज्जयिनीराजौ दुर्योधनस्य वशौ

अनुकूलौ अनुगौ च वस्तुतस्तु विशेष्यपरत्वमूह्यम् । स्वयंवरे कृष्णे सक्तां धृतचित्तां स्वभगिनीं निवारितवन्तौ ।। ३० ।। पितुः स्वसुर्भगिन्या राजाधिदेव्याः तनयां पुत्रीं मित्रविंदां प्रसह्य बलात्कृष्णो हृतवान् राज्ञां प्रपश्यतां सतां हे राजन् ।। ३१ ।। कौसल्योऽयोध्याधिपो नग्नजिन्नाम राजातिधार्मिक आसीत् तस्य राज्ञो देवी नाग्नजिती कन्या पितृनामतः स्वतः सत्यानाम्नयासीत् हे नृप तीक्ष्णानि शृंगाणि येषां तान् सुदुर्धर्षान् असह्यान् वीराणां गंधमपि न सहंत इति तथा तान् खलान् दुष्टान् सप्त गोवृषान् वृषभोत्तमान् अजित्वा तां कन्यां नृपा वोढुं परिणेतुं न शेकुः न समर्था बभूवुः ।। ३२-३३ ।।

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

सुपुण्यो विवाहयोग्यः ऋतुः ऋक्षं नक्षत्रं च यस्मिन् तस्मिन्नूर्जिते ग्रहबलवति मुहूर्ते परममङ्गलरूपो भगवान् स्वानां स्वभक्तानां द्वारकौकसां परमानन्दं विस्तारयन् कालिन्दीमुपयेमे विवाहितवान् ।। २९ ।। अथ पञ्चमं मित्रविन्दाविवाहमाह—द्वाभ्याम् । आवन्त्यौ अवन्तीराजानौ विन्दानुविन्दौ स्वयंवरे कृष्णे सक्तां कृष्णं वरितुमुद्युक्तां स्वभगिनीं न्यषेधतामित्यन्वयः । निषेधे हेतुमाह—दुर्योधनवशानुगाविति । भगवद्द्वेषिणो दुर्योधनस्य वशवर्तित्वात्तदननुमतत्वात् कृष्णवरणं निषेधितवन्तावित्यर्थः ।। ३० ।। 'राज्ञामप्येवं राक्षसो विवाहो भवतीति तव प्रसिद्धमेव' इति सूचयन् सम्बोधयति—राजन्निति । ततश्च पितृष्वसुः स्वपितृभगिन्याः राजाधिदेव्यास्तनयां मित्रविन्दां राज्ञां प्रपश्यतामेव सतां प्रसह्य बलात् कृष्णो हृतवान् इत्यर्थः ।।३१।। अथ षष्ठं नाग्नजितीविवाहमाह—नग्नजिदिति । हे नृप ! कौशल्यः कोशलदेशाधिपतिरयोध्यावासी नग्नजिन्नाम राजाऽऽसीत् । तस्य भगवत्सम्बन्धयोग्यतां सूचयन्नाह—अतिधार्मिक इति । तस्य नाग्नजिती पितृनाम्ना प्रसिद्धा देवी कान्तिमती सत्यानाम कन्याऽभवत् ।। ३२ ।।

अन्वितार्थप्रकाशिका

अथेति । सुपुण्यो विवाहयोग्यः ऋतुः ऋक्षं नक्षत्रं च यस्मिन् तस्मिन्नूर्जिते ग्रहबलवति मुहूर्ते परममङ्गलरूपो भगवान् स्वानां स्वभक्तानां द्वारकौकसां परमानन्दं वितन्वन् विस्तारयन् कालिन्दीम् उपयेमे विवाहितवान् ।। २९ ।। पञ्चमं विवाहमाह—विन्देति । दुर्योधनस्य भगवद्द्वेषिणः वशानुगौ इच्छानुसारिणौ आवन्त्यौ अवन्तीस्वामिनौ विन्दानुविन्दौ स्वयंवरे कृष्णे सक्तां कृष्णं वरितुमुद्युक्तां स्वभगिनीं न्यषेधताम् ।। ३० ।। राजेति । हे राजन् ! भ्रातृभ्यां कृष्णाय स्वभगिनीदाननिषेधे कृते पितृष्वसुः स्वपितृभगिन्याः राजाधिदेव्यास्तनयां मित्रविन्दां राज्ञां प्रपश्यतामेव सतां प्रसह्य बलात्कृष्णो हृतवान् ।।३१।। षष्ठं विवाहमाह—नग्नजिदिति । हे नृप ! अतिधार्मिकः कौसल्यः कोसलदेशाधिपतिरयोध्यावासी नग्नजिन्नाम राजाऽऽसीत् । तस्य नाग्नजितीति पितृनाम्ना प्रसिद्धा देवी कान्तिमती सत्यानाम कन्याऽभवत् ।। ३२ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ पंचमं मित्रविंदा पाणिग्रहणं प्रकारमाह द्वाभ्यां विंदेति । विंदानुविंदौ द्वौ आवंत्यौ अवंतिपुरस्य राजानौ ।। २९ ।। राजाधिदेव्यास्तत्संज्ञायाः पितृष्वसुः पुत्रीं ।। ३० ।। षष्ठं विवाहमाह नग्नजिदिति । कौसल्य अयोध्यास्वामी तस्य सत्यां संज्ञा कन्या अभवत् । कीदृशी देवी द्योतमाना । तत्पुत्रीत्वान्नाग्नजिती ।। ३१ ।। वीरस्य शूरस्य गंधमप्यसहमानान् । खलान् दुर्दातान् । दुर्द्धर्षान् गृहीतुमयोग्यान् अजित्वा तां वोढुं परिणेतुं ।। ३२ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथेति । अथानन्तरं, ऊर्जिते ग्रहबलवति, सुपुण्योऽनुकूलः ऋतुः ऋक्षं नक्षत्रं च यस्मिस्तस्मिन् मुहूर्त्ते, स्वानां द्वारकौकसां, परं सर्वोत्तमं आनन्दं, वितन्वन् विस्तारयन्, परममङ्गलः भगवान्, कालिन्दीं, उपयेमे विवाहितवान् ।। २९ ।। अथ पञ्चमं मित्रविन्दाविवाहं प्रस्तौति । विन्दानुविन्दाविति । आवन्त्याववन्तीराजानौ, विन्दानुविन्दौ, दुर्योधनवशं दुर्योधनाधीनत्वमनुगच्छत इति तथाभूतौ सन्तौ, स्वयंवरे कृष्णे सक्तामासक्तिं प्राप्तां, स्वभगिनीं, न्यषेधताम् ।। ३० ।। राजाधिदेव्या इति । हे राजन्, तदा कृष्णः भगवान्, पितृष्वसुः पितृभगिन्याः, राजाधिदेव्याः, तनयां पुत्रीं, मित्रविन्दां, राज्ञां प्रपश्यतां सताँ प्रपश्यतो राज्ञोऽनादृत्यैवेत्यर्थः । प्रसह्य हठात्, हृतवान् ।। ३१ ।। अथ षष्ठं नाग्नजितीविवाहमनुवर्णयति । नग्नजिदिति । कौसल्यः कोसलदेशाधिपतिः, अयोध्याधिपतिरिति यावत् । अतिधार्मिकः, नग्नजिन्नाम नग्नजिदिति नाम्ना प्रसिद्धः, राजा आसीत् । हे नृप, तस्य राज्ञः, देवी कान्तिमती, नग्नजिन्नृपपुत्रीत्वान्नाग्नजितीति प्रसिद्धा, सत्या सत्याख्यया प्रसिद्धा, कन्या, अभवत् ।। ३२ ।।

कृष्णप्रिया

वहाँ आकर उन्होंने विवाह के योग्य ऋतु और ज्यौतिष शास्त्र के अनुसार प्रशंसित पवित्र लग्न में कालिन्दीजी का पाणिग्रहण किया । इससे उनके स्वजन-सम्बन्धियों को परम मङ्गल और परमानन्द की प्राप्ति हुई ।। २९ ।। अवन्ती (उज्जैन)

देश के राजा थे विन्द और अनुविन्द। वे दुर्योधन के वशवर्ती तथा अनुयायी थे। उनकी बहिन मित्रविन्दा ने स्वयंबर में भगवान् श्रीकृष्ण को ही अपना पति बनाना चाहा। परन्तु विन्द और अनुविन्द ने अपनी बहिन को रोक दिया ॥ ३० ॥ परीक्षित् ! मित्रविन्दा श्रीकृष्ण की फूआ राजाधि देवी की कन्या थी। भगवान् श्रीकृष्ण राजाओं की भरी सभा में उसे बलपूर्वक हर ले गये, सब लोग अपना-सा मुंह लिये देखते ही रह गये ॥ ३१ ॥ परीक्षित् ! कोसल देश के राजा थे नग्नजित्। वे अत्यन्त धार्मिक थे। उनकी परम सुन्दरी कन्या का नाम था सत्या। नग्नजित् को पुत्रीहोने से वह नाग्नजिती भी कहलाती थी ॥ ३२ ॥

न तां शेकुर्नृपा वोढुमजित्वा सप्त गोवृषान्। तीक्ष्णशृङ्गान् सुदुर्धर्षान् [1]वीरगन्धासहान् खलान् ॥ ३३ ॥
तां श्रुत्वा वृषजिल्लभ्यां भगवान् सात्वतां पतिः। जगाम कौसलयपुरं[2] सैन्येन महता वृतः ॥ ३४ ॥
स कोसलपतिः प्रीतः प्रत्युत्थानासनादिभिः। अर्हणेनापि गुरुणा पूजयन् [3]प्रतिनन्दितः ॥ ३५ ॥

वरं विलोक्याभिमतं [4]समागतं नरेन्द्रकन्या चकमे रमापतिम्।
भूयादयं मे [6]पतिराशिषोऽमलाः करोतु सत्या[7] यदि मे धृतो व्रतैः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—नृपाः, तीक्ष्णशृङ्गान्, वीरगन्ध, असहान् खलान् सुदुर्धर्षान्, सप्तगोवृषान्, अजित्वा, तां, वढुं, न शेकुः।३३। भगवान्, सात्वतां, पतिः, वृषजिल्लभ्या, तां, श्रुत्वा, महता, सैन्येन, वृतः कौशल्यपुरं, जगाम ॥ ३४ ॥ सः, कोशलपतिः, प्रीतः, प्रत्युत्थान, आसनादिभिः, गुरुणा, अर्हणेन, तं, पूजयन्, प्रतिनन्दित, अपि ॥ ३५ ॥ तदा, सा, नरैन्द्रकन्या, तं समागतं, रमापतिं, अभिमतं, वरं विलोक्य, चकमे, यदि मे, व्रतैः धृतः, अयं, पतिः, सन्, अमलाः, आशिषः, सत्या, करोतु ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वीरस्य गन्धमपि न सहंत इति तथा तान् खलान् दुर्वृत्तान् ॥ ३३ ॥ वृषान् जयति यस्तेन लभ्याम् ॥ ३४ ॥ प्रतिनन्दितस्तं प्रतिनन्दितवान्। श्रीकृष्णेन वा स प्रतिनन्दितः ॥ ३५-३९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तां सत्याम्। वीरान् शूरान् गंधयन्ति हिंसन्तीति वीरगन्धाः शूरोत्तमास्तैरपि न सह्यन्त इति। तथा वीरं राहुं गन्धयत्यल्पीकरोतीति वीरगन्धो विष्णुस्तदसहान् असुरावतारत्वात्तेषामिति। तन्त्रान्तरे विष्णुनैव सर्वांगत्यागपूर्वं शिरोरूपत्वेन शेषणाद्राहुरल्पीकृत इत्युक्तमधस्तात्। "वीरो राहौ हरौ शक्रे भटे पुत्रे रसान्तरे। भ्रातरि शंकरगणे वीरा पतिसुतान्विता।" इति यादवः। 'गन्ध-हिंसालेशयोः' धातुः "घ्राणग्राह्यगुणे गन्धो लेशे ग्राहे च मारणे" इति च। स च तां श्रीभगवते दातुमिच्छन्नपि दुष्टजरासंधादिभ्यो विभ्यदुपायमकरोदित्यभिप्रेत्याह—नेति। गोवृषानिति गोबलीवर्दवदधिकार्थम्। यद्वा—वृषश्रेष्ठान्। यद्वा-गोषु धेनुषु स्थितानदान्तान् वृषाञ्जित्वा बन्धनादिना वशान्कृत्वा। खलान् हिंस्रानसुरस्वभावत्वात्। तच्च द्वितीयस्कंधे 'ये च प्रलम्ब-' इत्यादौ सप्तोक्षणामपि गणनान्मुक्तिकथनाच्च। मुक्तिश्च भगवत्स्पर्शप्रभावेण देहान्ते ज्ञेया ॥ ३३ ॥ लभ्यां लब्धुं योग्याम्। भगवान्सर्वशक्तियुतः। सात्वतां भक्तानां पतिः, पलनशीलः। अतस्तत्रैव महता सैन्येनावृतः। सैन्येनेति राजांतरभयदानार्थमेव ॥ ३४ ॥ प्रतिनन्दितो जातश्लाघः। तं कृष्णम्। गुरुणाधिकतरेणार्हणेन पूजनसामग्र्याऽपूजयत्प्रतिनन्दितवान्। वृद्धत्वात्तं श्रीकृष्णोऽप्यादृतवानित्याह—श्रीकृष्णेनेति। गुरुणा सर्वश्रेष्ठेन। अर्हणेन सर्वपूज्येनापि स नग्नजित् प्रतिनन्दितो वाचाऽपूजीत्यर्थः। "गुरुस्तु गीष्पतौ श्रेष्ठे गुरुः पितरि दुर्भरे" इत्युज्ज्वलः। स च तस्मा एव कन्यां दातुं कृततादृशव्याजः। अत एव प्रीतः प्रथमस्तावल्लौकिकरीत्याऽऽसनादिभिः पूजयन् पुनरर्चनरीत्या तु अर्हणेनोद्वाहोचिततत्तद्द्रव्येणाप्यपूजयदिति ध्येयम् ॥ ३५ ॥ अभिमतमभीप्सितम्। वरं वरणयोग्यं जामातरम् "वरो ना रूपजामात्रोर्देवादेरीप्सितावृतौ" इति यादवः। चकमे इयेष। आशिषः अभिलाषान् "आशीराश्यहिदंष्ट्रायां शुभवाक्याभिलाषयोः" इति यादवः। यदि मे मया व्रतः व्रतसमूहोऽधृत। धरतेः कर्मणि लुङ्। चिणभावस्त्वार्षः। व्रतानां समूह इत्यस्मिन्नर्थेऽच्प्रत्ययः। यद्वा-मे आशिषः धृतं व्रतं मद्विवाहनियमो येन स कृष्णः सत्याः करोत्वित्यर्थः। एवं सदसि वृत्तमुक्तं, ततश्चात्मीयैः सहाभ्यंतरकक्षामानीते भगवति वृत्तमाह—वरमिति। विलोक्य चन्द्रशालागवाक्षत इति ज्ञेयम्। अभिमतमात्मनश्चिरादभीष्टम्, सर्वेषाञ्च संमतमित्यर्थः। यतः रमायाः

---

१. गन्धान्महाघनान्। २. कौशलपुरीं-प्रा. पा.। ३. प्रत्यनन्दत-विज.। ४. त्रि-विज.। ५. धृतव्रतं-च. पु. टि. ६. राशिषां पति-विज.; अनलः श्रीधर. टि.। ७. सत्या यदहं धृतव्रता-वीर.; सत्यो यदि मे धृतव्रतः-विज.।

पूर्णलक्ष्मीरूपाया रुक्मिण्या अपि पतिं, तया पतित्वेन नित्यमाश्रितमिति सर्वोत्तमगुणमित्यर्थः। अतः सापत्नदुःखमपि न वितर्कितमिति भावः। सम्यक् वरौचित्येनांतःपुरपर्यंतमागतं विलोक्य साक्षाद्दृष्ट्वा चकमे, भावविशेषेण क्षुभ्यन्ती संकल्पयामासेत्यर्थः। नरेन्द्रस्य कन्येति कौशल्येन क्षोभाऽसहत्वं दर्शितम्। संकल्पमेवाह—भूयादिति। अनलश्चिरमिष्टदेवतात्वेनाभ्यर्चितोऽग्निर्मे आशिषो वांछितानि सत्याः सफलाः करोतु। अत्रोत्कण्ठास्वाभाव्येन सम्यक्त्वेऽपि संदिहानेव सास्रगद्गदमाह—यदीति। यदि तत्पूजादिनियमो यत्नेन रक्षित इति। 'आशिषोऽमलाः' इति पाठेऽयं पतिरेव परमेश्वरत्वेन सत्याः करोत्वित्यन्वयः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स च तां श्रीभगवते दातुमिच्छन्नपि भ्रातृव्यबृहद्बलाज्जरासन्धादिभ्यश्च बिभ्यदुपायमकरोदित्यभिप्रेत्याह—नेति। गोवृषानिति गोबलीवर्दवदनधिकार्थं, यद्वा; वृषश्रेष्ठान् यद्वा गोषु धेनुषु स्थितान् अदान्तान् वृषान् अजित्वा बन्धनादिना वशान् कृत्वा खलान् हिंस्रान् असुरस्वभावत्वात् तच्च द्वितीयस्कन्धे ये च प्रलम्बेत्यादौ सप्तोक्षस्यापि गणनात् मुक्तिकथनाच्च मुक्तिश्च भगवत्स्पर्शप्रभावेण देहान्ते ज्ञेया ॥ ३३ ॥ भगवान् सर्वशक्तियुक्तः किञ्च सात्वतां भक्तानां पतिः पालनशीलः (सर्वराजकुलागमनविचारेण) अतस्तत्रैव महता सैन्येनावृतः सन् जगाम ॥ ३४ ॥ स तस्मा एव कन्यां दातुं कृततादृशव्याजः अत एव प्रीतः प्रथमतस्तावल्लौकिकरीत्या आसनादिभिः पूजयन् पुनरर्चनशास्त्ररीत्या तु अर्हणेन तत्तत्पूजाद्रव्येणापि पूजयन्निति य ज्यम् आदिग्रहणात् पादप्रक्षालनव्यजनादिकं गृह्यते ॥ ३४ ॥ एवं सदसि वृत्तमुक्तं ततश्चात्मीयैः सहाभ्यन्तरकक्षामानीते भगवति वृत्तमाह—वरमिति। विलोक्य चन्द्रशालागवाक्षत इति ज्ञेयम्। अभिमतम् आत्मनश्चिरादभीष्टं सर्वेषां च सम्मतमित्यर्थः। यतः रमायाः पूर्णलक्ष्मीरूपाया रुक्मिण्या अपि पतिं तया पतित्वेन नित्यमाश्रितमिति सर्वोत्तमगुणमित्यर्थः। अतः सापत्न्यदुःखमपि न वितर्कितमिति भावः। सम्यक् वरौचित्येनान्तःपुरपर्य्यन्तमागतं विलोक्य साक्षाद्दृष्ट्वा चकमे भावविशेषेण क्षुभ्यन्ती सङ्कल्पयामासेत्यर्थः। नरेन्द्रस्य कन्येति कौमल्येन क्षोभासहत्वं दर्शितम्, सङ्कल्पमेवाह—भूयादिति। अनलः चिरमिष्टदेवतात्वेनार्चितोऽग्निः मे आशिषः सत्याः सफलाः करोतु तत्रोत्कण्ठास्वाभाव्येन तदर्चनसम्यक्त्वेपि सन्दिहानेव सास्रगद्गदमाह यदीति यदि तत्पूजादिनियमो यत्नेन रक्षित इति आशिषोऽमला इति पाठे अयं पतिरेव सत्याः करोत्वित्यन्वयः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स च तां श्रीभगवते दातुमिच्छन्नपि दुष्टजरासन्धादिभ्यो विभ्यदुपायमकरोदिति सूचयन्नाह—नेति। गोवृषान् गोषु श्रेष्ठान्; यद्वा, गोषु स्थितान् अवृद्धानभिनवान् वृषान्, अजित्वा बन्धनादिना वशे अकृत्वा, खलान् हिंस्रान् ॥ ३३ ॥ भगवान् सर्व्वशक्तियुक्तः, किञ्च, सात्वतां भक्तानां पतिः पालकः, अतस्तत्रैव विवाहेच्छया महता सैन्येनावृतः सन् जगाम ॥ ३४ ॥ सोऽतिधार्म्मिकत्वादिना प्रसिद्धः, किंवा तस्मै कन्यां दित्सुः, आदि-शब्दादर्घ्यपाद्यादीनि, गुरुणा श्रेष्ठेन अर्हणेन अन्येनापि भूषणादिपूजाद्रव्येण, अर्घ्यादि-शब्दान्तर्गतत्वसम्भवेऽपि पृथगुक्तिर्गुरुत्वस्य किंवा उपचारतः पृथक्त्वस्यापेक्षया ॥ ३५ ॥ अभिमतमात्मनश्चिरादभीष्टम्, यतो रमापतिं लक्ष्मीनाथम्; यद्वा, श्रीरुक्मिणीस्वामिनमपि अभिमतं रूपगुणादिना आत्मनः सर्व्वेषां वा अभितः सम्मतम्, तत्र च सम्यक् स्वयमेव बन्धुभिः सहागतं विलोक्य साक्षाद्दृष्ट्वा चकमे कामयते स्म, यतो नरेन्द्रस्य कन्या सर्व्वरूपगुणाद्यलंकृतेत्यर्थः। कथं चकमे ? तदाह—भूयादिति। अनलश्चिरमिष्टदेवतात्वेनार्च्चितोऽग्निर्मे आशिषो वाञ्छाः सत्याः सफलाः करोतु, बहुत्वं गौरवात्, तदर्थं निजसत्कर्म्माण्यर्पयति—यदीति। मे मया व्रत एकोऽप्युपवासादिधृतो नियमेन साधितः; यद्वा, तत्पूजादिनियमो यत्नेन रक्षितः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

नेति। खलान् दुर्वृत्तान् वीराणां गन्धमपि न सहन्त इति तथा तान् सोढुमशक्यान् गोवृषान् वृषभान् यो जयति तेन लभ्यां तां नाग्नजितीं तान् गोवृषानजित्वा गा अनुधावमानानिति गोशब्दाभिप्रायः वोढुमुद्वोढुं न शेकुः न प्रबभूवुः ॥ ३३ ॥ तामिति। एवं स्थिते भगवान् तां वृषजितैव लभ्यां श्रुत्वा कौसल्यपुरमयोध्यां जगाम ॥ ३४ ॥ स इति। स नग्नजित् प्रत्युत्थायासनादिभिर्महता अर्हणेन पूजासाधनेन पूजयन्ननुमोदितश्च भगवन्तमाह ॥ ३५ ॥ उक्तिं विवक्षुस्तावत् नाग्नजित्युत्साहमनुवर्णयति—वरमिति। नरेन्द्रकन्या चकमे अकामयत किमित्ययमेव मे मम पतिर्भूयात्, कथम् ? मदिच्छामात्रेण भूयादिति स्वयमेवाशङ्क्य कामयते मे ममाशिषः कामाः अमला निर्विघ्नाः सत्याः सतीश्च यथार्थाश्च करोतु भगवानिति शेषः। तत्र हेतुमुद्भावयति, यद्यहं धृतं व्रतं यया सा कृतपुण्या भवेयम् इत्यर्थः ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वीरान् शूरान् गन्धयन्ति, हिंसयन्तीति वीरगन्धाः तान् "गन्धो लेशे च हिंसायां घ्राणग्राहे प्रकीर्तितः" इति। वीरस्य राहोर्गन्ध इव गन्धो येषां तथा तान् "वीरो राहौ हरौ शक्रे इति वा महान्तो घना मेघा यथा नीलास्ते तथा तान् यद्वा महा-

कठिनान् महामुद्गरानिव स्थितान्वा "घनाः खलीनसम्पातमेघकाठिन्यमुद्गराः" इति ॥ ३३ ॥ वृषजिल्लभ्यां लब्धुं योग्यां सैन्येन सेनासमूहेन ॥ ३४ ॥ गुरुणा बहुमानेन महित्वेन ॥ ३५ ॥ **अभिमतमभीष्टं वरं वरणयोग्यरूपं** "वरो ना रूपजामात्रोर्देवादेरीप्सितवृतौ" इति आशिषां भार्याभिलाषाणां पतिः साधकः "आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयोः" यदि मे मया व्रतः व्रतसमूहो धृतः अनुपयुक्तत्वेन निधिवत् भवत्कृतस्तर्हि स सत्यः सच्चिदानन्दात्मा श्रीकृष्णः करोतु मम पाणिग्रहणं करोत्विति शेषः । व्रतानां समूह इत्यस्मिन्नर्थे अच् प्रत्ययः यदि सत्यो धृतो व्रतोऽस्ति तर्हि स व्रतः स्वफलत्वेन कृष्णं नः पतिं करोत्विति वा ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

खलान् हिंस्रान् असुरस्वभावत्वात् तच्च द्वितीयस्कन्धे ये च प्रलम्बखरदुर्दरेत्यादि सप्तोक्षाया गावो गणनात् मुक्तिकथनाच्च । मुक्तिश्च श्रीभगवत्स्पर्शस्वभावेन देहान्ते ज्ञेया ॥ ३३-४३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

वोढुं विव्योढुम् ॥ ३३-३४ ॥ कृष्णं पूजयन् प्रतिनन्दितः कृष्णेनादृतोऽभूत् ॥३५॥ विलोक्य चन्द्रशालागवाक्षतः ॥३६॥

गूढार्थदीपिनी

वृषान् जयति यस्तेन लभ्याम् ॥ ३४ ॥ प्रीतः सन् अर्हणेन पूजनसामग्र्या तं कृष्णं पूजयन् स राजा तेनाऽपि कृष्णेनापि वृद्धत्वात् प्रतिनन्दितः वाचा सत्कृतः ॥ ३५ ॥ **चकमे इयेष । यदि मे व्रतैर्नियमैः सह धृतो हृदि** चिन्तितस्तर्हि स एव मे आशिषः कामनाः सत्याः पूर्णाः करोतु । काः । अयं मे पतिर्भूयादिति ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वीरस्य गन्धमपि न सहन्ते इति तथा तान् ॥ ३३ ॥ वृषान् जयतीति वृषजित्तेन लभ्याम् ॥ ३४ ॥ श्रीकृष्णेन प्रतिनन्दितः सः नग्नजित् श्रीकृष्णं पूजयन् प्रीतोऽभूत् ॥ ३५ ॥ नरेन्द्रकन्या सत्या रमापतिमभिमतं वरं विलोक्य अयं मे पतिर्भूयादिति चकमे कामयत मे आशिषः कामान् सत्याः सतीः अयं करोतु स्वप्राप्तौ स्वयं प्रापको भवत्विति भावः ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आवन्त्याववन्तिभवौ न्यैषधतां निषिषिधतुः ॥३३॥ राजाधिदेव्या वसुदेवभगिन्यास्तन्नाम्न्या राज्ञां प्रपश्यतां ताननादृत्य प्रसह्य हृतवान् । पञ्चमी मित्रविन्दा चेयम् ॥ ३४ ॥ नाम प्रसिद्धः । सत्या तस्या नीलेत्याह्वया नीलेत्याह्वयो यस्यः सा । विवक्षाभावन्न सन्धिः । नीलेति विश्रुतेति पाठो ललितः ॥ ३५ ॥ वीरगन्धान् वीरगन्धयन्ति हिंसयन्ति ते तथा तान् । गन्धो लेशे च हिंसायां प्राणग्रहे प्रकीर्तित इति यादवः । महाघनानतिदृढान् । नैल्येन मेघसमान्वा ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सा भगवन्निमित्तमेव कथं स्थितेति शङ्कां परिहर्तुं तत्प्राप्तौ व्यसनानीव प्रतिबन्धका वृषाः स्थिता इत्याह न तां शेकुरिति । यतो नृपा राजसाः । अत एव तां वोढुं सप्तगोवृषान् अवध्यान् रुधिरसम्बन्धमपि कारयितुमयुक्तान् स्वतः अजित्वा तां वोढुं न शक्ताः । सप्तभिर्मिलितैर्जये सप्तानां सा भवतीति वैदिके पक्षे स निषिद्ध इति नग्नजिता न क्रियते । 'तस्मात् नैका द्वौ पती विन्दत' इति श्रुतेः । वार्क्षीद्रौपदीप्रभृतिषु 'ते दश प्राणाः, एते चेन्द्राः, पञ्चमुखो वा महादेव' इति कालवशात्पुष्टिवशाद्वा प्रलयात्पूर्वमेवं भवतीति न मर्यादायामेवं कर्तुं युक्तम् । तस्माद्भक्तिर्भगवतैव प्राप्तव्या, ज्ञानेन च भगवत्त्वमिति पूर्णबोधा एव भगवद्भक्ता भवन्ति । तान् वृषान् अजेयत्वार्थं वर्णयति **तीक्ष्णशृङ्गा**निति । शरीरेण दुष्टता निरूपिता । अजेयता च । **सुदुर्मर्षा**निति । दुष्टो मर्षः क्रोधो येषामिति स्वभावदोषो निरूपितः । अन्तःकरणदोषो वा । इन्द्रियदोषानाह । **वीरस्य गन्धमपि न सहन्त** इति । खलानिति सहजो जीवदोषः । असुरास्ते जीवा इति । अतो दोषचतुष्टयादजेयाः ॥ ३३ ॥ अतः सर्वेषु निवृत्तेषु भगवान् प्रवृत्त इत्याह तां श्रुत्वेति । यो हि व्यसनापनुत्, स एव विषय इति लोके फलिष्यति ।

क्षुत्पिपासे तथा रोगाः कर्माणि द्विविधानि च । लोकोपद्रवरूपाणि चत्वार्यावश्यकानि हि ॥ १ ॥
द्यूतं पानं स्त्रियश्चेति त्रीण्यनावश्यकानि हि । मृगयादिर्न सर्वेषां तस्मान्न व्यसनानि हि ॥ २ ॥
विशेषेणासनं यत्र व्यसनं तत्प्रकीर्तितम् । ज्ञातेऽपि दोषे यस्यास्ति न निवृत्तिस्तदेव तत् ॥ ३ ॥

भगवानेव तानि दूरीकर्तुं शक्त इति वृषजिन्मात्रलभ्यां तां श्रुत्वा । समर्थो भगवान् । **सात्त्वतां भक्तानां पतिः** । अन्यथा भक्तोद्धारो न भवतीति स्वयं जगाम । कौसल्याः कौसलदेशराजानस्तेषां पुरमयोध्याम् । **महता सैन्येन वृत** इति । महत्त्वा-

काङ्क्षिणो राज्ञः संतोषार्थम् । 'देवानां पूरयोध्या' इत्यादिश्रुतौ नगर्या अपि दैत्यनिवारकत्वमुक्तम् ॥ ३३ ॥ ततस्तस्याभिनन्दनमाह **स कौसलपतिः**रिति । महांश्चेन्नानुमन्येत, तदा बलादनभिप्रेतायां सम्बन्धिनी समीचीना न भवतीति तस्य पुरस्कार उच्यते । लौकिकन्यायेन स करिष्यतीति शङ्कां वारयितुमाह **प्रीत** इति । प्रत्युत्थानमासनं च आदिभूते येषाम् स्वयमुपविष्टः । **गुरुणा अर्हणेने**ति । अमूल्यद्रव्यैः पूजयामास । एवं कर्तुः कन्यादानमभिप्रेतं भवतीति । ततः **प्रत्यनन्दत** साधु समागतामिति प्रतिनन्दनं च कृतवान् । कदाचिद्भगवान् कृपां कुर्यात्, तदा कन्या कृतार्था भविष्यतीति । अनेन राजा सन्दिग्ध इत्युक्तम् । वृषजयाभावेऽपि ॥ ३५ ॥ अन्ये तु निःसन्दिग्धा एव, प्रतिज्ञापूरणाभावेऽपि तन्मात्रादयः कन्या चेत्याह **वरं विलोक्ये**ति । कन्यया यो वरणीयः, सर्वैरपि, सोऽयं स्वयमागतो वरयितुम्, तत्रापि स्वस्याभिमतम् । **नरेन्द्रकन्या** स्वयमपि विचक्षणा । अप्रहतश्च भगवद्वरणमार्ग इति निरूपयितुं विशेषणमाह **रमापति**मिति । दृष्ट्वा दर्शनफलं प्रार्थयति **भूयादयं मे पति**रिति । ननु धर्मादीनां भगवति सामर्थ्याभावात् कथं भगवान् पतिर्भविष्यतीत्याशङ्क्याह **आशिषोऽमलाः सत्याः करोत्वि**ति । अयं भगवानेव एतत्सर्वं सम्पादयतु । स्वस्मिन् स्वयमेव शक्तः । नन्वयं फलरूपः कथं तत्कृते साधनतामापद्यत इति चेत्, तत्राह **यदि मे धृतो** व्रतैरिति । व्रतैर्भगवन्नियमैः यैर्भगवान् वशे भवति, तादृशैश्चेद्धृतः, तदा अस्मदधीन इति मे निर्दुष्टा आशिषः सत्याः करोतु । अनेन लोकप्रतीत्या गोपिकासु अन्यादृश्योऽप्याशिषः सत्याः करोतीति सूचितम् । अतो मम नास्त्येव सन्देह इति भावः । अनेन सर्वासां भगवानभिप्रेत इति निरूपितम् । अन्यथा व्रतकरण एव विरोधं कुर्युः ॥ ३६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

न तां शेकुरित्यत्र । **ज्ञानेन** चेति । ज्ञानेन भगवत्त्वे सिद्धे तत्र स्थिता भक्तिः प्राप्यते इत्यर्थः । **तां** श्रुत्वेत्यत्र । **कर्माणि द्विविधानि** चेति । निषिद्धानि स्वर्णस्तेयादीनि, काम्यानि श्येनादीनि चेत्यर्थः ।

श्रीसुबोधिनी-सारः

वृषान् जयतीति तथा तेन लभ्यां प्राप्यां तां कन्यां श्रुत्वा सात्त्वतां पतिर्भगवान् महता सैन्येनावृतो युक्तः कौसल्यपुरमयोध्यां जगाम ॥ ३४ ॥ कौसलस्य देशस्य पतिः स राजा प्रीतः प्रत्युत्थानं सम्मुखमागमनम् आसनं आदिना स्वागतादि तैः गुरुणा महताऽर्हणेन पूज्योपकरणेनापूजयत् कृष्णेन प्रतिनन्दितः श्लाघितः ॥ ३५ ॥ अभिमतं स्वेप्सितं समागतं रमापति लक्ष्मीभर्तारं वरं विलोक्य दृष्ट्वा सभां गतं प्राप्तं वानरेन्द्रस्य राज्ञः कन्या चकमे उवास अयं मे मम पतिर्भूयात् यदि मे मया व्रतैः पूर्वं धृतः तदाऽमला आशिषः सत्या अयं श्रीकृष्णः करोतु ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दुर्धर्षान् धर्षयितुं वशीकर्तुमशक्यान् सप्त गोवृषान् गा अनुधावमानान् मत्तान् वृषान् अजित्वा तां सत्यां वोढुमुद्वोढुं नृपा न शेकुरित्यन्वयः । दुर्धर्षत्वे हेतूनाह—तीक्ष्णशृङ्गानिति । वीराणां गन्धमपि न सहन्त इति तान् । तत्र हेतुमाह—खलानिति, दुर्वृत्तानित्यर्थः ॥ ३३ ॥ एवं स्थिते वृषान् जयतीति वृषजित्, तेन लभ्यां तां श्रुत्वा सात्वतां यादवानां पतिः श्रीकृष्णो महता सैन्येन वृतः सन् कौशल्या कोशलदेशराजानस्तेषां पुरमयोध्यां जगामेत्यन्वयः । ननु 'वृषाणां दुर्जयत्वम्, तज्जयान्विना तस्या दुर्लभत्वं च श्रुत्वाऽपि कथं लल्लाभार्थं गत' इत्याशङ्क्याह—भगवत्त्वेन सामर्थ्यस्य विद्यमानत्वात् तान् जित्वा तद्ग्रहणनिश्चयेन गमनं युक्तमेवेत्याशयः ॥ ३४ ॥ तदा स कोशलपतिर्नग्नजित् तमागतं दृष्ट्वा प्रीतः सन् प्रत्युत्थाय अग्रतो गत्वा समानीय आसनादिभिर्गुरुणा महता अर्हणेन पूजासाधनेन तं पूजयन् प्रतिनन्दितः स्वागतमिति वाचापि प्रतिनन्दनं कृतवान्, यद्वा भगवता प्रतिनन्दितः वाचा सत्कृतो जात इत्यर्थः ॥ ३५ ॥ तदा च नरेन्द्रस्य नग्नजितः कन्या सत्या तं समागतं स्वाभिमतं वरं विलोक्य चकमे अकामयत । अभिमतवरत्वे हेतुमाह—रमापतिमिति । तत्कामनामेवाह—भूयादिति । यदि मे मया व्रतैरेतत्सन्तोषहेतुभिर्नियमैः सहायं भगवान् हृदि धृतः सर्वदा चिन्तितस्तदाऽयं मे पतिर्भूयात् । पतिश्च सन् अमला उत्कृष्टाः मम आशिषो मनोरथान् सत्याः सतीर्यथार्थाः करोतु ॥ ३६ ॥

अन्वितार्थप्रकाशिका

नेति । तीक्ष्णशृङ्गान् वीराणां गन्धमपि न सहन्त इति तान् खलान् दुर्वृत्तान् दुर्धर्षान् वशीकर्त्तुमशक्यान् सप्त गोवृषान् वृषश्रेष्ठान् वृषशब्द उत्तरपदे श्रेष्ठवचनः अजित्वा तां सत्यां वोढुं नृपा न शेकुः ॥ ३३ ॥ तामिति । वृषान् जयतीति वृषजित् तेन लभ्यां तां श्रुत्वा भगवान् सात्वतां पतिः श्रीकृष्णो महता सैन्यैन वृतः सन् कौसल्याः कोसलदेशराजानस्तेषां पुरमयोध्यां जगाम ॥ ३४ ॥ स इति । तदा स कोसलपतिः नग्नजित् तमागतं दृष्ट्वा प्रीतः सन् प्रत्युत्थाय अग्रतो गत्वा समानीय आसनादिभिर्गुरुणा महता अर्हणेन पूजासाधनेन तं पूजयन् प्रतिनन्दितः वाचा सत्कृतो जात इत्यर्थः ॥ ३५ ॥ वरमिति । तदा च नरेन्द्रस्य

नग्नजितः कन्या सत्या तं समागतं रमापतिं स्वाभिमतं वरं चन्द्रशालागवाक्षतो विलोक्य चकमे अकामयत। यदि मे मया व्रतैरेतत्सन्तोषहेतुभिर्नियमैः सहायं भगवान् हृदि धृतः सर्वदा चिन्तितस्तदाऽयं मे पतिर्भूयात्। पतिश्च सन् अमला उत्कृष्टाः ममाशिषो मनोरथान् सत्याः यथार्थाः करोतु ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यो वृषजित्तेन लभ्यां ॥ ३३ ॥ हरिणा प्रतिनंदितः प्रशंसितः कृष्णमपूजयत् ॥ ३४ ॥ व्रतैर्मे मया हरिर्धृतो हृदि ध्यातः मे धृतो वृत इति पाठे तु। मे मया धृतो ध्यानेन हृदि ध्यातः वरैर्वृत इत्यर्थः ॥ ३५ ॥ स्वकृतसेतोः परीप्सया रक्षया हेतुना याः लीलातनूः काले दधत् सः केनोपायेन मम तुष्येत् ॥ ३६–३७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न तामिति ॥ खलान् दुर्वृत्तान्, तीक्ष्णे शृङ्गे येषां तान्, सुदुर्द्धर्षान् सोढुमशक्यान्, वीराणां गन्धमपि न सहन्ते इति तथा तान्, सप्त सप्तसंख्याकान्, गोवृषान् वृषभान्, गामनु धावमानानिति गोशब्दाभिप्रायः। अजित्वा, नृपाः, तां वोढुं, न शेकुः ॥ ३३ ॥ तामिति ॥ सात्त्वतां पतिः भगवान् तां, वृषान् यो जयति तेन लभ्या तां श्रुत्वा, महता सैन्येन, वृतः सन्, कौसल्यपुरमयोध्यां, जगाम ॥ ३४ ॥ स इति ॥ कोसलपतिः, स नग्नजिन्नृपः, प्रीतः भगवन्तं दृष्ट्वा प्रसन्नतां प्राप्तः, प्रतिनन्दितः भगवता प्रशंसितः संश्च, प्रत्युत्थानासनादिभिः, महता अर्हणेनापि, अपूजयत् कृष्णं पूजयामास ॥ ३५ ॥ अथ तावन्नाग्नजित्युत्साहमनुवर्णयति ॥ वरमिति ॥ नरेन्द्रकन्या नाग्नजिती, समागतं स्वत एव समायातं, अभिमतं रमापतिं, वरं विलोक्य, चकमे अकामयत। किमित्यत आह। अयं श्रीकृष्णः, मे मम पतिः, भूयात्। कथं मदिच्छामात्रेण भूयादिति स्वयमेवाशङ्क्य कामयते। यद्यदि, अहं धृतं व्रतं यया सा, यद्यहं कृतपुण्या भवेयमित्यर्थः। तर्हि, भगवान् मे मम, आशिषः, कामान्, अमलाः निर्विघ्नाः, सत्याः सतीश्च, करोतु यथार्थतया संपादयत्वित्यर्थः ॥ ३६ ॥

कृष्णप्रिया

महाराज नग्नजित जी की प्रतिज्ञा थी जो सात दुर्दान्त बैलों को जीत कर बांध ले उसी राजा को कन्या समर्पित करें। लेकिन उन दुर्दान्त बैलों को बेधने के लिये या बांधने के लिये सफल न हुए। बैल के शींग बड़े एवं तीक्ष्ण थे और किसी वीर पुरुष की गंध भी नहीं सह सकते थे इसलिये नाग्नजिती का व्याह नहीं हुआ ॥ ३३ ॥ यदुकुल शिरोमणि श्रीद्वारिकाधीश भगवान् ने जब यह समाचार सुना कि जो वीर पुरुष इन बैलों को जोत लेगा उस वीर पुरुष को सत्या प्राप्त होगी तब पूर्णपुरुषोत्तम चतुरङ्गिणी विपुल सेना लेकर कोशलपुरी पधारे ॥ ३४ ॥ श्रीकोसलाधीश नग्नजित महाराज भगवान श्रीकृष्ण के सत्कार के लिये पहुँच गये। राजा ने अत्यंत प्रसन्नता से अर्घ प्रदान, दान, मान सत्कार किया। यदुनाथ भगवान ने भी राजा नग्नजित जी का आदर से अभिनन्दन किया ॥ ३५ ॥ नग्नजित महाराज की कुमारी श्री सत्या ने देखा कि मैं चिरकाल से जिनकी अभिलाषा कर रही हूँ वही रमानाथ द्वारिकाधीश श्रीकृष्ण भगवान् कृपा करके स्वयं यहाँ पधारे हैं; तब सत्याजी ने मन ही मन मनोरथ किया कि यदि मैंने तप व्रत जप नियम आदि का अनुष्ठान करके श्रीकृष्ण प्रभु का चिन्तन किया है तो ये ही रमानाथ मेरे नाथ हों और मेरी सर्व विशुद्ध कामनाओं को पूर्ण करें ॥ ३६ ॥

[1]यत्पादपङ्कजरजः शिरसा बिभर्ति श्रीरब्जजः[2] सगिरिशः सहलोकपालैः।
लीलातनूः[3] स्वकृतसेतुपरीप्सयासौ[4] काले दधत् स भगवान् मम[5] केन तुष्येत् ॥ ३७ ॥
अर्चितं पुनरित्याह नारायण जगत्पते। आत्मानन्देन[6] पूर्णस्य करवाणि किमल्पकः ॥ ३८ ॥

श्रीशुक उवाच

तमाह भगवान् [7]हृष्टः कृतासनपरिग्रहः। मेघगम्भीरया वाचा सस्मितं कुरुनन्दन ॥ ३९ ॥[8]

श्रीभगवानुवाच

नरेन्द्र याच्ञा कविभिर्विगर्हिता राजन्यबन्धोर्निजधर्मवर्तिनः।
तथापि याचे तव सौहृदेच्छया कन्यां त्वदीयां न हि शुल्कदा वयम् ॥ ४० ॥

---

१. अयं श्लोकः ३८ श्लोकस्य पश्चात्–विज.। २. श्च गि–विज.। ३. तनूः–विज.। ४. प्सया यः–वीर. विज.। ५. स्वकृतेन–विज.। ६. आत्मना देव–विज.। ७. अथ त्रिषष्ठीतमी–विज.। ८. नीता यथा–विज.।

कर्दमक्षमा

अन्वयः—यत्पादपङ्कजरजः, श्रीः, सहलोकपालैः, सगिरिशः, अब्जजः, शिरसा, बिभर्ति, असौ, स्वकृतसेतुपरीप्सया, काले, लीलातनूः, दधत्, सः, भगवान्, मम, केन, तुष्येत् ॥ ३७ ॥ राजन् ! अर्चितम्, पुनः, इति, आह, हे नारायणः ! हे जगत्पते ! आत्मानन्देन, पूर्णस्य, अल्पकः, किम्, करवाणि ? ॥ ३८ ॥ श्रीशुक उवाच—कुरुनन्दन ! कृतासनपरिग्रहः, भगवान्, हृष्टः, सस्मितम्, मेघगम्भीरया, वाचा, तम्, आह ॥ ३९ ॥ श्री भगवान् उवाच—नरेन्द्र, निजधर्मवर्तिनः, राजन्यबन्धोः, याञ्चा, कविभिः, विगर्हिता, तथा, अपि, तव, सौहृदेच्छया, त्वदीयाम्, कन्याम्, याचे, वयम्, शुल्कदाः, न, हि ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे नरेन्द्र । राजन्यबंधोः क्षत्रियस्य । शुल्कदा द्रव्यादिप्रदाः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वकृतसेतुपरीप्सया स्वकल्पितवर्णाश्रमधर्मलक्षणसेतुपालनेच्छया । मम केन स्वीयेन कर्मणा तुष्यत्वित्यर्थः । पुनस्तस्य माहात्म्यविशेषेण तदेवोपपादयति—यदिति । श्र्यादीनां यथापूर्वं श्रेष्ठ्यम्, तथा निर्देशश्च कनिष्ठकनिष्ठक्रमेण निजातितुच्छतां बोधयितुम् । तत्राब्जजाद्गिरिशस्य कनिष्ठत्वं, पुत्रत्वेन शिष्यत्वव्यवहारात् । अब्जजस्य साक्षादेव श्रीकृष्णाष्टादशाक्षरोपासकत्वाच्च । योदधत् अदधादिति सर्वावतारित्वं सूचितम् । 'परीप्सयेशः' इति क्वचित्पाठः । परीप्सया परिपालनेच्छयेत्यर्थः । यः स्वयमधुना वर्तते स इति विश्वनाथः । 'कृष्णस्तु भगवान्स्वयम्' इत्यादौ प्रसिद्धो भगवान् केन हेतुना साधनेन वा ममाधमस्य भूयात्, तन्न संभावयामीत्यर्थः ॥ ३७ ॥ अल्पकः अतितुच्छः । अर्चितं पुनरिति—अर्चितं तु संतमित्यर्थः । नग्नजिदिति शेषः । नारायण हे सर्वजीवाश्रय । अतो जगत्पते सर्वद्रव्यस्वामिन् । विशेषतः स्वानंदपूर्णस्य तवेत्याद्यप्रयोगस्तथाग्रे प्रत्यक्षत्वेऽपि परोक्षवादः परमगौरवात् । अहं तव किं करवाणि, तत्राप्यल्पकः अल्पतोऽप्यल्पः ॥ ३८ ॥ तं नग्नजितम् । तमाहेत्यर्धेन तस्य भाग्यस्य सूचनम् । तत्रापि मेघेत्यर्द्धेन तन्माधुर्यकृपाभ्यां हृतमनस्त्वस्य । कृतः आसनस्य चिरमर्पितस्यापि परिग्रहः स्वीकारो येन स इति निजाभिलषितस्य परस्वीकारेण मुदा सम्यगुपवेशात् । सस्मितमिति स्वभावादेव, तत्रापि विशेषतः स्वाभिलषितलाभादेव किंचिल्लज्जातश्च । अत एव कौतुकात्संबोधयति–हे कुरुनंदनेति । श्रीकृष्णयशःश्रवणेन स्ववंशमूलकुरुरपि त्वया नंदितोस्ति । "नंदंति स्वकुलोद्भूतं दृष्ट्वा विष्णुपरायणम् । स्वर्गताः पितरोऽनेन वयं धन्यीकृता इति ॥" इति विष्णुधर्मोत्तरोक्तन्यायेनेति भावः ॥ ३९ ॥ यद्यपि गर्हिता तथापीत्यन्वयः । "शुल्कं घट्टादिदेये स्याद्वरादर्थग्रहेऽस्त्रियाम्" इति मेदिनी । तादृशोऽप्यहं स्वजनप्रेमानंदमयनरलीलामेवानुसरन्नस्मि, तत्रापि त्वद्विधप्रेम्णा क्वचित्तदुचितमर्यादामुल्लंघयन्नस्मीति सिद्धांतव्यंजिकया क्षत्रियोचितप्रार्थनाचातुर्याऽऽह—नरेन्द्रेति, श्वशुरोचितामंत्रणं संबंधस्य दृढीभावाय । वस्तुतस्तु याचकेनादावेव प्रभुः स्तोतव्यः, पश्चान्निजार्थप्रकाशनं कार्यमिति बोधनायैवेति । यद्वा—त्वं नरेषु इंद्र इवाभिलषितवर्षणादिति भावः । यद्वा—त्वं न केवलं नृपः किन्तु नरेन्द्रोऽसीति । षोडशयोजनमितभूशास्ता नृपः, ततः शतगुणाधिको नरेन्द्र इति विवृतं ब्रह्मवैवर्ते । अर्थाच्छतशो नृपा अपि त्वदाज्ञां धारयन्ति नराणान्तु का कथात्रेति भावः । व्यासाद्यैः क्षत्रियाधमस्य याञ्चा विशेषेण गर्हिता निन्दिता । तत्र निजधर्ममाश्रितस्य क्षत्रियस्य तु सर्वथैव सा निंद्या, मम तु सर्वक्षत्रियश्रेष्ठस्य का तत्र कथेति भावः । "वाल्मीकिव्यासवासिष्ठमुख्या हि कवयो मताः" इत्युक्तेर्व्यासादयः कवयो मुख्यधर्मप्रणेतारस्तदनुगता अन्येपीति ज्ञेयम् । हरणस्यैव क्षत्रियधर्मत्वात् । सौहृदेच्छया त्वया सह सुसम्बंधार्थम् । यद्वा—तव यत्सौहृदं मयि प्रेम तेन या मदिच्छा तया । क्षत्रियधर्ममेव कथयन्बलीवर्दबंधनरूपं तच्छुल्कं विचार्य निगूढनमाह—न हीति । वयं क्षत्रियाः । शुल्कदा द्रव्यदायिन इत्यर्थः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अर्चितं पुनरिति अर्चितं तु सन्तमित्यर्थः । नग्नजिदिति शेषः । नारायण हे सर्वजीवाश्रय ! अतो जगत्पते सर्वद्रव्यस्वामिन् ! विशेषतः स्वानन्दपूर्णस्य तवेत्याद्यप्रयोगस्तथाग्रे प्रत्यक्षत्वेपि परोक्षवादः परमगौरवात् अतोऽहं किं तव करवाणि तत्राप्यल्पकः अल्पतोप्यल्पः ॥ ३७ ॥ पुनस्तस्य माहात्म्यविशेषेण तदेवोपपादयति–यदिति श्र्यादीनां यथा पूर्वं श्रैष्ठ्यं तथा निर्द्देशश्च कनिष्ठकनिष्ठक्रमेण निजातितुच्छतां बोधयितुं तत्राब्जजाद्गिरिशस्य कनिष्ठत्वं पुत्रत्वेन शिष्यत्वव्यवहारात् अब्जजस्य साक्षादेव श्रीकृष्णाष्टादशाक्षरोपासकत्वाच्च योऽदधत् अदधात् इति सर्वावतारित्वं सूचितं परीप्सयेश इति क्वचित्पाठः परीप्सया परिपालनेच्छयेत्यर्थः । स कृष्णस्तु भगवान् स्वयमित्यादौ प्रसिद्धो भगवान् केन हेतुना साधनेन वा ममाधमस्य तुष्येत् तन्न सम्भावयामीत्यर्थः ॥ ३८ ॥ तमाहेत्यर्द्धेन तदीयस्य महाभाग्यस्य सूचनं तत्रापि मेघेत्यर्द्धेन तन्माधुर्य्यकृपाभ्यां हृतमनस्त्वस्य

कृत आसनस्य चिरमर्पितस्यापि परिग्रहः स्वीकारो येन स इति निजाभिलषितस्य परमभक्त्या स्वीकारदर्शनेन मुदा सम्यगुपवेशात् सस्मितमिति स्वभावादेव तत्रापि विशेषतः स्वाभिलषितलाभात् किञ्चल्लजातश्च अत एव कौतुकात् सम्बोधयति कुरुनन्दनेति ॥ ३९ ॥ तादृशोप्यहं स्वजनप्रेमानन्दमयनरलीलामेवानुसरन्नस्मि तत्रापि त्वद्विधप्रेम्णा क्वचित्तदुचितमर्य्यादामप्युल्लङ्घयन्नस्मीति सिद्धान्तव्यञ्जिकया क्षत्रियोचितप्रार्थनाचातुर्य्याह—नरेन्द्रेति । एतच्च श्वशुरोचितसम्बोधनं सम्बन्धस्य दृढीभावाय कविभिः श्रीव्यासादिभिः राजन्यबन्धोः क्षत्रियाधमस्यापि विशेषेण गर्हिता तत्र च निजधर्मानुवर्त्तिन इत्यर्थः । बलेन हरणस्यैव तत्र श्लाघ्यत्वात् तव सौहृदेच्छया त्वया सह सुख सम्बन्धार्थं यद्वा तव यत्सौहृदं मयि प्रेम तेन या मदिच्छा तया क्षत्रियधर्ममेव कथयन् बलीवर्दबन्धनरूपं तच्छुकं विचार्य्य निगूढनर्ममाह न हीति वयं क्षत्रियाः ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तथापि भक्त्या तुष्यामीति चेत्तत्राह-यदिति । यस्य पादपंकजयोरेकस्य रज एकमेव, अन्जज इति साक्षान्नाभिपद्मजतया पुत्रत्वं सूचितम् । गिरिशेन सहित इति तस्य श्रीब्रह्मतः प्रादुर्भावेन तदृष्ट्यैव तद्धारणेन गौणत्वात् । एवं लोकपालैरिन्द्रादिभिरित्यपि ज्ञेयम् । श्र्यादीनां यथापूर्वं श्रैष्ठ्यम् । अत एवं ज्ञेयम्—अतिसामीप्येन प्राक् श्रीः, ततः पुत्रतया तत्स्नेहेनात्मजः, ततस्तत्स्नेहेन गिरिशः, ततो लोकपालनेन तत्कृपयेन्द्रादयो बिभ्रतीति; यद्वा, सोऽनिर्व्वचनीयप्रभावः सखित्वेन प्रसिद्धो गिरिशश्च, तस्य वेन्द्रादिभिः साहित्यं सुदुर्लभस्य भगवतः प्राप्त्यर्थम्, प्रायस्तैस्तस्यैव पूजनात् । तच्च श्रीहरिवंशे पारिजातहरणप्रसंगे व्यक्तमेव । श्र्यादयो यस्य तथा भक्तिं कुर्व्वन्ति, तद्भक्तौ कोऽहमिति भावः । किञ्च, अवतारेषु तेषां तद्धारणमपि दुर्लभमित्याशयेनाह—लीलेति । विचित्रक्रीड़ामयमूर्त्तीः स्वकृतस्य सेतोस्तत्तन्मर्य्यादायाः परीप्सया प्रतिपालनार्थं यथाकालं योऽदधत् अदधादिति तत्तदर्थं विचित्रक्रीड़ाभिनिविष्टे त्वयि तदानीं तेषां प्रवेशाभावादिति भावः । यद्वा, कृपया कृतेष्ववतारेषु मध्ये कस्यचित् कथञ्चिद्भक्त्या तोषो वा घटताम्, अवतारिणन्तु तव न सम्भवेदेवेत्याह—लीलेति । अर्थः स एव । इत्यस्माकं स्वधर्म्ममर्य्यादातिक्रमेण भक्त्याधिकारोऽपि नास्तीति भावः । तत्रापि भगवानधुना निजाशेषैश्वर्य्यप्रकटनपरः, अतः केन हेतुना साधनेन वा ममाधमस्य तुष्येत्, सम्भावनायां सप्तमी, अपि तु न तुष्येदेवेत्यर्थः ॥ ३७ ॥ विज्ञापनार्थं भक्तिभरेण वा पुनरर्च्चितं सन्तम्, नारायणः हे सर्व्वजीवाश्रय ! अतो जगतः पते पालक ! तच्च कराद्यपेक्षया मादृशां प्रजापालनमिव न स्यात्, अनन्यापेक्षकत्वादित्याह आत्मेति; स्वाभाविकसुखेनैव; यद्वा, नारायण ! हे परमेश्वर ! अतो जगत्पते ! सर्व्वद्रव्यस्वामिन् । विशेषतः स्वानन्दपूर्णस्य तवेत्याद्यप्रयोगः, अग्रे च प्रत्यक्षत्वेऽपि परोक्षवद्वादः परमगौरवात्, अतोऽहं तव किं करवाणि, तत्राप्यल्पकः, अल्पार्थे कः, किञ्चिदपि कर्त्तुमसमर्थोऽतिदीन इत्यर्थः ॥ ३८ ॥ भगवान् भक्तवात्सल्याद्यशेषगुणयुक्तः, यतः कृष्णः, किंवा अतएव भक्तानां चित्ताकर्षकः, अतो वात्सल्येन तस्य चित्तमाकर्ष्टुमाहेति भावः । कृत आसनस्य चिरमर्पितस्यापि परिग्रहः स्वीकारो येन सः, तत्स्तुत्यपेक्षया क्षणं स्थित्वा पश्चादेवोपवेशात्, सस्मितमिति स्वभावादेव, किंवा तस्मिन् प्रसादात्, किंवा तस्य समयं भावञ्च ज्ञात्वापि कन्याप्रार्थनया स्वयमेवान्तः कौतुकोदयामिति दिक् । अतएव कौतुकात् सम्बोधयति—कुरुनन्दनेति ॥ ४९ ॥ कन्याप्रदानेनाधुनाहं तुष्येयमित्याशयेनाह—नरेन्द्रेति । कविभिः श्रीव्यासादिभिः; राजन्यबन्धोः क्षत्रियाधमस्यापि गर्हिता तत्र च निजधर्म्मानुवर्त्तिनो विशेषेण गर्हितेत्यर्थः,—स्वयम्वरादौ तेषां कन्याहरणादेरेव श्लाघ्यत्वात्; तच्च त्वया महाराजेन ज्ञायत एवेत्याह–हे नरेन्द्रेति । तव सौहृदेच्छया त्वया सह सुसम्बन्धार्थम्, यद्वा, तव यत् सौहृदं मयि प्रेम तेन या मदिच्छा तया, तथापि हि निश्चितं वयं शुल्कदा न भवामः, कुलपूजार्थं शुल्कं न दास्याम इत्यर्थः,–महाकुलीनेषु यदुषु जातत्वात्, अन्यथा न्यूनत्वप्रसक्तिरिति भावः । अतएव यदुवर्गापेक्षया किंवा तेषु जन्मना आत्मनो बहुमानाद्बहुत्वम् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अथोक्तिमाह—अर्चितमिति । यद्यपि सः कोसलपतिः प्राहेत्यनेनैवास्य राजोक्तित्वलाभस्तथा वरमित्यादिना व्यवहितत्वादत्रार्चितमाहेत्युक्तं पुनःशब्दो वाक्यालङ्कारे हे नारायण ! हे जगत्पते ! स्वानन्देनैव पूर्णस्य तवाल्पकः क्षुद्रोऽहं किं करवाणि न किमपि प्रियं कर्तुं शक्त इत्यर्थः । यद्वा, किङ्करवाणि किङ्करोहमत आज्ञापयेत्यर्थः । आत्मनः स्वाभाविककिङ्करतां द्योतयितुं नारायणेत्यादिसम्बोधनम् आत्मानन्देन पूर्णस्येति विशेषणं चेत्यवगन्तव्यम् ॥ ३७ ॥ अथ परत्वं व्यनक्ति–यत्पादेति । अब्जभवो ब्रह्मा स रुद्रः लोकपालैश्च सहितः श्रीर्लक्ष्मीश्च शिरसा यस्य तव पादपङ्कजरजो बिभर्त्ति एकवचनं प्रत्येकाभिप्रापकं नाहं नारायणः किन्तु यदुष्वन्यतम इत्यत आह—लीलातनूरिति । स्वेव त्वया कृताः ये धर्मसेतवो धर्ममर्यादास्तेषां परित्राणेच्छया काले धर्मज्ञानहानिकाले लीलातनूः लीलाविग्रहान् अनेनाकर्मवश्यत्वमुक्तं दधद्बिभ्राणः अनेन नारायण एव सन् धर्मपरित्राणाय यदुषु त्वमवतीर्ण इति लब्धम् एवम्विधो भगवान् मम केन कैङ्कर्येण तुष्टो भवेत् ॥ ३८ ॥ तमिति । कृत आसनपरिग्रहो येन स कृष्णस्तं कौसल्यं हे कुरुनन्दन ! सस्मितेन सहितं यथा तया प्राह ॥ ३९ ॥ उक्तिमेवाह—नरेन्द्रेति । हे नरेन्द्र ! यद्यपि स्वधर्मनिरतस्य राजन्यबन्धोः क्षत्रियस्य याच्ञा विगर्हिता निन्दिता प्रतिषिद्धेति यावत् तथापि सौहृदेच्छया त्वद्बन्धुत्वेच्छया त्वदीयां कन्यां याचे वयं शुल्कदा इत्यादिप्रदाः न भवामः ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

आत्मना स्वलाभेन ॥ ३७ ॥ स्वकृतसेतुपरीप्सया स्वकल्पितवर्णाश्रमलक्षणसेतुपालनेच्छया मयि स्थितः स्वेनैव कृतेन कर्मणा ॥ ३८–३९ ॥ विदुषो विद्वांसः स्वयम्बरादन्यत्र काले अयाचितारं वरमुत्तममाहुः पुरुषार्थभागिनां प्रयोजनांशभाजां प्रभूणां मध्ये स अर्थार्थी तां वेलां कालं विनाह्वाययत्यात्मानमिति शेषः। आह्वानमिति पाठे सो याचितां स्वयम्बरकालं विनापि स्वहूतिं प्रभूणामाह्वानमर्हतीति शेषः। वेलेति पाठे प्रभूणामाह्वानं विनापि स एव वेलाकालः स्वयम्बराख्य इत्याहुरित्यर्थः ॥४०॥ सामान्यमुक्त्वा विशिनष्टि—नरेन्द्रेति। राजन्यबन्धोः राज्ञां वंशे जातस्य निजधर्मवर्तिनः क्षात्रधर्ममनुवर्तमानस्य शुक्लदा वेतनप्रदाः ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

परीप्सया परिपालनेच्छया तत्तत्काले दधत् प्रपञ्चे प्राकट्यात् पुष्यन् यः स्वयमधुना वर्त्तते सः ॥ ३७–३९ ॥ राजन्यबन्धोरतिनिकृष्टक्षत्रियस्यापि अहं रान्यजश्रेष्ठोऽपि याचे किन्तु वयं न शुल्कदा न द्रव्यादिदायिनः ॥ ४०–४१ ॥

गूढार्थदीपिनी

श्रीः लक्ष्मीः अब्जजो ब्रह्मा लोकपालैः सह यस्य पादरजः बिभर्ति स्वसेतूनां धर्ममर्यादानां परीप्सया परिपालनेच्छया तनूर्मूर्तीर्दधत् स ईश मम केन पुण्येन तुष्यैत् ॥ ३७ ॥ अल्पकोऽतितुच्छः ॥ ३८ ॥ तं नग्नजितम्। कृतः आसनपरिग्रह आसनस्वीकारो येन सः ॥ ३९ ॥ यद्यपि गर्हिता तथापीत्यन्वयः। राजन्यबन्धोः क्षत्रियाधनस्यापि कि पुनरुत्कृष्टस्य ममेत्यर्थः ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वकृतसेतूनां परीप्सया पालनेच्छया लीलातनूः काले तत्पालने दधत् अस्ति स भगवानयं मम केन सुकृतेन तुष्येत् ॥ ३७–३९ ॥ स्वानन्यभक्तायां सत्यायां प्रीत्यतिशयं द्योतयितुमाह—नरेन्द्रेति। राजन्यबन्धोनिकृष्टक्षत्रियस्यापि किं पुनरुत्कृष्टस्य ममेति भावः तर्हि उत्कृष्टो धनं दत्वा कन्यां गृह्णातु तत्राह—न हीति ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वृषाञ्जयतीति वृषजित्तेन लभ्यम् ॥ ३७ ॥ गुरुणा महताऽर्हणेन पूजासाधनेन गुरुणा पुरोधसा सहेति बा ॥ ३८ ॥ त्रिलोक्याऽभिमतं समागतं रमापतिं नरेन्द्रकन्या चकमे। यदि मे मया धृतव्रतः सत्यस्तर्हि स व्रत एव तथा करोतु। यथाऽऽशिषां पतिर्मे पतिर्भूयात् ॥ ३९ ॥ हे देव। आत्मना पूर्णस्याल्पकोऽहं किं करवाणि। अल्पकोऽतिनीचस्त्वयि मयीति दयां कलयति सत्यहमल्पकः किम्। न। पूर्णस्याप्यात्मना देहेन करवाणि नमनं वेति शेषः। अर्चितमिति वाऽन्वेति। आत्मानन्देन पूर्णस्येति पाठ आनन्ददः ॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अग्रे यत्पादपङ्कजेति श्लोकः कन्याया एव प्रार्थनारूप इति केचित्। केचित्तु राज्ञ इत्यग्रे पठन्ति। तत्र प्रसादः कन्याया एव युक्तः। अतोऽत्रैव व्याख्यायते। पूर्वं स्वव्रतविश्वासेन भगवान् करिष्यतीत्युक्त्वा, ईश्वरस्य को वा नियामक इति, तस्य तोषार्थमाकाङ्क्षां प्रकटीकुर्वती प्रसादमेव प्रार्थयति यत्पादेति। भगवत्प्रसादे हि भगवानेव प्राप्स्यते, तथैव च काम्यते। तदतिदुर्लभम्। यत्र तस्य एव सर्वैः कामितमित्याह। यस्य पादपङ्कजरजः शिरसा बिभर्ति श्रीः। **अब्जजो** ब्रह्मा। गिरिशो महादेव.। तत्सहितः लोकपालैश्च सहितः। रजसा हि भगवदीयं शरीरं भवतीति पूर्वमुक्तम्। तदा भगवान् निःसन्दिग्धं प्राप्यते। स्वतन्त्रा भक्तिर्वा भवति। तत्रापि शिरसि बिभ्रति। एतच्छरीरवियोगे प्रथमं तत एव देहारम्भकाः परिष्वङ्गं कुर्वन्तीति। लक्ष्म्या अपि भगवदवतारेषु अवतारोऽपेक्षित इति, सर्वेष्वेव देहेषु यथा भगवत्सम्बन्धो भवति, तदर्थं मृग्यमेव। ब्रह्मादीनामपि स्वाधिकारसमाप्त्यनन्तरं यथा तथा भवति तदर्थं धारणं पुनरधिकारनिवृत्त्यर्थम्। नन्वितः पूर्वास्ते कथं बिभ्रतीत्याशङ्क्याह लीलातनूरिति। यो भगवान् स्वकृतानां धर्ममर्यादानां **परीप्सया** रक्षितुमिच्छया लीलातनूर्दधत् भवति। तेन चरणरजःसम्बन्धप्रार्थना च युक्तेति भावः। एवं सर्वप्रार्थ्योऽयमेवेत्याह असाविति। स पुरः स्फुरतीति साधनविलम्बः सोढुमशक्य इति, प्रसाद एव तत्कार्यं सिध्यतीति, केन वा उपायेन तुष्येदिति जिज्ञासा। गत्वा चरणयोः पतित्वा प्रार्थनीयः, आहोस्विदन्यो वा कश्चिदुपाय इति। भगवत्त्वादेव दानादिपक्षो निराकृतः ॥ ३७ ॥ अचिन्तितमपि कल्पयिष्यतीति संभावनया मनोरथः। अत एव भगवान् तमुपायं कल्पितवानित्याह **अर्चितमिति**। पुनः पूजयित्वा भगवत्प्रेरणया स्वयमेव राजा किञ्चित्प्रार्थितवान्। इति वक्ष्यमाणप्रकारम्, यथा कन्यामनोरथः सिध्यति। अन्तर्बहिःपूर्णस्य नियामकस्य किं वक्तव्यं किं कर्तव्यमित्यभिप्रायेणाह।

नारायण प्रेरक । **जगत्पते** बहिर्नियामक । अतो यथेच्छसि **तथैव कारयसि** । **तस्मान्न किञ्चिद्वक्तव्यम्** । किञ्च । अपूर्णं हि केनचित् क्रियया पूर्यते, अयं तु पूर्णानन्देनैव पूर्णः, आत्मैव आनन्दः । व्यापकत्वे विरलता स्यादिति बृंहणत्वलक्षणं पूर्णत्वमाह **पूर्णस्ये**ति । तत्राप्यहमल्पकः अत्यल्पः कुत्सितोऽल्पो वा, अनानन्दत्वात् ॥ ३८ ॥ **प्रस्तावनार्थमेव भगवांस्तं** प्रेरितवान्, यथा याचितोऽपि न प्रत्याख्याति, अतोऽवसरं प्राप्य भगवान् भक्तहितार्थी तं याचितवानित्याह तमाहेति । भगवानिति सर्वसमर्थः पूर्णः पूर्णस्य याचनं न विगीतम्, प्रत्युपकारसम्भवात् । **कृष्ण** इति स्त्रीणां हितः । **कृतासनपरिग्रह** इत्यव्यग्रः । तस्यासनं चेत्परिगृहीतम्, अन्यदपि परिग्राह्यमिति । न हि भोजनार्थमुपविष्टस्तृप्तेः पूर्वमुत्तिष्ठति । न वा तदा याचनं दोषाय । तस्य सर्वमेव दुःखं नाशयतीति **मेघगम्भीरये**ति । **सस्मित**मिति किञ्चिन्मोहयन् यावता प्रयच्छति कन्यामेव, नत्वात्मानम् । तथा सति कन्या अग्राह्या स्यात् । सम्बोधनं विश्वासाय ॥ ३९ ॥ भगवान् याचनदोषं परिहरन् याचते **नरेन्द्रेति** । स्त्रीणां हितार्थमवतीर्णस्य येन केनाप्युपायेन तद्धितं साधनीयमिति मम न दोषः । तथापि राजन्यनाट्यं कुर्वतस्तद्विरुद्धं न कर्तव्यमिति तदर्थं सामान्यन्यायमाह । **राजन्यबन्धोर्याञ्चा कविभिर्विगर्हिता** । ब्रह्मवृत्तिरेव सा । **नरेन्द्रे**ति सम्बोधनेन संमतिः प्रदर्शिता । यागविचारे यागादाविन्द्रः प्रार्थ्यत इति नरनाट्ये प्रार्थना न विगीतेति सूचितम् । स्तुतिरप्यनेन कृता । कविभिरिति विचक्षणैः । ते ह्येवं मन्यन्ते । भगवता वीर्यं क्षत्रियेभ्यो दत्तम् । यत्किञ्चिदपेक्षितं तद्वीर्येणैव साधनीयमिति । अनेनादाने बलादपि नेष्यामीति सूचितम् । आपत्सु याचनं न दुष्यतीत्यत आह **निजधर्मवर्तिन** इति । निजधर्मो वीर्यम् । रागे उत्पन्ने राग एव निवारणीयः । अनिवृत्तौ वा स्वधर्मः कर्तव्यः । ततो मरणं प्राप्तिर्वा । मरणेऽपि परतः प्राप्नोति । तस्माद्वीर्यमेव कर्तव्यम् । तथापि याच इत्याह **तथापी**ति । एवं करणे हेतुः **सौहृदेच्छया** । यथा त्वदीया कन्या अभिलषिता, एवं सौहार्दमपि । ततो वीर्ये द्वयं न सिध्यति । ईश्वरत्वात्कापट्येन जयो जयो न भवतीति कदाचिद्दमनेऽपि न मन्येतेति याचनम् । धर्मपरीक्षार्थं च वचनम् । कन्या देयैवेति नातीव भारः । पूर्णो याचमानः प्रतिदास्यतीति शङ्कायामाह **न शुल्कदा** इति । मूल्ये दत्ते दासी भवतीति । तत्रापि वयं वीर्यमेव परं शुल्कं प्रयच्छामः । श्रोत्रियमत्या कदाचिच्छुल्कं याचेरन्, कन्यायाः कुशिका वयमिति नवमे तथा निरूपणात् ॥ ४० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

नरेन्द्रेत्यत्र । **योगविचारे** इति । त्वं नराणामिन्द्रः । इन्द्रप्रार्थना तूचितैवेति भावः । **रागे उत्पन्ने** इति । मुख्यतस्तु राग एव निवारणीयः । न निवर्तते चेत्, वीर्यं प्रकटनीयमित्यर्थः । **परत** इति । परलोके उत्तमस्त्रीप्राप्तिर्भवतीत्यर्थः ।

श्रीसुबोधिनीसारः

तत्प्रसादस्यात्मनि दुर्लभतां संभावयन्नाह राजा तत्पुत्री चेति गुरवः यस्य पादपंकजरजः चरणकमलरेणुं श्रीर्लक्ष्मीः शिरसा धारयति लोकपालैरिन्द्रादिभिः सह सगिरिशः सशिवोऽब्जजः पद्मजो ब्रह्मा बिभर्ति स्वकृतानां सेतूनां धर्ममर्यादानां परीप्सया सर्वतो रक्षणेच्छया काले समये लीलातनूः स्वेच्छामूर्तीर्दधत्स ईशो भगवान् ममोपरि केन कर्मणा तुष्येत्कथं प्रसीदेत् ॥ ३७ ॥ हे नारायण हे जगत्पते ! आत्मानन्देन पूर्णस्य तवाऽल्पकोऽतितुच्छो वराकोऽहं किं करवाणि इत्यर्चितं सुपूजितं श्रीकृष्णं पुनराह ॥ ३८ ॥ शुकोक्तिः । कृत आसनपरिग्रहो यस्य स भगवान् हृष्टः तं नग्नजिद्भूपं सस्मितं यथा भवति तथा मेघगंभीरया वाचाह हे कुरुनन्दन ! ॥ ३९ ॥ स्वधर्मचारिणो राजन्यबन्धोः क्षत्त्रियस्य याच्ञा याचना कविभिर्विगर्हिता निंदिता हे नरेन्द्र तथाप्येवं सत्यपि सौहृदेच्छया सम्बन्धकामनया तव त्वदीयां कन्यामहं याचे याचामि शुल्कदा मूल्यदा वयं न स्मः ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वमनोरथस्य दुर्लभत्वं द्योतयन्त्याह—यत्पादेति । श्रीर्लक्ष्मीः गिरिशेन रुद्रेण सहितः लोकपालैरिन्द्रादिभिश्च सहितः अब्जजो ब्रह्मा च यस्य पादपङ्कजरजः शिरसा बिभर्ति स स्वकृतानां सेतूनां धर्ममर्यादानां परीप्सया परित्राणेच्छया काले धर्मग्लानिकाले लीलातनूः दधत् बिभ्राणो भगवानीशो मम केनोपायेन तुष्येत् । आप्तकामत्वेन अन्यापेक्षारहितत्वात् कृपयैव मामङ्गीकरोत्वित्याशयः ॥ ३७ ॥ एवं नाग्नजित्युत्साहं निरूप्य राजप्रार्थनामाह—अर्चितमिति । पुनरिति वाक्यालङ्कारे । अर्चितं भगवन्तं राजाऽऽह–हे नारायण । हे जगत्पते । आत्मानन्देन स्वरूपानन्देनैव पूर्णस्य तवाल्पकः क्षुद्रोऽहं किं करवाणि, मत्कर्तृकेन केन कर्मणा तव प्रसन्नता स्यात् तदाज्ञापयेत्याहेत्यन्वयः ॥ ३८ ॥ कुरुनन्दन हे राजन् । कृत आसनपरिग्रहो येन स भगवान् ऐश्वर्यादिपूर्णोऽपि कृष्णः कृपया मेघनादवद्गम्भीरया हर्षजनिकया वाचा सस्मितं यथा भवति तथा तं राजानं प्रत्याह ॥ ३९ ॥ तदुक्तिमेवाह–नरेन्द्रेति । 'नरेन्द्र' इति सम्बोधनेन सौहृदेच्छायां हेतुः सूचितः । यद्यपि निजधर्मवर्तिनः राजन्यबन्धोः क्षत्रियस्य याञ्चा विगर्हिता निन्दिता लोकतः शास्त्रतश्च प्रतिषिद्धा, तथापि तव सौहृदेच्छया बन्धुत्वेन स्नेहेच्छया त्वदीयां कन्यां याचे शुल्कदा द्रव्यादिप्रदाश्च वयं नैव भवामः ॥ ४० ॥

अन्वितार्थप्रकाशिका

यदिति। श्रीर्लक्ष्मीः गिरिशेन रुद्रेण सहितः लोकपालैरिन्द्रादिभिश्च सहितः अब्जजो ब्रह्मा च यस्य पादपङ्कजरजः शिरसा बिभर्ति स स्वकृतानां सेतूनां धर्ममर्यादानां परीप्सया परित्राणेच्छया काले धर्मग्लानिकाले लीलातनूः दधत् बिभ्राणो भगवानीशो मम केनोपायेन तुष्येत् ॥ ३७ ॥ अर्चितमिति। पुनरिति वाक्यालङ्कारे। अर्चितं भगवन्तं राजा हे नारायण ! हे जगत्पते ! आत्मानन्देन स्वरूपानन्देनैव पूर्णस्य तवाल्पकः क्षुद्रोऽहं किं करवाणि। मत्कर्तृकेन केन कर्मणा तव प्रसन्नता स्यात् तदाज्ञापयेत्याह स्म ॥ ३८ ॥ तमिति। हे कुरुनन्दन ! हे परीक्षित् ! कृत आसनपरिग्रहो येन स भगवान् ऐश्वर्यादिपूर्णोऽपि कृष्णः कृपया मेघनादवद् गम्भीरया हर्षजनिकया वाचा सस्मितं यथा भवति तथा राजानं प्रत्याह स्म ॥ ३९ ॥ नरेन्द्रेति। हे नरेन्द्र ! यद्यपि निजधर्मवर्तिनः राजन्यबन्धोः निकृष्टक्षत्रियस्यापि याच्ञा विगर्हिता लोके शास्त्रे च निन्दिता किं पुनर्ममोत्तमक्षत्रियस्य तस्य हि प्रसभहरणमेव धर्म इति भावः। तथापि तव सौहृदेच्छया बन्धुत्वेन स्नेहेच्छया त्वदीयां कन्यां याचे। शुल्कदा द्रव्यादिप्रदाश्च वय नैव भवामः ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तमाहेति ॥ ३८ ॥ हे नरेंद्र राजन्यबंधोः क्षत्रियस्य याच्ञा याचना कविभिर्विगर्हिता निंदिता। तथापि तव कन्यामहं याचे शुल्कदाः धनादिमूल्यदा वयं न भवामः ॥ ३९ ॥ कोन्य इति ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अर्चितमिति। राजा, अर्चितं पूजितं भगवन्तं प्रति, हे नारायण, हे जगत्पते, आत्मानन्देन स्वानन्देनैव, पूर्णस्य तव, अल्पकः क्षुद्रोऽहं, किं करवाणि। न किमपि त्वद्योग्यं कर्त्तुं शक्त इत्यर्थः। इति पुनः भूयो भूयः, आह ॥ ३७ ॥ अथ भगवतः परत्वं व्यञ्जयन् कैंकर्येण तत्प्रसन्नतामाह। यदिति। श्रीः स्वयं लक्ष्मीः, अब्जजः कमलभूर्ब्रह्मा, स त्रिलोकप्रसिद्धः, गिरिशः शिवः, लोकपालैरिन्द्रादिभिः सह, यत्पादपङ्कजरजः यस्य तव चरणकमलरेणून्, शिरसा बिभर्त्ति। ईश ईश्वरः, यः स्वेन कृताः ये सेतवो धर्ममर्यादास्तेषां परीप्सया परित्राणेच्छया, काले धर्मग्लानिसमये, लीलातनूर्लीलाविग्रहान्, अनेनाकर्मवश्यत्वमुक्तम्। दधद्दधाति। अनेन धर्मपरित्राणाय त्वं परमेश्वर एवावतीर्णोऽसीति सूचितम्। एवंविधः भगवान्, स भवान्, मम केन तुष्येत्। केन कैंकर्येण तुष्टो भवेत् ॥ ३८ ॥ तमिति हे कुरुनन्दन, कृतासनपरिग्रहः भगवान्, कृष्णः, मेघगम्भीरया वाचा, सस्मितं यथा तथा, तं नग्नजिन्नृपं, आह ॥ ३९ ॥ उक्तिमेवाह। नरेन्द्रेति। हे नरेन्द्र, यद्यपि, निजधर्मवर्त्तिनः स्वधर्मनिरतस्य, राजन्यबन्धोः क्षत्रियस्य, याच्ञा कविभिः, विगर्हिता निन्दिता निषिद्धा इति यावत्। तथापि, तव सौहृदेच्छया त्वद्बन्धुत्वेच्छया, त्वदीयां कन्यां, याचे। वयं शुल्कदा द्रव्यादिप्रदाः, न भवामः हि ॥ ४० ॥

कृष्णप्रिया

पुनः पुनः नाग्नजिती श्रीसत्या मन हो मन मनोरथ करने लगी कि–भगवती श्री देवी, पद्मज ब्रह्माजी, कैलासनाथ भगवान् शंकर एवं समर्थ सर्वलोकपाल जिन भगवान् पादपङ्कज पराग अपने मस्तकपर धारण करते हैं और दयानिधि विश्वरक्षा के लिये अपनी बनायी हुई धर्ममर्यादा का रक्षण करने के लिये ही बार-बार अनेकानेक लीलावतार धारण करते है; वे परमकृपालु प्रभु मेरे कौन से व्रत, जप, तप, यम, नियम आदि से प्रसन्न होंगे। ये तो केवल करुणानिधान नाथ अपनी अहैतुकी करुणा से प्रसन्न होते है ॥ ३७ ॥ राजन् परीक्षित् ! श्रीकोसलेश नग्नजित् राजा ने भगवान् श्रीकृष्ण को विधि-विधान पुरःसर अर्घविधान–अर्चन-पूजन करके यह निवेदन किया कि हे जगत्पते ! हे नारायण ! आप स्वयं आनन्दमय निजानन्द से परिपूर्ण हैं मैं तो केवल एक क्षुद्रजन जीव हूँ। कृपानाथ ! आप की क्या सेवा करूँ ? ॥ ३८ ॥ श्री शुकदेव जी महाराज ने कहा राजन्। राजा कोसलेश का समर्पित किया हुआ आसन अर्चनादि को अङ्गीकार करके भगवान् श्रीकृष्ण अत्यंत सन्तुष्ट हुए। स्मित हास्यपूर्वक मेघगम्भीर वचन वर्षा करते हुए प्रभुने कहा ॥ ३९ ॥ भगवान् श्रीकृष्ण ने कहा–राजन् ! अपने क्षात्रधर्म में रहने वाले क्षत्रिय पुरुष को कुछ भी याचना करना समुचित नहीं। धर्मनिष्ठ महापुरुषों ने क्षत्रिय जन की इस कर्म की निन्दा की है। यह जानते हुए भी मैं सूर्यकुल से सख्य सौहार्द एवं स्नेह-संबंध स्थापित करने की सद्वृत्ति से आप की कन्या सत्या की कामना करता हूँ। एक वात को स्पष्ट भी करता हूँ कि हमारे यहां इस के बदले में कुछ शुल्क देने की प्रथा नहीं है ॥ ४० ॥

राजोवाच

कोऽन्यस्तेऽभ्यधिको नाथ कन्यावर[1] इहेप्सितः। गुणैकधाम्नो यस्याङ्गे श्रीर्वसत्यनपायिनी ॥ ४१ ॥
किं त्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ। पुंसां वीर्यपरीक्षार्थं कन्यावरपरीक्षया ॥ ४२ ॥
सप्तैते गोवृषा वीर दुर्दान्ता दुरवग्रहाः। एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ॥ ४३ ॥
[3]यदीमे निगृहीताः स्युस्त्वयैव यदुनन्दन। वरो भवानभिमतो दुहितुर्मे श्रियः[4] पते ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—राजा उवाच—हे नाथ ! गुणैकधाम्नः, यस्य, अङ्गे, अनपायिनी, श्रीः, वसति, ते, अभ्यधिकः, इह, अन्यः, कः, कन्यावरः, ईप्सितः ॥ ४१ ॥ हे सात्वतर्षभ ! किन्तु, अस्माभिः, कन्यावरपरीक्षया, पुसाम्, वीर्यपरीक्षया, पूर्वम्, समयः, कृतः ॥ ४२ ॥ हे वीर ! दुर्दान्ताः, दुरवग्रहाः, एते, सप्त, गोवृषाः, (सन्ति) एतैः, सुबह्वः, नृपात्मजाः, भिन्नगात्राः, भग्नाः। हे यदुनन्दन !, यदि, इमे, त्वया, एव, निगृहीताः, स्युः, हे श्रियः पते ! मे दुहितुः, भवान्, अभिमतः, वरः ॥ ४३-४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गुणानामेकमेव धाम स्थानं तथाभूतस्य यस्य तवांगे ॥ ४१-४२ ॥ दुर्दांता अशिक्षिताः। दुरवग्रहा अपरायत्ताः। कुतस्तदाह—एतैरिति। भग्ना भङ्गं प्रापिताः ॥ ४३ ॥ यद्यदीमे गोवृषा निगृहीता दमिता नाथिता इति यावत् ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एकमेव मुख्यमेव। श्रीः सर्वगुणाश्रयरूपापि। गुणैकधाम्न इति यद्गुणवशीकृतत्वादेवेत्यर्थः ॥ ४१ ॥ समयः संकेतः "समयः शपथाचारसिद्धान्तेषु तथा धियि। क्रियाकारे च निर्देशे संकेते कालभाषयोः ॥" इति मेदिनी। कन्याया वरपरीप्सया वरेच्छया। वयमपि न शुल्कग्राहिण इत्याह—किन्त्विति। अस्माभिरिति बहुत्वेन निजज्ञातिबांधवसंग्रहः। समयो नियमः। तं द्रढयति-कन्याया वरस्य धवतायोग्यस्य तव परीप्सया, पुंसां वीर्यस्य बलस्य च परीक्षार्थम्। पाठान्तरे कन्याया यो वरस्तस्य या परीक्षा तया हेतुना। स चास्माकं समयः पालयितव्य एवेति सम्बोधयति—हे सात्वतानां भक्तानामृषभ परिपालक ॥ ४२ ॥ अपरायत्ता अपराधीनाः 'अधीनो निघ्न आयत्तः' इत्यमरः। परानायत्तत्वे हेतुमाशंक्य समाधत्ते-कुत इति। तत् परानधीनत्वम्। एतैर्वृषैः। इत्थं स्वदोषं स्ववर्गदोषं च परिजहार। समयमेवाह—सप्तेति। तत इति तदंगीकारमुपलभ्य वृषवासं तेन गत्वांगुल्या निर्दिशति-एतैर्भिन्नगात्रा अतो भग्नाः, एतद्व्याजेन भवद्विरोधिनां तेषां शान्तिरेवास्माभिर्घटितेति भावः। हे वीरेति—तव वीर्येण तु निग्राह्या भविष्यन्तीति भावः ॥ ४३ ॥ अभिमत उचितः। यदीति निश्चये। 'धत्से पदं त्वमविता यदि विघ्नमूर्ध्नि' इतिवत्। यद्वा—यद्यस्मात्त्वयैव निगृहीता एव स्युः बलवत्त्वेनान्यैरशक्यत्वात् वृषत्वेनातिपीडयितुमयुक्तत्वाच्च तस्मादनेन प्रबंधेन भवानेव वरोऽभिमतः, पूर्वमेवावधारितः, तस्मादस्माकं प्रतिज्ञाया मनोरथस्य च पूरणार्थं भवतैतत्कार्यमेवेति भावः। हे यदुनंदनेति—यदुकुलनंदनार्थमपि त्वयैतत्कार्यं चेति भावः। यद्वा—यदुकुलनंदनस्त्वमस्मत्कुलमपि नंदयिष्यसि, कुलनन्दकस्वभावत्वादिति भावः। हे श्रियः पते इति—श्रीर्यथा सर्वान्देवासुरादींस्त्यक्त्वा त्वामेव वृतवती तथा मम कन्येयमपि श्र्यंशत्वेन त्वामेव वरिष्यतीति भावः। देवासुरनिग्रहं कृत्वा श्रियं प्राप्तवतस्तवैतन्निग्रहो न ह्यशक्योतस्त्वमेव वरो निर्णीतः। वृषास्त्विमे त्वद्विद्वेषिवधार्थमेव स्थापिता इति संबुद्ध्यभिप्रायः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीः सर्वगुणाश्रयरूपापि गुणैकधाम्न इति यद्गुणवशीकृतत्वादेवेत्यर्थः ॥ ४१ ॥ अस्माभिरिति बहुत्वेन निजज्ञातिबान्धवादिसङ्ग्रहात् तथा पूर्वमेवेति च समयं दृढयति कन्याया वरस्य धव (वर) तायोग्यस्य तव परीप्सया पुंसां वीर्य्यस्य बलस्य च परीक्षा तदर्थं पाठान्तरे कन्याया यो वरस्तस्य या परोक्षा तया हेतुना पुंसां या वीर्य्यपरीक्षा तदर्थमित्यर्थः। स चास्माकं समयो भवता पालयितव्य एवेति सम्बोधयति सात्वतां भक्तानाम् ऋषभ ! परिपालकेति ॥ ४२ ॥ इत्थं स्वदोषं स्वबर्गदोषं च परिजहार, अथ समयमेव सूचयति—सप्तेति। एत इति तदङ्गीकारमुपलभ्य तेन सह वृषवासं गत्वाङ्गुल्या निर्दिशति एतैर्भिन्नगात्राः अतो भग्नाः एतद्व्याजेन भवद्विरोधिनां तेषां शान्तिरेव चास्माभिर्घटितेति भावः। हे वीरेति तव वीर्य्येण तु निग्राह्या

---

१. कन्याया ईप्सितो वरः-वीर.। २. एस-श्रीधर. वंशी. जीव. वीर. विज. विश्व.। ३. यदीमे-वीर. ; यदिमे-श्रीधर. वंशी. जीव. विज. विश्व.। ४. प्रियः पतिः-प्रा. पा.।

भविष्यन्तीति भावः। अन्यत्तैः। तत्र एतानित्यादिकमध्याहृत्य श्लोकद्वयं योजितम् ॥ ४३ ॥ यद्यदीति निश्चये "धत्से पदं त्वमविता यदि विघ्नमूर्द्ध्नि" इतिवत् यद्वा यद्यस्मात् त्वयैव निगृहीता एव स्युः बलवत्त्वेनान्यैरशक्यत्वात् वृषत्वेनातिपीडयितुमयुक्तत्वाच्चन तस्मादनेन प्रबन्धेन भवानेव वरोऽभिमतः पूर्वमेवावधारितः तस्मादस्माकं प्रतिज्ञाया मनोरथस्य च पूरणार्थं भवतैतत्कार्य्यमेवेति भावः। हे यदुनन्दनेति यदुकुलहर्षार्थमपि त्वयैतकार्य्यमिति च ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नाथ्यते सर्व्वैः प्राप्तुमिष्यत इति नाथस्तत्सम्बोधनम्। अतः प्राप्तुमिष्ट आत्मनोऽभितोऽधिकस्ते त्वत्तोऽन्यः कोऽस्ति, अपि तु न कोऽप्यस्तीत्यर्थः। तत्र हेतुत्वेन नाथत्वमेवाभिव्यञ्जयन्नाह—गुणेति। अनपायिनी सदा सुस्थिरा सती अंगे श्रीविग्रहे वक्षसि वा वसति, यतो गुणानां सत्यशौचादीनामेकमद्वितीयमसाधारणं वा धाम तस्य ॥ ४१ ॥ अस्माभिरिति बहुत्वेन निजज्ञाति-बान्धवादिसंग्रहात्, तथा पूर्व्वमेवेति च समयं द्रढयति। कन्याया वरस्य परीप्सया पुंसां वीर्य्यस्य बलस्य परीक्षा तदर्थम्, हे सात्वतानां भक्तानामृषभ परिपालकेति भक्तानां मादृशां समयस्त्वया परिपाल्य एवेति। यद्वा, हे यादवश्रेष्ठेति यदुकुलावतीर्णस्य साक्षाद्भगवतस्तव प्राप्त्यर्थमेवेति भावः ॥ ४२ ॥ एत इति साक्षात्तत्रैव वर्त्तमानानंगुल्या निर्दिशति—एतैर्हेतुभिर्भग्नाः, यद्वा, एतैः कर्त्तृभिर्भग्नं प्रापिताः, यतो भिन्नगात्राः। नृपाणानात्मजा इति तारुण्यादिना बलिष्ठतादिकं सूचयति—हे वीरेति। तव वीर्य्येण निग्राह्या भविष्यन्तीति भावः। त्वयैवैकाकिना; हे यदुनन्दनेति यदुकुलहर्षार्थमपि त्वयैतत् कार्य्यमिति भावः। हे श्रियः पते ! इति लक्ष्मीनाथत्वान्मतः सम्मत एव, एषां निग्रहेण चाभितो मत इत्यर्थः। यद्वा, श्रीरुक्मिणीभर्त्तापि भवानेवाभिमतोऽभीष्टो वर इति ॥ ४३-४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थमुक्तः प्राह नग्नजित्क इति। हे नाथ ! ते त्वत्तः अभ्यधिकः कन्यायाः ईप्सितो वरः को वाऽस्ति ? समन्ति बहव इत्यतो भगवन्तं विशिनष्टि-गुणैक इति। गुणानां कल्याणगुणानामेकमेव धाम स्थानं तथाभूतात् यस्येत्यपेक्षया षष्ठ्यन्तं वा यस्य तवाङ्गे वक्षसि श्रीर्लक्ष्मीरनपायिनी निवसति ॥ ४१ ॥ किन्त्विति। हे सात्वतर्षभ ! समयः भाषाबन्धनं किमर्थं पुंसां वरत्वेनागतानां (परीक्षार्थं) सापि किमर्थेत्यत्राह—कन्याया वरोऽनुरूपः तत्परीप्सया हेतुभूतया ॥ ४२ ॥ कोऽसौ समय इत्यत्र तं वक्तुं तावत्तत्रान्येषामसमर्थतामाह—सप्तेति। हे वीर ! दुर्दान्ता अशिक्षिताः दुरवग्रहाः अपरायत्ताः तत्र निदर्शनमाह एतैर्गोवृषैर्भिन्नानि गात्राणि, येषां तथा बभूवुः एतान् यो गृह्णाति तस्येयं कन्येति भावः ॥ ४३ ॥ यदीति। अतो यदि इमे वृषास्त्वया निगृहीताः स्युस्तर्हि भवानेव मम दुहितुरभिमतो वरः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

कन्यायाः वरपरीप्सया वरेच्छया ॥ ४२ ॥ दुर्दान्ताः अशक्यशिक्षाः दुरवग्रहा गृहीतुमशक्यः ॥ ४३-४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वयमपि न शुल्कग्राहिण इत्याह—किन्त्विति। समयो नियमः कन्याया वरप्राप्तीच्छया या पुंसां वीर्य्यपरीक्षा तदर्थम् अन्यथा मत्कन्यायां सर्व एव नृपाः प्रार्थकास्ते मया कथं प्रत्याख्येया इति भावः। कन्याया वरः श्रुतरूपगुणस्त्वमेव वरणीयस्तस्य तव प्राप्त्यर्थमित्यर्थस्तु वास्तवः ॥ ४२-४३ ॥ यत् यदीति प्रकटोऽर्थः यत् यस्मादिति वास्तवः श्रियः पते इति सम्बोधनेन वृषनिग्रहो न त्वदशक्य इति त्वमेव वरो निर्णीतः वृषास्त्विमे त्वद्विद्वेषवधार्थमेव स्थापिता इति भावः ॥ ४४ ॥

गूढार्थदीपिनी

ते त्वत्तः। अनपायिनी अवियोगिनी ॥ ४१ ॥ समयो नियमः। कन्या वरपरीप्सया योग्यवरप्राप्तीच्छया ॥ ४२ ॥ दुर्दान्ता अशिक्षिताः। दुरवग्रहा अपराधीनाः। अत एव भग्ना भङ्गं प्रापिताः ॥ ४३ ॥ यत् यदि निश्चये इमे ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

गुणानां स्वाभाविकानां सत्यत्वानन्दत्वसर्वज्ञत्वसर्वेश्वरत्वसर्वकर्तृत्वादीनामेकमेव धाम स्थानं तस्य अङ्गे देहे वक्षसि ॥ ४१ ॥ समयो नियमः ॥ ४२ ॥ दुर्दान्ताः अशिक्षिताः दुरवग्रहाः अपरायताः भिन्नानि गात्राणि येषां ते तथा भग्नाः भङ्गं प्राप्ताः एतान् यो निगृह्णाति स अस्याः वर इति भावः ॥ ४३ ॥ यत् यदि ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

इति वैभववतो भवतोऽत्रागमनमनुग्रहत एव न तु वनिताकामनयेति नग्नाजिदानन्दमग्नः प्राह ॥ यदिति। यस्य पादपङ्कजे तयो रजः परागं श्रीः सिरसा बिभर्ति। अब्जजो ब्रह्मा च गिरिशो लोकपालैः सह बिभर्ति। स्वकृतः सेतुर्मर्यादा

तस्योच्छेदे दैतेयैः कृते तत्परीप्सया तद्रिरक्षया लीलातनूरिदमाद्याः काले तत्तत्समयेऽदधाद्धृतवान्स भगवान्भवान्स्वकृतेन । नर्ते त्वत्क्रियते किञ्चनार इत्यादेः स्वस्यैव कृतेन कर्मणा स्वेनैव कारितेन वा तुष्येत्तुष्टः स्यात् ॥ ४१ ॥ कृत आसनपरिग्रहो येन सः ॥ ४२ ॥ रमयैवमाराधितस्य न मया कारणं कारितं किमागमनकारणमिति क्षितिप न वद मर्यादेयमार्यदर्शितेत्याहेत्याह श्री भगवानिति । हे क्षितीश्वर विदुषो ज्ञानिनो राज्ञः सम्बन्धिनः स्वयंवरादन्यत्र तद्भिन्ने विवाहे वरमयाचितारमुत्तममाहुर्विद्वांस इति शेषः । जसः शसादेशो वा । विदुषो विद्वांसः । बहुवचनेन तथा विद्वद्वचनेन चैकस्य प्रतिभातं तु कृतकान्न विशिष्यत इत्युक्तकृतकता व्यावर्तिता । एकोऽपि विद्वांश्चेन्न कृतकता यदा तदा किं वक्तव्यं ते च बहवो यत्र तत्र न सेति भावः । स हि तादृशो विसदृशो वरो हि । पुरुषरूपो योऽयमर्थस्तद्भागिनां वराभिलाषवतां प्रभूणां तत्सकाशात् । आव्हानमर्हतीति शेषः । अहं राजा राजान्तरं प्रति कथं तव सुताय मम सुतां दास्यामागच्छेति मया मर्यादा त्याज्येत्यत आह ॥ वेलां मर्यादां विनेति । वेलेति पाठे स्वयंवरे तु विनाऽऽह्वानमायामेव वेला मर्यादेत्यर्थः ॥ ४३ ॥ त्वयाऽऽरब्धस्तु स्वयंवर इति स्वयं वरेणागन्तव्यमित्यहमायात इतः परं तव स्नेहलाभलाभेन स्वयंवरे ज्ञानिवरैः प्रतिषिद्धमर्यादं पार्थिवं त्वामर्पय इत्याह ॥ नरेन्द्रेति । हे नरेन्द्र । राजन्यवन्धो । नायं बन्धुशब्दो ब्रह्मबन्धुः क्षत्रबन्धुरित्यत्रेवात्र राजन्याभास इति स्वयं व्याकरोति ॥ निजधर्मवर्तिन इति । याञ्चा कविभिर्ज्ञानिभि विगर्हिता निन्दिता तथाऽपि तव सौहृदेच्छया त्वदीयां कन्यां याचे । तर्हि किं दिशति मूल्यमिति न वदेति वदति ॥ न हि वयं शुल्कदा इति । यद्यप्यहं न शुल्कद इति वक्तव्यं तथाऽपि न भेतव्याः सहागता मदीया शुल्कदान विषय इति द्योतयितुमियमुक्तिरिति मन्तव्यम् ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

राजा तु याचनात्पूर्वं देयत्वेन विचार्य प्रतिज्ञां च पूरयिष्यामोति कष्टे **भगबांश्च** न विनियोक्तव्य इति तूष्णीं स्थितः । रागे सति कष्टमपि करोति, नान्यथेति अधुना रागं ज्ञात्वा वृषदमनार्थं प्रार्थयते **कोऽन्य** इति । त्वत्तोऽप्यभ्यधिकः दाने कोऽपि नास्ति पात्रम् । कन्यायाश्चेप्सितो वरो नान्योऽस्ति । अतो दृष्टसम्पत्तिः सर्वापि सिद्धा । किञ्च । सर्वाः स्त्रियस्त्वदीया एव । यतो गुणानामेकं धाम भवानेव । अनन्ता गुणा नित्यास्त्वय्येव प्रतिष्ठिताः । अत एव श्रीरनपायिनी त्वयि । यत्र श्रीस्तत्र सर्वमिति । **वसतीत्यन्यत्र परिभ्रमणमात्रम्** ॥ ४१ ॥ परमस्मदीयोऽपि **धर्मः** पालनीय इत्याह **किन्त्वस्माभिरि**ति । अधुना करणे अपराधो भवेत्, किन्तु पूर्वमेव कृतः । **समयो** नियमः । तुशब्दो निर्भरदानं व्यावर्तयति । **सात्त्वतर्षभे**ति प्रतिज्ञा पालनीयेत्यत्र सम्मतिरुक्ता । यादवश्रेष्ठास्तत् जानन्तीति । भक्तस्वामी भक्तप्रतिज्ञां पालयिष्यतीति । प्रतिज्ञाकरणे निमित्तमाह **पुंसा**मिति । क्षत्रियेषु वीर्यवान् महान् । सप्ताङ्गानि क्षत्रियस्य । सर्वत्र तत्सामर्थ्ये महान् भवति । अतः सप्तवृषा दम्यत्वेन स्थापिताः । महत एव कन्या देया । जामातरं प्रति नम्रता बोधनीया । अधमे च सा निषिद्धा । अपरीक्षायां वीर्यं न ज्ञायत इति । एतदपि कन्यावरपरीक्षार्थमेव, न त्वस्यान्य उपयोगोऽस्ति । अतः कन्यादाने तदवश्यं कर्तव्यम् ॥४२॥ तं समयमाह, यथा परीक्षा सम्पद्यते, **सप्तैत** इति । एकत्र गृहे सप्तवृषा निरुद्धाः, न कश्चित्तत्र परिपालकः । नापि तत्र गौः काचित्, भक्ष्यं च यथेष्टं मादकम् । ततोन्योन्य युध्यमानाः अतिमत्ताः नित्यं क्रुद्धास्तिष्ठन्ति । तत्रापि सप्त । विषमसंस्थापन्नाः, अन्यथा द्वन्द्वयोधिनो भवेयुः । **गोवृषा** इति न मारणीयाः । गोजातीयः वृषाः समस्थाः । **वीरे**ति सम्बोधनमितरस्तुतिः श्रोतुर्निन्दार्थेति शङ्काव्युदासार्थम् । वीरस्याग्रे कथनं वीर्योद्बोधनार्थम् । बहूनेव वृषानेकश्चारयति इत्याशङ्क्य वैलक्षण्यमाह **दुर्दान्ता** इति । अदान्तापेक्षयापि कठिनाः । दुरुपसर्गो दमनविरोधिनं वदति । तत्र दमनसम्भावनापि नास्तीति ज्ञापयितुम् । वीरैरपि दुर्दान्ता इति वा । किञ्च । दुष्टः अवग्रहो येषाम् । तैः सह कलहो मरणपर्यवसायी । आग्रहो वा दुष्टः । ते मारयितुमशक्याः, दृष्टादृष्टोपायैः । अन्यांश्च मारयन्तीति द्वयमुक्तम् । नापि तेषां वीर्यं सम्भावनामात्रेण सिद्धम्, किन्तु बहुधा कृतकार्यमित्याह **एतैर्भग्ना** इति । काकतालीयव्युदासाय **सुबहवः** । भङ्गो न पराजयमात्रम् । तथा सति दृष्ट्वापि भीताः पलायिता भवन्ति । किन्तु भग्नगात्राणां करचरणादीनां भङ्गपर्यन्तं यतमानाः । ननु शिक्षाबीजयोरप्रयोजकत्वं तेषु भविष्यतीति चेत्, तत्राह **नृपात्मजा** इति । न तु क्षत्रियमात्रम् ॥ ४३ ॥ वृषाणां दोषा उक्ता इति, तेषु चेत्तव कृपा, एतादृशानप्युद्धरिष्यामीति, तदा भवानेव कन्याया वरः, तदा तां दुष्टामप्युद्धरति, तदीयांश्च । ते हि कन्यानिमित्तमेव निरुद्धा इति तदुद्धारव्यतिकेण कन्योद्धारो नोपपद्यते । अतस्त्वं चेत्तानुद्धरिष्यसि, तदा वर इत्याह **यदीमे निगृहीताः स्यु**रिति । निग्रहे कृते उद्धारोऽवश्यंभावीति तदेवोक्तम् । **यदुनन्दने**ति लीलार्थमागतः कदाचिन्न कुर्यादिति सूचितम् । यादवास्तथा न कुर्वन्तीति । सन्देहश्च गोवर्धनादिना । तदा **अभिमतो वरो भवान्** । **मे दुहितु**रिति स्वस्य हीनतां बोधयति । योग्यता तु सर्वोत्तमैवेत्याह **श्रियः पत** इति ॥ ४४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

किन्त्वस्माभिरित्यत्र । **सप्ताङ्गानी**ति । 'तस्यासते ऋषयः सप्ततीरे वागष्टमी ब्रह्मणा संविदाने'त्यत्रोक्ताः सप्त प्राणा इत्यर्थः । **सप्तैत** इत्यत्र । **समस्था** इति । विषमदेशस्था आरण्या महिषा नेत्यर्थः । **यदीमे** इत्यस्याभासमाहुः वृषाणामित्यादिना ।

श्रीसुबोधिनी–सारः

राजोक्तिः । गुणानानेकधाम्न एकांतस्थानात्ते त्वत्तोऽभ्यधिकः कन्याया वर ईप्सितो वांछितोन्यः क इह न कोपि । हे नाथ तत्र हेतुः । यस्यांगे वक्षसि अनपायिनी निश्चला श्रीर्वसति ॥ ४१ ॥ किं च हे सात्त्वतर्षभ पुंसां बलपरीक्षणार्थं कन्याया वरेच्छयास्माभिः पूर्वं समयः पणः कृतः ॥ ४२ ॥ हे वीर दुर्दांता दमनरहिता दुर्दुःखेनावग्रहो धृतिर्येषां ते तथा एते सप्त गोवृषा एतैर्भिन्नानि गात्राणि येषां ते बहवो नृपात्मजा राजपुत्रा भग्नाः ॥ ४३ ॥ हे यदुनंदन यदि इमे वृषास्त्वया निगृहीता दमिता नसि प्रोताः स्युस्तदा मे मम दुहितुः पुत्र्या ईप्सितो वरो भवान् त्वमेव हे श्रियः पते ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृताबालप्रबोधिनी

'सर्वस्वामिनस्तवैवं याच्ञावचनं मर्यादासंरक्षणायमनुकरणमात्रम्' इति सूचयन् सम्बोधयति—नाथेति । ते त्वत्तः अभ्यधिकः उत्कृष्टः कन्याया ईप्सितो वरोऽन्यः को वाऽस्ति ? । सर्वोत्तमत्वमेवोपपादयति—यस्य तवाङ्गे वक्षसि अनपायिनी विश्लेषरहिता सती श्रीर्लक्ष्मीर्वसति । तत्रैश्वर्यादिगुणपूर्णत्वं हेतुमाह—गुणैकधाम्न इति ॥ ४१ ॥ 'प्रतिज्ञापालनं तवापि संमतम्' इत्याशयेन सम्बोधयति—सात्वतर्षभेति । 'निर्भरतया कन्यादानमशक्यम्' इति सूचयति—किं त्विति । तत्र हेतुमाह—महते कन्या देया अतस्तादृशस्य कन्यावरस्य परीप्सया प्राप्तीच्छया या पुंसां वीर्यस्य बलादिप्रभावस्य परीक्षा तदर्थमस्माभिरितः पूर्वमेव समयः कृतः प्रतिज्ञा कृतेत्यन्वयः ॥ ४२ ॥ 'कोऽसौ समय' इत्यपेक्षायां तत्रान्ये षामसामर्थ्यं दर्शयंस्तमाह—सप्तेति द्वयेन । हे वीर ! सप्तैते गोवृषाः दुर्दान्ताः अशिक्षिताः दुरवग्रहाः अपरायत्ताः । एतैस्तु सुबहवोः नृपात्मजा भग्नाः भग्नाभिमानाः तथा भिन्नानि गात्राणि येषां तथाभूताश्च जाताः ॥ ४३ ॥ अतो हे यदुनन्दन ! यदि इमे त्वया निगृहीता स्युस्तर्हि भवानेव मम दुहितुरभिमतो वरः । अभिमतवरत्वे लक्ष्मीपतित्वं हेतुं सूचयन् सम्बोधयति—श्रियःपते इति ॥ ४४ ॥

अन्वितार्थप्रकाशिका

क इति ॥ हे नाथ । ते त्वत्तः अभ्यधिकः उत्कृष्टः कन्याया ईप्सितो वरोऽन्यः को वाऽस्ति । गुणानामेकधाम्नः यस्य तवाङ्गे वक्षसि अनपायिनी विश्लेषरहिता सती श्रीः लक्ष्मीर्वसति ॥ ४१ ॥ वयमपि न शुल्कग्राहिण इत्याह–किमिति ॥ हे सात्वतर्षभ ! किंतु कन्या वरस्य परीप्सया प्राप्तीच्छया पुंसां वीर्यस्य बलादिप्रभावस्य या परीक्षा तदर्थमस्माभिरितः पूर्वमेव समयो नियमः कृतः । अन्यथा अत्युत्तमगुणायाः मत्कन्यायाः बहवो याचकाः स्युस्तत्र के के प्रत्याख्येया इति भावः ॥ ४२ ॥ सप्तेति ॥ हे वीर । सप्तैते गोवृषाः दुर्दान्ता अशिक्षिताः दुखग्रहाः अपरायताः एतैस्तु सुबहवो नृपात्मजा भग्ना भङ्गं प्रापिताः तथा भिन्नानि गात्राणि येषां तथाभूताश्च जाताः । एतान् यो निगृह्णाति तस्य कन्येति समयः कृतः ॥ ४३ ॥ यदिति ॥ हे यदुनन्दन ! हे श्रियःपते ! यत् यदि इमे त्वया निगृहीताः दमिताः स्युर्स्तर्हि भवानेव मम दुहितुरभिमतो वरः । यद्वा । यत् यतः त्वयैव निगृहीताः स्युरेव अतः भवानेवाभिमतो वरः ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कन्यायाः यो वरस्तस्य परीक्षया परीप्सयेति वा याठः ॥ ४१ ॥ दुर्दांताः शिक्षारहिताः दुरवग्रहाः गृहीतुमशक्याः । तदेव दुरवग्रहत्वमाह एतैरिति । एतैर्भग्नाः भंगं प्रापिताः ॥ ४२ ॥ यद्यतः । इमे त्वया निगृहीताः स्युः ॥४३॥ एवं समयं प्रतिज्ञां । परिकरं बध्वा आत्मानं श्रीमूर्त्ति ॥ ४४–४७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमुक्तो नग्नजित् प्राह । क इति । हे नाथ यस्य तव, अङ्गे श्रीः, अनपायिनी सती, वसति । इत्थंभूतात् गुणैकधाम्नः कल्याणगुणानामेकस्थानभूतात्, ते त्वत्तः, अभ्यधिकः अन्यः, ईप्सितः कन्यावरः, इह कः अस्ति । न कोऽपीत्यर्थः ॥४१॥ किं त्विति । किं तु हे सात्त्वतर्षभ, पुंसां वीर्यपरीक्षार्थं, कन्यावरपरीक्षया हेतुभूतया च, अस्माभिः पूर्वं समयः भाषाबन्धनं, कृतः अस्ति ॥ ४२ ॥ कोऽसौ समय इत्यत्र तं वक्तुं तावत्तत्रान्येषामसमर्थतामाह । सप्तेति । हे बीर, दुर्दान्ताः अशिक्षिताः, दुरवग्रहाः अपरायत्ताः, एते सप्त गोवृषाः, सन्ति । एतैर्गोवृषैः, भग्नाः भङ्गं प्राप्ताः, भिन्नानि एतैरेव भङ्गं गमितानि गात्राणि येषां तथाभूताः, सुबहवः नृपात्मजाः, अभवन् । एतान् यो निगृह्णाति तस्येयं कन्येति समयः कृतो भवतीति भावः ॥ ४३ ॥ गदोति । हे यदुनन्दन, यदि इमे त्वया एव, निगृहीताः स्युः, तर्हि हे श्रियः पते कमलाकान्त, मे मम, दुहितुः भवान् अभिमतः एव, वरः अस्ति ॥ ४४ ॥

कृष्णप्रिया

कोसलेश नाग्नजित ने निवेदन किया—हे नाथ ! आप समस्त सद्गुणों के एक ही अधिष्ठान है। आपके श्रीवक्षःस्थल में भगवती श्रीदेवी नित्य निरंतर निवास करती है। भगवन् आपसे अधिक मेरी पुत्री के लिये योग्य और अभीष्ट वर भला और कौन हो सकता है ॥ ४१ ॥ लेकिन हे यदुकुल शिरोमणि ! हे श्रीकृष्ण ! मेरा नम्र निवेदन कृपा करके श्रवण करें। हमने पूर्व से ही व्याह-विषय में एक प्रण कर लिया है। सत्या के लिये कौन सा वर योग्य है और उपयुक्त है ? इसलिये वर का बल, पौरुष, सामर्थ्य की पहचान के लिये ऐसा प्रण प्रारम्भ से किया गया है ॥ ४२ ॥ हे वीरवर यदुवीर श्रीकृष्ण ! हमारे ये सातों बैल दुर्दान्त है; किसी के वश में न आने वाले और बिना सधाये हुए हैं। इन सात बैलों ने अनेकानेक युवराजों के अंगो को खण्डित कर दिया है और युवराज हतोत्साह हो गये हैं। हम भी सचिन्त है ॥ ४३ ॥ हे श्री यदुनन्दन ! हे श्रीकृष्ण ! कृपा करके यदि आप ही इन सात बैलों को नाथ लें और अपने वश बना लें तब तो हे श्रीकान्त ! हे श्रीपते ! आप ही हमारी पुत्री सत्या के लिये सर्वाभीष्ट वर होंगे ॥ ४४ ॥

एवं समयमाकर्ण्य बद्ध्वा परिकरं प्रभुः[1] । आत्मानं सप्तधा कृत्वान्यगृह्णाल्लीलयैव तान् ॥ ४५ ॥
बद्ध्वा तान् दामभिः शौरिर्भग्नदर्पान् हतौजसः । [3]व्यकर्षल्लीलया बद्धान् बालो दारुमयान् यथा ॥ ४६ ॥
ततः प्रीतः सुतां राजा ददौ कृष्णाय विस्मितः । तां प्रत्यगृह्णाद् भगवान् विधिवत् सदृशीं प्रभुः ॥ ४७ ॥
राजपत्न्यश्च[4] दुहितुः कृष्णं लब्ध्वा प्रियं पतिम् । लेभिरे परमानन्दं जातश्च परमोत्सवः ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—प्रभुः, एवम्, समयम्, आकर्ण्य, परिकरम्, बध्वा, आत्मानम्, सप्तधा, कृत्वा, लीलया, एव, तान्, न्यगृह्णात् ॥ ४५ ॥ शौरिः, भग्नदर्पान्, हतौजसः, तान्, दामभिः, बध्वा, यथा, बालः, दारुमयान्, बद्धान्, "लीलया, व्यकर्षत" तथा, व्यकर्षयत् ॥ ४६ ॥ ततः, विस्मितः, राजा, प्रीतः, सन्, कृष्णाय, सुताम्, ददौ, प्रभुः, भगवान्, सदृशीम्, ताम्, विधिवत्, प्रत्यगृह्णात् ॥ ४७ ॥ राजपत्न्यः, च, "कुटुम्बिनः", दुहितुः, प्रियम्, कृष्णम्, पतिम्, लब्ध्वा, परमानन्दम्, लेभिरे, च, परमोत्सवः, जातः ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतान्यो निगृह्णाति तस्य कन्येति समयः कृतस्तम्। सप्तधा कृत्वेति बह्वीनां योषितां सम्पूर्ण एवाहं संभोगयोग्यः स्यामिति सत्यां प्रत्यसापत्न्यप्रदर्शनार्थमात्मनः सप्तधा करणम् ॥ ४५-४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परिकरं दृढगात्रिकाबन्धम्। एतान्वृषान् निगृह्णाति स्वायत्तीकरोति तं समयम्। सप्तधेति स्वामिचरणैर्व्याख्यातमेव। आकर्ण्याकर्णनानन्तरमेव स्मित्वेति ज्ञेयम्। परिकरं वस्त्रादिपरिच्छदं दृढं बद्ध्वा, यतः प्रभुः सर्वत्र समर्थः। यद्वा—गोपलीलाभ्यासादेव तत्र समर्थः। आत्मानं श्रीविग्रहं कृत्वा प्रकाश्य। एवशब्दोऽत्रेवार्थे। सप्तधा कृत्वेव क्षिप्रकारित्वादिति भावः ॥ ४५ ॥ तान् वृषान् ॥ ४६ ॥ ततो वृषबन्धनोत्तरम्। तां सत्याम्। विस्मितः अकस्मात्तादृशस्वभाग्यफलोदयात्। प्रत्यगृह्णात् उद्वहति स्म। अन्यत्स्पष्टम् ॥ ४७ ॥ चाद्राजापि ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आकर्ण्य आकर्णनानन्तरमेवेत्यर्थः। स्मित्वेति ज्ञेयं परिकरं वस्त्रादिपरिच्छदं दृढं बद्ध्वा यतः प्रभुः सर्वत्र समर्थः यद्वा गोपलीलाभ्यासादिव तत्र समर्थ इत्यर्थः। आत्मानं श्रीविग्रहं कृत्वा प्रकाशयित्वा अन्यत्तैः यद्वा एवशब्द इवार्थे सप्तधा कृत्वेव क्षिप्रकारित्वादिति भावः ॥ ४५ ॥ दारुमयान् तत्रापि दामभिर्बद्धान् ॥ ४६ ॥ विस्मितः अकस्मात्तादृशस्वभाग्यफलोदयात् प्रत्यगृह्णात् उद्वहति स्म, उद्वाहसम्पदं दर्शयति, प्रभुः सर्वसामर्थ्ययुक्तः ॥ ४७ ॥ दुहितुः प्रियमभीष्टं पतिं लब्ध्वा परमानन्दं प्राप्ताः अत एव उत्सवश्च परमो जातः ॥ ४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

परिकरं वस्त्रादिपरिच्छदं दृढं बद्धवा, यतो लीलया विकर्षणे दृष्टान्तः—दारुमयान्, तत्रापि दामभिर्बद्धान्, बालो यथेति ॥ ४५-४६ ॥ विस्मितः साक्षात्तन्महाद्भुतानुभवात्; यद्वा, प्रीतत्वाद्विशिष्टं स्मितं यस्य सः, सदृशीं रूपगुणादिभिः

---

१. विभुः-वीर. । २ दन्तान्-वीर. । ३ व्याचकर्ष तथा बध्वा । ४. पत्न्यः स्व-वीर. विज. ।

स्वतुल्यां तां विधिवत् प्रत्यगृह्णात्, यथाविध्युपयेमे, यतः प्रभुः प्रियजनमनोरथपरिपूरणसमर्थः यतो भगवान् सर्व्वैश्वर्य्यप्रकटनपरः, स्व-शब्देन तासां तस्यां स्नेहभरः सूच्यते ॥ ४७ ॥ अतस्तस्तस्याः प्रियमभीष्टं पतिं लब्ध्वा परमानन्दं प्राप्ताः, अतएव परम उत्सवश्च जातः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमिति । परिकरमुत्तरीयादिकं लीलयैवेत्यनेन श्रमाभाव उक्तः तान् वृषान् न्यगृह्णात् ॥ ४५ ॥ बद्ध्वेति । दामभिः रज्जुभिर्भग्नाः दन्ता येषामत एव हतमोजो बलं येषां तान् वृषान् बद्ध्वा व्यचकर्षाऽऽकृष्टवान् यथा बालो बद्धान् दारु (काष्ठ) मयान् वृषान्, विकर्षति तद्वत् ॥ ४६ ॥ तत इति । ततो वृषग्रहणात् प्रीतः पूर्वमेव प्रीतः ततः सुतरां प्रीत इत्यर्थः । विस्मितश्च राजा नग्नजित् प्रभुः श्रीकृष्णः सदृशीमनुरूपां तां कन्यां यथाविधि प्रत्यगृह्णादुपयेम इत्यर्थः ॥ ४७ ॥ राजपत्न्य इति । दुहितुः प्रियं पतिं लब्ध्वा राजपत्न्यः परमानन्दं प्रापुः तदा महानुत्सवश्चासीत् ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

परिकरं चैलोष्णीषादिलक्षणम् ॥ ४५–४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

विस्मितः अकस्मात्तादृशस्वभाग्यफलोदयात् ॥ ४७–५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे **अष्टपञ्चाशत्तमोऽध्यायः** ॥ **५८** ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

आत्मानं सप्तधा कृत्वेति । सप्तधा अकृत्वेति भावः । एकश्चेत् सप्तवृषान् बध्नोति तदातिचित्रम् । सप्तधा कृत्वेति ऐश्वर्यप्रकटनमेव । तच्च नाग्नजित्या बहुसपत्नीकत्वे भगवतो बहुतनुत्वमाश्वासजनकमिति न रसजनकम् ॥ ४५–५८ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे **अष्टपञ्चाशोऽध्यायः** ॥ ५८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

आत्मानं सप्तधा प्रकृत्वा एक एवेत्यर्थः ॥ ४५–५८ ॥

इत्यष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सप्तधाकृत्वेति । सप्तधा कृत्वेत्येवमेव बह्वीरपि विलासिनीरहं सम्भुञ्जे इति मम बहुवल्लभत्वेपि न ते कापि क्षतिरिति सत्यां ज्ञापयामासेति श्रीस्वामिचरणाः ॥ ४५–५० ॥

गूढार्थदीपिनी

समयं प्रतिज्ञाम् । परिकरमत्र कटीयवस्त्रं बद्ध्वा दृढं कृत्वा । एवशब्द इवार्थे कृत्वेव ॥ ४५ ॥ दामभिः रज्जुभिः । ओजो बलम् । लीलया अनायासेन दारुः काष्ठम् ॥ ४६–४७ ॥ चात् राजापि ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

एकेनैव रूपेण गोवृषनिग्रहो युक्तः तथापि सत्यायाः सापत्न्यभयनिवृत्तये आत्मानं सप्तधा कृत्वा न्यगृह्णात् ॥४५–४६॥ सदृशीं कुलरूपतः ॥ ४७–४९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नन्दनन्दनो वर इत्यानन्दो दधौ मग्नो नग्नजित्प्रतिश्रवो मे प्रससार सारसाक्षीवितरणे प्रकारान्तरेण तन्निवर्त्य कन्या ग्राह्येत्थमनुग्राह्य इति वदति । क इति । हे नाथ । ते सकाशादभ्यधिकः कन्यावरोऽन्यः को न कोऽपीप्सितः सम्प्रतिपन्नोऽधिकस्तन्मात्रेणोनेत्यधिकोना कन्येति अधिको वर ईप्सित इति वा । तद्धेतुमाह । यस्य तव गुणैकधाम्नोऽङ्गेऽनपायिनी श्रीर्वसतीति ॥ ४५ ॥ किन्तु तयाऽप्यस्माभिः पूर्वं त्वदागमनतः समयः कृतः पुंसां राज्ञां वीर्यपरीप्सार्थं कः कस्माद्बलिष्ठ इति तत्तरतमभावज्ञानार्थम् । योऽधिको भवेत्स एव कन्यावर इति तदीप्सया ॥ ४६ ॥ तं समयप्रकारमाह । सप्तेति । हे वीर दुर्दान्ता अदम्या दुरवग्रहा गृहीतुमशक्या एतैर्वृषैर्भग्नाः स्विन्नगात्रा नृपात्मजा गता इति शेषः ॥ ४७ ॥ हे यदुनन्दन त्वयेमे यदि निगृहीताः स्युस्तर्हि श्रियःपते दुहितुर्भवानभिमतो वरः ॥ ४८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

प्राप्तैव कन्या, समयः परं पूरणीय इति राज्ञो विश्वासार्थमलौकिकप्रकारं निराकुर्वन् कटिबन्धनादिकं कृत्वा तथा कृतवानित्याह **एवमिति**। **विभुः** सर्वप्रकारेण कर्तुं समर्थः। अन्त **प्रविष्टः** आत्मानं सप्तधा कृतवान्। सप्तापि भगवानेव भवति। **अलौकिकं** तु न कर्तव्यम्। रूपाणि त्वेकस्य बहून्यपि भवन्ति। पुत्राश्चित्राणि। कालभेदेन च तानि न तिष्ठन्तीत्येतावन्मात्रमुत्कर्षहेतुरेव। नत्वलौकिकं किञ्चित्। ततो लीलयैव न्यगृह्णात्। लीलैवोत्कर्षहेतुः। बन्धनं तु **सुगममेव**। निगृह्य बद्ध्वा समानीतवानित्याह—**बद्ध्वेति** ॥ ४५ ॥ दामभिः पृथक् पृथक्। पूर्वं शृङ्खलाभिरपि न बद्धास्तिष्ठन्तीति। शौरिरिति लौकिकोत्कर्षः। गर्वो बलं च **हतम्**। ततो लीलया व्यकर्षत्। यथा मृतप्राया बलीवर्दा आकृष्यन्ते भारपीडिताः। बलीवर्दत्वमपि तेषां निवृत्तमिति दृष्टान्तेनाह बालो दारुमयानिति। ते हि विपरीता अपि पतिता **बालेनाकृष्यन्ते**, तथा विशीर्णावयवा **आकृष्टा** इति तेषां गर्वोऽपि निराकृतः, राज्ञश्च ॥ ४६ ॥ ततो राजकन्यां दत्तवानित्याह विस्मित इति। आदौ विस्मितः, पश्चान्मुदितः, बन्धनवशीकरणनिःसत्त्वकरणान्यत्याश्चर्याणीति **विस्मयः**। एतदर्थमेव प्रतिज्ञेति कार्ये सम्पन्ने **मुदितः**। **राजेति** महता सम्भ्रमेण तस्मै दुहितरं ददौ याचनदानप्रतिग्रहाः तस्यां जाता इति वक्तुं भगवानपि तां प्रतिगृहीतवानित्याह **तां प्रत्यगृह्णा**दिति। भक्तावेव भगवानेवं करोतीति **भगवानित्युक्तम्**। धर्मपरोऽयं भगवच्छब्दः। तदेव ज्ञापयति **विधिव**दिति। वैदिकधर्मास्तत्र योजितवान्। तदा लौकिका **आसुरा वा धर्मास्तां** न स्पृशन्तीति सर्वथा स्वाभिप्रेतं सम्पादयति। तस्यां **तथाकरणे** हेतुमाह **सदृशी**मिति। स्वभावतः सदृशी। आगन्तुकदोषाभावाय तथाकरणम्। तस्यां दोषदूरीकरणार्थं तथाकरणे लौकिकत्वं भगवति स्यात्, अत आह **प्रभुरिति**। स्वयं स्वत एव समर्थः ॥ ४७ ॥ तद्द्वारा सर्वासामेव स्त्रीणां हितं कृतवानित्याह **राजपत्न्य** इति। आदौ राज्ञोपि ताः धर्मैकहेतवो जाताः। ततो दुहितरि सापत्न्याभावः। तद्द्वारा स्वस्य सम्बन्धः भगवत्युत्कर्षबुद्धिः स्नेहश्चेति कृष्णमुद्धारकं प्रियमान्तरमीप्सितम्, पतिं बाह्यम्। ऐहिके बाह्याभ्यन्तरसुखदाता। पश्चादपि सायुज्यदः। अतः स्वस्यापि तद्द्वारा तथा भविष्यतीति परमानन्दं लेभिरे। सन्तोष एव तासां निस्तारे नियामकः। आन्तरमुक्त्वा तासां बाह्यमाह **जातश्च परमोत्सव** इति। महानेव सम्भ्रमस्ताभिः कृत इत्यर्थः ॥ ४८ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः। एवं समयं तस्य पणमाकर्ण्य श्रुत्वा परिकरं कट्युपरि पीतांबरं बद्धात्मानं सप्तधा कृत्वा प्रभुः समर्थो लीलयैव तान् वृषभान् न्यगृह्णात् ॥ ४५ ॥ हतो दर्पो गर्वो येषां हतमोजो वीर्यं शक्तिर्येषां तान् बद्धा दामभिः रज्जुभिर्बद्धान् तान् लीलया कर्षितवान् दारुमयान् काष्ठपुत्तिकान् बाल इव 'वत्सवृषासुरवदेतेषामप्यसुरांशत्वाद्धननं युक्तम्' इति भट्टाः ॥ ४६ ॥ ततः कर्मणो विस्मितो राजा प्रीतः कृष्णाय सुतां पुत्रीं ददौ आत्मनः सदृशीं तां विधिवत् प्रभुर्भगवान् परिणिन्ये ॥ ४७ ॥ दुहितुः पुत्र्याः प्रियं कृष्णं पतिं लब्ध्वा राज्ञः पत्न्यः स्त्रियः श्वश्र्वाश्च परमानंदं लेभिरे प्रापुः परमोत्सवो महान्महो जात ॥ ४८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

व्याख्याने। **स्वस्य हीनता**मिति। मे इत्येकवचनेन स्वस्य हीनता बोधितेत्यर्थः। एवमित्यत्र। **न तिष्ठन्तीति**। भगवत इति शेषः। यावत्तत्कार्यं स्थापयित्वा स्वस्मिन् उपसंहरति, अतो न तिष्ठन्ति। लोकानां तु पुत्रादयो जाताः स्वस्मिन्नुपसंहृता न भवन्तीत्यर्थः। **तां प्रत्यगृह्णा**दित्यत्र। **धर्मपरोय**मिति। ऐश्वर्यादिगणनायां धर्मस्येत्यपि क्वचित्पाठः। तत्पर इत्यर्थः। तथाच धर्मप्रकारेण विधिवदुपयेमे इत्यर्थः। **राजपत्न्य** इत्यत्र। **ततो** दुहितरीति। यज्ञसंयोगे एव नकारङीष्विधानेन पत्नीशब्दसिद्ध्या धर्महेतुत्वाद्धेतोः सपत्नीदुहितरि सपत्नमातॄणां सापत्न्याभाव इत्यर्थः। **स्नेहश्चेति**। एतावत्सर्वं चकारेण सूचितमित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवंभूतं समयं प्रतिज्ञामाकर्ण्य श्रुत्वा परिकरं उत्तरीयादिकं कट्यां बद्ध्वा प्रभुः सर्वथा सर्वं कर्तुं समर्थः श्रीकृष्णो लीलयैव सङ्कल्पमात्रेणैवात्मानं सप्तधा कृत्वा तान्यगृह्णात् वशीकृतवान् विद्धनासिकान् कृत्वा बबन्धेत्यर्थः ॥ ४५ ॥ हतं ओजो बलं येषां तान् अत एव भग्नो दर्पो गर्वो येषां तान् शौरिः कृष्णो दामभिर्बद्ध्वा बद्धांस्तान् लीलया अनायासेनैव व्यकर्षत्। तत्र दृष्टान्तमाह—बाल इति ॥ ४६ ॥ ततो वृषनिग्रहात् विस्मितः आश्चर्ययुक्तः प्रीतः प्रसन्नचित्तश्च राजा स्वसुतां कृष्णाय ददौ, तां च सदृशीं स्वानुरूपां सत्यां भगवान् विधिवत् प्रत्यगृह्णात् उपयेमे। ननु 'रुक्मिण्यादीनां सत्त्वे तां किमर्थं उपयेमे' तत्राह—प्रभुरिति। स्वतन्त्रस्याभिप्रायं को वेद ? ॥ ४७ ॥ राजपत्न्यश्च दुहितुः प्रियं पतिं लब्ध्वा परमानन्दं लेभिरे, तत्र तदा महानुत्सवश्च जातः ॥ ४८ ॥

अन्वितार्थप्रकाशिका

एवमिति ॥ एवंभूतं समयं प्रतिज्ञामाकर्ण्य श्रुत्वा परिकरम् उत्तरीयादिकं कट्यां वटवा प्रभुः श्रीकृष्ण आत्मानं सप्तधा कृत्वा प्रकाश्य तान् लीलयाऽनायासेनैव न्यगृह्णात् वशीकृतवान् विद्धनासिकान्कृत्वा बबन्ध । वह्वीनां योषितां पूर्ण एवाहं संभोगयोग्यः स्यामिति सत्यां प्रत्यसापत्न्यदर्शनार्थमात्मनः सप्तधाकरणम् । सप्तधा प्रकाशनं च सत्यां प्रत्येवेति अकृत्वा इति च्छेदो वा सप्तधा अकृत्वाऽपीत्यर्थः ॥ ४५ ॥ वद्ध्वेति ॥ हृतम् ओजो बलं येषां तान् अत एव भग्नो दर्पो गर्वो येषां तान् शौरिः कृष्णो दामभिर्बद्ध्वा बालो दारुमयान् यथा बध्नाति तथा बद्धांस्तान् लीलया अनायासेनैव व्यकर्षत् । ये च प्रलम्बखरेत्यत्र सप्तोक्षमुक्तिरुक्ता सा त्वेतत्प्रभावाद्देहान्ते बोध्या ॥ ४६ ॥ तत इति ॥ ततो वृषनिग्रहात् विस्मितः प्रीतश्च राजा स्वसुतां कृष्णाय ददौ । तां च सदृशीं स्वानुरूपां सत्यां प्रभुर्भगवान् विधिवत् प्रत्यगृह्णात् उपयेमे ॥ ४७ ॥ राजेति ॥ राजपत्न्यश्च कृष्णं दुहितुः प्रियं पतिं लब्ध्वा परमानन्दं लेभिरे । तत्र तदा परमो महानुत्सवश्च जातः ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तमेव परमोत्सवमाह सखेति वासांसि च स्रजश्च शोभनाश्च ता वासः स्रजश्च ताभिरलंकृता बभूव ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति । प्रभुः श्रीकृष्णः, एवमेवंविधं, समयं नृपकृतं भाषाबन्धं आकर्ण्य, परिकरं प्रगाढगात्रिकाविधानं, बद्ध्वा आत्मानं सप्तधा कृत्वा, तान् वृषान्, लीलयैव, न्यगृह्णात् । बह्वीनां योषितां सम्पूर्ण एवाहं संभोगयोग्यः स्यामिति सत्यां प्रत्यसापत्न्यदर्शनार्थमात्मनः सप्तधारणं, तत् केवलं सत्ययेक्षितं, अन्यथाऽन्येषामद्भुतता न संभवेदिति भावः ॥ ४५ ॥ बद्धेति । शौरिः श्रीकृष्णः, भग्नदर्पान् हतौजसः, तान् दामभिः बद्ध्वा, बालः बद्धान् दारुमयान्, यथा तथा, लीलया व्यकर्षत् ॥ ४६ ॥ तत इति । ततो वृषग्रहणात्, प्रीतः पूर्वं प्रीतः सन्नपि ततः सुतरां प्रीत इत्यर्थः । विस्मितः सप्तोक्षणां क्षणमात्रेणानायासतो बन्धनदर्शनेन विस्मयं प्राप्तश्च, राजा कृष्णाय, सुतां ददौ । प्रभुः श्रीकृष्णः भगवान् सदृशीं स्वानुरूपां तां राजकन्यां, विधिवद्यथाविधि, प्रत्यगृह्णात् उपयेमे इत्यर्थः ॥ ४७ ॥ राजपत्न्य इति । राजपत्न्यश्च नृपाङ्गना अपि, दुहितुः प्रियं पतिं कृष्णं लब्ध्वा, परं आनन्दं, लेभिरे प्रापुः । तदा, परमोत्सवश्च, जातः ॥ ४८ ॥

कृष्णप्रिया

यदुवीर भगवान श्रीकृष्ण ने महाराज कोसलेश का प्रण सुनकर अविलम्ब से कमर में फेंट कस ली और नाथ ने सात नर स्वरूप धारण कर लिया और रमत रमत में ही सातों बैलों को नाथ लिया ॥४५॥ भगवान के नाथने से बैलों का बल एवं गर्व चूर्ण हो गया और उनका बल-पौरुष भी नष्ट हो गया । पुनः पुरुषोत्तम श्रीकृष्ण बैलों का रस्सी से बांधकर इस प्रकार खींचने लगे, कि जैसे खेलते समय एक छोटा सा बालक काठ के बैलों को खींच रहा है ॥ ४६ ॥ कोसलेश नग्नजित राजा को अत्यन्त आश्चर्य हुआ । महाराजा ने प्रसन्नता पुरःसर यदुवर भगवान् श्रीकृष्ण को अपनी पुत्री सत्या का सम्प्रदान कर दिया पुनः पूर्णपुरुषोत्तम भगवान् श्रीकृष्ण ने भी अपने सर्वथा सानुरूप पत्नी सत्या जी का विधिपूर्वक पाणिग्रहण किया॥४७॥ महाराज कोसलेश की महारानियों ने देखा कि अपनी सुकन्या सत्या को उसके अतिशय प्रिय द्वारिकाधीश भगवान् श्रीकृष्ण ही पतिरूप प्राप्त हो गये है । सब रानियों को अत्यन्त हर्ष हुआ और कोसलपुरी में चारों ओर उत्साह से उत्सव मनाने लगे ॥ ४८ ॥

शङ्खभेर्यानका नेदुर्गीतवाद्यद्विजाशिषः । नरा नार्यश्च[1] मुदिताः सुवासःस्रगलंकृताः ॥ ४९ ॥
[2]दशधेनुसहस्राणि पारिबर्हमदाद् विभुः । युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससाम् ॥ ५० ॥
नवनागसहस्राणि नागाच्छतगुणान् रथान् । रथाच्छतगुणानश्वानश्वाच्छतगुणान् नरान् ॥ ५१ ॥
दम्पती रथमारोप्य महत्या सेनया वृतौ । स्नेहप्रक्लिन्नहृदयो यापयामास कोसलः ॥ ५२ ॥

कर्दमक्षमा

अन्वयः—शङ्खभेर्यानकाः, नेदुः, गीतवाद्यद्विजाशिषः, "जाताः", मुदिताः, नराः, च, नार्यः, सुवासःस्रगलंकृताः, जाताः ॥ ४९ ॥ विभुः, दशधेनुसहस्राणि, पारिबर्हम्, अदात्, निष्कग्रीवसुवाससाम्, त्रिसाहस्रम्, अदात् ॥५०॥ नवनागसहस्राणि, नागात्, शतगुणान्, रथान्, रथात्, शतगुणान्, अश्वान्, अश्वात्, शतगुणान्, नरान्, अदात् ॥५१॥ स्नेहप्रक्लिन्नहृदयः, कोसलः, महत्या, सेनया, वृतौ, दम्पती, रथम्, आरोप्य, यापयामास ॥ ५२ ॥

---

१. नार्यः प्र-श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुक. । २. शतं धेनुसहस्राणां-च. पु. टि. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

निष्कग्रीवाश्च ताः सुवाससश्च तासां युवतीनां च दासीनाम् ॥ ५० ॥ नागान्नागेभ्यः शतगुणान्नवलक्षाणि । रथाद्रथेभ्यः शतगुणान्नकोटीः । अश्वादश्वेभ्यः शतगुणान्नवपद्मानि ॥ ५१-५२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गीतादयः–अभूवन्निति शेषः ॥४९॥ युवतिपदमत्र दासीपरम् ॥५०॥ नागादित्यादित्रिक एकत्वं सामान्याभिप्रायम् ॥५१॥ रथमारोप्य रथे स्थापयित्वा ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तमेवाह—शङ्खेति । शङ्खादीनां यथापूर्वं महोत्सवापेक्षया मङ्गलत्वे श्रैष्ठ्यं वाद्यं गीतानुसारि तालादिप्रमुदिता इति नृत्यमपि ज्ञेयं सुशोभनानि वासांसि स्रजश्च येषां ते च कुण्डलाद्यलङ्कृताश्च बभूवुः ॥ ४९ ॥ दशेति युग्मकम् । धेनवः नवप्रसूता गावः अतः सवत्सा ज्ञेयाः विभुस्तत्तद्दाने समर्थः धेनुदानस्यादावुक्तिः सर्वदानश्रैष्ठ्यात् श्रीकृष्णस्याधिकतोषहेतुत्वाद्वा नागादिभ्यो युवतीनां प्रागुक्तिर्दास्यादिना तासां तेभ्यः श्रैष्ठ्यात् ॥ ५० ॥ तथा नागादिभ्यो यथोत्तरमधिकेभ्यस्तासां नागतृतीयांशेनाल्पत्वाद् निष्काणामेवोक्तिः प्राधान्यात् नागादित्यादेर्जातावेकत्वं नरान् दासपदात्यादीन् ॥ ५१ ॥ आवृतौ कृत्वेत्यर्थः । यतः स्नेहेन प्रकर्षेण बहिरप्यश्रुधारापातनादिना क्लिन्नमार्द्रं हृदयं यस्य सः ॥ ५२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तमेवाह—शङ्खेति । नेदुः स्वयमेव शङ्खादीनां यथापूर्व्वं महोत्सवापेक्षया मंगलत्वे श्रैष्ठ्यम्, वाद्यगीतानुसारि-तालादिप्रकर्षेण मुदिता इति नृत्यमपि ज्ञेयम् । सुशोभनैर्वासोभिः स्रग्भिश्चालंकृताः, अन्येषां भूषणानामपेक्ष्यत्वेऽपि वासःस्रजामेवोक्तिः, महोत्सवे तत्तद्विशेषापेक्षया । यद्वा, सुशोभनानि वासांसि स्रजश्च येषां ते च ते कुण्डलाद्यलंकृताश्च ॥ ४९ ॥ धेनवो नवप्रसूता गावः, अतः सवत्सास्ता ज्ञेयाः । विभुस्तत्तद्दाने समर्थः । धेनुदानस्यादावुक्तिः सर्व्वदानतः श्रैष्ठ्यात्, कृष्णस्याधिकतोषहेतुत्वाद्वा । नागादिभ्यो युवतीनां प्रागुक्तिर्दास्यादिना तासां तेभ्यः श्रैष्ठ्यात्; तथा नागादिभ्यो यथोत्तरमधिकेभ्यस्तासां नागतृतीयांशत्वेनाल्पत्वाच्च । अन्याभरणानामपेक्ष्यत्वेऽपि केवलं निष्कस्योक्तिः स्त्रीभूषणेषु तस्य प्राधान्यात्; अतोऽन्यान्यपि ज्ञेयान्येव । नागादित्यादिर्जातावेकत्वम्, नरान् दासपदात्यादीन् । आवृत्तौ कृत्वेत्यर्थः; यतः स्नेहेन प्रकर्षेण बहिरप्यश्रुधारापातादिना क्लिन्नमार्द्रं हृदयं यस्य सः ॥ ५०–५२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उत्सवमेव प्रपञ्चयति—शङ्खेति । नेदुर्दध्वनुः तथा गीतयुक्तानि वाद्यानि द्विजानामाशिषश्चाशीर्वादाः नेदुः शोभनैर्वासोभिः स्रग्भिश्चालङ्कृता आसन्निति शेषः ॥ ४९ ॥ विभुर्नग्नजित् दशधेनूनां सहस्राणि पारिबर्हमुपायनमदात् निष्कग्रीवाः सुवाससश्च तासां युवतीनां दासीनां त्रिसाहस्रमदादित्यनुषङ्गः ॥ ५० ॥ नागानां गजानां नवसहस्राणि नागात् नागेभ्यः शतगुणं शतगुणान्नवलक्षाणि रथान् रथात् रथेभ्यः शतगुणान्नवकोटिपरिमितानश्वान्नश्वेभ्यः शतगुणान्नवपद्मसंख्याकान् नरान् भृत्यांश्च प्रादादित्यनुषङ्गः ॥ ५१ ॥ दम्पतीति । दम्पती नग्नजिद्भार्ये तदा रथमारोप्य सभार्यं कृष्णमिति शेषः । स्नेहेन प्रक्लिन्नमार्द्रं हृदयं ययोस्तौ यापयामासतुः गमयामासतुः पुरं द्वारकां "यापयामास कोसलः" इति पाठे स्नेहप्रक्लिन्नहृदय इति पाठ्यं दम्पती नाग्नजितीश्रीकृष्णौ इति योज्यम् ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृतापदरत्नावली

गीतवाद्यानि द्विजाशिषश्च तथा प्रमुदिता अभूवन्निति शेषः ॥ ४९ ॥ पारिबर्हं स्त्रीधननिकायम् ॥ ५०–५७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

नागात् नागेभ्यः शतगुणान् नवलक्षाणि, रथात् रथेभ्यः शतगुणान् नवकोटीः, अश्वात् अश्वेभ्यः शतगुणान् नव पद्मानि ॥ ५१–५२ ॥

गूढार्थदीपिनी

गीतादयः आशीर्वादाश्च अभूवन्निति क्रियाशेषः ॥ ४९ ॥ पारिबर्हं कन्यादेयद्रव्यम् दहेज इति । युक्तीनां दासीनाम् । निष्कमुरोभूषणम् ॥ ५० ॥ शतगुणान् नवलक्षाणि । पुनः शतगुणान् नवकोटीः । पुनः नवपद्मानि । प्रक्लिन्नमार्द्रम् ॥ ५२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विभुरसङ्कुचितज्ञानः निष्कग्रीवाश्च ताः सुवाससश्च तासां त्रिसाहस्रं नागात् नागेभ्यः शतगुणान् नवलक्षाणि रथात् रथेभ्यः, शतगुणान् नवकोटीः अश्वात् अश्वेभ्यः शतगुणान् नवपद्मानि ॥ ४०-५३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

परिकरं बद्ध्वा दुकूलादिकमेतदनुकूलं यथा स्यात्तथा बद्ध्वा आत्मानं सप्तधा सप्ताकारं कृत्वा तान् लीलयैव न्यगृह्णात् । नन्वेक एव सप्तवृषान्बध्नीयादिति कृतवता प्रतिज्ञां राज्ञा सप्तधाऽऽत्मानं विधाय बद्धुं धावतो माधवस्य कथं न निषेधः कृत इति चेत् । न, शक्तिमात्रव्यक्त्यर्थे प्रतिश्रवे मम योगमहिमाऽपि महान्प्रदर्शितोऽयमेको महालाभ इति तूष्णीकोऽतितुष्टश्चात्मजामार्पयदित्युपपत्तेः । तत्क्षण एकस्यैवानेकीभवने तदेकतानयाच्च । अत्र लोकानां सप्तधाऽदर्शयदिति सप्तधेत्युक्तिर्हरिवंशे परमतत्वापेक्षया तदनुक्तिरेक एवेत्युक्तिरिति न विरोधः । तथा हि हरिवंशे । ततः कृष्णो रुषा मुष्टिं सन्निवर्त्य जघान च । क्रमेण मुष्ट्या तान्सर्वान्हत्वैको दैत्यगोपतीनिति । ते च कालनेमिसुताः । तदुक्तं तत्रैव बलं प्रति कृष्णवाक्ये । कालनेमिसुता आर्य मां हन्तुमिह सङ्गता इति । भागवते न कथाक्रमनियम इति नीलादिविवाहादेः कंसहिंसादिप्राक्तनतावेदकेन हरिवंशेन च न विरोध इति मन्तव्यम् । इयं नीला सुदक्षिणात्मजा चैकीभूते इति नाष्टकातिरेकः । उक्तं चाचार्यैः । ततो नीलां तस्य सुतां च लेभे पूर्वं नीला गोपकन्याऽपि याऽऽसीत् । सा देहस्याप्राविशत्पूर्वमेषा यस्मादेका द्विविधा सम्प्रजातेति ॥४९॥ कैरप्यबद्धान्बद्ध्वा बालो दारुमयान्काष्ठमयान्यथा तथा लीलया व्यचकर्षच्चकर्ष ॥ ५० ॥ सदृशीं स्वपत्नीत्वयोग्याम् ॥ ५१ ॥ प्रियमिष्टं परमानन्दं लेभिरे । उलूखले परमोत्सवो गोधूमकणिकीमुहूर्तोत्सवो जातः । लभिरं स्यादुलूखमित्यभिधानम् । तत्कुट्टनस्य स्त्रीमात्रकार्यत्वाद्राजपत्न्य इति तन्मात्रग्रहो युक्तः ॥ ५२ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अन्येषामपि सर्वेषां तत्प्रसङ्गात् कृतार्थतामाह शङ्खेति । शङ्खादयो वाद्यानि त्रिविधानि, गीतादीनि शब्दात्मकानि त्रिविधानि । षडेते सत्त्वादिसत्त्वान्ताः । गीतानकयो राजसत्वम् । **नरा नार्यश्चेति** । चकारादनुक्तसर्व सङ्ग्रहः । **मुदिता** इत्यान्तरम् । वस्त्रादयो बाह्यास्त्रयः । अलङ्काराः सहजा इति चकाराज्ज्ञेयाः ॥ ४९ ॥ राज्ञः सन्तोषेण प्रायेण सर्वस्वदानमाह **दशधेन्विति द्वाभ्याम्** । धर्मकामसाधका एकेन । अर्थसाधकाश्चतुरङ्गसेनारूपा अपरेण । अनभिप्रेतत्वान्न ग्रहीष्यतीत्याशङ्क्याह **पारिबर्हमिति** । कन्याग्रहणे तद्ग्रहणमावश्यकम् । विभुरिति प्रतिष्ठार्थं यथाकथञ्चिद्दानं वारितम् । धर्मो हि सहस्रदक्षिणः प्राकृतवैकृतभेदेन दशविधो भवति । कामस्त्रिविध इति सहस्रशो युवतयो दत्ताः । नायिकाभेदेन गुणभेदेन च त्रैविध्यम् । नियतालङ्कृता रसालम्बना इति । सहस्रशो गजाः सर्वावान्तरजातियुक्ता दत्ताः । नवैव नागभेदा भद्रादयः । रथादयः उत्तरोत्तरं शतगुणाः । पूर्वबुद्धेस्तस्योत्तरा बुद्धिः शतगुणं गृह्णाति ॥ ५०-५१ ॥ ततः स्नेहात्तत्र स्थापनं वारयितुं प्रस्थापनमाह **दम्पती** इति । स्थापने धर्मपत्न्यौ कुण्ठिते भवतः । रथं स्वकीयम् । गमनेऽपि राजप्रयत्न एव सर्वोऽपि सूचितः । महत्या सेनया च । तेनैव वृतौ स्वयं गमनमनुचितमिति । स्नेहेन हृदयक्लेदोऽपि गमने प्रतिबन्धकः । अनेन भक्तकर्तव्यं सर्वं कृतवानित्युक्तम् । कोसलदेशाधिपतिरिति स्वयं तत्र भक्तिकरणार्थं स्वयं स्थित इत्यप्युक्तम् ॥ ५२ ॥

श्रीसुबोधिनी-सारः

तथाहि शंखादयो नेदुः गीतानि वाद्यानि द्विजानां ब्राह्मणानामाशिषो जयजयेत्याशीर्वादा जाताः सुष्ठु वासोभिः स्रग्भिरलंकृता मंडिता नरा नार्यः पुरुषाः स्त्रियः प्रमुदिता बभूवुः ॥ ४९ ॥ धेनूनां सहस्राणि दश अयुतं पारिबर्हं विवाहदेयमदात् विभुः समर्थो राजा निष्को मणिर्ग्रीवायां यासां ताः सुष्ठु वासांसि यासां ताश्च ताश्चेति तासां युवतीनां तरुणीनां दासीनां त्रिसाहस्रमदादिति सर्वत्र संबध्यते ॥ ५० ॥ नागानां हस्तिनां सहस्राणि नवोदात् हस्तितः शतगुणान् ९००००० नवलक्षं रथान् रथतो शतगुणान् ९०००००००० नवकोटीनश्वान् अश्वतः शतगुणान् ९०००००००००० वृंदसंख्यामितान्नरान् पत्तीनदात् ॥ ५१ ॥ महत्या सेनया वृतौ युक्तौ दंपती वरवधूरूपौ रथमारोप्य स्नेहेन प्रेम्णा प्रविलन्नं द्रवीभूतं हृदयं चित्तं यस्य स कोसलो राजा प्रेषयामास ॥ ५२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उत्सवमेव प्रपञ्चयति—शङ्खेति । शङ्खादयः, तथा गीतयुक्तानि वाद्यानि द्विजानामाशिषः आशीर्वादाश्च नेदुर्दध्वनुः । तथा प्रमुदिता नरा नार्यश्च शोभनैर्वासोभिः स्रग्भिश्चालङ्कृता आसन्निति शेषः ॥ ४९ ॥ तदा च विभुः दाने समर्थः नग्नजिद्राजा पारिबर्हमुपायनं कृष्णायादात् । तद्दर्शयति–धेनूनां दशसहस्राणि । निष्कः ग्रीवायां यासां सुष्ठु वासो यासां तासां युवतीनां

दासीनां त्रिसाहस्रमिति। अदादिति सर्वत्र सम्बन्धः ॥५०॥ नागा गजानां नवसहस्राणि। नागात् नागेभ्यः शतगुणान् नवलक्षाणि रथान्। रथात् रथेभ्यः शतगुणान् नवकोटिअश्वान्। अश्वादश्वेभ्यः शतगुणान् नवपद्मानि नरान् भृत्यान् ॥ ५१ ॥ स्नेहेन प्रक्लिन्नं आर्द्रं हृदयं यस्य स कौशलो नग्नजित् महत्या सेनयावृतौ दम्पती सत्याकृष्णौ रथमारोप्य यापयामास गमयामास ॥ ५२ ॥

अन्वितार्थप्रकाशिका

शङ्खेति ॥ शङ्खभेर्यानकाः नेदुर्दध्वनुः तथा गीतयुक्तानि वाद्यानि द्विजानामाशिषः आशीर्वादाश्च बभूवुः तथा प्रमुदिता नरा नार्यश्च शोभनैर्वासोभिः स्रग्भिश्चालंकृता आसन्निति शेषः ॥ ४९ ॥ दशेति ॥ विभुः नग्नजिद्राजा धेनूनां दश सहस्राणि तथा निष्कः ग्रीवायां यासां निष्कमात्रोक्तिः प्राधान्यात् उपलक्षणमिदं सर्वभूषणानाम्। सुष्ठु वासो यासां तासां युवतीनां दासीनां त्रिसाहस्रं पारिबर्हमदात् ॥ ५० ॥ नवेति ॥ नागानां गजानां नव सहस्राणि नागात् नागेभ्यः। जातावेकत्वम् एवमग्रेऽपि। शतगुणान् नव लक्षाणि रथान् रथात् रथेभ्यः शतगुणान् नवकोटिमितान् अश्वान् अश्वादश्वेभ्यः शतगुणान् नव पद्मानि नरान् भृत्यान् पारिबर्हमदादित्यनुषङ्गः ॥ ५१ ॥ दम्पती इति ॥ स्नेहेन प्रक्लिन्नम् आर्द्रं हृदयं यस्य स कौसलो नग्नजित् महत्या सेनया वृतौ दम्पती सत्याकृष्णौ रथमारोप्य यापयामास गमयामास ॥ ५२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निष्कग्रीवाश्चताः सुवाससश्च तासां युवतीनां दासीनां त्रिसाहस्रं च अदात् ॥ ४९ ॥ नवसंख्याकानि नागानां सहस्राणि। नागाद्धस्तिसमूहात् शतगुणान् रथान् ददौ ॥ ५० ॥ स्नेहेन विक्लिन्नमार्द्रं हृदयं यस्य सः कौसलः कोसलदेशाधिपतिः ॥ ५१ ॥ पुरा यदुभिर्यादवैः सत्यभिर्गोवृषैश्च भग्नवीर्या अपि सुदुर्मर्षाः तदुत्कर्षमसहमानाः रुरुधुः ॥ ५२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उत्सवमेव प्रपञ्चयति ॥ शङ्खेति। तदा शङ्खभेर्यानकाः, गीतयुक्तानि वाद्यानि च द्विजानामाशिष आशीर्वादाश्च, नेदुर्दध्वनुः। स्त्रियो गीतान्यगायन्, वादका वाद्यान्यवादयन्, द्विजा आशीर्वादमन्त्रान्पेठुरित्यर्थः। सुवासःवेगलंकृताः, नराः नार्यश्च, प्रमुदिताः, आसन्निति शेषः ॥ ४९ ॥ दशेति ॥ विभुर्नग्नजिन्नृपः, दश धेनुसहस्राणि दशसहस्रधेन्वात्कमित्यर्थः। निष्कग्रीवसुवाससां युवतीनां दासीनां, त्रिसाहस्रं त्रिसहस्रात्मकं च, पारिलर्हं अदात् ॥५०॥ नवेति ॥ नव नागसहस्राणि, गजानां नव सहस्राणीत्यर्थः। नागात् नागेभ्य इत्यर्थः। शतगुणान् नव लक्षाणीत्यर्थः। रथान्, रथाद्रथेभ्य इत्यर्थः। शतगुणान् नवकोटीपरिमितानित्यर्थः। अश्वान्, अश्वादश्वेभ्य इत्यर्थः। शतगुणान् नवपद्मपरिमितानित्यर्थः। नरान् भृत्यांश्च, प्रादादिति शेषः ॥ ५१ ॥ दंपती इति ॥ कौसलो नग्नजिन्नृपः, स्नेहप्रक्लिन्नहृदयः सन्, महत्या सेनया, वृतौ दंपती, रथं आरोप्य, यापयामास ॥ ५२ ॥

कृष्णप्रिया

कोसलपुरी में सर्वत्र शङ्ख भेरी दुन्दुभि नगाड़े बजने लगे। चारों ओर मङ्गलगीत गाने लगे फिर विविध प्रकार का गाना-बजाना होने लगा। विप्रवर आशीर्वाद प्रदान करने लगे। उत्तम प्रकार के वस्त्राभूषण, पुष्पमाला; शृङ्गार, हार आदि से समलङ्कृत होकर कोसल नगर के नर-नारी-वृन्द आनन्द मनाने लगे ॥ ४९ ॥ कन्यादान के पश्चात् करियावरे महाराज कोसलेश ने दश हजार गौएँ और वस्त्राभूषण, कण्ठाभूषण रत्नालङ्कारादि से सुशोभित एवं विभूषित तीन हजार नव-युवती दासियाँ दहेज में दी। दासियों के साथ नव हजार हाथी, नव लक्ष रथ, नव कोटि अश्व, एवं नव अरब सेवक भी दहेज में दिये ॥ ५०-५१ ॥ पुनः महाराज नग्नजितजी ने पुत्री सत्या को और जामाता श्रीकृष्ण को रथ में बैठाकर महती सेना के साथ प्रस्थान मान दिया। महाराज कोसलेश का हृदय पुत्री वात्सल्य स्नेह के उद्रेक से अत्यंत आर्द्र हो रहा था ॥ ५२ ॥

[1]श्रुत्वैतद्रुरुधुर्भूपा नयन्तं पथि कन्यकाम्। भग्नवीर्याः सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ॥ ५३ ॥
तानस्यतः शरव्रातान्[2] बन्धुप्रियकृदर्जुनः। गाण्डीवी कालयामास सिंहः क्षुद्रमृगानिव ॥ ५४ ॥
पारिबर्हमुपागृह्य[3] द्वारकामेत्य सत्यया। रेमे यदूनामृषभो भगवान् देवकीसुतः ॥ ५५ ॥
श्रुतकीर्तेः सुतां भद्रामुपयेमे पितृष्वसुः। कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ॥ ५६ ॥

---

१. न स्तः-विज.। २. व्रातै-प्रा. षा.। ३. मुपानीय-वीर; च संगृह्य-विज.।

कर्दमक्षमा

अन्वयः—पुराः, यदुभिः, गोवृषैः, भग्नवीर्याः, सुदुर्मर्षाः, भूपाः, कन्यकाम्, नयन्तम्, एतत्, श्रुत्वा, पथि रुरुधुः ॥५३॥ बन्धुप्रियकृत्, गाण्डीवी, अर्जुनः, शरव्रातान्, अस्यतः, तान्, सिंहः, क्षुद्रमृगान्, इव, कालयामास ॥ ५४ ॥ यदूनाम्, ऋषभः, भगवान् देवकीसुतः, पारिबर्हम्, उपागृह्य, द्वारिकाम्, एत्य, सत्यया, रेमे ॥ ५५ ॥ कृष्णः संतर्नादिभिः, भ्रातृभिः, दत्ताम्, पितृस्वसुः, श्रुतकीर्तेः, सुताम्, कैकेयीम्, भद्राम्, उपयेमे ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यदुभिर्गोवृषैश्च भग्नवीर्या अपि सुदुर्मर्षा असहनशीला रुरुधुः ॥५३॥ अस्यतः क्षिपतः प्रयुंजानानिति यावत् ॥५४–५५॥ सप्तमं विवाहमाह—श्रुतकीर्तेरिति । श्रुतकीर्तिर्नाम या पितृष्वसा तस्याः सुतां भद्रां नाम कैकेयीं तद्देशजाम् ॥ ५६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतद्वृषबंधनपुरःसरं सत्योद्वहनम् । कन्यकां नयंतं प्राप्नुवंतम् । 'यदेभिर्गोवृषैः' इति पाठे तु यत् ये एभिर्नग्नजिद्गृहस्थैः । सुदुर्मर्षा असहन्तः ॥ रुरुधुरिति–विधिवद्विवाहे विलंबत्वाद्देशांतरान्नृपा आगता इति ॥ ५३ ॥ तान् रुन्धाननृपान् । गाण्डीवीत्यनेनार्जुनसाहित्यं दर्शितं कौशलपुरगमने । तत्रार्जुनस्यागमनं विवाहदर्शनार्थं निगूढसमाह्वानेनैव ज्ञेयम् । स्पष्टम् ॥५४॥ उपागृह्य सर्वमविकलमानीय ॥ ५५ ॥ पितृष्वसा वसुदेवभगिनी । तद्देशजां केकयदेशोद्भूताम् ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रुत्वा स्वस्वदेशात् इति विधिवद्विवाहे युक्तनक्षत्राद्यपक्षेया श्रीभगवतस्तत्रेषद्विलम्बोऽभूदित्युक्तं पथि रुरुधुः यतः सुदुर्मर्षाः अत्यन्तासहिष्णवः वीर्य्यं दर्पः तदापि यदुभिर्भग्नवीर्य्या बभूवुः । ते के ? तत्राह—ये पुरा गोवृषैर्भग्नवीर्य्याः बभूवुरिति ॥ ५३ ॥ तथापि तानस्यत इत्यादि कालयामास लीलयैव व्यद्रावयत् तत्रार्जुनस्य वरयात्रागमनं विवाहदर्शनार्थं निगूढसमाह्वानेन स्वयमेव स्नेहेन वा मध्ये मध्ये द्वारकागमनात् ॥ ५४ ॥ उप सामीप्येन आ सम्यक् गृहीत्वा तेषां विद्रावणे तु स्वयं न प्रवृत्त इति ॥ ५५ ॥ श्रुत्वेति स्पष्टम् ॥ ५६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रुत्वा स्वस्वदेशे, इति विधिवद्विवाहे युक्तनक्षत्राद्यपेक्षया श्रीभगवतस्तत्रेषद्विलम्बोऽभूदिति ज्ञेयम् । पथि रुरुधुः, यतः सुदुर्म्मर्षा अत्यन्तासहिष्णवः, वीर्य्यं दर्पः, कालयामास लीलयैव व्यद्रावयत्, यतो गाण्डीवी महासुप्रसिद्धधनुष्मान् । किमर्थम् ? बन्धोः श्रीकृष्णस्य प्रियकृत् सन् प्रियं कर्त्तुमित्यर्थः । तदानीं तत्रार्ज्जुनस्यागमनं पथि रोधनार्थदुष्टभूपवर्गोद्यमश्रवणादिति ज्ञेयम् ५३–५४ ॥ उप दाक्षिण्येन आ सम्यग् गृहीत्वा, इति पारिवर्हस्यापि भूपेभ्यो निर्व्विघ्नता सूचिता । यदुनामृषभस्तैः सेव्यमानः, देवक्याः सुत इति च तया लाल्यमानः सन्निति भावः । यतो भगवान् विचित्रक्रीडार्थमवतीर्णः साक्षात्परमेश्वरः, यद्वा, सर्व्वैश्वर्य्यपूर्णः सन् रेमे ॥ ५५ ॥ कृष्ण इति तत्तच्चित्ताकर्षणाभिप्रायेण, अतएव दत्ताम् ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

श्रुत्वेति । एतद्भगवतो यानं श्रुत्वा यदृभिर्गोवृषैश्च सप्तभिर्भग्नं वीर्यं येषां तथाभूता अपि दुर्मर्षाः कन्यकां नाग्नजितीं नयन्तं श्रीकृष्णं पथि रुरुधुः ॥ ५३ ॥ तानिति । शरसमूहानस्यतः क्षिपतः प्रयुञ्जानानिति यावत् तान् भूपान् बन्धूनां कृष्णादीनां प्रीतिकृदर्जुनः गाण्डीवी धृतगाण्डीवधनुष्कः कालयामास पलाययाञ्चक्रे यथा क्षुद्रमृगान् सिंहः कालयति तद्वत् ॥ ५४ ॥ पारिबर्हमिति । पारिबर्हं श्वशुरदत्तमिति शेषः । एत्यागत्य सत्यया नाग्नजित्या सह ॥ ५५ ॥ अथ सप्तमं विवाहमाह–श्रुतकीर्तेरिति । सन्तर्दन आदिर्येषां तैर्भ्रातृभिर्दत्तां कैकयस्यापत्यभूतां स्वपितृष्वसुः श्रुतकीर्तेः सुतां भद्रां नाम कन्याम् उपयेमे ॥ ५६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तदा यदुभिर्भग्नवीर्य्याः बभूवुः पुरा तु गोवृषैरपि ॥ ५३ ॥ कालयामास व्यद्रावयत् ॥ ५४–५५ ॥ सप्तमं विवाहमाहश्रुतकीर्तेरिति ॥ ५६–५७ ॥

गूढार्थदीपिनी

सुदुर्मर्षा असहमानाः ॥ ५३ ॥ वाणसमूहान् अस्यतः क्षिपतस्तान् गाण्डीवी अर्जुनः कालयामास पलायितान् चकार ॥ ५४–५५ ॥ सप्तममाह–कैकेयीं केकयदेशोद्भवाम् ॥ ५६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अस्यतः क्षिपतः ॥ ५४-५५ ॥ श्रुतकीर्तेः पितृष्वसुः सुतां भद्रां नामतः कैकेयीं तद्देशजाम् ॥ ५६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शङ्खभेर्यानका नेदुः । आशिषो नराः नार्यश्च सुवाससः स्रगलङ्कृता बभूवुरिति शेषः ॥ ५३ ॥ धेनुसहस्राणि दशनिकग्रीवाश्च ताः सुवाससश्च तासां युवतीनां त्रिसाहस्रम् ॥ ५४ ॥ नांगानां गजानां सहस्राणि नव । नागान्नागसमूहात् । तस्य समूह इत्यण् । शताधिकगुणोपेतान् नवलक्षसङ्ख्यानिति यावत् । रथात्सङ्घाच्छतगुणान्नवकोटिसंख्यान् । अश्वाच्छतगुणान् नवपद्मसङ्ख्यान् नरान्पत्तिमिति यावत् । विभुरिति तद्वितरणसमर्थतां बोधयति । पारिबर्हमदाद्दत्तवान् ॥ ५५ ॥ महत्या स्वसेनामेलनात् ॥ ५६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवतः सामर्थ्यं प्रतिपादयितुं वृषभजये लोकप्रसिद्धिर्न जातेति तैर्भग्नावयवाः सम्भूय तं ग्रहीतुं यत्नं कृतवन्त इत्याह श्रुत्वैतदिति । एतद्भगवच्चरित्रम् । **भूपा** इति तेषां स्वदेश उक्तः । भगवतस्तु नापि स्वदेशः, नापि श्वशुरदेशः । सर्वतो रोधे वैयग्र्यं भवतीति । कन्यकामेव नयतीत्यन्यथा श्रुत्वा किञ्चिद्धर्मबुद्धयोऽपि समागताः । अतो राजबाहुल्यं भवति । **पथी**ति विशकलितता सेनायाः । तेषामागमने हेतुं वैरमाह **यदुभिर्भग्नवीर्या** इति । कन्यार्थं क्लिष्टा अपीत्याह **गोवृषैः पुरा भग्नवीर्या** इति । तथाप्यागमने हेतुः **सुदुर्मर्षा** इति । सुष्ठु दुष्टो मर्षो येषामिति । दुरुपसर्गेण दुष्टः क्रोधो भवति ॥ ५३ ॥ न केवलं रोधनमात्रम्, किन्तु मारणार्थमपि प्रवृत्ता इत्याह **तानस्यत** इति । भक्तौ भगवदानुगुण्येऽपि भक्तानुगुण्यमप्यपेक्ष्यत इति वक्तुं भगवत्सेवकेनैव ते सर्वे हता इत्याह **अर्जुन** इति । अलौकिकं भगवता न कर्तव्यम्, ऐश्वर्यं च भक्तिमार्गे स्थापनीयम् । अर्जुनोऽपि न भगवत्प्रेरणया युद्धं कृतवान्, किन्तु बन्धूनां भगवद्भक्तानां वसुदेवादीनां प्रियकृत्, यथा भक्तौ भक्तापेक्षा भवति, बान्धवाश्च स्वोपकारं मन्येरन् । गाण्डीवादीनामुदासीनापकारोपकारौ निरूपितौ । बन्धुनामत्रोपकारो निरूप्यते । एतत्सूचयति **गाण्डीवी**ति । **कालयामासे**ति । कालवत् जग्रासेति सूचितम् । नात्यन्तं क्लेशोऽपि तस्य जात इति ज्ञापयितुं दृष्टान्तमाह **सिंहः क्षुद्रमृगा**निति ॥ ५४ ॥ उपसंहरति **पारिबर्ह**मिति । सोपस्करां तां गृहीत्वा **विधितो**ऽपि समानीय परमां रतिं तस्यामुत्पादितवान् । भगवान् नान्यत्र रमते, यथा भक्तौ रमत इति सर्वाभ्यो विशेष उक्तः । द्वारकागमनमर्थादुक्तम् । **यदूनामृषभ** इति तया गार्हस्थ्यं सम्यक्सम्पादितमिति लक्ष्यते । तत्र सर्वोपपत्तिसिद्ध्यर्थं **भगवा**निति । एवं रमणे भक्तकृपैव हेतुरित्याह **देवकीसुत** इति ॥ ५५ ॥ कीर्तिं श्रियं च विधितो गृहीत्वा अष्टैश्वर्ययुक्तः सर्वा एव गृहीतवानित्याह **त्रिभिः श्रुतकीर्ते**रित्यादिभिः । श्रुतकीर्तिरपि पितृभगिनी । कैकयदेशाधिपतेः पुत्री । ज्ञानानन्तरशक्तिर्भ्रातृनिषिद्धेति भक्त्यनन्तरापि कीर्तिस्तथा भविष्यतीति तन्निषेधार्थमाह **भ्रातृभिर्दत्ता**मिति । **कृष्ण** इत्यसामग्रीमप्येनां गृहीतवान् । संतर्दनोऽतिप्रसिद्ध इति । श्रुतेन कीर्तिः श्रुता वा कीर्तिर्यस्या इति कीर्तिकारणता युक्ता । तर्दनं शब्द इति भवत्येव प्रसिद्धिः । कैकयदेशः पाश्चात्यः ॥ ५६ ॥

श्रीसुबोधिनीसारः

एतत् वृत्तांतं श्रुत्वा पथि मार्गे कन्यकां नयंतं श्रीपुरीं प्रापयन्तं श्रीकृष्णं भूपा रुरुधुः सुदुर्मर्षा अतिक्रुद्धास्ते पूर्वं गोवृषैरिदानीं यदुभिर्भग्नवीर्या हतबला अभवन् ॥ ५३ ॥ शराणां व्रातान् समूहान् अस्यतः क्षिपतस्तान् राज्ञः बन्धोः सख्युः प्रियकृत् गांडीवी गांडीवधन्वार्जुनः परिद्रावयांबभूव सिंहः क्षुद्रान्मृगान् इव ॥ ५४ ॥ पारिबर्हं सर्वमुररीकृत्य द्वारकामेत्य यदूनामृषभो भगवान् देवकीपुत्रः सत्यया सह रेमे ॥ ५५ ॥ पितृष्वसुः श्रुतकीर्त्तेः सुतां भद्रां नाम्नीं कैकेयीं केककदेशजां तद्भ्रातृभिः सन्तर्दनादिभिर्दत्तां कृष्ण उपयेमे उवाह ॥ ५६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तानस्यत इत्यत्र । **उदासीनोपकारापकारा**विति । उदासीनस्य मयस्योपकारोऽग्नेश्चापकार इत्यर्थः । **श्रुतकीर्ते**रित्यस्याभासे । **कीर्तिं श्रियं** चेति । ज्ञानवैराग्यधर्मकीर्तिश्रीरूपा एताः क्रमेण । भौमाहृता ऐश्वर्यरूपा इत्याशयेनाहुः **अष्टैश्वर्ययुक्त** इति । रुक्मिण्यादयोऽष्टौ महिष्योऽष्टविधैश्वर्यरूपा इत्यप्यनेन सूचितम् । **व्याख्याने** । **ज्ञानानन्तरे**ति । मित्रविन्दाभ्रातृभ्यां विन्दानुविन्दाभ्यां निषिद्धेत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतत् कृष्णस्य प्रयाणं श्रुत्वा भूपाः कन्यकां सत्यां नयन्तं कृष्णं पथि मार्गे रुरुधुः । तेषां मूर्खत्वं सूचयन्नाह—यदुभिर्गोवृषैश्च पुरा भग्नवीर्याः पराजिता इति । तथापि तन्निरोधे हेतुमाह—सुदुर्मर्षा इति । पराजयं कन्यानयनं च असहमानाः

इत्यर्थः ॥ ५३ ॥ शरसमूहानस्यतः क्षिपतः प्रयुञ्जानान् तान् भूपान् बन्धोः कृष्णस्य प्रियं करोतीति तथा गाण्डीवी धृतगाण्डीवोऽर्जुनः कालयामास पलायितान् कृतवान् इत्यर्थः । तत्र दृष्टान्तमाह—क्षुद्रमृगान् सिंह इवेति ॥ ५४ ॥ अथ भगवान् कृष्णः श्वशुरदत्त पारिबर्हं उपागृह्य द्वारकामेत्य आगत्य सत्यया सह रेमे इत्यन्वयः । 'भगवान्' इत्यनेन सामर्थ्यम्, 'यदूनामृषभ' इत्यनेन यादवानाम्, 'देवकीसुत' इत्यनेन देवकीवसुदेवादीनाम्, तद्विवाहविहारादिभिः परमानन्दो जात सूचितम् ॥ ५५ ॥ अथ सप्तमविवाहमाह—श्रुतकीर्तेरिति । स्वपितृष्वसुः श्रतकीर्तेः सुतां कैकेयीं कैकयदेशोद्भवां सन्तर्दन आदिर्येषां तैर्भ्रातृभिर्दत्तां भद्रां नाम कन्यां कृष्ण उपयेमे इत्यन्वयः ॥ ५६ ॥

अन्वितार्थप्रकाशिका

श्रुत्वेति । यदुभिर्गोवृषैश्च पुरा भग्नवीर्या अपि सुदुर्मर्षाः पराजयं कन्यानयनं चासहमानाः भूपाः कृष्णस्य प्रयाणं श्रुत्वा कन्यकां सत्यां नयन्तं कृष्णं पथि मार्गे रुरुधुः ॥ ५३ ॥ तानिति । शरसमूहानस्यतः क्षिपतः प्रयुञ्जानान् तान् भूपान् बन्धोः कृष्णस्य प्रियं करोतीति तथा गाण्डीवो धृतगाण्डीवोऽर्जुनः क्षुद्रमृगान् सिंह इव कालयामास पलायितान् कृतवान् ॥ ५४ ॥ पारिबर्हमिति । अथ यदूनामृषभः देवकीसुतः भगवान् कृष्णः श्वशुरदत्तं पारिबर्हम् उपागृह्य द्वारकामेत्य आगत्य सत्यया सह रेमे ॥ ५५ ॥ सप्तमं विवाहमाह—श्रुतकीर्तेरिति । स्वपितृष्वसुः श्रुतकीर्तेः सुतां कैकेयीं केकयदेशोद्भवां सन्तर्दन आदिर्येषां तैर्भ्रातृभिर्दत्तां भद्रां नाम कन्यां कृष्ण उपयेमे ॥ ५६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

श्रुत्वेति ॥ पुरा यदुभिः, गोवृषैश्च भग्नवीर्याः सुदुर्मर्षाः सुतरां दुष्टामर्षयुक्ताः, भूपाः नृपाः, एतदुक्तविधं कृष्णप्रयाणं श्रुत्वा, कन्यकां नयन्तं कृष्णं, पथि मार्गे, रुरुधुः ॥ ५३ ॥ तानिति ॥ बन्धुप्रियकृत् कृष्णादिबन्धुजनानां प्रियकारकः, गाण्डीवी गाण्डीवधनुर्धरः, अर्जुनः, शरव्रातान् बाणसमूहान्, अस्यतः क्षिपतः, तान् राज्ञः, सिंहः क्षुद्रमृगान् इव, कालयामास पलायांचक्रे ॥ ५४ ॥ पारिबर्हेति ॥ यदूनां ऋषभः श्रेष्ठः, देवकीसुतः, भगवान् पारिबर्हं उपागृह्य, द्वारकां एत्य, सत्यया रेमे ॥ ५५ ॥ अथ सप्तमं विवाहमाह । श्रुतकीर्त्तेरिति ॥ कैकेयीं केकयस्यापत्यभूतां, श्रुतकीर्त्तेः श्रुतकीर्त्तिसंज्ञायाः पितृष्वसुः, भद्रां भद्राख्यां सुतां, संतर्द्दनादिभिः भ्रातृभिः, दत्तां सतीमेव, उपयेमे ॥ ५६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शरव्रातान् अस्यतो निक्षिपतः राजन्यान् । कालयामास पलायितान् चकार ॥ ५३–५४ ॥ अथ सप्तममुद्वाहमाह श्रुतकीर्त्तेरिति । श्रुतकीर्त्तेस्तत्संज्ञायाः पितृश्वसुः सुतां केकयदेशोत्पन्नां शिबिपुत्रीत्वात् शैब्यासंज्ञां संतर्द्दनादिभिर्भ्रातृभिः दत्तां भद्रां ॥ ५५ ॥ अथ हरेरष्टमविवाहमाह । सुतामिति मद्राधिपतेर्मद्रदेशाधिपस्य लक्षणैः पतिव्रताचिह्नैः ॥ ५६ ॥

कृष्णप्रिया

राजन् ! सत्या–स्वयंवर के काल में इन बैलों ने और रुक्मिणी आदि के स्वयंवर आदि प्रसङ्गों में यदुवंशियों ने पूर्व में अनेक वीर राजाओं का वीर्य-सामर्थ्य मिट्टी में मिला दिया था । जब पराजित एवं लज्जित उन राजाओं ने कृष्णविजय की सुनी तब उन राजाओं से भगवान् श्रीकृष्ण की यह विजय सहन न हुई । पराजित इन राजाओं ने अर्धाङ्गना सत्याजी को लेकर प्रस्थान-मार्ग में द्वारिकाधीश भगवान् को घेर लिया ॥ ५३ ॥ एकत्रित होकर सब नृपति लोग अत्यन्त त्वरा से भगवान्, सत्या एवं अर्जुन की साथ-सेना पर शरवृष्टि करने लगे । उस अवसर पर पाण्डवकुल विभूषण श्रीअर्जुनजी अपने प्रियतमनाथ एवं सुहृद् भगवान् श्रीकृष्ण का प्रिय करने के लिए गाण्डीव धनुष्य सजकर के जैसे वीर केसरी बड़े-छोटे पशुओं को भगा दे, वैसे ही उन नरपतियों को पीट-पीट कर सबको भगा दिया ॥५४॥ राजाओं को परास्त करने के पश्चात् यदुकुलनाथ देवकीनन्दन भगवान् श्रीकृष्ण विपुल प्रमाण में करियावर और नाग्नजिवी श्रीसत्याजी के साथ श्रीद्वारिकापुरी में पधारे पुनः श्रीद्वारिका में निवास कर गृहस्थाश्रम के धर्मों का सेवन करने लगे ॥ ५५ ॥ महाराज परीक्षित् ! केकय देश के महाराज से भगवान की फुआ श्रीश्रुतकीर्तिजी व्याही गई थी । उनकी भद्रा नामकी कन्या थी । सन्तर्दन आदि भद्राजी के भाई थे । सबने मिलकर भद्राजी को स्वयं सन्मुख होकर भगवान् श्रीकृष्णको समर्पण किया और कृपासिन्धु भगवान् ने भद्रा का पाणिग्रहण किया ॥५६॥

सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युताम् । स्वयंवरे जहारैकः स सुपर्णः सुधामिव ॥ ५७ ॥
अन्याश्चैवंविधा भार्याः कृष्णस्यासन् सहस्रशः । भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे[1] दशमस्कन्धे अष्टमहिष्युद्वाहो[2] [3]नामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

---

[1] पारमहंस्यां संहितायां–प्रा. पा. । [2] उत्तरार्द्धे–प्रा. पा. । [3] द्विषष्टितमो ।

कर्दमक्षमा

अन्वयः—लक्षणैः, युताम्, च, मद्राधिपतेः, सुताम्, लक्ष्मणाम्, सुपर्णः, सुधाम्, इव, एकः, सः, स्वयंवरे, जहार॥५७॥ कृष्णस्य, एवंविधाः, भार्याः, भौमम्, हत्वा, च, तत्, निरोधात्, आहृताः, चारुदर्शनाः, सहस्रशः, भार्याः आसन् ॥ ५८ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायामुत्तरार्द्धेऽष्टपञ्चाशत्तमोऽध्याये अन्वयाः समाप्ताः ॥ ५८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अष्टम विवाहमाह । सुतां चेति । एक एव स श्रीकृष्णो लक्ष्मणां जहार ॥ ५७ ॥ तस्य निरोधोंतःपुरं तस्मात् ॥ ५८ ॥

भैष्मी जांबवती भामा सत्या भद्रा च लक्ष्मणा ॥ कालिंदी मित्रविंदा चेत्यष्टौ पट्टमहास्त्रियः ॥ १ ॥

इति श्रीमद्भागवते दशमस्कंधे उत्तरार्द्धे श्रीध० टीकांयामष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मद्रो विपाशैरावत्यंतर्गतो देशविशेषस्तदधिपतेर्बृहत्सेनस्य । लक्षणैः कन्योचितचिह्नैर्युताम् । लक्षणानि रुक्मिण्युद्वाह उक्तानि ॥ ५७ निरोधाद् अदृश्यस्थानादंतः पुरस्थकारागारात् 'निरोधो नाशरोधयोः' इति मेदिनी भौमं भूम्याः सुतं श्रीवराहात्तस्यां जातम् । तदुक्तं भूम्यैव विष्णुं प्रति विष्णुपुराणे–"यदाहमुद्धृता नाथ त्वया सूकरमूर्तिना । त्वत्स्पर्शसंभवः पुत्रस्तदायं मय्यजायत ।। इति महाप्रभावोऽसूचि तस्य ॥ ५८ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धेऽष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मद्राधिपतेर्बृहत्सेनाख्यस्य लक्षणैः शुभोदयचिह्नैः स्वयम्वर इति मद्राधिपतिना स्वसुताया मतज्ञानेन श्रीकृष्णस्य प्राप्त्यर्थं दुर्भेद्यतममत्स्ययन्त्ररचनादिकं कृतं पश्चात्तस्मिन् श्रीकृष्णेनैव विज्ञापिते दुष्टा राजानस्तदिदमूचुः राजन् भवत एव मतमिदं न तु कन्याया इति ततश्च राज्ञा कन्याया दाष्ट्र्यं जानता स्वयम्वरोऽपि कारित इति कुरुक्षेत्रयात्राकथानुसारेण ज्ञेयम् ॥ ५७ ॥ भौमं श्रीवराहतो भूम्यां जातं तथा च श्रीविष्णुपुराणे श्रीभगवन्तं प्रति तस्या एवोक्तौ—

"यदाहमुद्धृता नाथ त्वया सूकरमूर्त्तिना । त्वत्स्पर्शसम्भवः पुत्रस्तदायं मय्यजायत ॥"

इति महाप्रभावः सूचितः ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मद्राधिपतेर्वृहत्सेनाख्यस्य सत्स्त्रीलक्षणैः स्वयम्बर इति मद्राधिपतिना राजव्यवहारानुसारेण प्राक् स्वयम्वरे कृते पश्चात् स्वसुताया मतज्ञानेन श्रीकृष्णस्य प्राप्तार्थं दुर्भेद्यतममत्स्ययन्त्रे रचिते तेन च तस्मिन् विद्ध्वा निपातितेऽथ तया वृते तस्मिन् स्पर्द्धया रोद्धुमागतान् नृपान् पथि जित्वा असावेक एव तां जहार, द्वारकामानयदित्यग्रे वक्ष्यमाणायां कुरुक्षेत्रयात्रायामस्या एवोक्त्यनुसारेण ज्ञेयम् । अन्यथा पूर्व्वापरविरोधापत्तिः । सुपर्ण इति दृष्टान्तश्च विपक्षवर्गजयेनैकाकितया हरणे ॥ ५७ ॥ एवम्विधाः श्रीलक्ष्मणासदृशसल्लक्षणैर्युताः, तदेवोद्दिशति—चार्विति । यद्वा, यथा श्रीरुक्मिण्याद्याः श्रीलक्ष्मणान्ता राजकन्यास्तादृश्यो देवादिकन्याश्चेत्यर्थः । तच्च निरन्तराध्यावान्ते तेषां व्याख्यातो व्यक्तं भावि । भौमं श्रीवराहतो भूम्यां जातम् । तथा च श्रीविष्णुपुराणे (५।३१।२३) श्रीभगवन्तं प्रति तस्या एवोक्तौ—'यदाहमुद्धृता नाथ त्वया शूकरमूर्त्तिना । त्वत्स्पर्शसम्भवः पुत्रस्तदायं मय्यजायत ॥' इति । इति महाप्रभावः सूचितः । स एवाग्रे व्यक्तो भावी ॥ ८८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यामष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अष्टमं विवाहमाह—सुतामिति । मद्रदेशाधिपतेः सुतां लक्षणैः युक्तां लक्ष्मणां नाम कन्यां स्वयम्वरे असहाय एव सन् जहार यथा सुपर्णो गरुत्मान् सुधां तद्वत् ॥ ५७ ॥ इत्थं प्रधानपत्नीरुक्त्वा अथान्या अप्याह—अन्याश्चेति ! कास्ता इत्यत आह–भौमं नरकासुरं हत्वा तन्निरोधादन्तःपुरादानीताः ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भौमं हत्वा तस्य भौमस्य निरोधात् तत्कारागृहादाहृता आनीताः ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

(श्रीविजयध्वजतीर्थरीत्या द्विषष्टितमः) ॥ ६१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सहस्रशः सहस्राणि षोडशसहस्राणीत्यर्थः ॥ ५८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । अष्टपञ्चाशत्तमोऽयं दशमेऽजनि सङ्गतः ॥ ५८ ॥

गूढार्थदीपिनी

मद्राधिपतेर्बृहत्सेनस्य । मद्रो अवन्त्यन्तर्गतो देशविशेषः ॥ ५७ ॥ तस्य भौमस्य निरौधान् अन्तःपुरात् आहृता आनीताः ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यामष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सः श्रीकृष्णः ॥ ५७ ॥ तस्य भौमस्य निरोधात् पुरात् ॥ ५८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सत्यया नग्नजित्या नीलया ॥ ५७ ॥ सप्तमं विवाहमाह ॥ श्रुतिकीर्तेरिति । पितृष्वसुः श्रुतिकीर्तेरित्येकाधिकरण्यम् । सुतां नाम्ना भद्रां कैकेयीं देशनाम तज्जां सन्तर्दनादिभ्रातृभिर्दत्तामुपयेमे परिणिनाय । भ्रातृभिर्दत्तामित्यनेन सन्नपि पिताऽजागलस्तनायित इति वा प्रकारान्तरं वा ध्वनयति ॥ ५८ ॥ अष्टमं विवाहमाह ॥ सुतां चेति । मद्राधिपतेः । अन्वर्थं च नामेत्याह ॥ लक्षणैर्युतामिति । ततश्चाशीद्यजन्तत्वानन्तरं टाप्रत्यय इति सूचितं भवति । सुधामिवैक एव स्वयंवरे जहार । ससुपर्ण इत्यविश्लेषभाषणेन सुपर्णमात्रेण सहितः ससुपर्णो वाहनमात्रसहित इति ध्वनयति । एक इत्युक्तिस्तु सेनाद्यभावपरेति ज्ञेयम् ॥ ५९ ॥ सहस्रशो वक्ष्यमाणषोडशसङ्ख्याः । निरोधशब्दोऽत्ररोधपर्याय इति । राजाऽन्तःपुरादिति केचित् । तन्निरोधात् । निरुध्यन्ते जना अत्रेति निरोधः काराधाम तस्मान्निरोधात् । तन्निरोधं परिहृत्याहृता भार्या आसन् ॥ ६० ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे द्विषष्टितमोऽध्यायः ॥ १०-६२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

श्रीरूपाया लक्ष्मणाया विवाहमाह **सुता**मिति । मद्रदेशोऽपि कैकयनिकटे । श्रीवत्सरूपेति लक्ष्मणा । अस्या विवाहे लक्षणवत्त्वं प्रयोजकमिति **लक्षणैर्युता**मित्युक्तम् । राधावेधसनिमित्तस्वयंवरे जहार । वरणानन्तरं अग्रिमवाक्यानुरोधेनावगम्यते । **एक** इति भगवत्प्रतापः । यतः **स** भगवान् **कृष्णः** । अप्रतिघातनयने दृष्टान्तः **सुपर्णः सुधामिवे**ति । इन्द्रादिजये च । एतामग्रे विस्तरेण वक्ष्यति । सर्वा एकतो विस्तरोपाख्याना इयमेकत इति ज्ञापयितुं वाचनिके विवाहे विस्तरेणोक्तम् ॥ ५७ ॥ साधनरूपा उक्त्वा साधनाधीनत्वात् साध्यस्य ताः संक्षेपेणाह **अन्या** इति । चकारादेताभ्य उत्कृष्टापकृष्टाश्च संगृहीताः । नरकासुरं हत्वा तदन्तःपुरात्संगृहीताः । तेनैवैकत्र मेलिता भगवता आहृता इति निदर्शनमात्रम् । तासामानयने चारुदर्शनं ज्ञानं सौन्दर्यं च यासामिति हेतुरुक्तः । विजातीया गोपिकादयः असमानाः । उत्कृष्टास्त्वप्सरसः स्वयमागताः । सर्वा एव भार्या आसन् । स्पष्टमेव सर्वासां मुक्तिर्दत्तेति निरूपितम् । एवं भगवतो निरोधः ॥ ५८ ॥

इति श्रीमद्भा० दशमस्कन्धे उत्तरार्द्धे सुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां
दशमस्कन्धविवरणे उत्तरार्धे नवमोऽध्यायः ॥ ९ ॥

श्रीसुबोधिनीसारः

भद्राधिपतेः सुतां पुत्रीं लक्षणैर्युतां लक्ष्मणां स्वयंवरे एकः स कृष्णो जहार सुपर्णो गरुडः सुधाममृतमिव ॥ ५७ ॥ इत्यष्टौ मुख्या विवाहा उक्ताः । एवं प्रकारा अन्या भार्याः सहस्रशोऽनंताः कृष्णस्यासन् भौमासुरं हत्वा तस्य निरोधादंतःपुरादाहृता आनीताः चारुदर्शनाः सुरूपाः ॥ ५८ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायामष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

अन्याश्चैवमित्यस्याभासे । **साधनरूपा** इति । विद्यारूपा इत्यर्थः । **ता** इति । साध्यरूपाः सर्वा एवेत्यर्थः ।

इति नवमाध्यायव्याख्या ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथाष्टमं विवाहमाह—सुतामिति । मद्रदेशाधिपतेः सुतां शुभलक्षणैर्युतां लक्ष्मणां स्वयंवरे एक असहायवान् स कृष्णः जहार । तत्र दृष्टान्तमाह—सुपर्ण इति । यथेन्द्रादींस्तिरस्कृत्य गरुडः सुधामनायासेन हृतवान् तथाऽन्यान् राज्ञस्तिरस्कृत्य तां हृतवानित्यर्थः ॥ ५७ ॥ एवं प्रधानपत्नीनां परिग्रहं निरूप्य अथ अन्यासामपि परिग्रहमाह–अन्याश्चेति । 'ताश्च कुतः प्राप्ता' इत्यपेक्षायामाह—भौममिति । नरकासुरं हत्वा तस्य निरोधादन्तःपुरात्तेनाहृता आनीताः । तत्र हेतुं परिग्रहयोग्यतां चाह–चारु सुन्दरं दर्शनं शरीरं यासां ता इति ॥ ५८ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने । कालिन्दीमित्रविन्दादि-विवाहानां निरूपकः ॥
अष्टपञ्चाशत्तमो वा अध्यायो विवृतिं गतः ॥ ३ ॥

अन्वितार्थप्रकाशिका

अष्टमं विवाहमाह—सुतामिति ॥ मद्रदेशाधिपतेः सुतां शुभलक्षणैर्युतां लक्ष्मणां स्वयंवरे एकः असहायः स कृष्णः सुपर्णः सुधामिव जहार । मत्स्ययन्त्रे श्रीकृष्णेन विद्धेऽपि दुष्टा राजानो मद्राधिपमूचुः–भवत एव मतमिदन्नतु कन्यायाः । ततो राज्ञा स्वयंवरोऽपि कारितः इति कल्प्यम् । तेन कुरुक्षेत्रकथाया न विरोधः ॥ ५७ ॥ अन्या इति ॥ एवंविधाः चारुदर्शनाः अन्याश्च कृष्णस्य सहस्रशः षोडशसहस्राणीत्यर्थः । भार्या आसन् ताश्च । भौमं हत्वा तस्य भौमस्य निरोधात् अन्तःपुरात् निरोधनस्थानाद्वा आहृताः भौमश्चायं श्रीवराहतो भूम्यां जातः । "यदाहमुद्धृता नाथ त्वया सूकरमूर्तिना । तत्स्पर्शसंभवः पुत्रस्तदाऽयं मय्यजायत ॥" इति विष्णुपुराणोक्तेः । भैष्मी जाम्बवती भामा सत्या भद्रा च लक्ष्मणा ॥ कालिन्दी मित्रविन्दा चेत्यष्टौ पट्टमहास्त्रियः ॥ ५८ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमेऽष्टपञ्चाशत्तमे व्यधात् ॥
इति श्रीभागवते दशमस्कन्धे उत्तरार्द्धेऽन्वितार्थप्रकाशिकायामष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्य भौमस्य निरोधो राजगृहं तस्मादाहृता आनीताः ॥ ५७ ॥

भैष्मी भामा जांबवती भद्रा सत्या च लक्ष्मणा । कालिंदी मित्रविंदा चेत्यष्टौ मुख्या हरेःस्त्रियः ॥ १ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने महिष्युद्वाहो नामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथाष्टमं विवाहमाह ॥ सुतामिति । एक एकाक्येव, स कृष्णः, लक्षणैः शोभनलक्ष्मभिः युतां मद्राधिपतेर्मद्रदेशाधिनाथस्य, सुतां पुत्रीं लक्ष्मणां, सुपर्णः गरुडः, सुधाममृतं इव, स्वयंवरे जहार स्वयंवरहेतुकमत्स्यवेधेक्षार्थागतप्रतिरोधकराजसमूहात् हृतवानित्यर्थः ॥ ५७ ॥ इत्थं प्रधानपत्नीरुक्त्वाऽथान्या अप्याह । अन्याश्चेति । भौमं नरकासुरं हत्वा, तन्निरोधात् तदीयान्तःपुरात्, आहृताः आनीताः, चारुदर्शनाः अन्याश्च, कृष्णस्य एवं विधाः सहस्रशः भार्याः, आसन् ॥ ५८ ;।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्द्धे अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

कृष्णप्रिया

राजन् ! श्रीलक्ष्मणा जी भद्रदेश के नरेश की कन्या थी । सन्नारियों के शुभलक्षणों से लक्ष्मणा सम्पन्न थी । श्रीपक्षीराज गरुड जी स्वयं लोक से अकेले ही जैसे अमृत सुधा का अपहरण कर लाये थे वैसे ही भगवान श्रीकृष्ण भी स्वयंवर में मत्स्यवेध करके अकेले ही लक्ष्मणा जी का हरण कर लाये थे ॥ ५७ ॥ राजन् परीक्षित् ! भगवान् श्रीकृष्णचन्द्रजी की इसी प्रकार षोडश सहस्र अर्धाङ्गनायें थीं । उन दिव्य देवियों को, कुमारिकाओं को भौमासुर का समर में वध करके कारागृह से मुक्त कर ले आये थे ॥ ५८ ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे निरोधलीलायां विवाह प्रकरणेऽष्टपञ्चाशत्तमाध्यायस्य भाषान्तर निरूपणं संपूर्णम् ॥ ५८ ॥

❖ ❖

[1] अथैकोनषष्टितमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४५	२६	१७	२	४	१८१४	२१	५१	१८८६	५८॥।	६

राजोवाच

यथा हतो भगवता भौमो [2] येन च ताः स्त्रियः । निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः ॥ १ ॥[3]

श्रीशुक उवाच

इन्द्रेण[4] हृतच्छत्रेण हृतकुण्डलबन्धुना ।
हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितम् । [5]सभार्यो गरुडारूढः प्राग्ज्यौतिषपुरं ययौ ॥ २ ॥
[6]गिरिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमम्[7] । मुरपाशायुतैर्घोरैर्दृढैः सर्वत आवृतम् ॥ ३ ॥
गदया निर्बिभेदाद्रीन् शस्त्रदुर्गाणि सायकैः । चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना ॥ ४ ॥

कर्दमक्षमा

अन्वयः—राजा उवाच—शुकाचार्य ! भगवता, यथा, भौमः, हतः, येन, च, यथा, ताः, स्त्रियः निरुद्धाः, च, भगवता, मोचिताः शार्ङ्गधन्वनः, एतत्, विक्रमम्, आचक्ष्व ॥ १ ॥ श्रीशुक उवाच—हृतामराद्रिस्थानेन हृतकुण्डलबन्धुना, हृतच्छत्रेण, इन्द्रेण, ज्ञापितः, सभार्यः, गरुडारूढः, "कृष्णः" प्राग्ज्योतिषपुरुषपु, ययौ ॥ २ ॥ गिरिदुर्गैः, शस्त्रदुर्ग जलाग्न्यनिलदुर्गमम्, दृढैः, घोरैः मुरपाशायुतः, सर्वतः, आवृतम्, प्राग्ज्योतिषपुरम्, ययौ ॥ ३ ॥ गदाधरः, "भगवान् कृष्णः" गदया, अद्रीन्, निर्बिभेद, सायकैः, शस्त्रदुर्गाणि, निर्विभेद, चक्रेण, अग्निम्, जलम्, वायुम्, निर्बिभेद, तथा, असिना, मुरपाशान् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ऊनषष्टितमे भौमं हत्वा तेनाहृता हरिः ॥ कन्याः सहस्रशः प्राप पारिजातं दिवोऽहरत् ॥ १ ॥
परिणीय ततस्ताभिस्तन्मनोरथपूरणैः ॥ आत्मारामोऽप्यसौ रेमे तद्गृहेसु गृहस्थवत् ॥ २ ॥

येन ताः स्त्रियो निरुद्धाः स भौमः चकाराद्येन कारणेन हतस्तदाचक्ष्वेति ॥ १ ॥ इंद्रेण भौमविचेष्टितं ज्ञापितः सन् प्राग्ज्योतिषपुरं भौमनगरं ययावित्यन्वयः । किंभूतेन । हृतं छत्रं यस्य तेन लोकपालप्रधानत्वादिंद्रस्य । वरुणच्छत्रहरणेऽपि तस्यैव मानभंग इति तथोक्तम् हृते कुंडले यस्याः सा अदितिर्बन्धुर्माता यस्य तेन हृतममराद्रौ स्थानं मणिपर्वतलक्षणं यस्य तेन सत्यभामाया गृहे भगवन्तामिंद्र आगत्य विज्ञापितवांस्तदा तस्याः कौतुकाय तया भार्यया सह ययाविति यद्वा त्वदनुज्ञयैव त्वत्पुत्रं हनिष्यामीति इतिहासोक्तं भूम्यै वरं दत्तं सत्यं कर्तुं सत्यभामाया भूम्यंशत्वात्तया सह ययौ । यद्वा नारदानीतपारिजातैककुसुमे रुक्मिण्यै दत्ते सति कुपितां सत्यभामां सांत्वयता तुभ्यं पारिजातमेव दास्यामीति श्रीकृष्णेन प्रतिश्रुतामिति हरिवंशे

---

[1] अथ त्रिषष्ठीतमो–विज. । [2] नीता यथा–विज. ।

[3] द्वारवत्यां महाभागे निवसत्यच्युते नृप । दीनेनोद्विग्नचित्तेन समागम्य त्रिविष्टपम् ॥

[4] हृतच्छत्रेण शक्रेण–विज. । [5] इन्द्रमाश्वास्य गोविन्दः सुसंपूज्य विसृज्य च ॥–विज. ।

[6] हिमाद्रौ तुङ्गशिखरे जलान्यनिलदुर्गमम् । गिरिदुर्गैः शस्त्रदुर्गैः मुरपाशायुतैर्वृतम् ॥ १ ॥
ससम्प्राप्तभटैर्गुप्तं दानवेन्द्रपुरं महत् । गदया निर्बिभेदाद्रि प्राकारकारसंस्थितम् ॥ २ ॥
सन्निर्भिद्य प्रविशान्तः शस्त्रदुर्गाणि सायकैः । चकर्त गौरवं पाशं चक्रेणामन्दमच्छिनत् ॥ ३ ॥
क्षुरमालां तथा घोरां निचकर्तासिना हरिः । वायव्यास्त्रेण सलिलं वारुणास्त्रेण पावकम् ॥ ४ ॥
हरिर्निमिषमात्रेण नाशयामास भारत । शङ्खनादेन तीव्रेण मनांसि च मनस्विनाम् ॥ ५ ॥
३–४–५ श्लोकस्थाने एते पञ्च–विज. ।

[7] मैः–प्रा. पा. ।

प्रसिद्धं तदर्थं तां नीतवानिति ॥ २ ॥ गरुडेन याने कारणम् । गिरिदुर्गैरित्यादि । तैरुपलक्षितम् । जलाग्न्यनिलैश्च सर्वतो वर्तमानैर्दुर्गमम् ॥ ३-४५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ऊनषष्टितमे एकोनषष्टितमे । तेन भौमेन । पारिजातं देववृक्षम् (१) । ततः परिणयनोत्तरम् । असौ कृष्णः । इह वतिना गृहासक्त्यभावो ध्वनितः (२) । "यदाहमुद्धृता नाथ त्वया सूकरमूर्तिना । त्वत्स्पर्शसंभवः पुत्रस्तदाऽयं मय्यजायत ॥ सोऽयं त्वयैव दत्तोऽयं त्वयैव विनिपातितः ।" इति विष्णुपुराणोक्तेः स विष्णोरपि पुत्र एव, दैत्यत्वं तु तस्य निषिद्धचारमूर्तिसूकरोद्धृतत्वाद्धरेरिच्छयैव । कुकर्मकर्तृत्वात्तस्य हननं युक्तमेव, सुकर्मकर्तुः प्रह्लादस्यारिपुत्रत्वेपि रक्षणं च दंडदातुरुचितमेवेति द्योतनायास्याध्यायस्यारम्भ इति ध्येयम् । येन भौमेन ॥ शार्ङ्गधन्वन इति शार्ङ्गसंबन्धित्वादेतच्छ्रवणेऽतीव मे प्रीतिरिति सूचितम् ॥ १ ॥ अन्वयः सार्धद्वयेन संबंधः । अमराद्रौ मेरौ । तस्यैवेंद्रस्यैव । तस्याः सत्यभामायाः । कौतुकायाद्भुतं दर्शयितुम् । तया सत्यभामया स्त्रिया सह गमनं युद्धे सर्वथानुचितमित्यतः कारणांतरमाह-यद्वेति । इतिहासोक्तम् इतिहासग्रंथोक्तम् । तथाहि-पृथ्व्या निजभरावतारार्थमर्थितो भगवान्पृथ्वीं-तव भारावतारणे तव पुत्रमपि हनिष्यामीत्याह तच्छ्रुत्वा सा प्राह-मदाज्ञां विना मा मारयेति, त्वदाज्ञयैव तं हनिष्यामीति हरिः प्रत्युक्तवानिति । यद्यप्येवमस्ति तथापि स्त्रीणां युद्धभूमौ नयनमन्याय्यमेवातः कारणांतरमाह-यद्वेति । तदर्थं पारिजातानयनार्थम्, साऽविश्वस्ता सहैव यायादित्येतदर्थमित्यर्थः ॥ इन्द्रेण स्वयं द्वारकामागतेनेति ज्ञेयम् । तदुक्तं वैष्णवे-"द्वारवत्यां ततः शौरिं शक्रः सुरगणेश्वरः । आजगामाथ मैत्रेय मत्तैरावतपृष्ठतः ॥" इति । भौमचेष्टितमपि तत्रैव-"भौमोऽयं नरको नाम प्राग्ज्योतिषपुरेश्वरः करोति सर्वभूतानामुपघातमरिंदम ॥ देवसिद्धासुराणां च नृपाणां च जनार्दन । हृत्वा हि सोऽसुरः कन्या रुरोध निजमंदिरे ॥ छत्रं यत्सलिलस्रावि तज्जहार प्रचेतसः । मंदरस्य तथा शृंगं हृतवान्मणिपर्वतम् ॥ अमृतस्राविणो दिव्ये मन्मातुः कृष्ण कुंडले । जहार सोऽसुरोऽदित्या वाञ्छत्यैरावतं गजम् ॥" इति ज्ञापितो भक्त्याष्टांगप्रणामपूर्वकमिति ज्ञेयम् । "ययाच आनम्य किरीटकोटिभिः पादौ स्पृशन्नच्युतमर्थसाधनम्" इत्यग्रे वक्ष्यमाणत्वात् ॥ २ ॥ तैर्गिरिदुर्गादिभिः । मुरपाशानामयुतैरनेकैः, षट्सहस्रैरित्यर्थः । "षट्सहस्रैरथो पाशैर्मुरस्याच्छादित पुरम्" इति पुराणांतरात् । "शताद्या द्विपरार्द्धांता संख्या स्वार्थपरा क्वचित् । प्रायोनेकार्थिका ज्ञेया इतिहासपुराणयोः ॥" इत्युक्तं नीलकंठेन । यद्वा-मुरपाशैरयुतैरसंयुतैः, पृथक्कृतैरित्यर्थः ॥ तत्रैव सभार्य इति सार्द्धकम् । गरुडं स्मृतिमात्रेणागतं सन्तं, किंवा-प्रायस्तत्रैव वर्तमानमारूढः । सभार्यगमनं साक्षात्तद्धरणकौतुकदर्शनादिपूर्वकं तस्या एव पारिजातदानार्थमवहेलासूचनार्थं च । तत्र पूर्वं मया सार्द्धं युद्धसंकटे गता पारिजातं स्वयमुद्यम्य मद्द्वारा नीतवतीति श्रीरुक्मिण्यादिषु व्यंजनात्, उत्तरं मम विनोद एवायं न तु युद्धोद्यम इति नरकादिषु व्यंजनात् । अथेंद्रोऽपि स्वपुरं ययाविति ज्ञेयम् "आरुह्यैरावतं नागं शक्रोपि त्रिदशालयम् । ततो जगाम मैत्रेय पश्यतां द्वारकौकसाम् ॥" इति वैष्णवोक्तेः । अनिलदुर्गः कुलालचक्रवद्भ्रमणमहाबलिष्ठदुष्टवायुः । गिरिदुर्गादीनां गणनमात्रमिदम्, क्रमस्तु भेदक्रमादग्रे ज्ञेयः । शस्त्रदुर्गाणि स्पर्शनमात्रेण शस्त्रादिच्छेदकनानास्त्रघटितदुर्गाणि । घोरैः क्षुरान्तत्वात् । "प्राग्जोतिषपुरस्यासीत्समंताच्छतयोजनम् । आचिता मौरवैः पाशैः क्षुरान्तैर्द्विजसत्तमः ॥ इति वैष्णवोक्ते । इह मुरुशब्द उकारान्तोपि । दृढैरच्छेद्यैः ॥ ३ ॥ अग्न्यादित्रयं चक्रेण ॥ गदया क्षिप्तया । एवं चक्रेणेत्यादिकमपि ज्ञेयम्, अतो दूरत एवेति च ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

येन भौमेन कर्त्रा चकाराद्येन कारणेन ताः षोडशसहस्रसङ्ख्याः स्त्रियो निरुद्धाः स च भौमो यथा येन प्रकारेण हतः एतत्सर्वं शार्ङ्गधन्वनो विशेषेण कार्य्यकारणरूपत्वाद्विक्रमरूपमाचक्ष्व शार्ङ्गधन्वन इति तत्र शार्ङ्गसम्बन्धिश्रवणे सम्प्रति मम स्पृहेत्यर्थः ॥ १ ॥ इन्द्रेणेति सार्द्धद्वयकम् । इन्द्रेण स्वयं द्वारकामागतेनेति ज्ञेयं तथा च श्रीविष्णुपुराणे—"द्वारवत्यां ततः शौरिं शक्रस्त्रिभुवनेश्वरः । आजगामाथ मैत्रेय ! मत्तैरावतपृष्ठगः" इति ॥ हृतम् अमराद्रेर्देवाक्रीडस्य मन्दरस्य स्थानं शृङ्गलक्षणं मणिपर्वताख्यं येन तेन भौमचेष्टितं वारुणच्छत्रहरणादि तथा च तत्रैव—"भौमोऽयं नरको नाम प्राग्ज्योतिषपुरेश्वरः । करोति सर्वभूतानामुपघातमरिन्दम ! ॥ देवसिद्धासुरादीनां नृपाणाञ्च जनार्द्दन ! । हृत्वा हि सोऽसुरः कन्या रुरोध निजमन्दिरे ॥ छत्रं यत् सलिलस्रावि उज्जहार प्रचेतसः । मन्दरस्य तथा शृङ्गं हृतवान् मणिपर्वतम् । अमृतस्राविणी दिव्ये मन्मातुः कृष्ण ! कुण्डले । जहार सोऽसुरोऽदित्या वाञ्छत्यैरावतङ्गजम्" ॥ इति ज्ञापितो भक्त्याऽष्टाङ्गप्रणामपूर्वकमिति ज्ञेयं "ययाच आनम्य किरीटकोटिभिः पादौ स्पृशन्" इत्यग्रे वक्ष्यमाणात् तत्रैव सभार्य्य इति सार्द्धकम् गरुडं स्मृतिमात्रेणागतं सन्तं किम्वा प्रायस्तत्रैव वर्त्तमानमारूढः सभार्य्यगमनं साक्षात्तद्धरणकौतुकदर्शनपूर्वकं तस्या एव पारिजातदानार्थम् अवहेलासूचनार्थञ्च तत्र पूर्वं मया सार्द्धमियं युद्धसङ्कटे गता पारिजातं स्वयमुद्यम्य मद्द्वारा नीतवतीति श्रीरुक्मिण्यादिषु व्यञ्जनात् उत्तरं मम विनोद एवायं न तु युद्धोद्यम इति नरकादिषु व्यञ्जनात् अथेन्द्रोपि स्वपुरं ययाविति ज्ञेयं तथा च तत्रैव—"आरुह्यैरावतं नागं शक्रोपि

त्रिदशालयम् । ततो जगाम मैत्रेय ! पश्यतां द्वारकौकसाम् ॥ इति ॥ २ ॥ अनिलदुर्गः कुलालचक्रवद्भ्रमन् महावलिष्ठदुष्टवायुः गिरिदुर्गादीनां गणनमात्रमिदं क्रमस्तु भेदक्रमादग्रे ज्ञेय; शस्त्रदुर्गाणि स्पर्शमात्रेण गात्रा [शस्त्रा] दिच्छेदकनानाशस्त्रघटित-दुर्गाणि घोरैः क्षुरान्तत्वात् । तथाच तत्रैव—"प्राग्ज्योतिषपुरस्यासीत् समन्ताञ्छतयोजनम् । आचिता मौरवैः पाशैः क्षुरान्तै-द्विजसत्तम ॥ इति ॥ एवं तस्य मते मुरुशब्द उकारान्तः "तीर्थे सौकरवे मम" इत्यादिवाराहवचनात् दृढैरच्छेद्यैः ॥ ३ ॥ गदया क्षिप्तया एवं चक्रेणेत्यादिकमपि ज्ञेयम् अतो दूरत एवेति च निश्शेषेण विभेद सञ्जहार ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवता दुष्टसंहाराद्यर्थमवतीर्णेन साक्षात् परमेश्वरेण निरुद्धा निजगृहान्तरावृत्य रक्षिताः, विक्रममद्भुतचरितं पराक्रमं वा, तच्च योग्यमित्यभिप्रायेणाह—शाङ्र्गेति । एतदिति नपुंसकत्वमार्षम्; यद्वा, सामान्यविशेष-न्यायेन योज्यम् ॥ १ ॥ इन्द्रेण स्वयं द्वारकामागतेनेति ज्ञेयम् । तथा च श्रीविष्णुपुराणे (५।२९।१)—'द्वारवत्यां ततः शौरिं शत्रुस्त्रिभुवनेश्वरः । आजगामाथ मैत्रेय मत्तैरावतपृष्ठगः ॥' इति हृतममराद्रेर्देवाक्रीडस्य मन्दरस्य स्थानं श्रृंगलक्षणं मणिपर्व्वताख्यं येन तेन, भौमचेष्टितं वारुणच्छत्रहरणादि; तथा च तत्रैव (वि० पु० ५।२९।८,९,११)—

'भौमोऽयं नरको नाम प्राग्ज्योतिषपुरेश्वरः । करोति सर्व्वभूतानामुपघातमरिन्दम ॥
देव-सिद्ध-सुरादीनां नृपाणाञ्च जनार्द्दन । अमृतस्राविणी दिव्ये मन्मातुः कृष्ण कुण्डले ॥
जहार सोऽसुरोऽदित्या वाञ्छन्नैरावतं द्विपम् ॥'

इति ज्ञापितो भक्त्याष्टांगप्रणामपूर्व्वकमिति ज्ञेयम् । (भा० १०।५९।४१)—'ययाच आनम्य किरीटकोटिभिः, पादौ स्पृशन्' इत्यग्रे वक्ष्यमाणत्वात् । गरुडं स्मृतिमात्रेणागतं सन्तम्, किंवा प्रायस्तत्रैव वर्त्तमानमारूढः । सभार्य्य इति तैर्व्याख्यातम् । यद्वा, सभार्य्यो ज्ञापितः, श्रीकृष्णस्य प्रियतमायाः श्रीसत्यभामायाः साहाय्येनैव मदर्थोऽयं किल सेत्स्यतीत्यादौ तां विज्ञाप्य तया सह गत्वा पश्चादयं ज्ञापित इत्यर्थः । अत इन्द्रार्थसाधिकायास्तस्याः साक्षादेव नरकवधादीन्द्रार्थसिद्ध्या सन्तो-षार्थम्, किंवाग्रे पारिजातानयने तस्य युद्धादिदुर्ब्बुद्धिं कौतुकेन तान् दर्शयितुं तयैव सह ययाविति ज्ञेयम् । अथेन्द्रोऽपि दिवं ययाविति च; तथा च तत्रैव (वि० पु० ५।२९।१५)—'आरुह्यैरावतं नागं शक्रोऽपि त्रिदशालयम् । ततो जगाम मैत्रेव पश्यतां द्वारकौकसाम् ॥' इति ॥ २ ॥ जलादित्रयस्य यथोत्तरं कारणतायाः सूक्ष्मत्व-दुर्गमत्वाधिकताया वापेक्षया तत्तत्क्रमेण निर्द्देशः, घोरैर्दूरतोऽपि छेदकैरित्यर्थः, क्षुरान्तत्वात् । तथा च तत्रैव (वि० पु० ५।२९।१६)—'प्राग्ज्योतिषपुरस्यासीत् समन्ताच्छत-योजनम् । आचिता मौरवैः पाशैः क्षुरान्तैर्भूर्द्विजोत्तम ॥' इति । एवं तस्य मते मुरु-शब्द उकारान्तः, दृढैरच्छेद्यैरिति गिरि-दुर्गादीनां यथोत्तरं श्रेष्ठ्यम् ॥ ३ ॥ गदया क्षिप्तया । एवं चक्रेणेत्यादिकमपि ज्ञेयम्; अतो दूरत एवेत्यर्थः । निःशेषेण विभेद सञ्जहार, पूर्व्वोक्तक्रमातिक्रमेणादावग्नेरुक्तिः, तेजस्तप्ते चक्रे स्वत एवाग्नेः प्रवेशेन प्राक् तस्य सुखनिर्भेदनात्, तथेति समुच्चये; किंवा तादृशानपि ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

"भौमं हत्वा तन्निरोधादाहृताः" इत्युक्तं तद्विस्तरबुभुत्सया पृच्छति राजा—यथेति । येन भौमेने ताः स्त्रियो निरुद्धाः स भौमः यथा येन प्रकारेण हतः चकाराद्येन कारणेनेत्यपि बोद्धव्यं तदाचक्ष्वाख्याहि ॥१॥ आचष्टे । इन्द्रेणेति । इन्द्रेण भौमचेष्टितं प्रति ज्ञापितस्सन् प्राग्ज्योतिषपुरं ययौ इति सम्बन्धः कथम्भूतेन ? हृतं भौमेन हृतं छत्रं यस्य तेन लोकपालप्रधानत्वादिन्द्रस्य वरुणच्छत्रहरणेपि तस्यैव मानभङ्ग इति तथोक्तं हृते कुण्डले यस्याः सा बन्धुर्माता अदितिर्यस्य तेन हृतममराद्रिस्थानं मणि-पर्वतात्मकं यस्य तेन सत्यभामागृहे भगवन्तम् इन्द्र आगत्य विज्ञापितवांस्तदा तस्याः कौतुकाय तया सह ययौ इति यद्वा त्वदनुज्ञयैव त्वत्सुतं हनिष्यामीति इतिहासेनोक्तं भूम्यै वरं दत्तं सत्यापयितुं सत्यभामाया भूम्यंशत्वात्तया सह ययौ इति यद्वा नारदानीतपारिजातकुसुमे रुक्मिण्यै दत्ते सति कुपितां सत्यभामां सान्त्वयितुं तुभ्यं पारिजाततरुमेव दास्यामीति प्रतिश्रुतम् इति हरिवंशे प्रसिद्धं तदर्थं तां नीतवानिति गरुडारूढ इत्यत्र हेतुं वदन् पुरं विशिनष्टि—गिरीति । गिरीति । गिरिदुर्गैश्शस्त्रदुर्गै-श्चोपलक्षितं जलाग्न्यनिलैश्च परितो वर्तमानैश्च दुर्गमं घोरैर्दृढैश्च मुरस्य पाशैः परितः आवृतम् ॥ २-३ ॥ गदयेति चक्रेण सुदर्शनेनाग्निजलवायून् निर्बिभेद असिना खड्गेन ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यथाकथं पृष्टं तत्सर्वम् ॥ १ ॥ द्वारवत्यां महाभागे निवसत्यच्युते नृप । दीनेनोद्विग्नचित्तेन समागम्य त्रिविष्टपात् ॥ हृतछत्रेण शक्रेण हृतकुण्डलबन्धुना । हृतामराद्रिस्थानेन ज्ञापितोभौमचेष्टितम् । इन्द्रमाश्वास्य गोविन्दः सुसम्पूज्य विसृज्य

च ॥ हिमाद्रौ तुङ्गशिखरे जलाग्न्यनिलदुर्गमम् । स सम्प्राप्य भटैर्गुप्तं दानवेन्द्रपुरं महत् ॥ चकर्त मौरवं पाशं चक्रेणामन्दमच्छिनत् । क्षुरमालां तथा घोरां निचकर्तासिना हरिः ॥ वायव्यास्त्रेण सलिलं वारुणास्त्रेण पावकम् । हरिर्निमिषमात्रेण नाशयामास भारत । शङ्खनादेनतीव्रेणमनांसिचमनस्विनां ॥ हृते कुण्डले यस्य स हृतकुण्डलः हृतकुण्डलो बन्धुर्माता यस्य स तथा तेन नरकेण हृतम् अमराद्रौ मेरौ स्थानं यस्य तथा प्राग्ज्योतिषपुरं नरकस्य नगरम् ॥ २ ॥ कुत्र तन्नगरमत्राह—हिमाद्राविति । जलेनानिलेन बायुना दुर्गमं गन्तुमशक्यं मुरपाशानामयुतै; अनेकैः षट्सहस्रैरित्यर्थः यद्वा मुरपाशैरयुतैरसम्बद्धैः पृथक्कृतैः शस्त्रदुर्गैः दुर्गमपि गिर्यादिक्रमेण ॥ ३-७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शक्रप्रोक्तो हरिर्भौममहन् प्राप तदाहृताः स्त्रीः सहस्राण्यूनषष्टितमे द्युतरुमाहरत् ॥ येन ताः स्त्रियो निरुद्धाः स भौमो यथा भगवता हतः एतदाचक्ष्वेत्यन्वयः एतदिति विशिनष्टि विक्रममिति ॥ १ ॥ हृतच्छत्रेणेति । वरुणस्य छत्रहरणेपि देवेन्द्रत्वात्तस्यैब छत्रं हृतमभूदिति तथोक्तं हृते कुण्डले यस्य स बन्धुर्माता यस्य तेन हृतम् अमराद्रिस्थानं मन्दरशृङ्गं मणिपर्वताख्यं यस्य तेन इन्द्रेण भौमस्य चेष्टितं छत्रहरणादिकं ज्ञापितः सन् ययौ भार्यया सत्यभामया सहित इति त्वदनुज्ञयैव त्वत्पुत्रं हनिष्यामीति भूम्यै यदुक्तं तत् सत्यं कर्त्तुं स्वविभूत्या भूम्या सह सत्यभामाया ऐक्यादेवात्र सत्यभामैव भूमिः सा च महायुद्धसङ्कटे तदेव जहीममित्यनुज्ञास्यते नान्यदेति । नारदानीतपारिजातपुष्पस्य रुक्मिण्यै प्रदानात् कुपितां सत्यभामां सान्त्वयन् तुभ्यं तद्वृक्षमेब दास्यामीति प्रतिश्रुत्य शक्रात् तदाहरणसामर्थ्यतां दर्शयितुं तां सङ्गे नीतवानिति वा ॥ २ ॥ जलाग्न्यनिलैश्च सर्वतो बर्तमानैर्दुर्गमम् ॥ ३-४ ॥

गूढार्थदीपिनी

ऊनषष्टितमे कृष्णो भौमं हत्वाऽन्तरं गतः । कन्यासहस्रमुद्वाह्य पारिजातमथानयत् ॥ १ ॥

येन स्त्रियो निरुद्धाः स भौमः यथा हतः । तदेतत् भगवतो विक्रमं चरितं कथय ॥ १ ॥ इन्द्रेणेति सार्द्धं । इन्द्रेण भौमचेष्टितं विज्ञापितः सन् भगवान् प्राग्ज्यौतिषपुरं भौमनगरं ययावित्यन्वयः । कथंभूतेन इन्द्रेण । हृते कुण्डले यस्याः सा अदितिबन्धुर्माता यस्य तेन । पुनश्च हृतं मेरौ स्थानं मणिपर्वताख्यं यस्य तेन । कथंभूतं पुरम् । मुरपशानामयुतैरनेकैः षट्सहस्रैरित्यर्थः । घोरैस्तीक्ष्णैः । दृढैरभेद्यैः । हृतच्छत्रेण । अत्र वरुणच्छत्रहरणेऽपि प्रधानत्वादिन्दस्यैव मानभङ्गादिन्द्रेणेत्युक्तम् ॥२-३॥ गदया प्रक्षिप्तयेति योज्यम् ॥ ४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

"अन्याश्च विविधा भार्या कृष्णस्यासन् सहस्रशः । भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः" ॥ इति यदुक्तं तदेकोनषष्टितमे प्रपञ्च्यते—यथेति । येन ताः स्त्रियो निरुद्धाः स भौमः यथा हतः चकारात् येन कारणेन हतस्तदाचक्ष्व तदाख्याहि ॥ १ ॥ भौमेन वरुणस्य छत्रे हृतेऽपि देवेन्द्रत्वादिन्द्रस्यापि तच्छत्रमतो हृतच्छत्रेण हृते कुण्डले यस्य स हृतबन्धुर्मातृरूपो यस्य तेन हृतममराद्रौ स्थानं मणिपर्वतलक्षणं यस्य तेनेन्द्रेण भौमचेष्टितं ज्ञापितः भार्यया सत्यभामया सहितः गरुडारूढः प्राग्ज्योतिषपुरं भौमनगरं ययौ सभार्यः इत्यस्यायमभिप्रायः सत्यभामा श्रीकृष्णस्य नित्या भार्या—भूदेवीति समाख्याता प्राणेभ्योऽप्योऽपिगरीयसी । अभिमानवतीं देवीं प्राणेभ्योऽपि गरीयसीम् । जानन् सात्राजितीं विष्णुर्विवेश शनकैरिव ॥ इत्युपक्रम्य—"मनसा कर्मणा वाचा न त्वामतिचराम्यहम् । गुणा गन्धादयो भूमेः शब्दद्याश्चावरे गुणाः । ध्रुवं पङ्कजगर्भाभे ! त्वयि स्नेहस्तथा मम । रुचिरग्नौ यथा दिव्या प्रभा चैव दिवाकरे । कान्तिश्च शाश्वतीश्चन्द्रे स्नेहस्त्वयि तथा मम" ॥ इति हरिवंशोक्तेः भूदेव्याः सत्यभामायाः विभूतिर्भूमिस्तस्यै वरं दत्तं त्वदनुज्ञयैव त्वत्पुत्रं हनिष्यामीति प्रसिद्धमितिहासे सत्यभामानुज्ञाद्वारा तत्सत्यं कर्तुं हरिवंशप्रसिद्धं श्रीनारदानीतं पारिजातपुष्पं भगवता रुक्मिण्यै दत्तं तच्छ्रुत्वा कुपितां सत्यभामां तुभ्यं पारिजातमेव दास्यामीत्यनुनीय तत्समक्षं पारिजातमानेतुं च तया सहैव ययाविति ॥ २-५ ॥

सत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ भौमं हत्वेत्यारोप्यबीजं मुनौ स मुनिव्रते तदङ्कूरणप्ररोहणादिकं कामयानः शुकं परीक्षित्पृच्छतीत्याह ॥ राजेति । यथा भौमं नरको यथा निरुद्धास्ता स्त्रियस्तेन भौमेन कथं नीतास्तात् । अव्ययम् । शार्ङ्गधन्वनो विक्रममाचक्ष्व ॥ १ ॥ त्रिविष्टपात्स्वर्गासमागम्यागमस्योद्विग्नं चित्तं यस्य स तेन दीनेन ॥ २ ॥ हृतं छत्रं यस्य स तेन । यद्यपि न छत्रं सहस्रनेत्रस्य । यद्वक्ष्यति वरुणाय तथा छत्रं प्राहिणोद्दैत्यकिङ्करैरिति तथाऽपि पौलेपीरमणस्याखिललोकपालमुख्यत्वात्तदप्रदापने मानभङ्गः स्वस्यैवेति तदुक्तिरिति ज्ञेयम् । हृते कुण्डले यस्याः सा हृतकुण्डला सा बन्धुर्माता यस्य स तेन । हृतम् । अमराद्रौ स्थानं मणिपर्व-

तात्मकं यस्य तेन । शुक्रेण भौमचेष्टितं कुजकुचेष्टां ज्ञापितो विज्ञापितः ॥ ३ ॥ इन्द्रं समाश्वास्य प्रसान्त्वय्य तमिन्द्रं सुसम्पूज्य विसृज्य गमयित्वा सभार्यः ससत्यभामः । सत्यभामाधाम्नि स्थितं प्रत्यागतमिन्द्रमिदं सर्वं तच्छ्रुतिस्मृतिं गतमिति कौतुकमवलोकयितुकामिनीति नीतवांस्तामिति सभार्यः । यद्वा भौमस्य दौरात्म्यं दृष्टवती चेदनपत्यं वरं मन्ये कदापत्याच्छुचास्पदादिति मतिमती शान्ता भवेदिति भूम्यात्मिकायाः सत्यभामायाः सह नयनमिति सभार्यः । **यथोक्तमाचार्यैः ।** मुमोद सत्यभामया । रमैव साऽपि भूरितीति । अथवा पुष्पे पारिजातस्य सर्वकामितदे नारदेन दत्ते च रुक्मिण्यै कृष्णेन कुपितां तां समाधातुं पारिजातं तरुमेव तरुणि दास्यामिति प्रतिश्रुतत्वात्तां सह निनाय नायको नाकमिति सभार्यः । **यथोक्तं** हरिवंशमहाभारततात्पर्यनिर्णययोः । सोऽर्चितो वासुदेवेन मुनिरर्चम……सताम् । पारिजाततरोः पुष्पं ददौ कृष्णाय भारत । तद्दृष्ट्वा राजकुसुमं रुक्मिण्याः प्रददौ हरिरित्यारभ्यालं कमलपत्राक्षि रुदितेन मनस्विनीत्यादिना विधाय तत्समाधिं प्रसीदैकापराधं मे मर्षयस्व शुचिस्मिते । पारिजातस्य पुष्पाणि यावत्कालं त्वमिच्छसीति । दाताऽस्म्यहं पारिजातं तरुं त इति । अहं रुद्राय धनुरातनोमीत्याद्युक्तलक्षण यत्तत्प्रदर्श्य रमात्वख्यात्वै नयनं नलिनाया इति सभार्यः । ननु न च कुतो ज्येष्ठा रुक्मिण्या विनिगमनविरहादिति तु दत्तोत्तरम् । कुसुमसुमनसत्वात्तस्या एतस्या द्युतिसुरतरुवितरणपरिहरणीयरुट्त्वाद्विनिगमकादिति सम्भवद्भगवन्नयनेऽयमेवेति सभार्यः ससत्यभाम इति वा । द्युमणिपराजयेन तत्प्रतमणिकृताहन्ताशान्त्यर्थं वैतन्नयनं ज्ञेयम् । नरकनगरं प्राग्ज्योतिषपुरम् ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सर्वासामुद्धृति पूर्वं संक्षेपेण निरूपिता । दशमे विस्तरेणाह तामेवान्यविभाषया ॥ १ ॥
यदर्थमवतीर्णोऽसौ नात्यन्तं तत्र मृग्यते । हेतुरित्यत्र निर्णीतमतस्ता जगृहे हरिः ॥ २ ॥

स्त्रीणां सामान्यतो विवाहे निरूपिते तत्र पराक्रमो न श्रुत इति तदर्थं पृच्छति, सर्वाणि कर्माणि वीर्यवन्ति चेद्भक्तिजनकानि भवन्तीति । **यथा** हत इति । **भगवतेति** न हनने सन्देहः, किन्तु प्रकारे एव । **भौम** इति भगवत एव पुत्रः । ननु सर्व एव यथा हताः तथा सोऽपि हत इति को विशेष इति चेत्, तत्राह **येन** चेति । राज्ञां हि ताः कन्याः षोडशसहस्रसङ्ख्याताः । यदि स्थानतः स्वरूपतो वा **सुगमः** स्यात् तदा सर्वे राजानः सम्भूय तं मारयेयुः । लज्जास्पदत्वाद्दुहितृहरणस्य । अतो ज्ञायते सर्वप्राणिनामवध्यः स इति दुर्गमश्चेति तादृशस्य वधो लौकिकन्यायेन कथमिति भगवति विचारणा । **ताः** प्रसिद्धाः । किञ्च । निरुद्धा एव कुतः, कथं नोपभुक्ताः । ता वा भगवता कथमाहृता इति । यथा विक्रमो भवति, तथा आचक्ष्व । अनेन तासां विवाहे लोके क्लिष्टता प्रतिभातीति ज्ञापितम् । युक्त्या चैवं ज्ञायतेऽक्लिष्टं भवतीति । यतोऽयं शार्ङ्गधन्वा । न हि समर्थः क्लिष्टं करोति ॥ १ ॥ तत्र प्रसङ्गात्तासां विवाहो जात इति वक्तुं देवकार्यार्थं भगवान् प्रवृत्त इत्याह **इन्द्रेणेति** । पूर्वं नरकासुरो दिग्विजये इन्द्रं पराजित्य जयख्यापनार्थं त्रयं गृहीतवान् । राजत्वख्यापक छत्रम्, तेनेन्द्रत्वं गृहीतवान् । अदितिकश्यपपुत्रत्वमपरिहार्यमहत्त्वं मत्वा कश्यपात् भगवान् महानिति पितृकृतोत्कर्षे सिद्धे 'इयं वा अदिति'रिति भूमिपुत्रत्वेनादित्यत्वे च रूप विशेषख्यापके कुण्डले तस्या गृहीत्वा स्वमात्रे भूम्यै दत्तवान् । तथा त्रैलोक्याधिपतित्वं च दूरीकर्तव्यम् । तत्र यत्र यस्तिष्ठति, तदधिपतित्वं न दूरीकर्तव्यम्, साधारण्यात्, अतो भूम्याधिपत्यं दूरीकर्तुममराद्रिस्थानं मेरौ यदिन्द्रस्य स्थानं तदपि हृतवान् । अनेन स्वस्थाधिपत्यं दूरापास्यमिति न पातालाधिपत्यव्युदासाय किञ्चिच्चकार । स्वर्गस्थानमपि ग्राह्यमित्यध्यवसायोऽस्ति । अन्येष्ववतारेष्ववतारप्रयोजनमात्रं करोति । नाधिकम् । नापि वामनः पुत्रं मारयितुमिच्छति । भ्रात्रपेक्षया तु पुत्रः प्रियः, अदितिर्भूमिश्च भक्ते । स्वापेक्षयापि पुत्रः प्रिय इति पुत्रेण स्वमात्रे कुण्डले दीयमाने च न निवारयति । विशेषावतारे सर्वगतं तेजस्तत्रैव गच्छति । अतो वामन उदासीन इति इन्द्रः कृष्णमेव विज्ञापयामास । हृते कुण्डले बन्धोर्मातुर्यस्य । हृतममराद्रेः स्थानं यस्य । चेष्टितमधिकग्रहणरूपम् । ज्ञापितो भगवान् । न हि तत्पुत्रोऽन्येन हन्तुं शक्यः । पूर्वं हि चतुर्मूर्तिर्भगवानास । तत्रैका तपः करोति । अपरा परिपालनम् । अपरा भोगम् । चतुर्थी तु निद्राति । तासां च रहटघटिकान्यायेन कर्मणां परावृत्तिः । या तपस्यति, सावेक्षां करोति । यावेक्षिष्ठ, सा भुङ्क्ते । या बुभुजे, सा शेते । याशयिष्ट, सा तपस्यतीति । क्रियायाः कालश्च सहस्रं वत्सराणि । तत्रैषा व्यवस्था । या तपस्यति, सोत्तिष्ठति । ये केचन स्वार्थं तपः कुर्वन्ति, तेभ्यः प्रसन्ना भवति । तत्रैकदा भूमिः तपस्यन्ती स्थिता । सन्ध्यायां च भगवानुत्थितो वरार्थं प्रेरयामास । ततः सन्ध्यायां भूमिः पुत्रं वव्रे । ततोऽयं नरको जातः कालवशादसुरः । ततो भगवान् भूम्या पुनः प्रार्थितः । नायं हन्तव्य इति । ततो भगवानाह 'त्वत्सम्मतिव्यतिरेकेण न हनिष्यामी'ति । स्वस्यास्त्रं नारायणाख्यं दत्तवान् । यावदस्मिन्नस्त्रम्, तावन्न मृत्युरिति । स चासुरत्वात् महादेवभक्तो बभूव । त्रिशूलं च प्राप्तवान्, नारायणास्त्रसमानम् । ततः स्वयं शिवभक्त इति त्रिशूलं स्वार्थे स्थापितवान् । पुत्राय भगदत्ताय नारायणास्त्रं ददौ । अतो हनने भूमिसम्मतिरेव ग्राह्या । भूमिश्च सत्यभामा ॥ २ ॥ अतो नरकवधार्थं भगवान् सत्यभामया सह गरुडाधिरूढो गत इत्याह **सभार्यो गरुडारूढ** इति । **प्राग्ज्योतिषपुर**मिति तन्नगरनाम । यदा तेजोबन्नात्मिका सृष्टिः, ततः पूर्वमिदं स्थानमुत्पादितमिति ज्ञापनार्थं तथा नाम । ततस्तस्य षडावरणानि निरूपयति **गिरिदुर्गै**रिति । सर्वतः गिरयः पर्वताः अश्वेचरस्य दुर्गमाः । साम्प्रतं कामरूदेश इति तत्प्रसिद्धिः । शस्त्रदुर्गाणि द्वितीयानि । दुर्गत्वं परितः स्थितया गमनप्रतिबन्धकत्वम् । शस्त्राणि

खड्गादीनि । यथा असिपत्रवनम् । ततो मध्ये जलं परितः । ततोन्तरग्निः । ततो वायुरिति । मुरो नाम पञ्चपर्वाविद्याधिष्ठात्री देवता । तस्य पाशाः सर्वापेक्षयान्तरावरणभूताः, ते च दृढाः, पूर्वापेक्षयापि । अनेन क्रम उत्तरोत्तरबलिष्ठत्वं सूचितम् । **सर्वत आवृतमिति** । सर्वैर्न मार्गोऽपि संरक्षितः । स्वयं तु खेचरः । तेजःप्रभृत्यावरणत्रयं उपर्यपीति सम्प्रदायः । तेन सर्वागम्यम् ।। ३ ।। तादृशस्यापि लौकिकप्रकारेण वधं वक्तुं क्रमेण दुर्गाणां नाशनमाह **गदयेतिति** । गदाप्रहारेणाद्रीन्निर्बिभेद । तेन प्रथमावरणे नराणामपि गमनं सुगममभूत् । स एव चेदानीं मार्गः । **सायकैः** शस्त्रदुर्गाणि चिच्छेद । सुदर्शनेन जलाग्न्यनिलदुर्गाण्यन्तर्भावितवानित्याह **चक्रेणेति** । आदावग्निप्रवेशनं सजातीयनिराकरणार्थम् । तदुभयोपष्टम्भकं भवति । तस्य च कार्यं जलम् । ततः कारणं वायुमिति प्रान्तस्थितयोरनुप्रवेशः । मुरपाशांस्तु असिना च नन्दकेन चिच्छेद ।। ४ ।।

श्रीसुबोधिनी- सारः

राजप्रश्नः । येन ताः स्त्रियो निरुद्धाः यदर्थं च भगवता स भौमो यथा हत एतत् शाङ्र्गधन्वनो विक्रमं वीर्यं त्वमाचक्ष्व ब्रूहि ।। १ ।। शुकोक्तिः । हृतं छत्रं यस्य तेन वरुणेन हृते कुंडले यस्याः सा अदितिर्बंधुर्माता यस्य तेनेन्द्रेण हृतममराद्रौ सुमेरौ स्थानं मणिपर्वतलक्षणं यस्य तेन कुबेरेण भौमस्य चेष्टितं ज्ञापितः सन् सभार्यः कौतुकार्थं स्त्रीसहितः तदनुमतेनैव 'त्वत्पुत्रं हनिष्यामीति इतिहासोक्तम्' भूम्यै वरप्रदानं सत्यं कर्त्तुं सत्यभामायास्तदंशत्वात्तया सह गमनमुक्तं यद्वा नारदानीतकल्पवृक्षपुष्पस्य रुक्मिण्यै दानात् कुपितां सत्यभामां 'त्वदंगणे पारिजातं रोपयिष्यामि' इति सांत्वयता श्रीकृष्णेन प्रतिश्रुतमिति हरिवंशे प्रसिद्धं तदर्थं वाऽविश्वसंत्या तया सहितो गरुडमारूढः प्राग्ज्योतिषं नाम तन्नगरं ययौ ।।२।। गिरिदुर्गैः पर्वतवप्रैः शस्त्रदुर्गैरुपलक्षितं जलाग्निवायुभिर्दुर्गमं प्रवेष्टुमशक्यं घोरैर्दारुणैर्दृढैर्मुरस्य पाशानामयुतैः सर्वत आवृतम् ।। ३ ।। यानप्रकारं तत्राह । गदयाद्रीन् सायकैर्बाणैः शस्त्रदुर्गाणि अग्नि जलं वायुं चक्रेण मुरस्य पाशानसिना खड्गेन तथा निर्बिभेद ।। ४ ।।

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

दशमे । **यथा हत** इत्यत्र । **यथा विक्रमो भवति, तथे**ति । मूले एतावत्पूर्वोक्तं विक्रमत्वेनाचक्ष्वेत्यर्थः । एतदित्यस्य विक्रमविशेषणत्वे एतमिति स्यात्, अत उद्देश्यविधेयभावेन व्याख्यानमिति भावः । **इन्द्रेणे**त्यत्र । **यत्र यस्तिष्ठतीति** । नरकासुरः पाताले स्वयमेव तिष्ठतीति पातालाधिपत्यनिवारणार्थं महानुद्यमो नापेक्षित इति भूम्याधिपत्यं निवारितवानित्यर्थः । कामरूपदेशस्थितावपि वासस्थानमसुरत्वात्पातालमेवेति भावः । **दीयमाने** चेति । उभे अपि भक्ते । अतः समत्वान्न निवारयति, पुत्रेण दीयमानत्वाच्च न निवारयतीति चकारः । न निवारयति । **वामन** इति पूर्वेणान्वयः । **सर्वगत**मिति । अवतारान्तरगतमित्यर्थः । **अत** इति । तेजसो भगवति गतत्वादित्यर्थः । **हृते कुण्डले** इत्यर्थकथनम् । हृतकुण्डलो बन्धुर्यस्येति विग्रहः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ऊनषष्टितमे भौम-गृहे दृष्टवरैरथ । स्त्रीजनैः सह कृष्णस्य विवाहो विनिरूप्यते ।। १ ।।

भौमं हत्वा तन्निरोधादाहृता इति यत् सङ्क्षेपत उक्तं तद्विस्तरबुभुत्सया राजा पृच्छति— यथेति । येन भौमेन ताः स्त्रियो निरुद्धाः स भौमो यथा येन प्रकारेण भगवता हतः, चकारात् येन प्रकारेण च हत इत्यपि बोध्यम्, तदेतत् शाङ्र्गधन्वनः कृष्णस्य विक्रमं चरितमाचक्ष्व आख्याहि ।। १ ।। इन्द्रेण भौमचेष्टितं प्रति ज्ञापितः सभार्यो गरुडारूढः श्रीकृष्णः प्राग्ज्योतिषं पुरं भौमनगरं ययाविति द्वितीयेनान्वयः । 'किं तच्चेष्टितम्' । इत्यपेक्षायां 'छत्रहरणादिकम्' इति सूचयन् इन्द्रं विशिनष्टि—हृतं छत्रं यस्य तेन इन्द्रस्य लोकपालप्रधानत्वात् वरुणच्छत्रहरणेऽपि तस्यैव मानभङ्ग इति तथोक्तम् । हृते कुण्डले यस्याः सा अदितिर्बन्धुर्माता यस्य तेन तथा हृतं अमराद्रिः सुमेरुस्तत्रत्यां स्थानं यस्य तेन कदाचिद्भगवता भूम्यै 'त्वत्संमतिव्यतिरेकेण त्वत्पुत्रमेनं न हनिष्यामि' इति वरो दत्तः । सत्यभामाया भूम्यंशत्वात्तत्संमत्यर्थं तामपि सहैव नीतवानिति इतिहासान्तराज्ज्ञेयम् ।। २ ।। गरुडेन गमने हेतुं वदन् पुरं विशिनष्टि–गिरिदुर्गैरिति । दुर्गत्वं गमनप्रतिबन्धकत्वं सर्वतस्थितैर्गिरिदुर्गैस्तथा सर्वतः स्थापितैर्भृशुण्ड्यादिशस्त्रदुर्गैश्च दुर्गममिति शेषः । तथा जलाग्न्यनिलैश्च सर्वतो वर्तमानैर्दुर्गमम् । तथा घोरैः आगच्छतां शत्रूणां ग्रहणे अव्यभिचारिभिः दृढैश्छेत्तुमशक्यैः मुरस्य दैत्यस्य पाशायुतैः सर्वत आवृतम् ।। ३ ।। एवं स्थिते भगवता दुर्गभेदनप्रकारमाह—गदयेति । चक्रेण सुदर्शनेनाग्न्यादीन् बिभेद, सुदर्शन एवान्तर्भावितवानित्यर्थः । स्पष्टमन्यत् ।। ४ ।।

अन्वितार्थप्रकाशिका

ऊनषष्टितमे भौमं हत्वा प्राप नृपात्मजः ।। दिवोऽहरत्पारिजातं श्लोकाः सार्द्धाः षडब्धयः (४६।।) ।।
चत्वार्युवाचेति (४) पादोनाद्रिबाणा (५६।।।) अनुष्टुभः ।। ५९ ।।

यथेति । येन भौमेन ताः स्त्रियो निरुद्धाः स भौमो यथा येन प्रकारेण चकाराद्येन कारणेन च भगवता हतः । तदेतत् शाङ्र्गधन्वनः कृष्णस्य विक्रमं चरितमाचक्ष्व आख्याहि ।। १ ।। इन्द्रेणेति । हृतं छत्रं यस्य तेन इन्द्रस्य लोकपालप्रधानत्वात्

वरुणछत्रहरणेऽपि तस्यैव मानभङ्ग इति तथोक्तं हृते कुण्डले यस्याः सा अदितिर्बन्धुर्माता यस्य तेन तथा हृतम् अमराद्रेर्मन्दरस्य स्थानं मणिपर्वतलक्षणं मन्दरशृङ्गं यस्य तेन इन्द्रेण भगवान् भौमचेष्टितं प्रतिज्ञापितः ।। २ ।। सभार्य इति सार्द्धम् । ततः सभार्यः सत्यभामासहितः गरुडारूढः सन् सर्वतः स्थितैः गिरिदुर्गैर्गमनप्रतिबन्धकैः गिरिभिः तथा सर्वतः स्थापितैर्भुशुण्ड्यादिशस्त्रदुर्गैश्च दुर्गममिति शेषः । अत एव गरुडारूढो भगवान् ययौ । तथा जलाग्न्यनिलैश्च सर्वतो वर्तमानैर्दुर्गमं तथा घोरैः आगच्छतां शत्रूणां ग्रहणे अव्यभिचारिभिः दृढैश्छेत्तुमशक्यैः मुरस्य दैत्यस्य पाशानामयुतैः सर्वत आवृतं प्राग्ज्योतिषपुरं ययौ । कदाचिद् भगवता भूम्यै त्वत्संमतिव्यतिरेकेण त्वत्पुत्रमेनं न हनिष्यामि इति वरो दत्तः । सत्यभामाया भूम्या ऐक्यात्सत्यभामैवात्र भूमिः तत्संमत्यर्थं तामपि सहैव नीतवानिति । यद्वा । सत्यभामागृहगतो भगवानिन्द्रेण छत्राद्यर्थं प्रार्थितोऽतः सत्यभामाकौतुकार्थं तामपि सह नीतवान् । यद्वा । नारदानीतपारिजातैककुसुमे रुक्मिण्यै दत्ते कुपितां सत्यभामां सान्त्वयता तुभ्यं पारिजातमेव दास्यामीति श्रीकृष्णेन प्रतिश्रुतमिति हरिवंशे प्रसिद्धं तदर्थं तान्नीतवानिति ।। २–३ ।। गदयेति । अद्रीन् गिरिदुर्गाणि गदया निर्बिभेद । शस्त्रदुर्गाणि सायकैः निर्बिभेद । अग्निं जलं वायुं च प्रदीप्तेन चक्रेण निर्बिभेद चक्र एवान्तर्भावितवान् । तथा मुररचितान् पाशान् असिना निर्बिभेद ।। ४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथैकोनषष्टितमेध्याये भौमहननं तदंतः पुराच्छताधिकषोडशसहस्रकन्याहरणं ता द्वारकां नीत्वाऽऽसां पाणिग्रहणं स्वर्गात्पारिजातापहरणं च निरूप्यते । येन भौमेन ताः स्त्रियोनिरुद्धाः चकारात् स भौमो वराहात्मजः श्रीवराहात्मजं भौमं हत्वा संस्थाप्य तत्सुतमिति तोषण्यां पुराणांतरात् । येन निहतः एतत् एतं सर्वं विक्रमं आचक्ष्व ।। १ ।। हृते कुंडले यस्य स चासौ बंधुरदितिर्माता यस्य तेन । वरुणछत्रहरणेपि सर्वदेवे इत्वाद्धत छत्रेणेतींद्रविशेषणमुक्तं हृतममराद्रेर्मंदरस्य स्थानं शृंगं मणिपर्वताख्यं यस्य तेनेंद्रेण भौमचेष्टितं छत्रहरणादिकं । प्रतिज्ञापितो विनयपूर्वकतया कथित इत्यर्थः प्राग्ज्योतिषपुरं तन्नामनगरं । एकदा नारदेनानीते पारिजातैकपुष्पे हरिणा वैदर्भ्यै समर्पिते सति क्रुधितां सत्यभामां प्रसन्नां कुर्वता श्रीकृष्णेन तुभ्यं पारिजातमेवाहं दास्यामीति प्रतिज्ञा कृता सा हरिवंशे प्रसिद्धा अतः श्रीकृष्णस्तस्यै एकस्यै एव पारिजातदानाय तया सह गत इति बोध्यं ।। २ ।। गिरिदुर्गाद्युल्लंघनार्थं गरुडयानं ज्ञेयं । पुरविशेषणान्याह गिरिशस्त्रदुर्गैरुपलक्षितं जलादिभिर्दुर्गमं च । मुरपाशानां अयुतैरसंख्यदशसहस्त्रैरेतैः सर्वैः सर्वत आवृतं पुरं ययाविति संबंधः ।। ३–४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ऊनषष्टितमे कृष्णो हत्वा भौमं तदाहृताः । सहस्रशोऽगमत् कन्याश्चाहरत् द्युतरुं दिवः ।। १ ।।
परिणीय च तास्ताभिः पूरयंस्तन्मनोरथान् । रेमे गृदस्थवत्तासामात्मारामो गृहेष्वसौ ।। २ ।।

भौमं हत्वा तन्निरोधादाहृता इति यदुक्तं तद्विस्तरबुभुत्सया पृच्छति राजा । यथेति । येन भौमासुरेण, ताः स्त्रियः निरुद्धाः, स भौमः, भगवता यथा हतः, चकाराद्येन कारणेन हत इत्यपि बोध्यम् । शार्ङ्गधन्वनः भगवतः, एतदिममित्यर्थः । विक्रमं आचक्ष्व समाख्याहि ।। १ ।। एवं पृष्टो मुनिः भौमवधादिकं विस्तरतो वक्तुं तदुपोद्घातमाह । इन्द्रेणेति । हृतं छत्रं यस्य तेन, यद्यपि छत्रहरणं तु भौमेन वरुणस्यैव कृतं भवत्यथापि लोकपालप्रधानत्वात्तत्त्वं शक्रे आरोप्य हृतच्छत्रेणेतीन्द्रविशेषणं कृतम् । हृते कुण्डले यस्याः साऽदितिर्बन्धुर्माता यस्य तेन, हृतममराद्रिस्थानं मणिपर्वतात्मकं यस्य तेन, इन्द्रेण, आगत्य सत्यभामागृहे वर्त्तमानो भगवानिति शेषः । भौमचेष्टितं ज्ञापितः । अतः सभार्यः सत्यभामासहितः, गरुडारूढश्च सन्, प्राग्ज्योतिषपुरं भौमनगरं, ययौ । सत्यभामायै कौतुकं प्रदर्शयितुं तया सह वर्त्तमानत्वात् सभार्य इत्युक्तम् । यद्वा । त्वदनुज्ञयैव त्वत्सुतं हनिष्यामीति हासोक्तं भूम्यै दत्तं वरं पालयितुं सत्यभामाया भूम्यंशत्वात्तत्साहित्यमुक्तम् । यद्वा । नारदानीतपारिजातकुसुमे कृष्णेन रुक्मिण्यै दत्ते सति कुपितां सत्यभामां सान्त्वयितुं तुभ्यं पारिजाततरुमेव दास्यामीति प्रतिश्रुतं हरिवंशप्रसिद्धं, तदर्थं तत्साहित्यं बोध्यम् ।। २ ।। गरुडारूढ इत्यत्र हेतुं वदन् पुरं विशिनष्टि । गिरिदुर्गैरिति । गिरिदुर्गैः शस्त्रदुर्गैः उपलक्षितं जलाग्न्यनिलदुर्गमं, जलपरिखया ज्वलत्खदिराङ्गारवृत्त्या वायुयन्त्रैश्च दुरासदमित्यर्थः । घोरैः दृढैः, मुरपाशायुतैरयुतसंख्याकैर्मुरदानवपाशैश्च, सर्वतः आवृतम् । तत्पुरं ययाविति संबन्धः ।। ३ ।। गदयेति । गदया कौमोदक्या, अद्रीन् अद्रिदुर्गाणि, निर्बिभेद । सायकैर्बाणैः, शस्त्रदुर्गाणि निर्बिभेद । जलं, अग्निं, वायुं, चक्रेण सुदर्शनेन, तथा असिना नन्दकाख्यखड्गेन, मुरपाशान् निर्बिभेद ।। ४ ।।

कृष्णप्रिया

भौमासुर उद्धार, षोडशसहस्र कन्याओं का कारागृहविमोचन एवं विवाह–कथा प्रसङ्ग

राजा श्रीपरीक्षित जी ने प्रश्न किया— महाराज शुकदेव जी ! षोडश सहस्र कुमारिकाओं को कारागृह में कैद करने वाले भौमासुर को कैसे मारा ? कन्याओं को कैसे छुड़ाया, प्राग्ज्योतिषनगर को कैसे नष्ट किया ? यह सारी शार्ङ्गधन्वा

भगवान् श्रीकृष्णचन्द्र की अत्यंत अद्भुत लीलाओं को श्रवण कराने का अनुग्रह करें ॥ १ ॥ महाराज श्रीशुकमुनि जी कहने लगे—राजन् परीक्षित् ! महाराज इन्द्र का छत्र, माता अदितिजी के कुण्डल, मेरु महागिरि पर विराजमान देवलोगों का मणि पर्वत नाम से विख्यात निवास स्थान, भौमासुर ने छीन लिया था। महाराजा इन्द्र ने द्वारिका में आकर भौमासुर के ये सब करतूत भगवान् श्रीकृष्ण को सुनाया। कृपानिधान भगवान् कृष्ण यह सब समाचार सुनकर प्रियतमा श्रीसत्यभामा जी के साथ गरुडारूढ होकर भौमासुर की राजधानी प्राग्ज्योतिषनगर में पधारे ॥ २ ॥ यह प्राग्ज्योतिषनगर विविध प्रकार के दुर्गों से दुर्गम था। नगर के चारों ओर गिरिवरों के दृढतर प्राकार थे। दूसरे विविध प्रकार के शस्त्रों की किलेबन्दी थी। तीसरी गहरी जल को खाई थी। पुनः आग की चारों ओर फिरती दिवाल थी। पांचवी किलेबन्दी वायु की बनाई गयी थी। नगर के बाहर एवं भीतर पांच मस्तक वाले मुरदानव ने अकाट्य ऐसे दस हजार दृढ और भयानक पाश-फंदे-बिछा दिये थे ॥ ३ ॥ सर्व समर्थ भगवान् श्रीकृष्ण ने अपनी कौमोदिकी गदा से गिरिदुर्गों की किलेबन्धी नष्टभ्रष्ट कर दी। दूसरी अस्त्रशस्त्रों की किलेबन्धी तीखे बाणों से नष्टभ्रष्ट कर दी। नाथ ने सुदर्शन चक्र से अग्निदुर्ग, वायुदुर्ग, एवं जलदुर्ग को छिन्नभिन्न कर दिया। पुनः भगवान् श्रीकृष्ण ने पञ्चशिरा मुरदानव के विविध पाशों का सर्वथा नाश कर दिया ॥ ४ ॥

शङ्खनादेन यन्त्राणि हृदयानि मनस्विनाम् । प्राकारं गदया गुर्व्या निर्बिभेद गदाधरः ॥ ५ ॥

पाञ्चजन्यध्वनिं श्रुत्वा युगान्ताशनिभीषणम् । मुरः शयान उत्तस्थौ दैत्यः पञ्चशिरा जलात् ॥ ६ ॥

त्रिशूलमुद्यम्य सुदुर्निरीक्षणो[1] युगान्तसूर्यानल[2] शोचिरुल्बणः ।
ग्रसंस्त्रिलोकीमिव पञ्चभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथोरगः ॥ ७ ॥
आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत् स पञ्चभिः ।
[3]खं रोदसी सर्वदिशोऽन्तरं[4] महानापूरयन्नण्डकटाहमावृणोत् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—निर्बिभेद, शङ्खनादेन, यन्त्राणि, च, मनस्विनाम्, हृदयानि, निर्बिभेद, गुर्व्या, गदया, प्राकारम्, निर्बिभेद ॥ ५ ॥ पञ्चशिराः, शयानः, दैत्यः, मुरः, युगान्ताशनिभीषणम्, पाञ्चजन्यध्वनिम्, श्रुत्वा, जलाद्, उत्थितः ॥ ६ ॥ युगान्तसूर्यानलशोचिः सुदुर्निरीक्षणः, उल्बणः, त्रिशूलम्, उद्यम्य, पञ्चभिः, मुखैः, त्रिलोकीम्, ग्रसन्, इव, उरगः, यथा, तार्क्ष्यसुतम्, अभ्यद्रवत् ॥ ७ ॥ गरुत्मते, तरसा, निरस्य, शूलम्, आविष्टा, पञ्चभिः, मुखैः, सः, व्यनदत्, सः, महान्, नादः, खम्, रोदसी, सर्वादिसोऽन्तरम्, अण्डकटाहम्, आवृणोत् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

युगांताशनेर्ध्वनिवद्भीषणम् । परिखाया जलात् ॥ ६-७ ॥ आविध्य आतोल्य । स महान्नाद इत्यन्वयः ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यंत्राणि द्वारकपाटनिरोधार्थं लोहादिनिर्मितानि, हृदयानि च ॥ यंत्राणि प्राकारन्यस्तानि, येषामग्रे परसैन्यागमदेशे पादघातमात्रेण चलन्तः प्राकारस्थानां शस्त्रक्षेपसंयोगाः स्युस्तन्निर्भेदनमुपरि स्थित्वा तादृससंयोगान्यथाकरणं, महाशब्दस्य कंपनादिस्वभावत्वात् । मनस्विनां धीराणां हृदयान्यपि यंत्रतुल्यान्येव । गुर्व्येति प्राकारस्थापितगुरुत्वम्, तथापि तन्निर्भेदेऽनायासं सूचयति, यतो गदाधरः तद्विद्याप्रावीण्येन गदाधर इति नाम प्राप्ता इत्यर्थः ॥ ५ ॥ परिखास्थतोयात् ॥ जलदुर्गनिर्भेदनस्य पूर्वकथामाह-पांचजन्येति । पूर्वमेव पांचजन्यशब्दं श्रुत्वेति ज्ञेयम् । युगांताऽशनिभीषणमित्यसुरेष्वेव ज्ञेयम्, 'मल्लानामशनिः' इत्यादिवत् । शयानः सदा मदाविष्टत्वान्निश्चिन्तत्वाच्च तथास्वभावः ॥ ६ ॥ उल्वणो भयंकरः । युद्धादिकौतुकं गायन्निव दीर्घच्छंदसाह-त्रिशूलमिति । सुदुर्निरीक्षणत्वे हेतुः-युगांतेति । उल्वणो भीषणः । तदेवाह-ग्रसन्निति । अभ्यद्रवत् हरिम्, तच्च स्ववधायैवेति दृष्टांतेन द्योतयति-तार्क्ष्येति ॥ ७ ॥ गरुत्मते तं हन्तुम् । निरस्य निक्षिप्य । आपूरयन् नादेनेति शेषः ॥ निरस्य क्षिप्त्वा । रोदसी दिवं भुवं च । अंतरं छिद्रम्, पातालमित्यर्थः ॥ ८ ॥

---

१. निरीक्ष्यो-विज ; क्षणं-प्रा. पा. । २. रोचि-श्रीधरः वंशी. जीव. वीर. विश्व. ; रुज्ज्वलः-विज. ; रुल्बणं-प्रा. पा. । ३. खं-वीर. विज. ; स-श्रीधर. वंशी. जीव. विश्व. शुक. । ४. दिशोऽम्बरं-त. पु. सू. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यन्त्राणि प्राकारन्यस्तानि येषामग्रे परसैन्यागमदेशे पादघातमात्रेण चलन्तः प्राकारान्तानां शस्त्रक्षेपकसंयोगविशेषाः स्युः तन्निर्भेदनम् उपरि स्थित्वा तादृशसंयोगान्यथाकरणं महाशब्दस्य कम्पनादिस्वभावत्वात् मनस्विनां वीराणां तदीयानामेव हृदयान्यपि गुर्व्येति प्राकारस्यापि गुरुत्वं तथापि तन्निर्भेदेऽनायासञ्च सूचयति यतो गदाधरः तद्विद्याप्रावीण्येन तन्नामतामेव प्राप्त इत्यर्थः ॥ ५ ॥ टीकायां परिखाया जलादिति जलदुर्गनाशात् यद्वा जलदुर्गनिर्भेदनस्य पूर्वकथामाह—पाञ्चेति । एवं पूर्वपूर्वमेव पाञ्चजन्यध्वनिः विशेषतस्तु यन्त्रनिर्भेदन इति ज्ञेयं युगान्ताशनिभीषणमित्यसुरेष्वेव ज्ञेयं नतु भक्तेषु "मल्लानामशनिः" इत्यादिवत् शयानः सदा मदाविष्टत्वान्निश्चिन्तत्वाच्च तथास्वभावः ॥ ६ ॥ युद्धादिकौतुकेन गायन्निव दीर्घच्छन्दसाह— त्रिशूलेत्यादि । दुर्निरीक्षणत्वे हेतुः युगान्तेति स्वयञ्चोल्बणो भीषणः उल्बणत्वमेवाह—ग्रसन्निति । मुखैर्व्यात्तैः अभ्यद्रवद्धरिं तच्च स्ववधायैवेति दृष्टान्तेन द्योतयति—तार्क्ष्येति । यद्वा स्थूलदर्शनत्वात्तार्क्ष्यसुतमेवाभ्यद्रवत् ॥ ७ ॥ निरस्य निश्शेषेण क्षिप्त्वा रोदसी रोदस्यौ दिवं भुवं च अन्तरं च छिद्रं पातालमित्यर्थः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यन्त्राणि औषधादिप्रयोगेण लोहगुलकादिक्षेपकाणि दुर्गन्यस्तानि, मनस्विनामपि गुर्व्येति प्राकारस्यापि गुरुत्वम्, तथापि तन्निर्भेदेनायासञ्च सूचयति, यतो गदाधरः पाणिना गदाधारणमात्रेणैवेति भावः ॥ ५ ॥ शयानो जले, यतो दैत्यः, जात्यैव मद्यपानादिरतत्वात्, किंवा शक्रादिनिर्ज्जयेन नैश्चिन्त्यादिति भावः ॥ ६ ॥ युद्धादि-कौतुकेन गायन्निव दीर्घच्छन्दसाह—त्रिशूलमित्यादि । दुर्निवीक्षणत्वे हेतुः—युगान्तेति । दुर्निरीक्षण इति पाठेऽपि स एवार्थः । अत उल्बणो भीषणः, उल्वणत्वमेवाह—प्रसन्निति । मुखैर्व्यात्तैः, अभ्यद्रवद्धरिं तच्च स्ववधायैवेति दृष्टान्तेन द्योतयति—तार्क्षेति ॥ ७ ॥ निरस्य निःशेषेण क्षिप्त्वा, रोदसी रोदस्यौ दिवं भुवञ्च, अन्तरं च छिद्रं पातालमित्यर्थः । शब्दस्याकाशजत्वेन प्राक् खं तदूर्द्ध्वगामित्वादतिवृहत्वाच्च स्वर्गाख्यमूर्द्ध्व लोकपञ्चकम्, ततो बहिर्निःसरणाशक्त्या निवृत्य मर्त्यलोकं ततोऽतिविस्तारप्राप्त्या सर्व्वा दिशः, ततोऽतिपूर्त्या विवरद्वारेणाधोलोकमेवं क्रमेण आ सम्यक् पूरयन्नित्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मनस्विनां स्वैरिणां मुरादीनां हृदयानि यन्त्राणि च शङ्खनादेन ॥ ५ ॥ पाञ्चजन्येति युगान्ताशनेर्ध्वनिवद्भीषणं पाञ्चजन्यध्वनिमाकर्ण्य ॥ ६ ॥ त्रिशूलमिति युगान्ते सूर्याग्न्योरिव रोचिर्दीप्तिर्यस्य स मुरासुरः अत एवोल्बणः दुस्सहो दुर्निरीक्षस्सन् त्रिशूलमुद्धृत्य पञ्चभिर्मुखैः त्रिलोकीं ग्रसन्निवाभ्यधावत् ययोरगः सर्पः तार्क्ष्यसुतं गरुडं तद्वत् ॥ ७ ॥ आविध्येति । स मुरः शूलमाविध्यालोल्य तरसा बलेन गरुडाय प्रयुज्य पञ्चभिर्वक्त्रैर्व्यनन्ननाद किं कुर्वन् रोदसी द्यावापृथिव्यौ खमन्तरिक्षं लोकोपरितनमाकाशं सर्वेषां श्रोत्रबिलं (स्थानं) वा दिगन्तरञ्चापूरयन्नादेनेति शेषः । स नादः कृत्स्नमप्यण्डकटाहमावृणोत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अमन्दमनलम् । निरस्य मुक्त्वा आपूरयन्नादेनेति शेषः ॥ ८-१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मनस्विनां शूराणां यन्त्रतुल्यानि हृदयानि निर्बिभेद ॥ ५-६ ॥ युगान्ताशनेर्ध्वनिवद्भीषणमिति शत्रूणामेव "मल्लानामशनिः" इति वत् परिखाया जलात् ॥ ७ ॥ आविध्य भ्रामयित्वा स महान्नाद इत्यर्थः ॥ ८ ॥

गूढार्थदीपिनी

यन्त्राणि यन्त्रतुल्यानि दृढानि हृदयानि व्यदारयत् ॥ ५ ॥ युगान्ताशनिवत् प्रलयकालिकवज्रपातवत् भीषणम् । जलात् परिखास्थात् ॥ ६ ॥ स मुरः त्रिशूलमुद्यम्य मुखैः त्रिलोकीं ग्रसन्निव कृष्णमभ्यद्रवदित्यन्वयः । तार्क्ष्यः कश्यपस्तस्य सुतं गरुडम् यथा उरगः । युगान्ते प्रलये सूर्यानलवत् रोचिः दीप्तिर्यस्य । उल्वणो भयङ्करः ॥ ७ ॥ स मुरः गरुत्मते गरुडं हन्तुं त्रिशूलं भ्रमयित्वा वेगेन प्रक्षिप्य च व्यनदत् । स महान् नादः रोदसी दिवं भुवं च । अन्तरं छिद्रं पातालम् । अम्बरमिति पाठे आकाशम् आपूरयन् ब्रह्माण्डमावृणोत् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

युगान्ताशनिध्वनिवद्भीषणम् । पाञ्चजन्यध्वनिं मुरः श्रुत्वा उत्तस्थौ मुर इत्यग्रेपि सम्बन्ध्यते ॥ ६-७ ॥ स नादः अण्डकटाहमावृणोदित्यन्वयः । सोपि तस्मै कृष्णाय ॥ ८-१० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हिमाद्रौ तत्रापि तुङ्गशिखरे गिरिदुर्गैः शस्त्रदुर्गैर्मरुपाशयुतैर्वृतमासीद्वाह्ये गिरिं दुर्गं तदन्तः पानीयदुर्गं गौरवं पाशदुर्गं तस्याप्यन्तः क्षुरधारोपमं तत्पाशाश्च ते षट्सहस्राः सुघोराः । अभेद्यत्वमारीभिरतार्यता च दत्तं दुर्गाणां ब्रह्मणाराधितेनेत्याचार्योक्तरर्थोऽवधेयः । सुघोरा अन्ये चतुस्सहस्रपाशा इत्यर्थे महाभारततात्पर्यनिर्णयोक्तिविरोधो न यद्वा मरुपाशाश्च तेऽयुताः परस्परमलग्नाश्च तैः षट्सहस्रै रित्यर्थः । यथोक्तं स्थानान्तरे हरिवंशे । क्षुरान्तान्मौरवाप्यशाषट्सहस्रान्दुर्दर्श स इति । अत एवं दुर्गस्थानरथारथनाद्गरुडारूढ इत्युक्तिरिति ज्ञेयम् । आयुतेनेति वक्तव्येऽयुतैरिति यदवोचद्ग्रन्थकृत्तेनासंलग्नता तेषां संलग्नेत्यभिप्रैति ॥ ५ ॥ प्राकारस्याकारेण संस्थितं गिरिमद्रिं गदया निर्बिभेद । पर्वतच्छिदिकार्यनिष्पादकतया तदमित्रगोत्राणामन्तरान्तरीयाचरणं न्याय्यं तत्पक्षपातिना गदयैतत्पातोऽपि न्याय्य इत्युक्तिर्युक्ता ॥ ६ ॥ चकर्ताच्छिनत् । अमरं मौरवं पाशं चक्रेणाच्छिनत् । मुर इति मुरुरित च नामनी ॥ ७ ॥ क्षुरमालां तदावलिम् ॥ ८ ॥ तीव्रेण कर्मनिष्ठुरेण ॥ ९ ॥ अशनिवद्भीषणम् । पञ्चशिरांसि यस्य स मुरुः । जलात्प्राक्स्तम्भितादम्भसः ॥ १० ॥ युगान्तः प्रलयस्तत्कालिकं यो सूर्यानिलो तयो रोचिषा तत्समकान्त्योज्वलः । पञ्चभिर्मुखैः त्रिलोकाद्विशेषणसमासः ॥ ११ ॥ आविध्य भ्रामयित्वा निरस्य क्षिप्त्वा पक्षिणे गरुत्मते पञ्चभिर्मुखैर्व्यनदन्ननाद । खं रोदसी द्यावापृथिव्यौ सर्वा दिशोऽन्तरं विदिशोऽण्डकटाहं चापूर्य नादेनावृणोदाच्छादितवान् ॥ १२ ॥ तं शूलम् । खलशूलाः पुंसि चेति लिङ्गानुशासनात्पुल्लिङ्गोऽपि शूलशब्दः । सोऽपि मरुरपि ॥ १३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवमावरणानि दूरीकृत्य दूरान्मारणसाधनानि पाषाणक्षेपणरूपाणि यन्त्राणि चिच्छेदेत्याह **शङ्खनादेने**ति । मनस्विनां हृदयानि उत्साहशक्तीश्च । ततो दुर्गप्राकारमपि बिभेदेत्याह **प्राकार**मिति । **गुर्व्ये**ति । तत्र स्थितानां देवानां नाशनसामर्थ्यं द्योतितम् । तेषामुपेत्य प्रतिबन्धकत्वाभावाय **निरु**पसर्गः । **गदाधर** इति । अग्रे युद्धार्थं सावधान इत्यर्थः ॥ ५ ॥ एवं सर्वावरणानि भित्त्वा सावधानो जातः । शङ्खनादस्य माहात्म्यं 'विष्णोर्मुखोत्थानिलपूरितस्य यस्य ध्वनिर्दानवदर्पहन्ते'ति । ततो दर्पाच्छयानः परिखाजले तन्नादेन **दर्प**नाशं मत्वा कथं जात इति हेत्वन्वेषणार्थं उत्थितः । न केवलं माहात्म्यात् दर्पनाशकत्वम्, किन्तु स्वरूपतोऽपि नादस्तादृश इत्याह **युगान्ताशनिभीषण**मिति । **युगान्ते** प्रलये, तत्रापि मारकत्वेनैव प्रसिद्धः अशनिः, ततोऽपि भीषणः दर्पं हन्त्येव । प्रलये दैत्यानां दर्पस्तिष्ठतीति **प्रसिद्धिः** । अतो दर्पेण निश्चिन्तः शयानोऽप्युत्थितः । स च दैत्यस्तेन मारणीय एवेति भगवत्सम्मुखोऽपि विरुद्ध एव जातः । अविद्यासम्बन्धीति ज्ञापयितुं **पञ्चशिराः** । पञ्च शिरांसि यस्येति योगः । **मुर** इत्येव नाम । **जला**दिति परिखासम्बन्धिनः ॥ ६ ॥ उत्थित एव युद्धार्थं प्रवृत्त इत्याह **त्रिशूल**मिति । अनेनासहायवीरत्वमुक्तम् । **सुदुर्निरीक्षण** इति युक्तमेव तस्य तथात्वम् । यो हि द्रष्टुमेवाशक्यः । तेन सह को वा युध्येत् । किञ्च । **युगान्तसूर्यानलशोचिरुल्बणः** । पाञ्चजन्यध्वनिस्तु प्रलयाशनितुल्य एव, अस्य तु देहकान्तिरपि प्रलयसूर्यानलसदृशी । ततोऽप्युल्बणश्च । अत एव युद्धे निःशङ्कः । महाभूतान्यपि यो भक्षयितुं शक्तः, स कथं जेयो भवेदित्याह **ग्रसंस्त्रिलोकी**मिति । पञ्चभिर्मुखैः चतुर्षु दिक्षु उपरि च सर्वानेव लोकान् भक्षयति, न समायेति । दर्शनमात्रमेव तस्य भयानकम्, न तु युद्धं कर्तुं शक्त इति ज्ञापयितुं दृष्टान्तमाह **तार्क्ष्यसुतं यथोरग** इति । गरुडं सर्पो यथाभिधावति भक्ष्यः ॥ ७ ॥ गतस्य पराक्रममाह **आविध्ये**ति । उत्तोल्य भ्रामयित्वा वा । **तरसा** यावद्द्वितीयो न सावधानः । स हि भगवन्तं द्रष्टुमशक्तो गरुडमताडयत् । अविद्या भगवन्तं न विषयीकरोति । कालान्तरमेव भगवत्प्राप्तिरिति कालरूपं गरुडं क्षोभयति । **निरस्य** प्रक्षिप्य । निरसनेन अवहेला सूचिता । न हि अस्मद्बलं शूलेन समर्थितं भवतीति तृणमिव दूरीकृतवान् । ततोऽविद्यया तं मोहयितुं पञ्चभिर्वक्त्रैर्व्यनदत् । बिशेषेण शङ्खध्वनिं कृतवान् । अन्यस्त्वेकधा गर्जति, अहं पञ्चधेति ज्ञापयितुम् । तस्य नादस्य महत्त्वमाह **खं रोदसी**ति । सर्वमेव विवरस्थानं पूरयन् अण्डकटाहमावृणोत् । उपर्यपि ब्रह्माण्डं भित्त्वा गत इत्यर्थः । तत्त्वानामप्यविद्यामोहो वर्तत इति अलौकिकत्वाच्छब्दस्य बहिर्गमनम् । ब्रह्माण्डस्यापि अण्डत्वाद्रोमकूपवच्छिद्रत्वम् । मध्ये सर्वत्र पूरणं न भविष्यतीति गणयति । खमाकाशं मध्यस्थितं सर्वेषां हृदयाकाशो वा । **रोदसी** द्यावापृथिव्यौ । सर्वा **अष्ट** दिशः । अन्तरं मध्यम् । शब्दाघातादुत्पन्नस्य शब्दान्तस्य तथात्वं भविष्यतीत्याशङ्क्याह **महा**निति । आ समन्तात्पूरणं वृंहणन्यायेन ॥ ८ ॥

श्रीसुबोधिनी-सारः

यंत्राणि संक्रमाणि मनस्विनां धीराणां हृदयानि शंखनादेन निर्बिभेद गदाधरो हरिर्गुर्व्या महत्या गदया प्राकारं निर्बिभेद ॥ ५ ॥ युगांते प्रलयेऽशनिर्वज्रस्तद्वद्भीषणं पांचजन्यस्य ध्वनिं श्रुत्वा शयानः पंचशिरा दैत्यो मुरो जलादुत्तस्थौ ॥६॥ युगांते सूर्याग्निवत् रोचिर्यस्य तत्त्रिशूलम् उद्यम्योल्वणो भयंकरः सुदुर्निरीक्षणो मुरः पंचभिर्मुखैः त्रिलोकीं ग्रसन् इवाभ्यद्रवत् तार्क्ष्यसुतं गरुडमुरगः सर्प इव ॥ ७ ॥ तरसा वेगेन शूलमाविध्यातोल्य गरुत्मते गरुडं हंतुं निरस्य क्षिप्त्वा पंचभिर्वक्त्रैर्मुखैः स दैत्योऽगर्जत् । स महान्नादः सर्वा दिशोंबरमाकाशमंडकटाहं ब्रह्मांडमापूरयत् ॥ ८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

मुरः शयान इत्यत्र । **परिखासम्बन्धिन** इति । आवरणजलस्य चक्रेणान्तर्भावितत्वादिति भावः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यन्त्राणि शत्रुप्रवेशप्रतिबन्धकतया सर्वतः कारितानि तथा मनस्विनां शूराणां प्रवेशप्रतिरोधकर्तॄणां मुरादीनां हृदयानि उत्साहशक्तीश्च शङ्खनादेन बिभेद । स्पष्टमन्यत् ॥ ५ ॥ युगान्ते प्रलये योऽशनिस्तस्य ध्वनिवद्भीषणं पाञ्चजन्यस्य शङ्खस्य ध्वनिं श्रुत्वा परिखाजले शयानः पञ्चशिरा मुराख्यो दैत्यः तत उत्तस्थौ ॥ ६ ॥ युगान्ते सूर्याग्न्योरिव रोचिर्दीप्तिर्यस्य सः, अत एव उल्बणो भयंकरः, अत एव सुदुर्निरीक्षणः सम्यग्द्रष्टुमप्यशक्यो मुरः त्रिशूलमुद्यम्य पञ्चभिर्मुखैः त्रिलोकीं ग्रसन्निव अभ्यधावत्, मुखानि प्रसार्य भगवन्तं हन्तुं वेगेनागत इत्यर्थः । 'एवं हन्तुमागतोपि स एव मरिष्यति' इति सूचयन् दृष्टान्तमाह–उरगः सर्पो तथा तार्क्ष्यसुतं गरुडं हन्तुमापतेत्तथेति ॥ ७ ॥ आगत्य च शूलमाविध्य अतोऽल्पतरसा बलेन गरुत्मते गरुडं हन्तुं तदुपरि निरस्य प्रक्षिप्य पञ्चभिर्वक्त्रैर्व्यनदत् । किं कुर्वन् ? खमाकाशम्, रोदसी द्यावापृथिव्यौ, दिशः, अन्तरं पातालं च तेन शब्देनापूरयन् किं बहुना स च नादः कृत्स्नमप्यण्डकटाहमावृणोत् ॥ ८ ॥

अन्वितार्थप्रकाशिका

शङ्खेति । गदाधरः कृष्णः यन्त्राणि प्राकारन्यस्तानि यद्वा शत्रुप्रवेशप्रतिबन्धकतया सर्वतः कारितानि तथा मनस्विनां शूराणां प्रवेशप्रतिरोधकर्तॄणां मुरादीनां हृदयानि उत्साहशक्तीश्च यन्त्रतुल्यानि मनस्विनां हृदयानीति वा शङ्खनादेन बिभेद प्राकारं च गुर्व्या गदया निर्बिभेद ॥ ५ ॥ पाञ्चजन्येति । युगान्ते प्रलये योऽशनिस्तस्य ध्वनिवद् भीषणं पाञ्चजन्यस्य शङ्खस्य ध्वनिं श्रुत्वा परिखाजले शयानः पञ्चशिरा मुराख्यो दैत्यः ततो जलात् उत्तस्थौ ॥ ६ ॥ त्रिशूलमिति । युगान्ते सूर्यानलयोरिव रोचिर्दीप्तिर्यस्य सः अत एव उल्बणो भयङ्करः अत एव सुदुर्निरीक्षणः सम्यग्द्रष्टुमप्यशक्यो मुरः त्रिशूलमुद्यम्य पञ्चभिर्मुखैः त्रिलोकीं ग्रसन्निव । शता आर्षः । उरगः सर्पो यथा तार्क्ष्यसुतं गरुडं हन्तुमापतेत्तथाऽभ्यधावत् । मुखानि प्रसार्य भगवन्तं हन्तुं वेगेनागतः ॥ ७ ॥ आविध्येति । सः मुरः शूलम् आविध्य उत्तोल्य गरुत्मते गरुडं हन्तुं तरसा वेगेन बलेन वा निरस्य प्रक्षिप्य पञ्चभिर्वक्त्रैर्व्यनदत् । स नादः रोदसी द्यावापृथिव्यौ खमाकाशं च दिशः अन्तरं पातालं चापूरयन् सर्वदिशोऽम्बरमित्यपि पाठः । कृत्स्नमप्यण्डकटाहमावृणोत् ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यंत्राणि प्राकारचित्रितानि हृदयानि च ॥ ५ ॥ युगांते योऽशनिर्वज्रपातस्तस्य ध्वनिवद्भीषणम् ॥ ६ ॥ युगांतः प्रलयावसरे सूर्योऽनलयोः कांतिवत् उल्वणो भयानको हरिमभ्यद्रवत् ॥ ७ ॥ गरुत्मते गरुडाय आविध्य आतोल्य निरस्य निक्षिप्य स मुरो वक्त्रैर्व्यनदत् । स महान्नादः खादीन् आपूरयन् सन् अंडकटाहमावृणोत् । अंतरं पातालं ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शङ्खेति । मनस्विनां स्वैरिणां मुरादीनामित्यर्थः । हृदयानि, यन्त्राणि च, शङ्खनादेन, गुर्व्या गदया, प्राकारं गदाधरः कृष्णः, निर्बिभेद ॥ ५ ॥ पाञ्चजन्येति । युगान्ताशनिभीषणं युगान्तकालजायमानाशनिध्वनिभयंकरं, पाञ्चजन्यध्वनिं श्रुत्वा, शयानो जले कृतशयनः, पञ्चशिराः मुरो मुरनामा दैत्यः, जलात् उत्तस्थौ ॥६॥ त्रिशूलमिति । युगान्ते युगान्तकाले वर्त्तमानयोः सूर्यानलयोरिव रोचिर्दीप्तिर्यस्य सः, सुदुर्न्निरीक्षणः सुतरां दुःखेन निरीक्षणीयः, उल्बणो दुःसहः मुरः, त्रिशूलं उद्यम्य, पञ्चभिः मुखैः, त्रिलोकीं ग्रसन्निव, वर्त्तमानः सन्, उरगः सर्पः, तार्क्ष्यसुतं प्रति, यथा तथा, अभ्यद्रवदभ्यधावत् ॥ ७ ॥ आविद्ध्येति । स मुरः, शूलं आविद्ध्य आतोल्य, तरसा बलेन, गरुत्मते गरुडाय, गरुडं हन्तुमित्यर्थः । निरस्य प्रयुज्य, पञ्चभिः वक्त्रैर्मुखैः, व्यनदन्ननाद । महान् महत्त्वोपेतो नादः, खमाकाशं, रोदसी द्यावापृथिव्यौ, सर्वदिशोऽन्तरं सर्वासामपि आशानामन्तरालं, आपूरयन् सन्, अण्डकटाहं, आवृणोत् ॥ ८ ॥

कृष्णप्रिया

भौमासुर के नगर की रचना विलक्षण थी, चारों ओर यन्त्रों की दिवारबन्धी बनायी थी । श्रीकृष्ण भगवान् ने शंखनाद से वीरपुरुषों के हृदयों को एवं यन्त्रों को तोड़ दिया । पुनः अपनी दिव्य गदा के प्रहार से भगवान ने नगर के परकोटे को तोड़ दिये ॥ ५ ॥ भगवान् श्रीकृष्ण ने प्रलयकाल के विद्युत् एवं मेघनाद के तीव्र ध्वनि के समान पाञ्चजन्य शङ्खनाद

किया । नाद को सुनते ही गाढे नींद में सोये हुए मुर दानव की नींद टूट गयी, वह खड़ा हुआ और पञ्चशिर वाला वह दानव जल से बाहर आया ॥ ६ ॥ मुर दानव प्रलयकाल के उग्र सूर्य और प्रलयाग्नि के समान भयानक तेजस्वी था। मुर दैत्य के सामने देखना भी अशक्य इतना वह भयङ्कर था। देखते ही नेत्रों का तेज नष्ट हो जाता था। पञ्चशिरा मुरदानव ने अपने हाथों में त्रिशूल उठाया और जैसे सर्प महाराज गरुडजी पर टूट पड़े इसी प्रकार भगवान् श्रीकृष्ण पर टूट पड़ा। इसके आक्रमण को देखते यह मालूम पड़ता था कि वह अपने पाँचो मुखों से क्या तीन लोक को निगल जायगा ॥ ७ ॥ मुर दैत्य ने अपने उग्र त्रिशूल को भयानक वेग से गोल-गोल घूमाया और पक्षीराज श्रीगरुडजी पर चलाया। पुनः इतने से संतुष्ट न हुआ और अपने उग्र पाँचो मुखों से अत्यत क्रूर सिंहनाद करने लगा। मुर का सिंहनाद पाताल, पृथ्वी, आकाश, दस दिशाओं और सारे ब्रह्माण्ड में फैल गया एवं पूर्ण ब्रह्माण्ड को भर दिया ॥ ८ ॥

[1]तदापतद् वै त्रिशिखं गरुत्मते हरिः शराभ्यामभिनत्त्रिधौजसा ।
मुखेषु[2] तं चापि शरैरताडयत् तस्मै गदां सोऽपि रुषा व्यमुञ्चत ॥ ९ ॥
तामापतन्तीं गदया गदां मृधे गदाग्रजो निर्बिभेदे सहस्रधा ।
उद्यम्य बाहूनभिधावतोऽजितः[3] शिरांसि चक्रेण जहार लीलया ॥ १० ॥
व्यसुः पपाताम्भसि कृत्तशीर्षो[4] निकृत्तशृङ्गो[5] ऽद्रिरिवेन्द्रतेजसा ।
[6]तस्यात्मजाः सप्त पितुर्वधातुराः [7]प्रतिक्रियामर्षजुषः समुद्यताः ॥ ११ ॥[8]
ताम्रोऽन्तरिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः ।
पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्रयुक्ता [9]निरगुर्धृतायुधाः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—गरुत्मते, आपतत्, तत्, विशिखम्, हरिः, शराभ्याम्, वै, ओजसा, त्रिधा, अभिनत्, च, अपि, तम्, मुखेषु, शरैः, अताडयत्, सः, अपि, तस्मै, रुषा, गदाम्, व्यमुञ्चत ॥ ९ ॥ गदाग्रजः, मृधे, आपतन्तीम्, ताम्, गदाम्, गदया, सहस्रधा, निर्बिभेदे, पुनः, अजितः, बाहून्, उद्यम्य, अभिधावतः, चक्रेण, लीलया, शिरांसि, जहार ॥ १० ॥ इन्द्रतेजसा, निकृत्तशृङ्गः, अद्रिः, इव, कृत्तशीर्षः, व्यसुः, अम्भसि, पपात, पितुः, बधातुराः, अमर्षजुषः, तस्य, सप्त, आत्मजाः, प्रतिक्रियार्थम्, समुद्यताः ॥ ११ ॥ भौमप्रयुक्ताः, धृतायुधाः, ताम्रः, अन्तरिक्षः, श्रवणः, विभावसुः, वसुः, नभस्वान्, च, सप्तमः, अरुणः, मृधे, पीठम्, चमूपतिम्, पुरस्कृत्य, निरगुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्मै श्रीकृष्णाय गदां व्यमुंचत व्यक्षिपत् ॥ ९-१० ॥ इन्द्रतेजसा वज्रेण प्रतिक्रियया हेतुभूतया अमर्षजुषः ॥११॥ पीठं पीठनामानम् निरगन्निरगमन् ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् शूलम् । अभिनत् अकृन्तत् । तं मुरम् । सोऽपि मुरोपि । आपतदेव न त्वापतितम् ॥ ९ ॥ अभिधावतः शिरांसीत्यन्वयः । गदाग्रज इति–गदस्यातिशूरत्वेन तस्यातिशूरतमत्वमुक्तम् ॥ १० ॥ तस्य मुरस्य । अमर्षं क्रोधं जुषंत इत्यमर्षजुषः । प्रतिक्रियया हेतुभूतयाऽमर्षजुषः ॥ ११ ॥ तान्नामतो निर्दिशति–ताम्र इति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वै एव गरुत्मते गरुत्मति आपतदेव नत्वापतितमित्यर्थः । ओजसा वेगेन अपीति सामर्थ्यद्योतकं मुखेष्विति ताद्व्यादानेन क्रोधात् इति सर्वेष्वपि तेषु युगपदेव ताडनं सूचितम् ॥ ९ ॥ मृधे युद्धमध्ये साक्षादेव नतु मायादिना परोक्षमित्यर्थः । गदया

---

[1] तमापतन्तं त्रिशिखं गरुत्मते चकर्त बाणद्वितयेन केशव । मुखेषु तस्यापि शरान्समर्पयन् पुनर्गदां सोप्यममुचन् मधुद्विषे ॥ –विज. ।

[2] ''पञ्चापि'' चक्रेण–श्रीधर. टि. । [3] दिशः–विज. । [4] कन्धरो–विजः; शीर्षा–प्रा. पा. । [5] पक्षो–विज. । [6] पपात विष्णोः शिरसि प्रमोदिनी प्रसूनवृष्टिर्निहते मुरेऽसुरे–विज. । [7] चिकीर्षवस्तस्य रणे प्रतिक्रियाम्–विज ।

[8] ध्रुवश्च विष्णुः श्रवणो विभावसुर्नभो विवस्वातरुणश्च सप्त । रथान्समारुह्य वृषप्रयुक्तान् भौमप्रयुक्ता भवनान्निराक्रमन् ॥
अयुञ्जतासज्ज्य शरासनान्भटाः शक्त्यृष्टिशूलानजिते रुषोल्बणात् ॥ इति पाठ भेदः-विज. ।

[9] निरगन–श्रीधर. वंशी. जीव. वीर. विश्व. शुक. सु. ।

गदाग्रज इत्यनुप्रासालङ्कार: उल्लासेन गदाग्रज इति तदुपलक्षितभ्रातृकुलयशोदातृतास्मरणसौख्येन च पश्चापीति पाठे गदयैवेति ज्ञेयं किन्तु अग्रे दृष्टान्ते इन्द्रतेजसेत्युक्त्वा तेज:साम्याच्चक्रेणेति पाठो युक्त: ॥ १० ॥ वधेनातुरा: शोकविह्वला: अत: प्रतिक्रियार्थममर्षजुष: ॥ ११ ॥ तमेवोक्तपोषन्यायेनाह—ताम्र इति । सप्तम इति भ्रात्रन्तरं निरस्तं तेषां नामग्रहणं नाम्नैव गुणज्ञापनार्थं स्वत एव प्रतिक्रियामर्षजुष: पुनश्च भौमेन प्रयुक्ता: एवं तदैव भौमेन तत्रोद्यतमिति तत्तत्क्रियायां श्रीभगवतो लाघवमपि दर्शितम् ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वै एव, गरुत्मते गरुत्मति, आपतदेव, न त्वापतितमित्यर्थ: । ओजसा वेगेन, हरिरिति तत्संहाराभिप्रायेण, अपि एव, मुखेष्वेव, तद्व्यादानेन क्रोधादिति सर्वेष्वपि तेषु युगपदेव ताडनं तेन क्षिप्रकारित्वादिकञ्च सूचितम् ॥ ९ ॥ मृधे वर्तमान इति युद्धकौतुकित्वम्, यतो गदाग्रजो युद्धादिविनोदार्थमेव श्रीवसुदेवाद्गदस्याग्रे प्रादुर्भूत इति भाव: । यद्वा, युद्धमध्ये साक्षादेव, न तु मायादिना परोक्षमित्यर्थ: । यतो गदाग्रजत्वेनावतीर्ण: साक्षाद्भगवान्, अभितोऽभिमुखे वा धावतस्तस्य, अजित इति महापराक्रमादिकं सूचितम् । अत एव लीलया जहार, छित्त्वा दूरे पातयामास । पश्चापोति पाठे गदयैवेति ज्ञेयम् । किन्तु अग्रे दृष्टान्ते इन्द्रतेजसेत्युक्त्या तेज: साम्याच्चक्रेणेति पाठो युक्त: ॥ १० ॥ नितरां निर्म्मलत्वादिना दूरत: कृत्तं शृंगं यस्य स:, वधेनातुरा: शोकविह्वला:, अत:, प्रतिक्रियार्थममर्षजुषोऽतिक्रुद्धा: सन्त: सम्यगुद्यता युद्धार्थमुद्योगं चक्रु: ॥ ११ ॥ तमेवोक्तपोषण्यायेनाह—ताम्रइति । सप्त इति भ्रात्रन्तरं निरस्तम् । पुरस्करणे हेतु:—चमूपतिं नरकस्य सेनान्यमिति । किञ्च, भौमेन प्रयुक्ता: पीठेन सह यातेति नियुक्ता:, अतो धृतायुधा:, अन्यथा शोकातुरतया विचारापगमेनानन्यापेक्षया निर्गमसम्भवात् । यद्वा, स्वत एव प्रतिक्रियामर्षजुय:, पुनश्च भौमेन प्रयुक्ता:, अत: पीठं सम्मान्य धृतायुधा: सन्तो मृधे निमित्ते युद्धस्थाने वा निरगन् पुरान्निर्गता: ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

निरगमन् निर्गता: ॥ १२-१४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेति । तिस्र: शिखा यस्य तत् गरुडायागच्छत् त्रिशूलम् ओजसा बलेन शराभ्यां त्रिधा चिच्छेद तं मुरं च मुखेषु शरैस्ताडयामास सोपि मुरोपि रुषा तस्मै कृष्णाय गदां व्यमुञ्चत् प्रायुङ्क्त ॥ ९ ॥ तामिति । गदाग्रजो भगवान् स्वगदया तां मुरप्रयुक्तामापतन्तीं गदां मृधे युद्धे सहस्रधा निर्बिभेद । ततो बाहू उद्धृत्याभिधावतो मुरस्य पञ्च शिरांसि चक्रेणाजितो भगवांश्चिच्छेद ॥ १० ॥ व्यसुरिति । निकृत्तानि शीर्षाणि शिरांसि यस्य स अत एव व्यसुर्गतप्राणोऽम्भसि जले पपात यथा इन्द्रतेजसोपलक्षितेन वज्रेण निकृत्तशृङ्गो गिरिस्तद्वत् तस्य मुरस्यात्मजा: सप्त पितुर्वधात् दु:खिता: प्रतिक्रियायै अमर्षजुष: क्रोधाविष्टा: भौमेन प्रेषिता: धृतान्यायुधानि यैस्ते च मृधे युद्धे निमित्ते पीठनामानं चमूपतिं पुरस्कृत्य समुद्यता: आयत्ता: निरगमन्निर्गता बभूवुरिति सम्बन्ध: तानेव सप्त निर्दिशति ताम्र इति ॥ ११-१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

गरुत्मते गरुत्मति आपतदेव नत्वापतितं तस्मै श्रीकृष्णाय सोऽपि मुरोऽपि ॥ ९ ॥ उद्यम्य उच्चीकृत्य अभिधावतो मुरस्य ॥ १० ॥ इन्द्रतेजसा वज्रेण प्रतिक्रियया हेतुभूतया अमर्षयुक्ता: ॥ ११ ॥ निरगन् निरगमन् ॥ १२-१४ ॥

गूढार्थदीपिनी

वै एवार्थे आपतदेव न त्वापतितम् त्रिशिखं त्रिशूलं ओजसा झटिति शराभ्यां त्रिधा अभिनत् अच्छिनत् । तं मुरमपि मुखेषु अताडयत् सोऽपि मुरोऽपि तस्मै कृष्णाय गदां व्यमुञ्चत् ॥९॥ गदा अग्रजो यस्य स: श्रीकृष्ण आपतन्ती तां गदां गदया निर्बिभिदे । पुनश्च अजित: श्रीकृष्ण: बाहून् उत्थाप्य अभिधावत: सम्मुखमागच्छतस्तस्य मुरस्य शिरांसि लीलयाऽनायासेन चिच्छेद ॥ १० ॥ व्यसु: विगतप्राण: सन् स मुर: जले पपात इन्द्रतेजसा वज्रेण छिन्नशिखर: पर्वतो यथा पतति प्रतिक्रिया प्रतीकार: तदर्थम् अमर्षं क्रोधं जुषन्ते तथा ॥ ११ ॥ ताम्रादय: सप्त पुत्रा: युद्धार्थं निरगमन्नित्यन्वय: । पीठं पीठनामानम् सेनापतिं पुरस्कृत्य ॥ १२ ॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

इन्द्रतेजसा वज्रेण प्रतिक्रियायै अमर्षजुष: क्रोधयुक्ता: ॥ ११ ॥ निरगन् निरगमन् ॥ १२-१३-१४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

गदाग्रजो गदां गदया कौमोदक्या सहस्रधा निर्बिभेद । दिशः प्रति ॥ १४ ॥ इन्द्रतेजसा वज्रनिहितेन मुरेऽसुरे निहते प्रमोदिनी प्रसूनवृष्टिर्विष्णोः शिरसि पपात ॥ १५ ॥ प्रतिक्रियां हरिं हत्वा मृतापचितिरूपां **प्रतिक्रियाम्** । तन्नामान्याह । ध्रुवश्चेत्यादिना । ध्रुवश्चरिष्णुरित्यत्र चरिष्णुरिति करिष्णुरिति नाम वेति दैत्यगुर्वाचार्यः । ताम्रोऽन्तरिक्ष इति च पठन्ति ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं तस्य पराक्रममुक्त्वा तत्प्रतीकारार्थं भगवच्चरित्रमाह तदापतदिति । तच्छूलमापतत् गरुडोपरि तदेव स्थितम् । **त्रिशिख**मित्यनेन **भेदत्रयं** करोतीति त्रिसत्यानां देवानामपि मारकं तदिति सूचितम् । **गरुत्मत** इति पक्षवानतिकोमल इति । स्वतो निवारणसामर्थ्यं चाह । **भगवांश्च** हरिः । ततः प्रतीकारोऽवश्यं कर्तव्य इति शराभ्यामच्छिनत् । त्रिधा छेदे न पुनः प्ररोहतीति । तच्छूलं दैत्यमित्यनेन ज्ञापितम् । **ओजसे**ति । तदधिष्ठिता देवतापि **यथा** छिन्ना **भवति**, तस्य तेजसा सह वा । तेजोऽपि त्रिधा छिन्नमित्यर्थः । न केवलं त्रिशूलच्छेद एव, किन्तु सोऽपि ताडित इत्याह मुखेष्विति । यथा न रूपात् तस्य रवेण लोकानां भयं जायत इति मुखान्यपि ताडितानि । अर्थात् पञ्चभिः । आपूरितानि वा । तदा यावद्भिः पूरणं भवति । **रव एव च** निवारणीय इति । **तं चापी**ति । भिन्नतया सोऽपि हृदये ललाटे वा हतः । तदा **पक्षपातं** ज्ञात्वा मम गम्यो भविष्यतीति तस्मै भगवते **सोऽपि** ताडितोऽपि रुषा 'अपकृतोतिक्रुद्धो भवती'ति दूरादेव गदां प्रक्षिप्तवान् ॥ ९ ॥ सापि गदा देवताधिष्ठितेति भगवान् स्वगदयैव तन्निराकरणं कृतवानित्याह **तामापतन्ती**मिति । कौमोदक्या नितरां बिभिदे । सहस्रधेति योजनायामशक्या कृता । सजातीयेन सजातीयहननमयुक्तमित्याशङ्क्याह मृध इति । सङ्ग्रामे न दोषः । **गदाग्रज** इत्यनुप्रासः, स्त्रीणां हितकारी वा । **बाहूनुद्यम्ये**ति ग्रहणार्थं समागमनमुक्तम् । स च भगवता न स्प्रष्टव्य इति कालेनैव तमच्छिनदित्याह **शिरांसि चक्रेण जहारे**ति । पश्चापि **पर्वाणि** छिन्नानि, यथा प्रतीत्यापि न संसारः । **लीलये**ति सुदर्शनसामर्थ्यं व्याबर्तयति । पौरुषं स्वकीयमेव व्यापृतम्, परं निरायासेन, प्राप्त एवायासो व्यावर्त्यते । अथवा । लीलैव तत्स्थाने व्यापृता भविष्यतीति । तेन निरोधरूप एव संसारः साम्प्रतं प्रवर्तताम्, नत्वन्य इति लीलयेत्युक्तम् ॥ १० ॥ छिन्नेष्वपि शिरस्सु दैत्यत्वात्कदाचित् प्राणाः हृदयादिषु तिष्ठेयुरिति तस्य छिन्नशिरसोऽग्रिमावस्थामाह **व्यसुः** पपातेति । विगता असवो यस्येति । भूमौ पतितस्य दैत्यत्वात् पुनरुद्गमो भविष्यतीति **अम्भसि** पात उच्यते । 'आपो हि रक्षोघ्नी'रिति । अविद्यायामपि **भगवत्सामर्थ्यार्थमग्रे**ऽप्युत्पादनाभावार्थं च **अजित** इत्युक्तम् । न केनापि मायादिभिरपि पराजितः । **निकृत्तशीर्ष** इति । निकृत्तं शिरो यस्येति । नितरां छेदः पुनर्योजनाभावार्थः । आधिदैविकच्छेदार्थो वा । युगान्तरेऽपि प्रादुर्भावाभावाय दृष्टान्तमाह **निकृत्तशृङ्गोऽद्रिरिवे**ति । **इन्द्रतेजसा** वज्रेण । तथापदं पुनरुत्थाने इन्द्राद्भयं सूचयति । तथात्रापि भयादनुत्थानम् । तस्य सप्तव्यसनानि पुत्राः साधिकरणा मारिता इति वक्तुं तेषामागमनमाह **तस्यात्मजा** इति । मूलच्छेदे शाखा इव ते न प्रयोजका इति पितुर्वधेनातुराः प्रतिक्रियार्थममर्षजुषः सेवितरोषाः । मारकस्य मारणं प्रतिक्रिया । स्वतः असामर्थ्यात् क्रोधसेवां कृतवन्तः । क्रोधेनापि कदाचिद्भवेदिति । **समुद्यता** इति बहिःसामग्री निरूपिता । अन्तः क्रोधः ॥ ११ ॥ तेषां प्रसिद्ध्यर्थं नामानि गणयति **ताम्रोऽन्तरिक्ष** इति । **ताम्र** इति वर्णतः क्रोधात्मकः । **अन्तरिक्ष** इति सर्वक्रियाव्यापारयितुमशक्यः । **श्रवण** इत्याकाशरूपः । **विभावसुः** सूर्याग्नितुल्यः । **वसुः** भीष्मादेरप्यधिकः । **नभस्वान्** वायुः । तत्तुल्यः । **अरुणः** सर्वोद्बोधकः । वर्णतो वा भयानकः । **सप्तम** इति क्रमोऽत्र विवक्षित इति ज्ञापयति । पीठस्तेषामाधारभूतः । नरकासुरस्य सेनापतिः । मृधे युद्धार्थं भौमप्रयुक्ताः । स्वस्थाने नरकासुरस्तान् प्रेषितवान् । ते हि स्वापेक्षयापि पितृवधाद्युद्धं करिष्यन्तीति । युद्धार्थं प्रथमतो निरगुः, धृतायुधाश्च पश्चाज्जाताः । अनेन युद्धे निश्चयो निरूपितः ॥ १२ ॥

श्रीसुबोधिनी–सारः

गरुत्मते आपतत् आयातं तद्वै त्रिशूलं त्रिशिखं तिस्रः शिखा यस्येति हरिः शराभ्यां द्वाभ्यां त्रिधाऽच्छिनदोजसा बलेन मुखेषु पंचसु शरैस्तं च मुरमपि अविध्यत् सोपि मुरस्तस्मै कृष्णाय रुषा गदां व्यमुंचत प्राक्षिपत् ॥ ९ ॥ मृधे संग्रामे आपतंतीं तां गदां गदाग्रजो हरिः स्वगदया सहस्रधा खंडितवान् बाहूनुद्यम्याभिधावतः संमुखमागच्छतो दैत्यस्य चक्रेण शिरांसि चिच्छेद लीलया यतोऽजितः ॥ १० ॥ कृत्तानि छिन्नानि शीर्षाणि यस्य स मुरो व्यसुर्मृतोंभसि परिखाजले पपात इंद्रस्य तेजसा छिन्नशृंगोद्रिः पर्वत इव पितुर्वधेन मृत्युनातुरा दुःखिताः प्रतिक्रियार्थम् अमर्षं क्रोधं जुषंते इति तथा तस्यात्मजा मुरस्य पुत्राः सप्त समुद्यता योद्धुं प्रवृत्ताः ॥ ११ ॥ तेषां नामानि ताम्र इति स्पष्टं धृतान्यायुधानि यैस्ते भौमेन प्रयुक्ताः प्रेषिता मृधे पीठं पीठासुरं पुरस्कृत्याग्रे कृत्वा निरगन् निर्गताः । वर्णलोप आर्षः ॥ १२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

मुखेषु तं चापीत्यत्र । **पञ्चभि**रिति । ताड्यानां मुखानां पञ्चत्वान्नात्र कपिञ्जलन्याय इति भावः । एतस्य रवनिवारणत्वादाहुः **आपूरितानी**ति । आपूरणेनैव रवनिवारणसम्भवादिति भावः । तदा पञ्चसंख्या शराणां नास्तीत्याहुः **यावद्भि**रिति । एतत्पक्षकथने बीजमाहुः **रव एवे**ति ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तिस्रः शिखा यस्य तत्त्रिशिखं त्रिशूलं गरुडाय आपतत् आगच्छदेव हरिः ओजसा झटिति वेगेन शराभ्यां त्रिधा अभिनत् चिच्छेद, तं मुरं चापि मुखेषु शरैरताडयत् । स मुरोऽपि रुषा तस्मै कृष्णाय गदां व्यमुञ्चत ॥ ९ ॥ मृधे युद्धे तां मुरप्रयुक्तां आपतन्तां गदां गदाग्रजो भगवान् कृष्णः स्वगदया सहस्रधा निर्बिभेदे निर्बिभेद । ततश्च बाहूनुद्यम्य अभिधावतोऽभिमुखमागच्छतो मुरस्य पञ्चशिरांसि अजितः क्वापि पराजयरहितः कृष्णः लीलया अनायासेनैव चक्रेण चिच्छेद ॥ १० ॥ कृत्तानि छिन्नानि शीर्षाणि शिरांसि यस्य सः मुरः अत एव व्यसुर्गतप्राणोंऽभसि पपात । तस्य महत्त्वं सूचयन् दृष्टान्तमाह—यथा इन्द्रतेजसा युक्तेन वज्रेण निकृत्तशृङ्गो गिरिः पतति तथेति । ततश्च ताम्रादयः सप्त तस्य मुरस्यात्मजाः पितुर्वधेनातुराः दुःखिताः, अत एव प्रतिक्रियायै अमर्षजुषः क्रोधाविष्टाः मृधे निमित्ते भौमेन प्रयुक्ताः, अत एव धृतायुधाः चमूपतिं पीठनामानं पुरस्कृत्य समुद्यताः आयत्ताः पुरान्निरगान् निसृता; ॥ ११-१२ ॥

अन्वितार्थप्रकाशिका

तदिति । तिस्रः शिखा यस्य तत्त्रिशिखं त्रिशूलं गरुडाय आपतत् आगच्छदेव हरिः ओजसा झटिति वेगेन शराभ्यां त्रिधा अभिनत् चिच्छेद । तं मुरं चापि मुखेषु शरैरताडयत् । स मुरोऽपि रुषा तस्मै कृष्णाय गदां व्यमुञ्चत ॥ ९ ॥ तामिति । मृधे युद्धे तां मुरप्रयुक्ताम् आपतन्तीं गदां गदाग्रजो भगवान् स्वगदया सहस्रधा निर्बिभिदे निर्बिभेद । ततश्च बाहूनुद्यम्योच्चीकृत्याभिधावतोऽभिमुखमागच्छतो मुरस्य पञ्च शिरांसि अजितः कृष्णः लीलया अनायासेनैव चक्रेण जहार चिच्छेद ॥ १० ॥ व्यसुरिति । कृत्तानि छिन्नानि शीर्षाणि शिरांसि यस्य सः मुरः इन्द्रतेजसा वज्रेण निकृत्तशृङ्गो गिरिः यथा पतति तथा व्यसुर्गतप्राणोऽम्भसि पपात । सप्तसंख्याः तस्य मुरस्यात्मजाः पितुर्वधेनातुरा दुःखिताः अत एव प्रतिक्रियायै प्रतिक्रियया हेतुभूतया वा अमर्षजुषः क्रोधाविष्टाः युद्धाय समुद्यता बभूवुः ॥ ११ ॥ ताम्र इति । ताम्रादयः षट् सप्तमोऽरुणश्चेति ते सप्त मुरसुताः मृधे निमित्ते भौमेन प्रयुक्ता अत एव धृतायुधाः चमूपतिं पीठनामानं पुरस्कृत्य पुरान्निरगन् निर्गताः । आर्षः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गरुत्मते गरुत्मति । आपतत् तद्वै तदेव तस्मै कृष्णाय ॥९॥ अभिधावतः शीघ्रं सन्मुखमागछतः ॥१०॥ कृत्तशीर्षाछिन्नमस्तकः इंद्रतेजसा शक्रवज्रेण प्रतिक्रियार्थंपितृवैरग्नहणार्थममर्षजुषः क्रोधयुक्ताः ॥ ११ ॥ पीठं पीठाभिधं सेनापतिं निरगन् निरगमन् ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति । गरुत्मते गरुडं हन्तुं, आपतदागच्छत् तत्, तिस्रः शिखा यस्य तत्, त्रिशूलमित्यर्थः । हरिः, ओजसा शराभ्यां त्रिधा, अलुनात् चिच्छेद वै । तं मुरं चापि, शरैः मुखेषु पञ्चस्वप्यास्येषु, अताडयत् । स मुरोऽपि, रुषा, तस्मै कृष्णाय, गदां व्यमुञ्चत ॥ ५ ॥ तामिति । गदाग्रजः श्रीकृष्णः, मृधे आवतन्तीं तां मुरप्रयुक्तां गदां, गदया स्वकौमोदक्या, सहस्रधा निर्बिभिदे । ततः बाहू भुजौ, उद्यम्य उद्धृत्य, अभिधावतो मुरस्य, शिरांसि, अजितः श्रीहरिः, लीलया चक्रेण, जहार । बाहूनभिधावत इति पाठे, तस्य शिरःपञ्चकवद्भुजबाहुल्यमपि बोध्यम् ॥ १० ॥ व्यसुरिति । इन्द्रतेजसा इन्द्रतेजसोपलक्षितेन वज्रेणेत्यर्थः । निकृत्तानि छिन्नानि शृङ्गाणि शिखराणि यस्य सः, अद्रिः पर्वतः इव, कृत्तानि छिन्नानि शीर्षाणि यस्य सः मुरः, व्यसुर्गतप्राणः सन्, अम्भसि जले, पपात । सप्त सप्तसंख्याकाः, तस्य मुरस्य, आत्मजाः पितुः वधातुराः पितृवधादतिदुःखिता इत्यर्थः । प्रतिक्रियामर्षजुषः प्रतिक्रियायै क्रोधाविष्टाः सन्तः, समुद्यताः कृष्णेन सह योद्धुमुद्यमयुक्ताः, आसन्निति शेषः ॥ ११ ॥ तान्नाम्ना निर्दिशन् तेषां युद्धाय पुरान्निष्क्रमणमाह । ताम्र इति ॥ ताम्रः, अन्तरिक्षः श्रवणः, विभावसुः, वसुः नभस्वान्, सप्तमः अरुणश्च । एते भौमप्रयुक्ताः नरकासुरेणापि नियुक्ताः, धृतान्यायुधानि यैस्तथाभूताः सन्तः, चमूपतिं भौमसेनाधिनाथं, पीठं पीठनामानमसुरं पुरस्कृत्य, मृधे संग्रामविधाननिमित्तमित्यर्थः । निरगन् निर्गता बभूवुः ॥ १२॥

कृष्णप्रिया

भगवान् श्रीकृष्ण के ध्यान में आया कि मुरप्रयुक्त यह भयङ्कर त्रिशूल श्रीगरुडजी पर आ रहा है तब अपने हस्त लाधव को दिखाते हुए नाथ ने अत्यन्त कौशल से दो बाण लगाये और बाणों के प्रहार से त्रिशूल के तीन टुकड़े हो गये। पुनः पुरुषोत्तमः ने मुर दैत्य के मुख में भगवान् ने बहुत बाण लगाये । प्रतीकार न कर सकने से मुर दानव को क्रोध आया और आविष्ट होकर मुर दैत्य ने भगवान् श्रीकृष्ण पर गदा चलायी ॥ ९ ॥ गदाग्रज भगवान् श्रीकृष्ण ने देखा कि मुरदानव की गदा आ रही है तब गदा के आने के पहिले ही नाथ ने अपनी गदा चलायी और गदा से गदा को चूर-चूर कर दिया । अब

मुर दानव निःशस्त्र हो गया इसलिये मुर ने अपनी भुजायें उठायी और फैलाकर भगवान पर टूट पड़ा तब उसके आने से पूर्व आसानी से सुदर्शन चक्र से भगवान् ने मुर दानव के पाँचों मस्तक कबन्ध से उतार लिये ॥ १० ॥ सिर कटते ही मुरदानव के के पाँचो प्राण निकल गये और स्वयं मुरदैत्य जल में गिर पड़ा मान महाराज इन्द्र के वज्र से शिर कट जाने पर कोई महान् गिरि महासागर में गिर पड़ा हो । अपने पिता की मृत्यु देखकर अत्यन्त खिन्न हुए दानव के ताम्र, अन्तरिक्ष, श्रवण, विभावसु, वसु, नभस्वान्, और सप्तम पुत्र अरुण, ये सातो पुत्र बदला लेने के लिये क्रोधाविष्ट होकर अस्त्र-शस्त्र से सुसज्ज बनकर पीठ नाम के दैत्य को सेनानायक बनाकर भौमासुर की आज्ञा से भगवान् श्रीकृष्ण पर चढ़ आये ॥ ११-१२ ॥

प्रायुञ्जतासाद्य शरानसीन् गदाः शक्त्यृष्टिशूलान्यजिते रुषाल्बणाः ।
तच्छस्त्रकूटं भगवान् स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त ह ॥ १३ ॥
तान्[1] पीठमुख्याननयद् यमक्षयं[2] निकृत्तशीर्षोरुभुजाङ्घ्रिवर्मणः[3] ।
स्वानीकपानच्युतचक्रसायकैस्तथा[4] निरस्तान् नरको धरासुतः ॥ १४ ॥
निरीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयोधिप्रभवैर्निराक्रमत् ।
[5]दृष्ट्वा सभार्यं गरुडोपरि स्थितं सूर्योपरिष्टात् सतडिद्घनं यथा ।
[6]कृष्णं स तस्मै व्यसृजच्छतघ्नीं योधाश्च सर्वे युगपत् स्म विव्यधुः ॥ १५ ॥
तद् भौमसैन्यं भगवान् गदाग्रजो विचित्रवाजैर्निशितैः शिलीमुखैः ।
निकृत्तबाहूरुशिरोङ्घ्रि[7] विग्रहं चकार तर्ह्येव हताश्वकुञ्जरम् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—आसाद्य, रुषा, उल्बणाः, अजिते, शरान्, असीन्, गदाः, शक्त्यृष्टिशूलानि, प्रायुञ्जत, अमोघवीर्यः, भगवान्, स्वमार्गणैः, तत् शस्त्रकूटम्, तिलशः, चकर्त ॥ १३ ॥ निकृत्तशीर्षोरुभुजाङ्घ्रिवर्मणः, पीठमुख्यान्, तान्, यमक्षयम्, अनयत्, दुर्मर्षणः धरासुतः, नरकः अच्युतचक्रसायकैः, स्वानीकपान्, तथा, निरस्तान्, निरीक्ष्य, पयोधिप्रभवैः, आस्रवन् मदैः, गजैः, निराक्रमत्, गरुडोपरिस्थितम्, सभार्यम्, कृष्णम्, यथा, सूर्योपरिष्टात्, सतडिद्घनम्, निरीक्ष्य, सः, तस्मै, शतघ्नीम्, व्यसृजत्, च, योधाः सर्वे, युगपत्, विव्यथुः, स्म ॥ १४-१५ ॥ भगवान्, गदाग्रजः, तर्हि-एव, विचित्रवाजैः, निशितैः शिलीमुखैः, तत् भौमसैन्यम्, निकृत्तबाहूरुशिरौङ्घ्रिविग्रहम्, हताश्वकुञ्जरम्, चकार ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृत्तानि शीर्षादीनि येषां तान् ॥ १४ ॥ शतघ्नीं शक्तिविशेषम् ॥ १५ ॥ विचित्रा वाजाः पत्राणि येषां तैर्बाणैर्निकृत्ता बाहव ऊरवः शिरोध्राः कंधरा विग्रहा देहाश्च यस्मिंस्तत् तर्ह्येव तं यदा विव्यधुस्तस्मिन्नेव क्षणे ॥ १६ ॥

---

[1] तान्–वीर. च. पु. टि; तान् योद्धुमिच्छूननय–विज. । [2] यमालयम्–श्रीधर. टि. । [3] कार्मुकान्–विज. । [4] हतान्निशम्याशु चुकोप भूमिजः–विज.; मृधेहतान्–च. पु. टि. ।

[5] रथैरनेकसाहस्रैर्गजैश्च बहुभिर्वृतः । महत्या सेनया युक्तश्चायादायोधनं बली ॥ विजये ।

[6] गृहीतकोदण्डमुदारशङ्खकौमोदकीचक्रधरं चतुर्भुजम् ।
नीलजीमूतसङ्काशं दृष्ट्वा तं गजवाहनम् । शङ्खमाध्माय गोविन्दः सिंहनादं व्यनीनदत् ॥
वरुथिनी दैत्यपतेः सुघोराञ्शरान्ववर्षाच्युतमूर्ध्नि दुर्जया ।
कृष्णे स भौमो व्यसृजच्छतघ्नीं लोहायसीं तेन भृशं स विव्यथे ।
अनेकबाणान्निर्मुक्तान्नरकेण स्मय न्निव । चकर्त बाणैर्युगपत्तदद्भुतमिवाभवत् ॥
ततोनु सैन्यं भगवान्गदाग्रजो विचित्रपत्रैर्निशितैः शरौघैः । निकृत्तबाहूरुशिरोङ्घ्रिविग्रहं चकार तूर्णं नृप साश्वकुञ्जरम् ॥
सार्धत्रयस्थाने एते दृश्यते विज.; त्रिषष्टितमोऽध्यायः विज. ।

[7] शिरोध्र–श्रीधर. वशी. जीव. वीर. विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अजिते कृष्णाय । तेषां शस्त्राणां कूटं समूहम् 'कूटोऽस्त्री निश्चले राशौ' इति मेदिनी ॥ प्रायुञ्जतेत्यर्द्धकम् । शरादीनां गुरुत्वे घातकत्वे चोत्तरोत्तरं श्रैष्ठ्यम् । ऋष्टिः खड्गभेदः ॥ १३ ॥ तांस्ताम्रादीन् । आस्रवन्मदो येभ्यस्तैः । यमक्षयं यमशब्दोपलक्षिताष्टगांयोगस्थानम्, मोक्षमिति वास्तवोर्थः । यं चाक्षयमाहुस्तमित्यर्थः । "तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते" इति चतुर्थोक्तेः ।अच्युतेति चक्राद्यवैयर्थ्याभिप्रायेण । निरस्तांल्लीलयैव हतान्निरीक्ष्य उत्तुंगदुर्गाद्यारोहणेन दृष्ट्वा । नरक इति जातमात्रेण मनुष्यमस्तकस्य मुखे ग्रहणात् तत्संज्ञां प्राप्त इति, जन्मत एव दुष्टस्वभावः सूचितः । तदाख्यायिका च कालिकापुराणे ज्ञेया । धरासुत इति शक्तित्वं दर्शितम् ॥ १४ ॥ स भौमः । तस्मै कृष्णाय ॥ पयोधिप्रभवैरैरावतकुलोद्भवैः सह, 'ऐरावतकुलेभांश्च' इति वक्ष्यमाणत्वात्, पुरान्निराक्रमत् । सभार्यमिति तद्दर्शनेनातिक्रुद्ध इति भावः । अहो मामपि कातरमयं मनुते, यतः सस्त्रीक आगतस्स्वं निर्भयं ज्ञापयितुमिति क्रोधे हेतुः ॥ १५ ॥ शिलीमुखैर्बाणैः । तत् उपस्थितम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रायुञ्जतेत्यर्द्धकम् । आसाद्याजितं शरादीनां यथोत्तरं गुरुत्वे घातकत्वे च श्रैष्ठ्यं तत्र ऋष्टिः खड्गभेदः शस्त्राणां कूटं समूहम् स्वैरसाधारणैः ॥ १३ ॥ यमक्षयं मृत्युमित्यर्थः यमगृहगमनोत्तरं मोक्षस्तु ज्ञेयः अच्युतेति चक्राद्यवैय्यर्थ्याभिप्रायेण तथा तेन शीर्षादिकर्त्तनप्रकारेण निरस्तान् लीलया दूरत एव हतान् वीक्ष्य उत्तुङ्गदुर्गाद्यारोहणेन नरक इति जातमात्रेण मनुष्यमस्तकस्य मुखे ग्रहणात् तत्सञ्ज्ञाप्राप्त्या जन्मत एव दुष्टभावः सूचितः तदाख्यायिका च कालिकापुराणे ज्ञेया धरायाः सुतः इति महाशक्तित्वं दर्शितम् ॥ १४ ॥ पयोधिप्रभवैर्गजैः सह तत्प्रभवैरावतकुलजत्वात् तथाचाग्रे ऐरावतकुलेभांश्चेतिः निरक्रमत् निरक्रामत् पुरान्निष्क्रान्तः सभार्यं दृष्टवेति तेन महाक्रुद्धस्सन्निति भावः । च अपि युगपदपि विव्यधुः ॥ १५ ॥ विचित्रवाजैरिति । वेगवत्त्वादिकमभिप्रेतं न च केवलमश्वाद्यारूढा हताः (तेषां) वाहनानि चेत्याह—हतेति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आसाद्याजितम्, शरादीनां यथोत्तरं गुरूत्वे घातकत्वे च श्रैष्ठ्यम्, तत्र ऋष्टिः खड्गभेदः, अजिते कदाचित् केनापि जेतुमशक्तेऽपि भगवति प्रायुञ्जत चिक्षुपुः, यतो रुषा उल्वणा दारुणाः, शास्त्राणां कूटं समूहं स्वकीयैरसाधारणैर्मार्गणैः, अत एव प्रत्येकं तिलशश्च कर्त्त । यतोऽमोघं वीर्य्यं पराक्रमो यस्य सः, यतो भगवान् सर्व्वैश्वर्य्यपूर्णः, ह हर्षे ॥ १३ ॥ यमक्षयं मृत्युद्वाराभावलक्षणमपुनरावृत्तिमोक्षमित्यर्थः अच्युतेति चक्राद्यवैयर्थ्याभिप्रायेण, तथा तेन शीर्षादिकर्त्तनप्रकारेण निरस्तान् लीलया दूरत एव हतान् निरीक्ष्य, चारचक्षुषा उत्तुंगदुर्गाद्यारोहणेन वा । नरक इति जातमात्रेण तेन मनुष्यमस्तकस्य मुखे ग्रहणात्तत्संज्ञाप्राप्त्या जन्मत एव दुःस्वभावः सूचितः । तदाख्यायिका च श्रीकालिकापुराणे व्यक्तैव । धरायाः सर्व्वसहायाः सुतोऽपि दुर्मर्षणः सन्, यद्वा, धरायाः श्रीभगवत्प्रियायाः सुत इति महाप्रभावोऽभिप्रेतः, अत एव दुर्मर्षणः, आ समन्तात् सदा स्रवन् मदो येषां तैः सह, यतः पयोधिप्रभवैः भीराब्धिमथनोद्भुतैरावतकुलोद्भवत्वात्, तथा चाग्रे वक्ष्यति (भा० १०।५९।३७)–ऐरावतकुलेभांश्च' इति निराक्रमत् पुरान्निष्क्रान्तः । कृष्णं श्यामसुन्दरं सभार्य्यं दृष्ट्वेति महाक्रुद्धः सन्निति । यद्वा, तादृशं तं दृष्ट्वापि, अहो महादारुणत्वमिति भावः । योधा गजारूढाः किंवा अन्येऽपि तत्संगागताः । ततश्च गजैः सहेत्युक्तिस्तेषां तत्र प्राधान्यात्, च एव, युगपदेव, वित्यधुर्वेद्धुमस्त्रादीनि असृजन्नित्यर्थ ॥ १५ ॥ विचित्रवाजैरिति वेगवत्त्वादिकमभिप्रेतम् । स्वरूपमात्रनिर्द्देशोऽयम् । एवं निशितैरित्याद्यपि न च केवलमश्वाद्यारूढा दैत्या एव हतास्तेषां वाहनानि च तथैवेत्याह–हतेति ॥ १७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

निराक्रमत् निर्ग्रतवात् ॥ १५ ॥ विचित्रवाजैः विचित्रपक्षैः ॥ १६–२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

प्रायुञ्जतेति । उल्बणास्ते ताम्रादयः आसाद्य अभ्येत्य रुषा क्रोधेन अजिते श्रीकृष्णे शरादीन् प्रायुञ्जत प्रयुक्तवन्तः तदा भगवान् स्वमार्गणैः स्वशरैस्तच्छस्त्रजालं तिलप्रमाणशश्चिच्छेद हेति विस्मये ॥ १३ ॥ तानिति । निकृत्तानि छिन्नानि शीर्षादीनि येषां तांस्ताम्रादीन् यमसदनमनयत् वर्ष्म शरीरं तच्चोपात्तातिरिक्तप्रदेशपरम् इदमर्थं पृथगन्वेतव्यम् ॥ स्वानीकपानिति । स्वान् कांश्चिदनीकपान् सेनापतीन् अच्युतस्य सायकैर्हतानिति शेषः । तथा कांश्चिन्निरस्तान् दूरतः पतितांश्च दृष्ट्वा धरासुतो नरकः दुस्सहः स्रवन्मदो येषां तैः पयोधिप्रभवैः पयोध्यन्तर्द्वीपजैर्गजैः सह निराक्रमन्निर्गतवान् दृष्ट्वेति यथा सूर्यस्योपरिष्टात् तडिता सहितं घनं नीलमेघं तद्वत् सभार्य्यं गरुडोपरि स्थितं कृष्णं तत्र सूर्य्यस्थानीयो गरुडः तडित्स्थानीया भार्या घनस्थानीयस्तु कृष्ण इति विवेकः स भौमस्तस्मै कृष्णाय शतघ्नीं शस्त्रविशेषं व्यसृजत् प्रायुङ्क्त तथा योधाश्च भौमसम्बन्धिनः युगपत्प्राविव्यधुः

ताडयामासुः स्वस्वायुधैरिति शेषः ॥ १४-१५ ॥ तदिति । विचित्रा वाजाः पत्राणि येषां तैर्निशितैर्बाणैर्निकृत्ता बाहवः ऊरवः शिरोधरा विग्रहा देहाश्च यस्य हताः अश्वाः कुञ्जराश्च यस्मिन् तथाभूतं तद्बलं यदा विव्यधुस्तस्मिन्नेव क्षणे चकार ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

(मूलम्) पपात विष्णोः शिरसि प्रमोदनी प्रसूनवृष्टिर्निहते मुरेऽसुरे ॥ क ॥
रथान्समारुह्य वृषप्रयुक्तान् भौमप्रयुक्ता भगवान्निराक्रमन् । अयुञ्जतासज्यशरासनान् भटाः शक्त्यृष्टिशूलानजिते रुषोल्बणान् । ख ।
तच्छस्त्रकूटं भगवान्स मार्गणैरमोघवीर्यस्तिलशश्चकर्त ह । तान्योद्धुमिच्छूननयद्यमक्षयं निकृत्तशीर्षोरुभुजांघ्रिकार्मुकान् ।
ततो द्रुततरं गत्वा भटा राजपुरं महत् । हतान्मुरसुतान्सर्वान्नरकाय न्यवेदयन् ॥
स्वानीकपानच्युतचक्रसायकैर्हतान्निशम्याशुचुकोपभूमिजः । निरीक्ष्यदुर्मर्षणमास्रवन्मदैर्गजैः पयोब्धिप्रभवैर्निराक्रमत् ॥
रथैरनेकसाहस्रैर्गजैश्च बहुभिर्वृतः । महत्या सेनया युक्तश्चायादायोधनं बली ॥ ग ॥
दृष्ट्वासभार्यंगरुडोपरिस्थितंसूर्योपरिष्ठत्सतडिद्घनं यथा । गृहीतकोदण्डमुदारशङ्खकौमोदकीचक्रधरं चतुर्भुजं ॥
नीलजीमूतसङ्काशं दृष्ट्वा तं गजवाहनम् । शङ्खमाध्माय गोविन्दः सिंहनादं व्यनीनदत् ॥
वरूथिनी दैत्यपतेः सुघोरान् शरान्ववर्षाच्युतमूर्ध्नि दुर्जया । कृष्णे सभौमो व्यसृजच्छतघ्नीं लोहायसीन्तेनभृशंसविव्यथे ॥ ० ॥
अनेकबाणान्निर्मुक्तान्नरकेण स्मयन्निव । चकर्तबाणैर्युगपत्तदद्भुतमिमाभवत् ॥
ततोनुसैन्यम्भागवान्गदाग्रजोविचित्रपत्रैर्निशितैः सरौघैः ।)

प्रमोदिनी सन्तोषजननी ॥ क ॥ भौमेन प्रयुक्ताः प्रेरिताः निराक्रमन्निर्गताः आसज्य ज्यामारोप्य ॥ ख ॥ कूटं समूहम् ॥ १३-१४ ॥ आयोधनं युद्धस्थानम् ॥ ग ॥ सूर्योपरिष्टात्स्थितं तडिता सहितं घनं मेघम् ॥ १५ ॥ लोहेनायसा निर्मितां तेन शतघ्नीप्रयोगेण विव्यथे "व्यथ ताडने" इति धातोः ताडिताभूत् ततोनु तदनन्तरम् ॥ ० ॥ गरुडस्य पक्षाभ्यां निघ्नतान्निहतान् गजानच्छिनत् ॥ १६-१७ ॥

मज्जीवगोस्वामिकृतक्रमसंदर्भः

यमक्षयं मृत्युमित्यर्थः । मोक्षस्तु ज्ञेयः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

यमक्षयं यमनियमाद्यष्टाङ्गयोगस्थानं मोक्षमिति वास्तवोऽर्थः ॥ १४ ॥ आस्रवन्तो मदा येषां तैर्गजैः सह निरक्रामत् शतघ्नीं शक्तिविशेषम् ॥ १५ ॥ विचित्राः वाजाः पत्राणि येषां तः ॥ १६ ॥

गूढार्थदीपिनी

अजितमासाद्य तस्मिन् अजिते श्रीकृष्णे रुषा शरादीन् प्रायुञ्जत प्रयुक्तवन्तः उल्बणा भीषणास्ते ऋष्टिः उभयतोधारखड्गः । शस्त्रकूटं बाणसमूहम् । मार्गणैर्बाणैः तिलशः चकर्त । हेत्यवहेलने ॥ १३ ॥ तानित्यदर्धम् । तान् ताम्रादीन् । निकृत्तानि छिन्नानि शीर्षादीनि येषां तान् । यमअक्षयमाहुस्तम् । यमालयमिति पाठे यमनियमाद्यष्टाङ्गयोगस्थानं मोक्षमित्यर्थः ॥ १४ ॥ स्वानीकपान् स्वसेनापतीन् चक्रसायकैः तथा निरस्तान् एवं हतान् निरीक्ष्य दुर्मर्षणोऽसहमानः स नरकः गजैः गजरथैः सैन्यैः सह पुरात् निराक्रमदित्यन्वयः । पयोधिप्रभवैः ऐरावतकुलोद्भवैः । तस्य पयोधिप्रभवत्वादित्यर्थः ॥ १५ ॥ स नरकः कृष्णं दृष्ट्वा तस्मै शतघ्नीं व्यसृजत् अन्येऽपि योधास्तमेकदैव विव्यधुः । स्म एवार्थे । अत्र सूर्यस्थानीयो गरुडः तडित्स्थानीया भार्या घनस्थानीयः कृष्णः इत्यवधेयम् । शतघ्नी तोपभेदः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

शतघ्नीं शक्तिविशेषम् ॥ १५ ॥ विचत्राः वाजाः पत्राणि येषां तैः ॥ १६-१९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भवनान्निराक्रमन् बहिः । शरा अस्यन्तेऽनेनेति शरासनश्चापः । करणाधिकरणयोश्चेति ल्युट् । तान् अमिते कृष्णे आसज्य सज्यं कृत्वा शरात्प्रयुञ्जत प्रायुञ्जत ॥ १७ ॥ तच्छस्त्रकूटं तत्सत्यमुक्तं शस्त्रसमूहं तिलशो मार्गणैश्चकर्त । निकृन्तशीर्षोरुभुजाङ्घ्रिकामुकांस्तात्सप्त । यमक्षयं यमगृहमनयत् ॥ १८ ॥ भटा मृतोर्वरिताः सर्वान्सप्तापि ॥ १९ ॥ दुर्मर्षणः सहनहीन आस्रवन्तो मदा येभ्यस्तैः । पयोब्धिः क्षीरसमुद्रस्तस्मात्प्रभवन्तीति ते तथा तैः सह निराक्रमत् ॥ २० ॥ सहस्रमपि साहस्रम् ।

लक्ष्मिर्लक्ष्मी हरेः प्रियेति द्विरूपकोशः। अनेकसाहस्रैरायोधनं समरस्थलमायात्। नोत्तरवदुत्तरत्र भावीत्याह। बलीति ॥ २१ ॥ गरुडोपरि स्थितं सभार्यं सूर्यस्योपरिष्टात्तदुपरि विद्यमानतटितासहितं घनं मेघमिव गरुडसमः सूर्यः। तटित्समा सत्यभामा। घनसमः श्रीधन इति तदेतदानुरूप्यं ज्ञेयम्। उदारेति शङ्खादिचक्रान्तविशेषणम् ॥२२॥ गजः सुप्रतीको व्यनीनदच्चकार ॥२३॥ दुर्जया वरूथिनी सेना लोहमयीं किञ्चित्स्थलेऽयोमयी शतघ्नीं तन्नाम्नीं शक्ति तेन तत्क्षेपणेन विव्यये ताडितोऽभूत् व्यथित इवाभवत्। आश्वस्तोऽथ हृषीकेशः संज्ञां प्राप्य च केशवः। धनुस्तस्यै ततो दत्वा शाङ्र्गभारसंहरणे। युद्धयस्व नरकं देवि श्रान्तोऽस्मि युधि पीडितः। तदा युद्धं समारेभे नरकेण दुरात्मनेत्यारभ्य शक्तिर्भगवती देवि वासुदेवस्य पश्यतः। ततः प्रीतोऽथ तां वीक्ष्य परिष्वज्य महाविभुः। श्रमाम्भश्चापि तस्यास्तु परिमृज्याथ केशवः। कण्ठस्याभरणं तस्यै ददौ प्रीतमना हरिः। न दत्तमय रुक्मिण्यै दत्तं तस्यै महात्मना। महार्घ्यं लोकविख्यातं हृतं बलिमुखे तदेत्यन्तेन ग्रन्थेन हरिवंशोक्तां सूचयामास व्यासो विव्यथ इत्यनेनानुसन्धेयम्। इत्येव कृष्णो दर्शयन् श्रान्तवत्स्वम्। तदा दृप्तं नरकं वीक्ष्य देवी सत्याददे कार्मुकं शार्ङ्गसंज्ञम्। चकार तं यतमानं च भौमं निरायुधं विरथं च क्षणेनेत्याचार्योक्तिश्च ॥ २४ ॥ अनेकबाणानेकदा ॥ २५ ॥ विचित्रपत्रैः शरौघैः। विग्रहः शरीरम्। हे नृप परीक्षित्। तत्तदावान्तरनरपाश्च साश्वाः कुञ्जराश्च यस्मिंस्तदिति वा ॥ २६ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे त्रिषष्टिरध्यायः ॥ १०–६३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः शस्त्राणि प्रायुञ्जतेत्याह **प्रायुञ्जतेति**। आसाद्य निकटे गत्वा षड्विधान्यस्त्राणि भगवति प्रयुक्तानि निरूपयति **शरानित्यादिभिः**। **अर्ष्टि**रायुधविशेषः। सप्तभिरपि प्रत्येकं षड्विधानि प्रयुक्तानि। यद्यप्यजितो भगवानिति जानन्ति, तथापि **रुषा** क्रोधेन उल्बणाः सन्तः तथा कृतवन्तः। भगवता कृतं प्रतीकारमाह **तच्छस्त्रकू**टमिति। **स्वमार्गणै**रिति। असाधारणैर्बाणैः, अन्यथा अग्नेर्बाणाः, दुर्गाया असिः, गदा वायोः, **अर्ष्टि**रपि **वरुणादेः**, शक्तिर्मायायाः, शूलं शिवस्येति, एतावन्तः तत्तद्देवताधिष्ठिता न हता भवेयुः। ननु **भगवानेव** तेष्वपि स्वसामर्थ्यं दत्तवानिति कथं भगवांश्च कर्तेत्याशङ्क्याह **अमोघवीर्य** इति। तेषु दत्तं परगामि मोघं जातम्, तदेव स्वस्थाने अमोघम्। अतः अमोघेन मोघानि वीर्याणि प्रतिहतानीत्यर्थः। तिलशः कर्तनं पुनर्नीत्वा लोहखण्डान्यपि सज्जीकर्तुमशक्तानीति ज्ञापयति। हेत्याश्चर्ये। तावन्न कर्तव्यम्, प्रयोजनाभावात्, तथापि स्वस्याक्लिष्टकर्मत्वं ज्ञापयितुं तावत् पराक्रमं प्रदर्शितवान्। शस्त्राणां विनियोगमुक्त्वा प्रयोक्तॄणामाह **तान् पीठमुख्यानि**ति। **यमक्षय**मिति तावद्दण्डार्थम्, मुरवत्पुनरावृत्त्यभावाय वा। ते हि पीठं पुरस्कृत्य समागता इति उपजीव्यत्वात् उत्साहनिवृत्त्यर्थं प्रथमतः स एव हतः। मूर्च्छादिना अलौकिकप्रकारेण हननं व्यावर्तयितुमाह **निकृत्ते**ति। चत्वार्यङ्गानि कवचं च निकृतानि येषाम्। पितुः पञ्चांशाः तेषु प्रतिष्ठिता इति कार्ये तदंशव्यावृत्त्यर्थं शिरःप्रभृतीनां छेदनम्। शीर्षाणि ऊरवः भुजाः अङ्घ्रयश्च। ज्ञानं गतिश्चाद्यन्तयोः। उत्पत्तिः कर्माणि च मध्ये। तत एवं क्रमः ॥ १३½ ॥ तत उभयेषां मुरस्य तत्पुत्राणां च फलरूपस्य नरकस्य निराकरणार्थं प्रवृत्तिमाह, **स्वानीक**पानिति। तस्य जयहेतवः सेनाः तासामनीकानां रक्षकाः। **अज्ञानेन व्यसनैश्च** नरकः सिद्धो भवतीति तेषां निराकरणे स्वयं निराकृतोऽपि लौकिकैः साधनैः स्वजयो भविष्यतीति आस्रवन्मदैर्गजैः सहितः युद्धार्थं निराक्रमत्। अच्युतत्वान्न तस्य केनाप्यंशेन क्षतिः। मुरश्चक्रेण हतः अन्ये सायकैरिति ससाधनसाध्यस्यानुवादः। **तथे**ति प्रकारस्यापि। ततस्तदपेक्षया समर्था गजा इति सूचयितुं पूर्वानुवादः। नन्वग्निवत् भगवान् स्थूलान् सूक्ष्मानपि दहतीति, ततो बलिष्ठानपि गजान् मारयिष्यतीति, कथं तत्प्रवृत्तिरिति चेत्, तत्राह **निरीक्ष्ये**ति। **दुर्मर्षण** इति। दुष्टक्रोधयुक्तः। ज्ञानाच्छादको वर्तत इति तथा प्रवृत्तिः। गजानामुत्कर्षमाह **आस्रवन्मदैः पयोधिप्रभवै**रिति। कार्यकारणोत्कर्षौ निरूपितौ। स्वभावतो गजा जीवेषूत्कृष्टाः सङ्घचराः। अतस्त्रिविधोऽप्युत्कर्षो निरूपितः। गजानां मदस्रव एव बलोत्कर्षे हेतुः। ऐरावतः पयोधिप्रभव इति समानजनकत्वेन तत्सामर्थ्यं सर्वेषां निरूपितम् ॥ १४ ॥ मातरं पितरं कालं च दृष्टवानिति निरूपयितुं तस्य भगवद्दर्शनं वर्णयति **दृष्ट्वा सभार्य**मिति। युद्धार्थमागमनशङ्कैव निवारिता। तत्रानुरक्तश्चेत्, कृतार्थ एव भवेदिति। भगवान् न लौकिकसाधनैरलौकिको जेतुं शक्य इति अभूतोपमामाह **सूर्योपरिष्टा**दिति। अद्भुतत्वाद्रागद्वेषाभ्यामिष्टानिष्टसूचकं भवति। यदि सूर्योपरि आधिदैविकः मेघः आधिदैविकविद्युल्लतया सह तिष्ठति, आदित्य एव पर्जन्य इति भवति। तस्याधिदैविकं रूपं तादृशमिति वचनोपपत्तिः। तथापि कृष्णः कालात्मा स्त्रीणां हितकारीति तस्य न सद्बुद्धिरुत्पन्ना, किन्तु विरुद्धैवेति तत्कार्यमाह **तस्मै व्यसृजच्छतघ्नी**मिति। शतं हन्तीति योगोऽपि तस्य विवक्षितः। तादृशीं विशेषेणासृजत्, योधाश्च शतघ्नीभिर्बाणैर्वा युगपदेव स्मेति प्रसिद्धे विव्यधुः ॥ १५ ॥ आदौ तेषामपराधो निरूप्यते। भगवतोऽक्लिष्टत्वाय। यावत्ते युद्धार्थं प्रवृत्ताः, ततः पूर्वं तस्मिन् वा समये भगवान् स्वमार्गणैः प्रथमतो योधांश्चिच्छेद। ततस्तत्प्रयुक्तान्यस्त्राणि। पूर्वमस्त्राणामुपस्थित्यभावात्। नात्र क्रमो दोषाय। **तत्प्रसिद्धं भौमस्य सैन्यम्**। भगवत्त्वात् न पुत्रादिभावस्तस्य बाधक इति भगवत्प्रवृत्तिः। सोऽपि मातुः पुत्र इति पित्रापि सह युद्धकरणं नायुक्तम्। **गदाग्रज** इति। भक्तोत्पादनार्थं भगवतस्तथाकरणं युक्तमेव। लौकिकेनैव प्रकारेण तान् हतवानिति

ज्ञापयितुं भगवच्छरान् विशिनष्टि **विचित्रवाजै**रिति । दूरगमनलक्ष्यैकगमनप्रयोजकाः पक्षाः । विचित्रा वाजा येषामिति । वायुर्जीयते गतिर्वा येभ्य इति । निशितानि कार्यसाधकानि । **निकृत्तानि बाह्वादीनि** यस्येति । प्रक्षेपकौ बाहू । आगमने जङ्घालता प्रयोजिका । कर्मजन्मनी वा पूर्ववत् । ततो ज्ञानगती । **बाहूरुशिरोऽङ्घ्रयः विग्रहे** यस्येति तादृशं चकार । **तर्ह्येव** यस्मिन् क्षणे युद्धार्थं तत्सैन्यं प्रवृत्तम्, तस्मिन्नेव क्षणे प्रथमशस्त्रविमोकानन्तरं यथा नापरं विमुञ्चति, तदर्थं पार्श्वभागान् सर्वानेव निराकृतवान् । वाहनानां निराकरणमाह । **हता अश्वाः कुञ्जराश्चे**ति । **चतुरङ्गे** रथा अचेतनाः । नराणां स्वरूपमुक्तमेव, अवशिष्यन्ते वाजिनः करिणश्चेति ॥ १६ ॥

श्रीसुबोधिनी-सारः

उल्बणाः क्रूरास्ते रुषा क्रोधेनासाद्य प्राप्यागत्य वाऽजितेऽजितं हंतुं शरान् असीन् गदाः शक्तीः ऋष्टीन् शूलानि प्रायुंजत प्राक्षिपन् । अमोघं सफलं वीर्यं यस्य स भगवान् तत् शस्त्राणां कूटं-समूहं तेषां शस्त्रवृंदं वा स्वस्य मार्गणैर्बाणैः तिलशश्चकर्त्त चिच्छेद ह स्फुटम् ॥ १३ ॥ निकृत्तानि शीर्षोरुभुजांघ्रिवर्माणि येषां पीठो मुख्यो येषां तान् यमस्यालयं संयमिनी मृत्युपदं वा हरिरनयत् प्रैषयत् तथाच्युतस्य **चक्रेण** सायकैर्निरस्तान् पराभूतान्स्वानीकपान् स्वसेनापतीन् निरीक्ष्य दुर्मर्षणोऽसहिष्णुर्धरायाः पृथ्व्याः सुतो नरको निराक्रमत् निर्ययौ आ सर्वतः स्रवन् मदो येषां तैः पयोधिप्रभवैः क्षीरसमुद्रजातैर्गजैः सह गरुडस्योपरि स्थितं सभार्यं सस्त्रीकं कृष्णं दृष्ट्वा सूर्यस्योपरिष्टात् सतडित्सविद्युत् घनं मेघं यथैव अभूतोपमेयं तस्मै कृष्णाय शतघ्नीं शक्तिविशेषं स नरको व्यसृजत् प्रायुंक्त सर्वे योधा युद्धकारिणो युगपत्सहैव विव्यधुः स्म प्रसिद्धम् ॥ १४-१५ ॥ तत् भौमस्य सैन्यं निकृत्ता बाह्वादयो यस्मिन् तत् हता अश्वाः कुंजरा यस्मिंस्तत् तर्हि तत्क्षणे एव गदाग्रजो भगवान् चकार विचित्रपुंखैः शिलीमुखैः निशितैस्तीक्ष्णैः शरैः ॥ १६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

स्वानीकपानित्यस्याभासे । **उभयेषा**मित्यस्यैव विवरणं **मुरस्य तत्पुत्राणां चे**ति । **फलरूपस्ये**ति । फलनिरूपकस्य युद्धफलत्वेन द्रव्यादिदातुरित्यर्थः । **दृष्ट्वा सभार्य**मित्यत्र । **भगवा**निति । अलौकिको भगवाँल्लौकिकैर्जेतुमशक्य इत्यन्वयः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उल्बणा भयंकरास्ते ताम्रादयः आसाद्य अभ्येत्य रुषा क्रोधेनाजिते श्रीकृष्णे शरादीन् प्रायुञ्जत प्रक्षिप्तवन्तः । तदा भगवांश्च स्वमार्गणैः स्वबाणैस्तेषां शस्त्रकूटं शस्त्रसमूहं तिलशः तिलप्रमाणतः चकर्त्त चिच्छेद । तत्र सामर्थ्यमाह—अमोघवीर्य इति । विस्मयं सूचयति—हेति ॥ १३ ॥ निकृत्तानि छिन्नानि शीर्षादीनि येषां तान् पीठादीन् यमालयमनयत् । भगवता हतानां मृतानां यमयातनाऽसम्भवात् तत्र तत्र भगवत्पदप्राप्तिकथनाच्च अत्र यमालयशब्देन मृत्युमात्रं विवक्षितमिति ज्ञेयम् ॥ १४ ॥ स्वानीकपान् स्वसेनापतीन् अच्युतस्य सायकैस्तथा निरस्तान् एवं निहतान् निरीक्ष्य **दुर्मर्षणः** असहमानो धरासुतो नरकः आस्रवन् मदो मदबिन्दुर्येषां तैः पयोधिप्रभवैः ऐरावतकुलोत्पन्नैर्गजैः निराक्रमत् योद्धुं विनिर्गतः ॥ १५ ॥ तदा स भौमो गरुडस्योपरि स्थितं सभार्यं कृष्णं दृष्ट्वा तस्मै शतघ्नीं शस्त्रविशेषं व्यसृजत् प्रायुङ्क्त । तथान्येपि भौमसम्बन्धिनो योद्धारः स्वस्वायुधैस्तं विव्यधुस्ताडयामासुः । गरुडस्थे भगवति दृष्टान्तमाह—सूर्यस्योपरिष्टात्तडिता सहितं घनं नीलमेघं यथा तथेति । तत्र सूर्यस्थानीयो गरुडः, तडित्स्थानीया भार्या, घनस्थानीयः कृष्ण इति विवेकः ॥ १६ ॥

अन्वितार्थप्रकाशिका

प्रेति । उल्बणा भयंकरास्ते ताम्रादयः आसाद्य अजितं प्राप्य रुषा क्रोधेनाजिते श्रीकृष्णे शरादीन् प्रायुञ्जत प्रजहुः । ऋष्टिः खड्गभेदः तदा अमोघवीर्यः भगवान् स्वमार्गणैस्तेषां शस्त्रकूटं शस्त्रसमूहं तिलशः तिलप्रमाणतः चकर्त चिच्छेद ॥ १३ ॥ तानित्यर्द्धम् ॥ निकृत्तानि छिन्नानि शीर्षोरुभुजाङ्घ्रिवर्माणि येषां तान् पीठमुख्यान् पीठादीन् यमालयमनयत् । भगवता हतानां मृतानां यमयातनाऽसंभवात् । तत्र भगवत्पदप्राप्तिकथनाच्चात्र यमालयशब्देन मृत्युमात्रं विवक्षितमिति ज्ञेयम् । यद्वा । यमनियमाद्यष्टाङ्गयोगस्थानम् ॥ १४ ॥ स्वेति ॥ स्वानीकपान् स्वसेनापतीन् अच्युतस्य चक्रसायकैस्तथा निरस्तान् एवं निहतान् निरीक्ष्य दुर्गाद्यारोहणेन वीक्ष्य दुर्मर्षणः असहमानो धरासुतो नरकः जातमात्रेण नरशिरसो मुखेन ग्रहणात्तन्नामा आस्रवन् मदो मदबिन्दुर्येषां तैः पयोधिप्रभवैः ऐरावतकुलोत्पन्नैर्गजैः निराक्रमत् योद्धुं विनिर्गतः । दीर्घाभाव आर्षः ॥ १५ ॥ दृष्ट्वेति ॥ तदा स भौमो गरुडस्योपरि स्थितं सभार्यं कृष्णं दृष्ट्वा तस्मै शतघ्नीं शक्तिविशेषं व्यसृजत् । सर्वेऽन्ये योधाश्च युगपत् विव्यधुस्ताडयामासुः । आर्षमिदं स्म पादपूर्त्तौ । गरुडस्थे भगवति दृष्टान्तमाह । सूर्यस्योपरिष्टात्तडिता सहितं घनं नीलमेघं यथा तथेति तत्र सूर्यस्थानीयो गरुडः तडित्स्थानीया भार्या घनस्थानीयः कृष्णः इति विवेकः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अजिते श्रीकृष्णे कूटं समूहं ॥ १३ ॥ निकृत्तानि शीर्षादीनि येषां तान् यमालयं अनयत् यमक्षयमित्यपि पाठः ॥ १४ ॥ स भौमः तस्मै कृष्णाय । शतघ्नीं शक्तिं ॥ १५ ॥ विचित्रवाजाः पत्राणि येषां तैः वेगवद्भिः शिलीमुखैः शरैः निकृत्ताः छिन्नाः बाहवश्च उरवश्च शिरोधनाग्नीवाश्च विग्रहाः शरीराणि च यस्मिन् तत् भौमसैन्यं चकार ॥ १६-१७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रायुञ्जतेति ॥ रुषा क्रोधेन, उल्बणा अतिभयानकाः पीठादयः, आसाद्य कृष्णान्तिकं प्राप्य, शरान् बाणान्, असीन् खड्गान्, गदाः शक्त्यृष्टिशूलानि शक्तीः ऋष्टीन् शूलानि चेत्यर्थः। अजिते श्रीकृष्णे, प्रायुञ्जत प्रयुक्तवन्तः। तदा अमोघवीर्यः भगवान्, तत् शस्त्रकूटं, तत्प्रयुक्तं शस्त्रजालमित्यर्थः। स्वमार्गणैः स्वकीयबाणैः, तिलशः तिलप्रमाणतः, चिच्छेद। ह स्फुटार्थः। ततः, निकृत्तानि छिन्नानि शीर्षाणि ऊरवः भुजाः अङ्घ्रयः वर्माणि च येषां तान्, पीठमुख्यान् तानसुरान्, यमक्षयं, अनयत्। यमसदनं प्रापयामासेत्यर्थः ॥ १३ ॥ स्वानीकपानिति ॥ धरासुतः पृथिव्यास्तनयः, नरकः भौमासुरः, अच्युतचक्रसायकैः अच्युतस्य चक्रेण सायकैर्बाणैश्चेत्यर्थः। तथा निरस्तान् उक्तप्रकारेण हतान्, स्वानीकपान् स्वकीयान् सेनापतीन्, निरीक्ष्य दृष्ट्वा, दुर्मर्षणः स्वानीकपहननमसहमानः सन्, आस्रवन् मदो येषां तैः, पयोधिप्रभवैः समुद्रान्तरीयजैः गजैः सह, निराक्रमत्पुरान्निष्क्रान्तवान् ॥ १४ ॥ दृष्ट्वेति ॥ स नरकासुरः सूर्योपरिष्टात् सूर्यस्योपरितनप्रदेशे, स्तडिद्घनं यथा, तडिता सह वर्त्तमानं नीलमेघमिव सभार्यं भार्यया सहैव, गरुडोपरि स्थितं, कृष्णं दृष्ट्वा, तस्मै कृष्णाय, कृष्णं हन्तुमित्यर्थः। तत्र सूर्यस्थानीयो गरुडः, तडित् स्थानीया भार्या, घनस्थानीयस्तु श्रीकृष्ण इति विवेकः। शतघ्नीं शक्तिविशेषं, व्यसृजत् प्रायुङ्क्त। तथा सर्वे योधाश्च भौमसंबन्धिनः सर्वे योधा अपीत्यर्थः। युगपत् विव्यधुः स्म। स्वस्वायुधैस्ताडयामासुरित्यर्थः ॥ १५ ॥ तदिति ॥ तर्ह्येव, गदाग्रजः भगवान्, विचित्रा वाजाः पत्राणि येषां तैः, निशितैस्तीक्ष्णैः, शिलीमुखैर्बाणैः, तत् भौमसैन्यं, निकृत्ता बाह्वादयो यस्य तत्, तत्र बाहवो भुजाः, ऊरवः सक्थीनि, शिरांसि मस्तकानि, अङ्घ्रयः पादाः विग्रहा देहाः। हताः अश्वा घोटकाः कुञ्जरा गजाश्च यस्मिंस्तथाभूतं, चकार ॥ १६ ॥

कृष्णप्रिया

ये सब समर में आकर क्रोधान्ध होकर श्रीकृष्ण भगवान् पर बाण, करवाल, गदा, शक्ति, ऋष्टि, त्रिशूल आदि अत्यन्त तीव्र शस्त्रास्त्रों की वर्षा करने लगे। राजन्! आप जानते है कि अजित भगवान् की शक्ति सफल एवं अनन्त है। समर्थ प्रभु ने अपने तीखे और तीव्र बाणों से उनके शस्त्रास्त्र-समूह को तिल-तिल करके काट दिये ॥ १३ ॥ अच्युत भगवान् के सुदर्शन चक्र और बाणों से सेनानायक पीठ और सहायक दैत्यों के मस्तक, जँघे, भुजा, पैर एवं कवच सम्पूर्ण कट गये पुनः पुरुषोत्तम ने इन सबको यमराज महाराज के धाम पहुँचा दिये। धरासुत नरकासुर ने देखा कि अच्युत भगवान् के सुदर्शन चक्र एवं सायकों से अपनी सेना और सेनानायकों का सम्पूर्ण नाश हो गया, तब वह भौम अतिशय क्रोध से जलने लगा ॥१४॥ तब भौमासुर रोषाबिष्ट होकर महासागर के किनारे प्रकट हुए अनन्त संख्यावाले मदोन्मत गजगजों की विपुल सेना लेकर प्राग्ज्योतिषनगर से युद्ध के लिये सन्मुख आ गया। समराङ्गण में आकर जब भौमासुर देख रहा है तो जैसे सूर्य के ऊपर सौदामिनी पत्नी के साथ वर्षाकाल का श्याम मेघ के समान सुशोभित गरुड़ पर प्रियपत्नी श्रीसत्यभामाजी के साथ विराजमान भगवान् श्रीकृष्ण का दर्शन हुआ। श्रीकृष्ण को देखते ही भौमासुर ने भगवान् द्वारिकाधीश के ऊपर अपनी "शतघ्नी" नाम की गदा चलायी और भौमासुर के योधाओं ने श्रीकृष्ण के ऊपर अपने-अपने शस्त्र एवं अस्त्र चलाये ॥ १५ ॥ तब गदाग्रज गोविन्द भगवान् भी विचित्र पंखवाले तीक्ष्ण से तीक्ष्ण बाण चलाने लगे। इस बाणवर्षा से तत्काल ही भौमासुर के सैन्य की भुजाएँ, जंघे, गर्दन और शरीर मस्तक-रहित देह कट-कटकर भूमिशायी होने लगे एवं गजराज और घोड़े भी मरने लगे ॥ १६ ॥

[1]यानि योधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह । हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः ॥ १७ ॥
उह्यमानः सुपर्णेन पक्षाभ्यां निघ्नता गजान् । गरुत्मता हन्यमानास्तुण्डपक्षनखैर्गजाः ॥ १८ ॥
[2]पुरमेवाविशन्नार्ता नरको युध्ययुध्यत । दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकम् ॥ १९ ॥
तं भौमः प्राहरच्छक्त्या वज्रः[3] प्रतिहतो यतः । [4]नाकम्पत तया विद्धो मालाहत[5] इव द्विपः ॥ २० ॥

---

१. अथ चतुःषष्टितमोऽध्यायः-विज. ; मुक्तानि चास्त्राणि कुरुद्वहामुना तान्यच्छिनत् तीक्ष्णशरैस्त्रिभि स्त्रिभिः। प्राच्ये "यानि" श्लोकस्य स्थानेऽयं पाठः। २. तुरङ्गमाश्च दुर्धर्षाः पेतुरुर्व्यां गतासवः-विज.। ३. वज्रेणेव हरिर्गिरिम्-विज.। ४. तयातिविद्धो गरुडो-विज.। ५. विद्ध-प्रा०।

कर्दमक्षमा

अन्वयः—कुरूद्वह ! योधैः, यानि, शस्त्रास्त्राणि, प्रयुक्तानि, हरिः, तानि एकैकशः, त्रिभिः, तीक्ष्णैः, शरैः, अच्छिनत् ॥१७॥ सुपर्णेन, उह्यमानः, कृष्णः, आसीत्, च, पक्षाभ्याम्, गजान्, निघ्नता, गरुत्मता, तुण्डनखैः, हन्यमानाः गजाः, आर्त्ताः, पुरम्, एव, आविशन्, नरकः, युधि, गरुडेन, अर्दितम्, विद्रावितम्, स्वकम्, सैन्यम्, दृष्ट्वा, अयुध्यत। सः भौमः, तम्, गरुडम्, शक्त्या, प्राहरत्, तया, शक्त्या प्रतिहतः, वज्रः, मालाहतः, द्विपः, इव, न, अकम्पत ॥ १८-२० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत्याश्चर्ये कुरूद्वहेति सबोधनम्। तथाहि तैर्यानि प्रयुक्तानि शस्त्रास्त्राणि तत्प्राप्तेः पूर्वमेव तत्सर्वसैन्यं हत्वा पश्चात्तानि शस्त्राण्यस्त्राणि च चिच्छेद तत्राप्येकैकं शस्त्रमस्त्रं च त्रिभिः शरैरित्याश्चर्यम् ॥ किंच गरुत्मतेति ॥ १७-१९ ॥ यतो यया शक्त्या वज्रः प्रतिहत आस गरुडस्तु नाकम्पत ॥ २० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कुरूद्वहेति-त्वय्यप्यस्त्रशस्त्रनिपुणे नैतत्कदाचिन्न दृष्टं श्रुतं वेति भावः। तैर्योधैः। तत्प्राप्तेः शस्त्रप्राप्तेः। तत्सैन्यं भौमसैन्यम्। तानि सैन्यप्रयुक्तानि। तत्रापि छेदेपि ॥ १७ ॥ न केवलं भगवानेवाद्भुतमपि तु तद्वाहनमपीत्याह-किञ्चेति। तुंडं चंच्वग्रम् "तुंडोऽस्त्री पक्षिचंच्वग्रे लवने ताडनेऽपि च" इति निरुक्तिः॥ सुपर्णेनोह्यमान इति तत्रैव लीलयातिशीघ्रगत्येतस्ततो नीयमान इत्यर्थः। भगवन्तं वहतापि पक्षाभ्यां गजहननात्तत्प्रभावोत्कर्षोऽप्युक्तः। गजा एते योधैरनधिष्ठिताः, राजवाहकाः पृथक्स्थिता इति। कुरूद्वहेत्याश्चर्येण संबोधनम्, कुरुषु मध्ये भीष्मार्जुनादिभिरप्येतत्प्रयोगलाघवं कृष्णेन ज्ञापितैरपि न ज्ञातुं शक्यत इति भावः ॥ १८ ॥ युधीति तस्य निर्भयतोक्ता ॥ १९ ॥ तं गरुडम्। तया शक्त्या ॥ यतो यया ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यानीति सार्द्धकम्। शस्त्राणि खड्गादीनि अस्त्राणि शरादीनि सुपर्णेनोह्यमान इति तत्रैवेतस्ततो लीलयाऽतिशीघ्रगत्या महाशोभा सूचिता श्रीगरुडस्यापि प्रभाव उक्तः श्रीभगवन्तं वहतोपि पक्षाभ्यां गजानां हननात् एतेच योधैरनधिरूढा राजवाहकाः पृथक्स्थिता ज्ञेया ॥ १७ ॥ तत्र केचिन्निहता एव केचिच्च भग्ना इत्याह—गरुत्मतेति ॥ १८ ॥ युधीति। युधि स्थितस्सन्नित्यर्थः। इति तस्यातिनिर्भयत्वादिकं सूचितं विद्रावितं भङ्गं प्रापितं यतोऽर्दितं यद्वा किञ्चिद्विद्रावितं किञ्चिदर्द्दितञ्च हतं दृष्ट्वा सैन्यमिति सैन्यस्य गजप्राधान्यात् किम्वा गजरक्षिणाम् अश्ववारादीनां सङ्ग्रहात् ॥ १९ ॥ विद्धोपि नाकम्पत नाव्यथत अनुभावेन भावो व्यज्यते किम्वा स्वस्थानाद्धैर्य्याच्च नाचलदित्यर्थः ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

शस्त्राणि खड्गादीनि, अस्त्राणि शरादीनि, हरिरिति—तादृशक्षिप्रकारित्वेन सर्व्वेषां मनोहरणात् ॥ १७ ॥ सुपर्णेनोह्यमान इति तत्रैवेतस्ततो लीलयातिशीघ्रगत्यादेर्महाप्रभावता सूचिता। यद्वा, श्रीगरुड़स्यापि प्रभाव उक्तः, श्रीभगवन्तं वहतापि पक्षाभ्यां गजानां हननात्, एते च योधैरनधिरूढ़ा राजवाहकाः पृथक् स्थिता महागजा ज्ञेयाः। तत्र केचिन्निहता एव केचिच्च भग्ना इत्याह—गरुत्मतेति। अग्रे स्थिताः केचित्तुण्डेन चञ्च्वा, पार्श्वद्वयस्थाश्च पक्षाभ्यां पश्चात्स्थिताश्च रणनखैरिति ज्ञेयम्। एवं तस्यापि क्षिप्रकारित्वं महाविक्रमादिकञ्च दर्शितम् ॥ १८ ॥ युधि स्थितः सन्निति तस्यापि निर्भयत्वादिकं सूचितम्, सर्व्वसैन्ये विनष्टेऽपि निजगजेषु भग्नेष्वपि तत्रावस्थानात्। विद्रावितं भंगं प्रापितम्, यतोऽर्द्दितम्; यद्वा, किञ्चिद्विद्रावितं किञ्चिदर्द्दितञ्च हतं दृष्ट्वा। सैन्यमिति सैन्यस्य गजप्रधानत्वात्, किंवा गजरक्षिणामश्ववारादीनां संग्रहात् ॥ १९ ॥ विद्धोऽपि नाकम्पत नाव्यथत, किंवा स्वस्थानाद्धैर्य्याच्च नाचलदित्यर्थः—तया किञ्चिदपि कर्त्तुमशक्तत्वात्। तत्रैव दृष्टान्तः—मालेति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यानीति। हे कुरूद्वहेत्याश्चर्य्यसम्बोधनं तथाहि तैर्योधैः यानि शस्त्राणि प्रयुक्तानि बभूवुः तत्प्राप्तेः पूर्वमेव तत्सैन्यं सर्वं हत्वा पश्चात्तानि शस्त्राणि चिच्छेद तत्राप्येकैकं शस्त्रं त्रिभिः शरैरिति ॥ १७ ॥ कथम्भूतः पक्षाभ्यां गजान्निघ्नतो गरुत्मतोह्यमानः किञ्च गरुत्मतेति, गरुत्मता कर्त्रा तुण्डादिभिः साधनैर्हतास्ताडिता अत एवार्त्ता गजाः ॥ १८ ॥ पुरं प्राग्ज्योतिषपुरमेव विविशुः नरकस्तु युद्धेऽयुद्धयत। दृष्ट्वेति। विद्रावितं पलायितं गरुडेन पीडितं स्वकीयं बलमवलोक्य भौमस्तं गरुडं शक्त्या प्राहरत् तां विशिनष्टि, यतः यया शक्त्या वज्रः प्रतिहतः आस ॥ नेति। तया शक्त्या ताडितोपि गरुडो नाकम्पत यथा मालया हतो गजस्तद्वत् ॥ १९-२० ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हरिरिन्द्रः ॥ १८–२० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सैन्यस्य बाह्वादिच्छेदमुक्त्वा तत्प्रयुक्तास्त्रशस्त्राणां छेदमाह—यानीति । शस्त्राणि खड्गादीनि अस्त्राणि शरादीनि एकैकश इति कर्मणः करणस्य च विशेषणं योधैर्यानि प्रयुक्तानि तेषां लक्ष्यप्राप्तेः पूर्वमेव तत्तत्प्रयोक्तॄन् प्रथमं छित्वा ततस्तत्प्रयुक्तानि तानि चिच्छेद तत्राप्येकैकं शस्त्रमस्त्रं च त्रिभिस्त्रिभिः शरैश्चिच्छेद तैरपि त्रिभिः प्रत्येकमेव प्रयुक्तैर्न तु युगपत् तत्प्रयुक्तैरित्याश्चर्य्येण सम्बोधनं कुरूद्वहेति कुरुषु मध्ये भीष्मार्जुनादिभिरपि नैतत्प्रयोगलाघवं कृष्णेन ज्ञापितैरपि ज्ञातुं शक्यत इति भावः ॥ १७–१९ ॥ यया शक्त्या वज्रः प्रतिहत आसीत् ॥ २० ॥

गूढार्थदीपिनी

यर्हि तं विव्यधुस्तर्ह्येव तत्सैन्यं तथाभूतं चकारेत्यन्वयः । वाजा पत्राणि । निशितैस्तीक्ष्णैः शिलीमुखैर्बाणैः । निकृत्ता बाह्वादयो यस्य । हता अश्वादयो यस्य । शिरोध्रो ग्रीवा ॥ १७ ॥ यानीति सार्द्धम् । सुपर्णेन उह्यमानो नीयमानो हरिरित्यग्रान्वेति ॥ १८ ॥ तुण्डं चञ्च्वम् । युधि युद्धे ॥ १९ ॥ विद्रावितं पलायितम् । अर्दितं पीडितम् । ते गरुडम् । यतो यया ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यतः यया ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ । एकैकश एकमेकं त्रिभिस्त्रिभिः शरैर्गजान्पक्षाभ्यां निघ्नता सुपर्णेनोह्यमानः ॥ १ ॥ गरुत्मता गतं । तुरङ्गमास्तुरगाः । तुरगोऽपि तुरङ्गश्च तुरङ्गम इतीर्यत इति त्रिरूपकोशः । गतासवा निष्प्राणाः ॥ २ ॥ हरिरिन्द्रः ॥ ३ ॥ तया शक्त्या । अतिबिद्धो नरकादि दृष्ट्वा मालाहतो द्विपो हस्तीव । किञ्चिदीषदपि न चचाल ॥ ४ ॥ ततः शक्तिमुक्त्यनन्तरम् ॥ ५ ॥ अर्धचन्द्रम् शरम् । शरासने सन्धायाकृष्टुकामं नरकं विज्ञाय । तच्चापं सन्धितार्धचन्द्रधनुः केशवोऽच्छिनत् ॥ ६ ॥ कालायसमयीं कृष्णायोविकृतां मधुसूदनस्तां क्षुरप्रेण चकर्त ॥ ७ ॥ निशातमुत्तेजितं परशुं भौमः प्राहिणोत् । तां चासिना श्रीधरश्चिच्छेद ॥ ८ ॥ पञ्चसप्तति तोमरान् चिक्षेप ॥ ९ ॥ एकेन तत्रापि यौगपद्येनेति तदद्भुतमिवाभवत् । नेदं देवस्याद्भुतमिति सूचयतीति वेन ॥ १० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः शस्त्राणां छेदनमाह । यानि तैरेव योधैः प्रयुक्तानि । शस्त्राणि गृहीत्वा प्रहरणसाधनानि । अस्त्राणि तु प्रक्षेप्यानि, ब्रह्मास्त्रादिरूपाणि वा । **कुरूद्वहेति** विपरीतत्वाद्विश्वासार्थम् । तानि स्थितानि अग्रेपि साधनत्वाल्लोकोपद्रवकारीणि भविष्यन्तीति तान्यच्छिनदित्यभिप्रायेणाह **हरिरिति** । **तीक्ष्णैः शरैरिति** नालौकिकत्वम् । एकैकशस्त्रिभिरिति च । ये पुनर्गजाः स्वार्थं शोभाकरा भवन्ति, तान् न हतवानिति वक्तुं तादृशेन गरुडेन उह्यमानो भगवान्निरूप्यते । येन गजाः अन्तःप्रवेशनार्थं पक्षाभ्यामेव हताः । हस्ताभ्यामन्तःप्रवेशिता इव निरूपिताः । सेनारूपाः दैत्यांशा गजा मारिताः, साधारणा देवांशाश्च रक्षिता इति विभागः ॥ १७ ॥ ततो गरुडहतानां पुरप्रवेशमाह **गरुत्मतेति** । तुण्डपक्षनखाः तामससात्विकराजसाः आर्ताः सन्तः पुरमेवाविशन् । न तु तेषु युद्धार्थं बुद्धिरुत्पन्नेत्यर्थः । ततस्तेषु निवृत्तेषु नरकः स्वयमयुध्यत । **युधी**त्यावश्यकता ॥ १८ ॥ इदं युद्धं केवलमेव, 'अहं योत्स्यामी'ति उत्साहनिश्चयात्मकम्, शस्त्रप्रहरणात्मकं त्वाह दृष्ट्वेति । गरुडेन विद्रावितं स्वसैन्यं दृष्ट्वा, अर्दितं च, न केवलं भयमात्रेण पलायितम् । यद्यपि स्वयं भगवता सह युद्धार्थमागतः, अन्यं च न गणयति, तथापि तादृशोऽपि स्वयमेव तं गरुडं शक्त्या प्राहरत् । ननु तथाप्यल्पे कथं स्वविक्रमं योजितवानित्याशङ्क्याह **वज्रः प्रतिहतो यत** इति । गरुडाद्वज्रोऽपि प्रतिहतः । तदमृतहरणे गरुडस्य प्रसिद्धम् । अतो महति पौरुषं कर्तव्यमिति न काप्यनुपपत्तिः ॥ १९ ॥ इदं माहात्म्यमग्रेऽप्युपयुज्यते । एकमेव वाहनं भगवत इति तदुपद्रवे भगवति काचिच्छङ्का स्यात्, अतस्तन्निवारणं वक्तव्यम्, अत एव किञ्चिज्ज्ञातमित्याह **नाकम्पतेति** । **तया** शक्त्या विद्धः । तेनाल्पमपि शरीरभेदमाशङ्क्य दृष्टान्तमाह **मालाहत इवेति** । मालया हतः । भेदेऽपि व्यथाभावमाह **द्विप इवेति** । यथा अङ्कुशेन विद्धः द्विपो जागर्ति, कार्यक्षमश्च भवति, तथा गरुडः अतिपराक्रमयुक्तो जात इत्यर्थः । ततो लज्जितो नरकासुरः महादेवात् प्राप्तं शूलं तस्मिन् जीवति अमोघमच्युते योजयितुं विचारितवानित्याह शूलमिति । यतो भौमो मातुः पुत्रः । तथा करणे हेतुमाह **वितथोद्यम** इति । बितथः गरुडे पराक्रमो व्यर्थो जात इति ॥ २० ॥

श्रीसुबोधिनी-सारः

हे कुरूद्वह योधैर्यानि शस्त्रास्त्राणि प्रयुक्तानि तानि हरिरच्छिनत् तीक्ष्णैः शरैः एकैकशस्त्रिभिरिति युद्धकर्तृविशेषणम् ॥ १७ ॥ सुपर्णेन गरुडेनोह्यमानः पक्षाभ्यां गजान् निघ्नता गरुत्मता तुंडेन चंच्वा पक्षाभ्यां नखैर्हन्यमाना विदार्यमाणा गजा आर्त्ताः पीडिताः पुरं नगरमेवाविशन् प्रविष्टवंतः युधि नरकोऽयुध्यत गरुडेनार्दितं पीडितं स्वकम् आत्मीयं सैन्यं विद्रावितं दृष्ट्वा ॥ १८-१९ ॥ यतो यया शक्त्या वज्रः प्रतिहतस्तथा शक्त्या भौमोसुरस्तं गरुडं प्राहरत् तया विद्धोसौ नाकंपत मालया हतो द्विपो गज इव ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यदा ते तं विव्यधुस्तर्ह्येव तस्मिन्नेव क्षणे गदाग्रजो भगवान् कृष्णस्तद्भौमसैन्यं विचित्रा वाजाः पत्राणि येषां तैर्निशितैस्तीक्ष्णैः शिलीमुखैर्बाणैर्निकृत्ता बाहवः ऊरवः शिरोधरा विग्रहाश्च यस्य, तथा हताः अश्वाः कुञ्जराश्च यस्मिंस्तथाभूतं चकार ॥ १७ ॥ हे कुरूद्वह । तत्सैन्यवधात्, पूर्वमेव यानि योधैः प्रयुक्तानि शस्त्राणि गृहीत्वा प्रहरणसाधनानि अस्त्राणि प्रक्षेप्याणि तानि हरिरेकैकशः त्रिभिस्त्रिभिस्तीक्ष्णैः शरैरच्छिनदित्यन्वयः ॥ १८ ॥ एवं झटिति सैन्यहनने गरुडस्य महावेगहेतुं सूचयन् विशिनष्टि—उह्यमान इति ॥ १९ ॥ तदा गरुत्मता तुण्डादिभिर्हन्यमानाः अत एव आर्ता गजाः पुरमेवाविशन्। तदैको नरक एव युद्धेऽयुध्यत । गरुडेनार्दितं पीडितं अत एव विद्रावितं पलायितं च स्वकीयं सैन्य दृष्ट्वा भौमस्तं गरुडं शक्त्या प्राहरत् । शक्तेरमोघत्वं दर्शयति—यतः यया शक्त्या वज्रः प्रतिहतः ॥ २० ॥

अन्वितार्थप्रकाशिका

तदिति ॥ यदा ते तं विव्यधुः तर्ह्येव तस्मिन्नेव क्षणे गदाग्रजो भगवान् कृष्णस्तद् भौमसैन्यं विचित्रा वाजाः पत्राणि येषां तैर्निशितैस्तीक्ष्णैः शिलीमुखैर्बाणैर्निकृत्ता बाहवः ऊरवः शिरोधरा कन्धरा विग्रहा देहाश्च यस्य तथा हता अश्वाः कुञ्चराश्च यस्मिंस्तथाभूतं चकार ॥ १७ ॥ यानीति सार्द्धम् ॥ हे कुरूद्वह ! तत्सैन्यवधात्पूर्वमेव यानि योधैः प्रयुक्तानि शस्त्राणि हस्तस्थान्येव प्रहरणसाधनानि खड्गादीनि अस्त्राणि प्रक्षेप्याणि शरादीनि तानि पक्षाभ्यां गजान्निघ्नता सुपर्णेन उह्यमानो हरिरेकैकश इति कर्मणः करणस्य च विशेषणम् । त्रिभिस्तीक्ष्णैः शरैरच्छिनत् । अयं भावः । योधैर्यानि प्रयुक्तानि तेषां लक्ष्यप्राप्तेः पूर्वमेव तत्प्रयोक्तॄन् प्रथमं छित्त्वा ततस्तत्प्रयुक्तानि तानि चिच्छेद तत्राप्येकैकं शस्त्रमस्त्रं च त्रिभिः शरैश्चिच्छेद । तैरपि त्रिभिः प्रत्येकमेव प्रयुक्तैर्नतु युगपत् प्रयुक्तैरित्याश्चर्येण कुरूद्वहेति भीष्मार्जुनादावपि नैतत्प्रयोगलाघवमिति ॥ १८ ॥ गरुत्मतेति ॥ तदा गरुत्मता तुण्डादिभिर्हन्यमाना अत एवार्ता गजाः पुरमेवाविशन् तदैको नरक एव युद्धेऽयुद्ध्यत । गजाश्चैते योधैरनारूढा राजवाहका ज्ञेयाः ॥ १९ ॥ दृष्ट्वेति ॥गरुडेनार्दितं पीडितम् अत एव विद्रावितं पलायितं च स्वकीयं सैन्यं दृष्ट्वा भौमस्तं गरुडं शक्त्या प्राहरत् । यतः यया शक्त्या वज्रोऽपि प्रतिहतः आसीत् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

युधि नरको भौमासुर एक एव अयुध्यतः ॥ १८ ॥ तं गरुडं यतो यया शक्त्या वज्रोपि पूर्वं प्रतिहतस्तिरस्कृतो बभूव ॥ १९ ॥ तया शक्त्या गरुडो नाकंपत न चचाल । अतस्तार्क्ष्ये वितथोद्यमः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यानीति । हे कुरूद्वह राजन् , योधैर्भौमसंबन्धियोद्धृभिः, यानि शस्त्रास्त्राणि, प्रयुक्तानि, एकैकशः तानि, पक्षाभ्यां गजान् निघ्नता, सुपर्णेन गरुडेन, उह्यमानः हरिः, तीक्ष्णैः त्रिभिः शरैः, अच्छिनत् । हरिर्भौमयोद्धृप्रयुक्तशस्त्रादीनि तत्प्राप्तेः पूर्वमेव त्रिभिस्त्रिभिः शरैः प्रत्येकं छित्त्वा, तत् सैन्यं च हतवानिति भावः ॥ १७ ॥ गरुत्मतेति । तुण्डपक्षनखैः, गरुत्मता गरुडेन, हन्यमानाः गजाः भौमकरिणः, आर्त्ताः सन्तः, पुरं एव, अविशन् । युधि संग्रामे तु, नरक एको भौमासुर एव, अयुद्ध्यत ॥ १८ ॥ दृष्ट्वेति । गरुडेन, अर्द्दितं अत एव, विद्रावितं पलायितं स्वकं सैन्यं दृष्ट्वा, यतः यया शक्त्या, वज्रः इन्द्रायुधं, 'वज्रोऽस्त्री' इत्यमरः । प्रतिहतः, तया शक्त्या, भौमः तं गरुडं, प्राहरत् । गरुडं हन्तुं शक्तिं प्राहिणोदित्यर्थः ॥ १९ ॥ नाकम्पतेति । तया शक्त्या विद्धः, भौमेन ताडित इत्यर्थः । गरुडः, मालाहतः मालया ताडितः, द्विपः हस्ती इव, न अकम्पत । ततः, वितथोद्यमः गरुडे व्यर्थोद्यमः, भौमः, अच्युतं श्रीकृष्णं हन्तुं, शूलं, आददे स्वीकृतवान् ॥ २० ॥

कृष्णप्रिया

राजन् ! इधर समराङ्गण में नरकासुर के योद्धाओं ने द्वारिकानाथ पर जो-जो शस्त्रास्त्र चलाये थे उन सबको भगवान् श्रीहरि ने अत्यन्त तीव्र एवं तीक्ष्ण तीन-तीन बाणों से काट दिये ॥ १७ ॥ महाराज कुरुनन्दन ! इस संग्राम में भगवान्

श्रीकृष्ण अपने प्रियतम श्री गरुड जी पर सवार थे समराङ्गण खेल रहे थे, तब स्वयं समर्थ सुपर्णजी अपने पंखों से गजराजों को मार रहे थे। गरुड जी की तीक्ष्ण चोंच, पंख, एवं पंजो की मार से चोट से अत्यन्त आर्त्त होकर समराङ्गण से भागकर प्राग्ज्योतिष नगर में घुस गये। युद्ध भूमि में केवल भौमासुर ही युद्ध करने लगा। इधर भौमासुर ने देखा कि गरुड जी के पंखों की गहरी चोट से आर्त होकर सारा सैन्य भाग रहा है, तब भौमासुर ने इन्द्र के वज्र को विफल बनाने वाली अपनी शक्ति चलायी किन्तु इस शक्तिप्रहार से पक्षीराज श्री गरुड जी तनिक भी चलायमान नहीं हुए। श्रीगरुड जी पर शक्ति का प्रहार जैसे ऐरावत गजराज पर फूलों की माला से प्रहार किया गया हो वैसा मालूम होता था ॥ १८–२० ॥

[1] शूलं भौमोऽच्युतं हन्तुमाददे वितथोद्यमः ।
तद्विसर्गात् पूर्वमेव नरकस्य शिरो हरिः । अपाहरद् गजस्थस्य चक्रेण क्षुरनेमिना ॥ २१ ॥
सकुण्डलं चारुकिरीटभूषणं[2] [3]बभौ पृथिव्यां पतितं समुज्ज्वलत् ।
हाहेति साध्वित्यृषयः सुरेश्वरा माल्यैर्मुकुन्दं विकिरन्त ईडिरे ॥ २२ ॥
[4]ततश्च [5] भूः कृष्णमुपेत्य कुण्डले प्रतप्तजाम्बूनदरत्नभास्वरे ।
[6] स वैजयन्त्या वनमालयार्पयत् प्राचेतसं छत्रमथो महामणिम् ॥ २३ ॥
अस्तौषीदथ विश्वेशं देवी देववरार्चितम् । प्राञ्जलिः प्रणता राजन् भक्तिप्रवणया धिया ॥ २४ ॥

कर्दमक्षमा

अन्वयः—तया, विद्धः, अपि, मालाहतः, द्विपः, इव, न, अकम्पत, गरुड, इति, यावत् । एवं, वितथोद्यमः, सः, भौमः, अच्युतम्, हन्तुम्, शूलम्, आददे ॥ २१ ॥ हरिः, तद्विसर्गात्, पूर्वमेव, गजस्थस्य, नरकस्य, शिरः, क्षुरनेमिना, चक्रेण, अपाहरत् ॥ २२ ॥ सकुण्डलम्, चारु, किरीटभूषणम्, समुज्वलत्, पृथिव्याम्, पतितम्, शिरः, बभौ, तदा, नरकसम्बन्धिनः, हा, हा, इति, ऊचुः, ऋषयः, साधु, इति (ऊचुः), सुरेश्वराः, मुकुन्दम्, माल्यैः, विकिरन्तः, सन्, ईडिरे ॥ २३ ॥ ततः, भूः, कृष्णम्, उपेत्य, प्रतप्तजाम्बूनदभास्वरे, कुण्डले, वैजयन्त्या, वनमालया, सह, प्राचेतसम्, छत्रम्, अथ, महामणिम्, च, अर्पयत् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गरुडे वितथोद्यमः सन् शूलं त्रिशूलमाददे धृतवान् ॥ २१–२२ ॥ प्रतप्ते जांबूनदे यानि रत्नानि तैर्भास्वरे मेर्वंशभूतं मन्दरं महामणिं चार्पयदिति ॥ २३–२४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वितथोद्यमो व्यर्थप्रयत्नः । तद्विसर्गाच्छूलत्यागात् । ततोऽमोघशूलहस्तं भौममालक्ष्य शीघ्रमिमं जहीति सत्यभामयोक्तः कृष्णस्तं जघानेत्याह—तदिति ॥ २१ ॥ हाहेति दैत्याः, साध्विति मुनयः । हाहेति 'हा विषादशुगर्तिपु, इह निंदायां

---

[1] किंचिदपि राजेन्द्र चचाल नरकाहवे ।

तत। कार्मुकमादाय नरकः शरसञ्चयान् । मुमोच कृष्णे तान्सर्वानच्छिनत्केशवः शरैः ॥ १ ॥
ततोऽर्धचन्द्रं नरकं सुसन्धाय शरासने । आक्रष्टुकामं विज्ञाय तच्चापं केशवोऽच्छिनत् ॥ २ ॥
ततः कालायसमयीं गदां गुर्वीं धरासुतः । आददे तां क्षुरप्रेण चकर्त मधुसूदनः ॥ ३ ॥
ततो निशातं परशुं भौमः परबलार्दनः । प्राहिणोद्विष्णवे तं च चिच्छेद श्रीधरोऽसिना ॥ ४ ॥
ततः कृष्णाय चिक्षेप तोमरान्पञ्चसप्ततिम् । चकार सिंहनादं च नरकः परवीरहा ॥ ५ ॥
तांस्तोमरान्कुरुश्रेष्ठ शरेणैकेन केशवः । चिच्छेद यौगपद्येन तदद्भुतमिवाभवत् ॥ ६ ॥

[2] भूषितं–वीर. विज. । [3] शिरः–वीर. ।

[4] हत्वा हरिर्नरकं दैत्यवर्यं मरुद्गणैः सहितो लोकपालैः । समाहूतः पौरमुख्यैः सभार्यः प्राग्ज्योतिषं प्राविशद्द्रष्टुकामः ॥ १ ॥
तत्रापश्यद्यदुश्रेष्ठो विचित्रं मणिपर्वतम् । च छत्रं वारुणं हृद्यं सलिलस्रावि भारत ॥ २ ॥
शक्राय प्राहिणोद्भूयः केशवो मणिपर्वतम् । वरुणाय तथा छत्रं प्राहिणोद्दैत्यकिंकरैः ॥ ३ ॥
तान्विसृज्य हरिर्देवान्स्वयमेव जगत्पतिः । प्राविशद्भौमसदनं पुरन्दरपुरोपमम् ॥ ४ ॥

[5] ततो धरा–विज. । [6] पौत्रं च वीरं भगदत्त संज्ञितं निवेद्य मालामपि वैजयन्तीम्–विज. । इत्थं पाठः ।

च इति क्षीरस्वामी। हा पापिष्ठ नरक, हा विश्वोद्वेजक त्वं यन्मृतस्तत्साधुसाध्विति ऊचुः। विकिरन्त आच्छादयन्तः, ऊचुरिति शेषः ॥ २२ ॥ ततो भौममृतेरनन्तरम्। वनमालया सह कुण्डले आर्पयदित्यन्वयः। किंभूतया–वैजयन्ती वसुविधमौक्तिकमाला, तत्सहितया। वनमाला तु हरेरर्चनायैव न तु भौमेन कस्यचिदानीतेति बोध्यम्। महांतो मणयो यत्र तं सुमेरोरंशभूतं मन्दराख्यगिरिशिखरम्। 'हृतामराद्रिस्थानेन' इत्युक्तेः। वैजयन्ती पंचवर्णा, वनमाला चरणलम्बिनी पत्रपुष्पमयीति भेदः। यद्वा–अष्टधामौक्तिकनिर्मिता वैजयन्ती, पञ्चरत्नमयी वा। अनयोर्लक्षणं तृतीयस्कन्धे टीकायामस्माभिर्लिखितमेव ॥ २३ ॥ अथ भगवदर्चनकुण्डलादिप्रत्यर्पणोत्तरम्। भक्त्या प्रवणया तद्गतया। "निम्नेऽथ तत्परे वक्रे प्रवणो वननिर्गतः" इति निरुक्तिः। अथ तत्तदर्पणोत्तरम्। भक्त्या प्रवणाऽऽयत्ता धीस्तया प्रणताऽवनतमस्तका सती। देववरैर्ब्रह्मादिभिरप्यर्चितम्। हे राजन्निति—श्रीकृष्णयशःश्रवणेन राजमान एव राजा भवतीति भावः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तस्य शूलस्य विसर्गात्प्रागेव अपाहरत् तस्याजानत इवाहरत् यतः क्षुरवत्तीक्ष्णधारा नेमयो यस्य तेन ॥ २१ ॥ शिरो बभौ लोकदृष्टी रञ्जयामास यतः पतितं दुष्टसम्बन्धित्वादितिभावः। अतस्तदीयशोभारचनमपि तदानीमेव तदुपोद्बलकं जातमिति सविनोदमाह—समुज्ज्वलमिति। समुज्वलदिति क्वचित् तत्र हेतुः सकुण्डलमित्यादि हाहेति निन्दायां महापापिष्ठोऽयमासीदित्यर्थः। हाविषादशुगार्त्तिष्वित्यत्र निन्दायां चेति हि क्षीरस्वामी। साध्विति हर्षात् भद्रं जातमिदमित्यर्थः। ऊचुरिति शेषः। सुरेश्वरः इन्द्रादयस्तं माल्यैर्विकिरन्त आच्छादयन्तः ॥ २२ ॥ वैजयन्ती पञ्चवर्णा वनमाला चरणलम्बिनी पत्रपुष्पमयीतिभेदः। वैजयन्तीसहितया वनमालया सह ॥ २३ ॥ अथ तत्तदर्पणानन्तरं भक्त्या प्रवणा आयत्ता वशीकृता या तया बुद्धया प्रणता स्तुत्यर्थं प्राक् कृतप्रणामा पश्चात् प्राञ्जलिः सती यद्वा प्रणता च अवनतमस्तका सती तुष्टाव यतः विश्वेशम् अतो देववरैर्ब्रह्मादिभिरर्चितं तत्तत्प्रकारेणैवास्तौदितिभावः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अच्युत सुस्थिरतयाभिमुखे सन्तं भगवन्तमित्यर्थः, यद्वा, अच्युतमव्यर्थं शूलम्, तस्य शूलस्य विसर्गात् प्रागेव अप अनायासेन क्षिप्रमेवाहरत्, यतः क्षुरवत्तीक्ष्णधारा नेमयो यस्य तेन ॥ २१ ॥ पतितमपि बभौ शिरः, यतः सम्यगुज्ज्वलम्। तत्र हेतुः—सकुण्डलमित्यादि। हाहेति भूमिसुतशिरः पातात्, साध्विति च दुष्टमरणात्, यद्वा, हाहेति तदनुगाः, ऋषयश्च साध्वित्यूचुरिति शेषः। सुरेश्वरा इन्द्रादयो माल्यैर्विशेषेण श्रीसत्यभामा-गरुडसाहित्यादिना, किरन्तो व्याप्नुवन्तः, मुकुन्दमिति नरकवधेन परमानन्दप्रदानात्, अत एव ईडिरे जयजयेत्यादिस्तुत्या तुष्टुवुः ॥२२॥ भूर्मातृत्वेन नरकस्य गृहे मूर्त्तिमती सदा वर्त्तमाना, किंवा तदानीमेवाविर्भूता, कृष्णं साक्षाद्भगवन्तं स्वपतिमित्यर्थः। अत उपेत्य समीपे गत्वा, वैजयन्ती पञ्चवर्णा, वनमाला चापादलम्बिनी पत्रपुष्पमयीति भेदः। वैजयन्ती–सहितया वनमालया सह। अथो समुच्चये, विलम्बे वा, त्वरयादौ मालासहितकुण्डलार्पणतः पश्चात् छत्राद्यर्पणात् ॥ २३ ॥ अथ तत्तदर्पणानन्तरं भक्त्या प्रवणा आयत्ता वशीकृता या तया बुद्धया, प्रणता स्तुत्यर्थं प्राक् कृतप्रणामा, पश्चात् प्राञ्जलिः सती; यद्वा, प्रणता चावनतमस्तका सती तुष्टाव; यतो विश्वेशम्, अतो देववरैः श्रीब्रह्मादिभिरर्च्चितं तत्तत्प्रकारेणास्तौषीदिति भावः। यतो देवी श्रीभगवत्प्रिया भक्त्या द्योतमाना वा; इति तस्याः श्रीभगवन्माहात्म्याभिज्ञता सूचिता। अतस्तत्स्तुतिश्रवणार्थमवधापयति—हे राजन्निति ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

प्राचेतसं वारुणम् ॥ २३-२८ ॥ (२४)

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

शूलमिति। गरुडे व्यर्थोद्यमस्सन् शूलमाददे स्वीकृतवान् तद्विसर्गाच्छूलप्रयोगात् पूर्वमेव हरिर्नरकस्य शिरश्चक्रेण चिच्छेद कथम्भूतेन क्षुरस्येव नेमिः धारा यस्य तेन ॥ २१ ॥ सकुण्डलमिति। कुण्डलाभ्यां सहितं सुन्दरेण किरीटेन भूषितं शिरः पृथिव्यां पतितं सत् सम्यगुज्ज्वलत् नरकसम्बन्धिनो हाहेति ऋषयस्तु साधु साध्वित्यूचुः सुरेश्वरास्तु कुसुमैर्विकिरन्तो मुकुन्दं तुष्टुवुः ॥ २२ ॥ ततश्चेति। (सा) भूः भूमिर्नरकस्य माता प्रतप्ते जाम्बूनद यानि रत्नानि तैर्भास्वरे कुण्डले तथा वैजयन्त्या वनमालया सह प्राचेतसं वारुणं छत्रं मेर्वंशभूतं मन्दरशिखरं महामणिञ्च कृष्णायार्पयामास ॥ २३ ॥ अस्तौषीदिति। हे राजन्! देवो देववरैरर्चितश्च तं कृष्णं भक्त्या प्रवणा या धीस्तयोपलक्षिता तुष्टाव ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

(मूलम्) तयातिविद्धो गरुडो मालाविद्ध इव द्विपः। न किञ्चिदपि राजेन्द्र चचाल नरकाहवे ॥
ततः कार्मुकमादाय नरकः शरसञ्चयान्। मुमोच कृष्णे तान् सर्वानच्छिनत्केशवः शरैः ॥
ततोऽर्धचन्द्रं नरकं सुसन्धाय शरासने। आक्रष्टुकामं विज्ञाय तच्चापं केशवोच्छिनत् ॥ क ॥

ततः कालायसमयीं गदां गुर्वीं धरासुतः। आददे तां क्षुरप्रेण चकर्त मधुसूदनः॥ ख ॥
ततो निशातं परशुं भौमः परबलार्दनः। प्राहिणोद्विष्णवे तं च चिच्छेद श्रीधरोऽसिना ॥
ततः कृष्णाय चिक्षेप तोमरान्पञ्चसप्ततिम्।
चकार सिंहनादञ्च नरकः परवीरहा। तांस्तोमरान् कुरुश्रेष्ठ! शरेणैकेन केशवः ॥
चिच्छेद यौगपद्येन तदद्भुतमिवाभवत्। आक्रष्टुकामम् आकर्णपूर्णमाकर्षणेच्छुकम् ॥ क ॥
नाम्ना क्षुरप्रेण शरेण ॥ ख ॥
क्षुरनेमिना निशितनेमिना ॥ २१-२३ ॥
भक्त्या प्रवणया सततया धिया बुद्ध्या ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्चामोघशूलहस्तं भौममालक्ष्य शीघ्रमिमं जहीति सत्यभामयोक्तः कृष्णस्तं जघानेत्याह—तदिति ॥२१॥ हा हेति। "हाविषादशुगार्त्तिषु" इत्यत्र निन्दायाञ्चेति क्षीरस्वामी हा पापिष्ठ! नरक हा विश्वोद्वेजक! त्वं यन्मृतस्तत्साधु साध्वित्यूचुः विकिरन्त आच्छादयन्तः ॥ २२ ॥ महामणिं मणिपर्वतम् ॥ २३-२४ ॥

गूढार्थदीपिनी

वितथोद्यमः व्यर्थप्रयत्नः ॥ २१ ॥ तद्विसर्गात् शूलप्रक्षेपात् पूर्वमेव शिरः अपाहरत् चिच्छेद। क्षुरनेमिना क्षुरवत्तीक्ष्णधारेण ॥ २२ ॥ **किरीटं** मुकुटम्। हाहेति दैत्याः साधु साधु इति ऋषय ऊचुरिति शेषः। माल्यैः पुष्पैः मुकुन्दं विकिरन्त आच्छादयन्त ईडिरे ॥ २३ ॥ **ततश्च भूः** कुण्डले छत्रादिकं च वनमालया सह कृष्णम् आर्पयदित्यन्वयः। प्रतप्ते सुवर्णे खचितानि यानि रत्नानि तैः भास्वरे कुण्डले। **बैजयन्ती** पञ्चरत्नमयी। वनमालापत्रपुष्पमयी तया सह महान्तो मणयो यत्र तं मेरोरंशभूतं मन्दराचलशिखरम् प्राचेतसं वारुणं छत्रं च आर्पयत् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शिरोऽपाहरत् सत्यभामानुज्ञयेति ज्ञेयम् ॥ २१-२२ ॥ महान्तो मणयो यस्मिन् तं मणिपर्वतम् ॥ २३-२४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वितथोद्यमो व्यर्थोद्यमो विगतं तथा सत्यं यस्मात्स वितथ उद्यमो यस्य सः। मिथ्या मृषा च वितथ इत्यमरोक्तेरयं वाच्यलिङ्गः शब्दः। तद्विसर्गाच्छूलोत्सर्जनात्। क्षुरवद्विद्यमाननेमिवता चक्रेण गजस्थस्य शिरोऽपाहरत् ॥ ११ ॥ पृथिव्यां पतितमुज्वलत्प्राक्। इदानीं सद्यः पतितत्वात्तत्रापि मातर्येव पाताब्दभावित्युचितं भानम्। हाहेति नारका अवदन्निति शेषः। यद्वा हाहेति किं हससीत्याभाणकमूलमिदं सत्साध्विति हाहेति। ऋषयः सुरेश्वरा इत्यनेनान्वेति। मुकुन्दमाल्यैः पुष्पैर्विकिरन्तमीडिरेऽस्तुवन् ॥ १२ ॥ हरिर्नरकं हत्वा आश्वयुजचतुर्दश्यां पौरमुख्यैः समाहूतो द्रष्टुकामः प्राग्ज्योतिषं प्राविशत् ॥ १३ ॥ मणिपर्वतं सुरगिरित उत्कृत्य नीतम् सलिलस्राविं सदा वरुणसम्बन्धि छत्रं चापश्यत् ॥१४॥ शक्राय मणिपर्वतं वरुणाय छत्रं च दैत्यकिङ्करैः प्राहिणोत्। त्रिविष्टपपर्यन्तं गरुडोपर्यारोप्य नीत्वेन्द्राय दत्वा दैत्यकिंकरैः प्राहिणोद्वरुणायेत्यर्थः। यथोक्तम्। समन्ततो योजनानां शते द्वे प्रवृद्धमिन्द्रस्य सरत्नपर्वतम्। नित्यामृतस्रावि जलेश्वरस्य छत्रं च दौर्भ्यां गरुडे न्यधाद्धरिरित्याचार्यैः। तांस्तान्पदार्थांस्तत्र प्रेषयामास। अनेन निस्पृहता ध्वनिता ॥ १५ ॥ तान्देवान्विसृज्य राजाऽन्तःपुर इतरैर्नागन्तव्यमित्यमरपरित्यागः ॥ १६ ॥ ततोऽन्तरागमनानन्तरं धरा कृष्णमुपेत्य सङ्गम्य प्रतप्तं जाम्बूनदं निष्ठापितमष्टापदं तदात्मके च ते रत्नैर्भास्वरे चेति ते। अदितिकुण्डले भगदत्तसंज्ञितं पौत्रं च तथा वैजयन्तीं मालां च निवेद्य ॥ १७ ॥ अर्पयित्वा देववरार्चितं देवी प्राञ्जलिः प्रणता सती भक्तिप्रवणया भक्त्या सदा वक्रया धियाऽस्तौषीत् ॥ १८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवान् पुनः शूलस्यापि माहात्म्यं स्थापनीयमिति, यस्मिन् क्षणे शूलं त्यक्ष्यति, तत्पूर्वक्षण एव सुदर्शनेन तस्य शिरोऽच्छिनदित्याह **तद्विसर्गादिति**। पूर्वमेवोत्पन्नप्रयत्नेन छेदनसमकालमेव विसर्गोऽपि जातः। अन्यथा स्थिते शूले सोऽवध्य इति केचित्। नेदं महादेवदत्तं शूलमित्यन्ये। किञ्च। स गजस्थः। आचमनाद्यभावान्न तस्मिन् शूले महादेवः सन्निहित इत्याह **गजस्थस्येति**। चक्रस्य सामर्थ्यं व्यावर्तयितुमाह **क्षुरनेमिनेति** ॥ २१ ॥ ततस्तस्य शिरसः पुनर्योजनाभावाय विनियोगान्तरं वदन् वर्णयति **सकुण्डलमिति**। यथा भूमेः सकाशात् शिर एव प्रादुर्भूतमविकृतं तथा भातीति ज्ञापयितुं कुण्डलकिरीटयोर्वर्णनम्।

सम्यक् उज्ज्वलत् शिरः पतितं जातमित्यर्थः । ततो बभौ । भूमिरवहेलनं न करोतीति सम्यक् स्थापनात् शोभा । यथा तदीयः पुत्रः तस्यै समर्प्यते । इयं भूमिरभिमानिनी देवता, न त्विला भगवच्छक्तिः, सा आधिदैविकी । सत्यभामा त्वाधिदैविकी । तस्या आनयने पञ्च प्रयोजनानि । पूर्णो भवति शक्त्या सहितः, बलभद्रे शक्तिविभागे योन्यंशः पृथक्कृत इति । माहात्म्यं च प्रदर्शनीयम् । तद्वाक्येन नरकासुरोऽपि हन्तव्यः । सापत्न्यसहनार्थम्, अन्यथा सा स्त्र्यन्तरसद्भावं न सहेत । बलाद्धरणे तु दुष्टत्वात् मंस्यत इति । पारिजातहरणार्थं च । ततो लोकाः **हाहेत्यब्रुवन्** । ऋषयश्च स्वपुत्र इति स्वयमेव छिन्न इति । अन्ये च पुनः ऋषयः **साध्विति** । सुराश्च साध्वेव कृतमिति । अनुमोदनमेव कुर्वाणाः माल्यैः विकिरन्तः, नरकस्यापि मोक्षो दत्त इति, मुकुन्दमीडिरे । हाहेतीडिरे, साध्विति च, किमित्ययं पुत्रो मारित इति भगवतः पराक्रममुक्त्वा ईडिरे । अन्ये तु साध्वेव कृतमिति वदन्तः ईडिरे इति । पुष्पवृष्टिर्देवार्थं तद्वध इति सूचयति ॥ २२ ॥ यदर्थमयं हतः, तस्मिन् हते तज्जातमित्याह **ततश्चेति** । उपेत्य निकटे समागत्य । कृष्णत्वान्न तस्या भयम् । अदित्याः कुण्डले सर्वदैव प्रकर्षेण तप्तजाम्बूनदवत् रत्नवच्च भास्वरे । उभयमपि तत्र प्रकृतिभूतमिति द्वयमुक्तम् । वैजयन्तीं वनमालां च भगवद्दत्तां समर्पितवती । भगवत्पूजार्थं वा वैजयन्ती । वरुणेन निर्मितं समुद्रोद्भूतमिन्द्रस्यैव छत्रं इदमन्यद्वा भगवदर्थे दत्तम् । अथो महामणिः कौस्तुभसदृशः । **अथो** इत्यनेन पूर्वं भगवदीयमेव भगवते दत्तम्, इदं त्वतिरिक्तमिति पुत्रोपार्जितं दत्तवती । अथवा । वैजयन्त्या सह कुण्डले भूमिष्ठे, छत्रं स्वर्गस्थम्, मणिः पातालस्थ इति । उपलक्षणत्वेन त्रिलोक्यां यत्किञ्चिदुत्कृष्टं तत्सर्वं निवेदितवती । एतदरिक्तहस्तत्वार्थमेव । वस्तुतस्तु सर्वं भगवत एव, सा भार्या स पुत्र इति । अत एव पुत्रेण सह न भेद इति भगवदर्थमेव सङ्गृहीताः **स्त्रिय** इति अन्यावरोधस्थस्त्रीविवाहो न दुष्यति ।२३। अथापराधशान्त्यर्थं भिन्नप्रक्रमेण स्तोत्रं करोतीत्याह **अस्तौषीदिति** । ननु घातकः कथं स्तूयत इत्याशङ्क्याह **विश्वेशमिति** । पुत्रत्वादिसम्बन्धस्य प्रयोजकत्वाभावाय **विश्वपदम्** । स्तोत्रपरिज्ञानाय **देवीति** । ननु (तथापि) साम्प्रतमलौकिकं कृतमिति कथं स्तुतिरित्याशङ्क्याह । देववरैः साम्प्रतमेवार्चितमिति । **प्राञ्जलिरिति** नम्रता दीनता च सूचिता । **प्रणतेति** शरीरेण नम्रा । स्त्रीस्वभावात् दुःखभयव्यावृत्त्यर्थमाह **भक्तिप्रवणया धियेति** । **भक्तिप्रवणा** प्रतिबन्धकमप्यनादृत्य भक्तिगामिनी, यथा जलं निम्नगामि । बुद्धिश्चेत्तद्गता सा मनसोऽपि नियामिकेति सर्वमेव भक्तिप्रवणम् ।

षड्भिः स्तुत्वा प्रार्थयते पौत्रजीवितमुत्तमम् । चतुर्भिर्नमनं प्रोक्तं सर्वभावप्रसिद्धये ॥
माहात्म्यं च स्वरूपं च ततो द्वाभ्यामुदीरितम् ॥ २४ ॥

श्रीसुबोधिनी-सारः

वितथो निष्फल उद्यमो यस्य स भौमोऽच्युतं हरिं हंतुं शूलमाददे जग्राह । तस्य शूलस्य विसर्गात्प्रयोगात्पूर्वमेव गजस्थस्य हस्त्यारूढस्य नरकस्य शिरः क्षुरवत् तीक्ष्णा नेमिर्धारा यस्य तेन चक्रेण हरिः श्रीकृष्णोऽपाहरत् अच्छिनत् ॥ २१ ॥ कुडलाभ्यां सहितं चारु सुंदरं किरीटं कुंडलं भूषणं यस्मिन् तत् समुज्ज्वलत् दीप्तिमत् पृथिव्यां पतितं बभौ शुशुभे हाहेत्यसुराः साधु इति ऋषयः ऊचुरिति शेषः । सुरेश्वरा देवेंद्राः माल्यैः पुष्पैर्मुकुंदं विकिरंत आच्छादयंतं ईडिरे तुष्टुवुः ॥ २२ ॥ ततोनंतरं भूस्तन्माता कृष्णमुपेत्त्य प्राप्य प्रतप्ते शुद्धे जांबूनदे सुवर्णे यानि रत्नानि तैर्भास्वरं कुंडले प्राचेतसं वारुणं छत्रमार्पयत् अथोनंतरं सवैजयंत्या वनमालया सह महामणिमार्पयत् ॥ २३ ॥ अथ प्रांजलिः प्रणता देवी भूमिर्देववरैरर्चितं विश्वस्येशं हरिं भक्त्या प्रवणया द्रवीभूतया धिया बुद्ध्यास्तावीत् इडभाव आर्षः हे राजन् ! ॥ २४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तद्विसर्गादित्यत्र । **चक्रस्य सामर्थ्यमिति** । नेमीनामेव सामर्थ्यं तेजोरूपत्वं चक्रसामर्थ्यं प्रकटितमित्यर्थः । **सकुण्डलमित्यत्र** । भूमिसत्यभामयोर्भेदमाहुः **इयं भूमिरिति** । **न त्विलेति** । 'श्रिया पुष्ट्ये'ति नवशक्तिषु गणिता सा आधिदैविकी इला नरकासुरमाता नत्वित्यर्थः । तर्हि सा इला का इत्यत आहुः **सत्यभामा** त्विति । सत्यभामा तु इलारूपा आधिदैविकी भवत्येवेत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तया शक्त्या विद्धस्ताडितोऽपि गरुडो नाकम्पत । अन्यत्र प्रबलत्वेऽपि गरुडे शक्तेरकिञ्चित्करत्वं सूचयन् दृष्टान्तमाह—मालया हतो यथा द्विपो गजो न कम्पते । एवं गरुडे वितथोद्यमः सन् भौमोऽच्युतं हन्तुं शूलमाददे स्वीकृतवान् ॥ २२ ॥ हरिस्तु तद्विसर्गात् शूलप्रक्षेपात् पूर्वमेव क्षुरस्येव तीक्ष्णा नेमिः धारा यस्य तेन चक्रेण गजस्थस्य नरकस्य शिर अपाहरत् चिच्छेद ॥२३॥ कुण्डलाभ्यां सहितं सुन्दरं किरीटं भूषणं यस्य तत्, अतएव सम्यक् उज्ज्वलत् प्रकाशमानं तस्य शिरो पृथिव्यां पतितं जातम् । तदा च नरकसम्बन्धिनो हाहेति, ऋषयस्तु साधुसाध्वित्यूचुः । सुरेश्वरास्तु कुसुमैर्मुकुन्दं विकिरन्त आच्छादयन्त ईडिरे तुष्टुवुः ॥ २४ ॥

अन्वितार्थप्रकाशिका

नेति । तया शक्त्या विद्धोऽपि गरुडो मालाहतो द्विप इव नाकम्पत । एवं गरुडे वितथोद्यमः स भौमोऽच्युतं हन्तुं शूलमाददे स्वीकृतवान् ॥ २१ ॥ ततश्चामोघशूलहस्तं भौममालक्ष्य शीघ्रमिमं जहीति सत्यभामयोक्तः कृष्णस्तं जघानेत्याह— तदिति हरिस्तु तद्विसर्गात् शूलप्रक्षेपात् पूर्वमेव क्षुरस्येव तीक्ष्णा नेमिः धारा यस्य तेन चक्रेण गजस्थस्य नरकस्य शिर अपाहरत् चिच्छेद ॥ २२ ॥ सकुण्डलमिति ॥ कुण्डलाभ्यां सहितं चारु सुन्दरं किरीटं भूषणं यस्य तत् अत एव सम्यक् उज्ज्वलत् प्रकाशमानं तस्य शिरः पृथिव्यां पतितं जातं तदा च तदा नरकसंबन्धिनो हा हेति ऋषयस्तु साधु साध्वित्यूचुः । यद्वा । "हा विषादशुर्गतिषु" इत्यत्र निन्दायां चेति क्षीरस्वामी । हा पापिष्ठेति यत्त्वं मृतस्तत्साध्विति च ऋषय ऊचुरिति । सुरेश्वरास्तु माल्यैः कुसुमैर्मुकुन्दं विकिरन्तं आच्छादयन्तम् ईडिरे तुष्टुवुः । आमभाव आर्षः ॥ २३ ॥ ततश्चेति ॥ नरकस्य माता भूः कृष्णमुपेत्य प्रतप्ते अत्युज्ज्वलिते जाम्बूनदे स्वर्णे खचितानि यानि रत्नानि तैर्भास्वरे कुण्डले अथो तथा वैजयन्त्या रत्नमिश्रितबहुगुणकुसुमग्रथितया वनमालया सह प्राचेतसं वारुणं छत्रं महामणिं मेर्वंशभूतमन्दरगिरिशिखरं चार्पयत् ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्षुरनेमिना तीक्षणधारेण ॥ २१ ॥ शिरो बभौ । ऋष्यादय ऊचुरिति शेषः । माल्यैः । विकिरंतो वर्षंतः ॥ २२ ॥ भूः पृथिवी । प्रतप्ते देदीप्यमाने जांबूनदेहेव कांचने खचितानि यानि रत्नानि तैर्भास्वरे कुंडले अदितिकर्णाभरणे प्राचेतसं वारुणं छत्रं च । महामणिं मंदरश्रृंगवैजयंतीपंचवर्णरत्नमाला तत्सहितया वनमालाया सहार्पयत् ॥ २३ ॥ प्रांजलिः कृतकरसंपुटा भक्तेः प्रवणया वशया बुद्ध्या ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति ॥ हरिः श्रीकृष्णः, तद्विसर्गात् शूलप्रयोगात् पूर्वं एव, गजस्थस्य नरकस्य, शिरः क्षुरनेमिना क्षुरवत्तीक्षणधारावता, चक्रेण अपाहरत् ॥ २१ ॥ सकुण्डलमिति ॥ सकुण्डलं कुण्डलाभ्यां सहितं, चारुणा सुन्दरेण किरीटेन भूषणं भूषितं, समुज्ज्वलत्, तच्छिरः, इति शेषः । पृथिव्यां पतितं सत्, बभौ । नरकसंबन्धिनः हा हेति, ऋषयस्तु, साधु इति ऊचुः । सुरेश्वरा देवाः, माल्यैः पुष्पैः, विकिरन्तो वर्षन्तः सन्तः, मुकुन्दं श्रीकृष्णं ईडिरे तुष्टुवुः ॥ २२ ॥ ततश्चेति ॥ ततश्च, भूर्भूमिर्नरकस्य मातेत्यर्थः । कृष्णं उपेत्य, प्रतप्ते जाम्बूनदे यानि रत्नानि तैर्भास्वरे, कुण्डले, तथा सवैजयन्त्या, वनमालया, वैजयन्त्या वनमालया, सहेत्यर्थः । प्राचेतसं वारुणं छत्रं, अथो महामणिं मेर्वंशभूतं मणिप्रधानं, मन्दरशिखरं, आर्पयत् अर्पयामास ॥ २३ ॥ अस्तौषीदिति ॥ अथ हे राजन्, देवी भूः, देवेषु वरा ब्रह्मादयस्तैरर्चितस्तं, विश्वेशं जदेकनाथं कृष्णं, भक्त्या प्रवणा तया, धिया प्राञ्जलिः प्रणता सती, अस्तौषीत् ॥ २४ ॥

कृष्णप्रिया

जब भौमासुर के सारे प्रयत्न निकम्मे हो गये तब उसने भगवान् श्रीकृष्ण को मारने के लिये अपने हाथ में त्रिशूल उठाया । नरकासुर ने उठाया तो सही, अभी छोड़ा तो नहीं उसके पूर्व ही द्वारिकेश श्रीहरि ने छुरे के समान अतिशय तीक्ष्ण धार वाले सुदर्शन चक्र से गजराज के ऊपर बैठे हुए भौमासुर का सिर काट दिया ॥२१॥ किरीट और कुण्डलों के जगमगाता तेजोमय भौमासुर का मस्तक धरणी के ऊपर गिर पड़ा । उसको देखकर भूमि पर रहे हुए भौमासुर के स्वजन 'हा हा' हाहाकार कर पुकारने लगे, ऋषिजन मुनिजन एवं सज्जन "साधु" "साधु" कहने लगे और देवतालोग भगवान् श्रीकृष्ण ऊपर कुसुम वर्षा के साथ यशोगान करने लगे ॥ २२ ॥ भौमासुर के बध के पीछे पृथ्वी देवी श्रीकृष्ण भगवान के पास आकर भक्तिभावपूर्वक नाथ के वक्षःस्थल में वैजयन्ती मालाजी को पधराने के पश्चात् वनमाला भी पहिना दी और देव माताजी के तेजोमय एवं तपाये हुए विशुद्ध सुवर्ण एवं मणिमण्डित दो कुण्डल भगवान् के श्रीचरणों में समर्पित कर दिये, पुनः वरुण देव का छत्र और साथ में एक दिव्यमणि भी भगवान् को समर्पित की ॥ २३ ॥ पुनः भूदेवी इन्द्रादि समर्थ देवों से समर्चित्त विश्वनाथ भगवान् को नमस्कार पुरःसर करबद्ध अञ्जलि पुरःसर भक्तिप्रह्व हृदय से निजनाथ की स्तुति करने लगी ॥ २४ ॥

[1]भूमिरुवाच

नमस्ते देवदेवेश शङ्खचक्रगदाधर । भक्तेच्छोपात्तरूपाय परमात्मन् नमोऽस्तु ते ॥ २५ ॥
नमः पङ्कजनाभाय नमः पङ्कजमालिने । नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ॥ २६ ॥
नमो भगवते तुभ्यं वासुदेवाय [2]विष्णवे । पुरुषायादिबीजाय पूर्णबोधाय ते नमः ॥ २७ ॥
अजाय जनयित्रेऽस्य ब्रह्मणेऽनन्तशक्तये । [3]परावरात्मन् भूतात्मन् परमात्मन् नमोऽस्तु ते ॥ २८ ॥

---

[1] भूरुवाच–प्रा. पा. । [2] चक्रिणे–प्रा. पा. । [3] चराचरात्मन् लोकेश–विज. त्मन् भूतानां ।

कर्दमक्षमा

अन्वयः—अथ हे राजन्, प्राञ्जलिः, देवी, प्रणता, भक्तिप्रवणया, धिया, देववरार्चितम्, विश्वेशम्, अस्तौषीत् ।।२५।। भूमिरुवाच, हे देवदेवेश ! हे शङ्खचक्रगदाधर ! ते नमः, भक्तेच्छोपात्तरूपाय, हे परमात्मन्, ते तुभ्यम्, नमः, अस्तु ।।२६।। पङ्कजनाभाय, ते नमः, पङ्कनमालिने (ते) नमः, पङ्कजनेत्राय, पङ्कजांघ्रये ते नमः ।। २७ ।। भगवते, वासुदेवाय, विष्णवे, तुभ्यम्, नमः, आदिबीजाय, पुरुषाय, पूर्णबोधाय ते नमः ।। २८ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ऐश्वर्यं ज्ञात्वा भूमिः स्तौति । नमस्त इति । परमात्मन् देवाद्यंतर्यामिन् ।। २५ ।। येन मंत्रेण कुंत्याः प्रसन्नः पूर्वमासीत्तेन मंत्रेण नमस्यति । नम इति । पंकजं नाभौ यस्य तस्मै । जगत्कारणायेत्यर्थः । अत एव सत्कीर्तिमयी पंकजमाला विद्यते यस्य तस्मै । एवंभूतं ध्यायतां पंकजवत्सुप्रसन्ने तापोपशमने नेत्रे यस्य तस्मै । पंकजवत्सुसेव्यौ पंकजांकितौ वांघ्री यस्य तस्मै नम इति ।। २६ ।। किञ्च भगवते निरतिशयैश्वर्याय वासुदेवाय सर्वभूताश्रयायात एव विष्णवे व्यापिने । न हि सर्वभूताश्रयत्वं परिच्छिन्नस्य संभवतीति कुतः सर्वाश्रयत्वं तत्राह । पुरुषाय सर्वस्मात्कार्यात्पूर्वमेव सते "पूर्वमेवाहमिहासामिति तत्पुरुषस्य पुरुषत्वम्" इति श्रुतेः । एतदपि कुतः । आदिबीजाय आदेर्जगत्कारणस्यापि कारणाय । एवमपि न मृदादिवज्जाड्यमित्याह । पूर्णबोधायेति ।। २७ ।। नन्वेवमपि स्वस्य कारणात्पूर्वं सत्त्वं न स्यादत आह । अजायेति । स्वयमजाय । अस्य च जगतो जनयित्रे । उभयत्रापि क्रमेण हेतुद्वयम् । ब्रह्मणे बृहते अनंतशक्तय इति च । बृहत्त्वादजत्वमनंतशक्तित्वात्तज्जनयितृत्वमित्यर्थः । ननु पित्रादयः पुत्रादीनां जनकास्तेषां च तत्पूर्वे तेषां च भूतानि तेषां च स्वकर्मद्वारेण जीवाः किमत्राहं तत्राह परावरात्मन्नित्यादि । पुत्राद्यात्मकत्वात्त्वमेव जनक इत्यर्थः ।। २८ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

देवाद्यंतर्यामिन्निति स्वस्यापि तदधीनत्वमाह ।। ननु त्वमपि देव्यसि कथं मत्स्तवने प्रवृत्ता, तत्राह–हे देवदेवेश, त्वं तु देवानामिंद्रादीनामपि ये देवा द्योतका ब्रह्मादयस्तेषामपि ईशस्तुत्यर्हो मम तु तत्सृष्टायास्तत्र का वार्तेति भावः । अतस्तेषामवनार्थमेव शंखादिशस्त्रधरोऽसीति भावः । यत्र । तत्र हेतुत्वेन संबोधयति–हे परमात्मन्निति । त्वां विना ते न किञ्चित्कर्तुं समर्था इति भावः । अतस्ते नमोऽस्तु । यद्वा–परमात्मन्नित्यस्यायं भावः-भगवंस्त्वद्द्वेषिमातुरपि ममान्तःकरणं जानास्येवेति तात्पर्यम् ।२५। इत्यर्थ इति–न तु योगवृत्त्या नाभिस्थापितकमलः कश्चिदपरो ग्राह्य इति भावः । अत एव जगत्कारणत्वादेव । एवम्भूतं जगत्कारणमुत्तमकीर्तिम् । न हि पंकजं प्रायः सेव्यत इत्यरुच्याह–पंकजांकिताविति ।। मन्नेत्रादिसर्वेन्द्रियकृतार्थीकर्तुमेवात्रागतोऽसीति प्रेम्णा माधुर्यं वर्णयति–नम इति । पंकजयोनितया नाभेस्सरोवरसाम्येन गांभीर्यमभिप्रेतम् । यद्वा–श्रीकृष्णनाभेः पद्माकारत्वात् । भक्त्युद्रेकेण चरणयोरन्ते निर्देशः । चरणयोरेकस्यैव पंकजांकितत्वेऽपि सजातीयत्वेनैक्यविवक्षया स्वामिचरणैः पंकजांकिताविति व्याख्यातम् ।। २६ ।। पुनर्हरेरैश्वर्यं द्योतयत्याह–किञ्चेति । अत एव सर्वभूताश्रयत्वादेव । तदेवाह–न हीति । सर्वाश्रयत्वे हेतुमाशंकते–कुत इति । एतत् सर्वकार्यपूर्वकालीनत्वम् । जगत्कारणस्य ब्रह्मादेः । एवमपि बीजरूपत्वेऽपि । पूर्णबोधाय ज्ञानैकरूपाय ।। तवैश्वर्यामृतसिंधावप्यहं खेलयंत्यस्मीत्याह—नम इति । भगवते निरतिशयैश्वर्याय । भगवत्त्वेपि वासुदेवाय वासुदेवो भगवताम्' इत्युक्तेर्वसुदेवनंदनाय, स्वयं भगवत इत्यर्थः । वसुदेवपुत्रत्वेऽपि विष्णवे सर्वव्यापकाय । सर्वव्यापकत्वेऽपि पुरुषाय पुरुषवत्परिच्छिन्नायेत्यर्थः । पुरुषवत्परिच्छिन्नत्वेऽप्यादिबीजाय सर्वादेः । श्रीनारायणस्याप्याविर्भावप्रयोजकब्रह्ममोहनलीलायां तथा दर्शनात् । तादृशादिबीजत्वेऽपि पूर्णश्चासौ बोधश्चेति, पूर्णं ज्ञानस्वरूपं यद्ब्रह्म तस्मै । अप्राकृतानंतविशेषत्वेऽपि त्वमेव निर्विशेषं ब्रह्मेत्यर्थः । तोषिणीकारास्तु—पुरुषाणां निजजनानामायः प्रेमादिलाभस्तस्यादिबीजाय कारणाय तद्दात्रे इत्यर्थमाहुः ।। २७ ।। पुनराशंकते–नन्विति । एवमपि पूर्णबोधरूपत्वेपि । अजाय कारणवर्जितायेत्यर्थः । अस्य विश्वस्य । उभयत्रापि–अजत्वे जनयितृत्वे च । इत्यर्थ इति–ब्रह्मण एवाजत्वं तद्भिन्नस्य तज्जत्वादनंतशक्तेरेव जनकत्वं, तद्भिन्नस्य जन्यत्वादिति भावः । अत्राऽऽशंकते–नन्विति । अत्र जनने । अहं किं, क इत्यर्थः । इत्यर्थ इति–पित्रादीनामपि जन्यत्वश्रुतेः परमकारणस्य तवैव मुख्यं जनकत्वमित्याशयः ।। त्वमजोऽपि अथ चास्य विश्वस्य जनयिता, जनयितापि त्वमेव ब्रह्म निर्विशेषरूपं, निर्विशेषस्वरूपमपि त्वमेवानंतशक्तिः सविशेषस्वरूपश्च, अनंतशक्तित्वेऽपि तव तिस्र एव शक्तयस्तटस्थबहिरंगांतरंगलक्षणाः, ताश्च त्वमेव इत्याह–परावरेषामुत्कटनिकृष्टानामात्मा जीवस्त्वमेव त्वमेव भूतात्मा पञ्चभूतात्मको देहस्त्वमेव परमात्मांतर्यामी ।। २८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

देवानां देवा ब्रह्मादयस्तेषामीश परिपालक ! अत एव दुष्टवधार्थं शङ्खादिधर ! किञ्च भक्तानां तेषामेवेच्छया उपात्तानि प्रकटीकृतानि श्रीमत्स्यादिरूपाणि येन तस्मै किञ्च तेषां सद्बुद्ध्यादिप्रवर्त्तकश्च त्वमेवेत्याशयेनाह—परमात्मन्निति ।। २५ ।।

देवदेवेशत्वमुपपादयन्ती स्तौति—नम इति। एतदादिपद्यद्वयं तैर्व्याख्यातं तत्र पङ्कजाङ्कितावङ्घ्री इत्येकस्यैव तदङ्कितत्वेपि सजातीयत्वेऽपि नैक्यविवक्षयेति मन्तव्यं यद्वा अथ सौन्दर्य्यं वर्णयति–पङ्कजेति। पङ्कजयोनितया नाभेः सरोवरसाम्येन (भी) गम्भीरताभिप्रेता यद्वा पङ्कजवन्नाभिर्यस्य श्रीकृष्णनाभेः पद्माकारत्वात् पङ्कजनाभत्वादीनां त्रयाणां यथोत्तरं सौन्दर्य्यहेतुत्वे श्रैष्ठ्यम् अन्ते तु भक्त्युद्रेकेण श्रीचरणयोः सौन्दर्य्यनिर्द्देशः ॥ २६ ॥ ईदृशन्तु सौन्दर्य्यादिकं युक्तमेवेत्याह—नम इति। भगवते निजाशेषगुणप्रकटनपराय यतः वसुदेवनन्दनाय अत एव विष्णवे स्वमहिम्ना च जगद्व्यापकाय किञ्च पुरुषाणां निजजनानाम् आयः प्रेमादिलाभस्तस्यादिबीजाय न च तदर्थं तेषां विज्ञापनापेक्षास्तीत्याह–पूर्णेति ॥ २७ ॥ श्रीवसुदेवसुतस्य तवैवैतदैश्वर्य्यमित्याह–अजायेत्यादि ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भक्तिप्रवणधीत्वेन पुनः पुनर्नमन्ती, तत्रापि प्रागेव वन्दमाना स्तौति—नमस्त इति। देवानां देवाः श्रीब्रह्मादयस्तेषामीश! परिपालक! अतएव दुष्टवधार्थं शङ्खादिधर! किञ्च, भक्तानां तेषामेवेच्छया उपात्तानि प्रकटितानि श्रीमत्स्यादिरूपाणि येन तस्मै; किञ्च, तेषां सर्व्वसद्बुद्ध्यादि-प्रवर्त्तकश्च त्वमेवेत्याशयेनाह—परमात्मन्निति। शङ्खादीनां तत्तत्क्रमेणोक्तिः प्रायो वामाधः कराद्दक्षिणाधः करान्तं क्रमेण तत्तद्धारणात्। तत्र च भार्य्यात्वेन वामस्थितया तया प्राग् वामत एव वर्णनादिति दिक्। एवं श्रीनारदादिवच्चतुर्भुजत्वेन तथासौ दृश्यत इति ज्ञेयम्। यद्वा, ननु देवदेवशः श्रीनारायण एव, सत्यम्, शङ्खादिधारणात्; स एव त्वमित्याह—शङ्खेति। ननु मम नारायणत्वे कथं कदाचिद्द्विभुजत्वम्? तत्राह—भक्तेच्छयोपात्तं रूपं मनुष्यमूर्त्तिर्द्विभुजत्वादिना सौन्दर्य्यं वा येन तस्मै, तथापि निजशक्त्या सर्व्वं व्याप्नुवन्नन्तरपि भासीति। किंवा अतएव सर्व्वेषां प्रियतमोऽसीत्याह—परमात्मन्निति ॥ २५ ॥ देवदेवेशत्वमुपपादयन्ती स्तौति—नम इति। एतदादिपद्यद्वयं तैर्व्याख्यातम्। पक्षान्तरे च सौन्दर्य्यमेव वर्णयति—पंकजेति। पंकजयोनितया नाभेः सरोवरसाम्येन गभीरताभिप्रेताः यद्वा, पंकजवन्नाभिर्यस्य, कृष्णनाभेः पद्माकारत्वात् पंकजनाभत्वादीनां यथोत्तरं सौन्दर्य्यहेतुत्वे श्रैष्ठ्यम्, अतएव भक्त्युद्रेकेण श्रीचरणयोः सौन्दर्य्यविशेषापेक्षयान्ते निर्द्देशः ॥ २६ ॥ ईदृशन्तु सौन्दर्य्यादिकं युक्तमेवेत्याह—नम इति। भगवते निजाशेषभगवत्ताप्रकटनपराय, यतो वसुदेवनन्दनाय, अतएव विष्णवे स्वमहिम्ना जगद्व्यापकाय, तच्चान्तर्वहिश्चेत्याह—पुरुषाय, अन्तर्य्यामितया सर्व्वेषां हृदि सदा वर्त्तमानाया किञ्च, आदिबीजाय मधुरमधुरविचित्रबाल्यादिक्रीड़ाया निदानाय—अन्यत्र तादृशबाल्यक्रीड़ाद्यविस्तारणात्। यद्वा, किञ्च, पुरुषाणां निजजनानामायः प्रेमादिलाभस्तस्यादिबीजाय, न च तदर्थं तेषां विज्ञापनापेक्षास्तीत्याह—पूर्णेति। यद्वा, किञ्च, पूर्णा आत्मारामास्तेषामपि बोधो मुक्ति तुच्छताया भक्त्युत्कृष्टतायाश्च ज्ञानम्, किंवा बोधयति भगवत्त्वादिकमिति बोधो भक्तियोगो यस्मात्तस्मै, तेषामपि स्वस्मिन् भक्तौ प्रवर्त्तकायेत्यर्थः। तथा च श्रीकुन्तीस्तुतौ (भा० १।८।२०) 'तथा परमहंसानां मुनीनाममलात्मनाम्। भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः ॥' इति ॥ २७ ॥ अजायेति सदातनतया तस्म कारणराहित्यमुक्तम्, परेषां कारणानां महदादीनाम्, अवरेषां च कार्य्याणां ब्रह्माण्डादीनाम्, किंवा परे उत्कृष्टाः श्रीब्रह्मादयः, अवरे अपकृष्टाः स्थावरादयस्तेषामात्मन्निति जीवानां भगवदंशतयाभेदाभिप्रायेण न केवलमात्मा, तेषामन्तर्य्यामी च त्वमेवेत्याह—हे परमात्मन्निति; अन्यत्तैर्व्याख्यातम्। पक्षान्तरे श्रीवसुदेवपुत्रतया परिच्छिन्नवद्दृश्यमानरूपत्वेऽपि बहिरन्तर्व्यापकत्वं घटत एवाद्भुतानन्तशक्तित्वादित्याह—अजायेति। निर्व्विकारायाजन्मविकाराय,—जन्मविकाराभावेन तदनन्तरान्यविकाराणामप्यभावात्। तथाप्यस्य विश्वस्य जनयित्रे। ननु निर्व्विकारस्य जनयितृत्वं किल विरुद्धं स्यात्? परमेश्वरत्वात् सर्व्वं घटतैवेत्याह—ब्रह्मणे ब्रह्मघनमूर्त्तये, अतएवानन्तशक्तये, अन्यत् समानम्। तत्रैव पक्षान्तरे निजजनलाभनिदानत्वादिकमेव दर्शयति—अजायेति। ब्रह्मणे श्रीब्रह्मार्थमस्य विश्वस्य बोधस्य वा जनयित्रे, श्रीब्रह्मणस्तत् पुरुषतां दर्शयंस्तमेव विशिनष्टि—अजायेति; आत् विष्णोर्जायत इत्यजस्तस्मै, जननञ्च वह्वाश्चर्य्यमयत्वादिनेत्याशयेनाह—अनन्तेति। अनेन महावात्सल्यञ्च दर्शितम्। यद्वा, ननु श्रीब्रह्मैव विश्वं सृजति? सत्यम्, त्वदद्भुतशक्त्यै वेत्याशयेनाह—अनन्तेति। ननु स्वीयानां तथास्तु नाम, आत्मारामाणां भक्तौ प्रवर्त्तनं कुतः? निजकारुण्यप्रभावादेवेत्याह—परेति; परे पित्रादयः, अवरे मात्रादयस्तेषामात्मन्! स्नेहेन पुत्रादिपालने प्रवर्त्तक! पित्रादिभ्योऽप्यधिकाधिकं सहजं त्वत्कारुण्यमित्याह—परमात्मन्निति। त्वत्कारुण्यार्णवांशविभागमात्रलाभे नैवान्येषां सर्वेषां कारुण्योदयादिति ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

स्तुतिमेवाह–नमस्त इति। तावत्परत्वभक्तानुग्रहशीलत्वसर्वान्तरात्मत्वादिविशिष्टं स्तुवन्ती नमस्करोति। देवानामिन्द्रादीनां देवो ब्रह्मा तस्येश भक्तानुग्रहेच्छया उपात्तरूपाय गृहीतविग्रहाय तुभ्यं हे परमात्मन्! नमः ॥ २५ ॥ पङ्कजनाभायेति मन्त्रेण विशेषेण नमस्करोति–नम इति। पङ्कजं चतुर्मुखोत्पत्तिस्थानभूतं नाभिः यस्य तस्मै जगत्कारणभूताय इति भावः। अतएव सत्कीर्त्तिमयी पङ्कजमाला यस्य तस्मै पङ्कजनेत्राय पङ्कजवत्प्रपन्नजनतापत्रयोपशमननेत्राय पङ्कजवत्सौगन्ध्यसौकुमा-

य्यादियुक्ताङ्घ्रये अनेन भक्तैर्ध्येयत्वमुक्तम् ॥ २६ ॥ अथ ध्येयत्वसमनियतकारणत्वविशिष्टं नमस्करोति-नमो भगवते इति। भगवत इति कारणत्वोपयुक्तगुणपूर्त्तिरुच्यते आदिबीजाय कारणकारणाय अनेन सृष्टिकारणत्वमुक्तम् अथ स्थितिकारणत्वमाह-वासुदेवाय विष्णवे पुरुषायेति-स्थितिर्हि मन्वाद्यन्तःप्रवेशस्वावतारादिभिः तत्र वासुदेवायेत्यनेन वसुदेवपुत्रत्वादिरूपस्वावतारेण स्थितिरभिप्रेता पुरुषायेत्यनेन मन्वादिपुरुषशरीरान्तःप्रवेशेन विष्णवे इत्यनेन कृत्स्नजगदन्तरात्मतया चाभिप्रेता पूर्णबोधायेत्यनेन लयकारणत्वं सूचितं प्रलयदशायां स्वानन्दानुभवपूर्णाय असहायत्वेनावस्थितायेत्यर्थः ॥ २७ ॥ अथ कारणत्वप्रयुक्तविकारादिदोषप्रसङ्गं वारयन्ती नमस्करोति ! अजायेति । अस्य जगतो जनयित्रे अनेन निमित्तकारणत्वमुक्तम् उपादानकारणत्वन्त्वादिबीजायेति पुरस्तादेवोक्तं तथाप्यजाय कार्यगतोत्पत्त्यादिविकाररहिताय विकाराणां स्वशरीरभूतप्रकृतिपुरुषगतत्वादिति भावः । न हि लोके किञ्चिदेवं दृष्टमित्येवम्विधदुर्घटत्वशङ्कां व्यावर्त्तयति—अनन्तशक्तय इति । अनन्ताः अपरिमिताः शक्तयः स्वासाधारणाः अग्न्यादेर्दाहकत्वादय इव यस्य तस्मै ब्रह्मणे इति दृष्टान्तार्थं यथा स्वरूपेण गुणैश्च निरतिशयबृहत्त्वन्त्वदसाधारणं तथा कारणत्वमजत्वञ्चेति तर्हि जगदुपादानत्वं केनाकारेणेत्यक्षपेक्षायां "नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म" इतिश्रुत्युक्तविधया चिदचिद्गतनामरूपनिर्वाहकत्वोपयुक्तान्तरात्मत्वेनेत्यभिप्रेत्य सम्बोधयति—परावरात्मन् उच्चावचजीवान्तरात्मन्! भूतात्मन् अचिदन्तरात्मन् अचिदन्तरात्मत्वं जीवसाधारणमिति तद्विशेषे पर्य्यवसाययति—परमात्मन्निति । परमात्मशब्दश्च गीताचार्येण निरुक्तः "यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः" इति जीव आत्मापि स्वभावेन व्ययः त्वन्तु स्वरूपतः स्वभावतश्चाव्ययः इत्यभिप्रेतम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भक्तेच्छया उपात्तं स्वीकृतं रूपम् ॥ २५-२६ ॥ वासुदेवाय सर्वत्र स्थित्वा द्योतमानाय विष्णवे सच्चिदानन्दरूपाय पुरुषाय पूर्णषड्गुणाय आदेर्ब्रह्मणो बीजाय व्यञ्जकाय ॥ २७ ॥ अस्य प्रपञ्चस्य जनयित्रे उत्पादकाय ब्रह्मणे वेदादिशब्दराशिवेद्याय सर्वशब्दवाच्यत्वे हेतुमाह—अनन्तेति । "अनन्ता वै वेदाः" इति श्रुतेः । चराचरात्मन् चराचरमात्मा देहः प्रतिमास्थानीयो यस्य स तथा परमात्मन् प्रत्यक्स्वरूप ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

भक्तेच्छोपात्तरूपायेत्यादि । भक्तैः स्वेच्छयोपात्तं मनसि गृहीतं रूपं यस्य ॥ २६-४५ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे एकोनषष्ठितमोऽध्यायः ॥ ५९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

भक्तैरिच्छया स्वेच्छया उपात्तं मनसि गृहीतं रूपं यस्य ॥ २६-४५ ॥

इत्यूनषष्ठितमोऽध्यायः ॥ ५९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

परमात्मन्निति । त्वद्विद्विषो जनन्या अपि ममान्तःकरणं त्वं जानास्येवेति भावः ॥ २५ ॥ मन्नयनादिसर्वेन्द्रियकृतार्थीकरणायागतोऽसीति माधुर्यं वर्णयति—नम इति ॥ २६ ॥ तवैश्वर्य्यामृतसिन्धावप्यहं खेलयन्त्येवास्मीत्याह—नम इति । भगवते निरतिशयैश्वर्य्याय भगवत्त्वेऽपि वासुदेवाय 'वासुदेवो भगवताम्" इत्युक्तेर्वसुदेवनन्दनाय स्वयं भगवते इत्यर्थः वसुदेवपुत्रत्वेऽपि विष्णवे सर्वव्यापकाय सर्वव्यापकत्वेपि पुरुषाय पुरुषवत् परिच्छिन्नायेत्यर्थः । पुरुषवत् परिच्छिन्नत्वेपि आदिबीजाय सर्वादेः श्रीनारायणस्याप्याविर्भावप्रयोजकाय ब्रह्ममोहनलीलायां तथा दर्शनात् तादृशादिबीजत्वेऽपि पूर्णश्चासौ बोधश्चेति पूर्णं ज्ञानस्वरूपं यद्ब्रह्म तस्मै अप्राकृतानन्तविशेषवत्त्वेऽपि त्वमेव निर्विशेषं ब्रह्मेत्यर्थः ॥ २७ ॥ अजायेति त्वमजोऽप्यथ चास्य विश्वस्य जनयिता जनयिताऽपि त्वमेव ब्रह्म निर्विशेषं स्वरूपं निर्विशेषरूपमपि त्वमेवानन्तशक्तिः सविशेषस्वरूपश्च अनन्तशक्तित्वेऽपि तवतिस्र एव शक्तयस्तटस्थबहिरङ्गान्तरङ्गलक्षणास्ताश्च त्वमेव इत्याह—परावरेषामुत्कृष्टनिकृष्टानामात्मा जीवस्त्वमेव त्वमेव भूतात्मा पञ्चभूतात्मको देहः त्वमेव परमात्मा अन्तर्यामी ॥ २८ ॥

गूढार्थदीपिनी

प्रवणया वशीकृतया । देववरैर्ब्रह्मादिभिः ॥ २५ ॥ उपात्तं गृहीतम् रूपं येन ॥ २६-२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

भक्तेच्छाविष्कृतनिरतिशयमङ्गलमूर्तिं भगवन्तं स्तौति—नम इति द्वाभ्याम् ॥ २५-२६ ॥ जगद्धेतुतया स्तौति-न इति । आदिबीजाय नमः प्रधाने अतिव्याप्तिं वारयति पुरुषायेति जीवे प्रतिव्याप्तिं वारयति पूर्णबोधाय न तु आदिबीजस्येह

कुतः सम्भव इत्यत आह—वासुदेवाय वसुदेवापत्याय वसुदेवापत्यत्वे परिच्छिन्नता स्यादत आह विष्णवे व्यापिने ननु व्यापिनः कथं गमनागमनादिकं घटेत इत्यत आह भगवते अचिन्त्यैश्वर्याय ॥ २७ ॥ आदिबीजायेत्यनेन भगवतो विश्वोत्पादकस्योत्पादकं नास्तीति सूचितं तत्स्फुटतया दर्शयति अस्य विश्वस्य जनयित्रे विश्वजनयितृत्वयोग्यतां दर्शयति—ब्रह्मणे इत्यादिना। ब्रह्मणे निरतिशयबृहत्स्वरूपगुणाय अनन्ताः अपरिमिताः चेतनाचेतनरूपाः शक्तयो यस्य तस्मै बहुब्रीहिना शक्तितद्वतोरत्यन्तभेदप्रतीतिरजस्तमोद्वैताद्वैतलक्षणं तादात्म्यं सम्बन्धं दर्शयितुं सम्बोधयति परावरात्मन् ब्रह्मादिनरकपर्यन्तचेतनानामात्मन्! भूतात्मन् भूताद्यन्वेतनात्मन् ते नमोऽस्तु ननु चेतनानामचेतनानाञ्चाहमेवात्मा चेत्तर्हि सर्वे दोषा बहुत्वजडत्वादयोऽपि भवेयुरित्यत आह—परमात्मन्निति ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे देवदेवेश देवदेवानां ब्रह्माशीनामीश शङ्खचक्रगदाधर भक्तानामिच्छया तत्संरक्षणेच्छयोपात्तं रूपं देहो येन तस्मै ते नमो नमः ॥ १९ ॥ पङ्कजमालाऽस्यास्तीति तस्मै। शिखादिः ॥ २० ॥ आदित्वेनेतरमतानां बीजं तस्मै पूर्णबोधाय ज्ञानमने ॥ २१ ॥ अस्य जगतो जनयित्रे जनकाय। तेन न किञ्चित्प्रयोजनमिति तुना द्योत्यते। स्वस्य जनकोऽस्ति चेन्न। निरवधिकजगज्जनकता तस्येत्यत उक्तमजायेति। ब्रह्मणे गुणपूर्णायानन्तशक्तयेऽपरिमितिसामर्थ्यायाप्रतिबद्धशक्तये वा। अनन्तमक्षरतत्त्वं रमा शक्तिर्भार्या यस्य सः। शक्यत्वाच्छक्तयो भार्या इत्युक्तेः। चराचरात्मन्। तदन्तर्गतपरमात्मन् विशिष्टचेतन लोकनायक। अनेकश्रुतिप्रतीकत्वान्नासङ्गतिरियं पुनरुक्तिरर्थतोऽपि दोषायेति ज्ञेयम् ॥ २२ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

आदावाविर्भूतः कश्चिदन्यो भविष्यति, कथमन्यथा पुत्रं मारयेदित्याशङ्कां परिहरन्ती लक्षणमाह **नमस्त** इति। **ते** तुभ्यं नमः। देवतायाः कथमन्यनमस्कार इत्याशङ्क्याह **देवदेवे**ति। ईशत्वाच्छिक्षैव, न मारणमिति पुत्रमारणेऽपि नान्यथात्वम्, देवदेवानामपि ब्रह्मादीनामीश इति नान्योऽत्र कश्चिद्वक्तव्यः। तथात्वे हेतुमाह। शङ्खचक्रगदाः धारयतीति। अर्थात्पद्मम्। त्रयाणां कार्यमुक्तमेव 'गदया निर्बिभेदाद्री'नित्यादिना। अद्यापि भगवान् न पुरं प्रविष्टः, गरुड एव स्थितः चतुर्भुजः प्रकट इति तथोच्यते। तादृशस्य कथं नराकृतित्वमित्यत आह **भक्तेच्छोपात्तरूपाये**ति। भक्तानां यादृशी इच्छा, तादृशमुपात्तं रूपं येन। ननु रूपग्रहण एव अन्यथाभावो भवतीति, तत्राप्यन्यादृशं रूपं गृहीतमिति जीवतुल्यत्वात् कथं नमस्करणीय इत्याशङ्क्याह **परमात्म**न्निति। जीवात्मन एव रूपान्तरस्वीकारे तथात्वम्, न तु परमात्मन इति। अत एव भक्ताधीनत्वात् पुनर्नमस्यति **नमोऽस्तु त** इति ॥ २५ ॥ कुन्त्या चतुर्धा स्तुतो भगवान् प्रसन्न इति स्वयमपि नमस्यति **नमः पङ्कजनाभाये**ति। तया हि ब्रह्माण्डे सर्वत्वं सर्वोत्तमत्वं चोक्तम्। पङ्कजं नाभौ यस्येति नारायणत्वेन पुरुषत्वं निरूपितम्। तेन ब्रह्माण्डरूपत्वं सिध्यति। तत्रोत्कर्षस्त्रिधा, लक्ष्मीपतित्वेन सर्वोपास्यत्वेन सर्वसुसेव्यत्वेन च। सुसेव्यश्चेन्महान् भवति, स सर्वपुरुषार्थान् सुखेन प्रयच्छतीति। पङ्कजानां माला वर्तते अस्येति पङ्कजमालया लक्ष्म्या वृतः। 'तया विना क्व देवत्व'मित्यादिवाक्यैः तस्याः सर्वपुरुषार्थरूपत्वम्। **पङ्कजनेत्राये**ति दृष्ट्यैव सर्वतापहारकत्वं वशीकर्तृत्वं च। **पङ्कजाङ्घ्रित्वे**न सुसेव्यत्वम् ॥ २६ ॥ एवं ब्रह्माण्डे स्वरूपोत्कर्षौ निरूप्य तत्त्वेषु तथात्वमाह **नमो भगवते तुभ्य**मिति। सर्वतत्त्वानां मूलभूतो भगवान्, भगरूपाणि च तत्त्वानीति शास्त्रार्थदृष्ट्या स्तुतिं व्यावर्तयति **तुभ्यमिति। वासुदेवाये**ति। तत्त्वानां करणप्रयोजनरूपाय मोक्षदात्रे। अनेनोपासनामार्गेण सेव्यत्वादुत्कर्ष उक्तः। **विष्णव** इति कर्ममार्गेऽपि सेव्याय। विष्णुः यज्ञः स्वतन्त्र इति ज्ञापयितुं यज्ञे विष्णुपदप्रयोगः। 'तत्त्वेषु पुरुषो महा'निति तद्रूपत्वमाह **पुरुषाये**ति। तत्र क्रियाज्ञानशक्त्युत्कर्षमाह **आदिबीजाय पूर्णबोधाये**ति। **बीजानां** कार्योत्पादनसमर्थानामपि उत्पादकाय। पूर्णा क्रियाशक्तिरुक्ता। पूर्णो बोधो यस्येति स्पष्टा ज्ञानशक्तिः ॥ २७ ॥ एवं तत्त्वोत्कर्षमुक्त्वा पुरुषोत्तमत्वमाह **अजाये**ति। सर्वविकाररहितं परतत्त्वमिति सिद्धान्तेनाह **अजाये**ति। जननाभावेन तदन्तरा भावाः तत एव निराकृताः। जगत्कर्तृत्वेन तथात्वमिति ये मन्यन्ते, तन्मतेनाह **अस्य जनयित्र** इति। स्वयमजोऽन्येषां जननं करोतीति सर्वोत्तमत्वमपि सिध्यति। आर्षज्ञानेन तथात्वमुच्यत इति नात्र प्रमाणं वक्तव्यम्। ब्रह्मैव वस्त्विति ब्रह्मवादे। तत्राप्याह **ब्रह्मण** इति। बृहत्त्वाद्बृंहणत्वाच्च ब्रह्म। सर्वभवनसमर्थं वस्त्वित्यपि पक्षेणाह **अनन्तशक्तय** इति। आत्मवादेनाह। **परे** ब्रह्मादयः, **अवरे** अस्मदादयः। तेषामात्मा भगवान्। भूतानि जडानि तेषामप्यात्मा। जीवजडयोरात्मत्वमुपपाद्य अन्तर्यामित्वमाह **परमात्म**न्निति। अन्ते नमनं सर्वत्रानुषञ्जनार्थम् ॥ २८ ॥

श्रीसुबोधिनी—सारः

हे देवदेवेश हे शंखचक्रगदाधर! ते तुभ्यं नमः हे परमात्मन्! भक्तानामिच्छार्थमुपात्तं गृहीतं रूपं येन तस्मै ते तुभ्यं नमोऽस्तु ॥ २५ ॥ पंकजं पद्मं नाभौ यस्य तस्मै नमः पंकजानां मालाऽस्यास्तीति तथा तस्मै नमः पंकजवन्नेत्रे यस्य तस्मै नमः

पंकजवदंघ्री पादौ यस्य तस्मै नमः ॥ २६ ॥ वासुदेवाय विष्णवे तुभ्यं भगवते नमः आदिकारणाय पूर्णज्ञानाय पुरुषाय ते नमः ॥ २७ ॥ अजाय ब्रह्मणेऽस्य विश्वस्य जनयित्रे उत्पादकायानंतशक्तये नमोस्तु हे परावरात्मन् हे भूतात्मन् हे परमात्मन् ! ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च नरकस्य माता भूः कृष्णमुपेत्य प्रतप्ते अत्युज्ज्वलिते जाम्बूनदे खचितानि यानि रत्नानि तैर्भास्वरे कुण्डले, अथो तथा वैजयन्त्या रत्नमिश्रितबहुगुणकुसुमग्रथितया वनमालया सह प्राचेतसं वारुणं छत्रं, महामणिं च अर्पयत् ॥ २५ ॥ अथ अनन्तरं प्राञ्जलिः प्रणतमस्तका भक्तिप्रवणया धियोपलक्षिता च देवी भूम्याभिमानिनी देवता देववरैर्ब्रह्मादिभिरभ्यर्चितम्, तत्र हेतुः-विश्वेशं कृष्णमस्तौषीदित्यन्वयः ॥ २६ ॥ स्तुतिमेवाह-नम इति सप्तभिः । देवा इन्द्रादयः, तेषामपि देवा ब्रह्मादयः, तेषामपीशः । तत्र हेतुमन्तर्यामित्वं सूचयन् पुनः सम्बोधयति—हे परमात्मन्निति । 'स च विष्णुर्नाहम्' इत्याशङ्क्य 'त्वमेव विष्णुः' इत्याशयेन सम्बोधयति-शङ्खचक्रगदाधरेति । 'तस्य किमर्थं देहग्रहणम्' इत्यपेक्षायामाह—भक्तानां या इच्छा तदनुरूपमुपात्तं स्वीकृतं रूपं देहो येन तस्मै ते तुभ्यं नमो नमोऽस्तु ॥ २७ ॥ पङ्कजं त्रिलोकात्मकं चतुर्मुखोत्पत्तिस्थानं नाभौ यस्य तस्मै जगत्कारणभूताय नमः । तथा पङ्कजस्य माला यस्य तस्मै नमः । पङ्कजवत् प्रसन्ने प्रपन्नजनतापत्रयोपशमने नेत्रे यस्य तस्मै नमः । पङ्कजवत् सौगन्धसौकुमार्यादियुक्तावङ्घ्री यस्य तस्मै ते तुभ्यं नमः ॥ २८ ॥

अन्वितार्थप्रकाशिका

अस्तौषीदिति ॥ हे राजन् ! अथानन्तरं प्राञ्जलिः प्रणतमस्तका भक्तिप्रवणया धियोपलक्षिता च देवी भूम्यभिमानिनी देवता देववरैर्ब्रह्मादिभिरभ्यर्चितं विश्वेशं कृष्णमस्तौषीत् । इडभाव आर्षः ॥ २५ ॥ नम इति ॥ हे देवदेवेश ! हे शङ्खचक्रगदाधर ! हे परमात्मन् ! हे देवाद्यन्तर्यामिन् ! भक्तानामिच्छया उपात्तं रूपं येन तस्मै तुभ्यं नमोऽस्तु ॥ २६ ॥ नम इति ॥ स्पष्टम् ॥ २७ ॥ नम इति ॥ भगवते वासुदेवाय विष्णवे ते तुभ्यं नमः । पुरुषाय आदेर्जगत्कारणस्यापि बीजाय पूर्णबोधाय ते नमः ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ भूमिः श्रीकृष्णं स्तौति नम इति भक्तेच्छया उपात्तं गृहीतं रूपं मनुष्याकारो येन तस्मै । हे परमात्मन् परमो मुक्तबद्धपुरुष देहेभ्यः श्रेष्ठ आत्मा देहो यस्य स तत्संबुद्धिः ॥ २५ ॥ नम इति पंकजतुल्या नाभिर्यस्य तस्मै ॥२६॥ वासुदेवाय वसुदेवपुत्राय । तत्पुत्रत्वेपि विष्णवे सर्वत्र व्यापनशीलाय सर्वत्र व्यापकत्वेपि पुरुषाय अनादिसिद्धपुरुषाकाराय । तथा च श्रुती । आत्मैवेदमग्र आसीत्पुरुषविध इति दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वमिति । अतः । आदिबिजाय मुख्यकारणाय पूर्णबोधाय समग्रज्ञानज्ञात्रे ते तुभ्यं नमः ॥ २७ ॥ अज्ञाय प्राकृतगुणमयजन्महीनाय अस्य विश्वस्य जनयित्रे उत्पन्नकर्त्रे । ब्रह्मणे सर्वेभ्यो महते अतः अनंतशक्तये अनंता असंख्याताः पुरुषकालप्रकृतिप्रभृतयः शक्तयो यस्य तस्मै अतः परावरात्मन् पराणां महामुक्तानां अवराणां ब्रह्मादीनां च आत्मांतर्यामी तत्संबुद्धिः । अतो हे भूतात्मन् भूतानां चेतनाचेतनानां आत्मा आत्मत्वेन प्रवर्तक अतो हे परात्मन् श्रेष्टमूर्त्ते ते तुभ्यं नमोस्तु ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्तुतिमेवाह नमस्त इति सप्तभिः । तत्र तावत् सर्वपरत्वभक्तानुग्रहशीलत्वसर्वान्तरात्मत्वादिविशिष्टतया स्तुवन्ती नमस्करोति ॥ नमस्त इति ॥ देवानामिन्द्रादीनां देवो ब्रह्मा तस्येशस्तत्संबुद्धिः । अनेन सर्वपरत्वमुक्तम् । हे शङ्खचक्रगदाधर, ते तुभ्यं, नमः । हे परमात्मन्, अनेन सर्वान्तरात्मत्वमुक्तम् । भक्तेच्छया भक्तानामनुग्रहेच्छया उपात्तं रूपं मूर्त्तिर्येन तस्मै, अनेन भक्तानुग्रहशीलत्वमुक्तम् । ते तुभ्यं नमः अस्तु ॥ २५ ॥ येन मन्त्रेण कृष्णः कुन्त्याः प्रसन्नः पूर्वमासीत्तेन मन्त्रेण नमस्यति ॥ नम इति ॥ पङ्कजं ब्रह्मोत्पत्तिस्थानभूतं कमलं नाभौ यस्य तस्मै, ते तुभ्यं, नमः । जगत्कारणभूतायेत्यर्थः । पङ्कजानां कमलानां माला विद्यतेऽस्येति तस्मै, ते नमः । पङ्कजे इव नेत्रे प्रपन्नजनतापत्रयोपशमने नेत्रे यस्य तस्मै, ते नमः । पङ्कजे इव अङ्घ्री सौगन्ध्यसौकुमार्यादियुक्तौ पादौ यस्य तस्मै, ते नमः ॥ २६ ॥ नम इति ॥ वासुदेवाय वसुदेवपुत्रत्वेनाविर्भूताय, तथात्वेऽपि, विष्णवे सर्वत्र व्यापनशीलाय, सर्वत्र व्यापनशीलत्वेऽपि, पुरुषाय सर्वदा पुरुषाकृतिमते, 'आत्मैवेदमग्र आसीत्पुरुषविध' इति, 'दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्' इति च श्रुतेः । आदिबीजाय मुख्यकारणाय, पूर्णबोधाय सर्वकालं संपूर्णबोधवते भगवते, ते संपूर्णैश्वर्यवत्तया श्रुतिप्रसिद्धाय, तुभ्यं नमो नमः ॥२७॥ अजायेति ॥ अजाय जायमानत्वेऽपि जन्मादिविकाररहिताय, विकाराणां स्वशरीरभूतप्रकृतिपुरुषगतत्वादिति भावः । अस्य विश्वस्य, जनयित्रे उत्पत्तिकर्त्रे, ब्रह्मणे गुणैश्वर्यमहिमादिभिः

सर्वेभ्योऽपि बृहते, न हि लोके किंचिदेवंविधं दृष्टमित्येवंविधदुर्घटत्वशङ्कां वारयति । अनन्ता अपरिमिताः शक्तयः स्वासाधारणा अग्न्यादेर्दाहकत्वादय इव यस्य तस्मै, ते तुभ्यं, हे परावरात्मन् महामुक्तानां ब्रह्मादीनां चान्तर्यामिन्, हे भूतात्मन् चेतनाचेतनप्रवर्त्तक, हे परमात्मन्, नमः अस्तु ॥ २८ ॥

कृष्णप्रिया

श्री भूमिदेवी ने कहा—हे देवाधिदेव ! हे शङ्खचक्र गदाधर केशव ! आपके श्रीचरणों में मैं नमस्कार करती हूँ। हे परमात्मन् ! आप निजजनों के मनोरथों को पूर्ण करने के लिये उनके मनोरथ के अनुकूल मङ्गल एवं विविध स्वरूप और अवतार धारण करते हैं ॥ २५ ॥ श्री ब्रह्मा एवं ब्रह्माण्ड के विधाता कमलनाभ कृष्ण आपको नमस्कार, पङ्कजमाला धारण करनेवाले पङ्कजमाली जो को प्रणाम, हे कमलनयन श्रीकृष्ण आपको नमस्कार, भक्तों के हृदय में विराजने वाले पङ्कजपाद आपको बारंबार नमस्कार ॥ २६ ॥ हे नाथ ! ऐश्वर्य-वीर्य-यशः-श्री-ज्ञान-वैराग्य नाम के षड्विध ऐश्वर्य-सम्पन्न भगवान् के श्रीचरणों में प्रणाम । समस्त विश्व में रहनेवाले श्री वसुदेवनन्दन जी को नमस्कार। सर्वत्र व्यापक श्री विष्णु भगवान को बारंबार नमस्कार । पूर्णपुरुष को प्रणाम । समस्त कारणों के कारण आदिकारण ब्रह्मा को प्रणाम । पूर्णबोधस्वरूप पुरुषोत्तम जी को नमस्कार ॥ २७ ॥ अजन्मा होते हुए भी अनन्त ब्रह्माण्डों के जन्मदाता को प्रणाम, परमब्रह्म श्रीकृष्ण को प्रणाम, अनन्तशक्तियों के नाथ को नमस्कार; पर और अवर आदि सर्वतत्त्व स्वरूप, सर्वलोकस्वरूप, कार्य और कारणस्वरूप प्राणीमात्र के आत्मा श्रीकृष्ण को प्रणाम; हे परमात्मन् आप के श्रीचरणों में मेरे अनन्त नमस्कार-बारंबार प्रणाम ॥ २८ ॥

त्वं वै विसृक्षू रज [1]उत्कटं प्रभो तमो निरोधाय [2]बिभर्ष्यपावृतः ।
स्थानाय सत्त्वं जगतो जगत्पते[3] कालः प्रधानं [4]पुरुषो [5]भवान् परः ॥ २९ ॥
अहं पयो ज्योतिर[6]थानलो नभो मात्राणि देवा मन इन्द्रियाणि ।
कर्ता महानित्यखिलं चराचरं[7] त्वय्यद्वितीये भगवन्नयं भ्रमः ॥ ३० ॥[8]
तस्यात्मजोऽयं तव पादपङ्कजं भीतः प्रपन्नार्तिहरोप[9] सादितः[10] ।
[11]तत् पालयैनं कुरु हस्तपङ्कजं शिरस्यमुष्याखिलकल्मषापहम् ॥ ३१ ॥

श्रीशुक उवाच

इति भूम्यार्थितो[12] वाग्भिर्भगवान् भक्तिनम्रया[13] ।
दत्त्वाभयं भौमगृहं प्राविशत् सकलर्द्धिमत् ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—हे परावरात्मन्, हे भूतात्मन्, हे परमात्मन्, ते (तुभ्यम्) अजाय, अस्य, जनयित्रे, अनन्तशक्तये, ब्रह्मणे नमः ॥ २९ ॥ हे प्रभो, त्वम्, वै, सिसृक्षुः, सत्, उत्कटम्, रजोगुणम्, विभर्षि । निरोधाय (उत्कटम्) तमोगुणम्, विभर्षि । जगतः, स्थानाय, उत्कटम्, सत्वम्, विभर्षि, हे जगत्पते, भवान्, प्रधानम्, कालः, असंवृत्तः, परपुरुषः, अस्ति, इति शेषः ॥३०॥ हे भगवन्, अहम्, ज्योतिः, अथ, अनिलः, नभः, मात्राणि (शब्दादय) देवाः, मनश्च, इन्द्रियाणि, च, कर्ता, महान्, इति, अखिलम्, चराचरम्, यद्, अद्वितीये, त्वयि, प्रतीयते, अयम्, भ्रम, एव ॥ ३१ ॥ हे प्रपन्नार्त्तिहर ! अयम्, तस्य, आत्मजः, मया, तव, पादपङ्कजम्, उपसादितः, अयम्, भीतः, तत्, एनम्, पालय, अमुष्य, शिरसि, अखिलकल्मषापहम्, हस्तपङ्कजम्, कुरु ॥३२॥

---

[1] उत्कटः–विज. । [2] बिभर्ष्य–श्रीधर. वंशी. जीव. वीर. विश्व. शु. ; र्षि–विज. । [3] प्रभो–विज. । [4] नः–विज. । [5] षोऽस्यापाइ–वि. । [6] रथो–वि. ; रथा नलोऽनिलो–वीर. । [7] तु कारणं–वि. ।

[8] यदाहमुद्धृता नाथ त्वया सूकरमूर्तिना । त्वत्स्पर्शसंभवः पुत्रस्तदायं मेऽभ्यजायत ॥
सोऽयं त्वयैव दत्तो मे त्वया च विनिपातितः ॥ विजयेऽन्यद् दृश्यते ।

[9] रं–विज. । [10] तुम्–विज. । [11] त्वं–विज. । [12] चि–विज. । [13] प्रसन्नः प्रददौ तस्मै भगदत्ताय चाभयम्–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु गुणा विश्वोत्पत्त्यादिहेतवस्ते च प्रधानस्येव तस्य च पुरुषः क्षोभकस्तत्र च कालो निमित्तमिति प्रसिद्धं किमत्राहं तत्राह । त्वं वा इति । तमसो धारणेऽप्यसंवृत एव । स्थानाय पालनाय । जगतः सृष्ट्याद्यर्थमुत्कटं रजआदि त्वमेव बिभर्षि सृजसीत्यर्थः । कालप्रधानपुरुषाश्च त्वद्व्यतिरिक्ता न संति त्वं तु परः सर्वव्यतिरिक्तः । अतस्त्वमेब जनयितेत्यर्थः ॥ २९ ॥ कार्यकारणप्रपंचस्य तदव्यतिरेकं तस्य च सर्वव्यतिरेकमुपपादयति । अहमिति । अहं भूमिः । मात्राणीति देवा मन इंद्रियाणीति च त्रिविधाहंकारकार्याणि । कर्ताऽहंकारः ॥ ३० ॥ एवं स्तुत्वा प्रार्थयते तस्येति । हे प्रपन्नार्तिहर । तस्य नरकस्य । अयं भगदत्तो नाम भीतोऽत एव मया तव पादपंकजमुपसादितः ॥ ३१ ॥ अभयं दत्त्वा ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनर्भंग्यन्तरेणाऽऽशंकते–नन्विति । ते च गुणाः । तस्य प्रधानस्य । तत्र च क्षोभे । पूर्ववदाह–किमत्राहमिति । निरोधाय नाशाय । उत्कटमधिकम् । इत्यर्थ इति–रजोधारणेन सर्गं करोषीति भावः । अतः सर्वव्यतिरिक्तत्वात् । इत्यर्थ इति–कालादीनां सामग्रीमात्रत्वात्त्वमेब मुख्यं कारणमिति भावः ॥ समयभेदेनास्य सृष्ट्यादिकं मायाशक्त्या त्वमेव करोषीत्याह–त्वमिति । उत्कटम् उद्रिक्तम् । असंवृतो न तु जीववत्तैः संवृतः । अतस्त्वच्छक्तिकार्यत्वादिदं जगत्त्वदात्मकम् । ये च नित्याः कालमायाजीवास्तेऽपि त्वच्छक्तित्वात्त्वदात्मका एवेत्याह–काल इति । किन्तु स्वरूपशक्त्या उश्चक्तेभ्य एतेभ्यः परोऽन्यः ॥ २९ ॥ तदव्यतिरेकं तदभिन्नत्वम् । तस्य भगवतः सर्वव्यतिरेकं सर्वातिरिक्तत्वम् । मां स्वविषयज्ञानस्य सत्त्वेन त्रायन्त इति मात्रा इंद्रियाणि । अथ पुनरर्थे । अयं पृथिव्यादिरूपः प्रपञ्चः शुक्तिरजतवद्भ्रम एव न तात्त्विक इति भावः । यद्वा–अयं जगद्भ्रमः चक्रभ्रमणवद्विश्वस्य परिवर्त्तनं त्वयि नियतमित्यर्थः । भ्रमशब्दस्यारोपपरत्वेऽर्थक्रियानुपपत्तेरिति तीर्थः ॥ ननु तत्तद्रूपश्चेत्कथं परत्वं तत्राह–अहमिति । तेषां त्वच्छक्तिरूपमात्रत्वेन तदनन्यत्वान्न विद्यते द्वितीयं यस्य तथाभूतेऽपि त्वयि पूर्वोक्तं कार्यं चराचरं भ्रमो भ्रमेणैव प्रतीतमित्यर्थः । अंतरंगशक्त्याऽऽलिंगिता । ते बहिरंगशक्तिकार्यैर्न स्पर्शः । आकाशादीनां वाय्वादिभिस्तद्धर्मैरिव चेति भावः । तदुक्तम्–"मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि" इति ॥ ३० ॥ आत्मज औरसः । मां कुतो न नमतीति चेदाह–भीतस्त्रस्तः । अत एव त्रस्तत्वादेव । अहं किं करोमीत्यत आह–यत उपसादितस्तत्ततो हेतोः । एनं भगदत्तम् ॥ ननु प्रस्तुतं किं तदुच्यताम्, तत्राह–तस्येति । महादुष्टत्वेन नामाऽग्रहणम् । ननु दुष्टस्यात्मजत्वादयमपि वध्य एव तत्राह–उपसादित इति, शरणं प्रापितः । किञ्च–अस्याऽपितृकत्वादिदुःखञ्च हरणीयमित्याह–प्रपन्नेति । तस्मादकुतश्चिद्भयमप्येनं विधेहीत्याशयेनाह–कुर्वीति । ननु तथा सति पितृवद्दुष्टतां करिष्यति तत्राह–अखिलेति । त्वच्छ्रीहस्तस्पर्शप्रभावेण नायमपराधं कर्तेति भावः । पंकजरूपकेण स्वयमेव तापापगमादिकं ध्वनितम् ॥ ३१ ॥ इतीत्थम् । वाग्भिरेवार्चितस्ताभिरेव नानोपचारगणनाद्भावितः । ऋद्धिश्चोक्ता हरिवंशे–"न वै राज्ञा कुबेरेण न शक्रेण यमेन च । रत्नसंनिचयस्तादृग्दृष्टपूर्वो न च श्रुतः ॥" इति । किञ्च–तत्रैव धनरक्षिणां दैत्यानामुक्तौ–"देवगंधर्वरत्नानि पन्नगानां च यद्वसु । तानि सर्वाणि सन्तीह नरकस्य निवेशने ॥" इति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वै एव त्वमेव उत्कटमिति साम्येन सृष्ट्याद्यासिद्धेः प्रभो इति विचित्रजगत्सृष्टिसामर्थ्यात् जगत्पत इति स्वभावत एव पालकत्वात् अन्यत्तैः यद्वा असम्वृतः सृष्ट्यादिकर्मभिरव्याप्तः ॥ २९ ॥ ननु, तत्तद्रूपश्चेत्कथं परत्वम्, तत्राह—अहमिति । तत्त्वानन्तर्य्यक्रमेणोक्तत्वादथशब्दः चकाराद्बुद्धिचित्ते तेषां त्वच्छक्तित्वात् कार्य्यरूपमात्रत्वेन त्वदनन्यत्वान्न विद्यते द्वितीयं यस्य तथाभूतेऽपि त्वयि इति पूर्वोक्तं कार्य्यं चराचरं भ्रमो भ्रमेणैव प्रतीतमित्यर्थः । अन्तरङ्गशक्त्यालिङ्गितस्य ते बहिरङ्गशक्तिकार्यैर्न स्पर्शः आकाशादीनां वाय्वादिभिः तद्धर्मैरिवचेति भावः । यथोक्तं प्रथमे श्रीमदर्जुनेन "मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि" इति तस्मात्सर्वमेव तुच्छं तव कोपविषयो न भवति किन्तु कृपाविषय एवेति भावः ॥ ३० ॥ ननु, प्रस्तुतं किं तदेवोच्यतां तत्राह—तस्येति । महादुष्टत्वेन नामाग्रहणं ननु दुष्टस्यात्मजत्वादयमपि वध्य एव, तत्राह उपसादित एति । शरणं प्रापितः किञ्चास्य पितृकत्वादिदुःखञ्च हरणीयमित्याह—प्रपन्नेति । तस्मादकुतश्चिद्भयमप्येनं विधेहीत्याशयेनाह, कुर्वीति । ननु, तथा सति पितृवद्दुष्टतां करिष्यति तत्राह अखिलेति । त्वच्छ्रीहस्तस्पर्शप्रभावेनायमपराधं न कर्त्तेति भावः पङ्कजरूपकेण स्वयमेव तापापगमादिकं ध्वनितम् ॥ ३१ ॥ वाग्भिरेवार्चितः प्रसादित इति "किञ्चित्करोत्यण्वपियत्स्वदत्तम्" इत्युक्तस्वभावत्वेन ताभिरेव नानोपचारमननाद्भावितः ऋद्धिश्च वर्णिता श्रीहरिवंशे—

"न वै राज्ञा कुबेरेण न शक्रेण यमेन च । रत्नसन्निचयस्तादृग्दृष्टपूर्वा न च श्रुतः" ॥ इति

किञ्च तत्रैव धनरक्षिणां दैत्यानामुक्तौ—

"देवगन्धर्वरत्नानि पन्नगानाञ्च यद्वसु । तानि सर्वाणि सन्तीह नरकस्य निवेशने" इति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु एक एवात्मान्तर्य्यामी चेति विरुद्धं स्यात्, न, कार्य्यकारणात्मकं जगत्त्वदभिन्नं त्वञ्च तस्माद्भिन्न एवेति भेदाभेदन्यायेनाह—त्वमिति, वै एव, त्वमेव, उत्कटमिति साम्येन सृष्ट्याद्यसिद्धेः। 'प्रभो' इति विचित्रजगत्सृष्टिसामर्थ्याज्जगत्पत इति स्वभावत एव पालकत्वात्, विशेषतश्च तदानीं पालने प्रवृत्तेः। अत एवास्यान्ते निर्द्देशः, पक्षान्तरद्वये च विरोधपरिहारतः समानमेव। अन्यत्तैर्व्याख्यातम्। यद्वा, असंवृतः सृष्ट्यादिकर्म्मभिरव्याप्तः, किंवास्य परेणान्वयः, पालनार्थं स्वयमेव श्रीविष्णवादिरूपेण प्रकटः सन्नित्यर्थः ॥ २९ ॥ अथ समुच्चये, चकाराद्बुद्धिचित्ते, त्वय्यद्वितीये त्वयि भिन्नतयास्तीत्ययं भ्रमः। तथा सति तस्यापि सत्यत्वनित्यत्वप्रसंगात्। ननु तथास्तु नाम, कोऽत्र दोषः? तत्राह—अद्वितीय इति। तथा सति (छा० ६।२।१) 'एकमेवाद्वितीयम्' इत्यादि-श्रुत्युक्त्या द्वितीयत्वबाधापत्तेरिति भावः। चराचरस्य त्वदभिन्नत्वेऽपि ततस्त्वं भिन्न एवेत्याह—भगवन्निति, हे परमेश्वर! अत इदं सर्व्वं त्वदीयत्वेन त्वदव्यतिरिक्तम्, त्वञ्च भगवत्त्वेनास्मद्व्यतिरिक्त एवेति। यद्वा, अद्वितीयेऽपि त्वय्यस्तीत्याधाराधेयभावेन भेदोऽयं भ्रमः किम्? काक्वा, अपि तु नैव। त्वदंशतया सच्चिदानन्दस्वरूपाणामपि जीवानां चिद्रूपत्वेन भेदराहित्येऽपि समुद्रस्य तरंगाणामिव पार्थक्यात्, अतस्तरंगेभ्यः समुद्रस्येव ततस्तव भिन्नता सिद्धैवेत्याह—भगवन्निति। तरंगाणां समुद्रत्वस्येव जीवानां भगवत्त्वस्याभावात् ॥ ३० ॥ तस्येति महादुष्टत्वेन तन्नाम्नोऽग्राह्यत्वात्। ननु दुष्टस्यात्मजत्वादयमपि वध्य एव, तत्राह—उपसादित इति, शरणागतत्वात्। किञ्चास्य पितृशोकादिदुःखञ्च हर्त्तव्यमित्याह—प्रपन्नेति। तत्तस्मादकुतश्चिद्भयमप्येनं विधेहीत्याशयेनाह—कुर्व्विति। ननु तथा सति पितृवद्दुष्टतां करिष्यति, तत्राह–अखिलेति। त्वच्छ्रीहस्तस्पर्शप्रभावेणायमपराधं न कर्त्तेति भावः। पंकजरूपकेण श्रीहस्तस्य सुशीतलतादिसूचनतः स्वयमेवाशेषतापापगमादिकमपि ध्वनितम् ॥ ३१ ॥ वाग्भिरर्च्चितः सम्मानितः, वाचामुत्कृष्टत्वेन भगवत्तोषहेतुत्वात्। तत्रैव गुणविशेषञ्च दर्शयति—भक्तेति। भगवान् परमदयालुः, अत एवाभयं तस्मै दत्त्वा प्रकर्षेण श्रीसत्यभामेर्ष्यापरिहारार्थं श्रीगरुडादवतीर्य्यैकाकित्वादिना, किं वा तया सत्यभामया, तेन गरुडेन, भूम्या, भगदत्तेन, कोशरक्षकादिभिश्च साहित्यादिनाविशत्। भूमिपुत्रगृहत्वादेव सकलर्द्धिमत्, ऋद्धिश्च वर्णिता श्रीहरिवंशे (विष्णु–प० ६४।८)–'न वै राज्ञा कुबेरेण न शक्रेण यमेन च। रत्नसन्निचयस्तादृग् दृष्टपूर्वा न च श्रुतः'। इति। किञ्च, तत्रैव (विष्णु० प० ६४।१७) धनरक्षिणां दैत्यानामुक्तौ—'देवगन्धर्व्वरत्नानि पन्नगानाञ्च यद्वसु। तानि सर्व्वाणि सन्तीह नरकस्य निवेशने ॥' इति ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

निरोधाय संहाराय तमो बिभर्षि स्थानाय स्थितये सत्त्वम् ॥ २९ ॥ अहं पृथिवी देवाः ज्ञानेन्द्रियाणि इन्द्रियाणि कर्मेन्द्रियाणि यद्वा, देवाः इन्द्रियाभिमानिदेवाः कर्त्ता देहे अहम्बुद्धिकरणहेतुत्वात् कर्त्तेत्यहङ्कारो विवक्षितः। भ्रमः देवादीनां जीवाद्यभिमानभ्रमहेतुत्वात् पृथिव्यादित्तत्त्वजातं भ्रम इत्युच्यते अद्वितीये समाभ्यधिकरहिते भ्रमति आविस्तिरोभावादिभिरिति भ्रमः ॥ ३०–३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

उक्तनामभिरभिप्रेतमेव कारणत्वं सुव्यक्तमाह—त्वं वा इति। हे विभो! तावत्त्वं स्रष्टुमिच्छुः उत्कटं रजो बिभर्षि रजोगुणप्रधानचतुर्मुखाख्यदेहानुप्रवेशेन सृजसीत्यर्थः। जगतां विनाशाय संहाराय तमःप्रधानकालाग्निरुद्रादीननुप्रविशसि तथात्वेन विनाशयसीत्यर्थः। स्थानाय स्थितये तु हे जगत्पते! उत्कटं सत्त्वं बिभर्षि सत्त्वप्रधानमन्वादिशरीरकोभूत्वा पालयसीत्यर्थः। न केवलं सृष्ट्यादिवत् पालनमपि सद्वारकमेवापि त्वद्वारकमपीत्यभिप्रायेण विशिनष्टि। असम्वृत्तः असम्वृतोपि जीवादिसम्वरणरहितोपि केवलस्वावताररूपेणापि पालयसीत्यर्थः। उपादानकारणत्वप्रयुक्तं कार्य्यानन्यत्वं वक्तुं कारणत्वं न स्वरूपेणापितु प्रकृतिपुरुषकालवैशिष्ट्यरूपेणेत्यभिप्रेत्य कारणत्वावस्थायां प्रकृत्यादिशरीरकत्वमाह–काल इत्यादि। इदं सामानाधिकरण्यं शरीरात्मभावनिबन्धनम् अत एव स्वरूपतादात्म्यनिबन्धनत्वाशङ्कानिरासाय विशिनष्टि—पर इति। परोऽन्यः सन्निहितत्वात्कालादेरन्य इत्यर्थः। "ऐतदात्म्यमिदं सर्वम्, तत्सत्यम्, स आत्मा" इतिवदयं निर्देशः ॥ २९ ॥ अथ कार्य्यानन्यत्वमाह—अहमिति। अहं पृथिवी पयो जलं ज्योतिष एव प्रदर्शनार्थमनल इत्युक्तम् अनिल इति तत्कारणस्याकाशस्याप्युपलक्षणं मात्राणि गन्धादितन्मात्राणि देवा इन्द्रियाधिष्ठितारः दिग्वातादयः इन्द्रियाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च दश कर्त्ता देहेऽहम्बुद्धिहेतुत्वात् कर्त्तेत्यहङ्कारो विवक्षितः। यद्वा महानिति तत्कार्यस्याहङ्कारस्याप्युपलक्षणं कर्त्ता जीवः "कर्त्ता शास्त्रार्थवत्त्वात्" (२–३–३३) इति सूत्रात् इत्येवम्विधमखिलं चराचरात्मकं जगदद्वितीये स्वतुल्यवस्त्वन्तररहिते त्वय्येव प्रकृतिपुरुषकालशरीरके त्वय्येव मृदि घट इव वर्त्तते इति शेषः। अतो मृदयं घटः इतिवत्त्वदभिन्नमेवेत्यर्थः। यद्वा उपादानत्वं कालादिवैशिष्ट्यरूपेणेत्यभिप्रायेण कालादितादात्म्यमाह–काल इत्यादि। तच्च तादात्म्यं न स्वरूपाभेदनिबन्धनमित्यभिप्रायेण तेभ्योन्यत्वमाह पर इति। तर्हि किं निबन्धनमिति जिज्ञासायां शरीरात्मभावनिबन्धनमित्युपपादयति—अहमिति। त्वय्येवान्तःप्रविश्य धारके

आत्मन्यवतिष्ठत इत्यर्थः। पृथिव्यादिषु स्वतन्त्रबुद्धिस्तु भ्रमात्मिकेत्याह–अयं भ्रम इति। अयं पृथिव्यादिषु स्वतन्त्रवस्तुत्वप्रत्ययो भ्रमः भ्रमात्मक इत्यर्थः। व्यासार्य्यैस्तु "देहानां जीवाभिमानहेतुत्वात्पृथिव्यादितत्त्वजातं भ्रम इत्युच्यते" इति व्याख्यातम् ॥३०॥ एवं स्तुत्वा किञ्चित्प्रार्थयते–तस्येति। अयं भगदत्तनामा तस्य भौमस्यात्मजः भीतस्सन् हे प्रपन्नार्त्तिहर! तव पादपङ्कजमुपसादितः मया प्रापितः तं प्रपन्नमेनं पालय अमुष्य भगदत्तस्य शिरसि अखिलाशुभहन्तृ त्वत्करपङ्कजं कुरु निधेहि ॥ ३१ ॥ इतीति। भक्त्या नम्रा प्रणता तया भूम्या कर्त्र्या वाग्भिः साधनभूताभिरर्चितः सकला ऋद्धयः भोग्यभोगोपकरणादिसमृद्धयो यस्मिन् सन्तीति तद्भौमस्य गृहं प्राविशत् ॥ ३२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सिसृक्षुः स्रष्टुकामः उत्कटस्त्वं रजोगुणं बिभर्षि उपादत्से निरोधाय संहाराय सम्वृतं ज्ञानसम्वरणकारणं तमोगुणं स्थानाय जगत्स्थित्यै सत्त्वगुणं कालः प्राणिनामदृष्टपाचकः एवम्विधः क इति तत्राह–प्रधान इति। प्रधानः पुरुषोसि पुरुषोत्तमोसीत्यर्थः। "उत्तमः पुरुषस्त्वन्यः" इति स्मृतेः। पुरुषत्वेपि परिच्छिन्नत्वं नास्तीत्याह–अपार इति। यद्वा जगत्कारणं प्रधानपुरुष इति केचित्सङ्गिरन्ते तदाशङ्कां निवारयति–प्रधान इति। प्रधानशब्दवाच्यः पुरुषशब्दवाच्यश्च त्वमेव तर्हि परिशिष्यमाणः क इत्यत्राह–अस्येति। अस्य प्रपञ्चस्य पारः परिशिष्यमाणः संसारनदीपारः; तीरान्तरशब्दवाच्यस्त्वमित्यर्थः ॥ २९ ॥ सृष्ट्यादिकर्ता त्वमित्युक्त्यैवाखण्डकर्तृत्वप्रतीतावपि धात्रादिशब्दाभ्यां विरिञ्चादेरपि कर्तृत्वशङ्कामिदानीं निवारयति, अहमिति। अहं नाम्ना पृथिवी मीयन्त इति मात्राणि शब्दादिविषयाः मानं स्वविषयज्ञानं स्वसत्त्वेन त्रायन्त इति वा देवा इन्द्रियाभिमानिनः कर्ता अहङ्काराभिमानी महान्महत्तत्त्वाभिमानी विरिञ्चः तुशब्द एवार्थे इतिशब्दः समाप्तिवचनः महदाद्यभिमान्यन्तमखिलकारणम् अद्वितीये च त्वय्येव त्वमेव धारयसीत्यर्थः। आतिथ्यवत्कदाचिन्नेत्याह–भगवन्निति। हे ऐश्वर्यादिगुणार्णव! अयं जगद्भ्रमः चक्रभ्रमणवद्विश्वस्य परिवर्तनं त्वन्नियंतमित्यर्थः। भ्रमशब्दस्यारोपार्थत्वाङ्गीकारे अर्थक्रियानुपपत्तिरिति ॥ ३० ॥ साम्प्रतं तव किं विधेयमित्यत्राह—तस्येति। अयं पुरोवर्ती तस्य नरकस्यात्मजः औरसः पुत्र इति जानीहीति शेषः। तर्हि किमिति मत्प्रणामं न करोतीत्यत्राह—तवेति। तव प्रपन्नार्तिहरं पादपङ्कजं प्राप्य त्वां प्रसादयितुं भीतस्त्रस्तः इत्यन्वयः। ततः किमत्राह—तदिति। यतो भीतस्तत्तस्मात्तत्पालनं चैतदेवेत्याह–कुर्विति। अनेन किं फलं स्यादित्याशङ्क्य पापनिमित्तं सर्वमनर्थजातं तन्नाशे सर्वसुखं स्यादिति भावेनाह—अखिलेति। यद्वा, प्रपन्नार्तिहरं भगवन्तं प्रसादयितुं तव पादपङ्कजं भीतः सञ्चलितः प्राप्त इत्यर्थः। "भीतिभयसञ्चलनयोः" इति धातुः। अतो रक्षेत्याह तदिति ॥ ३१-३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

ननु, तत्तद्रूपश्चेत् कथं परत्वम्? तत्राह। अहमिति। तेषां तच्छक्तिकार्य्यरूपमात्रत्वेन तदनन्यत्वान्न विद्यते द्वितीयं यस्य तथाभूतेऽपि त्वयि इति पूर्वोक्तकार्यं चराचरं भ्रमो भ्रमेणैव प्रतीतमित्यर्थः। अन्तरङ्गशक्त्यालिङ्गितस्य ते बहिरङ्गशक्तिकार्य्यैः न स्पर्शः। आकाशादीनां वाय्वादिभिस्तद्धर्म्मैरिव चेति भावः। तथोक्तम् "मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि" इति रूपमत्र प्रकाशः ॥ ३०-४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

समयभेदेनास्य विश्वस्य मायाशक्त्या सृष्ट्यादिकं करोषीत्याह—त्वमिति। उत्कटम् उद्रिक्तं रजस्तमःसत्त्वं च बिभर्षि असम्वृतः न तु जीववत्तैः सम्वृतः अतस्त्वच्छक्तिकार्यत्वादिदं जगत् त्वदात्मकं ये च नित्याः कालमायाजीवास्तेऽपि त्वच्छक्तित्वात्त्वदात्मका एवेत्याह—काल इत्यादि। किन्तु त्वं स्वरूपशक्त्या उक्तेभ्यः एतेभ्यः परोऽन्यः ॥२९॥ ननु, ममाप्ययं देहो भूतात्मक एव चक्षुरादीन्द्रियाण्यपि वैकारिकाण्येवेत्यतो मां मायाशबलं ब्रह्मेत्याचक्षते कथमहमेतेभ्यः पर इत्यत आह—अहं भूमिः मात्राणि विषयाः कर्त्ता अहङ्कारः महांश्चित्तमित्येतत् सर्वं चरं मनश्चक्षुरादि अचरं भूमिप्राणादि त्वयि भ्रमः ये त्वय्यपि भूतेन्द्रियादिकं ब्रुवते **ते** भ्रान्ता एवेत्यर्थः। यतोऽद्वितीये न विद्यते द्वितीयं यस्मिन् त्वयीदं देहेन्द्रियादिकं सर्वं त्वदात्मकं चिदेव न तु त्वत्तोऽद्वितीयं मायादिकमित्यर्थः ॥ ३० ॥ एवं स्तुत्वा प्रार्थयते—तस्येति। अयं भगदत्तो नाम भीतः अत एव मया तव पादपङ्कजमुपसादित इति ॥ ३१-३२ ॥

गूढार्थदीपिनी

अस्य विश्वस्य। परे ब्रह्मादयोऽवरेऽस्मदादयस्तेषां सर्वेषामात्मा ॥ २९ ॥ त्वं वै त्वमेव सिसृक्षुः सन् उत्कटं रजोगुणं बिभर्षि। निरोधाय विनाशाय तमः जगतः स्थानाय पालनाय सत्त्वं च बिभर्षीत्यन्वयः। अथापि असंवृतः स्वतन्त्रः। कालः गुणक्षोभकः प्रकृतिः पुरुषश्च भगवान् भवानेव। तेभ्यः परः व्यतिरिक्तश्च ॥ ३० ॥ इत्येवमखिलं चराचरं जगत् अद्वितीये त्वयि

भ्रम एव रज्जौ सर्प इव । अहं भूमिः । मात्राणि शब्दादयः । कर्ता अहङ्कारः । महान् महत्तत्त्वम् ॥ ३१ ॥ हे प्रपन्नार्तिहर । तस्य भौमस्य अयमात्मजः भगदत्तः भीतः सन् तव पादपङ्कजम् उपसादितः प्रापितः । तत् तस्मात् एनं पालय । अमुष्य शिरसि हस्तपङ्कजं च कुरु । अखिलं कल्मषमपहन्तीति तथाभूतम् ॥ ३२-३३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वावतारैः स्वांशाभ्याञ्च विश्वस्य पालनादि करोषीति स्तुवन् प्रकृत्यादीनां भगवति ज्ञादात्मामाह—त्वमिति । प्रधानं प्रकृतिः पुरुषो जीवः भवानेव ॥ २९ ॥ एवं सर्वकारणत्वं सर्वात्मकत्वमेकस्यैवानन्तशक्तेर्भगवतः उक्तमथ तदनुदावपूर्वकं नानाकारणवादवैशेषिकादिपक्षं श्रुतिविरुद्धं निराकरोति—अहमिति । अहं भूमिः पयःप्रभृतीनि चत्वारि महाभूतानि मात्राणि सूक्ष्मरूपाणि भूतानि देवाः मनः इन्द्रियाणि चकारात्तेषां कारणमहङ्कारः तत्कारणं महान् कर्ता जीवः "विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च" "कर्त्ता शास्त्रार्थवत्त्वात्" (२।३।३३) इति श्रुतिसूत्रप्रसिद्धः जातावेकवचनम् इति चराचरं चेतनाचेतनात्मकमखिलं कार्यजातम् अद्वितीये एव त्वयि तादात्म्यसम्बन्धेनास्ति "सदेव सौम्येदमग्र आसीत्" एक एव नारायण आसीत्"–

"अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥"

इत्यादिश्रुतिस्मृतिभ्यः हे भगवन् ! अयं प्रसिद्धः नानाकारवादस्तु भ्रमः तत्र समवायिकारणं नानापरमाणवो निमित्तकारणमीश्वरः सोपि शिवादिभेदेनानेकविधस्तार्किकादिभिः स्वीकृतः अत एव तर्कविमोहितो भौमस्त्वद्विमुखस्त्वया हत इति भावः ॥ ३० ॥ इत्थं स्तुत्वा प्रार्थयते—तस्येति । अयं भगदत्ताभिधः भीतः अत एव हे प्रपन्नार्तिहर ! मया तव पादपङ्कजमुपसादितः तत्तस्मात् एनं पालय ॥ ३१ ॥ अभयं दत्वा ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यदा त्वं सिसृक्षुः सर्जनेच्छावांस्तदोत्कटं कार्याभिमुखं रजो बिभर्षि । निरोधाय नाशं कर्तुमिच्छसि तदा संवृत्तं ज्ञानाद्यावरकं तमोगुणमुत्कटं बिभर्षि । तथा स्थानाय पालनार्थमुत्कटं सत्त्वं बिभर्षि । उत्कटं प्रभविति पाठे हे उत्कटोत्कृष्ट प्रभो स्वामिन्नित्यर्थः । अपारोऽपरिच्छिन्नोऽस्य जगतः पारः पारयितेति वा । गुणवानपि नागुणवांल्लोकवदित्याह । अपार इति । अपगता अरा दोषा यस्मात्स इति वा । पुनर्जगत्प्रभविति वदन्ती धरा वराहाभिन्नत्वेन जगत्प्राणः समीरण इत्यमरैकव्याकृतिमाश्रित्य मत्प्राणनाथेति सम्बोधयदिति बोध्यम् ॥ २३ ॥ अहं मही पय आपो ज्योतिरग्निरनिलो वायुर्नभो गगनं मात्रा गन्धाद्या देवा इन्द्रियाभिमानिनो मनः । मन एव मनुष्याणामित्युक्तेरिन्द्रियेभ्यः पृथक्कृत्योक्तम् । इन्द्रियाणीतराणि कर्ताऽहङ्काराभिमानी हरोऽभिमानी महत्तत्त्वाभिमानी ब्रह्मेत्यखिल इति यत्कारणं तत्सर्वमद्वितीयेऽसदृशे त्वदाधारतया वर्तते । यदाकदाचिद्यस्यकस्यचिद्यत्किञ्चिदधीनं भवति न तथेत्याह । भगवन् अयं भ्रमो जगच्चक्रपरिवर्तनं त्वय्येवेति । सदा त्वदधीन एवायमिति भावः । एवं सति यच्चाहं कर्तेत्यभिमानी अभिमानवान्सोऽयं भ्रमोऽन्यथामतिरित्यर्थः ॥ २५ ॥ एतावत्स्तवनेनावनि किं फलितमभिलषेत्यतो लपति ॥ तस्येति । तस्य त्वन्मारितस्य मम कुमारस्यायमात्मजो भीतस्तातघातात् । प्रपन्नार्तिहरं तव पादपङ्कजमुपसादितः प्राप्तो यतस्ततोऽखिलकल्मषापहं तव हस्तपङ्कजममुष्य सिरसि कुर्वेनं पालय च ॥ २६ ॥ वाग्भिर्भूम्याऽर्चितस्तस्मै तदुपदिष्टाय भगदत्ताय प्रसन्नः सन्नभयं प्रददौ ॥ २७ ॥ वंश्ये वंशपरम्परायास्ते राज्ये तं भगदत्तं नियोज्य तत्पदे तत्तत्पदे अमात्यांश्च नियोज्यानन्तरं भौमेन नरकेणोपरुद्धानां कान्तानां योषितां श्रेणीः पङ्क्तिः प्राविशत् ॥ २७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

माहात्म्यमाह त्वं वै सिसृक्षुरिति । सिसृक्षुः उत्कटं कार्योन्मुखं रजो बिभर्षि । निरोधाय तमः । तथा सति तेनावृतः स्यादित्यत आह **अपावृत** इति । आवरणरहितः । स्थानाय सत्त्वं बिभर्षि । सर्वत्रोत्कटं **विशेषणम्** । अन्यो न तत्र प्रतिबन्धक इति वक्तुमाह जगत्पत इति । गुणानां नियामकास्त्रयः । क्षोभकः कालः । स्वरूपभूता प्रकृतिः । पुरुषः अधिष्ठाता । एतत्त्रयमपि भवानेव । नापि तावन्मात्रम्, किन्तु तेषामपि परः ॥ २९ ॥ एवं सर्वोत्तमत्वमुक्त्वा सर्वत्वमाह अहमिति । तत्त्वानि कार्यं च भवानेवेत्यर्थः । अहं पृथिवी । अथेति त्रिवृत्करणपक्षान्यत्वं बोधयति । **मात्राणि** रूपतन्मात्रादीनि । **देवाः** दिग्वातादयः दश इन्द्रियाणि तथा । चकाराद्बुद्धिप्राणाः । कर्ता अहङ्कारः । महान् महत्तत्त्वम् । इतीति प्रकारवाची, समाप्तिवाची वा । अखिलमित्यस्यानुवादः चराचरमिति । भिन्नतया प्रतीतिरेव भ्रान्तेति, भेदोऽवश्यं कार्ये वक्तव्य इति अखिलमित्युभयत्र संबध्यते, न्यूनाधिकदोषपरिहाराय । **अद्वितीये त्वयि** 'एकः सन् बहुधा विचचार' इत्यादिश्रुत्या भगवानेव सर्वरूपेण विचरतीत्युक्तत्वात् भेदो भिन्नो नान्यः सम्भवति । तत्त्वादिनिरूपकाणां स्मार्तानां विचारकाणामपि भेदो हृदये भासत इति । अयं सर्वोऽपि भ्रमः एवं परिगणनात्मकः । त्वामेव यतो बहुधा गणयन्तः गणितानां परस्परं भेदं मन्यन्त इति । वस्त्वन्तरत्वमेव भेदः ॥ ३० ॥ एवं स्तुत्वा प्रार्थयते **तस्यात्मजजोयमिति** । स्तोत्रेण सर्वेषामपराधाः परिहृताः । भ्रान्ता इति सर्वो भवानेवेति च । **आत्मज** इति ।

राज्यदानार्थं तत्पुत्रत्वं निरूप्यते । तव पादपङ्कजं प्रपन्न इति तस्मिन् स्नेहकरणार्थम् । भीत इति दयार्थम् । तथापि शत्रुर्मारणीय इत्याशङ्क्याह **प्रपन्नार्त्तिहरे**ति । **उपसादितः** पादयोरागत्य पतितोऽस्ति, न तु त्वां विरुद्धं मन्यते । अनेन 'ये यथा मां प्रपद्यन्त' इति विचारेणापि तस्मिन् कृपा विधेयेति निरूपितम् । तस्मात्**पालये**ति प्रार्थना । एनमिति प्रदर्श्याह । भार्यात्वात्सोऽपि पौत्र इति धाष्टर्यात् पुनर्विज्ञापनान्तरमाह **कुरु हस्तपङ्कजं शिरस्यमुष्ये**ति । यथा स्वस्य रक्षित इति प्रतीतिर्भवति । ननु वाक्येनापि भवति, को विशेषो हस्तस्पर्श इत्याशङ्क्याह **अखिलकल्मषापह**मिति । कालत्रये त्रिविधान्यपि पापानि तस्मिन्न तिष्ठन्तीति हस्तपङ्कजमखिलकल्मषापहं भवति । स्वाधिकरणमेव तथा सम्पादयतीति । यद्यपि तत्पुत्रोऽपि दुष्टो मारणीय एव, तथापि भूमिप्रार्थनया तदा न मारितः ॥३१॥ सर्वैः सर्वमेव प्रार्थ्यते, तथापि यद्यत्र उचितम्, तदेव करोति, नान्यथा अणुमात्रमपीत्याह **इति भूम्ये**ति । वाग्भिः सह **अर्चितः** अर्चनद्रव्यैः । वाग्भिरेव वा । शिष्टं तस्यैवेति । बुद्धिं तु भगवान् श्रियमिव सर्वेभ्यो दत्तवान् । पुरञ्जनोपाख्याने तदुपपादितम् । तत्सर्वजीवेषु भिन्नम् । अन्यथा प्रमाणानां वैयर्थ्यं स्यात् । अतो बुद्धिदोषगुणान् पुरस्कृत्य यथोचितं करोतीति सर्वमविरुद्धम् । समयविशेषे लीलार्थं तथा बुद्धीनां निर्माणम् । तदाह **भगवा**निति । तथापि **भक्तिनम्रया** स्तुत इति **अभयमेव** दत्वा स्वगृहमेवेति **भौमगृहं** प्राविशत् । तत्र हेतुः **सकलर्द्धिम**दिति । तत्पुत्रस्य प्राणा एव तस्मिन् समये रक्षणीया इति तथाकरणम्, अन्यथा तावतीनां कन्यानां वैयर्थ्यं स्यात् । तदुपार्जितसर्वग्रहण एव तस्यापहारदोषपरिहारो भवतीति ॥ ३२ ॥

श्रीसुबोधिनी–सारः

हे जगत्पते जगतः सिसृक्षुः स्रष्टुमिच्छुस्त्वमुत्कटं रजो बिभर्षि स्थानाय पालनार्थं सत्त्वं निरोधाय संहारार्थं तमो बिभर्षि हे प्रभो असंवृतो नित्यज्ञानः कालः प्रधानं परः पुरुषो भवान् ॥ २९ ॥ अहं पृथिवी तदादीनि पंचभूतानि मात्राणि विषया गंधादयः देवा इंद्रियाणि मनः कर्त्ता त्रिविधाऽहंकारो महान् इत्येवं चराचरमखिलं सर्वं द्वैतजातमद्वितीये त्वयि भ्रमोऽध्यस्तः हे भगवन् ॥ ३० ॥ प्रार्थयते हे प्रपन्नार्त्तिहर तस्य नरकस्यात्मजः पुत्रोयं भीतः तव पादपंकजमुपसादितः प्रापितः तत्तस्मात्त्वमेनं पालय अमुष्य शरणं गतस्यास्य शिरसि अखिलकल्मषापहं सर्वपापनाशनं हस्तपंकजं स्वपाणिपद्मं कुरु निधेहि ॥ ३१ ॥ शुकोक्तिः । भक्तिनम्रया भूम्या पृथिव्या इत्येवमर्थितो याचितो वाग्भिरभयं दत्त्वा सकला ऋद्धयः संत्यस्मिन्निति भौमस्य गृहं प्राविशत् ॥ ३२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

इति भूम्येत्यत्र । **शिष्ट**मिति । वाण्याः स्वकीयत्वं व्युत्पादयन्ति बुद्धिं त्विति । उपक्रमे भक्तिप्रवणाया धियः स्तुतौ करणत्वकथनाद्बुद्धिकार्यं स्तुतिरूपा वाण्यपि स्वकीयेति भावः । **तत्सर्वजीवेष्वि**ति । बुद्धिदानं भिन्नभिन्नप्रकारकमित्यर्थः । तथाकरणमिति । प्राणमात्ररक्षार्थमभयदानमित्यर्थः । **अन्यथे**ति । अन्येषां कन्यादीनां रक्षणे इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्च भगवते ऐश्वर्यादिगुणपूर्णाय वासुदेवाय वसुदेवनन्दनाय तुभ्यं नमः । सर्वपालकत्वेन प्रणमति–विष्णव इति । सर्वोपादानत्वेन प्रणमति–आदिबीजायेति । सर्वसाक्षित्वेन प्रणमति–पूर्णबोधायेति । तत्र हेतुं सूचयन्नाह—पुरुषायेति । पूर्ष्वन्तःकरणेषु शेते निवसतीति पुरुषस्तस्मै नमः ॥ २९ ॥ सर्वनिमित्तकारणत्वेन प्रणमति–अस्य विश्वस्य जनयित्रे इति । 'तथापि तज्जनकः कश्चिदन्यः स्यात्' इत्याशङ्क्याह—अजायेति । ननु 'पित्रादयः पुत्रादीनां जनकास्तेषां च तत्पूर्वे तेषां च भूतानीति कथं मम सर्वकारणत्वम्' इत्याशङ्क्य 'सर्वोपादानत्वात् सर्वात्मकस्त्वमेव' इत्याशयेन सम्बोधनद्वयमाह–परावरात्मन्निति, भूतात्मन्निति । सर्वात्मत्वे विकारित्वमाशङ्क्य निर्लेपत्वमाह–परमात्मन्निति । 'कथमेवं संभवति' इत्याशङ्क्याह–अनन्तशक्तय इति । 'एवंभूतं तु वेदे ब्रह्म प्रसिद्धम्' इति चेत् 'तदेव त्वम्' इति आह–ब्रह्मणे इति ॥ ३० ॥ उक्तं सृष्ट्यादिकर्तृत्वमेव स्पष्टयति–त्वं वै इति । 'त्वत्स्वामिकमेव जगत्, इति स्पष्टयन् संबोधयति–जगत्पते इति । स्वामिनामपि लोककालकर्मादिपारतन्त्र्यदर्शनात् सर्वथा स्वातन्त्र्यं सूचयन् सम्बोधयति–प्रभो इति । त्वमेव सिसृक्षः स्रष्टुमिच्छुः सन् उत्कटं कार्योन्मुखं रजोगुणं बिभर्षि रजोगुणप्रधानचतुर्मुखो भूत्वा सृजसीत्यर्थः । तथा जगतो निरोधाय विनाशाय उत्कटं तमोगुणं बिभर्षि तमःप्रधानकालाग्निरुद्रादिरूपो भूत्वा विनाशयसीत्यर्थः । तथा जगतः स्थानाय पालनाय उत्कटं सत्त्वं गुणं बिभर्षि सत्त्वप्रधानविष्णवादिरूपो भूत्वा पालयसीत्यर्थः । एवं सृष्ट्यादिकुर्वतो विकारित्वमाशङ्क्याह–असंवृत इति । स्वातन्त्र्येण कार्यार्थं गुणाङ्गीकारेपि तैरवशीकृतत्वान्न विकारित्वमित्यर्थः । 'कालप्रधानपुरुषाणामपि स्वातन्त्र्यप्रसिद्धेः कथं मम स्वातन्त्र्यम्' इत्याशङ्क्याह—काल इति । कालादिरूपोऽपि परः पुरुषोत्तमो भवानेवेत्यर्थः ॥ ३१ ॥ ननु 'ममापि वसुदेवपुत्रतया सर्वजनतुल्यप्राकृतत्वेन प्रतीतेः कथं पुरुषोत्तमत्वम्' इत्याशङ्क्याह-अहमिति । अहं भूमिः, पयो जलम्, ज्योतिरग्निः, अथशब्दोऽप्यर्थे, अनिलः पवनः, नभः आकाशः, मात्राणि शब्दस्पर्शरूपरसगन्धाः, देवा इन्द्रियाधिष्ठातारोऽग्न्यादयः, मनश्च, इन्द्रियाणि च चक्षुरादीनि, कर्ता अहंकारः, महान् बुद्धिः, इत्येवं चराचरं प्राकृतं यत्त्वयि प्रतीयते सोऽयं प्रतीत्यात्मको जनानां भ्रमो बुद्धिमोह एव । तत्र हेतुमाह–अद्वितीय इति । आनन्दमात्रकरपादमुखोदरादि-

रूपे त्वयि प्रकृतिकार्यलेशाभावादित्याशयः। ननु 'कथमेवमानन्दमात्रस्य पुरुषाकारत्वम्' इत्यपेक्षायाम् 'अचिन्त्यानन्तैश्वर्यादिशक्तिमत्त्वात्' इत्याशयेन सम्बोधयति—भगवन्निति ॥ ३२ ॥

अन्वितार्थप्रकाशिका

अजायेति ॥ हे परावरात्मन् परेशामवरेषां च आत्मभूत ! हे भूतात्मन् पृथिव्यादिरूप ! हे परमात्मन् ! अजाय जन्मरहिताय अस्य विश्वस्य जनयित्रे ब्रह्मणे अनन्तशक्तये ते तुभ्यं नमः ॥ २९ ॥ त्वमिति ॥ हे प्रभो ! हे जगत्पते ! त्वं वै त्वमेव सिसृक्षुः स्रष्टुमिच्छुः सन्नुत्कटं कार्योन्मुखं रजोगुणं बिभर्षि। रजःप्रधानब्रह्मादिरूपो भूत्वा सृजसीत्यर्थः। तथा जगतो निरोधाय विनाशायोत्कटं तमोगुणं बिभर्षि। तमःप्रधानकालाग्निरुद्रादिरूपो भूत्वा विनाशयसीत्यर्थः। तथा जगतः स्थानाय पालनाय उत्कटं सत्त्वं गुणं बिभर्षि सत्त्वप्रधानविष्ण्वादिरूपो भूत्वा पालयसीत्यर्थः। तथा भवान् तमसो धारणेऽप्यसंवृतः स्वतन्त्र एव कालः प्रधानं पुरुषश्च भवानेव तेभ्यः परो व्यतिरिक्तश्च ॥ ३० ॥ अहमिति ॥ हे भगवन् ! अहं भूमिः पयो जलं ज्योतिरग्निः। अथशब्दोऽप्यर्थे। अनिलः पवनः नभः आकाशः मात्राणि शब्दस्पर्शरूपरसगन्धाः देवा इन्द्रियाधिष्ठातारोऽग्न्यादयः मनश्च इन्द्रियाणि च चक्षुरादीनि इति त्रिविधाहङ्कारकार्याणि कर्ता अहङ्कारः महान्बुद्धिः इत्येवम् अखिलं चराचरं प्राकृतं यदद्वितीयेऽपि त्वयि प्रतीयते सोऽयं प्रतीत्यात्मको जनानां भ्रमः बुद्धिमोह एव। भ्रमे यथा रूप्यादिशुक्त्यादितो नातिरिक्तं शुक्त्यादयस्तु ततोऽतिरिक्ताः अन्यथा रूप्यादिबाधे तद्बाधापत्तेः। तस्मात्सर्वमेव तुच्छं न ते कोपस्य विषयोऽपि तु दयापात्रमेव ॥ ३१ ॥ तस्येति ॥ हे प्रपन्नार्तिहर ! अयं भगदत्ताख्यः तस्य भौमस्यात्मजो मया तव पदपङ्कजमुपसादितः प्रापितः। यस्मादयं भीतस्तस्मादेनं पालय तथा अखिलकल्मषापहं स्वहस्तपङ्कजममुष्य शिरसि कुरु निधेहि ॥ ३२ ।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननूत्पत्त्यादीनां पुरुषप्रकृतिकाल ब्रह्मादय एव हेतवो नत्वहमिति चेत्तत्राह त्वमिति सिसृक्षुर्विश्वं स्रष्टुमिच्छुस्त्वं अनिरुद्धरूपेण उत्कटं शुद्धं रजो बिभर्षि निरोधाय विश्वनाशाय। संकर्षणरूपेण तमश्च बिभर्षि स्थानाय जगतः। पालयनाय प्रद्युम्नरूपेण सत्वं बिभर्षि। अतः। कालादीनां प्रवर्त्तको गुणैरसंवृत्तोभवान् परः सर्वेभ्यः श्रेष्ठः ॥ २९ ॥ अहं भूमिः कर्त्ताहंकारः उक्तं चेतनाचेतनं भवता सदृशमस्तीति अद्वितीये अद्वितीय उक्तेषु सर्वेषु चेतनाचेतनेषु नास्ति स्वरूपस्वभावादिभिस्त्वादृशो द्वितीयो यस्य एवंभूते अप्राकृतदिव्यावयविनि त्वयि अयं चेतनाचेतनसादृश्यरूपो जनानां भ्रमो विपरीतज्ञानं भवति ॥ ३० ॥ प्रार्थयतोसत्या हतस्येति हे प्रपन्नार्त्तिहरतस्य त्वया हतस्य भौमस्यायं भगदत्ताभिधः पुत्रो भीतः अतो मया तव पादपंकजमुपसादितः प्रापितः तत्तस्मादेनं पालय ॥ ३१ ॥ भक्त्या नम्रतया भूम्या ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सांप्रतं स्वाभिप्रेतं सर्वकारणत्वं सम्यक्तयाऽऽह। त्वं वा इति। हे प्रभो, त्वं वै त्वमेव, सिसृक्षुः स्रष्टुमिच्छुः सन्, उत्कटं तीव्रं, रजः बिभर्षि रजोगुणप्रधानचतुर्मुखाख्यदेहानुप्रवेशेन सृजसीत्यर्थः। तथा निरोधाय जगतां नाशाय, उत्कटं नमः, बिभर्षि। प्रधानभूतकालाग्निरुद्रानुप्रवेशेन जगद्विनाशयसीत्यर्थः। तथा हे जगत्पते, जगतः स्थानाय स्थितये, उत्कटं सत्त्वं, बिभर्षि। सत्त्वप्रधानमन्वादिकानुप्रशेन मन्वादिशरीरको भूत्वा पालयसीत्यर्थः। भवान्, कालः, प्रधानं, पुरुषः कालादिशरीरकस्त्वमेव भवसीत्यर्थः। तद्गतदोषसम्बन्धो मम प्राप्तः स्यात्तत्राह। परः अतः, असंवृतः, वस्तुतस्तव कालादेरनन्यत्वात्त्वं तदसंवृत एवेत्यर्थः। 'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा' इतिवदयं निर्देशः ॥ २९ ॥ एवं कारणानन्यत्वं प्रदर्श्याथ कार्यानन्यत्वमाह। अहमिति। अहं पृथिवी, पयो जलं, ज्योतिस्तेजः, अथ अनिलो वायुः, नभः आकाशं, मात्राणि शब्दादयो विषयाः, मात्राशब्दे क्लीबत्वमार्षम्। देवा दिगादयः, इन्द्रियाणि श्रोत्रादीनि च, मनः इदं बुद्ध्यादीनामुपलक्षणम्। महान्महत्तत्त्वं, कर्त्ता जीवः 'कर्त्ता शास्त्रार्थत्वात्' इति सूत्रात्। 'आत्मा कर्त्ता एव, शास्त्रार्थवत्त्वात्। अन्यथा कुर्यान्न कुर्यादिति शास्त्रस्य वैय्यर्थ्यं स्यात्' इत्येतद्व्याख्या। इत्येवंविधं, अखिलं, चराचरं, अद्वितीये स्वरूपस्वभावैश्वर्यादिभिः स्वसमानापरवर्जिते त्वयि, वर्त्तते। चराचरं त्वदेकाश्रयमेव भवतीत्यर्थः। हे भगवन्, चराचरमऽत्वदाश्रयं वदतामिति शेषः। अयं अत्वदाश्रयोक्तिरूप एषः भ्रमः, एव ॥ ३० ॥ एवं स्तुत्वा किंचित् प्रार्थयते। तस्येति। हे प्रपन्नार्त्तिहर, तस्य त्वया छिन्नशिरसो भौमस्य, अयं भगदत्तनामा आत्मजः सुतः, भीतः सन् तव पादपङ्कजं, उपसादितः। तत्तस्मात्, एनं पालय। अमुष्य भगदत्तस्य, शिरसि, अखिलकल्मषापहमखिलाशुभहर्त्तृ, हस्तपङ्कजं पाणिपद्मं, कुरु निधेहि ॥ ३१ ॥ इतीति। इतीत्थं, भक्तिनम्रया भूम्या, वाग्भिः अर्थितः सम्प्रार्थितः, भगवान् श्रीकृष्ण, अभयं भगदत्तायेति शेषः। दत्त्वा, सकलाः ऋद्धयो भोग्यभोगोपकरणादिसमृद्धयो यस्मिन् सन्तीति तत्, भौमगृहं भौममन्दिरं, प्राविशत् ॥ ३२ ॥

कृष्णप्रिया

हे सर्वसमर्थनाथ ! हे प्रभो ! यह निश्चित बात है कि "स अकामयत" आपकी जब ब्रह्माण्डों की रचना करने की कामना हुई तब आपने उत्कट रजोगुण का अङ्गीकार किया; जब इन ब्रह्माण्डों का निरोध–उपसंहार करना चाहा तब उत्कट तमोगुण को स्वीकार किया एवं हे जगन्नाथ ! जब आप इस विश्व का पालन-रक्षण करना चाहते हो तब उत्कट सत्वगुण को स्वीकार करते हो। लेकिन उत्पत्ति-पालन-निरोध के तीन गुणों को स्वीकार करने पर भी आप असंवृत-इन गुणों से ढक जाते नहीं है। भगवन् ! आप ही प्रकृति हैं, आप ही पुरुष हैं और सर्वसंयोजक नियोजक काल भी आप हैं फिर भी इन सबसे परे भी आप हैं ॥ २९ ॥ हे भगवन् ! अधिक आप सर्वज्ञ को क्या निवेदन करूँ, पृथ्वी (अहं) जल, तेज, वायु, आकाश, पञ्चतन्मात्रा, मनः, इन्द्रियों, इन्द्रियों के अधिष्ठाता देवगण, अहंकार (कर्ता) महान्–महत्तत्व प्रकृति, एवं संक्षेप में यह सचराचर ब्रह्माण्ड आपका ही स्वरूप है लेकिन अज्ञान से अथवा भ्रान्ति से आप से भिन्न-भिन्न मालुम हो रहा है ॥ ३० ॥ अब दैन्य पुरःसर भूमिदेवी निवेदन कर रही है कि हे नाथ ! हे शरणागतवत्सल ! हे भक्तभयभंजन ! हे भगवन् ! यह मेरा पौत्र भगदत्त आपके श्रीचरणों में प्रपन्न होकर प्रणाम कर रहा है। भौमासुर का पुत्र है, अब आप ही उसके पिता हैं पितामह हैं। नाथ ! यह भयभीत हो रहा है। मैं भगदत्त को आपके श्रीचरणों में शरण ले आयी हूँ। भगवन् बालक की रक्षा कीजिये और अपना अभयद एवं वरद करसरोज इसके सिरपर रखिये। नाथ ! आपका करकमल समस्त पाप-ताप-संताप का निवारक है ॥ ३१ ॥ श्री शुकमहर्षिजी ने कहा—महाराज ! जब श्रीपृथ्वी देवी ने भक्ति समर भाव एवं वाणी से दीन होकर नम्रता से भगवान् श्रीकृष्ण की प्रार्थना की तब भगवान् ने भगदत्त एवं पृथ्वी को अभयदान दिया। तदन्तर सकल-सम्पत्ति सम्पन्न भौमासुर के राजभवन में भगवान् ने चरणधरी की ॥ ३२ ॥

[1]तत्र राजन्यकन्यानां षट्सहस्राधिकायुतम् । [2]समाहृतानां विक्रम्य राजभ्यो ददृशे हरिः ॥ ३३ ॥
तं प्रविष्टं स्त्रियो वीक्ष्य[3] नरवर्य[4] विमोहिताः । मनसा वव्रिरेऽभीष्टं पतिं दैवोपसा[5]दितम् ॥ ३४ ॥
भूयात् पतिरयं मह्यं धाता तदनुमोदताम् । [6]इति सर्वाः पृथक् कृष्णे भावेन[7] हृदयं दधुः ॥ ३५ ॥
ताः प्राहिणोद् द्वारवतीं सुमृष्टविरजोऽम्बरैः[8] ।[9] नरयानैर्महाकोशं[10] रथाश्वा[11]द्रविणं महत् ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—भक्तिनम्रया, भूम्या, इति, वाग्भिः, अर्थितः, भगवान्, अभयम्, दत्त्वा, सकलर्द्धिमत्, भौमस्य, गृहम्, प्राविशत् ॥ ३३ ॥ तत्र, हरिः, भौमगृहे, विक्रम्य, राजभ्य, उपलक्षणतया, सिद्धादिभ्यश्च, भौमाहृतानाम्, षट्, सहस्राधिकायुतम्, राजकन्यानाम्, ददृशे ॥ ३४ ॥ स्त्रियः, तम्, प्रविष्टम्, नरवीरम्, वीक्ष्य, विमोहिताः (सन्त्यः) दैवोपसादितम्, अभीष्टम्, पतिम्, मनसा, वव्रिरे, ॥ ३५ ॥ ताः, सर्वाः, धाता, मह्यम्, तत्, अनुमोदताम्, अयम्, पतिः, भूयात्, इति, पृथक्-भावेन, कृष्णे, हृदयम्, दधुः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शताधिकमित्यपि ज्ञातव्यम् । यथाह श्रीपराशरः । "कन्यापुरे स कन्यानां षोडशातुलविक्रमः ॥ शताधिकानि ददृशे सहस्राणि महामते" इति । राजभ्य इत्युपलक्षणं सिद्धादिभ्यश्चेति । तथा च तेनैवोक्तम् । "देवसिद्धासुरादीनां नृपाणां च जनार्दन । हृत्वा हि सोऽसुरः कन्या रुरोध निजमंदिरे" इति ॥ ३३–३४–३५ ॥ प्राहिणोत् प्रस्थापयामास । सुमृष्टा कमनीयाश्च ता विरजोंबरऽम्बराश्रयाश्च नरयानैः शिबिकाभिः । अपि च महाकोशानिति ॥ ३६–३७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र भौमगृहे । पराशरमतमाश्रित्य समासः । पट्सहस्राणि च अधिकानि च अयुतञ्चैतेषां समाहारस्तथा । अधिकपदमत्र शतार्थकम् । तेनैव पराशरेण । सोऽसुरो नरकासुरः ॥ ३३ ॥ तं कृष्णम् ॥ अभितः सर्वतोभावेनेष्टं वांछितं दैवेन प्राचीनतद्भक्तिरूपेण प्रापितम् । तदुक्तं हरिवंशे–"निवसन्त्यो यथा देव्योऽसुखिन्यः कामवर्जिताः । बरिवव्रुर्महाबाहुरेकवेणी धराः स्त्रियः । सर्वाः

---

[1] राज्ये नियोज्य तं वंश्ये तदमात्याश्च तत्पदे । भौमावरोधकान्तानां श्रेणीं संप्राविशद् हरिः ॥–विजयेऽधिकः ।

[2] भौमा–श्रीधरादयः । [3] [ताः सर्वाः नव यौवनाः स्वलंकृता विचित्राङ्ग्यो] अधिकं विज. । [4] वीरं–श्रीधरादयः; वर्यं–वीर. [5] पा–विज. । [6] इति सर्वेश्वरे कृष्णे ता नार्यो हृदयं दधुः–विज. । [7] कृतचेतसः–प्रा पा. । [8] रुचिराम्बराः–विज. ; म्बराः–श्रीधर. वंशी. जीव. वीर. धिश्व. । [9] खरैरुष्ट्रैः–विज । [10] कोशान्–श्रीधरादयः । [11] श्वान्–श्रीधर. वंशी. जीव.; थांश्च–विज. ।

काषायवासिन्यः सर्वाश्च नियतेन्द्रियाः । व्रतोपवासतत्त्वज्ञाः कांक्षन्त्यः कृष्णदर्शनम् ॥'' इति ॥ ३४ ॥ अयं कृष्णः । धाता ईशः । तदस्मत्पतित्वम् ॥ मह्यं ममेति पृथक्पृथग्निगूढसंकल्पादेकवचनम् ॥ ३५ ॥ ता भौमगृहस्थाः ॥ सुमृष्टाः स्नपनादिना निर्मलीकृताश्च ता विरजोंबराः शुद्धवस्त्राः, तथाभूताः कृत्वा प्राहिणोदित्यर्थः । द्रविणं रत्नादिकं गवादिकं मदनसारिकादिकञ्च । महत्त्वं बहुमूल्यादिना बाहुल्येन च, श्रेष्ठम् । तदुक्तं हरिवंशे तद्धनाध्यक्षैः–''इमानि मणिरत्नानि विविधानि बहूनि च । गोषु चापि भवेद्यावत्कामस्तावज्जनार्दन ॥ तावतीः प्रापयिष्यामो वृष्ण्यंधकनिवेशनम् । कामव्याहारिणश्चैव पक्षिणः प्रियदर्शनाः ॥ चन्दनागुरुकाष्ठानि तथा कालीयकान्यपि । वसु यत्त्रिषु लोकेषु धर्मेणाधिगतं तव ॥'' इति ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विक्रम्य पराक्रम्य राजभ्यो भौमेनाहृतानाम् ॥ ३३ ॥ वीक्ष्य साक्षाद्दृष्ट्वा विमोहिताः हरिणा अभितः सर्वतो भावेनेष्टं चिराद्वाञ्छितं तच्च सुदुर्लभमपि दैवेन प्राचीनतद्भक्तिरूपेण उपसादितं प्रापितं पतिं पतित्वेनैव वव्रिरे तथा च तत्रैव—

''निवसन्त्यो यथा देव्यः सुखिन्यः कामवर्ज्जिताः । परिवव्रुर्महाबाहुमेकवेणीधराः स्त्रियः ॥
सर्वाः काषायवासिन्यः सर्वाश्च नियतेन्द्रियाः । व्रतोपवासतत्त्वज्ञाः काङ्क्षन्त्यः कृष्णदर्शनम् ॥'' इति ॥ ३४ ॥

कथं परिवव्रिरे ? तदाह—भूयादिति । मह्यं मम पतिः पृथक्-पृथक् निगूढसङ्कल्पादेकवचनम् ॥ ३५ ॥ नरयानैः प्राहिणोत्, कथम्भूताः सतीः ? सुष्ठु मृष्टाः स्नपनादिना निर्मलीकृताश्च ताः विरजोऽम्बराश्च तथाभूताः कृत्वेत्यर्थः । द्रविणं रत्नादिकं गवादिकं मदनशारिकादिकञ्च महत्त्वं बाहुल्येन बहुमूल्यत्वादिना च श्रैष्ठ्यं तथाच तत्रैव धनरक्षिणामुक्तौ—

''इमानि मणिरत्नानि विविधानि बहूनि च । गोषु चापि भवेद्यावत्कामस्तावज्जनार्दन ॥
ताबतीः प्रापयिष्यामो वृष्ण्यन्धकनिवेशनम् । कामव्याहारिणश्चैव पक्षिणः प्रियदर्शनाः ॥
चन्दनागरुकाष्ठानि तथा कालीयकान्यपि । वसु यत्त्रिषु लोकेषु धर्मेणाधिगतं तव'' ॥ इति ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हरिरिति तासां मनोहरणात् ॥ ३३ ॥ वीक्ष्य साक्षाद्दृष्ट्वा हरिणा वीक्षणेनैव वा विशेषेण मोहिताः, किंवा स्वार्थे इण्, विमूढाः सत्यः, यतः स्त्रियः, अभितः सर्व्वतोभावेनेष्टं चिराद्वाञ्छितं तच्च सुदुर्लभमपि दैवेन निजशुभादृष्टेन तत्कारुण्येन वा प्रापितं पतिं पतित्वेन वव्रिरे । तथा च तत्रैव (हरिवंशे विष्णु० प० ६४।२६।२७)

'निवसन्त्यो यथा देव्यः सुखिन्यः कामवर्ज्जिताः । परिवव्रुर्महाबाहुमेकवेणींधराः स्त्रियः ॥
सर्व्वा काषायवासिन्यः सर्व्वाश्च नियतेन्द्रियाः । व्रतोपवासतत्त्वज्ञाः काङ्क्षन्त्यः कृष्णदर्शनम् ॥' इति ॥

कथं वव्रिरे ? तत्राह—भूयादिति । मह्यं मम पतिः, ममेत्येकत्वं भावोद्रेकेणासापत्न्याय प्रत्येकं सर्व्वाभिरन्तःप्रार्थनात्, अत एवोक्तम्—पृथगिति, धातेति जगत्पोषणादिना शक्तिविशेषोऽभिप्रेतः, अतोऽनुमोदताम्, कृष्णे तासां चित्ताकर्षके भगवति ॥ ३५ ॥ नरयानैः प्राहिणोत् । कथम्भूताः ? सतीः सुष्ठु मृष्टाः स्नपनादिना निर्म्मलीकृताश्च ता विरजाम्बराश्च तथाभूताः कृत्वेत्यर्थः । द्रविणं रत्नादिकं गवादिकं शुकादिकञ्च, महद्बाहुल्येन बहुमूल्यत्वादिना च श्रेष्ठम्, तथा च तत्रैव धनरक्षिणामुक्तौ (हरिवंशे विष्णु० प० ६४।११, १४, १५, १६)—

'इमानि मणिरत्नानि विविधानि बहूनि च । गोषु चापि भवेद्यावत्कामस्तव जनार्द्दन ॥
भावतीः प्रापयिष्यामो वृष्ण्यन्धकनिवेशनम् । कामव्याहारिणश्चैव पक्षिणः प्रियदर्शनाः ॥
चन्दनागुरुकाष्ठानि तथा कालीयकान्यपि । बसु यत्त्रिषु लोकेषु धर्म्मणाधिगतं तव ॥' इति ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

राजभ्यो भौमेन आहृतानामित्यन्वयः ॥ ३३ ॥ दैवोपसादितं भाग्यलब्धम् ॥ ३४–४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

तत्रेति । पराक्रम्य राजभ्यो भौमेनाहृतानां राजकन्यानां षट्सहस्राण्यधिकानि यस्मिन् तदयुतं दशसहस्राणि षोडशसहस्राणीत्यर्थः । ददर्श ॥ ३३ ॥ तमिति । वरवर्य्यं वरश्रेष्ठं तं कृष्णं दैवेन प्रापितं भाग्यलब्धमभीष्टं पतिं मेनिरे ॥ ३४ ॥ मननप्रकारमेव दर्शयति—भूयादिति । मह्यं मम तदस्मदभिमतं धाता ब्रह्मा अनुमोदताम् अनुगृह्णातु सत्यापयत्वित्यर्थः । इतीति । पृथक् प्रत्येकं भावेनोक्ताभिसन्धिना कृष्णे हृदयं चित्तं दधुः निदधुः ॥ ३५ ॥ ता इति । विगतमालिन्यान्यम्बराणि यासां ताः

सुमृष्टाश्च स्नापिताः धौतवस्त्राद्यलङ्कारिताश्चेत्यर्थः । नरयानैरान्दोलिकाभिर्द्वारकां प्रति प्रेषयामास तथा महान् कोशो मूल्यं येषां ताननर्घान् रथादीन् विपुलं धनं च प्राहिणोत् प्रेषयामास ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

षट्सहस्रेणाधिकमयुतं शताधिकमपि विष्णुपुराणदृष्ट्या ज्ञेयं राजभ्य इत्युपलक्षणं सिद्धादिभ्यश्च सकाशादाहृतानाम् ॥ ३३-३५ ॥ नरयानैः शिबिकाभिर्महाकोशादीनपि ॥ ३६-३८ ॥

गूढार्थदीपिनी

तत्र भौमगृहे । विक्रम्य पराक्रमं कृत्वा राजभ्यः भौमेनाहृतानामित्यन्वयः षट्सहस्राणि च अधिकानि च अयुतञ्चैतेषां समाहारः । अधिकपदमत्रशतार्थबोधकम् । तेन शताधिकषोडशसहस्राणीत्यर्थः ॥ ३४ ॥ तं श्रीकृष्णम् ॥ ३५ ॥ मह्यं मम । धाता विधाता । भावेन सङ्कल्पेन मनो दधुः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

षट्सहस्राणि येषु शतोत्तरषट्सहस्रेषु तानि षट्सहस्राणि अधिकानि यस्मिन् तत् षट्सहस्राधिकं तच्चायुतं च तथा शताधिकषोडशसहस्राणीत्यर्थः—

"कन्यापुरे स कन्यानां षोडशातुलविक्रमः । शताधिकानि ददृशे सहस्राणि महामते ॥ इति

विष्णुपुराणे च राजन्यकन्यानाम् देवसिद्धासुरनृमुख्यकन्यानाम्—

"देवसिद्धासुरादीनां नृपाणां च जनार्दन ! । हृत्वा हि सोऽसुरः कन्या रुरोध निजमन्दिरे ॥ इति

विष्णुपुराणे च ॥ ३३-३७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

षट्सहस्रैरधिकं यदयुतं दशसहस्रं तच्छोडशसहस्रमित्यर्थः । षट्सहस्रैस्तथाऽधिकेन शतेन च सहितं यदयुतं तत्तद्ददृश इत्यर्थः । यथोक्तं पराशरेण । कन्यापुरे स कन्यानां षोडशातुलविक्रमः । शताधिकानि ददृशे सहस्राणि महामुन इति । आचार्यवर्याश्च । अष्टौ सहस्राणि शतं च रूपशीलोदारा अक्षताः सद्व्रतस्था इत्युक्तवन्तः । विक्रम्य विक्रमं कृत्वा राजभ्यो राजसिद्धादिभ्यो राजतयाऽवतरितसिद्धादिभ्यो वा । यथोक्तं पराशरेण च । देवसिद्धासुरादीनां नृपाणां च जनार्दन । हृत्वा हि सोऽसुरः कन्या रुरोध निजमन्दिर इति । भौमाहृतानां देवगन्धर्वकन्यास्तासां प्रधाना त्वष्टृपुत्री कशेरुरित्युक्तेस्तासां स्वरूपं ज्ञेयम् ॥३३॥ नवयौवना इति विवृतमाचार्यैरक्षता इति । स्वलङ्कृता विचित्राङ्ग्य स्वलङ्कृता इव विचित्राङ्ग्य इति योजनीयम् । तथा हि हरिवंशे । एकवेणीधराः स्त्रियः । सर्वाः काषायवासिन्यः सर्वाश्च नियतेन्द्रिया इति स्वभावशोभानुपमेति भावः । नरवर्य हे राजन् । विमोहिता इत्युत्तरेणान्वेति । नरवर्येण कृष्णेन विमोहिता इति वा ॥ ३४ ॥ दैवोपपादितमदृष्टानियामकश्रीहरिघटितमभीष्टं पतिं वव्रिरे । धाता विधिः । तद्भूतं भवनम् ॥ ३५ ॥ इति सर्वेश्वरे कृष्णे । एवं प्रकारेण ताः मनो दधुः । सुमृष्टं शुद्धं रुचिरमम्बरं यासां ताः । इदानीं दानवारिनारिभ्योऽम्बरण्याभरणं च दत्वा प्राहिणोदिति रुचिराम्बरत्वादिकं तासाम् ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तथापि कन्यानां स्वत एव वरणमाह तत्रेति । यतो राजन्यकन्याः सजातीयं रूपं वीर्यं चापेक्षन्ते । अयुतं षट् सहस्राणि च षोडशकलानां सहस्रधा तत्तदधिष्ठात्र्यो देवताः भूमौ प्रतिष्ठिता इति भूमिजेनाहृताः भगवत्प्रेरणया भ्रमात् । तदैव च तावत्यः सम्पन्नाः । एता द्विस्वभावा इति ज्ञापयितुं सङ्ख्याद्वयेन निर्दिष्टाः । षट्सहस्राण्ययुतं चेति । तत्राधिकपदं षट्सहस्राणामुत्तमत्वाय । ता ह्यप्सरसः । देवतात्वात्तद्रूपेण क्रीडार्थं जाताः । ता आदावष्टावक्रं स्तुत्वा पश्चादुपहसितवत्य इति ज्ञापयितुं द्विस्वभावत्वं निरूपितम् । अत एवादावन्ते च ऋषिकोपात् दुःखप्राप्तिः, प्रमादाद्वरणे बुद्धिः । **राजभ्यो विक्रम्य समाहृताना**मिति बलादानयनमुक्तम् । 'सर्वान् बलकृतानर्थान् न कृतान् मनुरब्रवी'दिति ज्ञापयितुम् । हरिस्तासां दुःखहर्ता तथात्वाय ददृशे ॥ ३३ ॥ वरणमाहतं प्रविष्टमिति । प्रकर्षेण स्वनिकटे समागच्छन्तम् । यतः स्त्रियः स्त्रीभिरवश्यं पतिर्वरणीय इति । तथापि भगवान् पुरुषोत्तमः कथं वृत इत्याशङ्क्याह **नरवर्द**मिति । नराकृतित्वं स्त्रीणां प्रियाकृतिं च गृहीतवानिति । यतो विमोहिताः । निरुद्धत्वाद्भयेन न कायेन वरणम् । **अभीष्टमिति** । पूर्वमपि तथैव भावनया स्थिताः । पतित्वेनैव वरणम् । **दैवोपसादित**मिति समये प्राप्ते एतादृशे वरणमावश्यकमिति ज्ञापयति । तेन युक्तमेव । यथा पित्रा निकटे वरणार्थं वर आनीयते, एवं दैवेनानीतः ॥ ३४ ॥ तासां मनोरथवाक्यमाह **भूयात्** पतिरिति । मह्यमिति प्रत्येकम् । ब्रह्माण्डे संवत्सरात्मकस्य प्रजापतेरधिकारो दत्त इति तदनङ्गीकारे पितुराज्ञाभाव इव वरणं न सम्भवतीति तदनुज्ञां प्रार्थयन्ति **धाता तदनुमोदता**मिति । सर्वासामेक

एव भावः। स तु पृथक्, न तु प्रत्येकपर्यवसायी। **कृष्ण** इति तासां प्रियः। **भावेन** आकाङ्क्षया पतिरयं भवत्विति। श्रद्धया वा रसाधारभूतभावेन वा। हृदयं **दधु**रिति। तत्रैव स्थिरीकृतवत्यः॥ ३५॥ शरीरमतःपरं भावाधिष्ठानं भगवदीयं कर्तुं तासामशक्तिरिति भगवांस्तत्सम्पादितवानित्याह **ताः प्राहिणो**दिति। **द्वारवती**मिति। तासामभिलषितार्थस्थानम्। द्वारं हि तद्भगवत्स्थानगमने। सुमृष्टविरजोम्बरैः कृत्वा नरयानैर्दोलाभिः। न केवलं **स्त्री**रत्नान्येव प्रेषितवान्, किन्त्वन्यान्यपि रत्नानीति वक्तुमाह **महाकोश**मिति। महान्तं रत्नादिकोशम्। **रथाश्वद्रविण**मिति। त्रिविधमुत्तमं धनं प्रेषयामासेति सम्बन्धः। तेषामपि प्रेषणे हेतुः महदिति। महदन्यत्र स्थापितमल्पस्यानिष्टं करोतीति॥ ३६॥

श्रीसुबोधिनी—सारः

तत्र गृहे राजकन्यानां भौमेनाहृतानां षट्सहस्रेणाधिकेन शतेन युक्तमयुतं हरिः श्रीकृष्णो ददर्श। आत्त्वमार्षम्। राजन्यो विक्रम्य पराक्रम्य तान् जित्वेत्यर्थः॥ ३३॥ गृहं प्रविष्टं तं नरवीरं श्रीकृष्णं वीक्ष्य दृष्ट्वा दैवेनोपसादितं प्रापितम् अभीष्टं वांछितं पतिं वव्रिरेंगीचक्रुः स्त्रियः। तत्र हेतुर्विमोहिताः॥ ३४॥ मह्यं ममायं पतिर्भूयात् धाता ब्रह्मा तत्संपादयतु इत्येवं पृथक्-पृथक् भावेन प्रेम्णा कृष्णे सर्वा हृदयं मनो दधुः धारयांचक्रुः॥ ३५॥ सुमृष्टानि अत्युज्ज्वलानि विरजांसि अंबराणि वस्त्राणि यासां ताः ताः कन्याः महाकोशान् निधीन् रथाश्वान् महद्द्रविणं भूरिधनं च नरयानैर्नरैर्यानैर्वा द्वारवतीं प्रैषयत् हरिः॥ ३६॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तथापीति। यद्यप्यपहारदोषपरिहारार्थं भगवता वरणं कर्तव्यमेव तथापीत्यर्थः। **वरण**माहेति। मानसं वाचिकं चाग्रिमाभ्यां तद्धेतुं चाद्येन एवं त्रिभिः श्लोकैराहेत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं भगवन्तं स्तुत्वा प्रार्थयते—तस्येति। 'शरणागतरक्षैव तव युक्तास्वाभाविकत्वात्' इत्याशयेन सम्बोधयति—प्रपन्नार्तिहरेति। अयं भगदत्ताख्यस्तस्य भौमस्यात्मजो मया तव पादपङ्कजमुपसादितः प्रापितः, यस्माद्भीतस्तस्मादेनं पालय। ननु 'तत्पुत्रत्वादयमपि सदोष एव, कथं पालनीयः?' इत्याशङ्क्याह—अखिलकलमषापहं सकलदोषनिवर्तकं स्वहस्तपङ्कजमस्य शिरसि कुरु निधेहि इति॥ ३३॥ भक्त्या नम्रया प्रणतया भूम्या इत्येवं वाग्भिः प्रार्थितो भगवान् भगदत्ताय अभयं दत्त्वा सकला ऋद्धयो भोगोपकरणादिसमृद्धयो यस्मिन् सन्ति तथाभूतं भौमस्य गृहं प्राविशदित्यन्वयः॥ ३४॥ तत्र भौमगृहे विक्रम्य पराक्रमं कृत्वा राजभ्यो भौमेन आहृतानां राजकन्यानां षट्सहस्राण्यधिकानि यस्मिंस्तदयुतं दशसहस्राणि षोडशसहस्राणि हरिर्ददृशे। शताधिकमित्यपि ज्ञातव्यम्, यथाह श्रीपराशरः—'कन्यापुरे स कन्यानां षोडशातुलविक्रमः। शताधिकानि ददृशे सहस्राणि महामते' इति। 'राजन्य' इति सिद्धादीनामप्युपलक्षणम्, तथोक्तं पराशरेण—'देवसिद्धासुरादीनां नृपाणां च जनार्दन हृत्वा हि सोऽसुरः कन्या रुरोध निजमन्दिरे॥ ३५॥ दैवेन भगवदाराधनाष्टावक्रवरदानादिविशेषेण उपसादितं स्वसमीपं प्रापितं भवनं प्रविष्टं तं कृष्णं वीक्ष्य विमोहितास्ताः स्त्रियो मनसा तं पतिं वव्रिरे। तथावरणे हेतुमाह—अभीष्टमिति। तत्रापि हेतुमाह—नरवीरमिति॥ ३६॥

अन्वितार्थप्रकाशिका

इतीति॥ भक्त्या नम्रया प्रणतया भूम्या इत्येवं वाग्भिः प्रार्थितो भगवान् भगदत्तायाभयं दत्त्वा सकला ऋद्धयो भोगोपकरणादिसमृद्धयो यस्मिन् सन्ति तथाभूतं भौमस्य गृहं प्राविशत्॥ ३३॥ तत्रेति॥ भौमगृहे विक्रम्य पराक्रमं कृत्वा राजभ्यः उपलक्षणतया सिद्धादिभ्यश्च भौमेनाहृतानां राजन्यकन्यानां षट् सहस्राण्यधिकानि यस्मिंस्तदयुतं दशसहस्राणि षोडश सहस्राणि शताधिकानि इत्यपि ज्ञेयम्। हरिर्ददृशे। तथा च पराशरः। "देवसिद्धासुरादीनां नृपाणां च जनार्दन। हृत्वा हि सोऽसुरः कन्या रुरोध निजमन्दिरे" इति। "कन्यापुरे स कन्यानां षोडशातुल्यविक्रमः। शताधिकानि ददृशे सहस्राणि महामते॥" इति च॥ ३४॥ तमिति॥ दैवेन भगवदाराधनाष्टावक्रवरदानादिविशेषेण उपसादितं स्वसमीपं प्रापितं भवनं प्रविष्टं नरवीरम् अभीष्टं कृष्णं वीक्ष्य विमोहितास्ताः स्त्रियो मनसा तं पतिं वव्रिरे॥ ३५॥ भूयादिति॥ अयं मह्यं मम पतिर्भूयात् तदेतन्ममाभिमतं धाता परमेश्वरोऽनुमोदतां सत्यं करोतु। सर्वास्ताः पृथक् प्रत्येकम् इत्येवंभूतेन भावेनाभिप्रायेण कृष्णे हृदयं दधुः॥ ३६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

राजन्यकन्यानां षट्सहस्रेणाधिकमयुतं दशसहस्रशताधिकमपि षोडशसहस्रमिति विष्णुपुराणात् ज्ञेयं। अत्राप्यंतिमेऽध्याये वक्ष्यति कथंभूतानां सा राजन्यान् विक्रम्य जित्वा राजभ्यो भौमेनाहृतानां॥ ३३-३४॥ ताः कथं वव्रिरे तदाह भूयादिति। तदस्मत्प्रार्थनं धाता अनुमोदतां सिद्धं कुरुतां॥ ३५॥ प्राहिणोत् प्रेषयामास महाकोशादींश्च॥ ३६-३७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्रेति । तत्र भौमगृहे, विक्रम्य पराक्रम्य, राजभ्यः, भौमाहृतानां भौमेनाहरणीकृतानां, राजन्यकन्यानां, षट् सहस्राण्यधिकानि यस्मिंस्तच्च तद्युतं च षोडशसहस्राणीत्यर्थः । हरिः श्रीकृष्णः, ददृशे । अत्र शताधिकत्वमपि ज्ञातव्यम् । यथाह श्रीपराशरः । 'कन्यापुरे स कन्यानां, षोडशातुलविक्रमः । शताधिकानि ददृशे सहस्राणि महामनाः' इति । राजभ्य इत्युपलक्षणं सिद्धादीनामपि । तथा तेनैवोक्तम् । 'देवसिद्धासुरादीनां नृपाणां च जनार्दन । हृत्वा हि सोऽसुरः कन्या रुरोध निजमन्दिरे' इति ॥ ३३ ॥ तमिति ॥ प्रविष्टं कन्यापुरे कृतप्रवेशं, नरवीरं नरश्रेष्ठं, दैवोपसादितं दैवेन प्रापितं, तं श्रीकृष्णं, वीक्ष्य विमोहिताः संजातमोहाः, स्त्रियस्ताः कन्याः, मनसा अभीष्टं पतिं मेनिरे ॥ ३४ ॥ भूयादिति ॥ मह्यमस्माकमित्यर्थः । अयं पतिः, भूयात् । तदेतत्, धाता ब्रह्मा, अनुमोदतामनुगृह्णातु । इतीत्थं, सर्वाः पृथक् प्रत्येकं, भावेन कृष्णे, हृदयं मनः, दधुः । श्रीकृष्णे चित्तं चक्रुरित्यर्थः ॥ ३५ ॥ ता इति । सुमृष्टानि शुद्धानि विरजांसि विगतमलान्यम्बराणि वासांसि यासां ताः, ताः स्त्रियः, नरयानैः द्वारवतीं प्रति, प्राहिणोत् । तथा, महाकोशान् रथाश्वान्, महत् द्रविणं च, प्राहिणोत् ॥ ३६ ॥

कृष्णप्रिया

भौमासुर के राजमहल में प्रवेश करते ही देखा कि भौमासुर ने राजाओं को पराजित करके बलात्कार से सोलह हजार राजकुमारियों को छीनकर राजमहल में कैद कर रखा है ॥ ३३ ॥ जब कारागृहग्रस्त राजकुमारियों ने भवन के भीतर पधारे हुए नरोत्तम भगवान् श्रीकृष्ण का दर्शन किया उसी क्षण सब कुमारियाँ मुग्ध हो गयीं । सभी कन्याओं ने अपना परम सौभाग्य माना और भगवान् की अहैतुकी अनुकम्पा का फल माना, पुनः अपना परम सौभाग्य मानकर अपने मन-ही-मन द्वारिकाधीश कृपानिधान भगवान् श्रीकृष्ण का अपने प्रियतम पति के स्वरूप में वरण कर लिया ॥ ३४ ॥ प्रत्येक कुमारिका ने पृथक् पृथक् अपने मन से ही यह मनोरथ किया कि श्रीद्वारिकाधीश भगवान ही मेरे पति हों और विश्वविधाता मेरे इस मनोरथ को सिद्ध करें—इस अनन्य भाव से भगवान् के श्रीचरणों में अपना सर्वस्व न्यौछावर किया ॥ ३५ ॥ पुनः भगवान ने सभी राजकुमारियों को दिव्य दुकूल एवं चित्राम्बरों के साथ उत्तम अलंकारों से समलङ्कृत करके पालकियों में बैठाकर श्रीद्वारिकापुरी भेज दिया । उन कन्या के साथ श्रेष्ठ कोश भण्डार उत्तम कक्षा के अश्व रथ आदि श्रेष्ठ समृद्धि भी भेज दिया ॥ ३६ ॥

ऐरावतकुलेभांश्च चतुर्दन्तांस्तरस्विनः[1] । [2]पाण्डुरांश्च चतुःषष्टिं प्रेषयामास केशवः[3] ॥ ३७ ॥
[4]गत्वा सुरेन्द्रभवनं दत्त्वादित्यै च कुण्डले । पूजितस्त्रिदशेन्द्रेण सहेन्द्राण्या[5] च स प्रियः ॥ ३८ ॥
नोदितो[6] भार्ययोत्पाट्य पारिजातं गरुत्मति । आरोप्य सेन्द्रान् विबुधान् निर्जित्योपानयत् पुरम् ॥ ३९ ॥
स्थापितः सत्यभामाया गृहोद्यानोपशोभनः । अन्वगुर्भ्रमराः स्वर्गात् तद्गन्धासवलम्पटाः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—ताः सुमृष्टाविरजाम्बराश्च भगवान् नरयानैः द्वारवतीम् प्राहिणोत्, तथा रथाश्वा द्रविणं महत् महाकोशान्नपि प्राहिणोत् केशवः, चतुर्दन्तान्, तरस्विनः, पाण्डुरान्, ऐरावतकुले भांश्च चतुर्षष्टि प्रेषयामास ॥ ३७ ॥ स प्रियः सुरेन्द्रभवनं गत्वा अदित्यै कुण्डले च दत्त्वा इन्द्राण्या सह त्रिदशेन्द्रेण, पूजितः, तत्र स्थितः ॥ ३८ ॥ भार्यया चोदितः पारिजातं उत्पाट्य गरुत्मति आरोप्य सेन्द्रान् विबुधान् निर्जित्य पुरम् उपानयत् ॥ ३९ ॥ समानीतः पारिजातः सत्यभामायाः गृहोद्यानोपशोभनः वृक्ष इति यावत् स्थापितः, स्वर्गात् तद्गन्धासवलम्पटाः भ्रमराः अन्वगुः ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सप्रियः सत्यभामासहितः ॥ ३८–३९ ॥ गृहोद्यानं निष्कुटं तदुपशोभयति यः ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पांडुराञ्छ्वेतवर्णान् । चतुःषष्टिं चतुःषष्टिसंख्याकान् ॥ चतुःषष्टिं चेति चकारात्तरस्विनोऽन्यांस्तावदूनषट्सहस्राणि चेति ज्ञेयम् । तदुक्तं वैष्णवे–"चतुर्दंष्ट्रान् गजांश्चोग्रान् षट्सहस्रान्स दृष्टवान् । कांबोजानां तथाश्वानां नियुतान्येकविंशतिम् ॥

---

[1] मदोत्कटान्–विज. । [2] भगदत्ताय दत्त्वैकं सुप्रतीकं ततोऽपरान् । विज. । [3] चतुःषष्टितमोऽध्यायः । [4] इत आरभ्याष्टौ न सन्ति–विज. । [5] महे–विज. । [6] चोदितो–श्रीधरादयः ।

कन्यास्ताश्च तथा नागांस्तानश्वान्द्वारकापुरीम्। प्रापयामास गोविन्दः सद्यो नरकिंकरैः।" इति। यच्च हरिवंशे रक्षिणामुक्तौ–"भीमरूपाश्च मातंगाः प्रबलाविद्धतांकुशाः। हेमसूत्रमहाकक्षाश्चापतोरणमालिनः॥ रुचिराभिः पताकाभिः सरला रुचिरांकुराः। ते च विंशतिसाहस्रा द्विस्तावत्यः करेणवः॥" इति। तच्च, चतुर्दंष्ट्रेतरसंग्रहादुक्तेभ्य आधिक्यं ज्ञेयम्। द्वितीयचकारात्तानपि प्रेषयामासेति ज्ञेयम्। एवं वारुणं छत्रं मणिपर्वतं च तत्र न प्रेषयामास किन्तु गरुडोपरि निधाय दिवं गत इति। तथा च तत्रैव–"तादृशं वारुणं छत्रं तथैव मणिपर्वतम्। आरोपयामास हरिर्गरुडे पतगेश्वरे॥" इति। श्रीहरिवंशे च–"ततस्तद्वारुणं छत्रं स्वयमुत्क्षिप्य माधवः। हिरण्यवर्षंवर्षंतुमारुरोह बिहङ्गमम्॥" इति। किञ्चाग्रे–"तस्य पर्वतराजस्य शृंगं यत्परमार्चितम्। विमलार्केन्दुसंकाशं मणिकांचनतोरणम्॥ सपक्षिगणमातंगं समृगव्यालपादपम्। शाखामृगगणाकीर्णं सुप्रशस्तशिलातलम्॥ न्यंकुभिश्च वराहैश्च रुरुभिश्च निषेवितम्। सप्रपातमहासानुं विचित्रशिखरद्रुमम्। अत्यद्भुतमचिंत्यं च मृगवृंदविलोडितम्। जीवंजीवकसंघैश्च बर्हिभिश्च निषेवितम्॥ तदप्यतिबलो विष्णुर्दोर्भ्यामुत्पाट्य भास्वरम्। आरोपयामास बली गरुडे पक्षिणां वरे॥ मणिपर्वतशृंगं च सभार्यं च जनार्दनम्। उवाह लीलया पक्षी गरुडः पततां वरः॥" इति ॥३७॥ सुरेन्द्रभवनगमनादिप्रकारविशेषश्च श्रीविष्णुपुराणे–"गरुडो वारुणं छत्रं तथैव मणिपर्वतम्। सभार्यं च हृषीकेशं लीलयैव वहन्ययौ॥ ततः शंखमुपाध्मासीत्स्वर्गद्वारगतो हरिः। उपतस्थुस्ततो देवाः सार्घपात्रा जनार्दनम्॥ स देवैरर्चितः कृष्णो देवमातुर्निवेशनम्। सिताभ्रशिखराकारं प्रविश्य ददृशे दितिम्॥ स तां प्रणम्य शक्रेण सह ते कुंडलोत्तमे। ददौ नरकनाशं च शशसास्यै जनार्दनः॥" इति। किञ्च–"अदित्या तु कृतानुज्ञो देवराजो जनार्दनम्। यथावत्पूजयामास बहुमानपुरःसरम्॥" इति। श्रीहरिवंशे च–"अर्चितो देवराजेन रत्नैश्च प्रतिपूजितः। सत्यभामा च पौलौम्या यथावदभिनंदिता॥" इत्यादि ॥ ३८ ॥ पारिजातलक्षणम्–"प्रवालमूलः सौवर्ण इंद्रनीलच्छदान्वितः। वैदूर्यवेदिको मुक्ताफलो माणिक्यपुष्पधृक्॥ गोमेदपक्वप्रवरो वज्रकिञ्जल्करंजितः। मरकतस्थूलशाखो हि पारिजातः प्रकीर्तितः॥" इति तीर्थः॥ भार्यया चोदित इत्यत्र विशेषः श्रीविष्णुपुराणे–"ददर्श च सुगंधाढ्यं मंजरीपुष्पधारिणम्। शच्याह्लादकरं ताम्रबालपल्लवशोभितम्॥ मथ्यमानेऽमृते जातं जातरूपसमत्वचम्। पारिजातं जगन्नाथः केशवः केशिसूदनः॥ तं दृष्ट्वा प्राह गोविंदं सत्यभामा द्विजोत्तमः। कस्मान्न द्वारकामेष नीयते देवपादपः॥ यदि ते तद्वचः सत्यं सत्यात्यर्थं प्रियेति मे। मद्गेहनिष्कुटार्थाय तदयं नीयतां तरुः॥ न मे जांबवती तादृगभीष्टा न च रुक्मिणी। सत्ये यथा त्वमित्युक्तं त्वया कृष्णाऽसकृत्प्रियम्॥ सत्यं तद्यदि गोविंद नोपचारकृतं वचः। तदस्तु कल्पवृक्षोऽयं मम निष्कुटभूषणम्॥ बिभ्रती पारिजातस्य केशपक्षेण मंजरीम्। सपत्नीनामहं मध्ये शोभेयमिति कामये॥" इति। निःशेषेण जित्वा पुरं द्वारकामुप दाक्षिण्येन निन्ये ॥३९॥ 'निष्कुटन्तु गृहोद्याने' इति मेदिनी। तस्य पारिजातस्य गंध एवाऽऽसवो मादकद्रव्यं तत्र लंपटा लोलुपाः 'लंपटो लोलुपे मत्ते' इति निरुक्तिः॥ पारिजातस्य माहात्म्यमाह–यद्गंधेति। तन्माहात्म्यमन्यच्च विस्तार्योक्तं तेनैव–"यमभ्येत्य जनः सर्वो जातिं स्मरति पौर्विकीम्। वास्यते यस्य पुष्पाणां गंधेनोर्वी त्रियोजनम्। ततस्ते यादवाः सर्वे देहबंधानमानुषान्। ददृशुः पादपे तस्मिन्कुर्वंतो मुखदर्शनम्॥" इति। हरिवंशे च–"नानाविधानि तूर्याणि गेयानि मधुराणि च। शुश्रुवुस्तस्य वृक्षस्य नातिदूरगता नराः॥ यो यं संकल्पयामास गंधं हृद्यं नरस्तथा। स तदैव समाजघ्रौ पारिजातसमुद्भवम्॥" इति। किञ्चाग्रे–"मनीषितेन स तरुरल्पो भवति भारत। सुमहान्वासुदेवस्य तदद्भुतमभून्महत्॥ कदाचिद्द्वारकां सर्वां प्रच्छादयति भारत। कदाचिद्धस्तधार्यश्च भवत्यंगुष्ठसंनिभः॥" इति। अत्र वारुणं छत्रमिंद्राय दत्तं, मणिपर्वतश्च द्वारकामानीत इति ज्ञेयम्। तथा च श्रीहरिवंशे–"प्रविवेश गृहं शौरिरादाय मणिपर्वतम्। तं च शक्रस्य दयितं पारिजातं महाद्रुमम्॥" इति ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

चतुष्षष्टिश्चेति चकारात् तरस्विन्योन्यान् तावदूनषट्सहस्राणि चेति ज्ञेयम्; तथा च श्रीविष्णुपुराणे—

"चतुर्दंष्ट्रान् गजांश्चोष्ट्रान् षट्सहस्रान् स दृष्टवान्। काम्बोजानां तथाऽश्वानां नियुतान्येकविंशतिम्॥
कन्यास्ताश्च तथा नागांस्तानश्वान् द्वारकापुरीम्। प्रापयामास गोविन्दः साद्यो नरककिङ्करैः" ॥ इति।

यच्च हरिवंशे रक्षिणामुक्तौ—

"भीमरूपाश्च मातङ्गाः प्रबलाविकृताङ्कुशाः। हेमसूत्रमहाकक्षाश्चापतोरणशालिनः ॥
रुचिराभिः पताकाभिः शबला रुचिराङ्कुशाः। ते च विंशतिसाहस्रा द्विस्तावत्यः करेणवः॥ इति।

तच्च चतुर्दंष्ट्रेतरसङ्ग्रहादुक्तेभ्य आधिक्यं ज्ञेयं। द्वितीयचकारात्तानपि प्रेषयामासेति ज्ञेयम् एवं वारुणं छत्रं मणिपर्वतं च तत्र न प्रेषयामास किन्तु गरुडोपरि निधाय दिवं गत इति ज्ञेयं तथाच तत्रैव।

"तादृशं वारुणं छत्रं तथैव मणिपर्वतम्। आरोपयामास हरिर्गरुडे पतगेश्वरे" ॥ इति।

श्रीहरिवंशे च—

ततस्तद्वारुणं छत्रं त्वयमुत्क्षिप्य माधवः। हिरण्यवर्षं कुर्वन्तमारुरोह विहङ्गमम्॥

किञ्चाग्रे—

तस्य पर्वतराजस्य शृङ्गं यत्परमार्चितम् । विमलार्केन्दुसङ्काशं मणिकाञ्चनतोरणम् ॥
सपक्षिगणमातङ्गं समृगव्यालपादपम् । शाखामृगगणाकीर्णं सुप्रस्तरशिलातलम् ॥
न्यङ्कुभिश्च वराहैश्च रुरुभिश्च निषेवितम् ॥ सप्रपातमहासानुं विचित्रशिखरद्रुमम् ॥
अत्यद्भुतमचिन्त्यञ्च मृगवृन्दविलोडितम् । जीवञ्जीवकसङ्घैश्च बर्हिभिश्च निषेवितम् ॥
तदप्यतिबलो विष्णुर्दोर्भ्यामुत्पाट्यभास्वरम् । आरोपयामास बली गरुडे पक्षिणांवरे ॥
मणिपर्वतशृङ्गञ्च सभार्यञ्च जनार्द्दनम् । उवाह लीलया पक्षी गरुडः पततां वरः ॥ इति ॥ ३७ ॥

सुरेन्द्रभवनगमनादिप्रकारविशेषश्च श्रीविष्णुपुराणे—

गरुडो वारुणं छत्रं तथैव मणिपर्व्वतम् । सभार्य्यञ्च हृषीकेशं लीलयैव वहन् ययौ ॥
ततः शङ्खमुपाध्मासीत् स्वर्गद्वारगतो हरिः । उपतस्तुस्ततो देवाः सार्घ्यपात्रा जनार्द्दनम् ॥
स देवैरर्च्चितः कृष्णो देवमातुर्निवेशनम् । सिताभ्रशिखराकारं प्रविश्य ददृशेऽदितिम् ॥
स तां प्रणम्य शक्रेण सह ते कुण्डलोत्तमे । ददौ नरकानशञ्च शशंसास्यै जनार्द्दनः ॥ इति ।

किञ्च—

अदित्या तु कृतानुज्ञो देवराजो जनार्द्दनम् । यथावत् पूजयामास बहुमानपुरस्सरम्" ॥ इति ।

श्रीहरिवंशे च—

अर्च्चितो देवराजेन रत्नैश्च प्रतिपूजितः । सत्यभामाच पौलम्या यथावदभिवन्दितः ॥ इत्यादि ॥ ३८ ॥

भार्य्यया चोचित इत्यत्र विशेषः श्रीविष्णुपुराणे—

ददर्श च सुगन्धाढ्यं मञ्जीरीपुष्पधारिणम् । शैत्याह्लादकरं ताम्रबालपल्लवशोभितम् ॥
मथ्यमानेऽमृते जातं जातरूपमयत्वचम् । पारिजातं जगन्नाथः केशवः केशिसूदनः ॥
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम । कस्मान्न द्वारकामेष नीयते कृष्ण पादपः ॥
यदि ते तद्वचः सत्यं सत्यात्यर्थं प्रियेति मे ॥ मद्गेहनिष्कुटार्थाय तदयं नीयतां तरुः ॥
न मे जाम्बवती तादृगभीष्टा न च रुक्मिणी ॥ सत्ये यथा त्वमित्युक्तं त्वया कृष्णासकृत्प्रियम् ॥
सत्यं तद्यदि गोविन्द नोपचारकृतं वचः ॥ ततस्तु पारिजातोऽयं मम निष्कुटभूषणम् ॥
बिभ्रती पारिजातस्य केशपक्षेण मञ्जरीम् ॥ सपत्नीनामहं मध्ये शोभेयमिति कामये ॥ इति ।

निश्शेषेण जित्वा पुरं द्वारकामुपदाक्षिणोनानयत् ॥ ३९ ॥

पारिजातस्य माहात्म्यमाह—यद्गन्धेति । तन्माहात्म्यमन्यच्च विस्तार्योक्तं तेनैव—

यमभ्येत्य जनः सर्वो जातिं स्मरति पौर्विकीम् । वास्यते यस्य पुष्पाणां गन्धेनोर्वी त्रियोजनम् ॥
ततस्ते यादवाः सर्वे देहबन्धानमानुषान् । ददृशुः पादपे तस्मिन् कुर्वन्तो मुखदर्शनम् ॥ इति ।

श्रीहरिवंशे च—

नानाविधानि तूर्य्याणि गेयानि मधुराणि च । शुश्रुवुस्तस्य वृक्षस्य नातिदूरगता नराः ॥
योऽयं सङ्कल्पयामास गन्धं हृद्यं नरस्तथा । स तदेव समाजघ्रौ पारिजातसमुद्भवम् ॥ इति ।

किञ्चाग्रे—

मनीषितेन स तरुरल्पो भवति भारत । सुमहान् वासुदेवस्य तदद्भुतमभून्महत् ॥
कदाचिद्द्वारकां सर्वां प्रच्छादयति भारत । कदाचिद्धस्तधार्य्यश्च भवत्यङ्गुष्ठसन्निभः ॥ इति ।

अत्र वारुणं छत्रमिन्द्राय दत्तं मणिपर्वतस्तु द्वारकामानीत इति च ज्ञेयं तथाच श्रीहरिवंशे—

प्रविवेश गृहं शौरिरादाय मणिपर्वतम् । तं शक्रस्य दयितं पारिजातं महाद्भुतम् ॥ इति ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

चतुःषष्टिश्चेति चकारात् तरस्विभ्योऽन्यान् तावदुनषट्सहस्राणि चेति ज्ञेयम् । तथा च श्रीविष्णुपुराणे (५।२९।३२-३३)

'चतुर्दंष्ट्रान् गजांश्चोग्रान् षट्सहस्रान् स दृष्टवान् । काम्बोजानां तथाश्वानां नियुतान्येकविंशतिम् ॥
कन्यास्ताश्च तथा नागांस्तानश्वान् द्वारकापुरीम् । प्रापयामास गोविन्दः सद्यो नरककिंकरैः ॥' इति ।

यच्च श्रीहरिवंशे रक्षिणामुक्तौ (विष्णु० प० ६४।११,१२,१३)—

‘भीमरूपाश्च मातंगाः प्रवालविकृतांकुशाः। हेमसूत्रा महाकक्षाश्चापतोमरशालिनः ॥
रुचिराभिः पताकाभिः शवला रुचिरांकुशाः। ते च विंशतिसाहस्रा द्विस्तावत्यः करेणवः ॥’ इति।

तच्च चतुर्दंष्ट्रेतरसंग्रहानुक्तेभ्य आधिक्यं ज्ञेयम्। चकारादेव तानपि प्रेषयामासेति च। द्वारवत्यां प्रेषणे हेतुः—माधवो मधुकुलोद्भव इति यादवानामानन्दार्थमिति भावः ॥ ३७ ॥

एवं वारुणच्छत्रं मणिपर्व्वतञ्च तत्र न प्रेषयामास, किन्तु गरुडोपरि निधाय दिवं गत इति ज्ञेयम्। तथा च तत्रैव विष्णुपुराणे (५।२९।३४)—‘ददृशे वारुणं छत्रं तत्रैव मणिपर्वतम्। आरोपयामास हरिर्गरुडे पतगेश्वरे ॥’ इति। श्रीहरिवंशेऽपि (विष्णु० प० ६४–१९)–‘ततस्तद्वारुणं छत्रं स्वयमुत्क्षिप्य माधवः। हिरण्यवर्षं वर्षन्तमारुरोह विहंगमम् ॥’ किञ्चाग्रे (विष्णु-प० ६४।३९–४४)—

‘तस्य पर्व्वतराजस्य शृंगं यत् परमार्च्चितम्। विमलार्केन्दुसंकाशं मणिकाञ्चनतोरणम् ॥
सपक्षिगणमातंगं समृगव्यालपादपम्। शाखामृगगणाकीर्णं सुप्रस्तरशिलातलम् ॥
न्यंकुभिश्च वराहैश्च रुरुभिश्च निषेवितम्। सप्रपात–महासानुं विचित्रशिखरद्रुमम् ॥
अत्यद्भुतमचिन्त्यञ्च मृगवृन्द–विलोडितम्। जीवं जीवकसङ्घैश्च बर्हिभिश्च निषेवितम् ॥
तदप्यतिबलो विष्णुदोर्भ्यामुत्पाट्य भास्वरम्। आरोपयामास बली गरुडे पक्षिणां वरे ॥
मणिपर्व्वतशृंगञ्च सभार्य्यञ्च जनार्द्दनम्। उवाह लीलया पक्षी गरुडः पततांवरः ॥’ इति।

चकाराद्वारुणच्छत्रं मणिपर्वतञ्च भौमकिंकरैर्वोढुमशक्यं श्रीगरुडोपर्य्येव निधाय स्वसंगत्या द्वारकायामानयदिति श्रीहरिवंशोक्त्यनुसारेण ज्ञेयम्। तथा च तत्र पारिजातहरणानन्तर-द्वारकाप्रवेशे—‘प्रविवेश गृहं शौरिरादाय मणिपर्व्वतम्। तञ्च शक्रस्य दयितं पारिजातं महाद्रुमम् ॥’ इति, किञ्च—‘ततोऽन्तःपुरमध्ये तं सशृंगं मणिपर्वतम्। न्यवेशयदमेयात्मा वृष्णिभिः सहितोऽच्युतः ॥’ इति। सुरेन्द्रभवनगमनादिप्रकारविशेषश्च श्रीविष्णुपुराणे (५।३०।१–४)—

‘गरुडो वारुणं छत्रं तथैव मणिपर्वतम्। सभार्य्यञ्च हृषीकेशं लीलयैव वहन् ययौ ॥
ततः शङ्खमुपाध्मासीत् स्वर्गद्वारं गतो हरिः। उपतस्थुस्ततो देवाः सार्घ्यपात्रा जनार्द्दनम् ॥
स देवैरर्च्चितः कृष्णो देवमातुर्निवेशनम्। सिताभ्रशिखराकारं प्रविश्य ददृशेऽदितिम् ॥
स तां प्रणम्य शक्रेण सह ते कुण्डलोत्तमे। ददौ नरकनाशञ्च शशंसास्यै जनार्द्दनः ॥’ इति।

किञ्च, (वि० पु० ५।३०।२८)—‘अदित्या तु कृतानुज्ञो देवराजो जनार्द्दनम्। यथावत् पूजयामास बहुमानपुरःसरम् ॥’ इति। श्रीहरिवंशे च (विष्णु० प० ६४।५३)—‘अर्च्चितो देवराजेन रत्नैश्च प्रतिपूजितः। सत्यभामा च पौलोम्या यथावदभिनन्दिता ॥’ इत्यादि ॥ ३८ ॥

भार्यया चोदित इत्यत्र विशेषः श्रीविष्णुपुराणे (५।३०।३०–३६)—

‘ददर्श च सुगन्धाढ्यं मञ्जरीपुष्पधारिणम्। शच्याह्लादकरं ताम्रबालपल्लवशोभितम् ॥
मथ्यमानेऽमृते जातं जातरूपमयत्वचम्। पारिजातं जगन्नाथः केशवः केशिसूदनः ॥
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम। कस्मान्न द्वारकामेष नीयते कृष्ण पादपः ॥
यदि ते तद्वचः सत्यं सत्यात्यर्थं प्रियेति मे। मद्गेहनिष्कुटार्थाय तदयं नीयतां तरुः ॥
न मे जाम्बवती तादृगभीष्टा न च रुक्मिणी। सत्ये यथा त्वमित्युक्तं त्वया कृष्णा सकृत् प्रियम् ॥
सत्यं तद्यपि गोविन्द नोपचारकृतं वचः। तदस्तु नारिजातोऽयं मम निष्कुटभूषणम् ॥
बिभ्रती पारिजातस्य केशपक्षेण मञ्जरीम्। सपत्नीनामहं मध्ये शोभेयमिति कामये ॥’ इति।

निःशेषेण जित्वा पुरं द्वारकामुप दाक्षिण्येनानयत्, तद्युद्धञ्च पितामहेन श्रीपराशरेण बहुशो वर्णितत्वादत्र न विस्तारितम् ॥ ४० ॥ पारिजातस्य माहात्म्यमाह—यस्य गन्धासवयोर्लम्पटाः सन्तो भ्रमरा इतस्ततो भ्रमणशीला अतिचञ्चला अपि स्वर्गात्तमन्वगमन्निति तन्माहात्म्यम्, अन्यच्च विस्तार्य्योक्तं तेनैव (वि० पु० ५।३१।११–१२)—

‘यमभ्येत्य जनः सर्वो जातिं स्मरति पौर्व्विकीम्। वास्यते यस्य पुष्पाणां गन्धेनोर्व्वी–त्रियोजनम् ॥
ततस्ते यादवाः सर्व्वे देहबन्धानमानुषान्। ददृशुः पादपे तस्मिन् कुर्वन्तो मुखदर्शनम् ॥ इति,

श्रीहरिवंशे च (विष्णु० प० ७५।५८–५९)—

‘नानाविधानि तूर्य्याणि गेयानि मधुराणि च। शुश्रुबुस्तस्य वृक्षस्य नातिदूरं गता नराः ॥
यो यं संकल्पयामास गन्धं हृद्यं नरस्तथा। स तदेव तमाजघ्रे पारिजातसमुद्भवम् ॥’ इति।

किञ्चाग्रे (विष्णु० प० ७५।६५-६६)—

'मनीषितेन स तरुरल्पो भवति भारत। सुमहान् वासुदेवस्य तदद्भुतमभून्महत् ॥
कदाचिद्द्वारकां सर्वां प्रच्छादयति भारत। कदाचिद्धस्तहार्य्यश्च भवत्यं गुण्ठसन्निभः ॥' इति।

यच्च श्रीद्वारकानिर्म्माणप्रसंगे प्रागुक्तम् (भा० १०।५०।५४)—'सुधर्म्मां पारिजातञ्च महेन्द्रः प्राहिणोद्धरेः' इति तत्समाधानं तैः कृतमेव, यद्वा, पारिजातस्यास्य महेन्द्रेण प्रस्थापनात् स्वयमेव श्रीभगवता बलादानयनाच्च, तथा श्रीहरिवंशेऽपि बारद्वयं तदुक्तेश्च स्वल्पबहुलप्रभावत्वादिना, किंवा सर्वसामान्यता श्रीसत्यभामैकस्वाम्यादिना भेदः कल्प्यः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

ऐरावतेति। चत्वारो दन्ता येषां तान् तरस्विनः बलीयसः ऐरावतकुलोद्भवान् अत एव पाण्डुरांश्चतुष्षष्टिसङ्ख्याकान् प्रेषयामास ॥ ३७ ॥ गत्वेति। सप्रियः ससत्यभामः इन्द्राण्या शच्या पूजितः भार्यया सत्यभामया चोदितः प्रेरितः पारिजातं तरुमुत्पाट्य गरुत्मति आरोप्य सेन्द्रान् देवान् युद्धे निर्जित्य पुरं द्वारकां प्रति प्रापयामास ॥ ३८—३९ ॥ स च तरुः स्थापितः आलवाल इति शेषः। सत्यभामाया गृहारामे शोभावहो बभूव तस्य सौरभमकरन्दयोर्लोलुपाः भ्रमराः स्वर्गादन्वगच्छन् सेन्द्रान् विबुधान्निर्जित्येतीन्द्रकृष्णयोः पारिजातार्थः सङ्ग्राम उक्तः ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वंश्ये वंशप्राप्ते तत्पदे अमात्यपदे श्रेणीं पङ्क्तिं शालां वा ॥ एरावतकुले जातानिभान् पाण्डुरान् श्वेतदेहान् ॥३७-४५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

(श्रीविजयध्वजतीर्थरीत्या चतुष्षष्टितमः) ॥ ६४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भार्यया सत्यभामया प्रेरितस्सन् ॥ ३९ ॥ स्थापितः पारिजातवृक्षः गृहान्तस्थितमुद्यानमुपशोभयतीति सः ॥ ४० ॥

गूढार्थदीपिनी

ताः कन्याः। सुमृष्टाः स्नापिताः कमनीयवस्त्राश्च कृत्वा। प्राहिणोत् प्रेषयामास। नरयानैः शिबिकाभिः। तथा महत् बहुमूल्यं द्रविणं रत्नादिकं च प्राहिणोत् ॥३७॥ पाण्डुरान् श्वेतवर्णान्। चादन्यानपि ॥३८॥ सप्रियः सत्यभामासहितः ॥३९-४०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रियया सहितः सप्रियः ॥ ३८-३९ ॥ गृहोद्यानमुपशोभयतीति सः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

महाकोशान्द्रविणमुपविद्यमानं। ऐरावतकुलजगजान् चत्वारो दन्ता येषां ते तान् तदर्थं कुबेरो भगदत्तोऽभवत्तस्मै न भगवद्दत्तः स इति नेत्याह। भगदत्तायैकं सुप्रतीकं तन्नामानं नागं दत्वा। अपरान्पाण्डुरांश्च चतुःषष्टिं केशवः प्रेषयामासेति ॥ ३७ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे चतुःषष्टिरध्यायः ॥ १०—६४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

विशेषतः स्वार्थमेव गजान् प्रेषितवानित्याह **ऐरावतकुलेभांश्चेति**। यस्मिन् कुले ऐरावत उत्पन्नः तत्कुलोत्पन्नाः। तेषामितरवैलक्षण्यमाह। **चतुर्दन्ता**निति रूपवैलक्षण्यम्। **तरस्विन** इति स्वभाववैलक्षण्यं च। चकारादुच्चैःश्रवसः कुलप्रसूतान् अश्वानपि प्रेषयामासेति। **पाण्डुरानन्यांश्च**। चतुर्दन्तत्वं वेगवत्त्वं च मृगादिजातिष्वपि वर्तत इति तद्व्यावृत्त्यर्थं पाण्डुरत्वम्। अन्येऽप्येतादृशा एव, तैः सह निर्दिष्टत्वात्परमं वैजात्यं भेदकम्। तत्र दन्तादिषु वैलक्षण्यं कल्प्यम्। **चतुःषष्टि**मिति कलारूपत्वं तेषां बोधितम्। **केशव** इति। महादेवभक्तत्वात्तद्वरेणैतावत्त्वं तस्य जातमिति कदाचिन्महादेवोऽतुष्टो भवेदित्याशङ्क्याह **केशव** इति। केशयोरपि सेव्यः ॥ ३७ ॥ ततस्तत्रत्यं कार्यं कृत्वा यदर्थमागत इन्द्रप्रेरणया तत्कृतवानित्याह **गत्वेति**। **सुरेन्द्रभवनं** स्वर्गस्थानम्, तत्रैव स्थितायै अदित्यै कुण्डले दत्वा। अदित्या भोगरूपं तत्रास्ते। क्रियारूपा त्वंशेन देवकी जाता। चकारादिन्द्रायापि छत्रादिकं दत्तवान्। ततस्त्रिदशेन्द्रेण पूजितः। त्रिदशपदं तेषां जरामृत्युरहितानामिन्द्रेण तेभ्योऽपि परमैश्वर्यदानसमर्थेन

स्वामित्वेन पूजित इति भगवदुत्कर्ष**:** सत्यभामायै प्रदर्शितः। सभार्यो भगवान् गत इति सभार्येणैव पूजित**:**। अन्यथा लोके विरुद्धमिव भवेत्। पूजायां सत्यभामाया वा न प्रवेशः स्यात्। चकाराद्देवैः देवपत्नीभिश्च। ननु भगवान् सर्वेश्वर इतीन्द्रादिभिः पूज्यते, सत्यभामा कथं पूजितेत्याशङ्क्याह **सप्रिय** इति। प्रियया सहितः। भगवत्प्रियत्वात् सापि पूजिता। अन्यथा भगवान् प्रीतो न भवतीति॥ ३८॥ तत**:** स्त्रीगोष्ठ्यां शच्या सह वार्तायां पारिजातपुष्पाकाङ्क्षायां मनुष्यत्वेन शच्या अपकर्षे निरूपिते बहिर्मुखाया वचनमसहमानया प्रार्थितो भगवान् पारिजातमानीतवानित्याह **नोदित** इति। ततो भगवान् पारिजातसमीपे गत्वा सभार्यो गरुडारूढः तं पारिजातमुत्पाट्य नरकगृहवत्तत्रापि भगवति विद्यमाने सर्वोत्कृष्टं स्थातुमयुक्तमिति तत्पुनर्गरुडे समारोप्य सोम इव भूमावानीतवान्। तदिन्द्रादीनामनभिप्रेतमिति सेवका लीलानुसारेणैव स्वामिनः स्वकार्यं कर्तुं युक्ता इति सिद्धान्तमज्ञात्वा अस्मभ्यं दत्तं कथं हरतीति समागता युद्धं कर्तुम्। तदा सेन्द्रान् विबुधान् जित्वा तेषां प्रतिबन्धं निराकृत्य पुरं द्वारकामुपानयत्। न तु मध्ये त्यक्त्वा समागतो, दत्वा वा प्रार्थनायां कदाचिन्नानयेत्। मतान्तरभाषेयमिति पूर्वमेवावोचाम॥ ३९॥ ततः स्त्रीवाक्यात् स्त्र्यर्थमेव तत्समानीतमिति ज्ञापयितुं सत्यभामाया गृहे स्थापितवानित्याह **स्थापित** इति। गृहमुद्यानं च उप समीपे शोभयतीति। उभयोः शोभनं वा यस्मादिति गृहोद्यानोपशोभन**:**। गृहोद्यानयोर्मध्ये स्थापितः। तस्य पारिजातस्य सर्वोत्कर्षमाह **अन्वगुर्भ्रमरा: स्वर्गा**दिति। स्वर्गमपि परित्यज्य तस्य यो गन्धः आसवः, रसश्च गन्ध एव वा, आसवो मादक**:**, तस्मिन् **लम्पटा:** विवेकेनापि तत्त्यागासमर्था**:**। किञ्च। नाम्ना ते भ्रममरणयुक्ताः, स्वर्गे तु तदुभयाभावः। तथापि समागता इति विषयोत्कर्ष उक्तः॥ ४०॥

श्रीसुबोधिनी–सारः

चतुःषष्टिम् ऐरावतकुलजातान् हस्तिनः चतुर्दंतान् चत्वारो दंता येषां तान् तरस्विनो वेगशालिन**:** पांडुरवर्णान् केशवः प्रेषयामास॥ ३७॥ सुरेंद्रगृहं गत्वाऽदित्यै कुण्डले चाद्वरुणाय छत्रं कुबेराय मणिपर्वतस्थानं दत्त्वा इन्द्रेण इंद्राण्या चादन्यैर्देवै**:** सप्रियः सत्यभामासहितः स श्रीकृष्णः पूजितः॥ ३८॥ स्त्रीवश्यतां सूचयति। भार्यया स्त्रिया नोदित**:** प्रेरितः पारिजातं कल्पवृक्षमुत्पाट्य गरुडे आरोप्य सेन्द्रानिंद्रसहितान् विबुधान् देवान् निर्जित्य पुरं द्वारकामानीतवान्॥ ३९॥ सत्यभामाया गृहोद्यानं निष्कुटं शोभयतीति तथा स्थापितः तस्य तरोर्गंधस्यासवे मकरन्दे लम्पटा लाषुका भ्रमराः स्वर्गादन्वगुः पृष्ठतः आययुः॥ ४०॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

ऐरावतेत्यत्र। **अन्येपी**ति। पाण्डुरेभ्योऽन्ये श्यामा गजा अपि तरस्विन इत्यर्थः। **तत्र दन्तादिष्वि**ति। मृगादिषु चतुर्दन्तत्वेपि दन्तादिषु गजाद्वैलक्षण्यमित्यर्थ**:**।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वरणप्रकारं दर्शयति—भूयादिति। अयं मह्यं मम पतिर्भूयात्, तवेतन्मम अभिमतं धाता परमेश्वरोऽनुमोवतां सत्यं करोतु। पृथक् प्रत्येकं सर्वास्ता इत्येवं भूतेन भावेनाभिप्रायेण कृष्णे हृदयं दधुः॥ ३७॥ सुमृष्टा**:** स्नापिताश्च विरजाम्बराश्च ताः स्त्रियो भगवान् नरयानैः शिबिकाभिर्द्वारवतीं प्राहिणोत् प्रस्थापयामास। तथा रत्नादिपूर्णान् महाकोशान्, तथा रथादीन्, महद्विपुलं धनं च प्राहिणोत्॥ ३८॥ चत्वारो दन्ता येषां तान् तरस्विनः वेगवत्तरान् पाण्डुरान् चतुःषष्टिसङ्ख्याकान् ऐरावतकुलोद्भवान् इभांश्च केशवः ब्रह्मरुद्रयोरपि नियन्ता कृष्णो द्वारवतीं प्राहिणोदित्यन्वयः॥ ३९॥ सप्रियः सत्यभामासहितः श्रीकृष्णः सुरेन्द्रभवनं गत्वा अदित्यै च कुण्डले दत्त्वा त्रिदशेन्द्रेण देवेन महेन्द्राण्या च पूजितः॥ ४०॥

अन्वितार्थप्रकाशिका

ता इति। सुमृष्टाः स्नापिताश्च विरजोऽम्बराश्च कृत्वा ताः स्त्रियो भगवान् नरयानै**:** शिबिकाभिर्द्वारवतीं प्राहिणोत् प्रस्थापयामास। तथा महाकोषादीनपि प्राहिणोत्॥ ३७॥ ऐरावतेति। चत्वारश्चत्वारो दन्ताः येषां तान् तरस्विनः वेगवत्तरान् पाण्डुरान् श्वेतान् चतुःषष्टिसंख्याकान् ऐरावतकुलोद्भवान् इभांश्च चकारादन्येऽपि गजाश्वादयो हरिवंशात् ज्ञेया**:**। केशवः कृष्णो द्वारवतीं प्राहिणोत्॥ ३८॥ गत्वेति। सप्रियः सत्यभामासहितः श्रीकृष्णः सुरेन्द्रभवनं गत्वा अदित्यै च कुण्डले दत्त्वा चकारादिन्द्राय छत्रं दत्त्वा तत्र स्थित**:** त्रिदशेन्द्रेण देवेन सहेन्द्राण्या च पूजितः॥ ३९॥ नोदित इति। भार्यया सत्यभामया नोदितः सन् तत्रत्यं पारिजाताख्यं तरुमुत्पाट्य गरुत्मति आरोप्य सेन्द्रान् विबुधान् युद्धे निर्जित्य पुरं द्वारकां प्रत्युपानयत्॥ ४०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स प्रियः प्रियया सत्यभामया सहितः॥ ३८॥ गरुत्मति गरुडे॥३९॥ तस्या पारिजातस्य गंधे आसवे रसे च लपटाः। अन्वगुः अन्वागच्छंति स्म॥ ४०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ऐरावतेति ॥ केशवः, चतुर्दन्तान् पाण्डुरान् श्वेतान्, तरस्विनो महाबलांश्च, चतुःषष्टिं चतुःषष्टिसंख्याकान्, ऐरावतकुलेभांश्च, प्रेषयामास ॥ गत्वेति ॥ ततः, सुरेन्द्रभवनं स्वर्गं गत्वा प्राप्य, अदित्यै कुण्डले दत्त्वा च, स्थितः कृष्णः, सप्रियः सभार्यः पत्न्या सहित एवेत्यर्थः। त्रिदशेन्द्रेण देवाधिपतिना शक्रेण, महेन्द्राण्या च, पूजितः ॥ ३८ ॥ नोदित इति ॥ भार्यया सत्यभामया, नोदितः संप्रेरितः कृष्णः, पारिजातं उत्पाट्य, गरुत्मति गरुडे, आरोप्य, सेन्द्रान् इन्द्रसहितान्, विबुधान् देवान्, निर्जित्य, पुरं द्वारकां, उपानयत् प्रापयामास ॥ ३९ ॥ स्थापित इति ॥ स तरुरिति शेषः। सत्यभामायाः गृहोद्यानमुपशोभयतीति तथाभूतः, स्थापितः आलवाल इति शेषः। तद्गन्धासवलम्पटाः तस्य सौरभमकरन्दयोर्लोलुभाः, भ्रमराः स्वर्गात्, अन्वगुः अन्वगच्छन् ॥ ४० ॥

कृष्णप्रिया

श्वेतवर्ण के इन्द्र के ऐरावत गजराज के वंश में प्रकट हुए एवं चार दाँत वाले चौसठ हाथिओं को भी भगवान् ने द्वारिका भेज दिया ॥ ३७ ॥ पुनः पुरुषोत्तम श्रीकृष्ण वहाँ से स्वर्ग नगरी में इन्द्र राज के दिव्य महलों में पधारे देवराज इन्द्र ने अपनी पत्नी इन्द्राणी शची देवी के साथ श्रीसत्यभामाजी और भगवान् का अर्चन किया ॥ ३८ ॥ जब भगवान् अमरावती से द्वारावती पधार रहे थे तब श्रीसत्यभामाजी की इच्छा का आदर करते हुए श्रीकृष्ण प्रभु ने पारिजातक तरुवर को उखाड़ कर गरुड़जी के पीठ पर रख लिया। राजकृत इन्द्र ने भगवान् से संघर्ष किया। भगवान् ने इन्द्र के साथ सर्व देवों को और इन्द्र को जित एवं लज्जित बनाकर तरुवर को लेकर द्वारिका की ओर प्रस्थान किया ॥ ३९ ॥ पारिजात तरु को भगवान् ने सत्यभामाजी के भवन के उद्यान में लगा दिया। इस तरुवर ने उद्यान एवं महल की सुषमा बढ़ायी। इन्द्र के उद्यान में कल्पतरु के गन्ध एवं मकरन्द में लुप्त जो भ्रमर थे वे स्वर्ग को छोड़कर द्वारिका आ गये ॥ ४० ॥

ययाच आनम्य किरीटकोटिभिः पादौ स्पृशन्नच्युतमर्थसाधनम्।
सिद्धार्थ एतेन विगृह्यते महानहो सुराणां च तमो धिगाढ्यताम् ॥ ४१ ॥
अथो मुहूर्त एकस्मिन् नानागारेषु ताः स्त्रियः। यथोपयेमे भगवांस्तावद्रूपधरोऽव्ययः ॥ ४२ ॥
गृहेषु तासामनपाय्यतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थितः।
रेमे रमाभिर्निजकामसम्प्लुतो[1] यथेतरो[2] गार्हकमेधिकांश्चरन् ॥ ४३ ॥[3]
इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः पदवीं यदीयाम्।
भेजुर्मुदाविरतमेधितयानुराग[4]हासावलोकनवसंगमजल्पलज्जाः ॥ ४४ ॥
प्रत्युद्गमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगन्धमाल्यैः।
[5]केशप्रसारशयनस्नपनोपहार्यै[6]र्दासीशता अपि विभोर्विदधुः स्म दास्यम् ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे[7] दशमस्कन्धे पारिजातहरणनरकवधो[8] नाम[9] एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

कर्दमक्षमा

अन्वयः—इन्द्रः प्रथमं मूर्द्धानमानम्य किरीटकोटिभिः पादौ स्पृशन् अर्थसाधनम्, अच्युतम्, ययाचे, पश्चात् सिद्धार्थः सन् महान् अपि एतेन विगृह्यते, अहो सुराणाम् तमः धिक् आढ्यताञ्च धिक् ॥ ४१ ॥ अथ एकस्मिन् एव मुहूर्ते ताः स्त्रियः नानागारेषु तावद्रूपधरः अव्ययः भगवान् यथा उपयेमे ॥ ४२ ॥ तासां निरस्तसाम्यातिशयेषु गृहेषु अवस्थितः गार्हकमेधिकान् चरन् अतर्क्यकृत् यथेतरः निजकामसम्प्लुतः (वशीकृतः) अनपायी भगवान् कृष्णः, रमाभिः रेमे ॥ ४३ ॥ ताः स्त्रियः इत्थम् यदीयां पदवीम् ब्रह्मादयोऽपि न विदुः तं रमापतिम् पतिम् अवाप्य अविरतमेधितया हासावलोकनवसङ्गम-

---

१. धाम-वीर. । २. गार्हमेधिकां-वीर. ।

३. स्वदारेषु पृथग् भावो भक्तचित्तानुवर्तितः। अनन्तस्याद्वितीयस्य किं नु चित्रं गुरुद्विषः ॥ १ ॥
योगेश्वरेश्वरः कृष्णो भक्तैरद्यापि लक्ष्यते। अन्तर्बहिः समन्ताच्च शतधा च सहस्रधा ॥ २ ॥-विज. ।

४. विरह-वीर. । ५. ध-वीर. ६. रैः-वीर. । ७. पारमहंस्यां संहितायां-प्रा. पा. । ८न्धे उत्तरार्धे पारिजातहरणं नरकवध एको-प्रा. पा. । ९. चतुः षष्टितमो-विज. ।

जल्पलज्जा ताः मुदा अविरतम् भेजुः ॥४४॥ दासीशता अपि ताः प्रत्युद्गमासनवरार्हणपादशौच ताम्बूलविश्रमणवीजनगन्ध-माल्यैः केशप्रसारशयनस्नपनोपहार्यैः विभोः, दास्यम् विदधुस्म ॥ ४५ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायामुत्तरार्द्धे एकोनषष्टितमोऽध्यायाः अन्वयाः समाप्ताः ॥ ५९ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सेन्द्रान्विबुधान्निर्जित्येतींद्रकृष्णयोः संग्राम उक्तस्तत्र ननु कथं प्रसाधितस्वमनोरथेन श्रीकृष्णेन महेन्द्रस्य संग्राम इत्याह यथाच इति । अच्युतमर्थसाधनमिति च कर्मद्वयं याचति धातोः विगृह्यते विग्रहं करोति महानपि तमः क्रोधः। आढ्यतां धनिकतां धिगिति ॥ ४१ ॥ यथा यथावत् । अनेन देवक्यादिबंधुजनसमागमोऽपि प्रतिगृहं यौगपद्येन सूचितः । अव्ययः सर्वत्रापि संपूर्ण एव ॥ ४२ ॥ अहो भाग्यं नारीणामित्याह त्रिभिः । गृहेष्विति । अतर्क्याणि कर्माणि करोति तथा सः निरस्तं साम्यमतिशयश्च यैरन्येषां तेषु गृहेष्वनपाय्यवस्थितः । रमाभिर्लक्ष्म्या अंशभूताभिः निजकामसंप्लुतः स्वानंदपरिपूर्णः । गार्हकमेधिकान् गृहस्थधर्मान् ॥ ४३ ॥ अनुरागं हाससहितमवलोकं च तत्पूर्वकं नवसंगमं च तद्गतं जल्पं च तस्मिन् लज्जां च भेजुः ॥ ४४ ॥ विश्रमणं पादसंवाहनम् । केशप्रसारः केशप्रसाधनम् । दासीनां शतानि विद्यंते यासां तथाभूता अपि स्वयं विभोर्दास्यं विदधुः ॥ ४५ ॥

इति श्रीमद्भागवते दशमस्कंधे उत्तरार्द्धे श्रीध० टीकायामेकोनषष्टितमोऽध्यायः ॥ ५९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अर्थसाधनायेति चतुर्थ्याः "अकथितं च" इति कर्मत्वम् । एतेन कृष्णेन सह । विगृह्यत इति कर्मकर्तरि प्रयोग इत्यभिप्रेत्यैव स्वामिचरणैर्विग्रहं करोतीति व्याख्यातम् । यद्वा—एतेनेन्द्रेण महानपि श्रीकृष्णो विगृह्यते विग्रहविषयीक्रियत इत्यर्थः । 'आढ्य इभ्यो धनी श्रीमान्' इति कोशात् । धिग्योगे द्वितीया ॥ सेद्रान्विबुधान्निर्जित्येत्युक्तम्, तत्र स्वार्थसाधकेनापि स्वेष्टदेवेनापि श्रीकृष्णेन सहेंद्रस्य युद्धं श्रुत्वातिविस्मितं राजानं प्रतींद्रदौरात्म्यमाह—यथाच इति । अर्थसाधनं स्वार्थसाधकं कृष्णं ययाचे-नरकं हत्वा कुंडलादीन्यानीय देहीति प्रार्थ्यते स्म । सिद्धार्थः प्राप्तकुंडलादिकः सन्नेतेन कृष्णेन सह । विगृह्यते इत्यार्षम् । विगृह्णाति विग्रहं करोति, तत्रापि महान्सुरेशः सन् अहो आश्चर्यं सुराणामपि तमः क्रोधः, सात्त्विकानां तेषामिदमत्यसंभवमिति भावः । तत्रापि सुरेशस्य तस्य, तस्मादाढ्यतां धनिकत्वं धिक्, आढ्यता हि कंकमसंभवमप्यनर्थंनोत्पादयतीति भावः ॥ ४१ ॥ अथो नरकवधोत्तरस्त्रयानयनानंतरम् । अनेन यथावदिति कथनेन । संकल्पमात्रेणानंतब्रह्मांडस्रष्टुर्निजसंबंध्यनेककिरणं नाद्भुतमिति भावः । अव्ययत्वात्तस्य सर्वसर्जनसामर्थ्यमस्तीति । अव्ययपदेऽकारो ब्रह्मविष्णुरुद्रवाचकः । 'ओं विष्णुः शंकरो ब्रह्मा' इति सौभरिकोशात् । उकारेण लोकपालाः, ईकारेण लक्ष्म्याद्या उक्ताः सौभरिणैव । तेषामय उत्पत्तिस्थानलयाधिकरणरूपः । अकारात्परोकारस्थाने वादेशे ईकारस्थाने यादेशे च कृतेऽव्य इति भवति । तथा च अश्च उश्च ई च अव्यस्तासामयोऽव्ययः "सावित्री पार्वती लक्ष्मीस्सर्वा देवांगनाश्च याः । ईवाचका लोकपाला उकारेणोदिता इह ॥ उत्पत्त्यादित्रये प्राप्तौ शुभावहविधावयः ।" इति व्याडिः । एतेन श्रीकृष्ण एव सर्वेषामुत्पत्त्यादिकर्तेति ध्वनितम् । श्रीमद्भागवतस्य 'पुराणं ब्रह्मसंमितम्' इत्युक्तेर्वेदरूपत्वाद्वेदस्य च मंत्ररूपत्वान्मंत्रेषु वर्णानामपि वाचकत्वमस्ति यथा—"वियद्भृगुस्थमनुयुग्" इत्यादौ वियत् 'हः', भृगुः 'सः', मनुः 'औः' तेन विसर्गाढ्यं च सत् 'हौः' भवति । यथा—'दामोदरश्चंद्रयुतः' इति, 'विधिर्वासवशांतीन्दुयुक्तम्' इत्यादि । अत्र दामोदरः 'ऐ', बिंदुयुतः 'ऐं' भवति । तथा-विधिः 'कः' वासवः 'लः', शांतिः 'ई' बिंदुयोगे 'क्लीं' इति भवति । तथा वेदेपि—"शं वै प्रजापतिः कं वै प्रजापतिः" इत्यादिश्रुतिदर्शनात्, 'अक्षराणामकारोऽस्मि' इति स्मृतेश्च । वर्णानां वाचकत्वमस्त्येव, स्फुटितं चैतद्भाष्ये पतंजलिना । भागवतपदानां बीजरूपता पंचाध्यायीव्याख्याने 'जगौ कलं वामदृशां मनोहरम्' इत्यत्रापि स्फुटिता । अथो द्वारकामागत्य । एकस्मिन्मुहूर्ते इति—तस्यैव वैवाहिकलग्नस्य तदानीं सर्वतोभद्रत्वेन मौहूर्तिकलोकैरुक्तत्वात् । यावत्यः स्त्रियस्तावद्रूपधरः । रूपाण्यत्रैकस्यैव वपुषः प्रकाशभेदास्तानि धरतीति सः । न तु तावद्वपुर्द्धर इति कायव्यूहो व्याख्येयः । "चित्रं बतैतदेकेन वपुषा युगपत्पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥" इत्यग्रिमोक्तेः । यथा यथावदित्यनेन देवक्यादिबंधुसमागमोऽपि प्रतिगृहं यौगपद्येन सूचित इति स्वामिचरणाः । तेषामपि प्रकाशभेदोऽचिंत्यशक्त्यैव कारितो ज्ञेयः । अव्ययः सर्वत्रापि पूर्ण एव, न त्वंशेन वर्तमानः "प्रकाशो वस्तुभेदेषु गण्यते स हि नो पृथक्" इति भागवतामृतोक्तेः ॥ ४२ ॥ तासां न विद्यतेऽपायो वियोगो यस्य स तथा ॥ तदेव दर्शयन्नाह-गृहेष्विति । तासां गृहेषु अनपायी सन् अव समंतात्कायमनोवचोभिः स्थितश्च सन्, रमाभी रमायाः स्वरूपशक्तेरेव नानावृत्तिरूपाभी रेमे । भगवानिति पूर्वेणान्वयः । अतो नात्मारामतापूर्णकामतयोर्हानिरिति भावः । ननु तास्वप्यात्मभाव एव चेत्कस्तर्हि रसविशेषस्तत्राह-निजो न तु प्राकृतो यः कामः स्वजनविशेषेषु प्रेमविशेषस्तेन संप्लुत इति । शक्तित्वेन भेदाभेदवृत्तिमतोष्वपि तासु लीलार्थं पृथगाविर्भावाद्भेदवृत्तिप्रधानासु स्वरूपशक्तिभेदह्लादिनीवृत्तिविशेषप्रेममयीषु तासु तादृशप्रेमरसचमत्कारवैशिष्ट्यं तस्यापि जायत इति

भावः। ननु भवत्वेवं प्रपंचात्वतीर्णत्वाद्गृहादिसामग्री, न तु तदनुरूपा तत्राह—निरस्तेति। परमवैकुंठतोऽपि श्रेष्ठेष्वित्यर्थः। अत एव तत्र रमयैकयैव, अत्र तु रमाभिर्बह्वीभिरित्युक्तम्। ननु कथं युगपत्सर्वत्रानपायित्वादिकं तत्राह-अतवर्यवृत्, अचिन्त्यशक्तिमय इत्यर्थः। अनपायित्वं चात्र योग्यावसरं व्याप्येति ज्ञेयम्, गृहमेधिकांश्चरन्नित्युक्तत्वात्, प्रथमस्कंधे चात्र च विप्रलम्भश्रवणात्। निजकामसंप्लुतत्वमेव दृष्टान्तेन दृढीकरोति—यथेति। तासां स्वरूपशक्तिवृत्तिरूपत्वं दर्शितं स्कांदे प्रभासखण्डे—"पुरा कृष्णो महातेजा यदा प्रभासमागतः। सहितो यादवैः सर्वैः षट्पंचाशत्प्रकोटिभिः। षोडशैव सहस्राणि गोप्यस्तत्र समागताः। लक्षमेकं तथा षष्टिरेते कृष्णसुताः प्रिये॥" इत्युपक्रम्य "ततो गोप्यो महादेवि विद्यायाः षोडश स्मृताः। तासां नामानि ते वक्ष्ये तानि ह्येकमनाः शृणुः॥ लंबिनी चन्द्रिका कान्ता क्रूरा शान्ता महोदया। भीषणी नंदिनो शोका सुपूर्वविमलाऽक्षया। सुभदा शोभना पुण्या हंससीता कला क्रमात्॥ हंस एव मतः कृष्णः परमात्मा जनार्दनः। तस्यैताः शक्तयो देवि षोडशैव प्रकीर्तिताः॥ चन्द्ररूपी मतः कृष्णः कलारूपाश्च ताः स्मृताः। संपूर्णमण्डला तासां मालिनी षोडशी कला॥ प्रतिपत्तिथिमारभ्य संचरत्यासु चन्द्रमाः। षोडशैव कलायास्तु गोपीरूपा वरानने॥ एकैकशस्ताः संभिन्नाः सहस्रेण पृथक्पृथक्। एवं ते कथितं देवि रहस्यं ज्ञानसम्भवम्। य एवं वेद पुरुषः स ज्ञेयो वैष्णवो बुधैः॥" इति। अत्र गोप्यो राज्य इत्यर्थः। 'गोपो भूपेऽपि' इति नानार्थात्। सर्वं गोपायन्तीति शक्तयो वा, श्रीदशाक्षरे व्याख्याविशेषवत्। लंबिनी अवतारशक्तिः। सुपूर्वविमला सुविमला हंससीतेत्यत्र प्राप्तस्य हंसशब्दस्य वाच्यमाह—हंस एवेति। स च चन्द्ररूपी चन्द्रदृष्टान्तेनोद्देश्य इत्यर्थः। कलारूपा इति—ताश्च शक्तयश्चन्द्रस्याऽमृतादिकलादृष्टान्ता नोद्देश्या इत्यर्थः। अनुक्तामंतिमां महाशक्तिमाह-संपूर्णेति। दृष्टान्तोपपादनाय चन्द्रस्य तादृशत्वमाह-प्रतिपदिति। आस्वेतत्तुल्यासु कलासु यथा चन्द्रमाः प्रतिपत्तिथिमारभ्य संचरति, तथा सोपि लीलारसविशेषं प्राप्य तत्तच्छक्तिं प्रकाशयतीत्यर्थः। विवक्षितमाह—षोडशैवेति। षोडशानामेव विद्यारूपत्वादेतदुपदेशस्य ज्ञानसम्भवरहस्यत्वात्, तज्ज्ञानस्य वैष्णवतानुमापकलिंगत्वाच्च। क्रूराभीषणीशोकानामपि भगवत्स्वरूपभूतानामेव मतीनाम् 'मल्लानामशनिः' इतिवत्। श्रीकृष्णस्य कठिनत्वप्रत्यायकत्वात् 'मृत्युर्भोजपतेः' इतिवत्। दुर्जनवित्रासकत्वादसतां शास्तेति तदीयशोकहेतुत्वादेव च तत्तन्निरुक्तिरुपपद्यते। यथा प्रकाशरूपाया एव सूर्यकान्तेरुलूकेषु तमआदिव्यञ्जकतेति। अतः। 'चन्द्ररूपो स्मृतः कृष्णः कलारूपाश्च ताः स्मृताः" इति स्फुटमेव स्वरूपभूतत्वं दर्शितम्। अतोऽन्यथाख्यानं किंचित्तत्र जीवांतराप्रकाशापेक्ष्यं किञ्चिन्मायिकमिति ज्ञेयम्॥ ४३॥ इत्थमुक्तरीत्या। ताः भौमादिवधेनानीताः। यदीयां कृष्णसंबंधिनीम्। अविरतं निरंतरमेधितया वर्धमानया॥ रमायाः पूर्णलक्ष्मीरूपायाः श्रीरुक्मिण्याः पतिमिति परमदौर्लभ्यं वैदग्ध्यादिकं च सूचितम्। ता रमांशभूताः। पतिमवाप्य स्वातंत्र्येण लब्ध्वा। ब्रह्मादयोऽपि किं पुनरन्ये, पदवीमपि किं पुनस्तम्, न विदुरपि किं पुनर्लभेरन्नित्यर्थः। अतस्तस्य लाभो रमात्वेनैव संभवतीति साध्वेवोक्तं रमाभिरिति भावः। चिरमनवस्तरतावपि नवसंगमेत्युक्तिरत्यौत्सुक्येन तासां नित्यनूतनवत्प्रतीतेः। अत एवानवरतमेधितया मुदेति हासादीनां तत्तत्क्रमेणोदयात्तथैवोक्तिः। मुदा तदेव भेजुः, कथम्—अनुरागेण हासादयो यासां ताः तत्तत्प्रकारेणेत्यर्थः॥ ४४॥ प्रत्युद्गम आगतस्य संमुखगमनम्। वरेण कुंकुमेनार्हणमर्चनम् "वरो जामातरि श्रेष्ठे देवाद्याप्ते च कुंकुमे" इति धरणिः। कुंकुम इत्युपलक्षणम्। वीजनं व्यजनचालनम्। गन्धश्चन्दनमेव। अत एव प्रत्युद्गमेति, प्रत्युद्गमः श्रुत्वैवोत्थायाभिमुख्येन गमनम्, आदरस्तदनन्तरमन्या च संमाननक्रिया, तत्रापि भयं कदाचिदस्याभीष्टभंगः स्यात्, निजधर्मादिकाच्चेति शंकित्वं पाठोऽयं चित्सुखसंमतः। पाठांतरं तु प्रायिकम्। आसनादीनामपि तत्तत्संस्थापनक्रियासु तात्पर्यम्॥ श्रीगोपीसदृशोत्कंठिबादरायणये नमः। तादृग्व्याख्याकृतेऽप्यस्तु श्रीधरस्वामिने नमः॥ ४५॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोरार्द्धे एकोनषष्टितमोऽध्यायः॥ ५९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ययाचे पूर्वमिन्द्रः महानपि सुराणां सात्त्विकानामपि॥ ४१॥ एकस्मिन्नेव मुहूर्त्ते इति युगपदित्यर्थः। तस्यैव मुहूर्त्तस्य गोधूल्यादिरूपत्वेन सर्वतो भद्रत्वात् यावत्यः स्त्रियः तावद्रूपधरः रूपमत्र एकस्यैव विग्रहस्य प्रकाशभेद एव न तु विग्रहभेदः—

"चित्रं बतैतदेकेन वपुषा युगपत् पृथक्। गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत्॥"

इति वक्ष्यमाणात् अचिन्त्यशक्तित्वात् अत एवाव्ययः॥ ४२॥ तदेव दर्शयन्नाह—गृहेष्विति। तासां गृहेष्वनपायी सन् अवसमन्तात् कायमनोवचोभिः स्थितश्च सन् रमाभिः रमायाः स्वरूपशक्तेरेव नानावृत्तिरूपाभीरेमे भगवानिति पूर्वेणान्वयः अतो नात्मारामतापूर्णकामतयोर्हानिरिति भावः। ननु तास्वप्यात्मभावः एव चेत् कस्तर्हि रसविशेषः? तत्राह, निजो ननु प्राकृतो यः कामः स्वजनविशेषेषु प्रेमविशेषः तेन सम्प्लुत इति शक्तित्वेन भेदाभेदवृत्तिमतीष्वपि तासु लीलार्थं पृथगाविर्भावात् भेदवृत्तिप्रधानासु स्वरूपशक्तिभेदाह्लादिनीवृत्तिविशेषप्रेममयीषु तादृशप्रेमरसचमत्कारवैशिष्ट्यं तस्यापि जायत इतिभावः। ननु, भवत्वेवं प्रपञ्चावतीर्णत्वात् गृहादिसामग्री ननु तदनुरूपा तत्राह-अतुल्येति। परमवैकुण्ठतोपि श्रेष्ठेष्वित्यर्थः। अत एव तत्र रमयैकयैव अत्रतु रमाभिर्बह्वीभिरित्युक्तम्। ननु, कथं युगपत्सर्वत्रानपायित्वादिकम्? तत्राह—अतवर्यकृत् अचिन्त्यशक्तिमय

इत्यर्थः अनपायित्वञ्चात्र योग्यावसरं व्याप्येति ज्ञेयं गार्हमेधिकांश्चरन्नित्युक्तत्वात् प्रथमस्कन्धे चात्र च विप्रलम्भश्रवणात् निजकामसम्प्लुतत्वमेव दृष्टान्तेन दृढीकरोति— यथेति । तासां स्वरूपशक्तिवृत्तिरूपत्वञ्च दर्शितम् यथा स्कान्दे प्रभासखण्डे—

"पुरा कृष्णो महातेजा यदा प्रभासमागतः । सहितो यादवैः सर्व्वैः षट्पञ्चाशत् प्रकोटिभिः ॥
षोडशैव सहस्राणि गोप्यस्तत्र समागताः । लक्षमेकं तथा षष्टिरेते कृष्णसुताः प्रिये ॥

इत्युपक्रम्य—

ततो गोप्यो महादेवि विद्यायाः षोडश स्मृताः । तासां नामानि ते वक्ष्ये तानि ह्येकमना श्रृणु ॥
लम्बिनी चन्द्रिका कान्ता क्रूरा शान्ता महोदया । भीषणी नन्दिनी शोका सुपूर्व्वविमलाक्षया ॥
शुभदा शोभना पुण्या हंससीताकलाः क्रमात् । हंस एवमतः कृष्णः परमात्मा जनार्द्दनः ॥
तस्यैताः शक्तयो देवी षोडशैव प्रकीर्त्तिताः । चन्द्ररूपीमतः कृष्णः कलारूपास्तु ताः स्मृताः ॥
सम्पूर्णमण्डला तासां मालिनी षोडशी कला । प्रतिपत्तिथिमारभ्य सञ्चरत्यासु चन्द्रमाः ॥
षोडशैव कलायास्तु गोपीरूपा वरानने । एकैकशस्ताः सम्भिन्नाः सम्भिन्नाः सहस्रेण पृथक्-पृथक् ॥
एवं ते कथितं देवि रहस्यं ज्ञानसम्भवम् । य एवं वेद पुरुषः स ज्ञेयो वैष्णवो बुधैः ॥ इति ।

अत्र गोप्यो राज्य इत्यर्थः । गोपो भूपेऽपीति नानार्थात् सर्व्वं गोपयन्तीति शक्तयो वा । श्रीदशाक्षरव्याख्याविशेषवत् लम्बिनी अवतारशक्तिः सुपूर्व्वविमला सुविमला हंससीतेत्यत्र प्राप्तस्य हंसशब्दस्य वाच्यमाह–हंस एवेति । सच चन्द्ररूपी चन्द्रदृष्टान्तेनोद्देश्य इत्यर्थः । कलारूपा इति ताश्च शक्तयश्चन्द्रस्यामृतादिककलादृष्टान्तेनोद्देश्या इत्यर्थः । अनुक्तामन्तिमां महाशक्तिमाह—सम्पूर्णेति । दृष्टान्तोपपादनाय चन्द्रस्य तादृशत्वमाह–प्रतिपदिति । तस्वेतत्तुल्यासु कलासु यथा चन्द्रमाः प्रतिपत्तिथिमारभ्य सञ्चरति तथा सोऽपि लीलावसरविशेषं प्राप्य तत्तच्छक्तिं प्रकाशयतीत्यर्थः । विवक्षितमाह—षोडशैरिति । षोडशानामेव विद्यारूपत्वादेतदुपदेशस्य ज्ञानसम्भवरहस्यत्वात् तज्ज्ञानस्य वैष्णवतानुमापकलिङ्गत्वाच्च क्रूरा भीषणीशोकानामपि भगवत्स्वरूपभूतानामेव सतीनां "मल्लानामशनिः" इतिवत् श्रीकृष्णस्य कठिनत्वप्रत्यायकत्वान्मृत्युर्भोजपतेरितिवत् दुर्जनवित्रासकत्वात् असतां शास्तेतिवत् तदीयशोकहेतुत्वादेव च तत्तन्निरुक्तिरुपपद्यते यथा प्रकाशैकरूपाया एव सूर्य्यकान्तेरुलूकेषु तम आदिव्यञ्जकतेति अतश्चन्द्ररूपीमतः कृष्णः कलारूपास्तु ताः स्मृता इति स्फुटमेव स्वरूपभूतत्वं दर्शितम् अतोन्यथाख्यानं किञ्चिन्मायिकमिति ज्ञेयम् ॥ ४३ ॥ रमायाः पूर्णलक्ष्मीरूपायाः श्रीरुक्मिण्याः पतिमिति परमं दौर्लभ्यं वैदग्ध्यादिकञ्च सूचितं ता रमांशभूताः पतिमवाप्य स्वातन्त्र्येण लब्ध्वा ब्रह्मादयोपि किम्पुनरन्ये पदवीमपि किम्पुनस्तं न विदुरपि किम्पुनर्नलभेरन्नित्यर्थः । अतस्तस्य तथा लाभो रमात्वेनैव सम्भवतीति साध्वेवोक्तं रमाभिरिति भावः चिरमनवरतरतावपि नवसङ्गमेत्युक्तिरत्यौत्सुक्येन तासान्नित्यनूतनवत्प्रतीतेः अत एवानवरतमेधितया मुदेति हासादीनां तत्तत्क्रमेणैवोदयात्तथैवोक्तिः अन्यत्तैः । यद्वा मुदा तमेव भेजुः कथम् अनुरागेण हासादयो यासां तास्तत्तत्प्रकारेणेत्यर्थः ॥ ४४ ॥ अत एव प्रत्युद्गमेति प्रत्युद्गमः श्रुत्वैवोत्थायाभिमुख्येनागमनम् आदरस्तदनन्तरमन्या च सम्माननक्रिया तत्रापि भयं कदाचिदस्याभीष्टभङ्गः स्यान्निजधाष्ट्र्यादिकञ्चेति शङ्कत्वं पाठोयं चित्सुखसम्मतः पाठान्तरन्तु प्रायिकम् आसनादीनामपि तत्तत्सङ्ख्यापनक्रियासु तात्पर्य्यम् ॥ ४५ ॥

श्रीगोपीसदृशोत्कण्ठिबादरायणये नमः । तादृग्व्याख्याकृतेप्यस्तु श्रीधरस्वामिने नमः ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ययाचे पूर्व्वमिन्द्रः; किं कृत्वा ? किरीटस्य कोटिभिरग्रभागैः पादौ स्पृशन्, आ सम्यक् साष्टांगं बहुशो नत्वा, इति महाभक्तिरुक्ता । अच्युतमिति स्वार्थसाधनात् कदाचित् कथञ्चिदपि च्युति-राहित्यात् । एतेनाच्युतेन देवेन्द्रत्वादिना भगवद्भक्तत्वादिना वा महानपि । अहो आश्चर्य्ये खेदे वा, च अपि, सुराणां शुद्धसात्त्विकानामपि । ननु, ऐश्वर्य्यमदात् सम्भवेदेवेत्याशंक्य तं निन्दति—धिगिति ॥ ४१ ॥ अथो मांगल्ये कार्त्स्न्ये वा, एकस्मिन्नेव मुहूर्त्त इति युगपदित्यर्थः । यतः स्त्रियः, अन्यथा स्त्रीस्वभावेन सापत्न्योत्पत्त्या तासामीर्ष्यादिसम्भवेदिति भावः । यावत्यः स्त्रियस्तावद्रूपधरः शताधिकषोडशसहस्ररूपधरः । एवं तस्य सर्व्वेषामेव रूपाणां सत्यत्वं नित्यत्वं च सूचितमेव । यद्वा, तावद्रूपधर इवैक एवोपयेमे, यतो भगवान् सर्व्वैश्वर्य्यपरिपूर्णः, अतएवाव्ययः । एवं तस्य सर्व्वेषामपि रूपाणां सत्यत्व-नित्यत्वादिकमपि सूचितमेव ॥ ४२ ॥ तदेव दर्शयन्नाह—गृहेष्विति । तासां सर्व्वासां सर्व्वेष्वपि गृहेषु अनपायी सदा सुस्थिरः सन्, अतर्क्यकृदिति अन्यगृहेऽपि रमते, अन्यस्यामपि प्रीयत इत्यादि—तच्चेष्टितस्य ताभिरतर्कणात् । निजकामसंप्लुतोऽपि, किंवा तादृशः सन् रेमे । कुतः ? निरस्तेति । इति वैकुण्ठतोऽप्याधिक्यमुक्तम् । किञ्च, रमाभिरिति तत्रैकैव लक्ष्मीः, अत्र तु बह्व्य इत्यर्थः । यद्वा, रमयन्ति लक्ष्मीतोऽप्यधिकं श्रीकृष्णं प्रीणयन्तीति तथा ताभिः । एवं परमैश्वर्य्येऽपि लौकिकत्वेन रतिमाधुरी पूर्व्ववद्दृष्टान्तेन बोधयति—यथेति । चरन् आचरन् इतरो

विषयसुखलम्पटोऽविवेकी । अन्यत्तैर्व्याख्यातम् । यद्वा, निजानां स्वीयानां कामा अभिलाषाः, संप्लुत इत्यनेन तेषामानन्त्यादिना महार्णवत्वं ध्वनितम्, तेषु संप्लुतोऽत्यर्थं निमग्नस्तत्परिपूरणासक्त इत्यर्थः । यद्वा, निजलौकिकत्वेऽप्यलौकिकत्वादलौकिकत्वेऽपि लौकिकत्वादसाधारणो यः प्रेमलक्षणकामरससमुद्रस्तस्मिन् संप्लुतः ॥ ४३ ॥ रमापतिं श्रीरुक्मिण्याः पतिमिति परमं दौर्लभ्यं वैदग्ध्यादिकञ्च सूचितम् । ता अनिर्व्वचनीयपुण्यवत्यः पतिमवाप्य स्वातन्त्र्येण लब्ध्वा । स्त्रिय इति तद्योग्यतोक्ता, पदवीमपि, किं पुनस्तम्; न विदुरपि, किं पुनर्लभेरन्नित्यर्थः । चिरमनवरतमपि नवसंगमेत्युक्तिरत्यौत्सुक्येन तासां नित्यनूतनवत् प्रतीतेः, हासादीनां तत्तत्क्रमेणोदयात्तथैवोक्तिः । अविरतमेधितयेति ब्रह्मानन्दादप्याधिक्यमुक्तम् । तस्य सदा वृद्ध्यभावादस्याश्च परमकाष्ठां प्राप्ताया अपि नित्यनूतनत्वादिना माधुर्य्यविशेषेण सदा वृद्धेः । अन्यत् समानम् ॥ ४४ ॥ तथापि ताः सगर्व्वास्तृप्ताश्च नाभवन्, किन्तु प्रेमभरेण दासीवत् विविधसेवां चक्रुरित्याह—प्रत्युद्गमेति । प्रत्युद्गमः—दूराद्दर्शनमात्रेणैवासनादुत्थाय अग्रेऽभिगमनम्, आदरः—अहो भाग्यमस्माकं जयजयेत्यादिमिष्टवाक्यैः, आतपत्रधारणादिना च सम्माननं गृहकर्म्मादिपरित्यागेन तदेकासक्तिर्वा, भयं सशंकत्वं सम्भ्रमो वा, पतित्वेन साध्वीभावेन वा नवसंगमानुसन्धानादिना वा, किंवा अप्रागल्भ्यमासनताम्बूलगन्धादीनामर्पणेनेति ज्ञेयम् । पादयोः शौचं प्रक्षालनम्, शयनं शय्याविस्तारणम्, उपहार्य्याणि उपहारयोग्यानि विचित्रमिष्टेष्टभोज्यपेयादीनि, विभोर्निजप्राणेश्वरस्येति प्रेमभरेणैव तत्तद्विधानं तेनानन्दविशेषञ्च सूचयति—स्मेति, एतच्च सुप्रसिद्धमेवेति तासामवलत्वादिनात्र संशयो न कार्य्य इति भावः । इति प्रसंगाद्भावविशेषोदयेन श्रीवादरायणिना स्त्रीणां तत्रापि श्रीभगवद्भर्तृकाणां सौभाग्यं श्लोकत्रयेण वर्णितम्, तच्चान्ते (भा० १०।९०।२७)–'याः संपर्य्यचरन् प्रेम्णा पादसम्वाहनादिभिः। जगद्गुरुं भर्त्तृबुद्धया तासां किं वर्ण्यते तपः ॥' इत्यादिना व्यक्तं भावि ।

श्रीगोपीभावसम्पन्न-वादरायणये नमः । तादृग् व्याख्याकृतेऽप्यस्तु श्रीधरस्वामिने नमः ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यामेकोनषष्टितमोऽध्यायः ॥ ५९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ययाचे इन्द्र इत्यध्याहारः सिद्धार्थ इति सप्तमी अथो प्रयोजने सिद्धे सतीत्यर्थः । इन्द्रः सिद्धार्थश्चाभूदिति वाक्यान्तरम् एतेन इन्द्रो महान् महापुरुषेण कृष्णेन महानपि युद्धेन प्रत्यर्थी क्रियते अहो सुरणामपि तमः मोहः आढ्यतां धिगित्यर्थः ॥ ४१–४२ ॥ अतर्क्यकृत् अचिन्त्यचेष्टितकारी ॥ ४३–४४ ॥ रमाभिः दासीशता अपि दासीशतयुक्ता अपि ॥ ४५ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नन्विन्द्रः पराजितः किमकरोदित आह–ययाच इति । आनम्य इन्द्रो मूर्द्धानमिति कर्तृकर्मपदाध्याहारः किरीटाग्रैः पादौ स्पृशन् अर्थसाधनमाश्रितजनाभिमतप्रयोजननिष्पादकं कल्पतरुं ययाचे तमेवङ्कृतवन्तमिन्द्रं निन्दति–सिद्धार्थ इति। तावन्निष्पन्नस्वप्रयोजनः समनन्तरमेवैतेन स्वप्रयोजनसाधकेन भगवता विगृह्यते विरुध्यते तत्समनन्तरमेव महान् याच्ञ्या प्राप्तकल्पतरुत्वेन आढ्यो बभूव तस्मादहो सुराणां तमः अहङ्कारमाढ्यताञ्च धिक् तदुभयं निन्द्यमित्यर्थः ॥ ४१ ॥ अत इति। अतस्ततः एकस्मिन्नेव मुहूर्ते नानाबहुष्वगारेषु यावत्यः स्त्रियस्तावत्सु गृहेषु इत्यर्थः । तथा तावन्ति रूपाणि शरीराणि धरतीति तथाभुतस्ताः षोडशसहस्रसङ्ख्याकाः स्त्रियः स्त्रीरुपयेमे उदवोढेति भगवन्महिमातिशयोक्तिः ॥ ४२ ॥ अहो तासां भाग्यमित्याह–गृहेष्विति । अतर्क्याण्यचिन्त्यानि चेष्टितानि करोतीति तथा स भगवान्निजधाम्ना स्वतेजसा उपात्तमनुजरूपत्वेपि अपरित्यक्तस्वासाधारणप्रभावेनेत्यर्थः । सम्प्लुतो व्याप्तोऽपि स्वानन्दानुभवपूर्णोपि वा निरस्तसाम्यातिशयेषु भोग्यादिसमृद्धया समाभ्यधिकरहितेषु तासां गृहेषु अनपायी विश्लेषरहितोऽवस्थितः प्राकृतजनवत् गार्हमेधिकान् (गार्ह्यधर्मवान् गृहस्थधर्मवान्) गृहस्थधर्मांश्चरन् अनुतिष्ठन् रमाभीरमणीयाभिः स्त्रीभिः सह रेमे ॥ ४३ ॥ अतिचित्रमेतदेकस्यानेकधा भवनमिति विस्मयमानं प्रत्याह–स्वदारेष्विति । अपरिच्छिन्नस्य समाभ्यधिकरहितस्य स्वभक्तचित्तानुर्बत्तिनो मुरारेः पृथक्भावः स्वदारेषु एकदैव तत्तद्दाराभिमतरूपधारणं किं चित्रं तदद्भुतचेष्टितेषु नेदं चित्रमित्यर्थः ॥ क ॥ भक्तचित्तानुर्बत्तिन इति विशेषणाभिप्रेतं व्यनक्ति—अद्यापि न केवलं तदैव अपित्वधुनापि योगीश्वरेश्वरः योगनिर्वाहकः कृष्णोन्तर्हृदि बहिस्तत्रापि समन्ताच्च भक्तैः परिपूर्णभक्तियोगैः शतधा सहस्रधा च लक्ष्यते ॥ ख ॥ अथाहरहस्तासां वृत्तिक्रममाह–इत्थमिति द्वाभ्याम् । रमापतिं श्रीकृष्णं तं विशिनष्टि यस्य श्रीकृष्णस्य सम्बन्धिनीं पदवीं महिमानं ब्रह्मादयोपि न विदुः तं पतिमवाप्य अविरहमविच्छिन्नं सन्ततमिति यावत् तद्यथा तथा वर्द्धितया मुदा अनुरागसहितो हासस्तत्पूर्वकावलोकश्च तत्पूर्वको नवसङ्गमश्च तत्र जल्पाः नर्मवचनानि तेषु लज्जः भेजुः प्रापुः ॥ ४४ ॥ किञ्च प्रत्युद्गमेति दासीनां (दास्यः) शतानि यासां तथाभूता अपि स्वयमेव विभोर्भर्त्तुः

प्रत्युद्गमादिभिर्दास्यं विदधुश्चक्रुः तत्र प्रत्युद्गमः प्रत्युत्थानम् आसनवरार्हणम् आसनश्रेष्ठसमर्पणं पादशौचं पादप्रक्षालनं विश्रमणं पादसम्वाहनादिना श्रमापहरणम् ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसंदर्भः

गृहेष्विति । अनपायित्वमत्र योग्ययोग्या वत्सरं व्याप्येति ज्ञेयम् गार्हमेधिकांश्चरन्नित्युक्तत्वात् निजाः स्वप्रियविशेषाः तेषां कामेन प्रेममयाभिलाषसम्प्लुतो व्याप्तो वशीकृत इत्यर्थः ॥ ४३ ॥ ब्रह्मादयोऽपीत्युक्त्वा तथा लोभो रमात्वेनैव साध्वेवोक्तं रमाभिरिति भावः ४४-४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सेन्द्रान् विबुधान्निर्जित्येत्युक्तं तत्र स्वार्थसाधकेनापि स्वेष्टदेवेनापि कृष्णेन सहेन्द्रस्य युद्धं श्रुत्वाऽतिविस्मतं राजानं प्रतीन्द्रदौरात्म्यमाह—ययाचे इति । अर्थसाधनं स्वार्थसाधकं कृष्णं ययाचे नरकं हत्वा कुण्डलादीन्यानीय देहीत प्रार्थयतेस्म सिद्धार्थः प्राप्तकुण्डलादिकस्सन् एतेन कृष्णेन सह विगृह्यते इत्यार्षं विगृह्णाति विग्रहं करोति तत्रापि महान् सुरेशस्सन्नपि अहो आश्चर्यं सुराणामपि तमः क्रोधः सात्त्विकानां तेषामिदमत्यसम्भवमिति भावः। तत्रापि सुरेशस्य तस्य तमः तस्मादाढ्यतां धनिकत्वं धिक् आढ्यता हि कमसम्भवमप्यनर्थं नोत्पादयतीति भावः ॥ ४१ ॥ अथो द्वारकामागत्य एकस्मिन् मुहूर्त्त इति तस्यैव वैवाहिकलग्नस्म तदानीं सर्वतो भद्रत्वेन मौहूर्त्तिकलोकैरुक्तत्वात् यावत्यः स्त्रियस्तावद्रूपधरः रुपाण्यत्र एकस्यैव वपुषः प्रकाशभेदा एव तानि धरतीति सः नतु तावद्वपुर्धर इति कार्यव्यूहो व्याख्येयः—

चित्रं बतैतदेकेन वपुषा युगपत् पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत्'' ॥

इत्यग्रिमोक्तेः । यथा यथावदित्यनेन देवकथादिबन्धुजनसमागमोपि प्रतिगृहं यौगपद्येन सूचित इति श्रीस्वामिचरणाः तेषामपि प्रकाशभेदोऽचिन्त्यशक्त्यैव कारितो ज्ञेयः । अव्ययः सर्वत्रापि पूर्ण एव नत्वंशेन वर्तमानः प्रकाशस्तु भेदेषु गण्यते सहि नो पृथगिति भागवतामृतोक्तेः ॥ ४२ ॥ तासां गृहेष्वनपायी प्रकाशभेदैः सर्वेष्वेव स्थित इत्यर्थः । अतर्क्यकृदिति तथा अतर्क्यं कर्म करोति यथा सर्वत्रापि सञ्चारितदासीसखीका अपि ताः प्रत्येकमहमेव संयोगिनी अन्यास्तु विरहिण्य एवेति जानन्तीति भावः। निरस्तं साम्यमतिशयश्च येभ्य इति तादृशा गृहा अपि वैकुण्ठेपि न सन्ति किमुत तादृशरमणादिसुखानीत्यर्थः। निजेन स्वरूपभूतेनैव कन्दर्पेणैव सम्प्लुतो निमग्नः रमाभी रेमे इति, वैकुण्ठे खल्वेकयैव रमया स्वांशो नारायण एव रमते इति वैकुण्ठादपि द्वारकाया ऐश्वर्येणाधिक्यं गार्हमेधिकान् धर्मांश्चरन्निति माधुर्य्येणाप्याधिक्यं ज्ञापितं तासां रमात्वेन स्वरूपशक्तित्वं स्कान्दे प्रभासखण्डेपि यथा—

षोडशैव सहस्राणि गोप्यस्तत्र समागताः । हंस एवमतः कृष्णः परमात्मा जनार्दनः ॥
तस्यैताः शक्तयो देवि षोडशैव प्रकीर्त्तिताः । चन्द्ररूपीमतः कृष्णः कलारूपास्तु ताः स्मृताः ॥
सम्पूर्णमण्डला तासां मालिनी षोडशीकला ॥ षोडशैव कलायास्तु गोपीरूपा वराङ्गने ॥
एकैकशस्ताः सम्भिन्नाः सहस्रेण पृथक् पृथक् ॥ इति ॥

पाद्मे कार्तिकमाहात्म्ये च ''कैशोरे गोपकन्यास्ता यौवने राजकन्यका'' इति अतः पूर्णतमस्य श्रीवृन्दावननाथस्य यथा द्वारकानाथः पूर्णः प्रकाशस्तथैव पूर्णतमानां तदीयाह्लादिनीशक्तीनां गोपीनां पूर्णप्रकाशरूपा पट्टमहिष्य इति ॥ ४३ ॥ रमायाः पूर्णलक्ष्मीरूपायाः पति श्रीकृष्णमवाप्य ब्रह्मादयोपि किं पुनरन्ये पमवीमपि किं पुनस्तं न विदुरपि किं पुनर्लभेरन्नित्यर्थः । अविरतमेव एधितया प्रवृद्धया मुदा अनुरागसहितं हासावलोकं तत्पूर्वकं नवसङ्गमञ्च तत्र तदुचितजल्पञ्च तत्प्रतिजल्पे प्राप्ते सति लज्जाञ्च भेजुः प्रापुः ॥ ४४ ॥ विश्रमणं सम्बाहनं केशानां प्रसारः प्रसाधनं दासीनां शतानि विद्यन्ते यासां तथाभूता अपि स्वयं विभोर्दास्यं विदधुरिति ॥ ४५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । ऊनषष्टितमोऽध्यायो दशमेऽजनि सङ्गतः ॥ ५९ ॥

गूढार्थदीपिनी

तद्गन्ध एव आसवो मादकद्रव्यं तत्र लम्पटा लोलुपाः भ्रमराः ॥ ४१ ॥ इन्द्रः प्रथमं स्वशिरं आनम्य मुकुटकोटिभिरग्रभागैः पादौ स्पृशन् अच्युतं ययाचे । किमर्थम् । अर्थसाधनाय कार्यसिद्धये । अत्र चतुर्थ्या 'अकथितं च' इति कर्मत्वम् । याचेद्विकर्मकत्वात् । सिद्धार्थः सिद्धकार्यः सन् अहो महान् ज्ञानवानपि एतेन श्रीकृष्णेन विगृह्यते विग्रहं करोति अतः सुराणां

तमः क्रोधम् आढ्यतां च धिक्। यद्वा। सुराणां मध्ये पूर्वं महानपि एतेन विगृह्यतेऽतोऽमहान्। कर्मकर्त्तरि प्रयोगः॥ ४२॥ यथा यथावत् सविधि॥ ४३॥ तासां गृहेषु अनपायी अवियोगी सन् अवस्थितः। कुतः। अतर्क्यं तर्कासंभवं कर्म करोतीति। निरस्तं साम्यमतिशय आधिक्यं च यैस्तेषु गृहेषु निजेति स्वानन्दपूर्णः। इतरः प्राकृतः। गार्हकमेधिकान् गृहस्थधर्मान् आचरन्। रमाभिः रुक्मिणीमुख्याभिः सह रेमे॥ ४४॥ पदवीं प्राप्तिमार्गम्। एधितया निरन्तरं वर्धमानया मुदा तं भेजुः अनुरागादिषु लज्जा यासां ताः स्त्रिय इत्यस्य विशेषणम्॥ ४५॥ दासीनां शतानि विद्यन्ते यासां ता अपि विभोः श्रीकृष्णस्य सेवां स्वयमेव चक्रुः। कैः प्रत्युद्गमादिभिः। प्रत्युद्गमः प्रत्युत्थानम्। अर्हणम् अर्ह्यतेऽनेनेति अर्हणं पूजनद्रव्यम्। विश्रमणं पादमर्दनम्। प्रसारोऽलङ्करणम्। उपहार्या भक्ष्यभोज्यादयस्तैः॥ ४६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यामेकोनषष्टितमोऽध्यायः॥ ५९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सेन्द्रान् विबुधान्निर्जित्येतीन्द्रस्य स्वेष्टदेवेन सर्वदोपकारकर्त्रा श्रीकृष्णेन सह सङ्ग्राम उक्तस्तत्र धनिकतां क्रोधञ्च हेतुमाह—ययाचेति। तत्तदवसरे शत्रुनाशाद्यर्थं तदानीमेव कुण्डलाद्यर्थञ्च अर्थसाधनं मनोरथसाधकम् अच्युतं परमेश्वरं ययाच प्रार्थयते स्म सिद्धार्थः प्राप्तमनोरथश्च सुराणां मध्ये महानपि तथापि अहो आश्चर्य्यम् एतेन श्रीकृष्णेन विगृह्यते विग्रहं करोति इन्द्र इति शेषः। अतस्तमः क्रोधलक्षणं आढ्यतां धनिकताञ्च धिक्॥ ४१॥ यावत्यः स्त्रियस्तावद्रूपधरः नानागारेषु पृथक् पृथक् गृहेषु यथायथावदुपयेमे अनेन देवक्यादिबन्धुजनसमागमोपि प्रतिगृहं यौगपद्येनेति गम्यते अव्ययः सर्वत्रापि सम्पूर्ण एव यतो भगवानचिन्त्यैश्वर्यः॥ ४२॥ तासामहो भाग्यमित्याह—गृहेष्विति त्रिभिः। निरस्तमतिशयश्च येभ्यः तेषु गृहेषु अनपायी विश्लेषरहितोऽवस्थितः अतर्क्याणि तर्क्यागोचराणि चेष्टितानि करोतीति तथा निजकामसंप्लुतः स्वानन्दतृप्तोपि यथेतरः इतरवत् अतृप्तवत् रमाभिः छत्रिणो यान्तीतिवत् रुक्मिणीमुख्याभिः रेमे॥ ४३॥ अविरतमेधितया प्रवृद्धया मुदा अनुरागसहितमवलोकञ्च तत्पूर्वकं नवसङ्गमञ्च तद्गतजल्पञ्च तस्मिन् लज्जाञ्च भेजुः प्रापुः॥ ४४॥ दासीनां शतानि विद्यन्ते यासां तथाभूताः अपि स्वयं विभोः प्रत्युद्गमादिभिर्दास्यं विदधुश्चक्रुः तत्र प्रत्युद्गमः प्रत्युत्थानम् विश्रमणं सम्वाहनम् केशानां प्रसारः प्रसाधनम्॥ ०५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकोनषष्टितमोऽध्यायः॥ ५९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अस्मिन्नपि मते भगवत्कृतमेव युक्तम्, नत्विन्द्रकृतमिति तत् कृतं निन्दति **ययाच** इति। य इन्द्रः अच्युतमर्थसाधनं ययाचे, पश्चात् सिद्धार्थः सन् अर्थसाधकेनैष विगृह्यते। प्रसङ्गाद्याचनं वारयति **आनम्ये**ति। प्रार्थनारूपम्। ननु मान्यः नमस्कृत्य याच्यते प्रसङ्ग इति, तत्राह **किरीटकोटिभिः पादौ स्पृशन्नि**ति। स्वापकर्षं भावयन्नपि ययाचे। किञ्च। स्वयमसमर्थः भगवान् समर्थः नरकं हन्तुमिति जानन् तथा प्रार्थितवानिति अभिप्रायं द्योतयति **अच्युत**मिति। अर्थस्य साधनं यस्मादिति। तस्मादेव कार्यसिद्धिः। समर्थोऽपि नान्यः कार्यं करोति। एवं महत्त्वेन भगवन्तं ज्ञात्वापि, पराक्रमं दृष्ट्वापि, स्वयं महानपि विगृह्यते। ननु कथं कारणविरुद्धं कार्यम्, तत्राह **अहो** इति। तथाप्युपपत्तिर्वक्तव्येति चेत्, तत्राह **सुराणां च तम** इति। सात्त्विकानां ज्ञानप्रधानानां केवलतमोरूपमज्ञानमिति। विरुद्धमनूद्य अर्थादाढ्यताहेतुत्वेन निरुच्यते। अत एव तां निन्दति **धिगाढ्यता**मिति। श्रीसम्पत्तिरेवाज्ञानमूलमप्रतिहतम्, नत्वन्यत्, तत्र सुरत्वादिकं बाधकमित्यर्थः॥ ४१॥ शौर्यावेशं परित्यज्य कामावेशेन, अनन्तरूपत्वात्कामस्य, तत्तत्पूरकरूपेण तासु विवाहरतिमानानि सम्पादितवानित्याह **त्रिभिः**। **अथो** इति। एकस्मिन्नेव मुहुर्ते सर्वतः समानफलत्वाय। कामनायास्तथात्वात्। नानागारेषु ताः स्थापयित्वा यथावदुपयेमे। दृष्टिभ्रमादिपक्षान् वारयितुमाह **तावद्रूपधर** इति। तत्र सामर्थ्यं **भगवा**निति। रूपाणामप्यविकृतत्वाय **अव्यय** इति। **यथा** गृह्योक्तप्रकारेण॥ ४२॥ विवाहमुक्त्वा रमणमाह **गृहेष्व**िति। तासां गृहेषु अनपायी नित्यं तिष्ठति। ता हि प्रमाणस्थकामानुसारेण न विवाहिताः, किन्तु प्रमेयस्थानुसारेण। स हि पुष्टः निरन्तरश्च नित्यरमणात्मकः। अतो विवाहक्षणमारभ्य यावत्स्थिति नित्यरमणमेव तासु कृतवान्। विधिपरिपालनार्थमेव दश पुत्रोत्पादनम्, तदत्र न वक्तव्यम्, कामप्राधान्यात्। उत्पादने हि कामः क्षीयत इति। ननु निरन्तररमणे बहूनि दूषणानि, कार्यान्तरे व्याघातः, लोकानां सन्देहोत्पत्तिः, परस्परं तासामन्योन्यगोष्ठ्यां सन्देहः, तत्राह **अतर्क्य**कृदिति। **यथा** न कोऽपि तर्क उत्पद्यते कस्यापि, तथा करोति। लोकप्रतीतिमेव विरोधेऽन्यथा जनयति। बहून्येव रूपाणीति केनचिद्रूपेणान्यत्रापि गच्छति। परमत्र विशेषकार्यं न करोति। अतः शाल्वादिषु विद्यमानोऽपि न युद्धं कृतवान्। कामार्थमेव स्थित इति कामसम्पत्त्यर्थं गृहान् वर्णयति **निरस्तसाम्यातिशयेष्व**िति। स्वर्गादिष्वपि (न) महिषीगृहाणां साम्यमतिशयो वा क्वचिदप्यस्ति। स्वयं **चावस्थितः** स्थिरः। वैयग्र्ये अस्थैर्ये च संततः कामः बाधितः स्यात्। एवं सर्वोपपत्तौ ताभिः सह रेमे। ननु भगवान् निरिन्द्रियः, ब्रह्मानन्दरूपायां लक्ष्म्यामेव रमते, नत्वन्यत्रेति कथं रमणमित्याशङ्क्याह **रमाभि**रिति।

यावन्ति भगवद्रूपाणि तावन्त्येव लक्ष्मीः करोतीति तासु लक्ष्म्यास्तावतां रूपाणामावेशः। एवं करणे हेतुः। निजकामेन संप्लुत इति। सेनायामागतायां कामोऽप्याविर्भूतः। जीवकामव्युदासार्थं **निजपदम्**। एवं सति तासां सङ्कल्पो न सिध्येदित्याशङ्क्याह **यथेतर** इति। केवलप्राकृतत्वं वारयति **गार्हमेधिकांश्चरन्निति**। गृहमेधिधर्मानाचरन् श्रौतान् स्मार्तांश्च ॥ ४३ ॥ तासां मानसम्पत्तिं कृतवानित्याह **इत्थमिति**। अथवा द्वाभ्यां भगवच्चरित्रमुक्तम्। तथाकरणानन्तरं ताभिरप्येकं कामरसेन कृतम्, एकं तु **भक्त्येत्याह** द्वाभ्याम्, **इत्थमिति**। रमाया एव भगवान् पतिः, नत्वन्यासाम्। तद्दासाः जीवा एवान्यासाम्। तं पतिं स्वयमवाप्य। पूर्वं बन्द्या गृहीतास्ताः। बन्दिग्रहणं तासामुपकारायैव जातमिति। **अविरतमेधितया मुदा भगवन्तं भेजुरिति** सम्बन्धः। निरन्तरं सेवितवत्यः। ननु किमाश्चर्यं स्त्रियो हि भर्तृसेवां कुर्वन्त्येवेति चेत्, तत्राह **ब्रह्मादयोऽपि न विदुः पदवीं यदीयामिति**। मार्गमेव भगवतो न जानन्ति, कुतः सेवां करिष्यन्ति। अभिप्रेता हि सेवा कर्तव्या। अभिप्रायस्तु दुर्गमः। तदपि ज्ञात्वा सेवां कृतवत्य इत्यलौकिकं बोध्यते। तत्रापि न विधिकिङ्करतया, किन्तु मुदा। औत्सुक्यान्मुदः प्रवृत्तिं वारयति **अविरतमेधितयेति**। भगवति तासां षड्भावानाह **अनुरागेति**। अन्यथा भक्तिरस एव स्यात्, न कामरसः। प्रथमतोऽनुरागः चित्ते। ततो **हासः** भावप्राकट्यम्। ततोऽ**वलोकनं** दृष्ट्या सङ्गः। ततो नवसङ्गमो नित्यम्। नित्यनूतनत्वाद्भगवतः। ततो जल्पाः नानाविधाः कथाः। तत उत्थितानां लज्जा कुलवधूभावप्राकट्यम्। अन्यथा अगुप्तो रसः रसाभासः स्यात्। **जातलज्जा** इति पाठः सुगमश्चिन्त्यः ॥ ४४ ॥ कामकृतमुक्त्वा भक्तिकृतमाह **प्रत्युद्गमेति**। दूरादागच्छन्तं दृष्ट्वा यथाकथञ्चिदपि स्थिताः प्रत्युद्गता भवन्ति। अग्रे गच्छन्ति। तत आसनं भगवते प्रयच्छन्ति। ततो वरार्हणमभीष्टं कुर्वन्ति, यदाज्ञापयति। वरस्य वा विवाहसमये समागतस्य यथोपचाराः क्रियन्ते, मधुपर्कादिः पाणिग्रहणादिर्वा। ततः पादप्रक्षालनम्, ततस्ताम्बूलदानम्, ततो विश्रमणं पादसंवाहनम्, ततो वीजनं व्यजनादिभिः, ततो गन्धमाल्यादिदानम्, ततः स्वेच्छयोपविष्टस्य माल्यादिग्रथनार्थं केशप्रसारः, ततः शयनम्, ततः कामे तृप्ते स्नपनम्, तत उपहारः भक्ष्यभोज्यादिदानम्। कामार्थमेव हि स्त्रीगृहे गमनम्, न तु भोजनार्थम्। अतः कामानन्तरमेव भोजनं युक्तम्, अन्यथोभयमपि विरसं स्यात्। एवं द्वादशधोपचाराः प्रत्यहं कर्तव्याः, द्वादशधा मनसो वृत्तिपूरणार्थम्। एवं करणे तासां क्लेशात् रसोत्पादकता न स्यादित्याशङ्क्याह **दासीशता अपीति**। अतस्ताभिः सुसंस्कृताः भगवतो दास्यं विदधुः। क्लिष्टो भगवानेताभिरेवं सेवित इति सापेक्षसेवां कश्चिद्ब्रूयात्, तद्व्यावृत्त्यर्थमाह **विभोरिति**। सर्वतः समर्थस्य। एवं सर्वासां विवाहावधिसेवान्ताः क्रिया निरूपिताः। मानापनोदनादिकं तु वक्तव्यम्, तदुत्तराध्याये रुक्मिण्यामुक्त्वा सर्वत्रातिदेशं वक्ष्यति। यदैव भगवान् यस्मिन्नंशे तिरोहित इव भवति, तत्रैव भगवत्कृतसंमाननात् मान उत्पद्यत इति स्थितिः ॥ ४५ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे दशमोऽध्यायः ॥ १० ॥

श्रीसुबोधिनी–सारः

'सर्वे स्वार्थपरायणाः' इति सूचयन् संपदां निंदति। पूर्वमापदि प्रणम्य किरीटकोटिभिर्मुकुटाग्रभागैः पादौ स्पृशन् सन् इंद्रोऽच्युतं हरिमर्थसाधनं प्रति ययाचे इदानीं सिद्धोऽर्थो मनोरथो यस्य स एतेन श्रीकृष्णेन विगृह्यते विग्रहं करोति अहो सुराणां देवानां महान् तमः क्रोधः अतः आढ्यतां धनिकतां धिग्गिति भावः॥ ४१ ॥ अथो इति मंगले एकस्मिन्मुहूर्त्ते नानागृहेषु यथावत् ताः स्त्रियः तावंति रूपाणि धरतीति न कर्मण्यणा बाधात् किं तु षष्ठीसमासो गंगाधरवत् अव्ययोऽविनाशी भगवानुपयेमे परिणिन्ये ॥ ४२ ॥ तासामहोभाग्यं वर्णयति। निरस्तम् अपाकृतं साम्यमतिशयश्चान्येषां यैस्तेषु तासां स्त्रीणां गृहेषु अवस्थितोऽनपायी नापायो यस्यास्तीति अतर्क्याणि कर्माणि करोतीति निजकामसंप्लुतः स्वानंदपरिपूर्णः गार्हकमेधिकान् गृहस्थधर्मान् चरन् सन् रमाभिर्लक्ष्म्यंशसंभूताभिः स्त्रीभी रेमे इतरः प्राकृतजन इव ॥४३॥ ब्रह्मादयोपि यदीयां पदवीं मार्गं न विदुः तं रमायाः पतिं श्रीहरिमित्थममुना प्रकारेण ताः स्त्रियः पतिमवाप्याविरतं निरंतरम् एधितया संवर्द्धितया मुदा हर्षेण भेजुः अनुरागः स्नेहो हासः प्रसिद्धस्ताभ्यां सहितमवलोकश्च तत्पूर्वको नव संगमश्च तद्गतं जल्पं रतिवार्त्ता च तस्मिन् लज्जां भेजुः ॥ ४४ ॥ दासीनां शतानि यासां तास्तथाभूता अपि विभोर्हरेर्दास्यं विदधुः चक्रुः स्वयं स्म प्रसिद्धम्। कैः प्रत्युद्गमः संमुखागमनम् आसनं वरार्हणमर्घ्यादि पादशौचं चरणप्रक्षालनं तांबूलं वीटकं विश्रमणं पादसंवाहनं वीजनं गंधः माल्यानि पुष्पाणि तैः केशानां प्रसारः प्रसाधन शयनं शय्याविधिः स्नपनम् उपहार्य्यं भोजनसंपत्तिस्तैः ॥ ४५ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायामेकोनषष्टितमोऽध्यायः ॥ ५९ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

ययाच इत्यस्याभासे। **अस्मिन्नपि मते** इति। मतान्तरभाषायामपीत्यर्थः। **गृहेष्वित्यत्र**। **प्रमाणस्थेति**। 'एवं व्यवायः प्रजया न रत्यै' इत्यत्र प्रजार्थं तदङ्गत्वेन कामः सम्पादनीय इत्युक्तम्। अयं प्रमाणस्थः कामः। भोगार्थकः कामः

प्रमेयस्थः। तथाच प्रजार्थं न विवाहिताः। अष्टभिरेव महिषीभिस्तत्सिद्धेः। किन्तु नानाविधविलासार्थं विवाहिता इत्यर्थः। इत्थमित्यत्र। **जलपलज्जा** इत्यर्श आद्यजन्तम्। **प्रत्युद्गमेत्यस्य** व्याख्यानान्ते पूर्व**'मथो मुहूर्ते'** इत्यस्याभासे अन्त्यश्लोकयोर्मानं वाक्यार्थ इत्युक्तम्। तद्व्युत्पादयन्ति **यदैव भगवानिति**।

इति दशमाध्यायव्याख्या।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भार्यया सत्यभामया नोदितः सन् तत्रत्यं पारिजाताख्यं तरुमुत्पाट्य गरुत्मति आरोप्य सेन्द्रान् विबुधान् युद्धे निर्जित्य, पुरं द्वारकां प्रत्यनयत् ॥ ४१ ॥ सत्यभामाया गृहसमीपस्थमुद्यानमुपशोभयतीति तथा तत्र स्थापितः। यद्यपि पारिजातं महेन्द्रः प्राहिणोदिति पूर्वोक्तेर्द्वारकायां सोस्ति तथापि सोन्यत्रास्ति, अयं तु सत्यभामामनोरथेनानीतस्तदुद्याने स्थापित इति ज्ञेयम्। तदुत्कर्षमाह-अन्वगुरिति ॥ ४२ ॥ "भगवता सह इन्द्रस्य विरोधो न युक्तः' इति आह—ययाच इति। इन्द्रः प्रथमं मूर्धानमानम्य किरीटाग्रैर्भगवत्पादौ स्पृशन् तमर्थसाधनं शरणागतमनोरथनिष्पादकम्, तत्र हेतुः—अच्युतमक्षीणबलपराक्रमं ययाचे भौमवधादिकं प्रार्थितवान्। पश्चात्सिद्धार्थः निष्पन्नभौमवधादिप्रयोजनः सन् महानपि एतेन दुःसाध्यकार्यसाधकेन स्वामिना सह वृक्षनिमित्ते विगृह्यते विरोधं कृतवान्। अहो आश्चर्यं सुराणां सात्त्विकत्वेन ज्ञानयोग्यानां चापीन्द्रसहायभूतानां तमोऽज्ञानम्। तत्र हेतुं सूचयन्नाह—आढ्यतां धनिकतां धिगिति ॥ ४३ ॥ तद्विवाहमाह—अथेति। द्वारकागमनानन्तरं एकस्मिन्नेव मुहूर्ते ताः शताधिकषोडशसहस्रसङ्ख्याकाः स्त्रियः स्त्रीर्भगवान् यथोचितमुपयेमे उदवोढ। ननु 'एकस्मिन्मुहूर्ते एकस्य कथं ताभिर्बह्वीभिर्विवाहः संभवति' इत्याशङ्क्याय—नानागारेष्विति। यावत्यः स्त्रियस्तावत्सु गृहेषु स्वयमपि तावद्रूपधर इति। 'तावद्रूपधारणेन ताभिः सह रमणेपि तस्य न कश्चिदायासः, क्षतिर्वा' इत्याशयेनाह—अव्यय इति ॥ ४४ ॥ एवं भगवतो विवाहान्निरूप्य तस्य रमणमाह—गृहेष्विति। तासां पत्नीनामेकशताष्टाधिकषोडशसहस्रसङ्ख्याकानां गृहेषु अनपायी विश्लेषरहितः अवस्थितः न इतरवत् प्राकृतजनवत् गार्हकमेधिकान् गृहस्थधर्मांश्चरन् अनुतिष्ठन् ताभिः सह भगवान् कृष्णो रेमे इत्यन्वयः। गृहाणां भगवद्रमणयोग्यतामाह—निरस्तसाम्यातिशयेष्विति। भोग्यपदार्थसमृद्ध्या साम्यान्यधिकरहितेषु। स्त्रीणामपि तद्रमणयोग्यतामाह—रमाभिरिति। 'लक्ष्म्यंशभूताभिः एकस्य बहुषु गृहेषु कथमवस्थानम्' इत्याशङ्क्याह—अतर्क्यकृदिति। यो ह्यचिन्त्यं जगदिच्छामात्रेण करोति तस्य किमशक्यम्? अतस्तावद्रूपेण प्रतिगृहावस्थानमित्याशयः। न च 'आप्तकामस्य कथमेवं रमणम्' इत्याशङ्क्याह—निजकामेति। निजानां स्वभक्तानां तासां कामेन मनोरथेन संप्लुतो वशीकृतः स्वयं स्वरूपानन्दपूर्णोपि तासां मनोरथानुसारेण एवं रेमे इत्यर्थः ॥ ४५ ॥ तासां भाग्यातिशयं सूचयन् भगवद्भजनमाह—इत्थमिति द्वयेन। ब्रह्मादयोपि यदीयां पदवीं यत्प्राप्तिमार्गमपि न विदुस्तं रमापतिं कृष्णमित्थमुक्तविवाहप्रकारेण पतिमवाप्य अनुरागसहितो हासस्तत्पूर्वकोवलोकश्च नवसङ्गमश्च तत्र जल्पा नर्मवचनानि तेषु लज्जाश्च यासां ताः स्त्रियः अविरतं निरन्तरमेधितया वर्धितया मुदा भेजुः तमेव सेवितवत्य इत्यन्वयः ॥ ४६ ॥ सेवनमेव विशेषतो दर्शयति—प्रत्युद्गमेति। दासीनां शतानि विद्यन्ते यासां तथाभूता अपि ताः स्त्रियः स्वयमेव विभोर्महत्तमस्य भर्तुः प्रत्युद्गमादिभिर्दास्यं विदधुश्चक्रुः। प्रत्युद्गम आगच्छन्तं दृष्ट्वा तदग्रतो गमनम्, आसनं आसनदानम्, वरार्हणं अर्घ्यदानादिसत्कारः, पादयोः शौचं प्रक्षालनम्, ताम्बूलसमर्पणम्, विश्रमणं पादसंवाहनादिना श्रमापहरणम्, व्यजनादिभिर्वीजनम्, गन्धस्य चन्दनादेर्दानम्, माल्यानि पुष्पाणि तत्समर्पणम्, केशप्रसारः केशप्रसाधनम्, शयनं शय्याया आस्तरणम्, स्नपनम्, उपहार्याः भक्ष्यभोज्यादयः, ते ४७ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने। ऊनषष्टितमो वृत्ति गतः कृष्णस्य सत्पतेः ॥
भौमेनाहृतकन्याभिः सहोद्वाहनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

स्थापित इति। सत्यभामाया गृहसमीपस्थमुद्यानमुपशोभयतीति तथा तत्र स्थापितः यद्यपि पारिजातं महेन्द्रः प्राहिणोदिति पूर्वोक्तेः द्वारकायां सोऽस्ति तथापि सोऽन्यत्रास्ति। अयं तु सत्यभामामनोरथेनानीतस्तदुद्याने स्थापित इति ज्ञेयम्। तस्य पारिजातस्य गन्धासवे लम्पटाः आसक्ताः भ्रमराः स्वर्गात्स्वर्गं परित्यज्य तत् पारिजातमन्वगुः ॥ ४१ ॥ ननूपकारकेण कृष्णेन कथमिन्द्रस्य संग्राम इत्यतः प्राह—ययाच इति। इन्द्रः प्रथमं मूर्द्धानमानम्य किरीटस्य कोटिभिरग्रैर्भगवत्पादौ स्पृशन् तमर्थसाधनं भौमवधादिकार्यसाधकम् अच्युतं ययाचे। भौमवधादिकं प्रार्थितवान्। अर्थसाधनमिति याचेः द्विकर्मकस्य कर्म वा पश्चात्सिद्धार्थः निष्पन्नभौमवधादिप्रयोजनः सन्महान् ज्ञानवानपि एतेन दुःसाध्यकार्यसाधकेन स्वामिना सह वृक्षे निमित्ते विगृह्य

ते विरोधं कृतवान् । आर्षः प्रयोगः । अहो आश्चर्यं सुराणां सात्त्विकानां चापि तमोऽज्ञानं जातम् । अतः आढ्यतां धनिकतां धिक् । यद्वा । सुराणां तमो धिक् आढ्यतां च धिक् ॥ ४२ ॥ अथो इति । अथ द्वारकागमनानन्तरम् एकस्मिन्नेव दैवज्ञोक्ते मुहूर्ते ताः शताधिकषोडशसहस्रसङ्ख्याकाः स्त्रियः स्त्रीः नानागारेषु तावद्रूपधरः अव्ययः सर्वत्र पूर्ण एव नत्वंशेन वर्त्तमानः भगवान् यथा यथोचितमुपयेमे । एतेन देवक्यादिबन्धुजनसमागमोऽपि भगवतः प्रभावात् प्रतिगृहमेव । अत्र चक्रवर्त्यादयः । अत्रैकस्यैव वपुषः रूपाणि प्रकाशभेदा एव नतु कायव्यूहो व्याख्येयः । "चित्रं बतैतदेकेन वपुषा युगपत्पृथक् ॥ गृहेषु द्व्यष्टं साहस्रं स्त्रिय एक उदावहत् ॥" इति वक्ष्यमाणत्वात् देवक्यादीनामपि प्रकाशभेद एव कारित इत्याहुः ॥ ४३ ॥ गृहेषु इति । तासां पत्नीनां निरस्तसाम्यातिशयेष्विति भोग्यपदार्थसमृद्ध्या साम्याधिकरहितेषु गृहेषु अवस्थितः अनपायी विश्लेषरहितः सन् इतरवत् प्राकृतजनवत् गार्हकमेधिकान् गृहस्थधर्मांश्चरन् अनुतिष्ठन् अतर्क्यकृत् अचिन्त्यस्य जगतः कर्ता निजानां भक्तानां कामेन संप्लुतो वशीकृतः स्वानन्दपूर्णो वा भगवान् कृष्णः रमाभिः लक्ष्म्यंशभूताभिः ताभी रेमे ॥ ४४ ॥ इत्थमिति द्वयेन ॥ ब्रह्मादयोऽपि यदीयां पदवीं यत्प्राप्तिमार्गमपि न विदुस्तं रमापतिं कृष्णमित्थमुक्तविवाहप्रकारेण पतिमवाप्य अनुरागसहितो हासस्तत्पूर्वकोऽवलोकश्च नवसङ्गमश्च तत्र जल्पा नर्मवचनानि तेषु लज्जा च यासां ताः स्त्रियः अविरतं निरन्तरमेधितया वर्धितया मुदा भेजुः तमेव सेवितवत्यः । यद्वा । अनुरागादिलज्जान्तान् कर्मभूतान् भेजुरिति ॥४५॥ प्रत्युद्गमेति । दासीनां शतानि विद्यन्ते यासां तथाभूता अपि ताः स्त्रियः स्वयमेव विभोर्महत्तमस्य भर्त्तुः प्रत्युद्गमादिभिर्दास्यं विदधुश्चक्रुः । प्रत्युद्गम आगच्छन्तं दृष्ट्वा तदग्रतो गमनम् आसनम् आसनदानं वरार्हणम् अर्घ्यदानादिसत्कारः पादयोः शौचं प्रक्षालनं ताम्बूलसमर्पणं विश्रमणं पादसंवाहनादिना श्रमापहरणं व्यजनादिभिर्वीजनं गन्धस्य चन्दनादेर्दानं माल्यानि पुष्पाणि तत्समर्पणं केशप्रसारः केशप्रसाधनं शयनं शय्यायाः आस्तरणं स्नपनम् उपहार्याः भक्ष्यभोज्यादयस्तैः एताश्च भगवतः स्वरूपशक्तिभूताः । तथा च स्कान्दे प्रभासखण्डे । "षोडशैव सहस्राणि गोप्यस्तत्र समागताः । हंस एव मतः कृष्णः परमात्मा जनार्दनः । तस्यैताः शक्तयो देवि षोडशैव प्रकीर्तिताः । चन्द्ररूपी मतः कृष्णः कलारूपास्तु ताः स्मृताः । सम्पूर्णमण्डला तासां मालिनी षोडशी कला । षोडशैव कला यास्तु गोपीरूपा वरानने । एकैकशस्ताः संभिन्नाः सहस्रेण पृथक्-पृथक् ।" इति पाद्मे कार्तिकमाहात्म्ये च । "कैशोरे गोपकन्यास्ता यौवने राजकन्यकाः" । इति । अतो यथा बाल्ये गोप्यः तथा यौवने पट्टमहिष्यः ॥ ४६ ॥

इति श्रीभागवते दशमस्कन्धे उत्तरार्द्धेऽन्वितार्थप्रकाशिकायामेकोनषष्टितमोऽध्यायः ॥ ५९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्रीकृष्णेन सह पारिजातनिमित्तकलहकर्त्तृ निंदादीन्निदन्नाह ययाच इति पादौ स्पृशन् सन् किरीटकोटिभिः आनम्य इंद्रः अर्थस्य साधनं साधनरूपं अच्युतं श्रीकृष्णं स्वप्रयोजनाय ययाचे याचितवान् पश्चात् सिद्ध्यर्थः सन् एतेन श्रीकृष्णेन सह विगृह्यते विग्रहं करोति स्मेत्यर्थः । अहो सुराणामपि महान् महत्तमोऽविवेकः तेषां आढ्यतां धनिकतां धिक् श्रीकृष्णेन सार्द्धं देवानां संग्रामविस्तरस्तु हरिवंशाद्विष्णुपुराणाच्च बोध्यः ॥४१॥ यथा यथाविधि ॥ ४२ ॥ अन्यग्रहाणां निरस्तसाम्यं अतिशयश्च यैस्तेषु तासां गृहेषु अनपायी अखंडः अवस्थितः अतर्क्यकृत् अचिंत्य चरित्रकृत् निजकामेन स्वलाभेन संप्लुतः संपूर्णः सन्नपि इतरो गृहस्थो यथा स्वस्त्रीभिः सह रमते तथा रमाभिः लक्ष्मीतुल्याभिः सह भगवान् रेमे ॥ ४३ ॥ अनुरागयुतो हासश्चावलोकश्च तत्पूर्वको नित्यनूतनसंगश्च तद्गतो विचित्रजल्पश्च लज्जा चैतानि ताः स्त्रियो भेजुः यद्वा । अनुरागयुता हासादयः संति यासां ताः स्त्रियः अविरतं निरंतरं एधितया मुदा हरिं भेजुः ॥ ४४ ॥ दासीनां शतानि संति यासामेव भूता अपि प्रत्युद्गमादिभिः स्वयमेव विभोः स्वपतेः श्रीकृष्णस्य दास्यं विदधुः । कृतवत्यः । प्रत्युद्गमः सन्मुखगमनं । पादशौचमंघ्रिप्रक्षालनं । विश्रमणं पादाद्यंगसंवाहनं केशप्रसारः केशप्रसाधनं । शयनं शय्याकरणं ॥ ४५ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने नरकवधोनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रसाधितस्वमनोरथेन श्रीकृष्णेन सह पारिजातनिमित्तककलहकर्त्तॄ निन्द्रादीन्निन्दन्नाह । ययाच इति । आनम्य प्रणम्य, इन्द्रः मूर्द्धानमिति च कर्त्तृकर्मपदाध्याहारः । किरीटकोटिभिः किरीटाग्रैः, पादौ स्पृशन् सन्, अर्थसाधनमाश्रितजनाभिमतप्रयोजननिष्पादकं, अच्युतं श्रीकृष्णं, ययाचे । स्वप्रयोजनाय याचितवान् । सिद्धार्थः तावन्निष्पन्नप्रयोजनः सन्नेव, एतेन स्वप्रयोजनसाधकेन भगवता, महान् सन्, विगृह्यते विग्रहं करोति । तस्मात्, अहो सुराणां तमः अहंकारं, आढ्यतां च धिक् । तदुभयं निन्द्यमित्यर्थः ॥ ४१ ॥ अथो इति । अथो अव्ययोऽविनाशिस्वरूपः, भगवान् श्रीकृष्णः, एकस्मिन् मुहूर्त्ते, नानागारेषु ताः स्त्रियः, तावद्रूपधरः सन्, यथा यथाविधि, उपयेमे । इति भगवन्महिमातिशयोक्तिः ॥ ४२ ॥ अहो तासां भाग्यमित्याह । गृहेष्विति । अतर्क्याणि अचिन्त्यानि चेष्टितानि करोतीत्यतर्क्यकृत् कृष्णः, निरस्तं साम्यमतिशयश्च येभ्यस्तेषु भोग्यादिसमूहसमाभ्यधिक-

रहितेषु, तासां गृहेषु, अवस्थितः । अनपायी विश्लेषरहितः, निजकामसंप्लुतः स्वानुभवानन्दपूर्णोऽपि, इतरः संसारी जनः यथा, तथा, गार्हकमेधिकान् गृहस्थधर्मान्, चरन्ननुतिष्ठन् सन्, रमाभिस्ताभी रामाभिरित्यर्थः । रेमे एवंविधैतन्माहात्म्योक्त्या देवक्यादिबन्धुजनसमागमोऽपि प्रतिगृहं यौगपद्येनेत्यपि सूचितम् ॥ ४३ ॥ अथाहरहस्तां वृत्तिक्रममाहेत्थमिति द्वाभ्याम् । इत्थमिति । इत्थं ब्रह्मादयः अपि, यदीयां पदवीं, न विदुः, तं रमापतिं लक्ष्मीकान्तं पतिं अवाप्य, ताः स्त्रियः, अविरतं निरन्तरं, एधितया वृद्धिं गतया, मुदा युक्ताः सत्यः, अनुरागसहितो हासस्तत्पूर्वकोऽवलोकस्तत्पूर्वको नवसंगमश्च तत्र जल्पा अतिनर्मवचनानि तेषु लज्जा तां, भेजुः संप्रापुः ॥ ४४ ॥ प्रत्युद्गमेति । किं च प्रत्युद्गमश्च आसनं च वरार्हणं च पादशौचं च ताम्बूलं च विश्रमणं च वीजनं च गन्धश्च माल्यानि च तैः, केशप्रसाधश्च शयनं च स्नपनं च उपहार्याणि च तैः, ताः दासीनां शतानि यासां तथाभूताः सत्योऽपि, विभोर्भगवतः, दास्यं स्वयमेव, विदधुश्चक्रुः । स्मेति प्रसिद्धौ । तत्र प्रत्युद्गमः प्रत्युत्थानं, आसनमासनसमर्पणं, वरार्हणं श्रेष्ठमर्हणं, पादशौचं चरणप्रक्षालनं, विश्रमणं पादसंवाहनादिना श्रमापहरणं, शेषं स्पष्टम् ॥ ४५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्द्धे एकोनषष्टितमोऽमोऽध्यायः ॥ ५९ ॥

कृष्णप्रिया

महाराज ! स्वार्थ की सीमा को देखिये ! राजा इन्द्र ने माता के कुण्डल इत्यादि भौमासुर से जब लौटाने का कार्य था तब तो विनम्र होकर सिर नवाँकर मुकुट के अग्रभाग से भगवान् श्रीकृष्ण के चरणारविन्दों का स्पर्श करके नाथ की सहायता की याचना की थी । आश्चर्य-सीमा देखिये कि जब कार्य सिद्ध हो गया तब उसी इन्द्र ने केवल तरुवर के लिये विश्वपति भगवान् श्रीकृष्ण से युद्ध ठान लिया । यह कहना होगा कि देवता लोग बड़े तमोगुणी एवं कृतघ्न ही हैं । क्या कहा जाय; धनमद से भरे हुए हैं उनकी धनमदान्धता को धिक्कार है ॥ ४१ ॥ द्वारिका में पधारकर भगवान ने अनेक एक समान महल बनवाये, प्रत्येक कुमारिका के लिये स्वतंत्र स्वरूप लिया पुनः सर्व कुमारियों के साथ एक ही मुहूर्त में विधिपूर्वक विवाह किया ॥ ४२ ॥ राजन् परीक्षित् ! भगवान् श्रीकृष्ण की प्रत्येक अर्धाङ्गनाओं के दिव्य महालयों में लोकोत्तर सर्वश्रेष्ठ सामग्रियाँ भरी थीं । इन सामग्रियों की तुलना में विश्व के किसी भी स्थान में या दिव्यलोक में सामग्री नहीं है । इन सामग्रियों से उत्तम सामग्री की सम्भावना नहीं हो सकती ॥ ४३ ॥ राजन् परीक्षित् ! ब्रह्मादिदेववर भी भगवान् श्रीकृष्ण के स्वरूप, सामर्थ्य एवं महिमा को जानते नहीं हैं और भगवान् की प्राप्ति के उपाय भी जानते नहीं हैं । ये सब रानियाँ बड़भागिनी हैं कि जिन्होंने लक्ष्मीपति भगवान् श्रीकृष्ण को अपने पति के स्वरूप में प्राप्त कर लिया था । राजन् ! इन रानियों का सौभाग्य कैसे कहा जाय ? अब द्वारिकानाथ की कृपा से इन रानियों के आनन्द एवं अनुराग में बाढ़ आती रहती थी । सब रानियाँ मधुर मुस्कान, रसमय चितवन, नवसङ्गम, स्नेहालाप और भाव को बढ़ानेवाली सहज सुलभ लज्जा से निरंतर भगवान् की सेवा करती थीं ॥ ४४ ॥ राजन् ! नाथ जब निजमहल में विराजते तब भगवान् के साथ सैकड़ों दासियाँ सेवा में रहतीं, लेकिन रानियाँ स्वयं सादर एवं सानुराग सेवा करती थीं । जब भगवान् बाहर से पधारे तब स्वयं लिवा लातीं, श्रेष्ठ आसन पर बैठातीं, श्रेष्ठ सामग्रियों से स्वागत करतीं, पादपखारन करतीं, चरणसेवा करतीं, मीजन करतीं, इत्र-तैल फुलेल लगातीं, गन्ध लगातीं, कुसुम मालायें पहनाती, केश सँवारती, भगवान को पौठाती, अभ्यङ्ग कराती, महाप्रसाद लिवाती इस प्रकार विविध सेवा अपने करकमलों से ही करती रहती थीं ॥ ४५ ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे निरोधलीलायां भाषान्तरे एकोनषष्टितमोऽध्यायः समाप्तः ॥ ५९ ॥

◆ ◆

विजयध्वजतीर्थीयपाठः

श्रीशुक उवाच

हत्वा नरकमत्युग्रं दानवं दानवान्तकः। आरुह्य गरुडं प्रायात्प्राग्ज्योतिषपुरान्नृप ॥ १ ॥
स गच्छन् गगने विष्णुः वन्दितुं देवमातरम्। जगाम त्रिदशावासं सहितः सत्यभामया ॥ २ ॥
स्वर्गद्वारं गतो विष्णुर्दध्मौ शङ्खं महास्वनम्। उपाजग्मुस्तदाकर्ण्य सार्घ्यपाद्या दिवौकसः ॥ ३ ॥
पूजितस्तैः सुरैः कृष्णः भक्तिनम्रैर्गतज्वरैः। सुरेन्द्रभवनं दिव्यं प्रविवेश मनोरमम् ॥ ४ ॥
तत्र शक्रः समं शच्या पूजयामास केशवम्। रत्नैराभरणैर्दिव्यैर्गन्धमाल्यैश्च शोभनैः ॥ ५ ॥
ततः प्रायात्पुरीं मातुरदित्याः सह भार्यया। दृष्ट्वोपतस्थे तं देवी पुत्रमायान्तमच्युतम् ॥ ६ ॥
ववन्दे तां हरिस्तं सा पूजयामास भामिनी। आशीर्भिः परमप्रीता चिरं दृष्टं यदूत्तमम् ॥ ७ ॥
सत्यभामापि कौरव्य श्वश्र्वाः कृष्णेन चोदिता। पादयोः कुण्डले तस्या निधाय प्रणनाम वै। ८।
स्नुषामाश्लिष्य सन्तुष्टा सा पुनर्लब्धकुण्डला। आनन्दबाष्पप्रचुरा प्राहेदं कश्यपप्रिया ॥ ९ ॥
न ते जरा न वैरूप्यं कान्तेन सह विप्रियम्। भूयात्कल्याणि सुव्यक्तं मत्प्रसादात्कदाचन ॥१० ॥
ततोऽनुज्ञाप्य तां देवीं त्रिदशानपि केशवः। आरुह्य प्रययौ तार्क्ष्यं सहितः सत्यभामया ॥ ११ ॥
महात्मना गगने देव देव्यौ गरुत्मता नीयमानौ विचित्रम्। अपश्यतां नन्दनं चारुगुप्तं शचीभर्तुर्दयितं हृद्यगन्धम् ॥ १२ ॥
वनं दृष्ट्वा दिव्यगन्धं सुपुष्पं कृष्णं सत्या प्राह पाणौ गृहीत्वा। प्रविश्यास्मिन् साधु चित्रं विहर्तुं मुहूर्तं मे काम्यते केशवेति ॥ १३ ॥
अथावरुह्य गरुडात्तस्या वचनगौरवात्। प्रविवेश वनं कृष्णः पालितं शक्रकिङ्करैः ॥ १४ ॥
तत्रापश्यत्तरून् दिव्यान् मत्तसारङ्गनादितान्। फलभारनतान् भूरि प्रसूनरजसावृतान् ॥ १५ ॥
चलत्किसलयोपेतान् विहङ्गध्वनिशोभितान्। विचरन्ती तथा तत्र पारिजातं महाद्रुमम् ॥ १६ ॥
दृष्ट्वा प्रपच्छ गोविन्दं विस्मयाकुललोचना। को नामायं तरुर्देव विचित्रो भुवनत्रये ॥ १७ ॥
सत्यमेतस्य वृक्षस्य कृतार्थाः फलभागिनः। प्रवालमूलो विपुलो जातरूपमहातनुः ॥ १८ ॥
इन्द्रानीलच्छदच्छन्नो लसद्वैदूर्यवेदिकः। माणिक्यपुष्पोविविधमुक्ताफलफलान्वितः ॥ १९ ॥
गोमेदपक्कप्रकरो वज्रकिञ्जल्करञ्जितः। स्फुरन्मरकतस्थूलशाखाशतविराजितः ॥ २० ॥
तरुरेषजगन्नाथ मनो मे हरते भृशम्। नेतव्योयं पुरीं वृक्षो यद्यहं ते प्रिया प्रभो ॥ २१ ॥
छायायामुपविष्टां मामन्यपत्न्यस्तवानघ। दृष्ट्वा मंस्यन्ति दयितां सर्वाभ्यो मां तवाच्युत ॥ २२ ॥
इत्युक्तो देवकीपुत्रः सत्यया प्रियकान्तया। प्राह नायं तनुर्भद्रे नेतव्यो नन्दनाद्वनात् ॥ २३ ॥
पुरा क्षीराम्बुधेर्जातो मथ्यमानात्सुरासुरैः। शक्राय दत्तः सकलैः सदा तत्फलभोक्तृभिः ॥ २४।
तन्नाहार्यमनादृत्य मया मित्रं शतक्रतुम्। तरुरत्नं सरोजाक्षि धर्ममेवानुतिष्ठता ॥ २५ ॥
नीयमाने च वृक्षेऽस्मिन् पारिजाते शुचिस्मिते। सङ्ग्रामो जायते घोरस्त्रिदशैर्जयकाङ्क्षिभिः ॥ २६ ॥
इत्युक्ता देवदेवेन सत्यभामा पुनर्हरिम्। प्राह भीषयसे किं मां व्यलीकैः कंसमर्दन ॥ २७ ॥
नाभ्यनन्ददद्दुराचारा शची मां गृहमागताम्। हेतुर्हि वृक्षस्तस्यायं भर्तृपौरुषगर्विता ॥ २८ ॥
नेतव्यः सर्वथा वृक्षः पारिजातोयमच्युत। प्रियाहं तव चेन्नाथ नोचेद्विरम साम्प्रतम् ॥ २९ ॥
इत्युक्तः सत्यया कृष्णस्ताननादृत्य रक्षकान्। उत्पाट्यारोपयामास परिजातं गरुत्मति ॥ ३० ॥
ततो निवारयामासुर्गोविन्दं वनपालकाः। केचिद्द्रुततरं जग्मुर्देवेन्द्राय निवेदितुम् ॥ ३१ ॥
कृष्ण कृष्ण न हर्तव्यस्तरुरेषोऽमरार्चितः। हरसे यदि तस्य त्वं फलं सद्योऽनुभोक्ष्यसि ॥ ३२ ॥
प्राप्नोषि न पुरीं कृष्ण सहानेन महीरुहा। सद्यः पश्यसि देवेन्द्रं पृष्ठतोऽभ्युद्युतायुधम् ॥ ३३ ॥
सुरेन्द्रान्तिकमासाद्य द्रुतं ते वनरक्षकाः। उपविष्टं समं शच्या शक्रं दृष्ट्वाऽब्रुवन्नृप ॥ ३४ ॥

वनरक्षका ऊचुः

अवज्ञायाखिलान् देवानिन्द्राणीं च त्वया सह। जहार कृष्णदयिता पारिजातं महाद्रुमम् ॥ ३५ ॥
उक्ताऽस्माभिर्भृशं देव वारयद्भिर्हरिप्रिया। उपालभ्याहरद्वृक्षं भर्तृपौरुषगर्विता ॥ ३६ ॥

श्रीशुक उवाच

इत्याकर्ण्याप्रियं शक्रो दण्डाहत इवोरगः। शचीं विलोक्य पार्श्वस्थां नामृष्यत्तत्पराभवम् ॥ ३७ ॥

सन्नाहोद्योगमाघोष्य सन्निपात्य च सैनिकान् । लोकपालान् समाहूय निश्चक्राम सुरेश्वरः ।। ३८ ।।
ऐरावतं चतुर्दन्तमारुह्य वरवारणम् । गृहीतवज्रं गच्छन्तमनुजग्मुर्दिवौकसः ।। ३९ ।।
वैश्वानरस्तु तुरगमारुह्य दृढदंशितः । घोरां शतघ्नोमादाय स्रुवपुच्छां ययौ रणम् ।। ४० ।।
यमस्त्वारुह्य महिषं दण्डमादाय वीर्यवान् । मृत्युकालादिभिर्युक्तो युद्धार्थी शक्रमन्वगात् ।।४१।।
निर्ऋतिश्च महातेजा घोरमारुह्य पौरुषम् । असिहस्तो महाबाहुर्युद्धाय प्रययौ नृप ।। ४२ ।।
मकरं भीषणाकारमारुह्य वरुणस्त्वरन् । पाशोद्यतकरः प्रायाद्युद्धायानुशचीपतिम् ।। ४३ ।।
वायुः कृष्णमृगारूढो दंशितस्तोमरायुधः । सुरेश्वरमनुप्रायाद्योद्धु चक्रभृता सह ।। ४४ ।।
ऊढां चतुर्भिः पुरुषैः शिबिकां नरवाहनः । योद्धुकामस्त्वरन् प्रायाद्विष्णुना मुद्गरायुधः ।।४५।।
ईशानो वृषभं तुङ्गमारुह्य शितशूलभृत् । वासवेन समं प्रायाद्भूतकोटिसमन्वितः ।। ४६ ।।
भेरीशङ्खमृदङ्गैश्च पणवानकगोमुखैः । सुवर्णसुषिरैर्दिव्यैः कांस्यतालैश्च भूरिभिः ।। ४७ ।।
रथनेमिनिनादैश्च हयानां खरनिःस्वनैः । क्ष्वेलितास्फोटितैर्घोरैः सङ्ग्रामाह्वानगर्जनैः ।। ४८ ।।
तिष्ठ तिष्ठेति मा याहि क्व यासीति पुनः पुनः । प्रवदद्भिः सुरगणैः शतशोथ सहस्रशः ।। ४९ ।।
कम्पयद्भिश्च शस्त्रौघैः प्रेषयद्भिश्च वाहनम् । पुरोहमितिगच्छद्भिः शतशोथ सहस्रशः ।।५०।।
घोरैर्ज्याघातनिर्घोषैः सिंहनादैश्च भूरिभिः । अभिदुद्रुवुरुद्वृत्ताः सिंहं गोमायवो यथा ।। ५१ ।।

इति श्रीभागवते महापुराणे दशमस्कन्धे विजयध्वजतीर्थपाठे पञ्चषष्टितमोऽध्यायः ।। अधिकपाठे प्रथमः ।। १ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

गतज्वरैः नष्टसन्तापः ।। १–३–४–५ ।। उपतस्थे समीपे तस्थौ ।। ६ ।। भाम तेजः अस्याः अस्तीति भामिनी चिरकालदृष्टम् ।। ७ ।। श्वश्र्वाः भर्तुर्मातुः ।। ८–९ ।। सत्यभामामाशिषा योजयति–न ते जरेति । वैरूप्यं सौन्दर्याभावः विप्रियं कलहः ।। १०–११ ।। हृद्यगन्धं हृदयप्रियगन्धम् ।। –१२–१३ ।। काम्यते वनसम्पदिति शेषः । काम इति वा ।। १४ ।। सारङ्गनादितान् भृङ्गनादितान् ।। १५–१६ ।। विविधं चित्रं मुख्यं मिश्रफलं यस्मिन् स विचित्रः “चित्रमालेख्यमिश्रयोः’ इति “मिश्रमाविलमुख्ययोः” इति च ।। १७ ।। एतस्य वृक्षस्य फलभागिनः कृतार्थाः इति सत्यमित्यन्वयः । वैचित्र्यं कथयति–प्रबालेति । प्रवालो रत्नविशेष एव मूलं शिफा यस्य स तथा विपुलो विस्तृतः जातरूपं सुवर्णमेव महातनुर्यस्य स तथा ।। १८ ।। इन्द्रनीलमेव छदः पत्रं इन्द्रनीलच्छदः तेन छन्नः सम्वृतः लसद्वैदूर्यरत्नमेव वेदिः परिष्कृता भूमिर्यस्य स लसद्वैदूर्यवेदिकः माणिक्यरत्नान्येव पुष्पाणि यस्य स माणिक्यपुष्पः विविधानि तारतम्योपेतानि मुक्ताफलान्येव फलानि विविधमुक्ताफलानि तैरन्वितः ।। १९ ।। गोमेदरत्नान्येव पक्वानि गोमेदपक्वानि तेषां प्रकारा यस्य स तथा वज्ररत्नान्येव किञ्जल्कानि तै रञ्जितोऽरुणीकृतः स्थूलाः शाखाः स्फुरन्ति मरकतरत्नान्येव स्थूलशाखाः स्फुरन्मरकतस्थूलशाखाः तासां शतेन विराजितः ।। २०–२१ ।। मंस्यन्ति निरूपयन्ति ।। २२ ।। २३ ।। तस्मात्समुद्राज्जातानां फलानां भोक्तृभिः ।। २४–२५ ।। जयकाङ्क्षिभिः जयेच्छुभिः जितयुद्धैर्वा ।। २६ ।। व्यलीकैः कपटवचनैः ।। २७ ।। तरून्नयने निमित्तमाह–नेति ।। २८ ।। विरम प्रियभाषणमितिशेषः ।। २९–३५ ।। उपालभ्य भर्त्सयित्वा ।। ३६–३७ ।। सन्नाहो युद्धोद्योगार्थं विद्यमानं गोमुखं सन्निपात्य सम्मेलयित्वा सैनिकान् सेनानायकान् ।। ३८–३९ ।। स्रुवं पुच्छे यस्याः सा ताम् ।।४०।। मृत्युकालादिभिः प्रभृतिभिः ।।४१–४३।। चक्रभृता कृष्णेन ।।४४।। नरवाहनो वैश्रवणः ।४५-४६। सुवर्णसुषिरैः काहलैः ।। ४७ ।। क्ष्वेलितैः सिंहनादैः आस्फोटितैः भुजास्फालैः ।। ४८–५१ ।।

इति श्रीविजयध्वजतीर्थकृतपदरत्नावल्यां पञ्चषष्टितमोऽध्याय. ।। ६५–१ ।।

अथ षट्षष्टितमोऽध्यायः

श्रीशुक उवाच

सुरानभिद्रुतान् दृष्ट्वा सत्यमाह जगत्पतिः । इमे प्राहुणिकाः प्राप्तास्तववृन्दारका इति ।। १ ।।
तथा ब्रुवाणे देवेशे प्रेषिता देबसैनिकाः । नदन्तो मुमुचुः कृष्णे शरबृष्टिं कुरूद्वह ।। २ ।।
ततः शाङ्गं समादाय सत्या व्यसनविक्लवा । मुक्तांश्चिच्छेद बाणौघैस्ताञ्छरान्देवसैनिकैः ।। ३ ।।
ततो वैश्रवणः श्रीमान् बहुभिर्गुह्यकैर्वृत्तः । विस्फारयंस्तालमात्रं कार्मुकं कनकाटवि ।। ४ ।।
स्वर्णपुङ्खान् शरान्मुञ्चन् सिंहवद्व्यनदन्मुहुः । अभिदुद्राव समरे तिष्ठतिष्ठेति चाब्रवीत् ।। ५ ।।
तैः पञ्चभिः शरैः सत्या निशितैर्मर्मभेदभिः । अर्पयामास वेगेन विशाले जठरे नृप ।। ६ ।।
सोतिविद्धो रणे बाणैस्त्रिभिर्मल्लैर्हरिप्रियाम् । अयोधयद्धनपतिः सिंहनादं व्यनीनद्रत् ।। ७ ।।

तानप्राप्तानर्धचन्द्रैस्त्रिभिश्चिच्छेद सा शरैः । भूयोष्टभिः शरैर्देवी वत्सदन्तैर्मनोजवैः ॥ ८ ॥
विव्याध गुह्यकपतेर्ललाटे कुरुपुङ्गवः । पीडितस्तैर्भृशं बाणैः पौलस्त्यः क्रोधविह्वलः ॥ ९ ॥
सन्दधे निशितान् बाणानेकविंशति संयुगे । तानन्तरे सत्यभामा सायकैः सप्तभिर्नृप ॥ १० ॥
चिच्छेद निमिषार्धेन त्रिधैकैकं हरिप्रिया । सत्यभामा ततः क्रुद्धा पौलस्त्यस्य महद्धनुः ॥ ११ ॥
अर्धचन्द्रेण चिच्छेद मुष्टिदेशे द्विधा नृप । ततोन्यच्चापमादाय सज्यं कृत्वा धनेश्वरः ॥ १२ ॥
ववर्ष शरजालानि क्रोधात्सर्प इव श्वसन् । सर्वांस्तान् सायकान् सङ्ख्ये शरैः सन्नतपर्वभिः ॥ १३ ॥
चिच्छेद लीलया देवी तदद्भुतमिवाभवत् । ततः क्रुद्धो वैश्रवणः सत्यभामां विलोक्य च ॥ १४ ॥
प्राह पश्य हनिष्यामि त्वामद्य मम पौरुषम् । इत्युक्त्वा तालमात्रे तु चापे गुह्यकसत्तमः ॥ १५ ॥
पश्यतां सर्वदेवानां मार्ष्टुकामः पराभवम् । सन्दधे सूदितुं देवीमर्धचन्द्रं शरोत्तमम् ॥ १६ ॥
तदवेत्य मनस्तस्य क्षुरप्रेण हरिप्रिया । चिच्छेद कार्मुकं तस्य मुष्टिदेशे कुरूद्वह ॥ १७ ॥
ततो मुद्गरमादाय घोरं दानवभीषणम् । भ्रामयित्वा शतगुणं देव्यै चिक्षेप वित्तपः ॥ १८ ॥
तं मुद्गरं महाघोरमायान्तं कुरुपुङ्गव । वामेन पाणिना कृष्णो जग्राहोच्चैर्जहास च ॥ १९ ॥
ततो निवृत्तसङ्ग्रामो विदुद्राव धनेश्वरः । शशंस देवीं कृष्णश्च समाश्लिष्याभिपूजयन् ॥ २० ॥
पलायिते धनपतौ सङ्ग्रामे कंसवैरिणा । वरुणोभ्यद्रवत्कृष्णं पाशमुद्यम्य संयुगे ॥ २१ ॥
तमायान्तमभिप्रेक्ष्य तार्क्ष्यो मकरवाहनम् । अभ्यद्रवन्महासत्त्वः शार्दूल इव गोवृषम् ॥ २२ ॥
तयोः समभवद्युद्धं घोरं तार्क्ष्यजलेशयोः । यथादेवासुरे युद्धे बलिवासवयोरिव ॥ २३ ॥
तत्र काश्यपपुत्रस्य कण्ठे पाशं जलेश्वरः । क्रुद्धश्चकर्ष विन्यस्य सिहः सिंहमिवौजसा ॥ २४ ॥
तं पक्षकोट्या गरुडः समुद्धृत्य जलेश्वरम् । पद्भ्यां गृहीत्वा मकरं चिक्षेप वरुणालये ॥ २५ ॥
कृच्छ्राद्गृहीतपाशस्तु वरुणो गतवाहनः । पदातिरेव सङ्ग्रामाद्विदुद्राव यथागतम् ॥ २६ ॥
तथा गते वार्धिपतौ सङ्ग्रामे वायुपावकौ । सममेवाभ्यवर्तेतां गोविन्दं कुरुसत्तम ॥ २७ ॥
पावकः पञ्चभिर्बाणैर्मारुतश्च तथा त्रिभिः । आयोधयद्धृषीकेशं तदद्भुतमिवाभवत् ॥ २८ ॥
ततः प्रहस्य गोविन्दो बाणेनैकेन पावकम् । विव्याध सप्तभिश्चैव समीरणमरिन्दमः ॥ २९ ॥
एकेनाग्निः क्षुरप्रेण गाढं वक्षसि ताडितः । तमसा धारणं मत्वा विदुद्राव रणाद्द्रुतम् ॥ ३० ॥
दृष्ट्वा समीरणो युद्धादपयातं हुताशनम् । सायकाचितसर्वाङ्गमात्मानं चातिविह्वलः ॥ ३१ ॥
विदित्वा पुण्डरीकाक्षं संग्रामे प्रत्युपस्थितम् । न्यवर्तत कुरुश्रेष्ठ प्राणत्राणपरायणः ॥ ३२ ॥
ततो महिषमारुह्य दण्डमुद्यम्य भास्वरम् । कृष्णमभ्यद्रवद्युद्धे यमः क्रोधारुणेक्षणः ॥ ३३ ॥
तमुद्यतमहादण्डं दृष्ट्वा कमललोचनः । गदां विसृज्य तद्धस्तात्पातयामास भूतले ॥ ३४ ॥
गदया ताडितो दण्डे त्रस्तहस्तः परेतराट् । विदुद्राव परावृत्य महिषेण कुरूद्वह ॥ ३५ ॥
वैवस्वत गतं दृष्ट्वा निर्ऋतिर्भयविह्वलः । नाभ्यवर्तत गोविन्दं योद्धुं विदिततद्बलः ॥ ३६ ॥
शङ्करस्तु महातेजास्त्रिशूली वृषवाहनः । अनेकभूतसङ्घातैः कृष्णमभ्यद्रवद्रणे ॥ ३७ ॥
तावुभौ लोकविख्यातौ बलिनौ वीर्यशालिनौ । चक्राते कदनं घोरं परस्परजयैषिणौ ॥ ३८ ॥
ईशानो दशभिर्बाणैः कृष्णं तार्क्ष्यं च पञ्चभिः । विव्याध समरे राजन् तिष्ठतिष्ठेति चावदत् ॥ ३९ ॥
ततः शार्ङ्गं समादाय कृष्णः परपुरञ्जयः । त्रिंशद्भिर्युगपद्बाणैर्विव्याध वृषवाहनम् ॥ ४० ॥
गरुडः पन्नगरिपुः पद्भ्यां द्वाभ्यां च संयुगे । पक्षाभ्यां चञ्चुकोट्या च मर्दयामास ते वृषम् ॥ ४१ ॥
भूयोपि कृष्णो नाराचैः पञ्चाशत्प्रमितैर्नृप । योधयामास समरे शङ्करं लोकशङ्करम् ॥ ४२ ॥
ततस्त्रिशूलमाविध्य निशितं घोरदर्शनम् । प्राहिणोद्वासुदेवाय कुपितो धूर्जटिर्नृप ॥ ४३ ॥
दृष्ट्वा त्रिशूलमायातं केशवस्तं निवारितुम् । गदां कौमोदकीं गुर्वीं प्राहिणोद्दैत्यमर्दनीम् ॥ ४४ ॥
ते वै कौमोदकी शूले कृत्वा नभसि सङ्गरम् । ज्वलमाने महाघोरे पेततुः सममम्बुधौ ॥ ४५ ॥
निपात्याब्धौ त्रिशूलं तद्गदा कौमोदकी पुनः । आससाद करं विष्णोस्त्रिशूलमपि शूलिनः ॥ ४६ ॥
तत उद्यम्य निशितं खड्गं पन्नगभूषणः । कृष्णमभ्यद्रवत्सङ्ख्ये पार्ष्णिभ्यां चोदयन् वृषम् ॥ ४७ ॥
तूर्णं गृहीत्वा बाहुभ्यां विषाणे तस्य नन्दिनः । स शूलपाणिं चिक्षेप वैनतेयो धनुः शतम् ॥ ४८ ॥
ततो विसृज्य सङ्ग्रामं त्रिशूली वृषवाहनः । प्रमथैः सहितः प्रायात्कुरुश्रेष्ठ यथागतम् ॥ ४९ ॥

इति श्रीभागवतेमहापुराणेदशमस्कन्धेषट्षष्टितमोऽध्यायः ॥ ६६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्राहुणिकाः सम्भावनया भोजयितव्याः वृन्दारका देवाः ॥ १–३ ॥ कनकाविद्धाटवीः कोटिर्यस्य तत्तथा ॥ ४–५ ॥ विशाले जठरे विस्तृतोन्नतोदरे ओदनमिवेति शेषः ॥ ६–७ ॥ वत्सदन्तैः शरविशेषैः ॥ ८–९ ॥ अन्तरे मध्ये ॥ १०–१९ ॥ निवृत्तसंग्रामः निवृत्तयुद्धः ॥ २०—२३ ॥ काश्यपपुत्रस्य गरुडस्य ॥ २४–२६ ॥ वार्धिपतौ वरुणे ॥ २७–२९ ॥ असाधारणं लोकोत्तरम् ॥ ३० ॥ सायकाचितसर्वाङ्गं शरसञ्चितसर्वावयवम् ॥ ३१–३४ ॥ परेतराट् यमः ॥ ३५–३७ ॥ कदनं युद्धम् ॥ ३८–४० ॥ चञ्चुकोट्या तुण्डकोट्या वृषं नन्दिकेश्वरम् ॥ ४१–४२ ॥ धूर्जटिः शङ्करः ॥४३–४६॥ पन्नगभूषणः सर्पालङ्कारः शिवः पार्ष्णिभ्यामास्फालनेनचोदयन् प्रेरयन् ॥ ४७ ॥ शूलपाणिना सहितं नन्दिनम् ॥ त्रिशूलित्वं गणस्यापि सम्भवतीति वृषवाहन इति ॥ ४९ ॥

इति श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्या षट्षष्टितमोऽध्याय ॥ ६६ ॥ अधिकपाठे द्वितीयः ॥ २ ॥

सप्तषष्टितमोऽध्यायः

श्रीशुक उवाच

ततः स्वयं देवपतिस्तुङ्गमारुह्य वारणम् । किरीटी बद्धतूणीरः प्रगृहीतशरासनः ॥ १ ॥
अभ्यद्रवद्रणे कृष्णं गजः केसरिणं यथा । पारिजातकृते राजन् पौलोम्या वचनं स्मरन् ॥ २ ॥
तमायान्तमभिप्रेक्ष्य हरिः परपुरञ्जयः । शङ्खं दध्मौ महानादं दिशः समभिपूरयन् ॥ ३ ॥
तमभिद्रुत्य देवेन्द्रो महद्विस्फारयन् धनुः । क्षुरप्रेण सुतीक्ष्णेन कृष्णं विव्याध सङ्गरे ॥ ४ ॥
हरिर्विद्धः क्षुरप्रेण देवराजेन वक्षसि । प्रहस्य साधु शक्रोसि युक्तं त इति चाब्रवीत् ॥ ५ ॥
भूयोपि बाणान् दश देवराजः सन्धाय चापे भुजगेन्द्रकल्पे । आकर्णपूर्णं विनिकृष्य कृष्णे मुमोच चक्रे सह सिंहनादम् ॥ ६ ॥
तानन्तरे कंसरिपुर्महात्मा छित्वा त्रिधैकेन शरेण बाणान् । विव्याध बाणैर्दशभिः सुधौतैः पुरन्दरं भारत लीलयैव ॥ ७ ॥
ते शरा देवराजस्य गात्रं निर्भिद्य सावृति । शोणिताक्ताः प्रदृश्यंते भूयो वेगेन निर्गताः ॥ ८ ॥
पुनश्च शक्रः कोदण्डे शरान् सन्धाय षोडश । मुमोचाकृष्य गोविन्दस्ताश्चकर्त शरैस्त्रिभिः ॥ ९ ॥
भूयोपि बाणैस्त्रिंशद्भिः सुरराजानमाहवे । आयोधयद्धरिस्ते च ममज्जुः शक्रवक्षसि ॥ १० ॥
ततश्चुकोप देवेन्द्रो दण्डाहत इवोरगः । प्रेषयामास तोत्रेण तार्क्ष्यं प्रति महागजम् ॥ ११ ॥
स गजः प्राप्य गरुडं पाकशासनचोदित; । चतुर्भिर्धटयामास दन्तैर्बाहुयुगान्तरे ॥ १२ ॥
ततस्तुण्डेन गरुडः पक्षाभ्यां च तथा नखैः । अर्दयामास कौरव्य गजमैरावताह्वयम् ॥ १३ ॥
शक्रस्तु वज्रमुद्यम्य घोरं दानवभीषणम् । पश्यतां सर्वभूतानां प्रजहार वृषाकपिम् ॥ १४ ॥
तमागतं मधुरिपुर्वज्रं दुश्च्यवनायुधम् । वामेन पाणिना विष्णुर्जग्राह प्रजहास च ॥ १५ ॥
निरायुधः सुरपतिर्गरुडार्दितवाहनः । व्यावर्तत रणाद्राजन् व्रीडावनतकन्धरः ॥ १६ ॥
तं दृष्ट्वा भ्रष्टसङ्कल्पं पलायनपरायणम् । सत्यभामा सुरपतिं प्रहसन्तीदमब्रवीत् ॥ १७ ॥

सत्यभामोवाच ।

एहि शक्र निवर्तस्व मा या हि कुलिशायुध । पलायनमयुक्तं हि पौलोम्या वल्लभस्य ते ॥ १८ ॥
ऐश्वर्यमत्ता पौलोमी भर्तृपौरुषगर्विता । अवमंस्यति सद्यस्त्वां भार्या रणपराजितम् ॥ १९ ॥
इत्थं देव्या गिरं शक्रः सोपालम्भमुदीरिताम् । निशम्याभिमुखो भूत्वा प्राह देवीं शुचिस्मिता ॥ २० ॥

इन्द्र उवाच

येनामरासुरमहोरगयक्षसिद्धागन्धर्वकिन्नरपिशाचनिशाराद्याः ।
सृष्टास्त्रिलोकगुरुणा रणमूर्ध्नि तेनको वा न याति परिभूतिमलं विरुध्य ॥ २१ ॥
वत्सो यथा तनुबलः सकृदेत्य मातर्यूथस्य पानसमये कुरुते विरोधम् ।
तद्वद्वयं च निजशैशवमप्रमेये—नाथे विरुध्य पिशिताशनि दर्शयाम ॥ २२ ॥

इति सत्राजितः पुत्रीमुक्त्वा भारतसत्तम । कृताञ्जलिः प्रणम्याह वासुदेवं पुरन्दरः ॥ २३ ॥

इन्द्र उवाच

नमस्ते देवदेवेश पुण्डरीकाक्ष माधव । क्षमस्व मत्कृतं विश्वमपराधं जगत्पते ॥ २४ ॥
न मां त्वदेकशरणं शरणागतवत्सल । भूरिबालिशमक्षान्तं परित्यक्तुं त्वमर्हसि ॥ २५ ॥

ऐरावतश्च कुलिशं पारिजातश्च पादपः। देवराज्यञ्च भगवन्नियञ्चाप्यमरावती ॥ २६ ॥
त्वदधीनमिदम्विश्वमहमाज्ञाकरस्तव । अत्र यद्रोचते नेतुं नीयतां तद्यथेच्छया ॥ २७ ॥
किन्तु वक्ष्यामि गोविन्द मूलं त्वयि विरुध्यतः। रमसे मानुषे लोके भगवंस्त्वमनन्यधीः ॥ २८ ॥
तत्र नीते पारिजाते भवता कल्पपादपे। तेन सा जायते स्वर्गान्निर्विशेषा वसुन्धरा ॥ २९ ॥
तेनाहं यदुशार्दूल विरोधं कृतवांस्त्वयि । तत्क्षन्तव्यं त्वया देव कार्याकार्यं विजानता ॥ ३० ॥

श्रीशुक उवाच

इत्युक्तो देवराजेन देवदेवो जनार्दनः। पुरन्दरं कुरुश्रेष्ठ प्राह प्रहसिताननः ॥ ३१ ॥

श्रीभगवानुवाच

अपराधस्त्वया शक्र न कश्चिदपि चेष्टितः। यत्कृतं तन्मयैवागस्त्वभेदादावयोः परम् ॥ ३२ ॥
यत्त्वयाद्य सहस्राक्ष चेष्टितं साध्वसाधुवा। मयैव यत्कृतं सर्वं नात्र कार्या विचारणा ॥ ३३ ॥
पारिजातस्तरुश्रेष्ठो मय्यारूढे तर्युदिवम्। मन्निर्देशात्सहस्राक्ष स्वयमेष्यति नन्दनम् ॥ ३४ ॥
इत्युक्तो वासुदेवेन देवराजः कुरूद्वह। गोविन्दं सत्यभामाञ्च प्रसाद्य गरुडं तथा ॥ ३५ ॥
पुत्रो मे रक्षितव्यस्ते श्यालो बीभत्सुरित्यपि। भूयोभूयः प्रार्थयित्वा कृतानुज्ञः पुरन्दरः ॥ ३६ ॥
सार्धं सकलदिक्पालैर्लब्धवज्रः पुरं ययौ। पुरन्दरं सदिक्पालं विसृज्य यदुनन्दनः ॥ ३७ ॥
गरुडं प्राह कौरव्य यास्यामो द्वारकामिति। गोविन्दं सत्यभामाञ्च पारिजातञ्च पादपम् ॥ ३८ ॥
गरुडः पन्नगरिपुर्लीलयैव वहन् ययौ। सम्प्रविश्य पुरीं रम्यां द्वारतोरणभूषिताम् ॥ ३९ ॥
पताकमालिनीं दिव्यां सिक्तसम्मृष्टभूतलाम्। ऊढोपायनताम्बूलस्रग्गन्धकलयाक्षतैः ॥ ४० ॥
उपस्थितैर्यदुश्रेष्ठैः पूजितश्चाभिवन्दितः। तूर्यमङ्गलनिर्घोषैर्वेदस्वाध्यायनिस्स्वनैः ॥ ४१ ॥
प्रविवेश सभां दिव्यां सुधर्मां वृद्धसेविताम्। आहुकं वसुदेवञ्च बलभद्रं तथाग्रजम् ॥ ४२ ॥
आभवाद्य यथान्यायं पूजितस्तैर्यथोचितम्। उपविष्टः सभामध्ये काञ्चने परमासने ॥ ४३ ॥
रराज राजशार्दूल वृहस्पतिपुरोगमैः। लोकपालैरुपासीनैर्दिवि वज्रधरो यथा ॥ ४४ ॥
प्राङ्गणे सत्यभामायाः पारिजातं महाद्रुमम्। स्थापयामास गोविन्दः सर्वतो मणिकुट्टिमे ॥ ४५ ॥
आयान्तं देवकीपुत्रं योषित्सार्थेन भूरिणा। श्रुत्वा द्रष्टुमुपाजग्मुः सकला यादवस्त्रियः ॥ ४६ ॥
वसुदेवस्तु कौरव्य रोहिण्याद्याः स्त्रियोखिलाः। आजग्मुः केशवं द्रष्टुं जितशत्रुमनामयम् ॥ ४७ ॥
स दृष्ट्वा मातरो विष्णुर्देवक्या सह सङ्गताः। चक्रे प्रणाममाशीर्भिस्ताश्च तं प्रत्यपूजयन् ॥ ४८ ॥
रुक्मिण्याद्यास्तथा सप्त महिष्यः कृष्णवल्लभाः। प्रणेमुर्देवमभ्येत्य दिव्यरूपाः स्वलङ्कृताः ॥ ४९ ॥
रेवती रामदयिता त्रिवक्रा च यशस्विनी। एकानङ्गा च तन्वङ्गी चित्रा च वरवर्णिनी ॥ ५० ॥
अन्याश्च कुरुशार्दूल भोजवृष्ण्यन्धकस्त्रियः। आनीतप्रमदासार्थं जितशत्रुमनामयम् ॥ ५१ ॥
गोविन्दं सत्यभामां चाप्यानीतममरद्रुमम्। प्रीत्युत्फुल्लमुखाः सर्वे कौतुकाद्द्रष्टुमीययुः ॥ ५२ ॥
तं समेता यथाजोषं लाजप्रसवतण्डुलैः। स्पृष्ट्वा मूर्ध्नि मुकुन्दस्य जग्मुः स्वं स्वं निवेशनम् ॥ ५३ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

ते तव युक्तं न्याय्यं **स्त्रीजितस्येति** शेषः। न्याय्ये सम्युक्तमिति यादवः॥ १–५ ॥ सः ह इति च्छेदः स शक्रः युद्धप्रारम्भे ॥ ६–७ ॥ गात्रं गात्राण्यवयवान् सावृतीतिक्रियाविशेषणं सकवचनिर्भिद्य ॥ ८–९ ॥ आहवे युद्धे ॥ १० ॥ तोत्रेण गजताडनचर्मणा ॥ ११ ॥ बाहुयुगान्तरे वक्षसि ॥ १२–१४ ॥ दुश्च्यवनायुधम् इन्द्रायुधम् अजेयप्रहारार्थमायुधं समाप्तमिति दर्शयितुं पूनर्वचनमिति ज्ञातव्यम् ॥ १५–१७ ॥ निवर्तस्व पुनरागच्छ मा याहि मा गच्छ प्रहसन्तीत्यस्य तात्पर्यं दर्शयति—पौलोम्येति ॥ १८ ॥ अवमंस्यति अवज्ञास्यति ॥ १९–२० ॥ गतासुरावेश इन्द्रः प्रतिवक्ति—येनेति ॥ २१ ॥ तनुबलः अल्पबलः मातर्यूधस्येतिपाठः ऊधस्यमूधसि जातं क्षीरं मातरि विरोधं हे पिशिताशनि "याज्ञियान्नै च मांसे च पिशितं देवभोजनम् इति ॥ २२–२४ ॥ भूरिबालिशम् अधिकमूर्खम् ॥ २५—२७ ॥ मूलं निमित्तम् अनन्यधीः तत्रैव निरतबुद्धिः ॥ २८–३१ ॥ त्वया यत्कृतं तदागः मयैव कृतं विद्धि आवयोः परमत्यभेदात् त्वयि स्थित्वा त्वयैव अपराधं कारयित्वा परिहरामीत्यर्थः ॥ ३२ ॥ एतदेव विवृणोति–यत्त्वयेति ॥ ३३–४४ ॥ मणिकुट्टिमे मणिबद्धस्थाने ॥४५॥ योषित्सार्थेन निरन्तरपत्न्या सहेतिशेषः ॥४६-४९॥

एकानङ्गा दुर्गा सुभद्रा चित्रा तारेतिच "अनुत्पन्नरजाः श्यामा तं दृष्ट्वा वरवर्णिनी। अप्रसूता भवेद्गौरी" इति च ॥ ५० ॥
आनतिः प्रमदानां सार्थो येन स तथा तम् ॥ ५१–५३ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे विजयध्वजतीर्थकृतपदरत्नावल्यां सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ अधिकपाठे ॥ ३ ॥

श्रीशुक उवाच

आराद्ध्य देवदेवेशं शङ्करं लोकशङ्करम्। तपसा तोषयित्वा तं कैलासगिरिवासिनम् ॥ १ ॥
रुक्मिण्यां तनयं लेभे दग्धकामं पुनर्हरिः। वीरं प्रद्युम्ननामानं रूपौदार्यगुणान्वितम् ॥ २ ॥

राजोवाच

पुत्रार्थमीश्वरं दृष्ट्वा स्वयं लब्धवरो हरिः। अवाप कीदृशं पुत्रं किं नामानं वदस्व मे ॥ ३ ॥

श्रीशुक उवाच

कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना। देहोपपत्तये भूयस्तसेव प्रत्यपद्यत ॥ ४ ॥
स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः। प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुः ॥ ५ ॥
तं शम्बरः कामरूपी हृत्वा तोकमनिदर्शम्। स विदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहम् ॥ ६ ॥
तं निर्जगारं बलवान् मीनः सोप्यपरैः सह। वृतो जालेन महता गृहीतो मत्स्यजीविभिः ॥ ७ ॥
तं शम्बराय कैवर्ता उपाजह्रुरुपायनम्। सूदा महानसं नीत्वाऽवद्यन् स्वधितिनाऽद्भुतम् ॥ ८ ॥
दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन्। नारदोऽकथयत्सर्वं तस्याः शङ्कितचेतसः ॥ ९ ॥
बालस्य तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनम्। सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी ॥ १० ॥
पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती ॥ ११ ॥
निरूपिता शम्बरेण सासूपोदनसाधने। कामदेवं शिशुं बुद्ध्वा चक्रे स्नेहं सदार्भके ॥ १२ ॥
नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः। जनयामास नारीणां वीक्षन्तीनाञ्च विभ्रमम् ॥ १३ ॥
सा तं पतिं पद्मदलायतेक्षणं प्रलम्बबाहुं नरलोकसुन्दरम्।
सव्रीडहासोत्तमविभ्रमेक्षितैः प्रीत्योपतस्थे रतिरात्मनो धनः ॥ १४ ॥
तामाह भगवान् कार्ष्णिर्मातस्ते मतिरन्यथा। मातृभावमतिक्रम्य वर्तसे कामिनीव मे ॥ १५ ॥

रतिरुवाच

भवान्नारायणसुतः शम्बरेण हृतो गृहात्। अहं तेऽधिकृता पत्नी रतिः कामो भवान् प्रभो ॥ १६ ॥
एष त्वा निर्दशं सिन्धावक्षिपच्छम्बरोऽसुरः। मत्स्योग्रसीत्तदुदरादिह प्राप्तो भवान् प्रभो ॥ १७ ॥
तमिमं जहि दुर्धर्षं दुर्नयं शत्रुमात्मनः। मायाशतविदं त्वं च मायाभिर्मोहनादिभिः ॥ १८ ॥
परिशोचति ते माता कुररीव मृतप्रजा। पुत्रस्नेहाकुला दीना विवत्सा गौरिवातुरा ॥ १९ ॥
प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने। मायावती महामाया सर्वमायाविनाशिनीम् ॥ २० ॥
स च शम्बरमभ्येत्य संयुगाय समाह्वयत्। अवष्टभ्यौष्ठमाक्षेपैः क्षिपन् सञ्जनयन् कलिम् ॥ २१ ॥
सोधिक्षिप्तो दुर्वचोभिः पदाहत इवोरगः। निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः ॥ २२ ॥
गदामाविध्य तरसा प्रद्युम्नाय महात्मने। प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरम् ॥ २३ ॥
तामापतन्तीं भगवान् प्रद्युम्नो गदया गदाम्। अपास्य शत्रवे क्रुद्धः प्राहिणोत्स गदां नदन् ॥ २४ ॥
स च मायां समाश्रित्य दैतेयीं मयदर्शिताम्। निर्ममेऽश्ममयं वर्षं कार्ष्णौ वैहायसोऽसुरः ॥ २५ ॥
बाध्यमानोऽश्मवर्षेण रौक्मिणेयो महारथः। सत्त्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीम् ॥ २६ ॥
ततो गौह्यकगान्धर्वपैशाचोरगराक्षसीः। प्रायुंक्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्सताः ॥ २७ ॥
निशातमसिमुद्यम्य सकिरीटं सकुण्डलम्। शम्बरस्य शिरः कायात्ताम्रश्मश्रु जहार तत् ॥ २८ ॥
आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्करैः। भार्ययाऽम्बचरारिण्या पुरं नीतो विहायसा ॥ २९ ॥
अन्तःपुरवरं राजन् ललनाशतसङ्कुलम्। विवेश पत्न्या गगनाद्विद्युतेव बलाहकः ॥ ३० ॥
तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससम्। प्रलम्बबाहुं ताम्राक्षं सुस्मितं रुचिराननम् ॥ ३१ ॥
अलङ्कृतमुखाम्भोजं नीलवक्रालकालिभिः। कृष्णं मत्वा स्त्रियो भीता निलिल्युस्तत्र तत्र ह ॥ ३२ ॥
उपधार्य शनैरीषद्वैलक्षण्येन योषितः। उपजग्मुः प्रमुदिताः सस्त्रीरत्नं शुचिस्मिताः ॥ ३३ ॥
अथ तत्रासितापाङ्गी वैदर्भी वल्गुभाषिणी। अस्मरत्स्वसुतं नष्टं स्नेहस्नुतपयोधरा ॥ ३४ ॥

कोऽन्वयं नरवैदूर्यः कस्य वा कमलेक्षणः । धृतः कया वा जठरे केयं लब्धाथ केन वा ॥ ३५ ॥
मम चाप्यात्मजो नष्टो नीतो वा सूतिकागृहात् । एतत्समवयो रूपो यदि जीवति कुत्रचित् ॥ ३६ ॥
कथं त्वनेन सम्प्राप्तं सारूप्यं शार्ङ्गधन्वनः । आकृत्यावयवैर्गत्या स्वरहासावलोकनैः ॥ ३७ ॥
स एव वा भवेन्नूनं यो मे गर्भे धृतोऽर्भकः । अमुष्मिन् प्रीतिरधिका वामः स्फुरति मे भुजः ॥ ३८ ॥
एवं मीमांसमानायां वैदर्भ्यां देवकीसुतः । देवकीवसुदेवाभ्यां नारदेन महात्मना ॥ ३९ ॥
अन्यैश्च यादवश्रेष्ठैरुत्तमश्लोक आविशत् । विदितार्थोऽपि भगवांस्तूष्णीमास जनार्दनः ॥ ४० ॥
नारदोऽकथयत्सर्वं शम्बराहरणादिकम् । तच्छ्रुत्वा महदाश्चर्यं कृष्णान्तःपुरयोषितः ॥ ४१ ॥
देवकीवसुदेवश्च कृष्णरामौ यथा स्त्रियः । दम्पती तौ परिष्वज्य रुक्मिणी च ययुर्मुदम् ॥ ४२ ॥
नष्टं प्रद्युम्नमायान्तमाकर्ण्य द्वारकौकसः । अहो मृत इवायातो बालो दिष्ट्येति चाब्रुवन् ॥ ४३ ॥

यं वै मुहुः पितृसरूपनिजेशभावास्तन्मातरो मनसिजार्द्रहृदोरुभावाः ।
चित्रं न तत्खलु रमास्पदबिम्बभूते कामे स्मरेऽक्षविषये किमुतान्यनार्यः ॥ ४४ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे शम्बरदैत्यवधोनामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ अधिकपाठे ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

"सोयं मनुष्यलोकः पुत्रेण जय्यः" इति श्रुतिविहितसदाचारो भुव्यवतीर्णैर्देवादिभिरनुष्ठेय इति दर्शयितुं श्रीकृष्णस्य तदनुष्ठानप्रकारं शम्बरासुरवधलक्षणं विक्रमं च कथयत्यस्मिन्नध्याये लोकस्य जनस्य शं सुखं करोतीति लोकशङ्करः तं देवदेवो नारायणः ईशः स्वामी यस्य स तथा तम् आराध्य लोकदृष्ट्या इति शेषः ॥ १–३ ॥ प्राग्रुद्रमन्युना दग्धो यः कामः भूयस्तमेव रुद्रमेव देहोत्पत्तये प्रत्यपद्यत ॥ ४ ॥ स एव कामः कृष्णवीर्यसमुद्भवो वैदर्भ्यां जातः उपात्तदेहः कीदृशः वासुदेवस्यांशः प्रद्युम्नो यस्मिन्नाविष्टः स तथा अत एव तदभिधानमेवास्याभिधानमित्याह—प्रद्युम्न इति । सर्वतो वीर्यादिभिः पितुरनवमः कृष्णस्य पुत्रत्वे योग्यः ॥ ५ ॥ तोकं सद्यो जातं शिशुं निर्गतो दशमो दिवसो यस्मात्स निर्दशः तम् उदन्वति समुद्रे ॥ ६ ॥ अपरैर्मत्स्यैर्जालेन सिचा वृतः संस्यूतः मत्स्यजीविभिर्दाशैः ॥ ७ ॥ कैवर्ताः मत्स्यमारकाः "कैवर्तौ दाशधीवरौ" इति च महानसं पाकस्थानं स्वधितिना परशुना "परश्वधः कुठारः स्यात् परशुः स्वधितिस्तथा" अवाद्यन् अखण्डयन् "दो अवखण्डने" इति धातुः ॥ ८ ॥ मायावती शम्बरस्य महानसाध्यक्षस्त्री ॥ ९ ॥ किमकथयदत्राह—बालस्येति । मत्स्योदरनिवेशनं मत्स्योदरप्रवेशम् ॥ १०–११ ॥ पक्वानां सूपानां मुद्गानां बाह्युपदंशानामोदनस्य च साधने संस्कारे यद्वा सूपादिसाधने अध्यक्षतया साधने सेकसाधने विध्युपायनिवृत्तिषु—

"मरणे मृतसंस्कारे वाचने नूनमेव च । सेनाग्रे यातनायाञ्च सेचने स्फूर्तिसेवयोः" ॥

इति ॥ १२ ॥ कृष्णस्यापत्यं कार्ष्णिः विभ्रमं विकारं यद्वा देवाद्यन्यतमा इति विशिष्टभ्रमम् ॥ १३ ॥ रतिरात्मनो धनैस्तं पतिमुपतस्थे अभिमुखेन तस्थौ, किमात्मधनानि सुवर्णादीनि ? नेत्याह—सव्रीडेति । व्रीडया सहितो हासः सव्रीडहासः उत्तमो विभ्रमः उत्कृष्टा शृङ्गारचेष्टा ईक्षणं कटाक्षनिरीक्षणं तैः ॥ १४ ॥ मातृभावं मातुः स्वभावं सुरतकामिनी ॥ १५ ॥ अधिकृता पत्नी वधूत्तमा ॥ १६ ॥ त्वां निर्दशम् इति पाठः ॥१७॥ मोहनशोषणद्रावणाभिर्मायाभिः ॥ १८ ॥ कुररस्य स्त्री कुररी "उत्क्रोशः कुररो मतः" इति मृतप्रजा नष्टापत्या ॥ १९ ॥ महामाया महासामर्थ्या ॥ २० ॥ ओष्ठमवष्टभ्य दंष्ट्रा दन्तैरिति शेषः ॥ २१–२२ ॥ नादमिति क्रियाविशेषणं वज्रनिष्पेषः स्फूर्जथुस्तद्वन्निष्ठुरो नादो यथा भवति तथा व्यनदत्" स्फूर्जथुर्वज्रनिष्पेषः" इति हलायुधः ॥ २३–२४ ॥ दैतेयीं दैत्यानां कुले देवतामिव विद्यमानां वैहायसः विहायसि गगने स्थितः ॥ २५ ॥ सत्त्वात्मिकां बलज्ञाननिधिविष्णुदैवत्यां महाविद्यां विज्ञानास्त्रसंज्ञाम् ॥ २६ ॥ गौह्यकादीन्यस्त्राणि प्रायुंक्त गुह्यकास्त्रं गौह्यकं व्यधमयदनाशयत् ॥ २७ ॥ ताम्रश्मश्रु कपिलरुचिरश्मश्रु ॥ २८–२९ ॥ बलाहको मेघः ॥ ३०–३१ ॥ निलिल्युः निलीनाः ॥३२॥ वैलक्षण्येन कृष्णलक्षणविपरीतलक्षणनिकरेण ॥ ३३ ॥ असितापाङ्गी नीलरुचिकान्तनेत्रान्ता ॥ ३४ ॥ नरवैदूर्यः नरश्रेष्ठः नराकारं वैदूर्यरत्नमिव शोभमान इति वा कस्य पुत्रः कया स्त्रिया धृतो गर्भ इति शेषः इयं कानने वा लब्धा ॥ ३५ ॥ प्रकारान्तरेण शङ्कते–ममेति ॥ ३६ ॥ सारूप्यं सादृश्यं, सारूप्यं केनेति ? तत्राह—आकृत्येति ॥ ३७ ॥ नूनं निश्चयः ॥ ३८ ॥ मीमांसमानायां विचारयन्त्याम् ॥ ३९–४३ ॥ नारीणां विभ्रमं जनयामासेति यदुक्तं न तच्चित्रं मन्तव्यमित्याह–यं वा इति । यं दृष्ट्वा तस्य प्रद्युम्नस्य मातरः हरेः पत्न्यः मनसिजार्द्रहृदा कामरसक्लिन्नमनस्कत्वेनोरुभावाः बहुविधशृङ्गारचेष्टायुक्ताः अङ्गुष्ठनखमुखमूलेन करयुगपीडनादिविकारलक्षणलक्षिता अभूवन्नित्यन्वयः । किं विशिष्टाः पितृसरूपतया पितृसारूप्येण निजेशोऽस्मत्पतिरयमिति भावोभिप्रायो यासां तास्तथा ताः तस्मिन् कामे मदने तच्चित्रं न खलु काम्यत इति कामस्तस्मिन् कामे अक्षविषये चक्षुर्गोचरे किमु इतोपि चित्रं नेत्याह रमेति रमास्पदस्य लक्ष्मीमूर्तेः श्रीकृष्णस्य बिम्बादखण्डलक्षणोपेताद्देहादुद्भूते

जाते "आत्मा वै पुत्रनामासि" इति श्रुतेः । श्रीकृष्णस्य बिंबस्य यल्लक्षणं तत्सर्वमस्य बिम्बस्य निधीयत इति श्रीकृष्णदेहप्रतिबिम्बभूत इत्यर्थः ।

"बिम्बोस्त्री मण्डलसमप्रतिमामुखलक्ष्मसु । प्रतिरूपे प्रतिकृतौ स्याद्बिम्बकापाल" ॥

इति अन्यनार्यः तन्मातृव्यतिरिक्ताः स्त्रियाः स्मृतेपि विमुह्यन्ति दृष्ट्वा किमु तदिदं सर्वं कृष्णमाहात्म्यविलास इति समर्थविशेषं वा इत्यनेन दर्शयति ॥ ४४ ॥

इति भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे विजयध्वजतीर्थे अष्टषष्टितमोऽध्यायः ॥ ६८ ॥ अधिकपाठे ॥ ४ ॥

एकोनसप्ततितमोऽध्यायः

श्रीशुक उवाच

पौण्ड्रको नाम राजा वै तस्मिन् काले कुरूद्वह । द्वारकां वृष्णिनिलयां निरुध्य बहुसैनिकः ॥ १ ॥
अर्दयामास कृष्णेन विदित्वा रहितां निशि । तं कामपालः शैनेयो वसुदेवोद्धवादयः ॥ २ ॥
उग्रसेनश्च कौरव्य ये चान्ये यदुपुङ्गवाः । अर्पयामासुरायान्तं कालयोग्यमिवातिथिम् ॥ ३ ॥

राजोवाच

कश्चासौ पौण्ड्रको नाम कस्मिन् देशे महीपतिः । कस्य वा तनयो ब्रह्मन् सर्वमेतद्वदस्व मे ॥ ४ ॥

श्रीशुक उवाच

अपुत्रः काशिराजो वै कन्यां सुतनुसंज्ञिताम् । प्रायच्छद्वसुदेवाय राज्यशुल्कां कुरूद्वह ॥ ५ ॥
तत्र जज्ञे महाबाहुर्दिवाकरसमद्युतिः । कुमारः पौण्ड्रको नाम बलवीर्यमदान्वितः ॥ ६ ॥
वसुदेवसुतत्वाच्च वासुदेवेतिशब्दितः । जाते तस्मिन् महाराजो वसुदेवो महाद्युतिः ॥ ७ ॥
राज्यं तस्मिन् समारोप्य सकोशबलवाहनम् । उवाह कंसावरजां देवकीं देवतोपमाम् ॥ ८ ॥
निरुद्धो भोजराजेन कंसेनानकदुन्दुभिः । कदाचिदपि न प्रायात्करवीरपुरीमति ॥ ९ ॥
असह्यं मातृसापत्न्यमभ्रातृत्वं तथात्मनः । स्मरमाणः स काशीशो यदूनुद्विजतेऽनिशम् ॥ १० ॥
स कृष्णरहितां श्रुत्वा समेत्य द्वारकां निशि । विमृद्य बलभद्रेण शैनेयेनापि निर्जितः ॥ ११ ॥
निहतानेकसाहस्रहयकुञ्जरसैनिकः । जगाम परशर्वर्यां पुरीं वाराणसीं नृप ॥ १२ ॥
प्रभातायां तु शर्वर्यां हरिर्बदरिकाश्रमात् । आययौ तार्क्ष्यमारुह्य द्वारकां रामपालिताम् ॥ १३ ॥
सपताकैः सार्घ्यपाद्यैर्यदुवृष्ण्यन्धकादिभिः । अभिवर्णितवृत्तान्तः प्राविशत्केशवः सभाम् ॥ १४ ॥
कदाचित्पौण्ड्रको नाम काशिराजः प्रतापवान् । वासुदेवोहमित्यज्ञो दूतं कृष्णाय प्राहिणोत् ॥ १५ ॥
त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः । इति प्रस्तोभितो बालैर्मेने स्वात्मानमच्युतम् ॥ १६ ॥
दूतस्तुद्वारकामेत्य सभायामास्थितं हरिम् । कृष्णं कमलपत्राक्षं राजसन्देशमब्रवीत् ॥ १७ ॥
वासुदेवोवतीर्णोहमेक एव न चापरः । भूतानामनुकम्पार्थं त्वं तु मिथ्याभिधां त्यज ॥ १८ ॥
यानित्वमस्मच्चिह्नानि मौढ्याद्बिभर्ष्यभीतवत् । त्यक्त्वै हि मां त्वं शरणन्नोचेद्देहिममाहवम् ॥ १९ ॥
कत्थनं तदुपाकर्ण्य पौण्ड्रकस्याल्पमेधसः । उच्चकैरुग्रसेनाद्याः सभ्याः जहसतुस्तदा ॥ २० ॥
उवाच दूतम्भगवान्परिहासकथा मनु । उत्स्रक्ष्ये मूढचिह्नानि यैस्त्वमेवं विकत्थसे ॥ २१ ॥
मुखन्तवविधायाज्ञकङ्कगृध्रवकैर्वृतम् । शयिष्य सेहतस्तत्र भविताशरणंशुनाम् ॥ २२ ॥
इति दूतस्तदाक्षेपं स्वामिने सर्वमाहरत् । कृष्णोपि रथमारुह्य प्रायात्काशीं ससैनिकः ॥ २३ ॥
पौण्ड्रकोपि तदुद्योगमुपलभ्यमहारथः । अक्षौहिणीभिः सहितो निश्चक्रामपुराद्द्रुतम् ॥ २४ ॥
तमायान्तं रथोपस्थे सुवर्णगरुडे स्थितम् । सुवर्णबाहुयुमलमपश्यत् पौण्ड्रकं हरिः ॥ २५ ॥
शङ्खार्यसिगदाशाङ्र्ग दधच्छ्रीवत्सलक्षितम् । बिभ्राणं कौस्तुभमणिं वनमालाविभूषितम् ॥ २६ ॥
कौशेयवाससीपीतेवसानङ्गरुडध्वजम् । आमुक्तमाल्याभरणं स्फुरन्मकरकुण्डलम् ॥ २७ ॥
दृष्ट्वा तमात्मनासाम्यं कृत्रिमंवेषमास्थितम् । यथानटंरङ्गगतम्विजहासभृशं हरिः ॥ २८ ॥
क्षणेनतंकाशिपतेः सैनिकादृढधन्विनः । शरैराच्छादयामासुर्मेघाः शैलमिवाम्भसा ॥ २९ ॥
केचिद्गजान् रथानश्वानास्थाय रणमूर्द्धनि ।
शूलैर्गदाभिः परिघैः शक्त्यृष्टिप्रासतोमरैः । असिभिः पट्टिशैर्बाणैः प्रहरन्नरयो हरिम् ॥ ३० ॥

तस्य काशिपतेर्मित्रं पार्ष्णिग्राहौ परो नृपः । अक्षौहिणीभिस्तिसृभिरुपायान्नृपसङ्गरम् ॥ ३१ ॥
कृष्णस्तु तत्पौण्ड्रककाशिराजयोर्बलं गजस्यन्दनवाजिपत्तिमत् । गदासिचक्रेषुभिरार्दयद्भृशं यथा युगान्ते हुतभुक्प्रभाज्वलन् ॥३२॥
आयोधनं तद्रथवाजिकुञ्जरद्विषत्खरोष्ट्रैरिपुणावखण्डितैः । बभौ च तन्मानवहं मनस्विनामाक्रीडनं भूतपतेरिवोल्बणम् ॥ ३३ ॥
अथाह पौण्ड्रकं शौरिर्भोभो पौण्ड्रक यद्भवान् । दूतवाक्येन मामाह तान्यस्त्राण्युत्सृजामि ते ॥ ३४ ॥
त्याजयिष्येऽभिधानं मे यत्त्वयाद्य मृषा कृतम् । व्रजामि शरणं तेद्य यदिनेच्छामि संयुगम् ॥ ३५ ॥
इति क्षिप्त्वा शितैर्बाणैर्विरथीकृत्य पौण्ड्रकम् । शिरोऽहरद्रथाङ्गेन वज्रेणेन्द्रो यथा गिरेः ॥ ३६ ॥
तथा काशिपतेः कायाच्छिर उत्कृत्य पत्रिभिः । न्यपातयत्काशिपुर्यां पद्मकोशमिवानिलः ॥ ३७ ॥
एवं मत्सरिणं हत्वा पौण्ड्रकं ससखं हरिः । द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः ॥ ३८ ॥

श्रीशुक उवाच

शिरः पतितमालोक्य राजद्वारि सकुण्डलम् । किमिदं कस्य वा वक्त्रमिति संशयिरे जनाः ॥ ३९ ॥
राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबान्धवाः । पौराः शोकहता राजन्नाथनाथेत्युपाद्रवन् ॥ ४० ॥
सुदक्षिणस्तस्य सुतः कृत्वा संस्थाविधिं पितुः । निहत्य पितृहन्तारं यास्याम्यपचितिं पितुः ॥ ४१ ॥
इत्यात्मनाभिसन्धाय सोपाध्यायो महेश्वरम् । सुदक्षिणोऽर्चयामास परमेण समाधिना ॥ ४२ ॥
प्रीतोऽविमुक्ते भगवांस्तस्मै वरमदाद्भवः । पितृहन्तुर्वधोपायं स वव्रे वरमीप्सितम् ॥ ४३ ॥
दक्षिणाग्निं परिचर ब्राह्मणैः सह ऋत्विजः । आभिचारविधानेन स चाग्निः प्रमथैर्वृतः ॥ ४४ ॥
साधयिष्यति सङ्कल्पमब्रह्मण्ये प्रयोजितः । इत्यादिष्टस्तथा चक्रे कृष्णायाभिचरन्नृप ॥ ४५ ॥
ततोग्निरुत्थितः कुण्डान्मूर्तिमानतिभीषणः । तप्तताम्रशिखाश्मश्रुरङ्गारोद्गारिलोचनः ॥ ४६ ॥
दंष्ट्रोग्रभ्रुकुटीदन्तकठोरास्यः स्वजिह्वया । आलिहन् सृक्किणी रक्ते विधुन्वन् त्रिशिखं ज्वलत् ॥ ४७ ॥
पद्भ्यां तालप्रमाणाभ्यां कम्पयन् धरणीतलम् । सोभ्यधावद्धृतो भूतैर्द्वारकां प्रदहन्दिशः ॥ ४८ ॥
तमाभिचारदहनमायान्तं द्वारकौकसः । विलोक्य तत्रसुः सर्वे वनदाहे यथा मृगाः ॥ ४९ ॥
अक्षैः सभायां क्रीडन्तं भगवन्तं भयातुराः । त्राहि त्राहीति लोकेशं वह्नेः प्रदहतः पुरम् ॥ ५० ॥
श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानाञ्च साध्वसम् । धरणीशः प्रहस्याह माभैष्टेत्यवितास्म्यहम् ॥ ५१॥
सर्वस्यान्तर्बहिः सोथ कृत्यां माहेश्वरीं विभुः । विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत् ॥ ५२ ॥

तत्सूर्यकोटिप्रतिमं सुदर्शनं जाज्वल्यमानं प्रलयानलप्रभम् ।
स्वतेजसा खं ककुभोऽथ रोदसी चक्रं मुकुन्दस्य झटित्यपूरयत् ॥ ५३ ॥
कृत्यानलः प्रतिहतः स रथाङ्गपाणे रस्त्रौजसा नृप विभग्नमुखो निवृत्तः ।
वाराणसीं प्रति समेत्य सुदक्षिणं तं सर्त्विर्जितं समदहत्स्वकृतोभिचारः ॥ ५४ ॥

चक्रं च विष्णोस्तदनुप्रविष्टं वाराणसीं साट्टसभालयापणाम् । सगोपुराट्टालककोष्ठतोरणां सकोशहस्त्यश्ववरूथमन्दिराम् ॥ ५५ ॥

दग्ध्वा वाराणसीं सर्वां विष्णुचक्रं सुदर्शनम् । भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः ॥ ५६ ॥
य एतच्छ्रावयेन्मर्त्य उत्तमश्लोकविक्रमम् । समाहितो वा शृणुयात्सर्वपापैः प्रमुच्यते ॥ ५७ ॥
तावुभौ सर्वपापेभ्यो ब्रह्महत्यादिभिर्नृप । विमुच्य देहावसाने विष्णुलोकं प्रयास्यतः ॥ ५८ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

न यस्य स्वः पर इतीममर्थं सत्यं कर्तुं पौण्ड्रकवधलक्षणं विक्रमं कथयितुमुत्तराध्यायप्रारम्भः ॥ १ ॥ तस्मिन्काले कृष्णरहितां विदित्वा कामपालो बलभद्रः ॥ २ ॥ अर्पयामासुः शरानितिशेषः ॥ ३–४ ॥ राज्यमेव शुल्कं यस्यां सा तथा ताम् ॥ ५–६ ॥ नामान्तरमाह—वसुदेवेति ॥ ७–८–९ ॥ उद्विजते भीतिं करोति भयकरणमात्मन एव फलतीति द्योतनाय स्मरमाण इति ॥ १० ॥ द्वारकां समेत्य पमृद्य ॥ ११ ॥ परशर्वर्यामपररात्रे उषःकाले ॥ १२-१३-१४ ॥ बालैरज्ञैः प्रस्तोभितोऽविद्यमानगुणेन प्रस्तुतो मूढाक्षेपमुक्तो वा ॥ १६–१७–१८ ॥ अस्मच्चिह्नानि चक्रादीनि मां शरणमेहि ॥ १९ ॥ कत्थनं व्यर्थभाषणम् ॥ २० ॥ अनु अनन्तरम् उत्स्रक्ष्ये त्याजयिष्ये त्वदीयानि चिह्नानि ॥२१–२२॥ स्वामिने पौण्ड्रकाय । २३–२४-२५–२६ । आमुक्तमाल्याभरणं बद्धमालालङ्कारम् ॥ २७–२८–२९ ॥ ऋष्टिः खड्गविशेषः प्रहरन् प्राहरन् ॥ ३० ॥ पार्ष्णिग्राहं पृष्ठतो गोप्तारम् ॥ ३१ ॥ प्रभया ज्वलन् ॥ ३२ ॥ यदायोधनं युद्धस्थानं तद्बभावित्यन्वयः । अचखण्डितैरुच्छिन्नैः । "खण्डि खण्डने"

द्विपदः पदातयः मनस्विनां शूराणां मानवर्धनं भूतपतेराक्रीडनं श्मशानम् ॥ ३३ ॥ किमाह शौरिरिति तत्राह—यदिति। भवान् दूतवाक्येन वासुदेवोवतीर्णोहमित्यादिलक्षणेन यन्मामाह तत्पश्येति शेषः। किन्तदिति तत्राह तानीति यान्युत्सृजेति भवानाह रणे तान्यस्त्राण्युत्सृजामि मुञ्चामि ॥ ३४ ॥ अद्य त्वयाऽहं यदेव वासुदेवेत्यभिधानं मृषा कृतं तत्त्वां त्याजयिष्ये प्रहापयिष्यामि यदि संयुगं नेच्छामि तर्हि त्वां शरणं व्रजामीति ॥ ३५–३८ ॥ संशयिरे संशयं चक्रिरे ॥ ३९–४० ॥ संस्थाविधि प्रेतक्रियाम् अपचितिम् अनृणत्वं प्रतिक्रियां वा अर्चनायामपचितिः प्रेतक्षये निष्कृतौ व्यय इति। ४१। आत्मना मनसा इत्यभिसन्धाय सङ्कल्प्य। ४२। अविमुक्ते काश्याम् अविमुक्तेश्वरनामक्षेत्रविशेषे वा प्रीतः। ४३। दक्षिणाग्निमन्वाहार्यनामेनं परिचर पूजय आभिचारविधानेन क्षुद्रप्रयोगप्रकारेण। ४४। अब्रह्मण्ये ब्राह्मणाचारविरुद्धाचारे प्रयोजितः आदिष्टः ईश्वरेणेति शेषः। आभिचरन् कृत्यप्रयोगं कुर्वन्। ४५–४६। त्रिशिखं शूलमिति शेषः। ४७–४८। आभिचारदहनं कृत्यालक्षणाग्निम्। ४९। अक्षैर्दुरोदरैः। ५०। धरणीशः भूमीशः धरणं यस्य तद्धरणितस्य त्रैलोक्यस्य वा अवितास्मि रक्षितास्मि। ५१–५२। सुदर्शनं नाम चक्रम् अभ्रं खं बिलं व्योम वा "खमिन्द्रिये दिवि व्योम्नि ताम्रे द्वाराभ्युपाययोः" इतियादवः।५३। अभिचारः कृत्याग्निः।५४। तदनु सुदक्षिणदहनानन्तरम् अन्तःप्रतिष्ठङ्कोष्ठयन्तर्गृहं वरूथं रथगुप्तिशालाम्। ५५–५६। एतच्चरित्रश्रवणादिफलमाह–य इति। ५७। तावुभौ श्रोता श्रावयिता च ब्रह्महत्यादिभिरुपलक्षितेभ्योऽशुभेभ्यः ॥ ५८ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे विजयध्वजतीर्थकृतपदरत्नावल्याम् एकोनसप्ततितमः ॥ ६९ ॥

सप्ततितमोऽध्यायः

श्रीशुक उवाच

अथैकदा द्वारवत्यां वसतो रामकृष्णयोः। सूर्योपरागः सुमहानासीत्कल्पक्षये यथा ॥ १ ॥
तं ज्ञात्वा मनुजा राजन् पुरस्तादेव सर्वशः। स्यमन्तपञ्चकं क्षेत्रं जग्मुः श्रेयोविधित्सया ॥ २ ॥
निःक्षत्रियां महीं कुर्वन् रामः शस्त्रभृतां वरः। नृपाणां रुधिरौघेण यत्र चक्रे महाह्लदान् ॥ ३ ॥
ईजे च भगवान् रामो यत्रास्पृष्टोपि कर्मणा। लोकस्य सङ्ग्रहायैषो यथान्योघापनुत्तये ॥ ४ ॥
महत्यां तीर्थयात्रायां तत्रागुर्भारतीः प्रजाः। कृष्णः षोडशसाहस्रमहिषीशिबिकान्वितः ॥ ५ ॥
पुत्रपौत्रजनानीकैर्वारकान्ताकरेणुभिः। नगरस्त्रीकदम्बैश्च प्रियासार्थैश्च संयुतः ॥ ६ ॥
वृष्णयश्च तथाक्रूरवसुदेवगदादयः। ययुर्भारत तत्क्षेत्रं स्वमघं क्षपयिष्णवः ॥ ७ ॥
शठप्रद्युम्नसाम्बाश्च सुवज्रोद्धवसारणाः। आहुकं कृतवर्माणं संस्थाप्य पुररक्षणे ॥ ८ ॥
ते रथैर्देवविख्यातैर्हयैश्च तरलप्रभैः। गजैर्बृहद्भिरभ्रामैर्नृभिर्विद्याधरद्युभिः ॥ ९ ॥
व्यरोचन्त महाभागाः पथि काञ्चनमालिनः। वेदवादित्रनिर्घोषैः शङ्खदुन्दुभिनिस्स्वनैः ॥ १० ॥
गायन्तः कृष्णकृष्णेति गोविन्देति च सन्ततम्। ककुभः पूरयन्नादैर्जग्मुः सर्वे कुरूद्वह ॥ ११ ॥
स्यमन्तपञ्चकं प्राप्य क्षेत्रं त्रैलोक्यविश्रुतम्। तृणैः पूर्णैस्तथा काष्ठैश्चक्रिरे भवनानि च ॥ १२ ॥
कम्बलाजिनवस्त्राणां शिबिराणि महीभृताम्। आसन्विचित्ररूपाणि शतशोथ सहस्रशः ॥ १३ ॥
तत्राजग्मुर्नृपाऽनेके ब्राह्मणाश्च सहस्रशः। वैश्याः शूद्राश्च निस्सङ्ख्या ये चान्ये वर्णनिन्दिताः ॥ १४ ॥
ऋषयश्च महात्मानो विख्याताः शंसितव्रताः। सोपाध्यायाः साग्निहोत्राः स्नातका गृहमेधिनः ॥ १५ ॥
अन्धाश्च बधिराश्चैव कुब्जा वामनपण्ढकाः। व्यङ्गा जडाश्च मूकाश्च कर्मक्षयपरीप्सवः ॥ १६ ॥
गोविन्दचरणाम्भोजरेणुरञ्जितमस्तकाः। कटकाङ्गदकेयूरहारकुण्डलभूषणाः ॥ १७ ॥
स्रग्गन्धदिव्यवसनाः कलत्रैः खेचरा इव। तत्र स्नात्वा महाभागा उपोष्य सुसमाहिताः ॥ १८ ॥
ब्राह्मणेभ्योऽददुर्धेनूर्वासःस्रग्रुक्ममालिनीः। रामह्लदेषु विधिवत्पुनराप्लुत्य वृष्णयः ॥ १९ ॥
ददुः स्वर्णं द्विजाग्रेभ्यः कृष्णे नो भक्तिरस्त्विति। स्वयञ्च तदनुज्ञाता वृष्णयः कृष्णदेवताः ॥ २० ॥
भुक्त्वोपविविशुः कामं स्निग्धच्छायाङ्घ्रिपाङ्घ्रिषु। तत्रागतांस्ते ददृशुः सुहृत्सम्बन्धिनो नृपान् ॥२१॥
मत्स्योशीनरकौशल्यविदर्भकुरुसृञ्जयान्। काम्बोजकैकयान्मद्रान् कुन्तिगान्धारकेरलान् ॥२२॥
अन्यांश्चैवात्मपक्षीयान्परांश्च शतशो नृपान्। नन्दादीन्सुहृदो गोपान्गोपीश्चोत्कण्ठिताश्चिरम् ॥२३॥

अन्योन्यसन्दर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः।
आश्लिष्य गाढं नयनैः स्रवज्जलाहृष्यत्त्वचोरुद्धगिरो ययुर्मुदम् ॥ २४ ॥
स्त्रियश्च सम्वीक्ष्य मिथोतिसौहृदाः सचापलापाङ्गदृशोऽभिरेभिरे।
स्तनैः स्तनान्कुङ्कुमपङ्करूषितान्निहत्य दोर्भ्यां प्रणयाश्रुलोचनाः ॥ २५ ॥

ततोभिवाद्य ते वृद्धान्यवीयैरभिवादिताः। स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णकथाम्मिथः ॥ २६ ॥
पृथा भ्रातॄन्स्वसुर्वीक्ष्य तत्पुत्रान्पितरावपि। भ्रातृपत्नीर्मुकुन्दञ्च जहौ सङ्कथयाशुचः ॥ २७ ॥

कुन्त्युवाच

आर्यभ्रातरहम्मन्ये आत्मानमकृताशिषम्। यद्वा आपत्सु मद्वार्तां नानुस्मरथ सत्तमाः ॥ २८ ॥
सुहृदो ज्ञातयः पुत्रा भ्रातरः पितरावपि। नानुस्मरन्ति स्वजनं यस्य दैवमदक्षिणम् ॥ २९ ॥

वासुदेव उवाच

अम्ब ! मास्मानसूयेथा देवक्रीडनकान्नरान्। ईशस्य हि वशे लोकः कुरुते कार्यतेथवा ॥ ३० ॥
कंसप्रतापिताः सर्वे वयं यता दिशो दश। एतर्ह्येव पुनः स्थानं दैवेनासादिताः स्वसः ॥ ३१ ॥

श्रीशुक उवाच

वसुदेवोग्रसेनाद्यैर्यदुभिः सेविता नृपाः। आसन्नच्युतसन्दर्शपरमानन्दनिर्भराः ॥ ३२ ॥
भीष्मो द्रोणोऽम्बिकापुत्रो गान्धारी ससुता तथा। सदाराः पाण्डवाः कुन्ती सञ्जयो विदुरः कृपः ॥ ३३ ॥
कुन्तिभोजो विराटश्च भीष्मको नग्नजिन्महान्। पुरुजिद्द्रुपदः शैब्यो धृष्टकेतुश्च काशिराट् ॥३४॥
दमघोषो विशालाजो मैथिलो मद्रकैकयाः। युधामन्युः सुशर्माच ससुता बाह्लिकादयः ॥ ३५ ॥
राजानोन्ये च राजेन्द्र युधिष्ठिरपुरोगमाः। श्रीनिकेतं वपुः शौरेः सस्त्रीका वीक्ष्य विस्मिताः ॥ ३६ ॥
अथ ते कृष्णरामाभ्यां सम्यक्प्राप्तसमर्हणाः। प्रशशंसुर्मुदा युक्तास्तुष्टाः कृष्णपरिग्रहान् ॥ ३७ ॥
अहो भोजपते यूयं जन्मभाजो नृणामिह। यत्पश्यथासकृत्कृष्णं दुर्दर्शमपि योगिनाम् ॥ ३८ ॥

यन्निस्सृतं वेदमयं पुनाति पादावनेजनपयस्तु वचश्च शास्त्रम्।
भूःकालभर्जितभगापि यदङ्घ्रिपद्म स्पर्शोद्धशक्तिरभिवर्षति नोऽखिलार्थान् ॥ ३९ ॥
तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौवनपिण्डबन्धः ।
येषां गृहे निरयवर्त्मनिवर्तताञ्च स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥ ४० ॥

नन्दस्तत्र यदून्प्राप्तान् श्रुत्वा कृष्णपुरोगमान्। तत्रागमद्वृतो गोपैस्तरसा तद्दिदृक्षया ॥ ४१ ॥
तं दृष्ट्वा वृष्णयो हृष्टास्तन्वः प्राणमिवोत्थिताः। परिषस्वजिरे गाढं चिरदर्शनकातराः ॥ ४२ ॥
वसुदेवः परिष्वज्य सम्प्रीतः प्रेमविह्वलः। स्मरन् कंसकृतान् क्लेशान् पुत्रन्यासञ्च गोकुले ॥४३॥
कृष्णरामौ परिष्वज्य पितरावभिवाद्य च। नकिञ्च नोचतुः प्रेम्णा साश्रुकण्ठौ कुरूद्वह ॥ ४४ ॥
तावुत्सङ्गं समारोप्य बाहुभ्यां परिरभ्यच। यशोदाच महाभागा सुतौ विजहतुः शुचः ॥ ४५ ॥
रोहिणी देवकी चैव परिष्वज्य व्रजेश्वरीम्। स्मरन्त्यौ तत्कृतां मैत्रीं बाष्पकण्ठ्यौ समूचतुः ॥ ४६ ॥
को विस्मरेत वां मैत्रीमनुवृत्तां व्रजेश्वरि। अथवाप्यैन्द्रमैश्वर्यं यस्या नेह प्रतिक्रिया ॥ ४७ ॥

एतावदृष्टपितरौ युवयोः स्म पित्रोः सम्प्रीणनाभ्युदयपोषणपालनानि।
प्राप्योषतुर्भवति पक्ष्महयद्वदक्ष्णोर्न्यस्तावकुत्रच भयौ न सतां परस्तात् ॥ ४८ ॥
गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपन्ति।
दृग्भिर्हृदीकृतमलं परिरभ्यसद्यस्तद्भावमापुरपि नित्ययुजां दुरापम् ॥ ४९ ॥

भगवांस्तास्तथाभूता विविक्त उपसङ्गताः। आश्लिष्यानामयं पृष्ट्वा प्रहसन्निदमब्रवीत् ॥ ५० ॥
अपिस्मरथ नः सख्यः स्वानामर्थचिकीर्षवः। गतांश्चिरायितानन्यासङ्गात्कृपणचेतसः ॥ ५१ ॥
अवबुद्ध्य यथास्मासु इदमेव विशङ्कये। नूनं भूतानि भगवान्युनक्ति वियुनक्ति च ॥ ५२ ॥
वायुर्यथा घनानीकं तृणतूलरजांसि च। संयोज्य क्षिपते भूयास्तथा भूतानि भूतकृत् ॥ ५३ ॥
मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते। दिष्ट्यासीन्मयि सुस्नेहो भवतीनां मुदावहः ॥ ५४ ॥
अहं हि सर्वभूतानामादिरन्तोन्तरं बहिः। मौक्तिकानां यथा खंवाभूर्वायुर्ज्योतिरङ्गनाः ॥ ५५ ॥
एवमेतानि भूतानि भूतेष्वात्मात्मना ततः। उभयं मय्यथ परे पश्यथाततमक्षरे ॥ ५६ ॥

श्रीशुक उवाच

अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः। तदनुस्मरणध्वस्तजीवकोशास्तमध्यगुः ॥ ५७ ॥

नताः स्म ते नाथ पदारविन्दं योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः।
संसारकूपपतितोत्तरणावलम्बं गेहञ्जुषामपि मनस्युदियात्सदा नः ॥ ५८ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तीर्थयात्रायां बहुविधं पुण्यं निमित्तं कालं ततोऽपि विशिष्टं तत्र स्नानात्सत्पात्रत्यागात्सन्दर्शनात्पुण्यवतां पुण्यराशेरितरेषामघ्वघक्षयाच्छुद्धान्तःकरणत्वेन निर्मला कृष्णविषया भक्तिः मुक्तावानन्दविशेषं मुक्तिञ्च ददातीति कृत्वा लौकिकाचारं विडम्बयतः कृष्णस्य तीर्थयात्रादिलक्षणं चरितं कथयत्यस्मिन्नध्याये तत्रादौ तीर्थयात्रायां निमित्तमाह—अथेति, कल्पक्षय इत्यनेन सर्वग्रासं लक्षयति ॥१॥ पुरस्तादुपरागादितिशेषः। स्यमन्तपञ्चकं कुरुक्षेत्रं स्यमन्तानां ह्लदानां पञ्चकं यस्मिंस्तत्तथा ॥२॥ एतदेव स्पष्टयति—निःक्षत्रियामिति। निषिद्धाः क्षत्रिया यस्यां सा तथा तां यत्र देशे यत्पञ्चमहाह्लदांश्चक्रे तत्स्यमन्तपञ्चकम् ॥३॥ कर्मणा हत्यानिमित्तपापोत्पन्नेन अस्पृष्टोपि लोकसंग्रहायेति विकर्मणेति केचित्पठन्ति ॥४॥ भारतोः भारतखण्डले विद्यमानाः ॥५॥ वारकान्ताः गणिकास्तदारूढकरेणुभिः ॥ ६–८ ॥ तरलानां तरङ्गाणां प्रभावत्प्रभा येषां ते तथा अतिधवलप्रभा इत्यर्थः। तैर्विद्याधरद्युतिभिः ॥ ९–१२ ॥ कम्बलाजिनवस्त्राणां वितानैरितिशेषः ॥ १३ ॥ अनेक इति पदच्छेदः बहव इत्यर्थः। निन्दिताश्चतुर्वर्णेभ्यः पृथक् कृताः ॥ १४ ॥ शंसितव्रताः निर्मलव्रताः स्नातकाः दण्डसोदककमण्डलुधराः गृहमेधिनः पञ्चयज्ञाधिकारिणः ॥ १५ ॥ कुब्जाः वक्राङ्गाः वामना ह्रस्वावयवाः पण्डकाः क्लीबाः व्यङ्गाः हस्ताद्यवयवहीनाः किं साध्यमिति तत्राह कर्मेति ॥ १६ ॥ कटकं वलयः ॥ १७–१८ ॥ वासांसि स्रजश्च रुक्ममालाः स्वर्णमालाः आसां सन्तीति वासस्स्रग्रुक्ममालिन्यः ताः ॥ १९–२४ ॥ सचापलाश्चाञ्चल्येन सहिताः अपाङ्गदृशः कटाक्षवीक्षणानि यासां तास्तथा अभिरेभिरे आलिङ्गनं चक्रुः ॥ २५–२७ ॥ केयं कथेति तत्राह—आर्येति। आर्यभ्रातर्ज्येष्ठभ्रातः वसुदेवः अकृताशिषम् अजीर्णपुण्यम् अस्मदापत्सु मद्वार्तां नानुस्मरथेति यत्तस्मादिति शेषः ॥ २८ ॥ तत्र किङ्कारणमिति तत्राह—यस्येति अदक्षिणं विपरीतवृत्ति ॥ २९॥ देवक्रीडनकान् देवस्येश्वरस्य क्रीडोपकरणभूतान् ईशस्य वशे स्थितो लोकः कर्माणि कुरुते सङ्गेन कार्यते वा "कार्यते ह्यवशः" इति स्मृतेः ॥ ३० ॥ कंसेन प्रतापिताः सन्तापं प्रापिताः एतर्हि इदानीं स्वसः हे भगिनि ॥ ३१–३६ ॥ कृष्णपरिग्रहान् कृष्णाशयान् ॥ ३७–३८ ॥ तुशब्दोऽवधारणार्थः चशब्दः समाहारार्थः यस्य कृष्णस्य वदनान्निस्सृतं वचः वागात्मकं शास्त्रं ब्रह्मसूत्रादिलक्षणम् इदं जगत्पुनात्येव यस्य पादावनेजनपयश्च पुनाति कालाग्निना भर्जितमगा निर्दग्धवीर्या भूः यस्याङ्घ्रिपद्मस्पर्शेन इद्धा समृद्धा शक्तिर्यस्याः सा तथा साऽस्मदर्थेऽखिलार्थानभिवर्षति तं कृष्णमसकृत्पश्यथेति यस्मात्तस्माज्जन्मभाज इति गतेनान्वयः ॥३९॥ इतोपि यूयञ्जन्मभाज इत्याशयेनाह—तद्दर्शनेति। निरयवर्त्मनि इष्टप्रददेवविरहितमार्गे अत एव दुःखविषये गृहे वर्ततां वर्तमानानां स्वर्गापवर्गविरमः दुःखासम्भिन्नप्रदेशः स्वर्गः कर्मसाध्यप्रदेशः अपवर्गो मोक्षः तयोर्विरामो यस्मात्स तथा मुक्तेरेव दातेत्यर्थः। "अपवर्गः क्रियासाध्ये फलाप्तौ त्यागमोक्षयोः" इति। यद्वा विशेषेण रमणं यस्मात्स तथा "ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गः" इति श्रुतेः। किमुत सन्न्यासिनामिति चशब्दः एवम्विधो विष्णुः स्वयमंशावेशमन्तरेण येषां युष्माकं गृहे आसते यूयं तस्य हरेर्दर्शनं च स्पर्शनञ्च अनुपथश्चानुगमनञ्च प्रजल्पश्च शय्याच आसनञ्च अशनञ्च तानि इमानि यस्य स यौवनस्य पिण्डस्य देहस्य सन्ति स तथा तस्य पिण्डस्य बन्धः दृढालिङ्गनं येषां ते तथा तस्माज्जन्मसाफल्यं युष्माकमितिशेषः ॥ ४०–४३॥ कृष्णरामयोर्जनमोहनविडम्बं कथयति-कृष्णरामाविति ॥ ४४–४५ ॥ व्रजेश्वरीं यशोदां समूचतुः सम्भाषणं चक्रतुः ॥ ४६॥ यस्याः मैत्र्याः वां युवयोः ॥ ४७ ॥ एतौ कृष्णरामौ युवयोः पित्रोः समीपे न्यस्तौ युवयोः सम्प्रीणनादीनि प्राप्य ऊषतुः सम्प्रीणनं सम्प्रीतिः अभ्युदयो जातकाद्यभिवृद्धिकर्म रसायनादिपुष्टिकरणं पोषणं कीदृशौ अदृष्टपितरौ पितृशब्दास्पदास्मद्दर्शनमप्राप्तौ सतां परस्तात्सज्जनेभ्योन्यत्राकुतश्चन भयौ कुत्रचित् भययुक्तौ न भवतः कुत्रचेत्युक्तं सङ्क्षिपति नकारेण सत्सु भययुक्तावित्यर्थः। ब्राह्मणादिसज्जनवधाद्बिभ्यतौ यद्वा बाल्ये विडम्बनार्थं सज्जनमन्तरेण दुष्टेभ्यो नाकुत्रच भयौ न बिभ्यतावित्यर्थः। तत्र दृष्टान्तमाह—पक्ष्मेति। यद्वद्यथा समीपन्यस्तत्वात्पक्ष्मेत्येकवचनं द्विवचनार्थे पक्ष्मणो अक्ष्णोः नेत्रयोः कुतश्चिद्भयनिवारके तथा युवामिति शेषः ॥ ४८ ॥ गोप्यश्चिरकालादृष्टं कृष्णमुपलभ्य दृष्ट्वा सद्यः दृग्भिः हृदि कृतम् अलं परिरभ्य तद्भावं तस्मिन्योग्यां भक्तिमापुरित्यन्वयः कीदृशं नित्ययुजां नित्यमनोयोगिनामपि दुरापं दुरापमित्यनेन भक्तेरेव प्राधान्यं सूचयति या गोप्यः यत्प्रेक्षणे तादर्थ्ये सप्तमी प्रेक्षणार्थं दृष्टिषु नेत्रेषु पक्ष्मणां कृतं निमेषलक्षणं कर्म शपन्ति पक्ष्मकर्तारं विधिं चेत्यनेन भक्त्यतिशयो दर्शितः ॥ ४९–५० ॥ स्वानां यदूनामर्थचिकीर्षवः अभीष्टं कर्तुकामाः अन्यासङ्गादन्यकार्यासक्तेश्चिरायितान् चिरादनागतान् कृपणेषु चेतो यासां तास्तथा ॥ ५१ ॥ यथा यथावदवबुध्यास्मास्विदमेव विशङ्क्य किन्तदिति तत्राह नूनमिति ॥ ५२॥ एतदेव विवृणोति–वायुरिति ॥ ५३ ॥ प्रेष्टवियोगादस्माकम् अनुताप इति तत्राह—मयीति ॥ ५४ ॥ मम परिच्छिन्नत्वे मद्वियोगशङ्का तदैव नास्ति सर्वगतत्वादिति हिशब्दसूचितं हेतुं व्यनक्ति—अहं हीति। आदिः कारणम् अन्तः संहर्ता आद्यन्तकाले वर्तमानो वा ननूक्तशङ्कायाः कः परिहार इति तत्राह–अन्तरमिति। हे अङ्गनाः! यथा खादिभूतानि भौतिकानां घटकविवक्षयैकवचनम् ॥ ५५ ॥ आत्मना परमात्मना तत इति खादीनि तत्त्वानि जीवस्तत इति योज्यं विध्यविध्यभावादौपचारिको व्यपदेश इति तत्राह—उभयमिति। यत् यदुक्तं शास्त्रीयमथ तस्मादुभयं जीवभूतशब्दवाच्यं तत्त्वं परे सर्वोत्तमे अक्षरे ब्रह्मणि मय्याततमिति पश्यथेत्यन्वयः। अनेनेदं श्रद्धेयमिति आयातमिति ज्ञायते ॥ ५६ ॥ स्त्रीणामयम् उपदेशो घटपृष्ठसलिलासेववद्व्यर्थ

इति तत्राह—अध्यात्मेति । देहमधिकृत्य वर्तमानानां परमात्मादितत्त्वानां शिक्षयोपदेशलणया शिक्षिताः विद्योपादानं कारिताः तदनुस्मरणेन तस्य कृष्णस्य निरन्तरोपासनया जातज्ञानाग्निना ध्वस्तो दग्धः जीवकोशः लिङ्गशरीराभिमानो यासां तास्तथा तं कृष्णमध्यगुः तं ज्ञातवत्यः ॥ ५७ ॥ ज्ञातकृष्णतत्त्वा इदं जगुरित्याह—नताः स्मेति । "अस भुवि" इत्यस्याशिषि प्रयोगः नताः नताभवामेति प्रार्थयामहे जन्मान्तरेपि त्वत्पादाब्जनमनमाशास्मह इत्यर्थः । ननु किमस्य माहात्म्यं येन तन्नमनमर्थनीयमिति तत्राह—योगेश्वरैरिति । यत्याश्रमिवत् ज्ञानदुर्बला नेत्याह—अगाधेति । किमर्थं विचिन्त्यमिति हेतुगर्भविशेषणमाह-संसारेति । संसारकूपपतितानाम् अस्मादुत्तरणावलम्बम् ऊर्ध्वगमनलक्षणाधिश्रेणिहस्ताधारं किञ्च गेहञ्जुषां गेहाख्यदेहपोषणनिरतानामपि नो मनसि सदोदियान्निरन्तरमुदेतु त्वत्स्वरूपमिति शेषः ॥ ५८ ॥

इति श्रीभागवते दशमस्कन्धे पदरत्नावल्यां टीकायां सप्ततितमोऽध्यायः ॥ ७० ॥ अधिकपाठं ॥ ६ ॥

एकसप्ततितमोऽध्यायः

श्रीशुक उवाच

तथानुगृह्य भगवान् गोपीनां स गुरुर्मतिः । युधिष्ठिरमथापृच्छत्सर्वांश्च सुहृदोऽव्ययम् ॥ १ ॥
त एवं लोकनाथेन परिपृच्छ्य सुसत्कृताः । प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः ॥ २ ॥

कुतोऽशिवस्त्वच्चरणाम्बुजासवं महन्मनस्तोमुखनिस्सृतं क्वचित् ।
पिबन्ति ये कर्णपुटैरलं प्रभो देहम्भृतस्तत्कृतमुच्छ्वसन्ति हि ॥ ३ ॥
तं त्वात्मधामविबुधात्मगतिं त्र्यवस्थमानन्दसम्प्लवमखण्डविकुण्ठबोधम् ।
कालोपसृष्टनिगमावपनात्तयोगमायाकृतिं परमहंसगतिं नताः स्मः ॥ ४ ॥
इत्युत्तमश्लोकशिखामणिं जनेष्वभिष्टुवत्स्वच्युतकौरवस्त्रियः ।
समेत्य गोविन्दकथां मिथोऽग्रणन्नृलोकगीतां शृणु वर्णयामि ते ॥ ५ ॥

द्रौपद्युवाच ।

हे वैदर्भ्यच्युतो भद्रे हे जाम्बवति कौशले । हे सत्यभामे कालिन्दि शैब्ये रोहिणि लक्ष्मणे ॥ ६ ॥
हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान्स्वयम् । उपयेमे यथालोकमनुकुर्वन् स्वमायया ॥ ७ ॥

रुक्मिण्युवाच

चैद्याय माऽर्पयितुमुद्यतकार्मुकेषु राजस्वशेषभटशेखरिताङ्घ्रिरेणुः ।
निन्ये मृगेन्द्र इव भागमजावियूथात्तच्छ्रीनिकेतचरणाब्जसमर्चनाय ॥ ८ ॥

सत्यभामोवाच

यो मे सनाभिवधतप्तहृदा ततेन लिप्ताभिशापमपमार्ष्टुमुपाजहार ।
जित्वर्क्षराजमथ रत्नमदात्स तेन नीतिच्छिदादिशत मां प्रभवेपि दत्ताम् ॥ ९ ॥

जाम्बवत्युवाच

आज्ञाय देहविकृतिन्निजनाथदैवं सीतापतिं त्रिनवहान्यमुनाभियुध्य ।
ज्ञात्वावधीरणमुपाहरदर्हणम्मां पादौ प्रगृह्य मणिनाहममुष्य दासी ॥ १० ॥

कालिन्द्युवाच

तपश्चरन्तीमाज्ञाय स्वपादस्पर्शकाम्यया । सख्योपेत्याग्रहीत्पाणिं याहं तद्गृहमार्ज्जनी ॥ ११ ॥

मित्रविन्दोवाच

यो मां स्वयम्वरमुपेत्य विजित्य भूपान् निन्येश्वयूथमिवचात्मबलिं द्विपारिः ।
भ्रातॄंश्च मेऽपकुरुतः स्वपुरंश्रियोगात्तस्यास्तु मेनुभवमङ्घ्र्यवनेजनाम्भः ॥ १२ ॥

नीलोवाच

सप्तोक्षणोऽतिबलवीर्यसुतीक्ष्णशृङ्गान् पित्रा कृतान् क्षितिपवीर्यपरीक्षणाय ।
तान्वीरदुर्मदहनस्तरसा निगृह्य क्रीडन्बबन्ध ह यथा शिशवोऽजतोकान् ॥ १३ ॥

य इत्थं वीर्यशुल्कां मां दासीभिश्चतुरङ्गिणीम् । पथि निर्जित्य राजन्यान्निन्ये तद्दास्यमस्तु मे ॥ १४ ॥

भद्रोवाच

पिता मे मातुलेयाय स्वयमाहूय दत्तवान् । कृष्णे कृष्णाय तच्चित्तामक्षोहिण्या सखीजनैः ॥ १५ ॥
तस्य मे पादसंस्पर्शो भवेज्जन्मनि जन्मनि । कर्मभिर्भ्राम्यमाणाया येन तच्छ्रेय आत्मनः ॥ १६ ॥

लक्ष्मणोवाच

ममापि राज्यच्युतजन्मकर्म च श्रुत्वा मुहुर्नारदगीतमास ह ।
चित्तं मुकुन्दे किल पद्महस्तया । वृतः स्वये यस्तु विहाय लोकपान् ॥ १७ ॥
ज्ञात्वा मम मतं साध्वि पिता दुहितृवत्सलः । बृहत्सेन इति ख्यातस्तत्रोपायमचीकरत् ॥ १८ ॥
यथा स्वयम्वरे राज्ञि मत्स्यः पार्थेच्छया कृतः । अयं तु बहिराच्छन्नो दृश्यते स जले परम् ॥ १९ ॥
श्रुत्वैतत्सर्वतो भूपा आययुर्मत्पितुः परम् । सर्वास्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाः सहस्रशः ॥ २० ॥
पित्रा सम्पूजिताः सर्वे यथावीर्यं यथावयः । आददुः सशरं चापं वेद्धुं पार्षति मद्धियः ॥ २१ ॥
आदाय व्यसृजन् केचित्सज्जीकर्त्तुमनीश्वराः । आकोष्ट्यां ज्यां समाकृष्य पेतुरेकेऽमुना हताः ॥ २२ ॥
सज्जं कृत्वाऽपरे वीराः प्राग्ज्योतिमगधेश्वरौ । भीमो दुर्योधनः कर्णो नाविन्दंस्तदवस्थितिम् ॥२३॥
मत्स्याभासं जले दृष्ट्वा ज्ञात्वा च तदवस्थितिम् । पार्थो यत्तोसृजद्बाणान्नाच्छिनत्पस्पृशे परम् ॥ २४ ॥
राजन्येषु निवृत्तेषु भग्नमानेषु मानिषु । भगवान् धनुरादाय सज्यं कृत्वाऽथ लीलया ॥ २५ ॥
तस्मिन् सन्धाय विशिखं मत्स्यं वीक्ष्य सकृज्जले । छिन्नेषुणाऽपातयत्तं सूर्ये चाभिजिति स्थिते ॥२६॥
दिवि दुन्दुभयो नेदुर्जयशब्दोऽपतद्भुवि । देवाश्च कुसुमासारान् मुमुचुर्हर्षविह्वलाः ॥ २७ ॥
तद्रङ्गमाविशमहं कलनूपुराभ्यां पद्भ्यां दिशो भ्रमयती चलपेशलाभ्याम् ।
वृत्ते पिधाय परिधाय च कौशिकाग्र्ये सव्रीडहासवदना कबरीधृतस्रक् ॥ २८ ॥
उन्नीय वक्त्रमुरुकुण्डलकुन्तलत्विट् गण्डस्थलं शिशिरहासकटाक्षमोक्षम् ।
राज्ञो निरीक्ष्य परितः शनकैर्मुरारेरंसेऽनुरक्तहृदया विदधे स्वमालाम् ॥ २९ ॥
ततो मृदङ्गपटहा शङ्खभेर्यानकादयः । निनेदुर्नटनर्तक्यो ननृतुर्गायका जगुः ॥ ३० ॥
एवं वृते भगवति मायेशे नृपयूथपाः । न सेहिरे याज्ञसेनि ! स्पर्धिनो हृच्छयातुराः ॥ ३१ ॥
मां रथं स समारोप्य लसद्धयचतुष्टयम् । शाङ्र्गमुद्यम्य सन्नद्धस्तस्थावीशश्चतुर्भुजः ॥ ३२ ॥
दारुकश्चोदयामास काञ्चनोपस्करं रथम् । मिषतां द्विषतां राज्ञि वृकाणां मृगराडिव ॥ ३३ ॥
ते त्वसज्जन्त राजन्या निषेद्धुं पथि केचन । संयत्ता उद्धृतेष्वासा ग्रामसिंहा यथा हरिम् ॥ ३४ ॥
ते शाङ्र्गच्युतबाणौघैर्नुन्नबाह्वङ्घ्रिकन्धराः । निपेतुः प्रधने केचिदेके सन्त्यज्य दुद्रुवुः ॥ ३५ ॥
ततः पुरीं पतिजयभूत्यलङ्कृतां रविच्छदध्वजपटचित्रतोरणाम् ।
कुशस्थलीं दिवि भुवि चाभिसंस्तुतांतदासमाविशत्तरणिरिव स्वकेतनम् ॥ ३६ ॥
पिता मे पूजयामास सुहृत्सम्बन्धिबान्धवान् । महार्हवासोलङ्कारैः शय्यासनपरिच्छदैः ॥ ३७ ॥
दासीभिः सर्वसम्पद्भिर्भटेभरथवाजिभिः । आयुधानि महार्हाणि ददौ पूर्णस्य भक्तितः ॥ ३८ ॥
आत्मारामस्य तस्येमा वयं वै गृहदासिकाः । सर्वसङ्गनिवृत्त्याद्धा तपसा च बभूविम ॥ ३९ ॥

महिष्य ऊचुः

भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाऽथ नः क्षितिजये हृतराजकन्याः ।
निर्मथ्य संसृतिविमोक्षमपि स्मरन्ती पादाम्बुजं परिनिनाय य आप्तकामः ॥ ४० ॥
न वयं साध्वि साम्राज्यं स्वाराज्यं भौज्यमप्युत । वैराज्यं पारमेष्ठ्यं वा आनन्त्यं वा हरेः पदम् ॥४१॥
कामयामह एतस्य श्रीमत्पादरजः श्रियः । कुचकुङ्कुमगन्धाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥ ४२ ॥
व्रजस्त्रियो यद्वाञ्छन्ति पुलिन्द्यस्तृणवीरुधः । गावश्चारयतो गोपैः पादस्पर्शं महात्मनः ॥ ४३ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे एकसप्ततितमोऽध्यायः ॥ ७१ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

श्रोत्रादीनां भक्त्यतिशयजननायाविस्मरणायातीताध्यायेषु उक्तं कृष्णविक्रमं सङ्क्षेपतोनुक्रामत्यस्मिन्नध्याये, तत्रादावुपोद्घातं रचयति–तथेति । यथोपदिष्टं ज्ञानं सुदृढं स्यात्तथा ज्ञानोपदेशेनानुगृह्य गतिः मुक्तिलक्षणानन्ददत्वेनेत्याशयः । अव्यय-

मनामयं कुशलमित्यर्थः ॥ १ ॥ तस्य हरेः पादेक्षया चरणनिरीक्षणेन हतांहसः निर्मूलपापाः ॥ २ ॥ किम्विधां कथामूचुरिति, तत्राह—कुत इति । ये जनाः कर्णपुटैः महन्मनस्तोमुखनिस्सृतं महतां व्यासादीनां मनस्तः मनःपूर्वकं मुखकमलान्निस्सृतं गलितं त्वच्चरणाम्बुजासवं तव पादकमलकथामृतं क्वचित्कस्मिंश्चित्प्रसङ्गेपि अलम्पिबन्ति अलम्बुद्धिराहित्येन सेवन्ते तेषामशिवः अशुभः पन्थाः कुतः स्यादित्यन्वयः । कीदृशोऽशिवमार्ग इति तत्राह–देहम्भृत इति । देहम्भृतः उदरम्भराः तत्कृतमशिवमार्गप्राप्तं व्यसनं प्रेक्ष्य उच्छ्वसन्ति दीर्घं श्वसन्ति द्वाये देहभृतः शरीरिणः कर्णपुटैः त्वच्चरणाम्बुजासवं पिबन्ति तत्तस्य तव कृतं चरितमुच्छ्वसन्ति लोके उपदिश्य विकासयन्ति विस्तारयन्ति तेषामशिवः कुत इति ॥ ३ ॥ ननु नारायणचरणकमलामृतपायिनाममङ्गलं नास्तीत्यनेन अन्येषामस्तीत्यायातं, तत्र भवन्तः के ? इति तत्राह—तन्त्वेति । तन्त्वानताः स्म इत्यन्वयः । यस्य पादाब्जसुधापायिनाममङ्गलं नास्ति तम् अस्य देवदत्तवदन्याधीनत्वे किमेतन्नमनफलमित्यत्राहुः आत्मधाम आत्मैव धाम गृहलक्षणम् आश्रयो यस्य स तथा तं स्वाश्रयमित्यर्थः । स्वाश्रयत्वं चेतोपि महत्ता देवाद्यन्यतमेन नित्यतेन किन्न स्यादित्यत्राहुः—विबुधेति । विबुधानामात्मा गतिः स्वभावगमकं स्वामिनमाश्रयं वा स्वभावगमकत्वं कथमत्राहुः त्र्यवस्थमिति तिस्रोऽवस्थाः जाग्रदाद्या यस्मात्स तथा तम् अनेन देवानां जाग्रल्लक्षणानिमिषस्वभावं दैत्यानां सुप्तिलक्षणाज्ञानस्वभावं मनुष्याणां स्वप्नलक्षणमिश्रज्ञानस्वभावं गमयतीति ज्ञातव्यं नन्ववस्थात्रयनियन्तृत्वे तत्कृतं श्रमलक्षणं दुःखमनिवारितमापतेद्देवदत्तवदत्राहुः—आनन्देति । आनन्दानां सम्प्लवो महौघो यस्मिन् स तथा तं पूर्णानन्दमित्यर्थः । नन्वनुभवलक्षणसाधनाभावात्पाषाणानामपि पूर्णानन्दः किं न स्यादत्राहुः, अखण्डेति, अखण्डः निरन्तरः अविकुण्ठः विमिश्रः बोधो यस्य स तथा तं स्वाभिन्ननिष्कलमषज्ञानमित्यर्थः । नन्वेवम्बिधस्य जननं किमर्थमत्राहुः कालेति । कालेन गुणेनोपसृष्ट उत्पन्ना निगमो वेदादिशास्त्रनिचयस्तस्यावपनाय पुनरभिव्यक्तिलक्षणाङ्कुरीकरणायात्ताऽङ्गीकृताः योगमायाकृतिः स्वरूपभूतेच्छाया देहो येन स तथा तं "आकारो देह आकृतिः" इति यादवः । उक्तार्थसर्वस्वे किं प्रमाणमत्राहुः—परमेति । परमहंसानां वेदान्तैकनिष्ठानां सन्न्यासिनां गतिर्ज्ञानं यस्मिन् स तथा तं भगवत्स्वरूपविषयं परमहंसज्ञानं प्रमाणमितरेषामित्यर्थः ॥ ४ ॥ अच्युतस्य कौरवाणां च स्त्रियः समेत्य एकत्र मिलित्वा यां कथामगृणन् तां वर्णयामि त्वं शृणु ॥ ५ ॥ प्रश्नप्रतिवचनपूर्वकां शृण्विति न गानवदत्रेति विवेकायाह द्रौपदीति । हे षोडशसहस्रकृष्णपत्न्यः ! पृथङ्नामग्रहणं बाहुल्यान्न कृतं स्वेच्छया लोकमज्ञजनमनुकुर्वन् अच्युतो भगवान् स्वयं वो युष्मान् यथा येन विधिना उपयेमे तं विधिमस्माकं ब्रूतेत्यन्वयः ॥ ६–७ ॥ राजसु जरासन्धादिषु मा माम् अशेषभटानामित्युपलक्षणं राज्ञां शेखरितः मूर्द्धसु शेखर इव अङ्घ्रिरेणुर्येन स तथा भागं तदर्थत्वेन क्लृप्तांशं न ग्राम्यभोगेच्छयेत्यत्राह–श्रीनिकेतेति । श्रीत्यनेन तद्भागं सूचयति अजानामवीनां यथा ॥ ८ ॥ सनाभेः सहोदरस्य प्रसेननाम्नो वधेन तप्तहृदा सन्तप्त हृदयेन ततेन तातेन पित्रा लिप्ताभिशापं कथितमिथ्यादोषम् अपमार्ष्टुम् परिहर्तुम् ऋक्षराजानं जाम्बवन्तं जित्वा रत्नमुपाजहार अथ तेन कृष्णेन भगवतानीतच्छिद्रप्राप्तभेदलक्षणापराधः स मे पिता मां प्रभवे कर्तुमकर्त्तुमन्यथाकर्तुं समर्थाय आदिशत दत्तवान् रत्नञ्चादात् कीदृशीं मामन्यस्मै वाचा दत्तामपि यद्वा ऋक्षराजं जित्वा रत्नमाहरत् आहृत्य च तद्रत्नं मत्पित्रे अदात्तेन रत्नेन सह भगवतानीतच्छिद्रस पिता तस्मै प्रभवे आदिशतेत्यन्यत् समम् ॥ ९ ॥ देहविकृतिं परिमाणतो वर्णतश्च विलक्षणदेहं कृष्णं प्रत्यक्षदृष्ट्या आज्ञाय सम्यक् ज्ञात्वा अनेन श्रीकृष्णेन त्रिनवाहानि सप्तविंशतिदिनान्यभियुध्य एन कृष्णं निजनाथदैवं स्वकुलस्वामिदेवताभूतं सीतापतिं पुनर्ज्ञात्वा मे पिता जाम्बवान् अवधीरणम् अवज्ञानमर्हणम् अपराधपरिहारयोग्यं पूजासाधनं मां मणिना सह पादौ प्रगृह्योपाहरत् कृष्णायेति शेषः यद्वा अवधिरवधानं निश्चयज्ञानं यत्तस्येरणं येन सोवधीरणः दशरथपुत्रोवतीर्णोयमिति विशिष्टज्ञानजनक इत्यर्थः । तं पराजित इति वा पाठः अज्ञायेति च त्वममुष्याधुना कीदृशीत्यत्राह—अहमिति "अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत्" इति वचनात् त्रिनवहानीति यद्वोत्तराकारगुणस्तैर्ज्ञस्यिकल्पतो गुण इत्यनेन पूर्वपरस्थानयोः गुणादेशेन रूपे सिद्धे भवति ॥ १० ॥ याऽहमिदानीं तद्गृहमार्जनी तां मां स्वपादस्पर्शकाम्यया तपश्चरन्तीं विज्ञाय सख्यार्जुनेन सहोपेत्य मम पाणिमग्रहीत् या कृष्णदेवता मम पाणिमग्रहीत् अहं तद्गृहमार्जनीति वा याय इति व्यत्ययेनान्वयो वा ॥ ११ ॥ यः कृष्णः द्विपारिः सिंहः श्वयूथं विजित्यात्मने क्लृप्तं बलिमुपहारमिव स्वयम्बरे भूपानुपेत्य विजित्य भ्रातॄन् अपकुरुतोऽपकुर्वतः सतः मां निन्ये स्वपुरञ्चागात् अनुभवं जन्मनि जन्मनि मम तस्य हरेरङ्घ्र्यवनेजनाम्भोस्त्वित्यन्वयः । अपकरणे हेतुः श्रिय इति सम्पदो हेतोः "श्रीः पद्मायां कान्तिसम्पदोः" इति तस्या अंशं मामिति वा ॥ १२ ॥ अत्यधिके बलवीर्ये सुतीक्ष्णानि शृङ्गाणि च येषां ते तथा तान् बलशक्तिवीर्यविक्रमदुर्मदान् घ्नन्तीति दुर्मदहनः अजतोकान् छागशिशून् ॥ १३ ॥ ततः किमकारीति तत्राह—य इति ॥ दासीभिः सह मां निन्येति ॥ १४ ॥ हे कृष्णे द्रौपदि ॥ १५ ॥ येन पादस्पर्शेनात्मनो मे तच्छ्रेयः स्यात् सपादस्पर्शो भवेत् ॥ १६ ॥ हे राज्ञि द्रौपदि ! यस्तु लोकपानिन्द्रादीन्विहाय पद्महस्तया स्वयम्वृतः तस्मिन्मुकुन्दे मम चित्तमासेत्यन्वयः ॥ १७ ॥ द्रौपदीस्वयम्बरे द्रौपद्याः पार्थवरेच्छया मत्स्यः कृतो यथा तथा मे पिता तत्रोपायमचीकरत् इदमुपायमतो विशिनष्टि अयन्त्विति तु शब्देनान्याशक्यं दर्शयति अयं मत्स्यः दीर्घस्तूणशिखरेऽवलंबितो बहिराच्छन्नः व्यवहितसर्वाङ्गः अदर्शनाद्वेधोऽसुकर इति तत्राह दृश्यत इति स मत्स्यः परं केवलं जले दृश्यते वेणुनालं निर्गतच्छायया जले प्रतिबिम्बितत्वेन चक्षुर्विषय इत्यर्थः । तदनेनाधोमुखे न जलेच्छायामवलोक्य वेद्धव्य इति पार्थकृतलक्ष्यवधोदधिकासुकरमिति ज्ञायते ॥ १८–१९ ॥

उपाध्याया आचार्याः पुरोहिता वा ॥ २० ॥ हे पार्षति ! सिद्धे कार्ये भोगार्थं मयि धियो येषां ते मद्धियः ॥ २१ ॥ व्यसृजन् मुक्तवन्तः आकोट्यां धनुरग्रपर्यन्तम् ॥ २२ ॥ तस्य मत्स्यस्य स्वरूपावस्थितिं नाविन्दन्न ज्ञातवन्तः ॥ २३ ॥ मत्स्याभासं मत्स्याकरं यत्तोऽभयेन वाणानसृजत् नाच्छिनच्च तर्हि किं कृतमत्राह पस्पृश इति ॥ २४–२५ ॥ अभिजिति दिनमध्यमुहूर्ते सति ॥ २६ ॥ भुवि जयशब्दोऽपतत् व्याप्तोऽभूत् ॥ २७ ॥ दिश इति लक्षणया दिक्षु स्थितान् नृपान् भ्रमयती कामविकारसूचकनानाचेष्टाकुलान् कारयन्ती तद्रङ्गं तत्स्वयम्बरस्थलं चलेन पादविक्षेपेण पेशलाभ्यां सुन्दराभ्यां वृत्ते स्वरूपे स्वेतरवस्तुभ्यो व्यावृत्तरूपे कौशिकाग्र्ये कृमिकोशोत्थतन्तुकृतवस्त्रश्रेष्ठे यद्वा वृते जघने परिधाय वृत्ते पीने स्तनद्वये पिधाय वा कबर्यां धृता स्रक् माला यस्याः सा तथा ॥ २८ ॥ शिशिरवत् तुषारवद्धवलो हासः स्निग्धो वा ॥ २९–३० ॥ हे याज्ञसेनि द्रौपदि ! ॥ ३१ ॥ ईशः शिवो नेत्याह चतुर्भुज इति ॥ ३२–३३ ॥ ग्रामसिंहाः सारमेयाः हरिं सिंहम् ॥ ३४ ॥ नुन्नाः छिन्नाः वाहवश्चाङ्घ्रयश्च कन्धराश्च येषां ते तथा प्रधने युद्धे ॥ ३५ ॥ पत्युः स्वामिनः कृष्णस्य जयभूत्या जयश्रिया अलङ्कृतां यथा जयलक्ष्मीरुत्कृष्टा तथाऽलङ्कृतां वा रविच्छदध्वजपटाश्च चित्रतोरणाश्च यस्यां सा तथा तां रविं छादयन्तीति रविच्छदाः आतपप्रतिष्टम्भकाः चित्रा नानावर्णास्तोरणाः स्वकेतनम् आत्मीयोदयशिखरिशिखरम् ॥ ३६–३७ ॥ पूर्णस्य अन्यपालकरहितस्य ॥ ३८ ॥ दासीत्वञ्च तप आदिपुण्यनिचयेन प्राप्तमिति ज्ञापनायोक्तं सर्वेति अद्धा यथार्थभूतया "अद्धा प्रत्यक्षसत्ययोः" इति ॥ ३९ ॥ षोडशसहस्रस्त्रियः स्वविवाहप्रकारं कथयन्ति—भौममिति । यः कृष्णः क्षितिजये भूमण्डलविजये राज्ञो निर्मथ्य हृतराजकन्याः ज्ञात्वा सगणं भौमन्निहत्य तेन नरकेण रुद्धाः निरोधलक्षणसंसृतेर्मोक्षं स्मरन्तीर्नोऽस्मान् पादाम्बुजं परिनिनाय समीपं प्रापयामास पादाम्बुजं सेवयितुमूढवान्वा न कामुकबुद्ध्या, कुतः ? आप्तकामः ॥ ४० ॥ वयमपि भगवत्पादरजस्सेवामन्तरेण नान्यदैश्वर्यपदमाशास्महे इत्याहुः—न वयमिति । साम्राज्यमुत्तरदेशराज्यं स्वाराज्यं पूर्वदेशराज्यं भौज्यं दक्षिणदेशराज्यं वैराज्यं पश्चिमदेशराज्यं पारमेष्ठ्यं चक्रवर्तिपदम् आनन्त्यं सर्वदेशाधिपत्यं वा हरेः पदम् इन्द्रपदं वा साम्राज्यं चक्रवर्तिपदं स्वाराज्यं स्वर्गराज्यं भौज्यमन्तरिक्षराज्यं वैराज्यं पातालराज्यम् अणिमादिराज्यं वा पारमेष्ठ्यं ब्रह्मपदम् आनन्त्यं मोक्षं वा न कामयामहे किन्तु गदाभृतो हरेः पदं कामयामहे ॥ ४१ ॥ किमर्थमत्राह—एतस्येति । एतस्य गदाभृतः श्रीमत्पादरजः मूर्ध्नि वोढुं कीदृशं श्रियो लक्ष्म्याः कुचलिप्तकुङ्कुमरजोगन्धाढ्यम् ॥ ४२ ॥ व्रजस्त्रियः यत्पादरजो वाञ्छन्ति न केवलं व्रजस्त्रिय एव वाञ्छन्ति पुलिन्द्यादयोपीत्याहुः—पुलिन्द्य इति । गावः गाः ॥ ४३ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे विजयध्वजतीर्थकृतपदरत्नावल्याम् एकसप्ततितमोऽध्यायः ॥ ७१ ॥

अथ द्विसप्ततितमोऽध्यायः

श्रीशुक उवाच

श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसेनी माधव्य इत्थमनुयाः परमप्रतीताः ।
कृष्णेऽखिलात्मनि हरौ प्रणयानुबन्धं सर्वा विसिस्म्युरलमश्रुकलाकुलाक्ष्यः ॥ १ ॥

इति सम्भाष्यमाणासु स्त्रीभिःस्त्रीषु नृभिर्नृषु । आययुर्मुनयस्तत्र कृष्णरामदिदृक्षया ॥ २ ॥
द्वैपायनो नारदश्च च्यवनो देवलोऽसितः । विश्वामित्रः शतानन्दो भारद्वाजोथ गौतमः ॥ ३ ॥
रामः सशिष्यो भगवान् वसिष्ठो गालवो भृगुः । पुलस्त्यः कश्यपोऽत्रिश्च मार्कण्डेयो बृहस्पतिः ॥ ४ ॥
द्वितस्त्रितश्चैकतश्च ब्रह्मपुत्रस्तथाङ्गिराः । अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे ॥ ५ ॥
तान् दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः । पाण्डवाः कृष्णरामौ च प्रणेमुर्लोकवन्दितान् ॥ ६ ॥
तानानर्चुर्यथा सर्वे सहरामोऽच्युतोर्चयत् । स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥ ७ ॥
उवाच सुखमासीनान् भगवान् धर्मगुप्तनुः । सदसस्तस्य महतो यतवाचोनुश्रृण्वतः ॥ ८ ॥

श्रीभगवानुवाच

अहो वयं जन्मभृतो लब्धं कार्त्स्न्येन तत्फलम् । देवानामपि दुष्प्रापं यद्योगेश्वरदर्शनम् ॥ ९ ॥
किं स्वल्पतपसां नृणामर्चायां देवचक्षुषाम् । दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकम् ॥ १० ॥
न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः । ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ११ ॥

नाग्निर्न सूर्यो न च चन्द्रतारकं न भूर्जलं खं श्वसनोऽथ वाङ्मनः ।
उपासिता भेदकृतो हरन्त्यघं विपश्चितो घ्नन्ति मुहूर्तसेवया ॥ १२ ॥
यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिश्च जलेन कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः ॥ १३ ॥

श्रीशुक उवाच

निशम्येत्थं भगवतः कृष्णस्याकुण्ठमेधसः । वचो दुरन्वयं विप्रास्तूष्णीमासन् भ्रमद्धियः ॥ १४ ॥
चिरं विमृश्य मुनय ईश्वरस्येशितव्यताम् । जनसङ्ग्रह इत्यूचुः स्मयन्तस्तं जगद्गुरुम् ॥ १५ ॥

ऋषय ऊचुः

यन्मायया तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वरम् ।
यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितम् ॥ १६ ॥
अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा ।
भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडम्बनम् ॥ १७ ॥
अथापि काले स्वजनाभिगुप्त्यै बिभर्षि सत्त्वं खलनिग्रहाय ।
स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरुषः परो भवान् ॥ १८ ॥
ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः । यत्रोपलब्धं सुव्यक्तमव्यक्तं च ततःपरम् ॥ १९ ॥
तस्माद्ब्रह्मकुलं ब्रह्मन् ! शास्त्रयोनेस्तवात्मनः । सभाजयसि सद्धाम तद्ब्रह्मण्यगुणो भवान् ॥ २० ॥
अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः । त्वया सङ्गम्य सङ्गत्या यत्त्वं नः श्रेयसां परः ॥ २१ ॥
नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे । स्वयोगमाययाच्छन्नमहिम्ने परमात्मने ॥ २२ ॥
न यं विन्दन्त्यमी भूपा एकारामाश्च वृष्णयः । मायाजवनिकाच्छन्नमात्मानं कालमीश्वरम् ॥ २३ ॥
तस्याद्य ते ददृशिमाङ्घ्रिमघौघमर्षतीर्थास्पदं हृदि धृतं सुविपक्वयोगैः ।
उत्सिक्तभक्त्युपहृताशयजीवकोशा आपुर्भवद्गतिमथानुगृहाण भक्तान् ॥ २४ ॥

श्रीशुक उवाच

इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरम् । राजर्षिवर्यास्तान् गन्तु मुनयो दधिरे मनः ॥ २५ ॥
तद्वीक्ष्यताननुव्रज्य वसुदेवो महायशाः । प्रणम्य चोपसङ्गृह्य बभाषेदं सुयन्त्रितः ॥ २६ ॥

वसुदेव उवाच

नमो वः सर्वदेवेभ्यो ऋषयः श्रोतुमर्हथ । कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यताम् ॥ २७ ॥

नारद उवाच

नातिचित्रमिदं विप्रा वसुदेवो बुभुत्सया । कृष्णं मत्वाऽर्भकं यन्नः पृच्छति श्रेय आत्मनः ॥ २८ ॥
सन्निकर्षो हि मर्त्यानामनादरणकारणम् । गाङ्गं हित्वा यथान्योऽम्भस्तत्रत्यो याति शुद्धये ॥ २९ ॥
यस्यानुभूतिः कालेन लयोत्पत्त्यादिनास्य वै । स्वतोऽन्यस्माच्च गुणतो न कुतश्चन रिष्यति ॥ ३० ॥
तं क्लेशकर्मपरिपाकगुणप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयम् ।
प्राणादिभिः स्वविषयैरुपगूढमज्ञो मेने ससूर्यमिव मेघहिमोपरागैः ॥ ३१ ॥
अथोचुर्मुनयो राजन्नाभाष्याऽनकदुन्दुभिम् । सर्वेषां शृण्वतां राज्ञां तथैवाच्युतरामयोः ॥ ३२ ॥
कर्मणा कर्मनिर्हार एष साधुनिरूपितः । यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः ॥ ३३ ॥
चित्तस्योपशमो यो वै कविभिः शास्त्रचक्षुषा । दर्शितः सुगमो योगो धर्मश्चात्ममुदावहः ॥ ३४ ॥
अयं स्वस्त्ययनः पन्था द्विजातेर्गृहमेधिनः ।
यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पूरुषम् । वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम् ॥ ३५ ॥
आत्मलोकैषणामेवं कालेन विसृजेद्बुधः । ग्रामे त्यक्तैषणाः सर्वे ययुर्धीरास्तपोवनम् ॥ ३६ ॥
ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितॄणां प्रभो । यज्ञाध्ययनपुत्रैस्ताननिस्तीर्य त्यजन् पतेत् ॥ ३७ ॥
ब्रह्मचर्यसुताभ्यां वै ऋषिपित्रोर्महामते ! । यज्ञैर्देवर्णमुन्मुच्य निर्ऋणोऽशरणो भवेत् ॥ ३८ ॥
वसुदेव भवान्नूनं भक्त्या परमया हरिम् । जगतामीश्वरं भेजे स यद्वां पुत्रतां गतः ॥ ३९ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे विजयध्वजतीर्थकृतपदरत्नावल्यां द्विसप्ततितमोऽध्याय. ॥ ७२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हरेर्ज्ञानिप्रियत्वं यज्ञस्य तदेकविषयत्वं तत्प्रीतेर्मुक्तिसाधनत्वं पुत्रमित्रादिस्नेहस्य संसारमूलत्वमित्यादिकमध्यायद्वये कथयति; तत्र व्यासादिमुनीनाम् आगमनं वक्तुं पृथादिस्त्रीणां सन्तोषोद्रेकम् कथयति—पृथेत्यादिना । या माधव्यः माधवपत्न्यः

तासां कृष्णे प्रणयानुबन्धं दृष्ट्वेतिशेषः। विसिस्म्युः विस्मिताः अभवन्नित्यन्वयः। सत्यादीनां भक्तिप्रवाहं दृष्ट्वा वा ॥ १ ॥ इदानीमृषीणामागमनप्रकारं वक्ति—इतीति ॥ २–४ ॥ द्वितस्त्रितैकताः सहोदराः "त्रितः कूपेऽवहितो देवान् हवत ऊतये" इति श्रुतेः ॥ ५ ॥ प्रागुत्थायाथानर्चुः नमनादिनेतिशेषः ॥ ६–७ ॥ धर्मगुप् धर्मगोप्त्री तनुर्यस्य स तथा ॥ ८ ॥ तत्फलं जन्मफलम् ॥ ९ ॥ नृणां युष्मद्दर्शनादिकं दुष्प्रापमिति किं वक्तव्यमित्याह स्वल्पेति। अर्चायामिति सप्तमी प्रथमार्थे प्रतिमैव देव इति चक्षुर्दर्शनं येषां ते तथा "अर्चा पूजाप्रतिष्ठयोः" इति ॥ १० ॥ ननु, बहिर्मुखानां नृणां तीर्थादिदर्शनादेर्जन्मनः साफल्यं स्यात्किं साधुदर्शनादिनेति तत्राह–त इति। तत्र सन्निहितास्ते देवा अप्युरुकालेन कालक्षेपं कृत्वैव पुनन्ति नतु तदानीमेव तत्र किङ्कारणमित्यस्येदमेवोत्तरं कलनमेव कालः ज्ञानं तावददन्तः "कल ज्ञाने" इतिधातुः। उरुणा गुरुणोपदिष्टज्ञानेन तत्स्वरूपं तन्मन्त्रतदङ्गाचरणादिकं ज्ञात्वा समुपास्य तद्दर्शनं प्राप्य तत्प्रसादेनाघक्षय इत्यतो गुरूपदेशः कारणमित्यर्थः। प्रकृते किमनेनेत्यत्राह—दर्शनादिति। साधवः स्वदर्शनादन्यथाज्ञानमपगमयन्ति एवशब्दः गुरूपदेशं व्यवच्छिनत्ति ॥ ११ ॥ नन्ववद्यनिमित्तमन्यथाज्ञानं जायते तत्राज्यादयः स्वदर्शनादघं क्षपयित्वाऽन्यथाज्ञानं नाशयन्ति ततो जन्म सारूप्यमिति तत्राह–नेति। कस्याघं न हरन्तीत्यत उक्तं भेदकृतः अन्यथाज्ञानिनः पुंसः दाहकत्वादिशक्तिदर्शनायमेवाग्निशब्दप्रवृत्तिहेतुरित्यन्यथाज्ञानं बहिर्मुखानां जायते मनः मनोभिमानीदेवः "मनोब्रह्मेत्युपासत" इति श्रुतिः। एवकारेण कियत्कालोव्यवच्छिन्न इति तत्राह–मुहूर्तेति। अत्र प्रतीतार्थमपहाय तत्र सन्निहितदेवताकल्पनं निष्प्रमाणकमित्यादिशङ्का "प्राकृतैर्दृश्यमानन्तु न द्रवं तीर्थमुच्यते" इत्यादिना परिहर्तव्या भेदस्यान्यथाज्ञानत्वञ्च भिन्नस्याभेदतो दृष्टिरिति प्रमाणसिद्धं नन्वियं व्यवस्था कुतः ऋष्यादिभ्यो देवानाम् उत्तमत्वादित्यतः—

"उत्तमा अपि देवेशा अचरान्विदुषो नृणाम्। पूजायै सम्प्रयच्छन्ति परोक्षत्वप्रिया यतः ॥"

इत्यादेः ॥ १२ ॥ इतोपि विद्वज्जनपूजा नृभिः कार्येत्याशयेनाह—यस्येति। यस्य पुरुषस्य त्रिधातुके प्राधान्यात्पृथिव्यप्तेजःकृते वातपित्तश्लेष्माकुले वा कुणपेशववदचेतनदेहे आत्मबुद्धिः अहमिति ज्ञानं देहोऽहमित्यन्यथाज्ञानमित्यर्थः। यस्य च कलत्रादिषु असद्भार्यादिषु स्वधीः मदीया एते अहमेषां भर्ता नान्य इति स्वकीयत्वबुद्धिः विषयभोगलौल्यं तत्र निमित्तं यस्य भौमे भूविकारे शिलादौ इज्यधीः पूज्यबुद्धिः यद्यस्य जले द्रवरूपे तीर्थबुद्धिः अघक्षयबुद्धिः यस्याभिज्ञेषु कर्हिचिदपि न पूज्यत्वबुद्धिः स गोखरः गवि पृथिव्यां गर्दभः नापरः गोस्पर्शनादिना शुद्धिः स्यादिति गौश्चासौ खरश्चेति विग्रहो न सङ्गच्छत इत्युक्त एवार्थः ॥ १३ ॥ अकुण्ठमेधसः अप्रतिहतज्ञानस्य दुरन्वयम् अन्वेतुमशक्यं दुर्ज्ञेयमित्यर्थः। भ्रमन्ती अनवस्था धीर्येषां ते तथा ॥ १४ ॥ मुनयः किमकुर्वन् पुनरिति तत्राह–चिरमिति। ईश्वरस्य जगन्नियन्तुरीशितव्यतां विद्वज्जनान् प्रति दास्यभावं चिरं विमृश्य अयं जनसङ्ग्रहः उन्मार्गप्रवृत्तिरिवाचारलक्षण इति मत्वा तं जगद्गुरुमूचुरित्यन्वयः ॥ १५ ॥ अहो हरेर्विडम्बनमिति कुतूहलादुत्पन्नमन्दस्मितं कुर्वन्तः किं स्वाश्रमगमनमुत बालककथामाहोस्वित्तत्त्वविषयं किञ्चिदूचुरित्याशङ्क्य तत्त्वविषयमेवेत्याह–यन्माययेति। तत्त्वविदुत्तमाः वयं यस्य मायया विमोहिताः स भवानीहया लोकचेष्टया गूढः ईशितव्यायति अनीशवदाचरतीति यस्मादहो भागवतो विचेष्टितं विचित्रम् "लोहितादिडाड्भ्यः क्यष्" (३।१।३) इति क्यष् प्रत्ययः ॥ १६ ॥ चेष्टायामतर्क्यत्वमुपपादयति—अनीह इति। आत्मना परप्रेरणामन्तरेण यथा भूमिः भौमैः स्वविकृतैः पदार्थैर्बहुनामरूपिणी कार्यरूपेण बध्यते यथा तथा भवान्न बध्यत इत्यन्वयः यो भवाननीहः कूटस्थ एतज्जगद्बहुधा सृजत्यवत्यत्तीति तस्मादहो विभूम्नश्चरितं कीदृशं विडम्बयतीति विडम्बनम् ॥ १७ ॥ यद्यपि लोकविडम्बनशक्त्या मोहयसि तथापि काले सज्जनोपप्लवसमये वेदपथञ्च बिभर्षि वर्णाश्रमात्मा वर्णाश्रमस्थापनाचार्यः ॥ १८ ॥ यतो वेदमार्गप्रणेता ततस्ते तव ब्राह्मणकुलं शुक्लत्वञ्च कस्मादित्यत्राह—यत्रेति। यत्र ब्राह्मणकुले अव्यक्तं परं ब्रह्म सुव्यक्तं व्यवधानमन्तरेण उपलब्धं दृष्टं यत्तस्मात् शास्त्रयोनेः वेदप्रतिपाद्यस्यात्मनस्तव सद्धाम प्रशस्तं स्थानं यतः सम्भावयति यत्तस्माद्भवान् ब्रह्मण्यगुणः ब्राह्मणप्रियत्वगुणलक्षणशिखामणिः ।१९। न केवलं जन्मन एव साफल्यमासीत् किन्तु विद्यादेरपीति तत्र निमित्तं त्वया सङ्गम्येति त्वं नः त्वत्सङ्गत्या श्रेयसां सकाशात्परः पुरुषार्थ इति यत् ॥२१–२२॥ एकस्त्वमेवारामः क्रीडावनं येषां ते तथा ॥२३॥ अघौघं मर्षयति नाशयतीत्यघौघमर्षं तादृशस्य तीर्थस्य गङ्गाशब्दवाच्यस्यास्पदं स्थिराश्रयं सुष्ठु विपक्वाः परिपाकं प्राप्ताः योगाध्यानलक्षणाः तैः उत्सिक्तया उद्रिक्तया भक्त्या उपहृतः सम्यगुन्मूलित आशयः स्थानं यस्य स तथा स जीवकोशः जीवाख्यसन्निधानवस्थानीयं लिङ्गशरीरं येषां ते तदुत्सिक्तभक्त्युन्मूलितस्थानलिङ्गशरीराः भवतो गतिं स्थानं वैकुण्ठलक्षणम् ॥ २४–२५ ॥ उपसङ्गृह्य अनुज्ञामिति शेषः। बभाष इदं "व्यत्ययो बहुलम्" इति सूत्रात् बभाषे इदमिति छान्दसः ॥ २६ ॥ सर्वे देवा येषु सन्निहितास्ते सर्वे देवास्तेभ्यः सर्वत्र देवो देवनं प्रकाशनं येषां ते तथा तेभ्य इति वा निर्हारो मूलच्छेदः ॥ २७ ॥ आत्मनः स्वस्य श्रेयः शिवं न पृच्छतीति यत्तदिदं नातिचित्रं मर्त्यस्वभावादितिशेषः ॥२८॥ कोयं मर्त्यस्वभाव इति तत्राह–सन्निकर्ष इति। तत्र गङ्गातीरे स्थितोन्यः पृथक्जनः बालिशः शुद्धं यद्गाङ्गं गङ्गासम्बन्धिजलं हित्वाऽन्याम्भः तटाकादिस्थं जलं यथा याति तथायं विचार इत्यर्थः ॥२९॥ यस्यानुभूतिः स्वरूपचैतन्यं कालेनास्य जगतो लयोत्पत्त्यादिना तदन्तःपातित्वेन स्वता स्वनिमित्तेनान्यस्मात्सत्त्वादिगुणाच्च कुतश्चनान्यतोऽधर्मतो न रिष्यति न हिंसितं न नष्टं स्यात् "रिष हिंसायाम्" इतिधातुः ॥ ३० ॥ अज्ञः अज्ञानिवद्वसुदेवः स्वविषयैः स्वेन गृह्यमाणैः

प्राणादिभिरिन्द्रियादिभिः प्राकृतैर्गूढं तेन इत्यन्वयः। क्लेशैरविद्यास्मितरागद्वेषाभिनिवेशैः कर्मपरिपाकैः पुण्यापुण्यफलैस्त्याज्यानुभोगैः परितापेतिपाठे अध्यात्मिकाभिधेयैर्विकारैः भौतिकैर्गुणप्रवाहैः सृष्ट्यादिभिरव्याहतोऽनभिभूतोनुभवः अनुभावो माहात्म्यं यस्य स तथा तम् अत्र हेतुगर्भविशेषणद्वयमाह—ईश्वरमद्वितीयमिति उपरागो राहुणा मेघादिभिराच्छन्नप्रकाशरूपं सूर्यमप्रकाशं मन्यते यथा तथेति ॥ ३१ ॥ प्रश्नप्रतिवचनमकृत्वा यत् किञ्चित्कथनं किं केन सङ्गतमिति मन्दाशङ्कां परिहर्तुमाह–अथेति ।३२। साधुभिः विद्वद्भिर्निरूपितः ॥ ३३ ॥ कर्मणा कर्मनिर्वापणं पङ्काम्भसा पङ्कप्रक्षालनमिवानुपपन्नमित्याशङ्क्य ब्रह्मार्पणबुद्ध्यानुष्ठितं सत्समर्थं भवति चिकित्सितद्रव्यमिवेत्याशयेनाह–चित्तस्येति। "कविभिः शमोपनिष्ठता बुद्धेः" इति शास्त्रचक्षुषा यश्चित्तस्योपशमो भगवदेकनिष्ठालक्षणो दर्शितः सुगमो योग उपायश्चिकित्सालक्षणः आत्मनः परमात्मनो मुदावहः सन्तोषजनको धर्मश्चाहिंसालक्षणः कर्मनिर्वापणसाधनम् ॥ ३४ ॥ उक्तं निगमयति–अयमिति। अयं ब्रह्मार्पणबुद्ध्यानुष्ठितः स्वस्तिमङ्गलस्य निष्पापस्य मोक्षस्य वा अयनमाश्रयः द्विजातेस्त्रैवर्णिकस्य गृहमेधिनः गृहस्थस्य आप्तवित्तेन न्यायार्जितधनेन शुक्लेन निर्मलेन ॥ ३५ ॥ इदानीं शुद्धान्तःकरणस्य सन्यासप्रकारं निरूपयति–वित्तैषणामिति। बुधः संसारस्यासारतां विद्वान् यज्ञदानैरनुष्ठितैर्वित्तैषणां वित्तेच्छां विसृजेदिति सर्वत्र योज्यं गृहैर्गृहस्थाश्रमैः सहदारसुतैषणाम् आत्मन इहामुत्र लोके धीरास्त्यागशक्तिमन्तः ग्रामे ग्राम्यविषये त्यक्तैषणा इत्यनेन ब्रह्मचारिणामपि सन्यासम् सूचयति "यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति ॥ ३६ ॥ तत्रातिशयितवैराग्याभावे एवम्विधस्य सन्यासानधिकार इति स्मार्तपक्षमाहुः—ऋणैरिति। त्रिभिर्ऋणैर्युक्तो जातः तानृणविशेषाननिस्तीर्य गृहादित्यजन्धः पतेत् ऋणबीजभर्जनवैराग्याग्न्यभावात् इति शेषः ॥ ३७ ॥ तत्र ऋणनिवारणप्रकारमाह–ब्रह्मचर्येति। अनेन वेदाध्ययनं सूचयति अशरणः गृहरहितः ॥ ३८ ॥ कर्मनिर्हारणप्रश्नस्य प्रतिवचनमुक्त्वा जनसङ्ग्रहणायेदं त्वया पृष्टमस्माभिरिति तदनुसमत्य प्रोक्तं भवतस्तज्जन्मान्तरानुष्ठानशुद्धस्य नेदानीं कर्तव्यमस्तीति ममत्वं ध्वनयन्तः सम्बोधयन्ति–वसुदेवेति। नूनं निश्चयः यद्यस्मात् भेज इत्यनेन लिटा अनद्यतनेन परोक्षवाचिना बहूनि पुरातनानि हरिभक्तिनिमित्तानि जन्मानि सूचितानि "बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते" इतिस्वोक्तेः ॥ ३९ ॥

इति भागवते महापुराणे दशमस्कन्धे विजयध्वजतीर्थटीकायां द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ अधिकपाठे ॥ ८ ॥

त्रिसप्ततितमोऽध्यायः

श्रीशुक उवाच

इति तद्वचनं श्रुत्वा वसुदेवो महामनाः। तानृषीनृत्विजो वव्रे मूर्ध्नानम्योपसृत्य च ॥ १ ॥
त एवमृषयो राजन् वृता धर्मेण धार्मिकम्। तस्मिन्नयाजयन् क्षेत्रे मखैरुत्तमकल्पकैः ॥ २ ॥
तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः। स्नाताः सुवाससो राजन् राजानः सुष्ठ्वलङ्कृताः ॥ ३ ॥
तन्महिष्यश्च मुदिता निष्ककण्ठ्यः सुवाससः। दीक्षाशालामुपाजग्मुरालिप्ता वस्तुपाणयः ॥ ४ ॥
नेदुर्मृदङ्गपटहशङ्खभेर्यानकादयः। ननृतुर्नटनर्तक्यस्तुष्टुवुस्तत्र मागधाः ॥ ५ ॥
जगुः सुकण्ठ्यो गन्धर्वाः सुगीतं सह भर्तृकाः। तमभ्यषिञ्चन्विधिवद्भक्तमव्यग्रमृत्विजः ॥ ६ ॥
पत्नीभिरष्टादशभिः सोमराजमिवोडुभिः।
ताभिर्दुकूलवलयहारनूपुरकुण्डलैः। स्वलङ्कृताभिर्विभवैर्दीक्षितो जनसम्वृतः ॥ ७ ॥
तस्यर्त्विजो महाराज नूत्नकौशेयवाससः। सप्तदशविरेजुस्ते यथा वृत्रहणोऽध्वरे ॥ ८ ॥
तदा रामश्च कृष्णश्च स्वैस्वैर्बन्धुभिरन्वितौ। रेजतुः स्वसुतैर्दारैर्जीवेशौ स्वविभूतिभिः ॥ ९ ॥
ईजेऽनुयज्ञं विधिना अग्निहोत्रादिलक्षणैः। प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरम् ॥ १० ॥
अथर्त्विग्भ्योऽददात्काले यथाम्नातं सुदक्षिणाः। स्वलङ्कृतेभ्योलङ्कृत्य गोभूकन्यामहाधनाः ॥ ११ ॥
पत्नीसंयाजावभृथैश्चरित्वाथ महर्षयः। सस्नूरामह्रदे विप्रा यजमानपुरस्सराः ॥ १२ ॥
स्नातोऽलङ्कारवासांसि वन्दिभ्योऽदात्तथा स्त्रियः। ततः स्वलङ्कृतान् वर्णान्नाश्वभ्योन्नेन पूजयत् ॥ १३ ॥
बन्धून् सदारान् ससुतान् पारिबर्हेण भूयसा। विदर्भकोशलकुरून् काशिकैकेयसृञ्जयान् ॥ १४ ॥
सदस्यर्त्विक्सुरगणानृभूतसूतचारणाः। श्रीनिकेतमनुप्राप्य शंसन्तः प्रययुः क्रतुम् ॥ १५ ॥
धृतराष्ट्रोनुजो द्रोणो भीष्मो द्रौणिः कृपस्तथा। नारदो भगवान् व्यासः सुहृत्सम्बन्धिबान्धवाः। १६ ।
बन्धून् परिष्वज्य यदून् सौहृदक्लिन्नचेतसः। ययुर्विरहकृच्छ्रेण स्वदेशांश्चापरे जनाः ॥ १७ ॥
नन्दस्तु सहगोपालैर्महत्या पूजयार्ऽचितः। कृष्णरामोग्रसेनाद्यैर्न्यवसद्बन्धुवत्सलः ॥ १८ ॥
वसुदेवोऽञ्जसोत्तीर्य मनोरथमहार्णवम्। सुहृद्वृतः प्रीतमना इदमाह करे स्पृशन् ॥ १९ ॥

वसुदेव उवाच

भ्रातरीशकृतः पाशो नृणां यः स्नेहसंज्ञितः। तं दुस्त्यजमहं मन्ये सुराणामपि योगिनाम् ॥ २० ॥
अस्मास्वप्रतिकल्पोयं यत्कृतं ज्ञानसत्तमैः। मैत्र्यर्पिता फलावापि न निवर्तेत कर्हिचित् ॥ २१ ॥
प्रागकल्पास्तु कुशलं भ्रातर्वो नाचरेमहि। अधुना श्रीमदान्धाक्षानपश्याम पुरःसतः ॥ २२ ॥
माराज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद। स्वजनान् भृत्यबन्धून् वा न पश्यति ययान्धदृक् ॥ २३ ॥
एवं सौहृदशैथिल्यचित्त आनकदुन्दुभिः। रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ॥ २४ ॥
नन्दस्तु सख्युः प्रियकृत्प्रेम्णा गोविन्दरामयोः। अद्यश्व इति मासांस्त्रीन्यदुभिर्मानितोऽवसत् ॥ २५ ॥
ततः कामैः पूर्यमाणः सव्रजः सहबान्धवः। परार्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः ॥ २६ ॥
वसुदेवोग्रसेनाभ्यां कृष्णार्जुनबलादिभिः। आदाय पारिबर्हन्तं यापितो यदुभिर्ययौ ॥ २७ ॥
तदा गोप्यश्च गोपाश्च गोविन्दचरणाम्बुजे। मनः क्षिप्तं पुनर्हर्तुमनीशा मथुरां ययुः ॥ २८ ॥
द्रोणो भीष्मोऽङ्गराजश्च बाह्लीकविदुरादयः। सपुत्रो धृतराष्ट्रश्च जग्मुः स्वंस्वं निकेतनम् ॥ २९ ॥
अन्ये च सर्वराजानो देवयात्रार्थमागताः। गते मासत्रये भूयः स्वानेव विषयान् ययौ ॥ ३० ॥
पाण्डवाश्च महात्मानः पृथा च नृपसत्तम। अनुज्ञाताः केशवेन बाष्पगद्गदभाषिणः ॥ ३१ ॥
शक्रप्रस्थं ययुः सर्वे स्वजनैः परिवारिताः। बन्धुषु प्रतियातेषु वृष्णयः कृष्णदेवताः ॥ ३२ ॥
परिवार्य हृषीकेशं ययुर्द्वारवतीं पुरीम् ॥ ३३ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

धर्मेण काल्पोक्तेन विधिना उत्तमकल्पकैः राजसूयसमैः ईषदसमाप्तौ कल्पब्देश्यदेशीयर इतिसूत्रात् ॥ १–२ ॥ दीक्षा स्याद्व्रतसङ्ग्रह इति पुष्करस्रजः कमलबीजमालाऽवलम्बिकण्ठाः ॥ ३ ॥ आलिप्ताश्चन्दनेनेतिशेषः। हिरण्यादिवस्तुपाणयः—

"हिरण्यं रजतं वापि गृहीत्वा क्रमुकंफलम्। शालां विशेद्यज्ञपत्नी शपेयुस्त्वन्यथा सुराः" ॥

इतिवचनात् ॥ ४–५ ॥ अव्यग्रमव्याकुलम् ॥६–७॥ होता पोता नेष्टा प्रशास्ता अध्वर्युराग्नीध्रो मैत्रावरुण इत्येवमादयो ऋत्विजः षोडश दीक्षितस्त्वैक इति सप्तदश सदस्येन वा सह वृत्रहणः इन्द्रस्य यज्ञे ॥ ८ ॥ जीवानामीशौ स्वरूपभूताभिर्विभूतिभिः मूर्तिमतीभिः—

"अणिमा महिमा गरिमा लघिमा प्राप्तिरेव च। ईशित्वं च वशित्वञ्च तथा प्राकाम्यमेवच" ॥

इतिसमाख्याताभिः नानाविधचेतनराशिसमुदायेन तत्तद्योग्यतानुसारेण सभाजनसमयेऽपेक्षिताभिः ॥ ९ ॥ द्रव्यज्ञानोपपदयोः क्रिययोर्यज्ञलक्षणयोः ईश्वरं द्रव्ययज्ञदानयज्ञयोः स्वामिनमित्यर्थः। कथमीज इति तत्राह—अनुयज्ञेति ॥ अनुशब्दो वीप्सावचनः, तन्तं यज्ञं प्रति विधिना कल्पोक्तप्रकारेण अग्निहोत्रादिलक्षणैः अग्निहोत्रेष्ट्यादिचिह्नैः प्राकृतैर्यज्ञैः सप्तक्रतुभिः वैकृतैर्यज्ञैः सौत्रामण्यादिभिरुत्तरक्रतुभिः ॥ १० ॥ यथाम्नातं यथाकथितं महान्ति धनानि यासां तास्तथा ॥ ११ ॥ पत्नीसंयाजः पत्नीभिः क्रियमाणः काश्चन देवता उद्दिश्य यजनम् अवभृथः समाप्तिः कर्मस्थानम् उभयत्रेष्टिविशेषाश्च भवन्ति तैश्चरित्वा तांश्च कृत्वेत्यर्थः ॥ १२ ॥ पूजयदपूजयत् स्त्रियः स्त्रीभ्यः ॥ १३ ॥ पारिबर्हेण पूजाद्रव्येण विदर्भादींश्चापूजयदितिशेषः ॥ १४ ॥ सदस्यर्त्विगादयः प्रययुरित्यन्वयः ॥ १५ ॥ अनुजो विदुरः ॥ १६–२० ॥ युष्माभिर्ज्ञानेन सत्तमैरस्मासु यत्कृतं सोयं स्नेहपाशोऽप्रतिकल्पः असदृशः याचास्माभिर्युष्मास्वर्पिता मैत्री अफला वापि मिष्फलात्रापि कर्हिचिदपि न निवर्तेत निवृत्यास्मत्त इति शेषः ॥ २१॥ एतदेव विवृणोति–प्रागिति। हे प्रातः! प्राग्वः कुशलं नाचरेमहि, कुतः? अकल्पा असमर्थाः कंसेनोपद्रुतत्वात् अथुना श्रीमदान्धाक्षाः वयं पुरस्तः परः स्थितान्नपश्याम इति यदत इति शेषः ॥ २२ ॥ यया राजश्रिया ॥ २३ ॥ सौहृदेन स्नेहेन शौथिल्यं शिथिलस्वभावं प्राप्तं चित्तं यस्य स तथा ॥ २४–३३ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ अधिकपाठे ॥ ६ ॥

चतुस्सप्ततितमोऽध्यायः

श्रीशुक उवाच

अथैकदात्मजौ प्राप्तौ कृतपादाभिवन्दनौ। वसुदेवोभिनन्द्याह प्रीत्या सङ्कर्षणाच्युतौ ॥ १ ॥
मुनीनां वदतां श्रुत्वा पुत्रयोर्धामसूचकम्। तद्वीर्यजातविश्रम्भः परिष्वज्याभ्यभाषत ॥ २ ॥

कृष्णकृष्ण महायोगिन् सङ्कर्षण सनातन । जाने वामस्य यत्साक्षात्प्रधानपुरुषौ पुरौ ॥ ३ ॥
यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा । स्यादिदं भगवान् साक्षात् प्रधानपुरषेश्वरः ॥ ४ ॥
एतन्नानाविधं विश्वमात्मसृष्टमाधोक्षज । आत्मनानुप्रविश्यात्मन् प्राणान् जीवो बिभर्ष्यज: ॥ ५ ॥
प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः । पारतन्त्र्याद्वैसादृश्याद्द्वयो श्चेष्टे च चेष्टितम् ॥ ६ ॥
कान्तिस्तेजः प्रभा सत्ता चन्द्राग्न्यर्कसविद्युताम् । यत्स्थैर्यं भूभृतां भूमेर्वृत्तिर्गन्धोऽर्थतो भवान् ॥ ७ ॥
तर्पणं प्राणनं चापां द्रवत्वं ताश्च तद्रसः । ओज:सहोबलञ्चेष्टा गतिर्वायोस्तवेश्वर ॥ ८ ॥
दिशां त्वमवकाशोसि शब्दस्त्वं स्फोट आश्रयः । नादोवर्णस्त्वमोङ्कार आकृतीनां पृथक्कृती: ॥ ९ ॥
इन्द्रियन्त्विन्द्रियाणान्त्वं देवाश्च तदनुग्रहाः । अवबोधो भवान् बुद्धेर्ज्जीवस्यानुस्मृतिःसती ॥ १० ॥
भूतानामसि भूतादिरिन्द्रियाणाञ्च तैजसः । वैकारिकं विकल्पानां प्रधानमनुशायिनाम् ॥ ११ ॥
नश्वरेष्विह भावेषु तदसित्वमनश्वरः । यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितम् ॥ १२ ॥
सत्त्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः । त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया ॥ १३ ॥
तस्मान्न सन्त्यमी भावा यर्हि त्वय्यविकल्पिताः । त्वञ्चामीषु विकारेषु सन् सदा व्यावहारिकः ॥ १४ ॥
गुणप्रवाह एतस्मिन्नबुद्धा त्वखिलात्मनः । गतिं सूक्ष्मामबोधेन संसरन्तीह कर्मभिः ॥ १५ ॥
यदृच्छया नृतां प्राप्य सुकल्पमिह दुर्ल्लभम् । स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वर ॥ १६ ॥
असावहं ममैवैते देहे वा स्यान्वयादिषु । स्नेहपाशैर्निबध्नाति भवान् सर्वमिदं जगत् ॥ १७ ॥
युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ । भूभारदैत्यक्षपणे अवतीर्णौ तथात्विह ॥ १८ ॥

तत्ते गतोस्म्यरणमद्य पदारविन्दमापन्नसंसृतिभयापहमार्तबन्धो ।
एतावतालमलमिन्द्रियलालसेन मर्त्यात्मदृक्त्वयि परे यदपत्यबुद्धिः ॥ १९ ॥

सूतीगृहे ननु जगाद भवानजो नौयद्यज्ञ इत्यनुयुगं निजधर्मगुप्त्यै ।
नानातनूर्गगनवद्विदधज्जहासि को वेद भूम्न उरुगाय विभूतिमायाम् ॥ २० ॥

श्रीशुक उवाच

आकर्ण्येत्थं पितुर्वाक्यं भगवान् सात्वतर्षभः । प्रत्याह प्रश्रया नम्रः प्रहसन् श्लक्ष्णया गिरा ॥ २१ ॥
वचो वः समवेतार्थं तातैतदुपमन्महे । यन्नः पुत्रान् समुद्दिश्य तत्त्वग्राम उदाहृतः ॥ २२ ॥
अहं यूयमसावार्य इमे च द्वारकौकसः । सर्वेप्येव यदुश्रेष्ठ विश्वं च सचराचरम् ॥ २३ ॥
आत्मा ह्येकः स्वयञ्ज्योतिर्नित्योन्यो निर्गुणो गुणैः । आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते ॥ २४ ॥
खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथाशयम् । आविस्तारोल्पभूर्येकनानात्वं यात्यसावपि ॥ २५ ॥
एवं भगवता राजन् वसुदेव उदाहृतम् । श्रुत्वा विनष्टनामाधिस्तूष्णीं प्रीतमना अभूत् ॥ २६ ॥
अथ तत्र कुरुश्रेष्ठ देवकी सर्वदेवता । श्रुत्वाऽऽनीतं गुरोः पुत्रमात्मजाभ्यां शुचिस्मिता ॥ २७ ॥
कृष्णरामौ समाश्राव्य पुत्रान्कंसविहिंसितान् । स्मरन्ती कृपणा प्राह वैक्लव्यादश्रुलोचना ॥ २८ ॥

देवक्युवाच

राम रामाप्रमेयात्मन् कृष्ण योगेश्वरेश्वर । वेदाहं वां विश्वसृजामीश्वरावादिपूरुषौ ॥ २९ ॥
कालविध्वस्तसेतूनां राज्ञामुच्छास्त्रवर्त्तिनाम् । भूमेर्भारायमाणानामवतीर्णौ क्षयाय मे ॥ ३० ॥
यस्यांशांशांशभागेन विश्वस्थित्युदयौ लयः । भवन्ति किल विश्वात्मंस्तं त्वाद्याहं गतिं गता ॥ ३१ ॥
चिरान्मृतसुतादाने गुरुणा किल चोदितौ । आनिन्यथुः पितृस्थानाद्गुरवे गुरुदक्षिणाम् ॥ ३२ ॥
तथा मे कुरुतां कामं युवां योगेश्वरेश्वरौ । भोजराजहतान् पुत्रान् कामये द्रष्टुमाहृतान् ॥ ३३ ॥

श्रीशुक उवाच

एवं सञ्चोदितौ मात्रा रामकृष्णौ कुरूद्वह । सुतलं सम्विविशतुर्योगमायामुपाश्रितौ ॥ ३४ ॥

तस्मिन् प्रविष्टावुपलभ्य दैत्यराड् विश्वात्मदैवं सुतरां तथात्मनः ।
तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः ॥ ३५ ॥
तयोः समानीय वरासनं मुदा निविष्टयोस्तत्र महात्मनोस्तयोः ।
दधार पादाववनिज्य तज्जलं सवृन्द आब्रह्मपुनद्यदम्बुभिः ॥ ३६ ॥

समर्हयामास महाविभूतिभिर्महार्हवस्त्राभरणानुलेपनैः ।
स्रग्धूपदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन च ॥ ३७ ॥
स इन्द्रसेनो भगवत्पदाम्बुजं भ्रमन्मुहुः प्रेमविभिन्नया धिया ।
बभाष हानन्दजलाकुलेक्षणः प्रहृष्टरोमा नृप गद्गदाक्षरम् ॥ ३८ ॥

बलिरुवाच

नमोऽनन्ताय महते नमः कृष्णाय वेधसे । साङ्ख्ययोगवितानाय ब्रह्मणे परमात्मने ॥ ३९ ॥
दर्शनं वां हि भूतानां दुष्प्रापमतिदुर्लभम् । रजस्तमःस्वभावानां यन्नः प्राप्तं यदृच्छया ॥ ४० ॥
दैत्यदानवगन्धर्वसिद्धविद्याधरादयः । यक्षरक्षः पिशाचाश्च भूतप्रमथनायकाः ॥ ४१ ॥
विशुद्धसत्त्वधाम्न्यद्धा त्वयि शास्त्रशरीरिणि । नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः ॥ ४२ ॥
केचनोद्बद्धवैरेण भक्त्या केचन कामतः । न तथा सत्त्वसंरब्धाः सन्निकृष्टाः सुरादयः ॥ ४३ ॥
इदमित्थमिति प्रायस्तव योगेश्वरेश्वर । नविदन्त्यपि योगेशा योगमायां कुतो वयम् ॥ ४४ ॥
तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्पादारविन्दधिषणः स्वगृहान्धकूपात् ।
निष्क्रम्य विश्वशरणङ्घ्र्युपलब्धवृत्तिः शान्तो यथैक उत सत्त्वसखैश्चरामि ॥ ४५ ॥
शाध्यस्मानीशितव्यशे निष्कामान् कुरु नः प्रभो । पुमान्यच्छ्रद्धया तिष्ठंश्चोदनायाविमुच्यते ॥ ४६ ॥

श्रीभगवानुवाच

आसन् मरीचेः षट् पुत्रा ऊर्णायां प्रथमेन्तरे । देवलं जहसुर्वीक्ष्य सुतांच्छपितुमुद्यतम् ॥ ४७ ॥
तेनासुरीमगुर्योनिममुनावद्यकर्मणा । हिरण्यकशिपोः शापात्पुत्रास्ते योगमायया ॥ ४८ ॥
देवक्या जठरे जाता राजन् कंसविहिंसिताः । सा तान् शोचत्यात्मजान् स्वांस्त इमे ध्यासतेन्तिके ॥ ४९ ॥
इत एतान् प्रणेष्यामो मातृशोकापनुत्तये । ततः शापविनिर्मुक्ता लोकं यास्यन्ति विज्वराः ॥ ५० ॥
स्मरोद्गीथः परिष्वङ्गः पतङ्गः क्षुद्रभृत् घृणी । षडिमे मत्प्रसादेन पुनर्यास्यन्ति मद्गतिम् ॥ ५१ ॥
इत्युक्त्वा तान्समादाय इन्द्रसेनेन पूजितौ । पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छताम् ॥ ५२ ॥
तान् दृष्ट्वा बालकान् देवी पुत्रस्नेहस्नुतस्तनी । परिष्वज्याङ्कमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ॥ ५३ ॥
अपाययत्स्तनं प्रीता सुतस्पर्शपरिस्नुतम् । मोहिता मायया विष्णोर्यथासृष्टिः प्रवर्त्तते ॥ ५४ ॥
पीत्वाऽमृतं पयस्तस्याः पीतशेषं गदाभृतः । नारायणाङ्गसंस्पर्शप्रतिलब्धात्मदर्शनाः ॥ ५५ ॥
ते नमस्कृत्य गोविन्दं देवकीं पितरं बलम् । मिषतां सर्वभूतानां ययुर्धाम विहायसः ॥ ५६ ॥
तान् दृष्ट्वा देवकीदेवी मृतागमननिर्गमम् । मेने सुविस्मिता मायां कृष्णसंसूचितां नृप ॥ ५७ ॥
एवम्विधान्यद्भुतानि कृष्णस्य परमात्मनः । वीर्याण्यनन्तवीर्यस्य सन्त्यनन्तानि भारत ॥ ५८ ॥

सूत उवाच

य इदमनुश्रृणोति श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ।
जगदघभिदलन्तद्भक्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ॥ ५९ ॥

इति श्रीभागवते दशमस्कन्धे चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सुखं गुणोपसंहारार्थं सम्यक्तत्त्वविज्ञाने हरौ भक्तिविधानं सुशकमिति पुनरपि हरेर्माहात्म्यं निगद्यतेऽस्मिन्नध्याये तदर्थं वसुदेवः कृष्णरामौ सम्बोध्य वक्ति अथेति ॥ १ ॥ पुत्रयोः कृष्णरामयोः धाम्नस्तेजसः माहात्म्यलक्षणस्य सूचकं वदतां मुनीनां वचः श्रुत्वा तयोर्वीर्ये माहात्म्ये जातविश्रंभः पुनरङ्कुरितविश्वासः ॥ २ ॥ अहं वां प्रधानपुरुषौ जाने वां यथाऽस्य विश्वस्य सकाशात् परौ विलक्षणत्वेनोत्तमौ भवतस्तथेति यद्वाऽस्य जगतस्तत्त्वं जाने ॥ ३ ॥ तत्कथमिति तत्राह—यत्रेति । यत्र यस्मिंस्तिष्ठति "यस्मिन्निदम्" इति श्रुतिः "यतो वा इमानि भूतानि" इति "यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनः मृत्युर्यस्योपसेचनम्" इति काठकाः । यस्मा इदं क्रियत इति "सच्च त्यच्चाभवत्" इति यथास्थितं यदा काले इदं स्यात् तथा तदाऽस्मात् "ब्रह्मैवेदं विश्वम्" इति श्रुतिः । इदं जगत्साक्षात् स्पष्टं निर्विचारं प्रधानपुरुषेश्वरशब्दवाच्यो भगवानेव स्यात्तस्मात्सत्ताया अपि तदधीनत्वात् यद्वा यत्र यस्मिन्नधिष्ठाने येन साधनेन यतो मृदः यस्य सम्बन्धेन यस्मै देवदत्ताय यद्वस्तु यथाप्रकारेण यदा यस्मिन् काले ॥ ४ ॥ तदिदं कथितमेव स्पष्टत्वाय कथयति—एतदिति । आत्मना त्वया सृष्टम् आत्मना अनुपहृतस्वरूपेण आत्मन्नात्मनि प्राणानिन्द्रि-

याणि जीवो जीवनप्रदः ॥ ५ ॥ प्राणादीनां मुख्यप्राणादीनां याः शक्तयस्ताः परस्य हरेर्विद्यमानाः तत्र हेतुः पारतन्त्र्येति । वैसादृश्याद्वैलक्षण्यात् तदुपपादयति द्वयोरिति द्वयोर्जीवेशयोः श्रेष्ठे अतिशयेनोत्तमे हरौ चेष्टितं यस्मात्तस्मात् इत्यर्थः । यथा वायोः शक्त्या तृणपर्णादीनां चालनं यथा वा पुरुषस्य शक्त्या शरादीनां वेगवती गतिस्तथा प्रकृते इति भावः ॥ ६ ॥ पदार्थगुणानां तदधीनत्वमाह—कान्तिरित्यादिना । चन्द्राग्न्यर्काणां सविद्युतां खद्योतादीनां मध्ये चन्द्रस्य या कान्तिः अग्नेर्यत्तेजः सूर्यस्य या प्रभा विद्युदादीनां या सत्ता भूभृतां यत्स्थैर्यं भूमेर्या वृत्तिः सस्यादीनां जीवनत्वं यो गन्धो गुणस्तत्सर्वमर्थतोऽभिधेयत्वं यद्भवान्नान्यः ॥ ७ ॥ किञ्च अपां यत्तर्पणं तृप्तिः प्राणनं चेष्टा द्रवत्वं स्यन्दनं ता आपश्च तासां रसो गुणश्च वायोः ये ओजआदयः ते सर्वे तवाधीनप्रवृत्तिनिमित्ताः ओजोवष्टम्भः सहोमर्षणं बलं शक्तिः चेष्टा स्पन्दनं गतिः समर्पणम् ॥ ८ ॥ यो दिशामवकाशः "सत्त्वं यश्च स्फोटो व्योमनि आश्रयः सत्वं निर्दोषः शब्द आगमः" इति वचनात् वर्णक्रमलक्षणोर्थव्यञ्जकशब्दस्त्वं किञ्च स्फोटो वेणुदारणादौ जन्यो ध्वनिराश्रयः शङ्खादिजन्यस्त्वमित्यर्थः "अवरस्वरातिगर्गरः" इति श्रुतेः आकृतीनां ब्रह्मादिप्राणिनां देवानां याः पृथक्कृतीः पृथक्क्रियाः अनिमेषादिलक्षणास्ताश्च त्वदधीनाः ॥ ९ ॥ इन्द्रियाणामिन्द्रियमिदं द्रवणं तदनुग्राहका देवाः सूर्यादयश्च त्वं बुद्धेरवबोधो ज्ञानजननशक्तिः जीवस्य सत्यनुस्मृतिः स्मरणशक्तिश्च भवान् ॥ १० ॥ पञ्चभूतानां कारणं भूतादिस्तामसाहङ्कारः चक्षुरादीन्द्रियाणां कारणं तैजसाहङ्कारः विकल्पानां जरादिशून्यत्वेन परमात्मव्यपदेशानां विविधाः कल्पाः न्यायाः येषां तेषां वा देवानां कारणं वैकारिकाहङ्कारः सङ्कल्पविकल्पानां मनोवृत्तीनां वा अनुशायिनां जीवानां कारणं प्रधानं प्रकृतिस्त्वं महदादीनां वा ॥ ११ ॥ सर्वभावानामादिस्त्वमिति निरूप्याधुनान्तकालावस्थायित्वं च तवेति समर्थयते नश्वरेष्विति । इह नश्वरेषु नाशशीलेषु भावेषु पदार्थेषु योऽनश्वरः अविनाशीभावस्तद्द्रव्यं त्वमसि सूक्ष्मार्थत्वान्निदर्शनेनावगमयति तथाहि, द्रव्यं प्रधानं तद्विकारेषु पृथिव्यादिषु पदार्थेषु प्रलये नश्वरेषु द्रव्यमात्रं केवलं स्वरूपभूतं प्रधानमेव निरूपितं तत्त्वज्ञैरिति शेषः यद्वा द्रव्यं परमाणु तत्संयुक्तेषु धटादिपदार्थेषु नश्वरं द्रव्यमात्रं परमाणुमात्रं निरूपितं परमाणुत्ववेदिभिरिति शेषः ॥१२॥ नन्वेवं तर्हि प्रधानादेर्नित्यत्वेन परमात्मनियतत्वमायातमिति तत्राह—सत्त्वमिति । इति शब्दो हेत्वर्थः। जगदुत्पत्त्यादिहेतवः सत्वादयो गुणा ये याश्च तेषां गुणानां वृत्तयो व्यापाराः ते ताश्च परे ब्रह्मणि तद्व्याप्ते च देशे व्याप्ते त्वयि श्रद्धा अनिर्वचनीयत्वेन कल्पिताः समर्थिताः । "एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च" इत्यादिवेदान्तवाक्यैः सत्त्वादिगुणानां प्रधानस्वरूपत्वेन तेषां तदाधारत्वकथने प्रधानस्य तदाश्रयत्वं किमु वक्तव्यमिति । परमाणुपक्षे शुक्लवर्णेन सत्त्वेनाव्याः रजसा पार्थिवाः सतमसा आवरकेण वायवीयाः परमाणवो लक्ष्यन्ते इति शब्देनादित्ववाचिना तैजसा लक्षिता इति चतुर्विधा गुणास्तन्तुस्थानीया परमाणवो यास्तद्वृत्तयः संयोगलक्षणस्त्वयि कल्पिताः त्वत्प्रेरितत्वेन कार्यकरणक्षमत्वेन समर्थिता इत्यर्थः । किमनेन नित्यमेनेत्यत उक्तं योगमाययेति योगमायया स्वसमवेतेच्छया ॥ १३ ॥

व्यतिरेकं दर्शयति—तस्मादिति । यर्हि यदाऽमी भावास्त्वय्यविकल्पिता त्वदाधारत्वेन निरूपिताः तदा तस्मादनाधारतया न सन्ति स्वरूपत एव नश्यन्ति तस्मात्तत्सत्तापि त्वदधीनेत्यर्थः । एतदेव विशदयति—त्वञ्चेति । अमीषु विकारेषु विविधप्रकारेषु पदार्थेषु त्वञ्च त्वमेव सन् सद्भावं कुर्वन् सदा व्यावहारिकः हानादिव्यवहारनिर्वाहकः नान्य इत्यर्थः ॥ १४ ॥ नन्वेवं तर्हि कस्मादेतस्य संसार इति; तत्राह—गुणेति । एतस्मिन् गुणप्रवाहे संसारे अखिलात्मनः अखण्डस्वामिनः तव सूक्ष्मामतीन्द्रियां गतिं स्थितिं सर्वव्यापी सर्वनियामक इत्यादि लक्षणामबुद्ध्वाऽज्ञात्वा तेनाबोधेनाज्ञानेन इह कर्मभिः संसरन्तीत्यन्वयः । तत्वाज्ञानात्संसार इतिभावः ॥ १५ ॥ ननु, भवतु मनुष्यत्वलाभात् ज्ञानं सुलभं तस्मान्मोक्षोपि स्यादित्याशङ्क्य सर्वं च त्वत्प्रसादमन्तरेण दुर्लभमित्याह—यदृच्छयेति । यदृच्छया भगवदिच्छया तत्रोद्बुद्धयारब्धपुण्यकर्मणा नृतां मनुष्यत्वं प्राप्य इह मनुष्यशरीरे त्वन्मायया स्वार्थे प्रमत्तस्य मम वयो गतं वृथेतिशेषः । अतः सुकल्पं क्लृप्तं फलप्रदं ज्ञानं दुर्लभमभूदितिशेषः नितरां ममत्वं त्वन्मायया ॥ १६ ॥ स्वार्थे प्रमादः कीदृश इति तत्राह—असाविति । असौ देहोहमस्य देहस्यान्वयादिषु इन्द्रियकलत्रादिषु ममैवैते सन्त इति सुदृढैर्ममत्वेन बध्नाति न केवलं मामेव किन्तु सर्वमिति भावेनोक्तं सर्वमिति ॥ १७ ॥ त्वदनुग्रहान्मम किञ्चित् ज्ञानमुत्पन्नमिति भावेनाह—युवामिति । प्रधानपुरुषेश्वरौ प्रकृतिजीवेश्वरौ ॥ १८ ॥ अतः किं तत्राह–तत्त इति । इन्द्रियलालसेन इन्द्रियाणां शब्दविषयभोगेच्छया मर्त्ये मृत्युशिरस्के देहे आत्मदृक् अहमिति दर्शनं यत्परे परमात्मनि त्वयि अपत्यबुद्धिः पुत्रत्वज्ञानम् ॥ १९ ॥ सूतीगृह इति । अजः शुक्रशोणितसम्पर्कजन्यशरीररहितः भवान् सूतीगृहे अरिष्टे अहं यज्ञोविष्णुरिति नौ जगाद नन्विति यत्तस्मादनुयुगं निजक्लृप्तधर्मरक्षायै नानातनूः सुरनरादिनानाविधशरीराणि विदधत् कुर्वन् त्वं पुनः रक्षावसाने तास्तनूः जहासि तिरोदधासि कथं दधातीत्यत उक्तं गगनवदिति, यथा युगं युग्मं कार्यकारणद्वयात्मकपदार्थजातमनु अणुबृहदनुकूलत्वेन नानाभवति पुनस्तद्गगनं तत्पदार्थजातस्य कारणावशेषे स्वयमेवैकमेव भवति तथेत्यर्थः । हे उरुगाय ! भूम्नः पूर्णानन्दस्य तव विभूतीनां मायां माहात्म्यं को वेद ? वेद चेत् ब्रह्मैव वेत्ति वायुर्वा नान्यः अनेन गगनादस्य विशेषो दर्शितः ॥ २० ॥ ब्रह्माद्यन्यतममन्तरेण प्रत्यक्षं भगवता सल्लापः कस्य सुलभोऽतो वसुदेवस्य भाग्यमतिविचित्रमिति भावेन कृष्णस्य प्रतिवचनप्रकारं कथयति—आकर्ण्येत्यादिना ॥ २१ ॥ समवेतार्थं श्रुतिस्मृत्युपपन्नार्थं प्रसिद्धार्थं वा ॥ २२ ॥ युष्मदादिविश्वमहमेव मदधीनमेव

नान्याधीनं "सर्वं खल्विदं ब्रह्म" इतिश्रुतिसिद्धम् ॥ २३ ॥ मत्समो नास्तीत्याह—एक इति। केवलः द्वितीयवर्जितः त्वं वा क इत्यत उक्तम् आत्मेति आत्मशब्देन किं देह उच्यते इत्यतः स्वयञ्ज्योतिर्नित्य इति अनेन विशेषणद्वयेन जीवोपि व्यावृत्तः तस्य नित्यानभिभूतस्वयञ्ज्योतिष्ट्वाभावाद्धरेस्तद्भावात्। "ब्रह्मवेदाहं ब्रह्मास्मि" इति श्रुतेः। बलमानन्द ओजश्चेति वा अहमेवेत्युक्त्याऽभेदः किं नस्यादित्यत उक्तम् अन्य इति अहमस्मादन्योन्यविलक्षणः कुतः निर्गुणः सत्त्वादिगुणनिमित्तवैपरीत्याभावात् अन्यस्य तद्भावात् "कार्यतेह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः" इत्यादेः। ननु तर्ह्यप्राप्तनिषेधः कस्मादिति तत्राह—इन्द्रियपूर्णेषु भूतेषु प्राणिदेहेषु बहुधेयते यथारुचिज्ञायते जनेनेतिशेषः। यथात्मनिमित्तैर्गुणैः पञ्चभूतैः तैर्विरचितेषु शेषं समम् ॥ २४ ॥ एतदेव दृढयति—खंवायुरिति। खादीनि तत्कृतेषु वस्तुषु यथाशयं यथास्थानं स्थितानि भवन्ति तथा असौ हरिरपि अल्पेष्वल्पत्वेन भूरिषु महत्त्वेनाविस्तारः प्रकाशिताविस्तारः एकनानात्वम् एकस्यानेकसङ्ख्याविषयत्वं यातीत्यन्वयः। अत्रायं भावः। स्वसृष्टतत्तद्वस्तुनियमार्थं तत्तद्वस्तुपरिमाणभूतं गृह्णातीति तात्त्विकाः ॥ २५ ॥ विनष्टं नाम कुत्सितमाधिर्यस्य स विनष्टनामाधिः "नाम कुत्सनसम्भाव्य प्रकाशेषु निगद्यते" इति ॥ २६ ॥ अथ मङ्गलाचरितमारभ्यते सर्वा देवता यस्यां सन्निहिताः स तथा ॥ २७ ॥ समाश्राव्य सम्बोध्य ॥ २८–२९ ॥ मे मत्तः सकाशात् कालेन विध्वस्तधर्मसेतूनाम् ॥ ३० ॥ भागो भजनं स्वीकारस्तेन गतिं शरणं गतास्मि ॥ ३१ ॥ पितृस्थानाद्यमलोकात् ॥ ३२–३४ ॥ तथात्मनः स्वस्य सुतरामिष्टदैवम् ॥३५॥ तज्जलं पादावनिर्णिक्तजलं यस्य पादजलैराब्रह्म चतुर्मुखपर्यन्तं जगत्पुनत्पुनाति शुध्यति छान्दसोयं प्रयोगः आदित्यः सुपथाऽकरदित्यादिष्विव ॥ ३६ ॥ अमृतभक्षणं रसायनभोजनम्—

"अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने।
अयाजिते जले जग्धौ मोक्षणे हेम्नि गोरसे। क्लीबे नात्वमरे स्त्रीतु गुडूच्यां मद्यभिक्षयोः ॥"

इतियादवप्रकाशः इन्द्रसेनो बलिः "गोत्रं नाम्नि कुलेऽचले" इति "आत्मा देहे भृतौ जीवे धैर्ये" इति वा प्रेमविभिन्नया स्नेहप्रवृद्धया धिया भगवत्पदाम्बुजं भ्रमत् शरणं गच्छन् प्रदक्षिणं कुर्वन् वा हाशुभमितिस्मरन् "हाविषादशुभार्तिषु" इति बभाषेतिसम्भ्रमाद्व्यत्ययः बभारेति पाठे पादाम्बुजंभबार गद्गदाक्षरं वचो जगादेतियोज्यम् ॥ ३७–३८ ॥ वेधसे अश्रमेण कर्त्रे साङ्ख्ययोगयोर्ज्ञानकर्मणोर्वितानो विस्तारः येन स तथा तस्मै साङ्ख्ययोगशास्त्रकाराय वा दृष्टकपिलादिभ्यो व्यावर्तनायाह—ब्रह्मण इति। नन्वमुना व्यावृत्तिः कथमत्राह परमात्मन इति ॥ ३९ ॥ अव्यक्तस्वभावयोर्युवयोर्दर्शनमनुग्रहसाध्यं नतु प्रयत्नसाध्यमिति भावेनाह–दर्शनमिति। वां दर्शनं भूतानां दुष्प्रापं हि यस्मात्तस्माद्रजस्तमस्स्वभावानां नातिदुर्लभं यद्युष्मद्दर्शनं प्राप्तं तद्यदृच्छया देवयोर्युवयोरनुग्रहोन्मुखीभूतयेच्छयेति मन्य इति शेषः ॥ ४० ॥ रजस्तमः स्वभावफलं प्रकटयन् तामसत्वं नाम चूडारत्नं निर्मलीकर्तुं दर्शनं कृतमित्याशयेनाह–दैत्येति। ये दैत्यदानवास्ते वयञ्च शास्त्रं वेदादिग्रन्थ एव शरीरं प्रतिमालक्षणमस्यास्तीति शास्त्रशरीरी तस्मिन् "शास्त्रं ग्रन्थनिदेशयोः" इति विशुद्धसत्त्वधाम्नि केवलज्ञाननिधाने त्वयि नित्यं निबद्धवैराः अन्ये राक्षसाश्च तादृशा निबद्धवैरा इत्यतो न कोप्यस्मद्गुणो युष्मद्दर्शन इति शेषः ॥ ४२ ॥ ननु, नित्यानुसन्धानलक्षणान्तःकरणगुणेनाविर्भूतज्ञानगुणोस्तीति माशाङ्कियतः सुरादीनामपि नास्ति कुतोस्माकमिति भावेनाह–केचनेति। केचन चैद्यादयः उद्बद्धवैरेण क्वचिदुद्गतवैरेण भक्ताः केचन गोपीजनाः कामतो भक्ताः सन्निकृष्टाः सहवर्तमानाः सत्त्वसंरब्धा उद्रिक्तसत्त्वगुणाः प्राणात्ययेप्यनुज्झितयुष्मद्भक्तिनिश्चयाः सुरगन्धर्वादयस्तथाऽनादिद्वेषसंरम्भादिना भक्ता न भवन्ति किन्तु निश्चलभक्तिसिन्धवः ॥ ४३ ॥ अपि तथापि ते योगेशाः ज्ञानोपायश्रेष्ठाः प्रायो बहुलं तव योगमायां जगत्सृष्ट्याद्यनुसंहितस्वरूपमाहात्म्यं न विदन्ति कथं इदमित्थमेवम्भूतमिति न जानन्ति वयं कुतो हेतोर्बुध्यामह इति ॥ ४४ ॥ अधुना स्वाशयम्विज्ञापयति–तन्नइति। यतो युष्मद्भक्तिज्ञानाभ्यामनुग्रह एवं प्रार्थनीयस्तत्तस्मान्नस्तथा प्रसीद कथं यथा एक उत्तमपुत्रादिस्नेहलक्षणसङ्गरहित एव सत्यं श्रीनारायण एव सखा येषां ते तथा तैर्युष्मद्भक्तैः सह चरामि वर्तमानो भवामि किङ्कृत्वा गृहान्धकूपान्निष्क्रम्य निर्गतो भूत्वा कीदृशोहं शान्तः युष्मन्निष्ठायुक्तः कथमत्राह निरपेक्षैः सन्यासिभिः विमृश्ययोरन्वेषणीययोर्युष्मत्पदारविन्दयोः धिषणा धीर्यस्य स धिषणा धिष्ण्यं गृहं वा अस्तु निवासस्थानं किञ्जीवनमत्राह–विश्वेति। विश्वस्य पक्षपातित्वेन शरणयोरक्षित्रोरङ्घ्र्योः सेवयोपलब्धा प्राप्ता वृत्तिर्जीविका यस्य स तथा ॥ ४५ ॥ सत्सेवनमपि युष्मच्छिक्षयैव भाव्यमिति भावेनाह–शाधीति। यस्मिंश्छासने श्रद्धया तिष्ठन् स्थिरः सन् चोदनाया विधिनिषेधलक्षणायाः संसृतेर्विमुच्यते ॥ ४६ ॥ शाधीतिवाक्यं श्रुतवान् कृष्णस्त्वयाधुनेदं कर्तव्यमिति वक्तुमुपक्रमते–आसन्नित्यादिना। प्रथमे मनोरन्तरे ये पुत्रास्ते कस्मिंश्चित्काले सुतान् शपितुम् शिक्षयितुम् उद्यतं देवलं वीक्ष्य जहसुः ॥ ४७ ॥ अमुना अवहासलक्षणपापकर्मणा निमित्तेन तेन देवलेनासुरीं योनिमगुः आपुः कालनेमेः पुत्रत्वेन इतिशेषः ते कालनेमेर्जाताः पुत्रा हिरण्यकशिपोः शापेन योगमायया देवक्या उदरे नीताः ततो जाताः कंसेन विहिंसिता इत्यन्वयः ॥ ४८ ॥ सा देवकी अधुना कुत्र आसत इत्यत आह त इमइति ॥ ४९ ॥ ततः किमत्राह इतइति ॥ ५० ॥ अभिज्ञानार्थन्तन्नामानि निर्दिशति–स्मर इत्यादिना। मद्गतिं मत्स्थानम् ॥ ५१ ॥ अयच्छतां दत्तवन्तौ ॥ ५२ ॥ अजिघ्रदाघ्राणं कृतवती ॥ ५३ ॥ सुतानां स्पर्शेन परिस्रुतं क्षरितं सृतमित्यर्थः। मायया महिम्ना ॥ ४५ ॥ अमृतमिव स्वादु लुप्तोपमं तस्याः देवक्यास्तनयस्य गदाभृतः

कृष्णस्य कृद्योगेषष्ठी नारायणस्याङ्गस्पर्शेन प्रतिलब्धम् आत्मदर्शनम् आत्मज्ञानं येषां ते तथा ॥ ५५–५६ ॥ कृष्णस्यसं समीचीनाम् अबाधितां सुष्ठूचितां नान्यस्येति कृष्णसंसूचितां मायां महिमानम् ॥ ५७ ॥ अनेनेन्द्रजालम् अतिदेशेनोपसंहरति–एवमिति । कृष्णेन संसूचितेयं माया अथापि बह्वयः सन्तीत्यतो वोपसंहरति एवमिति ॥ ५८ ॥ फलमाह–यइति । अमृतवन्निर्मलकीर्त्तेः जगतोऽघं पापं दुःखं वा भिनत्तीति जगदघभित् भक्तानां सत्प्रशस्तं कर्णपूरं कर्णाभरणं तस्य हरेः क्षेमधाम मोक्षलक्षणं स्थानं याति ॥ ५९ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे चतुस्सप्ततितमोऽध्यायः ॥ ७० ॥ अधिकपाठे ॥ १० ॥

राजोवाच

सर्वासां महिषीणान्तु गोविन्दासक्तचेतसाम् । मय्येव प्रेमवान्विष्णुरितिनिश्चितचेतसाम् ॥ १ ॥
समः सर्वासु वा कृष्ण एकस्यां प्रेमवानुत । तन्मे त्वं शंस तच्छ्रोतुं रतिरस्ति मम प्रभो ॥ २ ॥

श्रीशुक उवाच

महिषीणान्तु सर्वासां प्रथमा भीष्मनन्दना । प्रेमवानधिकं तस्यामिति प्रख्यातिरूर्जिता ॥ ३ ॥
कदाचित्प्रेमकलहः केशवेन तया समम् । कृतस्तच्छृणु कौरव्य कार्त्स्न्येन कथयामि ते ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रेक्षावतां भगवत्तत्त्वविज्ञानेऽधिकार इति लक्षणवृत्त्या तन्माहात्म्यं कथयत्यस्मिन्नध्याये तत्र श्रुतभगवन्माहात्म्यो राजा विशेषविवित्सया शुकं पृच्छति सर्वासामिति किमत्र संशयबीजमित्यत उक्तं गोविन्देत्यनेन ॥ १ ॥ सर्वासु प्रेमवान् मय्येव प्रेमवान् इत्युक्तममुना ॥ २ ॥ एकस्यां किमतिप्रतीयत इति प्रश्नावकाशो नास्तीति भावेन परिहरति महिषीणामिति ॥ ३ ॥ कथं प्रख्यातिरिति तां वक्तुमुपक्रमते कदाचित् तच्चरितम् ।. ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ दानवान्तकोऽत्युग्रं नरकं हत्वैवं कृत्वाऽऽगत इत्याह ॥ नरकमिति । नरकमत्युग्रं हत्वा प्रापयित्वा तमआदिकम् । हन हिंसागत्योरिति स्मरणात् । अन्तर्णीतण्यर्थश्च ॥ १ ॥ देवमातरमदितिं सहितो युक्तो भाविकुण्डलमण्डलनहितसमेत इति च ॥ २ ॥ सार्घ्यपाद्याः पादार्घ्याभ्यां चेति यत् । दिवौकसो दिवोकस इति द्वावपि शब्दावद्वन्द्वार्थावुपपादितं च प्राक् ॥ ३ ॥ हत्वा नरकमत्युग्रं दानवं दानवान्तकः । आरुह्य गरुडं प्रायात्प्राग्ज्योतिषपुरागतः । ज्वरो नरकासुररूप उपतापो येषां तैस्तस्कृत इति वा । दिव्यं तल्लोकम् । दिव्यैरिति सर्वान्वयि ॥ ५ ॥ पुरीममरावतीगतभवनविशेषाम् । तं पुत्रमायातं दृष्ट्वा । उपतस्थे गतम् ॥ ६ ॥ तां मातरमाशीर्भिः पूजयाम ॥ ७ ॥ श्वश्र्वाः पत्युर्मातुः कुण्डले नरकं हत्वा नीते ॥८॥ कश्यपप्रिया तद्भार्या ॥९॥ विप्रियग् । अव्ययं विभक्तीत्यर्थाभाव्येऽव्ययं विरोध इति यावत् । सुव्यक्तं यथा भवति तथा । मत्प्रसादं प्राप्य स्थितायास्त इत्यन्वयः ॥ १० ॥ देवीमदितिम् ॥ ११ ॥ देवदेव्यौ । नैकशेषः परवल्लिङ्गता च । नीयमाने ऊह्यमाने सत्यात्मनोऽनुसारिणी हरिप्रवृत्तिरिति द्योतयितुमेवं निर्दिदेशेति ज्ञेयम् । चाराः इन्द्रभटाः । चार्विति पाठे वनविशेषणम् । गुप्त दूतैरिति शेषः ॥ १२ ॥ पाणौ गृहीत्वा गतम् । मुहूर्तं मे चित्तं विहर्तुं कामयते । कामय इति पाठे चित्रमिति । मुहूर्तमित्यत्यन्तसंयोगे द्वितीया ॥ १३ ॥ तस्याः सत्यभामाया वचनगौरवात्तद्गुरुत्वात् । आन्तरङ्गिको भावस्तु तस्या यद्वचनं दातास्म्यहं पारिजातं तरुंत इति स्ववचनं तद्गारवाद्विति ॥ १४॥ सारङ्गा भ्रमरा रजसा परागेण ॥ १५ ॥ चलद्भिः किसलैरुपेतान् । तत्र नन्दने तथा यथा मनस्तथा ।१६। विस्मयेनाकुले लोचने यस्याः सा । नाम्ना को विचित्रो विशिष्टश्चित्रादिति विचित्रः । चित्रं स्यादद्भुतालेख्यतिलकेषु विहायसीति विश्वः । द्युलोके श्रेष्ठ इत्यर्थः । एतस्य वृक्षस्य । फलभागिनः कृतार्था इति नोपचरितमितीरयति ॥ सत्यमिति । प्रवाला विद्रुमास्तदात्मकं मूलं वा मूलो यस्य सः । विपुलो विशालो जातरूपमयी महती तनुर्यस्य सः ॥ १७–१८ ॥ इन्द्रनीलमहच्छदाः पत्राणि तैश्छन्नः । छदः पालाश इति विश्वः । लसन्ती वैदूर्यमयी वेदिका यस्य विदूरान्नो गतम् । माणिक्यान्येव पुष्पाणि यस्य सः । मुक्ताफलानि मुक्ता एव फलानि तैरन्वितः ॥ १९ ॥ गोमेदात्मा पक्वः । पचो व इति वः । स्वयं पातात्पक्वता । प्रकरो विकीर्णः कुसुमादिर्यस्य सः । प्रकरश्चोपकारे स्याद्विकीर्णकुसुमादिष्विति विश्वः । वज्रा एव किञ्जलकास्तै रञ्जितः । स्फुरन्मरकतात्मिकाः स्थूलाः शाखास्तासां शतेन विराजितः ॥ २० ॥ हे जगन्नाथ । एनं तरुर्मे मनो भृशं हरते । आदरातिशयात्पुनर्वृक्ष इत्युक्तिः । यदि तेऽहं प्रियो तर्हि नेतव्यः । पुरीं द्वारावतीम् ॥ २१ ॥ अन्याश्च ताः पत्न्यश्च ताः । हे अच्युत । सर्वाभ्यो मां दयितां मंस्यन्तीति जानते ॥ २२ ॥ प्रिया च सा कान्ता च तया । नन्दनाद्वनात् । हे भद्रे । न नेतव्यः ॥ २३ ॥ तज्जन्मोक्त्वा तन्मनः प्रसादयितुं यतते ।। पुरेति । सुरासुरैर्मथ्यमानात्क्षीराम्बुधेर्जातस्तदा तत्फलं समुद्रजातं भोक्तृभिर्देवैः स्वं स्वं गृहीत्वायमिन्द्राय दत्त इति भावः ॥ २४ ॥ मित्रं शक्रमनादृत्य मया नाहार्यम् । तदनाहरणे हेतुमाह ।। धर्ममेवानुष्ठितेति ॥ २५ ॥ हे शुचिस्मिते ।

पारिजाते वृक्षे नीयमाने जयकाङ्क्षिभिर्जयापेक्षावद्भिस्त्रिदिशैः सङ्ग्रामो जायते ॥ २६ ॥ देवदेवेन । इत्युक्ता सत्यभामा । हे कंसमर्दन व्यलोकैरनृतैः किं मां भीपस इति प्राह । अलीकं स्वप्रियेऽनृत इति विश्वः । कंसमर्दनेत्यनेन समर्थस्तां वचोऽलीकतामूलं ध्वनयति ॥ २७ ॥ नलिननयननयने तरोः कारणं किमित्यतः कथयति ॥ नेति । दुराचारा शची मां गृहमागतां नाभ्यनन्दन्न चाभिनन्दितवतो न च सच्चकारेति यावत् । तत्र निमित्तं किमित्यत इदमित्याह ॥ तस्येति । तस्य मदनाभिनन्दनस्य । अयं वृक्षो लोकविलक्षणो हेतुर्भर्तृपौरुषगर्वितेति । कृष्णेर्ष्याजननाय मुख्यः स हेतुरिति भावः ॥ २८ ॥ अच्युत नाथ । अहं तव प्रिया चेत्सर्वथा सङ्ग्रामो वा किं वा भवतु भवतोऽयं तरुः पारिजातो नेतव्यः । न प्रिया चेत्साम्प्रतं विरम तूष्णीमास्व । न व्यथाकर्त्री भाव्यमिति भावः । न चामरसमसमरे जयो नाप्यपजयो न वा मरणं तथा मरणं न निश्चितमिति । न राज्यादिच्युत्यभावेनान्यथासिद्धमच्युतपदमिति च न वद तव न मृत्युरित्यप्याह ॥ यमच्युतेति । यमाच्च्युतो यमबाधातीतो विमृत्युरिति यावत् ॥ २९ ॥ उत्पाट्य उत्कृत्य गरुत्मति गरुडे आरोपयामास गतम् ॥ ३० ॥ वनपालाः केचिद्द्रुततरं यथातथा केचिज्जग्मुः ॥ ३१ ॥ हरसे चेत्सद्यन्तत्फलं हरणफलमनुभोक्ष्यसि ॥ ३२ ॥ तदेव विविच्याहुः । अनेन महीरुहा सह पुरीं द्वारकां न पाप्नोति । किञ्च पृष्टतोऽभ्युद्यतमायुधं बज्रं येन तं पश्यतीति ॥ ३३ ॥ शच्या समं साकमेकासन उपविष्टं त्वया सहेन्द्राणीं चावज्ञाय धिक्कृत्य । कृष्णादयितेति वचनं तद्बोधितो जहार हरिरिति भावेनेति ज्ञेयम् ॥ ३४–३५ ॥ भर्तृपौरुषगर्विता हरिप्रियाऽस्माभिर्निवारयद्भिरुक्ताऽपि भृशमुपालभ्य भर्त्सयित्वा वृक्षमहरत् ॥ ३६ ॥ पार्श्वस्थां शचीं विलोक्य तत्पराभवं नामृष्यन्न सेहे । तरुणीपुरतोऽप्रतिष्ठा न सोढुं शक्येति शचीपार्श्वस्यामित्यनेन ध्वनयति ॥ ३७ ॥ सन्निपात्य मेलयित्वा सैनिकान्सेनासमवेतांस्तथा लोकपांश्चा सामाहूय तैःसह निर्जगाम ॥ ३८ ॥ ऐरावतं वरवारणं वारं यद्वा तदणयति गमयतीति वरवारणतां मदोदकस्रावणमिति यावत् । वराः प्रतिभटास्तेषां वारणं निवारणं येनेति वा वरान्वारयतीति वा । आरुह्य गृहीतवज्रं गच्छन्तमिन्द्रं दिवौकसोऽनुजग्मुः ॥ ३९ ॥ वैश्वानरोऽग्निः । तुरङ्गं तुरगो वाहमात्रेऽपीत्युक्तेर्वाहनमुरणम् । मेषारूढं वरप्रदमित्युक्तेरारुह्य वैश्वानरोऽग्निः । वैश्वानरस्तूरणमिति च सरलः पाठः । विश्वे नरा अस्येति वैश्वानरः । नरे संज्ञायामिति विश्वशब्दस्य दीर्घः । श्रुवं पुच्छे यस्याः सा तां शतघ्नीमादाय रणं प्रति ययौ ॥ ४० ॥ मृत्युकालावमात्यौ तदादिभिर्युक्तः ॥४१॥ पौरुषं स्वार्थेऽण् । पुरुषं । असिहस्तः खड्गपाणिः ।४३। भीषणाकारं मकरमारुह्य वरुणस्त्वरन् पाशोद्यतकरः शचीपतिमनु युद्धाय प्रायात् ॥ ४३ ॥ कृष्णमृगः सारङ्गः । तोमरमायुधं यस्य सः । चक्रभृता कृष्णेन ॥४४॥ नरवाहनः कुबेरः । चतुर्भिः पुरुषै रूढां शिबिकामारुह्येत्यन्वयः ॥४५॥ ईशानः शिवो भूतानां कोटयस्ताभिः समन्वितः ॥ ४६ ॥ सुवर्णसुषिरैः सुवर्णात्मकसरन्ध्रैः काहिलीभिरित्यर्थः । सुषिरं विवरे वाद्ये सरन्ध्रे सुषिरोऽनिल इति विश्वः । भूरिभिर्बहलैः खुराणां निःस्वनास्तैः क्ष्वेलितैः सिंहनादैरास्फोटितैरूर्वाद्यास्फालनैः सङ्ग्रामार्थमाव्हानं तद्रूपैर्गर्जनैः ॥ ४८ ॥ तव मायेति प्रवदद्भिरिति वा । मा याहि न गच्छ । हि यस्मात्त्वया मायाऽऽश्रिताऽतः ॥ ४९ ॥ अहं पुरोऽहं पुर इति गच्छद्भिः ॥ ५० ॥ सिंहं गोमायवः सृगालाः ॥ ५१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे पञ्चषष्टिरध्यायः ॥ १०—६५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ प्राहुणिका आमन्त्र्य भोजयितव्याः । तव ॥ १ ॥ प्रेषिता इन्द्रेण ॥ २ ॥ अव्यसनविक्लवा व्यसनः खेदो विक्लवो विह्वलता ताभ्यां रहिता देवसैनिकैर्मुक्तान्वो बाणौघैस्ताञ्छरांश्चिच्छेद ॥ ३ ॥ तालमात्रं तालस्य मात्रं प्रमाणं यस्य तत् कार्मुकम् । कनकाटविः कनकमयाटविः कोटिर्यस्य तत् । अटघटिभ्यामविरित्यविः । रे समसमरे तिष्ठ तिष्ठेति चाब्रवीत् ॥५॥ विशाले विस्तृते जठरे उदरे ॥ ६ ॥ स धनपतिः ॥ ७ ॥ सा सत्या ॥ ८ ॥ गुह्यकपतेः गुह्यकेश्वरस्य ॥ ९ ॥ एकैकं त्रिधा विच्छेद ॥ १०–११ ॥ अर्धचन्द्रेण तदाकृतिमता बाणेन मुष्टिप्रदेशे तद्धार्यप्रदेशे । सति स्वापथे येन दानं वैश्रवणेति तन्मुष्टिदेशे ताडनं युक्तमिति भावः । अत एवामाणकं बद्धमुष्टिरिति । सज्जं ज्यासहितम् ॥ १२ ॥ सङ्ख्ये युद्धे सन्नतानि पर्वाणि येषां ते तैः ॥ १३ ॥ तत्रापि नायताक्ष्या आयास इत्याह ॥ लीलयेति ॥१४॥ त्वमद्य मम पौरुषं पश्य त्वां-हनिष्यामीत्युक्त्वा तालमात्रे तु चापे ॥१५॥ पराभवं पराजयं मार्ष्टुकामः परिहर्तुकामः शरोत्तममर्धचन्द्रं सन्दधे ॥ १६ ॥ तत्स्वहननोद्योगकरणमवेत्य ज्ञात्वा ॥ १७ ॥ शतगुणं शतवारं भ्रामयित्वा देव्यै चिक्षेप ॥ १८ ॥ वामेन पाणिना जग्राहानन्तरमुच्चैर्जहास च । वामेनेत्यनेन भार्याभागो वाम इति प्रसिद्ध इत्युक्तेस्तव भागहस्तेनैव धारणान्न तव पराजय इति ध्वनयामास ॥ १९ ॥ समाश्लिष्याभिपूजयन्देवीं शशंस ॥ २० ॥ पाशमुद्यम्य संयोगे कृष्णमभ्यद्रवत् ॥ २१ ॥ गोवृषं शार्दूलो व्याघ्रः ॥ २२ ॥ देवासुरे युद्धे प्रसक्ते बलिवासवयोरिवैतद्युद्धं यथा तथा युद्धं समभवत् । यथा तथा सम्यगिति वा ॥ २३ ॥ काश्यपपुत्रस्य गरुडस्य ॥ २४ ॥ गरुडस्तं वरुणं पक्षकोट्या समुद्धृत्य पद्भ्यां मकरं तद्वाहनं गृहीत्वा वरुणालये चिक्षेप ॥ २५ ॥ कृच्छ्रात्कष्टाद्गृहीतो गरुडगलगतः प्रतिगृहीतः पाशो येन सः । यथाऽऽगतस्तथा विदुद्राव ॥ २६ ॥ वार्धिपतौ समुद्रनाथे वायुपावकौ समं युगपदेव मरुत्सखो हुताशन इति मैत्र्यात् ॥ २७ ॥ मरुतो वायुः ॥ २८ ॥ समीरणं समीरं तं कृष्णमसाधारणं स्वाशक्यं मत्वा ॥ ३० ॥ आत्मानं स्वं सायकैराचितं सर्वमङ्गं यस्य स तम् ॥ ३१ ॥ पुण्डरीकाक्षं साक्षान्नारायणं विदित्वा ज्ञात्वा ॥ ३२ ॥ यमोऽयमोऽसदृश इति वा ॥ ३३ ॥ विसृज्य मुक्त्वा

तद्धस्ताद्यमकारात् महादण्डं भूतले पातयामास। अनेन वरं स मानयामास सारसासनस्येति ध्वनयति ॥ ३४ ॥ त्रस्तहस्तः कम्पितकरः परेतराट् प्रेतपतिः ॥ ३५ ॥ विदिततद्बलो विदितं तस्य कृष्णस्य बलं येन सः। योद्धुमेव नाभ्यवर्तत नाभिससार ॥ ३६ ॥ त्रिशूली तद्वान् वृषो नन्दी ॥ ३७ ॥ परस्परं जयैषिणौ तदिच्छौ कर्दनं युद्धम् ॥ ३८ ॥ ईशानः शिवो दशभिर्बाणैः कृष्णं तार्क्ष्यं च गरुडं च पञ्चभिः शरैर्विव्याध। समरे युद्धे रे समलक्ष्मीरमण। तिष्ठ तिष्ठ कृष्णेति चावदत्। अनुवादेन साकं पिनाकोऽपि तेनानीत इति वादे ऊह्यमिति सूच्यते। त्रिषु स्थानेषु नतं च तच्छूलमायुधं धनुस्तदस्यास्तीति वाऽऽवृत्त्या पिनाकग्रहः। शूलं प्रहरण इति विश्वः। त्रयाणां लोकानां शूलं मृत्युर्येन सोऽस्यास्तीति वा। मृत्याविति तत्रैवोक्तेः ॥३९॥ त्रिशद्भिरेकस्य त्रिकं त्रिकमिति त्रिंशत्सङ्ख्यैः ॥४०॥ पन्नगरिपुरिति तदलङ्कृतिकृधेति ध्वन्यते। द्वाभ्यां पद्भ्यां पक्षाभ्यां च चञ्चुकोट्या तत्प्रान्तेन तं वृषं मर्दयामास ॥ ४१ ॥ पञ्चाशदिति प्रमितैर्गणितैः ॥ ४२ ॥ निशितं सशाणीकृतम् ॥ ४३ ॥ आयान्तं त्रिशूलम् ॥ ४४ ॥ कौमोदकीशूले। अभ्यर्हितत्वादादौ कौमोदक्युक्तिः। अम्बुधौ समुद्रे ॥ ४५ ॥ तत्त्रिशूलं निपात्याब्धौ सा कौमोदकी विष्णोः करं तथा शङ्करकरं शूलं चाससाद ॥ ४६ ॥ निशितं खड्गं। इदमप्युक्तगतिकम्। पार्ष्णिभ्यां पादपृष्ठभागाभ्यां वृषं चोदयन्। अनेन गरुडबाधितस्य गमनासामर्थ्यं द्योतयति ॥ ४७ ॥ तस्य नन्दिनो विषाणे। सप्तमी वा द्वितीयाद्विवचनं वा। बाहुभ्यां पद्भ्यां गृहीत्वा सशूलपाणिं सहहरं वैनतेयो धनुः शतं तत्परिमितं देशं प्रति चिक्षेप ॥४८॥ ततः स्वपातानन्तरं वृषवाहनस्त्रिशूली शूलस्य मोघतां वृषस्य गमनासामर्थ्यतां ध्वनयितुमेवमुक्तिः। प्रमथैर्भूतगणैः पारिषदैः सहितो यथाऽऽगतं तथा प्रायात्। प्रेण स्वोपास्यं रामं किं राम समरः कर्तव्य इत्यप्राक्षीलयक्ष इव तेन चाजित्यजनं क्षेम इत्युक्तमित्याभाणकमभिप्रैतीति मन्तव्यम् ॥ ४९ ॥

इति श्री भागवतटिप्पयां सत्यधर्मकृतायां दशमे उत्तरार्धे षट्षष्टिरध्यायः ॥ १०–६६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ ततः शर्वादिसर्वसुपर्वविद्रावणानन्तरम् ॥ १ ॥ गजः केसरिणं सिंहं पारिजातकृते तन्निमित्तं पौलोम्यो वचनं परीभाव्य भगवन्तं नगमानयेति मानिनीवाक्यम्। अनेनोभावपि भार्यामूलमेव कलहं कलयत इति द्योत्यते ॥ २ ॥ हरिस्तमिन्द्रम् ॥ ३ ॥ महद्धनुर्विस्फारयन्। सङ्गरे क्षुरप्रेण शरविशेषेण विव्याध। रे विव्याधसङ्ग विविधा व्याधास्तेषां सङ्गो यस्य स तत्सम्बुद्धिः। तैर्व्याधैर्विधेयकर्म पश्यतो हरत्वादिकं तत्त्वं कृतवानिति सम्बोधयामास वासवो वसुदेवं तथेति वाऽऽवृत्त्या ज्ञेयम् ॥ ४ ॥ साधु सम्यक् त्वं शक्तोऽसि। अतस्त इदं मदङ्गताडनं युक्तं न्याय्यमिति चाब्रवीत्। अनेनायं मम शयोऽधुनापि शीतलो जात इवेत्येव समये उपकारं विस्मृत्यायात इति हास इति ज्ञेयम्। न्यायसंयुक्तयोर्युक्तमिति यादवः ॥ ५ ॥ भुजगेन्द्रकल्पे मासृण्येनाकारेण च सर्पसमे। असहो दुस्सहो यो सिंहनादस्तं। स इन्द्रः सिंहनादं च चक्रे हेत्यन्वयो वा। सुधौतैर्निशितैः ॥ ७ ॥ सावृति। आवृत्या तद्रूपेण वर्मणा सहितं तद्गात्रं निर्भिद्य भूयोवेगेन बहुवेगेन शोणिताक्ता वेगेन विनिर्गता भूयः पुनः प्रदर्श्यत इति वा ॥ ८ ॥ तान् षोडशारांस्त्रिभिः पतत्त्रिभिरेकेन षट्द्वाभ्यां पञ्चकं पञ्चकमिति विवेकः ॥ ९ ॥ सुरराजानं त्रिंशत्सङ्ख्या बाणाः ॥ १० ॥ तोत्रेणाङ्कुशेन ॥ ११ ॥ बहुयुगान्तरे उरसि ॥ १२ ॥ तुण्डेन चञ्चुना ॥ १३ ॥ वृषाकपि हरिम्। वृषा इन्द्रः प्राग्घनुमन्तं प्रतीव प्रजहारेति लुप्तोपमा च। वासवो वृत्रहा वृषेत्यमरः ॥ १४ ॥ मधुरिपुर्मधुसूदनः। इदानी मधुर्मनोहरः सन्नेव रिपुः। न क्रौर्ये पुरस्तिष्ठेच्छक्र इति भावः। आगतं स्वसमीपं वज्रं वामेन करेण जग्राह। हे दुश्च्यवन। आगतं त आयुधं किलेति जहास चेत्यन्वयः ॥ १५ ॥ निरायुधः क्षुरप्रादिवज्रान्तानामायुधानां विसर्जनाद्वर्जितायुधस्तथा गरुडार्दितवाहनश्च व्रीडया व्रीडेन वाऽऽनता कन्धरा यस्य स सन्ध्यावर्ततापासर्पदिति यावत्। व्रीडा व्रीडश्चेति द्विरूपकोशः ॥ १६ ॥ प्रहसन्ती भर्तृभ्रातृत्वादपहसन्ती ॥ १७ ॥ हे शक्र। एहि निवर्तस्व। हे कुलिशायुधेति बव्हप्रतिष्ठां सूचयतीति मन्तव्यम्। अधुना मधुनाथहृतत्वात्तस्य। पौलोम्या वल्लभस्य पत्युस्ते पलायनं न युक्तं योग्यं न। पौलोम्या वल्लभस्येति स्वतदवमाननेर्ष्यामाविश्चकार सत्यभामेति ज्ञेयम् ॥ १८ ॥ ऐश्वर्यमत्ता भर्तृपौरुषगर्विता पौलोमीभार्या रणपराजितं त्वा स त्वामवमंस्यत्यवमानयति ॥ १९ ॥ सापलम्भं सापहासमुदीरितां गिरं शक्रो निशम्याभिमुखो भूत्वा शुचिस्मितां देवीं प्राह ॥ २० ॥ गतासुरावेशः शचीशो हरिगुणानुदीरयन्स्वस्वभावमाविर्भावयति। येनेति। अमराद्यानिशाचरान्ताः सृष्टा उत्पादितास्तेन त्रिलोकगुरुणा को वा पुमान्त्रणमूर्ध्नि विरुद्ध्यालं परिभूतिमति पराभवं न याति। परिभूतिमलं तद्रूपं कलङ्कं न यातीति। अलं विरुद्धयेति तु नान्वयः सरसः। तस्य च तमोहेतुत्वात्। वक्ष्यमाणगोवत्सन्यायोऽप्यतनुगुणः स्यात्। अनयेनातिपरिभूतिमलमिति वा ॥ २१ ॥ तनुबलोऽल्पं तनु बलं यस्य स वत्सस्तर्णकः सकृदेत्य झडित्युपागम्योधस्यमूधोभवं क्षीरं तस्य पानसमये मातरि गवि विरोधं मुखघट्टनादिजं कुरुते करोति। स्तन्याप्रदानसूचके कुरुते कुत्सिते शब्दे कृते सतीत्यप्यर्थः। तद्वद्वत्सवत्। अप्रमेये नाथे पत्यौ श्रीकृष्णे विरुद्धय किञ्चिद्विरोधम्। हे पिशिताशनि यज्ञीयान्नभोजने सत्ये निजशैशवमस्मद्बालभावं मौर्ख्यमिति यावद्दर्शयामः। हे अप्रमेये। नाथ स्वामिनि पिशिताशनि बहिर्मांसभक्षिणि स्त्रीराक्षसीत्युपहासः। त्वयि विरुद्ध्येव निजशैशवं दर्शयाम इति वा। यद्वा हे देवान्नाशिनि अमृतभोजने। अस्मल्लोकस्तु पारिजातेन तथामृतेन च विशिष्ट इति विशिष्टस्तत्रैकस्तु बलादबले गृहीत इदमन्नं मदीयमपि गृहाणेति वचनं दुश्च्यवनस्येति ज्ञेयम्। याज्ञीयान्ने च मांसे च पिशितं देवभोजनमिति यादवः। इदं सर्वं निजशैशवं

तव शैशवमेव न केशवस्येत्युपाहसदित्यपि ज्ञेयम् ॥ २२ ॥ सत्राजितः पुत्रीं प्रत्युक्त्वा कृताञ्जलिपुटः पुरन्दरो वासुदेवं प्रणम्याह ॥ २३ ॥ विश्वं समस्तम् ॥ २४ ॥ भूरिबालिशमतिमूर्खम् । सुवर्णादिवितरणकृतरुरिति भूरिभूरि प्रयुक्तं सुवर्णार्थं बालिश इति । भूरिब्रह्माच्युतेषु भूरिप्राज्यसुवर्णयोरिति विश्वः । अक्षान्तं क्षमारहितम् । तथाऽपि त्वदेकशरणं त्वं मां त्यक्तुं नार्हसि ! अहाने हेतुमाह । शरणागतवत्सलेति ॥ २५ ॥ सर्वं त्वदधीनमित्युक्त्वा कश्चन विशेषं पुनः पारिजातप्रत्यर्पणविषयं तं मुखतो वादयितुं पीठमारचयति । ऐरावत इति । कुलिशं भिदुरम् ॥ २६ ॥ इमं सर्वं त्वदधीनमहं तवाज्ञाकरोऽत्रैतन्मध्ये यत्तुभ्यं रोचते यथा सम्यगसन्देहेनेच्छया तदनुसारेण नीयताम् ॥ २७ ॥ इयन्मतिमता भवता कुतः कृतः कलह इत्यत आह । किन्त्विति। त्वयि विरुद्धयतो मम मूलं निमित्तं वक्ष्यामि । अनन्यधीर्यदर्थमवतीर्णस्तत्कार्यादन्यत्र निर्गतमतिर्मानुषे लोके रमसे क्रीडसि ॥२९॥ तत्र पारिजाते नीते तेन सा वसुन्धरा धूः स्वर्गान्निर्विशेषा निर्गतो विशेषो यस्याः सा तथा ज्ञायते । अस्मत्सदनवैशेष्यसाधनं भविष्यतीति कलहः कृत इति वक्ति । तेनेति । त्वं त्विदं कार्यं न कार्यं चेति विजानन्निति त्वया तन्मम मौर्ख्यं क्षन्तव्यम् ॥३०॥ प्रहसिताननो ममतावन्ममताविशेषं दर्शयित्वा मोहयिष्याम्येनमिति हासः ॥ ३१ ॥ हे शक्र त्वया न कश्चिदपराधश्चेष्टितः कृतः । यदागस्त्वया कृतस्तन्मयैव कारितम् । तवास्वतन्त्रत्वात् । आवयोस्त्वदन्तर्गतस्य मम चेत्यावयोः परमत्यन्त भेदात् । आवयोरभेदान्मत्यैक्त्यादिति व्याकुर्वते । पूर्वश्लोकात्पुरन्दरमित्यत्रत्यमनुवर्तते । अथशब्दानुशासनं के ते शब्दा इतिवत् । आवयोः पुरं शरीरं यत्कृतं यन्निमित्तमेकं व्यक्तमेकमिति । तस्याभेदाद्भेदाभावादेकत्वादिति यावत् । एकपितृकत्वात्त्वया यदकारि साधु वाऽसाधु मयाऽकारि विचारणाऽत्रैतद्विषये न कार्या । हे सहस्राक्ष साध्वसाधु वा यत्कृतं तत्त्वयाऽनया शच्या कृतमेव । तदुद्बोधनेनागतत्वात्तव । अत्र यत्सर्वं कृतं तन्मया सत्ययैव कृतम् । एतयोर्मध्ये आर्या का द्वे अपि बालिशे बाले इति भावः । विचारणा नास्तीत्यन्तरङ्गिको भावोऽवसेयः ॥ ३३ ॥ निर्विशेष्यं परिहरति । मयि दिवमारूढे तरुश्रेष्ठः पारिजातो मन्निदेशादाज्ञाया नन्दनं वनं स्वयमेष्यति । अतरुः अतो गतो रुःशब्दो यस्य स निश्शब्द एष्यतीति न तर्वतिरेकः । त्वया प्रेषणीयं मया प्रेष्यत इति शब्दं विनेत्यर्थः ॥ ३४ ॥ गोविन्दं सत्यभामां च गरुडं च प्रसादयित्वा ॥ ३५ ॥ मे पुत्रस्तव शालो बीभत्सुरर्जनो रक्षितव्य इत्यपि भूयोभूयः प्रार्थयित्वा कृता दत्ताऽनुज्ञा यस्य स पुरन्दरः ॥ ३६ ॥ सकलदिक्पालैः सार्धं लब्धवज्रः कृष्णात्पुरममरावतीं ययौ ॥ ३७ ॥ गरुडो गोविन्दं सत्यभामां च पारिजातं पादपं च ॥ ३८ ॥ पन्नगरिपुर्लीलयैव स्वान्तर्यामिभगवल्लीलयैव वहन्ययौ । न स्वतः पतत्त्रिणः समर्थता । उक्तं चोद्योगपर्वणि । विष्णुरुवाच । अहमेवात्मनात्मानं वहामि । त्वां च धारये । इमनावन्मनेकं त्वं बाहुं सव्यतरं वह स्वहस्तन्यस्तभारोऽभूद्वा सर्वस्नेहकारणात् । निपपातेत्यारभ्यक्षन्तुमर्हसीत्यन्तेन विश्वम्भरसर्वस्वादिकं सलघिमानं चकारेति लीलयैवेति वा ॥ ३९ ॥ ऊढा उपायनाक्षतान्ता यैस्तैः ॥ ४० ॥ उपस्थितैर्यदुश्रेष्ठैः पूजितोऽभिवन्दितश्च ॥ ४१ ॥ दिव्यां दिवि भवामेवात्रायाताम् ॥ ४२ ॥ यथान्यायमभिवाद्य तैर्यथोचितं स्वयं पूजितश्च ॥ ४३ ॥ बृहस्पतिः पुरोधाः । तत्पुरोगमैस्तदाद्यैर्लोकपालैरुपासीनैर्दिवि वज्रधर इन्द्रो यथा तथा सभामध्ये काञ्चने परमासने उपविष्टो रराज । ननु पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिमिति गीतायां बृहस्पतेः पुरोधोऽग्र्यत्वम् । तथाऽन्यत्र च वसिष्ठस्य पुरोहितवैशिष्ट्यमुच्यते । तत्र कथं समाधिरिति चेत् । देवपुरोधसां मध्ये बृहस्पतिर्मानुषपुरोधसां वसिष्ठ इति विवेकसम्भवात् । यथोक्तमेकादशतात्पर्ये । वसिष्ठोऽभ्यधिकस्तेषां मानुषाणां पुरोधसामिति त्रैकाल्य इति । प्रसङ्गाददमुक्तमिति ज्ञेयम् ॥ ४४ ॥ सर्वतः परितो मणिकुट्टिमे मणिनिबद्धभूमौ ॥ ४५ ॥ औत्सुक्यातिशयेन पुरत एव हरिसदः स्थितिमिव स्थापनं सुरतरोस्तरुण्या अङ्गण उक्त्वा तत्पूरङ्गं सङ्गमयन्नाह । आयान्तमिति । योषित्सार्थेन शतोत्तरषोडशसहस्रस्त्रीसमूहेन भूरिणैवंरूपेण बहुलेन सुवर्णादिना सह वा । आयान्तमागच्छन्तं तथा नरकासुरलाभविनाशकमित्यायस्यान्तोविनाशो येन तमित्यर्थः । आयास्यान्तो निवासः कोशस्तं वा । अन्तः स्थागं स्थलं वासः प्रवेश इति चोच्यत इति बृहद्भाष्योक्तेः । श्रुत्वा तं द्रष्टुं सकल यादवस्त्रिय उपाजग्मुः ॥ ४६ ॥ रोहिण्याद्या रोहिणी बाल्हीकपुत्र्येवाद्या यासां ताः । यथोक्तं बृहद्भाष्ये । बाल्हीकस्तु कौरव्यः । बाल्हीकपुत्री रोहिणी । अतो बलभद्रः कौरव्यायणीपुत्र इति । स्त्रियो वसुदेवपत्न्यः ॥ ४७ ॥ देवक्या साक्षाज्जनन्या सह दृष्ट्वा ताभ्यः प्रणामं चक्रे ता मातरोऽप्याशीर्भिः प्रत्यपूजयन् ॥ ४८ ॥ सप्तमहिष्यो नगरगा दिव्यरूपाः स्वभावतः ॥ ४९ ॥ रामदयिता बलाबला त्रिवक्रा । एकाङ्गनेति दुर्गानाम । तन्वङ्गी कोमलाङ्गी वा तन्नाम्नी काचना वा चित्रा सुभद्रा । सुभद्रा चित्रा तारेति विश्वः । अनुत्पन्नरजाः श्यामा तद्दृष्टा वरवर्णिनीत्यभिधानाद्वरवर्णिनी सद्यो दृष्टरजस्का । काचित्तन्नाम्नीति केऽपि ॥ ५० ॥ आनीतः प्रमदानां सार्थो येन तम् ॥ ५१ ॥ गोविन्दं सत्यभामां चानीतममरद्रुममपि । चापिन्या आनीतम् । चापं धृत्वा समरं कृतवतीति विदितवृत्ताः प्रीत्युत्फुल्लमुखाः सर्वाश्च सर्वे च सर्वे कौतुकाददृष्टमाययः ॥ ५२ ॥ लाजाश्च भ्रष्टव्रीहयः । लाजाः स्युर्भ्रष्टधान्येषु लाजः स्यादार्द्रतण्डुलः । उशीरे लाजमुद्दिष्टमिति विश्वः । प्रसवाः पुष्पाणि फलानि च । प्रसवस्तु फले पुष्प इत्यमरः । तण्डुलैः कृष्णस्य मूर्ध्नि स्पृष्ट्वा विकीर्येति यावत् । स्वं स्वं निवेशनं गृहं जग्मुः ॥ ५३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे सप्तषष्ठिरध्यायः ॥ १०–६७ ॥ ६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ किङ्कराद्पि शङ्कराद्वरवरणे तत्सम्माननीयता भवति जगतीति जगदीशोऽपि मानिन्या सह तपोऽचरदिति वा येन यस्य कामस्य हानिस्तेनैव तस्य । कामं पुनस्तनुभवं चेदियदतिशयितः । स्वरूपनाशः कर्तव्य इति मनसा तपोऽचरदिव हरिरभूतया जातः पोतः शम्बरमम्बरचरमसुरममीमरादित्यादि प्रतिपाद्यतेऽस्मिन्नध्याये । तत्रापि शुकः साम्मुग्ध्येनामुग्धं राजानं प्रति वक्तीति वक्ति ॥ श्री शुक इति । श्लोकद्विकमेकान्वयम् । हरिर्लोकशङ्करम् । न स्वस्येत्यनेनैव ध्वन्यते । आराध्यो यो देवदेवः स्वयमेवेशो यस्य तम् । कैलासाख्यो गिरिस्तस्मिन्वासोऽस्यास्तीति तम् । यद्वा कैलासश्च गिरिर्वायुश्चासावाश्रित्य वर्तमानम् । कैलासेन सहितो गिरिस्तस्मिन्निति वा । एवञ्चेन्न द्वन्द्वाभ्यर्हितमादिप्रसक्तिरिति बोध्यम् । तपसा तोषयित्वा । अतो नारेध्येत्यतिरेकशङ्केति सन्तोष्टव्यम् । सामान्यविशेषभावादिश्चागतिका गतिः । तेनैव दग्धं कामं पुनः प्रद्युम्नेति नाम यस्य तम् । रूपौदार्यगुणान्वितं वीरं तनयं रुक्मिण्यां प्रथमप्रमदायां लेभे प्राप ॥ १–२ ॥ ईश्वरं हरं पुत्रार्थं सोऽयं मनुष्यलोकः पुत्रेण जय्यो नापुत्रस्य लोकोऽस्तीत्यादेर्लोकनायकोऽपि लोकमनुकुर्वन् दृष्ट्वा तेन लब्धो वरो येन स सन् कीदृशं पुत्रम् । यद्यपि सामान्यतो रूपौदार्यगुणान्वितमिति प्रकार उक्तस्तथाऽपि विविच्य ज्ञातुमयं प्रश्न इति ज्ञेयम् । नाम्नः पूर्वं प्रद्युम्ननामानमित्युक्तेः पुनः किन्नामानमिति परीक्षिदपरीक्षक इव कथमप्राक्षीदिति चेत्सत्यम् । किन्निमित्तं नाम प्रद्युम्नेति यस्य तं किन्नामानमित्यर्थपरत्वोपपत्तेः । हे स्व स्वामिन्मे वद । स्वश्चासावहं च तस्य । प्रकाशमानः सन्वदेत्यर्थे भासमानोपसम्भाषेत्यात्मनेपदता वा ॥ ३ ॥ रुद्रमन्युना मामपि वशयितुमायातो मायात इति कोपेन देवदेवेन शूलिना खेदितेन कृतोऽनङ्ग इति हरिवंशोक्तेः । यः प्राग्दग्धः कामस्तस्य पुनर्देहोपपत्तये भूयस्तमेव प्रत्यपद्यत गतवान् ॥ ४ ॥ वैदर्भ्यां कृष्णवीर्यसमुद्भवः सन् स एव जातः । नामागतिप्रकारमाह ॥ वासुदेवांशः प्रद्युम्न इति विख्यात इति । वासुदेवादिव्यूहमध्ये योंऽश एको भागः प्रद्युम्नस्तदावेशित्वात्प्रद्युम्न इति विख्यात इत्यर्थः । पितुः सर्वतः प्रकारसर्वस्वेनानवमः समः पुत्रीभवनयोग्य इति यावत् । उत्तरत्र पितुर्भाविनां नवानां सत्त्वादयं दशम इत्यनवम इत्यर्थः ॥ ५ ॥ शम्बरोऽनिर्दशमनतिक्रान्तदशादिनमात्मनः स्वस्य तं सप्तरात्रे सम्पूर्णे निशीथ सूतिकागृहाज्जहार कृष्णस्य शिशुम् । विदितं तच्च कृष्णस्य देवमायानुवर्तिनः । ततो तनुगृहीतः स मृत्युना परितायरित्युक्त्वा दोर्भ्यामुत्क्षिप्य नगरं स्वं निनाय महासुरः । अनपत्या तु तस्यासीद्भार्या रूपगुणान्विता । नाम्ना मायावती नामेत्यादिना हरिवंशे परत्वादेतदनुरोधेन मीनलीलत्वं दाशदानादिकं ग्रन्थान्तरसंवादाच्च ग्राह्यमिति नानुक्तिदोषः । शत्रुं शातयितारं विदित्वा तं तोकमर्भकं हृत्वा । ननु सति भगवति सोऽरिष्टं गत्वा कथं हृतवानित्यत आह । कामरूपीति । कामेन स्वेच्छया रूपमस्यास्तीति कामेन हरीच्छया चेत्यपि स इत्यर्थः । ज्ञातैतत्कर्मापि कृष्णस्तूष्णीकस्तन्मारणार्थं कुमारविषय इति तात्पर्यम् । उदन्वत्युदधौ प्रास्य क्षित्वा गृहं स्वमगाद्ययौ ॥६॥ बलवान्मीनो निर्जगार । मत्वाऽपि मत्केतनकीर्तिव्यञ्जकः स्यामिति तदभिप्राय इत्यभिप्रायोऽस्य विभावनीयः । स मीनोऽपरैः सजातीयैरितरैर्मीनैः सह महता स्वेच्छाछेदनीयेन जालेनानायेन । जालं गवाक्षं आनाय इति विश्वः । आवृतो मत्स्यजीविभिर्दाशैर्गृहीतः ॥ ७ ॥ तमुपायनं शम्बराय कैवर्ताः । कैवर्तो दाशधीवरावित्यमरः । कैवर्तेत्यपि पठन्ति । दाशा उपाजह्रुः । सूदाः । सूदस्तु सूपकार इति विश्वः । महानसं पाकस्थानम् । अद्भुतं मीनं स्वधितिना कुठारशेषेण । परश्वधः कुठारः स्यात्परशुः स्वधितिस्तथेत्यभिधानम् । अवधन् अवाधन् अखण्डयन् । दोऽवखण्डन इति धातोः । द्वयोः कुठारः स्वधितिः परशुश्च परश्वध इत्यमरः ॥ ८ ॥ तदुदरे । उदरं च पुरो वर्तेतान्तः किञ्चित्किं वै तदेवैवमिति तद्विषयके संशये । उदरं संशयः प्रोक्तः परिनिष्ठा तु निश्चय इति तात्पर्योक्तेः । तदुदरे मत्स्यकुक्षौ बालं दृष्ट्वा सूदा मायावतीति रतिरेव शापात्तद्गृह एवावात्सीदतत्सङ्गा । यथोक्तं हरिवंशे नारदरौक्मिणेयसंवादे । सप्तरात्रे त्वसम्पूर्णे सूतिकाणरमध्यगः । वधार्थं शम्बरेण त्वं ह्रियमाणोऽस्त्युपेक्षितः । केशवेन महाबाहो देवकार्यार्थसिद्धये । एषा मायावती नाम भार्या वै शम्बरस्य तु । रतिं तं विद्धि कल्याणीं तव भार्यां पुरातनीम् । तव संरक्षणार्थाय शम्बरस्य गृहेऽवसत् । मायां शरीरजामस्य मोहनार्थं दुरात्मनः । रतेरुत्पादनार्थाय प्रेषयत्यनिशं तदेत्यादिना । तस्यै न्यवेदयत् ॥ ९ ॥ शङ्कितचेतसस्तस्य मायावत्या नारदो बालस्य तत्त्वं मुख्यं रहस्यं कामत्वमिति वा उत्पत्तिं मत्स्योदरनिवेशनमित्यादिकं सर्वमकथयत् ॥ १० ॥ सा च कामस्य पत्नी रतिः प्रतीक्षती प्रतीक्ष्यमाणा रुद्रोक्तं समयम् । यथोक्तं तत्रैव । रत्या प्रसादितो देवः कामपत्न्या त्रिलोचनः । इत्यारभ्य विष्णोर्मानुषदेहस्तु द्वारकायां भविष्यति । तस्य पुत्रस्तु ते भर्ता भविष्यति न संशयः । तद्गच्छ शम्बरगृहं भार्या मायावती भव । मायारूपप्रतिच्छन्ना शम्बरं मोहयिष्यसि । तत्र त्वमात्मनः कान्तं बालरूपं विवर्धय । प्राप्तयौवनदेहः स शम्बरं निहनिष्यति । ततस्त्वया सहानङ्गो द्वारकां वै गमिष्यति । रमिष्यति त्वया सार्धं शैलपुत्र्या त्वहं यथेत्यन्तेन । कामपत्नी प्रणम्याथ देवदेवमुमापतिम् । जगाम शम्बरगृहं कालस्यान्तं प्रतीक्षतीति च ॥ ११ ॥ सूपौदनसाधने पाककर्मणि शिशुं कामदेवं नारदोक्त्या बुद्ध्वाऽर्भके सदा स्नेहं चक्रे ॥१२॥ कृष्णस्यापत्यं कार्ष्णिः । नातिदीर्घेणाल्पीयसा कालेन रूढं यौवनं यस्य सोऽभवत् । रसायनमहिम्ना । यथोक्तं तत्रैव । रसायनप्रयोगैश्च शीघ्रमेनमवर्धयदिति । व्यधत्त पुत्रमुत्तमं मनोभवं पुरातनम् । चतुस्तनोर्हरेः प्रभोस्तृतीयरूपसंयुतः । ततस्तदाह्वयोऽभवत्स रुक्मिणीसुतो

बलो। पुरैव मृत्यवेऽवदत्तमेव शम्बरस्य हि। प्रजातमब्जजाङ्कजस्तवान्तकोऽयमित्यपि। स मायया हरेः सुतं प्रगृह्य सूतिकागृहात्। अवाक्षिपन्महोदधावुपेक्षितोऽरिपाणिना। तमग्रसज्जलेचरः स दाशहस्तमागतः। कुमारमस्य तूदरे निरीक्ष्य शम्बरे ददुः। विपाट्य मत्स्यकोदरं स शम्बरः कुमारकम्। न्यवेदयन्मनोभवप्रियाकरे सुरूपिणम्। अनङ्गतामुपागते पुरा हरेण साङ्गजे। वशं विरिञ्चिशापतो जगाम शम्बरस्य हि। पुरा हि पञ्चभर्तृकां निशम्य कञ्जजोदिताम्। जहास पार्षतात्मजां शशाप तां ततस्त्वजः। भवासुरेण दूषितेति सा ततो हि मायया। पिधाय तां निजां तनुं जगाम चान्ययासुरम्। गृहपिपासुरस्थिता निजस्वरूपतोऽसुरम्। न गच्छति स्म सा पतिं निजं समीक्ष्य हर्षिता। रसायनैः कुमारकं व्यवर्धयद्रतिः पतिम्। सुपूर्णयौवनोऽभवच्चतुर्भिरेव वत्सरैः। पतिं सुपूर्णयौवनं निरीक्ष्य तां विलज्जतीम्। उवाच कार्ष्णिरम्ब ते कुचेष्टितं कथं त्विति। जगाद साऽखिलं पतिं तदाऽस्य जन्म चागतिमित्याचार्योक्तकथाऽत्रानुसन्धेया। वीक्ष्यतीनां वीक्ष्यमाणानां विभ्रमं मनोविनोदम् ॥ १३ ॥ सा रतिः पद्मदलायिते ईक्षणे यस्य तम्। प्रलम्बौ बाहू यस्य तं नरलोके सुन्दरस्तं सव्रीडो यो हासः स चोत्तमो विभ्रमो विलासस्तद्युक्तानीक्षितानि पुनःपुनरवलोकनानि तैस्तदात्मभिरात्मधनैः प्रीत्या तं पतिमुपतस्थे ॥ १४ ॥ हे मातस्तव मतिरन्यथा कुत इति कार्ष्णिस्तां प्राह। तमेवान्यथाभावं विवृणोति ॥ मातृभावमिति। मे मम विषये मातृभावं तत्त्वमतिक्रम्य कामिनीव वर्तस इति। यद्यप्यवद्यावभेति निपातितः शब्दोऽवतेर्मप्रत्यये निष्पन्न इति व्याख्या कौमुद्याम्। अवमे नीचे। कामिनी सती वर्तस इति वा। वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरिति स्मरणात्। चतुर्थतात्पर्ये च। वधिमवधिमल्लोपेनेति ॥ १५ ॥ इति पतिगिरं श्रुत्वा रतिरतीवहृष्टा स्वरत्युपयोगिनीं कथां कथयति ॥ भवानिति। गृहात्। तथाऽप्यवमीयत इत्येवम् इत्यमरसुधायां व्याख्यातमुपायान्तरमेतदिति। कारागृहात्। अधिकृता बिवाहिता नीयतेति वा। अत्र महानसेऽधिकृता। अनेन दत्ताधिकारेति वा। रतिस्तन्नाम्नी पत्नी भवान्कामस्तद्रूपः ॥ १६ ॥ निर्दशं सप्तदिनकं तदुदराद्विपाटितमन्मत्स्यकुक्षेः ॥ १७ ॥ मायाशतविदं बहुमायाज्ञं मोहनादिभिर्मायाभिर्दुर्धर्षं दुर्जयं चात्मनस्तमिमं शत्रुं जहि ॥ १८ ॥ द्वारकावृत्तं किञ्चित्कथयति। गतप्रजा हृतत्वद्रूपापत्ययुक्ता ते माता रुक्मिणी कुररीव कुक्रोशयोषेव। गतप्रजेति वा विवत्सेति वाऽत्राप्यन्वेति। कुक्रोशःकुररी मत इति कोशः। पुत्रस्नेहाकुला। दृष्टान्तद्वयप्रदर्शनं गमनमनस्त्वरण इति मन्तव्यम्। आतुरा शोचति ॥ १९ ॥ एवं प्रभाष्य महात्मने स्मरणमात्रेण विद्याग्रहणपाटवमाहात्म्यवते। नन्ववमेयं वामा कथं विद्यामदादिति चेन्न। तस्या मूलकलेवरेणैव सत्त्वादेतस्य मानुषतनुषा युक्तत्वाद्युक्तं स्मारणमिति। सर्वा याः शम्बरसम्बन्धिन्यस्तां विनाशयतीति स तथा। सर्वा हिंसिकाश्च ता मायाश्च ता विनाशयतीति सा तं वा ॥ २० ॥ ननु च क्व वा द्वारका क्व च प्रसवः क्व वाऽयमसुरस्तथाऽपि ज्ञात्वोदधौ क्षिपन्नयं कथं बालमालक्ष्य न मम रिपुरयमिति जानन्हिंसितवानिति चेत्। भगवदुपेक्षणमेवैतदपेक्षणमूलमिति तदप्रतिभानसम्भवात्। ध्वजपातनादिकं तदमात्यतत्सेनाहननादिकं हरिवंशोक्तमनुसन्धेयम् ॥ २१ ॥ फलितमभिलपति ॥ स चेति। ओष्ठमधरम्। दन्तैरिति शेषः। अवष्टभ्यालम्ब्य विदस्येति यावत्। अवाच्चालम्बनाविदुर्ययोः। अवात्स्थम्भेरेतयोरर्थयोः सस्य षः स्यादिति षत्वम्। अनिदितामिति नलोपः। आक्षेपैराक्षिप्यते एभिरित्याक्षेपास्तिरस्कारास्तैः कलिं कलहं सञ्जनयन्समाह्वयत् ॥ २१ ॥ पदा हत उरग इव मूकस्य नासिकाप्रदर्शने यथा मर्षस्तथा गूढपात्वात्सर्पस्य पदा हतिरतीवकोपकारणमित्येवमुक्तिरिति ज्ञेयम्। सा स्त्री तु गतैवैयमेव मत्पाणिगृहीतीति गदापाणिरित्यनेन ध्वन्यते ॥ २२ ॥ वज्रनिष्पेषनिष्ठुरं वज्रयोः सतोरर्थो निष्पेषसङ्घर्षस्तज्जन्यो नादो लक्ष्यते तद्वत्कठोरस्तन्नादं व्यनददकरोत्। वज्रनिर्घोषेति पाठे स्फूर्जथुवन्निष्ठुरमित्यर्थः। अमरेऽपि स्फूर्जथुर्वज्रनिष्पेष इत्यपि पाठः। पिष्ऌ सञ्चूर्णने। घञ्। इदुपधस्येति कः। निष्पेषशब्दस्तदुत्थशब्दपर इति भानुः। स्फूर्जथुर्वज्रनिष्पेष इति हलायुधोऽपि ॥२३॥ प्रद्युम्न आपतन्तीं तां तदीयाम्। गदया स्वयाऽपास्य निरस्य पुनर्नदंस्तां गदां शत्रवे क्रुद्धः प्राहिणोत् ॥ २४ ॥ दैतेयीं मयदर्शितां तत्कृतां दैत्येभ्यो दत्तां मायां समाश्रित्य वैहायसो गगनग इति तत्सम्बन्धी। असुरः कार्ष्ण्यौ अश्ममयवर्षं निर्ममे ॥ २५ ॥ महारथो रौक्मिणेयोऽश्मवर्षेण बाध्यमानः सत्त्वात्मिकां महाविद्यां रतिप्रीतिसमीरितां निर्ममे ॥ २६ ॥ गौह्यकां च कौवेरी चेत्येवमाद्या मायाः शतशः प्रायुङ्क्त ताः स कार्ष्णिर्व्यधमत् ॥ २७ ॥ ताम्राणि श्मश्रूणि यस्मिंस्तत् सकिरीटं सकुण्डलं निशातमसिमुद्यम्य शम्बरस्य तच्छिरः कायाज्जहार ॥ २८ ॥ स्तुवद्भिः स्तोत्रं कुर्वाणैर्दिविजैः कुसुमोत्करैः पुष्पसङ्घैः कीर्यमाणः सन् अम्बरचारिण्या भार्यया विहायसा गगनमार्गेण पुरं द्वारकां नीतः ॥ २९ ॥ ललनाशतं तद्बहुसहस्रं तेन सङ्कुलमन्तःपुरवरं गगनादवरुह्य विद्युता तटिता सह बलाहको मेघ इव पत्न्या सह विवेश। गगनेऽततीति गगनादिति प्रथमा वा ॥ ३० ॥ उत्तरश्लोकेनान्वयः। स्त्रियोऽन्तःपुरस्थाः। जलदश्याममित्यादीनि विशेषणानि कृष्णसारूप्यं साधयन्ति भ्रमसाधनानीति ज्ञेयम्। नीलानां वक्त्राणमलकानामालयः पङ्क्तयस्ताभिरलङ्कृतं मुखाम्भोजं यस्य तं कृष्णं मत्वा लज्जया तत्र तत्र निलिल्युर्निलीना अभवन् ॥ ३१–३२ ॥ ईषद्वैलक्षण्येन किञ्चिद्विलक्षणलक्षणवत्तया शनैर्मन्दं स्वैरं वोपधार्य नायं श्रीकृष्ण इति निश्चित्य स्त्रीरत्नं स्त्रीरत्नेन सहितं प्रमुदिताः सत्य उपजग्मुः समीपमापुः ॥ ३३ ॥ तत्र तत्समये योषित्परिषदि वा। असितापाङ्गी नीललोचना वैदर्भी वल्गुभाषिणी रुक्मिणी स्नेहेन स्रुतौ पयोधरौ कुचौ यस्याः सा। पयोधरः स्यात्कुचकोशकारकेति विश्वः। नष्टं सूतिकागार एवादर्शनं गतं स्वसुतमस्मरत्ससमार ॥ ३४ ॥ अयं नरवैडूर्यः कः कमलेक्षणः कस्य पुत्र इति शेषः। कया कामिन्या गर्भे धृता इयं कामिनी काऽथ केनोपायेन लब्धेति तर्कयन्ती तत्प्रकारेणातर्कयदित्याह ॥ ममेति। नष्टो मृतः सूतिकागृहान्नीतो

यदि कुत्रचिज्जीवति चेदेतत्समवयोरूपो भवेत् ॥ ३५–३६ ॥ परश्चेन्नैवंरूपः स्यादित्यूहयति। अनेन शार्ङ्गधन्वनः सारूप्यं तु शब्द ईषद्व्यत्याससूचकः। प्राप्तं तदेव देवसारूप्यं देवी विविच्य वक्ति ॥ आकृत्येत्यादिना ॥ ३७ ॥ यो मे मया गर्भे धृतः स एवायं भवेत्। नूनं निश्चयेन। कुत इत्यत आह ॥ अमुष्मिन्निति। अधिका प्रीतिर्भवति न भवेदन्यत्रैवमिति भावः। मे वामो भुजः स्फुरति। अन्यथैवं मङ्गलसूचकं शकुनमपि न स्यात् ॥ ३८ ॥ वैदर्भ्यां रुक्मिण्यामेवं मीमांसमानायां विचारयन्त्यां सत्यां देवकीवसुदेवाभ्यां नारदेन च महात्मनाऽन्यैश्च यादवश्रेष्ठैश्च सहाविशत्। तदन्तःपुरमिति शेषः। विदितार्थोऽपि जनार्दनस्तूष्णीमज्ञातैतत्क इवास ॥ ३९–४० ॥ नारदः शम्बराहरणादिकं शम्बरेण दैत्येनाहरणमपहरण एवादिर्यस्य तत्सर्वं वृत्तम्। शम्बरं जलं प्रत्याहरणं क्षेपः शम्बराज्जलादाहरणं गिलनं मीनेनैवेति शम्बरेणानन्तरं शंबरान्मत्स्यादाहरादिकमिति वा। शम्बरं सलिले वित्ते लोध्रवतविशेषयोः। शम्बरो दैत्यहरिणमत्स्यशैलजलान्तर इति विश्वः। अकथयद्यत्तन्महदाश्चर्यं महतामाश्चर्यमिति वा। कृष्णमन्तःपुरयोषितः ॥४१॥ देवकीवसुदेवौ कृष्णरामौ च तथा स्त्रियोऽन्याश्च रुक्मिणी च तौ दम्पती परिष्वज्य मुदं ययुः ॥४२॥ द्वारकौकसो दूरागारा नष्टं प्रद्युम्नमायातमाकर्ण्य बालो मृत आयातश्चेद्यथा तथाऽऽयातः। अहो आश्चर्यम्। दिष्ट्या परमसुखमित्यब्रुवंश्च ॥ ४३ ॥ नारीणां विभ्रमं जनयामासेति यदुक्तं तदित्थं चेदपि नैतस्मिन्स्मरेच्चित्रं तदिति सहेतुकमाह ॥ यमिति। यं दृष्ट्वा तन्मातरः कृष्णपत्न्यः पितृसरूप इति कृष्णसमानरूप इति निजेशे स्वस्वामिनि कृष्णे भावो मनो यासां तास्तथा। स्वरमणारमणेच्छवो मुहुः पुनर्मनसिजार्द्रं च तदुधृच्चेतना अभवन्। तच्चित्रं न खलु निश्चयेन। तत्र तन्त्रं रमास्पदबिम्बभूते रमाया आस्पदं हरिस्तस्य बिम्बभूते प्रतिबिम्बे। बिम्बं फले बिम्बिकायाः प्रतिबिम्बे च मण्डल इति विश्वः। आस्पदेति। स्मरे साक्षादक्षविषये यत्स्मरणादेवास्मरणं शरीरे नारीणां भवति किं वक्तव्यमेवं चेदिति भावः। अन्यनार्यः कामे कमनीयेऽक्षविषये उरुर्नानाविधो भावोऽभिप्रायो वा चेष्टो वा मनो वा यासां ताः। भवेयुरिति किं वक्तव्यमिति भावः। वैलक्षण्येन न नाथ इति मतिमतीनां तथा नारदोपदिष्टवृत्तानां समाश्लिष्टकार्ष्णीनां कृष्णानां तन्मातॄणां एवंविधमोहस्यानूहास्पदत्वादप्रत्यवायश्च तासामित्यर्थो न क्लिष्ट इति मन्तव्यम्। भावः स्वभावाभिप्रायचेष्टासतात्मजन्मसु। क्रियालीलापदार्थेषु बुधजन्तुविभूतिष्विति विश्वः ॥ ४४ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धेऽष्टषष्टिरध्यायः ॥ १०—६८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ। हरिसमताममतानां दशेदृशी धुरीति विवरीतुं तथा मन्तुः पौड्रकवासुदेवस्य यादववासुदेवेन कृतां क्रियां वक्ष्यत्राध्याये। तत्रादौ बदरिकाश्रमं गतवति गरीयसीनगरी गृहीतुं सुशकेति मन्वानो द्वारकामगादित्याह। पौड्रक इति। तस्मिन्काले बहुसैनिको बहवः सैनिका यस्य सः। कृष्णेन रहितां विदित्वा वृष्णिनिलयां निशि रात्रौ निरुद्ध्यार्दयामास। तं पौण्ड्रकं कामपालो हलायुधो वसुदेवश्चोद्धवश्चादी येषां ते ॥ १–२ ॥ हे कौरव्य। अतिथिं काले यथा तथाऽऽयान्तं तं प्रति शरीरानिति शेषः। अर्पयामासुः ॥ ३ ॥ कः किं कुलः क्व वा राजा कस्य तनयो ब्रह्मन् एतत्सर्वं मे वदस्व ॥ ४ ॥ अपुत्रः पुत्ररहितः काशीति नगरनाम। सुतनुरिति संज्ञिता ताम्। राज्यमेव शुल्कं यस्याः सा ताम्। वसुदेवाय प्रायच्छद्ददौ ॥ ५ ॥ तत्र सुतनौ पौण्ड्रको नाम कुमारो जज्ञे उदभूत् ॥ ६ ॥ वासुदेव इति नाम चैतस्मादित्याह। वसुदेवसुतत्वादिति। शब्दितः सञ्ज्ञातशब्दस्तस्मिञ्ज्ञाते सति शुल्कत्वेन सङ्कल्पितं राज्यं तस्मिन्पौण्ड्रके समारोप्य। तदारोपणं न शून्यीकृत्येत्याह सकोशबलवाहनमिति।

अनन्तरं कंसावरजां देवतोपमां देवकीमुवाह परिणिनाय ॥ ७–८ ॥ कदाचिदपि करवीरपुरीमपि न प्रायात्। तां तुनेति किं वक्तव्यमित्यर्थसूचकोऽपिः ॥ ९ ॥ मातुः सुतनोः सापत्यं सपत्नीसाहित्यम्। किञ्च पुनरनागमनाद्वसुदेवस्य न गर्भनिभृता मातुरिति स्वस्य भ्रातृकत्वं चासह्यं सोढुमशक्यम्। स्मरमाणः स्मरन्। यदूननिशमुद्वेजते उद्वेयति। विमृद्य मर्दयित्वा बलभद्रेण शैनेयेन चेत्युभाभ्यां निर्जितः पराभूतः ॥ ११ ॥ निहता अनेकसाहस्रहयकुञ्जरसैनिका यस्य स सन्। वाराणसीं पुरीं स्वां परशर्वर्यामुषःकाले जगाम ॥ १२ ॥ शर्वर्यां प्रभया सूर्यप्रभयाऽतायां गतायां तार्क्ष्यं पितापुत्रयोर्नामिदं गरुडम्। अभिवर्णितवृत्तान्तोऽभिवर्णितो रामादिभिर्वृत्तान्तः पौण्ड्रकवार्ता यस्य सः। सभां सुधर्माम् ॥ १४ ॥ तिष्ठतु ज्येष्ठ इति कृष्णे तूष्णीके सति। तदायुरासन्नमिति मतिरियमुदभूतस्येति वक्ति। कदाचिद्दूतं कृष्णाय प्राहिणोत् प्रेषयामासेति। प्रह्ले इति पिङ्गलनागोक्तेः प्रोत्तरको यकारो लघुः सन् पौण्ड्रककार्यलाघवं सूचयतीति ज्ञेयम् ॥ १५ ॥ इति बालैर्मूर्खैः प्रस्तोभितो वञ्चितोऽपि भवान्स्वात्मानमच्युतं मेने जानाति। त्वं देवशक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविरादधेऽज इत्युदाहृत्य ऋग्भाष्यटीकायां मध्यमपुरुषादिनियमो नास्तीत्युक्तेरनियमेन इत्यन्वयो वा। विस्तृतं चास्माभिरनुसन्धेयम्। बालालाप एव मूलं तवाच्युतनाम न स्यादिति भावः ॥ १६ ॥ राजसन्देशमज्ञपौण्ड्रकाज्ञाम् ॥ १७ ॥ भूतानामुपर्यनुकम्पार्थं तां कर्तुं मिथ्याभिधां मुधानाम त्यज ॥ १८ ॥ अस्मच्चिन्हान्यस्माकं चिन्हानि शङ्खचक्रादीनि। अभीतवन्मोह्यबन्मूढताया बिभर्षि। तानि त्यक्त्वा मा मां त्वं शरणमेहि नो चेन्ममाहवं युद्धं देहि ॥ १९ ॥ अल्पमेधसः कत्थनमफलपर्यवसायिभाषणम्। उग्रसेनाद्याः सभ्याः सभायां साधवो जहसुः ॥ २० ॥ परिहासः

कथम् । अनु तदनन्तरं यैः कल्पितैरल्पमते विकत्थसे तानि कृत्रिमचिन्हान्युत्स्रक्ष्ये त्याजयिष्ये ॥ २१ ॥ हे अज्ञ । तव मुखं कङ्कगृध्रबकैर्वृतं विधाय यत्र शयिष्यसे तत्र शुनां सारमेयानां शरणं भविता ॥२२॥ तदाक्षेपं तेन कृष्णेन कृतमाक्षेपं तिरस्कारगिरं स्वामिने पौण्ड्रकायाहरन्काशीं प्रायात् ॥ २३ ॥ पुरात्काश्याः ॥ २४ ॥ गरुडप्रतिनिधितया सुवर्णकृतसुपर्णे । चतुर्भुजतां दर्शयितुं सुवर्णबाहुयुगलम् । शङ्खार्यसिगदाशार्ङ्गम् । सेनाङ्गत्वादेकवद्भावः । दधच्चासौ श्रीवत्सलक्षितश्च तम् । श्रीवत्सार्थे दग्धवक्षः स्थलाऽभूदित्यादेर्दाहेन तत्र कालिमेति मन्तव्यम् ॥ २६ ॥ आमुक्तानि कण्ठे स्थापितानि माल्याभरणानि यस्य तम् ॥ २७ ॥ तमात्मनाऽसाम्यं न विद्यते साम्यं यस्य सोऽसाम्यः स नेति नासाम्यः साम्यवान् । आत्मना नासाम्यस्तम् । पदमेकम् । वेमं कृत्रिमाकारमास्थितम् । रङ्गगतं नटं यथा तथा तं कृत्रिमं दृष्ट्वा भृशं हरिर्जहास ॥ २८ ॥ तं कृष्णं शरैः । यद्यपि शरशब्दो बाणस्येवोदकस्यापि वाचक इत्येकेनैव शैलशैलधरपक्षे बाणैरुदकैरित्यावृत्त्या तन्त्रेणवार्थसम्भवेऽम्भसित्यतिरिक्तं सद्यथोदकमकिंचित्करं गिरौ पतितं तयाऽरावपि पतितं न बबाधिर इति लिङ्गेन च सह ध्वनयामासेत्यवसेयम् ॥ २९ ॥ आस्थायेति गजं रथांश्चेति द्वितीयान्तपदेरन्वेति । प्राहरन् प्राहरन् प्राहरन्नित्यपि सुपठम् ॥३०॥ अपरः सोऽपि काशीशः पार्ष्णिग्राहः पृष्ठरक्षरितसृभिरक्षौहिणीभिः सह ॥ ३१ ॥ प्रभाज्वलन् हुतभुगग्निः । युगान्ते प्रलये ॥ ३२ ॥ आयोधनम् रणधरणीम् । रथाः स्यन्दना वाजिनोऽश्वाः कुञ्जरा गजा द्विपदः पदातयो गर्दभा उष्ट्राः क्रमेलकाः । मनस्विनां युद्धोत्थावतां मानवहमभिमानप्रापकम् । इषुणेत्यनेनैकेनैवानेकेषामवखण्डनं सूचयता भगवत्सामर्थ्यवैपुल्यं द्योतितं भवति । भूपतेर्हरस्योल्बणमाक्रीडं क्रीडास्थानं श्मशानमिव बभौ ॥ ३३ ॥ अथ दर्शनानन्तरं दूतवाक्येन वासुदेवोऽवतीर्णोऽहमित्यादिना मामाहृतान्यस्त्राणि ते समक्षमुत्सृजामि त्वया यन्मृषा कृतं मिथ्यात्वेन कृतमभिधानं त्याजयिष्येति शेषः । मां स्वयं त्याजयिष्ये । स्वार्थे वा णिच् । त्यक्ष्यामि । अद्य ते त्वां शरणं यामि । कदेदं सर्वमित्यत आह । यदीति । त्वया सह संयुगं यदि नेच्छामि तदेदं मदनुष्ठेयमिति भावः । इति क्षिप्त्वा तिरस्कृत्य शितैर्बाणैस्तं विरथीकृत्य रथाङ्गेन चक्रेण ॥ ३६ ॥ काशिपतेरेतद्देशैकदेशेशस्य पत्त्रिभिः शिर उत्कृत्यानिलः पद्मकोशमिव काशिपुर्यां तन्नगर्यां न्यपातयत् ॥ ३७ ॥ एवं मत्सरिणं मात्सर्ययुक्तं ससखं मित्रकाशीशसहितम् । अर्पष्टच् । अथवा अच्प्रत्ययवान्निवति अजिति योगविभागादच्प्रत्ययः । यद्वा समानं स्वं स्वसुखेन सुखं यस्य स सखः । मित्रमिति यावत् । तेन सहितः ससखः । तं विराजते पद्मनाभसधर्म इत्यादेः । हत्वा सिद्धैर्गीयमाना कथैवामृतं तद्वत्तृप्तिकरी यस्य सः, द्वारकामाविशत् ॥ ३८ ॥ किमिदमिति दूतो विलोक्य कस्य वेदं वक्त्रमिति समीपमुपेत्य जनाः संशयिरे संशयाञ्चक्रुः ॥ ३९ ॥ काशिपते राज्ञस्तच्छिर इति ज्ञात्वा नाथ नाथेति । नाथ अथ न किल त्वमित्युपा द्रवन्निति वा ॥ ४० ॥ पितुः संस्था मरणं तदनन्तरं क्रियमाणं विधिमावश्यकं कर्म कृत्वा पितृहन्तारं निहत्य पितुरपचितिमनृण्यम् । अर्चनायामपचितिप्रक्षये निष्कृतौ व्यय इति च ॥ ४१ ॥ आत्मना मनसा सोपाध्यायः सपुरोहितः परमेण समाधिना महेश्वरमर्पयामास ॥ ४२ ॥ अविमुक्ते काशीनामके क्षेत्रे प्रीतो भगवान्हरेर्वरमदात् तद्दानमनस्कोऽभूदित्यर्थः । स सुदक्षिणो बधोपायं वरं वव्रे । उपायमित्यनेन तन्मात्रविषयो वरो न वधविषय इति ध्वनयति । उपायः स्वयमपायवान्नेति नियमादर्शनात् ॥ ४३ ॥ सुदक्षिणं प्रति नेतरानलपरिचरणं कुर्विति वक्तव्यमित्याह । महादेवो दक्षिणाग्निमन्वहार्यपचननामानं परिचरेतीरयामासेति भावः । सहर्त्विजः । ऋत्विक् शब्दपर्यायोऽयमृत्विजशब्दः । तैर्ब्राह्मणैः सह दक्षिणाग्नि परिचरेति वा । अभिचारविधानेनाभिचारिकेणाथर्वमन्त्रविधानेन । सुदक्षिणा शुशुक्षणिः प्रम्यैर्मद्दूतैर्वृतः सन् । अब्रह्मण्यैर्ब्राह्मणाचारविरहितैः प्रयोजितः सन्वितस्तदुपरि विसृष्टश्चेतव सङ्कल्पं साधयिष्यतीति हरेणादिष्टः कृष्णायाभिचरंस्तमुद्दिश्याभिचारिकमाचरंस्तथा शिवशंसितप्रकारेण चक्रे । अनेन किंवदन्त्या कृष्णो ब्रह्मण्य इति मतिस्तस्येति स्फार्यते । किञ्च चक्र इत्यात्मनेपदेन तत्फलं तद्गामीति सूच्यते ॥ ४४–४५ ॥ ततो मन्त्रतः परिचरणानन्तरं मूर्तिमान्साकारः । तप्तताम्रवद्विद्यमानानि शिखाक्ष्मश्रूणि यस्य सः । अङ्गारस्योद्गारिणीव मती लोचने यस्य सः ॥ ४६ ॥ दंष्ट्रोग्रभृकुटीदन्तैः कठोरं क्रूरमास्यं यस्य सः । स्वजिव्हया रक्ते ताम्रे सृक्किणी आलिहन् । तिस्रः शिखा अग्रभागा यस्य तत्त्रिशूलमिति शेषः । ज्वलद्विधुन्वत् ॥ ४७ ॥ तालप्रमाणाभ्यां पभ्द्यां धरणीतलं कम्पयन् भूतैर्हराज्ञप्तैर्दिशः प्रदहन् द्वारकामभ्यधावत् ॥ ४८ ॥ वनदाहे मृगा यथा तथा । सर्वे द्वारकौकस आभिचारदहनं विलोक्य तत्रसुः । भीता अभवन् ॥ ४९ ॥ सभायामक्षैः पाशैः क्रीडन्तं भगवन्तम् । पुरीं प्रदहतो वन्हेस्त्राहि त्राहि । धात्वन्तररूपम् । त्रायस्व त्रायस्वेति भयातुरा लोकेशमवदन् ॥ ५० ॥ जनवैक्लव्यं श्रुत्वा स्वानां च साध्वसं च दृष्ट्वा मा भैष्टाहमविताऽस्मीति धरणीशः प्रहस्याह ॥ ५१ ॥ स विभुः सर्वस्यान्तर्बहिश्च व्याप्त इति माहेश्वरीं हरसम्बन्धिनीं कृत्यां विज्ञाय तद्विघातार्थं तस्या विनाशार्थं पार्श्वस्थं चक्रं सुदर्शनमादिशत् ॥ ५२ ॥ सूर्यकोटिप्रतिमं कोटिसूर्यसमप्रभम् । जाज्वल्यमानं प्रभयाऽनलस्यापि प्रभा यस्य तत्सुदर्शनं भक्तानां मुकुन्दस्य चक्रं स्वतेजसा खमाकाशं ककुभो दिशो रोदसी द्यावापृथिव्यौ झडित्यपूरयत् ॥ ५३ ॥ रथाङ्गपाणेरस्त्रौजसा प्रतिहतो विभग्नमुखो निवृत्तः सन् । स्वकृतः सुदक्षिणकृतोऽभिचारः कृत्यानलो वाराणसीं प्रति समेत्य सन्निहितं सुदक्षिणं समदहत् ॥ ५४ ॥ तदनु सुदक्षिणदहनमनु विष्णोश्चक्रमट्टान्यन्यानि सभाश्चालयाश्चापणाश्च तैः सहिता ताम् । अट्टशूला इति विराटपर्वव्याख्याम् । अट्टमन्नं शियो वेदशूलो विक्रय उच्यते । केशो भग इति प्रोक्त इत्युक्तेः । अनेन नाट्टालकाष्टान्यतरातिरेकः । गृहाट्टालक-

गोपुराट्टालकभेदेन भेद इति त्वगतिका गतिः । सगोपुराट्टालककोष्टतोरणामिति गतम् । वरूथं मन्दिरं रथगुप्तिस्थानम् ।।५५।। सुदर्शनं पुनरक्लिष्टकर्मणः कृष्णस्य पार्श्वमुपाष्ठित् । सकर्मकत्वान्नोपादिति प्रवर्तते ॥ ५६ ॥ समाहित इति श्रावकश्रोतृविशेषणम् । उत्तमश्लोकस्य विक्रमो यस्मिस्तदेतच्चरितं श्रावयेच्छृणुयाच्च सर्वपापैः स प्रमुच्यत इति पृथक् पृथगन्वयः । उक्तमनूद्य फलमभिलपति । तावुभाविति । ब्रह्महत्यादिभिः सहितेभ्यः सर्वपापेभ्यः । तादुभावात्मानं विमुच्य विमोच्य देहावसाने सति विष्णुलोकं प्रयास्यतः । सर्वपापेषु तद्वत्सु इभ्यः श्रेष्ठश्च । सर्वपापेभ्यः सर्वपापश्चेति ताबुभाविति वा । अतिपापिनावित्यर्थः ।। ५७–५८ ।।

इति श्री भागवतटिप्पण्यां सत्यधर्मकृतायां दशमे उत्तरार्धे एकोनसप्ततितमोध्यायः ।। १०–६९ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ।। श्रीकलत्रे लोकमनुकर्तरि श्यमन्तपञ्चकं गन्तुमुद्यते सति तत्रायन्खरकिरणोपरागहेतोर्ग्रामीणा अपि सकलाः सबालवृद्धा इव नानाजनपदजना लोकनाथावलोकाोत्सुका 'अपि समागुरिति निरूप्यतेऽत्राध्याये । तत्रादौ तत्क्षेत्रमाहात्म्यं तत्कर्तृगुणांश्चाह ।। अथेति । एकदा कदाचिद्रामकृष्णयोर्द्वारिकायां वसतोः सतोः । कल्पक्षये यथा प्रभाकरप्रभाप्रतिबन्धस्तथेति महान् । अनेन सर्वग्रासो ध्वन्यते । सूर्योपरागः सूर्यग्रहणमासीत् ॥ १ ॥ तमुपरागं मनुजा ज्ञात्वा सर्वशः पुरस्तादेव भगवदागमादग्र एब श्यमन्तं पञ्चकं श्यमन्तनामकह्लदपञ्चकोपेतं कुरुक्षेत्रं श्रेयोविधित्सया श्रेयस्कृतीच्छया जग्मुः ॥ २ ॥ कथं तत्पञ्चकं भवनमित्यतस्तत्प्रपञ्चयति ॥ निःक्षत्रियामिति । निर्गताः क्षत्रिया यस्याः सा तां महीं कुर्वंच्छस्त्रभृतां वरो रामो भार्गवो नृपाणां स्वहतानां रुधिरौघेण रक्तप्रवाहेण यत्र महाह्लदान्पञ्च चक्रे ॥ ३ ॥ कर्मणाऽस्पष्टोऽपि तदबद्धोऽपि भगवान्रामोऽन्यः परतन्त्रो यथाऽघानां पापानामपनुत्तिरपहृतिस्तस्यै यजति । तथा लोकस्य सङ्ग्रहाय यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन इत्यादेर्लोकं शासितुमीजे ॥ ४ ॥ तस्मिन्काले महत्यां तीर्थयात्रायां भारतीर्भारत्यस्तत्खण्डगाः प्रजा आगुः । षोडशसहस्रमहिषीणां शिबिका नरवाहनानि ताभिरन्वितः ॥ ५ ॥ वर्षमाहस्रामित्यनुव्याख्यावसरे सहस्रं परिमाणमस्येति साहस्रः सङ्घस्तदस्य परिमाणमित्यर्थे शतमानविंशतिकसहस्रवसनादणित्यणो विधानादिति सुधाभिधानादण् । विस्तरस्तु ननु सहस्रशब्दादित्यारभ्य तथा च सहस्ररूपपरिमाणोपाधिके सङ्घरूपेऽर्थे सङ्ख्यावाचिनः सहस्रशब्दसङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेष्विवत्यनेनाण्प्रत्यये णित्वादादिवृद्धौ यस्येति चेत्यकारलोपे साहस्रशब्दनिष्पत्तिरुक्तं भवतीत्यन्तया वाक्यार्थचन्द्रिकया ज्ञेयम् ॥ ५ ॥ वारकान्तारूढकरेणुभिः कदम्बैः समूहैः प्रियासार्थे रुक्मिण्यादिसङ्घैश्च संयुतः ॥ ६ ॥ स्वं स्वसम्बन्धि पापं क्षपयिष्णवः ॥ ७ ॥ शठादयो वज्रादय आहुकं कृतवर्माणं च पुररक्षणे संस्थाप्य ॥ ८ ॥ ते शठाद्या देवेष्वपि ख्यातैर्हयैस्तरलप्रभैस्तरलानां हारमध्यमणीनां प्रभा येषां ते तैः । तरलं चञ्चले सङ्गे हारमध्यमणावपीति विश्वः । एतेन हारोऽपि तेषां कण्ठे वर्तत इत्यसूचि । अभ्राभैर्धवलानां श्यामलानां च जलदानां भावात् गजा अपि सिना असिताश्च ज्ञेया नृभिः । विद्याधराणां द्युः प्रकाशो येषां ते तैः ॥ ९ ॥ सहशलाद्या महाभागाः काञ्चनमालिनश्च पथि व्यरोचन्त ॥१०॥ कृष्ण कृष्णेति गोविन्देति पूरयन्नादाः पूरयन्तश्च तैः नादाश्च तैः । काः पूरयन्तस्ते नादा इत्यत आह ॥ ककुभ इति । एकदेशान्वयमात्रं सोढव्यम् । एकवचनं बहुवचनार्थं वा ॥११॥ त्रैलोक्यविश्रुता भवनानि गृहान् ॥१२॥ महीभृतां राज्ञां विचित्ररूपापि नानावर्णानि ॥ १३ ॥ नृपानेक इति पदम् । नृपाश्च तेऽनेके चानेकनृपा इत्यर्थः । वर्णनिन्दितास्तास्द्ब्राह्मा: ॥ १४ ॥ सोपाध्यायाः साचार्याः स्नातका दण्डोदककमण्डलुधरा गृहमेधिनः पञ्चयज्ञाधिकारिणः ॥ १६ ॥ कुब्जास्त्रिवक्र नाम्नाः खर्वाः पण्डका षण्डा व्यङ्गाः करादिविकला जडा मूर्खा वोन्मादिनो वा कर्मक्षयपरीप्सवस्तमिच्छन्तः ॥ १६ ॥ रेणुभी रञ्जितानि मस्तकानि येषां ते तथा । कटकाङ्गदकेयूरकुण्डलैर्भूषणं येषां ते ॥ १७ ॥ कलत्रैर्भार्याभिः सह खेचरा गन्धर्वा इव तत्र तत्समये उपोष्योपोषणं कृत्वा ॥ १८ ॥ वासश्च स्रजः पुष्पाणां रुक्माणां माला आसां सन्तीति ता धेनूः । रामह्लदेषु पञ्चसु पुनराप्लुत्य ॥ १९ ॥ कृष्णे नो भक्तिरस्त्विति द्विजाग्रेभ्यः स्वन्नं षड्समन्नं षड्समन्नं ददुः । तदनुज्ञातास्तैर्ब्राह्मणैः ॥ २० ॥ स्निग्धा निबिडा छाया येषां ते च तेऽङ्घ्रिपाश्च तेषामङ्घ्रयः । भुक्त्वोपविविशुः । सुहृदश्च सम्बन्धिनश्च तान्नृपांस्तत्रागतान्ददृशुः ।। २१ ॥ मत्स्यादयो देशास्तद्भवान् ॥ २२ ॥ परान्परपक्षीयांश्चिरं बहुकालमुत्कण्ठिता उत्कलितोपेताः ॥ २३ ॥ रंहो वेग उत्फुल्लानि च तानि वक्त्रसरोरुहाणि च तेषां श्रीः शोभा येषां ते । अन्योन्य परस्परं गाढमाश्लिष्य नयनैः स्रवन्ति गलन्ति जलानि येषां ते । हृषत्यस्त्वचो येषां ते । सरोमाञ्चा रुद्धगिरस्तोषातिशयनिरुद्धवाचो मुदं ययुः ॥ २४ ॥ स चापला ललनास्वभावश्चापलमपाङ्गे तत्सहिता दृशो नेत्राणि यासां ताः । अभिरेभिरे आलिलिङ्गिरे । आलिङ्गनमङ्गीमाह ।। स्तनैः स्तनानीति ॥ २५ ॥ यवोयैर्यवीयाभिः स्वागतमित्युक्त्वा कुशलं पृष्ट्वा मिथः कृष्णकथाश्चकुः ।। २६ ।। भ्रातॄन्वसुदवादीन् स्वसॄर्भगिनीस्तत्पुत्रान्स्वस्रीयान् । पितरौ कुन्तिभोजं तद्भार्या च सङ्कथया परस्परकर्तया शुचः शाकांस्तत्प्रापकाकारभेदाच्छुचय इत्युक्तिः । जहौ तत्याज ॥ २७ ॥ सा वार्ता केत्यतः कार्तयति ।। आर्येति । भ्रातः कनिष्ठभ्रमं पितृव्यादिभ्रमं च वारयितुं त पदे । आत्मानं मामकृताशिषमकृताऽसम्पादिताऽऽशीरभिमतार्थो यथा तां मन्ये । आत्मपदविवक्षया तामिति वा । तत्र तन्त्रमाह ॥ यदिति । यत

आपत्स्वनेकास्वागतास्वपि मद्वार्तां नानुस्मरथेति । दुर्वृत्तानां किमिदं त्वदस्मरणं चित्रमित्यत आह ॥ सत्तमा इति ॥ २८ ॥ लोके लोकानां दैवहीनानां दशेदृशीति भ्रातः कातर्यात्स्थापितः शन्दो न तवोपरीति वक्ति ॥ सुहृद इति । एते स्वजनमपि तं नानुस्मरन्ति । यस्य स्वजनस्य दैवमदक्षिणमसहकारि । अहं हीनदेवा यूयं किं करिष्यथेति भावः ॥ २९ ॥ आदौ स्वापन्ना वक्तव्य उपद्रुतेष्विति पर्यायतस्तदुदाहृतदैवपदार्थं विवृण्वंस्तां समाधाय स्वापदमपि वक्ति द्वाभ्याम् ॥ अन्बेति । मातर्भगिनि । अस्मानासूयेथा अस्मभ्यमसूयां न कुरु । देवक्रीडनकान् देवस्य क्रीडनार्यैरिति तत्क्रीडासाधनभूतान्नरान्हि यतस्तदेव देवक्रीडनवत्त्वं सामान्यत आह । ईशस्य हरेर्वशे स्थितो लोकः कुरुते तथा कार्यते कर्माणि । ईशेन यथा कार्यते तथा कुरुत इति वा । अतोऽत्र न वयं स्वतन्त्रा इति भावः ॥ २० ॥ स्वसः कंसप्रतापिता वयम् । तत्रैव सर्वे सुहृदश्च दशदिशो याता इति भिन्नवाक्यतया योजनीयम् । अन्यथा वसुदेवस्यापि देशान्तरगमनापत्तेः । तस्य चादर्शनात् । एतर्हीदानीमेव पुनस्तदेव स्थानं दैवेनासादिताः स्वसाम्यं प्रापिता वयमपि बहुकष्टिन इति न विचारावसर इति भावः ॥ ३०–३१ ॥ नृपा देशान्तराधीशा अच्युतस्य दर्शो दर्शनम् । वायवाहि दर्शतेत्यृग्भाष्ये दर्शितस्तत्तद्दृष्टित्वात् । दृशोर्भावे घञि दर्शो दर्शनमिति तट्टीकायां चोक्तेः । तज्जनितो यः परमानन्दस्तेन निर्भराः पूर्णास्तस्य निर्भरो नैर्भर्यं येषां ते वा ॥ ३२ ॥ ससुता गान्धारो । अनेन पित्रननुरूपता पुत्राणां ध्वनयति । अन्यथा ससुतोऽम्बिकापुत्र इति वदेदिति ध्येयम् । सदारा द्रौपद्यादिभार्यासहिताः ॥ ३३ ॥ भीष्मको रुक्मणीपिता । पिता च नग्नजिन्नीलायाः ॥ ३४ ॥ दमघोषः शिशुपालपिता विशालाक्ष इति यथार्थ विशेषणं वा कस्यचिद्राज्ञः स्वतन्त्रं नाम वेति निर्णये न नामकरणसमयवर्तिनो वयम् । ससुता बाल्हिकादयो राजानः ॥ ३५ ॥ शौरेः श्रीनिकेतनं सम्पदाश्रयं रमाश्रयं वा वपुः सस्त्रीका वीक्ष्य विस्मिता अभवन्निति शेषः ॥ ३६ ॥ सम्यक् स्वस्वयोग्यतानुसारेण प्राप्तं समर्हणं येषां ते स्वयं तुष्टा ये मुदा युक्तास्तान् कृष्णपरिग्रहान् भार्याः प्रशशंसुः । भगवदङ्गसङ्गोऽङ्गनानामहो इति पारोक्ष्येणास्तुवन्परिजानन् । परिग्रहः परिजने पत्न्यां स्वीकारमूलयोरिति विश्वः ॥ ३७ ॥ भोजपते उग्रसेन इह नृणां मध्ये यूयं जन्मभाजः । तत्र निमित्तमाहुः । योगिनामपि दुर्दर्शं कृष्णमसकृद्बहुवारं निरन्तरमिति यावत् । पश्यथेति यदिति ॥ ३८ ॥ अधुनाऽपि मधुनाथदर्शनादिभाज इति जन्मभाज इति भोजराजादीन्प्रति राजानो वदन्ति ॥ यन्निःसृतमिति । तुरेवार्थे । तुः पयः सः समयस्य च किञ्चित्प्रमितविशेषसूचको वा । तन्महत्त्वस्यागतगीतारूपं च यन्निःसृतमुत्पन्नं च व्यक्तं जगत्पुनातीत्यावृत्त्या तन्त्रेण वाऽन्वयः । तथा पादावनेजनपयश्च गङ्गारूपं तथा तद्वचश्च । गङ्गा गङ्गेति यो ब्रूयादित्यादेस्तद्व्याहरणं च पुनाति । कालेन भर्जितभगं ऐश्वर्यादिर्यस्याः । दग्धस्वसम्पत्कादिदानीं यदङ्घ्रिपद्मयोः स्पर्शः सम्वन्धस्तेनेद्धाऽभिवृद्धा शक्तिर्यस्याः सा वीर्यवतीति यावत् । नोऽखिलार्थान् ईप्सितान् अभिवर्षति तमसकृत्पश्यथेति यूयं जन्मभाज इति प्रशशंसुरित्यतीतेनान्वयः । यन्निःसृतं वेद शास्त्रं च पादावनेजनपयश्च योऽयं पुनातीति वा ॥ ३९ ॥ निरयवर्त्मनि निरयः संसारस्तद्वर्त्मनि वर्ततां संसारिखानां निरयद्वारभूतत्वात्तद्वर्त्मनि वा वर्तमानानां येषां भवने गृहे स्वर्गापवर्गविरमोऽपवर्गः कर्मसाध्यफलात्मा स्वर्गश्चासौ स च तस्य विरमोऽप्राप्तिर्यस्मात्सः । स्वर्गो मुक्तिरपवर्गः स्वर्गस्तयोस्तयोर्विषये विरमोऽनभिलाषात्मा औदासीन्यं यस्मात्स एकान्तिनां स्वर्गापवर्गोऽपि वर्जनीय इति तदनार्जने मतिद इति भावः । अपवर्गस्त्यागमोक्षयोः । क्रियावसानसाफल्येऽप्यपवर्गः प्रयुज्यत इति विश्वः । अपवर्गः क्रियासाध्ये फलासौ त्यागमोक्षयोरिति च । स्वर्गः सुषुप्तिरित्याख्या मुक्तेरपि समा यत इति बृहदारण्यकभाष्योक्तेः । विष्णुः स्वयं प्रधान आस । धात्वन्तररूपम् । अव्ययं वा । प्रधानवाचकत्वे कश्चानन्यः केवलस्वयमिति ब्रह्म इति तृतीयतात्पर्योक्तेः । स्वयं साक्षात्कृष्णकेशात्मेति वा । ये च तस्य दर्शनं स्पर्शनमनुपथो गमनं प्रजल्पः सम्भाषणं शय्या च मिलित्वाऽऽसनं च सयौवनेन पिण्डेन देहेन बन्ध आलिङ्गनादिर्येषां ते । पिण्डो देहे जपापुष्पे निपाते सिल्हकेऽपि चेति विश्वः । निरयवर्त्म नरकमार्गो निवर्तन्तां गच्छत्वियासेत्यप्यर्थः । स्वर्गश्च सुखदुःखसम्भिन्नश्च लोकोऽपवर्गो मोक्षश्च तयोर्विरमो विरतिस्तथा विशेषतो रमो रतिश्च येन स इति वा । पिण्डा देहा जरादिना सहिताः सयौवनास्ते येन सम्बन्धो गाढालिङ्गनादियं वामिति वा । स्वयं सुशोभनदैवं निमित्तीकृत्यासेति वा । अनेन निरयवर्त्मनीति प्रोक्तप्रतिषेधः कृत इति मन्तव्यम् । यूनो भावो यौवनम् । हायनान्तेत्यण् । अन्निति प्रकृतिभावः कर्म वा । केचिदुद्धवार्जुनौ सेनेयार्जुनौ यथासम्भवं द्वौ ग्राह्यौ । दर्शनाशनान्तैः । तया सम्पदा सहितौ सयौ । एकारान्तः शब्दः । वने पिण्डबन्ध आलिङ्गनादिर्यस्यैषाम् । सर्वमुर्वरितं सममिति वा । सयौनसपिण्डबन्धं इति पाठे योनेरयं यौनः स च स पिण्डश्च तेन बन्धोऽनुबन्धस्तेन सहित इति स तथा । प्राहुणिकज्ञातिसम्बन्धवानिति यावत् ॥ ४० ॥ तत्र श्यमन्तपञ्चके तरसा त्वरया ॥ ४१ ॥ तन्वः शरीराणि चिरादृर्शनं तेन कातराः परिषस्वजिरे आलिलिङ्गुः । उपसर्गादिति षत्वम् ॥ ४२ ॥ पुत्रन्यासं सुतस्थापनं च स्मरन् ॥ ४३ ॥ पितरौ यशोदानन्दौ ॥ ४४ ॥ यशोदा च नन्दश्चेति तौ सुतौ । उत्सङ्गमूरुम् । उत्सङ्गमुद्रतसङ्गमेकमेकं चोत्कृष्टसङ्गं च जगद्वहमिति तावित्यप्यर्थः ॥ समारोप्य तथा बाहुभ्यां परिरभ्य च शुचो विरहजशोकान्विजहतुः ॥ ४५ ॥ व्रजेश्वरीं यशोदां बाष्पकण्ठे देवकी रोहिणी चेत्युभे । बाष्पकण्ठाविति पाठे यशोदानन्दौ प्रति समूचतुरित्यर्थः । बाष्पकण्ठाविति पाठो ललितः । तत्कृतं यशोदानन्दकृतम् । मैत्रीं स्मरन्त्यौ ॥ ५६ ॥ हे व्रजेश्वरि हे व्रजेश्वर । वामनुवृत्तामविच्छिन्नां मैत्रीं । को विस्मरेत विस्मरेत् । का विस्मरेतेति ते । प्रक्रमानुरोधेन वक्तव्ये क इति

वदन्त्यौ स्मरणेऽस्मरणेति स्वातन्त्र्यं किञ्चित्प्रत्याहरणेऽपि न स्त्री स्वातन्त्र्यमर्हतीत्यादेर्नावयोः पत्यादेरिति सूचयत इति मन्तव्यम्। नैवास्ति प्रत्युपकृतियोग्यं किञ्चिदथवा दातव्यं चेल्लोकेऽधिकत्वेन सम्प्रतिपन्नं चैन्द्रमैश्वर्यं च यस्या मैत्र्याः प्रतिक्रिया तत्फलरूपं न ॥४७॥ अदृष्टौ पितरावहं वसुदेवश्चेत्येतौ याभ्यां तौ। यद्यपि नदृयतश्चेति कपा भाव्यं तत्पितृत्वमेवाप्रामाणिकमिति ध्वनयितुं स नायात इति ज्ञेयम्। पित्रार्यशोदानन्दयोस्तथामतयोर्युवयोः सम्प्रीणनं सम्प्रीतिजननमभ्युदयो जातकर्माद्यभिवृद्धिव्यापारः पोषणं रसायनादिभोजनतः पालनमनलानिलादितः। एतानि प्राप्यास्माभिर्न्यसौ। मयूरव्यंसकादिसमासः। तर्हि लोकानुकरणार्थं सर्वमनुकुर्वतोः सद्भ्योऽपि भयं न किमित्यत आहतुः। न सतां परस्तादसद्भ्योऽन्यत्र सद्भ्य इति यावत्। सभयाविति शेषः। सतां परस्तादकुत्र च भयौ। पक्ष्मेत्येकवचनेन बलपक्षे यथाकथञ्चित्संरक्षणं भवेन्न भवेत्कथञ्चिदपि भगवत्पक्ष इति मन्तव्यम्। पक्ष्मेत्यक्षिलोमवाचकपदोत्तरमेकवचनेन शुक्लकेशकृष्णकेशयोरैक्यं सूच्यत इति वा। न सतां परस्तात्। असदन्येषां सतामिति यावत्। कुत्र न च विद्यते भयं याभ्यामित्यकुत्र च भयाविति वा ॥ ४८ ॥ गोप्योऽभीष्टं कृष्णं चिरादुपलभ्य यस्य प्रेक्षणे प्रसक्ते दृशिषु नेत्रेषु पक्ष्मकृतमुन्मीलनमीलनादिरूपं तद्व्यापारम्। पक्ष्मणां कृतं धातारं वा शपन्ति। क्रियाप्रबन्धे लट्। अशपन्। दृग्भिर्हृदि कृतमलमिति वृत्तलक्षणव्यत्यस्त्या तासां सद्वृत्तव्यत्यासं ध्वनयति। दृग्भिर्निरीक्ष्यानन्तरे हृदि कृतं साकारमङ्कूरितमलं परिरभ्य नित्यं मनोयुजो योगिनस्तेषामपि दुरापं दुष्प्रापं तद्भावं तद्भक्तिम्। भावो भक्तिस्समुद्दिष्टेति बृहद्भाष्योक्तेः। आपुः। प्रेक्षण इति तादर्थ्ये सप्तमी वा ॥ ४९ ॥ भगवान्कृष्णो विविक्ते एकान्ते उपसङ्गता मिलिता आश्लिष्य तथाऽनामयं नीरोगतां पृष्ट्वा प्रहसन्निदमब्रवीत् ॥ ५० ॥ हे सख्यः स्वानां ज्ञातीनामर्थं चिकीर्षव इति विग्रहः। न लोकेति षष्ठीप्रतिषेधात्। कृपणचेतसो गतान्। अन्यासङ्गात्कार्यान्तरासक्तेः। अन्यासामासङ्गात्तद्दूहितोऽप्यर्थो भवतु का हानिरित्यपि भगवद्भावः। चिरायितान् आगमनालस्यं कृतवतो नः स्मरथापि स्मरथ किम् ॥ ५१ ॥ यथायथावत्सम्यगिति वा। अवबुद्ध्य विचार्यास्मासु यूयं वयं चेति वयम्। त्यदादित्वात्परस्यैकशेषः। इदमेवेत्यपरनिरासः। विशङ्क्ये तर्कयामि। किन्तदित्यत आह। नूनमिति। त्वमेव योजयितेव वियोजयिता चेति तन्मुखत एव वादयितुं परोक्षत आह। भगवान्हरिर्भूतान्यस्मदादिभिर्युष्मदादीनि युनक्ति संयोजयति वियुनक्ति वियोजयति च प्रागिह संयोगकर्तेदानीं वियोगकर्तेश्वर इति भावः। एतमेवाभिप्रायं निदर्शनेन द्रढयति ॥ वायुरिति। घनानामनीकं मेघमण्डलं तथा तृणं च लघु तूलं कार्पासो रजांसि परागादीनि संयोज्यानन्तरं क्षिपते। तथा भूतकृद्धरिर्भूतानि संयोज्य भूयः पुनः क्षिपति। भूतकृद्यत्किञ्चिद्भूतकृद्वायुरपीति तदुभयान्वयीति ज्ञेयम् ॥ ५२ ॥ परमरहस्यदृष्टौ तु मम युष्माकं च सर्वथा वियोग इति वक्तुं तत्स्वभावमावेदयति ॥ मयीति। मयि भक्तिर्भूतानां जनानाममृतत्वाय मुक्तये कल्पते। किमापणवीथीकथया कथयोपयुक्तमित्यतः कथयति। मुदावहः स्वरूपसुखप्रापकः। अनेनामृतत्वेति विवृतार्थम्। भवतीनां सुस्नेहः। इदमपि भक्तिशब्दार्थकथनमिति बोध्यम्। दिष्ट्या सुखेनासीत्। उत्पन्न इति ॥ ५४ ॥ अहं सर्वभूतानामादिरुत्पादकस्तथाऽन्तो नाशकोऽन्तरं मध्ये च बहिश्च वर्ते। हिरन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। तद्दूरे तद्वदन्तिके। तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यत इत्याद्यागमप्रसिद्धिद्योतकः। अङ्गना भौतिकानां पदार्थानां खमाकाशो जलं भूः पृथ्वी वायुर्ज्योतिरग्निः। भौतिकानामन्तर्बहिश्च यथा भूतानि वर्तन्ते इति न दृष्टान्तः। वृषा यूथे वेत्यृग्भाष्येऽल्पस्यापि प्रसिद्ध्यैव दृष्टान्तत्वं युज्यत इत्युक्तेर्हरेर्निरवधिकव्याप्तत्वात्। यथा भूतानीत्युक्तौ न प्रतीयेत कार्यकारणभावः। किञ्च क्रमेणोक्तौ स्वातन्त्र्यं च तेषां प्रतीयेतेत्येषामेकैकशो ग्रहणमिव व्यत्यस्योक्तिरिति च ध्येयम् ॥ ५५ ॥ एवमेतानि भूतानि भौतिकेषु ततानि परमात्मना ततानि तैनैवात्मा च ततः। तर्हि स आत्मा त्वदितरः किमित्यतोऽहमेव स इति विधत्ते। उभयं भूतान्यात्मेत्युभयं कोटिद्वयं मय्यक्षरे परे आततं पश्यथ। अथपर इति पदमेकम्। न विद्यतेऽन्नं यस्य स चासौ परश्च तस्मिन्। अनश्नन्नन्योऽभिचाकसीति। अन्यो निरन्नोऽपि बलेन भूयानित्यादिश्रुतिस्मृतयोऽत्र भवन्ति। अन्नन्यमिति श्रुतेः ॥ ५६ ॥ एवमध्यात्मशिक्षयाऽध्यात्मानं देहमधिकृत्य विद्यमानानां परमात्मतत्वानां शिक्षयोपदेशेन कृष्णेन शिक्षिता उपात्तविद्या गोप्यस्तस्य कृष्णस्यानुस्मरणेन ध्वस्तो जीवकोशः शरीरं तदभिमान इति यावत्। यासां ताः श्रीकृष्णं तं हरित्वेनाध्यगुर्व्यजानन्। या एवं प्राङ्न शिक्षितास्ता गोप्यः कृष्णेऽध्यात्मशिक्षया ब्रुवति सति। इतरं पुरावत् ॥५७॥ अध्यगुरित्युक्तज्ञानवतीनां गोपीनां प्रार्थनां। प्रार्थनाऽस्माकमियमित्याहुः। नता इति। नाथ ते अगाधबोधैर्योगेश्वरैर्हृदि विचिन्त्यं योगेश्वरमात्रविचिन्त्यं चेत्कार्यसमयसमयातानां मशकानां किमिति नीतिवन्नेति शंसति ॥ संसारेति। संसार एव कूपस्तत्पतितानामुत्तरणे ऊर्ध्वमागमनेऽवलम्ब्यं निःश्रेण्याद्याश्रयं पदारविन्दं नताः स्म। गेह जुषां सेवमानानामपि नो मनसि सदा तत्पदारविन्दमुदियात् ध्यानकाले उदितं भवतु। एतदर्थं नताः स्मेति वाऽन्वयः। अस भुवीत्यस्याशिषि प्रयोगः। नतावामेति प्रार्थयामहे। जन्मान्तरे तु त्वत्पादाब्जनमनमाशास्मह इत्यर्थ इत्यस्यार्थः प्रेक्षावदीक्षणीयः। भूरादेशस्य वर्जनीयत्वादिति केचित्। स्म तव महत्त्वं स्मृत्वेति वा ॥ ५८ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे सप्ततिरध्यायः ॥ १०–७० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ अत्रापि भक्तिमार्गमेव व्यत्स्नीकर्तुं कृष्णभार्याणां कृष्णायाश्च संवादादिकं प्रतिपाद्यते। तत्रादौ धर्मादिकुशलालापादिकरत्पीठिकां रचयति ॥ तथेति। गुरुरभिहितहितो गतिर्गम्यस्थानं भगवान्गोपीनां गोपीस्तासामुपरि वाऽनुग्राह्यानुग्रहं कृत्वा स कृष्णोऽथ गोपायापनानन्तरं युधिष्ठिरम्। गवियुधिभ्यां स्थिर इति षत्वं सप्तम्या अलुक्। धर्मं तथाऽन्यांश्च सुहृदोऽव्ययं क्षेममपृच्छत् ॥ १ ॥ लोकनाथेन श्रीकृष्णेनैवमुक्तरीत्या परिपृच्छ्य पृष्टा। सुसत्कृतो बहुबहुमानितस्तत्पादयोर्वीक्षा निरीक्षणं तया हतमंहो दुरितं येषां ते तथा। कृष्णाङ्घ्रिदृष्टिनहृदुरिष्टा हृष्टमनसश्च प्रत्यूचतुः ॥ २ ॥ हे प्रभो। कर्णपुटैर्महमनस्तो महतां व्यासादीनां मनस्तो मनःपूर्वकं मुखतो निःसृत त्वच्चरणाम्बुजासवं तव चरणकमलकथामृतं क्वचिदपि पिबन्ति तेषामशिवो न विद्यते शिवं मङ्गलं यस्मिन्स व्ययः कुतः स्यात्। ते चालं देहभृतो बिभ्रति ये ते तत्कृतं तत्प्रापककर्मकर्तारं जनं वीक्ष्योच्छ्वसन्ति ह। अयं वृथा नश्यतीति क्लिश्यतीति भावः। हीतीदमर्थस्य प्रसिद्धिमाह। तत्कृतं तव व्यापारमुच्छ्वसन्ति शिष्यप्रशिष्यद्वारा प्रकाशयन्ति तेषां कुतोऽशिव इति वा। शिवं मोक्षे सुखे भद्रे शिवं भद्रमिति विश्वानेकार्थध्वनिपदमञ्जर्यौ। आश्वमेधिके पर्वणि गुरुशिष्यसंवादे नो मार्गाः शिवाश्च स्युरिति। तथाऽन्यत्रापि एतादृशः शिवः पन्था इति प्रयोगात्पुल्लिङ्गो मङ्गलवाचीत्यशिवोऽमङ्गलमिति वा। ये देहम्भृतस्तदभिमानवन्तस्तेषां चिज्ज्ञानं तत्कृतं स्वकर्माद्युच्छ्वसन्ति क्लिश्यन्ति तेषां कुतः। सार्वविभक्तिकस्तसिः। कौ शिव इति वा। परत्र क्लेश इति किं वक्तव्यमित्यर्थः ॥ ३ ॥ पिबन्ति ये कर्णपुटैरिति पारोक्षोक्त्या स्वेषां तदितरतापाततः प्रतीता तामपाकर्तुं तन्मध्ये वयमित्यवयन्ति ॥ तमिति। आत्मधाम आत्मनो धामाश्रयस्त प्रतिष्ठितः स्वे महिम्नीत्यादेः। विबुधानां ज्ञानिसामान्यस्यात्मगतिं स्वरूपप्रापकमात्मना धात्रा। आत्मा सुरौतः सुमना विरिञ्चश्चेति कथ्यत इत्युक्तेः। धाम तेजआदिकं येषां ते च ते विबुधाश्च तेषामात्मगतिदं वा। अवस्थं तिस्रोऽवस्था जाग्रदाद्या यस्मात्सः। एकैकस्यावस्थात्रिकदातेति वा। देवानां जागरणं दैत्यानां सुप्तिलक्षणाज्ञानं मानुषाणां स्वप्नलक्षणमिश्रज्ञानस्वभावं प्रापयतीति त्र्यवस्थं वा। आनन्दसम्प्लवं आनन्दस्य सम्प्लवो बाहुल्यं यस्य स तम्। अखण्डो विकुण्ठः सर्वगुणाभिन्नोऽप्रतिहतो बोधो यस्य तम्। एतादृशे मनुष्यलोके कर्मवश इव कुतो जात इत्यत आहुः ॥ कालेति। कालेनोपसृष्टाः सोपसर्गाः उत्सन्ना इति यावत्। निगमा वेदास्तेषामावपनं व्यक्तिकरणरूपपुनरावापस्तस्मै। आत्ता स्वीकृता योगमायया नित्याऽवियोगिन्याऽऽत्मेच्छयाऽऽकृतिर्देहो येन स तं कालेन यवनेनोपसृष्टा ये निगमा अवान्तरपुराणि तेभ्य आवपनमन्यत्र स्थापनं तदर्थम्। आत्ता स्वीकृता योग उपायस्तत्साधिका या मायाशक्तिस्तस्याः कृतिर्व्यक्तिर्येन तम्। कालोपसृष्टानामेषत्तदुपद्रवाणां निगमे नगर इति द्वारकायामावपनमत्रत्यानां रात्रौ तत्र स्थापनं तदर्थे आत्ता स्वीकृता योगमायायाः कृतिरभिव्यंजनं येन स तं वा। एतदर्थसर्वस्वे मानमाहुः। परमहंसानामतिशुद्धानां वेदान्तनिष्ठानां गतिर्ज्ञानं यस्मिंस्तं तज्ज्ञानविषयीकृतवैभवमित्यर्थः। हंसगतिर्हंसेन गतिर्गमनं यस्य स तस्य परम इत्युत्तम इति परमहंसगतिस्तं वा। परमहं बहूत्सवं सगतिमस्माभिरनीश्वरैः सहापि गतिर्गमनादिकं यस्य स तं वा। अनेन कारुण्यं ध्वन्यते। आवपनार्थं योग उपायो येन तम्। आयाकृतिं सकललाभात्मकदेहवन्तं। आकारो देह आकृतिरिति यादवः। तं त्वा त्वां तं तु नतास्मः। तन्तुश्चासावात्मा च पुत्रो ब्रह्मा तस्य धाम चासौ वि विबुधात्मगतिस्तं वा। तिस्रोऽवस्था आकारविशेषाः श्रीभूदुर्गेति यस्याः सा च सा मा च रमा च तस्या आनन्दसम्प्लवो येनेति वा। तिस्रोऽवस्था यस्मात्स चासौ तम्। नन्दस्य नन्दगोपस्य सम्यक् सम्प्लवो वारिधिपारणे नौकायितं तं वरुणागारं गत्वा नीतवान्नन्दमिति ॥४॥ उत्तमश्लोकशिखामणिं जनेष्वित्यभिष्टुवत्सु। अच्युतस्य तथा कौरवाणां च स्त्रियः समेत्यैकत्र मिलित्वा मिथः परस्परं नृलोको विशिष्टनृणां लोकः स्वर्गादिस्तत्र गीताम्। यथोक्तम्। शर्मणा नृपत्नीरित्यृक्टीकायां। नरो देवाः प्रधानपुरुषत्वादिति। गोविन्दकथामगृणन्। तान्तेऽनुवर्णयामि त्वं च तां शृण्वित्यन्वयः ॥ ५ ॥ हे वैदर्भि रुक्मिणि। हे भद्रे हे जाम्बवति हे कोसले सत्ये तस्या एव नीलेति नामान्तरम्। हे सत्यभामे हे कालिन्दि। शैब्ये मित्रविन्दे भो लक्षणे। यत्तु श्रीधरीये रोहिणी नाम काचिदष्टमहिषीतुल्येति व्याकृतं तदुत्तरत्र तदुत्तरानीरणान्वसरसम्। किञ्चाष्टमहिषीतुल्येति तु बाधितमिति बोधनीयम्। किञ्च महिषीतुल्येति स्थूलदृष्टित उक्तौ चाष्टेति स्पष्टेदं मुद्रणविरोधो वज्रलेपायित इत्यलम्। रोहमारोहमुत्सङ्गः सोऽस्या अस्तीति रोहिणी। उपसर्गाश्च धातुलीनार्थद्योतका इति स्थितेः। मतुवर्थश्च प्राशस्त्यं सहोरूरितिवद्वारारोह इति सर्वविशेषणमेवेति केचित्। वस्तुतस्तु जाम्बवत्या एव नामान्तरम्। प्रदाय रोहिणीं शुभां मणिं च तमित्याचार्योक्तेः ॥ ६ ॥ नायं विवाहक्रमः। तथात्वे जाम्बवत्या रुक्मिण्यव्यवधानेनाभिधातव्यत्वात्। नाप्युत्तमक्रमः। रुक्मिण्यनन्तरं सत्यभामायास्तदनन्तरं जाम्बवत्यास्तासां मध्ये जाम्बवती प्रधाना। रामेण तुल्या जाम्बवती प्रियत्व इत्युक्तेर्वक्तव्यत्वात्। कः क्रमोऽत्रेति चेत्सत्यम्। प्रत्यर्थमादितो रुक्मिणीसत्यभामाया औत्तम्याद्ग्रहणम्। जाम्बवत्याश्च रमावेशाभावदशायां किञ्चिन्त्यौन्यं षण्णामितरासामिति यथायथं ग्रह इति सम्भवात्। यथोक्तमाचार्यैः। कृष्णस्यान्याः किञ्चिदूनाश्च तस्याः। यदाऽऽवेशो बहुलः स्याद्रमायास्तदा तासु प्रीयते केशवोऽलम्। यदा वंशो ह्रासमुपैति तत्र प्रद्युम्नतो विंशगुणाधिकाः स्युरित्यादिना। हे कृष्णपत्न्यः शतोत्तरषोडशसङ्ख्याः। पत्न्य इत्यनेन सर्वाऽपि तत्कर्तृ व यज्ञफलभोक्त्र्य इति पाणिगृहीत्य इति सूचयति। स्वमायया लोकमनुकुर्वन् स्वयं प्रधानपुरुषः

सन् यथा येन प्रकारेण व उपयेमे एतन्नोऽस्मान्प्रति ब्रूत ॥ ७ ॥ भैष्मी भाषते ॥ चैद्यायेति । मा मां चैद्याय शिशुपालायार्पयितुं दत्तुं राजसु जरासन्धादिषु । उद्यतकार्मुकेषूद्यतानि कार्मुकाणि येषां तेषु । उद्यतकार्मुकेषु राजस्विति पदं वा । समासान्तबिधेरनित्वान्न टच् । उद्यतकार्मुकानीषवश्चैषां ते राजानश्च तेषु । उद्यतकार्मुकेषु यथा भवति तथा राजस्विति वा । अशेषा अनप्रधाना मुख्याश्च राजानो भटाश्च तेषां शेखेरितः शेखरवदाचरन्नङ्घ्रिरेणुर्येन सः । तन्मूर्धन्यरत्नकिरीटोपरि संस्थापितचरणरेणुरजाश्चावयश्च तेषां यूथात्सङ्घान्मृगेन्द्रः सिंहः स्वभागमामिषादिकमिव मां निन्ये नीतवान् । न सौन्दर्यलुब्धः स नीतवानिति समापि नाहन्ता किन्त्वेतत्कृत इत्याह ॥ तच्छ्रीनिकेतेति । सा च सा श्रीश्च तस्या निकेतमाश्रयो यच्चरणाब्जं तस्य समर्चनं तदर्थम् ॥ ८ ॥ यो मे सनाभीति श्लोकेऽप्रतीतेरिवार्थस्य तृतीयाभ्रान्तेश्च । नीतच्छिदादिशतेत्यत्र स्वयं प्रथमान्ततया पदं विच्छिद्यानूद्य व्याख्याति ॥ नीतच्छिद्भगवता प्राप्तभेद इति । नीता च्छिद्येनेति विग्रहोऽनेन सूच्यते । भावे वा सम्पदादिक्विबित्युक्तं भवति । मित्रभेद इति यथेति टीकोक्तेः । भगवता प्राप्तवैमनस्य इति वा । ततश्चायं श्लोकार्थः । साक्षाल्लक्ष्म्यौ द्वे इति रुक्मिण्यनन्तरं सत्यभामा भाषत इति भाषते ॥ सत्यभामेति । सनाभिः समाना नाभिरुदरं यस्य सहोदरः प्रसेनः । समानो नाभिरिति वा । यद्यपि नाभिः क्षत्रिय इत्यनुशासने नायं प्राणिप्रतीकवाची स्त्रीलिङ्ग इति ज्ञायते तथाऽपि कथं तर्हि समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीतनाभिरिति भारविः । उच्यते । दृढभक्तिरित्यादाविव सामान्ये नपुंसकं बोध्यम् । वस्तुतस्तु लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्यात्पुंस्त्वमपीह साधुः । अत एव नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके च स्त्रियां कस्तूरिकामृग इति मेदिनी । रभसोऽपि । मुख्यराट् क्षत्रियो नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्यप्रधाने च स्त्रियां कस्तूरीकामृग इति । एवमेवंविधेऽन्यत्रापि बोध्यमिति लिङ्गानुशासनवृत्त्युक्तेः प्रासङ्गिक्युक्तिः । तस्य वधः सिंहविहितः संहारस्तेन । ततेन तातेन । तत कस्मै मां दास्यसीति काठके तथा नाभागखण्डे च तताभाङ्तुरित्यादेः । श्रौतानुवादो वा ततोऽनुकम्प्ये जन इति विश्वाल्लौकिको वा लिप्ताभिप्रायम् । स्वारोपितमपवादमपमार्ष्टुं मार्जयितुमृक्षराजं जाम्बवन्तं जित्वा रत्नमदात् । कृष्णस्तेन रत्नेन सह । तेन कृष्णेन भगवता नीतच्छित् प्राप्तभेदः सापराध इति यावत् । सन्मम पिता दत्तामपि वाचाऽक्रूरादिभ्यः सङ्कल्पितामिति दत्तप्रायामपि मां प्रभवे समर्थाय । अनेन तान्परित्यज्यात्र प्रदाने निदानं कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वमित्युक्तं भवति । आदिशतादिशत् । रत्नं कन्यारत्नं च ददावित्यर्थः । सनाभिवधाज्जातं तप्तं तापो हृद्यातत्तं व्याप्तं च तेन हृदयात्ततापेनेत्यर्थः । सुखविशिष्टाभिधानादितिवदाहिताग्न्यादिवद्विशेषणपरनिपातः । करणेन स्वेन लिप्तो लांपितोऽभिशापः कृष्णो ययाचे मणिं स मया न दत्त इति मद्भ्रातरं घातयित्वा नीतवान्रत्नमिति स्वारोपितोऽपवादस्तमृक्ष राजं जित्वा यद्रत्नमुपाजहार यस्तस्मै प्रभवे नीतच्छित्पिता तेन रत्नेन सह दत्ता मामप्यादिशतेति वाऽन्वयः । यो मे पिता रत्नं मे मह्यमादिशत्तमवश्यं दिशेत्युक्तावपि सते प्रभवे तन्नोपजहार न दत्तवान् । अथ प्रसेनमरणानन्तरमितरद्यथापूर्वं योज्यम् । अदाने हेतुमप्याह । रत्नमदात्तल्लाभप्रयुक्तो मदो हन्ता तस्मात्॥९॥मम पिताऽपि अमुना कृष्णेन त्रिनवहानि सप्तविंशतिदिनानि । अभियुद्ध्य युद्धं कृत्वा । देहविकृतिं कृष्णदेहस्य रामदेहतया भवनरूपमाज्ञाय ज्ञात्वा प्रत्यक्षतो दृष्ट्वा निजनाथदैवं स्वनाथनयोग्यं देवमुपास्यं सीतापतिमाज्ञाय च । अनन्तरमयधीरणमनादरं ज्ञात्वा तच्छान्त्यै पादौ प्रगृह्य मणिना सहार्हणं मां तत्परिहारयोग्यामित्यर्हणरूपां मामुपाहरद्दत्तवान् । इत्यहममुष्य दासी । इहामुष्याज्ञा यदा भविष्यति तत्करिष्यामीति दासीति वाऽऽवृत्त्यान्वयः । त्रिनवाहानीति पठणे छन्दोभङ्गभियाऽपि माषं मषङ्कुर्याच्छन्दोभङ्गं न कारयेदित्यादेर्ह्रस्वपाठः । यद्वा शकन्ध्वादिपाररूप्ये ह्रस्वता ज्ञेया । प्राज्ञाय देहकृदमुमिति पठन्तोऽपि प्राज्ञाय देहकृन्मम पितेति तत्रार्थः । अगणयित्वा गतदिनं त्रिनवहानीत्युक्तिरिति नाष्टाविंशतिदिनाभिधानविरोधः । देहस्य विकृतिर्यस्य तमिति वा । स्मृतिगते तु राघवे तदाकृतिं यदूत्तमे । समस्तभेदवर्जितां समीक्ष्य सोऽयमित्यवेदित्युक्तविकृतिशब्द आकृतिपर्याय इति मन्तव्यम् । द्वितीयपाठे तु सीतापतिमित्येतद्विवरणपरमाचार्यवच इत्यनुसन्धेयम् ॥ १० ॥ स्वपदस्पर्शकाम्यया तपश्चरन्ती आज्ञाय ज्ञात्वा सख्याऽर्जुनेन सहोपेत्य यस्याः पाणिमग्रहीदहं तद्गृहमार्जनीव । याऽहमिति पाठे सर्वोपेता च तद्दर्शनादिवद्वतेत्यर्थः । तस्या गृहमार्जनीति विग्रहः । सङ्ख्योपेतेति च पाठ उपेतपदोपेतसूत्रस्मारक इति च वदन्ति ॥ ११ ॥ यः कृष्णः स्वयंवरमुपेत्य भूयान्द्विपारिः सिंहः श्वयूथं ग्रामसिंहनिवहं विजित्यात्मबलिं स्वापहारमिव विजित्य मां निन्ये । न केवलं भूयान्विजित्य किन्त्वपकुरुत आगात्तस्य मेऽनुभवं प्रतिजन्म । अवनेजनान्भोऽस्तु ॥ १२ ॥ यथा शिशवो बाला अजतोकान् छागशिशून्बध्नन्ति तथा । अतिबलवीर्यसुतीक्ष्णशृङ्गान् अत्यधिके बले च वीर्यं चैषां ते च ते सुतीक्ष्णानि शृङ्गानि येषां ते च ते ते च तान् । क्षितिपानां वीर्यपरीक्षणाय कृतान् । वीराणां दुर्मदमहदहङ्कारं घ्नन्तीति तान्वीरदुर्मदहनः सप्त उक्षणो वृषभान् । तरसा बलेन बेगेन च क्रीडन्निगृह्य बबन्ध ह प्रसिद्धम् ॥ १३ ॥ यश्चेत्थं वीर्यशुल्कं वीर्यमेव शुक्लं मूल्यद्रव्यं यस्याः सा ताम् । दासीभिः सहितां तया च तुरङ्गसेनावती पथि राजन्यान्निर्जित्य मां निन्ये । तद्दास्यं दासीत्वं मेऽस्तु॥१४॥मम मे पिता श्रुतकीर्तिः । हे कृष्णे द्रौपदी । मातुलेयाय मातृभ्रातृपुत्राय कृष्णाय तच्चित्तां मां सखीजनैरक्षोहिण्या सेनया च सहिताम् । स्वयमाहूय कारयित्वा दत्तवान्यस्मै ॥ १५ ॥ तस्य पादस्पर्शः । जन्मनि जन्मनि पदमेकम् । कर्मभिर्भाग्यमाणाया आत्मनस्तद्येन श्रेयो भवेत् ।

श्रेयः प्राप्तिनिवृत्तिश्च कर्मणां येन स पादस्पर्शो जन्मनि जन्मनि भवेदित्यर्थः। कर्मभिर्भाग्यमाणा या गोपस्त्रियस्तासां तच्छ्रेयो येन। संस्पर्श आत्मनः कृष्णस्य मेऽस्त्विति वा ॥ १६ ॥ हे राज्ञि राजराजीवनयने द्रौपदि। अच्युतस्य जन्म कर्म च जन्मना सहितं च तत्कर्म चेति वा। तच्छ्रुत्वा वक्ता च नानृतवादी नापि कश्चिदनामगोत्र इत्याह। नारदगीतमिति। मम चित्तं मुकुन्दे आस तल्लग्नमभूत्। न कयाऽपि सवृतो वृतः कथं कथय त्वयेत्यतः कथयति ॥ स्वयं पद्महस्तयेति। पद्मं हस्ते यस्याः सा तया लक्ष्म्या। लोकपालान् ब्रह्मादीन्। एष ब्रह्मातिवृद्धस्तपति दिनमणिश्चञ्चलो मातरिश्वा द्विग्वासा नीलकण्ठ इत्यादेर्विहाय त्यक्त्वा वृतः किलेदं सत्यमित्यर्थः। किलशब्दस्तु वार्तायां सम्भाव्येऽनृतसत्ययोरिति विश्वः। स्वयमित्यनेन मयि तदावेशमात्रमिति ध्वन्यते ॥ १७ ॥ हे साध्वि द्रौपदि। मम मतं दुहितृवत्सलो बृहत्सेन इति ख्यातः। पिता तत्र मन्मनोरथसम्पत्तावुपायमचीकरच्चकार ॥ १८ ॥ यद्यपि तत्र पिताऽपि मत्स्यवेधने मच्छरीरजां दास्यामीति प्रतिश्रुत्य चकार मत्स्यस्थापनं ततोऽपीदमसुसाध्यवेधं लक्ष्यमिति लक्षणां वक्ति ॥ यथेति। हे राज्ञि तव स्वयं वरः पार्थेच्छया पार्थात्मवरापेक्षया मत्स्यकृतः। अयं मत्स्यः। तुशब्दः सर्वाशक्यवेधत्वरूपविशेषसूचकः। बहिराच्छन्नः प्रावृतसर्वाङ्गः तर्हि क्वावलोक्य वेद्धव्यः स इत्यत आह ॥ जले परं केवलं दृश्यत इति। कन्यार्थं कथं मुखबन्धः कर्तव्यमिति लज्जां वर्जयित्या जले प्रतिबिम्बितं मुखमधोविधाय कीचकान्तस्तत्तच्छायां लक्षयित्वा लक्ष्यं वेद्धव्यमिति तदसुसाधता बोधताऽनेनेति ज्ञेयम् ॥ १९ ॥ मत्पितुः पुरं सर्वतो भूपा एतन्मत्स्यवेधनं श्रुत्वाऽऽययुः। सोपाध्यायाः साचार्याः सर्वास्त्रशस्त्रतत्त्वज्ञाः सर्वशो बहुलाः ॥ २० ॥ वेद्धुं लक्ष्यं मत्स्यं मद्धियो मद्विवाहमतयः सशरं चापमाददुः ॥ २१ ॥ धनुरादाय सज्जीकर्तुमनीश्वरा असमर्थाः केचिद्व्यसृजन् धनुस्तत्यजुः। आकोटिज्यामिति तथा कोष्टं ज्यामिति सरलौ पाठौ। आकोटि अन्तेपर्यन्तं ज्यां मौर्वीं समाकृष्यामुना धनुरग्रेण हता एके केचन पेतुः। कोष्टशब्दोऽपि कोटिवाची। आकोष्ट्यामिति पाठे द्वे पदे। सप्तम्यार्थी पञ्चमी चेदपि द्वे पदे परन्तु सानुशासिनिकी ॥ २२ ॥ प्राग्योती च मगधश्च तेषामीश्वरौ नरकजरासन्धौ भगदत्तो वा प्राग्ज्योतीशः। ज्योतिश्शदपर्यायो ज्योतिशब्द इत्येकः प्राग्ज्योतिर्मगधेश्वराविति च पेठुः। ज्योतिषशब्दपर्यायोऽयं ज्योतिश्शब्द इति केऽपि। दुर्योधनः कर्मश्चेत्येते तदवस्थितिं नाविन्दन्न व्यजानन्। भीमश्च तदवस्थितिं तस्मिन्स्वोपविष्टस्थल एवावस्थितिमवस्थानं कृत्वा कृतवानित्यर्थः यथावस्थानान्वये भीमस्यार्जुनापेक्षया दौर्बल्यम्। किञ्च साक्षात् प्राणात्मकस्य भगवन्मात्रयोग्यकार्ये प्रवृत्तिश्च स्याताम्। न च ते तत्र सम्भवतः। यथोक्तम्। भीमश्चोपालभ्यमप्येतदत्र द्रष्टुं च नैवैच्छदरोन्द्रधारिणः। योग्ये कर्मण्यायातं चापराधी स्यामित्यञ्जः पश्यमानो महात्मेति। तर्हि न गमनमन एव कर्तव्यं भीमेनेति चेत्। सत्यम्। लक्षणासुलक्षणविवाहमङ्गलप्रापकत्वात्तदुपपत्तेः ॥ २३ ॥

मत्स्यछायां मत्स्याभासं जले दृष्ट्वा तदवस्थितिं ज्ञात्वा चाप्यर्थः। बाणान् छिन्नानसृजत् लक्ष्यं नाच्छिनत् परं केवलं पस्पृशे पस्पर्श। ननु धनञ्जयः स्वात्मबलं प्रकाशयन्सज्जं कृत्वा धनुरैकलक्ष्यम्। नैवाददे बाणमनिच्छयैव प्राप्यां जानन् केशवेनैव तां चेति श्रीमदुक्तेरत्र पुनर्यतोऽसृजद्बाणानच्छिनत्पस्पृशे परमित्युक्तिरिति विरोध इति चेत्। नैवाददे बाणमित्यस्य तच्छेदो यथा स्यात्तथा नैवाददद इत्येवम्परत्वेन तूष्णीं स्पर्शानिवारणात्। इदमपि कार्यमर्जुनेन तथाऽपि मागधादिमानभङ्गार्थं तदमनस्कतयाऽनुष्ठानस्य प्रत्यवायानर्पकत्वात्। इदमप्युक्तं तत्रैव धनञ्जयः स्वात्मबलं प्रकाशयन्निति। यतच्छिन्ने मत्स्येऽपराधी भवेयमिति यतेन्द्रियः ॥ २४ ॥ मानिषु दुर्गर्ववत्सु भग्नमानेषु हीनमानेषु तथाऽशक्यमिति निवृत्तेषु सत्सु लीलयेति सज्जीकरण इवादानेऽपि क्रीडा ज्ञेया ॥ २५ ॥ अभिजिति मध्येऽह्नि सूर्ये स्थिते सति तं मत्स्यं छिन्नेषुणैकेनैकवारं तत्रापि छिन्नेनेषुणेति त्वन्मत्स्यवेधापेक्षया शक्यपातोऽयमिति प्रत्यपादयदिति ध्वन्यते ॥ २६ ॥ अपतत् शुश्रुव इति यावत्। कुसुमासारान् अविच्छिन्नपुष्पधारासम्पातम् ॥ २७ ॥ स चासौ रङ्गश्च तम्। तत्तदेत्यर्थेऽव्ययं वा। रङ्गो रणे खरे रागे नृत्ये रङ्गं त्रपुण्यपीति विश्वः। कलमधुरध्वनिनी नूपुरे ययोस्ताभ्यां चलपेशलाभ्यां चलेनैकैकशो विक्षेपेण मनोहराभ्यां पद्भ्याम्। दिशो भ्रामयती तत्स्थिताञ्जनान्भ्रान्तां कुर्वन्ती बुद्धिमतोऽपि दिग्भ्रमं जनयन्तीति वा वृते सह जघने तथा कुचयोर्युगलं च पिधाय परिधाय कृमिकाशोत्थश्रेष्ठेति कौशिकाग्र्ये क्षौमे सव्रीडहासं वदनं यस्याः सा। जानपदेति ङीष्। केशपाशे धृता स्रजो माला यस्याः सा। रङ्गं नृत्यजनयुतम्। अन्यथा चेद्रणाङ्गणं चाविशम् ॥ २८ ॥ प्रविष्टा चाहम्। उरणी च ते कुण्डले च तथा कुन्तलाश्च तेषां त्विट् कान्तिर्यस्मिस्तद्गण्डस्थलं यस्य तत्। हासेन सहितः कटाक्षः शिशिरः शीतलश्चासौ हासकटाक्षश्च तस्य मोक्षो हि स्थापनमन्यत्र यस्य तत्। अजिरशिशिरेति निपातितः शब्दः। शिशिरस्तु ऋतोर्भेदे तुषारे शीतलेऽन्यवदिति विश्वः। वक्त्रमुन्नीयोन्नम्य परितो राज्ञः कांश्चिदपलायितान्निरीक्ष्यानुरक्तं हृदयं यस्याः सा। राजपराजयार्थमियत्कृतं नमनस्तस्य त्वयीत्यतोऽप्याह। अनुरक्तहृदयेति। अनुरक्तं मय्यासक्तं हृदयं कृष्णाख्यं ब्रह्म यस्याः सा। स्वभागहरणाद्यानात्फलानां यापनान्नृणाम्। हृदयं भगवान्विष्णुरिति वचनात्। हृदयं ब्रह्म आरुणा उपासते हृदयनाद्धृदयमित्यादेश्च। शनकैर्मुरारंरसे स्कन्धे स्वमालां स्वधृतेति स्वमाला तां विदधे। नियमावहं विदध इति धाञो लिट्सम्भवति। पारोक्ष्यं च देवदेवत्वाद्युज्यते। परोक्षप्रिया इव हि देवा इत्यादेः। दधधातोर्वा लिटि रूपम्। दधे दधावहे दधामह इति रूपाणि। क्रियाप्रबन्धे लडित्यतीतार्थतोपपद्यते ॥ २९ ॥ ततो मालाल्पपादांसमालासमासज्जनानन्तरम् ॥ ३० ॥ मयेश

भगवत्येवं वृते सति। एवंवृत्त इति पाठे एवं वृत्तं यस्य स तस्मिन्। मायेश इति पाठे मायाया ईशो रमारमणस्तस्मिन्। हे याज्ञसेनि। स्पर्धिनः स्पर्धा येषामस्तीति स्पर्धिनः शिखादिः। मन्मथार्ता इति हृच्छ्रयातुराः ॥ ३१ ॥ हयानां शैव्यसुग्रीवमेघपुष्पादीनां चतुष्टयं यस्य स तं चतुर्भुजस्सन्नीशस्तस्थौ ॥ ३२ ॥ काञ्चनमय उपस्करो हि परिच्छदो यस्य स तां द्विषतां मिषतां पश्यतां सताम्।ताननादृत्येत्यर्थः। मृगराट् वृकाणां पश्यतां स्वभागं नीत्वा गच्छति यथा तथेति ॥ ३३ ॥ केचन ते राजन्या निषेद्धुं पथि मार्गे संयुक्ता उद्धृतेष्वासा यथा ग्रामसिंहा हरिं तथाऽसज्जन्त सङ्गता अभूवन् ॥ ३४ ॥ नुन्नाच्छिन्ना बाह्वङ्घ्रिकन्धरा येषां ते तथा प्रधने सङ्गरे सन्त्यज्य रणम् ॥ ३५ ॥ पत्युर्जयभूतिर्जयलक्ष्मीस्तयाऽलङ्कृतं रविं सूर्यं छादयन्तीति रविच्छदास्ते च ते ध्वजपटाश्च तैश्चित्राणि तोरणानि यस्यां सा सोमवंशसम्भवीयध्वजपटादे रव्याच्छादकतायुक्तिमती। दिवि भुवि च जनैः संस्तुतां तरणिः सूर्यः स्वकेतनमुदयगिरिं यथा विशति तथा समाविशत् ॥ ३६ ॥ परिच्छदैरितरसाधनैः ॥ ३७ ॥ सर्वसम्पद्भिर्दासीभिर्भटेभादिभिश्च सर्वसम्पद्भिः सहायुधानि ददौ। एतेन तस्य किं स्वोद्धत्यै दत्तवानित्याह। पूर्णस्य भक्तित इति। सर्वं तस्यैव तस्य दत्तमिति षष्ठ्या द्योतयति ॥ ३८ ॥ सर्वसङ्गनिवृत्त्या तपसाऽद्धा सम्यक्। इमा वयं च गृहदासिका बभूविम। नास्मत्कृत्यं तस्य किन्तु दयया लालयत्यस्मानित्याह। आत्मारामस्य स्वरमणस्येति ॥३९॥ शतोत्तरषोढशसहस्रयोषितो भाषन्ते भौममिति। यः क्षितिजये स्वकृते राज्ञो निर्मथ्य हृता राजकन्यास्तेन नरकेण रुद्धा न केवलमेतत्कारागारमोक्षणाऽपि तु संसृतिविमोक्षणं स्मरन्तीरस्मरतीर्नो युधि तं भौमं सगणं निहत्य पादाम्बुजं परिनिनाय नीत्वा पादाम्बुजं स्मरन्तीः परिणिनायोवाहेति वा। नास्मदाशा तस्येत्याहुः। आप्तकामः पूर्णकाम इति ॥ ४० ॥ अग्निपुत्रत्वात्तपसा स्त्रीत्वमेतमिच्छयाऽऽप्तमतोऽस्ति वेदाधिकार इत्यावेदयितुं ता अष्टमपञ्चकद्वितीयाध्यायगतता राज्याय साम्राज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्यायेत्यन्तखण्डमर्थतः सङ्गृह्यैतदादिसर्वापेक्षया हरिचरणपरिचरणमधिकमिति वदन्ति। नेति। हे साध्वि। साम्राज्यं धर्मतः प्रजापालनयोग्यसम्राष्ट्वं भोज्यं भोगसमृद्धिः स्वाराज्यमनन्याधीनत्वं वैराज्यं प्रतिपक्षिक्षितिपेभ्यो वैशिष्ट्यम्। अथामुष्मिकं च नेति वदन्ति। स्वाराज्यं स्वर्गाधिपत्यं पारमेष्ठ्यं सत्यलोकाधिपत्यमानन्त्यमनन्तो नाशशून्यो लोको वैकुण्ठः स एवानन्त्यं हरेः पदं स्थानभूतं वयं न कामयामहे। आनन्त्यं भोगिन्यां विद्यमानं शेषसाम्राज्यं हरेरिन्द्रस्य पदं स्वर्गमिति वा। प्राचीमासन्दीमित्यादिबह्वृचब्राह्मणोक्तप्रकारेण साम्राज्यस्वाराज्यवैराज्यानि क्रमादुत्तरपूर्वदक्षिणपश्चिमदेशाधीशत्वानीति ज्ञेयम्। एतस्य श्रियो रमायाः कुचयोः कुङ्कुमगन्धास्तैराढ्यं गदाभृतः श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामहे ॥ ४२ ॥ एतादृक्कामनास्पदस्य श्रीमत्पदस्यास्मत्काम्यता नाश्चर्यावहेति तां ताः कान्ता वदन्ति। व्रजस्त्रिय इति। आभीरभामिन्योऽज्ञता ध्वन्यते। तथा पुलिन्द्यः शबरनार्यस्तृणानि वीरुधश्च। तद्देवविवक्षयोत्प्रेक्षा वेति केचित्। गोपैः सहगाश्चरयतो महात्मनः कृष्णस्य पादस्पर्शं गावश्च यद्यतो वाञ्छन्ति किं कामना न भवेदस्माकमिति भावः ॥ ४३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे एकसप्ततिरध्यायः ॥ १०—७१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ ज्ञानिमाहात्म्यं सहोत्सवस्तु वासुदेवमत्र विषयो मुक्तेः साधनं भगवत्तोष इत्यादिकमत्र प्रतिपाद्यते। तत्रादौ कृष्णं द्रष्टुं कृष्णद्वैपायनाद्युपयानं तदेतत्संवादं च वक्तुं द्रौपद्याद्या माधववधुबोधितवृत्ताः किं चक्रुरित्यतस्तदाह ॥ श्रुत्वेति ॥ पृथा कुन्ती सुबलपुत्री गान्धारी अथ यज्ञसेनी द्रौपदी च। अनेन नैकान्ते श्रीकान्तकान्तः प्रतिपप्रच्छ द्रौपदी किन्त्वेतदादि सतैवेति द्योत्यते। याः परमप्रतीता अतिख्याता अनुतरतमभावेन माधविकास्तासामित्थमखिलात्मनि हरौ कृष्णे इत्थं तदुक्तिसक्तस्फोरितं प्रणयानुबन्धं याचनापूर्वकमनुबन्धं भक्तिम्। अनुबन्धस्तु भक्तिः स्याद्बन्धः स्नेह उदाहृत इति तात्पर्यान्तरात्। प्रणयः प्रेम्णि विश्रम्भे यात्राप्रसरयोरपीति विश्वः। सविश्वासं स्नेहमिति वा श्रुत्वा सर्वाः पृथाद्या अश्रुकलाभिराकुलान्यक्षीणि यासां ताः सत्यः। अलमिति यथायथमन्वेतुमलम्। विसिस्म्युर्विस्मिता अभवन् ॥ १ ॥ सम्भाष्यमाणास्त्विति विपरिणतलिङ्गं सन्नृष्वित्यनेनाप्यन्वेति। कृष्णरामयोर्दिदृक्षा दर्शनेच्छा तया मुनयस्तत्र श्यमन्तपञ्चके आययुः ॥२॥ तदभिधानाभिधानं मङ्गलकरमिति तन्नाम कीर्तयति ॥ द्वैपायन इति। व्यासो नारदो देवलोऽसित इति सामानाधिकरण्यं वैय्यधिकरण्यं वोभयथाऽपि व्युत्पादितमस्माभिरालोचनीयम्। शतानन्दो गौतमसुतः ॥ ३ ॥ रामो भार्गवो भार्गवेयोऽपि वा। रामो भार्गवेय इति बव्हृचब्राह्मणं प्रागुदाहृतमनुसन्धेयम्। बृहस्पतिः ॥ ४ ॥ एकतो द्वितस्त्रित इति क्रमः। बव्हृचब्राह्मणे एकतो द्वितस्त्रित इति। तथार्याजुष एकताय स्वाहद्वितायस्वाहत्रितायस्वाहेति चोक्तेः। गदापर्वणि बलदेवयात्रायाम्। आसन्पूर्वके युगे राजन्मुनयो भ्रातरस्त्रयः। एकतश्च द्वितश्चैव त्रितश्चैवाग्निसन्निभाः। सर्वे प्रजापतिसमाः प्रजावन्तस्तथैव चेत्यारभ्य तत्राप्यमितविक्रान्तः स्पृष्ट्वा तोयं हलायुध इत्यन्तेन ग्रन्थेन तन्माहात्म्यमुक्तमनुसन्धेयम्। कूपे वहितो देवान्वत ऊतय इति श्रुतेः ॥ ५ ॥ प्राक् तदागतेः पूर्वमासीना उपविष्टा नृपादयः सहसाऽविलम्बेनोत्थाय पाण्डवाः कृष्णरामौ च लोकवन्दितांस्तान्प्रणेमुः ॥ ६ ॥ सर्वे पाण्डवाद्या यथा तानानर्चुस्त सहरामोऽच्युतः कृष्णोऽर्चयत्। सहरामो द्वैपायनोऽच्युतः श्रीकृष्णात्मैव तथाऽपि लोकानुकारं स्वयमार्चयदिति

भिन्नवाक्यतयोक्तिर्यथाशब्दश्च सूचयतः। तत्पूजासाधनानि बोधयति ॥ स्वागतासनमित्यादिना ॥ ७ ॥ धर्मं गोपायतीति धर्मगुब् सा तनुर्यस्य सः। यतवाग्यस्य तत्तस्य। महतः सदसः सभाया अनुश्रृण्वतः सुखं यथा तथासीनान्। यतवाचो महतो मुनीन्प्रतीत्यप्यन्वयः। भगवानुवाच ॥ ८ ॥ यद्यतो योगेश्वरदर्शनं देवानामपि दुष्प्रापं तत्फलं जन्मनः फलं जन्मनः फलभूतां कार्त्स्येन लब्धम्। ततो वयं जन्मभृतः प्रशस्तदेहधारिणो दुर्घटं घटितमित्याह। रामपाराशर्ययोस्तादात्म्यादितरेषां चाहमित्युक्तौ स्यात्प्रत्यवाय इति वयमित्युक्त्याऽन्येषामस्मदीयानां तद्दौर्लभ्यं ध्वनयतीति मन्तव्यम्। यथाऽऽहुः प्रकाशिकायाम्। वयमस्मदीया इति मूलार्थः कृष्णस्य जन्माभावादिति ॥ ९ ॥ देवानामपीत्यनेन नृणां का कथेति सूचितमर्थात्तद्विशदयति ॥ किमिति। स्वल्पं तपो येषां ते तथा तेषामर्चायां प्रतिमायामेव देवेति देवतेति चक्षुर्दर्शनं ज्ञानं येषां तेषां योगेश्वराणाम्। प्रह्वेति भागप्रधानम्। दर्शनं स्पर्शनं प्रश्न इष्टगोष्ठिप्रव्हत्वेन प्रावण्येन पादानामर्चनमेवादिर्यस्य तद्दुष्प्रापमिति किमाश्चर्यमित्यर्थः ॥ १० ॥ न ह्यम्मयानि तीर्थानीति श्लोके न तत्र तीर्थादिषु परपवित्रीकरणशक्तिरस्ति चेदपि कालविलम्बेन तदिति तन्मात्रस्य जडस्य तथात्वं प्रतीयत इत्यतः स्वयं तात्पर्यमाह ॥ अम्मयाभिमानिन्य इति। अम्मयानि नद्यादीनि। आदिपदेन प्रतिमादिपरिग्रहः। एतदभिमानिन्योऽपि देवताः। देवा इति सति पुंलिङ्गे देवता इति वदन्नस्ततो गत्वा वक्ष्यमाणसहकारिसमवधानेऽपि स्वातन्त्र्यं नास्ति किन्तु ममैवेति ध्वनयति। किञ्च पृथिव्याद्यभिमानिनो देवताः प्रथितोजस इत्यादिमानिकतां स्वोक्तेः स्फोरयति। उरुकालेनेति व्याख्याति गुरूपदेशं प्रापयित्वेति। तथा चोरोर्गुरोः कलयति जानात्यनेनेति कालः शास्त्रोपदेशस्तेन तदुपदेशं प्रापयित्वैव पुनन्ति स्वासां पारोक्ष्यात्। केचित्तूरुकाले जातेऽपि नैव पुनन्ति। किन्तूपदेशं प्रापयित्वैव पुनन्तीति बहिष्ठं योजनमाहुः। ननु तच्छब्देनाम्मयतीर्थानां देवानां च परामर्शो न सम्भवति। नपुंसकलिङ्गशब्दवाच्यानां पुल्लिङ्गेन परामर्शायोगात्। न चैकशेषेणादोषः। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति नपुंसकशेषोक्तेरतः कथमिति चेत्। उभयत्रापि बुद्धिस्थादेवपरामर्श इत्यर्थसूचकं त इति पदमिति नानुपपत्तिः। ततश्चायं श्लोकार्थः। तीर्थीकुर्वत्तीर्थादिकं यथेच्छं वर्तत इति किं साधु साधुदर्शनादिनेत्यत आह। अम्मयानि केवलजडजलानि न हि किन्तु तदन्तर्गता देवाः। मृच्छिलामयास्तद्विकृताकाराः प्रतिमादयो देवा न किन्तु तदन्तर्गता देवाः। न च सद्यस्तेषामपि पावनं सुशकं किन्तु तेऽम्मयास्तत्स्था देवाः प्रतिमान्तरस्थाश्चेति ते देवाः। त इति पुल्लिङ्गेन परामर्श शंसन्व्यासो देवा अन्तस्थाः स्थानद्विकेऽपि ग्राह्या इत्यसूचयत्। अन्यथा तानित्यवक्ष्यत्। इदं चाचार्यस्याम्मयाद्यभिमानिदेवता इति व्याकुर्वते। मूलं मूलकृद्दर्शितमित्यवधेयम्। उरुकालेन गुरूपदिष्टज्ञानसाधनज्ञानोपदेशेन विलम्बेनैव पुनन्ति। उरुकालेऽपि नैवापरोक्ष्यात्स्वयं पुनन्ति किन्तूरुकालेन गुरूपदेशेन पुनन्तीत्यावृत्त्याऽन्वयः। तदुक्तं स्कान्दे वैशाखमाहात्म्ये षष्ठेऽध्याये। यान्यम्मयानि तीर्थानि देवा वा मृच्छिलामयाः। अपि तेन पुनन्त्येव दर्शनादेव साधव इति। सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवदिति। यथा वाऽऽचार्यस्य शिष्याः। वाराहे च। ज्ञानादिदानं देवानां विष्णुना साधु चोदितम्। वेदे च तेषां विहितं तत्राचार्यो महत्तरः। विहितः सहकारित्वे यद्गुरुः सुप्रसन्नः सन्दद्यात्तन्नान्यथा भवेत्। गुरुरेव परागतिरित्यादेरिति केचित्। तर्हि के सद्योऽविद्याबन्धं विष्वस्य पवित्र्यदा इत्यत आह। साधवो दर्शनादेवेति। विना गुरूपदेशादिकं न सुमिला एत इति तत्सम्पत्त्यनन्तरं तत्फलरूपास्त इति दर्शनादेवेत्युक्तिरत्र तदपेक्षया देवा जाग्रतो वर्तन्त इति भावः। फललाभानन्तरं तन्मात्रसाधनस्यानीप्सनीयत्वात् ॥ ११ ॥ नाग्निर्न सूर्यो न च चन्द्रतारकमिति श्लोकेऽग्न्यादय उपासिताः परस्परं स्वेषां हरेश्चाभेदकृता भेदं करोति जानातीति स तस्याघं विपश्चितो ज्ञानिनो न घ्नन्ति न नाशयन्ति। विपश्चितः प्रसक्तभेदविरुद्धाभेदज्ञानिनस्त्वघं घ्नन्तीति भेदज्ञानिनिन्दनमभिनन्दनमभेदज्ञानिन इत्यन्यथाप्रतीतिनिवारणाय स्वयं तत्पदार्थमाह। भेदकृतोऽन्यथाज्ञानिन इति। देवाश्च तदेवाबादिकमाश्रित्यासत इति पारोक्ष्याज्ञान्यथामतिमहापयन्ति। विपश्चितस्तु प्रात्यक्षिका इति प्रत्यक्षदर्शनात्। तदुपेत्य। अज्ञानामधिकारिणामन्यथाज्ञानमपगमयन्ति। तुस्तत्र तरतमभावरूपविशेषद्योतकः। एवकारस्तु सत्यधिकारे दर्शनस्यानन्यथाभावसूचकः। कुणपे त्रिधातुक इत्यादिमूलोक्तमन्यथाज्ञानमुपलक्षणपरमिति सूचयन्नुक्तश्लोकद्विकार्थे मानमाह ॥ प्राकृतैरिति। प्राकृतैरज्ञैर्दृश्यमानं द्रवं तीर्थमिति नोच्यते तु नोच्यत एव। देवाश्च शिला एवेति शिलामात्रा न तर्हि क इत्यत आह ॥ तत्रान्तरस्थिता देवा इति। तदन्तःस्थिता इत्येतावता पूर्तौ यत्तत्रेत्युक्तं तेन तं त्रायन्ते सर्वप्रकारेण पालयन्तीति तत्राश्च सन्तस्तन्मध्ये स्थिता अन्त आस्थिता वा देवा उच्यन्ते ज्ञानिभिः। तर्हि कथं ते दृश्यन्त इत्यत आह ॥ गुरूपदेशेनेति। गुरूपदेशन्त्विति वा। अन्यथाज्ञानिना तद्रूपं तदन्तर्गतं न दृश्यते च। तत्रामन्तॄणामनर्थमप्याह ॥ कोपादिति। कोपाज्जडजलाद्यैक्यज्ञानजाच्छापं प्रयच्छन्ति। तस्माद्गुरुमुपाव्रजेत्। तस्मात्तीर्थानि देवाश्च सर्वदेवमयो द्विजः। तीर्थानि पदे विप्रस्य दक्षिण इत्यादेश्च तीर्थमृदादिप्रतिमान्तरस्थिता देवा विद्वत्सु ज्ञानिष्वेव संस्थिताः। अतः साधवो दर्शनादेवेत्युक्तमुपपन्नमिति भावः। यस्माद्बुद्धिः कुणप इत्यत्रोपलक्षणमन्यथाज्ञानमेतल्लक्षणमिति मानेनाचष्टे ॥ भिन्नस्येति। भिन्नस्य वस्तुनोऽभेदतोऽभेदेन दृशिर्दर्शनमपि भेदिभिर्नादरणीयेति। वस्तुयाथात्म्येन तस्य वस्तुनो भिन्नत्वादिति तदभेददृग्भेदज्ञानं विनिन्दितम्। विद्यमानस्याभेदस्य दर्शनं क्वचिदपि न निन्दितम्। न तद्वाक्यस्य तत्र तात्पर्यमिति तात्पर्यम्। शिलाः प्रतिमादयः। अस्म्यहं देवोऽहमिति च या दृशिरुत्तमस्याधमत्वेन दृशिरिति योज्यम्। नीचस्य चोद्यत्वेनासमस्य

समत्वेन समस्यासम इति दर्शनं ज्ञानं द्रवं जडं जलं देहोऽहमिति च या मतिर्नास्तिकादीनामनुभासजन्या । तदुक्तम् । देहात्मत्वं यदि न तत्प्राप्तं प्रत्यक्षतः क्वचिदित्यनुव्याख्यानव्याख्यासुधायां नास्त्येव देहात्मप्रतीतिर्याऽनुमानादिना । बाध्ये येषां चास्तिकादीनां तेषामपि ते इन्द्रियजा किन्तु अनुमानाभासजन्यैवेतीति । असतीषु भार्यास्वसत्सु सदितरेषु च स्वीया इति दर्शनम् । एवमादिकं भेदज्ञानमिति प्रोक्तं या चान्येनानेनाप्युपलक्षणीया माऽस्तीति ध्वन्यते । तस्मात्तस्या अन्यथामतेरपहानाय त्याजनाय वरा गुरवः संसेव्याः । समा तदेकपटुतामभिप्रैति । गुरूणां पूजया । सुप्सुपेति समासः । सर्वा देवताः प्रीयन्ते प्रीता भवन्ति । एषां गुर्वन्तर्वसतां प्रीतिरन्यथा न स्यात् । तदनन्यथात्वं स्वयं व्याकरोति ॥ गुरूक्ति स्वाधिष्ठानगुरूपदेशमपहायेति । नृणां सतां पूजाविशेषेण सदा कार्या । कृत्यानां कर्तरि वेति स्मरणान्नृणामित्युपपद्यते । विशिष्टेष्वधिका मध्यमेषु मध्यत इति भक्तिस्तारतम्येन भवेत् । सहाराः सुरा आराध्या इति स्वातन्त्र्येण तत्सपर्या न कार्येत्यायातः । तेऽपि वा साक्षात्स्वसमञ्चनं विहायैव कुतः कुर्वन्तीत्यत आह ॥ उत्तमा अपीति । पूज्यत्वेन स्वसन्दर्शिते गुरुभ्य उत्तमा अपि देवेशाः स्वाधमान्विदुषो ज्ञानिनः पूजायै प्रयच्छन्ति ददति । तत्र तन्त्रं यतः परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष इत्यादेः । तेषु स्थित्वाऽनुपमां पूजां सदा स्वयं गृह्णन्ति । ज्ञानानि च पूजितगुरुद्वारा प्रयच्छन्ति । एवंविदा गुर्वादिके पूजिते पूजिता देवाः । सब्रह्माणः सकेशवाः सुरवराः पूजिताः स्युः । न च सान्निध्यात्ते महायोगिन्पातकानि महन्त्यपि । सद्यो नश्यन्तीत्यादिवचनात्सज्जनदर्शनादेर्महापातकघातकत्ववत्पुराणादिषु गङ्गा गङ्गेति यो ब्रूयात् । प्रयागेति स्मरणं पापभाजनम् । प्रयागे मरणान्मुक्तिः स्मरणादरुणाचले । सेतुं दृष्ट्वा विमुच्यत इति पापापनोदकत्वं तथामोचकत्वं चोच्यतेऽतः को निर्बन्धस्तीर्थाद्यपेक्षया प्रेक्षावदौत्तम्य इति वाच्यम् । पक्वयोगिनां ज्ञानद्वारैव पापापहानवादीनि तानि वचनानि मुक्त्यभिधायीनि च पापान्मुक्तिपराणि स्तुतिपराणि च । यथोक्तं तृतीयाध्यायगीताभाष्यटीकयोः । गत्यन्तरं च नान्यः पन्था इत्यस्य नास्ति । इतरेषां ज्ञानद्वाराऽप्यविरोधः । यत्र तीर्थाद्येव मुक्तिसाधनमुच्यते ब्रह्मज्ञानेन वा मुक्तिः प्रयागमरणेन वा । अथवा स्नानमात्रेण गोमत्यां कृष्णसन्निधावित्यादौ तत्र पापान्मुक्तिः स्तुतिपरता वा । तत्रापि कुत्रचिद्ब्रह्मज्ञानसाधनत्वमेवोच्यते । अन्यथा मुक्तिं निषिध्य ब्रह्मज्ञानं विना मुक्तिर्न कथञ्चिदपीष्यते । प्रयागादेस्तु या मुक्तिर्ज्ञानोपायत्वमेव हीत्यादौ । न च तीर्थस्तुतिवाक्यानि तत्प्रस्तावेऽप्युक्तज्ञाननियमं घ्नन्ति । यथा किञ्चिद्दक्षं भृत्यं प्रत्युक्त्वाऽयमेव हि राजा किं राज्ञेत्यादीनि । यथाऽऽह भगवान् । यानि तीर्थादिवाक्यानि कर्मादिविषयाणि च । स्तावकान्येन तानि स्युरज्ञानां मोहकानि च । भवेन्मोक्षस्तु मद्दृष्टेर्नान्यतस्तु कथञ्चनेति नारदीये । ननु यथा मोक्षस्य ज्ञानसाध्यत्वे तमेवमित्याद्यागमाः सन्ति तथा कर्मसाध्यत्वेप्यपामसोमेत्यादयो विद्यन्ते तत्कथं निर्णय इत्यतः सावकाशत्वनिरवकाशत्वबलादित्याह । गत्यन्तरं चेति ॥ ज्ञानद्वारेति । स्तुतीति प्रशस्तत्वोपलक्षणेत्यर्थः । प्रशस्तत्वसादृश्येन गौणी वा दुष्टजनव्यामोहनार्थत्वस्योपलक्षणमेतत् । अज्ञानां सम्यग्ज्ञानायोग्यानामित्यन्तेन ग्रन्थेन ॥ अथ श्लोकद्विकार्थः ॥ न ह्यम्मयानीत्यादिनोक्तं वितस्य तथा दर्शनादेवेत्येवकारव्यावर्त्यः कालः कश्च ग्राह्य इत्यत आह ॥ नेति । प्रसिद्धकाष्ठाधिरूढोऽग्निस्तदन्तर्गतो भेदकृतोऽन्यथाज्ञानिनः पुंसः । भेदेऽभेदज्ञानिनः । एवमेव सूर्याद्याश्चन्द्रश्च तारकं च । सर्वो द्वन्द्वो विभाषयेत्येकवद्भावः । चन्द्रेण सहितं च तत्तारकं चेति वा । खमाकाशः श्वसनो मातरिश्वा वा तदभिमानीन्द्रोऽग्निश्च मनः । सोमस्य पृथग्ग्रहणादुमा वा तत्पतिर्वा । उपासितास्सेविता अपि अघं हरन्ति । विपश्चितो ज्ञानिनस्तु मुहूर्तं सेवा तयैवाघं तत्सङ्गं घ्नन्तीत्येकेनैवावृत्त्या घ्नन्ति घ्नन्तीत्यन्वयसम्भवे किमिति हरन्तीति पदमिति चेन्न । न घ्नन्तीत्यन्वयने मास्तु हरणं मरणं स्यादिति । तथाऽन्यत्र हरन्तीत्येवोक्तौ हृतस्यापि केशादेः पुनरङ्कूरणवत्पातकाज्जृम्भणं स्यादिति हरन्ति घ्नन्तीत्युक्तिः । तत्र हरणमेव नास्ति हननं तु दूरापास्तम् ! अत्र तु हनने जाते न पुनर्भवस्तस्येति विशेषोऽपि बोधितः स्यादिति सन्तोष्टव्यम् । न ह्यम्मयानि तीर्थान्यपि तु देवास्तेऽपि न स्वातन्त्र्येण तीर्थेन शुद्धिकराणि किन्तु हरिरेव तीर्थं तद्भक्ताः साधव इति व्याकुर्वन्ते । विष्णुतीर्थीयवचनमुदचकथन् । सर्वशुद्धिकरत्वात्तु तीर्थाख्यो विष्णुरच्युत इति । तथा साधवः । नाम ब्रह्मेत्युपासीतेत्यादाविव प्रथमा सप्तम्यर्थे । साधुषु स्थिता देवाः । यदधीना यस्य सत्ता तत्तदेव भण्यत इत्यादेः साधुसत्ताया देवाधीनत्वात्सामानाधिकरण्ये साधवो देवा इति व्याचक्रुः । यस्याधिकारिणः कुणपे शवसदृशे त्रिधातुके प्राधानिकपृथिव्यप्तेजःकृते । वातपित्तश्लेष्मधातुयुते देहे । चेतन आत्मबुद्धिर्मम देह इति स्वाधीनतामतिरन्यथामतिः । कलत्रादिष्वसत्सु स्वधीः स्वकीया मतिर्भौमे भूमिशिलादिकृतप्रतिकृताविज्याः पूज्या इति बुद्धिर्यस्य सः । जले तीर्थबुद्धिस्तीर्थं शुद्धिकृदिति बुद्धिर्यस्य सः । अभिज्ञेषु जनेषु कर्हिचिद्यदाकदाचिदपि यस्य नेज्यधीरतीर्थबुद्धिर्वा स एव गोखरः । गवि भूमौ खरो गर्दभः । यद्वा देहोऽहमित्यन्यथाज्ञानमित्यर्थः । न च क्व च प्रत्यक्षतः प्राप्तमनुमानमबाधितम् । देहात्मत्वं यदि न तत्प्राप्तं प्रत्यक्षतः क्वचित् । मम देह इति ह्येव न देहोऽहमिति प्रमेत्याद्यनुव्याख्यानप्रतीतिरेव वा प्रभावानित्युक्तेः कथमिदमिति चेन्न । देहस्यात्मत्वं प्रत्यक्षतः प्राप्तमित्यारभ्य सुधायां क्वचित्प्रतीतेरभावात्क्वचित्प्रतीतिसद्भावेऽपि प्रत्यक्षजत्वाभावात्क्वचित्प्रत्यक्षप्रतीतिभावेऽप्ययथार्थत्वात्क्वचिदयथार्थत्वेऽपि प्रबलप्रत्यक्षेण बाधादित्यर्थः । अत एव क्वापीत्युक्तम् । अन्येनेत्यनुपजीव्येनागमादिनेत्यर्थः । तदेवं स्वभावतः प्रबलेन प्रत्यक्षेण विरुद्धावनुमानागमावाभासावेवेत्यन्तेन ग्रन्थेन स्फुटविवेकाभावेन व्यवहारमिति निर्णीतत्वाद्देहात्मबुद्धिर्नैषां ममाहमिति धीः श्वशृगालभक्ष्य इत्याद्यर्थोऽवसेयस्तद्वर्त्मनेति काऽत्र कथन्ता । गौः खर

इति शब्दौ वाचकौ यस्य स गोखर इति वा। पश्यज्जनानां गवां नेत्राणां खर इव खर इति वा। गौश्च पशुप्रायश्चासौ खरो दुश्शब्दकारित्वादिति केचित्। अनुव्याख्यासुधाद्यभिद्यानेन ब्रह्मपुराणादिगतवैकुण्ठमाहात्म्यादिवचनानां क्षेत्रतीर्थमाहात्म्यप्रतिपादकानां गतिरुक्ता वेदितव्या। तथा हि तानि। सद्धर्मरतिदान्यत्र कतिसङ्ख्यानि तानि च। कति च ज्ञानदान्यत्र भक्तिवैराग्यदानि च। मुक्तिप्रदानि कान्यत्र तानि मे वद सुव्रत। सद्धर्मरतिदान्यत्र सन्ति चाष्टोत्तरं शतम्। भक्तिवैराग्यदान्यत्र षष्ठीन्यष्टोत्तराणि च मुक्तिदान्यत्र षट्चेत्यादीनि॥ १३॥ भगवतः कृष्णस्य दुरन्वयं दुस्साध्वोऽन्वयस्तदर्थसम्बन्धतस्मिन्यस्य वा तत्। तत्रासम्बद्धमिति यावत्। तत्र तन्त्रमकुण्ठमेधस इति। मेधश्शब्दोऽयं स्वतन्त्रः। अप्रतिहतमतिः। यद्वा योऽकुण्ठमेधसोऽकुण्ठो मेधा यस्य च स चासौ साररूपत्वात्सश्च तस्य भगवतः कृष्णस्येति। सारत्वात्स इति प्रोक्त इत्यादेः। इत्थं निशम्य विप्रा मेधाविनोऽपि। गृणन्तु विप्र ते धिय इत्यृक्टीकायां विप्रमेधाविन्नित्युक्तेः। विप्रो गृत्स इत्यादिचतुर्विंशतिनामसु पाठादिति तट्टिप्पण्युक्तेः। तन्नामसु पाठात्। भ्रमद्धियो भ्रमन्ती धीर्येषां ते तथा सन्तः। तूष्णीं मौनवन्त आसन्॥ १४॥ कथं जगाद एवं जगदीश इत्यालोच्यैवं निश्चित्यापदंश्चेत्याह। चिरमिति। ईश्वरस्यापीशितव्यतां नियम्यकूटघटितताम्। तद्वचनतः प्राप्तं निशम्य श्रुत्वाऽनन्तरं चिरं विमृश्य जगद्गुरुं कृष्णं प्रति स्मयन्तः सन्तो जनसङ्ग्रह इति लोकानुकृतिरित्यूचुः। यद्वा जनसङ्ग्रह इति स्वयं विमृश्य जगद्गुरुं प्रति स्मयन्त ऊचुरित्यन्वयः॥ १५॥ तदृषिवर्गः किमवादीदित्यत आह। ऋषय इत्यादिना। हे विश्वसृजां ब्रह्मादिजगत्सर्जकानामधीश्वर स्वामिन्। तत्त्वविदुत्तमा वयमपि। यस्य तव मायया प्राज्ञया शक्त्येति वा विमोहिता मोहं प्राप्ता विमा विगता मा येभ्यस्ते विमा अज्ञा इत्युदिता इदं चर्येति ते तथेति वा। कथं तत्त्वविदुत्तमा इति आत्मनो निरहन्ता आहुरिति मोहिता इत्यनेन परास्तम्। स भवान् ईहया स्वेच्छया त्वचेष्टयेति वा गूढोऽनभिव्यञ्जितनिजचर्यः। ईशितव्या य ईशितव्यश्च स्वप्रेयः स भवति। लोहितादिढाज्भ्यः क्यषिति क्यष्। स च भवत्यर्थे त्वाचारार्थे। भृशादिभ्यो भुव्यच्वेर्लोपश्च हल इति भुवीत्यनुवृत्तेस्तदर्थस्तु भवत्यर्थ इत्युक्तेर्नाचारः। विकल्पतः पदयोरभिधानात्परस्मैपदता सम्भवति। तद्वद्भवतीति तात्पर्यम्। तत्तदनुकरणरूपं भगवच्च तद्विचेष्टितं च भगवदैश्वर्यादिमद्विचेष्टितं तत्स्वरूपत्वात्तस्येति सम्भवति चेष्टितस्यापि भगवत्त्वम्। अहो आश्चर्यम् पारोक्ष्योक्तिर्वा भगवतो विचेष्टितमहो। तर्हि मायया निगूढ इति मायिकत्वमुच्यत इति प्रतीयत इत्यत आहुः॥ विचित्रमिति। विगता चित्रा माया यस्मात्तदमायिकमित्यर्थः। विचित्रं नानाविधमिति वा। अहो विचित्रमत्याश्चर्यकरमिति वा॥ १६॥ तच्चेष्टावैचित्र्यं स्पष्टयन्ति॥ अनीह इति। आत्मना स्वेनानीहः फलाकाङ्क्षाशून्योऽक्लिष्टकारी वा एकः प्रधान एतज्जगद्बहुधा सृजत्यवत्यत्ति। यथा भूमिर्भौमैः स्वसम्बन्धिभिः पदार्थैः। बहुनामरूपिणी बहुविधानि नामानि च रूपाणि च सन्त्यस्या इति सा। यया बध्यते तथा भगवान्बध्यते। किञ्चित्कार्यकर्त्र्या धात्र्या बन्धो बहुविधम्। विभूम्नो विशेषतो भूमा पूर्णता यस्य स विभूमा। विडम्बनं विडम्बयतीति तत्तथा हि यतस्तस्मादहो॥ १७॥ विडंबनं च न सदा किन्तु प्रयोजनमात्यायिकं तदेवं प्रवर्तस इति विज्ञापयन्ति॥ अथापोति। स्वजनाभिगुप्त्यै स्वजनरक्षणाय स्वजनायतो वा इमानि भूतानि जायन्त इत्यादेः, स्वजातास्तेषामभिगुप्त्यै येन जातानि जीवन्तीति श्रुतेः। स त्वं तदन्यतमो बिभर्षि। किञ्च काले वेदपथप्रतिबन्धने यथावस्थितार्थप्रतिबन्धे तथा। स आत्मा तत्त्वमसीत्यादावनकारप्रश्लेषेण छेदने च खलैः प्रस्ताविते तं वेदपथं भवांस्तं पथम्। वाटः पथश्च पन्थाश्चेत्युक्तेः। मार्गं वेदेति जानातीति स्वलीलया तत्खलनिग्रहाय बिभर्षि सनातनं सदातनं ससंवादं स्याद्यथा तथा विभर्षि। प्रागुदाहृतं गीतातात्पर्यमनुसन्धेयम्। अनन्तरं वर्णाश्रमात्मा सकलवर्णाश्रमधर्मप्रवर्तक इति तत्स्वामी परः पुरुष उत्तमपुरुष इतोदम्भरणहेतुः। परोभवो भवतः पर इति परोभवा मुक्तास्तानपि बिभर्षीति वा। परोभवाननयति चेष्टयतीति स वा। नलोपाद्यभावस्तु तज्जलानित्यादिवदिति साधूक्तं प्रागनुसन्धेयम्। परो इत्युक्तमार्थकमव्ययम्। रञ्जनात्प्रकृतिः प्रोक्ता रज इत्येव वैदिकैः। तस्या अप्युत्तमो विष्णुर्यतोऽतः स परोरजा इति बृहद्भाष्ये। परो इति ततः परमिति छान्दोग्यभाष्ये तद्वदयमपीति मन्तव्यम्। स्वजनस्य स्वात्मजस्य विधेर्नाभो नाभ्यां वा गुप्त्यै रक्षणाय। हे खलनिग्रहाय खलस्य वेदस्तेयस्य हयास्यस्य निग्रहस्य हननस्यायो हि लाभो येन स तं यापयतीति तत्सम्बुद्धिर्वा। मत्स्यात्मा सन् काले तत्संहारे जाते सनातनं वेदपथं काले ब्रह्मणि बिभर्षि। वर्णाश्रमात्मा वर्णानां विषयेऽश्रमः श्रमरहित आत्मा मनो यस्य स सन्। पुरुषः प्राणो यस्य सः। परोभवान् बहुकांतिमांश्चासीदिति शेषः। हरिश्च प्रकृतिश्चैव ब्रह्मवायू तथैव च। सुपर्णशेषरुद्राश्च शक्रः सूर्ययमावपि। अग्निर्यमानुजश्चैव कालशब्दोदिताः क्रमात्। पूर्वोक्तास्त्वपरोक्तानां प्रभवः सर्वशो मता इत्यादिमहासंहितायामिति द्वितीयतात्पसंक्तेः। खलान्निगृह्णातीति स तथा स चासावायश्च तत्सम्बुद्धिरिति वा। महाफलप्रदत्वात्तु विष्णुराय इतीरित इति निरुक्त इत्येकादशतात्पर्योक्तेः। तत्रैवायस्तु फलमुद्दिष्टमिति चोक्तम्॥ १८॥ ब्रह्म ते हृदयमिति श्लोके ब्राह्मणजातेर्हृदयतादात्म्यमुच्यत इत्यन्यथाप्रतीतिनिरासाय तदनूद्य व्याचष्टे॥ हृदयं प्रियमिति। कथं हृदयशब्दः प्रियार्थक इत्यतस्तं तस्मिन्निर्वक्ति॥ हृदयनादिति। हृदाश्रितत्वात्प्रियस्येति भावः। द्वितीयतात्पर्ये च। हृदयं प्रियमुद्दिष्टं कान्तमित्यभिधीयत इति॥ ततश्चायं श्लोकार्थः॥ तपःस्वाध्यायसंयमैः शुक्लं गुह्यं ब्रह्म ब्राह्मणजातिस्ते हृदयं प्रियं परं च। तदुभयघटकमाह॥ यत्रेति। ब्राह्मणकुलेऽव्यक्तं ब्रह्म सुव्यक्तं यथा भवति तथाऽव्यवधानेनेति यावत्। उपलब्धं दृष्टं यत्तमः परं शुक्लं च। किञ्च तस्मात्तत्र ब्रह्मोपलब्धिर्यस्मात्। हे ब्रह्मन्

शास्त्रयोनेः शास्त्रं योनिः प्रमाणमस्येति शास्त्रयोनिस्तत्र सर्वस्वामिनः सद्धाम सन्मुख्यमाश्रयस्तस्मात्सम्भावयसि अहो वयं जन्मभृत इत्यादिना सम्भावयसि । यत्तद्ब्रह्मण्यगुणो ब्रह्मण्याः सर्वेऽपि गुणा अप्रधानीभूता यस्मात्स तच्छिखामणिर्भवान्भवतीति ॥ १९–२० ॥ अहो वयं जन्मभाज इति यत्तन्नटनं परमार्थत इदानीमिति विज्ञापयन्ति ॥ अद्येति । यद्वयं त्वया सङ्गम्य सङ्गं प्राप्य स्थितास्तस्मान्नोऽद्य जन्मसाफल्यं जन्मनः सफलता । साफल्यमिति विश्लिष्टं विद्यादिपदैरन्वेतव्यम् । विद्याया अभ्यस्तशास्त्रस्य तपसः कृच्छ्रादेर्दृशो ज्ञानस्य चक्षुषो वा साफल्यम् । कुत इत्यादीत्यत आह ॥ यदिति । सङ्गत्यैवं सहवासेन श्रेयसां मध्ये परो विशिष्टश्रेयोरूप इति । सङ्गत्या लिङ्गभङ्गानन्तरं गमनेन प्राप्यश्रेयसां परः स्वामी । तद्विश्राणनकृत्तत इति वा । यद्वा त्वमङ्गत्या किञ्चिद्वस्तुसङ्गाभावेन सन्नपि । असङ्गो ह्ययं पुरुष इति श्रुतेः । अथाऽऽपि त्वयैव सङ्गमिनो जन्म साफल्यम् । तत्र तन्त्रं यत्त्वं नः श्रेयसां मध्ये पर इति । यद्यपि न इत्येकोक्त्याऽलं न पुनर्न इति वक्तव्यं तथाऽपि तस्य नो इत्यव्ययरूपतया त्वयाऽर्थाज्जन्मभाज इत्यनेन यज्जन्मसाफल्यमुक्तं तत्तव नो किन्तु न इत्यर्थकं सदन्तरङ्गतः सार्थकमित्यवधेयम् ॥ २१ ॥ परोक्षस्तुतिस्त्वतिप्रीतिकृदिति तथा नमन्ति । भगवते हे अकुण्ठमेध हे से सहितो या रमयेति सेस्तत्सम्बुद्धिर्हे स इति । अकुण्ठमेधस इति वा परमात्मने साक्षाद्विष्णुरूपाय कृष्णाय ते नमः । तर्ह्येवं किं गोपरूपगोपनं तस्येत्यत आह ॥ स्वयोगेति । स्वस्य स्वरूपभूता वा या योगशक्तिस्तया छन्नो महिमा यस्य स तस्मा इति वा ॥ २२ ॥ अत एव न तेषां तव मनीषेति भाषन्ते ॥ नेति । ईश्वरमीशेभ्यो वरं सकलेप्सितदम् । माया तु स्वेच्छा तद्रूपिणी या जवनिका तिरस्करिणी । प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सेत्यमरः । जुवत्यस्यां जुः सौत्रो धातुर्गतौ वेगे च ल्युट् स्वार्थे कन् । यमनिकेति वा पाठः । यमयति यम उपरमे ल्युट् । यवनिकेति नामरे पाठो न व्याख्याता च । तथाऽपि बहुव्यवहाराद्यु मिश्रण इत्यस्य यवनिकेति रूपमिति ज्ञेयम् । तया छन्नमात्मात्मानं यममी भूपा मिलिता न विन्दन्ति । भवतु कदाचिन्मिलितानामवेदनं वेदनं तु सदा तदनुवर्तिनां यादवानामित्यतो नैते विन्दन्तीत्याहुः । एकरामा एकस्मिन्नैकेनैव वा रमन्त इति तथा वृष्णयोऽपि यं न विन्दन्ति । च समुच्चये । तस्मै नम इत्यतीतेन वा तस्येत्युत्तरेण वाऽन्वयः ॥२३॥ अद्य तस्याङ्घ्रिं ददृशिम । मोदेशः । एकान्तिनां तु ज्ञानमात्रमर्थनीयमिति । वरिति ज्ञानमुच्यते । सव्यश्चाङ्घ्रिर्ज्ञानात्मेति तं ददृशिमेत्येकवचनेन ध्वनयामासुः । हे अद्य उपजीव्येति वा । किं तद्दर्शनेनेत्यतो वदन्ति ॥ अवौघमर्षतीर्थास्पदमिति । धातूनामनेकार्थत्वात्तितिक्षार्थोऽप्यत्र नाशार्थः । नाशयन्तीति तानि च तानि तीर्थानि च तेषामास्पदं स्थानभूतम् । सुविपक्वयोगैरत्यन्तं विपक्वः फलोन्मुखो योग उपायो भक्त्यादिर्येषां ते तर्हीदं धृतं ध्यातमिति यावत् । आस्पदं प्रतिष्ठायामिति निपातितः शब्दः । ध्यानमात्रं न पुरुषार्थ इत्यत आहुः । उत्सिक्तोद्रिक्ता या भक्तिस्तयोपहृतोऽपहृत आशयो स्थानमभिप्रायो विषयाभिलाष इति यावत् । येषां ते ते च ते जीवकोशा जीवस्य कोशस्थानानीति लिङ्गानि येषां ते । भगवत्गतिमापुः । अथः तद्धृदयमपि तद्हृदि धृतवन्त इति तदनन्तरं भक्तान्नोऽनुगृहाण । न उपर्यनुग्रहं कुर्विति यावत् । पूर्वं भक्तत्वेन ग्रहाणानन्तरं भगवद्गतिमनुग्रहाणेत्यप्यावृत्त्याऽन्वयः ॥ २४ ॥ दाशार्हं कृष्णमित्यनुज्ञाप्य विज्ञाप्य धृतराष्ट्रं युधिष्ठिरं तान्राजर्षिवर्यान्राजर्षिश्रेष्ठान्राजश्रेष्ठान्कांचित्स्वतः पुरतस्तत्रायातानृषिश्रेष्ठान्वाऽनुज्ञाप्य मुनयो द्वैपायनाद्या गन्तुम् ॥२५॥ पश्चात्कृत्वा प्रणम्य । इदं किं पृच्छसि पृच्छेति तत्तदनुशासनमुपसङ्गृह्येदं वक्ष्यमाणं बभाषे । आर्षो बभाषेदमिति निर्देशः । बभाषेति पदव्यत्ययो वा । उत्तरत्र क्त्वादेः करिष्यमाणस्य पत्न्यानुकूल्येन भाव्यमिति सा चानुवर्तिनीति वाऽऽह ॥ दं सुयन्त्रित इति । दमिति भार्यावाच्यव्ययम् । दं सुयन्त्रिता यस्य स इति तदर्थः । इदं च वां पुत्रतां गत इति वक्ष्यमाणानुगुणम् । दं कलत्रं बुधैः प्रोक्तं छेदे दातरीत्यनेकार्थध्वनिपदमञ्जरी । द्रस्तरौ दं कलत्रे च दाने छेदे च दातरीति विश्वश्च ॥ २६ ॥ सर्वे देवा येषु सन्निहिता इति सर्वदेवास्तेभ्यः । सर्वदेवमयो विप्रः । सर्वा देवता वेदविदि ब्राह्मणे वसन्तीत्यादेः । वो नमः । हे ऋषयः श्रोतुं मद्वचनं श्रोतुमर्हथ योग्या भवत । कर्मणाऽनुष्ठितेनेष्ट्यादिना नरकाद्यनर्थप्रापककर्ममूलच्छेदो यथा स्यात्तथा नः प्रत्युच्यन्ताम् ॥२७॥ वसुदेवेन वासुदेवे सकलफलरूपे समीपे सति कथमस्मान्प्रति कृतः प्रश्नः किमियदज्ञोऽयमिति कुतुकिनोऽन्यान्मुनीन्स्वयं स्वयम्भूर्नारद आह ॥ नेति । हे विप्रा वसुदेव आत्मनः श्रेयो बुभुत्सया नोऽस्मान्पृच्छतीति यत्तदिदं नातिचित्रम् । यद्यस्मात्कृष्णमर्भकं मत्वा स्थित इति । इदं मननं कुतोऽमतिहेतुरित्यतोऽप्याह ॥ अर्भकमिति । अर्भः को ब्रह्मा यस्य तमाद्याद्यम् ॥२८॥ कश्यपस्यापि प्राग्वसुदेवस्य मानवतनुमत इदं सम्भवदेवेति तन्मौर्ख्यं सदृष्टान्तमाचष्टे ॥ सन्निकर्ष इति । मर्त्यानां सन्निकर्षोऽमर्त्यैः सन्निकर्षस्तदमर्यानादरणे कारणम् । हि लोकसम्मतम् । यथा तत्रत्यः । अमेहक्वतसित्रेभ्यः इति त्यः । तत्र सन्यः पामरो गां गमम्भो हित्वाऽन्यदीयमम्भः शुद्धये याति । सति जगज्जनकेऽस्मान्पृच्छति तदनादरणेनेति तद्धृदयमिति भावः ॥ २९ ॥ तन्मननान्यथात्वं विवरीतुं तन्मेयस्वभावमाह ॥ यस्येति । यस्यैतत्तनयस्यानुभूतिर्ज्ञानं न तथा । अस्य जगतो विश्वान्तर्निदेशे तदुत्पत्त्यादिप्रयुक्तोत्पत्त्यादिना च स्वतो नयनादिकण्डूयनसमये नखमुखदलने जातेऽशनैरशनसमये रदनैरशनारदने चेत्यवमादौ स्वतः । यथोक्तमेकादशे । जनोऽस्य हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत् । जिह्वां क्वचित्सन्दशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येदित्यादिना । अन्यस्मादृष्यादेः सत्त्वादिगुणाच्च । कुतश्च नार्तकिता दशनिपातादेश्च । नरिष्यति न नश्यति । नरिष्यतीत्युक्तिस्तस्यास्तत्तादात्म्यात् । अस्य जगतो यथा तथा । यस्यानुभूतिः काले ज्ञानं स्वतोऽत्यन्तं व्याप्तः । स योऽतोऽश्रुत इति श्रुतेः ।

अन्यस्मादित्यादि पूर्ववत् । यो नरिष्यति क्लेशप्रापको यः कर्मपरिपाकस्तत्प्रापका ये गुणास्तेषां प्रवाहाः परम्परास्तैरव्याहतोऽनुभवो ज्ञानमनुभावो वा यस्य स तम् । तत्र हेतुरीश्वरमिति । तदखण्डत्वे च हेतुरद्वितीयमिति । एतादृशं कृष्णम् ॥ ३० ॥ यथा मेघेन हिमेनोपरागेण राहुग्रहणेन च छादितं सूर्यमसूरिरप्रकाशं मनुजो मनुते तथा गुणप्रवाहैः प्राणादिभिर्गूढं सत्त्वरजसस्तमसां शुक्लरक्तनीलत्वेन हिममेघोपरागाणां तथात्वेन तैर्गूढं सूर्यमिवेति निदर्शनम् । एवमन्वयान्तरमिति ज्ञेयम् । केचिन्माञ्जिवर्णाश्चेति रामायणस्योक्तेरभ्रस्य रक्तता ज्ञेया । स्वविषयैः स्थूलेन्द्रियगोचरैः प्राणादिभिः प्राकृतैरुपगूढं मेने । प्राकृतशरीरं मेन इत्ययमज्ञोऽतः प्रश्नो युक्त इत्याशयः । स्वविषयैः स्वमातृमातृकैः प्राणादिभिर्बलादिभिश्चेष्टादिभिर्वा गूढं भवन्तमर्भकं मेन इत्यज्ञ इति वा । असुरविषयैरितरेषामिति वा ॥ ३१ ॥ प्राज्ञा एतदज्ञताज्ञापनेनैव समयमगमयन्निवोत्तरं तत्पृष्टस्यावदन्नित्यत आह ॥ अथेति । मुनयः सर्वेषां राज्ञां शृण्वतां तथा रामकृष्णयोः शृण्वतोश्च । आनकदुन्दुभिमाभाष्योचुः ॥ ३२ ॥ यद्यप्येतदपायोपायाः सन्ति बहवस्तथाऽपि बित्ततच्चित्ताः स मे मुनय इदं निर्हारकारणमैरयन्नितीरयति ॥ कर्मणेति । साधु यथा तथा निरूपिता शास्त्रे । साधुभिर्निरूपित इति सङ्ग्राह्यत्वे हेतूक्तिः । एष वक्ष्यमाणः सर्वयज्ञेश्वरं विष्णुं मखैर्यज्ञैश्च यजेत्पूजयेदिति यः स एष निरूपित इति वाऽन्वयः ॥ ३३ ॥ मखैरिति युष्मन्मुखतो यदुक्तं तत्कर्मकरणेक्षणे पुनस्तदन्तरकर्माकरणात्कर्मणा कर्मनिर्हारो दुश्शकः । भित्तेर्जलेन सम्मार्जने मृत्तिकैवेति नयत इति न युक्तिसहमिति दत्तो मयि शङ्काबहूपपादनेन श्लोकपञ्चके परिहरन्ति ॥ चित्तस्येति । चित्तस्य मनस उपशमो विषयेभ्य आहरणलक्षणाः । यः कविभिः शास्त्रचक्षुषा तद्रूपरूपमात्रग्रहेण दर्शितः । स सुगमो योगः कर्मबीजभर्जनोपायोऽयमेव चात्मनः स्वस्य मुदावहो धर्मो नेतर इत्यर्थः । चशब्दोऽवधारणे । यस्योपशम उपशान्तिरक्रोधोपरोध इति यावत् । तस्य चिज्ज्ञानम् । तथा यः पारत्रिक्यः सम्पदश्च सुगमा इत्यप्यर्थः ॥ ३४ ॥ स्वस्तीत्यव्ययमिति पक्षे स्वस्त्ययनः स्वस्त्याश्रयः । अयनशब्दः स्त्रीलिङ्ग इत्ययन इति सम्भवति । विस्तृतश्च प्राक् तत्प्रकारः । स्वस्तिरस्तु न इत्यादेः स्वस्तेरयन इति च । अयं मङ्गलाश्रयो मार्गः । अधिकार्यत्र क इत्यत आहुः ॥ द्विजाते गृहमेधिने गृहस्थाश्रमिण इति । स किमात्मेत्यतो वदन्ति । श्रद्धया शुक्लेन न्यायार्जितेनेति निर्मलेन वित्तेन पुरुषं भगवन्तमिज्येतेति यः सोऽयमित्यन्वयः ! आप्तेति सम्बोधनं च ॥ ३५ ॥ सन्न्यासस्तु विरक्तैरतिविरक्तैश्चेति द्विविधैर्ग्राह्यः । तत्र नानुपनीतस्य नाधिकारः । अधिकारश्च गृहिणाम् । तत्र द्वौ पक्षौ श्रौतः स्मार्तश्चेति । यदहरेव विरजेत्तदहरेव प्रव्रजेदित्याद्युदित आद्यः । अतिविरक्तोपनीतपरिणतविषयः । द्वितीयस्तु पित्रादिऋणपरिहारानन्तरं ग्राह्य इति विवेकं मनसि कृत्वा वदन्ति । वित्तैषणामिति। यज्ञाश्च दानानि च तैर्वित्तैषणां द्रव्यापेक्षा विसृजेदिति सर्वत्रान्वेतव्यम् । विसृजेत् । बुधः संसारासारतावित् । गृहैस्तत्तदाश्रमैः सहदारसुतैषणाम् । धीरो धैर्यं तद्विसर्गहेतुरित्यर्थः । कालेन ज्ञातेन कालेन भगवता निमित्तेनात्मलोकषणामात्मनः स्वस्य लोकविषयिणीं वैकुण्ठादिलोकेच्छां विसृजेत् । एकान्तिकत्वात् । स्वत एवागमिष्यति न याचनोचितेति भावः । एवं कालेन क्रमेणेत्यप्यर्थः । ग्राम्ये स्त्रीभोगे त्यक्तैषणाः सर्वे धीरा ब्रह्मचारिणोऽपि तपः प्रतिवनं ययुः । सन्न्यासिनः सन्तो वाऽतिविरक्ताः ॥३६॥ विरक्तेनेयदनुष्ठाय सन्न्यासो ग्राह्य इति तदाहुः । ऋणैरिति । जात उत्पन्नो द्विजो देवऋषिपितॄणां चेति त्रिभि ऋणैः । क्रमात्तदापकानाहुः । यज्ञेत्यादिना । यज्ञेन देवानामृणपरिहारः । अध्ययनेन ऋषिऋणपरिहारः । पुत्रेण पितृऋणमिति । तान्देवादींस्त्रीन् अनिस्तीर्य पुत्रेण जय्य इत्यादेस्तद्द्वारा जित्वेति यावत् । त्यजन्गृहाद्याश्रमं यतेन्नरकाद्यनर्थमृणबाधया प्राप्नुयात् । निस्तार्येति पाठे स एवार्थः । अतिविरक्तस्य तु तन्महिम्नैव तदादिऋणपरिहार इति मन्तव्यम् । ब्रह्मचर्यमत्र वेदाध्ययनम् । अध्ययनेति प्रागुक्तेः । पुत्रेति पुरोदीरणादत्रापि ब्रह्मचर्यपुत्राभ्यां चेति वक्तव्ये यद्ब्रह्मचर्यसुताभ्यां चेत्याहुस्तेन ब्रह्मचर्यं च सुता च ताभ्यां तच्च सुतश्चेति ताभ्यामावृत्त्या सुतया सुतेन चर्षिपित्रो ऋणमुन्मुच्य । कन्योदिता बत कुलद्वयतारिणीति । पुत्राच्छतगुणं पुत्री यदि पात्रे प्रदीयत इत्यादेः । स्वायम्भुवययात्यादीनां दौहित्रयज्ञाष्टकादिभ्य ऋणमुक्तिः प्रसिद्धा चेति विशेषं सूचयामासुरित्यवसेयम् । हे महामते वसुदेव यज्ञैर्देवानामृणमुन्मुच्यैव निरृणोऽशरणो गृहरहितः अ एव परमात्मैव शरणं यस्य स वा भवेत् ॥ ३८ ॥ जानता त्वया कृतः प्रश्नो लोकोद्धृत्यै तदुत्तरं च तदर्थमेवमस्माभिरुक्तम् । वस्तुतस्तु त्वमेवंविध इति न तवावश्यकमिति तमुत्साहयन्त आहुः ॥ वसुदेवेति । हे वसुदेव भवान्परमया देवकी सर्वदेवतेत्यादेरुत्तमया देवक्या सह जगतामीश्वरं हरिं गतः शरणं यातो नूनं निश्चयः । कुतः स इत्यत आहुः । यद्यतः स हरिर्वां युवयोः पुत्रतां भेजेऽत इति । एवमर्थापने वामिति सुलग्नम् । परमया देवक्या सहेदानीं पुरा च पुरुषजन्मसु सभार्यो भवान्भेजे नूनं यतः स वां पुत्रतां गत इति वाऽन्वयः ॥ ३९ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे द्विसप्ततितमोऽध्यायः ॥ १०–७२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ तन्मुखैरिति मुखवचनम् । तानेवर्षीनृत्विजो वव्रे ॥ १ ॥ धर्मेण यथा वरणं कर्तव्यं तद्धर्मेण वृता धर्मेण कल्पोक्तेन च तस्मिन्क्षत्रे उत्तमकल्पकैरुत्तमः कल्पो धरणीवितरणादिरूपः पक्षो येषु तैर्मखैः । उक्तंचाश्वमेधे पर्वणि । पृथिवी दक्षिणा चात्र विधिः ग्रथमकल्पकः । विद्वद्भिः परिदृष्टोऽयं शिष्टे विधिविपर्यय इति । प्रभुः प्रथमकल्पे तु योऽनुकल्पं प्रवर्तते । न तस्य साम्परायः स्याच्छ्रुतिरेषा सनातनीत्यनन्तदैवीये । तथा प्रथमस्कन्धीये । नयित्वाश्वमेधैस्तन्त्रिभिरुत्तमकल्पकैरिति

श्लोकव्याकृतौ यादवार्यैस्तद्यज्ञपञ्चकमजस्त्रिगुणं स एभ्यः सद्दक्षिणेत्युदाहृत्य श्रीमदुक्ति दक्षिणादिविषये विहितोत्तमकल्पयुतै रित्यर्थ इत्युक्तेश्च ॥ २ ॥ तस्य दीक्षाव्रतसङ्ग्रहस्तस्यां प्रवृत्तायां सत्यां पुष्करस्रजः कमलमाला रलयोरैक्याद्बहुमुक्तादिमाला इति वा राजान इतरे । सुष्ठ्वित्यव्ययम् । सुष्ठु प्रशंसनेऽपि च कथ्यत इति विश्वः । स्तुत्यमलङ्कृतमलङ्कारो येषां ते । सुष्ठु भृशं यथाऽलङ्कृता इति ॥ ३ ॥ तन्महिष्यो वसुदेवदेव्यो निष्कं वक्षोऽलङ्करणं तद्युक्ताः कण्ठा यासां ता आलिप्ता गन्धादिना । वस्तूनि हिरण्यफलादीनि पाणिषु यासां ता हिरण्यं रजतं वाऽपि गृहीत्वा क्रमुकं फलम् । शाला विशेद्यज्ञपत्नी शपेयुस्त्वन्यथा सुरा इति वस्तुशास्त्रं वा । यच्छमित्री यजमानमानिनी निशातं शस्त्रं गृहीत्वा प्रविशेच्छालामिति याज्ञिकाः ॥ ४ ॥ मृदङ्गपटहशङ्खभेर्यानकमादिर्येषां त इति विग्रहः । तूर्याङ्गत्वात् । गन्धर्व्यस्तद्भार्या अप्सरस इति न सरसम् । सहभर्तृका इत्युक्तेः ॥ ५ ॥ तमभ्यषिञ्चन्विधिवद्भक्तमव्यग्रभक्तमृत्विज इति सरलः पाठः । अव्यग्रमव्याकुलं भक्तं वसुदेवमव्यग्रं यथा भवति तथाऽभ्यषिञ्चन्निति वाऽन्वयः । विधिवदभ्यक्तमिति पाठस्तु बहुश्लिष्टः । अक्तं नयनयोः कव्यालेन प्रायस्त्रैककुदेन तन्न चेद्येन केन वा । यथोक्तं वाजसनेयके । यदाञ्जनं त्रैककुदमिति । त्रैककुदेनाञ्जनेनाङ्क्ते । यदि त्रैककुदं नाधिगच्छद्येनकेन चाऽञ्जनेनाञ्जीतेति । तथैवापस्तम्बारणं च यदाञ्जनं त्रैककुदं जातौं हिमवतस्परि । तेनामृतस्य मूलेनारातीं जम्भयामसीति । तत्फलं च प्रथमपञ्चकतृतीयखण्ड । आञ्जन्त्येनं तेजो वा एत...र्यदाञ्जनं सतेजसमे वैनं कृत्वा दीक्षयन्त्येकविंशत्या दर्भपिञ्जूलैः पावयन्तीत्यादिनोक्तं ज्ञेयम् । पिञ्जूलशब्दः सङ्घवाची । तत्रापि दक्षिणस्याक्ष्णः प्रागञ्जनमनन्तरं वामस्य । दक्षिणं पूर्वभङ्क्त्वेत्यादेः । ककुच्छब्दः शृङ्गवाची । हिमवत्सम्बन्धिशिखरत्रये जातस्त्रैककुदोऽजनविशेष इत्यर्थः । अभ्यक्तं नवनीतेन । तथा ह्यध्वरप्रस्तावे । हविष्यमुभौ भुक्त्वा लेपनपर्याप्तं नवनीतं त्रेधा विभज्येकं पयोऽसिदर्भपिञ्जूलाभ्यां नवनीतमुद्योतीत्याद्युक्तं नवनीतेन वाऽऽज्येन वा घृतेन वा युतेन वेति विशेषो ब्राह्मणेनावसेयः । तत्राज्यघृतशब्दयोरर्थभेद आयुतपदार्थश्च । य आज्यघृतयोर्भेदः पूर्वाचारैरुदाहृतः । सर्पिर्विलीनमाज्यं स्याद्घनीभूतं घृतं विदुरिति वचनादवसेयः । विलीनं द्रवदायुतं चेषद्द्रवदाज्यमित्यर्थः । अधिकारिविशेषपरा चाक्तिः । दीक्षयन्ति नवनीतेनाभ्यञ्जन्तीत्युक्त्वाऽऽज्यं देवानां सुरभि घृतं मनुष्याणामित्यादेः । विस्तरस्तु ब्राह्मणव्याख्यातोऽवसेयः । अभ्यषिञ्चदष्टादशभिस्तत्सङ्ख्याभिः । उडनि नक्षत्राणि तैरश्विन्यादिभिः सोमराजं चन्द्रं बहुत्वेन कान्तिमत्त्वेन च तन्निदर्शनं न तु तत्सङ्ख्यात्वेन सप्तविंशतिसङ्ख्यात्वात्तेषाम् । जनसंवृत इति पाठो नासंवृतः । आजनसंवृत इति निरञ्जनः पाठः । सोमाध्वरपञ्चके । अत्र कृष्णाजिनेन यजमानं दीक्षयन्तीत्यारभ्य वृत्रघ्नस्य विष्टपमगममिति चेत्यन्तेन तदावश्यकतोक्तेः ॥ ७ ॥ अपि माषं माषं नीत्या सप्तदशेति पाठ्यम् । ऋत्विजः । अध्वर्युः १ प्रतिप्रस्थाता २ नेष्टा ३ उन्नेष्टा ४ एवमध्वर्य्वादिचतुष्कम् । ब्रह्मा १ ब्राह्मणाच्छंसि २ आग्नीध्र ३ पोता ४ ब्रह्मचतुष्कम् । होता १ मैत्रावरुणा २ अच्छावाक ३ ग्रामस्तोता ४ । उद्गाता १ प्रस्तोता २ प्रतिहर्ता ३ सुब्रण्य ४ ॥ ४–१६ ॥ सदस्य एक इति सप्तदशर्त्विजः । सोमप्रवाकस्तु नैतन्मध्ये निविष्ट इति सप्तदशेत्युक्तिः । वृत्रहण इन्द्रस्याऽध्वरे यज्ञे । अत्राल्लोपाभावस्तु यज्ञस्याङ्गवैकल्याभावसूचकः ॥ ८ ॥ जीवेशौ जीवयति सर्वानिति जीवः शेषः सर्वाधारकत्वात् । तदात्मकत्वाद्बलश्चेशश्च जीवेशौ । रामश्च कृष्णश्चेति प्रागुक्तश्चानुकूलिताः । स्वविभूतिभिः स्वसन्निधानपात्रैः स्वसुतैर्दारैश्चान्वितौ स्वरूपभूताणिमादिभिर्वा ॥ ९ ॥ अनुयज्ञं प्रति प्रतिक्रतु यो विधिः कल्पोक्तः प्रकारस्तेन । यथाऽग्निहोत्रादिचिन्होपेतैरित्यग्निहोत्रादिलक्षणैः प्राकृतैः समाम्नातसर्वाङ्गा ज्योतिष्टोमादयः सप्त तैः । द्रव्यं पुरोडाशो ज्ञानमेतस्यात्र विनियोग इत्यादिज्ञानं क्रिया तदनुसारिकर्मेत्येतत्स्वामिनम् । द्रव्याद्रव्यज्ञानक्रियापदोत्तरं यज्ञपदमनुसन्धेयम् । ततश्च द्रव्ययज्ञो ज्ञानयज्ञः क्रियायज्ञस्तपोयज्ञस्तेषामीश्वरम् । द्रव्ययज्ञास्तपोयज्ञा ज्ञानयज्ञास्तथा पर इत्यादेः । ईजे ॥ १० ॥ यथोत्तमकल्पत्वेन गमावगमिनं काले विहिते स्वलङ्कृतेभ्यः प्राग्दत्तालङ्कारेभ्यः पुनस्तानलङ्कृत्य गोभूकन्या महान्ति धनानि यासां ता अददात् ॥ ११ ॥ प्रति प्रतिभावं गतया जाघन्या पत्नी संयाजं करोतित्यादेः । जाघन्या क्रियमाणपत्नीकर्तृकक्रतुविशेषः । तथाऽऽवभृथः समाप्तिस्तदाद्या वारुणेष्ट्यादींश्चरित्वा कृत्वा । तृतीया द्वितीयार्थे । तैः सहितमभिहितं कर्मेति वा । अथ तदनन्तरम् । न च नाथेति वक्तव्यम् । क्त्वाप्रत्ययेन तदानन्तर्यबोधनादिति वाच्यम् । तस्य नियमेन पूर्वकालानवगमकत्वात् । तथा ह्युदाहृतं मुखं व्यादाय स्वपितीत्यादि । अतोऽथेति सार्थकम् । रामह्रदे परशुरामनिर्मिते यजमानपुरःसरा विप्रा मेधाविनः सस्नुः ॥ १२ ॥ स्नातस्तातः कृष्णस्य बन्दिभ्यः स्तुतिपाठकेभ्योऽलङ्कारवासांसि अदात् तथा स्त्रियो वसुदेवभार्या अपि ददुः । ततः स्वलङ्कृतान्वर्णान् अश्वेभ्योऽन्नेन पूजयदपूजयत् ॥ १३ ॥ पारिबर्हेण योग्यद्रव्येण । तानाह ॥ विदर्भकोसलेत्यादिना ॥ १४ ॥ सदस्या ऋत्विजश्च सुरगणा आगताः । नरो भूता देवयोनयः पितरश्चारणाश्च श्रीनिकेतं श्रीनिवासं कृष्णमनुप्राप्य क्रतुं शंसंतः प्रययुः ॥ १५ ॥ धृतराष्ट्रोऽनुजस्ततो जात्या हीनः सन् जात इति विदुरः । अनु हीने चेति विश्वः । व्यास इत्येते सुहृत्सम्बन्धिबान्धवान् ॥ १६ ॥ बन्धून्यदून् सौहृदेन क्लिन्नं द्रवच्चेतो येषां ते ॥ १७ ॥ पूजया तत्साधनेन ॥ १८ ॥ वसुदेवो मनोरथमहार्णवमञ्जसोत्तीर्य करे नन्दं स्पर्शयन् ॥ १९ ॥ हे भ्रातः नृणां यः स्नेहसंज्ञित ईशकृतः पाशस्तत्तुलः । ईशकृतत्वं तद्दुस्त्यजत्वे हेतुः । सुराणां च योगिनामपि दुस्त्यजं मन्ये का कथाऽस्माकमिति भावः ॥ २० ॥

ज्ञानसत्तमैर्ज्ञानेन श्रेष्ठैर्युष्माभिरस्मासु यत्कृतं व्यापारोऽजानतो महिमानं तवेदमित्युदाहृत्य बृहद्भाष्ये सलीलमुक्तं तच्चास्माभिः प्रागिलखितमत्रानुसन्धेयम् । अप्रतिकल्प उपकरणीयप्रतिनिध्यन्तररहितः । किन्तु यत्क्षमं कर्तुं तन्मात्रं कथितं कथितं कृषेरिव पलालकुलमितिवत्कृतमित्याह । अफलाऽपि मैत्री अर्पिता साऽपि निवर्तेत कलिरिति नेत्यालपति । न निवर्तेत कर्हिचिदिति ॥२१॥ यथा छन्ने छन्नेऽवगमपटिम्न्यक्षिणि किम्विति वद सौभाग्यासौभाग्यदशयोर्न वैषम्यं फलन्त इति ॥ प्रागिति । हे भ्रातर्वो युष्मदादीनां कुशलं नाचरेम हि प्रसिद्धम् । कुत इत्यत आह । अकल्पाः कंससङ्कीलनचरणा इति । अधुना तु पुरः सतो युष्मान् श्रीमदेनान्धीन्यक्षीणि येषां ते तथा सन्तः पश्यामः । असद्विषये मीलितलोचनता युक्तेत्यतो न नन्द तादृशा इत्याह ॥ सतः सज्जनानपीति ॥ २२ ॥ श्रीर्यासां मम तु भवतु किलान्येषामपीति तन्माहात्म्यवचनपूर्वकमर्थयते । यया श्रियाऽन्धदृक्सन् स्वजनान् स्वो हरिस्तस्य जना दासास्तान् । भृत्या बन्धवो जामात्रादयो भ्रात्रादयश्च तान्न पश्यति । भृतितो ये बन्धवोऽन्योन्यं स्नेहपात्राणि तान्यपीत्यप्यर्थः । सा राज्यश्रीः । हे मानद नन्द श्रेयस्कामस्य पुंसो माऽभूत् । अडागम आर्षः ॥ २३ ॥ सौहृदेन शैथिल्यं द्रवतेति यावत् । यस्य चित्तं यस्य स एव । आनकदुन्दुभिरश्रुलोचनस्तत्कृतां मैत्रीमेव स्मरन् रुरोद ॥ २४ ॥ सख्युर्वसुदेवस्य प्रियकृत् । गोविन्दरामयोः प्रेम्णाऽद्य श्वः प्रातःप्रयाणोद्योग इति तस्मिंश्च निर्गमोद्योगेश्वर इति यदुभिर्मानितस्त्रीन्मासानवसत् ॥ २५ ॥ सव्रजो व्रजस्य स्वकीयलोकसहितः परार्ध्येति आभरणक्षौमाणां विशेषणम् । नानाविधानर्ध्यपरिच्छदैः पूर्यमाणः कृष्णार्जुनबलादिभिः कृष्णपरमप्रियत्वाद्बलस्य कदाऽपि वा विमनस्कत्वात्ततः प्रागुक्तः पार्थ इति ज्ञेयम् । कृष्णरामोद्धवादिभिरित्यपि पठन्ति । तं तद्दत्तं यदुभिर्यापितो ययौ ॥ २६–२७ ॥ गोप्यश्च काश्चन गोपाश्च केचन गोविन्दचरणाम्बुजे क्षिप्तं मनोऽपहर्तुं कार्यान्तरव्यापृतं कर्तुमिति यावत् । अनीशा असमर्था मधुरां ययुः ॥ २८ ॥ अङ्गराजः कर्ण इति च जानन्ति पूर्वराजानः । सर्वे राजान इति पठन्ति ॥२९–३०॥ बाष्पगद्गदभाषिणी च भाषिणश्च ते ॥३१॥ कृष्णो देवता येषां ते तथा॥ ३२॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे त्रिसप्ततितमोऽध्यायः ॥ १०–७३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ ॥ विशारदैर्नारदादिभिरुद्बोधितबोधस्य वसुदेवस्य वासुदेवरामौ प्रति तत्त्ववचनं वचनं च तं प्रति भगवतस्तथा देवक्या मृतापत्यप्रदर्शनमित्यादिमाहात्म्यमितरश्रुतवद्भक्तिकृदिति निरूप्यतेऽत्राध्याये । तत्रादौ पादाभिवन्दनं नन्दनयोर्वसुदेवस्याह । अथेति । द्वारकागमनानन्तरं कदाचित्कृतं पादाभिवन्दनं याभ्यां तौ सङ्कर्षणाच्युतौ प्रीत्या भक्तिविशेषरूपिण्याऽभिनन्द्याहो नटनमिति । अभिनन्दनं कृत्वाऽऽह ॥ १ ॥ आहेत्युत्साहेन प्रथमं प्रतिज्ञाय तदुपयुक्तमुक्त्वा तदुक्तिप्रकारमीरयति । मुनीनामिति । वदतां मुनीनां सकाशात्पुत्रयोर्धाम तेजः पराक्रममिति यावत् । श्रुत्वा स्वयं च तयोर्वीर्याज्जातो विश्रम्भो विश्वासो यस्य सः । अनेनान्यथैवं सामर्थ्यं न स्यादिति स्वतर्कणेन च तत्सत्यतां निश्चितवानिति ध्वन्यते । स्वसाक्षिसिद्धवीर्यादिजनितविश्वासो वा । तौ परिष्वज्यालिङ्ग्य सूचकं तदुपदिष्टं स्वसाक्षिसिद्धं च न विस्मृतमपि तु वर्तते हृदीति सूचकं वचोऽभ्यभाषत । धामसूचकं वदतामिति वाऽन्वयः । वाचालोऽयमिति यथा नोपेक्षा भवेत्तयोस्तथाऽवदद्वसुदेव इत्यप्याह । वदतां वाग्मिनाम् । वदो वदावदो वाग्मीत्यमरः । परिष्वज्यालिङ्ग्य तामाश्रित्येति यावत् । अभ्यभाषतेति ॥ २ ॥ परिष्वङ्गे साक्षादेतस्य नाधिकार इति ध्वनयितुमादौ सङ्कर्षणाच्युतावित्यादौ सङ्कर्षणग्रहः । अधुना तु मधुनाथ एव वक्ष्यमाणलक्षणलक्षितः साक्षादिति च तत्पुरस्करणमिति मन्तव्यम् । कृष्ण कृष्ण सनातनं वेदवेद्यं पुराणपुरुषं वा हे सङ्कर्षण । बलेत्यनुक्त्वा सङ्कर्षणेति वदन् एतदसम्भावितगुणपात्रं तदन्तर्गतः सङ्कर्षण इति ध्वनयामासेत्यवसेयम् । अस्य जगतः प्रधानपुरुषौ । प्रधानपुरुषो मुख्यपुरुषः पुरुषोत्तमः एक एकश्च प्रकर्षेणाधानं निधानं मूर्ध्नि यस्य स चासौ पुरुषश्चेति । परौ वा जाने । साक्षादिति ज्ञानस्य यथार्थतां ध्वनयति । यद्वा साक्षान्मुख्यतः परावित्यर्थः । अस्य जगतः सकाशात्परौ विलक्षणाविति साक्षात्प्रधानपुरुषौ जान इति वा ॥ ३ ॥ तदेव प्रधानपुरुषेश्वरत्वादिकं घटयन्नाह । यत्रेति । यत्रेदं तिष्ठति । यस्मिन्निदं सञ्च विचैधि सर्वमित्यादेः । येन । येन जातानि जीवन्तीति । यतः । यतो वा इमानि भूतानीति । यस्य यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनम् । यस्य प्रसादादित्यादेः । यस्मा इदं क्रियत इति यस्मै । यत् । सच्च त्यच्चेति । यथा । धाता यथा पूर्वमकल्पयदिति । येन प्रकारेण स्थितं यदा काले । इदं विश्वं स्यात्तथा साक्षात्तत्कुर्वन् भगवानेव त्वमिति प्रधानपुरुषेश्वरः । यदधीना यस्य सत्तेत्यादेः । ब्रह्मैवेदं सर्वमिति श्रुतेः । साक्षात्प्रधानपुरुषेश्वरो भगवानेव स्यादित्यपि योजयन्ति । यत्र गोत्रादौ येन यतो मृदो यस्य कुलालादेः सम्बन्धेन । अकारकत्वात् षष्ठ्यः । यस्मै जलाद्याहरणार्थं वा यद्घटादिकं यथा कम्बुग्रीवादिमत्त्वेन प्रकारेण यदा काले स्यात् तत्सर्वमित्यपि योजयन्ति ॥ ४ ॥ तदेव विवृणोति एतदिति । आत्मसृष्टं स्वोत्पादितमात्मना तत्तत्स्वभावेनात्मनाऽणुरूपेण वा तद्विश्वमनुप्रविश्यात्मन् आदानादिकर्तः हे अधोक्षज । प्राणानीन्द्रियाणि जीवो जीवयतीति जीवः । जीवो विनियता साक्षी जीव इति भगवतोऽनिरुद्धस्याख्येति श्रुतेः । विभर्षि पोषयसि । आत्मन्परमे व्योमन्निति वदात्मनि वा बिभर्षि धत्से वा । एतत्सम्भावकमाह । अज इति ॥ ५ ॥ तर्हीतरत्र दृश्यते कर्तृत्वादिकं कथमिति चेत्तत्राह । प्राणदीनां तथा विश्वसृजां प्रजाप्रत्यानां विश्वसृजां तत्त्वेन प्रवर्तमानानां ब्रह्मादीनां प्राणादीनां तदिन्द्रियाणां याः शक्तयो विषयग्रहण-

सामर्थ्यानि ताः। तथा चेष्टितं कर्मापि परस्य तदितरस्य तन्नियम्यत्वेन स्थितस्य। द्वयोर्मध्ये श्रेष्ठे सर्वं प्राणादिकं जीव इति हरिश्चेति द्वयोर्जीवेशयोः श्रेष्ठे कृष्ण एव वर्तते। तत्र हेतुः पारतन्त्र्यादिति। जीवजातस्य वैसादृश्यं विसदृशत्वं तस्माद्वैलक्षण्यादिति वा। द्वयोर्मध्ये श्रेष्ठे त्वयि चेष्टितं तदनुरूपं चेत्प्राणादीनां विश्वसृजां परस्य धातुरपि या रमाया अपि तास्तच्चेष्टितानुकूलाः शक्तयो भवन्ति। तत्र तन्त्रं पारतन्त्र्यादिति। तत्राप्यस्वतन्त्रवर्गे न साम्येनेत्याह। वैसादृश्याद्वैलक्षण्यादेव भवन्ति तरतमभावेनेति यावत्। पारतन्त्र्याद्वैसादृश्यादित्यस्याक्षरपरे लघु भवितव्यं तदर्थं चैवं वैसादृश्यात्पारतन्त्र्यादिति पाठे न किञ्चिद्वृत्तविच्छित्तिरथाऽप्येवं पठन् जीवत्वेनैकीकृत्योक्तजीवानां परतन्त्राणां मध्ये द्वौ च तौ सदृशौ च। द्वीत्युपलक्षणे। ये ये द्वौ त्रयो वा ब्रह्मवायू द्वन्द्वकामौ शेषरुद्रगरुडाश्चैवमादयः। द्विसदृशयोर्भावो द्वैसादृश्यं तस्मात्। परस्य ब्रह्मणो यास्ताः शक्तयस्तच्चेष्टितं च वायोरित्यादिविशेषसूचनं ततानेति ज्ञेयम्। द्वैसादृश्यात्पारतन्त्र्यादिति पाठे यद्यपि वृत्तसम्पत्तिश्चेदपि न वैसादृश्यप्रतीतिर्भवति। प्राक् प्रधानपुरुषेश्वराविति द्वयोः साम्यं न किन्तु छत्रिन्यायेन मयोक्तमिति। यत्र येनेत्यादिनैकमेव गृह्णन् द्वयोः प्रधानपुरुषत्वेनोक्तयोर्मध्ये श्रेष्ठे ताः शक्तयश्चेष्टितं चेत्यन्तरङ्गं स्वस्य ध्वनयामासेति मन्तव्यम् ॥ ६ ॥ विद्युद्भिः सहिताः सविद्युतश्चन्द्रश्चाग्निश्च ते च ते सविद्युतश्च तेषाम्। चन्द्राग्न्यर्कर्क्षविद्युतामिति सरलः पाठः। न च ऋक्षाणां पृथग्ग्रहणं न युक्तम्। पृथक् तद्गुणानीरणादिति वाच्यम्। ऋक्षविद्युतां सत्तैको गुण इति नानुपपत्तिः। चन्द्रस्य कान्तिरग्नेस्तेजोऽर्कस्य प्रभा ऋक्षविद्युतां सत्तामेतत्कान्त्यादिकं त्वं त्वयैतेषां न तत्प्रकाश्यस्त्वमिति तत्त्वम्। तथा च श्रुतिः। न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वम्। तस्य भासा सर्वमिदं विभातीति। स्मृतिश्च। यदादित्यगतं तेज इत्यादिका। भूभृतां पर्वतानां यत्स्थैर्यं भूमेर्वृत्तिराधारतयाऽवस्थानं सस्याद्यधिरोहकत्वेन जीवनदत्वं च यो गन्धस्तद्गुण इत्यादिसर्वमर्थतो मुख्यतो भगवान्नान्यः। पारतन्त्रमेव विवृतम् ॥ ७ ॥ तर्पणं तृप्ति प्राणनं चेष्टाद्रवत्वं स्यन्दनं ता आपस्तद्रसश्च मधुरस्त्वदधीनमदः सर्वम्। ओजोऽवष्टम्भः सहः साहनं बलं शक्तिः स्पन्दनं किञ्चिच्चलनं तर्वादिचालनं वा गतिः क्वचिन्मण्डलाकारगमनं सदेति वा गतिः स्पर्श इति वा वायोरियत्तव त्वदधीनम् ॥ ८ ॥ दिशां त्वमवकाशस्तदवकाशत्वदो दिशस्त्वं भूताकाशश्च त्वं तद्गुणः शब्दश्च शब्दो वेदादिः स्फोटो वेणुदारणादिज आश्रयः पक्ष्याद्याधारतारूपो नादः नादो नाम वर्णविशेषोऽकाराद्यतिशान्तान्तः सोऽयमष्टाक्षरमत इति तन्त्रसारे कर्मनिर्णयटीकायां च। नादो नामवर्णविशेषो मन्त्रशास्त्रे प्रसिद्ध इत्युक्तेः। वर्णोऽकारादिः। ओङ्कारस्त्रिमात्रोऽनन्तमात्रश्च। आकृतीनां पृथक् कृती। आकाराकारोवाराद्यात्मना पृथक्करणानि। आकृतीनां संस्थानविशेषाणां त्वं ते त्वदधीना मन्ये। आकृतीनां ब्राह्मादीनां पृथक्कृतीः पृथक्क्रियाश्च त्वदधीना इति वा। वैयाकरणाश्च स्फोटो वाक्यपदयोरिति वर्णयन्ति। आश्रयः शङ्खादिकमाश्रित्यविद्यमानः शब्द इति वर्णयन्ति ॥ ९ ॥ इन्द्रियाणां चक्षुरादीनां विषयमुद्दिश्य द्रवताम्। द्रवतां हीन्द्रियाणां तु नियन्ता प्राण एकराडिति बौधायनश्रुतिः। विषयद्रवणात्तेषामिन्द्रियत्वमुदाहृतमिति बृहत्संहितायामिति भाष्योक्तेः। त्वमेवेन्द्रियं। तच्छक्तिप्रद इत्यर्थः। तदनुग्रहस्तेष्वनुग्रहो येषां ते तदनुग्रहा देवाः सूर्यादयो बुद्धेरवबोधो ज्ञानशक्तिरूपो जीवस्य सती यथावस्थितार्थविषयिणी स्मृतिः स्मरणशक्तिश्च ॥ १० ॥ भूतानां पञ्चानां भूतादिस्तामसाहङ्कार इन्द्रियाणां कारणं तैजसाहङ्कारो विकल्पानां विविधत्वेनाध्यात्मिकादिभेदेन कल्प्यन्त इति विकल्पादेवास्तेषां वैकारिकाहङ्कारः। देवा वैकारिकाः स्मृता इत्यादेः। वैकारिकान्मनो जज्ञ इत्यादेः। विकल्पान्। बहुवचनमाद्यर्थे। सङ्कल्पविकल्पाद्यात्मवृत्तिसहितमनश्चेति वा। अनुशायिनां संसारिणां जीवानाम्। कर्मानुशयनाच्चैव संसार्यनुशयी स्मृत इति तत्त्वनिर्णयोक्तेः। प्रधानं प्रकृतिः संसारकारणम् ॥ ११ ॥ ईश्वरत्वमादिरित्युदीर्यान्ते नश्वरेषु त्वमनश्वरः स्थातेति स्थापयन्नाह ॥ नश्वरेष्विति। इह मात्रेषु पदार्थेषु नश्वरेषु नाशवत्सु त्वमनश्वरो नाशशून्यः। तद्द्रव्यं तादृग्वस्त्वसि। तत्र निदर्शनमाह। यथेति। द्रव्यविकारेषु मृदादिविकारेषु घटादिषु नश्वरेषु मृन्मात्रं यथा निरूपितमस्तीति तज्ज्ञैस्तथेति योजयन्ति। अनवस्थानमात्रे निदर्शनं पादानतायां नेत्यनुसन्धेयम्। द्रव्यस्य घटादेर्विकारेषु महारजनाञ्जनादिजेषु कालतो नष्टेषु द्रव्यमात्रं पटमात्रं निरूपितं तथेति वा द्रव्यस्य परमाणे विकारेषु तत्संयुक्तघटादिनश्वरेषु द्रव्यमात्रं परमाणुमात्रं नित्यमिति निरूपितं तद्वेदिभिरिति योजयन्ति ॥१२॥ तर्हि यन्मूलद्रव्यत्वेनावशिष्टं तन्नित्यमिति न भगवदधीनमित्यायातमिति तत्राह। तदिति। तद्यन्मूलद्रव्यं प्रधानादिकं सत्त्वरजस्तम इति गुणास्तद्गुणा वृत्तयस्तद्व्यापाराश्च याः कियत्यस्ताः परे ब्रह्मणि योगमायया सर्वोपायस्वरूपेच्छया कल्पिताः समर्थिता सत्या एवाद्धा निस्सन्देहं न वर्तन्ते। परमाणुपक्षे सत्त्वं शुक्लवर्णस्तेनाप्या रजसा पार्थिवास्तमसा वायवीया इति शब्देनादित्यवाचिना तैजसा लक्षिता इति चतुर्विधा गुणास्तन्तुस्थानीया इति ते तद्वृत्तयोऽपि संयोगादिलक्षणास्त्वयि समर्थिताः कार्यकारणक्षमत्वेनेत्यर्थ इत्युपपादयन्ति। अनित्यं पटादिद्रव्यं भवतु भगवन्नियतं प्रधानं नित्यं तत्कथमन्यनियतमित्यत आह। सत्त्वमित्यवतार्थ नित्यं नित्यात्मना यत इत्यादेः प्रधानस्य सपरिकरस्य भगवन्नियतत्वे तत्पटादिकं किं वक्तव्यं तदायत्तमितीत्यर्थपरोऽयं श्लोक इति व्याकुर्वन्ति ॥ १३ ॥ अन्यथैतदेव स्थितिदुर्लभेति भाषते ॥ यर्हीति। यर्हि त्वय्यविकल्पिताः पारमार्थिका अमी भावा न सन्ति तस्मात्ते न सन्ति न स्थास्यन्ति नश्यन्ति। अनाधारत्वात्। तस्मादेतत्स्थितिहेतोस्त्वं चामीषु विकारेषु नानापदार्थेष्वमीषु मूलप्रधानादिद्रव्येषु तथा विकारेष्विति वा सदा सन्नवस्थितो व्यावहारिको हानोपादानादिव्यवहारनिर्वाहको वर्तसे नान्य इत्यर्थः। अव्यवहारिकस्तस्मात्सदा सन्नयं प्रपञ्च इति शेष इत्यपि योजयन्ति ॥ १४ ॥

इयति सति कुतः संसार इत्यत आह ॥ गुणेति । एतस्मिन्गुणप्रवाहे प्रपञ्चे वर्तमाना अखिलात्मनः सर्वस्वामिनस्तव गतिं स्थितिमबोधेनाबहिः प्रकाशनेनेति सूक्ष्मां कर्मभिर्ज्ञानप्रतिबन्धकैरबुद्ध्वेह संसरन्ति संसारं प्राप्नुवति। प्रसादं विना न व्यक्तो भवसि त्वमिति स्वकर्मप्रतिबद्धसंविदः संसरन्ति त इति भावः। तदव्यक्तमाह हि। अतोऽनन्तेन तथा हि लिङ्गमित्यादेः ॥ १५ ॥ ननु नानाविधहीनतरशरीरेषु सतो यदाकदाचिद्यथाकथञ्चिन्मानवतनुसम्पत्तौ संवित्साधनेन मोक्षोऽपि स्यादित्यतोऽपि न त्वत्प्रसादं विनैतत्साधनमित्याह ॥ यदृच्छयेति। यदृच्छा त्वेतत्प्रापणमात्रहेतुर्भगवदिच्छा तया नृतां मनुष्यतां पुण्यवशात्प्राप्य। सा कीदृशीत्यत आह। सुकुल्यां संवित्सम्पादनसमर्थां दुर्लभमितरजन्मनीति। इह स्वार्थे प्रमत्तस्य प्रमादयुक्तस्योन्मत्तस्य मम मज्जातीयस्य च। तत्र तन्त्रं त्वन्माययेति। सा च कुतोऽतार्येत्यत आह ॥ ईश्वरेति। वयं वृथा गतम्। सुकल्पमिह दुर्लभमिति पाठेऽपि नृतामित्येतदर्थस्य नृत्वमित्यस्य विशेषणे इति ज्ञेयम्। विवृतः प्रागयं प्रकारोऽनुसन्धेयः। नृतामिहेदानीं प्राप्य यदृच्छया स्वेच्छयैव स्थितं सुकल्पं मुक्तिदानसमर्थं वयोगतं गरुडवाहनं त्वन्माययैव स्वार्थे प्रमत्तस्य पुंसो दुर्लभं मन्य इति शेषः ॥ १६ ॥ स प्रमाद एतादृश इति शंसति ॥ असाविति। ममासौ देहोऽहमेते च ममास्य देहस्यान्ववायादिष्वनुबन्धेषु। इन्द्रियजयादिषु। इदं सर्वं मदादिजगत्स्नेहपाशैर्भवानेव बध्नाति। अयं प्रमादस्त्वत्कर्तृकस्तत्कर्मायत्त इति भावः ॥ १७ ॥ प्रीत्या सङ्कर्षणाच्युतौ पुत्रयोर्धमसूचकमिति तथा प्रधानपुरुषौ पराविति। द्वावपि प्रस्तुत्य यत्र येनेत्यारभ्येदं जगदिति पर्यन्तं बलकबलनानर्हगुणैस्तदर्हमेकं भगवन्तं स्तुत्वा प्रस्तावानुकूल्येन पुनर्द्वयोः स्तवनेन विद्यमानस्थितिं विज्ञापयति ॥ युवामिति। युवां नः सुतौ न। तर्हि काविति तत्राह ॥ साक्षात्प्रधानपुरुषेश्वराविति। तादृशौ चेच्छौरेऽत्र कुत इत्यत आह ॥ भूभारेति। तथा नु तथाऽपि भूभारायितदैत्यानां क्षपणे भाविन्यवतीर्णावतोऽसुतौ ॥ १८ ॥ स्तुत्यन्ते मङ्गलमाचरन्निवैक एव तस्येष्ट इति पुनरावश्यकं तं प्रत्येव प्रार्थयते ॥ तदिति। हे आर्तबन्धो आपन्नसंसृतिभयापह। आपन्नानां शरणागतानां या संसृतिस्तस्या यद्भयं तदपहन्तीति तत्तत् ते पदारविन्दं पादकमलमद्याहं शरणं गतोऽस्मि। अस्म्यहं शरणं गत इति वा। एतावतेन्द्रियलालसेन विषयत्वमुद्दिश्य करणानां द्रवणौत्सुक्येनालमलमतिपर्याप्तम्। कुतो वसुदेवैतज्जिहासा तवेति वासुदेव वदसि चेदित इत्याह ॥ यदिति। यद्यतो लालसान्मर्त्ये देहे आत्मदृगहमिति मतिस्तत्त्वयि परे सर्वोत्तमेऽपत्यमिति बुद्धिश्चाभूतां तेनालमलम्। परापरविवेकनाशको विषयलालस इति भावः। लालसो लालसाऽपि स्याद्याच्ञातृष्णातिरेकयोः। औत्सुक्ये त्विति विश्वः। विषयतृष्णयेति वा। आर्तबन्धाविति धर्मिण आपन्नसंसृतिभयापहमिति पदारविन्दरूपावयवस्योक्त्या तयोरैक्यं सूचयति। यः शरण गतस्तस्यापन्नेत्यहं शरणं गत इति वा। अत्रापन्नाः स्युरित्युत्तरत्र संसृतिभयं च द्वयं च द्वयं सार्थकम् ॥ १९ ॥ पुत्रौ नेत्यत्र त्वदुक्तिरपि मानमिति विज्ञापयति ॥ सूतीगृह इति। अरिष्टेऽजो यज्ञोऽहं तन्नामेति। नौ जायापती प्रति भवाञ्जगाद ननु निश्चितम्। निजेन क्लृप्तो यो धर्मस्तद्गुप्त्यै गोपनार्थमनुयुगं प्रतियुगं नानातनूः सुरनरतिर्यगादिशरीराणि विदधत्स्वीकुर्वंस्तत्कार्यपर्याप्त्यनन्तरं तां जहासि मूले गमयसि। पूर्णमदः। स्वाप्ययादित्यादेः। हे उरुगाय ब्रह्मादिस्तुत्य तव विभूतिमायामैश्वर्यसामर्थ्यं को वेद न कोऽपि। को ब्रह्मा चेदपि न साकल्येन वेद किञ्चिद्वेदेत्यप्यर्थः। गगनवदिति निदर्शनमसङ्गत्व इति मन्तव्यमिव घटादिनाशे तदवच्छिन्नस्य तस्य मूलाकाशनिवेशवन्मूलनिवेशनं च यज्ञो विष्णुर्देवतेत्यादेर्यज्ञो विष्णुः ॥ २० ॥ इत्थं पितुः पूर्वोदीरितरीत्या तातस्य वाक्यमाकर्ण्य श्रुत्वा प्रहसन्। अयं हास एव किञ्चिदुदञ्चितज्ञानजवजवनिकारूप इति ज्ञेयम्। प्रश्रयाद्विश्वासान्नम्रं श्लक्ष्णया गिरा। प्रति तदुत्तरतयाऽऽह। प्रति श्लिष्टतयाऽऽहेत्युक्त्या तत्कालं तदुक्तनिराकरणं च ध्वनयति। यद्वक्ष्यति यन्नः पुत्रान्समुद्दिश्येति। सात्त्वतर्षभ इति गतम् ॥ २१ ॥ हे तात वो वच एतत्समवेतः श्लिष्टोऽर्थो यस्य तत् युक्तार्थमिति यावत्। वयमुपमन्महे। यतो नः पुत्रान्समुद्दिश्य लक्षीकृत्य तत्त्वग्रामो रहस्यसमूह उदाहृतोऽतः ॥ २२ ॥ यूयमसावार्यो बलराम इमे द्वारकौकसश्च सर्व इतरे सचराचरं विश्वमहं मदधीनं। सर्वं खल्विदं ब्रह्म। यदधीना यस्य सत्ता तत्तदित्येव भण्यत इत्यादेः ॥ २३॥ स्वस्वरूपं स्वयमेव निरूपयति। आत्मेति। एकः प्रधान एकत्वादेः करोतीति क ए चासौ कश्चेत्येकं एकः सकलकर्तेत्यर्थः। स्वयंज्योतिः स्वयंप्रकाशो नित्य आत्मा तच्छब्दवाच्यः। पूर्वत्र च सामानाधिकरण्येन प्राप्ताभेदप्रतीतिं वारयन्नाह ॥ अन्योन्यविलक्षण इति। निर्गुणः सत्त्वादिशून्यः स्वभिन्नगुणरहितः। आत्मसृष्टैर्गुणैस्तत्कृतेषु भूतेषु प्रविष्टो बहुधेयते लोकैः। भूतेषु पञ्चसु वा ॥ २४ ॥ पञ्च च भूतानि प्रपञ्चयति ॥ स्वमिति। तत्कृतेषु पदार्थेषु यथाशयं यथास्थानं स्थिता भवन्ति यथा तथाऽसौ हरिराविस्तार उपरि छन्नः सन्नपि। अल्पभूर्येकनानात्वमल्पस्थानेऽल्पत्वं भूरिस्थाने महति महत्त्वं। एकस्मिन्नेकत्वं नाना नानास्थानेषु नानाभावो नानात्वं याति ॥ २५ ॥ वसुदेव एवं भगवतोदाहृतं श्रुत्वा विनष्टो नाम कुत्सित आधिर्यस्य सः। नाम कुत्सनसम्भाव्यप्रकाशेषु निगद्यत इति। यदा विनष्टं नामापि यस्य स बिनष्टनामा स आधिर्यस्य स तथा। तन्नामाऽपि नष्टमिति यावत्। विनष्टनानाधिरिति सरलः पाठः। प्रतिमनास्तूष्णीमभूत् ॥ २६ ॥ अथेति कथान्तरारम्भे। सर्वा देवता यस्यां सा देवकी शुचिस्मिता। आत्मजाभ्यां रामकृष्णाभ्याम्। गुरोः सान्दीपनेः पुत्रं मृतमानीतं श्रुत्वा कृष्णरामौ समाश्राव्य कंसविहिंसितान्पुत्रान्स्मरन्ती कृपणा दीना वैक्लव्याद्विह्वलतयाऽश्रुलोचना प्राह ॥ २७–२८ ॥ अप्रमेयात्मन् योगेश्वरेश्वर कृष्ण राम राम। विश्वसृजामीश्वरौ आदिपुरुषौ वामहं वेद ॥२९॥ कालेन विध्वस्तः सेतुमर्यादा येषां ते तथा तेषामुच्छास्त्रवर्तिनामुच्छृङ्खलवृत्तीनामत एव भूमेर्भारायमाणानां राज्ञां क्षयाय मे मय्यवतीर्णे मासत्रयानन्तरं दुर्गापवाहित आहितश्च गर्भे रोहिण्यामिति न इत्युक्तिर्युक्ता। अवतीर्णोऽसि ॥ ३० ॥ यस्यांशांशांश-

भागेनांशांशस्वीकारेणांशांशांशविभागेन विशेषकृतेन विश्वस्थित्युदयौ लयश्चेत्येते भवन्ति । किलेति समयवार्ता । हे विश्वात्मन् । तं त्वा त्वामद्य आद्य वा । तन्तवो मत्पुत्रा आद्या यस्येति नतसम्बुद्धिः । हे तन्त्वाद्य अनेनानयनाबन्धं सूचयति । गतिं प्राप्य स्थानं गता ॥ ३१ ॥ किमियताऽस्मत्स्तवनेन तव मातरितःपरं वाऽभिलषितं भाषस्वेत्यत आह ॥ चिरादिति । अनेन तदुत्तरं स्वकुमारमारणमिति तदादानसौशक्यं ध्वन्यते । पितृस्थानात्पितृपतिस्थलात् । गुरवे गुरुदक्षिणां तदात्मानं मृतं सुतमानिन्यथुः ॥ ३२ ॥ तथा मे कामं योगेश्वरेश्वरौ युवां कुरुतम् । स क इत्यत आह ॥ भोजराजेति । भोजराजः कंसस्तेन हतान्पुनराहृतान्पुत्रान्द्रष्टुं कामये ॥ ३३ ॥ सुतलं संविशतुः । तत्र तन्त्रं योगमायामुपाश्रिताविति ॥ ३४ ॥ तस्मिन्स्वस्थाने प्रविष्टौ रामकृष्णौ दैत्यराड्बलिरुपलभ्य तयोर्मध्ये विश्वात्मदैवं सुतरामात्मनश्च दैवमुपलभ्य तद्दर्शनजनिताह्लादस्तेन परिप्लुत आशयोऽन्तःकरणं यस्य सः । सद्यस्तत्क्षणं समुत्थाय सान्वयः सपुत्रमित्रकलत्रो ननाम ॥ ३५ ॥ वरासने उत्तमासने । आसनवितरण एव सहभावः । समानीय दत्वा तयोर्मध्ये कृष्णस्य पादौ । अत एव पादावित्युक्तिः । अन्यथा पादानित्यवक्ष्यत् । किञ्च ब्रह्मेत्यादिकमयुततं च । अवनिज्य तज्जलं सवृन्दः कुटुम्बनिकुरम्बसहितो दधार शिरसीति शेषः । आब्रह्म पुनद्यदम्बुभिः । यदम्बु हेत्यपि पठन्ति हि । तत्र पक्षे यद्धारणम् । अम्बुभिर्वृतैः आब्रह्म ब्रह्माणमभिव्याप्य पुनत्पवित्रयत्प्रागवर्ततेत्यर्थः । द्वितीयः स्फुटोऽर्थः ॥३६॥ महाविभूतिभिरिति विशदयति । अमृतं रसायनं घृतं वा । अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जले जग्धौ मोक्षणे हेम्नि गोरसे । क्लीबे नात्वमरे स्त्री तु गुलूच्यां मद्यभिक्षयोरिति यादवप्रकाशः । अमृतं सलिले घृत इति विश्वः । गोरसभक्षणं वा । स्वस्य गोत्रं कुलम् । गोत्रं नाम्नि कुले चल इति । वित्तस्यात्मनः स्वतनोः समर्पणेन च समर्हयामासेत्यन्वयः ॥३७॥ इन्द्रसेनो बलिर्भगवत्पदाम्बुजे बिभ्रत्प्रेमभक्तिस्तद्विभिन्नयाऽभिवृद्धया धिया । आनन्दजलाकुलेक्षणः प्रहृष्टरोमा गद्गदाक्षरमुवाच ॥ ३८ ॥ महतेऽनन्ताय नमः । वेधसे ज्ञानात्मने । साङ्ख्यं शुद्धात्मतत्त्वविज्ञानं साङ्ख्यमित्यभिधीयत इत्यादेर्ज्ञानं योगः कर्म तयोर्वितानो विस्तारो येन कपिलादिना तस्मै । ब्रह्मणे गुणपूर्णाय परमात्मने मुख्यस्वामिने व्याप्त्यादिमते वा ॥ ३९ ॥ भूतानां प्राणिनां वा दर्शनं हि यतो दुष्प्रापं दुःसाधप्राप्ति तत्सदपि रजस्तमस्वभावानां किञ्चिद्रजोमिश्रतमःप्रचुरस्वभाववतां यदृच्छयाऽतिदुर्लभमपि यन्नः प्राप्तमतो दैवं मम विपुलमिति मन्य इति शेषः । सात्त्विकानां भूतानां दुष्प्रापमस्माकं त्वतिदुर्लभं तथाऽप्यनुग्रहात्प्राप्तमहो इति भावः । दुष्प्रायामितरे तद्धेतुज्ञानं तया तज्ज्ञानाभावादेव दुर्लभमिति पदमेकं वा । एवञ्च तद्दौर्लभ्यहेतुरपि सूचित इति ध्येयम् ॥ ४० ॥ दर्शनहेतुः कोऽपि नैवास्मास्विति युवयोर्दयैव कारणमिति वदति ॥ दैत्येति । दैत्यदानवा अस्मदादयः । पिशाचाश्चेति पाठः ॥४१॥ विशुद्धसत्त्वधाम्नि शास्त्रशरीरिणि शास्त्रं वेदादिकं च तच्छरीरं वा सन्निधानस्थानमस्यास्तीति तच्छरीरी तस्मिन् । त्वयि निबद्धवैरास्ते वयमन्ये राक्षसादयोऽपि तादृशा निबद्धवैराः । अनेनास्मद्व्यापारः शास्त्रविरुद्ध इति द्योतयामास ।४२।

भक्तान्विविक्तानुक्त्वा स्वयं नैतदन्यतम इति स्वं तुच्छीकृत्य वदति । केचन शिशुपालादयः । तात्पर्यमुक्तमत्रानुसन्धेयम् । कामतो गोपीजनाः । एतद्वत्सत्त्वसंरब्धाः सत्त्वगुणोद्रिक्तभक्तियुक्ताः सन्निकृष्टाः सदा समीपवर्तिनः सुरादयो नाचञ्चलभक्ता इत्यर्थः । एतदपेक्षयोद्बद्धवैरा इत्याद्युक्तिः । सुरादयः सुरेभ्यः आदयः सुरादयः पूर्वदेवा इत्यर्थः । सन्निकृष्टा अतिनीचा इत्यप्यन्तरर्थः ॥ ४३ ॥ एतादृशा अपि विदृशाः का कथाऽस्माकमिति कथयति ॥ इदमिति । हे योगेश्वरेश्वर । योगेशा अपि तव योगमायां सहजशक्तिमिदमित्थमिति प्रायो बाहुल्येन न विन्दन्ति न जानन्ति । वयं योगहीनाः कुतो जानीम इति । बलेरन्तरर्थस्तु कुतः कुं भूमिं निकृत्य योगीशा वयं च किञ्चिज्जानीम इति । स्वस्थितिं ज्ञानादिस्थितिं भागवतीं चोक्त्वा स्वाशयं विशदयति ॥ तदिति । निरपेक्षा एकान्तिकाः सन्न्यासिनो वा तैर्विमृग्यं विचार्यं त्रित्तनीयमिति यावत् । पादारविन्दे तयोर्वा धिषणा यस्य स सन् स्वगृहान्धकूपात्संसारात्प्रायान्निष्क्रम्य निर्गत्य विश्वस्य शरणं ययोस्तवाङ्घ्र्योः सेवयोपलब्धा वृत्तिर्जीविका यस्य सः । शान्तेर्विषयानागतिगतकोपा । सत्त्वं त्वम् । सत्त्वं सद्गुणसारत्वादित्यादेः सखा येषां तैर्मनीषिभिः सहैकोऽनुबन्धिविधुरो यथा चरामि तथा नः प्रसीद । हे विश्वशरण अङ्घ्र्युपलब्धा वृत्तिर्मार्गो यस्य सः । ते वनकृद्देवेति वा । चरामीत्यानुगुण्यमेवं चेदिति ज्ञेयम् । सत्त्वं गुणो ज्ञानं साधुत्वं वा सखा येषां तैरिति वा । समासान्त आर्षः । यद्वा सत्त्वस्य तव सखायो महान्तस्तैः सह चरामीति वा ॥ ४५ ॥ शास्त्रशरीरिणीति प्रागीरणाच्छासकस्त्वमिति शिक्षयेति शंसति ॥ शाधीति ! हे ईशितव्यानामीशास्मान् शाधि । तच्छिक्षणफलं च त्वन्निमित्तमिति तथा कुर्वित्याह ॥ निष्कामान्नः कुर्विति । नासामर्थ्यं तवेत्याह ॥ प्रभविति । नः प्रभविति वाऽन्वयः । यच्छ्रद्धया यस्मिञ्शिक्षणे श्रद्धया तिष्ठन्पुमानधिकारी चोदनाया, विधिनिषेधबन्धपात्रत्वाच्चोदना संसृतिस्तस्याः सकाशाद्विमुच्यतेऽतः शाधीति प्रस्तुतयोरेतद्द्वाऽनेक एवेत्येवमुपसंहरणमिति ज्ञेयम् ॥ ४६ ॥ आगमनप्रयोजनं वक्तुं तदुपोद्घातमाह ॥ श्रीभगवानिति । प्रथमेऽन्तरे स्वायम्भुवमन्वन्तरे मरीचेः सकाशादूर्णायां तन्नाम्न्यां भार्यायां षट् तत्सङ्ख्याः पुत्रा आसन् । ते च स्वपुत्रान् शपितुं कदाचिदुद्यतं देवलं वीक्ष्य जहसतुरपाहसन् । तत्कार्श्यं च दृष्ट्वा तेनामुना वधकर्मणा पापव्यापारेण । आसुरीं योनिं कालनेमिसुतत्वेनासुरजन्मागुः प्रापुः । देवाः कं जहसुर्वीक्ष्य सुतां यमितुमुद्यतमिति पठन्ति । देवा एते षट् । सुतां वाचं यमितुमुगतं कं प्रजापतिं वीक्ष्य जहसुरपहसन्नित्यर्थः । इतरत्समम् । तृतीयस्कन्धे । वाचं दुहितरं तन्वीं स्वयम्भूर्हरतीं मनः । अकामां चकमे क्षत्तः सकाम इति नः श्रुतम् । तमधर्मे कृतमतिं विलोक्य पितरं सुताः । मरीचिमुख्या मुनयो

विश्रम्भात्प्रत्यबोधयन् । नैतत्पूर्वैः कृतं त्वद्य न करिष्यन्ति ये परे । यः स्वां दुहितरं गच्छेदनिगृह्याङ्गजं प्रभुः । तेजोयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो । यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्पते । नमस्तस्मै भगवते य इदं स्वेन रोचिषा । आत्मस्थं व्यञ्जयामास स धर्मं पातुमर्हति । स इत्थं गृणतः पुत्रान्पुरो दृष्ट्वा प्रजापतोन् । प्रजापतिपतिस्तन्वीं तत्याज व्रीडितस्तदेत्येवोक्तेस्तत्कृतासुरजन्मोक्तिस्तथा मरीचिमुख्या इत्युक्तेरेतत् षट्पुत्रग्रहणं च पूर्वोत्तरापरामर्शमूलमित्युपेक्ष्यम् ॥ ४७ ॥ हिरण्यकशिपोः स्वौदासीन्येन ब्रह्मोपास्तिक्रोधेनात्र हिरण्यकशिपोर्जाता इति पठित्वा तत्क्षण एव हिरण्यकशिपोर्जाता योगनिद्रया नीता इति केचिद्व्याचक्रुः । तस्य चिन्तयतस्त्वेवं पातालभगमन्मनः । यत्र ते गर्भशयनात् षड्गर्भा नाम दानवाः । अमरप्रतिमा युद्धे पुत्रा वै कालनेमिनः । आर्यकं वै परित्यज्य हिरण्यकशिपुं पुरा । उपासाञ्चक्रिरे दैत्याः पुरा लोकपितामहम् । ततो हिरण्यकशिपुः सरोषो वाक्यमब्रवीत् । मामुत्सृज्य वरो यस्माद्वृतो यः पद्मसम्भवात् । तस्माद्वस्त्याजितः स्नेहः शत्रुभूतांस्त्यजाम्यहम् । षड्गर्भा इति योऽयं वः शब्दः पित्रा विवर्धितः । स एव वो गर्भगतान्पिता सर्वान्वधिष्यति । षडेव देवकीगर्भे षड्गर्भा वै महासुराः । भविष्यथ ततः कंसो गर्भस्थान्वो हनिष्यतीत्युक्तिविरुद्धं तच्चैतदपीत्युपेक्ष्यम् । आचार्या अपि । मरीचिजाः षण्मुनयो बभूवुस्तदेव कंसः प्राहसन्कार्श्यहेतोः । तच्छापतः कालनेमिप्रसूता अवध्यतार्थं तप एव चक्रुः । धाता प्रादाद्वरमेषां तथैव शशाप तान्क्ष्मातले सम्भवष्वम् । तत्र स्वतातो भवतां निहन्तेत्यात्मान्यतो वरलिप्सुर्हिरण्यः । दुर्गा तदा तान्भगवत्प्रचोदिता प्रस्वापयित्वा प्रचकर्ष कायात् । क्रमात्समावेशयदाशु देवकीगर्भाशये तान्न्यहनच्च कंस इति प्रोचुः । जगामाथ ततो विष्णुरित्यारभ्य स च मे न प्रणश्यतीत्येतदन्तेन हरिवंशे निद्रासंविधानमुक्तमनुसन्धेयम् । पुत्राः कालनेमेर्योगमायया भगवदाज्ञप्तया दुर्गया देवक्या जठरे न्यस्तास्त एव जातास्तत्क्षण एव कंसेन प्राक्कालनेमिना विहिंसिताः । सा मम माता तान्स्वानात्मजान्नुद्दिश्य शोचती । ते च क वर्तन्त एतर्हि स्वामिन्नित्यत आह । त इमे तवान्तिके समीपेऽध्यासत इति ॥ ४९ ॥ इत एतात्स्थलादेतान्प्रणेष्यामः । ततः शापेन देवलदत्तेन विनिर्मुक्ता विज्वरा अनुपतापा लोकं स्वदेहं यास्यन्ति सुरा भवन्ति ॥ ५० ॥ तन्नामानि कीर्तयति ॥ स्मरेति । स्मरेण सहित उद्गीथः स्मरोद्गीथो द्वौ परिष्वङ्गादिघृण्यन्ताश्च आहृत्य षट् । मत्प्रसादेन पुनस्तत्तनुगमनानन्तरं मुक्तिं यास्यन्ति ॥५१॥ इति बलिं प्रत्युक्त्वा तान्समादाय । इन्द्रेति विवक्षाभावादभावः सन्धेः । अनेन समादायो यस्येति समादाय आगता अपि देहान्तरत्वान्न ते विभागार्हाः पितृधन इति समादय इत्यप्यर्थविशेषो द्योतित आवृत्त्येति ज्ञेयम् । अयच्छतां ददतुः ॥ ५२ ॥ मूर्ध्नि शिरसि । एकैकश आघ्राणनमित्येकवचनोपपत्तिः । अभीक्ष्णशः पुनः पुनः ॥ ५३ ॥ सुतानां स्पर्शेन परिस्रुतं प्रस्रुतं स्तनं तयोः क्षीरमपाययत् । यया मायया सृष्टिः प्रवर्तते तया मायया मोहिता मृतानां पुनर्जातप्रायत्वाभिप्रायेयमुक्तिः ॥ ५४ ॥ गदाभृतो भुक्तशेषं तत्पीतशेषम् । अनेन किञ्चित्सङ्कुचितस्वकलेवरस्य देवकीस्तनं दत्वा व्रजं प्रत्यनैषीदिति द्योत्यते । अत एवामृतम् । लुप्तोपमम् । अमृतवद्विद्यमानं पयः पीत्वा नारायणस्याङ्गस्पर्शप्रतिलब्धमात्मनो भगवतो दर्शनं येषां ते तथा ॥ ५५ ॥ ते गोविन्दं नमस्कृत्य तथा पितरं वसुदेवं बलं बलरामं च सर्वेषां भूतानां तत्रत्यानां मिषतां पश्यतां धाम स्वं विहायसा ययुः । देवको स्वाभिलषितसिद्ध्युत्तरं न दुराग्रहं कृतवतीत्यप्याह । सा देवकी विहाय गन्तॄन्पुत्रान्विहायैव स्थितेति ॥ ५६ ॥ तं दृष्ट्वेति पाठः । मृतस्यागमनसहितो निर्गमस्तं दृष्ट्वा सुविस्मिता मायां शक्तिं कृष्णसंसूचितां कृष्ण एव सम्यक् सु अत्यन्तमुचितां मेने । कृष्णेन संसूचितां मायां स्वरूपशक्तिं मेन इति वा ॥ ५७ ॥ न चित्तं चित्रय परीक्षिदिदं परीक्ष्यास्मदादिमनोगोचराणां चानन्तानां भावादिति बोधयति ॥ एवंविधानीनि । अनन्तवीर्यस्य कृष्णस्य परमात्मन एवंविधान्यनन्तानि वीर्याणि सन्ति ॥ ५८ ॥ सूत एतत्फलं लपति ॥ य इति । अमृतकीर्तेर्मुक्तिप्रदा कीर्तिर्यस्य तस्य मृतानमृतत्वकरणेन कीर्तिर्यस्य तस्य वा । मुरारेर्व्यासपुत्रैर्वर्णनप्रकारबाहुविध्याद्बहुवचनं पूजार्थे वा तदादिभिरिति वा वर्णितमिदं चरितं योऽनुश्रृणोति यश्च श्रावयेत् । किञ्चाघं भित्तीति तत् भक्तानां सत्समोचीनं कर्णपूरं करणाभरणरूपं श्रृण्वन् श्रावयन्वा भगवति कृतं चित्तं यस्य स तत्क्षेमधाम मोक्षधाम याति । भक्तकर्णावतंस इति पाठेऽप्ययमेवार्थः । कालाद्यप्रतिहतमिति क्षेमधामेति ॥५९॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे चतुःसप्ततितमोऽध्यायः ॥ १०—७४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ भगवत्प्रवृत्तिः सर्वाऽपि श्रुता मुक्तिकरीति राजाऽनेकासु कामिनीषु कथमवर्तत भगवानिति कुतुकतः शुकं पृच्छति ॥ सर्वासामिति । तुना तत्र तरतमभावं सूचयति । तद्बुद्धिं बोधयति ॥ मय्येवेति । इत्येवं निश्चितमसन्दिग्धं चेतो यासां तास्तासाम् ॥ १ ॥ सर्वासु सम उतैकस्यां कस्याञ्चित् । श्रोतुं रतिरस्तीति मम शंश प्रभो विदितैतन्मर्मम् ॥ २ ॥ सर्वासां महिषीणां मध्ये प्रथमा पूर्वं परिणता तस्यामधिकं यथा तथा प्रेमवान्कृष्ण इति ऊर्जितोः दिग्विनताप्रख्यातिः प्रसिद्धिरस्ति ॥ ३ ॥ यदर्थं साक्षाल्लक्ष्मीरूपिण्योरपि प्रेमतरतमभावो रुक्मिणीसत्यभामारूपयोर्निरूपितस्तां कथां कथयितुं प्रतिज्ञां विधत्ते ॥ कदाचिदिति । तया रुक्मिण्या समं प्रेमकलहो लोकमनुकुर्वता कृतः । तं कात्स्न्र्येन ते त्वां प्रति कथयामि । कौरव्य तच्छृणु । केशवे भगवद्विषये कात्स्न्र्येन कथयति न बद । कुतः । अमितेऽप्रमेये तथा कथनं न समं वक्तुं न मम शक्तिरस्ति योग्यं नेत्यपि ज्ञेयोऽन्वयः ॥ ४ ॥

[1]अथ षष्टितमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	इ. वं.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
५९	३६	३	१	१९	७	२४०८	४३	४२	२४९३	७७॥।	५

[2]

श्रीशुक[3] उवाच

कर्हिचित् सुखमासीनं स्वतल्पस्थं जगद्गुरुम् । पतिं पर्यचरद् भैष्मी व्यजनेन सखीजनैः ॥ १ ॥
[4]यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यवतीश्वरः । स हि जातः स्वसेतूनां गोपीथाय यदुष्वजः ॥ २ ॥
तस्मिन्नन्तर्गृहे [5]भ्राजन्मुक्तादामविलम्बिना । विराजिते वितानेन दीपैर्मणिमयैरपि ॥ ३ ॥
मल्लिकादामभिः[6] पुष्पैर्द्विरेफकुलनादितैः[7] । जालरन्ध्रप्रविष्टैश्च गोभिश्चन्द्रमसोऽमलैः[8] ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—कर्हिचित्, स्वतल्पस्थम्, सुखं, आसीनं, जगद्गुरुं, पतिं (कृष्णं) सखीजनैः, सह, भैष्मी, व्यजनेन, पर्यचरत् ॥ १ ॥ यस्तु, ईश्वरः, लीलया, विश्वं, सृजति, अत्ति, अवति, स, अजः, स्वसेतूनाम्, गोपीथाय, यदुषु, जातः ॥ २ ॥ हे राजन् ! तस्मिन्, अन्तर्गृहे, भ्राजन्, मुक्तादामविलम्बिना, वितानेन, विराजिते, तथा, मणिमयैः, दीपैश्च, विराजिते (उपतस्थे इति परेणान्वयः) ॥३॥ मल्लिकादामभिः, द्विरेफकुलनादितैः, पुष्पैः, जालरन्ध्रप्रविष्टैः, अमलैः, चन्द्रमसो, गोभिः, विराजिते, (उपतस्थे इति परेणान्वयः) ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अथ षष्टितमे कृष्णः परिहासेन रुक्मिणीम् । कोपयित्वा ततः प्रेमकलहे तामसांत्वयत् ॥ १ ॥
रामारामजनानंदमहोदयविडंबनैः । रुक्मिण्या प्रेमकलहच्छद्मनैश्वर्यमीर्यते ॥ २ ॥

स्वतल्पस्थं स्वपर्यंकस्थम् ॥ १ ॥ वक्ष्यमाणं रुक्मिण्याः श्रीकृष्णे परमं प्रेमसंभावयितुं तस्योक्तमेव तत्त्वमनुस्मारयति । यस्त्विति ॥ २ ॥ आदौ तावत्त्रिभिः श्लोकैर्मन्दिरमनुवर्णयति । तस्मिन्निति । तच्छब्देनातिप्रसिद्धमाह । भ्राजन्ति मुक्तादामानि तेषां विलंबाः संति यस्मिंस्तेन वितानेन । विराजिते तृतीयांतानां विराजितपदेनान्वयः ॥ ३ ॥ सुगंधितया द्विरेफकुलैर्नादिते प्रविशद्भिश्चंद्ररश्मिभिः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः कोपानंतरम् । तां रुक्मिणीम् (१) । रामास्वारामो रमणं येषां ते जनास्तेषामानंदस्तस्य महोदयस्तस्य विडंबनैः (२) । पर्यंकः शय्याभेदः । श्रीमदनिरुद्धविवाहानंतरमेव वक्तुं योग्यामप्येतां श्रीरुक्मिणीदेव्याः प्रेमकलहक्रीडां महिषीविलासप्रसंगाद्रसविशेषोदयेनाधुना वक्तुमारभते–कर्हिचिदित्यादिना यावदन्तम् । कस्मिंश्चिद्गृहसुखक्रीडाकाले तस्या गृहे तस्या

---

[1] ६५–६६–६७ इति त्रयोऽध्यायाऽधिका–विज. ।

[2] **राजोवाच—**

सर्वासां महिषीणां तु गोविन्दासक्तचेतसाम् । मय्येव प्रेमवान् विष्णुरिति निश्चितचेतसाम् ॥ १ ॥
समः सर्वासु वा कृष्ण एकस्यां प्रेमवानुत । तन्मे त्वं शस तच्छ्रोतुं रतिरस्ति मम प्रभो ॥ २ ॥

श्रीशुक उवाच—

महिषीणां तु सर्वासां प्रथमा भीष्मनन्दना । प्रेमवानधिकं तस्यामिति प्रख्यातिरूर्जिता ॥ ३ ॥
कदाचित्प्रेमकलहः केशवेन तया समम् । कृतस्तच्छृणु कौरव्य कार्त्स्न्येन कथयामि ते ॥ ४ ॥

[3] बादरायणि–प्रा. पा. । [4] य एतत्–विज. । [5] राजन्–श्रीधर. टि. । [6] धूपैः–वीर. ; दिव्यैः–विज. : मृष्टैः–प्रा. पा. । [7] ते–त. पु. मू. । [8] ऽरुणैः–वीर. विज. प्रा. पा. ।

एव पर्यंके वर्तमानम् । तादृशपरिचरणे हेतुः—जगतः सर्वस्मात्सकाशाद्गुरुं महत्तमम् । विशेषतश्च स्वपतित्वात्परमप्रेमास्पदञ्चेत्यर्थः । सखीजनैः सह पर्यचरन्नानापरिचर्यामकरोत्, पश्चात्तु व्यजनेन स्वयं पर्यचरदित्यर्थः । सखीजनानां बहुत्वस्य निर्देशात्, व्यजनस्य त्वेकत्वे तथा बह्वीनामेकसेवानर्हत्वात्, 'बालव्यजनमादाय–' इत्यनुवदिष्यमाणत्वाच्च ॥ १ ॥ तस्य कृष्णस्योक्तं तत्त्वम् 'ब्रह्मादयोपि न विदुः पदवीं यदीयाम्' इत्याद्युक्तम् । 'गोपीथं रक्षणे दुग्धे' इति निरुक्तिः । जगद्गुरुत्वमेव दर्शयति–। तु प्रसिद्धौ । एतद्विविधाश्चर्यमयम् । ईश्वरः प्रकृत्यादिनयंता पुरुषावतारः सन् हि एव स स्वयं भगवानेव स्वेनेश्वररूपेण कृतानां नानासेतूनां गोपीथाय रक्षणायाजोपि जातः जन्मलीलया प्रादुर्भूतः ॥ २ ॥ "वितानो यज्ञ उल्लोचे विस्तारे पुंनपुंसकम्" इति मेदिनी । तत्र प्रेमकलहक्रीडा च जातेति वर्णयितुं सप्तभिः पद्यैः प्रेम वर्णयन्नादावुभयोस्तदुद्दीपनसामग्रीं वर्णयति—सार्द्धैस्त्रिभिः । गृहस्य वर्णनं त्रिभिः, अर्धेन शय्यायाः, अथ श्रीरुक्मिण्याः प्रेमवर्णनं सार्द्धेन, ततः श्रीभगवतस्तत्त्ववर्णनं सोपेति द्वयेनेति सप्त । तत्र तस्मिन्निति चतुष्कम् । अंतर्गृहे चंद्रशालादियुक्ते नानागृहशालिस्वांगनांतःपुरमध्ये । विराजित इति स्वत एव रत्नमित्त्यादिना राजमाने वितानादिभिश्च विशेषतो राजित इत्यर्थः ॥ ३ ॥ 'दामोक्तं गुणमालयोः' इति कोशान्मल्लिकादामभिर्मल्लिकाधिकैः पुष्पैः शोभित इत्यर्थः । मल्लिकादामभिर्द्वारादिबद्धैः । पुष्पैरन्यैश्च स्थानेस्थाने विकीर्णैः । 'धूपैः' इति क्वचित्पाठे आगुरवस्त्वग्रे । अरुणैरिति प्रागुद्यन्मात्रता सूचिता । इयं क्रीडा प्रदोषारंभे ज्ञेया ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीमदनिरुद्धविवाहानन्तरमेव वक्तुं योग्यामप्येतां श्रीभगवद्रुक्मिणीदेव्योः प्रेमकलहक्रीडां महिषीविलासप्रसङ्गाद्रसविशेषोदयेन वक्तुमारभ्यते—कर्हिचिदित्यादिना यावदन्तम् । कस्मिंश्चिद्गृहसुखक्रीडाकाले स्वतल्पस्थं तस्या गृहे तस्या एव पर्य्यङ्क्ते वर्त्तमानं तादृशपरिचरणे हेतुः जगतः सर्वस्मात् सकाशात् गुरुं महत्तमं विशेषतश्च स्वपतित्वात् परमप्रेमास्पदञ्चेत्यर्थः । सखीजनैः सह भैष्मी पर्य्यचरत् नानापरिचर्यामकरोत् पश्चात्तु व्यजनेन स्वयं पर्य्यचरदित्यर्थः । सखीजनानां बहुत्वस्य निर्देशात् व्यजनस्यत्वेकस्य तथा बह्वीनामेकसेवानर्हत्वात् । बालव्यजनमादायेत्यनुवदिष्यमाणाच्च ॥ १ ॥ जगद्गुरुत्वमेव दर्शयति—यस्त्विति । तु प्रसिद्धौ एतद्विविधाश्चर्य्यमयम् ईश्वरः प्रकृत्यादिनियन्ता पुरुषावतारस्सन् हि एव स स्वयं भगवानेव स्वेनेश्वररूपेण कृतानां सेतूनां तत्तन्मर्यादानां गोपीथाय रक्षणाय अजोपि जातः जन्मलीलया प्रादुर्भूतः ॥ २ ॥ तत्र प्रेमकलहक्रीडा च जातेति वर्णयितुं सप्तभिः पद्यैः प्रेमवर्णयन्नादावुभयोस्तदुद्दीपनसामग्रीं वर्णयति—सार्द्धैस्त्रिभिः । तत्र गृहस्य वर्णनं त्रिभिः शय्याया अर्द्धेन अथ रुक्मिण्याः प्रेमवर्णनम् उपेति सार्द्धेन श्रीभगवतस्तत्त्ववर्णनं सोपेतिद्वयेनेति सप्त तत्र तस्मिन्निति चतुष्कम् अन्तर्गृहे चन्द्रशालादियुक्तनानागृहशालिस्वाङ्गणान्तःपुरमध्ये विराजित इति स्वत एव रत्नमित्यादिना राजमाने वितानादिभिश्च विशेषेण राजित इत्यर्थः ॥ ३ ॥ मल्लिकानां दामभिर्द्वारादिबद्धैः पुष्पैरन्यैश्च स्थानेस्थाने विकीर्णैर्धूपैरिति क्वचित्पाठे साधारणो धूप आगुरवस्त्वग्रे अरुणैरिति प्रागुद्यन्मात्रता सूचिता एवमियं क्रीडा प्रदोषान्ते ज्ञेया जालरन्ध्रप्रविष्टैश्च गोभिरिति धूपैरागुरवैरिति च तत्रत्यगृहशोभा दर्शिता किन्तु चन्द्रांशुप्रवेशः पूर्वतः धूपनिर्गमस्तु मारुतानुकूल्येन ज्ञेयः वनशब्दः सर्वासां षट्टमहिषीणां गृहेष्विन्द्रेण पूर्वं प्रस्थापितस्यैकैकस्य पारिजातस्य वृत्तैः यस्तु मुख्यमूलचन्दनवृक्षवन्मुख्यमूलपारिजातवृक्षपवनसम्बन्धात् अन्ये वृक्षास्ते भवन्ति स तु न प्रेषितः श्रीभगवतैव परमाच्छिद्यानीत इति ज्ञेयम् । न च केवलं तदामोद एव विचित्रान्यपुष्पादीनामपि सौरभ्यमस्तीत्याह—उद्यानेति । जालरन्ध्रेभ्यो विशेषेण सर्वदिग्व्यापकत्वादिना निर्गतैः तादृशे अन्तर्गृहे यश्चन्द्रशालाङ्गणगतः पर्य्यङ्कः तस्मिश्च यत्कशिपूत्तमं तस्मिन् ॥ ४–५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीमदनिरुद्धविवाहानन्तरमेव वक्तुं योग्यामप्येतां श्रीभगवद्रुक्मिणीदेव्योः प्रेमकलह–क्रीडां रतिप्रसंगाद्रसविशेषोदयेन वक्तुमारभते—कर्हिचिदित्यादिना यावदन्तम् । कस्मिंश्चिद्गृहसुखक्रीड़ाकाले सुखं यथा स्यात्तथा आसीनम् । किमधिकरणकमित्यपेक्षायामाह—स्वतल्पस्थं तस्या गृहे तस्या एव पर्य्यंके वर्त्तमानम् । यद्वा, सुखमासीनमित्यत्र हेतुः—स्वतल्पस्थमिति, सखीजनैः सह पर्य्यचरदसेवत, यतो जगतो गुरुं विशेषतश्च पतिमात्मनः प्रियमिति परिचरणे भक्तिविशेषः सूचितः । तच्च तस्या युक्तमेवेत्याशयेनाह—भैष्मीति । कन्यात्वेऽपि निजपित्राद्यनादरेण या स्वयं निभृतं श्रीकृष्णं प्रति स्वनयनार्थं दूतं प्राहिणोदिति भावः ॥ १ ॥ तादृशपतित्वेन तथा परिचर्य्यया च श्रीरुक्मिण्या महाभाग्यं द्योतयन् जगद्गुरुत्वमेव दर्शयति—यस्त्विति । तु प्रसिद्धौ, एतद्विविधाश्चर्य्यमयम्, ईश्वर इति सर्व्वनैरपेक्ष्येण बालकवत् केवलं क्रीडार्थमेवेति । किंवा, किमर्थं सृष्ट्यादि करोति, तत् केनापि बोद्धुं न शक्यत इति । यद्वा, सर्व्वजीवानां पालकत्वेन तेषां स्वस्वकर्म्मोपभोगेन परमपदप्राप्त्यर्थमिति भावः । हि एव, स एव, स्वकृतानां सेतुनां तत्तन्मर्य्यादानां गोपीथाय रक्षणाय अजोऽपि जातः । अतस्तस्येयं सृष्ट्यादेरप्यधिकाश्चर्य्यमयी मधुरमधुरा क्रीडा योग्यैवेति भावः ॥ २ ॥ तत्र वक्ष्यमाण–श्रीभगवद्भावविशेषोद्दीपनोपकरणानि सप्तभिर्वदन्नादौ गृहं वर्णयति—तस्मिन्निति त्रिभिः । अन्तर्गृहे गृहमध्ये विराजित इति स्वत एव रत्नभित्त्यादिना राजमाने वितानाद-

भिश्च विशेषेण राजित इत्यर्थः। मल्लिकानां दामभिर्भिरित्यादिबद्धैः पुष्पैरन्यैश्च स्थाने स्थाने विकीर्णररुणैरिति प्रागुद्यन्मात्रता सूचिता ॥ ३-४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

भ्राजन्मुक्तादामविलम्बिना भ्राजत् विलम्बमानमुक्तादामवता ॥ ३-१२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अथ भगवतो रुक्मिण्या सह प्रेमकलहं वर्णयति षष्टितमेन कर्हिचिदिति। भैष्मी रुक्मिणी जगद्गुरुं स्वपर्यङ्कस्थं तत्रापि सुखं यथा तथा आसीनं सखीजनैः सहिता व्यजनेन चामरेण पर्य्यचरत् उपचचार ॥ १ ॥ एतदेव प्रपञ्चयति—यस्त्वित्यादिनोपासाञ्चक्र ईश्वरमित्यन्तेन। तावज्जगद्गुरुत्वं प्रपञ्चयति-यस्त्विति। सृजति स्वाराधनोपयुक्तकरणकलेवरादिप्रदानेन हितं करोति अत्ति संहरति संसरतां जीवानां प्रलयमुखेन विश्रान्तिरुपहितं करोति अवति पालयति अनिष्टनिरसनेष्टप्रापणरूपहितं करोतीति भावः। किञ्च स्वसेतूनां स्वकृतधर्म्ममर्य्यादानां गोपीथाय रक्षणाय यदुषु जातः कथम्भूतोप्यजोपि कर्मायत्तोत्पत्तिरहितोपि स्वेच्छया यदुष्ववतीर्ण इत्यर्थः। गुरुत्वं हितैककारित्वम्। एवं जगद्गुरुरिति भावः य एवम्विधस्तमीश्वरमुपतस्थे इति यच्छब्दस्य सम्बन्धः ॥ २ ॥ अथ स्वतल्पस्थमित्युक्ततल्पं वर्णयितुं तावत्तत्तल्पाश्रयमन्तर्गृहं वर्णयति— तस्मिन्निति त्रिभिः। तच्छब्दः प्रसिद्धिपरः तृतीयान्तानां विराजित इत्यनेनान्वयः भ्राजन्ति, मुक्तादामानि तेषां विलम्बा यस्मिन् तेन वितानेन उल्लोचेन मणिमयैरपि दीपैरित्यर्थः ॥ ३ ॥ द्विरेफानां भ्रमराणां कुलेन समूहेन नादितैर्मल्लिकादामभिश्च विराजित इत्यन्वयः नादित इति पाठान्तरं तदा सौरभलोभभ्रमद्भ्रमरकुलेनादिते तत्र हेतुर्मल्लिकादामभिर्धूपैश्च विराजितः इति (चन्द्रमसोरुणैरित्यत्र सन्धिरार्षः) अरुणैरौदयकालिकत्वादिति भावः। जालरन्ध्रद्वारा अन्तःप्रविष्टैश्चन्द्रमसो गोभिः किरणैश्च ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

स्वस्याः रुक्मिण्यास्तल्पे तलिमे स्थितम् ॥ १ ॥ राजन् हरिचरितमतिचित्रमिति भावेन तत्स्वरूपलक्षणमाह—य इति ॥ २ ॥ यद्गृहं रुक्मिण्यै क्लृप्तं तस्मिन्नन्तर्गृहे पर्यङ्के दन्तविहितमञ्चे कशिपूत्तमे तलिमे मृदुवस्त्रप्रावरणास्तरणे सुखासीनं पतिमुपतस्थ इत्यन्वयः। मुक्तादाम्नां विलम्बोस्यास्तीति मुक्तादामविलम्बि तेन उपरि बद्धचित्रपटेनेत्यर्थः ॥ ३ ॥ अरुणैरित्यनेन चन्द्रोदयकालभवा गावो लक्ष्यन्ते ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसंदर्भः

जगद्गुरुत्वमेव दर्शयति ॥ १ ॥ यस्त्विति राजपुत्रीत्यादि ॥ २ ॥ इदमस्यावतारिका प्रघट्टके ॥ ३-१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

कृष्णवाक्पेषणीपिष्टहृत्कर्पूरात्र रुक्मिणी। सम्मोह्याश्वासिता तं प्रत्यूचे षष्टितमे स्फुटम् ॥

जगद्गुरुं पतिमिति च परिचरणे हेतू ॥ १ ॥ वक्ष्यमाणे रुक्मिण्याः प्रेमसेवारसभञ्जने तस्य केवलं विनोद एव हेतुर्वस्तुतस्तु नान्य इति निदर्शनार्थं विश्वसृष्ट्यादेरपि विनोदहेतुकत्वमभिव्यञ्जयति-यस्त्वेतदिति। स्वसेतूनां धर्मादिमर्य्यादानां गोपीथाय पालनायेति स्वप्रियजनप्रेममर्य्यादायास्त्रोटनं न तस्याभीप्सितं किन्तु तेन तद्दृढीकरणमेवेति भावः ॥ २ ॥ तस्याः प्रेमसेवासुखस्य सर्वाण्येवोपकरणानि पूर्णानीति दर्शयितुं मन्दिरं वर्णयति-तस्मिन्निति त्रिभिः। भ्राजन्मुक्तादाम्नां विलम्बाः लम्बमाना गुच्छाः सन्ति यस्मिंस्तेन वितानेन चन्द्रातपेन विराजिते तृतीयान्तानां विराजते इत्यनेनान्वयः। अरुणैर्गोभिरिति चन्द्रमस उदयरागमयैः किरणैः प्रविशद्भिः आगुरवैर्धूपैश्च निर्गच्छद्भिः कशिपूत्तमे शयनीयेषु श्रेष्ठे ॥ ३-७ ॥

गूढार्थदीपिनी

कृष्णः षष्टितमे भैष्मीं प्रेमहास्येन कोपिताम्। सान्त्वयित्वाऽभ्यनन्दत्तामुक्तयुक्तानुवादतः ॥ १ ॥

आसीनमित्यत्र हेतुः स्वतल्पेति। पतिं पर्यचरत् सेवितवती ॥ १ ॥ तु प्रसिद्धौ स हि स एव सेतूनां धर्ममर्यादानां गोपीथाय रक्षणाय अजोऽपि जातः। 'गोपीथं रक्षणे मुग्धे' इति निरुक्तिः ॥ २ ॥ तस्मिन्निति चतुष्कम्। भ्राजन्ति मुक्तादामानि मुक्तामालास्तेषां लम्बमाना गुच्छाः सन्ति यस्मिंस्तेन वितानेन चन्द्रातपेन विराजिते अन्तर्गृहे। तृतीयान्तानां विराजितपदेनान्वयः। पुष्पैरन्यैश्च इतस्ततो विकीर्णैः। द्विरेफो भ्रमरः। गोभिः किरणैः। पारिजातवनस्य आमोदो गन्धस्तद्युक्तेन वायुना। पूर्वप्रस्थापितपारिजातस्य एकैकस्य सर्वत्र गृहेषु सत्त्वाद्वनमित्युक्तम्। पर्यङ्के शय्याकारमञ्चे। कशिपूत्तमे तूलिकास्तरणयुक्ते ॥ ३-६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पूर्वाध्याये रमाभी रेमे इत्यनेन "इत्थं रमापतिमावाप्यपतिं स्त्रियस्ताः" इत्यनेन च रमायाः प्राधान्यं सूचितं तदेव हास्यलीलाद्वारा षष्टितमे वर्णयति–कर्हिचिदिति ॥ १ ॥ जगद्गुरुमित्यनेन, सर्वपूज्यत्वं भगवतो दर्शितं तदेव प्रपञ्चयति–यो विश्वं सृजत्यवतीति अयं भावः विश्वकारणमेव जिज्ञास्यमित्युक्तं भगवता सूत्रकारेण "अथातो ब्रह्मजिज्ञासा" "जन्माद्यस्य यतः" इति "तदेवध्येयम्" इत्याह भगवती श्रुतिः "कारणन्तु ध्येयम्" इति तच्च विश्वकारणं यदुषु आविर्भूतं तस्य सभार्थस्य स्वरूपगुणश्रवणमननध्यानादिकं श्रेयोर्थिभिर्महतादरेण कर्तव्यमिति ॥ २ ॥ स्वतल्पस्थं पतिं पर्यचरदित्येतत्प्रपञ्चयति–तस्मिन्निति चतुर्भिः । वितानादिभिर्भ्राजिते सुगन्धाकृष्टैः द्विरेफकुलैर्नादिते तस्मिन्नतिप्रसिद्धे पर्यङ्कगते कशिपूत्तमे शयनीयश्रेष्ठे हंसतूलिकायां सुखासीनं पतिमुपतस्थे असेवतेति चतुर्णामन्वयः कथम्भूतेन वितानेन भ्राजता मुक्तादाम्नां विलम्बाः लम्बमानाः गुच्छाः सन्ति यस्मिन् तेन आगुरवैः अगुरुसम्भवैः कथम्भूते कशिपूत्तमे पयःफेननिभे पयसः क्षीरस्य फेन इव मृदुनि कथम्भूतं पतिं जगतामनन्तकोटिब्रह्माण्डानामीश्वरम् ॥ ३–६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कर्हिचित्सुखं यथा तथाऽऽसीनं स्वतल्पस्थ स्वशय्यास्थितं जगद्गुरुं पतिं भैष्मी सखीजनैः सह व्यजनेन चामरादिना पर्यचरत्सिषेवे ॥ ५ ॥ परवशः शुकस्तल्लक्षणमाह ॥ य इति । एतज्जगल्लीलया विश्वं सृजत्यवत्यति स हि । स एव स्वसेतूनां गोपीथायागतं रक्षणार्थं स्वयमजोऽपि यदुषु जातः ॥ ६ ॥ भ्राजन्ति यानि मुक्तादामानि विलंबीनि यस्मिंस्तेन वितानेनोल्लोचने विराजितेऽन्तर्गृहे रुक्मिण्या मणिमयैर्दीपैर्विराजिते ॥ ७ ॥ द्विरेफा भ्रमराश्चन्द्रमसोऽरुणैर्जालानां गवाक्षाणां रन्ध्रैः प्रविष्टैर्गोभिः करैः । आरुण्येन तारुण्यं चन्द्रस्य द्योत्यते । अमलैरिति पाठो निर्मलः । अरुणकिरणवत्कालस्यातरुणोरमणकालत्वात्स्वतल्पस्थमित्यानुकूल्याच्च विराजित इत्यनेनान्वयः ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

वाचिकस्तु तिरोभावो रुक्मिण्यामुच्यते स्फुटः । एकदशे निरोधार्थमन्यथा लौकिकं भवेत् ॥ १ ॥
सर्वथा कृतसेवायाः परीक्षापि निरूप्यते । यथा प्राणे शरीरस्य स्थितिस्तद्वद्यथा भवेत् ॥ २ ॥
सान्त्वनं कायिकं त्वत्र निःसम्बन्धाद्यतो भयम् । दोषाभावाय वाक्यं तु ईर्ष्यामात्सर्यदोषनुत् ॥ ३ ॥
निर्दुष्टायाः परिज्ञानमविरोधस्य वर्णनात् । निरूप्यते यतः सा हि न कुतश्चिद्भ्रमं भजेत् ॥ ४ ॥
शब्दार्थयोर्विरोधः स्यात् प्रामाण्ये सर्वथैव हि । लक्षणायामपि तथा मुख्यार्थो बाधितो यतः ॥ ५ ॥
अतो हि भगवद्वाक्यं दुर्ज्ञेयं सर्वथा मतम् । यस्त्वेतस्य परिज्ञाता स न मुह्यति कर्हिचित् ॥ ६ ॥

पूर्वाध्यायान्ते सर्वभावेन स्त्रीणां सेवा निरूपिता । तस्याः परीक्षार्थमिदमारभ्यते । तत्र प्रथमं पूर्वषट्के निष्पन्ने, उत्तरादिरूपं वीजनमाह कर्हिचिदिति । **सुखमासीन**मिति विश्रमान्ता सेवा निरूपिता । **स्वतल्पस्थ**मिति अग्रिमावश्यकत्वं निरूपितम् । कदाचिद्भगवान् रुक्मिण्या गृहे सभात उत्थाय रात्रौ समागतः । ततः प्रत्युद्गमनादिप्रकारेण स्वशय्यायामेवोपवेशितः । कामकलापूर्णं च तद्गृहम्, तत्पित्रादिभिः प्रायेण तत्सुखार्थं सामग्री प्रेषितेति लक्ष्यते । अन्यथा भगवान् स्वदत्तायां सामग्र्यां नैवं वदेत् । सापि भावज्ञा । नैवमभिमानेन सेवां कर्तुं प्रवर्तेत । अतोनभिप्रेतमेव स्वशय्यायां दीनभावमकृत्वा उपवेशितवती । भगवांश्च कथं तथा वदतीत्याशङ्कायामाह **जगद्गुरु**मिति । स हि सर्वोपदेष्टा । भ्रमादन्यथा बुद्धौ जातायां तन्निवारणीयमिति जगद्गुरोः कार्यमेव तत् । पतित्वान्निःशङ्कं पर्यचरत् । भैष्मीत्वात् साभिमाना । **व्यजनेने**ति स्वयं व्यजनं गृहीत्वा । सखीजनैः सहिता स्वोत्कर्षबुद्धया ता अपि स्थापितवती ॥ १ ॥ ननु तथापि संतोषे दुःखजननमयुक्तमिति चेत्, तत्राह **यस्त्वेत**दिति । उभयथापि भगवतो नैवंकरणे दोषः । आदावुत्पत्तिस्थितिप्रलयकर्ता, यथोत्पत्तिं हर्षादेः करोति, स्थितिं वा, तथा प्रलयमपि करोतीति हर्षादेर्नाशनं भगवत्कार्यमेव । किञ्च । भगवान् **स्वसेतूनां** स्वकृतमर्यादानां धर्मादीनां **गोपीथाय** रक्षणार्थमेवावतीर्णः । अन्यथा अजस्य यादवेष्ववतारो नोपपद्येत । ननु प्रलये कश्चन भगवत उद्योगो दृश्यते, समयश्च तादृश इति चेत्, तत्राह **लीलयेति** । न तस्य उत्पत्त्यादिकरणे किञ्चित्साधनं मृग्यते, किन्तु लीलयैव करोति । नापि यदोः पुष्टिस्थस्य विहितकालाद्यपेक्षा । नापि स्वभावमप्यन्यथा कृत्वा समागतस्य यदर्थमागतस्तत्करणमयुक्तं भवति ॥ २ ॥ तर्हि देशवशात्कालवशाद्वा भगवांस्तथोक्तवानित्याशङ्क्य गृहं वर्णयति **तस्मिन्नन्तर्गृह** इति । तां च रसाधिकरणभूतां षड्भिश्चतुर्भिर्द्वाभ्यां च । **गृहमध्य** इत्येकान्तता । तत्रापि **तस्मिन्नि**ति प्रसिद्धिः । तेन तत्कामस्थानमेव, नतु क्रोधादिस्थानम् । आदौ तस्योपरि शोभां वर्णयति । भ्राजन्मुक्तादाम्नां विलम्बनयुक्तेन वितानेन चन्द्रातपेन विराजिते । परितो विलम्बीनि मुक्तादामानि यस्मिंश्चन्द्रातपे । तेन विराजितं कामस्थानमेव भवति । मणिमयैरपि दीपैः परितो विराजिते । मल्लिकादामभिः केवलपुष्पैश्च सर्वतः । शृङ्गाररसानुभावकमाह । द्विरेफ-

कुलानां नादितं **यत्रे**ति । **द्विरेफाणां** वा कलं नादितम् । चन्द्रोऽप्यत्यन्तमुद्बोधक इति तत्किरणानामन्तःप्रवेशमाह **जालरन्ध्रप्रविष्टैश्चे**ति । चन्द्रमसः अरुणैरुदयकालीनैः **किरणैः** रागयुक्तैः गवाक्षमार्गेणान्तःप्रविष्टैः विराजिते ॥ ३-४ ॥

श्रीसुबोधिनी-सारः

अथ षष्टितमे लीला गृहस्थस्य निरूप्यते । रुक्मिणीं परिहासेन रुष्टां सांत्वयता ध्रुवम् ॥ १ ॥

शुकोक्तिः । कर्हिचित्कदाचित् स्वतल्पस्थं स्वशय्यायां स्थितं जगतां गुरुं श्रीकृष्णं सुखमासीनं पतिं सखीजनैः सह भैष्मी **रुक्मिणी** व्यजनेन सेवयांबभूव ॥ १ ॥ कोसौ जगद्गुरुस्तत्राह ईश्वरो यो लीलया एतद्विश्वं सृजति अत्ति खादति अवति पाति सोऽजो हि **स्वमर्यादानां गोपीथाय** रक्षणार्थं यदुषु जातः ॥ २ ॥ क्वेत्यपेक्षायामाधारं निरूपयति । भ्राजंति मुक्तानां दामानि तेषां विलंबाः संति **यस्मिंस्तेन** बिराजिते तस्मिन्नंतर्गृहे तृतीयांतानामत्रान्वयः **मणिमयैर्दीपै**रपि विराजिते इति मल्लिकाया दामभिः पुष्पैर्द्विरेफाणां भ्रमराणां कुलैर्नादिते जालच्छिद्रैः प्रविष्टैरमलैर्निर्मलैश्चंद्रस्य गोभिः किरणैः ॥ ३-४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

एकादशे । यथा प्राणे इति । प्राणे सति यथा शरीरस्य स्थितिर्भवति, तद्वत्सेवायां सत्यां रुक्मिण्याः शरीरस्य स्थितिरिति ज्ञानं **यथा** स्यात्तदर्थं **परीक्षा निरूप्यते** इत्यर्थः । ननु वाचिकतिरोधाने वाचैव सान्त्वनमुचितम्, अतः 'पर्यङ्कादवरुह्याशु' इत्यनेन कायिकसान्त्वनं कुतः **कृतवा**नित्यत आहुः **सान्त्वन**मिति । यतो हेतोर्निःसम्बन्धसम्भावनया **भयम्** । सम्बन्धश्चात्र कायिको, नतु वाचिकमात्ररूपः । त्रिविधविवाहस्य पूर्वमुक्तत्वात् । अतो दशम्यवस्थारूपदोषाभावाय सान्त्वनं कायिकं कृतवानित्यर्थः । तर्हि पूर्वमेव 'राजपुत्रो'त्यादिवाक्यं किमर्थमुक्तवानित्यत आहुः **वाक्ययं त्विति** । तर्हि दोषराहित्यं कथं ज्ञातं भवेदित्य आहुः **निर्दुष्टाया** इति । भगवद्वाक्येष्वविरोधस्य वर्णनाद्धेतोर्निर्दुष्टायाः परिज्ञानं निरूप्यते । यतो हेतोः सा निर्दुष्टैव भगवद्वाक्येषु **भ्रमं न** भजेत् । निर्दुष्टाया एव भ्रमाभावो युक्त इति हिशब्दः । भ्रमस्वरूपमाहुः **शब्दार्थयो**रिति । **कर्हिचि**दित्यस्याभासे । **तत्र प्रथम**मिति । वीजनकथनेन प्रत्युद्गमादिषट्कमप्युक्तमेव, तदेव 'सुखमासीन' मित्यनेनानूदितमिति भावः । **तस्मिन्नन्तर्गृह** इत्यस्याभासे । **देशवशा**दिति । गृहमुत्तमं नास्तीत्यर्थः । एतत्परिहारार्थं गृहवर्णनम् । तस्यावर्णनेन परिहार्यामाशङ्कामाहुः **कालावशा**दिति । तस्या वयो भोगयोग्यतासंपादकं जातं नास्तीत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ षष्टितमेऽध्याये पत्नीसेवां प्रदर्शयन् । रुक्मिणीं प्रति कृष्णस्य परिहासो निरूप्यते ॥ १ ॥

तत्र रुक्मिणीकृतां सेवामाह—कर्हिचिदिति । स्वतल्पस्थं तत्रापि सुखं यथा स्यात्तथा आसीनं जगद्गुरुं परमेश्वरत्वेन सर्वपूज्यं स्वपतिं कृष्णं सखीजनैः सह भैष्मी रुक्मिणी व्यजनेन पर्यचरत् सेवितवती ॥ १ ॥ तस्यास्तत्र प्रेमाधिक्ये हेतुत्वेन जगद्गुरुत्वमेव स्पष्टयति—यस्त्विति । यस्त्वीश्वरो लीलया निमित्तेनैतद्विश्वं सृजति, अत्ति संहरति, अवति रक्षति च स एव स्वयमजः कर्माधीनजन्मरहितोऽपि स्वसेतूनां स्वकृतधर्ममर्यादानां गोपीथाय परिरक्षणाय यदुषु जात इत्यन्वयः ॥ २ ॥ स्वतल्पस्थमित्युक्त्या 'स्वतल्पः कुत्रासीत्' इत्यपेक्षायां यदाधारं गृहमनुवर्णयति—तस्मिन्निति त्रिभिः । तच्छब्दः प्रसिद्धिपरः । उत्तमत्वेन प्रसिद्धेऽन्तर्गृहे गृहमध्ये यः पर्यङ्कः तदुपरि स्थापिते पयःफेनवन्मृदुले शुभ्रे धवले कशिपूत्तमे उत्तमशय्यायां सुखं यथा स्यात्तथाऽऽसीनं जगतामीश्वरं पतिमुपतस्थे असेवदिति चतुर्णामन्वयः । उत्तमत्वमेव स्पष्टयति—भ्राजन्ति यानि मुक्तादामानि तेषां विलम्बा यस्मिंस्तेन वितानेन चन्द्रातपेन विराजिते, तथा मणिमयैर्दीपैरपि विराजिते ॥ ३ ॥ मल्लिकादामभिरन्यैरपि पुष्पैश्च विराजिते । द्विरेफाणां सौरभ्यलोभेन आगतानां भ्रमराणां कुलेन समूहेन नादिते । जालरन्ध्राणि गवाक्षछिद्राणि तन्मार्गैरन्तःप्रविष्टैरमलैः शुद्धैः रजोमेघादिकालुष्यरहितैश्चन्द्रमसो गोभिः किरणैश्च विराजिते ॥ ४ ॥

अन्वितार्थप्रकाशिका

कृष्ण षष्टितमे प्रेम कलिं कृत्वाऽथ रुक्मिणीम् । असान्त्वयत्पुनस्तां च तत्र श्लोका नवेषवः (५९) ॥
उवाचेत्यष्टकं (८) साङ्घ्रिपञ्चशैला (७५।) अनुष्टुभः ॥ ६० ॥

कर्हिचिदिति ॥ स्वतल्पस्थं तत्रापि सुखं यथा स्यात्तथा आसीनं जगद्गुरुं पतिं कृष्णं सखीजनैः सह भैष्मी रुक्मिणी व्यजनेन पर्यचरत् सेवितवती ॥ १ ॥ रुक्मिण्याः प्रेमसेवारसभञ्जने तस्य लीला एव हेतुर्नान्य इति निदर्शनार्थं विश्वसृष्ट्यादेरपि लीलाहेतुकत्वमभिव्यञ्जति—यस्त्विति ॥ यस्त्वीश्वरो लीलया निमित्तेनैतद् विश्वं सृजति अत्ति संहरति अवति रक्षति च । स एव स्वयमजः स्वसेतूनां स्वकृतधर्ममर्यादानां गोपीथाय परिरक्षणाय यदुषु जातः । तेन स्वप्रियजनप्रेममर्यादात्रोटनं न तस्याभीष्टं किंतु तेन दृढीकरणमेवेति भावः ॥ २ ॥ तस्मिन्निति चतुष्कम् ॥ हे राजन् ! भ्राजन्ति यानि मुक्तादामानि तेषां विलम्बाः लम्बमाना गुच्छाः सन्ति यस्मिंस्तेन वितानेन चन्द्रातपेन विराजिते तथा मणिमयैरपि विराजिते मल्लिकादामभिरन्यैरपि पुष्पैश्च

विराजिते द्विरेफाणां सौरभ्यलोभेनागतानां भ्रमराणां कुलेन समूहेन नादिते जालरन्ध्राणि गवाक्षच्छिद्राणि तन्मार्गैरन्तःप्रविष्टैरमलैः शुद्धै रजोमेघादिकालुष्यरहितैः चन्द्रमसो गोभिः किरणैश्च विराजिते । अरुणैः इत्यपि पाठः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ षष्टितमेऽध्याये रुक्मिण्या कलहं विभुः । हास्येनह्यकरोत् कृष्णः पुनस्तस्याश्च सांत्वनम् ॥ १ ॥
प्रत्युक्ति कृष्णवचसां रुक्मिण्या हसतां प्रियाम् । इति प्रसंगं श्रीशुकः प्राहप्रेमरसोद्गमम् ॥ २ ॥

कर्हिचिदिति सखीजनैः सह व्यजनेन व्यजनादिसेवोपचारेण पतिं परमेश्वरं पर्यचरत् सिषेवे ॥ १ ॥ जगद्गुरुत्वं निरूपयन्नाह य इति । गोपीथाय रक्षणाय ॥ २ ॥ प्रथमं तावत्त्रिभिः श्लोकैः श्रीकृष्णमंदारशोभां निरूपयति तस्मिन्निति ॥ तस्मिन्नंतर्गृहे प्रसिद्धे मुख्यांतःपुरे भ्राजतां शोभमानानां मुक्तादाम्नां बिलंबाः परितो बंधनानि विद्यन्ते यस्मिस्तेन वितानेन विराजिते सर्वतृतीयांतपदानि विराजितपदेन योजनीयानि ॥ ३ ॥ पुष्पैर्धूपैरिति पाठौ । द्विरेफाणां भ्रमराणां कुलैर्नादिते सुगंधाधिक्याच्छब्दिते जालरंध्रेषु वातागमनछिद्रेषु प्रविष्टैः गोभिर्गभस्तिभिश्च ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

रुक्मिणीं परिहासेन कोपयित्वा स्वयं हरिः ॥ अथ षष्टितमे प्रेमकलहे तामसान्त्वयत् ॥ १ ॥

कर्हिचिदिति ॥ कर्हिचित् कस्मिश्चित् समये, भैष्मी रुक्मिणी, स्वतल्पस्थं स्वकीयपर्यङ्कावस्थितं, तत्रापि सुखासीनं सुखं यथा तथाऽऽसीनं, पतिं स्वस्वामिनं, जगद्गुरुं, स्वाश्रितहितोद्यतं श्रीकृष्णं, सखीजनैः सहिता सती, व्यजनेन चामरेण, पर्यचरदुपचचार ॥ १ ॥ सामान्येनोक्तमिमेवार्थं प्रपञ्चयति य इत्यादिनोपासांचक्र ईश्वरमित्यन्तेन तत्र तावज्जगद्गुरुत्वं प्रपञ्चयति ॥ यस्त्विति ॥ ईश्वरः यस्तु परमेश्वरो यो भगवांस्तु, एतत् विश्वं, लीलया सृजति विसृजति, अवति रक्षति, अत्ति संहरति, स हि स एव, अजः सन्नपि, स्वसेतूनां स्वकृतधर्ममर्यादानां, गोपीथाय रक्षणाय, यदुषु जातः गुरुत्वं हि हितैककारित्वं 'को गुरुरधिगततत्त्वः स्वजनहितायोद्यतः सततं । इत्यभियुक्तोक्तेः तच्चात्र सर्जनादिक्रियया द्योतितं तद्यथा । सृजति स्वाराधनोपयुक्तकरणकलेवरादिप्रदानेन हितं करोतीति । अवति अनिष्टनिरसनेष्टप्रापणरूपेण पालनरूपं हितं करोति इति । अत्ति संसरतां जीवानां प्रलयमुखेन विश्रान्तिप्रदानार्थकसंहरणात्मना हितं करोतीति ॥ २ ॥ अथ स्वतल्पस्थमित्युक्तं तत्र यत्र तल्पं तत्रस्थं प्रदेशं वर्णयति तस्मिन्निति त्रिभिः ॥ तस्मिन्निति ॥ तच्छब्दोऽत्र प्रसिद्धिपरः । तृतीयान्तानां विराजित इत्यनेन संबन्धः । तस्मिन् प्रसिद्धे, अन्तर्गृहे गृहमध्यप्रदेशे विषये, भ्राजन्ति यानि मुक्तादामानि तेषां विलम्बाः सन्ति यस्मिंस्तेन, वितानेनोल्लोचेन मणिमयैः दीपैः अपि, विराजिते ॥ ३ ॥ मल्लिकेति ॥ मल्लिकादामभिः, द्विरेफकुलनादितैः पुष्पैः, यदुपरि भ्रमरा गुञ्जारवं कुर्वन्ति तथाविधैः कुसुमैरित्यर्थः । यदा द्विरेफकुलनादिते इति पाठान्तरं, तदा सौरभलोभभ्रमद्भ्रमरकुलैः नादिते, पुष्पैः मल्लिकादामभिश्च विराजित, इत्यर्थः कार्यः । जालरन्ध्रप्रविष्टैः अमलैः चन्द्रमसः गोभिः किरणैश्च, विराजिते ॥ ४ ॥

कृष्णप्रिया

गृहस्थाश्रम विनोद माधुर्य

श्रीशुकदेवजी ने कहा—महाराज परीक्षित् ! एक दिवस अखिल ब्रह्माण्ड के नाथ सद्गुरु भगवान् श्रीकृष्ण, श्री रुक्मिणी जी के पर्यङ्क पर सुखपूर्वक विराजमान थे । श्री भीष्मकराज कुमारी श्री रुक्मिणी रानी सखीवृन्द के साथ निजनाथ श्री द्वारिकानाथ जी की सेवा कर रही थी, नाथ को वीजन डोल रही थी ॥ १ ॥ राजन् ! जो सर्वसमर्थ जगदीश्वर आसानी से समस्त विश्व की रचना, रक्षा एवं प्रलय करते हैं वही अज-अविनाशी-भगवान् स्वनिर्मित धर्ममर्यादाओं का रक्षण करने के लिये यादवों के यहां प्रकट हुए हैं ॥ २ ॥ महारानी का महल अति मनोहर था । उस दिव्य भवन में रमणीय चँदोवे तने हुए थे । इन चँदोवे के चारों ओर मुक्तामणियों की महामूली झालरें लटक रही हैं और सारे भवन में मणिमय दीपक जगमगा रहे थे ॥ ३ ॥ मधुमालती चमेली मल्लिका के पुष्प एवं मालाओं की लटें महँक रही थी । इन मालाओं और पुष्पों पर भौरों की पंक्तियाँ गुंजार कर रही थी । मनोहर झरोखों के गवाक्षों-जालियों में से चन्द्रमा की श्वेत किरणावली राजभवन के भीतर छिटक रही थी ॥ ४ ॥

पारिजातवनामोदवायुनोद्यानशालिना[1] । धूपैरगुरुजैः[2] राजन् जालरन्ध्रविनिर्गतैः ॥ ५ ॥
पयःफेननिभे शुभ्रे पर्यङ्के कशिपूत्तमे । उपतस्थे सुखासीनं जगतामीश्वरं पतिम् ॥ ६ ॥
बालव्यजनमादाय रत्नदण्डं सखीकरात् । तेन वीजयती देवी उपासाञ्चक्र ईश्वरम् ॥ ७ ॥
[3]सोपाच्युतं क्वणयति [4]कलनूपुराभ्यां रेजेऽङ्गुलीयवलयव्यजनाग्रहस्ता ।
वस्त्रान्तगूढकुचकुङ्कुमशोणहारभासा नितम्बधृतया च परार्घ्यकाञ्च्या ॥ ८ ॥

---

१. शोभिना—वीर । २. रागरवैः—विज. । ३. साप्य—प्रा. पा. । ४. मणि—श्रीधर वंशी जीव. वीर. विज. विश्व. ।

कर्दमक्षमा

अन्वयः—उद्यानशालिना, पारिजातवनामोदवायुना, जालरन्ध्रविनिर्गतैः, अगुरुजैः, धूपैश्च, विराजिते (उपतस्थे इति परेणान्वय) ॥ ५ ॥ तस्मिन्, पयःफेननिभे, कशिपूत्तमे, शुभ्रे, पर्यङ्के, सुखासीनं, जगतां, ईश्वरं, पतिं, उपतस्थे (भैष्मी इति पूर्वेणान्वयः) ॥ ६ ॥ देवी, सखीकरात्, रत्नदण्ड, बालव्यजनं, आदाय, तेन, बीजयन्ति, ईश्वरं, उपासाञ्चक्रे ॥ ७ ॥ सा उपाच्युतं, अङ्गुलीयवलयव्यजनयाग्रहस्ता, मणिनुपूराभ्यां, क्वणयति, वस्त्रान्तगूढ कुचकुङ्कुमशोणहारभासा नितम्बधृतया परार्घ्य-काञ्च्या, च, रेजे ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

निर्गच्छद्भिरगुरुसंभवैर्धूपैश्चातिमनोहरत्वं दर्शितम् ॥ ५ ॥ पयसः क्षीरस्य फेन इव मृदुनि पर्यंकस्थे कशिपूत्तमे हंसतूलिकायाम् उपतस्थे असेवत ॥ ६ ॥ तदेवाभिनयति । बालव्यजनति ॥ ७ ॥ उपाच्युतमच्युतस्य समीपे सा मणिनूपुराभ्यां रेजे । क्वणयती मणिमयौ नूपुरौ कूजयन्ती तथा अंगुलीयवलयव्यजनान्यग्रहस्ते हस्ताग्रे यस्याः सा वस्त्रांतेन गूढौ स्थगितौ कुचौ तयोः कुंकुमं तेन शोणो हारस्तस्य भासा नितंबे धृता या परार्ध्या अमूल्या कांची तया च रेजे ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

जालरंध्रप्रविष्टगोभिर्धूपैश्च गृहशोभादर्शिता । वनशब्दः सर्वासां पट्टराज्ञीनां गृहेष्विद्रेण पूर्वप्रस्थापितपारिजातस्यैकैकस्य सर्वत्र वृत्तेः । न च केवलं तदामोद एव विचित्रान्यपुष्पादीनामपि सौरभ्यस्तीत्याह––उद्यानेति । जालरंध्रेण विशेषतो निखिलदिग्व्यापकत्वादिना निर्गतैः । तादृशगृहे यश्चंद्रशालांगणगतः पर्यंकस्तस्मिन्यत्कशिपूत्तमं तस्मिन् ॥ ५ ॥ "एकोक्त्या कशिपुर्भक्ताच्छादने च द्वयोः पृथक्" इति विश्वः । "आयामः सप्ततालः स्याच्चतुस्तालं तु विस्तृतम् । द्वितालमुन्नतं ज्ञेयमेतत्पर्यंकलक्षणम् ॥" इति शिल्पिशास्त्रे । 'अंगुष्ठमध्यमयोर्विस्तृतयोरंतरालस्तालः' इति प्रयोगरत्ने । "शय्याच्छादनवस्त्रे च कशिपुर्लघुमञ्चके" इति धरणिः ॥ तदेव विशिनष्टि–पय इत्यादिपदाभ्याम् । उपतस्थे इत्यादेः पुनः पुनरुक्तिस्तु भावविशेषेण पुनः पुनस्तादृक्सेवाभिकामात् ॥ ६ ॥ तदेव उपस्थानम् । अभिनयति दर्शयति । तेन बालव्यजनेन ॥ व्यजनसेवाप्रकारमाह–बालव्यजनं चामरम् । देवी महापट्टराज्ञी ॥ ७ ॥ अंगुलीयवलयान्यंगुलिभूषणानि । हस्तस्याग्रमग्रहस्तमिति राजदंतादित्वात्समासः । स्थगितावाच्छादितौ । 'पश्चान्नितंबः स्त्रीकट्याः' इत्यमरः । "कांची स्यान्मेखलादाम्नि प्रभेदे नगरस्य च" इति मेदिनी । 'स्यात्पराध्यमनर्घ्येऽपि परभागे द्वयोः' इति निरुक्तः ॥ सेति–सा क्वणयन्ती शब्दायमाना रेजे । राजने हेतुः—मणिनूपुराभ्यामुपलक्षिता, अंगुलीयेत्यादिलक्षणा । 'तत्र तत्स्मारितानंतहृताखिलेंद्रियः' इति, "वासुदेवे भगवति निमग्नहृदयोऽब्रवीत्" इत्यादिरीत्या प्रस्तूयमानतदेकस्फूर्त्या तां सभामप्यनवधाय 'बाहुप्रसारपरिरंभकरालकोरु—' इत्यादिकं यथाऽवर्णयत्तथैव तत्सखीजनस्फुरणवशात्तद्भावितः संस्तस्या रहस्यामपि शोभां वर्णयति—वस्त्रेति । तत्र वस्त्रांतेत्यादिद्वयेनोपलक्षिता चेत्यर्थः । तत्र शाटीरूपवस्त्रस्य दीर्घत्वात् सम्यगेव गूढत्वं ज्ञेयम्, अन्तशब्दस्य स्वरूपार्थकक्वणने हेतुः—मणीति, वलयेति, परार्द्धेति च । वीजनेन, भावेन चलनादिति ज्ञेयम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेव विशिनष्टि—पयइति । पदाभ्याम् उपतस्थ इत्यादेः पुनः पुनरुक्तिर्भावविशेषेण तादृक्सेवाभिकामात् ॥ ६ ॥ व्यजनेन पर्य्यचरदित्युक्तं तत्प्रकारमेव विशिष्याह—बालव्यजनमिति । वालव्यजनं चामरं देवी (महा) पट्टमहिषी अत्र टीकायाम् अभिनयतीत्यभिनवपूर्वकं वदतीत्यर्थः ॥ ७ ॥ सेति । सा क्वणयति शब्दायमाना रेजे राजने हेतुः मणिनूपुराभ्यामुपलक्षिता अङ्गुलीयेत्यादिलक्षणा तत्र तत्स्मारितानन्तहृताखिलेन्द्रिय इति "वासुदेवे भगवति निमग्नहृदयोऽब्रवीत्" इति रीत्या प्रस्तूयमानतदेकस्फूर्त्या तां सभामप्यनवधाय बाहुप्रसारपरिरम्भकरालकोर्वित्यादिकं यथावर्णयत् तथैव तत्सखीजनस्फुरणवशात्तद्भावभावितस्सन् तस्या रहस्यामपि शोभां वर्णयति–वस्त्रेति । तत्र वस्त्रान्तेत्यादिद्वयेनोपलक्षिता चेत्यर्थः । अत्र शाटीरूपवस्त्रान्तस्य दीर्घत्वात्सम्यगेव गूढत्वं ज्ञेयम् अन्तशब्दस्य स्वरूपार्थकत्वात् क्वणने हेतुः मणीति वलयेति परार्द्ध्येति च वीजनेन भावेन च चलनादितिज्ञेयम् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमियं क्रीडा प्रदोषारम्भे ज्ञेया । वन-शब्दः सर्व्वासां श्रीमहिषीणां प्रीत्यै प्रतिगृहमेकैकस्य पारिजातस्य सृष्टेः, किंवा तेनैकेनैव वनिकावत् सर्व्वद्वारकाव्याप्तेः । न च केवलं तदामोद एव, विचित्रान्यपुष्पादीनामपि सौरभ्यमस्तीत्याह—उद्यानेति । एवं वायोः शीतलोद्यान-सम्बन्धेन शैत्यम्, शालित्वेन मान्द्यं चोक्तम् । जालरन्ध्रेभ्यो विशेषेण सर्व्वदिग्व्यापकत्वादिना निर्गतैः;

तत्तच्छ्रवणेन प्रहर्षाद्राजमानं श्रीपरीक्षितं दृष्ट्वा तथैव सम्बोधयति—राजन्निति ॥ ५ ॥ उत्कपोष-न्यायेन परिचरणप्रकारमेव प्रहर्षाद्वर्णयति—पय इति द्वाभ्याम् । तादृशेऽन्तर्गृहे यः पर्य्यंकस्तस्मिंश्च यः कशिपूत्तमस्तस्मिन् । तत्र च बहिर्विशिनष्टि—पय इति द्वाभ्याम् । उपतस्थ इत्यादेः पुनः पुनरुक्तिर्भाव-विशेषेण तादृक्सेवाभिकामात् ॥ ६ ॥ व्यजनेन पर्य्यचरदित्युक्तम् । तत्प्रकारमेव विशिष्याह—बालव्यजनमिति चामरम्, किंवा पिञ्छादिरचितं लघुतरस्वल्पव्यजनम्, कोमलतरकरत्वात् । देवीति तादृगुपासनेन शोभाभरोदयात्; यद्वा, श्रीमहिषी ॥ ७ ॥ तमेव ससाधनं दर्शयन् वक्ष्यमाणश्रीभगवत्प्रीतिहेतुत्वेन तां वर्णयति—सेति । मणीत्यादिना क्रमेण पादयोर्हस्तस्य वक्षसो मध्यभागस्य चेत्येवं सर्व्वांगशोभोक्ता । अन्यत्तैर्व्याख्यातम् । यद्वा, वीजनेन सर्व्वांगचलनाद्वलयादीन् क्वणयन्ती ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

उद्यानवने शोभते रोचते इति तथा तेन पारिजातवनामोदयुक्तेन वायुना अगुरुजैरगरुकाष्ठजैर्गवाक्षरन्ध्रविनिर्गतैर्धूपैश्च हे राजन् ! ॥ ५ ॥ अथ तल्पं वर्णयति—पयःफेनेति । दुग्धफेनवन्मृदुले धवले च पर्यङ्के यत्कशिपूत्तममास्तरणश्रेष्ठं तस्मिन् सुखं यथा तथा आसीनं पतिमुपतस्थे सन्निधिमवापेत्यर्थः ॥ ६ ॥ रत्नमेव दण्डस्थानीयं तदाकारं च यस्य तद्वालव्यजनं चामरं सख्याः कराद्धस्तादादाय तेन वालव्यजनेन वीजयती देवी रुक्मिणी उपासाञ्चक्रे तमेव पश्यन्त्यवतस्थ इत्यर्थः ॥ ७ ॥ तादात्विकीं तामनुवर्णयति—सेति । सा रुक्मिणी उपाच्युतम् अच्युतसमीपे मणिमयनूपुराभ्यां क्वणयती ध्वनिमुत्पादयन्ती अङ्गुलीयाऽग्रहस्ते हस्ताग्रे यस्याः सा वस्त्राञ्चलेन गूढयोः स्थगितयोः कुचयोः कुङ्कुमेन शोणो यो हारः मुक्ताहारस्तस्य भासा दीप्त्या नितम्बयोर्धृतया परार्ध्यया: काञ्च्या च रेजे ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पारिजातानां मन्दाराणां वनस्य काननस्यामोदेन युक्तेन वायुना शोभिते कीदृशेन उदान इव शालिना मनोहरेण पारिजातवनस्य सम्भजनीयस्य सेव्यस्यामोदस्य सम्बन्धिना वायुना वा आगरवैरगरुसम्पृक्तैः ॥ ६ ॥ पयःफेननिभे जलबुद्बुदवन्मसृणे ॥ ६ ॥ किं कर्मेति तत्राह—वालव्यजनमिति ॥ ७ ॥ उपाच्युतम् अच्युतस्य समीपे उन्नमदवनमतोः पादयोर्मणिनूपुराभ्यां क्वणयति अङ्गुलीयाख्यवलयेन व्यजनेन च युक्तं हस्ताग्रं यस्याः सा तथा पृथक्कृते वलये हस्तमूलेति वक्तव्यं न तु हस्ताग्रेति वस्त्रान्तेन वस्त्राञ्चलेन गूढयोः कुचयोः लिप्तकुङ्कुमचूर्णसम्बन्धेन शोणस्य रक्तस्य हारस्य मुक्तादाम्नो भासा युक्तोपलक्षणे तृतीया नितम्बधृतया कटिप्रदेशवेष्टितया परार्द्ध्यकाञ्च्या अनर्घरशनया च युक्ता ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

वालव्यजनेत्यादि । वालव्यजनं चामरम्, स्वल्पव्यजनखण्डं वा ॥ ७–८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

वालव्यजनं चामरम् स्वल्पव्यजनं वा ॥ ७–८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उपाच्युतम् अच्युतस्य समीपे सा मणिनूपुराभ्यां रेजे क्वणयन्ती अर्थान्मणिनूपुरौ काञ्ची च अत्यायतव्यजनचालनेन सर्वाङ्गस्पन्दनात् स्वनयन्तीत्यर्थः । अङ्गुलीयवलयव्यजनानि अग्रहस्ते यस्याः सा वस्त्रान्तेन शाटिकाञ्चलेन गूढौ गुप्तीकृतौ सकञ्चुकौ यौ तयोः कुचौ कुङ्कुमेन शोणस्य हारस्य भासा परार्द्ध्या परार्द्धमूल्यया काञ्च्या च रेजे ॥ ८ ॥

गूढार्थदीपिनी

बालव्यजनं चामरम् । वीजयती बाहुलकान्नुमभावः ॥ ७ ॥ सा रुक्मिणी अच्युतस्य समीपे ताभ्यां रेजे । तौ क्वणयन्तौ सती । अङ्गुलीयकादीनि अग्रहस्ते हस्ताग्रे यस्याः सा । राजदन्तादित्वात्समासः । वस्त्रान्तेन शाटिकाञ्चलेन गूढयोः कुचयोः कुंकुमेन यः शोणहारः तस्य भासा परार्ध्या अमूल्या परार्द्धमूल्या वा काञ्ची तेषां च रेजे ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

व्यजनेनेति यदुक्तं तत्प्रपञ्चयति—वालव्यजनमिति ॥७॥ सा देवी क्वणयती नूपुरकाञ्च्याद्याभरणानि व्यजनचालनवशात् कूजयन्ति अङ्गुलीयवलयव्यजनानि अग्रहस्ते हस्ताग्रे यस्या सा मणिनूपुराभ्यां वस्त्रान्तेन गूढयोः कुचयोः कुङ्कुमेन शोणस्य हारस्य भासा दीप्त्या परार्ध्यया कांच्या च उपाच्युतमच्युतस्य समीपे रेजे ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

परिजातवनानामामोदस्तेन युक्तो वायुस्तेनोद्यानेनोर्ध्वगमनेन शालत इति तेन शोभिते । अगुरवैरगुरुभवैर्धूपैर्जालरन्ध्रविनिर्गतैः शोभिते ॥ ९ ॥ पयःफेननिभे क्षीरोपरिगफेनसदृशे पर्यङ्के शुभ्रे दान्तिकत्वात् । पर्यङ्के सुखासीनं जगतामीश्वरं पतिं भर्तारमुपतस्थे ॥ १० ॥ सखीकराद्रत्नदण्डं बालव्यजनमादाय तेनेश्वरं वीजयति देव्युपासाञ्चक्रे ॥ ११ ॥ अच्युतमुप मणिनूपुराभ्यां क्वणयती क्वणयन्ती । अङ्गुलीयवलयव्यजनाग्रहस्ता अङ्गुलीयान्यूर्मिकावलयानि करभूषणानि व्यजनानि चाग्रं हस्ते हस्ताग्रे यस्याः सा । वस्त्रान्ते गूढो यौ कुचौ तयोर्यत्कुङ्कुमं तेन शोणो हारो मुक्तामाला तस्य भासो यस्याः सा । भासशब्दोऽयम् । भासो भासि स्वमाख्यात इति विश्वः । नितम्बधृतया परार्घ्यानर्घ्या काञ्ची तया विरेज इत्यन्वय ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अलौकिकोद्बोधकमाह—पारिजातकवृक्षाणां पूर्वप्रेषितपारिजातकल्पवृक्षस्य पोताः सर्वत्र स्थापिता वनप्राया जाताः । ते तस्य गृहस्य परितो वर्तन्त इति गवाक्षादिमार्गेण तदामोदयुक्तो वायुरपि तत्र प्रविष्टः, तेनापि विराजिते । तस्य शैत्यं मान्द्यं च वर्णयितुमाह **उद्यानशालिने** वाप्यः निर्झराश्च सन्ति । तत्रापि उद्यानं शाला यस्य । तेन मन्दतापि समायाति । सहजान्युद्बोधकान्युक्त्वा कृत्रिमान्याह धूपैरिति । अगरुजैः अगरुयुक्तनानाविधद्रव्योद्भूतैः । राजन्निति विश्वासार्थम् । अन्तः स्थापितः स धूमः, न तु बहिष्ठोऽन्तःप्रविष्ट इति ज्ञापयितुं विशेषणमाह **जालरन्ध्रविनिर्गतै**रिति ॥ ५ ॥ अधः शोभामाह पयःफेननिभ इति । पयःफेनस्य निरन्तरमुच्छूनता विचित्रता शुभ्रता च । सूत्रोपनिबद्धं मध्ये परितो दन्तैर्हीरकैश्च निर्मितम्, तेन शुभ्रम्, कशिपुना सुतरामुत्तमम् । एवं सामग्रीं वर्णयित्वा रसदातारं भगवन्तं तत्र स्थितं वर्णयति । तत्र सुखं यथा भवति तथा आसीनम् । लोकवेदशङ्काभावार्थं विशेषणद्वयम् । **जगतामीश्वरं पति**मिति ॥ ६ ॥ कुलवधूत्वादीश्वरत्वाच्च स्वतःप्रवृत्तिरयुक्तेति निकटे स्वयं स्थितेत्याह **बालव्यजनमादाये**ति । चमरीबालस्य व्यजनम् । रत्नानि दण्डे यस्य । अनेन दासीत्वं स्वस्य प्रकाशितम्, न तु नायिकात्वम् । तथा सति धाष्ट्र्यं भविष्यतीति पूर्वं सख्या हस्ते तत् स्थितम्, तदपि नापकर्षजनकमिति तस्य वर्णनम् । भगवति विलम्बमाने सखीहस्तात् स्वयं गृहीतवती, तेन वीजयती जाता । तदप्युद्बोधकम् । सेवया ईश्वरः परितुष्यतीति तदपि कृतवतीत्याह **उपासांच**क्र इति । सेवनरूपं निकटेऽवस्थानमुपासनम् ॥ ७ ॥ मुख्य आलम्बनविभाव इति तां वर्णयति **सोपाच्युतमिति** । अल्पचलनेन कलनूपुराभ्यां क्वणयती भवति । जघनादिभारात् स्थिरतया स्थातुमशक्ता किञ्चिच्चलनान्नूपुरशब्दं करोति । एतादृशी निर्बन्धेन सेवां कुर्वाणापि रेजे । भगवन्निकटे समागच्छन्तं हस्तं वर्णयति **अङ्गुलीये**ति । अङ्गुलीयानि बलयानि व्यजनाग्र्यं च हस्ते यस्याः । वस्त्रान्तेन गूढयोः कुचयोः कुङ्कुमेन शोणो यो हारः तस्य भासा रेजे । नितम्बधृतया बहुमूल्यकाञ्चया च । रसोत्पादकस्थाननिरूपणार्थं स्थानद्वयवर्णनम् । हस्तपादौ तु वर्णितौ पूर्वार्धेन । एवं रसस्थानमादिमध्यावसानेषु वर्णितम् । भगवतः सुमुखत्वाभावात् न सापि सुमुखीति मुखमान्तरो भावश्च न वर्णितः ॥ ८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

पारिजातेत्यत्र । **पूर्वप्रेषिते**ति । आद्येऽध्याये 'सुधर्मां पारिजातं च'त्यत्रोक्तस्येत्यर्थः । उद्यानं शाला यस्येति मत्वर्थीयविवरणम् । न तु बहुव्रीहिः ।

श्रीसुबोधिनी–सारः

पारिजातस्य कल्पतरोर्वने आमोदो यस्मिंस्तेन वायुना उद्यानं शालते शोभयतीत्येवं शीलेन जालरंध्रेभ्यो विनिर्गतैरगुरुजैर्धूपैर्विराजिते ॥ ५ ॥ पयसो दुग्धस्य फेनवत् निभेऽतिकोमले शुभ्रे पर्यंके कशिपूत्तमे हंसतूलिकायां सुखासीनं जगतामीश्वरं पतिमुपतस्थे उपासांचक्रे ॥ ६ ॥ सख्या दास्याः करात् हस्तात् रत्नमया दंडो यस्य तं वालैर्जातं ब्यजनमादाय गृहीत्वा स्वयं तेन वालव्यजनेन वीजयती सती देवी रुक्मिणी सेवनं चकारेश्वरं स्वामिनं हरिम् ॥ ७ ॥ उपाच्युतमच्युतस्य समीपे मणिमयाभ्यां नूपुराभ्यां मंजीराभ्यां क्वणयती शब्दयंती अंगुलीयानि वलयं व्यजनमग्रहस्ते व्यजनाग्रं वा हस्ते यस्याः सा वस्त्रस्योत्तरीयस्यांतेन गूढौ आवृतौ कुचौ तयोः कुंकुमं तेन शोणो रक्तो हारस्तस्य भासा दीप्त्या नितंबे धृतयापरार्ध्ययाऽमूल्यया कांच्या सा रुक्मिणी रेजे ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उद्यानशालिना उद्यानशोभिना पारिजातवनामोदयुक्तेन वायुना जालरन्ध्रविनिर्गच्छद्भिरन्तस्थैरगुरुजैर्धूपैश्च विराजिते । 'ईदृशं गृहं राज्ञामपि दुर्लभम्' इति सूचयन् सम्बोधयति—राजन्निति ॥ ५–६ ॥ तत्सेवामेव अभिनयेन दर्शयति—रत्नानि दण्डे यस्य तद्बालव्यजनं चामरं सख्याः करात् स्वयमादाय गृहीत्वा तेन चामरेण ईश्वरं जगत्पालकं भर्तारं वीजयती देवी अतिदीप्यमाना रुक्मिणी उपासाञ्चक्रे । तत्समीपे स्थिता अङ्गुलीयवलयव्यजनानि अग्रहस्ते हस्ताग्रे यस्याः सा, अत एव क्वणयती व्यजनचालनवेगेन सर्वाङ्गप्रकम्पनात् भूषणध्वनिमुत्पादयन्ती जातेत्यर्थः ॥ ७ ॥ उपाच्युतं अच्युतसमीपे स्थिता सा रुक्मिणी

मणिखचितनूपुराभ्यां वस्त्रान्तेन शाटिकाञ्चलेन गूढयोः गुप्तीकृतयोः कुचयोः कुङ्कुमेन शोणो यो मुक्ताहारस्तस्य भासा दीप्त्या, तथा नितम्बयोः धृतया पराध्र्यया अनर्घ्यया काञ्च्या च रेजे इत्यन्वयः ॥ ८ ॥

अन्वितार्थप्रकाशिका

तेन उद्यन्मात्रता व्यज्यते । तेन प्रदोषान्त इयं क्रीडा ज्ञेया । उद्यानशालिना उद्यानशोभिना पारिजातवनामोदयुक्तेन वायुना सर्वासां पट्टस्त्रीणां गृहेषु पूर्वमिन्द्रेण गौणपारिजातानां प्रस्थापनात् । "सुधर्मां पारिजातं च महेन्द्रः प्राहिणोद्धरेः ।" इति प्रागुक्तेः । मुख्यः पारिजातस्त्वेक एव स एवेन्द्रं जित्वाऽऽनीतः जालरन्ध्रेभ्यो विनिर्गच्छद्भिरन्तस्थैरगुरुजैर्धूपैश्च विराजिते तस्मिन्नुत्तमत्वेन प्रसिद्धेऽन्तर्गृहे गृहमध्ये यः पर्यङ्कः तदुपरि स्थापिते पयःफेनवन्मृदुले शुभ्रे धवले कशिपूत्तमे उत्तमशयायां सुखं यथा स्यात्तथासीनं जगतामीश्वरं पतिमुपतस्थे सेवितवती ॥ ३–६ ॥ तदेवाह—वालेति ॥ रत्नानि दण्डे यस्य तद्वालव्यजनं चामरं सख्याः करात् स्वयमादाय गृहीत्वा तेन चामरेण ईश्वरं जगत्पालकं भर्तारं बीजयती । नुमभाव आर्षः। देवी अतिदीप्यमाना रुक्मिणी उपासांचक्रे ॥ ७ ॥ सेति ॥ उपाच्युतम् अच्युतसमीपे स्थिता अङ्गुलीयवलयव्यजनानि अग्रहस्ते हस्ताग्रे यस्याः सा अत एव क्वणयती व्यजनचालनवेगेन सर्वाङ्गप्रकम्पनात् भूषणध्वनिमुत्पादयन्ती । नुमभाव आर्षः । मणिनूपुराभ्यां क्वणयती इति वा । सा रुक्मिणी मणिखचितनूपुराभ्यां वस्त्रान्तेन शाटिकाञ्चलेन गूढयोः गुप्तीकृतयोः कुचयोः कुङ्कुमेन शोणो यो मुक्ताहारस्तस्य भासा दीप्त्या तथा नितम्बयोर्धृतया पराध्र्यया अमूल्यया काञ्च्या च रेजे ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आगरवैः अगुरुसंभवैः प्रागिंद्रप्रेषितसामान्यपारिजातवृक्षाणां वने सत्यपि इन्द्रोद्यानादानीतो यः पारिजातः सतूत्तमोत्तमपारिजातो ज्ञेयः ॥ ५ ॥ पर्यंके पर्य्यंकस्थे कशिपूत्तमे श्रेष्ठतूलिकायां सुखासीनं उपत्तस्थे सिषेवे ॥ ६ ॥ वालव्यजनं चामरं ॥ ७ ॥ उपाच्युतं अच्युतस्य समियेसामणिमयनूपुराभ्यां वस्त्रांतेन गूढयोर्गुप्तयोः कुचयोः कुंकमेन रक्तहाराणां भासा कांत्या च नितंबधृतया पराध्र्यकांच्या अमूल्यकटिमेखलया च रेजे सा च कथंभूता क्वणयती नूपुरादीन् शब्दयंती अंगुलीयादीनि संति अग्रहस्ते हस्ताग्रे यस्याः सा अंगुलायं अंगुल्याभरणं ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पारिजातेति ॥ उद्यानशालिना पारिजातवनामोदवायुना पारिजातवृन्दीयामोदयुक्तेन वायुनेत्यर्थः । हे राजन्, जालरन्ध्रविनिर्गतैः अगुरुजैः धूपैः, विराजिते ॥ ५ ॥ एवं गृहान्तर्भागं संवर्ण्याथ तल्पं वर्णयति ॥ पयः फेननिभ इति ॥ पयःफेननिभे दुग्धफेनवन्मृदुले, शुभ्रे श्वेतवर्णे च, पर्यङ्के यत् कशिपूत्तमं श्रेष्ठास्तरणं तस्मिन्, सुखासीनं जगतां ईश्वरं, पतिं स्वस्वामिनं श्रीकृष्णं, उपतस्थे असेवत । रुक्मिणीति शेषः ॥ ६ ॥ वालेति ॥ रत्नानि दण्डे यस्य तत्, रत्ननिचितदण्डमित्यर्थः। वालव्यजनं चामरं, सखीकरात् आदाय, तेन चामरेण, वीजयती देवी रुक्मिणी, ईश्वरं श्रीकृष्णं, उपासांचक्रे ॥ ७ ॥ तादात्विकीं तामनुवर्णयति ॥ सेति ॥ सा रुक्मिणी, उपाच्युतमच्युतसमीपे, मणिनूपुराभ्यां निचितमणिभ्यां नूपुराभ्यां क्वणयती ध्वनिमुत्पादयन्ती, अङ्गुलीयानि ऊर्मिकाः वलयानि कटककङ्कणानि व्यजनं च अग्रहस्ते हस्ताग्रे यस्यास्तथाभूता सती, वस्त्रान्तेन गूढौ स्थगितौ यौ कुचौ तयोः कुङ्कुमेन शोणो हारो मुक्ताहारस्तस्य भासा दीप्त्या, नितम्बधृतया, पराध्र्यकाञ्च्या अनर्घ्यकटिमेखलया च, रेजे ॥ ८ ॥

कृष्णप्रिया

राजमहल के प्राङ्गण के उद्यान में पारिजात तरुवर राजि के कुसुमों की सुगन्धमयी वायु चारों ओर मन्द-मन्द बह रही थी । भवन के झरोखों की जालियों में से अगर धूप का धूआँ बाहर निकल रहा था ॥ ५ ॥ राजमहल की सुषमा मनोमोद दे रही थी । रनिवास में शयन खंडों में दूध के फेन के समान श्वेत-कोमल-बिछौनों से समाच्छादित रमणीय पर्यङ्क पर भगवान् श्रीकृष्ण आनन्द से विराजमान थे और श्रीरुक्मिणी देवीजी जगत्पति को निजप्रियतम पतिस्वरूप में प्राप्त करके बड़े चाव से सेवा कर रही थी ॥ ६ ॥ मणिमण्डित डाँडिओं की देदीप्यमान चँवर को सखी के हस्त से स्नेह से लेकर देवी रुक्मिणी जो स्वयं अतिस्नेह एवं आदर से भगवान् के श्रीचरणों की सेवा कर रहे थी ॥ ७ ॥ रुक्मिणीजी साक्षात् महालक्ष्मी जी ही हैं। देवी जी के करकमलों में मणिमण्डित अँगूठियाँ वलय और चँवर अति सुशोभित लगते थे । चरण सरोज में धारण किये हुए रत्नमण्डित पायल रुन झुन रुन झुन कर रहे थे । कंचुकी और वक्षःस्थल के वस्त्र से ढके हुए स्तनों की केशर की लालिमा मुक्तामणि की श्वेतमाला रक्तरङ्ग की दीख रही थी और चमक रही थी । नितम्ब तट पर विराजती महामूली मणि मेखला की लडियाँ लटक रही थी । इस प्रकार निरंतर समलङ्कृत श्रीरुक्मिणी जी प्रियपति श्रीकृष्ण के निकट में रह कर ही सेवा करती थी ॥ ८ ॥

तां [1] रूपिणीं श्रियमनन्यगतिं [2] च दृष्ट्वा या लीलया धृततनोरनुरूपरूपा ।
प्रीतः स्मयन्नलककुण्डलनिष्ककण्ठवक्त्रोल्लसत्स्मितसुधां हरिराबभाषे ॥ ९ ॥

श्रीभगवानुवाच

राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः । महानुभावैः श्रीमद्भिः रूपौदार्यबलोर्जितैः ॥ १० ॥
तान् प्राप्तानर्थिनो[3] हित्वा चैद्यादीन् स्मरदुर्मदान् । दत्ता भ्रात्रा स्वपित्रा च कस्मान्नो[4] ववृषेऽसमान् ॥ ११ ॥
राजभ्यो बिभ्यतः सुभ्रूः समुद्रं शरणं गतान् । बलवद्भिः कृतद्वेषान् प्रायस्त्यक्तनृपासनान् ॥ १२ ॥

कर्दमक्षमा

अन्वयः—या, लीलया, धृततनोः, अनुरूपरूपा, तां, रुपिणीं, अनन्यगतिं, श्रियं, अलककुण्डलनिष्ककण्ठ, वक्त्रोल्लसत्स्मितसुधां, प्रीतः, स्मयन्, हरिः, आबभाषे ॥ ९ ॥ श्रीभगवानुवाच—हे, राजपुत्रि ! लोकपालविभूतिभिः, महानुभावैः, रूपौदार्यबलोर्जितैः, श्रीमद्भिः, भूपैः, ईप्सिता (अभूः इति शेषः) ॥ १० ॥ तान्, प्राप्तान्, अर्थिनः, चैद्यादीन्, स्मरदुर्मदान्, भ्रात्रा, स्वपित्रा, च, त्वं, दत्ता, आसीः, तान्, हित्वा, असमान् नः, कस्मात्, ववृषे ॥ ११ ॥ हे सुभ्रू ! राजभ्यो, बिभ्यतः, समुद्रं, शरणं, गतान्, बलवद्भिः, कृतदेशान्, प्रायः, त्यक्तनृपासनान्, अस्मान्, कथं, ववृषे, इति, पूर्वेणान्वयः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तां निरीक्ष्य प्रीतस्सन्स्मयमानो हरिराबभाषे । कथंभूताम् । या लीलया धृतनरतनोस्तस्यानुरूपरूपा अनुरूपं रूपं यस्यास्ताम् । यथोक्तं श्रीपराशरेण—"देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ॥ विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुम्" इति । किं चालकैः कुंडलाभ्यां निष्केण पदकेनालंकृतकंठेन च चतुर्दिक्षु शोभिते वक्त्रे उल्लसंती स्मितसुधा यस्यास्ताम् ॥ ९ ॥ सर्वगुणयुक्ताऽपि तव बुद्धिर्मन्देत्याशयेनाह राजपुत्रीत्याद्येकादशभिः । हे राजपुत्रि लोकपालानामिव विभूतिरैश्वर्यं येषां तैस्तथा महाप्रभावैराढ्यैः रूपादिभिरूर्जितैश्च पूर्वमीप्सिताऽसि ॥ १० ॥ तान्हित्वा नोऽस्मानसमानान्कस्माद्ववृषे वृतवती त्वम् ॥ ११ ॥ प्रायशो राजभ्यो जरासंधादिभ्यो बिभ्यतो भयं प्राप्नुवतः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तां रुक्मिणीम् । अनुरूपं योग्यम् । देवत्वे देवभावे । इयं लक्ष्मीः । पुनः शोभाधिक्यमाह—किञ्चेति । अलकादीनां चतुष्कत्वाच्चतुर्दिक्ष्विति ज्ञेयम् ॥ तामिति–रूपिणीं वैकुंठलोकादौ लक्ष्मीरूपादेरप्यधिकरूपशालिनीमित्यर्थः । प्रशंसायां मत्वर्थीयः । तत्र हेतुः–येति । 'विस्मापनं स्वस्य च–' इत्यादिवचनप्रामाण्येन तेनाप्यधिकसौंदर्यप्रकटनादिति भावः । प्रीत इति भावविशेषं द्योतयति । अत एव नर्मविशेषस्य वक्तव्यत्वात् । स्मयन्स्मयमानः । सर्वप्रकारेण मदनुरूपाया अप्यस्याः स्वस्यानुरूपत्वं युक्त्या प्रदर्श्य परिहसामि, तत इयं किं वदेत्तदहमद्य शृणवानीति भावः अनन्यगतिमपि ताम् आ सम्यग्वाग्भंग्यादिना बभाषे । यतो हरिः नर्मादिना प्रियजनानां धैर्यादिहर इति भावः । यद्वा–आ इति पृथक्पदं खेदे । तां प्रति तादृगुक्तेरयोग्यत्वात् । तच्च वक्ष्यत्येव—अतदर्हामिति ॥ ९ ॥ अधिक्षिपति—सर्वगुणेत्यादिना । न हि राजपुत्रं विना राज्यपुत्र्यन्ययोग्या भवतीति सम्बुद्ध्याशयः ॥ अत्रायं भगवतोऽग्रिमवाक्प्रदृष्ट्या भावोधिगम्यते—एकेनैव द्युतरुकुसुमेनास्यै दत्तेन सत्यभामा तादृशमानकोपरसवर्षिण्यभूद्—यथा मया पादपतनादिभिरप्युपशमयितुमशक्या, दत्तेन तद्वृक्षेणैव प्रसादिता, इयं रुक्मिणी तु तद्वृक्षदानदर्शनेनापि न कोपं व्यंजयामास, तदस्या असंभावितमानायाः परमगंभीरायाः प्रियंवदाया रोषोक्तिमाध्वीकं कथमहं लभेयेति विमृश्य खल्वियमुक्तिरेवास्याः कोपमुत्पादयिष्यतीति निरचैषीद्भगवानिति केचिदाहुः । अन्ये तु—नायकेन प्रेमवृक्षस्योन्मूलने कृते सति प्रेमवती नायिका कीदृशी भवेदिति दिदृक्षैव भगवत आसीदिति तत्वमित्याहुः । प्रिये त्वमात्मनः परमबुद्धिमत्त्वं मन्यसे, वस्तुतस्तु संपूर्णसाद्गुणवत्या अपि स्वार्थानभिज्ञायास्तव बुद्धिरेवैकात्यल्पीयसी भवति, कथमिति चेच्छ्रुयतामित्येकादशभिराह—हे राजपुत्रि इति । त्वं राज्ञः पुत्री, अहं तु वसुदेवस्याकिंचनस्य पुत्रोऽतः कस्मादस्मान् मां ववृषे वृतवत्यसि । सविशेषणस्य बहुत्वमार्षम् । न च गत्यंतराभावात्त्वामहं वृतवत्यस्मीति वाच्यम्, भूपैरीप्सितासि । न च ते भूपा मत्तो विभूतिरूपगुणादिभिर्न्यूना इत्याह—लोकपालविभूतिभिरिति, श्रीमद्भिरिति, न तु रन्तिदेवाद्यैरिव धनसमृद्धिभोगरहितैरित्यर्थः ॥ १० ॥

---

१. रुक्मिणीं–विज । २. निरीक्ष्य–श्रीधर. वंशी. जीव. वीर. विज. विश्व. शुकः । ३. भूयान्–वीर. । ४. न्नववृषे समान्–वीर.; द्देववृषोपमान्–विज. ।

अर्थिनस्त्वदिच्छावतः। स्मरदुर्मदान् युवानः। अस्मान् सर्वथा त्वत्सादृश्यरहितान्। दत्ता वाचा दत्ता॥ न च ते तदानीं दूरे स्थिता इत्याह–प्राप्तानिति। न च बंधूनां तत्रासम्मितिरित्याह–भ्रात्रा पित्रापि वाग्दत्तैवेत्यर्थः। स्वपित्रेत्यत्र स्वशब्देन कन्यायाः पित्रधीनतोक्ता॥ ११॥ न केवलं त्वदसमाः किन्तु नृपांतरसमा अपि नेत्याह–किञ्चेति। प्रायः पदेन न सर्वथेत्यर्थो बोध्यः, 'वज्रं तत्राभ्यषेचयत्' इत्याद्युक्तेः॥ किञ्च–क्षत्रियजातेर्मम भीरुत्वलक्षणं महादोषमपि त्वं नाद्राक्षीरित्याह–राजभ्य इति। न च भीरुत्वेऽपि मम शिष्टत्वमस्तीत्याह–बलवद्भिरिति। प्रायोग्रहणाद्द्वित्रैरेवार्जुनादिभिर्मैत्र्यं न तु बहुभिः। किञ्च–यादवत्वाम्नायतो राजत्वाभावेऽपि कंसवधात्प्राप्तं यद्राजत्वं तदप्युग्रसेनाय दत्त्वा त्यक्तमित्याह–त्यक्तेति॥ १२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तामिति। रूपिणीं वैकुण्ठलोकादौ लक्ष्मीरूपादेरप्यधिकरूपशालिनीमित्यर्थः। प्रशंसायां मत्वर्थीयः तत्र हेतुः येति विस्मापनं स्वस्य चेत्यादिवचनप्रामाण्येन तेनाप्यधिकसौन्दर्य्यप्रकटनादिति भावः। अत्र। (लीलयेति कर्तृ तृतीयान्तं) प्रीत इति भावविशेषं द्योतयति अत एव नर्मविशेषस्य वक्तव्यत्वात् स्मयन् स्मयमानः अनन्यगतिमपि ताम् आ सम्यक् वाग्भङ्ग्यादिना बभाषे यतो हरिः नर्मादिना प्रियजनानान्धैर्य्यादिहर इति भावः। यद्वा आ इति पृथक् पदं खेदे तां प्रति तादृगुक्तेरयोग्यत्वात्तच्च वक्ष्यत्येव अतदर्हामिति॥ ९॥ तत्र स्ववरणे कारणमज्ञातमिव पृच्छन्नाह— राजेति त्रिकेण। हे राजपुत्रीति सर्वगुणरूपादिसम्पत्ति; सूचिता अत एव श्रीहरिवंशप्रोक्ते प्राचीने स्वयम्वरोद्यमे भूपैरीप्सितासि महानुभावैर्महाप्रभावैः श्रीमद्भिराढ्यैः यद्वा श्रीः सम्पत् शोभा च तद्वद्भिः॥ १०॥ प्राप्तान् स्वयमेव गृहागतान् तत्र चार्थिनः त्वां याचमानान् तत्रापि स्मरेण दुर्मदान् अतिमत्तान् अतिपरिहासोऽयं च अपि तत्रापि भ्रात्रा स्वपित्रा च दत्ता चैद्यायेति शेषः। स्वशब्देन कन्यायाः पित्रधीनतोक्ता एवं यथोत्तरं भूपानां त्यागायोग्यता च असमान् आत्मनस्तेषां वासदृशान् न इति बहुत्वम् "अस्मदाद्वेयाश्चे" (१·२-५१) इति वचनात् यद्वा नः मदादीन् यादवान् ववृषे पत्यादिरूपेणाङ्गीचकर्थ परोक्षनिर्देशस्तथैव वृतत्वात् अन्यथाऽहमपि न्यावारयिष्यमिति भावः॥ ११॥ असमत्वे हेतुः, राजभ्य इति। तथाप्यसमर्थस्वदुरन्तकारितेति न्यायेन बलवद्भिस्तैः सह तव हरणादिना कृतोऽनुवर्त्तितो द्वेषो यैस्तान् किञ्च ते भूपाः, वयं तु नेत्याह–त्यक्तेति। प्राय इति (हरिवंशप्रोक्तस्य) स्वस्य राजेन्द्राभिषेकस्य क्षणमात्रस्वीकाराभिप्रायेण उग्रसेनादीनाञ्च तदङ्गीकारो बलादिवेति च हे सुभ्रूः इति तच्छ्रवणात्तस्या भ्रूकौटिल्यदर्शनेन तादृशस्फूर्त्तेः स्तुतिपूर्वकमेवोपालम्भस्य प्रारब्धत्वाच्च एवमुत्तरत्रापि॥ १२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तादृश्यास्तस्याः सन्दर्शनेन जातभावविशेषाच्छ्रीभगवानपि कौतुकेन वाक्क्रीडाविशेषं चकारेत्याह— तामिति। रूपिणीं वैकुण्ठलोकादौ लक्ष्मीरूपादेरप्यभ्यधिकसौन्दर्य्यशालिनीमित्यर्थः। तत्र हेतुः—येति। (भा० ३।२।१२) 'विस्मापनं स्वस्य च' इत्यादिवचनप्रामाण्येन पूर्व्वतस्तेनाप्यधिकसौन्दर्य्यप्रकटनादिति भावः। प्रीत इति भावविशेषं द्योतयति। किंवा नर्म्मविशेषस्य वक्तव्यत्वात् स्मयन् स्मयमानः; अनन्यगतिमपि ताम्, 'आ' सम्यग् वाग्भंग्यादिनावभाषे, यतो हरिर्नर्म्मादिना प्रियजनानां धैर्य्यादिहर इति भावः। यद्वा, 'आ' इति पृथक्पदं खेदे, तां प्रति तादृगुक्तेरयोग्यत्वात्, तच्च वक्ष्यत्येव (२८ श० श्लो०) 'अतदर्शम्' इति॥ ९॥ हे राजपुत्रीति सर्व्वगुणरूपादिसम्पत्तिः सूचिता। अतएव भूपैरीप्सितासि; यद्वा, आत्मतुल्यमेव वरीतुमर्हसीति भावः। श्रीः सम्पत् शोभा वा, तद्वद्भिः॥ १०॥ प्राप्तान् स्वयमेव गृहागतान्, तत्रार्थिनः, त्वां याचमानान्, तत्रापि स्मरेण दुर्म्मदानत्यर्थं मत्तान्, च अपि, तत्रापि भ्रात्रा स्वपित्रापि दत्ता। स्व-शब्देन कन्यायाः पित्रधीनतोक्ता। एवं यथोत्तरं भूपानां त्यागायोग्यानाञ्चासमानयोग्यान् किंवा आत्मनोऽसदृशान्; यद्वा, भूपैः सहासमान्, इत्यात्मनो लोकपालविभूत्यादिराहित्यमुक्तम्। अतस्तत्तद्वैपरीत्यमस्य व्याख्येयम्। 'नः' इति बहुत्वेन श्रीबलदेवादीन् सर्व्वानेव यादवान् संगृह्णाति। न च मन्तव्यम्, यादवानां मद्बन्धूनां मध्ये कोऽपि तादृशोऽस्ति, यत्सम्बन्धादहं वरीतुं योग्योऽस्मीति भावः॥११॥ किञ्च, भयादिदोषादपि वरणयोग्या न भवाम इत्याह—राजभ्य इति। तेभ्यो भयादेव समुद्रमाश्रितान्। कुतस्तेभ्यो भयमित्यपेक्षायामाह—बलवद्भिस्तैः सहेति। तैः कृतो द्वेषो येष्विति वाक्येऽपि स एवार्थः। ननु भवन्तोऽपि बलिनः? तत्राह—त्यक्तेति। राजत्वाभावेन सैन्याद्यभावात्; यद्वा, राजपरिच्छदाभावेनापि किंवा राजपुत्री राजपुत्रस्यैव योग्येति न वरणयोग्या इत्याह—त्यक्तेति। प्राय इति कदाचिन्महाराजपरिच्छदाद्यंगीकारात्। एवमस्य सर्व्वैरप्यन्वयः। सुभ्रू! हे सुन्दरीति सौन्दर्य्यमेव तवास्ति, न तु कोऽपि विचार इति भावः। एवमग्रेऽन्यत्रापि॥ १२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तामिति। तां रुक्मिणीं निरीक्ष्य प्रीतो हरिः स्मयन् ईषद्धसन् आबभाषे उवाचेति सम्बन्धः। कथम्भूताम्? रूपिणीं मनुष्यरूपधारिणीं श्रियं महालक्ष्मीं न विद्यतेऽन्यः पतिः प्रत्यवतारं यस्यास्ताम् अनन्यगतिमिति पाठान्तरं तदा न विद्यतेऽन्या

गतिः प्राप्तिर्यस्यास्ताम् अनन्यप्राप्यामित्यर्थः। धृततनोः उपात्तमनुष्यरूपस्य हरेर्या अनुरूपा ताम् अलकैः कुण्डलाभ्यां निष्केण पदकाख्यभूषणेनालङ्कृतेन कण्ठेन चतुर्दिक्षु शोभिते वक्त्रे उल्लसन्ती स्मितमेव सुधा यस्यास्तां यद्वा अलककुण्डलनिष्काणि यथास्थानं कण्ठवक्त्रयोर्यस्यास्ताम् अनेनानपायिनोः श्रीश्रियःपत्योर्वक्ष्यमाणो विवादः केवलं नृलोकविडम्बनायेति सूच्यते ॥ ९ ॥ भाषणमेवाह—राजपुत्रीत्यादिभिरेकादशभिः। तात्पर्यतस्तामुपचरन्तीमभिनन्दयन्नेव शाब्दबृत्त्या कोपयन्निव कूटवचांसि प्रयुङ्क्ते हे राजपुत्रि ! लोकपालानामिव विभूतिरैश्वर्य्यं येषां महान् प्रभावो येषां भोग्यादिसमृद्धिमद्भिर्लोकपालविभूतिभिरित्यस्यैव प्रपञ्चः श्रीमद्भिरपि रूपादिभिरुच्छ्रितैरुत्कृष्टैर्भूपैस्त्वमीप्सिता रूपं सौन्दर्यमौदार्य्यं वदान्यत्वं बलं शत्रुपरिभवसामर्थ्यम् इत्थं सर्वं वस्तुगत्या आत्मनिष्ठमित्यभिप्रेतं शब्दतस्त्वपरित्याज्यत्वे तात्पर्य्यम् ॥१०॥ तानिति। तानेवम्बिधानर्थिनो याचमानान् स्मरेण कामेन दुष्टो मदो येषां तान् चैद्यादीन् त्वं पित्रा भ्रात्रा च दत्ता सती समाननुरूपान् कस्माद्धेतोर्न ववृषे न वृत्तवत्यसि नो ववृषे इति पाठे अर्थिनो हित्वेति पाठ्यं तान् हित्वा नोऽस्मान् कस्माद्धेतोर्वृतवत्यसीत्यर्थः। अतस्त्वं मन्देति भावः। तत्र हेतुं वदन्नात्मानं विशिनष्टि असमानिति। अननुरूपानित्यर्थः। बहुवचनं कोपापादनार्थं अस्मासु त्वदनुरूपः कोऽधुना वा वरणीयोस्तीति "न तत्समश्चाभ्यधिकश्च दृश्यते" इति श्रुत्युक्तविधया सर्वोत्तमं मां कस्माद्धेतोर्वृतवत्यसि तं हेतुम् आवयोः लक्ष्मीनारायणयोरनपायित्वरूपं त्वं जानास्येवेति हार्द्रो भावः ॥ ११ ॥ असमत्वमेव प्रपञ्चयितुं विशिनष्टि-राजभ्य इति। हे सुभ्रू ! राजभ्यो जरासन्धादिभ्यो बिभ्यतः भीतानत एव समुद्रं शरणं गृहं प्राप्तान् समुद्रान्तर्द्वीपमानसस्थानत्वेनाश्रितानित्यर्थः। हार्द्रभावपक्षे तु अबिभ्यत इति छेदः ममाभीतत्वं त्वदानयनकाले किं त्वया न दृष्टमिति भावः। समुद्रं शरणं गतानित्यस्यायं भावः त्वत्पितृक्षीरसागरगतसमुद्रत्वधर्मयोगित्वमात्रप्रयुक्ते प्रेमातिशयेन लवणार्णवान्तर्द्वीपमाश्रितानां किं पुनः साक्षात्त्वत्पितरि दुग्धार्णवे साक्षाच्छ्वशुरेऽस्माकं प्रीतिः किन्तराम् साक्षात्त्वयीति। बलवद्भिरिति बलशालिभिर्जरासन्धादिभिः सह कृत उत्पादितो द्वेषो यैस्तानिति शाब्दोर्थः। पक्षान्तरे तु बलवद्भिरिति निन्दायां मतुप् "भूमनिन्दाप्रशंसासु" इत्यनुशासनात् बलं धारणसामर्थ्यं तथा च बलवद्भिः निन्दितबलैः इन्द्रियाण्यात्मवश्यतया धर्त्तुमसमर्थैरजितेन्द्रियैरिति यावत् कृत; द्वेषो येषु तान् अजितेन्द्रियाणामेकमातृप्रसूतानामपि त्वद्भ्रातॄणां मयि द्वेषस्तव तु जितेन्द्रियाया अत एव मद्याथात्म्याभिज्ञायास्त्वयि ममेव मयि प्रीतिरभ्यधिकैवेति प्रकृतोपचारप्रशंसायां तात्पर्य्यं प्रायः प्रायशः त्यक्तं नृपासनं यैस्तान् शापवशात् सिंहासनानर्हवंशप्रभवत्वादिति भावः। पक्षान्तरे तूभयविभूतिनायकस्य परमेष्ठिनो मम केवलप्राकृतजनाधिष्ठेयनृपासनस्यायोग्यत्वादिति भावः। मम भर्त्ता नारायणश्चेदयमस्पृष्टशापदोषो नृपासनमधितिष्ठेदेवेत्यनारायणत्वसम्भावनानिरासायेदमुक्तं नृपासनपरित्यागस्याभिनयमात्रत्वाच्चेत्यपि तात्पर्य्यम् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हरिः नीलनीरदकान्तिः श्रीकृष्णः या लीलया धृततनोर्भगवतः अनुरूपरूपा अनुकूलसौन्दर्या अनुगुणवृत्ता वा तां रुक्मिणीं आबभाष इत्यन्वयः निष्कङ्ग्रैवेयकं अलककुण्डलाभ्यां निष्कालङ्कृतकण्ठेन च युक्तवक्त्रे उल्लसत् स्मितमेव सुधा यस्याः सा तथा ताम् ॥ ९ ॥ ईप्सिता प्रार्थिता श्रीमद्भिः श्रीकटाक्षविषयैर्हेराजपुत्रि ॥ १० ॥ वरणे गुणानाह—प्राप्तानिति। वाचा दत्ता देववृषोपमान् देव श्रेष्ठसमानान् ॥ ११ ॥ स्ववरणाङ्गीकारे दोषानाह—राजभ्य इति। अर्थीत्यादिगुणोपेतान् नृपान्हित्वा राजभ्य इत्यादिदोषयुक्तानस्मान् कस्मात्प्राप्तेत्यन्वयः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तां रूपिणीमित्यादि। रूपिणीं रूपवतीं श्रियम्, अस्मिन्नेव शरीरे श्रीरूपवती बभूवेत्यर्थः। एवम्भूतां तां निरीक्ष्य हरिराबभाषे इत्यन्वयः। तां कामित्याह—या लीलया लीलादेव्या धृतालिङ्गिता तनुर्यस्य तथाभूतस्य हरेरनुरूपरूपया अनुरूपं यस्याः। अथवा, या अनुरूपरूपा अर्थात् हरेरेव, तनोः श्रियं कान्ति लीलया सह, रूपिणोऽधृततनुकान्तिस्तनुलीलारूपवती यस्या इत्यर्थः। तां हरिरावभाष इत्यन्वयः। श्रियं कीदृशीम् ? अनन्यगतिम्, न विद्यतेऽन्यत्र गतिर्यस्याः। तत्रैव सर्वतोभावेन वर्त्तमानामित्यर्थः। स्मयन्निति सोपहासम्, प्रीत इति सौन्दर्यदर्शनेन ॥ ९ ॥ राजपुत्रीत्यादि। राजपुत्रीति सोत्प्रासपरम् ॥११-१६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

तां रूपिणीं श्रियमित्यादि। रूपवतीं श्रियमस्मिन्नेव शरीरे श्रीरूपवतीं बभूवेत्यर्थः, अथवा तां निरीक्ष्य तां कामित्यपेक्षायामाह—या तनोः श्रियं कान्तं रूपवतीं लीलया सह अधृत घृतवतीतामित्यर्थः श्रियं कीदृशीम् ? अनन्यगतिम्—न विद्यते अन्या गतिर्यस्याः, अतोऽनुरूपं रूपं यस्याः स्मयन्निति सोपहासम् प्रीत इति सौदर्य दर्शनेन ॥ ९ ॥ राजपुत्रीति सोत्प्रासपरम् ॥ ११-१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तां निरीक्षय हरिराबभाषे इत्यन्वय; रूपिणीं श्रियं वैकुण्ठस्थायाः श्रियः सकाशादपि बहुसौन्दर्य्यवतीं भूम्नि मत्वर्थीयः तत्र हेतुः येति—

"देवत्वे देवरूपा सा मानुषत्वे च मानुषी। विष्णोर्देहानुरूपां वै कारोत्येषात्मनस्तनुम् ॥"

इतिपराशरोक्तेः वैकुण्ठनाथादप्यधिकसौन्दर्य्यवतः कृष्णस्य कान्ता सापि तत्रत्यश्रियोप्यधिकसौन्दर्य्यवतीत्यर्थः। स्मयन् स्मयमान इति सर्वप्रकारेण मदनुरूपाया अप्यस्या; स्वस्या अननुरूपत्वं युक्त्या प्रदर्श्य परिहसामि तत इयं किं वदेत्तदहमद्य श्रृण्वानीतिभावः। अलकैः कुण्डलाभ्यां निष्कालङ्कृतकण्ठेन च चतुर्दिक्षु शोभिते वक्त्रे उल्लसन्ती स्मितसुधा यस्यास्ताम् ॥ ९॥ अत्रायं भगवतोग्रिमवाक्यदृष्ट्या भावोऽधिगम्यते, एकेनैव द्युतरुकुसुमेनास्यै दत्तेन सत्यभामा तादृशमानकोपोक्तिरसवर्षिण्यभूत् यथा मया पादपतनादिभिरप्युपशमयितुमशक्या दत्तेन तद्वृक्षेणैव प्रसादिता इयं रुक्मिणी तु तद्वृक्षदानदर्शनेनापि न कोपं व्यञ्जयामास तदस्या असम्भावितमानायाः परमगम्भीरायाः प्रियम्वदायाः रोषोक्तिमाध्वीकं कथमहं लभेयेति विमृश्य खल्वेव मुक्तिरेवास्याः कोपमुत्पादयिष्यतीति निरचैषीत् भगवानिति केचिदाहुरन्ये तु नायकेन प्रेमवृक्षस्योन्मूलने कृते सति प्रेमवती नायिका कीदृशी भवेदिति दिदृक्षैव भगवत आसीदिति तत्त्वमित्याहुः ततश्च प्रिये त्वमात्मनः; परमबुद्धिमत्त्वं मन्यसे वस्तुतस्तु सम्पूर्णसर्वसाद्गुण्यवत्या अपि स्वार्थानभिज्ञायास्तव बुद्धिरेवैकात्यल्पीयसी भवति कथमिति चेत् श्रूयतामित्याहैकादशभिः। हे राजपुत्रि! त्वं राज्ञः पुत्री अहन्तु वसुदेवस्याकिञ्चनस्य पुत्रोऽतः कस्मादस्मान्नो ववृषे वृतवत्यसि सविशेषणस्य बहुत्वमार्षं नच गत्यन्तराभावात्त्वामहं वृतवत्यस्मीति वाच्यं भूपैरीप्सितापि नच ते भूपा मत्तो विभूतिरूपगुणादिभिर्न्यूना इत्याह—लोकपालेत्यादि। श्रीमद्भिरिति नतु रन्तिदेवाद्यैरिव धनसमृद्धिभोगसमृद्धिरहितैरित्यर्थः। न च ते तदानीं दूरे स्थिता इत्याह, प्राप्तानिति। न च बन्धूनां तत्रासम्मतिरित्याह भ्रात्रा पित्रापि दत्ता वाग्दत्तैवेत्यर्थः। किञ्च क्षत्रियजातेर्मम भीरुत्वलक्षणम् महादोषमपि त्वं नाद्राक्षीरित्याह राजभ्य इति नच भीतत्वेषि मम शिष्टत्वमस्तीत्याह बलवद्भिरिति प्राय ग्रहणात् द्वित्रैरेवार्जुनादिभिर्मैत्र्यं नतु बहुभिः किञ्च यादवत्वात् न्यायतो राजत्वाभावेपि कंसवधात् यत् प्राप्तं राजत्वं तदपि उग्रसेनाय दत्वा त्यक्तमित्याह त्यक्तेति ॥ १०-१२ ॥

गूढार्थदीपिनी

तां निरीक्ष्य प्रीतो हरिः स्मयन् सन् तामाबभाषे इत्यन्वयः। या धृतनरतनोर्भगवतः अनुरूपरूपा। कीदृशीम्। अलकैः कुण्डलाभ्यां निष्कालङ्कृतकण्ठेन च युक्ते वक्त्रे उल्लसन्ती स्मितरूपा सुधा यस्याः ताम्। निष्कं ग्रैवेयकम् ॥ ९ ॥ हे राजपुत्रि त्वं भूपैरीप्सितासि। ऊर्जितैः सम्पन्नैः ॥ १० ॥ तानिति युग्मम्। चैद्यः शिशुपालः। दुर्मदान् उन्मत्तान्। दत्ता वाचा दत्ता। हे सुभ्रूः। उग्रसेनादीनां तदङ्गीकारात्प्राय इत्युक्तम्। ववृषे वृतवती ॥ ११-१२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रूपिणीं अप्राकृतरूपवतीं स्वासाधारणविग्रहयुक्तं श्रियं महालक्ष्मीम् अनन्यगतिं नास्ति कृष्णादन्या गतिर्गन्तव्या देवता यस्याः सा ताम् लीलया आविष्कृताप्राकृतमूर्त्तेर्भगवतः अनुरूपं रूपं यस्यास्ताम् अयमर्थः यदा लीलार्थं भगवान् अप्राकृतं नित्यं स्वां तनूं देवमनुष्याद्याकारेणाविष्करोति तदा भगवत्यपि नित्यामप्राकृतां स्वां तनूं भगवदनुरूपाभिः करोतीति तथोक्तं वैष्णवे—

देवत्वे देवदेहेयं मानुषत्वे च मानुषी। विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनूम् ॥
राघवत्वे भवेत्सीता रुक्मिणी कृष्णजन्मनि। अन्येष्वप्यवतारेषु विष्णोरेवानपायनी ॥ इति ॥

अलकैः कुण्डलाभ्यां निष्कयुक्तकण्ठेन च चतुर्दिक्षु शोभिते वक्त्रे उल्लसन्ती स्मितरूपा सुधा यस्यास्तां निरीक्ष्य स्मयन् ईषद्धसन् हरिराबभाषे इत्यन्वय ॥ ९ ॥ हे राजपुत्रि! लोकपालानामिव विभूतिरैश्वर्यं येषां तैस्तथा महानुभावत्वादिगुणयुक्तैः ईक्षिता भ्रात्रा पित्रा च दत्ता दातुं प्रवर्त्तितताँश्च अर्थिनः प्राप्तानपि हित्वा नः अस्मान् कस्मात् मां वृतवती त्वमिति त्रयाणामन्वयः ॥ १०—१२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

श्रियां रमात्मिकामनयः स्वयं गतिर्यस्याः सा ताम्। प्रधानयाचकस्त्वेकश्चानन्यः केवलः स्वयमिति तृतीयतात्पर्योक्तेः। स्वेतरगतिशून्यं वा। लीलाया धृता तनुः स्वस्य तस्या अनुरूपं रूपं स्वभावचेष्टादि यस्याः सा। यां यां परेश उरुधैव करोति लीलां तां तां करोत्यनु तथैव रमाऽपि देवीत्युक्तेः। पाराशरोऽपि। देवत्वे देवदेहेऽयं मनुष्यत्वे च मानुषी। विष्णोर्देहानुरूपां

वै करोत्येषात्मनस्तनुमिति । या तां प्रीतः स्मयं रहस्यप्रौढिं दर्शयन् । अलकाश्च कुण्डले च तैस्ताभ्यां सहितं निष्कयुक्तः कण्ठश्च तत्सहितं च तद्वक्त्रं च तत्रोल्लसत्स्मितमेव सुधा यस्याः सा तां निरीक्ष्याबभाषे ॥ १३ ॥ लोकपालविभूतिभिर्लोकपालानां नाकपालादीनां विभूतयो येषां तैः । महानुभावः । अनुभावः प्रभावे स्यादिति विश्वः । प्रभावो येषां तैः श्रीमद्भिः सम्पद्वद्भी रूपौदार्यबलोर्जितै रूपं चौदार्यं च बलं च तैरूर्जितैरुत्कृष्टैर्भूपैः । हे राजपुत्रि त्वमीप्सिता ॥ १४ ॥ तान्प्राप्तान्स्वतोऽर्थिनस्त्वदपेक्षावतः स्मर दुर्मदान् । स्वपित्रा भीष्मकेण भ्राता रुक्मिणा च दत्ता च । देववृषोपमान्देवश्रेष्ठसदृशांश्चैद्यादींस्तदाद्यान्हित्वा । ईप्सितेत्यनेनैव तेषामर्थिताऽर्थात्सिद्धा पुनः प्राप्तानर्थिन इतिवद्यन्नुत्तरत्र सर्वस्य स्वोक्तस्य प्रायो मुख्यमर्थमभिदधत्या रुक्मिण्या प्राप्ताश्च तेऽनर्थिनोऽनर्थवत इति विवरीतुं विवरं विततारेति मन्तव्यम् ॥ १५ ॥ यूयं कीदृशा इत्यतो सङ्ग्राह्यगुणका इति तान्गुणानस्यां स्वत्वेनाह । हे सुभ्रूः राजभ्यो बिभ्यतोऽत एव समुद्रं शरणं गतान् बलवद्भिर्जरासुतादिभिः कृतद्वेषान् । प्रायस्त्यक्तनुपासनं यदुंशापतो यैस्तान् कस्माद्वृतवती ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं रसार्थं देशकालादीनामानुगुण्येऽपि भगवति स रसो नोत्पन्नः । न हि भगवान् रसानुभवार्थं समागतः, किन्तु धर्मरक्षार्थं निरोधार्थं च । तदत्र रसानुभवे क्रियमाणे बाधितं भविष्यतीति तद्दोषानराकरणार्थं किञ्चिदुक्तवानित्याह **तां रूपिणी**मिति । भगवतो लक्ष्मीर्नियता अपरिहार्या च । तादृशीमपि न मन्यत इति वक्तुं तां वर्णयति । **तां** गुणतः प्रसिद्धाम् । **रूपिणीं श्रिय**मिति स्वरूपत उत्कृष्टाम् । **अनन्यगति**मिति भक्ताम् । **अनेन भगवद्योग्यता** निरूपिता । तस्या गुणत्रयमपि ज्ञात्वा तथोक्तवानिति वक्तुमाह **दृष्ट्वे**ति । आकृतिरसमाना भविष्यतीति तन्निराकरोति । या लीलया **धृततनोरनुरूपं** रूपं यस्याः सा । तस्या गुणादिभिः प्रीतः, अन्यथा गुणानां कार्यासाधकत्वेन अगुणत्वमेव स्यात् । अतस्तैर्गुणैः प्रीतोऽपि भगवान् स्मयन् जातः । नह्येतादृशगुणवत्त्वे गर्व उचित इति, गर्व एवोपक्षीणा गुणा इति वा । अत एव प्रीतोऽपि स्मयन् जातः । यदा भगवान् सम्मुखः हास्यवदनोऽपि जातः, तदा रुक्मिणी सुमुखं ज्ञात्वा स्वयमपि तथा जातेत्याह **अलककुण्डलनिष्ककण्ठवक्त्रोल्लसत्स्मितसुधा**मिति । शरीरमिव मुखं सर्वतो वर्णयति । उपर्यलकाः, उभयतः कुण्डले, अधः पदकयुक्तः कण्ठः त्रिवल्यात्मकः स्वरूपतोऽपि सुन्दरः, अन्यथा कण्ठपदं व्यर्थं स्यात् । एवं त्रिभिः कृत्वा सुन्दरं यद्वक्त्रं तत्र उल्लसत् स्मितमत्यन्तं प्रफुल्लरसमिव स्मितमेव सुधा । महादेवेन दग्धमपि कामं जीवयतीति । तादृशीमाबभाषे । **तत्र** हेतुर्**हरि**रिति । स हि तस्या अपि दोषं दूरीकर्तुं यतते ॥ ९ ॥ भगवद्वाक्यान्याह **राजपुत्री**त्येकादशभिः । सप्तभिः स्वोत्कर्षः विपरीततया स्वस्य धर्माणां च निरूपितः । येन भगवान् सिध्यति तन्निराकृत्य । चतुर्विधपुरुषार्थसिद्ध्यर्थं विपरीततया श्लोकचतुष्टयमाह । तत्र प्रथमं तस्याः कृतमनभिनन्दन् श्रियं कीर्तिं च विपरीततया निरूपयति । तत्रापि प्रथमं श्रियम् । **राजपुत्री**ति सम्बोधनं जातिकुलोत्कर्षसूचकम् । **भूपैरीप्सिते**ति सौन्दर्यम् । **लोकपालविभूति**भिरिति माहात्म्यम् । गुणाश्च । तेषामुत्कर्षं तदपेक्षयाप्यस्या उत्कर्षं वक्तुमाह **महानुभावै**रित्यादिपदत्रयेण । उत्कर्षो द्विविधः, बाह्य आभ्यन्तरश्च । बाह्यो द्विविधः, अलौकिको लौकिकश्च । तद्द्वयमाह । महाननुभावो येषाम् । श्रीयुक्ताश्चेति । आन्तरमाह रूपेति । **रूपं** शरीरसौन्दर्यम् । **औदार्य**मपेक्षितो गुणः सर्वदोषनिवारकश्च । बलं क्षत्रियाणामपेक्षितम् । तैरूर्जिताः अतिपुष्टाः । एवमेकेन सा स्तुता ॥ १० ॥ अगत्या तथा कृतमिति पक्षं वारयति **तान् प्राप्ता**निति । बहूनां निर्देशो विचार्य ग्रहणाय । सर्वेषामर्थित्वात् । त्वदर्थित्वमेवापेक्षितमिति भावः । **प्राप्ता**निति शरीरेण सम्बद्धान् । एवं बहिरन्तःसम्बद्धान् परित्यज्य । तत्रापि तव समानत्वमप्यन्तर्बहिश्च । कामादिना शरीरेण च सम्बद्धाः । विवाहश्च समयोरेवेत्यग्रे वक्ष्यते । न च तेषामप्रसिद्धिरित्याह **चैद्यादी**निति । जनपदशब्दत्वादतिप्रसिद्धिः । **स्मरदुर्मदा**निति । देशकालाद्यपेक्षामपि परित्यज्य स्त्रीहितं कुर्वन्तीत्यर्थः । तद्विवाहे लोकशास्त्रविरोधाभावमाह **दत्ता भ्रात्रा स्वपित्रे**ति । वाग्दत्ता । मुख्यतो भ्रात्रैव दत्तेति प्रथमं तन्निर्देशः । **स्वपित्रे**ति । तस्यैव सा कन्येति न स्वातन्त्र्यं स्वतो दाने । ऐहिकार्थं तु विवाहः । तदैहिकं तेष्वेव युक्त्या शास्त्रेण लोकेन च सिद्धमिति तत्परित्यज्य कस्मादेव हेतोः नोऽस्मान् **ववृषे** वृतवती । अविशेषादिति चेत् । तत्राह **अस्मा**निति । बहुवचनं सम्बन्धिकुलाभिप्रायम्, यथा राजानः त्वत्समाः, तथा नाहम्, नाप्यहं राजसमः, नाप्यस्मदीयाः । तेन लौकिकार्थं वरणपक्षे लौकिकोत्कर्षाभावात् आसक्त्यभावेन सुखाभावाच्च अलौकिकस्य प्रकृतेऽसम्भवात् कस्माद्ववृषे । हेतुश्चेदस्ति, वक्तव्य इति भावः ॥ ११ ॥ नन्वीक्षैव हेतुः, सर्वोऽपि स्वेष्टमेव वृणुते, अतो वस्तुविचारो व्यर्थ इत्याशङ्क्य वस्तुनि दोषानाह **राजभ्य** इति ।

रूपतः फलतश्चैव सम्मत्या युक्तिभिस्तथा । चतुर्भिर्दूषणं प्राह चतुर्विधमिहाच्युतः ॥ १ ॥

तत्र प्रथमं स्वरूपदोषमाह । राजानो जरासन्धादयः, तेभ्यो बिभ्यत इति । न हि भयानकरसेनाविष्टानां सुखजनकत्वमस्ति । किञ्च । **समुद्रं शरणं गता**निति । नह्यन्यं शरणं गतस्य स्वातन्त्र्यमस्ति । नह्यस्वतन्त्रस्य सुखसाधकत्वम् । सर्वान् यादवानालक्ष्य बहुवचनम् । कपटमानुषलीलेव यादवलीलाप्याश्रितेति तैः समानधर्मवचनं लीलायां युक्तमेव । लौकिकदृष्ट्यैव स्वीकृत इति तदुपयोगिप्रकारेण पदार्थनिरूपणेनापि शास्त्रीयो दोषः । तृतीयं दूषणं **बलवद्भिः कृतद्वेषा**निति । द्वेषमात्रस्य

करणमयुक्तम् । फलपर्यवसाने तु न दूषणम् । बलवत्पदात्फलपर्यवसानाभावोऽपि सूच्यते । बहुभिश्च सह कलहः न युक्तः । सर्वतः शङ्काया विद्यमानत्वान्न स्वास्थ्यं लोकप्रतीत्या निरूपयति । सर्वबलवद्विरोधे फलमपि जातं सूचयति **प्रायस्त्यक्तनृपासना**निति । ययातिशापात्त्यक्तं नृपासनं यैः यादवैः । अर्जुनादिव्युदासार्थं **प्राय** इति । अतो राजकन्यया राजैव विवाह्यो मुख्यः । अथवा राजमित्रम्, राजतुल्यो भवतीति । अथवा । स्वदेशस्थितः खण्डमण्डलाधिपतिर्वा । अथवा । निकृष्टपक्षे निर्भयः । नतु चतुर्विधदोषयुक्तः कश्चिदपि विवाह्यो भवति ॥ १२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

राजभ्यो बिभ्यत इत्यत्र । **फलपर्यवसाने** त्विति । द्वेषफलं तेषां मारणं कर्तुं शक्येत चेद्द्वेषे न दूषणम् । परं तदेव न शक्यमित्याहुः **बलवत्पदा**दिति ।

श्रीसुबोधिनी–सारः

या लीलया धृता तनूर्मूर्त्तिर्येन तस्य स्वस्यानुरूपं योग्यं रूपं यस्याः तदुक्तं पराशरेण "देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ॥ विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम्" इति तां रूपिणीं मूर्त्तिमतीं श्रियं लक्ष्मीमनन्यगतिं स्वात्मनिष्ठाम् अलकैः केशैः कुंडलाभ्यां निष्केण पदकेन युक्तेन कंठेन शोभिते वक्त्रे मुखे उल्लसंती स्मितसुधा यस्यास्तां निरीक्ष्य दृष्ट्वा हरिरुवाच । प्रीतः स्मयन्सन् ॥ ९ ॥ हे राजपुत्रि महाननुभावो येषां लोकपालानामिद्रादीनामिव विभूतिरैश्वर्यं येषां तैः रूपौदार्यबलैरूर्जितैः समृद्धैः श्रीमद्भिर्भूपैस्त्वमीप्सिता वांछितासि ॥ १० ॥ स्मरेण स्मर एव वा दुर्मदो येषां तान् चैद्यादीन् शिशुपालप्रभृतीन् अर्थिनो याचकान् प्राप्तान् परिणेतुं हित्वा त्यक्त्वा स्वभ्रात्रा रुक्मिणा स्वपित्रा भीष्मकेण दत्ता वाचाऽसमान् विसदृशान् नोस्मान्कस्माद्धेतोः ववृषे वृतवती ॥ ११ ॥ अतुल्यतां व्यनक्ति । हे सुभ्रूः राजभ्यो जरासंधादिभ्यो बिभ्यतः त्रस्यतः समुद्रस्य शरणं प्राप्तान् बलवद्भिः कृतो द्वेषो वैरं यैः प्रायो बाहुल्येन त्यक्तं नृपासनं राजसिंहासनं यैस्तान् ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तां रुक्मिणीं निरीक्ष्य प्रीतो हरिः स्मयन् ईषद्धसन् आबभाषे इत्यन्वयः । तत्प्रीतिहेतुत्वेन तत्स्वरूपमनुवर्णयति—या लीलया निमित्तभूतया धृततनोः स्वीकृतमनुष्यरूपस्य भगवतोऽनुरूपं योग्यं रूपं मूर्तिर्यस्याः सा तां रूपिणीं मनुष्यरूपधारिणीं श्रियं लक्ष्मीम् । पराशरेणापि एतत्स्पष्टमुक्तम्—"देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ॥ विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुम्" इति ॥ एवं रूपानुधारणे हेतुमाह—अनन्यगतिमिति । न विद्यते अन्या गतिराश्रयो यस्यास्ताम्, कदापि विश्लेषरहितामित्यर्थः । तात्कालीनं तच्छोभातिशयमाह—अलकैः कुण्डलाभ्यां निष्काख्यभूषणालङ्कृतेन कण्ठेन च शोभिते वक्त्रे उल्लसन्ती स्मितरूपा वसुधा यस्यास्तामिति ॥ ९ ॥ तद्भाषणमेव दर्शयति—राजपुत्रीति । 'राजपुत्रि' इति संबोधनेन 'तव चातुर्थमेव युक्तम्, नैव बुद्धिमान्द्यम्' इति सूचयति । लोकपालानामिन्द्रादीनामिव विभूतिरैश्वर्यं येषां तैः महानुभावैः श्रीमद्भिर्धनाढ्यैः तथा रूपं सौन्दर्यम्, औदार्यं मुक्तहस्तता, बलं शत्रुपरिभवसामर्थ्यम्, तैरूर्जितैरुत्कृष्टैर्भूपैर्वरणयोग्यैस्त्वमीप्सिता अभीष्टा ॥ १० ॥ अतो भ्रात्रा स्वपित्रा च तेभ्यो दत्ता अत अर्थिनो याचमानान् प्राप्तांस्तांश्चैद्यादीन् हित्वा असमान् त्वदननुरूपान्नोऽस्मान् कस्माद्धेतोर्ववृषे वृतवतीति द्वयोरन्वयः । 'कामान्धा हि युक्तायुक्तविचारमकृत्वैव स्त्रीप्रियं कुर्वन्ति, ते हि ताभिर्वरणयोग्याः, तादृशश्च ते' इत्याह—स्मरेण कामेन दुष्टो मदो येषां तानिति । उभयत्र बहुवचनं संबन्ध्यभिप्रायेण तत्संबन्धिनोऽपि तादृशाः, अस्मत्संबन्धिनोऽपि न तादृश इति भावः ॥ ११ ॥ असमत्वमेव प्रपञ्चयन्नात्मनो विशिनष्टि—राज्यभ्य इति । 'तव चास्मत्सङ्गतौ न निर्वाहः, सुकुमारीत्वात्' इत्याशयेन संबोधयति—सुभ्रिति । समुद्रं शरणं गतान् समुद्रान्तर्द्वीपमावासस्थानत्वेनाश्रितानित्यर्थः । अन्याश्रितानां स्वातन्त्र्याभावात् नान्यसुखसाधकत्वं संभवतीत्याशयः । समुद्रशरणगमने हेतुमाह—राजानो जरासन्धादयस्तेभ्यो बिभ्यतो भीतानित्यर्थः । न हि भयानकरसाविष्टानां परसुखसाधकत्वं संभवतीति भावः । भीतत्वे हेतुमाह—बलवद्भिः सह कृतो द्वेषो यैस्तानिति । 'तर्हि राज्यसंपत्त्यर्थं यत्नो विधेयः, तत्संपत्त्या द्विषिविजयेन भयनिवृत्तिः स्यात्' इत्याशङ्क्याह—प्रायस्त्यक्तनृपासनानिति । सहस्रबाह्वादयो राज्यमपि कृतवन्तः, तदभिप्रायेण प्रायग्रहणम् । ययातिना कुलवृद्धेन निराकृतत्वादस्माकं राज्यसंपत्त्याशैव नास्तीत्यर्थः ॥ १२ ॥

अन्वितार्थप्रकाशिका

तामिति ॥ या लीलया निमित्तभूतया धृततनोः स्वीकृतमनुष्यरूपस्य भगवतोऽनुरूपं योग्यं रूपं मूर्तिर्यस्याः सा तां रूपिणीं मनुष्यरूपधारिणीं श्रियं लक्ष्मीम् अनन्यगतिम् इति न विद्यते अन्या गतिराश्रयो यस्यास्तां कदापि विश्लेषरहिताम् अलकैः कुण्डलाभ्यां निष्केण पदकाख्यभूषणेनालङ्कृतेन कण्ठेन च चतसृषु दिक्षु शोभिते वक्त्रे उल्लसन्ती स्मितरूपा सुधा

यस्यास्तां रुक्मिणीं निरीक्ष्य प्रीतः हरिः स्मयन् शता आर्षः। आबभाषे जगाद। आः इति खेदे। तादृग्वक्तुमयोग्यामपि बभाषे इति तोषिणी ॥ ९ ॥ अत्र प्रियायाः प्रणये कोपोक्तिश्रवणेनापि कान्तस्यानन्दो भवतीति प्रसिद्धम्। अत्र अस्यै रुक्मिण्यै दत्तेनैकमात्रद्युतरुपुष्पेण सत्यभामाकोपोक्तिः रसवर्षिण्यभूत्। इयं तु सत्यभामायै द्युतरुदानदर्शनेनापि कोपं न चक्रे। तदस्या अतिसौम्यशीलायाः कोपोक्तिमाधुर्यं कथं लभेयेति वक्ष्यमाणोक्तिरेवास्याः कोपाय भविष्यतीत्याशयेन भगवानेवमाहेत्याहुः। गर्वापनोदस्तु न मुख्यः। अन्ये तु प्रेमवृक्षस्योन्मूलने कृते प्रेमवती नायिका कीदृशी स्यादिति दिदृक्षयैव भगवानेवमाहेत्याहुः। तत्र सर्वगुणयुक्ताया अपि ते बुद्धिर्मन्देत्याह—राजेति ॥ हे राजपुत्रि! लोकपालानाम् इन्द्रादीनामिव विभूतिरैश्वर्यं येषां तैः महानुभावैः श्रीमद्भिर्धनाढ्यैः तथा रूपं सौन्दर्यम् औदार्यं मुक्तहस्तता बलं शत्रुपरिभवसामर्थ्यं तैरूर्जिष्टैरुत्कृष्टैर्भूपैर्वरणयोग्यैस्त्वमीप्सिता अभीष्टा अभूः ॥ १० ॥ तानिति युग्मम् ॥ हे सुभ्रूः! भ्रात्रा स्वपित्रा च तेभ्यो दत्ता अतः अर्थिनो याचमानान् प्राप्तान् नतु दूरे स्थितान् स्मरेण कामेन दुर्मदान् तान् चैद्यादीन् त्यागायोग्यानपि हित्वा असमान् त्वं राज्ञः पुत्री अहं निर्धनस्य वसुदेवस्य पुत्र इत्यादिना अननुरूपान् राजभ्यः जरासन्धादिभ्यो बिभ्यतः भयं प्राप्नुवतः अतः समुद्रं शरणं गतान् न बलवद्भिरित्यादि स्पष्टम्। अस्मान् कस्मात्त्वं ववृषे वृतवती। सविशेषणस्य बहुत्वमार्षम् ॥ ११-१२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

रूपिणीं स्वरूपसौन्दर्यवतीं ॥ अलकैः कुंडलाभ्यां च निष्ककंठेन पदकालं कृतकंठेन च चतुर्दिक्षु शोभिते वक्त्रे उल्लसंतीहास्यसुधा यस्यास्तां तां रुक्मिणीं निरीक्ष्य हरिराबभाषे कुतः यतो या वैदर्भी लीलया धृततनोर्हरेः अनुरूपं योग्यं रूपं यस्याः सास्ति ॥ ९ ॥ तत्र स्वपाणिग्रहणे रुक्मिण्या अल्पबुद्धित्वमस्तीति दर्शयन्नाह राजपुत्रीत्याद्येकादश श्लोकैः ॥ हे राजपुत्रि लोकपालानामिंद्रादीनामिव विभूतिर्येषां तैः रूपादिभिरूर्जितैः श्रेष्ठभूपैः शिशुपालादिभिः पूर्वमीक्षितासि ॥ १० ॥ तान् हित्वा असमान् तवातुल्यान् नोऽस्मान् कस्माद्ववृषे उपयेमे ॥ ११ ॥ राजभ्यो मागधादिभ्यः बिभ्यतो भीतिं प्राप्नुवतो नोऽस्मान् कस्माद्ववृषे इति पूर्वेण संबंधः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तामिति। या लीलया धृततनोरुपात्तमनुष्यशरीरस्य श्रीकृष्णस्य, अनुरूपं रूपं यस्याः सा, तां रुक्मिणीं, रूपिणीं मनुष्यरूपधारिणीं, श्रियं महालक्ष्मीं न विद्यतेऽन्या गतिर्यस्यास्तां, अलकैः कुण्डलाभ्यां निष्केण पदकाख्यभूषणेन अलंकृतेन कण्ठेन चतुर्दिक्षु शोभिते वक्त्रे उल्लसन्ती स्मितमेव सुधा यस्यास्तथाभूतां, निरीक्ष्य, प्रीतः हरिः, स्मयन् ईषद्धसन्, आबभाषे। अनुरूपरूपा इत्यत्र पराशरः। 'देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी। विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुम्' इति ॥ ९ ॥ अनपायिनोः श्रीपत्योः वक्ष्यमाणोविवादः केवलं नृलोकविडम्बनायेति सूचयन् भाषणमेवाह राजपुत्रीत्याद्येकादशभिः। तत्र तात्पर्यतस्तामुपचरन्तीमभिनन्दयन्नेव कूटवचांसि प्रयुङ्क्ते। तत्रापि सर्वगुणयुक्ताया अपि तव बुद्धिर्मन्देत्याशयेनाह। राजपुत्रीति। हे राजपुत्रि, लोकपालानामिव विभूतिरैश्वर्यं येषां तैः, महाननुभावः प्रभावो येषां तैः, श्रीमद्भिः रूपौदार्यबलोर्जितैः रूपादिभिरुत्कृष्टैः, तत्र रूपं सौन्दर्यं, औदार्यं वदान्यत्वं, बलं शत्रुपरिभवसामर्थ्यं, भूपैः राजभिः, त्वं ईप्सिता ॥ १० ॥ तानिति। तानेवंविधान्, अर्थिनो याचमानान्, स्मरेण कामेन दुर्दृष्टो मदो येषां तान् चैद्यादीन्, हित्वा त्वं, स्वपित्रा, भ्रात्रा च, दत्ता तेभ्यः समर्पिता सत्यपि असमानननुरूपान्, नोऽस्मान्, कस्मात् ववृषे वृतवती। तान् हित्वा नो वृतवती त्वं मन्देति भावः ॥ ११ ॥ असमत्वमेव प्रपञ्चयितुं स्वान् विशिनष्टि। राजभ्य इति। हे सुभ्रूः, राजभ्यो जरासंधादिभ्यः, बिभ्यतः भीतान् अत एव, समुद्रं समुद्रात्मकं, शरणं गृहं, गतान् प्राप्तान्, समुद्रान्तर्द्वीपमावासस्थानत्वेनाश्रितानित्यर्थः। बलवद्भिः बलिभिः, कृतः द्वेषो यैस्तान्, प्रायः प्रायशः त्यक्तं नृपासनं यैस्तान्। शापवशात् राजोपवेश्यसिंहासनानर्हवंशप्रभवत्वादिति भावः ॥ १२ ॥

कृष्णप्रिया

देवी जी की घुंघराली श्याम अलकावली, कर्णों के कर्णपूर, और कण्डकी निष्क स्वर्ण कण्डी की शोभा विलक्षण थी। मुखकमल से मन्दमन्द मुसकान की अमृतवर्षा हो रही थी। भगवत्परा श्रीरमा ही रुक्मिणी जी के स्वरूप में सेवा कर रही थी। भगवती महालक्ष्मीजी ने देखा कि भगवान् निजलोक से मनुष्य लोक में लीलामनुष्य के स्वरूप में पधारे हैं तब स्वयं रुक्मिणी जी के स्वरूप में प्रकट हो गयी। साक्षात् परा रमा श्री रुक्मिणी जी अब रसिकवर भगवान् रसोद्रेक बहाने के बहाने मधुर विनोद कर रहे हैं ॥ ९ ॥ भगवान् श्री कृष्णचन्द्र जी ने कहा—राजकुमारी! देवी रुक्मिणी! लोकपालों के समान ऐश्वर्य एवं समृद्धि सम्पन्न, प्रतापशाली, श्रीमान् रूप औदार्य, पराक्रम से परिपूर्ण बड़े बड़े भूपशिरोमणि आप से विवाह करना चाहते थे ॥ १० ॥ देवी जी! आपके पितृचरण भीष्मक राजा एवं ज्येष्ठ भ्राता रुक्मिणी और भातृजन आदि सर्व स्वजन चेदी नरेश शिशुपाल के साथ विवाह करना चाहते थे एवं वाग्दान भी कर चुके थे। पुनः स्मरोन्मत्त और समर्थ वीर

शिशुपाल वगैरे आप के याचक बन रहे थे आपने इन सबको छोड कर मेरे जैसे सर्व सामान्य जन का वरण किया, जो किसी भी प्रकार आपके तुल्य नहीं है। देवी ? आपने ऐसा क्यों किया ? ॥ ११ ॥ हे कमललोचने राजकुमारी ! आप को सुविदित है कि जरासन्ध आदि वीर राजाओं से भयभीत होकर महासागर की शरण में जा बसे हैं। पुनः समर्थ वीर–महावीर नृपतियों से हमने वैर बांध लिया है। यह भी आप जानती हो कि हम राजसिंहासनारोहण अधिकार से भी सर्वथा वंचित है ॥ १२ ॥

अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषाम् । [1]आश्रिताः पदवीं सुभ्रूः प्रायः सीदन्ति योषितः ॥ १३ ॥
निष्किञ्चना वयं शश्वन्निष्किञ्चनजनप्रियाः । तस्मात् प्रायेण न ह्याढ्या मां भजन्ति सुमध्यमे ॥ १४ ॥
ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः[2] । तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ॥ १५ ॥
वैदर्भ्येतदविज्ञाय त्वया दीर्घसमीक्षया । वृता वयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा ॥ १६ ॥

कर्दमक्षमा

अन्वयः—अस्पष्टवर्त्मनां, अलोकपथं, ईयूषां, पुंसां, पदवीं, आस्थिताः, योषितः, हे, सुभ्रू ! प्रायः, सीदन्ति ॥ १३ ॥ हे सुमध्यमे ! वयं, निष्किञ्चनाः, शश्वत्, निष्किञ्चनजनप्रियाश्च (स्म) तस्मात्, मां, हि, प्रायेण, आढ्या, मां, न, भजन्ति ॥१४॥ ययोः, जन्म, ऐश्वर्यः, कृतिः, भवः, वित्तं, आत्मसमं (भवति) तयोः, मैत्री, विवाहश्च, उचितः, क्वचित्, उत्तम, अधमयोः, न, उचितः ॥ १५ ॥ हे वैदर्भि ! एतत्, अभिज्ञाय, अदीर्घसमीक्षया, त्वया, गुणैः, हीना, भिक्षुभिः, श्लाघिता, वयं, वृत्ता ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्पष्टवर्त्मनामविज्ञाताचाराणाम् । अलोकपथमस्त्रीपारतंत्र्यम् । पदवीं मार्गम् । आस्थिता अनुसृताः ॥ १३ ॥ किंच निष्किंचना इति ॥ १४ ॥ आत्मसमं परस्परमनुरूपम् । जन्मैश्वर्याभ्यां सहिता आकृतिः रूपं जातिर्वा समा । भव आयतिः ॥१५॥ न दीर्घा समीक्षा विचारो यस्यास्तया ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रायः पदं पूर्वोक्तार्थपरम् । अस्त्रीपारतन्त्र्यं वनितानुकूल्यवर्जितम् ॥ अत्रोत्तरमलभमानः साक्षादेव तदाक्षिपन्निव स्त्रीमात्रस्यापि मादृशभजनमयुक्तमित्याह—अस्पष्टेति । क्वचित्परदारसेवादिदर्शनेन क्वचिद्वैदिकाचारदर्शनायं किं नास्तिक आस्तिको वा, आस्तिकत्वेऽपि क्वचिद्यज्ञाद्यर्थमृगयादिदर्शनेन, क्वचिन्मुचकुन्दादौ तन्निन्दादर्शनेन च किं प्रवृत्तो निवृत्तो वेत्यादि न स्पष्टं न सुबोधं वर्त्म अदृष्टहिताचरणं येषाम्, तथा लोकपथं स्त्रीपुत्राद्यपेक्षादिलक्षणं दृष्टहिताचरणं नतं प्राप्नुवन्तं स्त्रियाः पुरतस्तद्भ्रात्राद्यपमानाज्जातमात्रपुत्राद्यरक्षणाच्च । प्रायो वितर्के, बाहुल्ये वा । यच्च काश्चिन्न सीदन्ति तत्तासामेव गुण इत्यपि तादृशीभिर्वयमभजनीया एवेति भावः ॥ १३ ॥ निजनैः स्वं द्योतयति—किञ्चेति । निरव्ययमभावे । निष्किञ्चना अकिंचनाः । यतोऽकिंचनप्रियास्तस्माद्धेतोः । प्रायेणेत्युक्तेर्ध्रुवांबरीषादय आढ्या भजंत्यपीत्यर्थः । किञ्च—आढ्यमात्रस्यापि न मद्भजनमाचारमात्रप्राप्तमित्याह—'उदासीना वयं नूनम्' इति वक्ष्यमाणानुसारेण न विद्यते किंचन येषां ते वयं मत्प्रधाना इत्यर्थः । किञ्च—निष्किञ्चनजनानां प्रियाः । यद्वा—निष्किञ्चनजन एव प्रिया येषां ते । शश्वन्नित्यम्, अस्योभयतोप्यन्वयः । प्रायेणेत्याढ्यत्वेप्यन्तर्विरक्तान्वर्जयित्वेति भावः । वस्तुमात्रेप्यासक्तिभावान्निष्किञ्चना एवेति भावः । अतो मां तेषु प्रधानं सुतरां न भजंतीत्यर्थः । अतो महाराजपुत्र्यास्तवाढ्यत्वेनांतर्वैराग्यासंभवेन सुतरां मद्भजनमयुक्तमिति भावः ॥१४॥ मया तव विवाहस्तु सर्वथानुचित एवेत्याह—ययोरिति । आत्मना समं परस्परार्थकमत्रात्मपदम्, ययोरिति सान्निध्यात् । संनिधेरप्यर्थग्राहकत्वमुक्तम्—"वाक्यवाच्यान्यसंनिधेः प्रस्तावदेशकालादेः" इति काव्यप्रकाशे मम्मटेन । "आकारेऽवयवे रूपे जातावाकृतिरुच्यते" इति धरणिः । "आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयोः" इति मेदिनी । "भवः क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः" इति च । भव आयतिः, प्रभाव इत्यर्थः ॥ किञ्च—सर्वेषामप्येवमेव युक्तमित्याह—ययोरिति । तयोरेव युज्यत इति शेषः । अन्यत्तैः । तत्रायतिरुत्तरकालो भवितव्यतेत्यर्थः । तज्ज्ञानञ्च ज्योतिः शास्त्रादिना । समकालजन्मना वयोऽभिप्रेतम् । न केवलं विवाहः मिथः सौहार्दमपि तयोरेव स्यादित्याह—मैत्री च, मैत्र्यपि व्यतिरेकेण । तदेव द्रढयति—नेति । क्वचित्कस्मिंश्चिद्देशे काले वा ॥ १५ ॥ एतद् वित्तजन्मादि । मुधा वितथे ॥ उपसंहरति—वैदर्भीति । एतत्सर्वं पूर्वोक्तमविज्ञायाविचार्य । ननु स्वैः सद्गुणैर्युक्ता एव यूयं, तच्च 'श्रुत्वा गुणान्—' इत्यादिना विज्ञापितमेव तत्राह—भिक्षुभिरिति । याचकैर्धनादिलोमेनैव श्लाघिता इत्यर्थः । वैदर्भीति दूरदेशोद्भवत्वात्तद्द्वारकामात्रश्रवणमभिप्रेतम् ॥ १६ ॥

---

१. स्थिताः–श्रीधर. वंशी. जीव. वीर. विश्व. शुक. सु. । २. भवेत्–वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्रोत्तरमलभमानः साक्षादेव तदाक्षिपन्निव स्त्रीमात्रस्यापि मादृशभजनमयुक्तमित्याह- अस्पष्टेति। क्वचित्परदारसेवादिदर्शनेन क्वचित् वैदिकाचारदर्शनेनायं किं नास्तिकः आस्तिको वा ? आस्तिकत्वेपि क्वचिद्यज्ञाद्यर्थमृगयादिदर्शनेन क्वचित्तु मुकुन्दादौ तन्निन्दादर्शनेन च किम्प्रवृत्तो निवृत्तो वेत्यादि न स्पष्टम् न सुबोधं वर्त्म अदृष्टहिताचरणं येषां तथा लोकपथः स्त्रीपुत्राद्यपेक्षादिलक्षणं दृष्टहिताचरणं न तं प्राप्तवतां स्त्रियाः पुरतस्तद्भ्रात्राद्यपमानात् जातमात्रपुत्राद्यरक्षणाच्च प्रायो वितर्के बाहुल्ये वा यच्च काश्चिन्न सीदन्ति तत्तासामेव गुण इत्यपि तादृशीभिर्वयमभजनीया एवेति भावः ॥ १३ ॥ किञ्चाढ्यमात्रस्यापि मद्भजनं नाचारप्राप्तमित्याह—उदासीना वयं नूनमिति। वक्ष्यमाणानुसारेण न विद्यते किञ्चन येषां ते वयं मत्प्रधाना इत्यर्थः। किञ्च निष्किञ्चनजनानां प्रियाः यद्वा निष्किञ्चनजना एव प्रिया येषां ते शश्वन्नित्यम् अस्योभयतोप्यन्वयः। अतो मां तेषु प्रधानं सुतरां न भजन्तीत्यर्थः। प्रायेणेति आढ्यत्वेप्यन्तर्विरक्तान् वर्जयित्वेति भावः अतो महाराजपुत्र्यास्तवाढ्यत्वेनान्तर्वैराग्यासम्भवेन च मद्भजनमयुक्तमिति भावः ॥ १४ ॥ किन्तु सर्वेषामप्येवमेव युक्तमित्याह-ययोरिति। ययोरेव युज्यत इति शेषः। अन्यत्तैः। तत्रायतिरुत्तरकालो भवितव्यतेत्यर्थः तज्ज्ञानं च ज्योतिश्शास्त्रादिना यद्वा जन्म जातिः आकृतिः रूपं भवश्चोत्पत्तिरिति समकालजन्मना वयोऽभिप्रेतं मैत्री चेति दृष्टान्तत्वेन यद्वा न केवलं विवाहः मिथः सौहार्द्दमपि तयोरेव स्यादित्याह मैत्रीति च अपि मैत्र्यपि व्यतिरेकेण तदेव द्रढयति नेति क्वचित्कस्मिंश्चिद्देशे काले वा ॥ १५ ॥ उपसंहरति-वैदर्भीति। एतत्पूर्वोक्तं सर्वमविज्ञाय अविचार्य्य ननु स्वैः सर्वसद्गुणैर्युक्ता एव यूयं तच्च श्रुत्वा गुणानित्यादिना मया विज्ञापितमेव तत्राह-भिक्षुभिरिति। याचकैर्धनादिलोभेनैवतस्ततः श्लाघिताः इत्यर्थः श्लाघ्यामाह वैदर्भीति दूरदेशोद्भवत्वात् तद्वारकमात्रश्रवणमभिप्रेतं न च वक्तव्यं तेभ्यो धनादिदानै नापि वदान्यत्वं महागुणः स्यादिति यतो मुधा धनाद्यम्नोपि त्वादृशीषु तल्लोभेनैव श्लाघिता इत्यर्थः ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

लोकवैलक्षण्येनापि न वरणयोग्या भवाम इत्याह—अस्पष्टेति। प्रायो बाहुल्ये, सदैव सर्व्वथा सीदन्तीत्यर्थः। किंवा प्रायः इत्याश्रिताः पातिव्रत्याद्यभावेनेषदाश्रितास्तु न सीदन्ति, अतोऽत्यन्तासक्त्या मदाश्रयणेन त्वं दुःखं प्राप्स्यसीति भावः ॥ १३ ॥ धनाद्यभावेनापि न वयं वरणयोग्याः; यद्वा, निष्किञ्चनत्वेन मम निष्किञ्चनजना एव प्रियाः, न तु विभूतिमन्तो राजन्यादय इत्याह—निष्किञ्चना इति। ननु स्वतो मास्तु धनादिकम्, प्रियजनधनादिनापि तत्सत्ता सम्भवेत् ? तत्राह—निष्किञ्चनेति, निष्किञ्चनजनानां प्रियाः, किंवा निष्किञ्चनजना एव प्रिया येषां ते, शश्वन्नित्यमित्यर्थः। अस्योभयतोऽप्यन्वयः। पक्षान्तरे चार्थः स्पष्ट एव ! नैव प्रायेणेति धनादिवृद्ध्यर्थं कदाचित् केनचिदाढ्येनापि भजनात् अतस्तवाढ्यत्वेन धनादिवृद्ध्यनपेक्षया च मद्भजनमयुक्तमिति भावः ॥ १४ ॥ वैषम्येण लोकव्यवहारविरोधाल्लज्जादिनापि न वयं वरणयोग्या इत्याह—ययोरिति। आकृतिः रूपं भवश्चोत्पत्तिरिति समकालजन्मना वयोऽभिप्रेतम्, मैत्री चेति दृष्टान्तत्वेन। यद्वा, न केवलं विवाहः, मिथः सौहार्द्दमपि तयोरेव स्यादित्याह—मैत्रीति। 'च' अपि मैत्र्यपि, अन्यथा तु न स्यादेव, विरुद्धत्वादित्युक्तार्थमेव द्रढ़यति—नेति। एको जनो धनादिसम्पत्त्योत्तमः, परश्च तदभावेनाधमस्तयोः क्वचित् कस्मिंश्चिद्देशे काले वा ॥ १५ ॥ अविज्ञाय अविचार्य्य, हे वैदर्भीति दाक्षिणात्यत्वेन वैदग्ध्यादिकं सूचितम्, तथाप्यदीर्घ-समीक्षया। ननु सर्व्वसद्गुणगणैर्युक्ता यूयम्, तच्च (भा० १०।५२।३७) 'श्रुत्वा गुणान्' इत्यादिना मया लिखितमेव, तत्राह—भिक्षुभिरिति। याचकैर्धनादिलोभेनेतस्ततः श्लाघ्यामह इत्यर्थः। न च वक्तव्यम्, तेभ्यो धनादिदानेनापि वदान्यत्वमहागुणः स्यादिति। यतो मुधा धनाद्यलाभेनापि केवलं त्वादृशीषु तल्लोभेन श्लाघिता इत्यर्थः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अलोकपथमीयुषां पुंसां पदवीमित्यन्वयः ॥ १३-२० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च सत्कुलप्रसूतानां त्वादृशीनामनिर्धारितकुलोत्पथवञ्चकमादृशानुवर्त्तनं दुःखहेतुरित्याह—अस्पष्टेति। वर्त्म गतिः प्रकारः जातिरिति यावत् किमयं वसुदेवसुतः क्षत्रियः उत नन्दात्मजस्तृतीयवर्णप्रसूत इत्येवमस्पष्टं संशयविषयं वर्त्म येषां तेषाम् आलोकपथं लोकविरुद्धपथम् उत्पथमित्यर्थः। ईयुषामुन्मर्य्यादानामित्यर्थः। एवम्विधानां मादृशां पुंसां पदवीमास्थिता अनुवृत्ताः स्त्रियस्त्वद्विधाः हे सुभ्रु ! प्रायशः सीदन्ति क्लिश्यन्ति ॥ पक्षान्तरे तु अस्पष्टवर्त्मनां दुर्ज्ञेयस्वरूपस्वभावानामपि अलौकिकपथमकर्मवश्यानामाचारं चेष्टितमिति यावत् प्राप्तानां कुर्वतामपीत्यर्थः। पुंसामस्माकं पदवीं याथात्म्यम् आस्थिताः

मामनुवर्त्तमाना एव स्त्रियः प्रायशः सीदन्ति षद्लृ गतौ, गत्यर्था बुद्धयर्थाः विदन्त्येतेवेत्यर्थः। मामननुवर्त्तमानास्तु एवं विधानामप्यस्माकं पदवीं न विदुरेव अतो मामनुवर्त्तमानायाः मद्याथात्म्याभिज्ञायास्तव मदुपचरणं युक्तमेवेति ॥ १३ ॥ किञ्च लोके कुरूपोऽप्याढ्य एव स्त्रीणामभिमतः अहं त्वनाढ्यः न त्वादृश्या वरणीय इत्याह—निष्किञ्चना इति। नास्ति किञ्चन स्वं येषां ते निष्किञ्चना निर्द्धना इति यावत् पृषोदरादित्वात् साधुः तर्हि यूयं केषां प्रियाः के च युष्माकं प्रिया इत्यत्राह—निष्किञ्चनेति। मादृशानामेव जनानां वयं प्रियास्ते च प्रिया येषां तथाभूताश्चेत्यर्थः। तथाहि तस्मादेव हेतोः हे सुमध्यमे नोऽस्मान् प्रायशो आढ्यास्सम्पन्नाः न भजन्ति नानुवर्तन्ते अनन्यार्हशेषत्वानन्यशरण्यत्वानन्यभोग्यत्वरूपाकारत्रयशालिनी त्वं मामेव भजस इत्युचितमेवेत्यभिप्रेतम् ॥ १४ ॥ किञ्च "विवाहश्च तथा मैत्री समयोरेव शोभते" इति न्यायेन असमयोरावयोः सम्बन्धो न शोभत एवेत्याभिप्रायेणाह—ययोरिति। ऐश्वर्येण सहिता आकृतिरैश्वर्य्याकृतिरैश्वर्य्यमाकृतिश्चेत्यर्थः। तत्र जन्म कुलम् आकृतिः सौन्दर्य्यं ययोरात्मसमं परस्परानुरूपं वित्तादिकं भवेदस्ति तयोरेव विवाहो मैत्री च उत्तमाधमयोरस्मादृशयोस्तु क्वचित्कदाचिदपि स नोचित इत्यर्थः। पक्षान्तरे तु वित्तादिभिरसमयोरपि स्वभावतः शेषशेषिणोरावयोः सम्बन्धोऽनुरूपः नतु विषमयोस्त्वच्चैद्ययोरिति ॥ १५ ॥ सर्वमेतद्वैषम्यमविचार्य्यैव त्वया वृता वयमित्याह—वैदर्भीति। हे वैदर्भि! अदीर्घा अदूरा समीक्षा विचारो यस्याः तया त्वया एतन्मदुपन्यस्तमननुरूप्यमविदित्वा त्वया वयं वृताः कथम्भूताः गुणैर्वरणीयताहेतुभूतैः श्लाघ्यैर्गुणैः रहिताः अत एव भिक्षुभिर्मुधा मिथ्या असद्गुणारोपेणेति भावः श्लाघिताः नत्वाढ्यैः। पक्षान्तरे तु दीर्घसमीक्षयेतिच्छेदः। अविज्ञायाविचार्य्य जगन्मातुर्मम चैद्यादयः पुत्रस्थानीया इति तद्गतं वित्तजन्मादिसाम्यमविचार्य्यैवेति यावत् दीर्घा भगवदसाधारणगुणान्वेषणपरा समीक्षाविचारो यस्यास्तया त्वया गुणैः परमात्मासाधारणैः कल्याणगुणैर्हीनाः "ओहाङ्गतौ" सङ्गता इत्यर्थः। अत एव भिक्षुभिर्न्नारदादिभिर्मुधा व्यर्थं प्रयोजनान्तरनिरपेक्षं श्लाघिता वयं वृताः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एवम्विधपुरुषप्राप्तौ योषितां भयं भवतीत्याह—पुंसामिति। अलोकपथमीयुषां लोकविलक्षणमार्गवर्तिनां पुंसां पदवीमास्थिताः योषितः प्रायः सीदन्तीत्यन्वयः ॥ १३ ॥ अस्माद्दोषाच्च वयं न वरणीया इत्याह—निष्किञ्चना इति। आढ्या राजकुमार्यः ॥ १४ ॥ अयञ्चैको हेतुर्लोके विवाहेत्याह—ययोरिति। ऐश्वर्याकृतिरैश्वर्ययुक्ताकारः भवः सौन्दर्यम् ॥ १५ ॥ एदद्गुणागुणसर्वस्वम् अदीर्घसमीक्षया अल्पबुद्धया मुधावृद्धया ॥ १६-१८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

वर्त्म अदृष्टहिताचरणम्। लोकपथो दृष्टहिताचरणम् भव आयतिरुत्तरकालो भवितव्यतेत्यर्थः ॥ १३-२० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

अस्पष्टवर्त्मनां कदाचित्परदारग्रहणेन कदाचिद्वैदिकाचारवत्त्वेन च वयमधार्मिका धार्मिका वेत्यस्पष्टवर्त्मनां भार्य्याया अपि अग्रतस्तद्भ्रातुरवमानत्वान्न लोकपथमपि ईयुषामस्मद्विधजनानां पदवीम् आस्थिता धार्मिका अनुसृताः सीदन्ति प्रायग्रहणात् काश्चित् यन्न सीदन्ति तत्तासामेव गुण इति भावः ॥१३॥ निष्किञ्चना इति वस्तुमात्रेप्यासक्त्यभावादिति भावः ॥१४॥ किञ्च तव मद्भार्य्यात्वं नोपपद्यत इत्यत्र नीतिशास्त्रवाक्यं शृण्वित्याह—ययोरिति। तव पितृपैतामहबहुधनवत्त्वात् बहूनि वित्तानि मम तु पितुर्वसुदेवस्य वित्ताभावान्मदुपार्जितमेवेदं यत्किञ्चिद्वित्तं जन्मेति त्वं महाकुलप्रसूता अहं यादवत्वादकुलीनः ऐश्वर्य्यमिति तव विदर्भदेशस्थकुण्डिनादिबहुनगरेष्वधिकारः ममत्वानर्त्तदेशस्थायामेकस्यां द्वारकानगर्यामेव आकृतिरिति त्वं गौरी अहन्तु काल ऐश्वर्य्येण सहाकृतिरैश्वर्य्याकृतिः भव इति "भवः क्षेमेश संसारे" इत्यभिधानात् त्वं सदाकल्याण्येव ममतु कल्याणवत्त्वं बहुशत्रुकत्वात् सन्दिग्धमेवेति ॥ १५ ॥ न दीर्घा समीक्षा विचारो यस्यास्तया ॥ १६ ॥

गूढार्थदीपिनी

किं प्रवृत्तो निवृत्तो वेत्यादि न स्पष्टं सुबोधं वर्त्म येषाम्। अलोकपथं स्त्रीपारतन्त्र्यरहितम्। सीदन्ति क्लिश्यन्ति। प्रायो वितर्के, बाहुल्ये वा ॥ १३ ॥ निरव्ययमभावे। निष्किञ्चना आकिञ्चनाः। शश्वत् नित्यमुभयत्रान्वेति। निष्किञ्चनेत्यत्र बहुव्रीहिस्तत्पुरुषो वा। अम्बरीषादिव्यावृत्तये प्रायेणेत्युक्तम् ॥ १४ ॥ जन्मकुलम्। आकृतिर्जातिः। समम् अनुरूपम्। जन्मैश्वर्याभ्यां सहिता आकृतिः। भवः प्रभावः ॥ १५ ॥ एतत् वित्तजन्मादि। अदीर्घसमीक्षया। नास्ति दीर्घसमीक्षा परिणामविचारो यस्यास्तया त्वया वयं वृता मुधा व्यर्थमेव ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अस्पष्टवर्त्मनामविज्ञातमार्गाणाम् अलोकपथमीयुषाम् लोकातीतं मार्गं प्राप्तानामस्मद्विधानां पदवीं मार्गं स्त्रियः त्वद्विधाः आस्थिताः अनुश्रिताः सीदन्ति क्लिश्यन्ति ॥ १३—१४ ॥ आत्मसमम् अन्योन्यसदृशम् ऐश्वर्येण सहिता आकृतिः रूपं भवः क्षेमः "भवः क्षेमेपि संसारे" इत्यभिधानात् ॥ १५ ॥ नदीर्घा मय्यसङ्कुचिता समीक्षा यस्यास्तया ॥ १६-१७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एतादृशो मृगदृशः क्लिश्यन्तीत्याह अस्पष्टवर्त्मनामिति । अस्पष्टं वर्त्म चौर्यमार्गो येषां तेषां लोकानां पन्था लोकपथो न लोकपथस्तं लोकविलक्षणं मार्गमीयुषां प्राप्तवतां पदवीमास्थितास्तदनुयायिन्यो योषितः प्रायः सीदन्ति । एतादृशा वयं तादृशी त्वमिति तत्त्वम् ॥ १७ ॥ इतोऽपि न वरणीया इत्याह ॥ निष्किञ्चना इति । निर्गतं किञ्चनापि येषां त इति तथा शश्वत्सदा न सहवासोऽपि श्रीमति श्रीमहामित्याह । शश्वन्निष्किञ्चनजनाः प्रिया येषामिति ते तथा यस्मात्तस्मात् हे सुमध्यमे रुक्मिणि । सुमध्ये नास्तीति तत्सम्बुद्धिः सुमध्यम इति च । आढ्याः श्रीमन्तो नः प्रायेण न भजन्ति न तु लक्ष्मीपतिं हरिम् । यस्यानुग्रहमिच्छामि तस्य वित्तं हराम्यहमित्यादेः ॥ १८ ॥ **भवतु भवान्यादृशो** वाऽनुबन्धो जातः किमिति मतिगती वद न नीतिरेवं लोक इत्याह ॥ ययोरिति । आत्मसममात्मनोः समं जन्म कुलं समम् । ऐश्वर्यसहिताऽऽकृतिः समा । भवो मङ्गलं समस्तयोरेव विवाहो मैत्री च विहितो विहिता । उत्तमाधमयोः क्वचिदपि न शोभते । अतोऽहमवमस्त्वं महावंश्येति जातमयुक्तमिति तात्पर्यम् ॥ १९ ॥ हे **वैदर्भि** । एतद्विवाहोपयुक्तगुणशून्यत्वविज्ञायादीर्घसमीक्षया जालमया गुणैर्हीना वयं वृताः । एतद्वित्तावृत्ता भ्रान्ताऽसीति कान्तामाह । भिक्षुभिरन्नार्थिभिर्मुधा वृथा श्लाघिता इति ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अविचार्य मोहात् नीतिं परित्यज्य विवाहे बाधकमाह **अस्पष्टवर्त्मना**मिति । अथ यद्यलौकिकदृष्ट्या दूषणानि परिहृत्य विवाहं कुर्यात्, तदा अलौकिकव्यवहारस्तया ज्ञातुमशक्य इति लौकिकपक्षाश्रयणे उभयभ्रष्टाः **स्त्रियः** सीदन्ति । अलौकिकानां लक्षणमाह । न स्पष्टं वर्त्म येषाम् । यस्य हि रीतिर्ज्ञायते, तदनुसारेण व्यवहर्तुं शक्यते । कदाचित्ते लोकानुसारेणापि व्यवहरन्तीति तेषां नियतमार्गज्ञानाभावेऽपि तदाश्रितो लौकिकमार्गो ज्ञायत इति कथमवसाद इति चेत् । तत्राह **अलोकपथमीयुषा**मिति । **अलोका** लोकातिरिक्ताः, लोके स्थित्वापि अलौकिकानामेव मार्गमाश्रयन्ति । तेषां लौकिकव्यवहारोऽप्यलौकिक इत्यर्थः । अत एव क्षणिकानामव्यवस्थितगतीनां पदवी**माश्रिताः** सीदन्ति । **प्रायः** इति । ता अपि चेत्तत्प्रवणास्तादृश्य एव भवेयुः तव्द्यावृत्त्यर्थं प्रायग्रहणम् ॥ १३ ॥ किञ्च । यं न कोऽपि भजते, तं यो भजते, स सीदतीति वक्तुं मां न कोऽपि भजत इत्याह भगवान् **निष्किञ्चना** इति । धनिन एव **स्त्रीणां** प्रियाः, वयं तु निष्किञ्चनाः । नाप्यस्मदीयाः सकिञ्चना इत्याह **निष्किञ्चनजनप्रिया** इति । निष्किञ्चना एव जनाः प्रिया येषाम्, निष्किञ्चनजनानां च स्वयं प्रियाः । अतः साक्षात्परम्परयापि धनाभाव उक्तः । एतत्प्रायिकं भविष्यतीत्याशङ्क्य सर्वजनीनं नियतमेतदित्याह **तस्मा**दिति । **आढ्या** धनेन सम्पन्नाः प्रायेण न मां भजन्ति, धननाशस्योभयथापि सम्भवात् । यद्यप्यस्मासु स्नेहं कुर्यात्, तदा सर्वस्वमस्मदर्थं विनियुञ्ज्यात्, तदापि निर्धनो भवेत् । यदि वास्मन्माहात्म्यं बुद्ध्वा आन्तरमेव भजनं कुर्यात्, तदापि अस्माकं प्रियः स इति अस्माभिरेव स्वप्रियत्वसिद्ध्यर्थं स निर्धनः क्रियते । अत उभयथापि लोके प्रतिष्ठाकरमाढ्यत्वं नश्यतीति न भजन्ति । तव तु **आढ्यत्वमेव** स्वरूपमिति स्वरूपनाश एव सम्भावित इति भावः । **प्रायेणे**ति अम्बरीषादिव्युदासार्थम् ॥ १४ ॥ नीतिविरोधमाह **ययोरात्मसम**मिति । **सुमध्यमे** इति सम्बोधनं निर्धनगृहे स्थातुमशक्तिं बोधयति । कार्यकरणासामर्थ्यात् भोगाभावाच्च । अत एव समान एव विवाह्यः, नासमान इति । लौकिकं समानत्वं **यैः** सिध्यति, तान् धर्मानाह । **ययोः** **स्त्री**पुरुषयोर्मित्रयोर्वा समानं वित्तं भवति, समानं च कुले जन्म, वयो वा, ऐश्वर्यं च समानम्, आकृतिश्च, वयस्तारुण्यं च, भव उत्पत्तिर्वा । जन्मभवयोः कालदेशकृतो भेदोऽनुसन्धेयः । सर्वथा साम्यं न युक्तमनुपपन्नं चेति आत्मपदम् । स्वयोग्यानुसारि साम्यमित्यर्थः । यथा चतुर्विंशतिवार्षिकः पतिः, षोडशवार्षिकी कन्येति । पञ्च धर्माः समाः । ऐश्वर्येण सहिता आकृतिः । 'कन्या वरयते रूप'मिति श्लोकेऽपि पञ्चापेक्षिता धर्मा उक्ताः । रूपमत्राकृतिः । वित्तं स्पष्टम् । श्रुतमैश्वर्यस्थानीयम् । कुलं जन्म । भवः समृद्धिः पक्वान्नस्थानीया । तदेवात्रापि ग्राह्यम् । तत्र लौकिकदृष्ट्या राजसमानं धनं नान्यस्य भवतीति साम्याभावः सिद्धः । जन्म । यादवानां तथा न कुलीनत्वमिति लोकप्रसिद्धिः । आकृतिरपि न गौरेति । राज्याभावादेव **नैश्वर्यम्**, उद्भवोऽपि तत एव निवर्तते । दैवाज्जातेऽपि विवाहे मैत्री न तिष्ठतीति प्रकृते मैत्र्या अप्युपयोगात् ग्रहणम् । **उत्तमाधमयोस्तु न क्वचि**दिति । क्वचिदपि नेत्यर्थः । क्वचिज्जातं वा न सुखकरं भवतीति वैलक्षण्यम् ॥ १५ ॥ तर्हि किमतः परं कर्तव्यमिति चेत्, तत्राह **वैदर्भी**ति द्वाभ्याम् । एकेनाज्ञानं समर्थ्यते । 'अज्ञानात्कृतमकृतमेवे'ति हविर्विपर्यास इव पुनर्यथाकरणमित्युपाय इति प्रथममज्ञानमाह । **वैदर्भि** विदर्भराजदुहितः । अनेन सत्कुलप्रसूतत्वमुक्तम् । **अविज्ञाय वयं वृता** इति । एतत्तस्या अज्ञानसमर्थनं कार्यान्तरविधानार्थम्, न तु दोषारोपार्थम् । ननु स्तोत्रद्वारा विज्ञापनया च तया पदार्था ज्ञायन्त एव, तत्कथमज्ञानमित्याशङ्क्याह **अदीर्घसमीक्षये**ति । न दीर्घा सम्यगीक्षा यस्याः । आपातत उत्कर्षं दृष्ट्वा अलौकिकमज्ञात्वा लौकिकं सुखं भविष्यतीति वरणाददीर्घदर्शित्वम् । वस्तुतस्तु भगवान् सर्वसंसारनिवारकः, नतु संसारप्रद इति वस्तुतोऽप्यदीर्घदर्शित्वम् । तत्र हेतुमाह **गुणैर्हीना** इति । सगुणादेव संसारो भवति । ननु पूर्वं नारदादिभिः त्वदीयैः अनन्तगुणपूर्णत्वेन भवान् स्तुतः, तत्कथं गुणैर्हीना इति चेत्, तत्राह **भिक्षुभिः श्लाघिता** इति । भिक्षवो हि न वस्तुस्वरूपं जानन्ति, परस्य कथमिष्टमनिष्टं वा भवतीति स्वकार्यमात्रं पश्यन्ति । अन्यथा न याचेरन् । तदुक्तं पूर्वम् । 'नूनं स्वार्थपरो लोको न वेद

परसङ्कटम् । यदि वेद न याचेते'ति सामान्यतो याचकदूषणम् । अतः स्वयं गुणातीता इति केवलं मोक्षार्थिनः संसारापेक्षिणोपि स्थाने स्तुवन्तीति भिक्षुभिः श्लाघिता इति दूषणम् । तत्रापि **मुधा** । तेषां स्वाचरणादेव पुरुषार्थोऽपि सिध्यतीति मोक्षेऽपि न मद्दानापेक्षा, परमभक्तानां तु सुतरामेव न मदपेक्षा । अतो मुधैव स्वरसात्ते स्तुवन्ति । ये पुनः संसारापेक्षिणः, तैर्न तद्ग्राह्यम् । अतः स्वतः परतश्च अभिप्रायापरिज्ञानात् भ्रमस्तवोत्पन्न इति अज्ञानादेव वरणमित्यर्थः ॥ १६ ॥

श्रीसुबोधिनी-सारः

तादृशां वरणं दुःखहेतुरित्याह । अस्य स्पष्टं वर्त्म मार्गः प्रवृत्तिर्येषां तेषाम् अलोकपथं लोकातीतमार्गमीयुषां सेवमानानां पुंसां पदवीं मार्गमाश्रिता योषितः स्त्रियः प्रायः सीदंति दुःख्यंति हे सुभ्रूः ॥ १३ ॥ किं च वयं निष्किचना निःसंगाः शश्वन्निरंतरं निष्किचना जनाः प्रिया येषां ते वयं स्मः । तस्माद्धेतोः आढ्या धनिनो मां प्रायेण न भजंति न सेवते हे सुमध्यमे ॥ १४ ॥ विचारशून्या त्वमित्याह । ययोर्वित्तं धनं जन्म ऐश्वर्यम् आकृती रूपं भव आयतिर्ज्ञातिवर्गश्चात्मना समं तुल्यं भवति तयोर्विवाहो मैत्री च युक्ता उत्तमाधमयोर्विसदृशयोः क्वचिन्न ॥ १५ ॥ हे वैदर्भि एतदविज्ञाय न बुद्धा न दीर्घा समीक्षा विचारो यस्याः सा तया त्वया विक्षुभिर्विरक्तैः श्लाघिता गुणैर्हीना वयं मुधा वृथा वृताः स्मः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'किञ्चास्मदनुसरणं तव केवलदुःखहेतुरेव' इत्याशयेन आह–अस्पष्टवर्त्मनामिति । अस्पष्टवर्त्मत्वे हेतुमाह–अलोकं लोकातीतं पथमीयुषां गच्छतामिति । एवंभूतानां पुंसां पदवीं मार्गमास्थिताः अनुवर्त्तमाना योषितः प्रायः सीदन्ति क्लिश्यन्ति । विवेकवतीनामृष्यादिपत्नीनां क्लेशाभावात् प्रायग्रहणम् । 'त्वं च न क्लेशयोग्या' इति सूचयन् संबोधयति–सुभ्रु इति ॥ १३ ॥ 'धनाभावादप्यस्मदनुसरणे तव क्लेश' इति सूचयन्नाह–निष्किञ्चना इति । वयं निष्किञ्चना धनादिसंपत्तिरहिताः । 'नचास्मत्संबन्धिनामपि धनमस्ति, येन ततोऽपि धनलाभात्तव निर्वाहः स्यात्' इत्याशयेनाह–निष्किञ्चना जनाः प्रिया येषां ते इति बहुव्रीहिः । निष्किचनानां जनानां प्रिया इति तत्पुरुषो वा समासः । 'न चायं व्यवहारः कादाचित्कः, किंतु सार्वदेशिक एव' इत्याह–शश्वदिति । तस्माद्बहुव्रीहिपक्षे स्वप्रियत्वसिद्ध्यर्थमस्माभिरेव ते निर्धना क्रियन्ते इति धननाशशङ्काया विद्यमानत्वात् । तत्पुरुषसमासपक्षे तु धनाद्यासक्तानामस्मद्भजनासंभवात् अस्मत्प्रीत्यर्थं सर्वस्वविनियोगभयाच्च आढ्या धनादिसंपन्ना प्रायेण मां न भजन्ति । 'शास्त्रप्रसिद्धमेवैतत्' इति सूचयति–हीति । धनाद्याढ्यानामप्यंबरीषादीनां भगवद्भजनस्य प्रसिद्धत्वात् प्रायग्रहणम् । तव च निर्वाहो धनं विना दुर्घट' इत्याशयेन संबोधयति–सुमध्यमे इति ॥ १४ ॥ किंच "विवाहश्च तथा मैत्री समयोरेव शोभते" इति न्यायविरोधादपि 'असमयोरावयोः संबंधो न युक्तः' इत्यभिप्रायेणाह–ययोरिति । ययोरात्मसमं परस्परानुरूपं वित्तादिकं भवेत्तयोरेव विवाहो युक्तः, मैत्री च युक्ता । उत्तमाधमयोस्तु विवाहमैत्र्यौ क्वचिदपि न युक्ते इत्यन्वयः । तत्र जन्मैश्वर्याभ्यां सहिता आकृतिः जन्म सत्कुले प्रसूतिः । ऐश्वर्यं विभवः । आकृतिः सौन्दर्यम् । भवः जातकनिर्णीतमुत्तरफलम् ॥ १५ ॥ 'महत्कुले महत्स्थाने चोत्पन्नायास्तवैत्रं बुद्धिमान्द्यं न युक्तम्' इत्याशयेन संबोधयति–वैदर्भीति । एतत्पूर्वोक्तमननुरूप्यमविज्ञाय वयं मुधा वृथैव त्वया वृता इत्यन्वयः । अज्ञाने हेतुमाह–अदीर्घा अदूरा समीक्षा विचारो यस्यास्तयेति । 'वयं च न वरणयोग्या' इत्याह–गुणैर्हीना इति । तथापि वरणे हेतुमाह–भिक्षुभिर्नारदादिभिः मुधेव श्लाघिता इति ॥ १६ ॥

अन्वितार्थप्रकाशिका

अस्पष्टेति ॥ हे सुभ्रूः ! अस्पष्टवर्त्मनाम् अविज्ञाताचाराणाम् अलोकं लोकातीतं पथं स्त्रीवश्यताभावमीयुषां गतानामिति एवंभूतानां मादृशानां पुंसां पदवीं मार्गमास्थिताः अनुवर्तमाना योषितः प्रायः सीदन्ति क्लिश्यन्ति । काश्चिन्न सीदन्ति तत्तासामेव गुण इति भावः । ऋष्यादिपत्नीनां क्लेशाभावात्प्रायोग्रहणम् ॥ १३ ॥ निष्किञ्चना इति ॥ हे सुमध्यमे ! वयं शश्वत् सदा निष्किञ्चनाः निर्द्धना निष्किञ्चनजनप्रियाश्च बहुव्रीहिस्तत्पुरुषो वा तस्मात् प्रायेण आढ्याः धनिनो मां न भजन्ति । अम्बरीषादिव्यावृत्तये प्रायेणेति ॥ १४ ॥ ययोरिति ॥ ययोः वित्तम् आत्मसमं परस्परानुरूपं इदं जन्मादीनामपि यथोचितं विशेषणम् । जन्म सत्कुलम् ऐश्वरं ऐश्वयम् । ष्यञ् ङीप् च । आकृतिः सौन्दर्यम् ऐश्वर्ययुक्ता कृतिरिति समासो वा । भवः उत्पत्तिर्वय इति यावत् । समृद्धिर्वा एतानि आत्मसमानि स्युः तयोरेव विवाहो मैत्री च युज्यते । उत्तमाधमयोस्तु क्वचिदपि न युज्यते ॥ १५ ॥ वैदर्भीति ॥ हे वैदर्भि ! एतत्पूर्वोक्तमसाम्यम् अविज्ञाय अदीर्घसमीक्षया दीर्घविचाररहितया त्वया गुणैर्हीना भिक्षुभिर्मुधैव श्लाघिता वयं वृता मुधा वृता इति वा ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्पष्टमविज्ञेयं वर्त्म । आचरणं येषां तेषां अलोकपथं लोकाचारहीनपथं । ईयुषां प्राप्तानां पुंसां पदवीं मार्गमास्थिता आश्रिताः हे सुभ्रु ॥ १३ ॥ निष्किचना इति आढ्या धनिकाः हे सुमध्यमे ॥ १४ ॥ आत्मसमं अन्यो अन्ययोग्यं वित्ताद्यस्ति

तयोर्विवाहादि स्यात् ॥ ऐश्वर्यं सामर्थ्यं आकृतिराकारश्च भवोवयः ॥ १५ ॥ हे वैदर्भिनास्तिदीर्घा समीक्षाविवेकदृष्टिर्यस्यास्तया मुधा मिथ्याश्लाघिताः स्तुताः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अस्पष्टेति ॥ अस्पष्टं वर्त्म आचारो जातिर्वा येषां तेषां, किमयं वसुदेवसुतः क्षत्त्रियः, वा नन्दात्मजत्वात्तृतीयवर्णप्रसूतः, इति अनिर्धार्यजातिकाचाराणामित्यर्थः। अलोकपथं लोकविरुद्धपन्थानमुत्पथमित्यर्थः। ईयुषामुन्मर्यादानामित्यर्थः। पुंसां, पदवीं मार्गं, आस्थिता अनुवृत्ताः। योषितः स्त्रियः, त्वद्विधा इत्यर्थः। हे सुभ्रूः, प्रायः प्रायशः, सीदन्ति क्लिश्यन्ति ॥१३॥ किं च लोके कुरूप्यप्याढ्य एव स्त्रीणामभिमतः अहं त्वनाढ्यः अतः, न त्वादृश्या वरणीय इत्याह ॥ निष्किचना इति ॥ वयं शश्वत्, नास्ति किंचन स्वं येषां ते निष्किचना निर्द्धना इत्यर्थः। तर्हि यूयं केषां प्रियाः के च तव प्रिया इत्यत्राह। निष्किचनजनानां प्रियाः, निष्किचनाः जनाः प्रिया येषां तथाभूताश्च। तस्माद्धेतोः, हे सुमध्यमे, आढ्याः, प्रायेण मां न भजन्ति हि ॥१४॥ किं च विवाहश्च तथा मैत्री समयोरेव शोभते इति न्यायेनासमयोः संबन्धो न शोभत एवेत्यभिप्रायेणाह ॥ ययोरिति ॥ ययोः स्त्रीपुरुषयोः, वित्तं, जन्म ऐश्वर्येण सहिता आकृतिरैश्वर्याकृतिः, ऐश्वर्यमाकृतिश्चेत्यर्थः। वयः आत्मसमं परस्परानुरूपं भवेत्, तयोः एव, विवाहः, मैत्री च, घटते। क्वचित् उत्तमाधमयोः, अस्मत्सदृशयोः, न घटते ॥ १५ ॥ सर्वमेतद्वैषम्यमविचार्यैव त्वया वयं वृता इत्याह ॥ वैदर्भीति ॥ हे वैदर्भि, अदीर्घा समीक्षा विचारो यस्यास्तया, त्वया, एतन्मदुपन्यस्तं सर्वं, अविज्ञाय अविदित्वा, गुणैः वरणीयताहेतुभूतैः, हीना रहिताः, भिक्षुभिः मुधा मिथ्यैव, श्लाघिताः प्रशंसिताः वयं, वृताः ॥ १६ ॥

कृष्णप्रिया

हे पद्मलोचने सुन्दरी ! अधिक क्या कहें ! हम किस पथ के पथिक हैं, हमारा कौन सा मार्ग है हमारा कौन सिद्धान्त है यह भी जनसमूह को अच्छी तरह से मालूम नहीं है। क्या कहें ? हम लोकव्यवहार से भी अनभिज्ञ हैं एवं व्यवस्थित लोकव्यवहार का पालन नहीं कर पाते। हम अनुनय विनय-प्रणय के पण्डित नहीं हैं इसलिये अर्धाङ्गनाओं को कैसे प्रसन्न करना है, यह भी जानते नहीं हैं। जो सन्नारियाँ हमारा वरण करती हैं प्रायः उन्हें क्लेशानुभूति ही होती है ॥ १३ ॥ हे सुमध्यमे ! हम तो नित्य के अकिंचन हैं। हम विदुरजी जैसे अकिंचनों से स्नेह करते हैं एवं अकिंचनजन हमसे स्नेह रखते हैं। आप अच्छी तरह से जानती हो कि न हमारे पास कुछ था न कुछ रहेगा। जो जन अपने को धनाढ्य मानते हैं, जानते हैं वे न केवल हमसे नाता रखते हैं सेवा और स्नेह भी करते हैं ॥ १४ ॥ राजकुमारी ! यह बात विवेक सम्पन्न है कि जिनका वित्तकुल-ऐश्वर्य-आकृति-वैभव-जन्म परस्पर समान होता है—उन दोनों से विवाह और मैत्री का नाता सम्बन्ध होना चाहिये। यदि अपने से उत्तम या निकृष्ट हो उनसे न किया जाय ॥ १५ ॥ विदर्भ राजकुमारी रुक्मिणी मुझे लगता है कि आपने दीर्घ दृष्टि से विचार किये विना हमारा वरण किया है। जो लोक भिक्षुक हैं वे ही हमारी झूठी प्रशंसा करते रहते हैं। देवी हम गुण सम्पन्न भी नहीं हैं ॥ १६ ॥

अथात्मनोऽनुरूपं वै भजस्व क्षत्रियर्षभम्। येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे ॥ १७ ॥
चैद्यशाल्वजरासंधदन्तवक्त्रादयो नृपाः। [1]मम द्विषन्ति वामोरु रुक्मी चापि तवाग्रजः ॥ १८ ॥
तेषां वीर्यमदान्धानां दृप्तानां स्मयनुत्तये। आनीतासि मया [2]भद्रे [3]तेजोऽपहतयेऽसताम् ॥ १९ ॥
उदासीना वयं नूनं न स्त्र्यपत्यार्थकामुकाः। आत्मलब्ध्याऽऽस्महे पूर्णा गेहयोर्ज्योतिरक्रियाः ॥ २० ॥

कर्दमक्षमा

अन्वयः—अथ, आत्मनः, अनुरूपम्, वै, क्षत्रियर्षभम्, भजस्व, येन, इह, च, अमुत्र, त्वम्, सत्याः, आशिषः, लप्स्यसे ॥ १७ ॥ हे वामोरु ? चैद्यशाल्वजरासन्धादयः, नृपाः, च, तव, अग्रजः, रुक्मी, अपि, मम, द्विषन्ति ॥ १८ ॥ हे भद्रे ! वीर्यमदान्धानाम्, दृप्तानाम्, तेषाम्, मदनुत्तये, असत्ताम्, तेजः, अपनुत्तये, अपहरता, मया, आनीता, असि ॥ १९ ॥ वयम्, नूनम्, उदासीनाः, स्त्री अपत्यार्थकामुकाः, न, गेहयोः, ज्योतिः, इव, अक्रियाः, आत्मलब्ध्या, पूर्णाः, आस्महे ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अथ इदानीमपि ॥ १७ ॥ तर्हि किमित्यानीताऽहमिति चेत्तत्राह। चैद्यशाल्वजरासंधेति। मम मां द्विषंति ॥ १८ ॥ स्मयनुत्तये गर्वापनयनाय ॥ १९ ॥ स्त्रीणामतिदुःसहमौदासीन्यमकामत्वञ्चाह। उदासीना इति। गेहयोर्देहगेहयोरुदासीना अत एव ज्योतिरक्रियाः ज्योतिः प्रदीपादि तद्वत्साक्षिमात्रतया क्रियारहिता आस्महे वर्तामहे इति ॥ २० ॥

---

१. द्विषन्ति मां वरारोहे विज.। २. तान्वि-वीर; ह्यद्धा-विज. त्वं च-च. पु. टि.। ३. पहताऽ-श्रीधरादयः।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

येनाऽनुरूपेण ॥ एवमुक्तमिव यदुक्तं यच्च वक्ष्यते तत्रात्यंतासंभवोक्त्या तस्यां परमकोमलचित्तायां परिहासत्वं चातिस्फुटीकरोति, किञ्च—यदभूत्तदभूदेव तव स्थिरयौवनत्वादधुनापि काचित्क्षतिर्नाभूदतो विवेकं कुर्वित्याह—अथेति, इदानीमपि । वै एव, अनुरूपं सदृशमेव ॥ १७ ॥ स्वयमाशंक्य समाधत्ते—तर्हीति । आदिना पौंड्रकादिः । चैद्येत्यादि तैरवतारितम्, तत्र चेदित्यधिकं भाति । किञ्च द्वाभ्यामिति शेषः । विशेषस्तु तव मद्भक्ताया अग्रजोपीति । अत्र वर्तमानसमीप एव वर्तमानत्वमस्य मारितत्वेन वक्ष्यमाणत्वात् ॥ १८ ॥ तेषां चैद्यादीनाम् । स्मयो गर्वस्तस्य नुत्तये नाशाय । न च तत्र मम कोऽपि दोषः, किन्तु दुष्टस्वभावेनैव ते द्विषंतीत्याह—वीर्येण प्रभावेण बलेन वा यो मदो मत्तता तेनांधानां हतविवेकानामतो दृप्तानां गर्वितानामिति । अतस्तेषां स्मयनुत्तये आनीतासि । तत्र हेतुविशेषः—असतां तेजोपहरतेति । त्वदानयने तदेव प्रयोजनं न तु त्वद्विवाहादिकमिति भावः ॥ १९ ॥ स्वस्य स्त्रीणामयोग्यतामाह—स्त्रीणामिति । उदासीना अनासक्ताः विषयव्यापारशून्याः, खपुष्पादिवदप्रसिद्धा वा । 'उदासीनस्त्वप्रसिद्धे विषयासक्तिवर्जिते । मध्यस्थ ऊद्धर्वमासीने" इति धरणिः । अत एवोदासीनत्वादेव । ननु नानावैभवयुक्तस्य नानास्त्रीसंग्रहवतः कुतोऽकिंचनत्वादिकम्, किञ्च—अस्पष्टवर्मत्वादिनात्मनि वा कुतो दांभिकत्वमिवांगीक्रियत इत्याशंक्य सर्वं समादधदेव तद्विधानामतिदुःसहमाह—उदेति । नूनं निश्चये । उदासीना न तु कुत्राप्यासक्ता न चात्मीयेष्वपीत्यह—नेति । कुतः—आत्मेति । आत्मसुखेनैव सुखिन इत्यर्थः । गेहयेरित्येकशेषात्, न च देहस्य गेहसामान्येन तच्छब्दप्रयोगात् । ज्योतिरक्रिया इति–परमात्मैकभावेनेति भावः । तदिदं परमार्थतः । स्वस्य जीवांतर्यामित्वापेक्षयोक्तमतो देहगेहौ चात्र जीवसंबंधिनावभिप्रेतौ न तु स्वसंबंधिनौ, लीलाविनोदस्तु स्वदेहगेहेषु लौकिकज्ञानित्वाद्यारोपणायोक्तमिति ज्ञेयम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमयुत्तमिव यदुक्तं यच्च वक्ष्यते तत्रात्यन्तासम्भवोक्त्या तस्यां परमकोमलचित्तायां परिहासत्वञ्चातिस्फुटीकरोति अथेति वै एव अनुरूपं सदृशमेव आशिषः कामान् सत्याः स्थिरा उत्तमा वा ॥ १७ ॥ चैद्येति तैरवतारितं तत्रेति चेदित्यधिकमिव भाति किञ्च आहेत्यस्यानन्तरं चैद्येत्यादिद्वाभ्यामिति शेषः विशेषतस्तु तव मद्भक्ताया अग्रजोपीति अत्र वर्त्तमानसामीप्य एव वर्त्तमानवत्त्वम् अस्य मारितत्वेन वक्ष्यमाणत्वात् ॥ १८ ॥ न च तत्र मम कोपि दोषः किन्तु दुष्टस्वभावेनैव ते द्विषन्तीत्याह वीर्य्येण प्रभावेण बलेन वा यो मदो मत्तता तेन अन्धानां हतविवेकानामतो दृप्तानां गर्वितानामिति अतस्तेषां स्मयनुत्तये एवानीतासि तत्र हेतुविशेषः असतां तेजोपहरतेति त्वदानयने तदेव प्रयोजनं न तु त्वद्विवाहादिकमिति भावः ॥ १९ ॥ ननु, नानावैभवयुक्तस्य नानास्त्रीसङ्ग्रहवतः कुतो निष्किञ्चनत्वादिकं किञ्चास्पष्टवर्मत्वादिनात्मनि वा कुतो दाम्भिकत्वमिवाङ्गीक्रियत इत्याशङ्क्य सर्वं समादधदेव तद्विधानामतिदुःसहमाह—उदेति । नूनं निश्चये उदासीनाः न तु कुत्राप्यासक्ताः न चात्मीयेष्वपि इत्याह—नेति । कुत आत्मेति आत्मासुखेनैव सुखिन इत्यर्थः । गेहयोरित्येकशेषात् न च देहस्य गेहसामान्येन तच्छब्दप्रयोगात् ज्योतिरक्रिया इति परमात्मैकभावेनेति भावः । तदिदं परमार्थतः स्वस्य जीवान्तर्यामित्वापेक्षायोक्तम् अतोः देहगेहौ चात्र जीवसम्बन्धिनावेवाभिप्रेतौ न तु स्वसम्बन्धिनौ लीलाविनोदस्तु स्वदेहगेहेषु लौकिकज्ञानित्वाद्यारोपणायोक्तमिति ज्ञेयम् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वै एव, अनुरूपं सदृशमेव, अतः क्षत्रियेषु ऋषभं श्रेष्ठं पुरुवंश्यादिजातमर्ज्जुनादिकमित्यर्थः । आशिषः कामान् सत्याः स्थिरा उत्तमा वा ॥ १७ ॥ चैद्यादीनां यथापूर्व्वं द्वेषं श्रैष्ठ्यम्, तव मद्भक्ताया अग्रजोऽपि, ममेत्येकत्वं द्वेष्यत्वे स्वस्याप्राधान्यमननात् ॥ १८ ॥ न च तत्र मम कोऽपि दोषः, किन्तु दुष्टस्वभावेनैव ते द्विषन्तीत्याह–वीर्य्येण प्रभावेण बलेन वा यो मदो मत्तता तेनान्धानां हतविवेकानाम्, अतो दृप्तानां गर्वितानां स्वयनुत्तयेऽतो हेतुविशेषः । असतां तेजोऽपहरतेति त्वदानयने मे तदेव प्रयोजनम्, न तु त्वद्विवाहादिकमिति भावः । पाठान्तरेऽपि स एवार्थः । किं त्वस्माभिरिति बहुत्वेनात्मनः सर्व्वसाधारण्यप्रतिपादनात्तस्यामौदासीन्यमेव बोधयति ॥ १९ ॥ एवं नृपाणां निर्जयादिनापि राजभ्यो विभ्यत इत्येव दृढ़ीकृतम्, दुष्टत्वेन तैः सदा छिद्रान्वेषणात्, नूनं निश्चये, उदासीनत्वादीनामुत्तरोत्तरं पूर्व्वपूर्व्वस्मिन् हेतुः । आत्मलब्ध्या स्वानन्दानुभवेन पूर्णाः । एवमुक्तानामसमत्वादीनां दोषाणां यथोत्तरं वरणायोग्यत्वे श्रैष्ठ्यम् । यद्यपि 'अपि मे पूर्णकामस्य नवं नवमिदं प्रियम्' इत्यादिवचनप्रामाण्येन तस्य भक्त-भक्त्याद्यपेक्षास्ति, तथापीदृश्युक्तिर्नर्म्मपरत्वादेव, न तु तत्त्वत इति सर्व्वमेव तदुक्तं विपरीतार्थत्वेन ज्ञेयम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

किमत इत्यत आह—अथेति । अथ अधुनेत्यर्थः । क्षत्रियर्षभं चैद्याद्यन्यतमं भजस्व, तं विशिनष्टि—येन सेव्यमानेन क्षत्रियर्षभेण हेतुना इहामुत्र च लोके सत्याः सतीराशिषः कामान् लप्स्यसे प्राप्स्यसे पक्षान्तरे तु क्षत्रियर्षभं क्षत्रियश्रेष्ठत्वेन अवतीर्णं

मामित्थं भजस्व इह लीलाविभूतौ अमुत्र नित्यविभूतौ च येन मया सेव्यमानेन सह सत्याः आशिषः कामान् मदनुभवात्मकान् लप्स्यसे इत्यर्थः ॥ १७ ॥ तर्हि मां किमर्थमानीतवानसीत्यत आह—चैद्येति । हे वामोरु ! शोभनोरु मम द्विषन्ति मां द्विषन्तीत्यर्थः ॥ १८ ॥ ततः किमत आह-तेषामिति । वीर्य्यमदेनान्धानां विवेकशून्यानां गर्वितानां च तेषां चैद्यादीनां च स्मयनुतये गर्वापाकरणाय मया त्वमानीता कथम्भूतेन असतां खलानां तेजसामिति कर्मणिषष्ठी तेजांसि हरता पक्षान्तरे तु यद्यपि मदनपायिनी त्वं केनाप्युपायेन मामेव प्राप्तवत्यसि यथापि तेषां स्मयनुत्तये मया नीतासीति प्रासङ्गिकोक्तिः युक्तञ्चैतदित्यभिप्रायेणाऽऽत्मानं विशिनष्टि-असतां तेजांसीति पूर्ववत् हरता "लक्षणहेत्वोः क्रियया: (३-२-१२-६) इति शत्रादेशः हर्त्तुमवतीर्णेनेतिशेषः ॥ १९ ॥ स्त्रीणामतिदुस्सहमौदासीन्यमकामुकत्वञ्चात्मन्याह—उदासीना इति । गेहयोरुदासीनाः गृहशब्दपर्यायो गेहशब्दोप्यत्र कलत्रवेश्मोभयपरः अत एव द्विवचनान्तनिर्देशः अत एव न स्त्र्यपत्यार्थकामुकाः दारेषणापुत्रेषणाधनेषणारहिताः तत्र हेतुरात्मलब्ध्या स्वात्मानुभवलाभेनैव पूर्णाः अलम्पटाः ज्योतिषा स्वयम्प्रकाशस्वात्मस्वरूपस्फुरणेन हेतुना अक्रियाः निष्क्रियाः प्राकृतचेष्टारहिताः आस्महे वर्त्तामहे इत्यर्थः । पक्षान्तरेत्वर्थस्तु यथोक्त एव तात्पर्य्यन्तु असतां स्मयनुत्तयेऽवतीर्णस्य मम गृहमेधिधर्मानुवर्त्तनं विडम्बनमात्रमन्यथैवम्विधस्यैतन्न घटत इति ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

स्मयनुत्तये अहङ्कारनिरासाय असतां दुरात्मनां तेजोपहरता अभिमानलक्षणप्रभावप्रणाशङ्कुर्वता मया नीतासीत्यन्वयः ॥ १९ ॥ स्वभावं सूचयति–उदासीना इति । उदासीना विषयव्यापारशून्याः खपुष्पादिवदप्रसिद्धा वा न स्त्र्यपत्यार्थकामुकाः कलत्रपुत्रधनलोलुपा न आत्मलब्ध्या स्वरूपलाभेन पूर्णाः अलम्बुद्धयः आस्महे इह क्रियाश्च आत्मसदृशाः कर्माणि जीवकर्मतुल्यानि न भवन्ति अतिमानुषाणीत्यर्थः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अथात्मन इत्यादि । अथ-शब्दो वाक्यान्तरद्योतकः । तद्वाक्यं तु देव्या पूर्वमेव प्रतिहतज्ञानया न श्रुतम्, अस्य प्रत्युत्तराभावात् । अत्यन्तासह्यमप्येतत्तदश्रवणमेव देहसद्भावे हेतुः ॥ १७–२० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अथात्मन इत्यादि । वाक्यान्तरेऽथशब्दः । एतद्वाक्यन्तु पूर्वमेव देव्या प्रतिहत-ज्ञानया न श्रुतम्, अस्य प्रत्युत्तराभावात् एतेनैव देहोऽपि स्थितः ॥ १९–२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्च यदभूत्तदभूदेव तव स्थिरयौवनत्वादधुनापि काचित् क्षतिर्नाभूदतो विवेकं कुर्वित्याह—अथ इदानीमपि ॥१७॥ तर्हि किमित्यानीताऽहमित्याशङ्क्याह—चैद्येति । मम माम् ॥ १८ ॥ स्मयनुत्तये गर्वापनोदाय ॥ १९ ॥ न चान्यभजने मम दुःखं माशङ्किष्ठा इत्याह–उदासीना इति । गेहयोर्देहगेहयोरुदासीनाः अत एव ज्योतिः प्रदीपादि तद्वत् साक्षिमात्रतया क्रियारहिता आस्महे ॥ २० ॥

गूढार्थदीपिनी

अथ अतः । येन अनुरूपेण अमुत्र परलोके त्वम् आशिषो भोगान् लप्स्यसे ॥ १७ ॥ मम माम् शेषे षष्ठी । रुक्मी चापि द्वेष्टि । तस्य हतत्वाद्वर्तमानसामीप्ये लट् ॥ १८ ॥ दृप्तानां गर्वितानां स्मयनुत्तये गर्वनाशाय ॥ १९ ॥ गेहयोर्देहगेहयोरुदासीना अनासक्ता वयम् इत्यन्वयः । आत्मलब्ध्या आत्मानन्देन पूर्णा आस्महे वर्तामहे । ज्योतिः प्रदीपादि तद्वत्साक्षित्वेन अक्रिया क्रियारहिताश्च आस्महे वर्तामहे ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मम माम् ॥ १८ ॥ स्मयनुत्तये गर्वापनयनाय ॥ १९ ॥ गेहयोः एकः गेहशब्दो गृहवाचकः द्वितीयः गृहिणीवाचकः "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" इति वचनात् तत्रैकशेषे गेहयोः लौकिकगृहकलत्रयोरुदासीनाः ज्योतिरक्रियाः ज्योतिवत् चिन्तामणिवत् स्वार्थव्यापारवर्जिता परार्थे व्यापृयमानाः आस्महे वर्तामहे ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कोपेन छिन्ना नाशिका न हि शान्त्या प्ररोहेदितिवत्कृतस्य करणायोगादितिवच्च न नूतनं किञ्चिदुदञ्चयितुमुचितमित्यतः शक्यमेवंकर्तुमित्याह ॥ अथेति । आत्मनोऽनुरूपमुक्तगुणैः समं योग्यं क्षत्रियर्षभं भजस्व येनोढेनेहामुत्र च सत्या अर्थवतीराशिषोऽभिलाषान् लत्सते प्राप्नोषि ॥ २१ ॥ हे वरारोहे । तवाग्रजो रुक्मी चापि मां द्वेष्टि ॥ २२ ॥ इयन्निदर्शनमधुना त्वत्तो नन्दनन्दन तदभिनन्दनं कुत इति न गदैतदर्थमानीताऽसि मानिनि मयेत्याह ॥ तेषामिति । वीर्यमदान्धानां दृप्तानां तेषां

स्मयनुत्तयेऽनहङ्काराय स्वद्वाऽतिसम्यक् । असतां तेजोऽपहरता मयाऽऽनीताऽसि । भद्र इति पाठः सुभद्रः ॥ २३ ॥ सत्यस्मद्रीतिरियमित्याह ॥ उदासीना इति । नूनं वयमुदासीना **यथा** स्त्र्यपत्यार्थकामुका न । आत्मलब्ध्या स्वरूपलाभेनैव पूर्णा अस्महे । **क्रियाश्चात्मसदृशा** न ह्यस्माकमिति शेषः । क्रियाश्च निरन्तरं क्रियमाणा नद्वा बन्धनीया य आत्मानो जीवास्ते सदृशा योग्या यासां ताः **क्रिया** अस्माकमिति वा । प्रसिद्धं चोलूखबन्धादिकमिति भाव इति वा । आत्मासदृशा यासां ता इति विग्रहः । **उपसर्जनतया** न ङोप् । आर्षो वा । सदृश इति पाठे न कोऽपि दोषः ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तर्ह्यतः परं किं कर्तव्यमित्याकाङ्क्षायामाह । **अथेति** भिन्नप्रक्रमेण । पितृगृहे गत्वा पूर्ववत् कृत्वा आत्मनोऽनुरूपं **संसारैकप्रवणम्** । स्त्रियः संसारैकस्वभावा इति स्त्रीणां न मुक्तिरिति मर्यादा । स्त्री च भर्तृसायुज्यं प्राप्नोति । अतः समाने भर्तरि सर्वमेतदुपपद्यते, न विषम इति, अन्यथा स्त्रीनाशो भर्तृनाशो वा स्यात् । स को वा वरणीय इत्याकाङ्क्षायां बहिर्मुखं निर्दिशति **क्षत्रियर्षभमिति** । ते हि बहिर्मुखा एव । अन्यथा निर्दयाः परघातं न कुर्युः । क्षत्रियश्रेष्ठत्वात् न कोऽपि वाच्यतां मन्यते । तेषां जये अन्यसम्बन्धिन्योऽप्याह्रियन्त इति न दूषणमपि । आकाङ्क्षा तु तेषां वर्तत इत्युक्तमेव । ततः किं स्यादित्याशङ्क्याह **येनेति** । सत्या आशिषः, प्रवाहनित्या विषयाः, तैरेव सिध्यन्ति, न त्वन्यैः । ऐहिकामुष्मिकफलरागरहितस्तु मत्परायण इति न मत्सेवया सर्वजन्मस्वैहिकामुष्मिकफलसिद्धिः । अतः संसार्यैकस्वभावक्षत्रियर्षभवरणेनैव फलप्राप्तिरिति युक्तम् । त्वमिति मायारूपत्वमुक्तम् । कापट्यं तत्रैव सफलं भवति, न तु ब्रह्मणीत्यर्थः ॥ १७ ॥ नन्वेवं कर्तव्ये, सर्वज्ञेन त्वया किमित्थहमाहृतेति चेत्, तत्राह **चैद्येति** द्वाभ्याम् । तान् तेषां दोषं च निरूपयति । आद्यन्तौ शापवशात् द्वेषिणौ । मध्यमौ देवतान्तरोपासकौ बहिर्मुखाविति चत्वार उक्ताः । तेन शापात् वा स्वभावाद्वा ये अन्यपराः, ते द्विषन्तीति । येऽप्यन्ये तानप्येतादृशधर्मवतः आदिशब्देन परिगृह्णाति । **नृपा** इति तेषां सर्वथा अमारणे हेतुः । मम सम्बन्धिनोऽपि मां द्विषन्ति । किञ्च । त्वत्सम्बन्धिनोऽपीत्याह **रुक्मी चापीति** । तव मुख्यः सम्बन्धी ज्येष्ठभ्राता । चकारात्तत्सम्बन्धिनः । सम्बन्धविशेषस्योक्तत्वात् ते तवापरिहार्या इत्यपि सूचितम् । अतस्तेऽस्मदीयास्त्वदीयाश्चेति तेषां गर्वलक्षणसन्निपातनिवृत्त्यर्थं त्वमानीतेत्याह । **वामोर्विति** सम्बोधनाददुष्टत्वं च द्योतितम् । निवार्यं दोषमनुवदति **तेषां वीर्यमदान्धानामिति** । वीर्यमदेन अन्धानाम् । यथा अन्धः निकटे स्थितमपि गर्तं न जानाति, अपि तु पतत्येव, तथा ते वैष्णवानलेषु पतन्तः मया निवारिता इति भावः । किञ्च । **दृप्ताः** हृदयशून्या अपि । न वा प्रमाणम्, न वा विचारस्तेषामित्यर्थः । ताभ्यां जातो यः स्मयः तस्य नुत्तये आनीतेति समानयने हेत्वन्तरमिति, दोषाभावश्च पूर्वं प्रतिपादित इतीतरभजनं समर्थितं भवति । ननु तेषां गर्वाभावस्तत्पराजयेनैव सिद्धो भवतीति किं मदाहरणेनेत्याशङ्क्याह **तेजोऽपहृतय** इति । तेषां तेजोऽप्युपहर्तव्यम् । **उपहृतये** नाशाय वा । जयपराजयावव्यवस्थिताविति शास्त्रेण कदाचिज्जातेऽपि पराजये न यावज्जीवं ग्लानिं मन्यन्ते । सत्प्रतिभाः सन्तः पुनरायान्ति च । एवं कृते तु गततेजसो भवन्तीति न तेषां पुनरुद्गमः । तेजोहरणं दोषाय भविष्यतीत्याशङ्क्याह **असतामिति** । असतां तेजोनाशः युक्त एव ॥ १८-१९ ॥ एवं रुक्मिण्या उपयोगमुक्त्वा स्वार्थं सा स्थापनीयेति पक्षं वारयति **उदासीना** इति । नूनमिति नात्र सन्देहः युक्त्या कर्तव्यः । ईषणात्रयं पर्यवसितं स्त्रीपुत्रधनरूपम् । तदपेक्षायामन्तस्तन्निवार्यरोगे तदपेक्षा भवति । पूर्णानन्दस्य स्वस्मिन् दोषाभावात् **औदासीन्यमेव** । द्वेषाभावात् नापि त्याज्यम् । अतः स्वस्योपचयापचयाभावात् न **स्त्र्यपत्यार्थकामुकाः** । अत्र भगवत्सम्बन्धः नोभयेच्छाकृतः, किन्त्वन्यतरेच्छाकृत एव । कार्यमुभयेच्छाधीनमिति तदनुरोधे भगवतः सकाशात्तत्कार्यमुत्पद्यते । अननुरोधे तु नेति नावश्यकत्वं कार्यस्य । अनुरोधस्तु न नित्यः भिक्षुकेष्विव । अतोऽन्यत्र नित्यापेक्षिणो गमनमुचितम् । 'धर्मार्थकाममोक्षार्थं य इच्छे'दित्यादिवाक्यमपि पृथगेव दानं बोधयति, नतु क्रियायां भगवत्सम्बन्धम्, अन्यथा भगवांस्तद्दाता न भवेदेव, स्वस्य निर्बन्धसम्भवात् । अकामुकत्वे हेतुमाह **आत्मलब्ध्येति** । यद्यपि भगवति नायं हेतुः आत्मत्वात् अज्ञानादिव्यवधानाभावाच्च । 'आत्मलाभान्न परं विद्यते' इति श्रुतिरपि न फलस्य फलसम्बन्धं बोधयति । तथापि लौकिकोक्त्या सम्मतिप्रदर्शनार्थं तथोच्यते । यथा लब्धात्मानः न स्त्र्यादिकामुकाः, एवं वयमिति । वाच्यं त्वेतावत्**पूर्णा आस्मह** इति । सर्वदैव वयं पूर्णास्तिष्ठाम इत्यर्थः । नित्यप्राप्त एवात्मा हेतुत्वेनानूद्यत इति । ननु तथापि क्रीडार्थं समागतस्य क्रीडानिर्वाहार्थं कामना भवत्येवेति चेत्, तत्राह **गेहयोर्ज्योतिरक्रिया** इति । आविर्भूतमनाविर्भूतं वा तेजः स्वयं कार्ये न व्यापृतं भवति, किन्त्वाविर्भूतं केनचिन्निमित्तेन स्वसम्बन्धिनं प्रकाशयति । सम्बन्धिन एव च दोषं नाशयति, नतु स्वस्य काचिदपेक्षा । आविर्भूतमिति **गेहयोर्देह**गेहयोः । उभयमपि तुल्यमिति ख्यापयितुं समानशब्देन निर्देशः । ज्योतिरिव क्रियारहिताः ज्योतिरक्रियाः । अनेन तेजोवद्भगवदाविर्भाव इत्युक्तम् । अतः क्रिया विकारात्मिका नास्तीति नास्माकं काप्यपेक्षा । फलं च न नियतमिति फलापेक्षायामन्यानुसरणं कर्तव्यमिति सिद्धम् । २० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

उदासीना इत्यत्र । **दोषाभावा**दिति । कामाद्यभावादित्यर्थः । **गेहयो**रिति सप्तमी । देहे गेहे च ज्योतिरिव क्रियारहिता इत्यर्थः ।

श्रीसुबोधिनी–सारः

अथेदानीमपि आत्मनोऽनुरूपं तुल्यं राजोत्तमं भजस्व त्वं सेवय पत्यपमानिताया देवरादिष्वस्थानस्य याज्ञवल्क्यादिभिरुक्तत्वात् येन हेतुना सत्या आशिष इहामुत्र च लोकद्वये त्वं प्राप्स्यसि ॥ १७ ॥ तर्हि किमित्यानीतेति चेत्तत्राह । हे वामोरु ! चैद्यादयो भूपा नृपाः तवाग्रजो ज्येष्ठभ्राता रुक्मी चापि मम मह्यं द्विषंति ॥ १८ ॥ वीर्यमदाभ्यामंधानां दृप्तानां गर्वितानां तेषां स्मयनुत्तये गर्वापहारार्थं हे भद्रे असतां दुष्टानां तेजोपहरता मानं खंडयता मया नीतासि ॥ १९ ॥ वयमुदासीनाः नूनं निश्चयेन स्त्रीपुत्रधनलुब्धा न गेहयोर्देहगेहयोरक्रिया निर्वर्त्तितव्यापारा आत्मनो लब्ध्या प्राप्त्या पूर्णा आस्महे वर्त्तामहे ज्योतिः प्रदीपादिरिव साक्षिण इत्यर्थः । शुकोक्तिः ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ तस्मात् अस्मद्वरणस्य विफलत्वात् अधुनापि येन सेव्यमानेन इहास्मिन् लोके अमुत्र परलोके त्वं सत्याः सतीः स्वाभिलषिताः आशिषो विषयान् लप्स्यसे प्राप्स्यसे तमात्मनोऽनुरूपं स्वयोग्यं क्षत्रियश्रेष्ठमेव भजस्वेत्यर्थः । परलोकमनोरथाऽपि दानादिद्वारा धनाढ्यानामेव सिद्धयतीत्यमुत्रग्रहणम् ॥ १७ ॥ ननु 'तर्हि किमर्थमहं युष्माभिरानीतास्मि' इत्यपेक्षायामाह—चैद्येति द्वाभ्याम् । हे वामोरु ! तवाग्रजः ज्येष्ठो भ्राता रुक्मी, तथा चैद्यादयो नृपाश्चापि मम मां द्विषन्ति ॥ १८ ॥ अतो वीर्यमदेनान्धानां विवेकशून्यानां दृप्तानां गर्वितानां तेषां शिशुपालादीनां स्मयनुत्तये गर्वविनाशाय असतां दुष्टानां तेजोऽपहरता मया त्वमानीतासीति द्वयोरन्वयः ॥ १९ ॥ स्त्रीणामतिदुःसहमौदासीन्यमकामुकत्वं चात्मन्याह—उदासीना इति । नित्यं सर्वदा वयमुदासीनाः सर्वत्रासक्तिरहिताः, अत एव गेहयोर्देहगेहयोरपि ज्योतिरक्रियाः ज्योतिः प्रदीपादि तद्वत्साक्षिमात्रतया सर्वविक्रियारहिताः आस्महे वर्तामहे । अतो नूनं निश्चयेन न स्त्र्यपत्यार्थकामुकाः स्त्रीपुत्रधनेच्छारहिताः । तत्र हेतुमाह—आत्मलब्ध्या स्वात्मानन्दानुभवेनैव पूर्णा इति ॥ २० ॥

अन्वितार्थप्रकाशिका

अथेति ॥ अथ इदानीमपि येन सेव्यमानेन इहास्मिन् लोके अमुत्र परलोके च त्वं सत्याः स्वाभिलषिताः आशिषो विषयान् लप्स्यसे प्राप्स्यसे । तमात्मनोऽनुरूपं स्वयोग्यं क्षत्रियश्रेष्ठमेव भजस्व ॥ १७ ॥ तर्हि किमित्यहमानीता तत्राह—चैद्येति । हे वामोरु ! चैद्यशाल्वादयः नृपाः मम माम् । शेषे षष्ठी । द्विषन्ति तथा तवाग्रजो रुक्मी चापि मां द्वेष्टि तस्य हतत्वाद्वर्त्तमानसामीप्ये लट् ॥ १८ ॥ तेषामिति । हे भद्रे ! वीर्यमदेनान्धानां विवेकशून्यानां दृप्तानां गर्वितानां तेषां शिशुपालादीनां स्मयनुत्तये गर्वविनाशाय असतां दुष्टानां तेजोऽपहरता मया त्वमानीतासि । नतु कामुकतया उद्वोढुम् ॥ १९ ॥ स्त्रीणां दुःसहमौदासीन्यमकामुकत्वं चाह यद्वा न चान्यभजने मम दुःखलवोऽपीत्याह–उदासीना इति । वयमुदासीनाः सर्वत्रासक्तिरहिताः अत एव गेहयोर्देहगेहयोरपि देहशब्दसमानार्थतां गेहशब्दस्याश्रित्यैकशेषः । देहस्यापि जीवगेहत्वात् । ज्योतिरक्रियाः ज्योतिः प्रदीपादिस्तद्वत्साक्षिमात्रतया सर्वविक्रियारहिताः । यद्वा । देहगेहयोः उदासीना इत्यन्वयः । आत्मलब्ध्या स्वात्मानन्दानुभवेनैव पूर्णा आस्महे वर्तामहे । अतो नूनं निश्चयेन स्त्र्यपत्यार्थकामुकाः न स्त्रीपुत्रधनेच्छरहिताः स्मः ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथाधुनापीत्यर्थः ॥ १७ ॥ एवं तर्हि मामत्र कस्मादानीतवानिति चेत्तत्र हेतुवदामि चैद्येति द्वाभ्यां ॥१८॥ स्मयनुत्तये गर्वनाशाय ॥ १९ ॥ स्त्रीपुत्रादीन् विना पुरुषस्य कथं स्थितिरित्याशंकायामाह उदासीना इति । देहगेहयोः समानार्थत्वाद्गेहशब्दं प्रयुज्य गेहं च गेहं च गेहे तयोर्गेहयोरित्येकशेषः गेहयोर्देहगेहयोरित्यर्थः उदासीनाः अतः स्त्र्यादिकामुकानभवामः पुनश्च कथंभूताः मणिदीपादिज्योतिरिव अक्रियाः देहाद्यर्थं क्रियाश्रुत्याः आत्मलब्ध्या स्वलाभेन पूर्णावयमास्महे वर्त्तामहे ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथेति ॥ अथेदानीमपि, आत्मनः तव, अनुरूपं क्षत्रियर्षभं क्षत्रियश्रेष्ठं, भजस्व सेवस्व । येन सेव्यमानेन क्षत्रियर्षभेण-हेतुना, इह लोके, अमुत्र परलोके च, सत्याः सतीः, आशिषः कामान्, त्वं लप्स्यसे प्राप्स्यसे वै ॥ १७ ॥ तर्हि मां किमर्थमानीतवानसीत्यत आह ॥ चैद्येति ॥ हे वामोरु शोभनोरु, चैद्यश्च शाल्वश्च जरासंधश्च दन्तवक्रश्च ते आदयो येषां ते, नृपाः, तव अग्रजः रुक्मी चापि, मम मां, द्विषन्ति ॥१८॥ ततः किमत आह ॥ तेषामिति ॥ वीर्यमेव मदो वीर्यस्य वा मदस्तेनान्धा विवेकशून्यास्तेषां, दृप्तानां गर्वितानां, तेषां चैद्यादीनां, स्मयनुत्तये गर्वापाकरणाय, हे भद्रे, असतां खलानां, तेजसां कर्मणि षष्ठी । तेजांसीत्यर्थः । हरता मया, त्वं आनीता असि ॥ १९ ॥ स्त्रीणामतिदुःसहमौदासीन्यमकामुकत्वं च तदात्मन्यारोप्याह ॥ उदासीना इति ॥ वयं

ज्योतिरक्रियाः ज्योतिषा स्वात्मस्वरूपाखण्डस्फुरणेन हेतुना अक्रियाः निष्क्रियाः, प्राकृतचेष्टारहिताः, न स्त्र्यपत्यार्थकामुकाः दारैषणापुत्रैषणाधनैषणारहिताः, कुतः। यतः, आत्मलब्ध्या स्वात्मानुलाभेनैव, पूर्णाः। अत एव, गेहयोः कलत्रवेश्मनोः, नित्यं उदासीनाः, नूनमित्यपि पाठः। आस्महे वर्त्तामहे। गेहयोरित्यत्र गृहशब्दपर्यायो गेहशब्दस्ततोऽत्रायं कलत्रवेश्मोभयपरः। अत एव द्विवचनान्तत्वेन निर्दिष्टः। केचित्तु गेहयोर्देहगेहयोरुदासीना अत एव, ज्योतिरक्रियाः ज्योतिः प्रदीपादिस्तद्वत्साक्षिमात्रतया क्रियारहिता इत्याहुस्तत्पक्षे भगवतः केवलज्योतिः स्वरूपत्वं सच्चिदानन्दादिगुणवद्भगवद्विग्रहे देहदेहिविभागानर्हत्वतस्तत्र भगवत औदासीन्यायुक्तत्वं चायात्यतो यथोक्त एवार्थः साधुः ॥ २० ॥

कृष्णप्रिया

रानी ! अब भी कुछ बिगड़ा नहीं है। यदि आप चाहें तो अपने सदृश किसी क्षत्रिय वीर का वरण कर लीजिये। उसके माध्यम से आपकी इहलोक की और पारलौकिक सर्व कामनाएँ पूर्ण हो जायेंगी ॥ १७ ॥ हे वामोरु ! हे सुन्दरी ! आप अच्छी तरह से जानती हो हो कि चैद्य नरेश शिशुपाल-शाल्व-मागध-जरासन्ध-दन्तवक्त्र-आदि नरेश एवं आपका ज्येष्ठ भ्राता रुक्मी सभी मेरे साथ द्वेष करते हैं ॥ १८ ॥ हे भद्रे ! हे कल्याणी ! शिशुपाल प्रभृति सब नरपति वीर्यमद से अंधे हो गये थे, गर्विष्ठ हो रहे थे; उन उच्छृंखलों का मद-मान मर्दन करने के लिये ही मैं आपको उठा लाया था और कोई हेतु नहीं था ॥१९॥ देवी सुनिश्चित है कि हम उदासीन ही हैं। स्त्री-पुत्र और अर्थकामुक नहीं हैं। धनादि की प्राप्ति के लिये हम सर्वथा निष्क्रिय हैं। आत्मलाभ से हम पूर्णकाम हैं–कृतार्थ हैं। जैसे अपने निवासो में दीपज्योति के समान केवल द्रष्टामात्र हैं ॥ २० ॥

श्रीशुक[1] उवाच

एतावदुक्त्वा भगवानात्मानं वल्लभामिव। मन्यमानामविश्लेषात् तद्दर्पघ्न उपारमत् ॥ २१ ॥

इति [2]त्रिलोकेशपतेस्तदाऽऽत्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियम्।
आश्रुत्य भीता हृदि जातवेपथुश्चिन्तां दुरन्तां रुदती जगाम ह ॥ २२ ॥
पदा सुजातेन नखारुणश्रिया भुवं लिखन्त्यश्रुभिरञ्जनासितैः[3]।
आसिञ्चती कुङ्कुमरूषितौ स्तनौ तस्थावधोमुख्यतिदुःखरुद्धवाक् ॥ २३ ॥
तस्याः सुदुःखभयशोकविनष्टबुद्धेर्हस्ताच्छ्लथद्वलयतो व्यजनं पपात।
देहश्च विक्लवधियः सहसैव [4]मुह्यन् रम्भेव वायुविहता प्रविकीर्य केशान् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—भगवान्, अविश्लेषात्, आत्मानम्, वल्लभाम्, मन्यमानाम्, तद् दर्पघ्नः, इव, एतावत्, उक्त्वा, उपारमत् ॥ २१ ॥ इति, आत्मनः, प्रियस्य, त्रिलोकेशपतेः, अश्रुतपूर्वम्, अप्रियम्, आश्रुत्य, हृदि-जातवेपथुः, भीता, देवी, रुदती, दुरन्ताम्, चिन्ताम्, ह, जगाम ॥ २२ ॥ नखारुणश्रिया, सुजातेन, यदा, भुवम्, लिखन्ती, अञ्जनासितैः, अश्रुभिः, कुङ्कुमरूषितौ, स्तनौ, आसिञ्चती, अतिदुःखरुद्धवाक्, अधोमुखी, तस्थौ ॥ २३ ॥ तस्याः, सुदुःखभयशोकविनष्टबुद्धेः, श्लथद्‍वलयतः, हस्तात्, व्यजनम्, पपात, च, विक्लवधियः, सहसा, एव, मुह्यन्, देहः, पपात्, केशान्, विकीर्य, वायुविहता, रम्भा, इव, देवी, पपात ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अविश्लेषाद्धेतोः आत्मानमेव वल्लभामित्येवार्थे इवशब्दः ॥ २१–२२ ॥ चिंतालक्षणमाह। पदेति। नखैररुणा श्रीः कांतिर्यस्य तेन सुजातेन सुकोमलेन पदा ॥२३॥ सुदुःखमप्रियश्रवणात् भयं त्यागशंकया शोकोऽनुतापः तैर्विनष्टा बुद्धिर्यस्यास्तस्याः। श्लथंति पतन्ति वलयानि यस्माद्धस्तात्। देहश्च पपात विक्लवा अवशा धीर्यस्यास्तस्याः ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतावत् 'राजपुत्रीप्सिता–' इत्यारभ्य 'ज्योतिरक्रियाः' इत्यन्तवाक्यसन्दर्भम्। तद्दर्पघ्नो रुक्मिणीदर्पहरः। वल्लभाशब्दस्य परमप्रियभार्यायां रूढत्वस्वीकारेणाऽजहल्लिगत्वादात्मतुल्याधिकरणत्वेऽपि स्त्रीत्वम्। तस्या दर्पो वल्लभात्वाभिमानस्तद्घ्न इवेति नर्ममयत्वात्। तथा च वक्ष्यति—'हास्यप्रौढिमजानन्त्याः' इत्यादि। तथा च स्वयमेव वक्ष्यति—''त्वद्वचःश्रोतु-

---

१. बादरायणि–प्रा. पा, २. त्रिलोकाधि–वीर-। ३. रंजनाविलैः–वीर.। ४. बिभ्यद् विज.।

कामेन क्ष्वेल्याचरितमङ्गने" इति ॥ २१ ॥ इतीत्थम् । तत्पूर्वोक्तम् । 'तदा' इति वा पाठो ज्ञेयः । तत्र यदा हरिणेदृग्दुःखकरं वच उक्त्वोपरतं तदेत्यर्थः । दुरन्तामपाराम् । अस्या रासव्याख्यातः प्रेमजातिद्वये दाक्षिण्यमयप्रेमत्वान्मानस्य नोदयः, किन्तु परिहासतायाः स्फुटत्वेऽपि चिंताया एवोदय इत्याह–इतीति । इत्येतद्वचनम् । तदा सुखकेलिसमये । लोकेशानां ब्रह्मादीनामपि पालकस्येति तस्य सर्वपरिपालकतया परुषोक्त्ययोग्यता विशेषता च । आत्मनः स्वस्य प्रियस्य । स्वयं देवी सर्वासु प्रेयसीषु मुख्यतया । तथाप्यप्रियम्, किञ्चाश्रुतपूर्वमिति तया दुस्तर्काभिप्रायत्वं परमासह्यत्वं चाभिप्रेतम् । आ अतिनैकट्यादिना सम्यक् श्रुत्वा त्यागशंकया भीता । हृदीति कम्पस्यांतरतया भयस्य गौरवं सूचितम् । चिंतामनिष्टावाप्तिजन्यध्यानलक्षणाम् । दुरन्तां दीर्घां दारुणां वा । हेत्यव्ययमाचारातिक्रमे ॥ २२ ॥ लक्षणं चिह्नम् । रूषितौ लिप्तौ । 'रूष-संगे' धातुः ॥ २३ ॥ तस्याः रुक्मिण्याः । रंभा कदली "रंभा कदल्यप्सरसोर्ना वेणौ वारणांतरे" इति कोशात् । सुदुःखमप्रियश्रवणात्, भयं त्यागशंकया, शोकस्ताभ्यां तापः, तैर्विनष्टा बुद्धिर्यस्याः । अतः परिहासोऽयमिति विचारोऽनाभूदिति भावः । श्लथंतीति सहसैव विरहपीडोत्थादतिकार्श्याद्वलयानि पेतुरिति गम्यते । तत्र हेतुमाह–न च केवलं विचारो नष्टश्चेतना पीत्याह—विक्लवधियः, नष्टचेतनापीत्यर्थः । ततश्च मुह्यन्निति सहसैव नवम्यपि दशान्तः पपातेति । स्तंभादंतिमः प्रलयश्च सात्त्विकोऽभूदिति भावः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वल्लभाशब्दस्य परमप्रियभार्य्यायां रूढत्वस्वीकारेणाजहल्लिङ्गत्वादात्मतुल्याधिकरणत्वेपि स्त्रीत्वं तामिव मन्यमानामिति केवलमुत्प्रेक्षते वस्तुतस्तु उपतस्थे सुखासीनमित्याद्युक्तरीत्या दासीतुल्यत्वमेव स्थाप्यते ततश्च तस्या दर्पं सत्यभामादिवदहं प्रणयं प्रणयकोपं न व्यञ्जयामीत्ययमपि कदाचिन्नोदासिष्यत इत्येतमभिमानं सकौतुकं हन्तीति तद्दर्पघ्नः सन् उपारमत प्रणयस्य प्रणयकोपस्य च दर्शनप्रतीक्षया तूष्णीमासेत्यर्थः । तथा च वक्ष्यति श्रीमान् मुनीन्द्रः "हास्यप्रौढिमजानन्त्याः" इत्यादि तथा च स्वयमेव वक्ष्यति—

"त्वद्वचः श्रोतुकामेन क्ष्वेल्याचरितमङ्गने । मुखं च प्रेमसंरम्भस्फुरिताधरमीक्षितुम्" ॥ इति ।

तदिदन्तु पुरस्ताद्विस्तारयिष्यते ॥ २१ ॥ ततश्चास्या रासव्याख्यातः प्रेमजातिद्वये दाक्षिण्यमयप्रेमत्वात् मानस्य नोदयः किन्तु परिहासतायाः स्फुटत्वेपि चिन्ताया एवोदयः इत्याह—इतीति । इत्येतद्वचनं तदा तादृशसुखकेलिसमये त्रिलोकेशानां श्रीब्रह्मादीनामपि पालकस्येति तस्य सर्वपरिपालकतया परुषोक्त्ययोग्यताविशेषतश्चात्मनः स्वस्य प्रियस्य स्वयं देवी सर्वासु प्रेयसीषु मुख्यतमा तथाप्यप्रियं किञ्चाश्रुतपूर्वमिति तथा दुस्तर्क्याभिप्रायत्व परमासह्यत्वञ्चाभिप्रेतम् आ अतिनैकट्यादिना सम्यक् श्रुत्वा त्यागशङ्कया भीता हृदीति कम्पस्यान्तरतया भयस्य गौरवं सूचितं चिन्ताम् अनिष्टावाप्तिजन्यध्यानलक्षणां दुरन्तां दीर्घां दारुणां वा हेत्यव्ययमाचारातिक्रमे ॥ २२ ॥ सुजातेनेति । भूमिलिखनायोग्यतोक्ता तथापि तेन लिखन्तीति दुरन्तचिन्ता दर्शिता एवमञ्जनासितैरिति कुङ्कुमरूषिताविति च ज्ञेयम् आ सम्यक् सिञ्चन्तीत्यश्रूणां धारा सूचिता नखारुणश्रियेत्युपरिभागेपि तच्छविभिररुणायितत्वात् ॥ २३ ॥ ननु स्वभावतो महाकौतुकपर एव सः किञ्च पुत्रपौत्राद्युत्पत्त्यादिना कथमपि त्यागो न सम्भवेदिति कथं तया न विचारितं तत्राह तस्याः परमदाक्षिण्यमयप्रेमविख्यातायाः विनष्टबुद्धित्वाद्विचाराभावः श्लथद्वलयत इत्यनेन वलयान्यपि पतितानीति ज्ञेयं न च केवलं विचारो नष्टः चेतनापीत्याह—विक्लवधिय इति । अत एव मुह्यन् प्रकर्षेण विकीर्य्य केशानित्यनेन मोहस्य रम्भेति दृष्टान्तेन च पातस्यातिशयः सूचितः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इवेति वस्तुतः प्रेमभरस्वभावाद्दैन्योदयेनात्मनः प्रायो दासीत्वमननात् । तथा चाग्रे कुरुक्षेत्रयात्रायां श्रीद्रौपदीं प्रति तस्य एवोक्तौ (भा० १०।८३।८)—'तच्छ्रीनिकेतचरणोऽस्तु ममार्च्चनाय' इति । इवेत्यस्य परतोऽप्यन्वयः । मन्यमानामिव, वस्तुत उक्तन्यायेन तादृशमननस्याप्यभावात्तस्या दर्पो वल्लभाभिमानस्तद्घ्न इव, वस्तुतो दर्पाभावात् तस्याः, नर्म्मकेलिपरत्वाच्च तस्य; तथा च वक्ष्यति (२५ श०–श्लो०) 'हास्यप्रौढिम्' इत्यादि । तादृशोक्तौ हेतुः—भगवान् महाकौतुकीत्यर्थः । तथा च स्वयमेव वक्ष्यति (२९ श०–श्लो०)—'त्वद्वचः श्रोतुकामेन क्ष्वेल्याचरितम्' इति ॥ २१ ॥ इत्येवं तद्वचनम्, किंवा इत्येतत्तदा तादृशसुखकेलिसमये, त्रिलोकेशानां श्रीब्रह्मादीनामपि पत्युः पालकस्येति तस्य सर्व्वपरिपालकतयापकर्षोक्तियोग्यतोक्ता, विशेषतश्चात्मनः स्वस्य प्रियस्य तथाप्यप्रियम्; किञ्च, अश्रुतपूर्व्वमिति दुस्तर्काभिप्रायत्वं चाभिप्रेतम्,—पूर्व्वश्रुतत्वे सति चिरविचारादिना कथञ्चिदभिप्रायतर्कणसह्यत्वयोरपि सम्भवात् । 'आ' इति नैकट्यादिना सम्यक् श्रुत्वा त्यागशंकया भीता त्रिलोकेशपतित्वादेव परमस्वातन्त्र्येण तस्य सर्व्वसम्भवादिति भावः । हृदीति—आन्तरतया कम्पस्य भयस्य च गौरवं सूचितम् । चिन्तामनिष्टावाप्तिजन्यध्यानलक्षणां दुरन्तां दीर्घां दारुणां वा, यतो देवी श्रीभगवत्प्रियतमा, अनेन सह सदाक्रीडापरा वा, चिन्ताया अनुभावानाह । ह खेदे ॥ २२ ॥ पदा सुजातेनेत्यादि; आभ्यां विशेषणाभ्याम्, तेन भूमिलिखनायोग्यतोक्ता; तथापि तेन लिखन्तीति दुरन्तचिन्ता दर्शिता । एवमञ्जनासितैरिति कुंकुमरूषिताविति तथा ज्ञेयम् । आ सम्यक् सिञ्चतीति अश्रूणां

धारा द्योतिता ॥ २३ ॥ ननु स्वभावतः सदा महाकौतुकपर एव सः; किञ्च, पौत्राद्युत्पत्त्यादिना कथञ्चिदपि त्यागो न सम्भवेदेवेति कथं तया न विचारितम् ? तत्राह—सुदुःखेति । विनष्टबुद्धित्वाद्विचाराभावः, श्लथद्वलयत इत्यनेन बलयान्यपि पतितानीति ज्ञेयम् । न च केवलं विचारो विनष्टः, चेतना च विनष्टेत्याह—विक्लवधिय इति । अतएव मुह्यन्; प्रकर्षेण विकीर्य्य केशानिति मोहस्य, रम्भेति दृष्टान्तेन च पातस्यातिशयः सूचितः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

वल्लभां मन्यमानाम् अलं वल्लभीकृत्याभिमानवतीम् ॥ २१-३३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एतावदिति अविश्लेषाद्विश्लेषाभावाद्धेतोरात्मानमेव वल्लभामितरपत्न्यपेक्षया भगवतो निरतिशयप्रीतिविषयां मन्यमानां रुक्मिणीं तद्दर्पघ्न इव तस्या दर्पमपनेतुकाम इवेत्यर्थः । एतावदुक्त्वा उपारमत्तूष्णीमास इवशब्दस्य व्यवहितेनापि दर्पघ्न इत्यनेन सम्बन्धः स्वारस्यात् दर्पघ्न इवेत्यनेन वस्तुतस्तामुपचरन्तीमभिनन्दितुमुक्त्वेति सूच्यते ॥२१॥ ततः किमासीदित्यत्राह—इतीति । देवी रुक्मिणी आत्मनः स्वस्याः प्रियस्य त्रिलोकाधिपतेः तदश्रुतपूर्वं कदाप्यश्रुतमित्येवम्विधमप्रियं वच आकर्ण्य भीता त्यागसम्भावनाभीता अत एव हृदि जातवेपथुः सञ्जातकम्पा रुदती चापारां चिन्तामवाप यद्यप्यभिप्रायान्तरेणैव प्रयुक्तानि वचांसि यद्यपि च साक्षाल्लक्ष्म्यवतारभूता सापि तदभिप्रायं जानात्येव तथापि किमयं रामावतार इवात्रापि केनापि व्याजेन मां जिहासति किम्वाभिनन्दतीत्येवं पूर्वकोटिसम्भावनामात्रेणैव जातवेपथुः रुदती च चिन्तामवापेतितात्पर्य्यम् ॥ २२ ॥ चिन्तालक्षणमाह—पदेति । नखैररुणा श्रीः कान्तिर्यस्य तेन सुकोमलेन पादेन वामपादाङ्गुष्ठेन भुवं लिखन्ती अञ्जनेनाविलैर्व्याप्तैरश्रुभिश्चन्दनचर्चितौ स्तनौ सिञ्चती दुःखेन रुद्धा वाग्यस्याः सा अधोमुखी चावतस्थे ॥ २३ ॥ तस्या इति । सुदुःखमप्रियश्रवणजन्यं भयं त्यागसम्भावनाजन्यं शोकश्च तैर्विनष्टा स्फुरणरहिता बुद्धिर्यस्यास्तस्याः रुक्मिण्याः श्लथन्ति तात्कालिकदुःखप्रभवकार्श्येन भ्रश्यन्ति बलयानि यस्मात् तस्माद्धस्ताद्व्यजनं पपात भूमावितिशेषः । तथा विक्लवा अधृष्टा धीर्यस्यास्तस्या हेतुगर्भमिदं तत्त्वात् तस्या देहः मुह्यन् मोहं प्राप्नुवन् केशान् विकीर्य्य पपात केशपाशविश्लथपूर्वकं पपातेत्यर्थः । यथा वातेन चण्डमारुतेन विहता रम्भा कदली पतति तद्वत् ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अविश्लेषान्निरन्तरसाहित्येन स्थितेरात्मनं वल्लभामिव मन्वानाम्प्रियतमाम् ॥ २१ ॥ यदा हरिणैतादृशं दुःखकरं वचनमुक्त्वोपरतं तदा देवी आत्मनः प्रियस्य त्रिलोकेशपतेरश्रुतपूर्वमप्रियं वचनमाश्रुत्यदुरन्ताञ्चिन्ताञ्जगाम प्रत्ययारम्भे प्रतिवचनोपक्रमेद्वौ इति वचनात् इति वचनोपक्रमभीता अत एव हृदि जातवेपथुः उत्पन्नकम्पा तल्लक्षणमाह—रुदतीति ॥ २२ ॥ एतदेव विवृणोति—पदेति । रक्तनखप्रभया अरुणा श्रीर्यस्य स तथा तेन कोमलेन पदा भुवं लिखन्ती अञ्जनासितैः कृष्णैः अश्रुभिः कुङ्कुमरूषितौ स्तनौ आसिञ्चन्ती अधोमुखी भूत्वा तस्थावित्यन्वयः ॥ २३ ॥ सुखदुःखादिभिर्विनष्टा इदङ्कर्तव्यमित्यपश्यन्ती बुद्धिर्यस्याः सा तथा श्लथद्विगलद्वलया यस्य स तथा तस्मात् केशान् प्रविकीर्य देहश्च पपात कीदृशः बिभ्यत्सञ्चलन् कम्पमान इत्यर्थः । रम्भा कदली ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भः

वल्लभाशब्दस्य परमप्रियभार्यायां रूढत्वस्वीकारेणाजहल्लिङ्गत्वादात्मातुल्याधिकरणत्वेऽपि स्त्रीत्वं तदानीमपि क्रोधांशानभिव्यक्तौ सकौतुकतदुद्भावनाय तमारोपयति ॥ २१-३० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एतावदित्यादि । आत्मानं वल्लभां मन्यमानां तद्दर्पघ्न इव एतावदुक्त्वा विरराम । अयं भावेनैषा सर्वासां मध्येऽहमेव वल्लभेति गर्ववती । नाप्ययं तद्दर्पघ्नः, अपि त्वविश्लेषाद्धेतोस्तया सह तस्य विश्लेषाभावाद् विप्रलम्भसुखानुभावो नास्ति, विप्रलम्भो रसनीयो न भवतीत्यस्य चानेकविधत्वे साक्षाद्विप्रलम्भरूपं प्रणयकोपमुद्भावयितुं सपरिहासमेवाह ननु वास्तवम् तेनात्मानं वल्लभां मन्यमानां स्त्रियं यथा तद्दर्पघ्नः पुरुषोऽतिपरुषं वदति, तथायमपि परिहासेनोक्तवान् । इव-शब्द उभयत्र सम्बध्यते । न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते' इति न्यायात् विप्रलम्भार्थमयमुद्यमः । वक्ष्यति च (२९ श्लो०) "त्वद्वचः श्रोतुकामेन" इत्यादि ॥ २१ ॥ इतीत्यादि । त्रिलोकेशपतेरपि सैवात्मा यस्य स तथा तस्य, तदात्मनः प्रियस्य प्रेयसः, न तु भर्त्तुरेव । अश्रुतपूर्वं तस्मिन्नेव दिने तच्छ्रुतमित्यर्थः ॥२३॥ तस्या इत्यादि । श्लथद्वलयत इति तत्कालकार्श्यं ध्वनितम् । न केवलं व्यजनं पपात, अपि तु देहश्च निपपात, नितरां पपातेत्यर्थः । व्यजनं पपात, देहो निपपातेत्युपसर्गकृतो विशेषः । केव ? वातविहता रम्भेव । सा यथा स्वयं नोत्तिष्ठति तथा । प्रविकीर्य केशानिति पतनात् पूर्वमेव केशाः स्रस्ता इत्यर्थः ॥ २४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एतावदित्यादि । आत्मानं वल्लभां मन्यमानां तद्दर्पघ्न इव एतावदुक्त्वा उपारमद् विरराम । अयमर्थः—न सा अहमेव सर्वासां मध्ये वल्लभेति गर्ववती, नाप्ययं तस्यास्तं दर्पं हन्तुं परुषमवदत्, अपि तु अविश्लेषात् हेतोस्तया सह तस्य विश्लेषो नास्ति, तेन 'न विना विप्रलम्भेन सम्भोगः तुष्टिमश्नुते' इति न्यायात् विप्रलम्भमेतमुद्भावयितुं कृत्रिमकर्कशमुक्तवानित्यर्थः । विप्रलम्भस्य पञ्चप्रकारत्वात् साक्षादपि ईर्ष्याख्यः स्वानन्दे विप्रलम्भः सम्भवतीति ॥२१॥ इतीत्यादि । त्रिलोकेशपतेरपि सैवात्मा यस्य स तदात्मा तस्य तदात्मनः, प्रियस्य न तु भर्त्तुः । अश्रुतपूर्वं तस्मिन्नेव दिने श्रुतम् ॥ २२–२३ ॥ तस्या इत्यादि । श्लथद्वलयतो हस्ताद्व्यजनं पपात, वलयैः सह पपातेत्यर्थः । न केवलं व्यजनं पपात, तद्देहश्च ॥ २४–२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वल्लभामिवेति सर्ववल्लभासु श्रेष्ठामपि तां परमानुरागोत्थस्वयोग्यत्वमननेनैव आत्मानं वल्लभामिव मन्यमानामेतावदुक्त्वा अविश्लेषाद्धेतोरिति भार्य्यात्वायोग्यामपि मामयं स्वगुणेनैव सुभगां भार्याङ्करोति तदहमेतावदद्भुतगुणार्णवभर्तृकैवास्मीति यो दर्पस्तं हन्तीति सः वल्लभाशब्दस्य परमप्रियभार्य्यावाचित्वेनोद्देश्यविधेयभावेनान्वयात् न पुंस्त्वं वल्लभाशब्दस्य परमप्रियभार्य्यायां रूढत्वस्वीकारेणाजहल्लिङ्गत्वादात्मतुल्याधिकरणत्वेऽपि स्त्रीत्वं तस्या दर्पो वल्लभात्वाभिमानः तद्घ्न इति नर्म्ममयत्वात् तथाच वक्ष्यति "हास्यप्रौढिमजानन्त्याः' इत्यादि तथाच स्वयमेव वक्ष्यति त्वद्वचः श्रोतुकामेन क्ष्वेल्या चरितमिति इति वैष्णवतोषिणी ॥ २१–२२ ॥ चिन्तालक्षणमेवाह–पदेति । नखैररुणा श्रीः कान्तिर्यस्य तेन सुजातेन सुकोमलेन ॥ २३ ॥ सुदुःखमाप्रयश्रवणात् भयत्यागशङ्कया शोकस्ताभ्यामनुतापः तैर्विनष्टा बुद्धिर्यस्याः अतः परिहासोऽयमिति विचारो नोदभूदितिभावः । श्लथन्ति वलयानि यस्माद्धस्तादिति सहसैव विरहपीडोत्थादतिकार्श्याद्वलयान्यपि पेतुरिति गम्यते तदनन्तरं देहश्च पपात तत्र हेतुः विक्लवधियः इति बुद्धेर्नाशस्यापि प्रागुक्तेर्विनष्टचेतनाया इत्यर्थः । ततश्च मुह्यन्निति सहसैव नवम्यपि दशा अतः पपापेति स्तम्भाद्यन्तिमः प्रलयश्च सात्विकोऽभूदिति भावः ॥ २४ ॥

गूढार्थदीपिनी

अत्रेवशब्द एवार्थे । अविश्लेषाद्धेतोः वल्लभामात्मानमेव मन्यमानाम् । उपारमत् तूष्णीमभूत् ॥ २१ ॥ देवी रुक्मिणी इति प्रियतमस्य तत्पूर्वोक्तमप्रियं वच आश्रुत्य भीता अत एव रुदती सती दुरन्तामपारां चिन्तां जगामेत्यन्वयः । हेति दुःखे । जातवेपथु उत्पन्नकम्पा ॥ २२ ॥ नखैररुणा श्रीः कान्तिर्यस्य तेन सुजातेन कोमलेन यदा भुवं लिखन्ती अञ्जनेन असितैः श्यामैः अश्रुभिः स्तनौ आसिञ्चती तस्थौ रूषितौ लिप्तौ ॥ २३ ॥ तस्या हस्तात् व्यजनं तथा तस्या देहोऽपि मुह्यन् मूर्च्छां प्राप्नुवन् कदलीव सहसा पपातेत्यन्वयः । वियोगकार्श्येन श्लथन्ति पतन्ति वलयानि यस्मात् । विक्लवा व्याकुला अधीरा ॥ २४ ॥

श्रीमच्छुकदेवकृता सिद्धान्तप्रदीपः

वल्लभामिवेति भौमगृहादानीतः सर्वाः वल्लभा एव वत्यभामाद्याः वल्लभासु श्रेष्ठाः इयं तु न वल्लभा नाऽपि वल्लभासु श्रेष्ठा । अपि तु "कृष्णात्मिका जगत्कर्त्री मूलप्रकृतिरुक्मिणी" इत्यादिश्रुतेः साक्षान्महालक्ष्मीः वल्लभासु श्रेष्ठास्तास्वपि श्रेष्ठा एवम्भूतामपि तां अविश्लेषात् हेतोः वल्लभामिव सर्वासु निकृष्टामिव मन्यमानाम् एतावदुक्त्वा तद्दर्पघ्नः तत्प्रसिद्धं प्रेष्ठं न्यमंसत स्वस्वमिति वक्ष्यमाणं तासां दर्पं हन्ति सः उपारमत् तद्दर्पनाशर्थं स्वमुखेनैव रुक्मिण्याः सर्वश्रेष्ठां वक्तुन्तन्मुखबचनश्रवणार्थं च हास्यवाक्यमुदाहृत्य तूष्णीं बभूवेत्यर्थः । न त्वादृशीं प्रणयनीं गृहिणीं गृहेषु पश्यामीति वक्ष्यति च तच्छब्देन रुक्मिणीपरामर्शस्तु नैव साधुः अस्मिन् ग्रन्थे ग्रन्थान्तरे च तस्याः दर्पगन्धस्पर्शस्याप्यदर्शनात् अन्यासामपि भगवत्प्रियाणां दर्पाभासः भगवल्लीला सौन्दर्यार्थः ॥ २१ ॥ भीता त्यागशङ्कया ॥ २२ ॥ चिन्तायुक्ताया दशामाह—वदेति । नखैररुणा श्रीः कान्तिर्यस्य तेन कोमलेन ॥ २३ ॥ सदुःखेनाप्रियश्रवणजेन भयेन त्यागशङ्कोद्भवेन शोकेन किं भविष्यतीत्यनुतापेन च विनष्टा विमोहिता बुद्धिर्यस्यास्तस्याः श्लथन्ति अतिदुःखभयशोककातर्येण पतन्ति वलयानि यस्मात् तस्मात् व्यजनं पपात तथा विक्लवा अवशा धीर्यस्यास्तस्याः देहः मुह्यन् मोहमुद्वहन् पपात ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आत्मानं वल्लभामतिप्रियामिव मन्यमानमिवैवेति वा । तत्र हेतुरविश्लेषान्नित्यसम्बन्धादिति । एतावदुक्त्वा तद्दर्पघ्न उपारमत् । उपोपपादकत्वात्परस्मैपदता । लोकापेक्षया तद्दर्पघ्न इव सन्नुपारमत्समापयास ॥ २५ ॥ जगन्नाटकमनु जगन्नाटकीदमाटीकतेत्याह ॥ इतीति । त्रिलोकेशानां पतिस्तस्यात्मनः प्रियस्याश्रुतपूर्वं कदाऽप्यश्रुतमश्रुतपूर्वमिति वचनं स्वस्याप्रियं देव्याश्रुत्य भीता । हृदि जातवेपथुरुत्पन्नकम्पा रुदती चिन्तां दुरन्तां जगाम । तत्तद्वै धनुरित्यादिभागवततात्पर्यतोऽयमिवार्थ-

स्तच्छब्दः । वस्तुतो न जगामेत्यर्थः । ह शोके । चिन्तौ चिन्ताचर्यामाह ॥ पदेति । **नखैररुणा श्रीर्यस्य** तेन सुजातेन कोमलेन भुवं लिखन्ती चिन्तातान्तकान्ता स्वभावोऽयं सन्नपि त्वद्रूपसत्यभामापक्षपातवान्नाथ एवं ततानेति तामदोदरदिति भावसूचक इति **ज्ञेयम्** । अञ्जनं कज्जलं तेनासितैर्नीलैरश्रुभिर्नयनतोयैः कुङ्कुमरूषितौ स्तनौ आसिञ्चती । अतिदुःखेन **रुद्धा** वाग्वचनं यस्याः सा । अधोमुखी सती तस्थौ ॥ २७ ॥ सुदुःखमुत्तरत्र त्यक्ष्यति किञ्चेति भयं शोको बहिः प्रदर्शितः । एतेतौ **विनष्टा बुद्धिर्यस्याः** सा कर्तव्यमूढेति यावत् । तस्याः श्लथन्ति गलन्ति वलयानि **यस्मात्तस्माद्धस्ताद्व्यजनं** पपात । कार्श्यं तत्क्षणत एव जातं **निष्प्राणता** चेति क्रमाद्धेतू । विव्हलधियो **बिभ्यद्देहश्च** वातविहता रम्भेव कदलीव केशान्प्रविकीर्य पपात । केशप्रकिरणेन यदि त्वं **नाथ कृष्ण** श्रीहरिकृष्णकेशस्तर्हि नाहं तव पत्नी न चैवमिति भावं ध्वनयामासेति ज्ञेयम् ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

निःसम्बन्धं निरूप्य भगवान् निवृत्त इत्याह **एतावदुक्त्वे**ति । इदमेव वाचा तिरोधानम् । तिरोधाने निमित्तमाह **आत्मानं वल्लभामि**वेति । तत्रापि हेतुः **अविश्लेषात्** । यथा चैद्यादीनां दर्पहननार्थं एषा समानीता, एवमेतस्या अपि दर्पनिराकरणार्थं सम्बन्धनिराकरणं दर्पहेतुना सह सम्बन्धे विद्यमाने स्मयाभावो न भवतीति अनेनैव भविष्यतीति ज्ञात्वा कृतवानिति ज्ञापयति। **वल्लभा** भगवतोऽत्यन्तं प्रिया । प्रीतिविषयत्वादपेक्षिता इवेति । बहुस्त्रीकत्वात्कार्यस्यान्यथापि सिद्धेः । एकमार्यस्य यथा सा वल्लभा भवति, तथा सा मन्यते, अन्यथा अविश्लेषो हेतुर्न स्यात् । अथवा । अज्ञानेन भगवन्तं भजतीति प्रबोधार्थं भगवानेवं वदतीति ज्ञापयितुं दृष्टान्तमाह **आत्मानं वल्लभामिवे**ति । भगवन्तं स्त्रियमिव मन्यते, 'यथा स्त्रिया सम्परिष्वक्तो न बाह्यं कञ्चन वेदे'ति सुषुप्त्युपाख्याने 'शारीर आत्मा प्राज्ञेनात्मना सम्परिष्वक्त' इति निरूपितम् । 'सुषुप्त्युत्क्रान्त्योर्भेदेने'त्यत्र विवृतम् । तस्य यथा प्रबोधः कार्यते, एवमस्या अपीति । **अर्धवल्लभां** वा आत्मानं मन्यत इति वेति । **उपारमत्** वाक्यात् कायिकमानसव्यापाराच्च ॥ २१ ॥ ततो यज्जातं तदाह **इतीति** त्रिभिः । सम्यक् ज्ञानवत्याः किञ्चिज्ज्ञानवत्याः मूर्छितायाश्च अवस्थाः क्रमेणोच्यन्ते । यतस्त्रिगुणा हि सा । अतः सत्त्वादितमोन्ता अवस्था वर्णिताः । प्रत्येकं गुणानां त्रैविध्यमिति त्रितयं त्रितयं निरूप्यते । तत्र प्रथमं सत्त्वे कार्यत्रयमाह । **इति** पूर्वोक्तप्रकारेण निःसम्बन्धप्रतिपादकं वाच्य**माश्रुत्य** प्रथमं भीता, जाता, त्यक्ष्यतीति । ततो हृदये वेपथुः कम्पोऽपि जातः । दुरन्ता चिन्तापि । चिन्ता सात्त्विकी, भयं तामसम् । त्रिलोक्याः ईशः, पतिश्च स्वस्यापि, लौकिकवैदिकोत्कृष्टसम्बन्धौ निरूपितौ । **तदे**ति । तस्यामवस्थायाम् । **तदि**ति वा प्रसिद्धं सर्वजनीनम् । अतः सत्यमपि कुर्यात् । केवलं लोकतो वेदतश्चैव सम्बन्ध इति न, किन्तु स्वस्यापि रोचत इत्याह **प्रियस्ये**ति । ननु परिहासवचनमेतद्भविष्यतीति कथं भयमिति चेत्, तत्राह **देवी**ति । देवतारूपा सा, सत्यमेव भगवान् वदतीति ज्ञातवती । तर्ह्यभिप्रायं ज्ञात्वा दर्पं परित्यज्य कथं न प्रपन्नेत्याशङ्क्याह **अश्रुतपूर्व**मिति । दर्पः सर्वदैव जायते, वाक्यं तु न कदाचिदप्येवं श्रुतम् । तदप्यासमन्तात् श्रुत्वा अभिप्रायतोऽर्थतश्च । अतः प्रथमतो भयं मनसि जातम् । हृदयस्थाने कम्पोऽपि जातः, इदं कायिकमिव बुद्धेः । अहङ्कारस्तु निवर्तनीय एव । चिन्ता चेतसः । **रुदती**ति रोदनमिन्द्रियाणाम्, अहङ्कारः तद्रूपेण निर्गत इति ज्ञापनार्थः । हेत्याश्चर्यम् । कथं वाक्यमात्रेणैतामवस्थां प्राप्तवतीति । आन्तरमेतन्निरूपितम् । बाह्यं निरूपयति **पदा सुजातेने**ति । **सुजातेना**तिकोमलेन लक्षणयुक्तेन वा । तेन लक्षणानामुत्पादकस्य वा दोषमापादयन्ती तथा कृतवती । अथवा । उत्कृष्टत्वाच्चरणस्य नैवमनिष्टं भविष्यतीति ज्ञापनार्थं तथोच्यते । **नखारुणश्रिये**ति । नखेषु नखैः कृत्वा वा अरुणा श्रीर्यस्येति । अनेन नखानां मणिरूपत्वमुक्तम् । अयं सात्त्विक उत्कर्षः । सहजागन्तुकोत्कर्षयुक्तेन पदा भुवं लिखन्ती । चिन्ताकुलितायास्तथैव व्यापार इति भूमिं लिखन्तीति। भूम्यां किञ्चिल्लेखनं निषिद्धम्, भूमिं भित्त्वान्तःप्रवेक्ष्यामीति भावेन तथा लेखनम् । इयं हि लौकिकी भाषा, लौकिकभावनिराकरणार्थमेव भगवता तथोक्तमिति यः कश्चन भावः परमोत्कर्षं प्राप्तः फलपर्यवसायी भवतीति ज्ञापनार्थं तथोच्यते। अतस्तस्याः कायिकव्यापारो निरूपितः । मानसमाह । **अश्रुभिः कुङ्कुमरूषितौ** स्तनावासिञ्चती । मनस्यतिशोकान्निरोत्पन्नान्यश्रूणि अञ्जनमपि भित्त्वा निर्गच्छतीति तस्या अतिरिक्तः सर्वोऽपि वर्णस्तैरपनीत इति सूच्यते । कुङ्कुमं कज्जलं च उभयमपहृतमिति । अधोमुखीति च मानसमेव । अतिदुःखेन रुद्धा वागिति वाचो निवृत्तिः । उभयोरल्पो व्यापारः । वाक् तु निवृत्तैवेति। बाह्याभ्यन्तरामवस्थामुक्त्वा देहस्य पातमाह **तस्या** इति । आद्येन मानसपातश्च । तस्या देहः पपात । देहधारिका बुद्धिः प्रयत्नद्वारा । सा तु त्रिभिर्नष्टेति सुदुःखभयशोका निरूपिताः । **सुदुःखं** पुरुषोत्तमलक्षणविषयाभावात् आनन्दरूपस्य भगवतस्तिरोभावाद्वा । **भयं** भगवानन्येभ्यो दास्यतीति । **शोकः** स्वस्य सर्वनाशात् । त्रिदोषेण बुद्धिनाशः । स स्वकीयं प्रयत्नाभावमपि करोतीत्याह **हस्तात् श्लथद्वलयतो व्यजनं पपाते**ति । कृशत्वात् श्लथद्वलयत्वम् । आदौ धर्मनाशः, पश्चाद्धर्मिण इति । क्रमेण ह्रास इति नालौकिकप्रकारेण तस्याः पातः । व्यजनं वीज्यमानं धारकप्रयत्ननाशात् पपात । अनेन स्थूलः प्रयत्नो नष्ट इत्युक्तम्। सूक्ष्मोऽपि नष्टः येन प्राणो धार्यत इत्याह **देहश्चे**ति । देहश्च पपात । चकारात्तत्सम्बन्धीन्याभरणादीन्यपि । इतोऽपि सूक्ष्मः कारणप्राणधारकोऽवशिष्यते । तस्मिन्निवृत्ते सर्वनाशो भविष्यतीति भगवत एतावद्दूरं परीक्षा । लौकिक्याः पुनर्जीवनमलौकिकं न युक्तमिति ततः पूर्वमेव प्रतीकारं करिष्यति । सूक्ष्मा धारिका बुद्धिः स्वप्नेऽपि तिष्ठतीति कथं देहपात इति चेत्, तत्राह **विक्लव-**

धिय इति । सूक्ष्मापि बुद्धिर्वैक्लव्यं प्राप्तवती । विचारेण तदपनोदाभावमाह **सहसैव मुह्य**दिति । 'मुग्धेऽर्धसम्पत्ति'रिति न्यायेन अर्धं मृता । केवलमासन्यस्तिष्ठति । अत एव पतिता, न मृता । पतनादपि भयं भवतीति भयेन प्रयत्नाभिव्यक्तिमाशङ्क्य तन्निषेधार्थमाह **रम्भेव वदातविहते**ति । वाय्वाघातेन यथा कदली भग्ना पतति, सर्वथा प्रयत्नरहिता स्वतोऽपि कोमला । **प्रविकीर्य केशा**निति रम्भातुल्यत्वं निरूपितम् । अथवा । मूर्च्छासमये शिरोभ्रमणं जातमिति केशग्रन्थिविस्रंसनात् केसविकीर्णता जाता । केशा वेण्याकारेण न बद्धाः ॥ २४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

एतावदुक्त्वेत्यत्र । दर्पहेतुनेति । चैद्यादीनां दर्पे हेतुर्मायात्वादियम् । तथा च तेषां दर्पहेतुना तया सह भगवतः सम्बन्धे तेषां स्मयनुत्तिर्न भवति, किन्त्वधिकः स्मयो भवेदित्यर्थः । दर्पहेतुर्भगवत्सम्बन्धः प्रबलः सन्नधिकं दर्पं जनयेदिति भावः । **अनेने**ति । सम्बन्धनिराकरणेनेत्यर्थः । **कृतवा**निति । सम्बन्धनिराकरणमिति पूर्वमन्वयः । लौकिकसम्बन्धे भार्यां प्रति स्वयमेवान्यभजनं नोपदिशेदिति भावः । **तस्याः सुदुःखे**त्यत्र । **लौकिक्याः पुनर्जीवन**मिति । उत्तरार्धे लोकधर्मपुरस्कारेण लीलाकरणात्तादृशलीलासम्बन्धिन्या अलौकिकप्रकारेण जीवन न युक्तम् । पूर्वार्धे अलौकिकभावेन लीलाकरणात्तत्र ब्रजस्थानां जीवनमलौकिकं सम्पादितवानिति द्वादशाध्याये तथैव निरूपितमिति भावः ।

श्रीसुबोधिनी–सारः

अहमेवास्य वल्लभा इत्यात्मानं वल्लभामिव एवार्थे मन्यमानां रुक्मिणीविश्लेषात्सदैकत्र वासात् हेतोः एतावदुक्त्वा तस्या दर्पं गर्वं सौभाग्यमदं हंतीति हरिः तूष्णीं बभूव ॥ २१ ॥ आत्मनः प्रियस्य भर्त्तुः त्रिलोकस्येशानां पतेस्तस्य इत्येवमश्रुतपूर्वं नवीनमप्रियं वच आश्रुत्य श्रुत्वा भीता हृदि जातो वेपथुः कंपो यस्याः सा देवी रुक्मिणी रुदती दुरंतां दुष्पारामनंतां चिंतां जगाम प्राप ॥ २२ ॥ तल्लक्षणमाह नखैररुणा श्रीः कांतिर्यस्य तेन सुजातेनातिमृदुना पदा चरणेन भुवं लिखंती पृथिवीं चित्रयन्ती अंजनेन कज्जलादिनाऽसितैः कृष्णै रश्रुभिः कुंकुमेन रूषितौ लिप्तौ स्तनौ आसिंचती अधोमुखी अतिदुःखेन रुद्धा वाक् वाणी यस्याः सा तस्थौ ॥ २३ ॥ सुदुःखमप्रियभाषणात् भयं त्यागशंकातः शोकोऽनुतापः तैर्विनष्टा बुद्धिर्यस्य विक्लवा मोहं गता धीर्यस्यास्तस्या रुक्मिण्याः श्लथंति पतंति वलयानि यस्मात्तस्माद्धस्तात् व्यजनं पपात केशान् प्रविकीर्य विक्षिप्य देहश्चापि सहसाऽकस्मान्मुह्यन् विचेताः पपात वायुना विहता त्रुटिता रंभा कदलीव ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवमुक्तेः प्रयोजनमाह—एतावदिति । अविश्लेषाद्धेतोरात्मानं वल्लभामितरपत्न्यपेक्षाया भगवतो निरतिशयप्रीतिविषयां मत्वा गर्विता रुक्मिणीं तद्दर्पघ्नः तस्या गर्वमपनेतुकामो भगवानेतावदुक्त्वा उपारमत् तूष्णीं बभूवेत्यर्थः ॥ २१ ॥ ततः किं वृत्तं तदाह—इतीति । त्रिलोकेशा ब्रह्मादयः, तेषामधिपतेः पालकस्य आत्मनः प्रियस्य भर्तुरित्येवंभूतमप्रियं वचनमाश्रुत्य त्यागसंभावनया भीता अत एव हृदि जातो वेपथुः कम्पो यस्याः सा अत एव रुदती देवी रुक्मिणी तदा दुरन्तां अपारां चिन्तां जगामेत्यन्वयः । भगवल्लीलाया आश्चर्यं सूचयति—हेति । 'अप्रियेणापि परिहासवचनेन कथमेवं भयं संभवति' इत्यपेक्षायामाह—अश्रुतपूर्वमिति । अश्रुतपूर्वत्वात्तद्यथार्थमेव मत्वा भीता जातेति भावः ॥ २२ ॥ चिन्तालक्षणमाह—पदेति । नखैररुणा श्रीः कान्तिर्यस्य तेन सुजातेन कमलवत्सुकोमलेन पदा वामपादाङ्गुष्ठेन भुवं लिखन्ती निखननेन स्वप्रवेशार्थं विवरं संपादयन्तीव, तथा अञ्जनेन असितैः श्यामैरश्रुभिः कुङ्कुमभूषितौ स्तनावासिञ्चती, तथा दुःखेन रुद्धा वाग्यस्याः सा रुक्मिणी अधोमुखी सत्यवतस्थे ॥ २३ ॥ तस्या रुक्मिण्या हस्ताद्व्यजनं पपातेत्यन्वयः । तत्र हेतुमाह—अप्रियश्रवणजन्यं सुदुःखम्, त्यागसंभावनाजन्यं भयं च, शोकश्चाग्रे कथं निर्वाह इत्यनुतापात्मकः, तैर्विनष्टा अनुसन्धानरहिता बुद्धिर्यस्यास्तस्या इति । दुःखातिरेकमेव सूचयन् हस्तं विशिनष्टि—श्लथन्ति तात्कालिकदुःखभवकार्श्येन भ्रश्यन्ति वलयानि यस्मात् तस्मादिति । तथा तस्या देहश्च सहसा झटित्येव मुह्यन् मूर्च्छां प्राप्नुवन् केशान् विकीर्य केशपाशविश्लथनपूर्वकं पपात । तत्र हेतुमाह—विक्लवा व्याकुला धीर्यस्यास्तस्या इति । तत्र दृष्टान्तमाह—रम्भेवेति । यथा वातेन प्रचण्डमारुतेन विहता रम्भा कदली पतति तद्वदित्यर्थः ॥ २४ ॥

अन्वितार्थप्रकाशिका

एतावदिति ॥ अविश्लेषाद्धेतोरात्मानमिव आत्मानमेव । इवेत्येवार्थे । वल्लभामितरपत्न्यपेक्षया भगवतो निरतिशयप्रीतिविषयं मन्यमानाम् अतो गर्वितां रुक्मिणीं यद्वा सर्ववल्लभासु श्रेष्ठामपि तां परमसुशीलतया स्वस्यायोग्यतामननेन आत्मानं वल्लभासदृशं मन्यमानाम् अथवा अहं कदापि कोपं न करिष्यामीत्यतोऽहं भगवतो वल्लभैव स्यामिति मन्यमानां वल्लभामिति प्रियभार्यायां रूढिं स्वीकृत्य उद्देश्यविधेयभावेनान्वयं स्वीकृत्य वा न पुंस्त्वं तद्दर्पघ्नः तस्या गर्वमपनेतुकामो भगवानेतावदुक्त्वोपारमत् तूष्णीं बभूव ॥ २१ ॥ इतीति ॥ त्रिलोकेशा ब्रह्मादयस्तेषामधिपतेः पालकस्य आत्मनः प्रियस्यैवंभूतम् अश्रुतपूर्वं पूर्वम-

श्रुतम् अप्रियं वचनम् आश्रुत्य अश्रुतपूर्वत्वात् यथार्थमेव मत्वा त्यागसंभावनया भीता अत एव हृदि जातो वेपथुः कम्पो यस्याः सा अत एव रुदती देवी रुक्मिणी तदा दुरन्ताम् अपारां चिन्तां जगाम ।। २२ ।। पदेति ।। नखैररुणा श्रीः कान्तिर्यस्य तेन सुजातेन सुकोमलेन पदा वामपादाङ्गुष्ठेन भुवं लिखन्ती निखननेन स्वप्रवेशार्थं विवरं सम्पादयन्तीव तथाऽञ्जनेनासितैः श्यामैरश्रुभिः कुङ्कुमभूषितौ स्तनावासिञ्चती तथा अतिदुःखेन रुद्धा वाग्यस्याः सा रुक्मिणी अधोमुखी सत्येव तस्थौ ।। २३ ।। तस्या इति ।। अप्रियश्रवणजन्यं सुदुःखं त्यागसम्भावनाजन्यं भयं च शोकश्चाग्रे कथं निर्वाह इत्यनुतापात्मकस्तैर्विनष्टा अनुसन्धानरहिता बुद्धिर्यस्याः विक्लवधियः व्याकुलबुद्धेस्तस्याः रुक्मिण्याः श्लथन्ति तात्कालिकदुःखभवकार्श्येन भ्रश्यन्ति पतन्ति वलयानि यस्मात् तस्माद्धस्ताद्व्यजनं पपात । वलयानि पूर्वमेव पेतुरिति भावः। तथा तस्या देहश्च सहसा झटित्येव मुह्यन् मूर्छां प्राप्नुवन् केशान् विकीर्य केशपाशविश्लथनपूर्वकं रम्भेवेति । यथा वातेन प्रचण्डमारुतेन विहता रम्भा कदली पतति तद्वत् पपात ।। २४।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अविश्लेषात् निरंतरमवियोगाद्धेतोः आत्मानं स्वां वल्लभामिव हरेरतिप्रियामेव मन्यमानां भैष्मीं तद्दर्पघ्नः तस्या वैदर्भ्यादर्पं राजकुलजन्माद्यभिमानं हंतीति तथाभूतः एतावदुक्त्वा उपारमत् । विरमत ।। २१ ।। इतीति तदा तस्मिन् काले आत्मनः स्वस्याः प्रियस्य हरेः देवी वैदर्भी अश्रुतपूर्वं वाक्यं ।। २२ ।। चिंताचिह्नमाह पदेति नखैररुणाश्रीः शोभा यस्य तेन सुजातेन मृदुना । पदाभुवं लिखंती अश्रुभिः स्तनौ आसिंचती ।। २३ ।। अप्रियश्रवणेन सुतरां दुःखं च त्यजन संदेहेन भयं च शोकः संतापश्च तैर्विनष्टा बुद्धिर्यस्यास्तस्याः विक्लवधियो विक्लवा परवशा धीर्यस्यास्तस्याः श्लथंति स्रसंति वलयानि यस्मात्तस्माद्धस्तात् व्यजनं पपात देहश्च ।। २४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एतावदिति ।। अविश्लेषाद्विश्लेषाभावाद्धेतोः, आत्मानमेव, वल्लभामितरपत्न्यपेक्षया भगवतो निरतिशयप्रीतिविषयां, मन्यमानां रुक्मिणीं, तद्दर्पघ्नः इव, तस्या दर्पमपनेतुकाम इवेत्यर्थः । भगवान् श्रीकृष्णः, एतावत् उक्त्वा, उपारमत्तूष्णीमास। आत्मानं वल्लभामिवेतीवशब्दोऽत्रैवार्थे वा बोध्यः । तत्पक्षे तद्दर्पघ्नः सन् इति योजना ।। २१ ।। ततः किमासीत्तत्राह ।। इतीति। देवी रुक्मिणी, आत्मनः स्वस्याः, प्रियस्य प्राणतोऽपि प्रेमास्पदीभूतस्य, त्रिलोकेशपतेः त्रिलोकाधिपतिस्वामिनः श्रीकृष्णस्य, इत्येवं भूतं, अश्रुतपूर्वं पूर्वं कदापि यान् मुखादेवं विधं नाकर्णितं, अप्रियं श्रवणकटुत्वादप्रीतिजनकं, तत् आश्रुत्य वचः आकर्ण्य, भीता त्यागसंभावनया भयं प्राप्ता, अत एव हृदि, जातवेपथुः संजातकम्पा, रुदती सती च, दुरन्तां चिन्तां, ह स्फुटं यथा तथा, जगाम ।। २२ ।। चिन्तालक्षणान्येवाह पदेति द्वयेन ।। पदेति ।। नखैररुणा श्रीः कान्तिर्यस्य तेन, सुजातेन सुकोमलेन, पदा पादेन, वामपादाङ्गुष्ठेनेत्यर्थः । भुवं लिखन्ती, अञ्जनेनाविलानि व्याप्तानि तैः, असितैरिति पाठे अञ्जनेन कृष्णवर्णैः, अश्रुभिः, कुङ्कुमेन रूषितौ स्तनौ, आसिञ्चती, अतिदुःखेन रुद्धा वाग्यस्या सा, अधोमुखं यस्यास्तथाभूता सती, तस्थौ ।। २३ ।। तस्या इति। सुदुःखं सुतरामाधिजाता पीडा च भयमप्रियश्रवणजन्या भीतिश्च शोकस्त्यागसंभावनाजन्या शुक् च तैर्विनष्टा स्फुरणरहिता बुद्धिर्यस्यास्तस्याः रूक्मिण्याः, श्लथन्ति तात्कालिकदुःखभवकार्श्येन भ्रश्यन्ति वलयानि यस्मादिति ततः हस्तात् व्यजनं चामरं, पपात न्यपतत् । भूमाविति शेषः । तथा विक्लवा अधृष्टा अवशेत्यर्थः । धीर्यस्यास्तस्याः, हेतुगर्भमिदम् । तत्त्वात्, तस्या रुक्मिण्याः, मुह्यन् मोहमुपगच्छन्, देहश्च देहोऽपि, केशान् प्रविकीर्य, वातेन चण्डमारुतेन विहता रम्भा कदली इव, सहसा एव, पपात ।। २४ ।।

कृष्णप्रिया

श्रीशुकदेव जी ने कहा राजन् ! निजनाथ श्रीकृष्ण से क्षणभर भी विलग न होने के हेतु श्रीरुक्मिणी जी के हृदय में ऐसा गर्व हो गया था कि मैं ही श्रीकृष्ण की सबसे अधिक प्रियतमा हूँ; इस अभिमान की निवृत्ति के लिये ही इतना कहकर स्वयं मूक हो गये ।। २१ ।। राजन् परीक्षित् ! देवी रुक्मिणी जी ने अपने प्रियतम नाथ श्री त्रिलोकीनाथ भगवान् श्रीकृष्ण के श्रीमुख से प्रथम ही बार ऐसी अप्रिय वाणी का श्रवण किया तब श्रीदेवी अत्यन्त भयान्वित बन गयी, हृदय में भारी कम्प होने लगा, आर्तस्वर से रोने लगी, चिन्ता के अगाध महासागर में डूबने लगी ।। २२ ।। देवी रुक्मिणी जी का हृदय कोमल और सरल था। वह लाल कान्ति वाले नखों से लालिमा प्राप्त किये चरणारविंद से धरणी को कुरेदने लगी। कुङ्कुम केशर से रङ्गे हुए वक्षःस्थल को नेत्र के अश्रुओं से पखारने लगी। वाणी अवरुद्ध हो गयी दुःख के अतिरेक से बोल न पायी और मुखकमल नीचे की ओर लटक गया और देवी सर्वथा स्तब्ध हो गयी ।। २३ ।। देवी रुक्मिणीजी की विचारशक्ति अतिशय दुःख, भय और शोक से नष्टप्राय हो गयी। क्या नाथ त्याग करेंगें ! इस प्रकार की वियोग सम्भावना से श्रीरुक्मिणी जी एक ही क्षण में इतनी देह से दुबली हो गयी कि करकमलों से कंगन खिसक गया। सखी के हाथ से लिया हुआ चँवर अपने हाथ से गिर पड़ा और बुद्धि की विकलता के कारण देवी तत् क्षण अचेत हो गयीं, उनके केश निखर गये और वायु के वेग से भूमि से उखड़े हुए केले के खंभे की नाई देवी की सुकोमल काया धरणी पर ढल गयी ।। २४ ।।

तद् दृष्ट्वा भगवान् कृष्णः प्रियायाः प्रेमबन्धनम् । हास्यप्रौढिमजानन्त्याः करुणः सोऽन्वकम्पत ॥ २५ ॥
पर्यङ्कादवरुह्याशु तामुत्थाप्य चतुर्भुजः । केशान् समुह्य तद्वक्त्रं प्रामृजत् पद्मपाणिना ॥ २६ ॥
प्रमृज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा । [1]आश्लिष्य बाहुना राजन्ननन्यविषयां सतीम् ॥ २७ ॥
सान्त्वयामास सान्त्वज्ञः कृपया कृपणां प्रभुः । [2]हास्यप्रौढिभ्रमच्चित्तामतदर्हां सतां गतिः ॥२८॥

कर्दमक्षमा

अन्वयः—हास्यप्रौढिम्, अजानन्त्याः, प्रियायाः, तत्, प्रेमबन्धनम्, दृष्ट्वा, करुणः, भगवान् सः, कृष्णः, अन्वकम्पत ॥ २५ ॥ आशु, पर्यङ्कात्, अवरुह्य, चतुर्भुजः, ताम्, उत्थाप्य, केशान्, समुह्य, पद्मपाणिना, तद्, वक्त्रम्, प्रामृजत् ॥२६॥ राजन् ! अश्रुकले, नेत्रे, च, शुचा, अपहतौ, स्तनौ, प्रमृज्य, बाहुना, आश्लिष्य, सान्त्वज्ञः, सताम्, गतिः, प्रभुः, हास्यप्रौढिभ्रमच्चित्ताम् अतदर्हाम्, कृपणाम्, कृपया, सान्त्वयामास ॥ २७–२८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हास्यस्य प्रौढिं गांभीर्यम् ॥ २५ ॥ चतुर्भुज इति उत्थापनाश्लेषणवक्त्रपरिमार्जनाद्यर्थमाविष्कृतचतुर्भुज इत्यर्थः । समुह्य निबध्य ॥ २६ ॥ अश्रुकले अश्रुभिः शोभिते । शुचा शोकाश्रुभिः ॥ २७ ॥ सांत्वयामासानुनीतवान् ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् प्रेमबन्धनम् । "प्रौढिर्गाम्भीर्यशकटीधारणास्वधिकेऽपि च" इति निरुक्तिः । स कृष्णः ॥ यथा सांसारिकजीवानामविद्यया बन्धनं तथा तस्याः प्रेम्णा बंधनं तदिति तस्य महादार्ढ्यं ध्वनितम् । यतः हासस्य प्रौढिं प्रौढत्वमजानन्त्या इति प्रेमपरिणामोऽनुरागो हि स्वाश्रयस्य प्रतिक्षणं दैन्यमेवापादयति, ततश्च नाहमेतद्योग्येत्यतोऽनेन त्यक्तैवाहमिति भ्रांतचित्ताया इत्यर्थः ॥ २५ ॥ तां रुक्मिणीम् । इत्यर्थ इति तात्पर्यम् । तद्वक्त्रं रुक्मिणीमुखम् ॥ अनुकम्पामेवाह—पर्यंकादिति त्रिभिः । उत्थाप्य भूमितः स्वांके निवेश्येत्यर्थः । प्रकर्षेणाऽऽवृत्त्यादिनाऽमृजत् ॥ २६ ॥ अनन्यविषयां हठप्राप्तकृष्णाम् "विषयो गोचरे देशे तथा जनपदेऽपि च । प्रवन्धाद्यस्य यो ज्ञातस्तत्र रूपादिके पुमान्" ॥ इति मेदिनी । अतदर्हामेवंविधहास्यायोग्याम् ॥ प्रमृज्येति युग्मकम् । प्रभुः सतीं पातिव्रत्यादिसद्गुणवतीं तां सांत्वयामास । सांत्वने हेतुः—सतां गतिः । सन्मात्राणां स्वयमेव शरणं किमुत तस्या इत्याह—अनन्यविषयामात्मैकाश्रयाम् । तादृशसांत्वने हेतुः—कृपणां स्वोपेक्षामननेन दुःखदीनचित्ताम् । तत्र हेतुः—हास्येति । तत्र हेतुः—अतदर्हां परमसरलस्वभावत्वात् । ननु तादृशखेदने झटिति कथं सांत्वनं स्यात्तत्राह सांत्वज्ञः सांत्वनाचातुर्यपण्डितः । तज्ज्ञत्वमेव विवृणोति—प्रमृज्येति । अश्रूणि कलयतः क्षरत इत्यश्रुकले । एवं तस्य खेदने सांत्वने च चातुरीमनुस्मृत्य साश्चर्यमिवाह—प्रभुर्यदा यत्करोति तदा तत्रैव समर्थ इत्यर्थः ॥ २७–२८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदनिर्वचनीयं प्रेमैव बन्धनं शृङ्खला तदिति तस्य महादाढर्य ध्वनितं किन्तु हास्यप्रौढिमजानन्त्या आजनत्या विचारयितुमशक्नुवत्याः वाम्यमयद्वितीयप्रेमभेदाभवात् स महाकौतुकपरोप्यन्वकम्पत यतः करुणः सर्वप्राणिषु दयालुः किमुत तस्यामिति भावः यतो भगवान् कृष्णः तत्तन्महागुणत्वेनातिप्रसिद्धः इत्यर्थः ॥ २५ ॥ अनुकम्पामेवाह–पर्य्यङ्कादिति त्रिभिः । उत्थाप्य भूमितः स्वाङ्के निवेश्येत्यर्थः । प्रकर्षेण आवृत्यादिनाऽमृजत् ॥ २६ ॥ प्रमृजेति युग्मकम् । प्रभूः सतीं पातिव्रत्यादिसद्गुणवतीं तां सान्त्वयामास सान्त्वने हेतुः सतां गतिः सन्मात्राणां स्वयमेव शरणं किमुत तस्या इत्याह अनन्यविषयाम् आत्मैकाश्रयां तादृशसान्त्वने हेतुः कृपया तत्र हेतुः कृपणां स्वोपेक्षामननेन दुःखदीनचित्ताम् अत्र हेतुर्हास्येति तत्र हेतुः अतदर्हां परमसरलस्वभावत्वात् ननु, तादृशखेदने झटिति कथं सान्त्वनं स्यात् तत्राह—सान्त्वज्ञः सान्त्वनाचातुर्ये पण्डितः तज्ज्ञत्वमेव विवृणोति–प्रमृज्येति । अश्रूणि–कलयतः क्षरत इति अश्रुकले एवं तस्य खेदने सान्त्वने च चातुरीमनुस्मृत्य साश्चर्यमिवाह—प्रभुः यदा यत् करोति तदा यत्रैव समर्थ इत्यर्थः ॥ २७–२८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तदनिर्वचनीयम्, प्रेमैव बन्धनं शृङ्खला तत्, इति तस्य महादार्ढ्यं ध्वनितम् । यतः प्रियायाः, अतएव हास्यप्रौढिमजानन्त्या विचारयितुमनवगच्छन्त्याः, स महाकौतुकपरोऽपि; यद्वा, प्रियजनपरवशः; किञ्च, करुणः कृपालुः, तत्रापि भगवान्

---

[1] आश्लिषत्–श्रीधर. टि. । [2] हास्यप्रौढे–वीर. विज. ; हास्यैः प्रौढैः–प्रा. पा. ।

निजाशेषगुणप्रकटनपरः, यतः कृष्णोऽनिर्व्वचनीयविचित्रमाहात्म्यामृतमहोदधिः, किंवा अतएव प्रियजनचित्ताकर्षकः, अतोऽन्वकम्पत; यद्वा, करुणः स्वयमपि रोदनादिना निजानां मूर्त्तकरुणरसः सन् ॥ २५ ॥ अनुकम्पामेवाह—पर्य्यंकादिति त्रिभिः। उत्थाप्य भूमितः स्वांके निवेश्येत्यर्थः। पद्मवत् सर्व्वसन्तापहरणादिगुणयुक्तेन पाणिना प्रकर्षेण पुनः पुनरावर्त्त्यादिनामृजत् ॥२६॥ अश्रूणि कलयतः प्रवहत इत्यश्रुकले; तद्वार्त्ताश्रवणेन शोकाकुलं श्रीपरीक्षितं स्वस्थयन्नाह—हे राजन्निति। यद्वा, अकारप्रश्लेषेण अराजमानो महार्त्त्या म्लानः सन्नित्यर्थः। यतो न विद्यतेऽन्यो विषयो गतिर्यस्यास्ताम्, यतः सतीं पतिव्रताम्, बाहुनेत्येकत्वं व्यग्रतयैकेनांके ग्रहणात्। अन्येन नेत्रयोरपरेण, स्तनयोर्मार्ज्जनाच्च। यद्वा, प्रागुक्तन्यायेनैकत्वेऽपि द्वित्वस्य बहुत्वस्य च प्राप्त्या गाढालिंगनं वोधयति। प्रभुः सान्त्वनसमर्थः, यतः सान्त्वं मिष्टवाक्यं जानातीति, शंकया व्याकुलं चित्तं यस्यास्ताम्; अतो न तां हास्यप्रौढिमर्हतीति तथा ताम्। सोऽपि तादृशजनेषु तादृशीं हास्यप्रौढिं कर्त्तुं नार्हतीत्याशयेनाह—सतां गतिरिति ॥ २७-२८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

तदिति। स भगवान् कृष्णः हास्यप्रौढिं चातुर्य्यमजानन्त्या इव लक्षितायाः प्रियायास्तत्प्रेमबन्धनं प्रेमपाशमवलोक्य करुणावानन्वकम्पत अनुपदमेव भीत इव अङ्कपतेत्यर्थः ॥ २५ ॥ ततः किमकरोदित्यत्राह—पर्य्यङ्कादिति। चतुर्भुजः उत्थापनाश्लेषणवक्त्रपरिमार्जनार्थमाविष्कृतचतुर्भुज इत्यर्थः। केशान् समुह्य निबद्ध्य पद्मतुल्येन पाणिना वक्त्रं प्रामृजत् ॥ २६ ॥ किञ्च, प्रमृज्येति। अश्रूणां काला बिन्दवो ययोस्ते नेत्रे तथा शुचा शोकाश्रुणा उपहतौ स्तनौ च प्रमृज्य परिमृज्य हे राजन्! बाहुना आलिङ्ग्य सान्त्वज्ञः सताङ्गतिः प्राप्यः श्रेयःप्राप्त्युपायभूतो वा विभुर्भगवान् हास्यप्रौढ्या भ्रमच्चित्तं यस्यास्ताम् अतदर्हाम् इत्थमवहसितुमनर्हां तत्र हेतुरनन्यविषयां न विद्यते अन्यः पुरुषान्तरं विषयः ज्ञानविषयो यस्यास्तां दीनां सतीं रुक्मिणीं सान्त्वयामास ॥ २७-२८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

हास्यं नाम शृङ्गारादिष्वेको रसः तस्य प्रौढिं समुद्रेकं करुणः करुणारसं प्राप्तः, अस्य विवरणमन्वकम्पतेति ॥ २५ ॥ चतुर्भुज; कृष्णः द्वाभ्यां भुजाभ्याम् उत्थाप्य द्वाभ्यां केशान् समुह्य एकीकृप्य बद्धवा वक्त्रं प्रामृजत् इति द्योतनाय चतुर्भुज इति प्रत्युक्तम् ॥ २६ ॥ अश्रूणां कला ययोस्ते तथा शुचोपहतौ कुशौ स्तनौ च अनन्यविषयाम् अन्यस्पर्शनायोग्याम् ॥ २७ ॥ अतदर्हां प्रेमगर्भविषादवचनायोग्याम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तामुत्थाप्य चतुर्भुज इत्यादि। चतुर्भुज इति द्वाभ्यां परिरेभे, द्वाभ्यां केशान् बबन्धेत्यर्थः। चतुर्भुजस्तदेवाभवदिति मन्तव्यम्—अन्तःपुरे सन्ततं द्विभुजत्वेनैव स्थितत्वात्। चतुर्भुजत्वमत्रैव शोभते ॥ २५-२८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

चतुर्भुज इति। द्वाभ्यां परिरेभे, द्वाभ्यां केशं ववन्धेति चतुर्भुजत्वमत्रैव शोभते स्म ॥ २६-२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यथा सांसारिकजीवानाम् अविद्यया बन्धनं तथा तस्याः प्रेम्णा बन्धनं यतो हास्यस्य प्रौढिं प्रौढत्वम् अजानन्त्या इति प्रेमपरिणामः अनुरागो हि स्वाश्रयस्य प्रतिक्षणं दैन्यमेवोत्पादयति ततश्च नाहमेतद्योग्येत्यतोऽनेन त्यक्तैवाहमिति भ्रान्तचित्ताया इत्यर्थः ॥ २५ ॥ चतुर्भुज इति उत्थापनाश्लेषणवक्रपरिमार्जनार्थमाविष्कृतभुजचतुष्टय इत्यर्थः। समुह्य निबध्य ॥ २६ ॥ अश्रुकले अश्रुधरे शुचा शोकाश्रुणा ॥ २७-२८ ॥

गूढार्थदीपिनी

बन्धनं पाशम्। प्रौढिं गाम्भीर्यम् अन्वकम्पत कृपां कृतवान् ॥ २५ ॥ द्विभुजोऽपि चतुर्भुजः सन्। समुह्य निबध्य। द्वाभ्यामुत्थापना आश्लेषौ द्वाभ्यां च केशबन्धनं मुखमार्जनं च ॥ २६ ॥ प्रमृज्येति युग्मम्। अश्रूणि कलयतः क्षरतः कला बिन्दवो वा। शुचा शोकाश्रुणा उपहतौ आर्द्रौ। सान्त्वं सान्त्वनोपायम्। अतदर्हामेवंविधहास्या योग्याम् ॥ २७-२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हास्यप्रौढिं गाम्भीर्यमजानन्त्याः प्रेमरूपं बन्धनं पाशम् ॥ २५-२६ ॥ अश्रूणां कलाः बिन्दवो ययोस्ते शुचा इत्येकवचनं जातौ शोकाश्रुभिः ॥ २७-२८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भगवान्कृष्णः प्रियायाः प्रेमबन्धनं स्नेहानुबन्धं तद्दृष्ट्वा हास्यप्रौढिमानमजानन्त्येव दर्शयिष्याः करुणः करुणयतीति स्वभावतः स इदानीमन्वकम्पतानुकम्पां कुर्वन्निव दर्शयामास ॥ २९ ॥ अनुकम्पाव्यापारमुपपादयति । पर्यङ्कादिति । द्वाभ्यामुत्थाप्यैकेन केशान्नाशीभूतान्केशानेकीकृत्यैकेन मुखं प्रामृजदिति । चतुर्भुजता च वक्ष्यमाणकार्यानुगुणतयोक्तेति मन्तव्यम् ॥३०॥ शुचोपहतौ शुष्काविति यावत् । न सदा तथेति द्योतयितुं शुचेत्युक्तिः । विविच्य सर्वाङ्गविचारकाले समन्ताद्घटना किलासीत् । सुपीनदेवी स्तनमध्यदेशे सुदुर्लभा सा परमच्युतस्येत्युक्तिराश्लिष्य सान्त्वयामासेत्यन्वयः ॥ ३१ ॥ हास्यप्रौढेः । प्रादूहूढेष्विति बृद्धिः । अतदर्हा विषादजनकवचनायोग्यां सान्त्वनप्रकारज्ञः सान्त्वयामास ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदा भगवान् क्षणविलम्बे समाधानमशक्यमिति उपेक्षाभावं परित्यज्य, तस्यामपेक्षाभावं कृत्वा, शीघ्रं प्रतिक्रियार्थं प्रवृत्त इत्याह **तद्दृष्ट्वेति** । तस्याः पतनं दृष्ट्वा करुणायुक्तो भूत्वा अन्वकम्पत । तस्या दुःखनिवृत्तिमियेष । अभिप्रायानुसारेण यत्तयाग्रे निरूपितं तावद्वक्तव्यम् । ततश्च अभिमानाभावे ज्ञाते भगवान् कृपां कुर्यात् । यत्तु मध्ये मूर्च्छया पतनम्, तदभिप्रायाज्ञानात् । ईश्वरवाक्ये च यावत्स एव स्वाभिप्रायं न प्रकाशयति, तावदर्थान्तरं न वर्णनीयम् । अतो लौकिकत्वात्तस्या अभिप्रायापरिज्ञानात् त्यागभयेन तथावस्थोचितैव । तदा भगवानुत्तरेऽदत्ते अभिमानाभावे चाज्ञातेऽपि कृपामेव कृतवान् । तत्र हेतुः **करुण** इति । दयायुक्तः । दयायामपि हेतुः **तद्दृष्ट्वे**ति । **भगवानिति** सर्वार्थाभिज्ञता । **कृष्ण** इति स्त्रीणां प्रियः । तासामुद्धारार्थं आगतः कथं तां मारयेत् । ननु बहव एव मूर्च्छिता भवन्ति वचसा त्रासिताः, किमत्राश्चर्यमिति चेत्, तत्राह **प्रियायाः प्रेमबन्धन**मिति । सापि भगवतः प्रिया, भक्तत्वात् । तस्याश्च प्रेमातिशयः सम्बन्धाभावे ज्ञात एव प्राणपरित्यागरूपः । प्रेमैव बन्धनमिति भगवत्प्रेम्णैव सा बद्धा तिष्ठति । तदभावे ज्ञात एव पतितेति । ननु युक्तमेव तस्यास्तथात्वम्, केनांशेन सन्तुष्टः, सन्तोषहेतोराश्चर्यस्याभावादित्याशङ्क्याह **हास्यप्रौढिमजानन्त्या** इति । हास्यरसे पूर्वपक्षसिद्धान्तन्यायेन पदार्थनिरूपणं प्रौढिः । तत्र भगवता पूर्वपक्षः कृतः । यतो रुक्मिणी न लौकिकी । नापि लौकिकविषयमपेक्षते । अतोऽवश्यं सिद्धान्तो वक्तव्यः । तद्वक्तुं न जानातीति मुग्धभावात् बालानामिवाभिमानो न दोषायेति मूर्च्छां दृष्ट्वा स्वभावतोऽपि परमकारुणिकः अनुकम्पां कृतवान् ॥ २५ ॥ ततो यत्कृतवांस्तदाह **पर्यङ्कादि**ति । स्वयं शीघ्रमवरुह्य पर्यङ्कात्, हस्तद्वयेन तामुत्थाप्य, हस्तद्वयेन च केशान् समूह्य, एकेन हस्तेन केशबन्धं धृत्वा, दक्षिणेन तद्वक्त्रं प्रामृजत् । **पद्मपाणिने**ति शीतलेनामृतस्रावेण । तेन तापापनोदः जीवनं च जातम् । स्पर्शेनैव प्राणाः समागताः ॥ २६ ॥ ततः स्वस्थां सान्त्वयामासेत्याह **प्रमृज्ये**ति । तेनैव पाणिना अश्रूणि प्रमृज्य, अश्रूणां कला यत्र । तत उत्थाप्यैव धृत्वैव हस्तद्वयेन मध्ये एकेन केशबन्धम् । उक्तां क्रियां कृतवान् । अतः सान्त्वनपर्यन्तं **चतुर्भुज एव** स्थितः । प्रकर्षेण मार्जनं अश्रूणि दूरीकृत्य परितः स्थितकज्जलस्य सर्वत्र स्थापनम्, तथैवान्यत्रापि स्नेहप्रकाशार्थं त्यागाभावविश्वासार्थं च बाहुना आश्लिष्य । ननु स्वयमेव 'न स्त्र्यपत्यार्थकामुका' इत्युक्त्वा, पुनः किमर्थं तथा कृतवान्, तत्राह **अनन्यविषया**मिति । न विद्यते अन्यो विषयो यस्याः । यद्ययमपि विषया न भवेत्, तदा शरीरनाशः स्यादिति । 'ये त्यक्तलोकधर्माश्च मदर्थे तान् बिभर्म्यहमि'ति । तस्यास्तथात्वं ज्ञात्वा स्वप्रतिज्ञास्थापनार्थमेव तथा कृतवानित्यर्थः ! ततश्च स्त्रीत्वेन न कामिता, किन्त्वनन्यविषयत्वेन । किञ्च । **सती** पतिव्रता । तदुपेक्षायां मर्यादाविरोधोऽपि स्यात् । **राजन्नि**ति सम्बोधनं भ्रमाभावाय । राजा हि पूर्णविषयो भवतीति ॥ २७ ॥ किञ्च, **सान्त्वयामासे**ति । ततो वाक्यैः सान्त्वयामास । ननु स्वयमेव निःसम्बन्धं प्रतिपाद्य, कथं सान्त्वनं कुर्यादित्याशङ्क्याह **सान्त्वज्ञ** इति । सान्त्वने हेतुः **कृपये**ति । नतु भयेन कथञ्चिदपि । **कृपणा**मिति दयायां हेतुः । नतु भार्याम् । ननु धर्मद्वयस्य विद्यमानत्वात्कथं कार्पण्यमेव हेतुरित्यत आह **प्रभु**रिति । स हि स्वतः समर्थो न भार्यादिकमपेक्षते । **हास्यप्रौढिवाक्यैर्भ्रमच्चित्ता**मिति वाक्यसान्त्वने हेतुः । अन्यथा कायसान्त्वनेनैव चरितार्थता स्यात् । अतश्चित्तभ्रमोऽपि निवारणीयः । ननु तिष्ठतु चित्ते भ्रमः, किं स्यात्, अत आह **अतदर्हा**मिति । तद्द्विरूपतयावस्थानं नार्हति । शरीरेण कृपाम्, वाचा अकृपां च । शरीरे स्वास्थ्यम्, चित्तेऽस्वास्थ्यं वा । यतो भगवान् **सतां गतिः** । सन्तो हि निःसन्दिग्धा भवन्ति, भगवद्वाक्यविश्वासेन प्रवर्तन्ते । 'द्विःशरं नाभिसन्धत्ते द्विःस्थापयति नाश्रितान् ।' 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यती'ति । अतश्चित्तभ्रमापनोदनार्थं वाचा सान्त्वनं कर्तव्यम् ॥ २८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तद्दृष्ट्वेत्यत्र । **अनुकम्पा**मिति । कृतवानिति शेषः । अनुकम्पापदार्थमाहुः **दुःखे**ति । परदुःखप्रहाणेच्छायाः कृपापदार्थत्वादिति भावः ।

श्रीसुबोधिनी-सारः

हासस्य प्रौढिं गांभीर्यमजानंत्याः प्रियायाः तत् प्रेमबन्धनं दृष्ट्वा करुणो दयालुः स भगवान् कृष्णोऽन्वकंपत दयामकृत ॥ २५ ॥ पर्यंकाच्छय्यात आशु शीघ्रमवरुह्योत्तीर्य तां रुक्मिणीम् उत्थाप्य द्वाभ्यां हस्ताभ्याम् एकेन केशान्समुह्य संबध्य

पद्मपाणिनान्येन तस्या वक्त्रं मुखं प्रामृजत् पर्यशोधयत् इत्येतदर्थं चत्वारो भुजा यस्य सः ॥ २६ ॥ अश्रूणां कला ययोस्ते नेत्रे शुचा शोकेनोपहतौ स्तनौ च प्रमृज्य परिशोध्यानन्यविषयामात्मनिष्ठां सतीं बाहुनाश्लिषत् आलिंगयत् ॥ २७ ॥ सांत्वं सांत्वनं जानातीति प्रभुः सतां गतिः कृपया कृपणां दीनां हास्यप्रौढ्या भ्रमच्चित्तं यस्याः तामतदर्हां तथा वैक्लव्यायोग्यां सांत्वयामासानुनीतवान् ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा च स कृष्णः हास्यस्य प्रौढिं चातुर्यमजानन्त्याः प्रियायास्तत् पतनं प्रेमबन्धनं प्रेमपाशं च दृष्ट्वा अन्वकम्पत कृपां कृतवानित्यन्वयः । 'सा च कृपा तस्य स्वाभाविकी, न कामप्रयुक्ता' इत्याशयेनाह—करुण इति । तत्र हेतुः—भगवानिति ॥२५॥ 'कथं च कृपा कृतवान्' तत्राह—पर्यङ्कादिति । चतुर्भुजः उत्थापनाश्लेषणवक्त्रपरिमार्जनाद्यर्थमाविष्कृतचतुर्भुजः सन् आशु पर्यङ्कादवरुह्य पतितामुत्थाप्य तस्याः केशान् समुह्य निबद्धय पद्मवत्कोमलेन पाणिना तद्वक्त्रं प्रामृजत् ॥२६॥ सान्त्वज्ञः सान्त्वनोपायज्ञः प्रभुः सर्वथा सर्वदा च सर्वं कर्तुं समर्थश्च श्रीकृष्णः अश्रूणां कला बिन्दवो ययोस्ते नेत्रे तथा शुचा शोकाश्रुणा उपहतौ आर्द्रीकृतौ स्तनौ च प्रमृज्य बाहुना आश्लिष्य तां कृपया सान्त्वयामासेति द्वयोरन्वयः । 'विवेकित्वात्त्वमेवैतल्लीलारहस्य श्रवणयोग्यः, नान्यः कश्चिन्मन्दबुद्धिः कामी, तस्यान्यथाकल्पनया दोषप्रसङ्गात्' इति सूचयन् सम्बोधयति—राजन्निति। सान्त्वने हेतुमाह—कृपणामिति । तत्र हेतुमाह—हास्यप्रौढ्या भ्रमच्चित्तं यस्यास्तामिति । 'कृपणतायामपि किम्' इत्यत आह-अतदर्हामिति । दैन्यायोग्यामित्यर्थः । तत्रापि हेतुमाह—अनन्यविषयामिति । न विद्यते भगवतोऽन्यो विषयः आश्रयत्वेनाभिप्रेतो यस्यास्तामित्यर्थः । तत्रापि हेतुमाह—सतीं पतिव्रतामिति । ननु 'तस्यास्तथात्वेऽपि स्वस्याप्तसमस्तकामत्वात् कथमेवं दैन्यसूचकं सान्त्वनकरणं सम्भवति' तत्राह—सतां गतिरिति । सतां स्वैकनिष्ठानां गतिः फलतया प्राप्यः । तस्याः स्वैकपरत्वादेवमसान्त्वने फलस्यादर्शनादमीषां तद्भजने प्रवृत्तिरेव न स्यात्, न च तद्विनोद्धारः, अतस्तदर्थं तत्सान्त्वनं युक्तमेव ॥ २७–२८ ॥

अन्वितार्थप्रकाशिका

तदिति । करुणः दयालुः भगवान् स कृष्णः हास्यस्य प्रौढिं गाम्भीर्यमजानन्त्याः । नुमार्षः । प्रियायास्तत् पतनं प्रेमबन्धनं प्रेमपाशं च दृष्ट्वा अन्वकम्पत कृपां कृतवान् ॥ २५ ॥ पर्यङ्कादिति । चतुर्भुजः आश्लेषणवक्त्रपरिमार्जनाद्यर्थमाविष्कृतभुजचतुष्को भगवान् आशु पर्यङ्कात् अवरुह्य पतितां तामुत्थाप्य भूमितः स्वाङ्के निवेश्य तस्याः केशान् समुह्य निबद्धय पद्मतुल्यकोमलेन पाणिना तद्वक्त्रं प्रामृजत् । श आर्षः ॥ २६ ॥ प्रमृज्येति युग्मम् । हे राजन् ! सान्त्वज्ञः सान्त्वनोपायज्ञः सतां गतिः प्रभुर्भगवान् अश्रूणां कला बिन्दवो ययोस्ते अश्रुभिः शोभिते वा अश्रुधरे वा नेत्रे तथा शुचा शोकाश्रुणा उपहतौ आर्द्रीकृतौ स्तनौ च प्रमृज्य बाहुना आश्लिष्य अनन्यविषयां भगवदन्याश्रयरहितां सतीं कृपणां दीनाम् अतः अतदर्हां खेदयितुमयोग्यां किन्तु वदिष्यतीति हासप्रौढ्या भ्रमच्चित्तं यस्यास्तां रुक्मिणीं कृपया सान्त्वयामास ॥ २७–२८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हास्यस्य प्रौढिं गांभीर्यकलां ॥ २५–२६ ॥ अश्रुभिः कले सुंदरे शुचा शोकाश्रुबिंदुकलापेनोपहतौ बाहुना बाहुद्वयेनाश्लिष्य । नास्ति कृष्णादन्यो विषयो यस्यास्तां ॥ २७ ॥ सांत्वज्ञः अनुनयकुशलः कृपणां दीनां सांत्वयामास ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति । भगवान् सः कृष्णः, हास्यस्य प्रौढिश्चातुर्यं तां, अजानन्त्याः प्रियायाः, तत् प्रेमबन्धनं, दृष्ट्वा अवलोक्य, करुणः करुणावान् सन्, अन्वकम्पत । भीत इवाकम्पतेत्यर्थः । यद्वा । अन्वकम्पतानुकम्पां चकारः ॥ २५ ॥ ततः सः किमकरोदित्यत्राह । पर्यङ्कादिति । ततः पर्यङ्कात् स्वतल्पात्, आशु अवरुह्य, चतुर्भुजः उत्थापनाश्लेषणवक्त्रपरिमार्जनाश्वासनायाविष्कृतचतुर्भुजः कृष्णः, तां रुक्मिणीं उत्थाप्य, केशान् समूह्य निबद्धय, तद्वक्त्रं रुक्मिण्यास्यं, पद्मपाणिना पद्मसदृशशीतलमृदुकरेण, प्रामृजत् ॥ २६ ॥ किं च प्रमृज्येति । सान्त्वयामासेति च । हे राजन्, सान्त्वज्ञः सान्त्वनरीत्यभिज्ञः सतां गतिर्भक्तजनानां प्राप्यः श्रेयः प्राप्त्युपायभूतो वा । प्रभुर्भगवान् श्रीकृष्णः, अश्रूणां कला बिन्दवो ययोस्ते, नेत्रे, शुचा शोकेन, उपहतौ स्तनौ च, प्रमृज्य, हास्यप्रौढ्या भ्रमत् चित्तं यस्यास्तां, अतदर्हामेवंविधहास्यप्रौढीकरणानर्हां, कृपणां दीनां, अनन्यविषयां, सतीं साध्वीं, तां रुक्मिणीं, बाहुना आश्लिष्य, कृपया, सान्त्वयामास इति द्वयोरेकान्वयः ॥ २७–२८ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण ने देखा कि प्रियतमा श्रीरुक्मिणी जी हंसी-विनोद की गम्भीरता को नहीं समझ सकीं और प्रेम बन्धन की दृढता के ही हेतु देवी जी की यह दशा हो गयी है । परम कारुणिक भगवान् श्रीकृष्ण का अति सुकुमार हृदय कमल

श्रीरुक्मिणी जी के लिये करुणा से छलक उठा ॥ २५ ॥ प्रियाजी की करुणामयी परिस्थिति को देखते ही श्री द्वारिकेश तत्क्षण चतुर्भुज होकर पर्यङ्क से नीचे उतर गये। भूतल पर गिरी हुई श्री रुक्मिणी जी को उठा लिया और प्रियाजी के बिखरे हुए केश कलाप को समारने लगे पुनः अपने कोमल एवं शीतल कर कमलों से देवी जी के मुखारविंद को पोछने लगे और स्पर्श सुख देने लगे ॥ २६ ॥ श्रीकृष्णजी ने श्रीरुक्मिणीजी के नयनों से निकले हुए और शोकसंतप्त अश्रुओं से भींगे हुए वक्षःस्थल को पोंछकर अपने प्रति अनन्य स्नेह भाव रखने वाली निर्दोष एवं सरल सती श्रीरुक्मिणी जी को दोनों भुजाओं में लेकर हृदय से लगा लिया ॥ २७ ॥ भगवान् श्रीकृष्ण नर्म विनोदी और रसज्ञ हैं एवं करुणानिधान हैं। श्रीरुक्मिणी जी नर्म विनोद अभिज्ञ नहीं है सरल है। नाथ समझाने में बड़े विचक्षण हैं भगवद्गीता उसमें प्रमाण है। भगवान हास्य विनोद कर रहे हैं रुक्मिणी वह वास्तविक बात मान ली और चित्त अत्यन्त खेद और भययुक्त हो गया तब संतो के आश्रय भगवान् सात्वना एवं समाधान करने लगे ॥ २८ ॥

श्रीभगवानुवाच

मा मा वैदर्भ्यसूयेथा जाने त्वां मत्परायणाम्। त्वद्वचः श्रोतुकामेन [1]क्ष्वेल्याऽऽचरितमङ्गने ॥ २९ ॥
मुखं च प्रेमसंरम्भस्फुरिताधरमीक्षितुम्। कटाक्षेपारुणापाङ्गं सुन्दरभ्रुकुटीतटम् ॥ ३० ॥
अयं हि परमो लाभो गृहेषु गृहमेधिनाम्। यन्नर्मैर्नीयते यामः प्रियया भीरु [2]भामिनि ॥ ३१ ॥

श्रीशुक उवाच

सैवं भगवता राजन् वैदर्भी परिसान्त्विता। ज्ञात्वा तत्परिहासोक्तिं प्रियत्यागभयं जहौ ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—श्री भगवान् उवाच—हे वैदर्भि ! हे अङ्गने ! मत्परायणाम्, त्वाम्, जाने, मा, मा, असूयेथाः, त्वद्वचः, श्रोतुकामेन, क्ष्वेल्या, आचरितम् ॥ २९ ॥ प्रेमसंरम्भस्फुरिताधरम्, कटाक्षेपारुणापाङ्गम्, च, सुन्दरभ्रुकुटीतटम्, मुखम्, ईक्षितुम्, मया, क्ष्वेल्याचरितम् ॥ ३० ॥ हे भीरु ! हे भामिनि ! गृहमेधिनाम्, गृहेषु, हि, अयम्, परमः, लाभः, यत्, नर्मैः, प्रियया, यामः, नीयते ॥ ३२ ॥ श्रीशुक उवाच—राजन् ! भगवता, एवम् परिसान्त्विता, सा वैदर्भी, तत्, परिहासोक्तिम्, ज्ञात्वा, प्रियत्यागभयम्, जहौ ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मा माम्। त्वद्वचः किं नु वदिष्यसीति श्रोतुकामेन श्रोतुमिच्छता क्ष्वेल्या नर्मणा एवमाचरितमुक्तं न तत्त्वतः। हे अंगने सुन्दरि ॥ २९ ॥ प्रेमसंरंभेण प्रणयकोपेन स्फुरितः कंपितोऽधरो यस्मिस्तत्। कटाशब्देन कटाक्षास्तैराक्षेपैररुणावपांगौ यस्मिस्तत्। अत एव सुन्दरं कुटिलं भ्रूकुटीतटं यस्मिस्तत् ॥ ३० ॥ ननु कलहे किं कौतुकं सुखं वाऽत आह। अयं हीति। नर्मैर्नर्मभिः। यामः कालः ॥ ३१-३२ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

'क्ष्वेलिर्नर्मणि हासे च' इति निरुक्तिः। मेत्यपि युग्मकम्। मा माम्। माभ्यसूयेथा मयि दोषदृष्टिं मा कुरु। नन्वनन्यगतिमपि मां त्यक्तुमिच्छसि कुतो नाभ्यसूया कार्या तत्राह—जान इति। अतः कदाचित्कथंचिदपि न त्याज्येति भावः। ननु तत्कुतस्तादृगुक्तं तत्राह—त्वद्वच इति। ननु तथापि सत्यवचनेन त्वया मिथ्या वक्तुं न युज्यते तत्राह—क्ष्वेल्याचरितमिति। नर्मसु तद्योग्यमित्यर्थः। अंगने परमसुन्दरीति स्तुतिः। अंगनास्वेतदुचितमेवेति भावः। हे वैदर्भीति—विशिष्टदर्भवनवासिभिर्मृगपक्ष्यादिभिरिव त्वयापि तन्न ज्ञातमिति भावः ॥ २९ ॥ एकदेशन्यायेन कटपदं कटाक्षपरम्। नर्मोक्तौ प्रयोजनांतरं चाह—प्रेमसंरंभेणेति, तैर्व्याख्यातम्। ननु यदि सत्यकामस्य भगवतस्तथाभूतैवेच्छाऽऽसीत्तदा तदानीमेव रुक्मिणी सकोपकुटिलकटाक्षा कथं नाभूदिति चेत्—इच्छाशक्तिर्हि भगवत एवाधीना प्रेमा तु तं भगवंतमप्यधीनीकरोतीति प्रेम्णोऽग्रे न तस्याः कापि प्रभविष्णुता। प्रेमा ह्यानन्दरूपमपि भगवन्तमतिशयेनानन्दयितुं तदिच्छामपि कदाचिदन्यथा करोति। इदमत्र तत्त्वम्—आसां रुक्मिण्यादीनां मधुरप्रेमस्नेहप्रणयमानरागानुरागेषु सप्तसु स्थायिभावेषु मध्ये कदाचित्कश्चित्स्वावसरं प्राप्योदयत इत्यतस्तदानीं व्यजनसेवामयेऽनुरागः स्थायिभाव एवोदगात् तस्य च दैन्यसंचारिप्राबल्यात्तस्याः खेदचिंतामोह एवाभून्न तु तस्मिन्प्रणयकोपकटाक्षादयः। ते चोपरिष्टान्मानस्थायिभावोदयक्षणेषु भविष्यन्त्येव। किञ्च—धृतस्नेहवत्या रुक्मिण्या मानकौटिल्यातिशयः

---

[1]. क्ष्वेला-विज.। [2]. भाषिणि-धिज.।

प्रायो नोदयते, मधुस्नेहवत्याः सत्यभामाया अनुरागोऽपि मानगर्भ एवेति संरंभसकंपाधरकुटिलकटाक्षादिमुखं कृष्णस्य तत्रैव संपद्यत इति ॥ ३० ॥ कौतुकमद्भुतम् । यत् यः । 'नर्मस्तु नर्मणा सार्द्धम्' इति द्विरूपकोशाददन्तोपि नर्मशब्दः । 'यामस्तु प्रहरे काले' इति मेदिनी । हि यस्मादयं गृहेषु वर्तमानानां गृहमेधिनां गृहेषु लाभः फलं सुखमित्यर्थः । गृहेष्विति—प्रोषितादीनां तत्सुखं निषेधति—याम एकप्रहरोपि । प्रिययेति सर्वाभ्यो मे त्वमतिवल्लभा, अतस्त्वयैव सहैतद्युज्यत इति । हे भीर्विति–भयमयदक्षिणप्रेमस्वभावादेव शंकां वहसि न तु विचारेणेति भावः । अतस्तदानीमपि क्रोधांशानभिव्यक्तौ सकौतुकं तदुद्भावनाय तमारोपयति—हे भामिनीति । एवं 'मा मा वैदर्भ्यसूयेथाः' इत्यपि । अत्र श्रीभगवतः सकौतुकोऽयमभिप्रायः—इयं खलु सरलप्रेमवती परमगांभीर्यवतीति ततो ममाभीष्टः प्रिया कोपविलासः प्रेमनिबंधप्रकाशकसविकारकष्ठोक्तिविशेषो वा नास्यां स्फुटमुपलभ्यते, तस्मात्कोपविलासो वा तज्जननाभावे तु द्वितीयस्तादृशोक्तिविशेषो वा यथास्यां प्रकाशेत तथा बाढं परिहासेन प्रयतिष्ये । तत्र यस्यां कोपजनने भ्रातृवैरूप्यादिकमपि कारणं नासीत्तस्यां तत्रान्यत्परमायोग्यमेव । किन्त्वहमेव मदविश्लेषसुखमेवास्याः सर्वस्वमिति तद्दर्पन्यक्कारेणैव कोपः संभवेद्यदि ततोपि कोपो नाविर्भवेत्तथापि मद्विश्लेषभयेन पूर्वानुरागवदधुनापि विकारविशेषसहितो निगदेनैव प्रेमनिर्बन्धः प्रकाश्येतेति । तत्र 'राजपुत्रीप्सिता भूपैः' इत्यादिकस्य तस्य श्रीकृष्णवचनस्य सप्रणयत्वं परिहासमयत्वं च 'तां रूपिणीम्' इति, 'प्रीतः स्मयन्' इत्यनेन च व्यक्तम्, परिहासमयत्वं तु विशेषतोप्युक्तं प्रसंगेन । तस्याः प्रेमसारल्यादिद्वयमपि 'तद्दृष्ट्वा भगवान्' इत्यादिना । हास्यं परिहासस्तत्र प्रौढिरवश्यमेनां सरलप्रेमवतीमपि गंभीरामपि क्षोभयिष्यामीति गर्वः तां प्रणयरसकौटिल्याभावेनाजानत्या इत्यर्थः । एवमग्रेपि हास्यप्रौढेर्भ्रमच्चित्तामिति । तत्र तेन परिहासेन कोपविलासादिदर्शनमेवाभीष्टमिति स्वयमेवोक्तम्' मा मा वैदर्भि' इति त्रिभिः । अथ तस्य तत्प्रेमनिबंधप्रकाशकविकारदर्शनेच्छापि प्राक्तनेनैव वाक्येन व्यक्ता 'तद्दृष्ट्वा भगवान्' इत्यादिना । तथा निगदनेनैव तद्व्यक्तिदर्शनेच्छापि स्वयमेव व्यंजयिष्यते 'साध्व्येतच्छ्रोतुकामैः' इति । तथैव च तस्या वाक्यम्—'जाड्यं वचस्तव गदाग्रज' इत्यादि । एवं स्वदर्पन्यक्कारेण तत्क्षोभो दर्शितः, अथ तदविश्लेषन्यक्कारेण तत्क्षोभो दर्शितः । तदविशेषन्यक्कारे श्रीशुकवाक्यम्—'एतावदुक्त्वा' इत्यादि । अन्यस्य तत्र हेतुत्वं भगवतैव निराकरिष्यते—'भ्रातुर्विरूपकरणम्' इत्यादिनेति । वैदर्भी तादृशानुरागेण विदर्भादागता वा । प्रियेण तेन यस्त्यागः स्वस्य त्याजनं तस्माद्भयम् । ॥ ३१ ॥ सा वैदर्भी । तस्य कृष्णस्य परिहासवचनम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मामेत्यपि युग्मकम् । मा मां माभ्यसूयेथाः मयि दोषदृष्टिं मा कुरु ननु अनन्यगतिमपि मां त्यक्तुमिच्छसि कुतोऽसूया न कार्य्या तत्राह–जान इति । अतः कदाचित्कथञ्चिदपि न त्याज्येति भावः । ननु, तत्कुतस्तादृगुक्तं, तत्राह—त्वद्वच इति । ननु तथापि सत्यवचनेन त्वया मिथ्या वक्तुं न युज्यते तत्राह, क्ष्वेल्येति, नर्मसु तद्योग्यमित्यर्थः । हे अङ्गने परमसुन्दराङ्गीति स्तुतिः ॥ २९ ॥ प्रेमसंरम्भेति तृतीयालुक्च्छान्दसः अतः कटेत्यादिकयोरप्यन्वयः सर्वेषामेव विशेषणानां वचसि मुखे चान्वयः ॥ ३० ॥ हि यस्मादयं गृहेषु वर्त्तमानानां गृहमेधिनां गृहिणां लाभः फलं सुखमित्यर्थः । गृहेष्विति प्रोषितादीनां तु तथा सुखं निषेधयति यामः एकप्रहरोपि प्रिययेति सर्वाभ्योपि मे त्वमतिवल्लभा अतस्त्वयैव सहैतत् युज्यत इति हे भीर्विति भयमयदक्षिणप्रेमस्वभावादेव शङ्कां वहसि नतु विचारेणेति भावः। अतस्तदानीमपि क्रोधांशानभिव्यक्तौ सकौतुकं तदुद्भावनाय तमारोपयति–हे भामिनीति । एवं मा मा वैदर्भ्यसूयेथा इत्यपि अत्र श्रीभगवतः सकौतुकोयमभिप्रायः इयं खलु सरलप्रेमवती परमगाम्भीर्य्यवती च ततो ममाभीष्टः प्रियाकोपविलासः प्रेमनिर्बन्धप्रकाशकसविकारकण्ठोक्तिविशेषो वा नास्यां स्फुटमुपलभ्यते तस्मात्कोपविलासो वा तज्जननाभावे तु द्वितीयस्तादृशोक्तिविशेषो वा यथा स्यां प्रकाशेन तथा बाढं परिहासेन प्रयतिष्ये तत्र यस्यां कोपजनने भातृवैरूप्यादिकमपि कारणन्नासीत् तस्यां तत्रान्यत्परमायोग्यमेव किन्त्वहमेव मदविश्लेषसुखमेव चास्याः सर्वस्वमिति तद्दर्पन्यक्कारेणैव कोपः सम्भवेत् यदि ततोपि कोपो नाविर्भवेत् तथापि मद्विश्लेषभयेन पूर्वानुरागवदधुनापि विकारविशेषसहितो निगदेनैव प्रेमनिर्बन्धः प्रकाश्येतेति तत्र राजपुत्रीप्सिताभूपैरित्यादिकस्य तस्य श्रीकृष्णवचनस्य सप्रणयत्वं सपरिहासमयत्वं च तां रूपिणीमित्यादौ प्रीतः स्मयन्नित्यनेन व्यक्तं परिहासमयत्वं तु विशेषतोप्युक्तं प्रसङ्गेन तस्याः प्रेमसारल्यादिद्वयमपि तद्दृष्ट्वा भगवानित्यादिना हास्यं परिहासः तत्र प्रौढिः अवश्यमेनां सरलप्रेमाणमपि गम्भीरामपि क्षोभयिष्यामीति गर्वः तां प्रणयरसकौटल्याभावावेनाजानत्या इत्यर्थः । एवमग्रेपि हास्यप्रौढैर्भ्रमचित्तामिति तत्र तेन परिहासेन कोपविलासादिदर्शनमेवाभीष्टमिति स्वयमेवोक्तं मामावैदर्भीत्यादि त्रिभिः । अथ तस्य तत्प्रेमनिर्बन्धप्रकाशकविकारदर्शनेच्छापि प्राक्तनेनैव वाक्येन व्यक्ता तद्दृष्ट्वा भगवानित्यादिना तथा निगदनेनैव तद्व्यक्तिदर्शनेच्छापि स्वयमेव व्यञ्जयिष्यते साध्व्येतच्छ्रोतुकामैरिति तथैव च तस्या वाक्यं 'जाड्यं वचस्तवगदाग्रज' इत्यादि एवं स्वदर्पन्यकारेण तत्क्षोभो दर्शितः । अथ तदविश्लेषदर्पन्यक्कारे श्रीशुकवाक्यम् एतावदुक्त्वेत्यादि अन्यस्य तु हेतुत्वं श्रीभगवतैव निराकरिष्यते भ्रातुर्विरूपकरणमित्यादिनेति ॥३१॥ वैदर्भी तादृशानुरागेण विदर्भादागता या प्रियेण तेन यस्त्यागः स्वस्य त्यजनं तस्माद्भयम् ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मां माभ्यसूयेथा मयि दोषदृष्टिं मा कुरु, मा–शब्दस्य तत्राप्यादौ प्रयोगो निषेधस्य दाढ़्यार्थं तत्प्रार्थने वैयग्र्याच्च । नन्वनन्यगतिमपि मां त्यक्तुमिच्छसि, कुतोऽसूया न कार्य्या, तत्राह—जान इति । अतः कदाचित् कथञ्चिदपि न त्याज्यैवेति भावः । ननु तत् कुतस्तादृगुक्तम् ? तत्राह—त्वद्वच इति । ननु तथापि सत्यवचनेन त्वया मिथ्या वक्तु न युज्यते, तत्राह—क्ष्वेल्येति । नर्म्मसु तद्योग्यमेवेत्यर्थः । हे 'अंगने' इति सर्व्वथा सौन्दर्य्यवत्या त्वया सुन्दरमेव वचो वक्तव्यमित्याशयेनेति भावः ॥ २९ ॥ तथाप्यवाच्यं तादृशं दुःखप्रदं वचो वक्तु न युज्यते, सत्यम्, किन्तु दैहिकसौन्दर्य्यविशेषञ्च द्रष्टुमित्याह–मुखञ्चेति । समासान्तः प्रविष्टस्यापि प्रेमसंरम्भेत्यस्य परतोऽप्याकर्षः, तत्रैव तत्तत्सम्पत्तेः, स्फुरिताधरत्वादीनां यथोत्तरं सौन्दर्य्याधिक्ये संरम्भलक्षणत्वे वा श्रैष्ठ्यम्, तादृगुक्ति विना क्रोधानुदयेन तत्तत्सौन्दर्य्यानुभवासिद्धेरिति भावः ॥ ३० ॥ हि एव, अयमेव, गृहेषु वर्त्तमानानां गृहमेधिनां पञ्चयज्ञादिगृहस्थधर्म्मे दीक्षितानां गृहिणां वा, लाभः फलं सुखमित्यर्थः । गृहेष्विति प्रोषितादीनामन्यप्रयोजनस्याप्यपेक्ष्यत्वात्; यद्वा, गृहमध्य इत्यर्थः, सभादौ तदसम्भवात् । परम इति विषयान्तरभोगादिना सद्यस्तादृक्सुखानुत्पत्तेः । याम एकप्रहरोऽपि; प्रिययेति सर्व्वाभ्यो मे त्वमतिवल्लभा, अतस्तयैव सहैतद्युज्यत इति । हे 'भीरु' इति साध्वीत्वेन भयस्वभावादेव शंकां वहसि, न च विचारेणेति । हे भामिनीति च प्रणयकोप एव त्वया कर्त्तुं युज्यते, न त्वीदृशदुःखादिकमिति भावः ॥ ३१ ॥ भगवता सर्व्वशक्तिमता, अतः परि सर्व्वतोभावेन सान्त्विता सती, यतो वैदर्भी कन्यात्वेऽपि तदर्थं त्यक्तसर्व्वार्थेति । यद्वा, परमवैदग्ध्या तत्त्वं बोद्धुं समर्थेति भावः । अतस्तस्य तां वा तेन प्रागुक्तां सर्व्वां परिहासेनैवोक्ति ज्ञात्वा प्रियेण तेन यस्त्यागः स्वस्य त्यजनं तस्माद्भयम् । यद्वा, भयत्यागे हेतुः—वैदर्भी, न च मैथिलीति तज्जन्मन्येव तत्सम्भवात् । ननु तथापि तस्मिन् विश्वसितुं नार्हतीति, तत्राह—भगवानिति । श्रीरघुनाथत्वे प्राय आर्य्यधर्म्मो दर्शितः, अधुना च भक्तवात्सल्यादिसर्व्वसद्गुणप्रकटनात्तादृक्त्वं न सम्भवेदिति भावः । हे राजन्निति च अहो तयापि तस्मात्तादृशभयं प्राप्यते, कथमन्येन विश्वासः कार्य्यः इति प्रणयोक्तिः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

सान्त्वनप्रकारमेवाह—मामेति । हे वैदर्भि ! मां मासूयेथाः मह्यमसूयां माकृथा इत्यर्थः । त्वामहमेव परायणं परमप्राप्यं यस्यास्तथाभूतां जाने तर्हि किमर्थमित्थमुक्तमित्यत आह—त्वद्वच इति । तव वचः श्रोतुमिच्छता किन्नु वदिष्यति तत् शृणोमीत्येवं कामयमानेन मया हे अङ्गने ! क्ष्वेल्या नर्मणा एवमाचरितं कृतमुक्तमिति यावत् ॥ २९ ॥ किञ्च, मुखञ्चेति । प्रेमसंरम्भेण प्रणयकोपेन स्फुरितः कम्पितः अधरो यस्मिन् कटशब्दोऽत्रापाङ्गसामीप्याद्गण्डस्थलपरः कटयोर्गण्डस्थलयोरधिकरणयोराक्षेपाः कोपावेशेन चञ्चलनेत्राघातास्तैररुणावपाङ्गौ नेत्रान्तौ यस्मिन् तत्सुन्दरं कुटिलं भ्रुकुटीतटं यस्मिन् तत्तव मुखञ्चेक्षितुं द्रष्टुमाचरितमिति पूर्वेण सम्बन्धः ॥ ३० ॥ ननु, कलहे किं कौतुकं ? सुखं वा ? अत आह—अयं हीति । कोसौ ? हे भीरु ! हे भामिन कोपिनि ! प्रियया सह नर्मैः प्रणयकलहैर्यामो नीयत इति यदेष परमो लाभ इत्यर्थ । सुखमेवेति भावः । यामग्रहणं घटिकाक्षणाद्युपलक्षणम् ॥ ३१ ॥ सैवमिति । तद्भगवदुक्तं परिहासार्थोक्तिरूपमेव ज्ञात्वा प्रियकर्तृकत्यागसम्भावनाप्रयुक्तं भयं तत्याज ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

मा मां प्रति माऽसूयेथाः गुणे दोषदर्शनं न कुरु तस्याः तव वचः श्रोतुकामेन मया क्ष्वेलया नर्मलक्षणलीलयाऽऽचरितं कृतम् ॥ २९ ॥ प्रेमसहितसंरम्भेण स्फुरिताधरं कम्पमानाधरोष्ठं कटाक्षेण तिर्यक्दर्शनेनारुणापाङ्गेन रक्तनेत्रप्रान्तेन सुन्दरभ्रुकुटीतटम् ॥ ३० ॥ कामिवज्जनविडम्बनं मयाऽकारीत्याशयेनाह–अयमिति । प्रियया सह नमः स्नेहगर्भपरिहासवचनैर्यामः कालावयवो नीयत इति यदयमेव गृहस्थानां गृहेषु परमो लाभो हीत्यन्वयः ॥ ३१ ॥ द्विविधं वाक्यम् इष्टसाधनाववोधकमेकं दुःखपरिहारात्मकं तत्र पश्चादुक्तं दुःखविनाशकमिति भावेनाह—सैवमिति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसंदर्भः

हे भाविनीति एवं मा मां मासूयेथा इत्यपि नत्वेवम् ॥ ३१–३४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

मामेत्यादि । हे वैदर्भि ! मा मां मासूयेथाः, मयि असूयां मा कृथाः । यद्वा, मामा अभ्यसूयेथा इति सम्भ्रमाद्वीप्सा । नन्वेवं परुषं वचस्त्वयाऽभिहितम्, कथमसूयात्र न कार्येत्याह—त्वद्वचः श्रोतुकामेन क्ष्वेल्या परिहासेनैतदाचरितम्, न तु हृत्कषायेन ॥ २९ ॥ नन्वेवं परिहासः किं बुद्धिमता क्रियते ? इत्याह— मुखञ्च प्रेमसंरम्भ-स्फुरिताधरमीक्षितुम् । तव कोपो न

मया दृष्टः कदाचिदपि तदावलम्बवचो न श्रुतमिति तथा विहितमित्यर्थः । कटाक्षे अपारुणः अपाङ्गो यत्र, अपशब्दोऽत्राधिवयार्थः अव्ययानामनेकार्थत्वात् । हे भीरु ! भीते ॥ ३२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मा मेति संभ्रमाद्वीप्सा, कदापि त्वत्कोपो मया न दृष्टः कोपाविलं वचोऽपि न श्रुतम्, तद्दर्शनश्रवणार्थमिदमुक्तमित्याह—मुखञ्चेत्यादि । कटाक्षे अपारुणोऽत्यन्तारुणोऽपाङ्गो यत्र, अप-शब्दोऽत्राधिवयार्थः । हे भीरु भीत ! हे भामिनि कोपने ॥ २९-३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

ननु, त्वया चेदिदं शरीरं त्यक्तं तर्हि कथमेष महाभारो मया वोढव्य इत्यतो मयाप्येतत् त्यज्यते तत्राश्लेषाश्रुमार्जनादिना कपटप्रेमाणं प्रकटीकृत्य यत्प्रत्यूहं विधत्से तत् किमतोऽप्यतिदुःखदित्सा पुनरपि ते वर्त्तत इति स्वस्मिन् दोषारोपणमाशङ्क्याह—मेति । हे वैदर्भि मा मां मा असूयेथाः ननु च हन्त हन्त परमकारुणिक त्वयि मम नेयमसूया किन्तु त्वत्पार्श्वे स्थित्वा दुःखमेव प्राप्नुवत्याः मम हितार्थमेव सुखमयीमन्यां गतिं यदुपदिष्टवानसि तदाकर्णितवत्याः ममेयमानन्दमूर्च्छैवाभूत् तद्भङ्गञ्च त्वं किमकार्षीः सा यदि क्षणमपरमप्यस्थास्यत्तदा मम तव च परमैव निर्वृत्तिरभविष्यदिति तस्या सप्रेमवक्रोक्तिमाशङ्क्याह—त्वां मत्परायणां मदनन्यगतिमहं जाने तर्हि कथमेवं दुर्वाक्यमवचस्तत्राह—त्वद्वचः कां कां वक्रोक्तिं वदिष्यतीति श्रोतुकामेन मया क्ष्वेल्या नर्मणैव आचरितम् एवमुक्तं नतु तत्त्वतः हे अङ्गने सुन्दरि ॥ २९ ॥ नर्मोक्तौ प्रयोजनान्तरञ्चाह—प्रेमसंरम्भेण प्रणयकोपेन स्फुरितः कम्पितोऽधरो यत्र तत् कटाशब्देन कटाक्षास्तैराक्षेपे अरुणावपाङ्गौ यस्मिन् अत एव सुन्दरं कुटिलं भ्रुकुटितटं यस्मिन् तच्च तत् मुखम् ईक्षितुञ्च ननु यदि सत्यकामस्य भगवतस्तथाभूतैवेच्छा आसीत्तदा तदानीमेव रुक्मिणी सकोपकुटिलकटाक्षा कथं नाभूदिति चेत् उच्यते इच्छाशक्तिर्हि भगवत एवाधीना प्रेमा तु तं भगवन्तमप्यधीनीकरोतीति प्रेम्णाग्रेण तस्याः कापि प्रभविष्णुता प्रेमा हि आनन्दरूपमपि भगवन्तमतिशयेनानन्दयितुं तदिच्छामपि कदाचिदन्यथा करोति इदमत्र तत्त्वम् आसां रुक्मिण्यादीनां मधुरप्रेमरसवतीनां रतिप्रेमस्नेहप्रणयमानरागानुरागेषु सप्तसु स्थायिभावेषु मध्ये कदाचित् कश्चित् स्वावसरं प्राप्योदयते इत्यतस्तदानीं व्यजनसेवासमये अनुरागस्थायिभाव एवोदगात् तस्य च दैन्यसञ्चारिप्राबल्यात् तस्याः खेदचिन्ता मोह एवाभून्नतु तस्मिन् प्रणयकोपकटाक्षादयः तेचोपरिष्ठान्मानस्थायिभावोदयक्षणेषु भविष्यन्त्येव किञ्च घृतस्नेहवत्या रुक्मिण्याः मानकौटिल्यातिशयः प्रायो न उदयते मधुस्नेहवत्याः सत्यभामायास्तु अनुरागोपि मानगर्भ एवेति संरम्भसकम्पाधरकुटिलकटाक्षादिसुखं कृष्णस्य तत्रैवाभिसम्पद्यत इति ॥ ३० ॥ ननु, मत्कृतया व्यजनादिपरिचर्य्यया दुःखं लभसे किन्तु तां परित्यक्तवत्याः मम कठोरकोपोक्त्यैव सुखं लभसे अपरञ्च प्रियाया मम हर्षसोत्फुल्लं मुखं त्वन्नयनाभ्यां न रोचते किन्त्वतिदुःखरूक्षं कोपविवर्णीकृतं रसप्रतिकूलं भ्रुकुटिभीषणं मुखमेव रोचत इति कोयं ते स्वभावस्तत्राह—अयमिति ॥ ३१-३३ ॥

गूढार्थदीपिनी

मेति युग्मम् । मा माम् मा असूयेथा दोषदृष्ट्या न पश्य । क्ष्वेल्या परिहासेन एवमाचरितमुक्तं न तत्त्वतः । 'क्ष्वेलिर्नर्मणि हासे च' इति निरुक्तिः । प्रेमसंरम्भः प्रणयकोपः । एकदेशन्यायेन कटाः कटाक्षास्तेषामाक्षेपररुणौ अपाङ्गौ यस्मिन् अत एव सुन्दरं कुटिलं भ्रुकुटीतटं यस्मिन् तत् मुखं चेक्षितुमेवमाचरितमिति पूर्वेणान्वयः ॥ २९-३० ॥ यत् नर्मैः परिहासवचनैर्यामः प्रहरो नीयते तदयमेव । नर्मशब्दोऽदन्तोऽपि 'नर्मस्तु नर्मणा सार्द्धम्' इति द्विरूपकोशात् । गृहैर्दारैर्मेधन्ते सङ्गच्छन्त इति गृहमेधिनः । 'मेधृ' सङ्गमे । धातुः ॥ ३१-३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

मा माम् क्ष्वेल्या नर्मणा आचरितमुक्तम् कटैः कटाक्षैराक्षेपेण अरुणावपाङ्गौ यस्मिन् तत् ॥ २९-३० ॥ नर्मैर्नर्मभिः यामः कालः ॥ ३१-३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सान्त्वनप्रकारं दर्शयति । हे वैदर्भि अङ्गने कल्याणि मह्यं माऽसूयेथाः । त्वां मत्पराणां जाने जानामीति । तर्हि किमिदं मदन्तिक इति न वदेति वदति । त्वद्वाक्यं श्रोतुकामेन मया क्ष्वेलया नर्मगर्भलीलयाऽऽचरितमिति । क्ष्वेल्याचरितमिति पाठे क्ष्वेलीशब्दः कल्प्यः ॥ ३३ ॥ न केवलं वचः श्रोतुं किन्तु मुखं प्रेमसंरम्भः स्नेहारभटी तेन स्फुरितः कम्पमानोऽधरो यस्य तत् । कटाक्षेण यदीयकटाक्षमोक्षेणारुणोऽपाङ्गो यस्य स तन्त्रन्यायेन । तच्च तत्कटाक्षपातमात्रेण स्मरोद्रेक इति तात्पर्यम् ।

सुन्दरं भ्रुकुटीतटं च यस्मिस्तत् । ईक्षितुं कटाक्षेणेक्षितुमिति वा । अरुणेनेदानीं प्रदर्शितकोपतः । वस्तुतस्त्वसित एव स इति ज्ञेयम् । शिष्टं प्राग्वत् ॥ ३४ ॥ अयं रसिकव्यापार इति मयाऽकारीत्याह ॥ अयमिति । गृहमेधिनां गृहस्थाश्रमिणां गृहेषु भार्यासु तन्मध्ये प्रियया नर्मभिर्यामः कालो नीयते तादृशो यामस्त्वमेव प्राप्नुहीत्येवमित्ययं परो लाभो मुख्यलाभः । अत एव वटुसन्ध्यावन्दनवेलायां तटाकान्तं द्विजोत्तमैरिति । हि यतोऽत एवं कृतमिति भावः । हे भीरुवद्भाषिणि गृहेषु सति वा ॥ ३५ ॥ प्रियेण त्यागस्तत्कर्तृकः स्वकर्मकस्तस्माद्भयं जहौ तत्याज । भगवत् मुखमिति पदे । भगमस्तीति तत् । एतेन तन्मुखमिति परास्तम् ॥ ३६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तामेवाह त्रिभिः । **मा मेति** । कायवाङ्मनसां पूर्वं पूर्वं बलिष्ठमिति कायेन सान्त्वने कृते फलरूपत्वात्तस्य वाचिकस्य दुर्बलत्वाच्च जातमेव सान्त्वनम् । परं कायवाचोः परस्परविरोधात् भगवान्न विश्वसनीय इति स्यात्, तन्निषेधति, हे **वैदर्भि, मां मासूयेथा** इति । दोषारोपेण मा पश्य । **अथवा** । निष्कारणमेतावद्दुःखं दत्तमिति कदाचिदसूयां कुर्यात् । अन्यस्तु सहजमेव, न तेन कश्चिदुपकारं मन्यते । तर्ह्येवं वचनस्य प्रवृत्तिविरुद्धस्य कोऽभिप्राय इति चेत्, तत्राह **जाने** त्वामिति । अन्यथा ज्ञात्वा अन्यथावचनमभिप्रायं सूचयति । ननु निर्दुष्टा सर्वथा चेत्, तदैवमपि दोषं न मंस्यत इति किं दोषनिराकरणेनेत्यत आह **वैदर्भी**ति । जन्मभूमिसम्बन्धात् कदाचिदेवमपि भावयेदिति, अन्यथा चित्तवृत्तिर्भगवता कृतेति तद्दर्पहननं क्ष्वेल्यर्थं च न परस्परं विरुध्यते । **शब्दस्य त्रेधा वृत्तिः । मुख्या गौणी तात्पर्यवृत्तिश्चेति । लक्षणागौण्योस्त्वभेदः, तात्पर्ये वा अन्तर्भावः** । तत्र मुख्यार्थबाधः दर्पहननपक्षे क्ष्वेलिपक्षे च तुल्यः । ततः प्रासङ्गिको गौणः क्ष्वेल्यां पर्यवस्यति । तात्पर्यं तु दर्पहनन इति उभयमविरुद्धम् । 'स्त्रीषु नर्मविवाहे चे'ति वाक्यात् मुख्यार्थरहितशब्दप्रयोगो न दोषाय । अन्यथा तात्पर्यादीनां वैयर्थ्यं स्यात् । 'परोक्षवादा ऋषयः परोक्षं च मम प्रिय'मिति भगवद्वाक्याच्च । पूर्वपक्षन्यायेन बहिर्मुखत्वं लौकिकत्वं च तस्यामारोप्य, वाक्यानि प्रयुक्तानीत्यवोचाम । प्रासङ्गिकानि फलानि भगवान् निर्दिशति सान्त्वनार्थम् । मुख्यार्थो न विवक्षित इत्यत्र हेतुः **जाने त्वां मत्परायणा**मिति । अहमेव परमयनं यस्याः । तर्हि कथने कोऽभिप्राय इति चेत्, तत्राह **क्ष्वेल्याचरित**मिति । **क्ष्वेली** परिहासः । परिहासार्थमेव हि गालयः उत्पन्नाः । अतः क्ष्वेल्यैवाचरितं तादृशवचनभाषणं कृतमित्यर्थः । तथाकरणे दोषाभावमाह **अङ्गने** इति । अङ्गं नयति प्रापयतीति तादृश्या सह रसोत्पत्त्यर्थं वक्तव्यमेव । प्रासङ्गिकत्वात्तदानीमेवैतदभावेऽपि न दोषः । अग्रे तु भविष्यति । दर्पस्तु भगवदीयतया स्वल्पो मृग्य एव, अन्यथा ज्ञानमार्गात् को विशेषः स्यात् । परमुद्गतो नापेक्ष्यते । तस्मिन्निराकार्ये वक्ता ईश्वर इति सर्वोऽपि निवृत्तः, तदाधाराः प्राणा अपि । तदनभिप्रेतमिति पुनः प्रतिप्रसवमाह **जाने त्वा**मिति । परन्त्वहमेव वल्लभेति न मन्तव्यमिति भावः । क्ष्वेल्याः प्रयोजनमाह **त्वद्वचः श्रोतुकामेने**ति । गूढं वाक्यमपि श्रोतव्यमिति भावः ॥ २९ ॥ प्रयोजनान्तरमाह **मुखं चे**ति । मुखं च ईक्षितुम् । गालिदाने हि लोकाः कुप्यन्ति, तथा त्वमपि कोपं करिष्यसीति कोपोत्पादनार्थं तथोक्तम् । प्रेमरसस्त्रिविधो भवति, सात्त्विको राजसस्तामसश्च । सात्त्विकस्तत्र पुत्रादिसाधारणः । राजसः स्त्रियामेव धर्मसहितः । तामसस्तु जार एव भवति । सहजः स भावः कदाचिदत्र द्रष्टव्य इति तदुत्पादनार्थं वचनम् । प्रेम्णा यः क्रोधसंरम्भः, तेन स्फुरितमधरं यत्र, कटाक्षेपा वक्रदृष्टयः, तत्सहितमरुणं अपाङ्गं नेत्रान्तं यस्य । सुन्दरश्च भ्रुकुट्याः तटः । मुखं रसालं तामसं तदैव भवति । दृष्टिश्च सात्त्विकी तदैव रसाला । तदैव भ्रभङ्गश्च रसालः ॥ ३० ॥ ननु किमेवं वाक्काययोः श्रवणादिनेति चेत्, तत्राह **अयं ही**ति । गृहमेधिनां गृहेषु कामैकप्रधानेषु अयमेव परमो लाभः, अनिषिद्धः सन् पूर्णः कामरसः प्राप्यत इति । अतो यत्र रसाभास एव, तत्र चेद्रसः प्राप्यते, स कथं न परमो लाभो भवेत् । **गृहमेधिना**मिति स्वभावतो रसाभाव उक्तः । **नर्मैः** परिहासवचनैः । **यामः** कालः याममात्रं वा । त्रियामा रात्रिः । तत्र निद्रार्थं यामद्वयम्, ततो याममात्रमेवावशिष्यते । **प्रियया सहे**ति । प्रीतिस्त्वन्तरा, कायिकः साधारणः, वाचनिकं चेन्न स्यात्, तदैकाङ्गविकलमिति सर्वथा परिहासो वक्तव्यः । नन्वेवं सति विरसता चेत्स्यात्, तदाधिकं नश्येदित्याशङ्क्याह । **भीर्वि**ति सम्बोधनम् । 'विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना' इति स्त्रीविशेषवाचित्वान्नैवं विरसं करोति । **भामिनी**ति लौकिकं चातुर्यमुच्यते । तेन स्वभावतः गुणतश्चोत्तमेति नान्यथा करिष्यतीति भावः ॥ ३१ ॥ ततः स्वस्था भूत्वा भगवदभिप्रेतं कृतवतीत्याह **सैव**मिति द्वाभ्याम् । आदौ स्वास्थ्यमुच्यते । सा पूर्वं तथोक्ता तथाभूता च । ननु उभयमपि भगवद्वाक्यमेवेति कथमस्मिन्वाक्ये विश्वासः, पूर्वोत्तरभावस्त्वप्रयोजकः, यथा पूर्वत्र हेतुरुक्तः, तथात्रापि मरणमनभिप्रेतं भविष्यतीति हेतुः कुतो न भवेत्, ततो निर्विचिकित्सं कथं प्रवृत्तिरित्याशङ्क्याह **भगवतेति** । स हि सर्वसमर्थो यथेच्छं करोतीति । **राजन्नि**ति पूर्ववत् । **वैदर्भी** स्वभावतो भक्तिप्रधाना राजसीति । परितः सान्त्वनं कायवाङ्मनोभिः । बाधकं च विरुद्धं वाक्यं परिहासोक्ति ज्ञात्वा उदासीनत्वे चिन्तारहिता अलौकिकी त्यक्ष्यतीत्येव स्फुरितबाधा अभिप्राये ज्ञाते प्रियत्यागभयं जहौ । अन्यथा सशेषोभिमानो न भवेदिति । तया क्ष्वेल्यर्थतैव ज्ञाता, नतु स्मयाभावार्थता । अत एव यथार्थत्वे प्रियत्यागेन यद्भयं तत्त्यक्तवती ॥ ३२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

मा मा वैदर्भीत्यत्र। **अन्यत्त्वि**ति। लौकिकविषयाभावादिकमित्यर्थः। **न तेने**ति। लौकिकविषयादिना कश्चिदपि भक्त उपकारं न मन्यते। अतस्तदभावकथनं सहजत्वान्न दुःखदम्, किन्तु त्यागबोधकं वाक्यं दुःखदमित्यर्थः। **दोषं न मंस्यते** इति। एतादृशवाक्याकथनेपि विषयान्न भावयिष्यतीत्यर्थः। **एवमपी**ति। विषयभोगमपीत्यर्थः। **प्रासङ्गिकानि फलानी**ति। दर्पहनने तात्पर्यात्तन्मुख्यं फलं स्वपरायणत्वज्ञानक्ष्वेलिकोपादीनि प्रासङ्गिकानीत्यर्थः। **मुख्यार्थ** इति। त्याग इत्यर्थः। **गाल्य** इति। विवाहाद्युत्सवे उच्यन्ते ता इत्यर्थः। **प्रतिप्रसवमाहे**ति। भगवज्ज्ञानस्य सिद्धविषयत्वात्तज्ज्ञानेन प्राणादीनां प्रतिप्रसवो जातः। प्राणादिस्थितिं विना भगवत्परायणत्वं न सिध्यतीति भावः। **अयं ही**त्यस्याभासे। **श्रवणादिने**ति। श्रवणं च तदादिदर्शनं च तयोः समाहारस्तथा। **तेने**ति। तथा च 'वचः श्रोतुकामेने'त्युक्तेन वाचः श्रवणेन 'मुखं च ईक्षितु'मित्युक्तेन कायस्य दर्शनेन चेत्यर्थः। **व्याख्यानान्ते नान्यथा करिष्यती**ति। मनसि वैरस्यं न ख्यापयिष्यतीत्यर्थः।

श्रीसुबोधिनी-सारः

हे वैदर्भि मा मां माभ्यसूयेथा मा निंदय मत्परायणां त्वामहं जाने वेद्मि कथं तर्हि एतत्कारणं तत्राह। तव वचः श्रोतुकामेन रुष्टेयं कथं भाषत इत्येतदर्थं क्ष्वेल्याचरितं नर्मकृतं हे अंगने ॥ २९ ॥ प्रेम्णः प्रणयस्य संरंभेण कोपेन स्फुरितोऽधर ओष्ठो यस्मिस्तत्कटाक्षैराक्षेपास्तैः वर्णलोप आर्षः। अरुणावपांगौ यस्मिन् सुन्दरं वक्रं भ्रुकुटीतटं यस्मिस्तच्च तच्च मुखमीक्षितुं द्रष्टुम् ॥ ३० ॥ न चेद्वक्रकलहेन किं सुखमिति वाक्यम्। गृहमेधिनां गृहेषु अयमेव परमो लाभः कोसावित्यत आह हे भीरु हे भामिनि प्रियया श्रिया सह नर्मैर्नर्मभिर्हास्योक्तैर्यामः कालस्तदवयवो वा नीयते इति यत् ॥ ३१ ॥ शुकोक्तिः। राजन् भगवता श्रीषणे नैवं परिसांत्विता वैदर्भी सा तस्य पत्युः परिहासेनोक्ति कथनं ज्ञात्वा प्रियस्य त्यागाद्भयं जहौ तत्याज ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सान्त्वनप्रकारमेवाह—मेति। 'विदर्भदेशाधिपतिकन्यात्वात् न त्वमेवं शोकयोग्या' इति सूचयन् सम्बोधयति—वैदर्भीति। मा मां मा असूयेथाः 'निर्निमित्तमेव मह्यं दुःखं दत्तवान्' इति दोषारोपेण मा पश्येत्यर्थः। यतो मत्परायणां अहमेव परं अयनं आश्रयो यस्यास्तथाभूतां त्वामहं जाने। अतो न तव दुःखोत्पादनार्थमेवमुक्तवानित्याशयः। 'तर्हि किमित्येवमुक्तवान्' इत्यपेक्षायामाह—त्वद्वच इति। 'परिहासयोग्या च त्वम्' इति सूचयन् सम्बोधयति—अङ्गनेति। मद्वचनेन क्रुद्धा सती किं वदिष्यतीति तव वचः श्रोतुमिच्छता मया क्ष्वेल्या परिहासेनैवमाचरितमुक्तमित्यर्थः ॥ २९ ॥ प्रयोजनान्तरमप्याह—मुखं चेति। प्रेमसंरम्भेण प्रणयकोपेन स्फुरितः प्रकम्पितोऽधरो यस्मिस्तत्, कटाक्षेपां वक्रदृष्टयस्तत्सहितमरुणं अपाङ्गं नेत्रान्तं यस्मिन् तत्, अत एव सुन्दरं भ्रुकुटीतटं यस्मिन् तत्, एवंभूतं तव मुखं चेक्षितुमेतदाचरितमिति पूर्वेणैवान्वयः ॥ ३० ॥ 'एवं कुटिलवचनश्रवणेन कुपितमुखदर्शनेन वा किं' तत्राह—अयमिति। 'त्वं तु परिहासवचनमपि न सहसे, भीरुत्वात्' इति सूचयन् सम्बोधयति—हे भीरुभामिनि इति। यत्प्रियया सह नर्मैर्नर्मभिः परिहासवचनैः यामः कालो नीयते तदयमेव गृहेषु दुःखप्रधानेषु वर्तमानानां गृहमेधिनां गृहसम्बन्धिहिंसापराणां गृहस्थानां परमो लाभः सुखरूपं फलमन्यत्तु सर्वं दुःखमेवेत्यन्वयः ॥ ३१ ॥ भगवल्लीलाश्चर्यं सूचयन् सम्बोधयति—राजन्निति। सा वैदर्भी रुक्मिणी भगवता एवं परिसान्त्विन्ता, अत एव तस्य परिहासार्थमेवमुक्तं न तात्त्विकमिति ज्ञात्सा प्रियकर्तृकत्यागभयं जहौ तत्याजेति सम्बन्धः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

मेति। हे वैदर्भि ! हे अङ्गने सुन्दरि ! मा मां मा असूयेथाः निर्निमित्तमेव मह्यं दुःखं दत्तवानिति दोषारोपेण मा मा पश्येत्यर्थः। यतो मत्परायणाम् अहमेव परम् अयनम् आश्रयो यस्यास्तथाभूतां त्वामहं जाने। यतः त्वद्वचः किन्नु वदिष्यतीति श्रोतुकामेन मया क्ष्वेल्या परिहासेनैवमाचरितमुक्तं नतु तत्त्वतः ॥ २९ ॥ मुखं चेति। प्रेमसंरम्भेण प्रणयकोपेन। आर्षस्तृतीयालोपः। तेन कटेत्यादिकयोरप्यन्वयः। स्फुरितः प्रकम्पितोऽधरो यस्मिस्तत्। कटशब्देन कटाक्षास्तेषामाक्षेपैररुणावपाङ्गौ नेत्रान्तौ यस्मिन् तत् अत एव सुन्दरं भृकुटीतटं यस्मिन् तत् एवंभूतं तव मुखं चेक्षितुमेतदाचरितमिति पूर्वेणैवान्वयः ॥ ३० ॥ अयमिति। हे भीरु ! हे भामिनि ! यत्प्रियया सह नर्मैर्नर्मभिः परिहासवचनैः यामः कालो नीयते। तदयमेव गृहेषु दुःखप्रधानेषु वर्तमानानां गृहमेधिनां परमो लाभः सुखरूपं फलमन्यत्तु सर्वं दुःखमेव ॥ ३१ ॥ सेति। हे राजन् ! सा वैदर्भी रुक्मिणी भगवता एवं परिसान्त्विता अत एव तस्य परिहासोक्तिं न तात्त्विकमिति ज्ञात्वा प्रियकर्तृकत्यागभयं जहौ तत्याज ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मा मां हे अंगने क्ष्वेल्या उपहासेनाचरितं एतद्वचनमुक्तं ॥ २९ ॥ प्रेमसंरंभेण स्नेहविशिष्टक्रोधेन स्फुरितः कंपितोऽधरो यस्मिस्तत्। कटानां कटाक्षानामाक्षेपैर्निक्षेपैः अरुणौ अपांगौ नेत्रप्रांतभागौ यस्मिस्तत्। अतस्सुंदरभ्रुकुटीतटं। मुखमीक्षितुं

मया क्ष्वेल्या चरितमिति पूर्वेण संबंधः ॥ ३० ॥ ननु कलहे किं कारणं तत्राह अयमिति नर्मैर्नर्मभिरुपहासवाक्यैः प्रियया सह गृहस्थैः यामः प्रहरादिकालो नीयते इति यदयं ॥ ३१-३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सान्त्वनप्रकारमेवाह मा मामिति त्रिभिः । मा मामिति । हे वैदर्भि रुक्मिणि, मां असूयेथाः । मह्यमसूयां मा कृथा इत्यर्थः । मा मा, इत्यपि पाठः त्वां अहमेव परायणं परमप्राप्यं यस्यास्तथाभूतां, जाने । तर्हि किमर्थमित्थमुक्तमित्यत आह । त्वद्वच इति । हे अङ्गने, त्वद्वचः त्वदीयं वचनं, श्रोतुकामेन श्रोतुमिच्छता, किं नु वदिष्यति तच्छृणोमीत्येवं कामयमानेनेत्यर्थः । मया, क्ष्वेल्या नर्मणा, एवं आचरितं कृतमुक्तमिति यावत् ॥ २९ ॥ किं च । मुखं चेति । प्रेमसंरम्भेण प्रणयकोपेन स्फुरितः कुपितोऽधरो यस्मिस्तत्, कटाशब्देष्ट कटाशब्देन कटाक्षाः तेषां वक्रदृष्टीनामाक्षेपैररुणावपाङ्गौ नेत्रप्रान्तौ यस्मिस्तत्, सुन्दरे कुटिले भ्रुकुटीतटे यस्मिस्तत्, यद्वा कटाक्षेपः कटाक्षेण तिर्यग्दर्शनं तेनारुणापाङ्गेन रक्तनेत्रप्रान्तेन सुन्दरं भ्रुकुटीतटं यस्मिस्तदित्येकं पदम् । मुखं च मुखमपि, ईक्षितुं, एवमाचरितमिति पूर्वेण संबन्धः ॥ ३० ॥ ननु कलहे किं कौतुकं सुखं वा अत आह । अयं हीति । गृहमेधिनां गृहेषु, अयं हि अयमेव, परमः लाभः । कोऽसौ तत्राह । हे भीरु, हे भामिनि, प्रियया सह, नर्मैः प्रणयकलहैः, यामः प्रहरः, नीयते इति यत्, एष परमो लाभ इत्यर्थ ॥ ३१ ॥ सैवमिति । हे राजन्, सा वैदर्भी रुक्मिणी, भगवता श्रीकृष्णेन, एवमुक्तप्रकारेण, परिसान्त्विता सती, तद्भगवदुक्तं, परिहासोक्तिं ज्ञात्वा, प्रियत्यागभयं प्रियकर्तृकत्यागसंभावनाप्रयुक्तां भीतिमित्यर्थः । जहौ तत्याज ॥ ३२ ॥

कृष्णप्रिया

करुणानिधान भगवान् श्रीकृष्ण ने कहा—हे विदर्भतनये ! मुझ पर नाराज नहीं होना ! देवी ! मैं अच्छी तरह से जानता हूँ कि आप मत्परायण एवं अनन्य प्रियतमा हो । प्रियाजू ! मैं आपके श्रीमुख से नर्मविनोदमयी सुधा झरती वाणी सुनना चाहता था । मैंने जो वाक्य कहें वे वास्तविक वाक्य न थे लेकिन नर्म वाक्य थे । जिन वाक्यों से आपके मर्म में दुःख हुआ क्षमा कीजिये ॥ २९ ॥ देवीजी ! मेरे ऐसे कटाक्ष एवं कठोर वाक्यों को सुनकर आप रुष्ट हो जायँ आपके नयन रुष्ट हो जायँ आपके बिम्बाधर प्रणय रोष से फड़कने लगे । कटाक्ष पूर्ण नजरों से देखने से नेत्रों में लालिमा छा जाय और आपकी भौंहें चढ़ जाने से मुख सरोज का लावण्य और सौन्दर्य का रस प्राप्त हो इस आशय से औपचारिक वाक्य सुनाये थे ॥ ३० ॥ प्रियतमाजू ! हे भामिनी ! हे सुन्दरी ! निरन्तर एवं दिन रातभर गृहस्थाश्रम के कार्यों में डूबे हुए गृहस्थ दम्पत्तियों के मनोमोद एवं नैसर्गिक आनन्द का यह ही लाभ है कि निज अर्धाङ्गना से हास्य विनोद करते हुए कुछ समय आनन्द में विताया जाय यह परम सुख माना ॥ ३१ ॥ श्रीशुकमुनिजी ने कहा—महाराज परीक्षित् ! जव कृपासिन्धु द्वारिकानाथ निजनाथ ने विदर्भ राजकुमारी प्रियतमा श्रीरुक्मिणीजी को स्नेहमयी वाक्सुधा से समझाया तब देवीजी को इस बात का निश्चय हो चुका कि मेरे प्राणजीवन ने केवल हास्य विनोद में ही ऐसे वचन सुनाये । देवीजी के हृदय से यह भय हट गया कि नाथ हमें छोड़ देंगे ॥ ३२ ॥

बभाष ऋषभं पुंसां वीक्षन्ती भगवन्मुखम् । सव्रीडहासरुचिरस्निग्धापाङ्गेन भारत ॥ ३३ ॥[1]

रुक्मिण्युवाच

नन्वेवमेतदरविन्दविलोचनाह यद् वै भवान्[2] भगवतोऽसदृशी[3] विभूम्नः ।
क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः क्वाहं गुणप्रकृति[4]रज्ञगृहीतपादा ॥ ३४ ॥
सत्यं भयादिव गुणेभ्य उरुक्रमान्तः शेते समुद्र उपलम्भनमात्र आत्मा ।
नित्यं कदिन्द्रियगणैः[5] कृतविग्रहस्त्वं त्वत्सेवकैर्नृपपदं विधुतं तमोऽन्धम् ॥ ३५ ॥
त्वत्पादपद्ममकरन्दजुषां मुनीनां [6]वर्त्मास्फुटं नृपशुभिर्ननु दुर्विभाव्यम् ।
यस्मादलौकिकमिवेहितमीश्वरस्य [7]भूमंस्तवेहितमथो अनु ये भवन्तम्[8] ॥ ३६ ॥

कर्वमक्षमा

अन्वयः—हे भारत !, सव्रीडहासरुचिरस्निगधापाङ्गेन, भगवन्मुखम्, वीक्षन्तीं, पुंसाम्, ऋषभम्, बभाषे ॥ ३३ ॥ रुक्मिणी-उवाच—हे अरविन्दविलोचन ! विभूम्नः, भगवतः, असदृशी इति, यत्, भवान्, आह, ननु, एतद्, योग्यम्, एव,

---

[1] रुक्मिणी चारु सर्वाङ्गी साक्षाच्छ्रीरनपायिनी—च. पु. टि. । [2] भवान्न भवतः—वीर. विज. । [3] सदृशो—विज. । [4] रन्य—विज. । [5] गुणैः—वीर. विज. । [6] वर्त्म—विज. । [7] भूम्नः—वीर. । [8] न्ति—विज. ।

स्वे, महिम्नि, अभिरतः, त्र्यधीशः, भगवान्, क्व ? अज्ञगृहीतपादा, गुणप्रकृतिः, अहम्, क्व ? ॥ ३४ ॥ हे उरुक्रमः, गुणेभ्यः, भयात्, इव, अन्तःसमुद्रे, उपलम्भनमात्र, आत्मा, नित्यम्, कदिन्द्रियगणैः, कृतविग्रहः, त्वम्, नित्यम्, शेते, तत्, सत्यम्, त्वत्, सेवकैः, अन्धम्, तमः, नृपपदम्, विधुतम्, तर्हि भवत् कृते, किमु, वक्तव्यम्, ॥ ३५ ॥ हे भगवन्–नृपशुभिः, ननु, त्वत् पादपद्ममकरन्दजुषाम्, मुनीनाम्, वर्त्म अस्फुटम्, दुर्विभाव्यम्, हे भूमन्, ईश्वरस्य, तव, ईहितम्, अथ, अलौकिकम्, यस्मात्, भवन्तम्, ये, अनु, तेषाम् अपि अलौकिकम् इव, स्यादेव ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भगवतस्तस्य ऐश्वर्ययुक्तं मुखं सव्रीडेन हासेन रुचिरेण स्निग्धेनापांगेन वीक्षमाणा ॥ ३३ ॥ "असमत्वं भयं दुर्गाश्रयणं प्रबलैः कलिः। अराजत्वमविज्ञाता लौकिकेहावसादनम् ॥ निष्किञ्चनत्वं तत्प्रीतिराढ्यानादरणीयता। अनौचित्यं निर्गुणत्वं वृथा श्लाघा च भिक्षुभिः॥ औदासीन्यमकामत्वं स्वदोषान्षोडशाऽसतः॥ अज्ञत्वादीर्घदर्शित्वे भैष्म्याराज्ञां बहून्गुणान्। कृष्णेनमोंदितान्भैष्मी न्यषेधत्तद्गुणस्तवैः॥" भगवता स्वनिंदापराणीव यानि वचनान्युक्तानि तानि सर्वोत्कर्षपरतया व्याचक्षाणा प्रतिभाषते स्म। तत्र यदुक्तं 'कस्मान्नो ववृषेऽसमान्' इति तत्रासाम्यं सत्यमेवेत्याह—नन्वेवमिति। हे अरविंदविलोचन! त्र्यधोशस्त्रयाणां ब्रह्मादीनामप्यधीशो नियंता त्वं क्व क्व चाहं गुणप्रकृतिस्त्रिगुणस्वभावा प्राकृता गुणमयी प्रकृतिर्वा। ननु त्वमेवाधीश्वरी श्रीः सर्वैरुपास्यत्वादिति चेदत आह—अज्ञैः सकामैर्गृहीतौ पादौ यस्याः सा ॥ ३४ ॥ यदुक्तं "राजभ्यो बिभ्यतः सुभ्रूः समुद्रं शरणं गतान्" इति तत्राह सत्यमिति। हे उरुक्रमेति भयाभावं दर्शयति। गुणाः शब्दादय एव राजंत इति राजानस्तेभ्यो भयादिवेति अंतर्हृदये समुद्रे तद्वदगाधे विषयाकारैरपरिच्छिन्न इत्यर्थः। शेते निश्चलतया प्रकाशते। उपलंभनमात्रश्चैतन्यघन आत्मा भवानिति। 'बलवद्भिः कृतद्वेषान्' इति यदुक्तं तदपि सत्यमित्याह—नित्यमिति। कदिंद्रियगणैः कुत्सितैर्बहिर्मुखैरिंद्रियगणैः वृत्त्यभिप्रायेण बहुवचनम्। कुत्सित इंद्रियगणो येषामिति वा। तैस्त्वं नित्यं कृतविग्रहः तेषु तवाप्रतीतेः। यदुक्तं 'त्यक्तनृपासनान्' इति तदपि युक्तमेवेत्याह— त्वत्सेवकैरिति। नृपाणां पदमासनमंधं गाढं तम एव तत्। अविवेकबहुलत्वात् त्वत्सेवकैरेव तत्त्यक्तं किं पुनर्वक्तव्यं त्वया त्यक्तमिति ॥३५॥ "अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषाम्" इति यदुक्तं तदपि तथैवेत्याह—त्वत्पादेति। नृपशुभिर्नराकारैः पशुभिः। किं पुनर्वक्तव्यं तव वर्त्मास्फुटमिति। किंच यस्माद्ये भवंतमनुवर्तंते तेषामपीहितमलौकिकमिव। अथो अतः किमु वक्तव्यं तवेश्वरस्येहितमलौकिकमित्यर्थः। "आस्थिताः पदवीं सुभ्रूः प्रायः सीदंति योषितः" इत्यस्य परिहारं वक्ष्यति यद्वाञ्छयेति पंचमश्लोके ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुंसामृषभमिति सर्वसौन्दर्यवैदग्ध्यादिकमुक्तम्। अतो भगवदिति। स्वेनैव सुस्निग्धस्मितश्रमजलादिना च श्रीमत्, अत एव विशेषेणेक्षमाणा। केन—सव्रीडहासरुचिरस्निग्धापांगेन। तत्र व्रीडापूर्वं हास्यप्रौढिज्ञानाशक्तेः, हासः संप्रति हास्यप्रौढानुसंधानात्, व्रीडासहितेन हासेन रुचिरः स्निग्धश्च प्रेमरसार्द्रो योऽपाङ्गस्तेन, इतीक्षणविशेषोपि दर्शितः। एवञ्च परमोत्तमयोस्तयोः प्रेमसंवादो महावंशयशस्करगुणत्वात्त्वमेव बोद्धुमर्हसीत्यतस्तत्र मनो निधेहीत्याह—भारतेति ॥ ३३ ॥ असमत्वमतुल्यत्वम्। अविज्ञातं चालौकिकं चाविज्ञातालौकिके ते च ते ईहे चाविज्ञातालौकिकेहे ते चावसादनं चैतेषां समाहारो विज्ञातालौकिकेहावसानम्, तथा चाविज्ञातेहालौकिकेहाऽवसादनं चेति त्रयम्। तत्प्रीतिर्निष्किचनप्रीति। अनौचित्यमौचित्याभावः। असतोऽविद्यमानान्। भैष्म्या द्वौ दोषौ। तद्गुणस्तवैः कृष्णगुणकथनैः। ते दोषा एव गुणास्तद्गुणा इतिवा। तत्र तेषु षोडशसु, तत्रेत्युक्तार्थमेव। यद्भवानाहैतदेवमेव। ननु एवार्थे। समो न त्वयेति। कथम्—विभूम्नो देशकालवस्तुपरिच्छेदसहितस्य व्याप्तस्य भवतः सदृशो नास्तीति, किन्तु भवानेव भवत्समः "रामरावणयोर्युद्धं रामरावणयोरिव" इतिवत्। मत्सदृशी त्वमिति चेन्नेत्याह––क्वेति। ननु ब्रह्मादयो मत्सदृशा एवेति––चेदाह––अधीश इति। त्रिगुणस्वभावत्वे वैलक्षण्यासिद्धेराह––प्राकृतगुणमयी स्वाभाविकगुणविकारा। प्रकृतिर्मूलकारणं, गुणानामित्यर्थः। अत्राक्षिपति भगवान्––नन्विति। इत्यत इत्यत्र। अज्ञेति–विद्वांसस्तु मां त्यक्त्वैव त्वामुपासत इति भावः॥ अत्र टीकापद्येषु अविज्ञातेत्यादिना दोषत्रयमज्ञातेहा च लौकिकेहा चावसादनञ्चेति। भवतः सदृशी नाहमिति यद्भवानाह एतदेवं सत्यमेवेत्यर्थः। किन्तु भवत इति वक्तव्ये भगवत इति गौरवात्। वै व्यक्तम्। ननु निश्चितम्। कुतः––विभूम्नः, अनंताद्भुतमाहात्म्यपरिपूर्णस्य। अरविंदादपि विशिष्टलोचनेति सौदर्येणापि न सदृशीति भावः। असदृशीत्वमेव व्यंजयति––क्वेति। स्वे महिम्नीति स्वरूपमेव महिमा परमप्रशंसाहेतुः, परमानंदरूपत्वात्तस्मिन्नित्यर्थः। तादृशे तत्रापि सर्वतोभावेन यतो भगवान्सर्वोत्कृष्टपदे वर्तते, अहं तु गुणा जाड्यादिदोषयुक्तास्तमःपर्यन्तास्त्रयः प्रकृतिः स्वरूपं यस्याः सा। क्व––सर्वनिकृष्टपदे वर्तेऽतो महदेवान्तरमिति भावः। एवं स्वरूपगते गौरवलाघवे दर्शिते। ऐश्वर्यगतं अप्याह––त्रयाणां गुणानां ब्रह्मादीनां वा ईश आराध्यः पुरुषस्तस्याप्युपरीशो भगवानधीशः, अहं त्वज्ञैस्त्वद्बहिर्मुखैर्गृहीता आश्रिताः पादा अंशाः सत्त्वादिवैभवरूपा यस्याः, सा, तत्सारांशजगल्लक्ष्मीत्वेप्यज्ञैरिंद्रादिभिरेवाश्रितौ पादौ चरणौ यस्यास्सा इत्यर्थान्तरोक्तिरिति

स्वस्य स्वरूपशक्तित्वेऽपि निजांशाभासमायाशक्तित्वेनोपन्यासो दैन्येनेव, टीकायां प्रथमार्थवत् । अतो वास्तवार्थे दैन्यं यथा स्वे स्वीये महिम्नि का कदा सर्वज्ञत्वादिरूपसौंदर्यसामर्थ्यादिरूपे वैभवेऽभिरतो भगवान् क, क वाऽहं स्वरूपभूतत्वेऽपि शक्तित्वेन शक्तिमत्त्वापेक्षया गौणी प्रकृतिर्यस्याः सा, तथा त्रयाणाम् "त्रिपाव्द्याप्तिः परे धाम्नि अनित्यं पादमैश्वरम्" इति पाद्मोत्तरखंडानुसारेण वैकुंठगतत्रिपाद्विभूतिरूपायां सर्वोपरीश्वरो भगवान्क, क चाहमस्य विष्णोस्तव ज्ञैर्ज्ञातृभिरेव गृहीतौ पादौ यस्याः सा, त्वन्महिमानुगतिमात्रसिद्धतत्तदैश्वर्येत्यर्थः। अथ दैन्यं विनापि वास्तवार्थे तत्तदुत्तरम्—यथैवमेवंभूतो भगवान्क कुत्रान्यत्र वर्तते किन्तु सर्वदा । ममाश्रयत्वेनैव वर्तते, अहं क कुत्रान्यत्र किन्तु सर्वदा त्वदाश्रितत्वेनैव वर्ते, तथा गुणा भवत ऐश्वर्यादय एव प्रकृतिः स्वरूपं यस्याः सा । अत एव न विद्यते ज्ञः पंडितो येभ्यस्तैर्गृहीतपादेति । एवं कथमसमत्वं घटत इति भावः ॥ ३४ ॥ येन पादन्यासेनातिबलदैत्यानीकपतेर्बलेः पृथिवी गृहीता तस्य कुतो भयमिति संबुद्ध्यभिप्रायः । इत्यर्थ इति—समुद्रवदगाधांतःकरणं विषयाकारतरंगैर्न परिच्छिद्यत इति भावः । यद्यपीन्द्रियगण एक एव तथाप्येकैकेन्द्रियवृत्तीनामनंतत्वाद्गुणैरिति बहुत्वमित्यर्थः । इन्द्रियाणां जडत्वात्स्वतो बहिर्मुखता न संभवतीत्यत आह—कुत्सितो विषयोन्मुखः । सत्यमित्यर्द्धांगीकारे । यद्वा—राजन्ते स्वशक्त्या द्योतन्ते इति राजानो गुणास्तेभ्यः इवेति शिक्षायां संसारावृत्तिहेतुगुणेभ्यो बिभ्यज्जनः समुद्रिक्तसुखाय समुद्रादिजलवासेन तपस्यति तथाहमपीति भावः । यद्वा—पंचभूतमुद्रासहिते शरीरे शेते भयादिवांगुष्ठमात्रः सन् "अंगुष्ठमात्रः पुरुषः" इति श्रुतेः । तर्हि जीववज्जन्माद्यपि स्यादत आह—उपलंभनमात्रः केवलचिन्मयः देहधर्मास्पृष्टः । कथम्—तत्राह—आत्मेति । सुखमेवाददाति नाण्वपि दुःखमित्यात्मा, जीवस्तु न तथेति । नृपपदं नृपासनं, न तु नॄन्पातीति नृपस्तत्पदन्तदर्थ इत्यर्थः ॥ भगवद्विवक्षितस्योत्तरानुपपत्तेः—सत्यमिति । अस्य टीकायास्तात्पर्यमिदम्—'राजभ्यः'—इत्यादि यदुक्तं तत्तु गौण्यैव वृत्त्या संभवति न तु मुख्ययेत्याह—सत्यमिति । यद्भवानंतःसमुद्रे समुद्रमध्ये द्वारकायां दुर्गे शेते लीनतया प्रकाशते तद्भयादिवेत्येव, न तु भयादेवेत्यर्थः । यतो गुणाख्यराजभ्यश्चित्ताख्यांतःकरणसमुद्रे तस्मादिवांतर्यामिरूपेणापि शेते, न तु तस्मादेवेत्यर्थः । उभयत्र हेतुः—उपलंभनेति । यच्च 'बलवद्भिः' इत्यादिकमुक्तं तत्तु मुख्ययैव । सत्यमित्याह—कर्दिद्रियगणयुक्तैर्जीवैः कर्तृभिर्नित्यमेव कृतो विग्रहो विरोधो यत्र तथाभूतस्त्वमतः संप्रत्यपि तादृशे राजभिः स एव कर्तुं योग्य इत्यर्थः । श्लेषेण यतोन्तर्यामिरूपत्वेपि कुत्सितैरिंद्रियगणैः कृतविग्रहस्त्वमित्यर्थः । यतस्तादृशेषु च त्वदीयस्वरूपादीनां यथावत्स्फूर्तिर्नास्ति ततस्तेषां त्वयि विरोधारुच्यादिमयद्वेषी युक्त एवेति भावः । अथवा—आत्मा त्वम्, शेते इत्यन्वयानुपपत्तेरात्मत्वमित्येतयोः पदयोर्न विशेषणविशेष्यभावः, अत उपमानोपमेयभाव एव योज्यः । इवाद्यभावः न तु लुप्तोपमेयम् । अयमर्थः—हे उरुक्रम आत्मा शुद्धजीवो यथा गुणेभ्यस्तन्मयेभ्यः कर्दिद्रियेभ्यो भयादिवांतर्हृदयाकाशे समुद्रवदनवगाह्ये शेते लीनतया वसति तथा त्वं गुणेभ्यः सदा, अधुना तु तत्प्रधानेभ्यो राजभ्यश्च भयादिवांतःसमुद्रे समुद्रस्य मध्ये श्वेतद्वीपादाविव द्वारकाख्ये धाम्नि शेषे नित्यं तथा वससि । तथा च श्रुतयः—"यमन्तसमुद्रे कवयो वयन्ति तदक्षरे परमे प्रजातयः । प्रसूता जगतः प्रसूती तोयेन जीवान्व्याससर्ज भूम्याम्"॥ इत्यारभ्य "तदेव ब्रह्म परमं कवीनाम्" इत्याद्याः, "यः कामयते मुग्धं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां समयोनिश्चरन्तः" इति महालक्ष्मीवचनाद्याश्च, "नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः" इत्येकादशवचनं च । तत्रोभयत्र साम्यमुपैति भगवत्यपि तन्मात्रत्वं सच्चिदानन्दविग्रहत्वादिति ॥ ३५ ॥ तथैव सत्यमेव अलौकिकेहत्वमाह—किञ्चेति । इत्यर्थ इति—विधिनिषेधविषयताऽज्ञस्यैव न ज्ञानिनः, नतरां सर्वज्ञस्य तवेति भावः । पंचमश्लोके—अतः परत्र पंचम इत्यर्थः ॥ ननु प्रेमसंबोधने, निश्चये वा । मुनयो ज्ञानिनस्तेषामपि त्वद्भक्तसंगादिप्रभावेण त्वत्पादयोर्मकरंदो यत्किंचिन्माधुर्यं तज्जुषां वर्त्म निजाभिरुचितचेष्टितम् । अस्फुटं स्वाच्छादनलोकसंग्रहाद्यर्थचेष्टितांतरावृतम्' अतो दुर्विभाव्यम्, बोद्धुमशक्यमिति भावः । इहास्पष्टवर्त्मनामिति स्वमते योजितम् । अलौकिकमिव यतः लोकातीतं लौकिकत्वेप्यलौकिकत्वदर्शनात् । तत्र हेतुः—हे भूमन् अपरिच्छिन्नमाहात्म्येति ॥३६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुंसामृषभमिति सर्वसौन्दर्य्यवैदग्धादिकमुक्तम् अतो भगवदिति स्वेनैव सुस्निग्धस्मितश्रमजलादिना च श्रीमत् अत एव विशेषेणेक्षमाणा केन सव्रीडहासरुचिरास्निग्धापाङ्गेन तत्र व्रीढा पूर्वं हास्यप्रौढिज्ञानाशक्तेः हासः सम्प्रति हास्यप्रौढ्यनुसन्धानात् व्रीडासहितेन हासेन रुचिरश्च स्निग्धश्च प्रेमरसार्द्रो योपाङ्गस्तेनेतीक्षणविशेषोपि दर्शितः एष च परमोत्तमयोः तयोः प्रेमसम्वादमहावंशयशस्करगुणात्वात्त्वमेव बोद्धुमर्हसीत्यतस्तत्र मनोनिधेहीत्याह—भारतेति ॥ ३३ ॥ तत्र टीकापद्येषु अविज्ञातेत्यादिना दोषत्रयं अविज्ञातेहा च अलौकिकेहा च अवसादनश्चेति भवतः सदृशी नाहमिति यद्भवानाह एतदेवं सत्यमेवेत्यर्थः । किन्तु भवत इति वक्तव्ये भग इति गौरवभरात् वै व्यक्तं ननु निश्चितं कुतः विभूम्नः अनन्ताद्भुतमाहात्म्यगुणसौन्दर्य्यादिपरिपूर्णस्य अरविन्दादपि विशिष्टलोचनेति भवदेकाङ्गसौन्दर्य्येणापि न सदृशी किमुत सर्वाङ्गसौन्दर्य्येणापि न सदृशी किमुत सर्वाङ्गसौन्दर्येणेति भावः । असदृशीत्वमेव व्यञ्जयति क्वेति स्वे महिम्नीति स्वरूपमेव महिमा परमप्रशंसाहेतुः परमानन्दरूपत्वात् तस्मिन्नित्यर्थः । तादृशे तत्र अभिसर्वतो भावेन यतो भगवान् भवान् क सर्वोत्कृष्टपदे वर्त्तते अहन्तु गुणा जाड्यादिदोषयुक्तास्तमःपर्य्यन्तास्त्रय; प्रकृतिः स्वरूपं यस्याः सा क सर्वनिकृष्टपदे वर्त्ते अतो महदेवान्तरमिति भावः । एवं

स्वरूपगते गौरवलाघवे दर्शिते ऐश्वर्य्यगते अप्याह-त्रयाणां गुणानां ब्रह्मादीनां वा ईशः आराध्यः पुरुषस्तस्याप्युपरीशो भगवानधीशः अहन्त्वज्ञैस्त्वद्बहिर्मुखैरेव गृहीताः आश्रिताः पादा अंशाः सत्त्वादिवैभवरूपा यस्याः सा तत्सारांशजगल्लक्ष्मीत्वेपि अज्ञैरिन्द्रादिभिरेवाश्रितौ पादौ चरणौ यस्याः सेत्यर्थान्तरव्यक्तिः इतिस्वस्य स्वरूपशक्तित्वेपि निजांशाभासमायाशक्तित्वेनोपन्यासोदैन्येनैव टीकायाः प्रथमार्थवत् त्र्यधीश इत्यस्य टीकायां श्रीशिवश्रीब्रह्मणोरिव भगवतः श्रीविष्णोरपि श्रीकृष्णनियाम्यत्वं स्फुटमेवाङ्गीकृतम् अतो वास्तवार्थे दैन्यं यथा स्वे स्वीये महिम्नि काकस्य सर्वज्ञादिरूपसौन्दर्य्यसामर्थ्यादिरूपे च वैभवेभिरतो भगवान् क्व, क्वचाहं स्वरूपभूतत्वेपि शक्तित्वेन शक्तिमत्त्वादपेक्षया गौणी प्रकृतिर्यस्याः सा तथा त्रयाणां त्रिपाद्व्याप्तिः परे धाम्नि अनित्यं पादमैश्वरमिति पाद्मोत्तरखण्डानुसारेण वैकुण्ठगतत्रिपाद्विभूतिरूपाणां सर्वोपरीश्वरो भगवान् क्व? क्व वाऽहम् अस्य विष्णोस्तवज्ञैर्ज्ञातृभिरेव गृहीतौ पादौ यस्याः सा त्वन्माहिमानुगतिमात्रसिद्धतत्तदैश्वर्य्येत्यर्थः। अथ दैन्यं विनापि वास्तवार्थे तदुत्तरं यथा एवमेवम्भूतो भगवान् क्व कुत्रान्यत्र वर्त्तते किन्तु सर्वदा ममाश्रयत्वेनैव वर्त्तते अहञ्च कुत्रान्यत्र किन्तु सर्वदा तदाश्रितत्वेनैव वर्त्ते तथा गुणा भवत ऐश्वर्य्यादय एव प्रकृतिः स्वरूपं यस्यास्सा अत एव न विद्यते ज्ञः पण्डितो येभ्यस्तैर्गृहीतपादेति एवं कथमसमत्वं घटत इति भावः ॥३४॥ भगवद्विवक्षितस्योत्तरानुपपत्तेः सत्यमित्यस्य टीकायाः तात्पर्यमिदं राजभ्य इत्यादि यदुक्तं तत्तु गौण्येव वृत्त्या सम्भवति नतु मुख्ययेत्याह–सत्यमिति। यद्भवानन्तस्समुद्रे समुद्रमध्ये द्वारकाख्ये दुर्गे शेते लीनतया प्रकाशते तद्भयादिवेत्येव नतु भयादेवेत्यर्थः। यतो गुणाख्यराजभ्यश्चित्ताख्यान्तःकरणरूपसमुद्रे तस्मादिवान्तर्यामिरूपेणापि शेते नतु तस्मादेवेत्यर्थः। उभयत्र हेतुः उपलम्भनेति यच्च बलवद्भिरित्यादिकमुक्तं तत्तु मुख्ययैव सत्यमित्याह—कदिन्द्रियगणयुक्तैर्जीवैः कर्तृभिः नित्यमेव कृतो विग्रहो विरोधो यत्र तथाभूतस्त्वम् अतः सम्प्रत्यपि तादृशैराजभिः स एव कर्त्तुं योग्य इत्यर्थः। श्लेषेण यतोन्तर्य्यामिरूपत्वेपि कुत्सितैरिन्द्रियगणैः कृतविग्रहस्त्वमित्यर्थः। यतस्तादृशेषु जीवेष्विन्द्रियेषु च त्वदीयस्वरूपादीनां यथावत् स्फूर्त्तिर्नास्ति ततस्तेषां त्वयि विरोधारुच्यादिमयद्वेषो युक्त एवेति भावः। अन्यत्तैः। अथवा आत्मा त्वं शेत इत्यन्वयानुपपत्तेरात्मा त्वमित्येतयोः पदयोर्न विशेषणविशेष्यभावः अत उपमानोपमेयभाव एव योज्य इवाद्यभावः नतु लुप्तोपमेयम् अयमर्थः हे उरुक्रम! आत्मा शुद्धजीवो यथा गुणेभ्य; तन्मयेभ्यः कदिन्द्रियेभ्यो भयादिव अन्तर्हृदयाकाशे समुद्रवदनवगाह्ये शेते लीनतया वसति तथा त्वं गुणेभ्यः सदा तेभ्योऽधुना तु तत्प्रधानेभ्यो राजभ्यश्च मयादिव अन्तस्समुद्रे समुद्रस्य मध्ये श्वेतद्वीपादाविव द्वारकाख्ये धाम्नि शेषे नित्यं तथा वससि तथाच श्रुतयः "यमन्तस्समुद्रे कवयो वयन्ति" तदक्षरे परमे प्रजाः' यतः प्रसूता जगतः प्रसूतीतो येन जीवान् व्यससर्जभूम्याम्" इत्यारभ्य "तदेव ब्रह्म परमं कवीनाम्" इत्याद्याः "यं कामये तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां, समयो निरप्सन्तरिति महालक्ष्मीवचनाद्याश्च "नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः" इत्येकादशवचनञ्च तत्रोभयत्र साम्यम् उपेति भगवत्यपि तन्मात्रत्वं सच्चिदानन्दविग्रहत्वादिति ॥ ३५ ॥ ननु, प्रेमसम्बोधने निश्चये वा मुनयो ज्ञानिनः तेषामपि त्वद्भक्तसङ्गादिप्रभावेन त्वत्पादयोर्मकरन्दो यत्किञ्चिन्माधुर्य्यं तज्जुषां वर्त्म निजाभिरुचितचेष्टितम् अस्फुटं स्वाच्छादनलोकसङ्ग्रहाद्यर्थचेष्टितान्तरेणावृतम् अतो दुर्विभाव्य बाद्धुमशक्यमिति भावः। नृपशुभिरिति सद्बुद्धिभिस्तु बोद्धुं शक्यमिति भावः इत्यस्पष्टवर्त्मनामिति स्वमते योजितम्। अलोकेति योजयति—यस्मादिति अलौकिकं लोकातीतम् इवेति लौकिकत्वेप्यलौकिकत्वदर्शनात् तत्र हेतुः भूमन् हे अपरिच्छिन्नमाहात्म्येति ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पुंसामृषभमिति—सर्वसौन्दर्य्यवैदग्ध्यादिकमुक्तम्, अतः श्रीभगवतः श्रमादिजातप्रस्वेदकणिकादिना स्निग्धहासादिना च श्रीमत्, इत्यन्तः प्रसादः सूचितः। अत एव वीक्षमाणा; केन? सव्रीडहासरुचिरस्निग्धापांगेन, तत्र व्रीडाहास्य-प्रौढिज्ञानाशक्तेः, किं वा साध्वीस्वभावाद्भावविशेषाद्वा हासो हास्यप्रौढानुसन्धानात्, अन्तःप्रसादोदयाद्वा, भावविशेषादेव वा, व्रीडासहितेन हासेन रुचिरश्च स्निग्धश्च प्रेमरसार्द्रो योऽपांगस्तेनेति, वीक्षमाणेति वि-शब्दार्थोऽपि दर्शितः। एवं तस्या अपि परमवैदग्ध्यादिकमुक्तम्, तेन च द्वयोरपि परमोत्तमत्वादिना वक्ष्यमाणार्थस्य परतमत्वं सूचितम्। तच्च महावंशजत्वात् परमोत्तमस्त्वमेव बोद्धुमर्हसीत्यतस्तत्र मनो निधेहीत्याह—हे भारतेति ॥ ३३ ॥ भवतः सदृशी नाहमिति यद्भवानाह। पाठान्तरेऽपि स एवार्थः, किन्तु भवत इति वक्तव्ये भगवते इति गौरवभवात्; वै व्यक्तम्। ननु निश्चितम्। एवमेतत् सत्यमेवेत्यर्थः। कुतः? विभूम्नोऽनन्ताद्भुतमाहात्म्य-परिपूर्णस्य, अरविन्दादपि विशिष्टलोचनेति सौन्दर्य्येणापि न सदृशीति भावः। तत्तदेवाभिव्यञ्जयति—क्वेति। स्वेऽसाधारणे महिम्नि निजानन्देऽभितो रतः, यतो भगवान् साक्षात्परमेश्वरः, अत एव अधीशः, अहं विषयसुखाद्यपेक्षिका स्त्री। एवं तस्य त्रयाणां विशेषणानां विरुद्धार्थत्वेन यथासंख्यं व्याख्येयम्। यद्वा, भगवानिति पूर्ववद्भवानित्यर्थः। ततश्च तस्य द्वयोर्विशेषणयोर्विरोधेनास्या विशेषणद्वयम्। अन्यत्तैर्व्याख्यातम्। यद्वा, स्वे महिम्नि एकस्मिन्नेव कर्म्मणि युगपल्लौकिकत्वैश्वर्य्ययोर्योगेन पूर्वपूर्व्वतो माहात्म्यविशेषेऽभिरतस्तत्प्रकटनपरः। तथा चोक्तं श्रीब्रह्मणा द्वितीयस्कन्धे (भा० २।७।२६)—'कर्माणि आत्ममहिमोपनिबन्धनानि' इति। तच्च पूर्व्वं व्याख्यातमेव। तत्सम्भावयति, यतो भगवाननन्ताद्भुतशक्तियुक्त इति। अतस्त्रयाणा-

मधोमध्योदूर्ध्वलोकानामधीशः, अहं दक्षिणैकदेशविदर्भराजकन्या, किञ्च, स्वगुणैः प्रकृतिरिव प्रकृतिर्जडेत्यर्थः। ननु तर्हि कृतलोकपालविभूतिभिर्भूपैः प्रार्थिता, विचाराभावादित्याह—अज्ञेति। इत्यात्मनोऽज्ञजनाधीशता परमाज्ञता च सूचिता। एवमुत्क्रमेण विरोधो वितर्क्यः। यद्वा, पूर्ववत्तस्य विशेषणाभ्यां क्रमेणैवास्या विशेषणयोर्विरोधः। तथाहि क्व स्वे महिम्न्यभिरतः, क्व गुणप्रकृतिः, क्व सर्व्वलोकानामपीश्वरः, क्व भवन्महिमानभिज्ञैः क्षुद्रैः सेव्याज्ञेति दिक् ॥ ३४ ॥ सत्यमन्तः शेते, कुतः ? गुणेभ्यो भयात्; कुतः ? बहिः स्थित्या विषयदोषस्पर्शशंकात इत्यर्थः। इवेति तत्त्वतो दोषास्पर्शेन भयाभावात्, क्रमो विक्रमः, गुणेभ्य इति तेषां प्रायः सर्व्वत्र प्रकाशमानतया राजभिरैक्येन तैनैव राज्ञां बोधनात्। एवं बलवत्त्वेन कदिन्द्रियैरित्यपि बहिः स्थस्यान्तःशयनमुपपादयति—उपेति। ज्ञानघनमूर्त्तिः, अत एव आत्मा भवानेव। भवानिति वक्तव्ये आत्मेति पूर्ववद्गौरवात्; यद्वा, पूर्वतो भवानित्यनुवर्त्तत एव। आत्मा स्वयमेवेति किंवान्तर्यामितयेत्यर्थः। सत्यमिति परत्राप्यनुवर्त्तते, कदिन्द्रियगणैः सह कृतो विग्रहो विरोधो येन सः, तेभ्यो नरकादिषु दुःखप्रदानात्; यद्वा, तैः कृतो विग्रहो यस्मिन् सः, तेषां त्वदभजनात्। एवं पूर्वोक्तबलवद्भिरित्यत्रापि वाक्यं ज्ञेयम्। तव सेवकैः परिचर्य्यामात्रभक्तौ प्रवर्त्तमानैरपि, अत्रैवमेकवाक्यता, यतोऽन्तः शेते, अतः कदिन्द्रियैः कृतविग्रहः, बहिर्मुखतयान्तर्दृष्ट्यभावेन महादुष्टतासम्पत्तेः। अत एव त्वत्सेवकैर्विधूतम्. नृपपदे कदिन्द्रियत्वसिद्धेरिति ॥ ३५ ॥ मुनयो ज्ञानिनस्तेषामपि त्वद्भक्तसंगादिप्रभावेण त्वत्पादयोर्मकरन्दो भक्तिरसस्तज्जुषां सताम्, किन्तरां सहजभक्तिमताम् किन्तमां भवेत्यर्थः। ननु प्रेमसम्बोधने निश्चये वा, अस्फुटमसंगतम्, मधुपानेन मत्तानामिवाननुसन्धानेन निजाचारच्युते, अतो दुर्विभाव्यं बोद्धुमशक्यम्, नृपशुभिरिति सद्बुद्धिभिस्तु बोद्धुं शक्यमिति भावः—तेषां कर्म्मस्वनधिकारात्, तच्च (भा० ११।२०।९) 'तावत् कर्म्माणि कुर्वीत' इत्यादौ बहुशो वक्तव्यमेवमेव। किञ्च, तेषामभिप्रायादितर्कनाच्च। (गी० ४।१७) 'कर्मणो ह्यपि बोद्धव्यं बोद्धव्यञ्च विकर्म्मणः' इत्यादौ विकर्म्मणोऽपि कस्यचिदनुमतविहितत्वादिति दिक्। (१३ श० श्लो०) 'अलोकपथमीयुषाम्' इत्यत्रोत्तरं यस्मादिति। अलौकिकं लोकातीतम्, इवेति प्रायः सदाचारपालनेन लोकानुसरणात्, यद्वा, लोकोक्तिरीत्यानधिकार्थः। तत्र हेतुः—भूमन्! हे अपरिच्छिन्नमाहात्म्येति लौकिकत्वे परिच्छिन्नतापत्त्या लोकातीतस्यैवेहितस्य योग्यत्वादिति भावः अन्यत्तैर्व्याख्यातम्। यद्वा, अस्फुटत्वे हेतुः—यस्मादिति। 'इव' एव, अलौकिकमेव, अथो अतस्तेषामपि ईहितमलौकिकमेव। अन्यत् समानम्। एवमप्यलोकपथमीयुषामित्यस्योत्तरं सिद्धमेव। यद्वा, पूर्वमप्यस्पष्टवर्त्मनामित्यत्रैव हेतुः—अलोकेति। ननु निश्चये, एतदपि निश्चितमेवेत्यर्थः ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

त्र्यधीशः ब्रह्मेन्द्राणामधीशः गुणानां सत्त्वादीनां लोकानां वा अज्ञगृहीतपादा किरणः प्रभाव अज्ञानप्रतिबद्धज्ञानेत्यर्थः। गुणप्रकृतिः गुणवश्यास्वभावा एवं भगवतो रुक्मिण्याश्च एवम्विधा वादाः मनुष्यसाजात्यानुगुणाः इतरेषाम् अज्ञानात्मानुगुणः इतरेषाम् अज्ञानामिव लीलया ज्ञानानामिव न स्वाभाविकसार्वज्ञादि विरोधः ॥ ३४ ॥ उपलम्भनमात्रः ज्ञानस्वरूपः न क्वापि जडः ॥ ३५–३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

सैवमिति। तद्भगवदुक्तं परिहासार्थोक्तिरूपमेव ज्ञात्वा प्रियकर्त्तृकत्यागसम्भावनाप्रयुक्तं भयं तत्याज ॥ ३२ ॥ किञ्च बभाष इति। हे भारत! सव्रीडहासेन रुचिरेण स्निग्धेनापाङ्गेन भगवतो मुखं वीक्षमाणा तं पुंसामृषभं पुरुषोत्तममाबभाषे उवाच ॥ ३३ ॥ भाषणमेवाह—नन्विति पञ्चदशभिः। तत्र तावद्यदुक्तं कस्मान्नो ववृषेऽसमानिति तदनुभाष्य प्रतिभाषते—नन्विति। ननु, हे अरबिन्दविलोचन! तिष्ठन्तु तावदसाम्यं गुणान्तरैः लोचनसौन्दर्य्येणैव त्वं स्वतुल्यरहित इति तत्सम्बोधनाभिप्रायः अहं भवतो असदृसी असमानेति यद्भवानुवाचेत्यनुवादः यद्यप्यसमानिति भगवदुक्त्या भवत्या अहमसम इति प्रतीयते एवं च मम भवान् असम इति यदित्येवमेवानुवदितव्यं तथापि भगवदभिप्रायक्रोडीकारेणानूदितम् अनुवादमुखेनापि मया सह भवान् असम इति वक्तुम् अनुचितमित्यभिप्रायेण च यद्भवान् उवाच तत्तात्त्विकमेवेति वाक्यशेषः। तदेवोपपादयति–भूम्नः स्वरूपस्वभावाभ्यामपरिच्छिन्नस्य हेतुगर्भमिदं क्वेत्यादिः भगवान् षाड्गुण्यपूर्णः त्र्यधीशस्त्रिलोकीनायकः स्वे महिम्नि स्वासाधारणायां नित्यविभूतावभिरतस्त्वं क्व ? गुणप्रकृतिः त्वद्गुणानुवर्त्तिस्वभावा त्वच्छन्दानुवर्त्तिनी त्वत्परतन्त्रेति यावत्, ननु, त्वमपि स्वतन्त्रा ब्रह्मादिभिरुपास्यमाना तदभिमतफलप्रदा चेत्यत आत्मानं विशिनष्टि—अज्ञगृहीतपादेति। अज्ञैर्मम त्वत्पारतन्त्र्यमजानद्भिः गृहीताबुपासितौ पादौ यस्याः साऽहं क्व ? अभिज्ञास्तु नमां स्वतन्त्रामुपासते किन्तु मां त्वत्परतन्त्रां पुरुषकारमात्रङ्कृत्वा मद्विशिष्टं त्वामेवोपासते इति भावः ॥ ३४ ॥ यदुक्तं राजभ्यो बिभ्यतस्सुभ्रु समुद्रं शरणं गतानिति तत्र प्रतिभाषते—सत्यमिति। हे उरुक्रम! उरवः विपुलास्त्रिलोकीसङ्ग्राहकाः क्रमाः पादविन्यासाः यस्य तथाभूत! पादक्रमैरेव त्रिलोकीं सङ्गृह्णतस्तव कथं राजभ्यो भयमितितदभिप्रायः भयादिवेति भगवदुक्त्यनुवादः राजभ्यो भयात्समुद्रं शरणं गत इत्येतत्सत्यमेवेत्यर्थः। वस्तुतो भयाभावसूचकेनेवशब्देन राजभ्यो बिभ्यत इति त्वदुक्तौ अबिभ्यत इतिच्छेदो भवदभिमत इति

सूच्यते तर्हि कुतः शरणं गत इत्यत्र आह—गुणेभ्य इति । मत्पितृदुग्धाब्धिगतसमुद्रत्वागाधत्वादिधर्मेभ्यः समुद्रत्वादिधर्मयोगात् लवणार्णवं शरणङ्गत इत्यर्थः । तदपि किमर्थमित्यत आह–उपलम्भनमात्र इति । सप्तम्यन्तमिदम् उपलम्भनमात्रे प्रदर्शनमात्रे निमित्ते मयि प्रीत्यतिशयप्रदर्शनार्थं शरणं गत इत्यर्थः । मात्रशब्देन न तु स्वपरित्राणाद्यर्थमिति सूच्यते अन्तःशेते समुद्र इति दृष्टान्तार्थम् अन्तरित्यव्ययं मध्ये वर्त्तते यथोपलम्भनमात्रे निमित्ते भवानन्तस्समुद्रे क्षीराब्धिमध्ये शेते तद्वल्लवणार्णवं शरणङ्गत इत्यर्थः । युक्तञ्चैतदित्यभिप्रायेण विशिनष्टि—आत्मेति । ममेति शेषः । आत्मा निरतिशयप्रीतिविषयः यो यस्य प्रियतमः स तस्यापि तथा । तथाचोक्तं भगवता 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' ज्ञानीत्वात्मैव मे मतम्'' इति च । एवञ्च त्वत्प्रियतमाया; मम प्रियतमत्वान्मत्सम्बन्धिगुणाश्रये तव प्रीतिरुचि तैवेति भावः । बलवद्भिः कृतद्वेषानित्यत्र प्रतिभाषते, नित्यं कदिन्द्रियगुणैः कृतविग्रहस्त्वमिति । कच्छब्देन बलवद्भिरित्यत्र मतुप् निन्दार्थकत्वेन व्याख्यातः कदिन्द्रियाणां गुणा विषयाः शब्दादयो येषां तैः कुत्सितानीन्द्रियाणि गुणास्तद्विषयाश्शब्दादयश्च येषां तैरिति वा त्वं नित्यं कृतो विग्रहः यस्य सः कृतद्वेषः कृताप्रीतिरिति यावत् । प्रायस्त्यक्तनृपासनानित्यत्र प्रतिभाषते, त्वत्सेवकैरिति । नृपाणां परमासनमन्धं गाढं तम एव तमश्शब्दोऽत्र नरकपर्यायस्तद्धेतुपरः नरकावहमित्यर्थः । हेतुगर्भमिदं तत्त्वात्तन्नृपपदं त्वत्सेवकैरेव बिधुतं तुच्छीकृत्य त्यक्तं किम्पुनस्त्वयोभयविभूतिनायकेन त्यक्तमिति ॥ ३५ ॥ अस्षष्टवर्त्मनामित्यत्र प्रतिभाषते–त्वत्पादेति । तव पादपद्मयोर्यो मकरन्दः अनुभवरसात्मकस्तं सेवमानानां मुनीनामेव वर्त्म याथात्म्यम् अस्फुटं किम्पुनरितरेषामिति भावः । तदेवाह—नृपशुभिरिति । ननु, हे भगवन् ! नृपशुभिः नर एव पशवस्तैः पशुतुल्यैर्नृभि; पशुवज्जिह्वोपस्थसुखमात्राभिज्ञैर्नृभिः इत्यर्थः । दुर्विभाव्यं दुःखेनापि भावयितुं चिन्तितुमशक्यं वर्त्मेति अलोकपथमीयुषामित्यत्र प्रतिभाषते–यस्मादिति । यस्मात् ये त्वामनुवर्त्तन्ते तेषामपीहितं चेष्टितम् अलौमिकमेवाथो अतः किमु वक्तव्यं भूम्नस्तवेश्वरस्येहितमलौकिकमित्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पूर्वोक्तमभीष्टसाधनावबोधकत्वेनोपादेयमिति सूचयितुमाह-बभाष इति ॥ ३३ ॥ देववृषोपमान् नृपान्हित्वाऽस्मान्कस्माद्धृतवतीत्यत्राह-नन्विति । यद्वा इह जीवराशौ आत्मसदृशा न सन्ति अस्माकं क्रियाश्च नेत्यस्योत्तरमाह–नन्विति । वा इत्ययं कृष्णोक्तवाक्यार्थारम्भे वर्तते नन्वित्यनुमतार्थे भवान् यदाह समो नास्तीति एतदेवं ननु अनुमतं कथं तत्राह नेति विभूम्नः देशतः कालतो गुणतश्चापरिच्छिन्नस्य व्याप्तस्य भवतः सदृशोऽन्यो नास्ति किन्तु भवानेव रामरावणयोर्युद्धमितिवत् मत्सदृशी त्वमसीति, नेत्याह क्वेति । भगवानैश्वर्यादिगुणसामग्रीसमुद्रो भवान् क ? राजादिवदन्याधीनत्वं किं न स्यादिति तत्राह स्व इति अनेन स्वार्था क्रिया नास्तीत्युक्तं भवति सत्त्वादिगुणप्रवर्तकत्वेन प्रकृतिशब्दवाच्याऽहं क ? तर्हि त्रिलोक्यां कश्चिन्मत्समः स्यादित्यतो नेति भावेनाह—त्र्यधीश इति । त्रयाणां लोकानां त्रयाणां वेदानां त्रयाणां गुणानां वा ईश इत्यनेन इन्द्रादिनिरासोऽभूदित्येतल्लोकपालविभूतिभिरित्यस्योत्तरं ब्रह्माद्यन्यतमोपि नेति भावेनाह–अन्येति । अन्यैर्ब्रह्मादिभिः अनेन महानुभावैरित्यस्योत्तरं क्वाहमित्यमुना श्रीमद्भिरित्यादेः ॥ ३४ ॥ राजभ्यो बिभ्यतः सुभ्रु इति यदुक्तं तदर्धाङ्गीकारेण परिहरति–सत्यमिति । हे उरुक्रम ! बाल्यादेरभिमानिजनशिरोरत्नराजराजितमहापादन्यास ! समुद्रेऽन्तः शेत इति सत्यं किन्तु राजभ्यो बिभ्यत इत्यसत्यं तर्हि तद्व्यर्थमुक्तं नेत्याह भयादिति "राजृ दीप्तौ" इतिधातोः कार्ये प्रकाशमानेभ्यः स्वशक्तिद्योतकेभ्यः सत्त्वादिगुणेभ्यो मयादिव सज्जनशिक्षार्थम् इवशब्दः संसारावृत्तिहेतुभ्यो गुणेभ्यो बिभ्यज्जनः समुद्रिक्तसुखार्थीसमुद्रादिजलवासेन यथा तपस्यति तथाऽहमिति यद्वा पञ्चभूतमुद्रासहितत्वात्समुद्रे शरीरेऽन्तर्हृदि शेते यत्सत्यं तत् दीप्यत् शब्दादिगुणेभ्यो भयादिवाङ्गुष्ठमात्रः "अङ्गुष्ठमात्रः पुरुषः" इतिश्रुतेः शरीरान्तस्थस्य जीवादविशेषाज्जननादिकमपि स्यादिति तत्राह–उपलम्भनमात्र इति । केवलचिन्मयः अतो न देहधर्मा अस्य स्युरिति भावः । एकत्र स्थितयोर्जीवेशयोर्विशेषः कथमत्राह आत्मेति । आत्मा तथाविधस्वभावः किन्नामधेयो भवानित्यतो वाह, आत्मेति । आत्मा सुखमेवाददाति नाण्वपि दुःखमित्यात्माजीवस्तु शरीरमादाय शरीरान्तराणि निर्मिमीत इति तच्छब्दवाच्यबलवद्भिः कृतद्वेषानित्यस्य तात्पर्यं वक्ति–य इति । यः अनित्ये केन्द्रियगुणैः कृतविग्रहः स त्वं तादृङ्माहात्म्यः "बलवानिन्द्रियग्रामः" इति स्मृतेः । बलवन्ति परिवर्तनवन्ति नानायोनिष्वित्यतोऽनित्यानीन्द्रियाणीत्युच्यन्ते नियन्तुमशक्यत्वाद्बलवन्तीति । भवत्प्रसादादितरेषाम् इन्द्रियजयो भवतस्तु स्वत इति "पराञ्चि खानि व्यतृणात्स्वयम्भूः" इति श्रुतेः । प्रायस्त्यक्तनृपासनानित्यत्राह–त्वत् सेवयेति । तव सेवा यस्याः साऽहं त्वत्सेवा तया त्वत्सेवया मया नृपासनं नृपपदं नृपशब्दवाच्यमात्रं नतु नॄन् पान्तीति नृपालनरक्षणार्थोपेतम् अन्धन्तमः प्रति विधुतं तत्त्यजनं कृतमित्यर्थः । तस्माद्भवानेव नृपशब्दमुख्यार्थत्वात्तत्त्वज्ञैस्सर्वैस्त्यक्तं दत्तं नृपासनं यस्मै स त्यक्तनृपासनः शिशुपालादय एव त्यक्तमुज्झितं यैस्ते तथा त्वत्सेवया हेतुना वा ते त्यक्ताः ॥ ३५ ॥ अस्पष्टवर्त्मनाम इत्यस्यार्थमाह—त्वत्पादेति । तव पादपद्ममकरन्दसेविनां मुनीनां वर्त्म स्वरूपं स्फुटं स्पष्टं तथापि त्वदुक्तं सत्यं नृपशुभिरज्ञानिभिर्दुर्विभाव्यं दुर्ज्ञेयं तस्मादस्पष्टमित्युच्यते यद्वा मुनीनां वर्त्म नृपशुभिः स्फुटं दुर्विभाव्यं किमु तव वर्त्मेति अलोकपथमीयुषामित्यस्याप्ययमर्थ इत्याह–यस्मादिति । हे भूमन् ! ईश्वरस्य तवेहितमलौकिकमिव यस्मादयो तस्मात्तवेहितमनु अनुकूलानि मम ईहितानि भवन्ति अलौकिकानीति शेषः । तवेहितमनुक्रियमाणानि ममेहितान्यलौकिकानि यस्मात्तस्मात्किमु तवेहितमलौकिकमिति वा ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सत्यम् ॥ ३५—३६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

बभाष इत्यादि । पुंसामृषभ श्रीकृष्णं बभाषे पुरुषोत्तममित्यर्थः । किङ्कुर्वती मुखं वीक्षती अर्थाच्छ्रीकृष्णस्य कीदृशं भगवत् श्रीमत् "भगं श्रीकाममाहात्म्य" इत्याद्यमरः । अन्यथा भगवन्मुखं वीक्षती पुंसामृषभं बभाष इति पुरुषान्तरप्रतीतिदोषः स्यात् ॥ ३३ ॥ किं बभाष इत्याह—नन्वित्यादि । ननु, भोः अरविन्दविलोचन यद्भवानाह तदेवमेतत् कथं नो ववृषेऽसमानिति यदुक्तं तत्सत्यमेव भवतः सदृशी न भवान्येव यतस्त्वं त्र्यधीशः त्रयाणां गुणानां नियन्ता गुणातीत इति यावत् । अहं गुणप्रकृतिः गुणाः प्रकृतयो यस्याः गुणस्वभावेत्यर्थः । त्वं स्वे महिम्नि स्वानन्दे नित्यपरिपूर्णभावे अभिरतः अहम् अज्ञगृहीतपादा । अतोऽहमसादृश्येव अत्यन्तासम्भावनायां क्व द्वयम् अतस्त्वं सत्यवागेव इति लक्ष्मीत्वस्फूर्त्ताविपि दैन्यमेवास्याः इति गर्वगर्भं दैन्यं किञ्च तवैतदुक्तमनुचितं न ह्युत्तमः स्वं महिमानं प्रकटयतीति सोत्प्रासप्रत्युत्तरञ्च ॥ ३४ ॥ राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणं गतानिति यदुक्तं तदपि सत्यमेवेत्याह—सत्यमित्यादि । हे उरुक्रम आत्मा भवान् विग्रहरूपी त्वं गुणेभ्यो गुणकार्य्येभ्यो राजभ्यो भयादिव समुद्रे अन्तः अन्तस्समुद्रं शेते इति यत्तदपि सत्यं कीदृश आत्मा उपलम्भनमात्र उपलम्भनमुपलब्धिर्ज्ञानम् तन्मात्रं अंशो यस्य ज्ञानमिति यद्वस्तु तदपि तवैव मात्रेत्यर्थः । वस्तुतस्तु असमुद्रो मुद्रासङ्कोचः तया सह वर्त्तत इति तथा न समुद्रम् असमुद्रम् असङ्कोचमिति यावत् । एवंविधे अन्तः भक्तानां अन्तःकरणे शेते इव । कीदृश, भयात् भयमत्तीति भयात् यद्बिभेति स्वयं भयं "भीरपि यद्बिभेति" इत्याद्युक्तेः । पुनः कीदृशः गुणेभ्यः गुण्याढ्यः इभ्य आढ्यो धनीत्याद्यमरः । गुणातीतोपि भक्तवात्सल्यादिमङ्गलगुणभूयिष्ठः अतस्तव कुतो भीः अतः राजभ्यो बिभ्यत इति यदुक्तं तत् अबिभ्यत इति मन्तव्यं समुद्रं मुद आनन्दस्य रा मानं तया सह वर्त्तमानं शरणं गृहं धाम गता इति भगवद्वचनमन्यथा व्याख्याति । किन्तु अभक्तास्तु त्वामेवमजानन्तो भवतः सह विग्रहं कुर्वन्तीत्याह नित्यमित्यादि । कदिन्द्रियगणास्त्वद्विमुखेन्द्रियाः अत एव ते अबला एव ज्ञानरहितत्वात् तैः कृतविग्रहः कृतदेह एव त्वं न तु तैर्गीयसे कदिन्द्रियगणत्वेनाधमत्वाद्दुर्बला एव ते यतः तेन बलवद्भिः कृतद्वेषानिति यदुक्तं तदपि विरोधिलक्षणयैवेति सत्यं त्यक्तनृपासनानिति यदुक्तं तदपि सत्यमेव कुत इत्याह—त्वत्सेवकैरित्यादि । त्वत्सेवका अपि नृपपदं त्यजन्ति किं पुनस्त्वमिति सर्वथा सत्यवागेव भवानिति वक्रोक्तिः ॥ ३५ ॥ ननु अस्पष्टवर्त्मनामिति यदुक्तं तदपि सत्यमेव तव वर्त्मनोऽस्पष्टत्वं प्रसिद्धमिति किं चित्रं त्वदनुसृतानामपि यत्तथैवेत्याह—त्वत्पादपद्मेत्यादि । त्वत्पादपद्मे यो मकरन्दश्छिद्रस्तज्जुषां मुनीनां वर्त्म अस्फुटं तत् नृपशुभिर्नराकारैः पशुभिर्दुर्विभाव्यम् ननु भोः कुत इत्याह—यस्मादीश्वरस्य तव ईहितम् अलौकिकमेव इव एवार्थे । हे भूमन् ! भवन्तम् अनुगता ये एकान्तभक्तास्तेषां च ईहितम् अलौकिकमेव तत्त्वाद्वर्त्मास्फुटमेवेति सत्यवागेवासीति वाक्यार्थः ॥ ३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

पुंसामृषभं पुरुषोत्तमं मुखं वीक्षती निरीक्षमाणा, मुखं विशिनष्टि—भगवत् श्रीमत् 'भगं श्रीकाममाहात्म्यम्', अन्यथा भगवन्मुखं वीक्ष्य पुंसामृषभं बभाष इति विरुद्धं स्यात् ॥ ३३ ॥ नन्वेवमित्यादि । ननु भोः ! एवमेतद् यदुक्तं तदेव किन्त्वर्थोऽन्य इति प्रपञ्चयति—त्वं त्र्यधीशस्त्रयाणां गुणानामधीशो नियन्ता गुणातीतः, अहं गुणप्रकृतिस्त्वं स्वे महिम्नि आनन्दे अभिरतः । अहमज्ञ–गृहीतपादा इति श्रीरप्यहं न तव योग्येति 'सत्यमेव, किन्तु तवैतद्वक्तुं न योग्यम्, न ह्युत्तमः स्वं महिमानं प्रकटयति । राजपुत्रीति सम्बोधनजनिते कोपे स्वरूप-स्फूर्त्या प्रत्युत्तरम् ॥ ३४ ॥ एवं भगवता यदुक्तम् तदेवान्यथयति–सत्यं भयादिवेत्यादि–बहुभिः । मम तु कथा दूरादास्ताम्, अहं त्वदीयत्वादनन्यैव मर्त्त्याकाराद् वा विना अन्यं श्रयेत इत्याह—कान्यमित्यादि । मर्त्त्येत्यन्वयः । लक्ष्म्या मम आलयं सम्यक् लयस्थानं लय आश्लेषस्य पराकाष्ठा ॥ ३५–४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

भगवता येन येन वाक्येन स्वस्यापकर्षः रुक्मिण्या उत्कर्षश्चोक्तस्तदेव वाक्यमनुवदन्ती रुक्मिणी तद्विपर्य्ययं व्याचष्टे तत्र यदुक्तं कस्मान्नो ववृषेऽसमानिति तत्रासाम्यं सत्यमेवेत्याह—हे अरविन्दविलोचन यद्भवानाह कस्मान्नो ववृषेसमानिति तत् ननु निश्चितमेव मे तत् सत्यमेवेत्यर्थः स्वे स्वीये महिम्नि षडैश्वर्यलक्षणे अभिरतो भगवान् त्र्यधीशः त्रिगुणनियन्ता भगवान् क्व, अहं गुणप्रकृतिर्जडा नियम्या वा क्वेति त्वत्तोऽतिनिकृष्टाया मम कुतस्त्वत्साम्यसम्भावनापीति भावः । गुणप्रकृतिर्बहिरङ्गाशक्तिस्तस्या स्वांशत्वात् स्वस्य तत्स्वरूपत्वमननमतिदैन्यादेव ॥ ३४ ॥ यदुक्तं राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणङ्गतानिति तत्राह सत्यमिति । हे उरुक्रम महाशक्ते इति भयाभावं दर्शयति "क्रमः शक्तौ परीपाट्याम्" इति विश्वः । गुणाशब्दाद-

यस्तेभ्यो राजन्त इति राजानस्तेभ्यो भक्तानां यद्भयं तदेव भक्ताधीनस्य तवापि भयमिवेत्यतस्तद्भयादिव अन्तस्ससमुद्रे समुद्रवदगाधे स्वभक्तहृदय एव शेते अतः शरणं गणानिति शरणशब्दस्य गृहमित्यर्थः कुतः तत्र ममास्तित्वे किं प्रमाणमिति चेत्तत्राह "नापेषि नाथ हृदयाम्बुरुहात् स्वपुंसाम्" इति प्रणयरशनया धृताङ्घ्रिपद्म इति ब्रह्मादिवाक्यादुपलम्भनं मात्राणां रूपरसगन्धादीनां यस्य सः भक्तैर्ध्यानोपलभ्यमानसौन्दर्यादिरित्यर्थः। आत्मा परमात्मा भवानेवेत्यर्थः यदुक्तं बलवद्भिः कृतद्वेषानिति तत्राह–नित्यमिति कदिन्द्रियगणैः स्वभक्तस्य विषयग्राहिभिरिन्द्रियैः सह कृतयुद्धः गणैरिति वृत्यभिप्रायेण बहुत्वं भक्तस्य संसारदुःखत्राणार्थमिति भावः। अयमर्थः साधकभक्तानां प्रथमतो ध्यानगम्यं यत् किञ्चित् माधुर्य एव त्वं भवसि नतु प्रत्यक्षीभवसि यत् तन्मन्ये विषयेभ्यो भयादिव तदन्तःकरणे प्रविश्य स्वपिष्येव यतो भक्तिवृद्ध्या कदिन्द्रियेषु निवृतेषु सत्सु विषयनिवृत्तौ सत्यां स्वापादुत्थित इव साक्षादेव प्रत्यक्षीभूय स्वीयानेकमाधुर्य्याणि स्वभक्तान् ग्राहयसीति यदुक्तं त्यक्तनृपासनानिति तदपि युक्तमेवेत्याह–त्वत्सेवकैरपि नृपपदं नृपासनम् अविवेकबहुलत्वादन्धं तमइव विधुतं त्यक्तं किन्पुनर्वक्तव्यं त्वया त्यक्तमिति अत्र सेवकैरिति पददृष्ट्या पूर्वत्रोभयत्रापि भक्तसम्बन्धो व्याख्यातः ॥ ३५ ॥ अस्पष्टवर्त्मनामिति यदुक्तं तदपि तथेत्याह–त्वदिति। नन्विति निश्चये अलोकपथमीयुषामिति यदुक्तं तदपि सत्यमेवेत्याह यस्मादलौकिकं लोकातीतमेव तवेहितम् अथो अत एव भगवन्तमनुवर्त्तन्ते ये तेषामपीहितमलौकिकमेव ॥ ३६ ॥

गूढार्थदीपिनी

सव्रीडो यो हासस्तेन रुचिरः स्नेहयुक्तो योऽपाङ्गस्तेन वीक्षन्ती सती ॥ ३३ ॥ वै एवार्थे। अहमसदृशी इति यत् भवानाह तदेतत् एवमेव। त्रयाणां गुणानां देवानां वा अधीशः भवान् क। अज्ञैः सकामैः। महिम्नि स्वरूपे ॥ ३४ ॥ हे उरुक्रम अनन्तपराक्रम। गुणरूपेभ्यः राजभ्यः भक्तानां भयमेव तव भयं तस्मात् हेतोः समुद्रवत् अगाधेऽन्तः भक्तान्तःकरणे शेते विराजते इत्यपि सत्यम्। कुत्सित इन्द्रियगणो येषां तैर्बहिर्मुखैः कृतविग्रहः कृतोपेक्षः तेषु तवाप्रतीतेः। त्वत्सेवकैः प्रियव्रतादिभिरेव नृपपदं विधुतं त्यक्तं किमुत वक्तव्यं त्वया त्यक्तमिति। उपलम्भनमात्रः ज्ञानस्वरूपः ॥ ३५ ॥ मकरन्दो भक्तिरसस्तं सेवमानानाम्। अज्ञैःदुर्विभाव्यं दुर्ज्ञेयम्। किंच यस्यात् ये भवन्तमनुवर्तन्ते तेषामपीहितं चेष्टितमलौकिकमिव। अथो अतः किमु वक्तव्यं तवेहितमलौकिकम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सव्रीडहासेन रुचिरेण स्निग्धेन अपाङ्गेन भगवन्मुखं वीक्षन्ति वीक्षमाणा ॥ ३३ ॥ यद्यत् हास्यार्थमुपन्यस्तं तत्तद्वैपरीत्या व्याचक्षाणा प्रतिभाषते स्म नन्वित्यादिना। हे अरविन्दविलोचन कस्मान्नो ववृषेऽसमानिति भवान् यदाह एतत् ननु निश्चितम् एवम् असाम्यं सत्यमेवेत्यर्थः। यतो भगवतः विभूम्नः असदृशी अहमस्मि तदेवाह त्र्यधीशः त्रयाणां लोकानामधीशः सर्वेश्वर इत्यर्थः। स्वे महिम्न्यभिरतः स्वानन्देन स्वे महिम्न्यभिरतः स्वानन्दपूर्णस्त्वं क ? क चाहं गुणप्रकृतिः भगवतः गुणलुब्धा शक्तिः शाकपार्थिवत्वान्मध्यमपदलोपः त्वद्गुणगणचिन्तनस्वाभावा इत्यर्थः। अनेन चेतनविलक्षणज्ञानानन्दस्वरूपेति द्योतितम्। जीववैलक्षण्यमाह—अज्ञगृहीतपादेति। अज्ञैर्वासुदेवतत्त्वज्ञैः स्वामिपत्नीत्वेन गृहीतौ पादौ यस्याः सा चेतनाचेतनविलक्षणा भगवद्गुणगणध्यानैकधना भवच्छक्तिविशेषरूपा भवदीयपत्नी तयैव भागवतैः पूज्यासर्वथात्वत्तोऽपकृष्टेत्यर्थः ॥ ३४ ॥ यदुक्तं "राजभ्यो बिभ्यतः सुभ्रूसमुद्रं शरणं गतानि"ति तत्राह सत्यमिति। हे उरुक्रम उरवः अतिविपुलाः क्रमाः पादविन्यासाः भक्तभयनाशनाः दुष्टभयवर्द्धनाः यस्य तथाभूत यद्वा हे उरुक्रम "क्रमः शक्तौ परीपाट्यम्" इति विश्वः सर्वथा शरणागतजनभयनाशन ! स्वयमभयेत्यर्थः। उपलम्भनं परमात्मतत्त्वग्राहकं तन्मात्रे शुद्धे अन्तर्हृत्पद्मे समुद्रे समुद्रवदगाधे गुणाः शब्दादयः रजआदयो रागद्वेषादिस्वकार्यसहिता वा राजन्त इति राजानस्तेभ्यः मद्भक्तानेते बाधयेयुरिति भयात् भक्तानामप्यहर्निशं भक्तिरसमत्तानां प्रायोगुणेभ्यो भयाभावादिवेत्युक्तम् आत्मा "एष ते आत्मान्तर्यामी"ति श्रुतेः। अन्तरात्मा भवान् शेते इत्यर्थः बलवद्भिः कृतद्वेषानिति यदुक्तं तदपि सत्यमेवेत्याह—कुत्सित इन्द्रियगणो येषां तैः बलान्नित्यं संसारे एव वसन्ति न तु त्वदुपदेशं श्रुतिस्मृतिरूपं स्वीकुर्वन्ति तैर्बलवद्भिर्नित्यबद्धैरसुरस्वभावैर्नित्यं त्वं कृतविग्रहोसि—

> "मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥

इति श्रीमुखोक्तेः यदुक्तं त्यक्तनृपासनानिति तदपि युक्तमेवेत्याह—त्वत्सेवकैरिति। नृपाणां पदमासनम् उग्रसेनयुधिष्ठिरादिनृपासनव्यावृत्यर्थमाह—तमोन्धमिति। अन्धं गाढं तम एव तत् संसारहेतुत्वात् त्वत्सेवकैरेव विधुतं त्यक्तं किम्पुनर्वक्तव्यं त्वया त्यक्तमिति ॥ ३५ ॥ अस्पष्टवर्त्मनां पुंसामित्यनेन स्वस्यास्पष्टवर्त्मत्वं द्योतितं तदपि तथैवेत्याह—त्वदिति। ननु निश्चितं त्वत्पादपद्ममकरन्दसेविनां मुनीनामन्तर्वृत्तीनां वर्त्मास्फुटं दुर्ज्ञेयं भवति किं पुनर्वक्तव्यं तव वर्त्मास्फुटमिति यदपि सूचितमलोकपथमीयुषामित्यनेन स्वस्य लोकातीतपथगत्वं तदपि तथैवेत्याह–यस्मात् भवन्तं ये अनुगताः मुनयः तेषामपीहितमलौकिकं लोकातीतमिव अथो अतः ईश्वरस्य तवेहितमलौकिकमिति किमु वक्तव्यम् ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नन्वेतदेवमरविन्दविलोचनाहेति श्लोके समनिषेधः क्रियते स्वस्य स्वसमस्य सत्त्वात् । भाष्ये चतुर्थे द्वितीयपादे । अथातः समाश्चासमाश्चाभिधीयन्ते समासमाश्च । अथ समानि ब्रह्मणो रूपाणि यैरुत्पत्तिः स्थितिर्लयो नियतिरायतिश्चैकं ह्येवम् । अथासमा ब्रह्मेन्द्रो रुद्रः प्रजापतिर्बृहस्पतिर्ये के च देवा गन्धर्वा मनुष्याः पितरोऽसुरा यत्किञ्चेदं चरमचरं च । अथ समासमा । प्रकृतिर्वावसमासमैषा हि नित्या जरा तद्वशा चेति श्रुतौ तथा स्वदृष्टान्तो हरेर्भवेदित्यृग्भाष्ये तथा प्रथमतात्पर्ये व्यत्यासोऽन्वयश्चैव प्रसिद्धो भूत एव च । सर्वसंहारकश्चेति दृष्टान्तः पञ्चधा स्मृत इति ब्राह्मे । ऊर्णनाभ्यादिको विष्णो विष्णुर्विष्णोस्तथैव च । विष्णुर्जीवस्य दृष्टान्ता ऊनसाम्याधिकाः क्रमादिति ब्राह्म इत्यादावुक्तेस्तथेत्यतो नात्र स्वमताऽमता रुक्मिण्याः किन्त्वन्यस्य सेति भावं विवृण्वन्नन्यगृहीतपादेत्यत्रत्यमन्यपदं लोपः प्रातिपदिकान्तरयेत्यत्र प्रातिपदिकान्तं सत्पुँलिङ्गप्रथमान्तत्वेन निषेधप्रतियोगिसमर्पकं भवतीति मनसि कृत्वा मौलभवच्छब्दोत्तरमन्ययोगवच्छेदकैवकारेण स्वनिबद्धेन सूचयंस्तेन सह मौलं पदान्यनुवदति । भवानेव भवतः सदृश इति । अनेनैव गृहीतपादेत्यस्य गृहीतौ पादौ तव यया सेत्यर्थ इति भगवानित्यस्याप्यावृत्तिरित्यसूचि । अन्यथा स्वधिक्कारप्रस्तावनानगुण्यापत्तेरिति ज्ञेयम् । अथ मूलार्थः । हे अरविन्दलोचन भवान्यदाह देववृषोपमान्हित्वा त्यक्तनृपासनानित्यादि नार्थादिति ज्ञेयम् । एतदेवं ननु तथैवेति निश्चितम् । तदेव दर्शयति । भवतः सदृशो नेति ! अन्यो भगवतः सदृशो न किन्तु भवानेव भवतः सदृशः । विभूम्नो भावभवित्रोरभेदात् । विशेषतो भूमा यस्य स तस्येति वा । अनन्वयः । इन्दुरिन्दुरिव श्रीमानित्यादौ तदन्वयः । रामरावणयोर्युद्धं रामरावणयोरिवेत्यादिवत् । समना चासृत्युपक्रमादमृतत्वं चानुपोष्येति त्वं मम समैवेति न स्वामिन्निति विशेषकं धर्ममाह । स्वमहिम्नि मदनधिष्ठिते रतः । भगवान्समग्रैश्वर्यादिमान् । स्त्र्यधीशो वेदा वा लोका वा गुणा वा श्रीभूदुर्गा वेति तदधीशः । क्वेति कालदेशव्याप्तिरेवं हिमसमग्रभगवत्त्वं च तव न ममेत्युक्त्वा तदुपोद्बलयति । गुणप्रकृतिः सत्त्वादिगुणप्रवर्तकतया तच्छब्दवाच्याऽहं क्वेति । गुणैः स्वरूपभूतैः । प्रकृष्टकरणात्प्रकृतिरिति भगवतोऽपि विशेषणम् । तदुपोद्बलयति गृहीतपादेति । गृहीतौ तव पादौ यया सा । गृही मदभिन्नभार्यायुतस्त्वं तस्य ईतौ अपेक्षयेति । इना इतौ प्राप्तौ पादौ यया सेति वा । स भगवः कस्मिन्प्रतिष्ठित इति स्वेमहिम्नीत्यादेः । देशतः कालतश्चैव गुणतश्च त्रिधा ततिः । सा समस्ता हरेरेव न ह्यन्ये पूर्णसद्गुणा इति गीतातात्पर्योक्तेः । मत्स्यकूर्मवराहाद्याः समा विष्णोरभेदतः । ब्रह्माद्यास्त्वसमाः प्रोक्ताः प्रकृतिश्च समासमेति वाराहोक्तेर्न समैवाहमिति तात्पर्यम् । राजपुत्रीप्सितेत्यारभ्य न ह्यात्मसदृशा इत्यन्तस्य भगवद्वाक्यस्य श्रवणशोकसम्मूढा प्रौढाऽपि रुक्मिणी नैकधारया धारणं तदिति नैकसरण्योत्तरमभिदधाना साम्मुग्ध्येन तज्जगाविति तत्पौर्वापर्यविचारः कर्तव्य इति ज्ञेयम् ॥ ३८ ॥ सत्यं भयादिवेति श्लोके नृपपदं तमोऽन्धं विद्युतमिति सामानाधिकरण्येन नृपस्थानस्यान्धतमसात्मकत्वं प्रतीयते । तच्च बाधितमित्यतो नृपपदमिति प्रथमान्तं तमोऽन्धमिति द्वितीयान्तं तत्रापि नृपपदं तत्स्थानवाचि किन्तु नामवाचि प्रतिशब्दमध्याहृत्यान्वयः । ऊर्ध्वरेतं विरूपाक्षं शङ्करं नीललोहितम् । ऋतं सत्यं परं ब्रह्मेत्याद्युद्देश्यद्वितीयका विभक्तिरूर्ध्वरेतादि प्रथमा रुद्रगोचरा । तस्माद्विष्णुं परं ब्रह्म प्रतीत्येवेति भावेन किञ्चिदनूद्य स्वयं व्याचष्टे । नृपपदं नृपशब्दमात्रवाच्यमिति । तथा च नृपेति पदं नाममात्रं यस्य तदिति तत्पदविग्रहः सूचितः । एतल्लब्धार्थमाह । न तु मुख्यतो नृपालक इति । अनेन केवलं रूढतां तस्याभिप्रेति । तमोऽन्धमन्धतमसं प्रति विधत्तं मयाऽऽक्षिप्तमित्यर्थः । मौलत्वत्सेवया मयेति पदेनान्वयः । ततश्चायं श्लोकार्थः । राजभ्यो बिभ्यतः सुभ्रूः समुद्रं शरणं गतानिति यत्तत्स्वयमर्धाङ्ग्यर्धाङ्गीकारेण परिहरति । सत्यमिति । उपलभनमेवोपलम्भनमात्रं । आत्माऽऽदानादिकर्ता स्वामी सर्वगुणपूर्ण इति वा । सर्वान्गुणानात्मशब्दो ब्रवीतीत्यादेः । समुद्रं तत्राप्यन्तः शेत इति समुद्रं शरणं गतानिति सत्यम् । गुणेभ्य उरु अति यथाक्रमो यस्य स तत्सम्बुद्धिः । गुणातीत । भयाद्राजादिजातात् । इव । वस्तुतस्तु न तस्मादितीवेन द्योत्यते । अतो भयादिति वाच्ये इवोक्तिरिति ज्ञेयम् । सत्त्वादिगुणागणनेन वर्तमानस्य न रजस्तमः प्रकृतिकभूपभीतिरिति भावः । बलवद्भिः कृतद्वेषानित्यस्य न बलवन्तो नाम दृश्यन्त इत्युत्तरयति । य इति । अनित्यानि किं सुखमिन्द्रियाणि च येषां तेषां राज्ञो गणैर्यस्त्वं विग्रहो येन सः । कृतविग्रहत्वमङ्गीकृतं नाङ्गीकृतं तत्प्रबलत्वमिति भावः । प्रायस्त्यक्तनृपासनानित्यस्य केवलं रूढनृपपदकास्त्वं तु न तथेति स्वानुष्ठितकर्मप्रतिपाद्योत्तरमाह । त्वत्सेवयेति । तव सेवा यस्याः सा तया । नृपेति पदं वाचकः शब्दो यस्य तत् नृपा इति पद्यत इति यावत् । तमोऽन्धमन्धन्तमः प्रति विधुतं प्रक्षिप्तं सेवया करणेन मयेति शेषः । तमोऽन्धं प्रति विधुतं त्वत् त्वत्तस्तद्विधुतमिति किं वाच्यमित्यर्थः । गुणैरिभ्य आढ्येऽप्यनित्यकेन्द्रियगणैर्मानवैः सम्पादित इति कृतो विग्रहः शरीरं यस्य सः । अनेन कृतद्वेषान्कृतवन्निर्मितवदाचरन्तः कृतं ता वेषा येषामिति पदमङ्गीकृत्यार्थं सूचितवन्तीति चतुरता ध्येया । यस्त्वं त्यक्तेन्द्रियगणैः कृतविग्रहो नित्यसुखात्मकेन्द्रियगणैरेव स्वीकृतविग्रह इति वा ॥ ३९ ॥ त्वत्पादमकरन्दजुषां मुनीनामिति श्लोके तवेहितमनु मे आवर्तितमनुवृत्तं वेहितमिति न भवन्तीत्यनेनैकवचनान्तेनान्वेतुं शक्यम् । असम्भवादित्यतस्तथा सद्बहुवचनतया विपरिणतमन्वेतीति दर्शयन्नन्वयमाह । तवेहितमनु म ईहितानि भवन्तीति । ततश्चायं श्लोकार्थः । अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषामित्यादेरुत्तरमाह । त्वत्पादेति । त्वत्पादपद्ममकरन्दजुषां

सेवमानानां तस्मिन्प्रीतिमतां वा मुनीनां वर्त्म नृपशुभिः स्फुटं दुर्विभाव्यं ननु। तव किं **वक्तव्यं** दुर्विभाव्यमिति भावः। तादृशानां मुनीनां **तव** वर्त्म दुर्विभाव्यम् नृपशुभिर्मनुष्येषु पशुप्रायैर्दुर्विभाव्यमिति किं वाच्यमिति युक्तमुक्तम्। हे भूमन्। ईश्वरस्य यस्मात्स्वेहितं व्यापारोऽलौकिकं लोकविलक्षणमाप्तकामव्यापारत्वात्। इवैव तवेहितं **चेष्टामनु। अथा मे ईहित**मीहितानि **भवन्ति प्रायः** सीदन्ति प्रायः सीदन्ति योषित इत्यभिप्रायः कथमिति चेत्। ते च मानिन्योऽन्याः पुरुषाश्चान्य इति भावः। **यां यां परेश उरुधैव** करोति लीलां तां तां करोत्यनु तथैव रमाऽपि देवीत्यादेः॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः **स्वस्था** भगव**द**भिलषितं किञ्चिदुक्तवतीत्याह **बभाष** इति। पुंसामृषभं पुरुषोत्तमम्। **अनेन भगवान् न स्त्री**पतिरित्युक्त**म्। ततश्च स्त्रीबुद्धिः** कापट्यं **स्त्रीवश्यता च** भगवतो निवारिता। एवं ज्ञात्वैव सा **यथार्थं** वदति, नतु साप्यन्यथा ज्ञात्वा अन्यथा वदति। तथा सत्यभिप्रायान्तरकल्पनायामनवस्था स्यात्। **वीक्षन्ती भगवन्मुख**मिति। दृष्ट्यैव परमः सन्तोषः वाच्यार्थस्फूर्तिरपि निरूपिता। **अन्तर्गतं** भावत्रयं **आविष्कुर्वती** तथोक्तवतीत्याह **सव्रीडे**ति। लज्जा स्वाभाविकी सात्त्विकी, हासो राजसः शृङ्गारप्रधानः। **रुचिरं** स्निग्धं **यदपाङ्गं तदपि** गुणत्रययुक्तम्। तेन वीक्षन्तीति स्वान्तःस्थितभावोद्गिरणं निरूपितम्। अत‘श्चित्तमनेनैवाकृष्यत’ इति **वचनानि पोषकाण्येव भवन्ति**, नत्वन्यार्थकल्पनया कदाचिदपि **विरुद्धानि भवन्तीति भावः**॥३३॥ वचनान्याह **पञ्चदशभिः नन्वेव**मिति। कला एवैताः त्रिविधमपि पञ्चविधं कामरसं प्रबोधयन्तीव। कथं **भगवता** तद्वाक्यश्रवणार्थं **सूत्ररूपाणि वाक्यानि निरूपितानी**त्याकाङ्क्षायां बहिरङ्गप्रकारं परित्यज्य अन्तरङ्गप्रकारेणैव तद्वाक्यव्याख्यानरूपाणि वाक्यानि श्रोष्यतीत्यवगत्य तद्व्याख्यानमेवाह। अन्यथा ‘अप्रतिषिद्धमनुमतं भवती’ति विरोधोऽङ्गीकृतः स्यात्, ईश्वरवाक्यं वा बाधितार्थमिति। **अतो दोष**निराकरणार्थं प्रवृत्तो **भगवान्** तस्यां नैवं दोषं सम्पादयेत्। अतः स्ववाक्यान्येव इयं व्याचष्टामिति भगवदभिप्रायः। तत्र **भगवता यदुक्तं** ‘कस्मान्नो ववृषेऽसमा’निति, तत्रार्थद्वयं सम्भवति। हीनत्वेनोत्तमत्वेन वा। तत्रोत्तमत्वेनैव तत्पदं सार्थकमित्याह **नन्वेवमेत**दिति। असमानिति पदं परित्यज्य, प्रथमं श्लोकद्वयमर्थतोऽङ्गीकृतमिति न तद्बाधनार्थं किञ्चिदुच्यते। **प्रयोजनं** त्वग्रे **वक्तव्यम्। दोषस्त्वादौ** परिह्रियते। तमपि शब्दं स्वरूपतोऽङ्गीकरोति। हे अरविन्दविलोचन, **यद्वै** निश्चयेन भवानाह। **नन्विति** कोमलसम्बोधनेन अर्थतो विचार्यमाणे प्रातीतिके स पूर्वपक्ष एवेति **ज्ञापयति**। आदावेव **नन्वित्यु**क्तत्वात्। सर्वाण्येव वाक्यानि **यथाश्रुतानि** पूर्वपक्ष एवेत्युक्तं भवति, **एवमेत**त्तथैव स्वार्थपरमित्यर्थः। सम्बोधनेन दृष्ट्यैव तापहारकः कथं **वाक्यै**स्तापं जनयिष्यतीति **विरुद्धार्थ**परित्यागो युक्त इति सूचितम्। **वै** निश्चयेन। नत्वेकदेशेनापि बाध्यते। असमानित्यस्य व्याख्यानम्, **न भवतः सदृशी**ति। न विद्यन्ते समा येषां न समा इति वा। एवमर्थद्वये **प्रथमार्थ** एव ग्राह्यः। भगवन्निरूपितं साम्यमन्यत्र नास्तीति। **भगवांस्तु सर्वसमः**, ‘समः प्लुषिणे’त्यादिश्रुतेः। यथाकाशः सर्वसमो भवति, नत्वाकाशसमः कश्चित्। अतः **अहं** भवतः समा न **भवामीति**। तत्र हेतुः **विभूम्न** इति। विशिष्टो भूमा यस्येति, विगतो भूमा यस्मादिति वा। वैशिष्ट्यं सर्वतः, अन्यत्र भूमाभावे च असमानत्वं सिद्धमेव। **भगवतो** व्यापकत्वं सर्वश्रुतिसिद्धम्, गुणानां मायाया वा न तथेति सर्वजनीनत्वाद्धेतुरयं **युक्तः**। ननु तथापि त्वय्येव रमत इति **तस्यापि** रत्युत्पादिका **त्वमेव** महती समा वेत्याशङ्क्याह **क्व स्वे महिम्नी**ति। भगवान् सर्वदा स्वस्मिन्नेव रमते। अभितो रमणं तत्रैव। केनचिदंशेन **कदाचिदेव** कार्ये रमणम्। अत एव तत्कार्याण्यपि **घटादीनि** कदाचिदेव **व्यापृतानि** भवन्ति, नतु सर्वदा। **स्वे महिम्नि** स्वपूर्णानन्दे। इयं च सृष्टिरूपा माया, नतु मुख्या लक्ष्मीर्ब्रह्मानन्दरूपापि। तस्या **एवांशो** मायेति न **क्वचिद्विरोधः**। यतो **भगवान्**। ननु समशो भवतु, तत्रापि को विशेष इति चेत्, **तत्राह अधीश इति**। त्रयाणां गुणानां तत्कार्याणां चाधीशः। नहीशितव्यैरीश्वरो रमते। तर्हि त्वमपि भगवति वा स्वस्मिन् वा **रमसे**। अतः साम्यमेवोचितमिति चेत्, तत्राह **क्वाहं गुणप्रकृ**तिरिति। मम तु प्रकृतिर्गुणाः, भगवतस्तु परमानन्दः। **यथैको मृण्मयेन व्यवहरति**, अपरः सौवर्णेनेति। अतः स्वरूपरमणमपि **ममाप्रयोजकम्**। **भगवत्यपि** रमणं **क्वचिदपि** परिच्छिन्नत्वान्ममैकदेशेनैव। **न हि** परिच्छिन्नः सर्वथा व्याप्तुमर्हति। किञ्च। कार्यद्वारापि ममापकर्ष एवेत्याह **अज्ञगृहीतपादे**ति। यद्यपि मत्सेवका बहवः, मां चाकाङ्क्षन्ते संसाररूपाम्, तथापि ते अज्ञाः। श्रेष्ठाश्रयणमेव महत्त्वसूचकम्, नत्वश्रेष्ठानां बहूनामपि। न हि **बह्व्यो** मक्षिकाः यं कञ्चिदपकृष्टमाश्रयन्त इति गरुडाश्रितभगवत्तुल्यो भवति। गृहीतपादपदेन दोषाभावोऽप्युक्तः। **अनेनान्ये** मत्सेवका एवेति न तेऽपि मत्समाः। तेनान्यान् समत्वेनाभिप्रेत्य **यद्भगवतोक्तम्**, तदपि निवारितं ज्ञातव्यम् ॥ ३४ ॥ एवमसमपदं व्याख्याय, ‘राजभ्यो बिभ्यत’ इत्यर्धेन **यद्भयं** निरूपितम्, तदपि **तथैवेति** व्याचष्टे **सत्यमि**ति। रजसो धर्मा राजसा **राजानः**। ते हि निरन्तरं प्रकृत्येकस्वभावाः। तेषु विद्यमानेषु न कदाचिदप्यात्मसुखस्फूर्तिः। ‘सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनु’रित्येव विवृतम्। अतः स्वानन्दानुभवे रजस्तमःप्रधानान् गुणान् परित्यज्य, **समुद्रे** मुद्रासहिते, यत्र गुणानां प्रवेशो न भवति, तादृशे **उपलम्भनमात्रे** केवले चिद्रूपे। ज्ञानं हि मायानिवर्तकं भवतीति। **तत्राप्यन्तः** यथा दूरादपि न कोऽपि पश्यति, तथा लीनः सन् आत्मा सूक्ष्मो व्यापको भूत्वा तदात्मकः सन् व्याप्नोतीति च ज्ञापयितुमप्यात्मपदम्। ते त्वकिञ्चित्करा इति **भयादिवेत्युक्तम्**। तत्र हेतुः **उरुक्रमे**ति। यथाश्रुतमग्रे निराकरिष्यते। **अनेना**त्रापि द्वारकायां आत्मरमणा-

र्थमेव स्थीयत इति गुणरूपेभ्यस्तेभ्यः पलाय्य समागमनं युक्तमिति समर्थितम्। यदप्युक्तं '**बलवद्भिः कृतद्वेषा**'निति, तदपि सत्यमेव। व्याचष्टे **नित्य**मिति। **कदिन्द्रियाणां** कुत्सितेन्द्रियाणां गणो येषु। सर्वाण्येवेन्द्रियाणि बहिर्मुखानीति। ते हि बलवन्तो भवन्ति अदान्तैरिन्द्रियैः। वस्तुतस्तु दुर्बला एव, इन्द्रियपरवशत्वात्। ते हि दुष्टाः काका इव स्प्रक्ष्यन्तीति तद्दत्तं न ग्राह्यमिति। वैदिकप्रकारेण कदाचित्ते यज्ञं कुर्युरिति, 'न द्विषतोऽन्नमश्नीया'दिति तद्दत्तभागाभजनेऽपि न दोष इति, तदर्थं तैः सह सर्वथैव भवान् कलहं करोति। एतदेव **दैव्यैः** सह नित्यविरोधे निमित्तम्। 'प्रायस्त्यक्तनृपासना'निति व्याचष्टे **त्वत्सेवकैर्नृपपदं विधुतं तमोऽन्ध**मिति। त्वत्सेवकैरपि तत्पदं त्यज्यते। ततो ज्ञायते नृपसिंहासनमधममिति। तस्मिन्नुत्कृष्टे तत्प्राप्य पश्चात्त्वत्सेवारसमनुभूय तत्परित्यागो नोपपद्येत। अतो भगवच्चरणसेवातो राज्यमपकृष्टमिति सिद्धम्। ततश्चापकृष्टे भगवान्न तिष्ठतीति युक्तमेव। यत्र भगवद्धर्मा अपि न तिष्ठन्ति, तत्र कथं भगवांस्तिष्ठेत्। यत्र कमलादेर्गन्धोऽपि न सम्भाव्यते, तत्र कमलस्थितिरिव। स्पष्टं तद्गतं दोषमाह **तमोऽन्ध**मिति। तत्रोपविष्टोऽन्धो भवतीति। तम इव सद्विरोधी च भवतीति। **प्रायः**पदं लौकिकदृष्ट्या अपेक्षितमिति न निराकृतम् ॥ ३५ ॥ यत्कार्ये कारणदोषमङ्गीकृत्य प्रवृत्तौ दूषणं द्वयं हेतुत्वेनोक्तं 'अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषा'मिति, तदपि सत्यमिति व्याचष्टे **त्वत्पादपद्मे**ति। 'सीदन्ती'ति तु फलमग्रे विवेचनीयम्। तव मार्गो न स्पष्ट इत्यास्ताम्। ये त्वच्चरणरजसा जातदेहाः, त्वच्चरणरजोभिलाषिणो वा, त्वामुपासते, तेषामपि वर्त्मास्फुटम्। स्फुटत्वे तु तैः प्रतिबन्धान्न मननं सिध्यति। यथा कालं वञ्चयित्वा भगवान् भक्तान् नेष्यत्यभिप्रेतानेव, तथा तेऽपि गुप्ताश्चरन्तीति त्वदुपासकाः कर्मिणोऽपि गुप्ता भवन्ति। सुतरां चरणोपासकाः ज्ञानिनः, सुतरामपि पादपद्मोपासका भक्ताः। तत्रापि भक्तिरसाभिज्ञाः मकरन्दनिषेवकाः तं रसमन्यो ग्रहीष्यतीति। अतो बहिर्विसदृशाचरणात्तेषामपि मार्गो न स्फुटः। अयं मार्ग एवैतादृश इति अस्पष्टवर्त्मत्वं न दोषाय, अपि तु गुणायैव। 'स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः। विपर्ययस्तु दोषः स्यादुभयोरेष निश्चय' इति वाक्यात्। ननु तथापि लोके प्रसिद्धमेतद्दूषणमिति चेत्, तत्राह **नृपशुभिर्ननु दुर्विभाव्य**मिति। युक्तमेवैतत्। नहि सर्वैरुत्कृष्टो मार्गः ज्ञेयो भवति। तथा सति साधारणः स्यात्। विशिष्टास्त्वत्रापि जानन्त्येव। अन्यथा कथं तत्सेवका भवेयुः। कथं वा तथा कुर्युः। अतो ये नराकाराः पशवः अपुच्छशृङ्गाः, अन्यः सर्वोऽपि व्यवहारः पशुतुल्य एव, तैर्दुर्विभाव्यमेव। **नन्वि**ति युक्तमित्यर्थे सम्बोधनम्। तेऽपि विवेकिनश्चेत्, अग्र ज्ञास्यन्तीति। प्रथमं दुर्विभाव्यत्वं पूर्वपक्षोऽपि। 'अलोकपथमीयुषा'मिति लोकवैलक्षण्यमपि दूषणं लोके प्रसिद्धं तत्परिहरति **यस्मादलौकिकमिवे**ति। भगवानलौकिकः भगवद्धर्माश्च। अन्यथा भगवतो न किञ्चित्कार्यं स्यात्। भगवन्मार्गस्य वा। संसारस्यान्यथैव सिद्धत्वात्तन्निवारकं त्वलौकिकमेव। किञ्च। लोकेपि साधारणस्येश्वरस्य च कृतौ वैलक्षण्यं प्रतीयते। न च तद्दोषाय भवति। तथा भगवतोऽपि अलौकिकमिव ईहितम्। ननु तथा सति कार्येषु लोकाः सहाया न भविष्यन्तीति चेत्, तत्राह **भूमन्नि**ति। त्वमेव महान्, किं तुच्छैरित्यर्थः। किञ्च। न सर्वथा अलौकिकम्, किन्त्वतिमूढानामेव तदगम्यम्। अन्यथा भगवतः सेवकाः मार्गपारम्पर्यं च न स्यादित्याशयेनाह **अथो अनु ये भवन्त**मिति। भगवतस्त्वीहितं शास्त्रेषु भाववर्णनाज्ज्ञातुमपि शक्यम्। तदीयानां तु सुतरामेवाभिप्रायो न बुध्यत इति भिन्नप्रक्रमः। तस्मादलौकिकेऽपि बहवः प्रकाराः सन्तीति लोकवत्तदपि प्रसिद्धम्। तस्माद्यावन्तो गुणा लौकिके, ततोऽप्यधिका अलौकिके इति नैतद्दूषणम्, किन्तु गुण एवेत्यर्थः। साधनस्यादोषत्वे कार्यस्यान्यथात्वं परिहृतमेव, तथाप्यग्रे परिहरिष्यते ॥३६॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

बभाषे इत्यत्र। **अतश्चित्त**मिति। सव्रीडेत्यादिकथनाद्भावोद्गमरणेनैव चित्तमत्राकृष्यते। अतोऽन्यथाज्ञात्वाऽन्यथावदतीत्येवं चित्तविरुद्धानि वचनानि न भवन्तीत्यर्थः। **नन्वेवमि**त्यत्र। अत्र भगवद्वाक्यानि गौण्या वृत्त्या व्याख्यायन्ते। तात्पर्यार्थो दर्पहननम्। शक्योऽर्थः प्रातीतिक इति विभागः। **त्रिविधमपी**ति। कायिकवाचिकमानसिकभेदेन त्रैविध्यम्। चुम्बनाश्लेषनखक्षतदन्तक्षतताडनभेदेन पञ्चविधत्वम्। **तद्वाक्ये**ति। तादृशवाक्येत्यर्थः। इयमाकाङ्क्षा रुक्मिण्या एव जाता तदा इत्यवगत्य व्याख्यानमेवाहेत्यन्वयः। **अतो दोषे**ति। विरोधाङ्गीकाराद्बाधितार्थत्वस्वीकाराद्वा प्राप्तं दोषं दोषनिराकरणार्थं प्रवृत्तत्वान्न सम्पादयेत्। **विभूम्न** इत्यत्र। विशिष्टो भूमा बाहुल्यं यस्येत्यर्थः। प्रथमपक्षे। यस्माद्धेतोर्बाहुल्यं सर्वतो विगतम्। अन्यत्र बाहुल्यं नास्तीत्यर्थो द्वितीयपक्षे। वैशिष्ट्यं विवृण्वन्ति **सर्वत** इति। द्वितीयपक्षं विवृण्वन्ति **अन्यत्रे**ति। 'भूमा सम्प्रसादा'दित्यधिकरणे श्रुत्युक्तमेव भूमपदं भगवद्वाचकमुक्तम्, अन्यत्र तु बाहुल्यार्थकमपि भवतीति ज्ञेयम्। नन्वस्या 'अपि अर्धो वा एष आत्मन' इति वाक्याद्भगवदानन्दत्वमेव, अतः 'क स्वे महिम्नी'ति कथमुपपद्यते इत्यत आहुः **इयं चे**ति। एतद्वाक्यवक्त्री सृष्टिनिरूपिका आनन्दशक्तिरूपा मायेत्यर्थः। नन्वेवं सत्येतस्या मुख्यलक्ष्मीत्वं बाधितं भवेदित्यत आहुः **तस्या एवे**ति। अस्या मुख्यत्वेप्यवस्थाविशेषकृतदैन्याविर्भावात्तावदंशमेवादाय वाक्यमुक्तवतीति भावः। **सत्य**मित्यत्र। **सूक्ष्म** इति। विरलावयवः सन् व्यापको भूत्वेत्यर्थः। **तदात्मक** इति। गुणात्मकः सन् शेते इति ज्ञापयितुमपि, गुणान् व्याप्नोतीति च ज्ञापयितुमप्यात्मपदमुक्तमित्यर्थः।

श्रीसुबोधिनी-सारः

सव्रीडेन हासेन रुचिरेण स्निग्धे नापांगेन भगवतो मुखं वीक्षंती पश्यंती पुंसामृषभं श्रेष्ठं हरिमुवाच हे भारत ॥ ३३ ॥ हे अरविंदविलोचन भगवतो विभूम्नोऽसदृशी नानुरूपेति यद्वै भवानाह ननु निश्चयेन एतदेवमित्थमेव तथाहि त्रयाणां ब्रह्मादीनाम् अधीशो नियन्ता स्वे महिम्नि अभिरतः आप्तकामत्वात् भगवान् भवान्क गुणा एव प्रकृतिरुपादानं यस्याः सा त्रिगुणस्वभावा अज्ञैर्ब्रह्मादिभिः सकामैः त्वमेव सर्वेश्वरी श्रीरिति गृहीतौ पादौ यस्याः सा सर्वोपास्याहं क्वेति महदंतरम् ॥ ३४ ॥ राजभ्यो बिभ्यत इत्युत्तरं वदति । हे उरुक्रम सत्यम् उक्तं गुणेभ्यः शब्दादिभिः भयादिवांतर्हृदये समुद्रे तद्वदगाधे उपलंभनमात्रः चैतन्यघनः शेते निश्चलत्वेनास्ते बलवद्भिः कृतद्वेषानित्युत्तरमाह । कदिंद्रियगणैः कुत्सितैर्बहिर्मुखैरिंद्रियवृत्तिभिः कुत्सित इंद्रियगणो येषामिति वा तैः नित्यं कृतवैरस्त्वमसि प्रायस्त्यक्तनृपासनानिति तदपि युक्तं नृपपदं राज्यस्थानं तमोंधं गाढतमोव्याप्तं तव सेवकैर्भक्तैर्विधुतं त्यक्तम् अतस्त्वयि तदाशा कथं संभाव्यते ॥ ३५ ॥ अस्पष्टवर्त्मनां पुंसामित्यनुवदति । तव पादपद्मयोर्मकरंदं जुषन्त इति तथा तेषां मुनीनां वर्त्म मार्गोऽस्फुटं नृपशुभिरज्ञैर्दुर्विभाव्यमवितर्क्यमचित्यं नन्वेव यस्माद्धेतोर्ये भवंतं त्वामनुवर्त्तंते तेषामपीहितं चेष्टितमलौकिकमिव लोकातीतमिव प्रतीयतेऽथो ईश्वरस्य तवेहितमलौकिकमिति किं वक्तव्यं हे भूमन् ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

‘ब्रह्मादिसेव्यलक्ष्म्यवतारत्वेपि रुक्मिण्या भगवत्सेवापरत्वमेवेत्यत्र विश्वासस्त्वया कार्यः, महत्कुलोत्पन्नत्वात्’ इति सूचयन् सम्बोधयति—भारतेति । सव्रीडो यो हासः तेन रुचिरो यः स्निग्धः स्नेहयुक्तोऽपाङ्गः कटाक्षस्तेन भगवतो मुखं वीक्षन्ती विशेषेण निमेषपरिहारेण ईक्षमाणा रुक्मिणी पुंसामृषभं पुरुषोत्तमं श्रीकृष्णं प्रति बभाषे तस्य स्वनिन्दापराणि यानि वचनानि तानि तदुत्कर्षपरतया व्याख्यातवतीत्यर्थ ॥ ३३ ॥ तत्प्रतिभाषणमेवाह—नन्विति । ‘तिष्ठतु तावदसाम्यं गुणान्तरैः, लोचनसौन्दर्यमात्रेणापि त्वं स्वतुल्यरहित’ इत्याशयेन सम्बोधयति—अरविन्दलोचन इति । विभूम्नो व्यापकस्य भगवत ऐश्वर्यादिगुणपरिपूर्णस्य भवतोऽहमसदृशी असमानेति यद्भवानाह तदेतद्भवद्वचनमेव वै यथार्थमेवेत्यर्थः । तत्रासमत्वं हीनत्वेनोत्तमत्वेन वा द्विविधम् । ‘तत्रोत्तमत्वेनैव तवासमत्वं शास्त्रे प्रसिद्धमेव’ इति सूचयति—नन्विति । असमत्वमेवोपपादयति—क्वेति । स्वमहिम्नि निजानन्दस्वरूपे अभिरतो भगवान् वैराग्यादिगुणपूर्णः त्रयाणां रजःसत्त्वतमसां गुणानामधीशः नियन्ता भवान् क्व ? गुणप्रकृतिः गुणकार्यविषयाविष्टचित्ताहं च क्व ? महद्वैषम्यमित्यर्थः । ‘ननु त्वमप्यधीश्वर्येव, ब्रह्मादिभिरुपास्यमानत्वात्तदभिमतफलप्रदत्त्वाच्च’ इत्माशङ्क्याह—अज्ञगृहीतपादेति । अज्ञैरेव गृहीतौ पादौ यस्याः सा । विवेकिभिस्तु त्वमेवाराध्य इति भावः ॥ ३४ ॥ यदुक्तं ‘राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणं गतान्’ इति तत्राह—सत्यमिति । ‘पादविन्यासैस्त्रिलोकीं सङ्गृह्णतस्तव कथं राजभ्यो भयं स्यात्’ इति सूचयन्ती सम्बोधयति—उरुक्रमेति । गुणाः गुणकार्यभूताः शब्दादय एव राजन्त इति राजानस्तेभ्यो भयादिव समुद्रे समुद्र इवागाधेऽन्तःकरणे उपलम्भनमात्रः चैतन्यघन आत्मा भवान् शेते निश्चलतया तिष्ठतीत्यपि सत्यमेवेत्यन्वयः । ‘निर्लेपत्वाद्वस्तुतो भयं नास्त्येव’ इति सूचयन्त्याह—इवेति । ‘बलवद्भिः कृतद्वेषान्’ इति यदुक्तं तदपि सत्यमेवेत्याह—नित्यमिति । कदिन्द्रियगणैः कुत्सितो विषयोन्मुख इन्द्रियगणो येषां तैस्त्वं नित्यं कृतविग्रहः, परस्परसेव्यसेवकभावादर्शनात् । यदुक्तं ‘त्यक्तनृपासनान्’ इति तदपि युक्तमेवेत्याह—त्वत्सेवकैरिति । नृपाणां पदमासनं त्वत्सेवकैरपि प्रियव्रतादिभिस्त्यक्तं त्वया त्यक्तमिति पुनः किंवक्तव्यमित्याशयः । अविवेकबहुलत्वादिति तत्र हेतुं सूचयन्ती विशिनष्टि—अन्धं गाढं तमः अज्ञानमिति ॥ ३५ ॥ ‘अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषाम्’ इति यदुक्तं तदपि तथैवेत्याह—त्वत्पादेति । यस्मात् ये भवन्तमनुवर्तन्ते सेवन्ते तेषां तव पादपद्मयोर्यो मकरन्दः परमानन्दात्मको रसविशेषः तज्जुषां तं सेवमानानां तदनुभवं कुर्वतां मुनीनां मननशीलानां विवेकिनामेव तावद्वर्त्म मार्गः अस्फुटं ईहितं चेष्टितं चालौकिकमिव । अत एतदुभयमपि नृपशुभिः पशुतुल्यैरविवेकिभिर्ननु दुर्विभाव्यं अवितर्क्यम् । नन्वित्यवधारणे । अथो तस्मात् हे भूमन् ! तवेश्वरस्य सत्मास्फुटमीहितं चालौकिकं दुर्विभाव्यं च भवतीति किं वक्तव्यमिति शेषेणान्वयः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

बभाष इति ॥ हे भारत ! सव्रीडो यो हासः तेन रुचिरो यः स्निग्धः स्नेहयुक्तोऽपाङ्गः कटाक्षस्तेन भगवतो मुखं वीक्षन्ती । शता आर्षः । रुक्मिणी पुंसामृषभं पुरुषोत्तमं श्रीकृष्णं प्रति बभाषे ॥ ३३ ॥ असाम्यं भूपतिभ्यो भीः दुर्गस्याश्रयणं ततः ॥ प्रबलैः कलहो राज्याभावश्चास्पष्टवर्त्मता ॥ अलौकिकाचारता च योषितामवसादनम् ॥ निष्किञ्चनत्वं तत्प्रीतिराढ्यानादरणीयता ॥ अनौचित्यं विवाहस्य निर्गुणत्वं वृथा स्तुतिः ॥ औदासीन्यमकामत्वं स्वदोषान् षोडशासतः ॥ अज्ञत्वादीर्घदर्शित्वे भैष्म्या राज्ञां बहून् गुणान् ॥ कृष्णनर्मोदितान् भैष्मी न्यषेधत्तद्गुणस्तवैः ॥ तत्र असमानित्युक्तं तत्राह—नन्विति ॥ हे अरविन्दविलोचन ! विभूम्नोऽनन्तगुणपूर्णस्य भगवतः भवतोऽहमसदृशी असमानेति यद् भवानाह तदेतद् भवद्वचनमेवं वै यथार्थमेव । यतः स्वे असाधारणे महिम्नि निजानन्दस्वरूपेऽभिरतो भगवान् त्रयाणां गुणानां ब्रह्मादीनां वा अधीशः नियन्ता भवान्

क अज्ञैः सकामैरेव गृहीतौ पादौ यस्याः सा गुणा एव प्रकृतिः स्वरूपं यस्याः साऽहं च क महद्वैषम्यमिति ॥ ३४ ॥ राजभ्यो बिभ्यत इति इत्यत्र बलवद्भिः कृतद्वेषानित्यत्र प्रायस्त्यक्तनृपासनानित्यत्र चाह—सत्यमिति ॥ हे उरुक्रम ! गुणाः गुणकार्यभूताः शब्दादय एव राजन्त इति राजानस्तेभ्यो भक्तानां भयमेव तव भयं तस्माद् भयादिव समुद्रे समुद्र इवागाधे भक्तान्तःकरणे उपलम्भनमात्रः चैतन्यघन आत्मा भवान् शेते निश्चलतया तिष्ठतीत्यपि सत्यम् । कुतः कुत्सितैः बहिर्मुखैरिन्द्रियाणां गणैरदान्तैः । वृत्त्यभिप्रायेण बहुत्वम् । सह त्वं नित्यं कृतविग्रहोऽसि । अन्धं गाढं तमः अज्ञानहेतुः नृपाणां पदमासनं त्वत्सेवकैरपि प्रियव्रतादिभिस्त्यक्तं त्वया त्यक्तमिति पुनः किं वक्तव्यम् ॥ ३५ ॥ अस्पष्टवर्त्मनां पुंसामित्यत्राह—त्वत्पादेति ॥ यस्मात् ये भवन्तमनुवर्तन्ते सेवन्ते तेषां तव पादपद्मयोर्यो मकरन्दः परमानन्दात्मको रसविशेषः तज्जुषां तं सेवमानानां तदनुभवं कुर्वतां मुनीनामेव तावद्वर्त्म मार्गः अस्फुटम् ईहितं चेष्टितं चालौकिकमिव अत एतदुभयमपि नृपशुभिः पशुतुल्यैरविवेकिभिर्ननु दुर्विभाव्यम् अवितर्क्यम् । नन्वित्यवधारणे । अथो तस्मात् हे भूमन् ! तवेश्वरस्य वर्त्माऽस्फुटमीहितं चालौकिकं दुर्विभाव्यं च भवतीति किं वक्तव्यमिति शेषः ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सव्रीडेन हासेन रुचिरेण स्निग्धेन चापाङ्गेन भगवन्मुखं वीक्षन्ती सती पुंसां मध्ये ऋषभं श्रेष्ठं हरिं बभाषे अत्रासमत्वं राजभ्यो भयं दुर्गाश्रयणं बलवद्द्वेषः अराजत्वं ॥ अस्पष्टाचारवत्त्वं अलौकिकाचारत्वं योषिदवसादः निष्किंचनत्वं निष्किंचनप्रियत्वं आढ्याभजनीयत्वं । विवाहानौचित्यं गुणहीनता । मुधा श्लाघित्वं औदासीन्यं अकामुकत्वं चेति षोडशस्वदोषा अज्ञत्वादीर्घदर्शित्वरूपौ द्वौ भैष्मी दोषौ राज्ञां गुणाश्चैतत् सर्वं भगवता यदुक्तं तत्र हरिर्दोषपराणि यानि वाक्यानि तानि सर्वोत्कर्षपरतया व्याचक्षाणा प्रतिवक्ति ॥ ३३ ॥ तत्र कस्मान्नो ववृषेऽसमानिति यदुक्तं तदुत्तरमाह नन्विति ॥ हे अरविंदलोचन पद्मनेत्र भगवतः भगं नानाविधमैश्वर्यषट्कं विद्यतेऽस्य तस्य । अत एव विभूम्नः सर्वोत्कृष्टस्वरूपस्वभावादिभिर्महामुक्तेभ्योप्यतिमहत्तमस्य तव असदृशी असमानात्वमिति यद्भवान् ॥ मामाह एतदेवमेव वै निश्चितमस्ति नात्र संशयः तथाहि स्वे स्वकीयेक्षराक्षरपुरुषोत्कृष्टे परमानंदमये महिम्नि अभिरतः सदासक्तः अधीशः त्रयाणां ब्रह्मादीनां संकर्षणादीनां च कालमायापुरुषाणां च अचेतनबद्धचेतनमुक्तानां चैवमनेकविधत्रिकाणामधीशो नियामकः अतो भगवानचिंत्यासंख्यैश्वर्यसंपन्नस्त्वं अज्ञैर्विषयासक्तैरबुधैर्गृहीतौ न तौ पादौ यस्याः सा गुणः स्वभक्तेभ्यो धनधान्यादिसमृद्धिप्रदायकत्वेतद्रूपा प्रकृतिः स्वभावो यस्याः साअहं लक्ष्मीः क्व अतस्त्वया सह ममात्यसमत्वमित्यर्थः ॥ ३४ ॥ राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणं गतानिति यत् ॥ कथितं तत्राह सत्यमिति हे उरुक्रम उपलंभनमात्रः चैतन्यघनमूर्त्तिः आत्मा सर्वांतर्यामि परमात्मा भवान् गुणेभ्यो रजस्तमो गुणोत्पन्न कामक्रोधलोभमानेर्ष्यादिभ्यः भयादिव समुद्रे तद्वदगाधे । अंतर्हृदये शेते योगिजनानां शिक्षार्थं स्वांतर्हृदये प्रतिलोमदृष्ट्यावर्त्तमान इत्यर्थः ॥ अनया रीत्या भयात्समुद्रशरणगमनं सत्यं बलवद्भिः कृतद्वेषानिति यदुक्तं तस्यापि सत्यत्वमाह नित्यमिति ॥ कर्दिद्रियगणैः कुत्सितः ॥ प्राकृतविषया सक्त इंद्रियगणो येषां तैर्जनैः ॥ साकं कृतविग्रहस्त्वमसि ॥ तेषां उरे वर्त्तमान इत्यर्थः त्यक्तनृपासनानिति यदुक्तं तदपि सत्यमित्याह त्वत्सेवकैरिति त्वत्सेवकैरपि नृपाणां पदं राज्यासनं अंधं निबिडं तमोज्ञानरूपं ॥ ज्ञात्वा विधुं तं त्यक्तं । तर्हि त्वया तस्य त्यजने किमाश्चर्यमित्यर्थः ॥३५॥ अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषामित्यनेन अस्पष्टाचारत्वं अलौकिकाचारत्वं यत्कथितं तथैव तत्सत्यमित्याह त्वत्पादेति । त्वच्चरणकमलसुगंधं सेवमानानां मुनीनां वर्त्ममार्गः अस्फुटं अस्फुटतया बोध्यं नास्ति केषामिति चेत्तत्राह नृपशुभिरिति । नृपशुभिर्भागवतधर्महीनैर्मनुष्याकारैः । पशुभिः तव भक्तमुनीनां वर्त्मदुर्विभाव्यमतर्क्यं ननु निश्चितं तर्हि तेषां तव वर्त्मास्फुटं । तत्र किमु वक्तव्यमिति भावः । यस्माद्ये भवन्तमनुसरन्ति तेषामपीहितमलौकिकमिव भवति । अतो तर्हि ईश्वरस्य तवेहितमलौकिकं स्यात्तत्र किमु वक्तव्यमित्यर्थः । आस्थिताः पदवीं सुभ्रुप्रायः सीदन्ति योषित इत्यस्योत्तरमितः । पंचमश्लोके यद्वांछया नृपशिखेति वक्ष्यतीति बोध्यं ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बभाष इति । हे भारत, सव्रीडहासेन रुचिरः स्निग्धो योऽपाङ्गस्तेन, भगवन्मुखं, वीक्षन्ती वीक्षमाणा रुक्मिणी, पुंसां, ऋषभं पुरुषोत्तममित्यर्थः । बभाषे उवाच ॥ ३३ ॥

असमत्वं राजभीतिर्दुर्गाश्रयणमेव च । बलवद्द्वेषराजत्वालौकिकाचारसंश्रयाः ॥ १ ॥
अलौकिकाध्वगमनं योषितामवसादिता । निष्किंचनत्वं निष्किंचिज्जनसंप्रियता तथा ॥ २ ॥
आढ्यैश्चाभजनीयत्वमनौचित्यं विवाहके । गुणै रहितता भिक्षुश्लाघितत्वमुदासिता ॥ ३ ॥
अकामुकत्वमित्येते स्वदोषाः षोडशोदिताः । अदीर्घदर्शितामौढ्ये भैष्म्यामुक्ते यथायथम् ॥ ४ ॥
कृष्णनर्मोदितान् भैष्मी गुणान् राज्ञां बहूनपि । न्यषेधद्भगवद्दिव्यगुणसंस्तवनैर्मुदा ॥ ५ ॥

भगवतः स्वनिन्दापराणीव यानि वचनानि तानि सर्वोत्कर्षपरतया व्याचक्षाणा प्रतिभाषते। तत्र यदुक्तं 'कस्मान्नो बवृषेऽसमान्' इति तत्रासाम्यं सत्यमेवेत्याह। नन्वेवमेतदिति। हे अरविन्दविलोचन कमलनयन, भगं नानाविधमैश्वर्यषट्कं विद्यतेऽस्येति भगवांस्तस्य, विभूम्नः स्वरूपस्वभावादिभिरविच्छिन्नस्य तव, स्वरूपस्वभावादिभिर्महत्तमस्य तवेति वा। असदृशी असमाना, इति भवान् मां यत् आह, एतत्, एवं एव। ननु इति तथाहीत्यर्थेऽत्राव्ययम्। स्वे स्वकीये, महिम्नि क्षराक्षरपुरुषोत्कृष्टपरमानन्दमये स्वासाधारणे महिमनीत्यर्थः। अभिरतः देशकालाद्यविच्छेदेन सदा वर्त्तमानः, त्र्यधीशः त्रिलोकनायकः, यद्वा त्रयाणां ब्रह्मविष्णुमहेशानां वा, संकर्षणप्रद्युम्नानिरुद्धानां वा, कालमायापुरुषाणां वा, अचेतनबद्धचेतनानामेवमनेकविधत्रिकाणामधीशो नियामकः, अतः भगवान् षाड्गुण्यपूर्णः, अचिन्त्यानन्तैश्वर्यसंपन्नस्त्वमित्यर्थः। क। ननु त्वमपि स्वतन्त्रा ब्रह्मादिभिरुपास्यमाना तदभिमतफलप्रदा चेति चेन्न। गुणप्रकृतिः त्वद्गुणानुवर्त्तिस्वभावात्त्वच्छन्दानुवर्त्तिनी, त्वत्परतन्त्रा त्रिगुणात्मिका चेत्यर्थः। अज्ञैर्विषयासक्तैर्गृहीतौ प्रणतौ पादौ यस्याः सा, अहं क। वै एतत् सत्यमेव। अतः त्वया सह ममातीवासमानत्वमिति परमार्थमेव त्वद्वच इति भावः॥ ३४॥ यदुक्तं 'राजभ्यो बिभ्यतः सुभ्रूः समुद्रं शरणं गतान्' इति तत्राह। सत्यमिति। उरवो विपुलाः त्रिलोकीसंग्राहकाः क्रमाः पादविन्यासा यस्य तत्संबोधने हे उरुक्रम, पादक्रमैरेव त्रिलोकीं संगृह्णतस्तव कथं राजभ्यो भयं, तथापि भयादिवेतीवपदमुपन्यस्य तत् साध्यते। गुणेभ्यः सर्वपराभवकरणशीलत्वोपेतेभ्यो राजोपमितेभ्यः सत्त्वादिगुणेभ्यः, भयात् इव, अन्तरन्तःकरणे समुद्रे, अन्तःकरणस्य समुद्रवदगाधत्वात्तत्तुल्ये हृदये इत्यर्थः। शेते भवानास्ते। कथंभूतस्तत्र त्वं शेषे इत्यत्राह। उपलम्भनमात्रश्चैतन्यघनः, आत्माऽन्तरात्मा, एवं राजभ्यो भयप्रकारो दुर्गाश्रयणं चेति द्वयमुक्तम्। एवं द्वयोः सत्यतां प्रतिपाद्य 'बलवद्भिः कृतद्वेषान्' इति यदुक्तं तस्य सत्यतामाह। त्वं नित्यं कत् कुत्सितैः जनमनसः प्राकृतविषयप्रवणविधानतारूपबलवत्त्वादसमीचीनैरिन्द्रियगणैः, कृतः विग्रहो द्वेषोऽप्रीतिर्येन स एवंभूतः, असि। यदुक्तं 'त्यक्तनृपासनान्' इति, तस्य सत्यतामाह। नृपपदं राज्यासनं, अन्धं गाढं, तमः तमः शब्दोऽत्र नरकपर्यायः। नरकावहमित्यर्थः। हेतुगर्भमिदम्। तत्त्वात्, त्वत्सेवकैः विधुतं त्यक्तं, तर्हि त्वत्कृते तत्त्यागे किमाश्चर्यमिति भावः। एवं 'राजभ्यो बिभ्यत' इत्यादिकं यत्त्वयोक्तं, तत् सत्यम्। मदुक्तरीत्या सत्यमेवेत्यर्थः॥ ३५॥ 'अस्पष्टवर्त्मनां पुंसाम्' इति यदुक्तं तस्यापि सत्यतामाह। त्वदिति। तव पादपद्मयोश्चरणकमलयोर्यो मकरन्दोऽनुभवरसात्मकः पुष्परसस्तं जुषन्ते सेवन्ते इति तेषां मुनीनां अपि, तव वर्त्म याथात्म्यं यदा अस्फुटं, तदा नृपशुभिः नराकारत्वेऽपि पशुतुल्यानामित्यर्थः। दुर्विभाव्यं दुःखेनापि चिन्तयितुमशक्यं, न। नु अपि तु अशक्यमेवेत्यर्थः। अतस्तवास्पष्टवर्त्मत्वमपि सत्यमेवेति भावः। 'अलोकपथमीयुषाम्' इति यदुक्तं तदपि सत्यमित्याह। यस्माद्धेतोः, ये भवन्तं त्वां अनु, वर्त्तन्ते तेषामपि, ईहितं चेष्टितं, अलौकिकं इव। इवात्रावधारणे। अथो अतः, भूम्नः ईश्वरस्य, तव ईहितं अलौकिकं, अत्र किमु वक्तव्यमिति शेषः॥ ३६॥

कृष्णप्रिया

देवी जी के हृदय में स्नेह उमड़ पड़ा; पुनः लज्जामय मन्द हास्य, स्नेह पूर्ण सुधास्रावी चितवन एवं अनुराग से करुणासिंधु भगवान् श्रीकृष्णचन्द्र का मुखकमल अवलोकन करती देवी देवाधिदेव को निवेदन कर रही हैं॥ ३३॥ श्रीरुक्मिणी जी ने कहा—हे अरविन्द लोचन ? आपने सत्य ही कहा कि मैत्री एवं व्याह समकक्ष में होना चाहिये। आपकी समानता मैं कैसे कर सकती हूँ ? सबसे प्रथम आप ऐश्वर्य यशः आदि षड्गुण सम्पन्न पूर्ण ब्रह्म भगवान् हैं। पुनः आप निजानन्द परिपूर्ण पुरुषोत्तम हैं। आप त्रिगुणीत, तीनों गुणों के स्वामी एवं विधि हरिहर आदि देवताओं से सदा सेवित परब्रह्म हैं। और हे नाथ मैं त्रिगुणात्मिका प्रकृतिरूपा एवं अज्ञजन ही मेरे चरणों को पकड़ते हैं, जो केवल अनन्त कामनाओं से भरे हुए हैं। प्रियतम ! प्रकृति एवं पुरुष का साम्य कैसे हो सकता है॥ ३४॥ हे नाथ ! आपने यह कहा कि राजाओं के भय से मैं समुद्र के भीतर रहा हूँ। यह वास्तविक कथन है—लेकिन रहस्य यह है कि जरासन्धादि भूतल के छोटे-छोटे राजाओं के भय से नहीं। लेकिन राजा शब्द का रहस्य एवं अर्थ यह है कि सत्वादि तीन गुण ही राजा हैं। वे ही सबके नियामक हैं सर्व देवगण भी इन तीनों के आधीन मालूम पड़ते हैं। आप तीनों के आधीन नहीं हैं लेकिन व्यवहार ऐसा बताते हैं। आप निरंतर निजानंद समुद्र में ही रहते हैं। नाथ ! आपका तो निरंतर दुष्ट इन्द्रियों के समूह से संघर्ष चलता ही है। भगवन् ! आपके श्रीचरणों के सेवक नृपतियों ने राजपद को अन्धः तमः समझकर दूरतक छोड़ दिया है पुनः आपके लिये तो कहना ही क्या ?॥ ३५॥ प्रियतम ! आपने कहा कि हमारा मार्ग स्पष्ट नहीं है, वह नयी बात नहीं है—आपके चरणकमल चञ्चरीक एवं आपके पदपङ्कजों के मकरन्द रस-पान करने वाले भक्तजनों का मार्ग भी अस्पष्ट रहता है और संसार सुखरत विषयी जीव उस दिव्य पथ की कल्पना भी नहीं कर पाता है। श्रीरुक्मिणीजी ने आगे बढ़कर कहा कि स्वामिन् ! आपके प्रपत्ति पथ पर चलने वाले आपके भक्तों का सामर्थ्य एवं व्यवहार भी दुर्ज्ञेय ही रहा है एवं अलौकिक चेष्टायें रहती हैं फिर आपके विषय में क्या कहना ?॥ ३६॥

निष्किञ्चनो ननु भवान् न यतोऽस्ति किंचिद् यस्मै बलिं बलिभुजोऽपि हरन्त्यजाद्याः।
न त्वा विदन्त्यसुतृपोऽन्त[1]कमाढ्यतान्धाः [2]प्रेष्ठो भवान् बलिभुजामपि तेऽपि तुभ्यम् ॥ ३७ ॥
त्वं वै समस्तपुरुषार्थमयः फलात्मा यद्वाञ्छया सुमतयो विसृजन्ति [3]कृत्यम्।
तेषां विभो समुचितो[4] भवतः [5]समाजः पुंसः स्त्रियाश्च रतयोः सुखदुःखिनोर्न ॥ ३८ ॥
त्वं न्यस्तदण्डमुनिभिर्गदितानुभाव[6] आत्माऽऽत्मदश्च जगतामिति मे वृतोऽसि।
[7]हित्वा भवद्भ्रुव [8]उदीरितकालवेग[9]ध्वस्ताशिषोऽब्जभवनाकपतीन् कुतोऽन्ये ॥ ३९ ॥
[10]जाड्यं वचस्तव गदाग्रज [11]यश्च भूपान् विद्राव्य शार्ङ्गनिनदेन जहर्थ मा त्वम्।
सिंहो यथा स्वबलिमीश[12] पशून् स्वभागं तेभ्यो भयाद् यदुदधिं शरणं प्रपन्नः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—भगवन्! ननु, भवान्, निष्किञ्चनः, न, यतः, किञ्चित्, बलिभुजः, अजाद्याः, अपि, यस्मै, बलिम्, हरन्ति, आढ्यतान्धाः, असुतृपः, अन्तकम्, त्वाम्, विदन्ति, बलिभुजाम्, अपि, भवान्, प्रेष्ठः, ते, अपि, तुभ्यम्, प्रेष्ठाः ॥ ३७ ॥ सुमतयः, यद्वाञ्छया, कृत्स्नम्, विसृजन्ति, समस्तपुरुषार्थमयः, त्वम्, वै, फलात्माः, विभो! भवतः, समाजः, तेषाम्, समुचितः, पुंसः, च, स्त्रियाः, रतयोः, अतः, सुखदुःखिनः, समाजः, न, स्यात् ॥ ३८ ॥ हे नाथ! भवद्भ्रुवः, उदीरितकालवेगध्वस्ताशिषः, अब्जभवनाकपतीन्, हित्वा, त्वम्, न्यस्तदण्डमुनिभिः, गदितानुभावः, जगताम्, आत्मा, च, आत्मदः, इति, मे, वृतः, असि, अन्ये, कुतः, चिन्तयामि ॥ ३९ ॥ हे गदाग्रज! यः, शाङ्र्गनिनदेन, भूपान्, विद्राव्य, त्वम्, माम्, जहर्थ, इति, तव, यद्, वचः, तत्, जाड्यम्, ईश! सिंहः, यथा, पशून्, विद्राव्य, स्वभागम्, बलिम्, यथा, हरति, तथा, जहर्थ। तेभ्यः, भयात्, यद्, उदधिम्, शरणम्, प्रपन्नः, इतिवाक्यम्, तु, जाड्यम् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

"निष्किंचना वयं शश्वन्निष्किञ्चनजनप्रियाः। तस्मात्प्रायेण न ह्याढ्या मां भजन्ति सुमध्यमे" इत्येतच्छ्लोकोक्तं दोषत्रयं परिहरति। निष्किंचन इति। दरिद्रतालक्षणं निष्किंचनत्वं एतत्तु तव न घटत इत्याह। यस्मा इति। अन्यतो बलिभुजः पूज्या अपि ब्रह्मादयो यस्मै भवते बलिं हरन्ति तस्य सर्वेश्वरस्य भवतो दरिद्रता न घटत इत्यर्थः। निष्किंचनजनप्रिया इत्यत्र तत्पुरुषेण बहुव्रीहिणा वा निंदा स्यादिति स्वयमप्युभयथा स्तौति। प्रेष्ठो भवानिति। बलिभुजां ब्रह्मादीनां लोकेश्वराणां त्वं प्रेष्ठस्तेऽपि तुभ्यं तवेति। "तस्मात्प्रायेण न ह्याढ्या मां भजन्ति" इति तस्योत्तरम्। न त्वां विदन्तीति आढ्यतयाऽन्धास्त्वामन्तकं न विदन्ति। अतस्ते असुतृपः असूनेव तर्पयन्ति न त्वां भजन्तीत्यर्थः ॥ ३७ ॥ बलिभुजामपि भवान्प्रेष्ठ इत्यत्र हेतुं वदन्ती 'ययोरेव समं वित्तम्' इत्यनेनोक्तमनौचित्यं परिहरति। त्वं वा इति। फलात्मा परमानन्दरूपः। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः। समाजः सेव्यसेवकलक्षणसंबंधो न तु पुंसः स्त्रियाश्च मिथो रतयोः। अत एव तत्कृतसुखदुःखिनोः। तदाकुलयोरित्यर्थः ॥ ३८ ॥ 'भिक्षुभिः श्लाघिता मुधा' इत्यस्य परिहारः त्वमिति भिक्षुपदव्याख्यानं न्यस्तदंडैर्मुनिभिरिति। मुधेत्यस्य परिहारः आत्मेति। यदर्थं सर्वं प्रियं भवति तस्य जगतामात्मनस्तव वरणं न वृथेत्यर्थः। किंच आत्मद इति। "वैदर्भ्येतदविज्ञाय त्वयाऽदीर्घसमीक्षया" इति स्वस्मिन्नुक्तं दोषद्वयं परिहरति। इतीति। इति ज्ञात्वैव मे मया वृतोऽसीत्यज्ञानपरिहारः। हित्वेत्यदीर्घसमीक्षापरिहारः। भवतो भ्रुवः सकाशादुदीरितो यः कालस्तस्य वेगस्तेन ध्वस्ता आशिषो येषां तान्ब्रह्मादीनपि विहाय। कुतोऽन्ये वराका इत्यर्थः ॥ ३९ ॥ स्वाज्ञानं परिहृत्य पुरुषांतरगुणवर्णनप्रदीप्तकोपसंरंभेण तस्मिन्नेवाज्ञानमापादयति। जाड्यमिति। सिंहो यथा पशून्विद्राव्य स्वबलिं हरति तथा शाङ्र्गधनुर्निनादेनैव जरासंधादीन्विद्राव्य मां स्वभागं श्रियं यस्त्वं हृतवानसि तस्य तव राजभ्यो भयादुदधिं प्रपन्न इति यद्वचो भाषणं तज्जाड्यं मांद्यम्। न घटत इत्यर्थः ॥ ४० ॥

---

[1]. न्तिक–विज.। [2]. प्रेष्ठः सतां बलिभुजामपि योऽन्तरास्ते–विज। [3]. कृत्स्नम्–श्रीधर. वंशी. जीव. वीर. विज. विश्व.। [4]. दितो–विज.। [5]. प्रसादः श्रय्यां च यश्च–विज.। [6]. हृदि भावितात्मा–प्रा. पा। [7]. मु–विज.। [8]. दु–विज.। [9]. गन्ध–विज.। [10]. सत्यं–विज.। [11]. यश्च–विज.; यस्तु–श्रीधर. वंशी. जीव. वीर. विश्व.। [12]. माशु–वीर.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यतोऽन्येभ्यः। इत्यर्थ इति—न हि मत्कटाक्षापेक्षिब्रह्मादिसेव्यपादमत्सेव्यस्य नैःस्वलक्षणदौर्गत्यं संगच्छत इति भावः। तत्पुरुषेण निष्किचनजनानां प्रिया इत्येवंरूपेण। बहुव्रीहिणा निष्किचनजनाः प्रिया येषां ते तथेत्येवंरूपेण वा। स्वयमपि रुक्मिण्यपि। उभयथा समासद्वयाभिप्रायेण। प्रेष्ठोऽतिप्रियः। इत्यर्थ इति—न हि प्राणतर्पणपराणां त्वद्दृष्टिर्भवतीति भावः। 'निष्किचनाः' इत्यस्य योग्यमर्थं योजयति। निरिति निषेधे। ननु निश्चये। यतो यद्व्यतिरिक्तमन्यत्किञ्चिन्नास्त्यत एव निष्किचनः, नान्यत इत्यर्थ। ननु दरिद्र एव निष्किचनः प्रसिद्धः—सत्यम्, तादृशत्वं तु तव न घटत इत्याह—यस्मा इति। 'तस्मात्प्रायेण' इत्युक्तं सत्यमेवेत्याह—न त्वामिति। अन्तकमिति "वीर्याणि तस्याखिलदेहभाजाम्" इति, 'प्रमत्तमुच्चैरितिकृत्यचिन्तया' इत्यादिप्रामाण्येन, 'न यतोऽस्ति किंचित्' इति न्यायेन च तेषामन्तकरूपं त्वां तद्रूपतया न विदन्ति, स्वशासनकर्तृत्वेनापि नानुसंदधते। यद्वा—अन्ते मरणेऽपि कं स्मरणादिना सुखं यस्मात्तमपि न विदन्ति। ते के—ये आढ्यतमांधा ज्ञानहीना न तु बहिराढ्यमात्राश्च। अत एव भवतापि प्रायेणेत्युक्तम्। यतो यत्र वाऽसुतृपो निजेन्द्रियमात्रभरणतत्परा न त्वन्य इति। 'निष्किचनजन—'इत्यस्य योग्यमर्थं योजयति–बलिभुजामिति। तेषामपि भवानेव प्रेष्ठो न तु बलयो बलिदातारो वा। 'तदस्तु मे नाथ स भूरिभागः' इत्यादिभ्यः। अत एवाढ्या अपि तेन तत्तयान्धाः प्रत्युत निष्किचना एव, विषयभोगेऽपि तत्र रागाभावात्। ननु संपदभावमात्रेणान्ये तदंगब्रह्मचर्यतयाऽपि संभवादत एव त्वां त एव भजन्ति नान्ये, एवं तवापि त एव प्रेष्ठा इति तन्निष्किचनत्वं परमविशिष्टमेवेति। अत्र समासभेदकस्य स्वरविशेषस्यानुसन्धानं वैकल्यादेव ज्ञेयम्। एकवाक्यता चैवम्निश्चितं भवान् निष्किचनो यदि तर्हि कथं मदुक्तमंगीचकर्थैव–सत्यम्, तत्र न दरिद्रत्वलक्षणेनार्थेन किन्त्वनेनैवेत्याह—नेति। अत एव यस्मा इत्यादि। ये तु त्वां न विदन्ति ते खल्वाढ्यतान्धा असुतृपश्च, ये तु त्वां विदन्ति ते खल्वतिप्रेष्ठा इत्येतद्योजनापेक्षयैव तदुक्ताक्रमेणोत्तरम्। 'आस्थिताः' इत्यादेस्तूत्तरं संरंभयोग्यत्वात्तत्प्रसंगे देयम् ॥ ३७ ॥ समस्तपुरुषार्था धर्मार्थकाममोक्षास्स्वरूपमस्येति तथा। स्वरूपे मयट्। परमानन्दरूपत्वमाह श्रुतिः—एतस्य परमात्मरूपस्य मात्रामंशमुपजीवन्त्याश्रयन्तीत्यर्थः। अत एव मिथोरतत्वादेव। तत्कृते मिथोरतिकृते सुखदुःखे ययोर्विद्येते तौ तथा तयोः। इत्यर्थ इति—परस्पररतिकृतसुखदुःखक्लिष्टयोस्तव रतिः कदापि न संभवतीति भावः। वै प्रसिद्धौ। समस्ताः पुरुषार्था धर्मादयश्चत्वारस्त्वद्भक्तिभेदाश्च तन्मयस्तत्प्राचुर्यवान्, "सर्वगंधः सर्वरसः" इति "एतं सपत्वाम इत्याचक्षते, एतं सर्वाणि रामाणि अभिसंयन्ति, एष उ एव भामनीः, एष हि सर्वाणि रामाणि नयताम्, एष उ एव भामनीः, एष सर्वेषु वेदेषु भाति" इति "अयमात्मा उपहतपाप्मा" इत्यादिश्रुतेः। अत एव बृहत्साम्नि—"बृहत्वार्थिवं बृहदन्तरीक्षं बृहद्दिवं बृहद्वामं बृहन्द्भ्यो वामं वामेभ्यो वामम्" इति ब्रह्मणः सर्वात्मत्वं सर्वेभ्योपि मनोहरत्वमुपदिश्यते। यतः फलात्मा "को ह्येवान्तात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्" इति, "रसो वै सः, रसं ह्येवायं लब्ध्वा नन्दी भवति" इति, "एतस्मै वा" इत्यादिश्रुतेः। अतो यदित्यादि। कृत्स्नं दैहिकं देहवित्ताद्यभिमानं लोकद्वयापेक्षं मोक्षादिकमपि सर्वं विसृजन्ति, अतस्त एवाकिंचनाः, भवानेव तत्प्रेष्ठ इति युक्तमेवेति भावः। एवं पूर्वार्थप्रतिपादनपूर्वकम् 'ययोरात्मसमम्' इत्यादावुत्तरमाह—तेषामिति। विभो हे सर्वेश्वर एवमपि तैः सहैव सम्यगुचितः, भवतो वित्ताद्यपेक्षाराहित्येन तैरेव साम्यात्, संशब्देनान्यैर्भक्तैरप्यौचित्याभासः सूचितः। रतयोरिति भाग्याभाव उक्तः। अत एव सुखदुःखिनोरिति, दुःखप्रतीकारमात्ररूपं सुखं दुःखं च तयोरुचितमिति भावः ॥ ३८ ॥ इत्यर्थ इति—"आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुतेरतिप्रीतेर्मोक्षहेतुत्वाद्वैयर्थ्यं नेति भावः। अन्यदाह—किञ्चेति। वराकाः शोचनीयाः। इत्यर्थ इति—न हि सर्वेश्वरप्रीतिमता प्राकृताः सेव्यन्त इत्याशयः। "वराकः शंकरे पुंसि शोचनीयेऽभिधेयवत्" इति मेदिनी। तत्रैव समुद्रमथनवृत्तं स्मरंत्याह—त्वमिति। न्यस्तदण्डेति गर्वादिराहित्यं सूच्यते, तेनांबुभिक्षुतावैशिष्ट्यम्। मुनिभिरित्यात्मारामत्वं, तेन तत्रापि वैशिष्ट्यम्। तैर्गदितोऽनुभावो माहात्म्यं यस्य स इति यथार्थगुणत्वं दर्शितम्। आत्मा सर्वमूलस्वरूपम्। भवद्भ्रुव इति कालस्यापि प्रवर्तकत्वेन कालापरिच्छिन्नत्वं तथा तदीयनिजलोकादेरपि नित्यत्वादिकं तथा ब्रह्माद्याशिषां तद्भ्रूक्षेपकालमात्रस्थायित्वादिकं चोक्तम्। नाकपतय इंद्राद्याः। अब्जभवमपि हित्वा कि पुनर्नाकपतीनित्येवं व्याख्येयमिति ब्रह्मादीनामवज्ञास्पदत्वं दर्शितवती। श्रीशिवस्यानुक्तिस्तु—तत्रावधानाविषयत्वं दर्शयित्वा तादृशत्वभाव एव तदकरणे हेतुं व्यनक्ति। यद्यपि स्वाभाविक एव तस्यास्तस्मिन्ननुरागो न तु विचारापेक्षस्तथापि स्वाभाविकत्वे सति विचारोऽप्यनुषज्जतीति तदंशमालंब्य सिद्धान्तितं, तस्यैव योग्यत्वात् ॥ ३९ ॥ संरंभस्संवेगः। तस्मिन्नेव श्रीकृष्ण एव। इत्यर्थ इति—अनुचितसंभाषणमेव मौढ्यापादकमिति भावः। "पौर्वापर्यमनालोच्य कथनं त्वाधियां भवेत्" इत्युक्तेः। तदेवमकस्मान्मानाख्यस्थायिभावोदयरतिस्वज्ञानसमीक्षयोरज्ञानं तस्मिन्नेव व्यंजनया वृत्त्योक्त्वापि पुनः पुरुषांतरगुणवर्णनप्रदीप्तकोपेनाभिधयापि तस्मिन्नज्ञानं संरंभभ्रुकुटिकुटिलकटाक्षं स्पष्टयन्त्याह—जाड्यमिति। जाड्यमयमित्यर्थः। यस्त्वं भूपान्विद्राव्य स्वभागं मां श्रियं जहर्थ, तेभ्यो भयादुदधिं प्रपन्नः शरणं प्राप्तस्त्वमिति यत्तव वचो भाषणं तत्तव जाड्यमज्ञानज्ञापकमित्यर्थः। ननु च पूर्वभकोपतया त्वया 'सत्यं भयादिव' इत्यादिवचः सत्यमेव समाहितमिति चेत्–सत्यम्, तन्ममापि जाड्यमिति ज्ञेयम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निष्किचना इत्यस्य योग्यमर्थं योजयति । निरिति निषेधे ननु निश्चये यतो यद्व्यतिरिक्तमन्यत्किञ्चिन्नास्ति तत एव निष्किञ्चनः नान्यत इत्यर्थः । ननु दरिद्र एव निष्किञ्चनः प्रसिद्धः सत्यं तादृशत्वन्तु तव न घटत इत्याह—यस्मा इति । तस्मात्प्रायेणेत्युक्तं सत्यमेवेत्याह—न न त्वामिति । अन्तकमिति "वीर्याणि तस्याखिलदेहभाजाम्" इति प्रमत्तमुच्चैरितिकृत्यचिन्तयेत्यादिप्रामाण्येन न यतोस्ति किञ्चिदिति न्यायेन च तेषाम् अन्तकरूपं त्वां तद्रूपतयापि न विदन्ति स्वशासनकर्तृत्वेनापि नानुसन्दधते यद्वा अन्तेपि मरणेपि कं स्मरणादिना सुखं यस्मात्तमपि न विदन्ति ते के ये आढ्यतमान्धाः ज्ञानहीना ननु बहिराघ्रमात्राश्च अत एव भवतापि प्रायेणेत्युक्तं यतो यत्र वाऽसुतृपः निजेन्द्रियमात्रभरणतत्परो नत्वन्यः इति निष्किञ्चनजनेत्यस्य योग्यमर्थं योजयति प्रेष्ठ इति । बलिभुजामपि तेषां भवानेव प्रेष्ठः नतु बलयो बलिदातारो वा तदस्तु मे नाथ स भूरिभाग इत्यादिभ्यः अत एव आढ्या अपि तेनैवान्धाः प्रत्युत निष्किञ्चना एव विषयभोगेपि तत्र रागाभावात् नतु सम्पद्भावमात्रेणान्ये तुरङ्गब्रह्मचर्यताया अपि सम्भवात् अत एव त्वां त एव भजन्ति नान्ये एवं तवापि त एव प्रेष्ठा इति तन्निष्किञ्चनत्वं परमविशिष्टमेवेति अत्र समासभेदकस्य स्वरविशेषस्याननुसन्धानं वैकल्पादेव ज्ञेयम् एकवाक्यताचैवं निश्चितं भवान् निष्किञ्चनः तर्हि कथं मदुक्तमङ्गीचकर्थैव सत्यं तत्र न दरिद्रत्वलक्षणेनार्थेन किन्त्वनेनैवेत्याह—नेति । अत एव यस्मा इत्यादि ये तु त्वां न विदन्ति ते खल्वाढ्यतान्धाः असुतृपश्च ये तु त्वां विदन्ति ते खल्वतिप्रेष्ठा इत्याह प्रेष्ठ इति एतद्योजनापेक्षयैव तदुक्तातिक्रमेणोत्तरमास्थिता इत्यादेस्तूत्तरं संरम्भयोग्यत्वात् तत्प्रसङ्गे देयम् ॥ ३७ ॥ वै प्रसिद्धौ समस्ताः पुरुषार्था धर्मादयश्चत्वारस्त्वद्भक्तिभेदाश्च तन्मयः तत्प्राचुर्यवान् "सर्वगन्धः सर्वरसः" इत्यादि "एतं सम्पाद्धाम इत्याचक्षते एतं सर्वाणि रामाणि अभिसंयन्ति एष उ एव भामनीः स एष हि सर्वाणि रामाणि नयताम् एष उ एव भामनीः एष सर्वेषु वदेषु भाति ' इत्यादि. "अयमात्मा अपहतपाप्मा" इत्यादिश्रुतेः । अत एव "बृहत्साम्निबृहत्पार्थिवं बृहदन्तरिक्षं बृहद्दिवं बृहद्धामं बृहद्भ्योवामं वामेभ्यो वामम्" इति ब्रह्मणः सर्वात्मत्वं सर्वभ्योऽपि मनोरमत्वमुपदिश्यते यतः फलात्मा "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात् इति "रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति" इति "एतस्मैवा" इत्यादि श्रुतेः । अतो यदित्यादि कृत्स्नं दैहिकं देहं वित्ताद्यभिमानं लोकद्वयापेक्षा मोक्षादिकमपि सर्वं विसृजन्ति अतस्त एवाकिञ्चनाः भवानेव तत्प्रेष्ठ इति युक्तमेवेति भावः । एवं पूर्वार्थप्रतिपादनपूर्वकं ययोरेवेत्यादावुत्तरमाह—तेषामिति । विभो हे सर्वेश्वर ! एवमपि तैः सहैव सम्यगुचितः भवतो वित्ताद्यपेक्षाराहित्येन तैरेव साम्यात् संशब्देनान्यैर्भक्तैरप्यौचित्याभासः सूचितः । रतयोरिति त्यागाभाव उक्तः अत एव सुखदुःखिनोरिति दुःखप्रतीकारमात्ररूपं सुखं दुःखञ्च तयोरुचितमितिभावः ॥ ३८ ॥ तत्रैव समुद्रमथनवृत्तं स्मरन्त्याह—त्वमिति । न्यस्तदण्डेति गर्वादिराहित्यं सूच्यते तेन भिक्षुतावैशिष्ट्यं मुनिभिरित्यात्मारामत्वं तेन तत्रापि वैशिष्ट्यं तैर्गदितः अनुभावो माहात्म्यं यस्य सः इति यथार्थगुणत्वं दर्शितम् । आत्मा सर्वभूतस्वरूपं भवद्भ्रुव इति कालस्याऽपि प्रवर्त्तकत्वेन कालापरिच्छिन्नत्वं तथा तदीयनिजलोकादेरपि नित्यत्वादिकं तथा ब्रह्माद्याशिषां तद्भ्रूक्षेपकालमात्रस्थायित्वादिकञ्चोक्तं नाकपतयः इन्द्राद्याः अब्जभवमपि हित्वा किम्पुनर्नाकपतीनित्येवं व्याख्येयम् इति ब्रह्मादीनामवज्ञास्पदत्वं दर्शितवती अत्र शिवस्यानुक्तिस्तु तत्रावधानाविषयत्वं दर्शयित्वा तादृशत्वभावएव तदकरणे हेतुं व्यनक्ति यद्यपि स्वाभाविक एव तस्यास्तस्मिन्ननुरागः नतु विचारापेक्षः, तथापि स्वाभाविकत्वे सति विचारोप्यनुषज्जतीति तदंशमालम्ब्य सिद्धान्तितं तस्यैव सिद्धान्ते योग्यत्वात् ॥ ३९ ॥ जाड्यं वच इति भावकर्मणोः ष्यञ् विधानात् भावपक्षे यत्नतः सामानाधिकरण्यनिर्द्देश्यो वचसो जाड्यप्राचुर्य्यपेक्षया कर्मपक्षे तु स्पष्टमेव तुशब्दो विरोधे हरणे हेतुः स्वभागमिति हे गदाग्रजेति त्वत्कनिष्ठेन गदेनैकेनापि विद्राव्यास्ते भूपहतकाः किमुत त्वयेति भावः यत ईश हे अशेषशक्तियुक्त ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यतो यद्व्यतिरिक्तम् । ननु दरिद्र एव निष्किञ्चनः प्रसिद्धः, तत्राह—यस्मा इति । अन्तकमिति पुत्रादिमृत्युदृष्टान्तेनावश्यं भाविमरणानुसन्धानादन्तकतयापि वेदितुं योग्यमिति भावः, यद्वा, अन्ते मरणेऽपि कं स्मरणादिना सुखं यस्मात्तमपि न विदन्ति, यतोऽसुतृपः, यत आढ्यतया अन्धा ज्ञानहीनाः, उक्तन्यायेन सर्वलोकश्रेष्ठत्वान्निरहंकारत्वाद्वा श्रीब्रह्मादय एवाकिञ्चनास्तेषां प्रेयानित्याह—प्रेष्ठ इति । अपिद्वयमुभयत्रापि प्राधान्यं गमयति । यद्वा, बलिभुजामपि किं पुनर्वक्तव्यम्, त्वदर्थं त्यक्ताशेषपरिग्रहाणां निष्किञ्चनानामिति । एवं श्रीब्रह्मादीनामाढ्यत्वेऽप्यान्ध्याभावेनासुतृप्त्वाभावाज्ज्ञानेन त्वद्भजनयोग्यमेवेत्यभिप्रायेण प्रस्ताव-प्रसंगतया तथा सर्वसारतरस्य प्रेष्ठत्वस्य स्तुतिरीत्यान्ते निर्द्देश्यतया पूर्वोक्तक्रमातिक्रमेणोत्तरं (१३ श० श्लो०) 'आस्थिताः' इत्यादेस्त्वग्रे संरम्भेणैव देयत्वेन तदुक्तानुकूलोत्तरं प्रसंगेऽस्मिन्न दत्तमिति ज्ञेयम् । तच्च तैरप्यग्रे व्याख्येयम् । अत्रैवमेकवाक्यता । बलिभुजां पूज्यमप्यहो आढ्यतान्धाः, विदन्ति, तच्च युक्तमेवेत्याह—प्रेष्ठ इति । आढ्यतान्धानां तदप्रियत्वादिति भावः ॥ ३७ ॥ वै प्रसिद्धौ, समस्ताः पुरुषार्था धर्म्मादयश्चत्वारस्त्वद्भक्त्यादयश्च तन्मयः, यतः फलात्मा कस्यचिदानन्दहेतुत्वेन, कस्यचिच्च साक्षादानन्दस्वरूपत्वेनेत्येवं सर्वेषामेव तेषामानन्दे पर्य्यवसानात्, यद्वा, फलरूपाणां तेषामात्मा च

प्रवर्त्तकः। एवं साध्यत्वं साधनत्वं चोक्तम्, अतएव कृत्स्नं साधनादिकमन्यत् सर्व्वं सुमतयो विवेकिनो विसृजन्ति। यद्वा, पुरुषार्थश्चतुर्वर्गस्तस्य फलं भक्तिः प्रेमा वा, तस्यात्मा च तस्य तव वाञ्छया वाञ्छामात्रेणापि, किं पुनः प्राप्त्येत्यर्थः। कृत्स्नं दैहिकं देहं वित्ताद्यभिमानं लोकद्वयापेक्षां मोक्षादिकमपि सर्वं विसृजन्ति उपेक्षन्ते, अतितुच्छत्वात् प्रायो दुःखप्रदत्वाच्च। अतस्त एवाकिञ्चनाः, तत्प्रेष्ठ एव भवानिति युक्तमेवेति भावः। ययोरेवेत्यादावुत्तरमाह—तेषामिति। विभो! हे सर्व्वव्यापक! हे जगदीशेति वा, तथापि तैः सहैव सम्यगुचितः, भवतोऽपि वित्ताद्यपेक्षाराहित्येन तैरेव साम्यात्। यद्वा, विभो! हे परिपूर्ण! अतो वित्तादिभिर्भवतः सम्बन्धासिद्धेरिति भावः। अत्यागिनामपि विविधकामेन भजतां तत्तत्फलप्रदानादिना कथञ्चित्सम्बन्धो युज्यत इति सं०—शब्दार्थः। रतयोरिति त्यागाभाव उक्तः। अतएव सुखदुःखिनोरिति दुःखप्रतीकारमात्ररूपं सुखं दुःखञ्च तयोरुचितमेवेति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, वित्तादिभिर्ग्राम्यसुखेऽपि दुःखिनोरेव, तथापि रतयोः, अतस्ताभ्यां सर्वथा नोचित एवेत्यर्थ॥ ३८॥ न्यस्तदण्डैर्मोक्षापेक्षकैः सन्न्यासिभिरपि, किं पुनर्मोक्षोपेक्षकैः श्रीनारदादिभिर्मुनिभिर्गदितो व्यक्तं वर्णितोऽनुभावो माहात्म्यं यस्य सः। अनुभावमेवाह—आत्मा सर्वान्तर्य्यामी ईश्वर आत्मदश्चेति। असीति—वरणस्य स्थैर्य्यं बोधयति, भवद्भ्रुव इति कालस्यापि प्रवर्त्तकत्वेन कालानधीनतया कालापरिच्छिन्नत्वं तथा वैकुण्ठलोकादेरपि नित्यत्वादिकं तथा श्रीब्रह्माद्याशिषां तद्भ्रूक्षेपकालमात्रस्थायित्वादिकञ्चोक्तम्। नाकपतय इन्द्राद्या अब्जभवमपि हित्वा, किं पुनर्नाकपतीनित्येवं व्याख्येयम्। श्रीशिवस्यानुक्तिस्तस्य नाकपत्यन्तर्गतत्वादेवेति ज्ञेयम्॥ ३९॥ तु-शब्दो विरोधे, प्रत्यक्षविरुद्धत्वादित्यर्थः। हरणे हेतुः—स्वभागमिति, अन्यथापकीर्त्तिप्रसक्तिरिति भावः। अस्यान्ते निर्द्देशो लज्जया प्रागवाच्यत्वात्। हे गदाग्रजेति त्वत्कनिष्ठेन पदेनैकेनापि विद्राव्याः, किं पुनस्त्वयेति भावः। यत ईश! हे अशेषशक्तियुक्त॥ ४०॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

बलिभुजः हविर्भोक्तारः अजाद्याः ब्रह्माद्याः बलिभुजां ब्रह्मादीनां प्रेष्ठं प्रियतमं त्वाम् असुतृपः प्राणतर्पकाः न विदुस्तेऽपि ब्रह्मादयोपि तुभ्यं तव शेषभूता इत्यर्थः॥३७॥ तेषां मुनीनां समाजः तवोचितः स्त्रीपुंसोरतयोः नः समुचितः अजितेन्द्रियाणां जन्तूनां न सुखायेत्यर्थः॥ ३८-४०॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

आस्थिताः पदवीमित्यादौ प्रतिभाषिष्यते यद्वाञ्छयेत्यष्टमेन, तावन्निष्किञ्चना इत्यत्र प्रतिभाषते-निष्किञ्चन इति। ननु, हे विभो! त्वं निष्किञ्चन इति सत्यमेव कुतः यतः किञ्चिदप्यनवाप्यं नास्ति यस्य तथाभूतस्त्वं निष्किञ्चन इत्यर्थः। दारिद्रतालक्षणनिष्किञ्चनत्वन्तु तव न घटत इत्याह—यस्मा इति। बलिभुजः बलिं पूजां भुञ्जन्त इति तथा अन्येभ्यः पूजार्हा अपि ब्रह्मादयो यस्मै तुभ्यं बलिं पूजां हरन्त्यर्पयन्ति कुर्वन्तीत्यर्थः। तस्य सर्वेश्वरस्य भवतो दरिद्रता न घटत इत्यर्थः। निष्किञ्चनजनप्रिया इत्यस्योत्तरं प्रेष्ठो भवानित्यादि। निष्किञ्चनजनप्रिया इत्यत्र बहुव्रीहितत्पुरुषान्यतरत् उभावपि वा सर्वथा चेदृश एव भवानित्याह—प्रेष्ठ इति। बलिधुजां पूजार्हाणां नारदादीनामकिञ्चनानामनन्यप्रयोजनानां प्रेष्ठो भवान् तथा तेऽपि बलिभुजोऽपि तुभ्यं तव प्रेष्ठाः तस्मात् प्रायेणेत्यस्योत्तरमाह—न त्वामिति। आढ्यतया अभिजनादिभिराढ्यत्वाभिमानेनान्धाः विवेकशून्याः अन्तकम् अन्तं करोतीति अन्तकस्तथाविधं त्वा त्वां न विदन्ति न भजन्ते असुतृपः असूनिन्द्रियाण्येव तर्पयन्तीति अन्तकमित्यस्य कालरूपेणायुर्हरन्तमित्याशयः॥ ३७॥ प्रेष्ठ इत्यत्र हेतुं वदन्ती ययोरात्मसमं वित्तमित्यादिनोक्तम् अनौचित्यं परिहरति—त्वं वा इति। समस्तपुरुषार्थस्वरूपः फलात्मा अभीप्सितफलरूपः आत्मा च यद्वा अभीष्टतपःफलरूपः सर्वेषामिष्टतमं हि फलं सुखं त्वन्तु निरवधिकानन्दरूपः चतुर्विधपुरुषार्थनिर्वाहकत्वस्वरूपस्य निरतिशयानन्दरूपस्य च तव सुखलेशसाधनभूतवित्तादिमद्भिस्साम्यं दूरापास्तमेवेति भावः। तर्हि निस्समत्वादेव मम त्वयाऽसमया सह विवाहोऽनुचित एव जात इत्यत आह यद्वाञ्छयेति। यस्मिन् त्वद्दास्ये वाञ्छया कृत्स्नं त्वद्दास्य व्यतिरिक्तं सर्वम्विसृजन्ति त्यजन्ति नेच्छन्तीति यावत् अतएव ते जनाः सुमतयस्तेषां तव च समाजः सङ्गतिरुचित एव न हि तारतम्येपि स्वभावतः शेषशेषिणो; सम्बन्धो नोचितः अतस्त्वद्दास्यमात्राकाङ्क्षिण्याः मम तव च सम्बन्धः सूचित एवेति भावः। सामान्येन तु सम्बन्धोऽनुचित इत्यभिप्रेत्याह—पुंस इति। रतयोर्मिथोरतयोरत एव तत्कृतसुखदुःखिनोः पुंसः स्त्रियाश्च न समाजो नोचित इत्यर्थः। यः केवलमैथुन्यतत्प्रयुक्तसुखदुःखानुभावार्थः समाज; सतु नोचितः यस्त्वावयोः शेषशेषिलक्षणः समाजः स उचित एवेति भावः॥ ३८॥ भिक्षुभिः श्लाघिता मुधेत्यस्योत्तरमाह—त्वमिति। भिक्षुपदव्याख्यानं न्यस्तदण्डैरिति भिक्षुभिः सर्वभूतसुहृत्त्वं प्रार्थयमानैर्न्यस्तदण्डैरित्यस्याप्ययमेवार्थः गदितः श्लाघितः प्रभावो यस्य तथाभूतः तत्र हेतुं वदन्ती मुधेत्यस्योत्तरमाह—आत्मेति। त्रिजगतामात्मा आत्मदः आत्मपर्य्यन्तप्रदः "यआत्मदा बलदा" इति श्रुतेः। आत्मत्वादात्मपर्य्यन्तवदान्यत्वाच्च गदित इत्यर्थः। आत्मद इत्यनेन मुक्तप्राप्यत्वं विवक्षितं नह्यात्मनः प्राप्यस्य च श्लाघा प्रयोजनान्तरापेक्षा किन्तु स्वसत्तालाभार्थाप्राप्यप्राप्त्यर्था चेति मुधैवेति सत्यमुक्तमित्यर्थः। आत्मनः शरीरादिविलक्षणतया स्तुतौ हि शरीरसत्तासिद्धिः अथ

वैदर्भ्येतदविज्ञाय त्वयादीर्थसमीक्षयेत्यस्योत्तरमाह— इतीति। इतीत्थम्भूतं भवन्तं ज्ञात्वेति शेषः। अब्जभवनाकपतीन् ब्रह्मेन्द्रादीन् भवतो भ्रुवः सकाशादुदीरितो यः कालस्तस्य वेगेन ध्वस्ताः आशिषो येषां तथाभूतान् हित्वा विहाय एवम्बिधत्वान्मम तेषां पुत्रस्थानीयत्वाच्च तद्गतवित्तादिप्रयुक्तसाम्यमविचार्य्यैवेति भावः। एवं हित्वेत्यनेनाविज्ञायेति व्याख्यातं मे मया त्वं वृतोसि अब्जयोन्यादय एवाविचार्य्याः कुतोन्ये चैद्यादयो विचार्य्याः स्युरित्यर्थः॥ ३९॥ पुनः सिंहावलोकितन्यायेन राजभ्यो बिभ्यत इत्यस्योत्तरं वक्तुमात्मानयनदृष्टान्तेन निर्भयत्वं स्थापयन्ती स्पष्टमबिभ्यत इत्येव प्रयोक्तव्ये संशयापादकेन राजभ्यो बिभ्यत इति पूर्वरूपात्मकसन्धिना प्रयुक्तं वचः शृण्वतां जाड्यावहमित्याह—जाड्यमिति। हे गदाग्रज यस्त्वं शाङ्र्गनिनदेन शत्रून् भूपान् विद्राव्य पलाययित्वा मां जहर्थ हृतवानसि तस्येदं वचोजाड्यं शृण्वतां सन्धिविशेषमजानतां त्वयि भयसम्भावनात्मके ज्ञानरूपजाड्यावहमित्यर्थः। हरणे दृष्टान्तः यथा सिंहः पशून् महिषादीन् विद्राव्य स्वभागं हरति तद्वदिति किं तद्वचो यज्जाड्यं तदाह—तेभ्य इत्यादि। तेभ्यः शत्रुभूतेभ्यो भयादुदधिं समुद्रं शरणं प्रपन्न इति यत्तत्॥ ४०॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

निष्किञ्चना वयमितीदं निबोधयतः किञ्चित्किञ्चिन्मात्रं नास्ति किन्तु सर्वमेवास्त्यतो भवान्निष्किञ्चन इत्युच्यते नत्वनाढ्यत्वं निष्किञ्चनत्वमित्याह—यस्मा इति। सर्वप्राणिदत्तबलिभुजोप्यजाद्या यस्मै बलिं हरन्ति स भवान्निष्किञ्चन इति विदुषां परिषदि न शोभत इति शेषः। तस्मात्प्रायेण नोह्याढ्या न भजन्तीत्यत्रावधारयामहे नत्वेति आढ्यातान्धाः ऐश्वर्यमदान्धाः त्वा त्वां न विदन्ति न जानन्ति न लभन्ते चेत्यन्वयः। दूरस्थत्वान्न विदन्तीति, नेत्याह—अन्तिकमिति "नेदिष्ठमन्तिकतमम्" इत्यमरः। अत्र हेतुरसुतृप इति स्वेन्द्रियपोषणपरत्वात् अन्तिकस्थत्वं स्पष्टयति बलिभुजामिति यस्त्वं बलिभुजां ब्रह्मादीनामप्यन्तरास्से तिष्ठसि किमुतेतरेषां नियन्तृत्वेनेतिशेषः। अत्र प्रमाणमाह—प्रेष्ठ इति। सतां प्रियतमः "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इत्यतो ज्ञानिदर्शिनं प्रमाणम् "कस्मै देवाय हविषा विधेम इमा रुद्राय स्थिरधन्वने गिरः" इत्यादिश्रुतिः॥३७॥ ययोरेव समं वित्तम् इत्याद्युक्तमनुवदति—त्वं वा इति। वैशब्दो हेत्वर्थः त्वं फलात्मासुखात्मा परमानन्दस्वरूपो वै यस्मात्तस्मात् समस्तपुरुषार्थमयोऽर्थ्यत इत्यर्थः। मयट् प्रत्ययः प्रधानार्थः सर्वस्मात् प्राधान्यस्वरूपः समस्तपुरुषैरर्थ्यमानस्वरूप इत्यर्थः। ये सुमतयः सम्यग्ज्ञानिनो यस्य तव वाञ्छया अनुग्रहेच्छया कृत्स्नं पुत्रमित्रवित्तादिसर्वं विसृजन्ति मुञ्चन्ति त्यक्तसर्वेषणा इत्यर्थः। अनेन प्रकृते किमागतमत्राह— तेषामिति। हे विभो तेषां सुमतीनां भवतश्च प्रसादः पूर्णसुखलक्षणो गुणः समुदितिः सम्यगुक्तः समानो वा नास्तीत्यस्य कोभिप्राय इत्यत उक्तं यश्चेति चोऽप्यर्थे यश्च कोपि नास्तीत्यर्थः। ननु युवयोः कोपि गुणः समो नास्ति किमत्राह—त्रय्याञ्चेति। त्रय्यां चशब्दात् स्मृतिष्वपि च तयोर्युवयोर्यश्च कोपि गुणोऽस्ति स क इत्यतो रतयोरित्यनेन सूचितः। "अग्निष्टोमेन स्वर्गकामो यजेत" इति वेदोक्तकर्मकर्तृत्वेन सुमतीनां त्रयीरतत्वं भवतो वेदप्रतिपाद्यत्वेन चेत्येवमाकारेण समत्वम् ननु जीवस्य चेतनत्वेन ज्ञानानन्दादिगुणोऽस्त्येवातः कथं समो गुणो नास्तीत्यत्राह—सुखदुःखिनोरिति। सुखदुःखिनोर्युवयोर्मध्ये केवलपरिपूर्णसुखो भवांस्ते सुमतयो भवज्ज्ञानपर्यन्तं दुःखिन इति। ननु पश्चात्समगुणत्वमापन्नं योवाऽऽनन्दाद्विमुक्तः ज्ञानानन्दी भवतीति श्रुतेरितीयमाशङ्का "अल्पसम्पूर्णशक्तित्वादल्प पूर्णसुखत्वतः" इति स्मृतिवचनेन परिहरणीया यद्वा ये सुमतयः कृत्स्नं विसृजन्ति तेषां भवतः पुंसां भवदीयपुरुषाणां यस्त्वं फलात्मा परमानन्दमोक्षरूपः समुदितिः सम्यगुक्तः त्रय्यां त्रिवेदविहितमार्गे वर्तमानयोः सुखदुःखिनोः धर्माधर्मानुष्ठानेन तत्तत्फलभुजोर्विहितप्रतिषिद्धकर्त्रोर्यस्त्वं फलात्मा न समुदितः स त्वं मे वृतोसीत्यन्वयः॥ ३८॥ भिक्षुभिः श्लाघिता मुधेत्यस्योत्तरं शृणु—त्वमिति। न्यस्तो वाङ्मनःकायलक्षणो दण्डो यैस्ते न्यस्तदण्डाः तैर्मुनिभिः वाचंयमैः निर्जितेन्द्रियग्रामैः यतिभिरित्यर्थः। गदितानुभावः स्पष्टीकृतप्रभावस्त्वम् अदीर्घसमीक्षयेति यदुक्तं तत्राह—आत्मेति। जगतामात्मा स्वामी भजतामात्मदः सायुज्यमुक्तिप्रदश्चेति। दीर्घसमीक्षया निश्चित्य मे मया त्वमभिहितः वृतोसि "हिर्हेताववधारणे" इतियादवः। भवतः भवज्ज्यायमानमुदीरितमुदीरणं प्रेरणं यस्य स भवद्भ्रुवदुदीरितः स चासौ कालः भवद्भ्रुवदुदीरितकालः तस्य गन्धेन ध्वस्ताशिषः निरस्तसम्पदः अद्भ्यो जातोऽब्जः ब्रह्मा "सोद्भ्य एव पुरुषं समुद्धृत्यामूर्च्छयत्" इति श्रुतेः। भवो रुद्रः नाकपतिरिन्द्रः एतान् मुक्त्वा अन्यांश्चैद्यादीन् मुक्त्वेति कुतः? किमु वक्तव्यमित्यर्थः। एषामदीर्घसमीक्षया वृतोसीत्यर्थः॥ ३९॥ राजभ्यो बिभ्यत इत्येतत्प्रकारान्तरेणाक्षिपति—सत्यमिति। हे गदाग्रज! चशब्द एवार्थे यस्त्वमेव शाङ्र्गनिनदेन भूपान् विद्राव्य मां जहर्थ हृतवानसि कथमिव यथा सिंहः स्वभागं पशुलक्षणं स्वबलिं स्वस्य भरणे योग्यं हरति तथा तेभ्यो राजभ्यो भयाद्यदुदधिं शरणं प्रपन्न इति यत्तत् तव वचः सत्यं साधुभावं त्यजतीति अस्मद्व्यामोहनार्थमुक्तमिति भावः॥ ४०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

निष्किञ्चन इति निरिति निषेधे नु निश्चितं भवान् निष्किञ्चनः तर्हि कथं मदुक्तमङ्गीचकर्थैव सत्यं तत्तु न दरिद्रत्वलक्षणेनार्थेन। किन्त्वनेनैवेत्याह—नेति। अतएव यस्मा इत्यादि येतु त्वां न विदन्ति ते खल्वाढ्यतान्धाः असुतृपश्च येतु त्वां

विदन्ति ते खल्वतिश्रेष्ठा इत्याह—प्रेष्ठ इति । एतद्योजनापेक्षयैव तदुक्तातिक्रमेणोत्तरं । आस्थिता इत्यादेस्तूत्तरं संरम्भयोग्यत्वात् तत्प्रसङ्गे देयम् ॥ ३७–४१ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु (१४ श० श्लो०) "निष्किञ्चना वयं शश्वन्निष्किञ्चनजनप्रियाः" इति यदुक्तम् तदपि सत्यमेवेत्याह—निष्किञ्चन इत्यादि । ननु भो भगवन् ! भवान् निष्किञ्चन एव कुतः ? इत्याह—न यतोऽस्ति किञ्चित्, न विद्यते किञ्चन यस्मादिति पञ्चम्यन्तपदार्थेन, सत्यमेव तदित्यर्थः । ननु ब्रह्मादयो यद्भिन्नाः पृथगीशा वर्तन्ते, तत् कथमयमर्थः समर्थ्यतामित्याशङ्क्याह—यस्मै बलिमित्यादि । बलिभुजो ब्रह्मादयो यस्मै तुभ्यं बलिं हरन्ति अतोऽसुतृपो विषयिणस्त्वां न विदन्ति । कीदृशं त्वाम् ? अन्तकं कालाख्यशक्त्या सर्वसंहारकम् । ते कीदृशाः ? आत्मतयैश्वर्येणान्धाः । न केवलं तेषामेवान्तकम्, अपि तु बलिभुजां ब्रह्मादीनामपि, न केवलमसुतृप एवाढ्यतान्धास्तेऽपि बलिभुजोऽपीत्यर्थः । अतस्त्वं प्रेष्ठः प्रियतमः सर्वेषां प्रेष्ठः । अत एव निष्किञ्चनोऽसीति यत्तत् सत्यमेवेति वाक्यार्थः ॥ ३७ ॥ (१५ श० श्लो०) "ययोरेव समं वित्तं ययोरेव समं बलम्" इत्यादि यदुक्तम्, तदपि सत्यमेवेत्याह—तं वै समस्तेत्यादि । त्वं समस्तपुरुषार्थमयः फलात्मा फलस्वरूपः, सर्वपुरुषार्थं सर्वलोकार्थं सर्वलोकनिमित्तमित्यर्थः । अयः शुभावहो विधिः सर्वलोकशुभादृष्टम्, यस्त्वां भजते, स एव तव योग्य इत्यर्थः । तेनाहं त्वत्कामत्वेन त्वद्योग्यैव । अतो मम त्वया सह समत्वमस्त्येवेति फलात्मतां दर्शयति—यद् वाञ्छया सुमतयो विसृजन्ति कृत्स्नम् । फलार्थं हि सर्वं एव यतन्ते । हे विभो ! तेषां समाजो गोष्ठी भवतः समुचित एव । तेनाहमपि भवदर्थं सर्वमसृजम्, मया सह गोष्ठी तव समुचितैवेति पुंसः स्त्रियाश्चान्योन्यं रतयोर्गोष्ठी न समुचिता । त्वया सह यदि पुंसो वा स्त्रियो वा गोष्ठी भवति तदा समुचितैव । सान्द्रानन्दस्वरूपेण भवता सह सङ्गतः पुरुषः स्त्री वा त्वत्समत्वमेव लभते, न त्वन्योन्यं तयोः । कुतः ? इत्याह—सुखदुःखिनोः, कदाचित् सुखिनोः, कदाचिद् दुःखिनोः नित्यसुखे त्वयि सङ्गतस्तु पुरुषः स्त्री वा नित्यसुखित्वमेव लभते । अथवा सुखेऽपि कामसुखेऽपि दुःखिनोः,—(भा० ११।१९।४१) "दुःखं कामसुखापेक्षा" इत्युक्तेः ॥ ३८ ॥ (१६ श० श्लो०) "वैदर्भ्येतदविज्ञाय" इति यदुक्तम् तदपि सत्यमेव । एतद्भवदुक्तं विपरीतं (१२ श० श्लो०) "राजभ्यो बिभ्यतः" इत्यादिकमविज्ञाय वस्तुत्वाभावात् सर्वमिदमविज्ञायैवेत्याह—त्वं न्यस्तदण्डमुनिभिरित्यादि । न्यस्तदण्डैरात्मारामैर्मुनिभिर्गदितानुभावः, आत्मा श्रीविग्रहः आत्मदः सर्वेषां प्राणद आत्मशोधको वा, 'दैप शोधने' इति कृत्वा मे मया वृतोऽसि । अत एतदविज्ञायैवेति तवोक्तिः सत्या । किं कृत्वा वृतोऽसि ? इत्याह—हित्वेत्यादि । भवनाकपतयोऽपि भवद्भ्रूभङ्गकालध्वस्ताधिकाराः किमुतान्ये नाकयति—शब्दोऽत्र ब्रह्मादिपरः ॥ ३९ ॥ (१२ श० श्लो०) "राजभ्यो विभ्यतः सुभ्रु ! समुद्रं शरण गतान्" इति भगवदुक्तं पुनः स्मृत्वा सत्यत्वेन स्ववैदग्ध्या प्रथमं प्रतिपादितमपि पुनरत्यन्तासम्भाव्यत्वेन प्रत्यक्षबाधितं मत्वा सक्रोधोपहासमाह—जाड्यं वचेत्यादि । हे गदाग्रज ! तव वचोजाड्यं वचसो जाड्यमित्यर्थः । अथवा, हे गदाग्रज ! तव जाड्यमिदम् । किं तत् ? तेभ्यो भयादुदधिं शरणं प्रपन्न इति वचः । क्रुद्धोक्तौ न्यूनपदत्वं गुणः । कुतो जाड्यमिदं वचो न सत्यम् ? नैवेत्याह—यस्त्वित्यादि । यस्त्वं भूपान् विद्राव्य शार्ङ्गनिनदेनैव, न तु युद्धकौशलेन मां जहर्थ । क इव ? इत्याह—सिंहो यथेत्यादि । तस्मात्तवैतज्जाड्यमेव पूर्वं पूर्वं धैर्यभावेनैव सर्वं भगवद्वचनमन्यथयित्वा सत्यत्वेन प्रतिपाद्य सम्प्रत्यमर्षभावेन तदेवान्यथयतीति ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निष्किञ्चना वयं शश्वदिति यदुक्तं तत्राह—निष्किञ्चन इति । निरिति निषेधे नास्त्यधिकं किमपि वस्तु यस्मात् स निष्किञ्चनस्त्वं यद्वा सर्वविभक्तिकस्तसिः न विद्यते किञ्चन ऐश्वर्यमाधुर्ययशोबलज्ञानवैराग्यादिकं किन्तु सर्वांशित्वात् सम्पूर्णमेव यस्य सः दरिद्रत्वान्न विद्यते किञ्चनापि यस्य स इत्यर्थस्तु त्वयि न घटत इत्याह—यस्मा इति । तस्मात् प्रायेण न ह्याढ्या मां भजन्तीति यदुक्तं तत्राह—नेति । आढ्यतया अन्धाः अत एवासुतृपः स्वप्राणतर्पका बहिर्मुखास्त्वामन्तकं दण्डकर्त्तारं नैव विदन्ति कुतो भजिष्यन्तीत्यर्थः । निष्किञ्चनजनप्रिया इति यदुक्तं तत्र तत्पुरुषसमासमाश्रित्य कैमुत्येनाह—प्रेष्ठ इति । भवान् बलिभुजामपि सकामानामपि ब्रह्मादीनां प्रेष्ठः किमुत निष्किञ्चनानां निष्कामभक्तानां प्रेष्ठ इति, बहुव्रीहिमाश्रित्याह, तेपि सकामभक्ता अपि तुभ्यं तव प्रियाः किमुत निष्कामभक्ताः निष्किञ्चनजनाः न येषां भजनादन्यच्चिकीर्षितमभीप्सितं जिज्ञासितञ्च किञ्चित्तेज्ञेया । निष्किञ्चना बुधैरिति पौराणिकोक्तेर्भक्तवाचित्वे निष्किञ्चनशब्दो व्याख्यातः ॥ ३७ ॥ ययोरेव समं वित्तमित्यादि यदुक्तं तत्तु त्वत्तोऽन्यत्रैव नतु त्वयि सम्भवेदित्याह—त्वमिति । फलात्मा फलस्वरूपः समाजः सेव्यसेवकलक्षणसम्बन्धः सतु नारायणलक्ष्म्योरपि त्वदस्मदाद्योरपि प्राकृतस्य पुंसः नतु स्त्रियाश्च मिथो रतयोः ॥ ३८ ॥ भिक्षुभिः श्लाघिता मुधेति यदुक्तं तत्र भिक्षुशब्दार्थं व्याचक्षाणा भिक्षुश्लाघैव सर्वोत्कर्ष इत्याह—त्वमिति । न्यस्तदण्डेति त एव भिक्षव उच्यन्त इतिभावः । गदितानुभावः श्लाघितप्रभावः आत्मा परमात्मेति यदर्थं सर्वं प्रियं जातं तेषामात्मनामप्यात्मनस्तव श्लाघा न मुधेत्यतो मुधेति त्वदुक्तिरेव मुधेतिभावः । जगतामात्मद इति जगद्वर्त्तिजनेभ्योपि भजद्भ्यस्त्वमा-

त्मानमपि ददासीति ज्ञात्वैव मे मया त्वं वृतोसि तदपि यदुक्तं त्वया वैदर्भ्येतदविज्ञायेति तन्ममेदं विचक्षणं ज्ञानमज्ञात्वैवेति भावः। भवतो भ्रुवः सकाशादुदीरितो यः कालस्तस्य वेगेन ध्वस्ता आशिषो येषां तान् ब्रह्मादीनपि विहाय त्वं वृतोसि कुतोऽन्ये वराकास्तदपि यदुक्तं त्वया अदीर्घसमीक्षयेति तन्मम दीर्घसमीक्षामप्यविज्ञायैवोक्तमिति भावः ॥ ३९ ॥ तदेवमकस्मान्मानाख्यस्थायिभावोदयवती स्वज्ञानसमीक्षयोरज्ञानं तस्मिन्नेव व्यञ्जनया वृत्या उक्त्वापि पुनः पुरुषान्तरगुणवर्णनप्रदीप्तकोपेनाभिधयापि तस्मिन्नज्ञानं ससंरम्भभ्रुकुटिकुटिलकटाक्षं स्पष्टयन्त्येवाह—जाड्यमिति। जाड्यमयमित्यर्थः। यस्तु त्वं भूपान् विद्राव्य स्वभागं मां श्रियं जहर्थ तेभ्यो भयादुदधिं शरणं प्रपन्नस्त्वमिति यत्तव वचो भाषणं तत्तव जाड्यम् अज्ञानज्ञापकमित्यर्थः। ननु च पूर्वमकोपनया त्वया "सत्यम्भयादिव गुणेभ्य उरुक्रमान्तः शेते समुद्र" इत्येनन तद्वचः सम्यगेव समाहितमिति चेत्सत्यं तन्ममापि जाड्यमिति ज्ञेयम् ॥ ४० ॥

गूढार्थदीपिनी

निर्निषेधे। नास्ति किञ्चन दुर्लभं वस्तु यस्य यस्माद्वा स निष्किञ्चनो न तु दरिद्रः। यतोऽन्यत् किञ्चन् नास्ति यस्मै तुभ्यं बलिभुजः पूज्या अपि अजाद्याः बलिं हरन्ति पूजां समर्पयन्ति। बलिभुजां ब्रह्मादीनां त्वं प्रेष्ठः ते च तुभ्यं तव प्रेष्ठा प्रियतमा अतोऽन्ये आढ्यतया अन्धा एव अन्तकं त्वां न विदन्ति केवलमसूनेव तर्पयन्ति ते मूढा एव ॥ ३७ ॥ वै एवार्थे। पुरुषार्था धर्मादयः स्वरूपमस्येति। स्वरूपे मयट्। फलात्मा फलदाता च यत् यस्य तव प्राप्तीच्छया सुमतयः कृत्स्नं मोक्षादिकमपि त्यजन्ति। तेषां सुमतीनाम् भवत्समाजः सेव्यसेवकलक्षण एव न तु स्त्रीपुंसयोः समाजः समुचित उपयुक्तः। रतयोः अनुरक्तयोः। अत एव सुखेति ॥ ३८ ॥ न्यस्तस्त्यक्तः। अनुभावः प्रभावः। जगतामात्मा। आत्मदश्च इति हेतोः मे मया त्वम् वृतोऽसि। अब्जो भवो ब्रह्मा तदादीन् हित्वा। कथंभूतान्। भवतो भ्रुवः सकाशात् प्रेरितो यः कालवेगस्तेन ध्वस्ता आशिषो भोगा येषान्तान्। नाकपतय इन्द्रादयः। अन्ये तुच्छा चैद्यादयः कुतः ॥ ३९ ॥ पशून् विद्राव्य यथा सिंहः स्वबलिं हरति एवं भूपान् विद्राव्य स्वभागं मां त्वं जहर्थ हृतवानसि अतो भयादुदधिं प्रपन्न इति यद्वचस्तज्जाड्यमनुचितमिवेति ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

निष्किञ्चना वयमिति यदुक्तं तदपि सत्यमेवेत्याह–निष्किञ्चन इति। ननु, निश्चितं यतः यस्य किञ्चित् अल्पं जीवविषयं कर्मजन्यं प्राकृतं देहादिकं नास्ति स भवान् निष्किञ्चन एव दरिद्रतालक्षणं निष्किञ्चनत्वन्तु तव नोपपद्यते इत्याह यस्मायिति। अजाद्याः ब्रह्मादय; अन्यतो बलिभुजोपि यस्मै बलिं हरन्ति स भवान् इति योज्यम् निष्किञ्चनजनप्रिया इति यदुक्तं तदपि युक्तमेवेत्याह–प्रेष्ठोभवानिति। बलिभुजां परदत्तान्नभुजामगृहानां मुनीनां भवान् प्रेष्ठः ते तुभ्यं प्रेष्ठाः अतः निष्किञ्चनजनानां प्रियास्तेवा प्रिया येषामिति निष्किञ्चनजनप्रिया वयमिति त्वदुक्तिः उपपन्नेत्यर्थः ॥ ३७ ॥ ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः। तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित्। इति यदुक्तं तत् अन्यस्त्रीपुरुषविषयं त्वयि तु निरतिशयोत्कृष्टे निकृष्टा एव शिष्टा दास्यं कुर्वन्ति तद्वदहमपि भार्याभावेन त्वामेव भजामीत्याशयेनाह—त्वमिति। हे विभो! व्यापक! त्वद्वैभवापेक्षया सर्वे पदार्थाः परिच्छिन्ना इति सम्बोधनाभिप्रायः वै निश्चितं समस्ताः सम्पूर्णाः पुरुषार्था येभ्यस्ते तथा सर्वपुरुषार्थोपायास्तन्मयः समस्तपुरुषार्थोपायरूपः फलात्मा फलरूपः पुरुषार्थः रूपः उपेय इत्यर्थः। यद्वाञ्छया यद्वास्येच्छया शोभना त्वन्निरतिशयोत्कर्षधारणवाती मतिर्येषां ते कृत्स्नं त्वत्तो निकृष्टं विसृजन्ति "भूमात्वेव विजिज्ञासितव्यः" इत्यादि श्रुतेः। तेषामेव निकृष्टानां भवतो निरतिशयोत्कृष्टस्य समाजः सेव्यसेवकलक्षणसम्बन्धः सम्यगुचितः अन्येषान्तु वित्तादिसमत्वेन परस्परं समाजो युक्तः न भवतः समाज इत्याह–पुंसःस्त्रियाश्च मिथो वित्तादिसमत्वेन रतयोर्न भवतः समाजः समुचितः अत एव दुःखितयोरित्युक्तम् ॥ ३८ ॥ भिक्षुभिःश्लाघिता मुधेति यदुक्तं तत्रोत्तरमाह-त्वमिति। भिक्षवो मुनयः "ऋषिर्यतिर्मुनिर्भिक्षुस्तापसः संयतो यमी" इति कोशात् न्यस्तदण्डाः अभयदाः प्रजापीडावारणार्थं भिक्षयैव कालक्षेपं कुर्वन्ति अतस्ते भिक्षव इत्यर्थः। तेच मुनयः न्यस्तदण्डमुनयः तैर्गदितानुभावः श्लाघितप्रभावः। मुधेत्यस्योत्तरमाह–आत्मेति। जगतां सर्वेषामात्मनामात्मा नहि आत्मनामप्यात्मनः श्लाघा मुधा भवतीति भावः। प्रयोजनमाह–आत्मदः श्लाघाकर्तृणामात्मपर्यन्तफलद इत्यर्थः "य आत्मदा बलदा" इति श्रुतेः। वैदर्भ्येतदविज्ञाय त्वयाऽदीर्घसमीक्षयेति यदुक्तं तदुत्तरमाह—इतीति। इतीत्थं ज्ञात्वैव मे मया वृतोसीत्येतदविज्ञायेत्यस्योत्तरम् अदीर्घसमीक्षयेत्यस्योत्तरमाह—हित्वेति। भवतो भ्रुवः सकाशात् उदीरितो यः कालस्तद्वेगेन ध्वस्ता आशिषो येषां तान् ब्रह्मादीनपि हित्वा कुतोऽन्ये केऽन्ये इत्यर्थः। सर्वपरित्यागपूर्वकत्वदभिनिवेषेण मत्समीक्षाया अदीर्घत्वमिति भावः ॥ ३९ ॥ राजभ्यो बिभ्यतः इत्यत्र सिंहावलोकनन्यायेन पुनः किञ्चिदुत्तरमाह—जाड्यमिति। हे गदाग्रज! सिंहो यथा पशून् विद्राव्यं स्वभागं हरति तद्वच्छार्ङ्गनिनादेनैव भूपान् जरासन्धादीन् विद्राव्य स्वभागं मां यस्त्वं जहर्थ हृतवानसि तस्य तव राजभ्यो बिभ्यत इति वचोभाषणं जाड्यं भवति श्रोतॄणां जाड्यपादकं भवति अबिभ्यत इति स्पष्टप्रयोगादर्शनात् ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

निष्किञ्चनो ननु भवान्न यतोऽस्ति किञ्चिदिति श्लोको हरेः सर्वराहित्यमुच्यत इति भ्रमभ्रंशं किञ्चिदध्याहृत्य योजयंस्तनोति ॥ यतः किञ्चिन्मात्रमिति । किञ्चिन्मात्रं यतो नास्तीत्युक्तलभ्यार्थं दर्शयति ॥ किन्तु सर्वमेवास्तीति । मात्रेति किञ्चिदित्यतःपरं योज्यमित्युक्तं भवति ॥ ततश्चायं मूलार्थः । यतो यस्मात्किञ्चित्किञ्चिदेव नास्त्यतो निष्किञ्चनः । नितरां किञ्चन सर्वं यस्य स इति निष्किञ्चनपदार्थो ज्ञेयः । बहुकिञ्चनातिरिक्तस्य सर्वस्य दुर्निरूपत्वात् । आढ्या न भजन्तीति यदुक्तं तत्र केचिच्चिदाढ्याः केचिन्मदाढ्याः इति द्विविधास्तत्र चिदाढ्या इम एवं कुर्वन्तीत्याह ॥ यस्मा इति । यस्मै स्वयं बलिभुज इतरवितरितवलिभुजोऽजाद्या अपि बलिं हरन्ति सपर्यां कुर्वन्तीति यावत् । ये केचनाढ्यतया मदाढ्यतयाऽन्धा असुतृपाः स्वप्राणमात्रतर्पकास्त्वां न विन्दन्ति न जानन्ति पूजा तु दूरोत्सारितेति भावः । दूरे सत्त्वान्न विन्दन्तीति नेत्याह । अन्तिकम् । नेदिष्टमन्तिकमित्यमरः । समीपवर्तिनमपि । कथं समीपवर्तता कीर्तितेत्यतः कीर्तयति ॥ सतां प्रेष्ठेति । प्रियो यस्त्वं बलिभुजां शुनां तदादिनिकृष्टयोनिजानामप्यन्तः । आस्ते सतामन्तरा स्म इति किं वक्तव्यमित्यर्थः । शुनि चैव श्वपाके च पण्डिताः समदर्शिन इत्याद्यन्यथा युक्तं स्यादिति मन्तव्यम् । अन्तरा आस्स इति वा । कैमुत्यघटकमाह ॥ प्रेष्ठ इति । सतां प्रेष्ठः । प्रियो हि ज्ञानिनोऽत्यर्थमहमित्युक्तेः । तेऽजाद्या विन्दन्ति प्रागनन्तरं नत्वा बलिं हरन्तीत्यप्यर्थः । बलिभुक् शुनि वायस इति रत्नकोशः । वायसादीनां वा ॥ ४१ ॥ त्वं वै समस्तपुरुषार्थमयः फलात्मेति श्लोके सर्वपुरुषार्थमयफलात्मपदयोर्भेदो मयटश्च कोऽर्थः । उत्तरार्धेनान्वयः सम्यक् प्रतीयते । चशब्दः किमर्थः किमर्थश्च यच्छब्द इत्यतः समस्तं यथावद्व्याकृत्य तत्र मानं चोदाहरति ॥ फलात्मा सुखात्मेति । फलं तत्प्राप्यफलाभावात्फलपदेन सुखं ग्राह्यम् । तदेवात्मा स्वरूपं यस्य सः । अत एवेति फलात्मकत्वादेव पुरुषार्थमय इति पुरुषार्थमयत्वे हेतूक्तिरिति सूचयति । पुरुषैरधिकारिभिरर्थ्यत इति पुरुषार्थः स एव तन्मयः । एतेन मयटस्तादात्म्यमर्थ इति दर्शयति । सुमतिकोटिरे भगवानेक इति युवयोरित्युक्तिरित्यभिप्रेत्य तेषां सुमतीनां भवतश्चेत्युक्तिः । समुदित इत्यस्य समुदायसहित इति सम्यगुदित इत्याद्यर्थप्रतीतिः स्यात्स चात्र नातिक्लिष्ट इत्यनूद्य व्याचष्टे ॥ समुदितैः समा इति । प्रसादो नामेच्छाविशेषो वा गुणान्तरं वा न नः काचित्क्षतिरित्युक्तेः सर्वेषां गुणानां तादात्म्याद्गुणमात्राभिधायक इत्यभिप्रेत्याह ॥ गुण इति । यच्छब्दो यतश्चोदेति सूर्य इत्यादिवर्तिकशब्दार्थ इति स्वयमनूद्य चशब्दोऽप्यर्थ इति तेन संयोज्य व्याकरोति । यश्च कोऽपि त्रय्यां रतयोरिति हरितदितरयोर्विधिबद्धतादिसाम्यं प्रतीयत इत्यतो रतशब्दस्य कोटिद्वययोग्यमर्थं तदनूद्य दर्शयति ॥ त्रय्यां रतेभ्योरिति । त्रय्यां वेदे रतास्तदुक्तेः कर्मकर्तृत्वेन सुमतयः । भगवतस्तु तत्प्रतिपाद्यत्वेन तद्गतत्वमिति विवेकः । सुखदुःखिनोरित्युभयोरुभयप्रसक्तिः प्रसक्तिश्च क्रामिकेऽर्थे तेषां सुमतीनां सुखसामान्याभावश्चेत्यतः स्वयमनूद्य व्याकरोति ॥ सुखदुःखिनोरिति । सुखं च दुःखं च ते स्तोऽनयोरिति सुखदुःखिनौ तयोरित्यर्थः । प्राशस्त्यं तच्च केवलं परिपूर्णत्वरूपं तद्वान्भवानभवत् । ज्ञानपर्यन्तं तदुदयावधिदुःखिनस्ते सुमतयः । अनन्तरमभवन्नित्यवदन्वदंश्च भवानभवदिति तत्सुखं न स्वातन्त्र्येण तेषामिति ध्वनयामास । दुर्दुःखमिति सम्प्रोक्तं खं सुखं प्रोच्यते बुधैरिति स्नेनैवान्यत्रोक्तेर्दुर्दुःखेन सहितं च तत्खं चेति विग्रह एतदपार्थप्रतीतिवारणसम्भवेन पराक्रमणीयमत्राचार्यैरिति चेत्सत्यम् । मुक्तावपि दुःसाहितीभायात्स्वस्य न भातव्यं तयेत्येवं वचनीयत्वात् । अत एव सुखिनोरन्तरमित्यनुक्तिरिवोक्तिर्मानेऽल्पसुखत्वत इत्यस्येति ज्ञेयम् । अल्पशक्तिसम्पूर्णत्वात् तथाऽल्पपूर्णसुखत्वतोऽल्पसम्पूर्णदर्शितत्वात् अल्पदर्शी च सम्पूर्णदर्शी च तयोर्भावस्तत्त्वम् । जीवः कृष्णश्च तयोः साम्यं न । सुमतिपदं तथा सुखपदं च जीवसामान्यपरं सम्पूर्णशक्त्याद्युपलक्षकमल्पशक्त्याद्युपलक्षकं चेति ज्ञेयम् । स्मृतिष्वपीति स्मृतिसमुच्चायकश्चशब्द इत्यर्थः ॥ अथ मूलार्थः ॥ भूमंस्तवेहितमथोऽनुभवन्तीति ययोरेव समं वित्तमिति किञ्चिदुत्तरितप्रायमिदानीं स्पष्टं न समस्तवास्तीति बोधयति ॥ त्व वेति । फलात्मा सुखं हि फलं तदेवात्मा स्वरूपं यस्य सः । अत एव समस्तैः पुरुषैरर्थ्यत इति पुरुषार्थः स एवेति तन्मयः पुरुषार्थरूप इति यावत् । यस्य तव वाञ्छया प्रसादमाकाङ्क्षन्तः सुमतयः सुसमीचीना मतिर्येषां ते कृत्स्नं पुत्रमित्रादिकं विसृजन्ति त्यजन्ति निर्गतेषणा भवन्तीत्यर्थः । दारान्सुतान्प्रियान्प्राणान्परस्मै सन्निवेदयेदित्यादेरभिमानत्यागेन त्वय्येवार्पयन्तीति वा । हे विभो तेषां तदादिजीवसङ्घस्य भवतश्चेति युवयोः सुखदुःखिनोः प्रसादो गुणः समुदितः समो यश्च कोऽपि नास्ति । तयोर्विवाह इत्यादिकं न मत इति भावः । सुखदुःखिनोरिति वदन्मूलकृद्रतशब्दस्यार्थद्वयं कटाक्षयामास । तदेव व्यञ्जयामासुराचार्या इति नोन्मूलत्वशङ्कापीडेति ज्ञेयम् । सुखी केवलपरिपूर्णसुखवान् अथवा सुखं तदात्मकमिति सुखं च दुःखी ज्ञानोदयपर्यन्तं दुःखी तयोः ॥ ४२ ॥ त्वन्न्यस्तदण्डमुनिभिरिति पद्येऽब्जभवो ब्रह्मा चाद्रुदः कुतो न गृहीतोऽनुगृहीतश्च तदधम इन्द्रो बहुवचनं चानुपपन्नमित्यतोऽब्जपदमनूद्य तदर्थमुक्त्वा भवपदेन तद्ग्रह इति समाधत्ते ॥ अब्जो ब्रह्मेति । अब्जजः कथमब्ज इत्यतस्तेभ्योऽप्येकदोत्पन्नत्वाद्धातुरित्यर्थप्रतिपादकं मानमुदाहरति । सोऽद्भ्य एव पुरुषं समूद्धृत्यामूर्छयदिति श्रुतेरिति । सः परमात्माऽद्भ्यस्तदादिभूतेभ्यस्तदंशानिति शेषः । उद्धृत्य पुरुषममूर्छयत्साकारमकरोत् । पुरुषोऽत्र कुतो धाता यः कश्चिन्मानवः किन्न स्यादित्यतः स्पष्टां श्रुतिमाह ॥ अद्भ्यः सम्भूतो हिरण्यगर्भ इत्यष्टाविति चेति । अद्भ्योऽवादिभ्यः सम्भूतो जातो हिरण्यगर्भ इति । अम्भस्य पारे भुवनस्य मध्य इत्याद्यावेदितगुणत्वेनाष्टौ तुष्टाव हरिमिति शेषः । ष्टु

स्तुताविल्यस्य लङि छान्दसं रूपम् । अष्टौ लोकपाला इति । ननु यदि पुरुषशब्दो निर्णीतार्थ इति तन्निर्णयार्थमद्भ्यः सम्भूतो हिरण्यगर्भ इत्यष्टाविति श्रुतिरुदाहृता हन्त तर्हि चशब्दो व्यर्थः । अतत्समाख्यारूपत्वादिति चेन्न । मुख्यवक्तव्यस्याद्भ्य इत्यंशस्य सत्त्वेन समाख्यात्वोपपत्तेश्चशब्दः सम्भवीयदष्टावित्याद्यधिकाभिधानं तत्पूर्वं श्रुतिवर्णरूपमिति विवेकसम्भवात् ॥ ततश्चायं मूलार्थः ॥ भिक्षुभिः श्लाघिता मुधेति तदुत्तरयति ॥ त्वमिति । न्यस्तो दण्डः कायवाङ्मनसम्भवो हस्तादिना शिक्षणं वाचा निष्ठुरगोष्ठी मनसाऽहितचिन्तनमित्येवंरूपस्त्यक्तो यैस्ते तैर्मुनिभिर्गदितोऽनुभावो यस्य सः । आत्मा मत्स्वामी सर्वस्वामी चात्मदः सायुज्ययोजकद इति तद्दः स्वरूपशरीरद इति वा जगतामविशेषेण सतामिति हेतोर्मे मया वृतोऽसि । इदानीमेव वृत इति नेत्याह ॥ मुक्त्वेति । भवतो भवज्जायमानं यदुदीरितं प्रेरणं यस्य स चासौ कालस्तस्य गन्धो लेशस्तेन ध्वस्ता आशिष एषां तान् । अद्भ्यो जायत इत्यब्जो ब्रह्मा भवो रुद्रो नाकपतिरिन्द्र एतान्मुक्त्वा प्राग्वृतोऽसि । इदानीमन्यान्मुक्त्वा वृतोऽसीति कुतो वाच्यम् । अदीर्घसमीक्षयेत्यज न त्वदुक्तोऽर्थः । अपि तु न विद्यते दीर्घो बहुलः कालो येषामिति तेऽदीर्घास्तत्सम्पदश्चाशाश्वतिका इति समीक्षया मया वृतोऽसीति तदर्थः । क्वचिच्चिरायुरित्यादिनाऽष्टमे स्पष्टमुक्तेः । एष ब्रह्मेत्यादेः । हित्वा चैद्यानित्युत्तरितमत्रेति न क्रम इत्यनुसन्धेयम् । न्यस्तो हस्तविन्यस्तो दण्डो येषामिति तैर्मुनिभिरन्यैर्गृहस्थैस्तपोनिरतैरिति मुधापेक्षां विनेत्यर्थः । निष्कामैरिति यावदिति । पूर्वं न सर्वेशेन कटाक्षिता हनुकर्मत्वे तु न चतुराननादय इत्यर्थिन इति तांश्चैद्यादीनिति वदता किञ्च देववृषोपमानिति गदता च ज्ञायतेऽस्मद्व्याख्यानमेवैतत्सख्यं भजते । अन्यथोक्तेप्सितार्थिन इत्यादिना ते प्रत्यवेयुरिति भावः । भगवदुदीरितकालवेगः कुतोऽन्य इति पाठं मन्ये सुन्दरम् । भवतो भ्रुवः सकाशादुदीरित एतदादिकार्योन्मुखीकृतो यः कालस्तस्य वेगो येषां तेऽन्ये शिशुपालादयः कुतो न त्याज्या इति तदर्थः । आत्मानं जीवजातत्यात्मदः स्वभावाविर्भावक इति वा ॥ ४३ ॥ समुद्रं शरणं गतानिति प्राक् प्रकारान्तरेणार्धाङ्गीकारेण परिहृत्य त्वदुक्तार्थकतायां न शुभं भवति भगवन्निति तदशोभानिमित्तमुपन्यस्त काक्वोपहासमुखेन प्रतिषेध्यति ॥ सत्यमिति । हे गदाग्रज ईश । यश्च त्वं भूपांश्चैद्यादीन् शार्ङ्गनिनदेन तद्ध्वनिना ध्वनिं विद्राव्य । अनेन सुनायासः सूच्यते । यथा सिंहः स्वबलिं पशुं शशगोमायवद्यावृतं तान्विद्राव्य स्वलक्षितमिति हरति तया स्वमा त्वदुद्देश्येन प्रभा भा यस्याः सा या ताम् । यत्राच्छलेन विभवेऽर्पयन्ती स्वशोभामित्युक्तेः । जहर्थ हृतवान् स त्वं तेभ्यो भयाद्धेतोरुदधिमगं गोमन्तं च शरणं प्रपन्न इति यत्तव वचः सत्यम् । काकुः । न सत्यमित्यर्थः । क्वचिद्गदयाऽग्रे त्यागात्पूर्वमेव जयो यस्य सः इति चार्थः । गदान्मदलाभहेतुकाद्रोगादेवाग्रे जयो येन स इति वा । गदाद्रोगोऽग्रे जायत इति स तथा तत्सम्बुद्धिः । तदपेक्षया प्राग्जातस्य न तद्बाधेति नीरोगतेति वा । अस्वबलि पत्परिवर्तनेन स्पर्शेनेति यावत् । शून्यं स्वभागं पशुं यथेत्यन्वयो वा । समुद्रमितीदं मुद्रणेन हरिणेरितेऽपि यदुदधिमित्याह तेनोदा निधीयन्तेऽस्मिन्निति योगेन प्रवर्षणाख्यश्रृङ्गोपेततागस्य द्योतयामास । भयादिति सङ्गत्या गोपीगृहीत इति नानुवतोवितदोषश्च ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदप्यभजनसम्मत्यर्थं स्वतः परतश्च धनाभावलक्षणं दूषणमुक्तम्, तस्याप्यन्यथार्थं व्याचष्टे **निष्किञ्चन** इति । निष्किञ्चनपदं यौगिकमत्र, न तु रूढं निर्धनार्थम् । योगमाह **न यतोऽस्ति किञ्चिदिति । नन्विति** निश्चयेनैव । भवान् निष्किञ्चनः । यस्य किञ्चन नास्ति, किन्तु सर्वमेव । यतो हेतोर्वा किञ्चिन्नास्ति, किन्तु सर्वमेवास्ति । यतो भिन्नं वा । अत्रापि ज्ञानोदये सर्वं भगवतः सकाशादल्पमेव भविष्यतीति यतः सर्वं किञ्चिदेवेति नन्वर्थः । अथवा । निरुपसर्गो निर्गतार्थे । यतो भगवतः सकाशात् सर्वमेव निर्गतमिति । **नयतः** सर्वं प्रापयतो भगवतः सकाशात्किञ्चिदस्तीत्यर्थः । ननु रूढिं परित्यज्य, किमिति योग आश्रीयते इति चेत्, तत्राह **यस्मै बलिं बलिभुजोऽपि हरन्तीति** । न हि बाधितोर्थः स्वीकर्तुं शक्यते । यथा प्रकरणवशात्सैन्धवादिपदेषु युद्धार्थं प्रवृत्तौ, सिन्धुजत्वमेव पुरस्कृत्य, अश्व एव प्रतीयते, न तु लवणम्, तथात्रापि बलिभुज इन्द्रादयोऽपि सर्वोपास्या यस्मै बलिं हरन्ति । चरणक्षालने अजः प्रसिद्ध इति तेनापि बलिर्दत्तो भविष्यति । चरणसेवका इति ज्ञापयितुं वा तदादित्वम् । अनेन स्वतो धनाभावपक्षः परिहृतः । परतो धनाभावपक्षे सिद्धान्तमाह **न त्वां विदन्तीति** । ज्ञात्वा हि भजनम् । नन्वज्ञानमपि दोषाभावप्रतिपादकमिति चेत् । सत्यम् । यदि प्रतिबन्धाभावेऽप्यज्ञानं भवेत् । अत्र तु त्वदज्ञाने हेतुरस्तीत्याह **असुतृप** इति । प्राणतर्पण एव व्यापृता न जानन्ति । ज्ञापनार्थं प्रयत्ने अवकाशाभावात् । नन्वनावश्यकत्वं तथासति जातमिति प्राणापेक्षया अपकर्षात् अज्ञानमदोषायेवेति चेत्, तत्राह **अन्तकमिति** । स हि मारकः सर्वसंहर्ता । अतः सर्वैरेव ज्ञातव्यः । तथाप्यज्ञानं बहिर्मुखत्वादेव । हेत्वन्तरमप्याह **आढ्यतान्धा** इति । आढ्यतया अन्धाः । न हि चक्षुषि द्रव्यादिना पिहिते कश्चित्पश्यति । तथाढ्यता सर्वत्र व्यापृता निरन्तरा अन्धत्वमेव सम्पादयति । परिमितमेव गुणो, नत्वपरिमितं धनम् । अजीर्णान्नवत् । अतो ज्ञानाभावात् परतो धनाभावो युक्तः । नह्यन्धत्वापादकं धनं भवति । यदप्युक्तं 'निष्किञ्चनजना एवास्माकं प्रियाः, नत्वाढ्या' इति स्वरुचिनिरूपणम्, तदपि युक्तमेवेत्याह **प्रेष्ठो भवानिति** । बलिभुजां विरक्तानां देवानां वा भवान् प्रियः, पुरुषार्थसाधकत्वात् । अपि शब्देनोभये सङ्गृहीताः । तदनुगामिनश्च । तेऽपि तुभ्यं त्वदर्थमेव जातास्तव प्रियाः । यो हि यदर्थ-

मेवोत्पद्यते, स तु तस्य प्रियः। नात्रार्थशब्दो निवृत्तिवाची। अतोऽन्योन्यं प्रियत्वात् निष्किञ्चना एव जनाः प्रियाः, न तु धनवन्तः, पुरुषार्थापेक्षाभावात्। अतदर्थत्वाच्च। अनेन 'तस्मात्प्रायेण नह्याढ्या' इत्यभजनं समर्थितम्॥ ३७॥ यदुक्तं भगवता 'ययोरात्मसमं वित्त'मिति विवाहयोग्यत्वाय. तत्र निर्णयमाह **त्वं वै समस्तपुरुषार्थमय** इति। पुरुषार्थश्चेद्धर्मादिर्भवेत्, उभयातिरिक्तः, तत्र जन्मादयः पञ्च विचारणीयाः। क्षेत्रबीजयोर्वैजात्ये फलानुत्पत्तेः। नतु फलसाधनयोर्जन्मादिकं तुल्यमपेक्ष्यते। अतो लौकिकदृष्ट्यैव यो भवन्तं साधनत्वेन मन्यते, तं प्रत्येवैषा वाचोयुक्तिः, नत्वस्मान् प्रतीति असमतयाऽविवाहकथनं न मां प्रति न त्वां प्रतीति प्रकरणादिदं वाक्यमुत्कर्षमेवार्हति, नतु प्रकरणे केनाप्यंशेन सम्बध्यत इत्यभिप्रायेणाह। **त्वं सर्वपुरुषार्थमयः**। धर्मादयः पुरुषार्थाः त्वदवयवेषु वर्तन्ते। यथा गङ्गायां जलम्। ततोऽपि गङ्गा महती, तथा भवानिति मयडर्थः। साधनैः साधितास्तत्र भविष्यन्तीत्याशङ्क्याह **फलात्मेति**। पुरुषार्थाः साधनरूपा अपि भवन्तीति साधनफलरूपत्वं वा प्रतिपाद्यते। सर्वेषामेव वा फलानां त्वमात्मा। नहि परमानन्दे कश्चित् स्वाधिकारो नास्तीति विलम्बते। भगवतः फलत्वं साधनत्वं चार्षज्ञानेनोक्त्वा लौकिकबुद्ध्या तदनङ्गीकारं मत्वा तेषामप्यनुग्रहाय युक्तिमाह **यद्वाञ्छयेति**। फलाकाङ्क्षायामेव विरुद्धानां च परित्यागः, साधनानां च ग्रहणम्, नतु फलयोः अन्यफलाकाङ्क्षया। न ह्यन्यत्फलं त्यज्यते, वैषम्यादेकस्य सिद्धत्वादपरस्यासिद्धत्वात्, अतो राज्यं न फलम्, नापि फलसाधनम्, यदुच्यते **यद्वाञ्छयापि त्यज्यत** इति। ननु तथापि राज्यमैहिकं फलं भवतीति तत्परित्यागे भ्रान्तत्वं स्यादित्याशङ्क्याह **सुमतय** इति। **कृत्यं** कर्तव्यम्। साधनसाध्यरूपत्वात् भगवतः स एव ग्राह्यः, नत्वन्य इति कृत्यं छेदनमर्हतीति सुमतित्वे हेतुरप्युक्तः। अतस्त्वदर्थमेव ये सिद्धाः, तेषां तव च समाजो युक्त इत्याह तेषामिति। यद्यपि मैत्री विवाहश्च तेष्वपि न सम्भवति, तथाप्येकगोष्ठ्यां सम्बन्धमात्रमपि युज्यत इति तन्निरूप्यते। **विभो** इति सामर्थ्यम्। राज्यादिपरित्यागिनां परमसुकुमाराणां सन्तोषजनने। सम्यगुचितः समाजः राजमन्त्रिणामिव। सर्वथा आनुगुण्यं प्रतिपादयितुं दृष्टान्तमाह **पुंसः स्त्रियाश्चेति**। यथा पुंसः स्त्रियाः समाजः, चकारान्मित्रयोः समानशीलव्यसनयोः। 'अश्वं न त्वा वारवन्तं' इतिवत् उपमार्थवाचकाभावेऽपि निरुक्तादिवोपमार्थत्वमुच्यते। तत्रापि प्रसङ्गं वारयति रतयोरिति। सर्वक्लेशरहितत्वे सत्यन्योन्यं प्रीतयोः। प्रीत्यादिसद्भावेऽपि बाधकं चेद्भवेत्, तदा न भवतीति व्यावर्तयति **सुखदुःखिनोर्नेति**। एकः सुखी, अपरो दुःखी रोगादिना, तयोः कथमपि न समाजः। अनेन दुःखिनोः सुखिनोर्वा समाज उक्तः॥ ३८॥ यदप्युक्तं 'भिक्षुभिः श्लाघता मुधे'ति अज्ञानसमर्थनार्थम्, तत्रापि निर्णयमाह त्वं न्यस्तदण्डमुनिभिरिति। भिक्षुभिः परमहंसैरिति व्याख्येयम्। मुधेति फलाकाङ्क्षारहितैश्च। अन्यथा नारदादिषु लौकिकभिक्षुकत्वाभावात् बाधितार्थता स्यात्। अन्ये च भिक्षवः न श्लाघां कुर्वन्ति। तदाह। न्यस्तो दण्डो भूतेषु यैः। अनेन दोषाभाव उक्तः। ते च ते मुनयश्चेति गुणाः। व्यक्तवाण्या अपरोक्षवचनैः (उक्तः) अनुभावो यस्य। श्लाघामात्रं न, किन्तु यथा कृतं तथेत्यनुभावपदेनोच्यते। तत्स्वानुभवसिद्धं तेषाम्। अन्यथा कथं तादृशा जाताः। अतस्तेषां वचनं सार्थकमिति तद्वाक्यैर्ज्ञात्वा भवान् सम एव वृतः। समत्वे हेतुरात्मेति। यथा बहिर्दृष्टौ समत्वापादका जन्मादयः, तथान्तर्दृष्टावात्मत्वमेव। न हि कस्यचिदपि स्वात्मा न समः। तर्हि वरणेन किमित्यत आह आत्मदश्चेति। जीवाः खण्डितात्मान एव स्थिताः। तेषामात्मानं स्वात्मानं वा प्रयच्छतीति। अनेन त्वं स्वात्मानं दास्यसीति ज्ञात्वैव मया वृत इत्युक्तम्। चकाराद्धर्मादीनपि। नन्वहं कथं तवात्मेत्याशङ्क्य साधारण्येनाह जगतामिति। इति बुद्ध्यैव वृतः। अत एव तेऽपि परित्यक्ता इत्याह हित्वा भवद्भ्रुव उदीरितकालवेगध्वस्ताशिष इति। न केवलं मयेदानीमेव भवान् वृतोऽन्यपरित्यागेन, किन्तु पूर्वमेव लक्ष्मीस्वयंवरे अब्जभवनाकपतिप्रभृतीन् परित्यज्य जन्मैश्वर्योत्कर्षयुक्तान् भवानेव वृत इति सम्बन्धः। तेषां परित्यागे हेतुमाह। भवतो भ्रूः कालजनिका, तस्याः सम्बन्धी, तेनैवोदीरितो यः कालः, तस्य वेगेन ध्वस्ताः आशिषो येषाम्। क्षणमपि विसम्मतौ भ्रूवक्रतायां सर्वनाश एव तेषां भवतीति किं तेषां वरणेन। नहि मुमूर्षुः कयाचिद्व्रियते। ब्रह्मादीनामेव चेदियमवस्था, कुतोऽन्ये वरणयोग्या भवन्तीत्याह कुतोऽन्य इति। अतो ज्ञात्वैव भवान् वृतः। नाप्यन्ये वरणीयाः। अन्यद्भगवदुक्तं नास्माकं बाधकम्, उदासीनत्वं च। आत्मात्मदत्वेन अस्मदिष्टमेव। अहमपि तथा भविष्यामीति॥ ३९॥ एवं बाधकानि पदानि साधकत्वेन व्याख्याय, वाक्यार्थं चोक्त्वा, यथाश्रुतं भगवद्वाक्यं लोकदृष्टिपरत्वेऽपि विरुध्यते, तस्माद्वाक्यानि विपरीततया स्वोत्कर्षमेव प्रतिपादयन्तीति वक्तव्यमित्यभिप्रायेणाह जाड्यं वच इति। अतः परं पुनः सर्वे श्लोकाः लोकदृष्ट्यापि विरुध्यन्त इति व्याख्यास्यते। यतो विपरीततया स्वोत्कर्षमेव प्रतिपादयेयुः। तदा ध्वनिपरत्वेन तान्येव वाक्यानि योजितानि भवन्ति। यदुक्तं प्रथमत एव 'राजभ्यो बिभ्यत' इति, तत्रोत्तरमुच्यते। 'मुखं च प्रेमसंरम्भस्फुरिताधरमीक्षितु'मिति भगवतोक्तत्वात्तामसप्रकारेणापि क्रोधाविष्टा वाक्यानि खण्डयतीति पूर्वस्माद्विशेषः। भयं हि जडस्य भवति। जाड्यादेव कम्पो दृश्यते। तत्र भगवति भयहेतोरभावात् वक्तुर्भयवाचकः शब्दः। भट्टानामिव शब्दस्यैव शक्तिद्वयं परिकल्प्य वक्तृत्वं वाच्यत्वं च। सार्थकता सम्पादनीयेत्याह जाड्यं वच इति। वच एव जाड्यं जडता भीतत्वमिति यावत्। तवेति भेदार्थमसमासः। ननु विद्यमाने वक्तरि मुख्यार्थं परित्यज्य वचोजडता कथं सम्पाद्यत इत्यत आह गदाग्रजेति। यथा गदोत्पत्तिपर्यन्तं स्वयमभीतोऽपि क्रियां जडां सम्पादितवान्, एवं वाचमप्यत्र तथा सम्पादयति। तेन भगवदिच्छयैव तथा कायिकवाचिकयोर्जातत्वान्न किञ्चिद्दूषणम्।

वच इति वाच इति वचस इति वा छान्दसम्। अथवा। केनचिद्धर्मेण ज्ञानाभावेन लोके जडो भवति। प्रकृते तु जडत्वसम्पादकत्वं वच एव। केवलं वाक्यादेव प्रतीयते जाड्यम्, न त्वर्थत इत्यर्थः। चकारात् पूर्वं बहुधा भगवज्जयं समुच्चिनोति। यस्त्वं भूपान् शार्ङ्गनिनदेनैव विद्राव्य, पशुतुल्यान् कृत्वा, मां जहर्थ। पशव एव हि शब्दमात्रेण पलायन्ते। पूर्वं निनदेनैवाभिभूय समाहृता, पश्चात् युद्धार्थं प्रवृत्तौ बलेन सर्वे हृता इत्यविरोधः। हे हि शब्दमात्रेण पलायन्ते, तेन तेभ्यो भयं सम्भाव्यते। शार्ङ्गनिनदेनेति हेतुरत्रोक्त इति पूर्वं धनुष्टङ्कारं कृतवानिति लक्ष्यते। राजन्यचक्रं परिभूयेत्यत्र शार्ङ्गनिनदेनेति योजनीयम्। देवाद्गृहीत्वा अनवहितेषु तेषु समागत इति पक्षं व्यावर्तयति सिंहो यथेति। बलाद्ग्रहणदोषं व्यावर्तयति स्वभागमिति। अदत्तस्यापि ग्रहणे दोषाभावं सामर्थ्यं चाह ईशेति। यथा क्लृप्तोऽपि भागो दैवैर्न गृह्यते, अहुतश्चेत्, तथेश्वरो न भवतीत्यर्थः। लोके स्वभागस्य बलादपि ग्रहणं दृष्टमिति। मां त्वमिति प्रत्यक्षं प्रमाणमुक्तम्। पशूनिति सिंहव्यावृत्तिः। न हि सिंहस्य कन्या सिंहेन बलाद्ग्रहीतुं शक्या। यद्यपि स्वभागरूपा। देवादीनां रक्षाभावाय स्वबलिमिति। स्वार्थमेव देवैः क्लृप्तमिति। यथा सिंहः पशून् विद्राव्य, स्वभागभक्षकान् व्याघ्रादीन् नादेनैव निवार्य, स्वभागं कुम्भस्थमांसं हरति, एवं निःशङ्कं हृतवतः ते कथं भयमिति। भयवाक्यमनुवदति, विरुद्धार्थमिति वक्तुम्, तेभ्यो भयाद्यदुदधिं शरणं प्रपन्न इति। यस्मात्तेभ्यो भयात्त्वमुदधिं शरणं प्रपन्नः, अस्माद्वचो जाड्यमित्यर्थः। उत्तरवाक्यगतो यच्छब्दं नापेक्षत इति न तच्छब्दाध्याहारः। पशुतुल्येभ्यो विद्रावितेभ्यो भयवचनं बाधितार्थं भवत्येवेति विपरीततयैवार्थो वक्तव्य इति भावः। अनेनैव 'बलवद्भिः कृतद्वेषा'निति व्याख्यातम्। न हि पशवः पलायनपरा बलवन्तो भवन्ति। स्वयमेव त्यक्तनृपासनत्वमुत्कर्ष एव ॥ ४० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

निष्किञ्चनो नन्वित्यत्र। नात्रार्थशब्द इति। अनुपदसंस्कृते यदर्थमेवोत्पद्यते इत्यत्रोक्तोऽर्थशब्दोऽन्यार्थनिवृत्तिवाची न। तथासति भगवदर्थत्वाभावेन भगवत्प्रियत्वं न स्यात्। किन्तु भगवदर्थत्ववाचीत्यर्थः। अर्थशब्दस्य पञ्चमोऽर्थो निवृत्तिरिति तथाशङ्क्य निराकृतम्। पुरुषार्थेति। पुरुषार्थमयो भगवानिति वक्ष्यते, तेषां तदपेक्षा नास्ति, किन्तु धनापेक्षैवेत्यर्थः। त्वं वै समस्तेत्यत्र। उभयातिरिक्त इति। भार्यापुरुषातिरिक्त इत्यर्थः। भगवांस्तु पुरुषार्थरूप एवेति भावः। साधनत्वेनेति। पुरुषार्थसाधनत्वेनेत्यर्थः। प्रकरणादिति। प्रकरणं भगवद्विवाहस्य। 'ययोरात्मसम'मिति वाक्यमेतस्मात्प्रकरणादुत्कर्षमर्हति। बाधित्वादत्र प्रकरणे प्रवेशमलभमानमन्यत्रोत्कृष्टव्यम्, लौकिकविवाहप्रतिपादकत्वेन वक्तव्यमित्यर्थः। गङ्गा महतीति। आधिदैविकी गृहेपि प्रकटा भवतीति जलापेक्षया महत्परिमाणेत्यर्थः। फलयोरिति। सिद्धयोरिति शेषः। फलमिति। सिद्धमिति शेषः। छेदनमर्हतीति कृत्यपदनिरुक्तिः। कृती छेदने इति धातोर्ण्यत्। अश्वं न त्वेति। अयं नकार इवार्थकत्वेन निरुक्ते प्रथमाध्याये व्याख्यातः, तद्वदत्रापि उपमारूपार्थवाचकेवादिपदाभावेपि नकारस्यैवावृत्तस्योपमार्थकत्वमुच्यते। तथा च नकारस्यावृत्तिः। पूर्वनकारस्योपमार्थकत्वम्। रतयोरिवेत्यर्थः। द्वितीयस्य निषेधार्थकत्वम्। सुखदुःखिनोः समाज उचितो न भवतीत्यर्थः। प्रसङ्गमिति। प्रसङ्गात्कार्यान्तरार्थे मिलितयोः स्त्रीपुंसयोः समाजस्तथा रसजनको न भवतीत्यर्थः। त्वं न्यस्तदण्डेत्यत्र। गदितानुभाव इति। गदधातोरर्थमाहुः व्यक्तवाण्येति। अहमपि तथेति। भगवद्वरणे अहमप्यात्मलब्ध्या पूर्णा भविष्यामीत्यर्थः। जाड्यं वच इत्यत्र। जाड्यादेवेति। जाड्यं भयं हेत्वभावाद्भगवत्यनुपपन्नं वक्तरि शब्दे पर्यवस्यति। तथा च भयेन शब्दस्य कम्पो जातः। अतः अभीतमपि भगवन्तं भीतं बोधयति शब्द इति भावः। वक्तुरिति। शब्दस्येत्यर्थः। शब्दस्य कथं वक्तृत्वमित्याशङ्क्य सम्मतिपूर्वकं व्युत्पादयन्ति भट्टानामिवेति। वच एव जाड्यमिति। वचस एव जडतेत्यर्थः। क्रियां जडामिति। भययुक्तामित्यर्थः। वाचमपीति। वाक्यमपि भययुक्तं सम्पादयतीत्यर्थः। इदं शक्तिद्वयकल्पनं पूर्वमीमांसायामुक्तम्, न तु व्यासाभिमतमित्यरुच्या पक्षान्तरमाहुरथवेति। अस्मिन्पक्षे वच इति पञ्चम्यन्तम्। उपपत्तिस्तु छान्दसत्वेनोक्तैव। यश्च त्वमेतादृशः, स त्वं तेभ्यो भयादुदधिं शरणं प्रपन्न इति यद्यस्मादतो वचस एव जाड्यमित्यन्वयः।

श्रीसुबोधिनी-सारः

आस्थिताः पदवीं सुभ्रूः प्रायः सीदन्ति योषित इत्युत्तरं यद्वांछयेति वक्ष्यति निष्किचना वयं शश्वन्निष्किचनजनप्रिया इत्युत्तरमाह। यतोन्यत्किंचन वस्तुजातं नास्तीत्यतो भवान् निष्किचनो ननु निश्चयेन न तु दरिद्रः बलिभुजोऽन्यतो बलिभोक्तारोप्यजाद्या ब्रह्माद्या यस्मै तुभ्यं बलिं ददति अतो महादरिद्रैः पूज्य इत्युक्तं निरस्तम् उभयथापि स्तौति बलिभुजां ब्रह्मादीनामपि भवान्प्रेष्ठः तेपि ब्रह्मादयः तुभ्यं तव प्रेष्ठाः तस्मात्प्रायेण न ह्याढ्या मां भजन्ति सुमध्यमे इत्युत्तरत्वेनात्मविमुखान् धनिनो निंदन्नाह ये आढ्यतयांधाः असुतृपः केवलं प्राणपोषकास्तेंतकं कालरूपिणं त्वा त्वां न विदन्ति न जानन्ति कथमुहो भजनम् ॥ ३७ ॥ 'ययोरात्मसमं वित्तम्' इति सम्बन्धे दोष उक्तस्तं समाधत्ते। त्वं पुरुषार्थचतुष्टयरूप उपासनानुसारात् फलात्मा फलदः यस्य तव वांछया सुमतयो ज्ञानिनः कृत्स्नं सर्वं विसृजंति त्यजंति निष्कामा भवन्ति तेषां भवतस्तव समाजः सम्बन्धः सेव्यसेवकरूपः समुचितो योग्यः मिथो रतयोः परस्परं मिथुनीभूतयोः पुंसः स्त्रियाश्चेति द्वयोः

सुखदुःखयुक्तयोर्न ॥ ३८ ॥ भिक्षुभिः श्लाघिता मुधा इति परिहारमाह । त्यक्तदण्डैर्मुनिभिर्गदितो वर्णितोनुभावो यस्य स त्वम् आत्मा जगतामात्मदश्च भवतो भ्रुवः सकाशादुदीरितो यः कालस्तस्य वेगेन ध्वस्ता नष्टा आशिषो येषां तानब्जभवनाकपतीन् ब्रह्मशिवस्वर्गपतीन् हित्वा इति हेतोः मे मया वृतोसि एतेन वैदर्भ्येतदविज्ञाय इत्युत्तर दत्तं भवति । अन्ये पामराः कुतो वरेण्याः ॥ ३९ ॥ हे गदाग्रज तव वचो राजभ्यो बिभ्यत इत्यादि जाड्यं मांद्यम् । तथाहि । शाङ्गस्य निनदेन भूपान् जरासंधादीन् विद्राव्य यस्त्वं मां जहर्थ हे ईश पशून् विद्राव्य सिंहः स्वभागमिव तेभ्यो भयाद्भीतोरुदधिं समुद्रं शरणं गत इति यावत् ॥४०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'निष्किञ्चना वयं शश्वन्निष्किञ्चनजनप्रियाः । तस्मात्प्रायेण न ह्याढ्या मां भजन्ति सुमध्यमे' इत्येतच्छ्लोकोक्तं दोषत्रयं परिहरति—निष्किञ्चन इति । नन्विति सम्बोधने । हे प्रभो ! यतः सकाशात् किञ्चिदपि दुर्लभं नास्ति तथाभूतो निष्किञ्चनो भवान् । 'दरिद्रतालक्षणं निष्किञ्चनत्वं तु तव न घटते' इत्याशयेनाह—यस्मा इति । बलिं पूजां भुञ्जते स्वीकुर्वन्ति इति बलिभुजः अन्यैः पूज्या अपि ब्रह्मादयो यस्मै तुभ्यं बलिं हरन्ति पूजां समर्पयन्ति तस्य सर्वेश्वरस्य तव दरिद्रता कथं स्यादिति शेषः । निष्किञ्चनजनप्रिया इत्यत्र 'बहुव्रीहिणा तत्पुरुषेण वा निन्दा स्यात्तदुभयत्रापि नियमो नास्ति' इत्याशयेनाह—प्रेष्ठ इति । बलिभुजां लोकेश्वराणां ब्रह्मादीनामपि भवान् प्रेष्ठः ते ब्रह्मादयोऽपि तुभ्यं तव प्रेष्ठाः । 'तस्मात् प्रायेण न ह्याढ्या मां भजन्ति' इत्यस्योत्तरमाह—न त्वामिति । आढ्यतया धनाभिजनादिभिराढ्यत्वाभिमानेनान्धाः विवेकशून्या अतएव असुतृपः असून् इन्द्रियाण्येव तर्पयन्तीति तथाभूता अन्तकमायुर्हरन्तं कालरूपमपि त्वा त्वां न विदन्ति न जानन्ति । अतो न भजन्तीत्यर्थः ॥ ३७ ॥ प्रेष्ठत्वे हेतुं वदन्तो 'ययोरात्मसमं वित्तम्' इत्यादिनोक्तमनौचित्यं परिहरति–त्वमिति । 'वा' इत्यनेन 'अयमर्थः शास्त्रप्रसिद्ध' इति द्योतयति । समस्तपुरुषार्थमयः धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थप्रदः फलात्मा फलं हि परमानन्दस्तत्स्वरूपश्च, 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः । अत्र अविवेकिनामाचारं प्रमाणमाह—यद्वाञ्छयेति । यस्य फलरूपस्य तव वाञ्छया प्राप्तीच्छया सुमतयः कृत्स्नं सर्वमपि व्यवहारं विसृजन्ति त्यजन्तीत्यर्थः । "नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्" इति वचनेन सर्वत्यागेन स्थित्यसम्भवात् तावन्मात्रेण मत्प्राप्त्यसम्भवाच्च किञ्चिदनुष्ठानमवश्यं कर्तव्यम् । 'तर्हि किं कुर्वन्ति' इत्यपेक्षायां 'त्वद्भजनमेव' इत्याशयेनाह—तेषामिति । हे विभो ! तेषां विवेकिनां भवतः समाजः सेव्यसेवकलक्षणः सम्बन्धः यद्वा भवत्सम्बन्धिनां भक्तानां समाजः तत्र स्थित्वा त्वद्भजनमेवोचितः, तयोः परस्परानुरागयुक्तयोः अत एव सुखदुःखिनोः पुंसः स्त्रियाश्च समाजो गोष्ठीस्तेषां नोचितः ॥ ३८ ॥ 'भिक्षुभिः श्लाघिता मुधा' इत्यस्योत्तरमाह—त्वमिति । भिक्षुपदव्याख्यानं न्यस्तदण्डमुनिभिरिति । न्यस्तस्त्यक्तः दण्डः प्राणिपीडा यैस्ते च ते मुनयो मननशीला विवेकिनश्च तैर्गदितः श्लाघितोऽनुभावो यस्य तथाभूतो जगतामात्मा स्वभक्तानामात्मदश्च त्वमिति ज्ञात्वा अब्जभवो ब्रह्मा नाकपतयो स्वर्गपतयः इन्द्रादयस्तान् हित्वा उपेक्ष्य मे मया वृतोसीत्यन्वयः । ब्रह्माद्युपेक्षायां हेतुमाह—भवतो भ्रुवः सकाशात् उदीरितो यः कालस्तस्य वेगेन ध्वस्ताः खण्डिताः आशिषो भोगा येषां तानिति । यदि ब्रह्मादीनामियं व्यवस्था तदाऽन्ये चैद्यादयः कुतो वरणयोग्या इति शेषः । आत्मेति वृथा श्लाघेति परिहृतं अन्येषां तदर्थप्रियत्वात् । ज्ञात्वा इत्यनेन अज्ञानपरिहारः । हित्वेत्यनेनादीर्घसमीक्षापरिहारः ॥ ३९ ॥ एवं स्वाज्ञानं परिहृत्य किञ्चित्क्रोधाविष्टा तद्वाक्यानि खण्डयति—जाड्यमिति । हे गदाग्रज ! सिंहो यथा पशून् महिषादीन् विद्राव्य स्वबलिं स्वभागं हरति तथा यस्त्वं शाङ्र्गधनुर्निनादेनैव भूपान् जरासन्धादीन् विद्राव्य पलायनं कारयित्वा स्वभागं मां जहर्थ हृतवान् असि । तस्य तव तेभ्यो राजभ्यो भयादुदधिं शरणं प्रपन्न इति यद्वचो भाषणं तज्जाड्यं अनन्वितमेवेत्यन्वयः । 'परमाप्तस्य तव भक्तप्रतारकं वचनं न पुनरुक्तम्' इत्याशयेन सम्बोधयति—ईशेति ॥ ४० ॥

अन्वितार्थप्रकाशिका

निष्किञ्चना इति श्लोकोक्तं दोषत्रयं प्रत्याह—निष्किञ्चन इति ॥ नन्विति सम्बोधने । हे प्रभो ! यतः सकाशात् किञ्चिदपि दुर्लभं नास्ति यस्य तथाभूतो निष्किञ्चनो भवान् नतु दरिद्रतारूपनिष्किञ्चनत्ववान् यतः बलिं पूजां भुञ्जते स्वीकुर्वन्ति इति बलिभुजः अन्यैः पूज्या अपि अजादयः ब्रह्मादयोऽपि यस्मै तुभ्यं बलिं हरन्ति पूजां समर्पयन्ति तस्य सर्वेश्वरस्य तव दरिद्रता कथं स्यादिति शेषः । निष्किञ्चनजनप्रिया इत्यत्र तत्पुरुषमाश्रित्याह बलिभुजां लोकेश्वराणां ब्रह्मादीनामपि भवान्प्रेष्ठः बहुव्रीहिमाश्रित्याह ते ब्रह्मादयोऽपि तुभ्यंत व प्रेष्ठाः आढ्यतयाभिजनादिभिराढ्यत्वामानेनान्धाः विवेकशून्या अत एव असुतृपः असून् इन्द्रियाण्येव तर्पयन्तीति तथाभूता अन्तकमायुर्हरन्तं कालरूपमपि त्वा त्वां न विदन्ति न जानन्ति । अतो न भजन्ति इत्यर्थः ॥ ३७ ॥ ययोरात्मसमं वित्तमित्यत्राह—त्वमिति ॥ समस्तपुरुषार्थमयः धर्मादिप्रदः फलात्मा फलं हि परमानन्दस्तत्स्वरूपश्च यस्य फलरूपस्य तव वाञ्छया प्राप्तीच्छया सुमतयः कृत्स्नं सर्वमपि व्यवहारं विसृजन्ति त्यजन्तीत्यर्थः । हे विभो ! तेषां विवेकिनां भवतः समाजः सेव्यसेवकलक्षणः सम्बन्धः । यद्वा । भवत्संबन्धिनां भक्तानां तैरेव समाजः उचितः । रतयोः

परस्परानुरागयुक्तयोः अत एव सुखदुःखिनोः पुंसः स्त्रियाश्च समाजो भवतो भक्तानां च नोचितः ॥ ३८ ॥ भिक्षुभिः श्लाघिता इत्युक्तं तत्र भिक्षुश्लाघैव सर्वोत्कर्ष इत्याह—त्वमिति ॥ न्यस्तस्त्यक्तः दण्डः प्राणिपीडा यैस्ते च ते मुनयश्च त एव भिक्षव उच्यन्ते तैर्गदितः श्लाघित ऽनुभावो यस्य तथाभूतो जगतामात्मा स्वभक्तानामात्मदश्च त्वमिति ज्ञात्वा भवतो भ्रुवः सकाशात् उदीरितो यः कालतस्य वेगेन ध्वस्ताः खण्डिताः आशिषो भोगा येषां तान्। अब्जभवो ब्रह्मा नाकपतयः स्वर्गपतयः इन्द्रादयस्तान् हित्वा उपेक्ष्य मे मया वृतोऽसि। अन्ये कुतः चैद्यादीनां का गणना। एतेन वैदर्भ्येतदविज्ञायेत्यपि अदीर्घदर्शित्वमज्ञानं च समाहितम् ॥ ३९ ॥ स्वाज्ञानं परिहृत्य पुरुषान्तरगुणवर्णनप्रदीप्तकोपसंरम्भेण भगवत्येवाज्ञानमापादयन्ती समुद्रं शरणं गतानित्यत्राह—जाड्यमिति ॥ हे ईश ! हे गदाग्रज ! सिंहो यथा पशून्महिषादीन् विद्राव्य स्वबलि स्वभागं हरति तथा यस्त्वं शार्ङ्गधनुर्निनादेनैव भूपान् जरासन्धादीन् विद्राव्य पलायनं कारयित्वा स्वभागं मां जहर्थ हृतवान् असि। तस्य तव तेभ्यो राजभ्यो भयादुदधिं शरणं प्रपन्न इति यद्वचो भाषणं तज्जाड्यमनन्वितमेव। "यत्तु सत्यं भयादिव" इति पूर्वं मया भवद्वचः समाहितं तन्ममापि जाड्यमेवेति भावः ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निःकिंचनावयं शश्वदित्येतस्मिच्छ्लोके गदितं यद्दोषत्रिकं तन्निराकरोति निःकिंचन इति। यतस्त्वतः पुरुषोत्तमात्किचित्किमपि वस्तु उत्तमं नास्तीति ननु निश्चितमस्ति अतो भवान्निःकिंचनोऽस्ति यस्मै तुभ्यमितरलोकानां बलिभुजोपि उपहारग्राहका अपि अजाद्यामहाधनिका ब्रह्मादिदेवाः बलिं पूजोपहारं हरंति समर्पयंति। अतो निःकिंचनशब्दवाच्यो दरिद्रीभवान्नास्तीतिभावः। निःकिंचनावयंशश्च निःकिंचनजनप्रिया इत्यत्र विशेष्यविशेषणयोर्बहुवचनं स्वानेकावतारपरं बोध्यं निःकिंचनजनप्रिया इति यदुक्तं तस्यान्वर्थतयोत्तरमाह नास्ति हरिव्यतिरिक्तं किंचनवस्तु येषां ते निःकिंचनास्ते चेते जनाः साधुजनाश्च तेषां प्रियाः वयं यद्वा ते निःकिंचनजनाः प्रिया येषां तथाभूता वयं स्मः इति भवता यदुक्तं तस्मिन्पक्षे बलिभुजः बलिं अतिप्रेम्णा प्रह्लादादिभिस्तुभ्यं समर्पितं त्वद्भुक्तावशिष्टं भुंजंतीति तथाभूताः। अजाद्याः अजा अजन्मानो ब्रह्मपुरश्वेतद्वीपादिहरिधामस्थाः। महामुक्तास्तदाद्यानारदसनकादयः अकिंचनाः साधवः यस्मै तुभ्यं बलिं पूजोपहारं हरंति समर्पयंति तेषामकिंचनसाधूनां भवान् प्रियः तेऽपि तव प्रिया इत्यर्थः। नह्याढ्यतमां भजंतीत्यस्योत्तरमाह नेति आढ्यतया धनिकतया ये अंधाः कार्याकार्यविवेकदृष्टिहीनाः अतएवासुतृप उदरंभरास्ते। अंतकं भक्तजनिर्मृतिनाशकं। त्वां न विदंति। अतो न भजंतीत्यर्थः ॥ ३७ ॥ ययोरात्मसमं वित्तमित्यस्योत्तरमाह त्वमिति। समस्तपुरुषार्थमयः धर्मादिचतुष्टयपुरुषार्थरूपः अतः फलात्मा अनवधिकातिशयस्वपरमानंदप्रदस्त्वमसि अतः सुमतयो यस्य तव वांछया प्राप्तुमिच्छया कृत्स्नं प्राकृतसुखं ब्रह्मसुखं च विसृजंति त्यजंति। कृत्यमिति पाठे तु सांसारिकव्यापारवृंदं त्यजंति अतो हे विभो तेषां भवतस्तव च। समाज उपास्योपासकरूपसंबंधः समुचितः सम्यग्योग्योस्ति रतयोः परस्परमासक्तयोः अतएव सुखदुःखिनोः आसक्तिजनितसुखलेशमिश्रानेकविध दुःखव्याकुलयोः पुंसः स्त्रियाश्च समाजो न समुचितोस्ति तव भक्तानामेव परमसुखं नान्येषां स्त्रीपुंसानामिति भावः ॥ ३८ ॥ इदानीं भिक्षुभिः श्लाघिता मुधा इति यदुक्तं तस्योत्तरमाह। त्वमिति न्यस्तो राज्यादित्यागेन त्यक्तो दंडो जननिग्रहो यैस्तैर्मुनिभिर्मनुप्रियव्रतांगप्रभृतिभिर्भिक्षुभिः। जगतां चेतनानां आत्मा अंतर्यामी। आत्मदो भक्तानां स्वमूर्त्तिप्रदश्चेति। गदितो योनुभावः स सत्योस्ति न मुधेति ज्ञात्वैव मे मया वृतोसि किंकृत्य भवद्भ्रुवस्तव भृकुटेः सकाशात् उदीरितः। उत्थितो यः कालस्तस्य वेगेन ध्वस्ता हता आशिषो भोग्यपदार्था येषां तान् विधि शिवेंद्रान् हित्वा त्वमेव वृतः। तर्ह्यन्यै चैद्यादयस्तु छास्तान् हित्वेति कुतो वक्तव्यमित्यर्थः वैदर्भ्येतदविज्ञाय त्वया दीर्घसमीक्षयेति स्वदोषद्वयमुक्तं तस्य परिहारो वृतोसीत्यारभ्योक्तः ॥ ३९ ॥ समुद्रशरणं गतानित्यस्योत्तरांतरमाह जाड्यमिति। तेभ्यो राजभ्यो भयात् शरणमाश्रयं उदधिं त्वं प्रपन्न इति यत्तव वचस्तज्जाड्यं वाणीविलासपरं न परमार्थः ॥४०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

'आस्थिताः पदवीं सुभ्रूः प्रायः सीदन्ति योषितः' इत्यस्य परिहारं यद्वाञ्छयेतीतः पञ्चमे श्लोके वक्ष्यति। इदानीं तावत् 'निष्किंचना वयं शश्वन्निष्किंचनजनप्रियाः। तस्मात् प्रायेण नह्याढ्या मां भजन्ति सुमध्यमे' इत्येतच्छ्लोकोक्तं दोषत्रयं परिहरति ॥ निष्किंचन इति ॥ यतः किंचित् न अस्ति। ततः, भवान् निष्किंचनः, न। नु कुतः बलिभुजः अन्येभ्य इन्द्रादिभ्योऽपि बलिग्राहकाः, अजाद्या ब्रह्मादयः अपि, यस्मै तुभ्य बलिं पूजां, हरन्त्यर्पयन्ति। ततः न विद्यते किंचन स्वं यस्येत्येवं दरिद्रतालक्षणं निष्किंचनत्वं तु तव न घटतेऽपि तु न विद्यते किंचन प्राप्यं यस्येत्यकिंचन इति तु घटते इत्यर्थः। न हि करदीकृतभूपालश्चक्रवर्त्ती नृपो निष्किंचन इति वक्तुं शक्य इति भावः। 'निष्किंचनजनप्रिया' इत्यत्र तत्पुरुषेण बहुव्रीहिणा वा निन्दा न स्यादिति स्वयमुभयथा स्तौति। बलिभुजां पूजार्हाणामनन्यप्रयोजनत्वादकिंचनानां नारदादीनां, भवान् प्रेष्ठः। न विद्यते भगवतस्त्वत्तोऽन्यदधिकं येषां तेऽकिंचना नारदादयस्ते ये जनास्तेषां प्रिय इति तत्पुरुषपक्षे स्तुतिः। ते नारदादयोऽकिंचना जनाः अपि, तुभ्यं तव, प्रेष्ठाः। ते उक्तविधा अकिंचना जनाः प्रिया यस्येति बहुव्रीहिपक्षे स्तुतिः। बलिभुक्शब्दविशेषितानां नारदा-

दीनामपि अकिंचनशब्देन त्वभिमतं दारिद्र्यं नास्तीति न निन्दापरतयाऽकिंचनशब्दार्थो युक्तः। 'तस्मात् प्रायेण न ह्याढ्या मां भजन्ति' इत्यस्योत्तरमाह। आढ्यतया धनकुलाभिजनरूपाद्याढ्यत्वाभिमानेनान्धा विवेकहीनाः, असुतृपः केवलेन्द्रियतर्पणपराः, अन्तं करोतीत्यन्तकस्तं, त्वा त्वां, न विदन्ति। अन्तकशब्दोक्त्या कालरूपेणायुर्हरन्तमित्याशयः। अन्धानां त्वद्वैभवाचक्षुःश्रोत्रविषयत्वादसुतर्पणपरतया त्वदभजनमिति भावः॥ ३७॥ बलिभुजामपि भवान् प्रेष्ठ इत्यत्र हेतुं वदन्ती 'ययोरात्मसमं वित्तम्' इत्यनेनोक्तमनौचित्यं परिहरति॥ त्वं वा इति॥ समस्तपुरुषार्थमयः धर्मादिसमस्तपुरुषार्थस्वरूपः, फलात्मा अभीप्सितफलरूपः, आत्मा चेत्यर्थः। यद्वा। स्वाश्रितवाञ्छितार्थफलप्रदत्वात् फलरूपः अनवधिकातिशयानन्दमयत्वात्परमानन्दस्वरूपश्च। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः। त्वं वै एवंभूत एकस्त्वमेवेत्यर्थः। यद्वाञ्छया यस्य तव सेवाप्राप्तिवाञ्छया, सुमतयः शोभनबुद्धयः, कृत्स्नं त्वद्दास्यव्यतिरिक्तं सर्वं सांसारिकसुखमित्यर्थः। विसृजन्ति त्यजन्ति नेच्छन्तीति यावत्। हे विभो, तेषामुक्तविधसुमतीनां, भवतश्च समाजः सेव्यसेवकलक्षणः सबन्धः, समुचितः। अत्र प्रथमपादेन वित्तादिमद्भिर्भगवत्साम्यं दूरापास्तं, द्वितीयतृतीयपादाभ्यां त्वद्दास्यमात्रकाङ्क्षिण्या मम तव संबन्धस्तूचित इति सूचितम्। चतुर्थपादेन च मदन्येन संबन्धस्त्वनुचित इत्यभिप्रेत्याह। रतयोर्विषयादिभोगार्थं मिथ आसक्तयोः, अत एव सुखदुःखिनोः तत्कृतसुखदुःखभाजोः, पुंसः स्त्रियाश्च, स्त्रीपुरुषयोरित्यर्थः। न, तव समाजो नोचित इत्यर्थः। यः केवलमैथुन्यतत्प्रयुक्तसुखदुःखानुभवार्थः समाजः स तु नोचितः यस्त्वावयोः शेषशेषिणोः समाजः, सतु समुचित एवेति भावः॥ ३८॥ 'भिक्षुभिः श्लाधिता मुधा' इति यदुक्तं तस्योत्तरमाह॥ त्वमिति॥ भिक्षुपदव्याख्यानं न्यस्तदण्डेति। त्वं न्यस्तदण्डमुनिभिः सर्वभूतसुहृत्त्वं प्रार्थमानैर्भिक्षुसंज्ञाभाग्भिर्मुनिभिः, गदितः श्लाघितः अनुभावः प्रभावो यस्य तथाभूतः। तत्र हेतुं वदन्ती मुधेत्यस्योत्तरमाह। जगतां आत्मान्तर्यामी, आत्मदः स्वस्मिन् गाढानुरागवतामात्मीयमूर्त्तिपर्यन्तफलप्रदश्च। 'आत्मदा बलदा' इत्यादि श्रुतेः। आत्मत्वादात्मपर्यन्तवदान्यत्वाच्च यतस्त्वं मुनिगदितानुभावोऽतः, भिक्षुकृतं तव मिथ्याश्लाघित्वं नास्तीति भावः। 'वैदर्भ्येतदविज्ञाय त्वयाऽदीर्घसमीक्षया' इति स्वस्मिन्नुक्तं दोषद्वयं परिहरति इतीति। इतीत्थं भूतं त्वां ज्ञात्वेति शेषः। भवतः या भ्रूस्तस्याः सकाशात्, उदीरितो यः कालस्तस्य वेगेन ध्वस्ता नाशं प्राप्ता आशिषः आशीःफलरूपा लोकभोगादयो येषां तान्, अब्जभवनाकपतीन् ब्रह्मेन्द्रादीन् हित्वा विहाय, मे मया, त्वं वृतः, असि। अन्ये चैद्यादयः, कुतः। ब्रह्मादीन् विहाय यदा त्वं मया परिणीतस्तदा चैद्यादीन् विहाय तथा कुर्यां, तत्र किमु वक्तव्यमित्यर्थः। दीर्घसमीक्षयैव विचार्यैव मया वृतोऽसि त्वमिति भावः॥ ३९॥ एवं स्वाज्ञानं परिहृत्य पुरुषान्तरगुणवर्णनप्रदीप्तकोपसंरम्भेणेदं वचस्तव शृण्वतां जाड्यावहमित्याह—जाड्यमिति॥ हे गदाग्रज, यस्तु त्वं, शार्ङ्गनिनदेन, भूपान् प्रतिपक्षताभाजो नृपान्, विद्राव्य पलाययित्वा, हे ईश, सिंहः यथा पशून् महिषादीन्, विद्राव्य स्वबलिं स्वभागं हरति, तद्वत् मां जहर्थ हृतवानसि। एवं भूतस्य तव तेभ्यो राजभ्यः, भयात् उदधिं समुद्रं, शरणं प्रपन्नः। इति यत् वचः, तत् जाड्यं, शृण्वतां तव जाड्यताबोधकमित्यर्थः॥ ४०॥

कृष्णप्रिया

प्रियतम! आपने कहा कि—निष्किञ्चनावयं शश्वत् देवि! हम सदा निष्किञ्चन हैं, वह सर्वथा सुसङ्गत है आपकी अकिञ्चनता दरिद्रता नहीं है लेकिन आपसे अतिरिक्त कोई पदार्थ नहीं हैं केवल आपही सर्व हैं यही श्रुति भगवती जी का वचन है कि "सर्वं खल्विदं ब्रह्म"। आज शिव आदि देवाधिदेवों को भक्तजन जो पूजा चढ़ाते हैं सेवा आदि सामग्रियाँ समर्पण करते हैं वे सब आपके श्रीचरणों में समर्पित करते हैं। पुनः आपने कहा "न आढ्याः भजन्ते माम्" जो धनाढ्य जन हैं वे मेरा भजन नहीं करते हैं वह ठीक ही है क्योंकि धनमदान्धजन को दृष्टि ही नहीं कि भगवान् है। उनकी नजरों में केवल इन्द्रियों की तृप्ति ही केवल रही है। पुनः दृष्टि में यह भी अनुसन्धान है कि मृत्यु मेरे शिर पर सवार हो रहा है फिर भजन कैसे करें?। देवाधिदेव जो आदिभक्तों से प्राप्त करते हैं उनके आप ही प्रियतम हैं और आपको देवाधिदेव श्री प्रिय अतिप्रिय है॥ ३७॥ भगवन्! निश्चित रूप से यही सिद्धान्त है कि—मनुष्यमात्र के लिये जो धर्म, अर्थ, काम एवं मोक्ष नाम के जो चार पदार्थ हैं वे चारों पुरुषार्थ आपके ही स्वरूप हैं। भगवन्! आपके श्रीचरणों की प्राप्ति के लिये विवेकसम्पन्न सज्जन लोग समस्त भौतिक दैविक सुख साधनों को विना बिलम्ब छोड़ देते हैं। स्वामिन्! उन परमभक्त विवेक सम्पन्न सज्जनों का आपके साथ निरंतर नाता होना चाहिये। लेकिन, जो विषयों से घिरे हुए स्त्री पुरुष परस्पर का सम्बन्ध से सुख दुःख के वश बनकर रहे हैं वे आपका सम्बन्ध प्राप्त करने में कैसे योग्य हो सकेंगे॥ ३८॥ स्वामिन्! आपने कहा कि "भिक्षुभिः श्लाघिता मुधा" केवल व्यर्थ भिक्षुकों ने ही हमारी प्रशंसा की है यह कहना सर्वथा सुसंगत है लेकिन वे भिक्षुक महापुरुष कौन है नाथ? पूर्ण प्रशान्त आत्मरत एवं परमविरक्त महापुरुषों ने ही आपका उज्ज्वल यशोगान किया है। वे भिक्षुक "न्यस्तदंडमुनिभिः" सतत मननशील मुनिवर हैं और किसी भी अपराधी को कभी न दण्ड देना इस प्रकार के आत्मदर्शी एवं करणालु हैं। पुनः अनेक रात्रियों दिवसों के परिपक्व निश्चय एवं आपकी सम्पूर्ण महिमा श्रुति शास्त्र एवं पुण्यश्लोक पुरुषों ने गायी है उनका श्रवण करने के पश्चात् ही वरण किया है। मुझे यह अनुसन्धान है कि आप प्राणीमात्र के आत्माओं के आत्मा हैं पुनः अपने निजभक्तों को

आत्मदान करते हैं। प्रियतम मैं यह भी जानती हूँ कि नाकपति इन्द्र अब्जनाभ ब्रह्माजी एवं कैलासपति श्री शङ्कर आदि समर्थ देवों का भी वरण इसलिये नहीं किया कि आपकी भृकुटी के संकेत से प्रकट होने वाला वह महाकाल उनके उर:पुर में रही हुई उन आशाओं को मिट्टी में मिला देता है फिर तो जरासन्ध शिशुपाल आदि नाममात्र नरेशों की बात ही क्या कही जाय ? ॥ ३९ ॥ हे गदाग्रज ! हे यदुवीर ! हे यदुवर ! आपने कहा कि "समुद्रं शरणं गताः" नृपतियों डरकर भागकर हम समुद्र की शरण में गये, यह तो आपका उपहास-विनोद वाक्य है। नाथ ! आपने स्वयंवर के अवसर पर इकट्ठे हुए जरासन्धादि नृपतियों को आपके शार्ङ्ग धनुष्य के मात्र टङ्कार से भगाकर एवं रुक्मी को लज्जित एवं पराजित करके निजदासी को भाव एवं चाव से अपनी शरण में ले गये कि जैसे गजराज केसरी अपने सिंहनाद से वन्यपशुओं को भगाकर अपना भाग ले जाय यह तो पराक्रमवीर आप ही कर सकते हैं ॥ ४० ॥

यद्वाञ्छया नृपशिखामणयोऽङ्गवैन्यजायन्तनाहुषगयादय ऐकपत्यम् ।
राज्यं विसृज्य विविशुर्वनमम्बुजाक्ष सीदन्ति [1]तेऽनुपदवीं त इहास्थिताः किम् ॥ ४१ ॥
कान्यं [2]श्रयीत तव पादसरोजगन्धमाघ्राय सन्मुखरितं जनतापवर्ग्यम्[3] ।
लक्ष्म्यालयं त्वविगणय्य गुणालयस्य[4] [5]मर्त्या [6]सदोरुभयमर्थविविक्तदृष्टिः ॥ ४२ ॥
तं त्वानुरूपमभजं जगतामधीशमात्मानमत्र च परत्र च [7]कामपूरम् ।
स्यान्मे तवाङ्घ्रिररणं[8] सृतिभिर्भ्रमन्त्या [9]यो वै भजन्तमुपयात्यनृतापवर्गः ॥ ४३ ॥
[10]तस्याः स्युरच्युत नृपा भवतोपदिष्टाः स्त्रीणां गृहेषु खरगोश्वविडालभृत्याः ।
यत्कर्णमूलमरिकर्शन नोपयाता[11] युष्मत्कथा मृडविरिञ्चसभासु गीता ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—हे अम्बुजाक्ष ! अङ्गवैन्यजायन्तनाहुषगयादयः, नृपशिखामणयः, यद्वाञ्छया, ऐकपत्यम्, राज्यम्, विसृज्य, वनम्, विविशुः, तर्हि, इह, ते, पदवीम्, अमु, आस्थिताः, तै, सीदन्ति, किम् ? ॥ ४१ ॥ सन्मुखरितम्, जनतापवर्गम्, गुणालयस्य, लक्ष्म्यालयम्, तव, पादसरोजगन्धम्, आघ्राय, अर्थविविक्तदृष्टि, मर्त्या, का, अन्या, सदा, उरुभयम्, अन्यम्, श्रयेत ॥ ४२ ॥ जगताम्, अधीशम्, अत्र, च, परत्र, कामपूरम्, अनुरूपम्, आत्मानम्, तम्, त्वाम्, अभजम्, यः, वै, अपवर्गः, भजन्तम्, उपयाति, सृतिभिः, भ्रमन्त्यः, मे, तवाङ्घ्रिः, अरणम्, स्यात् ॥ ४२ ॥ हे अरिकर्षण ! हे अच्युत ! भवता, उपदिष्टाः, स्त्रीणाम्, गृहेषु, खरगोश्वविडालभृत्याः, नृपाः, तस्याः, स्युः, मृडविरिञ्चसभासु, गीताः, युष्मत्, कथाः, यत्कर्णमूलम्, न, उपयायात् ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यच्च 'अन्यदस्पष्टवर्त्मनाम्' इत्यादिना अर्थात्त्वां भजन्तः सीदंतीत्यवसादनं श्रमावहत्वमुक्तं तदपि मन्दमेवेत्याह—यद्वाञ्छयेति । यस्य तव भजनवांछया नृपोत्तमाः अंगो वेनस्य पिता, वैन्यः पृथुः, जायन्तो भरतः नाहुषो ययातिः, गयश्चादिर्येषां ते य एते तव पदवीं मार्गमाश्रितास्ते किं सीदन्ति न सीदन्त्येव अपि तु त्वत्पदं प्राप्ता इत्यर्थः । एवं कोपावेशेनावसादनस्यपरिहारादस्पष्टवर्त्मनामित्येतदानन्तर्यं विहायात्रोत्कर्षः ॥ ४१ ॥ यच्चोक्तम् 'अथात्मनोऽनुरूपम्' इति तत्राह—काऽन्यमिति श्लोकद्वयेन । गुणानामालयस्य तव पादसरोजगंधं जनताया अपवर्गं मोक्षरूपं लक्ष्म्या आलयं तत्सेव्यं सद्भिर्मुखरितं वर्णितमाघ्राय तमविगणय्य मर्त्या मरणधर्मिका सदा उरुभयं यस्य तमन्यं का स्त्री श्रयेत सेवेत अर्थे विविक्ता दृष्टिर्यस्याः सा गुणालयस्येत्यनेन गुणैर्हीना इति यदुक्तं तदपास्तम् ॥ ४२ ॥ अतस्त्वामेवाहमभजमित्याह । तं त्वेति । किंच प्रार्थयते । स्यादिति । अरणं शरणम् । सृतिभिर्देवतिर्यगादिभिर्जन्मभिः पाठांतरे त्वर्थवादबहुलकर्मश्रवणैरित्यर्थः । कथंभूतस्य तव ! यस्त्वमनृतस्य संसारस्यापवर्गो नाशो यस्मात्स भजन्तमुपयात्यात्मसात्करोति तस्य तवांघ्रिरिति । भीतस्य हि शरणमेवानुरूपं भजनयोग्यमतस्त्वामहमभजमित्यर्थः ॥ ४३ ॥ ये चोक्ता राज्ञां बहवो गुणाः "राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः" इत्यादिना तत्र सेर्ष्यं सशापं सांगुलिभंगं चाह द्वाभ्याम् । तस्याः स्युरिति । खरा इव केवलं भारवाहा गावो बलीवर्दा इव नित्यं व्यापार-

---

१. तेनु–विज. । २. यी–वीर.; श्रयेत–श्रीधर. वंशी जीव विश्व.; का स्त्री वृणीत–विज. । ३. वर्गम्–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ४. याल्यं–विज. ५. मर्त्यं–वीर; मर्त्याशिषो–विज. । ६. विवेक विज. । ७. रूपम्–विज. । ८. शरणं श्रु–विज. । ९. ये वै भजन्त्युत यान्त्यनृतापवर्गम्–विज. । १०. कस्याः–विज. । ११. यायात्–श्रीधर. वंशी जीव. वीर. विज. विश्व. ।

क्लिष्टाः श्वान इवावमता बिडाला इव कृपणा हिंस्राश्च भृत्या इव किंकरा नृपास्तस्या दुर्भगायाः पतयः स्युः यस्याः कर्णपथं त्वत्कथा न प्राप्नुयादिति ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति—न हि सुखिनो दुःखमार्गे प्रवृत्तिरपि तु पूर्वसिद्धसुखादिकसिद्ध्यर्था तु भवत्येवेति तात्पर्यम्। एवमित्थम्। कोपावेशेनानन्तर्यं प्रथमं वक्तव्यमस्पष्टवर्त्मपदार्थवर्णनं विहाय। अत्रोत्कर्ष उत्कर्षो वर्णितः। कोपावेशेनैवैतत्परिहर्तुं योग्यमिति संप्रत्येवावसादनं परिहरति—यद्वांछयेति। यस्य वांछया, तस्य ते तवेति योज्यम्। नु प्रश्ने। इह जगति यत्र कुत्रापीत्यर्थः। प्रायः सीदंतीह योषितामुपलक्षणत्वात् ॥ ४१ ॥ जनताया जनसमूहस्य। आघ्राय आसेव्य। अविगणय्याऽगणयित्वा। अर्थे परमार्थे। विविक्ता विवेकवती। यत्त्वयोक्तम् 'अथात्मनः' इत्यादि तदपि तथैवेत्याह—केति। या त्वदीयं यशो न श्रुतवती साऽन्यं श्रयतु नामेति भावः। सद्भिर्भ्रमरैरिव मुखरितं स्तुतम् जनताया जनमात्रस्यापि श्रवणादिभिरपवर्गसाधकम्। अवगणय्यावज्ञाय। मर्त्या मानुषीति। राक्षसप्रेतादिकन्या त्वन्यमाश्रयतामिति भावः। कीदृशमन्यम्—सदोरुभयम्। अर्थविविक्तदृष्टिरित्यविचारांधा त्वन्यं श्रयत्विति भावः। 'गुणालयम्' इत्यनेन गुणैर्हीनेत्यपि पराहतम् ॥ ४२ ॥ अतो गुणालयत्वात्सत्यत्वाच्च। 'सृतिर्जन्ममार्गयोः' इति निरुक्तिः। पाठांतरे 'श्रुतिभिः' इति पाठे। इत्यर्थ इति—"अपाम सोमममृता अभूम" इत्यादिवाक्याकर्णनैरिति भावः। अतोऽनुरूपत्वात्। इत्यर्थ इति—'अथात्मनोनुरूप–' इति दत्तोत्तरं जातमिति भावः। तम् उक्तमाहात्म्यम्। अत एवानुरूपं भजनयोग्यमभजम्। जन्मांतरेष्वपि तवैव भजनं करिष्यामीति वदती प्रेमभरदैन्येनात्मनो लीलामानुषीत्वं मत्वा तद्भजनं दुर्लभं मन्यमाना प्रार्थयते—स्यादिति। विविधजन्मभिरितस्ततो भ्रमंत्या अति। 'श्रुतिभिः' इति पाठे काश्चिच्छ्रुतयस्त्वां सर्वत्रानासक्तं वदन्ति, काश्चित्तु भक्तासक्तं, काश्चित्तु कदाचिद्दुःखेष्युदासीनप्रायमित्येवं विविधाः, ताभिः शंकां प्राप्तवत्याः। योंघ्रिस्त्वमिति टीका विचार्या, उपयातीति प्रथमपुरुषेणान्वयाय त्वंपदस्य विशेषणत्वं, य इत्यस्य विशेष्यत्वमंगीकृत्य समाधेया वा। अन्यत्तैः। तत्र चेति 'भीतस्य' इत्यादिवाक्यार्थयोजना। इत्यनेन प्रकारेणेत्यर्थः। अत्रानुरूपपदस्य व्याख्यापूर्वमव्याख्यानादेवेति। यद्वा—सृतिभिर्गतिभिस्तव तादृशनानाचेष्टाभिः। पाठांतरे, श्रुतिभिर्लक्ष्मीप्रियत्वादिकथनपराभिस्तत्राप्यनासक्त्यादिविख्यापिकाभिः। यद्वा—तवान्यावतारे सीतादीनां परित्यागादिश्रवणैरत्र च श्रीगोपीनां तथाद्येवेदृशवचनश्रवणैश्चानृतं तादृशविविधभ्रमस्तस्यापवर्गो यस्मात्। गीर्देवीव्यञ्जितार्थश्चायम्—तव सृतिभिर्नानावताररीतिभिर्भ्रमंत्या "देवत्वे देवदेहा सा मानुषत्वे च मानुषी" इत्यादिविष्णुपुराणोक्तेः। भवद्वल्लीलाकारप्रकटनेन त्वया सह विहरन्त्याः। पाठान्तरे यथायथा तत्तदवतारे मत्प्रतिपादिका श्रुतयस्तथा विहरंत्य इत्यर्थः। कीदृशोंघ्रिः—अनृतस्यापवर्गो यत्र स सच्चिदानन्दरूप इत्यर्थः। अन्यत्समम् ॥ ४३ ॥ तत्र राजगुणेषु। सेर्ष्यमक्षांतिसहितम्। सशापं परानिष्टोक्तिसहितम्। सांगुलिभंगं मुखेंगुलिप्रदानपूर्वकम्। अवमता अवज्ञास्पदाः। कृपणा मन्दाः। 'कृपणः कुत्सिते मन्दे क्रिमावपि' इति मेदिनी। दुर्भगाया मन्दभाग्यायाः। मृडः शिवः। तस्याः स्युरिति शापः, भवतोपदिष्टा इतीर्ष्या, खरगोश्वेति मुखांगुलियोग्यमिति विवेकः। हे अच्युतेति कालदेशाव्यभिचारिगुणो भवानेव, अन्यत्र गुणाभासमात्रत्वेऽपि व्यभिचारान्नान्य इति भावः। महादोषमप्याह–स्त्रीणामिति। अन्यतैः। तत्र किंकरा इति–किं करोमीत्याज्ञाप्रतीक्षका इत्यर्थः। क्षीरस्वामिना तथा तन्निरुक्तेः। यद्वा–खरपदेन ताड्यमानोपि तामनुगंतृत्वात्, गौर्भारवाहकत्वात्, अश्वः कदाचित्तद्वोढृत्वात्, श्वा वा पिंड वांछया तदाज्ञाकारित्वात्, बिडालस्तदुच्छिष्टभोक्तृत्वात्, भृत्याः पूर्ववदिति। यस्याः कर्णस्य मूलमवधानविषयमुप समीपे न यायात्, ईषदपि न गच्छेदित्यर्थः। युष्मदिति–गौरवेण बहुत्वात्। न च स्त्रीणामल्पबुद्धित्वात्तासां मनोहरा, अपि तु परमविदुषामपीत्याह—मृडेति। अरिकर्षण हे शत्रुसूदन भगवद्द्वेषेण ते मृतप्राया इति भावः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कोपावेशेनैवैतत्परिहर्तुं योग्यमिति सम्प्रत्येवावसादनं परिहरति—यद्वाञ्छयेति। तस्य वाञ्छया राज्यं देवेन्द्रादीनामपि स्पृहणीयं विसृज्य नृपशिखामणयस्ते वनं विविशुः तस्मात् नन्दनन्दनरूपत्वेन तैर्निश्चितस्य ते तवेत्यन्वयः। नु प्रश्ने इह जगति यत्रकुत्रापीत्यर्थः। प्रायः सीदन्तीत्यत्रापि योषितामुपलक्षणत्वादत्र नृपा अपि सङ्गृहीताः ॥ ४१ ॥ अन्या पुनरन्यं श्रयेत नाम तव पादसरोजगन्धन्त्वाघ्रायाप्यविगणय्य कान्यं श्रयेत तदघ्राणेऽन्याश्रयणमेवाविगणनमिति भावः। पादेत्यादिका भक्त्युक्तिः गुणग्रामं श्रुत्वेत्यर्थः। कीदृशं सद्भिरात्मारामैरपि मुखरितं सशब्दीकृतं शब्देन संयोजितं पूर्वसव्याख्या वर्णितमित्यर्थः। जनानां तापस्यवर्गो वर्जनं यस्मात्तं सर्वसम्पत्तेराश्रयं च इति मुक्तमुमुक्षुविषयिसेव्यत्वमुक्तम् अत एव गुणालयस्य सर्वगुणनिधेः अन्यस्य दोषमाह—मर्त्यश्च सः आ समन्तात् सदा सर्वदा च उरुभयं यस्य स च सः तम् उपलक्षण चैतत् सन्मुखरितविपरीतत्वादिकस्य नन्वन्यमाश्रयमाणा बहवो दृश्यन्ते, तत्राह—अर्थेति। ता मूर्खा एवेति भावः ॥ ४२ ॥ तमुक्तमाहात्म्यम् अत एवानुरूपं भजनस्य योग्यमभजं जन्मान्तरेष्वपि तवैव भजनं करिष्यामीति वदन्ती प्रेमभरदैन्येनात्मनोलीलामानुषीत्वमेव वरमानु-

षीत्वं मत्वा तद्भजनं च दुर्लभं मन्यमाना प्रार्थयते—स्यादिति। विविधजन्मभिरितस्ततो भ्रमन्त्या अपि श्रुतिभिरिति पाठे काश्चित् श्रुतयस्त्वां सर्वत्रानासक्तं वदन्ति काश्चित्तु भक्तासक्तं काश्चित्कदाचित्तु दुःखेष्युदासीनप्रायमित्येवम्विधाः ताभिः शङ्कां प्राप्नुवत्याः योऽङ्घ्रिः यस्त्वमिति टीका विचार्य्या उपयातीति प्रथमपुरुषेणान्वयाय त्वम्पदस्य विशेषणत्वं य इत्यस्य विशेष्यत्वमङ्गीकृत्य समाधेया वा अन्यत्तैः तत्र च इति भीतस्येत्यादिवाक्यार्थयोजना इति अनेन प्रकारेणेत्यर्थः। अत्रानुरूपपदव्याख्या पूर्वसव्याख्यानादेवेति यद्वा सृतिभिर्गतिभिः तव तादृशनानाचेष्टाभिः पाठान्तरे श्रुतिभिः लक्ष्मीप्रियत्वादिकथनपराभिः तत्राप्यनासक्त्यादिविख्यापिकाभिश्च यद्वा तवान्यावतारे सीतादीनां परित्यागादिश्रवणैः अत्र च श्रीगोपीनां तथाद्यैवेदृशवचनश्रवणैश्च अनृतं तादृशविविधभ्रमः तस्यापवर्गो यस्मात् गीर्देवी व्यञ्जितार्थश्चायं तव सृतिभिर्नानावताररीतिभिर्भ्रमन्त्याः "देवत्वे देवहदेहा मा मानुषत्वे च मानुषी" इत्यादिविष्णुपुराणोक्तेः भवद्वल्लीलाकारप्रकटनेन त्वया सह विहरन्त्याः पाठान्तरे यथायथा तत्तदवतारे मत्प्रतिपादिकाः श्रुतयस्तथा विहरन्त्या इत्यर्थः। कीदृशोऽङ्घ्रिः अनृतस्यापवर्गो यत्र सः सच्चिदानन्दरूप इत्यर्थः। अन्यत् समानम् ॥ ४३ ॥ हे अच्युतेति कालदेशाव्यभिचारिगुणो भवानेव अन्यत्र गुणाभासमात्रेत्वपि व्यभिचाराज्ञान्य इति भावः। महादोषमप्याह—स्त्रीणामिति। अन्यत्तैः। तत्र किङ्करा इति किङ्करोमीत्याज्ञाप्रतीक्षका इत्यर्थः। क्षीरस्वामिना तथा तन्निरुक्तेः। यद्वा खरः पदेन ताड्यमानोपि तामनुगन्तृत्वात् गौर्भारवाहकत्वात् अश्वः कदाचित्तद्वोढृत्वात् श्वावा पिण्डीवाञ्च्छातस्तदाज्ञाकारित्वात् बिडालः तदुच्छिष्टभोक्तृत्वात् भृत्यः पूर्ववदिति यस्याः कर्णस्य मूलमवधानविषयम् उप समीपे न यायात् ईषदपि न गच्छेदित्यर्थः। युष्मदिति गौरवेण बहुत्वात् न च स्त्रीणामल्पबुद्धित्वात्तासामेव मनोहरा अपि तु परमविदुषामपीत्याह—मृडेति। अरिकर्षण हे शत्रुसूदनेति भवद्द्वेषेण ते मृतप्राया इति भावः ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अस्य वाञ्छया तस्य ते तवेत्यन्वयः। नृपशिखामणय इति साम्राज्यं सूचितम्, तदेवाह—ऐकपत्यमेकस्वामिकमपीत्यर्थः। यद्वा, त एव नृपशिखामणयः, न तु जरासन्धादय इति भावः। आदिशब्दात् प्रियव्रतादयः, नु प्रश्ने, किंवा अनुपदवीं त्वन्मार्गानुसारिमार्गमपि इह वनेऽपि किं सीदन्ति? हे अम्बुजाक्षेति सौन्दर्य्यमात्रदर्शनापेक्षयैवास्थिता इति भावः ॥ ४१ ॥ तु अपि, अस्य यथापेक्षं सर्व्वैरन्वयः। पादसरोजस्यैकस्यापि गन्धमीषत्सम्बन्धमपि आघ्राय श्रवणादिना कथञ्चिद्दूरतो लब्ध्वापि किं पुनः साक्षात्त्वां लब्ध्वेत्यर्थः। गुणालयस्येति गन्धस्यापि सर्वगुणनिधित्वं सूचितम्। तदेव दर्शयति—जनेत्यादिपदद्वयेन। अत एव सद्भिः श्रीनारदादिभिर्मुखरितम्, अविगणय्य अनादृत्य कान्यं श्रयेत, अपि तु सर्वा त्वामेवाश्रयितुमर्हतीत्यर्थः। यतो मर्त्या श्रीमार्कण्डेयादीनामिव त्वत्तो मरणस्यापि निवृत्तेरिति भावः। किञ्च, सर्वार्थसिद्धिरपि स्यादित्याह—अर्थेति। अन्यस्त्वात्मानमपि रक्षितुं स्वश्रेयश्च साधयितुं न शक्नुयादित्याह—सदोरुभयमिति। अन्यत्तैर्व्याख्यातम्। यद्वा, सन्तो मौनशीला अपि मुखरिता येन तं जनानां स्वभक्तानाम्, तापस्य आध्यात्मिकादितापलक्षणस्य तद्विच्छेदजस्य वापवर्गो वर्ज्जनं यस्मात्तं लक्ष्म्याः सर्वसम्पत्तेरालयम्। एवं विशेषणत्रयस्यास्य यथोत्तरं श्रेष्ठ्यम्। अन्यत् समानम् ॥ ४२ ॥ तमुक्तमाहात्म्यम्, अत एवानुरूपं भजनयोग्यमभजम्। अनुरूपत्वमेव पुनर्विशेषतो दर्शयन्ती तं विशिनष्टि—जगतामित्यादिना। अधीशम्—ईश्वरेश्वरम्, न च केवलं बहिरेवाधीशत्वम्, अन्तरपीत्याह—आत्मानमन्तर्यामिणम्, सत्कर्म्मसु प्रवर्त्तनादिना परमं गुरुं सुहृदञ्चेत्यर्थः। किञ्च, अत्रेति चकारद्वयं द्वयोरपि प्राधान्यार्थम्, एवमेषां त्रयाणां विशेषणानां यथोत्तरमनुरूपत्वे श्रेष्ठ्यम्। न केवलमस्मिन्नेव जन्मन्यभजम्, जन्मान्तरेष्वपि तवैव भजनं करिष्यामीति वदन्ती प्रेमभरदैन्येन तद्दुर्लभं मन्यमाना प्रार्थयते—स्यादिति। विविधजन्मभिरितस्ततो भ्रमन्त्या अपि, पाठान्तरे श्रुत्युक्त—कर्म्माचरणेन विचित्रजन्मानि प्राप्नुवत्या अपीत्यर्थः। कामपूरणमेव दर्शयति—य इति। वै प्रसिद्धौ, अनृतापवर्ग इति संसारदुःखध्वंसन-पूर्वकमित्यर्थः। अन्यत्तैर्व्याख्यातम्। तत्रानुरूपमिति तस्य पूर्वमव्याख्यानादत्रार्थगत्या व्याख्यार्थं गृहीतम्, किंवा लेखकभ्रमादिति। अथवा योऽङ्घ्रिः, अनृतोऽप्रियोऽनादृतो वा भवत्यपवर्गो मोक्षो यस्मात् सः। अन्यत् समानम् ॥ ४३ ॥ हे अच्युतेति—असाधारणमाहात्म्यामृतपरिपूर्णो भवानेव, अन्ये तु सर्वगुणरहिता दुष्टा इति भावः। तदेव दर्शयति—स्त्रीणामिति। स्त्र्यधीनेष्वित्यर्थः, इति कापुरुषत्वं सूचितम्। यस्याः कर्णस्य मूलं प्रान्तमपि उप समीपे न यायात्। युष्मदिति गौरवेण भक्तवर्गापेक्षया वा ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

जायन्तः जयन्तीपुत्रः ऐकपत्यं पत्यन्तरशून्यम् ॥ ४१ ॥ सन्मुखरितं सद्भिः स्तुत जनानामपवर्गहेतुं तव पादसरोजमाघ्राय का स्त्री तदनादृत्य अर्थविविक्तदृष्टिः पुरुषार्थविषयविविक्तज्ञानवती स्यात् त्वत्पादपद्मोपेक्षिणी चेत् न पुरुषार्थाभिज्ञेत्यर्थः ॥ ४२ ॥ या अपवर्गहेतुभूतं भगवन्तं वारयति जहाति सा नृताचेष्टेत्यर्थः ॥ ४३ ॥ खरगोश्वेति खरादितुल्याः ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

आस्थिता: पदवीं सुभ्रु प्राय: सीदन्ति योषित इत्यस्योत्तरमाह—यद्वाञ्छयेति। यस्मिन् त्वद्दास्ये वाञ्छया ये अङ्गादयो नृपोत्तमाः ऐकपत्यं ततो मत्वर्थीयोच् तद्राज्यं त्यक्त्वा वनं विविशुः तत्राङ्गो वेनस्य पिता वैन्य: पृथु: जायन्तो भरतः नाहुषो ययाति: ते नृपशिखामणयो हे अम्बुजाक्ष तव पदवीमास्थिता: इह सीदन्ति किं क्लिश्यन्ति किम्? अपित्विह पदवीं याथात्म्यं सीदन्ति उपासिषत उपासिषुः उपासनादशायामपि त्वदनुभवात्मकं सुखम् अनुबभूवु: इह लोके आस्थिता अवस्थिता: किम्? किन्तु त्वत्साधर्म्यमवापुरित्यावृत्त्यान्वय: ॥ ४१ ॥ अथात्मनोनुरूपमित्यस्योत्तरमाह—कान्यमिति श्लोकद्वयेन। गुणानां कल्याणानामाश्रयस्य तव पादसरोजयोर्गन्धं कथम्भूतं जनताया: जनसमूहस्यापवर्गं निरतिशयफलरूपं लक्ष्म्या: ममालयम् आश्रयं सेव्यमिति यावत्। सद्भिर्मुखरितमाघ्रातम् अविगणय्य अनादृत्य मर्त्यं मरणशीलं सदा उरुभयं यस्य स तमन्यं पुरुषं का वा स्त्री अर्थविवेकदृष्टिः स्वहिताहितविभागपरिशीलनपरा चेदाश्रयेत गुणाश्रयस्येत्यनेन गुणैर्हीना इत्येतत्पूर्वोक्तविधया व्याख्येयमित्यभिप्रेतम् ॥ ४२ ॥ अतस्त्वामेवाहमभजमित्याह—तमिति। तमुक्तविधं किञ्च अनुरूपं शेषित्वादिति भाव:। एवम्विधत्वात् त्वामेवाभजम् किञ्चित् प्रार्थयते स्यादिति। स्मृतिभिर्गतिभिर्जन्मभिरिति यावत्—

"राघवत्वे भवेत्सीता रुक्मिणी कृष्णजन्मनि। देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी" ॥

इत्युक्तावतारविशेषैरित्यर्थ:। भ्रमन्त्याश्च रन्त्यास्त्वत्सहचारिण्या मम तवाङ्घ्रिरेव अरणं शरणं गृहमाश्रय इति यावत् स्यात् कथम्भूतस्य योऽनृतस्य पापस्य तन्मूलसंसारस्य वा अपवर्गोऽवसानं यस्मात् तथाभूत: भजन्तमुपयाति अनुभजते तस्य तवेति सम्बन्ध: ॥ ४३ ॥ ये राज्ञां गुणा: राजपुत्रीप्सिताभूपैरित्यादिनोक्तास्तत्र सेर्ष्यं सशापं साङ्गुलिभङ्गञ्चाह द्वाभ्याम्। तस्यास्स्युरिति। हे अच्युत हे नृपाः स्त्रीणाङ्गृहेषु स्त्रीप्रधानकेषु गृहेषु खरा इव केवलं भारवाहा: गोबलीवर्दा इव नित्यं व्यापारक्लिष्टा: श्वान इवावमता: गृहपालनाद्यर्थं द्वारस्थाश्च बिडाला इव कृपणाः पदा ताड्यमाना अपि पुन: पुनरनुवर्त्तमानाश्च भृत्या आज्ञाधारकाश्च ते तस्या दुर्भगाया: पतयः स्यु: तामेव विशिनष्टि—यदीत्यादिना। हे अरिकर्शन शत्रुहन्! त्वं यस्या: कर्णमूलं कर्णपथं नोपयाया: नोपगतवान् तथा मृडविरिञ्च्यादिभिस्सभायां तेषां सभायां वा गीतास्तव कथाश्च नोपाययु: या त्वां त्वत्कथाञ्च कदापि न श्रुतवती तस्या: पतय: स्युरिति सम्बन्ध: ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

प्रायः सीदन्ति योषित इत्यत्र वक्ति—यद्वाञ्छयेति। नृपशिखामणयोऽङ्गादयो यस्य तव श्रीपादनिषेवणवाञ्छया ऐकाधिपत्यं राज्यं साम्राज्यं विसृज्य वनं विविशु: ते राजान: सीदन्ति किम्? तवानुपदवीं नास्थिता: किम्? आस्थाय न सीदन्तीत्यर्थः अम्बुजाक्षेत्यनेन नयनयो: स्निग्धं गुणं सूचयति ॥ ४१-४२ ॥ स्थिरबुद्धित्वेन पुरुषाणां विषादाभावेपि भीरूणां स्त्रीणां स स्यादिति मन्दाशङ्कां श्लोकद्वयेन परिहरति—केति। का स्त्री सततरमणकाङ्क्षिणी जनताया: जनसमूहस्यापवर्गो मोक्षो यस्मात्स तथा तं सद्भि: मुखरितं मुख्यत्वेनेरितं दत्तमुपदिष्टं प्रधानीकृतमित्यर्थ:। एवंविधं तव पादसरोजगन्धमाघ्राय निषेव्य पुनरत्र परत्र च कामरूपं त्वामविगणय्य मर्त्याशिषानाशशिरस्कसम्पदा कारणेन उरुभयं गुरुतरभीतिमन्तं जनं वृणीतेत्यन्वय:। कीदृशं त्वां लक्ष्म्या: सकलसम्पद आलयं शौर्यादिगुणानामालयम् अत एवाढ्यं च यस्त्वमविशेषेण स्त्रीपुरुषाणामर्थनीयगुणरत्नाकरस्तं त्वामहमभजं चैद्यादीन् हित्वेति शेष:। कथम्विधं त्वामनुरूपमनुकूलसौन्दर्यं जगतामधीशं जगतामीश्वराणां ब्रह्मादीनामपि सम्पत्प्रदम् अत एव आत्मानं तेषां स्वामिनं कीदृश्यहञ्च अर्थविविक्तदृष्टि: अर्थोऽयमिति विवेकी कृतदृष्टि: अव्यक्तज्ञानेत्यर्थ:। किम्बहुनेत्याशयेनाह—स्यादिति कीदृश्याः भ्रमत्या: भ्रम: ति अन्नं यस्या: सा भ्रमतिः तस्या: विपरीतज्ञानिनामशित्र्या इत्यर्थ:। केनेयमवगम्यत इत्यत उक्तं श्रुतिरिति। श्रुतिप्रमाणेन सिद्धाया इति शेष: "अभ्रमाभ्रमतामैत्री या वेदैरधिगम्यते" इत्यादिस्मृत्या च मुखन्तु वदने मुख्यं इति यादव: "तीत्यन्नम्" इति श्रुति:। पारत्रिककामरूपत्वं दर्शयति य इति। ये त्वां भजन्ति त उत एवानृतापवर्गं संसारान्मोक्षं यान्तीत्यन्वय: "तमेवं विद्वानमृत इह भवति" इति श्रुतिर्वैशब्देन गृहीता ॥ ४३ ॥ नृपाणां हेयत्वे दोषान्तरमाह—कस्या इति। हे अच्युत! स्वत: परतो वा च्युतिरहित भवतोपदिष्टा नृपाश्चैद्यादय: कस्या: स्त्रिय न कस्या अपि भवन्तीत्यर्थः। सर्वदोषेष्वाधिको दोषोयमिति भावेहान—यत्कर्णमूलमिति। हे अरिकर्शन मृडो रुद्र: रुद्रविरञ्चसभासु गीता युष्मत्कथा येषां नृपाणां कर्णमूलं नोपयायान्नोपगच्छति त इति शेष:। तासां स्युरितिपाठे यासां कर्णमूलं तासां स्त्रीणां ते नृपाः स्युरित्यर्थः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मर्त्यश्च स आ समन्तात् सदा सर्व्वदा च उरु भयं यस्य स च स: ॥ ४२ ॥ सृतिभिः गतिभिस्तव तादृशनानाचेष्टाभि: पाठान्तरे तवान्यावतारे सीतादीनां परित्यागादिश्रवणै: अनृतं तादृशविविध: भ्रम: तस्यापवर्गो यस्मात् ॥ ४३-४४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

(१३ श-श्लो०) "अस्पष्टवर्त्मनाम्" इत्यादिनार्थतः प्राप्तं मदुक्ताः सीदन्तीति यद्भगवद्वाक्य-तात्पर्यम्, तदन्यथाकारेण सत्यत्वेन स्थापयन्त्याह—यद्वाञ्छयेत्यादि। ऐकपत्यं राज्यं विसृज्य वनं विविशुः अतस्तद्भक्ता सीदन्त्येव, विरोधिलक्षणया तदेव सत्यत्वेन प्रतिपादितम्। वस्तुतस्तत्तेषां परमानन्दलाभ एव। तत् सर्वं विसृज्य तस्थुषां त्वद्भजनमेव परमानन्द इत्याह—ते तव पदवीं वर्त्म आस्थिताः। तथा कृत्वा त्वत्पदवीं त्वत्प्रेमानन्दसाम्राज्यं प्राप्ताः इह किं चित्रमिति वाक्यशेषः ॥४१॥ ननु भो भगवन्! मम तु कथा दूरादास्ताम्, का मर्त्या कन्या त्वां विनान्यं पतित्वेन श्रयीतेत्याह—कान्यमित्यादि। का मर्त्येत्यनुषङ्गः। तव पादसरोजगन्धम् कीदृशम्? लक्ष्म्यालयम् लक्ष्म्या आ सम्यक् लय आश्रयो वा यत्र ॥ ४२ ॥ अमर्त्याया मम त्वमेवानुरूप इत्याह—तं त्वानुरूपमभजमित्यादि। यो भवान् भजन्तमुपयाति भजति अनृतो मिथ्याकृतोऽपवर्गो मोक्षोऽपि यस्मात्, अर्थाद्भक्तैर्भजतो जनस्यापवर्गमपि मिथ्यात्वेन हापयित्वा स्वपरिजनत्वं सम्पाद्य भजतो जनानुपभजसि। (भा० १०।१४।२६) "अज्ञानसंज्ञौ भवबन्धमोक्षौ" इति मोक्षस्य मिथ्यात्वमेव। यद्वा, अनृतात्त्वदितरादुपवर्जयसि त्याजयसीति, अनृतादपवर्गो यस्मादिति विग्रहः। अतो मम त्वमेवानुरूपोऽसि, तवाप्यहं नृसृतिभिरवतारैस्त्वया सह भ्रमन्त्याः ॥ ४३ ॥ न त्वेवमेतोऽहं प्राक्सिद्धा नित्यप्रेयसी तेन त्वामभजम्; किन्तु स्त्रीमात्रस्यापि मध्ये या त्वत्कथा न श्रुतवती, तस्या एव भवतोपदिष्टाः पतयः स्युरित्यन्वयव्यतिरेकाभ्यां श्लोकद्वयेनाह—तस्याः स्युरित्यादि। ये स्त्रीणां गृहेषु खरादिवदधीना भवन्ति ॥ ४४-४५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अमर्त्याया मम त्वमेवानुरूपं, तेन त्वामेवाभजमित्याह—तं त्वानुरूपमित्यादि ॥ ४३ ॥ अतोऽहं प्राक्सिद्धा प्रेयसी, तेन त्वामेवाभजम्, किन्तु स्त्रीमात्रस्यापि मध्ये या त्वत्कथा न श्रुतवती, तस्या एव भवतोपदिष्टः पतिः स्यादित्याक्षेपेणाह—अन्वयव्यतिरेकाभ्याम्, तत्रान्वयं दर्शयति—तस्याः स्युरित्यादि ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

यत्त्वयोक्तम् अस्मत् पदवीमास्थिताः प्रायः सीदन्ति योषित इति तदपि जाड्यमित्याह—यद्वाञ्छयेति। जायन्तो भरतः ते तव पदवीम् आश्रितास्ते राजनः किं सीदन्ति किं ते निर्बुद्धयः यतो वयं राजकन्याः निर्बुद्धयः सीदाम इति त्वयोच्यते ॥ ४१ ॥ यच्चोक्तम् अथात्मनोऽनुरूपं वै भजस्वेति, तत्राह—कान्यमिति द्वाभ्याम्। आघ्रायेति या त्वदीयं यशो न श्रुतवती साऽन्यं श्रयतु नामेति भावः सद्भिर्भ्रमरैरिव मुखरितं स्तुतं जनताया जनमात्रस्यापि श्रवणादिभिरपवर्गसाधकम् अविगणय्य अविज्ञाय मर्त्या मानुषीति राक्षसप्रेतादिकन्यात्वन्यमाश्रयतामिति भावः। अन्यं कीदृशम् सदोरुभयं अर्थविविक्तदृष्टिरित्यविचारान्धा तु श्रयत्विति भावः। गुणालयस्येत्यनेन गुणैर्हीना इति यदुक्तं तदपि पराहतम् ॥ ४२ ॥ अहं तु श्रुतचरत्वद्गुणा मानुष्यकन्या विचारवतीत्यतस्त्वामेवाभजमित्याह—तमिति। अनुरूपं यत आत्मानं परमात्मनस्तव भजनमुचितमेवेत्यर्थः। स्वस्य लीलामानुषीत्वमेवाकस्मादतिदैन्योदये कर्ममानुषीत्वं मत्वा तद्भजनं प्रार्थयते—स्यादिति। सृतिभिर्विविधजन्मभिर्भ्रमन्त्या अपि मे, श्रुतिभिरिति पाठे तवान्यत्रावतारे सीतादीनां त्यागस्य श्रवणैरत्र च गोपीनां तथाद्यैवैतादृशवचनश्रवणैश्च भ्रमन्त्याः विविधशङ्कामयं भ्रमं प्राप्नुवत्या अपि यस्तवाङ्घ्रिः भजन्तमुपयाति कृपया तत् समीपं स्वयमेवायाति अनृतस्य विविधभ्रमस्यापवर्गो नाशो यस्मात् सः तेन तवाङ्घ्रिपद्ममेवास्मदादीनां सुखदं समरसञ्च शरणं भूयान्नतु मुखपद्मं यत् खलु विषयरसमेव कदाचित् मारकं विषमप्युद्गिरति कदाचित् सञ्जीवकममृतमपीति-द्योतितम् ॥ ४३ ॥ ये चोक्ता राज्ञां बहवो गुणाः राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिरित्यादिना तत्र सेर्ष्यं सशापं साङ्गुलिस्फोटञ्चाह—तस्या इति द्वाभ्याम्। खरा गर्दभा इव तत्पादताडिताः गावो बलीवर्दा इव भारवहनादिव्यापारक्लिष्टाः श्वान इव तद्गेहपालनार्थं तदन्येषु वैरकारिणः बिडाला इव तदुच्छिष्टभोजिनः भृत्या इव तद्दास्यकारिणो नृपास्तस्या अधमायाः पतयः स्युः यस्याः कर्णपथं त्वत्कथा न प्राप्नुवात् हे अरिकर्षण ममारीन् शिशुपालादीन् अन्तकनगरीं प्रति कर्षसि त्वमित्यर्थः ॥ ४४ ॥

गूढार्थदीपिनी

यस्य तव भजनवाञ्छया अङ्गवैन्यादयो नृपोत्तमा राज्यं विसृज्य वनं विविशुः। तस्य ते पदवीं मार्गमास्थितास्ते किं सीदन्ति क्लिश्यन्ति नैव अपि तु मुक्तिं प्राप्ता इत्यन्वयः। नु प्रश्ने ॥ ४१ ॥ गुणानामालयस्य तव गन्धवन्मनोहरं यश आघ्राय आसेव्य पुनस्तत् अवज्ञाय का मर्त्या अन्यपतिमाश्रयेत न कापीत्यन्वयः। सद्भिः मुखरितं वर्णितम्। जनतायाः अपवर्गं मोक्षस्वरूपम्। लक्ष्मीरपि आलीयते आसज्जतेऽस्मिन्। अर्थे परमार्थे विविक्ता विवेकवती दृष्टिर्यस्याः सा। उरुभयं मृत्युभययुक्तमन्यम् ॥ ४२ ॥ तं त्वामहम् अभजम्। परत्र परलोके च सर्वस्यापि कामपूरमात्मानं परमात्मानम्। वै एवार्थे। यो भजन्तं भक्तमुपयाति अनुगृह्णात्येव नात्र संदेहः तस्मादङ्घ्रिर्मे अरणं शरणं स्यादित्यन्वयः। सृतिभिर्नानाजन्मभिर्भ्रमन्त्या मे।

अनृतापवर्गः संसारमोचको यः ॥ ४३ ॥ यस्याः कर्णपथं युष्मत्कथा न प्राप्नुयात् तस्यास्ते पतयः स्युः । ते के । ये गृहेषु खरादिवद्वर्तमानाः । गावो वृषभाः । मृडः शिवः ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यदुक्तमास्थिताः पदवीं सुभ्रु प्रायः सीदन्ति योषित इति तस्य सिंहावलोकनन्यायेनोत्तरमाह—यद्वाञ्छयेति । यद्वस्य तव वाञ्छया अङ्गपृथुभरतययातिगयादयः ऐकपत्यम् एकाधिपत्यं राज्यं त्यक्त्वा वनं विविशुः ऐते तव पदवीं मार्गमाश्रितास्ते किं सीदन्ति नैव सीदन्ति अपि तु त्वां प्राप्नुवन्ति “मद्भक्ता यान्ति मामपि” इति स्मृतेः ॥ ४१ ॥ यदुक्तमथात्मनोऽनुरूपं वै भजस्वेति तस्योत्तरमाह— केति द्वयेन । गुणालयस्य स्वाभाविकगुणमन्दिरस्य गुणैर्हीना इति श्रीमुखवचनन्तु प्राकृतगुणाभिप्रायमिति भावः । प्राकृतगुणवर्जितस्य कल्याणगुणाश्रयस्य तव सन्मुखरितं सद्भिर्वर्णितम् । जनतायाः जनसमूहस्य अपवर्गम् अपवर्गदम् लक्ष्म्या आलयमाश्रयं सेव्यम् पादसरोजयोः गन्धं गन्धवन्मनोहरं यशः आघ्राय अपि तु शब्दः अप्यर्थः । अविगणय्य अवज्ञाय मर्त्या मनुष्यजातीया उपलक्षणञ्चैतत् यक्षराक्षसोरसादिस्त्रीणाम् अर्थे विविक्ता दृष्टिर्यस्याः सा चेत्स्त्री का सदोभयं यस्य तमन्यं श्रयेत आश्रयेतेत्यर्थः ॥४२॥ अहन्तु त्वदनुरूपरूपा त्वद्भार्या त्वां सर्वेश्वरं सर्वात्मानं सर्वपुरुषार्थपदं ज्ञात्वैवाभजमित्याह–तं त्वा त्वाम् अनुरूपमभजम् यतो भजनीयस्त्वमेवेत्याशयेन भगवन्तं विशिनष्टि—जगतामधीशमात्मानम् इहामुत्र च कामपूरमिति । सर्वेश्वरं सर्वात्मानं सर्वपुरुषार्थप्रदञ्च “देवत्वे देवदेहेयं मानुषत्वे च मानुषी” इति विष्णुपुराणप्रसिद्धेः पुनःपुनर्लीलावशाद्वियोगैर्भीता सती नैरन्तर्य्येण भजनं प्रार्थयते—सृतिभिर्गतिभिः प्रादुर्भावैरित्यर्थः । श्रुतिभिरिति पाठे व्रजसुन्दरीपरित्यागश्रवणैः अथात्मनोनुरूपं वै भजस्वेति त्वद्वचनश्रवणेन च भ्रमन्त्याः दोलायमानायाः स्वरूपैक्यभ्रमः सेव्ये देवतान्तरतुल्यताभ्रम इत्यादिरूपस्यानृतस्य भ्रमस्यापवर्गो नाशो यस्मात्स तथा भजन्तमुपयाति आत्मसात्करोति एवम्भूतो यो भवान् तस्य तवाङ्घ्रिः अरणं शरणं मे स्यात् ॥ ४३ ॥ ये चोक्ता—

राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः । महानुभावैः श्रीमद्भीरूपौदार्यबलोर्जितैः ॥

इति राजगुणास्तत्रोत्तरमाह— तस्या इति द्वाभ्याम् । हे अच्युत ! नित्यमूर्त्ते अरिकर्षण भजनविरोधिह्यज्ञानादिनाशन ! यस्याः कर्णमूलं युष्मत्कथा नोपयायात् न प्राप्नुयात् तस्याः भाग्यवर्जितायाः स्युः पतय इति शेषः । तत्र हेतुं दर्शयितुं तान् विशिनष्टि—स्त्रीणां गृहेषु औपस्थ्यसुखप्रधानेषु खरा इव केवलं भारवाहाः गावो बलीवर्दा इव नित्यं व्यापारक्लिष्टा श्वान इव तमोबहुलाः बिडाला इव हिंस्रा भृत्या इव व्याप्रियमाणाः ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रायः सीदन्ति योषित इत्युत्तरयति ॥ यद्वाञ्छयेति । तस्य तव वाञ्छया त्वत्प्रसादासादनकामनया नृपशिखामणयस्तच्छ्रेष्ठाः । अङ्गेत्येकदा विशकलितं पर्यायं सदम्बुजाक्षेत्यनेनान्वेति । अङ्गो नाम तद्देशेशः कश्चिद्राजा स च वैन्यो वेनापत्यं पृथुः । वेनः स जगत्पीडनादतद्गुणस्तत्पुत्र इति द्योतयितुं वैन्येत्युक्तिः । यथोक्तं चतुर्थतात्पर्ये । पीडां वेनेति च प्राहुर्वेनोऽसौ पीडनादितीति । जायन्तो जयन्तो भरतो दुष्यन्तस्य नामान्तरं जयन्त इति । नाहुषः । स्वार्थिकाणि स वा तत्पुत्र. ययातिर्वा गय आदिर्येषां ते । एकः पतिर्यस्य तत् तस्य भाव ऐकपत्यं आ सम्यगैकपत्यं च यस्य तत् । स्वार्थे वाऽऽपत्यं तैयक् एकाधिपतीत्यर्थः । राज्यं विसृज्य वनं विविशुर्निविविशिरे । ते सीदन्ति किं त इत्यन्वयं तेषां पदवीमास्थिता योषित इति शेषः । सीदन्ति असीदन् किमित्यन्वयः । अतो न योषिदनुक्तिदोषः । यद्वा ते सीदन्ति किं अनुपदवीं नास्थिताः किमित्येवान्वयः । न स्त्री स्वातन्त्र्यमर्हतीत्यादेस्तत्सुखदुःखसुखदुःखा इति न पृथग्वक्तव्या इत्यनुक्तिः । तदनुमतानां सतीनां सती भवतु तथा त्वं तु न मतेति कथमिति न वदाहं सेति दयापात्रमित्यप्याह ॥ अम्बुजाक्षेति । अम्बुजा कमला तस्यामक्षिणी यस्य स तत्सम्बुद्धिः ॥४५॥ अप्रतिपत्तिविप्रतिपत्तिभ्यां का स्त्री वृणीतं त्वामिति पद्यद्विकस्य यथावदर्थमाह ॥ सन्मुखरितं सद्भिः प्रधानीकृतमिति । नखमुखकुञ्जभ्यो र इति विहितो रः स्वार्थे । गतेरर्थवत्त्वमिति यथा । ततश्च मुखशब्दस्य मणिर्मुखं प्रधानं चेत्युत्तमस्य वचो भवेदिति मानात् । तथा मुखं प्रधाने प्रारम्भ इति नानार्थरत्नमालोक्तेश्च मुखशब्दस्य पर्यायो मुखरशब्दः । स च भावप्रधानः । मुखरत्वं सञ्जातं यस्य तत् । भावदीपे इदमेव निदर्शनीकृत्य चिन्तासन्तापलेपोद्भवमृतिमुखरेति मुखशब्द एव प्रधानवाचीति व्याकृतम् । पूर्वं तथाऽज्ञातं तथा ज्ञातमिति द्व्यर्थः । अनादितः सिद्धस्य करणायोगात् । दासीकृतामर इतिवत् । तत्रैवापेक्षितमध्याहृत्य मर्त्याशिषोरुभयमर्थविविक्तदृष्टिरिति पदद्वयं व्याख्याति । मर्त्याशिषेति मर्त्या नश्यन्ती आशीस्तया निमित्तभूतयोरुभयं यस्य स तं जनम् । अर्थः शाश्वतिको बिम्बरूपी हरिः प्रत्यर्थः प्रतिबिम्बरूपः सर्व इति विविक्ता विवेकं भेदं प्राप्ता दृष्टिर्ज्ञानं यस्याः सेति । अनेनार्थपदार्थपदात्पूर्वं प्रतिपदमध्याहार्यमित्यसूचयदिति ज्ञेयम् । कामरूपमपेक्षितसर्वस्वात्मकं त्वामविगणय्य । अथवा मर्त्याशिषोरुभयमिति पदमेकम् । मर्त्याशिषाया उरुभयं यस्य स तं जनम् । हलन्तत्वाट्टाबन्तता । अनेनोरुभयशब्दयोगे कथं न पञ्चमीति

परास्तम् । भाष्यकृताऽत एव तृतीयान्ततया पृथक् कृत्य व्याकृतवानिति मन्तव्यम् । अलक्षयित्वा भ्रमत्या इति साक्षाल्लक्ष्म्या भ्रमो भ्रमणं वा प्रतीयते न सम्भवतीत्यतः स्वयं व्याकृत्य तदविगानाय श्रुतिभिरिति व्याकृत्य मानमुदाहरति ॥ भ्रमतिरिति । भ्रम इत्यर्श आद्यचि तद्वाञ्जनः स तिरन्नं यस्याः सा भ्रमतिः । तस्या भ्रमत्याः । अर्थः सम्पन्नः क इत्यत आह ॥ मिथ्याज्ञानिभक्षिकाया इत्यर्थ इति । क्वचिद्भ्रमतिरिति सा भ्रमतीति च पाठद्वयं दृश्यते । तदतिदृश्य आद्यः । दृश्यो द्वितीयः । भ्रमन्तस्तिरन्नं यस्याः सेति तस्याः । भ्रमतीति च । य एवं वेद तत्सत्यं सदितिः प्राणस्तीत्यन्नं यमित्यसावादित्यस्तदेतत्त्रिवृदिति । व्यञ्जनमात्रस्य नित्यस्य ग्रहणादिकार उच्चारणार्थ इति सर्वैरेष्टव्ये भवत्वीकारोऽपीति तथोक्तिरितिकारान्ततया निर्देशोऽथवा भ्रमन्तः । तू अन्नं इ कोपेन यस्या भ्रमती । ई दुःखभावने कोप इति विश्वः । केचित्तु रित्यन्ननामेति विवृत्य पुनरिकार इच्छार्थक इति तद्रूपकामितान्नवती भ्रमतीति व्याचक्रुः । भ्रमतीति पाठो भ्रमा भ्रमतामत्रेति मानिकवर्णानुगुणः । परोऽपि वर्णवाचमेव तकारमत्र इकारस्तूच्चारणार्थो निबद्ध इत्यैतरेयव्याकृतावकृतवृत्तिम् । श्रुतिभिः श्रुतिप्रमाणेन । अभ्रमो न विद्यते भ्रमो यस्याः सा । भ्रमतामन्यथाज्ञानिनां या वेदैरधिगम्यते । तस्यै ते देव्यै नमोऽस्तु । सा लक्ष्मीरिति कुत इत्यत आह ॥ विष्णुवक्षःस्थलाश्रय इति । विष्णोर्वक्षःस्थलमेवाश्रयो यस्याः सा तत्सम्बुद्धिः । नारदीयोक्तेर्भ्रमतिस्तुतिभिः पदयोरर्थाशयः इत्यर्थः ॥ ततश्चायं श्लोकद्विकार्थः ॥ अङ्गादिपुरुषग्रहे नाङ्गना अप्युक्तप्राया इति सूचितम् । तदेव देवं प्रति देवी वितत्या त्यागे निमित्तमुपन्यस्य वक्ति ॥ केति । का स्त्री सन्मुखरितं सद्भिः प्रधानीकृतम् । दुर्मुखे मुखराबद्धमुखाविति नामरेरितोऽर्थोऽत्र सम्भवीति पराक्रान्तमाचार्यैः । तत्त्वेन ज्ञानं जनतापवर्गं संसारे जनानां न भवति । तापानां वर्गो ह्याध्यात्मिकादितापत्रयं यस्मादनन्तरम् । जनताया अपवर्गो मोक्षो येन स तम् । लक्ष्म्यालयं शोभापदम् । गुणालयाढ्यम् । न विद्यते लयः कदाचिदेषां ते च ते गुणाश्चेति गुणालयाः । विशेषणस्य परनिपातः । तदाढ्यं तत्सम्पन्नं तव पादसरोजगन्धमाघ्राय तमविगणय्य का स्त्री अर्थविविक्तदृष्टिबिम्बो हरिरेते प्रतिबिम्बा इति जनं प्रत्यर्थविविक्तज्ञाना मर्त्याशिषोरुभयं मर्त्याशिषा निमित्तोभयं जनम् । मर्त्याशिषयोभयमिति वा जनं चैद्याद्यं वृणीत । यद्येवमपि काचित्कामिनी वृणोत सा का कुत्सितेत्यप्यर्थः । ईहितमनु हितनीत्युक्तेरनुरूपं तमेतादृशपादसरोजगन्धोपेतम् । जगतामवान्तरभेदज्ञापनाय बहुवचनम् । आत्मानं गतम् । अत्र च परत्र च कामरूपम् । कामपूरमित्यपि पठन्ति । तथा तात्पर्ये चेति न विरोधः । जनतापवर्गमित्यस्यात एव प्रागस्माभिरर्थद्वयमभिहितमिति ज्ञातव्यम् । अहमभजं श्रुतिभिर्वेदप्रमाणेनाधिगम्याया भ्रमत्या मिथ्याज्ञानिभक्षिकाया मे तवाङ्घ्रिशरणं तद्रूपं रक्षयितृ स्यात् न । न केऽपि तत्काङ्क्षितवन्तः । काङ्क्षणेऽपि तत्फलं तेषामिति नेत्याह । ये भजन्ति तेऽच्युत तद्भजनानन्तरमनृतादास्थिरतायास्तथाविधात्संसारादपवर्गं मुक्तिं यान्तीति ततो भजन्ति । उतेति नापरथा मुक्तीति तदसन्धिर्ध्वन्यतेऽसन्धिना नरो विशिष्टमानवत्त्वाद्देवादयो मानवा तेषां यस्तापवर्गः पूर्वोक्तः स न येन तं चेत्यप्यर्थः ॥ ४६-४७ ॥ कस्याः स्युरिति श्लोके खरगोऽश्वबिडालभृत्या इत्यत्र द्वन्द्वसमासे भृत्याः स्वतन्त्रपदार्थ इति किञ्चिदुत्कृष्टताभायात्तथा न भीतव्यमिति समासेन सह योजनामतिनैच्या वेदिकां दर्शयति ॥ खरगोऽश्वविडालाद्भृत्याः स्त्रीणामिति । अनेन बुद्ध्या विविक्तं भृत्यपदं स्त्रीपदेनान्वेतीति कटाक्षितमाचार्यैरिति ज्ञेयम् । ततश्चायं श्लोकार्थः । हे अच्युत सर्वप्रकारेण च्युतिरहित । भवतोपदिष्टा वरत्वेन वरणीया इति ते गृहेषु खरवद्भारवाहकतया गोवन्नस्योता गाव इव तदधीनत्वेन श्ववत्तत्परिवेषणमार्गान्वेषणेन सारमेयवत् दुर्भुताशया बभ्रुवत् भृत्याः स्त्रीणाम् । एत एतस्याः पुरुषा भवेयुरिति भाषते । यत्कर्णमूलमिति । हे अरिकर्शन वैरिकर्षक । तत्कर्षणमेतऽभिमर्शनजमित्यप्याह । अरिणा चक्रेण कर्शनं येन योग्यतयाऽरिग्रहणं वाऽऽवृत्या केति ज्ञेयम् । मृडविरिञ्चसभासु हरहिरण्यगर्भसभासु । अत्र पुरहरपुरस्करणं जरासन्धसाल्वादींल्लक्षयित्वा । शिवश्च नः परागातिर्गुरुर्भवानरिर्हरिः । शिवोर्हलिङ्गमित्यलं सुमाल्यवस्त्रभूषणैः । समर्चितमित्याचार्योक्तेर्मुख्यत्वेन सम्प्रतिपन्नाभ्यां हरिविरिञ्चाभ्यां । एतदपि नैकान्त इति तदपि नैकस्यां कदाचित्सभायामित्याह सभास्वित्यनेन । गीता युष्मत्कथा कर्णमूलं यस्याः कर्णमूलं कर्णविवरं नोपायात्तस्याः कस्याश्चित्स्युर्नान्यस्येति भावः । यत्कर्णमूलं येषां मगधादय उपविष्टाः कस्याः स्युरिति न कस्या अपि स्युर्यादृशो यक्षस्तादृशो बलिरितिवत्ताद्दृश्या एव कस्याश्चित्स्युरित्यर्थः । न दाक्षिण्येन गीता सेति वाऽऽह । मृडविरिञ्चसभासु सुगीतेति ॥ ४८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदुक्तं भगवता 'अस्पष्टवर्त्मना'मिति 'तन्मार्गानुवर्तिनः सीदन्ती'ति, तत्राप्यन्यार्थप्रतीतेः अवाक्यार्थधीजनकत्वात् ध्वनिप्रकारेणैव निर्णय इत्याह **यद्वाञ्छयेति** । **योषित** इति पदमुपलक्षकम् । तेन पुरुषा अपि सीदन्तीति वक्तव्यम् । **स्त्री**पदमप्रौढान्यवृत्तीति । अवसादस्तत्रैव लयः । भगवानग्रे गत इति तेन मार्गेण जिगमिषया राज्यादिकं विसृज्य, राज्यादिभ्यो भगवद्दर्शनं महदिति तद्वाञ्छया नृपशिखामणयः अम्बरीषप्रभृतयः वनं विविशुः । भगवति समागतेऽपि ते न समागता इति पूर्वमपि न व्याघुट्यागता इति पदवीमन्वेव अवसन्नाः भगवन्मार्ग एव मार्गप्रदर्शका इव स्थिताः । अन्यथा भगवन्मार्गो न प्रवर्तेत । अतः अवसादवाक्यं यथार्थम्, तथापि बहव एव प्रवर्तन्त इति न दूषणम् । नन्वेकत्र निरूपणे कृते कथं सर्वत्र युज्यते, तत्राह **ते इहास्थिताः किमिति** । **ते अङ्गादयः** । **अङ्गः** पृथोः पितामहः । **वैन्यः** पृथुः । **जायन्तो** भरतः जयन्त्याः पुत्रः । **नाहुषो**

ययातिः । गयः प्रियव्रतवंशजः । एते इह आस्थिताः किम्, आमरणान्ते कि गृह एव स्थिताः, अपि तु वने प्रविष्टाः । तत्रैवावसन्नाः । तेन विपरीतार्थे ये गृहे स्थिताः, त एवावसन्नाः, नतु त इति वाञ्छामात्रेण स्वकीयं सिद्धमपि राज्यं परित्यजन्ति। वने स्वावसादमपि सहन्ते । तत्र भगवन्तं प्राप्य अधमराज्यपरित्यागः किमाश्चर्यमिति भावः ॥ ४१ ॥ 'निष्किञ्चना वयं शश्व'दिति भयन्यायेनैव निवारितमपि लक्ष्म्याश्रयत्वेन तन्निवारयन्नाढ्याभजनमपि विपरीततया व्यावर्तयति **कान्यं श्रयीते**ति। **का वा स्त्री** तव पादसरोजगन्धमाघ्राय अन्यं लशुनामेध्यरूपं आश्रयेत । अनेनोत्कर्षविषयः तत्र स्वरुचिश्चेति निरूपितम्। क्वचिन्निन्दितमप्येतादृशं भवतीति तद्व्यावृत्त्यर्थमाह **सन्मुखरित**मिति । सद्भिर्मुखरवत् भगवच्चरणारविन्दो वर्णित इति। फलसाधकत्वमाह **जनतापवर्ग्य**मिति । जनतायाः प्राणिमात्रस्य आपवर्ग्यमपवर्गमभिव्याप्य यावत्सुखं तत्सर्वं यस्मादिति। प्रमाणं फलं चोक्तम् । किञ्च । **स्त्रीणां** मुख्या लक्ष्मीः सम्पत्तिरूपा च । तस्यास्तदेव गृहमिति स्त्रीभिः सर्वाभिस्तत्रैव स्थातव्यम्। नन्वेवं सति कथं सर्वासामन्य एव भर्तारः । तत्र तुशब्देन पूर्वपक्षं निराकरोति **अविगणय्ये**ति । समागतमुपस्थितं भगवन्तमविगणय्य कापि नान्यं श्रयते । किञ्च । मर्त्या स्वयं मरणधर्मा मरणनिवर्तकमात्मदं भगवन्तमेव सेवितुमर्हति, नतु **सदोरुभयं** सर्वदैव कालादेः सकाशात् अधिकं भयं यस्येति । महद्भयं मरणात्मकम् । स्वस्य कदाचिद्वा तद्भवेत् । सेव्यस्तु सर्वदैव तादृशभयवानित्यभजनेहेतुरुक्तः । किञ्च । गुणालयस्य तव । अनन्तगुणानामालयरूपो भवानेव । ततो या गुणरूपा भविष्यति, सा त्वामेव श्रयते, दोषरूपा त्वन्यमिति स्थितिः । ननु बह्व्य एव गुणरूपाः अन्यमपि भजन्ति, अन्यथा भगवत्समानकाले अन्येषां विवाहो न स्यात्, तत्राह । अर्थे विवक्ता दृष्टिः यस्या इति । अविचारेण अर्थविवेचनासामर्थ्येन वा अन्यभजनम् । प्रयोजनतारतम्यदृष्टौ तु मर्त्यायाः गुणरूपायाः लक्ष्म्यंशायाः पूर्वोक्तन्यायेन भगवदाश्रयणमेव युक्तमित्यर्थः । अनेन समताविवाहः साधारणः, उत्कृष्टविवाह एव कर्तव्य इति 'तयोर्विवाहो मैत्री' इति पक्षः परिहृतः । अन्यथा लक्ष्म्यादीनां विवाहो नोपपद्येत ॥ ४२ ॥ 'वैदर्भ्येतदविज्ञाये'त्यस्योत्तरमाह **तं त्वानुरूप**मिति । अज्ञानेन विवाहे हि अन्यवरणं कर्तव्यं भवेत् । ज्ञात्वैव वृत इति स्वज्ञातमर्थमनुवदति । **तं** पूर्वोक्तलक्ष्मीपतित्वादिधर्मयुक्तम् । **त्वा**मिति तादृश एवावतारेऽपि न प्रच्युतस्वरूपस्त्वम्। ननु तथापि समविवाह एवोचित इतिचेत् । तत्राह **अनुरूप**मिति । मम तु त्वमनुरूप एव, उत्कृष्टत्वात्, तव परमहं नानुरूपा। तस्मादयमुपालम्भः न मां प्रति वक्तव्यः । किञ्च । अतिनिकृष्टैरपि ईश्वरः सेव्य एव स्वशक्त्यनुसारेण, तदाह **जगतामधीश**मिति। किञ्च । सर्वेषामात्मा सेव्यः । सर्वं स्वार्थमिति । भवांस्त्वात्मा । किञ्च । पुरुषार्थप्रदः सेव्यः । स भवानित्याह **अत्र च परत्र च कामपूर**मिति । चकारादिह लोके परलोकसुखानि प्रयच्छति । स्वर्गादिसुखानि । परलोके च जातिस्मरणादिना ऐहिकं फलं प्रयच्छतीति चकारौ । काममभिलषितार्थं तस्य पूररूपं पूरयति प्रवाहरूपं वा । ननूक्तं 'वयमुदासीना' इति, अतः कामाभावात् कथं त्वत्कामपूरणमिति चेत् । तत्राह **स्यान्मे तवाङ्घ्रशरण**मिति । संसारे निराश्रये परिभ्रमन्त्या मम तव चरणः आश्रयोऽस्तु । कामनापूरणाद्यभावेऽपि चरणे आश्रयत्वं न विहन्यते । नन्वाश्रयमात्रेण भगवांश्चेन्न किञ्चित्कुर्यात्, तदा कि भवेदित्याशङ्क्याह **यो वै भजन्तमुपयात्यनृतापवर्ग** इति । **अनृतापवर्गो मोक्षः**, विशेषेण अप्रार्थितोऽपि भगवता अदत्तोऽपि, **भगवद्भक्तमु**पयाति, भगवच्चरणामोद इव । अनृतस्य भगवत्यपवर्ग एव । तत्र गतः सीमान्ते गत इव तदभावमवश्यं प्राप्नोति । अतो विशेषफलाभावेऽपि मोक्षस्तु सिद्ध एव इति ॥ ४३ ॥ नन्वेतावदेव चेत् प्रार्थ्यम्, तदा विषयभोगानन्तरमन्यभजनेऽपि शास्त्रार्थानुसारेणापि भजने मोक्षो भवेत्, अत उभयं परित्यज्य विषयाधिकारिणः कथं मद्भजनमिति चेत् । तत्राह **तस्याः स्यु**रिति। सत्यं या तादृशी प्राकृती, तस्याः पतयः त्वया गणिताः चैद्यादयो भवन्तु सर्वथा विषयपूरकाः । या केवलं विषयानपेक्षते। सर्वा एवापेक्षन्त इति चेत् । तत्राह **यत्कर्णमूलं नोपयाता युष्मत्कथा** इति । कथानां कर्णप्रवेशे यथा विषयाभिलाषा गच्छति, तद्वक्ष्यति । कथं राज्ञां सर्वथा विषयपोषकत्वम्, न भगवत इति वैलक्षण्यं निरूपयति **स्त्रीणां गृहेष्वि**ति । स्त्रीणां शयनभोजनविहारमलत्यागादिगृहेषु ये स्वोत्कर्षं परित्यज्य तत्सेवापरा भृत्या भवन्ति, यथा गृहदासाः । दास्येऽपि चतुर्धा विशेषमाह **खरादिपदैः** । गर्दभो हि तदपेक्षितं जलादिकं तत्कर्तव्यं स्वयं करोति । तथा ये भार्याकर्तव्यं स्वयं कुर्वन्ति निरालस्याः । यथा वा गावो वृषभाः शकटैस्ता वहन्ति दुह्यन्ति वा, स्वसर्वस्वं प्रयच्छन्ति, इष्टदेशेषु स्वयं भारमूढ्वा, तथा ताः प्रापयन्ति । यथा वा श्वानः रात्रौ गृहस्वामिनि शयाने स्वयमनिद्रः तत्पालनं करोति, तथा नीचा भूत्वा शरीरेण पालयन्ति । एवं स्थितिगतिशयनेषु सेवकत्वमुक्तम् । एवमपि सति यदि भोगस्तुल्यो भवेत्, भोगार्थं वा भवेत्, तदा न काचिच्चिन्ता, किन्तु तच्छेषस्य निकृष्टस्यैव तदुच्छिष्टस्य तदनुपयुक्तस्य वा भोग इति बिडालदृष्टान्तनाह । स हि स्त्रीणां पादयोः भक्षणयाचनार्थं अनेकां चेष्टां करोति, ततस्ता दुग्धं पीत्वा भाण्डनिर्यासमिव प्रयच्छन्ति कदाचित्, तथा ये निकृष्टा नियतभोगाः तादृशैरेव स्त्रीणां भोगः सम्पादयितुं शक्यते । विषयाभिलाषिण्यः तादृशमेवापेक्षन्ते । कथाः कर्णे साधारण्येन प्रविशन्ति सर्वेषामेवेति यादृशप्रवेशेन कार्यं कुर्वन्ति तद्वक्तुमाह **कर्णमूल**मिति । अन्तःप्रवेशे मूलसम्बन्धः कथानाम् । विषयाभिलाषनाशकत्वे हेतुमाह **अरिकर्षणे**ति। विषं यान्तीति विषयाः अरयः तान् कर्षत इति शत्रुनाशको विषयनाशको भवति । तत्कथास्तद्रूपाः । ता अप्यच्युताः स्वनाशशङ्कारहिताः । विषयैस्तन्नाशः कर्तुं न शक्यत इति । तत्रापि बहुरूपाः एकरूपाद्भगवतोऽतिबलिष्ठाः । तत्राप्युप समीपे स्वयमेव

समागता बह्व्यः। **युष्मत्कथा** इति समासेन तासां नित्यं भगवत्सहभाव उक्तः। तासां विषयनिवर्तकत्वे युक्तिमुक्त्वा, प्रमाणमाह **मृडविरञ्च्यसभासु गीता** इति। प्रलयोत्पत्तिकर्तारौ तौ। तदुभयं तदधीनमेवेति तेषामपेक्षितम्। तत्सभासु गीयते, यत्तयोर्दुर्लभमभिलषितं च। प्रत्यहं क्रियमाणासु सर्वास्वेव सभासु भगवत्कथा एव गीयन्ते। अनेन तयोरपि उत्कृष्टो भगवानिति निरूपितम्। ताभ्यां कथानां फलं निर्णीतमिति प्रमाणनिरूपणे तथोक्तम्। तावेव हि मुख्याविति। अनेन स्त्रीणां शापो निरूपितः। या भगवत्कथा न शृणोति, सा तादृशं पतिं प्राप्नोतीति। सामान्यतः स्त्रियो दुष्टा इति हि योनिदोषं मत्वा, भगवानेवं निराकरोतीति सा मन्यते। अन्यथा पुरुषानसमानपि भजने अनिषिध्य मामेव कथं निषेधतीति ॥ ४४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

यद्वाञ्छयेत्यत्र। **पूर्वमपीति**। भगवदागमनात्पूर्वमपि नागताः। आगमनानन्तरमपि नागता इत्यर्थः। **कान्यं श्रयीते**त्यत्र। **मुखरवद्वर्णयन्ति** मुखरयन्ते। 'प्रातिपदिकाद्धात्वर्थे बहुल'मिति बाहुलकाण्णिङ्। तथावर्णितं मुखरितमित्यर्थः। अपवर्गमभिव्याप्येत्यापवर्ग्यम्, अव्ययीभावः। तथा वर्तते इत्यापवर्ग्यं सुखं प्रत्यक्षा क्रियेतिवदर्शआद्यच्। जनतायास्तद्यस्मादिति विग्रहमभिप्रेत्याहु**र्जनताया** इति।

श्रीसुबोधिनी–सारः

यस्य तव वांछया नृपाणां नृपेषु वा शिखामणयो मस्तकरत्नभूता अंगेति सम्बोधनम् राजा वा वैन्यः पृथुर्जायंतो भरतो नाहुषो ययातिर्गयः प्रसिद्धस्ते आदिर्येषां ते ऐकपत्यं चक्रवर्त्तिराज्यं विसृज्य त्यक्त्वा वनं विविशुः। हे अम्बुजाक्ष ते तवानुपदवीं ये इह लोके आस्थितास्ते किं सीदन्ति दुःख्यन्ति अपि तु न सीदन्त्यवसादनोत्तरम् ॥ ४१ ॥ अथात्मनो रूपं वै भजस्व क्षत्त्रियर्षभम् इत्युक्तमाक्षिपति गुणानामालयस्यास्पदस्य तव लक्ष्म्या आलयं तत्सेव्यं सद्भिर्मुखरितं वर्णितं जनताया जीवसंघस्यापवर्गं मोक्षरूपं पादसरोजयोर्गंधमाघ्राय तम् अविगणय्यानादृत्य मर्त्या मरणधर्मिकाः अर्थे विविक्ता पूता दृष्टिर्यस्याः सा का स्त्री सदा उरु महद्भयं यस्य तमन्यं श्रयेत सेवेत न कापि "बहिर्मुखा भजन्त्यन्यं न तथाहमनिंदिता" इत्युक्तेः ॥ ४२ ॥ अनुरूपं तुल्यमात्मानं जगतामधीशमत्र परत्र च लोकद्वये कामपूरं वांछितप्रदं तं त्वा त्वाम् अहमभजमिति मत्कौशल्यं किं चाऽनृतस्य मिथ्यासंसारस्यापवर्गो नाशो मोक्षो वा यस्मात्स यो भगवान् भजंतमुपयात्यात्मसात्करोति तस्य तवांघ्रिश्चरणं सृतिभिर्देवादजन्मभिर्भ्रमन्त्या मे ममारणं शरणं स्यात् वै एव ॥ ४३ ॥ "राजपुत्रीप्सिता भूपैः" इति राज्ञां गुणानुक्तानाक्षिपति। हे अरिकर्षण मृडः शिवो विरिंचिर्ब्रह्मा तयोः सभासु गीता युष्माकं कथा यस्याः कर्णमूलं श्रोत्रपथं नोपयायात् नेयात् तस्या मंदभाग्यायाः स्त्रियो भवता त्वयोपदिष्टा उक्ता नृपाः स्युः हे अच्युत कीदृशास्ते इत्यत आह—स्त्रीणां गृहेषु खरादिरूपाः गर्दभा इव भारवाहा गावो बलीवर्दा इव व्यापारक्लिष्टाः श्वान इवापमानपात्राः बिडाला इव कुरूपाः भृत्या इव वश्याः ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यच्चास्पष्टवर्त्मनां पुंसां पदवीमास्थिता योषितः सीदन्तीति स्वजने क्लेश उक्तस्तत्रोत्तरमाह—यद्वाञ्छयेति। यस्य तव वाञ्छया प्राप्तीच्छया ये अङ्गादयो नृपशिखामणयो राजोत्तमा ऐकाधिपत्यं एकः स्वयमधिपतिर्यस्मिन्नेतादृशमपि स्वराज्यं विसृज्य त्यक्त्वा त्वत्प्राप्तिसाधनत्वद्भजनार्थं वनं विविशुस्ते तव पदवीं मार्गमास्थिताः किमिह संसारे सीदन्तीति इतरवत् क्लिश्यन्ति? नैव क्लिश्यन्ति। तेषां मुक्तेः प्रसिद्धत्वादित्यर्थः। "भजनावस्थायामेव त्वद्भक्तानां त्वत्कृपादृष्ट्या सर्वसन्तापनिवृत्तिर्भवति, कुतः क्लेशशङ्कावकाश" इति सूचयन्ती संबोधयति—अम्बुजाक्षेति। अङ्गो वेनस्य पिता, वैन्यः पृथुः, जायन्तो भरतः, नाहुषो ययातिः, गयोपि प्रियव्रतवंशजः ॥ ४१ ॥ अथात्मनोनुरूपमन्यं भजस्वेति यदुक्तं तस्योत्तरमाह—केति द्वयेन। सद्भिर्विवेकिभिर्मुखरितं कथितं तव पादसरोजगन्धमाघ्राय तव चरणकमलप्रभावं श्रुत्वा अविगणय्य त्वामनादृत्य मर्त्या स्वयं मरणस्वभावा का स्त्री अन्यं पुरुषं श्रयेत भजेतेत्यन्वयः। अहं तु साक्षादेव तव पादसरोजगन्धमाघ्रातवती, अतः कथमन्यं भजेयमिति भावः। ननु 'सारासारविवेकिनो हि सर्वं त्यक्त्वा मच्चरणप्रभावं किमिति वर्णयन्ति' तत्राह—जनतापवर्गमिति। जनताया जनसमूहस्य श्रवणकीर्तनादिपरस्य अपवर्गं अपवर्गस्य मोक्षस्य साधकमित्यर्थः। 'सौभाग्यातिशयप्रापकं च' इति सूचयन्त्याह—लक्ष्म्यालयमिति। लक्ष्म्या अप्यालयं आश्रयं सेव्यमित्यर्थः। तुशब्देनात्र सन्देहो नास्तीति सूचयति। 'मर्त्यम्' इति पाठे तु नान्यो भजनयोग्यो मरणशीलत्वादिति पुरुषविशेषणम्। भजनयोग्यत्वे हेत्वन्तरमप्याह-सदोरुभयमिति। जीवतोपि सदोरु अधिकं भयं यस्य कर्माधीनत्वात् इत्यर्थः। गुणैर्हीना इत्यस्य परिहारं वदन्ती तद्भजने हेत्वन्तरमप्याह—गुणाश्रयस्येति। ज्ञानैश्वर्यबलादिगुणार्णवस्येत्यर्थः। ननु 'कथं तर्हि स्त्रियोऽन्यपुरुषासक्ता भवन्ति' इत्याशङ्क्य तासामज्ञत्वं सूचयन्त्याह—अर्थेति। अर्थे विविक्ता दृष्टिर्यस्याः सा स्वहिताहितविभागपरिशीलनपरा चेदित्यर्थः ॥ ४२ ॥ तमुक्तप्रभावमनुरूपं योग्यमेव त्वा त्वामभजं उत्कृष्टत्वात्। उत्कृष्ट एव हि याः पतिर्योग्यो भवतीत्युत्कर्षमेव स्पष्टयन्ती विशिनष्टि—जगतामधीश इति। सर्वस्यात्मानमिति।

अत्रास्मिन् लोके परत्र परलोके च सर्वान् कामान् विषयान् पूरयति प्रापयतीति तथा तमिति । इतोऽग्रेपि तद्भजनं प्रार्थयते—स्यादिति । यो वै तवाङ्घ्रि भजन्तं पुरुषं उपयाति अनायासेन स्वयमेव प्राप्तो भवति संसृतिभिर्जन्मभिर्भ्रमन्त्या मे मम अरणं सेव्यतयाऽऽश्रयः स्यादित्यनुगृहाणेति शेषेणान्वयः । 'चरणप्राप्त्यापि किम्' इत्यपेक्षायामाह— अनृतस्य देहादावहं ममाभिमानपूर्वकं नानाविधदुःखस्यापवर्गो निवृत्तिर्यस्मात्तथाभूत इति ॥४३॥ यत्तु भगवतोक्तं 'राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः इति' तदसहमाना तान्निन्दत्याह—तस्य इति द्वाभ्याम् । 'मम तु त्वमेव योग्यो गुणतः स्वरूपतश्च च्युतिरहितत्वात्' इत्याशयेन सम्बोधयति— अच्युतेति । भवतोपदिष्टाः विभूत्यादिगुणवत्त्वेन संस्तुता भूपास्तस्याः स्त्रियाः पतयः स्युः । 'मम तु न ते वरणयोग्या' इत्याशयेनाह—स्त्रीणामित्यादिना । स्त्रीप्रधानेषु गृहेषु खरा इव तासां भारवाहकाः, गावो बलीवर्दा इव सर्वदा व्यापारक्लिष्टाः, श्वान इवावमत्ताः गृहादिरक्षणपराश्च, विडाला इव कृपणा हिंस्रा उच्छिष्टभक्षकाश्च, भृत्या इवाज्ञानुसारिणः। तस्या इति कस्या इत्यपेक्षायामाह— यत्कर्णेति । कामक्रोधादिशत्रुनिर्वर्तिका त्वत्कथैव । 'तच्छ्रवणरहितायाः कामाद्यभिभूतायाः कथं विवेकः स्यात्' इत्याशयेन सम्बोधयति—अरिकर्शनेति । यस्याः दुर्भगायाः कर्णरन्ध्रं कर्णमूलं युष्मत्कथा नोपयायात् नोपगच्छेत् । तत्कथामाहात्म्यमाह—मृडविरिञ्चिभ्यां तत्र तत्र सभासु गीतेति । भगवद्भक्ताभिप्रायेण युष्मदिति बहुत्वं विवक्षितम् ॥ ४४ ॥

अन्वितार्थप्रकाशिका

अस्पष्टवर्त्मनामित्यत्र त्वां भजन्तः सीदन्तीत्युक्तं तदपि मन्दमेवेत्याह—यदिति । हे अम्बुजाक्ष ! अङ्गो वेनस्य पिता वैन्यः पृथुः जायन्तो भरतः नाहुषो ययातिः गयोऽपि प्रियव्रतवंशजः इत्यादयः नृपशिखामणयो राजोत्तमा ऐकाधिपत्यम् एकः स्वयमधिपतिर्यस्मिन्नेतादृशमपि । स्वार्थे ष्यञ् । स्वराज्यं विसृज्य त्यक्त्वा यद्वाञ्छया त्वत्प्राप्तिसाधनत्वद्भजनार्थं वनं विविशुरतस्ते तव पदवीं मार्गमास्थिताः किमिह संसारे सीदन्तीति इतरवत् क्लिश्यन्ति न क्लिश्यन्ति तेषां मुक्तेः प्रसिद्धत्वात् ॥ ४१ ॥ अथात्मनोऽनुरूपमित्यत्राह—केति । जनताया जनसमूहस्य श्रवणकीर्तनादिपरस्य अपवर्गरूपं लक्ष्म्या अपि आलयम् आश्रयं सद्भिर्विवेकिभिः मुखरितं कथितं ज्ञानादिगुणानामालयस्य इत्यनेन गुणैर्हीना इत्यपास्तम् । तव पादसरोजगन्धमाघ्राय तव चरणकमलप्रभावं श्रुत्वा अर्थे विविक्ता दृष्टिर्यस्याः सा स्वहिताहितविभागपरिशीलनपरा मर्त्या मानुषस्वभावा अविगणय्य त्वामनादृत्य का स्त्री सदा उरु अधिकं भयं यस्य तम् । यद्वा । मर्त्यश्चासावासमन्तात्सदा उरु भयं यस्य स च तमित्येकं पदम् । अन्यं पुरुषं श्रयेत भजेत । राक्षसादिस्वभावाविचारान्धा त्वन्यं श्रयेतेति ॥ ४२ ॥ तमिति ॥ अतः जगतामधीशं सर्वस्यात्मानम् अत्रास्मिन् लोके परत्र परलोके च सर्वान्कामान् विषयान् पूरयति प्रापयतीति तया तं त्वाम् अनुरूपं योग्यमेवाहमभजम् । अनृतस्य संसारस्यापवर्गो निवृत्तिर्यस्मात् तादृशो यो भवान् तवाङ्घ्रि भजन्तं पुरुषम् उपयाति आत्मसात्करोति । अनायासेन स्वयमेव प्राप्तो भवति तस्य तवाङ्घ्रिः । यद्वा । य इत्यङ्घ्रेरेव परामर्शकः सृतिभिर्जन्मभिः श्रुतिभिरिति पाठे अर्थवादबहुलकर्मश्रवणैः भ्रमन्त्या मे मम अरणं सेव्यतयाश्रयः स्यादित्यनुगृहाणेति शेषः ॥ ४३ ॥ राजपुत्रीप्सिता भूपैरित्यत्र लोकपालविभूतित्वादयो राज्ञां गुणा उक्तास्तत्र सेर्ष्यमाह—तस्या इति ॥ हे अच्युत ! हे अरिकर्शन ! ये राजानः स्त्रीणां गृहेषु स्त्रीप्रधानेषु गृहेषु खरा इव तासां भारवाहकाः पादताडिता अप्यनुगन्तारश्च गावो बलीवर्दा इव सर्वदा व्यापारैः परिक्लिष्टाः श्वान इवावमताः गृहादिरक्षणपराश्च विडाला इव कृपणा हिंस्रा उच्छिष्टभक्षकाश्च भृत्या इवाज्ञानुसारिणः भवतोपदिष्टाः विभूत्यादिगुणवत्त्वेन संस्तुता नृपास्तस्या दुर्भगायाः स्त्रियाः पतयः स्युः । यस्याः कर्णमूलं मृडविरिञ्चसभासु गीता युष्मत्कथा नोपयायात् मम तु न ते वरणयोग्याः ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आस्थिताः पदवीं सुभ्रु प्रायः सीदंति योषित इति यदुक्तं तदपि जाड्यमित्याह—यद्वांछयेति । यस्य तव वांछया ध्यानेच्छया नृपश्रेष्ठा अंगादयः ॥ ऐकपत्यं राज्यं त्यत्काननं विविश्रुः । तस्य तव पदवीं मार्गं ये आस्थिता अश्रितास्ते इह लोके किं सीदंति न सीदंति ॥ अपितु तव परमानंदमयमक्षरपदमेव गताः । अतो योषिदवसादवाक्यं जाड्यमिति भावः अंगो वेन पिता वैन्यः पृथुः जायंतो भरतः नाहुषो ययातिः ॥ ४१ ॥ आत्मनोनुरूपमिति यदुक्तं तं उत्तरमाह केति द्वाभ्यां सन्मुखरितं सद्भिरात्मारामैरपि मुखरितं वर्णितं जनतापवर्गं जनतायाजनसमूहस्यापवर्गं मुक्तिरूपं यद्वा जनानां ये तापास्तेषां वर्गो वर्जनं यस्मात्तं लक्ष्मीः सर्वसंपत्त्यधिपाया आलयं निवासस्थानं गुणानां सत्यशौचसौंदर्यादीनामसंख्यानां आलयस्य निवासभूतस्य तव अनेन गुणैर्हीना इत्युक्ता गुणहीनता प्रत्युक्तापादसरोजगंधमाधाय तमविगणय्यानादृत्य मर्त्या मरणधर्मा अर्थे साध्यप्रयोजने विविक्ताविचारकुशला दृष्टिर्यस्याः साकास्त्री सदा उरु बहुभयो यस्य तं । अन्यं पतिं श्रयेत सेवेत ॥ गुणालयस्येति पदेन हरेः सकाशादन्येषां मूर्खत्वमुक्तं हरिस्तु सर्वदा सुखनिधिः स च सर्वस्त्रीभिर्वरणीय इति भावः ॥ ४२ ॥ अतस्त्वामेवाहमभजमित्याहतमिति । आत्मानं परमात्मानं । कामपूरकं त्वामहमभजं । सृतिभिर्देवमनुष्यादिषु संसरणैर्जनिभिरिति यावत् । भ्रमंत्या मे मम तवांघ्रिः

अरणं शरणं स्यात् यस्तवांघ्रिः अनृतस्य संसरणस्य अपवर्गो नाशो यस्मात्तथाभूतः सन् त्वां भजंतं जनं उपयाति समीपे गच्छति अतो भवभीतानां तवांघ्रि शरणमेवानुरूपमिति भावः ॥ ४३ ॥ राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिरित्यादिनोक्तानां राजगुणानां राज्ञां च निंदां कुर्वत्याह श्लोकद्वयेन। तस्या इति हे अच्युत ! भवतोपदिष्टाः कथिता ये नृपास्ते कथंभूताः स्त्रीणां गृहेषु खरवत्पादताडिता अपि स्त्रियमनुगच्छंतः गावः अनड्वाह इव भारवाहकाः। श्वान इव तिरस्कृताः बिडालमार्जारा इव हिंस्रयोदरंभराः भृत्याः किंकरास्तद्वत् स्त्री परवशा भवन्ति। ते च तस्यानंदभाग्यायाः भर्त्तारः स्युः यस्याः कर्णमूलं श्रोत्रपथं तत्कथा नोपयायातु न प्राप्नुयात् ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

'प्रायः सीदन्ति योषित' इत्यस्योत्तरमाह। यद्वाञ्छयेति। यस्मिंस्त्वद्दास्ये वाञ्छेच्छा तया, नृपशिखामणयः नृपोत्तमा, अङ्गो वेनपिता च वैन्यः पृथुश्च जायन्तो भरतश्च नहुषो ययातिश्च गयश्च ते आदयो येषां ते, राजानः, ऐकपत्यमेकस्वामिकं राज्यं विसृज्य, हे अम्बुजाक्ष, वनं विविशुः। एवं ते तव, पदवीं आस्थिताः ते नृपाः, इह सीदन्ति किं नु। न सीदन्त्येवेत्यर्थः। इहोपासनादशायामपि त्वदनुभवात्मकं सुखमेवानुबभूवुरमुत्र त्वत्साधर्म्यमवापुश्चेत्यर्थः ॥ ४१ ॥ 'अथात्मनोऽनुरूपम्' इत्यस्योत्तरमाह द्वाभ्याम्। काऽन्यमिति। गुणानां कल्याणानामाश्रयस्तस्य तव, जनताया जनसमूहस्यापवर्गं निरतिशयफलरूपं, लक्ष्म्या रमाया आलयमाश्रयं सेव्यमिति यावत्। सन्मुखरितं सद्भिर्वर्णितं, पादसरोजगन्धं आघ्राय तु आघ्रायापि, अविगणय्य, तं त्वत्पादसरोजगन्धमनादृत्य, मर्त्यं मरणशीलं, सदा उरु महद्भयं यस्य तं, अन्यं पुरुषं, अर्थविविक्तदृष्टिः स्वहिताहितविभाग-परिशीलनपरा, का वा स्त्री, श्रयेत। गुणाश्रयस्येत्यनेन 'गुणैर्हीना' इति यदुक्तं तदपास्तम् ॥ ४२ ॥ अतस्त्वामेवाहमभजमित्याह। तं त्वेति। जगतां अधीशं, आत्मानं अत्र लोके परत्र लोके च, कामपूरं च मनोरथपूरकमेव, तं प्रसिद्धं, त्वा त्वां, अनुरूपं ज्ञात्वा, अभजम्। अहं तवाननुरूपापि भवान् ममानुरूप एवेति बुद्ध्वा त्वामाश्रित्य त्वामेवाभजमिति भावः। एवमुक्त्वा किंचित् प्रार्थयते। सृतिभिर्गतिभिर्जन्मभिरिति यावत्। 'राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि। देवत्वे देवदेहेयं मानुषत्वे च मानुषी' इति वचनात्त्वदवतारविशेषैरित्यर्थः। भ्रमन्त्याश्चरन्त्यास्त्वत्सहचारिण्या इत्यर्थः। मे मम, अनृतस्य पापस्य तन्मूलसंसारस्य वा अपवर्गो नाशो यस्मात्सः, यः भजन्तं उपयाति आत्मसात् करोति। तस्य तव, अङ्घ्रिश्चरण एव, अरणं शरणरूपः, स्यात् वै ॥ ४३ ॥ ये राज्ञां गुणा 'राजपुत्रीप्सिता भूपैः' इत्यादिनोक्तास्तत्र सेर्ष्यं सशापं साङ्गुलिभङ्गं चाह द्वाभ्याम्। तस्या इति। हे अच्युत, स्त्रीप्रधानकेषु गृहेषु, खरगोश्वबिडालभृत्याः खरा इव केवलं भारवाहाः, गावो बलीवर्दा इव नित्यं व्यापारक्लिष्टाः, श्वान इवावमताः गृहपालनाद्यर्थं द्वाःस्थाश्च, बिडाला इव कृपणा हिंस्राश्च, भृत्या इव किंकराश्च, ये नृपाः, भवता उपदिष्टाः, ते नृपाः, हे अरिकर्षण शत्रुहन्, यत्कर्णमूलं यस्याः कर्णपथं, मृडः, शिवः, विरिञ्च्याः विरिञ्चि-सहिता नारदादयस्तत्सुतास्तेषां सभास्तासु गीता, युष्मत्कथा न उपयायात्। अत्र कथेत्येकवचनं जात्यभिप्रायकम्। कथाः नोपाययुरित्यर्थः। या त्वां त्वत्कथाश्च न श्रुतवती तस्याः पतयः इति शेषः। स्युः ॥ ४४ ॥

कृष्णप्रिया

हे कमल लोचन ! आपने प्रासङ्गिक एक वाक्य कहा कि प्रिये ! "आस्थिताः पदवीं सुभ्रूः प्रायः सीदन्ति योषितः" जो लोग हमारा आश्रय लेते हैं वह प्रायः दुःखी होते हैं तो बात कैसे जँचती है क्योंकि अङ्गराजा, महाराज पृथु श्री भरत जी जयन्ती माता के पुत्र, नहुषपुत्र ययाति, और गयराजा आदि सम्राट् नरपति लोग अपना एकातपत्रछत्र एवं अकंटक साम्राज्य का त्यागकर आपके चरणों की प्राप्ति की इच्छा से वन में जाकर तपश्चर्या करने लगे। यदि आपकी प्राप्ति प्रधान नहीं होती और परमानन्दमय न होती तो नाथ सम्राट् के सम्राट् वन में क्यों पधारते और ऐसे विवेकनिधि इस पथ में दुःखकर मार्ग में क्यों प्रवेश करते ? ॥ ४१ ॥ कृपानाथ ! आपने कहा कि "अथात्मनो हि रूपं वै भजस्व" राजपुत्री ! अभी भी योग्य वर का वरण कर लो" प्रियतम ! आप सर्वज्ञ और हृदयस्थ रहते हुए भी यह कैसे कह सकते हो ? महाराज ! हे करुणानिधान ! हे गुणनिधान ! आपके श्रीचरणों की सुगन्ध का संतवर सतत यशोगान गाते ही रहते हैं, उन सुकुमार चरणकमलों का केवल आश्रय लेने से ही संसार के जीव पाप ताप, संताप मात्र मुक्त हो जाते हैं। भगवती श्री श्रीदेवी हे श्रीकृष्ण प्रभु ! आपके श्रीचरणों में निवास करती है। प्रियतम ! इतना आपके विषय में जानने वाली और अपने हित-अहित को अच्छी तरह से समझने वाली कौन सी राजकुमारी होगी ? जो एक बार प्रभु के यशः सुगन्ध का सुख लेकर जन्म मृत्यु जरा व्याधि आधि उपाधियों से युक्त मर्त्यजन की ओर नजर भी करें ॥ ४२ ॥ प्रियतम ! आप ही अखिल लोकनाथ है; इहलोक एवं परलोक की समस्त इच्छाओं के आप ही एक परिपूरक हैं और आप आत्मा हैं। नाथ पूर्णविवेक पूर्ण समझदारी से आपका वरण किया है आपको मेरे लिये सर्वथा अनुरूप जानकर ही वरण किया है। यदि मुझे अनेकानेक जन्मों में मेरे कर्मों के अनुसार जिस जिस

योनि में जन्म लेना पड़े फिर भी मुझे चिन्ता नहीं है। हाँ नाथ! एक कामना अवश्य है कि जो कृपासिन्धु भगवान् भक्तवत्सल है, संसार-भय निवर्तक हैं और अपनी आत्मा का प्रदान भी कर देते हैं वैसे आपके श्रीचरणों की नित्य शरण में रहूँ॥ ४३॥ हे अच्युत! हे द्वारिकेश! आपने कहे हुए राजा लोग जिनके श्रवण में न आये हों। जिनके कर्णप्रदेश में आप का यश ने प्रवेश किया न हो वैसे खर के समान बोझ ढोने वाले, बैलों की तरह गृह परिवार के सारे भार को सतत उठाने वाले, श्वानों के समान घर के आङ्गन में बैठने वाले उपेक्षा से रोटी को खाने वाले, या तो बिल्ली की तरह चोरी से पेट भरने वाले अथवा घर घाटी के समान सारा घर कामना बोझा उठाने वाले शिशुपाल आदि नृपतियों; उनके पति हो जिनके कर्णपथपर देवाधिदेव लोक में नित्य जिसका गान होता है ऐसी रसमयी कथा कर्णप्रदेश में न प्रविष्ट हुई होगी॥ ४४॥

त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट्कफपित्तवातम् ।
जीवच्छवं भजति [2]कान्तमतिर्विमूढा या ते पदाब्जमकरन्दमजिघ्रती स्त्री ॥ ४५ ॥
[3]अस्त्वम्बुजाक्ष मम ते चरणानुराग आत्मन् रतस्य मयि चानतिरिक्तदृष्टेः ।
यर्ह्यस्य वृद्धय उपात्तरजोऽतिमात्रो मामीक्षसे तदु ह नः परमानुकम्पा ॥ ४६ ॥
[4]नैवालीकमहं मन्ये वचस्ते मधुसूदन । अम्बाया इव हि प्रायः कन्यायाः [5]स्यादुरतिः क्वचित् ॥ ४७ ॥
[6]व्यूढायाश्चापि पुंश्चल्या मनोऽभ्येति नवं नवम् । बुधोऽसतीं न बिभृयात् तां बिभ्रदुभयच्युतः ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—या, ते, पदाब्जमकरन्दम्, अजिघ्रती, स्त्री, विमूढा, त्वक्श्मश्रुरोमनखपिनद्धम्, अन्तः, मांसास्थिरक्तकृमिविट्कफपित्तवातम्, जीवच्छवम्, कान्तमतिः, भजति॥ ४५॥ हे अम्बुजाक्ष! आत्मन्, रतस्य, च, मयि, अनतिरक्तदृष्टेः, ते, चरणानुरागः, मम, अस्तु, यर्हि, अस्य, वृद्धये, उपात्तरजः, अतिमात्रः, माम्, ईक्षसे, तद्, उ, ह नः, परमा, अनुकम्पा॥ ४६॥ हे मधुसूदन! अहम्, ते, वचः, अलीकम्, न, एव, मन्ये, अम्बाया, इव, कन्याया, क्वचित्, रतिः, स्यात्॥ ४७॥ व्यूढायाः, अपि, पुंश्चल्याः, नवम्, नवम्, अभ्येति, बुधः, ताम्, असतीम्, न, बिभृयात्, ताम्, बिभ्रत्, उभयच्युतः, भवति॥४८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तथाहि। ते पदाब्जमकरंदमजिघ्रती सती या स्त्री विमूढा सा कांतोऽयमिति मतिर्यस्याः सा कांतमतिर्जीवच्छवं भजति। त्वगादिभिर्बहिः पिनद्धं छन्नमंतर्मांसादिमयमिति॥ ४५॥ यदुक्तमुदासीना वयमित्यादिना तत्राह। अस्त्विति। यद्यपि त्वं निरपेक्षस्तथाऽपि मम ते चरणानुरागोऽस्तु मयि च मय्यपि नातिरिक्ता अतिशयवती दृष्टिर्यस्य तस्य ते आत्मन् आत्मन्येव रतस्य। तर्हि तव तेन को लाभः। त्वच्चरणानुराग एव महाल्लाभः। किञ्च। यर्ह्यस्य विश्वस्य वृद्धये उपात्ता रजसोऽतिमात्रा औत्कंठ्यं येन स तथाभूतः सन्मामीक्षसे। उ एवार्थे। ह हर्षे। तदेव नः परमानुकंपा अत्यनुग्रह इति॥ ४६॥ तदेवं सर्वं तदुक्तं प्रतिव्याख्याय प्रसन्नचित्ता मंत्रमुपदिशंत्याह द्वाभ्याम्। नैवेति। अथात्मनोऽनुरूपमित्यादि ते वचोऽलीकं मिथ्येति नैव मन्ये यतो लोके कन्याया एव क्वचिद्रतिर्भवति। यथा काशिराजकन्यानामंबाम्बालिकांबिकानां तिसृणां मध्ये अंबायाः कन्याया एव शाल्वे रतिर्जाता तद्वत्॥ ४७॥ व्यूढायाः परिणीताया अपीति। उभयस्मादिहपरलोकद्वयाच्च्युतो भ्रष्ट इति॥ ४८॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

कफादिर्मलविशेषः। जीवच्छवं श्वसन्मृतकम्। एतेन श्रीकृष्णवपुस्तु "आनंदश्मश्रुरानंदकेश—" इत्यादि श्रुतेर्मलमयं न, केवलचिद्घन एव, अंगरचनादि तु भक्तानुग्रहार्थमेवेति ध्वनितम्। 'स वै पतिः स्यादकुतोभयः स्वयम्' इत्यादिप्रमाणतो वस्तुतः स्त्रीणां सार्वकालिकीनामपि त्वमेव पतिस्तदपि या त्वदन्यं पतिं भजति सा प्रेतमेव रमयन्ती भजतीत्याह— त्वगिति, जीवच्छवत्वमेव दर्शयति विशेषणद्वयेन। त्वगादिभिः पिनद्धम्, अन्यथा दौर्गंध्याकृष्टमक्षिकाकीटकोटिभिश्च व्याप्तं स्यादिति भावः। ते सच्चिदानन्दघनविग्रहत्वेन प्रसिद्धस्य तवात्र त्वगादिषु केषांचित्तत्संगिमात्राणां निषेधः। वेदादावप्रसिद्धत्वात्स्वयमननुभवाच्च। केषांचित्तु लोकप्रसिद्धजडमलिनादिस्वरूपाणामेव न तु तत्र वेदप्रसिद्धानां सच्चिदानन्दस्वरूपाणामपि, वेदप्रसिद्धत्वादेव तथा स्वयमनुभवात्, बीभत्समात्रस्यैव त्यागस्य विवक्षितत्वाच्चेति ज्ञापितम्। मूढैवांतर्मांसादिमयं जीवं तमेव शवं कांतमत्या भजति, ते पादाम्बुजमकरन्दं पौराणिकजनभक्तैः सर्वतः प्रसारितमपि या न भजतीति हेतोः सा मूढा, नाहं

---

१. भरितान्त्रवीतं–विज। २. काम–विज.। ३. अस्त्य–विज.। ४. लीकं भरत्येव–विज। ५. वादरतिः–विज.। ६. जडा–वीर.; मूढा–विज.।

मूढेति भावः ॥ ४५ ॥ स्वापेक्षामप्याह—किञ्चेति । यद्वा—अस्य जगतोऽभिवृद्धये सृष्टये उपात्तं रजोतिमात्रं रजो येन स तथा । यद्वा–उपात्ता प्रलये मूलरजसि अतीतास्संगता मात्रा अंशा येन स तया । यद्वा—स्थित्यै उपात्ता रजसोऽतिरिक्ता मात्रा सत्त्वलक्षणा येन, तदा मामीक्षते । यद्वा—वर्धनं छेदेन वृद्धिः संहारस्तस्यै उपात्ता रजोतिक्रांता मात्रा तमोलक्षणा येन स तथा । अत्रेक्षणं नाम तत्तत्कार्यमनुस्मृत्य रजआदिमदधीनतत्तद्गुणाभिवर्धनमभिप्रेतम् । अथ "त्रिगुणा ह्येष प्रकृतिरगुणो वा विष्णुः स यदात्मरजा रजोस्या उद्वर्धयती स्यात्" इत्यादि श्रुतेः । नैतत्स्वप्रयोजनमुद्दिश्येति—किं त्वस्मानुद्दिश्य परमानुकंपेति भावः ॥ हे अंबुजाक्षेति सौरूप्योद्देशः । तत्रातिलोभे हेतुः—माम् । प्रकृतिरूपामिति । दैन्येनाऽभेदोक्तिः, प्रकृतेस्तच्छायारूपकत्वेन निकृष्टांशत्वात्, न त्वात्मरत्या । तदपि न घटेतेत्याशंक्याह—उपात्तेति । उपादानमत्र सांनिध्यमात्रेणोपकरणम्, ईक्षणं च स्वैरितयैवेति, ज्ञेयम् । यद्वा—मत्संबंधाभासेन तत्रापि मद्रूपतामारोप्य तव दृष्टिरिति स्थिते मयि तु परमैवानुकंपेति मद्विधत्वदेकशरणजनसंबंधादन्यत्रैव तवौदासीन्यमिति भावः । तदेवमेव टीकाप्रतिज्ञातञ्च षोडशानामपि दोषाणामसत्त्वं घटेत । यद्वा—मयि च रतस्य, यतः अनतिरिक्तदृष्टेः स्वरूपशक्तित्वान्मय्यभिन्नदृष्टेः । रजो रागस्तत्राप्यन्यानुरागस्य विवृद्धये स्वयमुपात्तरागादिमात्रः सन् यन्मामीक्षसे कदाचिदालोकयसि तत्परमानुकम्पा तद्रूपमेव । अन्यत्समम् । अतः 'नामरूपे भगवति' इति षष्ठस्कंधोक्तेस्तव देहस्यात्मैकरूपत्वान्मम च तदभिन्नत्वात् तन्मत्संबंधादन्यत्रैवौदासीना इत्यादिवाक्यप्रवृत्तिरिति भावः ॥ ४६ ॥ मंत्रं रहस्यम् । तद्वदंबावत्—त्वय्येव मम रतिः पर्यवस्यतीति भावः । भारत चेयं कथा—काशिराजपुत्रीत्रयमंबादिकं भीष्मेण स्वयंवरे जितम्, जित्वा च ताः स्वभ्रात्रे विचित्रवीर्याय प्रायच्छत्तदा तास्वंबोवाच—हे भीष्म नाहं त्वां त्वद्भ्रातरञ्चान्यं वा विना शाल्वं वृणे, इत्युक्तो भीष्मस्तां शाल्वाय प्रस्थापयामासेत्यलं विस्तृत्या । अथवा—यदेतत्सर्वमुक्तं भवता तत्तु स्त्रीसाधारणत्वमेवाभिप्रेत्य न तु तद्विशेषत्वम्, तच्च युक्तमित्युपसंहरति—नैवेति युग्मकेन । वचः स्त्री जातिस्वभावसूचकमीदृशं वचनम्, अलीकमविषयं नैव मन्ये, हि यस्मात्कन्याया अपि क्वचिदेव त्रैव पुरुषे रतिः स्यात् । प्रायो बाहुल्येनेति तासु साध्वी जातिरित्यर्थः । टीकायाञ्च कन्याया एव कस्याश्चिदेव कन्याया इत्यर्थः । तत्र दृष्टान्तः—अंबाया इवेति ॥ ४७ ॥ पुमांसं दृष्ट्वा चलति निजधर्माद्या सा पुंश्चली "या नारी रूपजात्याद्यर्चितयित्वोत्सुका भवेत् । पुरुषोयमिति ज्ञात्वा रत्यै सा पुंश्चली स्मृता" इत्युक्तेः । असतीं पुंश्चलीं न बिभृयात् विवाहितामपि पृथक्शय्यां कुर्यादित्यर्थः । एवमकुर्वन्पतितो भवतीत्याह—तामिति । "पुंश्चल्यां गमनाद्विप्रस्तप्तसूर्मिं व्रजेत्पुनः । जीवन्नेव भवेच्छूद्रो मृतो भुंक्तेऽत्र यातनाः" ॥ इति स्मृतेः । विप्र इत्युपलक्षणम् । मृतः पुनरत्र तप्तसूर्मौ ॥ पुनः पुंश्चल्यास्तु व्यूढाया अपीत्यादि । मादृशी तु सर्वोत्तमैव सर्वज्ञेन भगवता स्वीकारादित्याह—बुध इति । न बिभृयात्–बिभर्तीति न संभाव्यत इत्यर्थः । अत उभयच्युत एव तां बिभ्रद्भवतीत्यर्थः । एतेन 'अथात्मनोनुरूपम्' इत्याद्युत्तरितम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो अत्यन्तघृणास्पदत्वेन च ते कथञ्चिदपि त्वदीयानां मनसोपि सम्बन्धयोग्या न स्युरित्याह—त्वगिति । जीवच्छवत्वमेव दर्शयति—त्वगित्यादिना । विशेषणद्वयेन यस्य शरीरमात्रस्य दृष्ट्या कान्तमतिः स्त्रीप्रवर्तते तस्य शवेन को भेद इति भावः । त्वगादिभिः पिनद्धम् अन्यथा दौर्गन्ध्याद्याकृष्टमक्षिकादिकीटकोटिभिश्च व्याप्तं स्यात्, यथाहुः—

"यदिनामास्य कायस्य यदन्तस्तद्बहिर्भवेत् । दण्डमुद्यम्य लोकोयं शुनः काकांश्च वारयेत् ॥" इति

भावः । ते सच्चिदानन्दविग्रहत्वेन प्रसिद्धस्य तव अत्र त्वगादिषु केषाञ्चित्तत्संज्ञिमात्राणां निषेधः वेदादावप्रसिद्धत्वात् स्वयमनुभवाच्च केषाञ्चित्तु लोकप्रसिद्धजडमलिनादिस्वरूपाणामेव नतु तत्र वेदप्रसिद्धानां सच्चिदानन्दरूपाणामपि वेदप्रसिद्धत्वादेव तथा स्वयमनुभवात् बीभत्सपरित्यागमात्रस्यैव विवक्षितत्वाच्चेति ज्ञापितम् । अत्र "या लीलया धृततनोरनुरूपरूपा" इत्युक्तत्वादस्यास्त्वयमभिप्रायः भवत्सदृशदेहा मादृशी तावत् स्वत एव तादृशे जुगुप्सते यातु स्वयमपि त्वगित्याद्युक्तलक्षणदेहा सापि कथञ्चित्तादृशत्वदनुभवं विनैव तत्र रमते त्वदनुभवे सति नतु स्वदेहेपि किञ्च त्वद्भजनयोग्यत्वाय मलिनवस्त्रादिवत्तत्त्यागमपि वाञ्छति योग्यत्वस्य तु क्रमतारतम्यं ज्ञेय त्रिवक्राया इव पूर्वदेह एव सद्यस्तवयोग्यत्वाविर्भावात् अन्तर्गृहगताः कांश्चिदित्याद्युक्तानामिव पूर्वदेहत्यागपूर्वकत्वद्योग्यदेहाविर्भावात् पिङ्गलाया इव स्वदेहे जुगुप्साया उदयात् किम्बहुना कान्यं श्रयेतेति मदनुभवोक्त्या तथा "दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान्" इति श्रुत्युक्त्या च वयं सर्वा अपि त्वन्निष्ठा एव प्राकृते त्वत्सारूप्यं प्राप्ते च नासज्जामः किमुत त्वद्विरोधिषु चैद्यादिष्विति ॥ ४५ ॥ हे अम्बुजाक्षेति सौरूप्योद्देशस्तत्रातिलोभे हेतुः मां प्रकृतिरूपामिति दैन्येनाभेदोक्तिः प्रकृतेस्तच्छायारूपत्वेन तन्निकृष्टांशत्वात् नन्वात्मरत्या तदपि न घटत इत्याऽऽशङ्क्याह—उपात्तेति । उपादानमत्र सान्निध्यमात्रेणोपकरणम् ईक्षणं च स्वैरितयैवेति ज्ञेयं यद्वा मत्सम्बन्धाभासेन तत्रापि मद्रूपतामारोप्य तव दृष्टिरिति स्थिते मयि तु परमैवानुकम्पेति मद्विधत्वादेकशरणजनसम्बन्धादन्यत्रैव तवौदासीन्यमिति भावः । तदेवमेव टीकाप्रतिज्ञातं च षोडशानामपि दोषाणामसत्वं घटते किन्तु प्रथमं प्रकृतिवीक्षणं ततस्तस्याः क्षोभः ततो गुणानां पार्थक्ये सति सृष्ट्यर्थं रजसः पृथग्वीक्षणमिति क्रमो लभ्यते यद्वा मयि च रतस्य यत अनतिरिक्तदृष्टेः स्वरूपशक्तित्वात् मय्यभिन्नदृष्टेः रजो रागः तत्राप्यस्यानुरागस्य विवृद्धये स्वयमुपात्तरागातिमात्रश्च सन् यन्मामीक्षसे कदाचिदालोकयसि तत्

परमानुकम्पा तद्रूपमेव अन्यत्समानम् अतस्तव देहस्यात्मैकरूपत्वान्मम च तदभिन्नत्वात्तन्मत्सम्बन्धादन्यत्रैवोदासीना इत्यादिवाक्यप्रवृत्तिरिति भावः ॥ ४६ ॥ अथवा यदेतत्सर्वमुक्तं भगवता तत्तु स्त्रीसाधारणत्वमेवाभिप्रेत्य न तु तद्विशेषत्वं तच्च युक्तमित्युपसंहरति—नैवेति युग्मकेन । वचः स्त्रीजातिस्वभावसूचकमीदृशं वचनम् अलीकमविषयं नैव मन्ये हि यस्मात् कन्याया अपि क्वचिदेकत्रैव पुरुषे रतिः स्यात् प्रायो बाहुल्येनेति तासु साध्वीजातेरित्यर्थः । टीकायाञ्च कन्याया एवेति कस्याश्चिदेव कन्याया इत्यर्थः । तत्र दृष्टान्तः, अम्बाया इवेति, अतः पुंश्चल्यास्तु व्यूढाया अपीत्यादि मादृशी तु सर्वोत्तमैव सर्वज्ञेन भवता स्वीकारादित्याह—बुध इति । न बिभृयात् बिभर्त्तीति न सम्भाव्यत इत्यर्थः । अत उभयच्युत एव तां बिभ्रद्भवतीत्यर्थः । एतेन अथात्मनोनुरूपमित्यप्युत्तरितम् ॥ ४७–४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न च वक्तव्यमप्रकटत्वेन नोपयायादिति सर्व्वत्र सर्व्वैरेव कीर्त्यमानत्वादित्याह—त्वगिति । जीवच्छवत्वमेव दर्शयति विशेषणद्वयेन; रोमाणि पक्ष्मादीनि, त्वगादिभिः पिनद्धम्, अन्यथा दौर्गन्ध्याद्याकृष्ट-मक्षिकादि-कीट-कोटिभिर्व्याप्तेरिति भावः । त्वगादीनां यथापूर्व्वं मांसादि-पिधाने श्रैष्ठ्यं तथा मांसादीनां घृणाभरास्पदत्वमाधिक्यं वा ज्ञेयम् । विशेषेण मूढा विवेकहीना, ते सच्चिदानन्दघनमूर्त्तेस्तव । एवं राजभिः सहासमानिति पक्षेऽपि तेषामत्यन्तापकर्षस्य श्रीभगवत्परमोत्कर्षस्य चोक्त्याऽसमत्वमेव दृढीकृत्योत्तरितमिति । अन्यत्तैर्व्याख्यातम् । यद्वा, कान्तमतिः सुन्दरबुद्धिरपि त्वत्पदाब्जरसगन्धराहित्येन विमूढा सतीत्यर्थः ॥ ४५ ॥ अम्बुजाक्ष ! हे परमसुन्दरेत्यर्थः । अतस्त्वच्चरणयोरनुरागोऽस्तु, आत्मरतत्वादेव मयि पत्न्यामप्यनतिरिक्ता अन्यलोकसाधारणी दृष्टिर्मतिर्यस्य तस्य; अस्य सकलभक्तगणस्य; मां लक्ष्मीं मां प्रकृतिरूपाम्,—प्रकृतेरपि तदंशत्वात्; यद्वा, विभूतिप्रधानाद्यर्थमीक्षसेऽपेक्षसे । ननु आत्मरत्या तदपि न घटेतेत्याशंक्याह—उपेति । यद्वा, सन्तत्युत्पादनेनास्य यदुवंशस्य वृद्धयेऽत्यर्थमित्यर्थः । तस्य गुणातीतत्वेऽपि रज इत्युक्तिरप्राकृत सच्चिदानन्दगुणान्तर्गत-रजोऽभिप्रायेण । तच्च श्रीभागवतामृते बहुशो विवृतमेव । 'नः' इति स्वसखीदास्याद्यपेक्षया, परमेति तस्याः सुदुर्लभत्वात् । अन्यत्तैर्व्याख्यातम् । यद्वा, अम्बुजाक्षेति त्वच्चरणानुयागेण त्वत्सौन्दर्य्यदर्शनमेव महालाभ इति भावः । किञ्च, अस्यानुरागस्य वृद्धये उपात्तैर्गोपक्रीड़या स्वीकृतै रजोभिर्गोपादधूलिभिरतिक्रान्ता मात्रा बर्हापीड़म् गुञ्जावतंस-वनमालावस्त्रादिपरिच्छदो यस्य सः, व्रजजनानन्दक-सायन्तनगोपवेशः सन्नित्यर्थः । तथा च विश्वः—'मात्रं चावधृतौ कार्त्स्न्ये मात्रा कर्ण-विभूषणे । अक्षरावयवे वृत्ते मानेऽल्पे च परिच्छदे ।' इति । यद्वा, उपात्तै रजोभिरतिमात्रो भरितः । अन्यत् समानम् ॥ ४६ ॥ हे मधुसूदनेति मधुमादिदैत्यं प्रति वरदानादिपालनेन सत्यवाक्यम्, श्लेषेण मधुसूदनो भ्रमरस्तद्वत् सारग्राहित्वं सूचयति । अतोऽलीकं नैव मन्ये, किन्तु कन्याया एव मन एकनिष्ठम्, न त्वन्यस्या इत्याह—अम्बाया इवेति । हि यतः, क्वचित् कस्मिंश्चिदेकस्मिन् पुरुषे, प्राय इति कस्याश्चित् कन्याया अपि पुरुषान्तरे रतिः, न त्वन्यस्या इत्यभिव्यञ्जयति ॥ ४७ ॥ व्यूढाया इति । च अपि, व्यूढाया अपि पुंश्चल्या दुष्टायाः सत्याः, अपि गर्हायाम्, अभितो याति; यद्वा, अभि अभयं यथा स्यात्तथा याति, नवं नवमिति पूर्वपूर्वत्यागेनापरापरकामान्न बिभृयाद् गृहे न रक्षेत्, किन्तु परित्यजेदेवेत्यर्थः— बुधश्चेत्; यद्वा, ननु मनोवृत्तं कथं ज्ञातं स्यात् ? तत्राह—बुध इति ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

विमूढा अज्ञा या स्त्री का त्वत्पादपमजिघ्रती भवती स जीवच्छवं भजति ॥ ४५–५९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तथाहीत्याह—त्वगिति । या स्त्री तव पदाब्जमकरन्दम् अजिघ्रवती नाघ्रातवती कदाप्यश्रुतत्वत्कथा अत एव विमूढा अत एव कान्तः प्रियतमोऽयं ममेति मतिर्यस्याः सा बहिस्त्वगादिभिः पिनद्ध छन्नमन्तर्मांसादयो यस्मिन् तज्जीवादपि शवतुल्यं कलेवरं यस्य तं पुरुषाधमं भजते विण्मलं त्वगादयः प्रसिद्धाः ॥ ४५ ॥ यदुक्तमुदासीना वयमित्यादि तत्राह—अस्त्विति । हे अम्बुजाक्ष ! आत्मन् आत्मनि रतस्य आत्मारामस्येत्यर्थः । अनेन निरपेक्षारूपमुदासीनत्वमनूदितं मय्यनतिरिक्ता अनतिशयिता दृष्टिर्यस्येत्यनेनाकामुकत्वं तस्य च तव चरणयोरनुरागः प्रेमा अस्तु, मेति शेषः । यद्यप्युदासीनोऽकामुकश्च सन् गृहमेधिधर्मान् अभिनयसि तथापि मयाऽपि त्वच्चरणानुरागमात्रमेव प्रार्थनीयं नतु ततोधिकमिति भावः । सन्तु तव वचांसि आपातप्रतीतनिष्ठुरार्थपराणि, तथापि कदाचित्समयविशेषे तव मय्यनुकम्पा दुर्निवारैवेत्यभिप्रेत्याह—यर्हीत्यर्द्धेन यर्हि यदा अस्य विश्वस्य विवृद्धये समृद्धये उपात्ता रजसस्सृष्ट्युपयुक्तरजोगुणस्यातिमात्रा औत्कट्यं येन तथाभूतः सन् मामीक्षसे इति यत् तदुह तदेव परमा निरतिशया अनुकम्पा कृपा विचित्रं जगत्सृष्ट्वा तत्र मदनुमोदनार्थं मामीक्षसे इत्येषैव महतीकृपेत्यर्थः ॥४६॥ तदेवं सर्वं तदुक्तं प्रतिभाष्य प्रसन्नचित्ता मन्त्रमुपदिशन्ती प्राह—नैवेति द्वाभ्याम् । हे मधुसूदन ! तव यद्वचः अथात्मनोनुरूपं वा इत्यादि तदलीकम-

नृतमिति न मन्ये नासत्यमित्यर्थः। कुतः ? यतो लोके कन्याया एव क्वचित्पुरुषविशेषे रतिर्भवति यथा अम्बायाः काशिराजपुत्रिकायाः अम्बाख्यायास्तद्वत् अम्बायाः कन्याया एव साल्वे रतिर्बभूवेतीतिहासोत्र विवक्षितः ॥ ४७ ॥ तथा ऊढायाः परिणीताया अपि पुंश्चल्याः मनो नवन्नवं पुरुषमभ्येति ततः किमत आह—बुध इति। बुधो बुद्धिमान् असतीमुक्तविधां स्त्रियं न बिभृयात् विपर्ययेऽनर्थमाह—बिभ्रत् पुष्णन् उभयच्युतः उभयस्मादेतल्लोकात्परलोकाच्च प्रच्युतो भवति इहामुत्र च न सुखी किन्तु दुःख्येव भवतीत्यर्थः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

एतदेव स्पष्टयति—त्वक्श्मश्रुरोमेति। या स्त्री तव पदाब्जमकरन्दमजिघ्रती असेवमाना सा जीवच्छवं जीवन्मृतं पुरुषं भजति तत्र निमित्तं, काममतिरिति, अस्य सम्पदमाह—बहिस्त्वगादिभिः पिनद्धं बद्धम् अन्तर्मांसादिभिः सम्वृतं ननु विग्रहोप्येतादृशः कृष्णस्य किं न स्यादविशेषादिति चेन्न "आनन्दश्मश्रुरानन्दकेशः" इत्यादिश्रुतेर्हेतोः कालात्ययानदिष्टत्वात् ॥ ४५ ॥ अहमप्येतादृशी नेत्याह—अस्तीति। चरणयोरनुरागः परा भक्तिरस्तीति भक्तेः सर्वदैकप्रकारत्वं कथयति मया तव न कोप्यर्थ इति भावेनाह—आत्मन्निति। आत्मन्नात्मनि ममतु त्वत्तो महानर्थोऽस्तीति भावेनाह, मयि चेति, मयि महाधिकारिण्यां भक्तेर्न अतिरिक्ता दृष्टिरनुग्रहलक्षणा यस्य स तथा भक्त्यनुकूलानुग्रह इत्यर्थस्तस्य चशब्दो भक्तेरन्वयव्यतिरेकसूचकः तत्कुत इति चेन्न "य एष देवः परं क्षरोमरस्तं वा एनमाहुः भक्ताः" इत्यादिश्रुतिसिद्धत्वात् अनेनैव तारतम्यं सूचयति "अथातो भक्तिमीमांसा" इति श्रुतिविहितत्वात् अन्योन्यं हेतुहेतुमद्भावञ्च "मिलितौ वाव एतौ एतो भवतो यदनुग्रहश्च भक्तिश्च" इति श्रुतिसिद्धमनुवदति मिलितावन्योन्यं हेतुहेतुमद्भावोपेतौ भक्त्यनुकूलानुग्रहविशेषं कथयति—यर्हीति। यर्हि यदास्य जगतोऽभिवृद्धये सृष्टिलक्षणायै उपात्तं स्वीकृतं रजोऽतिमात्रं केवलं रजो येन स तथा यद्वा उपात्ताः प्रलये मूलरजसि अतीताः सङ्गताः मात्रा अंशाः येन स तथा मूलरजोगुणोपदानवानित्यर्थः। तदु तदेव मामीक्षसे ह विशेषत इत्यर्थः। यदा स्थितिलणायै उपात्ता रजसोतिरिक्ता मात्रा सत्त्वलक्षणा येन स तथा तदा मामीक्षसे यदातिवृद्धिरहितो वर्धनं छेदनं संहारस्तस्मै उपात्ता रजोसिक्रान्ता मात्रा तमोलक्षणा येन स तथा अत्रेक्षणं नाम तत्तत्कार्यमनुस्मृत्य रज आदिमदधीनतत्तद्गुणाभिवर्धनमभिप्रेतं तदुक्तं "अथ त्रिगुणाह्येष प्रकृतिरगुणो वा विष्णुः स यदात्मरजा रजोस्या उद्वर्धयति" इत्यादि श्रुतौ नैतत्स्वप्रयोजनमुद्दिश्येति नः अस्मानुद्दिश्य कृता परमकृपेति भावः ॥ ४६ ॥ भगवती भगवदुक्तेरेवं तात्पर्यं प्रकाश्य निगमयति—नैवेति। हे मधुसूदन ! ते तव वचः अलीकं असत्यलक्षणं भारं न भरति नतु बिभर्त्येव "भृञ् भरणे" इति धातुः। कथमिव अम्बायाः कन्यावादरतिरिव यथा मातुः कन्याप्रदानकथायां रतिस्तात्पर्याभिनिवेशलक्षणा नालीकं भवति प्रायः एवायमर्थोऽनुमतो हि "समुच्चयेऽनुमत्यां चाप्येव साम्येऽवधारणे इति यादवः। क्वापि मातूरतिरलीकं भरति तव वचः क्वाप्यलीकं न भवत्येवैतदुक्तं क्वचिदिति क्वचित्क्वापि ॥ ४७ ॥ इदानीं कृष्णस्य नियतदारत्वमात्मनो नियतपातिव्रत्यञ्च ध्वनयन्ती देवी पुंश्चलीममर्थं वादयति—मुग्धाया इति। अस्यार्थः आचार्योक्तोत्र लिख्यते यामसती बुधो न बिभृयात् याञ्च तांबिभ्रदादृष्टच्युतो भवति तस्याः अपि पुंश्चल्यास्त्वयि मनो नवन्नवमभ्येतीति मूर्च्छया मोहिन्या मूढत्वं युवयोरपि तत्र तत्र सुलभमुपलब्धमिति मन्दाशङ्का "अमुग्धैव तु मुग्धैव त्वद्दुःखदुःखिता" इति च "श्रीर्दर्शयेद्धरिश्चैव नैवैतौ मोहदुःखिनौ" इत्यादिस्मृत्या परिहर्तव्या ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

त्वक् श्मश्रु ॥ ४५ ॥ अस्तु ॥ ४६–४२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

व्यतिरेकमाह—त्वक्श्मश्रुरोमेत्यादि। त्वद्विग्रहस्य सान्द्रानन्दमयत्वात्। अतस्त्वत्पदाब्जमजिघ्रती जीवच्छवं जीवन्मृतं भजति; या तु जिघ्रती, सा तु जीवच्छवान् त्वदितरान् पतीन् न कामयते। यदेतदुक्तं भवता तत् सर्वमनन्वितमेव। मम पुनरेतदेवास्त्वित्याह—अस्त्वेवमित्यादि। हे अम्बुजाक्ष ! ते तव चरणाम्बुजानुरागो मेऽस्तु। कीदृशस्य तव ? आत्मन् रतस्य, आत्मनि भक्ते रतस्य मयि विरतस्येत्यन्वयः। कुतः ? अनतिरिक्तदृष्टेस्तुल्यदृष्टेः, अहं भार्येति मय्यधिका दृष्टिर्मास्तु, तुल्या तद्भवितुमर्हतीति भावः। यर्हि यदा अस्य चरणानुरागस्य वृद्धय उपात्तरजोऽतिमात्रो गृहीत रागातिशयः सन् मामीक्षसे, तदेव नोऽस्मान् प्रति परमानुकम्पेत्यर्थः ॥ ४६ ॥ उपसंहरति—नैवेत्यादि। किं बहुना ? स्वालौकिकप्रकटनेन त्वया यदुक्तम्, तदेव सत्यम्, नैवालीकमहं मन्ये। अन्ये मन्यन्ते चेत्, मन्यन्तां नाम। लौकिकेऽपि दृश्यते कन्यायाः क्वचिदेव रतिः। तत्रास्यैव प्रमाणमिदमपि त्वया न ज्ञातमित्याक्षेपः ॥ ४७ ॥ पुंश्चल्यास्तु व्यूढाया अपि मनो व्यभिचरतीति दर्शयन्त्याह—व्यूढाया इत्यादि। तां बिभ्रदबुधोऽपि उभयच्युतो भवति। त्वां विना पुरुषान्तरं भजन्ति याः, ता एवं पुंश्चल्य इत्याक्षेपः ॥ ४८–४९ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

व्यतिरेकं दर्शयति—त्वक्श्मश्रुरोमेत्यादि। त्वद्विग्रहस्यानन्दमयत्वात् नैवम्विधत्वम्। तेन त्वद्विग्रहे त्वगावत् प्रतीयमानम्, न तु त्वगादि; अतस्त्वत्पदाम्बुजमजिघ्रती स्त्री एवम्भूतं जीवच्छवं भजति ॥ ४५-४६ ॥ उपसंहरति—नैवालीकमित्यादि। किं बहुना ? स्वालौकिकत्व-प्रकटनेन त्वया यद्यदुक्तं तदेव सत्यम्, नैवालीकमहं मन्ये। अन्ये मन्यन्तेवेत् मन्यन्तां नाम किन्तु नाहं लक्ष्मीः, न त्वमपि भगवान्। अस्त्वेवमपि तु लोकेऽपि दृश्यताम्—कन्यायाः क्वचिदेव रतिस्तत्राम्वैव प्रमाणम्। इदमपि न ज्ञायते-इत्याक्षेपः ॥ ४७ ॥ पुंश्चल्यास्तु व्यूढाया अपि मनो नरं नवमभ्येति। त्वां बिभ्रत् बुधोऽपि उभयच्युतो भवति, न तु त्वम्, कदाचित् तन्मध्ये त्वां चेदभ्येति, तदा साप्येकान्तभक्ता भवति, पिङ्गलावत्। तस्मात्त्वया यदुक्तं तत्सर्वं प्रलाप एवमाक्षेपः ॥ ४९-५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

"स वै पतिः स्यादकुतोभयः स्वयम्" इत्यादि प्रमाणतो वस्तुस्तु स्त्रीणां सार्वकालिकीनामपि त्वमेव पतिस्तदपि या त्वदन्यं पतिं भजति सा प्रेतमेव रमयन्ती भजन्तीत्याह—त्वगिति। त्वगादिभिर्बहिः पिनद्धमन्यथा दौर्गन्ध्याद्याकृष्टमक्षिकादिकीटकोटिभिर्व्याप्तः स्यादिति भावः। अन्तर्मांसादिमयं जीवं तमेव शवं कान्तोयमिति मतिर्यस्याः सवै मूढा भजति, मौढ्यमेवाहते सच्चिदानन्दविग्रहत्वेन प्रसिद्धस्य तव पदाब्जस्य मकरन्दं माधुर्य्यं पौराणिकजनप्रभञ्जनैः सर्वत्रैव प्रसारितमप्यजिघ्रती ॥४५॥ यदुक्तमुदासीना वयमिति तत्र तदुदासीनतानुसन्धानमात्रेणैव मानस्थायिभावोपशान्तौ सत्यामतिदैन्यसमुद्रे निमज्जन्त्येवाह—अस्त्विति। यद्यपि त्वं निरपेक्षस्तदपि मम ते चरणानुरागोऽस्तु मयि तवौदासीन्यमुचितमिवेत्याह—आत्मन्रतस्य आत्मारामस्य अत एव यथा ते जगत्यस्मिन्नुदासीना दृष्टिस्तथैव मयि च अनतिरिक्ता ततोऽनधिका दृष्टिर्यस्य तस्य किञ्च यर्हि अस्य विश्वस्य वृद्धये उपात्ता रजसोतिमात्रा औत्कण्ठ्यं येन सः तथाभूतः मन्माम् ईक्षसे उ एवार्थे ह हर्षे तदेव नः परमानुकम्पा तदेवाहं परमं स्वसौभाग्यमभिमन्ये इति भावः। अयमर्थः "तथाहमपि त्वच्चित्तोनिद्राञ्च न लभे निशि" इति त्वद्वचनान्मयि तवासक्तिः उदासीना वयमिति वचनादौदासीन्यं च दृश्यते तस्मान्मयि भवानासज्जते चेदहन्ते परमान्तरङ्गा स्वरूपशक्तिरेवात एवात्मारामोपि मय्यात्मभूतायां रमत एव मय्युदास्ते चेदहन्ते बहिरङ्गा शक्तिर्गुणप्रकृतिरेवेत्यतो मयि तवोभयत्वमिव त्वय्यपि ममोभयत्वमिति ॥ ४६ ॥ अथवा मम स्त्री जातित्वान्मामेव लक्षीकृत्यान्यासांस्त्रीणां स्वभावं व्याख्याय पुरुषान् परान् भवानशिक्षयदित्याह—नैवेति। यथात्मनोऽनुरूपमित्यादि ते वचः अलीकं न मन्ये यतो लोके कन्याया अपि क्वचिद्रतिर्भवति यथा काशिराजकन्यानाम् अम्बाऽम्बालिकाम्बिकानान्तिसृणां मध्ये अम्बायाः कन्याया अपि साल्वे रतिर्जाता ॥ ४७ ॥ तद्वदेव व्यूढाया अपि उभयस्मात् लोकद्वयात् बुधो विज्ञ एव त्वन्तु सर्वज्ञ एव मां पूर्वमेवात्यक्ष एव यदि मां तादृशीमज्ञा य इति भावः ॥ ४८ ॥

गूढार्थदीपिनी

ते पदाब्जमकरन्दमजिघ्रती सती या स्त्री कान्तमतिः सा जीवन्मृतकमेव भजति। कथंभूतम्। त्वगादिभिर्बहिः पिनद्धमाच्छन्नम्। अन्तश्च मांसादयो यस्मिस्तथाभूतम् ॥ ४५ ॥ आत्मन् आत्मनि। 'सुपां सुलिति सप्तम्या लुक्। यद्वा सम्बोधनम्। मयि अनुरक्तस्य यतः अनतिरक्तदृष्टेर्मय्यभिन्नदृष्टेः। अस्य जगतः वृद्धये उपात्ता गृहीता रजसोऽतिमात्रा उत्कटं रजो येन स त्वम् मामीक्षसे। तदु हतदेव हर्षे। नोऽस्माकमुपरि ते अनुकम्पा ॥ ४६ ॥ अलीकमनृतम् न मन्ये। क्वचित् एकत्रैव पुरुषे प्रायो बाहुल्येन। यथा तिसृणां काशिराजकन्यानां मध्ये अम्बायाः शाल्वे रतिः ॥ ४७ ॥ व्यूढाया विवाहितायाः उभयस्मात् लोकद्वयात् च्युतः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

त्वगादिभिर्बहिः पिनद्धं छन्नम् अन्तर्मांसादिमयं जीवच्छवं जीवन्मृत नृपादिरूपं भौतिकदेहं ते पदाब्जमकरन्दं भवदीयकीर्त्तिम् अजिघ्रती अशृण्वन्ती अत एव विमूढा कान्तोऽयमिति मतिर्यस्याः सा एवंभूता या स्त्री सा भजति ॥ ४५ ॥ उदासीना वयमिति यदुक्तं तत्राह—अस्त्विति। आत्मन् आत्मनि रतस्य निरपेक्षस्योदासीनस्येत्यर्थः। मयि च नातिरिक्ता अतिशयवती दृष्टिर्यस्य तस्य मय्यकामुकस्येत्यर्थः। एवम्भूतस्यापि ते चरणयोर्ममानुरागोऽस्तु एतावतैव लब्धार्थास्मीति भावः। अस्य विश्वस्य वृद्धये उपात्ता रजसोऽतिमात्रा औत्कण्ठ्यं येन सः मा चेतना परमा शक्तिरहं तद्विलक्षणा असा अचेतना प्रकृत्याख्या तामीक्षसे उ एवार्थे ह हर्षे तत्तदैव नोऽस्मान्प्रति परमानुकम्पा अत्यनुग्रहः अयमर्थः सृष्टिं कृत्वा तत्र प्रविश्य अस्माभिः सह अत्यद्भुतां लीलां करिष्यतीत्येवं सृष्टिप्रारम्भकाले एवास्माकं विनोदो जातः अधुना लीलामृतसेवनसमय

एवेति ॥ ४६ ॥ तदेवं सर्वं भगवदुक्तं प्रति व्याख्यायाथ मामुदिश्य स्त्रीमात्रस्वभावाभिप्रायेण यदि त्वया तथोक्तं तदापि सत्यमेवोक्तमित्याह—नैवालीकमिति द्वयेन । अथात्मनोनुरूपं वै भजस्वेत्यादि वच अम्बाया इव कन्याया एव क्वचित्कस्मिंश्चित्पुरुषे रतिः स्यात् अम्बाम्बिकाम्बालिकानां काशिराजकन्यानां मध्ये अम्बायाः कन्याया एव साल्वे रतिर्जाता पश्चात् भीष्मेण विचित्रवीर्यविवाहार्थं ताः स्वयम्बरे राजचक्रं परिभूय स्वपुरे आनीताः तत्राऽम्बयोक्तं मया साल्वः पतिर्वृत इति तदनन्तरं भीष्मेण सा निसृष्टा गच्छ साल्वं प्रतीति भारते विस्तरो द्रष्टव्यः ॥ ४७ ॥ व्यूढायः परिणीतायाः ॥ ४८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्वक् श्मश्रुरोमनम्वेति श्लोके लोकेशस्य नैतादृक् शरीरमिति प्रतीयते । दृश्यते च तत् । वेधादिदर्शनाच्चेत्यतो विग्रहोऽप्राकृतः । विद्धवन्मुग्धवच्चैव केशवो वेदनार्तवत् । प्रदर्शयति मोहाय नैव विष्णुस्तथा भवेदित्यादेस्तमङ्गीकृत्य मानेन तत्स्वरूपं निरूपयति । आनन्दश्मश्रुरिति । आनन्दात्मकानि श्मश्रूणि मुखरोमाणि यस्य सः । आनन्दात्मकः केशः । अनेन यत्केशतः प्रादुर्भावस्तदाद्या आनन्दात्मका इत्यावेदयितुं तत्पदघटितश्रुत्युदाहरणमिति तात्पर्यं सूच्यते । आपादादानखादभिव्याप्य सर्वं आनन्दस्तदात्मकावयववान् स एष विष्णुरजो जननहीनोऽमृतो मुख्यामृतोऽचलः स्थिरः । यो ब्रह्मा गुणपूर्णो योऽधिकारी । एनं कृष्णमेकं प्रधानं वेद स आनन्दस्यैवं तदात्मकस्य सार्ष्णितां सामीप्यम् । अग्निर्हिङ्कार इति खण्डे छन्दोगोपनिषच्चतुर्थप्रपाठके सलोकतां सार्ष्णितां सायुज्यमिति खण्डार्थे सामीप्यमिति व्याख्यातत्वात्, यत्र क्वच न सामीप्यसार्ष्णिशब्दौ सह श्रूयेते तत्र सामीप्यातिसामीप्ये अधिकारिविवक्षया ज्ञेये । सलोकतां समानलोकत्वं सायुज्यं सयुजां भावः सायुज्यम् । माध्यंदिनायनश्रुतेरप्राकृतत्वगादिमत्त्वमेव तस्येति न प्राकृतः अप्राकृतो विग्रह इत्यर्थः । श्रुतिरिति पाठे यतोऽस्ति श्रुतिस्ततो न प्राकृतविग्रह इत्यर्थः । ननु विष्णोरेवैषा तोषात्मककेशादिमत्त्वं प्रतिपादयति किमायातं यादवस्येति चेन्न । सुस्मूर्षतु भवानुक्तार्थसङ्गतेः । साक्षाद्विष्णुरध्यात्मदीप इति देवक्या तथा त्वं ब्रह्म परमं धामेत्यर्जुनेन चोक्तेः कृष्णं प्रति । ऋष् ज्ञाने इतीवास्य भाष्योक्तेराङ्पूर्वादृषधातोस्तिप्रत्यये आर्धधातुके गुणे समानशब्दस्य सभावे सवर्णदीर्घे सार्ष्णिस्तद्भावं स्वयोग्यज्ञानितामित्यपि वर्णयन्ति । तच्छब्दश्रवणात्कृष्णपरेयं श्रुतिरिति समाधत्ते । अथवा सार्ष्णिष्टुत्वे च तां समानचक्राद्यायुधवतां । ये पृषतीभि ऋष्टिभिः । मरुतो भ्राजदृष्टय इत्येतद्भाष्येऽन्यदायुधमुच्यत इत्युक्तेः शङ्खचक्रादयस्तत्पदग्राह्याः । सर्वे चारुचतुर्भुजाः । धनुर्निषङ्गासिगदाशङ्खचक्राम्बुजश्रिय इत्यादेः । ऋषः गतावित्यस्याः वितच्क्तौ च संज्ञायामिति वितजन्तः शब्दः । सार्ष्णितामिति क्वाचित्कपाठे णकारागमो वाऽखण्डो वैदिकः स इति वा ज्ञेयम् । परस्तु सार्ष्टिरेव सार्ष्णिरिति व्याचख्याविति सार्ष्णितेति वा । पृथक् फलश्रवणादानन्दश्मश्रुरिति नार्थवाद इति ज्ञेयम् । ततश्चायं श्लोकार्थः । त्वक्चर्म च श्मश्रूणि च नखाश्च केशाश्च तैः पिनद्ध पिहितं बहिरन्तस्तु मांसेनास्थ्ना रक्तेन कृमिभिर्विड्भिर्विष्टाभिर्भरितं भरोऽस्य सञ्जात इति स तथा । तथाऽन्त्रैर्वीतं परीतं जीवच्छवं जीवन्तमेव शवसदृशदेहं पुरुषमिति यावत् । या ते पदाब्जमजिघ्रती अनाघ्रातवती मूढा स्त्री कामयति स्म परवशा भजति न मद्विधेति भावः । क्वचित्क्रमिन्तिरिति पाठो दृश्यते । तौ दृश्यौ । तथोक्तममरसुधायाम् । नोलङ्गस्तु कृभिः कर्णकलौकाः क्रमति । क्रमू पादविक्षेपे । क्रमितिमीति कः । बाहुलकात्सम्प्रसारणमिति । द्रुमामया भवेत्पुंसि कीटे चक्रमिव कृमिरिति रभसः । कृधिर्नाक्रमिवत्कीट इति निरभिधानाभिधानेन च ॥ ४९ ॥ अस्त्यम्बुजाक्षेति श्लोकेऽनतिरिक्त दृष्टेरिति । मयि चात्प्रपञ्चाद्द्वैतज्ञानवत इत्यन्यथामतिमन्यथयितुं स्वयमनूद्य व्याचष्टे । अनतिरिक्तदृष्टेर्भक्त्यानुसारिणो दृष्टिः कृपादृष्टिस्तद्वत्त इत्यनुग्रहवत इति । कथं पूर्यते भक्त्यादिकमविद्यमानमित्यतो मानमानन्दमुनिरुदाहरति । स इति । अत्युपसर्गपूर्वकत्वाद्गत्यर्थाद्रिगेः कर्तरि क्तप्रत्ययेऽतिरिक्ता तामतिक्रान्ता न भवतीत्यनतिरिक्ता दृष्टिः सुखयाम्येनमितीच्छाविशेषो यस्येति विग्रहः सूचितः । तथा चायं श्रुत्यर्थः । स एष इति प्राक् प्रकृतो हरिः परामृश्यते । परः सर्वोत्तमोऽजरो जरारहितोऽमरो मरणरहितस्तमेनं परं भक्तं भक्तिस्वाम्यात्तसम्बन्धिना । आहुरिति बहुसम्मतिमाह श्रुतिः । तत्स्वाम्यं स्फोरयति । हि यतः स भक्त्याऽनुगृह्णातीति । भक्त्यैवेदं जगद्वृणुते स्वकीयतया स्वीकरोति । इदमित्यसङ्कुचितवृत्तीति स्वयं तदर्थापयति । श्रियमित्यादिना । आपिपीलकं तज्जीवपर्यन्तं भक्तं वृणुतेऽभक्तं न वृणुते । यावद्भक्तो विशेषणीभूता भक्तिर्यावतीत्यर्थः । तावत्तद्भक्त्यनुसारम् । अधिकमिति क्रियाविशेषणम् । भक्तितारतम्यहेतुकम् । वरणादितारतम्यमित्यत्र श्रुतिमुदाहरति । अथातो भक्तिमीमांसेति । युवा स्यादित्यत्र न स्वातन्त्र्येणेति तद्व्याख्याति । साधुना विष्णुना यौति । यु मिश्रणामिश्रणयोरिति स्मरणात्ततः क्वनि युवा मिश्रीभवति । तथा तादात्म्यं नार्थ इत्यमिश्रीभवतीत्यावृत्त्याऽप्यर्थ इति केचित् । तैरनुव्याख्यातद्व्याख्यासुधाविरोधानुरोधः सम्पाद्यः । ते च स्वावसरे उदाहरिष्येते । युवा नित्यतरुणो मुक्त्यनन्तरं साधुयुवा साधुना विष्णुना युक्त इति साधुयुवा । आध्यायकः प्राप्ताध्ययनफलः । आशिष्ठोऽनुनीभवदानन्दः । दृढिष्ठो लिङ्गभङ्गानन्तरं प्राप्तानन्यथात्वात् । अतिबल इति बलिष्ठः । विवृतान्येतानि पदान्यनुव्याख्यासुधयोस्तथा तैत्तिरीय भाष्ये च । साधुना विष्णुना युक्तो मुक्तः साधुयुवा मतः । यौवनं नित्यमेतस्य मुक्तस्येति युवा स च । फलमध्ययनस्याप्तं तेनाध्यायक ईरितः । निह्लासानन्दसम्प्राप्त्या चाशिष्ठ इति गीयते । स्थिरतयानन्यथाप्राप्तेर्दृढिष्ठ इति चोदितः । बलिष्ठश्च स्वभावेन मुक्तो भवति केवलम् । इदानी

तैत्तिरीयश्रुतौ मुक्तमनुष्यज्ञापकं दर्शयन्युवा स्यादित्यादीनि पदानि व्याचष्टे। साधुनेति। निर्दोषो हि साधुरित्युच्यते। न च विष्णोरितरो निर्दोषोऽस्ति। अतः साधुना विष्णुनेत्युक्तम्। तृतीयान्ते साधुशब्द उपपदे यु मिश्रण इत्यस्मादन्येभ्योऽपि दृश्यत इति क्वनिन्प्रत्यये साधुयुवेति भवति। यद्वा युजिरं योग इत्यस्येद रूपम्। दृशिग्रहणासामर्थ्याद्धातोरन्तलोपः। तथा च भगवत्सामीप्यलक्षणमोक्षवानित्युक्तं भवति। युवशब्दादप्यतिशयेन साधुयुवशब्दो मुक्तस्त्वज्ञापक इति क्रममतिलङ्घ्यादौ व्याख्यातः। यद्यपि युवशब्दो यौवनमितस्तथाऽपि मुख्यामुख्ययोर्मुख्ये सम्प्रत्यय इति नित्ययौवनमङ्गीकार्यम्। तच्चैतस्य मनुष्यमुक्तस्यैव युज्यते तं संसारिण इति हेतोर्यया च स मुक्त एव। आध्यायकशब्दो यद्यप्याङ्धिपूर्वादिगध्ययन इत्यस्माण्वुल्प्रत्यये सति निष्पन्नः सम्यगध्ययनकर्तारमाह। तथाऽप्यत्र पुरुषार्थप्रसङ्गादध्ययनस्य चापुरुषार्थत्वादध्ययनफलप्राप्तेर्लक्षको वर्णनीयः। अध्ययनस्य फलं च तेनैवाप्तं मुक्तेरेव तत्फलत्वात्। तेन कारणेन मुक्त एवाध्यायक ईरितः। आ सम्यक् समन्ताच्च शमस्येत्याशोऽतिशयेनाशेषः। सम्यक्त्वादिकं च ह्रासाभावादिकमेव। ततो निर्ह्रासस्य योग्यतानुसारेण पूर्णस्यानन्दस्य सम्प्राप्त्या कारणेन मुक्त एव आशिष्ठ इति च गीयते। अधिकारो हि दृढो नाम। अतिशयेन दृढो दृढिष्ठः। छान्दसत्त्वादकृतो हलादेर्लघोरित्येतन्न भवति मुक्त एव स्थितस्यान्यथाप्राप्तेरतिशयेन निर्विकारत्वाद्दृढिष्ठ इति चोदितः। बलमस्यास्तीति बली। अतिशयेन बली बलिष्ठ.। अतिशयश्च स्वाभाविकत्वम्। स्वभावेन बलिष्ठश्च केवलं मुक्तो भवति नामुक्तः। अतो बलिष्ठ इति स एवोच्यत इतीति। यस्तु साधुर्गुणैर्युक्तस्तस्यैवाप्यखिला मही। त्रेतायुगे चक्रवर्ती यदा मुक्तस्तु संसृतेः। अधीति फलपूर्णत्वादाध्यायक इतीरितः। स एव विष्णुना युक्तो गच्छतीति युवा स्मृत इति। तस्येयं पृथिवी वित्तेन पूर्णा स्यादधीनेति शेषः। तस्येयं पृथिवीत्यादि पूर्वभावव्यपेक्षया। पूर्वभावोऽमुक्तत्वम्। मुक्तामुक्तमनुष्ययोर्बिवक्षया हि युवा स्यादित्यादीकृत्यैकविषयताप्रतिभासो नानुपपन्न इत्यन्तेन सुधोक्तमनुसन्धेयम्। स एको मानुषो मुक्तः। एको भक्तिको मनुष्यो भवति। ये शतं मानुषा भक्ता एतावानेतत्प्रमाणो मानुषः। गन्धर्वो भवतीत्येकवचनान्तेन सर्वत्रान्वितो भवति। तश्चक्रवर्तितामापन्नस्य शतभक्तिमेलने मनुष्यगन्धर्व एको भक्त एकत्वसङ्ख्यावच्छिन्नभक्तिमानिति। एवमुत्तरत्राप्यनुसन्धेयम्। ते ये शतं मनुष्यगन्धर्वा एतावान्देवगन्धर्वः। ते ये शतं गन्धर्वास्तावांश्चिरलोकपितृकाश्चिरलोकस्तत्रत्यपितृगणः। एतदुक्तं तैत्तिरीयभाष्ये। एकानन्दस्वरूपोऽसौ मानुषो मुक्त इष्यते। तस्माच्छतगुणानन्दा गन्धर्वा मानुषात्मकाः। मुक्त्या श्रुतिफलं प्राप्तास्ततः कामाहतास्तथा। तेभ्यः शतगुणानन्दा देवप्रेष्यास्तु मुख्यतः। एते हि देवगन्धर्वा मुक्तेभ्यस्तेभ्य एव च। शताधिका हि पितरस्तेभ्य आजानदेवताः। अनाख्याता देवतास्तु जाता देवकुलेऽन्वयाः। आजानदेवतास्ता हि ताभ्योऽग्र्याः कर्मदेवताः। बल्याद्या अन्तरा प्राप्तदेवताः कर्मदेवताः ताभ्यश्च तात्त्विकादेवाः सृष्ट्यादौ देवतां गताः। तेभ्यो दक्षश्चेन्द्रनामा स हीन्दुरारयत्पुरा। तस्माद्बृहस्पतिर्नाम महेन्द्रत्वात्पुरन्दरः। तस्मात्प्रजापतिर्मुक्तो रुद्रः प्रजननेशिता। तस्माद्ब्रह्मा शतगुणो मुक्त इत्येष निर्णयः। यथाऽऽनन्दे तथा ज्ञाने विष्णुभक्तौ बलादिके। अत एतदुदाहरणं युक्ततरमिति ज्ञेयम्। सर्वैर्गुणैः शतगुणाः क्रमेणोक्तेन तेऽखिला इत्यादि। ते ये शतं चिरलोकपैतृका एतावांश्चिरलोकगतदेवगणः। एतच्छताधिकभक्तिमत्यतात्त्विकी बल्यादिकर्मदेवता तद्गणः। तस्या अतात्त्विक्या देवतायाः सकाशात्तात्त्विकी देवता तत्त्वेशगणस्तच्छतांशभक्त्यधिकः पुरुहूत इन्द्रः। एतच्छताधिको रुद्रस्ततो विरिञ्चो ब्रह्मा ततः श्री एतावती भक्त्यधिका भवति। ते ये शतं विरिञ्चा इत्यत्र शतशब्दो बहुत्वपरः। एभ्यः श्रीस्तु मुक्तेभ्यो गुणैः कोटिगुणोत्तरा। ज्ञानानन्दबलादिभ्य इति बृहद्भाष्योक्तेः। यदर्थमिदमुक्तं तन्निगमयति। तद्यावतीति। अथ एषो यद्भक्तिरितरानन्दतरतमभावभाविकैष हरिः परमः परानन्दः। विश्वो देशादिपूर्णो विनोदो विशेषतो नुदति प्रेरयतीति तथाऽपनोदः स्वयमपगतप्रेरकः सकारकः सम्यक्करोति कारयतीति वा सकारकः। किञ्च विविधतया कारकोऽपि। अधिकारकः कारकत्वेनेतरमताधिकः। एतस्यैव बिम्बभूतानन्दस्य मात्रं विप्लुषम्। अन्यानि भूतानि रमादितृणचरमाणि उपजीवन्त्युपजीव्य वर्तन्त इति पौत्रायणश्रुतिः। क्षितिपानां तु कोशशौर्यवयः पुत्रदेहदार्ढ्ययुतस्य च। सप्तद्वीपवती भर्तुर्यत्सुखं जायतेऽतुलम्। स एको मानुषानन्दो मोक्षे तु प्रतिपद्यते। तस्माच्छतगुणानन्दो महीशानां निगद्यते। तस्माच्छतगुणानन्दा गन्धर्वा मानुषात्मका इति वायुपुराणमधिमाहात्म्योक्तेर्ग्रहणमत्र ज्ञेयम्। देवर्षिपितृपनराः क्षितिपा मानुषगन्धर्वा इत्यादेश्च। मानुषा वर्णभेदेन तथैवाश्रमभेदत इति मानुषगन्धर्वा इति सूत्रभाष्योक्तेश्च। यदर्थं भक्तितारतम्यमुक्तं साधनस्योत्तमत्वेन साध्यं चोत्तममाप्नुयुरित्यादेस्तदनुग्रहमहत्त्वतादमहत्त्वं भक्त्यनुग्रहयोः सामानाधिकरण्ये च स्पष्टयन्ती श्रुतिमुदाहरति। मिथिताविति। एतौ भक्तिरनुग्रहश्चेत्येतौ मिथितौ मिथुनीभावेन ताविति तौ भवतः। स्वयमेवैतत्पदार्थं प्रपञ्चयति। यदनुग्रहश्च भक्तिश्चेति। एताविप्युपपत्तये भक्तिश्चानुग्रहश्चेति पुमांस्त्रियेत्युक्तेर्व्यत्यस्यान्वयो ज्ञेयः। पुनः पुनर्दार्ढ्याय व्याप्तेरुक्तिः। प्रकृतौ रमायां तदवरो रमावरो महत्यभिमन्यमानाभिमानिनोरभेदं व्यपदेशो दृष्टचर इति चतुर्मुखेऽथ रुद्रे तत इन्द्रे देवेषु तात्त्विकेषु तेन तत्त्वेशा अप्युपलक्षणीयाः। चिरलोकगर्षिपितृषु मनुष्याश्चक्रवर्तिन इति श्रुतिर्यतोऽस्ति ततोऽनतिरिक्तदृष्टिरित्यस्योक्त एवार्थो युक्त इति भावः। तथैवोपात्तरजोऽतिमात्रमिति भगवतो रजःसम्बन्धः प्रतीयत इत्यतः स्वयं तद्व्याकृत्य प्रसङ्गसन्निधापितगुणद्वयेन सह रजःसम्बन्धो न हरेरस्तीत्यत्र मानमभिधत्ते। तस्यामेवेति। तस्यां प्रकृतावेव रजसो गुणस्योद्रेचनमुद्रिक्तीकरणमुपात्तरजोमात्रत्वमुपात्तं रजसोऽतिमात्रमुद्रेचनं येनेति मूले विग्रह इत्यनेनासूचीति ज्ञेयम्। रजः

परमपरयोः सत्त्वतमसोरुपलक्षकमिति ज्ञेयम्। अथेति गुणवदगुणवद्विवेचनारम्भे। त्रिगुणा त्रयो गुणा यस्यां सा त्रिगुणा प्रकृतिः। अगुणो वाव विष्णुः। अरजास्तत्सम्बन्धविधुरः। अस्याः प्रकृतेः सकाशाद्रज उद्वर्धयति स्थुलीकरोति तत एषा वाव स्थूलतां याता सृष्टिः। स हरिः स्वयमसत्त्वः सत्त्वं चोद्वर्धयति। एषोद्रिक्तसत्त्वात्प्रकृतिः स्थितिः। तथा तमसाऽतत्सङ्गस्तमुद्वर्धयति। एष वाव लयः कथ्यत इति शेषः। एते गुणा यथा स्वकार्यकारिणः सन्तो नैनं स्पृशन्ति एष भगवानपि। एतांस्तत्कार्यानुभवेन नाभ्युपस्पृशति। अतोऽयमगुणो भवति न तु सर्वथा तदनाश्रयो विश्वम्भरत्वहान्यापत्तेः। अत्रैतद्विषयेऽयं श्लोकोऽपि भवति मानमिति शेषः। निर्गुणस्य यद्गुणादानन्दगुणस्वीकारः श्रुतौ श्रूयते तत्प्रकृतेः सकाशाद्गुणवर्धनं तदात्मकः। कदाचिदेष गुणैः स्पृश्यते। तत्र हेतुर्हि स परम इति। प्रकृतिर्जडा मुख्यतस्तदुद्रेचनपात्रं पात्रं च रमाहरिस्वाम्येन। स च स्वातन्त्र्येणोद्रेचक इति विवेको ज्ञेयः। ततश्चायं श्लोकार्थः॥ स्वस्वभावमावेदयन्त्यात्मानं ताभ्यो विमूढाभ्यो व्यावर्तयन्त्याह॥ अस्तीति। हे अम्बुजाक्ष! मम ते चरणानुरागस्तत्परमभक्तिरस्ति। लटा सार्वत्रिकत्वं तस्य द्योतयति। न त्वां विना ममापि गतिरिति नेत्याह॥ आत्मन्नात्मनीति। रतस्य स्वरमणस्य तव न रमणीकृत्यमिति भावः। मयि चानतिरिक्ता भक्त्यनुसारिणी दृष्टिरनुग्रहो यस्य तस्य। यर्हि यदाऽस्य जगतो विवृद्धये सृष्ट्यै मय्युपात्तरजोऽतिमात्र उपात्तं रजसोऽतिमात्रमुद्रेचनं येन सः। तस्यामित्यावृतं मयीत्यस्य व्याख्यानमिति मन्तव्यम्। तद्रमात्मकत्वं द्योतयितुं तस्यामित्युक्तेस्तात्पर्य इति तात्पर्यं ज्ञेयम्। मामीक्षस इति यत्तन्नोऽस्मदुपरि परमाऽनन्यसाधारिण्यनुकम्पा करुणाकर्तुमकर्तुमन्यथाकर्तुं शक्तस्यास्मदीक्षणं करुणामूलमिति भावः। उ अवधारणे। हेतीतरगुणद्वयस्यापि कार्यानुरोधेनोद्रेचनं मानिकमिति तदुपलक्षणीयताद्योतकमिति मन्तव्यम्। न इति मामिति च गदन्ती रूपविशेषाविशेषतां च तेषां ध्वनयामास॥ ५०॥ नैवालीकं भवत्येवेति श्लोके सर्वथा व्यतिरेकनिदर्शनत्वं प्रतीयते। तथा भीष्मभार्यायाः कन्येति वादे रतिरिवेति चेति प्रायःपदं क्वचित्पादाभ्यां क्वचिदलीकता चेति। ततः स्वयं सान्वयमर्थं दर्शयति॥ मातुरिति। मातुः कन्याप्रदानवादे पुत्र्या वराय वितरणकथायां रतिरिमामस्मै दास्यामिति प्रीतिस्तज्जन्यं वचो यथा प्रायोऽलीकं मिथ्या न भवति। अनेनायथार्थं क्वचिद्भवति यथावस्थितांश एव निदर्शनमत्रेति सूचयति। तथा ते वचः क्वापि नालीकं भवत्येव। अत्र प्रायःपदान्वयभ्रमयातानृतत्वभ्रमभ्रंशमेवकारयोजनेनातनोदिति ज्ञेयम्॥ ततश्चायं श्लोकार्थः॥ आत्मनो रूपं भजस्वेत्युक्तं यथार्थमिति वक्ति॥ नैवेति। हे मधुसूदन। ते वचोऽलीकं नैव भवति सत्यमेव। अम्बाया मातुः कन्यावादरतिः प्रीतियुक्तं सङ्कल्पं प्रायो यथा नालीकं भवति तथा तद्याथार्थ्यवद्वचनविशेषवत्तव वचः क्वचित्क्वापि नालीकं भवति। अनुरूपो मम त्वमेवेति नालीकं तव वच इति नालीकलोचन औत्तरयदिति ज्ञेयम्। अतोऽपि न पाङ्तमुत्तरमिति ज्ञायते। भवतीति पाठ एवाचार्यगृहीत इति दृष्टान्तेऽपि भवतीति संयोज्य दार्ष्टान्तिकेऽवधारणसहितं तं विधायावृत्त्याऽन्वयनाज्ज्ञायते। रूपतोऽपि न शोभां बिभर्ति॥ ५१॥ मूढाया अपि पुंश्चल्या इति श्लोके नान्वयार्थौ सरसतया प्रतीयेते इति किञ्चिदध्याहृत्य तावाह॥ यामसतीमिति। यामसतीं बुधो न बिभृयाद्यां च बिभ्रत्पुमानुभयस्माच्च्युत इत्यर्थापयति। दृष्टादृष्टच्युतो भवति ऐहिकपारलौकिकभ्रष्टो भवति। तस्या अपि पुंश्चल्यास्त्वयि मनो नवं नवमभ्येति पुंमात्रं गच्छन्त्याऽपि तस्या नवं नवं यथा तथा नित्यनूतनतयेति यावत्। मनोऽभ्येति। सुखदुःखभयेति श्लोके रुक्मिण्या दुःखादिकं प्रतीयते तथा विप्लवाधिय इति भ्रान्तिश्च तथाऽऽर्तेति मोहः प्रतीयते। न च साक्षाल्लक्ष्म्या जयन्ती जानकी सत्या रुक्मिणीत्यादिका रमेत्यादिबृहदारण्यकभाष्योक्तप्रमाणविरोधात्। तथा द्वावेतौ नित्यमुक्ताविति विरोधाच्चेत्यतो मानेन तत्प्रदर्शनमात्रं न तद्वास्तवमित्याह॥ अमुग्धेवेति। हरिश्चैवं दर्शयेदित्यन्वयः। मिथः परस्परं तादृग्वचनं तादृशमाकारं च लीलयैव नृणां दर्शयन्तौ मोहं कुर्याताम्। उभयोर्व्यापारो दुर्जनमोहनार्थमेवेत्यत्र बहुमानसंवादोऽस्तीति बोधयितुं शास्त्रदर्शनादित्युक्तमिति मन्तव्यम्। एवं कुतः कुर्वाते तयोः शास्ता किन्नेत्यतोऽप्याह। शास्तुरदर्शनान्नास्ति शास्तेति च। एवं लीलां लातीति भावः। तच्च भारतादिकमजानन्पृच्छति स्मान्यास्तनूस्त्यक्त्वा दिवं गतः। इत्याद्यसुरमोहाय दर्शयामास नाट्यवदिति। अदुःखाऽबद्धेत्यादि च॥ ततश्चायं श्लोकार्थः॥ यामसतीं बुधो न बिभृयाद्यां च तां बिभ्रत्पुमानुभयस्माद्दृष्टादृष्टाच्च्युतो भवति। तस्या अपि मूढायाः पुंश्चल्याः पुंमात्रगामिन्या मनो नवं नवं यथा तथा त्वय्यभ्येति। मादृशानां मनो गच्छेदिति किं वाच्यमतो मया त्वं वृत इति भावः॥ ५२॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तर्हि तासामैहिकं सुखं तैर्भविष्यति, ऐहिकामुष्मिकयोस्तुल्यत्वादप्रयोजकः शाप इत्याशङ्क्याह त्वगिति। न हि शवालिङ्गने कश्चन भोगोऽस्ति। स्वप्नेऽपि तथा दर्शने मृत्युर्भवति। अग्निप्रवेशे तु शवालिङ्गने स्पष्ट एव मृत्युः। यदि तस्मिन् देहे चेतनः कश्चिदिन्द्रियवान् भवेत्, तदा स न गर्दभादिभावं प्राप्नुयात्। अतः केवलं शव एव, परं जीवच्छवः। प्रसिद्धात् प्राणा अत्र विशिष्टाः। न केवलं शवत्वमात्रमेव दूषणम्, किन्तु अवयवशोऽपि विचारे तत् दुष्टमित्याह। बाह्याभ्यन्तरभेदतः। तस्य शवस्य परितस्त्वक्। ऊर्ध्वं लम्बितभागे श्मश्रूणि। यथाष्टदिशः पूर्वभागः। सर्वत्र लोमानि यथा तृणानि। अन्तेषु नखाः,

यथा प्राकारे शृङ्गाणि शूलानि वा । पश्चात्केशाः । एवं सर्वतो बहिः **पिनद्धम्** । अन्तस्तु मांसम्, तस्याप्याधारभूतमस्थि च । तत्रापि मध्ये नाड़ीषु लोहितम् । नाड्यो बहिरप्यायान्तीति रुधिरं मांसाद्बहिरप्युपलभ्यते । वस्तुततस्त्वन्तः । तत्र च कृमयः क्षुद्राः जीवाः । ततोऽपि मध्ये पुरीषम् । कफपित्तवाताः शास्त्रसिद्धा रोगादिसूचकाः । एवं दृष्टादृष्टदोषा निरूपिताः । नन्वेतादृशं चेत्कुत्सितम्, तदा कथं भजेतेत्याशङ्क्याह **कान्तमति**रिति । अयं कान्तः परमसुन्दर इति तस्मिन्नुत्कृष्टबुद्धिः । ननु प्रत्यहं मलादिरूपत्वं दृश्यत इति कथं तस्मिन् कान्तबुद्धिः स्यात्, तत्राह **विमूढे**ति । ननु सर्वासामेव स्त्रीणामियमेव व्यवस्थेति साधारण्यादस्यैव भोगशब्दवाच्यत्वात् सुखजनकत्वस्य दृष्टत्वात्तादृशेनैव सुखं भविष्यतीति व्यर्थं तद्दोषनिरूपणमिति चेत् । तत्राह **या ते पदाब्जमकरन्द**मिति । यथा श्रोत्रं कथा गृह्णाति, तथा घ्राणमपि भगवन्तमा व्य भगवच्चरणारविन्दरजो गृह्णाति चेत्, तदा शवं न गृह्णाति । यो हि कमलगन्धमाजिघ्रति, स शवगन्धात् विचिकित्सते । विशेषानभिज्ञस्तु काकादिः न विचिकित्सत इति नायं सर्वात्मना भोगरूपः । स्त्रीपदं पतिव्रताव्युदासार्थम् । सा हि धर्मार्थमेव भगवद्बुद्धया तं भजत इति । नापि तस्या विषयापेक्षा ॥ ४५ ॥ एवमितरभजने स्त्रियं पुरुषं च निन्दित्वा, स्वस्य विषयाधिकार एवेति सर्वथा विषयाभावे केवलमोक्षाधिकारात् स्वस्यापि प्रवृत्तिर्व्यर्थेत्याशङ्क्याह **अस्त्वम्बुजाक्ष मम ते चरणानुराग** इति । **अम्बुजाक्षे**ति दृष्ट्यैव परमसुखदातृत्वं निरूपितम् । ते चरणानुरागो ममास्तु । **उभयोरनुरागे** उभयोः सुखं भवति, स्पर्शादिना, नत्वननुरागे । तत्र भगवतश्चेन्मयि नानुरागः, तदा पूर्णानन्दत्वात् मत्स्पर्शादिकृतसुखाभावेऽपि न काचित् क्षतिः । मम तु पूर्णानन्दत्वाभावात् अन्यत्र स्पर्शे धाष्टर्यं भवतीति चरणस्पर्शे विरोधाभावात् तत्रानुरागोऽस्तु । प्रार्थनायां लोट् । **मम त** इति अव्यवहितसम्बन्धः प्रार्थनाधिकारे हेतुः । भगवतो नापेक्षित इति द्वितीयस्य स्नेहः कदाचित् प्रतिबन्धकत्वेन अनपेक्षितः स्यात् । ततो भगवदिच्छाभावे रागो न भवेदिति प्रार्थना । भगवतोऽनपेक्षत्वे हेतुः **आत्मन्नतस्ये**ति । तर्ह्यात्मारामो विषयेष्विव त्वय्यपि भगवान् सम्बन्धं न करिष्यतीत्याशङ्क्याह **मयि चे**ति । यथा भगवानात्मनि रमते, एवं प्रपञ्चेऽपि रमते । तत्र प्रपञ्चस्य मूलं स्वरूपमहमिति सृष्टिप्रलययोः सिद्धत्वान्मत्सङ्गं न बाधिष्यत इत्यर्थः । नन्वेवं सति संसारिणामात्मारामाणां च को विशेष इति चेत् । तत्राह **अनतिरिक्तदृष्टे**रिति । सर्वात्मनो भगवतः आत्मनि वा मयि वा न अतिरिक्ता दृष्टिर्यस्य । सर्वस्यैवात्मत्वादेकैव दृष्टिः सर्वत्र । तर्हि तव कथं स्त्रीरूपः पुरुषार्थः सिध्येत्, अन्यथा स्त्रीत्वं व्यर्थं स्यादिति चेत् । तत्राह **यर्ह्यस्य वृद्धय** इति । **यर्हि** भगवान् अस्य जगतो वृद्धये आत्ता रजसः अतिमात्रा अधिकमात्रारूपः कामः येन । तर्हि मामीक्षिष्यते । 'वर्तमानसामीप्ये वर्तमानद्वे'ति । तर्हि तदैव नोऽस्मभ्यं सर्वशक्तिभ्यः परमानुकम्पा । अस्मासु महती कृपेत्यर्थः । 'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् । सम्भवः सर्वभूतानां ततो भवति भारते'ति वाक्यात् । ईक्षणेनैव चिच्छक्त्याधानमुक्तम् । सम्बन्धस्तु भगवता सह नित्य इतीक्षणमेव विशेषः ॥ ४६ ॥ एवमुदासीनत्वेऽपि स्वस्य सर्वपुरुषार्थसिद्धिमुक्त्वा, सुखप्रस्तावनायां भगवानकस्मादेवं यदुक्तवान्, तत्र को हेतुरित्याशङ्क्य, परीक्षार्थं तेषामुपयोग इति भावं वर्णयति द्वाभ्याम् । **नैवालीकमहं मन्य** इति । यथाश्रुतार्थत्वेऽपि ते वचः अहमलीकं न मन्ये । असम्भावितवचनमलीकम् । मधुसूदनत्वात् परमसमर्थस्य सर्वापेक्षारहितस्य क्लिष्टकरणे प्रयोजनाभावात् परीक्ष्यैव सम्बन्धः कर्तव्य इति सूचितम् । सम्भावनायां स्त्रीत्वमेव हेतुः । यतः महति कुले जातायाः काशिराजसुताया अम्बायाः कन्याया इव क्वचित् साल्वे रतिर्दृश्यते । अम्बा अम्बिका अम्बालिकेति तिस्रः काशिराजकन्याः भीष्मेण विचित्रवीर्यार्थे स्वयंवरे आहृताः । ततो ज्येष्ठा भीष्मं प्रति स्वाभिप्रायमुक्तवती 'साल्वे मन्मन'इति । ततो भीष्मेण प्रेषिता, साल्वेनान्याहृतेत्यगृहीता, पुनर्भीष्मं प्राप्ता । परशुरामवाक्यादपि भीष्मेणासङ्गृहीता, तपसा देहं त्यक्त्वा शिखण्डी भूत्वा, भीष्मवधार्थमुत्पन्नेति भारतकथा । व्यूढाया अपि पुंश्चल्याः । जन्मसंस्काराद्ग्रहैर्वा बहुपुरुषसम्बन्धिनी भवति । ततस्तस्या मनः नवं नवं पुरुषमभ्येति । तदवश्यं परीक्षणेन ज्ञातव्यम् । तत्र प्रयोजनमाह **बुधः असतीं न बिभृया**दिति । **तां बिभ्रदुभयच्युत** इति बाधकम् ॥ ४७–४८ ॥

श्रीसुबोधिनी-सारः

या हि ते तव पादाब्जयोर्मकरंदमजिघ्रति सा विमूढा स्त्री कांतोयमिति बुद्धिर्यस्याः सा त्वगादिभिः पिनद्धमावृतमंतमांसादयो यस्य तं जीवन्मृतं भजतीत्यहो मोहवैभवम् ॥ ४५ ॥ "उदासीना वयम्" इत्युक्तमुररीकृत्य प्रार्थयते मयि चापि नातिरिक्तोत्तमेयमिति दृष्टिर्यस्य तस्यात्मन् रतस्य स्वात्मारामस्य ते तव चरणयोरनुरागः प्रीतिरस्तु मम हे अंबुजाक्ष अस्य जगतो विवृद्धये उपात्ता गृहीता रजसोतिमात्रा येन स हरिर्यर्हि यदा मामीक्षसे पश्यसि तदीक्षणमेव नोऽस्माकं परोनुग्रहः तु एव ह हर्षे ॥ ४६ ॥ हे मधुसूदन अथात्मनोनुरूपं वा इत्यादि ते वचोऽलीकं मिथ्या नाहं मन्ये कन्याया अंबायाः काशिराजसुताया इव प्रायः क्वचिदन्यत्र रुचिः स्यादिति भारतादिपर्वणि कथा मम तु त्वय्येव तिष्ठतीति भावः ॥ ४७ ॥ न केवलं कन्याया एवान्यत्र रतिरपि तु व्यभिचारिण्या विवाहिताया अपि मनो नवं नवमभ्येति प्रचलति तामसतीं दुष्टां बुधः पंडितो न दध्यात् । तत्र हेतुः । बिभ्रत् धारयन् उभयस्माल्लोकद्वयाच्च्युतो भ्रष्टो भवति ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

या स्त्री तव पादाब्जमकरन्दमजिघ्रती तव चरणमाहात्म्यं कथायामश्रुतवती सा कान्तो कमनीयोऽयमिति मतिर्यस्यास्तथाभूता। तत्र हेतुमाह—विमूढेति। विशेषेण मोहितचित्ता बहिस्त्वगादिभिः पिनद्धं छन्नं अन्तश्च मांसादयो यस्मिंस्तं अतो जीवदपि शवतुल्यं पुरुषं भजतीत्यन्वयः॥ ४५॥ यदुक्तम् 'उदासीना वयम्' इत्यादि तत्राह—अस्त्विति। तस्मिन् स्वासक्ति सूचयन्ती सम्बोधयति—अम्बुजाक्षेति। मयि चापि अनतिरिक्ता अनतिशयवती अनासक्ता दृष्टिर्यस्य तस्य। तत्र हेतुमाह—आत्मन् आत्मनि निजस्वरूपानन्दे रतस्येति। ते तव चरणानुरागो ममास्तु। एवं त्वय्युदासीनस्य चरणानुरागेपि तव किं फलं स्यात्तत्राह—यर्हीति। अस्य विश्वस्य वृद्ध्यर्थं उपात्ता अङ्गीकृता रजोगुणस्यातिमात्रा औत्कण्ठ्यं येन तथाभूतः सन् मां त्वमीक्षसे तत् उत दीक्षणमेव नोस्माकं सर्वासां शक्तीनां परमा निरतिशया अनुकम्पा तव कृपेति। हेति हर्षं सूचयति॥ ४६॥ अथात्मनोऽनुरूपं भजस्वेति यदुक्तं तत्र विवेकवती काऽन्यं श्रयेतेत्युत्तरमुक्तम्। 'मूढायास्तु तदपि संभवति' इत्याह—नैवेति द्वाभ्याम्। हे मधुसूदन! अथात्मनोनुरूपं भजस्वेति यत्ते वचस्तदहमलीकमनृतमसत्यं न मन्ये, कुतो यतो लोके कन्याया एव क्वचित्पुरुषविशेषे रतिर्भवति। तत्र दृष्टान्तमाह—अम्बाया इवेति। यथा काशिराजकन्यानामम्बाम्बिकाम्बालिकानां तिसृणां मध्ये अम्बायाः कन्याया एव शाल्वे रतिर्जातेति तद्वदित्यर्थः। 'विवेकवत्यास्तु न स्वत एवं रतिः, पित्रधीनत्वात्' इत्याशयेन प्रायग्रहणम्॥ ४७॥ तथा व्यूढायाः परिणीतायाः अपि पुंश्चल्या मनो नवं नवं पुरुषमभ्येति व्यवहारे सत्यपि बुधो विवेकी पुरुषः असतीं पुंश्चलीं स्त्रियं न बिभृयात् न प्रतिगृह्णीयात्। विपर्ययेऽनर्थमाह—तामिति। तामसतीं बिभ्रत् पुष्णन् पुरुषः उभयच्युतो भवति अस्मिन् लोके परलोके च दुःखमेवानुभवति, न सुखमित्यर्थः॥ ४८॥

अन्वितार्थप्रकाशिका

त्वगिति॥ या विमूढा स्त्री ते तव पदाब्जमकरन्दमजिघ्रती तव चरणमाहात्म्यं कथायामश्रुतवती। नुमभाव आर्षः। सा कान्तः कमनीयोऽयमिति मतिर्यस्यास्तथाभूता सती त्वक्श्मश्रुरोमनखकेशैः पिनद्धं छन्नम् अन्तश्च मांसास्थिरक्तकृमिविट्कफपित्तवाता यस्मिन् तं जीवन्तमपि शवतुल्यं पुरुषं भजति॥ ४५॥ उदासीना वयमित्यत्राह—अस्त्विति॥ हे अम्बुजाक्ष! मयि चापि मय्यपि अनतिरिक्ता नास्त्यतिशयवती दृष्टिर्यस्य तस्य आत्मन् आत्मनि निजरूपानन्दे रतस्येति आत्मन्निति सुपां सुलिति सप्तम्या लुक्। यद्यपि त्वं मयि त्वं निरपेक्षः आत्मरतश्चेति तथापि ते तव चरणानुरागो ममास्तु यर्हि अस्य विश्वस्य वृद्धये उपात्ता अङ्गीकृता रजोगुणस्यातिमात्रा औत्कट्यं येन तथाभूतः सन्मां प्रकृतिरूपां त्वमीक्षसे तत् उ तदीक्षणमेव नोऽस्माकं सर्वासां शक्तीनां परमा निरतिशया अनुकम्पा अत्यनुग्रहः॥ ४६॥ एवं सर्वं तदुक्तं प्रतिव्याख्याय प्रसन्नचित्ता प्राह—नेति॥ हे मधुसूदन! अथात्मनोऽनुरूपं भजस्वेति यत्ते वचस्तदहमलीकमनृतमसत्यं न मन्ये यतः अम्बायाः काशिराजसुतायाः शाल्व इव कन्याया एव क्वचित्पुरुषे रतिर्भवति। मम तु रतिस्त्वय्येव पर्यवस्यतीति। अम्बा अम्बिका अम्बालिकेति तिस्रः काशिराजकन्याः भीष्मेण विचित्रवीर्यार्थं स्वयंवरे आहृताः। ततो ज्येष्ठा भीष्मं प्रति स्वाभिप्रायमुक्तवती शाल्वे मन्मन इति। ततो भीष्मेण प्रेषिता शाल्वेनान्याहृतेत्यगृहीता पुनर्भीष्मं प्राप्ता परशुरामवाक्यादपि भीष्मेणासंगृहीता तपसा देहं त्यक्त्वा शिखण्डीभूत्वा भीष्मवधार्थमुत्पन्नेति भारतकथा॥ ४७॥ व्यूढाया इति॥ व्यूढायाः परिणीतायाः अपि पुंश्चल्या मनो नवं नवं पुरुषमभ्येति एवं व्यवहारे सत्यपि बुधो विवेकी पुरुषः असतीं पुंश्चलीं स्त्रियं न बिभृयात् न प्रतिगृह्णीयात्। यतः तामसतीं बिभ्रत् पुष्णन् पुरुषः उभयच्युतो भवति। अस्मिन् लोके परलोके च दुःखमेवानुभवति॥ ४८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

त्वगिति त्वगादिभिः पिनद्धमाच्छादितं अंतर्मध्ये मांसादयो विद्यंते यस्मिस्तं। अतो जीवच्छवं नरं कांतोयमिति मतिर्यस्या एवंभूता सती या स्त्री भजति सा विमूढायतस्ते तव पदाब्जमकरंदमजिघ्रती असेवमानास्ति॥ ४५॥ उदासीना वयं नूनमित्यस्योत्तरमाह अस्त्विति॥ हे अंबुजाक्ष आत्मन् आत्मनि रतस्य मपि च न अतिरिक्ता अधिका दृष्टिर्यस्य तस्य संकुचित्तांतर्यामिशक्त्याकृतप्रतिलोम दृष्टेरपीत्यर्थः अनेन अकामुकत्वमुक्तं ते तव चरणयोः अनुरागः प्रीतिरस्तु सा च कदेति चेत्तत्राह यर्हि अस्य विश्वस्य वृद्धये उत्पतये पालनाय च उपात्ता रजोतिमात्रा रागात्मकवृत्तिर्येन सः। त्वं मामीक्षसे विकसितांतर्यामिशक्तिप्रवर्त्तिकयाऽनुलोमदृष्ट्यापश्यसीत्यर्थः उह्ण्वार्थे। तदेव नोऽस्माकं परमानुकंपा अत्यन्तदयास्ति॥ ४६॥ अदीर्घसमीक्षया त्वया वयं वृता त्वया इत्यस्योत्तरं कुर्वती सती प्रत्युक्तिमुपसंहरति द्वाभ्यां नैवेति। अदीर्घसमीक्षया वयं वृता इति ते तव वचस्तदहमलिकमसत्यं न मन्ये तद्वचस असाध्वीपरत्वात् अहं तु साध्व्यस्मि अतो मया तु दीर्घसमीक्षयैव वृतोसि हि यतः साध्व्यसाध्वीति द्विविधासु स्त्रीषु मध्ये साध्व्याः कन्याया अपि क्वचित् एकस्मिन्नेव पुरुषे रतिः स्यात् यथा अंबायाः पार्वत्याः कंन्याया अपि शंकरे रतिः तथा ममापि त्वय्येव रतिः॥४७॥ पुंश्चल्याः असाध्व्याः व्यूढायाः कृतपाणिग्रहणाया अपि नवं नवं नरं तां बिभृत्सन्। उभयलोकतः च्युतः॥ ४८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त्वगिति । या स्त्री, ते तव, पदाब्जमकरन्दं, अजिघ्रती नाघ्रातवती, कदाप्यश्रुतत्वत्कथेति यावत् । अत एव, विमूढा अत एव, कान्तः प्रियतमोऽयं ममेति मतिर्यस्याः सा, एवंविधा स्यात् । सा स्त्री, त्वक् च श्मश्रूणि च केशाश्च नखाश्च रोमाणि च तैः पिनद्धं बहिश्छन्नं, अन्तः मांसं च अस्थीनि च रक्तं च कृमयश्च विट् च कफश्च पित्तं च वातश्च यस्मिंस्तत् । जीवदपि, शवं शवतुल्यं पुरुषं, भजति ॥ ४५ ॥ यदुक्तम् 'उदासीना वयम्' इत्यादि तत्राह । अस्त्विति । हे अम्बुजाक्ष कमलनयन, आत्मन् आत्मनि रतस्य, आत्मारामस्येत्यर्थः । अनेन निरपेक्षत्वरूपमुदासीनत्वं सूचितम् । मयि च मय्यपि, अनतिरिक्ता अनतिशयिता दृष्टिर्यस्य तस्य, अनेन अकामुकत्वमपि सूचितम् । ते तव, चरणानुरागश्चरणकमलयोर्गाढ़स्नेहः, मम अस्तु । ननु निरपेक्षादात्मारामादकामुकान्मत्तश्चरणानुरागप्रार्थनया तव मत्संबन्धिनी कान्यनुकम्पा इत्यत्राह । यर्हि यदा, अस्य विश्वस्य, वृद्धये वृद्ध्यर्थं, उपात्ता रजसः सृष्ट्युपयुक्तरजोगुणस्य अतिमात्रा औत्कण्ठ्यं येन तथाभूतः सन्, उ एवार्थे, ह हर्षे । मां ईक्षसे, तत् सैव, नोऽस्माकं, परमा अनुकम्पा । अत्र, 'अथ त्रिगुणा ह्येषा प्रकृतिरगुणो वा विष्णुः स यदात्मरजा रजोऽस्या उद्वर्द्धयति' इत्यादिश्रुतिरस्याः प्रकृतित्वमपि गमयति । त्वदीक्षणमात्रेणैव कृतकृत्याऽस्मीति भावः ॥ ४६ ॥ तदेवं सर्वं तदुक्तं प्रतिभाष्य प्रसन्नचित्ता मन्त्रमुपदिशन्तीव प्राह नैवेति द्वयेन । नैवेति । हे मधुसूदन, ते तव, यत् वचः, अथात्मनोऽनुरूपं वै भजस्व क्षत्रियर्षभम्' इत्यादिकं यद्वचनमित्यर्थः । तत् अहं अलीकमनृतं मिथ्येति यावत् । नैव, मन्ये । असत्यं नेत्यर्थः । कुतः हि यतः ! अम्बयाः काशिराजपुत्र्याः इव, कन्यायाः प्रायः, क्वचित् रतिः प्रीतिः, स्यात् । अम्बाऽम्बिकाम्बालिकाख्यानां तिसृणां काशिराजकन्यानां मध्ये अम्बायाः कन्याया एव शाल्वे रतिर्बभूव, मम रतिस्तु त्वय्येव पर्यवस्यतीत्यभिप्रायः ॥ ४७ ॥ व्यूढाया इति । किंच व्यूढायाः परिणीतायाः अपि, पुंश्चल्याः स्त्रियाः, मनः, नवं नवं पुरुषं अभ्येति च एव । ततः किमत आह । बुधो बुद्धिमान्, असतीमसाध्वीं, तां स्त्रियं, न बिभृयात् न पुष्णीयात् । बिभ्रत्तां पुष्णन् सन्, उभयच्युतः एतल्लोकात्पराल्लोकाच्च प्रच्युतो भवति । इहामुत्र च न सुखी किं तु दुःख्येव तिष्ठतीति भावः ॥ ४८ ॥

कृष्णप्रिया

प्रियतम ! यह भौतिक शरीर उच्छ्वास लेने पर भी मृत देह के समान है । कारण यह है कि—चमड़ी, दाढी, मूँछ, रोमावली, नख, केशों से आच्छादित है, लेकिन भीतर के भाग में तो मांस, हड्डी, खून, शोणित, कीटाणु, मलमूत्र, कफ, वात, पित्त आदि भरे पड़े हैं ऐसे नश्वर देह वाले पुरुषों को अपने प्रियतम पति समझ कर सेवा करती है जिसको आपके श्रीचरण कमलों की सुधागाथा कर्णपथ पर नहीं आयी ॥ ४५ ॥ हे अरविन्दलोचन ! प्रियतम ! आप आत्माराम पूर्ण पुरुष हैं । कभी यह कोमलाङ्गी है मनोहरा है अथवा रमणी है यह आप को कभी विचार नहीं आता है । आपने इसलिये कहा कि "उदासीना वयं नूनम्" वह स्वाभाविक गुण है । लेकिन मैं तो सामान्यजन हूँ इसलिये यह नम्र निवेदन है कि आपके पद पंकज में दृढानुराग रहे । आप इस विश्व के विकास के लिये उत्कट रजोगुण का अङ्गीकार करके मेरी ओर देखते हैं, वह आपकी अनुकम्पा है ॥ ४६ ॥ हे नाथ मधुसूदन ! आपने कहा था कि अभी भी अनुरूप वर की खोज कर लो, मैं आपके इस वाक्य को मिथ्या नहीं मानती । काशी नरेश की कन्या अम्बा के समान किसी-किसी कन्या की कामना दूसरे पुरुष में सुनी गयी है ॥ ४७ ॥ स्वामिन् ! व्याह हो जाने पर भी पुंश्चली स्त्री की मति नये-नये पुरुषों की ओर आसक्ति रहती है। जो बुद्धिमान् मनुष्य है वह ऐसी कुलटा नारी को कभी अपने साथ न रखे । पुंश्चली रखने वाला मनुष्य इस लोक और परलोक को खो बैठता है पुनः उभयभ्रष्ट हो जाता है ॥ ४८ ॥

श्रीभगवानुवाच

[1]साध्व्येतदभिज्ञाय त्वं राजपुत्रि प्रलम्भिता । मयोदितं [2]यदन्वात्थ सर्वं तत् सत्यमेव हि ॥ ४९ ॥
[3]यान् यान् कामयसे [4]कामान् मय्यकामाय मानिनि । सन्ति ह्येकान्तभक्तायास्तव कल्याणि नित्यदा ॥ ५० ॥
उपलब्धं पतिप्रेम पतिव्रत्यं च तेऽनघे । यद्वाक्यैश्चाल्यमानाया न धीर्मय्यपकर्षिता ॥ ५१ ॥
ये मां भजन्ति दाम्पत्ये तपसा व्रतचर्यया । कामात्मानोऽपवर्गेशं मोहिता [5]मम मायया ॥ ५२ ॥

कर्दमक्षमा

अन्वयः—श्रीभगवान्-उवाच—'राजपुत्रि ! साध्वी, एतत्, श्रोतुकामैः, त्वम्, प्रलम्भिता मया, उदितम्, यद्, अनु, आत्थ, तत्, सर्वम् एव, हि ॥ ४९ ॥ हे भामिनि ! अकामाय, मयि, यान्, यान्, कामान्, कामयसे, हे कल्याणि ! एकान्त-

---

१. कामेन-वीर. ; कामैस्त्वं-श्रीधर. वंशी. जीव. विज. विश्व. । २. यदन्वर्थं-विज. । ३. यं यं-विज. । ४. काममयि कामाय का-विज. ; भामिनि-श्रीधर. वंशी. जीव. विश्व. । ५-मायया हि मे-प्रा. पा. ।

भक्तायाः, तव, ते, मयि, सन्ति ॥ ५० ॥ हे अनघे ! पतिप्रेम, पातिव्रत्यम् च-उपलब्धम्, यद्, वाक्यैः, चाल्यमानायाः, धीन्न, मयि, अपकर्षिता ॥ ५१ ॥ ये कामात्मानः जनाः अपवर्गेशं मां दाम्पत्ये तपसा ब्रह्मचर्यया च भजन्ति ते मम मायया मोहिताः (सन्ति) इति भावः ॥ ५२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उपहसिता प्रलम्भिता । अन्वात्थान्वाख्यातवती ॥ ४९ ॥ मयि एकांतभक्तायास्ते कामाः संत्येव । अकामाय कामनिवृत्तये मोक्षपर्यवसायिन इत्यर्थः ॥ ५० ॥ अनुवादेन वरान् दत्त्वा तामभिनन्दति । उपलब्धमिति । यद्यस्मान्मयि वर्तमाना धीर्नापकर्षिता नान्यविषया जाता ॥ ५१ ॥ एकांतभक्तिमभिनंद्य तामेव दृढीकर्तुं सकामान् भक्तान्निंदति ये मामिति । दांपत्ये दंपत्युपभोग्यसुखार्थम् ॥ ५२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतत् पूर्वोक्तं वचः । अन्वाख्यातवती अनुवादं कृतवती । तत् अनुवादरूपकथनम् । यद्यपि हे साध्वि इति गुणेन, हे राजपुत्रीत्यैश्वर्यजातिभ्यां स्तूयते तथापि साध्वीति साध्वेवोत्तरं विचार्य दातव्यं त्वयेति मयोक्तमिति भावः । तच्च युक्तमेवेत्याह-राजपुत्रीति । श्रोतुकामैरस्माभिरिति बहुत्वेन परिहसितुं तत्सख्योपि काश्चित्क्रोडीकृता अत्र, न तु, "अस्मदो द्वयोश्च" इति बहुवचनं प्राप्नोति 'सविशेषणानां प्रतिषेधः' इति तन्निषेधात्, तथाप्यस्मच्छब्दोऽध्याहृत एव । यद्वा-श्रोतुकामैर्मत्कर्णेन्द्रियवृत्तिसमूहैरेव तद्द्वारा प्रलम्भिता अनु अनन्तरमेवात्थ मदुक्तिमेव प्रकारान्तरेण व्याख्यातवतीत्यर्थः ॥ ४९ ॥ इत्यर्थ इति-कामनिवृत्तिरेव मोक्षः । तथाहि-"प्रजहाति यदा कामान्मानवो मनसि स्थितान् । तर्ह्येव पुण्डरीकाक्ष भगवत्त्वाय कल्पते ।" इति प्रह्लादः । अत्र परमसन्तुष्टेनापि मया कस्तुभ्यं वरो देय इत्याह—यानिति । काम्यन्त इति कामा गुणाः संपदश्च अकामाय कामादन्यस्मै प्रेममात्रविलासाय 'अकामः सर्वकामो वा' इत्यादौ तथार्थप्रतीतेः । हे कामिनीति स्वभावसंबोधने । मद्विषयककामवत्यास्तव ते मदीयमेवायोग्याः कामाः कन्याश्च सर्वोत्कृष्टा एवेति भावः । यद्वा-कामिनि त्वद्विषयककामयुक्ते मयि-एवमन्योन्यतत्परत्वेन परमप्रियतोक्ता । 'भामिनि' इति पाठे हे कोपवति यतः कृत्रिमवाक्येनापि मत्परिचर्याप्रातिकूल्ये सति त्वं महाकोपमकार्षीरिति भावः । हि एव, संत्येव । स्वभावतो वर्तन्त एव । तत्रापि नित्यमेवाकामायेत्यादौ हेतुः—एकान्तभक्तायाः निष्कामभक्तायाः । यद्वा-ए अकारवाच्ये मयि वासुदेवे कान्तोऽयमतोऽस्याऽयोग्योक्तिरपि सोढव्येत्येवं भक्तायाः स्नेहवत्या इत्यर्थ । अतो हे कल्याणि नित्यमंगले । एकांतभक्ताया इत्युक्त्या कामानित्यस्याकामायेत्यस्य चान्यार्थकता परास्ता ॥ ५० ॥ अनुवादेन पुनरुक्तप्रायेण । यद्वा-अनुवादेन प्रीत इति शेषः तां रुक्मिणीम् । नान्यविषया जाता मत्तोऽन्यत्र न नीता । पातिव्रत्यं चाभीष्टाप्तौ निमित्तम् । यद्यप्यस्माद्वाक्यैः प्रेमभंगप्रतिपादकवचनैर्नर्मलक्षणैर्मया चाल्यमानायाः क्षोभ्यमाणाया अपि तव धीः प्रकृष्टप्रेममयी नापकर्षिता यत्किंचिदपकर्षं न्यूनत्वं न प्राप्ता किमुत भंगं, किन्तु बद्धमूलैव स्थिताऽतः प्रेम्णो लक्षणं साक्षादनुभूतमिति भावः । तदुक्तम्—"सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे । यद्भावबन्धनं यूनोः स प्रेमा परिकीर्तितः ।" इति । न तिष्ठत्यघमपराधो दासीनामपि यस्यामित्यतः प्रेयसो ममायमपराधः सुतरामेव क्षंतव्य इति भावः ॥ ५१ ॥ एवं तस्याः स्वस्मिन्पतिभावमयीमेकान्तमुक्तिं स्तुत्वा तत्पोषणाय प्राकृतीनां पतिभावार्थं स्वभजनमपि निंदन्नुभयेषां दांपत्यार्थमपि निंदति-ये मामिति । तपसा स्वधर्मेण । व्रतादीनां कृच्छ्रादीनां चर्यया पुनःपुनराचरणाशक्त्या । भजने हेतुः-कामेषु विषयभोगेष्वात्मा चित्तं येषां ते । अपवर्गः पंचमस्कन्धानुसारेण भक्तिलक्षणस्तस्येशं दातारमपि । हि एव मोहिता एव । एवमेवोक्तं केतुमालवर्षे भगवत्प्रादुर्भावविशेषेणैवेति भावः । यथा पंचमे—"स्त्रियो व्रतैस्त्वा हृषिकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यम् । तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि यतोऽस्वतंत्राः । स वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनम् । स एक एवेतरथा मिथो भयं नैवात्मलाभादधिमन्यते परम् । यातस्य ते पादसरोरुहार्हणं निकामयेत्साखिलकामलंपटा । तदेव रासीप्सितमीप्सितोऽर्चितो यद्भग्नयाञ्जा भगवन्प्रतप्यते" ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यद्यपि हे साध्वीति गुणेन हे राजपुत्रीत्यैश्वर्य्यजातिभ्यां स्तूयते तथापि साध्वीति साध्वेवोत्तरं दातव्यं त्वयेति विचार्य्य मया तथोक्तमिति भावः । तच्च युक्तमेवेत्याह—राजपुत्रीति । अत एव श्रोतुकामैरस्माभिः प्रलम्भिता परिहसिता बहुत्वं तत्र स्थिताः सखीरप्यात्मना सम्मेल्य सहायीकरोति मां प्रत्यापयति च अन्वात्थ मदुक्तिमेवानुकूलप्रकारविशेषेण व्याख्यातवतीत्यर्थः । हि निश्चये अत्र संशयो नास्तीत्यर्थः ॥ ४९ ॥ अत्र परमसन्तुष्टेनापि मया कस्तुभ्यं वरो देय इत्याह—यानिति । काम्यन्त इति कामाः गुणाः सम्पदश्च अकामाय कामादन्यस्मै प्रेममात्रविलासाय अकामः सर्वकामो वेत्यादौ तथार्थप्रतीतेः हे कामिनीति स्वभावसम्बोधनेन मद्विषयककामवत्यास्तव ते मदीयसेवायोग्याः कामाः कन्याश्च सर्वोत्कृष्टा एवेति भावः । यद्वा कामिनि त्वद्विषयककामयुक्ते मयि एवमन्योन्यतत्परत्वेन परमप्रियतोक्ता भामिनीति पाठान्तरे क्रोधक्षमापणार्थं तदनुवादः हि एव सन्त्येव

स्वभावतो वर्त्तन्त एव तत्रापि नित्यमेव अकामायेत्यादौ हेतुः एकान्तभक्तायाः निष्कामभक्तियुक्तायाः अतो हे कल्याणि नित्यमङ्गले ॥ ५० ॥ उपलब्धमिति । यद्यस्मात् वाक्यैर्नर्मलक्षणैश्चाल्यमानायाः क्षोभ्यमाणाया अपि धीः प्रेमलक्षणा स्नेहभङ्गज्ञानहेतुभिरपि तैर्नापकर्षिता अपकर्षं न्यूनतां न प्रापिता किन्तु बद्धमूलतयैव स्थितेत्यर्थः । इदं हि प्रेमाख्यभावपरिणामविशेषलक्षणं सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे "यद्भावबन्धनं यूनोः स प्रेमा परिकीर्त्तितः" इति न तिष्ठति अघं भक्तानामप्यपराधो यस्यां तथा तत्सम्बोधनम् अतो मदपराधः सुतरामेव क्षन्तव्य इति भावः ॥ ५१ ॥ एवं तस्याः स्वस्मिन् पतिभावमयीमेकान्तभक्तिं स्तुत्वा तत्पोषाय प्राकृतेषु प्रकृतीनां पतिभावार्थं स्वभजनमपि निन्दन् उभयेषां दाम्पत्यार्थमपि निन्दति—येमामिति । तपसा स्वधर्मेण व्रतानां कृच्छ्रादीनाञ्च चर्य्यया पुनःपुनराचरणासक्त्या भजने हेतुः कामेषु विषयभोगेषु आत्मा चित्तं येषां ते अपवर्गः पञ्चमस्कन्धानुसारेण प्रेमभक्तिलक्षणः तस्य ईशं दातारमपि हि एव मोहिता एव एवमेवोक्तं केतुमालवर्षे भगवत् प्रादुर्भावविशेषेणैवेति भावः । यथा पञ्चमे—

"स्त्रियो व्रतैस्त्वां हृषीकेश्वर स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यम् ।
तासां न ते वै परिपान्त्यपत्यं प्रियं धनायूंषि यतो स्वतन्त्राः ॥
सवै पतिः स्यादकुतोभयः स्वयं समन्ततः पाति भयातुरञ्जनम् ।
स एक एवेतरथामिथो भयं नैवात्मलाभादधिमन्यते परम् ॥
या तस्य ते पादसरोरुहार्हणं निकामयेत्साऽखिलकामलम्पटा ।
तदेव रासीप्सितमीप्सितोर्चितो यद्भग्नयाञ्चा भगवन् प्रतप्यते ॥ इति ॥ ५२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे साध्वीति—त्वया साध्वेवोत्तरं दातव्यमिति भावः । तच्च युक्तमेवेत्याह—हे राजपुत्रीति । अतएव श्रोतुकामैरस्माभिः, बहुत्वं शुश्रूषाया गौरवेणात्मनो बहुमानात्, हि निश्चये, अत्र संशयो नास्तीत्यर्थः ॥ ४९ ॥ ननु तर्हि प्रसादविशेषं विधेहीत्यपेक्षायामाह—यानिति; वीप्सयालौकिका अपि सर्व्वे गृहीताः । अकामाय प्रेमविलासाय । हे कामिनीति—मद्विषयककामवत्यास्तव ते कामाः सर्व्वोत्कृष्टार्थप्राप्तिरूपाः सन्त्येवेति भावः । यद्वा, कामिनि त्वद्विषयककामयुक्ते मयि । एवमन्योन्यं सकामत्वेन परमप्रियतोक्ता । अतो न विद्यते कामः फलाभिसन्धिर्यस्मिन् प्रेम्णि तस्मै तद्वृद्धये यान् यान् कामयसे, हि एवं, सन्त्येव, स्वभावतो वर्त्तन्त एव । कुतः ? एकान्तभक्तायाः; तदपि कुतः ? हे कल्याणि ! स्वधर्म्माचरणात् नित्यप्रियत्वाद्वेति भावः । अतः परमसन्तुष्टेनापि मया किं ते वरो देय इति भावः ॥ ५० ॥ अतस्ते त्वयैव पत्यौ पत्युर्वा यत् प्रेम तत् उप दाक्षिण्येन स्वसमीपे वा, शीघ्रमनायासेन लब्धमेव । अथवा तथाप्यस्त्विति श्रीमुखेनानुमोदस्व, तत्राह—उपेति । स्वयमेवोपलब्धं किं पिष्टपेषणवन्ममानुमोदेनेति भावः । यद्यस्माद्वाक्यैर्नर्म्मलक्षणैरेव, न तु तात्त्विकैः । चाल्यमानायाः क्षोभ्यमाणाया अपि नापकर्षिता अपकर्षं न प्राप्ता, किम्भूत्कर्षमेव गतेत्यर्थः । न तिष्ठत्यघं भक्तानामपराधो यस्यां तथा तत्सम्बोधनम्, अतो मदपराधः क्षन्तव्य इति भावः ॥ ५१ ॥ तपसा स्वधर्म्मण, व्रतादीनां कृच्छ्रादीनां चर्य्यया पुनः पुनराचरणासक्त्या; भजने हेतुः—कामेषु विषयभोगेषु आत्मा चित्तं येषां ते; अपवर्गः संसारदुःखध्वंसः, किंवा पञ्चमस्कन्धोक्तानुसारेण भक्तिलक्षणस्तस्य ईशं दातारमपि; हि एव, मोहिता एव; अन्यत्तैर्व्याख्यातम् । यद्वा, पत्नीतया तु पतिप्रेमादिसम्पत्त्या मया सह रतिविशेष एव सर्व्वार्थश्रेष्ठतर इत्याशयेनाह—य इति । दाम्पत्ये मया सह मैथुन्यसुखार्थम्, यतो मद्विषयकप्रेमविलासरूपे कामे आत्मा येषां ते, हि अपि, मम दुरतिक्रममायस्यापि, मायया एव मोहिताः, मा ऊहिता न तर्किता अपि ते मायासम्बन्धरहिता इत्यर्थः ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अथैवं क्रोडीकृतस्वाभिप्रायो भगवानिदमेव मदभिप्रेतं कूटवचांसि तु त्वद्वचः शुश्रूषया प्रयुक्तानीत्याह—साध्वीति । हे साध्वि ! हे राजपुत्रि ! श्रोतुकामेन मया एतत्त्वद्वच इति शेषः । प्रलम्भिता इत्थमुपहसितेत्यर्थः । यन्मयोदितं सर्वमन्वात्थ तात्पर्य्यक्रोडीकारेण प्रतिभाषितवत्यसि तत्सर्वं सत्यमेव मदभिप्रेतमेव ॥ ४९ अतीव तुष्टोऽनुगृह्णाति—यान् यानिति । हे मानिनि यान् यान् कामान् "स्यान्मे तवाङ्घ्रिररणम्" अस्त्वम्बुजाक्ष मम ते चरणानुरागः" इत्येवं काम्यमानान् अकामाय कामानिर्वृत्तये मदनपायित्वव्यतिक्रमनिवृत्तये कामयसे ते कामाः मय्येकान्तभक्ताया अनन्यप्रयोजनभक्तियुक्तायास्तव हे कल्याणि ! नित्यदा सन्त्येव न त्वया प्राथ्या मया देयाश्चेत्यर्थः ॥५०॥ अभिनन्दति—उपलब्धमिति । हेऽनघे पत्यौ कृष्णे प्रेम्णा यत्पातिव्रत्यं पतिपारार्थ्यं तदुपलब्धं दृष्टं मयेति शेषः । कुतः ? यद्यतो वाक्यैरुक्तविधैर्मद्वाक्यैश्चाल्यमानाया अपि तव धीर्बुद्धिर्मयि नापकर्षिता नापनीता नान्यविषया जाता ॥ ५१ ॥ एकान्तभक्तिमभिनन्द्य तामेव दृढीकर्तुं सकामान् भक्तान्निन्दति—ये मामिति । ये जनाः कामात्मानः क्षुद्रमनोरथाविलचित्ताः मोक्षाधिपतिमपि मां दाम्पत्ये दम्पत्योः कर्मणि दम्पत्युपभोगसुखार्थमित्यर्थः । तपसा मनः प्रणिधानात्मकेन व्रतचर्यया अनशनादिव्रतानुष्ठानेन च भजन्ति ते मम मायया मोहिताः ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भगवत्योक्तं भगवता किमनुमतं विमतमिति विकल्पं परिहरति–साध्विति। एतद्वचः प्रलम्भिता प्रस्तोभिता अन्वर्थमनुकूलार्थम् ॥ ४९ ॥ हे ईश्वरि ! यं यं कामं कामयसे सर्वे त्वयि नित्यदा सन्ति हि यस्मात्तस्मात्कां विभूतिं कामयसे न कामपीत्यर्थः। यद्वा यं यं कामं कामयसे तान् मयि कामयस्व तेषामभावाद्वच्मीत्याह—सन्तीति। तस्मात्प्रियवचनमुक्तं कामयति ॥ ५० ॥ भर्तुः स्नेहः पातिव्रत्यञ्चाभीष्टसम्पत्प्राप्तौ निमित्तं तत्तवास्तीत्याह–उपलब्धं दृष्टं तत्र हेतुर्यद्वावयैरिति मयि सल्लग्ना धीर्नापकर्षिता अन्यत्र न नीता यद्यस्मान्नित्यमुक्तत्वादावयोः दाम्पत्यं नित्यम् ॥ ५१ ॥ तत्र मुक्तिमन्तरेण दाम्पत्यापेक्षयाऽस्मद्भजनमयुक्तमित्याशयेनाह—य इति ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसंदर्भः

नैव अकामाय कामादन्यस्मै प्रेयपात्रविलासाय ॥ ५० ॥ उपलब्धम् ॥ ५१ ॥ ये माम् ॥ ५२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

यान् यानित्यादि। अय-कामिनि ! 'अयः शुभावहो विधिः' तं कामयितुं शीलं यस्याः सम्बोधने अकामा त्वं मयि मद्विषये यान् कामान् कामयसे इच्छसि, ते ते कामास्तव सन्ति; प्रार्थनीयं तव नास्तीत्यभिप्रायः। यत एकान्तभक्तायाः एकान्तभक्तत्वेऽहं तव वश्य एव। मयि प्रार्थनान्तरं क्वेति तात्पर्यम् ॥ ५० ॥ तर्हि कथमेवं रुक्षमवादीः ? इत्याशङ्क्याह—उपलब्धमित्यादि। मया परमभ्रामकेणापि तव धीर्भ्रामयितुं न पारिता। अतो मामजैषीरिति। अतस्ते पतिप्रेमोपलब्धम् ॥ ५१ ॥ प्रेम दाम्पत्य एव भवति, तत्र भवत्येव प्रमाणम् अतः प्रेमाकाङ्क्षिणो दाम्पत्येनैव मां सेवितुमर्हन्तीति व्यतिरेकेण तदेव स्तवन्नाह—ये मामित्यादि। दाम्पत्ये सति ये मां तपसा व्रतचर्यया भजन्ति, ते मम मायया मोहिताः। कीदृशः माम् ? अपवर्गेशम्, अपगतो वर्गो वर्जनं यस्मात् तथाभूतमीशं ये मां भजन्ति, तान् कदापि नाहं त्यजामीत्यर्थः। यद्वा, दाम्पत्ये सति तप आदिना येऽपवर्गेऽपवर्गनिमित्तं मां भजन्तीत्यर्थः। कीदृशं माम् ? शं सुखस्वरूपम्। ते कीदृशा ? कामात्मानः, ममेदं भूयादिति यः कामः सङ्कल्पस्तत्रात्मा यत्नो यासाम्, त्वं त्वकामा पूर्वोक्तेः ॥ ५२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

उपलब्धं पतिप्रेमेत्यादि। मया भ्रामकचक्रचूडामणिना चाल्यमानाया अपि तव न धीरपकर्षिता। तन्मायया स्थिरीभूतासि, अतो लक्ष्मीरेवासि, सा ह्येव मन्मायया न लिप्यते, अतः पतिप्रेम उपलब्धम्। पतिप्रेम तु दाम्पत्य एवेति दाम्पत्यं प्रशंसन्नाह—ये मां भजन्तीत्यादि। दाम्पत्ये सति तदन्यथा कृत्वा तपसा व्रतचर्यया अपवर्गे अपवर्ग-निमित्तं ये न भजन्ति, ते मम मायया मोहिताः। किम्भूतं माम् ? शं कल्याण-गुणं सुखस्वरूपं वा। कामात्मान इदं मे भूयादिति सङ्कल्पभाजः तेन मोक्षार्थिनोऽपि कामात्मानः ॥ ५१–५२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रोतुकामैरस्माभिरिति बहुवचनेन परिहसितुं तत्सख्योपि काश्चित् क्रोडीकृताः अत्र नत्वस्मदोर्द्वयोश्चेति बहुवचनं प्राप्नोति सविशेषणानां प्रतिषेध इति तन्निषेधात् तत्राप्यस्मच्छब्दोत्राध्याहृत एव यद्वा श्रोतुकामैर्मत्कर्णेन्द्रियवृत्तिसमूहैरेव मद्द्वारा प्रलोभिता उपहसिता अनु अनन्तरम् आत्थ मदुक्तिमेव प्रकारान्तरेण व्याख्यासि व्याख्यातवतीत्यर्थः ॥ ४९ ॥ परमसन्तुष्टेनापि मया तुभ्यं को वरो देय इत्याह–यान् यान् कामान् मत्परिचर्य्यालक्षणान् कामयसे किमर्थं मयि अकामाय कामभिन्नाय प्रेम्णे प्रेमार्थमित्यर्थः। मयि कीदृशे कामिनि कामयमाने भामिनीति पाठे हे कोपवति यतः कृत्रिमवाक्येन मत्परिचर्याप्रातिकूल्ये सति महाकोपमकार्षीरिति भावः। अत्र एकान्तभक्ताया इत्यनेन कामानित्यस्य कामायेत्यस्य च अन्यार्थकता पराहता ॥ ५० ॥ यत् यस्मात् वाक्यैः प्रेमभङ्गप्रतिपादकवचनैर्मया चाल्यमानाया अपि तव धीर्मयि प्रकृष्टप्रेममयी बुद्धिर्न अपकर्षिता यत् किञ्चिदपकर्षमपि न प्राप्ता किमुत भङ्ग यतः प्रेम्णो लक्षणं साक्षादनुभूतमिति भावः। तदुक्तं "सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे। यद्भावबन्धनं यूनोः सप्रेमा परिकीर्त्तितः" इति हे अनघे न तिष्ठत्यघमपराधो दासीनामपि यस्यमित्यतः प्रेयसो ममायमपराध क्षन्तव्य इति भावः ॥ ५१ ॥ सकामभक्तान् निन्दति—ये इति। दाम्पत्ये दाम्पत्याय मत्पतिः मत्सुखदो भवतु मद्भार्य्या वा मत्सुखदा भवत्विति प्राकृतदाम्पत्युभोगसुखार्थमित्यर्थः। अपवर्गेशं पञ्चमस्कन्धगद्यानुसृत्या प्रेमदातारं यद्वा अपकृष्टा भवन्ति वर्गाश्चत्वारोपि यतस्तथाभूतम् ईशं माम् ॥ ५२ ॥

गूढार्थदीपिनी

हे साध्वि। प्रलम्भिता उपहसिता मयोदितं यत् अन्वात्थ अनूद्योत्तरं कृतवती तत् सर्वं सत्यमेव ॥ ४९ ॥ हे भामिनि हे कोपवति। 'भाम कोपे' इत्यस्मात्। अकामाय कामनानिवृत्तये। यान् यान् मनोरथान् करोषि ते कामा निष्कामभक्तायास्तव

सन्ति हि सन्त्येव अतो न त्वया प्राथ्यां न च मया देया एव ॥ ५० ॥ यत् यस्मात् मयि निबद्धा धीः त्वया नापकर्षिता नान्यत्र नीता हे अनघे ॥ ५१ ॥ कामेषु विषयभोगेषु आत्मा चित्तं येषान्ते । अपवर्गेशं मोक्षदातारम् । दाम्पत्ये दम्पतिसुखार्थम् ॥५२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हे साध्वि ! उपलम्भिता उपहसिताऽसि यदन्वात्थ अन्वाख्यातवती तत्सर्वं सत्यमेव ॥ ४९ ॥ हे मामिनि ! "स्यान्मे तवाङ्घ्रिररणम्" अस्त्वम्बुजाक्ष मम ते चरणानुराग इत्येवम्विधान् कामान् यान् यान् अकामः अन्यनिरपेक्षः स्वतः पूर्णकामोऽहं तदर्थं मत्प्रियार्थं कामयसे हे कल्याणि ते सर्वे कामाः मयि एकान्तभक्तायाः नित्यदा सन्ति ॥ ५० ॥ तामभिनन्दति— मयि या धीः सा नापकर्षिता ॥ ५१ ॥ एकान्तभक्तिमभिनन्द्य तद्दाढ्यार्थं सकामान् भक्तान् निन्दति येति दाम्पत्ये स्त्रीपुरुषसंयोगसुखार्थम् ॥ ५२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भगवत्योक्तं भगवाञ्छ्रुत्वाऽभूषयददूषयद्वेत्यतोऽभ्युपगममादिमस्य पक्षस्य दर्शयन्देवो देवीं प्रति वक्तीति वक्ति ॥ श्री भगवानिति । हे साध्वि राजपुत्रि राज्ञो दुहिता । एतद्विलासवचनं श्रोतुकामेन मयोपहसिता त्वम् । प्रलम्भिता विप्रलम्भिता यन्ममोदितं वचनमनु अनुसृत्यार्थो यस्य तत् सर्वं त्वद्वचनं सत्यमेव यथार्थमेवेत्यनेन न किञ्चित्तत्रानृतमिति द्योत्यते । ममोदितं यदन्वर्थेति पाठः स्फुटार्थः । मयोक्तमन्वर्थं क्षेप्यार्थं त्वयोक्तं सर्वं सत्यमेवेति वा ॥ ५१ ॥ हे कामिनि यं यं कामं कामयसे काङ्क्षसि तं तं मयि कामय । तर्हि प्राक् स नाभूत्तस्या इत्यभूतिकलेत्यत आह ॥ सन्तीति । अनेन बहुवचनेन वीप्सालभ्योऽर्थः सूचितः । हे कल्याणि । एकान्तभक्तायास्तव कामा नित्यदा सन्ति । एतेन वरणं वितरणं च पामरविवक्षयेति ज्ञेयमित्यसूचि । यं कामं केन ब्रह्मणा सहितश्चासावमश्च प्राणश्च तम् । अकामं कामविरोधिनमिति रुद्रं तथा कामं वा । यं ज्ञानमस्यास्तीत्यर्श आद्यचि सुमेधसं कर्तुं कामयसे तस्य नित्यं ददातीति सा तथेति । कामास्तव नित्या, सन्ति यतस्ततः । कामयेति मयोदितमन्वर्थं हीनार्थं निष्प्रयोजनमिति कामाशामप्राप्तप्राप्तिविषयिणी अयसे गच्छसि न तादृशोऽर्थो वर्तत इति वा । वागेव सा प्राणो मः पतिरीरित इति छन्दोगोपनिषद्भाष्योक्तेः । येति ज्ञानं कामं समुद्दिष्टमिति वचनात् । अम्भ्रणीसूक्तं स्मर्तव्यम् । नित्यदा कामा इतर आनन्दाद्याः सन्ति सत्यं तथाऽपि यं मद्विषयं ज्ञानं कामय नान्यम् । यस्माद्ब्रह्मेन्द्ररुद्रादिदेवतानां श्रियोऽपि च । ज्ञानस्फूर्तिः सदा तस्मै हरये । नव नव सुविशेषोपलम्भज्ञानाभावः सर्वस्येत्यादेः । एकान्तभक्ता ये तेषां सन्ति कालान्तरे प्रादुर्भवन्ति । या रमात्मिकायास्तव तु नित्यदेति किं त्वं कामयसे । अहं च कामयेति वदामीत्यपि योजयन्ति ॥ ५२ ॥ वाक्यैश्चोदनप्रकाराकारबाहुविध्यवद्वाक्यैः । चोद्यमानायाः प्रेर्यमाणाया या मयि धीर्मद्विषयिणी शेमुषी सा नापकर्षिता न प्रत्याहृता तत इति ॥ ५३ ॥ त्वद्वन्नान्येषां योषिज्जनानां सुलभोऽहमिति वक्ति ॥ य इति । तपसा साधारणो न व्रतचर्यया साधारणेन च । ये योषिज्जना मां दाम्पत्ये जायापतिभावे तदर्थं भजन्ति । कामात्मनः कामकलुषीकृतचेतसोऽपवर्गेशं मां ते मम मायया मोहिता मोक्षप्रच्युतिर्लक्ष्यानुपलब्धिश्च तेषामिति भावः । एकान्तभक्ताया इत्यनेनैकान्तिकत्वमभिनन्द्य सकामान्निन्दयति ॥ ये मामिति । दाम्पत्ये तन्मिथुनीभावाविर्भवत्सुखार्थम् । योषिज्जनं दूषयित्वा पुरुषानपि सकामान्दूषयति ॥ मामिति । हे मानिनि । अपवर्गसम्पदं साक्षान्मोक्षसम्पद्रूपम् । सत्पतिं तत्पतिमिति पाठौ । तत्र तत्स्वामिनं तस्या अपवर्गसम्पदः पतिमित्यर्थः । मां प्राप्य तपआदिना प्रसन्नं विधाय सम्पद ऐहिकीर्वाञ्छन्ति ये ते मन्दभाग्याः । कुत इत्यत आह ॥ ये निरये दुर्योनौ वा नरके वा स्युस्तद्भन्त इति । कुतस्तत्सम्पत्तत्रेत्यत आह । मात्रात्मकत्वाच्छब्दादिविषयाव्यतिरेकित्वात्तेषां सार्वत्रिकत्वान्निरय उक्तरूपद्विके । सुसङ्गमः सुमिलस्तत्सम्पद्भोग इत्याशयः । हे निरये नितरां शुभदैववति रुक्मिणि । अथवा निर्गत आयोगमनं मां त्यक्त्वा यस्याः सा । अथवा न विद्यते रयो लयो यस्याः सा तथा तस्याः सम्बुद्धिः हे निरये । पूर्वोक्तमन्दभाग्यत्वादिमतो न भवतीति । तव सुसङ्गमः । ये मामित्युक्तमेव व्यक्तीकरोति मामिति वा ॥ ५४-५५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं साभिप्रायं प्रकारद्वयेन भगवद्वाक्यानि व्याख्यातानि । तत्र व्याख्याने सान्त्वनार्थं प्रकाशितं स्वाभिप्रायं तया वर्णितं श्रुत्वा अनन्यत्वं परिज्ञाय, दीनत्वस्य हीनभावत्वस्य च प्रकाशितत्वात् गर्वाभावमपि ज्ञात्वा, सन्तुष्टो भगवान् तस्या वाक्यमभिनन्दति **साध्व्येत**दिति । **एतद्व्याहृत**मुक्तं साध्वेव । हे साध्वीति वा । पूर्वमेव त्वमेवं वक्ष्यसीत्यभिज्ञाय **प्रलम्भिता** वक्रोक्त्या वञ्चिता । एवं वचने सामर्थ्यं **राजपुत्री**ति । साध्वीत्येतदमर्मेति ज्ञापितम् । व्याख्यानं यथा व्याख्यातमेवेत्याह **मयोदितं यदन्वात्थे**ति । उदितस्यानुवचनं व्याख्यानम् । अतः **मयोदितं यदन्वात्थ** व्याख्यातवती, तत्सर्वं सत्यमेव । **हि** युक्तश्चायमर्थः । अन्यथा वाक्यानामसम्बद्धार्थता स्यात् ॥ ४९ ॥ प्रसन्नः सन् प्रार्थितचरणारविन्दरतिदानप्रस्तावे बह्वेव प्रयच्छति **यान्यान् कामयसे कामा**निति । मत्सम्बन्धिनः सर्व एव सकामा निष्कामाश्च व्यवहाराः निष्कामा एव । सिद्धवदनुवादेनायं

वरो दत्तः । यान् कामान् कामयसे, तानकामाय कामयस इति । यतो **मयी**त्यावृत्त्या **योजना** । वीप्सा नानाविधत्वाय । तस्मात्तव कामा निष्कामा भवन्त्वित्युक्तं भवति । **मानिनी**ति सम्बोधनं मानापनोदनार्थमेवमुच्यत इति सूचयति । निष्कामा मानवती न भवतीति । एवं कामानां निष्कामत्वमुक्त्वा, सर्वानेव कामान् प्रयच्छति **सन्ति ही**ति । अर्थात् कामाः । तत्र दानव्यतिरेकेणैव विद्यमानत्वे हेतुः **एकान्तभक्ताया** इति । हि युक्तश्चायमर्थः । या ह्यनन्यभक्ता, सा सर्वं प्राप्नोतीति । एकान्ते वा भजते, साप्यपेक्षितं कामसुखं प्राप्नोतीति । **तवे**ति तत्रानुभवो निरूपितः । **कल्याणी**ति स्वरूपयोग्यता विवाहितत्वाद्भाग्यं चोक्तम् । **नित्यदे**ति सर्वदा । छान्दसः ॥ ५० ॥ तदा पतनक्रियया यज्जातं तदप्याह **उपलब्धं प्रतिप्रेमे**ति । परित्यागसम्भावनायामेव शरीरत्यागस्य कृतत्वात् पतिप्रेम उपलब्धम् । पातिव्रत्यं चोपलब्धम् । व्रतभङ्गे मरणमेवाङ्गीकृतमिति । चकारान्मयि स्थिरापि बुद्धिः, मत्स्पर्शेनैव जीवनस्य प्राप्तत्वात् । चकारात् हेत्वन्तरमप्याह **यद्वाक्यै**रिति । यस्मात् कारणात् वाक्यैश्चाल्यमानाया अपि तव धीः मयि **नापकर्षिता,** अपकर्षं न प्राप्तवती । सर्वथाभावस्तु दूरापास्तः ॥ ५१ ॥ तया यद्विरक्ततया भक्तिमार्गानुसारेण भक्तिमेवोररीकृत्य, कादाचित्कः कामः समर्थितः, तदेव युक्तम्, न तु लौकिकवन्मद्भजनमिति स्वयं सम्मतिं वक्तुं विपरीते बाधकमाह **ये मां भजन्ती**ति । **दाम्पत्ये** दम्पत्योरिव भावार्थे । भक्तिमार्गे एवं नास्तीति, अन्यत्र भगवद्भजनं न लोकसिद्धमिति, स्वयं कर्ममार्गे तत् वक्तुं साधनमाह **तपसा व्रतचर्यये**ति । **तपः** पुरुषस्य, व्रतचर्या स्त्रियः । कथं भगवन्तमपि तथा भजन्ति । न हि शैत्यार्थं कश्चिद्वह्निं सेवत इति, तत्राह **कामात्मान** इति । कामात्मानः काममेव पुरुषार्थं मन्यन्ते । भगवान**पवर्गेशः** मोक्षदाता । एवं विरुद्धयोः सेव्यसेवकयोरपि सतोः यद्भजनं सिध्यति, तन्मायामोहनेनैवेत्याह **मोहिता मम मायये**ति ॥ ५२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

यान्यान्कामयसे इत्यत्र । **यतो मयि इत्यावृत्त्ये**ति । यतस्ते कामा मयि । अतोऽकामायेत्यावृत्तम्, **मयी**तिपदमकामत्वे हेतुत्वेनोक्तमित्यर्थः । **ये मा** मित्यत्र । **अन्यत्रे**ति । लोकास्तु कामात्मानः, भक्तिमार्गे एवं नास्ति । कामात्मत्वं नास्तीति हेतोः कर्मादिमार्गेभ्योऽन्यत्र भक्तिमार्गे भजनं लोकप्रसिद्धं न भवतीत्यर्थः ।

श्रीसुबोधिनी–सारः

श्रीकृष्णोक्तिः । हे साध्वि हे राजपुत्रि एतद्वचः श्रोतुमिच्छद्भिरस्माभिस्त्वं प्रलंभितोपहसिता मयोदितम् उक्तं यत्तदनु त्वम् आत्थ उक्तवती अनुवादरूपेण तत्सर्वं सत्यमेव हि युक्तम् ॥ ४९ ॥ हे भामिनि कोपने यान् यान् कामान् कामयसे इच्छसि ते मयि एकांतभक्तायास्तव नित्यदाऽकामाय निवृत्तये मोक्षार्थं संति हे कल्याणि हि युक्तम् ॥ ५० ॥ अभिनंदति हे अनघे शुद्धे निष्पापे ते तव पातिव्रत्यं पतौ प्रेम च मयोपलब्धं ज्ञातं दृष्टं च यद्यस्माद्वाक्यैः चाल्यमानाया मयि धीर्बुद्धिर्नापकर्षिता नान्यविषया जाता ॥५१॥ सकामान्निंदति । कामेष्वात्मा चित्तं येषां ते ये तपसा व्रतचर्ययाऽपवर्गेशं मोक्षप्रदं मां दांपत्ये स्त्रीपुरुषोपभोगसुखार्थं भजंति ते मम मायया मोहिताः ॥ ५२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं तस्या दैन्येन यथार्थवचनेन च सन्तुष्टो भगवानाह—साध्वीति । 'तुभ्यं दुःखोत्पादनं न युक्तं राजपुत्रीत्वात्, सुस्वभावत्वाच्च' इति सूचयन् द्विःसंबोधयति—हे साध्वीति, हे राजपुत्रीति च । एतत्त्वदुक्तं वचनं श्रोतुकामेन मया त्वं प्रलम्भिता उपहसिता । ममोदितं यत् अन्वात्थ व्याख्यातवती तत् सर्वं सत्यं यथार्थमेव । 'युक्तत्वात्' इति सूचयन्नाह—हीति ॥ ४९ ॥ स्नेहेन सम्बोधयति—भामिनीति । सकलगुणपूर्णत्वं स्नेहे हेतुं सूचयन् पुनः सम्बोधयति—कल्याणीति । अकामाय संसारसुखहेतुकामनानिरासाय "स्यान्मे तवाङ्घ्रिररणं सृतिभिर्भ्रमन्त्या" "अस्त्वम्बुजाक्ष मम ते चरणानुराग" इत्येवं यान् यान् कामान् कामयसे मनोरथान् करोषि ते कामा मय्येकान्तभक्तायास्तव नित्यदा सन्त्येव, अतो न त्वया प्रार्थ्या न च मया देया इत्यर्थः ॥ ५० ॥ 'कुतो ममैकान्तभक्तिमत्त्वं' तत्राह—उपलब्धमिति । हे अनघे सर्वदोषरहिते ! पतिप्रेम पत्यौ मयि निरतिशयः स्नेहः तथा पातिव्रत्यं सर्वोत्कृष्टत्वबुद्ध्या पत्येकनिष्ठत्वं च ते तव उपलब्धं मया दृष्टमेव । 'कथम्' इत्यपेक्षायामाह—यदिति । यस्माद्वाक्यैरुक्तविधैर्मद्वाक्यैश्चाल्यमानाया अपि मयि स्थिता तव बुद्धिर्नापकर्षिता मय्यपकर्षं दृष्ट्वाऽन्यविषया न जातेत्यर्थः ॥ ५१ ॥ एवमेकान्तभक्तिमभिनन्द्य तामेव दृढीकर्तुं सकामान् भक्तान् निन्दति—ये मामिति । अपवर्गेशं मोक्षदातारमपि मां दाम्पत्ये दम्पत्युपभोगसुखार्थं ये जनास्तपसा पंचाग्निवातवर्षादिसन्तापसहनेन व्रतचर्यया एकादश्याद्युपवासपरिचर्यादिना न भजन्ति ते मम मायया मोहिता इत्यन्वयः । मोहमेव स्पष्टयति—कामात्मान इति । कामो विषयभोगाभिलाषः आत्मन्यन्तःकरणे येषां ते ॥ ५२ ॥

अन्वितार्थप्रकाशिका

साध्वीति । हे साध्वि ! हे राजपुत्रि ! एतत्त्वदुक्तं वचनं श्रोतुकामेन मया त्वं प्रलम्भिता उपहसिता श्रोतुकामैस्त्वमिति बहुवचनपाठे परिहासे रुक्मिणीसख्योऽपि काश्चित् क्रोडीकृताः । ममोदितं यत् अन्वात्थ प्रकारान्तरेणानुव्याख्यातवती तत् सर्वं यथार्थमेव ॥ ४९ ॥ यानिति । हे भामिनि ! हे कल्याणि ! अकामाय कामनानिरासाय मोक्षे पर्यवसायिन इति भावः। यान्यान्कामान्कामयसे मनोरथान् करोषि ते कामाः मय्येकान्तभक्तायास्तव नित्यदा । दा आर्षः । सन्त्येवातो न त्वया प्रार्थ्या न च मया देया इत्यर्थः ॥ ५० ॥ उपलब्धमिति । हे अनघे ! पत्यौ मयि प्रेम तथा पातिव्रत्यं सर्वोत्कृष्टत्वबुद्ध्या पत्येकनिष्ठत्वं च ते तव उपलब्धं मया दृष्टमेव । यस्माद्वाक्यैः उक्तविधैर्मद्वाक्यैश्चाल्यमानाया अपि ते धीर्मयि वर्त्तमाना न अपकर्षिता नान्यविषया जाता । अतः प्रेयसो ममापराधः क्षन्तव्य इति भावः ॥ ५१ ॥ ये मामिति । कामात्मानः विषयभोगचित्ताः ये जनाः अपवर्गे शं मोक्षदातारमपि मां दाम्पत्ये दम्पत्युभोगसुखार्थं तपसा व्रतचर्यया च भजन्ति ते मम मायया मोहिताः ॥ ५२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे साध्वि प्रलम्भिता परिहसिता ॥ यत् मयोदितं अन्वात्थप्रकारभेदेन कथयसि तत् सर्वं सत्यमेव ॥ ४९ ॥ हे भामिनि मयि यान् ॥ यान्कामान्कामयसे ते कामाः एकांतभक्तायास्तव अकामाय निष्कामाय नित्यदा संति । ५० ॥ तस्या एकान्तभक्तित्वं प्रशंसति उपलब्धमिति ॥ पत्यावेव प्रेमयस्मिस्तत् पातिव्रत्यमपि चोऽप्यर्थे ते त्वया उपलब्धं । यद्यस्मात् वाक्यैश्चाल्यमानायास्तव मयि स्थिता धीः । नापकर्षिता नान्यत्र गता मय्येव निश्चला स्थिताऽस्तीत्यर्थः ॥ ५१ ॥ सकामान्निदन्नाह ये इति दाम्पत्ये दांपत्याय स्त्रीपुरुषभोगसुखाय कामेषु विषयेषु आत्मा मनो येषां ते ॥ ५२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथैवं क्रोडीकृतस्वाभिप्रायो भगवानिदमेव मदभिप्रेतं कूटवचांसि तु त्वद्वचःशुश्रूषया प्रयुक्तानीत्याह नवभिः। साध्वीति । हे साध्वि, हे राजपुत्रि, एतत् वचः, श्रोतुकामेन मया, त्वं प्रलम्भिता उपहसिता । श्रोतुकामैस्त्वमित्यपि पाठः। यत् मम उदितं सर्वं, अन्वात्थ अन्वाख्यातवती । तात्पर्यक्रोडीकारेण प्रतिभाषितवतीत्यर्थः । असि । तत् सर्वं, सत्यमेव मदभिप्रेतमेव, हि । अवधारणद्वयं तत्परमार्थोक्त्यर्थमेव ॥ ४९ ॥ अतीव तुष्टो भगवाननुगृह्णाति । यानिति । हे भामिनि, यान् यान् कामान् कामयसे, 'स्यान्मे तवाङ्घ्रिररणं सृतिभिर्भ्रमन्त्याः' 'यस्त्वम्बुजाक्ष मम ते चरणानुराग' इत्याद्युक्तरीत्येच्छसि, ते त्वया काम्यमानाः कामाः, मयि एकान्तभक्तायाः तव, हे कल्याणि, नित्यदा सर्वकालं, सन्ति हि । ते कामाः, अकामाय कामनिवृत्तये, सन्ति । न त्वया प्राप्याः मया देयाश्चेत्यर्थः ॥ ५० ॥ अभिनन्दति । उपलब्धमित्ति । हे अनघे, ते तव, पतिप्रेम पत्यौ स्नेहः, पातिव्रत्यं पतिपारार्थ्यं च, उपलब्धं, मयेति शेषः । कुतः । यद्यतः, वाक्यैः चाल्यमानायाः अपि, ते धीः मयि वर्त्तमाना सती, न अपकर्षिता नान्यविषया जातेत्यर्थः ॥ ५१ ॥ एकान्तभक्तिमभिनन्द्य तामेव दृढीकर्त्तुं सकामभक्तान् निन्दति । ये मामिति । कामात्मानः क्षुद्रमनोरथविलसिताः, ये जनाः, अपवर्गशं मोक्षाधिपतिमपि मां, दांपत्ये दम्पत्योः कर्मणि दम्पत्युपभोगसुखार्थमित्यर्थः । तपसा मनःप्रणिधानात्मकेन, व्रतचर्यया अनशनादिव्रतानुष्ठानेन च, भजन्ति । ते, मम मायया मोहिताः ॥ ५२ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण कहते हैं—देवी ! साध्वी ! हे राजपुत्री ! आपके श्रीमुख से ऐसे विवेक स्नेह समर वचन सुधा का पान करने के लिये ही मैंने हास्य विनोद और व्यङ्ग्य वचन सुनाये थे । प्रिये ! मेरे वाक्यों की आपने योग्य समालना की एवं सुसङ्गत समाधान किया ॥४९॥ हे भामिनी ! हे राजकुमारी ! आप मेरी प्राणेश्वरी ही हैं और मेरे प्रति आप का स्नेह भी अनन्य है । हे कल्याणी ! मैं सर्वथा निष्काम हूँ; इसलिये आप मुझसे जो-जो कामना करती हो वे तो सर्व सदा के लिये आपको सिद्ध ही हैं ॥ ५० ॥ प्रियाज् ! आप निर्दोष एवं पुण्यमयी मेरी प्रियतमा हो । मैंने आपको प्राप्तकर पतिप्रेम और पातिव्रत्य दोनों सम्पादन किया । भली भाँति विचित्र वार्ता कहकर आपको चलायमान करने का मेरा प्रयत्न निष्फल गया और आपकी अनन्यता सुदृढ़ होती रही ॥ ५१ ॥ देवी ! मैं तो भक्तों को अपवर्ग देने वाला मुकुन्द हूँ । जीव फिर भी मेरी माया से मोहित होकर जो जन तपश्चर्या, व्रताराधन आदि सत्कर्मों से दाम्पत्य सुख की कामना करते हैं, आराधना करते हैं वे मार्ग चुक गये हैं ॥ ५२ ॥

मां प्राप्य मानिन्यपवर्गसम्पदं वाञ्छन्ति ये सम्पद एव [1]तत्पतिम् ।
ते मन्दभाग्या [2]निरयेऽपि ये नृणां मात्रात्मकत्वान्निरयः[3] सुसंगमः ॥ ५३ ॥
दिष्ट्या [4]गृहेश्वर्यसकृन्मयि त्वया कृतानुवृत्तिर्भवमोचनी खलैः ।
सुदुष्करासौ सुतरां दुराशिषो ह्यसुम्भराया निकृतिजुषः[5] स्त्रियाः ॥ ५४ ॥
न त्वादृशीं प्रणयिनीं गृहिणीं गृहेषु पश्यामि मानिनि यया स्वविवाहकाले।
प्राप्तान् नृपानवगणय्य रहो[6] अहो मे प्रस्थापितो द्विज [7]उपश्रुतसत्कथस्य ॥ ५५ ॥
भ्रातुर्विरूपकरणं युधि निर्जितस्य प्रोद्वाहपर्वणि च तद्वधमक्षगोष्ठ्याम् ।
दुःखं समुत्थमसहोऽस्मदयोगभीत्या नैवाब्रवीः किमपि तेन वयं जितास्ते[8] ॥५६॥

कर्दमक्षमा

अन्वयः—हे मानिनि, अपवर्गसम्पदं, तत्पतिं, मां, प्राप्य, सम्पद, एव, वाञ्छन्ति, ते, मन्दभाग्या, एव, ये, निरयेऽपि, तेषां नृणां, मात्रात्मकत्वात्, सुसङ्गम, एव ॥ ५३ ॥ हे गृहेश्वरि ! त्वया, असकृत्, मयि, अनुवृत्तिःकृता, तत्, दिष्ट्या, असौ, अनुवृत्तिः, भवमोचनी, खलैः, सुदुष्कराः, हि, असुम्भरायाः, दुराशिषः, निकृतिञ्जुषः, दुरभिप्रायायाः, स्त्रियास्तु, सुदुष्करा एव ॥ ५४ ॥ हे, मानिनि, स्वविवाहकाले, यया, प्राप्तान्नृपान्, अविगणय्य, उपश्रुताः, सत्यकथाः, यस्य, तस्य, मे, रहोहरेः, द्विजः, प्रस्थापितः, त्वादृशीं, प्रणयिनीं, गृहिणीं, गृहेषु, न, पश्यामि ॥ ५५ ॥ युधि, मया, निर्जितस्य, भ्रातुः, विरूपकरणं, तथा, प्रोद्वाह, पर्वणि, च, अक्षगोष्ठ्यां, तद्वधं, च, कालान्तरेऽपि, समुत्थं, दुःखं, असहः, नैवाब्रवीः, अस्मद् अयोगभीत्या, किमपि, नैवोक्तवती, तेन, त्वया, वयं, सर्वे, जिताः ॥ ५६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मायामोहितत्वमेवोपपादयति । मां प्राप्येति । अपवर्गेण सह संपदो यस्मिंस्तं माम् । प्राप्य प्रसाद्य ये केवलं संपद एव विषयान्वांछंति न तु माम् । तत्पतिं तासां संपदामपि योऽहमेव पतिस्तम् । तथा ये विषया निरयेऽप्यतिनिकृष्टयोनावपि स्युस्तान् । किंच तेषां पुंसां मात्रात्मकत्वाद्विषयात्मकत्वान्निरयः सुसंगमः शोभनसंगम एव स्यादतो मंदभाग्या एव त इत्यर्थः ॥ ५३ ॥ तस्मात् हे गृहेश्वरि त्वया मयि भवमोचनी निष्कामानुवृत्तिः कृता एतद्दिष्ट्या भद्रम् । कथंभूता । खलैः सुदुष्करा । दुराशिषो दुरभिप्रायाया अत एव असुंभरायाः प्राणतर्पणपरायाः निकृतिजुषो वंचनपरायाः स्त्रियाः सुतरामसावनुवृत्तिर्दुष्करेति ॥ ५४ ॥ किंच संति निष्कामाः प्रेम्णैव मय्यनुवर्तमाना बह्व्यः किंतु त्वया सदृशीं क्वापि न पश्यामीति तस्या भक्तिं बहुमानेनाभिनंदति । न त्वादृशीमिति त्रिभिः । उपश्रुताः सत्यः कथा यस्य मे ॥ ५५ ॥ प्रोद्वाहपर्वण्यनिरुद्धविवाहे । अक्षगोष्ठ्यां द्यूतसभायाम् । तस्य भ्रातुर्वधम् । तस्मिन्काले कालांतरे वा तदनुस्मरणतः पुनः पुनः समुत्थं दुःखमस्माभिरयोगो वियोगस्तद्भीत्या असहः सोढवत्यसि । अनेनैवानिरुद्धविवाहानंतर्यमस्य ज्ञातव्यम् ॥ ५६ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

"अतिनिकृष्टजनौ प्रोक्तो निरयो नरके दुर्भगसुभगयोश्च" इति निरुक्तिः । विषयिणां नरक एव न तु सुखमित्याह—किञ्चेति । तेषां मद्विमुखानां मात्रा सु शब्दादिविषयेष्वात्मा बुद्धिर्येषां ते मात्रात्मकास्तेषां भावस्तत्त्वं तस्मात् । अतो विषयाविष्टमनस्त्वादित्यर्थः । सुसंगमः सुलभः । इत्यर्थ इति—मंदभाग्या एव विषयैषिणो नरकेषु गच्छन्ति मद्विमुखत्वादिति । मत्पराणां तु मोक्षः करकलित एव 'यांति मद्याजिनोपि माम्' इति स्मृतेः । टीकायामपवर्गेण सह संपदो यस्मिन्नित्यर्थकथनमेव न तु विग्रहः, उपपदविभक्त्या समासाभावात् । अपवर्गयुक्ता संपदो यस्मिन्निति विग्रहः, समासश्च मध्यमपदलोपी । अपवर्गोऽत्र मोक्षो भक्तियोगश्च । संपद्यन्त इति संपदो विषयाः, अतः संपद एव विषयानिति काकाक्षिन्यायेन संपद एव विषयानेव । न तु मामिति न संगच्छते समानविभक्त्यन्तस्व्यावर्तकस्वादेवकारस्य । तेषां विषयवांछकानाम् । निरयो निकृष्टयोनिरपि सुशोभनोऽभिरुचितश्चासौ संगमनीयश्चेत्यर्थः । तत्र हेतुर्निरयस्यापि विषयात्मकत्वादिति । यद्वा—हे भामिनि परिहासेपि मद्विच्छेदशंकयात्मकोटितोपि परमप्रेमास्पदे मय्यपीर्ष्या रतिः अपवर्गरूपा प्रेमभक्तिलक्षणा सपद्यस्मात्तमपि तथा तत्पतिं पूर्वोक्तदांपत्यादिसंपदः पतिमपि मां प्राप्य वशीकृत्य संपदे दांपत्यादिसंपदर्थमेव मां वांछन्ति पुनः पुनः सेवितुमीहन्ते, न तु मदर्थं ते मन्दभाग्या

---

[1] सत्–विज. । [2] ये स्यु–विज. । [3] ये–विज. । [4] युते–विज. । [5] विकृति–विज. । [6] रहोहरो–श्रीधर. वंशी. जीव. ; रहस्करो–वीर. ; रहोपहो–जीव. ; रहारहो विज. । [7] स्थित–विज. । [8] स्मा–वीर. ।

अप्रशस्तभक्तिसंस्कारवन्तः। यतो ये तत्संपद्वांछकास्ते निरये नरकेऽपि संति तत्सादृश्यं कथं मद्भक्तियोगिनां युज्यत इति भावः। ननु संपदिच्छका महाविपत्तिरूप निरयं कथं गच्छन्ति तत्राह—नृणां मात्रात्मकत्वात् पापेनापि तदुपार्जकत्वान्निरयः सुसंगमः, प्रयत्नं विनापि लभ्य इत्यर्थः। अन्यत्समम् ॥ ५३ ॥ यस्माद्विषयिणां निरयदुःखं तस्माद्धेतोः। असकृत्पुनः पुनः। दुष्टः केवलविषयनिष्ठोऽभिप्रायो यस्यास्तस्याः। अत एव दुरभिप्रायत्वादेव। असुंभरायाः स्वप्राणपोषणपरायाः। वञ्चनञ्चात्र निजपातिव्रत्यप्रदर्शनपूर्वकं जारसेवनं, तत्परायणायाः ॥ या भवमोचनी संसारबंधमोचनी सा त्वया कृता, तव भयाभावात्त्वयि सा ऋणवत्येवाभूदन्यैरेव त्वदनुगंतृलोकैः कृता भवमोचनी भवेदिति भावः। ननु तर्हि खला अपि मुक्ताः स्युस्तत्राह—खलैरिति ॥ ५४॥ रुक्मिण्या भक्तिं गुरूकरोति—किञ्चेति। क्वापि कास्वपि कुत्रापि वा यया त्वया अवगणय्य त्यक्त्वा रहोहरो रहस्यप्रापकः दूत इत्यर्थः। मे मम पार्श्वे इति शेषः॥ गृहेषु सार्वत्रिकेषु स्वीयेष्वपि वा स्वविवाहस्य कालेऽत्यासन्नसमये रहो रहस्यं वहति प्रापयतीति सः 'रहोहरः' इति पाठेऽपि स एवार्थ इति तादृशभावेष्वपि पितृमात्रादिसर्वजनेष्वप्यनादरः सूचितः। 'रहोऽतिगुह्ये सुरते' इति विश्वः। उपश्रुतसत्कथस्येति—गृहांतर्मद्वार्त्ताश्रवणमात्रेणैव न तु मन्माहात्म्यानुभवेनेत्यर्थः। किमुताधुना जातपरमासक्तित्वे सतीति भावः। मानिनीति—मानः पूजा चित्तसमुन्नतिर्वा हे तद्वति तद्योग्या त्वमेव न त्वन्येति भावः ॥ ५५॥ तेनातिदुःसहसहनादिना जिता वशीकृताः। अनेन तद्वधमितिवचनेन। अस्य क्ष्वेल्याचरितस्य ॥ किञ्च—भ्रातुरिति बंधुवात्सल्येन तत्तदसह्यता, युधि निर्जितस्येति त्वद्भ्रातृत्वाद्युद्धेऽपि तस्य निर्जयायोग्यता, तथा प्रोद्वाहेत्यादिना तदानीं तद्वधायोग्यता सूचिता। यतोऽसहिष्ठा अतो नाब्रवीश्च। भीतिः शंका, ईश्वरोऽयं कदाचिन्मय्यनवधानं कुर्यादित्याशंकयेत्यर्थः। अस्मदिति बहुत्वं निजबंधुजनापेक्षया। आत्मना सह वियोगेन तैरपि तत्सिद्धेः। किंवा—पराजिताः अस्माकं तादृश शक्त्यभावात्। वयमिति न केमलमहं मदीयाश्च ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

टीकायामपवर्गेण सह सम्पदो यस्मिन्नित्यर्थकथनमेव नतु विग्रहः उपपदविभक्त्या समासाभावात् अपवर्गयुक्ताः सम्पदो यस्मिन्निति विग्रहः समासश्च मध्यपदलोपी अपवर्गोऽत्र मोक्षो भक्तियोगश्च सम्पद्यन्त इति सम्पदो विषयाः अतः सम्पद एव विषयानिति काकाक्षिन्यायेन सम्पद एव विषयानेवेति योज्यम् अन्यथा न तु मामिति न सङ्गच्छते समानविभक्त्यन्तरव्यावर्त्तकत्वादेवकारस्य तेषां विषयवाञ्छकानां नृणां निरयो निकृष्टयोनिरपि सुशोभनोऽभिरुचितश्चासौ सङ्गमनीयश्चेत्यर्थः। तत्र हेतुः निरयस्यापि विषयात्मकत्वादिति यद्वा हे मानिनि परिहासेपि मद्विच्छेदशङ्कयाऽऽत्मकोटितोपि परमप्रेमास्पदे मय्यपीर्ष्यावति अपवर्गरूपा प्रेमभक्तिलक्षणा सम्पद्यस्मात्तमपि तथा तत्पतिं पूर्वोक्तदाम्पत्यादिसम्पदः पतिमपि मां प्राप्य वशीकृत्य सम्पदो दाम्पत्यादिसम्पदर्थमेव वाञ्छन्ति पुनः पुनः सेवितुम् ईहन्ते नतु मदर्थं ते मन्दभाग्या अप्रशस्तभक्तिसंस्कारवन्तः यतो ये तत्सम्पद्वाञ्छकास्ते निरयेपि सन्ति तत्सादृश्य कथं मद्भक्तियोगिनां युज्यत इति भावः। ननु सम्पदिच्छावका महाविपत्तिरूपं निरयं कथं गच्छन्ति तत्राह—नृणां मात्रात्मकत्वात् पापेनापि तदुपार्जकत्वात् निरयः सुसङ्गमः प्रयत्ने विनापि लभ्य इत्यर्थः। अन्यत्समानम् ॥ ५३ ॥ असकृत् सदेत्यर्थः। सेयञ्च त्वत्कृतमदनुवृत्तिर्भवस्य प्रपञ्चस्यापि सर्वस्य मोचनी श्रवणादिना सर्वेषामपि सर्वदुःखतो मोक्षकरी तर्ह्येतदूर्ध्वं प्रपञ्चं न स्थास्यत्येव कि तत्राह—खलैः श्रीगुर्वादिवञ्चकैः सुदुष्करा करोत्यर्थस्य सर्वधात्वर्थव्यापकत्वाद्दुर्बोधादिरूपाञ्च दुराशिषः मन्निष्ठत्वाभावाद्दुष्टा आशीः कामो यस्याः तत्र हेतुः यतः कुतश्चेदिन्द्रियतर्पणमात्रपरायाः यतो निकृतिञ्जुषः पूर्ववत् खलाया इत्यर्थः। गृहेश्वरीति त्वयैव दृष्टान्तरूपया मम सर्वेष्वपि गृहेषु अनुवृत्तिः प्रवर्तितेति त्वमेव सर्वगृहस्वामिनीति यद्वा गृहस्येश्वरी त्वमेव अहन्तु त्वदधीन एवेति भावः ॥ ५४ ॥ गृहेषु सार्वत्रिकेषु स्वीयेष्वपि वा स्वविवाहस्य काले अत्यासन्नसमये रहः रहस्यं वहति प्रापयतीति तथा सः रहोरह इति पाठेऽपि स एवार्थः। पितृभ्रात्रादिसर्वजनेष्वनादरः सूचितः उपश्रुतसत्कथस्येति स्वगृहान्तर्मद्वार्त्ताश्रवणमात्रेणैव नतु मन्माहात्म्यानुभवेनेत्यर्थः। किमुताऽधुना जातपरमासक्तित्वे सतीति भावः। मानिनीति मानः पूजा चित्तसमुन्नतिर्वा हे तद्वति तद्योग्या त्वमेव नत्वन्येति भावः ॥ ५५ ॥ किञ्च भ्रातुरिति बन्धुवात्सल्येन तत्तदसह्यता युधि निर्जितस्येति त्वद्भ्रातृत्वाद्युद्धेऽपि तस्य निर्जयायोग्यता तथा प्रोद्वाहपर्वणीत्यादिना तदानीं तद्वधायोग्यता सूचिता यतोऽसहोऽसहिष्टा अतो नाब्रवीश्च भीतिः शङ्का ईश्वरोयं कदाचित् मय्यनवधानं कुर्यादित्याशङ्कयेत्यर्थः। अस्मदिति बहुत्वं निजबन्धुजनापेक्षया आत्मना सह वियोगेन तैरपि तत्सिद्धेः ते त्वया जिताः वशीकृताः कि वा पराजिता अस्माकं तादृशशक्त्यभावात् वयमिति न केवलमहं मदीयाश्च ॥ ५६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अपवर्गरूपा सम्पत् यस्मात्तमपि, तत्पतिमिति मद्वाञ्छया सम्पदोऽपि स्वयमेवाधीना भवन्तीति भावः। तथापि ता एव वाञ्छन्ति, न तु मामिति स्वामिपादैरार्थिको नञ् व्याख्यातम्। सर्वदोषहरं सर्वसद्गुणाधायकं तासु कथञ्चिन्नमत्सम्बन्धमित्यर्थः। हे मानिनीति मत्प्रीतिवाञ्छयैव मानस्याप्याचरणात्त्वादृशी भूरिभाग्यैवेति भावः। अन्यत्तैर्व्याख्यातम्। पक्षान्तरे—

ये तु केवलं प्राकृतविषयभोगमेव वाञ्छन्ति, ते दुर्भगा एवेत्याह—मामिति । अर्थः स एव । अथवा प्रसंगाद्विषयकामुकानिव मोक्षेच्छूनिन्दति—मामिति । मोक्षसम्पदं ये वाञ्छन्ति; अकारप्रश्लेषेण—यतो न विद्यते सम्पत् प्रेमसम्पद् येषु ते, तस्याः प्रेमसम्पदः पतिं दातारमपि, निरयेऽपि ये स्युस्तास्तु ये वाञ्छन्ति, तेषां निरयः सुसंगमः । अन्यत् समानम् । यद्वा, मयि प्रेमसम्पत्त्यैव मया सह दाम्पत्यं सिध्येदित्याशयेन तस्याः परमसाध्यत्वमाह—मोक्षसम्पदमपि सम्पदे प्रेमसम्पत्त्यर्थमेव वाञ्छन्ति । अकारप्रश्लेषेण—अमन्दभाग्या भूरिभागाः ।। ५३ ।। असकृत् सदेत्यर्थः । भवो भक्तिप्रतिघातकसंसारतापस्तस्मान्मोचयतीति तथा सा, अयं स्वरूपमात्रनिर्देशः, यद्वा, भवस्य प्रपञ्चस्यापि सर्वस्य मोचनी श्रवणादिना सर्वदुःखतो मोक्षकरी, खलैः परदोषसूचकैः पुरुषैः, हि निश्चितम्, दुराशिष इत्यादिविशेषणत्रयस्य यथोत्तरं सुदुष्करताहेतुत्वे श्रैष्ठ्यम् । एवं तस्याः खलत्वादिदोषनिरसनेन परमसाध्वीत्वं तेनानुवृत्तेर्दार्ढ्यमपि सूचितम् । हे गृहेश्वरीति स्वदृष्टान्तेन मम सर्वेष्वपि गृहेष्वनुवृत्तिप्रवर्त्तनात्वमेव सर्वगृहस्वामिनीति । यद्वा, गृहस्येश्वरी त्वमेव, अहन्तु त्वदधीन एवेति भावः ।। ५४ ।। त्वादृशीं त्वत्सदृशीम्, गृहेषु सार्वत्रिकेषु स्वीयेष्वपि वा, स्वविवाहस्य काले अत्यासन्नसमये रहो रहस्यं वहति प्रापयतीति तथा सः, पाठान्तरेऽपि स एवार्थः । इति पितृभ्रात्रादिसर्वस्वजनेष्वनादरः सूचितः । उपश्रुतमत्कथस्येति स्वगृहान्तर्मद्वार्त्ताश्रवणमात्रेणैव, न तु माहात्म्यानुभवेनेत्यर्थः । हे मानिनि ! मानः पूजा चित्तसमुन्नतिर्वा, तद्वदिति तद्योग्या त्वमेव, न त्वन्येति भावः ।। ५५ ।। भ्रातुरिति बन्धुवात्सल्येन तत्तदसह्यता, यूधि निर्जितस्येति त्वद्भ्रातृत्वाद्युद्धेऽपि तस्य निर्ज्जयायोग्यता, प्रोद्वाहपर्व्वणीत्यादिना तदानीं तद्वधायोग्यता च सूचिता, भीतिः शंका, कदाचिदस्माभिः सह वियोगः स्यादित्याशंकयेत्यर्थः । यद्वा, अयोगो दुःखाकुलत्वेनासंयोगस्तस्माद्भीत्या, अस्माभिरिति बहुत्वं श्रीबलदेवादीनामपेक्षया, आत्मना सह वियोगेन तैरपि तत्सिद्धेः । यद्वा, तस्यास्तद्भीत्यात्मनो बहुमानात्, किं वक्तव्यम्, हृदि तत्तदसहिष्ठा इति किमपि नाब्रवीश्च निजमनोदुःखादिकम्, किंवा तद्विरूपकरणादिकमपि किञ्चिन्नाभिव्यञ्जितवतीत्यर्थः । ते त्वया जिता वशीकृता, किंवा पराजिताः, अस्माकं तादृशशक्त्यभावात् । वयमिति न केवलमहम्, मदीयाः सर्वेऽपीत्यर्थः ।। ५६ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवोपपादयति—मामिति । अपवर्गः मोक्षस्स एव सम्पत् लक्ष्मीर्यस्मात्तं तासामपवर्गेतरसम्पदामपि पतिं मां प्राप्य प्रसाद्य तप आदिभिरिति शेषः । सम्पदः अपवर्गेतरकामानेव वाञ्छन्ति ते जना मन्दभाग्याः, कुतः ? यद्यस्माद्ये नृणां विषयास्ते निरये नरकेपि स्युः कुतः शब्दादिविषयसुखानां केवलदुःखात्मकनरके सम्भवस्तत्राह—मात्रात्मकत्वात्तेषां सुखलेशात्मकत्वान्नरकेपि सम्भव इतिभावः । अतो निरयः सुसङ्गमः शोभनरूपतया प्रतीयमानो दम्पत्योः सङ्गमः निरयो नरकप्राय एव अतस्ते मन्दभाग्या इत्यर्थः ।। ५३ ।। पुनरप्यभिनन्दति–दिष्ट्यैति । हे गृहेश्वरि ! त्वया मयि भवमोचनी निष्कामा अनुवृत्तिः कृता एतद्दिष्ट्या आनन्दः वृत्तिं विशिनष्टि-असावनुवृत्तिः खलैर्दुर्जनैः दुःखेनापि कर्त्तुमशक्या दुराशिषो दुरभिप्रायाः अत एवासुम्भरायाः इन्द्रियतर्पणपरायाः निकृतिञ्जुषः वञ्चनपरायाः स्त्रियास्तु सुतरां दुष्करा ।। ५४ ।। न त्वामिति । हे मानिनि ! प्रणयिनीं प्रेमवतीं न पश्यामि तत्र निदर्शनं वदन् तां विशिनष्टि—ययेति । यया त्वया अविगणय्यानादृत्य श्रुताः सत्कथास्त्वदीया येन तस्य मे मह्यं रहस्करः रहस्यवार्त्ताहर्त्ता द्विजः प्रेषितः अतस्त्वादृशीं भार्यां न पश्यामीत्यर्थः ।। ५५ ।। किञ्च त्वद्गुणैरेवाहं वशीकृत इत्याह—भ्रातुरिति । युद्धे मया निर्जितस्य भ्रातुः रुक्मिणा विरूपकरणं तथा प्रोद्वाहपर्वण्यनिरुद्धविवाहोत्सवे तत्राप्यक्षगोष्ठ्यां द्यूते तस्य रुक्मिणो वधम् इदं समनन्तराध्याये स्फुटीभविष्यति समुत्थं तद्वधश्रवणजं दुःखञ्च अस्मदयोगभीत्या अस्मद्विश्लेषभीत्या हेतुभूतया असहः सोढवत्यसि किमपि नाब्रवीः नोक्तवत्यसि तेनैवम्विधगुणजातेन वयं जितास्स्म वशीकृता बभूविम यद्यप्यस्य प्रणयकलहस्यानिरुद्धविवाहानन्तर्यमतो ज्ञायते तथापि अत्र व्युत्क्रमेणोक्तिः प्रश्नानुगुण्येनेत्यवगन्तव्यम् ।।५६।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ननु, तर्हि सम्पदर्थे भगवद्भजनं युक्तं हीति तत्राह—मामिति । सतः सत्यस्य मोक्षस्य पतिं ये सम्पल्लक्षणभोगाः कथं तेषां भोगानां निरये सत्त्वमिति तत्राह—मात्रात्मकत्वादिति । मात्रात्मत्वात्तेषां भोगानां शब्दादिविषयाविनाभूतत्वान्निरये सुसङ्गमः सुलभः सङ्गम इत्यर्थः ।। ५३ ।। सर्वभक्तेषु त्वमेव मुख्यभक्तेत्याशयेनाह—दिष्ट्येति । हे गृहैश्वर्ययुते देवि त्वया मय्यनुवृत्तिः भक्तिः कृतेति यत्तद्दिष्टया त्वदन्येषां भवमोचनी वा असावनुवृत्तिः खलैः सुदुष्करा दुराशिषः दुष्टेच्छायाः पत्या सह दुर्वाक्यायाः वा असुम्भरायाः स्वप्राणपोषणपरायाः विकृतिञ्जुषः जारलक्षणव्याजसेवमानायाः स्त्रियः सुतरां सुदुष्करा दिष्टया गृहं मङ्गलमन्दिरञ्च ऐश्वर्ययुतश्च दिष्टया गृहैश्वर्ययुतः तस्मिन्निति वा ।। ५४ ।। श्लोकत्रयेण देव्याः पूर्वोक्तां भक्तिं लालयति—न त्वादृशीमित्यादिना । उपस्थिता समीपं प्रापिता त्वत्सत्कथा यस्य स तथा तस्य रहोरहः अतिरहसि ।। ५५ ।। विरूपकरणं केशवपनं प्रोद्वाहपर्वणि विवाहलक्षणोत्सवदिवसे अक्षगोष्ठ्यां द्यूतविशेषक्रीडायां तस्य भ्रातुर्वधम् अस्मदयोगभीत्या अस्मद्विरहभयेन ।। ५६ ।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मन्दभाग्यत्वमेव दर्शयति—येऽन्ये सम्पद्वाञ्छका निरयेऽपि वर्त्तन्ते। येऽन्यत्र वर्त्तन्ते तेषां नृणां मात्रात्मकत्वादत्यन्तविषयावेशात्यागेन विषयार्ज्जनान्निरयोऽपि सुसङ्गमः अनिच्छयापि प्राप्य इत्यर्थः ॥५३॥ तस्मादेतत् समानवासनत्वात्तेऽपि मन्दभाग्या इत्याह—असकृत् सदेत्यर्थः। कृता प्रचारिता भवस्य सर्व्वस्यैव प्रपञ्चस्य श्रवणादिना सर्व्वदुःखतो मोक्षकरी तर्हि ऊर्द्ध्वं प्रपञ्चो न स्थास्यत्येव तत्राह खलैर्गर्व्वादिभिर्मुखैः दुष्क रैः करोत्यर्थस्य सर्व्वधात्वर्थव्यापकत्वाद् दुर्बोधादिरूपा च ॥ ५४-५९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे षष्टितमोऽध्यायः ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

इममेवार्थं स्पष्टयति—मां प्राप्येत्यादि। तत् तस्मात् मां पतिं प्राप्य पतित्वेन लब्धापवर्गसम्पदं ये वाञ्छन्ति, तेऽसम्पदो दरिद्रा एव। दरिद्राः खलु क्षुद्रमेव प्रार्थयन्ते तेऽत्यन्तमन्दभाग्या एव। वाञ्छन्तीति पूर्वेणैवानुषङ्गः। यच्छब्देन तच्छब्द आक्षिप्यते, एवं तच्छब्देनापि यच्छब्दः, यत्तदोर्नित्यसम्बन्धात्। तेषां मन्दभाग्यत्वेन कः परिणाम इत्याह—निरय इत्यादि। तेषां निरयः सुसङ्गमः। तत्र हेतुः—मात्रात्मकत्वात् मात्रा विषयाः ॥ ५४ ॥ दाम्पत्यं प्रणम्य तदेव द्रढ़यति—न तादृशीमित्यादि बहुभिः। उक्तव्याख्यानं विनैव तेषां वाक्यानाम् असङ्गतेर्भगवतो वचनासौष्ठवदोषप्रसङ्गः स्यात् ॥ ५५-५७ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

इममेवार्थं स्पष्टयति—मां प्राप्येति। हे मानिनि! तत्तस्मात् मां पतिं पतित्वेन प्राप्य अपवर्गसम्पदं ये वाञ्छन्ति, तेऽसम्पद एव दरिद्रा एव। दरिद्रा हि क्षुद्रमर्थं प्रार्थयन्ते, अपि तु ये विषया निरयेऽपि स्युस्तान् ये वाञ्छन्ति तेऽत्यन्तं मन्दभाग्या एव। वाञ्छन्तीति पूर्वेणैव सम्बन्धः। यच्छब्देन तच्छब्द आक्षिप्यते, एवं तच्छब्देनापि यच्छब्दः—यत्तदोर्नित्यसापेक्षत्वात्। तेषां मन्दभाग्यत्वे नरकः परिणाम इत्याह—निरयः सुसङ्गमः, तेषां निरयः सुलभः स्यात्। तत्र हेतुः—मात्रात्मकत्वाद्-विषयात्मकत्वात् ॥ ५४ ॥ इदानीं दाम्पत्यं प्रशस्य तमेवार्थं द्रढ़यति—न त्वादृशीत्यादि बहुभिः ॥ ५५-५७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

उक्तमेवार्थं प्रपञ्चयति—मामिति। अपकृष्टा वर्गसम्पन्मोक्षानन्दोपि यतस्तं मां प्राप्य सम्पदः प्राकृतीरेव वाञ्छन्ति यतस्तासामपि पतिं दातारं ते सम्पद्वाञ्छकाः मन्दभाग्याः यतो नारकीष्वपि योनिषु स्त्रीसङ्गादिविषयसुखान्यनायासेनैव लभ्यत इत्याह—ये जीवा निरयेपि सूकरादिजातावपि वर्त्तन्ते तेषां नृणां जीवानां मात्रात्मकत्वात् विषयात्मकत्वात् स स निरय एव सुसङ्गमः स्त्रीसङ्गादिसुखसाधकत्वात् शोभनसङ्गमहेतुरित्यर्थः ॥ ५३ ॥ या भवमोचनी सा त्वया कृतेति तव भयाभावात्त्वयि सा ऋणवत्येवाभूदन्यैरेव कृता भवमोचनी भवेदिति भावः। ननु तर्हि खला अपि मुक्ताः स्युस्तत्राह—खलैरिति। दुराशिषः दुरभिप्रायाया असुम्भरायाः स्वप्राणतर्पिण्या. निकृतिञ्जुषः वञ्चनपरायाः अतिखलायाः स्त्रियास्तु सुतरामेव दुष्करा ॥ ५४ ॥ परन्तु प्रेमवतीनां मद्भार्याणामपि मध्ये गृहिणो मम त्वमेव गृहिणीश्रेष्ठेत्याह—नेति। मानिनीति मान आदरः हे तद्वति रहोवहः रहस्यवस्तुप्रापकः "रहोतिगुह्ये सुरते" इति विश्वः। उपश्रुताः सत्यः कथा यस्य तस्य मम स्थाने ॥ ५५ ॥ प्रोद्वाहपर्वण्यनिरुद्धविवाहे अक्षगोष्ठ्यां द्यूतसभायां तस्य भ्रातुर्वधं समुत्थं तत्र तत्र अस्मदयोगभीत्या अस्मासु न युज्यते नोचिती भवतीत्यस्मदयोगस्तद्भीत्या किमपि दुःखं नैवाब्रवीः। कीदृशम्? असहो दुर्बलं केवलं लोकापेक्षैकहेतुत्वादिति भावः। पुनः कीदृशम्? समुत्थं समुद्यथा स्यात्तथा तिष्ठतीति तद्दुःखं मत्प्रतिकूलरुक्मिहिंसनादतः सुखसहितमेवेत्यर्थः। अनेनैवानिरुद्धविवाहानन्तर्य्यमस्य ज्ञातव्यम् ॥ ५६ ॥

गूढार्थदीपिनी

हे मानिनि अपवर्गयुक्ताः सम्पदो यस्मिन् तम्। अत एव तासां सम्पदां पतिं मां प्राप्य ये सम्पद एव विषयानेव वाञ्छन्ति ते मन्दभाग्या इत्यन्वयः। ये निरये नरकतुल्यशूकरादियोनावपि स्युः अतो मात्रात्मकत्वात् विषयनिष्ठत्वात्तेषां निरय एव सुलभो भवेन्न मोक्ष इत्यर्थः ॥ ५३ ॥ हे गृहेश्वरि। असकृत् निरन्तरं मयि अनुवृत्तिः कृता एतद्दिष्ट्या भद्रं जातम्। कथंभूता। खलैः सुदुष्करा। निकृतिजुषो वञ्चनपरायाः स्त्रियास्तुः असावनुवृत्तिः सुतरां दुष्करेति। दुराशिषा दुर्व्यसनाया इन्द्रियतर्पणपरायाः। सर्वत्र शेषे षष्ठी। निकृतिमित्यत्र तदर्हमिति निर्देशात् द्वितीया ॥ ५४ ॥ गृहेषु भार्यासु मध्ये त्वया सदृशीं प्रणयिनीं प्रेमवती न पश्यामि यया त्वया नृपान् अवगणय्य त्यक्त्वा मे मम पार्श्वे रहोहरो दूतः प्रस्थापितः। उपश्रुता सती कथा यस्य तस्य मे मां प्राति ॥ ५५ ॥ भ्रातुः रुक्मिणः। प्रोद्वाहपर्वणि अनिरुद्धविवाहे अक्षगोष्ठ्यां द्यूतसभायाम् तद्वधम् समुत्थं तत्तत्स्मरणजं दुःखमसहः सोढवत्यसि। वियोगः भवेन। ते त्वया। 'सह' धातोराधृषीयस्य णिजभावे रूपम् ॥ ५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तदेवोपपादयति–मामिति । अपवर्गेण सह सम्पदो यस्मात् तम् मां प्राप्य आराध्य केवलं सम्पद एव वाञ्छन्ति तासां सम्पदां पतिं मां न वाञ्छन्ति ये ते मन्दभाग्याः कुतः मात्रात्मकत्वात् मात्राः सम्पद एव न त्वहम् आत्मा आश्रयो येषां मात्रासु वा आत्मा मनो येषां ते मात्रात्मानः स्वार्थे कः तेषां भावस्तत्त्वं तस्मात् ननु तथापि ते धन्याः देवमनुष्यादिरूपेण दाम्पत्यं प्राप्य विहरन्तीत्यत आह—ये दाम्पत्याभिरतास्ते निरयेपि सन्ति ननु निरयतो देवमनुष्यादिलोकस्य महद्वैलक्षण्यमत आह—नृणां सुसङ्गमः शोभनतयाऽभिमतः स्त्र्यादिभिः सङ्गमः निरय एवेत्यन्वयः ॥ ५३ ॥ भवमोचनी निष्कामा असौ अनुवृत्तिः खलैः सुदुष्करा दुराशिषो दुरभिप्रायायाः असुम्भरायाः प्राणतर्पणपरायाः निकृतिञ्जुषः प्रत्युपकाङ्क्षावत्या सुतरां सुदुष्करा ॥ ५४ ॥ रुक्मिण्याः सर्वाभ्यः श्रैष्ठ्यं दर्शयति—न त्वादृशीमित्यादि त्रिभिः । मानः आदरः तद्वती मानिनी तस्याः सम्बोधने हे मानिनि ! रहोहरः अतिगुह्यसन्देशहरः “रहोतिगुह्ये सुरते” इति विश्वः । उपश्रुता सत्या कथा यस्य मे समीपे ॥ ५५ ॥ प्रोद्वाहपर्वणि अनिरुद्धविवाहे तत्र च अक्षगोष्ठ्यां द्यूतसभायां तस्य भ्रातुर्वधञ्च समुत्थं तद्वधश्रवणजं दुःखञ्च अस्माभिरयोगो वियोगस्तद्भीत्या असहः सोढवत्यसि अनेन हास्यलीला अनिरुद्धविवाहानन्तरं कृता इति ज्ञायते तथापि किमपि नाब्रवीः नोक्तवत्यसि तेन गुणगणेन वयं ते त्वया जिताः वशीकृताः ॥ ५६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एतामभिनन्दनीयगुणोपपाद्य नन्दयन्स्त्रीपुंसौ निन्दनीयधर्ममुपपाद्य गोविन्दो निन्दति ॥ दिष्ट्येति । गृहैश्वर्ययुतं सम्बद्धं यया तत्सम्बुद्धिः । गृहैश्वर्यसकृदिति च पठन्ति । हे गृहैश्वरीति सम्बोधनम् । उभयपक्षेऽपि श्रियः सम्भवीदम् । भवमोचिनि । वस्तुत इतरेषाम् । हे भवमोचिनि रमात्मिके । यामप्यनुवृत्तिः कृता असत्कृता वासौ । खलैः खं सुखं लान्त्यादत्त इति खलास्तैः प्रक्रमानुगुण्यादर्थः स्वीकार्य इति । खं विषयसुखं तैः सुदुष्कराः कर्तुमशक्या दुराशिषोऽसाध्याभिलाषाया असुम्भरायाः स्वप्राणमात्रपोषणरतायाः । वैवक्षिकसंज्ञात्वमाश्रित्य संज्ञायां भृतृवृजीति खचि खित्यनव्ययस्येति मुम् । निकृतिः कापट्यं जुषः सेवमानायाः स्त्रियः सुतरां सुदुष्करा सा त्वया कृतेति दिष्ट्या सुभद्रं गृहैश्वर्ययुते मयीत्यन्वयो वा । ये मां भजन्ति दाम्पत्य इत्यस्यैका व्याख्या सख्यमेतत्पद्यगतसुतरां दुराशिष इत्यादिना भजत इति सोपादेया ॥ ५६ ॥ श्लोकत्रिकेन देवीसेवां लालयंस्तद्गुणान्स्वानुभूतान्विशालंयति ॥ नेति । प्रणयिनी स्नेहसहितां त्वादृशीं त्वत्सदृशीं गृहेषु गृहिणीं भार्यां न पश्यामि । हे भामिनि । स्वविवाहकाले प्राप्ताननायासेन नृपानविगणय्यागणयित्वा रहो रहोऽत्येकान्त्ये उपस्थिता सती कथा तव यस्य तस्य । यो द्विजः प्रस्थापितः । प्रेणपत्रसाहित्यं सूचयति । रहः स्वनगरेऽरहो द्वारवत्यामिति वा ॥ ५७ ॥ वयमेतदादिजयिनोऽपि त्वया सहस्रहयसेनानीरपि स्वभार्या कार्पासचयकृन्नीत्या पराभूता इति लोकमनुकुर्वन्वक्ति । युधि निर्जितस्य भ्रातू रुक्मिणो विरूपकरणं पञ्चचूडीकरणमक्षगोष्ठ्यामक्षखेलनपरिषदि प्रोद्वाहपर्वण्यनिरुद्ध विवाहोत्सवे तद्वधं रुक्मिवधं बलकृतम् । अत्र द्वयीं गतिमवलम्ब्य ग्रन्थक्रमः । अनिरुद्धविवाहः प्राक् पश्चाद्रुक्मिणीप्रणयकलहशंसकः शंसकश्च प्राक् कलहस्यानन्तर विवाहस्येति । तत्राद्ये जातो रुक्मिवधं इति प्रोद्वाहकर्मणीत्युक्तिर्युक्ता । द्वितीये तु द्वयोरपि सार्वज्ञ्याद्भाविनं वधं तत्सहनेन सह भविष्यतोक्तवान्हरिरेष्यन्नयेनेत्यविरोधो ज्ञेयः । तथा तदुत्थं दुखं चासहः । धात्वन्तररूपं । तत्र तन्त्रमस्मदयोगभीत्या वियोगभयेन लोकार्थं प्रदर्शितेन किमपि नैवाब्रवीरिति तेन वयं ते त्वया जिताः पराभूताः ॥ ५८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

साधारणसेवकानां स्थितिमुक्त्वा, ये पुनर्विशेषेण भगवन्तं प्राप्ताः, तेऽपि चेत् सकामा भवेयुः, तदा कालेन तेषां बुद्धिर्नश्यत इति निन्दति **मां प्राप्य मानिनीति** । अपवर्गस्य सम्पद्यस्मात् । **मानिनी**ति सम्बोधनं मानस्य विद्यमानत्वान्न त्वं प्रार्थयिष्यसीति सूचितम् । ये केवलमैहिकसम्पद एव प्रार्थयन्ति, ते मन्दभाग्याः । यथा मन्दभाग्यो निधिमपि प्राप्य, पाषाण इति पदा प्रक्षिपति, एतन्मन्दभाग्यस्य लक्षणम् । ननु विषया अपि दुर्लभाः स्त्रीधनादयः, तत्कथं मन्दभाग्यत्वमिति चेत् । तत्राह । **ये** विषया **निरयेऽपि नृणां भवन्ति** । तत्र हेतुः **मात्रात्मकत्वा**दिति । न हि क्वचिद्विषयाभावोऽस्ति । श्वादियोनावपि विषयोपभोगस्य दृष्टत्वात् । दुःखं तु विषयसम्बन्धे नियतम् । तारतम्यं त्वप्रयोजकम् । तर्हि तादृशो निरयोऽपि सम्पत्तियुक्तः समीचीन इति चेत्, तत्राह **निरयः सुसङ्गम** इति । सुष्ठु सङ्गमो यस्येति । न तदर्थं तपः कर्तव्यं मद्भजनं वा । अतः अक्लेशसिद्धे क्लेशकरणात् दुर्भाग्यत्वम् । पूर्णादल्पप्रार्थनायां मन्दभाग्यत्वं वा स्यादिति तथा न भावनीयमित्युपदेशः ॥ ५३ ॥ तया यदुक्तं मामीक्षसे, तर्हि नः परमानुकम्पेति तदभिनन्दति **दिष्ट्ये**ति । असकृन्मयि त्वया या अनुवृत्तिः कृता, सा दिष्ट्या कृता । यतः सा भवमोचनी । **गृहेश्वरी**ति सम्बोधनं लोकप्रसिद्धसंसारसुखं तव सिद्धमेवेति सूचयति । अनुवृत्तिर्नामोदासीनेऽपि भगवति तदनुसरणम् । तत्प्रथमं पत्रप्रेषणेनात्मसमर्पणरूपा । ततो रुक्मिवधे प्रार्थनया वाक्समर्पणरूपा । तत इदानीं मूर्च्छया मनःसमर्पणरूपा । स्वाभिप्रायप्रतिपादकैर्वाक्यैश्च सर्वसमर्पणरूपा । ईश्वराद्भिन्नतया स्थितो संसारः ‘ईशादपेतस्ये–’ त्युक्तरत्र

वक्ष्यते । अत इयं भवमोचनी भवति । ननु किमाश्चर्यम्, भार्या करोत्येवेति चेत् । तत्राह **खलैः सुदुष्करेति** । दुष्टैरुक्मिप्रभृतिभिः कृत्वा सुतरां दुष्करा । **खला** दुष्टस्वभावाः मात्सर्येण परकार्यनाशकाः । किञ्च । अन्तरपि तव बाधकं न जातमित्याह **दुराशिष** इति । दुष्टा प्राकृती आशीर्यस्य तस्याः मदनुवृत्तिः सुतरामेव दुर्लभा । तत्राप्यसावेतादृशी । तत्रापि **असुंभरायाः** प्राणपोषिकायाः । तत्रापि **निकृतिजुषः** नरकसेविकायाः । **स्त्रियश्च** । अन्तःकरणप्राणेन्द्रियशरीरदोषाणां प्रत्येकसद्भावेऽपि दुर्लभा, समुदाये किं वक्तव्यमित्यर्थ. । इमामेवोपपत्तिं हिशब्द आह ॥ ५४ ॥ एतादृश्योऽन्या अपि बह्व्यः सन्तीति स्त्रीणामपि मध्ये तामुत्कृष्टत्वेन स्तौति **न त्वादृशीमिति** । प्रणयिनो गृहिणी दुर्लभा । लौकिकधर्माभिनिविष्टा गृहिणी । तथाभूतापि परमप्रेमयुक्ता आत्मनोऽप्यधिकस्नेहवती दुर्लभा भवति । **गृहेषु** गृहस्थाश्रमेषु मम बहुरूपेषु । **न पश्यामीति** तादृश्या अभावे प्रमाणम् । **मानिनीति** मानसद्भावेन अन्यासक्तिनिवृत्तिः अपकीर्तिलेशस्याप्यसहनं च सूच्यते । कथमित्याकाङ्क्षायामुपपादयति । **यया** स्वविवाहकाले प्राप्तान् सर्वप्रकारेण शिशुपालादीनविगणय्य, **रहः** एकान्ते द्विजः प्रस्थापितः । नापि मया सह परिचयः, किन्तु उपश्रुता सद्भिः कृता कथा यस्य, सत्कथा वा । अहो आश्चर्ये । नह्येतादृशं क्वचिदपि लोके जातमिति । स्वयंवरे तु वरणं युक्तम्, नत्वेतादृशम्, अन्याः सर्वा एव लौकिकप्रकारेणानीताः । अनेन सम्बन्धप्रकारः त्वत्सदृशो नान्यासामिति निरूपितम् ॥ ५५ ॥ अपराधसहनं च त्वत्सदृशं नान्यासामित्याह **भ्रातुर्विरूपकरण**मिति । विवाहसमये रुक्मिणो ज्येष्ठभ्रातु**र्विरूपकरणं** मुण्डनम्, तत्रापि युधि निर्जितस्य । **प्रोद्वाहपर्वणी**त्युभयत्र सम्बध्यते । यद्यपीयं कथा प्रद्युम्नोत्पत्तेः पूर्वमेव, अन्यथा भगवान् अन्यभजनं न वदेत् । न हि पुत्रपौत्रादियुक्ता क्वचिदेवमुच्यते । प्रथमसङ्ग एवैवं भवति । सर्वथा हृदयानभिज्ञदशायां तस्या अपि पतनादिसम्भवः, न तु निरन्तरप्रवृत्तौ । अनिरुद्धविवाहे तु अक्षगोष्ठ्यां तद्वधः । तदुत्तराध्याये वक्ष्यते । तथापि यथा तया आर्षज्ञानेन सर्वं निरूपितम्, तथा भगवानपि तां तादृशीं मत्वा भाव्यर्थमपि सिद्धवत्कारेण निरूपयति । भूतप्रत्ययस्तु लङ्प्रयोगः । 'छन्दसि लुङ्लङ्लिटः' इति दश लकारार्थेषु भवन्तीति आवृत्त्या योजनायां द्वितीयवाक्ये भविष्यदर्थे ज्ञातव्यः । ताभ्यां समुत्थं दुःखमसह इत्यपि तथा । अस्मदयोगः अस्मत्सम्बन्धोः निवर्तिष्यत इति भयेन उत्पत्तिबलिष्ठभ्रातृसम्बन्धापेक्षयापि अस्मत्सम्बन्धाभावशङ्कापि महतीति सर्वोत्तमा त्वमेव । चकारान्मध्ये प्रद्युम्नविवाहादौ तदवगणनादि संगृह्यते । समुत्थं दुःखं सोढुमशक्यम् । बलभद्रोपदेशात् समुत्थमिति ज्ञायते । एकक्रियोपात्तत्वात् द्वितीयमपि तादृशमेव । **तेन दुःखसहनेन ते** त्वया वयं जिताः । तव वयमित्यपि । जयोऽप्यङ्गीकृतः । त्वदीयत्वं च ॥ ५६ ॥

श्रीसुबोधिनी–सारः

अपवर्गेण सह संपदो यस्मिस्तं मां प्राप्य प्रसाद्य ये संपदो विषयान् वांछन्ति न तु तासां संपदां पतिं माम् इति काका व्याख्येयम् । भट्टास्तु । तत्पतिं मां प्राप्य संपद एव ये वांछन्ति ते मंदभाग्याः ये विषया नृणां पुंसां मात्रात्मकात् विषयात्मकत्वान्निरयेऽपि नरके निकृष्टश्वसूकरोष्ट्रखरादियोनावपि स्युः अतो निरय एव सुसंगमः सुलभस्तेषां निरयेषु संगमः इति पाठः साधुः हे मानिनि ॥ ५३ ॥ हे गृहेश्वरि त्वया भवमोचनी संसारनिर्वर्त्तिनी अनुवृत्तिरसकृन्मुहुः कृता दिष्ट्या भद्रम् खलैः पापिभिर्दुष्टैरभक्तैरसौ सुदुष्करा दुराशिषो दुरभिप्राया असुंभरायाः प्राणोपचयकर्त्र्या निकृतिं शाठ्यं जुषते इति तस्याः स्त्रिया नितरां सुदुष्करा "कुसृतिर्निकृतिः शाठ्यम्" इत्यमरः ॥ ५४ ॥ गृहेष्वनेकेषु प्रणयिनीं प्रेमवतीं त्वादृशीं गृहिणीं त्वत्तुल्यां स्त्रीं नाहं पश्यामि तद्यथा हे मानिनि उपश्रुता नारदादिभिः सत्यः कथा यस्य तस्य मे षष्ठी चतुर्थ्यर्थे स्वविवाहसमये प्राप्तान् नृपान् अनादृत्य रहोहरः संदेशप्रापको द्विजो विप्रः प्रेषितः यया ॥ ५५ ॥ युधि निर्जितस्य भ्रातुस्तव रुक्मिणो विरूपकरणम् एतेनानिरुद्धविवाहानंतरमेतद्वृत्तमिति ज्ञायताम् । प्रोद्वाहपर्वणि अनिरुद्धविवाहेऽक्षगोष्ठ्यां द्यूतसदसि तस्य भ्रातुस्तव रुक्मिणो वधं ततः समुत्थं दुःखं चासहः सोढवती अस्माभिरयोगो वियोगस्तस्माद्भीत्या भयेन किमपि साध्वसाधु नैवाब्रवीस्त्वं तेन कारणेन ते त्वया वयं जिता स्मः ॥ ५६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उक्तमेवोपपादयति—मामिति । 'आत्माभिमान एव मदन्तरायकरो महान् दोष इति स त्वया त्याज्य' इति सूचयन् संबोधयति—मानिनीति । अपवर्गो मोक्षस्तत्सहिताः संपदो यस्मात्तं तत्पतिं मोक्षादिपुरुषार्थचतुष्टयदातारं मां प्राप्य तपआदिभिः प्रसाद्य ये केवलं संपद एव वाञ्छन्ति, न माम्, ते मन्दभाग्या एव । ननु 'सम्पद्वतां लोके उत्कर्षदर्शनात् कथं तेषां मन्दभाग्यत्वम्' इत्याशङ्क्याह—ये इति । नृणां सम्बन्धिनो ये विषयास्तेषां मात्रात्मकत्वात् तामसाहङ्कारकार्यत्वात् ते निरये नरकतुल्ये श्वसूकरादिनीचयोनावपि सुलभा एव । तानेव यदि प्राप्तसंसारोद्धारसाधनमद्भजनाधिकारा मनुष्या अपि वाञ्छन्ति तर्हि तेषां निरयोऽपि सुसङ्गमः शोभनतयाऽभिमत एव । अतस्ते मन्दभाग्या एव, स्वेनैव स्वानर्थसम्पादनादित्यर्थः ॥ ५३ ॥ 'त्वं तु कृतार्था, इत्याह— दिष्ट्येति । 'लोकप्रसिद्धमपि गृहसुखं तु तव सिद्धमेव' इति सूचयन् सम्बोधयति—गृहेश्वरीति । असकृत् निरन्तरं त्वया या मयि अनुवृत्तिः सेवा कृता सा दिष्ट्या । तया तव भद्रं मम च महान् सन्तोषो जात इत्यर्थः । तत्र हेतुं

सूचयन्ननुवृत्तिं विशिनष्टि—यतोऽसावनुवृत्तिः खलैर्दुर्जनैर्दुःखेनापि कर्तुमशक्या, दुराशिषो दुरभिप्रायायाः स्त्रियास्तु सुतरां सुदुष्करा। दुरभिप्रायमेव स्पष्टयति—निकृतिजुषः परोपकारं परप्रयोजनं चापश्यन्त्या असुंभरायाः केवलं स्वेन्द्रियतर्पणपराया इति। 'सुदुष्करत्वं कुत' इत्यपेक्षायां 'संसारबन्धनिवर्तकत्वात्' इति हेतुमाह—भवमोचनीति। सुकरत्वे तु सर्वमोक्षेण संसार एवोच्छिद्येतेत्याशयः॥ ५४॥ 'अन्यासक्तिनिरासांशे त्वभिमानोपि गुण एव' इति सूचयन् सम्बोधयति—मानिनीति। यया त्वया स्वविवाहकाले त्वां परिणेतुं प्राप्तान्नृपान् अविगणय्य अनादृत्य उपश्रुताः सत्यः कथा यस्य तस्य मे तं मां प्रति रहोहरो गुह्यसन्देशप्रापको द्विजः प्रस्थापितस्तादृशीं त्वादृशीं प्रणयिनीं प्रेमवतीं गृहिणीं भार्यां गृहेषु बह्वीषु भार्यासु मध्ये न पश्यामीत्यन्वयः॥ ५५॥ अपि च युद्धे मया निर्जितस्य भ्रातुः रुक्मिणो विरूपकरणं तथा प्रोद्वाहपर्वणि अनिरुद्धविवाहोत्सवे अक्षगोष्ठ्यां द्यूतसभायां तस्य रुक्मिणो वधं च ततश्च कालान्तरेपि समुत्थं तत्स्मरणजं दुःखं चास्मदयोगभीत्या अस्माभिः सह वियोगभयेन असहः सोढवत्यसि किञ्चिदपि कटुवचनं नैवाब्रवीः नैवोक्तवती तेनेवमस्मासु स्नेहाधिकेनैव ते त्वया वयं सर्वे जिता वशीकृताः। बहुवचनं तु वसुदेवरामाद्यभिप्रायेणोक्तम्। यद्यप्यनिरुद्धविवाहरुक्मिवधादिसमनन्तराध्याये कथनीयं तथापि तस्य भूतत्वेन निर्देशादस्य रुक्मिणीपरिहासस्य तदानन्तर्यं ज्ञेयम्॥ ५६॥

अन्वितार्थप्रकाशिका

मामिति॥ हे मानिनि! अपवर्गो मोक्षः तत्सहिताः सम्पदो यस्मात्तं तत्पतिं तासां सम्पदामपि योऽहमेव पतिः तं मां प्राप्य तपआदिभिः प्रसाद्य ये केवलं सम्पदो विषयान् एव वाञ्छन्ति नतु मामपवर्गं वा ते मन्दभाग्या एव ये विषयाः निरये नरकतुल्ये श्वसूकरादिनीचयोनावपि सुलभा एव तानेव यदि मोक्षयोग्या मनुष्या अपि वाञ्छन्ति तर्हि तेषां नृणां मात्रात्मकत्वात् विषयात्मकत्वात् निरयोऽपि सुसङ्गमः शोभनतयाऽभिमत एव। यद्वा। ये सम्पद्वाञ्छकाः ते निरये निकृष्टयोनावपि स्युः। तत्र हेतुः विषयवाञ्छकानां निरयोऽपि सुसङ्गमः निरयस्यापि मात्रात्मकत्वात्। अतस्ते मन्दभाग्या एव स्वेनैव स्वानर्थसम्पादनात्॥ ५३॥ दिष्ट्येति॥ हे गृहेश्वरि! त्वया असकृत् निरन्तरं मयि अनुवृत्तिः कृता तद्दिष्ट्या भद्रं जातं यतः असौ अनुवृत्तिः भवमोचनी खलैर्दुर्जनैर्दुष्करा दुःखेनापि कर्तुमशक्या निकृतिजुषः वञ्चनपरायाः अतिखलायाः। विकृतिमिति क्विबन्तयोगे द्वितीयाऽऽर्षी। तदर्हमिति निदेशाद्वा असुम्भरायाः केवलं स्वेन्द्रियतर्पणपरायाः दुराशिषो दुरभिप्रायायाः स्त्रियास्तु। सर्वत्र शेषे षष्ठी। सुतरां सुदुष्करा॥ ५४॥ नेति॥ हे मानिनि! यया त्वया स्वविवाहकाले त्वां परिणेतुं प्राप्तान् नृपान् अविगणय्य अनादृत्य उपश्रुताः सत्यः कथा यस्य तस्य मे तं मां प्रति रहोहरो गुह्यसंदेशप्रापको द्विजः प्रस्थापितस्तादृशीं त्वादृशीं प्रणयिनीं प्रेमवतीं गृहिणीं भार्यां गृहे बह्वीषु भार्यासु मध्ये न पश्यामि॥ ५५॥ भ्रातुरिति॥ युधि मया निर्जितस्य भ्रातुः रुक्मिणो विरूपकरणं तथा प्रोद्वाहपर्वणि अनिरुद्धविवाहोत्सवे अक्षगोष्ठ्यां द्यूतसभायां तस्य रुक्मिणो वधं च ततश्च कालान्तरेऽपि समुत्थं तत्स्मरणजं दुःखं चास्मदयोगभीत्या अस्माभिः सह वियोगभयेन हेतुना असहः सोढवत्यसि। सहतेराधृषीयस्य णिजभावे रूपम्। तथा किञ्चिदपि कटुवचनं नैवाब्रवीर्नैवोक्तवती। यद्वा। किमपि दुःखं नैवाब्रवीः तेनैवमस्मासु स्नेहाधिक्येनैव ते त्वया वयं सर्वे जिता वशीकृताः। एतेन रुक्मिवधादिकं तत्परिहासात्पूर्वं ज्ञेयम्॥ ५६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अपवर्गयुक्ताः संपदो यस्मिंस्तं मां। प्राप्य संपद एव केवलं वांछति नतु तत्पतिं मां। अतस्ते मंदभाग्याः यतो नृणां ये विषयास्ते निरयेपि निरयसदृशश्वशूकरादिदेहेपि संति॥ मात्रात्मकत्वात् शब्दादिप्राकृतविषयासक्तमानसत्वात् तेषां निरयः सुसंगमः सुखेन संगमः प्राप्तिर्यस्य तथाभूतः स्यात्॥ ५३॥ रुक्मिण्या अप्रतिहत प्रेमप्रशंसन्नाह दिष्ट्येति हे गृहेश्वरि॥ खलैः॥ सुदुष्करा भवमोचनी॥ मयि यानुवृत्तिः सा त्वया। असकृत्। पुनः पुनः कृता एतद्दिष्ट्या समीचीनं जातं॥ दुराशिषो दुष्टमनोरथाया असुंभरायाः इन्द्रियपोषणपरायाः निकृतिजुषः प्रतारणयुक्तिपरायाः स्त्रियाः असौमदनुवृत्तिः सुतरां सुदुष्करा॥ ५४॥ यया त्वया। उपश्रुता सत्कथा यस्य तस्य॥ मे मम॥ समीपे॥ रहोहरः॥ तव गुप्तपत्रिकाहरो द्विजः प्रस्थापितः प्रेषितः। अतो त्वादृशीं गृहिणीं अहं न पश्यामि॥ ५५॥ प्रोद्वाहपर्वणि अनिरुद्धोद्वाहे सति अक्षगोष्ट्यां राज्ञां द्यूतरमणसंसदि॥ तद्वधं रुक्मिवधं पुनः पुनः स्मृत्वा॥ समुत्थं दुःखं मद्वियोगभीत्या त्वं॥ असहः तस्य सहनमकरोरित्यर्थः॥ किमपि नैवाब्रवीः तेन वयं जिताः॥ स्म अयं प्रेमकलहः॥ प्रकरणानुसारे काले बोध्यः॥ ५६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मायामोहितत्वमेवोपपादयति। मां प्राप्येति हे मानिनि, अपवर्गो मोक्षः स एव संपल्लक्ष्मीर्यस्मात्तं, यद्वा। अपवर्गेण मोक्षेण सह सम्पदो यस्मिंस्तं तासामपवर्गेतरसंपदामपि पतिस्तं, मां प्राप्य प्रसाद्य, तपआदिभिरिति शेषः। सम्पदः अपवर्गेतरकामान् एव, ये जनाः, वाञ्छन्ति। ते जनाः, मन्दभाग्याः, कुतः। यद्यस्मात्, ये नृणां विषयाः, ते निरये नरकेऽपि,

स्युः, कुतः शब्दादिविषयसुखानां केवलदुःखात्मकनरके संभवस्तत्राह। मात्रात्मकत्वात्तेषां सुखलेशात्मकत्वात्, यद्वा। ये नृणां विषयास्ते निरये निरयप्रायनिकृष्टयोनावपि स्युः मात्रासु विषयेषु आत्मा येषां तत्त्वात्, तेषां निरयः, सुसंगमः शोभनसुखतया प्रतीयमानः दंपत्योः संगमो नरकप्राय एव, तदासक्तत्वात्ते मन्दभाग्या इति भावः॥ ५३ ॥ पुनरप्यभिनन्दति। दिष्ट्येति। हे गृहेश्वरि, त्वया, मयि असकृत्, भवमोचनी अनुवृत्तिः, कृता। दिष्ट्या तेन मम महानानन्द इत्यर्थः। अनुवृत्तिं विशिनष्टि। असावनुवृत्तिः, खलैर्दुर्जनैः, सुदुष्करा दुःखेनापि कर्त्तुमशक्या। दुराशिषो दुरभिप्रायायाः, अत एव असुंभराया इन्द्रियतर्पणपरायाः, निकृतिजुषः वञ्चनपरायाः स्त्रियाः, सुतरां दुष्करा हि ॥५४॥ नेति। हे मानिनि, गृहेषु दारेषु, त्वादृशीं प्रणयिनीं प्रेमवतीं, गृहिणीं स्त्रियं, न पश्यामि। तत्र निदर्शनं वदंस्तां विशिनष्टि। यया त्वया, स्वविवाहकाले प्राप्तान नृपान्, अवगणय्य, अनादृत्य, उपश्रुता सती कथा यस्य तस्य, मे मम, मह्यमित्यर्थः। रहोहरो रहस्यवार्त्ताहर्त्ता, द्विजः प्रस्थापितः सम्प्रेषितः। अतस्त्वादृशीं भार्यां न पश्यामीत्यर्थः॥ ५५ ॥ किं च त्वद्गुणैरेवाहं वशीकृत इत्याह। भ्रातुरिति। युधि युद्धे, मया निर्जितस्य, भ्रातुः रुक्मिणः, विरूपकरणं, तथा प्रोद्वाहपर्वणि अनिरुद्धविवाहोत्सवे, तत्रापि अक्षगोष्ठ्यां द्यूते, तद्वधं रुक्मिणो वधं, इदं समनन्तराध्याये स्फुटीभविष्यति। समुत्थं तद्वधश्रवणाज्जातं दुःखं च, अस्मदयोगभीत्या अस्मद्विश्लेषहेतुकभीत्या, असहः सोढवत्यसि। किमपि न अब्रवीः नोक्तवत्यसि। तेनैवंविधगुणजातेन, ते त्वया, वयं जिताः वशीकृता बभूविम एव। यद्यप्यस्य प्रणयकलहस्यानिरुद्धविवाहानन्तर्यं ज्ञायते, तथाप्यत्र व्युत्क्रमेणोक्तिः प्रश्नानुगुण्येनेत्यवगन्तव्यम्॥ ५६ ॥

कृष्णप्रिया

हे मानिनी रुक्मिणी देवी ! मैं अपवर्ग, मोक्ष और सर्वसम्पत्तियों का स्वामी हूँ फिर यह न जानकर जो लोग केवल मुझसे लौकिक सुखों की ही कामना करते हैं, मेरी प्रेममयी भक्ति की अभिलाषा नहीं करते हैं वे लोक मन्दभागी ही हैं कारण कि जो भौतिक सुख-सम्पत्ति है वह तो नरक में क्षुद्र सुखों में और क्षुद्र पशुपक्षियों की योनि में भी सुलभ है। ये सर्व सुख इन्द्रियों के ही विषय हैं। जो इन सुखों में आसक्त है उनके लिये नरक सुलभ है ॥५३॥ हे गृहदेवो ! हे स्वामिनी ! अत्यन्त आनन्द की बात है कि आपने सतत संसार बन्धनों से मुक्त करने वाली अहैतुकी प्रेमलक्षणा सेवा–भक्ति की है जो भव मोक्षदायिनी है। यह क्रिया यह भक्ति खलों के लिये सर्वथा अशक्य है। जिन नारियों के अन्तःकरण कलुषित भावों से भरे हुए हैं और अपने भौतिक विषयों की तृप्ति में ही जो लगे रहे हैं पुनः इन इच्छाओं की प्राप्ति के लिये छल कपट में डूबे हैं; ऐसे विषयी जीवों के लिये तो सर्वथा दुष्कर है ॥ ५४ ॥ हे सम्माननीये देवि ! मेरा विपुल परिवार है, सर्व भक्त है, फिर भी आपके समान स्नेह करने वाली गृहिणी नजरों में नहीं आती। प्रिये ! आपने कभी देखा न था, मुनिवरों से केवल सुना था फिर भी बड़े बड़े वीर नर आपकी उत्कण्ठा से आये थे, व्याह चाहते थे, लेकिन सबकी उपेक्षा करके विवाहकाल में आपने अनुराग से महाराज श्रीसुदेव जी को गुप्त संदेश लेकर भेजे थे ॥ ५५ ॥ प्रिये ! कहाँ तक कहूँ ! विवाहप्रसङ्ग में युद्ध के समय विजीत आपके भ्राता को बांध कर मैंने उसको कुरुप बनाया। अनिरुद्ध के विवाह अवसर पर चौसर खेलने में बड़े भाई श्री बलभद्र जी ने उसको मार दिया ! यह दुःख असाधारण था लेकिन आपका स्नेह और सहिष्णु को धन्यवाद है कि हमारे साथ वियोग न हो, मनोभङ्ग न हो, वैमनस्य न हो, यह समझकर सारा दुःख चुपचाप सह लिया और कभी मुझे यह बात भी नहीं कही। इस स्नेहसौजन्य से मैं वश हूँ॥ ५६ ॥

दूतस्त्वयाऽऽत्मलभने [1]सुविविक्तमन्त्रः प्रस्थापितो मयि चिरायति शून्यमेतत्।
मत्वाजिहास[2] इदमङ्गमनन्ययोग्यं तिष्ठे[3]त तत्त्वयि वयं प्रतिनन्दयामः ॥ ५७ ॥

श्रीशुक उवाच

एवं सौरतसंलापैर्भगवान्देवकीसुतः[4]। स्वरतो रमया रेमे नरलोकं विडम्बयन् ॥ ५८ ॥
[5]अथान्यासामपि [6]विभुर्गृहेषु गृहवानिव। आस्थितो गृहमेधीयान् धर्मांल्लोकगुरुर्हरिः[7] ॥ ५९ ॥

इति श्रीमद्भागवते महापुराणे[8] दशमस्कन्धे कृष्णरुक्मिणीसंवादो नाम [9]षष्टितमोऽध्यायः ॥ ६० ॥

---

[1] विभक्त–वीर.। [2] जिहासुरिद–विज.। [3] तिष्ठेस्ततस्त्व–विज.। [4] देवकीसुतः–वीर. विज.; जगदीश्वरः–श्रीधर. वंशी. जीव.। [5] तथा–श्रीधर. वंशी. जीव. वीर. विज. विश्व.। [6] स्त्रीणां–वीर. विज. [7] जुषन्–विज.। [8] पारमहंस्यां संहितायां दमस्कन्धे उत्तरार्धे–प्रा. पा.। [9] पञ्चसप्ततितमो–विज.।

कर्दमक्षमा

अन्वयः—आत्मनः, लभने, त्वया, सुविविक्तः, मन्त्रः, प्रस्थापितः, मयि, चिरायति, सति, एतत्, विश्वं, शून्यं, मत्वा, अनन्ययोग्यं, इदं, जिहासे, इति, निश्चितवती, तत्, त्वयि, एव, तिष्ठेत, इति, वयं, प्रतिनन्दयाम ॥ ५७ ॥ एवं, भगवान्, जगदीश्वरः, स्वरतः, नरलोकं, विडम्बयन्, सौरतसंलापैः, रमया, सह, रेमे ॥ ५८ ॥ यथा, रुक्मिणी, तथाऽन्यासामपि, गृहेषु, आस्थितः, विभुः, लोकगुरुर्हरिः, गृहमेधीयान्, अनुतिष्ठन्, ताभिः, सह, रेमे ॥ ५९ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायामुत्तरार्द्धे षष्टितमोऽध्यायाः अन्वयाः समाप्ताः ॥ ६० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च दूत इति आत्मलभने मत्प्राप्त्यर्थम् । मयि चिरायति श्वोभाविनि विवाहे आगंतव्यमिति कृते समये कथंचिदप्राप्तवति सत्येतद्विश्वं शून्यं मत्वेदमनन्ययोग्यमंगं जिहासे त्युक्तुमिच्छामि त्यक्ष्यामीत्येवं दूतः प्रस्थापितः तथाह्युक्तं त्वया "यर्ह्यंबुजाक्ष न लभेय भवत्प्रसादं जह्यामसून् व्रतकृशाञ्छतजन्मभिः स्यात्" इति। यद्वा अजिहास इतिच्छेदः। त्यक्तुमैच्छ इत्यर्थः। तत्तव कर्म त्वय्येव तिष्ठेत् । न तत्प्रतिकर्तुं शक्यमित्यर्थः। किंतु केवलं त्वां प्रति नन्दयामो हर्षयाम इति ॥ ५७ ॥ सौरतसंलापैः सुरतनर्मगोष्ठीभिः ॥ ५८–५९ ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे श्रीध० टीकायां षष्टितमोऽध्यायः ॥ ६० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदाह–अपि चेति । सुविविक्तमन्त्रः सुष्ठु प्रकाशितरहोवचनः। जिहास इति तङार्षः। आर्षत्वाश्रयणस्यागतिकगतिकत्वादाह–यद्वेति । इत्यर्थ इति–सन्नंताज्जहातेर्लङो मध्यमपुरुषैकवचनमिति ध्येयम् । तत् मां विनाऽन्यत्यागरूपम् । इत्यर्थ इति–अपरिचितेऽतीवानुरागोऽप्रतिकार्यो भवतीति भावः। पुनः पूर्वानुरागवैशिष्ट्यं स्मृत्वाह–दूत इति। अस्यायमेवार्थः–प्रस्थापितो मत्पार्श्वं प्रेषितः। कीदृशः सुष्ठु विविक्तो निर्णिक्तो मन्त्रो गुप्ता युक्तिर्यत्र सः। ततश्च मयि चिरायति तदातिथ्यत्वत्संदेशश्रवणावेशवर्त्मदैर्घ्यादिभिः किंचिद्विलंबे सति एतत् पितृभ्रात्रादिबन्धुयुक्तमपि विश्वं शून्यं मत्वा कुत्राप्यालंबनं न लब्ध्वेदं सर्वोत्कृष्टमप्यंगं शरीरमजिहासस्त्यक्तुमैच्छः 'दुर्भगाया न मेधाता' इत्यादिचिंतया भवत्याऽऽशाबन्धच्छेदावगमात् 'यर्ह्यंबुजाक्ष न लभेय भवत्प्रसादम्' इत्यादिपूर्वोक्तस्वारस्याच्च । अजिहास इत्यत्र हेतुः अनन्ययोग्यमन्यस्मै समर्पणाऽयोग्यमित्यर्थः। प्रतिनन्दयामः हर्षयन्तीं त्वां हर्षयामः ॥ ५७ ॥ रुक्मिण्या गुणान्वक्तुमशक्यान्मत्वाह शुकः–एवमिति। स्वरत आत्मारामोपि । रमया साक्षाल्लक्ष्म्या । विडंबयन्ननुकुर्वन् । रुक्मिणीमाधवौ वन्दे ययोः कलहसन्निभा । वाग्वैदग्धी मिथस्तोत्रतात्पर्याश्चर्यता मता । एवमिति अन्येपि तादृशा बहवो विलासाः सूचिताः। स्वरतो रमणस्वरूपशक्तित्वेन स्वरमणयोग्यया रुक्मिण्या सह रेमे। तस्मिन्नमणेऽपि विशेषः—नरेति। क्रीडालोभेनैश्वर्यांशं गुणीकृत्य तादृशलीलया नरलोकमनुकुर्वन्नपि परममाधुर्येण तमपि हीनोपमानं कुर्वन्नित्यर्थः। यतो भगवानपि देवकीसुतस्तथाविर्भावेणैव प्रारब्धलील इत्यर्थः ॥ ५८ ॥ इदमन्यत्रातिदिशति–तथेति । यथा रुक्मिण्या रेमे तथेत्यर्थः। अथातो हेतोर्विभुरपि स्वयमेवैकः सर्वाणि गृहाणि व्याप्नुवन्नित्यर्थः। एतच्चाग्रे व्यक्तं भावि । गृहवानिवेति–यथाऽन्यो गृही तथेत्यर्थः। गृहमेधीयान् गृहस्थसम्बन्धिनस्तादृशप्रियाप्रेममयान्वैदिकांश्च धर्मानास्थित आचरदित्यर्थः। यतो लोकगुरुस्तस्मादेव ते धर्माः प्रवर्तंत इत्यर्थः। यतो हरिस्तेन शीलेन सर्वेषां मनोहर इत्यर्थः। यद्वा–आश्रितः सन्रेमे इति पूर्वक्रिययैवान्वयः। अतो गृहधर्मानुष्ठानेऽपि क्रीडार्थमेवेति ॥ ५९ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे षष्टितमोऽध्यायः ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुनः पूर्वानुरागवैशिष्ट्यं स्मृत्वाऽऽह—दूत इति। अस्यायमेवार्थः आत्मलभने मत्प्राप्त्यर्थं त्वया दूतः प्रस्थापितः स च सुविविक्तमन्त्रः सुष्ठु निर्निक्ता गुप्तयुक्तिर्यत्र सः ततश्च मयि चिरायति तदातिथ्यत्वत्सन्देशश्रवणावेशवर्त्मदैर्घ्यादिभिः किञ्चिद्विलम्बमाने सति एतत् पितृमात्रादिबन्धुयुक्तमपि विश्वं शून्यं मत्वा कुत्राप्यवलम्बनं न लब्ध्वेदं सर्वोत्कृष्टमप्यङ्गम् अजिहासः त्यक्तुमैच्छः। "दुर्भगाया न मे धाता" इत्यादि चिन्तया भवत्या आशाबन्धच्छेदावगमात् "यर्ह्यम्बुजाक्ष न लभेय भवत्प्रसादम्" इत्यादि पूर्वोक्तस्वारस्याच्च अजिहास इत्यत्र हेतुरनन्ययोग्यम्। अन्यस्मै समर्पणायोग्यमित्यर्थः। प्रतिनन्दयामः केवलमनुमोदामहे ॥ ५७ ॥

रुक्मिणीमाधवौ वन्दे ययोः कलहसन्निभा । वाग्वैदग्धी मिथस्तोत्रतात्पर्य्याश्चर्य्यता मता ॥

एवमित्यन्येऽपि तादशा बहवो विलासाः सूचिताः स्वरतो रमया स्वरूपशक्तित्वेन स्वरमणयोग्यया रुक्मिण्या सह रेमे तस्मिन् रमणेऽपि विशेषः न वेति क्रीडालोभेनैश्वर्य्यांशं गुणीकृत्य तादृशलीलया नरलोकमनुकुर्व्वन्नपि परममाधुर्य्येण तमपि

हीनोपमानं कुर्वन्नित्यर्थः। यतो भगवानपि देवकीसुतस्तथाविर्भाविनैव प्रारब्धलील इत्यर्थः॥ ५८॥ अथ अतो हेतोर्विभुरपि स्वयमेवैकः सर्व्वाणि गृहाणि व्याप्नुवन्नित्यर्थः एतच्चाग्रे व्यक्तं भावि गृहवानिवेति यथाऽन्यो गृही तथैवेत्यर्थः। गृहमेधीयान् गृहस्थसम्बन्धिनस्तादृशप्रियाप्रेममयान् वैदिकांश्च धर्म्मानास्थितः आचरदित्यर्थः। यतो लोकगुरुस्तस्मादेव ते धर्म्माः प्रवर्त्तन्त इत्यर्थः। यद्वा यतो हरिस्तेन शीलेन सर्वषां मनोहर इत्यर्थः। आश्रितस्सन् रेमे इति पूर्व्वक्रियैवान्वयः इति पूर्वधर्म्मानुष्ठानमपि क्रीडार्थमेवेति॥ ५९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां षष्टितमोऽध्यायः॥ ६०॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुविविक्तो महारहस्यः परमविचित्रो वा मन्त्रो गुप्तवाक्यं यस्मिन् सः, इत्यस्य ज्ञाततया परमनिभृतत्वेन प्रेमविशेषः सूचितः। एतत् पितृमात्रादिबन्धुवर्गयुक्तमपि विश्वं जिहास। इत्यत्र हेतुः—अनन्ययोग्यमिति। अन्यस्मै समर्पणायोग्यत्वादित्यर्थः। प्रतिनन्दयामस्त्वया क्रियमाणस्य महानन्दस्य प्रतिच्छायारूपेण कथञ्चिन्नन्दयामः, नन्दयितुं यताम इति।

तौ विदग्धवरौ वन्दे ययोः प्रेमोक्तयो मिथः। स्वसंवेद्याः परैर्वोध्या न स्युर्भक्तिं विना ययोः॥

इत्यन्येऽपि तादृशा बहवः सूचिताः॥ ५७॥ स्वरतोऽपि रमया श्रीरुक्मिण्या सह रेमे, यतो भगवान् साक्षादीश्वरो देववयाः सुतः क्रीडार्थं तस्यां जात इत्यर्थः। अतएव नरलोकं विडम्बयन् मनुष्यक्रीडामनुकुर्व्वन्, किंवा उतयोरैक्यात् स्थिरीकुर्व्वन्नित्यर्थः; यद्वा, निजसुखविलासोद्रेकेण तादृशसुखादिरहितं नरलोकं तुच्छीकुर्व्वन्; यद्वा, नरलोकं विडम्बयन्निति लोकदृष्ट्या रतेर्लौकिकत्वम्, भगवानिति त्वैश्वर्य्यमित्येवमेकत्रैव लौकिकत्वैश्वर्य्ययायोगेन पूर्व्ववदतिमाधुरी सूचिता। तत्रैव हेतुर्देवकीसुत इति॥ ५८॥ अथ मांगल्ये; यद्वा, सर्व्वप्रेष्ठतमया श्रीरुक्मिण्या सह रतेरनन्तरम्। विभुरिति स्वयमेवैकः सर्व्वाणि गृहाणि व्याप्नुवन्नित्यर्थः। एतच्चाग्रे श्रीनारददृष्टैश्वर्य्याध्याये व्यक्तं भावि। गृहवानिवेति—यथान्यो गृही तथैवेत्यर्थः। गृहमेधीयान् गृहस्थसम्बन्धिनो धर्म्मानास्थित आचरदित्यर्थः। किमर्थम्? लोकगुरुर्लोकशिक्षार्थमित्यर्थः। यतो हरिः सर्व्वलोकदुःखहर्त्तेति; यद्वा, अन्यगृहस्थाशक्यानन्ताद्भुतधर्म्माचरणेन सर्व्वेषां मनो हरन्निति भावः। इति तेषामसाधारण्यमुक्तम्; यद्वा, आस्थितः सन् रेम इति पूर्व्वक्रिययैवान्वयः। इति गृहधर्म्मानुष्ठानमपि क्रीडार्थमेवेत्यर्थः। एवं पितृत्वेन गृहावानिवेत्यनेन च पूर्व्ववदतिमाधुरी ज्ञेया।

श्रीधरस्वामिचरणैर्निपीतममृतं मुदा। तेषां प्रसादमुच्छिष्टं किञ्चित् सञ्चिनुमो वयम्॥ ५९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशम-टिप्पण्यां षष्टितमोऽध्यायः॥ ६०॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये षष्टितमोऽध्यायः॥ ६०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

किञ्च, दूत इति! आत्मलभने मत्प्राप्त्यर्थं सुविभक्तः यर्ह्यम्बुजाक्ष न लभेय तव प्रसादं जह्यामसून् व्रतकृशान् शतजन्मभिः स्याम्" इत्येवं विविच्य ज्ञापितः मन्त्रो यस्य सः दूतः प्रेषितः तदाऽपि चिरायति ईषद्विलम्बं कुर्वति सति एतद्विश्वं शून्यं मत्वा इदमनन्यार्हमङ्गं शरीरं जिहासे हातुमिच्छाभीत्येवं भवती तिष्ठेत स्थितवतीति यत्त्वया केवलं प्रतिनन्दयामः प्रतिकर्त्तुमशक्नुवन्तः केवलं हर्षयाम इत्यर्थः। यद्वा जिहासे इत्येवं विभक्तमन्त्रो दूतः प्रस्थापित इति सम्बन्धः॥ ५७॥ एवमिति। नरलोकं विडम्बयन्ननुकुर्वन् हेतुगर्भमिदं तत्त्वादित्थं सौरतसल्लापैः सुरतनर्म्मगोष्ठीभिः स्वरतः आत्मारामोपि रमया लक्ष्म्यवतारभूतया रुक्मिण्या सह रेमे॥ ५८॥ तथेति। अन्यासामपि पत्नीनां गृहेषु गृहाश्रमीव गृहस्थाश्रमयुक्तान् धर्म्मानास्थित सन्नेव रमे॥ ५९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां षष्टितमोऽध्यायः॥ ६०॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

आत्मलभने स्वलाभार्थं सुष्ठु विविक्तमन्त्रः स्पष्टीकृतरहोवचनः चिरायति विलम्बनं कुर्वति सति एतज्जगच्छून्यम् असदमङ्गलम्मत्वाऽनन्ययोग्यम् अन्यपुरुषसंयोगायोग्यमिदम् अङ्गं जिहासुस्तिष्ठेरिति यावत्॥ ५७॥ देव्या गुणा ब्रह्मायुषापि वक्तुं न शक्या इति सङ्क्षिपतीत्याह—श्रीशुक इति। सौरतसंलापैः सुरतसम्बन्धिमिथोभाषणैः नरलोकं मनुष्यजनं विडम्बयन्

अनुकुर्वन् ॥ ५८ ॥ इदमन्यत्रातिदिशति—तथेति । गृहवान् गृहस्थ इव आस्थितः उद्गतश्च प्रकाशितः "आङ उद्गमने ॥१–४०॥ इति सूत्रम् ॥ ५९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां षष्टितमोऽध्यायः ॥ ६० ॥
(श्रीविजयध्वजतीर्थरीत्या पञ्चसप्ततितमः) ॥ ६० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवमित्यादि । सुरतं प्रेम, तदर्हः संलापस्तेन नरलोकमनुकुर्वन् रमया रुक्मिणीरूपया लक्ष्म्या रेमे । कीदृशः ? स्वरतः स्वे निजैश्वर्ये रतः ॥ ५९ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे षष्ठितमोऽध्यायः ॥ ६० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

एवमित्यादि । सुरतं प्रेम तदर्हः संलापः सौरतसंलापः तैर्नरलोकं विडम्बयन् नरादिलोकं तिरस्कुर्वन्नलौकिको भूत्वेत्यर्थः । अथवा नरलोकमनुकुर्वन् सुरतोऽपि मनुष्यलीलामनुकुर्वन् ॥ ५९ ॥

इति षष्टितमोऽध्यायः ॥ ६० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आत्मनो मम लभने लभनाय प्रापणार्थं ततश्च मयि चिरायति विलम्बमाने सति एतद्विश्वं शून्यं मत्वा इदमङ्गम् अनन्ययोग्यम् अजिहासः त्वं त्यक्तुमैच्छः तत्तव कर्म त्वय्येव तिष्ठेत न तत्प्रतिकर्तुं शक्यमित्यर्थः । किन्तु वयं प्रतिनन्दयामः हर्षयन्ती त्वां प्रति हर्षयामः ॥ ५७ ॥ सौरतसँल्लापैः सुरतसँल्लापैः सुरतसम्बन्धिर्नर्मसम्वादैः स्वरत आत्मारामः अत एव रमया आत्मभूतया रेमे विडम्बयन् स्वयं नरलीलोपि स्वसुखदर्शनयातिरस्कुर्वन् तं हीनोपमानं कुर्वन्नित्यर्थः ॥ ५८–५९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमेऽस्मिन् षष्टितमः सङ्गतस्सङ्गतस्सताम् ॥ ६० ॥

गूढार्थदीपिनी

आत्मलभने मत्प्राप्त्यर्थम् । सुष्ठु विविक्तो विज्ञापितो मन्त्रो गुप्तवृत्तं यस्य सः । मयि चिरायति विलम्बमाने सति एतद्विश्वं शून्यं मत्वा इदमङ्गं जिहासे त्यक्तुमिच्छामि त्यक्ष्यामीत्यर्थः । यद्वा । अजिहासः त्यक्तुमैच्छः । सन्नन्ताज्जहातेर्लङि मध्यमपुरुषैक वचनम् । तत् तव कर्म त्वम्येव तिष्ठेत न तत्प्रतिकर्तुमुपकर्तुं शक्यम् । वयं तु केवलं साधु साधु कृत्वा त्वामभिनन्दयामः । अनन्ययोग्यम् अन्यस्मै समर्पणायोग्यम् ॥ ५७ ॥ सौरतसंलापैः सुरतसम्बन्धिनर्मोक्तिभिः । स्वरत आत्मारामोऽपि । विडम्बयन् अनुकुर्वन् रमया रेमे ॥ ५८ ॥ गृहमेधीयान् गृहस्थसम्बन्धिनो धर्मानाश्रितः सन् रेमे इति पूर्वेणैवान्वयः ॥ ५९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां षष्टितमोऽध्यायः ॥ ६० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

आत्मलभने मत्प्राप्त्यर्थं ततश्च मयि चिरायति विलम्बमाने इदं विश्वं शून्यं मत्वा इदमङ्गमनन्ययोग्यं स्वासाधारणम् अजिहासे त्यक्तुमैच्छ इत्यर्थः । तत् तव चेष्टितं त्वय्येव तिष्ठेत न तत्प्रतिकर्तुं शक्यमित्यर्थः । किन्तु केवलं त्वां प्रतिनन्दयामः हर्षयामः ॥ ५७ ॥ जगदीश्वरः जगद्यात्रानिर्वाहकः नरलोकं विडम्बयन् अनुकुर्वन् एवम्भूतैः सौरतसंलापैः सुरतकर्मगोष्ठीभिः स्वरतः स्वसम्पन्नोपि रमया स्वयं लक्ष्म्या सह रेमे ॥ ५८ ॥ अन्यासामपि सत्यभामादीनां गृहेषु तथा रेमे ॥ ५९ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षष्टितमोऽध्यायार्थप्रकाशः ॥ ६० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आत्मलाभेन स्वलाभार्थं स्वामित्वेन मम लाभार्थं वा सुविविक्तमन्त्रोऽतिगुप्तभाषणहर्ता यो दूतस्तत्त्वेन कृतो द्विजः प्रस्थापितस्तेन सहागति मयि च किञ्चिच्चिरायति विलम्बमलम्बमान इव जाते । अनेन प्रस्थापितो द्विज इति पूर्वोक्तेः पौनरुक्त्यमिति शङ्का परास्ता । एतज्जगच्छून्यं तत्प्रायं मत्वा । अनन्ययोग्यमितरायोग्यमनन्यः प्रधानोऽहं तन्मात्रयोग्यमिति वा । अङ्गं जहसे त्यक्तुमिच्छामिति यत्तत् । यर्ह्यम्बुजाक्ष न लभेयं भवत्प्रसादं जह्याम्यसून्व्रतकृशा बहुजन्मभिः स्यामिति त्वत्कृतकामनाद्ब्रह्मणदत्तादेव ज्ञायते । त्वय्येव तिष्ठेत् तत्प्रतिकरणे न वयं शक्ताः किन्तु कं तु मातुरेतत्कृत्यमस्माकमित्याह । वयं प्रतिनन्दयाम इति । केवलं तुष्याम इत्यर्थः । जिहासुस्तिष्ठेस्तत इति पाठे इदमङ्गं जिहासुस्तिष्ठेरिति यावदिति पूर्वटीकोक्तोऽ

र्थोऽवधेयः। प्रतिनन्दयाम इत्यनेन पठनादिभिरिदमङ्गं। एतज्ज्ञानं यत्र तिष्ठेत्तानधिकारवतोऽपि नन्दयाम इति ध्वनयति। महाकथायास्तत्फलालापं विना समापनायोगात् ॥ ५९ ॥ कियत्पर्यंतं विडम्बनं गुणाश्चैकत्रेतरा मता मयि च त्वदादिसर्वा मताः साकल्येनेति हरिरुपसंहरतीतीरयति। एवमिति। सुतसम्बन्धिनः सँल्लापैस्तैर्नरलोकं विडम्बयन्रमया स्वरतोऽपि रेमे। अनेनानुकम्पैव रमणकारणं नान्यदिति ध्वनयति ॥ ६० ॥ तथा रुक्मिणीवदन्यासां स्त्रीणां गृहेष्वपि गृहमेधियान्धर्मान्गृहवानिव लोकगुरुर्जुषन्सेवमान आस्थितोऽतिष्ठत् ॥ ६१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे पञ्चसप्ततितमोऽध्यायः ॥ १०-७५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अन्यदेकं तव चरित्रं अनन्यदपि अनुपमेयमपि जयाद्यङ्गीकारेऽप्यप्रतीकार्यमपीत्याह **दूत** इति। **आत्मलभने** कृष्णप्राप्त्यर्थम्। सुष्ठु विविक्तो मन्त्रो यस्य तादृशो द्विजः प्रस्थापितः। अनेन मयि सिद्धवद्विश्वासः प्रथमत एव कृत इति निरूपितम्। ततो मयि **चिरायति** विलम्बमाने एतज्जगच्छून्यमेव मत्वा, इदमङ्गं शरीरमनन्ययोग्यं केवलं भगवदेकभोग्यं जिहास इति मत्वा द्विजः प्रस्थापित इति पूर्वेणैव सम्बन्धः। प्रस्थापनसमय एवैते पक्षा विचारिताः। इति एतत्त्वय्येव तिष्ठेत। विध्यर्थोऽयम्। नास्य प्रतीकारः सम्भवतीति। अप्रयोजकत्वेन तथात्वमाशङ्क्य निराकरोति **त्वय्येव तिष्ठेत, वयं तु प्रतिनन्दयाम** इति। अस्मिन्नर्थे वयं ऋणिन इति भावः ॥ ५७ ॥ एवं सान्त्वनं कृतमुपसंहरन् अन्यास्वप्येवंभावमतिदिशत्**येव**मिति द्वाभ्याम्। सौरताः सुरतयोग्याः संलापाः, येन सुरतं वर्धते। **भगवा**निति लीलायां योग्यता। **देवकीसुत** इति स्त्रीणां प्रियार्थे भक्तहितैकसाधकत्वात् तथा करोतीति सूचितम्। **स्वरतोऽपि रमया** लक्ष्म्या रुक्मिण्या सह रेमे। न तु वाक्यैरेव निवृत्तव्यापारः। परब्रह्मणस्तदयुक्तमाशङ्क्य लीलानुकरणमाह **नरलोकं विडम्बय**न्निति। अन्यथा नरोऽयमिति लोकानां प्रतीतिर्न स्यात्। अतिदिशति **अथान्यासामपी**ति। अयमेव न तास्वपि प्रकारः, किन्त्वतिरिक्तस्तत्तद्योग्यः। तदाह **अथशब्दः**। **अन्यासामपि** रुक्मिणीव्यतिरिक्तानां गृहेषु **गृहवानिव** प्राकृत इव तदनुकरणं कुर्वन् **गृहमेधीयान्** धर्मानास्थितः, लौकिकान् वैदिकांश्च। विडम्बनार्थं लौकिकाश्रयणम्, तत्पूर्वमुक्तम्। वैदिकाश्रयणे विशेषमाह **लोकगुरु**रिति। तथागत्य सर्वकरणे बहुकालस्थितौ च हेतुः **हरि**रिति ॥ ५९ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे एकादशोऽध्यायः ॥ ११ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

एवं सौरतेत्यत्र। **लीलायां योग्यते**ति। षड्गुणैर्लीलाकरणादितिभावः। **न तु वाक्यैरेवे**ति। वीजनलीलायामेतावज्जातम्। ततो गन्धमाल्यकेशप्रसारशयनस्नपनोपहारान् स्वीकृतवानित्यर्थः।

इत्येकादशाध्यायव्याख्या समाप्ता।

श्रीसुबोधिनी-सारः

किं च त्वद्गुणास्त्वय्येवेति प्रशंसति। आत्मनो मम लभने प्राप्त्यर्थे सुविविक्ते रहस्यगुपितो मन्त्रो यस्य स दूतस्त्वया प्रस्थापितः मयि चिरायति विलम्बे कृते सति एतद्विश्वं शून्यं मत्वा इदमंगं शरीरम् अनन्ययोग्यं मद्भोग्यं त्वं जिहासे त्यक्तुमैच्छः तत्तथा करणं त्वय्येव स्यात् इति वयं हर्षयामः त्वां श्लाघयामो वा ॥ ५७ ॥ शुकोक्तिः। सुरतनर्मभाषणैर्नरलोकं विडंबयन् स्वस्मिन्नत आत्मरतिर्जगदीश्वरो भगवान् रमया लक्ष्म्यंशरूपया रुक्मिण्या सह रेमे ॥ ५८ ॥ गृहवान् गृहस्थ इव गृहमेधीयान् धर्मानास्थितो लोकानां गुरुर्हरिर्विभुः अन्यासामपि स्त्रीणां गृहेषु तथा तद्वद्रेमे ॥ ५९ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायां षष्टितमोऽध्यायः ॥ ६० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किंच आत्मलभने मत्प्राप्त्यर्थं सुविविक्तः "यर्ह्यम्बुजाक्ष न लभेय भगवत्प्रसादं जह्यामसून् व्रतकृशान् शतजन्मभिः स्यात्" इत्येवं विविच्य ज्ञापितो मन्त्रो यस्य स दूतस्त्वत्प्रेषितस्तदा मयि चिरायति ईषद्विलम्बं कुर्वति सति एतद्विश्वं शून्यं मत्वा इदं मदङ्गमनन्ययोग्यं अन्ययोग्यं न भवतीति जिहासे त्यक्तुमिच्छामीत्येवं निश्चितवती तत् त्वत्कर्म त्वय्येव तिष्ठेत्, वयं तु केवलं प्रतिनन्दयामः प्रतिकर्तुमशक्नुवन्तः केवलं स्तुत्या वां हर्षयाम इत्यर्थः ॥ ५७ ॥ रुक्मिणीरमणपरिहासाद्युपसंहरति-एवमिति। सौरतसंल्लापैः सुरतसंल्लापैः सुरतयोग्यैः परिहासैर्भगवान् कृष्णो रमया लक्ष्म्यवतारभूतया रुक्मिण्या सह रेमे इत्यन्वयः। नन्वेवं 'रममाणस्य वैराग्याभावात् कथं भगवत्त्वम्' इत्याशङ्क्याह—स्वरत इति। आत्मारामत्वं तु तस्य न भग्नमित्यर्थः। ननु 'रमया सह रममाणस्य कथमात्मारामत्वम्' इत्याशङ्क्य 'अचिन्त्यशक्तित्वात्' इति हेतुं सूचयन्नाह-

जगदीश्वर इति । 'किमर्थमेवं रेमे' तत्राह–नरलोकं विडम्बयन् अनुकुर्वन् इति ॥ ५८ ॥ यथा रुक्मिणी गृहे तथाऽन्यासामपि स्वभार्याणां गृहेषु आस्थितो हरिर्गृहमेधीयान् गृहस्थैरनुष्ठेयान् धर्माननुतिष्ठंस्ताभिः सह रेमे । एकस्य कथं बहुषु गृहेष्ववस्थानं तत्राह—विभुरिति । तावद्रूपधर इत्यर्थः । 'कर्मभिर्निर्लेपस्य किं धर्माचरणेन' तत्राह—लोकगुरुरिति । लोकान् शिक्षयितुमित्यर्थः ॥ ५९ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने । षष्टितमो गतो रुक्मिणी परिहासबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

दूत इति ॥ आत्मनो लभने मत्प्राप्त्यर्थं सुविवित्तः विविच्य ज्ञापितो मन्त्रो यस्य स दूतस्त्वया प्रस्थापितः प्रेषितस्तदा मयि चिरायति ईषद्विलम्बं कुर्वति सति । आर्षः प्रयोगः । एतद्विश्वं पित्रादियुतमपि शून्यं मत्वा इदमङ्गमनन्ययोग्यमन्ययोग्यं न भवतीति हेतोर्जिहासे त्यक्तुमिच्छामि । त्यक्ष्यामीत्येवं निश्चितवती । तङार्षः । यद्वा । अजिहासः त्यक्तुमैच्छः जह्यामसूनिति पूर्वोक्तेः । तत् त्वत्कर्म त्वय्येव तिष्ठेत । तङार्षः । वयं तु केवलं प्रतिनन्दयामः प्रतिकर्तुमशक्नुवन्तः केवलं साधु साधु इति स्तुत्या त्वां हर्षयामः ॥ ५७ ॥ एवमिति ॥ स्वरतः आत्मारामो भगवान् जगदीश्वरः नरलोकं विडम्बयन्ननुकुर्वन् एवं सौरतसंलापैः सुरतनर्मगोष्ठीभिः रमया लक्ष्म्यावतारभूतया रुक्मिण्या सह रेमे ॥ ५८ ॥ तथेति ॥ यथा रुक्मिणीगृहे तथाऽन्यासामपि स्वभार्याणां गृहेषु आस्थितः विभुः तावद्रूपधरः लोकगुरुर्हरिर्गृहमेधीयान् गृहस्थैरनुष्ठेयान्धर्माननुतिष्ठंस्ताभिः सह रेमे ॥ ५९ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमे व्यधात्षष्टितमे सुखम् ॥

इति श्रीमद्भागवते दशमेऽन्वितार्थप्रकाशिकायां षष्टितमोऽध्यायः ॥ ६० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दूत इति । त्वां विना अनन्ययोग्यं अन्यस्य योग्यं नास्तीतीदमंगमहं जिहासे त्यक्ष्यामीति मत्वा समयं कृत्वा आत्मलभने । मत्प्राप्त्यर्थमित्यर्थः । त्वया सुविवित्तः अतिगुप्तो मंत्रः संदेशो यस्मिन्सः दूतो द्विजः प्रस्थापितो द्वारिकायां प्रेषित। श्वो भाविनिविवाहे मयि चिरायति किंचिद्विलंबयति सति । एतद्विश्वं शून्यं तवाभूत् । तत्तव कर्म त्वय्येव तिष्ठेत् । अस्माभिर्न तत् प्रतिकर्त्तुं शक्यमित्यर्थः । अतो वयं प्रतिनंदयामः साधु साध्वित्यनुमोदयामहे । यद्वा त्वया मत्प्राप्त्यर्थं दूतः प्रस्थापितः मयि चिरायति सति एतद्विश्वं शून्यं मत्वा इदमनन्ययोग्यमंगं अजिहासः इति पदच्छेदः त्वं त्यक्तुमैछः शेषं पूर्ववत् ॥ ५७ ॥ सौरतसंलापैः सुरतः आलापैः क्रीडावचनैः स्वरतः आत्मरतः ॥५८॥ अन्यासां स्वस्त्रीणां । धर्मान् प्रति आस्थितः ॥ ५९ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने रुक्मिणीसंवादो नाम षष्टितमोऽध्यायः ॥ ६० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च ॥ दूत इति ॥ त्वया, आत्मलभने मत्प्राप्त्यर्थं, सुविवित्तः 'यर्ह्यम्बुजाक्ष न लभेय तव प्रसादं जह्यामसून् व्रतकृशान् शतजन्मभिः स्याम्' इत्येवं विविच्य ज्ञापितो मन्त्रो यस्य सः, दूतः, प्रस्थापितः प्रेषितः । ततः मयि, चिरायति ईषद्विलम्बं कुर्वति सति, एतद्विश्वं शून्यं, मत्वा, इदं अनन्ययोग्यमन्यानर्हं, अङ्गं, अजिहासः त्यक्तुमुद्युक्ता अभूः । यद्वा जिहासेऽहमिति । तदेतत्, त्वयि, तिष्ठेत घटेत, वयं त्वां, प्रतिनन्दयामः प्रतिकर्त्तुमशक्नुवन्तः सन्तः केवलं प्रशंस्य, हर्षयुक्तां कुर्म इत्यर्थः । यद्वा । अजिहास इत्येवं सुविवित्तमन्त्रो दूतः प्रस्थापित इति संबन्धः ॥ ५७ ॥ एवमिति । नरलोकं, विडम्बयन्ननुकुर्वन्, हेतुगर्भमिदम् । तत्त्वात् एवमित्थं, सौरतसंलापैः सुरतकर्मगोष्ठीभिः, जगदीश्वरः भगवान्, स्वरत आत्मारामोऽपि, रमया लक्ष्म्यवतारभूतया रुक्मिण्या सह, रेमे ॥५८॥ तथेति ॥ तथा अन्यासामपि पत्नीनां गृहेषु, गृहवान् इव गृहाश्रमी यथा तथेत्यर्थः । गृहमेधीयान् गृहस्थाश्रमप्रयुक्तान् धर्मान्, आस्थित आश्रितः । लोकगुरुः हरिः श्रीकृष्णः, विभुः सन्, रेमे ॥ ५९ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे षष्टितमोऽध्यायः ॥ ६० ॥

कृष्णप्रिया

प्रिये ! मुझे प्राप्त करने के लिये आपने गुप्त संदेश के साथ विप्रवर्य वसुदेवजी को भेजे थे लेकिन मेरे आने में कुछ बिलम्ब हो गया तब यह सारा विश्व आपको शून्य सा दीख पड़ा तब आपने अपना सर्वाङ्ग सुन्दर श्री अङ्ग के लिये और किसी को सुपात्र न मानकर देहत्याग का निश्चय कर लिया था। देवि ! आपका यह अनन्य स्नेह आपके ही अंदर रहे। हम इसका बदला कैसे चुकावें निरंतर आपके इस सर्वोत्कृष्ट स्नेह का अभिनन्दन करते रहें ॥ ५७ ॥ श्री शुकदेवजी ने कहा— राजन् ! भगवान् श्रीकृष्ण तो निजानन्द पूर्ण है फिर भी जब आप मानव लीला का नाटक करते हैं तब इस दाम्पत्य स्नेह को समृद्ध करने के लिये विनोदपूर्ण मधुर वार्तालाप भी करते हैं और अपनी प्रियतमा भगवती श्रीदेबीजी के साथ विहार भी करते हैं ॥ ५८ ॥ भगवान श्रीकृष्ण लोक शिक्षण दे रहे हैं। वे स्वयं "विभु" सर्वव्यापक हैं। नाथ सत्यभामा आदि अन्य अर्धाङ्गनाओं के राजभवनों में भी गृहस्थाश्रम धर्म का पालन करते और आदर्श दाम्पत्य जीवन एवं आनन्द से धर्म का सतत् पालन करते थे ॥ ५९ ॥

इति श्रीमद्भागवतस्य दशमस्कन्धस्योत्तरार्द्धे निरोधलीलायां रुक्मिणीपरिहासोक्तिप्रसङ्गो भाषायां षष्टितमोऽध्यायः ॥ ६० ॥

* * *

अथैकषष्टितमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	वस.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४०	३५	१	४	३	१४५४	१६	४७	१५१८	४७।	६

श्रीशुक उवाच

एकैकशस्ताः कृष्णस्य पुत्रान् दश दशाबलाः । अजीजनन्ननवमान्पितुः सर्वात्मसम्पदा ॥ १ ॥
गृहादनपगं वीक्ष्य राजपुत्र्योऽच्युतं स्थितम् । [1]प्रेष्ठं न्यमंसत[2] स्वं स्वं न तत्तत्त्वविदः स्त्रियः ॥ २ ॥
चार्व[3]ब्जकोशवदनायतबाहुनेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः ।
सम्मोहिता भगवतो न मनो विजेतुं स्वैर्विभ्रमैः समशकन् वनिता विभूम्नः ॥ ३ ॥
[4]स्मायावलोकलवदर्शन[5]भावहारिभ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः ।
पत्न्यस्तु षोडशसहस्रमनङ्गबाणैर्यस्येन्द्रियं विमथितुं [6]कुहकैर्न शेकुः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—राजन् ! कृष्णस्य, ताः, अबलाः, एकैकशः, दश, दश, सर्वात्मसम्पदा, पितुः अनवमान्, पुत्रान्, अजीजनन् ॥ १ ॥ राजन् ! राजपुत्र्यः, गृहान्, अनपगम्, स्थितम्, अच्युतम्, वीक्ष्य, स्त्रियः, न, तत्, तत्वविदः, स्वम्, स्वम्, प्रेष्ठम्, अमन्यत ॥ २ ॥ भगवतः, चार्वब्जकोशवदनायतबाहुनेत्र सप्रेमहासरसवीक्षितवल्गुजल्पैः, सम्मोहिताः, वनिताः, स्वविभ्रमैः, विभूम्नः मनः, विजेतुम्, न, समशकन् ॥ ३ ॥ षोडशसहस्रम्, पत्न्यः, तु, स्मायावलोकलवदर्शितभावहारि भ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः, अनङ्गबाणैः, करणैः, यस्य, इन्द्रियम्, विमथितुम्, न, शेकुः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एकषष्टितमे शौरेः पुत्रपौत्रादिसंततिः । अनिरुद्धविवाहे च रुक्मिणो रामतो वधः ॥ १ ॥
अष्टाधिकशतद्व्यष्टसहस्रस्त्रीसमुद्भवान् । कोटिशः पुत्रपौत्रादीन्हरिर्दारैरयोजयत् ॥ २ ॥

तदेतद्वक्तुमाह । एकैकश इति । कृष्णस्याबला भार्याः सर्वा या आत्मनि सम्पत्तया पितुः सकाशादनवमानन्यूनान् ॥ १ ॥ प्रेष्ठं न्यमंसत अच्युतस्य प्रियतमं प्रत्येकं स्वं स्वं मेनिरे । न तस्य तत्त्वमात्मारामत्वं विदंति ताः ॥ २ ॥ आत्मारामत्वं व्यनक्ति द्वयेन । चार्विति । चार्वब्जकोशवद्वदनं च आयतानि बाहुनेत्राणि च सप्रेम्णा हासरसेन वीक्षितानि च वल्गुजल्पाश्च भगवतः एतैः संमोहिता वनिताः स्वैःस्वैरनेकैर्विभ्रमैस्तस्य श्रीकृष्णस्य मनो विजेतुं हतुं न समशकन्न शक्ता बभूवुः । विभूम्नः परिपूर्णस्य ॥ ३ ॥ तासां विभ्रमान्वर्णयन्नेतद्विवृणोति । स्मायेति । स्मायो गूढहसितं तद्युक्तोऽवलोकलवः कटाक्षस्तेन दर्शितः सूचितो भावोऽभिप्रायस्तेन हारि मनोहरणशीलं यद्भ्रूमंडलं तेन प्रहिताः प्रस्थापिता ये सौरता मन्त्रास्तेषु शौण्डैः प्रगल्भैरनंगस्य बाणैः शरैरन्यैश्च करणैः कामशास्त्रप्रसिद्धैर्यस्येंद्रियं मनो विमथितुं क्षोभयितं षोडशसहस्रमपि पत्न्यो न शेकुरिति ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

चादन्येषामपि । रामतो बलदेवात् (१) । अष्टभिरधिकं शतमष्टाधिकशतम्, द्विरावृत्ता अष्टौ द्व्यष्टौ च तानि सहस्राणि द्व्यष्टसहस्राणि, तच्च तानि च स्त्रियोष्टाधिकशतद्व्यष्टसहस्रस्त्रियस्तासु समुद्भयान् (२) । तदेतल्लोकविडम्बनम् । ता रुक्मिण्याद्याः । सर्वात्मसम्पदाऽन्यूनदेहादिस्वभावसमृद्ध्या । अजीजनञ्जनयामासुः ॥ १ ॥ स्वं स्वं निजं निजमात्मानं देहमिति यावत् । गृहात्स्वस्वपुरात् । अनपगं प्रीतिपूर्वकमन्यभार्यापुराणि नापगच्छंतं किन्त्वनुरोधवशात्कदाचिदेवेति । तोषिणी तु—अनपगं नायिकांतरगृहगमनरहितमित्याह । तस्य तत्त्वं सर्वगृहावस्थानरूपं न विदन्तीति ताः ॥ २ ॥ नन्वेवं

---

[1] आत्मनोऽमंसत प्रेष्ठं-विज. । [2] त्वात्मानं न तु तत्व-प्रा. पा. । [3] चारु-विज. । [4] स्मेरा-वीर. । [5] दर्शित-श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [6] करणै-श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

तस्यातिकामुकत्वमेव प्रतीयते, न, किन्तु प्रेमैकवशत्वमेवेत्युदाहरति द्वाभ्याम्। वनिता जनितात्यर्थाऽनुरागास्ताः स्त्रियः स्वैः स्त्रीजातीयैः विभ्रमैर्विलासैर्भगवतो मनो विशेषेण तत्प्रेमाधिकसपत्नीतुल्यत्वेन जेतुं वशीकर्तुं नाशकन्, किंतु स्वप्रेमांशानुरोधेनेति भावः। अत एव-सप्रेमेति। वनिताशब्देन गृहादनपगामित्वं वशत्वं च लक्षितम्। यद्यपि विसंशब्दयोरेकतरेणाप्यभीष्टार्थलाभस्तथापि विशब्देन श्रीभगवति वशीभावचिह्नं, संशब्देन तास्वपि तत्कृतियोग्यताचिह्नं तादृशं न दृष्टमितिपृथगवसितं तादृशविभ्रमव्यजने हेतुश्चार्विति। चार्वब्जकोशवदनादिभिः सम्मोहिताः प्रेम्णा कामेन वा क्षोभिता इति। अत्र पूर्वं वदनं पश्यन्ति पश्चाल्लज्जादृष्ट्या बाहुँ ततस्तद्दर्शनेन गाढालिंगनस्पृहाजातधाष्टर्येन पुनर्मुखे दृश्यमाने मिथो नेत्रमेलनं ततः सप्रेमहासादीति। एतदुक्तं भवति-परस्परं तस्य ताभिः सह प्रेमवशतास्त्येव किन्तु कदाचित्तत्प्रेमाधिकसपत्नीवत्तन्मनो वशीकर्तुं काममयान्विलासान् दर्शयन्ति तदा तस्य तद्वत्तन्न स्यादित्यतो न कामुकत्वं किन्तु प्रेमविशेषवशत्वमेवेति। विभूम्नः सर्वापेक्ष्यपरिपूर्णस्य कामुकत्वं न संभवति भक्तवश्यत्वरूपमहागुणस्य तत्र सद्भावोस्त्येवेति 'अहं भक्तपराधीनः' इत्युक्तेः। अत एव गोपालतापिन्यामुक्तम् "विद्यामयो यस्स कथं विषयीभवति, यो हि कामेन कामान्कामयते स कामी भवति, यो हि वै त्वकामेन कामान्कामयते सोऽप्यकामी भवति" इति श्रुतेः। चारू रम्यो योऽजकोशोंबुजमध्यभागस्तत्तुल्यं वदनमास्यं तथा ॥ ३ ॥ तासां स्त्रीणाम्। सौरताः सुरतोद्बोधकाः। "शौंडो मत्ते प्रगल्भे च ख्याते शौंडी तु पिप्पली" इति धरणिः। कामशास्त्रप्रसिद्धैर्हावादिभिः। यस्य कृष्णस्य। न शेकुर्वशीकृतकामत्वेन दृढवीर्यत्वात्। बाणशब्देन भ्रूमण्डलस्य धनुष्ट्वं ध्वनितम्, मंडलशब्देन तस्याकृष्टत्वम्, ततश्च तादृशभ्रूमण्डलेन प्रहिता मुक्ताश्च सौरतमन्त्रशौंडाश्चेति विग्रह। अन्येऽपि बाणा मन्त्रेण शौंडा भवन्तीति। यस्येति यच्छब्दस्यांतिमनिर्देशात्तच्छब्दानपेक्षयैवान्वयः। तथा चालंकारिकाः-'यच्छब्दोप्युत्तरवाक्यार्थगतत्वेनोपपत्तेः पूर्ववाक्यगतस्य तच्छब्दस्योपादानं नापेक्षते इति। यथा-"साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके। उद्यताब्जयिनि राधिकामुखे तेन साहसमनुष्ठितं पुनः" इति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अनवमानन्यूनान् कृष्णस्याबलाः न विद्यते तं विना बलं गतिर्यासा तादृशभार्य्या इत्यर्थः ॥ १ ॥ एकस्य तावतीषु तावत्पुत्रजननासम्भावनां कैमुत्येन परिहरति तत्प्रसङ्गे ताभिः सममत्यासक्तिञ्च दर्शयति-गृहादिति। स्थितमिति प्रतिवारमेव यथासमयमेव बहिः प्रदेशादन्तःपुरमगच्छन्निव निजगृह एवागत्य वर्त्तमानमित्यर्थः। तथापि तस्मादनपगं नायिकान्तरगृहगमनरहितं वीक्ष्य विशेषेण दृष्ट्वा राजपुत्र्य इत्युपलक्षणं देवादिपुत्र्योपि आत्मानं प्रेष्ठममसत प्रत्येकमिति शेषः टीकायां स्वस्वमिति पुनरुक्तिस्तु प्रत्येकमात्मानमित्यस्यैव निर्गलितार्थकथनाय स्वमितिपाठे तु प्रत्येकमित्यस्य वैयर्थ्यं स्यात् अन्यत्तैः। यद्वा, न तस्य तत्त्वं सर्वगृहावस्थानरूपं विदन्तीति ताः तद्विलासभरमोहेनान्यानुसन्धानासक्तेरिति भावः ॥ २ ॥ नन्वेवं तस्यातिकामुकत्वमिव प्रतीयते न किन्तु प्रेमैकवशत्वमेवेत्युदाहरंस्तासां मोहञ्च दर्शयति-चार्विति द्वाभ्याम्। वनिताः जनितात्यर्थानुरागास्ताः स्त्रियः स्वैः स्त्रीजातीयैर्विभ्रमैर्विलासैर्भगवतोः मनो विजेतुं विशेषेण स्वस्वतत्प्रेमाधिकस्य पत्नीतुल्यत्वेन जेतुं वशीकर्त्तुं न सम्यगशकन् किन्तु यावांस्तत्प्रेमांशस्तावदेवेत्यर्थः। अत एव सप्रेमेति तस्यापि प्रेमनिगदेनैवोक्तम् वनिताशब्देन गृहानपगामित्वं लक्षितं वशत्वञ्च यद्यपि विसंशब्दयोरेकतरेणाप्यभीष्टार्थलाभः स्यात्तथापि विशब्देन श्रीभगवति वशीभावचिह्न संशब्देन तास्वपि तत्कृतियोग्यत्वचिह्नं तादृशं दृष्टमिति पृथगवमितं तथा तादृशविभ्रमब्यञ्जने हेतुः, चार्विति चार्वब्जकोशवदनादिभिः सम्मोहिताः सम्यक् प्रेम्णा कामेन च क्षोभिता इति अत्र पूर्वं वदनं पश्यन्ति पश्चाल्लज्जानम्रदृष्ट्या बाहुः ततस्तद्दर्शनेन गाढालिङ्गनस्पृहाजातधाष्टर्येन पुनर्मुखे दृश्यमाने मिथो नेत्रमिलनं ततः सप्रेमहासादीति पाठक्रमेण व्यक्तम् एतदुक्तं भवति परस्परं तस्य ताभिः प्रेमवशताऽस्त्येव किन्तु यदि कदाचित्तत्प्रेमाधिकसपत्नीवत्तन्मनो वशीकर्त्तुमनङ्गबाणैरिति वक्ष्यमाणात् काममयान् विलासविशेषान् दर्शयति तदा तस्य तद्वत्तन्न स्यादित्यतो न कामुकत्वं किन्तु प्रेमविशेषवत्त्वमेवेति, तच्च युक्तमित्याह-विभूम्नः स्वतः सर्वापेक्षणीयपरिपूर्णस्य ततः कामुकत्वं न सम्भवति महागुणस्य भक्तवशत्वस्य तु तत्र सद्भाव एवेति भावः। तदुक्तम् "अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज" इति। अतस्तमुद्दिश्य श्रीगोपालतापन्यामप्युक्तं "विद्यामयो हि यः स कथं विषयी भवति" इति। योहि कामेन कामान् कामयते स कामी भवति योहि वै त्वकामेन कामान् कामयते सोप्यकामी भवतीति ॥ ३ ॥ स्मायेत्यादिकं विभ्रमाणां विशेषणं प्रहितत्वं व्यञ्जितत्वं सौरतमन्त्रत्वं सुरतसम्बन्धिरहस्ययुक्तित्वम् अनङ्गबाणैस्तद्रूपैरित्यर्थः। यद्वा, तदेव विवृणोति—करणैः कामशास्त्रप्रसिद्धैरुपायैर्विशेषेण मथितुं न शेकुरिति पूर्ववत् तेषां रूपकम् अनङ्गबाणैरित्येषां विशेषणं भ्रूमण्डलेति बाणशब्देन च भ्रूमण्डलस्य धनुष्ट्वं ध्वनितं मण्डलशब्देन तस्याकृष्टत्वं ततश्च तादृशभ्रूमण्डलेन प्रहिता मुक्ताश्च ते सौरतमन्त्रशौण्डाश्चेति विग्रहः अन्येपि बाणा मन्त्रेण शौण्डा भवन्तीति यस्येति यच्छब्दस्यान्तिमनिर्द्देशात्तच्छब्दानपेक्षयैवान्वयः। तथा चालङ्कारिकाः यच्छब्दोप्युत्तरवाक्यार्थगतत्वेनोपपत्तेः पूर्ववाक्यगतस्य तच्छब्दस्योपादानं नापेक्षत इति; तथा—

"साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके। उद्यता जयिनि राधिकामुखे तेन साहसमनुष्ठितं पुनः" ॥ इति।

एवं श्रीवृजदेवीनां तत्र तत्र परमशुद्धोत्कृष्टं प्रेमप्रशंसनादाभ्यः सर्वाभ्योप्याधिक्यं सूचितम् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ताः सर्वा अबलास्तन्वंग्यः, कृष्णस्य सर्व्वशक्तिमतः, अतः सर्व्वात्मसम्पदा अनवमान् अन्यूनान् ॥ १ ॥ एवं श्रीभगवतस्तास्वासक्तिं तासां च तस्मिन् पञ्चभिर्वर्णयन्नादौ तद्धेतुमाह—गृहादिति। स्वगृहान्नापगच्छति न निःसरतीति तथाभूतम्, यतः स्थिरं स्थिरतया स्वगृहे सदा साक्षाद्वर्त्तमानमित्यर्थः। तत्र हेतुः—राजपुत्र्यः सर्व्वसद्गुणरूपादिमत्य इति भावः। देवादिपुत्रीसत्तायामपि राजपुत्र्य इति तासामेव प्राधान्यात्। एवं कस्मादपि गृहाच्च्युतिराहित्येनाच्युतम्, आत्मानं प्रत्येकं सर्व्वाः स्वं स्वं नितराममंसत। इत्थमात्मानमित्येव तैः प्रत्येकं स्वं स्वमिति व्याख्यातम्। अतः स्वं स्वमिति पाठश्चिन्त्यः। न तस्यानपगमस्य अच्युतस्य वा तत्त्वं मद्गृह एवान्यत्रापि तिष्ठतीत्येवलक्षणं वितन्यनुसन्दधतीति तथा ताः, यतः स्त्रियस्तत्प्रेमभरमोहिता इति भावः ॥ २ ॥ चार्वब्जकोशवदनादीनां यथोत्तरं संमोहने श्रैष्ठ्यम्, तत्र वदनादपि बाह्वोरायततया गाढ़ालिंगनाभिप्रायेण, भगवत इति लोकातीतसंमोहन-सामर्थ्यादिकं ध्वनितम्। अतः सम्यङ् मोहिता आकृष्टचित्ता अपि विभूम्नोऽपि मनोविशेषेण भक्तभ्योऽधिकतया जेतुं वशीकर्त्तुं न सम्यगशकन् किम्? काक्वा, अपि तु सम्यक्तया शेकुरेवेत्यर्थः। एवमग्रेऽपि। कुतः? स्वैरसाधारणैः प्रेमविशेषमयैरित्यर्थः। अतएव वनिताजनितपुरुषादर्थानुरागा योषितः परमस्वतन्त्रस्यापीश्वरस्य प्रियजनप्रेमपरवशत्वादिति भावः। तथा चोक्तं श्रीभगवतैव (भा० ९।४।६३)—'अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज' इत्यादि। एवमन्योन्यं भावविशेषेणान्योन्यं मोहनमुक्तम्। यद्वा, विजेतुं विशेषेण जेतुं वशीकर्त्तुम्, यथा व्रजदेव्यो विजिग्यिरे, तथा जेतुमित्यर्थः ॥ ३ ॥ स्मायेत्यादिकं विभ्रमाणां विशेषणम्, अनंगबाणानामेव विशेषणम्, ततश्च न तिष्ठत्यंगं येभ्यस्तथाभूतैर्मर्म्मभेदिभिर्वाणैरित्यर्थः। एवं वाण-शब्देन भ्रूमण्डलस्य धनुष्ट्वं ध्वनितम्, ततश्चैवं वाक्यम्—तादृशभ्रूमण्डलेन प्रहिता मुक्ताश्च ते सौरतमन्त्रशौण्डाश्च तैरिति, विमथितुं विशेषेण मथितुम्, यथा व्रजदेव्यो विशेषेण ममन्थुस्तथा मथितुं न शेकुरिति ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

स्मायावलोकः स्मयकार्यवलोकजम् ॥ ४-३१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ भगवतस्तासु पत्नीषु पुत्रपौत्रादिपरम्परां अनुवर्णयत्येकषष्टितमेन—एकैकश इति। ताः कृष्णस्याबलाः स्त्रियः सर्वाः या आत्मसम्पत्तया पितुः सकाशादनवमानन्यूनान् तुल्यान् एकैकशो दशदश पुत्रान् जनयामासुः ॥ १ ॥ तदेव विस्तरेण वक्तुं तावत्तासां भगवन्मायामोहितत्वं भगवतस्तदवशत्वञ्चाह—गृहादिति द्वाभ्याम्। गृहादनपगं नापगच्छति न निष्क्रामतीति तथा तं स्थितं गृहेष्वेव स्थितमच्युतमवलोक्य सर्वास्ता राजपुत्र्यः अतत्तत्त्वविदः भगवद्याथात्म्यानभिज्ञाः हेतुगर्भमिदं तत्त्वात् प्रत्येकं स्वं स्वमात्मानं प्रियतमं भगवत इति शेषः। न्यमंसत अमन्यन्त ॥ २ ॥ चार्विति। चार्वब्जकोशवद्वदनम् आयतानि बाहुनेत्राणि च सप्रेम्णा हास्यरसेन वीक्षतानि च वल्गुजल्पाश्च तैः साधनैर्भगवता कर्त्रा सम्मोहिताः वनिताः स्वैरनेकैर्विभ्रमैर्विभूम्नः परिपूर्णस्य भगवतः मनो मानसं जेतुं वशीकर्त्तुं न समशकन् न समर्था बभूवुः तस्यात्मारामत्वादिति भावः ॥ ३ ॥ तासां विभ्रमान् वर्णयन्नेव तद्विवृणोति—स्मेरेति। स्मेरो गूढहसितं तद्युक्तोऽवलोकलवः कटाक्षस्तेन रचितस्सूचितो भावोऽभिप्रायस्तेन हारि मनोहरणशीलं यद्भ्रूमण्डलं तेन प्रहिताः प्रस्थापिताः ये सौरतमन्त्राः तेषु प्रगल्भैरनङ्गस्य बाणैरन्यैश्च करणैः कामशास्त्रप्रसिद्धैर्य्यस्य भगवत इन्द्रियं मनः मथितुं क्षोभयितुं षोडशसहस्रमपि पत्न्यः न शेकुर्नाशक्नुवन् ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अध्यायद्वयेन लोकविडम्बनानुचरितं कथयति—तेन सतां ज्ञानाभिवृद्धिरसतामन्यथेति तत्रादावेकैकस्यां दशदश पुत्रा आसन्नित्यादि कथयति—एकैकश इति। सर्वात्मसम्पदा अन्यूनदेहादिस्वभावसमृद्धया ॥ १ ॥ अनपगं अपगमरहितम् ॥ २ ॥ एवमपि पराजयः स्त्रीणामेवेत्याह—चार्विति ॥ ३ ॥ स्मायः मन्दस्मितं तेन युक्तोऽवलोकः स्मायावलोकः तस्य लवेनाल्पेन दर्शिते। भावेन स्पन्दनलक्षणक्रियया हारिणा मनोहरेण भ्रुवोर्मण्डलवलयेन प्रहिताः सौरतमन्त्राः सुरतवर्धनमन्त्राः एतैः शौण्डैः पटुत्वमाप्तैः कामबाणैः करणैः सम्भोगसाधनैः यस्य हरेरिन्द्रियं रेतोलक्षणं विमथितुम् आलोडयितुं स्रावयितुं वा वशीकृतकामत्वेन दृढवीर्यत्वात् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्त्वं सर्वगृहस्थितत्वम् ॥ २ ॥ चार्विति तत्त्वम् ॥ ३-१० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

गृहादित्यादि। स्त्रियः सत्यभामाद्या राजपुत्र्यः अतद्यथा भवति, सामान्यस्त्रीभाववद् यथा न भवति तथा। स्वं स्वमात्मानं प्रेष्ठं सर्वतः प्रियतमं न्यमंस्यत नितराममन्यत। कीदृश्यः? तत्वविद आत्मतत्वज्ञाः यद्वा, न विद्यन्ते तस्य

श्रीकृष्णस्य तत्वविदो याभ्यरताः; ता यथा कृष्णत्तत्त्वं जानन्ति न तथान्ये केऽपीति भावः । किं कृत्वा ? गृहात् स्वगृहादनपगं युगपदेव सर्वेषु गृहेषु सदा सन्तमच्युतं वीक्ष्यात्मानमेव प्रेष्ठममंसत ॥ १-२ ॥ न तु तं वशीकर्तुम् शेकुरित्याह—चार्वित्यादि द्वाभ्याम् । अनङ्गवाणैर्मथितुं न शेकुः, प्रेम्णा तु शेकुरेव ॥ ५ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

गृहादनपगमित्यादि । स्त्रियः सत्यभामादयो राजसुताः, न तद्यथा भवति सामान्यस्त्रीभाववद् यथा भवति, तथा स्वं स्वमात्मानं प्रेष्ठममंसत । तत्र हेतुः—गृहादनपगमित्यादि । सदैवास्माकं गृहे तिष्ठतीति नैष स्त्रीजितः, अपि त्वस्माकमेव सौभाग्यमीदृशमपि सर्वा एव स्त्रीतुल्या नात्मानं मेनिर इत्यर्थः । चेत्तत्त्वविदः श्रीकृष्णस्य तत्वाविद आत्मानमेव प्रेष्ठमन्यन्त, न तु तं वशीकर्त्तुमशक्नुवन्, तत्त्वविस्त्वादित्याह—चार्वित्यादिद्वाभ्याम् । अनङ्गवाणैर्मथितुं न शेकुः, प्रेम्णा तु शेकुरेव । तदेवाह—प्रत्युद्गमेत्यादि । दास्यम्—सेवाख्यां प्रेमलक्षणां साध्यां भक्तिमित्यर्थः ॥ १-४० ॥

इत्येकषष्टितमोऽध्यायः ॥ ६१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

एकषष्टितमे कृष्णपुत्रपौत्राभिधोच्यते । द्यूतेऽहन् रुक्मिणं रामोऽनिरुद्धोद्वाहपर्वणि ॥

ताः कृष्णस्य अबला भार्याः पितुः श्रीकृष्णस्य सर्वाः आत्मभूता स्वरूपभूता या सम्पत्तया अनवमान् अन्यूनान् ॥ १ ॥ गृहात् स्वस्वपुरात् अनपगं प्रीतिपूर्वकमन्यभार्यापुराणि न अपगच्छन्तं किन्त्वनुरोधवशादेव कदाचिदेवेति वीक्ष्य आत्मानं स्वं स्वमेव प्रेष्ठं परमसुभगं न्यमंसत नत्वन्यजनं किन्तु अतर्क्ययोगमायया सर्वप्रियाजनसुभगतासम्पादकं तस्य तत्त्वं विदन्तीति ताः ॥ २ ॥ भगवद्विलासमात्रेणापि वशीभूतानां तासां समञ्जसरतिमत्वात् प्रेममयाः काममयाश्च विलासाः सम्भवन्ति तत्र काममयैर्विलासैस्तस्या वशीभावमाह चार्विति द्वाभ्याम् । चार्वब्जकोशवद्वदनञ्च आयतौ बाहू आयते नेत्रे च सप्रेमहासरसेन वीक्षितानि च वल्गुजल्पाश्च तैः सम्मोहिताः स्वैः स्वीयविभ्रमैर्विलासैः तस्य मनो विजेतुं न समशकन् तत्र हेतुः विभूम्नः स्वत एव सर्वापेक्षणीयपदार्थपरिपूर्णस्य ॥ ३ ॥ तासां काममयान् विभ्रमान् विवृणोति-स्मायेति । करणशब्दस्य इन्द्रियवाचकत्वात् करणैर्नेत्रैरनङ्ग बाणैर्यस्य कृष्णस्येन्द्रियं मथितुं न शेकुः कीदृशैः स्मायः स्मितं तत्सहितोऽवलोकलवः कटाक्षस्तेन दर्शितः सूचितोऽभिप्रायस्तेन हारि मनोहरणशीलं यद्भ्रूमण्डलं तेन प्राहिताः प्रस्थापिता ये सौरतमन्त्रास्तेषु शौण्डैः प्रगल्भैः ॥ ४ ॥

गूढार्थदीपिनी

एकषष्टितमे कृष्णपत्नीनां वंशवर्णनम् । अनिरुद्धविवाहे च द्यूतेऽहन् रुक्मिणं बलः ॥ १ ॥

कृष्णस्य ताः अबला दशं दश पुत्रान् जनयामासुः । 'दशास्यां पुत्रानाधेहि इति श्रुतेः । सर्वा या आत्मनि सम्पत् सौन्दर्यादिरूपा तया पितुः सकाशात् अनवमान् अन्यूनान् ॥ १ ॥ न अपगच्छति न निष्क्रामतीति अनपगम् । अत एव गृहेष्वेव स्थितम् तं स्वं स्वं प्रेष्ठं प्रियतमं मेनिरे । तत्त्वम् आत्मारामत्वं न विदन्तीति तथा ॥ २ ॥ भगवतः चारुकमलकोशवत् वदनेन आयतैः बाहुनेत्रैश्च सप्रेमहासवीक्षणैश्च मधुरभाषणैश्च संमोहिताः वनिता यस्य मनो वशीकर्तुं न समशकन् न समर्था बभूवुरित्यन्वयः । विभ्रमैः शृङ्गारभावैः । विभूम्नः परिपूर्णस्य ॥ ३ ॥ षोडशसहस्रमपि पत्न्यः यस्यः मनः क्षोभयितुं न शेकुः । कैः । करणैः साधनैः नेत्रादिभिः । कीदृशैः । स्मायो मन्दस्मितं तद्युक्तेन अवलोकलवेन कटाक्षेण दर्शितो यो भावः अभिप्रायः तेन हारि आकर्षकं यत् भ्रूमण्डलं तेन प्रेषिता ये मन्त्राः रत्यालापाः तेषु शौण्डैः प्रगल्भैः अनङ्गबाणैः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

एकषष्टितमे भगवतः पुत्रपौत्रादिसन्ततिः अनिरुद्धविवाहे रुक्मिवधश्च निरूप्यते-एकैकश इति । कृष्णस्य अबलाः भार्याः सर्वा आत्मनि या सम्पत् तया पितुः सकाशादनवमान् अन्यूनान् ॥ १ ॥ स्वं स्वमात्मानं प्रेष्ठं प्रियतमम् न्यमंसत अच्युतस्याहमेवातिप्रेष्ठा नान्या इति प्रत्येकं मेनिरे भक्तप्रियस्यास्य सर्वा एव प्रिया इति तस्य तत्त्वं स्वभावं न विदन्ति ताः ॥ २ ॥ किञ्च चार्वब्जकोशवद्वदनञ्च आयतानि बाहुनेत्राणि च सप्रेम्णा हासरसेन वीक्षितानि च वल्गुजल्पाश्च भगवतः एतैः सम्मोहिताः स्वैर्विलासैर्विभूम्नः परिपूर्णस्य मनो विजेतुं न समशकन् अशक्ता बभूवुः ॥ ३ ॥ तासां विभ्रमान् दर्शयति—स्मायेति । स्मायेन गूढहसितेन युक्तोऽवलोकलवो निरीक्षणलेशः तेन दर्शितो निवेदितो भावोऽभिप्रायः सम्भोगाभिलाषः तेन हारि चित्ताकर्षणशीलं यत् भ्रूमण्डलं तेन प्रहितेषु प्रेषितेषु सौरतमन्त्रेषु शौण्डैः प्रगल्भैः अनङ्गबाणैः अन्यैश्च करणैर्वात्स्यायादिप्रोक्तैः सम्भोगसाधनैः यस्येन्द्रियं मनो विमथितुं क्षोभयितुं षोडशसहस्रमपि पत्न्यो न शेकुः नैवाशक्नुवन् ॥ ४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हरिः ॐ। लोकमनुकुर्वन् लोकेशो वंशमवर्धयज्जातजातं देवता इति तच्चरितश्रवणं भगवद्भक्त्युपोद्बलकमित्यध्यायद्विकेन वदति एकैकश इति। ता योषित एकैकशः पृथक् पृथगेकैका एकैकस्य स्त्रीजनस्य सकाशादेकाशास्ता प्रशस्ता रूपादिनेत्याह। एकैकशस्ता इत्यप्यर्थः। कृष्णस्य सकाशात्पितुः सर्वात्मसम्पदा सर्वाङ्गसम्पदा। अनवमान् पुत्रीभवनभाग्ययुता इत्यनवमान्समस्तान् दशदशाजीजनत्। एकैकशोऽबला दशाजीजनन्नित्यकैकस्यां दशपुत्रा अभवन्निति तद्वीप्सयैव लाभे पुनर्दशेति न वक्तव्यमिति चेत्। महात्मन्नर्थान्तरे तु तत्सार्थकं किलार्थान्तरपक्ष एवं दशाया दैवस्य बलं यासां ता इति। दशा दैवे वार्तिकायां वस्त्रप्रान्ते च कीर्तिता। अवस्थायां प्रवृत्तौ चेति रानमाला ॥१॥ राजपुत्र्यो गृहादनपगमापगमरहितं तत्रैव वर्तमानमात्मप्रियं प्रेष्ठममंसत व्यजानात्। तत्तत्वं विन्दतीति ता न भगवत्तत्त्वावगमविकलाः ॥ २ ॥ तत्सौंदर्यमुपपाद्य तदजितत्वमजितस्यावेदयति। चार्विति। भगवतश्चारु अब्जकोशवद्वदनं मुखं च। आयते च ते चारुणे च ते नेत्रे च सप्रेमहासरसं यद्वीक्षितं च वल्गुजल्पा मनोहरव्यवहाराश्च तैर्विमोहिताः स्वैर्विभ्रमैर्विलासैश्चाविरयतदन्वयि च मनो विजेतुं न समशकन् शक्ता नाभूवन्। तत्र तन्त्रं विभूम्न इति ॥ ३ ॥ अधुनाऽपि मधुनाथस्य बहुधा तत्सामर्थ्यमुधाकरणं वक्ति कैश्चिच्छ्लोकैः। स्मायः स्मितसम्बन्धी योऽवलोकस्तस्य लवो लेशस्तस्य दर्शितं दर्शनं तेन भावो मनस्तद्धारिणा मनोहरेण भ्रुवा मण्डलसङ्घस्तेन प्रहिताः प्रेषिता ये सौरतमन्त्राः सुरतसम्बन्धिरहस्यभाषणानि तैः शौण्डाः पुरुषवशीकरणपटवस्तैरनङ्गबाणैः पञ्चबाणैः सहकारिसहितैः करणैः स्वेन्द्रियैः षोडशसहस्रं तत्सङ्ख्याः पत्न्य इन्द्रियस्य भवतो विमथितुं विलोडयितुं स्वपरवशीकर्तुं न शेकुर्न समर्था अभवन्। निरीक्षणादिसर्वेन्द्रियकार्या अविषया इति द्योतयितुमिन्द्रियमित्येकवचनम्। दर्शितो यो भावो लीलाविशेषस्तेन हारि हरत्स्ववशीकुर्वद्यद्भूमंडलं तत्प्रतिहतैरिति वा। भावः क्रियालीलापदार्थेष्विति विश्वः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

द्वादशे रमणं प्राह पुत्रपौत्रयुतस्य हि। प्रसङ्गान्मारणं चोक्तं रुक्मिणः प्रतिबन्धनुत् ॥ १ ॥
भगवान् केवलं लोके क्रीडार्थं न समागतः। किन्तु सर्वोद्धारणाय तदुद्वाहेऽपि मारणम् ॥ २ ॥
कलौ शुद्धक्षत्रियो हि न स्थाप्य इति निश्चयात्। पापं विवाहमकरोत् फलं तस्याप्यसूचयत् ॥३॥
देवकीप्रीतये वंशः स्थाप्य एवेति तत्तथा। तदानीं सर्वधर्माणां सम्यक् स्थितिनिरूपणे ॥ ४ ॥
'दशास्या'मिति वाक्येन दशपुत्रनिरूपणम्। यथोक्तं श्रुतिसिद्धं हि कर्तुं नान्यः क्षमो भवेत् ॥५॥
लोकवेदौ पुरस्कृत्य रमणं तत्तथोच्यते।

पूर्वं लौकिकं रमणमुक्तम्, इदानीं वैदिकं रमणमाह **एकैकश इति**। 'कथं रुक्म्यरिपुत्राये'त्यन्तेन। धर्मो हि द्विविधः, विहितकरणं निषेधपरिपालनं च। 'त्रयीद्विषो हन्तव्या इति, नोपेक्षितव्या इति, दैत्यानां रुक्मिप्रभृतीनां वधोऽप्यतोऽग्रे निरूप्यते। तत्र प्रथमं 'दशास्यां पुत्रानाधेही'ति वेदवाक्यात् सर्वास्वेव दश पुत्रान् नाधिकान् न न्यूनांश्चोत्पादितवानिति निरूप्यते। भगवत एकैकशः स्त्रियः ताः सर्वा एव कृष्णस्य स्वप्रियस्य अबलाः स्त्रियः दश दश पुत्रान् अजीजनन्। तासु पुत्रजनने भगवतः सर्वोऽपि भावोऽस्तीति ज्ञापयति। **पितुः अनवमान्** अन्यूनान्। केनचिदंशेन तथात्वं वारयति **सर्वात्मसम्पदे**ति। सर्वा याः आत्मसम्पदः शरीरेन्द्रियादिसम्पत्तयः, ताः समुदिताः प्रत्येकं भवन्तीति ज्ञापयितुमेकवनं तासामेवोत्कर्ष इति कदाचित् स्यात्, तन्निवृत्त्यर्थम् ॥ १ ॥ प्राकृतत्वमाह **पञ्चभिः**। **गृहादनपग**मिति। आदौ साभिमाना जाताः। तत्र हेतुः **गृहादनपगं** भगवन्तं वीक्ष्येति। सर्वदा गृह एव भगवांस्तिष्ठति। भगवत्सम्बन्धेऽपि तथा दोषोत्पत्तौ औत्पत्तिकराजकन्यात्वं हेतुः। अच्युतत्वात् न स्वतः सुरतविच्छेदः। अतः स्वेच्छापूरकत्वं च ताभिर्ज्ञातम्। व्यापकत्वेनागमनमाशङ्क्य, लौकिकन्यायेन तथात्वमित्याह **स्थित**मिति। गृहेष्वेव लौकिकवत् स्थितम्। एवं भगवतो गुणत्रयेण कृत्वा आत्मानं प्रेष्ठं भगवतः प्रियममंसत। ननु सत्यमेव आत्मा प्रेष्ठः, भगवतोऽप्यात्मैवेति, तत्राह **अतत्तत्त्वविद** इति। तस्य तत्त्वं तत्तत्त्वं च न जानन्ति। भगवदभिप्रायं वस्तुतत्त्वं च न जानन्तीत्यर्थः। यतः स्त्रियः ॥ २ ॥ तत्सम्बन्धाद्भगवतोऽपि कदाचित्तद्धर्मसम्बन्धः स्यादित्याशङ्क्य निराकरोति **चार्वब्जकोशे**ति। भगवद्धर्मैः संमोहिताः भगवन्तं व्यामोहयितुं न समशकन्। **स्वयं** वनिताः वनं प्राप्ताः, यत्र संसाराटवी सम्पद्यत इति। स तु विभूमा। विगतो भूमा यस्मादिति। **स्वयमुज्जटप्रायाः**, स तु सर्वाधिवास इति यावत्। तासु भगवतः षड्धर्मान् मोहकानाह। चार्वब्जकोशवत् वदनम्। आयता बाहवः। नेत्रे च। सप्रेमहासः। रसपूर्वकं वीक्षितम्। वल्गुजल्पाः मनोहरकथाः। पूर्णरसाख्यापनार्थं चार्वब्जकोशत्वम्। परिष्वङ्गक्रिया पूर्णेति ख्यापयितुं आयतपदम्। नेत्रं सौन्दर्यार्थे भिन्नम्। तद्धि स्वरूपतोऽपि रसोद्बोधकम्। एतत्त्रयं कायिकं रसार्थम्। मानसिकमाह **सप्रेमहासरसवीक्षित**मिति। प्रेम हास्यं रसवीक्षितानीति त्रयम्। स्नेहाभावे तन्न रसालं भवतीति सहभावो निरूपितः। हासो रसोद्बोधकः, रसवीक्षितानि प्रलोभकानि। वाचनिकान्याह **वल्गुजल्पैरिति**। मनोहरार्थानि वाक्यानि स्वपक्षस्थापकानि परपक्षदूषकाणीति, तान्यपि त्रिविधानि। एवं कायवाङ्मनोभिः सम्मोहिताः, अत एव दुर्बलाः भगवतो मनो विजेतुं वशीकर्तुं नाशकन्। अनेन भगवच्चित्तं तासु नासक्तमित्युक्तम् ॥ ३ ॥

नापि क्षोभं जनयितुं शक्ता इत्याह **स्मायावलोकेति**। आसक्तिरन्या, मनःक्षोभोऽन्यः। कदाचिद्वशीकरणार्थं भावानुत्पाद्य कथञ्चित्स्वमोहमपि प्रतिबध्य विलम्बमाना भवेयुः, तथाकरणेऽपि न क्षोभका जाता इति सम्बन्धासम्बन्धाभ्यां भगवति दोषमुत्पादयितुं न शक्ता इति निरूप्यते। स्मायावलोकः गर्वपूर्वकं दर्शनम्, तेन सम्बन्धे विलम्बं सूचयन्ति, मानापनोदनार्थमुपेक्षां बाधितुं लवदर्शनानि च कुर्वन्ति, कटाक्षैः अलसवलितादिभिः स्वासक्तिं कुर्वन्ति, ततो भावहारिभ्रूमण्डलं कुर्वन्ति, तेन यथैव भगवतो भावः मनोधर्मः, स्वस्मिन्नासक्तं भवति, तादृशं कामशास्त्रसिद्धं भ्रूमण्डलं कुर्वन्ति, तैस्त्रिभिः प्रहिता याः चेष्टाः सौरतमन्त्रैश्च शौण्डाः बलिष्ठाः। सुरतोद्बोधकानि यानि गुह्यभाषणानि। अनेन दृष्टादृष्टसाधनानि निरूपितानि। सर्वाश्च पत्न्यः यथासुखं प्रवृत्तौ सङ्कोचरहिताः प्रतिबन्धरहिताश्च। तत्रापि **षोडशसहस्रं** षोडशकलस्य मनसः सहस्रप्रकारेण व्यामोहनसमर्थाः। **अनङ्गबाणाः** चेष्टासहितावयवविशेषाः यैर्जयो भवत्येव। मन्त्रसहिता बाणाः कार्यसाधका इति ब्रह्मास्त्रादिषु प्रसिद्धिः। मण्डलीकृतकार्मुका दृष्टद्वारा, तथा दृष्टिमुष्ट्योरेकत्वाय लवदर्शितानि। वीररसाविष्काराय स्मायावलोक इति। एवं सर्वसाधनसम्पत्तियुक्तैरपि बाणैः यस्येन्द्रियं मनश्च विमथितुं ग्लानियुक्तं अस्तम्भयुक्तं वा कर्तुं न शेकुः। सहजानामेतादृशेर्थे जयो न भवतीति कठिनदुर्गस्थेषु राजधर्मेषु कापट्यं निरूपितमिति कुहकैः कपटधर्मैरपि न शक्ताः॥ ४॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

द्वादशे। कारिकायाम्। प्रतिबन्धनुदिति। भगवद्भजने प्रतिबन्धको रुक्मी स्वरूपाज्ञानपर्वरूपः, तन्मारणेन भजनप्रतिबन्धनिवृत्तिर्जातेत्यर्थः। फलमिति। रुक्मिणो वधः पापविवाहफलमित्यर्थः। तादृशविवाहेनाशुद्धत्वमपि सम्पाद्य वंशस्थापने हेतुमाहुः **देवकीप्रीतये** इति। भगवत्सदृशसुतवरणं वंशस्थापनाभिप्रायेणैवेति भावः। **स्थितिनिरूपणे** इति। निमित्तसप्तमीयम्। धर्मास्थितिनिरूपणार्थमित्यर्थः। **गृहादनपग**मित्यस्याभासे। **प्राकृत**तत्त्वमिति लौकिभाववत्त्वमित्यर्थः। **स्मायावलोके**त्यत्र। स्मयास्यायं स्मायस्तादृशोऽवलोक इत्यर्थः। लवमीषन्मात्रं दर्शनं लवदर्शनमित्यर्थः। **मण्डलीकृते**ति। भ्रुवस्तादृशाकारत्वादिति भावः। **दृष्टिमुष्ट्यो**रिति। मुष्ट्या यथा धनुर्धृत्वा बाणः प्रक्षिप्यते, तथा दृष्टिं भ्रूपर्यन्तां विधाय कटाक्षबाणाः प्रक्षिप्यन्ते इत्यर्थः। **कठिने**ति। कठिनदुर्गस्थेषु जनेषु सत्सु राजधर्मेषु मध्ये कापट्यमपि राजधर्मो निरूपित इत्यर्थः।

श्रीसुबोधिनी-सारः

शुकोक्तिः। कृष्णस्याबलाः स्त्रियस्ता एकैकशः सर्वा या आत्मनि सम्पत् तया पितुरनवमान्सदृशान् दश दश पुत्रानजीजनत्॥ गृहादनपगं नापगच्छति न यातीति तथाभूतम् अच्युतं श्रीकृष्णं स्थितं वीक्ष्य राजपुत्र्यो भूपकन्याः स्वं स्वमात्मानं प्रेष्ठमच्युतस्य प्रियतमं मेनिरे न तस्य तत्त्वमात्मारामत्वं विदन्तीति तथा स्त्रियः॥ २॥ चारु सुन्दरमब्जकोशवत् वदनं मुखमायतानि बाहुनेत्राणि सप्रेम्णा हासरसेन वीक्षितानि दर्शनानि वल्गुजल्पानि मंजुलभाषणानि तैः सम्मोहिता विभूम्नो भगवतो मनो विजेतुं वशीकर्त्तुं वनिताः स्त्रियः स्वैर्विभ्रमैर्न समशकन् न समर्था बभवुः॥ ३॥ एतद्दृढीकर्त्तुं पूर्वोक्तमेव श्लोकमुपन्यस्यति स्मायेन गूढहासेन युक्तोऽवलोकलवः कटाक्षस्तेन दर्शितं सूचितं भावहारि मनोहरणशीलं यत् भ्रूमण्डलं तेन प्रहिताः प्रेरिता ये सौरतमन्त्राः सुरतनर्मकेलयस्तेषु शौंडैः प्रगल्भैः अनंगस्य कामस्य पंच बाणैरन्यैः करणैः कामशास्त्रप्रसिद्धैर्वश्याद्युपायैर्यस्य श्रीकृष्णस्येन्द्रियं मनो विमथितुं षोडशसहस्रं तुशब्दादष्टोत्तरशतं पत्न्यः स्त्रियो न शेकुः॥ ४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एकषष्टितमे कृष्ण पुत्रपौत्रादिसन्ततिः। रुक्मिणो बलभद्रेण वधश्च विनिरूप्यते॥ १॥

अथ तासु भगवत्पत्नीषु पुत्रपौत्रादिपरम्परामनुवर्णयति—एकैकश इति। ताः पूर्वोक्ताः कृष्णस्याबला भार्या एकैकशो दश दश पुत्रानजीजनन्। पुत्रान् विशिनष्टि—सर्वा या आत्मनि श्रीकृष्णे सौन्दर्यादिसम्पत् तयाः पितुः सकाशात् अनवमान् अन्यूनान् तत्तुल्यानित्यर्थः॥ १॥ तान् पुत्रानेव विस्तरेण प्रदर्शयन् प्रसङ्गात्तासां भगवद्भार्याणां भगवन्मायामोहितत्वं भगवतस्तदवश्यत्वं चाह— गृहादिति पञ्चभिः। गृहादनपगं नापगच्छति न निष्क्रामतीति तथा तं सर्वदा स्वस्वगृहेऽवस्थितं अच्युतं सम्भोगादौ वैरस्यरहितं श्रीकृष्णं वीक्ष्य ताः स्त्रियः प्रत्येकं स्वस्वमात्मानं तस्य प्रेष्ठं प्रियतमं स्वमंसतेत्यन्वयः। तासामभिमानाधिक्ये हेतुमाह— राजपुत्र्य इति। 'तथापि तस्यात्मारामत्वात् तथाभिमानोऽयुक्त एव' इत्याशङ्क्याह—न तत्तत्त्वविद इति। तस्य तत्त्वमात्मारामत्वं न विदन्तीति तथाभूता यतोऽतस्तासां तथाभिमान इत्यर्थः॥ २॥ आत्मारामत्वमेव स्पष्टयति—चार्विति। भगवतश्चार्वब्जकोशवदनं च, आयतानि दीर्घाणि बाहुनेत्राणि च, सप्रेम्णा हासरसेन वीक्षितानि च, वल्गुजल्पाः मनोहरवाक्यानि च, तैः सम्मोहितास्तत्रासक्तास्ता वनिताः स्वैरनेकैर्विभ्रमैस्तस्य विभूम्नः निजानन्दपरिपूर्णस्य मनो विजेतुं वशीकर्तुं न समशकन् सम्यक्प्रकारेणापि शक्ता न बभूवुः॥ ३॥ तासां विभ्रमानेव दर्शयन्नेतद्विवृणोति—स्मायेति। स्मायो गूढहसितं तद्युक्तो योऽवलोकलवः कटाक्षस्तेन दर्शितः सूचितो यो भावोऽभिप्रायस्तेन हारि मनोहरणशीलं यद्भ्रूमण्डलं तेन प्रहिताः प्रस्थापिता ये सौरतमन्त्रास्तेषु शौण्डैः प्रगल्भैः अनङ्गस्य कामदेवस्य बाणैः कामशास्त्रप्रसिद्धैरन्यैश्च करणैर्यस्य भगवत इन्द्रियं मनः विमथितुं क्षोभयितुं षोडशसहस्रमपि पत्न्यः न शेकुः समर्था न जाता इत्यर्थः॥ ४॥

अन्वितार्थप्रकाशिका

एकषष्टितमे शौरेः सन्ताना रुक्मिणो वधः । अनिरुद्धविवाहोऽत्र श्लोकाः प्रोक्ता द्विसिन्धवः (४२) ॥
त्रीण्युवाचेत्यर्द्धयुक्ताः पञ्च वेदा (४५॥) अनुष्टुभः ।; ६१ ॥

एकैकश इति । ताः पूर्वोक्ताः कृष्णस्याबला भार्या एकैकशः सर्वा या आत्मनि सौन्दर्यादिसम्पत्तया पितुः सकाशात् अनवमान् अन्यूनान् तत्तुल्यान् यद्वा पितुः सर्वात्मभूता स्वरूपभूताया सम्पत्तया अन्यूनान् दश दश पुत्रानजीजनन् ॥ १ ॥ गृहादिति । अच्युतं श्रीकृष्णं स्वस्वगृहादनपगं नापगच्छति तथा तं सर्वदा स्वस्वगृहेऽवस्थितं वीक्ष्य राजपुत्र्यः राजादिपुत्र्यः तस्याच्युतस्य तत्त्वमात्मारामत्वं न विदन्ति । तथाभूताः ताः स्त्रियः प्रत्येकं स्वस्वमात्मानं तस्य कृष्णस्य प्रेष्ठं प्रियतमं न्यमंसत । अहमेवास्य प्रिया नान्या भार्या इति मेनिरे ॥ २ ॥ चार्विति । भगवतश्चार्वब्जकोशतुल्यं वदनं च आयतानि दीर्घाणि बाहुनेत्राणि च प्रेम्णा हासरसेन च सहितानि च वल्गुजल्पाः मनोहरवाक्यानि तैः संमोहितास्तत्रासक्ता वनिताः जातानुरागाः स्त्रियः स्वैरनेकैर्विभ्रमैस्तस्य विभूम्नः निजानन्दपरिपूर्णस्य मनो विजेतुं वशीकर्तुं न समशकन् सम्यक् प्रकारेणापि शक्ता न बभूवुः ॥ ३ ॥ स्मायेति । स्मयः स्मितमेव स्मायो गूढहसितं तद्युक्तो योऽवलोकलवः कटाक्षस्तेन दर्शितः सूचितो यो भावोऽभिप्रायस्तेन हारि मनोहरणशीलं यद्भ्रूमण्डलं तेन प्रहिताः प्रस्थापिता ये सौरतमन्त्रास्तेषु शौण्डैः प्रगल्भैः । अनङ्गस्य कामदेवस्य बाणैः कामशास्त्रप्रसिद्धैरन्यैश्च करणैरिति स्वामिपादाः । करणैरुपायैः तेषां रूपकम् अनङ्गबाणरूपैरिति स्मायेत्यादिकरणानां विशेषणम् । करणैः नेत्रैरिति चक्रवर्ती । सर्वमिदं करणशब्दप्रतीतग्राम्यतापरिहारायेति यस्य भगवत इन्द्रियं मनः विमथितुं क्षोभयितुं षोडशसहस्रमपि पत्न्यः न शेकुः समर्था न जाताः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथेदानीमेकषष्टितमेऽध्याये पट्टपत्नीनां पुत्रगणनमन्यासामपि संततिवर्णनं चानिरुद्धोद्वाहे रामकृतरुक्मिहननं च गदति एकैकश इति । अबलाः स्त्रियः सर्वथा आत्मनि स्वस्मिन् संपदा पितुः सकाशादनवमान् । अन्यूनान् तत्तुल्यानित्यर्थः । दशदशपुत्रान् । एकैकशः अजीजनत् ॥ १ ॥ अनपगं अगच्छंतं स्थितं सदा वर्त्तमानं । तस्य तत्त्वं स्वरूप याथार्थ्यं विदंतीति तत्वविदस्तथाभूतानभवंतीति ताः स्वस्वं स्वकीयं स्वकीयं प्रेष्ठं न्यमंसत मेनिरे ॥ २ ॥ श्रीकृष्णस्य निर्लेपत्वमाह द्वाभ्यां चार्विति अब्जकोशवद्वदनं चायतानि विस्तृतानि बाहुनेत्राणि च सप्रेमहासरसेन वीक्षितानि च वल्गुजल्पाः मनोहरवाक्यानि च चारुभिरेतैर्भगवत्संबंधिभिः संमोहिताः संजातानुरागाः वनिताः स्वैः स्वकीयैर्विभ्रमैः श्रृंगारिकभावैः विभूम्नः पूर्णकामस्य भगवतः सर्वैश्वर्य्यसंपन्नस्य श्रीकृष्णस्य मनो विजेतुं न समशकन् न समर्थाः बभूवुः ॥ ३ ॥ स्मायेति स्मायेन मंदहसितेन युक्तश्चासाववलोकलवः कटाक्षश्च तेन दर्शितः प्रकटितो भावः स्वाभिप्रायस्तेन हारि चित्तहरणशीलं यद्भ्रूमंडलं तेन प्रहिताः प्रेरिताश्च ते सौरतमंत्राश्च तेषु शौंडैर्निपुणैः अनंगस्य बाणैरिषुभिः ततो भिन्नैश्च करणैरनंगशास्त्रविख्यातैरुपायैः यस्य हरेरिंद्रियमंतःकरणं । विमथितुं चालयितुं षोडशसहस्रं पत्न्यो न शेकुः समर्था न बभूवुः ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

संततिः पुत्रपौत्रादेरेकषष्टितमे हरेः । विवाहे चानिरुद्धस्य रामतो रुक्मिणो वधः ॥ १ ॥

एकैकश इति ॥ एकैकशः ताः, कृष्णस्य, अबलाः स्त्रियः, सर्वा या आत्मसंपत् तया, पितुः सकाशात्, अनवमानन्यूनान् तुल्यानिति यावत् । दश दश पुत्रान्, अजीजनन् जनयामासुः । श्रीकृष्णत एकैकपत्न्यां दश दश पुत्रा अभूवन्नित्यर्थः ॥ १ ॥ तदेव विस्तरेण वक्तुं तावत्तासां भगवन् मायामोहितत्वं भगवतस्तदवश्यत्वं चाह द्वाभ्याम् ॥ गृहादिति ॥ गृहात् न अपगच्छति न निष्क्रामतीत्यनपगस्तं, स्थितं गृहेष्वेव सर्वकालं स्थितमित्यर्थः । अच्युतं परमेश्वरं श्रीकृष्णं, वीक्ष्यावलोक्य, राजपुत्र्यः राज्ञां सुताः, सर्वास्ताः स्त्रियः, अतत्तत्त्वविदः भगवद्याथात्म्यानभिज्ञाः, हेतुगर्भमिदम् । तत्त्वात् प्रत्येकं स्वं स्वं स्वस्वात्मानमित्यर्थः । प्रेष्ठं प्रियतमं, भगवत इति शेषः । न्यमंसतामन्यन्त ॥२॥ चार्विति ॥ चारु अब्जकोशवद्वदनं च आयतानि बाहुनेत्राणि च सप्रेम्णा हासरसेन वीक्षितानि च वल्गुजल्पाश्च तैः साधनैः, भगवता कर्त्रा, संमोहिताः, वनिताः, स्वैः विभ्रमैः, स्वकीयैरनेकविधैर्विलासैरित्यर्थः । विभूम्नः परिपूर्णस्य कृष्णस्य, मनो मानसं, विजेतुं वशीकर्त्तुं, न समशकन् शक्ता न बभूवुः । तस्यात्मारामत्वादिति भावः । भगवता इत्यत्र भगवत इत्यपि पाठः । तत्पक्षे भगवतः विभूम्नः अनयोः पर्यायेण विशेषणविशेष्यभावः । चार्वित्यादिभिः स्वैः विभ्रमैः, वनिताः, तन्मनः विजेतुं न समशकन्नित्यन्वयः ॥ ३ ॥ तासां विभ्रमान्वर्णयन्नेतदेव विवृणोति ॥ स्मेरेति ॥ क्वचित् स्मायेत्यपि पाठः । तत्र स्मेरस्माययोरेकार्थत्वम् । स्मेरो गूढहसितं तद्युक्तोऽवलोकलवः कटाक्षस्तेन दर्शितः सूचितो भावोऽभिप्रायस्तेन हारि मनोहरणशीलं यत् भ्रूमण्डलं तेन प्रहिताः प्रस्थापिता ये सौरतमन्त्रास्तेषु शौण्डैः प्रगल्भैः, अनङ्गस्य कामस्य बाणैः शरैः, अन्यैश्च करणैः कामशास्त्रप्रसिद्धैः, यस्य भगवतः, इन्द्रियं मनः, विमथितुं क्षोभयितुं, षोडशसहस्रं तु षोडशसहस्रपरिमिता अपि पत्न्यः, न शेकुः नाशक्नुवन् ॥ ४ ॥

कृष्णप्रिया

भगवान् की पारिवारिक कथा

श्रीशुकदेवजी ने कहा—राजन्! भगवान् श्रीकृष्ण की सर्व अर्धाङ्गनाओं की कुक्षि से दस-दस पुत्र उत्पन्न हुए। भगवान् के सर्व पुत्र भगवान् के समान बल वीर्य रूप आदि श्रेष्ठ गुणों से सम्पन्न थे ॥ १ ॥ महाराज! राजकुमारियाँ यह देखती थीं कि हमारे प्रियतम भगवान् श्रीकृष्णजी कभी राजभवन से बाहर नही पधारते, केवल हमारे ही समीप रहते हैं। इससे रानियों का मन्तव्य था कि नाथ की मैं ही प्रियतमा हूँ। महाराज! सच कहो, तो रानियाँ पूर्णपुरुषोत्तम की महिमा नहीं जानती थीं ॥ २ ॥ महाराज! भगवान् श्रीकृष्ण की रानियाँ निजानन्द-निमग्न सुन्दरवर भगवान् श्रीकृष्ण के कमल कली के समान रमणीय मुख, दीर्घबाहु, दीर्घनेत्र, प्रेमपूर्ण मधुर हास्य, रसमय अवलोकन, हृदयङ्गम वार्तालाप आदि से स्वयं ही अत्यन्त मुग्ध रहती थीं। यद्यपि रानियाँ सर्वथा रमणीय थीं फिर भी अपने हाव-भाव कटाक्ष आदि श्रृङ्गार भावों से नाथ के मन को अपनी ओर आकृष्ट करने में सफल न हो सकीं ॥ ३ ॥ श्रीद्वारिकाधीश प्रभु की षोड़श सहस्र से अधिक रानियाँ थी एवं सर्वाङ्ग रमणीय थीं। वे मधुर स्मित और तिरछी चितवनमयी भौंहों के इशारे से चलाये हुए कामकलामय मधुर रस से पूर्ण-परिपूर्ण होने पर भी किसी भी प्रकार से चेष्टाओं से, सामग्रियों से श्रीकृष्ण के मन इन्द्रियों में क्षोभ न कर सकीं ॥ ४ ॥

[1]इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः पदवीं यदीयाम् ।
भेजुर्मुदाविरतमेधितयानुरागहासावलोकनवसङ्गमलालसाद्यम् ॥ ५ ॥[2]
प्रत्युद्गमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगन्धमाल्यैः ।
केशप्रसार[3]शयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यम् ॥ ६ ॥
[4]तासां या दशपुत्राणां कृष्णस्त्रीणां पुरोदिताः । अष्टौ महिष्यस्तत्पुत्रान् प्रद्युम्नादीन् [5]गृणामि ते ॥ ७ ॥
चारुदेष्णः सुदेष्णश्च चारुदेहश्च वीर्यवान् । सुचारुचारुगुप्तश्च[6] भद्रचारुस्तथापरः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—ब्रह्मादयः, यदीयाम्, पदवीम्, न, विदुः, ताः, स्त्रियः, इत्थम्, रमापतिम्, पतिम्, अवाप्य, अविरतम्, एधितया, मुदा, अनुरागहासावलोकनवसङ्गमलालसाद्यम् भेजुः ॥ ५ ॥ दासीशताः, अपि, कृष्णपत्न्यः, दासीभूताः, प्रत्युद्गमासन-वरार्हण-पादशौच-ताम्बूल-विश्रमपा-वीजन-गन्ध-माल्यैः, केशप्रसार-शयन-स्नपनोपहार्यैः, विभोः, दास्यम्, विदधुः, स्म ॥ ६ ॥ दशपुत्राणाम्, तासाम्, कृष्णस्त्रीणाम्, याः, पुरोदिताः, अष्टौ, महिष्यः, प्रद्युम्नादीन्, तत्पुत्रान्, ते, गृणामि ॥ ७ ॥ चारुदेष्णः, च, सुदेष्णः, च, चारुदेहः, वीर्यवान् च सुचारुः, च, चारुगुप्तः, च तथा अपरः, भद्रचारुः ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनुरागेण हासोऽवलोकश्च नवसंगमे लालसमौत्सुक्यं च ते आद्या यस्य विभ्रमकदंबस्य तं भेजुः। अनुरागहासावलोकनवसंगमलालसाद्यं भेजुस्तस्य मनो विजेतुं न शेकुरिति वा ॥ ५ ॥ किन्तु प्रत्युद्गमादिभिर्विभोस्तस्य दास्यं नित्यं विदधुरिति। प्रौढभावेऽपि नवसंगमाद्यभिधानमगतसारत्वेनौत्सुक्येन च तथा प्रतीतेः। तेषामेव श्लोकानां प्रस्तावांतरपुनःपुनरावृत्तिरिति सौंदर्यात् ॥ ६ ॥ प्रासंगिकमुक्त्वा प्रस्तुतमाह तासामिति। दशदश पुत्रा यासां तासां मध्येऽष्टौ महिष्यो याः प्रागुक्तास्तत्पुत्रानिति ॥ ७-१२ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

ता रुक्मिण्याद्याः। यदीयां यत्संबंधिनीम्। विभ्रमपदाध्याहारे गौरवं मत्वार्थांतर—अनुरागेति। पूर्वेणैव सम्बन्धः। नवो नित्यनूतनः संगमोंगसंगश्च लालसा तृप्त्यभावश्च तदाद्यं तदादिकविलासमनेकं स्वकर्तृकं कृष्णकर्तृकं वा भेजुः। "तथाह·

---

[1] यास्वीप्सितं स्वभवनेष्वधिरूढमुच्चैर्लक्ष्म्यैकधाम सरसप्लुतवीक्षणेन ।
ऐक्षन्सतामपि पतिं च सतीः कटाक्षैः स्थूणान्तरेण नवसङ्गमलज्जयैव ॥ १ ॥
रामा गृहे विहरतः पुरतः कराभ्यां बद्धेक्षणाः स्वदयितस्य मुदा हसन्त्यः ।
गात्रान्तराण्यपिदधुर्निजपूरुषस्य क्लेशावहान्यपि तदङ्गजभङ्गभीताः ॥ २ ॥—विज. ।

[2] ५-६ श्लोकौ विजये न स्तः । [3] प्रसाध—श्रीधर. टि. । [4] आसां—प्रा. पा. । [5] गृणन्ति तान्—विज. । [6] दीप्तिश्च—प्रा. पा. ।

मपि तच्चित्तो निद्रां च न लभे निशि" इति भगवदुक्तिज्ञाप्यः "ईक्षितोंतःपुरस्त्रीणां सव्रीडस्मितवीक्षितैः। कृच्छ्राद्विसृष्टे निरगाज्ज्ञातहासो हरन्मनः ॥" इति, "रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा" इत्यादिकोक्तिज्ञाप्यश्च पारिजाताद्यपहरणज्ञाप्यश्च तासां प्रेममयैर्विलासैस्तद्वशीभावस्त्वस्त्येति ज्ञेयम् ॥५॥ सेवनानुरागमाह–किन्त्विति। वरार्हणं पुष्पांजलिरत्नांजलिनिक्षेपादि। प्रौढभावेऽपि नवोढात्वाभावेपि। अगतसारत्वेनैकरसरूपयौवनादिमत्त्वेनौत्सुक्येनानुरागाधिक्येन च तथाप्रतीतेर्नवसंगसमास्वाद-प्रतीतेः। तेषामेव पूर्वोक्तानामेव। प्रस्तावांतरे प्रकृतांतरे ॥६॥ प्रासंगिकं प्रसंगानुगतम्। तासां सर्वासाम्। तत्पुत्रान्रुक्मिण्यादिपुत्रान्। ते तुभ्यम् ॥ ७ ॥ प्रद्युम्नादन्येषां कानि नामानीत्यत आत—चारुदष्ण इति। वीर्यवानिति सर्वविशेषणम् ॥ ८–९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च तासां ब्रह्मादिभिरपि दुर्गमभजनं दर्शयति—इत्थमिति। रमापतिं श्रीरुक्मिणीकान्तं श्रीगोपीरूपाणां परमरमाणां वा रमणं निरन्तरं वर्द्धमानया मुदा तादृशावलोकनयुक्तनवसङ्गमलालसा आद्या यत्र तद्यथा स्यात्तथा भेजुः ॥ ५ ॥ किञ्च प्रत्युदगमेति प्रसारेति प्रसाधेति वा पाठः एषां प्रायोनुक्रमोपचारत्वं गम्यं वरार्हणं पुष्पलाजरत्नाञ्जलिनिक्षेपादि अत्र टीकायां प्रौढभावेपीत्यादिकं प्रकरणसङ्गमनं तथा तेषामेवेति प्रथमस्कन्धाद्युक्तानामित्यर्थः ॥ ६ ॥ तत्पुत्रान् तासामेव पुत्रानित्यर्थः। बाहुल्यभियेति भावः ॥ ७–८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यस्य भगवतस्तं प्रेष्ठं न्यमंसतेति पूर्व्वेण, किंवा रमापतिमिति परेणान्वयः। तु अपि, षोडशसहस्रमपि, न तु कतिचिदित्यर्थः। पूर्व्वोक्तानुसारेण साष्टशताधिकं ज्ञेयम्। इत्युक्तेन तन्मनोवशीकरणप्रकारेण ॥ ५–६ ॥ तासां पुत्रानिति अन्यासां प्रत्येकं पुत्राणामुक्तौ प्रयोजनाभावात्, अतिबाहुल्येन प्रस्तुतकथारसविघाताच्च। प्रद्युम्न आदिर्येषां तानिति तस्य सर्व्वेभ्यो ज्येष्ठत्वात् रूपगुणादिना श्रेष्ठत्वाच्च। वीर्य्यवानिति सर्व्वेषां विशेषणम्, अतस्तत्समुच्चयार्थं प्रायः सर्व्वत्रैव च-शब्दः। तथेति च परश्चारुगुप्तस्यानुज इत्यर्थः। एवमग्रजानुजक्रमेण सर्व्वे ज्ञातव्या इति भावः ॥ ७–८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

इत्थमिति। किन्तु तदीयां पदवीं याथात्म्यं ब्रह्मादयोपि न विदुः तमित्थम्भूतं श्रियः पतिं पतिमवाप्य ताः स्त्रियः अविरतं सन्ततं यथा तथा एधितया वर्द्धितया मुदा नवसङ्गमे लालसौत्सुक्यमाद्यो यस्य विभ्रमकदम्बस्य तं भेजुः नवसङ्गमलालसाद्यं भेजुस्तस्य मनो विजेतुं न शेकुरिति वा ॥ ५ ॥ किन्तु प्रत्युद्गमादिभिः विभोस्तस्य दास्यं विदधुरिति प्रौढभावेपि नवसङ्गमाद्यभिधानमगतसारत्वेनौत्सुक्येन च तथा प्रतीतेः एतेषामेव श्लोकानां प्रस्तावान्तरे पुनःपुनरावृत्तिरपि सौन्दर्य्यात् ॥ ६ ॥ प्रासङ्गिकमुक्त्वा प्रस्तुतमाह–तासामिति। दशदश पुत्राः यासां तासां कृष्णस्य स्त्रीणां मध्ये या अष्टौ रुक्मिण्यादयः पूर्वं कथितास्तासां पुत्रान् प्रद्युम्नादीन् तुभ्यं कथयामि ॥ ७ ॥ चारुदेष्ण इति। प्रद्युम्नः प्रमुख आदिर्येषामिति तद्गुणसम्विज्ञानो बहुव्रीहिः ते दश पितुर्हरेरनवमास्तुल्या रुक्मिण्याः पुत्रा इति शेषः। प्रद्युम्नव्यतिरिक्तान्नव पुत्रान्निर्दिशति। चारुदेष्ण इति। वीर्य्यवानिति चारुदेहविशेषणम् ॥ ८–९ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

याः पत्न्यः पक्ष्मकटाक्षैः स्थूणान्तरेण स्तम्भव्यवधानेन स्वीप्सितं सुतरामभीष्टं कृष्णमैक्षन् अपश्यन् ता इति शेषः केन उच्यते लक्ष्म्याः कान्त्या एकधामप्रधानगृहञ्च सरसं सस्नेहं प्लुतं दीर्घीकृतं सृतं वां वीक्षणं दर्शनं लक्ष्म्येकधामसरसप्लुतवीक्षणं तेन स्वभवनेष्वधिरूढम् उत्तुङ्गमञ्चारूढम् अपि सम्भावनार्थं सतीः सत्यः स्थूणान्तरे किमर्थं वीक्षणमित्यत उक्तं नवसङ्गमेति (क)। सुरतादन्यत्र काले तासां लीलाविशेषमाह—रामा इति। रामाः स्त्रियः गृहे विहरतः स्वदयितस्य कराभ्यां पुरतो बद्धेक्षणाः मुदा रोमाञ्चहेतुहर्षेण हसन्त्यः सात्तपाशं कुर्वन्त्यः निजपूरुषस्य निजभर्तुः क्लेशावहानि क्लेशाकराण्यपि गात्रान्तराणि विषयेभ्यः स्पर्शयोग्येभ्यो गात्रेभ्योऽन्यत् गात्राणि अपि दधुः वस्त्रादिना पिहितानि चक्रुरित्यन्वयः। कीदृश्यः तस्याङ्गजस्याश्लेषलक्षणकामस्य भङ्गे भीता अपीति (ख) ॥ ५–६ ॥ इदानीं तासां पृथक्-पृथक् पुत्रान् वक्तुमुपक्रमते—तासामिति। दशदश पुत्रा यासां ताः दशपुत्राः तासां तासां कृष्णस्त्रीणां मध्ये याः पुरोदिताः पूर्वोक्ताः अष्टौ महिष्यस्तासां तान् पुत्रान् प्रद्युम्नादीन् गृणन्ति तत्रत्या इति शेषः ॥ ७ ॥ प्रद्युम्नादन्ये किं नामन इति तत्राह—चारुदेष्ण इत्यादिना ॥ ८–९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तदेवाह—प्रत्युद्गमेत्यादि। दास्यं प्रेमलक्षणं साध्यं पादसेवाख्यभक्तिम् ॥ ७–४० ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे एकषष्टितमोऽध्यायः ॥ ६१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

तासां प्रेममयैर्विभ्रमैस्तदिन्द्रियमथनकारणकमङ्गसङ्गश्चाह—इत्थमिति। अनुरागः प्रेमविलासविशेषस्तन्मयो यो हासावलोकस्तेन नवः नित्यनूतनः सङ्गमो अङ्गसङ्गश्च लालसा तृप्त्यभावश्च तदाद्यं तदादिकमनेकविलासं स्वकर्त्तृकं कृष्णकर्त्तृकं वा भेजुः "तथाहमपि तच्चित्तो निद्राञ्च न लभे निशि" इतिभगवदुक्तिज्ञाप्य—

ईक्षितोन्तःपुरस्त्रीणां सव्रीडस्मितवीक्षितैः। कृच्छ्राद्विसृष्टो निरगाज्जातहासो हरन्मनः॥" इति।

"रेमे स्त्रीरत्नकूटस्थो भगवान् प्राकृतो यथा" इत्यादिशुकोक्तिज्ञाप्यश्च पारिजाताद्याहरणज्ञाप्यश्च तासां प्रेममयैर्विलासैस्तद्वशोभावस्त्वस्त्यैवेति ज्ञेयम्॥ ५॥ तासां तद्विषयकप्रेम्णः परिचर्य्यात्मकाननुभावानाह—प्रत्युद्गमेति। वराहणं पुष्पाञ्जलिरत्नाञ्जलिनिक्षेपादि॥ ६॥ प्रासङ्गिकमुक्त्वा प्रस्तुतमाह—तासामिति। दशदश पुत्राः यासां तासां मध्ये या अष्टौ महिष्यः प्रागुक्ताः॥ ७-१३॥

गूढार्थदीपिनी

यदीयां पदवीं यथार्थस्वरूपं न विदुः तं पतिम् अवाप्य स्त्रियः निरन्तरं वर्धितया मुदा सङ्गमलालसात् यं भेजुः तस्य इन्द्रियमित्यन्वयः॥ ५॥ दासीशता अपि ताः स्त्रियः विभोः श्रीकृष्णस्य दास्यं सेवां स्वयमेव विदधुः। स्म इत्याश्चर्यम्। कैः। प्रत्युद्गमादिभिः। प्रत्युद्गमः आगच्छतः पुरतो गमनम् अर्ह्यतेऽनेनेति वराहणम्। अर्घ्यपाद्यादि शौचं प्रक्षालनम्। वीजनं व्यजनचालनम्। माल्यैः पुष्पैः। प्रसारः अलङ्करणम्॥ ६॥ दश दश पुत्रा यासाम् तासाम्। पुरा उदिताः कथिताः ते तुभ्यम् कथयामि॥ ७॥ वीर्यवान् सर्वषां विशेषणम्॥ ८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यदीयां पदवीं ब्रह्मादयोपि न विदुस्तं रमापतिमित्यन्ताः पूर्वोक्ताः स्त्रियोपि पतिमवाप्य अविरतं सन्ततं यथा तथा एधितया वर्द्धितया मुदा अनुरागेणातिप्रेम्णा हासोऽवलोकश्च नवो नित्यनूतनः सङ्गमोऽसङ्गसङ्गश्च लालसः औत्सुक्यं च ते आद्या यस्य विभ्रमकदम्बस्य तं भेजुः॥ ५॥ किञ्च प्रत्युद्गमादिभिर्विभोः व्यापकस्य श्रीकृष्णस्य दास्यं नित्यं विदधुः तत्र वरैः श्रेष्ठैः पुष्पादिभिरर्हणं पूजनम् उपहार्य्याणि तत्तत्काले जातानि वस्तूनि॥ ६॥ दशदश पुत्राः यासां तास्तथा तासां मध्ये अष्टौ महिष्यो याः रुक्मिण्याद्याः पुरोदिताः तत्पुत्रान् ते तुभ्यं गृणामि कथयामि॥ ७-१२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

याः स्वभवनेषु तत्रोच्चैरुत्तुगमञ्चादौ चाधिरूढं लक्ष्म्येकधामसम्पन्मुखाश्रयं तव तन्त्रं सरसप्लुतवीक्षणेन स्वीप्सितं सुष्ठ्वीप्सितं कामितमपि सतां सज्जनानां पतिं चन्द्रमिव वियामानं वा सतीः सत्यो नवसङ्गमलज्जयेव स्थूणान्तरेणैक्षन्न पश्यन्। नित्यनूनसुखप्रदत्वान्नवसङ्गम इति लज्जयैवेत्यपि पाठः सम्भवति। भित्त्याद्यनुक्त्वोक्त्या च स्थूणान्तरेणेति नृसिंहादिकमन्यच्च दुरितादिनिवृत्तय इत्यादेर्हरिसङ्गान्तरायापनुत्त्यै श्रीनृसिंहस्य तदन्तर्लसतः प्रार्थनामतन्वंस्तन्वङ्ग्यः स चायमिति प्रादुर्भूयादिहेति वा ध्वन्यते॥ ५॥ रामा गृह इति श्लोके गात्रान्तरशब्दार्थः क इति न ज्ञायते प्रतीयते क्लेशावहपदस्य निजभर्तृपदेनान्वयो वाधितोऽङ्गजभङ्गोऽपि कृष्णेन क्रियमाणः स्वाङ्गे जायमानो नो भङ्ग इति चेत्यतः स्वयं किञ्चिदनूद्याध्याहृय किञ्चिदन्वयप्रदर्शनेनार्थापनेन च तां वारयति। गान्त्रान्तराण्यपिदधुः पिधातव्येभ्योऽन्यान्यपीति। गात्राणि पिधातव्यानीत्यूरुमूलो राजादीनि तेभ्योऽन्यानि मुखादीन्यपिदधराच्छादितवत्यः। लक्षणया तानि च मुखादीनि ज्ञेयानीति सूचयन्विछिद्यध्याहृत्यान्वयं दर्शयति। येषामवयवानां पिधानेनात्मनः क्लेशो भवतीति। तथा निजभर्तुरपि गात्रान्तराण्यपिहितव्यान्यप्यपिदधुः आच्छादितवत्यः। तत्र हेतुं वक्तुं तदङ्गजभङ्गभीता इति पदमिति मनसि कृत्वा सोपोद्बलकं तदङ्गभङ्गजपदार्थं वर्णयति। निर्लज्जा इति। अनेन दासीसमाजे सती सत्यश्चुम्बनादिनीरता अता निर्लज्जा इति। अङ्गजपदेन कामशब्दो लक्ष्यस्तेन चाभिलाषो ग्राह्यः। अकामो मदभिलाषप्रसोषी स्यादसाविति भयात्स्वमुखतन्मुखादीनासाच्छादनमन्तरत एवं चुम्बनाद्युपयोगि चक्रुरिति भावः। ततश्चायं श्लोकार्थः। रामा गृहे विहरतो रामा दासीनार्यस्ताभिः सहितं गृहं तस्मिन्निति चावृत्याऽर्थः। क्रीडतो विहरतो हरिविरुद्धवदाचरतोऽस्वाथागतासङ्गतस्यानालिङ्ग्याङ्गवर्तमानस्येति यावत्। स्वदयितस्य स्वपीतमात्रस्य निजपुरुषस्य भर्तुः पुरतोऽग्रे कराभ्यां स्वयं बद्धानि पिहितानीक्षणानि यासां ताः। मुदाऽऽनन्देनाहसन्त्य ईषत्स्मितं कुर्वत्यः स्वपतौ नृपतौ वा सतीसतीनां बहुमतो न बहुह्लास इति तत्। गात्रान्तराणि अपिहितोरुमूलकुचाद्यतिरिक्तान्यात्मनः क्लेशावहानि। मुखनयनमुखपिधाने किञ्चिच्छ्वासस्यजनभजनतः क्लेशापादकानि स्वाङ्गानि तथा निजपुरुषस्यापि नयनवदनादीन्यपि निर्लज्जाः सतीपरिवारजने किमिदं तन्वङ्ग्यस्तन्वतीति तस्य पत्युरङ्गजः कामः स्वाभिलाषस्तस्य भङ्गस्तस्माद्भीताः

पिदधुः । रमणीरमणयोः पटकुटिकारूपपटादिघटितावरणयोरन्तरेव सम्भावितस्वेप्सितचुम्बनालम्बनादिकं भवति भक्तिपात्राणामिति भामिन्य एवं काञ्चनलीलामलालयन्निति मूलतात्पर्यं ज्ञेयम् ॥ ६ ॥ दशपुत्राणां कृष्णस्त्रीणां षोडशसहस्राष्टोत्तरशतशङ्ख्यानां तासां मध्ये याः पुरा मायास्यां प्रत्युदिता अष्टौ महिष्यो रुक्मिण्याद्यास्तत्पुत्रान्प्रद्युम्नादींस्तान्गृणन्ति तानिव गृणन्ति । अन्ये सदृशा न सन्त एतत्सदृशा इति तथा गृणन्तीति वा जानातीति शेषः ॥ ७ ॥ गृणन्तु ते भवतु तन्नामायगमस्तेषां मम किमन्यस्योदरशूलामूलिकाद्यदनमन्यस्येति वद्वद स्वामिन्नित्यावसरमवितरन्मुनिस्तदभिधा अभिधत्ते । प्रद्युम्नः पूर्वं प्रद्युम्नादीनित्यनेनाम्नात इति पुरस्कृतश्चारुदेष्ण इति ज्ञेयम् । वीर्यवानित्यादावीर्यमाणानां च विशेषणम् । अपरे इति योग्यान्वयि ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं तासां दोषं तत्सम्बन्धेन भगवति दोषाभावं च प्रतिपाद्य, भगवत्सामर्थ्येनैव तासु धर्मः स्थापित इति पुत्रोत्पादनमुक्त्वा, 'पतिमेकादशं कृधी'ति वेदवाक्यानुसारेण भगवत्सेवां कृतवत्य इत्याह **द्वाभ्याम्** । इत्थमिति । पूर्वमेतच्छ्लोकद्वयं व्याख्यातम् । विवाहप्रसङ्गे उक्तमपि पुनः स्वस्थाने तदेवोक्तवान् । तस्मात्सर्वोऽप्यर्थः स एव । भ्रमव्यावृत्त्यर्थं पाठविशेषमाह **लालसाढ्यमिति** । पूर्वमनुरागादयः स्त्रीनिष्ठाः, इदानीं भगवन्निष्ठाः । अनुरागपूर्वको हासो मानसः, अवलोक ऐन्द्रियः, नवसङ्गमः कायिकः ; त्रिभिरपि या लालसा तदिच्छाविशेषः तया आढ्यो भगवान् । स्त्रीनिष्ठानेतान् धर्मान् स्वस्मिन् भावयतीति भगवन्निष्ठा धर्माः । प्रत्युद्गमादिभिः दास्यं च विदधुः । सेवा तदपेक्षिता कामकृता, दास्यं साधारणमिति विशेषः । स्त्रीत्वं भक्तत्वं च देहमन्तःकरणं च कृतार्थीकृतवत्य इत्यर्थः ॥ ६ ॥ विधिप्राधान्यात् विधिसिद्धानामष्टमहिषीणां पुत्रान् गणयितुमारभते । येन भगवान् धर्मरक्षार्थमेतावद्रूपो जात इति तन्नामग्रहणे राज्ञः पापक्षयो भवतीति, तदर्थं प्रसिद्धान्यपि नामानि निरूपयति । **तासां** कृष्णस्त्रीणां दशपुत्राणाम् । सर्वा एव दशपुत्रयुक्ताः । तासां मध्ये याः पूर्वमुक्ता अष्टौ महिष्यः रुक्मिणीप्रभृतयः तत्पुत्रान् प्रद्युम्नादीन्, ते त्वद्धितार्थं गृणामि । अन्याः कामकृता इति न तेषां नामग्रहणम् ॥ ७ ॥ **चारुदेष्णा**दयो नव प्रद्युम्नानन्तरभाविनः । यथा नामावयवास्तद्गुणाः । **वीर्यवा**निति विशेषणं सुन्दरदेहस्य शौर्यशङ्काभावेनोक्तम् । चकाराः सर्वत्र पूर्वधर्मसमुच्चयार्थाः । अन्तिमः कन्यासमुच्चयार्थः । अन्येऽपि कन्यासमुच्चयार्था इति केचित् । यदनन्तरं कन्या, तत्र चकार इति । **तथे**ति वीर्यवान् । तेन सह वीर्यवत्त्वमाशङ्क्य पृथगुपदिशति **अपर** इति । परः सर्वेभ्यः श्रेष्ठो वा ॥ ८ ॥

श्रीसुबोधिनी–सारः

"उक्तानां पुनरावृत्तिः सौंदर्यार्थं प्रसंगतः ॥ व्याख्यातानां पुनर्व्याख्या शीघ्रमर्थावबोधनात् १ अब्रवीदग्रतो वाक्यमुवाचेति प्रदृश्यते ॥ प्रायः पुराणशैलीयं संख्यापूर्त्यर्थमेव हि २" इत्थमिति द्वौ श्लोकौ अनंतरोक्तार्थौ अतो न पुनर्विव्रियेते ॥ ५–६ ॥ दश दश पुत्रा यासां तासां कृष्णस्त्रीणां मध्ये या अष्टौ महिष्यः पट्टराज्ञ्यः पुरा विवाहप्रस्तावे उदितास्तासां पुत्रान्प्रद्युम्नादीन् ते तुभ्यं गृणामि ब्रवीमि ॥ ७ ॥ चारुदेष्णादयो नव प्रद्युम्नः प्रमुखो प्रमुख्यो ज्येष्ठो वा येषां ते दश पितुःनावमाः तुल्या रुक्मिण्यां जाताः ॥ ८–९ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतच्छ्लोकद्वयं प्रसङ्गात् विवाहप्रकरणे उक्तमपि पुनस्तदेव तासां भक्त्युद्रेकं सूचयन्नाह—इत्थमिति । ब्रह्मादयो यदीयां पदवीं यत्प्राप्तिमार्गमपि न विदुस्तमित्थंभूतं रमापतिं विष्णुं ताः स्त्रियः पतिमवाप्य अविरतं निरन्तरमेधितया वर्धितया मुदा हर्षेण अनुरागेण हासोऽवलोकश्च नवसङ्गमे नित्यं नवीनतया प्रतीयमाने तत्सङ्गमे लालसं औत्सुक्यं च ते आद्या यस्य विभ्रमकदम्बस्य तं भेजुः चक्रुरित्यन्वयः ॥ ५ ॥ तासां सेवां दर्शयति—प्रत्युद्गमेति । दासीनां शतानि विद्यन्ते यासां तथाभूता अपि ताः स्त्रियः स्वयमेव विभोर्महत्तमस्य कृष्णस्य प्रत्युद्गमादिभिः दास्यं विदधुरित्यन्वयः । प्रत्युद्गमः आगच्छन्तं दृष्ट्वा तदग्रतो गमनम्, आसनं आसनदानम्, वरार्हणं अर्घ्यदानादिसत्कारः, पादयोः शौचं प्रक्षालनम्, ताम्बूलसमर्पणम्, विश्रमणं पादसंवाहनादिना श्रमापहरणम्, व्यजनादिभिर्वीजनम्, गन्धस्य चन्दनादेः समर्पणम्, माल्यानां पुष्पाणां समर्पणम्, केशानां प्रसाधनम्, शयनं शय्याया आस्तरणम्, स्नपनम्, उपहार्या भक्ष्यभोज्यादयस्तैः ॥ ६ ॥ एवं प्रासङ्गिकमुक्त्वा प्रस्तुतमाह—तासामिति । दश दश पुत्रा यासां तासां कृष्णस्त्रीणां मध्ये या अष्टौ रुक्मिण्यादयो महिष्यः पुरोदिताः पूर्वं कथितास्तासां पुत्रान् प्रद्युम्नादीन् ते तुभ्यं गृणामि कथयामीत्यन्वयः ॥ ७ ॥ प्रद्युम्नः प्रमुखः आदिर्येषामिति तद्गुणसंविज्ञानो बहुव्रीहिः । ते दश पितुर्हरेरनवमाः सौन्दर्यादिगुणैस्तुल्या रुक्मिण्यां पुत्रा जाताः । प्रद्युम्नव्यतिरिक्तान्नव पुत्रान्निर्दिशति—चारुदेष्ण इति ॥८–९॥

अन्वितार्थप्रकाशिका

इत्थमिति ॥ ब्रह्मादयोऽपि यदीयां पदवीं यत्प्राप्तिमार्गमपि न विदुस्तमित्थंभूतं रमापतिं विष्णुं पतिमवाप्य ताः स्त्रियः अविरतं निरन्तरमेधितया वर्धितया मुदा हर्षेण अनुरागेण हासोऽवलोकश्च नवसङ्गमे नित्यं नवीनतया प्रतीयमाने

तत्सङ्गमे लालसा औत्सुक्यं च ते आद्या यस्य विभ्रमकदम्बस्य तं भेजुः चक्रुः। अनुरागहासावलोकनवसङ्गमलालसाद्यं भेजुः। तथापि तस्य मनो विजेतुं न शेकुरिति वा ॥ ५ ॥ प्रत्युद्गमेति ॥ दासीनां शतानि विद्यन्ते यासां तथाभूता अपि ताः स्त्रियः स्वयमेव विभोः कृष्णस्य प्रत्युद्गमादिभिः दास्यं विदधुरित्यन्वयः। प्रत्युद्गमः आगच्छन्तं दृष्ट्वा तदग्रतो गमनम्। आसनं आसनदानं वरार्हणम् अर्घ्यदानादिसत्कारः पादयोः शौचं प्रक्षालनं ताम्बूलसमर्पणं विश्रमणं पादसंवाहनादिना श्रमापहरणं व्यजनादिभिर्वीजनं गन्धस्य चन्दनादेः समर्पणं माल्यानां पुष्पाणां समर्पणं केशानां प्रसारः प्रसाधनं शयनं शय्याया आस्तरणं स्नपनम् उपहार्या भक्ष्यभोज्यादयस्तैः अत्र प्रौढभावेऽपि नवसङ्गमाद्यभिधानमगतसारत्वेनौत्सुक्येन च तथा प्रतीतेः तेषामेव श्लोकानां प्रस्तावान्तरे पुनः पुनरावृत्तिरतिसौन्दर्यात् ॥ ६ ॥ प्रस्तुतमनुसरति—तासामिति ॥ दश दश पुत्रा यासां तासां कृष्णस्त्रीणां मध्ये या अष्टौ रुक्मिण्यादयो महिष्यः पुरोदिताः पूर्वं कथितास्तासामेव पुत्रान् प्रद्युम्नादीन् ते तुभ्यं गृणामि कथयामि। विस्तरभयादिति भावः ॥ ७ ॥ चारुदेष्ण इत्यादयः प्रायो निगदव्याख्याताः ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इत्थमिति अविरतं निरंतरं एधितया वर्द्धितया मुदा ताः स्त्रियः अनुरागेण हासोऽवलोकश्च नवसंगमे नवीनसमागमे लालसोत्कंठा चैते आद्या यस्मिन् कर्मणि यथा स्यात्तथा तं भेजुः यद्वा। अनुरागहासावलोकनवसंगमलालसात् यं भेजुः। अतस्ताद्यन्या इति भावः ॥ ५ ॥ पुनः पूर्वप्रसंगमाह प्रत्युद्गमेति। प्रत्युद्गमादिभिस्तस्य विभोः स्वयं दास्यं विदधुः ॥ ६ ॥ दशपुत्राणां एकैकशो दश दश पुत्राः संति यासां तासां मध्ये अष्टौ महिष्यः याः याः पुरोदिता अभूवन् तासां पुत्रान् ते तुभ्यं गृणामि कथयामि ॥ ७-८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमिति ॥ किं तु यदीयां पदवीं याथात्म्यं, ब्रह्मादयः अपि, न विदुः। तमित्थंभूतं रमापतिं श्रियः पतिं, ताः स्त्रियः, पतिं अवाप्य, अविरतं यथा तथा, एधितया वर्द्धितया, मुदा, अनुरागेण हासोऽवलोकश्च नवसंगमे लालसमौत्सुक्यं च ते आद्या यस्मिन् कर्मणि यथा स्यात्तथा, भेजुः। यद्वा, अनुरागहासावलोकनवसंगमलालसात्, यं भेजुः, तस्य मनः विजेतुं, न शेकुरिति॥५॥ प्रत्युद्गमेति ॥ प्रत्युद्गमश्च आसनं च वरार्हणं च पादशौचं च ताम्बूलानि च विश्रमणं च वीजनं च गन्धश्च माल्यानि च तैः, केशप्रसाधश्च शयनं च स्नपनं च उपहार्यमुपहारार्पणं च तैः, दासीशताः अपि, ताः विभोः दास्यं, विदधुः स्म। एतेषामेव श्लोकानां प्रस्तावान्तरे पुनरावृत्तिरतिसौन्दर्यात् ॥ ६ ॥ प्रासङ्गिकमुक्त्वा प्रस्तुतमाह ॥ तासामिति। दश दशसंख्याकाः पुत्रा यासां तासां, तासां ब्रह्माष्टावक्रादिकथितदत्ततपोवराभ्यां, श्रीकृष्णपतिमुपलब्धानां, कृष्णस्त्रीणां श्रीकृष्णपत्नीनां मध्ये, याः अष्टौ रुक्मिण्यादयः महिष्यः, पुरा पूर्वं उदिताः कथिताः, तत्पुत्रान् तासां सुतान्, प्रद्युम्नादीन्, ते तुभ्यं, गृणामि कथयामि ॥ ७ ॥ चारुदेष्ण इति ॥ चारुदेष्णः, सुदेष्णः, चारुदेहः, वीर्यवांश्च वीर्यवानिति चारुदेहविशेषणं न तु सुतान्तरसंज्ञा। सुचारुः, चारुगुप्तश्च, तथा अपरः भद्रचारुः ॥ ८ ॥

कृष्णप्रिया

राजन्! ब्रह्मादि समर्थ देवाधिदेव भी भगवत्प्राप्ति के उपायों को नहीं जानते हैं एवं नाथ के नैसर्गिक स्वरूप को भी नहीं जानते। उन ही रमापति भगवान् श्रीद्वारिकानाथजी को उन रानियों ने, राजकुमारियों ने निज सौभाग्यनाथ के स्वरूप में प्राप्त किया। षुनः नित्य निरन्तर उन स्त्रियों के स्नेह और रस की पुष्टि होती रहती थी। वे राजकुमारियाँ स्नेहमय स्मितहास्य, रसमय अवलोकन, नवसङ्गम लालसा आदि से श्यामसुन्दर भगवान की सेवा में लगी रहती थी ॥ ५ ॥ इन रानियों के साथ अनन्त दासियों के रहने पर भी भगवान् जब महल में बाहर से पधारते तब सब रानियाँ सन्मुख होकर स्नेह सद्भाव से भगवान् को ले आती, अच्छे आसनों पर बैठाती, श्रेष्ठ सामग्रियों से स्वामी की अर्चना करती, चरण सरोज का प्रक्षालन करती, ताम्बूल बीडी अरोगावती, चरण सेवा कर श्रम को दूर करती, चँवर ढोलती, इत्र सुगन्ध, तैल गन्ध लगाती, वन माला माला पहनाती, केश सँवारती, सुलाती, अभ्यङ्ग कराती विविध प्रकार की सामग्रियाँ सिद्ध कर प्रियतम को प्रसाद लिवाती सतत सेवा में लगी रहती थी ॥ ६ ॥ राजन्! आगे यह बात कही है कि भगवान् श्रीकृष्णचन्द्रजी की प्रत्येक पत्नी के दस-दस पुत्र थे। इन षोड़श सहस्र रानियों में अष्ट पटरानियाँ थी उनकी व्याहगाथा आपने सुनी है। पुनः उनके प्रद्युम्न आदि पुत्रों का वर्णन सुनिये ॥ ७ ॥ महाराज! श्रीरुक्मिणीजी महाराजजी की कुक्षि से प्रद्युम्न आदि दस पुत्र हुए जो भगवान् श्रीकृष्ण के तुल्य किसी भी क्षेत्र में कम नहीं थे ॥ ८ ॥

चारुचन्द्रो [1]विचारुश्च चारुश्च[2] दशमो हरेः । प्रद्युम्नप्रमुखा जाता रुक्मिण्यां [3]नावमाः पितुः ॥ ९ ॥
भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा । चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः ॥ १० ॥
श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश । साम्बः सुमित्रः पुरुजिच्छतजिच्च सहस्रजित् ॥ ११ ॥
विजयश्चित्रकेतुश्च [4]वसुमान् [5]द्रविडः क्रतुः । जाम्बवत्याः सुता ह्येते साम्बाद्याः पितृसंमताः[6] ॥ १२ ॥
[7]वीरश्चन्द्रोऽश्वसेनश्च चित्रगुर्वेगवान् वृषः । आमः शङ्कुर्वसुः श्रीमान् [8]कुन्तिर्नाग्नजितेः सुताः ॥ १३ ॥
श्रुतः कविर्वृषो वीरः सुबाहुर्भद्र एकलः । शान्तिर्दर्शः पूर्णमासः कालिन्द्याः सोमकोऽवरः ॥ १४ ॥
[9]सुघोषो गात्रवान्सिंहो [10]बलः प्रबल ऊर्ध्वगः । माद्र्याः [11]पुत्रा महाशक्तिः सह ओजोऽपराजितः ॥ १५ ॥
[12]वृको हर्षोऽनिलो गृध्रो [13]वर्धनोऽन्नाद एव च । [14]महाशः पावनो वह्निर्मित्रविन्दात्मजाः [15]क्षुधिः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—चारुचन्द्रः, च, विचारुः, च, चारुः, हरेः, दशमः, इति प्रद्युम्नप्रमुखाः, रुक्मिण्याम्, पितुः, नावमाः, जाताः ॥ ९ ॥ भानुः, सुभानुः, स्वर्भानुः, प्रभानुः, तथा, भानुमान्, चन्द्रभानुः, बृहद्भानुः, तथा, अष्टमः, अतिभानुः, श्रीभानुः, प्रतिभानुः, इति, दश, सत्यभामात्मजाः । साम्बः, सुमित्रः, पुरुजित्, शतजित्, च, सहस्रजित्, विजयः, चित्रकेतुः, च, वसुमान्, द्रविडः, क्रतुः, पितृसंमताः, एते, साम्बाद्याः, हि, जाम्बवत्याः, सुताः ॥ १०-१२ ॥ वीरः, चन्द्रः, अश्वसेन, च, चित्रगुः, वेगवान्, वृषः, आमः, शकुः, वसुः, श्रीमान् कुन्तिः, नाग्नजितेः, सुताः ॥ १३ ॥ श्रुत, कविः, वृषः, वीरः, सुबाहुः, भद्रः, एकलः, शान्तिः, दर्शः, पूर्णमासः, अवरः, सोमकः, कालिन्द्याः, सुताः ॥ १४ ॥ प्रबोधः, गात्रवान्, सिंहः, बलः प्रबलः, ऊर्ध्वगः, महाशक्तिः, सहः, ओजः, अपराजितः, मद्रराजपुत्र्याः माद्र्याः, दश-पुत्राः ॥ १५ ॥ वृकः, हर्षः, अनिलः, गृध्रः, वर्धनः, च, अन्नादः, महाशः, एव, पावनः, वह्निः क्षुधिः मित्रविन्दात्मजः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीमानिति वसोः कुन्तेर्वा विशेषणम् ॥ १३ ॥ भद्रो नाम एकल एकः । सोमकोऽवरः कनीयान् । एते कालिंद्याः सुता इति ॥ १४ ॥ माद्र्या लक्ष्मणायाः ॥ १५ ॥ क्षुधिश्च दशमः । एते मित्रविंदात्मजाः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्वर्भानुः स्वर्गेऽपि यस्य दीप्तिर्यश इत्यर्थः ॥ १० ॥ पुरुजिदसंख्यजयी ॥ ११-१२ ॥ वेगवानिति नामैव । अमात्रोगान् हिनस्तीत्यामश्चिकित्साविज्ञः तद्धितप्रत्ययानां सर्वार्थे विधानाद्धिसायामत्राण् ॥ १३ ॥ वृषपदावृत्तिस्तु प्रवृत्तिनिमित्तभेदात्, पूर्वं वृषपदं धर्मवत्परमिह तु वदान्यपरम् "वृषो धर्मे बलीवर्दे राश्याखुशुक्रलेषु च । श्रेष्ठे स्यादुत्तरस्थोयं व्यासेऽपि परिकीर्तितः ॥" इति मेदिनी । वीर इति वृषविशेषणं, सर्वेषां वा । स्वामिना त्वेकल इति भद्रविशेषणं कृत्वा वीर इति नामांतरमेवोक्तम् । पूर्वं वीरपदं शूरपरमिह तु वीराः संत्यस्येति वीरो मत्वर्थीयाच् । 'अवरश्चरमे त्रिषु' इति धरणिः इह ज्यैष्ठ्यानुजभावस्तूद्देशक्रमत एव ज्ञेयः ॥ १४ ॥ सहओज इत्यत्र विनि लोपः 'गम्यमानस्याप्रयोग एव लोपः' इति कैयटः ॥ १५ ॥ महानाशो भोजनं यस्य स तथा । वैयधिकरण्ये पूर्वपदस्याकार आर्षत्वादेव । महं तेजोऽश्रुत इति वा 'महश्च महसा सह' इति द्विरूपकोशात् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

चार्विति युग्मकम् । वीर्य्यवानिति सर्वेषां विशेषणम् अतस्तत्समुच्चयार्थं प्रायः सर्वत्रैव चशब्दः तथेति च परश्चारुगुप्तस्यानुज इत्यर्थः । एवमग्रजानुजक्रमेण सर्वे ज्ञातव्या इति भावः । दशम इत्येकादशाभावं दृढयति एवं सर्वमग्रेपि ज्ञेयं हरेरिति सर्वमनोहरस्य तस्य पुत्रा अपि तादृशाः "यथाबीजं तथाङ्कुरम्" इति न्यायेनेति भावः । अनेनैवाभिप्रायेण सर्वत्र चारुशब्दः अत एव पितुर्नावमा न्यूना न भवन्ति पूर्वोक्तस्याप्यस्य पुनरुक्तिस्तद्दार्ढ्यार्थम् अतोग्रेपि सर्वत्रेदमनुवर्त्यम् ॥ ९ ॥ भानुरिति सार्द्धकम् । अष्टम इति पर इतिवत् भानुशब्दश्चारुशब्दवत् ज्येष्ठाया जाम्बवत्याः प्राक् सत्यभामायाः पुत्राणामुक्तिः प्रेमाधिक्येन तस्याः

---

१. ऽति-वीर. विज. । २. मान्-विज. । ३. सदृशाः-विज. ; नवमाः-च. पु. टि. । ४. कीर्तिमान्-च. पु. टि. । ५. द्रविणः-वीर. विज. । ६. संनिभाः-वीर. ; वत्सलाः-प्रा. पा. । ७. चारुचन्द्रोऽग्रसेनश्च-प्रा. पा., भानुश्च-वीर. विज. ८. दृति-वीर.; कृति-विज. । ९. प्रजस्वो-वीर., प्रघोषो-श्रीधर. वशी. जीव. वीर. विज. । १०. सिद्धो-विज. । ११. सुताः-प्रा. पा. । १२. ह्यर्को-वीर.; ऽहंकोऽनिलो नीलो-विज. । १३. बह्वन्नो-वीर. विज. । १४. महाशापोऽवनो-विज.; महीशः-श्रीधर. टि. । १५. सुधीः-च. पु. टि.; कृतिः-विज. ।

श्रैष्ठ्यात् एवमग्रेपि ज्ञेयम् ॥ १० ॥ साम्ब इति च सार्द्धकम्। द्रविणो द्रविड़श्चेति पाठद्वयं हि एव पित्रा सम्मताः न्यायादनपेतत्वेन निश्चिताः एवं साम्बपुराणादौ साम्बवृजिनस्य नारदकल्पितत्वेनैव प्रसिद्धत्वात् तत्र श्रीभगवतोपि लोकशिक्षाभिप्रायेणैव तदिच्छत्वात् यथा मुसलशापादावपीति भावः ॥ ११–१२ ॥ श्रीमानिति सर्वेषामेव वा विशेषणम् ॥ १३ ॥ भ्रातॄणामपि मध्ये द्वयोर्वृष इत्येकनामत्वं केनचिदपरिहार्य्येण कारणेन भवेत् व्यवहारस्तु मात्रादिनामविशेषणेन सिद्ध्यतीति ज्ञेयम् एवमग्रे वीरोपि तद्वच्छूरबलावपि ॥ १४ ॥ सह ओजसी सकारान्ते मूर्त्तं सह एवार्यमित्याद्यभिप्रायेण पुत्राः सुताः इति पाठद्वयम् ॥ १५ ॥ महांश इत्यत्र महासिः क्वचित् वह्वुश्च इत्यत्र वर्द्धनः क्वचित् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दशम इत्येकादशाभावं द्रढ़यति। एवं सर्वमग्रेऽन्यत्रापि ज्ञेयम्। हरेरिति मनोहरस्य तस्य पुत्रा अपि तादृशा इति भावः। अनेनैवाभिप्रायेण सर्वत्र चारु–शब्दः, अत एव पितृर्नावमा न्यूना न भवन्ति, पूर्वोक्तस्याप्यस्य पुनरुक्तिस्तद्दार्ढ्यार्थम्। अतोऽग्रेऽपि सर्वत्रेदमनुवर्त्यम् ॥ ९ ॥ अष्टम इति पर इतिवत्, विशेषतश्च दीप्त्या चारुदेष्णादिभ्योऽप्याधिक्यं बोधयति, ज्येष्ठायाः श्रीजाम्बवत्याः प्राक् श्रीसत्यभामायाः पुत्राणामुक्तिः प्रौढ़तया प्राक् तत्पुत्रोत्पत्तेः, किंवा प्रेमाधिक्येन तस्याः श्रैष्ठ्यात्। एवमग्रेऽपि ज्ञेयम्। हि एव, पिता वत्सलो येषु ते, पितुरत्यन्तस्नेहविषया एवेत्यर्थः। इति कुत्रापि कथ्यमानः श्रीसाम्बापराधो निरस्तः, वस्तुतो लोकशिक्षार्थमेव तस्य कारितत्वेन मायिकत्वादिति दिक् ॥ १२ ॥ श्रीमानिति तैर्व्याख्यातम्। यद्वा, श्रीसत्यभामात्मजानां भानुनामत्वात् श्रीमानेको भानुश्चन्द्रश्चैको ज्ञेयः, हरिश्चन्द्रादिवत् संज्ञायां सुडागमः, असकारपाठो वा ॥ १३ ॥ एकल एकः, न तु भद्र इति सर्वेषां विशेषणमित्यर्थः ॥ १४ ॥ सहादयस्त्रयोऽप्यकारान्ताः, यद्वा, सह ओजसो सान्तौ, अपराजित् तकारान्तः द्वन्द्वसमासः, संज्ञापेक्षया तन्नाम्नोः पुंस्त्वम्, किंवा मूर्त्तं सह एव ओज एवेत्यभिप्रायेण नपुंसकत्वम् ॥ १५ ॥ एव अपि, अन्नादोऽपि, महांसश्च, वर्द्धनादिसंज्ञाया साम्येन, महाश इति पाठश्च क्वचित्, शैव्यानामपि सैवेति टीकास्यास्ति, मित्रविन्दात्मजा इत्यस्यानन्तरं लेख्याया अपि लेखकभ्रमेणैव ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अथ सत्यभामासुतानाह—भानुरिति। भान्वादयो दश सत्यभामायाः सुता इत्यन्वयः। जाम्बवतीसुतानाह—साम्ब इति। एते साम्बादयः पितृतुल्याः जाम्बवत्याः सुताः ॥ १०–१२ ॥ नाग्नजितीसुतानाह—भानुरिति। श्रीमानिति वसोर्धृतेर्वा विशेषणम् ॥ १३ ॥ कालिन्द्याः सुतानाह—श्रुतिरिति। भद्रस्यैवैकल इति नामान्तरं सोमकोऽवरस्तेषां सर्वेषां कनीयान् एते दश कालिन्द्याः सुता इति शेषः ॥ १४ ॥ अथ लक्ष्मणायाः सुतानाह—प्रजङ्घ इति। माद्र्याः लक्ष्मणायाः सुताः प्रजङ्घादय इत्यन्वयः ॥ १५ ॥ मित्रविन्दायास्सुतानाह—वृक इति। क्षुधिर्दशमः एते मित्रविन्दात्मजाः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

चन्द्रस्य स्वर्भानू राहुरिव अपरः लोकस्य भानुः सूर्य इव स्वः स्वर्गपुरे स्थितः ॥१०–१२॥ नाग्नजितेः नग्नजित्पुत्र्या नीलायाः ॥ १३ ॥ वृषविशेषणं वीर इति अपरः सोमतोपि कालिन्द्याः सुतः ॥ १४ ॥ माद्र्याः लक्ष्मणायाः ॥ १५–१७ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

साम्बाद्याः पितृसम्मताः ॥ ११–४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकषष्टितमोऽध्यायः ॥ ६१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भद्रोनाम एकलः एकः सोमको ऽवरः कनिष्ठः ॥ १४ ॥ माद्र्याः लक्ष्मणायाः ॥ १५–१७ ॥

गूढार्थदीपिनी

पितुः नावमा अन्यूनाः। नैकधावत्समासः ॥ ९–१२ ॥ देहलीदीपकन्यायेन श्रीमानिति उभयोर्विशेषणम् ॥ १३ ॥ भद्रविशेषणम् एकलः इति एक एव शत्रून् लाति। अवरः कनिष्ठः सोमकः ॥ १४ ॥ माद्र्याः लक्ष्मणायाः। अपराजितो दशमः। सह ओज, इत्यत्र विनिलोपः गम्यमानस्याप्रयोग एव लोप इति कैयटः ॥ १५ ॥ क्षुधिश्च दशमः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

श्रीमानिति कुन्तेर्विशेषणम् ॥ १३ ॥ एकलः एकः शान्तिगुणयुक्तत्वान्मुख्यः इति शान्तेर्विशेषणम् ॥ १४ ॥ माद्र्याः लक्ष्मणायाः ॥ १५–१६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दशमः प्रद्युम्नेन सह हरेः सकाशाद्रुक्मिण्याः प्रद्युम्नप्रमुखा जाताः। यद्वा रुक्मिण्या न वमा इति छेदः। वमा अवमा इत्यर्थः। न समासो वा। षष्टिभागुरिरित्यादेः ॥ ९ ॥ मान्त्राद्या दश सत्यभामात्मजाः ॥ १० ॥ पितृसम्मताः साम्बाद्या दशजाम्बवत्याः सुताः ॥ ११-१२ ॥ श्रीमानिति शब्दो यथायथं योजनयोग्यः। श्रीमान्। नाग्नजितेर्नीलायाः ॥ १३ ॥ वीर इत्यपि तथाऽपरः कनिष्ठः सोमकः कालिन्द्याः सुताः ॥१४॥ महाशक्तिरपि तथा सुघोषाद्यपराजितान्ता माद्र्यालक्षणायाः ॥१५॥ वृकादिकृत्यन्ता मित्रविन्दात्मजाः ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

दशम इति क्रमोऽत्र विवक्षित इत्युक्तम्। हरेः सकाशात् प्रद्युम्न एव प्रमुखो येषाम्। रुक्मिण्या जाताः। करणमात्रं रुक्मिणी, नत्वेते मातृपुत्रा इति। तत्र हेतुः यतः **पितुरनवमाः**। **अवमो** न्यूनभावः ॥ ९ ॥ भानुप्रभृतयो दश सत्यभामायाः। तथेति यस्य कर्माणि न प्रसिद्धानि, सोऽपि प्रसिद्धवदेव ज्ञातव्य इति तथेत्युच्यते क्वचित्। **अष्टम** इति तस्य स्वतन्त्रता महत्त्वं च। सङ्ख्यायां पृथगुपदेशात्। **सत्यभामात्मजा** इति परिज्ञानार्थमेव मातृनिरूपणम्। सर्वेषां पुत्राणां सर्वासु मातृव्यवहारस्तुल्य इति ॥ १०½ ॥ साम्बादयो दश जाम्बवत्याः सुताः। एते इति तेषां देवतात्वात् निरूपणसमये उपस्थितिमाह। **पुनः साम्बाद्या** इति वचनं दशानां द्विःस्वभावत्वं द्योतयति। ततो भगवतोऽसम्मतिमाशङ्क्य पितृसम्मतिमाह **पितृसम्मता** इति ॥ ११-१२ ॥ श्रीमानिति विशेषणं। नाग्नजितेः सत्यायाः पुत्राः। श्रुतादयो दश कालिन्द्याः। **एकल** इति विशेषणं एक एव सन् सर्वान् शत्रून् लातीति। सोमकस्त्ववरो दशमः। सङ्ख्यापूरणार्थं पश्चादुत्पन्नः। सुघोषादयः माद्र्याः लक्ष्मणायाः पुत्राः। **ऊर्ध्वग** इति नाम। **महाशक्तिरेकः**। सहो भिन्नः। ओजश्च। **अपराजित** इति नाम ॥ १४-१५ ॥ वृकादयो दश मित्रविन्दायाः। महाश इति नाम। क्षुधिर्दशमः सङ्ख्यापूरकः ॥ १६ ॥

श्रीसुबोधिनी-सारः

भान्वादयो दश सत्यभामाया आत्मजाः ॥ १० ॥ सांबादयो दश पितुः श्रीकृष्णस्य संमता एते जांबवत्याः सुताः ॥ ११-१२ ॥ वीराद्या दश नाग्नजितेः सुताः ॥ १३ ॥ श्रुतादयो दश तत्र भद्र एकः सोमकोऽवरः कनिष्ठः कालिंद्याः सुता ॥१४॥ प्रघोषादयो दश माद्र्या लक्ष्मणायाः पुत्राः ॥ १५ ॥ वृकादयः क्षुध्यंता दश मित्रविंदाया आत्मजाः पुत्राः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ सत्यभामासुतानाह—भानुरिति। भान्वादयो दश सत्यभामात्मजा इत्यन्वयः ॥ १०-११ ॥ साम्बाद्याः क्रत्वन्ता हि प्रसिद्धा एते जाम्बवत्याः सुताः ॥ १२ ॥ वीरादयः कुन्त्यन्ता दश नाग्नजितेः सुताः। 'श्रीमान्' इति वसोः कुन्तेर्वा विशेषणम् ॥ १३ ॥ श्रुतादयः सोमकान्ता दश कालिन्द्याः सुताः। एक एव शत्रून् लातीति एकल इति भद्रविशेषणम्। अवरः कनीयान् इति सोमकविशेषणम् ॥ १४ ॥ प्रघोषादयोऽपराजितान्ता दश माद्र्या लक्ष्मणायाः सुताः ॥ १५ ॥ वृकादयः क्षुध्यन्ता दश मित्रविन्दात्मजाः। वृकः उदर्कः सन्धिरार्षः ॥ १६ ॥

अन्वितार्थप्रकाशिका

पितुर्नावमा अन्यूनाः अत्र दशम इत्युक्तिः "दशास्याः पुत्रानाधेही"ति श्रुत्युक्तसंख्यादरः। हरेरिति मनोहरत्वं तेन पुत्राणां तादृशत्वम्। अत्र सर्वत्र चारुपदम्। एवमग्रे भानुपदमपि ॥ ९-१२ ॥ श्रीमानिति वसोः कुन्तेर्वा विशेषणम्। नाग्निजितौ कालिन्दी पुत्रयोः वृष इत्येकनामत्वं केनाचिदपरिहार्यनिमित्तेन। व्यवहारस्तु मात्रादिनामविशेषणेन। एवं वीरादावपि ॥ १३ ॥ एक एव शत्रून् लातीति एकल इति भद्रविशेषणम्। अवरः कनीयान् इति सोमकविशेषणम्। कालिन्द्याः सुताः ॥ १४ ॥ माद्र्या लक्ष्मणायाः ॥ १५ ॥ वृक उदर्कः सन्धिरार्षः। क्षुधिश्च दशम एते मित्रविन्दात्मजाः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पितुः कृष्णात् अवमाः न्यूनाः न संति ॥ ९-१२ ॥ श्रीमानिति वसोः कुंतेर्वा विशेषणं ॥ १३ ॥ भद्राभिधः एकलः एकः सोमकः अवरः कनिष्ठः एते कालिंद्याः पुत्राः ॥ १४ ॥ माद्र्याः लक्ष्मणायाः ॥ १५ ॥ क्षुधिसंज्ञः अंतिमः इमे मित्रविंदायाः पुत्राः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चारुचन्द्र इति ॥ चारुचन्द्रः विचारुश्च, दशमः चारुश्च। एते प्रद्युम्नप्रमुखाः तद्गुणसंविज्ञानोऽत्र बहुव्रीहिः। पितुः न अवमाः नावमाः पुत्रा इति शेषः। हरेः सकाशात्, रुक्मिण्यां जाताः। इति द्वयोरेकान्वयः ॥ ९ ॥ अथ सत्यभामासुतानाह

सार्द्धेन ।। भानुरिति ।। भानुः, सुभानुः, स्वर्भानुः, प्रभानुः, तथा भानुमान्, चन्द्रभानुः, बृहद्भानुः, तथा अष्टमः रतिभानुः, श्रीभानुः प्रतिभानुश्च, एते दश सत्यभामात्मजाः ।।१०।। जाम्बवतीसुतानाह सार्द्धेन ।। साम्ब इति । साम्बः सुमित्रः पुरुजित्, सहस्रजिच्च विजयः, चित्रकेतुः, वसुमान्, द्रविडः, क्रतुश्च, पितृसंमताः पितृतुल्याः साम्बाद्याः, एते जाम्बवत्याः सुताः, हि ।। ११ ।। नाग्नजितीसुतानाह ।। वीर इति ।। वीरः, चन्द्रः, अश्वसेनः, चित्रगुः, वेगवान्, वृषः, आमः, शङ्कुः, श्रीमान्, वसुः, कुन्तिश्च । श्रीमानिति वसोः कुन्तेर्वा विशेषणम् । एते नाग्नजितेः सुताः ।। १२ ।। कालिन्दी सुतानाह ।। श्रुत इति ।। श्रुतः, कविः, वृषः, वीरः, सुबाहुः, भद्रः, एः स्मृतेः कं सुखं लाति गृह्णातीत्येकलः अनुभूतार्थाखण्डस्मृतिमान् । शान्तिः एकल इति भद्रस्य शान्तेर्वा विशेषणम् । 'ए स्मृतावप्यसूयानुकम्पामन्त्रणहूतिषु' इति मेदिनी । दर्शः, पौर्णमासः, अवरः कनिष्ठः, सोमकः । एते कालिन्द्याः सुता इति शेषः ।। १३ ।। अथ लक्ष्मणायाः सुतानह ।। प्रघोष इति ।। प्रघोषः, गात्रवान्, सिंहः, बलः, प्रबलः ऊर्ध्वगः, महाशक्तिः, सहः, ओजः, अपराजितः । एते माद्रया लक्ष्मणायाः पुत्राः ।।१४।। अथ मित्रविन्दात्मजानाह ।। वृक इति ।। वृकः, हर्षः, अत्र केचिदर्क इति केचिदर्हक इति बहुधा पठन्ति । अनिलः, गृध्रः, वर्द्धनः, नादः, अन्नाद इत्यपि पठन्ति । महाशः, पावनः, वह्निः क्षुधिश्च । एते मित्रविन्दायाः आत्मजाः एव ।। १५ ।। अथ भद्रायाः सुतानाह ।। संग्रामजिदिति ।। संग्रामजित्, बृहत्सेनः, शूरः, प्रहरणः, अरिजित्, जयः, सुभद्रः, वामः, आयुः, सत्यकश्च, भद्रायाः सुता इति शेषः । एवमन्यासामपि शताधिकषोडशसहस्रपत्नीनां दश दश पुत्राः अभवन् । तासां मध्ये केनचिद्गुणेन महत्या रोहिण्याः सुतानामुक्तिर्दीप्तिमानित्यर्द्धेन प्रदर्शयति, तेनान्यासामपि बोध्याः । दीप्तिमांश्च ताम्रतप्तश्च तावाद्यौ येषां ते, हरेः सकाशात्, जाता इति शेषः । रोहिण्याः, तनयाः ज्ञेया इति शेषः ।।१६।।

कृष्णप्रिया

प्रद्युम्न, चारुदेष्ण, सुदेष्ण, परमवीर चारुदेह, सुचारु, चारुगुप्त, भद्रचारु, चारुचन्द्र, विचारु और दशवाँ चारु पुत्र था ।। ९ ।। रानीजी श्रीसत्यभामाजी के भी दस पुत्र थे । भानु, सुभानु, स्वर्भानु, प्रभानु, भानुमान्, चन्द्रभानु, बृहद्भानु, अतिभानु, श्रीभानु एवं प्रतिभानु नामके थे । श्रीमती जाम्बवतीजी के भी दस कुमार थे । साम्ब, सुमित्र, पुरुजित्, शत्रजित्, सहस्रजित् विजय, चित्रकेतु, वसुमान् , द्रविड, और क्रतु संज्ञक एवं पितृचरणों के अतिशय प्रिय और समान थे ।। १०–१२ ।। नाग्नजिती श्रीसत्या पटरानीजी के भी-वीर-चन्द्र, अश्वसेन, चित्रगु, वेगवान्, वृष, आम शङ्कु, वसु, और श्रीमान् कुन्ति नाम के तेजस्वी दस पुत्र थे । श्रीकालिन्दीजी पटरानीजी के भी श्रुत, कवि, वृष, वीर, सुबाहु, भद्र, शान्ति-दर्श, पूर्णमास, एवं सबसे छोटा कुमार सोमक थे ।। १३–१४ ।। मद्रदेशाधिपतिजी की सुपुत्री श्रीलक्ष्मणाजी के प्रघोष, गात्रवान्, सिंह, बल, प्रबल, ऊर्ध्वग, महाशक्ति, सह, ओज, एव अपराजित संज्ञक तेजस्वी पुत्र थे ।। १५ ।। श्रीमित्रविन्दा महारानीजी के–वृक, हर्ष, अनिल, गृध्र, वर्धन, अन्नाद्, महाश, पावन, वह्नि, एवं क्षुधि संज्ञक तेजस्वी दस कुमार थे ।। १६ ।।

संग्रामजिद् बृहत्सेनः शूरः प्रहरणोऽरिजित् । जयः सुभद्रो भद्राया वाम आयुश्च सत्यकः ।। १७ ।।
दीप्तिमांस्ताम्र[1] पत्राद्या रोहिण्यास्तनया हरेः । प्रद्युम्नाच्चानिरुद्धोऽभूद्रुक्मवत्यां महाबलः ।। १८ ।।
पुत्रस्तु रुक्मिणो राजन् नाम्ना भोजकटे पुरे ।
एतेषां पुत्रपौत्राश्च बभूवुः कोटिशो नृप । मातरः कृष्णजातानां सहस्राणि च षोडश ।। १९ ।।

राजोवाच

कथं रुक्म्यरिपुत्राय प्रादाद् दुहितरं युधि ।
कृष्णेन परिभूतस्तं[2] हन्तुं रन्ध्रं प्रतीक्षते । एतदाख्याहि मे विद्वन् द्विषोर्वैवाहिकं [3]मिथः ।। २० ।।

कर्दमक्षमा

अन्वयः—संग्रामजित्, बृहत्सेनः, शूरः, प्रहरणः, अरिजित्, जय , सुभद्रः, वामः, आयुः, च, सत्यकः, भद्रायाः, सुताः ।। १७ ।। हरेः, रोहिण्याः, दीप्तिमान्, ताम्रतप्तः, आद्याः, दश-दश-पुत्राः, आसन्, प्रद्युम्नात्, रुक्मवत्याम्, च, महाबलः, अनिरुद्धः, अभूत्, राजन्, भोजकटे, पुरे, रुक्मिणः, रुक्मवत्याम्, अनिरुद्धः, अभूत् ।। १८–१९ ।। राजा उवाच—युधि, कृष्णेन, परिभूतः, तम्, हन्तुम्, रन्ध्रं, प्रतीक्षते, सः, रुक्मी, अरिपुत्राय, दुहितरम्, प्रादात् ? हे, विद्वन् ! द्विषोः, मिथः, वैवाहिकम्, एतत्, मे, आख्याहि ।। २० ।।

---

[1] पत्राद्याः–वीर. विज. ; तप्ताद्याः–श्रीधर. वंशी. जीव. । [2] भूतोऽसौ–प्रा. पा. । [3] वैवाहिकीं क्रियां–विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

संग्रामजित्प्रमुखाः सत्यकान्ता भद्रायाः सुताः, शैब्यानामापि सैव ॥ १७ ॥ रोहिण्याः सुतानामुक्तिरन्यासामुपलक्षणार्थम् ॥ १८ ॥ एतेषामिति । अन्येषामपि श्रीकृष्णपुत्राणां शतसंख्यस्त्रीषु पुत्राः पौत्राश्च कोटिशो बभूवुः । तत्र हेतुत्वेन श्रीकृष्णपत्नीनां बाहुल्यमनुस्मारयति । मातरः कृष्णजातानामिति । चशब्देनाधिकाश्चेत्युक्तम् ॥ १९ ॥ यः कृष्णं हंतुं रंध्रं प्रतीक्षते स कथं प्रादादिति । बैवाहिकं विवाहनिमित्तम् ॥ २० ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

सैव भद्रैव । अष्टानां सर्वमुख्यानां पुत्रानुक्त्वा षोडशसहस्रमुख्याया रोहिण्या आह—दीप्तिमानिति ॥ १७ ॥ प्रासंगिकमाह-प्रद्युम्नादिति । भोजकटे-स्थितस्येति शेषः ॥ १८ ॥ एतेषां प्रद्युम्नादीनाम् । तत्र कृष्णपुत्र पौत्रानंत्ये । अधिका अष्टोत्तरशतमिति ज्ञेयम् ॥ १९ ॥ अरिपुत्राय कृष्णपुत्राय । रंध्रमवकाशम् । यो रुक्मी । विवाहनिमित्तं विवाहकारणम् । 'रंध्रं तु दूषणे छिद्रे' इति मेदिनी ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सङ्ग्रामेति शैब्यानामपि सैवेति टीका व्याख्यायास्तु मित्रविन्दात्मजा इत्यस्यानन्तरं योग्यायाः अपि लेखकभ्रमेणैव भद्रायाः सुता इत्यस्यानन्तरं लेखः श्रीविष्णुपुराणे ह्येतत्प्रसङ्गे "शैब्यायां मित्रविन्दायाम्" इति तथात्रैवाग्रे कुरुक्षेत्रयात्रायां श्रीद्रौपदीप्रश्ने शैब्येति मित्रविन्दे इति च टीकैव ॥ १७ ॥ दीप्तीत्यर्द्धकम् । रोहिणी शताधिकषोडशसहस्रमहिषीणां मुख्या तस्याः ॥ १८ ॥ आश्चर्य्यादाह—हे राजन्निति ! एतेषां श्रीप्रद्युम्नादीनाम् ॥ १९ ॥ कथमिति सार्द्धकम् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भद्रायाः सुता इत्यस्यानन्तरं लेखः, श्रीविष्णुपुराणीयैतत्प्रसंगे 'शैब्यायां मित्रविन्दायाम्' इति तथात्रैवाग्रे कुरुक्षेत्रयात्रायां श्रीद्रौपदीप्रश्ने शैब्ये मित्रविन्दे इति च श्रीस्वामिपादैरेव व्याख्यातत्वात् ॥ १८-१९ ॥ रोहिणी शताधिकषोड़शसहस्रमहिषीणां मुख्या, तस्याम्, त्वर्थे चकारः । पौत्रोत्पत्त्याभिन्नोपक्रमात् तु-शब्दो विरोधे, श्रीभगवद्द्वेषिणो रुक्मिणः पुत्र्यां तत्रापि तत्पुरे श्रीमदनिरुद्धोत्पत्तेः, अतएवाश्चर्य्यादाह—हे राजन्निति । राजमान इति वा । एतेषां श्रीप्रद्युम्नादीनाम्ः हे नृपेति आनन्त्येनाद्भुतत्वात् ॥ १८-१९ ॥ अरेः श्रीकृष्णस्य पुत्राय प्रादात् प्रणयेनादात् । अरित्वमेव दर्शयति—युधि परिभूत इति । प्रतीक्षते अपेक्षते मृगयते वा । हे विद्वन्निति तत्त्वया ज्ञायत एवेति भावः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ भद्रायास्सुतानाह—सङ्ग्रामजिदिति । भद्राया इत्यस्य सुता इति शेषः । एवमन्यासामपि षोडशसहस्रपत्नीनां दशदश पुत्राः तथैव रोहिण्याः सुतानामुक्तिरन्यासामपि सुतप्रदर्शनार्थं दीप्तिमानिति । हरेराश्रितार्त्तिहरस्य बलभद्रस्य रोहिण्याश्च जाताः इत्यर्थः । अथ विवक्षिष्यमाणकथाविषयकपिपृच्छिषामुत्पादयन् भगवतः पौत्रादीनाह—प्रद्युम्नादिति द्वाभ्याम् । हे राजन् नाम्ना भोजकटमिति प्रसिद्धे पुरे वसत इति शेषः । तस्य रुक्मिणः पुत्र्यां रुक्मवत्याख्यायां भार्य्यायां प्रद्युम्नादनिरुद्धो बभूव, तेषाञ्चेति । तेषां प्रद्युम्नव्यतिरिक्तानां कृष्णपुत्राणामपि पुत्राः पौत्राश्च कोटिशो बभूवुः तत्र हेतुत्वेन श्रीकृष्णपत्नीनां बाहुल्यमनुस्मारयति—मातर इति । कृष्णजातानां मातरः षोडशसहस्राणि चशब्दात्ततोऽप्याधिक्यं सूच्यते ॥ १७-१९ ॥ रुक्मिण पुत्र्यामित्युक्तं तत्र पृच्छति राजा-कथमिति । अरेः कृष्णस्य पुत्राय प्रद्युम्नाय कथं दुहितरं ददौ किञ्च स हि रुक्मी युद्धे कृष्णेन परिभूतोऽवमानितस्तं कृष्णं हन्तुं रन्ध्रमन्तरं प्रतीक्षते स कथं प्रादादिति भावः । एतदिति । हे विद्वन् द्विषोः कृष्णरुक्मिणोर्मिथो यद्वैवाहिकं विवाहनिमित्तमेतन्मह्यमाख्याहि ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

रोहिण्याः भद्रायाः ॥ १८ ॥ भोजकटे पुरे स्थितस्य रुक्मिणः पुत्र्याम् एतेषां मातरः कृष्णभार्याणां षोडशसहस्राणि ॥१९॥ अरेः कृष्णस्य पुत्राय प्रद्युम्नाय तं कृष्णं रन्ध्रमवसरं द्विषोः शत्रुभूतयोः वैवाहिकीं विवाहसम्बन्धिनीम् ॥२०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अष्टानां सर्वमुख्यानां पुत्रानुक्त्वा षोडशसहस्रमुख्याया रोहिण्या आह—दीप्तिमानिति ॥ १८ ॥ मातर इति कृष्णजातानां मातर एव सङ्ख्यातुं शक्यते नतु पुत्रपौत्रादयः ताश्च षोडशसहस्राणि अष्टोत्तरशतानि च ॥ १९ ॥ वैवाहिकं विवाहस्य कारणम् ॥ २० ॥

गूढार्थदीपिनी

संग्रामेति सार्द्धम् । अरिजित् नाम एकः । भद्रा शैव्या । षोडशसहस्रमुख्या रोहिणी भौमान्तःपुरतः प्राप्ता ॥ १७ ॥ पुरे कञ्चित्कालं निवसतः प्रद्युम्नादिति योज्यम् ॥ १८ ॥ कृष्णात् जातानां पुत्राणां मातरः चशब्दात् अष्टोत्तरशतानि च ॥ १९ ॥ अरिपुत्राय प्रद्युम्नाय । रन्ध्रम् छिद्रम् अवसरमित्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सत्यकान्ताः भद्रायाः शैब्यानामपि सैव ॥ १७ ॥ एवं दशदशपुत्राः अन्यासामपि ज्ञेया इति सूचयितुमाह—दीप्तिमानिति ॥ १८ ॥ एतेषां प्रद्युम्नादीनां यतः कृष्णजातानां तेषां मातरोऽपि षोडशसहस्राणि चकारादष्टोत्तरशताधिकानीति वैवाहिकं विवाहनिमित्तम् ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सङ्ग्रामनिद्बृहत्सेनेत्येवैकं विशेष्यमेकं विशेषणमित्येकतरत्राह शूर इति यथायथं विशेषणम् । प्रहरणः २ अरिजित् ३ जयः ४ सुभद्रो भद्राया इति पाठः ५ वामः ६ आयुः ७ सात्यकः ८ दीप्तिमान् ९ एते ताम्रपात्राया दशरोहिण्या जाम्बवत्या यथा हरेः सम्मतास्तथैते सुभद्रायास्तनया इति । अत्र निर्देशक्रमेणादिमत्त्वान्तिमत्त्वे न विवाहक्रमेण । हरिवंशे च रोहिण्या अष्टौ महिष्य इति प्रतिज्ञाय रुक्मिणी सत्यभामा चेति विशेषणत्रयमित्युक्त्वा रुक्मिणीतनयान् शृण्वित्येवोक्ते रोहिणीत्यनुक्तेः सा नवमीति लेखनं तु भारतविगीतम् । ततः क्षमापयन्सुतां प्रदाय रोहिणीं शुभाम् । अथापि साम्बनामकं सुतं च रोहिणी हरेः । चतुर्मुखांशसंयुतं कुमारमेव षण्मुखमित्याचार्या रोहिणीति नान्या जाम्बवत्या इति यत्र क्वचिद्ग्रन्थान्तरे रोहिणीशब्दः श्रूयते चेन्नाष्टमहिषीसमा नवम्यस्तीति जजल्पुः । हरिवंशे च सुतां जाम्बवतश्चापि रोहिणीं कामरूपिणिमित्युक्तेश्च । अतो न भद्राऽपि । अतोऽस्मदुक्तयोजनाऽऽचार्यकटाक्षितेति दिक् । अथवा सङ्ग्रामजित् १ बृहत्सेनः २ प्रहरणः ३ अरिजित् ४ जयः ५ सुभद्रः ६ वामः ७ आयुः ८ सत्यकः ९ दीप्तिमांश्चेति १० दश भद्रायाः पुमपत्यानि रोहिण्याः । तदादीनां सर्वासां ताम्रपात्राद्यास्तनया योषितो जाता इति वा । सर्वासामेका द्वे चतस्रश्च कन्या जाता इति विशेषं द्योतयितुमेव रोहिणीनाम तथा ताम्रपत्राद्या इति सत्यभामा चतुरपत्यमध्य एकस्या नाम च गृहीत इति । तथा च रुक्मिणी तनयान्कन्या चारुमती तथेत्युक्त्वा जज्ञिरे सत्यभामायां भानुभीमरथः क्षुपः । रोहितो दीप्तिमांश्चैव ताम्रवक्त्रो जिनान्तकः । भानुर्ग्रामणिका चैव ताम्रपात्रा जलन्धरा । चतस्रो जज्ञिरे तेषां स्वसारो गरुडध्वजादित्यादि हरिवंशशंसनात् । अत्र तत्र नामव्यत्यासश्च तेषां बहुनामतया सम्भवतीति न विसंवादः । न चाचार्यैः पृथक्पृथक् तासु दशैव पुत्रकानधत्त कन्यामित्येकवचः प्रत्युक्तं तर्हि कथमिति वाच्यम् । मुख्यविवक्षयैकवचनमाचार्याणां मुख्यामुख्यविवक्षया बादरायणस्येत्यविरोधसम्भवात् ॥ १७ ॥ यदर्थमेतत्कीर्तनं तत्र परीक्षितानु योजयित्वोत्तरं वक्तुं बीजावापं कुर्वन्किञ्चित्तदुपोद्घातं रचयति । प्रद्युम्नादिति । रुक्मिणो मातुलस्य । भोजकटे पुर इति पुनरनुबन्धदौर्घट्यहेतुवचनम् । कोटिशो बहुकोटिसङ्ख्याः ॥ १८-१९ ॥ यः कृष्णेन युधि परिभूतस्तं हन्तुं रन्ध्रमवकाशं प्रतीक्षत स कथमरिपुत्राय दुहितरं प्रादात् ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सङ्ग्रामजिदादयो दश भद्रायाः । सत्यको दशमः । रोहिणी षोडशसहस्राणां शताधिकानां मुख्या । क्वचिदेषैवाष्टमहिषीमध्य इति भद्रायाः स्थाने मन्त्रशास्त्रे प्रसिद्धा । तस्या दीप्तिमान् पुत्रः अष्टमहिषीपुत्रतुल्यः । तेनैकाशीति पुत्राः एकाशीति भक्तिप्रकारा इव भगवता प्रकटीकृता इति द्योतितम् । ताम्रपत्राद्या रोहिण्यास्तनयाः साधारणाः । अस्या दशपुत्रागणनमन्यासां दशपुत्रत्वख्यापकम् ॥ १७½ ॥ पौत्रान् निरूपयन् एकं निरूप्य तत्सदृशा अन्य इत्यतिदिशति **प्रद्युम्नाच्चानिरुद्धोऽभूद्**इति । रुक्मवती रुक्मिणः पुत्री मातुलकन्या । प्रद्युम्नस्तत्रैव कियत्कालं स्थितः । तत्रैव विवाहं कृत्वा पुत्रमुत्पादितवान् । शत्रुगृहे कथमेकाकी स्थित इति शङ्कां वारयति **महाबल** इति । चस्त्वर्थे । भगवदाविष्टात् प्रद्युम्नादनिरुद्धो जात इति ज्ञापयितुं चकारः । अन्यथा कामाज्जातोऽप्रयोजकः स्यात् । मायावत्यामुत्पादनं वारयति **पुत्र्यां तु रुक्मिण** इति । मायावत्या नामान्तरमावेशो वा स्यादिति तुशब्दः असम्भावनां व्यावर्तयति । **राजन्**निति सम्बोधनं प्रद्युम्नस्य द्वारकाप्रेषणाभावं द्योतयति । सोऽपि राजा तत्रैव जामातरं दुहितरं च स्थापितवानिति । **पुरे** स्वनगरे । नाम्ना भोजकटे । एकं पौत्रमुक्त्वा अन्यानतिदिशति । एतेषां पुत्रपौत्राश्च पुत्राः पौत्राश्च कोटिशो जाताः । न तेषु दशसङ्ख्यानियमः । सर्वेषामैकमत्यार्थमाह **मातरः कृष्णजाताना**मिति । सर्वेषामेव भगवत्पुत्राणां सर्वा एव भगवत्स्त्रियो मातरः । यथा जननी, तथैव सर्वा इति सापत्न्याभावो निरूपितः । चकारादष्टोत्तरशतम् ॥ १८-१९ ॥ रुक्मिकन्याविवाहः असम्बद्ध इति तत्र हेतुं पृच्छति **कथ**मिति । विवाहः स्नेहकृतः, पुत्रः पितुरिति अयंपेक्षया अरिपुत्रो द्वेष्यो भवति, दुहिता चात्यन्तं प्रिया । द्वेषकारणमाह **युधि कृष्णेन परिभूत** इति । विस्मृतो द्वेष इति चेत् । तत्राह

हन्तुं रन्ध्रं प्रतीक्षत इति । अद्यापि द्वेषव्यापारान्न निवृत्तः । **रन्ध्रमिति** साक्षाद्विरोधे असामर्थ्यं सूचितम् । प्रसिद्धसम्बन्धहेतोरभावात् हेत्वन्तरं पृच्छति **एतदाख्याहीति** । **विद्वन्निति** कथने ज्ञानं हेतुभूतं निर्दिशति । द्विषोः परस्परं द्वेषविषययोः मिथो वैवाहिकं विवाहसम्बन्धि व्यवहरणं कारणं वा ॥ २० ॥

श्रीसुबोधिनी-सारः

संग्रामजिदादयो दश सत्यकांता भद्रायाः सुताः ॥ १७ ॥ हरेः रोहिण्याः षोडशसहस्राष्टोत्तरशतसंख्याप्रधानाया दीप्तिमान् ताम्रतप्त आद्यः प्रधानो येषां ते दश पुत्रा उपलक्षणत्वादन्यासामपि बोध्याः प्रद्युम्नात् रुक्मवत्यां पत्न्यां रुक्मिणः पुत्र्यां महाबलोऽनिरुद्धोऽभूत् नाम्ना भोजकटे पुरे हे राजन् एतेषां पुत्रपौत्राः कोटिशो बभूवुः कृष्णाज्जातानां पुत्राणां मातरः षोडशसहस्राणि चात् शतमष्टोत्तरम् हे नृप ॥ १८–१९ ॥ राजप्रश्नः । युधि संग्रामे कृष्णेन परिभूतस्तिरस्कृतो विरूपकरणात् तं कृष्णं हंतुं रंध्रं छिद्रमवसरं यः प्रतीक्षते स रुक्मी अरेः शत्रोः कृष्णस्य पुत्राय दुहितरं कन्यां कथं प्रादात् द्विषोर्वैरिणोर्मिथः परस्परं एतद्वैवाहिकं विवाहकर्म मे मह्यमाख्याहि वर्णय हे विद्वन् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सङ्ग्रामजिदादयः सत्यकान्ता दश भद्रायाः पुत्राः । एवमन्यासामपि षोडशसहस्रपत्नीनां प्रत्येकं दश दश पुत्रा जाता इति सूचयंस्तन्मध्यपातिन्या रोहिण्याः सुतानाह—दीप्तिमानिति ॥ १७ ॥ एवं भगवतः पुत्रान्निरूप्य पौत्रान्निरूपयति—प्रद्युम्नादिति द्वाभ्याम् । हे राजन् ! नाम्ना भोजकटे पुरे निवसतः प्रद्युम्नाच्च रुक्मिणः पुत्र्यां रुक्मवत्यां भार्यायां महाबलः अनिरुद्धाख्यः पुत्रोऽभूत् ॥ १८ ॥ तथैतेषां प्रद्युम्नव्यतिरिक्तानामपि पुत्राणां पुत्राः पौत्राश्च कोटिशो बभूवुः । तत्र हेतुत्वेन श्रीकृष्णपत्नीनां बाहुल्यमनुस्मारयति—मातुर इति । हे नृप ! कृष्णाज्जातानां पुत्राणां मातरः षोडश सहस्राणि, चकारस्ततोऽप्यष्टोत्तरशताधिक्यसूचनार्थः ॥ १९ ॥ 'रुक्मिणः पुत्र्याम्' इत्युक्तं तत्र पृच्छति—कथमिति । अरेः कृष्णस्य प्रद्युम्नाय रुक्मी स्वदुहितरं कथं प्रादात् । अरित्वमेव स्पष्टयति–यतो युद्धे कृष्णेन रुक्मी परिभूतोऽवमानितः अतस्तं कृष्णं हन्तुं रन्ध्रमवसरं प्रतीक्षते । अतस्तस्य कन्यादानासम्भवादिति भावः ॥ २० ॥

अन्वितार्थप्रकाशिका

संग्रामजिदाद्याः सत्यकान्ताः भद्रायाः सुताः भद्रैव शैब्यानाम ॥ १७ ॥ दीप्तिमानिति अर्द्धम् । दीप्तिमान् ताम्रः तप्तः इत्याद्याः हरेः सकाशाद्रोहिण्याः षोडशसहस्रमहिषीषु प्रथमायाः सुताः अन्यासामप्येवं ज्ञेयाः । प्रद्युम्नादिति । हे राजन् ! नाम्ना भोजकटे पुरे कंचित्कालं द्वारकात आगत्य निवसतः प्रद्युम्नाच्च रुक्मिपुत्र्यां रुक्मवत्यां भार्यायां महाबलः अनिरुद्धाख्यः पुत्रोऽभूत् ॥ १८ ॥ एतेषामिति । एतेषां प्रद्युम्नव्यतिरिक्तानामपि पुत्राणां पुत्राः पौत्राश्च कोटिशो बभूवुः । यतः हे नृप ! कृष्णाज्जातानां पुत्राणां मातरः षोडसशहस्राणि चकारस्ततोऽप्यष्टोत्तरशताधिक्यसूचनार्थः ॥ १९ ॥ कथमिति । अरेः कृष्णस्य पुत्राय प्रद्युम्नाय रुक्मी स्वदुहितरं कथं प्रादात् । यतो युधि युद्धे कृष्णेन रुक्मी परिभूतोऽवमानितः । अतस्तं कृष्णं हन्तुं रन्ध्रमवसरं प्रतीक्षते ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

संग्रामजिदादिसत्यकांताः भद्रायाः सुताः ॥ १७ ॥ षोडशसहस्रपरिमितासु स्त्रीषु मुख्यायाः रोहिण्याः हरेर्भार्यायाः तनयाः ॥ १८ ॥ एतेषामुक्तानामनुक्तानां च कृष्णसुतानां कोटिशः पुत्राः पौत्राश्च बभूवुः कृष्णजातानां कृष्णोत्पन्नानां तेषां पुत्राणां षोडशसहस्राणि चकारादेकशताधिकाः मातरः अभूवन् ॥ १९ ॥ तं कृष्णं हेतुं द्विषोः परस्परवैरिणोः कृष्णरुक्मिणोः मिथो वैवाहिकं विवाहकारणं ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ विवक्षिष्यमाणविषयपिपृच्छिषामुत्पादयन् भगवतः पौत्रादीनाह प्रद्युम्नादिति द्वाभ्याम् । प्रद्युम्नादिति ॥ हे राजन्, नाम्ना भोजकटे भोजकटमिति प्रसिद्धे इत्यर्थः । पुरे, वसत इति शेषः । रुक्मिणः पुत्र्यां, रुक्मवत्यां तु, प्रद्युम्नात् सकाशात्, महाबलः अनिरुद्धश्च, अभूत् ॥ १७ ॥ एतेषामिति ॥ एतेषां प्रद्युम्नव्यतिरिक्तानां, श्रीकृष्णपुत्राणामपि पुत्रपौत्राश्च पुत्राः पौत्राश्चेत्यर्थः । हे नृप, कोटिशः, बभूवुः । तत्र हेतुत्वेन श्रीकृष्णपत्नीनां बाहुल्यमनुस्मारयति । मातर इति । कृष्णजातानां श्रीकृष्णत उत्पन्नानां, सुतानां मातरः षोडशसहस्राणि, चशब्दात्ततोऽप्याधिक्यं सूच्यते । षोडश सहस्राणि तदुपर्यष्टाधिकमेकशतमित्यर्थः । बभूवुः ॥ १८ ॥ रुक्मिणः पुत्र्यामित्युक्तं तत्र राजा पृच्छति कथमिति सार्द्धेन ॥ कथमिति ॥ यः युधि, कृष्णेन परिभूतः, तं कृष्णं, हन्तुं, रन्ध्रं छिन्द्रं, प्रतीक्षते, सः रुक्मी, अरिपुत्राय श्रीकृष्णसुताय प्रद्युम्नाय, दुहितरं

स्वां सुतां, कथं प्रादात् । हे विद्वन्, द्विषोः, श्रीकृष्णरुक्मिणोः, मिथः परस्परं, वैवाहिकं विवाहकर्म, यत् एतत्, मे मह्यं आख्याहि ॥ १९ ॥ न जानामीति मा वोच इत्याह ॥ अनागतमिति अनागतं भविष्यत्, अतीतं भूतं, वर्त्तमानं, अतीन्द्रियमस्मदिन्द्रियागोचरं, विप्रकृष्टं दूरस्थं, व्यवहितं कुड्याद्यन्तरितं च, एतत्सर्वं, योगिनः सम्यक्, पश्यन्ति साक्षात् कुर्वन्ति । अतो जानास्येवेति भावः ॥ २० ॥

कृष्णप्रिया

श्रीभद्रारानीजी के भी **तेजस्वी** संग्रामजित्, वृहत्सेन, शूर, प्रहरण, अरिजित्, जय-सुभद्र, वाम, आयु, एवं सत्यक, **तेजस्वी** दस कुमार थे ।।१९।। राजन् ! भगवान् श्रीकृष्ण द्वारिकाधीशजी की षोडशसहस्र से भी अधिक रानियाँ थी । श्रीरोहिणी इनमें विशिष्ट थी । उनके दीप्तिमान् ताम्रतप्त आदि दस-दस वीर पुत्र थे । और सर्वं पत्नियों के भी दस दस पुत्र थे । रुक्मवती रानी में प्रद्युम्नजी से अनिरुद्ध जी का प्राकट्य हुआ था । वह रुक्मवती मायावती श्रीरतिरानी से भिन्न भोजकट नगर निवासी रुक्मी राजा की सुकुमारी थी और उसका व्याह प्रद्युम्न जी से किया गया था । श्री अनिरुद्ध महान् वीर पराक्रमी थे । राजन् ! भगवान् के पुत्रों की सोलह हजार एक सौ से अधिक माताएँ थी । भगवान् श्रीकृष्ण के पुत्र और पौत्रों की संख्या करोड़ तक पहुँच गयी थी ।। १७-१९ ।। महाराज ने प्रश्न किया भगवान् शुकाचार्य जी ! आप परम विवेकी हैं कहिये ! भगवान् श्रीकृष्ण ने संग्राम में रुक्मी का पराजय और तिरस्कार किया था वह चाहता था कि अवसर मिलते ही श्रीकृष्ण का वध कर दे ।। २० ।।

अनागतमतीतं च वर्तमानमतीन्द्रियम् । विप्रकृष्टं व्यवहितं सम्यक् पश्यन्ति योगिनः ॥ २१ ॥

श्रीशुक उवाच

वृतः स्वयंवरे साक्षादनङ्गोऽङ्ग[1]युतस्तया । राज्ञः समेतान् निर्जित्य जहारैकरथो युधि ॥ २२ ॥[2]
यद्यप्यनुस्मरन् वैरं रुक्मी कृष्णावमानितः । व्यतरद् भागिनेयाय सुतां कुर्वन् स्वसुः प्रियम् ॥ २३ ॥[3]

कदमक्षमा

अन्वयः—योगिनः, अनागतम्, अतीतम्, वर्तमानम्, अतीन्द्रियम्, विप्रकृष्टम्, व्यवहितम्, सम्यक्, पश्यन्ति ॥ २१ ॥ श्रीशुक उवाच—अङ्गयुतः, साक्षात्, अनङ्गः, तया, स्वयंवरे, वृतः, एकरथः, समेतान्, राज्ञः, युधि, निर्जित्य, जहार ॥ २२ ॥ यद्यपि, कृष्णावमानितः, वैरम्, अनुस्मरन्, रुक्मी, स्वसुः, प्रियम्, कुर्वन्, भागिनेयाय, सुताम्, व्यतरत् ॥ २३ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रुक्मिणोऽभि प्रायं कथं जानीम इति चेदत आह । अनागतमिति । अतीन्द्रियमस्मदादीद्रियागोचरम् । विप्रकृष्टं दूरस्थम् । व्यवहितं कुड्याद्यंतरितम् ॥ २१ ॥ तत्रोत्तरम् । स्वयंवरे रुक्मवत्या वृतः सन् राज्ञो निर्जित्य जहारेति ॥ २२ ॥ यद्यपि श्रीकृष्णावमानितस्तथापि वैरमनुस्मरन्नपि व्यतरत्प्रादात् अन्वमोदतेत्यर्थः ॥ २३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु दुर्घटघटना कारिणीयं भगवदिच्छा भगवल्लीलाशक्तिरेव सा सामान्यतो ज्ञायताम्, विशेषपर्यालोचनं त्वस्या अशक्यमित्याशंक्याह—अनागतमिति । योगिनस्तावदनागतादिकं जानन्ति, भगवद्भक्तिविशेषत्वेन परमतद्विशेषा भवन्तस्तु भगववत्संबंधिनमपि तत्तद्विशेषं जानंतीति भावः । अनागतं भावि ॥ २१ ॥ तत्राक्षेपे । एकरथः सेनारहितः । भीतोऽयं वैरिपुत्राय कन्यां दित्सतीत्यप्रतिष्ठाभयाद्रुक्मिणा स्वपुत्र्याः स्वयंवरणमकारि इत्याह–वृत इति । वरणे हेतुः—अन्यत्र य आवेशभावेनानंगः स पुनरत्र साक्षात्पूर्णरूपोंगयुतश्चेत्यर्थः । समेतान् तथा स्वयंवरे तस्मिन्वृतेऽपि तेन सह योद्धुं मिलितान् । विवाहोत्तरं मातुलप्रीत्या तस्य पुरे चिरवासेन, यद्वा–द्वारकातः पुनरानयनात्तत्रानिरुद्धस्य जन्माभूदिति ज्ञेयम् ॥ २२ ॥ इत्यर्थ इति–न तु तेन श्रद्धया दत्ता हृतामन्यः शाल्व इवांबां न ग्रहीष्यतीति हेतोस्तद्दानं स्वीकृतवानिति भावः । कारणांतरमाह—स्वसुरिति, स्वप्राणरक्षिकायाः स्वसुः श्रीरुक्मिण्याः प्रियं कुर्वन् कर्तुम् ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, दुर्घटघटनाकारिणीयं भगवदिच्छा भगवल्लीलाशक्तिरेव वा सामान्यतो ज्ञायतां तद्विशेषपर्यालोचनन्त्वशक्यमित्याशङ्क्याह—अनागतमिति । योगिनस्तावदन्यदनागतादिकं जानन्ति भगवद्भक्तिविशेषत्वेन परमतद्विशेषाः भवन्तस्तु

---

[1] ऽङ्गवृतः–वीर. । [2] "२२ एवं २३" श्लोकौ पूर्वापर्येण वर्तते–वीर प्रा. पा. । [3] तदेवानु–श्लोकादारभ्य नव श्लोकाः अधिकाः–विज. ।

भगवत्सम्बन्ध्यपि तत्तद्विशेषं जानन्तीति भावः ।। २१ ।। तत्र तमेवेयं वरीतेति निश्चित्य तदसहिष्णुनिजवर्गवञ्चनार्थं स्वयम्वरश्च कृत इत्याह-वृत इति । वरणे हेतुः, अन्यत्र य आवेशभावेनानङ्गः स पुनरत्र साक्षात्पूर्णरूपः अङ्गयुतश्चेत्यर्थः, समेतान् स्वयम्बरे तया वृतेनापि तेन सह मत्सरेण योद्धुं मिलितान् युधि निर्जित्येत्यादिना महापराक्रमः उक्तः एवं विवाहानन्तरं मातुलस्य प्रीत्या तस्य पुरे चिरनिवासेन किम्वा द्वारकां गतस्य तस्य पुनः प्रत्यानयनात् तत्रानिरुद्धस्य जन्मेत्युक्तम् ।। २२ ।। यद्यपीति द्वयं तैर्व्याख्यातं तत्र व्यतिक्रमेण व्याख्यानं सिद्धान्ते स्वयम्वरणस्य मुख्यत स्वसृप्रियचिकीर्षयास्तु तदनुमोदनमात्रत्वेन गौणतेति ज्ञापनार्थं यद्वा वैरम् अनुस्मरन् सदा चिन्तयन्नपि स्वसुः श्रीरुक्मिणीनाम्न्याः श्रीभगवन्महाशक्तेस्तत्स्वसृभूतायाः स्नेहप्राबल्येनैव ददावित्यर्थः । अग्रेपि स्वसुः प्रियचिकीर्षयेत्येव वक्ष्यते ।। २३ ।।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

न जानामीति मावोच इत्याह—अनागतमिति । अतीन्द्रियमस्मदिन्द्रियागोचरं विप्रकृष्टं दूरस्थं व्यवहितमीषदन्तरितं चेत्येतत्सर्वं योगिनो भवन्तं सम्यग्यथावत् पश्यन्ति साक्षात्कुर्वन्ति अतो जानास्येवेति भावः ।। २१ ।। एतदेव स्पष्टयितुं तावत्स्वयम्बरे तद्दुहिता प्रद्युम्नेन हृतेत्याह-वृत इति । एक एव रथो यस्य सः असहायः प्रद्युम्नेन हृतेत्याह—वृत इति । एक एव रथो यस्य सः असहायः प्रद्युम्नः स्वयम्बरे तथा रुक्मवत्या वृतः स्वयञ्च तस्यामनुरागयुक्तः, समेतान् युयुत्सया प्राप्तान् राज्ञो नृपान् युद्धे निर्जित्य तां जहार ।। २२ ।। इत्थमापृष्टः प्राह मुनिः–यद्यपीति । यद्यपि रुक्मी कृष्णेनावमानितस्तथापि वैरमनुस्मरन्नपि स्वसुः रुक्मिण्या, प्रियं कुर्वन् "लक्षणहेत्वोः" इति शत्रादेशः कर्त्तुमित्यर्थः । व्यतरद्ददौ अन्वमोदतेति भावः । न त्वाहूय कन्यां ददौ अपितु स्वयम्बरे प्रद्युम्नेन हृतामन्वमोदतेत्युत्तरमभिप्रेतम् ।। २३ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तदेवाभिव्यञ्जयति—अनागतमिति । ननु वर्त्तमानमन्येऽपि पश्यन्ति ? तत्राह—अतीन्द्रियमिति । तदेवाह—विप्रेति पदद्वयेन । योगिनोऽपि पश्यन्ति, किं पुनर्भवादृशाः श्रीभगवद्भक्तवरा इत्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, अतीन्द्रियं ब्रह्म व्यवहितं मायान्तरतमविशेषेण श्रीनारायणादप्याधिक्येन प्रकृष्टं श्रीकृष्णञ्च पश्यन्ति, यतो योगिनो भक्तियोगवन्तः, किं पुनः रुक्मिणोऽभिप्रायमिति भावः ।। २१ ।। वैरमनुस्मरन् सदा चिन्तयन्नपि स्वसुः श्रीरुक्मिण्याः स्नेहेन ददावित्यर्थः । अंगयुत इति कामदेवत्वादप्युत्कर्ष उक्तः, अतो वृतः, समेतान् स्वयम्बरे तया वृत्तेनापि तेन सह दुर्बुद्धया द्वेषेण युद्धार्थं मिलितान्, युधि निर्जितेत्यादिना महापराक्रम उक्तः । एवं विवाहानन्तरं मातुलस्य प्रीत्या तस्य पुरे चिरं वासेन किंवा द्वारकां तस्य पुनः गतस्य श्वशुरेण प्रत्यानयनात्तत्रानिरुद्धस्य जन्मेति ज्ञेयम् ।। २३ ।।

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

अतीतकथा नेदानी वक्तुं शक्येति नेत्याह— अनागतमिति । विप्रकृष्टं दूरस्थं व्यवहितम्मूर्त्तद्रव्यान्तरितम् ।। २१–२२ ।। अर्धाङ्गीकारेण परिहरति—यद्यपीति । व्यतरद्दत्तवान् भागिनेयाय सहोदर्याः पुत्रायेति सूचितं प्रियम् इष्टं स्पष्टं तदेव आचष्टे—कुर्वन्निति । इदं दाने कारणम् ।। २३ ।। ननु, ततः परं वैरं मुक्तवान् किम् ? न तताधिकमभूत् कथमत्राह—तदेवेति । श्रीशैलनिलयं श्रीपर्वतवासिनं मल्लिकार्जुननामानमित्यर्थः ।। क ।। छन्दयामास अभीष्टं दत्तवान् "वशाभिप्राययोश्छन्दः" इति ।। ख ।। शत्रुसङ्घानां मनसेति शेषः । अजेयाच्छेद्यत्वे तथास्तामित्युक्त्वा तस्य कृष्णभक्तिं दर्शयितुं वक्ति वाक्यञ्चेति ।। ग–च ।। तर्हि बन्धुमैत्रीं निर्दुष्टात्माऽकार्षीत् किम् ? नेत्याह—मैत्रीमिति । अपितु बन्धुकृत्याकरणेन कल्मषमकरोत् ।।छ।। मैत्र्यकरणे विरोधाकारणे च निमित्तमाह—यदीति । अनङ्गश्चेत् किमवलोक्य वृत इत्यत उक्तमङ्गयुत इति ।। ज–झ ।। यम् अनिरुद्धम् ।। ञ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अनागतमिति । तेनाहमप्येतेत्र जानामीति न वक्तव्यमिति भावः ।। २१ ।। किन्तु वैरिपुत्राय कन्यां दित्सतीत्यप्रतिष्ठाभयाद्रुक्मिणा स्वपुत्र्याः स्वयम्वरणसभा कारितेत्याह वृत–इति ।। २२ ।। तत्रोत्तर स्वप्राणरक्षिकायाः स्वसुः प्रियं कुर्वन् कर्त्तुम् ।। २३ ।।

गूढार्थदीपिनी

एतत् विवाहकारणम् । अनागतं भविष्यत् । विप्रकृष्टं दूरस्थम् । सम्यक् साक्षात् पश्यन्ति ।।२१।। अङ्गयुतः मूर्तिमान् । तया रुक्मवत्या ।। २२ ।। भागिनेयाय रुक्मिणीपुत्राय । कुर्वन् कर्तुं 'लक्षणहेतोः' इति शतृप्रत्ययः ।। २३ ।।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अनागतं भविष्यम् अतीतं भूतम् वर्तमानं विप्रकृष्टं दूरस्थं ब्रह्माण्डान्तर्वर्तिव्यवहितं मुष्टयान्तरितबीजस्थं पत्रपलाशादिकम् ।। २१ ।। विद्विषोरपि कृष्णरुक्मिणोः अपत्यविवाहे निमित्तं रुक्मिणः स्नेह इत्युत्तरमाह–वृत इति द्वाभ्याम् ।।२२–२३।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एतदित्यव्ययम्। एतां वैवाहिकीं क्रियां। द्विषोरिति। विरुद्धामाख्याहि। न मम तावती परिचितिरिति न वद स्वामिन्निति ज्ञानिवत्वं स्फोरयन्परोक्षतो योगिमाहात्म्यमाह ॥ अनागतमिति। विप्रकृष्टं भित्त्याद्यनावृतदूरप्रदेशवर्ति व्यवहितं तदन्तरितमिति विवेकः। अतस्तव योगित्वान्नाविदितं किञ्चिदित्युदञ्चय मां प्रति तां कथमिति तात्पर्यं राज्ञो ज्ञेयम् ॥ २१ ॥ कृष्णावमानित इति यद्यप्यनुस्मरंस्तथाऽपि स्वसुः रुक्मिण्याः प्रियं कुर्वन्भागिनेयाय तत्पुत्राय प्रद्युम्नाय सुतां व्यतरत्। विशिष्य-भागिनेयायेत्युक्तप्रपञ्चनमेव स्वसुः प्रियं कुर्वन्नित्यनेन कृतमित्यनेके। स्वसुः प्रियं कुर्वन्नित्येवोक्तौ न वरो वरणीयगुण इति तद्दाक्षिण्यमात्रं दाननिदानमिति स्यादित्यत उक्तं भागिनेयायेति। भाजिकन्या देया तस्मै वैतस्मा इत्यालोचने इनः श्रेष्ठ इति भागिनेयस्तस्मै। गुणाभावश्छान्दसः। सर्वोर्वीशपुत्रापेक्षया श्रेष्ठतामतिविषयाय सोऽपि योग्य इत्यर्थः। परेयं प्रियमित्युक्तेः स्वसुः प्राणमात्रावशिष्ट इति सु असवो यस्य सोऽपि योग्य इत्यर्थः। परेयं प्रियमावर्त्यपरेयं स्वव्यतिरिक्तसर्वविषयं प्रियं कुर्वन् भागिनेयाय सुतां व्यतरदिति वा ॥ २२ ॥ प्राय आयोधनपराभवस्मरणं विहाय विवाहानन्तरमनन्तविद्वेषं त्यक्तवान्भवेदित्यतः स्वभावस्यानपायात्तत उत्तरमपि मल्लिकार्जुनं यदुवरवरप्रदमित्यपः प्रथातः स्वेर्ष्या फललब्ध्यै तपसाऽतोषयदित्याह ॥ तदेवेति ॥ २३ ॥ वरेण छन्दयामास वरं वरयेति स्वाभिप्रायमाविष्कृतवान्। स च रुक्म्यपि दृढं वव्रे। सति शलादौ धनुर्वरणं च किमर्थमिति चन्ने। शार्ङ्कस्य पिनाकस्य चैकदोत्पत्तेः हर ऐकं हरिरेकं जगृहतुर्हरिशरासनपराजये जाते स हरशरासनांशेन धनुषा जयो स्यामिति दुराशात इति ज्ञेयम् ॥ २४ ॥ शत्रुसङ्घानामजेयमप्राप्यं धर्तुमशक्यमिति यावत्। त्रिदिशैरप्यच्छेद्यम्। तथेति स्यातामजेयत्वाच्छेद्यत्वे इत्युक्त्वा कार्मुकं दत्वा शङ्कर इदं चोवाच च ॥ २५ ॥ यदा विष्णौ तद्विषये विरुद्धयसे विरोधं करोषि तदैतत्कार्मुकं त्वां हित्वा मामेव प्रतिपत्स्यति। अन्यथा नेत्युक्त्वा कार्मुकं दत्वा। पुनः कार्मुकं दत्वेत्यनेन स्वामिन्महादेव यदर्थमियानायासः सम्पादितस्तन्नोपपादितमिति वक्तुमवसरमददानो न व्यदृश्य तादृश्योऽभूदिति द्योतयति। सोऽपि। अपिना पिनाकिना कृष्णहनने ईप्सिते न वरवितरणमिति वरग्रहणं सूचितमिति ज्ञेयम्। कृष्णमृते विना ॥ २८ ॥ अत इति डोलायमान-मानसः सोऽभूदित्याह ॥ विरोद्धुमिति। तत्र तन्त्रं धनुर्लोभस्तद्गाध्र्यम्। अकल्मषामतिशुद्धां मैत्री नैवाकरोत्। तत्पूर्तिरामायणं कियती कण्डूतिस्तावत्कण्डूयनमिति नीत्योपर्युपरि सम्बन्धिव्यवहृतिपूर्तिव्यवहारादिमात्रमकरोदित्यकल्मषां नेत्यनेन ध्वन्यते ॥ २९ ॥ गिरीशस्य वचो मामेव प्रतिपत्स्यतीति वैरं चानुस्मरन्न मैत्रीमकल्मषां चाकरोदित्यतीतेनान्वयः। तद्वितरण-पूर्वरङ्गमुपपादयति ॥ वृत इति। अनङ्गः प्राक् अङ्गयुत इदानीं स्वयंवरे साक्षात्तया रुक्मवत्या वृतः ॥ ३० ॥ समेतान्राज्ञो युधि निर्जित्यैकरथो निस्सहायो जहार सः। यत्कृतेऽनिरुद्धनिमित्तं सहस्रबाहुर्बाणो द्विभुजोऽभवत्। एतद्विस्तरस्तु स्वावसरे वक्ष्यते ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नन्वेतत्पूर्वं न श्रुतम्, समाध्यभावादधुना न चिन्त्यत इति तज्ज्ञानं कथमिति चेत्, तत्राह **अनागतमतीतं चेति**। योगिनां देशकालव्यवधायकानि ज्ञाने न प्रतिबन्धकानि। यथा चक्षुःसन्निकर्षः प्रत्यासत्तिः प्रत्यक्षे, तथा सर्वत्र योगिनां योगजधर्मः प्रत्यासत्तिः। कालो हि वस्तूनि नयति, यथा नदी जलम्। यद्यपि जलमभिज्ञानद्रव्यसहितं क्वचिद्देशे स्थितं तस्मिन् समये तद्देशस्थितः पश्यति, तथापि प्रदेशान्तरे गतं न पश्यति तद्देशस्थितः। सहगतो वा तदपि पश्यति। यथा वा मनुष्यैर्द्रष्टु-मयोग्यमपि देवाः पश्यन्ति, यथा सर्वैराच्छन्नं कालज्ञाः पश्यन्ति, एवं सर्वसामर्थ्ययुक्तो योग एव सर्वसमर्थः। वर्तमानस्य विशेषणमतीन्द्रियमिति। **अतीतं** यन्नानुभूतम्। **अनागतं** यत् ज्ञापकरहितम्। चकाराद्धर्मान्तरमापन्नम्। **विप्रकृष्टं** देश-व्यवहितम्। निकटस्थमपि व्यवहितं भित्त्यादिना। सर्वमेव योगिनः सम्यक् पश्यन्ति। ध्यानेन ज्ञानं ज्ञानिनाम्। योगिनां तु भगवत इव योगजधर्मे प्रकटे सर्वज्ञत्वमिति ॥ २१ ॥ तत्र प्रद्युम्नविवाहे हेतुद्वयमाह **यद्यप्यनुस्मरन्निति** द्वाभ्याम्। 'स्वसुः प्रियं कुर्वन्' इत्येकम्, 'स्वयंवरे कन्ययैव वृत' इत्यपरम्। तत्र प्रथममुपपादयति। कृष्णावमानितः वैरमनुस्मरन् यद्यपि वर्तते, तथापि स्वसुः प्रियं कुर्वन् **भागिनेयाय** भगिनीपुत्राय मातृपक्षपातिने सुतामदात्। अनुरोध्या स्वसा, सा पूर्वमपकृता तदभि-प्रायमज्ञात्वा पश्चात् ज्ञात्वा कथं प्रसन्ना भवतीति विचार्य, प्राणश्च तया रक्षित इति, स्वकन्यां तत्पुत्राय प्रायच्छत्। प्रियं प्रियाय चेद्दीयते, तदा प्रसन्नः सर्वोऽपि भवतीति ॥ २२ ॥ द्वितीयमाह **वृतः स्वयंवरे साक्षा**दिति। यद्वशादन्येऽपि व्रियन्ते, स एव साक्षात् पूर्वमनङ्गः। अतः कयाप्यवृतः इदानीमङ्गयुतो जात इति तयाभिज्ञया वृतः। स्वयंवरे वृतो न प्रत्याख्यायत इति स महाभिमानी कन्यायाः स्वयंवरं कृतवान्, पश्चाद्विधानपूर्वकमपि सन्तोषेण दत्तवानिति **व्यतरदित्युक्तम्**। तस्य रूपमेव महत्, न पौरुषं भविष्यतीत्याशङ्क्याह **राज्ञः समेतान्निर्जित्य जहारेति**। युधि सावधानान्, तत्रापि मिलितान् सर्वान् नितरां जित्वा। **एकरथ** इत्यसहायः, हृत्वा मातुलगृहमेव गत इति पूर्वश्लोकानुरोधादवसीयते। एकरथत्वादिधर्मैः प्रतीत्या पितुरधि-कत्वमुक्तम् ॥ २३ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

अनागतमित्यस्याभासे । **समाध्यभावादिति** । एतन्निरूपणस्य माहात्म्याप्रतिपादकत्वेन समाधिभाषात्वाभावादित्यर्थः । **व्याख्याने** । **कालो हीति** । इदं लौकिकं कालाधीनमेव । भगवल्लीलाया एव कालानधीनत्वमिति भावः ।

श्रीसुबोधिनी-सारः

अन्याभिप्रायमन्यैश्च दुर्ज्ञेयमिति मा वदेत्याह । अनागतं भविष्यम् अतीतं भूतं वर्त्तमानम् अतींद्रियागोचरं विप्रकृष्टं देशांतरस्थं व्यवहितं कुड्याद्यंन्तरितं च योगिनः सम्यक् पश्यंति ॥ २१ ॥ शुकोक्तिः । स्वयंवरे पूर्वमनंगोंगरहितः शिवेन भस्मीकरणादधुनांगयुतो मूर्त्तिमान् कामः साक्षात्तया रुक्मवत्या वृत एकरथो युधि समागतान् राज्ञः निर्जित्य जहार ताम् ॥ २२ ॥ यद्यपि कृष्णेनावमानितो रुक्मी वैरमनुस्मरन् तथापि स्वसुर्भगिन्याः प्रियं कुर्वन् भागिनेयाय भगिनीपुत्राय सुतां व्यतरददात् ॥ २३ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे विद्वन् ! द्विषोः द्वेषयुक्तयोः कृष्णरुक्मिणोर्मिथो यद्वैवाहिकं विवाहनिमित्तं तन्मे मह्यमाख्याहि । ननु 'एतन्न जानामि' इत्याशङ्क्याह-अनागतमिति । अनागतं भविष्यत् अतीतं भूतं, वर्तमानं च सर्वं वस्तु योगिनः सम्यक् साक्षात्पश्यन्ति । 'ननु वर्तमानं तु सर्वे एव पश्यन्ति, तेन क उत्कर्षः' इत्याशङ्क्य वर्तमानं विशिनष्टि—अतीन्द्रियं अस्मदिन्द्रियागोचरम् । विप्रकृष्टं दूरस्थम् । व्यवहितं कुड्याद्यन्तरितम् । अतोऽज्ञातं तव किञ्चिदपि नास्ति, अतो वक्तव्यम् ॥ २१ ॥ यद्यपि कृष्णेनावमानितस्तथापि वैरं स्मरन्नपि रुक्मी स्वसुः रुक्मिण्याः प्रियं कुर्वन् भागिनेयाय प्रद्युम्नाय स्वसुतां व्यतरत् प्रददावित्यन्वयः ॥ २२ ॥ ननु 'स्वयमाहूय कन्यां दत्तवान्, किंतु तया वृतेन प्रद्युम्नेन कृतं तद्धरणमनुमोदितवान्' इत्याशयेनाह—वृत इति । तया रुक्मवत्या स्वयंवरे वृतः प्रद्युम्नः तत्र समेतान् कन्याप्राप्तिलोभेनागतान् बलात्कन्याग्रहणाय युधि प्रवृत्तान् राज्ञः निर्जित्य कन्यां जहारेत्यन्वयः । तत्पराक्रमातिशयं सूचयन् विशिनष्टि—एकरथ इति । तया वरणे तत्सौन्दर्यातिशयं हेतुं सूचयंस्तत्र हेतुमाह—अङ्गयुतः मूर्तिमान् साक्षादनङ्गः कामदेव इति ॥ २३ ॥

अन्वितार्थप्रकाशिका

एतदिति अर्द्धम् ॥ हे विद्वन् ! द्विषोः द्वेषयुक्तयोः कृष्णरुक्मिणोर्मिथो यद्वैवाहिकं विवाहनिमित्तं तन्मे मह्यमाख्याहि । अनागतमिति ॥ अनागतं भविष्यत् अतीतं भूतं वर्तमानं च अतीन्द्रियम् अस्मदिन्द्रियागोचरं विप्रकृष्टं दूरस्थं व्यवहितं कुड्याद्यन्तरितं च सर्वं वस्तु योगिनः सम्यक् साक्षात्पश्यन्ति । अतः सर्वज्ञत्वात् वद ॥ वृत इति ॥ रुक्मवत्या स्वयंवरे वृतः अङ्गयुतः मूर्तिमान् साक्षादनङ्गः कामदेवः प्रद्युम्नः एकरथः एकरथमात्रसहायः सन् तत्र समेताद् कन्याप्राप्तिलोभेनागतान् बलात्कन्याग्रहणाय युधि प्रवृत्तान् राज्ञः निर्जित्य कन्यां जहार ॥ यद्यपीति ॥ यद्यपि कृष्णेनावमानितः वैरं स्मरन्नपि रुक्मी स्वसुः स्वप्राणरक्षिकायाः रुक्मिण्याः प्रियं कुर्वन् भागिनेयाय प्रद्युम्नाय स्वसुतां व्यतरत् प्रददौ । प्रद्युम्नकृतं कन्याहरणमनुमोदितवानिति भावः ॥ रुक्मिण्या इति ॥ हे राजन् ! विशालाक्षीं नेत्रादिसौन्दर्यवतीं चारुमत्याख्यां रुक्मिण्यास्ततयां कन्यां तदवस्थां कृतवर्मणः सुतो बलिसंज्ञक उपयेमे । उपलक्षणमेतत् । अन्यासामपि एकैकाः कन्या अभूवन् ताश्च वराः उपयेमिरे ॥ २१-२४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनागतं भविष्यं अतीतं भूतं चातींद्रियमिंद्रियाप्राप्यं विप्रकष्टं दूरदेशस्थं ॥ व्यवहितं भितिकादिव्यवधानयुक्तं वस्तुजातं । योगिनः पश्यंति ॥ अतएतदाख्याहीति पूर्वेण संबंधः ॥ २१ ॥ तया रुक्मवत्या अनंगः प्रद्युम्नः तां जहार ॥ २२ ॥ यद्यपि कृष्णेनावमानितः कृतापमानः अतः वैरं स्मरन्नपि भागिनेयाय प्रद्युम्नाय स्वसुतां स्वसुप्रियं कुर्वन् सन् व्यतरत् ददौ ॥२३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमापृष्टः प्राह मुनिः ॥ वृत इति ॥ तया रुक्मिणः सुतया रुक्मवत्या, अनङ्गः सन्नपि, अङ्गयुतः शंभुवरादङ्गयुतो जातः, साक्षान्नयनविषयतां प्राप्तः काम इत्यर्थः । स्वयंवरे, वृतः । ततः, एकरथः सः, समेतान् राज्ञः, युधि निर्जित्य, जहार ॥ २१ ॥ यद्यपीति ॥ यद्यपि, रुक्मी कृष्णावमानितः श्रीकृष्णेन तु कृतावमानः, वैरं च अनुस्मरन् स्मरत्येव, तथापि, स्वसुः स्वप्राणरक्षकभगिन्याः, प्रियं कुर्वन्, 'लक्षणहेत्वोः-' इति शत्रादेशः । प्रियं कर्त्तुमित्यर्थः । भागिनेयाय स्वभगिनीसुताय प्रद्युम्नाय, सुतां स्वतनयां, व्यतरद्ददौ । तदा बहुभिः संप्रेरितोऽपि तदन्वमोदत । न त्वाहूय कन्यां ददावित्येवं प्रश्नोत्तरमभिप्रेतम् ॥ २२ ॥ रुक्मितनयाप्रसङ्गात् किं भगवतो दुहितरः सन्ति, यदि सन्ति तर्हि कस्यां भार्यायां कति कति कन्या अजीज-

नन्निति राज्ञो बुभुत्सां शमयन्नाह ॥ रुक्मिण्या इति ॥ हे राजन्, विशालाक्षीं विशालनयनां, चारुमतीं चारुमतीसंज्ञां, रुक्मिण्याः, कन्यां कन्यावस्थोपेतां तनयां, बली एतन्नामा कृतवर्मसुतः, उपयेमे किल। एवं सर्वासामप्येकैका कन्या तासां सर्वासां विवाहोपलक्षणार्थं ज्येष्ठायाः रुक्मिण्यास्तनयाया विवाह उक्तः ॥ २३ ॥

कृष्णप्रिया

महाराज ! आप तो योगिवर हैं आप से कोई बात छिपी नहीं है। योगिजन भूत-भविष्य-वर्तमान तीनों काल की सब बात अच्छी तरह से जानते हैं। अधिक क्या कहा जाय ? जो इन्द्रियातीत बातें होती हैं निकट प्रदेश में है या तो दूर सुदूर या मध्य में अन्तरायवाली भी बातें जानते हैं ॥ २१ ॥ श्रीशुकदेवजी महाराज ने कहा—राजन् ! श्रीप्रद्युम्न कुमार प्रत्यक्ष कामदेव थे। श्रीप्रद्युम्नजी की गुणगरिमा और रूपमाधुरी प्रसन्न होकर रुक्मवती ने स्वयंवर में प्रद्युम्नजी का वरण किया था। श्रीप्रद्युम्नजी ने संग्राम में अकेले ही स्वयंवर में इकट्टे हुए समस्त राजाओं को जीत लिया और रुक्मवती का अपहरण कर लाये ॥ २२ ॥ राजन् ! भगवान श्रीकृष्ण से पराजित एवं अपमानित रुक्मी के हृदय की वैरवृत्ति शान्त नहीं हुई थी और उनके हृदय में वैर की आग भभक रही थी लेकिन अपनी बहिन रुक्मिणीजी को प्रसन्न करने के आशय से अपने भानजे प्रद्युम्नजी को अपनी कन्या दे दी ॥ २३ ॥

रुक्मिण्यास्तनयां राजन् कृतवर्मसुतो बली। उपयेमे विशालाक्षीं[1] कन्यां चारुमतीं किल ॥ २४ ॥
दौहित्रायानिरुद्धाय पौत्रीं रुक्म्यददाद्धरेः।
रोचनां बद्धवैरोऽपि स्वसुः प्रियचिकीर्षया। जानन्नधर्मं तद्[2] यौनं स्नेहपाशानुबन्धनः ॥ २५ ॥
तस्मिन्नभ्युदये राजन् रुक्मिणी रामकेशवौ। पुरं भोजकटं जग्मुः साम्ब[3]प्रद्युम्नकादयः ॥ २६ ॥
तस्मिन् निवृत्त उद्वाहे कालिङ्गप्रमुखा नृपाः। दृप्तास्ते रुक्मिणं प्रोचुर्बलमक्षैर्विनिर्जय ॥ २७ ॥
अनक्षज्ञो[4] ह्ययं राजन्नपि तद्व्यसनं[5] महत्। इत्युक्तो बलमाहूय तेनाक्षै रुक्म्यदीव्यत ॥ २८ ॥

कर्दमक्षमा

अन्वयः—राजन् ! कृतवर्मसुतः, बलोकामा, विशालाक्षीम्, चारुमतीम्, कन्याम्, उपयेमे ॥ २४ ॥ राजन् ! हरेः, बद्धवैरः, अपि, तद्, यौनम्, अधर्मम्, जानन्, अपि, स्नेहपाशानुबन्धनः, स्वसुः, प्रियचिकीर्षया, अनिरुद्धाय, दौहित्राय, रोचनाम्, पौत्रीम्, अदात् ॥ २५ ॥ राजन् ! तस्मिन्, अभ्युदये, रुक्मिणी, रामकेशवौ, साम्बप्रद्युम्नादयः, भोजकटं, पुरम्, जग्मुः ॥ २६ ॥ तस्मिन्, उदवाहे, निवृत्ते, दृप्ताः, कलिङ्गप्रमुखाः, नृपाः, अक्षैः, बलम्, विनिर्जय, इति, प्रोचुः ॥ २७ ॥ राजन् ! हि, अनक्षज्ञः, अपि, अयम्, तद्, महत्, व्यसनम्, आसीत्, इति, उक्तः, बलम्, आहूय, रुक्मी, तेन, अक्षैः अदीव्यत ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सर्वासामपि एकैका कन्या तत्सर्वविवाहोपलक्षणार्थं ज्येष्ठकन्याविवाहमाह। रुक्मिण्या इति ॥ २४ ॥ यौनं विवाहः। तद्यौनमधर्मं जानन्निति "द्विषदन्नं न भोक्तव्यं द्विषंतं नैव भोजयेत्" इति लोकविरोधात्। "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु" इति निषेधाच्चेत्यर्थः ॥ २५–२६ ॥ लोकविरुद्धाचरणफलं वक्तुमाह। तस्मिन्निति ॥ २७ ॥ अदीव्यत् क्रीडितवान् ॥ २८–२९ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

सर्वासां कृष्णभार्याणाम्। चारुमतीनाम्नीं बलीनामा। यद्यप्ययं विवाहोऽनुचितस्तथापि जन्मांतरीयकर्मवशाद्भगवदनुमोदनेनाशास्त्रीयमपि शास्त्रीयं भवति वेदस्यापि तदाज्ञारूपत्वात्तदुक्तं क्रियते "मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके" इति कपिलदेवोक्तेः। "एतत्पुंसां परं श्रेयो यत्तवाज्ञानुपालनम्" इति भृगूक्तेः ॥ २४ ॥ योन्यै तत्प्राप्तय इदं यौनं विवाहः। तत् मातुलपुत्रीविवाहरूपम्। यद्यपि "मातुलस्य सुतामूढ्वामातृगोत्रां तथैव च" इत्यादिस्मृतेः प्रायश्चित्तविधानादधर्मोऽपि तथापि "आयाहींद्र पथिभिरीळितेभिर्यज्ञमिमं नो भागं जुषस्व तृप्तां जहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयीमिव" इति मंत्रलिंगात्। "यौषापत्यं मातुलीयं यथा भागः पितृष्वसुः पुत्रस्यैवंवयांतेंशंजुषस्वेंद्रेत्यृषिर्जगौ" इति श्रुतेः स्मृत्यपेक्षया बलवत्त्वम्। तदुक्तम्—

---

१. लाक्षः—वीर. विज. । २. तद्योगं—विज. । ३. प्रद्युम्नाद्यास्तथापरे—वीर. । ४. बलो राजन्—वीर. विज. । ५. नी महान्—विज. ।

"श्रुत्या स्मृतेर्विरोधे श्रुतिर्बलीयसी"। तथाहि—"श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते। श्रौतं तत्र प्रमाणं स्याद्द्वयोर्द्वैधे श्रुतिर्वरा। श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ। स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक्-पृथक् ॥" इत्याचारार्कोक्तेर्यद्यपि 'मातुलस्य सुतामूढ्वा' इत्यादिस्मतेः "मातुलस्येव व योषाभागस्ते" इत्यादिश्रुतेः प्राबल्यमस्ति तथापि "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नहि" इति लोकविद्विष्टत्वाद्धर्मत्वेऽप्यकार्य्यत्वमेव। यच्चोक्तम् "दक्षिणे मातुलीकन्या ह्युत्तरे मांसभोजनम्। चर्मोदकं धन्वनि च न दुष्टं मनुरब्रवीत् ॥" इति तच्च तत्रत्यानां देशधर्मत्वान्न दुष्टम्। तदुक्तं स्मृत्यंतरे—"यद्यपि स्यात्स्वयं ब्रह्मा त्रैलोक्याकर्षणक्षमः। तथापि लौकिकाचारं मनसापि न लंघयेत् ॥ समयाचारिको धर्मो जातिदेशकुलोद्भवः। ग्रामाचारः परिग्राह्यः सर्वत्रैव यथोदितम्" इति। एवमेककुलस्थदेवकीवसुदेवकृष्णसत्यभामाविवाहवत्पूर्वोक्तचारुमतीकृतवर्मसुतविवाहोऽपि कुलधर्मत्वान्न दुष्टः। यद्वा—यादवानां चंद्रसूर्योभयवंश्यानामन्यतरत्वमादाय भिन्नवंशतापि संभवति। तथा च सर्वथैव तेषां परस्परविवाहे न दोषः। उभयवंश्यत्वं यदूनां हरिवंशे वर्णितम्। तथाहि—ययातेर्यदुः, यदोः क्रोष्टा, क्रोष्टुर्देवमीढः, तस्माच्छूरः, तस्माद्वसुदेवः, तत कृष्णः। पुनः सूर्यवंशाद्धर्यश्वाद्यदुः, यदोर्माधवः, तस्मात्सत्त्ववान्, सत्त्वतो भीमः, भीमादंधकः, ततो रैवतः, तत ऋक्षः, ततो विश्वगर्भः, ततो वसुः, वसोर्वसुदेवः, ततः कृष्ण इति चंद्रवंशीययदोः षष्ठस्य सूर्यवंशीयात्तत एकादशत्वं च कृष्णस्य न कल्पांतराभिप्रायं किन्तु गृहाद्गृहांतरप्रवेशवद्योगबलेनैक एव यदुः सूर्यवंशेऽपि प्रादुर्बभूव सूर्यवंशं स्ववंशे आनीतवान्। यथा ब्रह्मणो मानसः पुत्रो वसिष्ठः केनचिन्निमित्तेन पुनर्मित्रावरुणाभ्यां जन्म लब्ध्वापि वसिष्ठत्वं न जहौ। एवं यदुरपि लीलया देहद्वयं दध्रे, न तावद्द्वौ यदू जातावेक एव यदुर्वंशद्वयकर्तेति। एवं वसुदेवकृष्णावपि वंशद्वयानुगतावेक एव। एवं वसुशूरयोरपि पितृभेदान्नामभेदेऽपि स्कन्दसनत्कुमारवद्व्यक्त्यैक्यमेव। यादवानां देवतात्वेनाप्येकस्योभयसम्बन्धस्य युगपत्संभवान्न विरोधः। अत एव क्वचिन्नरधर्मोल्लंघनेऽपि न तेषां दोषः शास्त्रस्य मनुष्यपरत्वमेव प्राय इति लोकसंग्रहार्थं स्वीकुर्वंतु शास्त्रं मा वेत्यलं प्रसक्तानुप्रसक्तेन ॥२५॥ तस्मिन्विवाहलक्षणे। अभ्युदये मंगले "आविर्भावे प्रकाशे च मंगलेऽभ्युदयः स्मृतः" इति धरणिः ॥२६॥ तस्मिन्प्रकृते। अक्षैः पाशकैः "अक्षो रथस्यावयवे व्यवहारे विभीतके। पाशके शकटे कर्षे ज्ञाने चात्मनि रावणौ ॥" इति हेमचन्द्रः ॥ २७ ॥ तेन बलेन ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नूनं बलीतिसंज्ञा सा च सर्वेषां गुणानामुपलक्षणम् अत एव तस्मै सा दत्तेति भावः। विशालाक्षीमिति "धन्या पितृमुखी कन्या" इति न्यायात् ॥ २४ ॥ दौहित्रायेति सार्द्धकम्। हरेः हरौ बद्धवैरोपि अधर्म्मं क्वचित् मातुलकन्यापरिणयशास्त्रे आचारे सत्यपि शत्रुसम्बन्धस्य तत्रत्यलोकानामपि व्यवहारविरुद्धत्वेनान्याय्यत्वं जानन्नप्यददात् यतः स्नेहपाशेनानु निरन्तरं बध्यत इति तथा सः ॥ २५ ॥ एवमपि श्रीभगवति कौटिल्यस्य फलमाह–तस्मिन्निति। अभ्युदये महोत्सवे रुक्मिण्या आदावुक्तेः भ्रातृगृहाय तस्या एव प्रयोजकत्वात् श्रीरामस्य साम्बस्य चादावुक्तिः स्वसम्बन्धिगृहे श्रीकृष्णेन श्रीप्रद्युम्नेन च स्वस्मादपि यथा स्वं तस्य पुरस्कारात् ॥ २६ ॥ तस्मिन्निवृत्त इति सार्द्धकम्। नृपो यथा हरिवंशे—

"संयुक्ता ज्ञातयश्चैव रुक्मिणः सुहृदश्च ये। आहूता रुक्मिणा तेपि तत्राजग्मुर्नराधिपाः" ॥ इति ॥ २७ ॥

हि यतः प्रोत्साहयन्ति हे राजन्निति राजत्वेन तव सम्यगक्षज्ञानं भवतीति भावः। इतीत्यर्द्धकम् अदीव्यत सभामध्ये तथा च तत्रैव—

ते शुभां काञ्चनस्तम्भां कुसुमैर्भूषिताजिराम्। सभामाविविशुर्हृष्टाः सिक्तां चन्दनवारिणा ॥

किञ्च—

निकृत्य तं जिगीषन्तो दाक्षिणात्या नराधिपाः। मणिमुक्ताः सुवर्णञ्च तत्रानिन्युः सहस्रशः ॥
ततः प्रावर्त्तत द्यूतं तेषां रतिविनाशनम्। कलहस्यास्पदं घोरं दुर्मतीनां क्षयावहम् ॥ इति ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बलीति—गुणः, विशालाक्षाख्य इति रूपञ्च सूचितम्। अतो राजन् राजमानः, हे नृपेति वा, किल निश्चये, भृत्यस्य प्रभुकन्याविवाहे संशयो न कार्य्यस्तस्य भक्तवात्सल्यादित्यर्थः ॥ २४ ॥ हरेः–हरौ बद्धवैरोऽपि अधर्म्मं लोकाचारविरुद्धेन अन्याय्यं जानन्नप्यदात्, यतः स्नेहपाशेन अनु निरन्तरं बध्यत इति तथा सः ॥ २५ ॥ अभ्युदये महोत्सवे, आदि-शब्दात् सर्व्वे कुमारा यादवाश्च; साम्बात् पश्चात् प्रद्युम्नस्योक्तिः, श्वशुरस्य मरणशंकयागमने तस्य गौणत्वात्, अत एव संज्ञामात्रापेक्षया क-प्रत्ययः। हे राजन्निति दुष्टरुक्मिणो मृत्युहेतूपसत्त्या प्रहर्षात् ॥ २६ ॥ नृपाः प्रायो दाक्षिणात्या रुक्मिणः सुहृदो विवाहोत्सवे तेनाहूताः,

तथा च श्रीहरिवंशे (विष्णु० प० ६१।१५) संयुक्ता ज्ञातयश्चैव रुक्मिणः सुहृदश्च ये। आहूता रुक्मिणा तेऽपि तत्राजग्मुर्नराधिपाः ।।' इति । दृप्ताः गर्विताः, प्रोत्साह्योचुः, बलं महाबलिनमपीति भावः। विशेषेणान्यतोऽधिकतया, अतो निःशेषेण सर्वस्वग्रहणादिना जय ।। २७ ।। कथमेतद् घटेतेत्यपेक्षायामाह—अनक्षज्ञ इति । हि यतः प्रोत्साहयन्ति, हे राजन्निति राजत्वेन तव सम्यगक्षज्ञानं भातीति भावः । अदीव्यत सभामध्ये; तथा च श्रीहरिवंशे (विष्णु० प० ६१।२३)—'ते शुभां काञ्चनस्तम्भां कुसुमैर्भूषिताजिराम् । सभामाविविशुर्हृष्टाः सिक्तां चन्दनवारिणा ।।', किञ्च (विष्णु प० ६१।२६–२७)—

'निकृत्या तं जिगीषन्तो दाक्षिणात्या नराधिपाः । मणिमुक्ताः सुवर्णञ्च तत्रानिन्युः सहस्रशः ।।
ततः प्रावर्त्तत द्यूतं तेषां रतिविनाशनम् । कलहस्यास्पदं घोरं दुर्मतीनां क्षयावहम् ।।' इति ।।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

रुक्मितनयाप्रसङ्गात् किं भगवतोपि दुहितरः सन्ति यदि सन्ति तर्हि कस्यां कस्यां भार्यायां कति कति कन्या अजीजनत् इति राज्ञो बुभुत्सां शमयन्नाह—रुक्मिण्या इति । तनयामित्येकवचनेनाप्येन्यासामेकैव कन्येति दर्शितं चारुमतीं नाम कन्यां कृतवर्म्मणः सुतः उपयेमे ।। २४ ।। न केवलं रुक्मी प्रद्युम्नगृहीतां स्वसुतामेवान्वमोदत अपि तु प्रद्युम्नसुतायानिरुद्धाय स्वदौहित्राय स्वपौत्रीमपि भगिनीप्रियचिकीर्षया ददावित्याह—दौहित्रायेति । हरेरित्यस्य पौत्रायेति शेषः । रोचनां नाम पौत्रीं ददावित्यर्थः । न केवलं बद्धवैरोप्येव अपितु तद्यौनमधर्म्यं जानन्नपि "यु मिश्रणे" योर्निर्मिश्रणं वैवाहिकसम्बन्धः तत्प्रयुक्तं भोजनप्रतिभोजनादिकं यौनं तदधर्म्यमस्वर्ग्यं लोकविरुद्धं च जानन्नपीत्यर्थः । "द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत्" इतिशास्त्रादितिभावः । एवम्भूतोप्यदात् तत्र हेतुं वदन् विशिनष्टि स्नेहपाशेन स्वसरि य; स्नेह एव पाशः तेनानुबध्यत इति तथा अत एव तस्याः प्रियं कर्तुमिच्छया ददावित्यर्थः ।। २५ ।। लोकविरुद्धाचरणफलं वक्तुमाह—तस्मिन्नित्यादिना । तस्मिन् अभ्युदये अनिरुद्धविवाहरूपोत्सवे निमित्ते ।। २६ ।। तस्मिन्निति । तस्मिन्नुद्वाहे निवृत्ते जाते सति ये कलिङ्गप्रमुखास्ते रुक्मिणं प्रोचुः' किमिति ? बलं बलभद्रम् अक्षैर्देवनाक्षैस्तद्व्यापारैर्द्यूतैरितियावत् । हे राजन्! रुक्मिन् अयं बलरामः अनक्षज्ञः द्यूतानभिज्ञः अपि तथापि तद्व्यसनं द्यूतव्यसनं महदस्य वर्त्तते इति ।। २७ ।। इत्थमुक्तो रुक्मी बलभद्रमाहूय तेन सहाक्षैरदीव्यत क्रीडितवान् । शतमिति निष्काणामित्यादि । तत्र द्यूते रामस्तावन्निष्काणां शतं ततः सहस्रं ततोऽयुतं च पणं जित्वा स्वीकृतवान् पुनस्तं राममपि रुक्मी जितवान् तदा बलं रामं कलिङ्गः प्राहसत् अपहसितवान् । तद्धसनं नामृष्यत् न सेहे ।। २८–२९ ।।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावलो

कृतवर्मणः सुतः पुत्रः ।। २४ ।। रुक्मी स्वदौहित्राय हरेः पौत्रायानिरुद्धायेति शेषः । स्वपौत्रमदात् ।। २५ ।। तस्मिन्नभ्युदये अनिरुद्धविषये विवाहे प्रवृत्ते सति ।। २६ ।। बलं बलभद्रम् ।। २७ ।। तद्व्यसनी द्यूतक्रियापरः ।। २८ ।।

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

यौनं विवाहं अधर्मम् अधर्महेतुं जानन्नपीति 'द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत्" इत्यादिलोकविरोधात् "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नतु" इति निषेधाच्चेत्यर्थः ।। २५–२६ ।। बलं राममिति कृष्णस्य द्यूतेऽपि दुर्जयत्वनिश्चयादिति भावः ।। २७ ।। प्रथमं सुवर्णमुद्राणां शतं ततः सहस्रं ततोऽयुतं तं पणं नामृष्यत् अन्तश्चुकोपेत्यर्थः ।। २८–२९ ।।

गूढार्थदीपिनी

बली नामा । उपयेमे विवाहितवान् ।। २४ ।। दौहित्रेति सार्द्धम् । दौहित्राय रुक्मवतीपुत्राय अनिरुद्धाय । यौनं विवाहसम्बन्धम् अधर्मम् 'द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत्' इति धर्मशास्त्रात् ।। २५ ।। अभ्युदये विवाहोत्सवे ।। २६ ।। दृप्ता गर्विताः । बलं बलदेवम् । अक्षैः पाशैः विनर्जय ।। २७ ।। तथापि द्यूतव्यसनमस्येति शेषः ।। २८ ।।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सर्वासामेकैका कन्या कुलपुत्राय तदनुरूपाय च दत्तेति सूचयति—रुक्मिण्या इति ।। २४ ।। एवं पुत्राणां कन्यानां च विवाहानेकदेशकथनद्वारा दर्शयित्वा महद्विरोधोऽनर्थहेतुरिति सूचयितुं रुक्मिणो वधं पौत्राणां विवाहोपलक्षणार्थमनिरुद्धविवाहञ्चाह—दौहित्रायेति । यौ द्विषोः पौत्रीपौत्रौ तयोः यौनं विवाहमधर्मः अधर्महेतुं जानन्नपि "द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत्" इत्यादिलोकविरोधात् "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नतु" इति निषेधात् तथापि अदात् ।। २५–२६ ।। श्रीकृष्णमजेयं मत्वा बलमित्युक्तम् ।। २७ ।। अदीव्यत क्रीडितवान् ।। २८ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विशालाक्षो नाम्ना कृतवर्मणः पुत्रः ॥ २३ ॥ दौहित्राय स्वपुत्रीपुत्राय पौत्रीं पुत्रपुत्रीं हरेर्हरिणा बद्धवैरोऽपि स्वसुः प्रियचिकीर्षया रोचनां नाम्ना कान्तिमतीं वा। रोचना रुचिरस्त्रियामिति विश्वः॥ ३४ ॥ तद्योगं श्रीकृष्णानुबन्धमधर्मम्। द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत्। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्वित्यादेः। तद्यौनमिति पाठे योनेरिदं यौनं योनिसम्बन्धमित्यर्थः। जानन्नपि स्नेहपाशानुबन्धनः सन्नददात्। तस्मिन्नभ्युदये विवाहमहे ॥ ३५ ॥ भोजकटं पुरं साम्बप्रद्युम्नकादयो रुक्मिणी रामकेशवौ चेति जग्मुः। तस्मिन्नुद्वाहे प्रवृत्ते कलिङ्गप्रमुखा नृपा दृप्तास्ते रुक्मिणं बलमक्षैः पाशैर्विनिर्जित्य पराजयं कुर्विति प्रोचुः। बलः स्वयमनक्षज्ञो दुरोदरस्थापनाचतुरो न हि लेखनं कलयेदित्यत आहुः। अपि तथाऽपि तद्व्यसनी तस्य तस्मिन्वा व्यसनमस्तीति स तथा तत्पर इति। महानिति प्रकरणविशेषतो धर्मिविशेषणत्वेन सरसमिति व्यसनविशेषणम्। ततश्च महाव्यसनवानिति पर्यवस्यति ॥ ३६ ॥ इत्युक्तः कलिङ्गादिभिर्बलमाहूय तेनाक्षैरदीव्यत चिक्रीड। तत्र राम आदौ शतमिति क्रमेणायुतं पणं ग्लहमादधे न्यधत्त ॥ ३७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं धर्मप्रस्तावे पुत्रस्योत्पत्तिं विवाहं चोक्त्वा कन्यादानमपि भगवत्कृतमाह **रुक्मिण्यास्तनया**मिति। कृतवर्मा यादवः, बलीति नाम। विशालाक्षीमिति सौन्दर्यम्। चारुमतीमिति नाम। कन्यामाहूय दत्ताम्। **रुक्मिण्यास्तनया**मित्यनेन अन्यासामपि कन्या उक्ताः सन्तीति तथा तासां विवाहोऽपि ज्ञातव्यः। **विशालाक्षी**मिति सौन्दर्यं तस्या विवाहे प्रयोजकमुक्तम्, नतु महतः कन्यात्वम्। **चारुमती**मिति नाम्ना अन्या अपि कन्याः सन्तीति सूचितम्। तेन रुक्मिण्याः पञ्च कन्याः पञ्चचकारैरुक्ताः अध्यवसेयाः, अन्यासामपि यथाचकारं कन्यका ज्ञेयाः। किलेति प्रसिद्धे। न तु व्यासादिभिरेतदुपदिष्टमिति। महत्त्वाख्यापकत्वात् केवलं लौकिकत्वात् ॥ २४ ॥ ततोऽनिरुद्धस्तत्रैव भोजकटे जातः। तस्यापि विवाहं तत्रैवाह **दौहित्रायानिरुद्धाये**ति स्वकुलस्थां कन्यामन्यो विवाहं मा करोत्विति। तस्या नाम रोचनेति। साप्यनिरुद्धस्य मातुलकन्या। तावता द्वेषः शान्तो भविष्यतीत्याशङ्क्याह बद्धवैरोऽपीति। **स्वसुः प्रियचिकीर्षये**ति पूर्ववद्धेतुः। यावज्जीवं यदेव किञ्चिदुत्कृष्टम्, तदेव भगिनीप्रीत्यर्थं दत्तवानित्यध्यवसीयते। अन्यथा पुनः पुनः तद्धेतुत्वेन नोच्येत। ननु तस्मै देयं दत्तवान्, कथमेतावता स्वसा प्रीता भवतीति चेत्। तत्राह **स्वसुः प्रियचिकीर्षया जानन्नधर्मं तद्यौन**मिति। स्त्रीसम्बन्धः अधर्मो भवति। 'माता पितामही यस्य तथैव प्रपितामही। तिस्र एककुले जाताः सोऽभिशस्तो निगद्यत' इति तस्यामुत्पन्नस्याभिशस्तिदोषात् तद्यौनमधर्मरूपं भवति। अधर्ममप्यङ्गीकृत्य स्वसुः प्रियार्थं दत्तवान्। ननु निषिद्धाचरणे कथं प्रियम्, न वा तत्प्रियं प्रियं भवतीत्याशङ्क्याह **स्नेहपाशवशं** गत इति। स्नेहे सर्वमेव समीचीनं भासते। उभयोः परमस्नेहात् तद्गतो दोषो न भासते। अतो जानन्नपि एवं कृते प्रियं भवतीत्युभयोर्लौकिकबुद्ध्या तथा कृतवानित्यर्थः ॥ २५ ॥ अयं विवाहः लौकिकवदिति दत्तायां कन्यायां वरयात्रिकाः भगवदादयः सर्व एव समागता इत्याह **तस्मिन्नभ्युदय** इति। विवाहोत्सवे रुक्मिणी मुख्या। निमित्तत्वात्। ततो लौकिकमिति ज्येष्ठानुक्रमेण रामकृष्णौ पुरत्वमापन्नं भोजकटस्थानं प्रतिज्ञास्थानं जग्मुः। **रामकेशवा**विति ययोर्गमनमसम्भावितं तौ निरूप्य, साम्बप्रद्युम्नादयः वरयात्रिका निरूप्यन्ते। सुन्दरः साम्ब इति प्रद्युम्नादपि प्रथमं निर्दिष्टः, कप्रत्ययोऽनादरे, निषिद्धत्वात् ॥२६॥ निषिद्धाचरणस्य फलमाह **तस्मिन्निवृत्त उद्वाह** इति। कन्यादानानन्तरं वरयात्रायामपि सिद्धायां कलिङ्गदेशाधिपतिः देशनाम्नैव प्रसिद्धः। स्वतः स्नेहेन तूष्णींभूतमपि रुक्मिणं प्रोचुः। यतो दृप्ताः। नापि तस्य तथा करणे किञ्चित्प्रयोजनमस्ति ॥ २७ ॥ नन्वक्षजयः कथमेकान्ततो ममैव भविष्यतीत्याशङ्कायामाह **अनक्षज्ञ** इति। ये हि वैदिककर्मपरा धर्मपरा वा ते ह्यक्षज्ञा भवन्ति। बलस्यानुभयरूपत्वात् युक्तमेवाक्षाज्ञानमिति हिशब्दः। राजन्निति सम्बोधनात्त्वमक्षज्ञ इति। **अपि तद्व्यसनं मह**दिति अज्ञो न क्रीडिष्यतीति शङ्कां वारयति। अत आदौ प्रवृत्तः पश्चान्न निवर्तिष्यत इति पराजितो भविष्यति। एवमुपपत्त्या प्रबोधितः तथा कृतवानित्याह इत्युक्त इति। बलः पूर्वं ज्ञानोपदेशात् सान्त्वनात् हित इति बलमेवाहूय, भगवतः सकाशात् पृथक्कृत्य, रुक्मी दुर्बुद्धिरदीव्यत, तत्राक्षान्गृहीत्वा रुक्मी प्राह 'पणः क्रियता'मिति। भिन्ना सङ्ख्या चतुर्दिक्ष्वक्षेषु लिख्यते। तत्र कस्यचित् समसङ्ख्या, कस्यचिद्विषमसङ्ख्येति पूर्वमेव प्रतिज्ञाय, क्रीडार्थं प्रवृत्तौ ॥ २८ ॥

श्रीसुबोधिनी–सारः

एकैका कन्या सर्वासामित्यनेन ज्ञाप्यते तद्विवाहमंतरा गृहाशुद्धेः "कन्याल्पं पुत्रबाहुल्यं गृहस्थसुखकारणम्" इति सूचयति। हे राजन् रुक्मिण्याः तनयां पुत्रीं चारुमतीं विशालनेत्रां कन्यां कृतवर्मणः सुतो बली उपयेमे किल निश्चये ॥ २४ ॥ हरेर्बद्धवैरोपि रुक्मी रोचनां नाम्नीं पौत्रीं स्वदौहित्राय दुहितृपुत्रायानिरुद्धायाऽदात् स्वसुर्भगिन्याः प्रियकरणेच्छया तयोर्यौनं योनिसंबंधं विवाहमधर्मं जानन् सन् स्नेहपाश एवानुबंधो दोषोत्पादो यस्य सः ॥ २५ ॥ 'महत्पापं फलेत्सद्यः' इति सूचयितुं तत्कथामाह। तस्मिन्नभ्युदये विवाहे रुक्मिणी रामकृष्णौ सांबादयो भोजकटं पुरं जग्मुर्ययुः हे राजन् ॥ २६ ॥ तस्मिन्नुद्वाहे

विवाहे निवृत्ते पूर्णे सति कालिगः प्रमुखो येषां ते नृपा दृप्ता गर्विताः तत्पक्षीयास्ते रुक्मिणं प्रोचुः बलं राममक्षैः पाशकैस्त्वं विनिर्जयेति ॥ २७ ॥ अयं बलोऽनक्षज्ञोऽक्षान्न जानातीति अपि एवं सत्यपि तेषां पाशकानां तस्य वा व्यसनमाग्रहो महत् हि युक्तम् इत्युक्तो रुक्मी बलमाहूय तेन सहाक्षैः पाशकैरदीव्यताक्रीडत ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं पुत्रान्निरूप्य उपलक्षणविधयाऽनिरुद्धं पौत्रं च निरूप्य सर्वासामेव भगवत्पत्नीनामेकैका कन्यास्ति तत्सर्वविवाहोपलक्षणार्थं ज्येष्ठकन्याविवाहमाह—रुक्मिण्या इति। हे राजन्! विशालाक्षीं नेत्रादिसौन्दर्यवतीं चारुमत्याख्यां रुक्मिण्यास्तनयां कन्यां तदवस्थां कृतवर्मणः सुतो बलिसंज्ञक उपयेमे इत्यन्वयः। 'किल' इति लोकप्रसिद्धिं द्योतयति ॥ २४॥ रुक्मिणो रुक्मिण्यां स्नेहातिशयं सूचयन्नाह—दौहित्रायेति। तद्यौनं 'यु मिश्रणे'। तं विवाहसम्बन्धमधर्मं जानन्नपि रुक्मी स्वदौहित्राय हरेः पौत्राय अनिरुद्धाय रोचनाख्यां स्वपौत्रीं अददादिति सार्धान्वयः। अधर्मं ज्ञात्वापि वैरिणे दाने हेतुमाह—स्नेह एव पाशस्तेनानुबध्यते इति तथा स इति। तदेव स्पष्टयति—स्वसुः प्रियचिकीर्षयेति ॥ २५॥ अधर्मफलं दर्शयन्नाह—तस्मिन्निति। 'राज्ञां विवाहव्यवहारस्तु तव विदित एव' इति सूचयन् सम्बोधयति—राजन्निति। तस्मिन्नभ्युदये अनिरुद्धविवाहोत्सवनिमित्ते सति रुक्मिण्यादयो भोजकटाख्यं पुरं जग्मुरित्यन्वयः॥ २६॥ तस्मिन्नुद्वाहे निवृत्ते सति कालिङ्गः कलिङ्गदेशाधिपनिर्देशनाम्ना प्रसिद्धः प्रमुखो येषां ते ये नृपास्ते बलं अक्षैः देवनसाधनैर्विनिर्जय। ततः पराजयशङ्का तु नैव कर्तव्या, हि यस्मात् अयं बलः अनक्षज्ञः द्यूतानभिज्ञः। तत्रापि राज्याभावं हेतुं सूचयन् सम्बोधयति—राजन्निति। ननु 'तर्हि देवनमेव कथं करिष्यति' इति शङ्कानिरासायाह—अपीति। अनभिज्ञत्वेऽपि अस्य तद्व्यसनं तस्य द्यूतस्य व्यसनं महद्वर्तत इति रुक्मिणं प्रति प्रोचुरिति सार्धान्वयः। 'ते एवं निर्भयतया कथमूचुः' इत्यपेक्षायां तत्र हेतुमाह—दृप्ता गर्विता इति। राजभिरित्युक्तो रुक्मी बलमाहूय तेन सहाक्षैरदीव्यत् क्रीडितवान् ॥ २७–२८ ॥

अन्वितार्थप्रकाशिका

दौहित्रायेति सार्द्धम् ॥ "द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत्।" इत्युक्त्या व्यवहारविरुद्धं तद्यौनं विवाहसंबन्धम्। "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु।" इति निषेधादधर्ममधर्महेतुं जानन्नपि स्नेह एव पाशस्तेनानुबध्यते इति तथा स इति। रुक्मी स्वसुः प्रियचिकीर्षया स्वदौहित्राय हरेः पौत्राय अनिरुद्धाय रोचनाख्यां स्वपौत्रीम् अददात् ॥ २५ ॥ तस्मिन्निति॥ हे राजन्! तस्मिन्नभ्युदये अनिरुद्धविवाहोत्सवनिमित्ते सति रुक्मिणी रामकेशवौ साम्बप्रद्युम्नकादयश्च भोजकटाख्यं पुरं जग्मुः ॥ २६ ॥ लोकविरुद्धाचरणफलं वक्तुमाह—तस्मिन्निति ॥ तस्मिन्नुद्वाहे निवृत्ते सति कालिङ्गः कलिङ्गदेशाधिपतिः प्रमुखो येषां ते दृप्ताः गर्विताः नृपाः रुक्मिणं प्रोचुः। त्वं बलमक्षैः देवनसाधनैर्विनिर्जय। कृष्णस्य द्यूतेऽपि दुर्जयत्वान्निश्चयात् ॥ २७॥ अनक्षज्ञ इति ॥ हे राजन्! हि यस्मात् अयं बलः अनक्षज्ञः द्यूतानभिज्ञः तथापि तद्व्यसनं द्यूतव्यसनं महद्वर्तते। राजभिरित्युक्तो रुक्मी बलमाहूय तेन सहाक्षैरदीव्यत क्रीडितवान्। तङार्षः। कर्मव्यतिहारे वा तङ् ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

चारुमतीं तत्संज्ञां ॥ २४ ॥ पौत्रीं रोचनां हरेः। हरौ बद्धः वैरोपि तद्यौनं विवाहं अधर्मं जानन् ॥ २५ ॥ अभ्युदये विवाहोत्सवे ॥ २६ ॥ कालिगाद्याः नृपाः अक्षैर्बलं विनिर्जयेति रुक्मिणं प्रोचुः अयं रामः अनक्षज्ञः अक्षज्ञोनभवतीत्युत्तरादपकृष्यते अतः तस्य जयेन कृष्णादि सर्वे यादवाः जिताः स्युः कुंडिनं न प्रवेक्ष्यामीति प्रतिज्ञात्वा या कृता तेषां जयेन तस्याः सत्यत्वं भविष्यतीति भावः ॥ २७ ॥ अयं बलदेवः तेषामक्षाणां व्यसनं तस्याऽस्ति। अक्षैरदीव्यत क्रीडयामास ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न केवलं रुक्मी प्रद्युम्नगृहीतां स्वसुतामन्वमोदितापि तु प्रद्युम्नसुतायानिरुद्धाय स्वदौहित्राय पौत्रीमपि भगिनीप्रियचिकीर्षया ददौ इत्याह। दौहित्रायेति। 'यु मिश्रणे' तस्य योनिर्मिश्रणं वैवाहिकः सम्बन्धः तत्प्रयुक्तं भोजनप्रतिभोजनादिकं यौनं, तत् यौनं अधर्मं जानन्नपि, अधर्मस्तु 'द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत्' इति शास्त्रादिति भावः। स्नेहपाशानुबन्धनः स्नेहपाशसितः, रुक्मी स्वसुः, प्रियचिकीर्षया, बद्धवैरः सन्नपि, पौत्रीं स्वपुत्रसुतां रोचनां, हरेः पौत्रायेति शेषः। दौहित्राय स्वदुहितृसुताय, अनिरुद्धाय, अददात् ददौ ॥ २४ ॥ लोकविरुद्धाचरणफलमाह। तस्मिन्निति। हे राजन्, तस्मिन् अभ्युदये अनिरुद्धविवाहरूपोत्सवे निमित्ते, रुक्मिणी, रामकेशवौ, साम्बप्रद्युम्नकादायः, भोजकटं पुरं, जग्मुः ॥ २५॥ तस्मिन्निति। तस्मिन्, उद्वाहे, निवृत्ते समाप्ते सति, दृप्ताः दर्पपूर्णाः, कालिङ्गप्रमुखाः, ते प्रसिद्धाः नृपाः, हे राजन् रुक्मिन्, त्वं अक्षैः पाशकैः, बलं बलभद्रं, विनिर्जय, इति, रुक्मिणं प्रोचुः। हि यस्मात्, अयं बलः, अनक्षज्ञः अपि, महत् एव, तद्व्यसनं

पाशकखेलनव्यसनं, अस्य वर्त्तते इति शेषः ॥ २६ ॥ इतीति । इतीत्थं उक्तः कलिङ्गनृपादिभिरभिहितः, रुक्मी बलं आहूय, तेन बलेन, अक्षैः अदीव्यत क्रीडितवान् ! तत्र द्यूते, शतं निष्काणामिति शेषः । सहस्रं अयुतं, पणं, रामः, आददे जित्वा स्वीकृतवान् ॥ २७ ॥ तमिति । पुनरिति शेषः । तं तु राममपि, रुक्मी, अजयत् । तत्र तदा, कालिङ्गः, बलं बलभद्रं दन्तान् संदर्शयन्, उच्चैरुच्चस्वरेण, प्राहसत् । तत्तत्कृतमट्टहासं, हलायुधो बलभद्रः, न अमृष्यत् न सेहे ॥ २८ ॥

कृष्णप्रिया

महाराज परीक्षित् ! श्री रुक्मिणी जी पुत्री सर्वाङ्ग सुन्दरी चारुमती का विवाह कृतवर्मा नाम के यादव के सुपुत्र बली के साथ किया गया ॥ २४ ॥ राजन् ! यद्यपि रुक्मी का भगवान् श्रीकृष्ण के साथ रुक्मिणीजी के व्याहकाल से सुदृढ़ वैर था । परंतु बहिन श्रीरुक्मिणीजी को संतुष्ट करने के लिये अपनी पुत्री रोचना का विवाह भगवान् श्रीकृष्ण के पौत्र और अपने दौहित्र अनिरुद्ध के साथ कर दिया । शास्त्र-सिद्धान्त से यह विवाह करना योग्य नहीं था फिर भी स्नेहपाशबद्ध होकर रुक्मी ने ऐसा कर दिया ॥ २५ ॥ राजन् ! श्री अनिरुद्धजी के लग्नपर्व अवसर पर भगवान् श्रीकृष्ण, श्री रुक्मिणीजी, श्रीबलरामजी, प्रद्युम्नजी, साम्ब आदि यादव भोजकट नगर में पधारे थे ॥ २६ ॥ राजन् ! लग्नमङ्गल निर्विघ्न पूर्ण होने पर कलिङ्गदेशादि के अभिमानी राजाओं ने रुक्मी से कहा कि रुक्मी ! आप श्रीबलरामजी को पासों के खेल से जीत लीजिये ॥२७॥ राजन् ! रुक्मी और बलभद्रजी पासों के खेल को अच्छी तरह से जानते नहीं हैं फिर भी उन्हें खेलने का भारी व्यसन है । इस तरह कलिङ्ग नरपतियों ने रुक्मी को समुत्तेजित किया और रुक्मी ने श्रीबलरामजी को बुलवाया; वे पधारे और रुक्मी से चौसर खेलने लगे ॥ २८ ॥

शतं सहस्रमयुतं रामस्तत्राददे पणम् ।
तं तु रुक्म्यजयत्तत्र कालिङ्गः प्राहसद्बलम् । दन्तान् संदर्शयन्नुच्चैर्नामृष्यत्तद्धलायुधः ॥ २९ ॥
ततो लक्षं रुक्म्यगृह्णाद् ग्लहं [1]तत्राजयद्बलः । जितवाहनमित्याह रुक्मी कैतवमाश्रितः ॥ ३० ॥
मन्युना क्षुभितः श्रीमान्समुद्र इव पर्वणि । जात्यारुणाक्षोऽतिरुषा [2]न्वर्बुदं ग्लहमाददे ॥ ३१ ॥
तं चापि जितवान् रामो धर्मेण[3]च्छलमाश्रितः । रुक्मी जितं मयाऽत्रेमे [4]वदन्तु प्राश्निका इति ॥ ३२ ॥[5]

कर्दमक्षमा

अन्वयः—तत्र, रामः, शतम्, सहस्रम्, अयुतम्, पणम्, आददे, तम्, तु, रुक्मी, अजयत्, तत्र, दन्तान्, संदर्शयन्, कालिङ्गः, उच्चैः, बलम्, प्राहसत्, हलायुधः, तत्, न, अमृष्यत् ॥ २९ ॥ ततः, रुक्मी, लक्षम्, ग्लहम्, अगृह्णात्, तत्र, बलः, अजयत्, कैतवम्, आश्रितः, रुक्मी, अहम्, जितवान्, इति आह ॥ ३० ॥ पर्वणि, समुद्रः, इव, मन्युना, क्षुभितः, जात्यारुणाक्षः, अतिरुषा, न्युर्बुदम्, ग्लहम्, आददे ॥ ३१ ॥ रामः, तम्, च, अपि, धर्मेण, जितवान्, रुक्मी, छलम्, आश्रितः, मया, जितम्, अत्र, इमे, प्राश्निकाः, इति, वदन्तु ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

निष्काणां लक्षं ग्लहं पणं कृतवान् । कैतवं कपटम् ॥ ३० ॥ न्यर्बुदं दशकोटीर्ग्लहं क्षुभितो राम आददे ॥ ३१ ॥ छलमाश्रितो रुक्मी मया जितमित्याह ॥ ३२–३५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पणं लापितद्रव्यम् "पणो वराटमाने स्यान्मूले कार्षापणे ग्रहे । द्यूतदेये धने चैव भृतिस्तुल्योरपि स्मृतः ॥" इति धरणिः । तं पणम् । तत्र तदा । कालिंगस्तद्देशेशः । केचित्तु दन्तवक्र एव स इत्यूचुः । 'कालिंगो भूमिकर्कारौ दंताबलभुजंगयोः' इति मेदिनी । तद्धसनम् ॥ २९ ॥ ततः कालिगहासोत्तरम् । निष्कणां दीनाराणाम् । "निष्कामस्त्री साष्टहेमशते दीनारकर्षयोः । वक्षोलंकरणे हेमपात्रे हेमपलेऽपि च ॥" इति मेदिनी । 'दीनारः स्वर्णमुद्रिका' इति मंजर्याम् । 'ग्लहो द्यूतपणीकृते' इति च । तत्र तदा । कैतवस्तुच्छले द्यूते' इति मेदिनी ॥३०॥ 'अर्बुदो मांसकीले स्यात्पुरुषे दशकोटिषु । महीधरविशेषे ना" इति मेदिनी । निश्चितोऽर्बुदोत्यर्बुदः ॥ ३१ ॥ तमपि पणम् । धर्मेण न्यायेन । प्राश्निकाः पार्श्वस्थाः "प्राश्निकः पार्श्वगे पुंसि गणके पृच्छकेऽपि च" इति निरुक्तिः । 'पार्श्विकाः' इति पाठः सम्यग्भाति ॥ ३२ ॥

---

१. तं चाज–वीर. ; तदज–विज । २. पूर्ववद्–वीर. । ३. छलतोऽब्रवीत्–विज. । ४. ब्रुवन्तु–प्रा. पा. ।
५. तथेत्याह कलिंगोऽपि दन्तासन्दर्श सीरिणः । ततः कोपपरीतात्मा तूष्णीमासीद् हलायुधः ॥–विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

शतमिति सार्द्धकम् । शतं निष्काणां प्राक् ततः सहस्रं ततोऽयुतं दशसहस्राणि तत्र द्यूते प्रहसनमेवाह—दन्तानिति । उच्चैरतिशयेन सम्यगदर्शयन् हलायुधः प्रसिद्धनिजास्त्रपराक्रम इत्यर्थः । अतो नामृष्यत् अन्तश्चुक्रोधेत्यर्थः ॥ २९ ॥ ग्लहम् अगृह्णात् पराजितेन देयमिति स्थापितवान् ॥ ३० ॥ श्रीमान्रामः तच्छब्देनोक्तिश्च तादृशदुष्टवधोद्यतं स्मृत्वा सन्तोषेण तदानीं तेजोविशेषाबिर्भावस्मरणेन च अक्षोभिणोपि कदाचित् क्षोभे दुर्द्धर्षत्वेपि च दृष्टान्तः समुद्रः इति । जात्या प्रकृत्यैवारुणाक्षः अतिरुषा त्वतिशयेनारुणाक्षः सन्नित्यर्थः ॥ ३१ ॥ धर्मेण न्यायेन जितवान् जितमित्यादौ आहेति शेषः ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

शतं निष्काणाम्, प्राक् ततः सहस्रं ततोऽयुतमिति क्रमेण ज्ञेयम् । तत्र द्यूते प्रहसनमेवाह—दन्तानिति । उच्चैरतिशयेन सम्यग् दर्शयन् प्रकटयन्, उच्चानिति वा, तत् प्रहसनम्; हलायुधो महावीर इति भावः । अतो नामृष्यत्, अन्तश्चुक्रोधेत्यर्थः ॥ २९ ॥ तत्र ग्लहे ॥ ३० ॥ श्रीर्धैर्य्यसम्पत्तद्वानपि, अक्षोभस्यापि कदाचित् क्षोभे दृष्टान्तः—समुद्र इति । जात्या प्रकृत्यैवारुणाक्षः, क्षोभेण चाधिकारुणाक्षः सन्नित्यर्थः । यद्वा, जात्यारुणाक्षः पुनश्च मन्युना क्षुभित इति भ्रूभंगादिकं सूचितम् । अतः श्रीमान् शोभाभरवानिति, अपि एव, राम एव, धर्म्मेण न्यायेन जितवान् । यद्वा, अकारप्रश्लेषेणाधर्म्मेणेति, ततश्चास्य परेणान्वयः । इत्याहेति शेषः ॥ ३१-३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

धर्मेण रामः जितवानित्यन्वयः छलमाश्रित्य रुक्मी मया जितमित्याहेत्यन्वयः ॥ ३२-४० ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकषष्टितमोऽध्यायः ॥ ६१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

ततो रुक्मी लक्षं ग्लहं पणमाददे बलश्चाजयत् किञ्च कालेन मृत्युना चोदितः अतएव परिहसन् सङ्कर्षणमुवाच किमित्युवाचेत्यत आह—जितवानिति । कैतवं वञ्चनमाश्रितो रुक्मी अहं जितवानित्याहेत्यर्थः ॥ ३० ॥ मन्युनेति । यथा पर्वणि समुद्रस्तद्वन्मन्युना क्षुभितोऽत एव जातेऽरुणेऽक्षिणी यस्य तथाभूतो रामः रुषा पूर्ववल्लक्षं ग्लहमाददे ॥ ३१ ॥ तं रुक्मिणञ्च धर्मेणैवाजयच्च रुक्मीतु छलमाश्रितः मया जितम् अत्रास्मिन् विषये प्राश्निकाः पृष्टव्याः कलिङ्गादयो वदन्ति मया जितमित्येव वदन्ति अतस्ते पृष्टव्या इत्याहेत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

पराजये पणं ग्लहं कलिङ्गः दन्तवक्रः त्वां जितवान् तानशिक्षित अग्रे इति भावः ॥ २९-३० ॥ अर्बुदं दशकोटिधनम् ॥ ३१-३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

कैतवं कपटम् ॥ ३० ॥ न्यर्बुदं दशकोटीः ॥ ३१ ॥ छलमाश्रितोऽतो रुक्मी मया जितमित्याह—प्राश्निकाः साक्षिणः ॥ ३२ ॥

गूढार्थदीपिनी

शतमिति सार्द्धम् । 'ग्लहो द्यूतपणीकृते' इति कोशः । आददे स्थापितवान् । तत् हसनम् ॥ २९-३० ॥ न्यर्बुदं दशकोटीः स्थापितवान् जात्या जन्मनैव ॥ ३१ ॥ रामो धर्मेण । रुक्मी छलमित्यत्रान्वेति । प्राश्निकाः पार्श्वस्थाः धर्मतो बलेन वचनेन रुक्मी । 'प्राश्निकः पार्श्वगे पुंसि' इति निरुक्तिः ॥ ३२-३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रथमं रामः निष्काणां शतं तदनन्तरं सहस्रं पुनः अयुतं पणं जित्वा आददे स्वीकृतवान् एकवारं तं रामं रुक्मी अजयत् तत्र बलं कलिङ्गः प्राहसत् तदुपहास्यं नामृष्यत न सेहे ॥ २९ ॥ निष्काणां लक्षं ग्लहं पणं रुक्मी अगृह्णात् कृतवान् तत्र बलः अजयत् जितवान् कैतवं कपटम् ॥ ३० ॥ न्यर्बुदं दशकोटीर्ग्लहम् आददे जित्वा स्वीकृतवान् ॥ ३१ ॥ तं ग्लहम् अपि निश्चितं धर्मेण राम एव जितवान् तथापि छलमाश्रितः रुक्मी मया जितमित्याह ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तं पणं रुक्म्यजयाज्जितवान्। तत्र बलं कलिङ्गोऽहसज्जहास। न तद्धसनं मन्दमित्याह ॥ दं दन्तान्सन्दर्शयन्नुच्चैरिति। तद्धलायुधो नामृष्यन्न सेहे। दुर्बलकोपो दंष्ट्रालयमूल इतिवन्नेत्याह ॥ हलायुध इति ॥ ३८ ॥ ततस्तदनन्तरं रुक्मी लक्षं ग्लहमगृह्लत्तं लक्ष्यं बलोऽजयज्जिगाय। कैतवं कापट्यमाश्रितो रुक्म्यहं जितवानित्याह ॥ ३९ ॥ श्रीमानित्यदारिद्र्यं बोध्यते। समुद्रः पर्वणीव मन्युना कोपेन क्षुभितः सञ्चलितस्तथा जाते अरुणे अक्षिणी यस्य सोऽतिरुषा रुषमतिक्रान्तमिति रुट् तेन मनसा न्यर्बुदं शतकोटिधनं ग्लहमाददे ॥ ४० ॥ धर्मेण शिल्पमस्येत्यर्थे तदस्य शिल्पमिति ठकि तस्यैकादेशे आदिवृद्धौ यस्येति चेत्यकारलोपे प्राश्निकेति भवति। प्रश्नकरणरूपशिल्पवन्तः सभ्या इति यावत्। वदन्तित्यब्रवीत् ॥ ४१ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततोऽक्षहस्तेन रुक्मिणा आज्ञप्तः शतं सहस्रमयुतं उत्तरोत्तरं दशगुणं रामस्तत्र पणमादधे। तं तु पणं स्वानुकूलतया अक्षान् पातयित्वा रुक्मी अजयत्। तत्रानक्षज्ञता कालिङ्गेन प्रथमतो निरूपितेति बलं प्राहसत्। तदपि हसनं प्रकटमित्याह **दन्तान्संदर्शयन्नु**च्चैरिति। तन्मनसि कापट्येन हसतीति हलायुधो नामृष्यत्। ननु नीतिज्ञेनावश्यं हास्यं सोढव्यम्, तत्राह हलायुध इति ॥ २९ ॥ ततो वारत्रयानन्तरं जये वा पराजये वा विपर्यस्य अन्यः पातयेदित्यक्षशास्त्रात् कपटादिशङ्कानिवृत्त्यर्थं बलः स्वयमक्षान् गृहीत्वा अपातयत्। ततः अयुताद्दशगुणं रुक्मी लक्षं ग्लहं पणात्मकं द्रव्यं प्रतिज्ञातवान्। तत्र तस्यां क्रीडायां बलः अजयत्। एकान्ते क्रीडतीति न स्वकीयाः साम्बादयः साक्षिणः, परं तदीया एव सर्वे। अत एकवारमेव भूयान् पराजयो जात इति, द्यूते मृषा भाषणं न विगीतमिति, जितवानहमित्याह रुक्मी। तानक्षान् विपरीततया धृत्वा प्रदर्श्य कैतवमाश्रितः कपटेनैव जेष्यामीति निश्चित्य मृषोक्तवान् ॥ ३० ॥ तदा मन्युना क्षुभितस्तदसहमानः। देयाभावादसहनं भविष्यतीत्याशङ्क्य निराकरोति श्रीमानिति। पूर्णधनः। निवार्यमाणोऽपि **सहज** एव तादृश इति। तस्मिन् काले तथैव युक्तमिति दृष्टान्तमाह। **समुद्रः** पौर्णमास्यामिवेति। स हि पूर्णं चन्द्रमभिमुखो गच्छति, तथायमपि मच्छिष्य एव मत्तोऽप्युत्कर्षं वाञ्छति, अनृतं च वदतीति चन्द्रमिव जिघृक्षुर्जातः। जात्या स्वभावेन च अरुणाक्षः, अक्रुद्धोऽपि क्रुद्ध इव प्रतीयते, क्रोधे तु का वार्त्तेत्यर्थः। **अतिरुषा** सुतरामरुणाक्षो जातः। अतो मनसि मारणीयोऽयमिति भावो निरूपितः। ततो वारत्रयं क्रीडितव्यमिति पुनरक्षान् बलो गृहीतवान्। तदा रुक्मी न्यर्बुदं ग्लहमादधे, प्रतिज्ञातवान् दशकोटिमितम्। वारत्रयेण यावद्दशगुणं तावत्सकृदेवादधे, यथैकानृतेनैव सर्वमनृतं भवति ॥ ३१ ॥ पूर्ववत् तं चापि रामो जितवान्, अभिज्ञतया न, किन्तु दैवगत्येत्याह **धर्मणेति**। तदा महतीं विनष्टिं दृष्ट्वा, छलमाश्रितः कापट्यमेव कर्तव्यमिति निश्चित्य, रुक्मी आह। चकारेण आहेति पूर्वक्रिया आकृष्यते। मया जितमत्रेमे प्राश्निका ब्रुवन्त्वित्याह। प्राश्निकानामपि स्वानुगुण्यवचने बलस्य स्वज्ञानमेव भ्रान्तमिति प्रतीतिः स्यात्, तदर्थं प्राश्निकानां सभासदाम्। येषामग्रे प्रश्नः सम्भवति सन्दिग्धे, ते प्राश्निकाः। तत्र देशादिदेवाः साक्षिण इति, कालिङ्गादिषु ते अनिविष्टाः, दुष्टत्वात्तेषाम् ॥ ३२ ॥

श्रीसुबोधिनी-सारः

तत्र क्रीडायां शतं सहस्रमयुतं पणं द्यूते उत्सृष्टं धनं राम आददे निक्षिप्तवान् तं तु पणं रुक्मी अजयत् तत्र सभायां दन्तान्संदर्शयन्नुच्चैः कालिंगो बलं प्राहसन् तत् ठीठीतिहसनं हलायुधो रामो नाक्षमत ॥ २९ ॥ ततोनन्तरं लक्षं ग्लहं पणं रुक्मी अधरत् तत्र द्यूते बलोऽजयत् कैतवं कपटमाश्रितो रुक्मी अहं जितवानित्याह ॥ ३० ॥ तदा मन्युना क्रोधेन क्षुभितः पर्वणि समुद्र इव श्रीमान् रामो जात्यारुणे अक्षिणी यस्य सोऽतिरुषा न्यर्बुदं दशकोटिमितं ग्लहं पणं जग्राह। तं चापि ग्लहं धर्मेण रामो जितवान् छलमाश्रितो रुक्मी मया जितमित्याहेति शेषः अत्र सत्यासत्ये विवादे इमे प्राश्निकाः प्रश्नविदो भाषंतु ॥ ३१-३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र द्यूते प्रथमं सुवर्णमुद्राणां शतं, ततः सहस्रं, ततः अयुतं च क्रमेण रामः पणमादधे स्थापितवान्। तं तु पणं अक्षाणामनुकूलतया पतनात् क्रमेण रुक्मी अजयत्। तत्र च दन्तान् सन्दर्शयन् कालिङ्गो बलमुच्चैः प्राहसत्। हलायुधो बलभद्रस्तु तत्तस्य हसनं नामृष्यत् न सेहे ॥ २९ ॥ ततश्च रुक्मी लक्षं ग्लहं पणं अगृह्लात् स्थापितवान् तत्र च तं बलोऽजयत्, कैतवं कपटमाश्रितो रुक्मी तु 'अह जितवान्' इत्याह। एवमुक्त्वा च पणं गृहीतवानिति ज्ञेयम् ॥ ३० ॥ ततः श्रीमान् परिपूर्णधनोपि बलः अनृतवचनान्मन्युना क्रोधेन क्षुभितः प्रचलितचित्तः रुषा न्यर्बुदं दशकोटिसङ्ख्याकं ग्लहमादधे। क्षोभे दृष्टान्तमाह—पर्वणि पौर्णमास्यां समुद्रो यथा चन्द्रं गृहीतुमुद्गच्छति तद्वदिति। 'अक्रुद्धोपि स भयंकरः, क्रोधे पुनः किं वक्तव्यम्' इत्याशयेनाह—जात्या स्वभावेनैवारुणाक्ष इति ॥ ३१ ॥ तं चापि ग्लहं धर्मेण अक्षपतनानुसारेण रामो जितवान्,

रुक्मी तु च्छलमाश्रितः सन् 'मया जितं अत्रास्मिन् विषये इमे पार्ष्णिकाः समीपस्थाः कालिङ्गादयोपि एवमेव वदन्ति' इत्याहेति शेषः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

शतमिति ॥ तत्र द्यूते प्रथमं सुवर्णमुद्राणां शतं ततः सहस्रं ततः अयुतं च क्रमेण रामः पणमाददे स्थापितवान् । तं तु पणम् अक्षाणामनुकूलतापतनात् क्रमेण रुक्मी अजयत् । तत्र च दन्तान् संदर्शयन् कालिङ्गो बलमुच्चैः प्राहसत् । हलायुधो बलभद्रस्तु तत्तस्य हसनं नामृष्यत् न सेहे । अन्तश्चुकोपेत्यर्थः ॥ २९ ॥ तत इति ॥ ततश्च रुक्मी निष्काणां लक्षं ग्लहं पणम् अगृह्णात् स्थापितवान् । तत्र च तं बलोऽजयत् । कैतवं कपटमाश्रितो रुक्मी त्वहं जितवानित्याह । एवमुक्त्वा च पणं गृहीतवानिति ज्ञेयम् ॥ ३० ॥ मन्युनेति ॥ ततः अनृतवचनान्मन्युना क्रोधेन पर्वणि समुद्र इव क्षुभितः जात्या स्वभावेनैवारुणाक्षः श्रीमान् बलः अतिरुषा न्यर्बुदं दशकोटिसंख्याकं ग्लहमाददे ॥ ३१ ॥ तमिति ॥ तं चापि ग्लहं धर्मेण अक्षपतनानुसारेण रामो जितवान् । रुक्मी तु च्छलमाश्रितः सन्मया जितम् अत्रास्मिन्विषये इमे प्राश्निकाः साक्षिणः कालिङ्गादयो वदन्त्वित्याह स्मेति शेषः ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शतादिरूप्यमुद्रिकारूपं पणं पराजये दातव्यं वित्तादि तत्र पाशकक्रीडायां । आददे प्रतिज्ञातवान् तं रामग्लहं । तद्धास्यं नामृष्यत् न सेहे ॥२९॥ लक्षंरूप्य मुद्रिकारूपं ग्लहं पणं पराजये दातव्यं धनमित्यर्थः अगृह्णाद्देयत्वेन स्थापितवान् ॥३०॥ जात्यारुणाक्षः स्वाभाविकतया रक्तनेत्रः न्यर्बुदं दशकोटिरूप्यमुद्रिकारूपं ग्लहं ॥ ३१ ॥ तं ग्लहं । धर्मेणरामः मयाजितमिति रुक्मी प्राह । अत्र सभायां इमे प्राश्निकाः स्थिताः साक्षिण इतिवदं तु ॥ ३२-३३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः, रुक्मी, लक्षं ग्लहं पणं, अगृह्णादाददे । कृतवानित्यर्थः । बलः, तत्र तं, अजयत् । तदा, कैतवं वञ्चनं, आश्रितः रुक्मी, अहं जितवान् इति आह ॥ २९ ॥ मन्युनेति । जाते अरुणे अक्षिणी यस्य सः, क्वचित्तु जात्यारुणाक्ष इत्यपि पाठः । श्रीमान् बलः, पर्वणि, समुद्रः इव, मन्युना क्रोधेन, क्षुभितः क्षोभं प्राप्तः सन्, अतिरुषा, न्यर्बुदं दशकोटीः, ग्लहं, आददे । आदधत्, इत्यपि पाठः ॥ ३० ॥ तमिति । तं ग्लहं चापि, धर्मेण रामः, जितवान् । तदा छलं आश्रितः रुक्मी, अत्र इमे प्राश्निकाः प्रष्टव्याः कालिङ्गादयः, मया जितं इति, वदन्तु इत्याहेति शेषः ॥ ३१ ॥ तदेति । तदा, धर्मतो धर्मेण वचनेन च, ग्लहः बलेन एव, जितः । इति, नभोवाणी, अब्रवीत् । रुक्मी, मृषा मिथ्या, वदति वै । इति च, अब्रवीत् एव ॥ ३२ ॥

कृष्णप्रिया

श्रीबलभद्रजी ने प्रथम सौ, पुनः सहस्र, इसके बाद दस हजार मुद्राओं का दाव लगाया । रुक्मी उन दावोंको जीत गया । रुक्मी की जय होने पर अट्टहास्य करता दाँत दिखाता और ठहाका मारता कलिङ्गराज श्रीबलरामजी की हँसी उड़ाने लगा । बलरामजी हँसी न सह सके और रुष्ट हो गये ॥ २९ ॥ पुनः रुक्मी ने एक लाख मुद्राओं का दाँव लगाया। उस दाव को बलभद्रजी जीत गये, लेकिन मिथ्याभाषी रुक्मी धूर्तता से कहने लगा कि मैंने जीता । इस प्रसङ्ग से बलभद्रजी रोष से लाल-पीले हो गये, मानो महासागर में पूर्णिमा के पर्व पर ज्वार आ गया हो । दाऊजी के नयनकमल नैसर्गिक आरक्त थे, आज अतिशय क्रोध से और भी दाहक हो गये और श्रीबलभद्रजी ने दस करोड़ मुद्राओं का दाव लगाया । अब भी द्यूत के नियमानुसार श्रीबलभद्रजी की ही जीत हुई । लेकिन रुक्मी ने कपट कर कहा, मेरी जय है और कहा कि— चौसर खेल के नियमों के विशेषज्ञ कलिङ्गराज आदि मध्यस्थ इस विषय का निर्णय करें ॥ ३०-३२ ॥

[1]तदाब्रवीन्नभोवाणी बलेनैव जितो ग्लहः । धर्मतो [2]वचनेनैव रुक्मी वदति वै मृषा ॥ ३३ ॥
तामनादृत्य वैदर्भो दुष्टराजन्यचोदितः । संकर्षणं परिहसन् बभाषे कालचोदितः ॥ ३४ ॥
नैवाक्षकोविदा यूयं गोपाला वनगोचराः । अक्षैर्दीव्यन्ति राजानो बाणैश्च न भवादृशाः ॥ ३५ ॥
रुक्मिणैवमधिक्षिप्तो राजभिश्चो[3]पहासितः । क्रुद्धः [4]परिघमुद्यम्य [5]जघ्ने तं नृम्णसंसदि ॥ ३६ ॥

---

१. अथा-वीर. । २. वञ्चने-वीर. । ३. श्राप-वीर. । ४. स्त्वष्टापदेनैवं-विज. । ५. तातं कु-प्रा. पा. ; जघानोद्वाहकर्मणि-विज. ; जघ्नेतं नृम्ण-श्रीधरादयः ।

कर्वमक्षमा

अन्वयः—तदा, नभोवाणी, अब्रवीत्, धर्मतः, बलेन, एव, ग्लहः, जितः, रुक्मी, वचने एव, वै, मृषा, वदति ।। ३३ ।। दुष्टराजन्य चोदितः, वैदर्भः, हसन्, ताम्, अनादृत्य, कालचोदितः, सङ्कर्षणम्, परिहसन्, बभाषे ।। ३४ ।। यूयम्, वनगोचराः, गोपालाः अक्षकोविदाः, न, अक्षैः, च, बाणैः, राजानः, दिव्यन्ति, भवादृशाः, न दिव्यन्ति ।। ३५ ।। रुक्मिणा, एवम्, अधिक्षिप्तः, च, राजभिः, उपहासितः, क्रुद्धः, परिघम्, उद्यम्य, नृम्णसंसदि, तम्, जघ्ने ।। ३६ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

नृम्णसंसदि मंगलसभायाम् ।। ३६–३९ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्राश्निकानां दुर्जनत्वेन मिथ्यात्वं संभाव्य श्रीबलस्य कोपं वर्द्धयितुं पापरुक्मिवधार्थं नभोवाण्यभूदित्याह—तदेति । धर्मतो मर्यादाबन्धतो यद्वचनं ग्लहस्वीकारवाक्यं तेनैव, रुक्मी तु मृषैव वदति । विष्णुपुराणेपि—"त्वयोक्तोऽयं ग्लहः सत्यं न मयैषोऽनुमोदितः । एवं त्वया चेद्विजितं न मया विजितं कथम् ।" इति । आकाशवाक्यमपि—"विजितं बलदेवेन रुक्मिणा भाषितं मृषा" इति । तदा पार्श्वगकथनावसरे ।। ३३ ।। तामाकाशवाणीम् ।। ३४ ।। गोपाला इति वक्रोक्तिः । गीस्तु स्तौत्येव—गवां धेनुपृथ्वीवेदादीनां पालका यूयम्, वने निर्जनदेशे एव गोचरा ध्यानविषया भवथ नैव न तु अक्षेषु द्यूतसभासु कोविदा येषां तादृशा भवथ यतोऽक्षैर्बाणैश्च राजानः श्रियोन्मत्ता एव दीव्यंति परहिंसायां रमन्ते न तु भवन्त इव दृश्यन्ते ये भगवद्भक्तास्तेपीत्यर्थः । ततो वयं न जानीमः किंतु भगवद्भक्ता एव जानन्ति स्वतन्त्रलीलानिबन्धनमेवेदृशं भवतां चरितमिति भावः ।। ३६ ।। तं रुक्मिणम् । नृपूर्वकटवर्गपवर्गपञ्चमसंयोगमध्यश्चायमकारान्तो नृम्णशब्दो वैदिको मंगलवाची ।। ३६ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्राश्निकानां नृपाणां दुर्जनत्वेन मिथ्यासाक्षित्वं सम्भाव्य पापरुक्मिवधार्थं श्रीबलदेवस्य कोपं वर्द्धयितुमाकाशवाण्यभूदित्याह—तदेति । धर्मतो मर्य्यादाबन्धतो यद्वचसनं ग्लहस्वीकारवाक्यं तेनैव जितः रुक्मीतु मृषैव वदति तच्च यथा श्रीविष्णुपुराणे—

"त्वयोक्तोऽयं ग्लहः सत्यं न मयैषोनुमोदितः । एवं त्वया चेद्विजितः न मया विजितः कथम् ।।

तत्रैवाकाशवाक्यञ्च—

"विजितं बलदेवेन रुक्मिणा भाषितं मृषा । अनुक्त्वापि वचः किञ्चित्कृतं भवति कर्मणः ।। इति ।। ३३ ।।

सङ्कर्षणं सद्यः सर्वं संहर्त्तुं समर्थमिति भावः । यद्वा स्वयं भगवतो द्वितीयव्यूहमिति परिहसन् उपहसन् ।। ३४ ।। यूयमिति । श्रीकृष्णापेक्षया तत्सङ्गिनोपि गृह्णाति अकोविदत्वे हेतुः गोपालाः क्षुद्रजातयः वनमेव गोचरो ज्ञानविषयो येषां तादृशाश्च गीदेवीतु तं स्तावयति गवां धेनुपृथ्वीवेदादीनां पालका यूयं वने निर्जनदेश एव गोचरा ध्यानविषया भवथ नैव नतु अक्षेषु द्यूतसभासु कोविदा येषां तादृशा भवथ यतः अक्षैर्बाणैश्च राजानः श्रियोन्मत्ता एव दीव्यन्ति परहिंसाया रमन्ते नतु भवन्त इव दृश्यन्ते ये भवद्भक्तास्तेपीत्यर्थः । ततो वयं न जानीमः किन्तु भवद्भक्ता एव जानन्ति स्वतन्त्रलीलानिबन्धनमेवेदृशं भवतां चरितमिति भावः ।। ३५ ।। एवम् अनेन श्रीकृष्णस्यापि व्यापकेन प्रकारेण रुक्मिणैव हेतुकर्त्रा तैराजभिः कर्तृभिरुपहासितः अतो नृम्णसंसदि जघान नृपूर्वः पवर्गटवर्गपञ्चमसंयोगमध्यमश्चायमकारान्तो नृम्णशब्दो वैदिको मङ्गलवाचकः ।। ३६ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अब्रवीदिति परेण वान्वयः । प्राश्निकानां नृपाणां दुष्टत्वेन मिथ्यावाक्यं सम्भाव्य दुष्टरुक्मिवधार्थं श्रीबलदेवस्य कोपं वर्द्धयितुमाकाशवाण्यभूदित्याह—तदेति । धर्म्मतो जितः, रुक्मी तु वचनेनैव जितमिति वदति, न तु धर्म्मेण, तदपि वै एव, मृषैव; तथा च श्रीविष्णुपुराणे तस्य वाक्यम् (५।२८।२०)—'त्वयोक्तोऽयं ग्लहः सत्यं न मयैषोऽनुमोदितः । एवं त्वया चेद्विजितं न मया विजितं कथम्' ।।' किञ्च, (वि० पु० ५।२८।२२)—'विजितं बलदेवेन रुक्मिणा भाषितं मृषा । अनुक्त्वापि वचः किञ्चित् कृतं भवति कर्म्मणा' ।। इति ।। ३३ ।। संकर्षणं सद्यः सर्वं संहर्त्तुं शक्यमिति भावः,—प्रलये तस्य मुखाग्निनैव विश्वस्य दाहात् । यद्वा, द्वितीयव्यूहं साक्षाद्भगवन्तमित्यर्थः । परिहसन् उपहसन् ।। ३४ ।। यूयमिति श्रीकृष्णापेक्षया, यतो गोपाला ऋजुबुद्धय इत्यर्थः । कुतः ? वनगोचरा वन्यतया नागरजनसंगाद्यभावेन वैदग्ध्यादिराहित्यादिति भावः ।। ३५ ।। एवमनेन श्रीकृष्णव्यापक-

प्रकारेणोपहासित उपहासं कारितः, किंवा भण्डकेन केनापि कृत्वा, किंवा रुक्मिणैव प्रयोजककर्त्रा, तै राजभिरुपहासं कारितः, अतो नृम्णसंसद्यपि जघान। नृम्णशब्दोऽयं वैदिको मंगले ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अथेति। धर्म्मतो बलेन रामेणैव ग्लहो जितः रुक्मीतु वञ्चनेनैवं वदति अतस्तदुक्तिम् मृषेत्यशरीरवाणी प्राहेत्यर्थः ॥३३॥ तां नभोवाणीमनादृत्य दुष्टराजन्यैः कलिङ्गादिभिश्चोदितो वैदर्भो रुक्मी कालचोदितोऽत एव परिहसन् बभाषे ॥ ३४ ॥ भाषणमेवाह—नैवेति। नाक्षकोविदाः न द्यूतकुशलाः तत्र हेतुं वदन् विशिनष्टि—गोपाला वनगोचराश्चेति राजान एवाक्षैः बाणैश्च दीव्यन्ति नतु भवादृशाः पशुपालकाः ॥ ३५ ॥ रुक्मिणेति रुक्मिणैवम् अधिक्षिप्तो रामः हे नृप! सभायां संसदि नृपाणां संसदि वा तं जघ्ने ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

आकाशसरस्वती किमाहेति तत्राह—बलेनेति ॥३३॥ तामाकाशवाणीम् ॥३४-३५॥ अष्टपदेन अक्षफलकेन ॥३६-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदा तेषां साक्षिणामधर्मिष्ठनृपाणां मिथ्योक्तिसमये धर्मतो वचनं यस्य तेन बलेनैव जितः रुक्मीतु मृषा वदति ॥ ३३-३५ ॥ नृम्णसंसदि मङ्गलसभायाम् ॥ ३६-३९ ॥

गूढार्थदीपिनी

ताम् आकाशवाणीम्। वैदर्भो रुक्मी ॥ ३४-३५ ॥ परिघं लोहदण्डम्। नृम्णसंसदि मङ्गलसभायाम्। नृम्णशब्दो वैदिको मङ्गलवाची ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

नृम्णसंसदि मङ्गलसभायाम् ॥ ३६-४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकषष्टितमोऽध्यायार्थप्रकाशः ॥ ६१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कलिङ्गो दन्तवक्रः सीरिणो हलिनो दन्तान्सन्दर्श्य दर्शयित्वा तथा रुक्मी जित इत्याह। ततस्तदुक्त्यनन्तरं कोपपरीतात्मा हलायुधस्तूष्णीमासीत् ॥ ४२ ॥ तदा बले तूष्णीके तत्काले नभोवाणी अशरीरिणी वाक् तद्देवता प्राश्निका वदन्त्विति वदन्नशरीरिणीं वाणीमपि विवक्षितवांश्च इति च प्राश्निकपदप्रयोगतो ज्ञायते। उपसर्गाणां धातुलीनार्थबोधकत्वपक्षे प्राश्निकैव विप्राश्निका भवति। विप्राश्निकात्वीक्षणिका दैवज्ञेत्यमरात्। सा चात्र दैवीत्यब्रवीत्। किमित्यत आह। बलेनैव धर्मतो ग्लहो न्यर्बुदात्मा जितः। वञ्चनेन रुक्मी मृषा वदति। वा एवेति। अवचनेनैवेति तूष्णीमित्येतदर्थकम्। तूष्णीं वदतीत्यर्थः। तथा ह्यपभ्रष्टभाषया किंवदन्ती। सुमङ्गे अथाने अदु अबद्धेति। वचनेन कलिङ्गादिवचनानुसारेणेत्यर्थः ॥ ४३ ॥ तामशरीरिणीमनादृत्य। को वैतत्कुलीन एकान्ते निलीनो वक्तीति वाग्देव्यपि मृषा वदतीति वाऽनादरो ज्ञेयः। दुष्टराजन्यचोदितो बहिः कालचोदितोऽन्तः सङ्कर्षणं परिहसन्वैदर्भो बभाषे ॥ ४४ ॥ वनगोचरा वनगोपाला यूयमक्षकोविदाः कुशला नैव। तर्हि केषां तत्र कौशल्यमित्यतः प्रस्तुतेन सहाप्रस्तुतं स्वजीवनग्लहग्रहणहेतुमप्याह। राजानोऽक्षैर्दीव्यन्ति क्रीडन्ति तथा बाणैश्च दीव्यन्ति भवादृशास्तु न दीव्यन्तीति भाव इत्यन्वयः ॥ ४५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्रत्यानां वचनात् पूर्वमेव आकाशवाणी सर्वदेवतामयी सन्देहनिवृत्त्यर्थमाह **बलेनैव जितो ग्लह** इति। यद्यप्यक्षक्रीडां न जानाति, तथापि धर्मतः जितवान्। वचनेनैव केवलेन धर्मरहितेन रुक्मी वदति। वै निश्चयेन। नात्र सन्देहः कर्तव्यः। लौकिकत्वमपि तद्वाक्यस्य निवारयति **मृषे**ति। लौकिकाः अप्येतादृशे न मृषा वदन्ति ॥ ३३ ॥ ततः को वायं कृत्रिमः शब्दः प्रमाणम्, साक्षात् प्राश्निकेषु विद्यमानेष्विति तामनादृत्य दुष्टराजन्यैः तथैव वक्तव्यम्, इदं नाङ्गीकर्तव्यमिति प्रेरितः संकर्षणं परिहसन् बभाषे। यतो वैदर्भः, न धर्मप्रधानदेशस्थः दुःसङ्गश्च। स हि जगदेवाकर्षति लयार्थम्। तादृशसामर्थ्यवन्तं परिहसन् कटाक्षहास्यादिभिः अयुक्तमुक्तवान्। ननु वचनस्य किं प्रयोजनम्, तूष्णीं स्थातव्यम्, उत्थाय वा गन्तव्यमिति तत्राह **कालचोदित** इति ॥ ३४ ॥ भगवता गोपालत्वं समर्थितमिति तदन्तर्याम्यपि तथैव प्रेरितवान्। बाल्ये हि विद्याभ्यासः, क्षत्रियाणां

च शस्त्राभ्यासः, तस्मिन् समये वने गोचारणमेव कृतमिति लोकविश्वासार्थं मर्मभेदमाह। यूयं नाक्षकोविदाः, यतो गोपालाः। न हि सर्वविद्यासु सर्वे अभिज्ञाः, तस्माद्वने गोचरा एव। उभयमपि ज्ञायत इति चेत्। तत्राह **अक्षैर्दीव्यन्ति राजान** इति। अभ्यासव्यतिरेकेण न विद्या समायातीति अक्षाणामप्रयोजकत्वमाशङ्क्य द्यूतक्रीडापरा अधमा इति शङ्काव्युदासार्थं जयसाधकत्वात् बाणे तुल्यतां वक्तुमाह **बाणैश्चेति**। ननु क्षत्रिया वयमित्युभयं जानीम इति चेत्। तत्राह **न भवादृशा** इति। परगृहे पुष्टा आबाल्यं नीचकर्मणि नियुक्ताः नाक्षबाणकोबिदा भवन्तीति निषेधति **न भवादृशा** इति ॥ ३५ ॥ ततः सर्वैरेव 'सत्यं वदती'त्युक्ते, उपहासे च **कृते**, कालप्रेरितो बलः तत्रैव दैवगत्या कालमुद्गररूपं परिघमुद्यम्य, संसदि सभायामुपविष्ट एव तं जघ्ने। पक्षपातिभिः तस्य पक्षः पोषणीय इति ज्ञापयन्निव सभायामेव जघ्ने। **नृपेति** राज्ञां तथाकरणं युक्तमिति ज्ञापयति। **क्रुद्ध** इत्यविचारः। **परिघमुद्यम्येत्य**न्या क्रिया निर्वर्तिता। चकारात्तदीयैः सेवकैरप्युपहसितः ॥ ३६ ॥

श्रीसुबोधिनी-सारः

तदा तस्मिन्काले नभोवाणी आकाशवाक् अब्रवीत् धर्मतो ग्लहः पणो बलेनैव जितोस्ति रुक्मी वचनेनैव वदतीति मृषा मिथ्या वै एव ॥ ३३ ॥ तां व वाणीम् अनादृत्य दुष्टै राजन्यैः क्षत्त्रियैर्नोदितो वैदर्भो विदर्भदेशजातो रुक्मी कालेन चोदितः संकर्षणं बलदेवं परिहसन्नुवाच ॥ ३४ ॥ अक्षेषु कोविदा निपुणा यूयं नैव स्थ तत्र हेतुः वनगोचरा गोपालाः। साभिमान आह। अक्षैर्बाणैश्च राजानो दीव्यन्ति विहरन्ति भवादृशा नैव "राजवार्त्तां कथं वृद्धो वक्तुं श्रोतुं प्रवर्त्तते" इतिवत् अत्यन्तासंभवोक्तेर्महानुपहासः कृत इति ज्ञायते ॥ ३५ ॥ शुकोक्तिः। रुक्मिणा एवमधिक्षिप्तोऽवमानितो राजभिरुपहासितो बलो नृम्णसंसदि मंगलसभायां परिघमुद्यम्य उद्धृत्य तं रुक्मिणं जघ्ने ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा तस्मिन् काले तु नभोवाणी अदृष्टवक्तृका आकाशे वाणी अब्रवीत् उत्पन्ना। तां दर्शयति—धर्मतोऽक्षपतनानुसारेण बलेनैव ग्लहो जितः। रुक्मी तु वचनमात्रेण मया जितमिति मृषैव वदति ॥ ३३ ॥ तां नभोवाणीमनादृत्य वैदर्भो रुक्मी सङ्कर्षणं प्रति हसन् बभाषे इत्यन्वयः। ननु 'कथमेवमयुक्तमुक्तवान्' तत्राह—दुष्टै राजन्यैः कालिङ्गादिभिश्चोदित इति। 'अन्यप्रेरणेऽपि क्रोधाविष्टस्य समर्थस्य तिरस्कारे कथं प्रवृत्त' इत्याशङ्क्याह—कालचोदित इति। मरणनिमित्तकालेन तद्बुद्धिभ्रंशो जातः, अन्यथा स्वविरूपकरणसमये स्वबन्धविमोचकस्योपकारिणः पराभवे कथं प्रवर्तेत ॥ ३४ ॥ तद्भाषणमेवाह—नैवेति। यूयमक्षकोविदाः द्यूतकुशला नैव भवथ। तत्र हेतुं सूचयन् विशिनष्टि—गोपाला वनगोचराश्चेति। मादृशा राजान एवाक्षैर्बाणैश्च दीव्यन्ति क्रीडन्ति, नतु भवादृशाः पशुपालाः ॥ ३५ ॥ एवं वचनैः रुक्मिणा अधिक्षिप्तः तिरस्कृतः राजभिः कालिङ्गादिभिश्च उपहसितः अतएव क्रुद्धो रामः परिघं लोहदण्डमुद्यम्य तं रुक्मिणं नृपसंसदि राजसभायां जघ्ने ॥ ३६ ॥

अन्वितार्थप्रकाशिका

तदेति ॥ तदा प्राश्निकानां दुर्जनत्वेन मौनसमये नभोवाणी अदृष्टवक्तृका आकाशवाणी अब्रवीत् उत्पन्ना तां दर्शयति। धर्मतोऽक्षपतनानुसारेण बलेनैव ग्लहो जितः रुक्मी तु वचनमात्रेण मया जितमिति मृषैव वदति ॥३३॥ तामिति ॥ दुष्टै राजन्यैः कालिङ्गादिभिश्चोदितः कालेन मरणहेतुना च चोदितः वैदर्भो रुक्मी तां नभोवाणीमनादृत्य सङ्कर्षणं परिहसन् बभाषे ॥ ३४ ॥ नैवेति ॥ यूयमक्षकोविदाः द्यूतकुशला नैव भवथ। यतो गोपालाः वनगोचराश्चेति मादृशा राजान एवाक्षैर्बाणैश्च दीव्यन्ति क्रीडन्ति नतु भवादृशाः पशुपालाः। वस्तुतः यूयम् अक्षकोविदाः द्यूतव्यसनमग्ना इन्द्रियलम्पटाश्च न भवथ। किंतु गोपालाः वेदादिपालकाः वनवासिमुन्यादीनां ध्यानगोचराश्च यतः अक्षैरिन्द्रियैर्द्यूतैर्वा बाणैश्च राजाद्या मदमत्ता एव क्रीडन्ति नतु भवादृशाः भगवन्तः ॥ ३५ ॥ रुक्मिणेति ॥ एवं वचनैः रुक्मिणाऽधिक्षिप्तः तिरस्कृतः राजभिः कालिङ्गादिभिश्च उपहासितः अत एव क्रुद्धो रामः परिघं लोहदण्डमुद्यम्य तं रुक्मिणं नृपसंसदि राजसभायां जघ्ने। नृम्णसंसदीति पाठे उत्सवसभायाम् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वैदर्भो रुक्मी ॥ ३४ ॥ दीव्यन्ति क्रीडन्ति ॥ ३५ ॥ नृम्णसंसदि मंगलसभायां ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तामनादृत्येति। दुष्टराजन्यचोदितः दुष्टैः कालिङ्गादिनृपतिभिः संप्रेरितः, वैदर्भः रुक्मी, तामाकाशवाणीं, अनादृत्य, कालचोदितः अतएव, परिहसन् सन्, संकर्षणं, बभाषे ॥ ३३ ॥ नैवाक्षेति। गोपालाः वनगोचराः, यूयं अक्षकोविदाः द्यूतकुशलाः, नैव। अक्षैः बाणैश्च, राजानः, दीव्यन्ति। भवादृशाः, नैव ॥ ३४ ॥ रुक्मिणेति। एवं, रुक्मिणा, अधिक्षिप्तः, राजभिः कालिङ्गादिभिः, उपहासितश्च, रामो बलभद्रः, क्रुद्धः सन्, नृम्णसंसदि मङ्गलसभायां, अत्र केचिन्नृपसंसदीत्यपि

वदन्ति । परिघं उद्यम्य, तं रुक्मिणं, जघ्ने हतवान् ॥ ३५ ॥ कलिङ्गराजमिति । यतः यः, विवृतैः द्विजैः दन्तैः, अहसत्। तं कलिङ्गराजं, तरसा प्रसह्य, दशमे पदे पादविन्यासे, गृहीत्वा क्रुद्धः सन्, दन्तान् अपातयत् ॥ ३६ ॥

कृष्णप्रिया

सभासद के कहने के पहले ही आकाशवाक् देवता ने कहा कि यदि धर्म को आगे रखकर कहा जाय तब तो श्रीबलराम जी ने यह दाँव जीता है। रुक्मी का कहना सर्वथा झूठ है कि उसने दाँव जीता है ॥ ३३ ॥ खल राजाओं से बहकाया था और सिर पर काल का आरोहण था इसलिये आकाशवाणी का अवहेलन किया। श्रीबलराम की मखौल करते कहने लगा। दाऊजी ! आप लोग वन में विचरने वाले ग्वाल लोग हैं और गौओं को चराना जानते हो। पासों को चलाना और वाणों से खेलना तो केवल राजाओं का ही कार्य है; यह आप का कौशल्य नहीं। राजन् ! इस प्रकार के आक्षेप और उपहास से श्रीबलराम जी पीले हो गये। आविष्ट होने पर एक मुद्गर उठाया और उस माङ्गलिक सभा में ही रुक्मी को मार दिया ॥ ३४-३६ ॥

कलिङ्गराजं तरसा गृहीत्वा दशमे पदे। दन्तानपातयत् क्रुद्धो योऽहसद् विवृतैर्द्विजैः ॥ ३७ ॥
अन्ये निर्भिन्नबाहूरुशिरसो रुधिरोक्षिताः। राजानो दुद्रुवुर्भीता बलेन परिघार्दिताः ॥ ३८ ॥
निहते रुक्मिणि श्याले नाब्रवीत् साध्वसाधु वा। रुक्मिणीबलयो राजन् स्नेहभङ्गभयाद्धरिः ॥ ३९ ॥
[1]ततोऽनिरुद्धं सह सूर्यया वरं रथं समारोप्य ययुः कुशस्थलीम्।
रामादयो भोजकटाद् दशार्हाः [2]सिद्धाखिलार्था मधुसूदनाश्रयाः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे अनिरुद्धबिवाहे रुक्मीवधो नामैकषष्टितमोऽध्यायः[4] ॥ ६१ ॥

कर्दमक्षमा

अन्वयः—दशमे, पदे, तरसा, कलिङ्गराजम्, गृहीत्वा, यः, विवृतैः, द्विजैः, अहसत्, तस्य, दन्तान्, क्रुद्धः, अपातयत् ॥३७॥ बलेन, परिघार्दिताः, निर्भिन्नबाहूरुशिरसः, रुधिरोक्षिताः, अन्ये, राजानः, भीताः, दुद्रुवुः ॥३८॥ रुक्मिणी बलयोः, स्नेहभङ्गभयात्, हरिः, हे राजन् ! श्याले, रुक्मिणि, निहते, साधु, असाधु, वा, न, अब्रवीत् ॥ ३९ ॥ ततः सिद्धाखिलार्थाः, मधुसूदनाश्रयाः, रामादयः, दशार्हाः, सूर्यया, सह, वरम्, अनिरुद्धम्, रथम्, समारोप्य, भोजकटाद्, कुशस्थलीम्, ययुः ॥ ४० ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायामनिरुद्धविवाहे एकषष्टितमेऽध्याये अन्वयाः समाप्ताः ॥ ६१ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सूर्यया नवोढया। सिद्धा अखिला अर्था अभ्युदयशत्रुवधादयो येषां ते ॥ ४० ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे श्रीध० टीकायामेकषष्टितमोऽध्यायः ॥ ६१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दशमे तत्संख्ये। पदे पादन्यासे। 'शिखायां वा शिखा वै दशमं पदम्' इति वारतांतविः ॥ ३७ ॥ निर्भिन्नानि बाहूरुशिरांसि येषां ते तथा ॥ ३८ ॥ 'श्यालस्तु पत्नीभ्राता' इति कोशः। राजन्निति—यन्निमितं बलदेवेन श्रीकृष्णं प्रति पूर्वं परुषमुक्तं, तेनैव तद्वध इति क्षत्रियजातेश्चरितमद्भुतमिति संचित्या। रुक्मिणो दुष्टत्वेन तद्वधे साध्विति वक्तुमुचितं पत्नीभ्रातृत्वेन तद्वधेऽसाध्विति वक्तुमुचितम्, यन्नाब्रवीत्तत्र हेतुः—स्नेहभंगेति। साधूक्तौ रुक्मिण्याः, असाधूक्तौ बलदेवस्य स्नेहभंग इति विवेकः ॥ ३९ ॥ ततो रुक्मिहननानन्तरम्। 'सूर्या तु स्यान्नवोढायां सूर्यपत्न्यामपि' इति निरुक्तिः। सिद्धाखिलार्थत्वे हेतुः— मधुसूदनाश्रया इति। यद्वा—यथा मधुमादिदैत्यं वरदानचातुर्येणाहंस्तथा रुक्मिणमपि द्यूतक्रीडौदासीन्यमय्या बुद्ध्येति भावः। एतेन रामस्य तद्वधे कृष्णसंमतिरपि द्योतितेति ॥ ४० ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे एकषष्टितमोऽध्यायः ॥ ६१ ॥

---

१. अथोऽनिरुद्धं सह भार्यया—विज. । २. दशार्हकाः—वीर. विज. । ३. पारमहंस्यां संहितायां दशमस्कन्धे एक—प्रा. पा. । ४. षट्सप्तति—विजः ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

दशमे पदे पादविन्यास इति भीत्या पलायनात् तथाप्यपातयत् यतः क्रुद्धः तत्र हेतुर्य इति विवृतैः प्रकटितैः वदन्नसौ मन्महद्दुःखमिच्छति दुरात्मा अतोऽस्येममभिलाषं कुतो न पूरयेयमिति विभाव्य तथा कुर्वन् तस्य तमपूपुरदिति च ज्ञातव्यम् ॥ ३७ ॥ अन्ये च राजानः परिघार्द्दिताः अतो निश्शेषेण भिन्नानि बाह्वादीनि येषां ते बाह्वादीनां यथोत्तरं मर्मस्थानत्वे श्रैष्ठ्यम् अतो रुधिरेणोक्षिताः सिक्ताः अत एव भीताः सन्तो दुद्रुवुः वेगेनापसृताः ॥ ३८ ॥ रुक्मिणि स्वनाम्नैव तादृशदुष्टतया विख्याते इति साध्विति वक्तुमुचितं श्याले तादृशनिजनिकटसम्बन्धिनीत्यसाध्विति। तथापि तत्तन्नाब्रवीत् यतः साध्वित्युक्ते रुक्मिण्याः असाध्वित्युक्ते च बलदेवस्य स्वविषयकोपः स्नेहस्तस्य भङ्गः पलायनं निलीनत्वं तस्माद्यद्भयं तस्मात् यद्यप्येतन्न सम्भवति तथापि स्नेह एव तत्सम्भावयति इति ज्ञेयं यद्वा भङ्गः कौटिल्यं प्रणयकोप इत्यर्थः। यद्वा भङ्गस्तरङ्गः ततश्चानयोर्मय्येतादृशः स्नेहतरङ्गः अहन्तु तद्विपरीतं कथं वदामीति तस्माद्भयमिव भयं लज्जेति ज्ञेयं यद्वा तयोर्योन्योन्यं स्नेहस्तस्य भङ्गभयात् मनागपि तत्र तस्य सम्मत्यनुभावेन रुक्मिण्या बलदेवेऽसूयोत्पत्तिः स्यादिति तूष्णीं स्थितिः साध्वित्यनुक्तिस्तु रुक्मिणीप्रकटपरिभवस्य तत्कुटुम्बलोकविगानस्य च शङ्कयेति भावः। अत एव श्याल इति विशेषितम् एवं स्नेहभङ्गहरणात् हरिरिति तादृशभगवच्चातुर्य्येण प्रहर्षात्तथा पूर्वं विरूपतामात्रकरणेपि श्रीकृष्णं प्रति किञ्चित्परुषमुक्तवता तेनैवाधुना तद्वध इति कौतुकाच्च सम्बोधयति—राजन्निति ॥ ३९ ॥ वरं श्रेष्ठं रथं सम्यक् गीतवाद्यादिसाधुप्रकारेणारोप्य रामस्यादित्वं दुर्जनवैरिवधेन सर्वैः सम्मानितत्वात् तथा कृष्णस्य मौनावलम्बनाच्च सिद्धाखिलार्थत्वे हेतुः मधुसूदनाश्रया इति एवं रामस्यादित्वेपि तदधीनत्वं तथा रामस्य रुक्मिवधे तत्सम्मतिं च द्योतयत्येव तत्र मधुसूदनेति यथा पुरादिदैत्यं मधुं वरदानादिचातुर्य्येणाहन् तथा द्यूतक्रीडोदासीन्यमप्यबुद्ध्या रुक्मिणञ्चेति भावः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां एकषष्टितमोऽध्यायः ॥ ६१ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दशमे पद इति भीत्या पलायनात्, तथाप्यपातयत्, यतः क्रुद्धः, तत्र हेतुः—य इति, विवृतैः प्रकटितैः ॥ ३७ ॥ अन्ये च राजानः परिघेणार्द्दिताः प्रहृताः, अतो निःशेषेण भिन्नानि वाह्वादीनि येषां ते, वाह्वादीनां यथोत्तरं मर्म्मस्थानत्वेन श्रैष्ठ्यम्, अतो रुधिरेणोक्षिताः सिक्ताः, अत एव भीताः सन्तो दुद्रुवुर्वेगेनापसृताः ॥ ३८ ॥ श्यालेऽपि साध्वित्युक्ते रुक्मिण्याः, असाध्वित्युक्ते च बलस्य यः स्वविषयकस्नेहभंगस्तद्भयात्, यद्वा, तयोर्योऽन्योन्यं स्नेहस्तस्य भंग-भयात्, किञ्चिदनुवत्या तत्रापि तस्य संगत्यनुमानेन श्रीरुक्मिण्याः श्रीबले असूयानुत्पत्तेरिति दिक्। एवं द्वयोरपि स्नेहस्तस्य भंगहरणाद्धरिरिति। तादृशश्रीभगवच्चातुर्य्येण प्रहर्षात्तथा पूर्व्वं विरूपतामात्रकरणादपि श्रीकृष्णं प्रति अतिपुरुषमुक्तवता तेनैवाधुना तद्वध इति कौतुकाच्चाह—हे राजन्निति। यद्वा, दुष्टवधेन राजमानोऽपि ॥३९॥ वरं श्रेष्ठम्। कथम्? सम्यग् गीतवाद्यादिसाधुप्रकारेणारोप्य; रामस्यादित्वं दुष्टवैरिवधेन सर्व्वैः सम्मानितत्वात्, तथा श्रीकृष्णस्य मौनावलम्बनाच्च, सिद्धाखिलार्थत्वे हेतुः—मधुसूदनाश्रया इति। एवं रामस्यादित्वेऽपि तदधीनत्वं तथा रामस्य रुक्मिणो वेति भावः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यामेकषष्टितमोऽध्यायः ॥ ६१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

कलिङ्गराजन्तु तरसा प्रसह्य दशमे पदे पादविन्यासे गृहीत्वा क्रुद्धस्सन् दन्तानपातयत् भग्नानकरोदित्यर्थः। तत्र हेतुं वदन्विशिनष्टि—यः कलिङ्गः विवृतैः प्रकाशितैर्द्विजैः दन्तैरहसत् अतो दन्तानेवापारयदित्यर्थः ॥ ३७ ॥ अन्येतु राजानः बलेन कर्त्रा परिघेण साधनेनार्दितास्ताडिता अत एव निर्भिन्नानि बाह्वादीनि येषां ते अत एव रुधिरेणोक्षिताः सिक्ताः भीताश्च दुद्रुवुः पलायितवन्तः ॥ ३८ ॥ निहत इति। हरेः कृष्णस्य स्याले रुक्मिणि निहते सति रुक्मिणी साध्वसाध्विति वा नाब्रवीत् कुतः बलयोः रामकृष्णयोर्विषये यः स्नेहस्तस्य भङ्गभयात् बलयोरित्यत्र द्विवचनबलेन कृष्णपरिग्रहः हरिरिति प्रथमान्तपाठे स्याले रुक्मिणि निहते सति हरिर्भगवान् रुक्मिणीबलयोः रुक्मिणीबलरामयोः स्नेहभङ्गभयात् साध्वसाधु वा नाब्रवीदित्यर्थः ॥३९॥ तत इति। ततो रामादयो दाशार्हकाः सूर्य्यया नवोढ्या सहानिरुद्धं श्रेष्ठं रथमारोप्य आरोहयित्वेत्यर्थः मधुसूदन आश्रयो येषां ते अत एव सिद्धाः सकला अर्थाः प्रयोजनानि येषां ते कुशस्थलीं द्वारकां प्रति ययुर्जग्मुः ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां एकषष्टितमोऽध्यायः ॥ ६१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

हरेः श्याले रुक्मिणि निहते सति ।। ३९ ।। भार्यया सहानिरुद्धं वरं रथम् आरोप्य रामादयो दशार्हकाः सिद्धाखिलार्थाः सम्पन्नसमस्ताभीष्टाः तत्र हेतुः मधुसूदनेति ।। ४० ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां एकषष्टितमोऽध्यायः ।। ६१ ।।

(श्रीविजयध्वजतीर्थरीत्या षट्सप्ततितमः) ।। ७६ ।।

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सूर्य्यया नवोढया सिद्धाखिलार्थाः सिद्धसमस्तवाञ्छिता इति विशेषणेन रुक्मिण्या अपि क्रोडीकृतत्वात्तस्या रुक्मिणि हते सत्यन्तः सुखमेवाभूदिति गम्यते तेन स्नेहभङ्गभयादित्यत्र रुक्मिण्या रुक्मिणि बहिः स्नेह एव व्याख्येयः ।। ४० ।।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । एकषष्टितमोऽध्यायो दशमेऽजनिसङ्गतः ।। ६१ ।।

गूढार्थदीपिनी

विवृतैः प्रकटितैः द्विजैः दन्तैः अदृसत् ।। ३७ ।। निर्भिन्नानि बाह्वादीनि 'येषां' ते । दुद्रुवुः । पलायितवन्तः ।।३८–३९।। ततो दशार्हाः यादवाः । सूर्यया नवोढया पत्न्या सह तं वरं समारोप्य भोजकटात् कुशस्थलीं द्वारकां ययुरित्यन्वयः ।। ४० ।।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यामेकषष्टितमोऽध्यायः ।। ६१ ।।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

रुक्मिणैवमधिक्षिप्तो धिक्कृतो राजभिरितरैरुपहासितश्च । अष्टापदेन येन जयेय्यविजय उद्भावितस्तेन तेनैवाक्षफलकेनाष्टापदं स्यात्कनके सारिणां फलकेऽपि चेति विश्वः । उद्वाहपर्वणि जघानाहन् । परिघमुद्यम्येत्यपाठः । जघानाष्टापदेनैव प्रगृह्य यदुपुङ्गव इति हरिवंशेऽप्युक्तेः ।। ४६ ।। यो विवृतैर्द्विजैर्दन्तैरहसत्तं कलिङ्गराजं दशमे पदे तत्सङ्ख्ये पादविन्यासे गृहीत्वा । अनेन तत्पलायनं ध्वनयति । अन्ये ये उपाहसुस्ते राजानो विभिन्नबाहोरुशिरसः । बाहाशब्दोऽयम् । रुधिरेण रक्तेनोक्षिताः सिक्ताः । बलेन परमं यथार्ऽदितास्तस्माद्भीता दुद्रुवुः ।। ४७ ।। निहते रुक्मिणीश्याल इति श्लोके देवस्य देव्या वा प्रीतिभक्तिभङ्गभीतिः प्रतीयते । नोभयोः सम्भवति सा निर्दोषत्वादित्यतो ब्रह्माण्डवचनेन तत्तात्पर्यमाह ।। नेति । देव्या रुक्मिण्याः स्नेहभङ्गो न केशवस्य तु देवस्यापि न भयं तद्भङ्गाद्भाविनेति शेषः । तर्हि कथमिदं नटनं घटत इत्यत आह । तथाऽपि लोके लोके । यथा स्नेहभीतो भार्यास्नेहाद्भज्यमानाद्भीतो भवति तथा रुक्मिवधे बलकलिते किञ्चिदपि हरिर्नोचे । तु शब्दो द्वावेतौ नित्यमुक्तावित्यादिसिद्धनित्यमुक्तत्वादिविशेषार्थकः । ततश्चायं श्लोकार्थः ।। शाले भार्याभ्रातरि । शालास्तु भ्रातरः पत्न्या इत्यमरः । रुक्मिणी निहते स्नेहभङ्गभयात्तद्रक्षणार्थमिति यावत् । रुक्मिणीबलयोर्विषये साधु सम्यगसाध्वसम्यगिति हरिर्नाब्रवीत् । अभावज्ञानं प्रतियोगिज्ञानाधीनमिति यथाक्रममुक्तम् । तथा चेद्बलरुक्मिण्योरिति वक्तव्यं स्यात्ततश्च क्रमेऽनुसरणीये नैवं निर्देशः सम्भवतीति चेन्न । एवं निर्दिशन्भगवच्चित्तवेदिन्या देव्या अपि नानुबन्धोऽयं प्रयोजकोऽपि त्वसद्भननं सम्यगेवेत्यान्तरङ्गिकं भावमावेदयामास व्यास इत्यवसेयम् । अभ्यर्हितत्वाच्च । असाधुताप्रतीतिरित्वतरासुरविवक्षयेति मन्तव्यम् । स्नेहभङ्गभयादिति वेति । यदा तु स्नेहभङ्गभीतिरेव विवक्ष्यते तदा साध्वित्युक्तौ रुक्मिण्याऽसाध्वित्युक्तौ बलस्य स्नेहभङ्ग इति यथाक्रममर्थो ज्ञेयः ।। ४८ ।। ततोऽनिरुद्धमिति वाऽथानिरुद्धमिति बा पाठौ । अथो अनिरुद्ध इत्यसरलः । ओदिति प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यमिति प्रकृतिभावे अथो अनिरुद्धेति भाव्यत्वात् । भार्यया रोचनया सह रथं समारोप्य भोजकटाद्रुक्मिपुराद्रामादयो दाशार्हकाः सिद्धा अखिला अर्था येषां ते तथा । तत्र हेतुर्मधुसूदनाश्रया इति । कुशस्थलीं ययुः।। पुस्तकान्तरे तु । ततो रुक्मिहनानन्तरं सूर्यया नार्या । सूर्याकर्पर्णे तपने स्त्री तु नार्यौषधीषु चेति भानुः । सूर्यायाः पश्य रूपाणीति रुच्युक्तेर्नवोढया सह वरमनिरुद्धं रथं समारोप्य भोजकटाद्रुक्मिणा स्ववासार्थं निर्जितान्निर्गत्य । मधुसूदनाश्रया इति सिद्धार्थाः । दाशार्हका यादवविशेषास्तदाद्या रामादयः कुशस्थलीं द्वारकां ययुः ।। ४९ ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे षट्सप्ततितमोऽध्यायः ।। १०–७६ ।।

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

वाक्यापराधे वधं कृत्वा, मानसिकापराधे ताडनमाह **कलिङ्गराज**मिति । येनोपहसितः, पलायमानं तं दशमे पदे धृत्वा, क्रियाशक्तिः प्राणस्येति, 'नव वै पुरुषे प्राणा' इति श्रुतेः प्राणानुरोधेन नव प्रयत्नानुपेक्ष्य, दशमे पदे तं गृहीतवान् । ततो लोकेभ्यः दन्ताः प्रदर्शिता इति पुनः प्रदर्शननिवृत्तये दन्तानपातयत् । अत्रापि क्रुद्ध इत्यविचारः । तस्य दोषमाह

योऽहसदिति । **विवृतैर्द्विजै**रिति दन्तानामेव पातने हेतुः ॥ ३७ ॥ अन्येऽप्यनुमोदनकर्तारः निर्भिन्नाः बाहवः ऊरवः शिरांसि च येषां तादृशा जाताः । तत्राभिज्ञानं **रुधिरोक्षिताः** रुधिरेणोक्षिता इति । ततो भीताः सन्तः दुद्रुवुः । स्वतोऽपि भयेन पलायने बलोत्कर्षो न भवतीति पलायने तत्क्रियां साधनमाह **परिघार्दिता** इति ॥ ३८ ॥ नन्वेवमनर्थे पौत्रविवाहे जाते भगवता किं कृतमित्यत आह **निहत** इति । एक एव श्यालो हतः । विवाहे श्यालः पावित्र्यहेतुर्भवति । अतः किञ्चिद्वक्तव्यम् । धर्मस्थापनायां दुष्टो मारणीय एव । अतो न वक्तव्यमेव । तदुभयं निषेधति । श्याले **निहते** साधु असाधु वा नाब्रवीदिति । ननु 'अप्रतिषिद्धमनुमतं भवती'ति तूष्णींभावेऽपि बलभद्रपक्षः स्यात्, तत्किं साध्ववचनेनेति चेत्, तत्राह **निहत** इति । कृते कार्ये वचनं व्यर्थमेव स्यात् । अनेन वक्तव्यो भवति, असाधु कृतमिति, तथापि नोक्तमिति सूच्यते । तत्र हेतुः । रुक्मिण्या स्नेहभङ्गभयादिति । भक्तत्वेऽपि मायायाः कार्यरूपा अविद्येति उत्पत्तिविचारेण स्नेहभङ्गः सम्भाव्यते । ततः प्रपन्नायाः तथात्वे ममापि तथात्वमुचितमिति सर्वथा स्नेहे भग्ने भक्तिमार्गो नश्यतीति भयम् । नन्वीश्वरस्य नष्टेऽपि मार्गे किं भयमिवेति चेत् । तत्राह **हरि**रिति । स हि सर्वदुःखहर्ता । अन्यथा सर्वेषां दुःखं न गच्छेदिति । तथैवासाध्ववचने बलस्य स्नेहभङ्गभयं हेतुः । तस्य स्नेहभङ्गे अवतारप्रयोजनं न भवेदिति । भगवद्व्यतिरिक्तानामन्यधर्मः प्रवर्तत इति स्नेहभङ्गसम्भवः, शक्तिविभक्तेति ॥ ३९ ॥ उभयोर्विनियोगमुक्त्वा, त्रिषूत्साहरहितेषु सत्सु शिष्टानां कृत्यमाह **ततोऽनिरुद्ध**मिति । तदीयानां प्रतिबन्धनिवृत्तये रामः पुनरादित्वेन गृहीतो वरयात्रिकाणाम् । सूर्यया नवोढया सह । **रथं समारोप्ये**ति दुःखितत्वात् बलात् समारोपणमुक्तम् । मातामहः पितामहो मारित इति । **कुशस्थली**मिति प्रदेशस्य विषमत्वं सूचितम् । दशार्हा यादवविशेषाः । तां दशामर्हन्तीति । शिष्टानामुभयमपीष्टमित्याह **सिद्धाखिलार्था** इति । शत्रुमरणमिष्टप्राप्तिश्च अखिलार्थाः । तथात्वे हेतुः **मधुसूदनाश्रया** इति । एवं धर्मप्रस्तावे अनिरुद्धो धर्मरक्षक इति तत्कथायां दुष्टनिवारणमुक्तम् ॥ ४० ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे द्वादशोऽध्यायः ॥ १२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

निहते रुक्मिणीत्यत्र । **तत्र हेतु**रिति । असाधुत्वेन वक्तव्यत्वे साधुत्वाकथने इत्यर्थः ।

इति द्वादशाध्यायव्याख्या समाप्ता ।

श्रीसुबोधिनी–सारः

तरसा वेगेन दशमे पदे कलिगराजं गृहीत्वा दन्तानत्रोटयत् क्रुद्धः सन् तत्र हेतुः विवृतैर्निरावरणैरोष्ठतो बहिर्गतैर्दन्तैर्योऽहसत् ॥ ३७ ॥ बलेन कर्त्रा परिघेणार्दिताः पीडिताः निर्भिन्नानि बाहूरुशिरांसि येषां ते रुधिरेणोक्षिताः सेचिता अन्ये भूपा दुद्रुवुः ॥ ३८ ॥ श्यामुच्छिष्टं लाति गृह्णातीति तस्मिन् रुक्मिणि निहते सति हरिः श्रीकृष्णः साधु असाधु इति वा नाऽब्रवीत् रुक्मिणीबलयो स्नेहस्य प्रीतेर्भङ्गभयात् नाशभयतः हे राजन् ! ॥ ३९ ॥ ततोऽनंतरं सूर्यया नवोढया वध्वा सह वरमनिरुद्धं रथं समारोप्य भोजकटात् पुरात् सिद्धाः पूर्णा अखिलाः सर्वेऽर्था मनोरथा येषां मधुसूदनमाश्रयन्तीति ते रामादयो दशार्हा यादवाः कुशस्थलीं द्वारकां ययुः ॥ ४० ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायामेकषष्टितमोऽध्यायः ॥ ६१ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कलिङ्गराजं तु तरसा झटिति पलायमानं दशमे एव पादविन्यासे गृहीत्वा क्रुद्धः संस्तस्य दन्तान् भङ्क्त्वा अपातयत् । तत्र हेतुं सूचयन्नाह—य इति । यो विवृतैः प्रकाशितैर्दन्तैरुपलक्षितः सन्नहसत् तस्येत्यर्थः ॥ ३७ ॥ अन्ये च रुक्मिपक्षीया राजानो बलेन कर्त्रा परिघेन साधनेनार्दितास्ताडिता अतो निर्भिन्नानि बाह्वादीनि येषां ते, अत एव रुधिरेणोक्षिताः भीताश्च दुद्रुवुः पलायितवन्तः ॥ ३८ ॥ एवं स्वश्याले रुक्मिणि निहते सति हरिः कृष्णः 'साधु जातमसाधु वा जातम्' इति किमपि नाब्रवीत् । 'इदमपि राजनीतिचातुर्यम्' इति सूचयन् सम्बोधयति—राजन्निति । तत्र हेतुमाह—रुक्मिणीबलयोः स्नेहभङ्गभयादिति । साधु कृतमित्युक्ते रुक्मिण्या वैमनस्यं स्यात्, असाधु कृतमित्युक्ते च बलस्य वैमनस्यं स्यादिति द्वयं माभूत् इत्याशयेन तूष्णीमासीत् इत्यर्थः ॥ ३९ ॥ ततश्च रामादयो दाशार्हा यादवविशेषाः सूर्यया नबोढया चारुमत्या सहानिरुद्धं श्रेष्ठं रथं समारोप्य भोजकटाख्यात् पुरात् कुशस्थलीं द्वारकां प्रतिययुः । गमने हेतुमाह–सिद्धा अखिला अर्था अनिरुद्धविवाहशत्रुवधादिरूपप्रयोजनानि येषां ते । प्रयोजनसिद्धौ हेतुमाह—मधुसूदनाश्रया इति ॥ ४० ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने । एकषष्टितमः कृष्णपुत्रादिविनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

कलिङ्गेति ।। यो विवृतैः प्रकाशितैर्दन्तैरुपलक्षितः सन्नहसत् तं कलिङ्गराजं तु तरसा झटिति पलायमानं दशमे एव पदे पादविन्यासे गृहीत्वा क्रुद्धः संस्तस्य दन्तान् भङ्क्त्वा अपातयत् ।। ३७ ।। अन्य इति ।। अन्ये च रुक्मिपक्षगा राजानो बलेन कर्त्रा परिघेन करणेनार्दितास्ताडिताः अतो निर्भिन्नानि बाह्वादीनि येषां ते अत एव रुधिरेणोक्षिताः भीताश्च दुद्रुवुः पलायितवन्तः ।। ३८ ।। निहत इति ।। एवं स्वश्याले रुक्मिणि हतेऽपि हरिः रुक्मिणीबलयोः स्नेहभङ्गभयात् साधु कृतमित्युक्तौ रुक्मिण्या वैमनस्यं स्यात् । असाध्वित्युक्ते तु बलस्येति हेतोः साधु जातमसाधु वेति किमपि नाब्रवीत् ।। ३९ ।। तत इति ।। ततश्च सिद्धा अखिला अर्था अनिरुद्धविवाहशत्रुवधादिरूपप्रयोजनानि येषां ते मधुसूदनाश्रयाः रामादयो दशार्हा यादवाः सूर्यया नवोढया चारुमत्या सहानिरुद्धं श्रेष्ठं रथं समारोप्य भोजकटाख्यात्पुरात्कुशस्थलीं द्वारकां प्रति ययुः ।। ४० ।।

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमस्यैकषष्टितमे व्यधात् ।।

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायामेकषष्टितमोऽध्यायः ।। ६१ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विवृतैरुद्घाटितैः द्विजैर्दन्तैः ।। ३७ ।। रुधिरेणोक्षिताः संसिक्ताः ।। ३८ ।। रुक्मिणीरुक्मिसंज्ञे हरिर्नाब्रवीत् ।। ३९ ।। सूर्यया नवपरिणीतया वध्वा दशार्हाः दाशार्हाः यादवः सिद्धाखिलार्थाः निष्पन्नसर्वप्रयोजनार्थाः कुशस्थलीं द्वारकां ।। ४० ।।

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने अनिरुद्धविवाहे रुक्मिवधो नामैकषष्टितमोऽध्यायः ।। ६१ ।।

भगत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्ये इति ।। बलेन बलभद्रेण, परिघार्दिताः परिघेण ताडिताः, अत एव भीताः, अन्ये राजानः, निर्भिन्नबाहूरुशिरसः रुधिरोक्षिताः सन्तः, दुद्रुवुः ।। ३७ ।। निहत इति ।। हरेः श्रीकृष्णस्य, श्याले रुक्मिणि, निहते मारिते सत्यपि, रुक्मिणी, बलयोः रामकृष्णयोः, यः स्नेहस्तस्य भङ्गभयात्, साधु असाधु वा, न अब्रवीत् । अत्र केचित् हरिरिति प्रथमान्तं पठित्वा, रुक्मिणि श्याले, निहते बलेन मारिते सत्यपि, हे राजन्, हरिः श्रीकृष्णः, रुक्मिणीबलयोः स्वस्मिन्, स्नेहभङ्गभयात्, साधु असाधु वा, न अब्रवीत् । इति व्याख्यायन्ते, ते 'दुःखं समुत्थमसहोऽस्मदयोगभीत्या नैवाब्रवीः किमपि तेन वयं जितास्ते' इति पूर्वोक्तमस्मृत्वा व्याख्यायन्ते इति प्रतिभाति ।। ३८ ।। तत इति ।। मधुसूदनः श्रीकृष्णः आश्रयो येषां ते, सिद्धाः अखिलाः सकलाः अर्था अभ्युदयशत्रुवधादयः येषां ते, रामादयः, दशार्हाः, सूर्यया नवोढया सह, वरं अनिरुद्धं रथं समारोप्य, ततः भोजकटात्, कुशस्थलीं, ययुः ।। ३९ ।।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे एकषष्टितमोऽध्यायः ।। ६१ ।।

कृष्णप्रिया

प्रथम तो कलिङ्गराज दाँत दिखाकर हँसी उड़ाता था अब बाजी बदलने पर भागने लगा, लेकिन बलरामजी ने दस ही कदम पर उसे पकड़ लिया और रोषाविष्ट होकर उसके दाँत तोड़ दिये ।। ३७ ।। श्री दाऊजी ने अपने मुद्गर की चोट से दूसरे राजाओं के हाथ, पैर, बाँह, जाँघ, मस्तक आदि तोड़ दिये । अङ्गभङ्ग होने पर रुधिर से लथपथ और भयभीत हो वहाँ से भागने लगे ।।३८।। राजन् परीक्षित् ! भगवान् बड़े विवेकी थे । मन से निर्णय किया कि बलरामजी का समर्थन करने पर श्रीरुक्मिणीजी नाराज होंगी और रुक्मि के वध को अनुचित कहने पर दाऊजी नाराज होंगे इसलिये योग्य अयोग्य कुछ नहीं बोले ।। ३९ ।। पुनः श्रीअनिरुद्ध का विवाह सम्पन्न होने पर और शत्रुवध होने पर दोनों कार्य बन जाने पर भगवदाश्रित यादव, श्रीबलभद्रजी, नवविवाहिता दुलहिनी रोचना के साथ श्री अनिरुद्धजी को रथ पर बैठाकर भोजकट नगर से श्रीद्वारिका नगरी की ओर प्रस्थान किया ।। ४० ।।

इति श्रीमद्भागवतस्य दशमस्कन्धे उत्तरार्द्धेऽनिरुद्धविवाहे हिन्दीभाषान्तरं समाप्तम् ।। ६१ ।।

* * *

अथ द्विषष्टितमोऽध्यायः

श्लोकाः	अनु.	इ. वं.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
३५	३०	१	४	४	६६२	२०	४१	१०५३	३२॥।	५

राजोवाच

बाणस्य तनयामूषामुपयेमे यदूत्तमः ।[1]
तत्र युद्धमभूद् घोरं हरिशंकरयोर्महत् । एतत् सर्वं महायोगिन् समाख्यातुं त्वमर्हसि ॥ १ ॥

श्रीशुक उवाच

बाणः पुत्रशतज्येष्ठो [2]बलेरासीन्महात्मनः । येन वामनरूपाय हरयेऽदायि मेदिनी ॥ २ ॥
तस्यौरसः सुतो बाणः शिवभक्तिरतः सदा । मान्यो वदान्यो धीमांश्च सत्यसंधो दृढव्रतः ॥ ३ ॥
शोणिताख्ये पुरे रम्ये स राज्यमकरोत् पुरा ।
तस्य शम्भोः प्रसादेन किंकरा इव तेऽमराः । सहस्रबाहुर्वाद्येन ताण्डवेऽतोषयन्मृडम् ॥ ४ ॥

कर्दमक्षमा

अन्वयः— राजा उवाच—यदूत्तमः, बाणस्य, तनयाम्, ऊषाम्, उपयेमे, तत्र, हरिशङ्करयोः, महत्, घोरम्, युद्धम्, अभूत्, महायोगिन् ! त्वम्, एतत्, सर्वम्, समाख्यातुम्, अर्हसि ॥ १ ॥ श्रीशुक उवाच—येन, वामनरूपाय, हरये, मेदिनी, अदायि, तस्य, बलेः, महात्मनः, पुत्रशतज्येष्ठः, बाणः, आसीत् ॥ २ ॥ तस्य, शिवभक्तिरतः, औरसः, सुतः, बाणः, मान्यः, वदान्यः, श्रीमान्, सत्यसन्धः, दृढव्रतः, आसीत् ॥ ३ ॥ सः, शोणिताऽख्ये, रम्ये, पुरे, पुरा, राज्यम्, अकरोत्, तस्य, शम्भोः, प्रसादेन, ते, अमराः, किङ्कराः, इव, आसन्, सहस्रबाहुः, बाणः, वाद्येन, ताण्डवे, मृडम्, अतोषयत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

द्वियुक्षष्टितमे प्रोक्तमनिरुद्धस्य रोधनम् । कन्यया रममाणस्य बाणेन बहुबाहुना ॥ १ ॥
अनिरुद्धोद्वहेऽन्यस्मिन् बाणयादवसंयुगे । श्रीकृष्णः श्रीहरं जित्वा बाणबाहूनथाच्छिनत् ॥ २ ॥ १–४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कन्यया ऊषया (१) । अन्यस्मिन् द्वितीये । 'पाणिग्रहणमुद्वहः' इति नाममाला । अथ हरजयानंतरम् (२) । उपयेमे "उपाद्यमः स्वकरणे" इत्यात्मनेपदम् । तत्र विवाहनिमित्तम् ॥ १ ॥ पुत्राणां शतं तत्र ज्येष्ठः । येन बलिना । अदायि दत्ता ॥ २ ॥ तस्य बलेः । पाणिगृहीतीभार्यायां जात औरसः । वदान्यः "गुणवान्दानशीलश्च वदान्यः पुरुषो मतः" इति नीलकण्ठः ॥ ३ ॥ स बाणः । तस्य बाणस्य । ते प्रसिद्धाः । तांडवे नृत्ये "तांडवं नटनं नाट्यं लास्यं नृत्यं च नर्तने" इत्यमरः । मृडं शिवम् 'गिरीशो गिरिशो मृडः' इति च ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महात्मनः श्रीभगवद्भक्तस्यापि इति बाणस्याभक्तत्वं व्यज्य भगवद्विद्वेषप्रापकापराधविशेषस्य तादृशसत्सङ्गेनापि दुर्निवारत्वं दर्शितं तच्चापराधं महाभागवतसार्वभौमश्रीमृडाराधनेपि दुर्नाशं दर्शयन् प्रत्युत तत्सम्बन्धेन तस्यापि श्रीभगवता सह स्पर्द्धाभासो दृष्ट इति दर्शयितुमाह—सहस्रेत्यादि । सहस्रबाहुरिति वाद्ये कौशलादिकं व्यञ्जितं मृडमिति ताण्डवे हेतुगर्भं नाम मृडयति भगवद्भक्तिमयताण्डवादिना सुखयति ॥ ४ ॥

---

[1] ६२–६३ अध्यायौ विजये न स्तः । अयं सार्धश्लोकः सर्वसंमतो न इति जीव. । इतः परम् अष्टार्धानि क्वचित् न दृश्यते इति व. पु. टि । [2] बलः–प्रा. पा. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

महात्मनः श्रीभगवद्भक्तस्यापि, इति बाणस्याभक्तत्वं ध्वनितम् । सहस्रबाहुरिति च वाद्ये कौशलादिकम्, अतस्ताण्डवे श्रीभगवत्प्रेमोल्लासेन क्रियमाणे तन्नृत्येऽतोषयत् । मृड़मिति श्रीभगवद्भक्तिप्रवर्त्तनादिना जगत्सुखकरमिति भावः ॥ २ ॥ भगवान् सर्व्वैश्वर्य्ययुक्त इति श्रीकृष्णगुणावताराभिप्रायेण, अतएव सर्व्वेषां भूतानां जीवानाशीशः प्रभुः । किञ्च, शरण्य आश्रयणयोग्यः, यतो भक्तवत्सलः, अतश्छन्दयामास, इच्छां कारितवान् । यद्वा, भगवान् परमदयालुरित्यर्थः, अतः सर्व्वेषां भूतानां निजगणभेदानां दुःस्वभावानामपीशः पालकः, किञ्च, शरण्यः शरणागतरक्षकः, किञ्च, भक्तवत्सलः । एवं विशेषणानामेषां यथोत्तरं वरच्छन्दनहेतुत्वे श्रैष्ठ्यम् ॥ ३ ॥ श्रीभगवता युद्धे कार्य्यो बाणबाहुदर्पच्छेदः श्रीशिवस्यानुमत एवेति दर्शयंस्तत्प्रसंगमाह—स इति पञ्चभिः । पार्श्वस्थं पुराधिपत्येन सदा तत्पुरे सपरिवारस्य तस्य निवासात्, तथा च श्रीहरिवंशे कुम्भाण्डचिन्तायाम् (विष्णु० प० ११६।८१)—'देवदानवसङ्घानां यः कर्त्ता भुवनप्रभुः । स भवः कार्त्तिकेयश्च कृतवासो हि नः पुरे ।' इति । अर्कवर्णेनेति श्रीशिवप्रसादान्महाधनसम्पत्तिस्तया दुर्म्मदता च सूचिता; सम्यक् स्पृशन्निति भक्तिश्च ॥ ४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

द्विषष्टितमः स्पुटार्थः ॥ १-३१ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये द्विषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अथ अनिरुद्धविवाहप्रसङ्गात्तदीयमेव विवाहान्तरं समासत, श्रुतपूर्वं विस्तरबुभुत्सया पृच्छति राजा—बाणस्येति। ऊषामुषां नाम तनयां यदूत्तमो अनिरुद्धः तत्र निमित्ते हरिशङ्करयोः कृष्णशिवयोः महद्घोरञ्च युद्धमभूदस्येतत्सर्वं मह्यमाख्यातुमर्हसि ॥ १ ॥ आचष्टे—बाण इत्यादिना । बलेः पुत्राणां शतस्य ज्येष्ठः बाणो नामासीत् कोसौ बलिरित्यत आह—येन बलिना मेदिनी भूमिरदायि दत्ता ॥ २ ॥ बाणं विशिनष्टि—तस्येति । तस्य बलेरौरसः उरसा निर्म्मितः सुतः सत्ये सन्धा अभिसन्धिर्यस्य धृतं रुद्रोपासनात्मकं व्रतं येन सः ॥ ३ ॥ शोणिताख्य इति । स बाणः तस्य बाणस्य शम्भोः प्रसादेन वरेण हेतुना अमरा देवाः किङ्करा इव ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

श्रीशुक उवाच

तथा ताभिर्वरस्त्रीभीरममाणो जनार्दनः । दिनानि हृतसापत्न्यः सुबहून्यत्यवासयत् ॥ १ ॥

राजोवाच

तासां षोडशसाहस्रमहिषीणां जनार्दनः । तृप्तिं कथं चकारैको मानुषं देहमाश्रितः ॥ २ ॥

श्रीशुक उवाच

हन्त ते कथयिष्यामि श्रोतृणां विस्मयावहम् । यथा चकार बह्वीनामेकस्तृप्तिं जनार्दनः ॥ ३ ॥

अग्रे एकोनसप्ततितमाध्यायादारभ्य पाठसाम्यं वर्त्तते नास्त्यत्रेतरपाठसमानम् ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

द्विषष्टितम ऊषाया अनिरुद्धेन सङ्गमः । चित्रलेखाहृतेनैतं बाणो बध्नादितीर्य्यते ॥ १-४ ॥

गूढार्थदीपिनी

द्विषष्टितम ऊषाया अनिरुद्धेन सङ्गमम् । दृष्ट्वा बाणोऽहिपाशेन तं बबन्धेति वर्ण्यते ॥ १ ॥

बाणेति सार्द्धम् । यदूत्तमः अनिरुद्धः । उपयेमे विवाहितवान् ॥ १ ॥ येन बलिना ॥ २ ॥ औरसः पाणिगृहीतभार्यायां प्रथमो जातः पुत्रः । वदान्यः दानशीलः सन्धा प्रतिज्ञा ॥ ३ ॥ शोणितेति सार्द्धम् । ताण्डवे नृत्ये मृडं शिवमतोषयत् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अनिरुद्धस्य विवाहान्तरं वक्तुं तावद् द्विषष्टितमे तस्य बाणकन्यान्तःपुरे प्रवेशमाह–बाण इति ॥ २-४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ अथोऽनिरुद्धं सह भार्यया रथमित्येतदुत्तरं बाणस्य तनयामुषामुपयेमे यदूत्तम इति श्लोकमारभ्यैवं कृष्णस्य विजयं शङ्करेण च संयुगम् । संसरत्प्रातरुत्थाय तस्य न स्यात्पराजय इत्यन्तमध्यायद्वयं क्वचित्पुस्तकसंपुट्यां नास्तीति प्राचीना न व्यचीचरन्विवृतिम् । बहुपुस्तकेषु वर्ततेऽपि चानुक्रमणिकायां बाणस्य भुजकृन्तनमित्युक्तेस्तथा तृतीये च शम्बरं द्विविधं बाणं मुरुवल्कलमेव च । अन्यांश्च दन्तवक्त्रादीनवधीत्कांश्चाघातयदित्युक्तेश्च तद्व्याक्रियते । उषा उषेति पर्यायौ । उषा त्वनिभार्या । तत्र हरिश्च शङ्करश्च तयोर्महद्घोरं युद्धमभूत्तत्कथमेतत्सर्वं समाख्यातुमर्हसीत्यन्वयः ॥ १ ॥ महात्मनो बलेः पुत्राणां शतं तन्मध्ये ज्येष्ठो बाण आसीत् । किं महात्मत्वं तस्येत्यत आह ॥ येनेति ॥ २ ॥ सुतो न वाल्हीकादिवद्गृहीत इत्याह । औरस इति । पित्रनुरूपतां वक्तुं मान्यादिविशेषणम् ॥ ३ ॥ त इतरेऽमराः किङ्करा इव भृत्या इवाभवन् । सहस्रबाहुर्बाणो वाद्येन मृढमतोषयत् ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

निरोधे राजसफले देवानां विजयः स्फुटः । निरूप्यते यतो रुद्धा नान्यं सम्भावयन्ति हि ॥ १ ॥
त्रयोदशे ततोऽध्याये हेतुस्तस्य निरूप्यते । अनिरुद्धप्रसङ्गेन धर्मः सिध्यति तेन हि ॥ २ ॥
सर्वथाप्युपकारित्वात्सर्वतो भयशङ्कया । परमानन्दरूपत्वात्सफलो राजसः स्मृतः ॥ ३ ॥
अनिरुद्धो निरोद्धव्यो निरुद्धो येन केनचित् । तन्मूलाः सर्व एवैते विनिरुद्धा भवन्ति हि ॥ ४ ॥

सर्वदेवजयार्थं प्रथममनिरुद्धस्य बन्धनं निरूप्यते । निरुद्धं मनः सर्वहेतुर्भवतीति । तत्रानिरुद्धबन्धनं कालेनैवेति उषोपाख्यानमुच्यते । कालेऽपि विषयवैचित्रीहेतुरिति चित्रलेखा नेत्री ।

स्वप्नेऽपि चेत्प्रसङ्गः स्याद्बद्धो भवति मानवः । अन्येन वा तथा ज्ञातः किमु साक्षात्तथाविधः ॥ १ ॥

प्रथममनिरुद्धबन्धनहेतुसम्बन्धनिरूपकनयनार्थं प्रस्तावनामाह—**बाणः पुत्रशतज्येष्ठ** इति **सप्तदशभिः** । पुत्राणां शतमध्ये ज्येष्ठ आसीत् । भगवता स बद्ध इति तन्निष्कृतिसूचनार्थं भगवदंशोऽनिरुद्धः तत्पुत्रेण बद्ध इति सूचयितुं बलेः पुत्रत्वं निरूप्यते । ननु तेनैव कथं न बध्यते, तत्राह **महात्मन** इति । स हि महात्मा नापकरोति । **पुत्रशतज्येष्ठ** इति तत्कृतं पितृकृतमेवेति ज्ञापयति । बलेरिवास्यापि बन्धशङ्कापि व्यावर्त्यते, पार्ष्णिग्राहा बहवः सन्तीति । तथापि भगवता सह विरोधे न सामर्थ्यं भवतीति तस्य महादेवोपासनमाह **सहस्रबाहुरिति** । सहस्रबाहुत्वं च तत्कृपयैव । तेन बहुधा लब्धप्रसादः महादेवात् स इति सूचितम् । ताण्डवे उत्साहवृद्ध्यर्थं वाद्यभूयस्त्वमपेक्ष्यते । तत्र बहुभिर्वादने व्यधिकरणप्रयत्नानां समता न भवतीति, एकेन बहुवाद्यकरणं तोषहेतुर्भवतीति, सहस्रबाहुभिर्वाद्यैः ताण्डवे मृडमतोषयत् ॥ १ ॥ तुष्टस्य कृत्यमाह भगवानिति । वरदानसामर्थ्यं भगवच्छब्देनोक्तम् । तद्दत्तं कोऽप्यन्यथा न करिष्यतीति सूचयितुमाह **सर्वभूतेश** इति । सर्वनियामकः । स एव भूतश्चेत् शरीरसम्बन्धेन जातः साहङ्कारः, तदावश्यमहङ्कारनियामकवश्यो भवति । अहङ्कारे सात्त्विकादिव्युदासं मत्वा आह सर्वेति । सामर्थ्याप्रतिघातौ निरूप्य दातृस्वभावं निरूपयति **शरण्य** इति । शरणार्हः स एव भवति, यः प्रपन्नदुःखनिवारकः । तथाप्युचितदाता चेत् परिमितमेव यच्छेदिति, विशेषदानार्थमाह **भक्तवत्सल** इति । यथा वत्सला गौरन्तःस्थितमपि दुग्धं तल्लोभेनान्येभ्योऽपि यच्छति, तथा भगवान् भक्तेभ्यः अदेयमपि यच्छतीति 'वरं ब्रूही'ति छन्दयामास । छन्दनं कामचारनियोगः । ततः स गुह्यं चिकीर्षुर्बाणः सर्वत्र स्वयं गच्छन् शत्रुबाहुल्याद्गृहरक्षार्थं चिन्ताकुलितः तं महादेवं पुराधिपं पुररक्षकं वव्रे । अनेन तस्य पुरस्य सर्वाभेद्यता निरूपिता । तेन देवादीनामपि तत्र प्रतीकारो निवर्तितः ॥ २ ॥ तर्हि तादृशस्य कथं नाश इत्याशङ्क्य, तस्यैव क्रोधेनेति वक्तुं प्रसङ्गान्तरमाह **स एकदेति षड्भिः** । गिरिशो महादेवः, तत्रैव गिरौ शेते इति निरन्तरस्थित्या धाष्टर्यं सूचितम् । **पार्श्वस्थमिति** तत्रापि भक्तकृपया तस्यैव पार्श्वे वर्तमानम्, तेन सुतरामेव तस्य स्मयः । वीर्यस्य दुष्टो मदो यस्य । उपजीव्यातिक्रमकर्ता । वीर्यस्मयेन विवेकरहितस्य कृत्यमाह **किरीटेनार्कवर्णेनेति** । विनीतो हि मुकुटोष्णीषादिकं स्थापयित्वा साष्टाङ्गं प्रणतः विज्ञापयेत् । अयं तु किरीटमेव परिधाय, तत्राप्यग्निवर्णं स्पर्शेऽत्यन्तपरुषम्, तेन चरणाम्बुजमतिकोमलं स्पृशन् आह **नमस्ये** इति । स्तौति । वाचा नमस्कारो वा । **महादेवेति** न त्वत्सदृशोऽन्योऽस्ति, य उपास्यः स्यादिति । **लोकानां गुरुमिति** । उपदेष्टा फलदाता च **भवानेवेति** साधनफलरूपत्वं निरूपितम् । तेन त्वमेव प्रार्थनीयः, न त्वन्य इति प्रार्थनायां हेतुरुक्तः । किञ्च । प्रार्थितं सर्वमयुक्तमपि प्रयच्छति । नापि यत्किञ्चित्प्रार्थनायामपि क्रोधं मन्यत इति दृष्टान्तमिवाह **पुंसामपूर्णकामानामिति** । देवतान्तरतपःप्रभृतिसाधनैः यदा कामना न सिद्धा भवन्ति, तेषां सर्वोपायपरिभ्रष्टानामाश्रयमात्रेण सर्वपूरकममराङ्घ्रिपवत् कल्पवृक्षवत् कामपूरः अमराङ्घ्रिपः यः ॥ ४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेख:

त्रयोदशेऽध्याये । **अनिरुद्ध** इति । येन केनचिन्निरुद्धः अनिरुद्धः भगवता स्वस्मिन्निरोद्धव्यः इत्यर्थः । तत्र हेतुः **तन्मूला** इति । एते भक्तानामिन्द्रियादयः सर्वे अनिरुद्धमूलाः । तस्य मनोधिदेवत्वादिति भावः । **कालेनैवेतीति** । दैत्यानां कालसेवकत्वेन कालरूपत्वात्तत्पुत्र्या ऊषाया अपि कालरूपत्वमिति भावः । **कालेऽपीति** । कालस्य हेतुत्वेपि विषयवैचित्री मुख्यो हेतुः । **तस्यां** सत्यां मनोबन्धनं सम्यग्भवतीति भावः । **प्रसङ्ग** इति । कालोपासकैर्दैत्यैरसाङ्गः प्रसङ्ग इत्यर्थः । अत एव निरुद्धबन्धने कालस्य हेतुत्वमुक्तमिति भावः । **साक्षा**दिति । जाग्रद्दशायामपि दुःसङ्गवानित्यर्थः । **बाणः पुत्रशते**त्यस्याभासे । **प्रथम**मिति । अनिरुद्धस्य बन्धने हेतुः ऊषा, तस्याः सम्बन्धनिरूपिका चित्रलेखा, सामान्यनिर्देशात्पुल्लिङ्गकथनम् । तत्कृतं नयनमनिरुद्धस्य । तदर्थमित्यर्थः । **इति सप्तदशभि**रिति । इति श्लोकमारभ्याग्रिमैः सप्तदशभिरित्यर्थः । पूर्वार्धाष्टमाध्याये 'ततस्तु भगवान् कृष्ण' इति श्लोकप्रतीके टिप्पण्यामेवं व्याख्यातम्, तद्रीत्यात्राप्युच्यते ।

श्रीसुबोधिनी-सारः

राजप्रश्नः । बाणस्य तनयां पुत्रीम् ऊषां यदूत्तमोऽनिरुद्ध उपयेमे परिणिन्ये तत्र विवाहे हरिशंकरयोर्महत् युद्धमभूत् घोरं दारुणं च एतत् सर्वं समाख्यातुं त्वमर्हसि हे महायोगिन् ॥ १ ॥ शुकोक्तिः । महात्मनोत्युदारस्य बलेः पुत्रशते ज्येष्ठो बाणोऽभूत् कोसौ बलिरित्यपेक्षायामाह । वामनरूपाय हरये येन मेदिनी पृथिवी अदायि पादत्रयेण दत्तासीत् ॥ २ ॥ तस्य औरसो हृदयजो बाणः सुतः सदाशिवस्य भक्तौ रतः मान्यो वदान्यो दानी धीमान् सत्यप्रतिज्ञो दृढं व्रतं संकल्पो यस्य सः ॥ ३ ॥ रम्ये मनोहरे शोणितमित्याख्या नाम यस्य तस्मिन् पुरे पुरा पूर्वं स राज्यमकरोत् तस्य बाणस्य शम्भोः शिवस्य प्रसादेन तेऽऽमरा देवाः किंकरा भृत्या इवासन् सहस्रबाहुः स बाणो वाद्येन हेतुना ताण्डवे नृत्ये मृडं रुद्रम् अतोषयत् ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

द्वियुक्षष्टितमे कृष्णपौत्रस्य बाणकन्यया । ऊषया ह्यनिरुद्धस्य रमणं विनिरूप्यते ॥ १ ॥

अनिरुद्धविवाहप्रसङ्गात् तदीयमेव विवाहान्तरं समासतः श्रुतपूर्वं विस्तरबुभुत्सया पृच्छति—बाणस्येति । यदूत्तमः अनिरुद्धः । स्पष्टमन्यत् ॥ १ ॥ एवं पृष्टस्तद्विवाहं विस्तरतो निरूपयति—बाण इत्यादिना अध्यायद्वयेन । महात्मनोऽत्युदारस्यात्युदारचित्तस्य बलेः पुत्राणां शतस्य ज्येष्ठः पुत्रः बाणो नामासीत् । कथं तस्य महात्मत्वं’ तत्राह—येन बलिना वामनरूपाय हरये मेदिनी भूमिरदायि दत्ता ॥ २ ॥ बाणं विशिनष्टि—तस्येति । तस्य बलेः सुतो बाणो सदाशिवभक्तिरतः । दत्तः पालितः क्रीतो वापि पुत्रो भवति तच्छङ्कावारणायाह—औरस इति । मान्यः, वदान्यः लोके सन्मानयोग्यः अत्युदारचित्तः, धीमान् व्यवहारे निपुणबुद्धिः, सत्यसन्धः सत्यसङ्कल्पः, धृतव्रतः धृतं रुद्रोपासनात्मकं व्रतं येन सः ॥ ३ ॥ ते आराध्यत्वेन प्रसिद्धा अपि अमरा देवाः शम्भोः प्रसादेन वरेण तस्य बाणस्य किङ्करा इव स्थिताः । स्पष्टमन्यत् ॥ ४ ॥

अन्वितार्थप्रकाशिका

द्विषष्टितमके बाणोऽनिरुद्धं चोषया रतम् । नागपाशैर्बबन्धात्र श्लोकाः षट्त्रिंशदीरिताः (३६) ॥
चत्वार्युवाचेति सार्द्धा अष्टत्रिंशदनुष्टुभः (३८॥) ॥ ६२ ॥

बाणस्येति सार्द्धम् ॥ यदूत्तमः अनिरुद्धः बाणस्य तनयाम् ऊषाम् उपयेमे । तत्र हरिशङ्करयोः महत् घोरं युद्धमभूत् । हे महायोगिन् ! त्वं एतत्सर्वं समाख्यातुम् अर्हसि । "राजोवाच । बाणस्येति सार्द्धपद्यम् । येन वामनरूपाय" इत्यादिसार्द्धपद्यद्वयं च न सर्वसम्मतमिति तोषिणी ॥ १ ॥ बाण इति ॥ येन वामनरूपाय हरये मेदिनी पृथ्वी अदायि दत्ता तस्य महात्मनः बलेः पुत्राणां शतस्य ज्येष्ठः पुत्रः बाणो नामासीत् ॥ २ ॥ तस्येति ॥ तस्य बलेः औरसः सुतः बाणः मान्यो लोके सम्माननयोग्यः वदान्य उदारचित्तः प्रियवाक् च धीमान् सत्यसन्धः सत्यप्रतिज्ञः धृतव्रतः सः सदाशिवभक्तिरतः आसीत् ॥ ३ ॥ शोणितेति ॥ सः पुरा शोणिताख्ये रम्ये पुरे राज्यमकरोत् । ते आराध्यत्वेन प्रसिद्धा अपि अमरा देवाः शम्भोः प्रसादेन वरेण तस्य बाणस्य किङ्करा इव स्थिताः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथेदानीं द्विषष्टितमेऽध्यायेऽनिरुद्धस्य हरणं तस्य बंधनं चाह बाण इति ताण्डवे नृत्ये मृडं शंकरं ॥ १ ॥ भगवान् शिवः वरेण छंदयामास प्रेरयामास वरं वरयेति प्रेरितवानित्यर्थः स बाणः पुराधिपं नगररक्षकं ॥ २ ॥ गिरिशं गिरौ शेति इति गिरिशस्तं ॥ ३ ॥ कामपूरश्चासावमरांघ्रिपः कल्पवृक्षश्च तं ॥ ४-५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कन्यया सुतया बाणोऽनिरुद्धं वीक्ष्य रोधनम् । क्रीडन्तं चक्र एतस्य द्वियुक्षष्टितमे बली ॥ १ ॥
अन्यस्मिन्ननिरुद्धस्योद्वाहे कृष्णो हरं युधि । बाणयादवयोर्जित्वा बाहून् बाणस्य सोऽच्छिनत् ॥ २ ॥

अनिरुद्धविवाहप्रसङ्गात्तदीयमेव विवाहान्तरं बुभुत्सया पृच्छति राजा बाणस्येति सार्द्धेन । बाणस्येति ॥ बाणस्य बाणासुरस्य, ऊषामूषेति नाम्ना प्रसिद्धां, तनयां सुतां, यदूत्तमोऽनिरुद्धः, उपयेमे । तत्र निमित्ते, हरिशंकरयोः श्रीकृष्णशंकरयोः, महत् घोरं, युद्धं अभूत् । हे महायोगिन्, एतत् सर्वं, समाख्यातुं त्वं, अर्हसि ॥ १ ॥ बाण इति । येन बलिना, वामनरूपाय, हरये, मेदिनी भूमिः, अदायि दत्ता । तथाभूतस्य, बलेः, पुत्राणां शतं तत्र ज्येष्ठः, बाण एतन्नामा, आसीत् ॥ २ ॥बाणं विशिनष्टि तस्येत्यादिना एकश्लोकेन । तस्येति । तस्य बलेः, औरस उरसा निर्मितः, बाणो बाणाख्यः, सः सुतः, सदा शिवभक्तिरतः, मान्यः, वदान्यः, दाता महान्वा, धीमान्, सत्यसंधः सत्यप्रतिज्ञः, दृढव्रतः दृढीकृतरुद्रोपासनात्मकव्रतः च सन्, पुरा पूर्वं, शोणिताख्ये रम्ये पुरे, राज्यं अकरोत् ॥ ३ ॥ तस्येति । तस्य बाणस्य, शम्भोः प्रसादेन वरेण हेतुना, ते प्रसिद्धाः, अमराः देवाः, किंकराः इव, अभवन्निति शेषः । किं बहुना सहस्रं बाहवो यस्य स बाणः, वाद्येन वाद्यवादनेन, मृडं रुद्रं, ताण्डवे नृत्ये, अतोषयत् । मृडे ताण्डवनृत्यं कुर्वति सति सहस्रबाहुभिः पञ्चशतवाद्यानि वादयंस्तमतोषयदित्यर्थः ॥ ४ ॥

कृष्णप्रिया

अनिरुद्ध-विवाह

महाराज परीक्षित् जी ने पूछा—भगवन् श्रीशुकाचार्यजी ! आप तो सर्वदर्शी समर्थ योगिवर हैं । नम्रता से निवेदन है कि यदुकुलशिरोमणि श्रीअनिरुद्धजी ने बाणासुर-कुमारी ऊषाजी के साथ विवाह किया था । इस अवसर पर भगवान् श्रीशङ्करजी और भगवान् श्रीकृष्णजी में परस्पर तुमुल सङ्ग्राम हुआ था । भगवन् इस वृत्तान्त को आप अपने श्रीमुख से सविस्तर सुनाने की अनुकम्पा करें ॥ १ ॥ महाराज श्रीशुकदेव जी ने कहा—राजन् ! भक्तवर महात्मा बलि के सौ पुत्रों में ज्येष्ठ पुत्र का नाम बाणासुर था । महामना बलि राजा ने वामन स्वरूप लेकर पधारे हुए भगवान् श्रीविष्णुजी को समस्त पृथ्वी को समर्पण किया था ॥ २ ॥ महात्मा श्रीबलिजी का सुपुत्र बाणासुर भगवान् सदाशिव की भक्ति-सेवा में निरंतर संलग्न रहता था । बाणासुर समाज में सम्मान्य, परमोदार, दानी, धीमान्, सत्यप्रतिज्ञ, दृढव्रती पुरुष था ॥ ३ ॥ बाणासुर मनोहर शोणितपुर में राज्य करता था । भगवान् श्रीशङ्करजी की कृपा से इन्द्रादि देवलोग भी सेवक के समान बाणासुर की सेवा करते थे । बाणासुर के एक सहस्र हाथ थे । एक बार ऐसा प्रसङ्ग आया कि भगवान् शङ्करजी ताण्डव नृत्य कर रहे थे तब बाणासुर ने भगवान् शङ्करजी को मृदङ्ग वाद्य बजाकर संतुष्ट कर दिया था ॥ ४ ॥

भगवान् सर्वभूतेशः शरण्यो भक्तवत्सलः । वरेणच्छन्दयामास स तं वव्रे पुराधिपम् ॥ ५ ॥
स एकदाऽऽह गिरिशं पार्श्वस्थं वीर्यदुर्मदः । किरीटेनार्कवर्णेन संस्पृशंस्तत्पदाम्बुजम् ॥ ६ ॥
नमस्ये त्वां महादेव लोकानां गुरुमीश्वरम् । पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम् ॥ ७ ॥
दोःसहस्रं त्वया दत्तं परं भाराय मेऽभवत् । त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समम् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—तम् वरेण, छन्दयामास, सः, सर्वभूतेशः, शरण्यः, भक्तवत्सलः, प्रसन्नः, जातः, सः, बाणः, तम्, पुराधिपम्, वव्रे ॥ ५ ॥ वीर्यदुर्मदः, स, एकदा, अर्कवर्णेन, किरीटेन, तत्, पदाम्बुजम्, स्पृशन्, पार्श्वस्थम्, गिरिशम्, आह ॥ ६ ॥ महादेव ! अपूर्णकामानाम्, पुंसाम्, कामपूरामराङ्घ्रिपम्, लोकानाम्, गुरुम्, ईश्वरम्, त्वाम्, नमस्ये ॥ ७ ॥ दोः, सहस्रम्, त्वया, दत्तम्, परम्, भाराय, मे, अभवत् । त्रिलोक्याम्, त्वद्, ऋते, समम्, प्रतियोद्धारम्, न, लभे ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुराधिपं पुरपालकम् ॥ ५-६ ॥ कामान्पूरयतीति कामपूरः स चासावमराङ्घ्रिपः कल्पतरुस्तं त्वाम् ॥ ७-८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

छन्दयामास वरार्थं प्रेरयामास । 'छदि—संवरणे' । स बाणः । तं शिवं पुराधिपं वव्रे—त्वं मम पुराधिपः स्या इति वरयामास ॥ ५ ॥ स बाणः । तत्पदांबुजं हरपदारविंदम् ॥ ६ ॥ लोकानां गुरुं ब्राह्मणत्वात् । ब्राह्मणत्वं तु शिवस्य दित्या

तृतीयस्कन्धे स्फुटीकृतम्। "वधं भगवता साक्षात्सुनाभोदारबाहुना। आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणाद्विभो ॥" इति वाक्येन। "आचार्यत्वमाद्यवर्णे मया संस्थापितं धरे" इति वाराहोक्तेः। कामपूरको योऽमरांघ्रिपः कल्पतरुस्तत्तुल्यस्तम् ॥ ७ ॥ तस्मान्ममापि कामः पूरणीय इत्याह–दोरिति। त्वदृते त्वां विनेति। यदि कृपया स्वयमेव मे प्रतियोद्धा त्वं भवेस्तदा मे रणकंडूया दुःखनिस्तार इति ध्वनिः। ततश्च त्वां विजित्यैव सर्वदिग्विजयेन सम्पूर्णेन सम्पूर्णयशा अहं भवेयमित्यनुध्वनिः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, कथमसौ तादृशं दुर्जनं स्वीकरोति उच्यते सम्पदैश्वर्यसम्वलितकारुण्यगुणस्वाभाव्येनैवेति तच्च कदाचिदस्य दुर्जीवस्य मत्सम्बन्धेन तादृशदोषोऽपयादित्यभिप्रेत्येति ज्ञेयं भगवदावेशमयस्वताण्डवे वाद्यसाहाय्येन कारुण्योदयादिति तदेतदभिप्रेत्याह—भगवानित्यर्द्धेन। अत एव वरेण निमित्तेन छन्दयमास स्वाभिप्रायमाचष्ट बाणं प्रति वरं वृणुष्वेति प्रोवाचेत्यर्थः। सा च बाणस्तं पुराधिपतया वव्रे त्वं मम पुराधिपः स्या इति ॥ ५ ॥ तत्र प्रस्तावविशेषमाह—स इत्यादिना। पार्श्वस्थमिति पुराधिपत्वेन सदा तत्पुरे सपरिवारस्य तस्य निवासात् तथा च हरिवंशे कुम्भाण्डचिन्तायां—

"देवदानवसङ्घानां यः कर्त्ता भुवने प्रभुः। स भवः कार्त्तिकेयश्च कृतवासो हि नः पुरे ॥" इति

पार्श्वत इति वा पाठः वीर्य्यदुर्मद इति तदपि वरोन्मुखं प्राप्य स्वदौर्जन्यानुरूपमेब वरयिष्यतीतिभावः। अर्कवर्णेनेति। शिवप्रसादान्महाधनसम्पत्तिस्तयाच तस्य दुर्मदता सूचिता ततश्च सम्यक् स्पृशन्निति भक्तिश्च रजस्तमोमय्येवेति सूचितम् ॥६॥ नमने हेतुः, हे महादेवेति। सर्वदेवश्रेष्ठत्वादित्यर्थः। किञ्च लोकानां सर्वजीवानां गुरुं सर्वहितोपदेष्टारम् ईश्वरं च प्रभुं नमस्कारे प्रयोजनं सूचयति—पुंसामिति। अतो ममापि कामः पूरयितव्य इति भावः ॥ ७ ॥ वरमपि सगर्वयैव भङ्गया व्यञ्जयति। दोरिति द्वाभ्याम्। परं केवलं, भारत्वे हेतुमाह—त्रिलोक्यामिति। त्वदृते त्वां विना इति त्वमेव मम समस्त्वयातु युद्धं न घटेतैवेति प्रयोजनाभावात् भारायैवाभूदित्यर्थः ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नमने हेतुः—हे महादेवेति सर्वदेवश्रेष्ठत्वादित्यर्थः। किञ्च, लोकानां सर्वजीवानां गुरुं पालकत्वादिना उपदेशकत्वेन च पित्रादिरूपमीश्वरञ्च प्रभुम्। प्रयोजनञ्च सूचयति—पुंसामिति। अतो मे कामः पूरयितव्य इति भावः ॥ ५ ॥ परं केवलं भारत्वे हेतुमाह—त्रिलोक्यामिति। त्वत्त ऋत इति त्वमेव समः, त्वया च युद्धं न घटेतैवेति प्रयोजनाभावाद्भारायैवाभूदित्यर्थः ॥ ६ ॥ न च केवलमेव वैफल्येन दुःखम्, कण्डूत्या चेत्याह—कण्डूत्येति। आद्य! सर्वश्रेष्ठेति त्वमेव मम योद्धा योग्यो न त्वन्य इति भावः ॥ ७ ॥ भगवानीश्वर आहेति शेषः। क्रुद्धः सन् दुर्म्मदाद्दुर्व्वाक्याच्च केतुर्मायुरध्वजो भज्यते स्वयमेव। हे मूढेति स्वयमेवात्मविपद्वाञ्छनात् दुर्दर्पाच्च, अहमेव समः कथञ्चित्तुल्यो यस्य स श्रीकृष्णस्तेन, यद्वा, मत्समेनानिरुद्धेन, यद्वा, मया लक्ष्म्या सह वर्त्तत इति समः श्रीकृष्णः, मदीयो मत्सेव्यो यः समस्तेन सहेत्यर्थ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

किम्बहुनेत्याह—सहस्रबाहुरिति। सहस्रं बाहवो यस्य स बाणः सहस्रबाहुवाद्येनेति समस्तपाठे तु सहस्रबाहुभिर्यद्वाद्यं वाद्यवादनं तेन मृडं रुद्रं ताण्डवे नृत्ये अतोषयत् मृडे ताण्डवं कुर्वति सति सहस्रबाहुभिः पञ्चशतवाद्यानि वादयन् तमतोषयदित्यर्थः। इत्थं तोषितः स भगवान् रुद्रस्तं बाणं वरेण 'अध्ययनेन वसतीतिवत्तृतीया' वरार्थं छन्दयामास। स बाणस्तं रुद्रं पुराधिपं पुरपालकं वव्रे त्वं मत्पुरीं पालयन्नास्वेति वव्र इत्यर्थः ॥ ५ ॥ स इति। स बाणः वीर्य्येण दुष्टो मदो यस्य सः अर्क इव वर्णः यस्य तेन किरीटेन तस्य रुद्रस्य पदाम्बुजं स्पृशन् गिरिशमुवाच ॥ ६ ॥ उक्तिमेवाह–नमस्य इति। हे महादेव! त्वां नमस्करोमि कथम्भूतं न पूर्णः कामो येषां तेषां पुंसां कामान् पूरयतीति तथा स चासौ अमराङ्घ्रिपः कल्पतरुस्तम् ॥ ७ ॥ त्वया दत्तं भुजसहस्रं केवलं मम भाराय भारार्थमेवाभवत् त्वदृते त्वां विना मया सह प्रतियोद्धारं तुल्यं पुरुषं न पश्यामि मदिष्टदैवेन त्वया तु समेनापि न योत्स्यामीति भावः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तच्छ्रुत्वेत्यादि। मत्समेन अहं समः सश्रीको यस्मात् स तथा, यस्य प्रसादादहमीश्वर इत्यर्थः। तेन मदधिकेनेत्यर्थः। यद्वा, समेन सश्रीकेन श्रीलक्ष्मणेन श्रीकृष्णेन समं संयुगं भवेत्। कीदृशम्? मत्, मथ्नातीति मत् क्विपि रूपम् अतस्त्वद्दर्पघ्नः ॥ ९-१४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

'मूढ ! संयुगं मत्समेन ते' इत्यादि । अहं समः सश्रीकः तस्माद्धेतोः स तथा तेन मदधिकेनेत्यर्थः । यद्वा समेन सश्रीकेन श्रीकृष्णेन, संयुगं कीदृशम् ? मथ्नातीति मत्, संयुगमिति क्लीबत्वमार्षम् ॥ ९-१४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

छन्दयामास वशयामास दित्सितेन रणेन वरेण तं वशीचकारेत्यर्थः । "अभिप्रायवशौ छन्दौ" इत्यमरः । स बाणः तं पुराधिपं स्वपुरपालकं वव्रे ॥ ५-६ ॥ कामपूरको योऽमराङ्घ्रिपः कल्पतरुस्तत्तुल्यम् ॥ ७ ॥ तस्मान्ममेदं दुःखमुपशमयितव्यमित्याह—दोरिति । त्वदृते त्वां विनेति यदि कृपया स्वयं त्वमेव मे प्रतियोद्धा भवेस्तदैव मे रणकण्डूया दुःखान्निस्स्तार इति ध्वनिः । ततश्च त्वां विजित्यैव सर्वदिग्विजयेन सम्पूर्णेन सम्पूर्णयशा अहं भवेयमित्यनुध्वनिः ॥ ८ ॥

गूढार्थदीपिनी

छन्दयामास वरार्थं प्रेरयामास । पुराधिपं पुरपालकम् ॥ ५ ॥ दुर्मदः उन्मत्तः किरीटेन मुकुटेन ॥ ६ ॥ कामान् पूरयतीति स चासौ अमराङ्घ्रिपः कल्पवृक्षः तत्तुल्यं त्वाम् ॥ ७ ॥ दोषां भुजानां सहस्रम् । त्वत् ऋते त्वां विना अन्यं समं न लभे ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पुरस्य अधिपं रक्षकम् ॥ ५-६ ॥ कामपूरश्चासावमराङ्घ्रिपो देवद्रुमश्च स तथा ॥ ७-८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स बाणस्तं पुरहरमेव पुराधिपं वव्रे । त्वमेव मम पुररक्षको भवेति भवं यथा च इति भावः ॥ ५ ॥ वीर्यहेतुको दुर्दृष्टो मदो हन्ता यस्य यः ॥ ६ ॥ हे महादेव । महत एवोत्सवत एव त्वां नमस्ये । इतरेभ्यो वैशेष्यं भाषते ॥ पुंसामिति । अपूर्णकामानां पुंसां कामपूरश्चासावमराङ्घ्रिपः सुरतरुस्तद्रूपम् ॥ ७ ॥ दोष्णां सहस्रम् । कुतोऽरे कुरुपुरुषेण केनचित्सङ्गरमित्यत आह ॥ त्रिलोक्यामिति । त्वदृते रामं मया न लभे ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं प्रार्थितार्थसिद्ध्यर्थं व्याजेन युद्धं याचते **दोःसहस्रं त्वया दत्त**मिति । क्रियाशक्तिबाहुल्यार्थं सहस्रं बाहवो दत्ताः । **ते** निर्विषयाः सार्थका न भवन्ति । विषयस्तु समानेनाधिकेन **वा** सङ्ग्रामः, तदभावात् भाराय परमभवत् । यथा शीताभावे **वस्त्राणि** भारायन्ते, युद्धाभावे वा **शस्त्राणि** । वैयर्थ्यं प्रकटयति **त्रिलोक्यां प्रतियोद्धार**मिति । तर्हि शशशृङ्गाभावे किं चक्षुः निष्फलं तद्वद्विद्यमानैरेव यथायोग्यं क्रियतामित्याशङ्क्य, समेनैव युद्धं कर्तव्यमिति समस्य तव विद्यमानत्वात्त्वदृते अन्यं समं न लेभे । अनेन भगवान् अस्ति परं स न इन्द्रियविषय इति लेभ इत्युक्तम् ॥५॥ तर्हि मास्तु, सुप्यतामित्याशङ्क्याह **कण्डूत्येति** । निभृताः पूर्णाः, अतः स्थातुमशक्ताः । तर्हि युद्धाभावे अन्य एव कश्चित् कण्डतिनिवृत्त्यर्थमुपायः क्रियतामित्याशङ्क्य, दिग्गजानहं युयुत्सुः चूर्णयन्नद्रीन् अन्वयाम् । पर्वता अपि चूर्णीकृताः । दिग्गजा अपि युद्धार्थमन्विष्टाः । बलमुभयथा क्षीणं भवति, शौर्यरूपं युद्धे न, बलरूपं पराक्रमेण, तत्राचेतनाश्चूर्णीभूताः, चेतनास्तु पलायिता इति वैयर्थ्यमेव जातमित्यर्थः ॥ ६ ॥ एवं गर्वं श्रुत्वा क्रुद्धो भगवानित्याह **तच्छ्रुत्वेति** । भगवान् सर्वज्ञः महादेवः क्रुद्धः आहेति पूर्वोक्तैव क्रिया अनुवर्तनीया । यदा **ते** केतुः भज्यते, तदेव तवाभिज्ञापकं युद्धप्राप्तौ । केतुर्ध्वजः वंशस्य । कन्या जारोपभुक्ता भग्नकेतुरुच्यते । अकस्माद्रसस्थे तस्मिन् केतुभङ्गश्च । तदा त्वद्दर्पघ्नं त्वद्दर्पहननार्थमेव संयुगं मत्समेन भगवता भविष्यति । मया समः भगवान् । सर्वसम इति महादेवेनापि समः ॥ ७ ॥ एवं युद्धसम्भवमाकर्ण्य प्रीतो जात इत्याह **इत्युक्त इति** । महादेवेनैवमुक्तः हृष्टो जातः, यतः कुमतिः । तस्य महादेववाक्ये विश्वासमाह **स्वगृहं प्राविश**दिति । स्वयमुद्यममकृत्वा स्वगृहं प्रविष्टः गिरिशादेशं प्रतीक्षन् आस्ते । यद्यपि स आदेशः स्ववीर्यनाशकः, तथापि कुधीः ॥ ८ ॥

श्रीसुबोधिनी-सारः

शरण्यः शरणे साधुः भक्तेषु वत्सलः कृपालुः सर्वभूतानामीशो भगवान् वरेण छंदयामास बाणं प्रलोभितवान् स तं शिवं पुराधिपं जागरूकं वव्रे ॥ ५ ॥ एकस्मिन्कालेऽर्कवर्णेन सूर्यप्रभेण किरीटेन मुकुटेन तस्य पदांबुजं स्पृशन् सन् वीर्येण दुष्टो मदो यस्य स बाणः पार्श्वस्थं समीपवर्त्तिनं गिरिशं शिवमाह हे महादेव लोकानां गुरुमीश्वरं न पूर्णः कामो मनोभिलाषो येषां तेषां

पुंसां कामानां पूर: पूरकोऽमराणां देवानामंघ्रिप: कल्पवृक्षरूपस्तं त्वां नमस्येहं नमस्करोमि ॥ ६–७ ॥ त्वया दत्तं दोषां भुजानां सहस्रं परं केवलं मे मम भारार्थमभवज्जातं त्वदृते त्वां विना त्रिलोक्यां समं तुल्यं प्रतियोद्धारं प्रतिद्वंद्विनं न लभे न प्राप्नोमि प्रथमांतपाठे यतोऽसम एक एवातुल्य: सर्वोत्तमबलीत्यर्थ: ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सहस्रं बाहवो यस्य स बाण: मृडे ताण्डवे नृत्यविशेषे कुर्वति सति सहस्रबाहुभिर्बहूनि वाद्यानि वादयन् तमतोषयदित्यर्थ: । एवं सन्तोषितो मृडस्तं बाणं वरेण छन्दयामास 'वरं वृणीष्व' इत्युक्तवान् । सर्वदाने सामर्थ्यमाह—भगवानिति । 'तस्य दानमावश्यकम्' इत्यत्र हेतुमाह–सर्वभूतानामीश: पालक इति । सर्वोपास्यत्वमाह—शरण्य इति । तत्र हेतुमाह—भक्तवत्सल इति । स च बाणस्तं रुद्रं पुराधिपं वव्रे त्वं मत्पुरीं पालयंस्तिष्ठेति वृतवान् इत्यर्थ: ॥ ५ ॥ स बाण एकदा किरीटेन तत्पदाम्बुजं स्पृशन् गिरिशमाह । 'तद्वचनमयुक्तम्' इति सूचयन्नाह—वीर्येण दुष्टो मदो यस्य स इति ॥ ६ ॥ उक्तिमेवाह—नमस्य इति । हे महादेव ! त्वामहं नमस्करोमि । 'नमस्कारपूजादिनाऽऽराधनयोग्यस्त्वम्' इत्याशयेनाह—लोकानां सर्वप्राणिनां गुरुं पूज्यमिति । तत्र हेतुमाह—न पूर्ण: कामो मनोरथो येषां तेषां पुंसां कामान् पूरयतीति तथा स चासावमराङ्घ्रिप: कल्पतरुश्च तमिति । तत्र हेतुमाह—ईश्वरमिति ॥ ७ ॥ 'किमर्थं नमस्करोषि' इत्यपेक्षायामाह—दोस्सहस्रमिति । त्वया वरतया यत् दोस्सहस्रं भुजसहस्रं दत्तं तन्मे मम परं केवलं भारार्थमेवाभवत् । तत्र हेतुमाह—त्रिलोक्यामिति । दोस्सहस्रग्रहणं तु युद्धकौतुकसिद्ध्यर्थमेव । तत्र तु त्वदृते त्वां विना त्रिलोक्यां मया समं सह प्रतियोद्धारं न लभे न लब्धवान्, अतस्तद्भारमात्रमेवाभवत् ॥ ८ ॥

अन्वितार्थप्रकाशिका

सहस्रेत्यर्द्धम् ॥ सहस्रं बाहवो यस्य स बाण: मृडं श्रीशिवं ताण्डवे नृत्यविशेषे वाद्येन सहस्रबाहुभिर्बहूनि वाद्यानि वादयन् इत्यर्थ: । अतोषयत् । भगवानिति ॥ भगवान्सर्वभूतेश: शरण्य: भक्तवत्सल: सन्तोषितो मृडस्तं बाणं वरेण च्छन्दयामास वरं वृणीष्वेत्युक्तवान् । वरेण दित्सितेन छन्दयामास वशीचकार । "अभिप्रायवशौ छन्दौ" इत्यमर: । इत्यन्ये । स च बाणस्तं रुद्रं पुराधिपं वव्रे । त्वं मत्पुरीं पालयंस्तिष्ठेति वृतवान् इत्यर्थ: ॥५॥ स इति ॥ वीर्येण दुर्मद: स बाण: एकदा अर्कवर्णेन किरीटेन तत्पदाम्बुजं स्पृशन् पार्श्वस्थं गिरिशमाह स्म ॥ ६ ॥ नमस्य इति ॥ हे महादेव ! लोकानां गुरुम् ईश्वरं न पूर्ण: कामो मनोरथो येषां तेषां पुंसां कामान् पूरयतीति तथा च चासावमराङ्घ्रिप: कल्पतरुश्च तं त्वामहं नमस्ये । तद्भार्थ: ॥७॥ दोरिति ॥ त्वया वरतया यत् दोषां भुजानां सहस्रं दत्तं तन्मे मम परं केवलं भाराय एवाभवत् । यत: त्वदृते त्वां विना त्रिलोक्यां मया समं सह प्रतियोद्धारं बलेन तुल्यं योद्धारं न लभे न प्राप्नोमि । अतो यदि त्वमेव योद्धा भवेस्तदा मम मनोरथपूर्तिरिति ध्वन्यते ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कंडूत्या दु:सहसंग्रामस्पृहया निभृतैर्व्याप्तै: हे आद्य अद्रीन् चूर्णयन सन् । अयां अहं अगच्छं ॥ ६ ॥ हे मूढ ! त्वद्दर्पघ्नं संयुगं युद्धम् ॥ ७ ॥ स्ववीर्यस्य नशनं यस्मात्तं गिरिशस्यादेशं ध्वजभंगरूपं वाक्यं एवं राजसानां तामसानां च स्वेष्टदेवगुर्वादिषु महत्सु । तत्प्राप्तसमृद्धिसामर्थ्यादयोपि अपराधाय भवेयुरिति बोध्यं ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवानिति । इत्थं तोषित इति शेष: । सर्वभूतेश:, शरण्य: शरणे साधु:, भक्तवत्सल: भगवान् रुद्र:, तं बाणं, वरेण अध्ययनेन वसतीतिवत्तृतीया । वरार्थमित्यर्थ: । छन्दयामास नोदयामास । स बाण:, तं रुद्रं, पुराधिपं पुरपालकं, वव्रे । त्वं मत्पुरीं पालयन्नत्रास्स्वेति वव्र इत्यर्थ: ॥ ५ ॥ स इति । वीर्येण दुर्दुष्टो मदो यस्य स:, स बाण:, अर्क इव वर्णो यस्य तेन, किरीटेन, तस्य रुद्रस्य पदाम्बुजं चरणकमलं, संस्पृशन् सन्, एकदा, पार्श्वस्थं सदा स्वनिकटवर्त्तिनं, गिरिशं, आहोवाच ॥ ६ ॥ उक्तिमेवाह नमस्य इति त्रिभि: । नमस्ये इति । न पूर्ण: कामो येषां, तेषां, पुंसां, कामान् पूरयतीति कामपूर: स चासावमराङ्घ्रिप: कल्पतरुस्तं लोकानां गुरुं, ईश्वरं त्वां, हे महादेव, नमस्ये नमस्करोमि ॥ ७ ॥ दो:सहस्रमिति । त्वया दत्तं, दो:सहस्रं भुजसहस्रं, परं केवलं, मे मम, भाराय भारार्थमेव, अभवत् । यत: त्वदृते त्वां विना, मया सह, प्रतियोद्धारं समं तुल्यं पुरुषं, त्रिलोक्यां, न लभे । न पश्यामीत्यर्थ: । मदिष्टदेवेन त्वया तु समेनापि न योत्स्यामीति भाव: ॥ ८ ॥

कृष्णप्रिया

शरणागत संरक्षक भक्तवत्सल समस्त भूतों के इष्टदेव भगवान् शिवजी ने एकबार बाणासुर को कहा—वत्स ! जो कामना हो मुझसे पूर्ण कर लो, तब बाणासुर ने कहा—नाथ ! मेरे नगर की रक्षा करते हुए यहाँ रहिये । भगवान् ने स्वीकार

किया ॥ ५ ॥ एक दिन वीर्य मद से अभिमानी बाणासुर ने समीपवर्ती भगवान् महेश्वर जी के श्री चरणकमलों को सूर्य समान तेजोमय किरीट कोटि से स्पर्श करते हुए कहा प्रभो ! हे देवाधिदेव ! आप स्थावर-जङ्गम समस्त ब्रह्माण्डों के स्वामी एवं गुरु हैं। मैं बार-बार आपको प्रणाम करता हूँ। जिन सेवकों के मनोरथ अबतक संपूर्ण नहीं हुए हैं उनके मनोरथों के परिपूरक आप कल्पतरु हैं ॥ ६-७ ॥ नाथ ! हे भगवन् ! आपने मुझे एक हजार भुजाएँ समर्पित की हैं-लेकिन वे भुजाएँ मेरे लिये तो भाररूप बन गयी हैं। कारण यही है कि अखिल ब्रह्माण्ड में आपके सिवाय मुझे मेरे तुल्य और कोई वीर योद्धा ही नहीं मिलता है जो मेरे साथ संग्राम करे ॥ ८ ॥

कण्डूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहम् । [1]अन्वयां चूर्णयन्नद्रीन् भीतास्तेऽपि प्रदुद्रुवुः ॥ ९ ॥
तच्छ्रुत्वा भगवान् क्रुद्धः केतुस्ते भज्यते यदा । त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते ॥ १० ॥
इत्युक्तः कुमतिर्हृष्टः स्वगृहं प्राविशन्नृप । प्रतीक्षन् गिरिशादेशं स्ववीर्यनशनं[2] कुधीः ॥ ११ ॥
तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम् । कन्यालभत कान्तेन प्रागदृष्टश्रुतेन सा[3] ॥ १२ ॥

कर्दमक्षमा

अन्वयः—अहम्, कण्डूत्या, निभृतैः, दोर्भिः, युयुत्सुः, अद्रीन्, चूर्णयन्, दिग्गजान्, अन्वयाम्, ते, अपि, भीताः, ततः, प्रदुद्रुवुः ॥ ९ ॥ तत्, श्रुत्वा, क्रुद्धः, भगवान्, आह, मूढ ! ते, केतुः, यदा, भज्यते, तदा, ते, मत्समेन, त्वद्, दर्पघ्नम्, संयुगम्, भवेत् ॥ १० ॥ हे नृप इत्युक्तः, हृष्टः, कुमतिः, स्ववीर्यनशनम्, गिरिशादेशम्, प्रतीक्षन्, कुधीः, स्वगृहम्, प्राविशत् ॥११॥ तस्य, ऊषा, नाम, दुहिता, सा, कन्या, प्राक्, अदृष्टेन, अश्रुतेन, प्राद्युम्निना, कान्तेन, स्वप्ने, रतिम्, अलभत ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे आद्य निभृतैर्भरितैर्दोर्भिरद्रींश्चूर्णयन् अयामगच्छम् ॥ ९-१० ॥ स्ववीर्यस्य नशनं नाशनं केतुभंगं प्रतीक्षमाणः ॥११॥ श्रीमहेशादिष्टसंग्रामस्य प्रसंगमाह । तस्योषेति । प्राद्युम्निनाऽनिरुद्धेन तत्रापि स्वप्ने ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कंडूतिर्गात्रघर्षणम् । 'निभृतं भरिताचले' इति कोषः । यातेर्लङि रूपमयामिति । कंडूत्या रणकंडूत्या नितरां भृतैः पूर्णैर्दोर्भिर्युयुत्सुरहं दिग्गजान्प्रति हे आद्य एतादृशबलैश्वर्यादेस्त्वमेव कारणमसीत्यतस्त्वमेवैतां रणकंडूतिं शमयेति भावः। ऐशानीदिशं विनाऽन्याः सर्वा मया जिता एव, परं त्वष्टौ दिग्गजाञ्जित्वा ममाष्टदिग्विजयोस्त्वित्यभिप्रायेणाहं गतवांस्तेऽपि भीताः प्रदुद्रुवुः । किं कुर्वन्—कंडूतिशांत्यर्थमद्रीनपि चूर्णयन् । अतः कथय त्वया सह युद्धं विना मम रणकंड्वा कथमुपशाम्येत्, तस्या उपशमं विना मम कथं धैर्यं भवेदिति मयि दोषो न देय इति भावः ॥ ९ ॥ तदुद्धतवचः । **ते केतुः भज्यते** कर्मकर्तरि प्रयोगः । ते संयुगमिति पृथक्सम्बन्धादपौनरुक्त्यम् । मत्समेन मत्तुल्येन क्रुद्ध इति प्रथमं तज्जिघांसा शिवमनस्युद्भूदिति भावः । ततश्च स्वहस्तेन स्वसेवकवधोऽनुचितः । परन्तु मत्प्रसादलब्धं महाबलवद्भुजसहस्रं यदाऽयं दुर्मदो भारं मन्यते तर्हि भारावतारणकर्ता मत्प्रभुरेव खल्विममपि भारमपनेष्यतीति परामृश्याह-हे मूढ ! स्वाभीष्टज्ञानशून्य । केतुर्मयूरध्वजः स्वयमेव यदा भज्यते त्रुट्यति । वर्तमानसामीप्ये वर्तमानवत् । मत्समेनेति-तं प्रीणयितुमुक्तम् । वस्तुतस्तु मा लक्ष्मीः तया सह वर्तत इति समः श्रीकृष्णः, मदीयो मत्सेव्यो यः समः स मत्समस्तेनेत्यर्थः । यद्वा—मा शोभा तत्सहितसमः, अहं समः सशोभो यतस्तेन । अत्र क्रुद्ध इतोग्रे उवाचेति शेषः ॥ १० ॥ स्वपराभवश्रुतेर्हर्ष एव कुमतित्वे हेतुः । पुनः कुधीरित्यत्यन्तमौढ्यमाहुः । सर्वेशेन युद्धाकांक्षावत्त्वात् । यदयं मूढेति मां संबोध्य त्वद्दर्पघ्नं संयुगं भवेदिति ब्रूते तदयमेव मूढो मद्दर्पघ्नसंयुगस्यासंभवादेवेति कुत्सिता मतिर्मननं यस्य सः । परं त्वेतद्वाक्येनानुमीयते मदणकंडूपशमकः कश्चिद्बलिष्ठो योद्धुमेष्यतीति मत्वा हृष्टः गिरिशादिष्टं केतुभंगं प्रतीक्षमाणः कदा मे केतुभंगो भविष्यतीत्यमङ्गलसोत्कण्ठत्वात्कुधीरेव स इति विश्वनाथः ॥ ११ ॥ तस्य बाणस्य । तत्रापि तस्मिन्नपि स्वप्नः । कन्या कुमारी । कांतेन श्रीपार्वत्या पतित्वेनादिष्टेनेत्यर्थः । तथा विष्णुपुराणे-"ऊषा बाणसुता विप्र पार्वतीं शम्भुना सह । क्रीडन्तीमुपलक्ष्योच्चैः स्पृहां चक्रे तदाश्रयाम् । ततः सकलचित्तज्ञा गौरी तामाह भाविनीम् । अलमत्यर्थतापेन भर्त्रा त्वमपि रंस्यसे । इत्युक्ता सा तदा चक्रे कदेति मतिमात्मनः । को वा भर्ता ममेत्येनां पुनरप्याह पार्वती । वैशाखशुक्लद्वादश्यां स्वप्ने योऽभिभवं तव । करिष्यति स ते भर्ता बाणपुत्रि भविष्यति ॥" इति ॥ १२ ॥

---

[1] अभ्ययां-वीर ; आद्यायां-श्रीधर. वंशी. जीव. विज. विश्व. । [2] भ्रंशनं-वीर. । [3] च-वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न च वैफल्येनैव दुःखमित्याह–कण्डूत्येति। कण्डूतिवत् दुस्सहा युद्धस्पृहा तया ते दिग्गजा अपि आद्य सर्वश्रेष्ठेति त्वमेव मम युद्धयोग्यो न त्वन्य इति त्वमेव मया युद्ध्यस्वेतिभावः। एवं श्रीभगवद्बहिर्मुखस्य स्वसेव्यतया गृहीते देवतान्तरेऽप्यपराध एव फलितः स्यादिति दर्शितम् ॥ ९ ॥ रुद्रोपि भगवान् भूतभव्यभवद्वृत्तश्च ईश्वर आहेति शेषः। तदनुरूपमेवोक्तवानित्यर्थः। केतुर्मायूरध्वजः भज्यते स्वयमेव हे मूढेति स्वाभीष्टसिद्धिञ्च न जानासि दुर्दर्पेणैव च वृणोषीति भावः। मत्समेनेति एतावतैवास्य चमत्कारो भविष्यति किमधिकनिर्देशेनेति भावः। वस्तुतस्तु मया लक्ष्म्या सह वर्त्तत इति समः श्रीकृष्णः मदीयो मत्सेव्यो यः मत्समस्तेन सहेत्यर्थः ॥ १० ॥ इत्युक्तो दृष्टः यतः कुमतिः कुत्सितो विचारो यस्य सः ततश्च स्ववीर्य्यस्य नशनं यस्मात्तादृशं गिरिशादेशं तदादिष्टमर्थं प्रतीक्षमाणः स्वगृहं प्राविशत् यतः कुधी दुर्व्यवसाय इति टीकायां नशनं नाशमिति नाशरूपमित्यर्थः। नशनं नाशनमिति क्वचित्पाठः तदैव ध्वजश्चासौ भग्न इति ज्ञेयं तथा च श्रीविष्णुपुराणे—

"ततः प्रणम्य मुदितः शम्भुमभ्यागतो गृहम्। भग्नं तं ध्वजमालोक्य दुष्टो हर्षान्तरं ययौ ॥" इति

ईदृशं हरिवंशेपि किन्तु बाणकुम्भाण्डयोः सम्वादस्तत्र विशेषः ॥ ११ ॥ कन्याकुमारी कान्तेन श्रीपार्वत्या पतित्वेनादिष्टेनेत्यर्थः। तथा च श्रीविष्णुपुराणे—

उषा बाणसुता विप्र पार्वतीं शम्भुना सह। क्रीडन्तीमुपलक्ष्योच्चैः स्पृहाञ्चक्रे तदाश्रयाम् ॥
ततः सकलचित्तज्ञा गौरी तामाह भाविनीम्। अलमत्यर्थपापेन भर्त्रा त्वमपि रंस्यसे ॥
इत्युक्ता सा तदा चक्रे कदेति मतिमात्मनः। को वा भर्त्ता ममेत्येनां पुनरप्याह पार्वती ॥
वैशाखशुक्लद्वादश्यां स्वप्ने योऽभिभवं तव। करिष्यति स ते भर्त्ता राजपुत्रि भविष्यति" ॥ इति ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हेत्युक्तोऽपि हृष्टः, यतः कुमतिः, ततश्च स्ववीर्य्यनशनरूपमपि गिरिशस्यादेशम्; यद्वा, गिरिशस्यादेशे यस्मिस्तद्गिरिशादिष्टमित्यर्थः। स्ववीर्य्यस्य नशनं नाशो यस्मात्तत् संयुगं प्रतीक्षमाणो बभूव, यतः कुधीः। एवं वाक्यभेदादपौनरुक्त्यम्। यद्वा, कुमतिः कुत्सितसंकल्पः, कुधीर्दुर्व्यवसाय इत्यर्थः। इत्याश्चर्य्यादाह—हे नृपेति। तदैव ध्वजश्चासौ भग्न इति ज्ञेयम्। तथा च श्रीविष्णुपुराणे (५।३३।४)–'ततः प्रणम्य मुदितः शम्भुमभ्यागतो गृहम्। भग्नं तं ध्वजमालोक्य हृष्टो हर्षान्तरं ययौ ॥' इति। ईदृशं श्रीहरिवंशेऽपि, किन्तु बाणकुम्भाण्डयोः संवादस्तत्र विशेषः, बहुत्वादत्र न संगृह्यते। एवमग्रेऽपि ॥ ९ ॥ कन्या कुमारी, कान्तेन श्रीपार्व्वत्या पतित्वेनादिष्टेनेत्यर्थः। तथा च श्रीविष्णुपुराणे (५।३२।११–१४)—

'ऊषा बाणसुता विप्र पार्व्वतीं शम्भुना सह। क्रीडन्तीमुपलक्ष्योच्चैः स्पृहाञ्चक्रे तदाश्रयाम् ॥
ततः सकलचित्तज्ञा गौरी तामाह भाविनीम्। अलमत्यर्थतापेन भर्त्रा त्वमपि रंस्यसे ॥
इत्युक्ते सा तदा चक्रे कदेति मतिमात्मनः। को वा भर्त्ता ममेत्येतां पुनरप्याह पार्व्वती ॥
वैशाखशुक्लद्वादश्यां स्वप्ने योऽभिभवं तव। करिष्यति स ते भर्त्ता राजपुत्रि भविष्यति ॥' इति ॥ १० ॥

सा तथा श्रीपार्व्वत्यनुगृहीता सौन्दर्य्यादिनानिर्वचनीया वा, तत्र स्वप्ने स्थाने वा, सखीनां निरयेकत्र सुप्तानाम्, विह्वला अत्यार्त्ता, भावि-विरहात्; यद्वा, विह्वला रतिपरिश्रमाद्व्याकुला व्रीडिता च, तादृशोक्तेः, अतो व्रीडिता; तथा च श्रीहरिवंशे (विष्णु० प० ११८।३)—'सा स्वप्ने रमिता तेन स्त्रीभावञ्चापि लम्भिता। शोणिताक्ता प्ररुदती सहसैवोत्थिता निशि ॥' इति ॥ ११ ॥ सखी सखीमिति मिथो विश्वास उक्तः; अतोऽपृच्छत्, कौतूहलेन सम्यगन्वितेति तस्यास्तादृगुक्त्यादिना ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

कण्डूत्येति। निभृतैर्भरितैर्भुजैर्योद्धुमिच्छुः अद्रीन् कूर्णयन् दिग्गजानभ्ययाम् अभिद्रुतवानस्मि तेपि दिग्गजा अपि दुद्रुवुः ॥ ९ ॥ तदिति। तद्बाणवचः श्रुत्वा भगवान् रुद्र प्राहेति शेषः उक्तिमेवाह–केतुरिति। तव केतुर्ध्वजो यदा भज्यते स्वयमेव भग्नः पतेदित्यर्थः। तदा हे मूढ! तव दर्पं हन्तीति तथाभूतः भवेत् सम्भवेत् तेन अमत्समेनेति छेदः नाहं समो यस्य स तेन मत्तोप्यधिकेन त्वद्दर्पघ्नेन संयुगश्च भवेत् ॥ १० ॥ इतीति। हे नृप! कुबुद्धिर्बाणः स्ववीर्यं भ्रंशयतीति तथा तं गिरिशस्यादेशं केतुभङ्गात्मकं प्रतीक्षमाणो गृहान् प्राविशत् ॥ ११ ॥ एवं स्थिते रुद्रादिष्टसङ्ग्रामप्रसङ्गमाह–तस्येत्यादिना। तस्य बाणस्य दुहिता उषा नाम कन्या प्रागदृष्टः श्रुतश्च तेन प्राद्युम्निना अनिरुद्धेन सह रतिं लेभे ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

कण्डूत्या रणकण्डूयया नितरां भृतैः परिपूर्णैर्दोर्भिर्युयुत्सुरहं दिग्गजान् प्रति हे आद्य अयाम् अगच्छम् ऐशानीं दिशं विना सर्व एवान्या दिशो मया जिता एव परन्तु अष्टौ दिग्गजान् जित्वा ममाष्टदिग्विजयोऽस्त्वित्यभिप्रायेणाहं गतवानिति भावः।

किं कुर्वन् भुजबलकण्डूयनिवर्त्तनार्थमद्रींश्चूर्णयन् ते दिग्गजा अपि भीताः अतः कथय त्वया सह युद्धं विना मम रणकण्डूया कथमुपशाम्यतु तस्या उपशमं विना मम कथं धैर्यं भवेदिति मयि दोषो न देय इति भावः ॥ ९ ॥ क्रुद्ध इति प्रथमं तज्जिघांसा शिवमनस्युदभूदिति भावः ततश्च स्वहस्तेनैव स्वसेवकवधोऽनुचितः परन्तु मत्प्रसादलब्धं महाबलं भुजसहस्रं यद्ययं दुर्मदो भारं मन्यते तर्हि भारावतारणकर्त्ता मत्प्रभुरेव खल्विममपि भारमपनेष्यतीति परामृश्याह केतुर्मायूरध्वजः भज्यते स्वयमेव यदा वर्त्तमानसामीप्ये वर्त्तमानत्वं मत्समेनेति तं प्रीणयितुमुक्तं वस्तुतस्तु मा शोभा तया सह वर्त्तमानः समः अहं समः सशोभा यतस्तेन अत्र क्रुद्ध इत्यनन्तरमुवाचेति शेषः ॥ १० ॥ कुमतिरिति यदयं मूढेति मां सम्बोध्य त्वद्दर्पघ्नं संयुगे भवेदिति ब्रूते तदयमेव मूढः मद्दर्पघ्नस्य संयुगस्यासम्भवादेवेति कुत्सितं मननं विचारो यस्य सः परन्त्वेतादृशवाक्येनानुमीयते मदीयरणकण्डूयोपशमकः कश्चिद्बलिष्ठो योद्धुमेष्यतीति मत्वा हृष्टः स्ववीर्यस्य नशनं नाशो यस्मात् तं गिरिशादेशं तदादिष्टं केतुभङ्गं प्रतीक्षन् प्रतीक्षमाणः कदा मे केतुभङ्गो भविष्यतीत्यलक्षणसोत्कण्ठत्वात् कुधीः ॥ ११—१२ ॥

गूढार्थदीपिनी

हे आद्य । निभृतैः भरितैः दोर्भिः भुजैः युयुत्सुः सन् अहं दिग्गजान् अयाम् । यातेर्लङि रूपम् । तेऽपि दुद्रुवुः पलायिताः बभूवुः ॥ ९ ॥ केतुः मयूरध्वजः यदा भज्यते कर्मकर्तरि प्रयोगः । मत्समैन कृष्णेन सह संयुगं युद्धम् ॥ १० ॥ वीर्यस्य नशनं नाशो यस्मात् तमादेशं केतुभङ्गात्मकम् ॥ ११ ॥ प्राद्युम्निना अनिरुद्धेन रतिमलभत । स्वप्ने वैशाखशुक्लद्वादश्याम् । इति वैष्णवे ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हे आद्य मरीच्यादिभ्यः पूर्वज ! कण्डूत्या निभृतैर्भरितैर्दोर्भि । कुण्डूतिशान्त्यर्थम् अद्रीन् चूर्णयन् दिग्गजान् प्रति अयाम् अगच्छम् ते दिग्गजा अपि भीताः प्रदुद्रुवुः ॥ ९ ॥ भगवान् शिवः मत्समेन ते संयुगम्भवेत् इत्याह कदेत्याकाङ्क्षायामाह यदा ते केतुर्भज्यते ॥ १० ॥ स्ववीर्यस्य नशनं नाशो यस्मात्तं गिरिशादेशं केतुभङ्गात्मकम् प्रतिक्ष्यमाणः ॥ ११ ॥ शिवादिष्टसंयुगप्रसङ्गमाह–तस्येति ॥ १२–१४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कण्डूत्या युद्धकामनोत्पन्नया निभृतैः पुष्टैः । हे आद्य । अद्रींश्चूर्णयन्नयमगच्छम् । तेऽपि दिग्द्विपाः प्रदुद्रुवुः ॥ ९ ॥ पुरहरः स्वपुरत एवैवं वदन्तं बाणं शशापेत्याह । तदिति । केतुर्ध्वजः । मत्समेनाहं समः ससम्पत्को येन तेन संयुगं संयुगो युद्धं भवेत् ॥ १० ॥ दृष्टो यदाकदाचिद्वा मम समसमरो हरो वितरित इति तुष्टः । स्ववीर्यनशनं स्ववीर्यस्य नशनं नाशकं गिरिशादेशं प्रतीक्षन्प्रतीक्षमाणोऽभूत् ॥ ११ ॥ तस्य बाणस्य स्वप्ने वैशाखे मासि द्वादश्यां तत्रापि पार्वतीवरेणेति । यथोक्तं हरिवंशे । उषे शीघ्रं त्वमप्येवं भर्त्रा सह रमिष्यसि । द्वादश्यां शुक्लपक्षस्य वैशाखे मासि यो निशीत्यादि । प्राद्युम्निः प्रद्युम्नपुत्रोऽनिरुद्धस्तेन प्रागदृष्टोऽश्रुतश्च साक्षात्तेन ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्य केतुभङ्गप्रकारमाह तस्योषा नाम दुहितेति । अत्र पुराणान्तरे उषा पत्यर्थं पार्वतीं प्रार्थितवती । ततः सा तुष्टा अद्य यः स्वप्ने त्वां भजिष्यति स तव पतिरिति पार्वत्योक्ता, आधिदैविकः प्राद्युम्निरूपो भगवान् स्वप्नसृष्टौ मायिकयां तामालिङ्ग्य, स्वभावं तत्र स्थापितवान् । ततः सा वस्तुत आधिदैविकेन प्राद्युम्निना रतिमलभत । कन्यायाः रतिर्व्रतभङ्गहेतुर्भवति । मनोरथमात्रत्वं निवारयति कान्तेनेति । तर्हि भावनयैव मनोरथतुल्यः स्वप्नः तथा जात इत्याशङ्क्याह प्रागदृष्टश्रुतेनेति । प्राक् ततः स्वप्नात्पूर्वं न दृष्टः श्रुतो वा कदाचिदपि तया । वै निश्चयेनेति दैवोपपत्तिरुक्ता ॥ ९ ॥

श्रीसुबोधिनी–सारः

कंडूत्या निभृतैः पूर्णैर्दोर्भिर्भुजैर्युयुत्सुर्योद्धुमिच्छुरहं दिशां गजानयामगच्छम् । हे आद्य अद्रीन् पर्वतान् चूर्णयन् सन् ते दिग्गजा अपि भीता प्रदुद्रुवुः ॥ ९ ॥ तच्छ्रुत्वा क्रुद्धः "विषवृक्षोपि संबर्ध्य स्वयं छेत्तुमसांप्रतम्" इति वचनात्स्वयं हंतुमनिच्छन् भगवान् शिव आह । हे मूढ ते तव केतुः पताका यदा भज्यतेऽकस्मात्तदा ते तव मत्समेन मया समेन तुल्येन श्रीविष्णुना राजसमो मंत्रीतिवत्किंचिन्न्यूने समशब्दप्रयोगदर्शनादहं समः किंचिन्न्यूनो यस्मादिति रामानुजीयास्तन्न तुलोपमावर्ज्ये तुल्यार्थयोगे तृतीयया समासस्य विधानात् ते तव संयुगं संयुद्धं भवेत् तत्र जयाशा न कार्येत्यतो विशेषणं तव दर्पं हंतीति तत् ॥१०॥ शुकोक्तिः । हे नृप इत्येवमुक्तः कुबुद्धिर्बाणो हृष्टः स्वगृहे प्राविशत् स्ववीर्यस्य बलस्य नशनं नाशनं केतुभंगं गिरिशस्य शिवस्यादेशम् आज्ञां प्रतीक्षमाणोऽत एव कुधीरिति पुनर्न्यस्तः ॥ ११ ॥ तत्प्रसंगमाह । तस्य बाणस्योषा नाम दुहिता पुत्री कन्या प्रागदृष्टश्रुतेन

प्राद्युम्निनानिरुद्धेन कांतेन भर्त्रा स्वप्ने रतिमलभत ऐत् एकदाऽऽरामे रममाणयोरुमाशंकरयोर्दर्शनात्सकामामूषां ज्ञात्वाऽनिरुद्धेनास्याः संगमो भविष्यतीति शिववरदानतोऽदृष्टश्रुतेनापि स्वप्ने रतिरुक्ता ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रतियोद्धृलाभमेव स्पष्टयति—कण्डूत्येति । कण्डूत्या निभृतैर्भरितैर्भुजैः युयुत्सुर्योद्धुमिच्छुः अहं अद्रीन् चूर्णयन् दिग्गजान् अन्वयां अनुद्रुतवान्, तदा तेपि प्रदुद्रुवुः पलायिताः । तथाच 'यदि कृपया स्वयं त्वमेव मे प्रतियोद्धा भवेस्तदैव कण्डूतिदुखान्निस्तारः, नान्यथा' इति सूचितम्, त्वदृत इत्युक्तत्वात् ॥ ९ ॥ तद्बाणवचनं श्रुत्वा भगवान् रुद्रः क्रुद्ध आह—हे मूढ ! यदा ते केतुर्ध्वजो भज्यते तदा त्वद्दर्पघ्नं तव गर्वनाशकं मत्समेन सह ते तव संयुगं युद्धं भवेद्भविष्यतीति आहेति शेषेणान्वयः ॥ १० ॥ आश्चर्यं सूचयन् सम्बोधयति—नृपेति । इत्येवं रुद्रेणोक्तस्तत्समेन युद्धं भविष्यतीति कृत्वा हृष्टः सन् स्वगृहं प्राप आविशत् । 'त्वद्दर्पघ्नं' इत्युक्तत्वात् 'कथं तेन हर्ष' इत्याशङ्क्याह—कुमतिरिति । गृहं प्रविष्टोऽपि स्ववीर्यनाशसूचकं गिरिशोक्तं केतुभङ्गं प्रतीक्षमाणः आस्ते स्म । तत्रापि तमेव हेतुमाह-कुधीरिति ॥ ११ ॥ एवं स्थिते रुद्रादिष्टसङ्ग्रामप्रसङ्गमाह—तस्येत्यादिना । तस्य बाणस्य ऊषा नाम दुहिता आसीत् । सा च कन्या विवाहरहितैव प्रागदृष्टश्रुतेन कान्तेन मनोहरेण प्राद्युम्निना अनिरुद्धेन सह स्वप्ने रतिं लेभे ॥ १२ ॥

अन्वितार्थप्रकाशिका

कण्डूत्येति ॥ हे आद्य ! कण्डूत्या रणेच्छाजन्यया कण्डूयया निभृतैः पूर्णैर्दोर्भिर्भुजैः युयुत्सुर्योद्धुमिच्छुः अहम् अद्रीन् चूर्णयन् दिग्गजान् अयाम् अगच्छम् । तदा तेऽपि भीताः प्रदुद्रुवुः पलायिताः ॥ ९ ॥ तदिति ॥ तद्बाणवचनं श्रुत्वा भगवान् रुद्रः क्रुद्धः सन्नुवाच । हे मूढ स्वहितज्ञानशून्य ! यदा ते केतुर्मायूरो ध्वजो भज्यते तदा त्वद्दर्पघ्नं तव गर्वनाशकं मत्समेन सह ते तव संयुगं युद्धं भवेद्भविष्यति । विषवृक्षोऽपि संवर्द्ध्येति न्यायादहं त्वत्प्रतीकारं न करोमि । नापि ते नाशमिच्छामीति भावः ॥१०॥ इतीति ॥ हे नृप ! इत्येवं रुद्रेणोक्तः कुमतिः हृष्टः सन् स्वगृहं प्राविशत् । ततश्च कुधीः सः स्ववीर्यस्य नशनं नाशो यस्मात्तं स्ववीर्यनाशसूचकं गिरिशादेशं गिरिशोक्तं केतुभङ्गं प्रतीक्षन् । शता आर्षः । आस्ते स्म । तदैव ध्वजो भग्न इति विष्णुपुराणे॥११॥ तस्येति ॥ तस्य बाणस्य ऊषा नाम दुहिता आसीत् । ऊषाशब्दः प्रायो दीर्घादिः । क्वापि ह्रस्वादिः सा च कन्या विवाहरहितैव प्रागदृष्टश्रुतेन कान्तेन मनोहरेण प्राद्युम्निना अनिरुद्धेन सह स्वप्ने रतिं लेभे । तत्कारणं विष्णुपुराणे । "ऊषा बाणसुता विप्र पार्वतीं शम्भुना सह । क्रीडन्तीमुपलक्ष्योच्चैः स्पृहां चक्रे तदाश्रयाम् । ततः सकलचित्तज्ञा गौरी तामाह भामिनीम् । अलमत्यर्थतापेन भर्त्रा त्वमपि रंस्यसे ॥ वैशाखशुद्धद्वादश्यां स्वप्ने योऽभिभवं तव करिष्यति स ते भर्त्ता हे राजपुत्रि ! भविष्यति" ॥१२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शिवोपदिष्टयुद्धप्रसंगमाह तस्येति प्राद्युम्निना अनिरुद्धेन । प्राक् पूर्वं । अदृष्टेन अश्रुतेन च ॥ ९ ॥ तत्र स्वप्ने । तमनिरुद्धं अपश्यंती सती हे कांत क्वासीति वादिनी सती । उत्तस्थौ ॥ १० ॥ कौतूहलेनाऽऽश्चर्येण समन्विता ऊषेति दीर्घादिः क्वचित् ह्रस्वादिः ॥ ११ ॥ हस्तग्राहं पतिः हे राजपुत्रि नोपलक्षये अहं न पश्यामि ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कण्डूत्येति । कण्डूत्या निभृतैर्भरितैः, दोर्भिर्भुजैः, युयुत्सूर्योद्धुमिच्छुः, अहं अद्रीन्, चूर्णयन् दिग्गजान् अभ्ययामभिद्रुतवानस्मि । ततः, भीताः ते दिग्गजा अपि, प्रदुद्रुवः ॥ ९ ॥ तदिति । तद्बाणवचः, श्रुत्वा क्रुद्धः, भगवान् रुद्रः, प्राहेति शेषः । हे बाण, ते तव, स तुरयं ध्वजः, यदा भज्यते स्वयमेव भग्नः सन्, पतेदित्यर्थः । तदा, हे मूढ, तव दर्पं हन्तीति त्वद्दर्पघ्नः संयुगः, न अहं समो यस्येत्यमत्समस्तेन मत्तोऽप्यधिकेनेत्यर्थः । ते तव, भवेत् । मत्तोऽप्यधिकेन सह त्वद्दर्पघ्नः संग्रामो भवितेत्यर्थः ॥१०॥ इत्युक्त इति । हे नृप, इत्यमुना प्रकारेण, उक्तः रुद्रेणाभिहितः, कुमतिर्दुर्बुद्धिः बाणः, हृष्टः सन्, स्वगृहं प्राविशत् । कुधीः कुत्सितमतिः, स्ववीर्यं भ्रंशयतीति तं, गिरिशादेशं केतुभङ्गात्मकं रुद्रादेशं, प्रतीक्षन् प्रतीक्षमाणः सन्, आस्ते स्मेति शेषः ॥ ११ ॥ एवं रुद्रवचनविश्वासयुते बाणे स्थिते रुद्रादिष्टसंग्रामप्रसङ्गमाह । तस्येति । तस्य बाणस्य, ऊषा नाम ऊषेति नाम्ना प्रसिद्धा, दुहिता कन्या सती, प्रागदृष्टश्रुतेन च, पूर्वमदृष्टेनाश्रुतेन चापीत्यर्थः । प्राद्युम्निना प्रद्युम्नसुतेनानिरुद्धेनेत्यर्थः । कान्तेन स्वामिना, स्वप्ने रतिं, अलभत ॥ १२ ॥

कृष्णप्रिया

नाथ ! एक बार मेरी भुजाओं में युद्ध करने के लिये इतनी खुजली हुई कि मैं न रह सका और युद्ध करने के लिये दश दिग्गजों की ओर चल पड़ा तब वे दिग्गज भी भाग चले । खुजली से मैं रह नहीं सका तो रास्ते में मेरे लौटते समय मेरी

भुजाओं की चोट से बहुत से पर्वतों को तोड़ फोड़ दिये ॥९॥ उच्छृंखल बाणासुर की यह बात सुनकर भगवान् त्रिपुरारिजी को अल्प क्रोध आया और उन्होंने कहा कि हे मूर्ख ! ध्यान रखना—जिस दिन तेरी ध्वजा टूटकर गिर जायगी उस समय मेरे तुल्य कोई वीरवर से तुम्हारा संग्राम होगा वह संग्राम तेरे अभिमान को चूर्ण कर नेगा ॥ १० ॥ राजन् परीक्षित् ! कुमति बाणासुर भगवान् त्रिपुरारीजी की बात सुनकर अतिशय प्रसन्न हुआ और अपने शोणित नगर लौट आया। घर आने पर भगवान् कैलासनाथजी के वचनानुसार उसदिन की प्रतीक्षा करने लगा कि जिस संग्राम से उसके वीर्य का विनाश होने वाला था ॥११॥ राजन् परीक्षित् ! बाणासुर की एक सुन्दरी कन्या थी। कन्या का नाम था उषा, अब तक व्याह नहीं हुआ था। उषा कुमारी ने एक दिन स्वप्न में देखा कि सर्वाङ्ग सुन्दर वीरवर यादव कुमार श्री अनिरुद्धजी के साथ उसका समागम हो रहा है। आश्चर्य की वार्ता तो यह थी कि उषाजी ने न तो कभी अनिरुद्ध का दर्शन किया था न उनके बारे में कुछ सुना था ॥ १२ ॥

सा तत्र तमपश्यन्ती क्वासि [1]कान्तेति वादिनी। सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशम् ॥ १३ ॥
बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता। सख्यपृच्छत् सखीमूषां[2] कौतूहलसमन्विता ॥ १४ ॥
[3]कान्तं मृगयसे सुभ्रूः कीदृशस्ते मनोरथः। हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये ॥ १५ ॥

ऊषोवाच

दृष्टः कश्चिन्नरः [4]श्यामः श्यामः कमललोचनः। पीतवासा बृहद्बाहुर्योषितां हृदयं गमः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—सा, तत्र, तम्, अपश्यन्ती, हे, कान्त, क्वासि, इति वादिनी, विह्वला, भृशम्, व्रीडिता, सखीनाम्, मध्ये, उत्तस्थौ ॥१३॥ बाणस्य, मन्त्री, कुम्भाण्डः, च, तत्सुता, चित्रलेखा, कौतूहलसमन्विता, सखी, ऊषाम्, सखीम्, अपृच्छत् ॥१४॥ हे, सुभ्रूः ! अद्य, अपि, ते, हे, राजपुत्रि !, हस्तग्राहम्, न, उपलक्षये, त्वम्, कम्, मृगयसे ! ते, मनोरथः, कीदृशः ? ॥ १५ ॥ पीतवासाः, बृहद्बाहुः, योषिताम्, हृदयम्, कमललोचनः, श्यामः, कश्चित्, नरः, स्वप्ने, दृष्टः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तं कांतमपश्यंती सा उत्तस्थौ ॥ १३ ॥ ततः किं वृत्तं तत्राह। बाणस्येति ॥ १३ हस्तग्राहं भर्तारम् ॥ १६-१८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सा ऊषा। विह्वला विवशा विरहात्। यद्वा-रतिश्रमाकुलाऽतो व्रीडिता। तथा च हरिवंशे—"सा स्वप्ने रमिता तेन स्त्रीभावं चापि लंभिता। शोणिताक्ता प्ररुदती सहसैवोत्थिता निशि ॥" इति ॥ १३ ॥ ततस्तदनन्तरम्। तत्सुता कुंभांडात्मजा ॥ १४ ॥ हस्तस्य ग्राहो यत्र स तथा विवाहः। यद्वा-हस्तं गृह्णातीति हस्तग्राहो भर्ता तमित्यर्थः। 'पत्युद्वाहे हस्तग्राहः' इति निरुक्तिः। अद्याप्यद्यपर्यंतमपि ॥ १५ ॥ हृदयंगमो मनोहरः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विह्वला अत्यार्त्ता विरहात् यद्वा रतिपरिश्रमाद्याकुला अतो व्रीडिता तथा च हरिवंशे—

"सा स्वप्ने रमिता तेन स्त्रीभावञ्चापि लम्भिता। शोणिताक्ता प्ररुदती सहसैवोत्थिता निशि" ॥ इति।

तदेवं श्रीमदनिरुद्धस्य साक्षादागमनमेव गम्यते तच्च वक्ष्यमाणया चित्रलेखयेव देव्या कृतमेव ज्ञेयं तदिदमुक्तरञ्च तस्य वृत्तं नरलीलाव्यञ्जनाद्घटते ॥ १३ ॥ सखी सखीमिति विश्वास उक्तः अतोऽपृच्छत् अतोऽनेन कुम्भाण्ड इत्यस्य नान्वयः किन्तु तत्सुतात्वनिर्द्देशानुवादमात्रत्वम् अतश्चशब्दोपि तु शब्दार्थ एव कौतूहलेति तस्यास्तादृगुक्त्यादिना ॥ १४ ॥ मृगयसे क्वासीत्युक्तेः तत्र च कान्तेति यदुक्तं तत्राह—हस्तेति ॥ १५ ॥ हृदयङ्गम इत्यनुक्तं यौवनोद्भेदादिकमपि सङ्गृह्णाति ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मृगयसे क्वासीत्युक्तेः। सुभ्रू ! हे सुन्दरीति सुन्दरं कञ्चित् मृगयस इति भावः। मार्गणञ्च कया वाञ्छयेत्याह—कीदृश इति। ननु स्वरमणं मृगये, तेन रन्तुं चेच्छामीति चेत्तत्राह—हस्तेति। अद्यापि नोपलक्षये, न पश्यामि, वरान्वेषणस्याप्यकृतत्वात्, हे राजपुत्रीति स्वातन्त्र्याभावादिति भावः ॥ १३ ॥ नरो मनुष्याकारः कश्चित्, श्यामत्वादिना क्रमेणोत्तमकान्ति-

---

[1] क्वासि क्वासीति-वीर.। [2] चोषां-वीर.। [3] कं त्वं-श्रीधर. वंशी. जीव. वीर. विश्व.। [4] स्वप्ने-श्रीधर. वंशी. जीव. विश्व.।

सौन्दर्य्य-परिच्छद-बलिष्ठत्वादीनि सर्व्वाण्युपलक्षणत्वेन सूचितानि। अतो हृदयंगम इत्यनुक्तं नवयौवनोद्भेदादिकमन्यदपि संगृह्णाति ॥ १४ ॥ मधु मधुरम्; यद्वा, आधरमधरसम्बन्धिमधुस्पृहयतीम्, अपूर्णकामामित्यर्थः ॥ १५ ॥ अपकर्षामीति वर्त्तमाननिर्द्देशः शैघ्र्यबोधनार्थम्, त्रिलोक्यां सोऽस्तीति यदि केनचिद्भाव्यते ज्ञायते सम्भाव्यते वा; यद्वा, स्वार्थे इण्, भूयते तेन स्थीयते, तदानेष्ये, आदिश मया लिख्यमानेषु मध्ये दृष्ट्वा कथयेत्यर्थः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

सेति। सा स्वप्नोत्थिता उषा तं कान्तमपश्यन्ती क्वासि क्वासि क्वास्से क्वास्स इत्येवं वदन्ती तत्तदा नितरां व्रीडिता लज्जिता च ॥ १३ ॥ ततः किमासीत्तत्राह—बाणस्येति। तस्य कुम्भाण्डस्य सुता चित्रलेखा इदमन्वर्थं नाम सा कौतूहलेन युक्ता सखीमुषामपृच्छत् ॥ १४ ॥ प्रश्नमेवाह—तमिति। हे सुभ्रु! मनोरथविषयः कीदृश; हे राजपुत्रि! ते तव हस्तग्राहं हस्तं गृह्णातीति तथा तं भर्त्तारम् अद्यापि नोपलक्षये इत्थन्त्वेन न निश्चिनोमीत्यर्थः ॥ १५ ॥ एवमुक्ता प्राहोषा—दृष्ट इति। हृदयङ्गमः मनोहरः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तमहमित्यादि। आधरं अधरसम्बन्धि मधु ॥ १८–३३ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे द्विषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

अधरं मधु अधरसम्बन्धि मधु ॥ १६–३३ ॥

इति द्विषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

महेशादिष्टसंयुगप्रसङ्गमाह—तस्येति। प्राद्युम्निना अनिरुद्धेन स्वप्न इति तत्कारणं श्रीविष्णुपुराणे यथा—

> उषा बाणसुता विप्र पार्वती शम्भुना सह। क्रीडन्तीमुपलक्ष्योच्चैः स्पृहाञ्चक्रे तदाश्रयाम् ॥
> ततः सकलचित्तज्ञा गौरी तामाह भाविनीम्। अलमत्यर्थतापेन भर्त्रा त्वमपि रंस्यसे ॥
> इत्युक्ता सा तदा चक्रे कदेति मतिमात्मनः। कोवा भर्त्ता ममेत्येनां पुनरप्याह पार्वती ॥
> वैशाखशुक्लद्वादश्यां स्वप्ने योऽभिभवं तव। करिष्यति स ते भर्त्ता राजपुत्रि भविष्यति ॥ इति १३–१४ ॥

हस्तग्राहं भर्त्तारं विवाहाभावान्न लक्षये ॥ १५–१७ ॥

गूढार्थदीपिनी

हस्तस्य ग्राहो यस्मिन् तं विवाहं नोपलक्षये। हस्तं गृह्णातीति भर्तारं वा ॥ १५ ॥ हृदयङ्गमः हृदयस्पर्शी ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हस्तं गृह्णातीति तथा तं पतिम् ॥ १५–१७ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्र जाग्रद्दशायां शय्यायां तरं तारमपश्यन्ती। हे कान्त क्वासीति सखीनां मध्य उत्तस्थौ व्रीडितेतः। यथोक्तं तत्रैव। ततो हर्म्ये शयानां तां वैशाखे मासि भामिनीम्। द्वादशी शुक्लपक्षस्य सखीगणवृतां तदा। यथोक्तः पुरुषः स्वप्ने रमयामास तां तदा। विचेष्टमानां रुदतीं देव्या वचनचोदितः। सा स्वप्ने रमिता तेन स्त्रीभावं चापि लम्भिना। शोणिताक्ता प्ररुदती सहसैवोत्थिता निशीत्यादिना। कुंभाण्डो बाणस्य मन्त्री। यस्तत्सुता नाम्ना रामा। उषाया वचनं श्रुत्वा रामा वाक्यमिदं पुनरित्युक्तेस्तत्रैव। तत्सखी चित्रलेखा स्वयं च तत्सखी उषासखी। तामपृच्छत् ॥ १३ ॥ हे सुभ्रु। कं पुरुषं स्वाप्नं मृगयसे हस्तग्राहं पाणिग्रहणकर्तारम्। अद्यापि तव मनोरथो नाभूदित्युपलक्षये ऊहयामि ॥ १४ ॥ हृदयङ्गमो मनोहरः ॥ १५ ॥ आधरं मधु अधरामृतम्। वृजिनार्णवे दुःखाब्धौ ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततस्तस्या व्रतसमाप्तिं कृत्वा गते, स्वप्नान्ते उत्थिता, तत्र शय्यायां स्वप्नस्य समानदेशे तमनिरुद्धमपश्यन्ती, 'क्वासि कान्ते'ति भाषन्ती, सखीनां मध्ये उत्तस्थौ। सा हि परितः सख्यो मध्ये शेते। गुप्तं सखीषु अन्वेषयन्तीव सा उत्थिता।

उत्थिताया अप्युपभोगलक्षणमाह **विह्वलेति**। अन्तर्व्रीडिता। **भृशमत्यर्थं** स्वावस्थां स्मृत्वा ॥ १० ॥ पूर्वमेव पार्वत्या चित्रलेखा नाम योगिनी तस्याः सखी निष्पादिता, यया तस्या मनोरथः सर्वोऽपि सिद्धो भवति। यद्यप्यन्या अपि जिज्ञासां कृतवत्यः, तथापि सा प्रयोजिकेति चित्रलेखाया उपाख्यानमुच्यते **बाणस्य मन्त्रीति**। मन्त्र्यधीनं राज्यमिति स महादेवेन दत्त इति ज्ञापितम्। **कुम्भाण्ड** इति नाम। ननु कुम्भाकारावण्डाविति। **तस्य दुहिता** चित्रलेखा। चकारादन्या अपि तस्य कन्या उषासख्यः। सखी उषायाः। उभयोरन्योन्यसखित्वे न गोप्यं किञ्चिदवशिष्यते वक्तव्ये इति **सखीमूषा**मित्युक्तम्। अद्यैव पार्वत्युक्तम्, अद्यैवेयं विह्वलेति कौतुकसमन्विता ॥ ११ ॥ तस्या वाक्यमाह **कान्तं मृगयस** इति। **सुभ्रु** इति भ्रूभङ्गादिभावो दृश्यत इति अकन्यात्वं तस्या आह। ननु कान्तान्वेषणं युक्तमेवेति चेत्, तत्राह **कीदृशस्ते मनोरथ** इति। मनोरथे कृते स्वप्ने तथा दृश्यत इति दृष्ट एवोपाय इति तं मनोरथमेव पृच्छति। कश्चिन्मनोरथो भविष्यतीति चेत्, तत्राह **हस्तग्राह**मिति। हस्तो गृह्यते अनेनेति हस्तग्राहः पतिः, अस्मिन्निति विवाहो वा। अद्यापि **ते** विवाहं न लक्षये। कस्याश्चिद्बाल्य एव विवाहो भवति, पश्चात् सखीभिः सम्बन्धः, तदापि विवाहो जात इति लक्ष्यते, विवाहे तु कुलकन्यायाः तत्र मनोरथो युक्तो भवति। **राजपुत्रीति**पदात् निरोधेन यथेच्छया सम्बन्धो निवारितः ॥ ११ ॥ उत्तरमाह **दृष्ट** इति। **कश्चि**द्विशेषतो निर्वक्तुमशक्यः। **नरवरः** मनुष्यश्रेष्ठः। सर्वेषामाकृतिर्भिन्नेति स न देवः, नापि दैत्यः, अन्यो वा, किन्तु नरश्रेष्ठ एव। स्वप्ने कात्स्न्यानभिव्यक्तिरिति केवलं भ्रमः स्यात्, तत्प्रकृते नास्तीति आकृतिरूपगुणादीन् वर्णयति। सर्वलक्षणसम्पन्ननरत्वं आकृतिः। **श्याम** इति रूपम्। **कमललोचन** इति सौन्दर्यम्। **पीतवासा** इति भूषितत्वम्। **बृहद्बाहु**रिति भोगयोग्यता। **योषितां हृदयङ्गम** इति संभोगसामर्थ्यम् ॥ १३ ॥

श्रीसुबोधिनी-सारः

तमनिरुद्धं पश्यन्ती तत्र स्थाने हे कांत क्वासि कुत्र वर्त्तसे इति वादिनी भाषमाणा विह्वला सखीनां मध्ये उत्तस्थौ संभ्रमेण भृशमत्यर्थं लज्जिता ॥ १३ ॥ बाणस्य कुंभांडो मंत्री तस्य सुता चित्रलेखा सखी कौतूहलेन समन्वितादभुतदर्शनयुक्ता सखीमूषाम् अपृच्छत् ॥ १४ ॥ हे सुभ्रूः कं पुरुषं त्वं गवेषयसे **ते** तव मनोरथ इच्छा कीदृशोऽस्ति हे राजपुत्रि ते तव हस्तग्राहं विवाहमद्यापि अधुना नाहमुपलक्षये नो पश्यामि ॥ १५ ॥ ऊषोक्तिः। श्यामवर्णः पद्मनेत्रः पीतांबरो महाबाहुः स्त्रीणां मनोहरः कश्चिन्नरः स्वप्ने दृष्टः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च सा ऊषा तत्र स्वप्ने तमनिरुद्धमपश्यन्ती विह्वला सती 'हे कान्त! क्वासि? त्वं क्व गतोऽसि' इति वादिनी वदन्ती सखीनां मध्ये उत्तस्थौ जागरणं प्राप्ता। ततश्च व्रीडिता लज्जिता जाता ॥ १३ ॥ कुम्भाण्डाख्यश्च बाणस्य मन्त्री, तस्य सुता चित्रलेखाख्या। सा च ऊषायाः सखी कौतूहलेन आश्चर्येण समन्विता सती तां सखीमूषामपृच्छत् इत्यन्वयः ॥ १४ ॥ तत्प्रश्नमेवाह—कमिति। 'प्राप्तयौवनत्वेऽपि राजपुत्रीत्वेन पुरुषसम्बन्धासम्भवात्' इति सम्बोधनद्वयेन सूचयति—हे सुभ्रु! हे राजपुत्रीति। **ते** तव हस्तग्राहमद्यापि नोपलक्षये न पश्यामि। क्वासि कान्तेति वचनात्त्वं कं मृगयसे? तव मनोरथश्च कीदृशस्तद्वदेति शेषः ॥ १५ ॥ ऊषा प्राह—दृष्ट इति। हृदयंगमः मनोहरः ॥ १६ ॥

अन्वितार्थप्रकाशिका

सेति ॥ सा ऊषा तत्र स्वप्ने तमनिरुद्धमपश्यन्ती विह्वला सती हे कान्त! क्वासि त्वं क्व गतोऽसीति वादिनी वदन्ती सखीनां मध्ये उत्तस्थौ जागरणं प्राप्ता भृशं व्रीडिता च जाता ॥ १३ ॥ बाणस्येति ॥ कुम्भाण्डाख्यश्च बाणस्य मन्त्री तस्य सुता चित्रलेखाख्या सा च ऊषायाः सखी कौतूहलेन आश्चर्येण समन्विता सती तां सखीमूषामपृच्छत् ॥ १४ ॥ कमिति ॥ हे सुभ्रूः! हे राजपुत्रि! **ते** तव हस्तग्राहं भर्तारमद्यापि नोपलक्षये न पश्यामि। क्वासि कान्तेति वचनात्त्वं कं मृगयसे। तव मनोरथश्च कीदृशस्तद्वद ॥१५॥ दृष्ट इति ॥ श्यामः कमललोचनः पीतवासा बृहद्बाहुर्योषितां हृदयंगमः मनोहरः कश्चिन्नरः स्वप्ने दृष्टः॥१६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हृदयंगमो मनोहरः ॥ १३ ॥ आधरं अधरसंबंधि। क्व यातः कुत्र गतः ॥ १४ ॥ व्यसनं दुःखं सः त्रिलोक्यां यदि भाव्यते मया दृश्यते चेत् ॥ १५-१६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सेति ॥ सा स्वप्नोत्थितोषा, तं कान्तं, तत्र क्वापि, अपश्यन्ती सती, हे कान्त, क्व असि क्वास्से इत्यर्थः। इत्येवं, विह्वला सती, वादिनी वदन्ती, ततः भृशं व्रीडिता लज्जिता च सती, सखीनां मध्ये, उत्तस्थौ ॥ १३ ॥ ततः किमासीत्तत्राह ॥ बाणस्येति ॥ बाणस्य मन्त्री च मन्त्री तु, कुम्भाण्डः, तत् सुता तस्य कुम्भाण्डस्य पुत्री, सखी चित्रलेखा, इदमस्या अन्वर्थं नाम।

कौतूहलसमन्विता कौतुकेन युक्ता सती, सखीं ऊषां, अपृच्छत् ॥ १४ ॥ प्रश्नमेवाह ॥ कमिति ॥ हे सुभ्रूः, त्वं कं मृगयसे । ते तव, मनोरथः कीदृशः । हे राजपुत्रि, अद्यापि, ते तव, हस्तग्राहं भर्त्तारं, न उपलक्षये इत्थंत्वेन न निश्चिनोमीत्यर्थः ॥ १५ ॥ एवं चित्रलेखोक्तोषा प्राह ॥ दृष्ट इति ॥ हे सखि, मया स्वप्ने श्यामः, कमललोचनः, पीतवासाः, बृहद्बाहुः, योषितां हृदयंगम, कश्चित् नरः, दृष्टः ॥ १६ ॥

कृष्णप्रिया

राजन् ! ऊषाकुमारी स्वप्न में ही समागम के बाद अनिरुद्ध को स्वप्न में ही अन्तर्हित होता देखकर यकायक बोल उठी । हे प्रियतम ! आप कहाँ चले गये ? आप कहाँ हो ? और ऊषा की नींद टूट गई । ऊषा अतिशय विह्वल हो गयी और आसन पर बैठ गयी । उसने देखा कि स्वयं सखियों के मध्य में बैठी है । इस अवस्था से ऊषा अतिशय लज्जित हो गयी ॥ १३ ॥ राजन् परीक्षित् ! बाणासुर का कुम्भाण्ड नाम का एक मन्त्री था । उसकी चित्रलेखा नाम की एक कन्या थी वह योगिनी थी । ऊषा एवं चित्रलेखा दोनों सखियाँ थी । चित्रलेखा ने आश्चर्यवश ऊषा से प्रश्न किया—हे सुकुमारी ! हे सुलोचने ! हे राजपुत्री ! ऊषा ! मैं अच्छी तरह जानती हूँ कि आज दिन पर्यन्त तेरा किसी व्यक्ति ने पाणिग्रहण नहीं किया है फिर भी हे सखि ! तुम कान्त को ढूंढ रही हो ? तुमने क्या देखा ? तुम्हारी क्या अभिलाषा है, कौन मनोरथ है ? ॥ १४-१५ ॥ ऊषाजी ने कहा—सखी चित्रलेखा ! मैंने स्वप्न में श्याम सलोना सुन्दरवर किसी कमललोचन युवा को देखा । उसने पीताम्बर धारण किया था, मेघ श्याममनोहर कान्ति थी, आजानुबाहु था, रमणियों के चित्त चुराने वाला था; अधिक मैं नहीं जानती हूँ ॥ १६ ॥

तमहं मृगये कान्तं पाययित्वाधरं मधु । क्वापि यात स्पृहयतीं क्षिप्त्वा मां वृजिनार्णवे ॥ १७ ॥

चित्रलेखोवाच

व्यसनं [१]तेऽपकर्षामि त्रिलोक्यां यदि भाव्यते । तमानेष्ये नरं यस्ते मनोहर्ता तमादिश ॥ १८ ॥
इत्युक्त्वा देवगन्धर्वसिद्धचारणपन्नगान् । दैत्यविद्याधरान् यक्षान् मनुजांश्च यथालिखत् ॥ १९ ॥
मनुजेषु च सा वृष्णीन् शूरमानकदुन्दुभिम् । व्यलिखद् रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥ २० ॥

कर्दमक्षमा

अन्वयः—अधरम्, मधु, पाययित्वा, स्पृहयतीम्, माम्, वृजिनार्णवे, क्षिप्त्वा, क्व, अपि, यातः, अहम्, तम्, कान्तम्, मृगये ॥ १७ ॥ चित्रलेखा, उवाच, ते व्यसनम्, अपकर्षामि, यदि, त्रिलोक्याम्, भाव्यते, तम्, नरम् आनेष्ये, यः, ते, मनोहर्ता, तम्, आदिश ॥ १८ ॥ इति, उक्त्वा, देवगन्धर्वसिद्धचारणपन्नगान्, दैत्यविद्याधरान्, यक्षान्, च, मनुजान्, यथा अलिखत् ॥ १९ ॥ मनुजेषु, सा, वृष्णीन्, शूरम्, आनकदुन्दुभिम्, च, रामकृष्णौ, प्रद्युम्नम्, व्यलिखत्, सा, प्रद्युम्नम्, वीक्ष्य, लज्जिता ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिकाप्रकाशः

स्वप्ने त्वया दृष्टः एषां मध्ये को वा भवेदिति देवादीन्यथावत्पटेऽलिखत् ॥ १९ ॥ प्रद्युम्नं लिखितं वीक्ष्य श्वसुरोऽयमिति लज्जिता ॥ २०-२१ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

तं स्वप्नदृष्टम् । वृजिनार्णवे दुःखसागरे ॥ १७ ॥ भाव्यते मल्लिखितस्तदाकारो भवत्याऽनुसंधीयेत तदा तमानेष्ये तस्माच्चित्राणि दृष्ट्वा आदिश कथय ॥ १८ ॥ इतीत्थमुक्तरीत्या ॥ १९ ॥ सा चित्रलेखा ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आधरं अधरसम्बन्धि मधु स्पृहयन्तीम् अपूर्णकामामित्यर्थः ॥ १७ ॥ अपकर्षामीति वर्त्तमाननिर्देशः शैघ्र्यबोधनार्थः यतो यदि त्रिलोकीमध्ये भाव्यते मया लिखितस्तदाकारो भवत्यानुसन्धीयेत तदा तच्चानेष्य इत्यर्थः । तस्माद्य इति आदिश चित्राणि दृष्ट्वा कथयेत्यर्थः ॥ १८ ॥ श्यामत्वादिलक्षणे गदितेऽप्यन्यानलिखदिति स्वसर्वज्ञता ज्ञापनेन तस्याः विश्वासोत्पादनार्थ-

---

[१] नेष्यामि-प्रा० पा० ।

मिति ज्ञेयं नाना तादृशानां सह योगिन एव ते ज्ञेयाः विश्वेषां लिखनस्यानन्त्यप्राप्तेः ॥ १९ ॥ मनुजेष्विति युग्मकम् । विशेषेणालिखदिति नरः इत्युक्त्या तत्रापि श्यामलादिलक्षणोक्त्या तेष्वेव सम्भावनात् प्रद्युम्नं विलिखितं वीक्ष्य लज्जिता स्वाभाविकभावात् अनिरुद्धन्तं तु वीक्ष्य विलिखितं ह्रिया भावविशेषजनितयाऽवाङ्मुखीती एवङ्गुर्वादिभेदेन लज्जाया अपि भेदश्चेतसो सनेत्रादेरपि सङ्कोचविकासादितो ज्ञेयः प्रकर्षेण सगद्गदत्वादिनाह हे महीपते इति चित्रलेखायास्तादृशं लिखनसौष्ठवम् ऊषायाश्च प्रत्यभिज्ञानादिकं पृथ्व्यां कुत्रापि न सम्भवेदिति त्वया पृथ्वीशत्वाद्विज्ञायत एवेति भावः ॥ २०–२१ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

देवादीनां प्रायो द्विभुजत्वादिना नराकारसाम्यत्तानप्यलिखत् । श्यामत्वादिलक्षणे गदितेऽप्यन्यानप्यलिखदिति स्वसर्व्वज्ञताज्ञापनेन तस्या विश्वासोत्पादनार्थमिति ॥ १७ ॥ विशेषेणालिखदिति नर इत्यनुक्त्वा तत्रापि श्यामत्वादिलक्षणोक्त्या तेष्वेव सम्भावनात् । लज्जिता सारूप्ये किञ्चिद्वयोऽतिरेकदृष्ट्या श्वशुरमननात् स्वाभाविकभावाद्वा ॥ १८ ॥ ह्रिया भावविशेषजनितया, अतोऽवाङ्मुखी । एवं गुर्व्वादिभेदेन लज्जाया अपि भेदो ज्ञेयः । प्रकर्षेण भावविशेषेण सगद्गदत्वादिनाह—हे महीपते इति, चित्रलेखायास्तादृशं लिखनसौष्ठवमूषायाश्च प्रत्यभिज्ञानादिकं पृथ्व्यां कुत्रापि न सम्भवेदिति त्वया पृथ्वीशत्वाद्विज्ञायत एवेति भावः ॥ १९ ॥ योगिनीति, अतएव तस्या विद्याविशेषवत्त्वात्, किंवा श्रीहरिवंशोक्त्यनुसारेण श्रीनारदतो विद्याप्राप्तेः, तथा च तत्र श्रीभगवतो विभ्यती चित्रलेखा समाश्वास्य तेनोक्ता (विष्णु प० ११९।१९)–'गृह्यतां तामसी विद्या सर्व्वलोकप्रमोहिनी । कृतकृत्यस्तु ते देवि एतां विद्यां ददाम्यहम् ॥' इति । कृष्णेन साक्षाद्भगवता पालितामपि, अतस्तदिच्छयैव तत्तत् सर्व्वमिति भावः । तच्च बुद्ध्या प्रकाशमानत्वमवकलयस्येवेति सम्बोधयति–राजन्निति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृताभागवतचन्द्रचन्द्रिका

तमिति । मृगये विचिनोमि स्पृहयतीं काङ्क्षन्तीं मां दुःखार्णवे क्षिप्त्वा क्वापि नूनं यातः ॥ १७ ॥ इत्येवमुक्ता प्राह चित्रलेखा—व्यसनमिति । तव व्यसनं दुःखमपनयामि कथं त्वया यदि त्रिलोक्यां कश्चिद्भाव्यते अयमेवेति निश्चीयते तर्हि तं नरं पुरुषमानेष्ये अतो यस्ते मनोहर्त्ता तं प्रति मामादिश आज्ञापय ॥ १८ ॥ इतीति । इत्युक्त्वा देवादीन् पटे यथावदलिखत् ॥ १९ ॥ यदा च मनुष्येष्वपि वृष्णीन् तत्रापि शूरादीनलिखत् तदा प्रद्युम्नं वीक्ष्य लज्जिता पुत्रतुल्यरूपत्वादिति भावः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

तमहमित्यादि । आधरम् अधरसम्बन्धि मधु ॥ १७–३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भाव्यते प्राप्यते ॥ १८–१९ ॥ एतेषां पुरुषाणां मध्ये तव पुरुषः क इति पृष्टा उषा प्रद्युम्नं वीक्ष्य श्वशुरोयमिति बुद्ध्या लज्जिता तत्पुत्रमनिरुद्धं वीक्ष्य सोसावसाविति द्विरुक्तिरतिविस्मयहर्षोदयात् अतस्तत्र चित्रपटे अयमस्य पुत्रोऽयमस्य नामेति प्रतिलेख्य प्रतिमोपरि तया अक्षराण्यपि लिज्जितानीति बुध्यते ॥ २०–२२ ॥

गूढार्थदीपिनी

आधरम् अधरसम्बन्धि मधु अमृतम् । वृजिने दुःखम् ॥ १७ ॥ व्यसनं कष्टम् । आदिश कथय । भव्यते प्रतीयते ॥१८॥ यथा यथावत् ॥ १९ ॥ लज्जिता श्वशुरत्वात् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्राप्तं व्यसनं वियोगजं दुःखमपकर्षाम्यपनयामि यदि भाव्यते अयमेवेति निश्चीयते ॥१८॥ यथा यथावत् ॥ १९–२४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यदि त्रिलोक्यां भाव्यते वर्तसे स इत्यनुचिन्त्यते तमादिश इति । उषां प्रत्युक्त्वा नाम्ना शिल्पतश्च चित्रलेखा ॥ १७ ॥ व्यलिखत् । शूरं वसुदेवपितरं वसुदेवं च तथा रामकृष्णौ च प्रद्युम्नं च वीक्ष्य लज्जिता । स्वाप्निकस्वरन्तृसारूप्याद्दुहितस्वश्वशूरत्वात् । विलिखितमनिरुद्धं वीक्ष्यावाङ्मुखी तदतिसारूप्यादयमेव स्वाप्निक इति निश्चित्य ह्रिया तद्दृष्टिजातलज्जया स इत्यङ्गुल्या निर्दिश्यासावसाविति विस्मयमाना प्राह ॥ २० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु दर्शनमात्रेण कथं कान्तत्वम्, तत्राह **तमहं मृगये कान्त**मिति। स मम कान्तो जातः, मृगये। कथं जात इत्याकाङ्क्षायामाह **पाययित्वाधरं मधु** इति। अनेन सर्वेऽपि सम्बन्धा निरूपिताः। बहुधा सम्बन्धे हि सामार्थ्यक्षये **स्त्रियाः** पुरुषाधरपानम्। अनेन बहुकालावस्थानं सूचितम्। ततः क्वापि यातः, न तु विलीनः, भोगलक्षणानां विद्यमानत्वात्। विशेषसुखमदत्वा गत इति युक्तमन्वेषणमिति वक्तुमाह **स्पृहयतीं मां वृजिनार्णवे क्षिप्त्वे**ति। रसेच्छामुत्पाद्य तदपूरणाद्दुःखम्॥ १४॥ ततः सख्याः प्रतिज्ञामाह **व्यसनं तेऽपकर्षामी**ति। यदि त्रिलोक्यां सः, तदा ते व्यसनमपकर्षामि। कथमित्याकाङ्क्षायामाह **भाव्यत** इति। चित्रे मया लिख्यते। तत्र यस्ते मनोहर्ता तमादिश। तमहमानयिष्यामीति व्यसनापकर्षणप्रकारः। यद्यपि नरवर इति विशेषकथनात् देवादीनां लेखनमसङ्गतम्, तथापि देवादयो रूपान्तरेणोपभोगार्थमायान्तीति देवादयो नररूपा एवात्र लिख्यन्ते। ऊर्ध्वादधःपर्यन्तं स्त्रीणां दृष्टिः। अत आदौ देवलेखनम्। एते त्रिगुणास्त्रयो गुणाः देवादयो नव सामान्यतो लिखिताः। चकारान्मनुष्येषु सर्वप्रकाराः, देवादिष्वपि वा। मनुष्येषु श्यामत्वादिधर्मा उक्ता इति तत्साम्यं यादवेष्वेव वर्तत इति मनुजेषु सा वृष्णीनलिखीत्। ततोऽपि हृदयङ्गमादिधर्मैः उत्तरोत्तरवैशिष्ट्यरूपत्वात् वृष्णिषु शूरमलिखत्। तस्य च पुत्रमानकदुन्दुभिं वसुदेवम्। तत्र यद्यपि रामो न श्यामः, तथापि रूपान्तरेण तथा कुर्यादिति रामोऽपि लिखितः। **रामकृष्णौ चे**ति। चकाराद्गदादयोऽपि लिखिताः। प्रद्युम्नं लिखितं वीक्ष्य ईषद्वैलक्षण्यात् तत्पुत्रो भवितुमर्हतीति निश्चित्य विलज्जिता। यद्यपि भगवान् तादृशमकृत्रिमं रूपं कर्तुं शक्तः, तथापि मर्यादायामेकैकस्य गुणस्याभिव्यक्त्यर्थं एक एव पदार्थो निर्णीयते। ततो यादृशो गुणोऽनिरुद्धनिदानभूतः, तेनानिरुद्धो निष्पादित एव। अन्यः क्रियमाणः कृत्रिम एव भवतीति वैलक्षण्यं भवत्येव। आधिदैविको दृष्ट इति अनिरुद्धो वा स्वयं मायया तथा आगत इति न वैलक्षण्यं लज्जया ज्ञातवती। एतत्पुत्रो भविष्यतीति। भर्तृपितामहादिभ्यो न लज्जेति लौकिकाः॥ १७॥

श्रीसुबोधिनी-सारः

अधरं मधु अधरामृतं पाययित्वा स्पृहयतीं तदिच्छंतीं मां वृजिनस्य दुःखस्यार्णवे समुद्रे क्षिप्त्वा निपात्य क्वापि कुत्र यातो गतस्तं कांतमहं मृगये गवेषयामि॥ १७॥ चित्रलेखोक्तिः। ते तव व्यसनं दुःखम् अपकर्षामि निवर्त्तयामि यदीति संभावनायां त्रिलोक्यां भाव्यते प्रतीयते चेत् तं नरमहमानेष्यामि यस्ते तव मनोहर्त्ता चित्ताकर्षकस्तं प्रति त्वमादिशाज्ञापय॥ १८॥ इत्युक्त्वा देवादीन् मनुजान् मनुष्यांश्च यथा यथावदलिखत् तथेति पाठ इत्येके॥ १९॥ मनुजेषु वृष्णीनलिखत् तत्रापि शूरं शूरसेनम् आनकदूंदुभिं वसुदेवं रामकृष्णौ च व्यलिखत्सोषा विलिखितं प्रद्युम्नं वीक्ष्य दृष्ट्वा लज्जिता श्वशुरत्वात्॥ २०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स अधरं मधु पाययित्वा स्पृहयतीं काङ्क्षन्तीं मां वृजिनार्णवे विरहदुःसमुद्रे क्षिप्त्वा क्वापि यातस्तं कान्तमहं मृगये विचिनोमीत्यन्वयः। ते तव व्यसनं दुःखमपकर्षामि अपनयामि। कथं तत्राह—यस्ते मनोहर्ता स यदि त्रिलोक्यां क्वाप्यस्ति तदा तं नरं पुरुषमहमिहानेष्ये। मया तावत्सर्वोस्मिन् भाव्यते चित्रे लिख्यते। चित्रलेखा इत्येवमुक्त्वा देवादीनलिखत्। दृष्टः कश्चिन्नर इति नरपदं पुरुषमात्रपरमिति देवादिलिखनं नानुचितम्॥ १७-१९॥ सा मनुष्येष्वपि वृष्णीन्, तत्रापि शूरादीन् अलिखत्। तत्र चानिरुद्धतुल्यरूपत्वात् प्रद्युम्नं लिखितं वीक्ष्य श्वशुरोयमिति लज्जिता जाता॥ २०॥

अन्वितार्थप्रकाशिका

तमिति॥ सः आधरम् अधरसम्बन्धि मधु पाययित्वा स्पृहयतीं कांक्षन्तीं मां वृजिनार्णवे विरहदुःखसमुद्रे क्षिप्त्वा क्वापि यातस्तं तमहं मृगये विचनोमि॥ १७॥ व्यसनमिति। तव व्यसनं कष्टमपकर्षामि अपनयामि यस्ते मनोहर्ता स यदि मल्लिखितायां त्रिलोक्यां भाव्यते प्राप्यते सोऽयमिति त्वया प्रत्यभिज्ञायते च तर्हि तं नरमानेष्ये। अतो मल्लिखितचित्रेषु दृष्ट्वा तमादिश कथय॥ १८॥ इतीति॥ चित्रलेखा इत्येवमुक्त्वा देवगन्धर्वादीन् तथा मनुजांश्च चित्रपटे यथा यथावदलिखत्॥ १९॥ मनुजेष्विति॥ सा मनुजेष्वपि वृष्णीन् शूरम् आनकदुन्दुभिम् रामकृष्णौ च व्यलिखत्। ततः प्रद्युम्नं लिखितं वीक्ष्य प्रियसमानरूपत्वात् तदधिकवयस्त्वाच्च श्वशुरोऽयमिति ज्ञात्वा लज्जिता जाता। यद्वा। चित्रपटे अयमस्य पुत्रोऽयं नप्ता इत्याद्यपि साऽलिखत्॥ २०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

चित्रितं प्रद्युम्नं॥ १७॥ अवाङ्मुखी अधोमुखी सती॥ १८॥ योगिनी मंत्रयोगकलावती॥ १९॥ योगमंत्रयोगकलामास्थिता शोणितपुरं नीत्वा। गृहीत्वा सख्यै ऊषायै प्रियंपतिं॥ २०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति । हे सखि, सः मां मधु मधुरं, अधरमधरामृतं, पाययित्वा, स्पृहयतीं काङ्क्षन्तीं, मां वृजिनार्णवे दुःखाब्धौ, क्षिप्त्वा, क्वापि यातः । अहं तं कान्तं, मृगये ॥ १७ ॥ तदुषावाक्यं श्रुत्वा चित्रलेखा प्राह । व्यसनमिति । हे सखि, सः यदि, त्रिलोक्यां भाव्यते अयमेवेति मया निश्चीयते, तदा तु, ते तव, व्यसनं दुःखं, अपकर्षामि । निवर्त्तयिष्यामीत्यर्थः । कथमित्यत्राह । यः, ते तव, मनो हर्त्ता, तं नरं आनेष्ये । परं तु, त्वं तं, आदिश अयमिति मां निवेदय ॥ १८ ॥ इतीति । चित्रलेखा, इत्यमुना प्रकारेण, उक्त्वा, देवांश्च गन्धर्वांश्च सिद्धाश्च चारणाश्च पन्नगाश्च तान्, दैत्यान्, विद्याधरान्, यक्षान्, तथा मनुजांश्च, अलिखत् ॥ १९ ॥ मनुजेष्विति । सा मनुजेषु चापि, वृष्णीन् शूरं आनकदुन्दुभिं, रामकृष्णौ, प्रद्युम्नं च, व्यलिखत् । तत्र ऊषा, प्रद्युम्नं वीक्ष्य तु, लज्जिता । तस्य स्वश्वशुरत्वात्तद्वीक्षणावसरे संजातलज्जाऽभवदित्यर्थः ॥ २० ॥

कृष्णप्रिया

आगे की कथा सुनो ! उसने मुझे स्वप्न में अधरामृत सुधा पिलायी मैं संतुष्ट होकर पान नहीं हो पायी कि वह मुझे कष्ट सागर में छोड़कर पता नहीं कि वह कहां चला गया ? प्रिये ! चित्रलेखा ! क्या कहूँ मैं उसी प्रियतम प्राणनाथ को खोज रही हूँ ॥ १७ ॥ चित्रलेखा बोली—प्रिय सखी, ऊषा ! बात सुन ले तेरा प्राणवल्लभ यदि इस ब्रह्माण्ड में कहीं भी होगा ? और उसे आप पहचान लोगी तब तो मैं तुम्हारी वियोग वेदना का निवारण कर सकूंगी । अब मैं सुन्दर वरों के चित्र बना रही हूँ तुम अपने प्रियतम को पहचानकर मुझे बता देना । फिर सखी चिन्ता न करना, वह पुरुष कहीं भी होगा मैं उसे तुम्हारे पास अवश्य ले आऊँगी । इतना कहकर चित्रलेखा ने उसी क्षण में देव, गन्धर्व, सिद्धचारण, पन्नग, दैत्य, विद्याधर, यक्ष एवं मनुष्यों के चित्र खींच दिये । मनुष्यों के चित्रों में भी शूरसेन वसुदेवजी के पिता जी का, पुनः श्रीवसुदेवजी का पुनः पूर्णपुरुषोत्तम भगवान् श्रीकृष्णजी का भी चित्र बना दिये । पुनः जब प्रद्युम्नजी का चित्र देखा तब तो ऊषा का सर एकाएक धरणी की ओर झुक गया ॥ १८-२० ॥

अनिरुद्धं विलिखितं वीक्ष्योषावाङ्मुखी ह्रिया । सोऽसावसाविति प्राह स्मयमाना महीपते ॥ २१ ॥
चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी । ययौ विहायसा राजन् द्वारकां कृष्णपालिताम् ॥ २२ ॥
तत्र सुप्तं सुपर्यङ्के प्राद्युम्निं योगमास्थिता । गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥ २३ ॥
सा च तं सुन्दरवरं विलोक्य मुदितानना । दुष्प्रेक्ष्ये स्वगृहे पुम्भी रेमे प्राद्युम्निना समम् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—महीपते, अनिरुद्धम्, विलिखितम्, वीक्ष्य, अवाङ्मुखी, ऊषा, ह्रिया, स्मयमाना, सः, असौ, असौ, इतिः, प्राह ॥ २१ ॥ योगिनी, चित्रलेखा, कृष्णस्य, पौत्रम्, तम्, आज्ञाय, राजन्, कृष्णपालिताम्, द्वारिकाम्, विहायसा, ययौ ॥२२॥ योगम्, अस्थिता, तत्र, सुपर्यङ्के, सुप्तम्, प्राद्युम्निम्, गृहीत्वा, शोणितपुरम्, सख्यै, प्रियम्, अदर्शयत् ॥ २३ ॥ मुदितानना, सा, तम्, च, सुन्दरवरम्, विलोक्य, पुम्भिः, दुष्प्रेक्ष्ये, अश्वगृहे, (स्वगृहे) प्राद्युम्निना, समम् रेमे ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शोणितपुरं नीत्वा ॥ २३ ॥ पुंभिर्दुष्प्रेक्ष्ये प्रेक्षितुमशक्ये ॥ २४ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

एतेषां मध्ये तव पुरुषः क इति पृष्टोषा प्रद्युम्नं वीक्ष्य श्वशुरोऽयमिति बुद्ध्या लज्जिता, चित्रपटेऽयमस्य पुत्रोऽयमस्य नप्तेति प्रतिलेख्यप्रतिमोपरि तयाऽक्षराण्यपि लिखितानीति बुध्यते । असावनिरुद्धः । वीप्सा संभ्रमे । स स्वप्नदृष्टः ॥ २१ ॥ तमूषोद्दिष्टम् । योगिनी दैत्यात्मजत्वान्मायायोगविशारदा । यद्वा—हरिवंशानुसारेण श्रीनारदतः प्राप्तविद्या । द्वारकां प्रवेष्टुमशक्नुवत्यै चित्रलेखायै नारदेन समाश्वास्य सोक्ता "गृह्यतां तामसी विद्या सर्वलोकप्रमोहिनी । कृतकृत्यां तु दैतेयि विद्यामेतां ददाम्यहम् ॥" इति चित्रलेखा योगमायांशेति केचिदाहुः । हे राजन्निति बुद्ध्या प्रकाशमानस्त्वमवकलयस्येवेति भावः ॥ २२ ॥ तत्र द्वारकायाम् । योगं मायाबलम् "योगोऽपूर्वार्थसंप्राप्तौ संगतिध्यानयुक्तिषु" इति कोशः । नीत्वेति शेषः । सप्तम्यन्तपाठस्तु सुगमः ॥ २३ ॥ सा ऊषा । तमनिरुद्धम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

योगिनीति। स्वत एव तस्या विद्याविशेषवत्त्वात् किम्वा श्रीहरिवंशोक्त्यनुसारेण श्रीनारदतो विद्याप्राप्तेः तथा च तव श्रीभगवतो बिभ्यती चित्रलेखा समाश्वास्य तेनोक्ता—

"गृह्यतां तामसी विद्या सर्वलोक प्रमोहिनी। कृतकृत्यास्तु दैतेयी एतां विद्यां ददाम्यहम्" ॥ इति।

कृष्णेन स्वयं भगवता पालितामपि अतस्तदिच्छयैव तत्तत्सर्वमिति भावः। तत्र बुद्ध्या प्रकाशमानस्त्वमवकलस्येवेति सम्बोधयति राजन्निति ॥ २२ ॥ प्रियं वल्लभम् ॥ २३ ॥ मुदितं हर्षेण विकासितमाननमपि यस्याः सा हर्षोद्रेकेन अवहित्थायामप्यशक्तेः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रियं वल्लभम् ॥ २१ ॥ मुदितं हर्षेण विकसितमाननमपि यस्याः सा, हर्षोद्रेकेणावहित्थायामप्यशक्तेः ॥ २२ ॥ यथा तेन सा परमप्रीताभूत्तथा तया च स इत्याह—पराद्ध्र्येति द्वाभ्याम्। आदि-शब्दात् शय्यादयः, भोजनभक्ष्ययोश्चव्यर्याचव्यर्त्वादिना भेदः, वाक्यैश्च नर्म्मादिभिः, शुश्रूषणं पादप्रक्षालनादिसेवा भक्तिर्वा ॥ २३ ॥ शश्वं पुनः पुनः, प्रकर्षेण नित्यनूतनत्वादिना वृद्धः स्नेहोऽनुरागो यस्यां वा तया, रूपादिना सुप्रसिद्धया, न बुबुधे, कति दिनान्यतीतानि, अधुना दिनं निशा वेत्यादिकं न ज्ञातवान्। कुतः ? अपहृतमिन्द्रियं मनो यस्य सः, प्रेममोहितत्वादित्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ततोऽनिरुद्धमवलोक्य ह्रिया लज्जया अवाङ्मुखी बभूव स स्वप्नदृष्टः असावेवासावेवेति प्राह—हे महीपते ! ॥ २१ ॥ तमुषया निश्चितं कृष्णस्य पौत्रमनिरुद्धं विज्ञाय योगिनी वैहायसगमनाऽन्तर्धानतूर्णगमनाद्यावहयोगशालिनी आकाशमार्गेण द्वारकां ययौ ॥ २२ ॥ तत्र द्वारकायां शोभने पर्यङ्के सुप्तं प्राद्युम्निमनिरुद्धं गृहीत्वा शोणितपुरमागत्येति शेषः सख्यै उषायै ॥ २३ ॥ सा चेति। सा उषा पुम्भिरितरैः प्रेक्षितुमप्यशक्ये स्वगृहे प्राद्युम्निना अनिरुद्धेन सह रेमे ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शोणितपुरमित्यनन्तरं गत्वेति शेषः। योगमास्थितेति द्वारकायां प्रवेष्टुमशक्नुवत्यै तस्यै श्रीनारदेन योगविद्योपदेशो हरिवंशादौ दृष्टः चित्रलेखापि योगमायांशभूतेति केचिदाहुः ॥ २३ ॥ पुम्भिर्दुष्प्रेक्ष्ये पुरुषान्तरप्रवेशाशक्य इत्यर्थ ॥ २४ ॥

गूढार्थदीपिनी

सः असौ असौ अनिरुद्धः। वीप्सा संभ्रमे। अवाङ्मुखी अधोमुखी ॥२१-२२॥ तत्र द्वारकायाम् शोणितपुरे सप्तम्यन्त-पाठ एव सुगम इति वंशीधरी ॥ २३ ॥ पुम्भिः दुष्प्रेक्ष्ये प्रेक्षितुमप्यशक्ये ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कृष्णपौत्रमाज्ञाय ज्ञात्वा विहायसा योगिनी ययौ। योगमायावतो नगरीप्रवेशः कथं योगिनीमात्रस्य न वा वासुदेवत्रासोऽत्रासैतस्या इत्येतद्धरिवंशवचनतः परिहर्तव्यम्। तथा हि तत्। नारदं पश्यते तत्र ध्यायन्तमुदके मुनिम्। तं दृष्ट्वा चित्रलेखा तु हर्षेणोत्फुल्ललोचना। उपसृत्याभिवाद्येत्यारभ्य कथं हि पुण्डरीकाक्षो ज्ञापितस्तदिदं भवेत्। त्वत्प्रसादाच्च भगवन्न मे कृष्णाद्भयं भवेत्। क्रुद्धो हि स महाबाहुस्त्रैलोक्यमपि निर्दहेत्। इति गर्भीकृत्य स नारदः उवाच च शुभं वाक्यं मा भैस्त्वं समयं शृणु। त्वया नीतेऽनिरुद्धे तु कन्यावेश्म प्रवेशिते। यदि युद्धं भवेत्तत्र स्मर्तव्योऽस्मि शुचिस्मिते। ममैष परमः कामो युद्ध द्रष्टुं मनोरमे। यद्दृष्ट्वा महाप्रीतिप्रवृद्धिश्च दृढा भवेत्। गृह्यतां तामसीविद्या सर्वलोकप्रमोहिनी। कृतकृत्यस्तु ते देवि एष विद्यां ददाम्यहमिति। भगवददतिसम्मतकार्यतया च न भीरिति मन्तव्यम् ॥ २१ ॥ सख्या उषायै पुम्भी रेमे। ढ्रलोप इति दीर्घः ॥ २२-२३ ॥ **वाक्यैः** समयसमुचितैः ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततोऽनिरुद्धोऽकृत्रिमो लिखित इत्याह **अनिरुद्ध**मिति। विशेषेण लिखितं सहजरूपं स्वप्नदृष्टसमानं दृष्ट्वा, उषा तं साक्षादेव मत्वा, पूर्वसम्बन्धं स्मृत्वा, अधोमुखी जाता। तत आदरेण अन्यं मा लिखत्विति, स एवासावसाविति द्विरुक्तवती। **स्मयमाने**ति तस्याः प्राप्स्यामीति हर्षः सूचितः। **महीपते** इति सम्बोधनं भ्रमाभावाय ॥ १८ ॥ ततो वरं निश्चित्य तमानेतुं गतेत्याह **चित्रलेखे**ति। **कृष्णस्य पौत्र**मिति स्त्रीणां हितकारी भविष्यति। स्वयं च योगिनी तस्याग्रे रमणं योगाभ्यासेन

ज्ञातवती । अत एव विहायसा ययौ । अन्यथा रक्षकैर्गमनागमनाशक्तेः । **राजन्नि**ति सावधानार्थम् । **कृष्णपालिता**मिति । तदानीं कृष्ण एव पालकः पुराध्यक्षः स्वयं जातः, इदमेव कार्यमुद्दिश्य । अन्यथा देवैः सानुभावैश्च रक्षिता पुरीति नान्यः प्रवेशमर्हति ॥ १९ ॥ तत्रापि भगवदिच्छया अनिरुद्धोऽपि न जागर्ति, अन्यथा स एव न गच्छेत् । **स्वपर्यङ्क** इति निर्भरनिद्रात्वाय । ननु राजन्याः सावधाना भवन्ति, कथमेवं निर्भरनिद्रात्वम्, तत्राह **प्राद्युम्नि**मिति । स हि प्रद्युम्नस्य पुत्रो निर्भयः । प्रद्युम्नोऽपि हृतः, सोऽपि हृतो, भगवदिच्छयेति वा । पराभवः स्त्रीप्राप्तिश्चोभयत्र तुल्या । शक्तिह्रासस्तु नैमित्तिक इति बोध्यते । सापि तं नेतुं लौकिकमुपायं परित्यज्य **योगमास्थिता** । अलौकिक उपायो योगः । आस्थितिः सर्वभावेन तत्रातिभरं दत्वा । गृहीत्वा पर्यङ्कात्तमेव बालकमिव । अप्रबोधो योगानुभावः । **शोणितपुरे** इति नाम्नैव भयानकत्वमुक्तम् । **सख्यै** उषायै । तस्याः प्रियमनिरुद्धं 'अयं तव प्रिय' इति प्रदर्शितवती ॥ २० ॥ तत्र गतः प्रबुद्धः स्त्रीमण्डले । ततः सा **मुदितानना तेन** सह **रेमे** । चकारात्सोऽपि तया सह । **मुदितानने**ति तस्या भयाद्यभाव उक्तः, विषयसौन्दर्यात् । लौकिकोऽपि हेतुरस्तीत्याह **दुष्प्रेक्ष्ये स्वगृह** इति । स्त्रियः सर्वाः कन्यायां तस्मिश्चा**नुरक्ताः** ऐकमत्यं प्राप्ताः । मात्रादयोऽपि । **प्राद्युम्निने**ति सर्वथा कामपूरकत्वम् ॥ २१ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तत्र सुप्तमित्यत्र । **पराभव** इति । शत्रोः पराभव इत्यर्थः । **शक्तिह्रास** इति । प्रद्युम्नः स्वयमेव शत्रुं हत्वा स्त्रियमानीतवान्, अयं तु स्वयं बद्धः, पश्चाद्भगवता मोचित इति शक्तिह्रासो निमित्तवशात् । कालेन तत्रापि विषयवैचित्र्या मनोबन्धो युक्त एवेति पूर्वमुक्तत्वादित्यर्थः ।

श्रीसुबोधिनीसारः

कृष्णस्य पौत्रं तमनिरुद्धं ज्ञात्वा योगिनी योगोऽस्या विद्यत इति योगबलयुक्ता चित्रलेखा गुणनाम्नी विहायसाकाशमार्गेण कृष्णेन पालितां द्वारकां ययौ जगाम हे राजन् ॥ २२ ॥ नारदोक्तविद्याबलेन तत्र प्रवेश इति हरिवंशेऽन्यथा कृष्णपालितायां पुरि तस्याः प्रवेशानुपपत्तौ हरणं न स्यादिति भावः । पर्यंके शय्यायामुपरि सुप्तं प्रद्युम्नस्यापत्यं गृहीत्वा योगमास्थिता शोणितपुरमागत्य सख्यै ऊषायै प्रियमनिरुद्धमदर्शयत् ॥ २३ ॥ सुन्दरं वरमित्येके अति सुन्दरमिति गुरवः व्याघ्रादिवच्छ्रेष्ठार्थवाचित्वेनोत्तरपदनियमात् तमनिरुद्धं विलोक्य दृष्ट्वा हर्षितानना प्रसन्नमुखी पुंभिः दुष्प्रेक्ष्ये द्रष्टुमशक्ये स्वगृहे आत्ममन्दिरे प्राद्युम्निनानिरुद्धेन समं सह रेमे ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततोऽनिरुद्धं लिखितं वीक्ष्य हे महीपते ! सोषा ह्रिया लज्जया अवाङ्मुखी स्मयमाना हर्षेण प्रहसितमुखी च सती स मया दृष्टोऽसावसाविति प्राहेत्यन्वयः । वीप्सा सम्भ्रमसूचिका ॥ २१ ॥ **चित्रलेखा** तमूषया **निर्दिष्टं कृष्णस्य पौत्रमनिरुद्धं विज्ञाय विहायसा**ऽऽकाशमार्गेण **कृष्णपालितां द्वारकां ययावि**त्यन्वयः । समुद्रादिभिर्दुर्गमायामेवंगमनसामर्थ्ये हेतुमाह—**योगिनी**ति । **तत्र** द्वारकायां शोभने **पर्यङ्के सुप्तं प्राद्युम्निमनिरुद्धं गृहीत्वा** पुन**र्योगमास्थाय शोणितपुरमागत्य सख्ये ऊषायै प्रियं** तमदर्शयत् ॥ २२-२३ ॥ साच ऊषा तं विलोक्य मुदितानना सती इतरैः पुम्भिरवेक्षितुमप्यशक्ये स्वगृहे **तेन प्राद्युम्निना समं सह रेमे** ॥ २४ ॥

अन्वितार्थप्रकाशिका

अनिरुद्धमिति ॥ हे महीपते ! अनिरुद्धं लिखितं वीक्ष्य सा ऊषा ह्रिया लज्जया अवाङ्मुखी स्मयमाना सती स मया दृष्टोऽसावसाविति प्राह स्म ॥ २१ ॥ चित्रलेखेति ॥ योगिनी सा चित्रलेखा तमूषया निर्दिष्टं कृष्णस्य पौत्रमनिरुद्धं विज्ञाय कृष्णपालितां द्वारकां विहायसाकाशमार्गेण ययौ ॥ २२ ॥ तत्रेति । योगमास्थिता सा चित्रलेखा द्वारकां प्रवेष्टुमशक्नुवत्यै तस्यै नारदेन योगविद्योपदेशो हरिवंशादौ दृष्टः । चित्रलेखाऽपि योगमायांश इति केचित् । तत्र द्वारकायां शोभने पर्यङ्के सुप्तं प्राद्युम्निमनिरुद्धं गृहीत्वा शोणितपुरं नीत्वा सख्यै ऊषायै प्रियं तमदर्शयत् ॥२३॥ सेति । सा च ऊषा सुन्दरेषु वरं तं विलोक्य मुदितानना सती इतरैः पुंभिर्दुष्प्रेक्ष्येऽवेक्षितुमप्यशक्ये स्वगृहे तेन प्राद्युम्निना समं सह रेमे । परार्ध्येति द्वयम् ॥ सोऽनिरुद्धश्च कन्यापुरे गूढः शश्वन्नित्यं प्रवृद्धः स्नेहो यस्यास्तयोषया परार्ध्यैः अमूल्यैर्वासःस्रगादिभिः पानभोजनभक्ष्यैः मधुरवाक्यैश्च शुश्रूषया चार्चितो बहुमत अत एवापहृतमिन्द्रियं मनो यस्य सः गच्छतोऽहर्गणान्न बुबुधे न ज्ञातवान् ॥ २४-२६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुंभिः दुःप्रेक्ष्ये दृष्टुमशक्ये ॥ २१ ॥ पराघ्र्यैरमूल्यैः वासःप्रभृतिभिः शुश्रूषया पादसंवाहनादिना चर्चितः ॥ २२ ॥ कन्यांतःपुरे । अहर्गणान् दिन् पूगान् ॥ २३ ॥ आप्रीतामतिप्रसन्नां अतएव दुरवच्छदैः गोपयितुमशक्यैः हेतुभिः रतिचिह्नैः हतव्रतां लक्षयां चक्रुः दृष्टवंतः भटा इति शेषः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अनिरुद्धमिति । ऊषा, अनिरुद्धं विलिखितं, वीक्ष्य ह्रिया लज्जया हेतुना, अवाङ्मुखी न्यक्कृतास्या, बभूव ! हे महीपते, स्मयमाना सती, सः असौ, असौ, इति प्राह ।। २१ ।। चित्रलेखेति । योगिनी सम्यक् सविदितयोगमार्गा, चित्रलेखा, तमनिरुद्धं, कृष्णस्य पौत्रं, आज्ञाय हे राजन्, विहायसा आकाशमार्गेण, कृष्णपालितां द्वारकां, ययौ ।। २२ ।। तत्रेति । योगं आस्थिता चित्रलेखा, तत्र द्वारकायां, स्वपर्यङ्के सुप्तं, प्राद्युम्निमनिरुद्धं, गृहीत्वा सपर्यङ्कमुपादाय, शोणितपुरं एत्य, सख्यै ऊषायै, प्रियं अदर्शयत् ।। २३ ।। सेति । सा च सोषापि, सुन्दरवरं रूपवत्सु श्रेष्ठं, तमनिरुद्धं, विलोक्य मुदितमाननं यस्यास्तथाभूता सती, पुम्भिः पुरुषैः, दुष्प्रेक्ष्ये वीक्षितुमप्यशक्ये, स्वगृहे प्राद्युम्निनाऽनिरुद्धेन, समं साकं, रेमे चिक्रीड ।। २४ !!

कृष्णप्रिया

राजन् ! यह अवस्था देखकर चित्रलेखा हर्षित हुई और उत्साह से जब श्री अनिरुद्ध जी का चित्र बनाया तब तो देखते ही लज्जावश उषा जी का मुखकमल धरणी की ओर झुक गया। पुनः मन्दस्मित मुख सरोज से मधुर स्वर से और नेत्र संकेत से कहा कि यही मेरे प्राणनाथ हैं ।। २१ ।। महाराज परीक्षित ! चित्रलेखा चित्रिका तो थी पुनः समर्थयोगिनी भी थी। उसने जाना कि यह सुन्दर वर युवा त्रिभुवन सुन्दर भगवान् श्रीकृष्ण चन्द्र जी के सुपौत्र है तो वह आनन्दविभोर हो गई और चित्रलेखा नभोमार्ग से रात्री में ही भगवान् श्रीकृष्ण से सुरक्षित श्रीद्वारिकापुरी में पहुँच गयी। प्रभु के दिव्य भवन में श्री अनिरुद्धजी अत्यन्त सुन्दर पर्यङ्क पर निद्रा ले रहे थे। चित्रलेखा योगिनी थी अतः अपने योगबल के सामर्थ्य से श्रीअनिरुद्ध जी को उठाकर बाण के नगर शोणितपुर ले आयी और अपनी प्रिय सखी उषा जी का अपने प्रियतम से समागम करा दिया ।। २२-२३ ।। श्री उषा कुमारी अपने अभीष्ट सर्वाङ्ग सुन्दर प्रियतम पति को प्राप्त कर अत्यन्त प्रसन्नवदना हो गयीं। उषा का निवासस्थान ही ऐसा था कि जहाँ किसी भी पुरुष का प्रवेश संभावित न था सेवकों से सुरक्षित था। केवल भगवान् की ही ईच्छा से अनिरुद्ध जी मिल गये थे वह अपने निवास में अनिरुद्ध जी के साथ विहार करने लगी ।। २४ ।।

परार्घ्यवासः स्रग्गन्धधूपदीपासनादिभिः । पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूष[1] यार्चितः ॥ २५ ॥
गूढः कन्यापुरे शश्वत् प्रवृद्धस्नेहया तया । नाहर्गणान् स बुबुधे ऊषयापहृतेन्द्रियः ॥ २६ ॥
तां तथा यदुवीरेण भुज्यमानां [2]हतव्रताम् । हेतुभिर्लक्षयांचक्रुरा[3]प्रीतां दुरवच्छदैः ॥ २७ ॥
भटा [4]आवेदयांचक्रू राजंस्ते दुहितुर्वयम् । विचेष्टितं लक्षयामः कन्यायाः कूलदूषणम् ॥ २८ ॥

कर्दमक्षमा

अन्वयः--शश्वत्, परार्घ्यबासः स्रग्गन्धधूपदीपासनादिभिः, च, पानभोजनभक्ष्यैः, च, वाक्यैः, प्रवृद्धस्नेहया, शुश्रूषया, अर्चितः, ऊषया, अपहृतेन्द्रियः, तया, कन्यापुरे, गूढः, सः, अहर्गणान्, न, बुबुधे ।। २५-२६ ॥ ताम्, यदुवीरेण, तथा, भुज्यमानाम्, हतव्रताम्, आप्रीताम्, दुरवच्छदैः, हेतुभिः, लक्षयाञ्चक्रुः, भटाः, ओदयाञ्चक्रुः, राजन् ! ते दुहितुः, विचेष्टितम्, कन्यायाः, कुलदूषणम्, लक्षयामः ॥ २७-२८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिकाप्रकाशः

स च परार्ध्यैरमूल्यैर्वासः स्रगादिभिः शुश्रूषणपूर्वकमर्चितः सन् ।।२५।। तया ऊषयाऽपहृतेन्द्रियोऽहर्गणान् दिनसमूहान्न बुबुधे ।। २६ ।। आप्रीतामतिहृष्टाम् । दुरवच्छदैश्छादयितुमशक्यैः ।। २७ ।। विचेष्टितं विरुद्धाचरणम् ।। २८ ।।

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

भोजनपदमत्र लेह्यादिपरम् ।। २५ ।। सोऽनिरुद्धः ।। २६ ।। हतो नष्टो व्रतः पितृदानपूर्वकपतिस्वीकाररूपो धर्मो यस्यास्सा ताम् व्रतो धर्मोपवासयोः' इति धरणिः । हेतुभिः पुंसंगबोधकैर्वक्रनिरीक्षणदेहसंस्कारादिभिः ।। २७ ।। भटा गृहरक्षकाः "भटः स्यात्पुंसि वीरेऽथ प्रभेदे पामरस्य च" इति मेदिनी । कुलदूषणं व्यभिचारम् ।। २८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

परार्द्ध्येति युग्मकम् । पानभोजने पेयभोज्ये "कृत्यल्युटो बहुलम्" [३-३-११३] भोज्यभक्ष्ययोश्च व्याचर्य्यत्वादिना भेदः एतैर्यच्छुश्रूषणं तेनार्चितः शश्वत् पुनः पुनःप्रकर्षेण नित्यनूतनादिना वृद्धःस्नेहोऽनुरागो यस्याः यस्यां वा तया नाहर्गणा-

---

१. षणार्चितः-प्रा. पा. । २. क्षत-वीर. ; हतत्रपाम्-प्रा. पा. । ३. चक्रुर्दु-वीर. । ४. निवेदयामासु-वीर. ।

निति श्रीकृष्णपरित्यागेन तत्र चिरस्थितौ सिद्धान्तः तच्च लीलाविशेषाय श्रीकृष्णेच्छयैव ज्ञेयम् तत एव उषया अपहृतम् इन्द्रियं मनो यस्य सः प्रेममोहित इत्यर्थः ॥ २५–२६ ॥ यदुवीरेणेति । परमविदग्धेन निर्भयेन च तेन भुज्यमानां तां हतव्रतां स्खलितकन्यानियमां लक्षयाञ्चक्रुः भटा इत्युत्तरस्थेनैवान्वयः । कैर्हेतुभिः दुरवच्छदैः हेतुभिः परम्परावगतैः रतिचिह्नैः तत्र मुख्यं चिह्नम् आप्रीतामिति ॥ २७ ॥ भटा अन्तःपुरचराः षण्डादयो रक्षिणो बाणभृत्याः ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तथा तेनोक्तप्रकारेण भुज्यमानाम्, अतो हतं व्रतं कन्यानियमो यस्यास्ताम्, हतत्रपामिति पाठे यतो निर्लज्जाम्, अत एव आप्रीताम्, यदुवीरेणेति परमं निर्भयत्वं वैदग्ध्यादिकञ्च सूचितम्, अत एव दुरवच्छदैर्हेतुभी रतिचिह्नैः ॥ २५ ॥ भटा अन्तःपुरचराः षण्टकुब्जादयो रक्षिणो बाणभृत्याः, एषामुभयतोऽप्यन्वयः । हे राजन्निति राज्ञे भृत्यैरवश्यमेव स्वप्रयोजनं विज्ञाप्यमिति, किंवा राज्ञस्तव पुत्र्यास्तदसम्भाव्यमिति भावः ॥ २६ ॥ तच्च कथमभूदित्यस्माभिर्बोद्धुं न शक्यत इत्याहुः— अनपायिभिरिति । तु अपि, अस्य यथापेक्षं सर्वैरन्वयः । हे प्रभो ! इति त्वत्प्रभावेणान्तःपुरेऽन्यस्य प्रवेशो नैव सम्भवतीति भावः । अतः पुम्भिर्दुष्प्रेक्षाया अपि, यद्वा, अस्माभिः सदा द्रष्टुमशक्याया इत्यर्थः । केवलं गृहान्तरावृत्य गुप्ताया इति स्वदोषः परिहृतः, दुष्प्रेष्या इति पाठे सखीद्वारैव तदिति भावः ॥ २७ ॥ ततस्तस्माद्भटानामावेदनाच्छ्रुतदूषणः, ततोऽतिदुःखितःप्रकर्षेण शनैर्निगूढतया प्राप्तो गतः सन् ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

परार्ध्येति । परार्ध्यैः वासःप्रभृतिभिः शुश्रूषया चार्चितो बहुमतः सोऽनिरुद्धः उषाया गृहे गूढः शश्वन्नित्यं प्रवृद्धः स्नेहो यस्यास्तयाऽपहृतमिन्द्रियं मनो यस्य सः अहर्गणान्न बुबुधे न ज्ञानवान् ॥ २१–२६ ॥ तामिति । यदुवीरेण अनिरुद्धेन भुज्यमानामत एव क्षतं विहतं व्रतं कन्याया विहतं यस्यास्तथाभूतां वीक्ष्य दुरवच्छदैश्छादयितुमशक्यैर्हेतुभिश्चिन्हैर्दूषितां लक्षयाञ्चक्रुः ॥ २७ ॥ भटाः ततस्ते राज्ञे बाणायावेदयाञ्चक्रुः आवेदनप्रकारमेवाह—राजन्नित्यादिना न विद्मह इत्यन्तेन । हे राजन् ! कुलं दूषयतीति तथा तच्चेष्टितं लक्षयामः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

अपहृतेन्द्रियः प्रेममोहित इत्यर्थः ॥ २६–२७ ॥ भटाः षण्डादयः ॥ २८–३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

एतैर्यत् शुश्रूषणं तेनार्चितः ॥ २५–२६ ॥ हेतुभिः रतिचिह्नैः दुरवच्छदैः छादयितुमशक्यैः आप्रीतामत्यानन्दवतीमिति मुख्यं रतिचिह्नं पुरपालकभटश्रिय इति शेषः ॥ २७ ॥ भटाः प्रकारान्तरेण जानन् बाणो नः शास्ति करिष्यतीति प्राप्ताशङ्काः ज्ञापयामासुः कन्याया अपरिणीतायाः अपि ॥ २८ ॥

गूढार्थदीपिनी

परार्द्ध्यैः अमूल्यैः वासःस्रगादिभिः ॥ अपहृतेन्द्रियः आकृष्टमना अहर्गणान् दिनसमूहान् ॥ २६ ॥ हृतं व्रतं कन्यात्वलक्षणम् यस्याः छादयितुमशक्यैः हेतुभिः रतिचिह्नैः । आप्रीताम् अतिप्रसन्नाम् ॥ २७ ॥ भटाः गृहरक्षकाः । विचेष्टितं विरुद्धाचरणम् व्यभिचारं कुलदूषणम् ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

परार्द्ध्यैरमूल्यैर्वासःप्रभृतिभिः वाक्यैरनुकूलैः शुश्रूषणपूर्वकमर्चितः ॥ २५ ॥ आप्रीतामतिदृष्टाम् हृतं विहतं व्रतं कन्याकृत्यं यस्याः तां हेतुभिः रतिचिह्नैः दुरवच्छदैश्छादयितुमशक्यैः लक्षयाञ्चक्रुः भटा एव स्वस्त्रीद्वारेति बोध्यम् दुष्प्रेक्षे स्वगृहे पुम्भिरित्युक्तवान् ॥ २६–२७ ॥ विचेष्टितं विपरीतं कर्म लक्षयाम। केवलमिदमित्थमिति तु न जानीम इत्याहुः ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्नेहयातयेत्येकं पदं वा। स्नेहत्वेन यातया उषया। अपहृतानि स्वमात्रपराणि कृतानीति ॥ २५ ॥ हन्तं व्रतं कन्यावस्थावश्यकं कर्म यया सा तां दुरवच्छदैर्दुःसाध्योऽवच्छद आच्छादनं येषां ते तैर्हेतुभिश्चिन्हैराप्रीतां बहुतुष्टां लक्षयाञ्चक्रुः ॥ २६ ॥ अतिस्फुटानि लक्षणानि नाच्छादयितुं शक्यानि । किञ्च यथाकथञ्चिदाच्छादनेऽस्मच्छिरश्छेदने राज्ञा आज्ञा भवेदिति भीता भटान्न्यवेदयन्नित्याह। भटा इति। तत्प्रकारमाह। राजन्निति। वयं ते दुहितुः कन्यायाः कुलदूषणं चेष्टितं लक्षयाम

इति ॥ २७ ॥ यूयं क्व गताः कथं च कोऽन्तर्गत इत्यत आहुः। अनपायिभिः क्वाप्यगच्छद्भिरिति। गुप्ताया दुष्प्रेक्षाया दुराचारेति दुष्टा प्रेष्या दूतिका यस्याः सा तस्याः पायिनो न भवन्तीत्यपायिनस्ते न भवन्तीत्यनपायिनोऽतिशयेन मद्यपायिन इत्यर्थः। दैत्यानां धर्मोऽयमिति राजपुरत उक्तौ न बाधेतेत्येवमुक्तिरित्यान्तरङ्गिको भावः। अत एव न विग्रह इति सुलग्नम्। पुंभिः कन्यायाः कृतदूषणम्। बहुवचनेनैकमात्रपर्याप्तसुरता तव तनुजेति तदूहनेन सम्भवति। समेसमेता एव वदन्पृथगिति वा तदिति वा। पुम्भिरस्माभिरित्यन्वये न चाशङ्का नोत्तरं न विद्महे। हे राजन् न विद्महेति वा। विदो लटो वेति स्मरणात् ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

निलीय क्लेशरमणं व्यावर्तयति परार्ध्येति। परार्घ्यान्यमूल्यानि सर्वाण्येव। धूपदीपासनादिभिरिति देववत्पूजनमुक्तम्। स्नातस्य प्रथमं वस्त्रम्, ततः स्रजः, ततो गन्ध इति। केशेषु संस्कारार्थं धूपः। ततो गृहे प्रविष्टस्य आरात्रिकम्। तत उपवेशनार्थमासनम्। ततः पानभोजनभक्ष्याणि। पानं मादकरुच्युत्पादकद्रव्यकृतम्। भोजनं प्रकृतम्। भक्ष्यं ताम्बूलादि। अथवा। कदाचित्पानम्, कदाचिद्भक्ष्याणि। चकारात्तत्सम्बन्धीनि। मानसस्तु सिद्ध एवेति बाह्या एते निरूपिताः। **वाक्यै**रिति वाचनिकी। शुश्रूषा कायिकी। सर्वभावेनार्चितः ॥ २२ ॥ सोऽपि तासां इच्छानुरोधी जात इत्याह **गूढः कन्यापुर** इति। शश्वन्निरन्तरमुपचाराणां प्रतायमानत्वादनुरोधः। **प्रवृद्धस्नेहये**ति निरन्तरं साधनेषु हेतुः। तस्य क्रियान्तरस्मरणाभावायाह **नाहर्गणान्स बुबुध** इति। रूपयेति। पूर्वस्त्रीणामप्यस्मरणं सर्वोत्तमैषेति च द्योतितम्। अपहृतं वशीकृतं तदधीनं जातमिन्द्रियं यस्य ॥ २३ ॥ ततः पुरुषोपभुक्ता **गर्भकृतैर्लक्षणैः** भोगकृतैरेव वा हतं **व्रतं यस्याः**। कन्याया ब्रह्मचर्यं व्रतम्, तदा हतव्रतां तां लक्षयांचक्रुः। **यदुवीरेणेति** निर्भरो भोग उक्तः तेन स्पष्टानि चिह्नानि। आसमन्तात् पीता पीतवर्णा, श्रमाद्गर्भेण वा स्त्रीणां तथात्वं भवति। **दुरवच्छदै**रिति। आच्छादयितुमशक्यैः धर्मैः रूपेण च ज्ञात्वा। स्वापराधशङ्कया भटा आवेदयांचक्रुः। तेषां रक्षकाणां कन्यान्तःपुराधिकारिणां वाक्यमाह राजन्निति। अयुक्तं कथं श्राव्यत इत्याशङ्क्य संबोधनेन पश्चान्महदनिष्टं सूचयन्ति। विचेष्टितं व्यभिचारम्। **लक्षयाम** इति प्रमाणं तर्कितमात्रम्। नन्वस्तु को दोष इति चेत्, तत्राह **कुलदूषण**मिति। यद्यपि पापादिना न तेषां भयम्, तथापि दैत्याः न व्यभिचारिणो भवन्तीति। तेषां कुले व्यभिचारो दूषणम्, यथा देवानामनृतम् ॥ २५ ॥

श्रीसुबोधिनी-सारः

परार्ध्यैरमूल्यैर्वासआदिभिः पानं पेयं रसालादिफलरसदुग्धादि भोजनं ओदनादिभक्ष्यं पर्पटादि तैः वचनैः सेवयार्चितः ॥ २५ ॥ कन्यायाः पुरे गूढो गुप्तः शश्वन्निरंतरं प्रवृद्धः स्नेहो यस्याः तयोषयाऽपहृतमिंद्रियं मनो यस्य सोनिरुद्धोऽहर्गणान् न बुबोध न विजज्ञे ॥ २६ ॥ तथोक्तप्रकारेण यदुवीरेण अनिरुद्धेन भुज्यमानां हतं व्रतं कन्यात्वलक्षणं यस्यास्तामाप्रीताम् अतिहृष्टां तामूषां दुरवच्छदैः छादयितुमशक्यैर्हेतुभिर्गर्भस्थित्यादिलक्षणैर्लक्षयामासुः ॥ २७ ॥ भटा द्वारपाला निवेदयां बभूवुः हे राजन् ते तव दुहितुः पुत्र्याः कुलस्य दूषणं यस्मात्तद्विचेष्टितं वयं लक्षयामः ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सोऽनिरुद्धश्च कन्यापुरे गूढः शश्वन्नित्यं प्रवृद्धः स्नेहो यस्यास्तयोषया परार्ध्यैः अमूल्यैर्वासःप्रभृतिभिः शुश्रूषया चार्चितो बहुमतः अत एवापहृतमिन्द्रियं मनो यस्य सः गच्छतोहर्गणान्न बुबुधे न ज्ञातवान् इति द्वयोरन्वयः ॥ २५-२६ ॥ तामूषां यदुवीरेण तथा निगूढतया भुज्यमानां अतएवाऽऽप्रीतां दुरवच्छदैः छादयितुमशक्यैर्गर्भधारणादिभिर्हेतुभिर्हतं व्रतं पुरुषसम्बन्धराहित्यं यस्यास्तथाभूतां द्वारपाला भटा लक्षयाञ्चक्रुः ॥ २७ ॥ ततश्च ते राज्ञे बाणायावेदयाञ्चक्रुः। तदावेदनप्रकारमाह—राजन्निति सम्बोधयन्तो आत्मनोपि ततो भयं सूचयन्ति। ते दुहितुः कन्यायाः विवाहरहिताया एव कुलं दूषयतीति तथाभूतं परपुरुषसम्बन्धलक्षणं चेष्टितं वयं लक्षयामः ॥ २८ ॥

अन्वितार्थप्रकाशिका

तामिति। तामूषां यदुवीरेण तथा निगूढतया भुज्यमानाम् अत एवाऽऽप्रीतामतिहृष्टां दुरवच्छदैः छादयितुमशक्यैर्हेतुभिः रतिचिह्नैर्हतं व्रतं पुरुषसम्बन्धराहित्यं यस्यास्तथाभूतां भटाः अन्तःपुरचराः षण्ढाः लक्षयांचक्रुः ॥ २७ ॥ भटा इति। ततश्च ते भटाः राज्ञे बाणायावेदयांचक्रुः। हे राजन् ! ते दुहितुः कन्यायाः विवाहरहिताया एव कुलं दूषयतीति तथाभूतं परपुरुषसंबन्धलक्षणं चेष्टितं वयं लक्षयामः ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ते तव दुहितुः कन्यायाः विचेष्टितं। कुलदूषणं ॥ २५ ॥ अनपायिभिरन्यत्रागच्छद्भिः सावधानैश्च पुंभिः दुःप्रेक्ष्यायाः दृष्टुमशक्यायाः कन्यायाः दूषणं ॥ २६ ॥ यदूद्वहं यदुपूत्साहजनकमनिरुद्धं ॥ २७ ॥ कामात्मजं प्रद्युम्नतनयं ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पराघ्र्येति । वासांसि च स्रजश्च गन्धश्च धूपश्च दीपश्च आसनं च पराघ्र्याणि वासःप्रभृतीनि आदयो येषां तैः, पानं च भोजनं च भक्ष्यं च तैः, वाक्यैर्मधुरभाषणैः, शुश्रूषया च, अर्चितो बहुमतः ॥ २५ ॥ गूढ इति । सोऽनिरुद्धः, कन्यागृहे ऊषाया भवने, गूढः ऊषया अपहृतमिन्द्रियं मनो यस्य तथाभूतः सन्, शश्वत् प्रवृद्धः स्नेहो यस्यास्तया, तयोषया, क्रीडन् संश्चेति शेषः । अहर्गणान् न बुबुधे । इति द्वयोरेकसंबन्धः ॥ २६ ॥ तामिति । यदुवीरेणानिरुद्धेन, भुज्यमानां अत एव, क्षतं विहतं व्रतं कन्याव्रतं यस्यास्तां, आप्रीतामतिहृष्टां, तामूषां, तथा तथाभूतां वीक्ष्य, दुरवच्छदैः छादितुमशक्यैः, हेतुभिः चिह्नैः, भटाः लक्षयांचक्रुः पुंसंबन्धवतीं तर्कयांचक्रुरित्यर्थः ॥ २७ ॥ भटा इति । ततः भटास्तद्रक्षणार्थमास्थापिता जनाः, हे राजन्, वयं कन्यायाः, ते तव, दुहितुः पुत्र्याः, कुलदूषणं विचेष्टितं लक्षयामः, इति आवेदयांचक्रुः राज्ञे कथयामासुः ॥ २८ ॥

कृष्णप्रिया

दिन-प्रतिदिन बढ़ते अनुराग से ऊषा दिव्य वस्त्र, कुसुमों की मालाएँ, सुगन्धमय तैल-फूलेल इत्यादि उपकरण, धूप दीप, उत्तम आसनादि वस्तुओं से, श्रेष्ठ स्वादिष्ट पेय पदार्थों से; भक्ष्य-भोज्य-चोष्य-लेह्य-भोजन सामग्रियों से, मधुर वार्तालाप से श्रीअनिरुद्ध जी की अविश्रान्त अवस्था से सेवा-शुश्रूषा करती थीं । परम सुन्दरी और स्नेहमयी ऊषाजी ने अपने स्नेहानुराग से अनिरुद्धजी के हृदय में स्थान प्राप्तकर लिया और अनिरुद्ध जी गुप्तरूप से कन्या के अन्तःपुर में रह रहे हैं—यह बात भूल गये और यह भी अनुसन्धान न रहा कि यहाँ रहे कितना समय हुआ ॥ २५-२६ ॥ राजन् परीक्षित् ! यदुवीर श्री अनिरुद्ध जी के समागम से श्री ऊषा कुमारी का कौमार्यव्रत तो नहीं ही रहा और अङ्ग-प्रत्यङ्गों के स्वरूप में असाधारण परिवर्तन भी आ गया था जो स्पष्ट कह रहा था कि ऊषा ने गार्हस्थ्य में प्रवेश कर लिया है । पुनः ऊषा अत्यन्त प्रसन्न भी रहने लगी थी । पहरेदारों ने भी समझ लिया था कि ऊषा अवश्य ही किसी पुरुष के संसर्ग में है । राक्षसों ने बाणासुर को जाकर सुनाया कि राजन् ! आप की कुमारी ऊषा के व्यवहार से और रंगढंग से निश्चय हो चुका है कि ऊषा किसी पुरुष के संसर्ग में है और कुलदूषण होने जा रहा है ॥ २७-२८ ॥

अनपायिभिरस्माभिर्गुप्तायाश्च[1] गृहे प्रभो । कन्याया दूषणं पुम्भिर्दुष्प्रेक्षाया न विद्महे ॥ २९ ॥
ततः प्रव्यथितो बाणो दुहितुः श्रुतदूषणः । त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीद् यदूद्वहम् ॥ ३० ॥
कामात्मजं[2] तं भुवनैकसुन्दरं श्यामं पिशङ्गाम्बरमम्बुजेक्षणम् ।
बृहद्भुजं कुण्डलकुन्तलत्विषा स्मितावलोकेन च मण्डिताननम् ॥ ३१ ॥
दीव्यन्तमक्षैः प्रिययाभितृष्णया[3] तदङ्गसङ्गस्तनकुङ्कुमस्रजम् ।
बाह्वोर्दधानं मधुमल्लिकाश्रितां तस्याग्र आसीनमवेक्ष्य विस्मितः ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—हे प्रभो ! अनपायिभिः, अस्माभि गृहे, गुप्तायाः, च पुम्भिः, दुष्प्रेक्षायाः, कन्यायाः, दूषणम्, न, विद्महे ॥ २९ ॥ ततः, दुहितुः, श्रुतदूषणः, प्रव्यथितः, बाणः, त्वरितः, कन्याऽऽगारम्, प्राप्तः, यदुद्वहम्, अद्राक्षीत् ॥ ३० ॥ भुवनैकसुन्दरम्, श्यामम्, पिशङ्गाम्बरम्, अम्बुजेक्षणम्, बृहद्भुजम्, कुण्डलकुन्तलत्विषः, स्मितावलोकेन, मण्डिताननम्, अभितृष्णया, प्रियया, अक्षैः, दीव्यन्तम्, तदङ्गसङ्गस्तनकङ्कुमसृजम्, मधुमल्लिकाश्रिताम्, बाह्वः, दधानम्, तस्याग्रे, आसीनम्, कामात्मजम्, तम्, अवेक्ष्य, विस्मितः ॥ ३१-३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनपायिभिः अपायोऽपसर्पणं प्रमादो वा तद्रहितैः । पाठांतरे दुष्टा प्रेष्या सखी यस्यास्तस्याः पुंभिर्दूषणं कुतो वेति न जानीम इत्यर्थः ॥ २९-३० ॥ कामस्यात्मनो देहाज्जातम् ॥ ३१ ॥ अभिनृम्णया सर्वमंगलया तस्या अंगसंगेन स्तनकुंकुमं यस्यां स्रजि तां बाह्वोर्मध्ये वक्षसि दधानम् । मधुमल्लिका वसन्तभवा मल्लिकास्तदाश्रिताम् । तस्याग्र इत्यार्षः संधिः । तस्या अग्र इत्यर्थः ॥ ३२ ॥

---

[1] याः स्व-वीर. । [2] तमजातं-वीर. । [3] नृम्णया-श्रीधर. वंशी. जीव. वीर विश्व.; भितुष्टया-प्रा. पा. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पाठांतरे 'दुष्प्रेष्याया' इति पाठे पुंभिः कृत्वा ॥ २९ ॥ ततो भटोक्तिश्रुत्युत्तरम्। "अपत्ये वायुभेदे चोद्वाहे उद्वह ऊर्द्ध्वगे" इति निरुक्तिः ॥ ३० ॥ कामस्य प्रद्युम्नस्य ॥ ३१ ॥ 'नृम्णं रम्यभद्रयोः' इति धरणिः। इत्यर्थ इति व्याख्या। तत्रागमनसौंदर्यनिर्भयत्वादिभिर्विस्मितो बाणोऽभूत् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वेषामपराधं परिहरन्त आहुः—अनपायिभिरिति। तुशब्दः अशङ्कानिरासार्थः पुम्भिर्दुष्प्रेक्षाया अपि पाठान्तरे पुम्भिर्दूषणमिति पुंश्चल्या दूषणं न विद्मः अनुमीयमानमपि प्रत्यक्षीकर्तुं न शक्नुम इत्यर्थः। "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" (१-२-५८ ॥ इति स्मरणाद्बहुवचनम् ॥ २९ ॥ प्रकर्षेण शनैर्निगूढतया आप्त आगतः सन् यदूद्वहं यदुश्रेष्ठम् ॥ ३० ॥ यदूद्वहत्वं दर्शयति—कामेति युग्मकेन। सौन्दर्य्यमेवाह—श्याममित्यादिना। निर्भयत्वं दीव्यन्तमित्यनेन वैदग्ध्यादिकं तदङ्गेत्यादिना तस्या अपि व्यूढोचितमङ्गलवेषादिकम् ॥ ३१ ॥ अभिनृम्णयेत्यनेन मधुमल्लिका मधुस्राविं तदुत्तमजातिविशेषः चत्वारो वार्षिका मासा इति वक्ष्यमाणात् प्रावृट्कालप्राप्तेः। तस्य बाणस्याग्रेऽपि आसीनमेव नतु भयादिनोत्थितमित्यर्थः। विस्मितोऽभूत् सौन्दर्य्यादिना तस्य तत्र गमनादिना निर्भयत्वादिना च ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यदूद्वहत्वमेव दर्शयंस्तं वर्णयति—कामेति द्वाभ्याम्। कामस्य प्रद्युम्नस्यात्मजत्वादेव भुवनेषु एकमद्वितीयं सुन्दरम्, सौन्दर्य्यमेवाह—श्याममित्यादिना। कुण्डलयोः कुन्तलानां चालकानां त्विषा कान्त्या ॥ २९ ॥ किञ्च, दीव्यन्तमिति, अनेन निर्भयत्वादिकमपि सूचितम्। तदंगेत्यादिना वैदग्ध्यादिकञ्च, अभिनृम्णयेति तस्या अपि मंगलवेशादिकमवेक्ष्य दूराद् दृष्ट्वा विस्मितः सौन्दर्य्यादिना तस्य तत्र गमनादिना च। अन्यत्तैर्व्याख्यातम्। तत्र 'चत्वारो वार्षिका मासाः' इत्यग्रे वक्ष्यमाणप्रावृट्कालेऽपि वसन्तभवमल्लिका इति बाणस्य भीत्या तत्पुरे सर्व्वेषामृतूणां सन्निपातादिति। यद्वा, श्रीहरिवंशानुसारेण वैशाखशुक्लद्वादश्यां ऊषास्वप्नदर्शनाद्वसन्तमल्लिका एव। ततश्चत्वारो वार्षिका मासा इति वसन्तशेषे ग्रीष्मे च सर्व्वतो मार्गणेनापि तदुद्देशालाभतो वर्षास्वेव शोकोद्रेकात्, अथवा बाह्वोर्बाहुमूलयोः, मधोर्वसन्तस्येव, किंवा मधुयुक्ता मल्लिकास्तदाश्रिताः, तस्य बाणस्याग्रेऽप्यासीनमेव, न तु भयादिनोत्थितमित्यर्थः ॥ ३० ॥ स दीव्यन् किंवा अनिर्वचनीयवीर्य्यः, यतो माधवो मधुकुलोद्भवः, तं बाणं भटैर्वीरैर्जिघांसया विशेषेण महाघोरत्वेन परमोत्साहादिना चावस्थितोऽवज्ञापूर्वकमतिष्ठत्, तत्रानुरूपो दृष्टान्तः—यथेति ॥ ३१ ॥ जिघृक्षया अन्तःपुरप्रवेशादिवार्त्तापेक्षया, किंवा श्रीहरिवंशोक्त—कुम्भाण्डवाक्यापेक्षयापहरणेच्छैव, न तु जिघांसा तया अहनत् परिघेण प्रहृतवान्, शूकरयूथपो महावराहः, सोऽपि यथात्मनो जिघृक्षया परितः प्रसर्पतः शुनो हन्ति, तद्वत्, भवनात् ऊषायाः, कन्यागाराद्वा, निःशेषेण भिन्नाः केषाञ्चिन्मूर्द्धानः केषाञ्चिदूरवः केषाञ्चिच्च भुजा येषां ते, अत एव प्रकर्षेण दुद्रुवुः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अनपायिभिः अनुसरद्भिरप्रमादैरस्माभिः स्वगृहे गुप्ताया अपि दूषणं न विद्महे ॥ २९ ॥ तत इति। दुहितुर्यद्दूषणं तच्छ्रुतं येन स बाणः अत एव प्रव्यथितः त्वरायुक्तः कन्यकागृहं प्राप्य यदूद्वहमनिरुद्धं ददर्श ॥ ३० ॥ कथम्भूतम्? कामस्य प्रद्युम्नस्यात्मनो देहाज्जातमत एव भुवनैकसुन्दरं कुण्डलयोः कुन्तलानाञ्च त्विषा स्मितयुक्तेनावलोकेन च मण्डितम् आननं यस्य तम् ॥ ३१ ॥ अक्षिनृम्णया सर्वतोमङ्गलया प्रियया सह अक्षैर्दीव्यन्तं क्रीडन्तं तस्याः अङ्गसङ्गेन स्तनकुङ्कुमं यस्यां मधुमल्लिका वसन्तभवमल्लिकास्ताभिराश्रितां स्रजं बाह्वोर्मध्ये वक्षसि दधानं तस्या अग्रे पुरतः अत्र सन्धिरार्षः आलक्ष्यावलोक्य विस्मितो बभूव ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मधुमल्लिका शतदलमल्लिकाजातिविशेषः ॥ ३२-३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अनपायिभिः अपायः अपसर्पणं प्रमादो वा तद्रहितैः दुष्प्रेक्षाया इति पाठे दुष्टा या योगिनी प्रेष्या सखी यस्यास्तस्याः पुम्भिर्दूषणं पुञ्जात्यादूषणं न विद्मः अनुमीयमानमपि प्रत्यक्षीकर्त्तुं न शक्नुम इत्यर्थः "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" इति बहुवचनम् ॥ २९-३१ ॥ अभिनृम्णया परममङ्गलया तस्या अङ्गसङ्गेन स्तनकुङ्कुमं यस्यां तां स्रजम् अंसाभ्यां सकाशात् स्खलितां बाह्वोर्दधानं यद्वा बाह्वोर्बाहुशिरसोः स्कन्धयोरित्यर्थः। मधुमल्लिका वसन्तभवा मल्लिका तदाश्रितां तस्या उषाया अग्रे सन्धिरार्षः अहो महासाहसिनोऽस्यै तावदपि धार्ष्ट्यमिति विस्मितः ॥ ३२ ॥

गूढार्थदीपिनी

अनपायिभिः अनपगच्छद्भिः। अप्रमत्तैर्वा हे प्रभो ॥ २९–३० ॥ कामस्य प्रद्युम्नस्य आत्मजं तमनिरुद्धं तस्या ऊषाया अग्रे आसीनमवेक्ष्य बाणः विस्मितो बभूवेत्यन्वयः। कथंभूतम्। कुण्डलयोः कुन्तलानां केशानां च त्विषा तथा सस्मितावलोकनेन च मण्डितमाननं यस्य तम्। पुनश्च अभिनृम्णया सर्वाङ्गरम्यया प्रियया सह अक्षैः पाशैः दीव्यन्तं क्रीडन्तम्। पुनश्च। मधुमल्लिकाभिः वसन्तभवं मल्लिकापुष्पैः आश्रितां गुम्फितां स्रजं बाह्वोः मध्ये वक्षसि दधानम्। तस्या अङ्गसंगेन स्तनगतं कुङ्कुमं केसरादि यस्यां तामेवंभूतां स्रजम्। मल्लिका (वेलापुष्पाणि)। कामेति युग्मम्। अवैधसम्बन्धसूचनार्थमयं सन्धिः तस्या अग्रे इति ॥ ३१–३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अनपायिभिरिति। पुम्भी राजपुरुषैः अनपायिभिरनपसर्पद्भिरस्माभिः द्वारपालैः गुप्तायाः सामीप्येन प्रेक्षितुमशक्यायाः न जानीमः ॥ २९–३१ ॥ अभिनृम्णया सर्वमङ्गलया सह अक्षैर्दीव्यन्तम् तस्याः अङ्गसङ्गेन स्तनकुङ्कुमं यस्यां तां मधुमल्लिका वसन्तभवा मल्लिका तदाश्रितां बाह्वोर्मध्ये दधानं तस्याग्रे इत्यत्र सन्धिरार्षः ॥ ३२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

श्रुतं दूषणं येन सः। यदूद्वहमनिरुद्धम् ॥ २९ ॥ कुन्तलानां कुण्डलयोश्च त्विट् तया मण्डितमलङ्कृतमाननं यस्य तत् ॥ ३० ॥ अभिनृम्णया। प्रथमाष्टकपञ्चमाध्यायाष्टाविंशतिवर्गीयान्त्या ऋचः प्रेह्यभीहि धृष्णु हि न ते वज्रो नियंसते। इन्द्र नृम्णं हि ते शवोहनो वृत्रं जया। अपोर्चन्ननु स्वराज्यमित्यस्या व्याकृतौ नृम्णं नृणां पुरुषाणां नामकमभिभावकमिति यावदिति माधवोक्तेः पुरुषाभिभावकयेत्यर्थः। पुरुषानविगणय्य वर्तमानयेति यावत्। नृन्नामयति प्रह्वीकरोतीति सा। सर्वोऽपि पृषोदरादिः। तदङ्गसङ्गेन स्तनकुङ्कुमं यस्याः सा स्रक् च तां मधुमल्लिकावसन्तकालिक्यो मल्लिकाश्रितायां सा तां बाह्वोर्दधानं तमागतं स्यति निरस्यतीति तस्या या अग्रं तस्याग्रं तस्मिन्नित्यासीनं स्वागतावप्यनधिगतभीतिः पीतोऽयमितिः विस्मितः ॥ ३१ ॥ आततायिभिरुद्यतशस्त्रैरनेकैर्भटैर्वृतमावृतं प्रविष्टं तं बाणं माधवो विलोक्य। सौर्वं उर्वस्य मुनेरपत्यमग्निस्तेन सहितस्तम्। अग्न्युद्गारिणमिति यावत्। मौर्वीमिति पठित्वा मुरुर्लोहविशेषस्तन्निर्मितमिति यावत्। मौरव इति स्यात्। तत्र नाप्यभिहितमभिधानं तैः। तथाऽपि व्यादिशं किङ्कराणां तु सैन्यं तेन महात्मना। जघान परिघं लोहमादाय परवीरहेति विष्णुपुराणे पञ्चमेंऽशे त्रयस्त्रिंशोध्याये लोहमित्युक्तेरनुकूलम्। रेफस्य चोर्ध्वगमने च सतीति ज्ञेयम्। अन्तको दण्डधरो यमो जिघांसया तथा व्यवस्थितः ॥ ३२ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तर्हि कः समायातीति शङ्कायामाहुः **अनपायिभि**रिति। स्वतो विवाहं व्यावर्तयति। **कन्याया** इति। अनेन तर्कितस्यार्थस्य युक्त्या बाधोऽप्युक्तः। अत एव **दूषणं** लक्षयामः, न विद्महे च। अन्यथानिर्धारे तेऽपि हन्तव्याः स्युः ॥ २६ ॥ ततो निर्धारार्थं स्वयं प्रवृत्त इत्याह **तत** इति। प्रकर्षेण व्यथितः शस्त्रादिभ्योऽपि। **ततस्त्वरितः** कन्यकागारं प्राप्तः प्रथमं यदूद्वहमेव दृष्टवान्। सर्वानेव यदून् उद्वहतीति महाशूरत्वं यदुकुलोत्पन्नत्वं च ज्ञातवान् ॥ २७ ॥ तद्दृष्टमनिरुद्धं वर्णयति, निर्भयत्वाय, **कामात्मज**मिति। स्त्रीणामत्यन्तहितार्थाय कामात्मजत्वमुक्तम्। **भुवनैकसुन्दर**मिति सर्वेषामेव मोहकम्। **श्यामं पिशङ्गाम्बरम्**। पीताम्बरमिति भगवत्सारूप्येण भगवदीयत्वं ज्ञापितम्। **अम्बुजेक्षण**मिति दृष्ट्यैव सर्वाह्लादकत्वमुक्तम्। **बृहद्भुज**मिति। भोगयोग्यता वीरत्वं च। स्वभावतोऽप्ययं महानिति कुण्डलकुन्तलैर्मण्डितमाननं यस्येत्युक्तम्। **स्मितावलोकेने**ति मनोहरस्वभाव उक्तः। अनेन सर्वलक्षणसम्पूर्णोऽयं वर इत्युक्तम् ॥ २८ ॥ तस्य चौर्येण व्यभिचारसम्बन्धं निवारयति। यथा कृतविवाहौ स्त्रीपुरुषावक्षैः क्रीडतः, एवं प्रियया सह तदेकनिष्ठया अक्षैर्दीव्यन्तम्। सा च क्रीडा न क्रीडार्था, किन्तु रसपोषिकेत्याह **अभितृष्णये**ति। अभितः तृष्णा यस्याः सर्वतः सम्बन्धं वाञ्छतीति। **अभितृप्तया** वा सम्भोगनितान्ततृप्तया। **अभिनृम्णया** वा। नृम्णमिति प्रकाशनाम। वैदिकशब्दो नृम्णं 'नृम्णाय नृम्ण'मित्यत्र प्रसिद्धम्। प्रकाशमाने प्रकाशमानामित्यर्थः। अभितः प्रकाशमानया, न तु सङ्कोचेन केनचिदप्यंशेन स्थितया। तत्सम्बद्ध एव क्रीडतीति सर्वसन्देहनिवृत्त्यर्थमाह **तदङ्गसङ्गस्तनकुङ्कुमस्रज**मिति। तस्या अङ्गसङ्गेन यत् कुचकुङ्कुमं स्रजि संबद्धं तादृशीं स्रजं बाह्वोर्मध्ये दधानम्। अत्यन्तरसालसमये दृष्टवानिति। मधुयुक्ता या मल्लिका तयाश्रितां स्रजमिति तत्र भ्रमरादिसम्बन्धो निरूपितः। गन्धेन रूपेण च मल्लिका रसपोषिका। तस्यैवाग्रेऽप्यासीनं बाणेऽप्यागते तथैवासीनमित्यर्थः। स्वस्याग्र आसीनमिति वक्तव्ये तस्य तथा विचारो न जात इति शुक एवाह **तस्याग्रेऽप्यासीन**मिति। अत एव विस्मितः ॥ २९ ॥

श्रीसुबोधिनी-सारः

अनपायिभिः तत्र स्थायिभिरस्माभिर्गृहे गुप्तायाः कन्यायाः पुंभिर्दुष्प्रेक्षाया दूषणं कलंकं कथं जातमिति वयं न जानीमः हे प्रभो ॥ २९ ॥ ततोनन्तरं दुहितुः पुत्र्याः श्रुतं दूषणं येन स बाणः प्रव्यथितोतिदुःखितः त्वरितः कन्यकाया अगारं गेहं प्राप्तो यदूद्वहमनिरुद्धमद्राक्षीत् ॥ ३० ॥ कामस्यात्मजं पुत्रं भुवने जगति एकमेव सुन्दरं श्यामं पीताम्बरं पद्मनेत्रं बृहद्बाहुं कुण्डलतोः कुन्तलानां केशानां त्विषा दीप्त्या स्मितयुक्तेनावलोकेनालंकृतमुखम् ॥ ३१ ॥ अभिनृम्णया सर्वमंगलया प्रियया भार्यया सहाक्षैः पाशकैर्दीव्यंतं क्रीडंतं तस्या अंगसंगेन स्तनयोः कुंकुमं यस्यां स्रजि तां मधुमल्लिका वसन्तजातामल्लिकास्तदाश्रितां मालां बाह्वोर्मध्ये दधानं तस्या ऊषाया अग्रे संधिरार्षः । आसीनम् उपविष्टं तम् अवेक्ष्य दृष्ट्वा विस्मितोऽभूत् ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तर्हि यूयमेव द्वारपालाः, युष्माकं द्वारं हित्वेतस्ततः प्रसर्पणेनैवायं दोषो जातः, अन्यथा स कथं स्यात्' इत्याशङ्क्याहुः—अनपायिभिरिति । 'तवान्यथाकोपेस्मन्निर्वाहो नास्तीति विचारः कर्तव्य' इत्याशयेन सम्बोधयन्ति—प्रभो इति । अनपायिभिः अनपसर्पद्भिः सावधानैरस्माभिर्गृहे गुप्ताया अत एव पुम्भिर्दुःप्रेक्षाया अपि कन्यायास्तैर्दूषणं कथं जातं तद्वयं न विद्महे ॥ २९ ॥ दुहितुः श्रुतं दूषणं येन सः अत एव प्रव्यथितः बाणः ततः स्थानात् त्वरितं शीघ्रं कन्यागारं प्राप्तः संस्तत्र यदूद्वहमनिरुद्धमद्राक्षीत् ॥ ३० ॥ तमनिरुद्धमवेक्ष्य विस्मितो बभूवेति द्वयोरन्वयः । तमेव वर्णयति—श्यामम् । भुवनेषु एक एव सुन्दरः तथा सुन्दरोन्यो नास्ति तमित्यर्थः । तत्र हेतुमाह—कामस्य तदवतारस्य प्रद्युम्नस्यात्मनो देहाज्जातम् । पिशङ्गं पीतमम्बरं वस्त्रं यस्य तम् । अम्बुजे इव ईक्षणे यस्य तम् । बृहन्तौ भुजौ यस्य तम् । कुण्डलयोः कुन्तलानां च त्विषा दीप्त्या स्मितयुक्तेन अवलोकनेन च मण्डितमाननं यस्य तम् ॥ ३१ ॥ अभिनृम्णया सर्वतः कृतमङ्गलतया प्रियया ऊषया सह अक्षैःदीव्यन्तं क्रीडन्तम् । मधुमल्लिका वसन्तभवा मल्लिकास्ताभिराश्रितां ग्रथितां तस्या अङ्गसङ्गेन स्तनगतं कुङ्कुमं यस्यां तां स्रजं बाह्वोर्मध्ये दधानम् । तस्याग्रे तस्या ऊषाया अग्रे आसीनम्, सन्धिरार्षः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

अनपायिभिरिति । हे प्रभो ! अनपायिभिः अनपसर्पद्भिः सावधानैरस्माभिर्गृहे गुप्ताया अत एव पुंभिर्दुष्प्रेक्षाया अपि कन्यायास्तैः पुंभिः दूषणं कथं जातं तद्वयं न विद्महे । अतिगुप्तत्वात्प्रत्यक्षीकर्तुं न शक्नुमः । तङार्षः । यद्वा हे इति प्रभो इत्यनेनान्वितम् । विघ्नेति "विदो लटो वा" इति सोरमादेशे रूपम् । दुष्प्रेष्या इति पाठे दुष्टा योगिनी प्रेष्या सखी यस्याः ॥ २९ ॥ तत इति । दुहितुः श्रुतं दूषणं येन सः अत एव प्रव्यथितो बाणः ततः स्थानात् त्वरितं शीघ्रं कन्यकागारं प्राप्तः संस्तत्र यदूद्वहमनिरुद्धमद्राक्षीत् ॥ ३० ॥ कामेति युग्मम् । कामस्य तदवतारस्य प्रद्युम्नस्यात्मनो देहाज्जातं भुवनेषु एक एव सुन्दरः तथा सुन्दरोऽन्यो नास्ति तमित्यर्थः । श्यामं पिशङ्गं पीतमम्बरं वस्त्रं यस्य तम् । अम्बुजे इस ईक्षणे यस्य तं बृहन्तौ भुजौ यस्य तं कुण्डलयोः कुन्तलानां च त्विषा दीप्त्या स्मितयुक्तेनावलोकनेन च मण्डितमाननं यस्य तम् । अभिनृम्णया सर्वतः कृतमङ्गलया प्रियया ऊषया सह अक्षैः दीव्यन्तं क्रीडन्तं मधुमल्लिका वसन्तभवा मल्लिकास्ताभिराश्रितां ग्रथितां तस्या अङ्गसङ्गेन स्तनगतं कुङ्कुमं यस्यां तां स्रजं बाह्वोर्मध्ये दधानं तस्याग्रे तस्या ऊषाया अग्रे आसीनं नतु बाणभयादुत्थितम् । सन्धिरार्षः । तमनिरुद्धमवेक्ष्य विस्मितो बभूव ॥ ३१-३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अभिनृम्णया मंगलया समस्तमांगलिकैः पतिमतीशृंगारैर्युक्तयेत्यर्थः । प्रियया सह अक्षैः दिव्यंतं रममाणं । तस्या अंगसंगेन स्तनकुंकुमं यस्यां तथाभूता चासौ स्रक्कृतां मधुमल्लिकाश्रितां ममुस्राविमल्लिकाकुसुमग्रथितां मालां बाह्वोर्मध्ये दधानं तस्याग्रे अग्र संधिरार्षः तस्या अग्र इत्यर्थः ॥ २९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अनपायिभिरिति ॥ हे प्रभो, अनपायिभिरनपसर्पद्भिरप्रमादैरिति यावत् । अस्माभिः, गृहे स्वगृहे, गुप्तायाः, अत एव पुम्भिः पुरुषैः, दुष्प्रेक्ष्यायाः, कन्यायाः दूषणं कथं जातमिति शेषः । न विद्महे न जानीमः ॥ २९ ॥ तत इति ॥ ततः, दुहितुः पुत्र्याः, श्रुतं दूषणं येन सः, अत एव, प्रव्यथितः प्रकृष्टव्यथायुक्तो जातः, बाणो बाणासुरः, त्वरितः संजातत्वरः, कन्यकागारं प्राप्तः सन्, तत्र यदूद्वहमनिरुद्ध, अद्राक्षीत् ॥ ३० ॥ यदूद्वहं विशिनष्टि ॥ कामात्मजमिति ॥ कामात्मजं रूपनिधेः साक्षान्मन्मथस्य तु तनयं, भुवनेष्वेक एव सुन्दरस्तं, श्यामं, पिशङ्गाम्बरं परिहितपीतपीताम्बरं, अम्बुजेक्षणं कमलनयनं, बृहन्तावाजानुलम्बिनौ भजौ यस्य तं, कुण्डले च कुन्तलाश्च तेषां त्विट् दीप्तिस्तया, स्मितेन सहितो योऽवलोकस्तेन च, मण्डितं शोभमानमाननं मुखं

यस्य तम् ॥ ३१ ॥ दीव्यन्तमिति ॥ अभिनृम्णया सर्वतो मङ्गलया प्रियया सह, अक्षैः दीव्यन्तं, तस्या ऊषाया अङ्गसङ्गेन स्तनकुङ्कुमं यस्याः तां, मधुमल्लिका वसन्तभवा मल्लिकास्ताभिराश्रिता तां, स्रजमपि बाह्वोः मध्ये, दधानं, तस्या अग्रे पुरतः आसीनं, तमनिरुद्धं, अवेक्ष्य, विस्मितः बभूवेति शेषः। इति द्वयोरेकान्वयः ॥ ३२ ॥

कृष्णप्रिया

महाराज ! यह निश्चितरूप से कहते हैं कि लगातार हम सब दिनरात महल का पहरा लगाते रहे हैं कि कोई भी बाहर का मनुष्य ऊषा को देख भी नहीं पाता, फिर भी आश्चर्य है कि कुलदूषण कैसे लग गया। राजन् ! अपने सेवकों से जो अन्तःपुर के संरक्षक थे उनके मुख से ऊषा का कौमार्य खंडित हो चुका है यह सुनकर बाणासुर अतिशय व्यथित हो गया। वह विना विलम्ब ऊषा के निवास गृह में जा पहुँचा और वहाँ पर बैठे हुए अनिरुद्ध को देखा ॥ २९–३० ॥ राजन् परीक्षित् ! बाणासुर अनिरुद्धजी को देख रहा है कि सर्वाङ्गसुन्दरी ऊषा कुमारी अपने सर्वाङ्गों से समलंकृत होकर बैठी हुई थी और पासे खेलती थी। अनिरुद्धजी तो स्वयं कामावतार प्रद्युम्नजी के सुकुमार कुमार थे। त्रिभुवन सुन्दर थे, मेघ श्याम सांवरा श्रीअङ्ग था, पीताम्बर धारण किया था, कमलदल कोमल सुन्दर आँखे थीं, आजानु बाहु थे, कपोलों पर श्याम अलकावली और कुण्डलों की सुमिश्रित कान्ति से एवं स्मितहास्य युक्त अवलोकन से मुख कमल की शोभा अनूठी बन रही थी। युवा कामात्मज अनिरुद्धजी अपनी सर्वाङ्ग सुन्दरी एवं समलंकृत प्रियाजू के साथ पासे खेल रहे थे। अनिरुद्धजी के वक्षस्थल में मधुमालिनी के कुसुमों की माला विराजती थी। उस वनमाला में ऊषाजी के अङ्ग वक्षःस्थल में लगाये गये कुङ्कुम-केसर से आरक्त एवं सुगन्धित थी। अनिरुद्धजी ऊषा के सन्मुख एवं समीप ही विराजते थे ॥ ३१–३२ ॥

स तं प्रविष्टं वृतमाततायिभिर्भटैरनीकैरवलोक्य माधवः।
उद्यम्य मौर्वं परिघं व्यवस्थितो यथान्तको दण्डधरो जिघांसया ॥ ३३ ॥
जिघृक्षया तान् परितः प्रसर्पतः शुनो यथा सूकरयूथपोऽहरत्[1] ।
ते हन्यमाना भवनाद् विनिर्गता निर्भिन्नमूर्धोरुभुजाः प्रदुद्रुवुः ॥ ३४ ॥
तं नागपाशैर्बलिनन्दनो बली घ्नन्तं स्वसैन्यं कुपितो बबन्ध ह।
ऊषा भृशं शोकविषादविह्वला बद्धं [2]निशम्याश्रुकलाक्ष्यरौदिषीत्[3] ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धेऽनिरुद्धबन्धो नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥

कर्दमक्षमा

अन्वयः—आततायिभिः, अनीकैः, भटैः, वृत्तम्, प्रविष्टम्, तम्, अवलोक्य, स, माधवः, मौर्वम्, परिघम्, उद्यम्य, यथा, जिघांसया, दण्डधरः, अन्तकः, व्यवस्थितः ॥ ३३ ॥ जिघांसया, परितः, प्रसर्पतः, तान्, सूकरयूथपः, यथा, शुनः, अहरत्, निर्भिन्नमूर्धोरुभुजाः, हन्यमानाः, ते, भवनात्, विनिर्गताः प्रदुद्रुवुः ॥ ३४ ॥ स्वसैन्यम्, घ्नन्तम्, तम्, कुपितः, बलिनन्दनः, बली, ह, बबन्ध, शोकविषादविह्वला, ऊषा, बद्धम्, निशम्य, अश्रुकलाक्षी, भृशम्, अरौदिषीत् ॥ ३५ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां अनिरुद्धबन्धनाम्नि द्विषष्टितमेऽध्याये अन्वयाः समाप्ताः ॥ ६२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आततायिभिरुद्यतशस्त्रैः। माधवोऽनिरुद्धः। मौर्वं मुरुर्लोहविशेषस्तन्निर्मितम् ॥ ३३–३४ ॥ शोकविषादाभ्यां विह्वला अवशा। अश्रूणां कला बिंदवो ययोस्ते अक्षिणी यस्याः सा ॥ ३५ ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे श्रीध० टीकायां द्विषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सोऽनिरुद्धः। तं बाणम् ॥ ३३ ॥ तान् बाणभटान्। ते बाणभटाः ॥ ३४ ॥ तमनिरुद्धम्। "नागपाशः पुमान्स्त्रीणां करणे वरुणायुधे" इति मेदिनी। बलिनंदन इति विरुद्धलक्षणया मंगलशब्दवत्तस्य दुःखदः पुत्र इत्यर्थः। बलीति श्रीकृष्णस्य

---

१. हनत्–श्रीधर. वंशी. जीव. वीर. विश्व.। २. निशाम्य–श्रीधर. टि.। ३. कलाक्ष्यरोदीत्–वीर.। ४. पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे–प्रा. पा.।

लीलाविशेषेच्छाया विपर्ययादिति। यद्वा—कलिबली कामधेनू "अपिस्विदास्ते भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः। यमामनंति स्म हि शब्दयोनिं मनोमयं सत्त्वतुरीयतत्त्वम् ॥" इति तृतीये विदुरप्रश्नाच्छब्दयोनिं निःश्वासव्यञ्जितवेदवृंदं मनोमयं चित्ते वासुदेववन्मनस्युपास्यं सत्त्वं शुद्धसत्त्वात्मकं भगवत्तत्त्वं तस्य च तद्व्यूहत्वे चतुर्थं व्यूहमित्यर्थः। विष्णुधर्मोत्तरे वज्रप्रश्ने—"कस्त्वसौ बालरूपेण कल्पांतेषु पुनः पुनः। पृष्टो यो न त्वया ज्ञातस्तत्र कौतूहलं मम। मार्कंडेय उवाच ॥ भूयोभूयो मया दृष्टस्त्वसौ देवो जगत्पतिः। कल्पक्षये न विज्ञातः स मायामोहितेन वै ॥ कल्पक्षये तु तं देवं प्रपितामहात्। अनिरुद्धं विजानामि पितरं ते जगत्पतिम् ॥" पाद्मसहस्रनाम्नि तस्य नामानि—"अनिरुद्धो बृहद्ब्रह्म प्राद्युम्निर्विश्वमोहनः। चतुरात्मा चतुर्वर्णश्चतुर्युगविधायकः। चतुर्भेदैकविश्वात्मा सर्वोत्कृष्टांशकोटिसूः। आश्रयात्मा" इति। श्रीगोपालोत्तरतापिन्यां त्वसौ प्रणवार्थत्वेनापि दर्शितः—"रोहिणीतनयो रामः अकाराक्षरसंभवः। तैजसात्मकप्रद्युम्न उकाराक्षरसंभवः ॥ प्राज्ञात्मकोऽनिरुद्धो वै मकाराक्षरसंभवः। अर्द्धमात्रात्मकः कृष्णो यस्मिन्विश्वं प्रतिष्ठितम् ॥" इति। बलिनं ततो बली' इति पाठे हरिवंशोक्तशक्तिप्रहारेण बाणनिर्ज्जयात्साक्षाद्युद्धाशक्त्या कुंभाण्डोक्त्या मायया सर्पास्त्रैर्बबंधेति ज्ञेयम् "युध्यमानो यथाशक्ति यदा वीरेण निर्जितः। मायया युयुधे तेन स तदा मंत्रिचोदितः ॥" इति वैष्णवोक्तेः। "व्यष्टीनामंतरात्मानं श्वेतद्वीपेशमंशतः। बाणोऽबध्नात्प्रभोर्लीलाशक्तिरेवात्र कारणम् ॥" इति। निशम्य श्रुत्वा, कन्यागाराद्बहिर्युद्धात्। 'निशाम्य' इति पाठे तु "नागैर्विचेष्टितं दृष्ट्वा ऊषा प्राद्युम्निमातुरा" इति अरौदित्यर्थः। अरौदिषीदित्यार्षः सिचो लोपाभावः ॥ ३५ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे द्विषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भटैस्तन्निकटवर्त्तिवीरैः स्वयमवज्ञया लज्जया च तद्द्वारैव ग्रहणार्थं पश्चादाहूतैः मौरवमिति वक्तव्ये मौर्व्यमित्यार्षं विशेषेण महाघोरत्वेन परमोत्साहादिनाचावस्थितोऽवज्ञापूर्वमतिष्ठत् तत्रानुरूपो दृष्टान्तः यथेति ॥ ३३ ॥ जिघृक्षा ग्रहीतुमिच्छैव या जाता नतु जिघांसा तया अहनत् परिघेण प्रहृतवान् उषाया भवनात् ॥ ३४ ॥ बलिनन्दन इति यौगिकार्थो विरोधिलक्षणया मङ्गलशब्दवत् तस्य दुःखदपुत्र इत्यर्थः। बलीति श्रीकृष्णस्य लीलाविशेषेच्छया तदानीं विपर्य्ययादिति ज्ञेयम्—

"अपिस्विदास्ते भगवान् सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः।
यमामनन्ति स्म हि शब्दयोनिं मनोमयं सत्त्वतुरीयतत्त्वम् ॥

इति तृतीये श्रीविदुरप्रश्ने तस्य तादृशमाहात्म्यात् तत्र शब्दयोनिं निश्वासव्यञ्जितवेदवृन्दं मनोमयं चित्ते श्रीवासुदेववन्मनस्युपास्यं सत्त्वं शुद्धसत्त्वात्मकं भगवत्तत्वं तस्य चतुर्व्यूहत्वे चतुर्थं तत्त्वमित्यर्थः। तथा च विष्णुधर्मोत्तरे श्रीवज्रेण पृष्टं।

"कस्त्वसौ बालरूपेण कल्पान्तेषु पुनः पुनः। दृष्टो यो न त्वया ज्ञातस्तत्र कौतूहलं मम ॥" इति।

अत्र श्रीमार्कण्डेयेनोत्तरितं—

"भूयोभूयस्त्वसौ दृष्टो मया देवो जगत्पतिः। कल्पक्षये न विज्ञातः स मायामोहितेन वै ॥
कल्पक्षये व्यतीते तु तं देवं प्रपितामहात्। अनिरुद्धं विजानामि पितरं ते जगत्पतिम् ॥" इति।

अस्य पाद्मबृहत्सहस्रनाम्नि माहात्म्यनामानि चैतानि—

"अनिरुद्धोबृहद्ब्रह्म प्रद्युम्निर्विश्वमोहनः। चतुरात्मा चतुर्वर्णश्चतुर्युगविधायकः ॥
चतुर्भेदैकविश्वात्मा सर्वोत्कृष्टांशकोटिसूः।

श्रीगोपालोत्तरतापिन्यां आश्रयात्मेति तु "असौप्रणवार्थत्वेनापि दर्शितः"--

"रोहिणीतनयो राम अकाराक्षरसम्भवः। तैजसात्मकः प्रद्युम्न उकाराक्षरसम्भवः ॥
प्रज्ञात्मकोऽनिरुद्धो वो मकाराक्षरसम्भवः। अर्द्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठितम् ॥ इति।

अतः श्रीकृष्णव्यूहत्वेनान्यानिरुद्धत्वात्परमत्वमपीति। बलिनं ततो बलीति पाठस्तु श्रीहरिवंशोक्तशक्तिप्रहारादिना बाणनिर्जयात् नागपाशैरिति साक्षाद्युद्धाशक्त्या कुम्भाण्डवचनेन मायया सर्पास्त्रैर्बबन्धेति ज्ञेयम्। तथाच श्रीविष्णुपुराणे—

"युद्ध्यमानो यथाशक्ति यदा वीरेण निर्जितः। मायया युयुधे तेन स तदा मन्त्रिचोदितः ॥ इति।

निशम्य श्रुत्वेति कन्यागाराद्बहिर्युद्धात् किम्वा निशाम्येति पाठः। तथा च श्रीहरिवंशे "नागैर्विचेष्टितं दृष्ट्वा उषा प्राद्युम्निमातुरा" इत्यादि तत्तद्विस्तारश्च तत एव ज्ञेयः अश्रूणां कला धारा रूपा विभागा ययोस्ते अक्षिणी यस्याः सा अरोदीति वक्तव्ये अरौदिषीदित्यार्षं पदम् अरोत्सीदिति पाठेति इरुभावः आर्षः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां द्विषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बलिनन्दनत्वादेव बली, पाठान्तरे बलिनमिति श्रीहरिवंशोक्त-शक्तिप्रहारादिना बाणनिर्ज्जयात्, नागपाशैरिति साक्षाद्युद्धाशक्त्या कुम्भाण्डवचनेन मायया सर्पास्त्रैर्बबन्धेति ज्ञेयम्। ह खेदे, तथा च श्रीविष्णुपुराणे (५।३३।८)–'युध्यमानो यथाशक्ति यदा वीरेण निर्जितः। मायया युयुधे तेन स तदा मन्त्रिचोदितः॥' इति। निशम्य श्रुत्वेति कन्यागाराद्बहिर्युद्धात् किंवा निशाम्येति पाठः। तथा च हरिवंशे (विष्णु० प० ११९।२००)—"नागैर्व्विचेष्टितं दृष्ट्वा ऊषा प्राद्युम्निमातुरा' इत्यादि, तत्तद्विस्तारश्च तत्रैव ज्ञेयः॥ ३३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशम-टिप्पण्यां द्विषष्टितमोऽध्यायः॥ ६२॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

स इत्यादिसार्द्धमेकान्वयि स माधवो मधुवंशप्रभवोऽनिरुद्धः अत एव आततायिभिरुद्यतायुधैर्भटैः परिवृतं तं बाणमवलोक्य यथा दण्डधरोऽन्तकस्तद्वत् जिघांसया तत्र व्यवस्थितं लोहमयं परिघमुद्यम्य गृहीतुमिच्छया परितः प्रसर्पतस्तानाततायिनः अहनत् जघान यथा सूकराणां यूथं पातीति तथा सूकरश्रेष्ठः शुनो हन्ति तद्वत्। त इति। ते आततायिनः निर्भिन्नाः मूर्द्धादयो येषां तेऽत एव गृहाद्विनिर्गता दुद्रुवुः॥ ३३-३४॥ तमिति। बली बलवान् बलिनन्दनो बाणः स्वसैन्यं घ्नन्तं तमनिरुद्धं कुपितो नागपाशैर्बबन्ध शोकविषादाभ्यां बाह्याभ्यन्तरदुःखाभ्यां विह्वला अवशा अश्रूणां कला बिन्दवो ययोस्ते अक्षिणी यस्याः सा रुरोद॥ ३५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां द्विषष्टितमोऽध्यायः॥ ६२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

अनिरुद्धस्य बन्धः श्रीकृष्णसन्दर्भे वाख्यातः बलिनन्दनः विरोधलक्षणायाः तस्य दुखदः पुत्र इत्यर्थः। बलीति श्रीकृष्णेच्छयेदानीं विपर्य्ययादिति ज्ञेयम्॥ ३५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे द्विषष्टितमोऽध्यायः॥ ६२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

माधवोऽनिरुद्धः मूर्वा लोहविशेषस्तन्निर्मितम्॥ ३३-३४॥ अश्रूधरे अक्षिणी यस्याः सा कलिवली कामधेनू अरोत्सीदित्यार्षम् अरोदीदित्यर्थः—

व्यष्टीनामन्तरात्मानं श्वेतद्वीपेशमंशतः। बाणोऽबध्नात् प्रभोर्लीलाशक्तिरेवात्र कारणम्॥ ३५॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। द्विषष्टितम एतस्मिन् दशमेऽजनिसङ्गतः॥ ६२॥

गूढार्थदीपिनी

माधवोऽनिरुद्धः आततायिभिः उद्यतशस्त्रैः। अनीकैरिति पाठः। मौर्वं लोहमयं परिघं दण्डम्॥ ३३॥ प्रसर्पतः आगच्छतः तान्। निर्भिन्नाः मूर्धोरुभुजाः येषां ते तथाभूताः सन्तः दुद्रुवुः पलायिताः बभूवुः॥ ३४॥ अश्रुकलाभिः बिन्दुभिः पूर्णे अक्षिणी यस्याः सा तथाभूता। नागपाशो वरुणायुधः॥ ३५॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां द्विषष्टितमोऽध्यायः॥ ६२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

माधवः मधुवंशप्रभवः मौर्वं लोहविशेषनिर्मितम्॥ ३३॥ जिघृक्षया गृहीतुमिच्छया॥ ३४॥ अश्रूणां कलाः बिन्दवो ययोस्ते अक्षिणी यस्याः सा॥ ३५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्विषष्टितमाऽध्यायार्थप्रकाशः॥ ६२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आत्मानं जिघृक्षया परितः प्रसर्पतस्तान्बाणसैनिकान्। सूकरयूथपो महावराहः शुनः सारमेयान्यथा तयाऽहनदहन्। ते प्राद्युम्निना निहन्यमाना भवनान्निर्भिन्नमूर्धोरुभुजा विनिर्गताः सन्तः प्रदुद्रुवुः॥ ३३॥ बलिनन्दनः स्वयं बली च स्वसैन्यं स्वसेनं नान्यस्वामिकं तदित्यप्याह। सेनस्य सहितस्वामिकस्य भावः सैन्यं स्वेनैव सैन्यं यस्य तादिति। घ्नन्तं घातयन्तं तं

नागपाशैः कुपितो बबन्ध ह शोके । उषा भृशं शोकेन बहिःप्रदर्श्येन विषादेनान्तःखेदेन । विषमाददतीति ते पाशभूता अहीशास्तैर्विह्वला विवशा बद्धं निशम्य स्वयं निरीक्ष्याश्रुकलाक्षी अश्रूणां कला बिन्दवो ययोस्ते अक्षिणी यस्याः साऽरौदिषद्रुरोद ॥३४॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे सप्तसप्ततितमोऽध्यायः ॥ १०–७७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो युद्धार्थं तदीया असहमानाः प्रवृत्ता इत्याह **स तं प्रविष्टमिति** । अन्तःप्रविष्टम् । तं श्वशुरम् । **आततायिभिर्वृतमिति** शस्त्रपाणिभिः सह समागच्छन्तम् । मारयिष्यतीति निश्चित्य मधुवंशोत्पन्नः अन्यस्यापि स्वसम्बन्धेन मदं जनयति, किं पुनः स्वस्य साक्षात्, अतो युद्धार्थमेकाकी प्रवृत्त इत्याह **उद्यम्य मौर्वं परिघमिति** । लोहबद्धं तृणविशेषबद्धं वा । मौर्वी काचित्तृणजातिर्लोहजातिर्वा । विशेषेणावस्थितः । सर्वथा निकटगमने प्राणान् ग्रहीष्यतीति ज्ञापनार्थमाह **यथान्तको दण्डधर** इति । **जिघांसया व्यवस्थित** इति स्वरूपेण भयानकत्वं निवारितम् ॥ ३० ॥ ततो यज्जातं तदाह **जिघृक्षयेति** । धर्तव्य एवायम्, न तु हन्तव्य इति परितः समागताः । ततः स्वयमपि तान् परितः प्रसर्पतः अहरत् हृतवान् । दूरे नीतवान् । **अहनद्वा** । यथा दन्तैर्निकटे गत्वा शुनो हन्ति । नतु केनचित्पराभूतः । दूरादेव तेषां शब्दाः, न तु निकटे समागन्तुं शक्ताः । ततो यज्जातं तदाह **ते हन्यमाना** इति । नितरां भिन्ना मूर्धा ऊरुर्बाहवश्च येषामिति हननासहने हेतुः । अतः प्रथमं सङ्कीर्णत्वाद्भवनाद्विनिर्गताः, पुनस्तत्रापि निर्भिन्नावयवाः प्रदुद्रुवुः ॥ ३१ ॥ तेषु निवृत्तेषु अलौकिकप्रकारेण तं निगृहीतवानित्याह **तं नागपाशैरिति** । **बलिनन्दन** इति पितुर्वैराद्बन्धनं कृतवान् । नागपाशा अवतारविशेषे भगवतोऽपि तथात्वं सम्पादयन्ति, किमुत तदंशानाम् । ततोऽनिरुद्धाद्बली । बलेन बन्धने हेत्वन्तरमप्याह **घ्नन्तं स्वसैन्यमिति** । यदि न मारयेत्, तदा जिज्ञासां कृत्वा पश्चात्तथा अयुक्तत्वं नास्तीति स्वतो महादेवं वा पृष्ट्वा विवाहवदनुमोदनं कुर्यात् । अतः स्वसैन्यं मारयतीति, जामाता भवतीति विनिश्चित्य, बन्धनमेव कृतवान् । तच्च बन्धनं दूरे गतस्य । तदाह **ऊषा भृशमिति** । आश्चर्यं तस्य बन्धनं निशम्य भर्तृत्वे सन्देहाभावादश्रुकलाक्षी सती स्वाभिप्रायं ज्ञापयन्ती अरोदीत् । अनेन तस्य जारत्वं परिहृतम् ॥ ३२ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीसुबोधिनी–सारः

आततायिभिः सशस्त्रैरनेकैर्भटैः शूरैर्वृतं मन्दिरं प्रविष्टं तं बाणमवलोक्य स माधवोऽनिरुद्धो मौर्वं मुरुर्लोहविशेषस्तन्निर्मितं परिघमुद्यम्योद्गृह्य हंतुमिच्छया व्यवस्थितः दण्डधरोंतको मृत्युर्यमो वा यथावतिष्ठते ॥ ३३ ॥ जिघृक्षया ग्रहीतुमिच्छया परितः सर्वतः प्रसर्पत आगच्छतस्तान् भटान् अहन् सूकरयूथपः शुनः कुक्कुरान् इव हन्यमानास्ते भवनाद्विनिर्गता निर्भिन्ना मूर्द्धोरुभुजा येषां ते प्रदुद्रुवुः ॥ ३४ ॥ स्वस्य सैन्यं घ्नंतं तमनिरुद्धं बलेर्नंदनः पुत्रो बली बाणः कुपितो नागपाशैर्बबंध ह खेदे बद्धं निशम्य श्रुत्वा निशाम्येति पाठः साधुः । दृष्ट्वा भृशमत्यर्थं शोकविषादाभ्यां विह्वला अश्रूणां कला बिंदवो ययोस्ते अक्षिणि नेत्रे यस्याः सोपाऽरौदिषीत् अरोदीत् आर्षं रूपम् ॥ ३५ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायां द्विषष्टितमोऽध्यायः ॥ ६२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स माधवो मधुवंशप्रभवोऽनिरुद्धः आततायिभिः उद्यतशस्त्रैर्भटैः परिवृतं तं बाणं प्रविष्टं अवलोक्य मौर्वं मुरुर्लोहविशेषस्तन्निर्मितं परिघं दण्डविशेषं उद्यम्य गृहीत्वा जिघांसया हन्तुमिच्छया तदग्रतो व्यवस्थितः । तत्र सामर्थ्यं भयकरत्वं च द्योतयन् दृष्टान्तमाह—यथा दण्डधरोन्तको यमस्तथेति ॥ ३३ ॥ जिघृक्षया गृहीतुमिच्छया परितः सर्वतः प्रसर्पतः आगच्छतस्तान् आततायिनः अहनत् जघान । तत्र दृष्टान्तमाह—सूकराणां यूथं पातीति तथा स सूकरश्रेष्ठः शुनो यथा हन्ति तथेति । ते च हन्यमानाः अतएव निर्भिन्ना मूर्धादयो येषां ते गृहाद्विनिर्गताः सन्तः प्रदुद्रुवुः पलायिताः ॥ ३४ ॥ तं स्वसैन्यं घ्नन्तमनिरुद्धं कुपितो बलिनन्दनो बाणो नागपाशैर्ग्रन्थिविशेषैर्बबन्ध, जामातृवधस्यानुचितत्वात् । तत्र तत्सामर्थ्यमाह– बलीति । हेति आश्चर्यं सूचयति । तं बद्धं निशाम्य दृष्ट्वा अनिष्टं जातमिति शोकः तज्जनितं दुःखं विषादस्ताभ्यां विव्हला अवशा, अतः अश्रूणां कला बिन्दवो ययोस्ते अक्षिणो यस्याः सा ऊषा अरौदिषीत् ॥ ३५ ॥

इति श्रीवल्लभाचार्य–वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र राजसानां निरोधने । द्वियुक् षष्टितमोध्यायो गत ऊषानिरुद्धयोः ॥
बाणस्यान्तःपुरे वृत्ति रमणविनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

स इति। स माधवो मधुवंशप्रभवोऽनिरुद्धः आततायिभिः उद्यतशस्त्रैर्भटैः परिवृतं तं बाणं प्रविष्टम् अवलोक्य मौर्वं मूर्वा लोहविशेषस्तन्निर्मितम्। मुरुर्लोहविशेष इति पठतां तोषिण्यादीनां मते ओर्गुणाभाव आर्षः। परिघं दण्डविशेषम् उद्यम्य गृहीत्वा यथा अन्तको दण्डधरस्तथा जिघांसया तदग्रतो व्यवस्थितः ॥ ३३ ॥ जिघृक्षयेति ॥ जिघृक्षया गृहीतुमिच्छया परितः सर्वतः प्रसर्पतः आगच्छतस्तान् आततायिनः सूकराणां यूथं पातीति तथा सूकरश्रेष्ठः शुनो यथा हन्ति तथाऽहनत्। शबलुगभाव आर्षः। ते च हन्यमानाः निर्भिन्नाः मूर्द्धोरुभुजा येषां ते ऊषाया भवनाद्विनिर्गताः सन्तः प्रदुद्रुवुः पलायिताः ॥ ३४ ॥ तमिति ॥ तं स्वसैन्यं घ्नन्तमनिरुद्धं कुपितो बली बलिनन्दनो बाणो नागपाशैर्ग्रन्थिविशेषैर्बबन्ध। जामातृवधस्यानुचितत्वात् बन्धश्चायं भगवदिच्छयैव। अन्यथा चतुर्व्यूहान्तर्गतस्य बाणेन बन्धनासम्भवात् तं बद्धं निशम्य दृष्ट्वा अनिष्टं जातमिति शोकः तज्जनितं दुःखं विषादस्ताभ्यां विह्वला अवशा अतः अश्रूणां कला बिन्दवो ययोस्ते अश्रूणि कलयतोऽधत्त इति तथाभूते इति वा अक्षिणी यस्याः सा ऊषा अरौदिषीत् आर्षः। अरौत्सीदिति वा पाठः सोऽप्यार्षः ॥ ३५ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां द्विषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आततायिभिः शस्त्रपाणिभिः भटैर्योद्धृभिः वृतं बाणं माधवस्य गोत्राऽपत्यं पुमान् माधवः सः अनिरुद्धः अवलोक्य मौर्वं मुरुर्लोहभेदस्तेन रचितं परिघं उद्यम्य। जिघांसया व्यवस्थितः ॥ ३० ॥ अनिरुद्ध गृहीतुमिच्छया ऊषा भवनस्य परितः प्रसर्पतः अटमानात् तान् भटान् अहनत् अहन् ॥ ३१ ॥ ततः बलिनं बलवंतमनिरुद्धं बली बलवान् बलिनंदन इति पाठे तु बलिपुत्रः बबंध बधं निशम्य दृष्ट्वा अश्रूणां कल्पबिंदुधारायोस्तथाभूते अक्षिणी नेत्रे यस्याः सा अरोदिषीत् अरोदीत् ॥ ३२ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंध-
व्याख्याने अनिरुद्धबंधो नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति। माधवः, सोऽनिरुद्धः, आततायिभिरुद्यता युधैः, अनेकैः भटैः, वृतं तं बाणं, प्रविष्टं अवलोक्य, दण्डधरः अन्तकः यथा, तद्वत् जिघांसया हेतुना, मौर्वं मूर्वाख्यं लोहकृतं, परिघं उद्यम्य, व्यवस्थितः बभूव ॥ ३३ ॥ जिघृक्षयेति। जिघृक्षया ग्रहीतुमिच्छया, परितः, प्रसर्पतः तान् भटान्, सूकरयूथपः शुनः यथा, तद्वत् अहनत्। ते आततायिनः, हन्यमाना अनिरुद्धेन ताड्यमानाः, अत एव, भवनात् विनिर्गताः। निर्भिन्नाः मूर्द्धानः ऊरवः भुजाश्च येषां तथाभूताः सन्तः, प्रदुद्रुवुः ॥३४॥ तमिति। बली बलवान्, बलिनन्दनो बलिसुतो बाणः, स्वसैन्यं घ्नन्तं, तमनिरुद्धं, कुपितः सन्, नागपाशैः, बबन्ध ह। ऊषा बद्धं निशम्य, शोकश्च विषादश्च ताभ्यां बाह्यान्तरदुःखाभ्यां विह्वला, अश्रूणां कला बिन्दवो ययोस्तथाभूते अक्षिणी यस्यास्तथाभूता सती, भृशं अरौदिषीत् रुरोद ॥ ३५ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्व-
यार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे द्विषष्टितमोऽध्यायः ॥ ६२ ॥

कृष्णप्रिया

मधुवंशज श्रीअनिरुद्धजी ने देखा कि बाणासुर अनेक प्रकार के शस्त्रास्त्रों से सुसज्ज सैनिकों को लेकर ऊषा निवास में आक्रमण के लिये आ रहा है तब वीरवर अनिरुद्ध बाणासुर को धराशायी करने के लिये लोहे का परिघ-मुद्गर को लेकर सामने आ गये तब लग रहा था खुद काल-अन्तक यमदण्ड लेकर सामने खड़ा है। बाणासुर के सैनिक अनिरुद्धजी को पकड़ने के लिये जैसे-जैसे अनिरुद्धजी पर झपटते वैसे-वैसे वीर अनिरुद्ध उन सबको मार-मार गिराते थे और भगाते थे। तब ऐसा लग रहा था कि सूकरों के सेनानायक कुत्तों को मार डालते हों। अनिरुद्ध जी के प्रहार से सैनिकों के मस्तक, हस्त, भुजा, जङ्घा आदि अङ्ग-प्रत्यङ्ग टूट गये और अपनी रक्षा के लिए महल से भाग गये ॥३३-३४॥ जब बलिष्ठ बलिनन्दन बाणासुर ने देखा कि इस युवा ने मेरी सेना कुचल डाली है तब वह अत्यंत आविष्ट-रुष्ट हो गया और नागपाश से वीर अनिरुद्ध को बांध लिया। तब ऊषा ने जाना कि अपने प्रियतम वीर अनिरुद्ध जी को बांध लिये हैं तब शोकाविष्ट और विषाद विह्वल ऊषा के नेत्रों से अश्रुधारा बहने लगी और मुक्तकंठ से रोने लगी ॥ ३५ ॥

इति श्रीमद्भागवत दशमस्कन्धनिरोधलीला उत्तरार्द्धेऽनिरुद्धबन्धे हिन्दीभाषान्तर समाप्त ॥ ६२ ॥

* * *

अथ त्रिषष्टितमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	उप.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
५३	४१	११	१	५	१८१७	३१	३३	१८८१	५८॥।	१

श्रीशुक उवाच

अपश्यतां चानिरुद्धं तद्बन्धूनां च भारत । चत्वारो वार्षिका मासा व्यतीयुरनुशोचताम् ॥ १ ॥
नारदात्तदुपाकर्ण्य वार्तां बद्धस्य कर्म च । प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः ॥ २ ॥
प्रद्युम्नो युयुधानश्च गदः साम्बोऽथ सारणः । नन्दोपनन्दभद्राद्या रामकृष्णानुवर्तिनः ॥ ३ ॥
अक्षौहिणीभिर्द्वादशभिः समेताः सर्वतोदिशम् । रुरुधुर्बाणनगरं समन्तात् सात्वतर्षभाः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—भारत ! अनिरुद्धम्, अपश्यताम्, च, अनुशोचताम्, च, तद्बन्धूनाम्, चत्वारः, वार्षिकाः मासाः, व्यतीयुः ॥ १ ॥ कृष्णदेवताः, वृष्णयः, तस्य, बद्धस्य, वार्ताम्, च, तस्य, कर्म, नारदात्, उपाकर्ण्य, शोणितपुरम्, ययुः ॥ २ ॥ प्रद्युम्नः, युयुधानः, च, गदः, साम्बः, अथ, सारणः, नन्दोपनन्दभद्राद्याः, रामकृष्णानुवर्तिनः, सात्वतर्षभाः, समेताः, द्वादशभिः, अक्षौहिणीभिः, समेताः, बाणनगरम्, समन्तात्, रुरुधुः ॥ ३–४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिकाप्रकाशः

त्रियुक्षष्टितमे चाथ बाणयादवसंगरे । स्तुतिर्ज्वरेण रुद्रेण बाणबाहुभिदो हरेः ॥ १ ॥

कर्म च युद्धादिकम् ॥ २ ॥ रामकृष्णानुवर्तिन इति । तौ पुरतो निर्गतावित्यर्थः ॥ ३ ॥ सर्वतो दिशमित्यस्योत्तरेणान्वयः ॥ ४ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

संगरः संग्रामः । बाणबाहून् भिनत्तीति तथा तस्य (१) तद्बंधूनामनिरुद्धबंधूनाम् । तदिति षष्ठ्या लुगार्षः । तस्य बंधूनाम्, चाद्दासादीनामित्यर्थः । वार्षिका वर्षाकालीनाः । वैशाखशुक्लद्वादश्यामूषायाः स्वप्नदर्शनम् । "सप्तरात्रेण ते भीरु दर्शयिष्याम्यहं प्रियम्" इति हरिवंशे चित्रलेखोक्तेर्ज्येष्ठकृष्णपक्षेऽनिरुद्धहरणात् षण्मासेष्वतीतेषु वार्षिका अपि चत्वारो मासा गतास्ततो मार्गमासारंभोऽभूत् । हे भारतेति भरतवंशश्रेष्ठपांडुवंशोद्भवस्त्वं कृष्णलीलामौग्ध्यं जानास्येवेति भावः ॥ १ ॥ तदनिरुद्धबंधनम् ॥ २ ॥ तौ रामकृष्णौ । इत्यर्थ इति–अनुवर्तनमग्रस्थस्यैव भवतीति भावः ॥ ३ ॥ उत्तरेण सर्वतोदिशम् । 'भज्यमाने पुरोद्याने' इत्यादिना सर्वतोदिशमभिनिर्ययावित्यनेन वान्वयः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्वर्थे चशब्दः भिन्नोपक्रमात् तस्य बन्धूनां सर्वयादवानां चकाराद्दासदास्यादीनाञ्च अनु निरन्तरं शोचतां सतां विशेषेणातीयुः मार्गमासारम्भोऽभूदित्यर्थः । वैशाखशुक्लद्वादशीरात्री उषायाः स्वप्नानन्तरं 'सप्तरात्रेण ते भीरु दर्शयिष्याम्यहं प्रियम्" इति श्रीहरिवंशोक्तचित्रलेखावाक्यानुसारेण ज्येष्ठप्रथमे श्रीअनिरुद्धहरणात् षण्मासेष्वतीतेष्वपि वार्षिकाश्चत्वारो मासा इति तेऽपीत्यर्थः । अतोऽत्रैव वा पूर्वचकारान्वयः तेषु त्वधिका चिन्ता जातेत्यभिप्रायात् हे भारत भरतकुलश्रेष्ठ ! पाण्डवकुलोद्भवेति त्वं पुनरेतच्छ्रीभगवतो लीलामौग्ध्यं जानास्येवेतिभावः ॥ १ ॥ तत्तस्यानिरुद्धस्य षष्ठीलुक्छान्दसः उप समीपे आकर्ण्य गुह्यत्वेन कर्णे कथनात् प्रकर्षेण महोद्यमेन ययुः यतः कृष्णस्तत्पितामहरूपः स्वयं भगवानेव देवता परमाराध्यो येषां ते इति भयाभावः सूचितः तच्छब्देन तस्य गमनं सूचितं तेषां तदनुगामित्वात् ॥ २ ॥ प्रद्युम्न इति युग्मकम् । अथ साम्बस्यानन्तरम् इति रामकृष्णानुयाने तेषां क्रम उक्तः नन्दादयोत्र पार्षदप्रवरा यादवविशेषाः समेताः स्नेहेन मिलिताः समन्तात् नैरन्तर्य्येणेत्यर्थः ॥ ३–४ ॥

---

१. पालिताः-वीर, ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

त्वर्थे च-शब्दो भिन्नोपक्रमात्, किंवा अप्यर्थे, अपश्यतामपि तस्य बन्धूनां सर्व्वयादवानाम्, चकाराद्दासदास्यादीनाञ्च, अनु निरन्तरम्, शोचतां सताम्, विशेषेणातीयुर्मार्गमासारम्भोऽभूदित्यर्थः। वैशाखशुक्लद्वादशीरात्रावूषायाः स्वप्नानन्तरम् (विष्णु० प० ११८।३०)—'सप्तरात्रेण ते भीरु दर्शयिष्याम्यहं प्रियम्' इति श्रीहरिवंशोक्तचित्रलेखावाक्यानुसारेण ज्येष्ठप्रथमेऽनिरुद्धहरणात् षण्मासेष्वतीतेष्वपि चत्वारो मासा इति प्रावृषि युद्धोद्यमाद्यसम्भवात्, किंवा श्रीभगवदिच्छया बाणानिरुद्धयोर्युद्धापेक्षया विलम्बनात्, अतो वार्षिका अपीत्यर्थः। यद्वा, श्रीवादरायणिमते वर्षारम्भ एव तद्धरणादिति दिक्। श्रीभगवति साक्षात्तत्रैव विराजमानेऽप्यनिरुद्धवृत्ताज्ञानादिनानुशोचनादाश्चर्य्येण सम्बोधयति—भारतेति। यथा त्वत्पूर्व्वजभारतकुलयुद्धादावभिमन्युपतनादावप्यज्ञवत्तस्य चेष्टितं तथेति भावः ॥ १ ॥ तत्तदा तस्येति वा, उप समीपे, आकर्ण्य गुह्यत्वेन कर्णे कथनात्, सर्व्वज्ञशिरोमणिना श्रीभगवता स्वयं तदप्रतिपादनन्तु समुद्रकोटिगम्भीरस्वभावत्वेन लौकिकलीलापेक्षया वा, श्रीनारदप्रतिष्ठार्थं वा। एवमग्रेऽपि ज्ञेयम्। प्रकर्षेण महोद्यमादिना ययुः, यतः कृष्णः साक्षाद्भगवानेव देवता इष्टदेवो येषां ते, तदादेशादिति किंवा तत्प्रसादेन सर्व्वसम्पत्तिसद्भावादिति भावः ॥ २ ॥ अथ अपि, युद्धादाविष्ट प्रसिद्धाः, सारणोऽपि यद्वा, साम्बस्यानन्तरमिति रामकृष्णानुयाने तेषां क्रम उक्तः। नन्दादयः पार्षदप्रवरा यादवविशेषाः, आद्य-शब्देन कृतवर्म्मादयो यदुवीराः; यद्वा, नन्दो गोपेन्द्र उपनन्दस्तद्भ्राता भद्रो भद्रसेना गोपसेनाध्यक्षः, आद्य-शब्दात् श्रीदामादयः, प्रायस्तेषां श्रीकृष्णस्नेहेन द्वारकायामेव निवासात्, सदा प्रयाणाद्वा, किंवा श्रीरुद्रेण सह श्रीकृष्णस्य युद्धशंकया स्नेहभरेण द्रुतं व्रजात्तदानीमेवागमनात्, ततश्चाथशब्दस्यात्रैवान्वयः। नन्दाद्या अपि प्रद्युम्नादीनाञ्च रामकृष्णानुगमने यथापूर्वमग्रयत्वम्। रामस्यादावुक्तिरग्रजत्वात्, किंवा स्नेहभरणोनुजस्याग्रे प्रयाणात्। इति सर्व्वेषां रमणाद्रामः, स्नेहेनाकर्षणाच्च कृष्ण इति ॥३॥ समेताः स्नेहेनान्योन्यं मिलिताः सन्तः, समन्तात् नैरन्तर्य्येणेत्यर्थः। यतः सात्वतेषु यादवेषु ऋषभाः श्रेष्ठाः, पक्षान्तरे गोपेन्द्रादीनां सद्भावेऽपि सात्वतर्षभा इत्युक्तिः 'छत्रिणो गच्छन्ति' इति न्यायात्, किंवा स्कान्दोक्तप्रामाण्येन यादवैरभिन्नतया तेषामपि यादवत्वात्, यद्वा, सात्वता भगवद्भक्तास्तेषु ऋषभाः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथानिरुद्धादर्शनजव्यथानां क्रमेण नारदाच्छ्रुततद्वार्त्तानां प्राप्तशोणितपुराणां यदूनां बाणेन सह सङ्ग्रामं वर्णयति त्रिषष्टितमेन—अपश्यतामिति। अनिरुद्धमपश्यतां तस्यानिरुद्धस्य बन्धूनाम् अनुशोचतां सतां वार्षिकाः आषाढाद्याश्विनान्ताश्चत्वारो मासा व्यतीयुरतिक्रान्ताः ॥ १ ॥ नारदादिति। बद्धस्यानिरुद्धस्य वार्त्तां बन्धनात् पूर्वं तस्य कर्म च श्रुत्वा कृष्णेन पालिताः कृष्णसहिता इत्यर्थः वृष्णयो यादवाः ॥ २ ॥ वृष्णीनेव प्रधानानाह–प्रद्युम्न इति। एते सर्वे रामकृष्णावनुवर्त्तन्त इति तथाभूता ययुः ॥ ३ ॥ अक्षौहिणीभिरिति समेताः सहिताः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

वार्षिकाश्चत्वारो मासा अपीत्यर्थः। वैशाखशुक्लद्वादश्यां तस्याः स्वप्नदर्शनमिति श्रीहरिवंशे ॥ १ ॥ तत् तस्य भगवानिति स्वयं सर्वज्ञत्वात्तन्महिमज्ञ एव बाणमन्यांश्च प्रति स्वपराभवेन तन्महिमानं दर्शयितुमिति भावः ॥ २-२३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

जिताभ्यां ज्वररुद्राभ्यां संस्तुतो बाणबाहुभित्। सनप्तृकः पुरीं प्रागात् त्रियुक्षष्टितमे हरिः ॥

ज्येष्ठादिषण्मासेष्वपि व्यतीतेषु चत्वारो वार्षिका इति वार्षिका अपीत्यर्थः ॥ १ ॥ तत्तस्यानिरुद्धस्य कर्म च युद्धादिकम् ॥ २-५ ॥

गूढार्थदीपिनी

सत्रिषष्टितमे घोरे बाणयादवसंयुगे। संस्तुतिर्ज्वरशर्वाभ्यां बाणबाहुच्छिदो हरेः ॥

अत्र एकश्चकारो हेतौ द्वितीयः समुच्चये। यतः व्यतीयुः अतः प्रययुरिति योज्यम्। वार्षिका वर्षाकालिकाः वार्तां तद्बन्धनवार्ताम्। कर्म युद्धादिकं च ॥ १-३ ॥ समेता मिलिताः सन्तः। सर्वतो दिशं बहिः समन्तात् अन्तश्च ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अनिरुद्धनिरोधानन्तरं बाणयादवयुद्धज्वरकृतभगवत्स्तुतिबाणबाहुच्छेदनादिकं यद्वृत्तन्तद्वर्णयति—अपश्यतामिति त्रिषष्टितमेन ॥ १ ॥ तत्तस्यानिरुद्धस्य कर्म युद्धादिकं बद्धस्य वार्त्तां कन्यान्तःपुरे वासादिकथाम् ॥ २-५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ दैवतोऽत्रैवं सत्यनिरुद्धे निरुद्धे का कथा वृत्ता द्वारकायामित्यत आह। अपश्यतामिति। वार्षिका वर्षकालसम्बन्धिनो व्यतीयुरतिक्रान्ताः ॥ १ ॥ चित्रलेख्योक्तं नारदः समरमनपगमयन्नागत्यावददिति वर्दति ॥ नारदादिति। तत्कर्म चेत्यन्वयः ॥ २ ॥ रामकृष्णमनुवर्तितुं शीलं येषां ते तथा। अनेन पुरतो द्वयोस्तदन्वेव **तेषां** गमनं ध्वन्यते ॥ ३ ॥ द्वादशभिरक्षौहिणीभिः समेताः सात्वतर्षभाः सर्वतो दिशं सर्वासु दिक्षु तथा समन्ताद्विदिक्षु च तद्बाणनगरं रुरुधुः ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

चतुर्दशे तु विजयः शिवादीनां निरूप्यते। निरोधो राजसः पूर्णो भविष्यति यतः फले ॥ १ ॥
भक्तवत्सलतां दृष्ट्वा न निरोधः क्वचित्तथा। अतोऽन्यनाशशङ्कापि भजनान्तरबाधिका ॥ २ ॥
न बाधते हरिः क्वापि विरुद्धोऽपि कथञ्चन। अक्लिष्टत्वाय तु हरेरुपेक्षात्र निरूप्यते ॥ ३ ॥
प्रद्युम्नवत्तु तस्यापि नयनेन्वेषणं नहि। अत्रापि नारदः प्रोक्तः प्रमाणं चिन्तनाधिके ॥ ४ ॥
सर्वभावेन युद्धाय ज्वरोपाख्यानमुच्यते। तामसस्तु ज्वरोऽत्रैव समुत्पन्नस्तथोत्तमः ॥ ५ ॥
शीतरोरौ पृथक् पूर्वमुत्पन्नौ मिलितौ नहि। अतो हि भगवानत्र मेलयामास सर्वथा ॥ ६ ॥

पूर्वाध्यायान्ते बन्धनमुक्तम्। एवं शोणितपुरकथायां जातायां द्वारकाकथा वक्तव्येति हेतुत्वेन पूर्वोक्तां कथामाह **अपश्यतां चानिरुद्धमिति। चकारेण गमनप्रकारज्ञानादयः** सङ्गृहीताः। अनिरुद्धोऽपि चेन्निरुद्धः, तदा सर्वमन्यथा भविष्यतीति शोकः। तद्बन्धूनाम्, चकारादन्येषाम्। **भारतेति** विश्वासार्थम्। तूष्णींभावे हेतुः **चत्वारो वार्षिका मासा व्यतीयु**रिति। वर्षायां युद्धादिगमनं बाधितमिति। **अनुशोचता**मित्यन्तः तदेकपरत्वम्। अप्रसिद्धत्वाल्लौकिकप्रकारेण न प्रमाणं सिद्धमित्यन्वेषणेऽपि नोपलब्धिः ॥ १ ॥ अतो नारदवाक्याद्वैष्णवप्रीत्यर्थं कलहार्थमुद्यता इत्याह **नारदा**दिति। तद्वृत्तान्तं फलितं बन्धनं वा। वार्तां आदितः कथां बद्धस्य **वार्ताम्**। कर्म च। तत्कन्यया सह रमणम्। चकाराद्युद्धं **च**। ततः शोणितपुरं प्रययुः युद्धार्थम्। ननु महादेवाधिष्ठितं तत्, अतस्तद्विरोधसम्भवात् कथं गता यादवा इत्याशङ्क्याह **कृष्णदेवता** इति। कृष्ण एव देवता येषाम्। अनेन सामर्थ्यमपि द्योतितम् ॥ २ ॥ लौकिकं सामर्थ्यं वक्तुं महतां नामानि गृह्णाति **प्रद्युम्न** इति। **युयुधानः** सात्यकिः। **गदो** बलभ्राता। **साम्बः** भगवत्पुत्रः। एते महारथाश्चत्वारः मुख्या गणिताः। **अथ** भिन्नप्रक्रमेण प्रकीर्णकान् गणयति **अथे**ति। चकारात्तदीयाः सारणादयो भगवद्भ्रातरः। तेऽपि चत्वारो गणिताः। एवमष्टविधा आदिभूता येषां मुख्यानां गौणानां च। सर्व एव रामकृष्णानुवर्तिनः, नतूद्धताः, स्वतन्त्रा वा। उभयोर्ग्रहणं सम्पूर्णशक्त्यर्थम्। तेषां स्वाभाविकं बलं द्वादशाक्षौहिणीयुतम्। **समेता** मिलिताः अन्योन्यवैमनस्यं परित्यज्य सर्वतो दिशं रुरुधुः। **बाणनगर**मिति प्रसिद्धम्। **समन्ता**दिति। न क्वचित्सेनाया विच्छेदः। **सात्वतर्षभा** इति। न तेषां क्वचिद्भयमिति सूचितम् ॥ ३-४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

चतुर्दशेऽध्याये। कारिकायाम्। भक्तवत्सलतेति। सर्वत्र भगवतो भक्तवत्सलता दृष्टा, परन्तु भक्तार्थं देवान्तरेण सह भगवतो विरोधो न दृष्टः। अतो हेतोर्भगवद्भजनस्य अन्तरे मध्ये बाधिका अन्यतो देवान्तरात्स्वस्य नाशशङ्कापि भक्तानां भवेदिति शेषः। अतस्तादृशशङ्कानिवृत्त्यर्थं देवान्तरविजयोऽत्र निरूप्यते इति भावः। ननु भगवान् नारदवाक्यं विना स्वत एव कुतो न प्रवृत्त इत्यत आहुः **न बाधत** इति। कथञ्चन केनचिदंशेन विरोधविषयीकृतोऽपि भगवान् स्वतः क्वापि न बाधते। तर्हि भक्तोपेक्षादोषः स्यादित्याशङ्क्य, तत्तात्पर्यमाहुः **अक्लिष्टत्वाय त्विति**। अक्लिष्टकर्मत्वबोधनार्थमित्यर्थः। **प्रमाण**मिति। प्रद्युम्नवदनिरुद्धस्यापि प्रमाजनको नारद इत्यर्थः। **तामसस्त्विति**। वक्ष्यमाणविधः शिवकलारूप इत्यर्थः। तुशब्देन प्रसिद्धो ज्वरः पूर्वमेवोत्पन्न इति तद्व्यावृत्तिः कृता। **तथोत्तम** इति। वैष्णवो ज्वर इत्यर्थः। **पूर्वमुत्पन्ना**विति। शीतोष्णज्वरौ पूर्वमुत्पन्नौ। ज्वरे शिवकलात्वमधुना जातमिति विभागः। **अपश्यता**मित्यत्र। **अनिरुद्धोपी**ति। मनोधिदेवस्यासुरनिरोधे सर्वेषां मनोऽसुरसंबन्धि भविष्यतीत्यर्थः। **प्रमाण**मिति। प्रमाहेतुरभिज्ञापकं न किञ्चित्सिद्धमित्यर्थः। **वैष्णवप्रीत्यर्था**मिति। वैष्णवानां शोक उक्तस्तन्निवृत्त्यर्थम्। अत एव भगवदाज्ञाया अपि प्रतीक्षा न कृतेति भावः।

श्रीसुबोधिनीसारः

शुकोक्तिः। हे भारत अनिरुद्धमपश्यतां वीक्षमाणानां तस्य बंधूनामनुशोचतां सतां वर्षायां भवा वार्षिकाश्चत्वारो मासा व्यतीयुर्निर्गताः ॥ १ ॥ बद्धस्य वार्तां तत् कर्म युद्धादि नारदादुपाकर्ण्य श्रुत्वा कृष्णो देवता येषां ते वृष्णयः शोणितपुरं प्रजग्मुः ॥ २ ॥ तत्र मुख्यानाह। प्रद्युम्नः युयुधानः सात्यकिः गदादयः प्रसिद्धाः रामकृष्णानुयायिनः इत्यन्येन तयोर्यानं पूर्वमेव सूचितम् ॥ ३ ॥ द्वादशभिरक्षौहिणीभिः समेता युक्ताः सात्त्वतर्षभाः सर्वतो दिशं बाणस्य नगरं समन्तात् रुरुधुः ॥ ४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्रियुक्‌षष्टितमे चाथ बाणयादवसङ्गरः । ज्वररुद्रस्तुतिः कृष्णविजयश्च निरूप्यते ॥ १ ॥

एवं शोणितपुरे बन्धनान्तमनिरुद्धवृत्तं निरूप्य द्वारकास्थानां यादवानां वृत्तमाह—अपश्यतामिति । हे भारत ! अनिरुद्धमपश्यतां चकारात् तद्गमनप्रकारं चाजानतां अत एवानुशोचतामेव सतां तस्य बन्धूनां वार्षिका वर्षोपलक्षिता आषाढाद्याश्विनान्ताश्चत्वारो मासा व्यतीयुरतिक्रान्ताः । वर्षा हि प्रतिबन्धिकेति तावदन्वेषणप्रयत्नोऽपि न कृत इति ज्ञेयम् ॥ १ ॥ बद्धस्यानिरुद्धस्य वार्तां तद्बन्धनवार्तां चित्रलेखाहरणोषारमणादिरूपं कर्म च युद्धादिरूपं नारदादुपाकर्ण्य श्रुत्वा प्रद्युम्नादयो वृष्णयो द्वादशभिरक्षौहिणीभिः सेनाभिः समेता मिलिताः युद्धार्थं शोणितपुरं प्रययुरिति त्रयाणामेकान्वयः । ननु 'श्रीमहादेवाधिष्ठितं हि तत्पुरम्, अतस्तद्विरोधेन तत्र भयसम्भवात् कथं ते निर्भयतया तत्रागता' इत्याशङ्क्याह—कृष्णदेवता इति । कृष्ण एव देवता रक्षको येषाम् । अतो न तेषां भयशङ्कालेशः ॥ २ ॥ तेषां गमने हेतुमाह—रामकृष्णानुवर्तिन इति । तावपि पुरतो गतौ, तदनु तेपि गता इत्यर्थः ॥ ३ ॥ गत्वा ते सात्वतर्षभाः यादवश्रेष्ठाः बहिः सर्वतोदिशं अन्तश्च समन्तात् सर्वतो बाणनगरं रुरुधुः ॥ ४ ॥

अन्वितार्थप्रकाशिका

त्रयःषष्टितमे बाणदोश्च्छेदी शम्भुना हरिः । तद्रक्षायै स्तुतस्तत्र श्लोका दहनमार्गणाः (१३) ॥ (५)
पञ्चोवाचेत्यर्द्धयुक्ता सप्तबाणा (५८॥) अनुष्टुभः ॥ ६३ ॥

अपश्यतामिति । हे भरत ! अनिरुद्धमपश्यतां चकारात् तद्गमनप्रकारं चाजानताम् अत एवानुशोचतामेव सतां तस्य बन्धूनां वार्षिकाः वर्षोपलक्षिता आषाढाद्याश्विनान्ताश्चत्वारो मासा व्यतीयुरतिक्रान्ताः । ज्येष्ठादिषण्मासेषु व्यतीतेष्वपि चत्वारो वार्षिका अपि तदन्तर्गता व्यतीता इति व्याख्येयम् ॥ १ ॥ नारदादिति । बद्धस्यानिरुद्धस्य वार्तां तद्बन्धनवार्तां चित्रलेखाहरणोषारमणादिरूपं कर्म च युद्धादिरूपं नारदादुपाकर्ण्य श्रुत्वा कृष्णदेवताः वृष्णयः शोणितपुरं प्रययुः ॥ २ ॥ प्रद्युम्न इति युग्मम् । द्वारकातो बर्हिर्निर्गतौ रामकृष्णौ अनुवर्तन्ते अनुगच्छन्ति तच्छीलाः प्रद्युम्नादयो द्वादशभिरक्षौहिणीभिः समेता मिलिताः ते सात्वतर्षभा यादवश्रेष्ठाः । अत्र नन्दाद्याः पार्षदाः यादवविशेषाः । बहिः सर्वतौदिशम् अन्तश्च समन्तात्सर्वतो बाणनगरं रुरुधुः ॥ ३–४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं त्रिषष्टितमेऽध्याये यादवानां शोणितपुरगमनं तेषां बाणेन सह युद्धं च शंकरज्वराभ्यां कृतश्रीकृष्णस्तवनं चानिरुद्धोद्वाहश्च निरूप्यते तस्यानिरुद्धस्य बंधूनां प्रद्युम्नादीनां ॥ १ ॥ बद्धस्य अनिरुद्धस्य कर्मसंग्रामादिकं ॥ २ ॥ रामकृष्णौ अनुवर्त्तंते इति तथाभूताः तदाज्ञानुसारेण वर्त्तमाना इत्यर्थः ताभ्यां सह ययाविति भावः ॥ ३ ॥ द्वयोः सहान्वयः बाणनगरं समंतात् रुरुधुः कथंभूतं तत् सर्वतोदिशं भज्यमानानि पुरोद्यानादीनि यस्मिस्तत् ॥ ४–५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बाणयादवसंग्रामे त्रियुक्‌षष्टितमे त्वथ । स्तवनं ज्वररुद्राभ्यां हरेर्बाणभुजच्छिदः ॥ १ ॥

अथानिरुद्धादर्शनजव्यथानां क्रमेण नारदाच्छ्रुतवार्त्तानां संप्राप्तशोणितपुराणां यदूनां बाणेन सह संग्रामं वर्णयति । अपश्यतामिति । हे भारत, अनिरुद्धं अपश्यतां चापि, अनुशोचतां तमनुशोचमानानां चापि, तद्बन्धूनां, वार्षिका आषाढाद्याश्विनान्ताः, चत्वारः मासाः, व्यतीयुरतिक्रान्ताः ॥ १ ॥ नारदादिति । बद्धस्य बाणासुरेण नागपाशेन कृतबन्धनस्यानिरुद्धस्य, वार्त्तां संदेशं, तत् बन्धनात् पूर्वमनिरुद्धेन कृतं तत्सैन्यवधादिकमित्यर्थः । कर्म च, नारदात्, उपाकर्ण्य श्रुत्वा, कृष्णपालिताः श्रीकृष्णेन कृतसर्वत्र संरक्षणाः, कृष्णेन सहिता इत्यर्थः । वृष्णयो यादवाः, शोणितपुरं, प्रययुः ॥ २ ॥ वृष्णीनेव प्रधानानाह । प्रद्युम्न इति । प्रद्युम्नः, युयुधानः सात्यकिश्च, गदः, अथ साम्बः, सारणः, नन्दश्च उपनन्दश्च भद्रश्च ते आद्या येषां ते, रामश्च कृष्णश्च तावनुवर्त्तन्ते तच्छीलाः ॥ ३ ॥ अक्षौहिणीभिरिति । सात्त्वतर्षभाः, दशभिः अक्षौहिणीभिः, समेताः सहिताः सन्तः, समन्तात्परितः, बाणनगरं, रुरुधुः । इति द्वयोरेकसंबन्धः । सर्वतोदिशमित्यस्योत्तरेणान्वयः ॥ ४ ॥

कृष्णप्रिया

श्रीशुकाचार्यजी ने कहा—राजन् ! वर्षाकाल के चार महीने व्यतीत हो गये लेकिन अनिरुद्धजी का कोई भी समाचार न मिला। सारे कुटुम्बीजन इस प्रसङ्ग से अतिशय शोकाकुल हो रहे थे। तब एक दिन देवर्षि नारद जी ने पधारकर चित्रलेखा

के माध्यम से अनिरुद्ध का शोणितपुर जाना, शोणितपुर में बाणासुर के सैनिकों को पराजित करना, बाणासुर द्वारा नागपाश से बाँधना यह सारा वृत्तान्त सुनाया। भगवान् श्रीकृष्ण को अपना सर्वस्व मानने वाले यादवों ने शोणितपुर पर आक्रमण किया। भगवान् श्रीकृष्ण और बलभद्रजी के अनुयायी सारे यादव, प्रद्युम्नजी, सात्यकि, गद, साम्ब, सारण, नन्द, उपनन्द एवं भद्र आदि ने बारह अक्षौहिणी सेना के साथ व्यूहरचना बनाकर चारों ओर से शोणितपुर को घेर लिया ॥ १-४ ॥

भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम् । प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभि[1]निर्ययौ ॥ ५ ॥
[2]बाणार्थे भगवान् रुद्रः [3]ससुतैः प्रमथैर्वृतः । आरुह्य नन्दिवृषभं युयुधे रामकृष्णयोः ॥ ६ ॥
आसीत् सुतुमुलं युद्धमद्भुतं रोमहर्षणम् । कृष्णशंकरयो राजन् प्रद्युम्नगुहयोरपि ॥ ७ ॥
कुम्भाण्डकूपकर्णाभ्यां बलेन सह संयुगः । साम्बस्य बाणपुत्रेण बाणेन सह सात्यकेः ॥ ८ ॥

कर्दमक्षमा

अन्वयः—भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम्, प्रेक्षमाणः, रुषाविष्टः, तुल्यसैन्यः, अभिनिर्ययौ ॥ ५ ॥ भगवान् रुद्रः, बाणार्थे, ससुतैः, प्रमथैः, वृतः, नन्दिवृषभम्, आरुह्य, रामकृष्णयोः, युयुधे ॥ ६ ॥ राजन् ! कृष्णशङ्करयोः, प्रद्युम्नगुहयोः, अपि, रोमहर्षणम्, सुतुमुलम्, युद्धम्, अभूत् ॥ ७ ॥ कुम्भाण्डकूपकर्णाभ्याम्, बलेन, सह, संयुगः, बाणपुत्रेण, साम्बस्य, सात्यकेः, सह, बाणेन, युद्धम्, अभूत् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भज्यमानानि पुरोद्यानादीनि। द्वंद्वैकवद्भावः। अट्टालाः प्राकारादुपरितनान्युन्नतस्थानानि। अभिनिर्ययौ बाणः ॥५॥ सुतः स्कंदस्तत्सहितैः प्रमथैर्गणैः। रामकृष्णाभ्यां युयुधे ॥ ६-१२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तुल्यसैन्यो द्वादशाक्षौहिणीसैन्यः। पुरे द्वादशाक्षौहिण्यवस्थितिस्तु रुद्रयोगबलाद्धयेया ॥ ५ ॥ सुतपदेन गणेशो न ग्राह्यस्तद्युद्धाश्रवणात्। 'प्रमथाः स्युः पारिषदाः' इत्यमरः। भगवानिति-स्वयं सर्वज्ञोऽपि स्वपराभवेण बाणमन्यांश्च प्रति कृष्णमहिमानमबोधयदिति भावः। तृतीयार्थे षष्ठी रामकृष्णयोरिति ॥ ६ ॥ सुतुमुलं सुसंकुलम् "तुमुलः कलिवृक्षे ना क्लीबं तु रणसंकुले" इति मेदिनी ॥ ७ ॥ सात्यकेः संयुग आसीदित्यन्वयः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भज्यमानेति समाहारद्वन्द्वगर्भः कर्मधारयः प्रकर्षेण सैन्यगणनादिना ईक्षमाणः तुल्यसैन्य इति सैन्याधिक्येपि दुर्मदेनात्मनः सन्याययुद्धत्वं दर्शयितुम् अन्य गो बोध्यते अतोऽभिमुखे निर्ययौ पुरात् ॥ ५ ॥ बाणार्थमिति तद्दुस्सङ्गदोषव्यञ्जनार्थमित्यर्थः। बाणार्थ इति सप्तम्यन्तं क्वचित् किञ्च भगवानिति स्वयं सर्वज्ञत्वात्तन्महिमज्ञ एव किन्तु बाणमन्यांश्च प्रति स्वपराभवेन तन्महिमानं दर्शयितुमिति भावः ॥ ६ ॥ सुतुमुलमत्यन्तमङ्कुलम् अतोऽद्भुतम् अत एव लोमहर्षणं श्रवणादपि पुलकोद्गमकरम् एवमादौ सामान्येनोक्त्वा पश्चाद्विशेषेण द्वन्द्वयुद्धमाह—कृष्णेति सार्द्धेन ॥ ७ ॥ कुम्भाण्डकूपकर्णाभ्यां सह बलेन बलस्य संयुगमासीत् ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पुरस्योद्यानादीनां यथोत्तरमान्तरत्वमुत्कृष्टत्वं वा, प्रकर्षेण चरादिद्वारा प्रत्यक्षत्वेन चेक्षमाणः, तुल्यसैन्या द्वादशाक्षौहिणीसहित इति भावत एव तत्तत्सैन्यस्य सद्भावात्, किंवा सैन्याधिक्येऽपि दुर्म्मदेन साम्यार्थमन्यत्यागात्, अतोऽभिमुखे निर्ययौ पुरात् ॥ ५ ॥ भगवान् भक्तवत्सल इति भावः। अतो रुद्भक्तानां दुःखं द्रावयतीति रुद्रः, अतएव रामकृष्णाभ्यामपि युयुधे, अन्यथा भक्तोपेक्षया तयोरेवाप्रीतेरिति भावः ॥ ६ ॥ सुतुमुलमत्यन्तसंकुलम्, अतोऽद्भुतं लोकातीतं विस्मयावहं वा, अतएव लोमहर्षणं सर्व्वांगेषु पुलकोद्गमकरम्। एवमादौ सामान्येनोक्त्वा पश्चाद्विशेषेण द्वन्द्वयुद्धमाह—कृष्णेति सार्द्धेन। तादृशयुद्धेन किंवा श्रीकृष्णेन सह श्रीशंकरस्य युद्धेन विस्मयादाह—हे राजन्निति; यद्वा, राजमानो द्वन्द्वत्वेन शोभमानोऽप्रतिहतो वा ॥ ७ ॥ संयुगः कुम्भाण्ड-कूपकर्णाभ्यां सह बलेन बलस्य ॥ ८ ॥

---

[1] विनि—वीर.। [2] बाणार्थं—वीर.। [3] स पुत्रः—प्रा. पा. ; स सुतः—वीर.।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

भज्यमानेति। भज्यमानानां पुरादीनां द्वन्द्वैकवद्भावौ यद्वा बहुव्रीहिरेव पुरमिति विशेष्याध्याहारः रुषा आविष्टो व्याप्तो बाणस्तुल्यसैन्यः द्वादशाक्षौहिणीसैन्ययुक्तः विनिर्गतः पुरादितिशेषः। अट्टालाः प्राकारादुपरितनान्युन्नतस्थानानि ॥ ५ ॥ बाणार्थमिति बाणस्य सहायार्थं ससुतः स्कन्देन सहितः नन्दिनाम वृषभमारुह्य रामकृष्णाभ्यां युयुधेऽयुध्यत ॥ ६ ॥ आसीदिति। तुमुलं सङ्कुलं रोमहर्षणं शृण्वतां पश्यताञ्च रोमोद्गमावहं कस्य केन सहेत्यत आह—कृष्णशङ्करयोरिति सार्द्धेन। हे राजन्! बलेन बलभद्रेण सह ॥ ७-८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बाणार्थमिति। तद्दुःखसङ्गदोषव्यञ्जनार्थमिति भावः। भगवानिति सर्वज्ञोपि स्वपराभवेन बाणमन्यांश्च तन्महिमानं दर्शयितुमिति भावः इति प्राञ्चः। भगवतो युद्धोत्साहसुखसम्पादनार्थं नरलीलत्वेऽपि रामाद्यवतारतो वैलक्षण्येन सर्वोत्कर्षख्यापनार्थञ्च लीलाशक्तिप्रेरिता योगमायैव ब्रह्माणमिव तमपि तदीयानपि विशेषतो मोहयामासैव अत एवोक्तं भक्तिरसामृतसिन्धौ "ब्रह्मरुद्रादिमोहनम्" इति नवीनाश्चाहुः ॥ ९-१२ ॥

गूढार्थदीपिनी

भज्यमानानि पुरोद्यानादीनि यस्य। गोपुरं नगरद्वारम् ॥ ५ ॥ सुतोऽत्र स्कन्दः नतु गणेशः तद्युद्धाश्रवणात्। रामेति तृतीयार्थे षष्ठी। आसीदित्यर्द्धम्। सुतुमुलं घनघोरम् ॥ ६-७ ॥ कृष्णेति सार्द्धम् ॥ ८-९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ससुतः स्कन्दसहितः ॥ ६-१२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भज्यमानानि पुरसमीपगान्युद्यानानि भज्यमानाः प्राकाराश्च तथाऽट्टालगोपुराणि च यस्य तन्नगरम्। पुरात्रोद्यानं तथा प्राकाराट्टालगोपुराणीत्येवं भज्यमानानि तानि यस्मिंस्तदिति वा। निर्नामभग्नानीति यावत्। न भवति पुरा पुरेति व्यर्थमिति चेत्। भज्यमानं च तत्पुरप्राकाराट्टालसहितं च तद्गोपुरं चेति विग्रहः। न नगरपदान्वय इति वा। प्रेक्षमाणो बाणो रुषाऽऽविष्टस्तुल्यं द्वादशाक्षौहिण्यात्मकं सैन्यं यस्य सः। अनेनाधुनाऽऽनीतं सैन्यं बहुलं वर्तते तन्नेति ध्वन्यते। तेन च तस्य नीतिमत्त्वं ध्वन्यत इति ध्वनिर्ध्वनिः ॥ ५ ॥ सुतः स्कन्दस्तत्सहितैः प्रमथैस्तद्गणैर्नन्दी तन्नामा चासौ वृषश्चेति विग्रहः। नन्दिवृषभमिति पाठोऽपि नन्दिनन्दिनाविति द्विरूपोक्तेः। रामकृष्णयोस्ताभ्याम् ॥ ६ ॥ गुहः षण्मुखः ॥ ७ ॥ बलेन रामेण। बाणपुत्रेण केनचित् ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

गतमात्राः पूर्वमेव तदपराधस्य सिद्धत्वात् परितो नाशयाञ्चक्रुरित्याह **भज्यमानेति**। पुराणि मध्यखण्डाः, यथा महानगरेष्ववान्तरपुराणि भवन्ति। **उद्यानमुपवनम्**। **प्राकारः** आवरणम्। **अट्टालाः** सौधगृहोपरिभागाः। **गोपुरं** पुरद्वारम्। एतानि भज्यमानानि यस्य नगरस्य। भगवदीयैः कृतं स्वनगरं तथाविधं दृष्ट्वा स्वप्रौढिख्यापनार्थं तुल्यमेव बलं गृहीत्वा अभिनिर्ययौ नगरात्। हीनबलत्वे अप्रतिष्ठा स्यात्। अधिकबलत्वे पलायनं सम्भाव्य तन्निषेधार्थं तुल्यबल एव निर्गतः ॥ ५ ॥ ततो भ्रान्तः स इति मत्वा कृष्णस्तत्र रक्षकः। ततः कोऽपि न हतो भविष्यतीति स्वयमप्यत्र पार्ष्णिग्राहो **जातः** शिव इत्याह **बाणार्थमिति**। मिथ्यात्वाय भगवत्त्वम्। **रुद्र** इति रुद्रोगान् द्रावयतीति। **ससुतः** कार्तिकेयसहितः। तेन सर्वेऽपि देवाः अत्र समागता इति बोद्धव्यम्। स हि चमूपतिः। **प्रमथैर्वृत** इति स्वभूतगणावृतत्वमुक्तम्। दैत्यत्वाद्बाणस्य दैत्याः सहजाः। अनेनैकत्र भगवान् संवत्सरात्मककालसहितः, अन्यत्र सर्व एवेति बहुत्वमप्रयोजकत्वं चोक्तम्। **आरुह्य नन्दिवृषभमिति**। स्वस्य वृद्धं बलीवर्दमारुह्य, नाट्यमिव कुर्वन्, रामकृष्णयोर्युयुधे, ताभ्यां सह। वस्तुतस्तयोरेवायम् ॥ ६ ॥ ततो युद्धं वर्णयति द्वाभ्याम् **आसीदिति**। **सुतुमुल**मत्यधिकं निरन्तरशस्त्रपातसहितम्। रोमहर्षणं श्रुते रोमाञ्चो भवतीति। विशेषत आह **कृष्णशङ्करयोरिति**। **राजन्निति** कदाचिन्महान्तोऽपि युद्धं कुर्वन्तीति। प्रद्युम्नगुहयोः उभयोः पुत्रयोः। कुम्भाण्डकूपकर्णौ दैत्यसिद्धौ। उभाभ्यां बलेन सह संयुगः। **साम्बस्य बाणपुत्रेणेति**। बाणपुत्र इत्येव प्रसिद्धिः, न तु नाम्नेति। बाणेन सह सात्यकिर्महारथः ॥ ७-८ ॥

श्रीसुबोधिनीसार:

भज्यमानानि पुरोद्यानादीनि यस्मिस्तन्नगरं प्रेक्षमाणः पश्यन् रुषाविष्टः क्रोधव्याप्तः तुल्यसैन्यो द्वादशाक्षौहिणीको बाणोऽभिनिर्ययौ योद्धुमाजगाम ॥ ५ ॥ बाणनिमित्तं सुतः स्कन्दस्तत्सहितैः प्रमथैर्गणैर्वृतो भगवान् रुद्रो नन्दिवृषभमारुह्य रामकृष्णाभ्यां युयुधे योद्धुं प्रवृत्तः ॥ ६ ॥ तथाहि हे राजन् कृष्णशिवयोः प्रद्युम्नस्कंदयोरपि सुतुमुलं संकीर्णमद्भुतं रोमहर्षणं युद्धमासीत् ॥ ८ ॥ कुभांडकूपकर्णाभ्यां बाणमन्त्रिणोर्बलेन सह संग्रामः सांबस्य बाणपुत्रेण सह संयुगः सात्यकेर्बाणेन सह संयुगः ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भज्यमानानि पुरादीनि यस्मिस्तथाभूतं स्वपुरं प्रेक्ष्य रुषा क्रोधेन आविष्टो बाणस्तुल्यसैन्यः द्वादशाक्षौहिणीसेनायुक्तः पुराद्योद्धुमभिनिर्ययौ । अट्टालाः प्राकाराद्युपरितनान्युन्नतस्थानानि । गोपुरं पुरद्वारम् ॥ ५ ॥ बाणार्थे बाणस्य सहायार्थे ससुतः स्कन्दादिसहितः प्रमथैः स्वगणैश्च वृतो भगवान् रुद्रो नन्दिनामानं बृषभमारुह्य रामकृष्णाभ्यां युयुधे । स्कन्दसाहित्योक्त्या देवसेनापि तत्पक्षे सहायार्थमागता, तस्य तत्सेनापतित्वादिति बोध्यम् ॥ ६ ॥ सुतुमुलं सङ्कुलं निरन्तरशस्त्रपातलक्षणं अत एव शृण्वतां पश्यतां च रोमहर्षणं रोमोद्गमकारणमद्भुतं युद्धमासीदित्यन्वयः । 'कस्य केन सह' इत्यपेक्षायामाह— कृष्णशङ्करयोरिति सार्द्धेन ॥ ७–८ ॥

अन्वितार्थप्रकाशिका

भज्यमानेति । भज्यमानानि पुरोद्यानानि प्राकाराः अट्टालाः प्राकाराद्युपरि उन्नतस्थानानि गोपुराणि पुरद्वाराणि च यस्मिस्तथाभूतं स्वपुरं प्रेक्षमाणः रुषा क्रोधेन आविष्टो बाणस्तुल्यसैन्यः द्वादशाक्षौहिणीसेनायुक्तः पुराद्योद्धूमभिनिर्ययौ ॥ ५ ॥ बाणेति । बाणार्थे बाणस्य सहायार्थे ससुतः स्कन्दादिसहितः प्रमथैः स्वगणैश्च वृतो भगवान् रुद्रो नन्दिनामानं वृषभमारुह्य रामकृष्णाभ्यां युयुधे । दुष्टस्यापि स्वभृत्यस्य युद्धसंकटे त्यागानौचित्यात् ॥ ६ ॥ आसीदिति अर्द्धम् । सुतुमुलं सङ्कुलं निरन्तरशस्त्रपातलक्षणम् । अत एव शृण्वतां पश्यतां च रोमहर्षणं रोमोद्गमकारणमद्भुतं युद्धमासीत् ॥७॥ कृष्णेति सार्द्धम् । स्फुटम् ॥८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रमथैर्भूतगणैः सुतेन स्कंदेन सहितः रामकृष्णयोः रामकृष्णाभ्यां सह युयुधे ॥६॥ प्रतिभटयुद्धमाह सार्द्धश्लोकेन ॥७॥ कूभांडकूपकर्णाभ्यां बाणामात्याभ्यां ॥ ८–११ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भज्यमानेति ॥ सर्वतोदिशं, पुरोद्यानानि च प्राकाराश्च अट्टालाश्च गोपुराणि च भज्यमानानि पुरोद्यानादीनि यस्मिस्तत्, पुरमिति विशेष्याध्याहारः । प्रेक्ष्य, रुषा क्रोधेन, आविष्टो व्याप्तः बाणः, तुल्यसैन्यो दशाक्षौहिणीसेनायुक्तः, अभिनिर्ययौ विनिर्गतः । पुरादिति शेषः । अट्टालाः प्राकाराद्युपरितनानि अद्भुतस्थानानि ॥ ५ ॥ बाणार्थे इति ॥ बाणार्थे बाणसहायार्थं, ससुतः प्रमथैः वृतः भगवान् रुद्रः नन्दिवृषभं नन्दिनामानं वृषभं, आरुह्य रामकृष्णयोः रामकृष्णाभ्यामित्यर्थः । युयुधे ॥ ६ ॥ आसीदिति हे राजन्, तदा कृष्णशंकरयोः, अद्भुतमाश्चर्यावहं, सुतुमुलं संकुलं, रोमहर्षणं शृण्वतां पश्यतां च रोमोद्गमावहं, युद्धं आसीत् । तयोरिव कस्य केन सह युद्धमासीत्तत्राह सपादश्लोकेन । प्रद्युम्नश्च गुहश्च तयोः अपि ॥ ७ ॥ कुम्भाण्डेति । कुम्भाण्डश्च कूपकर्णश्च ताभ्यां, अनयोर्द्वयोरित्यर्थः । बलेन बलभद्रेण सहेत्यर्थः । साम्बस्य, बाणपुत्रेण सह, सात्यकेः बाणेन सह, संयुगः युद्धमभूत् ॥ ८ ॥

कृष्णप्रिया

बाणासुर ने देखा कि यादवसेना निज नगर बगीचे, परकोटों, बुर्जों और सिंहद्वारों को नष्टभ्रष्ट कर रही है तब उसको क्रोध आया और स्वयं बारह अक्षौहिणी सेना लेकर नगर से निकल पड़ा ॥ ५ ॥ भगवान् शङ्कर भी बाणासुर की ओर से वृषभराज नन्दीश्वर सवार होकर अपने पुत्र कार्तिक स्वामी और गणों के साथ रणभूमि में आ पहुँचे और भगवान् श्रीकृष्ण और बलभद्र जी के साथ युद्ध करने लगे ॥ ६ ॥ महाराज ! यह युद्ध अति भयानक था, देखनेवालों के रोम जाग्रत हो जाते थे । भगवान् श्रीकृष्ण के साथ भगवान् शङ्कर का और प्रद्युम्नजी के साथ कार्तिक स्वामी का संग्राम हो रहा था ॥७॥ बलभद्रजी के साथ कुम्भाण्ड कूपकर्ण का और साम्बकुमार का बाणासुर के पुत्र के साथ एवं बाणासुर सात्यकि का संग्राम छिड़ गया ॥ ८ ॥

ब्रह्मादयः सुराधीशा मुनयः सिद्धचारणाः । गन्धर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥ ९ ॥
शंकरानुचराञ्छौरिर्भूतप्रमथगुह्यकान् । डाकिनी[1]र्यातुधानांश्च वेतालान्' सविनायकान् ॥ १० ॥
भूत[2]मातृपिशाचांश्च कूष्माण्डान् ब्रह्मराक्षसान् । द्रावयामास तीक्ष्णाग्रैः शरैः [3]शार्ङ्गच्युतैर्भृशम् ॥ ११ ॥
पृथग्विधानि प्रायुङ्क्त पिनाक्यस्त्राणि शार्ङ्गिणे[4] । प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—ब्रह्मादयः, सुराधीशाः, मुनयः, सिद्धचारणाः, गन्धर्वाप्सरसः, यक्षाः, विमानैः, द्रष्टुम्, आगमन् ॥ ९ ॥ शौरिः, शार्ङ्गच्युतैः, भृशम्, तीक्ष्णाग्रैः, शरैः, शङ्करानुचरान्, भूतप्रमथगुह्यकान्, डाकिनीः, यातुधानान्, च, सविनायकान्, वेतालान्, च, भूतमातृपिशाचान्, कूष्माण्डान्, ब्रह्मराक्षसान्, द्रावयामास ॥ १०–११ ॥ पिनाकी, शार्ङ्गिणे, पृथक्, विधानि, अस्त्राणि, प्रायुङ्क्त, अविस्मितः, शार्ङ्गपाणिः, प्रत्यस्त्रैः, शमयामास ॥ १२ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

युद्धमिति शेषः ॥ ९ ॥ डाकिन्यः कालखंडाशन्यः ॥ १० ॥ कु ईषदूष्मा अण्डेषु बीजेषु यस्य स कूष्माण्डः । तदाकारत्वाच्छिवगणोऽपि कूष्माण्डः । शंकरस्य स्वभक्तत्वेन तदनुचरान्भूतादीन्केवलं द्रावयामास न त्ववधीत्, भक्तवत्सलत्वात् ॥ ११ ॥ अविस्मितस्तुल्यसमर्थत्वात् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ब्रह्मा आदिर्येषां ते सुराधीशाः एतदादीनां यथोत्तरं न्यूनत्वम् ॥ ९ ॥ शङ्करेति युग्मकम् । प्रेतमातृपिशाचांश्चेति पाठः काश्यादौ । भूतमात्रेति पाठे तु पौनरुक्त्यं समाधेयं देवमातृभ्यो गौर्यादिभ्योऽन्या एता भूतमातरः द्रावयामासैव नत्ववधीत् यतः स्वभक्तस्य शङ्करस्यानुचरान् शार्ङ्गधनुषश्च्युतैः निस्सृतैरिति करुणमाहात्म्यञ्च दर्शितम् ॥ १०–११ ॥ दिव्यानि ब्रह्मास्त्रादीनि पृथक् असङ्कीर्णतया प्रायुङ्क्त पृथग्विधानीतिपाठे स एवार्थः शार्ङ्गिणे पिनाकीति चोभयोरपि धनुरादानमुक्तं तच्च परमन्याययुद्धाङ्गीकारव्यञ्जकम् अविस्मितः सावहेलः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुराधीशादीनां यथोत्तरं दिदृक्षायां न्यूनत्वम्, श्रीरुद्रप्रबोधार्थं श्रीब्रह्मादीनामेवागमने प्राधान्यात् ॥ ९ ॥ श्रीशंकरेण सह युद्धेऽग्रतोऽभिसृतांस्तदीयगणानादौ श्रीकृष्णो भंगं प्रापयामासेत्याह—शंकरेति द्वाभ्याम् । भूता देवयोनिविशेषाः, भूतादीनां यथोत्तरमुग्रत्वमपकृष्टत्वं वा ज्ञेयम् । प्रेताः पिशाचविशेषाः, द्रावयामासैव, न त्ववधीत्, यतः शंकरस्यानुचरान्, शार्ङ्गधनुषश्च्युतैर्निःसृतैरिति अमोघत्वं वेगवत्त्वादिकञ्च सूचितम् ॥ ११ ॥ दिव्यानि ब्रह्मास्त्रादीनि, पृथगसंकीर्णतया प्रायुङ्क्त पृथग्विधानीति पाठे पाठान्तरेऽपि स एवार्थः । शार्ङ्गिणे श्रीशिवविषयकाद्दूरात् सर्वसंहारक–चक्रादिव्यतिरेकेण केवलं धनुषैव युध्यमानायेत्यर्थः । एवं पिनाकीति शार्ङ्गपाणिरिति च तत्तद्धनुषैव युद्धात्, अविस्मितः श्रीरुद्रेण तत्तत्सम्प्रयोगेऽपि गर्व्वरहितः, यद्वा, तादृशयुद्धेऽपि न विगतं स्मितं यस्य सः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

ब्रह्मादय इति । सिद्धचारणादीनामितरेतरयोगद्वन्द्वः तदा गन्धर्वादयोपि (तथा गन्धर्वादीनामपि) आगमन्नाजग्मु ॥ ९ ॥ शङ्करानुचरानिति । शौरि कृष्णः शार्ङ्गाख्याद्धनुषश्च्युतैस्तीक्ष्णमग्रं येषां तैः शरैर्भूतादीन् शङ्करस्यानुचरान् द्रावयामासेति सम्बन्धः ॥ १०–११ ॥ पृथग्विधानीति । पिनाकी रुद्रः शार्ङ्गिणि कृष्णे पृथग्विधानि नानाविधान्यस्त्राणि प्रयुक्तवान् शार्ङ्गपाणिः कृष्णः अविस्मित एव तानि प्रत्यस्त्रैः समयामास ॥ १२ ॥

गूढार्थदीपिनी

शङ्करेति युग्मम् । शौरिः कृष्णः ॥ १०–११ ॥ पिनाकी रुद्रः । प्रायुङ्क्त प्रयुक्तवान् । प्रत्यस्त्रैः निवारकास्त्रैः । अविस्मित इति तुल्यसामर्थ्यादुक्तम् ॥ १२ ॥

---

[1] रक्षरक्षो वि–वीर. । [2] प्रेत–श्रीधर. वंशी. जीव. वीर. विश्व. । [3] शार्ङ्गधनुरच्युतः–श्रीधर. वंशी. जीव. वीर. विश्व. । [4] णि–वीर. ।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विमानैस्तानारुह्य ॥ ९ ॥ शौरिः कृष्णः ॥ १० ॥ शङ्करेण सह युद्धयन्नपीमांश्च शार्ङ्धनुश्च्युतैः शरैर्द्रावयामासेत्यन्वयः । पिनाकी हरः प्रत्यस्त्रैः ॥ ११-१२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

पञ्चद्वन्द्वान्युक्त्वा तस्य युद्धस्य सर्वोत्कर्षं वक्तुं ब्रह्मादीनामप्याश्चर्यादर्शनमित्याह **ब्रह्मादय** इति । देवानामीशा इन्द्रादयः । **मुनयः** सनकादयः । सिद्धाः कपिलादयः । एते त्रिविधा उत्तमाः । सिद्धचारणाः गन्धर्वाप्सरसो यक्षाश्चेति त्रिविधा निकृष्टाः । एवं षड्विधेषु निरूपितेषु सर्व एव निरूपिता भवन्ति । विमानैरागमनं युद्धाभिनिवेशेन देहविस्मरणेऽपि अपातार्थम् ॥ ९ ॥ ततः प्रतिपक्षाणां खण्डनमाह **शङ्करानुचरा**निति । देवास्तु तदीया एवेति शङ्करानुचरा एव ताडिताः । यैः पूर्वं प्रतिज्ञा कृता । **शौरि**रिति पितृनाम्ना निर्देशः । भूताः प्रमथाः गुह्यका इति त्रयः । डाकिनीरित्यादि त्रयः ॥ १० ॥ भूतमातृपिशाचाश्च कूष्माण्डा ब्रह्मराक्षसाः विनायकाश्चेति द्वादशधा भवन्ति । तान् सर्वानेव कालग्रस्तान् तीक्ष्णाग्रैः शरैः शार्ङ्गच्युतैरिति समर्थैर्हेतुभिः कृत्वा भृशं द्रावयामास । तत्प्रहारैर्व्यथिताः पलायनपरा जाताः । ततो भृत्येषु निवृत्तेषु पिनाकी पिनाकेन पृथग्विधान्यस्त्राणि शार्ङ्गिणे भगवते प्रायुङ्क्त । आदौ तुल्यतानिरूपणार्थं धनुर्द्वयग्रहणम् । भगवान् पुनस्तस्य निराकरणमेव कृतवान्, न तु तं दूरीकृतवानित्याह **प्रत्यस्त्रै**रिति । लौकिकत्वाय शार्ङ्गपाणिरिति । **अविस्मित** इति जयेऽपि गर्वाभाव उक्तः । लौकिकाभिनिवेशद्योतकः ॥ ११-१२ ॥

श्रीसुबोधिनीसारः

ब्रह्मादयो देवपतयो विमानैर्द्रष्टुमाययुः सिद्धादयश्च ॥ ९ ॥ शंकरस्यानुचरान् भूतादीन् ब्रह्मराक्षसान् तान् शौरिः श्रीकृष्णः शार्ङ्गधनुषः च्युतैः प्रचलितैस्तीक्ष्णाग्रैः शरैर्बाणैर्द्रावयामास ॥ १०-११ ॥ पिनाको अजगवंधनुस्तद्वान् पिनाकी शिवः शार्ङ्गिणे शार्ङ्गधनुष्मते श्रीकृष्णाय तमुद्दिश्य पृथग्विधानि नानाप्रकाराणि अस्त्राणि प्रायुंक्त शार्ङ्गं पाणौ यस्य स श्रीकृष्णोऽविस्मितः प्रत्यस्त्रैः तानि निवर्तयामास ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्य युद्धस्योत्कर्षं सूचयन्नाह—ब्रह्मादयो विमानैर्द्रष्टुमागमन्निति । शौरिः कृष्णः शार्ङ्गाख्यधनुषश्च्युतैस्तीक्ष्णाग्रैः शरैः भूतादीन् शङ्करानुचरान् शङ्करकिङ्करान् द्रावयमासेत्यन्वयः ॥ ९-११ ॥ पिनाकी रुद्रः शार्ङ्गिणे कृष्णाय पृथग्विधानि नानाप्रकाराणि अस्त्राणि प्रायुङ्क्त युक्तवान् । शार्ङ्गपाणिः कृष्णः अविस्मितो भयगर्वादिरहित एव तानि प्रत्यस्त्रैः शमयामास ॥१२॥

अन्वितार्थप्रकाशिका

ब्रह्मादय इति ॥ ब्रह्मादयो विमानैर्द्रष्टुमागमन् ॥ ९ ॥ शङ्करेति युग्मम् ॥ शौरि कृष्णः शार्ङ्गाख्यधनुषश्च्युतैस्तीक्ष्णाग्रैः शरैः भूतादीन् शङ्करानुचरान् शङ्करकिङ्करान्द्रावयामास । शङ्करानुचरत्वान्नावधीदित्यर्थः । अत्र भूतप्रेतयोरवान्तरजातिभेदः । यद्वा । गौर्यादिमातृभ्योऽन्या भूतमातर इति ॥ १०-११ ॥ पृथगिति ॥ पिनाकी रुद्रः शार्ङ्गिणे कृष्णाय पृथग्विधानि नानाप्रकाराणि अस्त्राणि प्रायुंक्त प्रयुक्तवान् । शार्ङ्गपाणिः कृष्णः अविस्मितो भयगर्वादिरहित एव तानि प्रत्यस्त्रैः शमयामास ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शार्ङ्गिणे श्रीकृष्णाय पिनाकी रुद्रः प्रायुंक्त प्रेरयामास ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ब्रह्मादय इति । सुराधीशा देवाधिपतयः, ब्रह्मादयः मुनयः, सिद्धाश्च चारणाश्च ते, गन्धर्वाप्सरसो गन्धर्वैः सहिताः स्वः स्त्रियः, यक्षाश्च, द्रष्टुं युद्धं निरीक्षितुं, विमानैः आगमन् ॥ ९ ॥ शंकरेति । प्रेतेति च । शौरिः श्रीकृष्णः, भूतप्रमथगुह्यकान्, डाकिनीः, यातुधानान्, सविनायकान् वेतालांश्च, प्रेतमातृपिशाचान्, कूष्माण्डान्, ब्रह्मराक्षसांश्च, शंकरानुचरान्, शार्ङ्गधनुश्च्युतैः, तीक्ष्णाग्रैः शरैः, द्रावयामासेति द्वयोरेकान्वयः ॥ १०-११ ॥ पृथगिति । पिनाकी पिनाकधनुर्धरः शिवः शार्ङ्गिणे शार्ङ्गिणं पराजेतुमित्यर्थः । क्वचित्तु शार्ङ्गिणीत्यपि पाठः । पृथग्विधानि नानाविधानि, अस्त्राणि, प्रायुङ्क्त प्रयुक्तवान् । तदपि, अविस्मितोऽस्त्रावलोकजविस्मयरहितः, शार्ङ्गपाणिः श्रीकृष्णः, प्रत्यस्त्रैः शमयामास ॥ १२ ॥

कृष्णप्रिया

इस संग्राम को देखने के लिये ब्रह्मा-इन्द्रादि देव लोग, ऋषि मुनिजन सिद्ध चारण, गन्धर्व अप्सरावृन्द और यक्ष लोग विमान में बैठकर आ गये थे ॥ ९ ॥ भगवान् शौरि श्रीकृष्ण ने शार्ङ्गधनुष के तीक्ष्णाग्र बाणों से भूत, प्रेत, प्रमथ, गुह्यक, पिशाच, कूष्माण्ड, ब्रह्माण्ड, ब्रह्मराक्षस आदि शिवानुचरों को प्रहार करके रणसंग्राम से भगा दिया ॥ १० ॥ तब पिनाकपाणि भगवान् शङ्कर जी ने शार्ङ्ग धनुषधारी भगवान् श्रीकृष्ण पर विविध प्रकार के शस्त्रास्त्रों का प्रयोग किया, तब भगवान् श्रीकृष्ण ने बिना आश्चर्य से और आसानी से विरोधी अस्त्रों से प्रतीकार किया ॥ १२ ॥

ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्वतम् । आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च ॥ १३ ॥
मोहयित्वा तु[1] गिरिशं जृम्भणास्त्रेण जृम्भितम् । बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः ॥ १४ ॥
स्कन्दः प्रद्युम्नबाणौघैरर्द्यमानः समन्ततः । असृग् विमुञ्चन् गात्रेभ्यः शिखिनापाक्रमद्[2]रणात् ॥ १५ ॥
कुम्भाण्डः कूपकर्णश्च पेततुर्मुसलार्दितौ । दुद्रुवुस्तदनीकानि हतनाथानि सर्वतः ॥ १६ ॥

कर्दमक्षमा

अन्वयः—ब्रह्मास्त्रस्य, ब्रह्मास्त्रम्, च, वायव्यस्य, पार्वतम्, च, आग्नेयस्य, पार्जन्यम्, च, नैजम्, पाशुपतस्य, क्षेपयामास ॥ १३ ॥ जृम्भास्त्रेण, जृम्भितम्, गिरिशम्, मोहयित्वा, शौरिः, बाणस्य, पृतनाम्, असिगदे, पृभिः, जघान ॥१४॥ प्रद्युम्नबाणौघैः, समन्ततः, अर्द्यमानः, स्कन्दः, गात्रेभ्यः, असृग्, व्यमुञ्चन्, शिखिना, रणात्, अपाक्रमत् ॥ १५ ॥ कुम्भाण्डः, च, कूपकर्णः, मुसलार्दितौ, पेततुः, सर्वतः, हतनाथानि, तदनीकानि, दुद्रुवुः ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रत्यस्त्राण्येवाह । ब्रह्मास्त्रस्येति । नैजं नारायणास्त्रम् ॥ १३–१४ ॥ शिखिना मयूरेण वाहनेन ॥ १५ ॥ तयोरनीकानि । हतौ नाथौ येषां तानि ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"न ह्यस्यान्यतमं किञ्चिदस्त्रं प्रत्यवकर्षणम्" इत्युक्तेर्ब्रह्मास्त्रस्य ब्रह्मास्त्रमेव प्रत्यस्त्रमिति भावः ॥ १३ ॥ जृंभणास्त्रेण निद्रोत्पादकास्त्रेण । जृंभितं जातास्फोटम् "जृभितं करणे स्त्रीणां मोहास्फोटितयोरपि" इति मेदिनी ॥ १४ ॥ 'शिखिनौ वह्नि-केकिनौ' इत्यमरः ॥ १५ ॥ सर्वतो दुद्रुवुः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ब्रह्मास्त्रस्य कृते ब्रह्मास्त्रं प्रायुङ्क्तेति पूर्वेणैवान्वयः नैजं निजं स्वार्थेऽण् ॥१३॥ जृम्भितं जृम्भायुक्तं सन्तं मोहयित्वा, तथा च हरिवंशे—

"सशरः सधनुश्चैव हरस्तेनाशु जृम्भितः । संज्ञां न लेभे भगवान् बिजेतासुररक्षसाम् ॥ इति

अस्यादीनां यथोत्तरं दूरस्थघातेन श्रैष्ठ्यम् ॥ १४ ॥ एवं श्रीकृष्णस्य जयमुक्त्वा तदीयानामाह—स्कन्द इति द्वाभ्याम् ॥ १५ ॥ कुम्भाण्ड इति । एवं साम्बेनापि बाणपुत्रो निर्जित इति ज्ञेयम् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नैजं निजमित्यर्थः । ह हर्षे चार्थे वा, अथानन्तरमेव जृम्भितं जृम्भायुक्तं सन्तं मोहयित्वा स्तम्भयित्वा; यद्वा, विसंज्ञं कृत्वा; तथा च श्रीहरिवंशे (विष्णु० प० १२५।५)–'सशरः सधनुश्चैव हरस्तेनाशु जृम्भितः । संज्ञां न लेभे भगवान् विजेताऽसुर-रक्षसाम् ॥' इति; अस्यादीनां यथोत्तरं दूरस्थ-घातने श्रैष्ठ्यम् ॥ १३–१४ ॥ एवं श्रीकृष्णस्य जयमुक्त्वा अन्येषामपि तदीयानामाह—स्कन्द इति द्वाभ्याम् । शिखिना हेतुना, तदभावेऽत्यन्तपीड़या भंगेऽप्यशक्त इति भावः ॥ १५ ॥ बलदेवस्य मुषलेनार्द्दितौ, सर्व्वत इतस्ततः सर्व्वाणीति वा । एवं साम्बेनापि बाणपुत्रो निर्ज्जित इति ज्ञेयम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह—ब्रह्मास्त्रस्येति । नैजं नारायणास्त्रं शामकं प्रायुङ्क्तेत्यर्थः ॥ १३ ॥ मोहयित्वेति । जृम्भणाख्येनास्त्रेण गिरिशं जृम्भितं जृम्भणयुक्तं यथा तथा मोहयित्वा ॥ १४ ॥ स्कन्द इति । स्कन्दः षण्मुखः असृग्रुधिरं विमुञ्चन् शिखिना मयूर-

---

[1] हरिः शंभुं–प्रा. पा. । [2] प्राद्रवद्–वीर. ।

वाहनेन सह रणस्थानात्प्राद्रवत् ॥ १५ ॥ कुम्भाण्ड इति । मुसलेन बलभद्रप्रयुक्तेनार्दितौ पीडितौ पेततुः हतौ नाथौ येषां तानि तयोरनीकानि सर्वतो दिक्षु दुद्रवः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

प्रत्यस्त्राण्येवाह— ब्रह्मास्त्रस्य शमनार्थं ब्रह्मास्त्रं प्रायुङ्क्तेति पूर्वेणैवान्वयः नैजं नारायणास्त्रम् ॥ १३-१४ ॥ स्कन्दः कार्तिकेयः शिखिना मयूरेण सह ॥ १५-१९ ॥

गूढार्थदीपिनी

नैजं नारायणास्त्रम् ॥ १३ ॥ जृम्भणास्त्रेण निद्रोत्पादकेन । जृम्भितं निद्रितम् ॥ १४ ॥ अर्द्यमानः ताड्यमानः । शिखिना मयूरवाहनेन । अपाक्रमत् पलायितवान् ॥ १५-१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रत्यस्त्राण्येव दर्शयति—ब्रह्मास्त्रस्येति । नैजं वैष्णवम् ॥ १३-१४ ॥ शिखिना मयूरेण ॥१५॥ तत्तयोः ॥ १६-२१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तदेव विशदयति । **ब्रह्मास्त्रस्येति** । वायव्यस्यास्त्रस्य पार्वतं पर्वताभिमान्यभिमन्यमानम् । तदचलनीयत्वात् । अग्ने यस्य च पार्जन्यम् । अनलस्य जलशमनीयत्वात् । नैजं निजस्य स्वस्येदं नारायणास्त्रं पाशुपतस्य पशुपतिसम्बन्धिनोऽस्त्रस्य ॥ १३ ॥ **जृम्भणास्त्रेण** जृम्भितं जृम्भणोपेतम् । तदारभ्येदमाभाणकं मया कलहः कृतश्चेत्तवास्यं त्याजयिष्यामीति प्रावर्तत लोक इति वदन्ति ॥ १४ ॥ शिखिना स्ववाहनेन मयूरेण तेन सहापाक्रमत् ॥ १५ ॥ तदनीकानि कुंभाण्डकूपकर्णसेना हतनाथानि तत्प्रायस्वामिकानि ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

विशेषत आह **ब्रह्मास्त्रस्य च ब्रह्मास्त्रमिति** । चकारात्सर्व एव ब्रह्मास्त्रभेदा गृहीताः । नात्र पूर्वात्परबलीयस्त्वम्, किन्त्वस्त्राभिज्ञानं बलं च प्रयोजकमिति लौकिकेऽपि भगवदुत्कर्ष एव । **वायव्यस्य** चेत्यत्रापि तथा । पार्वतास्त्रमेव तस्य निवारकम् । वायोर्वाय्वन्तरस्य निवारकत्वाभावात् । आग्नेयस्य च पार्जन्यम्, जलेनैवाग्निः शाम्यतीति । षष्ठ्यन्तस्य शमनार्थं प्रथमान्तं प्रायुङ्क्तेति योजना । **पृथग्विधानि** प्रायुङ्क्तेत्यत एवानुवृत्तिः । नैजं नारायणास्त्रं पाशुपतस्य निराकरणार्थं प्रायुङ्क्तेति । दृष्ट एवान्धकारस्य निवारकः सूर्यः, तथैव सत्त्वं तमसः । चकारेणावान्तराण्यस्त्राण्यपि परिगृहीतानि ॥ १३ ॥ ततः क्षीणास्त्रं जृम्भणास्त्रेण मोहयामास । जृम्भणाख्यो गणस्तृतीये निरूपितः । तदस्त्रं तद्दैवत्यम् । तुशब्दस्तु मोहाभावपक्षं व्यावर्तयति । तत्र हेतुः **गिरिशमिति** । महामोहः पर्वतेष्वेव प्रतिष्ठितः । जृम्भितमिति देवताया अनुभावो दर्शितः । अन्यथा अलौकिकप्रकारेण मोहसम्भावना स्यात् । ततो महादेवे मोहात्परावृत्ते तूष्णींभूते शयाने प्रतिकूले वा । ततो बाणस्य पृतनां शौरिर्जघान । लौकिकप्रकारेण असिगदेषुभिः सर्वथा छेदकमारकालपच्छेदकैः ॥ १४ ॥ **तत एवं** भगवद्युद्धमुक्त्वा, तथान्येषामाह **स्कन्द इति** । बाणसमूहैरर्द्यमानः असृग्व्यमुञ्चन् मूर्छित इव शिखिना हेतुना कृत्वा रणादपाक्रमत् । मयूरस्तं गृहीत्वा पलायित इत्यर्थः ॥ १५ ॥ बलभद्रस्तु विचाराभावात् मारितवानेवेत्याह **कुम्भाण्ड** इति । मुशलेन पीडितौ द्विधा विदीर्णौ सकृत्प्रहारेणैव अग्रमध्यभागभेदेन पेततुः भूमौ मृतावेव । तत्स्पष्टं ज्ञापयति **दुद्रुवुस्तदनीकानीति** । तयोरनीकानि । तौ हि सेनापती, हतौ नाथौ येषाम् । सर्वत इति केचिद्भ्रमाद्भगवत्कटकेऽपि गता इति वैक्लव्यं प्रदर्शितम् ॥ १६ ॥

श्रीसुबोधिनीसारः

तद्यथा ब्रह्मास्त्रस्य प्रत्यस्त्रं ब्रह्मास्त्रं वायव्यस्य पार्वतं पर्वतास्त्रम् आग्नेयस्य मैघं पाशुपतस्य नैजं नारायणास्त्रं प्रत्यस्त्रमित्यर्थः ॥ १३ ॥ जृंभणास्त्रेण जृंभितं गिरिशं रुद्रं मोहयित्वा शौरिः श्रीहरिः खड्गगदाबाणैर्बाणस्य पृतनां सेनां जघान ॥ १४ ॥ प्रद्युम्नस्य बाणानामोघैः पूरैरर्द्यमानः पीड्यमानः स्कन्दः समंततः सर्वतो गात्रेभ्योंगेभ्योऽसृक् रुधिरं विमुंचन् शिखिना मयूरेण वाहनेन रणात्संग्रामादपाक्रमत् निर्गतः ॥ १५ ॥ मुसलेनार्दितौ कुंभांडः कूपकर्णश्च पेततुर्मम्रतुः हतौ नाथौ येषां तानि तयोर्द्वयोरनीकानि सैन्यानि सर्वतो दुद्रुवुः ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रत्यस्त्राण्येवाह—ब्रह्मास्त्रस्येति । नैजं नारायणास्त्रम् ॥ १३ ॥ जृम्भणाख्येनास्त्रेण जृम्भितं यथा स्यात्तथा गिरिशं मोहयित्वा । स्पष्टमन्यत् ॥ १४ ॥ स्कन्दः षण्मुखः प्रद्युम्नस्य बाणौघैः बाणसमूहैः समन्ततः सर्वतः अर्द्यमानस्ताड्यमानः,

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

संख्ये युद्धे 'संख्यं समिति' इति मेदिनी ।। १७ ।। एकैकस्मिन्धनुषि ।।१८।। अपूरयदवादयत् ।। १९ ।। तन्माता बाणमाता। श्रीहरिवंशानुरोधेन महातपसा श्रीशिवपुत्रतां प्राप्तस्य तस्य पार्वतीमातृकत्वात् कोटाराख्या पार्वत्या काचिन्मूर्तिः श्रीहरिवंशादौ 'कोटवी' इति प्रसिद्धा। तथाहि–'बाणं त्रायस्व देवेशि देवि त्वम्' इति शिवादिष्टया पार्वत्या "गच्छेति लंबे शीघ्रं त्वं बाणस्य रक्षणं प्रति" इत्युक्तां लंबामधिकृत्य तद्वाक्यम्–"कृष्णस्यैकस्य तद्रूपं दर्शयत्पार्श्वमागता। अन्तर्द्धानमुपागम्य त्यक्त्वा सा वाससी पुनः ।। परित्राणाय बाणस्य विजयाधिष्ठिता पुनः। प्रमुखे वासुदेवस्य दिग्वासाः कोटवी स्थिता ।।" अस्यार्थः—दर्शयत् अदर्शयत्। विजयया विजयानाम्न्या पार्वतीसख्याऽधिष्ठिता कृतसाहाय्या। यद्वा—पार्वत्यैवाधिष्ठिता तन्मूर्तिविशेष इत्यर्थः। लंबैव कोटवीति। विष्णुपुराणे तु—कोटवी नाम मंत्रमयी दैत्यकुलदेवता–"नग्ना दैतेयविद्याऽभूत्कोटवी पुरतो हरेः" इति। बाणमाता त्वशनानाम्न्यस्ति "बाणज्येष्ठं पुत्रशतमशनायां ततोऽभवत्" इति षष्ठस्कंधोक्तेः ।। २० ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वस्य बलं सैन्यं सङ्ख्ये द्वन्द्वयुद्धे ।। १७ ।। रणदुर्मदो रणे दुरभिमानः ।। १८ ।। युगपच्चिच्छेद तच्च शरसन्धानकाल एवेति ज्ञेयम् एतच्च लीलामात्रमित्याह—भगवान् सर्वैश्वर्य्ययुक्तः सारथ्यादीनां यथाक्रममुपरिस्थितानां हननं तत्तत्संहाराद्धरिः ।। १९ ।। तस्य बाणस्य मातेति श्रीहरिवंशानुसारेण महातपसा श्री शिवपुत्रतां प्राप्तस्य तस्य पार्वतीमातृकत्वात् कोटराख्या पार्वत्याः काचिन्मूर्त्तिः श्रीहरिवंशादौ कोटरीति प्रसिद्धा, तथाच श्रीहरिवंशे "बाणं त्रायस्व देवि त्वम्" इति शिवादिष्टया पार्वत्या "गच्छेतिलम्बे शीघ्रं त्वं बाणसंरक्षणं प्रति" इत्युक्तां लम्बामधिकृत्य वाक्यम्—

कृष्णस्यैकस्य तद्रूपं दर्शयत् पार्श्वमागता। अन्तर्धानमुपागम्य त्यक्त्वा सा वाससी पुनः ।।
परित्राणाय बाणस्य विजयाधिष्ठिता पुनः। प्रमुखे वासुदेवस्य दिग्वासाः कोटरी स्थिता ।।"

अस्यार्थः दर्शयत् अदर्शयत् विजयया विजयानाम्न्या पार्वतीसख्या अधिष्ठिता कृतसाहाय्या यद्वा पार्वत्यैवाधिष्ठिता तन्मूर्त्तिविशेष इत्यर्थः। लम्बैव कोटरीति तद्विशेषश्च ततो ज्ञेयः श्रीविष्णुपुराणे तु कोटरी नाम मन्त्रमयी दैत्यकुलदेवता। तथाच तत्र "नाम्ना दैतेयविद्याभूत्कोटरी पुरतो हरेः" इति इत्यतोत्रापि कोटवीति पाठः क्वचित् रिरक्षया रिरक्षिषया ।। २० ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विशीर्य्यमाणं भंगं क्षयं वा प्राप्नुवत्, स्वस्य बलं सैन्यम्; यद्वा, सात्यकिना सह युद्धे स्वसामर्थ्यं क्षीयमाणं दृष्ट्वा अनेन सह युद्धे वृथा स्वशक्तिक्षपणेनालम्, मुख्यतमेन श्रीकृष्णेनैव युध्येयेति तमभ्यद्रवत्, द्रुतमभिमुखे आपतत्, यतो रथी नन्दीश्वरसारथिकं रथमारूढः सन्नित्यर्थः। तथा च श्रीविष्णुपुराणे (५।३३।२८)—'नन्दीश संगृहीताश्वमधिरूढो महारथम्। बाणस्तत्राययौ योद्धुम्' इति; सङ्ख्ये द्वन्द्व-युद्धे त्यक्तुमयोग्यमपि सात्यकिं हित्वैव, न तु जित्वोपेक्ष्य वेत्येव-शब्दार्थः, यतोऽत्यमर्षणः ।। १७ ।। वै अपि, पञ्चशतान्यपि, यतो रणे दुर्म्मदोऽतिमत्तः, किंवा अहं महायोद्धा सर्व्वविजयीत्यादिर्दुष्टो मदोऽभिमानो यस्य सः ।। १८ ।। युगपच्चिच्छेद, तच्च शरमोचनात् प्राक् सन्धानकाल एवेति ज्ञेयम्। यतो भगवान् सर्व्वैश्वर्य्ययुक्तः। सारथ्यादीनां यथाक्रममुपरि स्थितानां तथैव हननम्, तत्तत्संहाराद्धरिः ।। १९ ।। तस्य बाणस्य मातेति श्रीहरिवंशोक्तानुसारेण महातपसा श्रीशिवपुत्रतां प्राप्तस्य तस्य श्रीपार्व्वतीमातृकत्वात् कोटराख्या श्रीपार्व्वत्याः काचिन्मूर्त्तिः, तथा च श्रीहरिवंशे (विष्णु–प० १२६।१०८)—'बाणं त्रायस्व देवि त्वम्' इति श्रीशिवादिष्टया श्रीपार्व्वत्या (विष्णु–प० १२६।१०९)—'गच्छैहि लम्बे शीघ्रं त्वं बाणसंरक्षणं प्रति' इत्युक्तां लम्बामधिकृत्य (विष्णु० प० १२६।११०–१११)—

'कृष्णस्यैकस्य तद्रूपं दर्शयत् पार्श्वमागता। अन्तर्द्धानमुपागम्य त्यक्त्वा सा वाससी पुनः ।।
परित्राणाय बाणस्य विजयाधिष्ठता ततः। प्रमुखे वासुदेवस्य दिग्वासाः कोटवी स्थिता ।।' इति।

अस्यार्थः—दर्शयत् अदर्शयत्, विजयया विजयानाम्न्या पार्व्वतीसख्या अधिष्ठिता कृतसाहाय्याः यद्वा पार्व्वत्याधिष्ठिता तन्मूर्त्तिविशेष इत्यर्थः। लम्बैव कोटवीति, तद्विशेषश्च तत एव ज्ञेयः; श्रीविष्णुपुराणे तु कोटवी नाम मन्त्रमयी दैत्यकुलदेवता, तथा च तत्र (वि० पु० ५।३३।३६)—'नग्ना दैतेयविद्याभूत् कोटवी पुरतो हरेः' इति। इतोऽत्रापि। कोटरीति पाठः क्वचित् ।। २० ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

विशीर्यमाणमिति। विशीर्य्यमाणं हन्यमानं दृष्ट्वा अतीव न मृष्यतीति तथा स बाणः सात्यकिं प्रतियोद्धारं हित्वा अनादृत्य सङ्ख्ये युद्धे रथी सन् कृष्णमभ्यद्रवत् ।। १७ ।। धनूंषीति। रणे दुष्टो मदो यस्य स बाणः एकैकस्मिन् धनुषि द्वौ द्वौ

शरौ सन्दधे ॥ १८ ॥ तानीति । तानि संहितमात्रशराण्येव नतु प्रयुक्तबाणानि धनूंषि चिच्छेद सायकैरिति शेषः । ततः सारथिरथाश्वान् हत्वा नाशयित्वा शङ्खं पाञ्चजन्यमपूरयत् ॥ १९ ॥ तन्मातेति । तस्य बाणस्य माता कोटरा नाम नग्ना मुक्ताः विस्रस्ताः केशाः यस्यास्तथाभूता च पुत्रस्य प्राणान् रक्षितुमिच्छया कृष्णस्य पुरत उपतस्थे अवस्थितवती ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कोटरा पार्वत्या एव मूर्तिर्दैत्योपास्या कोटरीति चान्यत्रास्याः संज्ञा रिरक्षया रिरक्षिषया ॥ २० ॥

गूढार्थदीपिनी

विशीर्यमाणं पलायितं बलं सैन्यम् संख्ये युद्धे ॥ १७ ॥ युगपत् एकदैव रणे दुर्मदः उन्मत्तः ॥ १८ ॥ अपूरयत् अवादयत् ॥ १९ ॥ कोटरेति मन्त्रमयी कुलदेवता न तु तज्जननी षष्ठस्कन्धे तज्जनन्या अशनाया उक्तत्वादिति चक्रवर्ती ॥ २० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सात्यकिं हित्वा त्यक्त्वा । न च गरुडारूढानां बलरामकृष्णप्रद्युम्नानां त्रयाणां तथाऽध्वनोऽत्यसाध्यगमनत्वस्य । नारदः । स्मरणं वैनतेयस्य कर्तुमर्हसि माधव । न ह्यन्येन तदध्वानं शक्यं गन्तुं महाभुजेत्यादिना । आस्थितो गरुडं देवस्तस्य चानु हलायुधः । पृष्ठतोऽथ बलस्यापि प्रद्युम्नः शत्रुकर्शन इति हरिवंशे । तथा गतो गरुडमारुह्य स्मृतमात्रागतं हरिः । बलप्रद्युम्नसहितो बाणस्य प्रययौ पुरमिति विष्णुपुराणे पञ्चमेंऽशे स्त्रयस्त्रिंशोऽध्याये शंसनाद्द्वादशाक्षौहिण्याः सात्यक्यादीनां च तत्र गमनं न सम्भवतीति रणस्तु दूरोत्सारण इति चेत् । न ह्येको मार्गो ग्रामाणामिति शक्यगमनमार्गगमनसम्भवेन वा गरुडारूढसेनादीनां वा गमनसम्भवेन सम्भवात् । मन्दरादिभर्तुर्विनतातनयस्यास्येयत्कियदित्यौचित्यात्सात्यकिं हि वेत्यादिसम्भवात् ॥ १७ ॥ एकैकस्मिन्द्वौ द्वौ शरौ शन्दधे । आहत्य साहस्रम् ॥ १८ ॥ तानि धनूंषि युगपदेकदा रथं च चिच्छेदेत्यन्वयः । सारथिमश्वांश्च हत्वेति चान्वयः ॥ १९ ॥ तन्माता बाणे सुतामिमतिमतीति । कोटरी । उक्तं च तत्रैव । श्रुत्वा लम्बामथाब्रवीत् । गच्छेति लम्बे त्वं तूर्णं बाणसंरक्षणं प्रति । ततो योगं समास्थाय ह्यदृश्या हिमवत्सुता । कृष्णस्यैकस्य तद्रूपं दर्शयन्ती व्यवस्थिता । अन्तर्धानमुपागम्य त्यक्त्वा सा वाससी पुनः । प्रमुखे वासुदेवस्य दिग्वासा कोटरी स्थिता । अथ बाणोऽब्रवीद्वाक्यं देवदेवं सनातनम् । देव्याः पुत्रत्वमिच्छामि त्वया दत्तं त्रिलोचन । शङ्करश्च तथेत्युक्त्वा रुद्राणीमिदमब्रवीत् । कनीयान्कार्तिकेयस्य पुत्रोऽयं प्रतिगृह्यतामित्यादि पुत्रस्योक्तप्रकारेण प्राणरक्षणेच्छया ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं तयोर्वधे बाणः स्वयमागत इत्याह **विशीर्यमाण**मिति । सामान्ययुद्धं परित्यज्य विशेषतः कथं युद्धं करोतीति क्रोधः । ततः सात्यकिं हित्वैव कृष्णमभ्यद्रवत् । अत्र त्यागोऽहं त्वया सह युद्धं न करिष्यामीति । अन्यथा तेन प्रतिरुद्धः स्यात् । अलौकिकं प्रकारं प्रदर्शयिष्यामीति लौकिकपरित्यागः ॥ १७ ॥ तस्य तं प्रकारमाह **धनूंष्याकृष्येति** । साधनानां बहुत्वेऽपि प्रयत्न एक एवेति तस्य शीघ्रता श्लाघ्यते । युगपद्धनूंष्याकृष्य, बाणासुरः पञ्चशतानि योजयित्वा । आकृष्य धनुःपरीक्षां कृत्वा । एकैकस्मिन् धनुषि एकेन हस्तेन द्वौ द्वौ शरौ संदधे । तदैकदा सहस्रं बाणा भवन्ति । ननु किमित्येवमेकदैव बहुसाधनप्रक्षेपं करोतीत्याशङ्क्याह **रणदुर्मद** इति । रणे दुष्टो मदो यस्येति । न हि मत्तः संबद्धं करोति । सुतरां दुष्टो मत्तः ॥ १८ ॥ अल्पेनैव निराकरणमाह **तानि चिच्छेदेति** । युगपदेकबाणेन कमलिनीशतपत्रवेधवत् सर्वाण्येव धनूंषि छिन्नानि । ततः सारथिं रथमश्वांश्च । तेनैव न क्षतमात्रं बाणकार्यम्, किन्तु हत्वा । ततोऽपि युद्धादनिवृत्तं वीक्ष्य तदन्तःकरणे भयजननार्थं शङ्खमपूरयत् । 'यस्य ध्वनिर्दानवदर्पहन्ते'ति । ततो भीतः पलायनेऽप्यशक्तः लज्जया रिपोः स्वपश्चाद्भागमदर्शयन् तथैव स्थितः ॥ १९ ॥ ततस्तस्य महादेवगणत्वे पार्वत्या अंशरूपा तस्य धर्मतो माता अभूत् । गणमातृसमाना, धात्री मातृतः, धर्ममातृतश्च विशिष्टा सा । ततः सा क्वचित्पार्वतीत्युक्ता पर्वतोद्भवा तदंशभूता वा, नाम्ना कोटरा, मातृगणे पठिता, 'कोटरा रेवती ज्येष्ठे'त्यत्रापि प्रसिद्धा, नग्ना भूत्वा मुक्तशिरोरुहा पुत्रप्राणरिरक्षया कृष्णस्य पुरोऽवतस्थे । अनेन तस्य देवसाहाय्यं द्योतितम् । धर्मनिष्ठा चोक्ता । अनेन गणमातेयमिति निरूपणात् साक्षाज्जननी या अशना, या वा तत्पत्नी विन्ध्यावलिः, ते उभे निरस्ते ॥ २० ॥

श्रीसुबोधिनीसारः

विशीर्यमाणं छिन्नभिन्नत्वेन द्रवंतं स्वबलं दृष्ट्वाऽत्यमर्षणोऽत्यंतासहिष्णुर्बाणः संख्ये संग्रामे सात्यकिं हित्वा त्यक्त्वा रथी कृष्णमभ्यगात् ॥ १७ ॥ युगपदेकदा सहैव पंचशतानि धनूंषि आकृष्य एकैकस्मिन् धनुषि द्वौ द्वौ शरौ रणे दुर्मदो यस्य स बाणः संदधे युयोज ॥ १८ ॥ तानि धनूंषि युगपत्समकालमेव हरिः चिच्छेद सारथिं रथम् अश्वान् च हत्वा भगवान् शंखमवादयत् ॥ १९ ॥ तस्य बाणस्य माता कोटरा नाम नग्ना वस्त्रहीना मुक्ता विक्षिप्ताः शिरोरुहाः केशा यस्या यथेत्यन्ये पुत्रस्य जीवनेच्छया कृष्णस्य पुरतोऽग्रेऽवतस्थेऽधितस्थौ ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वबलं विशीर्यमाणं सर्वतः पलायितं दृष्ट्वा अतिशयेन न मृष्यतीति तथा सः रथी रथस्थो बाणः स्वप्रतियोद्धारं सात्यकिं हित्वा सङ्ख्ये युद्धे कृष्णमभ्यद्रवदित्यन्वयः ॥ १७ ॥ रणे दुर्मदः अतिगर्वितो बाणः युगपदेकदैव सहस्रबाहुत्वात् पञ्चशतैर्भुजैः पञ्चशतानि धनूंष्याकृष्य गृहीत्वा पञ्चशतैर्भुजैः एकैकस्मिन् धनुषि द्वौ द्वौ शरौ सन्दधे इत्यन्वयः ॥ १८ ॥ तत्प्रयोगात्पूर्वमेव तानि धनूंषि हरिः सायकैः चिच्छेद । तत्र सामर्थ्यमाह—भगवानिति । ततश्च सारथिं रथमश्वान् हत्वा शङ्खमपूरयत् अवादयत् ॥ १९ ॥ तदा च कोटरा नाम तस्य बाणस्य माता तस्य पुत्रस्य प्राणान् रक्षितुमिच्छया मुक्ताः शिरोरुहाः केशा यस्याः सा नग्ना सती कृष्णस्य पुरतः अवतस्थे ॥ २० ॥

अन्वितार्थप्रकाशिका

विशीर्यमाणमिति । स्वबलं विशीर्यमाणं सर्वतः पलायितं दृष्ट्वा अतिशयेन न मृष्यतीति तथा सः रथी रथस्थो बाणः स्वप्रतियोद्धारं सात्यकिं हित्वा संख्ये युद्धे कृष्णमभ्यद्रवत् ॥ १७ ॥ धनूंषीति । रणे दुर्मदः अतिगर्वितो बाणः युगपदेकदैव सहस्रबाहुत्वात् पञ्चशतैर्भुजैः पञ्च शतानि येषामिति वहुव्रीहिः । धनूंष्याकृष्य गृहीत्वा पञ्चशतैर्भुजैरेकैकस्मिन्धनुषि द्वौ द्वौ शरौ सन्दधे ॥ १८ ॥ तानीति । तत्प्रयोगात्पूर्वमेव तानि धनूंषि भगवान् हरिः सायकैः युगपत् चिच्छेद । ततश्च सारथिं रथमश्वान् हत्वा शङ्खमपूरयत् अवादयत् ॥ १९ ॥ तदिति । तदा च कोटरा नाम तस्य बाणस्य माता तस्य पुत्रस्य प्राणानां रिरक्षया रक्षितुमिच्छया । सन्लुगिडभावो वा आर्षः । मुक्ता शिरोरुहाः केशा यस्याः सा नग्ना सती कृष्णस्य पुरतः अवतस्थे । कोटरानाम्नी काचिद्देवी पार्वतीमूर्तिर्दैत्योपास्या बाणस्य मातृत्वेन उक्ता । सैव बाणं ररक्षेति हरिवंशे । इयं कोटरी कोटवी चोच्यते । विष्णुपुराणे तु मन्त्रमयी कुलदेवतेत्युक्तम् ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

रथी बाणः संख्ये युद्धे ॥१७–१९॥ तस्य बाणस्य माता कोटरानाम । विष्णुपुराणे मंत्रमयी दैत्यकुलदेवीत्युक्ता ॥२०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विशीर्यमाणमिति । बाणः, संख्ये युद्धे स्वबलं स्वसैन्यं, विशीर्यमाणं हन्यमानं दृष्ट्वा, अतीव न मृष्यतीत्यमर्षणः सन्, सात्यकिं हित्वा परित्यज्यैव, रथी रथारूढः सन्, कृष्णं अभ्यद्रवत् ॥ १७ ॥ धनूंषीति । रणे दुर्दृष्टो मदो यस्य सः, बाणः, पञ्चशतानि धनूंषि, आकृष्य, युगपत् , एकैकस्मिन् धनुषि, द्वौ द्वौ शरौ, संदधे वै ॥ १८ ॥ तानीति । भगवान् सकलैश्वर्यसंपन्नः, हरिः श्रीकृष्णः, तानि धनूंषि, युगपत् चिच्छेद । सारथिं, रथं, अश्वांश्च , हत्वा, शङ्खं पाञ्चजन्यं, अपूरयत् ध्वनितवान् ॥ १९ ॥ तन्मातेति ॥ ततः कोटरा नाम नाम्ना कोटरेति प्रसिद्धा, तन्माता बाणासुरमाता, नग्ना विवस्त्रा, मुक्ताः विस्रस्ताः केशा यस्याः सा एवंभूता सती, पुत्रस्य प्राणरिरक्षया हेतुना, कृष्णस्य पुरः, अवतस्थे ॥ २० ॥

कृष्णप्रिया

रथ में बैठकर बाणासुर सात्यकि के संग्राम खेल रहा था। उसने देखा कि मेरा सैन्य श्रीकृष्ण-बलराम-प्रद्युम्न आदि महापुरुषों के प्रहार से छिन्न भिन्न हो गया है। तब बाणासुर को बहुत क्रोध आया और सात्यकि यादववीर को छोड़कर भगवान् श्रीकृष्णजी के सम्मुख आ गया। महाराज परीक्षित्! रणदुर्मद बाणासुर ने अपने एक हजार हस्तों से एक ही साथ पाँच सौ धनुष उठा लिये, पुनः प्रत्येक धनुष में दो-दो शर संधान किया। लेकिन बाण छूटने के पहले ही भगवान् श्रीकृष्ण ने उसके सारे धनुष तोड़ दिये। रथ, सारथि, अश्वों को धराशायी कर दिया पुनः शङ्खनाद व विजय घोष किया तब बाणासुर की जननी कोटरा धर्ममाता थी वह अपने भक्त एवं सेवक पुत्र बाणासुर के प्राणों की रक्षा के लिये केश कलाप को फैलाकर विना वस्त्र देह से भगवान् श्रीकृष्ण के सन्मुख आकर खड़ी हो गयी ॥ १७–२० ॥

ततस्तिर्यङ्मुखो नग्नामनिरीक्षन् गदाग्रजः । बाणश्च [1]तावद् विरथश्छिन्नधन्वाविशत् पुरम् ॥ २१ ॥
विद्राविते भूतगणे[2] ज्वरस्तु त्रिशिरास्त्रिपात् ।[3] [4]अभ्यपद्यत दाशार्हं दहन्निव दिशो दश ॥ २२ ॥
[5]अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम् । माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥ २३ ॥
माहेश्वरः समाक्रन्दन् वैष्णवेन बलार्दितः ।
अलब्ध्वाभयमन्यत्र भीतो माहेश्वरो ज्वरः । शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः ॥ २४ ॥

---

[1] तव–प्रा. पा. । [2] पतौ–प्रा. पा. ।

[3] महादेव प्रयुक्तोऽसौ घोररूपोविभीषणः । आविर्बभूव पुरतस्समरेशार्ङ्गधन्वनः ॥–च. पु. टि. ।

[4] अभ्यधावत–श्रीधर. वंशी. जीव. वीर. विश्व. ; अन्वपद्यत–श्रीधर. टि. । [5] आविर्बभूव पुरतः समरे शार्ङ्गधन्वनः–अधिकं वीरे. ।

कर्दमक्षमा

अन्वयः—ततः, नग्नाम्, अनिरीक्षन्, गदाग्रजः, तिर्यङ्मुखः, जातः, तावत्, विरथः, च, छिन्नधन्वा, बाणः, पुरम्, आविशत् ।। २१ ।। भूतगणे, विद्राविते, त्रिशिरा, त्रिपात्, ज्वरः, तु, दश, दिशः, दहन्, इव, दाशार्हम्, अभ्यपद्यत ।। २२ ।। अथ, देवः, नारायणः, तम्, दृष्ट्वा, ज्वरम्, व्यसृजत्, माहेश्वरः, च, वैष्णवः, उभौ, ज्वरौ, युयुधाते ।।२३।। वैष्णवेन, समाक्रन्दन्, बलार्दितः, माहेश्वरः, अन्यत्र, अभयम्, अलब्ध्वा, भीतः, शरणार्थी, माहेश्वरः, ज्वरः, प्रयताञ्जलिः, हृषीकेशम् तुष्टाव ।। २४ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनिरीक्षमाणस्तिर्यङ्मुखो बभूवेति ।। २१ ।। ज्वरस्तु योद्धुमभ्यधावदिति ।। २२ ।। श्रीनारायणः शीतज्वरमसृजत ।। २३ ।। माहेश्वरः समाक्रंदन्युयुधे ।। २४ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गदाग्रज इति-गदस्यापि तादृशशक्तिपरंपरा विराजतेऽत्र तु किमद्भुतमिति भावः। ततस्तन्मातृनग्नीभवनानन्तरम्। अभूदिति शेषः। तावत्तदा ।। २१ ।। अभ्यपद्यत प्राप। श्रीहरिवंशे ज्वरस्वरूपमुक्तम्—"ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः। भस्मप्रहरणो रौद्रः कालांतकयमोपमः।" इति ।। २२ ।। अथ माहेश्वरज्वराऽऽगमनारंभे। अथाऽव्ययमारंभेपि। तं ज्वरं। स्वीयं ज्वरम्। व्यसृजदादिदेश ।। २३ ।। वैष्णवेन बलेनार्दितः पीडितः समाक्रंदन्नाकुलीभवन्। अन्यत्र नारायणेतरस्थाने। शरणार्थी "शरणं गृहरक्षित्रोर्वधरक्षणयोरपि" इति मेदिनी ।। २४ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत इत्यर्द्धकम्। गदाग्रज इति गदस्यापि तादृशशक्तिपरम्परा विराजते तत्र तु किमाश्चर्य्यमिति भावः। तत्र टीकायां योद्धुमभ्यधावदिति शेष इत्यर्थः। ज्वरोऽयुद्धयतेति शेष इति चित्सुखश्च ।। २१ ।। विद्राविते भूतगण इति श्रीशिवयुद्धादस्य प्राक्तनत्वं द्योतयति यद्वा ज्वरागमनहेतुतया अनुवादमात्रं ज्वरस्तु वर्णितः श्रीहरिवंशे—

"ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नव लोचनः। भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ।।
नदन्मेघसहस्रस्य तुल्यनिर्घातनिस्वनः। निःश्वसन् जृम्भमाणश्च निद्रान्वितनुर्भृशम् ।। इति ।। २२ ।।

अथ सद्य एवेत्यर्थः। इति कचित्कमन्यथा व्याख्यानं प्रत्याख्यानं कृतविशेषेण माहेश्वरज्वरादप्याधिक्येनासृजत् तच्च क्रीडयेत्यभिप्रायेणाह—दिव्यति क्रीडतीति देव इति यतो नारायणः तद्रूपेणांशेन तत्रापीच्छामात्रेणैव जगत्स्रष्टेत्यर्थः ।। २३ ।। माहेश्वर इत्यर्द्धकम्। समाक्रन्दन् अत्युच्चरवं कुर्वन् युयुध इति ज्ञेयं ततश्च वैष्णवेण ज्वरेण कर्त्रा बलेन करणेनार्दितः अन्यत्राभयमलब्ध्वेति भीत्या यत्र यत्रापयाति तत्र तत्र चैतं वैष्णवो ज्वरोऽनुयाति दुर्वाससं सुदर्शनमिव यं वा रक्षरक्षेति महार्त्त्या शरणं याति सोपि तमिव भयान्न रक्षतीत्यर्थः। अतो भीतः अत एव शरणं रक्षिता आश्रयो बा तदर्थी सन् प्रणतो नम्रो भक्त्या भूमिष्ठोऽञ्जलिर्यस्य सः पाठान्तरे प्रयतः भक्त्या विशुद्धः उद्यतो वाऽञ्जलिर्येन सः हृषीकेशमिति माहेश्वरोयं मयोद्वेजितः सन् मामेव शरणमागत इति कृपया तेनैवासौ तत्र प्रवर्तितः स्फूर्त्तिं प्रापितश्चेति भावः ।। २४ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गदाग्रज इति निजसर्व्वसद्गुणप्रकटनार्थं यदुकुले श्रीवसुदेवपुत्रतया पदस्याग्रे प्रादुर्भूतस्य तस्य तद्युक्तमेवेति भावः ।। २१ ।। विद्राविते भूतगण इति श्रीशिवयुद्धादस्य प्राक्तनत्वं द्योतयति, यद्वा, ज्वरागमनहेतुतयानुवादमात्रम्, ज्वरस्तु वर्णितः श्रीहरिवंशे (विष्णु० प० १२२।७१-७३)—

'ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः। भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ।।
नदन्मेघसहस्रस्य तुल्यनिर्घातनिस्वनः। निःश्वसन् जृम्भमाणश्च निद्रान्वितनुर्भृशम् ।।' इति ।। २२ ।।

अथ सद्य एवेत्यर्थः। विशेषेण माहेश्वरज्वरादप्याधिक्येनासृजत्, तच्च क्रीड़येवेत्यभिप्रायेणाह—दीव्यति क्रीड़तीति देव इति, यतो नारायण इच्छामात्रेणैवाशेषजगत्स्रष्टेत्यर्थः ।। २३ ।। बलार्दद्दितोऽपि सम्यगाक्रन्दन्; यद्वा, बलार्द्दितः सन्नत्यन्तार्त्तनादं कुर्व्वन् उच्चै रुदन् वा। एवमस्य परेणान्वयः, अन्यत्राभयमलद्ध्वेति भीत्या यत्र यत्रापयाति, तत्र तत्रैव तं वैष्णवज्वरोऽनुयाति। दुर्व्वाससं चक्रं सुदर्शनमिव, यद्वा, रक्ष रक्षेति महार्त्त्या शरणं याति, सोऽपि तमिव भयान्न रक्षतीत्यर्थः। अतो भीतः, अतएव शरणं रक्षिता आश्रयो वा, तदर्थी सन् प्रयतो भक्त्या विशुद्ध उद्यतो वा अञ्जलिर्येन सः पाठान्तरं चिन्त्यम्।

असंगतत्वेऽपि तैरव्याख्यातत्वात् । तद्दार्ढ्ये च सति प्रणतं प्रणतिस्तद्युक्तोऽञ्जलिर्यस्य, किंवा प्रकृष्टौ नताञ्जली यस्य सः। हृषीकेशमिति मोहेश्वरत्वेन कृपया तेनैवासौ तत्र प्रवर्त्तित इति भावः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत इति । नग्नामनिरीक्षमाणस्तिर्यङ्मुखो बभूव तावत्तदन्तरं लब्ध्वेत्यर्थः ॥ २१ ॥ विद्रावित इति । भूतगणे विद्राविते पलायिते सति शङ्करेण प्रयुक्तः घोरं रूपं यस्य सः विशेषेण भीषयतीति तथा त्रीणि शिरांसि यस्य त्रयः पादा यस्य स तापज्वरः दशदिशो दहन्निव दाशार्हं कृष्णमभ्यपद्यत अभ्याजगाम ॥ २२ ॥ समरे शार्ङ्गधन्वनः कृष्णस्याग्रे आविर्बभूव। अथेति । देवः कृष्णस्तं ज्वरं दृष्ट्वा ज्वरं वैष्णवं शीतज्वरं व्यसृजत् प्रायुङ्क्त माहेश्वरो वैष्णवश्चेत्युभौ ज्वरौ युयुधाते युद्धङ्कृतवन्तौ तदा वैष्णवेन ज्वरेण कर्त्रा बलेन साधनेनार्दितः विहतः माहेश्वरो ज्वरः समाक्रन्दत् रुरोद । अलब्ध्वेति । अन्यत्र अन्यतः अभयमलब्ध्वा अत एव नितरां भीतः शरणं रक्षितारं तदुपायं वा अर्थयते इति बद्धाञ्जलिः कृष्णं तुष्टाव ॥ २३-२४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

हृषीकेशमिति महेश्वरत्वेन कृपया तेनैवासौ तत्र प्रवर्त्तितः स्फूर्त्ति प्रापितश्चेति भावः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अनिरीक्षमाणस्तिर्यङ्मुखो बभूव ॥ २१ ॥ ज्वरस्तु योद्धुमभ्यधावदिति शेषः ।

"ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः । भस्मप्रहरणो रौद्रः कालान्तकयमोपमः" ॥ इति ॥ २२ ॥

शीतज्वरमसृजत् ॥ २३ ॥ समाक्रन्दन् रुदन्नभूत् अन्यत्राभयमलब्ध्वेति स्वस्वामिनः शम्भोरपि पार्श्वं गत्वा तस्य च स्वरक्षणासामर्थ्यं ज्ञात्वैव भीतः प्रणतो भक्त्या भूमिष्ठोऽञ्जलिर्यस्य सः ॥ २४ ॥

गूढार्थदीपिनी

तिर्यङ्मुखो बभूवेति योज्यम् ॥ २१ ॥ दाशार्हं श्रीकृष्णम् अभ्यपद्यत सम्मुखमाजगाम ॥ २२-२३ ॥ माहेश्वर इति सार्द्धम् । समाक्रन्दन् व्याकुलीभवन् तुष्टावेति योज्यम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

त्रीणि शिरांसि यस्य स तथा त्रयः पादा यस्य स तथा ॥ २२ ॥ तं माहेश्वरं तप्तज्वरं दृष्ट्वा शीतं वैष्णवं ज्वरं व्यसृजत् प्रायुङ्क्त ॥ २३ ॥ बलार्दितः बलादर्दितः समाक्रन्दन् सम्यक् रुदन् अभूत् ॥ २४ ॥

सत्यधर्मकृता भागवतटिप्पणी

ततस्तिर्यङ्मुखः पश्चात्याननोऽनिरीक्षन् अनिरीक्षमाणः। न नग्नां स्त्रियमीक्षेतेत्यादिप्रतिषेधात् । त्रिशिरास्त्रीणि शिरांसि यस्य सः। तथा त्रियात् । ज्वरं वैष्णवम् ॥ २२ ॥ महांश्चासावीश्वरः शिवस्तस्यायं शैवो वैष्णवश्चेति द्वौ ज्वरौ वैष्णवेन कर्त्रा बलेन करणेनार्दितः ॥ २३ ॥ अभयमन्यत्रान्यस्मात् ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्यास्तथाकरणेन यज्जातं तदाह **ततस्तिर्यङ्मुख** इति । 'नग्नां स्त्रीं प्रकटस्तनी'मिति निषेधात् अनिरीक्षन् तिर्यङ्मुखो जातः। किञ्च । गदाग्रजः। ततो भगवति परावृत्ते बाणश्च पराङ्मुखो भूत्वा पुरमविशत् । पदातिः पलायितः। विरथश्छिन्नधन्वेति । चकारात्तदीयाः सर्व एव गताः ॥ २१ ॥ एवं प्रथमयुद्धमुक्त्वा, द्वितीयराजसयुद्धार्थं भगवच्छङ्करयोः प्रस्तावनामाह **विद्राविते भूतगण** इति । यदैव भवान् तिर्यङ्मुखः, तदैव स भावस्त्यक्त इति महादेवोऽपि मोहादुद्गतः। तत आत्मविस्मरणात् साधनसेवकभूतानां भूतानां पलायनं दृष्ट्वा स्वस्य वैदिकभावेन आध्यात्मिकरूपं रुद्रं ज्वरं उत्पादयामासेत्याह । 'रुद्रः पशूंश्छमायेते'त्यत्र रुद्रो ज्वर उक्तः। 'न तस्य रुद्रः पशूनभिमन्यत' इत्यत्रापि । वैदिकमार्गेणापि भगवता सह युद्धं कर्तव्यमिति प्रवृत्त्यर्थं **विद्राविते भूतगण** इति । अत एव ज्वरोत्पत्तिरत्र नोक्ता । रूपान्तरेण रुद्र एव ज्वर इति। तुशब्दोऽन्यं ज्वरं व्यावर्तयति, स त्रिशिराः त्रिपाच्च । दाशार्हं शरणागतरक्षामर्णि कोटराहितार्थे परावृत्तमभ्यपद्यत। स्वसामर्थ्यं प्रकटयन्निवाह **दहन्निव दिशो दशेति** ॥ २२ ॥ तदा भगवान् सर्वरूपोऽपि तन्निवारककर्मरूपं परित्यज्य, प्रकारान्तरेण पूर्वोत्पन्नं शीतं ज्वरं च योजयित्वा असृजदित्याह **अथ नारायणो देव** इति । **तं ज्वररूपं** महादेवं दृष्ट्वा । स ज्वरो

रुद्रोऽष्टमूर्तेः शिवस्य कलारूपः 'यास्ते अग्ने घोरास्तनुवः । क्षुच्च तृष्णा च । अस्तु क्वानाहुतिश्च । अशनाया च पिपासा च । सेदिश्चामतिश्च । एतास्ते अग्ने घोरास्तनुव' इति श्रुतेः । 'ताभिरमुं गच्छ, योऽस्मान् द्वेष्टि, यं च वयं द्विष्म' इति श्रुत्यर्थवशात् रुद्रेण प्रेरितास्तास्तनुव एकीभूताः ज्वरत्वमापन्ना भगवत्समीपं गताः । ततो नारायणो देवः पुरुषो यज्ञरूपः 'पुरुषो ह वै नारायण' इति, तस्माद्देवतारूपमग्निं निःसारयितुं वृत्रादिवाग्नीषोमौ ज्वरं व्यसृजत् । श्रुतावपि 'इन्द्र आत्मनः शीतरोरावजनय'दित्यत्र आत्मा भगवानेव यज्ञः तत्प्रार्थनयैवासृजदिति । ततो ज्वरयोः परस्परं युद्धमासीदित्याह **माहेश्वरो वैष्णवश्चेति । उभौ प्रसिद्धौ** । यथा विष्णुशिवौ पूर्वं युयुधाते, तथा तदीयावपीति । उभयोर्ज्वरत्वात् युद्धं समानम्. तथापि देवताया एव प्राबल्यात् माहेश्वरः वैष्णवेन बलेनार्दितः सम्यगाक्रन्दत्, रोदनं कृतवान् । रुद्रप्रकृतित्वात् तामस एव पीडितो रोदिति, नेतरौ । कृतेऽपि रोदने तत्पीडायामनिवृत्तायां वैष्णवाद्भीतः स्वमूलभूतं पूर्वमेव पराजितं मत्वा शरणार्थी सन् हृषीकेशमेव शरणं गतः । अङ्गीकारार्थं तुष्टाव । **हृषीकेश**मिति भगवता तथैव प्रेरितः । किञ्च । अन्यत्राभयमलब्ध्वा पूर्वबाधां स्मृत्वा, भीतश्च । अङ्गीकारार्थं शरणार्थित्वम् । अन्तःकरणस्य तत्परत्वमनेन निरूपितम् । **प्रयताञ्जलि**रिति कायिको व्यापारो नम्रत्वरूपः ॥ २४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

धनूंष्याकृष्येत्यत्र । **साधनाना**मिति । **बाहूनामित्यर्थः** । **ततस्तिर्यङ्मुख** इत्यत्र । **किञ्चेति** । निषेधात्तिर्यङ्मुखः । गदाग्रजत्वाच्च तिर्यङ्मुख इति समुच्चयः । गदाग्रजत्वेनोद्भवहेतुत्वमुक्तम् । नग्नदर्शनं त्वमङ्गलत्वादनुद्भवकरमिति भावः । **प्रसवयुद्ध**मिति । यस्माद्युद्धान्तरं भविष्यति तादृशं प्रसवरूपं युद्धमित्यर्थः । **द्वितीयेति** । रूपान्तरेण युद्धमित्यर्थः । **विद्राविते भूतगण** इत्यत्र । **प्रवृत्त्यर्थ**मिति । भूतगणावृते देशे वैदिकप्रकारो न प्रवर्ततेत्यर्थः । **तन्निवारककर्म**रूपमिति । "**न तस्य रुद्र**' इत्यत्र ज्वरनिवारकं कर्मोक्तम् । तद्रूपं प्रकारं परित्यज्येत्यर्थः । **शीतं ज्वरं चेति** । पूर्वं रूपं शीतम् । उत्तरं रूपं वेदे रूरशब्दवाच्यो ज्वरस्तदुभौ मेलयित्वेत्यर्थः ।

श्रीसुबोधिनी-सारः

ततो हेतोर्नग्नामनिरीक्षन् नेक्षमाणो गदाग्रजः श्रीकृष्णः तिर्यङ्मुखो विमुखोऽभूत् तावत् विरथो रथहीनः छिन्नं धनुर्यस्य स बाणः पुरं शोणिताख्यमविशत् ॥ २१ ॥ भूतानां गणे विद्राविते पलायिते सति त्रीणि शिरांसि यस्य त्रयः पादा यस्य स ज्वरः तु शब्दात् षड्भुजो नवलोचन इत्यनुसंधेयः । दश दिशो दहन्निव दाशार्हं श्रीकृष्णं प्राप्तः ॥ २२ ॥ अथानंतरं तं माहेश्वरं ज्वरं दृष्ट्वा नारायणो देवो वैष्णवं ज्वरं सृष्टवान् तौ उभौ ज्वरौ युयुधाते युद्धं चक्रतुः ॥ २३ ॥ वैष्णवेन ज्वरेणार्दितः पीडितो माहेश्वरो ज्वरः समाक्रोशमानो भीतोन्यत्राऽभयं रक्षामलब्ध्वाऽप्राप्य शरणमर्थते इत्येवं शीलः कृतांजलिः हृषीकेशं हरिं तुष्टाव ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा च गदाग्रजः कृष्णस्तां नग्नामनिरीक्षमाणस्तिर्यङ्मुखो बभूव । तावत्तदन्तरं लब्ध्वा विरथश्छिन्नधन्वा बाणः पुरमविशत् ॥ २१ ॥ एवं भूतगणे भगवता विद्राविते सति गतमोहेन रुद्रेण प्रयुक्तो दशदिशो दहन्निव प्रकाशमानस्त्रिशिरास्त्रिपात् ज्वरो योद्धुं कृष्णमभ्यपद्यत अभ्याजगाम ॥ २२ ॥ अथ नारायणो देवस्तं ज्वरं दृष्ट्वा स्वकीयं शीतज्वरं व्यसृजत् । तदा च उभौ ज्वरौ युयुधाते ॥ २३ ॥ तत्र च वैष्णवेन ज्वरेण कर्त्रा बलेन साधनेनार्दितः पीडितो माहेश्वरो ज्वरो समाक्रन्दत् रुरोद । तदाऽन्यत्र भगवतोऽन्यतः अभयमलब्ध्वा, अत एव भीतः, अत एव शरणं रक्षितारमर्थयते इति शरणार्थी कृताञ्जलिश्च सन् माहेश्वरो ज्वरः हृषीकेशं सर्वेन्द्रियनियन्तारं श्रीकृष्णमेव तुष्टाव ॥ २४ ॥

अन्वितार्थप्रकाशिका

तत इति । ततश्च गदाग्रजः कृष्णः तां नग्नामनिरीक्षन् । शतार्थः । तिर्यङ्मुखो बभूव तावत्तदन्तरं लब्ध्वा विरथश्छिन्नधन्वा च बाणः पुरमविशत् ॥ २१ ॥ विद्राविते इति । एवं भूतगणे भगवता विद्राविते सति गतमोहेन रुद्रेण प्रयुक्तो दश दिशो दहन्निव प्रकाशमानस्त्रिशिरास्त्रिपात् ज्वरो योद्धुं कृष्णमभ्यपद्यत अभ्याजगाम ॥ २२ ॥ अथेति । अथ नारायणो देवस्तं ज्वरं दृष्ट्वा स्वकीयं शीतज्वरं व्यसृजत् । तदा च माहेश्वरो वैष्णवश्चेति उभौ ज्वरौ युयुधाते ॥ २३ ॥ माहेश्वर इत्यर्द्धम् । तत्र च वैष्णवेन ज्वरेण कर्त्रा बलेनार्दितः पीडितो माहेश्वरो ज्वरः समाक्रन्दत् रुरोद । समाक्रन्दन्निति पाठे उच्चैः शब्दं कुर्वन् युयुधे रुदन्नभूद्वा । अलब्ध्वेति । तदाऽन्यत्र भगवतोऽन्यतः अभयमलब्ध्वा भीतः अत एव शरणं रक्षितारमर्थयते इति शरणार्थी प्रयताञ्जलिः कृताञ्जलिश्च सन्माहेश्वरो ज्वरः हृषीकेशं श्रीकृष्णं तुष्टाव ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नग्नामनिरीक्षन् अनिरीक्ष्यमाणः सन् तिर्यङ्मुखोऽभवत् ॥ २१ ॥ त्रिशिरा इति । यस्य ज्वरस्य नवलोचनत्वं षड्भुजत्वं निद्राजृंभणादिम् त्वं चेत्येतद्धरिवंशे प्रसिद्धं ॥ २२ ॥ माहेश्वर उष्णः वैष्णवः शीतः ॥ २३-२४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः, नग्नां विवस्त्रां स्त्रियं, अनिरीक्षन्नपश्यन्, गदाग्रजः श्रीकृष्णः, तिर्यङ्मुखस्तिरश्चीनास्यः, बभूवेति शेषः । तावत्, तदन्तरं लब्ध्वेत्यर्थः । विरथः, छिन्नधन्वा, बाणश्च पुरं, अविशत् ॥ २१ ॥ ततः किं जातं तत्राह ॥ विद्राविते इति ॥ कृष्णेन, भूतगणे विद्राविते सति, शंकरेण प्रयुक्तः, त्रीणि शिरांसि यस्य सः, त्रयः पादाः यस्य सः, ज्वरः तु, दश दिशः, दहन्निव, दाशार्हं श्रीकृष्णं, अभ्यपद्यत । अत्र क्वचिच्चरमपादस्थाने घोररूपो विभीषण इति पाठः प्रतिभाति, कासुचिट्टीकासु तद्व्याख्याऽदर्शनात् स न गृहीतः ॥ २२ ॥ अथेति ॥ अथ नारायणः, देवः श्रीकृष्णः, तं माहेश्वरं ज्वरं दृष्ट्वा, वैष्णवमिति शेषः । ज्वरं वैष्णवं शीतज्वरमित्यर्थः । व्यसृजत् । ततः, माहेश्वरः महेश्वरसंबन्धी, वैष्णवो विष्णुसंबन्धी चेत्येतौ उभौ ज्वरौ, युयुधाते परस्परं युद्धं चक्रतुः । वैष्णवेन ज्वरेण, बलार्दितः बलेन पीडितः, माहेश्वरः ज्वरः, समाक्रन्ददतिशयेन रुरोद ॥२३॥ अलब्ध्वेति । अन्यत्र भगवतोऽन्यतः, अभयं निर्भयत्वं, अलब्ध्वा, भीतः माहेश्वरः ज्वरः, शरणार्थी, अत एव, प्रयताञ्जलिः सन्, हृषीकेशं तुष्टाव ॥ २४ ॥

कृष्णप्रिया

गदाग्रज भगवान् श्रीकृष्ण ने कोहरा पर अपनी दृष्टि न पड़ जाय इसलिये अपना मुंह मोड़ लिया तब बाणासुर को मौका मिल गया उनके धनुष्य टूट गये थे रथ नष्ट हो गया था निरुपाय बनकर वह अपने नगर में चला गया ॥ २१ ॥ यहाँ संग्राम से भगवान् त्रिपुरारि जी के भूतगण इधर-उधर जब भाग गये, तब भगवान् भवानी शङ्कर जी का छोड़ा हुआ त्रिशिरा त्रिपाद ज्वर दशों दिशाओं को जलाता हुआ श्रीकृष्ण प्रभु की ओर आ रहा था ॥२२॥ भगवान् श्रीद्वारिकाधीश जी ने सन्मुख आते हुए उष्ण ज्वर को जब देखा तब सामना करने के लिये अपने शीत ज्वर को छोड़ा । अब माहेश्वर ज्वर और वैष्णवज्वर परस्पर लड़ने लगे ॥ २३ ॥ दोनों ज्वरों के संघर्ष के अन्त में वैष्णव ज्वर के तेज से आर्त होकर माहेश्वर ज्वर भयपरवश अन्यत्र रक्षण न पाकर दैन्य, पुरःसर शरणार्थी बनकर अञ्जलिबद्ध श्रीहृषीकेश प्रभु की स्तुति करने लगा ॥ २४ ॥

ज्वर उवाच

नमामि त्वानन्तशक्तिं परेशं सर्वात्मानं [1]केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद् ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥ २५ ॥
कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
तत्संघातो बीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥ २६ ॥
नानाभावैर्लीलयैवोपपन्नैर्देवान् साधूँल्लोकसेतून् बिभर्षि ।
हंस्युन्मार्गान् हिंसया[10] वर्तमानान् जन्मैतत्ते भारहाराय भूमेः ॥ २७ ॥
तप्तोऽहं ते तेजसा दुःसहेन शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत्तापो देहिनां तेऽङ्घ्रिमूलं नो सेवेरन् यावदाशानुबद्धाः[11] ॥ २८ ॥

कर्दमक्षमा

अन्वयः—ज्वर उवाच—अनन्तशक्तिम्, परेशम्, सर्वात्मानम्, ज्ञप्तिमात्रम्, केवलम्, विश्वोत्पत्तिस्थानसंरोधहेतुम्, प्रशान्तम्, ब्रह्मलिङ्गम्, यत्, ब्रह्म, तत्, त्वा, ह, नमामि ॥ २५ ॥ कालः, दैवम्, कर्म, जीवः, स्वभावः, द्रव्यम्, क्षेत्रम्, प्राणः, आत्मा, विकारः, तत्, संघातः, बीजरोहप्रवाहः, एषा, त्वत्, माया; तत् निषेधम्, त्वां, प्रपद्ये ॥ २६ ॥ लीलया, एव, उपपन्नैः, नानाभावैः, देवान्, साधून्, लोकसेतून्, बिभर्षि, हिंसया, वर्त्तमानान्, उन्मार्गान्, हंसि, ते एतत्, जन्म, भूमेः, भारहाराय ॥२७॥ हे नाथ ! ते, दुःसहेन, शान्तेन, अत्युग्रेण, अत्युल्बणेन, तेजसा, ज्वरेण, तप्तः, अहम्, अस्मि; आशानुबद्धाः, यावत्, जनाः, यावत्, ते, अङ्घ्रिमूलम्, नो, सेवेरन्, तावत्, देहिनाम्, तापः ॥ २८ ॥

---

[1] केशवं–प्रा० पा० । [10] स्वेच्छया–वीर. । [11] बन्धाः–प्रा. पा. ।

श्रीधरस्वामिविरचिता भावार्थदीपिकाप्रकाशः

आत्मानं परमशक्तिमंतं मन्यमानः श्रीकृष्णं तापयितुं प्रवृत्तः स्वयमेव तप्तः संस्तं परमेश्वरं ज्ञात्वा स्तुवन्नमस्करोति। नमामीति। त्वा त्वामनंतशक्तिं नमामि। कुतः। परेषां ब्रह्मादीनामीशम्। तत्र हेतुः। सर्वात्मानं सर्वस्यात्मानं चेतयितारम्। तत्कुतः। केवलं शुद्धं ज्ञप्तिमात्रं चैतन्यघनम्। तदेवं चेतयितृत्वेन परमेश्वरत्वमुक्तम्। किंच विश्वसृष्ट्यादिहेतुत्वादपीत्याह। विश्वोत्पत्तीति। नन्वेवंभूतं ब्रह्म प्रसिद्धं नाहमिति तत्राह। यत्तद्ब्रह्मेति। यद्ब्रह्म तदेव त्वमित्यर्थः। किं तद्ब्रह्मेत्यत आह। ब्रह्मलिंगं ब्रह्मणा वेदेन लिंग्यते द्योत्यत इति। तत्कुतः। प्रशांतम्। सर्वविक्रियारहितत्वान्न साक्षाद्वाच्यमिति भावः॥ २५॥ किंच। यत्सविशेषं वस्तु तत्र वयं प्रभवामः त्वयि तु सर्वविशेषातीते न कस्यापि प्रभुत्वं किंतु त्वमेव सर्वप्रभुरिति ज्ञप्तिमात्रत्वं विवृण्वन्स्तौति। काल इति। कालः क्षोभकः। कर्म निमित्तम्। तदेव फलाभिमुखमभिव्यक्तं दैवम्, स स्वभावस्तत्संस्कारः। जीवस्तद्वान्। द्रव्यं भूतसूक्ष्माणि। क्षेत्रं शरीरम्। प्राणः सूत्रम्। आत्मा अहंकारः। विकार एकादशेंद्रियाणि महाभूतानि चेति षोडशकः। ततः संघातो लिंगदेहः। एतस्य च बीजरोहवत्प्रवाहः। रोहोंकुरो देहाद्बीजरूपं कर्म ततोंकुररूपो देहस्ततः पुनरेवमिति प्रवाहः। एषा त्वन्माया। तस्या निषेधः अपोहो यस्मिंस्तं त्वां निषेधावधिभूतं प्रपद्ये भज इति॥ २६॥ ननु देवकीतनयस्य मे कथमेवंभूतत्वं तत्राह। नानाभावैरिति। सर्वोपाधिविनिर्मुक्त एव त्वं यथा लीलया स्वीकृतैर्मत्स्याद्यवतारैर्देवान् बिभर्षि पालयसि। तदर्थं लोकसेतून्वर्णाश्रमधर्मान्। तदर्थं तदनुष्ठातॄन्साधून्। तदंगत्वेनोन्मार्गान् दैत्यादीन्हंसि संहरसि। एवमेतदपि तव जन्म भूमेर्भारहरणाय। लीलावतारोऽयं न कस्यापि त्वं तनय इत्यर्थः॥ २७॥ अतोऽज्ञानतस्त्वदभिभवे प्रवृत्तं मां तप्तं रक्षेत्याशयेनाह। तप्तोऽहमिति। ते तेजसा त्वत्सृष्टेन तेजोरूपेण ज्वरेण शांतोग्रेण शीतज्वरेण। परसंतापकस्य युक्त एव ताप इति चेदत आह। तावदिति। सेवायां प्रवृत्तानामनुचित इति भावः॥ २८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बलवद्विरोधो न सुखायेत्याह—आत्मानमित्यादिना। तं कृष्णम्। अनंतशक्तित्वे हेतुमाशंकते—कुत इति। तत्र परेशत्वे। तत्सर्वात्मत्वम्। प्रकारांतरेणापि परमेश्वरत्वमाह—किञ्चेति। निजपरमेश्वरत्वे पुनराशंकते—नन्विति। तत्राक्षेपे। इत्यर्थ इति—'अहं ब्रह्म परं धाम' इति श्रीमुखोक्तेरिति तात्पर्यम्। तत्राक्षिपति—किमिति। तत् वेदद्योत्यत्वम्। इति भाव इति—वेदोऽपीदमित्थतया न बोधयति किन्तु तात्पर्येणेत्याशयः, "यतो वाचो निवर्तन्ते" इत्यादिश्रुतेः। अनंतशक्तिमिति—मत्स्वामिनः शंभोः सकाशादपि तव शक्तिरधिकाऽनुभूतेति भावः। तत्र हेतुः—परेशम्। स ईशस्त्वं तु परमेश इत्यर्थः। सर्वात्मानमिति सर्वेषां त्वं परमात्मा भवन्नेव सर्वस्य शंभोरप्यात्मा भवसीत्यर्थः। दन्त्यादिसर्वशब्दोऽपि शंभुवाची दृष्टः 'सर्वः शर्वः शिवः स्थाणुः' इत्यादौ। ज्ञप्तिमात्रमिति शुद्धचिन्मयत्वम्, केवलमिति मायाशारण्यं निरस्तम्। मत्स्वामी शंभुस्तु मायाशरण एवेति भावः। विश्वोत्पत्तीति त्वं तु सृष्टिस्थितिसंहारकर्ता स तु केवलं संहारकर्तेति भावः। ब्रह्मणा वेदेन लिंग्यते द्योत्यत इति ब्रह्मलिंगं यद्ब्रह्म प्रशांतं तदेव त्वं स तु उग्रे ब्रह्मेति भाव इति विश्वनाथः॥ २५॥ भगवति निजासामर्थ्यमाह—किञ्चेति। तत्र सविशेषवस्तुनि। किन्तु प्रत्युत। तदेव कर्मैव। तत्संस्कारः कर्मसंस्कारः। तद्वान् कर्मसंस्कारवान्। ततः कर्मणः। ततो देहात् पुनरेवं कर्म जीवस्य मायाभिन्नत्वेऽपि मायाग्रस्तत्वान्मायात्वं तस्या मायाया निषेधो यत्र तं त्वां त्वद्देहेन्द्रियादीनि त्वन्मयान्येव न माया इत्यर्थः॥ २६॥ निजैश्वरत्वमाच्छादयन्नाक्षिपति—नन्विति। एवंभूतत्वं मायानिषेधावधिभूतत्वम्। तदर्थं देवपालनार्थम्। पुनस्तदर्थं वर्णाश्रमधर्मार्थम्। तदनुष्ठातन्वर्णाश्रमधर्मनिष्ठान्। तदंगत्वेन धर्मानुष्ठानांगत्वेन। तेषां धर्मनाशकत्वेन तद्धननमपि धर्मानुष्ठानांगमेव। एतत्कृष्णरूपमपि। इत्यर्थ इति—ब्रह्मादिरक्षकत्वेन सर्वादिकारणीभूतस्य न कस्यापि पुत्रता संपनीपद्यत इति भावः। नन्वेवंभूतश्चेत्तर्ह्यनुग्रहनिग्रहज्ञापितौ रागद्वेषौ मायिकधर्मौ किं मयि दृश्येते तत्राह—नानेति। मद्भक्तानुकूलान् बिभराणि एतांस्तत्प्रतिकूलान् हनानीत्येवं भक्तवत्सलस्य तव ये नाना भावा अभिप्रायास्तैर्लीलयानया बाणयुद्धादिकयैवोपपन्नैर्देवानिन्द्रादीन्साधून्मुन्यादींश्च बिभर्षि। उभयेषामपि विशेषणं लोकसेतून् लोकाश्रयभूतान्। तेन भक्तवात्सल्यांगभूतौ रागद्वेषौ तेन न मायिकाविति। अहो मयेदमवगतमित्याह—एतत्ते जन्म भूमेः परमभक्तायाः भारहाराय तादृशसाधुशिरोमणिभक्तवृंदानुग्रहमयत्वाद्दुष्टहिंसादिकोपि तव मायातीतो महागुण एवेति भाव इति विश्वनाथः॥ २७॥ यतस्त्वमेव सर्वशोऽसीत्यतो हेतोः। इति भाव इति—'अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः' इति न्यायेन नायं महतामुचितः। किञ्च—तवास्मीति वदतो हननवदधुना मम संतापोऽपि पातक एवेति तात्पर्यम्। ज्वररूपेण ते तव तेजसा शान्तमपि 'मल्लानामशनिः' इत्यादिन्मादृशदुर्जनं प्रत्युग्रायमाणं यत्तेन तत्राप्युल्बणेन महोद्भटेन। तापः सर्वोपि किं पुनर्ज्वरमात्रकृत इत्यर्थः। नो सेवेरन्नाश्रयेरन्। तत्र हेतुः—आशाभिः पुत्रवित्तलोकेषणाभिर्बद्धा इति। अधुनाहं त्वत्सेवक एवाभूवमिति भाव इति तोषिणी॥२८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीमान् महेश्वरोप्यनेन जृम्भित इति पूर्णभगवद्बुद्ध्या परिवृत्यागत्य शरणयोग्यत्वं स्तुतियोग्यत्वं च व्यञ्जयन् नमस्करोति नमामीति—तैर्व्याख्यातं तत्र केवलमित्यादावयं भावः शुद्धचैतन्यमेव खल्वात्मा भवति चेतयिताच चैतन्यादेव हि

जडप्रवृत्तिर्दृश्यते ततस्तस्यैव तच्छक्तित्वं तत्तदीशितृत्वञ्च एवं सांसारिकजीवचैतन्यस्य स्वस्वाधिष्ठानगतमेव तत्तत्परमात्मचैतन्यस्य तु सर्वगतम् अतो वाय्वादि महाभूतप्रवृत्तिरपि तस्मादेव न विना त्वत्क्रियते किञ्च नारे "भीषास्माद्वातः पवते" "एको देवः सर्वभूतेषु गूढः" इत्यादिश्रुतेः। अतोऽनन्तशक्तित्वं ब्रह्मादीशितृत्वञ्च तस्यैव घटत इति एवं व्यष्टिद्वारा तस्य तत्तन्निरूप्य समष्टिद्वारापि निरूपयतीत्याह—किञ्चेति प्रशान्तमित्यादावयं भावः विकारजातमेव हि सर्वेषां प्रतीतिविषयः स्यात् अनुभूतजातीयत्वात् ततः शब्दोपि तदेव साक्षाद्बोधयितुं शक्नोति नत्वविकृतं तद्रूपम् अनुभूतजातीयतो विलक्षणत्वात् अतः कथञ्चित् द्योतयत्येव तदिति अथवा ननु ब्रह्म निर्विशेषम् अहन्तु श्रीमद्विग्रहरूपत्वात्सविशेषं तत्राह ब्रह्मैव लिङ्गं श्रीविग्रहो यस्य तं तत्स्वरूपशक्तिवृत्तिवैचित्र्याविष्कारेण शुद्ध ब्रह्मैवैतद्रूपेण प्रकाशित इति भावः। यद्वा ब्रह्मणा वेदेन लिङ्ग्यसे तथा व्यज्यसे यस्तं यद्वा ब्रह्मणो लिङ्गं लक्षणं यत्र तं विद्वदनुभूततादृशत्वमित्यर्थः। यतः प्रशान्तम् अविकृतं प्रकृष्टं शान्तं शान्तिसुखरूपमिति यावद्वा ॥ २५ ॥ एवं नमस्कुर्वन्नेव शरणत्वसम्पादनाय सर्वाश्रयत्वं न्यरूपयत् सर्वाश्रयत्वेपि केवलत्वादिना तत्तद्दापालिप्तत्वञ्च तदेवाधुना विवृण्वन् शरणं याति—काल इति। क्षेत्रं प्रकृतिरिति टीकायाः पाठो युक्तः क्षेत्रं शरीरमिति पाठेपि तच्छब्देन कथञ्चित्प्रकृतिरेव व्याख्येया पौनरुक्त्यात् जीवः सोपाध्यवस्थः एषा त्वन्माया एते तव बहिरङ्गशक्तेरेव विलासा इत्यर्थः प्रपद्ये शरणतयाश्रये मायावृतत्वादस्माकमिति भावः ।।२६।। नन्वेवं निर्दोषश्चेदहं तर्हि कथं कांश्चिद्धन्मि—तत्राह नानेति। लीलानिजपरिकररूपैर्भक्तैः सह क्रीडा तयैव हेतुना उपपन्नैर्योग्यतां लब्धैर्नानाभावैः एतान् मद्भक्तानुगतान् बिभराणि तत्प्रतिकूलांस्त्वेतान् हन्मीत्येवं ये नानाभावा विचित्राभिप्रायाः तैर्देवानिन्द्रादीन् साधूंश्च मुन्यादीन् बिभर्षि उभयेषामपि विशेषणं लोकसेतून् लोकाश्रयरूपानीति तथा उन्मार्गान् हंसि यतोऽयमवतार एतदर्थमित्याह—जन्मेति। भूमेः परमभक्तायाः पृथिव्याः अतस्तादृशसाधुशिरोमणिभक्तवृन्दानुग्रहमयत्वाद्दुष्टहिंसादिकोपि तव मायातीतो महागुण एवेति भावः ।। २७ ।। एवं शरणमागम्य तन्निमित्तं निवेदयति—तप्त इति। ज्वररूपेण ते तव तेजसा शान्तमपि "मल्लानामशनिः" इत्यादिवत् मादृशदुर्जनं प्रत्युग्रायमाणं यत्तेन तत्राप्युल्बणेन महोद्भटेन तापः सर्वोपि किम्पुनर्ज्वरमात्रकृत इत्यर्थः। नोसेवेरन् नाश्रयेरन् असेवने हेतुः आशाभिः पुत्रवित्तलोकैषणाभिरनु निरन्तरं बद्धा इत्यर्थः। यद्वा सेवाधिकारिण आह आशया त्वदेककृपातृष्णया अनुबद्धा इति ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

केवलमेकमपि सर्व्वेषामात्मानं हृदि हृदि परमात्मरूपेण वर्त्तमानम्। अन्यत्तैर्व्याख्यातम्। यद्वा, यज्जीवतत्त्वं ब्रह्म तदपि त्वम्, जीवानां तत्त्वतस्त्वदंश्यंशत्वात्; किञ्च, ब्रह्मलिंगं ब्रह्मघनमूर्त्तिमित्यर्थः, परब्रह्मत्वात्, अतएव प्रकृष्टं शान्तं शान्तिः सुखं यस्मात्तत्, तद्रूपं वा ॥ २५ ॥ कालादीनां यथोत्तरं सौक्ष्म्याधिक्य-न्यूनताभ्यां सङ्घातत्वे श्रेष्ठ्यम्; अन्यत्तैर्व्याख्यातम्। ईदृशं तज्ज्ञानं मायिकप्रवाहान्तःपतितानां मादृशां त्वत्कृपया मायानिवृत्तौ सत्यामेव सदा सुसिध्यतीत्येतदर्थं त्वामाश्रयामीत्याह—काल इति। दैवं देवस्य तवेच्छारूपम्, स्वभावः शान्तत्वादिः, क्षेत्रं चित्तं बुद्धिश्च, तस्या मायाया निषेधो यस्मात्तम्, अतस्त्वन्मायाहतस्य ममागस्त्वया क्षन्तव्यमिति भावः॥ २६ ॥ यद्यप्येवं पूर्व्वतः श्रीनारायणरूपेण विविधावतारैश्च कृपां तनोषि, तथाप्यधुना निजाशेषभगवत्ताप्रकटनार्थं स्वयमवतीर्णो विशेषतोऽखिललोकहितं करोषीत्याह—नानेति। विवधावतारैरूपपन्नैस्त्वद्योगैः सर्व्वैश्वर्य्ययुक्तैरित्यर्थः। अतो लीलयैव देवादीन् विभर्षि, उन्मार्गांश्च हंसि, उन्मार्गान् विमार्गवर्त्तिनः, अतएव हिंसया वर्त्तमानान् लोकहिंसकानित्यर्थः; यद्वा, उन्मार्गानतिक्रान्तसन्मार्गान् दैत्यान् दुष्टराजादींश्च, जीवहिंसया जीवतश्च राक्षसादीन्। एतच्च तव जन्म श्रीदेवक्यां प्रादुर्भावो यथायोग्यमुक्तिभक्त्यादिप्रदानेन भूमेर्भारस्य हरणाय, इदं पूर्व्वं विवृतमेव। अतोऽपराधिन्यपि मयि कृपामेव कर्त्तुमर्हसितरामिति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, पूर्व्वतोऽप्यधुना कृपाभरं विस्तारयन्नसीत्याह—नानाभावैर्बाल्यादिचेष्टितैर्लीलयैव, न तु मनुष्यत्वादिना हेतुनोपपन्नैः स्वीकृतैः, किंवा, विचित्रक्रीड़यैव, न तु पूर्णकामत्वादीश्वरभावेन युक्तैः, साधून् सदाचारान् लोकसेतून् स्वभक्तांश्च,-- बाल्यादिक्रीड़या देवादीनां स्वत एव परमानन्दोत्पत्तेः। हंसीति तच्छ्रवणाद्दुष्टानां भयाद्युत्पत्तेः, इति तेषामपि भयादिना तद्ध्यानादिकं सूचितम्। यद्वा, उन्मार्गान् भक्तिविरुद्धमार्गान् पाषण्डादीन् तत्तत्क्रीड़ाश्रवणादिना दुर्बुद्धीनामपि विमार्गपरित्यागेन सन्मार्गे प्रवृत्तेः, अन्यत् समानम्। एवं भूमेर्भारहरणाय, किंवा भारयुक्तहाराय महालंकारायेत्यर्थः। अतोऽतिदुष्टत्वेन वधयोग्यमपि मामधुना त्वत्कृपया शरणागतं परिपालयेति भावः॥ २७ ॥ तत्र चादौ निजज्वरात् रक्षेत्याशयेनाह—तप्त इति। ननु त्वमपि माहेश्वरः, कथं तप्तोऽसि ? तत्राह—ते तेजसेति। अतएव दुःसहेन, यतः शान्तः शीतश्चासौ उग्रश्च दारुणस्तेन तत्राप्यत्युल्वणेन महोद्भटेन ताप आध्यात्मिकादिरपि, किंवा सांसारिकोऽपि किं पुनर्ज्वरकृत इत्यर्थः। देहिनामिति देहाभिमानेन देह—स्वभावेन वा तापयोग्यतोक्ता। अङ्घ्रेरेकस्यापि मूलं तलभागमपि नो सेवेरन्, कथञ्चित् किञ्चित् परिचर्य्यामपि न कुर्य्युरित्यर्थः। सम्भावनायां सप्तमी। तत्राप्याशया तापापगमस्य सेवनस्यैव वा वाञ्छया अनु ईषद्बद्धा यन्त्रिताः सन्तः, किंवा अनुबद्धाः कृतारम्भाः प्रवृत्ता अपीत्यर्थः। अतोऽधुना त्वत्प्रपत्त्या कमपि तापं नार्हामि, किं पुनस्तज्ज्वरकृतमिति भावः॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

ज्ञप्तिमात्रं क्वापि जाड्यरहितं ब्रह्मलिङ्गं वेदप्रमाणकम् ॥ २५ ॥ दैवं कालद्यभिमानिदेवता: स्वभावः जडत्वाजडत्वपरिणामित्वादितत्तद्वस्तुस्वभाव: द्रव्यं पृथिव्यादि क्षेत्रं पृथिव्याद्युत्पत्तिभूमिः प्रकृतिः प्राणः पञ्चवृत्तिः आत्मा मति: विकार: अवस्थाभेद: सङ्घात: शरीरं बीजरोहप्रवाहकार्यकारणप्रवाह: त्वन्माया एषा त्वत्सङ्कल्परूपज्ञानाधीनं सर्वमित्यर्थ: अधिकरणे घञ् त्वत् त्वत्तः कृतं भयं न भवेत् ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

स्तुतिमेवाह—नमामीति चतुर्भिः। तावत्स्वरक्षणोपयुक्तपरत्वविशिष्टं स्तौति द्वाभ्याम् परेशं त्वां नमामि परेषां ब्रह्मादीनामपीशं नियन्तारं किं प्राकृतराजादिवत् नेत्याह—सर्वात्मानमिति। सर्वेषां ब्रह्मादीनामात्मानम् अन्तःप्रविश्य धारकत्वेन नियन्तारमित्यर्थः। कथमणुस्वरूपब्रह्मादिजीववर्गान्तःप्रवेश इत्यतो विशिनष्टि—केवलं निरवयवं ज्ञानमात्रस्वरूपं सजात्यादन्तःप्रवेशोपपत्तिरिति भावः। मात्रशब्देन क्वचिदपि जाड्याराहित्यं विवक्षितं ननु परेशस्तर्हि कोसौ जगत्कर्त्तेत्यत्र त्वमेवेति वक्तुं कारणत्वोपयुक्तसर्वशक्तित्वादिगुणयोगमाह—अनन्तशक्तिमिति। कारणत्वमाह—विश्वोत्पत्तीति। स्थानं स्थितिः विश्वस्योत्पत्त्यादि हेतुमित्यर्थः। ममैवंविधत्वे किं प्रमाणमत आह—ब्रह्मलिङ्गं वेदप्रमाणकं ननूक्तविधं ब्रह्म नत्वहं तत्राह यत्तद्ब्रह्मेति यद्वेदान्तप्रसिद्धं ब्रह्म तदभिन्नं त्वां नन्वहमपि कदाचिच्छोचामि नेत्याह—प्रशान्तम् अशनाया पिपासाशोकमोहजरामृत्युरूर्मिषट्करहितम् ॥ २५ ॥ ननु, कालकर्मस्वभावादीनामेव जगद्धेतुत्वं न ममेत्यत आह—काल इति। दैवं कालाद्यभिमानिदेवता कर्म जीवादृष्टं स्वभाव: जडत्वाजडत्वपरिणामित्वादितत्तद्वस्तुस्वभाव: द्रव्यं पृथिव्यादिभूतपञ्चकं क्षेत्रं पृथिव्याद्युत्पत्तिभूमि: प्रकृतिः प्राणः पञ्चवृत्तिः प्राणः आत्मा मतिः विकारः अवस्थाभेदः तत्सङ्घातः शरीरं बीजरोहप्रवाहः कार्यकारणप्रवाह एषा एतत्सर्वं त्वन्माया त्वत्सङ्कल्परूपज्ञानाधीनमित्यर्थः। एषेति सर्वनामत्वात् पर्यायेणोद्देश्यविधेयलिङ्गभावत्वात्प्रतिनिर्दिश्यमानमायापेक्षया स्त्रीलिङ्गनिर्देशः तं त्वां निषेधे "नेतिनेति" इति प्रकृतिप्राकृतसमस्तवस्तुगतप्रकारो यस्मिन्निषिध्यते तं त्वां प्रपद्य इत्यर्थः। निषेधमित्यत्राधिकरणे घञ् ॥ २६ ॥ ननूक्तविधः परेशोऽन्य एवाहन्तु यदुष्वन्यतम इत्यत आह—नानाभावैरिति। लीलयैव हेतुभूतया उपपन्नैरन्यथा त्वय्यकर्म्मवश्ये तेषामनुपपन्नत्वादिति भावः। तैर्भावैः प्रकारभूतैः मत्स्याद्यवतारैरिति यावत् धर्मसेतून् धर्ममर्यादाश्च बिभर्षि पुष्णासि उन्मार्गानुत्पथान् हंसि नाशयसि उन्मार्गानित्यस्यैव विवरणं स्वेच्छया वर्त्तमानानिति यथा मत्स्यकूर्मादिजन्म तद्वदेतदपि तव जन्मावतारं भूमेर्भारहाराय भारापनयनार्थम् अनेन वात्सल्यसौशील्यसौलभ्यादीनि सूचितानि ॥ २७ ॥ इत्थं तस्य शरण्यत्वमाविष्कृत्य स्वकीयामार्त्तिमावेदयति तप्त इति। तावच्छान्तेनाप्यन्त उग्रेणोल्बणेन दारुणेनात एव सोढुमशक्येन त्वत्तेजोपबृंहितेन ज्वरेणाहं तप्तस्ततो मां प्रपन्नं पाहीति भावः। परसन्तापकस्य युक्त एव ताप इत्यत आह—तावदिति। यावदाशया रक्षकान्तरसम्भावनाशया तवाङ्घ्रिमूलं न सेवेरन् तावदेव देहिनां तापः सेवायां प्रवृत्तानां त्वनुचितमिति भावः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नमामीत्यत्र टीकायां केवलमित्यादावयं भावः शुद्धचैतन्यमेव खल्वात्मा चेतयिताच। चैतन्यादेव हि जडप्रवृत्तिर्दृश्यते ततस्तस्यैव तत्तच्छक्तित्वं तत्तदीशितृत्वञ्च। एवं सति जीवचैतन्यस्य स्वस्वाधिष्ठानगतमेव तत्तत्परमात्मचैतन्यस्य तु सर्वगतम् अतो वाय्वादिमहाभूतप्रवृत्तिरपि तस्मादेव "भीषास्माद्वातः पवते" इत्यादेः अतोऽनन्तशक्तित्वं ब्रह्मादि ईशितृत्वञ्च तस्यैव घटत इति एवं व्यष्टिद्वारा तस्य तत्तन्निरूप्य समष्टिद्वारापि निरूपयतीत्याह—विश्वेति। प्रशान्तमित्यादावयम्भावः। विकारजातमेव हि सर्वेषां प्रतीतिविषयः स्यात् अनुभूतजातीयत्वात् ततः शब्दोऽपि तदेव साक्षाद्बोधयितुं शक्नोति नन्वविकृतं तद्रूपम् अनुभूतजातीयतो विलक्षणत्वात् अतः कथञ्चित् द्योतयत्येव तदिति अथवा ब्रह्मनिर्विशेषम् अहन्तु श्रीमद्विग्रहत्वात् सविशेषः तत्राह ब्रह्मैव लिङ्गं श्रीविग्रहो यस्य तम् ॥ २५ ॥ पूर्वं सर्वाश्रयत्वं तद्दोषालिप्तत्वं यन्निरूपितं तदेव विवृण्वन् शरणं याति—कालो दैवम् अत्र क्षेत्रं प्रकृतिरिति टीकायाः पाठो युक्तः क्षेत्रशरीरमिति पाठोऽपि तच्छब्देनाकथञ्चित् प्रकृतिरेव व्याख्येया पौनरुक्त्यात् ॥ २६ ॥ नन्वेवं निर्दोषश्चेदहं तर्हि कथं कांश्चिद्धन्मि तत्राह—नानेति। लीला निजपरिकररूपैः भक्तैः सह क्रीडा तयैव हेतुना। उपपन्नैर्योग्यतां लब्धैर्नानाभावैरभिप्रायैर्देवानिन्द्रादीन् साधूंश्च मुन्यादीन् बिभर्षि उभयेषामपि विशेषणं लोकसेतून् तथा उन्मार्गन् हंसि यतोऽयमवतार एव तदर्थ इत्याह—भूमेः परमभक्तायाः पृथिव्याः ॥ २७–३३ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

नमामि त्वामित्यादि। ज्ञप्तिमात्रम् ज्ञप्तिर्ज्ञानं मात्रा अंशो यस्य; ब्रह्मलिङ्गम्, ब्रह्म वेदस्तदेव लिङ्गं गमकं यस्य, ब्रह्म बृहत् परिपूर्णाम्। यद्वा, यद् यतो ब्रह्म वेदः अतएव ब्रह्मलिङ्गं ब्रह्मणस्त्वद्गमकत्वं त्वज्जन्यत्वेनैव, अतएवानन्तशक्तिम्, यतः परेशं परेषामीशम् ॥ (२५–३३)।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

नमामीत्यादि । ब्रह्मलिङ्गं ब्रह्मवैभवम्, लिङ्ग्यतेऽनेनेति लिङ्गं वैभवम्, यद्यतस्त्वं ब्रह्म वृहदपरिच्छिन्नं पूर्णं ब्रह्मेत्यर्थः । यद्वा, ब्रह्म ब्रह्मणोः शब्दब्रह्म परब्रह्मणोः लिङ्गम् ॥ २५-२६ ॥ जन्मैतदिति-जन्म प्रादुर्भावः ॥ (२७-३३) ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

अनन्तशक्तिमिति । मत्स्वामिनः शम्भोः सकाशादपि तव शक्तिरधिकाऽनुभूतेति भावः । तत्र हेतुः परेशं स ईशस्त्वन्तु परमेश इत्यर्थः । सर्वात्मानमिति त्वं सर्वेषां परमात्मा भवन्नेव सर्वस्य शम्भोरप्यात्मा भवसीत्यर्थः । दन्त्यादिसर्वशब्दोऽपि शम्भुवाची दृष्टः । ज्ञप्तिमात्रमिति शुद्धचिन्मयस्त्वं केवलमिति मायाशाबल्यं निरस्तं मत्स्वामी शम्भुस्तु मायाशबल एवेति भावः । विश्वोत्पत्तीति त्वं सृष्टिस्थितिसंहारकर्त्ता स तु केवलं संहारकर्त्तैवेति भावः । ब्रह्मणा वेदेन लिङ्ग्यते द्योत्यते इति ब्रह्मलिङ्गं यद्ब्रह्म प्रशान्तं तदेव त्वं सतु उग्रं ब्रह्मेति भावः ॥ २५ ॥ केवलं ज्ञप्तिमात्रत्वं विवृण्वन् प्रथमं केवलपदेन व्यावृत्तानि वस्तूनि गणयति—काल इति । कालः क्षोभकः कर्म निमित्तं तदेव फलाभिमुखमभिव्यक्तं दैवं स्वभावस्तत्संस्कारः जीवः तद्वान् द्रव्यं भूतसूक्ष्माणि क्षेत्रं प्रकृतिः प्राणः सूत्रम् आत्मा अहङ्कारः विकार एकादशेन्द्रियाणि महाभूतानि चेति षोडशकः तत्सङ्घातो देहः बीजं देहाज्जायमानं कर्म रोहस्तस्माज्जनिष्यमाणोऽन्यो देहस्तयोः प्रवाहः पौनःपुन्यं परम्परा एषा त्वन्माया तत्र जीवस्य मायाभिन्नत्वेपि मायाग्रस्तत्वान्मायात्वं तन्निषेधं तस्या मायायाः निषेधो यत्र तं त्वद्देहेन्द्रियादीनि त्वन्मयान्येव न माया इत्यर्थः ॥ २६ ॥ नन्वेवम्भूतश्चेदहं तर्ह्यनुग्रहनिग्रहज्ञापितौ रागद्वेषौ मायिकधर्मौ किं मयि दृश्येते ? तत्राह—नानेति । एतान् मद्भक्तानुकूलान् बिभराणि एतांस्तत्प्रतिकूलान् हतानीत्येवं भक्तवत्सलस्य तव ये नाना भावा अभिप्रायास्तैर्लीलया अनया बाणयुद्धादिकयैव उपपन्नैर्देवानिन्द्रादीन् साधून् मुन्यादींश्च बिभर्षि उभयेषामपि विशेषणं लोकसेतून् लोकाश्रयभूतानिति तथा उन्मार्गान् हंसि तेन भक्तवात्सल्यगुणाङ्गभूतौ रागद्वेषौ तेन न मायिकाविति भावः अतो मयेदमवगतमित्याह—एतत्ते जन्म भूमेः स्वभक्तायाः भारहाराय ॥ २७ ॥ अतःपरं त्वां स्तोतुमप्यहं न शक्नोमीत्याह—तप्तोहमिति । ते तेजसा त्वत्सृष्टज्वरेण शान्तः शीतश्चासावुग्रो दाहकश्च तेन परसन्तापकस्य ते सन्तापो युक्तः एवेति चेदत आह तावदिति । अधुना त्वहं ते भक्त एवाभूवमिति भावः ॥ २८ ॥

गूढार्थदीपिनी

त्वामनन्तशक्ति । कुतः नमामीत्यन्वयः । परेशां ब्रह्मादीनामीशम् । पुनश्च ज्ञप्तिमात्रं ज्ञानघनम् । विश्वोत्पत्त्यादिहेतुम् । नन्वेतत् प्रसिद्धं ब्रह्म नाहं तदाह । यदेतत् ब्रह्म तदेव त्वमित्यन्वयः । किं तत् । ब्रह्मणा वेदेन लिङ्ग्यते ज्ञायते तत् ॥ २५ ॥ तेषां संघातो लिङ्गदेहः एतस्य बीजाङ्कुरवत् प्रवाहो भवति सैषा त्वन्मायैव तस्या निषेधम् अपवादभूतं त्वां प्रपद्ये इत्यन्वयः । कालो गुणक्षोभक. । दैवं फलाभिव्यक्तिजनकम् । कर्म निमित्तम् । स्वभावः संस्कारः द्रव्यं शब्दादि । क्षेत्रं शरीरम् । प्राणः सूत्रं क्रियाशक्तिप्रधानं महत्तत्त्वस्य सूक्ष्मा पूर्वावस्था । आत्मा अहङ्कारः विकारः षोडशकः ॥ २६ ॥ लीलया हेतुभूतया गृहीतैः नानाभावै अवतारैः सेतून् वर्णाश्रमधर्ममर्यादाः पालयसि । उन्मार्गान् धर्ममुल्लङ्घ्य वर्तमानान् हंसि ॥२७॥ प्रथमं शान्तः शीतः पुनः उग्रो दाहकश्च शीतज्वरः तेन । उल्वणेन । भीषणेन आशाभिः पुत्रवित्तलोकैषणाभिः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अनन्तशक्ते, शक्तिद्वारा परिणामित्वं ज्ञप्तिमात्रस्वरूपस्य स्वरूपतो निर्विकारित्वञ्चोक्तं ताः शक्ती, स्वरूपञ्च विभज्य दर्शयन् सर्वाधारत्वं दर्शयति-एषा कार्याकारेण संस्थित्वा त्वन्माया प्रकृतिः कालः क्षोभकः दैवं दिग्वातार्कादिदेवतागणः कर्म जन्म निमित्तं जीवः क्षेत्रज्ञः स्वभावः परिणामित्वापरिणामित्वादिरूपस्तत्तत्पदार्थधर्मः द्रव्यं भूतसूक्ष्माणि क्षेत्रं व्यष्टिशरीराणि प्राणः पञ्चवृत्तिः आत्माऽहङ्कारः विकारः एकादशेन्द्रियाणि पञ्च महाभूतानि चेति षोडशसङ्घातः समष्टिशरीरं ब्रह्माण्डम् किम्बहुना बीजं प्रधानं तस्माद्रोहप्रवाहः कार्यप्रवाहः संसारप्रबाहश्च यस्मिन् परमकारणे तद्ब्रह्म त्वां प्रपद्ये प्रपत्तेः फलं द्योतयितुं तत्पदवाच्यं ब्रह्म विशिनष्टि तन्निषेधयति तस्य संसारस्य निषेधो निवृत्तिर्यस्मात्प्रपतव्यात् तत् जीवकालप्रकृतितत्कार्यनिर्देशः अनुक्तानां ब्रह्मशक्तीनामुपलक्षणार्थः इति सङ्क्षेपार्थः ॥ २५-२६ ॥ एवं विश्वजन्मादिहेतुत्वसर्वशक्तित्वसर्वात्मत्वनिर्विकारस्वरूपत्वसर्वाधारकत्वसंसारनिवर्तकत्वादयो भगवद्गुणा उक्ताः अथ नानावतारैर्देवादीन् यस्त्वं पालयसि उत्पथांश्च हंसि स एव त्वं वसुदेवगृहे अवतीर्णोसीति स्वयं भगवत्त्वपरमकारुणिकत्वादीन् दर्शयितुं स्तौति-नानेति ॥ २७ ॥ त्वत्पराङ्मुखत्वात्त्वां पातयितुं प्रवृत्तः त्वदीयेन ज्वरेण प्रत्युतोपतापितस्तत्सन्निकर्षादधुना त्वद्भक्तोऽस्म्यतो नाधुना तापार्ह इत्यभिप्रायेण प्रार्थयते—ततोऽहमिति । शान्तोग्रेण शीतोग्रेण शीतोग्रेण अत एव दुःसहेन ते तव तेजसा ज्वरेण ॥ २८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यं तापयितुमुपयातस्ततः सन्तप्तोऽनन्यरक्षकस्तं स्तुवन्नमति । नमामीति । अनन्तशक्तिमपरिमिताऽप्रतिबद्धा शक्तिर्यस्य तम् । परेषामीशं सर्वस्वामिनं केवलं जडामिश्रं ज्ञप्तिमात्रं ज्ञानस्वरूपं स्थानं स्थितिः संरोधो नाशो ब्रह्मलिङ्गं ब्रह्म वेद एव लिङ्गं ज्ञापकं यस्य तत् । ब्रह्मणश्च ब्रह्मलिङ्गतत्त्वं चिन्हं यस्मात्तत् । प्रशान्तं समाधानगुणयुक्तं प्रस्तुतभीतिहतिहेतूक्तिरियम् । यद्ब्रह्म तदेव त्वं त्वा त्वां नमामि ॥ २५ ॥ त्वदृते कस्यापि शक्तिरिति त्वमेवैतत्प्रवर्तकतया तत्तच्छब्द इत्याह । काल इति । दैवं दिष्टं कर्म सत्त्वं द्रव्यं प्रकृतिः क्षेत्रं लिङ्गशरीरं प्राणः सूत्रात्मा आत्माऽहङ्कारो विकारो मनसा सहैकादशेन्द्रियाणीतराणि पञ्चभूतानीत्याहृत्य षोडशसङ्ख्यस्तत्सङ्घातः स्थूलदेहः स च बीजरोहो यथाऽङ्कुराज्जातस्तज्जनकस्तथा शरीरान्तरसङ्गति हेतुः । त्वन्मायया त्वदिच्छाधीनमेतत्सर्वं तस्मान्निबध्यते । नेति नेतीति निषेधं निषेधशेषं त्वां प्रपद्ये ॥ २६ ॥ ब्रह्मैवाहं चेदेवं ज्वरं वसुदेवादिसप्तजन्म कुत इत्यत आह । नानेति । लीलयैवोपपन्नैर्युक्तैर्नानाभावैः सुरनरतिर्यगादिभी रूपैर्देवान्साधूंस्तदतिरिक्तान्सर्वान्बिभर्षि पालयसि तदर्थं लोकसेतुं तन्मर्यादाश्च बिभर्षि । उन्मार्गानिति विवरणं हिंसया वर्तमानान् प्रजाद्रोहेण वर्तमानानिति । हिंसि संहरसि । एतत्ते वसुदेवादेर्जन्म भूमेर्भारहाराय हारो हरणं तस्मै ॥ २७ ॥ इयता किमरे ज्वर तव मनोज्वरं वदेत्यतो वक्ति । तप्त इति । अहं ते तेजसा तव तेजोरूपेण निमित्तेन सृष्टेन दुःसहेनोग्रेणात्युल्बणेनातिक्रान्तमुल्बणं मामित्यत्युल्बणस्तेन ज्वरेण तप्तः । तप्तोऽहं त इत्यानुपूर्व्या । हे अहन्ते अहङ्कार । ते तेजसा सामर्थ्येन तप्त इत्यान्तरङ्गिको भावः सूच्यते । हे शान्तेति वा । तव तापो मद्ज्वरापपरिहारस्त्वत्कृतलोकतापफलरूप इत्यतो यादृशो भवतु स भवद्दर्शनादिसेवनावधिक इत्यभिधत्ते । तावदिति । देहिनां तदभिमानवतां यावताऽऽशानुबद्धास्तेऽङ्घ्रिमूलं न सेवेरंस्तावदयं तापः । तदुत्तरं कुतो मम स्वामिस्तथा विनेये दया विधेयेति ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्य स्तोत्रमाह **चतुर्भिः** ।

स्वरूपबलकार्याणि जानतो मम सर्वथा । रक्षा त्वयैव कर्तव्येत्येवंरूपा स्तुतिः कृता ॥ १ ॥

तत्र प्रथमं स्वरूपमुक्त्वा नमस्यति । शास्त्रसिद्धं स्वरूपं परिदृश्यमानादन्यदिति शङ्कां व्यावर्तयितुं त्वामित्याह, इदमेव तदिति वक्तुम् । नन्वष्टमूर्तेर्ज्वरोऽयं सर्वसंहारकशक्तिरूपः, कथमन्यं स्तौतीत्याशङ्क्य, तस्य माहात्म्यमाह **अनन्तशक्ति**मिति । अनन्ताः शक्तयो यस्येति । ननु कालादेर्ब्रह्मादेर्वा साहाय्ये रक्षा भविष्यतीति किं शत्रोर्महतः शरणगमनेनेत्याशङ्क्याह **परेश**मिति । ब्रह्मादीनामपि नियन्ता । ननु तथापि मरणं वरम्, न तु शत्रोः शरणगमनमित्याशङ्क्याह **सर्वात्मान**मिति । स हि सर्वेषामात्मा, न तु शत्रुः । अनेन वैषम्यनैर्घृण्ययोः परिहृतयोरपि प्रकृतिसम्बन्धात् सर्वात्मनोऽप्यन्यथाभावमाशङ्क्य, तन्निराकरोति **केवल**मिति । न प्रकृत्यादिभिः सम्बद्धं जीववत् । ननु प्रादुर्भूतस्य काममयत्वात् कथं केवलत्वम्, तत्राह **ज्ञप्तिमात्र**मिति । चिद्रूप एवायं प्रकट इति स मन्यते । औडुलोमिवदात्मानं चैतन्यमात्रं मन्यते । साङ्ख्यवद्वा । उभयोर्वैलक्षण्यं जीवत्वब्रह्मत्वकृतम् । सर्वेषामेव दैत्यांशानां तत्पक्षपातिनां च चिन्मात्रपक्ष एव सम्मतः । तत्र केषाञ्चिज्जगत्कर्तृत्वं न भगवतः, किन्तु प्रकृत्यादेरिति । तत्पक्षपातो भविष्यतीत्याशङ्क्य, निराकरोति **विश्वोत्पत्तिस्थानसंरोधहेतु**मिति । विश्वस्य सृष्टिस्थितिप्रलयहेतुस्त्वमेव । केवलादेवाविकृतात् सर्वं जायत इति चिन्तामण्यादौ दृष्टमिति चिन्मात्रस्यापि हेतुत्वं मन्यते । श्रुतिसिद्धत्वात् । अत एवास्मिन्नर्थे अलौकिककर्तृत्वे प्रमाणमाह **यत्त**दिति । लोकवेदप्रसिद्धम् । यल्लोके प्रसिद्धम्, तदेव वेदे प्रसिद्धमिति । ननु कृष्णं पुरस्कृत्य न लोकवेदयोः प्रसिद्धिः क्वचिद्दृष्टा, तथाभूतशब्दस्याश्रुतत्वात्, तत्राह **ब्रह्मे**ति । ब्रह्म त्वमेव व्यवहार्यत्वात्कथमित्याशङ्क्याह **ब्रह्मलिङ्ग**मिति । जगत्कर्तृत्वतन्निर्वाहकत्वसेतुत्वविघरणत्वादीनि तल्लिङ्गानि तान्येवात्र सन्तीति । अत्रापि प्रमाणमाह **प्रशान्त**मिति । प्रकर्षेण शान्तिः प्रत्यक्षसिद्धा, अन्यथा स्वतन्त्रः समर्थः किमस्मदादेः अपेक्षां कुर्यात् । प्रशान्तत्वेन च ब्रह्मधर्मा लक्ष्यन्ते, धर्मश्च ब्रह्मत्वम् । ततो लोकवेदसमन्वयः, तेन जगत्कर्तृत्वमिति, गुणा उत्तरार्धे निरूपिताः, दोषाभावश्च पूर्वार्धे । एवं निर्दोषपूर्णगुणविग्रहत्वं निरूपितम् ॥ २५ ॥ अनेन सर्वसामर्थ्यं भगवत एव सर्वत्र, नान्यस्येति सिद्धमपि प्रतीत्या कालादीनां बलं सिद्धमनूद्य, तन्निराकरणेनैव निराकरोति **कालो दैवमिति** । कार्यकारणरूपाणि वस्तुतस्त्वमेव, तेषु भिन्नतया प्रतीत्या यत्सामर्थ्यपरिकल्पनम्, तदपि त्वन्मायैषा । अन्यथा सर्वप्रमाणसिद्धे कथमन्यथाकल्पनं सम्भवति । तत्र कालः सर्वकारणमिति ज्योतिःशास्त्रादन्वयव्यतिरेकाभ्यां च निश्चीयते । तदवान्तरभेदा ग्रहाः कालावयवास्तदिन्द्रियरूपाः दैवमित्युच्यन्ते । ततो धर्मशास्त्रे तत्सर्वं कर्मवशादिति सामान्यविशेषकर्मभ्यां सर्वकार्योत्पत्तिमाहुः । साङ्ख्याः सर्वत्र बीजस्वभावमेव कारणमाहुः । अन्येऽपि स्वभाववादिनः । जडकार्यकारणवादिनामेवं सिद्धान्तः । जीवकार्यवादिनां मते जीवस्वभाव इति पाठः । सर्वमेव जीवात्मकमिति । यद्यप्ययं ब्रह्मवादे निराकृतः, तथापि पूर्वपक्ष एव निराकृत इति सर्वजीवपक्षोऽपि युक्त एव । कालादयः पञ्च

वा सामान्यकारणभूताः। कालो गुणक्षोभकः। दैवं प्राण्यदृष्टम्। कर्म जन्मनिमित्तं भगवद्रूपं सामान्यम्। जीवो भोक्ता। स्वभावः परिणामहेतुरिति। जीवः स्वभाव इति पाठे कार्यमाह **द्रव्यमिति**। द्रव्यं तत्त्वानि। **तेषां** कार्यं देहः क्षेत्रम्। तत्र प्राणः सर्वहेतुः। तस्यापि प्रभुरात्मा। अहंकारः पुराध्यक्षो विकारः। तत्सङ्घातश्च देवतिर्यङ्मनुष्यादिरूपः आद्यः। ततो बीजरोहप्रवाहः बीजभावापन्नानां तेषामेव रोहः। अङ्कुरोत्पत्तिः कार्यमिति यावत्। तस्य प्रवाहोऽनादिसिद्धः बीजाङ्कुरन्यायः। एतत्सर्वं भिन्नतया अखण्डात्त्वत्तः परिज्ञातम्। त्वन्मायैव एषा एवं बुद्धिरूपा भवति। तस्या व्याप्तिः कामवज्जीवेष्वेव। अतो मायावशात्त्वमेव तथा भवसीति निराकरणार्थमाह **तन्निषेधमिति**। तस्या निषेधो यत्रेति। अतः सर्वसमर्थं त्वामेव प्रपद्ये ॥ २६ ॥ एवं स्वरूपसामर्थ्ये निरूप्य विशिष्टं कार्यमवतारकृतं निरूपयति **नानाभावैरिति**। नटवत् मत्स्यादिभावान् बिभर्ति। आनन्दरूप भावमात्रेण तथा जायत इति भावपदम्। तत्रापि नटवत् क्लेशेन न पदार्थसम्पादनम्, किन्त्विच्छयैव तथात्वमित्यर्थः। तेषां प्रयोजनमाह **देवान् साधून् लोकसेतून्बिभर्षीति**। त्रिविधा एते। साधवो भूमिष्ठाः। धर्ममर्यादाः सेतवः। ते भूमेरधः एव निरूपिताः, 'खाता हि वेदि'रिति। अनेन त्रिलोकस्थितभक्तरक्षार्थं अवतारा इत्युक्तं भवति। एवं गुणार्थतामुक्त्वा दोषाभावार्थतामाह **हंस्युन्मार्गानिति**। **उन्मार्गा** धर्ममार्गविरोधिनः। किञ्च। हिंसया वर्तमानान् मारणैकस्वभावान्। अत एतत्ते जन्म तादृशमुभयं कुर्वदपि विशेषकार्यमपि करोतीत्याह **भारहाराय भूमेरिति**। भारहारो भारहरणम्। अवतारान्तराणि भूम्युपजीवकानामेव दोषाभावं गुणं च सम्पादयन्ति। अयं त्ववतारः भूमेरेव भारं दूरीकरोति। उपलक्षणमेतत्। परमानन्दं च सम्पादयति ॥ २७ ॥ एवं स्तुत्वा प्रार्थयितुं स्वदुःखं (वि) ज्ञापयति **तप्तोऽहमिति**। ते दुःसहेन तेजसा क्रूरेण ज्वररूपेण 'नाग्नेर्हि ताप' इति न्यायमपि बाधित्वा संतप्तोऽहम्। 'न हि दृष्टे अनुपपन्नं नाम।' ननु वैष्णवं तेजः न तापं जनयति, तत्राह **शान्तोग्रेणेति**। बहिः शान्तः, अन्तरुग्रः, अन्यथा वैष्णवतेजसो न दैत्यनिवारकत्वं स्यात्। यथा भगवान् 'चक्षुषश्चक्षुः, श्रोत्रस्य श्रोत्रम्', तथायं धर्मो ज्वरस्यापि ज्वरः, निवर्तकः प्रवर्तकश्चेति आनुगुण्यसिद्ध्यर्थं तापमेव निवारयितुं तथानिरूपणम्। अत्युल्बणमसह्यं क्रूरादपि क्रूरत्वात्। ननु ज्वरे निवृत्ते तापो निवर्तिष्यते, अतो ज्वर एव प्रार्थनीयः। न हि शस्त्रे प्रयुक्ते शस्त्रपीडितः शस्त्रं प्रार्थयते इत्याशङ्क्य निराकरोति **तावत्ताप** इति। देहाभिमानिनां तावदेव तापः, यावत्तेऽङ्घ्रिमूलं नासेवेरन्। अनेनान्यथा तापनिवृत्तिर्न भवतीत्यप्युक्तम्। ज्ञानेपि तापनिवृत्तौ अङ्घ्रिमूलाश्रयणमेव हेतुरिति किमन्तर्गडुना ज्ञानेनेति भक्तेरुत्कर्षोऽप्युक्तः। तर्ह्यसेवने को हेतुः, तत्राह **आशानुबद्धा** इति। भगवच्चरणारविन्दासेवायां न कामः प्रतिबन्धकः। किन्तु तच्छक्तिराशा। अतो नैराश्याभावात् सर्वत्र तत्तदाशापि न पूर्यत इति तयानुबद्धाः। **यावदित्ययमनुबन्धः** सान्त इति निरूपितम्। आशायोगेनाशा सत्या भवति, तदा पूर्णा सती निवर्तते, कामनिवृत्तौ तु निवर्तत एव, विषयदोषदर्शनादपि निवर्तते। तन्निवृत्तौ बहवः प्रकारा इति सम्भावनाया विद्यमानत्वात् **यावदित्यवधिरुक्तः**। अग्निरूपः काम इति। तेन **तापस्ताव**देवेत्यपि युक्तम् ॥ २८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

नमामि त्वेत्यत्र। **प्रकृतिसम्बन्धादिति**। स्वरूपतो वैषम्यनैर्घृण्याभावेपि प्रकृतिसम्बन्धात्तथा स्यादित्यर्थः। **उभयोरिति**। जीवभगवतोश्चिद्रूपत्वे समानेपि जीवत्वब्रह्मत्वकृतं वैलक्षण्यम्। **जीवत्वमं**शत्वम्। **ब्रह्मत्वं** व्यापकत्वमित्यर्थः। **तत्पक्षपात** इति। तत्पक्षे पातस्तत्पक्षाश्रयणं भविष्यतीत्यर्थः। **अत एवेति**। युक्त्यगम्यत्वादेवेत्यर्थः। **ब्रह्मलिङ्गमिति**। ब्रह्मणो लिङ्गानि यस्येत्यर्थः। **कालो दैवमि**त्यत्र। **यद्यप्ययमिति**। चित्कारणतापक्ष इत्यर्थः। **पूर्वपक्षे** इति। 'न विलक्षणत्वा'दिति सूत्रस्य पूर्वपक्षत्वादिति भावः। एते पञ्चापि प्रमाणसिद्धाः। अतो ज्योतिःशास्त्रादिमतभेदेन विकल्पो न युक्त इत्यरुच्या पक्षान्तरमाहुः **कालादय** इति। **अतो मायावशादिति**। **अत** इतिपदं निराकरणार्थमित्यनेनान्वेति। **तप्तोऽहमि**त्यत्र। **तथायं धर्म** इति। शीतक्रूररूपं भगवत्तेज इत्यर्थः। **शस्त्रं प्रार्थयत** इति। किन्तु शस्त्रस्यैव निष्कासनाद्युपायं करोति, तथा ज्वरस्यैव प्रार्थनाद्युपायः कर्तव्य इत्यर्थः। **न कामः प्रतिबन्धक** इति। **भगवद्विषयकस्य कामस्य** भजनसाधकत्वात्काममात्रं न प्रतिबन्धकम्, किन्तु **तद्विशेषः** अप्राप्तवस्त्वभिलाषरूपा आशा प्रतिबन्धिका। **भगवत आत्म**त्वेन सर्वदा प्राप्तत्वात्तद्भिन्नाभिलाषस्यैवाशात्वमिति भावः। **आशात्यागेनेति**। 'ततो वै ते सत्याशा भविष्यती'त्यत्राशायाः सत्यत्वेन निवृत्तौ स्वर्गप्राप्तिरुक्ता।

श्रीसुबोधिनीसारः

अचिंत्यशक्तिं परेशं सर्वनियंतारं सर्वेषामात्मानं केवलं ज्ञानघनं विश्वस्योत्पत्त्यादिहेतुं जन्मादिकारणं त्वा त्वां नमाम्यहं स्तौमि यत्तद्ब्रह्म प्रसिद्धं तत्त्वं ब्रह्मणा वेदेन लिंग्यते द्योत्यते इति तत् प्रशांतं शुद्धम् ॥ २५ ॥ कालादिरूपा एषा तव मायास्ति तस्या निषेधो यस्मिंस्तं निषेधावधिभूतं त्वां प्रपद्ये शरणं व्रजामि कालः क्षोभहेतुः कर्मनिमित्तं दैवं प्रारब्धं स्वभावः तत्संस्कारः जीवस्तद्वान् द्रव्यं भूतसूक्ष्माणि क्षेत्रं शरीरं प्राणः सूत्रम् आत्माहंकार एकादशेंद्रियाणि महाभूतानि पंचेति षोडशात्मकः तत्संघातो लिंगदेहः बीजस्य रोहवदंकुरवत्प्ररोहः संसारप्रवाह इति भावः ॥ २६ ॥ लीलया स्वेच्छयैवोपपन्नैर्गृहीतैर्नानाभावैर्मत्स्याद्यवतारैर्देवादीन् पालयसि हिंसया वर्तमानान् जीवतो दैत्यादीनुन्मार्गगान् उत्पथगान् त्वं हंसि

एतत्ते जन्म भूमेर्भारहाराय पृथिव्या भारोत्तारणार्थम् ॥ २७ ॥ दुःसहेनासह्येन शांतोग्रेण शीतज्वरेणात्युग्रेण ते तव तेजसाहं तप्तोस्मि ननु परपीडाकरस्य तव तापोऽयुक्तः प्रहिखनितुः श्वभ्रमिवेति चेत्तत्राह आशयानुबद्धा यावत्ते तवांघ्रिमूलं नो सेवेरन् देहिनां प्राणिनां तावदेव तापः ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्कृतां स्तुतिमेव दर्शयति चतुर्भिः तत्रात्मानं परमशक्तिमन्तं मन्यमानो भगवन्तं प्रतापयितुं प्रवृत्तः ततश्च स्वयमेव तज्ज्वरेण सन्तप्तः संस्तं परमेश्वरं ज्ञात्वा नमस्करोति–नमामीति । त्वा त्वामहं नमामि । ननु 'त्वं पीडितो भीतश्चेत्तर्हि परेषां ब्रह्मरुद्रादीनां रक्षायां समर्थानां सत्वात्तान् विहाय शत्रोर्मम नमस्कारादिभिस्तव किं स्यात्' इत्याशङ्क्याह—परेशमिति । परेषां ब्रह्मादीनामपीशं नियन्तारमित्यर्थः । तथाच त्वद्विमुखस्य कोऽपि रक्षको नास्तीति भावः । परेशत्वे हेतुमाह–विश्वोत्पत्त्यादिहेतु यद्ब्रह्म तत्त्वमित्यर्थः । 'हेतुत्वमपि न निमित्तत्वमात्रम्, किंतूपादानत्वमपि' इत्याह–सर्वात्मानमिति । एवं चेद्विकारित्वं स्यात्तत्राह–प्रशान्तमिति । तत्र हेतुः–ज्ञप्तिमात्रमिति । चैतन्यैकरूपमित्यर्थः । 'तथाप्यन्यसम्बन्धाद्विकारित्वं स्यात्' इत्याशङ्क्याह—केवलमिति । 'तथापि कथमभिन्ननिमित्तोपादानत्वं सम्भवति' इत्याशङ्क्याह–अनन्तशक्तिमिति । एवंभूते किं प्रमाणं तत्राह–ब्रह्मलिङ्गमिति । ब्रह्मणा वेदेन लिङ्ग्यते द्योत्यते इति तथा तम् ॥ २५ ॥ सर्वोपादानत्वमेवोपपादयन् कालादेस्तद्भिन्नत्वं निराकरोति–काल इति । कालः गुणक्षोभकः । दैवं ग्रहादि ज्योतिःशास्त्रसिद्धम् । कर्म प्राणिकृतशुभाशुभक्रियाजन्यमदृष्टं पुण्यपापात्मकम् । जीवस्तत्फलसुखदुःखभोक्ता । स्वभावस्तत्तत्परिणामहेतुः तत्तद्वस्तुनिष्ठसंस्कारविशेषः । द्रव्यं शब्दादिभूतसूक्ष्माणि । क्षेत्रं महदाद्युत्पत्तिभूमिः प्रकृतिः । प्राणः पञ्चवृत्तिकः प्रसिद्धः । आत्मा अहङ्कारः । विकारः पञ्चमहाभूतानि, एकादशेन्द्रियाणि चेति षोडशकः । तेषां पृथिव्यादीनां सङ्घातो देहः । एतस्य च बीजरोहप्रवाहः रोहोऽङ्कुरः देहाद्बीजरूपं कर्म ततोऽङ्कुररूपो देहस्ततः पुनरेवमिति प्रवाहः । एषा भेदप्रतीतिरूपा त्वदीया माया तस्या निषेधः अपोहो यस्मिन् ज्ञाते सति भवति तं त्वामहं प्रपद्ये शरणमागतोऽस्मि ॥ २६ ॥ ननु वसुदेवपुत्रस्य मम कथमेवंभूतत्वं तत्राह–नानेति । लीलया अनायासेन सङ्कल्पमात्रेण उपपन्नैः स्वीकृतैः नानाभावैः विविधप्रकारकैर्मत्स्याद्यवतारैर्यथा देवान् साधून् सन्मार्गस्थान् लोकसेतून् वर्णाश्रमादिधर्ममर्यादाश्च सर्वदा बिभर्षि पुष्णासि, तदर्थं च उन्मार्गान् हंसि तथैवैतदपि तव जन्म भूमेर्भारावतारणाय । अतो लीलावतारोऽयम्, न त्वं कस्यापि पुत्र इति । उन्मार्गानेव दर्शयति–हिंसया वर्तमानानिति ॥ २७ ॥ एवं शरणमागत्य स्वदुःखमावेदयन् तन्निरासं प्रार्थयते—प्राप्तोहमिति । शान्तोग्रेण प्रथमं शान्तः शीतस्ततश्चोग्रो दाहकस्तेन अतएवात्युल्बणेन भयंकरेण अत एव दुःसहेन ते तेजसा शक्तिरूपेण ज्वरेणाहं तप्तोऽस्मि, अतः शरणागतं मां ततो रक्षेति शेषः । 'परसन्तापकस्य तव सन्तापो युक्त एव' इत्यत आह—तावदिति । यावदाशया कामवासनयाऽनुबद्धास्तत्तद्विषयप्राप्त्युपायेषु भ्रमन्तस्तवाङ्घ्रिमूलं न सेवेरन् शरणं नैवागच्छन्ति, तावत्तेषां देहिनां तापो युक्तः मम तु त्वच्छरणागतस्य स न युक्त इत्यर्थः ॥ २८ ॥

अन्वितार्थप्रकाशिका

नमामीति ॥ अनन्तशक्ति परेषां ब्रह्मादीनामीशं सर्वात्मानं केवलम् असङ्गं ज्ञप्तिमात्रं चैतन्यैकरूपं विश्वोत्पत्तिस्थानसंरोधानां हेतुं यत्तत्सर्वस्वरूपं ब्रह्मात्मकं ब्रह्मणा वेदेन लिङ्ग्यते ज्ञायते ब्रह्मैव लिङ्गं मूर्तिर्यस्येति वा तथा तं प्रशान्तं त्वां नमामि ॥ २५ ॥ काल इति ॥ कालः गुणक्षोभकः कर्मनिमित्तमदृष्टं दैवं तदेव फलाभिमुखमभिव्यक्तम् । स्वभावस्तत्संस्कारो जीवस्तद्वान् द्रव्यं शब्दादिभूतसूक्ष्माणि क्षेत्रं शरीरं प्रकृतिः प्राणः सूत्रम् आत्मा अहङ्कारः विकारः पञ्चमहाभूतानि एकादशेन्द्रियाणि चेति षोडशकः तेषां सङ्घातो लिङ्गदेह एतस्य च बीजरोहवत्प्रवाहः रोहोऽङ्कुरः देहाद्बीजरूपं कर्म ततोऽङ्कुररूपो देहस्ततः पुनरेवमिति प्रवाहः । एषा त्वदीया माया तस्या निषेधः अपोहो यस्मिन् तं त्वां निषेधावधिभूतमहं प्रपद्ये शरणमागतोऽस्मि ॥ २६ ॥ नानेति ॥ लीलयैव उपपन्नैः स्वीकृतैः नानाभावैः विविधप्रकारकैर्मत्स्याद्यवतारैर्यथा देवान् साधून्सन्मार्गस्थान् लोकसेतून् वर्णाश्रमादिधर्ममर्यादाश्च सर्वदा बिभर्षि पुष्णासि तदर्थं च हिंसया वर्तमानान् उन्मार्गान् हंसि तथैवैतदपि तव जन्मभूमेर्भारहाराय भागवतारणाय । न तु त्वं कस्यापि तनयः ॥ २७ ॥ तप्तोऽहमिति ॥ शान्तोग्रेण प्रथमं शान्तः शीतस्ततश्चोग्रो दाहकस्तेन अत एवात्युल्बणेन भयङ्करेण अत एव दुःसहेन ते तेजसा ज्वररूपेणाहं तप्तोऽस्मि । अतः शरणागतं मां ततो रक्षेति शेषः । यावदाशया कामवासनयाऽनुबद्धास्तत्तद्विषयप्राप्त्युपायेषु भ्रमन्तस्तवाङ्घ्रिमूलं नो सेवेरन् शरणं नैवागच्छन्ति तावत्तेषां देहिनां तापो युक्तः । मम तु त्वच्छरणागतस्य दुःखमात्रं न युक्तं किं पुनर्ज्वरमात्रम् ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वयं पराभूतः सन् स्वतापेनापराभूतं परमेश्वरं श्रीकृष्णं नारायणं विदित्वा प्रणमन्नाह—नमामीति ॥ अनंतशक्ति असंख्यसामर्थ्यं अतः परेशं परेषां महामुक्तानां कालप्रकृतिपुरुषाणां चेशं नियामकं ॥ अतः सर्वात्मानं चेतनाचेतनवृंदप्रवर्त्तकं

प्रवर्त्तके सत्यपि केवलं निर्दोषं ॥ ज्ञप्तिमात्रं ज्ञानघनविग्रहं ॥ एवं सत्यपि विश्वोत्पत्त्यादिहेतु ॥ यत् ब्रह्म अस्ति तत् प्रशांतं ॥ ब्रह्मलिंगं शरीरं यस्या परंब्रह्म त्वां नमामि ॥ २५ ॥ परमात्मनः सर्वोत्कृष्टत्वेन स्तुवन्नाह काल इति । अत्र कालादिपदानां श्लोकानुक्रमेणाचयो न क्रियते किं त्वर्थानुसंगत्वनुसारेणैव कालः परमाण्वादिप्रलयांतःजीवः पुरुषः क्षेत्रं प्राणः सूत्ररूपं महत्तत्त्वं ॥ कर्मजीवानामनेकजन्मार्जितं शुभाशुभं । स्वभावः सत्वादित्रिगुणसमुदायः द्रव्यं पंचभूतानि च ॥ दैवं इंद्रियदेववृंदं ॥ आत्मा अहंकारः विकारः इंद्रियाणि तेषां चतुर्विंशतितत्वानां संघातो देहः ॥ तस्य बीजरोहवत् बीजांकुरवत् ॥ प्रवाहः बीजरूपात्कर्मणः ॥ अंकुररूपो देहः देहात्पुनः कर्म कर्मणः पुनर्देहः एवंभूतः पुनः पुनः प्रवाहः एषा त्वन्मायाजीवमोहिनी तेषां कालादीनां निषेधस्तुल्यत्वनिषेधो यस्मिन् तं त्वां प्रपद्ये शरणं प्राप्तोस्मि ॥ २६ ॥ ननु वसुदेवपुत्रस्य मम कथमेवं माहात्म्यमिति चेत्तत्राहनानेति ॥ लीलयैव उपपन्नैरंगीकृतैः नानाभावैर्वराहादिनानावतारैः देवादीन् बिभर्षि रक्षसि ॥ उन्मार्गान् तद्विपरीतान् हंसि ॥ एतत् वर्त्तमानं यादवं ते जन्म ॥ अतो न त्वं वसुदेवपुत्र इति भावः ॥ २७ ॥ अज्ञानेन त्वदपराधे प्रवृत्तं मां पाहीत्यभिप्रायेणाह तप्त इति ॥ उल्वणेन बलवत्तरेण शोतंशी तं उग्नं अधिकं यस्मिस्तेन ॥ धनकलत्राद्याशानुबद्धाः जनाः यावत् ते तवांघ्रिमूलं ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्तुतिमेवाह नमामीति चतुर्भिः । तावत् स्वरक्षणोपयुक्तपरत्वविशिष्टतया स्तौति द्वाभ्याम् । नमामीति ॥ परेषां ब्रह्मादीनामीशो नियन्ता तं, किं प्राकृतराजादिवन्नियन्ता नेत्याह । सर्वात्मानं सर्वेषां ब्रह्मादीनामन्तःप्रविश्य धारकत्वेन नियन्तारमित्यर्थः । के स्वात्मानुभवसुखे वलते तिष्ठतीति तं, धातूनामनेकार्थत्वात् संवरणार्थस्य वलतेः स्थित्यर्थत्वम् । ज्ञप्तिमात्रं ज्ञानस्वरूपे स्वात्मनि जाड्यरहितं, अत्र मात्रशब्देन जाड्यराहित्यस्य विवक्षितत्वात् । ननु ममैवंभूतत्वे सति जगत् कर्त्ता क इति चेत्त्वमेवेति वक्तुं कारणत्वोपयुक्तसर्वशक्तित्वादिगुणयोगमाहानन्तशक्तिमिति । अनन्ताः शक्तयो यस्य तं, कारणत्वमाह । विश्वस्य उत्पत्तिश्च स्थानं स्थितिश्च संरोधो लयश्च तेषां हेतुस्तं, ममैवंविधत्वे किं प्रमाणमत आह । ब्रह्मलिङ्गं वेदप्रमाणकं, ननूक्तविधं ब्रह्म नाहं तत्राह । यत् वेदान्तप्रतिपाद्यं ब्रह्म 'विशोको विजिघत्सोऽपिपास' इत्यादिश्रुत्याभिहितं यद्ब्रह्मेत्यर्थः । तत्त्वमेव । नन्वहमपि कदाचिच्छोचामि नेत्याह । प्रशान्तमशनायापिपासाशोकमोहजरामृत्युरूपोर्मिषट्कराहितमित्यर्थः । अतः, त्वा त्वामुक्तविधं भवन्तं नमामि ॥ २५ ॥ ननु कालकर्मस्वभावादीनामेव जगद्धेतुत्वं, न ममेत्यत आह ॥ काल इति ॥ कालः क्षोभहेतुः, दैवं कालाद्यभिमानि देवता, कर्म जीवादृष्टं, जीवः कालाद्यधीनः क्षेत्रज्ञः, स्वभावः जडत्वाजडत्वपरिणामित्वादितत्तद्वस्तुस्वभावः, द्रव्यं पृथिव्यादिभूतपञ्चकं, क्षेत्रं पृथिव्याद्युत्पत्तिभूमिः प्रकृतिः, प्राणः पञ्चवृत्तिः प्राणः, आत्मा मतिः, विकारोऽवस्थाभेदः, तत् संघातः शरीरं, बीजरोहप्रवाहः बीजं कर्मरोहोऽङ्कुरस्तद्वत्प्रवाहः देहाद्बीजरूपं कर्म, ततोऽङ्कुररूपो देहस्ततः पुनरेवमिति प्रवाह इत्यर्थः । एषा एतत् सर्वमित्यर्थः । त्वन्माया त्वत्संकल्पज्ञानाधीनमित्यर्थः । तस्या निषेधोऽपोहो यस्मिस्तं तन्निषेधं, त्वां प्रपद्ये भजे ॥ २६ ॥ ननूक्तविधः परेशोऽन्य एव यदुषु अन्यतमो देवकीतनयोऽहमन्य एवेत्यत आह ॥ नानाभावैरिति ॥ लीलयैव हेतुभूतया, उपपन्नैः स्वीकृतैः, अन्यथा त्वय्यकर्मवश्ये तेषामनुपपन्नत्वादिति भावः । नानाभावैस्त्वत्प्रकारभूतैर्मत्स्याद्यवतारैरित्यर्थः । देवान्, साधून्, लोकसेतून् धर्ममर्यादाः, क्वचित्तु धर्मसेतूनित्यपि पाठो दृश्यते । बिभर्षि पुष्णासि । हिंसया वर्त्तमानान्, अत्र हिंसेत्युपलक्षणं तेन मद्यमांसमैथुनायोग्यान्नाशनजलपानादिरूपाधर्मे वर्त्तमानानित्यर्थः । उन्मार्गान् उत्पथान्, क्वचित्तु 'हंस्युन् मार्गान् स्वेच्छया वर्त्तमानान्' इत्यपि पाठो दृश्यते, तत्पक्षे वामदक्षिणशब्दाभिहितशाक्तकौलकुण्डबौद्धादीन् स्वेच्छाप्रवृत्तानुन्मार्गानित्यर्थो बोध्यः । हंसि । तद्वत्, ते तव, एतत् जन्मापि, तवायमवतारोऽपीत्यर्थः । भूमेः, भारहाराय भारमपनेतुमित्यर्थः । अस्ति । वस्तुतो न त्वं कस्यापि पुत्र इति भावः ॥ २७ ॥ इत्थं तस्य शरण्यत्वमाविष्कृत्य स्वकीयामार्त्तिमावेदयति ॥ तप्त इति ॥ शान्तं च तदुग्रं च तेन, प्रथमतः शान्तवत् प्रतीयमानेनाप्यन्ततउग्रेणेत्यर्थः । अत एव, अत्युल्बणेन भीतिजनकेन, दुःसहेन सोढुमशक्येन, ते तव, तेजसा त्वत्तेजोपबृंहितेन, ज्वरेण, शीतज्वरेण, अहं तप्तः । ततः, प्रपन्नं मां पाहीति भावः । परसंतापकस्य युक्त एव ताप इत्यत आह तावदिति । यावत्, आशया रक्षकान्तरसंभावनाशया, अनुबद्धाः संयुताः सन्तः, ते तव, अङ्घ्रिमूलं नो सेवेरन्, तावत् एव, देहिनामाशायुक्तप्राणिनां, तापः । त्वत्सेवायां प्रवृत्तौ त्वनुचित इति भावः ॥ २८ ॥

कृष्णप्रिया

ज्वरचतुष्टयी—ज्वर भगवान का यशोगान कर रहा है—हे नाथ ! अनन्तशक्ति आपको प्रणाम; ब्रह्मादि देवाधिदेवों के परमेश्वर, सर्व के आत्मा, सर्वस्वरूप केवल ब्रह्मस्वरूप ज्ञानस्वरूप भगवान् आपके श्रीचरणों में मेरा प्रणाम । विश्व की उत्पत्ति स्थिति एवं निरोध-लय के कारण नाथ ! आप को नमस्कार । श्रुति-निरूपित जो परमब्रह्म है वह भी आप हैं । आपके चरणों में नमस्कार ॥ २५ ॥ नाथ ! भगवन् काल-दैव-कर्म-जीव-स्वभाव-द्रव्यपदार्थ-क्षेत्रशरीर-सूत्रात्मा-प्राणआत्मा

अहंकार-विकार एकादश इन्द्रियाँ-तत्सङ्घात-पञ्चमहाभूत-लिङ्गदेह-स्थूलदेह, स्थूलदेह से कर्म, कर्म से पुनः लिङ्गदेह, लिङ्गदेह से पुनः स्थूल यह सारी बीजाङ्कुर न्याय से देहादि की उत्पत्ति यह सारी आपकी ही माया-शक्ति है। और आप माया के निषेध की अन्तिम अवधि हैं। मैं आपके श्रीचरणों का प्रपन्न हूँ ॥ २६ ॥ कृपानाथ! कृपापरवश! आप की दिव्य लीला से अनन्त लोक मङ्गल विग्रह धारण कर लेते हैं और इन विग्रहों से देव मनुष्य संत धर्म मर्यादा आदि दिव्य तत्वों का पालन पोषण संरक्षण करते हैं। पुनः जो उच्छृंखल उन्मार्गगामी दैत्य दुष्ट असुरों का संहार-नाश भी करते हैं। आपका यह श्रीकृष्णावतार पूर्णावतार है वह भूतल का भार-निवारण के लिये है ॥ २७ ॥ हे नाथ! आपके शान्त-उग्र-और अतिशय भयानक तेज ज्वर से मैं अतिशय सन्तप्त हो रहा हूँ। हे कृपानाथ! देहधारी प्राणियों को तभी तक ताप रहता है जब तक वे जीव आशापाश में बद्ध रहे हैं और आप के श्रीचरणों का शरण नहीं स्वीकारते हैं ॥ २८ ॥

श्रीभगवानुवाच

त्रिशिरस्ते प्रसन्नोऽहं[1] व्येतु ते मज्ज्वराद् भयम्। यो नौ [2]स्मरेत संवादं तस्य त्वन्न भवेद् भयम् ॥ २९ ॥
इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः। बाणस्तु रथमारूढः प्रागाद्योत्स्यञ्जनार्दनम् ॥ ३० ॥
ततो बाहुसहस्रेण नानायुधधरोऽसुरः। मुमोच [4]परमक्रुद्धो बाणांश्चक्रायुधे [5]नृप ॥ ३१ ॥
तस्यास्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना। चिच्छेद भगवान् बाहून् शाखा इव वनस्पतेः ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—श्रीभगवान् उवाच—त्रिशिरः, ते, प्रसन्नः, अस्मि, मज्वरात्, ते, भयम्, वि, एतु, यः, नः, संवादम्, स्मरति, तस्य, त्वत्, न, भयं, भवेत् ॥ २९ ॥ इति, उक्तः, माहेश्वरः, ज्वरः, अच्युतम्, आनम्य, गतः, रथम्, आरूढः, बाणः, तु, जनार्दनम्, योत्स्यन्, प्रागात् ॥ ३० ॥ नृप! ततः, परमक्रुद्धः, नानायुधधरः, असुरः, बाहुसहस्रेण, चक्रायुधे, बाणान्, मुमोच ॥ ३१ ॥ अस्त्राणि, अस्यतः, तस्य, बाहून्, वनस्पतेः, शाखा, इव, भगवान्, क्षुरनेमिना, चक्रेण, चिच्छेद ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे त्रिशिरः। व्येतु अपयातु। मदाज्ञापालकः सन्सुखं विचर। काऽसावाज्ञा तामाह। य इति। नौ आवयोरिमं संवादं यः स्मरेत्तस्य त्वत् त्वत्तो न भयं भवेत्। त्वया भयं नोत्पादनोयमित्यर्थः ॥ २९–३३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इमं श्लोकचतुष्टयात्मकम् 'नमामि' इत्यारभ्य 'यावदाशानुबद्धाः' इत्यंतं संवादम्। इत्यर्थ इति–त्वया स त्यक्तव्य इति भावः। भयं न भवेदिति भगवतोक्तं न तु तं त्वं मा स्पृशेत्युक्तमत एतत्संवादश्रोतुरपि कश्चिज्ज्वरो यत्तिष्ठति ततस्तस्य भयं न भवतीति बोध्यम्। हरिवंशे त्वत्र श्लोकद्वयात्मको मन्त्रोपि ज्वरघ्न उक्तः। तथाहि–"त्रिपाद्भस्मप्रहरणस्त्रिशिरा नवलोचनः। स मे प्रीतः सुखं दद्यात्सर्वामयपतिर्ज्वरः। आद्यंतवंतः कवयः पुराणाः सूक्ष्मा बृहंतोप्यनुशासितारः। सर्वाञ्ज्वरान् घ्नंतु ममानिरुद्धप्रद्युम्नसंकर्षणवासुदेवाः इति ॥ २९ ॥ प्रागात् युद्ध इति। योत्स्यन् योत्स्यमानः। जनान् दुष्टानर्दयति पीडयतीति निरुक्तेः स्वपीडकमित्यर्थः ॥ ३० ॥ ततो युद्धभूमावागमनानन्तरम्। चक्रायुधेऽपि बाणच्छेदकास्त्रधरेऽपि बाणान्यतो मुमोचातो निर्बुद्धिरयमिति हसन् राजानं सम्बोधयति—नृपेति। नृपा एवंवृत्ता एवं भवन्ति यथा त्वया समाधिष्ठं जानताऽपि शमीककण्ठेऽहिर्निक्षिप्तस्तद्वदयमिति भावः ॥३१॥ तस्य बाणस्य। वनस्पतेर्बृहद्वृक्षस्य। तदा बाणैर्न किमपि कर्तुं शक्तद्वयथामापेति दृष्टांतमाह—वनस्पतेरिति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमस्य सकामत्वादापाततस्तत्ताप एव शान्तो जातो नतु सर्वोपीति श्रीभगवद्वाक्येनैव दर्शयति—त्रिशिर इति। सम्वादमपि किम्पुनर्युद्धादिकं स्मरत्यपि किम्पुनः शृणुयात् कीर्त्तयेद्वा अन्यत्तैः तत्र मदाज्ञेत्यस्यादौ त्वमपीत्यधिकं वाच्यं यो नाविति करुणया तादृशलोकतापकं मुञ्चतापि लोककरुणयोक्तं यद्वा तस्यापि न भवेत् किम्पुनर्मत्प्रपन्नस्य तव मज्ज्वराद्भयमित्यर्थः। इति च तथैव ॥ २९ ॥ अच्युतमिति। सर्वदोषक्षमादिनिजमाहात्म्यतश्च्युतिराहित्याभिप्रायेण तुशब्दस्तादृङ्महापराक्रमस्य ज्वरस्यापगमेपि बाणस्यागमनान्निर्बुद्धित्वं बोधयति रथं नन्दीश्वरसारथिकं माहेश्वरमेव यथोक्तं श्रीविष्णुपुराणे—

---

[1] ऽस्मि–श्रीधर. वंशी. जीव. वीर. विश्व; ऽस्मि–प्रा. पा.। [2] स्मरति–श्रीधर. वंशी. जीव. वीर. वि.। [3] युतो–प्रा. पा.। [4] परिघं–वीर। [5] नृपः–श्रीधर. टि.।

"नन्दीशसङ्गृहीताश्वमधिरूढो महारथम् । बाणस्तत्रागमद्योद्धुं कृष्णकार्ष्णिबलैः सह ॥" इति

योत्स्यन् योत्स्यमानः जनान् दुर्जनान् अर्दयतीति तथा तमिति स्वपीडनार्थमेवागत इति भावः ॥ ३० ॥ नानायुधधरोपि नृपः असुरसैन्यराजोपि परमक्रुद्धः सन् स्वयमेव दूरादादौ बाणान् मुमोच चक्रायुध इति तस्मिंस्तेषां वैफल्यं सूचयति यद्वा चक्रायुधेपि बाणान्मुमोच कुतः परमक्रुद्धः महाक्रोधेन विचारलोपादित्यर्थः । एवं तस्यातिनिर्बुद्धित्वेन हसन् सम्बोधयति नृपेति ॥ ३१ ॥ पश्चादस्त्राणि विविधान्यस्यतः सत इत्यस्त्रमोचनारम्भ एव बाहून् चिच्छेदेति ज्ञेयं यतो भगवान् सर्वशक्तियुक्तः क्षुरवत्तीक्षणतरा नेमयः प्रान्ता यस्य तेनेति छेदने शैघ्र्यमनायासादिकञ्च द्योतयति तथाच हरिवंशे—

"अलातचक्रवत्तूर्णं भ्राम्यच्चक्रं सदाभवत् । क्षिप्तन्तु वासुदेवेन बाणस्य रणमूर्द्धनि ॥
विष्णुचक्रं भ्रमत्याशु शैघ्र्याद्रूपं न दृश्यते । तस्य बाहुसहस्रस्य पर्य्यायेण पुनःपुनः ॥
बाणस्य छेदनं चक्रे तच्चक्रं रणमूर्द्धनि ॥ इति ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्वादमपि, किं पुनर्युद्धादिकम्, स्मरत्यपि किं पुनः श्रृणुयात् कीर्तयेद्वा; अन्यत्तैर्व्याख्यातम् । यद्वा, तस्यापि न भवेत्, किं पुनर्मत्प्रपन्नस्य तव मज्ज्वराद्भयमित्यर्थः । किंवा न भवेन्न भविष्यत्येवेति किं तदर्थमाज्ञा कार्य्येति भावः ॥ २९ ॥ आनम्य दण्डवत् पातादिना सम्यङ् नत्वा, अच्युतमिति तादृशापराधिनं प्रत्यपि भयेन सद्यो वाचैव प्रपत्त्या अभयप्रदानेन—'सकृदेव प्रपन्नो यस्तवास्मीति च याचते । अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम ॥' इत्यादि-स्वप्रतिज्ञातस्तथा स्वल्पस्तुतिमात्रेण तत्रापि क्षणदैन्येनापि सर्वदोषक्षमादिनिजमाहात्म्यतश्च्युतिराहित्याभिप्रायेण । ननु तथापि लोकोपतापके तस्मिंस्तादृशोऽनुग्रहोऽनुचितः ? तत्राह—माहेश्वर इति, निजप्रेष्ठश्रीरुद्रभक्तत्वादित्यर्थः । अतः श्रीभगवदनुग्रहेण तस्याशेषदोषक्षयादधुनैव तदपि सिद्धमिति भावः । तु-शब्दस्तादृङ्महापराक्रमस्य ज्वरस्यापगमनेऽपि बाणस्यागमनान्निर्बुद्धित्वं बोधयति, रथं माहेश्वरमेव । श्रीनन्दीश्वरसारथिकम्, अतः प्रकर्षेणागादागतः, योत्स्यन् योत्स्यमानः, जनान् दुष्टानर्दयतीति तथा तमिति स्वपीडार्थमेवागतमिति भावः ॥ ३० ॥ नानायुधधरोऽपि परमक्रुद्धः सन् दूरादादौ बाणान् मुमोच । चक्रायुध इति तेषां तस्मिन् वैफल्यं सूचयति । यद्वा, चक्रायुधेऽपि बाणान्मुमोच । कुतः ? परमक्रुद्धो महाक्रोधेन विचारलोपादित्यर्थः । एवं तस्यात्यतिनिर्बुद्धित्वेन हसन् सम्बोधयति—नृपेति ॥ ३१ ॥ पश्चादस्त्राणि विविधान्यस्यतः सतोऽस्त्राणि बाहूंश्च चिच्छेद, यद्वा, अस्यत इति वर्त्तमाननिर्द्देशेनास्त्रमोचनात् प्रागेव बाहून् चिच्छेदेति ज्ञेयम्, यतो भगवान् सर्वशक्तियुक्तः । क्षुरवत्तीक्षणतरा नेमयः प्रान्ता यस्य तेनेति छेदने शैघ्र्यमनायासादिकत्वञ्च द्योतयति; तथा च श्रीहरिवंशे (विष्णु-प० १२६।१२८-१३०)—

'अलातचक्रवत्तूर्णं भ्राम्याञ्चक्रं तदाभवत् । क्षिप्तन्तु वासुदेवेन बाणस्य रणमूर्द्धनि ॥
विष्णुचक्रं भ्रमत्याशु शैघ्र्याद्रूपं न दृश्यते । तस्य बाहुसहस्रस्य पर्य्यायेण पुनः पुनः ॥
बाणस्य छेदनं चक्रे तच्चक्रं रणमूर्द्धनि ॥' इति ।

तत्र च बाणः किञ्चित् प्रतिकर्त्तुमशक्तो वृक्षवत् स्तब्धतां प्राप्त इत्यादिकं दृष्टान्तेन बोधयति-शाखा इति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं संस्तुतः शरण्यो भगवान् तमनुगृह्णन्नाह— त्रिशिर इति । हे त्रिशिरः ! ते तुभ्यम् अहं प्रसन्नः तव मज्ज्वराद्भयं व्येतु व्यपैतु यः पुमानावयोरिमं सम्वादं स्मरति तस्य त्वत् त्वत्तः भयं न भवेत् तं त्वं मा भीषयेत्यर्थः ॥ २९ ॥ इतीति। आनम्य प्रणम्य योत्स्यन् योद्धुं जनार्दनं कृष्णं प्रागादभ्यापतत् ॥ ३० ॥ तत इति । नानाविधान्यायुधानि धरतीति तथा सोऽसुरो बाणः क्रुद्धो हे नृप ! चक्रायुधे कृष्णे परिघं मुमोच प्रायुङ्क्त ॥ ३१ ॥ तस्येति । अस्यतः क्षिपतः प्रयुञ्जानस्येति यावत् तस्य बाणस्यास्त्राणि बाहूंश्च सकृद्युगपत् क्षूरस्येव नेमिर्यस्य चक्रेण सुदर्शनेन चिच्छेद वनस्पतेर्वृक्षस्य शाखा इव ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नौ तव मम च त्वत्तः सकाशात्तस्य भयं न भवेदित्येव भगवतोक्तं न तु तं त्वं मास्पृशेत्युक्तमत एतत् सम्वादश्रोतुरपि क्वचित् ज्वरो यत्तिष्ठति तद्भयानुत्पादक एवाकिञ्चित्कर एवेति ज्ञेयम् ॥ २९ ॥ योत्स्यन् योत्स्यमानः ॥३०-३१॥ तस्य बाणस्य अस्यतः क्षिपतः ॥ ३२ ॥

गूढार्थदीपिनी

व्येतु निवर्तताम् । नौ आवयोः संवादम् । त्वत् त्वत्तः ॥ २९ ॥ योत्स्यन् योद्धुम् ॥ ३० ॥ चक्रायुधे श्रीकृष्णे ॥ ३१ ॥ असकृत् अस्त्राणि अस्यतः क्षिपतः तस्य बाणस्य बाहून् चक्रेण चिच्छेदेत्यन्वयः । क्षुरनेमिना तीक्ष्णधारेण ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

व्येतु अपयातु नौ आवयोः सम्वादं यः स्मरति स्मरेत् तस्य त्वत् त्वत्तो भयं नो भवेत् त्वया भयं मदाज्ञया नोत्पादनीयमित्यर्थः ॥ २९–३३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

त्रिशिरः हे ज्वरा मज्ज्वरान्मम ज्वरात् । मथ्नातीति मम चासौ ज्वरश्च तस्मादित्यपि । ते त्वदुपरि प्रसन्नोऽस्मि ते भयं व्येतु । यो नौ तव च मम च संवादं स्मरति तस्य त्वत्त्वत्तो भयं न भवेत् । हरिवंशे च । श्रीभगवानुवाच । महामृधे तव मम च द्वयोरिमं पराक्रमं भुजबलकेवलाः स्त्रियः । प्रणम्य मामेकमनाः पठेत्तु यः । स वै भवेज्ज्वरविगतज्वरो नर इति । ज्वरविभजनं तथा तत्समसमरादिकं च तत्रोक्तमनुसन्धेयम् । तत्र बाणस्थस्वत्राणकृदिति बहुमत इति कृष्णवर्त्मसङ्गरोक्तिरत्र तु तदुत्तरग्रन्थत्वेनाग्निर्वै देवानामवस इत्यादेस्तज्जयो न यशोविशेषको यशोदासुतस्येत्यनुक्तिरिति ज्ञेयम् ॥ २९ ॥ रथं पुनरन्यम् ॥ ३० ॥ बाहुसहस्रेण नानायुधानां धरः ॥ ३१ ॥ असकृदस्त्राण्यस्यतः क्षिपतः क्षुरनेमिना चक्रेण वनस्पतेः शाखा इव बाहूंश्चिच्छेद । मारणमकृत्वा कृन्त्वा भुजांस्तत्त्यागे निमित्तं हरिवंशोक्तमनुस्मर्तव्यम् । तच्च । भूयस्त्वमसितापाङ्गि विवस्त्रावस्थिता रणे । बाणे संरक्षणपरा हन्मि बाणं न संशयः । एवमुक्ता तु कृष्णेन भूयो देव्यब्रवीदिदम् । प्रयच्छ ह्यभयं बाणे जीवपुत्री त्वमेव च । मया दत्तवरो ह्येष भूयश्च परिरक्ष्यते । न मे मिथ्या समुद्योगं कर्तुमर्हसि माधव । एवमुक्ते तु वचने कृष्णः परपुरञ्जयः । क्रुद्धः प्रभाषते वाक्यं शृणु सत्यं तु भामिनि । बाणो बाहुसहस्रेण नर्दते दर्पमाश्रितः । एतेषां छेदनं त्वद्य कर्तव्यं नात्र संशयः । द्विबाहुना च बाणेन जीवपुत्री भविष्यसि । एवमुक्ते तु वचने कृष्णेनाक्लिष्टकर्मणा । प्रोवाच देवी बाणोऽयं देव एवं भवेदितीति ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं विज्ञापितो भगवान् गुह्यकर्ता मृत्योरयं ज्येष्ठः भ्रातेति तं स्थापयितुं नियमबन्धेन निरूपयति **त्रिशिरस्ते प्रसन्नोऽहमिति** । त्रीणि शिरांसि यस्येति । वातपित्तश्लेष्माणः धातुवैषम्यात् । न कर्माणि । कालकर्मस्वभावा वा शिरांसि भवन्ति । अतः सम्बोधनेन तस्याक्षयत्वं निरूपितम् । **अहं प्रसन्न** इति । तव सर्वमेव कार्यं सेत्स्यतीत्युक्तम् । यदर्थं प्रार्थितः, तदाह **व्येतु ते मे ज्वराद्भयमि**ति । परं यथा मदीयात्तव न भयम्, तथा त्वत्तोऽपि न मदीयानां भयमित्याशयेनाह **यो नौ स्मरेत संवाद**मिति । **नौ** आवयोः स्तोत्रप्रसादरूपः संवादः । तस्य त्वत् त्वत्तः भयं न भवेदिति भगवदाज्ञा ॥ २९ ॥ एवं कृतार्थः सन् भगवदाज्ञां प्राप्य व्याजेनात्र कस्यापि भयं न कर्तव्यमिति ज्ञापितः स्वस्थानमेव जगाम, मृत्योः समीपम् । **इत्युक्त** इति । अच्युतत्वाद्वाक्यमपि तथा । ततो माहेश्वरो ज्वरो गतः । तस्मिन् गते महादेवाल्लब्धवरः दैवं बलमाश्रित्य युद्धार्थमागत इत्याह **बाणस्त्व**िति । तुशब्दः पूर्वागमनाद्विशेषमाह । बाणोऽपि बाणवज्जनार्दन इति जनार्दनं योद्धुं योधयितुम् ॥ ३० ॥ ततः प्रत्येकं बाहुषु नानाशस्त्रा(स्त्रा)णि स्थापयित्वा युयुध इत्याह **ततो बाहुसहस्रेणे**ति । नानायुधानि बिभर्तीति । ततश्चक्रायुधं प्रति नानायुधानि मुमोच । ननु भगवता पूर्वमस्य प्राणरक्षा कृतेति कथं शस्त्राणि मुमोच, तत्राह **परमक्रुद्ध** इति । मुमोच, परं वस्तुतस्त्वक्रुद्धः । अन्यथा परमत्वं क्रोधविशेषणं न सम्भवति । समासे वा असामर्थ्यं स्यात् । **चक्रायुध**मित्यनेन चक्रेण सर्वनिराकरणं द्योतितम् । एकतः सहस्रमायुधानि, एकतः सुदर्शनमिति ॥३१॥ समतां प्राप्तां परिहरति **तस्यास्यत** इति । **अस्त्राण्यस्यतः क्षिपतः** । लौकिकप्रकारार्थं क्षुरनेमिना चक्रेण चिच्छेद दशशतानि बाहून् । मध्ये शिरश्छेदनं प्राप्तं निराकरोति **शाखा इवे**ति । **वनस्पतेः** । तेन महानिति न शिरश्छिन्नम्, किन्तु तस्य प्रसरणनिराकरणार्थं शाखा इव बाहूनेव चिच्छेद । बाहव एव वरप्राप्ता इति ॥ ३२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

त्रिशिरस्त इत्यत्र । **धातुवैषम्या**दिति । धातुवैषम्यजनितत्वाज्ज्वरस्य वातादय एव शिरांसि, नतु सात्त्विकादित्रिविधकर्माणि, कालादयो वेतिपक्ष इत्यर्थः । **अत** इति । अतः परमित्यर्थः । **बाणस्त्व**त्यत्र । **बाणोपी**ति । बाणासुरोपि बाणेन शरेण यथादृष्टद्वारैव कार्यं क्रियते, तथा जनार्दनोपि भगवान् दृष्टद्वारेणैव कार्यं करोतीति ज्ञात्वा अहं तु दैवबलवान् जात इति मत्वा तादृशं योद्धुं प्रायादित्यर्थः । **तत** इत्यत्र । **न संभवती**ति । पदार्थः पदार्थेनान्वेतीति नियमः । क्रोधस्तु पदार्थैकदेश इति भावः । अस्य नियमस्य प्रायिकत्वेन समाधाने दूषणान्तरमाहुः **समासे वे**ति । कर्मधारये कर्तव्ये परमपदस्य क्रुद्धविशेषणत्वाभावेन विशेषणविशेष्ययोः परस्परानन्वयरूपमसामर्थ्यं स्यात्, तथा च समास एव न भवेत्, 'समर्थः पदविधि'रित्यनुशासनादिति भावः ।

श्रीसुबोधिनीसारः

श्रीकृष्णोक्तिः। हे त्रिशिरः ते तवोपरि प्रसन्नोस्मि मम ज्वरात्तो तव भयं व्येतु नश्यतु तथाप्येवं कार्यमिति प्रशास्ति नौ आवयोः संवादं यः स्मरति तस्य पुंसः त्वत्त्वत्तो भयं न भवेत् एतेन इह "शैवो ज्वरोरिष्टहेतुर्निवर्तत उपायतः। वैष्णवो मृतिहेतुस्तु न निवर्तति कर्हिचित्" इति सूचितम् ॥ २९ ॥ इत्येवमुक्तोऽच्युतं श्रीकृष्णं प्रणम्य माहेश्वरो ज्वरो गतः बाणस्तु योत्स्यन् योद्धुं रथमारूढो जनार्दनं हरिं प्रायात् ॥ ३० ॥ ततोनन्तरं बाहूनां सहस्रेण नानायुधधरोऽसुरोऽतिक्रुद्धः चक्रायुधे चक्रायुधदमुद्दिश्य बाणान् मुमोच चिक्षेप हे नृप ॥ ३१ ॥ असकृन्मुहुरस्त्राणि अस्यतः क्षिपतस्तस्य तीक्ष्णधारेण चक्रेण भगवान् बाहून् चिच्छेद वनस्पतेर्महावृक्षस्य शाखा इव ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं संस्तुतः शरण्यो भगवान् तमनुगृह्णन्नाह—त्रिशिर इति। भयंकरत्वं सूचयन् सम्बोधयति—हे त्रिशिरः! ते तुभ्यमहं प्रसन्नः, अतः मज्ज्वरात्तव भयं व्येतु अपगच्छतु। एवमभयं कृत्वा आज्ञापयति–यः पुमानावयोः संवादं स्तुतिप्रसादरूपं स्मरति स्मरेत्तस्य त्वत्त्वत्तो भयं न भवेत् त्वया भयं नोत्पादनीयमित्यर्थः ॥ १९ ॥ इत्येवं भगवतोक्तो माहेश्वरो ज्वरस्तमच्युतमानम्य नमस्कृत्य ततो गतः। बाणोऽपि रथारूढः सन् योत्स्यन् योद्धुं जनार्दनं कृष्णं प्रति प्रागात् ॥ ३० ॥ ततो हे नृप! बाहुसहस्रेण नानाविधानि आयुधानि धरतीति तथा स बाणः परमक्रुद्धः सन् चक्रायुधे कृष्णे बाणान् मुमोच प्रायुङ्क्त ॥ ३१ ॥ पुनः पुनः अस्त्राणि अस्यतः प्रयुञ्जानस्य तस्य बाणस्य बाहून् चक्रेण भगवान् चिच्छेद। तत्र दृष्टान्तमाह–वनस्पतेर्वृक्षस्य शाखा इवेति ॥ ३२ ॥

अन्वितार्थप्रकाशिका

त्रिशिर इति। हे त्रिशिरः! ते तुभ्यमहं प्रसन्नः अस्मि। अतः मज्ज्वरात्तव भयं व्येतु अपगच्छतु। यः पुमानावयोः संवादं स्तुतिप्रसादरूपं स्मरति स्मरेदपि किं पुनः श्रृणुयात्कीर्त्तयेद्वा तस्य त्वत्तो भयं न भवेत्। त्वया भयं नोत्पादनीयमित्यर्थः ॥ २९ ॥ इतीति। इत्येवं भगवतोक्तो माहेश्वरो ज्वरस्तमच्युतमानम्य नमस्कृत्य ततो गतः। बाणोऽपि तथा रथं नन्दीश्वरसारथिकं माहेश्वरमिति विष्णुपुराणे। आरूढः सन् योत्स्यन् योद्धुम्। शता आर्षः। जनार्दनं कृष्णं प्रति प्रागात् ॥३०॥ तत इति। ततो हे नृप! बाहुसहस्रेण नानाविधानि आयुधानि धरतीति तथाभूतोऽपि सोऽसुरो बाणः परमक्रुद्धः संश्चक्रायुधे कृष्णे बाणान्मुमोच प्रायुङ्क्त। चक्रायुध इति प्रथमान्तपाठे चक्रायुधोऽपि च बाणः ॥ ३१ ॥ तस्येति। बाणमोचनानन्तरम् असकृत्पुनः पुनः अस्त्राणि अस्यतः प्रयुञ्जानस्य तस्य बाणस्य बाहून् वनस्पतेः वृक्षस्य शाखा इव चक्रेण भगवान् चिच्छेद ॥३२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे त्रिशिरः व्येतु गच्छतु ॥ २९ ॥ योत्स्यन् युधं करिष्यन् ॥ ३० ॥ चक्रायुधे श्रीकृष्णे ॥ ३१ ॥ असकृत् वारंवारं। अस्यतः। क्षिपतः। तस्य बाणस्य ॥ ३२–३३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थं संस्तुतः शरण्यो भगवांस्तमनुगृह्णन्नाह। त्रिशिर इति। हे त्रिशिरः, ते तुभ्यं, अहं प्रसन्नः अस्मि। मज्ज्वरात् ते तव, भयं व्येत्वपयातु। यः पुमान्, नावावयोः, इमं संवादं, स्मरति, तस्य त्वत्त्वत्तः, भयं न भवेत्। तं त्वं मा भीषयेरित्यर्थः ॥ २९ ॥ इतीति। इतोत्थं, उक्तो भगवताऽभिहितः, माहेश्वरो महेश्वरसंबन्धी, ज्वरः, अच्युतं आनम्य, गतः। ततः, बाणस्तु बाणासुरोऽपि, रथं आरूढः, योत्स्यन् युद्धं कर्त्तुमित्यर्थः। जनार्द्दनं श्रीकृष्णं, प्रागात्। अभ्यपतत् ॥ ३० ॥ तत इति। हे नृप, ततः बाहुसहस्रेण, नानायुधधरः, असुरः बाणः, क्रुद्धः सन्, चक्रायुधे श्रीकृष्णे, परिघं मुमोच ॥ ३१ ॥ तस्येति। भगवान् अस्त्राणि, असकृत् अस्यतः क्षिपतः, तस्य बाणस्य, क्षुरनेमिना चक्रेण, वनस्पतेर्वृक्षस्य, शाखाः इव, बाहून् चिच्छेदः ॥ ३२ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण ने कहा—हे त्रिशिर! त्रिपाद! मैं तुम पर प्रसन्न हूँ। भैया! मेरे इस ज्वर से निर्भय हो जाना। विश्व में कोई भी व्यक्ति हम दोनों के संवाद का स्मरण करेगा उसको तुम दोनों से कभी भय नहीं होगा ॥ २९ ॥ भगवान् श्रीकृष्ण के अभयप्रद वचनों का श्रवण कर माहेश्वर ज्वर प्रभु चरणों में प्रणाम करके प्रस्थान कर दिया। इतने में रथारूढ़ होकर सज्जवन कर बाणासुर भगवान् द्वारिकानाथ के साथ संग्राम खेलने के लिये आ पहुँचा ॥ ३० ॥ नरेश! बाणासुर अपने

हजार हाथों में अनेक प्रकार के शस्त्रास्त्रों को सज धज कर आ रहा था। क्रोधाविष्ट बाणासुर सुदर्शन चक्रधारी भगवान् द्वारिकेश पर बाण वर्षा करता था ॥ ३१ ॥ भगवान ने देखा कि बाणासुर हजारों हाथों से विविध प्रकार की बाण वर्षा कर रहा है तब गोविन्द के छूरे के समान तीक्ष्ण धारवाले सुदर्शन चक्र बाणासुर के हाथों को काटने लगे तब ऐसा लगता था कि कोई व्यक्ति तरुवर की कोमल डालियाँ काट रहा है ॥ ३२ ॥

बाहुषु च्छिद्यमानेषु बाणस्य भगवान् भवः । भक्तानुकम्प्युपव्रज्य चक्रायुधमभाषत ॥ ३३ ॥

श्रीरुद्र उवाच

त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये । यं पश्यन्त्यमलात्मान आकाशमिव केवलम् ॥ ३४ ॥

नाभिर्नभोऽग्निर्मुखमम्बु रेतो द्यौः शीर्षमाशाः श्रुतिरङ्घ्रिरुर्वी ।
चन्द्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेन्द्रः ॥ ३५ ॥
रोमाणि [1]वृक्षौषधयोऽम्बुवाहाः केशा विरञ्च्यो [2]धिषणा विसर्गः ।
प्रजापतिर्हृदयं यस्य धर्मः स वै भवान् पुरुषो लोककल्पः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—बाणस्य, बाहुषु, छिद्यमानेषु, भक्तानुकम्पी, भगवान्, भवः, चक्रायुधम्, उपव्रज्य, अभाषत ॥ ३३ ॥ श्री रुद्र उवाच—त्वम्, हि, वाङ्मये, ब्रह्मणि, गूढं, परम्, ब्रह्म, ज्योतिः, यम्, हि, केवलं, आकाशम्, इव, अमलात्मानः, पश्यन्ति ॥ ३४ ॥ यस्य, नभः, यस्य, नाभिः, अग्निः, मुखम्, अम्बु, रेतः, द्यौः शीर्षम्, आशाः, श्रुतिः, उर्वी, अङ्घ्रिः, चन्द्रः, मनः, अर्कः, दृग्, अहम्, शिवः, आत्मा, अहंकारः, समुद्रः, जठरम्, इन्द्रः, भुजा ॥ ३५ ॥ वृक्षौषधयः, रोमाणि, अम्बुवाहाः, केशाः, विरञ्च्यः, धिषणा, विसर्गः, प्रजापतिः, धर्मः, यस्य, हृदयम्, सः, वै, भवान्, लोककल्पः, पुरुषः ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भक्तरक्षणार्थं श्रीरुद्रो भगवंतं स्तौति। त्वं हीति। अयमर्थः। त्वामज्ञात्वाऽयं युध्यत इति न चित्रम्। यतस्त्वं वाङ्मये ब्रह्मण्यपि गूढं ब्रह्म अभिधाऽविषयत्वात्। कुतः। परं ज्योतिः ज्योतिषामपि प्रकाशकत्वादविषय इत्यर्थः। कथं तर्हि प्रतीतिरत आह। यमिति। अमलात्मनां स्वतः प्रकाशस इत्यर्थः ॥ ३४ ॥ आस्तां तावन्निर्गुणस्य तव ज्ञानं लीलयाऽधिष्ठितस्त्वया यो विराडिग्रहः सोऽपि न ज्ञायते उदुंबरफलांतर्वर्तिमशकैरिवोदुंबरफलमित्याशयेन विराड्रूपेण स्तौति द्वाभ्याम्। नाभिरिति। यस्य नभआदयो नाभ्याद्यवयवाः स भवान् लोककल्पः पुरुष इत्युत्तरेणान्वयः। नभो यस्य नाभिः। अग्निर्मुखम्। अंबु रेतः। द्यौः शीर्षम्। आशा दिशः श्रुतिः श्रवणेंद्रियम्। उर्वी अंघ्रिः। चन्द्रो मनः। अर्को दृक्। अहं शिव आत्मा अहंकारः। समुद्रो जठरम्। इंद्रो भुजा बाहुः। इंद्रादयो लोकपाला बाहव इत्यर्थः ॥ ३५ ॥ ओषधयो रोमाणि। यच्छब्दावृत्तिः स्पष्टार्था। अंबुवाहाः केशाः। विरिंचो धिषणा बुद्धिः। प्रजापतिर्विसर्गो मेढ्रम्। धर्मो हृदयम्। लोकैः कल्प्यतेऽवकल्प्यत इति लोककल्पः ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु यदैव येनायुध्यत तदैव तमुपव्रज्य तुष्टावेति भवस्य लज्जापि नाभूत्तत्राह—भगवान् सर्वज्ञः। स्वस्य परस्य ब्रह्मादेरपि तन्मायामोहितत्वं न चित्रमिति जानात्येवातस्तस्मिन्स्वप्रभौ स्वयं भगवति का लज्जेति भावः। भवो रुद्रः ॥ ३३ ॥ युद्धप्रवृत्तिमाह—अयमर्थ इति। अयं बाणः। वाङ्मये वेदे। अभिधा कथनं तदगोचरत्वात्। कथनागोचरत्वे हेतुमाशंकते—कुत इति। इत्यर्थ इति—"येनेद्धः सूर्यस्तपति" इत्यादिश्रुतेरिति भावः। अविषयप्रतीतिप्रकारं शंकते—कथमिति। इत्यर्थ इति—'दृश्यते त्वग्र्यया बुद्धया' इति श्रुतेरिति भावः। त्वं परं ब्रह्मैव ज्योतिरप्राकृतज्योतिस्स्वरूपम् "तत्परं परमं ब्रह्म सर्वं विभजते जगत्। ममैव तद्धनं तेजो ज्ञातुमर्हसि भारत ॥" इति हरिवंशेऽर्जुनं प्रति भगवदुक्तेः। नन्वेवं जानन् कथं मया युद्धमकरोत्तत्राह—वेदेपि गूढं ब्रह्म साक्षादेव त्वं कथं ज्ञेयः स्या इति भावः। तर्ह्यहमज्ञेय एव तत्राह—यं मायामालिन्यरहिता एव पश्यंति अहं तमोमयः कथं पश्येयमिति भावः। मायाश्रयत्वेपि तव न तल्लेप इत्याह–आकाशमिवेति ॥ ३४ ॥ त्वं साक्षाद्ब्रह्मैव

---

[1] यस्यौ–श्रीधर. वंशी. जीव. वीर. विश्व. । [2] रिञ्चो–श्रीधर. वंशी. जीव. वीर. विश्व. ।

जगदिदमस्मदाद्यात्मकं तव विभूतय एवेत्याह—नाभिरिति । यस्य तव नभोंतरिक्षम्, द्यौः स्वर्गः, उर्वी भूमिः । इत्यर्थ इति—‘इन्द्रादयो बाहव आहुरुस्राः’ इत्युक्तेरिति ज्ञेयम् ॥ ३५ ॥ ओषधय उद्भिज्जम् ‘रोमाण्युद्भिज्जजातीनि’ इत्युक्तेः । विसृज्यते रेतःसेचनद्वारोत्पाद्यते देहोऽनेनेति विसर्गः “बिंदुद्वये विसर्गोथ रादेशे सर्गशिश्नयोः” इति निरुक्तिः । लोकानकल्पयति स्वनाभ्यादिभिश्चिन्मयैर्नभोख्यादीन्प्राकृतान् चयतीत्यर्थः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भगवान् महाप्रभावोऽपीति सर्वज्ञ इति वा चक्रायुधमुपव्रज्य शरणागतत्वेनाश्रित्य ननु तथापि महापराधिनं तमुपेक्षितुमेवासावर्हति तत्राह भक्तमनुकम्पितुं शीलमस्येति तथा सः अयं भावः स्वयं भगवन्महिमव्यक्त्यर्थमेव युद्धादिकं कृतवानिति सर्वज्ञे तस्मिन् स्वापराधभञ्जनार्थं यत्नमकरोत् किन्तु निजभक्तस्य तादृशत्वदूरीकरणार्थमेव पूर्वं प्रवृत्तत्वात्तदर्थमेवाधुनाप्युद्यम उचित इति चक्रायुधमिति बाहुवर्गच्छेदनानन्तरं चक्रेणाव्यर्थेन बाणस्य वधशङ्कयेति भावः । अस्तौदिति वक्तव्ये अभाषतेति स्वरूपमात्रवर्णनस्याप्यशक्यत्वेन स्तुतावप्यशक्तेः अतस्तस्य जृम्भापि प्रागेव गतेत्यागतम् ॥ ३३ ॥ त्वं हि त्वमेव परं परमतत्त्वं ननु परमतत्त्वं नाम कथं परिच्छिन्नं दृश्यमानं च एतत् स्यात्तत्राह–ब्रह्म यतोऽन्यद्बृहन्नास्ति तद्रूपं तथा ज्योतिः सर्वप्रकाशकं स्वप्रकाशञ्च नन्वत्र किम्प्रमाणं तत्राह वेदे गूढं रहस्यत्वेन क्वचिदेव तथैव दर्शितं तथाच गोपालतापन्यां । “तेहोचुरेतस्य गोविन्दस्याखिलाधारिणो ब्रूहीतिचेतनश्चेतनानामिति तं ह देवमात्मवृत्तिप्रकाशम्” इति च अत एवोक्तं “गूढं परं ब्रह्म मनुष्यलिङ्गम्” इति ननु कथं तर्हि कश्चिदशुद्ध इव प्रतीयते तत्राह यमिति यं त्वां शुद्धात्मानं केवलं शुद्धं स्वरूपशक्त्यैकविलासिनं पश्यन्ति यथावदनुभवन्ति किमिव आकाशमिव यथान्यधर्मैराकाशं न लिप्यते तथात्वमित्येतदंशे तत्तुल्यमित्यर्थः ॥३४॥ नाभिरिति युग्मकम् । लोकैश्चतुर्दशभिर्भुवनैः कल्पते कल्पनया उपास्यत्वेन सम्पाद्यते यः स लोककल्पः यद्वा तत्तया सम्पद्यते यः पुरुषो विराड्रूपः स भवान् भवदधिष्ठानमित्यर्थः ॥ ३५–३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवान् परमैश्वर्य्ययुक्तोऽपि, चक्रायुधमुपव्रज्य शरणागतत्वेनाश्रित्य । ननु तथापि महापराधिनं तमुपेक्षितुमेवासावर्हति ? तत्राह—भक्तमनुकम्पितुं शीलमस्येति तथा सः । चक्रायुधमिति बाहुवर्गच्छेदनानन्तरं चक्रेणाव्यर्थेन बाणस्य वधशंकयेति भावः । अस्तौदिति वक्तव्ये अभाषतेति तत्त्वज्ञेन तेन स्वरूपमात्रवर्णनात्, अतस्तस्य जृम्भापि प्रागेव गतेति ज्ञेयम् ॥ ३३ ॥ अमलस्त्वद्भक्त्या विशुद्धः, किंवा अमले सर्व्वदोषनिवर्त्तके त्वयि आत्मा चित्तं येषां ते, केवलमेकमपि आकाशमिव बहुधा व्यापकं पश्यन्ति । अन्यत्तैर्व्याख्यातम् । यद्वा, त्वमेव परमेश्वरो वयन्तु तवांशांशाः, अतस्त्वतो निजपराजयान्न लज्जे, अनुग्रहञ्च मन्य इत्याशयेनादौ परमेश्वरत्वं वर्णयति—त्वमिति । हि एव, परमित्यस्योभयतोऽप्यनुषंगः । परं ब्रह्म त्वमेव, न तु मिथ्याभिमानिनो वयम् । परब्रह्मत्वे हेतुः—परं ज्योतिरिति, ब्रह्मणोऽपि प्रकाशकत्वात्, तच्च (वृ० २।१।२०) ‘यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरन्त्येवास्मादात्मनः सर्व्व एवात्मानो व्युच्चवन्ति’ इति श्रुत्या जीवानां तत्त्वतः परमेश्वरादेव प्रकाशप्रसिद्धेः । अतस्तद्भक्तवरा एव तत्त्वतस्त्वां पश्यन्ति, न तु वयमित्याह—गूढमपि, यं त्वां केवलं निर्म्मलमाकाशमिव सुश्यामकान्तिसुन्दरं पश्यन्ति, वयन्तु परमेश्वरत्वेनैव पश्यामः, न च सौन्दर्य्यमयत्वेन, अस्माकं भक्तिविशेषाभावेन तदेकपरत्वाभावात् ॥ ३४ ॥ आत्मनोऽन्येषां कार्य्य-कारणानां तदधिष्ठितविराड् विग्रहावयवत्वेन तदंशांशत्वं प्रतिपादयति—नाभिरिति द्वाभ्याम् । लोककल्पः कारणकार्य्यात्मकप्रपञ्चरूपः पुरुषो वैराजेन सहाभेदात्, वै प्रसिद्धौ, नाभ्यादीनाञ्च कोऽपि क्रमो नापेक्षितः, अत्यन्तोच्चावचस्य प्रपञ्चस्य तदवयवत्वमात्रापेक्षया तत्र तात्पर्य्याभावात् । अन्यत्तैर्व्याख्यातम् । तत्र लोकैः कल्पतेऽवकल्पत इति चतुर्द्दशभुवनैः कार्य्य–कारणात्मकैः संपद्यत इत्यर्थः । यद्वा, कल्पत इति सयत्वे लेख्य-लेखकभ्रमान्निर्यत्वम् । अथवा वै एव, स चतुर्द्दशभुवनात्मकः पुरुषः भवानेवाधिष्ठानत्वेनाभेदात्, अन्यत् समानम् ॥ ३५–३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

वाङ्मये ब्रह्मणि उपनिषदि आकाशमिव केवलं निर्दोषम् ॥ ३४ ॥ अहमात्मा अन्तःकरणम् अहङ्काररूपम् “अहङ्कारोऽध्यात्मरुद्रस्तत्राधिदैवतम्” इति श्रुतेः । चन्द्रो मन इतिवत् कार्यकारणभावेन सामानाधिकरण्यं “चन्द्रमा मनसो जातः” इति श्रुतेः एवं भगवत्मनःप्रसूतश्चन्द्रो देहिनां मनसोभिमानी । एवं भगवदीयाहङ्कारप्रसूतो रुद्रो भवत्यहङ्काराभिमानी-देवता ॥ ३५–३७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

बाहुष्विति । छिद्यमानेषु सत्सु भगवान् भवो रुद्रः भक्तानुकम्पी हेतुगर्भमिदं तत्त्वादभाषत ॥ ३३ ॥ भाषणमेवाह—त्वं हीत्यादिभिर्द्वादशभिः । केवलं वेदान्तैकवेद्यं योगपरिशुद्धमनोग्राह्यं त्वत्स्वरूपस्वभावादिकं कथमयं मूर्खो जानीयादित्यभि-

प्रयन् स्तौति—त्वं हीति। वाङ्मये ब्रह्माणि वेदे उपनिषदीति यावत् गूढं यत्परं ब्रह्म तत्त्वं किं तद्ब्रह्मस्वरूपमत आह—ज्योतिरिति। स्वप्रकाशं ज्ञानस्वरूपमित्यर्थः। अमलात्मानः योगपरिशुद्धान्तःकरणाः यं पश्यन्ति स त्वमिति सम्बन्धः अथ शरण्यत्वोपयुक्तकल्याणगुणान् विवक्षुस्तावद्दृष्टान्तमुखेन निर्दोषत्वमाह—आकाशमिव केवलं निरस्तानिखिलदोषम् ॥ ३४ ॥ न हि शरीरमात्मनोऽपि प्रियमतस्त्वच्छरीरभूतकृत्स्नजगदन्तर्गतः अयं मूर्खोऽपि तवानुकम्प्य एवेत्यभिप्रयन् विराड्रूपत्वेन स्तौति–नाभिरिति द्वाभ्याम्। नभोऽग्न्यम्बुद्युदिक्पृथिव्यो यथाक्रमं तव नाभिमुखरेतःशिरःश्रोत्रपादाः चन्द्रो मन इति कार्य्यकारणभावेन सामानाधिकरण्यं "चन्द्रमा मनसो जातः" इति श्रुतेः। भगवन्मानसात्प्रसूतस्य चन्द्रस्य सर्वदेहिमनोभिमानदेवतात्वाच्च एवं दृगर्क इत्यपि "चक्षोः सूर्योऽजायत" इति श्रुतेः दृगभिमानिदेवतात्वाच्च यस्य तवेति सर्वत्र योज्यम् अहं रुद्रः आत्मा अन्तःकरणभेदोऽहङ्कारः अत्रापि पूर्ववदेव सामानाधिकरण्यं द्रष्टव्यं जठरं कुक्षिः भुजात्मक इन्द्रः इन्द्रादयस्तव भुजा इत्यर्थः। यच्छब्दानां स वै भवानित्यनेन सम्बन्धः ॥ ३५ ॥ रोमाणीति। ओषधयो यस्य रोमाणि अम्बुवाहा मेघाः केशाः विरिञ्चो धिषणा बुद्धिः प्रजापतिर्विसर्गो मेढ्रं धर्मो हृदयं स वै भवान् इत्थं लोकैः कल्प्यते अवयवत्वेनेति लोककल्पः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

त्वं हि त्वमेव परं परमतत्त्वं ननु परमतत्त्वं नाम कथं परिच्छिन्नं दृश्यमानं च स्यात् तत्राह ब्रह्म सर्वतो बृहत् तथा ज्योतिः स्वप्रकाशमन्यप्रकाशकञ्च नन्वत्र किं प्रमाणं तत्राह वेदे गूढं रहस्यत्वात् क्वचिदेव तथैव दर्शितं यथा तापन्यां "ते होचुरेतस्य गोविन्दस्याखिलाधारिणो ब्रूहीति चेतनश्चेतनानामिति तं ह देवमात्मवृत्तिप्रकाशम्" इति च अत एवोक्तं "गूढं परं ब्रह्म मनुष्यलिङ्गम्' इति कथं तार्किकैश्चिदशुद्ध इव प्रतीयते तत्राह यमिति केवलं शुद्धं शुद्धत्वे दृष्टान्तः आकाशमिवेति ॥ ३४–३६ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

त्वं हीत्यादि। त्वं हि परं ब्रह्म मूर्तिमद्ब्रह्मेत्यर्थः। ज्योतिः प्रकाशस्वरूपम्। ननु वेदो मां मूर्त्तं ब्रह्मेति न वदति इत्याशङ्क्याह—वाङ्मये ब्रह्माणि वेदे गूढम्, प्रचरद्रूपवेदगम्यो न भवसि किन्तु आनुमानिकवेदबोधितं त्वा त्वामलात्मानः पश्यन्ति जानन्ति। किमिव ? केवलमाकाशमिव, आकाशो यथाऽऽलिप्तस्तथा। तेन युद्धादि केवलं ते लीलैव। अत्र यः क्रोधादिस्तेन त्वं लिप्तो न भवसीति भावः ॥ ३४ ॥ विराड्रूपं तु तव विभूतिमात्रम्, न तु तद्वास्तवम्। तत् कीदृशम् ? इत्याह—नाभिर्नभ इत्यादि द्वाभ्याम् ॥ ३५–३६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

त्वं हीत्यादि। त्वं हि परंब्रह्म गूढं ज्योतिः, वाङ्मये ब्रह्माणि वेदे अमलात्मानः शुद्धान्तःकरणाः केवलं यं पश्यति श्रुतिप्रतिपाद्यमेव ते जानन्ति, कमिव आकाशमिव आकाशो यथा केवलोऽन्यालिप्तस्तद्वत्। यद्वा, आकाशमिव 'काशृ दीप्तौ' काशो दीप्तिः, आसम्यक् प्रकाशमिव, इव एवार्थः ॥ ३५–३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, यदैव येन सहायुध्यत तदैव तमुपव्रज्य तुष्टावेति भवस्य लज्जापि नाभूत्तत्राह—भगवान् सर्वज्ञः स्वस्य परस्य ब्रह्मादेरपि तन्मायामोहितत्वं न चित्रमिति जानात्येवातस्तस्मिन् स्वप्रभौ स्वयं भगवति का लज्जेति भावः ॥ ३३ ॥ त्वं परं ब्रह्मैव ज्योतिरप्राकृतज्योतिःस्वरूपं—

"तत्परं परमं ब्रह्म सर्वं विभजते जगत्। ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत" ॥ इति

अर्जुनंप्रति हरिवंशे भगवदुक्तेः नन्वेवञ्चेज्जानासि तदा मया सह विग्रहं कथमकरोस्तत्राह—वाङ्मये ब्रह्माणि वेदेपि गूढं ब्रह्म साक्षादेव त्वं कथं ज्ञेयः स्या इति भावः तर्हि किमहमज्ञेय एव तत्राह—यमिति। अमलात्मानो मायामालिन्यरहिता एव अहन्तु तमोमयः कथं पश्येयमिति भावः। आकाशमिवेति मायाश्रयत्वेपि तव न तल्लेपः ॥ ३४ ॥ त्वं साक्षाद्ब्रह्मैव जगदिदमस्मदाद्यात्मकन्तु तव विभूतिरेवेत्याह–नभो यस्य तव नाभिः उर्वी तव अङ्घ्रिः अर्को दृक् अहं शिवः आत्मा अहङ्कारः इन्द्रो भुजाः ओषधयो रोमाणि धिषणा बुद्धिः विसर्गः उपस्थः धर्मो हृदयं यच्छब्दावृत्तिः स्पष्टतार्था नभ आदयो येऽमी दृश्यन्ते ते सर्वे सच्चिदानन्दशरीरस्य तव नाभ्यादीनि इति विभूतय इत्यर्थः ॥ ३५ ॥ लोकान् कल्पयसि स्वनाभिमुखादिभिश्चिन्मयैर्नभोऽग्न्यादीन् प्राकृतान् सृजसीत्यर्थः ॥ ३६ ॥

गूढार्थदीपिनी

भक्तानुकम्पी भक्तवत्सलः ॥ ३३ ॥ यत् ब्रह्म ब्रह्माणि वेदे गूढं ज्योतिःस्वरूपं आकाशमिव व्यापकं च परं दुर्दर्शं दुर्ज्ञेयमस्ति तदेव अवतीर्णं यं मुनयः पश्यन्ति स त्वं हि त्वमेवेत्यन्वयः ॥ ३४ ॥ नाभिरिति युग्मम्। नभो यस्य नाभिः। द्यौः

स्वर्गः शीर्षं आशा दिशः श्रुतिः श्रवणेन्द्रियम्। अहं शिवः आत्मा अहङ्कारः। भुजा बाहुः। धिषणा बुद्धिः। विसर्गो मेढ्रम्। स पुरुषः लोकैः अवयवित्वेन कल्प्यते प्रतिपाद्यते इति ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

स्वामिनि त्वयि प्रातिकूल्ये मया स्वभक्ताभयदानप्रतिज्ञापालननिर्बन्धतः कृतमतोऽस्मै बाणायाभयं दत्वा मां सत्यप्रतिज्ञं कुर्वित्याशयेन भगवन्तं स्तौति–त्वमित्यादिना। वाङ्मये ब्रह्मणि वेदे प्रतिपादके गूढं विविधैरतिदुर्बोधैः शब्दैर्वर्णितं ब्रह्म-बृहत्स्वरूपगुणशक्तिजिज्ञास्यं तत्त्वं परं चेतनाचेतनविलक्षणं ज्योतिः सर्वप्रकाशम् आकाशमिव सर्वगतेपि सर्वदोषास्पृष्टम् केवलं स्वाश्रयम् त्वमेवासि कथं तर्हि सपरिकरो युद्धङ्कृतवानत आह—यमिति। अमलात्मानः सात्त्विकाः यं त्वां पश्यन्ति त्वन्मायागुणेन तमसा मोहितत्वादकार्यं कृतवानिति भावः ॥ ३४ ॥ किञ्च विभूतिभूतेन मया विभूतिमति त्वयि प्रातिकूल्यं सर्वथा मोहादेव कृतमित्याशयेन भगवन्तं विराड्रूपिणं स्तौति नाभिरिति द्वाभ्याम्। श्रुतिः श्रोत्रम् आत्मा अहङ्कारः भुजाः इन्द्रः विसर्गो मेढ्रम् किम्बहुना लोकान् सर्वान् विभूतिभूतान् यः कल्पयति सृजति स भवान् ॥ ३५–३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भक्तानुकम्पी बाणकरुणावान्। अनुकम्पाऽस्यास्तीति शिखादित्वादिनिः। अकारान्तः पुल्लिङ्गोऽप्यनुकम्प इति पक्षे अत इनिठनावितीनिरूपं ज्ञेयम्। यथोक्तं भक्तानुकम्पादिति शुद्धसंविद्दात्र इत्यनुव्याख्यानव्याख्यासुधायामनुकम्पादनुक्रोशादिति। चक्रायुधम्। अभाषत ॥ ३३ ॥ ब्रह्म परं ज्योतिर्वाङ्मये ब्रह्मणि वेदे गूढमाशामिव केवलमद्वितीयममलात्मानो यं पश्यन्ति ॥३४॥ आत्माऽहङ्कारोऽहन्तत्त्वमहं। भुजेन्द्रो भुजाशब्दो बाहाशब्दवदाकारान्तः स्त्रीलिङ्गः। बाहा भुजायां बाहुष्वति विश्वः। भुजा इन्द्र इन्द्राद्या भुजश्चासाविन्द्रश्चेति कर्मधारयसमासेऽप्युद्देश्यविधेयभावः सम्भवतीत्येकपद्यं वा ॥ ३५ ॥ विरिञ्चो धिषणा बुद्धिः प्रजापतिर्दक्षो विसर्गो मेढ्रं धर्मो हृदयं लोकान्कल्पयतीति स तथा। पुरुषो विराड्रूपो भवान्यै मानिकतां द्योतयत्यस्यार्थस्य ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः स्ववरदत्तबाहुच्छेदने महादेवः सर्वोपायपरिभ्रष्टः भगवन्तं स्तोतुं प्रवृत्त इत्याह **बाहुष्विति**। केवलं जये रुद्रादीनामभजनं नायाति। जयस्यानियतत्वात्। तद्दत्तवरच्छेदेऽपि तथा। स चेत् स्वतः स्वसामर्थ्याभावं निश्चित्य, भगवन्तमेव प्रार्थयेत्, तदा सर्वथा अन्ये सेवकाः भगवानेव स्वामीति निरोधः फलति नान्यथेति विज्ञापयितुं रुद्रस्तुतिः। **भगवा**नित्युपायपरिज्ञानार्थमुक्तम्। अन्यार्थं स्वस्य लब्धप्रतिष्ठस्य हीनत्वावलम्बने हेतुमाह **भक्तानुकम्पीति**। **उपव्रज्य** निकटे समागत्य। असम्मतिश्चेत्, अन्ततो मां मारयतु, न तु भक्तमिति ज्ञापयितुम्। अनेन भक्तहितार्थमेव पूर्वं लौकिकवैदिकप्रकारेण साहाय्यं कृतमिति ज्ञापितम्। तदभावे स्तोत्रेणापि तथा करोतीति। **चक्रायुध**मिति। छिन्नेष्वपि बाहुषु चक्रं गृहीत्वैव तिष्ठतीति शिरश्छेदमपि कुर्यात्। अतः अभाषत ॥ ३३ ॥ तस्य स्तोत्रमाह **द्वादशभिः**। संवत्सरात्मककालातिक्रमार्थम्। त्वं हि ब्रह्मेति। आदौ लोकदृष्ट्या दृष्टो भगवान् न ज्ञातो भवतीति भगवत्स्वरूपमुक्त्वा, स योगेनैव ज्ञातव्य इत्याह। त्वं निश्चयेन ब्रह्म। युक्तश्चायमर्थः। अन्यथा लौकिकवैदिकप्रकारा व्यर्था न भवेयुः। प्रमेयमेव हि प्रमाणाद्बलिष्ठम्। एतदाह हि शब्दः। ननु तथापि प्रमाणात्कथं बलिष्ठमिति चेत्, तत्राह परं ज्योतिरिति। 'किं ज्योतिरयं पुरुष' इति ब्राह्मणे सूर्यादिनिराकरणप्रस्तावे वागपि निराकृता। सुप्तायां वाचि 'किं ज्योतिरयं पुरुष' इति वाक्यादतः परं ज्योतिर्भगवानेव। तर्ह्येवं सति साक्षात्पुराणपुरुषः परमात्मा देवक्यामवतरिष्यति, स एव वेदार्थ इति कथं वेदे न श्रूयते, तत्राह **गूढं ब्रह्मणि वाङ्मय** इति। वेदैस्तथैव प्रतिपाद्यते, परं गुप्तप्रकारेण। अत एव गुप्तत्वाद्भगवानाह 'वेदैश्च सर्वैरहमेव वेद्य' इति। तर्हि कथं निश्चयेन प्रवृत्तिरित्यत आह **यं पश्यन्तीति**। ते हि प्रथमतो गूढं ज्ञात्वा सूक्ष्मदर्शनार्थं अमलात्मानो भवन्ति। ततः पाञ्चभौतिकेषु घटपटादिषु आकाशमिव अप्रकटमपि शून्यवत्प्रतिभासमानं सर्वत्र पश्यन्ति। तर्हि सङ्घातप्रविष्टं तं जीवरूपं जानीयुः, तत्राह **केवल**मिति। ननु सङ्घाताविष्टम् ॥ ३४ ॥ एवं भगवत्स्वरूपमुक्त्वा विश्वरूपं वदन् प्रमाणप्रतिपादितप्रकारात् अन्यथाज्ञानं प्रत्यक्षतो न प्रमाणविरोधीति ज्ञापयति **नाभिर्नभोऽग्निरिति द्वाभ्याम्**। आदौ मध्ये दृष्टिर्भवतीति तन्नभः भगवतो नाभिस्थानमित्याह। ततो रूपवती दृष्टिर्भवतीति 'रूपमग्नौ प्रतिष्ठित'मिति अग्निर्मुखमित्युक्तम्। ततो रूपप्रसङ्गे स्त्रियो मुख्यतेति विषयं निरूपयितुं अम्बुनिरूपणम्, एकाश्रयं वा वाचो रसनमिति तदाधारत्वेन जलनिरूपणम्। सृष्टिक्रमेण वा त्रिवृत्करणे अग्न्यन्तरं जलमिति रेतो भगवतः। 'विश्वस्य भगवान् पिते'ति जलमेव बीजमिति तथोच्यते। तत उपरि सर्वतोऽधश्चेति भूमिं त्रिधा निरूपयति। द्यौः शीर्षम्, आशाः परितः ताः श्रुतिः श्रवणेन्द्रियम्। ऊर्वी पृथ्वी अङ्घ्रिः। सर्वत्र जात्यपेक्षायामेकवचनम्। माहात्म्यज्ञापनार्थं वा इन्द्रियप्रकरणत्वात् चन्द्रादीनां निरूपणम्। अयं चन्द्रो यस्य मनः। अर्को दृक्। अहङ्कार आत्मा हृदयम्। समुद्रो जठरम्। इन्द्रो भुजाः।

वृक्षौषधयो रोमाणि । रोमसु सूक्ष्मस्थूलभेदोऽस्तीति द्वयोर्निरूपणम् । अम्बुवाहा मेघा भगवतः केशाः । य एव कश्चित्सर्वात्मकत्वेन वक्तव्यः, स एवं निरूप्यते । **तद्धर्मे** वेदमूलको धर्म इति वेदात्मके शिवे निरूपितम् । **ततः** सन्देहे प्रमेये भगवतैव प्रदर्शितं सर्वात्मकत्वमक्रूराय । ततोऽत्र प्रमाणेन वेदेनान्यथाबुद्धिनिराकरणार्थं निरूप्यत इति वक्तव्यप्रयोजनयोर्भेदात् न पौनरुक्त्यम् । **विरञ्चयो** ब्रह्मा भगवतो **धिषणा बुद्धिः** । विशेषेण सर्गो यस्मादिति गुह्येन्द्रियम् । चतुर्मुखः प्रजापतिः । धर्मो यस्य हृदयम् । एवं सर्वोत्कर्षमुक्त्वा अन्ते सम्बन्धिनं निरूपयति सर्वत्रानुषङ्गार्थम्, तथादिमध्ययोः उपासनाव्यावृत्त्यर्थं आधिदैविकत्वादिभेदाभावार्थं च । एतादृशः पुरुषो यो नारायणः स एव भगवान् ॥ ३५–३६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

बाणस्त्वित्यत्र । बाणोपीति । बाणासुरोपि बाणेन शरेण **यथादृष्टद्वारैव** कार्यं क्रियते, तथा जनार्दनोपि भगवान् दृष्टद्वारेणैव कार्यं करोतीति ज्ञात्वा अहं तु दैवबलवान् जात इति मत्वा तादृशं योद्धुं प्रायादित्यर्थः । **तत** इत्यत्र । **न संभवतीति** पदार्थः पदार्थेनान्वेतीति नियमः । क्रोधस्तु पदार्थैकदेश इति भावः । अस्य नियमस्य प्रायिकत्वेन समाधाने दूषणान्तरमाहुः **समासे वेति** । कर्मधारये कर्तव्ये परमपदस्य क्रुद्धविशेषणत्वाभावेन विशेषणविशेष्ययोः परस्परानन्वयरूपमसामर्थ्यं स्यात्, तथा च समास एव न भवेत्, 'समर्थः पदविधि'रित्यनुशासनादिति भावः । त्वं हि ब्रह्मेत्यत्र । **दृश्यमान** इति । मानुषत्वेन प्रतीयमान इत्यर्थः । **भूम्यादीनामिति** । मूले नभस आदित्वेपि भूमेश्चरणरूपत्वात्तदारभ्यैव व्याख्यानं युक्तमिति भावः । तृतीयश्लोकार्थमाहुः **अङ्गान्यपीति** । लोके रोमकेशादीनां मृतत्वग्रूपत्वेनाङ्गत्वाभावेपि भगवति रोमादीनामङ्गत्वमेव, अतो लोकप्रकारप्रतीतावपि हरेरङ्गानि लोकप्रकाराद्भिन्नानीति यतो विदुस्ततो रोमादीनामप्यङ्गनिरूपणे एव निरूपणमाहेति शेषः । **अस्मदर्थं चेति** । शिवस्य वेदरूपत्वाद्वैदिकधर्मपालनार्थं चकारात् खलनिग्रहार्थमित्यर्थः । पञ्चमश्लोकार्थमाहुर्**निर्दोषेति** । एतादृशोप्यस्मदादिभिर्यथाधिकारमेवेयते इत्यर्थः । **नाभिर्नभ** इत्यत्र । **रूपमग्नाविति** । रूपस्य तेजस्तन्मात्रारूपत्वादिति भावः । अम्बुनिरूपणमिति । रेतोरूपमम्बु विषयं निरूपयितुं निरूपितमित्यर्थः । **तद्धर्मे** इति । सद्धर्मनिरूपकोऽष्टमे स्कन्धे तन्निरूपितमित्यर्थः । **प्रमेये** इति । स्वरूपे इत्यर्थः । **तत** इति । द्वयेपि तदनन्तरमित्यर्थः । सर्वत्रानुषङ्गप्रयोजनमाहुः **तथादिमध्ययो**रिति । आदौ मध्ये चैतद्व्यावृत्त्यर्थमेतदभावार्थं च तथा सर्वत्रानुषङ्ग इत्यर्थः ।

श्रीसुबोधिनीसारः

बाणस्य बाहुषु छिद्यमानेषु सत्सु भक्तमनुकंपितुं शीलं यस्य स भगवान् भवो महादेव उपव्रज्य समीपमागत्य चक्रायुधं श्रीकृष्णमुवाच ॥ ३३ ॥ परं ज्योतिः स्वप्रकाशं ब्रह्म त्वं वाङ्मये ब्रह्मणि वेदे गूढम् अलक्षितं बहुधा संम्प्रदायात् तर्हि कथं संसारोपरमः "ज्ञात्वा देवं मुच्यते मृत्युपाशात्" इति नियमात्तत्राह । अमलं शुद्धं निर्वासनम् आत्मा चित्तं येषां ते आकाशमिव केवलं निर्लिप्तमसंगं पश्यंत्यात्मत्वेनानुभवन्ति ॥ ३४ ॥ "इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रुतेर्विराड्रूपत्वमाह द्वाभ्याम् । नभः खं यस्य नाभिः अग्निर्मुखम् अम्बु वारि रेतो वीर्यं द्यौः स्वर्गः शीर्षं शिरः आशा दिशः श्रुतिः कर्णः उर्वी पृथिवी अंघ्रिः पादः चन्द्रो मनोऽर्को दृग् नेत्रम् आत्माऽहंकारोहं शिवः समुद्रो जठरम् इन्द्रो भुजः सन्धिरार्षः ॥ ३५ ॥ औषधयो यस्य रोमाणि अम्बुवाहा मेघाः केशाः विरिंचो ब्रह्मा धिषणा बुद्धिः प्रजापतिर्विसर्गो मेढ्रं धर्मो यस्य हृदयं स लोकैः कल्पते इति लोककल्पः पुरुषो भवान् वै एव ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं बाहुषु छिद्यमानेषु सत्सु चक्रं गृहीत्वैव तिष्ठतीति शिरश्छेदमपि कुर्यादिति ज्ञात्वा भक्तानुकम्पी भक्तकृपापरवशो भगवानपि भव उपायान्तरमलभमान उपव्रज्य समीपमागत्य चक्रायुधमभाषत तुष्टाव ॥ ३३ ॥ भाषणमेवाह—त्वमिति । यत् वाङ्मये ब्रह्मणि वेदेपि गूढं मनोग्राह्यतया प्रतिपादितम् । तत्र हेतुः—ज्योतिः स्वप्रकाशज्ञानरूपं परं ब्रह्म । यं चाशुद्धमनसामविषयमप्यमलात्मानो विशुद्धमनस आकाशमिव व्याप्तं सर्वदोषसंश्लेषरहितं पश्यन्ति स एव त्वमित्यन्वयः । हिशब्दोऽवधारणे ॥ ३४ ॥ "एवं स्वप्रकाशरूपस्य परब्रह्मणो रूपदुर्ज्ञेयत्वमुक्त्वा लीलया स्वीकृतो विराट् विग्रहोपि उदुम्बरफलान्तर्वर्तिमशकैरुदुम्बरफलमिव तदन्तर्वर्तिप्राणिभिर्दुर्ज्ञेय एव" इत्याशयेन विराड्रूपेण स्तौति—नाभिरिति द्वाभ्याम् । यस्य नभआदयो नाभ्याद्यवयवाः स भवान् लोकैः कल्प्यते अवयवित्वेन प्रतिपाद्यते इति लोककल्पः पुरुष इति द्वयोरन्वयः । नभो नाभिः । अग्निर्मुखम् । अम्बु रेतः । द्यौः शीर्षम् । आशाः दिशः श्रुतिः श्रवणेन्द्रियम् । उर्वी भूमिः अङ्घ्रिः । चन्द्रोः । मनः । अर्कः दृक् चक्षुः । अहं रुद्रः आत्मा अहंकारः । समुद्रो जठरम् । इन्द्रः भुजा बाहुः, इन्द्रादयो लोकपाला बाहव इत्यर्थः । एवं सर्वत्रैकवचनं जात्यभिप्रायेण ॥ ३५ ॥ **औषधयो रोमाणि** । वच्छब्दावृत्तिः स्पष्टार्था । अम्बुवाहा मेघाः केशाः । विरिञ्चो धिषणा बुद्धिः । प्रजापतिर्ब्रह्मैव विसर्गो मेढ्रम् । धर्मो हृदयम् ॥ ३६ ॥

अन्वितार्थप्रकाशिका

बाहुष्विति । एवं बाणस्य बाहुषु छिद्यमानेषु भक्तानुकम्पी भगवान् भव उपव्रज्य समीपमागत्य चक्रायुधमभाषत तुष्टाव ॥ ३३ ॥ अयं भवन्तमज्ञात्वा युद्धयत इत्याशयेनाह—त्वं हीति । यत् वाङ्मये ब्रह्मणि वेदेऽपि ब्रह्म वाङ्मनसाऽग्राह्यतया प्रतिपादितं परं ज्योतिः ज्ञानरूपं यं च अमलात्मानो विशुद्धमनस आकाशमिव व्याप्तं केवलं सर्वदोषसंश्लेषरहितं पश्यन्ति स त्वम् ॥ ३४ ॥ आस्तां निर्गुणस्य तव ज्ञानं त्वयाऽधिष्ठितो विराड्विग्रहोऽपि दुर्ज्ञान इत्याशयेनाह-नाभिरिति युग्मम् । यस्य नभो नाभिः अग्निर्मुखम् अम्बु रेतः द्यौः शीर्षम् आशाः दिशः श्रुतिः श्रवणेन्द्रियम् उर्वी भूमिः अङ्घ्रिः चन्द्रो मनः अर्कः दृक् चक्षुः अहं रुद्रः आत्मा अहङ्कारः समुद्रो जठरं इन्द्रः भुजा बाहुः इन्द्रादयो लोकपाला बाहव इत्यर्थः । एवं सर्वत्रैकवचनं जात्यभिप्रायेण । औषधयो रोमाणि यच्छब्दावृत्तिः स्पष्टार्था । अम्बुवाहा मेघाः केशाः विरिञ्चो धिषणा बुद्धिः प्रजापतिर्ब्रह्मैव विसर्गो मेढ्रं धर्मो हृदयं स भवान् लोकैः कल्प्यते अवयवित्वेन प्रतिपाद्यते इति लोककल्पः पुरुष इति ॥ ३५-३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पार्वतीपतिः । स्तौतित्वमिति ज्योतिषि कोटिसूर्यचंद्राग्निभ्योऽप्यधिकप्रकाशमये ब्रह्मपुराख्येऽक्षरधाम्नि गूढं कैवल्यार्थानामदृश्यत्वाद्गुप्ततया स्थितं । परं बद्ध-मुक्त-पुरुषेभ्यः श्रेष्ठं ब्रह्मबृद्धत्वाद्यसंख्यगुणगणसागरं पुरुषोत्तमस्वरूपं त्वमसि । वाङ्मये वेदरूपे ब्रह्मणि शब्दब्रह्मणि । अमलात्मानो निर्मलांतःकरणाः आकाशमिव केवलं लोके मनुष्यतया वर्त्तमानमपि आकाशवन्निर्लेपं यं त्वां पश्यंति ज्ञाननेत्रेण ईक्षंते ॥३४॥ इत्थं पुरुषोत्तमत्वेन श्रीकृष्णं स्तुत्वा सांप्रतं विराड्रूपेण तं स्तौति नाभिरिति । नभो गगनं यस्य नाभिः एवं सर्वं योज्यं आशाः दिशः श्रुतिः श्रोत्रेंद्रियं दृक्चक्षुरिंद्रियं । अहं शंकरः यस्य वैराजस्य । आत्मा अहंकारः इन्द्रः भुजा बाहुः ॥ ३५ ॥ विरंच्यो विधिः धिषणा बुद्धिः प्रजापतिः विसर्गः । उपस्थेंद्रियं । धर्मो हृदयं । लोकैश्चतुर्दशभुवनैः कल्पते परमात्मना त्वया कर्त्रा विरच्यते इति लोककल्पः पुरुषो विराट् सः भवान् तवावतार इत्यर्थः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बाहुष्विति । बाणस्य बाहुषु, छिद्यमानेषु सत्सु, भगवान् भवो रुद्रः, भक्तानुकम्पी हेतुगर्भमिदम् । तत्त्वात्, चक्रायुधं श्रीकृष्णं, उपव्रज्य, अभाषत ॥ ३३ ॥ भाषणमेवाह द्वादशभिः । तत्र केवलं वेदान्तवेद्यं योगपरिशुद्धमनोग्राह्यं त्वत्स्वरूपस्वभावादिकं, कथमयं मूर्खो जानीयादित्यभिप्रयन् स्तौति । त्वं हीति । वाङ्मये ब्रह्मणि वेदे, उपनिषदीति यावत् । गूढं यत्, परं ब्रह्म, तत् त्वं हि । किं तद्ब्रह्मस्वरूपमत आह । ज्योतिः स्वप्रकाशं ज्ञानरूपमित्यर्थः । अमलात्मानः योगपरिशुद्धान्तःकरणाः, आकाशं इव, केवलं निरस्तनिखिलदोषं, यं पश्यन्ति, स त्वमिति सम्बन्धः ॥ ३४ ॥ न हि शरीरमात्मनोऽप्रियमतस्त्वच्छरीरभूतकृत्स्नजगदन्तर्गतोऽयं मूर्खोऽपि तवानुकम्प्य एवेत्यभिप्रयम् कृष्णं विराड्रूपत्वेन स्तौति द्वाभ्याम् । नाभिरिति । यस्य तव, नभ आकाशं, नाभिः । अग्निः, मुखं, अम्बु जलं, रेतो वीर्यं, द्यौः शीर्षं, आशा दिशः, श्रुतिः श्रवणेन्द्रियं, उर्वी पृथ्वी, अङ्घ्रिः, चन्द्रः मनः, कार्यकारणभावेन सामानाधिकरण्यं, चन्द्रमा मनसो जातः' इति श्रुतेः । भगवन्मानसात् प्रसूतस्य चन्द्रस्य सर्वदेहिमनोऽभिमानिदेवतात्वाच्च । एवं, दृक् अर्कः, 'चक्षोः सूर्योऽजायत' इति श्रुतेः । दृगभिमानित्वाच्च । अहं शिवः, आत्मा अन्तःकरणभेदोऽहंकारः । अत्रापि पूर्ववदेव सामानाधिकरण्यम् । समुद्रः जठरमुदरं, इन्द्रः, भुजा बाहुः, इन्द्रादयो लोकपाला बाहव इत्यर्थः । 'भुजा बाहा च बाहौ स्यात्' इति त्रिकाण्डशेषः ॥३५॥ रोमाणीति । औषधयः, यस्य तव, रोमाणि, अम्बुवाहा मेघाः, केशाः, विरिञ्चो ब्रह्मा, धिषणा बुद्धिः, 'धिषणा धियि योषिति' इति मेदिनी । प्रजापतिः विसर्गो, मेढ्रं, धर्मः, यस्य, हृदयं, पुरुषः पुरुषाकृतिः, स वै भवान्, स एव त्वमित्यर्थः । लोकैः अवयवत्वेन कल्प्यते इति लोककल्पः, असि ॥ ३६ ॥

कृष्णप्रिया

भक्तानुकम्पी भगवान् भवानी शङ्करजी ने देखा कि निजभक्त बाणासुर की भुजाएँ कट रही हैं तब करुणानिधान चक्रपाणि श्रीकृष्ण के समीप आये और निवेदन करने लगे ॥ ३३ ॥ अब भगवान् श्री महारुद्र जी ग्यारह श्लोकों से एवं एक श्लोक से अभ्यर्थना करते हैं-श्रीरुद्र प्रभु ने कहा-नाथ ! श्रुतिवाङ्मय में रहस्य रूप से निगूढ तेजोमय परब्रह्म तत्त्व है । लेकिन विशुद्ध हृदय वाले महान् पुरुष ही आकाश के समान निर्लेप और निर्विकार आपके स्वरूप का साक्षात्कार कर सकते हैं ॥३५॥ नाथ नभोमण्डल आपकी नाभि है, अग्निदेव आपका श्रीमुख है; जल आपका वीर्य है; स्वर्ग आपका मस्तक है; दिशाएँ आपके कर्ण हैं; धरणी आपकी चरण है; चन्द्रमा आपका मन है; सूर्यनारायण आपके नेत्र हैं और अहम् मैं शिव आपका अहंकार है; सागर आपका उदर है और इन्द्रदेव आपकी भुजा है ॥ ३५ ॥ औषधियाँ-धान्यसम्पत्तियाँ आपके रोम है; मेघमण्डल केश है; ब्रह्माजी आपकी बुद्धि हैं; और प्रजापति आपकी विसर्ग इन्द्रिय-लिङ्ग है; धर्म आपका हृदय है; इस प्रकार लोक और समस्त लोकान्तरों के साथ आपके विराट्देह की तुलना की जाती है वे पूर्णपुरुष आप ही हैं ॥ ३६ ॥

तवावतारोऽयमकुण्ठधामन् धर्मस्य गुप्त्यै [1]खलनिग्रहाय।
वयं च सर्वे भवतानुभाविता विभावयामो भुवनानि सप्त ॥ ३७ ॥
त्वमेक आद्यः पुरुषोऽद्वितीयस्तुर्यः स्वदृग्घेतुरहेतुरीश्वरः[1]।
प्रतीयसेऽथापि यथाविकारं स्वमायया सर्वगुणप्रसिद्ध्यै ॥ ३८ ॥
यथैव सूर्यः पिहितश्छायया[2] स्वया छायां च रूपाणि च सञ्चकास्ति।
एवं गुणेनापिहितो गुणांस्त्वमात्मप्रदीपो गुणिनश्च भूमन् ॥ ३९ ॥
यन्मायामोहितधियः पुत्रदाहगृहादिषु। उन्मज्जन्ति निमज्जन्ति प्रसक्ता वृजिनार्णवे ॥ ४० ॥

कर्दमक्षमा

अन्वयः—हे, अकुण्ठधामन्! अयम्, तव, अवतारः, धर्मस्य, गुप्त्यैः, खलनिग्रहाय, च, भवता, अनुभाविताः, वयम्, सर्वे, सप्त, भुवनानि, विभावयामः ॥ ३७ ॥ त्वम्, एकः, आद्यः, पुरुषः, अद्वितीयः, तुर्यः, स्वदृक्, हेतुः, अहेतुः, ईशः, अथ, अपि, स्वमायया, सर्वगुणप्रसिद्ध्यै, यथा, विकारम्, प्रतीयसे ॥ ३८ ॥ यथा, हि, एव, सूर्यः, स्वया, छायया, पिहितः, छायाम्, च, रूपाणि, च, सञ्चकास्ति, एवम्, हे भूमन्! आत्मप्रदीपः, गुणेन, अपिहितः, गुणान्, च, गुणिनः, सञ्चकास्ति ॥३९॥ यन्मायामोहितधियः, वृजिनार्णवे, प्रसक्ताः, पुत्रदारागृहादिषु, उन्मज्जन्ति. निमज्जन्ति ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु तत्त्वतः प्रादेशिकशरीरस्य कथं नभो नाभित्वादीत्यत आह। तवेति। हे अकुंठधामन्नप्रच्युतस्वरूप। भवायाभ्युदयाय। न केवलमेतावत्किं त्वस्मदनुग्रहार्थमपीत्याह। वयं चेति। सर्वे लोकपालास्त्वया पालिताः सप्तापि भुवनानि पालयाम इति ॥ ३७ ॥ ननु यदि विभावयितारो यूयं विभाव्यानि च भुवनानि सन्ति तर्हि कथमुक्तं त्वं हि ब्रह्मेति न हि ब्रह्मत्वे मम सजातीयविजातीयभेदः संभवतीत्यत आह। त्वमिति। एकः सजातीयभेदरहितः। कुतः। आद्यः पुरुषः पुरुषाणामवस्थात्रयवतामाद्यः प्रकृतिभूतः पुरुषः। कुतः। तुरीयः शुद्ध इत्यर्थः। तदपि कुतः। स्वदृक् स्वप्रकाशज्ञानरूपः। शुद्धादेव ह्युपाधियोगाज्जीवा जायन्ते। "यथाऽग्नेः क्षुद्रा विस्फुलिगा व्युच्चरंत्येवमेवास्मादात्मनः सर्व एव आत्मानो व्युच्चरन्ति" इति श्रुतेः। अतः सजातीयरहितः किंच अद्वितीयो विजातीयरहितोऽपि। कुतः। हेतुः सर्वस्य तथा स्वयं हेतुरहितश्चेति। कथं तर्हि प्रतिशरीरं जीवभेदः प्रतीयतेऽत आह। प्रतीयस इति। सर्वगुणप्रसिद्ध्यै सर्वविषयप्रकाशनाय ॥ ३८ ॥ तर्हि किमहमेवं संसारीत्युच्यते नहिनहीति सदृष्टांतमाह। यथैवेति। हे भूमन्स्वया छायया मेघलक्षणया परदृष्ट्या पिहितश्छादितोऽपि सूर्यश्छायां मेघं च रूपाणि च मेघांतरितान्घटादीनपि संचकास्ति प्रकाशयति एवं गुणेनाहंकारेण स्वकार्येण जीवावरकेण तद्दृष्ट्याऽपिहितोऽपि गुणान्सत्त्वादीनुपाधीन्गुणिनश्चोपहिताञ्जीवानपि चकास्ति। आत्मप्रदीपः स्वप्रकाशः। अतः सर्वसाक्षिणस्तव न संसार इत्यर्थः ॥ ३९ ॥ किंच मायाश्रयस्यान्यान्मोहयतस्तव कुतः संसृतिरित्याशयेनाह–यन्मायेति। पुत्रादिषु प्रसक्ताः। वृजिनार्णवे दुःखसारे। उन्मज्जंति देवादियोनिषु। निमज्जंति स्थावरादिषु। तदुक्तं वायवीये। "विपर्ययश्च भवति ब्रह्मत्वस्थावरत्वयोः" इति ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनराशंकते–नन्विति। प्रादेशिकं प्रादेशमितं शरीरं यस्य तस्य "केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्" इति द्वितीयस्कन्धोक्तेः। यद्वा–प्रादेशो यत्किंचिद्देशस्तत्र तिष्ठतीति प्रादेशिकः 'प्रादेशो देशमात्रेऽपि' इति मेदिनी। साक्षाद्ब्रह्मणोऽदृश्यस्यापि यद्दृश्यत्वं तत्केवलं कृपानिबन्धनमेवेत्याह—हे अकुंठधामन् परब्रह्मणो यद्दृश्यत्वं तस्मात्तर्कैस्तव प्रभावः कुंठीकर्तुमशक्य एवेति भावः। धर्मस्य स्वभक्तिलक्षणस्य तत्प्रतिपक्षमतनिरसनपूर्वकं रक्षणाय जगतः कर्मिज्ञानिमूढबहिर्मुखदुराचारपर्यंतस्याभवाय मोक्षाय न च सामान्यजगत्पालनायेत्याह–वयं सर्वे दिक्पाला भवतानुभाविताः पालिताः सन्तः पालयाम एव तन्मात्रार्थे तवाविर्भावे किं प्रयोजनमिति भाव इति विश्वनाथः ॥ ३७ ॥ पुनर्भंग्यंतरेणाऽऽक्षिपति–ननु यदीति। एकत्वे हेतुमाशंकते—कुत इति। अवस्था जाग्रदाद्याः। तत्र हेतुः–तुर्य्य इति। इत्यर्थ इति—मालिन्यहेत्ववस्थाऽस्पष्टत्वादिति भावः। तदपि तुर्य्यत्वमपि। उपाधिर्माया। विस्फुलिगा अग्निकणाः। आत्मानो जीवाः। अत एवंभूतत्वात्। न केवलं सजातीयरहित एवेत्याह–किञ्चेति। विजातीयराहित्यं कस्मादत्राह–हेतुरिति। प्रतीयत इति। प्रातीतिक एव भेदो न स्वाभाविक इति

---

[1] जगतो भवाय–श्रीधर. वंशी. जीव. वीर. विश्व.। [2] रीशः–श्रीधर. वंशी. जीव. वीर. विश्व.। [3] स्वयं घनैः–च. पु. टि.।

भावः। अत्र विश्वनाथः–ननु केचिन्मम गुणाबताराः केचिच्च विभूतय इति मत्तो यूयमभिन्ना एव तत्राह—त्वमेवैक ईशः वयं तु सेवका एव। कुतः–आद्यः पुरुषो यतस्तुरीयः विराट् हिरण्यगर्भश्च कारणश्चेत्युपाधयः "ईशस्य यत्त्रिभिर्हीनं तुरीयं तद्विदुर्बुधाः"। किञ्च–नारायणवासुदेवाद्योऽपि त्वदन्तःपातादद्वितीयाः। अन्येषां हेतुः स्वयं हेतुरहितश्च यतः स्वदृक् स्वेनैव दृग्दर्शनं यस्य न त्वन्यः कोऽपि त्वां द्रष्टुं शक्नोतीति भावः। यद्वा–स्वानां भक्तानां दृग्यस्य सः। तथा स्वभक्तानां नित्यसत्ताविचित्रबहुलरूपेण प्रकाशस इत्याह–प्रतीति। स्वेषु या दया कृपा तया तेषामेकांतित्वादिसर्वगुणप्रसिद्ध्यै लोके विख्यात्यै यथाविकारं भावानुसारेण प्रतीतो भवसि। ईदृगैश्वर्यवानपि तुच्छमायागुणानामुपकरोषीत्याह–प्रतीयस इति। यथा विकारं प्रति शरीरं स्वमायया कृत्वा बुद्धीन्द्रियादिगुणानां प्रसिद्ध्यर्थमन्तर्यामितयाऽनुभूयसे यदि त्वमन्तर्यामित्वं न कुरुषे तर्हि तेषां प्रकाशकाभावात्ते जडतया व्यर्थाः स्युरिति भावः॥ ३८॥ पुनराक्षिपति–तर्हीति। सूर्यकिरणा एव मेघाकारेण परिणमंत इत्युक्तं हरिवंशे। एवमित्थम्। अतः स्वप्रकाशत्वात्। इत्यर्थ इति–"ददामि बुद्धियोगं तं येन मामुपयांति ते" इत्युक्तेर्यत्कृपयाऽन्येषां संसारो नश्यति तस्य कुतः स भवेदिति भावः। एवं महाकृपां तन्वन्नपि त्वं साधुवर्गशिरोमणिः स्वाभाविकलज्जाविनयादिना साक्षान्न तनोषि किन्तु गुर्वादिद्वारा पारोक्ष्येणैवेति परमसद्गुणनिधित्वमाह–यथेति। पिहित एव सन्सम्यक्प्रकाशयसि गुणेन तत्रस्थांशेन तस्मिन्स्थानीयेन जीवे पूर्वपूर्वगुर्वादिरूपेणाच्छन्नस्संस्तद्द्वारैवेत्यर्थः। गुणान् कारुण्यादींस्तत्प्रकाशनार्थं गुणिनश्च कारुण्यादिकर्तॄन् परस्परगुर्वादीन्सम्यक्प्रकाशयसि। न च तत्तत्प्रकाशनेऽन्यो हेतुरस्तीत्याह–आत्मना स्वयमेव प्रदीपयति कृपया प्रकाशयतीति तथा सः। तत्र हेतुः–भूमन् हे अपरिच्छिन्नमाहात्म्य 'महांतो हि दयालवः' इत्युक्तेरिति तोषणीकाराः॥ ३९॥ मायायाः स्वाश्रयानावरकत्वं प्रसिद्धमायासु दृष्टम् ततोऽपि न तव संसाराशंकेत्याह—किञ्चेति। उन्मज्जंति ऊर्द्ध्वं गच्छन्ति। निमज्जंति अधो गच्छंति। तदुन्मज्जनिमज्जनम्। वायवीये वायुपुराणे। विपर्ययो वैपरीत्यम्। ब्रह्माऽप्यज्ञानवशात् स्थावरतां याति का कथाऽन्येषामित्यर्थः॥ ४०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तवेति तैर्व्याख्यातं तत्र प्रादेशिकत्वमेकदेशस्थत्वं नभो नाभित्वादित्वं तत्तदङ्गाधिष्ठिततत्तद्वस्तुत्वं तत्र सिद्धान्तः सर्वदेशकालाप्रच्युतस्वीयविग्रह एव त्वमचिन्त्यशक्त्यैव प्रादेशिकतया भासीति अप्रच्युतस्वरूप इत्यस्य तात्पर्य्याद्गम्यः यद्वा नन्वेवम्भूतस्य मम कथं प्रपञ्चे स्वस्वरूपेण प्राकट्यं तत्राह–तवेति! हे अकुण्ठधामन् श्रीगोलोकादिनित्यस्थान! तव अवतारः अपूर्ववत् प्रपञ्चे प्राकट्यधर्मस्य प्राधान्यतस्त्वद्भक्तानां त्वद्भक्तिलक्षणस्य (अतो) जगतः सर्वजीवानामेव भवाय लोकद्वयश्रेयसे अतो वयञ्चेति विशेषेण त्वद्भक्तिविस्तारणादिना पूर्वत आधिक्येन भावयामः॥ ३७॥ त्वमेक इति तैर्व्याख्यातं तत्र सम्भवतीत्यस्यान्ते येन भेदेन भवन्तो भावयितार इति शेषः। पुरुषाणामित्यादौ चिदंशेनैकापेक्षया जीवेश्वरस्वरूपभेदविवक्षया प्रकाशनायेत्यस्यान्तेऽतो वयमपि तद्विभूतिरूपा एवेति सजातीयादिभेदाभावात् त्वमेव ब्रह्मेति पर्य्यवसितमिति शेषः। किञ्च यथाविकारं स्व स्व देहानुरूपश्चैतन्यप्रकाशतारतम्येन नानाविधः प्रतीयस इत्यर्थः। तच्च स्वमाययाऽचिन्त्यशक्त्येति तत्स्वरूपे तद्धर्मास्पर्शश्च निरूपितः अन्यत्तैः। यद्वा त्वमेकः सजातीयभेदरहितः अद्वितीयो विजातीयभेदरहितश्च यतः आद्यः "विष्णोस्तु त्रीणि रूपाणि" इत्युक्तानां पुरुषाणां मूलरूपः अतस्त्वमेव पुरुषः "पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वम्" इति श्रुतेः। कुतस्तुरीयः विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः "ईशस्य यत्त्रिभिर्हीनं तुरीयं तद्विदुर्बुधाः" इत्युक्तलक्षणः तदपि कुतः स्वदृक् स्वयं प्रकाशः अतो हेतुरहेतुरपि यद्यप्येवमखण्डस्त्वं तथापि यथाविकारं तत्तद्विकारानुसारेण सर्वेषां तेषां सत्त्वादिगुणप्रकाशनाय महत्स्रष्ट्रादिरूपस्सन् गुणवत्प्रतीयसे तच्च मायया स्वपूर्णतावरणशक्तितारतम्येनेत्यर्थः। अतस्त्वमेव चेशः यद्वा ननु केचिन्मम गुणावताराः केचिच्च विभूतय इति मत्तो यूयमभिन्ना एवेति चेत्तत्राह—त्वमेवैक ईशः वयन्तु सेवका एवेत्यर्थः। कुतः आद्यः पुरुषः यतस्तुर्य्यः नारायणवासुदेवयोरपि त्वदन्तःपातात् अद्वितीयश्च अतोन्येषां हेतुः स्वयन्तु हेतुरहितः यतः स्वदृक् तथापि स्वभक्तानां नित्यसत्यविचित्रबहुलरूपेण प्रकाशसे इत्याह प्रतीति स्वेषु भक्तेषु मायया कृपया तेषामेकान्तित्वादिसर्वगुणस्य प्रसिद्ध्यै लोकेषु विख्यातये प्रकर्षेण सिद्ध्यै वा यथाविकारं भावानुसारेण प्रतीतो भवसीति॥ ३८॥ यथैवेति तैर्व्याख्यातं तत्र सर्वत्र हेतुः हे भूमन्! सर्वात्मत्वादपरिच्छिन्नेति यद्वा ननु ममैव चेन्महत्स्रष्ट्रादिरूपत्वं तर्हि तत्तद्रूपेण मायादिप्रवर्त्तयितुर्ममैव तत्तद्दोषलेपः स्यादित्याशङ्क्य दृष्टान्तेन परिहरति–यथैवेति। यद्वा एवं महाकृपां तन्वन्नपि साधुवर्गशिरोमणिस्त्वं स्वाभाविकलज्जाविनयादिना साक्षान्न तनोषि किन्तु गुर्वादिद्वारा पारोक्ष्येणैवेति परमसद्गुणगणनिधित्वमाह—यथेति। (अपिहित) पिहित एव सन् सम्यक् प्रकाशयसि गुणेन तटस्थांशेन रश्मिस्थानीयेन जीवेन पूर्वगुर्वादिरूपेणाच्छन्नः सन्निति तद्द्वारैवेत्यर्थः। गुणान् कारुण्यादीन् तत्प्रकाशनार्थं गुणिनश्च कारुण्यादिकर्तॄन् परस्परगुर्वादीन् सम्यक् प्रकाशयसि नच तत्तत्प्रकाशने नान्यो हेतुरस्तीत्याह—आत्मना स्वयमेव प्रदीपयति कृपया प्रकाशयतीति तथा सः तत्र हेतुः, भूमन् हे अपरिच्छिन्नमाहात्म्येति॥ ३९॥ तदेवं निगूढं तन्महिमानं व्यज्य प्रस्तुतं बाणार्थप्रसादनं योजयितुं परमापत्प्रान्त्या मदरहितं बाणमपि शिक्षयितुं निवेदयति पञ्चभिः—तत्र तादृशत्वन्महिमाज्ञानमस्य नाश्चर्यं प्रायशः सर्वस्यैव मोहितत्वादित्यभिप्रेत्याह–यदिति। यस्य तव माययेति

(पूर्ववत्तच्छब्दानपेक्षा) वदतात्र तस्य प्रेरकत्वं नाभिमतं किन्तु तत्सम्बन्धाभासबलेन तस्या एव स्वतःकर्तृत्वं तच्च युक्तं तस्मिन्नैर्घृण्यापातात् वक्ष्यते आत्मानं प्रियमीश्वरमिति ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं सदात्मत्वदीयत्वेन वयं त्वदनुग्रहे योग्या एव, विशेषतश्चाधुना नितरामनुगृहीता इत्याह—तवेति । अवतारो वैकुण्ठलोकादवतरणम्, धर्म्मस्य त्वद्भक्तिलक्षणस्य, अतो जगतः सर्व्वजीवानामेव, भवाय लोकद्वयश्रेयसे, हे अकुण्ठधामन्निति साक्षाद्भगवत्त्वात् । एवं भवतानुभाविताः सन्तो वयमपि त्वद्भक्तिविस्तारणादिना विशेषेण पूर्व्वत आधिक्येन भावयामः ॥ ३७ ॥ त्वमेवेशः, अत एकः, यद्वा, एवं सजातीयविजातीयभेदराहित्यादीशः, अतएव परं ब्रह्मेति भावः । यथा विकारं स्वस्वदेहानुसारेण देहानुरूपचैतन्यप्रकाशतारतम्येन नानाविधः प्रतीयत इत्यर्थः । तच्च स्वमाययेति तत्त्वतोऽपि जीवत्वं निरस्तम्, तच्च व्यक्तं भावि । अन्यत्तैर्व्याख्यातम् । यद्वा, ननु केचिन्मम गुणावताराः केचिच्च विभूतय इति मत्तो युयमभिन्ना एवेति चेत्तत्राह—त्वमिति । त्वमेवैक ईशः, वयन्तु सेवकाः एवेत्यर्थः । कुतः ? आद्य पुरुषः श्रीब्रह्मादिभ्योऽपि श्रेष्ठः, अतस्तुर्य्यः श्रीब्रह्मविष्णुरुद्रेभ्योऽवतारित्वेन भिन्नत्वात्, न च चतुर्व्यूहादीनां पृथक् पृथग् वर्त्तमानानां प्रत्येकमीश्वरत्वेन तव परमेश्वरत्वहानिस्तेषामपि त्वदभिन्नत्वादित्याह—अद्वितीय इति । यतो हेतुस्तेषां त्वत्त एव प्रादुर्भावात्, स्वयं वा हेतुः, यतः स्वदृक् स्वप्रकाशः, तथापि स्वभक्तानां नित्यसत्य-विचित्र-बहुलरूपेण प्रकाशक इत्याह—प्रतीति । स्वेषु भक्तेषु मायया कृपया, यद्वा, भक्तेषु तेषु अमायया तेषामेकान्तित्वादिसर्व्वगुणस्य प्रसिद्ध्यै लोकेषु विख्यातये प्रकर्षेण सिद्धौ वा, यथाविकारं भावानुसारेण प्रतीतो भवसि, स्वभक्तेषु प्रत्येकं चतुर्व्यूहादीनां मध्ये स्वस्वसेव्यैकनिष्ठया नित्यसत्यत्वेन परिस्फुरसीत्यर्थः ॥ ३८ ॥ एव अपि, पिहितोऽपि, च-काराभ्यां द्वयोरपि प्राधान्यं द्योत्यते,—दूरस्थानामपि रूपाणां सन्निहितमेघवत् प्रकाशनात् । सञ्चकास्तीति क्रियान्तर्गतः सं-शब्दो मेघाच्छन्नतया सूर्य्यतेजसामतीक्ष्णत्वेन दृष्टेः सम्यक् प्रसारणात्, एवं दार्ष्टान्तिकेऽपि ज्ञेयम् । अहंकाराच्छन्नस्यापि तत्प्रवर्त्तनात् स्वयमेवाभिव्यक्तगुणगुणिनामप्याधिक्यप्रकाशनसिद्धेः । अपिहितः पिहितः, तथा चामरः–'अपिधान–तिरोधान–पिधान'–इत्यादि, यद्यप्यहंकारेण जीव एव पिधीयते, न च परमात्मा, तथापि त्वमित्यहंकाराच्छन्नतया जीवेन तदननुभवात् । अतएव तैरपि व्याख्यातम् । तद्दृष्ट्येति जीवदृष्ट्यैवेत्यर्थः । एवं सर्व्वमेव त्वं प्रकाशयसि, त्वञ्च स्वप्रकाश एवेत्याह—आत्मेति । एवं वस्तुतोऽहंकारेण पिहितत्वमपि निरस्तम्, सदा प्रकाशमानत्वादिकञ्च सूचितम्, तत्र हेतुः—भूमन् ! हे अपरिच्छिन्नेति अन्येन व्याप्तुमशक्यत्वादित्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, एवं महाकृपां तन्वन्नपि साधुवर्गशिरोमणिस्त्वं स्वाभाविकलज्जाविनयादिना साक्षान्न करोषि, किन्तु गुर्व्वादिद्वारा परोक्षेणैवेति परमसद्गुणगणनिधित्वमाह–यथेति । पिहित एव सन् सम्यक् प्रकाशयति, गुणेन स्वांशेन सूर्य्यच्छायास्थानीयेन जीवेन गुर्व्वादिरूपेणाच्छन्नः सन्नेव तद्द्वारेत्यर्थः । गुणान् कारुण्यादीन्, तत्प्रकाशनार्थं गुणिनश्च कारुण्यादि-कर्तॄन् गुर्व्वादीन् सम्यक् प्रकाशयसि । न च तत्तत्प्रकाशने त्वत्कृपां विनान्यो हेतुरस्तीत्याह—आत्मना स्वयमेव प्रदीपयति कृपया प्रकाशयतीति तथा सः । तत्र हेतुः—भूमन् ! हे अपरिच्छिन्नमाहात्म्येति ॥ ३९ ॥ एवं भक्तेष्वेव कृपां प्रकाशयसि, न त्वभक्तेष्विति ते सदा दुःखिन एवेत्याह—यदिति; यस्य तव मायया ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अद्वितीयः समाभ्यधिकरहितः ॥ ३८ ॥ सूर्य्यः स्वच्छायया स्वकीयरश्मिनिवारणप्रभवजातया पिहितो न भवतीत्यपिहितः अनाच्छादितः सः छायां सञ्चकास्ति प्रकाशयति नैशे तमसि शाखादिच्छायाया अदर्शनात् छायाया आदित्यप्रकाश्यत्वमित्यभिप्रायः गुणेन सत्त्वादिगुणेन गुणान् पृथिव्यादीन् आत्मप्रदीपः स्वप्रकाशः ॥ ३९–४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नन्वेवमप्ययं दुरात्मा निग्राह्य एवेति चेत् यद्यप्येवं तथाप्यधुना शरणङ्गतोऽनुग्राह्य एव युक्तं चैतत्तवावतारस्य प्रपन्नलोकाभ्युदयार्थत्वादित्यभिप्रयन्नाह—तवेति । हे अकुण्ठधामन् ! धाम तेजः स्वभाव इति यावत् अवतारदशायामप्यप्रच्युतसार्वज्ञ्यसर्वशक्त्यादिस्वभावेत्यर्थः । जगतः प्रपन्नलोकस्य भवायाभ्युदयाय च अभवायेति वा छेदः अभवाय भवप्रयुक्ततापत्रयनिवृत्तये इत्यर्थः । अनुग्राह्यश्चेत्तर्हि त्वमेवैनमनुगृह्णीष्वेत्यत आह–वयमिति । सर्वे वयं लोकपालास्तावत्त्वया सृष्टाः अनु ततो भाविताः पालिताः सप्त भुवनानि विभावयामः पालयामः वयं (त) त्वत्परतन्त्रा इति भावः ॥ ३७ ॥ आकाशमिव केवलमिति निरस्तनिखिलदोषत्वमुक्तं विराट्शरीरत्वोक्त्या सर्वान्तरात्मत्वं फलितं तवावतारोयमित्यनेन निरुपाधिकरक्षकत्ववात्सल्यसौशील्यादिकमाविष्कृतम् । अथ परत्वोपयुक्तं कारणत्वादिकमाह—त्वमेक इति । त्वमस्य जगतः हेतुः कारणं किं चतुर्मुखादिव ?

नेत्याह—अहेतुरिति । स्वयं कारणान्तररहितः, किं निमित्तकारणं ? नेत्याह—एक इति । अविभक्तनामरूपसूक्ष्मचिदचिद्विशिष्टत्वेनैकत्वव्यपदेशार्हः आद्यः पुरुषः जगदुपादानकारणभूतपुरुषश्चेत्यर्थः । किमुपादानकारणमेव ? नेत्याह—अद्वितीय इति। अधिष्ठात्रन्तररहितः निमित्तकारणञ्चेत्यर्थः । अत एव प्रकृतिपुरुषविलक्षण इत्याह—स्वदृक तुर्य्यश्चेति । स्वदृक् स्वयम्प्रकाशज्ञानस्वरूपः अनेन प्रकृतिवैलक्षण्यमुक्तं जडत्वात्तस्याः तुर्य्यः जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयसम्बन्धरहितः अनेन जीववैलक्षण्यमुक्तम् आकाशमिव केवलमित्यनेन तुर्य्य इत्यनेन च निर्विकारत्वमुक्तम् एक आद्यः पुरुष इत्यनेन विकाराश्रयत्वरूपोपादानत्वं कथमेतदुभयं मिथो विरुद्धमेकस्मिन्नुपपद्यते ? इत्याशङ्क्य परिहरति--प्रतीयस इति । यद्यपीदं परस्परविरुद्धमथाऽपि सर्वगुणाप्रसिद्ध्यै सर्वेषां गुणानां स्वापृथक्सिद्धविशेषणानां प्रकृतिपुरुषादीनां प्रसिद्ध्य देवमनुष्यत्वाद्याकारसिद्धये स्वमायया आत्मीयसङ्कल्पेन यथाविकारं प्रकृतिपुरुषगतस्वरूपान्यथाभावस्वभावान्यथाभावरूपविकारानुगुणं प्रतीयसे तत्तदन्तरात्मतया तत्तन्नामरूपनिर्वाहकत्वेन प्रतीयसे प्रमीयसे वेदान्तजन्यप्रमाविषयो भवसीत्यर्थः । अस्मिन् विषये वेदान्तानामेव प्रामाण्यमिति भावः॥३८॥ सर्वगुणेत्यनेन प्रकृतिसम्बन्धः सूचितस्तर्हि जीवस्येव प्रकृत्या तिरोहितस्य यथाविकारमन्तरात्मतया प्रकाशो न स्यादित्याशङ्कां दृष्टान्तेन निराकरोति–यथैवेति । अपिहित इति च्छेदः दार्ष्टान्तिके गुणेनापि इति दर्शनात् अन्यथोपध्मानीयप्रसङ्गाच्च अपिहित इति नञ्समासः नतु "वष्टिभागुरिः" इति वचनविहिताकारलोपाभावपक्षे रूपं स्वया स्वप्रकाश्यया छायया मेघादिरूपया अपिहितोऽतिरोहितस्वरूपस्वभाव एव सन् नहि मेघादिना सूर्य्यतत्प्रभयोस्तिरोधिः मेघादीन् भित्वा तदन्तर्बहिश्च प्रसरणात् अन्यथा तद्व्यवहितरूपाग्रहणाप्रसङ्गात् यथैवम्भूतः सूर्य्यः छायां मेघादीन् रूपाणि तद्व्यवहितरूपाणि च सञ्चकास्ते सम्यक् प्रकाशयति एवं हे भूमन् ! गुणेन सत्त्वादिगुणेन गुणमयप्रकृत्येति यावत् अपिहित' अतिरोहितस्वरूपस्वभाव एव त्वं गुणान् प्रकृतितत्कार्य्यगतधर्मान् गुणिनः प्रकृत्यादींश्च प्रकाशयसि आत्मप्रदीपः स्वप्रकाशश्च यद्यपि दृष्टान्ते छायासूर्य्ययोः न सम्बन्धः मिथस्तयोर्विप्रकृष्टत्वात् दार्ष्टान्तिकेत्वपृथक्सिद्धविशेषणविशेष्यभावः सम्बन्ध इति दृष्टान्तो विषमस्तथापि विप्रकृष्टस्येवापृथक्सिद्धाया अपि प्रकृतेरतिरोधायकत्वमन्यप्रकाश्यत्वं तिरोधानप्रतीतेर्भ्रमरूपत्वञ्चेत्येतदेव दृष्टान्ताभिप्रेतम् ॥ ३९ ॥ न केवलमयमेवाज्ञः किन्तु सर्वेपि त्वन्मायामोहितत्वादित्यभिप्रयन्नाह–यन्मायेति । यस्य तव मायया मोहिता धीर्येषां ते पुत्रादिष्वासक्ताः वृजिनार्णवे दुःखार्णवे उन्मज्जन्ति उत्प्लवन्ते पुनर्निमज्जन्ति च ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नन्वेवम्भूतस्य मम कथं प्रपञ्चे स्वस्वरूपेण प्राकट्यम् ? तत्राह–तवेति । धर्म्मस्य प्राधान्यतस्त्वद्भक्तिलक्षणस्य ॥३७॥ त्वमेकः सजातीयभेदरहितः अद्वितीयो विजातीयभेदरहितश्च यत आद्यः "विष्णोस्तु त्रीणि रूपाणि" इत्युक्तानां पुरुषाणां मूलरूपः अतस्त्वमेव पुरुषः । "पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वम्" इति श्रुतेः । कुतस्तुरीयः विराट् हिरण्यगर्भश्च कारणं चेत्युपायः "ईशस्य यत् त्रिभिर्हीनं तुरीयं तद्विदुर्बुधाः" इत्युक्तलक्षणः तदपि कुतः स्वदृक् स्वप्रकाशः अतो हेतुरहेतुरपि यद्यप्येवम् अखण्डस्त्वं तथापि यथाविकारं तत्तद्विकारानुसारेण सर्वेषां सत्त्वादिगुणप्रकाशनाय महत्स्रष्ट्रादिरूपस्सन् खण्डवत् प्रतीयसे तच्च मायया स्वपूर्णत्वावरणशक्तितारतम्येनेत्यर्थः । अतस्त्वमेव चेश्वर इति ननु ममैव चेन्महत्स्रष्ट्रादिरूपत्वं तर्हि तत्तद्रूपेण मायाप्रवर्त्तयितुर्ममैव तत्तद्दोषलेशः स्यात् इत्याशङ्क्य दृष्टान्तेन परिहरति–यथैवेति ॥ ३८–३९ ॥ तदेवं निगूढं तन्महिमानं व्यज्य प्रस्तुतं बाणार्थं प्रसादनं योजयितुं परमापत्प्राप्त्या मदरहितं बाणमपि शिक्षयितुं निवेदयति पञ्चभिः । तत्र तादृशत्वन्महिमाज्ञानमस्य नाश्चर्य्यं प्रायः सर्वस्यैव मोहितत्वादित्यभिप्रेत्याह–यदिति ॥ ४०–४२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

त्वं तु सर्वकारणकारणं मूर्त्तानन्दः । नन्वेवं चेदहं तदा कथमवनौ भविष्यामीत्याह—तवावतारोऽयमित्यादि । हे अकुण्ठधामन् ! अयं तवावतारः किल धर्मस्य गुप्त्यै जगतो भवाय क्षेमाय । ननु भवन्त एव लोकपालकाः ? नेत्याह—वयञ्चेत्यादि । वयञ्च सर्वे ब्रह्मादयस्त्वयानुभाविता अनुभावितं प्रापिताः, न त्वस्माकं स्वतोऽनुभावः, तदनुभावेनैव सप्तभुवनानि विभावयामः ॥ ३७–४० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

विराड्रूपन्तु तव लीलामात्रम्, तत् कीदृशमित्यनूद्य तवावतारोऽयमिति वदन् श्रीकृष्णस्य परमैश्वर्यं प्रदर्शयति—'वयञ्च सर्वे भवतानुभाविताः सन्तो विभावयामो भुवनानि सप्त' इति ॥ ३७—४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

साक्षाद्ब्रह्मस्वरूपत्वाददृश्यस्यापि तव यत् प्रापञ्चिकलोकैर्दृश्यत्वं तदतर्क्यशक्तेस्तव परमकृपानिबन्धनमित्याह। तवेति । हे अकुण्ठधामन् ! परब्रह्मणोपि तव यद्दृश्यत्वं तस्मात्तर्कैस्तव प्रभावः कुण्ठीकर्तुमशक्य इत्यर्थः । धर्मस्य स्वभक्ति-

लक्षणस्य गुप्त्यै तत्प्रतिपक्षमतनिरसनपूर्वकरक्षणाय जगतः कर्मिज्ञानिमूढदुराचारबहिर्मुखपर्य्यन्तस्यापि अभवाय मोक्षाय न च सामान्यजगत्पालनायेत्याह—वयमिति। सर्वे दश दिक्पालाः भवता अनुभाविताः पालिताः सन्तः पालयाम एव तन्मात्रार्थं तवाविर्भावे किं प्रयोजनमिति भावः ॥ ३७ ॥ मद्विभूतयो यूयमपि मदभिन्ना एवेति तत्र नहि नहीत्याह। त्वमेकः सजातीयभेदरहितः ईश्वरान्तराभावात् त्वत् स्वरूपभूतानां मत्स्याद्यवताराणामपि मध्ये त्वमाद्यः स च त्वं मनुष्याकृतिरेवेत्याह, पुरुषः त्वत्स्वरूपाद्भिन्ना जीवशक्तिः मायाशक्तिरपीत्याह। अद्वितीयः विजातीयभेदरहितः किञ्च पुरुषाकाराणां मुख्यानां स्वरूपभूतानां चतुर्णां व्यूहानाम् अपि मध्ये त्वं तुर्य्यः वासुदेवस्वरूप इत्यर्थः। ननु त्वामन्यः कोपि दर्शयितुं शक्नोतीत्याह। स्वदृक् स्वेनैव दृक् दर्शनं यस्य स अतः सर्वश्रेष्ठत्वात्त्वमेव हेतुः सर्वकारणम् अहेतुस्तव तु कारणं नास्तीत्यर्थः। अत एव ईशः मुख्यमैश्वर्यं तवैवेति भावः एतादृगैश्वर्य्यवानपि त्वमतितुच्छानां मायिकगुणानामप्युपकारं करोषीत्याह—प्रतीयस इति। तथापि तदपि यथाविकारं प्रतिशरीरं स्वमायया कृत्वा ये सर्वे गुणा बुद्धीन्द्रियादयस्तेषां प्रकृष्टसिद्ध्यर्थं प्रतीयसे अन्तर्यामिरूपेणानुभूयसे तत्र तत्रान्तर्यामित्वं यदि त्वं न स्वीकुरुषे तदा मायागुणानां प्रकाशनाभावात्ते व्यर्था एव भवेयुरिति भावः ॥ ३८ ॥ अदृष्टस्याप्यन्तर्यामिणो मायागुणप्रकाशने दृष्टान्तमाह—यथैव सूर्य्यः स्वया छायया मेघलक्षणाया पिहितः लोकदृष्ट्या आच्छादितोपि छायां मेघं रूपाणि मेघान्तरितान् लोकांश्च घटादीनपि सञ्चकास्ति प्रकाशयति एवं गुणेनाऽहङ्कारेण स्वकार्य्येण जीवावरकेण तद्दृष्ट्यापिहितोपि गुणान् बुद्धीन्द्रियविषयादीन् गुणिनो जीवानपि सञ्चकास्ति प्रकाशयसि आत्मा परमात्मा चासौ प्रदीपः प्रकाशकश्चेति ॥ ३९ ॥ स त्वमेव कृपयाऽवतीर्य जीवानुद्धरसि जीवास्तु संसारसिन्धौ पतिता एवेत्याह–यन्मायेति ॥ ४० ॥

गूढार्थदीपिनी

हे अकुण्ठधामन् अलुप्तज्ञान! भवाय अभ्युदयाय। अनुभाविता पालिताः सन्तः भुवनानि विभावयामः पालयामः ॥ ३७ ॥ स्वदृक् स्वप्रकाशरूपः। सर्वस्य हेतुः स्वयम् अहेतुः। यथाविकारं प्रतिशरीरम् गुणप्रसिद्ध्यै विषयप्रकाशनाय प्रतीयसे ॥ ३८ ॥ यथैव सूर्य छायया मेघलक्षणया आच्छादितोऽपि छायां मेघं रूपाणि घटपटादीनि प्रकाशते। एवं गुणेन अहङ्कारेण स्वकार्येण तद्दृष्ट्या आच्छादितोऽपि त्वं गुणान् सत्त्वादीन् तदुपहतान् गुणिनः जीवानपि प्रकाशयसि आत्मना स्वयमेव दीपयसीति तथा। हे भूमन् परिपूर्ण ॥ ३९ ॥ वृजनार्णवे दुःखसमुद्रे संसारे पुत्रादिषु प्रसक्ताः सन्तः उन्मज्जन्ति ऊर्ध्वं स्वर्गं गच्छन्ति पुण्याधिक्यात्। निमज्जन्ति अधो नरकं गच्छन्ति पापाधिक्यात् ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किञ्च सर्वपोषके स्वामिनि पोष्येण मया व्यतिक्रमः कृत इति सूचयति–तवेति। हे अकुण्ठधामन् निरावरण! भवाय अभ्युदयाय भाविताः पालिताः ॥ ३७ ॥ ननु, चक्षुरादिवृत्तिपरिच्छिन्ने पित्रादौ अयमनेन पालितः इति पालकपालितयोः सम्बन्धो दृष्टः कथमकुण्ठस्वरूपे सर्वकरणवृत्तिभिरपरिच्छेद्ये पालकोऽयमिति प्रतीतिरिति शङ्कां निराकरोति–त्वमेक इति। एकः केवलः सजातीयभेदशून्यः अद्वितीयः विजातीयभेदशून्यः सजातीयस्य विजातीयस्य च पदार्थान्तरस्य आवरकस्याभावात् यद्यपि निरावरणस्त्वमसि तथापि गुणप्रसिद्ध्यै कृपालुत्वस्वभक्तरक्षकत्वसर्वार्थप्रदत्वादिगुणविख्यापनाय यथाविकारं विकारो मायाकार्यं तत्तदनुसारेण मायया कृपया प्रतीयसे करणवृत्त्यनावृतोपि हृदि ध्यातृभिरनुभूयसे इत्यर्थः। नन्वेवम्भूतभेदद्वयशून्ये मयि सति कुतो ध्यातृध्येयादिभेदसिद्धिरित्यत्र स्वगतभेदात्सर्वं सङ्गच्छते इत्याह—आद्य इति। विश्वस्याऽनभिव्यक्तनामरूपस्य बीजमित्यर्थः। तर्हि किं प्रधानं नेत्याह—स्वदृक् स्वयम्प्रकाशः अत एव हेतुः स्वगतस्य चेतनाचेतनात्मकस्य विश्वस्योत्पादकः स्वयमहेतुरनन्यसिद्धः किञ्च स्वरूपताप्यनेकधा कृपया प्रतीयसे इत्याशयेनाह–पुरुष इति। अनेकपुरुषरूप इत्यर्थः—

"आद्यस्तु महतः स्रष्टृद्वितीयं त्वदसम्भवम्। तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते ॥

इति सात्वततन्त्रोक्तेः तुर्य्यः वासुदेवः वासुदेवादिचतुर्व्यूहस्वरूप इत्यर्थः ॥ ३८ ॥ गुणप्रसिद्ध्यायित्यनेन निर्दिष्टान् गुणान् एकदेशकथनेन सूचयन् तत्तद्धृदि प्रविष्टस्याप्यनावृतत्वं प्रपञ्चयति—यथैवेति। यथा सूर्यः स्वच्छायया मेघलक्षणया पिहितः प्रभया छायां मेघञ्च रूपाणि मेघान्तरितान् घटादीन् अपि सञ्चकास्ति प्रकाशयति एवं गुणेन हृदा पिहितः "अन्तःप्रविष्टः शास्ता जनानाम्" इति श्रुतेरन्तःप्रविष्टोपि हे भूमन् हे सर्वगत! सर्वव्यापकत्वादनावृतः गुणान् अन्तःकरणभेदान् गुणिनम् अन्तःकरणवतो जीवान् आत्मा परमात्मा चासौ प्रदीपः सर्वप्रकाशकः प्रकाशयसीत्यर्थः ॥ ३९ ॥ अथापि जनस्त्वन्मायामोहितः न केवलमहमेवेत्याह—यन्मायेति। वृजिनार्णवे दुःखार्णवे उन्मज्जन्ति देवादियोनिषु निमज्जन्ति स्थावरादिषु ॥४०॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे अकुण्ठधामन्। अनन्यथाभवत्प्रकाश। तथाभूतवैकुण्ठाख्यधामवान्वा। तवायमवतारो धर्मस्य गुप्त्यै जगतो भवाय मङ्गलाय योग्यस्य। वयं सर्वे च भवताऽनुभाविताः पालिताः सन्तः सप्तभुवनानि विभावयामः पालयामः ॥ ३७ ॥ एको मुख्य

ए चासौ कश्चेत्येककर्तेति वा आद्योऽद्वितीयस्तुर्यो द्वावित्याद्युक्तबन्धातीतो गुणातीतो गुणात्ययस्तुरीयश्चेति पञ्चमतात्पर्योक्तेः। स्वदृक् स्वप्रकाशो हेतुः स्वयं कारणमहेतुः कारणशून्य ईशः श्रीरमणः। अथाऽप्येवं सन्नपि सर्वगुणानां प्रसिद्धिः प्रयोजनसम्पत्तिस्तदर्थं यथाविकारं तत्तद्विधाकारामनुसृत्य स्थूलत्वलघुत्वादिभिः प्रतीयसे। न मृदादिवत्कर्मपरवश इत्याह। स्वमाययेति। स्वेच्छयेत्यर्थः। सु अत्यन्तं अमाययेति वा ॥ ३८ ॥ गुणप्रसिद्धये इत्युक्तं निदर्शनतो विवृणोति। सूर्य इति। स्वया स्वसम्बन्धिन्या छाययाऽपिहित आच्छादितो लोकलोचनोऽनन्तरं तां छायां रूपाणि तदन्तरितान्यप्रकाशितानि घटादिवस्तूनि च चकास्ति प्रकाशति। स्वयं तदसम्बद्धो यथैवं तथा। गुणेनापिहित इतरमतेः। वस्तुतस्तु पिहितो नेत्यपिहितः। गुणानित्यनुवादेन प्राक्तनं गुणपदं जात्यैकवचनाभिप्रायेणेति द्योतयति। अनेनैव सर्वगुणप्रसिद्धये इत्युक्तिरप्यनुकूलितेत्याकलनीयम्। आत्मप्रदीपः स्वरूपज्ञानस्तान्गुणान्गुणिनो जीवानपि चकास्ति प्रकाशयतीति न संसारस्तवेति सारांशः। स्तवस्य ज्ञेयः। एतदसम्भावनोच्छित्त्यै भूमन्निति ॥ ३९ ॥ यतस्त्वन्मोहिता हि वयं वर्तामहे तव तत्संसारवार्ता कंसारे कथं स्यादित्यपि विज्ञापयन्ति। यदिति। यस्य तव मायया मोहिता धीर्येषां ते पुत्रदारगृहादिषु प्रसक्ता वृजिनार्णवे मज्जन्ति निमज्जन्ति ॥४०॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं विश्वरूपत्वमुक्त्वा तादृशस्यावतारे प्रयोजनमाह **तवावतारोऽयमिति**। अकुण्ठो वैकुण्ठः स्वरूपप्रच्युतस्य समागमनं निवारयति सम्बोधनेन। अयं तवावतारः धर्मस्य गुप्त्यै खलनिग्रहाय च उभयार्थमवतारः। यत्र विरोधः, तत्रोभयसमर्थनं विचारणीयमिति निरूप्यते। मदुक्ता भुजा धर्मः, स च खलः, उभयमत्र समाधेयम्। ननु प्रमाणभूतोऽपि भवान् पक्षपातेन करणादप्रमाणं जात इति शङ्कां वारयति वयं चेति। **जगतो भवायेति** पाठेऽपि उद्भवार्थमयं मारणीय इति सिध्यति। येन वा धर्मेणोद्भवो भवति, दैत्यांशनिराकरणपूर्वकेण हि तथा। वयं च भवतैव सर्वार्थे अनुभाविताः, तथा भावनया प्रेरिताः, संस्कृता वा, सप्तभुवनानि विभावयामः। वयं तत्त्वाधिष्ठातृदेवाः ब्रह्माण्डदेवा वा। सर्वत्रैव यदि वयं त्वद्भावभाविताः, तदा अस्मिन्नेव कः सन्देहो भवेत्। अनेन केवलतामसभावकत्वमिति पक्षो निवारितः। अधस्तात्सप्तभुवनेषु तदनुभावः सिद्ध इति उपरितनान्येव सप्तभुवनानि गृहीतानि ॥३७॥ ननु तथापि ममाग्रे अयमपकारं करिष्यति, ततो मया मारणीय इति, अस्मिन्ननुभावो न युक्त इति चेत्, तत्राह **त्वमेक आद्य** इति। यद्यपि भवान् सर्वत्र एक एव, पूर्णगुणश्च, तथापि यावन्ति रूपाणि जगति प्रसिद्धानि घटपटादीन्यपि, तत्र कारणे विचार्यमाणे भगवानेव स्वस्यैकमेकं धर्मं मुख्यतया परिगृह्य, तथाविधो जात इति मन्तव्यम्। तथा सति सहस्रभुजरूपो बाणो येन (गुणेन) भवति, स एव गुणः कारणभूतोऽङ्गीकर्तव्य इति तथैव करणमुचितम्। अस्माकं सर्वत्र भेदप्रतीतावपि त्वमेक एव। न हि निम्बबुद्ध्या भक्षिता शर्करा तिक्ता भवति। तस्यैकत्वं साधयति आद्य इति। यथैक एव व्रीहिः अङ्कुरादिभावेन सहस्रं व्रीहयो भवन्ति, तथैक एव भगवानाद्यः कारणभूतः। सङ्घातोत्पत्त्यर्थं व्रीहिवत्। निराकारतामाशङ्क्य कारणस्य बीजात्मकस्य स्वरूपमाह **पुरुष** इति। तस्य कारणतायां स्त्र्यपेक्षामाशङ्क्याह **अद्वितीय** इति। कार्यकारणवैलक्षण्यं कार्यवैचित्र्यं च चिन्तामणाविवात्राप्यध्यवसेयम्। तस्योपादानत्वमविकृतत्वं निमित्तत्वं च पूर्वमेव साधितम्। अत एव जगतः अनुपाम्यतापि सिद्धा। ब्रह्मत्वे च जगतस्तज्जलान्तत्वमेव। दृष्टान्तैः स्थितिप्रलयावन्यत्रेति निदर्शनमात्रत्वम्। बहवो दृष्टान्ता एकीभूताः भगवति सर्वलक्षणां बुद्धिं सम्पादयन्ति। तर्कमात्रमूलत्वे अप्रामाण्यं स्यादिति दृष्टान्ताभावाच्च श्रुत्यैकसमधिगम्यमेव ब्रह्मेति स्थापितम्। कादाचित्कत्वेऽपि भगवानेव हेतुः। अन्यस्मिन् कारणत्वेन परिकल्प्यमाने या उपपत्तिः, सा भगवत्येव सम्पादनीया। सर्वसमर्थत्वात् ब्रह्मणः। भिन्नाधिकरणत्वे यथा विरोधपरिहारः, तथैकाधिकरणत्वेऽपि। युक्त्यपेक्षायामपि पत्रदारुनिर्यासपुष्पफलेषु बीजमेकमेव कारणं सर्वविलक्षणं दृष्टमिति तस्यैव परम्परया साक्षाद्वा कारणत्वमध्यवसीयते, तथा श्रुतत्वाद्ब्रह्मणोऽप्यध्यवसेयम्, अवधृतप्रामाण्यवेदात्। तथा सति श्रुतिर्यथार्था समर्थिता भवति। वैयर्थ्यं च स्यात्, प्रत्यक्षानुमानादिभिरेव वैदिकार्थस्यापि सिद्धेः। सङ्केतस्तु निरूपकग्रहणादेव। अन्यथा तत्तन्मते आत्मादिपदानां सङ्केतः अलौकिकार्थानामसङ्गतः स्यात्। अतोऽद्वितीयपुरुष एव आद्यो जगत्कारणम्। एवं भगवतः जगत्कारणत्वमुपपाद्य तत्रोत्पत्तिस्थितिप्रलया एव कार्यत्वेन सिद्धा इति मोक्षसाधकत्वं भगवतो वदन् पुनर्विशेषणान्तरमाह **तुर्य** इति। समाधिगम्यः। यथा जाग्रत्स्वप्नसुषुप्तयः स्थित्युत्पत्तिप्रलयाभिज्ञापिकाः, एवं तुर्यावस्थापि मोक्षाभिज्ञापिका। तस्यां प्रादुर्भूतो भगवान् मोक्षद इति। तस्य मोक्षदाने प्रकारमाह स्वदृगिति। यथाद्वितीयः पुरुषो जगत्कारणम्, तथा **स्वदृक्** स्वस्मिन्नेव दृष्टियुक्तः आत्मानुभवतुष्टः मोक्षहेतुरिति। ननु स्वमोक्षमेव साधयेत्, नतूपासकानामन्येषाम्, तत्राह **हेतुरिति**। अन्येषामपि मोक्षे स्वदृक्त्वे तुर्यत्वे च स एव हेतुः। तर्ह्यन्यस्यास्मदादेः स्वयं स्वस्य ततोऽपि मूलभूतः कश्चिद्भविष्यतीत्याशङ्क्याह **अहेतुरिति**। न तस्य कश्चिद्धेतुरस्ति। ननु यथा भगवान् स्वेच्छया सर्वं भवतीत्युच्यते, एवं सर्वोऽपि सर्वं भवतु, अभेदश्च श्रुत्या प्रतिपाद्यत इति, तत्राह ईश्वर इति। स हि सर्वसमर्थोऽपि स्वयं तथैव मूलभूतः। कार्यरूपस्तु स्वस्मादेव जायते, सर्वसामर्थ्यस्य विद्यमानत्वात्, ईश्वरेच्छाया नियन्तुमशक्यत्वाच्च। एवं सर्वसामर्थ्यमलौकिकत्वं निर्दोषपूर्णगुणविग्रहकत्वमुपपाद्य सर्वत्र पूर्णगुणकोऽपि यथाविकारं इक्षुक्षीराम्ललवणादिविकारमनतिक्रम्य प्रतीयसे, सर्वात्मना अप्रतीतौ भगवन्मायैव नियामिका। ननु तस्याः स्वातन्त्र्यास्वातन्त्र्याभ्यां पुनः

स दोषस्तदवस्थ इति चेत्, तत्राह **सर्वगुणप्रसिद्धचा** इति। अन्यथा भगवदीयाः सर्वे गुणाः प्रत्येकं न प्रसिद्धा भवेयुः। यथा षड्रसापि हरीतकी नीरसैव, निसर्गतः कोऽपि रसः सर्वविलक्षणो न प्रतीयत इति, तथैव भगवान् सर्वत्र सर्वगुणप्राकट्ये कृसरवत्प्रतीयेत। अतो भगवदिच्छारूपया मायया सर्वत्र पूर्णगुणकोऽपि यथाविकारं प्रतीयते। तथैव लीलायां यादवत्वमात्रं प्रकटयितुमाविर्भूतः नान्यान् धर्मान् प्रकटितवानित्यस्मदादीनामप्यज्ञानमिति भावः॥ ३८॥ ननु सर्वत्र कारणेषु कार्योत्पत्तौ कारणप्रत्यक्षता दृश्यते, नत्वप्रत्यक्षान्मृदादेः घटादिकमुत्पद्यते; तथा पदार्थोत्पत्तौ कारणत्वेन ब्रह्मप्रतीतिः स्यात्, तदभावात् प्रत्यक्षविरोधात् कथं कारणतेत्याशङ्क्याह **यथैव सूर्य** इति। 'मेघाः सूर्योद्भूता' इति श्रुतिः, 'यावदादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षती'ति श्रुतेः सूर्य एव पर्जन्यः, अन्यथा सवितृत्वं न स्यात्। ततः सूर्यादुत्पन्ना अपि मेघाः यथा सूर्याच्छादकाः, एवं जगदपि भगवदुत्पन्नमपि भगवदाच्छादकम्। यथा तान् मेघान् मेघान्तर्जायमानां वृष्टिं तस्याप्यधोभूमिं भूमिष्ठांश्च पदार्थान् स्वयमदृष्टोऽपि प्रकाशयति, एवं सर्वकारणभूतः भगवानेव सर्वत्र सर्वप्रकाशक इति न काप्यनुपपत्तिः। **छायया मेघैः**। चकारात्तत्कार्यां वृष्टिम्। मेघानां पृथक्त्वं निवारयति स्वयेति। **रूपाणि** घटादीनि। चकारात्तैर्जायमानां क्रियामपि लौकिकीं वैदिकीं च प्रकाशयति। एवं गुणेन स्वयमेव तथाभूतेनापिहितोपि सर्वथा गुप्तोऽपि गुणान् कारणभूतान् गुणिनः कार्याणि च प्रकाशयति, आत्मप्रदीपश्च भवति। **सर्वथा** सामर्थ्यार्थं सम्बोधनं भूमन्निति॥ ३९॥ भगवत्कारणतायां हेत्वन्तरमप्युपादयति **यन्मायामोहितधिय** इति। विवेकिनोऽपि विषयान् दृष्ट्वापि दुःखदान् तत्रैवासक्ता भवन्ति। तत्रेष्टसाधनतायाः लौकिके कारणत्वात् तदभावेऽपि प्रवृत्तेरवश्यं कारणान्तरमाक्षिपति। प्रत्यक्षभ्रमस्य प्रत्यक्षमेव विशेषज्ञानं बाधकमिति दिङ्मोहादौ दृष्टमिति चेत्, तत्राह **प्रसक्ता वृजिनार्णव** इति। दृष्ट्वापि तद्गतदोषान्, अनुभूयापि दुःखम्, पुत्रदारगृहादिषु **उन्मज्जन्त्युत्पद्यन्ते**, 'अन्ते या मतिः सा गति'रिति तत्रैवासक्ताः **निमज्जन्ति,** आसक्त्यैव तत्र स्थिता यावज्जीवं तत्रैव म्रियन्ते। 'प्रजामनु प्रजायन्त' इति पुत्रादुत्पद्यन्ते, पुत्रार्थमेव च क्वचित् म्रियन्ते च। तथैव भार्यायां पुत्ररूपेणोत्पद्यन्ते, भार्यार्थं म्रियन्ते च। गृहे तूत्पत्तिमरणे प्रसिद्धे। आदिशब्देनाश्वगर्दभादिष्वपि। 'अन्ते या मतिः सा गति'रिति भरतवत्तत्राप्युत्पद्यन्ते म्रियन्ते च। तस्मादेवं महामोहहेतुः भगवच्छक्तिरेव काचिदङ्गीकर्तव्या, या प्रत्यक्षशास्त्रैरप्यनुल्लङ्घ्या॥ ४०॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तवावतारोऽयमित्यत्र। मदुक्ता भुजा इति। मया वरत्वेन दत्ता भुजा वेदरूपेण मया दत्तत्वात् धर्मरूपा इति भावः। **उपरितनान्येवेति**। अधःस्तनाभिप्रायेण सप्तत्वव्याख्याने भगवतानुभाविता इति कथनं व्यर्थं स्यात्, तामसत्वेन तेषां स्वत एव भावनसम्भवादिति भावः। **त्वमेक** इत्यत्र। भगवतः सर्वत्रैकरूपत्वादत्रानुभावो युक्तोत्र नेति विभेदो नास्तीत्यर्थः। **कार्यकारणेति**। कार्यमचेतनमुपादानं चेतनमिति वैलक्षण्यमित्यर्थः। **अत एवेति**। नहि चिन्तामणिनिर्मिताः पदार्थाः फलदत्वेनोपास्यन्ते, किन्तु चिन्तामणिरेव फलदत्वेनोपास्यते इति दृष्टान्तादित्यर्थः। **ब्रह्मत्वे चेति**। जगतो ब्रह्मत्वे तज्जलान्तत्वमेव हेतुरिति शेषः। **भिन्नाधिकरणत्वे** इति। भिन्नोपादानकत्वे इत्यर्थः। **यन्मायेत्यस्याभासे। हेत्वन्तरमिति**। पुत्रादिषु प्रवृत्तिभगवत्कारणतायां हेत्वन्तरं भगवानेव स्वशक्त्या मायया पुत्रादिषु प्रवर्तयतीत्यर्थः। ननु क्लृप्तस्येष्टसाधनताज्ञानस्यैव हेतुता, नतु भगवत इत्याशङ्क्य व्युत्पादयन्ति विवेकिनोपीति। इदमेव विवृण्वन्ति तत्रेत्यादिना। तत्र पुत्रादिष्वित्यर्थः। एतस्य प्रवृत्तेरित्यनेनान्वयः। **तदभावेपि** इष्टसाधनत्वाभावेपीत्यर्थः। तथा चेष्टसाधनत्वाभावेपि पुत्रादिषु प्रवृत्तेर्हेतोः सा प्रवृत्तिः कारणान्तरं भगवन्तमेव कारणत्वेनाक्षिपतीत्यर्थः। प्रत्यक्षेति। एतस्मात्पूर्वं नन्विति शेषः। ननु वस्तुत इष्टसाधनत्वाभावेपि तथाज्ञानं भ्रमात्मकं तिष्ठत्येवातः प्रवृत्तिः। विशेषज्ञानं भ्रमनिवर्तकमिति हेतोर्विशेषज्ञाने चाप्रवृत्तिरत इष्टसाधनताज्ञानस्य कारणता, नतु भगवत इत्याशङ्क्य वृजिनार्णवे प्रसक्ता एव भवन्तीत्याहेत्यर्थः। **प्रत्यक्षमेवेति**। न तु तदर्थमलौकिकमपेक्षितमित्येवकारः। अतो निवृत्तावपि न भगवान्कारणमित्यर्थः। भ्रमात्मकमपीष्टसाधनताज्ञानं नास्ति, तथापि प्रवर्तन्ते इत्याहुः **दृष्ट्वापीति**।

श्रीसुबोधिनीसारः

हे अकुंठधामन् तवायमवतारो धर्मस्य गुप्त्यै रक्षणाय जगतो भवाय समृद्धये भवता त्वयाऽनुभाविता अनुगृहीताः सर्वे वयं सप्त भुवनानि पालयामः॥ ३७॥ आद्यः पुरुषः श्रीविष्णुः एकोऽद्वितीयः सजातीयविजातीयभेदरहितः तुर्यः शुद्धः स्वदृक् स्वप्रकाशः हेतुरस्य कारणं स्वयमहेतुः। कारणकारणत्वात् ईशोऽवशीकृतमायाशक्तिः जीवरूपेण यथाविकारं प्रतिशरीरं प्रतीयसे स्वमायया सर्वेषां गुणानां प्रसिद्धयै प्रकाशनार्थम्॥ ३८॥ यथा सूर्यः स्वया छायया मेघरूपेण पिहितः छन्नः छायां मेघं रूपाणि च संप्रकाशते एवं गुणेनाहंकारेण पिहितः आवृतस्त्वमात्मप्रदीपो गुणिनो गुणान् सत्त्वादींस्तदुपाधींश्च संचकास्ति हे भूमन्॥ ३९॥ यस्य मायया मोहिता धीर्येषां ते पुत्रस्त्रीगृहादिषु प्रसक्ता वृजिनस्य दुःखस्यार्णवे समुद्रे संसारे उन्मज्जंति देवादियोनीः प्राप्नुवन्ति निमज्जंति स्थावरादियोनीर्भजन्ते॥ ४०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'एवंभूतस्य ममावतारः किमर्थम्' इत्याशङ्क्याह—तवेति। हे अकुण्ठधामन् अप्रच्युतस्वरूप ! तवायमवतारो धर्मस्य गुप्त्यै रक्षार्थम्, जगतः प्रपन्नजनसमूहस्य भवाय यथोचितं धर्मादिपुरुषार्थसिद्धये। ननु 'यूयमेव लोकपालत्वेन प्रसिद्धास्तत्राहं क' इत्यत आह—वयमिति। वयं च लोकपालाः सर्वे भवता अनुभाविताः प्रभावयुक्ताः कृता एव सप्त भुवनानि विभावयामः पालयामः, न स्वतन्त्रा इत्यर्थः॥ ३७॥ ईशः स्वतन्त्रस्तु एक एव त्वमेवेत्यन्वयः। तत्र हेतुमाह—हेतुरिति। सर्वकारणत्वादित्यर्थः। तत्र हेतुमाह—आद्य इति। 'जगद्धेतुत्वेपि कश्चिदन्य एव तस्य हेतुः स्यात्' इत्याशङ्क्याह—अहेतुरिति। स्वहेतुरहितः। तत्र हेतुमाह—अद्वितीय इति। जीववज्जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयं वारयति—तुर्य इति। जडत्वं वारयति—स्वदृगिति। स्वप्रकाशज्ञानरूप इत्यर्थः। सर्वान्तर्यामित्वमाह—पुरुष इति। अथापि उक्तस्वप्रकाशरूपोपि स्वमायया एकोहं बहु स्यामित्यात्मसङ्कल्पेन यथाविकारं देवतिर्यङ्मनुष्यादिस्वस्वरूपेण प्रतीतिः। ननु 'किमर्थमेवं सङ्कल्पः' तत्राह—सर्वगुणप्रसिद्ध्यै इति। रजआदिगुणानां स्वैश्वर्यादिगुणानां च प्रसिद्धिरन्यथा न स्यात्तदर्थमित्यर्थः॥ ३८॥ ननु 'स्वप्रकाशरूपेण कथं न प्रतीयते' इत्यपेक्षायां 'आच्छादितत्वात्' इति सदृष्टान्तमाह—यथैवेति। सर्वसामर्थ्यं सूचयन् सम्बोधयति—भूमन्निति। यथा स्वच्छायया 'यथा हि सूर्यात्प्रभवन्ति वार' इत्यादिवचनात् स्वकार्यमेघवर्षादिरूपया पिहितः आच्छादितोपि सूर्यस्तां छायां रूपाणि च नीलपीतादीनि एकश्चकारोनुक्तघटपटादिसमुच्चयार्थः सञ्चकास्ति प्रकाशयति। एवं गुणेन स्वकार्येण देहाहंकारादिसङ्घातेनाच्छादितोऽपि त्वं तान् गुणान् देहेन्द्रियान्तःकरणादीन् गुणिनस्तदुपहितान् जीवांश्च प्रकाशयसि, स्वयं च आत्मप्रदीपः स्वप्रकाश एव॥ ३९॥ एवं भगवतः स्वरूपं माहात्म्यं चोक्त्वा जीवव्यवस्थामाह—यन्माययेति। यस्य मायया मोहितधियः अत एव पुत्रादिषु प्रसक्ता जीवा वृजिनार्णवे दुःखसागरे उन्मज्जन्ति च स सर्वनियन्ता त्वमेवेति शेषः। उन्मज्जनं दुःखनिवृत्तिः, निमज्जन्ति, निमज्जनं च पुनर्दुःखप्राप्तिः॥ ४०॥

अन्वितार्थप्रकाशिका

तवेति॥ हे अकुण्ठधामन् अप्रच्युतस्वरूप ! तवायमवतारो धर्मस्य गुप्त्यै रक्षार्थं जगतः भवाय अभ्युदयाय। वयं च लोकपालाः सर्वे भवता अनुभाविताः प्रभावयुक्ताः कृता एव। सप्त भुवनानि विभावयामः पालयामः न स्वतन्त्रा इत्यर्थः॥ ३७॥ त्वमिति। त्वमेक आद्यः पुरुषोऽन्तर्यामी अद्वितीयः तुर्यः जाग्रदाद्यवस्थातीतः स्वदृक् स्वप्रकाशहेतुः सर्वकारणम् अहेतुः स्वहेतुरहितः ईशः स्वतन्त्रः अथापि सर्वगुणानां रजआदीनामैश्वर्यादीनां च प्रसिद्ध्यै स्वमायया यथाविकारं देवतिर्यङ्मनुष्यादिस्वस्वरूपेण प्रतीयसे॥ ३८॥ यथेति। हे भूमन् ! यथा स्वच्छायया स्वकार्यमेघवर्षादिरूपया। तुगभाव आर्षः। परदृष्ट्या अपिहितः आच्छादितो सूर्यस्तां छायां रूपाणि च नीलपीतादिकानि चान्मेघान्तरितान् घटपटादीनपि सञ्चकास्ति प्रकाशयति एवंगुणेन अहंकारेण स्वकार्येण जीवावरकेण तददृष्ट्या अपिहित आच्छादितोऽपि त्वं तान् गुणान् देहेन्द्रियान्तःकरणादीन् गुणिनस्तदुपहितान् जीवांश्च प्रकाशयसि। स्वयं च आत्मप्रदीपः स्वप्रकाश एव अतः सर्वसाक्षिणस्तव न संसारः॥ ३९॥ यदिति॥ यस्य मायया मोहितधियः अत एव पुत्रादिषु प्रसक्ता जीवा वृजिनार्णवे दुःखसागरे उन्मज्जन्ति निवृत्तदुःखा भवन्ति निमज्जन्ति पुनः दुःखं प्राप्नुवन्ति॥ ४०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुनस्तं वै राजात्परत्वेन स्तुवन्नाह तवेति। हे अकुंठधामन् अकुंठं अक्षरं धाम स्थानं यस्य तत्संबुद्धिः जगतो जनवृंदस्य अभवाय मोक्षाय यद्वा। जगतो विश्वस्य भवाय वृद्धये। भवता परमेश्वरेण अनुभाविताः पालिताः सर्वे पुरुषकालप्रकृतिवैराजब्रह्मादयः समग्रा वयं ईश्वराः सप्त भुवनानि विभावयामः पालनादियुक्तानि कुर्महे॥ ३७॥ तस्य परमेश्वरस्य द्वितीयत्वमाह त्वमिति। आद्यः सर्वेषामादिभूतः स्वयमनादिः पुरुषः नित्यसिद्धदिव्यसुंदरपुरुषाकारविग्रहः हेतुः सर्वेषां कारणं। अहेतुः नास्ति हेतुः कारणं यस्य सः ईशः सर्वनियंता स्वदृक् स्वेषु स्वकीयभक्तेषु दृक् दृष्टिर्यस्य सः अद्वितीयः स्वरूपस्वभावगुणविभूतिलोकभोगादिभिर्नास्ति द्वितीयः स्वतुल्यो यस्य सः अतएव एकः तुर्यः संकर्षणादित्रिभ्यश्चतुर्थो वासुदेवस्त्वं सर्वेषां चेतनानां ये गुणाः तज्जन्यकर्माणि तेषां प्रसिद्ध्यै प्रकाशाय जीवानां यथा कर्मफलप्रदानायेत्यर्थः। स्वमायया स्वकीययांतर्यामिशक्त्या यथाविकारं क्षेत्रज्ञ गृहीतनानाविधदेवमनुष्यादिदेहानुगुणं प्रतीयसे न्यूनाधिकभावेन विभासि अथापीति पादपूरणे॥ ३८॥ तदेव दृष्टांतेनोपपादयति यथेति। सूर्यः स्वच्छायया स्वकीयानां मेघानां छायया अभ्रयया पिहित आवृतः सन्। छायां अभ्रं रूपाणि पदार्थस्वरूपाणि। यथा संचकास्ति प्रकाशयति। एवं तथा आत्मप्रदीपः स्वप्रकाशस्त्वं गुणेन सृष्टिलक्षणेन। यद्वा। मनुष्यसमानस्वभावेन पिहितः। सन्। गुणान् सत्त्वादीन् गुणिनः प्रद्युम्नादीन् त्रीन्। गुणयुक्तानन्यान् क्षेत्रज्ञांश्च संचकास्ति चकास्सि यथा योग्यं प्रकाशयसि॥ ३९॥ एवं निगूढं भगवन्माहात्म्यमुक्त्वा संप्रति प्रस्तुतं बाणापराधं क्षमापयन्नाह यन्माययेत्यादि षड्भिः। वृजिनार्णवे दुःखसमुद्ररूपे देवतिर्यगाद्युच्चनीचयोनौ॥ ४०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वेवं सत्यपि दुरात्माऽयं निग्राह्य एवेति चेत् यद्यप्येवं तथापि अधुना शरणं गतोऽनुग्राह्य एव, युक्तं चैतत्तवावतारस्य प्रपन्नलोकाभ्युदयार्थत्वादित्यभिप्रयन्नाह । तवेति । हे अकुण्ठधामन्, अवतारदशायामपि अच्युतसार्वज्ञसर्वशक्त्यादिस्वभावेत्यर्थः । अयं, तव अवतारः, जगतः प्रपन्नलोकस्य, भवाय अभ्युदयाय, यदा अभवायेति छेदस्तदा भवप्रयुक्ततापत्रयनिवृत्तये इत्यर्थः । धर्मस्य, गुप्त्यै च, भवति । ननु सर्वथैवायमनुग्राह्यश्चेत्तर्हि त्वमेवैनमनुगृह्णीष्वेत्यत आह वयमिति । वयं सर्वे च, सर्वे वयं लोकपाला अपीत्यर्थः । भवता, अनुभाविताः, त्वयैवादौ सृष्टाः पश्चात्पालिताश्चेत्यर्थः । एवंभूताः सन्तः, सप्त भुवनानि, विभावयामः पालयामः । वयं सर्वे तु त्वत्परतन्त्रा इति भावः ॥ ३७ ॥ आकाशमिव केवलमिति निरस्तनिखिलदोषत्वमुक्तम् । विराट्शरीरत्वोक्त्या सर्वान्तरात्मत्वं फलितम् । तवावतारोऽयमित्यनेन निरुपाधिकरक्षकत्ववात्सल्यसौशील्यादिमत्त्वमाविष्कृतम् । अथ परत्वोपयुक्तं कारणत्वादिमाह । त्वमेक इति । ईशः, त्वं एकः अविभक्तनामरूपसूक्ष्मचिदचिद्विशिष्टत्वेनैकत्वव्यपदेशार्हः, आद्यः, पुरुषः, जगदुपादानकारणभूतः पुरुषश्चेत्यर्थः । किमहं केवलमुपादानकारणमेव नेत्याह । अद्वितीयः अधिष्ठात्रन्तररहितो निमित्तकारणं चेत्यर्थः । एवं त्वमुभयविधकारणत्वभागिति भावः । अत एव, प्रकृतिपुरुषविलक्षण इत्याह । स्वदृक् स्वयंप्रकाशज्ञानरूपः, अनेन प्रकृतिवैलक्षण्यमुक्तम् । तस्या जडत्वात् । तूर्यः जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयसंबन्धवतो जीवतश्चतुर्थत्वादस्थात्रयसंबन्धरहितः, अनेन जीववैलक्षण्यमुक्तम् । हेतुः, अहेतुः, हन्त तर्हि घटहेतुमृत्कुलालादौ तथाऽदर्शनान्मिथो विरुद्धं तदुभयविधकारणत्वं कथमेकस्मिन्नुपपद्यत इत्याशङ्क्य परिहरति । यद्यपीदं परस्परविरुद्धवत् प्रतीयते, अथापि, अविकारं यथा, विकारसहितो यथा भवति तथा, प्रतीयमानस्त्वमित्यर्थः । स्वमायया स्वसंकल्पेन, सर्वगुणप्रसिद्धयै स्वस्य प्रकृत्यादिसम्बन्धवत्तत्तद्रहितत्वादिस्वकीयदिव्यविचित्रगुणख्यातिं विधातुमित्यर्थः । प्रतीयसे उभयविधकारणताभागवमाससे । अयं भावः । कुलालस्यासर्वशक्तेर्घटादिषु मृत्कार्येषु अनन्वयान्नोपादानत्वमचेतनाया मृदोऽपि घटादेर्व्यतिरेकाभावान्न निमित्तत्वं, भगवतस्तु प्रत्यक्षादिप्रमाणान्तराऽनवगतस्य केवलवेदान्तैकसमधिगम्यस्य चिदचिच्छरीरस्य तथात्वेऽपि तद्विलक्षणस्योभयविधकारणत्वोपयुक्तसार्वज्ञसर्वशक्तियुक्तस्यान्वयव्यतिरेकयोर्वेदान्तेभ्योऽवगतत्वादुभयविधकारणत्वोपपत्तिमत्त्वमस्त्यतः, हे भगवंस्त्वं तथा प्रतीयस इति ॥ ३८ ॥ ननूपादानकारणत्वेऽनादिकालतोऽज्ञानरूपप्रकृत्या तिरोहितस्य जीवस्येव सर्वान्तःस्थस्य ममास्वदृक्त्वं प्राप्तमित्यत आह । यथैवेति । अपिहित इति च्छेदः । दार्ष्टान्तिके गुणेनापिहित इति दर्शनादन्यथोपध्मानीयप्रसङ्गाच्च, अपिहित इति नञ्समासः । यथा सूर्यः, स्वच्छायया स्वप्रकाश्यया मेघादिरूपया, अपिहितः एव, अतिरोहितस्वस्वरूपस्वभावः सन्नेव, छायां मेघरूपां, रूपाणि मेघान्तरितान् घटादीनपि, चकारोऽप्यर्थे । संचकास्ति एव प्रकाशयति । द्वितीयश्चकारोऽवधारणे । मेघादीन् भित्त्वा तदन्तर्बहिश्च प्रसरणात् । अन्यथा तद्व्यवहितरूपाग्रहणप्रसङ्गात् । हे भूमन्, अप्राकृतदीव्यबहुगुण, एवं सूर्यवदेव, गुणेन सत्त्वादिगुणेन गुणमयप्रकृत्येति यावत् । अपिहितः अतिरोहितस्वरूपस्वभाव एव त्वं, गुणान् प्रकृतितत्कार्यगतधर्मान्, गुणिनः प्रकृत्यादींश्च, प्रकाशयसि । अतस्त्वं आत्मप्रदीपः स्वदृक् स्वप्रकाश इति यावत् । यद्यपि दृष्टान्ते छायासूर्ययोर्न मिथः सम्बन्धस्तयोर्विप्रकृष्टत्वात् । दार्ष्टान्तिके त्वपृथक्सिद्धविशेषणविशेष्यभावरूपेण नित्यसम्बन्धात् दृष्टान्तस्यैकदेशित्वं बोध्यम् । अस्वदृक्स्वदृक्तया जीवेश्वरयोर्विलक्षणत्वान्न त्वं जीवसमान इति भावः ॥ ३९ ॥ न केवलमयमसुर एवाज्ञः, किं तु सर्वेऽपि त्वन्मायामोहितत्वादज्ञा एवेत्यभिप्रयन्नाह । यन्मायेति । यन्मायया यस्य तव मायया, मोहिता मोहं प्राप्ता धीर्येषां ते जनाः, पुत्रदारगृहादिषु, प्रसक्ताः आसक्ताः सन्तः, वृजिनार्णवे दुःखाम्बुधौ, उन्मज्जन्ति, देवादियोनिप्राप्तिरुन्मज्जनं स्थावरत्वादिप्राप्तिर्निमज्जनम् ॥ ४० ॥

कृष्णप्रिया

हे वैकुण्ठनाथ ! हे अखण्ड ज्योतिस्वरूप भगवन् ! आपका अवतरण धर्मरक्षण के लिये और विश्व के कल्याण के लिये हुआ है । हम सब देव लोग आपकी अनुकम्पा से अनुगृहीत होकर सात भुवनों का पालन करते हैं पोषण करते हैं । आप ही एक हैं, आद्य हैं, अद्वितीय पुरुष हैं । पुनः जाग्रत-स्वप्न-सुषुप्ति इन तीन अवस्थाओं में अनुस्यूत रहते हुए भी उन अवस्थाओं से अतीत्य तुरीय तत्त्व आप हैं । आप स्वयंप्रकाश हैं, आप सर्व के कारण होते हुए भी आप का कोई कारण नहीं है । आप स्वयं ईश हैं । हे नाथ ! आप सत्वादि तीन गुणों की विषमता को प्रकट करने के लिये अपनी माया से देव-मनुष्य-पशु पक्षी आदि शरीरों के अनुसार भिन्न-भिन्न आकारों में प्रतीत होते हैं । हे भूमन् ! हे नाथ ! जैसे प्रकाशस्वरूप अपनी छाया मेघ से आच्छन्न हो जाता है वही सूर्य उन मेघों और विभिन्न रूपों को प्रकाशित करता है, उसी प्रकार आप स्वयंप्रकाश होते हुए भी क्षण भर गुणों से आच्छन्न जैसे हो जाते हैं और समस्त गुणों को और गुणाभिमानी जीवों को प्रकाशित करते हैं ॥ ३७–३९ ॥ नाथ ! आपकी माया से मुग्ध बन कर लोग पुत्र-पौत्र-कलत्र-देह-गेह आदि पदार्थों में आसक्त होकर अपार दुःख के महासागर में डूबने लगते हैं ॥ ४० ॥

देववत्तमिमं लब्ध्वा नृलोके[1] अजितेन्द्रियः । यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवञ्चकः ॥ ४१ ॥
यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरम् । विपर्ययेन्द्रियाथार्थं[2] विषमत्त्यमृतं[3]त्यजन् ॥ ४२ ॥
अहं ब्रह्माथ विबुधा मुनयश्चामलाशयाः । सर्वात्मना प्रपन्नास्त्वामात्मानं [4]प्रेष्ठमीश्वरम् ॥ ४३ ॥
तं त्वा जगत्स्थित्युदयान्तहेतुं समं प्रशान्तं सुहृदात्मदैवतम्[5] ।
अनन्यमेकं जगदात्मकेतं भवापवर्गाय भजाम देवम्[6] ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—नृलोके, देवदत्तम्, इमम्, लब्ध्वा, अजितेन्द्रियः, यः, त्वत्पादौ, न, आद्रियेत, हि, आत्मवञ्चकः स, शोच्यः ॥ ४१ ॥ यः मर्त्यः, आत्मानम्, प्रियम्, ईश्वरम् त्वाम्, विसृजते, विपर्ययेत्, सः अमृतम्, त्यजन्, विषम्, अत्ति ॥ ४२ ॥ अहम्, ब्रह्मा, अथ, विबुधाः, च, अमलाशयाः, मुनयः, आत्मानम्, प्रेष्ठम्, ईश्वरम्, त्वाम्, सर्वात्मना प्रपन्नाः ॥ ४३ ॥ जगत् स्थित्युदयान्तहेतुम्, समम्, प्रशान्तम्, सुहृदात्मदैवम्-अनन्यम्, एकम्, जगदात्मकेतम्, देवम्, भवापवर्गाय भजाम ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिकाप्रकाशः

एवं जीवेश्वरव्यवस्थां निरूप्येदानीमभजंतं निंदति द्वाभ्याम् । देवेति । देवेन त्वया कर्माध्यक्षेण दत्तं नृदेहमिमं लब्ध्वापीति ॥४१॥ शोच्यत्वे हेतुः । यस्त्वामिति विपर्यया विपरीता अनात्माप्रियाऽनीश्वरा ये इंद्रियार्थाः पुत्रादयस्तदर्थम्॥४२॥ अहमन्ये च शुद्धमनसस्त्वामेव प्राप्ता इत्याह । अहमिति ॥ ४३ ॥ भगवतो भजनीयत्वे हेतून्वदंस्तद्भक्तिं प्रार्थयते । तं त्वेति । समत्वे हेतुः । प्रशांतमिति । सुसेव्यत्वमाह । सुहृदात्मदैवं सुहृद्बुद्धिप्रवर्तकत्वात् । आत्मा च सर्वात्मकत्वात् । एवंभूतं दैवमीश्वरं त्वाम् । भवापवर्गाय संसारमोक्षाय भजामेत्यन्वयः । न चान्यो भजनीयोऽस्तीत्याह । अनन्यमेकं समानासमानजातीयरहितम् । तत्कुतः । जगतात्मनां च केतमधिष्ठानम् ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदाह—एवमित्यादिना । इमं प्रत्यक्षसिद्धम् । आत्मवंचको निजप्रलंभकः । शोच्यः विज्ञैः शोचनीयः ॥ ४१ ॥ मर्त्यो मरणधर्मा ॥ ४२ ॥ सर्वज्ञतामाह—अहमित्यादिना । भक्तिर्विद्यते येषां ते भक्ता भजंत इत्यर्थः । सर्वात्मना कायवाङ्मनोव्यापारेण । भजनीयत्वे हेतुत्रयम्–आत्मानमित्यादि ॥ ४३ ॥ प्रशांतस्य समता भवतीति प्रसिद्धमेव । ननु मदन्येऽपि ब्रह्मादयो भजनीयाः संतीति चेदत्राह—न चेत्यादि । नास्ति अन्यो भिन्नो यस्मात्स तथा तम् । तेषामपि त्वदभिन्नत्वात्त्वदाराधनेन तेप्याराधिता भवन्तीति भावः । अनन्यत्वे हेतुः एकमिति । तद् एकत्वम् । जगतां स्थावराणामात्मनां जंगमानां च कल्पितत्वेनाधिष्ठानानतिरेकात् ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र त्वया त्वद्भक्तियोग्यतां प्रापितोपि मयैष इव केनचित्कारुणिकेन कृतोपदेशोपि त्वद्विमुखस्त्वस्मद्विधानां शोच्य एवेत्याह—देवेति । इमं त्वद्भजनयोग्यं देवेन त्वयैव दत्तं यद्वा केषाञ्चिन्निजमहाभक्तानां सम्बन्धेन सर्वत्र प्रसारिण्या कृपया प्रापितमिमं सम्प्रति त्वदाविर्भाववन्तं नृलोकं मनुष्यभुवनं लब्ध्वेति परमोपकारित्वेनात्यन्तादरयोग्यताभिप्रेता तथाप्यजितेन्द्रियस्सन् न बहुमन्येत हि यस्मादात्मवञ्चक इति ॥ ४१ ॥ तत्र चाधुना मयैव श्रीगुरुणा प्रकाशितमपि यस्त्वां त्यजेत् सतु परमशोच्य इत्याह–य इति । मर्त्यो मरणशील इत्यमृतत्यागायोग्यतोक्ता अभजने दण्डयति चेत्याह–ईश्वरमिति । एवमेषां विशेषणानां यथोत्तरं भजनहेतुत्वे श्रैष्ठ्यं तथापि विसृजेत् न भजेत विषमत्त्यमृतं त्यजेदिति परमाविवेकित्वमुक्तं त्यजन्निति पाठः क्वचित् ॥ ४२ ॥ अहो परमतुच्छोपीदृशस्त्वां न भजति यं परमपूर्णा अपि वयं भजामः अतस्त्वदभजने ईदृशस्यैव हानिरित्याह—अहमिति । अहं ब्रह्मा च त्वया गुणावतात्वया स्वीकारेण सर्वोर्द्ध्वकक्षां प्रापितः तथा विबुधा देवर्षयः मुनयो ब्रह्मर्षयश्च अमले ब्रह्मण्ये वाऽऽशयो येषां ते आत्मारामाश्चेत्यर्थः । तत्रापि सर्वात्मना सर्वभावेन प्रपन्ना आश्रिताः स्वेषां (प्रपन्ने) प्रपत्तौ हेतुः आत्मानं सर्वमूलस्वरूपम् अतएव प्रेष्ठम् अत एवेश्वरमपीति ॥ ३३ ॥ अत एवेदमेव प्रार्थयामह इति वदन् बाणानुग्रहेपि कारणतया विशेषणानि विन्यस्यति–तमिति । ते भजनयोग्यं त्वा त्वां भजामः किमन्यार्थं भजध्वे ? नेत्याह—भवेति । पञ्चमस्कन्धोक्त्यनुसारेण भवेषु जन्मजन्मसु अपवर्गाय भक्तियोगायेत्यर्थः तत्र हेतुत्वेन स्वेषामाकर्षणं तदीयपरमकारुण्यगुणं सूचयति देवेति । दीव्यति भक्तेषु प्रकाशते क्रीडति वा यः सः ॥ ४४ ॥

---

१. नृलोक–श्रीधर. वंशी. जीव. वीर. विश्व. । २. र्थार्तौं–वीर. । ३. त्यजेत्–श्रीधर. टि । ४. श्रेष्ठ–प्रा. पा. । ५. दैवम्–श्रीधर. वंशी. जीव. विश्व. ; दात्मनायकं–वीर. । ६. देव–वीर. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतस्त्वदभक्ता महानिन्द्या एवेत्याह-देवेति। इमं त्वद्भजनयोग्यम्, देवदत्तमिति परमोपकारित्वेनात्यन्तादरयोग्यताभिप्रेता। तथाप्यजितेन्द्रियः सन् नाद्रियेत, आदरेण न सेवेत, किंवा न बहुमन्यतेऽपि शोच्यो निन्द्यः, हि यत आत्मानमपि वञ्चयत इति तथा सः। यद्वा, हि निश्चितं शोच्यः—परमोपकारिणस्तवानादरेणाकृतज्ञत्वादि-सम्पत्तेः। किञ्च, आत्मवञ्चको लोकद्वयसुखरहितोऽभूदित्यर्थः॥ ४१॥ तदेवाह—य इति। मर्त्यो मरणधर्म्मशील इत्यमृतत्यागायोग्यतोक्ता। आत्मानमन्तर्यामित्वेन सर्व्वसत्कर्म्मादौ प्रवर्त्तनात् परमोपकारिणमित्यर्थः। प्रियं स्वत एवात्मनोऽप्यधिकप्रेमास्पदम्, परमात्मत्वात्। एवमवश्यभजनीयत्वेनापि त्यागायोग्यतोक्ता। अभजने दण्डयति चेत्याह—ईश्वरमिति। एवमेषां विशेषणानां यथोत्तरं भजनहेतुत्वे श्रैष्ठ्यम्। तथापि विसृजेन्न भजेत् 'विषमत्त्यमृतं त्यजेत्' इति परमाविवेकित्वमुक्तम् विषयभोगेऽपि सर्वदा महादुःखी, न कदाचिदपि सुखी स्यादित्यर्थः॥ ४२॥ अतएव वयं सर्वथा त्वामभजामेत्याह—अहमिति। विबुधा इन्द्रादिदेवाः, मुनय श्रीसनकादयः, अथ अपि, मुनयोऽपि, सर्व्वात्मना सर्व्वभावेन प्रपन्ना आश्रिताः, यतोऽमलाशया, शुद्धचित्ताः, अन्यथा अमलाशयत्वहानिरिति भावः। यद्वा, मुनीनामेव विशेषणम्, केषाञ्चित्तेषामद्वैतवासनया मलिनाशयानां व्यावृत्त्यर्थम्। प्रपत्ति-राहित्ये चाकृतज्ञत्वादि-महादोषोऽपि पर्य्यवस्यतीति विशिनष्टि—आत्मानमित्यादिना॥ ४३॥ यस्याभवत्या संसारमहादुःखादिकं तम्, किंवा अनिर्व्वचनीयमाहात्म्यं त्वा त्वाम्, महामाहात्म्यमेव दर्शयति—जगदित्यादिना। जगतः सर्व्वस्य स्थित्यादिहेतुमिति परमेश्वरत्वमुक्तम्, अत एव सममीश्वरत्वेन सर्व्वेषु तुल्यम्, इत्यधिकाराद्यनपेक्षया सर्वैरपि भजनीयत्वम्, यद्वा, मया लक्ष्म्या सह वर्त्तमानं समम्, इति भक्तवात्सल्यं तथा कदाचिदपराधे सति जगज्जनन्या तया सोढ़यितव्य इति। साहाय्यं च कुतः ? प्रशान्तं तत्वतः क्रोधादिरहितम्, किंवा अक्षोभ्य इत्यशेषदोषराहित्यम्, अत एव सुहृत् निरुपाधिकृपाकारी, आत्मा स्वतः प्रेष्ठः, दैवमीश्वरः, तञ्च तञ्च तञ्च, इति सुसेव्यत्वमवश्यभजनीयत्वञ्च। यद्वा, अत एव सुहृदां शोभनचित्तानामात्मदैवमिष्टदेवतामिति साधुसेव्यत्वम्, यतोऽनन्यमेकञ्च, इति विजातीय-सजातीयभेदराहित्येन त्वद्भजनात् सर्व्वजीवानां सर्व्वावतारादीनाञ्च भजनसिद्ध्या सर्वानुकूल्येन निर्व्विघ्नत्वादिकं सर्व्वमूलत्वञ्च। किञ्च, देवं दीव्यति, भक्तेषु प्रकाशते, भक्तैः सह क्रीड़तीति वा, तथा तम्, पाठान्तरेऽपि स एवार्थः। किंवा एवं सर्व्वपूज्येति, अतो भवः श्रेयस्तद्रूपोऽपवर्गो मोक्षः, श्रीवैकुण्ठलोक इत्यर्थः। तस्य तात्त्विकोत्तमसुखात्मकत्वात्तस्मै यद्वा, पञ्चमस्कन्धोक्तानुसारेण भवेषु जन्मजन्मस्वपवर्गाय भक्तियोग्यायेत्यर्थः। भजामेत्याशिषि पञ्चमी॥ ४४॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

नृलोकं नरशरीरं देवदत्तं भाग्यलब्धं विसृजते इन्द्रियार्थार्थं शब्दादिविषयरूपप्रयोजनार्थम्॥ ४१-५३॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ननु, मोहयन् वृजिणार्णवे पातयंश्चाहं किं निर्घृणः ? नेत्याह—देवदत्तमिति। देवेन निरवधिककृपावता त्वया दत्तं त्वदाराधनोपयुक्तं त्वन्मायातरणसाधनञ्चेमं मनुष्यदेहं लब्ध्वाप्यजितेन्द्रियः इन्द्रियपरवशस्सन् यः पुमान् त्वच्चरणौ नाद्रियेत न सेवेत स शोच्यः अहो किमस्य दौर्भाग्यमित्येवं शोचनीयः कुतः ? हि यस्मादयमात्मवञ्चकः आत्मापहारी—

"योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चोरेणात्मापहारिणा"॥

इति वचनार्थोत्रानुसन्धेयः स्वदोषेणैव स्वयं दुःख्यतीति न तव दोषप्रसङ्ग इति भावः॥४१॥ इतोपि शोच्य इत्याह—यस्त्वामिति। स्वयं मरणशीलस्सन् आत्मानं प्रियमीश्वरञ्च त्वां विसृजते त्यजति न सेवते किन्तु विपर्ययेषु अनात्मस्वप्रियेष्वनीश्वरेषु इन्द्रियार्थेषु शब्दादिष्वार्त्तः दीनः अमृतमपि त्वाम् अमृततुल्यां त्वत्सेवां विषबुद्ध्या त्यजन् आस्ते स शोच्य इति सम्बन्धः॥ ४२॥ यतस्त्वत्सेवाऽमृततुल्योऽत एव वयं त्वामेव प्रपन्ना इत्याह—अहमिति। अहं रुद्रः त्वामेवोक्तविधं सर्वभावेन उपायोपेयभावेन शरणं गताः॥ ४३॥ न केवलमात्मत्वानुगुणगणमात्रप्रयुक्तमेव त्वां प्रपन्नाः किन्तु शरण्यत्वोपयुक्तासङ्ख्येयगुणान्तरयुक्तञ्चेत्यभिप्रयन्नाह—तमिति। हे देव! तमुक्तविधं किञ्च जगदुत्पत्तिस्थितिकारणं समं वैषम्यरहितं प्रशान्तमूर्मिषट्करहितं भजतामपि शान्त्यावहञ्च सुहृच्चासावात्मनायकश्च तम् अनन्यं स्वतुल्यसेव्यान्तररहितम् एकं स्वाधिकप्रपदनीयान्तररहितम् आत्मकेतम् आत्मनामस्माकं केतमाश्रयमाधारमिति यावत् आत्मैव केतं यस्य तमिति वा "स्वे महिम्नि प्रतिष्ठितः" इति श्रुतेः। भवाभ्युदयायैहिकसुखाय अपवर्गाय मोक्षाय भजामः॥ ४४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

भवेषु जन्मजन्मसु अपवर्गाय प्रेमलक्षभक्तियोगाय॥ ४४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अतस्त्वां ये न भजन्ति, ते मूढाः इत्याह—देवदत्तमित्यादि । त्वत्पादौ यो नाद्रियेत, न भजेत स शोच्यः, हि निश्चितम्, अत आत्मवञ्चकः । त्वदिति दृश्यमान् श्रीविग्रहपरम् । देवेन भवतैव दत्तं नृलोकं वदेदं लब्ध्वा पादाविति पादसेवां हित्वा योऽपवर्गमपि प्रार्थयते सोऽपि शोच्य इत्यर्थः ॥ ४२-५३ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतञ्जूषा

यो नाद्रियेतेत्यादि । त्वत्पादौ यो नाद्रियेत त्वच्चरणाविन्दं हित्वा यो मुक्तिं प्रार्थयते, स शोच्या आत्मवञ्चक इत्यर्थः । (४२-५३),

इति त्रिषष्टिः ॥ एवञ्चतुःषष्टितमोऽध्यायः ॥ ६३-६४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शनी

अभजन्तं निन्दति—देवेन त्वयैव दत्तं नृदेहम् ॥ ४१ ॥ विसृजते त्यजति किमर्थं विपर्य्ययाः त्वद्विपरीता अनात्मानोऽप्रियाः अनीश्वराश्च ये इन्द्रियार्थाः पुत्रादयस्तदर्थम् ॥ ४२ ॥ यत्त्वया कृतं तन्मया क्षान्तं सम्प्रति त्वया त्वत्सङ्गिभिरन्यैश्च देवैः किं व्यवसितमिति चेत्तत्राह—अहमिति । आत्मानं प्रेष्ठमीश्वरमिति विशेषणत्रयेण अनात्मनः अप्रियस्य अनीश्वरस्य बाणस्य कृते यत्त्वया सह विग्रहमकरवं तदहमेव अमृतं त्यक्त्वा विषम्भुक्तवानस्मीति पूर्वश्लोकेन मामेवाहमनिन्दामिति भगवन्तं ज्ञापयामास ॥ ४३ ॥ तस्मात् स्वभक्तिं स्वयमेव देहीति प्रार्थयते—तमिति । हे देव ! भवापवर्गाय भवेभवे जन्मनि जन्मनि अपवर्गाय पञ्चमस्कन्धोक्तलक्षणभक्तियोगाय त्वामेव भजाम प्रार्थनायां लोट् त्वदन्यो भजनीयो न भवतीत्यभिप्रायेण विशिनष्टि—ईश्वरत्वात् जगत्स्थित्युदयान्तहेतुमित्यन्यस्त्वनीश्वरः सममित्यन्यो विषमः प्रशान्तमित्यन्यः प्रकर्षेण शान्तो न भवति सुहृदित्यन्यो हितकृन्न भवति आत्मदैवमिति अन्यः परमात्मा न भवत्यतो द्योतमानश्च न भवतीत्यर्थः । अनन्यमित्यन्योऽनन्यो न भवति किन्त्वन्य एव त्वन्तु स्वभक्तस्यानन्य एव "साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्" इति त्वदुक्ते, एकमित्यन्योऽनेकः जगतामात्मनश्च केतमाश्रयमित्यन्यस्त्वनाश्रयः ॥ ४४ ॥

गूढार्थदीपिनी

देवेन त्वया दत्तं नृदेहं मनुष्यदेहं लब्ध्वा यो नाद्रियेत् स शोच्यः निन्दनीयः अपराधीत्यर्थः । आत्मानं वञ्चयतीति वञ्चकः ॥ ४१ ॥ यो मर्त्यो मरणधर्मा त्वां विसृजते उपेक्षते । त्वत्तो विपर्यया विपरीता अर्थात् अनात्मानः अप्रियाः अनीश्वराश्च ये इन्द्रियार्थाः पुत्रादयः तदर्थं स विषम् अत्ति ॥ ४२ ॥ अत एव सर्वे वयं त्वामेव प्रपन्नाः शरणं गताः स्मः । सर्वात्मना कायवाङ्मनो व्यापारेण ॥ ४३ ॥ त्वं त्वां भवापवर्गाय संसारमोक्षाय वयं भजामेत्यन्वयः । प्रार्थनायां लोट् अनन्यं समानातिशयरहितम् आत्मनां जीवानां च केतम् आधारम् ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

एवं भगवन्मायामोहितानां सामान्यतः संसारित्वमुक्त्वा तत्र त्वत्पराङ्मुखाः नित्यसंसारिणः अस्मदादयस्तु त्वद्भक्ता मुक्तिभागिन इत्याह–देवदत्तमिति ॥ ४१ ॥ विपर्ययाः विपरीताः अनात्मानः अप्रियाः अनीश्वरा ये इन्द्रियार्थाः गृहकलत्रादयस्तदर्थम् अमृतं मोक्षम् विषं संसारम् ॥ ४२-४३ ॥ सुहृत् हितकृत् च आत्मा आश्रयश्च तम् अनन्यमेकम् समानातिशयशून्यम् जगतामात्मनश्च केतं वासस्थानम् भवापवर्गाय संसारिनिवृत्तये ॥ ४४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं निमज्जनुन्मज्जंस्तज्जनो देवदत्तं दैववशादेव नृलोकं मनुजतनुं लब्ध्वाऽपि त्वत्पादावजितेन्द्रियः स एव शोच्यः । स एव ह्यात्मवञ्चकः स्ववञ्चक आत्मघातीति ॥ ४१ ॥ निदर्शनेन शोच्यतां व्यनक्ति । यो मर्त्य आत्मानं प्रियमीश्वरं त्वां विसृजते विसृजति । त्वत्पादानादरणं चरति । किन्निष्ठावान्स इत्यत एतत्स्पृह इत्याह । विपर्ययेन्द्रियार्थार्थं विपर्ययाः क्वचिदेव कदाचिल्लभ्या इव वस्तुतो लभ्या इतीन्द्रियार्थास्तत्तर्पकतयाऽभिमताः सतीसुतादयस्तदर्थमिति योऽमृतं त्यजन्विषमत्ति भक्षयति स इवायमिति स्वघातक इति भावः ॥ ४२ ॥ हे महादेव । न केऽप्यमृते निभृताः सन्ति किमित्यतो न सन्तः सन्तीत्याह अहमिति । इदानीं दयनीयोऽहमिति पुरहरः पुरस्कृत्य स्वभवादीदिति ज्ञेयम् ॥ ४३ ॥ अभीष्टं विज्ञापयितुमुक्तगुणान्कांश्चिसङ्गृह्यामिष्टौति तं त्वामिति । सुहृच्चात्मदैवं सुहृदात्मा दैवतमिति वाऽनन्यमेकं जगतः स्वामित्वेन निकेतमाश्रयं संसृत्यपसृत्यै भजाम ॥४४॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

इदानीं अर्धभगवत्कृपायुक्तानां शोचन्नाह **देवदत्त**मिति। भगवता विवेकेन्द्रियादियुक्तं शरीरं दत्तं यस्मै, सोऽपि चेत् अर्धकृपायुक्तः पूर्णार्थं न यतेत, स मोहितैरपि शोच्यो भवति, देवेन भगवता दत्तम्, भगवदिच्छयैव **नृलोके** मनुष्यदेहे समागत इति। तर्ह्यनादरे को हेतुः, तत्राह **अजितेन्द्रिय** इति। इन्द्रियजयाभावादिन्द्रियैरपकृष्टोऽन्यत्र गच्छति। अतो न सेवते। ननु तर्हि तस्य को दोष इति चेत्, तत्राह **नाद्रियेते**ति। आदरमपि न करोति। तत्रासक्तिर्नियामिकेति। अतो विद्यमानमपि साधनं **अन्यथा नाशयतीति** स शोच्यो भवति। आत्मवञ्चकश्च। हिशब्दसूचिता युक्तिरुक्ता। परार्थं तथा करोतीत्याशङ्क्य तदभावार्थं निराकरोति **आत्मानमेव वञ्चयती**ति। उपकारस्तु पर्यवसानवृत्त्या आत्मगाम्येव भविष्यतीति यत्रात्मवञ्चनं न भवति, तत्रैव परार्थकरणं युक्तम्, अन्यथा स्वयमेवात्मघाती स्यात्, किं तस्योपकारेण ॥ ४१ ॥ अप्राप्तभगवन्तं निन्दित्वा, प्राप्यापि यस्त्यजति तं निन्दति, भगवदिच्छां मायां स्तोतुम्, अन्यथा वाक्यभेदप्रसङ्गः, **यस्त्वां विसृजत** इति। प्रयोजनाभावमाशङ्क्याह **मर्त्य** इति। मरणधर्मा। आवश्यकत्वाया**त्मे**ति। **प्रियं** प्रीतिविषयम्। अनावश्यकेऽपि प्रीतिवशादादरः क्रियते। तत्रापि ईश्वरमन्यथा मारकम्। एवं प्रकारत्रयेण वस्तुतो बाह्याभ्यन्तरव्यवहारेण च आवश्यकं **विसृजते** त्यजति, तत्रापि **विपर्ययेन्द्रियार्थार्थम्**, विपर्यया अनात्माप्रियानीश्वराः, ते च ते इन्द्रियार्थाश्च रूपादयः। न हि कश्चिन्नदीं तितीर्षुर्नौकां दत्वा शिलां गृह्णाति, नौकां त्यक्त्वा वा। शिलार्थमेव वा नौकां त्यजति। तस्य गतिमाह **विषमत्त्यमृतं त्यजन्नि**ति। म्रियमाणोऽमृतं प्राप्य तद्दत्वा यथा विषं गृहीत्वा भक्षयति, तस्य या अवस्था, सा एतस्यापीति भावः ॥ ४२ ॥ तथा भवदादीनामपीत्याशङ्क्याह **अहं ब्रह्मे**ति। यथार्धकृपायुक्ताः अन्ये भ्रान्ताः, यथा वा प्राप्यापि विषयप्रवणाः, तथा न वयम्, किन्तु भिन्नप्रकारमाश्रिताः। भगवतः सात्त्विकत्वादितरौ समानौ प्रथमं गणयति। **अहं रुद्रो ब्रह्मा चेति**। ततो हीनास्तन्नियम्या विबुधाः। अधिकारिणो निरूप्य ज्ञानपरान् निरूपयति **मुनयश्चे**ति। तेषां पृथङ्निरूपणे हेतुः **अमलाशया** इति। साधनपराः सिद्धाश्चेति वा। अमलाशया मनुष्याः। मुनयः सनकादयोऽपि तथा। एते त्रिविधा अपि। चकारादेतदनुसारिणः सर्वे परिगृहीताः। ते वयं सर्वात्मना त्वां प्रपन्नाः। स्वस्य प्रवृत्तौ हेतुभूतं ज्ञानं निर्दिशति **आत्मानं प्रेष्ठमीश्वर**मिति। पूर्वस्मात्प्रेमातिशयो विशेषः। तेनैव साधनानि अन्यानि सम्पन्नानि ॥ ४३ ॥ साम्प्रतं विरोधमाशङ्क्य तत्परिहारार्थं शरणं व्रजामीत्याह **तं त्वा**मिति। एवं सर्वोपास्यं निर्दोषपूर्णगुणविग्रहं त्वां भजाम। तमिति श्लोकद्वयार्थः परिगृहीतः, लोकवेदप्रसिद्धम्। **त्वां** परिदृश्यमानम्। **जगत्स्थित्युदयान्तहेतु**मिति ब्रह्मत्वाय जगत्कारणत्वमुक्तम्। बहिर्दोषाभावाय **समम्**। **प्रशान्त**मिति अन्तर्दोषाभावाय। **सुहृ**दिति विश्वासार्थम्। **आत्मे**ति भयाभावाय। **दैवत**मितीष्टसिद्धये। भावकृतवैलक्षण्याभावायाह **अनन्य**मिति। न विद्यते अन्यो यस्मादिति। यस्य वा। अन्यबुद्धिर्भगवतो न कस्मिंश्चित् यत एक एव। कार्यमपि न ततः पृथक्, यतोऽयं जगतः आत्मा केतश्च। विशेषतो भजनस्य अपराधनिवर्तकत्वे प्रार्थि**ते इष्टमग्रे** प्रार्थयितुमशक्यमिति सर्वस्यापि दोषस्य निवृत्तिरूपं मोक्षमेव प्रार्थयति **भवापवर्गाये**ति। एवं शरणागमनलक्षणं भजनं निरूपितम् ॥ ४४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

देवदत्तमित्यत्र। **परार्थ**मिति। इन्द्रियहितार्थं तथा करोति, तथा च परार्थसाधकत्वं गुण एव स्यादित्यर्थः। **तदभावार्थ**मिति। एवंकरणाभावार्थमेतादृशपरार्थस्य कर्तव्यतां निराकरोतीत्यर्थः। **अन्यथा वाक्यभेदप्रसङ्ग** इति। निन्दायां तात्पर्यकथने। त्वं हि **ब्रह्मे**त्यस्याभासे द्वादशश्लोकानामपि स्तुतिरूपोर्थ उक्तो बाधितो भवेदित्यर्थः। **अहं ब्रह्मे**त्यत्र। **भगवतः सात्त्विकत्वा**दिति। सात्त्विककल्पे भगवान् विष्णुरूपः सन्कार्यं करोति। तथाचात्र भगवतो विष्णुरूपत्वात्सात्त्विकत्वमित्यर्थः। **पूर्वस्मा**दिति। पूर्वश्लोकोक्तस्य प्रियः अस्मदादीनां प्रेष्ठ इति पूर्वस्मात् **स्वस्य** प्रेमातिशयो **विशेष** इष्ठन्प्रत्ययेनोक्त इत्यर्थः। **तं त्वा**मित्यत्र। **लोकवेदे**ति। स्वस्य वेदरूपत्वादहं ब्रह्मेत्यनेन वेदप्रसिद्धिरुक्ता। तत्पूर्वेण च लोकप्रसिद्धिरित्यर्थः। **भावकृते**ति। कस्मिंश्चिदन्यादृश इति वैलक्षण्यमनन्यत्वान्नास्तीत्यर्थः।

श्रीसुबोधिनी–सारः

देवेन त्वया दत्तम् इमं नृलोकं मानुष्यं लब्ध्वा प्राप्याजितानि इंद्रियाणि येन स **यः** तव पादौ न सेवेत स आत्मचौरः शोच्यः हि युक्तम् ॥ ४१ ॥ आत्मानं प्रियमीश्वरं त्वां यो मर्त्यो मनुष्यो **विसृज्यते** त्यजति विपर्यया विपरीता अनात्मानो जडा दुःखरूपा इंद्रियार्थाः पुत्रादयस्तदर्थं सोऽमृतं त्यजन् विषमत्ति भक्षयति तदुक्तम्। "योन्यथा संतमात्मानं योन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चौरेणात्मापहारिणा" इति ॥ ४२ ॥ अहं शिवो ब्रह्मा विबुधा देवा अमलाशयाः शुद्धचित्ता मुनयः सर्वात्मना सर्वप्रकारेणात्मानमीश्वरं प्रेष्ठं त्वां प्रपन्नाः शरणं गताः ॥ ४३ ॥ जगतः स्थितिः पालनम् उदयो जन्म अंतो नाशस्तेषां हेतुं कारणं सममविषमं शांतं सुहृदुपकारकम् आत्मानं दैवं तं त्वां दैवं स्वप्रकाशम् अनन्यमेकं जगतामात्मनां च केतमाश्रयं भवस्य संसारस्यापवर्गाय मोक्षार्थं वयं भजेम ॥ ४४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इदानीं भगवद्विमुखान्निन्दति—देवेति द्वाभ्याम् । देवेन कर्माध्यक्षेण त्वया दत्तमिमं त्वन्मायातरणसाधनत्वद्भजनोपयुक्तं नृलोकं मनुष्यदेहं लब्ध्वापि यस्त्वत्पादौ नाद्रियेत न सेवेत । तत्राह—अजितेन्द्रिय इति । विषयासक्त्याऽहर्निशं पापाचरणादित्यर्थः । स हि आत्मवञ्चकः शोच्यः ॥ ४१ ॥ शोच्यत्वमेव स्पष्टयति—य इति । विपर्ययास्त्वत्तो विपरीताः अनात्मानः अप्रियाः अनीश्वराः ये इन्द्रियार्थाः पुत्रादयः शब्दादयश्च तदर्थं तदासक्त्या यो मर्त्यः स्वयं मरणशीलः प्रियं त्वां विसृजते त्यजति न सेवते, स यथा अमृतं त्यजन् विषमत्ति तथा शोच्यः । प्रियत्वे हेतुद्वयमाह—आत्मानमिति । अन्येषामात्मार्थत्वेन प्रियत्वान्निरतिशयप्रीतिविषयत्वमात्मन एवेत्याशयः । धर्मादिचतुर्विधपुरुषार्थप्रदत्वेनापि तस्य प्रियत्वमाह—ईश्वरमिति ॥४२॥ यतस्त्वद्भजनेनैव कृतार्थता, नान्यथाऽतोऽमलाशया विशुद्धान्तःकरणा वयं सर्वात्मना परिपूर्णेन प्रेम्णा उक्तविधं त्वामेव प्रपन्नाः शरणं गताः स्मः ॥ ४३ ॥ एवं भगवद्भजने प्रवृत्तानामपि तदनुग्रहमन्तरेण भजननिर्वाहस्य दुर्लभत्वं मत्वा तमेव प्रार्थयते—तमिति । हे देव ! भवस्य संसारस्यापवर्गाय मोक्षाय तं त्वां वयं भजामेत्यन्वयः । प्रार्थनायां लोट् । भजनीयत्वे हेतून् सूचयन् विशिनष्टि—जगतः स्थित्यादीनां हेतुमिति । तथा सर्वस्य सुहृत् हितचिन्तकश्चासावात्मा चासौ देवमाराध्यः फलदश्च तं तथापि प्रशान्तं रागलोभसुखदुःखादिसर्वविकाररहितम् । तत्र हेतुमाह—सममिति । तत्र हेतुमाह—जगतः आत्मनां जीवानां च केतमाश्रयभूतमिति । तत्र हेतुमाह—अनन्यमिति । सर्वाभिन्नमित्यर्थः । तत्रापि हेतुमाह—एकमिति ॥ ४४ ॥

अन्वितार्थप्रकाशिका

देवेति । देवेन कर्माध्यक्षेण त्वया दत्तमिमं त्वन्मायातरणसाधनं नृलोकं मनुष्यदेहं लब्ध्वाऽपि यः अजितेन्द्रियः त्वत्पादौ नाद्रियेत सः आत्मनोऽपि वञ्चकः शोच्यः ॥ ४१ ॥ य इति । यो मर्त्यो मरणशीलः आत्मानं प्रियम् ईश्वरं त्वां विपर्ययाः विपरीताः अनात्मप्रियानीश्वरा ये इन्द्रियार्थाः पुत्रादयस्तदर्थं विसृजते न सेवते । तडार्थः । सः अमृतं त्यजन् विषमत्ति ॥ ४२ ॥ अहमिति । अहं शिवः ब्रह्मा बिबुधाः मुनयश्च एते अमलाशयाः वयम् आत्मानं प्रेष्ठम् ईश्वरं त्वां सर्वात्मना प्रपन्नाः स्मः ॥ ४३ ॥ तमिति । जगतः स्थित्युदयान्तानां हेतुं समं प्रशान्तं सुहृद्बुद्धिप्रवर्त्तकत्वात्स चासौ आत्मा च सर्वात्मकत्वात् एवंभूतं देवं च तम् अनन्यमेकं सजातीयासजातीयरहितं जगतः आत्मनां जीवानां च केतनमाश्रयभूतं देवं तं त्वां भवस्य संसरणस्य अपवर्गाय भजाम । प्रार्थने लोट् ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र पतितेषु जंतुषु मध्ये हरिभक्तिहीनं नरं निंदन्नाह देवेति । देवेन कर्मफलप्रदात्रा त्वया दत्तं नृलोकं मनुष्यदेहं ॥४१॥ विपर्ययाः मोक्षविरोधिनो ये इन्द्रियार्थाः प्राकृताः । शब्दादयस्तदर्थं । त्वां जीवानां कल्याणाय प्रादुर्भूतं प्रत्यक्षं त्यजति सः । अमृतं त्यजन् ॥ ४२ ॥ सर्वः समस्त आत्मा प्रेक्षणश्रवणादीद्रियस्वभावस्तेन सर्वात्मना परमात्मानं त्वां ॥ ४३ ॥ ननु किमर्थं प्रपन्ना इति चेत्तत्राहमिति । समं यथा कर्मफलप्रदातृत्वादस्मदादिक्षेत्रज्ञेषु समतयावर्त्तमानं सुहृद्धितकर्त्ता आत्मा स्वयं तद्वज्जनहितकारी देवं सर्वोपास्यः स च स च स च तत् । अनन्यं नास्ति स्वतुल्यः अन्यो यस्य ते । जगति ये आत्मानः क्षेत्रज्ञास्तेषां के तं आश्रयणीयस्थानं एवंभूतं एकं प्रशांतं शांतमूर्त्ति वासुदेवं त्वा त्वां हे देव भवापवर्गाय भजामः ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु यन्मायेत्युक्तेर्मायया जीवान् मोहयन् वृजिनार्णवे पातयंश्चाहं किं निर्घृणः नेत्याह ॥ देवदत्तमिति । देवेन निरवधिककृपावता त्वया दत्तं, इमं नृलोकं लब्ध्वा, त्वदाराधनोपयुक्तं त्वन्मायातरणसाधनं चेमं मनुष्यदेहं प्राप्यापीत्यर्थः । अजितेन्द्रियः इन्द्रिय परवशः सन्, यः पुमान्, त्वत्पादौ त्वदीयचरणौ, न आद्रियेत न सेवेत, सः शोच्यः, अहो किमस्य दौर्भाग्यमित्येवं शोचनीयः । कुतः । हि यस्मात्, अयं आत्मवञ्चकः आत्मापहारी ॥ ४१ ॥ इतोऽपि शोच्य इत्याह । यस्त्वामिति । यो जनः, मर्त्यः स्वयं मरणशीलः सन्, आत्मानं, प्रियं, ईश्वरं च, त्वां, विसृजते विपर्यया विपरीताः अनात्मानः अप्रियाः अनीश्वरा इत्यर्थः । ये इन्द्रियार्थाः पुत्रादयस्तदर्थं, विपर्ययेन्द्रियार्थार्त्त इति पाठे, विपर्ययेष्वनात्मस्वप्रियेष्वनीश्वरेष्विन्द्रियार्थेषु शब्दादिष्वार्त्तो दीनः, अमृतममृततुल्यं त्वां त्वत्सेवां चेत्यर्थः । त्यजन्, विषं अत्ति । अतः स शोच्य इति सम्बन्धः ॥ ४२ ॥ यतस्त्वं त्वत्सेवा चामृततुल्याऽत एव वयं त्वामेव प्रपन्नाः स्म इत्याह । अहमिति । अहं रुद्रः, अथ ब्रह्मा, विबुधाः, अमलाशयाः शुद्धान्तःकरणाः मुनयश्च, सर्वात्मना सर्वभावेन उपायोपेयभावेनेत्यर्थः । आत्मानं प्रेष्ठं, ईश्वरं, त्वामुक्तविधं भवन्तमेव, प्रपन्नाः शरणं गताः ॥ ४३ ॥ न केवलमात्मत्वादिगुणयुक्तमेव त्वां प्रपन्नाः, किं तु शरण्यत्वोपयुक्तासंख्येयगुणान्तरयुक्तं चेत्यभिप्रयन्नाह । तमिति । हे देव, तमुक्तविधं, जगतो या स्थितिश्च उदयश्च अन्तश्च तेषां हेतुः कारणं तं, समं वैषम्यरहितं, प्रशान्तं सर्वथोर्मिषट्करहितं, भजतामपि शान्त्यावहं च, सुहृदात्मदैवं सुहृदं सन्तमात्मनायकमित्यर्थः । अनन्यं स्वतुल्यसे-

व्यान्तररहितं, एकं स्वाधिकप्रपदनीयान्तररहितं, जगन्ति च आत्मानश्च तेषां वेतमाश्रयमाधारमिति यावत्। त्वां, भवापवर्गाय अभ्युदयाय मोक्षार्थं चेत्यर्थः। भजाम ॥ ४४ ॥

कृष्णप्रिया

भगवान ने अतिशय अनुकम्पा से मनुष्यों को यह मानव देह दिया है। जो मानव ऐसा दिव्य मानव देह पाकर इन्द्रियों पर संयम करके आपके चरणकमलों की सेवा नहीं करता उस मनुष्य का जीवन सर्वथा शोचनीय है और वह जीव आत्मवञ्चक है ॥ ४१ ॥ हे भगवन्! आप जीवमान के आत्मा, ईश्वर और प्रियतम हैं। जो मृत्यु का ग्रास मानव आपको छोड़कर अनात्म दुःखरूप और क्षुद्र पदार्थों में नित्य बुद्धि करके उनमें लगा रहता है वह अमृत का त्याग कर विष पान कर रहा है ॥ ४२ ॥ मैं शङ्कर, ब्रह्मा, और सर्वदेव और निर्मल मन वाले ऋषि मुनि गण सर्व, सर्वाकार से और सर्वात्म भाव से आपके शरणागत हैं कारण यह कि आप हमारे जीवों के आत्मा, प्रियतम और परमेश्वर हैं ॥ ४३ ॥ हे नाथ! अखिल विश्व की उत्पत्ति स्थिति लय के आप ही कारण हैं, आप समदृष्टि, परम प्रशान्त, सर्व के सुहृद्, आत्मा और इष्टदेव भी हैं। आप एक अद्वितीय विश्व के आश्रय और अधिष्ठान हैं। संसार से मुक्त होने के लिये आपके शरण हैं और आपका भजन करते हैं॥४४॥

अयं ममेष्टो दयितोऽनुवर्ती मयामयं दत्तममुष्य देव।
[१]सम्पद्यतां तद् भवतः प्रसादो यथा हि ते दैत्यपतौ प्रसादः ॥ ४५ ॥

श्रीभगवानुवाच

यदात्थ भगवंस्त्वन्नः करवाम प्रियं तव। भवतो यद् व्यवसितं तन्मे साध्वनुमोदितम् ॥ ४६ ॥
अवध्योऽयं ममाप्येष वैरोचनिसुतोऽसुरः। प्रह्लादाय वरो दत्तो न वध्यो ते [२]मयान्वयः ॥ ४७ ॥
दर्पोपशमनायास्य प्रवृक्णा[३] बाहवो मया। सूदितं च बलं भूरि यच्च भारायितं भुवः ॥ ४८ ॥

कर्दमक्षमा

अन्वयः—देव! अयम्, मम, ईष्टः, दयितः, अनुवर्ती, मया, अमुष्य, अभयम्, दत्तम्, तत्, हि, दैत्यपतौ, यथा, ते, प्रसादः, तथा, अमुष्य, भवतः, प्रसादः, सम्पद्यताम् ॥ ४५ ॥ श्रीभगवान् उवाच, भगवन्! नः, त्वम्, यत्, आत्थ, तव, प्रियम्, करवाम, भवतः, यत्, व्यवसितम्, तत्, मे, साधु, अनुमोदितम् ॥ ४६ ॥ वैरोचनिसुतः, अयम्, असुरः, मम, अपि, एषः, अवध्यः, प्रह्लादाय, वरः, दत्तः, ते, अन्वयः, मे, अवध्यः ॥ ४७ ॥ अस्य, दर्पोपशमनाय, मया, बाहवः, प्रवृक्णाः, भुवः, भारायितम्, यत्, च, भूरिबलम्, सूदितम् ॥ ४८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वयं भक्तिमाशास्य स्वभक्तस्याभीष्टमाशास्ते। अयमिति। दैत्यपतौ प्रह्लादे ॥ ४५-४६ ॥ वैरोचनिर्बलिर्मद्भक्तस्तत्सुतत्वादवध्यस्तावत् किंच प्रह्लादायेति। अन्वयो वंशः ॥ ४७ ॥ तर्हि किमित्येवं कृतं तत्राह। दर्पोपशमनायेति ॥ ४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अयं बाणः। अमुष्य बाणस्य। तत् अस्याभयप्रदानमेव। भवतस्तव ममोपरि प्रसादः। कथमसुरे प्रसादस्त्वया कृत इति चेदाह—यथा हीति ॥ ४५ ॥ नोऽस्मभ्यम्। यद् अस्याभयप्रदानादि। अनुमोदितं निश्चितम्। वस्तुत आवयोरभेदत्वादिति भावः ॥ ४६ ॥ एष बाणः। अन्वयशब्दोऽत्र सजातीयपरः, तत्रैव तदभिमानोपपत्तेः। विजातीये तु देहान्निकृष्टे कीटादौ प्रसूते च सर्पमंडूकादौ तदभिमानाभावेन झटिति तत्त्यागदर्शनात्। अतो बकबकयघादीनामपि तिर्यगंतःपातित्वात्कंसादीनां सजातीयत्वाभावाच्च वध्यतैव युक्तेति भावः ॥ ४७ ॥ अस्य बाणस्य। यत् बलम्। भार इवाचरतीति भारायते। ततः कर्तरि क्ते भारायितम् ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवमात्मनस्तदनुपेक्ष्यत्वं प्रतिपाद्य चिरमभीष्टं बाणस्यापि तादृशत्वं युक्तमिति प्रार्थयते-अयमिति। इष्टः त्वद्भक्तिविशेषात्मकताण्डवे वाद्यसाचिव्येन प्रीतिविषयतां यातः तथा दयितः प्रह्लादबलिसम्बन्धेन स्वभावत एव दयाविषयश्चायम्

---

१. सम्पा–श्रीधर. वंशी. जीव. वीर. विश्व. । २. मे तवा–श्रीधर. वंशी. जीव. वीर. विश्व. ३. प्रकृत्ता–प्रा. पा. ।

अत एव मदनुवर्त्तितामपि प्राप्तः अत एव मया त्वदनुग्रहाभिमानेन अमुष्य अस्मै अभयं दत्तं भवतो भवता स्वस्य युद्धाद्यपराधं मत्वा लज्जमान आह-यथेति । दैत्यपतौ प्रह्लादे यथा तदनुसारेणापीत्यर्थः ॥ ४५ ॥ भगवन् हे सर्वज्ञेति श्रीप्रह्लादसम्बन्धेनास्मिन् मयाप्यपेक्षणीयत्वं स्वस्मिन् मदनुग्रहं मन्माहिमानं स्वेन सह मम युद्धादिकौतुकं बाहुच्छेदनादिनास्य मदशमनादिमदभिप्रायञ्च ज्ञात्वैव त्वया सर्वं व्यवसितमिति भावः । नः अस्मान् प्रति यदात्थ तत्करवामैव यतस्तव प्रियं प्रीतिकरम् अहो तवोक्त्यपेक्षामपि न सहे यतस्त्वत्सम्मतमेव मया सम्पादनीयमित्याह—भवत इति । व्यवसितं बुद्धया निश्चितं साधु यथा स्यात्तथानुऽमोदितं तद्दाढर्यविवक्षयाऽतीतनिर्देशः साध्विति व्यवसितादप्याधिक्यार्थं न इति बहुत्वं श्रीबलदेवादि स्वजनापेक्षया अस्माकं मध्ये यं प्रति यदात्थ तत्तेन कर्त्तव्यमित्यर्थः । पश्चान्मयेत्येकत्वं त्वद्भक्तिविशेषेण मया यदनुमोदितं तत्सर्वैरपि मदीयैश्च स्वत एव स्वीकर्त्तव्यमित्यभिप्रायेण ॥ ४६ ॥ मया वध्यस्तु सर्वथा नेत्याह-अवध्य इति । असुरोप्यवध्योयं यत एव वैरोचनसुतः वैरोचनीति क्वचित् अन्वयशब्दोत्र सजातीय एवाभिमतः तत्रैव तदभिमानसम्पत्तेः नहि देहान्निकृष्टे कीटादौ पुत्रवत्प्रसूते सर्पमण्डूकादौ वा परलोकस्य सोयं सम्पद्यते झटिति त्यागदर्शनात् तदेवं बकीबकाघानां वधो न युक्तः लोकेण्यमङ्गलशङ्कया तत्सुहृद्भिस्ते सर्पादयो हन्यन्ते सजातीयास्तु कुमतयोपि ताडनादिना शिक्षन्त एवेति ॥ ४७ ॥ किन्तु दर्पः दोस्सहस्रं त्वया दत्तमित्याद्युक्तिहेतुः तस्योपशमनाय शीघ्रहरणाय प्रवृत्ताः छिन्नाः बलं सैन्यम् ॥ ४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इष्टः सखा, दयितः, प्रियः, अनुवर्त्ती च सेवकः, इष्टत्वदयितत्वयोः सोपाधि-निरुपाधिस्नेहद्वारा भेदः कल्प्यः, यद्वा, इष्टः प्रियः, यतो दयितः, सखा अनुवर्ती च, यद्वा, इष्टो दयितः प्रियसखः, इष्टोऽनुवर्त्ती च प्रियसेवकः, अतोऽमुष्य अस्मै अभयं दत्तम् । देव ! हे मत्प्रभो ! इति मदीयोऽपि त्वदीय एव, विशेषतश्च भक्तस्य भक्तत्वान्मत्तोऽप्यधिकमनुग्राह्यस्त्वयेति भावः । अतस्तदभयमेव प्रसादः सम्पाद्यतां सम्यक् क्रियताम् । यद्वा, तत्तस्मात् कीदृशः प्रसाद इत्यपेक्षायामाह—हि एव, यथा यादृश एव, प्रह्लादवदात्मनः परमभक्तं कुर्वित्यर्थः । यद्वा, हि यतः, यथा यथावत्, अस्मतोऽप्यधिक इत्यर्थः । यद्वा, अहो मयि तवापेक्षा मास्तु, श्रीप्रह्लादापेक्षयापि सम्पाद्यतामिति सदैन्यमाह—यथेति । तदनुसारेणापीत्यर्थः ॥ ४५ ॥ भगवन् ! हे सर्वज्ञेति त्वयि मम यादृशो भावः, यदर्थञ्चास्य वाहवो मया छिन्ना इत्यादिकं सर्वं त्वं वेत्स्येवेति भावः । 'नः' अस्मान् प्रति यदात्थ, तत् करवाम करिष्याम एव, यतस्तव प्रियं प्रीतिकरम्, अहो भवोक्त्यपेक्षया वा किन्त्वत्सम्मतमेव सर्व्वं मया सम्पाद्यमित्याह—भवतेति । व्यवसितं बुद्धया निश्चितं साधु यथा स्यात्तथानुमोदितं स्वीकृतम्, तद्दार्ढ्यविवक्षयातीतनिर्द्देशः । साध्विति व्यवसितादप्याधिक्यार्थम् । आदौ बहुत्वं श्रीबलदेवादिस्वजनापेक्षया । अस्माकं मध्ये यं प्रति यदात्थ, तत्तेन कार्य्यमित्यर्थः । पश्चान्म इत्येकत्वं त्वद्भक्तिविशेषेण मयानुमोदितं सत् सर्व्वैरपि मदीयैः स्वत एव स्वीकर्त्तव्यमित्यभिप्रायेण । किं वक्तव्यम्, त्वत्प्रीत्यर्थमयं न हन्तव्य इति ॥ ४ ॥ ममाप्यवध्य एवेत्यत्यन्तविनयादिना तत्संकोचनिरासार्थमाह—अवध्य इति । असुरोऽप्यवध्योऽयम् यत एष वैरोचनि-सुतः । एवं वाक्यद्वयादेष इत्यपुनरुक्तम् । यद्वा, पाठान्तरमत्रानुसन्धेयम्, तैरव्याख्यातत्वात् । दर्पः 'दोः सहस्रं त्वया दत्तम्' इत्याद्युक्तिहेतुस्तस्योपशमनाय शीघ्रहरणाय, बलं सैन्यञ्च, तु यत्त्विति भवदीयगणाश्च न सूदितास्तेषां भूभारत्वाभावादित्यर्थः ॥ ४७-४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

प्रकृतं विज्ञापयति-अयमिति । अयं बाणः मे त्वां प्रपन्नस्य मम इष्टो भक्तः अनेन "मम मद्भक्तभक्तेषु प्रीतिरभ्यधिका भवेत्" इति भगवद्वचनं स्मारितम् अत एव दयितिः प्रियः अनुवर्तते इति तथा च हे देव ! अमुष्य बाणस्य मया अभयं दत्तं किमत इत्यत आह-तन्मया दत्तमभयं सम्पाद्यतां सफलीक्रियताम् अयमेव भवतोऽनुग्रहः तथाहि ते त्वया दैत्यपतौ प्रह्लादे प्रसादः कृत इति शेषः । त्वद्वंशजं न हनिष्यामीति प्रह्लादमनुगृहीतवानित्यर्थः ॥ ४५ ॥ इत्थं संस्तुतः प्रसन्नः प्राह भगवान्-यदात्थेति । हे भगवन् रुद्र ! नोऽस्मान्प्रति यदात्थ अवोचः यच्च तव प्रियं तत् करवाम यद्वा यत्तव प्रियं तन्नोऽस्माकमप्यतस्तत्करवाम भवता यन्निश्चितमेतत्प्राणसंरक्षणात्मकं तन्मयाप्यनुमोदितम् ॥ ४६ ॥ विरोचनसुत इति हेतुगर्भं तत्त्वादवध्यः तत्रापि हेत्वन्तरमाह-प्रह्लादायेति । अन्वयः वंशजः ॥ ४७ ॥ तर्हि किमर्थं बाहूनच्छिनस्तत्राह—दर्प इति । प्रवृक्णा भिन्नाः तर्हि किमर्थं बहुसैन्यं हतवानसीत्यत आह-नाशितमिति । भूभारापनयनार्थमिति भावः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

इष्टः त्वद्भक्तिविशेषात्मकताण्डवे बाद्यसाचिव्येन प्रीतिविषयतो याताः तथा दयितः प्रह्लादबलिसम्बन्धेन स्वभावत एव दयाविषयश्चायम् अत एव मदनुवर्तितामपि प्राप्तः, अतएव मया त्वदनुग्रहाभिमानेन अमुष्य अस्मै अभयं दत्तं दैत्यपतौ प्रह्लादे यथा तदनुसारेणापीत्यर्थः ॥ ४५-५३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भोः शम्भो ! प्रसन्नोऽस्मि **वरं** वृणु इत्युक्ते सति हे **प्रभो** ! दुष्टेप्यनुवर्त्तिनि बाणासुरे ममतां त्यक्तुं न शक्नोमि किङ्करोमि तस्मादस्मिन्नपि त्वत्प्रसादोऽस्त्वित्येष एष मे वर इत्याह—अयमिति । तत् अभयं सम्पाद्यतां नन्वत्र को हेतुस्तत्राह—भवतः प्रसाद एव न त्वेतन्निष्ठं किमपि सुलक्षणमस्तीति भावः। ननु कीदृशः प्रसादः कर्त्तव्यस्तत्राह—यथेति दैत्यपतौ प्रह्लादे ॥ ४५-४९ ॥

गूढार्थदीपिनी

इष्टः अभिमतः। दयितः प्रियश्च सेवकश्च भवतः तव प्रसादः अस्मिन्नपि सम्पाद्यतां यथा प्रह्लादे ॥ ४५ ॥ नोऽस्मान् प्रति **यत्** ब्रवीषिभवतीयत् व्यवसितं निश्चितं बाहुच्छेदनं तत् न केवलमनुमोदितम् अपि तु साधु सम्यक् पूर्णीकृतम् ॥ ४६ ॥ वैरोचनो बलिः ॥ ४७ ॥ बाहवः प्रवृक्णाः छिन्नाः भार इव आचरति भारायते। ततः कर्तरि क्तः भारायितं तच्च सूदितं नाशितम् ॥ ४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तन्मया दत्तमभयं सम्पाद्यतां सफलीक्रियताम् अथमेव भवतः प्रसादः अनुग्रहो भवतु बाणे इति शेषः। तत्र निमित्ताकांक्षायां हिशब्दः अनिरुद्धश्वशुरत्वादिति हिशब्दार्थः निमित्तान्तरं स्मारयति **यथा** दैत्यपतौ प्रह्लादे **ते** त्वया प्रसादः कृतः न बध्यो तव वंशजः इति ॥ ४५-५१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शर्वः सर्वथाऽयं मम त इति सूचयितुं त्रिवारं वदामि ततो नानृतमिति लौकिकीं घाटीं नटयन्नाह। इष्टो दयितोऽनुवृतीति। अतिभक्ततायां तात्पर्यम्। मयाऽमुष्य। तस्य मृतप्रायताभिप्रायेण पारोक्ष्योक्तिः। अभयं दत्तम्। उत्तरत्रानिर्वाहात् षष्ठी च। तदभयं भवतः सम्पाद्यताम्। अन्धकबन्धकः कश्चिदनुबन्धं च दयनीयतायां सदृष्टान्तमाचष्टे। यथा हीति। ते दैत्यपतावतिबलौ दौवारिकतया प्रसादस्तथा कार्यः। तज्जातिस्वभावमावेदयति। असुरत्वेनाहितेऽपि दैत्यपताविति। तद्दौवारकस्त्वमेतद्दौवारिकोऽहमिति समाधिकाराविति मय्यपि दया विधेयेति नर्ममर्मोक्तिः। पौत्रत्वेनेत्यान्तरङ्गिको भावो भवस्य ॥ ४५ ॥ हे भगवन्। त्वं नः प्रति यदात्थाब्रवीस्तत्तव प्रियं करवाम। इदमेकमेव तव कार्यं मम सम्मतमिति न किन्तु कन्तुहर हर सर्वमित्युक्त्वा शर्वं प्रोत्सायति। भवतेति। यद्भवता व्यवसितं तन्मे ममाप्यधुना सम्यगनुमोदितम्। नासङ्गतं त्वं वदेरपि तु तदेवं च वामदेवाभवेदित्यध्याह। साध्वनुमोदितं साधुजनसम्मतमिति ॥ ४६ ॥ बाणप्राणत्राणने कारणान्तरमपि श्रावयति। मयाऽप्येष वैरोचनसुतो बलिबालासुरोऽपि न वध्यः। प्रह्लादाय मे मया तवान्वयो न वध्य इति वरो दत्त इति ॥ ४७ ॥ तर्हीयत्कुतोऽदर्शि भवता भगवन्नित्यत आह। दर्पेति। त्वदनुभूतो भूतपते यस्तद्दर्पस्तन्नाशाय। वृक्णाश्छिन्नाः। सैन्यसूदने मधुसूदनो हेतुमाह। भुवो भारायितमिति ॥ ४८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

विज्ञापनामाह **अयं ममेष्ट** इति। इष्टानुवृत्तिर्लोकसिद्धा। **दयित** इति प्रीतिविषयः। इच्छा रुचिश्च निरूपिते। **अनुवर्ती**ति सर्वहेतुः, सर्वदा मामनुवर्तत इति, तेन मयाप्यनुवृत्तिः कर्तव्येति। **अमुष्याभयं मया दत्त**मिति वाचनिकम्। एवं कायवाङ्मनोभिरयमनुरोध्य इति सर्वथा त्वया कृपा कर्त्तव्येत्याह **संपद्यता**मिति। तत्तस्मात्कारणाद्भवतः प्रसादः संपद्यताम्। अथवा। मदुक्तं त्वदुक्तमेव। अतः स पूर्वोक्तः प्रसादः संपद्यताम्, आवयोर्भिन्नभावाभावात्। प्रसादं विशिनष्टि। **यथा हि ते दैत्यपतौ प्रह्लादे प्रसाद** इति ॥ ४५ ॥ ततो भगवान् प्रीतः कृतं कृतमेवेति वाचा शिवसान्त्वनं कृतवानित्याह **यदात्थे**ति। **भगवन्नि**ति सम्बोधनमभेदाभिप्रायेण। स हि भगवन्तमपृथक्त्वेन भजते। त्वं यदात्थ तन्नोऽस्मान् प्रति। तद्युक्तमेवेति। नोऽस्माकं वा त्वम्। अतः प्रियं करवाम। स्वकीयानां प्रियं कर्तव्यमेवेति। **तवे**ति। वस्तुतस्तव वाक्यं च समर्थनीयम्। तदिदानीं बाहुच्छेदनाभावमाशङ्क्य पूर्वोक्तं स्मारयति **भवता यद्व्यवसित**मिति। 'त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते' इति। तत्साध्वेवानुमोदितम्। कृतं तु त्वयैव तच्छस्त्रद्वारा अनुमोदनमात्रं कृतमिति ॥४६॥ अभयं यत्प्राथ्यते, तत्राह **अवध्योऽयं ममाप्येष** इति। प्रह्लादान्वयत्वज्ञापनाय पुरुषत्रयमाह **वैरोचनसुत** इति। विरोचनात्मजस्य बलेः सुतोऽयं बाणः। किमतो यद्येवम्, तत्राह **प्रह्लादाय वरो दत्त** इति। **ते अन्वयो मया न वध्य** इति। ननु भक्ते कथमेवं वचनम्, तत्राह **असुर** इति। असुरा हन्तव्या एवेति। अनेन भक्तकृपालुत्वं भक्तापेक्षया आधिक्येन सूचितम्। स त्वेकस्यैव प्राणरक्षामाह, अहं तु वंशस्यैव कथयामीति ॥४७॥ तर्हि कथं छेदनमिति चेत्, तत्राह **दर्पोपशमनाये**ति। प्रकर्षेण छेदनं बाहुमूलकम्। ते वृक्णा एवेति न तस्य प्रतीकारः। सेनावधस्य क्लिष्टकर्मत्वमाशङ्क्य निमित्तान्तरमाह **यच्च भुवो भारायितम्**। चकाराद्भक्तानां बुद्धिनाशकं तत्सर्वमेव बलं **सूदितं** मारितम् ॥ ४८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

अयं ममेष्ट इत्यत्र। **इति वाचनिक**मिति। **तथा चानुवर्ती**ति कायिकम्। **इष्टो दयित** इति मानसमितिभावः। भगवतान्यः प्रसादो न संपादित इत्याशयेन पक्षान्तरमाहुः **अथवे**ति। मदुक्त एवास्य प्रसादः संपद्यताम्, तस्यान्यथाभावो मा भवत्वित्यर्थः। **कृतं कृतमेवे**ति। भुजच्छेदस्तु कृत एव, अवशिष्टं तिष्ठत्वित्यर्थः। **यदात्थे**त्यत्र। **नोऽस्माकं वे**ति पक्षे मूले यदस्माद्धेतोरित्यर्थः। **बाहुच्छेदनाभाव**मिति। जातस्य बाहुच्छेदनस्याभावो निवृत्तिः, पुनः बाहुप्ररोह इदानीं स्यादित्याशङ्क्येत्यर्थः। **कृतं त्वि**ति। भगवतो व्यवसाय एव कृतिः। **क्रिया** त्वनुमोदनमात्रम्। यथा व्यवसायेनैव द्रोणादयो हताः। अत एव 'द्रोणं च भीष्मं च'तिवाक्यम्। तदनन्तरं युद्धादिकं तु लोकप्रतीत्यर्थं तस्यैवानुमोदनम्, तथा सर्वत्रेति ज्ञेयम्। **अवध्योय**मित्यत्र। **कथमेवं वचन**मिति। निषेधस्य संभावनाहेतुकत्वाद्वरसंभावनाबाधकं निषेधवचनं कथमुक्तवानित्यर्थः।

श्रीसुबोधिनीसारः

अयं बाणो ममेष्टो वांछितो दयितः प्रियोऽनुवर्ती आज्ञाकरः सेवकः हे देव मयाऽमुष्यामुष्मै अभयं दत्तं ते त्वया तत्तस्माद्धेतोः संपाद्यतां प्रसादः क्रियताम् असुरे कथं प्रसाद इति तर्कं विरुणद्धि यथा दैत्यपतौ प्रह्लादे भवतः प्रसादो हि युक्तम् हिते प्रिये इति वा ॥४५॥ कृष्णोक्तिः। हे भगवन् त्वं यदात्थ नोस्मान् तत्तव प्रियं वयं करवाम यद्भवतो व्यवसितं निश्चितं तन्मे मम साधु यथा भवति तथानुमोदितुं कर्तुमिष्टं मयेति वा ॥ ४६ ॥ वैरोचनस्य बलेः सुतः पुत्र एषोऽसुरो बाणो ममाप्यवध्योऽमारणीय इत्यर्थः कथमित्यत आह प्रह्लादाय मे मया वरो दत्तः कीदृशस्तत्राह तवान्वयो वंशोऽवध्य इति ॥ ४७ ॥ इदं तु त्वदीप्सितं कृतम् "त्वद्दर्पघ्नं भवेन्मूढ" इति तदुक्तेः। अत एव रुद्रः पराजित इति वदंतो निरस्तास्त्वदुक्तेः संपादनात् तदभीष्टमिति भावार्थः। अस्य बाणस्य गर्वनिवृत्तये मया बाहवो भुजाः प्रवृक्णाः छिन्ना यच्च भुवो भूमेर्भारायमाणं बलं सैन्यं भूरि बहु तच्च सूदितं नाशितम् ॥ ४८ ॥

गोस्वामिश्रीगिरिधरलालकृता प्रालप्रबोधिनी

एवं स्वेष्टं सम्प्रार्थ्य बाणेऽनुग्रहं प्रार्थयति—अयमिति। अयं बाणो ममेष्टः इच्छाविषयः चित्त उषितः। तत्र हेतुः—दयितः प्रियः। तत्र हेतुः—अनुवर्ती सेवकः। अत एव हे देव! मया अमुष्य अभयं दत्तं तत्तस्मात् यथा हि दैत्यपतौ प्रह्लादे ते त्वया प्रसादः कृतः तथाऽस्मिन्नपि भवतः प्रसादः सम्पाद्यतां मद्दत्तमभयं सत्यं क्रियतामित्यर्थः। 'दैत्यपतौ' इत्यनेन भक्तपौत्रत्वात् अस्मिन्नपि तव प्रसाद उचित एवेति सूचितम् ॥ ४५ ॥ एवं संप्रार्थितो प्रसन्नो भगवानाह—यदात्थेति। 'त्वया यत्कृतं तन्मयैव कृतम्, आवयोर्भेदाभावात्' इति सूचयन् सम्बोधयति—भगवन्निति। नोऽस्मान् प्रति त्वं यत् यथा आत्थ प्रार्थितवान् तथैव तव प्रियमस्याभयं करवाम। बाहुच्छेदनं तु यथा भवता व्यवसितं—"त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते" इति निश्चयेनोक्तं तत्तथैव मे मया साधुतयाऽनुमोदितम् नतु त्वदनिष्टं किञ्चित्कृतम् ॥ ४६ ॥ अयमसुरोपि ममावध्यः वधार्हो न भवति। तत्र हेतुमाह—एष वैरोचनिसुत इति। विरोचनपुत्रो बलिः। स मद्भक्तः। तस्य पुत्रत्वादित्यर्थः। तत्रैव हेत्वन्तरमप्याह—प्रह्लादायेति। अन्वयः वंशजः। अत्र सप्तमे तथा च वचनाभावेपि पुराणान्तरे 'भविष्यति च ते वंशो ह्यवध्यो मे सदा किल' इति प्रह्लादं प्रति भगवद्वचनमस्तीति ज्ञेयम् ॥ ४७ ॥ त्वदुक्तदर्पनाशायैवास्य बाहवो मया प्रवृक्णाः छिन्नाः, यच्च भुवो भारायितं भूरि बलं सैन्यं तच्च सूदितं विनाशितम् ॥ ४८ ॥

अन्वितार्थप्रकाशिका

अयमिति ॥ अयं बाणः मम इष्टः चित्ते उषितः दयितः प्रियः अनुवर्ती सेवकः अत एव हे देव! मया अमुष्य अभयं दत्तं तत्तस्मात् यथा हि दैत्यपतौ प्रह्लादे ते त्वया प्रसादः कृतः तथाऽस्मिन्नपि प्रह्लादवंशजाते भवतः प्रसादः सम्पाद्यतां मद्दत्तमभयं सत्यं क्रियताम् ॥ ४५ ॥ यदिति ॥ हे भगवन्! नोऽस्मान् प्रति त्वं यत् यथा आत्थ कथयसि तथैव तव प्रियमस्याभयं करवाम। बाहुच्छेदनं तु यत् यथा भवता व्यवसितम् "त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते।" इति निश्चयेनोक्तं तत्तथैव मे मया साधुतयाऽनुमोदितं नतु त्वदनिष्टं किंचित्कृतम् ॥ ४६ ॥ अवध्य इति ॥ असुरोऽप्येष ममापि अवध्यः यतः वैरोचनो बलिः मद्भक्तः तत्सुतः किञ्च तव अन्वयः वंशजः स्वजातीय एव तेन बकीबकाद्यसुरादिवधो नायुक्तः इति तोषिणी। मे मम न वध्यः इति मया प्रह्लादाय वरो दत्तः। "भविष्यति च ते वंशो ह्यवध्यो मे सदा किल।" इति टीकाधृतपुराणान्तरवचनात् ॥ ४७ ॥ दर्पेति ॥ त्वदुक्तदर्पनाशायैवास्य बाहवो मया प्रवृक्णाः छिन्नाः। यच्च भुवो भारायितं भूरिबलं सैन्यं तच्च सूदितं विनाशितम् ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं तं प्रसाद्यकरणीयमाह। अयमिति इष्टः प्रियः। अतो दयितो दयार्हः। अमुष्य अमुष्मै बाणाय मया अभयं दत्तं तत्संपाद्यतां यथा दैत्यपतौ प्रह्लादे। भवतः। प्रसादोऽस्ति तथा अस्मिन्नपि त्वया प्रसादः कार्यः ॥ ४५ ॥ नोऽस्माकं यत्करणीयं

त्वमात्थ तत्तव प्रियं बाणरक्षणादिकरूपं हितं वयं बलदेवादयस्तवोपास्याः करवामः यत् व्यवसितं विचारितं तन्मे मया सम्यक् अनुमोदितं अंगीकृतं ॥ ४६ ॥ वैरोचनस्य मद्भक्तबलेः सुतः तवान्वयो न वध्य इति मया प्रह्लादाय वरो दत्तः ॥ ४७ ॥ प्रवृक्णाः छिन्नाः सूदितं हतं ॥ ४८–४९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रकृतं विज्ञापयति ॥ अयमिति ॥ अयं बाणः, मम त्वां प्रपन्नस्य ममेत्यर्थः। इष्टः अनुकम्पाविषयः, दयितः प्रियो भक्तः, अनुवर्त्ती च भवति। हे देव, मया अमुष्य बाणस्य, अभयं दत्तं अस्ति। तत्तस्मात्, भवतः प्रसादोऽनुग्रहः, यथा ते तव, दैत्यपतौ प्रह्लादे प्रसादः, भवति हि। तथा अस्मिन् संपाद्यतां मद्दत्तमभयं सफलीक्रियतामित्यर्थः ॥ ४५ ॥ इत्थं संस्तुतः प्रसन्नः भगवान् प्राह यदिति चतुर्भिः ॥ यदिति ॥ हे भगवन् रुद्र, नोऽस्मान् प्रति, त्वं यत्, आत्थ तत्, तव प्रियं करवाम। भवतः यत्, व्यवसितमेतत्प्राणरक्षणात्मकं, तत् मे मया, साधु यथा तथा, अनुमोदितम् ॥ ४६ ॥ अवध्य इति ॥ हे रुद्र, अयं वैरोचनसुतः, असुरः, भवति। अतः, एषः, ममापि अवध्यः, कुतः। मे मया, प्रह्लादाय, वरः दत्तः। तव, अन्वयः, न वध्यः, अतोऽपि न हनिष्यामीति भावः ॥ ४७ ॥ तर्हि किमिति अस्य बाहूनच्छिनस्तत्राह ॥ दर्पेति ॥ मया, दर्पोपशमनाय, अस्य बाहवः, प्रवृक्णाश्छिन्नाः, यच्च भुवः, भूरि, भारायितं बलं च, तच्च सूदितं नाशितम् ॥ ४८ ॥

कृष्णप्रिया

रुद्र भगवान् भगवान् श्रीकृष्ण की ग्यारह श्लोकों में स्तुति करके अपने भक्त बाणासुर के लिये अभ्यर्थना करते हुए कहते हैं कि हे भगवन् ! यह बाणासुर मेरा अतिशय प्रिय, दयापात्र, आज्ञांकित सेवक है। मैंने इसको अभयदान दिया है। हे कृपासिंधु ! जैसा आपका इनके पितामह प्रह्लाद जी पर रहा है, वैसा इन पर नित्य बना रहे ॥ ४५ ॥ भगवान् श्रीकृष्ण ने कहा कि हे शिवजी ! आपने जो कहा और जो चाहते हो, मैं वैसा ही करूँगा। इसको मैं निर्भय कर देता हूँ। इसके लिये आपने जो चाहा था कि इनके चार हस्त अखंड रहें, तो वैसा ही होगा ॥ ४६ ॥ भगवन् ! यह बाणासुर भक्तिवर बलिराजा का पुत्र है, इसलिये मेरा भी अवध्य है। मैंने प्रह्लाद को वचन दिया, तेरा वंशज दैत्य मेरा अवध्य होगा ॥ ४७ ॥ केवल इसका गर्व उतारने के लिये इसकी अधिक भुजाएँ काट दी हैं जो इसका अनिष्ट न करें। इसका सैन्य भूतल का बोझ था, इसलिये सेना का संहार किया गया ॥ ४८ ॥

चत्वारोऽस्य भुजाः शिष्टा भविष्यन्त्य[1]जरामराः। पार्षदमुख्यो भवतो नकुतश्चिद्भयोऽसुरः ॥ ४९ ॥
इति लब्ध्वाभयं कृष्णं प्रणम्य शिरसासुरः। प्राद्युम्निं रथमारोप्य स [2]बध्वा समुपानयत् ॥ ५० ॥
अक्षौहिण्या परिवृतं सुवासःसमलंकृतम्। सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥ ५१ ॥

कर्दमक्षमा

अन्वयः—अस्य, शिष्टाः, चत्वारः, भुजाः, अजरामराः, भविष्यन्ति, भवतः, पार्षदमुख्यः, असुरः, न, कुतश्चिद्भयः ॥ ४९ ॥ इति, अभयम्, लब्ध्वा, असुरः, शिरसा, कृष्णम्, प्रणम्य, सवध्वा, प्राद्युम्निं, रथम्, आरोप्य, समुपायनत् ॥५०॥ सुवासःसमलङ्कृतम्, अक्षौहिण्या, परिवृतम्, सपत्नीकम्, पुरःस्कृत्य, रुद्रानुमोदितः, ययौ ॥ ५१ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनुगृह्णाति। चत्वार इति ॥ ४९ ॥ सह वध्वा ऊषया ॥ ५० ॥ रुद्रानुमोदित इति तदभिप्रेतस्यैव बाणभुजभंगस्य कृतत्वात् ॥ ५१ ॥

श्रीवंशीधरकृता भावार्थदीपिकाप्रकाशः

अस्येत्युक्तार्थः ॥४९॥ प्राद्युम्निमनिरुद्धम्। स–सहेत्यर्थः। 'क्वचिदादेशोऽप्यादेशित्वेन गृह्यते' इति वैयाकरणाः ॥५०॥ तदभिप्रेतस्य रुद्राभिप्रायविषयस्य। "त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते" इति रुद्रोक्तेः ॥ ५१ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रसादं सम्पादयति–चत्वार इति। असुरोपि पार्षदमुख्यः त्वत्प्रार्थनानुसारेण जातमद्भक्तित्वादिति भावः। अजरामरत्ववरप्रदानेन भुजकर्त्तनव्यथापि सद्यः शान्तेति ज्ञेयं न कुतश्चिदपि भयं यस्येति संसारभयस्यापि निवृत्त्या जीवन्मुक्तो

---

[1] ष्यत्य–वीर. । [2] सह वध्वा समानयत्–प्रा. पा. ।

भावीत्यर्थः। वृषपर्वा बलिर्बाण इत्येकादशे सत्सङ्गलब्धसिद्धित्वस्य वक्ष्यमाणत्वात् नञो लोपाभाव आर्षः ॥ ४९ ॥ कृष्णं सर्वचित्ताकर्षकमाहात्म्यं भगवन्तं दृष्टोपि तादृशप्रसादात् सम्यक् बहुलोपस्करयुक्तत्वादिना उप श्रीकृष्णान्तिके आनयत् ॥ ५० ॥ संशब्दार्थमेव विवृणोति–अक्षौहिणीत्यर्द्धेन। सपत्नीकम् उषासहितं प्राद्युम्नि रुद्रेति तैर्व्याख्यातम् यद्वा रुद्रेण बाणादिसर्वदुःखद्रावकेण भगवता अनुमोदितः अनुव्रजनादिना हर्षितः सन् ययौ प्रतस्थे श्रीकृष्णः ॥ ५१ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं दर्पोपशमनादधुना स्वरूपतां प्राप्तो भवत्पार्षदप्रवरो भावीत्याह—चत्वार इति। असुरोऽपि, न कुतश्चिदपि भयं यस्येति संसारभयस्यापि निवृत्त्या जीवन्मुक्तो भावीत्यर्थः ॥ ४९ ॥ इति एवमीदृशं वा, स श्रीकृष्णेनानुगृहीतोऽसुरः कृष्णं सर्व्वचित्ताकर्षक-माहात्म्यं भगवन्तम्, दुष्टेऽपि तादृशप्रसादात्; शिरसा प्रणम्येति छिन्नबाहुवर्गमूलतो रक्तधारास्रावादिवैकल्येन भूमौ दण्डवत्पाताशक्तेः। यद्वा, कृष्णं परमानन्दघनमूर्त्तिम्; प्रणम्येति तत्प्रणाममात्रेणैव छेदवेदनादिनिवृत्त्या तस्यापि परमसुखत्वं सूचितम्। ततश्च शिरसेत्यस्य परेणान्वयः। वध्वा सह शिरसा कृत्वा सम्यग् बहुलोपस्करयुक्तत्वादिना उप श्रीकृष्णान्तिके आनयत् ॥ ५० ॥ सं-शब्दार्थमेव विवृणोति—अक्षौहिणीत्यर्द्धेन। सपत्नीकमूषासहितं प्राद्युम्निम्, रुद्रेति तैर्व्याख्यातम्। यद्वा, रुद्रेण बाणादि-सर्व्वदुःखद्रावकेण भगवता अनु निरन्तरं मोदितः, अनुव्रजनादिना हर्षितः सन् ययौ प्रतस्थे श्रीकृष्णः ॥ ५१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

रुद्रमुखेन बाणमनुगृह्णाति–चत्वार इति। अस्य बाणस्य चत्वारः भुजाः शिष्टाः आज्ञप्ता अनुगृह्यावशेषिताः इत्यर्थः। अयं जरामरणरहितो भविष्यति न कुतश्चिद्भयं यस्य तथाभूतश्च भविष्यतीति सम्बन्धः ॥ ४९ ॥ इतीति। अभयमिति च्छेदः बध्वा उषया सह प्राद्युम्निमनिरुद्धं समानवद्द्वारकां प्रापयामासेत्यर्थः ॥ ५० ॥ तदेवाह–अक्षौहिण्येति। शोभने वाससी यस्य तं पत्न्या सहितमनिरुद्धं पुरस्कृत्य पुरतो गमयन् रुद्रानुमोदितः स्वयमप्यनुययौ ॥ ५१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

स बाणाऽसुरः वध्वा उषया सह ॥ ५०–५१ ॥

गूढार्थदीपिनी

अजराः श्रमरहिताः। अमरा अच्छेद्याश्च ॥ ४९ ॥ प्राद्युम्निम् अनिरुद्धम् सादरमानयत् स सहेत्यर्थः। क्वचिदादेशोऽपि आदेशित्वेन गृह्यते इति वैयाकरणाः ॥ ५०–५१ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अस्य बाणस्य भुजाश्चत्वारः। अजरामर अ इति छेदः। हे अजरामर हर ह शिष्टा भविष्यन्ति। भवतः पार्षतमुख्योऽयमसुरः। कुतश्चिदिति निपातसमुदायः सुप्सुपेति समासः। अः कृष्ण आहेति शेषः। अजरामर इति तु श्लिष्टम्। अजरामरा ये पार्षदास्तेषु मुख्य इति वाऽन्वयः। ननु भारते हरिवंशे द्विबाहुना च बाणेनेति। कृत्वा द्विबाहुं तं बाणं छिन्नशाखामिव द्रुममिति च द्विबाहुत्वोक्तेः कथमत्र चतुर्भुजमित्युक्तिरिति चेत्। तत्र बाहुशब्द एकबाहुपरोऽत्र न तु भागद्विकबाहुपर इति द्वित्वचतुष्ट्वाविरोधसम्भवात्। यद्वा रुद्राणी प्रति वाणी वाणी च रुद्रं प्रतीति कृष्णेन द्विवारं द्विभुजमितीरणात्तच्चतुष्ट्वं ज्ञेयम्। एवमन्यत्रापि समाधिरवधेया ॥ ४९ ॥ इत्यभयं लब्ध्वा कृष्णे शिरसा प्रणम्य प्राद्युम्निं रथं वध्वोषया सहारोप्य समुपानयत्। कुभाण्डदुहिता रामा उषायाः सखिमण्डले। प्रवेश्य तां महाभागां वैदर्भ मवर्धयत्युत। साम्बाय दीयतां रामा कुभाण्डदुहिता शुभेत्यादिव था। तथा वारुणो बाणस्य गोनिमित्तं जात इत्यादिका चात्र ज्ञेयेति समा सूच्यते ॥ ५० ॥ अक्षौहिण्या द्वादशसङ्ख्यया। सपत्नीकं सोषम् ॥ ५१ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तर्हि मत्प्रार्थनायां को विशेष इत्याशङ्क्याह **चत्वारोऽस्य भुजाः शिष्टा भविष्यन्तीति**। मद्दत्तं सहजं भुजद्वयं त्वद्दत्तमागन्तुकं भुजद्वयमिति चत्वारोऽस्य भुजाः छिद्यमानेषु भुजेषु अवशिष्टा भविष्यन्ति। अनेन सुदर्शनं प्रक्षिप्तं साम्प्रतं छिनत्तीति सूचितम्। अधिकभुजद्वयदाने हेतुः **पार्षदमुख्य** इति। तयोः कालान्तरेऽपि नाशाभावायाह **अजरामरा** इति। देवत्वं निरूपितम्। युक्तमेव **पार्षदमुख्यो भवत** इति। **न कुतश्चिद्भय** इति असुरत्वेऽपि न मत्तो न मदीयान्न गुणेभ्यो भयमित्यर्थः ॥ ४९ ॥ एवमभये दत्ते भगवत्कृपावलोकितः स्वोचितं कृतवानित्याह **इति लब्ध्वेति**। अभयं लब्ध्वा, कृष्णं प्रणम्य, कन्यादाने संतुष्टो भविष्यतीति। शिरसेति। तस्यैतदेव महत्, यतोऽयमसुरः। **प्राद्युम्नि** भगवत्पौत्रम्। अर्थाद्बन्धनादिकं

त्याजयित्वा, वरमिवालङ्कृत्य, **वध्वा** ऊषया सह समुपानयत्। सम्यक् भगवत्समीपमुपानयत्। एतदर्थमेव समागत इति तावता सन्तुष्टः ॥ ५० ॥ **अक्षौहिण्या परिवृत**मिति पारिबर्हमक्षौहिणी सेना। **सुवासःसमलंकृत**मिति वस्त्राभरणानि। ततो भगवत्कृत्यमाह। सपत्नीकं तं पौत्रं पुरस्कृत्य **रुद्रेणानुमोदितः**, अन्यथा दण्डमिव तद्ग्रहणं रुद्रो मन्येत। **कृष्णोनुमोदित** इति पाठे अर्थाद्रुद्रेण। अनेन तस्मिन् भगवत्प्रसादो निरूपितः। जाम्बवत इव शिक्षार्थं निग्रह इत्यपि सूचितम् ॥ ५१ ॥

श्रीसुबोधिनी–सारः

अस्य शिष्टा उर्वरिताः चत्वारो भुजा अजरामरा भविष्यंति भवतस्तव पार्षदेषु मुख्योऽसुरो न कुतश्चिद्भयं यस्य स भविष्यति ॥ ४९ ॥ शुकोक्तिः। इत्येवमभयं लब्ध्वा प्राप्य कृष्णं शिरसा प्रणम्य सोऽसुरो बाणो वध्वा पुत्र्या सह प्रद्युम्नस्यापत्यं रथमारोप्य न्यवेदयत् ॥ ५० ॥ अक्षौहिण्या परिवृतं युक्तं सुष्ठु वासोभिः वस्त्रैः समलंकृतं सुष्ठु वासांसि यस्य सम्यगलंकृतानि भूषणानि यस्य स च स च तम् इति गुरवः सपत्नीकं सस्त्रीकं पुरस्कृत्य अग्रे कृत्वा रुद्रेणानुमोदितः साध्विति प्रशंसितः श्रीकृष्णो जगाम ॥ ५१ ॥

गोस्वमिश्रीगिरिधरलालकृता बालप्रबोधिनी

अवशिष्टाश्चत्वारोस्य भुजा अजराः श्रमरहिताः अमरा अच्छेद्याश्च भविष्यन्ति। तथाऽयमसुरोपि यतो भवतः पार्षदेषु मुख्यः प्रियत्वादतो नकुतश्चिद्भयो निर्भयश्च भविष्यति ॥ ४९ ॥ इत्येवं भगवद्वचनादभयं लब्ध्वा असुरो बाणः शिरसा कृष्णं प्रणम्य वध्वा ऊषया सह प्राद्युम्निमनिरुद्धं रथमारोप्य सम्यगादरेणानयत् ॥ ५० ॥ रुद्रमनोरथसंपादनात्तेनाप्यनुमोदितो वाचा सत्कृतः श्रीकृष्णोप्यनिरुद्धं पुरस्कृत्य द्वारकां ययौ। स्पष्टमन्यत् ॥ ५१ ॥

अन्वितार्थप्रकाशिका

चत्वार इति ॥ अवशिष्टाश्चत्वारोऽस्य भुजा अजराः श्रमरहिताः अमरा अच्छेद्याश्च भविष्यन्ति। तथाऽयमसुरोऽपि यतो भवतः पार्षदेषु मुख्यः प्रियत्वादतो न कुतश्चिद्भयो निर्भयश्च भविष्यति ॥ ४९ ॥ इतीति ॥ इत्येवं भगवद्वचनादभयं लब्ध्वा सः असुरो बाणः शिरसा कृष्णं प्रणम्य वध्वा ऊषया सह प्राद्युम्निमनिरुद्धं रथमारोप्य सम्यगादरेणानयत् ॥ ५० ॥ अक्षौहिण्या इति ॥ रुद्रेणानुमोदितः तदभिप्रेतस्यैव बाणभुजभङ्गस्य कृतत्वात् कृष्णोऽपि अक्षौहिण्या परिवृतं सुवासःसमलंकृतं सपत्नीकमनिरुद्धं पुरस्कृत्य द्वारकां ययौ ॥ ५१ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्राद्युम्निं प्रद्युम्नपुत्रमनिरुद्धं वध्वा उषया सह रथमारोप्य सः बाणः समुपानयत् श्रीकृष्णसमीपमानीतवान् ॥ ५० ॥ सपत्नीकं अनिरुद्धं रुद्रेण शिवेन। अनुमोदितः प्रसादितः ॥ ५१ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चत्वार इति ॥ अस्य, चत्वारः भुजाः, शिष्टाः अवशेषिताः, भविष्यन्ति। अजरामराः, भविष्यति। असुरः अयं बाणः, नकुतश्चिद्भयः सन्, भवतः, पार्षदमुख्यश्च, भविष्यति ॥ ४९ ॥ इतीति ॥ असुरो बाणः, इत्येवं विधं असुरो बाणः, इत्येवं विधं अभयं लब्ध्वा, कृष्णं, शिरसा प्रणम्य, प्राद्युम्नसुतमनिरुद्धं, सवध्वा वध्वोषया सह, रथं आरोप्य, समुपानयत् द्वारकां प्रापयामासेत्यर्थः ॥ ५० ॥ एतत्स्फुटमाह ॥ अक्षौहिण्या सेनया, परिवृतं सुवासः समलंकृतं सपत्नीकमनिरुद्धं, पुरस्कृत्य, रुद्रानुमोदितः रुद्रेण कृतानुमोदनः कृष्णः, ययौ ॥ ५१ ॥

कृष्णप्रिया

अब इनकी चार भुजाएँ अवशिष्ट रही हैं, ये चारों अजरामर होंगी। बाणासुर आपके पार्षदों में प्रधान रहेगा। अब बाणासुर को किसी से किसी भी प्रकार का भय नहीं रहेगा ॥ ४९ ॥ भगवान् श्रीकृष्ण से अभयदान प्राप्त करके बाणासुर ने श्रीद्वारिकानाथ जी के श्रीचरणों में साष्टाङ्ग दण्डवत् प्रणाम किया। वह नगर में गया, श्री अनिरुद्ध जी को आदर से अपनी पुत्री ऊषा के साथ रथ पर बैठाकर प्रभु के समीप ले आया ॥५०॥ पुनः भगवान् पुरुषोत्तम ने भगवान् भवानी शङ्कर की अनुमति से वस्त्रालङ्कार विभूषित ऊषा और अनिरुद्ध जी को एक अक्षौहिणी सेना के साथ लेकर श्री द्वारिकापुरी की ओर प्रस्थान किया ॥ ५१ ॥

[1]स्वराजधानीं समलंकृतां ध्वजैः [2]सतोरणैरुक्षितमार्गचत्वराम् ।
विवेश शङ्खानकदुन्दुभिस्वनैरभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥ ५२ ॥

[3]य एतत् कृष्णविजयं शंकरेण च संयुगम् । संस्मरेत् प्रातरुत्थाय न तस्य स्यात् पराजयः ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे[5]ऽनिरुद्धानयनं नाम त्रिषष्टितमोऽध्यायः[6] ॥ ६२ ॥

कर्दमक्षमा

अन्वयः—सतोरणैः, ध्वजैः, समलङ्कृताम्, उक्षितमार्गचत्वराम्, शङ्खानकदुन्दुभिस्वनैः, पौरसुहृद्द्विजातिभिः, अभ्युद्यतः, स्वराजधानीम्, विवेश ॥ ५२ ॥ यः, एतत्, कृष्णविजयम्, च, शङ्करेण, संयुगम्, प्रातः, उत्थाय, संस्मरेत्, तस्य, पराजयः, न, स्यात् ॥ ५३ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां अनिरुद्धानयने त्रिषष्टितमेऽध्यायेऽन्वयाः समाप्ताः ॥ ६३ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

पौरादिभिरभ्युद्युतोऽभिमुखमागत्य सत्कृतः ॥ ५२-५३ ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे श्रीध० टीकायां त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स कृष्णः ॥ ५२ ॥ एवमित्थम् । कृष्णस्य विजयो यत्र तत्संयुगम् । तस्य स्मर्तुः ॥ ५३ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स श्रीकृष्णः राजधानीं श्रीद्वारकां सम्यक् तदानीं विशेषतोऽलङ्कृतां भूषितमार्गेत्यत्र उक्षितमार्गेत्येकत्र ॥ ५२॥ श्रीकृष्णेन बाणो निर्जितः श्रीरुद्रश्च जृम्भितः इत्यद्भुतं न स्यात् यतस्तत्स्मरणेनापि न कस्यचित् कश्चित्पराजयो भवतीत्याह—य इति । कृष्णस्य विजयमेतं शङ्करेणेति बाणस्य मङ्गलार्थमेव युद्धप्रवर्त्तनाभिप्रायेण सम्यक् श्रद्धापूर्वकं स्मरेदपि किमुत शृणुयात् कीर्त्तयेद्वेत्यर्थः । प्रातरुत्थायेति स्नानापेक्षा च निरस्ता पराजयः बाह्याभ्यन्तरादिभ्यो भक्तिविघ्नेभ्यश्च पराभवो न भवतीत्यर्थः ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स श्रीकृष्णो राजधानीं श्रीद्वारकां सम्यगलंकृतामिति सदैवालंकृताम्, तदानीञ्च विशेषतोऽलंकृतामित्यर्थः ॥ ५२ ॥ श्रीकृष्णेन बाणो निर्ज्जितः, श्रीरुद्रश्च जृम्भित इत्युद्भूतं न स्यात्, यतस्तत्स्मरणेनापि न कस्यचित् कश्चित् पराजयो भवतीत्याह—य इति । कृष्णस्य साक्षाद्भगवतो विशेषेण जयं बाणबाहुच्छेदनादिलक्षणम्, संयुगमिति संयुगान्तर्गतजृम्भणादिकमपि सूचितमेव । साक्षात्तदनुक्तिर्गौरवात्, शंकरेणेति बाणस्य मंगलार्थमेव युद्धे प्रवृत्त्यभिप्रायेण । यद्वा, कृष्णस्य विजयमुत्कर्षं तमेवाह—'च' अपि, शंकरेणापि संयुगम् । अन्यत् समानम् । सम्यक् स्मरेदिति स्मरणमात्रमपेक्षितम्, न तु कीर्त्तनादि; प्रातरुत्थायेति पावित्र्याद्यपेक्षापि निरस्ता । पराजयो बाह्यान्तरादिभ्यो भक्तिविघ्नेभ्यश्च पराभवो न भवति ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री-श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स इति । स बाणः कृष्णो वा अन्यतरसहितोऽन्यतरो वा पौरादिभिरभ्युद्यतः अभिमुखमागत्य सत्कृतः शङ्खादिध्वनिभिः राजधानीं द्वारकां विवेश कथम्भूतामुक्षिताः सिक्ताः मार्गा वीथयः चत्वराण्यङ्गणानि यस्यां ताम् ॥ ५२ ॥ उक्तकथासंस्मरणफलमाह—य इति । यः पुमान् संस्मरेत् इति श्रवणाख्यानादीनामप्युपलक्षणं तस्य स्मरतः पराजयो न स्यात् ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

---

१. स राज—प्रा. पा. । २. मनोरमैर्भूषित—प्रा. पा. । ३. य एवं—श्रीधर. वंशी. जीव. वीर. विश्व. । ४. पारमहंस्यां संहितायां दशमस्कन्धे बाणासुरसंग्रामे कृष्णविजये—प्रा. पा. । ५. उत्तरार्धे—प्रा. पा. । ६, अयमध्यायो विजये नास्ति ।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स कृष्णः ॥ ५२–५३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । त्रिषष्टितम एतस्मिन् दशमेऽजनिसङ्गतः ॥ ६३ ॥

गूढार्थदीपिनी

सतोरणैरित्यत्र स इति पृथक् पदं कार्यम् द्वारकां कृष्णः सविवेशेत्यन्वयः । तोरणं वन्दनमालिका । उक्षिताः सिक्ताः मार्गादयो यस्याः । पौरादिभिः अभ्युद्यतः अभिमुखमागत्य सत्कृतः ॥ ५२ ॥ श्रीकृष्णस्य विजयो यत्र संयुगविशेषणम् । तत्पुरुषो वा ॥ ५३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अभ्युद्यतः अभिमुखमुपव्रज्य पूजितः ॥ ५२–५३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्रिषष्टितमाऽध्यायार्थप्रकाशः ॥ ६३ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वराज्यधानीं ध्वजैस्तोरणैश्च समलङ्कृतम् । सतोरणैर्ध्वजैरिति वा । समलङ्कृतां सम्यगलङ्कृताम् । उक्षिता गन्धादिकोदकैर्मार्गचत्वराश्च यस्यां सा ताम् । शङ्खानकदन्दुभिस्वनैः पौरसुहृद्द्विजातिभिरभ्युद्यतः ॥ ५२ ॥ विशेषत एतच्छ्रवणे फलश्रवणे प्रवर्तन्ते लोका इति तदभिलषति ॥ य इति । तस्य पराजयो न स्यात् परेषामाजयो युद्धानि न भवेयुः । पराजयस्तु दूरोत्सारित इत्यप्यर्थः । अत आवश्यकमेतच्छ्रवणमिति ॥ ५३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धेऽष्टसप्ततमोऽध्यायः ॥ १०–७८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सिद्धार्थस्य भगवतः पुनरागमने पुरीं वर्णयति, विवाहोत्सवे पुरी न वर्णितेति, स्वराजधानीमिति । अनेन विधिवद्विवाहः तेन द्वारकायामेव कृत इति सूचितम् । स्वस्य राजधानीति समागमने विलासा उक्ताः । ध्वजैः सतोरणैरलङ्कृतामित्युपर्यलङ्कारः । **उक्षितमार्गचत्वरा**मित्यधः । गन्धोदैः उक्षिताः सिक्ताः मार्गाः चत्वराण्यङ्गणानि च यस्याः । मध्ये शोभामाह । **पौरसुहृद्द्विजातिभिः** शङ्खानकदुन्दुभिस्वनैः सहितैरभ्युद्यतः । पौरास्तामसाः, सुहृदो राजसाः, सर्वैरभ्युपगमनम्, अयं विवाहः सर्वसंमत इति ज्ञापयितुम् ॥५२॥ प्रकरणं समाप्तमिति ज्ञापयितुमेतदुपाख्यानश्रवणफलमाह **य एतत् कृष्णविजय**मिति । प्रत्यहं य एतत् स्मरेत्, तस्य पराजयो नेन्द्रियान्तःकरणैर्भवति । भगवता निरुद्धानां विस्मृतप्रपञ्चानां भगवदासक्तियुक्तानां कालादिभिरुपद्रवे राजसानामुद्वेगो भवतीति फलनिरूपणे तदवश्यं वक्तव्यम् । उपायश्चानेन निरूपितः । पराजयसम्भावनायामेतत्स्मर्तव्यमिति ॥ ५३ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे चतुर्दशोऽध्यायः ॥ १४ ॥

इति श्रीमद्भागवत-दशम-उत्तरार्ध-राजस-फल-प्रकरणं समाप्तम् ।

श्रीसुबोधिनी-सारः

सतोरणैः ध्वजैः समलंकृतां मंडिताम् उक्षिता गंधजलैः सिक्ता मार्गाः चत्वराणि यस्यां तां स्वराजधानीं द्वारकां विवेश शंखादिशब्दैः सह पौरैः सुहृद्भिर्द्विजादिभिरभ्युद्यतः संमुखमागत्य सत्कृतः ॥ ५२ ॥ एवं प्रकारेण कृष्णस्य विजयं बाणात् शंकरेण च संग्रामं प्रातरुत्थाय यः संस्मरेत् तस्य पुंसः पराजयो न स्यात् ॥ ५३ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायां त्रिषष्टितमोध्यायः ॥ ६३ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

स्वराजधानीमित्यस्याभासे । **विवाहोत्सवे** इति । विवाहार्थं निर्गमने इत्यर्थः । **व्याख्याने** । अनेनेति । पुर्या अलङ्कारकथनेनेत्यर्थः । य एतदित्यत्र । निरुद्धानामित्यस्य विवरणमग्रिमपदद्वयेन ।

इति चतुर्दशाध्यायव्याख्या समाप्ता ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च पौरादिभिरभ्युद्यतः अभिमुखमागत्य सत्कृतः श्रीकृष्णः शङ्खादिशब्दैः सह स्वराजधानीं द्वारकां विवेशेत्यन्वयः। तां वर्णयति—सतोरणैर्ध्वजैः समलङ्कृताम्। तथा उक्षिताः सिक्ताः मार्गाः चत्वराण्यङ्गणानि यस्यां ताम्॥ ५२॥ प्रकरणस्य समाप्तत्वात् एतदुपाख्यानश्रवणादेः फलमाह—य इति। एवंभूतं कृष्णस्य विजयं शङ्करेण सह संयुगं युद्धं च यः पुमान् प्रातरुत्थाय सम्यक् श्रद्धाभक्तिपूर्वकं स्मरेत्, इदं श्रवणकीर्तनादीनामप्युपलक्षणम्, तस्य श्रवणादिनिष्ठस्य पराजयः इन्द्रियान्तःकरणादिभ्यः शत्रुभ्यश्चाभिभवो न स्यादित्यर्थः॥ ५३॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा॥ १॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी॥ २॥
रचिता दशमे तत्र राजसानां निरोधने। त्रियुक्षष्टितमः कृष्ण-विजयस्य निरूपकः॥ ३॥

अन्वितार्थप्रकाशिका

स्वेति॥ पौरसुहृद्द्विजातिभिः अभ्युद्यतः अभिमुखमागत्य सत्कृतः श्रीकृष्णः शङ्खानकदुन्दुभिस्वनैः सह सतोरणैर्ध्वजैः समलङ्कृतां तथा उक्षिताः सिक्ताः मार्गाः चत्वराण्यङ्गणानि यस्यां तां स्वराजधानीं द्वारकां विवेश॥ ५२॥ य इति॥ एवंभूतं कृष्णस्य विजयं शङ्करेण सह संयुगं युद्धं च यः पुमान् प्रातरुत्थाय सम्यक्श्रद्धाभक्तिपूर्वकं स्मरेत् अपि किमुत कीर्तयेत् शृणुयाद्वा। तस्य पराजयः इन्द्रियादिभ्यो बाह्येभ्यश्च शत्रुभ्यः अभिभवो न स्यात्॥ ५३॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां त्रिषष्टितमोऽध्यायः॥ ६३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उक्षिताः सिक्ताः मार्गाश्चत्वराणि अंगणानि च यस्यां तां द्वारिकां। पौरादिभिः शंखादिस्वनैः सह अभ्युद्यतः अभिमुखमागत्य सत्कृतः स श्रीकृष्णः॥ ५२-५३॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने अनिरुद्धद्वारिकानयनं नाम त्रिषष्टितमोऽध्यायः॥ ६१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वेति॥ स कृष्णः, सतोरणैः तोरणसहितैः, ध्वजैः समलंकृतां, उक्षिताः सिञ्चिताः मार्गाश्चत्वराणि च यस्यां तां, स्वराजधानीं शङ्खानकदुन्दुभिस्वनैः सह, पौरसुहृद्द्विजातिभिः पुरवासिभिः सुहृद्भिर्द्विजातिभिश्चेत्यर्थः। अभ्युद्यतः अभिमुखमागत्य सत्कृतः सन्, विवेश॥ ५२॥ उक्तकथासंस्मरणफलमाह॥ य इति॥ यः पुमान्, एवमुक्तप्रकारं, कृष्णस्य विजयं, शंकरेण संयुगं संग्रामं च, प्रातः उत्थाय, संस्मरेत् तस्य, पराजयः न स्यात्। अत्र स्मरणं श्रवणाख्यानादीनामुपलक्षणम्॥५३॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे त्रिषष्टितमोऽध्यायः॥ ६३॥

कृष्णप्रिया

जब लोगों को सूचना मिली कि नाथ श्री ऊषा तथा अनिरुद्धजी के साथ द्वारिका आ रहे हैं तब नगरनिवासियों ने, सारे प्रजाजन ने ध्वजा-तोरणों से नगर के कोने-कोने सजा दिये। राजमार्गों को, छोटी छोटी गलियों को गन्ध सुगन्धित जल से सींच दिया गया। नगर के नागरिक, नर-नारी वृन्द, बन्धुजन, बान्धवजन, विप्रवृन्द, महाजन आदि को आगे कर अतिशय उत्साह और धूम-धाम से प्राणनाथ का स्वागत किया। नाथ के नगरप्रवेश अवसर पर शङ्खनाद, नगाडें और ढोलों की मङ्गल तुमुलध्वनि हो रही थी। भगवान श्रीकृष्ण ने द्वारिकापुरी में इसी प्रकार प्रवेश किया। राजन्! जो सज्जन भगवान् भवानी शङ्कर के साथ भगवान श्रीकृष्ण का युद्ध और विजय-गाथा का प्रातःकाल उठकर स्मरण करता है उसकी पराजय नहीं होती॥ ५२-५३॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धेऽनिरुद्धानयने ६३ अध्याये भाषान्तरं समाप्तम्॥ ६३॥

* * *

अथ चतुःषष्टितमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४४	३७	६	१	३	१५०९	१७	४३	१५६९	४९	१

श्रीशुक[1] उवाच

[2]एकदोपवनं राजन् जग्मुर्यदुकुमारकाः । विहर्तुं साम्बप्रद्युम्नचारुभानुगदादयः ॥ १ ॥
क्रीडित्वा सुचिरं तत्र विचिन्वन्तः पिपासिताः । जलं निरुदके कूपे ददृशुः सत्त्वमद्भुतम् ॥ २ ॥
कृकलासं गिरिनिभं वीक्ष्य विस्मितमानसाः[3] । तस्य चोद्धरणे यत्नं चक्रुस्ते कृपयान्विताः ॥ ३ ॥
[4]चर्मजैस्तान्तवैः पाशैर्बद्ध्वा पतितमर्भकाः । नाशक्नुवन् [5]समुद्धर्तुं कृष्णायाचख्युरुत्सुकाः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—राजन्, एकदा, साम्बप्रद्युम्नचारुभानुगदादयः, यदुकुमारकाः, विहर्त्तुम्, उपवनम्, जग्मुः ॥ १ ॥ तत्र, सुचिरम्, क्रीडित्वा, पिपासिता, जलम्, विचिन्वन्तः, निरुदके, कूपे, अद्भुतम्, सत्वम्, ददृशुः ॥ २ ॥ विस्मितमानसाः, कृपयान्विताः, ते, गिरिनिभं, कृकलासम्, वीक्ष्य, च, तस्य, उद्धरणे, यत्नम्, चक्रुः ॥ ३ ॥ अर्भकाः, चर्मजैः, तान्तवैः, पाशैः, बद्ध्वा, पतितम्, तम्, समुद्धर्तुम्, न, अशक्नुवन्, तदा, उत्सुकाः, कृष्णाय, आचख्युः ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चतुःषष्टितमे कृष्णो नृगं पापादमोचयत् । ब्रह्मस्वहारिदोषोक्त्या राज्ञो दृष्टान्तशिक्षयत् ॥ १ ॥
विभूतिभाग्यभोगादिमदोन्नद्धमनोरथान् । अन्वशासद्यदून्कृष्णो नृगोद्धारप्रसंगतः ॥ २ ॥

पिपासितास्तृषिता जलं विचिन्वंतः । सत्त्वं जीवम् ॥ २ ॥ तं च कृकलासं वीक्ष्य ॥ ३ ॥ चर्मजैश्चर्ममयैः पाशैस्तांतवैस्तंतुमयैश्च ॥ ४ ॥

---

१. बादरायणि–प्रा. पा. ।

२. **श्रीशुक उवाच—**

उपविष्टं सुधर्मायां कदाचित्क्षत्रियैर्वृतम् । विज्ञापयद्वेत्रपाणिर्द्वास्थोऽभ्येत्य जनार्दनम् ॥ १ ॥
शक्रप्रस्थाद्द्विजः कश्चिदागत्य द्वारि तिष्ठति । प्रवेशितव्यो वा देव नवेति यदुसत्तम ॥ २ ॥
प्रवेशयेति कृष्णेन द्वास्थेनोक्तेन सत्वरः । प्रवेशितः प्रणम्याहं ब्राह्मणः पुरुषोत्तमम् ॥ ३ ॥
धर्मज्ञो धार्तराष्ट्रेण मूढेनाधर्मचारिणा । अक्षैः पराजितो यातः सभार्यः सानुजो वनम् ॥ ४ ॥
ब्राह्मणेनोदितां वाणीमित्याकर्ण्य सुदुःश्रवाम् । क्रोधोद्विग्नमनास्तूर्णमुत्तस्थे हरिरासनात् ॥ ५ ॥
स रथं दारुकानीतमारुह्य सह सत्यया । महत्या सेनया सार्धं ययौ यत्र पृथासुताः ॥ ६ ॥
वने वसन्तं राजानं ब्राह्मणैः परिवारितम् । दृष्ट्वाऽनुशोचत्सुभृशं सानुजं यदुनन्दनः ॥ ७ ॥
व्यसनान्यनुभुक्तानि वर्णयित्वा परस्परम् । उषित्वा तत्र तां रात्रिं पाण्डवैः सह केशवः ॥ ८ ॥
हेतुवाक्यैः समाश्वाय धर्मराजं युधिष्ठिरम् । भीमसेनार्जुनौ चैव यमौ च यदुनन्दनः ॥ ९ ॥
पाञ्चालीं द्रौपदीं साध्वीं सत्यभामासमन्वितः । आश्वास्यताननुज्ञाप्य ब्राह्मणांश्च सहस्रशः ॥१०॥
सुभद्रामभिमन्युं च रथमारोप्य माधवः । आजगाम वनाद्राजन्पुरीं द्वारवतीं प्रभुः ॥११॥
स प्रविश्य पुरीं दिव्यां पार्थविश्लेषदुर्मनाः । उवास पालयन्पृथ्वीं धर्मेणान्यांश्च कालयन् ॥१२॥

विजयेऽधिका. ।

३. चेतसः–वीर. विज. । ४. चर्मभिर–वीर. ; चर्मभिस्तं तया–विज. ; तं बद्ध्वा तान्तवैः पाशैः पतितं च तमर्भकाः–प्रा. पा. । ५. तमु–श्रीधर. टि. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नृगं नृपम् (१) । विभूतिरैश्वर्यम्, भाग्यं संपदः, 'भोग्यम्' इति पाठे भोग्याः स्त्र्यादयः । भोगस्तत्तद्विषयानुभवस्तेषां मदेनोन्नद्धा उच्छृङ्खला मनोरथा येषां तान् । अन्वशासत् विभूत्यादिमदांधानामेषा गतिर्भवतीति स च न कार्य इत्यशिक्षयदित्यर्थः ॥ २ ॥ लीले यमनुरुद्धतः जन्मतः प्रागूह्या श्रीप्रद्युम्नादीनां यौवनोद्भेद एवास्या लीलाया औचित्यात्, क्रीडासक्तत्वात्तु कुमारशब्दप्रयोगः कुमारप्राचुर्याद्वा । सांबस्यादावुद्देशः प्रद्युम्नस्य शंबरपुरात्तत्कालागमनेनागमनाभावात् । स्वल्पपापेनापि तादृशजनस्य तादृशी गतिरित्याश्चर्येण संबोधयति—राजन्निति । हे हरिभक्तिद्योतमानेत्यर्थः । उपवनं नगरोपकंठवनम् ॥ १ ॥ तत्रोपवने । "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मत्वे व्यवसायासुचित्तेष्वस्त्री तु जंतुषु ॥" इति मेदिनी ॥ २ ॥ कृकं लासयति नर्तयतीति कृकलासः । "शिरःप्राग्रं कृकं प्रोक्तं कृको गल उदीरितः" इति वामनः । तस्य कृकलासस्य । ते यदुकुमाराः । महाकायस्य तस्य चिरमुपवनांतर्वर्तिकूपस्थस्य भगवदिच्छातो दर्शनं तदैव जातं व्यवहारतस्तु तस्यातिपुरातनकूपस्य गभीरत्वेन चिरासंस्कृतत्वेन लतापत्राद्यावृतत्वेन जलान्वेषणवेलायामेव दृष्टत्वात् ॥ ३ ॥ "तंतुः संततिकार्पासादिसूत्रविस्तृतिषु च" इति निरुक्तिः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं श्रीरुद्रनिर्जयादिना प्रकटतरमैश्वर्यमुक्त्वा प्रसङ्गात्किञ्चिदन्यदप्याह—एकदेत्यादिना । एकदा कदाचिदिति क्रीडाक्रमो निरस्तः इतीयं लीलाऽनिरुद्धजन्मतः प्रागूह्या श्रीप्रद्युम्नादीनां यौवनोद्भेद एवास्या लीलाया औचित्यात् क्रीडासक्तत्वात्तु कुमारशब्दप्रयोगः कुमारप्राचुर्याच्च साम्बस्यादावुद्देशः प्रद्युम्नस्य शम्बरपुरात्तत्कालागमनेनाग्रगामित्वाभावात् स्वल्पपापेनापि तादृशी गतिः स्यादित्याश्चर्य्येण पूर्वोक्तलीलावेशपरिहारेच्छया वा सम्बोधयति राजन्निति ॥ १ ॥ तत्रोपवनेऽद्भुतं महाकायत्वेन कूपान्तरपि जीवनादिना च लोकातीतत्वात् महाकायस्य तस्य चिरमुपवनकूपान्तर्वर्त्तमानस्य प्रसिद्धिसम्भवेपि तदानीमेव दर्शनं वस्तुतो भगवत एव तादृशलीलेच्छातः व्यवहारतस्तु तस्यातिपुरातनकूपस्यातिगभीरत्वेन चिरासंस्कृततया लताद्यावृतत्वेन च जलान्वेषणेनैव दृष्टत्वात् ॥ २ ॥ अतिप्राक्कालीनत्वेन तादृशतत्तज्जीवत्वात् गिरिनिभमिति महागौरवं तथा तत्कूपस्याप्यतिबृहत्त्वं सूचितं वीक्ष्य साक्षात् दृष्ट्वा विस्मितचेतसः कृपयान्विताश्च सन्तः विस्मितमानसा इति क्वचित्पाठः ॥ ३ ॥ कथं चक्रुस्तदाह—चर्म्मभिरित्यर्द्धेन । पतितमिति कृकलासरूपं प्राप्य भ्रंशात् नाशक्नुवन् यतोऽर्भकाः बाल्यलीलापेक्षयानाविष्कृतप्रौढभावाः तमुद्धर्तुमिति वा पाठः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं श्रीरुद्रनिर्ज्जयादिना प्रकटतरमैश्वर्य्यमुक्त्वा प्रसंगात्तादृशचरितान्तरमप्याह—एकदेत्यादिना नृणामित्यन्तेन । एकदा कदाचिदिति क्रीडाक्रमो निरस्तः, इतीयं लीला अनिरुद्धजन्मतः प्रागूह्या । श्रीप्रद्युम्नादीनां यौवनोद्भेदेऽस्या लीलाया औचित्यात् नैश्चिन्त्यात् क्रीडासक्तत्वात् कुमार-शब्दप्रयोगः । स्वल्पपापेनापि तादृशजनस्य तादृशगतिः स्यादित्याश्चर्य्येण सम्बोधयति—राजन्निति ॥ १ ॥ तत्रोपवने, अद्भुतम्, महाकायत्वेन कूपान्तरपि जीवनादिना लोकातीतत्वात्, महाकायस्य तस्य चिरमुपवनकूपान्तर्वर्त्तमानस्य प्रसिद्धिसम्भवेऽपि तदानीमेव दर्शनं तेषां बाल्येन तदज्ञानात्, किंवा यथाकालं तदुद्धारे श्रीभगवदिच्छोदयात् ॥ २ ॥ गिरिनिभमिति—महागौरवं तथा तत्कूपस्याप्यतिबृहत्त्वं सूचितम् । वीक्ष्य साक्षाद्दृष्ट्वा, विस्मितचेतसः कृपयान्विताश्च सन्तः, यद्वा, 'च' अपि, तस्य तादृशस्यापि कूपात् पापाच्चोद्धरणे यत्नं चक्रुः, यतः कृपान्विता दयाशीलाः ॥ ३ ॥ कथं चक्रुः? तदाह—चर्म्मभिरित्यर्द्धेन । तैर्व्याख्यातम् । यद्वा, कृपान्वितत्वेन पीडापरिहारार्थमादौ चर्म्मभिर्वेष्टयित्वा तदुपरि सूत्रादिनिर्म्मितपाशैर्बद्ध्वा, पतितमित्यर्भकत्वेन तैस्तस्य तत्र पातमननात्, किंवा आत्मोद्धारार्थं तेनैव तत्रागत्य स्वयंपतनात्, यद्वा, प्रागेव कृकलासरूपेण तत्रैव स्वर्गतो भ्रंशात्, नाशक्नुवत्, यतोऽर्भका बाल्यलीलापेक्षया नाविष्कृतप्रौढभावाः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ दत्तोपहारप्रयुक्तदुरितनिमित्तकृकलासजन्मनो नृगस्य तज्जन्मविमोचनात्मकं भगवच्चेष्टितमनुवर्णयति चतुःषष्टितमेन, एकदेत्यादिना तावदुपोद्घातमाह—एकदेति । हे राजन् ! साम्बादयो यदुकुमारकाः ॥ १ ॥ क्रीडित्वेति । तत्रोपवने पिपासितास्तृषिताः जलमन्वेषयन्तः क्वचिन्निरुदके निर्जले कूपे महदुन्नतमद्भुतं च सत्वं जन्तुं ददृशुः ॥ २ ॥ कृकलासं नाम गिरितुल्यं जन्तुं विस्मितं चेतो येषां ते तस्य कृकलासस्योद्धरणे निमित्ते यत्नं च चक्रुः ॥ ३ ॥ चार्म्मभिरिति । चर्ममयैस्तन्तुमयैश्च पाशैरज्जुभिर्बद्ध्वा पतितं तमुद्धर्तुं न प्रबभूवुः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

(विजयध्वजतीर्थीयपाठानुसारेण सप्ताशीतितमाध्यायस्य त्रयोदशश्लोकादारभ्येयं
कथा पठ्यते तथापि श्रीधरीयादिव्याख्यानुसारेणात्रसमुद्रयते ।)

विचिन्वन्तः अन्वेषणं कुर्वन्तः सत्वं प्राणिनम् ॥ २ ॥ कृकं लासयति नर्तयतीति कृकलासः "शिरःप्राग्रं कृकं विदुः" इति च ॥ ३-७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चतुष्षष्टितमे कूपोद्धृतात् श्रुत्वा नृगाद्धरिः । दानं स्वान् शिक्षयामास विप्रभक्तिं सुशङ्कितान् ॥ १-२ ॥ तं सत्वं कृकलासं वीक्ष्य ॥ ३ ॥ चर्मभिश्चर्ममयैः पाशैः तान्तवैः सूत्रमयैश्च ॥ ४-५ ॥

गूढार्थदीपिनी

चतुःषष्टितमे कृष्णो नृगं योनेरमूमुचत् । ब्रह्मस्वहारिदुर्गत्या नृपानुदृप्तानबोधयत् ॥

सत्यपि यौवने क्रीडासक्तत्वात् कुमारप्राचुर्याद्वा कुमारशब्दप्रयोगः । कुत्सितान् हिंसकजन्तून् मारयतीति वा कुमारः ॥ १ ॥ जलं विचिन्वन्तः अन्वेषयन्तः । सत्त्वं विशालजन्तुम् । कूपे ददृशुः 'सत्त्वं गुणे' जन्तुषु--इति मेदिनी ॥ २ ॥ कृकं गलं लासयति नर्तयतीति तथा । गिरिगिट इति । 'कृको गले' इति वामनः ॥ ३-५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

चतुष्षष्टितमे भगवान् ब्रह्मस्वापहारदोषेण कूपे पतितं नृगमुद्धृत्य तन्मुखाद्ब्रह्मस्वापहारदोषं श्रुत्वा स्वकीयान् शिक्षयामासेति वर्णयति, रुक्मिण्यादिविवाहतत्तत्पुत्रोत्पादनादिकं भगवच्चेष्टितं वर्णयित्वाऽथ पुत्रविहारप्रसङ्गे भगवच्चेष्टितं वर्णयितुं सङ्क्षेपतस्तत्पुत्रविहारं तावद्वर्णयति--एकदेति ॥ १ ॥ सत्वं जीवम् ॥ २ ॥ तं च कृकलासं वीक्ष्य कृपययाऽन्विताः तस्य कृकलासस्योद्धरणे यत्नं चक्रुः ॥ ३ ॥ चर्मभिश्चर्ममयैः ॥ ४-५ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

राजसप्रक्रिया पूर्णा तत्त्वैरिन्द्रियशोधिका । निरूपिता नातियत्ना सात्त्विकी त्वधुनोच्यते ॥ १ ॥
अध्यायैरेकविंशत्या वसुदेवमखावधि । चतुर्धा रूप्यते षड्भिः षड्भिः षड्भिस्त्रिभिस्तथा ॥ २ ॥
अर्थो धर्मस्तथा कामः मोक्षश्च त्रिविधोऽन्ततः । प्रकीर्णकाख्यानवती प्रक्रियेयमिहोच्यते ॥ ३ ॥
नात्र क्रमविवक्षा हि नृगः पूर्वं निरूप्यते । गोप्यः पश्चात्ततो मिथ्यावासुदेवः प्रकीर्तितः ॥ ४ ॥
धर्मकामार्थयुक्ता हि प्रमाणेनैव पोषिताः । द्विविदो लक्ष्मणा चैव नारदश्च त्रयः स्मृताः ॥ ५ ॥
एतेषामर्थसिद्धिर्हि षडविधा प्रोच्यते स्फुटैः । ततः साधारणो धर्मो विशिष्टः पञ्चभिस्ततः ॥ ६ ॥
यथा कामकथा षड्भिस्त्रिभिर्मोक्षस्तथोच्यते । अर्थोऽनर्थः सर्वथैव धर्मार्थमपि योजितः ॥ ७ ॥
तस्यापि भगवानर्थः स निरुद्धः फले परम् । अर्थो ब्राह्मणसम्बन्धरहितश्चेत् परः स्मृतः ॥ ८ ॥
दृष्टान्ततो निरूप्यादौ भगवानाह तत् स्फुटम् । उत्तरार्धे पञ्चदशे नृगमोक्षो निरूप्यते ॥ ९ ॥
शिक्षा च सात्त्विके भावे राजसा यादवा यतः ।

अतः परं स्कन्धसमाप्तिपर्यन्तं प्रकीर्णकाः कथाः निरोधोपयोगाय निरूप्यन्ते । तत्र प्रथमं नृगमोक्षो निरूप्यते । नृगो नाम कश्चिद्राजा अर्थवान् दानधर्मपरः ब्राह्मणार्थसंसर्गादनर्थं प्राप्तः, तस्यापि भगवान् उद्धारकः, अधमभावादुद्धृत्य स्वर्गं प्रापयिष्यति, ततः स सर्वतो निरुद्धः भगवन्माहात्म्यं दृष्ट्वा विस्मृतप्रपञ्चः भगवदेकपरो भविष्यति । तदत्र भगवाननिरुद्धरूपः तमुद्धृत्य धर्मं ग्राहयामास । कथाक्रमे तु देवान्तरभक्तः यथानर्थं प्राप्तवान्, एवं धर्मपरोऽपि नृग इति वदन् अर्थविषये धर्मतत्त्वमुच्यते । तत्र प्रथमं नृगस्य कृकलासशरीरादपगमो निरूप्यते **एकदोपवन**मिति **षड्भिः** । स्त्रियो हि भगवन्माहात्म्यं दृष्टवत्यः, बालकास्तु न जानन्तीति तेभ्य एवानर्थ उत्पत्स्यत इति ब्राह्मणातिक्रमो न कर्तव्य इति तान् बोधयितुं तद्द्वारैव नृगमोक्षो निरूप्यते । **एकदा** सर्व एव बालकाः क्रीडार्थं द्वारकाया उपवनं जग्मुः । दुर्गादुत्तीर्य पुराणद्वारका उपवनत्वेन स्थिता, 'क्रीडायां गुप्तस्थान'मिति रक्षकैर्निरुद्धमप्युपवनं यदुकुमारकाः रक्षकैरनिरोध्याः जग्मुः । तत्र भगवत्पुत्राणां विशेषतो नामान्याह **साम्बप्रद्युम्ने**ति । विहर्तुमेव गताः । साम्बोऽग्रेऽनर्थहेतुरिति स एव मुख्य उपदेष्टव्य इति प्रथमं निर्देशः । प्रद्युम्नः सर्वमान्यो महासमर्थः । तथापि नृगोद्धारे न समर्थ इति वक्तुं निरूपितः । चारुस्तेषामेव दशमः । भानुर्नाग्नजित्याः प्रथमः । गदादयो

भ्रातरः ॥ १ ॥ क्रीडां प्रस्तावनार्थमुक्त्वा प्रासङ्गिकमाह **क्रीडित्वेति**। समुद्रतीरस्थाने मिष्टं जलं दुर्लभमिति जलान्वेषणार्थं प्रवृत्ताः, कूपास्तत्र सम्भवन्तीति । **ते** बालका अनभिज्ञाः अभिज्ञाश्च प्रवेशं न लभन्त इति जलं विचिन्वन्तः कूपे अद्भुतं विचित्रं सत्त्वं ददृशुः । सर्वलोकविलक्षणत्वादद्भुतं तं वर्णयति । **अनेन भगवदीयानां क्रीडास्थाने पूर्वकृतो धर्मः साधनतामापन्न** इति निरूपितम् । सर्वस्यापि धर्मस्यैतावन्मात्रे उपक्षयात् ॥२॥ **कृकलास**मिति जातिविशेषः । स भवति प्रायेण सूक्ष्मः । गिरिनिभत्वं तस्याश्चर्यकरम् । ततस्तान् दृष्ट्वा समारोढुमियेष, न तु शक्तः, अर्धस्थाने समागत्य पुनः पुनः पतति । ततस्तददृष्टवशात् हन्तव्येऽपि शरीरे दयोत्पन्नेति **तेषामुद्धारार्थं** प्रयत्नमाह **तस्य चोद्धरणे यत्नं चक्रुरि**ति । चोऽपीत्यर्थे । वस्तुतस्तु हन्तव्य एव । 'अपि कृकलास'मित्यत्र श्रुतौ तथा निरूपणात् । ततो हस्तात्पतितं तं बहव एव वाधस्तादुत्तीर्य कृपया पीडिताः ॥ चर्मभिः चर्मोपरि तं पातयित्वा परितस्तान्तवपाशान् बद्ध्वा सर्वतः स्थिताः तदुद्धारे यत्नं कृतवन्तः । तथापि समुद्धर्तुं नाशक्नुवन्, अलौकिकत्वात् । **अलौकिके भगवानेव साधन**मिति मत्वा कृष्णायाचख्युः । यद्यपि विशेषसाधनैरुद्धर्तव्यो भवति, तथापि उत्सुकाः सन्तः कृष्णायैवाचख्युः । **औत्सुक्यं चित्तोल्लासो विवेकासहिष्णुः** ॥ ४ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । एकस्मिन् काले सांबप्रद्युम्नचारुभानुगदा आदिर्येषां **ते** यदूनां कुमारका बालका विहर्तुं क्रीडितुं उपवनम् कृत्रिमं वनं जग्मुः हे राजन् ॥ १ ॥ तत्र वने सुचिरं बहुकालं यथा भवति तथा क्रीडित्वा पातुमिच्छंतो जलं विचिन्वंतो मगयंतो निरुदके जलहीने कूपेऽद्भुतमाश्चर्यरूपं सत्त्वं प्राणिविशेषं ददृशुः ॥ २ ॥ **गिरिनिभं** पर्वतसदृशं कृकलासं शरटं वीक्ष्य दृष्ट्वा चकितचिताः कृपयान्विता युक्तास्ते बालकाः तस्य कृकलासस्योद्धरणे बहिर्निष्कासननिमित्तं यत्नमुद्यमं चक्रुः ॥ ३ ॥ तथाहि चर्मजैः चर्ममयैः तांतवैः तंतुमयैः पाशैः पतितं तं सत्त्वं बद्ध्वाऽर्भका बालाः समुद्धर्तुं बहिरानेतुं न समर्था आसन् तदोत्सुका हर्षिताः कृष्णायाचख्युः ॥ ४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

पञ्चदशेऽध्याये । कारिकासु । तत्त्वैरिति । अष्टाविंशतिभिरध्यायैरित्यर्थः । **इन्द्रियशोधिके**ति । तामसप्रकरणीयलीलाश्रवणे तामसाहङ्कारकार्यभूतात्मकत्वात् देहस्य शुद्धिर्भवति, एवं राजसलीलाश्रवणे राजसाहङ्कारकार्येन्द्रियशुद्धिर्भवति । तथा सात्त्विकलीलाश्रवणे सात्त्विकाहङ्कारकार्यस्य मनसः शुद्धिर्भवतीत्याशयेनेदमुक्तं **नातियत्ने**ति । तामसानामाग्रहस्य दृढत्वात् **तन्निरोधे भूयान्** यत्नः, राजसे न तथेत्यर्थः । **चतुर्धे**ति । अत्र षड्भिः षड्भिरिति वीप्सया वारत्रयमिदं ज्ञेयम् । तथा च, प्रमेयं साधनं फलं च षड्भिः षड्भिरध्यायैर्निरूप्यते, अन्ते त्रिभिरध्यायैर्धर्मिणो निरूप्यन्ते । एवं **चतुर्धे**त्यर्थः । षण्णामध्यायानामर्थमाहुः **अर्थ** इति । एवं षडध्याया इति । अनेन प्रकरणविभागोप्युक्तः । प्रमेयसाधनफलैरर्थधर्मकामाः, धर्मिप्रकरणेन त्रिविधो मोक्षश्चोक्त इति । **प्रकीर्णके**ति । प्रकीर्णकानि यान्याख्यानानि तद्वती प्रक्रियेत्यर्थः । अध्यायविभागपक्षमाहुः नात्रेति । **अत्र** पूर्वोक्तकारिकाया अध्यायविभाजकत्वपक्षे कारिकोक्तः क्रमो न विवक्षितः, किन्तु धर्मयुक्तो नृगः पूर्वं निरूपितः, ततः कामयुक्ता गोप्यः, ततोऽर्थयुक्तो मिथ्यावासुदेवः, ततो मोक्षत्रयमित्यर्थः । **प्रमाणेनैवे**ति । नृगः प्रमाणे श्रद्धाधिक्यात् तत्पोषितः, गोप्यो वेदात्मकबलदेवरमणात् प्रमाणपोषिताः, पौण्ड्रकोपि वेदात्मकमहादेववरपुष्टत्वात् प्रमाणपोषितः । त्रिविधमोक्षाधिकारिण आहुः **द्विविद** इति । द्विविदो 'ये च प्रलम्बे'ति श्लोके गणित एव । लक्ष्मणाया आवेशद्वारापि हस्तिनापुरविकर्षणेन भगवन्माहात्म्यज्ञानं मोक्षः । नारदस्य बहुनायिकारमणसंशयनिवृत्तिपूर्वकं भगवद्धर्मज्ञानं मोक्ष इति ज्ञेयम् । प्रकरणविभागपक्षमाहुः **एतेषा**मिति । अत्र कारिकोक्तः क्रम एव ज्ञेयः । षड्भिरध्यायैरर्थः, ततः षड्भिर्धर्मः, एकेन साधारणः, पञ्चभिर्विशिष्टः, ततः षड्भिः कामः, ततस्त्रिभिर्मोक्ष इत्यर्थः । **अर्थोऽनर्थ** इति । नृगेन दानार्थं योजितोप्यर्थोऽनर्थरूप एव जात इत्यर्थः । **तस्यापी**ति । अनर्थत्वं प्राप्तस्याप्यर्थो भगवानेव । 'चक्षुषश्चक्षु'रितिवदर्थस्याप्यर्थरूपो भगवान्, परन्तु फले कामिते सति स भगवान्निरुद्धो भवति । फलकामनायां सत्यां पुरुषार्थत्वेन स्वयं न प्रकटो भवति, किन्तु अनर्थरूपं पशुपुत्रादिकं ददातीत्यर्थः । यादवानां शिक्षाकरणे हेतुमाहुः **राजसा** इति । सात्त्विकधर्मेषु न निपुणाः । अतः शिक्ष्यन्ते इत्यर्थः । भगवाननिरुद्धरूप इति । राजसप्रकरणे प्रद्युम्नरूपः, सात्त्विकेऽनिरुद्धरूप इति पूर्वं निरूपितम् । **एकदोपवन**मित्यत्र । **तेभ्य एवानर्थ** इति । मौसलरूपोनर्थ इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं राजसभक्तानां निरोधो विनिरूपितः । **अथो** सात्त्विकभक्तानां **निरोधो** विनिरूप्यते ॥ १ ॥
चतुःषष्टितमेऽध्याये कृष्णेन नृगमोचनम् । ब्रह्मस्वहारिदोषस्य वर्णनं च निरूप्यते ॥ २ ॥

'राज्ञामेवं प्रायशः प्रमादो भवतीति स्वदृष्टान्तेन ज्ञेयम्' इति सूचयन् संबोधयति—राजन्निति । साम्बप्रद्युम्नादयो यदुकुमारका विहर्तुमेकदोपवनं जग्मुरित्यन्वयः ॥ १ ॥ तत्रोपवने सुचिरं बहुकालं क्रीडित्वा पिपासिताः तृषायुक्ता जलं

विचिन्वन्तः अन्वेषन्तः क्वचिन्निरुदके निर्जले कूपे अद्भुतं महत् सत्त्वं जन्तुं ददृशुः ॥ २ ॥ तं च गिरिनिभं पर्वतसदृशं कृकलासं वीक्ष्य विस्मितं मानसं येषां ते कृपायुक्तास्तस्य कूपादुद्धरणे निमित्ते यत्नं चक्रुः ॥ ३ ॥ तदेवाह—ते अर्भकास्तं कूपे पतितं कृकलासं चर्मभिर्वेष्टयित्वा तान्तवैः पाशैः रज्जुभिश्च बद्ध्वा प्रयतमाना अपि समुद्धर्तुं नाशक्नुवन्। तदा चोत्सुकाः उद्धारे चोत्साहयुक्ताः कृष्णायाचख्युः कथितवन्तः ॥ ४ ॥

अन्वितार्थप्रकाशिका

चतुःषष्टितमे कृष्णो नृगं शापादमोचयत्। अशिक्षयन्नृपान्दृप्तान् तत्र श्लोकाः कृताब्धयः (४१) ॥
उवाचत्रितयं (३) सप्तचत्वारिंशदनुष्टुभः (४७) ॥ ६४ ॥

एकदेति ॥ हे राजन्! साम्बप्रद्युम्नचारुभानुगदादयः यदुकुमारकाः विहर्तुमेकदोपवनं जग्मुः। एकदेत्यनेन क्रमो निरस्तः। तेनौचित्यादियं लीला प्रद्युम्नादीनां यौवनारम्भ एवानिरुद्धजन्मतः प्राग्बोध्या इति तोषिणी ॥ १ ॥ क्रीडित्वेति ॥ तत्रोपवने सुचिरं बहुकालं क्रीडित्वा पिपासिताः तृषायुक्ताः जलं विचिन्वन्तः अन्वेषयन्तः क्वचिन्निरुदके निर्जले कूपे अद्भुतं महत् सत्त्वं जन्तुं कृकलासं ददृशुः ॥ २ ॥ कृकलासमिति ॥ गिरिनिभं पर्वतसदृशं कृकलासं वीक्ष्य विस्मितं मानसं येषां ते कृपयाऽन्वितास्तस्य कूपादुद्धरणे निमित्ते यत्नं चक्रुः ॥ ३ ॥ चर्मजैरिति ॥ ते अर्भकास्तं कूपे पतितं कृकलासं चर्मजैश्चर्ममयैः तान्तवैः सूत्रमयैश्च पाशैः रज्जुभिः बद्ध्वा प्रयतमाना अपि अर्भकत्वात् समुद्धर्तुं नाशक्नुवन्। तदा चोत्सुकाः उद्धारे उत्साहयुक्ताः कृष्णायाचख्युः कथितवन्तः ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं चतुःषष्टितमेऽध्याये नृगोपाख्यानमाह ॥१॥ पिपासिताः तृषार्त्ताः जलं विचिन्वंतः सत्वं जंतुं विशेषं ॥२-३॥ चर्मभिः चर्मरज्जुमयैः तांतवैः सूत्ररज्जुमयैः ॥ ४-५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चतुःषष्टितमे पापात् कृष्णो नृगममोचयत्। शिक्षयन् दृप्तभूपालान् ब्रह्मस्वापहृतावघम् ॥ १ ॥

अथ दत्तापहारप्रयुक्तदुरितनिमित्तकृकलासजन्मभाजो नृगभूपतेस्तज्जन्मविमोचनात्मकं भगवच्चेष्टितमनुवर्णयति तत्र तावदुपोद्घातमाह ॥ एकदेति ॥ हे राजन्, एकदा एकस्मिन् समये, साम्बश्च प्रद्युम्नश्च चारुश्च भानुश्च गदश्च ते आदयो येषां ते, यदुकुमारकाः, विहर्त्तुं, उपवनं जग्मुः ॥ १ ॥ क्रीडित्वेति ॥ तत्रोपवने, सुचिरं बहुवेलं, क्रीडित्वा, पिपासितास्तृषिताः, अत एव, जलं विचिन्वन्तः सन्तः, कस्मिंश्चित् निरुदके जलवर्जिते, कूपे, अद्भुतं महत्त्वादुन्नतत्वाच्चाद्भुतावहमित्यर्थः। सत्त्वं जन्तुं, ददृशुः ॥ २ ॥ कृकलासमिति ॥ ते यदुकुमारकाः, गिरिनिभं पर्वततुल्यं, कृकलासं सरठं वीक्ष्य, विस्मितमानसाः, कृपया दयया, अन्विताः युक्ताः सन्तश्च, तस्य उद्धरणे यत्नं, चक्रुः ॥ ३ ॥ चर्मजैरिति ॥ चर्मजैः, तान्तवैस्तन्तुमयैः च, पाशैः रज्जुभिः, पतितं कूपे इति शेषः। कृकलासं, अर्भकाः बद्ध्वा, समुद्धरन्तः सन्तोऽपीति शेषः। समुद्धर्त्तुं, न अशक्नुवन् न प्रबभूवुः। ततः, उत्सुका आश्चर्याविष्टाः सन्तः, कृष्णाय, आचख्युः कूपपतितसत्त्वं तदुद्धारे स्वकृतप्रयासं च, शशंसुः ॥ ४ ॥

कृष्णप्रिया

श्रीशुकाचार्य जी ने कहा—राजन् परीक्षित! एक दिन यादव राजकुमार श्रीसाम्ब-प्रद्युम्नजी-चारु-भानुजी एवं गद आदि सब मिलकर घूमने के लिये उपवन में गये। उपवन में देर तक सब खेलते रहे; वहाँ उन्हें सबको प्यास लगी। यादव कुमारों ने इधर उधर सर्वत्र खोजते एक कूप देखा। उस कूप में जल तो नहीं था लेकिन एक विचित्र प्राणी देखा। वह पर्वताकार बड़ा एक गिरगिट था। गिरगिट को देखते ही सबको बड़ा आश्चर्य हुआ। कुमारों के हृदय करुणा से भर गये और वे पुनः उस गिरगिट को निकालने का प्रयत्न करने लगे। यादव कुमारों ने चर्म के और सूत के मजबूत तन्तुओं के तन्तुओं से बाँधकर प्रयत्न करने पर सफलता न मिली तब यदुकुमार आश्चर्यचकित होकर भगवान श्रीकृष्ण के समीप गये और सारा वृत्तान्त प्रभु को सुनाया ॥ १-४ ॥

[1]तत्र गत्वारविन्दाक्षो भगवान् विश्वभावनः । वीक्ष्योज्जहार वामेन तं करेण स लीलया ॥ ५ ॥

स उत्तमश्लोककराभिमृष्टो विहाय सद्यः कृकलासरूपम् ।
संतप्तचामीकरचारुवर्णः[2] [3]स्वर्ग्यद्भुतालंकर[4]णाम्बरस्रक् ॥ ६ ॥
[5]पप्रच्छ विद्वानपि तन्निदानं[6] जनेषु विख्यापयितुं मुकुन्दः ।
कस्त्वं महाभाग वरेण्यरूपो देवोत्तमं त्वां गणयामि[7] नूनम् ॥ ७ ॥
दशामिमां वा[8] कतमेन कर्मणा सम्प्रापितोऽह्य[9]तदर्हं सुभद्र[10] ।
आत्मानमाख्याहि विवित्सतां नो यन्मन्यसे [11]चेत्क्षममत्र वक्तुम् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—विश्वभावनः, भगवान्, अरविन्दाक्षः, तत्र आगत्य, वीक्ष्य, वामेन, करेण, लीलया, सः, तम्, उज्जहार॥५॥ उत्तमश्लोक कराभिमृष्टः, सद्यः, कृकलासरूपम्, सः, विहाय, संतप्तचामीकरचारुवर्णः, अद्भुतालङ्करणाम्बरस्रक्, स्वर्गी, बभूव ॥ ६ ॥ भगवान्, मुकुन्दः, विद्वान्, अपि, तन्निदानम्, जनेषु, विख्यापयितुम्, वरेण्यरूपः, हे महाभाग ! त्वम्, कः ! नूनम्, त्वाम्, देवोत्तमम्, गणयामि ॥ ७ ॥ हे सुभद्र ! कतमेन, कर्मणा, इमाम्, दशाम्, सम्प्रापितः, अतदर्हः, असि, च, क्षमम्, विवित्सताम्, नः, वक्तुम्, क्षमम्, यदि, च वक्तुम्, मन्यसे, तर्हि, आत्मानम्, आख्याहि ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

संतप्तं चामीकरं सुवर्णं तद्वद्वर्णो यस्य सः । अद्भुता अलंकारांबरस्रजो यस्य सः । स्वर्गी देवो बभूवेति ॥ ६-७ ॥ यद्यदि । क्षमं योग्यम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र कूपसमीपे । तं कृकलासम् ॥ ५ ॥ सः कूपोद्धृतः । सुवर्णमिति "चामीकरं स्वर्णहेममहाटकं वह्निजं तथा" इति कोशांतरात् ॥ ६ ॥ तस्य नृगस्य । विवित्सतां ज्ञातुमिच्छताम् । अत्राधुना ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स कृष्णः अरविन्दाक्षः तच्छ्रुत्वा विस्मयलीलयाऽरविन्दवत् प्रफुल्लदृष्टिरसन् तत्रागत्य वीक्ष्य च तं वामकरेण तत्रापि लीलया सहेलया समाकर्षणरूपयोज्जहार तत्र हेतुः विश्वभावनः सर्वपालनशीलः तत्र योग्यता भगवानिति ॥ ५ ॥ ततश्च सद्यः सर्वपापान्मुक्तः सद्गतिं प्रापेत्याह—स इति । उद्गतं तमो यस्मात्तादृशः श्लोकोऽपि यस्य यशःश्रवणेनापि संसारनिवृत्तेः यद्वा नामाभासादिनापि जगदुद्धारादुत्तमः उत्कृष्टः श्लोको यस्य तस्य भगवतः करेणाभिमृष्टः स्पृष्टः सद्यइति हेत्वन्तरनिरसनेन प्रारब्धभोगापेक्षा निरस्ता स्वर्गिलक्षणमाह—सन्तप्तेति अद्भुतेति च । यद्वा स्वर्गिविशेषविवक्षया विशिनष्टि, तत्पदद्वयेन, अत एव संशब्दश्चारुशब्दोऽद्भुतशब्दश्च अन्यत्तैः तत्र तद्वच्चारुवर्ण इति लेख्ये चारुशब्दाभावो लेखकभ्रमादिति ॥६॥ पप्रच्छेत्यर्द्धकम् मुकुन्द इति तन्मोचनाभिप्रायेण महान् भागो भाग्यं यस्य तत्सम्बोधनं महाभाग्यलक्षणमाह वरेण्यं सर्वश्रेष्ठतमं रूपं सौन्दर्य्यं यस्य सः अतो देवेषूत्तमं गणयामि अवकलयामि नूनं वितर्के ॥ ७ ॥ वा शोके हि निश्चये अतदर्हः ईदृग्दशाया अयोग्योऽपि असीति पाठः स्पष्टः तत्र हेतुः सुभद्र हे परममङ्गलेति कतमनेति पाठः समञ्जसः आत्मानमित्यर्द्धकम् विवित्सतां त्वत्तत्त्वं विविदिषतां नोऽस्माकं कर्म्मणि षष्ठी बहुत्वं परमाश्चर्य्येण सद्यस्तत्रागतानां यादवानामपेक्षया तत्र स्थाने नोऽस्मान् प्रति यदि क्षममिति वाक् चातुर्य्या गुह्यस्यापि प्रकाशनेच्छातः किं वा सर्वसद्गुणनिधेर्विनयस्वभावादेव अत एव न इति पुनर्बहुत्वम् ॥८॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स कृष्णो लीलयोज्जहार, यतो विश्वभावन इच्छामात्रेण विचित्रजगत्स्रष्टा, यतो भगवान् कारुण्याद्यशेषगुणप्रकटनपर इत्यर्थः । अरविन्दाक्ष इति कृपया वीक्षणेनाक्ष्णोः प्रसारणविशेषेण साक्षादरविन्दत्वापत्तेः, किंवा दृष्टिमात्रेण तस्य सर्व्वताप-

---

[1] तत्र गत्वा—वीर. विज. ; तत्राऽऽगत्य—श्रीधर. वंशी. जीव. विश्व. । [2] तुल्य—श्रीधरः. टि. । [3] स्वर्गोचि—विज. । [4] करणोपपन्नः—प्रा. पा. । [5] भूत्वा मुकुन्दस्य पदारविन्दं ननाम मूर्ध्ना पतितो धरण्याम्—अधिकः विज. । [6] तस्य कर्म—विज. । [7] म—वीर. । [8] त्वं—विज. । [9] स्व—श्रीधर. वंशी, जीव. विश्व. ; ह्य—वीर. विज. । [10] सुदीप्तिः—वीर. ; सुप्रभः—च. पु. टि. ; सुभद्रः—विज. । [11] नः—श्रीधर. वंशी. जीव. वीर. विश्व. ; ऽङ्गः—विज. ।

हरणात् । करेणेति साक्षात्तेनैव किंवा तेन तत्पाशग्रहणद्वारा ॥ ५ ॥ ततश्च सर्व्वपापान्मुक्तः सद्गतिं प्रापेत्याह—स इति । उद्गतं तमो यस्मात्तादृशः श्लोकोऽपि यस्य, यशःश्रवणादिना संसारार्त्तिनिवृत्तेः यद्वा, नामाभासादिनापि जगदुद्धारादुत्तम उत्कृष्टः श्लोको यस्य तस्य भगवतः करेणाभिमृष्टः स्पृष्टः सन्निति हेत्वन्तरनिरसनेन प्रारब्धभोगापेक्षा निरस्ता; स्वर्गिलक्षणमाह—सन्तप्तेति । अद्भुतेति च अलंकरणानि किरीटकुण्डलादीनि; यद्वा, स्वर्गितो विशेषविवक्षया विशिनष्टि तत्पदद्वयेन । अतएव सं-शब्दश्चारु शब्दोऽद्भुत-शब्दश्च । अन्यत्तैर्व्याख्यातम् । तत्र तद्वच्चारुकर्ण इति लेख्ये चारु-शब्दाभावो लेखकभ्रमात्, तथालंकरणेति लेख्येऽलंकारेति च, किंवा तदर्थमात्रव्याख्यानादिति, अथवा सन्तप्तचामीकरादपि चारुवर्णो यस्य सः ॥ ६ ॥ मुकुन्द इति विख्यापनद्वारा ब्रह्मस्वापहारादिपापतो लोकानां मोचनाद्यभिप्रायेण । महान् भागो भाग्यं यस्य तत्सम्बोधनम् । महाभागलक्षणमाह—वरेण्यं सर्व्वश्रेष्ठतमं रूपं सौन्दर्य्यं यस्य सः, अतो देवेषूत्तमं गणयामोऽवकलयामः; नूनं वितर्के ॥ ७ ॥ वा शोके, हि अपि, अतदर्हं ईदृग्दशाया अयोग्योऽपि वा; असीति पाठः स्पष्टः । पाठान्तरे स्पष्टम् । तत्र हेतुः—सुभद्र ! हे परममंगलेति; अतो विवित्सताः त्वत्तत्त्वं वेत्तुं लब्धुं ज्ञातुमिच्छतामित्यर्थः । इच्छतां नोऽस्माकम्, कर्म्मणि षष्ठी, बहुत्वं परमाश्चर्य्येण सद्यस्तत्रागतानां यादवानामपेक्षया वा, अत्र स्थाने नोऽस्मान् प्रति; यदि क्षममिति वाक्चातुर्य्या गुह्यस्यापि प्रकाशनार्थं सर्व्वसद्गुणनिधेर्विनयस्वभावादेव । अतएव न इति पुनर्बहुत्वम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्रेति । विश्वं भावयति अभ्यधिकं करोतीति तथा वामेन करेण लीलयैव तमुज्जहार बहिर्निष्कासितवान् ॥ ५ ॥ स इति । स उद्धृतः उत्तमश्लोकस्य करेण अभिमृष्ट इति हेतुगर्भमिदं सन्तप्तं चामीकरं सुवर्णं तद्वद्वर्णो यस्य सः अद्भुताः अलङ्करणादयो यस्य सः स्वर्गी देवो बभूव ॥ ६ ॥ पप्रच्छेति । तस्य कृकलासजन्मनो निदानं कारणं जानन्नपि मुकुन्दः तज्जनेषु ख्यापयितुं प्रसिद्धीकर्त्तुं पप्रच्छ, प्रश्नमेवाह—कस्त्वमिति । हे महाभाग ! वयं तु त्वां ध्रुवं देवश्रेष्ठं गणयाम ॥ ७ ॥ कतमेन केन वा कर्मणा इमां कृकलासस्वरूपां दशामवस्थां प्रापितोऽसि तत्र हेतुः, अतदर्हा एतदवस्थानर्हा शोभना दीप्तिर्यस्य सः । आत्मानमिति । विवित्सतां 'वेत्तुमिच्छतां नोऽस्मभ्यमात्मानमाख्याहि यद्यदि तद्वक्तुं क्षमं योग्यं तर्ह्याख्याहीति सम्बन्धः ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

विवित्सतां ज्ञातुकामानां यद्यदि ॥ ८–९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वर्गी देवो बभूव ॥ ६–७ ॥ विवित्सतां विविदिषतां कर्मणि षष्ठी आर्षी यदि क्षमं योग्यम् ॥ ८–९ ॥

गूढार्थदीपिनी

श्रीकृष्णस्य करेण अभिमृष्टः स्पृष्टः सन् रूपं विहाय स स्वर्गी देवो बभूवेति योज्यम् । चामीकरं सुवर्णं तद्वत् सुन्दरवर्णो यस्य ॥ ६ ॥ तन्निदानं कारणं विद्वान् जानन्नपि प्रचारयितुम् पप्रच्छ । वरेण्यम् आदरणीयम् ॥ ७ ॥ हे सुभद्र पुण्यमूर्ते । अतदर्हः एतद्दशानर्हः । नोऽस्माकमग्रे यत् यदि वक्तुं क्षममुचितं मन्यसे तर्हि कथयेत्यन्वयः । अत्र अधुना आत्मानं स्वप्राक्तनं वृत्तं कथय ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सन्तप्तसुवर्णवद्वर्णो यस्य सः अद्भुता अलङ्करणा वरस्रजो यस्य सः स्वर्गी देवो बभूव ॥ ६–७ ॥ यत् यदि क्षममाख्यातुं योग्यं मन्यसे तर्हि आख्याहि ॥ ८–१० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदा भगवान् योनित एव तदुद्धारं कृतवानित्याह तत्र गत्वेति । दृष्ट्यैव सर्वतापहारकः भगवान् सर्वसमर्थः विश्वमेवानुभावयतीति उद्धारकरूपमवलम्ब्यागत इति तदुद्धारोऽपि तस्य युक्त एव । उद्धारमाह वीक्ष्योज्जहारेति । ज्ञात्वास्य कर्मभोगक्षयो जात इति । वामेन करेणेति । लीलां सामर्थ्यातिशयं च ज्ञापयितुम् । वामो हस्तः दैत्यहितकारी, दक्षिणो देवानामिति देवपक्षपातिना तदुद्धाराभावः सूचितः । लीलयेति । स्वस्य कारणाभावादपि यथा अन्या लीला कदाचिद्धर्ममपि बाधते ॥ ५ ॥ ततो यज्जातं तदाह स उत्तमश्लोकेति । करेणाभिमृष्टः भगवत्स्पर्शेन कारणदोषे निवृत्ते उपष्टम्भकाभावात् (तत्) शरीरे पतिते स्वर्गोपभोगयोग्यं शरीरं प्राप्तवानिति तद्वर्णयति संतप्तेति । आवर्त्यमानसुवर्णवर्णः । स्वर्गि स्वर्गसम्बन्धि स्वर्गोऽस्यास्तीति । स्वर्गिणामपि वा अद्भुतानि अलङ्करणान्यम्बराणि स्रजश्च यस्मिन् । तादृशो जात इत्यर्थात् बभूवेति ।

अस्तिभवत्योः सर्वत्र प्रयोगात् ॥ ६ ॥ ततो निर्धार्य स्वरूपं ज्ञापयित्वा प्रेषणीय इति स्वतः **कथने** विश्वासो न जायेतेति **तद्द्वारैव** वक्तुं तद्वृत्तान्तं पप्रच्छ । ज्ञात्वा प्रश्नो न **कर्तव्य** इति सर्वेषां सामान्यनिरोधं कर्तुं अयुक्तमार करोतीति **विद्वानपी**त्युक्तवान् । **विधिरत्र प्रमेये न नियामक इति न भगवतो विहितं निषिद्धं वा किञ्चिदस्ति** । वचनस्यापि प्रयोजनमाह जनेषु विख्यापयितुमिति । तस्य दानं लोके विख्यापनीयम्, अन्यथा 'धर्मः क्षरति कीर्तना'दिति तस्य धर्मक्षयो भवेत् । भगवता पृष्टेन तु वक्तव्यमेव । **नन्वेतदपि किमर्थमिति चेत्**, तत्राह **मुकुन्द** इति । **अग्रे मोक्षो देयः**, स च **कीर्तिमत एव भवतीति** कीर्तिख्यापनार्थं निरोधार्थं वा । अतिकीर्तिमानन्यत्र न प्रवर्तत इति **निरोधानन्तरमेव** मुक्तिलीलेति । प्रश्नमाह **कस्त्वं महाभागे**ति । भाग्यं धर्मस्योत्तमं तेजः तदुपकरोति सर्वत्र, महद्भाग्यं यस्येति । **महाभागे**ति सम्बोधनमकस्मादेवंभावे त्व सुकृतमस्तीति ज्ञापितम् । **वरेण्यरूप** इति । सहजमेतन्न रूपम्, अत एवं **ज्ञायते** किञ्चिदुत्कृष्टं कर्मास्तीति, अन्यथा अदृष्टं स्वधर्मं कथं वदेत्, कथिते स्वर्गो न भविष्यतीति तच्छङ्कां निवारयितुमाह **देवोत्तमं त्वां गणयामि नून**मिति । देवेषु स्वर्गः प्रतिदिनः, तत्राप्युत्तमेषु, तत्राप्यहं गणयामि, नहि मद्गणितं कश्चिदन्यथा कुर्यात् ॥ ७ ॥ दोषोऽपि वक्तव्य इत्याह **दशामिमां वे**ति । उत्तमस्य अपकृष्टं कर्म न सम्भवति । येन कृकलासरूपं भवेत् । अत उत्कृष्टमेव कर्म प्रकारविशेषापन्नं सत्कर्मैव किञ्चिद्भविष्यतीति तं प्रकारं श्रोतुं प्रश्नः **कतमेने**ति । सम्यक् प्रापणं बहुकालस्थानं तत्र सूचयति । ननु जायन्ते निकृष्टेष्वप्युत्कृष्टसुखजनकानि कर्माणि, उत्कृष्टेष्वपि निकृष्टभावजनकानि । तस्मात् प्रश्नो व्यर्थ इत्याशङ्क्याह **अतदर्ह** इति । देवगत्योत्कृष्टत्वमिति चेत्, तत्राह **सुभद्रे**ति । सुभद्रस्य भद्रं स्वाभाविकम्, अभद्रमेव वैशेषिकमिति । किञ्च । **आत्मानं** पूर्वसिद्धमाख्याहि । **विवित्सता**मिति । त्वन्मुखतो वेदितुमिच्छास्माकम्, नतु स्वतः । लौकिकन्यायेन माहात्म्यज्ञानाभावे सङ्कोचान्न वदिष्यतीत्याह **यन्मन्यसे नः क्षममत्र** वक्तुमिति । नोऽस्माकं श्रोतुं क्षमं मन्यसे । क्षमत्वेऽपि अत्र वक्तुं चेन्मन्यसे, पञ्चानामग्रे तदा वक्तव्यमिति भावः ॥ ८ ॥

श्रीसुबोधिनी-सारः

अरविंदाक्षः पद्मनेत्रो भगवान् विश्वपालकः तत्रागत्य कूपे तं दृष्ट्वा **वामेन करेण** हस्तेन लीलयैव स उज्जहार बहिरानिन्ये ॥ ५ ॥ उत्तमश्लोकस्य हरेः करेणाभिमृष्टः संस्पृष्टः स जंतुः सद्यः तत्कालमेव कृकलासरूपं शरटदेह विहाय त्यक्त्वा संतप्तं शुद्धं चामीकरं सुवर्णं तद्वत् चारुवर्णो यस्याद्भुता अलंकरणांबरस्रजो भूषणवस्त्रमाला यस्य स स्वर्गी देवो बभूवेति शेषः ॥ ६ ॥ तस्य कृकलासस्य निदानमादिकारणं विद्वान् जानन्नपि मुकुंदः श्रीकृष्णो जनेषु प्रकटयितुं पप्रच्छ हे महाभाग त्वं कोसि वरेण्यं सुंदरं रूपं यस्य स देवोत्तमं त्वामहं गणयामि जानामि नूनमेव ॥ ७ ॥ हे सुभद्र अतदर्ह एतद्दशाऽयोग्यस्त्वं कतमेन कर्मणा इमां दशां शरटयोनिरूपां प्रापितोसि यत् यदि नोस्मान् वक्तुं क्षमं योग्यं मन्यसे तर्हि विवित्सतां वेत्तुमिच्छतां नोस्माकं चतुर्थ्यर्थे षष्ठी आत्मानमाख्याहि वर्णय ॥ ८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तत्र गत्वेत्यत्र । **वामो हस्त** इति । कृकलासस्य आसुरत्वाद्वामेनैव तदुद्धारणमिति भावः । **स्वस्ये**ति । यद्यपि स्वस्य कारणं प्रयोजनं नास्ति, तथापि यथान्या लीला कदाचिद्धर्मं बाधते, तथेयमपि धर्मबाधिका लीला । कृतेति शेषः । **स उत्तमश्लोक** इत्यत्र । **तादृश** इति । एतादृशरूपवान् जात इति फलितार्थकथनम् । **बभूवेती**ति । तादृशशरीरप्राप्तो बभूवेत्यन्वय इत्यर्थः । **कस्त्वमि**त्यत्र । **अन्यथे**ति । वरेण्यरूपपदस्योत्कृष्टकर्मप्रश्नाभिप्रायकत्वाभावे इत्यर्थः । **यन्मन्यसे** इत्यस्याभासे । **लौकिके**ति । भगवतो माहात्म्यज्ञानाभावे 'नव गोप्यानि सर्वथे'ति लौकिकन्यायेन सङ्कोचाद्धेतोस्तादृशं कर्म न वदिष्यति । माहात्म्यज्ञाने तु भगवति दासस्य को वा सङ्कोच इति ज्ञात्वा वदेदिति भावः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

विश्वं भावयति पालयति इति विश्वभावनः । अतस्तस्याप्युद्धारे पालनं युक्तमेवेति सूचितम् । दृष्ट्यैव तापनाशकत्वं सूचयन्नाह—अरविन्दाक्ष इति । उद्धारे सामर्थ्यमाह—भगवानिति । तत्रागत्य स कृष्णस्तं कृकलासं वामेन करेण लीलया अनायासेनैवोज्जहार कूपाद्बहिर्निष्कासितवान् ॥ ५ ॥ स उद्धृतो जन्तुः उत्तमश्लोक अविद्यानिवर्तको भगवांस्तस्य करेणाभिमृष्टः स्पृष्टः, अतः पापस्य निवृत्तत्वात् सद्यः कृकलासरूपं विहाय सन्तप्तं यच्चामीकरं सुवर्णं तद्वच्चारुः सुन्दरो वर्णो यस्य सः, तथाऽद्भुता अलङ्करणादयो यस्य स तथा स्वर्गी देवो बभूवेति शेषः ॥ ६ ॥ तस्य कृकलासजन्मनो निदानं कारणं विद्वान् जानन्नपि मुकुन्दः जनेषु तत्ख्यापयितुं प्रसिद्धीकर्तुं तं पप्रच्छ । तदाह—क इति । 'पुण्यातिशयंविनैतद्रूपं दुर्लभम्' इत्याशयेन संबोधयति—महाभागेति । वरेण्यं अभीष्टं रूपं यस्य स त्वं क इति । नूनं निश्चयेनाहं तु त्वां देवोत्तमं गणयामि मन्ये ॥ ७ ॥ हे सुभद्र मङ्गलमूर्ते ! अतदर्हः एतद्दशाप्राप्त्ययोग्योऽपि त्वमिमां दशां कृकलासयोनिं कतमेन कर्मणा प्रापितस्तत्तथाऽऽत्मानं स्वप्राक्तनं रूपं च विवित्सतां त्वन्मुखाद्वेत्तुमिच्छतां नोऽत्र अस्माकमग्रे वक्तुं क्षमं यत् यदि मन्यसे तर्हि आख्याहीत्यन्वयः ॥ ८ ॥

अन्वितार्थप्रकाशिका

तत्रेति ।। विश्वभावनः अरविन्दाक्षः भगवान् तत्रागत्य तं कृकलासं वामेन करेण लीलया उज्जहार कूपाद्बहिर्निष्कासितवान् ।। ५ ।। स इति ।। स उद्धृतो जन्तुः उत्तमश्लोकस्य भगवतः करेणाभिमृष्टः स्पृष्टः अतः पापस्य निवृत्तत्वात् सद्यः कृकलासरूपं विहाय सन्तप्तं यच्चामीकरं सुवर्णं तद्वच्चारुः सुन्दरो वर्णो यस्य सः तथाद्भुता अलङ्करणादयो यस्य स तथा स्वर्गी देवो बभूवेति शेषः ।। ६ ।। पप्रच्छेति ।। तस्य कृकलासजन्मनो निदानं कारणं विद्वान् जानन्नपि मुकुन्दः जनेषु तत्ख्यापयितुं प्रसिद्धीकर्तुं तं पप्रच्छ । हे महाभाग ! वरेण्यम् अभीष्टं रूपं यस्य स त्वं क इति नूनं निश्चयेनाहं तु त्वां देवोत्तमं गणयामि मन्ये ।। ७ ।। दशामिति ।। हे सुभद्र मङ्गलमूर्ते ! अतदर्हः एतद्दशाप्राप्त्ययोग्योऽपि त्वमिमां दशां कृकलासयोनिं कतमेन कर्मणा प्रापितस्तत् तथात्मानं स्वप्राक्तनं रूपं च विवित्सतां त्वन्मुखाद्वेदितुमिच्छताम् । इडभाव आर्षः । नोऽत्र अस्माकमग्रे । शेषे षष्ठी । वक्तुं क्षमं यत् यदि मन्यसे तर्हि आख्याहि ।। ८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अभिमृष्टः स्पृष्टः संतप्तं चामीकरं कांचनं तद्वत् चारु सुंदरो वर्णो यस्य । अद्भुता अलंकारादयो यस्य सः स्वर्गी अमरोऽभवत् ।। ६-७ ।। तस्याः कृकलासरूपायाः दशाया अर्हं उचिस्तदर्हस्तथाभूतो न भवतीत्यतदर्हः विवित्सतां ज्ञातुमिच्छतां यद्यदि क्षमं योग्यं ।। ८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्रेति ।। अरविन्दाक्षः कमलनयनः, विश्वं भावयत्यभ्युदितं करोतीति तथाभूतः, भगवान् सः श्रीकृष्णः, तत्र आगत्य तं वीक्ष्य, लीलया, वामेन करेण, उज्जहार कूपाद्बहिः निष्कासितवान् ।। ५ ।। स इति ।। उत्तमश्लोकस्य भगवतो यः करस्तेनाभिमृष्टः स्पृष्टः, सः कृकलासः, सद्यः, कृकलासरूपं विहाय, संतप्तं पुटपाकशोधितं यच्चामीकरं सुवर्णं तस्येव चारुर्वर्णो यस्य सः, अद्भुताः अलंकरणाम्बरस्रजो यस्य सः, तत्र अलंकरणान्याभरणानि, अम्बराणि वस्त्राणि, स्रजः पुष्पादिमालाः, स्वर्गी देवः, बभूवेति शेषः ।। ६ ।। पप्रच्छेति ।। मुकुन्दो मुक्तिप्रदः श्रीकृष्णः, विद्वान् अपि तस्य कृकलासजन्मभाक्तकारणं जानन्नपि, जनेषु विख्यापयितं, तन्निदानं तस्य कृकलासजन्मनः कारणं, पप्रच्छ । हे महाभाग, वरेण्यं सर्वोत्तमं रूपं शरीरं यस्य सः, त्वं कः । वयं तु त्वां, देवोत्तमं देवेषु श्रेष्ठं, गणयाम । नूनम् ।। ७ ।। दशामिति ।। हे सुभद्र मङ्गलरूप, अतदर्हः इमां कृकलासजन्मप्राप्तिरूपां दशां प्राप्तुमयोग्यः, त्वं कतमेन कर्मणा, इमां दशां, संप्रापितः असि । यत् यदि, अत्र नोऽस्मभ्यं, वक्तुं क्षमं योग्यं मन्यसे, तर्हि, विवित्सतामेतद्वेत्तुमिच्छतां, नोऽस्माकं, अस्मान् प्रतीत्यर्थः । आत्मानं, आख्याहि ।। ८ ।।

कृष्णप्रिया

विश्व के प्राणदाता करुणानिधान अरविन्दलोचन भगवान् द्वारिकानाथ श्रीकृष्ण कूप समीप पधारे। प्रभु ने गिरगिट को देखा और अपने वाम करकमलों से स्पर्श करके आसानी से उसको बाहर निकाल दिया ।।५।। राजन् उत्तमश्लोक भगवान् द्वारिकाधीशजी के करारविन्दों का स्पर्श होते ही वह गिरगिट तो न रहा लेकिन एक स्वर्गीय अमरवत् शरीर बन गया। तपाये हुए सुवर्ण के समान शरीर की उज्ज्वल तेजोमय कान्ति चमक रही थी। उसके दिव्य शरीर पर दिव्यालङ्कार दिव्य वस्त्र और दिव्य कुसुममालाएँ शोभा दे रही थी ।। ६ ।। भगवान् श्रीकृष्णचन्द्रजी सर्वज्ञ हैं, लेकिन ऐसे दिव्य पुरुष को गिरगिट प्राणी का शरीर क्यों मिला–इस रहस्य को सर्वसामान्यजन भी जान ले इस आशय से उन दिव्य पुरुष से भगवान ने अज्ञात की तरह प्रश्न पूछा कि हे महाभाग हे महापुरुष ! आप अवश्य कोई असाधारण आत्मा हैं, कोई देव पुरुष हैं। यदि संकोच का कोई कारण न हो तब रहस्य बताइये ।। ७ ।। हे भद्रपुरुष ! हे पुण्यशील सज्जन ! किस जन्म के कर्मफल से आपको इस शरीर गिरगिट की योनि मिली ? आपके समान सज्जन ऐसी योनि के लिये योग्य नहीं है। हम सब आपका जीवन वृत्तान्त जानना चाहते हैं। यदि कोई गोप्य बात न हो तब ही कहिये ।। ८ ।।

[1]श्रीशुक उवाच

इति स्म राजा सम्पृष्टः कृष्णेनानन्त[2]मूर्तिना । [3]माधवं प्रणिपत्याह किरीटेनार्कवर्चसा ॥ ९ ॥

नृग उवाच

नृगो नाम [4]नरेन्द्रोऽहमिक्ष्वाकुतनयः प्रभो । [5]दानिष्वाख्यायमानेषु यदि ते कर्णमस्पृशम् ॥ १० ॥
किं नु तेऽविदितं नाथ सर्वभूतात्मसाक्षिणः । कालेनाव्याहतदृशो वक्ष्येऽथापि तवाज्ञया ॥ ११ ॥
यावत्यः सिकता [6]भूमेर्यावत्यो दिवि तारकाः । यावत्यो वर्षधाराश्च तावतीरददां[7] स्म गाः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—अनन्तमूर्तिना, कृष्णेन, इति, स्म, सम्पृष्टः, अर्कवर्चसा, किरीटेन, प्रणिपत्य, माधवम्, आह ॥ ९ ॥ प्रभो, अहम्, इक्ष्वाकुतनयः नृगः, नाम, नरेन्द्रः, दानिषु, आख्यायमानेषु, यदि, ते, कर्णम्, अस्पृशम्, तर्हि, आसम् ॥ १० ॥ सर्वभूतात्मसाक्षिणः, कालेन, अव्याहतं, दृशः, ते, हे, नाथ, किम्, नु, अविदितम्, अथ, अपि, तव, आज्ञया, वक्ष्ये ॥ ११ ॥ नाथ ! भूमेः, यावत्यः, सिकताः, दिवि, यावत्यः, तारकाः, च, यावत्यः, वर्षधाराः, तावतीः, गाः, अददाम्, स्म ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यदि ते कर्णमस्पृशमित्यसंदेहे संदेहवचनं यदि वेदाः प्रमाणं स्युरितिवत् । कर्णपथं नूनं प्राप्तः स्यामित्यर्थः ॥१०॥ किंच किं न्विति । सर्वेषां भूतानामात्मनो बुद्धेः साक्षिणस्तेऽविदितं किं नु न किंचित् ॥ ११-१३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अनंतमूर्तिनेत्युक्त्या तद्दानकालेऽपि भगवान्मूर्त्यन्तरेणासीदिति ध्वनितम् । प्रश्नस्तु मनुष्यनाट्याभिप्रायेण श्रीमदमत्तजनशिक्षणार्थमेवेति भावः ॥ ९ ॥ इत्यर्थ इति— श्रीमताऽवश्यं मम नाम श्रुतमेवेति भावः ॥ १० ॥ श्रीहरेस्त्रिकालज्ञतामाह—किञ्चेति । यद्यपि ते नाविदितमथापीत्यन्वयः । 'नु वितर्कानुनययोः' ॥ ११ ॥ सिकता रजांसि । यद्वा—सिकता द्वीपाः, अदिवि मर्त्यलोके भारते तारका नद्यः, वर्षधाराः पर्वताः २७४५७ वामरीत्या सप्तविंशसहस्रचतुःशतसप्तपंचाशद्गावो नृगेण दत्ताः, यथाश्रुतार्थग्रहणे गवां स्थितिरपि दुर्घटास्तीति ज्ञेयम् । अददां ददातेर्लङ उत्तमपुरुषैकवचनम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्म प्रसिद्धो राजेति प्रागवस्थामारोप्योक्तम् । आधुनिकावस्थाया विशेषाव्यक्तेः आनन्दमूर्त्तिना सुखघनविग्रहेणेति दर्शनमात्रेण तत्रापि प्रश्नेन तस्याप्यानन्दाविर्भावः सूचितः अनन्तमूर्त्तिनेति पाठे नित्यविभुविग्रहेणेत्यर्थः । ततश्च तस्य तादृशत्वस्फूर्त्या चमत्कारविशेषो जात इति भावः । एवं प्रथमं तावत् स्वर्गित्वं प्राप्य स्तब्ध एव जातः नतु श्रीभगवन्तं ज्ञातवान् पश्चात्कृपया तेन सम्भाषितस्तु तत्स्वरूपानन्दमनुभूतवान् पश्चादैश्वर्य्यानन्देप्यनुभूते नमस्कारमकरोत् तदाज्ञानुरूपमाह चेत्याह—माधवं लक्ष्मीकान्तं तद्रूपत्वेन विज्ञातमित्यर्थः । प्रणिपत्य दण्डवत् प्रणम्य अर्कवर्चसा किरीटेनोपलक्षित इति तत्र शोभाविशेषो वर्णितः ॥ ९ ॥ यद्यपि नवमस्कन्धरीत्या श्राद्धदेवस्य पुत्र इक्ष्वाकोर्भ्रातेति नृगः प्रसिद्धस्तथाप्यत्रेक्ष्वाकुतनय इत्युक्तेरन्योऽसौ नृग इति ग[ण्य]म्येत नरेन्द्रः सम्राडिति देवोत्तमत्वपरिहारः कस्त्वमित्यस्योत्तरं नृगो नामेत्यादि प्रभो हे राजराजेश्वर ! लीलेति विविधवन्दिवृन्दसङ्ग्रहेण कर्णस्पर्शयोग्यताऽभिप्रेता यदिति तैर्व्याख्यातं यद्वा संशय एव विनयभरेणात्यन्तदैन्येन चात्मनस्तच्छ्रवणायोग्यत्वमननात् अत एवोक्तं कर्णमस्पृशमिति कथञ्चिदीषच्छ्रुतः स्यामित्यर्थः । तत्र हेतुः प्रभो इति सर्वेश्वरेश्वरस्वाल्पकजनश्रवणासम्भवादित्यर्थः । दानिष्वित्यादिना निजदातृत्वस्य गोप्यस्यापि सूचनम् ईदृशस्यापि स्वल्पपापेनेदृशो गतिः स्यादिति श्रीभगवदभिप्रायानुसारेण लोकेषु विज्ञापनार्थम् एवमग्रेपि ॥ १० ॥ ननु, श्रुतोऽस्येव किन्त्वेतत्त्वद्दशानिदानं न वेद्मीति चेत्तत्राह, किं न्विति । नाथ हे परमेश्वर ! अत एव सर्वेति अत एवान्तरमपि सर्वं वेत्सि किम्पुनर्बाह्यमित्यर्थः । नच वक्तव्यं चिरकालेन विस्मृतमित्याह—कालेनेति ॥ ११ ॥ यावत्य इत्यादेस्तस्य गणत्रयस्य मिलित्वा यावत्त्वमित्यर्थः । अत एव चशब्दः अगण्यतामात्रतात्पर्य्यकमिदं स्मेति प्रसिद्धमेवैतदित्यत्र सम्भावना न कार्य्येत्यर्थः ॥ १२ ॥

---

[1] बादरायणि—प्रा. पा. । [2] न्द—वीर. । [3] मानुषः—वीर. ; प्रतीतः—विज. । [4] ऽहं मानवे वरुणात्मजः—प्रा. पा. । [5] दाने—वीर । [6] भूमौ—वीर । [7] ददाः—विज. ; रददं—त. पु. मू. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्म प्रसिद्धौ, इति एवम्, कृष्णेन साक्षाद्भगवतापि सम्यक् पृष्टः सन्, राजेति तत्त्वतः क्षत्रियत्वाद् राजवेशाद्वा, आनन्दमूर्त्तिना सुखघनविग्रहेणेति दर्शनमात्रेण तत्रापि प्रश्नेन तस्याप्यानन्दाविर्भावः सूचितः। माधवं निजाशेषरूपगुणादि-प्रकटनार्थं मधुकुलेऽवतीर्णम्, अतस्तत्सौन्दर्य्य-दिदृक्षया केवलं किरीटेनैव, तत्र चार्कवर्च्चसेति ईषद्ग्रीवानमनेन तन्महादीप्त्यैव प्रणिपत्य नमस्कृत्य; यद्वा, अत एव भक्तिभरेण दण्डवद्भूमौ निपातेन साष्टांगं प्रणम्य, अर्कवर्चसा किरीटेन विशिष्टोऽपि; यद्वा, दूरतः किरीट-दीप्त्यापादाम्बुजस्पर्शनेन प्रणिपत्येत्यर्थः ॥ ९ ॥ नरेन्द्रः सम्राडिति देवोत्तमत्वपरिहारः, कस्त्वमित्यस्योत्तरं नृगो नामेत्यादि; प्रभो ! हे सर्व्वशक्तियुक्तेति कर्णस्पर्शयोग्यताभिप्रेता। यदीति तैर्व्याख्यातम्। यद्वा, संशय एव विनयभरेणात्यन्तदैन्येन चात्मनस्तच्छ्रवणासम्भवादित्यर्थः। दातृष्वित्यादिना निजदातृत्वस्य गोप्यस्यापि सूचनम्। ईदृशस्यापि स्वल्पपापेनेदृशी गतिः स्यादिति श्रीभगवदभिप्रायानुसारेण लोकेषु विज्ञापनार्थम्, एवमग्रेऽपि ॥ १० ॥ ननु श्रुतोऽस्त्येव, किन्त्वेतद्दशानिदानं न वेद्मीति चेत्तत्राह—किं न्विति। नाथ ! हे परमेश्वर ! अतएव सर्व्वेति, अत आन्तरमपि सर्वं वेत्सि, किं पुनर्बाह्यमित्यर्थः। न च वक्तव्यम्, चिरकालेन विस्मृतमित्याह—कालेनेति ॥ ११ ॥ सिकता इति गवामानन्त्यम्, तारका इति दिव्यत्वम्, वर्षधारा इति तद्दानेऽविरतत्वमभिप्रेतम्। यद्वा, सर्वासामानन्त्यमात्रे तात्पर्य्यम्, ततश्च सिकता नदीपुलिनादि-गतबालुका ज्ञेयाः, एवं सिकतादीनां यथोत्तरमाधिक्यम्, स्मेति प्रसिद्धमेवैतदित्यत्रासम्भावना न कार्य्येत्यर्थः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आनन्दमूर्त्तिना हृद्यमूर्त्तिना मानवः मनोः वंशप्रभवः ॥ ९ ॥ दानिषु दानशीलेषु ॥ १०-१३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीति। आनन्दमूर्त्तिना हृद्यमूर्त्तिना सम्पृष्टो राजा मानुष इति च पूर्वजन्माभिप्रायेणोक्तम् अर्कस्येव वर्णो यस्य तेन किरीटेन नमस्कृत्याह ॥ ९ ॥ उक्तिमेवाह—नृग इत्यादिना, इत्युक्त्वा तमित्यतः प्राक्तनेन। अहं नृगो नाम नरेन्द्रः राजश्रेष्ठः हे प्रभो ! दानिष्वाख्यायमानेषु दानप्रशंसासु वक्तव्यासु इत्यर्थः। दानिषु दानशीलेषु वा यदि तव कर्णमस्पृशम् इत्यसन्देहं वचनं 'यदि वेदाः प्रमाणं स्युरितिवत् कर्णपथं नूनं प्राप्तः स्यामित्यर्थः ॥ १० ॥ किञ्च, किन्न्विति। ते त्वया न विदितं किन्तु विदितमेवेत्यर्थः। तत्र हेतुत्वेन विशिनष्टि—सर्वभूतानामात्मनो बुद्धेः साक्षिणः साक्षाद्द्रष्टुः कालेनाव्याहतमविप्लुतं दृक् ज्ञानं यस्य तस्याथापि यद्यप्येवं तथापि वक्ष्ये ॥ ११ ॥ यावत्य इति। सिकतादयो यावत्यः तावतीर्गाः धेनूरददां दत्तवानस्मि मया दत्तानां गवां सङ्ख्या न विद्यत इत्यर्थः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तव कर्णमस्पृशं ज्ञातुं योग्य इत्यर्थः ॥ १० ॥ अन्यथापि ज्ञातुं शक्य इत्याह—किन्त्विति ॥ ११ ॥ सिकता रजांसि अददास्म अददाम् "दा दाने" इति धातुः तुडागमश्छान्दसः ॥ १२-१५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यदीत्यसन्देहेऽपि यदि वेदाः प्रमाणमितिवत् दानिष्वाख्यायमानेषु दातृजनानां गणनप्रसङ्गे सति अहं तव कर्णमस्पृशं कर्णपथमगममेवेत्यर्थः ॥ १० ॥ किन्नु तव अविदितम् अपि तु सर्वमेव विदितमित्यर्थः ॥ ११ ॥ सिकता इत्यादिकमगण्यतामात्र-तात्पर्य्यकमिति प्राञ्चः कुरुक्षेत्रादिदेशेषु सूर्य्यग्रहणादिकालेष्वेकस्या अपि गोः कोट्यर्बुदगुणीभूतत्वात् तत्र तत्र देशकालेषु प्रतिदिनं च कोट्यर्बुदसङ्ख्यानां गवां दातुस्तस्य तावत् सङ्ख्याकत्वमपि नानुपपन्नमित्यन्ये ॥ १२ ॥

गूढार्थदीपिनी

स्म साश्चर्यम् ॥ ९ ॥ इक्ष्वाकुभ्रातुर्नृगादन्योऽयं नृगः इक्ष्वाकुतनयः। आख्यायमानेषु प्रशस्यमानेषु। अस्पृशम् अवश्यमेव। यदीति असन्देहे सन्देहवचनम् ॥ १० ॥ आत्मा बुद्धिः तस्य। साक्षिणः अव्याहतदृशः अलुप्तज्ञानस्य ॥ ११ ॥ सिकता द्वीपाः ॥ ७ ॥ अदिवि मर्त्यलोके भारते तारका नद्यः ॥ ४५ ॥ वर्षधाराः पर्वताः ॥ २७ ॥ एवम् अङ्कानां वामतो गत्या २७४५७ इयत्संख्याका एवं गावो नृगेण दत्ता। यथाश्रुतार्थग्रहणे तु तासां स्थितिरपि दुर्घटाऽस्तीति किमुत दानमिति वंशीधरी। अददामिति पाठः स्म एवार्थे ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वभूतानामात्मनो बुद्धेः साक्षिणः किन्नु अविदितं सर्वं विदितमेवेत्यर्थः ॥ ११-१३ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ज्ञात्वा भगवत्स्वरूपं पुण्यवशेन लोकभाषापि बुद्धेति भगवदाज्ञां कर्तुं स्ववृत्तान्तमुक्तवानित्याह इतीति। स्मेति प्रसिद्धे। प्रश्नः क्लिष्टं कर्म भवतीति स्वदोषनिवृत्त्यर्थं प्रसिद्धिः प्रमाणत्वेनोक्ता। परीक्षितोऽपि शङ्कां व्यावर्तयितुं राजेति। कृष्णेन सदानन्देन सम्भाषणेनापि सुखं भवतीति। भक्तिहितेन वा। **अनन्तमूर्तिनेति**। अनन्ता मूर्तयो यस्येति। तस्य न सर्वात्मना स्वरूपं प्रकाशितम्। तस्य तावन्मात्रेणैवाभिव्यक्तः। **अथवा**। पूर्वप्रकरणयोरन्या मूर्तिः, अस्मिन्प्रकरणे चान्या मूर्तिरिति ज्ञापयितुमनन्तमूर्तित्वम्। ततो भगवन्तं दृष्ट्वा, श्रीनिकेतत्वात् **भगवानेवेति** विज्ञाय, माधवं प्रणिपत्य, अर्कवर्चसा किरीटेनोपलक्षितः भगवतोऽपि चरणारविन्दं प्रबोधयन्, भक्तांश्चोद्दीपयन्, महानप्येवं जायत इति ब्राह्मणातिक्रमाभावाय ॥९॥ स्ववृत्तान्तमाह **नृगो नामेति षोडशभिः**। नृगः पूर्वमपि प्रसिद्धः इक्ष्वाकोस्तनयः। शतमध्ये विकुक्षिनिमिदण्डकानन्तरमयमेव प्रसिद्धः। **प्रभो** इति सम्बोधनं प्रभुस्थाने मिथ्याभाषणाभावं ज्ञापयति। ननु का प्रसिद्धिः, येन त्वं ज्ञायस इत्याशङ्क्याह दानिष्वाख्यायमानेष्वति। **दानिनो दानकर्तारः, नतु दातारः उदाराः। दानी विध्यपेक्षः, दाता तु निरपेक्ष** इति। यदि **ते** कर्णमस्पृशम्, तदाहं प्रसिद्धः। राजेति, नृग इति, दानीति च नूनं कीर्तिद्वारा गच्छतीति ॥ १० ॥ श्रवणानन्तरं ज्ञानं प्रसिद्धिहेतुत्वेन साधारणं निरूप्य, असाधारणप्रकारेण ज्ञानमाह **किं नु तेऽविदितं नाथेति**। हे नाथ, अनेनोद्धारः तवावश्यक एवेत्युक्तम्। नु इति वितर्के। किं वा ते अविदितम्, किन्तु सर्वमेव विदितमिति। तत्र हेतुः, सर्वभूतानां अन्तःकरणसक्षिणः। ननु कालव्यवधाने जीवोऽपि स्वानुभूतं विस्मरति, तथा भगवतोऽपीति कथं तत् ज्ञानमिति चेत्, तत्राह **कालेनाव्याहतदृश** इति। तस्मात् ज्ञानार्थं प्रतिज्ञापनप्रयोजनाभावात् न वक्तव्यम्, तथापि तवाज्ञया वक्ष्ये, अन्यथा आज्ञोल्लङ्घनं स्यादिति ॥ ११ ॥ आदौ स्वस्य दानित्वमाह **यावत्य सिकता भूमेरिति**। रेणवस्तामसाः, तारकाः सात्त्विकाः, वर्षधारा राजसाः दृष्टान्तीकृताः, असङ्ख्यातास्तिस्रोऽपि त्रिविधा अपि गावः असङ्ख्याता दत्ता इति। अहमददम्। स्मेति प्रमाणम्। तुल्यसङ्ख्यात्वे विवक्षिते तामेव सङ्ख्यां वदेत्, **परार्धातिरिक्ता** सङ्ख्यापि नास्ति। तस्मादसङ्ख्यातदाने त्रिविधदाने च दृष्टान्ताः। त्रिविधदाने प्रयोजनं चोक्तम्। भूमिसिकता उपादानभूताः, तारकाः प्रकाशकाः, वर्षधाराः पोषिका इति। असङ्ख्यातपदे प्रयुज्यमाने अल्पप्रतीतिः स्यात्, तत एवमुक्तम् ॥ १२ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः। अनंतमूर्त्तिना कृष्णेन इत्येवं सम्यक् **पृष्टः** राजा नृगोर्कवर्णेन सूर्यप्रभेण किरीटेन मुकुटेन माधवं श्रीकृष्णं प्रणम्याह स्म प्रसिद्धम् ॥ ९ ॥ हे प्रभो याचकैर्ऋषिभिर्वा दानिष्वाख्यायमानेषु कथयत्सु सत्सु यदि ते तव कर्णमस्पृशमहं नृगो नाम नरेंद्रो भूपतिरिक्ष्वाकोः तनयः पुत्रः असंदेहे संदेहवचनं **यदि वेदाः प्रमाणं** स्युरितिवत् ॥१०॥ हे नाथ सर्वभूतात्मसाक्षिणः कालेनाव्याहताऽखंडिता दृक् ज्ञानं यस्य तस्य ते तवाऽविदितमज्ञातं किं नु न किमपि सर्वं ज्ञातमित्यर्थः। अथाप्येवं सत्यपि तवाज्ञयाहं वक्ष्यामि ॥ ११ ॥ भूमेः पृथिव्याः सिकता रेणुकणा यावत्यो यत्संख्याकाः दिवि स्वर्गे तारका यत्प्रमाणाः वर्षधारा जलबिंदवो यत्संख्याकास्तावतीर्गा अहमददमसंख्या गा मया दत्ता इति भावः। तद्विशिनष्टि। पयस्विनीर्दुग्धवतीः तरुणीर्गृष्टीः शीलादियुक्ताः कपिला वर्णतः सुवर्णशृंगीः न्यायेनार्जिता न तु बलेन रूप्यखुराः सवत्सा वत्सेन सहिता इत्येके वत्सयेति गुरव इदं च धर्मशास्त्रतो रहस्यं बोध्यम्। एतेन केवलाया गोदानं निषिद्धमिति सूचितम्। दुकूलं वस्त्रं मालाऽऽभरणं घंटादि यासु ता गा अहं ददौ जन्मभेदात्पारोक्ष्यमिति शिष्टा अदामिति भट्टाः ॥ १२–१३ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

इति स्मेत्यस्याभासे। **लोकभाषापीति**। भगवतो लोकवद्भाषणं प्रश्नकरणमन्येभ्योपि मद्वृत्तान्तं बोधयितुमित्यपि बुध्यते इत्यर्थः। **व्याख्याने**। प्रश्नः **क्लिष्टं कर्मेति**। मर्मोद्घाटकत्वादितिभावः। **तथा च** क्लिष्टं कर्म समाधौ नानुभूयते। अतोऽप्रामाणिककथनं शुकस्य दोषः स्यात्तन्निवृत्त्यर्थं शुकेन प्रसिद्धिः प्रमाणत्वेनोक्तेत्यर्थः। **परीक्षितोऽपीति**। एतादृशो दानी कथमेवं जात इति परीक्षितः शङ्का स्यात्तद्व्यावृत्त्यर्थं राजपदम्। यथा त्वं राज्यमदाद्ब्राह्मणातिक्रमकर्ता जातः, तथा राज्यमदात्सोपि तथा जात इति भावः। स्वदोषः प्रसिद्धिकथनेन **निवर्तितः**। राज्ञोपि शङ्का निवर्तितेत्यपिशब्दः। अथवेति। तामसराजसप्रकरणयोर्वासुदेवप्रद्युम्नमूर्तिः, अत्र प्रकरणेऽनिरुद्धमूर्तिरित्यर्थः। माधवपदस्यार्थमाहुः **श्रीनिकेत**त्वादिति। यावत्य इत्यस्याभासे। **आदाविति**। दोषकथनात्पूर्वमित्यर्थः। **व्याख्याने**। **प्रयोजनं चोक्त**मिति। निबन्धे इति शेषः। तत्र हि 'गुणस्तु दोष एव स्या'दित्यनेन सत्त्वादिगुणविशिष्टदानस्य दोषवत्त्वं गुणरहितस्य च निर्दोषत्वं निरूपितम्।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आनन्दमात्रं मूर्तिर्यस्य **तेन** कृष्णेन मानवः प्राक्जन्मनि मनुवंशे उत्पन्नो राजा इत्येवं संपृष्टः अर्कस्येव वर्चो यस्य **तेन** किरीटेन तथाभूतकिरीटयुक्तमस्तकेन तं प्रणिपत्य नमस्कृत्याहेत्यन्वयः ॥ ९ ॥ तदुक्तिमेवाह—नृग इत्यादिना। 'तवाग्रे

यथार्थमेव वदामि, नान्यथा, दण्डभयात्' इत्याशयेन संबोधयति—प्रभो इति। अहं नृगो नाम नरेन्द्रः इक्ष्वाकुपुत्रः दानिषु दानशीलेषु आख्यायमानेषु प्रशस्यमानेषु सत्सु यदि ते कर्णमस्पृशम् 'यदि वेदाः प्रमाणं स्युः' इतिवदिदमप्यसन्देहे सन्देहवचनम्। नूनं तव कर्णपथं प्राप्तः स्यामित्यर्थः ॥ १० ॥ यद्यपि ते तव किमप्यविदितं न, सर्वं विदितमेव, अथापि तवाज्ञया त्वत्पृष्टं वक्ष्ये कथयामीत्यन्वयः। 'कथने स्वामित्वात्' इति हेतुं सूचयन् संबोधयति—नाथेति। अविदितत्वे हेतुमाह—सर्वभूतात्मसाक्षिण इति। सर्वभूतानामात्मनो बुद्धेः साक्षिणः साक्षाद्द्रष्टुः। कदाचिदेवं दर्शनेपि कदाचिज्ज्ञानं विलुप्तं स्यादित्याशङ्क्याह—कालेन न व्याहतं न विलुप्तं दृक् ज्ञानं यस्य तस्येति ॥ ११ ॥ तावतीर्गाः अददं स्म दत्तवानस्मि, मया दत्तानां गवां सङ्ख्या नास्तीत्यर्थः ॥ १२ ॥

अन्वितार्थप्रकाशिका

इतीति ॥ अनन्तमूर्तिना पाठान्तरे आनन्दमूर्तिना कृष्णेन प्राग्जन्मनि राजा इत्येवं संपृष्टः अर्कस्येव वर्चो द्युतिर्यस्य तेन किरीटेन तथाभूतकिरीटयुक्तमस्तकेन माधवं प्रणिपत्य नमस्कृत्याह स्म ॥ ९ ॥ नृग इति ॥ हे प्रभो! अहं नृगो नाम नरेन्द्रः इक्ष्वाकुपुत्रः नवमस्कन्धोक्तश्राद्धदेवपुत्रादिक्ष्वाकुभ्रातुर्नृगादन्यो नृग इक्ष्वाकुतनयो ज्ञेयः। दानिषु दानशीलेषु आख्यायमानेषु प्रशस्यमानेषु शत्सु यदि ते कर्णमस्पृशं यदि वेदाः प्रमाणं स्युरितिवदिदमसंदेहे संदेहवचनं नूनं तव कर्णपथं प्राप्तः स्याम् ॥ १० ॥ किमिति ॥ हे नाथ! सर्वभूतानामात्मनो बुद्धेः साक्षिणः कालेन न व्याहता न विलुप्ता दृक् ज्ञानं यस्य तस्य ते तव किमविदितं तत्सर्वं विदितमेव। अथापि तवाज्ञया त्वत्पृष्टं वक्ष्ये ॥ ११ ॥ यावत्य इति ॥ भूमेर्यावत्यः सिकताः। अत्र बहुषु पुस्तकेषु यावन्त्य इति नुम्वान् पाठो दृश्यते तत्र तु नुमार्षः। यावत्यः दिवि तारकाः यावत्यो वर्षधाराश्च तावतीः गाः अददम्। आलोप आर्षः। स्म पादपूर्तौ। अत्रागण्यतायां तात्पर्यमित्याहुः। अन्ये तु कुरुक्षेत्रादिदेशेषु सूर्यग्रहणादिकालेषु च एकस्या अपि कोटिगुणीभूतत्वात्तत्र तत्र देशकालेषु प्रतिदिनं च कोट्यादिसङ्ख्यानां गवां दातुस्तस्य तावत्संख्यत्वमपि नानुपपन्नमित्याहुः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनंतमूर्त्तिना अविनाशिविग्रेहेण ॥ ९ ॥ यदि यदा दानिषु आख्यायमानेषु सत्सुतदाने कर्णमस्पृशं कर्णपथं प्राप्तो भवेयं ॥ १० ॥ सर्वभूतानां आत्मनः अंतःकरणस्य साक्षी साक्षाद्द्रष्टा तस्य कालेन उत्पत्यादिनापि अव्याहतदृशः। अप्रतिहतज्ञानस्य ते तवाविदितं किंनु न किमप्यस्ति तव किं न विदितमस्ति ॥ ११ ॥ गाः अहमद ददौ स्मेति प्रसिद्धं ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं आनन्दमूर्त्तिना कृष्णेन, संपृष्टः राजा, अर्कवर्चसा सूर्यसमानतेजसा, किरीटेन किरीटसहितेन मूर्ध्नेत्यर्थः। माधवं श्रीकृष्णं, प्रणिपत्य, स्म स्फुटं यथा स्यात्तथेत्यर्थः। आह ॥ ९ ॥ उक्तिमेवाह नृग इत्यादिना इत्युक्त्वेत्यतः प्राक्तनेन ग्रन्थेन ॥ नृग इति ॥ हे प्रभो, अहं नृगः नाम नरेन्द्रः, नृगनाम्ना प्रसिद्धो राजश्रेष्ठ इत्यर्थः। इक्ष्वाकुतनयः इक्ष्वाकुनृपतेः सुतः, नवमस्कन्धोक्तश्राद्धदेवपुत्रादिक्ष्वाकोर्भ्रातुर्नृगादन्योऽयं नृग इक्ष्वाकुतनयो ज्ञेय इति। दानिषु, आख्यायमानेषु, दानिप्रशंसासु कर्त्तव्यास्वित्यर्थः। आख्यायमानेषु, दानिषु दानशीलेष्विति वा। यदि, ते तव, कर्णं, अस्पृशं, इत्यसंदेहे संदेहवचनं, यदि वेदाः प्रमाणं स्युरिति वत्। कर्णपथं नूनं प्राप्तः स्यामित्यर्थः ॥ १० ॥ किमिति ॥ हे नाथ, सर्वभूतात्मसाक्षिणः सर्वभूतबुद्धेः साक्षात् द्रष्टुः, कालेन, अव्याहताऽविप्लुता दृक् ज्ञानं यस्य, तस्य, ते तव, अविदितं किं नु। सर्वमपि तव विदितमेवास्तीत्यर्थः। अथापि, तवाज्ञया वक्ष्ये ॥ ११ ॥ यावन्त्य इति ॥ यावन्त्यः, भूमेः सिकताः वालुकाः, दिवि, यावन्त्यः तारकाः, यावन्त्यः वर्षधाराश्च, अहं, तावतीः गाः धेनूः, सत्पात्रविप्रेभ्य इति शेषः। अददं स्म दत्तवानस्मि। मया दत्तानां गवां संख्या न विद्यते इत्यर्थः ॥ १२ ॥

कृष्णप्रिया

श्री शुकदेवजी ने कहा राजन्! जब अनन्तमूर्ति भगवान् श्रीकृष्णचन्द्र ने नृगराजा को पूछा तब राजा नृग ने सूर्य समान तेजस्वी मुकुट से मुकुन्द भगवान् के श्रीचरणों में दण्डवत् प्रणाम करते हुए निवेदन करने लगे ॥ ९ ॥ राजा नृग कहने लगे—नाथ! श्राद्धदेव मनुराजा के ज्येष्ठ पुत्र इक्ष्वाकु राजा का नृग नाम का पुत्र हूं। संभव है कि विश्व के दानियों की चर्चा चली होगी तो मेरा नाम भी कभी कर्णपथ में आया होगा ॥ १० ॥ नाथ! हे प्रभो! आपसे अज्ञात कोई भी बात नहीं हो सकती। आप सर्वदर्शी-त्रिकालज्ञ है। भूत-भविष्य वर्तमानकाल का व्यवधान भी आपके अखण्ड ज्ञान में बाधक नहीं हो सकता। इसलिये आप से कुछ अविदित नहीं है। लेकिन आपकी आज्ञा पालन करने के लिये वृत्तान्त कह रहा हूँ ॥ ११ ॥ भगवन्! पृथ्वी में जितनी सिकता है नभोदेश में जितने तारे हैं, और वर्षा में जितनी धाराएँ हैं उतनी गौएँ दान की थीं ॥१२॥

पयस्विनीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हेमशृङ्गीः[1] ।
न्यायार्जिता रूप्यखुराः सवत्सा दुकूलमालाभरणा ददावहम्[2] ॥ १३ ॥

स्वलंकृतेभ्यो गुणशीलवद्भ्यः[3] सीदत्कुटुम्बेन ऋतव्रतेभ्यः ।
तपःश्रुतब्रह्मवदान्यसद्भ्यः प्रादां युवभ्यो द्विजपुङ्गवेभ्यः ॥ १४ ॥

गोभूहिरण्यायतनाश्वहस्तिनः कन्याः सदासीस्तिलरूप्यशय्याः ।
वासांसि रत्नानि परिच्छदान् रथानिष्टं च यज्ञैश्चरितं च [4]पूर्त्तैः ॥ १५ ॥

कस्यचिद् द्विजमुख्यस्य भ्रष्टा गौर्मम गोधने । [5]सम्पृक्ताविदुषा सा च मया दत्ता द्विजातये ॥ १६ ॥

कर्दमक्षमा

अन्वयः—पयस्विनीः, तरुणीः, शीलरूपगुणोपपन्नाः, कपिलाः, हेमशृङ्गीः, न्यायार्जिताः, रूप्यखुराः, सवत्साः, दुकूलमालाभरणाः, अहम्, ददौ ॥ १३ ॥ स्वलंकृतेभ्यः गुणशीलवद्भ्यः, सीदत्कुटुम्बेभ्यः, ऋतव्रतेभ्यः, तपःश्रुतब्रह्मवदान्यसद्भ्यः, युवभ्यः, द्विजपुङ्गवेभ्यः, प्रादाम् ॥ १४ ॥ गोभूहिरण्यायतनाः, च, हस्तिनः, स दासीः, कन्याः, तिलरूप्यशय्याः, वासांसि, रत्नानि, च, परिच्छदान्, रथान्, च, यज्ञैः, च, पूर्तैः, इष्टम्, चरितम् ॥ १५ ॥ कस्यचित्, द्विजमुख्यस्य, भ्रष्टा, गौः, मम, गोधने, सम्पृक्ता, अविदुषा, च मया, सा, द्विजातये, दत्ता ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ऋतव्रतेभ्योऽदंभाचारेभ्यः । तपसा श्रुताः प्रख्याताश्च ते ब्रह्मणि वदान्या अत्युदारा अध्यापनशीलाश्च ते संतश्च तेभ्यः ॥ १४ ॥ पूर्तं वापीकूपादि चरितं कृतम् ॥ १५ ॥ एवं वर्तमानस्य मम संकटं किंचिदापन्नं शृण्वित्याह । कस्यचिदिति । द्विजमुख्यस्य प्रतिग्रहनिवृत्तस्य । संपृक्ता मिलिता । अविदुषा ब्राह्मणस्येयमित्यजानता ॥ १६-१७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यादृशी गौर्देया तत्स्वरूपमाह-पयस्विनीरित्यनेन दुग्धाभाववत्याः तरुणीरित्युक्तेर्बालाया वृद्धायाश्च दानं न कार्यम् । शीलेत्याद्युक्तेः सुशीलायाः परताडनहीनायाः सुरूपायाः शृंगभंगादिदोषहीनाया बहुदुग्धायाश्च दानं कार्यम् । कपिला इत्युपलक्षणम् । यद्वा—कपिला इति बहुत्वोक्तेर्वाराहोक्ता दशविधकपिला ग्राह्याः । तथाहि—"सुवर्णकपिला पूर्वा द्वितीया गौरपिङ्गला । तृतीया चैव रक्ताक्षी चतुर्थी गूढपिंगला ॥ पञ्चमी बहुवर्णा स्यात्षष्ठी स्याच्छ्वेतपिंगला । सप्तमी श्वेतपिंगाक्षी ह्यष्टमी कृष्णपिंगला ॥ नवमी पाटला ज्ञेया दशमी पुच्छपिंगला । एता दश समाख्याताः कपिलास्ते वरानने ॥ सर्वाश्चैता महाभागास्तारयन्ति न संशयः ॥" इति हेमशृंगरूप्यखुराद्युक्तेः सांगायाः । न्यायार्जिता इत्युक्तेर्मौल्यगृहीतायाः, स्वगेहजातायाः, प्रतिग्रहादिलब्धायाश्च । सवत्सा इत्युक्तेर्वत्सवत्सीसहितायाः, 'वत्सः पुत्रादिवर्षयोः' इत्युक्तेरिहादिपदं पुत्रीपरम्, तेन केवलाया दानं न कार्यमिति भावः ॥ १३ ॥ पात्रस्वरूपमाह—गुणाः सत्यशौचसौमनस्यादयः, शीलं सुचरितं तद्वद्भ्यः । एतेन कटुभाष्यादयः सत्यशौचादिहीना न दानपात्रम् । सीदत्कुटुंबेभ्य इत्यनेन धनिनामगृहस्थानां विद्यादिमतामपि पात्रत्वं नास्ति "वृथा दानं धनाढ्येषु यथा दीपो दिवाकरे" इत्युक्तेः, "हव्यकव्ये यत्र दुग्धघृताद्यमुपयुज्यते । तस्मै विप्राय गौर्देया यद्वा बालसुताय वै ॥" इति भारतोक्तेश्च । ऋतव्रतेभ्य इत्यनेन दांभिकानां न पात्रत्वम् "धर्मश्च सत्यञ्च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षानसूया । यज्ञश्च दानञ्च धृतिः श्रुतञ्च व्रतानि वै द्वादश ब्राह्मणस्य ॥" इत्युद्योगपर्वोक्तानि व्रतानि ग्राह्याणि । तपःश्रुतेत्याद्युक्तेस्तपश्चर्यापराणां वेदवेदांगाध्यापनपराणां सदाचाराणामेव पात्रत्वम् । युवभ्य इत्युक्तेर्वृद्धानां दानप्रतिग्रहप्रायश्चित्तासमर्थत्वात् शौचाचारशैथिल्याद्गोसेवासामर्थ्याभावाच्च तेभ्यो दत्तानां गवां दुःखं स्यात्तेन पापोत्पत्तेश्चेति भावः । द्विजपुंगवेभ्य इत्युक्तेर्ब्राह्मणेतराणामविद्यादिमतां च पात्रत्वाभाव उक्तः । स्वलंकृतेभ्य ऊर्द्ध्वपुंड्रादिना भूषितेभ्यः । एतेन रिक्तमस्तकादीनामपि दानानर्हतोक्तेति 'सोर्द्ध्वपुंड्राय दानम्' इति मायापुरीमाहात्म्ये । यद्वा—मयैव पूर्वं सुवर्णकुण्डलादिनाऽलंकृतेभ्यः गोदानार्थवरणे पात्राय स्वर्णकुंडलाद्यवश्यं दत्त्वैव तस्मै गां दद्यादिति सूचितमनेन ॥ १४ ॥ विप्रापराधः सुकृतानंत्यमपि नाशयतीत्याह—गोभूहिरण्येति । आयतनञ्च वासोचितगृहम् । वासांसि कार्पासोर्णाक्षौमकौशादीनि । परितश्छाद-

---

१. ङ्गाः—वीर. । २. म्य—विज. ; स्वदामहम्—च. पु. टि. । ३. वध्यः—विज. । ४. र्तम्—श्रीधर. वंशी. जीव. वीर. ; र्तैः—विज. ।
५. संसृष्टा—विज. ।

यंतीति परिच्छदा वस्त्रगृहादयः। यद्वा—परिच्छदपदेन तत्तत्कार्योचितसामग्री ग्राह्या। तदुक्तम् "विवाहादिक्रियाकाले तत्क्रियासाधनं तु यः। ददाति दीनविप्रेभ्यः सोऽश्वमेधफलं लभेत् ॥" इति पुराणात् ॥ १५ ॥ कृकलासत्वप्रापकं किं पापं तत्र अज्ञातापराधं निवेदयति—कस्येति। भ्रष्टाऽभ्यस्तदेशं विहायान्यदेशं गता ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं द्रव्यस्यानन्त्यमुक्त्वा साद्गुण्यमाह—पयस्विनीरिति। शीलं सुस्वभावः स्वामिवश्यतादि रूपं पुष्ट्यादिसौन्दर्य्यं गुणः सर्वदैव बहुलोत्कृष्टक्षीरदत्वादिः तैरुपपन्नाः युक्ताः कपिलाश्च दशविधाः, ताश्चोक्ताः वाराहे—

"सुवर्णकपिला पूर्वा द्वितीया गौरपिङ्गला। तृतीया चैव रक्ताक्षी चतुर्थी गुडपिङ्गला ॥
पञ्चमी बहुवर्णा स्यात् षष्ठी स्यात् श्वेतपिङ्गला। सप्तमी श्वेतपिङ्गाक्षी अष्टमी कृष्णपिङ्गला।
नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला। एता दश समाख्याताः कपिलास्तु वरानने ॥
सर्वाश्चैता महाभागास्तारयन्ति न संशयः" ॥ इति

विशेषणानामेषां यथोत्तरं साद्गुण्ये श्रैष्ठ्यम् एवमग्रेप्यूह्यं नच केवलाः किन्तु सालङ्कारा इत्याह—हेमेति रूप्येति च। किञ्च दुकूलाद्या आभरणानि यासां ता इति तत्र दुकूलं पृष्ठोपरिपट्टवस्त्रं मालाश्च रत्नादिनिर्मिता गले किञ्च सवत्सा इति प्रायो धेनवो ज्ञेयाः नच नरेन्द्रत्वेन कथञ्चिदन्यायेन सञ्चिता इत्याह—न्यायेति। अहं ददाविति पुनरुक्त्या तन्निश्चयं बोधयति ॥ १३ ॥ अधुना पात्रसाद्गुण्यमाह—स्वलङ्कृतेभ्य इति। मयैव कनककुण्डलादिनादौ सुष्ठ्वलङ्कृतेभ्य इत्यर्थः। गुणा दैहिकाः सल्लक्षणादयः शीलानि आन्तराणि सारल्यविनयादिसुस्वभावाः व्रतानि स्वोत्कर्षाय यत्नसम्पादितानि उद्यमपर्वोक्तानि—"धर्मश्च सत्यं च दमस्तपश्च अमात्सर्य्यं ह्रीस्तितिक्षाऽनसूया तपश्च दानञ्च धृतिः श्रुतञ्च व्रतानि वै द्वादश ब्राह्मणस्य। इति व्रतानि अकापट्येन प्रकटितानि व्रतानि यैस्तेभ्यः तपः स्वधर्मो नित्यं सन्ध्यावन्दनादिः सत्यं सदाचारपरत्वं युवभ्य इति तेषामेव धर्माचरणसामर्थ्येन प्राधान्यात् अत एव द्विजेषु श्रेष्ठेभ्यः प्रकर्षेण भक्त्या पादप्रक्षालनादिपूर्वकमदाम् ॥ १४ ॥ न केवलं ता एव अन्यांश्च बहून् पदार्थानदामित्याह–गो इति। गावो वृषाः आयतनानि गृहादीनि परिच्छदाः छत्रचामरादयः गवादीन् रथान्तान् प्रादामिति पूर्वेणैवान्वयः। यज्ञैः सर्वैरेव चकाराभ्यां यज्ञानां पूर्त्तस्य प्राधान्यं बोधयन् तद्विधाने सम्यक्त्वं बोधयति ॥ १५ ॥ भ्रष्टा विच्युता गोधने गोकुले ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं द्रव्यस्यानन्त्यमुक्त्वा साद्गुण्यमाह—पयस्विनीति। शीलं सुस्वभावः स्वामिवश्यतादि, रूपं पुष्ट्यादिसौन्दर्य्यम्, गुणः सदैव बहुलोत्कृष्ट-क्षीरदत्वादि, तैरुपपन्ना युक्ताः, कपिलाश्च दशविधाः, ताश्चोक्ता वाराहे—

'सुवर्णकपिला पूर्व्वा द्वितीया गौरपिंगला। तृतीया चैव रक्ताक्षी चतुर्थी गुड़पिंगला ॥
पञ्चमी बहुवर्णा स्यात् षष्ठी स्यात् श्वेतपिंगला। सप्तमी श्वेतपिंगाक्षी अष्टमी कृष्णपिंगला ॥
नवमी पाटला ज्ञेया दशमी पुच्छपिंगला। एता दश समाख्याताः कपिलास्ते नरानने ॥
सर्व्वाश्चैता महाभागास्तारयन्ति न संशयः ॥ इति।

विशेषणानामेषां यथोत्तरं साद्गुण्ये श्रैष्ठ्यम्। एवमग्रेऽप्यूह्यम्। न च केवलाः, किन्तु सालंकारा इत्याह—हेमेति रूप्येति च। किञ्च, दुकूलाद्या आभरणानि यासां ता इति तत्र दुकूलं पृष्ठोपरि पट्टवस्त्रं मालाश्च रत्नादिनिर्म्मिता गले, किञ्च, सवत्सा इति प्रायो धेनवो ज्ञेयाः। न च नरेन्द्रत्वेन कथञ्चिदन्यायेन सञ्चिता इत्याह—न्यायेति। अहं ददाविति पुनरुक्त्या तन्निश्चयं बोधयति ॥१३॥ अधुना पात्रसाद्गुण्यमाह—स्वलंकृतेभ्य इति। मयैव कनककुण्डलादिनादौ सुष्ठ्वलंकृतेभ्य इत्यर्थः। गुणाश्चोक्ता उद्यमपर्व्वणि—'धर्म्मश्च सत्यञ्च दमस्तपश्च, अमात्सर्य्यं ह्रीस्तितिक्षानसूया। यज्ञश्च दानञ्च धृतिः श्रुतञ्च, व्रतानि वै द्वादश ब्राह्मणस्य ॥' इति। शीलं विनयनम्रत्वादि, तपः स्वधर्म्मः कृच्छ्रादि वा, सत्त्वं श्रीवैष्णवत्वम्, तपआदीनां प्रायो गुणान्तर्गतत्वेऽपि पृथगुक्तिस्तद्विशेषापेक्षया, अत एव द्विजेषु विप्रेषु पुंगवेभ्यः प्रकर्षेण भक्त्या पादप्रक्षालनादिपूर्व्वकमदाम् अन्यत्तैर्व्याख्यातम्। यद्वा, श्रुतं स्मृत्यादिशास्त्रम्, ब्रह्म वेदः, तपआदियुक्ता वदान्याश्च ते सन्तश्च तेभ्यः, वदान्यतया गुणान्तर्गतत्वेऽपि पृथगुक्तिः सत्पात्रत्वेन तस्या अवश्यापेक्ष्यत्वात्, अत एवाग्रे श्रीभगवान् वक्ष्यति (३७ श० श्लो०)—'वदान्यानां कुटुम्बिनाम्' इति। कालसाद्गुण्यञ्चाविश्रामत्वेन, तदनपेक्षया नोक्तम् ॥ १४ ॥ न केवलं ता एव, अन्यांश्च बहून् पदार्थानदामित्याह—गा इति। गावो वृषाः, आयतनानि गृहादीनि, परिच्छदाश्छत्रचामरादयः, गवादीन् रथान्तान् प्रादामिति पूर्वेणैवान्वयः। यज्ञैः सर्वैरेव, च-काराभ्यां यज्ञानां पूर्त्तस्य च प्राधान्यं बोधयंस्तद्विधाने सम्यक्त्वं बोधयति ॥ १५ ॥ कस्यचिदिति—तपआदिना प्रसिद्ध्यभावात्, भ्रष्टा स्वयूथाद् गृहाद्विच्युता, गाव एव धनं देयाशेषद्रव्योत्तमत्वात्तस्मिन्, यद्वा, गोधने गोकुले ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

तपःश्रुतब्रह्मवादान्विताः वदान्याः सन्तः तेभ्यः ॥ १४-२५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ता एव विशिनष्टि—पयस्विनीरिति । अत्र भूम्नि मत्वर्थीयः शीलादिभिर्युक्ता कपिलवर्णाः हेमस्वर्णालङ्कारः शृङ्गयोर्यासां ताः न्यायतः सम्पादिताः रौप्यं रजतालङ्कारः खुरेषु यासां ताः वत्सैः सहिताः दुकूलादीनां द्वन्द्वः ततो मत्वर्थीयोच् ददामि अदां इत्यर्थः ॥ १३ ॥ अथ सत्पात्राणि विशिनष्टि—स्वलङ्कृतेभ्य इति । सीदत् विलश्यमानं कुटुम्बं येषां तेभ्यः ऋतव्रतेभ्यः अदम्भाचारेभ्यः तपसा श्रुताः प्रख्याताश्ते ब्रह्मणि वदान्या ब्रह्मवादिनः ते च ते सन्तः तेभ्यो वदान्यवद्भ्य इति पाठे तप आदिविशिष्टेभ्यः एवम्विधेभ्यो ब्राह्मणोत्तमेभ्योऽदामित्यर्थः ॥ १४ ॥ न केवलं गा एवादामन्यदपीत्याह—गोभ्विति । पुनर्गोग्रहणम् इतरापेक्षया तद्भूयस्त्वाभिप्रायकं गवादीनाम् इतरेतरयोगद्वन्द्वः तत्रायतनानि गृहाः दासीभिः सहिताः कन्याः तिलादीनां द्वन्द्वः तत्र रूप्यं रजतं परिच्छदान् गृहोपकरणानि न केवलं प्रादामेव किन्तु यज्ञैरिष्टं च पूर्त्तं स्मार्त्तं कर्म चरितं कृतञ्च ॥ १५ ॥ एवं वर्त्तमानस्य मम किञ्चित्सङ्कटमापन्नं शृणु इत्याह—कस्यचिदिति । द्विजमुख्यस्य गां प्रतिगृहीतवतो गौर्भ्रष्टा बलात्तद्धस्ताद्विमोचिता सती मम गोधने सम्पृक्ता मिलिता सा च अविदुषा पूर्वमेव कस्मैचिद्दत्तेत्येवमजनता मया द्विजातयेऽन्यस्मै ब्राह्मणाय दत्ता ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

भ्रष्टा अभ्यस्तदेशं विहायान्यदेशं गता संसृष्टा सङ्कुलिता अविदुषा अजानता ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देयवैशिष्ट्यमाह—पयस्विनीरिति ॥ १३ ॥ सम्प्रदानवैशिष्ट्यमाह—स्वलङ्कृतेभ्यः इति । तपसा श्रुताः ख्याताश्च ब्रह्मणि वेदशास्त्रे अध्यापनपरत्वादत्युदाराश्च ते सन्तश्च तेभ्यः ॥१४॥ देयान्तराण्यप्याह—गोभू इति । प्रादामिति पूर्वेणैवान्वयः चरितं कृतम् ॥ १५ ॥ ननु, कृकलाससत्वप्रापकं किं पापम् ! तद्ब्रहीत्यत आह—कस्यचिदिति । भ्रष्टा विच्युता गौरेकैव मम गोकुले सम्पृक्ता मिलिता अविदुषा ब्राह्मणस्येयमित्यजानता ॥ १६-१७ ॥

गूढार्थदीपिनी

तरुणीत्युक्तेः बालाया वृद्धायाश्च दानं न कार्यम् । वाराहोक्ता दशविधाः कपिला ग्राह्याः ॥ १३ ॥ सुष्ठु सदाचारेण अलङ्कृतेभ्यः । तपसा श्रुता विख्याता ब्रह्मणि वदान्या वेदे अत्युदाराः अध्यापनशीलाश्च ते च ते सन्तः तेभ्यः ॥ १४ ॥ परिच्छदान् गृहोचितसामग्रीः । इष्टं वैदिकं कर्म । पूर्तं स्मार्त्तं कर्म वापीकूपादि चरितं कृतम् ॥ १५ ॥ मुख्यस्य प्रतिग्रहशून्यस्य । भ्रष्टा स्थानात् च्युता । सम्पृक्ता मिलिता अजानता मया दत्ता ॥ १६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तपसा श्रुताश्च ते ब्रह्मणि वदान्या उदारा अध्यापनशीलाश्च ते सन्तश्च तेभ्यः ॥ १४ ॥ गवादीन् प्रादामिति पूर्वेणान्वयः पूर्तं वापीकूपादि चरितं कृतम् ॥ १५ ॥ द्विजमुख्यस्य प्रतिग्रहनिवृत्तस्य नाहं प्रतीच्छे इति वक्ष्यमाणात् भ्रष्टा विच्युता सती मम गोधने सम्पृक्ता मिलिता अविदुषा मदीया नेयमित्यजानता ॥ १६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

गवां गुणानाह **पयस्विनीरिति** । दुग्धाधिक्ययुक्ताः । तरुण्यः प्रथमप्रसूताः । शीलममारणादिशान्तस्वभावः । रूपं सौन्दर्यम् । एतैर्गुणैरुपपन्नाः । अथवा । गुणाः सत्पुत्राः । दुग्धे घृताधिक्यमारोग्यजनकत्वं च गुणाः । प्रायेण बह्व्यः कपिलाः । दाने कपिला विशिष्टेति । **हेमशृङ्गीः** सुवर्णशृङ्गयुक्ताः । न्यायार्जिताः, न त्वतिक्रमेण प्राप्ताः । **रूप्यखुराः सवत्सा** इति विधिप्राशस्त्यार्थमुक्तम् । तेन विहिता एव दत्ताः, नत्वविहिताः, नाप्यविहितप्रकारेण । दुकूलानां माला यासु । दुकूले मालाः आभरणानि च वा । एवं त्रयोदशगुणाः कथिताः ॥ १३ ॥ पात्राभावे सर्वं व्यर्थमिति पात्रधर्मानाह **स्वलङ्कृतेभ्य** इति । विधिप्रकारोलङ्करणादि, गुणाः विद्याः, शील- माचारः सुस्वभावश्च । **सीदत्कुटुम्बेभ्य** इति । गृहीतस्य शीघ्रं सद्विनियोगः । ऋतं व्रतं येषामिति ब्राह्मणस्य सहजो धर्मो निरूपितः । **तप** इन्द्रियनिग्रहः, श्रुतं यथाविधि, **ब्रह्म** वेदो वेदार्थश्च, **वदान्यत्वमलुब्धता, सत्त्वं** परोपकारत्वं च । तपः श्रुतं ब्रह्म च येषां ते तपःश्रुतब्रह्माणः, ते च ते वदान्याश्च सन्तश्च । **युवभ्यो**

द्विजपुङ्गवेभ्य इति द्वादशगुणा ब्राह्मणानामुक्ताः ॥ १४ ॥ दानान्तराण्यप्याह **गोभूहिरण्येति**। एकदा असङ्ख्यातगोदानं बहुभ्यः। ततः पृथगपि गावो दत्ताः। भूमिर्वृत्तिकरी। हिरण्यदानं स्वतन्त्रम्। आयतनदानं गृहदानम्। अश्वदानं हस्तिदानं च। कन्यादानं ब्राह्मणाय, पोषितानां कन्यानाम्। औरस्याः **क्षत्रियायां विवाहितायां** जाताया **राजकन्यायाः स्वयंवर एव**। **सदासीरिति** पारिबर्हसहिताः। दासीदानं वा कन्यादानेन सहोच्यते। तिलाः तिलपर्वताः। रूप्यं रूप्यपर्वतः। शय्याः सुखशय्यादानम्। वासांसि नानाविधानि। तथैव नव रत्नानि। **परिच्छदान्** कञ्चुकवितानादीन्। रथाश्च गजरथाश्वरथादिभेदाः। एवं पञ्चदशदानानि सर्वदा क्रियन्ते। ततः यज्ञैरिष्टमग्निष्टोमादयश्च कृताः। **पूर्तैश्च चरितं** कूपारामादयश्च धर्मार्थं कृताः ॥ १५ ॥ एवं धर्मपरायणे मयि कर्मवशादधर्मः कश्चनोत्पन्न इत्याह **कस्यचिद्द्विजमुख्यस्येति**। अयं राजा दानाभिनिविष्टचित्तः स्वसेवकेभ्यः यथाकथञ्चिद्देयान् गृह्णाति, न तु जिज्ञासते। एवं बहुधा प्रमादे कदाचिद्भगवान् तत्पापं प्रकटितवान्। कश्चिद्ब्राह्मणः राजप्रतिग्रहरहितः स्वधर्मनिष्ठ आसीत्। तस्य गौः स्वस्थानादपगता राजगोषु प्रविष्टा। ततस्तामनवद्यलक्षणां तदधिकारिणो ज्ञात्वा दानार्थं नीतवन्तः ॥ १६ ॥

श्रीसुबोधिनी-सारः

केभ्य इत्यत आह। सुष्ठु अलंकृतेभ्यो गुणशीलसंपन्नेभ्यः सत्यव्रतेभ्यः तपसा श्रुता विख्याता तपःश्रुते विद्येते येषु इति वा ब्रह्मणि विप्रे वदान्या अत्युदारास्ते न च संतश्च तेभ्यः सन्तश्च वा तेभ्यः सीदत् दुःख्यत् कुटुंबं येषां कुटुंबेन सीदंत इति वा तेभ्यो युवभ्यो विप्रोत्तमेभ्योऽहं प्रादाम् ॥ १४ ॥ गोभूमिसुवर्णमंदिरादिस्थानाश्वहस्तिनः सदासीः कन्याः तिलरूप्यशय्यावासांसि रत्नानि परिच्छादानुपकरणानि प्रादामित्यन्वयः। यज्ञैश्चेष्टं पूर्तं वापीकूपादि चरितं मया कृतम् ॥ १५ ॥ द्विजमुख्यस्य ब्राह्मणोत्तमस्यायाचकस्य कस्यचित्कनखलवासिनो गौः शबला नाम्नी भ्रष्टा मम गोधने गोष्ठे संपृक्ता संमिलिता सा च गौरविदुषा ब्राह्मणस्येयमित्यजानता मया ब्राह्मणाय दत्ता इत्यनेनान्यस्य प्रतिग्रहो दूषित इति ध्वनितम् ॥ १६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

पयस्विनोरित्यत्र। दुकूलेत्यस्य द्वितीयव्याख्याने अर्शआद्यजन्तम्।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ता एव विशिनष्टि—पयस्विनीरिति। दुग्धाधिक्ययुक्ताः। तरुणीः प्रथमप्रसूताः। शीलं शान्तस्वभावः, रूपं सौन्दर्यम्, गुणाः सदपत्यत्वं दुग्धे घृताधिक्यारोग्यत्वादयः, तदुपपन्नाः युक्ताः। कपिलाः सर्वतः श्वेतवर्णाः। हेमशृङ्गीः सुवर्णशृङ्गयुक्ताः। न्यायार्जिताः स्वधर्मपूर्वव्यापारेण सम्पादिताः। रूप्ययुक्तखुराः। वत्सैः सहिताः। दुकूलादीनां द्वन्द्वस्तद्युक्ताः। एवंभूता गा अहं ददौ ॥ १३ ॥ अथ दानपात्राणि विशिनष्टि—स्वलङ्कृतेभ्य इति। गुणा वैराग्यसन्तोषादयः, शीलं शान्तः स्वभावः, तद्वद्भ्यः। सीदत् क्लिश्यत् कुटुम्बं येषां तेभ्यः। ऋतं सत्यं व्रतमाचारः सङ्कल्पो वा येषां तेभ्यः। तपसा श्रुताः प्रख्यातास्ते ब्रह्मणि वदान्याः अत्युदाराः वेदाध्ययनशीलाश्च ते सन्तः समचित्ताश्च तेभ्यो द्विजपुङ्गवेभ्यो ब्राह्मणोत्तमेभ्यो गाः प्रादाम् ॥१४॥ न केवलं गा एवादाम्, किंतु गवादीन्, दासीभिः सहिताः कन्याश्च, तिलादीन्, रथान्तांश्च प्रादामित्यन्वयः। पुनः गोग्रहणमितरापेक्षया तद्रूपत्वज्ञापनार्थम्। आयतनानि गृहान्। परिच्छदान् गृहोपकरणानि। यज्ञैरिष्टं अग्निष्टोमादयो यज्ञाश्च कृताः। पूर्तं वापीकूपतटाकदेवतायतनारामादिनिर्माणान्नप्रदानादि चरितं कृतम् ॥ १५ ॥ एवं धर्मपथि वर्तमाने मयि कर्मवशादधर्मः कश्चनोत्पन्न इत्याह—कस्यचिदिति। द्विजमुख्यस्य प्रतिग्रहरहितस्य भ्रष्टा स्वबन्धनाद्विमुक्ता गौर्मम गोधने संपृक्ता मिलिता सा चाविदुषा द्विजस्येयमित्यजानता मया द्विजातये अन्यस्मै ब्राह्मणाय दत्ता ॥ १६ ॥

अन्वितार्थप्रकाशिका

देयवैशिष्ट्यमाह—पयस्विनीरिति ॥ पयस्विनीः दुग्धाधिक्ययुक्ताः तरुणीः प्रथमप्रसूताः शीलं शान्तस्वभावः रूपं सौन्दर्यं गुणाः सदपत्यत्वदुग्धघृताधिक्यारोग्यत्वादयः तैरुपपन्नाः युक्ताः कपिलाः हेमशृङ्गीः सुवर्णशृङ्गयुक्ताः न्यायार्जिताः स्वधर्मपूर्वव्यापारेण सम्पादिताः रूप्ययुक्तखुराः वत्सैः सहिताः दुकूलादीनां द्वन्द्वस्तद्युक्ताः एवंभूता गा अहं ददौ। छन्दसि लिडित अपरोक्षेऽपि भूतसामान्येऽपि च लिट् ॥ १३ ॥ सम्प्रदानवैशिष्ट्यमाह—स्वलमिति ॥ मद्दत्तालङ्कारैः स्वलङ्कृतेभ्यः गुणाः सन्तोषादयः शीलं च तद्वद्भ्यः सीदत् क्लिश्यत् कुटुम्बं येषां तेभ्यः ऋतानि सत्यानि दम्भरहितानि व्रतानि धर्मादीनि येषां तेभ्यः तपसा श्रुताः प्रख्यातास्ते ब्रह्मणि वदान्याः अत्युदाराः वेदाध्यापनशीलाश्च ते सन्तः समचित्ताश्च तेभ्यो युवभ्यः धर्माचरणगोपालनादिदक्षेभ्यः द्विजपुङ्गवेभ्यो ब्राह्मणोत्तमेभ्यो गाः प्रादाम् ॥ १४ ॥ देयान्तराण्याह—गविति ॥ गावोऽत्र वृषाः भूहिरण्यानि आयतनानि गृहान् अश्वान् हस्तिनः सदासीः कन्याः। कबभाव आर्षः। तिलरूप्यशय्याः वासांसि रत्नानि परिच्छदान् रथान् गृहोपकरणानि च प्रादां यज्ञैरिष्टम् अग्निष्टोमादयो यज्ञाश्च कृताः पूर्तं वापीकूपादि चरितं कृतम् ॥ १५ ॥

कस्यचिदिति ॥ कस्यचिद् द्विजमुख्यस्य प्रतिग्रहरहितस्य गौः भ्रष्टा स्वबन्धनाद्विमुक्ता सती मम गोधने सम्पृक्ता मिलिता सा चाविदुषा द्विजस्येयमित्यजानता मया द्विजातये अन्यस्मै ब्राह्मणाय दत्ता ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यावम्

कपिलाश्च वाराहे सुवर्णकपिला श्वेतपिंगला कृष्णपिंगलादिभेदेन दशविधा उक्ताः न्यायेन धर्मशास्त्रोदितेन । अर्जिताः संपादिताः ॥ १३ ॥ ऋतव्रतेभ्यः । ऋतं दम्भरहिततया सत्यव्रतं विप्रगुणद्विषड्कं च येषां तेभ्यः तदुक्तं भारते धर्मश्च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षानसूया । यज्ञश्च दानं धृतिः । श्रुतं च व्रतानि वै द्वादशब्राह्मणस्येति तपसा श्रुताः प्रसिद्धाश्च ते ब्रह्मणि वेदे वदान्याः तत्पाठनेनात्युदाराश्च । ते संतः साधुशीलाश्च तेभ्यः प्रादां ददौ ॥ १४ ॥ तेभ्यः गोप्रभृतीनपि ददौ । गावो वृषाः । आयतनानि गेहानि । सदासीः दासीभिः सहिताः परिच्छदानछत्रादीन् यज्ञैः इष्टं कर्मचरितं कृतं पूर्तं वापि कूपादि ॥ १५ ॥ एवं वर्तमानस्य मम कृकलासतनुहेतुं वदामीत्याह कस्यचिदिति । द्विजमुख्यस्य ब्राह्मणोत्तमस्य अविदुषा ब्राह्मणस्येयं गौर्नमदीया भवतीत्यज्ञानता मया अन्यस्मै दत्ता ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ता एव विशिनष्टि ॥ पयस्विनीरिति ॥ पयस्विनीः, अत्र भूम्नि मत्वर्थीयः । बहुदुग्धवतीरित्यर्थः, तरुणीः, शीलं च रूपं च गुणाश्च तैरुपपन्ना युक्ताः, कपिलाः कपिलालक्षणवतीः, यद्वा । कपिलवर्णाः, हेमश्रृङ्गीः स्वर्णालंकृतविषाणाः, न्यायार्जिताः न्यायतः संपादिताः, रूप्यखुराः, सवत्सा वत्सैः सहिताः, दुकूलानि उत्तमवासांसि च माला मुक्ताहाराश्च आभरणानि च तानि विद्यन्ते आसां तास्ताः, दुकूलादीनां द्वन्द्वस्ततो मत्वर्थीयोऽच् । अहं, ददौ ॥ १३ ॥ अथ सत्पात्राणि विशिनष्टि ॥ स्वलंकृतेभ्य इति ॥ स्वलंकृतेभ्यः, गुणशीलवद्भ्यः, सीदत् क्लिश्यमानं कुटुम्बं येषां तेभ्यः, ऋतव्रतेभ्यः, तपःश्रुतास्तपसा प्रख्याताश्च ब्रह्मवदान्या ब्रह्मवादिनश्च ते च सन्तस्तेभ्यः, वदान्यवद्भ्य इति पाठे, तपआदिविशिष्टेभ्यः, युवभ्यः, द्विजपुङ्गवेभ्यः, गा इति शेषः । प्रादाम् ॥ १४ ॥ न केवलं गा एवादां, किं त्वन्यदपीत्याह ॥ गावश्च भूश्च हिरण्यं च अश्वाश्च हस्तिनश्च तान्, सदासीर्दासीभिः सहिताः कन्याः तिलरूप्यशय्याः, वासांसि, रत्नानि, परिच्छदान् गृहोपकरणानि, रथान् द्विजेभ्य इति शेषः । प्रादां, गवादीनामितरेतरयोगद्वन्द्वः । पुनर्गोग्रहणमितरापेक्षया तद्भूयस्त्वाभिप्रायकम् । आयतनानि गृहाः, न केवलं गवादिकमेव प्रादामपि तु, यज्ञैः इष्टं च, पूर्तं स्मार्त्तकर्म च, चरितं कृतम् ॥ १५ ॥ एवं वर्त्तमानस्य मम किंचित् संकटमापन्नं तच्छृणिवत्याह । कस्यचिदिति ॥ द्विजमुख्यस्य प्रतिग्रहानाचरणरूपमहाधर्मस्थतया ब्राह्मणेषु मुख्यस्य, कस्यचित् विप्रस्य, भ्रष्टा बलात्तद्धस्ताद्भ्रष्टतां प्राप्ता गौः, मम गोधने, संपृक्ता मिलिता, सा अविदुषा, मया च, द्विजातये तदितरस्मै ब्राह्मणाय, दत्ता इतरगोभिः समं विश्राणिता ॥ १६ ॥

कृष्णप्रिया

नाथ ! सभी गौएँ दुधार, तरुण, सरल, सुन्दर सद्‌गुण सम्पन्न एवं कपिला थीं। उनके सींगों में सुवर्ण मढ़ दिया गया, न्यायोपार्जित द्रव्य खरीद ली थी, खुरें चांदी की थीं, सब गौएँ सवत्सा थीं, दुकूल वस्त्रों से, कुसुमों की मालाओं से, गले में कंठीओं से अलङ्कृत कर दी थी ॥ १३ ॥ हे नाथ ! विप्रवर भी समलङ्कृत थे, गुणशील विद्या समान थे विपुल एवं कष्टग्रस्त कुटुम्ब वाले थे, सत्यव्रती थे, तपस्वी, वेदाध्येता, विद्या दान करने वाले सच्चरित्र, युवावस्था सम्पन्न द्विजवर्य ऋषितनय थे पुनः वस्त्राभूषण से अलंकृत किये जाते थे ॥ १४ ॥ हे नाथ ! इस प्रकार आदर और सत्कारपूर्वक बहुत सी गौएँ, भूमि, सुवर्ण, आवास, हाथी, घोड़े, दासियों के साथ कन्याएँ, तिलके पर्वत, चांदी के पात्र, शय्या, वस्त्रालंकार, रत्नाभूषण, गृह के उपकरण, रथ आदि अनन्त वस्तुओं का दान किया था। बहुत से यज्ञ भी किये थे। कूप-वापिका जलप्याऊँ भी बनवायीं थी ॥ १५ ॥ भगवन् ! क्या निवेदन करूँ ! मेरे दुर्दैव से ऐसा प्रसङ्ग हो गया कि नगर में एक अप्रतिग्रही तपस्वी शीलसम्पन्न ऋषिवर विराजते थे, उनकी एक गाय एक दिन बिछुड़कर मेरे गोमण्डल में आ मिली। मुझे इस विषय का सहज भी ध्यान न था। मैंने प्रमाद से या अनजान अवस्था में उस गाय का किसी ब्राह्मण को दान किया ॥ १६ ॥

तां नीयमानां तत्स्वामी दृष्ट्वोवाच ममेति तम् । ममेति प्रतिसंग्रह्य[1] नृगो मे दत्तवानिति ॥ १७ ॥
विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ । भवान् दातापहर्तेति तच्छ्रुत्वा मेऽभवद् भ्रमः ॥ १८ ॥
अनुनीतावुभौ विप्रौ धर्म[2]कृच्छ्रगतेन [3]मे । गवां लक्षं [4]प्रकृष्टानां दास्याम्येषा प्रदीयताम् ॥ १९ ॥
भवन्तावनुगृह्णीतां किंकरस्याविजानतः । समुद्धरत[5] मां कृच्छ्रात् पतन्तं निरयेऽशुचौ ॥ २० ॥

---

[1] ग्राह्याह-श्रीधर. वंशी. जीव. वीर. विज. विश्व. ; गृह्या-च. पु. टि. । [2] कृच्छ्रं-वीर. । [3] मे-विज. ; तौ-प्रा. पा. । [4] प्रगृह्णीतां-विज. । [5] धरतं-वीर. विज. ।

कर्दमक्षमा

अन्वयः—ताम्, नीयमानाम्, तत्स्वामी, दृष्ट्वा, तम्, मम, इति, उवाच, च, प्रतिसंग्रह्य, मम, इति, नृगः, मम, इति, उवाच ॥ १७ ॥ स्वार्थसाधकौ, विवदमानौ, विप्रौ, माम्, ऊचतुः, भवान्, दाता, भवान्, अपहर्ता, इति, तत्, श्रुत्वा, मे, भ्रमः, अभवत् ॥ १८ ॥ धर्मकृच्छ्रगतेन, मया, उभौ, विप्रौ, अनुनीतौ, मे, एषा, प्रदीयताम्, प्रकृष्टानाम्, गवाम्, लक्षम्, प्रदास्यामि ॥ १९ ॥ अजानतः, किङ्करस्य, भवन्तौ, अनुगृह्णीतां, अशुचौ, निरये, पतन्तम्, माम्, कृच्छ्रात्, समुद्धरत ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रतिग्राहिणोक्तं दातेति। स्वामिनोक्तमपहर्तेति। अभवद्भ्रमः व्याकुलोऽभवमित्यर्थः ॥ १८ ॥ तदोभावपि प्रत्येकमनुनीतौ प्रार्थितौ। कथं तदाह। गवामिति सार्धेन ॥ १९–२० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तां मयाऽज्ञातदत्ताम् गाम्। तत्स्वामी तस्या गोः पूर्वो नाथः ॥ १७ ॥ विवदमानौ "भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः" इत्यात्मनेपदम्। "तङानावात्मनेपदम्" इत्यानस्यात्मनेपदसंज्ञेति। इत्यर्थ इति—भ्रमपदमत्र चेतोऽस्वास्थ्यपरमिति ज्ञेयम् ॥ १८ ॥ अनुनीतौ प्रार्थितौ धर्मकृच्छ्रगतेन धर्मसंबंधिकष्टं प्राप्तेन। प्रकृष्टानामितोऽपि शोभनानाम्। एषा मदज्ञानदत्ता ॥ १९ ॥ कृच्छ्राद्धर्मकृच्छ्रात्। अशुचौ महामलादिपूर्णे अकाराऽप्रश्लेषे तप्ते इत्यर्थः। 'शुचिरनुपहते तप्ते च' इति कोशात् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्यस्माद्धेतोः ॥ १७ ॥ स्वार्थस्य स्वीयाभिमानमात्रस्य साधकौ ॥ १८ ॥ धर्मस्य कृच्छ्रे सङ्कटे गते न मयेति शेषः। धर्मकृच्छ्र उपागत इति क्वचित् प्रकृष्टानाम् अस्या अप्युत्कृष्टानां प्रकर्षेण निजाग्रहत्यागपूर्वकान्तःशुद्ध्यादिना दीयताम् ॥ १९ ॥ कृच्छ्रात् कष्टात् समुद्धरतं कृच्छ्रमेवाह—पतन्तमिति। यद्वा कृच्छ्रात्पापाद्धेतोः पतन्तम् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तं गोर्नेतारमुवाच, तेनैव प्रतिग्राहि—दम्भभंगस्तत्स्मरणेनाधुनापि भयानुवृत्त्या वाग्वैकल्यात्। एवमग्रेऽपि; किंवा लेखकभ्रमादेव। प्रतिग्राही ममेत्याहेति मां समुद्धरतामिति च पाठः। एवमन्यत्राप्यूह्यम्। ननु मामकेयं मह्यं दत्ता, कथं तव स्यात्तत्राह—नृग इति, इत्यस्माद्धेतोः ॥ १७ ॥ स्वार्थसाधकाविति तयोरपि तदेकधेनुपरतोक्ता ॥ १८ ॥ धर्म्मस्य कृच्छ्रे संकटे प्रकृष्टानामस्या अप्युत्तमानां प्रकर्षेण निजाग्रह—त्यागपूर्व्वकान्तःशुद्ध्यादिना दीयताम् ॥ १९ ॥ कृच्छ्रात् कष्टान्मां समुद्धरतम् कृच्छ्रमेवाह—पतन्तमिति, यद्वा, कृच्छ्रात् पापाद्धेतोः पतन्तम् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तामिति। तामन्यस्मै दत्तां गां दृष्ट्वा तस्याः गोः स्वामी पूर्वं प्रतिगृहीता तां गां मदीयेत्याह—प्रतिग्राही पश्चात्प्रतिगृहीताऽपि मदीयैवाधुनैव मह्यं नृगो दत्तवानित्याह ॥ १७ ॥ विप्राविति। भवान् दाता ततोपहर्त्तेत्येवमूचतुः यतस्तौ स्वार्थसाधकौ स्वार्थपरावृत एवमूचतुरित्यर्थः ॥ १८ ॥ तद्विप्रयोर्वचः श्रुत्वा ममापि भ्रमो जातः तदा धर्मकृच्छ्रं धर्मसङ्कटं प्राप्तेन मयाऽनुनीतावुपच्छन्दितौ, अनुनयनप्रकारमाह—गवामिति सार्द्धेन। प्रकृष्टानां श्रेष्ठानां गवां लक्षमन्यतरस्मै प्रदीयतां युवयोरन्यतरेणेत्यर्थः ॥ १९ ॥ किञ्च, भवन्ताविति। किङ्करस्य मम कर्मणः शेषत्वविवक्षयेयं षष्ठी किङ्करं मामनुगृह्णीतामित्यर्थः। तत्र हेतुत्वेन विशिनष्टि—अविजानत इति। कृच्छ्राद्धर्मसङ्कटादशुचौ निरये पतन्तं मां समुद्धरतेति पूजार्थं बहुवचनम् ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तस्या गोस्वामी पूर्वतनो नाथः अन्यः प्रतिग्रहीता ममेति प्रतिगृह्याब्रवीत् ॥ १७ ॥ विवदमानौ विप्रतिपद्यमानौ "भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः" (१–३–४७) इत्यत आत्मनेपदं भ्रमः सम्भ्रमः ॥ १८–२० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

प्रतिग्राही विप्र उवाच भवान् दातेति गोस्वामी उवाच भवानपहर्त्तेति भ्रमः अतिवैयग्र्यमित्यर्थः ॥ १८–२० ॥

गूढार्थदीपिनी

तत्स्वामी अप्रतिग्राही ॥ १७ ॥ विवदमानौ । 'भासनोपसंभाषा' इत्यात्मनेपदम् । भ्रमो व्यग्रता ॥ १८ ॥ अनुनीतौ प्रार्थितौ । एषा युवयोर्मध्ये अन्यतरेण अन्यतरस्मै दीयताम् ॥ १९-२० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रतिग्राह्युवाच दातेति स्वाम्युवाचापहर्त्तेति ॥ १७-१८ ॥ तदा धर्मकृच्छ्रगतेन धर्मकष्टप्राप्तेन उभावपि प्रत्येकमनुनीतौ उपच्छन्दितौ, तदेवाह—गवामिति सार्द्धेन । दास्यामि अन्यतरस्मै एषा प्रदीयतामन्यतरेणाऽन्यतरस्मै ॥१९॥ किङ्करस्य किङ्करमनुगृह्णीताम् कर्म्मणः शेषत्वविवक्षया षष्ठी समुद्धरतेति बहुवचनं पूजार्थम् ॥ २०-२२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः प्रतिग्रहीतरि तां प्रतिगृह्य गच्छति सति तत्स्वामी मिलितो मध्ये ममेयं गौः कथं नीयत इति चाह । ततः प्रतिग्राही 'नृगो मे दत्तवा'निति ममेत्याह । **प्रतिसंगृह्य** । प्रतिग्रहं कृत्वा, प्रतिग्रहकथामप्युक्त्वा, नृगो दत्तवानिति ममेत्याह ॥ १७ ॥ एवमुभौ विप्रौ विवदमानौ स्वार्थसाधकौ । प्रतिग्रहे सिद्धे ब्राह्मणस्य गौर्भवति, राज्ञश्च ब्राह्मणगवापहारदोषो भवति । दानप्रतिग्रहयोरभावे ब्राह्मणस्यैव गौः, नापहारदोषः, लोकदृष्ट्या धर्मे सिद्धे प्रतिग्रहस्य सिद्धत्वाद्दानस्य च प्रतिग्रहीतुरेव गौः, अपहारदोषप्रायश्चित्तं परं कर्तव्यम्। अलौकिकश्चेद्धर्मः देवाद्यधिष्ठितः, तदा अधर्मसिद्धं द्रव्यं धर्मविषयो न भवतीति न दानं सिध्यति । सुतरां प्रतिग्रहः । अतो विवादः । राजा चेदत्र दानमङ्गीकरिष्यति, तदा प्रतिग्रहः सेत्स्यति, अपहारश्च । अपहारदोषस्याधिक्यात् नाङ्गीकुर्याच्चेत्, तदा स्वामी गां नेष्यतीति स्वार्थसाधकौ विप्रौ अन्योन्यं विवदमानौ मां राजानमूचतुः। एकस्य वचनं **भवान् दाते**'ति । तस्मिन्नङ्गीकृते द्वितीय आह अपहर्तेति । हेतुपूर्वकं वृत्तान्तवचनं अर्थात् ज्ञायते । पश्चादपहारवचनं श्रुत्वा मे भ्रमः अभवत् यदेको न प्रार्थितः । एकस्मिन् दोषे अङ्गीकृतं तत्प्रायश्चित्तं स्वेच्छया कृतं स्यात् ॥ १८ ॥ भ्रमादेकमकृत्वा स्वतस्तत्त्वापरिज्ञानात् अन्यस्यापृष्टत्वात् द्वयमपि सन्देहे स्थापयित्वा उभावनुनीतौ । गौः त्यक्तव्येत्यस्मिन्नर्थे यथा द्वितीयोऽप्यपहारः सिध्यति । ननूभयोरनुनये को हेतुः, तत्राह **धर्मकृच्छ्रं गतेन मे** इति । तस्य हृदये धर्मे निश्चयाभावात् कृच्छ्रं सङ्कटमेव प्राप्तवान् । अनुनयमाह । गवां लक्षं एतन्निष्कृतित्वेन दास्यामि । एषा प्रदीयतामिति ॥ १९ ॥ ननु निष्कृतिग्रहणे दोषः स्यात्, कथं ग्राह्य इति चेत्, तत्राह **भवन्तावनुगृह्णीता**मिति । मदुपर्यनुग्रहेण निषिद्धमपि कर्तव्यमिति भावः। अनुग्रहे **किङ्करस्येति** । तथापि सापराधो दण्ड्य एवेति चेत्, तत्राह **अविजानत** इति । विशेषेणायमर्थो न ज्ञात इति । अज्ञाते स्वल्पमेव प्रायश्चित्तमित्यनुग्रहेणापि सिध्यति । तस्य भाव्यर्थः स्वत एव स्फुरितः तन्निराकरणार्थं प्रार्थयति **समुद्धरते**ति। **कृच्छ्रात्** सङ्कटात् निर्णयज्ञानाभावात् अशुचौ निरये पतन्तमिति । **हीनभावः निरयो भवति**, ततश्च गोत्वमश्वत्वं वा चेद्भवेत्, तदा निरयत्वेऽपि नाशुचित्वम् । **श्वयोनौ** शूकरयोनौ वा पाते तथात्वमिति । तामिस्रादौ तु न पातः, नरकभोग एव परम् । योनिसम्बन्धे तु अभिमान उत्पद्यत इति पातः । **अशुचावि**ति । लोकप्रसिद्धमलादिप्रदर्शनेन दया वा उत्पाद्यते ॥ २० ॥

श्रीसुबोधिनी—सारः

मार्गे नीयमानां तां गां दृष्ट्वा तस्या गोः स्वामी तं नीयमानं विप्रं ममेयमित्युवाच प्रतिग्राही विप्रो ममेत्याह तत्र हेतुः नृगो राजा मे मह्यं दत्तवान् इति ॥ १७ ॥ स्वार्थस्य साधकौ विप्रौ विवादं कुर्वाणौ मामूचतुः भवान् दातेति प्रतिग्राहिणोक्तम् अपहर्त्तेति अयाचकेनोक्तम् इति श्रुत्वा मे मम भ्रमोऽभवत् संदेहोऽजायत ॥ १८ ॥ धर्मे कृच्छ्रं गतेनापत्प्राप्तेन मया उभौ द्वौ विप्रौ अनुनीतौ अनुनयं प्रति याचितौ वै एव तदाह बिभागेन प्रकृष्टानामुत्तमानां गवां लक्षं प्रदास्यामि भो स्वामिन् एषास्मै प्रदीयतामिति स्वाम्यनुनयः ॥ १९ ॥ किंकरस्य दासस्याविजानतो ममोपरि भवंतावनुग्रहं कुरुतां अशुचौ घोरे नरके पतन्तं मां कृच्छ्राद्दुःखात् युवां समुद्धरतम् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तां दत्तां प्रतिग्राहिणा नीयमानां गां तस्याः गो स्वामी दृष्ट्वा मम मदीयेयमित्युवाच, प्रतिग्राही च मदीयेयमित्याह। 'कुतस्त्वया प्राप्ता' इत्यपेक्षायामाह—मे मह्यमधुनैव नृगो दत्तवानिति ॥ १७ ॥ एवं परस्परं विवदमानौ तौ विप्रौ मामूचतुः। तत्र हेतुमाह—स्वार्थसाधकाविति । मन्मुखान्निर्णयेन गोग्रहणोत्सुकावित्यर्थः । तत्र प्रतिग्राह्याह—भवान् दाता अधुनैवेमां मह्यं दत्तवान्, अतः इयं मदीया, अयं च वदति मदीयेति । तदा स्वाम्याह—भवानपहर्तेति । इयं च गौर्मदीया लोके प्रसिद्धा तां चेद्भवानस्मै दत्तवांस्तदापहर्तेत्यर्थः । तत् द्वयोर्वचनं श्रुत्वा मे भ्रमो व्याकुलता अभवत् ॥ १८ ॥ इयं च गौरन्यस्यैव, तस्या दानं यदि अन्यस्मै प्रतिग्राहिणे क्रियते तदा तत्स्वामिनः अपहारः कृतः स्यात् । यदि तु तत्स्वामिनो सा च दीयते तदा दानस्य

कृतत्वात् प्रतिग्राह्यपहारः कृतः स्यात्तदापि स एव दोष इत्येवं धर्मविचारे उभयथापि कृच्छ्रं संकटं प्राप्तेन मया तावुभावपि विप्रावनुनीतौ उपच्छन्दितौ। अनुनयप्रकारमाह—गवामिति सार्धेन। प्रकृष्टानां श्रेष्ठानां गवां लक्षं युवयोरन्यतरस्मै दास्यामि, तेनान्यतरेणैषा गौरन्यतरस्मै प्रदीयतामित्यर्थः ॥ १९ ॥ "एका गौर्न प्रतिग्राह्या द्वितीया न कदाचन ॥ सा चेद्विक्रयमापन्ना रौरवं नरकं नयेत्" इति गोविक्रयनिषेधात्। 'कथं तन्निष्कृतिरूपं गवां लक्षं ग्राह्यम्' इत्याशङ्क्य 'मदुपर्यनुग्रहेण निषिद्धमपि कर्तव्यम्' इत्याशयेनाह—भवन्तावनुगृह्णीतामिति। अनुग्रहे हेतुमाह—किङ्करस्येति। तथापि सापराधो दण्ड्य एवेति चेत्तत्राह अविजानत इति। इयं गौः अन्यस्येत्यजानतः। अज्ञाते त्वल्पमेव प्रायश्चित्तम्, तत्स्वानुग्रहेणापि सिद्ध्येदित्याशयः। तस्य भाव्यर्थः स्वत एव स्फुरितस्तन्निराकरणं प्रार्थयति—अनेनापहारदोषेण अशुचौ नरके पतन्तं मां तस्मात् कृच्छ्रात् सङ्कटात् अनेन निष्कृतिग्रहणरूपानुग्रहेण समुद्धरतमिति ॥ २० ॥

अन्वितार्थप्रकाशिका

तामिति ॥ तां दत्तां प्रतिग्राहिणा नीयमानां गां तस्याः गोः स्वामी दृष्ट्वा मम मदीयेयमित्युवाच प्रतिग्राही च मदीयेयमित्याह स्म। यतः मे मह्यमधुनैव नृगो दत्तवानिति ॥ १७ ॥ विप्राविति ॥ एवं परस्परं विवदमानौ स्वार्थसाधकौ मन्मुखान्निर्णयेन गोग्रहणोत्सुकौ तौ विप्रौ मामूचतुः। तत्र प्रतिग्राह्याह स्म। भवान्दाता अधुनैवेमां मह्यं दत्तवान्। स्वाम्याह स्म। इयं गौर्मदीया तां चेद्भवानस्मै दत्तवान् तदा अपहर्ता। तद्द्वयोर्वचनं श्रुत्वा मे भ्रमो व्याकुलताऽभवत् ॥ १८ ॥ अनुनीताविति ॥ एवं धर्मविचारे कृच्छ्रं संकटं प्राप्तेन मया तावुभावपि विप्रावनुनीतौ प्रार्थितौ। तदेवाह प्रकृष्टानां श्रेष्ठानां गवां लक्षं युवयोरन्यतरस्मै दास्यामि तेनान्यतरेणैषा गौरन्यतरऽस्मै प्रदीयतामित्यर्थः ॥१९॥ भवन्ताविति ॥ भवन्तौ इयं गौः अन्यस्येत्यविजानतः किङ्करस्य ममोपरि अनुगृह्णीताम्। अनेनापहारदोषेण अशुचौ नरके पतन्तं मां तस्मात्कृच्छ्रात्सङ्कटात् अनेन निष्कृतिग्रहणरूपानुग्रहेण समुद्धरतमिति ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तं नेतारं दृष्ट्वा इयं गौर्ममास्तीति तत्स्वामी उवाच प्रतिग्राही गोनेताममेत्याह। यतो मे मह्यं नृगो दत्तवान् इति हेतोः ॥ १७ ॥ भवान्मह्यं दातेति प्रतिग्राहिणोक्तं मम धेनोर्भवानपहर्तेति स्वामिनोक्तं तच्छ्रुत्वा ॥ १८ ॥ उभौ विप्रौ धर्मकृच्छ्रगतेन मया प्रत्येकमनुनीतौ तथाहि प्रकृष्टानां श्रेष्ठानां ॥ १९ ॥ कृच्छ्रात् मां युवां समुद्धरतं ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तामिति ॥ तत् स्वामी अप्रतिग्रहकर्त्ता धेनोः स्वामी विप्रः, नीयमानां प्रतिग्रहकर्तृद्विजेन नीयमानां, तां स्वधेनुं दृष्ट्वा, तं सद्यः प्रतिग्रहकर्त्तारं द्विजं, मम इति इयं धेनुर्मदीयाऽस्तीति, उवाच, तदा प्रतिग्राही, यतः नृगः, मे मह्यं, सांप्रतमेव, दत्तवान्, इति हेतोः, मम मदीयेयमिति, आह ॥ १७ ॥ विप्राविति ॥ ततः, स्वार्थसाधकौ विवदमानौ विप्रौ, मां उपेत्य, भवान् सांप्रतमेव, दाता इति, प्रतिग्राही आह। भवान्, अपहर्त्ता अप्रतिग्राहिणो ममास्या धेनोरपहर्त्तेत्याह। एवमुभावूचतुः। तच्छ्रुत्वा, मे मम, भ्रमः अभवत् ॥ १८ ॥ अनुनीताविति ॥ तदा, धर्मकृच्छ्रगतेन धर्मनिमित्तककष्टं प्राप्तेन मया, वै उभौ विप्रौ, अनुनीतौ उपच्छन्दितौ, अनुनयप्रकारमाह गवामिति सार्द्धेन। प्रकृष्टानां गवां, लक्षं दास्यामि। अस्याः स्थाने इति शेषः। अतः, एषा प्रदीयताम्। भवतोर्द्वयोर्मध्येऽन्यतरोऽन्यतरस्मै दीयतामित्यर्थः ॥ १९ ॥ भवन्ताविति ॥ अविजानतः किंकरस्य, कर्मणः शेषत्वविवक्षायां षष्ठी। किंकरं मामित्यर्थः। भवन्तौ, अनुगृह्णीतां, अशुचौ निरये नरके, पतन्तं मां, कृच्छ्रात्, समुद्धरत, अत्र पूजार्थं बहुवचनम् ॥ २० ॥

कृष्णप्रिया

वह गाय ब्राह्मण अपने घर ले जा रहे थे तब मार्ग में खोजते असली मालिक ने प्रतिग्राही विप्र को कहा—यह गाय तो मेरी है, तब प्रतिग्राही विप्र ने कहा यह गाय मेरी है, मुझे नृग राजा ने इस गाय का दान किया है। नाथ ये दो विप्रवर सत्यवादी थे। अपनी बात पक्की करने के लिये विवाद करते हुए मेरे पास आये। एक प्रतिग्राही विप्र ने कहा राजन्! आपने अभी यह गाय मुझे दान में दी है, तब अप्रतिग्राही ऋषि ने कहा कि यह गाय मेरी है, इसे आप दान में कैसे दे सकते हैं? दोनों की बात सत्य थी। यह बात सबके अनाजानपने में बन गयी थी। मैं धर्मसंकट में आ गया। भगवन्! इन दोनों विप्रवर्यों की विनय-अनुनय करके कहा कि महाराज! इस गाय के बदले में एक लाख उत्तम गौएँ दूँगा, आपलोग कृपा करके मुझे यह गाय दे दीजिये। ऋषि महाराज! आप लोगों का अकिञ्चन किङ्कर हूँ। मुझसे अज्ञात अवस्था में यह अपराध बन गया है। आप इस दास पर दया करें, इस सेवक को घोर नरक से एवं संकट से बचा लीजिये ॥ १७–२० ॥

[1]नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपाक्रमत्। [2]नान्यद् गवामप्ययुतमिच्छामीत्यपरो ययौ ॥२१॥
[3]एतस्मिन्नन्तरे[4] [5]याम्यैर्दूतैर्नीतो यमक्षयम्। यमेन पृष्टस्तत्राहं देवदेव जगत्पते ॥२२॥
पूर्वं त्वमशुभं [6]भुङ्क्षे [7]उताहो नृपते शुभम्। नान्तं दानस्य धर्मस्य [8] पश्ये[9] लोकस्य भास्वतः ॥२३॥
[10]पूर्वं देवाशुभं भुञ्ज इति प्राह पतेति सः। तावदद्राक्षमात्मानं कृकलासं पतन् प्रभो ॥२४॥

कर्दमक्षमा

अन्वयः—राजन्, अहम्, न, प्रतीच्छे, इति, उक्त्वा, स्वामी, अपाक्रमत्, गवाम्, लक्षम्, अन्यत्, अयुतम्, अपि, इच्छामि, इति, अपरः, **ययौ** ॥ २१ ॥ हे, देवदेव ! हे, जगत्पते ! एतस्मिन्, अन्तरे, याम्यैः, दूतैः, यमक्षयम्, नीतः, तत्र, अहम्, यमेन, पृष्टः ॥ २२ ॥ नृपते ! त्वम्, पूर्वम्, अशुभम्, भुङ्क्षे, उत, अहो, शुभम्, भुंक्षे ? दानस्य, धर्मस्य, भास्वतः, लोकस्य, अन्तम्, न ॥ २३ ॥ देव ! पूर्वम्, अशुभम्, भुञ्जे, इति, सः, पत, इति, प्राह, प्रभो, पतन्, तावत्, आत्मानम्, कृकलासम्, अद्राक्षम् ॥ २४ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

अपरः प्रतिग्राही दुराग्रहो यल्लक्षं त्वयोक्तमन्यदपि गवामयुतं यदि तदपीमां विहाय नेच्छामीत्युक्त्वा गां त्यक्त्वा ययावित्यर्थः ॥ २१ ॥ एतस्मिन्नंतर इति । इतः पूर्वं पापाभावान्नेतुमसमर्था इति **भावः** ॥२२॥ उताहो इत्येकं पदम् । अथवा पूर्वं शुभमिति नान्तमिति **यमस्य** स्वस्य वा वाक्यम् । पश्ये पश्यामि ॥ २३ ॥ हे देव **यम** पूर्वमशुभं भुंज इति मयोक्ते स यमः पतेति प्राह ॥ २४-२५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

राज्यं राजप्रतिग्रहमहं न प्रतीच्छे करोमीति प्रतिग्रहभयादपाक्रमद्गां त्यक्त्वैवापासरदित्यर्थः । इत्यर्थ इति-अव्ययानामनेकार्थत्वादितिपदं त्यागमपि बोधयतीति भावः ॥ २१ ॥ एतस्मिन्नज्ञातापराधलक्षणे अंतरेऽवकाशे सति पापादायुषः संकोचे सति । यद्वा—अज्ञातविप्रगोदानतः प्राग्यमो ममाह्वा नेऽपि न प्रभुरभूत्तत्सत्त्वे तेनाहमाहूतः । हे देवानां पूज्यानामपि पूज्य जगत्पते इति जगत्पालनार्थं त्वयैव नियुक्तस्य तदुचितमेव । यद्वा—त्वत्कृतनिबंधस्तेषामप्यलंघ्य एवेति भावः । इति भाव इति—'याज्ञामृते पथि चरन्प्रभुभिर्न चाल्यः' इति न्यायेन धर्मशीलानां छिद्रं विना दंडो न भवतीति तात्पर्यम् । तत्र यमालये ॥ २२ ॥ यमो मामित्थमपृच्छदित्याह—पूर्वमिति । भुंक्षे भोक्ष्यसे । वर्तमानसामीप्ये लट् । "भुजोऽनवने" इत्यात्मनेपदम् । 'उताहो परिप्रश्नविचारयोः' इति मेदिनी । दानस्य दानरूपस्य । यद्वा—मत्वर्थीयोऽत्र बोध्यस्तेन प्रकृष्टदानवतो धर्मस्येत्यर्थः ॥ २३ ॥ तावत्साकल्येन । कृकलासं सरटम् । वाल्मीकीये तु ताभ्यां विप्राभ्यां त्वं कृकलासो भवेति शाप एव राज्ञे दत्तस्स च विरोधः कल्पांतरव्यवस्थयाऽनुसंधेय इति तोषणीकाराः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वै एव न प्रतीच्छे नैव प्रतिगृह्णामीत्यर्थः । अपाक्रमत् गां त्यक्त्वा प्रतिग्रहभयेनापसृतः ॥ २१ ॥ अन्तरे छिद्रे परिमितायुषः समाप्तेर्मरणावकाशे सति यमस्य क्षयं पतत्यग्रे वक्ष्यमाणात्पुण्यात्मानस्तस्य गम्यं दक्षिणस्यां मानस्योपरिस्थं निवासमेव न तु भूमिष्ठं तत्र यमक्षय एव न त्वन्यत्रेति आदरेण साक्षात्प्रश्नः सूचितः हे **देवानां** त्रयादीनामपि देव पूज्य यतो हे जगत्पते जगत्पालनार्थं त्वयैव धर्माधिकारे नियुक्तस्य तस्य तदुचितमेवेति किम्बा त्वत्कृतनिबन्धस्तेषामप्यलङ्घ्य इति भावः । अयं प्रश्ने हेतुः ॥ २२ ॥ अशुभं पापं तद्विप्रगोहरणजं भुंक्ष्व भोक्ष्यसे धर्मस्य यज्ञादेः साधनानन्त्यात् साध्यस्य लोकस्य स्वर्गादेरपि भास्वतः अद्भुतसुखवैभवादिना राजमानस्येत्यर्थः ॥ २३ ॥ पूर्वमिति अशुभोदर्कतायाः परमाशोभनत्वात् प्रकर्षेण अभिनयादिनाह तावत्तत्क्षण एव पतन् सन् प्रभो हे सर्वकर्मेश्वरेति त्वया दीयमानं कर्म फलमवश्यमेव भोग्यमिति किं वा तच्च त्वदिच्छयैवेति भावः । कृकलासमिति तादृशपापस्य तादृशफलत्वात् श्रीरामायणादौ च ताभ्यां विप्राभ्यां तथैव शपनात् तत्रोक्तञ्च तद्विरुद्धं कल्पभेदव्यवस्थया परिहार्य्यम् ॥ २४ ॥

---

[1] नान्यां-वीर. ; नान्यां प्रतीच्छे राजेन्द्र इत्युक्त्वा-प्रा. पा. । [2] नान्यं-विज. । [3] ततोहं कालयोगेन मृतः परममायया-वीर. विज. । [4] देव दैवन्नीतस्तद्वदामि तवाग्रतः-वीर. । [5] दूतैर्याम्यै-प्रा. पा. । [6] भुंक्ष्व-विज. । [7] अथवा-प्रा. पा. । [8] भवतः-वीर. । [9] पश्य लोकांश्च-विज. । [10] पूर्वमेवा-वीर. विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वै एव, न प्रतीच्छे नैव प्रतिगृह्णामीत्यर्थः। किंवा प्रतिग्रहं मनसापि नेच्छाम्येवेति, अपाक्रमद् गां त्यक्त्वा प्रतिग्रहभयेनापसृतः; कोपेन मयि पृष्ठं दत्त्वा निर्गतो वा ॥ २१ ॥ अन्तरे अवकाशे छिद्रे वा, यमस्य क्षयं निवासमेव, न तु नरकम्। तत्र यमक्षय एव, न त्वन्यत्रेति आदरेण साक्षात्प्रश्नः सूचितः। हे देवानां यमादीनामपि देव पूज्य! यतो हे जगत्पते! जगत्पालनार्थं त्वयैव धर्म्माधिकारे नियुक्तस्य तस्य तदुचितमेवेति। किंवा त्वत्कृतनिबन्धस्तेषामप्यलङ्घ्य इति भावः। अयं प्रश्ने हेतुः ॥ २२ ॥ अशुभं पापं तद्विप्र-गोहरणजम्, किंवा दुःखं तत्पापजं भुङ्क्ष भोक्ष्यसे। भुङ्क्ष्वेति पाठे पाठान्तरेऽपि स एवार्थः। धर्म्मस्य यज्ञादेः, दानस्य धर्म्मान्तर्गतत्वेऽपि पृथगुक्तिस्तदतिशयापेक्षया। यद्वा, दानलक्षणस्य धर्म्मस्य अन्यविविधधर्म्मसद्भावेऽपि तस्यैवोक्तिस्तथैव, लोकस्य धर्म्मार्ज्जितस्य स्वर्गादेः; कथम्भूतस्य? भास्वतोऽनन्ताद्भुतसुखवैभवादिना राजमानस्येत्यर्थः। एवं श्रीध्रुवपदादिवदूर्द्ध्वलोकेष्वेव तस्य वैशिष्ट्यमुक्तम् ॥२३॥ पूर्व्वमिति अशुभोदर्कतायाः परमाशोभनत्वात्, प्रकर्षेणाभिनयादिनाह—तावत् तत्क्षण एव पतन् सन् प्रभो हे सर्व्वकर्म्मेश्वरेति त्वया दीयमानं कर्म्मफलमवश्यमेव भोग्यमिति। किंवा तच्च त्वदिच्छैवेति भावः। कृकलासमिति तादृशपापस्य तादृक्फलत्वात्; श्रीरामायणादौ च ताभ्यां विप्राभ्यां तथैव शयनात् तत्रोक्तश्चैतद्विरुद्धं कल्पभेदव्यवस्थया परिहार्य्यमेव ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमुक्तयोस्तयोरन्यतरः गोस्वामी हे राजन्! अहं गवां लक्षमपि न प्रतीच्छे न प्रतिगृह्णामि किन्तु दत्तामेनामेव नयामीत्युक्त्वाऽपाक्रमद्ययौ तथाऽपरोपि प्रतिग्राही दुराग्रहः यल्लक्षं त्वया प्रतिश्रुतमन्यदपि गवामयुतं दत्तं यदि तथाप्येनां विहाय नेच्छामीत्युक्त्वा गां त्यक्त्वा ययौ इत्यर्थः ॥ २१ ॥ तत इति। हे परम! तव मायया परमस्य तव माययेति वा हेतुभूतेन सङ्कल्पेन कालयोगेन निमित्तेन मृतः हे देव! दैववशाददृष्टानुसारात् यत्र नीतस्तत्तवाग्रतो वदामि ॥ एतस्मिन्निति। हे देवदेव! जगत्पते! एतस्मिन्नन्तरे इतः पूर्वं पापाभावात् नेतुमक्षमैरिति भावः। यमसम्बन्धिभिर्यमसदनं प्रापितः तत्र यमसदने यमेनाहं पृष्टश्च ॥ २२ ॥ प्रश्नमेवाह—पूर्वमिति। किं पूर्वमशुभं पापफलं भुङ्क्षे उताहो किम्वा शुभं पुण्यफलं भोक्ष्यसे भवतो दानस्य यो लोकः लोक्यत इति लोकः फलं तस्य भास्वतः प्रकाशमानस्य उपस्थितस्येति यावत् अन्तमवधिं न पश्यामि ॥२३॥ पूर्वमेवाशुभं पापफलं भुञ्जे तस्याल्पीयस्त्वादिति भावः इति मयोक्ते पत निरये इति शेषः। इति इत्थं स यमः मां प्राह तावदिति। तावत्तदैव हे प्रभो! पतन्नहमात्मानं कृकलासमद्राक्षं दृष्टवानस्मि ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अपाक्रमत् अपगतवान् ॥ २१ ॥ याम्यैर्यमस्य विद्यमानैः ॥ २२ ॥ भुंक्ष्व भोक्ष्यसे तव दानस्य धर्मस्य अन्तं नास्ति तज्जन्यलोकान् पश्य इत्युक्तोहं प्राक् अशुभं भुञ्जे इत्यवदं इत्युक्ते स यमः तर्हि पतेति मां प्राह ॥ २३-२७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शनी

राज्ञां न प्रतीच्छे राजप्रतिग्रहं न करोमीत्युक्त्वा अपाक्रमत् स्वीयां गां विहायैव ययौ अपरः प्रतिग्राही दुराग्रहः यल्लक्षं त्वयोक्तम् अन्यदप्ययुतमपि यदि ददासि तदपीमां विहाय नेच्छामीत्युक्त्वा ययौ ॥ २१ ॥ मरणानन्तरमिति शेषः यमक्षयं संयमनीम् ॥ २२ ॥ अशुभम् अजानता यद्विप्रस्य गौरपहृता तज्जन्यपापफलम् उताहो किं वा शुभं पुण्यफलं तव दानस्य अन्तं न पश्यामि तत्फलस्य भास्वतो लोकस्य स्वर्गस्यापि अन्तं न पश्यामि ॥ २३ ॥ हे देव यम! पूर्वमहमशुभं भुञ्जे इति मयोक्ते स यमः पतेति प्राह ॥ २४ ॥

गूढार्थदीपिनी

न प्रतीच्छे अन्यां न प्रतिगृह्णामि। स्वामी अप्रतिग्राही अपाक्रमत् ययौ स्वगां विहाय। अपरः प्रतिग्राही हठी एनामेव नान्यत् इत्युक्त्वा ययौ ॥ २१ ॥ यमक्षयं यमलोकम्। 'क्षि निवासे' इत्यस्मादेरच् ॥ २२ ॥ उपार्जितस्य दानस्य तज्जन्यधर्मस्य भास्वतः प्रकाशमानस्य स्वर्गादिलोकस्य पुण्यफलस्य च अन्तं नेत्यन्वयः। भुङ्क्षे भोक्ष्यसे। वर्तमानसामीप्ये लट्। 'भुजोऽनवने।' इत्यात्मनेपदम् ॥ २३ ॥ पत गच्छ नीचयोनिमिति यमः मां प्राहेति ॥ २४-२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पश्ये पश्यामि ॥ २३ ॥ हे देव ॥ २४-२५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्र मुख्यः स्वामी, गोविक्रयस्य निषिद्धत्वात्, अन्यल्लक्षायुतादिसङ्ख्यापरिमितं गोसमूहं अहं न प्रतीच्छ इत्युक्त्वा, राजप्रार्थनां त्यागांशे अङ्गीकृत्य, स्वाम्यपाक्रमत्, प्रतिग्रहस्य राज्ञा स्थापितत्वात् पूर्वप्रतिग्रहस्यैव सिद्धत्वात्। विक्रयपक्षे प्रतिग्रहपक्षे वा दोषश्रवणात्। 'एका गौर्न प्रतिग्राह्या द्वितीया न कदाचन। सा चेद्विक्रयमापन्ना रौरवं नरकं व्रजे'दिति वाक्याद्गवामयुतमपि एतन्निष्कृतित्वेन नाहं प्रतीच्छ इति द्वितीयोऽपि ययौ। राजन्निति संबोधनात् अनिष्कृतित्वेऽपि प्रतिग्रहोऽपि निषिद्ध इति सूचितम्। राजा सर्वेषामनुरोध्यः, अतिक्रमोऽपि सोढव्य इति सूचितम्। लक्षं गावः राज्ञा दातुं शक्याः, न तु ब्राह्मणेन, अयुतमेव परमा काष्ठा ब्राह्मणस्य। कोऽर्हति सहस्रं पशून् प्राप्तुमिति सहस्रस्यैव महत्त्वात्। दशपुत्रविभागे सहस्रशो दानेऽपि अच्युतस्यैव पर्याप्तत्वात्। प्राप्तमयुतं निषेधति **गवामप्ययुत**मिति। यद्यपि तावता पूर्णः कामो भवेत्, तथाप्यव्यवस्थितत्वात् एकस्यामपि गवि यत्रायं सन्देहः, तत्र किमन्यद्वक्तव्यमिति भावः॥ २१॥ एवं ब्राह्मणद्वयक्षोभे दण्डार्थं यमः प्रवृत्तः, गोश्वापहारे आयुः क्षीणमिति तदेव यमदूतैः समागतमित्याह **एतस्मिन्नन्तर** इति। यावदयं प्रतिविधानं कुर्यात्, तन्मध्य एव याम्यैर्यमक्षयं नीतः। अनेन बलान्नयनं निरूपितम्। वलाद्गौर्हृतेति। तेनापि ब्राह्मणाः सम्बोधिता इति स्वेच्छयैव तैस्त्यक्त इत्यस्यापि स्वेच्छयैव नरकभोगो निरूप्यते। अत एव इच्छार्थं यमेन पृष्टः। अस्मिन्नर्थे सत्यतां निरूपयितुं **देवदेवे**ति सम्बोधनम्। **जगत्पत** इति च। धर्मकर्तुः कथं यमदण्ड इति शङ्कां वा दूरीकर्तुम्। **प्रमेयबले वेदापेक्षया भगवदाज्ञा** कर्तव्येति निरूपयन् देवस्यापि त्वं देव इति त्वदाज्ञा यमेन कर्तव्या। जगत्पतित्वात् मयापि। अतस्त्वदिच्छयैव जातमिति नात्र किञ्चित्प्रतिकर्तव्यमस्तीति सूचितम्। हे **नृपते, पूर्वं** त्वमशुभं भुङ्क्षे। लण्मध्यमपुरुषैकवचनम्, प्रश्नार्थे लट्। अशुभस्याल्पत्वात् नान्तरीयकमिवाशुभं गमिष्यतीति प्रथममशुभभोगप्रश्नः। अथवा। **दुःखान्तता निषिद्धे**ति। अथवा। को वा दुःखानुभवं मन्येत अतः प्रथममेव हे नृपते अशुभं भुङ्क्षे॥ २२३॥ तदा स्वस्यालोचनामाह **नान्तं दानस्य धर्मस्ये**ति। दानस्यान्यस्यापि धर्मस्य अन्तो न विद्यते। गोदानप्रस्तावे कश्चिद्वञ्चको धूर्त आसन्नमरणां गां वञ्चयित्वा ब्राह्मणाय दत्वा मुक्तिं गत इति श्रूयते। स हि नगरमध्यवासे मृतायाः गौर्निर्हरणासमर्थः व्याजेन कञ्चिद्ब्राह्मणमाकार्य, तस्मै दानं दत्तवान्। ततो मुहूर्तत्रयानन्तरं गौर्मृता। ततो ब्राह्मणः प्रतिग्रहीता स्ववस्त्रं चाण्डालेभ्यो दत्वा तां गां बहिः निःसारितवान्। एवं ब्राह्मणं वञ्चयित्वा पश्चान्मृतः, यमेन पृष्टः चित्रगुप्तेन, तस्य वृत्तान्ते कथिते पूर्वं शुभफलभोगं करिष्यामीत्युक्त्वा, तत्रापि कौटिल्यं कृतवान्, तादृशगोदानस्य हि फलं यावद्गौर्जीवति, तावत्परलोके कामधेनुस्तद्वशे तिष्ठतीति। तथा यमेनोक्तः मुहूर्तत्रयं कामधेनुस्त्वदधीना स्थास्यतीति। कामधेनुं प्रत्याह 'व्याघ्रो भूत्वा यमं भक्षये'ति। ततो व्याघ्रेणोपसृतः यमः भीतो विष्णुं शरणं ययौ। यत्रास्ते भगवान् ब्रह्मादिभिर्वृतः। तत्र पश्चादयमपि गतः, कामधेन्वा नीतो, विष्णुसाक्षात्कारे मुक्त इति। यत्र तादृशगोदानस्याप्यनन्तफलत्वम्, तदा विधानपूर्वकं दत्तायाः किं वक्तव्यमिति। अन्यस्याप्येवं धर्मस्यानन्तफलत्वम्। फलं हि द्विविधम्, इह लोके यशः, परलोके स्वर्ग इति। तदुभयमाह **यशो लोकश्च भास्वर** इति। अनन्तं यशः, अनन्तो लोक इति। तामसधर्मेऽपि तथेति तत्पातालोपभोग्यमिति तद्व्यावृत्त्यर्थं **भास्वर** इति। दानस्य फलरूपं यशः अनन्तम्, लोकश्चानन्त इति। **लोकस्य भास्वत** इति पाठे अनन्तं यशः शुभं चेति पूर्वोक्तं सङ्ग्राह्यम्। भुङ्क्ष इति भुञ्ज इति वा क्रिया। भास्वतो लोकस्योत्तमदेहस्य वा। पूर्वं सम्बन्धि अशुभं भुङ्क्ष इति। देवेति सम्बोधनं परिज्ञानार्थम्। उक्तवानित्यर्थादिति। एवं सति पतेति स यमः प्राह। यतः स ब्राह्मणातिक्रमं दृष्ट्वा क्रोधवान्। पतेति तस्माल्लोकात् भूलोके। **नीचयोनिभूतो नरकः भूमावेव, नान्यत्रे**ति। ततो यज्ज्ञातं तदाह **तावदद्राक्ष**मिति। पतन्नात्मानं कृकलासमद्राक्षम्, कर्मणा देहसम्बन्धेन। ग्रहणपरित्यागयोः परिज्ञानं योगज्ञानभक्तिष्वेव। तद्देहाद्वैतादात्मपदम्। बहिर्मुखत्वादस्य कर्मदोषो जात एव। **प्रभो** इति। त्वमेव समर्थस्तादृशकर्मभ्यो मोचयितुमिति सूचितम्। **जीवस्य ग्रहणपरित्यागज्ञानमेव नास्ति, कुतो मोचनपरिज्ञानम्**। एतादृशेऽर्थे भगवानेव शरणमिति॥ २४॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

नान्तं दानस्येत्यत्र। न अन्तो यस्य तत् नान्तम्। नशब्देन समासः। अनन्तं यश इत्यर्थः। **तावदद्राक्ष**मित्यत्र। **कर्मणे**ति। योगादिरहितेनेति शेषः। अयं देहसम्बन्धो भोगार्थमेवेति भावः। योगेति। अत एव तृतीयस्कन्धे परिज्ञातुर्गर्भस्थजीवस्य स्तुतौ शरणगमनमेव निरूपितम्। नन्वेतावद्धर्मकर्तुः कथं दोषसम्बन्ध इत्यत आहुः **बहिर्मुखत्वा**दिति।

श्रीसुबोधिनी-सारः

गवां लक्षमहं न प्रतीच्छे नेच्छाम्ययाचकत्वादित्युक्त्वा स्वामी निरगात् गवामयुतं तुभ्यम् अन्यत् अधिकं लक्षं चोक्तं दास्याम्येषा स्वामिने दीयतामित्यनुनीतोऽपरो दुराग्रही गवां लक्षमन्यदयुतं नेच्छामीत्युक्त्वा ययौ सा गौरन्यस्मै दत्तेति वाल्मीकीयोत्तरकांडे कथा इति पापबीजम्॥ २१॥ एतस्मिन्मन्वंतरे प्रारब्धभोगानंतरमहं याम्यैर्दूतैर्यमलोकं नीतः हे देवदेव हे जगत्पते यमेन तत्र लोके पृष्टश्च॥ २२॥ हे नृपते पूर्वमादौ अशुभं दुःखं त्वं भुंक्षे उतापि शुभं भुंक्षे इति दानस्य धर्मस्य

भास्वतो दिव्यस्य लोकस्यांतं समाप्ति न पश्येऽहं नेक्षे ॥ २३ ॥ हे देव पूर्वमशुभं भुंजे इत्यहं प्राह स च यमः पतेति मामाह पतन्नहं तावत् तत्क्षण एव कृकलासं सरटमात्मानमद्राक्षं हे प्रभो ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवमुक्तयोर्द्वयोर्मध्ये गोस्वामी "हे राजन् ! यद्यपि त्वं दातुं समर्थोसि तथापि गोविक्रयस्य निषिद्धत्वात् एनां स्वकीयां गां विहाय निष्कृतित्वेन त्वया दीयमानं गवां लक्षमहं न प्रतीच्छे न प्रतिगृह्णामि" इत्युक्त्वा स्वगां गृहीत्वा अपाक्रमत् प्रययौ । तथा अपरः प्रतिग्राह्यपि विक्रयस्य निषिद्धत्वात्त्वद्वचनविश्वासाभावाच्चाहमपि यत्त्वया गवां लक्षं प्रतिश्रुतं ततोन्यदधिकमपि गवामयुतं यदि त्वं ददासि तदप्येनां विहाय गृहीतुं नेच्छामि इत्युक्त्वा ययौ ॥ २१ ॥ एतस्मिन्नन्तरे यावत्स्वदोषनिस्तारोपायं कुर्यां तन्मध्य एव याम्यैर्दूतैरहं यमक्षयं यमस्थानं प्रति नीतः प्रापितः । तत्र यमसदने हे देवदेव जगत्पते ! यमेनाहं पृष्टश्च ॥२२॥ प्रश्नमेवाह—पूर्वमिति । हे नृपते ! पूर्वं प्रथमतस्त्वं किमशुभं पापफलं भुङ्क्षे भोक्ष्यसे उताहो अथवा पुण्यकर्मफलं भोक्ष्यसे ? एवं पृष्टश्चाहं स्वकृतस्य दानस्य तज्जन्यस्य धर्मस्य पुण्यस्य तथा भास्वतः प्रकाशमानस्य स्वर्गादिलोकस्य पुण्यफलस्यान्तमवधिं न पश्यामि ॥ २३ ॥ तदा यमं प्रत्युक्तवान् हे देव यम ! अहं पूर्वमशुभमेव भुञ्ज इति । तदा स यमः पत 'अपकृष्टां योनिं त्वं गच्छ' इति प्राह । 'त्वमेव पतितोद्धारणे समर्थोऽसि' इति सूचयन् संबोधयति—प्रभो इति । पतन् नीचां योनिं गच्छन्नहं तावत् तत्क्षण एवात्मानं कृकलासरूपमद्राक्षम् ॥ २४ ॥

अन्वितार्थप्रकाशिका

नेति ॥ एवमुक्तयोर्द्वयोः मध्ये गोस्वामी हे राजन् ! यद्यपि त्वं दातुं समर्थोऽसि तथापि गोविक्रयस्य राजप्रतिग्रहस्य च निषिद्धत्वात् त्वया दीयमानं गवां लक्षमप्यहं न प्रतीच्छे न प्रतिगृह्णामि । तङार्षः । इत्युक्त्वा स्वामी स्वकीयां गां विहायैव अपाक्रमत् प्रययौ । दीर्घाभाव आर्षः । तथा अपरः प्रतिग्राह्यपि दुराग्रहः विक्रयस्य निषिद्धत्वात्त्वद्वचने विश्वासाभावाच्चाहमपि यत्त्वया गवां लक्षं प्रतिश्रुतं ततोऽन्यदधिकमपि गवामयुतं यदि त्वं ददासि तदप्येनां विहाय ग्रहीतुं नेच्छामि इत्युक्त्वा ययौ ॥ २१ । एतस्मिन्निति ॥ हे देवदेव जगत्पते ! एतस्मिन्नन्तरे याम्यैर्दूतैरहं यमक्षयं यमस्थानं संयमनीं प्रति नीतः । इतः पूर्वं पापाभावान्नेतुमशक्य इति भावः । अन्तरेऽमितस्यायुषोऽन्ते मरणावकाश इत्यर्थो वा तत्र यमसदने यमेन पृष्टः ॥ २२ ॥ पूर्वमिति ॥ हे नृपते ! पूर्वं त्वं किमशुभं पापम् अजानता विप्रगव्याहरणपापफलं भुङ्क्षे भोक्ष्यसे उताहो अथवा शुभं पुण्यकर्मफलं भोक्ष्यसे दानस्य तज्जन्यस्य धर्मस्य तथा भास्वतः प्रकाशमानस्य स्वर्गादिलोकस्य पुण्यफलस्य अन्तमवधिं न पश्ये न पश्यामि । तङार्षः । उत्तरार्द्धं यमस्य स्वस्य वा वाक्यम् ॥ पूर्वमिति ॥ तदाहं यमं प्रत्युक्तवान् हे देव यम ! अहं पूर्वमशुभमेव भुञ्ज इति तदा स यमः पत अपकृष्टां योनिं गच्छेति मां प्राह स्म । ततश्च हे प्रभो ! पतन् अहं तावत् तत्क्षण एवात्मानं कृकलासरूपमद्राक्षं तत्पापस्य तादृशफलत्वात् । रामायणादौ तु विप्रयोस्तथा शाप उक्तः ॥ २३–२४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे राजन् । अहं न प्रतीच्छे गोप्रतिग्रहं न कुर्वे अन्यल्लक्षोपरि अयुतं दशसहस्रं इमां विना नेच्छामीत्युक्त्वा धेनुं त्यक्त्वा अपरः प्रतिग्राही ययौ ॥ २१–२२ ॥ पूर्वं प्रथमं अशुभं भुंक्षे उताहो अथवा शुभं तव दानादीनामंतं न पश्ये । भास्वतः प्रकाशमानस्य लोकस्य च ॥ २३ ॥ हे देव हे यमराज पूर्वमशुभं भुजे इति मयोक्तो यमः त्वं पत इति मां प्राह हे प्रभो श्रीकृष्ण तावत् पतन् आत्मानं स्वदेहं कृकलासं अहमद्राक्षं ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नाहमिति । हे राजन्, एवमुक्तयोस्तयोरन्यतर इति शेषः, अहमप्रतिग्रहकृत्, भवामि । अतः न प्रतीच्छे वै । मद्गवितरगोग्रहणं न करिष्याम्येव । इति उक्त्वा, स्वामी अप्रतिग्रहीता गोपतिः, अपाक्रमत् ययौ । अन्यदेतद्गवितरत्, गवां अयुतमपि, अहं न इच्छामि । इत्युक्त्वा, अपरः, ययौ । लक्षं त्वया प्रतिश्रुतमन्यदपि गवामयुतं यदि दास्यसि, तथाप्येनां विहाय नेच्छामीत्युक्त्वाऽपरोऽपि ययावित्यर्थः ॥ २१ ॥ ततश्चेति ॥ ततश्च, हे परम परमेश्वर, तव मायया, कालयोगेन प्रवृत्तेनेति शेषः । मृतः परासुतां प्राप्तः, एतस्मिन्नन्तरे, याम्यैः दूतैः, यमक्षयं यमालयं नीतः, अहं हे देवदेव, हे जगत्पते, तत्र यमसदने, यमेन पृष्टः ॥ २२ ॥ प्रश्नमेवाह ॥ पूर्वमिति ॥ हे नृपते, त्वं पूर्वं प्रथमं, अशुभं पापफलं भुङ्क्षे । उताहो कि वा, शुभं सुकृतफलं, भास्वतः प्रकाशमानस्य, दानस्य दानसंबन्धिनः, धर्मस्य, लोक्ते इति लोकः फलं तस्य, धर्मसंबन्धिनः फलस्येत्यर्थः । अन्तं, न पश्ये अवधिं न पश्यामीत्यर्थः ॥ २३ ॥ पूर्वमिति ॥ हे देव, पूर्वं प्रथमं, अशुभं पापफलमेव भुञ्जे । इति एवं मया प्रोक्ते सतीत्यर्थः । स यमः, पत निरये इति शेषः । इत्येवं प्राह, हे प्रभो, तावत् अहं, पतन्सन्, आत्मानं कृकलासं, अद्राक्षं दृष्टवानस्मि ॥ २४ ॥

कृष्णप्रिया

नाथ ! मेरा निवेदन कर ऋषिवर निरुपाय थे। उनकी भी धार्मिक समस्या थी, अप्रतिग्राही दान नहीं ले सकते थे, बदले में लेने से गोविक्रय का प्रायश्चित्त होने जा रहा था, इसलिये धर्मपरवश होकर मुझे कहा राजन् ! मैं इसके बदले में कुछ नहीं लूँगा। यह कहकर गाय का स्वामी चला गया। जो प्रतिग्राही था वह भी इसी प्रकार के धर्मसङ्कट से कहा राजन् ! आप इसके बदले में मुझे एक लाख ही नहीं, दस हजार और भी गौएँ दो तो भी लेने वाला नहीं। यह कहकर प्रतिग्राही विप्रवर भी चले गये ॥ २१ ॥ हे जगन्नाथ ! हे देवाधिदेव ! मेरी आयु समाप्त होने पर यमराज के किङ्कर आये और मुझे यमपुरी में ले गये और महाराज धर्म ने मुझे पूछा ॥ २२ ॥ राजन् नृग ! आप प्रथम अपने पाप का फल भोगना चाहते हो या पुण्य का ? राजन् ! आप अपने दान और सुकृतों के फलस्वरूप दिव्य एवं उत्तम लोक प्राप्त करने वाले हो, जिसकी कोई अवधि ही नहीं है ॥ २३ ॥ नाथ ! तब विनयपूर्वक महाराज श्री धर्मराज को कहा कि हे देव ! प्रथम मैं अपने पाप का फल भोगना चाहता हूँ। तब धर्मराज ने उसी क्षण कहा "कि तुम गिर जाओ"। धर्मराज के कहते ही मैं वहाँ से गिरा और गिरते हुए मैंने देखा कि मैं गिरगिट हो गया हूँ ॥ २४ ॥

ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव। स्मृतिर्नाद्यापि विध्वस्ता [1]भवत्संदर्शनार्थिनः ॥ २५ ॥

[2]स त्वं कथं मम विभोऽक्षिपथः[3] परात्मा योगेश्वरैः श्रुतिदृशामलहृद्विभाव्यः।
साक्षादधोक्षज उरुव्यसनान्धबुद्धेः स्यान्मेऽनुदृश्य[4] इह [5]यस्य भवापवर्गः ॥ २६ ॥

देवदेव जगन्नाथ गोविन्द पुरुषोत्तम। नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय ॥ २७ ॥

अनुजानीहि मां कृष्ण [6]यान्तं देवगतिं विभो[7]। यत्र क्वापि सतश्चेतो भूयान्मे त्वत्पदास्पदम् ॥ २८ ॥

कर्दमक्षमा

अन्वयः—ब्रह्मणस्य, वदान्यस्य, तव, दासस्य, हे, केशव, भवत् संदर्शनार्थिनः, अद्य, अपि, स्मृतिः, न, विध्वस्ता ॥ २५ ॥ हे, विभो ! परात्मा, योगेश्वरैः, श्रुतिदृशा, अमलहृदविभाव्यः, साक्षात्, अधोक्षजः, यस्य, इह, भवापवर्गः, स्यात्, तस्य, अनुदृश्यः, स्यात्, सः, त्वम्, मम, अक्षिपथः, कथम्, जातः ॥ २६ ॥ हे देवदेव ! जगन्नाथ ! गोविन्द ! पुरुषोत्तम ! नारायण ! हृषीकेश ! पुण्यश्लोक ! अच्युत ! अव्यय ! ॥ २७ ॥ कृष्ण ! विभो ! देवगतिम्, यान्तम्, माम्, अनुजानीहि ? यत्र, क्व, अपि, सतः, मे, चेतः, त्वत्, पदास्पदम्, भूयात् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दुर्घटेन श्रीकृष्णदर्शनेन विस्मितः सन्नात्मनो भाग्यमभिनंदति। स त्वमिति। हे विभो स त्वं ममाक्षिपथो लोचनगोचरः सन्कथं साक्षात्प्रत्यक्षऽसोत्यर्थः। किमत्राश्चर्यं तदाह। पर आत्मा अत एव योगेश्वरैरपि श्रुतिदृशा उपनिषच्चक्षुषाऽमले हृदि विभाव्यश्चित्यः। यतोऽधोक्षजः अक्षजमैंद्रियकज्ञानं तदधोऽर्वागेव यस्मात्सः। यस्येह भवापवर्गो भवेत्तस्य भवाननुदृश्यः स्यात्। उरुव्यसनेन कृकलासभवदुःखेनांधबुद्धेस्तु ममैतच्चित्रमित्यर्थः ॥ २६ ॥ उद्रिक्तभक्तिर्बहुधा संबोधयन्नाह। देवदेवेति ॥ २७ ॥ अनुज्ञापयति। अनुजानीहीति। देवलोकेऽपि सतो वर्तमानस्यात्मनो मनसः सन्निधि प्रार्थयते। यत्र क्वापीति। तत्पदमास्पदं विषयो यस्य तथाभूतं भूयादिति ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्मृत्यनाशे हेतुः—तव दासस्येति। न हि नारदादिवद्भगवद्भक्तानां जन्मांतरीयस्मृतिनाशो भवतीति भावः। दास्यत्वे च हेतुत्रयं ब्रह्मण्यस्येत्यादि। ब्राह्मणसेवा च वदान्यानामेव तया च भगवद्दर्शनेच्छोत्पद्यते। तया तद्दास्यं जायत इति स्मृतिर्ममेति शेषः। अद्य कृकलासदेहे तथा महाभिमानिदेवदेहेऽपि न ध्वस्ता भ्रष्टा तत्र हेतवः—ब्रह्मण्यस्येत्यादयः। ब्रह्मण्यस्य ब्राह्मणभक्तस्य, तत्रापि वदान्यस्य यथेष्टदानेन तांस्तोषयतः, तत्रापि दासस्य कर्मसाद्गुण्यार्थं तत्तत्कर्म समर्पणेन त्वदीयं दास्यभक्तिं प्राप्तस्य ततो भवन्महिमज्ञानेन भवतः संदर्शनार्थिनः। दास्ये हेतुः—हे केशव "को ब्रह्मेति समाख्यात ईशोऽहं सर्वदेहिनाम्। अवांतरांशसंभूतौ तस्मात्केशवनामवान् ॥" इति हरिवंशोक्तवैभव एवंभूतं त्वां त्यक्त्वा कस्मायन्यस्मै सत्कर्म

---

१. तव–विज. । २. नास्ति श्लोकः विज. । ३. क्षिगतः–वीर. । ४. योगी–च. पु. टि. । ५. शान्ते–वीर. । ६. यातुं–वीर. विज । ७. प्रभो–श्रीधर. वंशी. जीव. वीर. विज. ।

समर्पय इति भावः। संदर्भस्तु ब्रह्मण्यस्य वदान्यस्य च तव योऽहं दासः ब्रह्मण्यवदान्यत्वांशेन त्वदनुगस्येत्यर्थः। न तु त्वत्सेवैकपुरुषार्थिन इति। भवत्संदर्शनार्थिन इति—भवतः परमब्रह्मण्यत्वं वदान्यत्वं च श्रुत्वा दर्शनकौतुकिन इत्येवार्थः। न तु तदर्थानुरागिण इति। तस्मिन्नपि तद्गुणद्वयख्यापनेन तदंशमात्रव्यक्तेः गत्यंतरप्राप्तेश्च। अत एव साधकदशायामप्यंबरीषादिवत्सेवादिवत्सेवादिलक्षणसाक्षाद्भक्तिनाद्तेति विघ्नो जातो न तु तद्वद्दुर्वाससा क्रोधे विघ्न इति गम्यते। भगवद्दर्शनादिकं तु यथाकथंचिदभिलाषगुणादिति ज्ञेयम्। विश्वनाथस्तु नृगस्य भक्तिमिश्रकर्मित्वाद्गुणा भूता या भक्तिस्तयैव भगवदग्रे दासस्येति विनयव्यंजिकोक्तिः। भवत्संदर्शनार्थिन इति कदाचिदतिसुंदरश्रीविग्रहमंदिरादिश्रीगीताश्रीभागवतादिशास्त्रप्राप्त्युत्कंठस्य महाभागवतस्यापेक्षणीयं नृगेण यद्वोदारत्वात्संपादितं ततश्च तेन संतुष्यता भोराजंस्तव भगवद्दर्शनं भूयादित्याशीर्यदा दत्ता तदैव नृगस्य भगवद्दिदृक्षाऽभूदिति गम्यते ॥ २५ ॥ कृष्णदर्शनदौर्लभ्यमाह—दुर्घटेत्यादिना। इत्यर्थ इति। साक्षादव्ययस्य प्रत्यक्षार्थकत्वादयमर्थः। प्रत्यक्षस्यानेकविधत्वात्साक्षादित्युक्त्या चाक्षुषप्रत्यक्षमेव न लभ्यतेऽत उत्तम—अक्षिपथः सन्निति। अत्र चाक्षुषप्रत्यक्षे। तदाश्चर्यम्। न हि परात्मा चक्षुषा गृह्यते। 'दृश्यते त्वग्र्यया बुद्ध्या' इत्युक्तेः 'नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषोवदीक्षेत' इति ब्रह्मणोक्तेश्च। अत एव चक्षुरिंद्रियागोचरत्वादेव। अपि शब्दात्किमुत मादृशैरित्यर्थः। यतो हेतोः। अधोक्षज इंद्रियजन्यज्ञानागोचर इत्यर्थः। यस्य पुंसः। भवापवर्गस्संसारांतः। साक्षात्पदमत्रापि योज्यं साक्षादनुदृश्य इति। इत्यर्थ इति—बहुजन्मसुकृतावाप्तचरमदेहस्य तव दर्शनमुचितं तानाद्यनधिकारितिर्यग्जन्मनः कथं जातमिति न जाने इति भावः ॥ २६ ॥ दशभिः संबुद्धिभिर्भगवतः परमवैभवं द्योतयन्ननुज्ञापयत्यनुज्ञां प्रार्थयति तद्दर्शनशुद्धचेताः स्वस्य श्रवणकीर्तनादिशुद्धभक्त्यभावेऽपि तद्दर्शने तस्य कारुण्यं प्रशस्यानुज्ञां ग्रहीष्यन्बहुधा संबोध्य प्रार्थयते युग्मेन। प्रथमदेवेति देवगतिगमनानुज्ञायां तद्गति प्राप्तस्यापि तस्यैव परमाश्रयत्वेन, द्वितीयदेवेति अधुना त्वमपि देवो जातः किमर्थं मां प्रार्थयसे तत्राह—हे देवानां ब्रह्मादीनामपि त्वं देवोऽसि मम तु का वार्तेति। ननु यद्यहं ब्रह्मादीनामपि देवस्तर्हि क्षुद्रस्त्वमीदृशप्रार्थनधाष्टर्येन कथं न संकुचसि तत्राह—हे जगत्पते, जगन्मध्यपातित्वेन प्रार्थनार्होऽस्मीति भावः। ननु सत्यादिलोकस्था ब्रह्मादय एव महांतोऽहं मर्त्यलोकस्थो न तादृशोऽतस्तानेव प्रार्थयस्व तत्राह—हे गोविंद, कृपया गां भुवं विंदतीति तथाभूत मादृङ्मूढपालनायैव भुवमागतोऽसीति भावः। किञ्च—हे पुरुषोत्तम दीनदयालो तेन त्वादृशकृपालव इति त्वं स्वभावत एव सर्वजीवाश्रयोऽसीत्याह—नारायणेति। नारं नरसमूहस्तस्यायनाश्रयोभूतेत्यर्थः। एतादृशप्रार्थनाप्रवर्तकोऽपि त्वमेवेत्याह—हे हृषीकेश सर्वेन्द्रियप्रवर्तक। त्वमेव पावकत्वात्प्रार्थनायोग्य इत्याह—हे पुण्यश्लोक नामोच्चारणादिना पावक मादृशदीनपालने च्युतिरहितत्वादपि त्वमेव प्रार्थयितुं योग्य इत्याह—हे अच्युत। किञ्च—अनन्तभक्ताभीष्टदानैरपि न क्षीयते इत्याह—हे अव्ययेति ॥ अत्र विश्वनाथः—देवानां देवोऽपि त्वं जगतामपि नाथत्वान्मन्नाथो भव। गोविंदेति कृपादृष्ट्या मां विंदस्व। अत्र हेतुः—पुरुषेषु विष्ण्वादिषूत्तमः। नारा जीवा अयनमधिष्ठानं यस्येति मां दुर्जीवमप्यधितिष्ठ। हृषीकेश मदिंद्रियाण्यात्मसात्कुरु। पुण्यश्लोक तवैषानृगमोचनी कीर्तिरभूदेव। अच्युत मदन्तःकरणाद्विच्युतो मा भव। अव्ययेति अत्र न ते कोप्यपचय इति ध्वनयः ॥ २७ ॥ सतः स्थितस्य। यत्र क्वापि यस्मिन्कस्मिन्योनौ स्थाने वा त्वत्पदमेवास्पदं विषयो यस्य तथाभूतं मच्चेतो भूयादिति ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्मृतिर्ममेति शेषः। साक्षात्तथानुक्तिर्विनयादिना अद्य कृकलासदेहे तथा महाभिमानिदेवदेहेपि तद्विरोधिनि ध्वस्ता न भ्रष्टा तत्र हेतवो ब्रह्मण्यस्येत्यादयः प्रथमतो ब्रह्मण्यस्य ब्राह्मणभक्तस्य तत्रापिवदान्यस्य यथेष्टदानेन तान् परितोषयतः तत्रापि तव दासस्य कर्मसाद्गुण्यार्थं तत्तत्कर्मसमर्पणेन त्वदीयदास्यभक्ति प्राप्तस्य ततो भवन्महिमज्ञानेन भवतः सन्दर्शनं तदर्थिनः दास्ये हेतुः केशव—

"को ब्रह्मेति समख्यात ईशोहं सर्वदेहिनाम्। आवान्तवाङ्गसम्भूतौ तस्मात्केशवनामवान् ॥

इति तन्नाम्ना श्रीहरिवंशोक्तवैभव एवम्भूतं त्यक्त्वा कस्मै वा अन्यस्मै सत्कर्मसमर्पय इति भावः। यद्वा, भृगुसाक्षितया ब्रह्मण्यः श्रीबलिसाक्षितयात्मपर्य्यन्तस्य वदान्यश्च यस्त्वं तस्य तव योहं दासस्तत्तत्कर्मसमर्पयतस्तस्य मम शेषं समानम् एवमप्यस्य कृकलासत्वं सुसाध्यायामपि श्रवणादिलक्षणसाक्षाद्भक्तावप्रवृत्तेस्तत्र अविश्वासदोषेण दानादिकर्मण्यपि वैफल्यापातात् सङ्कल्पमाहात्म्येन तु पश्चात्तद्दर्शनादिकं किन्तु ते दास्यदिदृक्षे अपि फलविशेषप्राप्त्यर्थे एव नतु निष्कामे देवगतिफललाभेन कारणानुमानात् अत एव वदान्यस्येति भगवन्तं विशेष्य पर्य्यवसाने तु परमगतिर्भविष्यति सत्यं दिशत्यर्थितमर्थितो नृणामित्यादौ तथा त्वप्राप्तेः दर्शनादेवनश्वरं तद्बीजरूपत्वाच्चेति ज्ञेयं पूर्णयोर्ब्रह्मण्यवदान्यत्वयोरंशानुवर्त्तित्वाद्योहं दास इव दासस्तथा तत्तद्गुणमात्रेण नतु त्वन्निजदासवद्विचित्रेण गुणवृन्देन चमत्काराद्भवद्दर्शनकाङ्क्षी च योहं तस्य मम तत्तत्त्वद्गुणां-

शानुभवप्रभावान्नाद्यापि तत्तत्स्मृतिर्विध्वस्ताभूत् प्रत्युत तादृशत्वद्दर्शनमपि जातमित्यर्थः। अथ तदिदमनुमिमे त्वदीयब्रह्मण्यत्ववदान्यत्वयोरंशानुकरणमप्यभिमानमयमेव ममासीत् येनाद्यापि त्वदग्रेपि तत्प्रकटनधाष्टर्यमेव जातं पूर्वमपि नत्वम्बरीषादिविधिशास्त्रेष्वादरो जातः तत एव तादृशदानकर्मण्यपि विघ्नो बभूव तथापि त्वत्कारुण्यप्रभावादीदृशत्वद्दर्शनमभूत् तादृगभिमानाविच्छेदादेव स्वर्गित्वं भजन्नपि त्वत्कारुण्यात्तु सत्यं दिशत्यर्थितमर्थितो नृणामिति न्यायेन त्वदनुवर्तित्वपि भविष्यतीति भावः ॥२५॥ स परमदुर्लभः किं वा अनिर्वचनीयमाहात्म्यस्त्वं विभो हे सर्वव्यापकेति चाक्षपथयोग्यत्वं तथा परमात्मा परमात्मेत्यात्मसाक्षात्कारादपि तत्साक्षात्कारस्य दुर्घटत्वं सूचितं योगो भक्तियोगः तस्मिन्नीश्वरैः समर्थैः परमभक्तैरित्यर्थः। योजना तु तैः कृता यद्वा कथं केन प्रकारेणाक्षपथं प्रयातोसि तन्तु विचारेणापि न लभे इत्यर्थः। यतः पूर्वोक्तप्रकारेणाधोक्षजो ज्ञानाविषयो यः स साक्षात् स्यात् काक्वा नैवेत्यर्थः। तत्रापि मे मम उरुव्यसनान्धबुद्धेः साक्षात्स्यात् काक्वा नतरामित्यर्थः। यतो यस्य भावापवर्ग उपस्थितोस्ति तेनैवानुदृश्यः दृष्टसदृशो भवसि सर्वातीतत्वादानन्त्याच्च तस्मान्मम स्वर्गितां प्राप्तस्य त्विदं दर्शनमतीव चित्रमिति भावः कथं जातमिति तं कारुण्यप्रकारं स्वशक्तिप्रकारं च स्वयमेव वेत्सीति भावः ॥ २६ ॥ तद्दर्शनप्रभावेन जातशुद्धभक्तिश्रद्धा स्वस्य प्राचीनश्रवणकीर्त्तनादिशुद्धभक्त्यभावेपि तद्दर्शनं जातमिति तस्य कारुण्यं प्रशस्यानुज्ञां ग्रहीष्यन् नामकीर्तनप्रियतमत्वेनादौ तैरेव स्तुत्या तं सम्बोधयन् प्रार्थयते—देवदेवेति युग्मकेन। तत्र प्रथमं देवगतिगमनानुज्ञायां तथा तद्गतिं गतस्यापि परमाश्रयत्वे च तत्रैव योग्यतां दर्शयति—देवदेवेति। नन्वहं देवानां ब्रह्मादीनामपि देव इत्यतिक्षुद्रस्त्वमीदृशप्रार्थनधाष्टर्येन कथं न सङ्कुचसीत्याशङ्क्याह—हे जगन्नाथेति। एवं जगन्मध्यपातित्वेपि प्रार्थनार्होऽस्मीति भावः। नन्वासतान्तावद्ब्रह्मादयः जगति सत्यलोकादिगता एव महान्तः स्वं मर्त्यलोकगतः कियानित्याशङ्क्याह—हे गोविन्द ! कृपया गां पृथिवीं विन्दतीति तथाभूत ततः सम्प्रति तेभ्योपि वयं त्वत्कृपाभाजनानीति भावः। नन्वत्रापि महान्तः सन्ति तत्राह—हे पुरुषोत्तम इति। भवदुचितां दीनदयालुतामिवालम्ब्येदृशं प्रार्थये नतु स्वगुणमिति भावः। किञ्च हे नारायण स्वभावत एव सर्वजीवाश्रय हे हृषीकेश एतादृशप्रार्थनादीनामपि प्रवर्तक ! हे पुण्यश्लोक एतादृशकृपाकीर्तिसुधाकर ! हे अच्युत एतादृशशरणागतदीनजनपालनकृते च्युतिरहित ! हे अव्यय अनन्तभक्ताभीष्टदाननैरन्तर्य्येऽपि सर्वदा परिपूर्ण इति युक्तमिदं प्रार्थनमिति भावः। ननु यादवविशेषोहं नाहं भवदभिप्रेतो भगवानित्याक्षेपान्तरमाशङ्क्याह—हे कृष्ण ! स्वयं भगवान् कृष्णस्तु भगवान् स्वयमिति प्रसिद्धेः अत एव हे विभो सर्वतः परिपूर्णेति ॥ २७-२८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्मृतिर्ममेति शेषः। साक्षात्तथानुक्तिर्विनयादिनाः; इयं कृकलासदेहे तथा महाभिमानिदेवदेहेऽपि तद्विरोधिन्यपि न ध्वस्ता न भ्रष्टा। तत्र हेतवः—ब्रह्मण्यस्येत्यादयः। दासत्वादेव भवतो भवतां वा, श्रीप्रद्युम्नाद्यपेक्षया सन्दर्शनं साक्षाद्दर्शनं तदर्थिनस्तदेकापेक्षकस्येत्यर्थः। दास्ये हेतुः—केशव ! हे साक्षात् परमेश्वर ! तथा च श्रीहरिवंशे (भविष्य-प० ८८।४८)-'को ब्रह्मेति समाख्यात ईशोऽहं सर्व्वदेहिनाम्। आवां तवांगसम्भूतौ तस्मात् केशव-नामवान् ॥' इति। किंवा केशिमथनेति—अनेन श्रीवृन्दावनक्रीडायाः प्रान्तसूचनेन सा सर्व्वैव संगृहीता, तया चाशेषभगवत्ताप्रकटनमेवाभिप्रेतम्। इति तस्य पूर्वं श्रीजगन्नाथदर्शनप्रभावादेव श्रीद्वारकेश्वरोपासनं जातमिति ज्ञेयम्। जगन्नाथत्वेन स्तोष्यमाणत्वात् तद्दर्शनं सम्भाव्यम्, अत एव द्वारकोपकण्ठकूपे पतनम्। एवं श्रीभगवद्दास्येनैव तत्रापि तद्दर्शनैकाकाङ्क्षया तस्य तज्ज्ञानादिकमपि ज्ञेयम्। तथापि कृकलासत्वं श्रीभगवत इव तद्भक्तानामपि लोकशिक्षार्थप्रवृत्त्या विप्रस्वहरणदोषप्रदर्शनार्थं हरिणत्वादि-स्वीकारवत्। एतच्च श्रीभागवतामृतोत्तरखण्डे विवृतमेव ॥ २५ ॥ स परमदुर्लभः, किंवा अनिर्व्वचनीयमाहात्म्यस्त्वम्, विभो ! हे सर्वव्यापकेति अक्षपथायोग्यत्वम्, तथा परात्मा परमात्मेति आत्मसाक्षात्कारादपि तत्साक्षात्कारस्य दुर्घटत्वं सूचितम्। किञ्च, 'मे' मदीये इह अस्मिन् कूपे जन्मनि वा। एवं मे इत्यस्यापौनरुक्त्यं तस्याप्यनुदृश्य ईषदेव दृश्यः। अन्यत्तैर्व्याख्यातम्। यद्वा, हे मम विभो ! हे मदीश्वर ! ननु ईश्वरो दासानां दृश्यः स्यादेव ? तत्राह—परात्मेत्यादि। योगो भक्तियोगस्तस्मिन्, ईश्वरैः समर्थैः परमभक्तैरित्यर्थः। श्रुतिदृशा वेदार्थतत्त्वज्ञानेन यदमलं हृत् तस्मिन् विशेषेण भाव्यस्तत्रापि साक्षात् स्वयं योऽधोक्षजोऽवतारीत्यर्थः। किंवा शकटभञ्जने पूतनावधे शकटाक्षादधोऽजायत इत्येवमधोक्षजनाम्ना गोकुले प्रसिद्धः श्रीयशोदानन्दन इत्यर्थः। यस्य भवापवर्गः स्यात्, उ वितर्के, तस्यैव इह श्रीद्वारकायां दृश्यः स्याः। अन्यत् समानम् ॥ २६ ॥ अनुज्ञां ग्रहीष्यन् संकीर्त्तनप्रियत्वेनादौ श्रीभगवतो नामसंकीर्त्तनेन सम्बोधयन् स्तौति— देवेति। देवानां जगत्पूज्यानां श्रीब्रह्मादीनामपि देव ! यतो जगन्नाथ श्रीनीलाद्रिपते ! तत्र प्राक् स्वयं श्रीब्रह्मणा अधुनापि देवैस्तत्पूजनात्, अतो गोविन्द ! पृथ्व्यां दारुब्रह्मरूपेणावतीर्ण ! साक्षाद्भगवन् ! अत एव पुरुषोत्तम ! पुरुषोत्तमाख्ये स्वक्षेत्रे तत्संज्ञया प्रसिद्ध ! अतो नारायण ! देवदुर्लभनिजोच्छिष्टमहाप्रसादवर्गप्रदानादिना सर्वजीवाश्रय ! न केवलं मद्रूपेण बहिरेवासि, किन्त्वन्तश्चेति सेवकानां सर्वशक्तिसम्पादकत्वमाह—हृषीकेश ! निजसेवादौ सर्वेषां सर्वेन्द्रियप्रवर्त्तक ! यद्वा, तत्रापि भक्तवात्सल्यभरमाह—हृषीकेश ! स्वभक्तवाक्सत्यतार्थमेकदा दीर्घकेशाविर्भावनात् तदाख्यानं तत्रतानृपतेर्बालभोगप्रदानात् प्रसिद्धमेव, अतः पुण्या उत्कृष्टाः श्लोकास्तत्तन्माहात्म्यनिबन्धनानि

कवीनां पद्यानि यस्मिंस्तथाभूत उत्कृष्टभक्तवात्सल्यादियश इति वा। कुतः? अच्युत (भा० ९।४।६३) 'अहं भक्तपराधीनः' इत्यादि–स्ववागर्थाच्युतिरहित! किंवा सदा नीलाचलनिवासिन्! किञ्च, अव्यय! निरन्तरं तत्तन्महाप्रसादप्रदानेनापि न व्ययो धनादित्रुटिः, किंवा अकालेऽपि भोगादि—ह्रासो यस्य तथाभूत! साक्षान्महालक्ष्म्या सेव्यमानत्वात्, अथवा देवदेवेति परमेश्वरत्वमुक्तम्। तदेव दर्शयति—जगतां कार्य्य—कारणानां सर्वेषां नाथेति, तत्रापि गोविन्द! निजाशेषभगवत्ताप्रकटनार्थं प्राप्तगोकुलेन्द्रत्व! अत एव पुरुषोत्तम! क्षराक्षरातीत! तथा च श्रीगीतासु (१५।१८)—'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥' इति; यद्वा, पुरुषेषु श्रीब्रह्मादिषु त्रिषूत्तम! यतो नारायण साक्षादवतारिपरमेश्वर! किञ्च, हृषीकेश! स्वभक्तौ सर्वेषां सर्वेन्द्रियप्रवर्त्तक! तच्च यथायथमूह्यम्। अतः पुण्यश्लोक! सर्वोत्कृष्टयशःकारुण्यादिनिजाशेषगुणप्रकटनात्, यतोऽच्युत सर्व्वथा परिपूर्ण! किंवा अत एव (रामायण—युद्धकाण्डे १८।३३) 'सकृदेव प्रपन्नो यः' इत्याद्युक्त—स्वप्रतिज्ञातो विच्युतिरहित! अत एवाव्यय अपरिच्छिन्नमाहात्म्य! यद्वा, आत्मदानेनापि न व्येतीत्यव्यय! अथवा अनुज्ञाप्रार्थनेऽपि दैन्येन स्वस्य योग्यतां मन्यमानः श्रीभगवन्माहात्म्येन तां सम्भावयंस्तद्वर्णयति—देवेति। जगन्नाथेति देवदेवोऽपि नीचानामप्यस्माकं प्रभुस्त्वमेवासि, जगदन्तर्गतत्वेन मादृशामपि त्वदेकनाथत्वादिति भावः। तत्रापि गोविन्द! गोपालनादिना महाकारुण्यादि निजाशेष-गुणप्रकटनादित्यर्थः। अत एव पुरुषोत्तम! वैदग्ध्याद्यशेषमहापुरुष–लक्षण-सेवित! किञ्च, नारायण! सर्वजीवैकशरण! स्थावरादिनामप्युद्धारात्; किञ्च, हृषीकेश परमसुन्दरेत्यर्थः। न च केवलमाकृत्या सुन्दरः प्रकृत्या चेत्याह—पुण्यश्लोक! तत्तद्बाल्यलीलादिना जगत्पुण्यजनक-यशोविस्तारणात्, अच्युत! बाल्यक्रीडादावपि निजैश्वर्य्याच्युतिरहित! अन्यत् समानम्॥ २७॥ कृष्ण साक्षाद्भगवन्! अत एव विभो! सर्वप्रेरक! अतस्त्वदिच्छयैव देवगतिं देवत्वं स्वर्गं वा, किंवा देवस्य तव गतिं स्थानं श्रीवैकुण्ठलोकं क्रमेण यान्तम्, तत्र च ममापेक्षा नास्ति, किन्तु तद्भक्तावेवेत्याह–यत्रेति। यद्वा, तव पदं श्रीद्वारका–मथुरादि–स्थानं तदास्पदम्॥ २८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अक्षिपथः उरुव्यसनान्धबुद्धेः मम त्वं चक्षुर्विषयः श्रुतिदृशा वेदचक्षुषा अमलहृदि विभाव्यः चिन्त्यः यस्य भवापवर्गः। संसारनाशः तस्य त्वं शान्तहृदि दृश्यो भवसीत्यर्थः॥ २६–२८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ब्रह्मण्यस्येति। हे केशव! ब्रह्मण्यस्येत्यादिविशेषणचतुष्टयं पूर्वजन्मस्मृत्यनपाये हेतुतयोपात्तं ब्रह्मणि ब्राह्मणकुले साधुब्रह्मण्यः॥ २५॥ अलभ्यलाभेनाधुना कृतार्थोऽभवमित्याह—स त्वमिति। हे विभो! सः यस्याहं सन्दर्शनार्थी स त्वं कथं ममाक्षिपथं गतः लोचनगोचरः कथमित्यनेन दौर्लक्ष्यं सूचितं तत्र हेतुत्वेन विशिनष्टि, परमात्मा न हि परमात्मा केवलं मांसचक्षुषा वीक्ष्य इति भावः। किञ्च योगेश्वरैः श्रुतिदृशा उपनिषच्चक्षुर्द्वारेण निर्मले हृदये विभाव्यः केवलं चिन्त्यः यद्यप्येवमथापि हे अधोक्षज अभक्तेन्द्रियजन्यज्ञानविषयः यस्य भवापवर्गः संसारनाशस्तस्योरुणा व्यसनेनान्धा बुद्धिर्यस्य तथाभूतस्यापि शान्ते सति हृदये त्वं दृश्य एवेत्यर्थः॥ २६॥ हर्षातिशयेन बहुधा सम्बोधयन् किञ्चित्पार्थयमानश्चानुज्ञां पृच्छति—देवदेवेति। द्वाभ्याम् देवगतिं स्वर्गलोकं प्रति यातुं गन्तुम् उद्यतं मामनुजानीहि आज्ञापय यत्र क्वापि सतो वर्त्तमानस्य मम चेतः त्वत्पदास्पदं त्वत्पादारविन्दसंश्रयं भूयात्तथानुगृह्णीष्वेत्यर्थः॥ २७–२८॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

देवगतिं स्वर्गं यत्र क्वापि योनिविशेषे सतः सम्भवतः॥ २८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ब्रह्मण्यस्य वदान्यस्य च तव योऽहं दासः तस्येति ब्रह्मण्यत्ववदान्यत्वांशेन भवदनुगतस्येत्यर्थः। ननु भवतः सेवैकपुरुषार्थिन इति तथा भवत्सन्दर्शनार्थिन इति भवतः परमब्रह्मण्यत्वं वदान्यत्वञ्च श्रुत्वा दर्शनकौतुकिन इत्येवार्थः। ननु तदर्थानुरागपि इति स्वस्मिन्नपि तद्गुणद्वयख्यापनेन तदंशमात्रव्यक्तेः गत्यन्तरप्राप्तेश्च अतएव साधकदशायामपि श्रीमदम्बरीषादिवत् सेवादिलक्षण साक्षाद्भक्तिर्नादृतेऽतिविघ्नो जातः ननु तद्वद्दूर्वाससः क्रोधेऽप्यविघ्न इति गम्यते तथापि भगवद्दर्शनादिकं यथाकथञ्चिदभिलाषगुणादिति ज्ञेयम्॥ २५–४४॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे चतुष्षष्टितमोऽध्यायः॥ ६४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नृगस्य भक्तिमिश्रकर्मित्वाद्गुणभूतैव या भक्तिरासीत्तामाश्रित्यैव भगवदग्रे दासस्येति विनयव्यञ्जकोक्तिरियं ज्ञेया भवत्सन्दर्शनार्थिन इति कदाचित् कदाचिदतिसुन्दरश्रीभगवद्विग्रहतन्मन्दिरादिश्रीगीताश्रीभागवतादिशास्त्रप्राप्त्युत्कण्ठस्य

महाभागवतस्यापेक्षणीयं नृगेण महादातृत्वात् सम्यक् सम्पादितं ततश्च तेन सन्तुष्यता भो राजंस्तव भगवद्दर्शनं भूयादिति यदेवाशीर्दत्ता तदारभ्यैव नृगस्य भगवद्दिदृक्षाऽभूदिति गम्यते ॥ २५ ॥ स्मृतिर्ममेति शेषः साक्षात्तथानुक्तिर्विनयादिना अद्य कृकलासदेहे तथा महाभिमानी देवदेहेऽपि तद्विरोधिनि न ध्वस्ता न नष्टा दुर्घटेन श्रीकृष्णदर्शनेन विस्मितः सन्नात्मनो भाग्यमभिनन्दति स एव त्वं मम सकथमक्षपथोऽभूर्यः खलु योगेश्वरैः सनकाद्यैरपि श्रुतिदृष्ट्या निर्मले हृदि विभाव्यो ध्येय एव तत्रापि त्वं साक्षादधोक्षजः शकटासुरभञ्जनः स्वयं भगवानेव तत्रापि उरुव्यसनान्धबुद्धेर्मद्विधस्याधमस्यापि किञ्च यस्य जनस्य भवापवर्गः संसारनाशो भवेत्तस्यापि मे मम किं भवान् दृश्यः स्यात् अपि तु न स्यादेव किन्तु महाभागवतस्य कस्यचिदाशीर्वादादेव स्यादिति भावः ॥ २६ ॥ सहसोत्पन्नया श्रद्धया भगवत्कृपया लब्धदास्यो नामान्येवानुकीर्त्तयन्ननुज्ञां प्रार्थयते—देवदेवेति । देवानां देवोऽपि त्वं जगतामपि नाथत्वान्मन्नाथो भव गोविन्द गवां कृपादृष्ट्या मां विन्दस्व अत्र हेतुः पुरुषेषु विष्ण्वादिष्वप्युत्तमः नारायण नारा जीवा अयनमधिष्ठानं यस्येति मां दुर्जीवमप्यधितिष्ठ हृषीकेश मदिन्द्रियाण्यात्मसात्कुरु पुण्यश्लोक तवैषा नृगमोचनी कीर्त्तिरभूदेव अच्युत मदन्तःकरणाद्विच्युतो मा भव अव्यय अत्र न ते कोऽप्यपचय इति ध्वनयः त्वत्पदमेव आस्पदं विषयो यस्य तथाभूतं मच्चेतो भूयात् ॥ २७–२८ ॥

गूढार्थदीपिनी

यः श्रुतिदृशा उपनिषच्चक्षुषा अमले हृदि विभाव्यः चिन्तनीयो भवति स त्वं मम साक्षात् अक्षिपथः नेत्रगोचरः कथं जातोऽसि । यस्य भवापवर्गः संसारान्तः भवेत् तस्यैव भवान् अनुदृश्यः स्यात् मम तु एतद्योनिदुःखेन अन्धबुद्धेः कथमेतदित्याश्चर्यम् ॥ २६ ॥ देवदेवेति युग्मम् । देवगति स्वर्गम् । अनुजानीहि । आज्ञां देहि । दशेन्द्रियैः सह मे चेतः त्वत्पदास्पदं भूयादिति दशसम्बोधनैः प्रार्थयते ॥ २७–२८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे विभो ! यस्य भवापवर्गो भवेत् मुक्तिर्भवेत्तस्य यो दृश्यः स्यात् यश्च श्रुतिदृशा वेदान्तश्रवणजन्येन ज्ञानेन अमले हृदि विभाव्यः ध्येयः स त्वं साक्षात्परात्मा अधोक्षजः अधः अर्वागेव अगृहीत्वा निवृत्तमेव अक्षजमिन्द्रियजन्यं ज्ञानं यस्मात् "नानुमानं नेन्द्रियाणि'ति श्रुतेः । उरुव्यसनेन पुनःपुनर्जन्ममरणदुःखेनान्धबुद्धेर्मम इह कथं अक्षपथः चक्षुर्ग्राह्योसि नु अहो मे भाग्यमिति शेषः ॥ २६–२७ ॥ प्रेमातिशयेन बहुधा सम्बोध्य अनुज्ञां प्रार्थयते—अनुजानीहीति । देवगतिं प्रति यान्तं गन्तुमुद्यन्तं मामनुजानीहि आज्ञापय यत्र क्वापि सतो वर्तमानस्य मे चेतः त्वत्पदमास्पदं विषयो यस्य तथाभूतं भूयात् ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नन्वेतादृशस्य तव कथं पूर्ववृत्तान्तपरिज्ञानमिति चेत्, तत्राह **ब्रह्मण्यस्येति** । **अज्ञानं** हि स्मृतिनाशकम्, **तच्च ज्ञानसमानाधिकरणम् । ब्राह्मणाः स्वभावतो ज्ञाननिष्ठाः**, 'ज्ञानं विज्ञानमास्तिक्य'मिति वाक्यात् । अतो ब्रह्मण्यस्य ब्राह्मणभक्तस्य ब्रह्मधर्मा हितं कुर्वन्तीति न स्मृतिभ्रंशः । 'राजन्योऽपि सर्वदेवमय' इति ब्रह्मक्षत्रयोस्तुल्यत्वात् 'क्षतात्त्रायत' इति धर्माच्च 'तत्र दानमीश्वरभावश्चे'ति वाक्यात् 'वदान्ये क्षत्रं प्रतिष्ठित'मिति 'अन्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षत' इति वाक्यात् ज्ञानं क्षत्रियमपि पालयति । भगवान् सर्वेश्वर इति ज्ञानादयस्तदधीनाः भगवद्भक्ते स्वोपकारं कुर्वन्तीति प्रकारत्रयेणापि स्मृतिर्न विध्वस्ता । **अस्त्येको ज्ञाननाशप्रकारः चतुर्थे निरूपितः**, 'इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मन' इत्यादिना । स इतः पूर्वं न जात इत्याह **अद्यापि न विध्वस्तेति** । **केशवेति**पदं उत्पत्तिप्रलयकर्त्रोरपि मोक्षं प्रयच्छतीति भक्तज्ञानदाने कः प्रयासः स्यादिति सूचितम् । किञ्च । स्मृतिनाशका यावन्तो मायादयः ते सर्वे मत्तो बिभ्यतीत्याह **भवत्संदर्शनार्थिन** इति । **यो भगवद्धर्मान् प्रतीक्षते, तस्य नान्ये धर्माः बाधका भवन्ति** ॥ २५ ॥ एवं स्ववृत्तान्तमुक्त्वा भगवद्दर्शनं दुर्लभं सर्वप्राणिनां कथं ममाकस्माज्जातमिति स्वभाग्यमभिनन्दयन्नाह **स त्वं कथमिति** । तादृशस्त्वं ममाक्षपथः कथं वा जात इत्याश्चर्यम् । परात्मेति । आत्मनोऽपि परोऽन्तरः कथं देहादपि बहिर्दृश्येतेत्येकानुपपत्तिः । किञ्च । **योगेश्वरैरपि** योगानुसारेण, तत्रापि **श्रुतिदृशा** वेदबोधितज्ञानेन, न तु वैदिकप्रकारेण, तत्रापि **अमला दृष्टिर्यस्य** तादृशेन विभाव्यः । साधनप्रमाणाधिकारः उत्तमा निरूपिताः । तैरप्येवं प्रत्यक्षो न भवति, किन्तु विशेषेण भाव्यः तर्क्य एव । स मम साक्षात्कथं जात इत्याश्चर्यम् । **अनेन प्रमाणविचारेण दर्शनायोग्यता निरूपिता, प्रमेयविचारेणापि दर्शनायोग्यतामाह अधोक्षजेति** । अधः अक्षजं ज्ञानं यस्मादिति । किञ्च । स्वस्यानधिकारोऽपि । **उरुव्यसनान्धबुद्धेः** । अनेकव्यसनैः अन्धा बुद्धिर्यस्येति । नन्वकारणककार्योत्पत्तिर्न सम्भवतीति, अवश्यं कारणं भगवद्दर्शने वक्तव्यमिति चेत्, तत्राह **स्यान्मेनुदृश्य इति** । मे अनुदृश्यः स्यात्, यस्य मम भवापवर्गः । प्रायेण मम मोक्षः सम्भाव्यते केनचित्कारणेन, तद्भगवद्दर्शनव्यतिरेकेण मोक्षो न भवतीति मोक्षसाधनानि फलोन्मुखानि सन्ति भगवद्दर्शनं कारयामासुः । तत्रापि मोक्ष **इहैव, अन्तिमजन्मन्येव भगवत्साक्षात्कारात्** ॥ २६ ॥ एवं दुर्लभदर्शनमुपपाद्य स्वर्गगमनार्थं भगवन्तं

प्रार्थयितुं नवधा भगवन्तं सम्बोधयति **देवदेवेति**। लोके गमने देवानामपि यो देवः तदाज्ञयैव गमनं भवति। स चेत्स्वस्मिन् क्रीडति, तदा देवत्वं भवतीति। **जगन्नाथ**त्वादवश्यमाज्ञा प्रार्थनीया। **गोविन्देति**। सतामिन्द्रः। एवं राजसतामससात्त्विकभावेन प्रभुत्वेन सम्बोधितो भगवान्। आज्ञां प्रार्थयितुं प्रेरकत्वेन त्रिविधं पुरुषमाह। **पुरुषोत्तमः** पूर्णः पुरुषः। **नारायणः** पुरुषो द्वितीयः। हृषीकेशोऽन्तर्यामी तृतीयः पुरुषः। 'विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदु'रिति वाक्यात्। अनेन भगवत्प्रेरणया भोगार्थं गच्छामीति स्वापराधाभावो निरूपितः। तत्र गतस्य भगवत्स्मरणाद्यभावान्न निस्तार इत्याशङ्क्य भगवद्गुणाः सर्वत्र सन्तीति निरूपयन् विशेषणत्रयमाह **पुण्यश्लोकाच्युताव्ययेति**। पुण्या श्लोका कीर्तिर्यस्येति। विषयसम्बन्धकृतदोषपरिहारः कीर्तिस्वाभाव्यादेव भवतीति सूचितम्। श्लोका विषयेष्वपि भवतीति न विषयैर्विरुध्यते। तेन सेवनसम्भवः। भगवतः सर्वतोऽच्युतत्वात् नित्या कीर्तिर्भवति, पूर्णा च। ततः सम्पादनसाधनानपेक्षता। न विद्यते व्ययो यस्मादिति। तेनान्यस्यापि नाशाभाव उक्तः। श्रोतुरप्यच्युतत्वं सम्पादयतीति षष्ठीबहुव्रीहिपक्षेऽपि न दोषः॥ २७॥ एवं स्वर्गगमने सर्वामुपपत्तिमुक्त्वा प्रार्थयति **अनुजानीहीति**। मामिति। आवश्यकं पुण्यफलभोगयुक्तम्। **कृष्णेति**। सर्वथा सर्वप्रकारेण मोचनसमर्थः। न हि तस्य विषयसम्बन्धे मोचनसामर्थ्याभावः। अन्यथा विशेषावतरणं न कुर्यात्। **यान्तं देवगतिमिति** गमनमावश्यकमुक्तम्। अनभिप्रेतत्वादभ्यनुज्ञाभावमाशङ्क्याह **विभो** इति। तथापि विषयसम्बन्धे नाशमावश्यकमाशङ्क्य प्रार्थयति **यत्र क्वापि सतश्चेत** इति। त्रिविधानि स्थानानि सुखदुःखोभयरहितानि। **दुःखे असामर्थ्यम्, सुखे अन्यासक्तिः, उभयाभावे मोहादिरिति सर्वत्रैव स्मरणाभावस्तुल्यः**। तथापि **कृपयैव स्मरणमिति स्थानविशेषस्याप्रयोजकत्वात्** यत्र क्वापि सतो मे चेतः त्वत्पदे एव आस्पदं स्थानं यस्य। तथा सति सर्वत्र गच्छदपि चेतः त्वत्पदयोरेव स्थिरीभविष्यतीति न कापि चिन्ता॥ २८॥

श्रीसुबोधिनी–सारः

ब्रह्मण्यस्य साधोः वदान्यस्यात्युदारस्य तव दासस्य भवतः संदर्शनमर्थत इत्येवं शीलस्य मम स्मृतिरधुनापि न नष्टा हे केशव॥ २५॥ पर आत्मा योगेश्वरैरपि श्रुतिदृशा उपनिषच्चक्षुषा ज्ञानदृष्ट्याऽमले शुद्धे हृदि विभाव्यो ध्येयः अधोऽर्वागेवाक्षजमिन्द्रियजन्यं ज्ञानं यस्मात् सोऽधोक्षजः स त्वम् उरु भूरि व्यसनं दुःखं तेनांधा बुद्धिर्यस्य तस्य मम साक्षादक्षिपथो नेत्रगोचरः कथं यस्येह लोके भवापवर्गो मोक्षः स्यात्तस्य भवाननुदृश्यः प्रत्यक्षः स्यात् हे विभो॥ २६॥ हे देवदेवेत्यादि संबोधनं स्पष्टार्थम्॥ २७॥ हे कृष्ण देवगतिं यांतं गच्छंतं मामनुजानीहि आज्ञापय यत्र क्वापि देवलोके सतो वर्त्तमानस्य वसतो वा मे मम चेतः तव पदमास्पदम् आश्रयो यस्य तथाभूतं भवेत् हे विभो॥ २८॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

ब्रह्मण्यस्येत्यत्र। अज्ञानमिति। वस्तुतत्त्वाज्ञानमित्यर्थः। स्वमतेऽज्ञानं पदार्थान्तरम्, न त्वभावरूपम्, अत एवमुक्तम्। स त्वमित्यत्र। **तादृशेनेति**। अयं बहुव्रीहिः तादृशेन पुरुषेण श्रुतिफलितार्थाभिप्रायेण। विग्रहे तु अमलया दृशा विभाव्य इति।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'तव पूर्वजन्मस्मृतिः कथम्' इत्यपेक्षायां तत्र हेतून् सूचयन्नाह—**ब्रह्मण्यस्येति**! हे केशव! ब्राह्मण्यस्य ब्राह्मणभक्तस्य वदान्यस्य दानशूरस्य तव दासस्य भवतः सन्दर्शनमेवार्थो यस्यास्ति तस्य मेऽद्यापि स्मृतिर्न विध्वस्ता न विनष्टेति॥२५॥ एवं भगवत्प्रश्नस्योत्तरमुक्त्वा 'मया तु त्वद्दर्शनं दुर्लभं प्राप्तम्' इत्याह—सत्त्वमिति। महतस्तवाभिप्रायः को वा जानातीति सूचयन् संबोधयति—विभो इति। यः योगेश्वरैः योगाङ्गप्राणायामादिभिर्वशीकृतसङ्घातैरपि श्रुतिदृशा उपनिषच्चक्षुषा अमले हृदि विभाव्यः केवलं चिन्तनीयः, नतु साक्षाद्दर्शनयोग्यः। तत्र हेतुमाह—अधोक्षज इति। अधः अक्षजं ज्ञानं यस्मात्सः। तथेह संसारे यस्य पुरुषस्य भवस्य संसारस्य अपवर्गः समाप्तिः स्यात्तस्य यो मेऽनुदृश्यः। तत्र हेतुमाह—परात्मेति। स एवंभूतस्त्वं मम साक्षात् अक्षिपथो दर्शनविषयः कथं जातोसीत्यन्वयः। 'तर्हि तवापि संसारापवर्गः प्राप्तः स्यात्तेन मद्दर्शनं संभावितमेव' इत्याशङ्क्याह—उरुणा व्यसनेनान्धा विवेकहीना बुद्धिर्यस्य तस्य मम कथं दृश्यः स्यादित्यन्वयः॥ २६॥ एवं दर्शनस्य दुर्लभत्वमुपपाद्य स्वर्गगमनं प्रार्थयितुं बहुधा सम्बोधयति—देवदेवेति। 'देवलोकगमने देवानामपि देवस्य तवाज्ञा अपेक्षिता' इत्याशयेन सम्बोधयति—देवदेवेति। देवदेवत्वे हेतुं सूचयन् सम्बोधयति–जगन्नाथेति। तत्रापि हेतुं सूचयन् पुनः संबोधयति—पुरुषोत्तमेति। भक्तवात्सल्यं सूचयन् संबोधयति—गोविन्देति! जमत्कारणत्वं सूचयन् संबोधयति—नारायणेति। अन्तर्यामित्वेन संबोधयति—हृषीकेशेति। हृषीकाणीन्द्रियाणि तत्प्रेरककीर्तन्ययशस्त्वेन संबोधयति–पुण्यश्लोकेति। विकारित्वमाशङ्क्य तन्निराकुर्वन् संबोधयति–अच्युतेति। तथापि कदाचिद्विनाशमाशङ्क्य तन्निराकुर्वन् संबोधयति—अव्ययेति॥२७॥ परिच्छिन्नत्वं वारयन् संबोधयति—विभो इति। आनन्दस्वरूपत्वेन संबोधयति—कृष्णेति। देवगतिं स्वर्गलोकं यान्तं मामनुजानीहि आज्ञां देहि। तत्र गतस्य विषयासक्त्या भगवद्वैमुख्यमाशङ्क्य प्रार्थयते—कर्मवशाद्यत्र क्वापि सतो वर्तमानस्यापि मम चेतः त्वत्पदमेवास्पदं स्मरणीयतयाऽऽश्रयो यस्य तथाभूतं भूयादिति॥ २८॥

अन्वितार्थप्रकाशिका

ब्रह्मण्यस्येति ।। हे केशव ! ब्रह्मण्यस्य ब्राह्मणभक्तस्य वदान्यस्य दानशूरस्य तव दासस्य भवतः संदर्शनमेवार्थोऽस्ति यस्य तस्य मेऽद्यापि स्मृतिर्न विध्वस्ता न विनष्टेति ।। २५ ।। स त्वमिति ।। हे विभो ! यः योगेश्वरैः श्रुतिदृशा उपनिषच्चक्षुषा अमले हृदि विभाव्यः केवलं चिन्तनीयः नतु साक्षाद्दर्शनयोग्यः अधः अक्षजं ज्ञानं यस्मात् स परात्मा त्वम् उरुणा व्यसनेन कृकलासयोनिभवदुःखेन अन्धा बुद्धिर्यस्य तस्य मम साक्षात् अक्षिपथः दर्शनविषयः कथं जातोऽसि । इह संसारे यस्य पुरुषस्य भवस्य संसारस्य अपवर्गः समाप्तिः स्यात् त्वं तस्य अनुदृश्यो भवसि ।। २६ ।। देवदेवेति युग्मम् ।। हे देवेत्यादीनि सम्बोधनानि। हे प्रभो ! देवगतिं स्वर्गलोकं यान्तं मामनुजानीहि आज्ञां देहि । कर्मवशाद्यत्र क्वापि सतो वर्तमानस्यापि मम चेतः त्वत्पदमेवास्पदं स्मरणीयतयाऽऽश्रयो यस्य तथाभूतं भूयात् ।। २७–२८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अद्यापि सरटदेहेपि स्मृतिर्ममेतिशेषः ।। २५ ।। हे विभो परात्मा परस्मिन् प्रकृतिपरे असंख्यसूर्यचंद्राधिकतेजोमये अक्षरब्रह्मणि वर्त्तमानः । आत्माविग्रहो यस्य । एवंभूतो यः पुरुषोत्तमः योगेश्वरैः । समाधिनिष्टैः श्रुतिदृशा उपनिषत्प्रोक्तज्ञानेन अमले हृदि विभाव्यो दृश्यः स त्वं उरुव्यसनांधबुद्धेः कृकलासतनुदुःखेनांधमतेर्मम अक्षपथो नेत्रगोचरः कथं जातः तदहं न जानामि । यतः अधोक्षज इंद्रियागोचरोपि भवान् इह यस्य भवापवर्गः स्यात्तस्य जनस्य अनुदृश्यः द्रष्टुं योग्योस्ति स त्वं मे मया साक्षात् दृष्ट एव एतन्महद्भाग्यमितिभावः ।। २६–२७ ।। मां त्वदीयं त्वमनुजानीहि यत्र कुत्रापि सतो वर्त्तमानस्य मे मम त्वत्पदं तव पादपद्ममेवास्पदं निवासस्थानं यस्य तथाभूतं चेतो भूयात् ।। २८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ब्रह्मण्यस्येति ।। हे केशव, ब्रह्मण्यस्य ब्राह्मणकुले साधोः, वदान्यस्य, तव दासस्य, भवतस्तव, संदर्शनं संप्रेक्षणं तस्यार्थः प्रयोजनं विद्यतेऽस्येति तस्य मम, अद्यापि, स्मृतिः, न विध्वस्ता नाशं न प्राप्ताऽस्ति ।। २५ ।। अलभ्यलाभेनाधुना कृतार्थोऽहमभूवमित्याह ।। स त्वमिति ।। हे विभो, सः यस्याहं संदर्शनार्थी, सः परात्मा परमात्मा, न हि परात्मा मांसचक्षुषा वीक्ष्य इति भावः । योगेश्वरैः अपि, श्रुतिदृशोपनिषच्चक्षुर्द्वारेण, अमलहृद्विभाव्यः निर्मले हृदये केवलं चिन्त्यः, अक्षजमैन्द्रियकं ज्ञानं तदधोऽर्वागेव यस्मात्सः, उभयेन्द्रियजन्यज्ञानाविषयः त्वं, उरुणा बहुतरेण व्यसनेनान्धा बुद्धिर्यस्य तस्य, मम अक्षिपथः लोचनमार्गस्य, गोचरः सन्, साक्षात् प्रत्यक्षतयेक्षणीयः, कथं, जातोऽसीति शेषः । किमत्राश्चर्यं तत्राह । यस्य भवापवर्गः संसारनाशः, भाव्यः भवेत्, तस्य भवान् इह अनुदृश्यः, स्यात् । एवंभूतस्त्वं मे मम, अनुदृश्यो जात इदमतिचित्रमिति भावः ।। २६ ।। हर्षातिशयेन बहुधा संबोधयन् किंचित् प्रार्थयमानश्चानुज्ञां पृच्छति ।। देवदेवेति । हे देवदेव, हे जगन्नाथ, हे गोविन्द, हे पुरुषोत्तम, हे नारायण, हे हृषीकेश, हे पुण्यश्लोक पवित्रकीर्त्ते, हे अच्युत, हे अव्यय ।। २७ ।। अनुजानीहीति ।। हे विभो, हे कृष्ण, देवगतिं यान्तमुपगच्छन्तं मां, अनुजानीहि आज्ञापय । यत्र क्वापि, सतो वर्त्तमानस्य, मे मम चेतश्चित्तं, त्वत्पदास्पदं त्वत्पदारविन्दैकाश्रयं, भूयात् । तथाऽनुगृह्णीष्वेति शेषः । इति द्वयोरेकसंबन्धः ।। २८ ।।

कृष्णप्रिया

कृपानाथ ! मैं विप्रों का सेवक था, दानशील था, उदारहृदय था, आपका विनम्र भक्त था। नाथ ! मुझे एक उत्कट अभिलाषा थी कि किसी भी उपाय से आपका साक्षात्कार हो जाय, आपका दर्शन हो जाय । हे भगवन् ! आपकी अपार अनुकम्पा से मेरे पूर्व जन्म की स्मृति नष्ट न हुई ।। २५ ।। हे विभो ! हे भगवन् ! आप तो साक्षात् सर्वेश्वर हैं, अधोक्षज हैं । योग के प्रवर्तक समर्थ महापुरुष श्रुतिदर्शित उपायों से अन्तःकरण को विशुद्ध बनाकर भक्ति भाव से अद्वैत दृष्टि से आपका ध्यान करते रहते हैं । वे सर्वथा दुर्लभ नाथ आज मेरे नयनपथ कैसे हो गये ? भगवन् ! मैं तो बहुविध व्यसनों से और दुःखफलद कर्मों से घिरा हुआ विषयान्ध बन रहा था । कृपानाथ ! आपका दर्शन तो केवल संसारासक्ति से निवृत्ति होने के बाद ही होती है ।। २६ ।। हे देवाधिदेव ! हे जगदीश्वर ! हे गोविन्द ! हे पुरुषोत्तम ! हे नारायण ! हे हृषीकेश ! हे पुण्यश्लोक ! हे अच्युत ! हे अविनाशी ! हे कृष्ण ! हे नाथ ! आपके अनुग्रह से ही मैं अब दिव्य लोक में जा रहा हूँ । आप अनुज्ञा दीजिये। नाथ ! यह विनम्र निवेदन है कि मेरा प्रारब्धवश जहाँ भी निवास हो लेकिन मेरा मनोमराल आपके चरणारविन्द में ही रहे ।। २७–२८ ।।

नमस्ते सर्वभावाय ब्रह्मणेऽनन्तशक्तये । कृष्णाय वासुदेवाय [१]योगानां पतये नमः ॥ २९ ॥
इत्युक्त्वा तं परिक्रम्य पादौ स्पृष्ट्वा स्वमौलिना । अनुज्ञातो विमानाग्र्यमारुहत् पश्यतां नृणाम् ॥ ३० ॥
कृष्णः परिजनं प्राह भगवान् देवकीसुतः । ब्रह्मण्यदेवो धर्मात्मा राजन्याननुशिक्षयन् ॥ ३१ ॥
दुर्जरं बत ब्रह्मस्वं भुक्तमग्नेर्मनागपि । तेजीयसोऽपि किमुत राज्ञामीश्वरमानिनाम् ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—सर्वभावाय, ब्रह्मणे, अनन्तशक्तये, कृष्णाय, वासुदेवाय, योगानाम्, पतये, ते नमः, ते नमः, इति, उक्त्वा, तम्, परिक्रम्य, स्वमौलिना, पादौ, स्पृष्ट्वा, अनुज्ञातः, नृणाम्, पश्यताम्, विमानाग्र्यम्, आरुहत् ॥ २९–३० ॥ ब्रह्मण्यदेवः, देवकीसुतः, भगवान्, धर्मात्मा, कृष्णः, राजन्यान् अनुशिक्षयन्, परिजनम्, प्राह ॥ ३१ ॥ तेजीयसः, अग्नेः, अपि, मनाक्, अपि, भुक्तम्, ब्रह्मस्वम्, बत, दुर्जरम्, ईश्वरमानिनाम्, राज्ञाम्, किमुत ॥ ३२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यास्यन्नमस्यति । नम इति । सर्वभावाय सर्वस्य भावो जन्म येन तस्मै ब्रह्मणे कर्तृत्वेऽप्यविकाराय । कुतः । अनंतशक्तये अनंता मायाख्या शक्तिर्यस्य तस्मै वासुदेवाय सर्वभूताश्रयायेत्युपादानत्वमुक्तम् । श्रीकृष्णाय सदानंदरूपायेति पुरुषार्थत्वमुक्तम् । "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ॥ तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इति स्मृतेः ॥ किंच योगानां इष्टापूर्तादिकर्मणां पतये फलदात्रे । अयं भावः । एवंभूतं त्वां विहाय गंतुमनिच्छुरपि गमिष्यामि त्वद्दत्तकर्मफलभोगायेति ॥ २९–३१ ॥ मनागीषदपि भुक्तं सदग्नेरग्निसदृशस्य तेजीयसोऽतितेजस्विनोऽपि दुर्जरम् । ईश्वरमानिनां राज्ञां किमु ॥३२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्मृतेरितिपदमत्र श्रुतिपरं, गोपालतापनीयोपनिषद्यस्य पाठाच्छ्रुतिरेवेयम् । क्वचिच्छ्रुतिस्मृत्योरेकरूपत्वेनैव । यथा—"गोत्रं नो वर्द्धताम्" अयं श्लोकः श्रुतित्वेन स्मृतित्वेन च पठ्यते तथाऽयमपीति । न केवलं सच्चिदानंदरूप एव त्वमपि तु कर्मफलदातापीत्याह—किंचेति । स्वाशयं प्रकाशयति—अयं भाव इति । एवंभूतं सर्वकर्मफलदातारमनंतशक्तित्वादिरूपम् । सर्वेषां भावश्श्रेष्टा यस्मात्तस्मै । कुतः—ब्रह्मणे बाह्याभ्यन्तरव्यापकाय । ननु जीवाः स्वयमेव प्रत्यलं चेष्टंते, नेत्याह—अनन्तशक्तये तव शक्त्यैव तेषां तत्तच्छक्तिर्न स्वतः । कुतः—वासुदेवाय सर्वचित्ताधिष्ठात्रे । अत एव योगानां कर्मज्ञानादिलक्षणानां पतये प्रवर्तकाय एवंभूताय तुभ्यं कृष्णाय नमोनमः । भक्त्युद्रेकेण द्विरुक्तिः । यद्वा—सर्वेषां ब्रह्मादीनां स्थावरांतानां भावायोत्पादकाय । स्वरूपतः सर्वबृहत्तमाय । स्वरूपशक्तिमायाशक्तिवृत्तिभेदेनानंतशक्तये । एवमपि कृष्णाय नराकृतिपरब्रह्मणे तत्रापि वसुदेवाज्जन्मलीलयैव प्रकटीभूताय योगानां दुर्घटघटनाशक्तीनां पतये नमोनमो नतिमात्रमेव मुहुरस्तु तन्निकटस्थातुमयोग्यत्वादलं सेवाद्यभिलाषेणेति भावः । अत्र विश्वनाथस्तु—मम त्वयि दास्यभाव एवास्तु त्वं तु सर्वभावविषयीभूत एवासीत्याह—सर्वे भावा यस्मिंस्तस्मै । तत्र शांतभावस्य विषयालम्बनमाह—ब्रह्मणे मूर्तब्रह्मस्वरूपाय । दास्यभावस्याह—अनंतशक्तये महामहैश्वर्याय । सख्यभावस्याह—कृष्णस्यार्जुनस्य नामरूपगुणादिभिः साम्यादेव सदानंददात्रे । वात्सल्यस्याह—वसुदेवस्य पुत्राय । उज्ज्वलभावस्याह—योगानां भक्तियोगमयीनां श्रीरुक्मिण्यादीनां पतये भर्त्रे ॥ २९ ॥ भोगांते मामाप्स्यसीत्यनुज्ञातः इत्युक्तरीत्या । तं श्रीकृष्णम् । विमानाग्र्यं विमानश्रेष्ठम् ॥ ३० ॥ परिजनम् "परीवारे समीपस्थे ज्ञातौ परिजनः स्मृतः" इति निरुक्तिः ॥ ३१ ॥ ब्रह्मस्वं ब्राह्मणद्रव्यम् । ब्राह्मणेन स्वत्वेन स्वीकृतमन्यथा मरुत्तनृपयज्ञावासत्यक्तब्राह्मणस्वर्णाहरणे युधिष्ठिरस्य स्वर्णस्तेयित्वेन महापातकित्वं स्यादिति भावः । 'ब्रह्म विप्रपरात्मनोः' इति कोशात् । यद्वा—अग्नेरपि दुर्जरम्, अग्निस्तु भुक्तो यथाकथंचिज्जीर्णो भवेदपीत्यर्थः । तेजीयसस्तपस्विनोपि, क्षत्रियादेः किमुत केवलमीश्वरमानिनां प्रभुत्वाभिमानवतामित्यर्थः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, तर्ह्यत्रैव तिष्ठेति चेत्तत्राह—नम इति । तैर्व्याख्यातं यद्वा अतस्त्वत्प्रेरणया यामि तत्र मच्छक्त्या किं स्यादित्याशयेन तस्य सर्वप्रेरकतां प्रदर्शयन्नैश्वर्यं वर्णयति—सर्वेषां भावश्श्रेष्टा यस्मात् तस्मै कुतः ब्रह्मणे बहिरन्तश्च सर्वव्यापकाय ननु, जीवाः प्रत्यक्षं स्वयमेव बहुधा चेष्टन्ते नेत्याह—अनन्तेति । तव शक्त्यैव तेषां तत्तच्छक्तिर्न स्वत इत्यर्थः कुतः वासुदेवाय सर्वचित्ताधिष्ठात्रे अत एव योगानां कर्मज्ञानादिलक्षणानां पतये प्रवर्त्तकाय एवमेवम्भूताय कृष्णाय तुभ्यं नमो नमः भक्त्युद्रेकेण

---

[१] गोपा–विज. ।

द्विरुक्तिः सदा नम इत्यर्थः । अथवा सर्वेषां ब्रह्मादिस्थावरान्तानां भवाय उत्पादकाय स्वरूपतः सर्वबृहत्तमाय शक्तितश्च स्वरूपशक्तिमायाशक्तिवृत्तिभेदेनानन्तशक्तये एवमपि कृष्णाय नराकृत्यैव परब्रह्मणे तत्रापि वसुदेवाज्जन्मलीलयैव प्रकटीभूताय यतो योगानां दुर्घटघटनाशक्तीनां पतये नमो नमः पुनःपुनर्नमस्कारमात्रं त्वन्निकटे स्थातुमयोग्यत्वादलं सेवाद्यभिलाषेणेति भावः ॥ २९ ॥ पश्यतां नृणाम् आश्चर्य्येण सर्वेषु लोकेषु पश्यत्सु ॥३०॥ स्वयं भगवानपि निजान्तरङ्गवर्गमपि प्रकर्षेण ब्राह्मणापराधदुष्फलदर्शनेनावोचत् यतो देवकीसुतः तैर्निजपरिकरैः सहाङ्गीकृततज्जन्मादिमनुष्यलीलः तत्रापि ब्रह्मण्यो ब्राह्मणहितावतारश्चासौ देवः सर्वश्रेष्ठश्च न केवलं तावन्मात्रो धर्म्मप्रवर्त्तकः किन्तु धर्मात्मा सर्वधर्मप्रवर्त्तकश्च ननु ते तत्परिजनाश्चेत्तर्हि तेषु किं शिक्षा पिष्टपेषणेन तत्राह राजन्यान् तत्रस्थान् क्षत्रियान् ततोऽन्यानपि तद्व्याजेन शिक्षयितुमित्यर्थः ॥ ३१ ॥ दुर्जरं दुष्टाजीर्णवन्महादुःखदमित्यर्थः । बत विस्मये भुक्तं चौर्य्यादिना तेजीयसः इत्यार्षं तपोयोगादिबलेन पापाद्यपरिभाव्यस्यापीत्यर्थः। ईश्वरमानिना तदभिमानेन तपोयोगादिसम्भावनाशून्यानां तु राज्ञां किमुत सुतरामेव दुर्जरमित्यर्थः । अन्यत्तैः यद्वा मनाक् स्वल्पमपि ब्रह्मस्वम् अग्निमतिक्रम्यापि यस्तेजीयान् तेजस्वितमः तस्यापि ॥ ३२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तर्ह्यत्रैव तिष्ठेति चेत्तत्राह—नम इति । तैर्व्याख्यातम् । यद्वा, अन्तस्त्वत्प्रेरणया यामि, तत्र मच्छक्त्या किं स्यादित्याशयेन तस्य सर्वप्रेरकतां प्रदर्शयन्नैश्वर्य्यं वर्णयति—सर्वेषां भावश्चेष्टा यस्मात्तस्मै । कुतः ? ब्रह्मणे बहिरन्तश्च सर्व्वव्यापकाय ! ननु जीवाः प्रत्यक्षं स्वयमेव बहुधा चेष्टन्ते, नेत्याह—अनन्तेति । तव शक्त्यैव तेषां तच्छक्तिर्न स्वत इत्यर्थः ? कुतः ? वासुदेवाय सर्वचित्ताधिष्ठात्रे, अत एव योगानां कर्म्मज्ञानादि-लक्षणानां पत्ये प्रवर्त्तकाय । एवं कृष्णाय साक्षात् परब्रह्मणे तुभ्यं नमो नमः, भक्त्युद्रेकेण द्विरुक्तिः । अथवा सर्वेषां श्रीब्रह्मादि-स्थावरान्तानां भावाय निजपादाब्जप्रेमार्थं वासुदेवाय वसुदेवगृहेऽवतीर्णाय, अत एव ब्रह्मणे भावविस्तारणेन सर्वव्यापकाय, यतोऽनन्ताः शक्तयो यस्य तस्मै, अत एव योगानां भावोपायानाम्, किंवा बहुत्वं गौरवात्; भक्तियोगस्य पत्ये पालकाय, एवं कृष्णाय गुह्यनिजैश्वर्य्यप्रकटनपराय ते नमो नमः। अतोऽस्मिन्नवसरे तत्राप्यस्मिन् स्थाने स्थातुं नार्हामि, तथा तल्लीलाहेत्वाद्यवितर्कणेन मुह्येयं चेति भावः ॥ २९ ॥ विमानेष्वग्र्यं श्रेष्ठम्, भगवदीयत्वात्, पश्यतां नृणाम्, आश्चर्य्येण सर्व्वलोकेषु पश्यत्सु सत्सु तादृशस्यापि सद्यस्तादृशगतेः । ननु तथापि कञ्चित् कालं विलम्बितुं युज्यते, तत्राह—अनुज्ञातः श्रीभगवता प्रस्थापितः सन् ॥ ३० ॥ परिजनं यादवादि–निजपरिवारवर्गं प्रकर्षेण न्यायप्रमाणादि-दर्शनेनाह । किमर्थम् ? राजन्यान् सर्वक्षत्रियान्, अनुशिक्षयन् स्वाचारेण शिक्षितानपि नृग दृष्टान्तेन पुनश्च शिक्षयितुमित्यर्थः, यतो धर्म्मात्मा धर्म्मस्वरूपः, किंवा धर्म्मस्यात्मा प्रवर्त्तकः, तत्रापि ब्रह्मण्येषु ब्राह्मणभक्तेषु देवः श्रेष्ठः, तत्र हेतुः—देवकीसुत इति, अत एव भगवान् सर्वैश्वर्य्यपरिपूर्णः, कृष्णश्च मुनीनामपि चित्ताकर्षकः ॥ ३३ ॥ दुर्ज्जरं दुष्टाजीर्णवन्महादुःखदमित्यर्थः ? वत विस्मयेऽवधारणे वा, भुक्तं चौर्य्यादिना । ईश्वरमानिनामिति तत्त्वत ऐश्वर्य्याभावेन तेजस्वितोक्ता, अन्यत्तैर्व्याख्यातम् । यद्वा, मनाक् स्वल्पमपि ब्रह्मस्वमग्नेः सकाशादपि यस्तेजीयान् महातपस्वी ज्ञानी वा तस्यापि ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सर्वभावाय सर्वपदार्थशरीराय ॥ २९-३४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यास्यन्नमस्करोति—नमस्त इति । तुभ्यं सर्वभावय सर्वः भावः पदार्थो यस्य शरीरत्वेनेति स तथा तस्मै तत्र हेतुः ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहत्त्वायानन्ताः शक्तयः कार्योपयुक्तापृथक्सिद्धप्रकृतिपुरुषकालसार्वज्ञसर्वशक्तित्वादयो यस्य तस्मै योगानां पतये निर्वाहकाय ॥ २९ ॥ इतीति । स्वमौलिना स्वकिरीटेन विमानाग्र्यं विमानश्रेष्ठम् आरुरोह नृणां पश्यतां सताम् ॥३०॥ कृष्ण इति । ब्रह्मण्यदेवो धर्मात्मेति च हेतुगर्भं तत्त्वात् राजन्याननुशिक्षयन्नित्यत्र "लक्षणहेत्वोः" इति शत्रादेशः अनुशिक्षयितुमित्यर्थः । परिजनं परितोविद्यमानञ्जनम्प्रति प्राह ॥३१॥ उक्तिमेवाह—दुर्जरमित्यादिनैतद्विश्राव्येत्यतः प्रात्तनेन। बतेत्याश्चर्ये ब्रह्मस्वं मनागीषदपि भुक्तं सदग्नेरग्निसदृशस्यातितेजस्विनोपि दुर्जरं दुःखेनापि न जीर्यतीति तथा किं वक्तव्यम् ईश्वरं मन्यमानानां राज्ञां दुर्जरमिति ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

सर्वभावाय सम्पूर्णैश्वर्याय सर्वोत्पादनकर्त्रे वा अखण्डलीलायेति वा ॥ २९-३० ॥ परिजनं परित उपासमानं जनम् ॥ ३१ ॥ अग्नेरपि दुर्जरं जीर्णीकर्तुमशक्यं मनागल्पमपि किम्पुरन्यस्येत्यर्थः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मम त्वयि दास्यभाव एवास्तु त्वन्तु सर्वभावविषयीभूत एवासीत्याह—**नम इति**। सर्वेऽपि भावा यस्मिंस्तस्मै तत्र शान्तभावस्य विषयालम्बनमाह **ब्रह्मणे** मूर्त्तब्रह्मस्वरूपाय दास्यभावस्याह **अनन्तशक्तये** महामहैश्वर्याय सख्यभावस्याह—**कृष्णाय** कृष्णस्यार्जुनस्य नामरूपगुणादिभिः साम्यादेव सदानन्ददात्रे "कृषिर्भूवाचकः शब्दोणश्च निर्वृतिवाचकः" इति स्मृतेः। वात्सल्यभावस्याह—**वासुदेवाय** वसुदेवपुत्राय उज्ज्वलभावस्याह **योगानां** भक्तियोगमयीनां श्रीरुक्मिण्यादीनां **पतये** भर्त्रे ॥ २९ ॥ **अनुज्ञातः** भोगान्ते मां प्राप्स्यसीत्यादिष्टः ॥ ३०-३१ ॥ ब्रह्मस्वं मनाक् ईषदपि चौर्य्यादिना भुक्तं सत् अग्नेः सकाशादपि यस्तेजीयान् तपोयोगादियुक्तस्तस्यापि दुर्जरम् ॥ ३२ ॥

गूढार्थदीपिनी

सर्वं भावाय सर्वस्य भावो जन्म यस्मात्। योगानां साधनानां पतये फलदात्रे ॥ २९ ॥ **अग्र्यं** श्रेष्ठम् ॥ ३० ॥ परिजनं परितो वर्तमानं जनसमुदायम् प्राह ॥ ३१ ॥ स्वं धनं मनाक् ईषदपि भुक्तं सत् अग्नेरिव **तेजीय**सोऽपि दुर्जरं दुष्पचं भवति किमुत राज्ञामित्यन्वयः ॥ ३२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यास्यन् नमस्करोति सर्वे भावा यस्मात् तस्मै विश्वहेतवे ब्रह्मणे **बृहते** अनन्ताः असङ्ख्येयाः शक्तयो यस्य तस्मै ॥ २९-३० ॥ परिजनं परितो वर्त्तमानं जनम् ॥ ३१ ॥ बतेत्याश्चर्ये ब्रह्मस्वं मनागीषदपि भुक्तं सत् अग्नेः अग्निसमस्यापि तेजीयसः अतितेजस्विनोऽपि दुर्जरम् ईश्वरमानिनामज्ञानादनीश्वरमात्मानमीश्वरम्मन्यमानानां राज्ञां दुर्जरमिति किमु वक्तव्यम् ॥ ३२-३३ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो गच्छन् नमस्यति **नमस्ते सर्वभावायेति**। भगवान् षड्गुणयुक्त इति धर्मिणं निर्दिश्य षड्विशेषणान्याह। भक्तस्य गमनमनुचितमाशङ्क्य सर्वभावस्त्वमेवेति न त्वत्परित्यागः। अनेन कार्यरूपता निरूपिता। कारणरूपतामाह **ब्रह्मण** इति। **अनन्तशक्तय** इति। कारणत्वोपपादकं प्रकारमुक्तवान्। एवं साधनत्वेन त्रिरूपत्वमुक्त्वा, फलेऽपि त्रिरूपतामाह। **कृष्णाय** सदानन्दायेति शुद्धफलरूपत्वम्। **वासुदेवाय** मोक्षफलदात्रे। **योगानां पतय** इति। तस्य मोक्षफलदाने साधनत्वम्। आद्यन्तयोर्नमस्कारः सर्वत्रानुषङ्गार्थः ॥ २९ ॥ अङ्गीकारेणैवाभ्यनुज्ञातः स्वर्गतिं गत इत्याह **इत्युक्त्वेति**। प्रदक्षिणानमस्कारौ सर्वकार्यसाधकौ। स्वमौलिना पादस्पर्शः **भगवद्धर्माणां नित्यत्वात्तच्चरणछायायामेव सर्वभोगसूचकः**। **तदेव** देवसमानीतं विमानमारुह्य भगवन्माहात्म्यं लोके प्रख्यापयन् नृणां पश्यतामेव सतां यथावित्यर्थः ॥ ३० ॥ एवं नृगस्य ब्राह्मणातिक्रमेण दुर्गतिम्, भगवदीयत्वेन सुगतिं च प्रदर्श्य, निरोधनिरूपणार्थं ब्रह्मस्वसम्बन्धाभावमुपदिशति **कृष्णः परिजनं प्राहेति**। यावदध्यायपरिसमाप्ति। **सात्त्विकाः प्रथमं धर्मे उपदेष्टव्या** इति। परिजनः पुत्रपौत्रादयः। **भगवानि**ति भाव्यर्थाभिज्ञः। ब्राह्मणातिक्रमादेव तेषामनिष्टं भविष्यतीति। **देवकीसुत** इति। भक्तकृपालुत्वात्तथाभावो न सम्मतः। किञ्च। ब्राह्मणानामपि हितप्रेप्सुः। एवमुपदेशे ब्राह्मणातिक्रमं न कुर्युरिति। किञ्च। **धर्मात्मा** धर्मः स्थापनीय इति। एकेनापि ब्रह्मस्वेन मिलितेन सर्व एव कृतो धर्मो नष्टो भवतीति। किञ्च। राजवंशे स्वयमपि प्रादुर्भावलीलां कृतवान्। अतो राजन्यान् शिक्षयन् धर्मार्थं च धर्मः कर्तव्यः कारणीयश्चेति ॥ ३१ ॥ उपदेशमाह द्वादशभिः **दुर्जरं बत ब्रह्मस्वमिति**। आदौ सात्त्विकान्प्रति उपदिशन् धर्मान्तरेण ब्रह्मस्वं गृहीतं परिहर्तव्यमिति पक्षं निराकरोति। **बते**ति खेदे। यथा बालकाः सर्पसमीपं चेद्गच्छेयुः, तदा यथा पित्रादयः खेदमाविष्कुर्वन्ति, तथा भगवानाहेति लक्ष्यते। स्वतः उपायान्तरेण वा न जीर्णं भवतीति दुर्जरम्। यतो ब्रह्मैवाक्षयम्, तस्यापि स्वमिति। अत्यन्तरङ्गम्। उपभुक्तं चेद्दुर्जरमिति। अजीर्णद्रव्यमिव मृत्युसाधकमुक्तम्। यत्र ब्राह्मणस्य ब्रह्मभूतस्य स्वमित्यभिमानः, तत्र दृष्टप्रकारेणैव दुर्जरं भवति, नृग इव, अन्यथात्वे शास्त्रद्वारेति दृष्टादृष्टाभ्यां दुर्जरम्। यः सर्वमेवोपभुक्तं भस्मसात्करोति, तेनाप्यग्निना उपभुक्तं दुर्जरमेव भवति, न तु भस्मसाद्भवतीति ऐहिकदुर्जरत्वमेव निरूपितम्। ननु 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथे'ति वाक्यात् ज्ञानेन ब्रह्मस्वजरणमिति चेत्, तत्राह **तेजीयसोऽपी**ति। ज्ञानं फलोन्मुखं तेजः करोति, तद्वान् तेजस्वी, तस्यापि दुर्जरमुपजीव्यविरोधात्। न हि ज्ञानं स्वोपजीव्यमपि खण्डयति। यत्र ब्राह्मणस्यापि ब्रह्मस्वं दुर्जरम्, तत्र राज्ञां ब्रह्मस्वं कथं न दुर्जरं स्यात्। स्वतो ब्रह्मत्वाभावात् ब्राह्मणोपजीवकत्वाच्च। किञ्च। तत्रापि ये ईश्वरमानिनः, स्वस्य क्षात्रं धर्मं परित्यज्य, भगवद्धर्ममैश्वर्यमभिमन्यन्ते, तेन परधर्मनिष्ठत्वात् सुतरामेव ब्रह्मस्वं दुर्जरं भवति ॥ ३२ ॥

श्रीसुबोधिनी-सारः

सर्वेषु भावोऽस्ति त्वं यस्य सद्रूपत्वात् तस्मा अनंतशक्तये ब्रह्मणे ते नमः कृष्णाय वासुदेवाय योगानाम् इष्टापूर्त्तादीनां पतये फलदातृत्वात्स्वामिने नमः ॥ २९ ॥ इत्युक्त्वा तं श्रीकृष्णं परिक्रम्य स्वमुकुटेन चरणौ स्पृष्ट्वा तेनानुज्ञातो नृणां पश्यतां सतां विमानाग्र्यं विमानोत्तममारुहत् ॥ ३० ॥ ब्रह्मण्यदेवो धर्मे आत्मा चित्तं यस्य धर्म आत्मा स्वरूपं यस्येति वा देवकीसुतो भगवान् कृष्णो राजन्यान् भूपाननुशिक्षयन् परिजनं भृत्यवर्गमाह ॥ ३१ ॥ मनागीषदपि भुक्तं ब्रह्मस्वं ब्राह्मणधनं दुर्जरं बतेति खेदे अग्नेरग्निसदृशस्यापि तेजीयसोऽतितेजस्विनः ईश्वरा वयमिति मंतुं शीलं येषां तेषां राज्ञां ब्रह्मस्वं दुर्जरमिति किमु वक्तव्यम् ॥ ३२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

इत्युक्त्वेत्यस्याभासे । **स्वर्गति गत** इति । अस्य क्रममोक्षः । **अतः** स्वर्गादिभोगानन्तरं मोक्ष इति भावः । विमानारोहस्य स्वर्गमनार्थकत्वात्स्वर्गमनमेव तात्पर्यार्थः । अत एव **यथावित्यर्थं** इत्यनेन गमनमेव तात्पर्यार्थ उपसंहृतः, विमानारोहो वाच्यार्थ इति भावः । **कृष्णः परिजनमित्यत्र** । **सात्त्विकाः प्रथममिति** । राजन्येभ्यो राजसेभ्यः प्रथमं परिजनाः सात्त्विका उपदेष्टव्याः, प्रकरणित्वात् । अतः प्रथमं परिजनाः पश्चाद्राजन्या उक्ता इत्यर्थः । देवकीसुतपदतात्पर्यमाहुः **भक्तेति** । **दुर्जरमित्यत्र** । **धर्मान्तरेणेति** ब्रह्मस्वग्रहणदोषो धर्मान्तरेण परिहर्तव्य इत्यर्थः । **अन्यथात्वे** इति । वस्तुतः स्वत्वेपि ब्राह्मणस्य तथाभिमानाभावे इत्यर्थः । **यत** इति । अग्नेर्हेतोः पुरुषः सर्वं भुक्तं भस्मसात्करोति । तादृशेनाप्यग्निना करणेन ब्रह्मस्वमुपभुक्तं चेद्दुर्जरमेव भवतीत्यर्थः । अग्नेर्हेतोरपि मनागपि ब्रह्मस्वं भुक्तं चेद्दुर्जरं भवतीति मूलेऽर्थः ।

इति पञ्चदशाध्यायव्याख्या समाप्ता ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं गमनाज्ञां प्रार्थ्य यास्यन्नमस्करोति—नम इति । आद्यन्तयोर्नमःपदप्रयोगः सर्वत्रानुषङ्गार्थः । कार्यरूपत्वमाह—सर्वभावायेति । कारणत्वेन नमस्यति—ब्रह्मण इति । जगज्जन्मादिकर्तृत्वं सूचयन्नमस्करोति—अनन्तशक्तय इति । सदानन्दरूपफलत्वेन प्रणमति–कृष्णायेति । मोक्षप्रदत्वेन नमस्यति–वासुदेवायेति । धर्मादिप्रवर्तकत्वेन तत्फलप्रदत्वेन च नमस्करोति–योगानां सर्वसाधनानां पतय इति ॥ २९ ॥ इत्येवमुक्त्वा तं श्रीकृष्णं परिक्रम्य स्वमौलिना तत्पादौ स्पृष्ट्वा दण्डवत्प्रणामं कृत्वा तेनानुज्ञातो नृणां पश्यतामेव सतां आगतं विमानाग्र्यमारुहदित्यन्वयः ॥ ३० ॥ ततश्च परिजनं परितो विद्यमानं जनं प्रति कृष्णः प्राहेत्यन्वयः । एवं कथने हेतुमाह—राजन्याननुशिक्षयन्निति । शिक्षायां हेतुमाह—ब्रह्मण्यदेव इति । ब्रह्मणा साधको ब्रह्मण्यः स चासौ देवश्च सर्वाराध्यश्चेति तथा । ब्राह्मणाराधने हेतुमाह—धर्मात्मेति । तत्र हेतुमाह—भगवानिति । स यदि स्वाचारेण लोकं न शिक्षयेत् तदा कः शिक्षयेदित्याशयः । तथापि तस्य भक्तवात्सल्यं सूचयन्नाह—देवकीसुत इति ॥ ३१ ॥ तदुक्तिं दर्शयति—दुर्जरमिति । बतेत्याश्चर्यं द्योतयति । मनाक् ईषदपि भुक्तं ब्रह्मस्वं अग्नेः अग्निसदृशस्यातितेजस्विनोऽपि दुर्जरं दुःखेन केनाप्युपायेन न जीर्यति । यद्येवं तदा वृथैवेश्वरमानिनां समर्था वयमित्यभिमानवतां राज्ञां तद्दुर्जरं भवतीति किमुत वक्तव्यम् ॥ ३२ ॥

अन्वितार्थप्रकाशिका

नम इति ॥ सर्वभावाय कार्यरूपाय सर्वस्य भावो जन्म येन तस्मै इति वा ब्रह्मणे कारणरूपाय अनन्तशक्तये ते नमः । कृष्णाय वासुदेवाय योगानां सर्वसाधनानां पतये नमः ॥ २९ ॥ इतीति ॥ इत्येवमुक्त्वा तं श्रीकृष्णं परिक्रम्य स्वमौलिना तत्पादौ स्पृष्ट्वा दण्डवत्प्रणामं कृत्वा तेनानुज्ञातो भोगान्ते मां प्राप्स्यसीत्यादिष्टः नृणां पश्यतामेव सताम् आगतं विमानाग्र्यमारुहत् । छन्दसश्च्लेरङ् ॥ ३० ॥ कृष्ण इति ॥ भगवान् देवकीसुतः ब्रह्मण्यदेवः धर्मात्मा कृष्णः राजन्यान् क्षत्रियाननुशिक्षयन् परिजनं परितो विद्यमानं जनं प्राह स्म ॥ ३१ ॥ दुर्जरमिति ॥ मनाक् ईषत् अपि चौर्यादिना भुक्तं ब्रह्मस्वम् अग्नेः अग्निसदृशस्यातितेजस्विनोऽपि दुर्जरं यद्येवं तदा वृथैवेश्वरमानिनां समर्था वयमित्यभिमानवतां राज्ञां तद्दुर्जरं भवतीति किमुत वक्तव्यम् ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रकृतेः सकाशात् सर्वेषां महदादीनां स्थावरजंगमानां च भावो भवनं जन्म येन तस्मै ब्रह्मणे परब्रह्मणे । अनंतशक्तये अपरिमितसामर्थ्याय योगानां चतुर्वर्गोपायानां पतये प्रवर्तकाय ॥ २९-३० ॥ ब्रह्मणो ब्राह्मणा एव ब्रह्मण्यास्त एव देवाः

पूज्या यस्य सः चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् । संज्ञापूर्वकविधेरनित्यत्वाद्वृद्ध्यभावः । यद्वा ब्रह्मण्यानां ब्राह्मणसत्कारशीलानां देव उपास्यः ॥ ३१ ॥ ब्रह्मस्वं ब्राह्मणधनं मनाक् स्वल्पमपि । भुक्तं तेजीयसः याचने समर्थस्य अग्नेरपि दुर्जरं राज्ञां तु किमुतः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ यास्यन्नमस्करोति ॥ नम इति ॥ सर्वे भावाः पदार्थाः शरीरत्वेन यस्य तस्मै सर्वभावाय, ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते, अनन्ताः शक्तयो यस्य तस्मै, वासुदेवाय शुद्धान्तःकरणावस्थिताय वसुदेवपुत्राय वा, योगानां पतये, कृष्णाय, ते तुभ्यं, नमः नमः, पुनः पुनर्नमस्करोमि ॥ २९ ॥ इतीति ॥ तं श्रीकृष्णं प्रति, इतीत्थं, उक्त्वा परिक्रम्य, स्वमौलिना स्वकिरीटेन, पादौ स्पृष्ट्वा, कृष्णेन अनुज्ञातो यदाऽहं हरिकृष्णनाम्ना सारवज्ञातीयधर्माख्यद्विजगृहे प्रादुर्भूय भूमौ विचरिष्यामि तदा भवान्मद्भक्तिरहितकेवलदानादिप्रवृत्तकर्मनिष्ठत्वतः कङ्कजातीयक्षत्रियकुलोत्पन्नाऽभयाख्यभूपनाम्ना संभविष्यन् सन्, मामेष्यति ततः ‘यत्र क्वापि सतश्चेतो भूयात्’ इति भवद्याचितं सत्यं करिष्यामीत्यनुगृहीतो नृगः, नृणां पश्यतां सतां, विमानाग्र्यमुत्तमं विमानं, आरुहत् ॥ ३० ॥ कृष्ण इति ॥ ब्रह्मण्यः देवः, धर्मात्मा, देवकीसुतः, भगवान् कृष्णः, राजन्यान् क्षत्रियान्, अनुशिक्षयन्ननुशिक्षयितुं, परिजनं परितो विद्यमानं जनं प्रति, प्राह ॥ ३१ ॥ उक्तिमेवाह दुर्जरमित्यादिना एवं विश्राव्येत्यतः प्राक्तनेन ग्रन्थेन ॥ दुर्जरमिति ॥ बतेत्याश्चर्ये । ब्रह्मस्वं ब्राह्मणधनं, मनागीषदपि, भुक्तं सत्, अग्नेरग्निसदृशस्यापि, तेजीयसस्तेजस्विनः, दुर्जरं दुःखेनापि जरणं विधातुमशक्यं तदा ईश्वरमानिनामात्मानमीश्वरमित्यभिमन्यमानानां, राज्ञां दुर्जरं स्यात्, तत्र किमुत किं वक्तव्यमित्यर्थः ॥ ३२ ॥

कृष्णप्रिया

नाथ! सर्वभावात्मकस्वरूप आपके चरणों में-कार्य, कारणादि सर्वस्वरूप आपको प्रणाम, परब्रह्म स्वरूप को नमस्कार-अनन्त शक्तिस्वरूप को प्रणाम, समग्र योग के स्वामी को प्रणाम, वासुदेव-विश्वात्मक स्वरूप को नमस्कार, एवं भगवान् श्रीकृष्ण को प्रणाम ॥ २९ ॥ भगवान के श्रीचरणों में इस प्रकार भक्ति से भरे भाव से बार-बार प्रणाम किये, पुनः पादस्पर्श किया अपने श्रीमस्तक के मुकुट से श्रीचरणों में दण्डवत् किया, भगवान् की परिक्रमा की, भगवान् की अनुज्ञा प्राप्त करके सबके सन्मुख ही दिव्य विमान में बैठकर प्रस्थान किया ॥ ३० ॥ श्री देवकीनन्दन भगवान् श्रीकृष्ण नृगराजा के प्रस्थान के बाद ब्रह्मण्य देव के और धर्माधिष्ठाता के नाते क्षत्रियों को शिक्षा देने के लिये समुपस्थित अपने कुटुम्बी जन को कहने लगे ॥ ३१ ॥ हे कुटुम्बीजन! मनुष्य अग्नि के कितना भी तेजस्वी क्यों न हो लेकिन वे भी ब्राह्मणों का अल्प से भी अल्प द्रव्य को हडपकर कर सकेगा ? नहीं । तब जो नाममात्र के लिए राजा मान बैठा, वह क्या पचा सकेगा ? ॥ ३२ ॥

नाहं हालाहलं मन्ये विषं यस्य प्रतिक्रिया । ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधि[1]र्भुवि ॥ ३३ ॥
हिनस्ति विषमत्तारं[2] वह्निरद्भिः प्रशाम्यति । कुलं समूलं दहति ब्रह्मस्वारणिपावकः ॥ ३४ ॥
ब्रह्मस्वं दुरनुज्ञातं भुक्तं हन्ति त्रिपूरुषम् । प्रसह्य [3]तु बलाद् भुक्तं दश पूर्वान् दशापरान् ॥ ३५ ॥
राजानो राजलक्ष्म्या [4]च नात्मपातं विदन्ति ते[5] । [6]निरयं येऽभिमन्यन्ते ब्रह्मस्वं साधु बालिशाः ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—अहम्, हालाहलम्, विषम्, न, मन्ये, यस्य, प्रतिक्रिया, अस्ति, हि, ब्रह्मस्वम्, विषम्, प्रोक्तम्, भुवि, अस्य, प्रतिविधिः, न ॥ ३३ ॥ विषम्, अत्तारम्, हन्ति, वह्निः, अद्भिः, प्रशाम्यति, ब्रह्मस्वारणिपावकः, समूलम्, कुलम्, दहति ॥३४॥ दुरनुज्ञातम्, ब्रह्मस्वम्, भुक्तम्, त्रिपूरुषम्, हन्ति, प्रसह्य, बलात्, भुक्तम्, दश, पूर्वान्, दश, अपरान्, हन्ति ॥ ३५ ॥ राजानः, राजलक्ष्म्यान्धाः आत्मपातम्, न, विचक्षते, बालिशाः, ब्रह्मस्वम्, निरयम्, साधु, ये, साधु, अभिमन्यन्ते ॥ ३६ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

किंच विषादपि घोरमित्याह हिनस्तीति । संसर्गिसंसर्गेण मारकत्वादग्नितुल्यता स्यात्तदपि नेत्याह । वह्निरिति । अपि च समूलमिति वह्निर्मूलान्यवशेषयति । ब्रह्मस्वलक्षणारणिजः पापपावकस्तु कुलं तदपि समूलमिति ॥ ३४ ॥ दुरनुज्ञातं यथावदननुज्ञातम् । त्रिपूरुषं कुलं स्वयं पुत्रं पौत्रं च । प्रसह्य हठात् । बलाद्राजाद्याश्रयतः ॥ ३५ ॥ ये ब्रह्मस्वमभिमन्यन्ते इच्छन्ति ते निरयमेवाभिमन्यन्ते । अतो बालिशा अज्ञा आत्मपातं न विचक्षत इति ॥ ३६ ॥

---

१. निधि-विज. । २. रमग्नि-वीर. विज. । ३. प्रसह्याति-विज. । ४. न्धा-श्रीधर. वंशी. जीव. ; क्ष्म्याश्च-विज. । ५. विचक्षते-श्रीधर. वंशी. जीव. विश्व. ; प्रच-वीर. विज. । ६. निरये-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हालाहलमित्युपलक्षणं स्थावरजंगमोभयविधविषस्य। स्थावरं तिंदुकादि जंगमं सर्पवृश्चिकाद्युत्थम्। विषं नाशकं विशेषेण स्यत्यंतं करोतीति 'षो अंतकर्मणि' इत्यतः "आतश्चोपसर्गे" इति कः। यस्य हालाहलादेः। प्रतिक्रिया मंत्रौषधादिरूपः शंभुना जर्जरितत्वान्निवृत्त्युपायोऽस्तीत्यर्थः। अस्य ब्रह्मस्वस्य। प्रतिविधिः प्रतिक्रिया "प्रतीकारः प्रतिविधिनिवर्तकप्रतिक्रियाः" इति धरणिः। भुवीत्युक्तेर्भूशब्दोपलक्षिततीर्थस्नानादिकञ्चास्य निवर्तकं नास्ति किन्तु बहुधा ब्राह्मणार्चनोपवासचांद्रायणादि कथंचिन्निवर्तकं भवेदिति भावः। "यो ब्राह्मणस्य सद्धनमभिनारदमन्यते। विषमे तद्देवकृतं राजा वरुणोऽब्रवीत्॥" इत्यथर्वसंहिताचतुर्थकांडश्रुतेः "न विषं विषमित्याहुर्ब्रह्मस्वं हि विषं स्मृतम्" इति स्मृतेश्च ॥ ३३ ॥ सर्वथाऽप्रतिकार्यत्वमेवाह-किञ्चेति। अत्तारं केवलं संसर्गिणम्। संसर्गेण वह्निसंसृष्टलोहसंसर्गो यथा मारकस्तथा नेत्यर्थः। ब्रह्मस्वलक्षणारणिजतः ब्राह्मणधनरूपारण्युत्थितः पापाग्निः। तदपि कुलमपि। ब्राह्मणधनहारिणो वंशो नश्यतीत्यर्थः ॥ ३४ ॥ दुरत्र वर्जने। अनुज्ञां विना, यथावदनुज्ञां विना च। एतेन अयं मे बंधुरुपकारी मद्धनं मया खल्वदत्तमपि भुंक्ते चेत् भुंक्तामित्येवमनुज्ञातमित्यर्थः। प्रीत्या दत्तं सेवादिना गृहीतं च न दोषायेति भावः। 'प्रीतिदानं न दोषाय' इति वाल्मीक्युक्तेरत्र प्रीतिरुपलक्षणं सेवादेः, अन्यथा ब्राह्मणजातेर्व्यवहारनिरोधः स्यादिति। राजाद्याश्रयादुत्कोचरूपेण गृहीतं पूर्वान्पितृवंश्यानपरान्मातृवंश्यान् एकश्च भोक्तेत्येवमेकविंशतिपुरुषान्। हंतिरत्र दुर्गतिदानेऽस्तीति ध्येयमौचित्यात् ॥ ३५ ॥ आत्मपातं राज्यश्रियः पतित्वा नरके स्वात्मपतनम् ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ब्रह्मस्वं विषतोऽपि विषममित्युत्तरोत्तरवाक्याधिक्येनाह—नेति द्वाभ्याम्। विषं हिंसालक्षणस्वभावाव्यभिचारीत्यर्थः। प्रतिक्रिया मणिमन्त्रादिभिः प्रतीकारोऽस्ति हि एव ब्रह्मस्वमेव प्रकर्षेण न्यायप्रदर्शनादिनोक्तं बुधैः भुवि सर्वत्रापीत्यर्थः ॥ ३३ ॥ अत्तारं तद्भक्षकमेव न सङ्ग्यादिकं प्रकर्षेण शाम्यतीति ब्रह्मस्वारण्यग्निस्तु प्रतीकारैरपीषदपि न शाम्यतीति प्रशब्दध्वनिः कुलं पुत्रपौत्रादिकं समूलं पितृपितामहादिसहितम् ॥ ३४ ॥ कथं कियद्दहति तदाह—स्वमिति ॥ ३५ ॥ तस्मात् राजान इति। राजकुल्याः राज्ञां पुत्रादयो भृत्यादयश्च तदुपलक्षणत्वादन्येऽपीत्यर्थः। राजलक्ष्म्येति पाठे राजश्रिया तन्मदेनेत्यर्थः। साधु सम्यक् यथा स्यात्तथा यद्वा साधु बालिशा अतिशयेन मूर्खाः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ब्रह्मस्वं प्रसिद्धविषतो विषममित्याह—नेति द्वाभ्याम्। विषं मारकमित्यर्थः। प्रतिक्रिया मणिमन्त्रादिभिः प्रतिकारोऽस्ति, हि एव, ब्रह्मस्वमेव, प्रकर्षेण न्यायप्रदर्शनादिनोक्तम्, बुधैर्भुवि सर्वत्रापीत्यर्थः ॥ ३३ ॥ अत्तारं तद्भक्षकमेव, न तु संग्यादिकम्, प्रकर्षेण शाम्यतीति ब्रह्मस्वारण्यग्निस्तु प्रतीकारैरीषदपि न शाम्यतीति प्र-शब्दध्वनिः ; समूलं पितृपितामहादिसहितम् ॥ ३४ ॥ कथं दहति ? तदाह—ब्रह्मस्वमिति। 'तु' वा, बलाद्वा ॥ ३५ ॥ न च वक्तव्यं रक्षकाणां ब्रह्मस्वभोगो न दोषाय कल्पत इत्याह—राजान इति। राजा लक्ष्य आश्रयो येषां ते; पाठान्तरे राजश्रिया तन्मदेनेत्यर्थः। साधु सम्यग् यथा स्यात्तथा निरयं येऽभिमन्यन्ते; यद्वा, साधुबालिशा अभ्यन्ताज्ञा इत्यर्थः ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

दुरनुज्ञातं सम्यगनुज्ञारहितम् ॥ ३५-४४ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च, नाहमिति। हालाहलं न विषं मन्ये, कुतः ? यस्य हालाहलस्य प्रतिक्रिया प्रतीकारः वर्तते इति शेषः। किन्तु ब्रह्मस्वमेव विषं प्रोक्तं हि यस्मादस्य ब्रह्मस्वस्य भूमौ प्रतिक्रिया नास्ति ॥ ३३ ॥ किञ्च, हिनस्तीति। विषं त्वत्तारं भक्षयितारमेव हन्ति अग्निस्त्वद्भिर्जलैः प्रशाम्यति अनेन संसर्गिसंसर्गेण मारकत्वादग्नितुल्यता स्यादित्येतदपि नास्तीत्युक्तम्। अपि च समूलमिति वह्निर्हि मूलान्यविशेषयति ब्रह्मस्वलक्षणारणिजः पावकस्तु कुलं तदपि समूलं दहति ॥ ३४ ॥ किञ्च, ब्रह्मस्वमिति। दुरनुज्ञातं सम्यगननुज्ञातं सत् भुक्तं स्वं पुत्रं पौत्रञ्चेति त्रीन् पुरुषान् दहति बलाद्राजाद्याश्रयबलात्प्रसह्य बलात्कृत्वा भुक्तं तु दशपूर्वान् पितृपितामहादीन् हन्ति नरके पातयति अपरान् पुत्रपौत्रादीन् दश नाशयति ॥ ३५ ॥ तर्हि राजानः किमति भुञ्जते इत्यत्र आह—राजान इति। ये राजानः साधु यथा तथा ब्रह्मस्वमभिमन्यन्ते आकाङ्क्षन्ति ते राज्यलक्ष्म्या अन्धा इति शेषः। आत्मा पतत्यस्मिन्निति तथा तं निरयं न प्रतीक्षन्ते न विचारयन्त्यतस्ते केवलं बालिशाः मूढाः इत्यर्थः ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रतिनिधिः प्रतिक्रिया नास्ति ॥ ३३ ॥ ब्रह्मस्वाख्यारणिजन्यपावकः ॥ ३४ ॥ दुरनुज्ञातम् अनुज्ञां विना भुक्तम् अननुज्ञातं वा प्रसह्य अविचार्य ॥ ३५ ॥ राजलक्ष्म्याः राजश्रियः पातं निरये आत्मपातं च न प्रचक्षते न पश्यन्ति ये ब्रह्मस्वं साधु मन्यन्ते ते बालिशाः ॥ ३६-३९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किं दुर्ज्जरमन्नमिव न विषादप्यतितीव्रमित्याह—नेति । हालाहलं हि शम्भुर्जरयामासैव अस्य प्रतिविधिः प्रतिक्रिया ॥ ३३ ॥ तादृशं विषमपि वरं भोक्तव्यं नतु ब्रह्मस्वमित्याह—वह्निर्हि मूलान्यवशेषयति ब्रह्मस्वारणिपावको हि दुरुपशमत्वाद्वह्निविशेषः पुरातनतरुकोटरमध्यन्यस्तवह्निर्यथा कालेनान्तः प्रवृद्धो बहुवार्षिकजलैरपि न निर्वाति किन्तु मृत्तिकान्तर्गतमूलपर्य्यन्तमपि तरुं दहति तथा कुलं तदपि समूलम् ॥ ३४ ॥ दुरनुज्ञातमिति दुःशब्देन यथावदननुज्ञातमित्यर्थः । अयं मे बन्धुरुपकारी मद्धनं मया खल्वदत्तमपि भुङ्क्ते चेद्भुङ्क्तामित्येवमनुज्ञातमित्यर्थः । त्रिपुरुषं स्वं पुत्रं पौत्रं च प्रसह्य हठात् बलात् राजाद्याश्रयतश्च ॥ ३५ ॥ राजकुल्याः राजकुलप्रसूताः ये ब्रह्मस्वमभिमन्यन्ते ते निरयं नरकमेवाभिमन्यन्ते अतो बालिशा अज्ञाः आत्मपातं न चक्षते ॥ ३६-३९ ॥

गूढार्थदीपिनी

प्रतिविधिः प्रतिक्रिया ॥ ३३ ॥ विषं कर्तृ अत्तारं भोक्तारम् हन्ति । ब्रह्मस्वमेव अरणिः काष्ठं तज्जातः पावकः समूलं कुलम् ॥ ३४ ॥ दुरत्र वर्जने । अनुज्ञां विना । त्रिपूरुषं स्वयं पुत्रं पौत्रं च । प्रसह्य हठात् बलात् राज्यसाहाय्यात् । पूर्वान् पितृपितामहादीन् । अपरान् पुत्रपौत्रादीन् भोक्तारं च हन्ति ॥ ३५ ॥ निरयं नरकहेतुभूतम् अभिमन्यन्ते इच्छदन्ति ते साधु-बालिशाः महामूर्खाः ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ब्रह्मस्वलक्षणारणिजः पावकस्तु कुलं तदपि समूलं दहति ॥ ३४ ॥ दुरनुज्ञातं यथावदनुज्ञातं प्रसह्य हठात् बलात् राजाद्याश्रयतः पूर्वान् पितृपितामहादीन् अपरान् पुत्रपौत्रादीन् ॥ ३५ ॥ निरयम् अन्यायतो गृहीतत्वात् निरयप्रदं ब्रह्मस्वं ये साधु मन्यन्ते ते बालिशाः आत्मपातं न विचक्षते ॥ ३६-३९ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एवं मरणपर्यवसायित्वमुक्त्वा तादृशान्यन्यान्यपि सन्तीति अनुपमार्थमितरं निषेधति **नाहं हालाहलं मन्य** इति । समुद्रोद्भूतं महादेवेन पीतं विषं हालाहलम् । न विषमात्रम् । तस्यापि महादेवभक्षितस्य प्रतीकारो दृष्ट इति तस्य विषत्वमेव नास्ति । यद्यपि वाक्यान्तरे 'न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते । विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रक'मिति प्रकारान्तरेण क्रूरता निरूपिता, तथापि तस्याप्यनङ्गीकारार्थमप्रतिक्रियामेवाह । यतो ब्रह्मस्वस्य प्रतिक्रियाभावः, अन्यथा नृगप्रार्थनया सर्वमित्रयोर्ब्राह्मणयोर्दया स्यात्, तदा प्रतिक्रियां कुर्वीताम् । ननु तस्यापि प्रतीकारो दृष्टः, कृकलासशरीरं प्राप्य मुक्त इति, तत्राह **भुवीति** । यथास्थितस्य न प्रतीकार इत्यर्थः ॥ ३३ ॥ तमपि विशेषमाह **हिनस्ति विषमत्तार**मिति । अप्रतीकारेऽपि विषमत्तारमेव हिनस्ति । विषादग्निः क्रूर इति तत्तुल्यो भविष्यतीत्याशङ्क्याह **अद्भिरग्निः प्रशाम्यती**ति । दृष्टत्वात् न लौकिके हेतुर्वक्तव्यः, अलौकिकेऽपि 'आपो वा अग्नेर्भ्रातृव्या' इति श्रुतेः अद्भिः प्रशाम्यत्येव । ब्रह्मस्वस्य अशान्तौ हेतुमाह **कुलं समूलं दहती**ति । ब्रह्मस्वमेव अरणी याभ्यां मथने अग्निर्भवति । स हि यजमानं यदर्थे आधीयते, तमपि दग्ध्वा शाम्यति, यावज्जीवाधिकारादग्निहोत्रस्य । ब्रह्मस्वलक्षणा त्वरणिः कुलार्थमेव प्रविष्टेति कुलमेव दग्ध्वा शाम्यति । न हि कश्चिद्धर्मार्थं परलोकार्थं वा ब्रह्मस्वं गृह्णाति । शरीरमपि कुलोद्भवमिति वंशजनकमिति च कुलमेव पोषयति । निषिद्धार्थं ब्रह्मस्वग्रहणे उभाभ्यां सर्वनाशः । **कुल**मित्युपलक्षणं वा । यत्रैव क्वचिद्ब्रह्मस्वं सम्बध्यते, तमेव दहतीति सर्वमविवादम् । **समूल**मिति । कुलरक्षकधर्ममपि उपजीवकत्वात् दहति ॥ ३४ ॥ सामान्यतः कुलनाशकत्वं ब्रह्मस्वस्योपपाद्य विशेषतो व्यवस्थामाह **ब्रह्मस्वं दुरनुज्ञात**मिति । दुष्टतया अनुज्ञातम्, मनसि अदत्वैव वाङ्मात्रेणानुज्ञातम्, यथा बलाद्गृहीत्वा अनुज्ञां प्रार्थयति । ततो बलिष्ठं ज्ञात्वा मारणादिशङ्कया अनुगृह्णाति, तत् दुरनुज्ञातम् । तच्चेद्भुक्तम्, तदा त्रिपूरुषं हन्ति । भोक्ता तत्पुत्रः पौत्रश्चेति त्रयः पुरुषाः । चौर्यभुक्तं तु निषिद्धत्वान्महापातके पर्यवस्यति । प्रसह्य धृत्वा अतिक्रमं कृत्वा शास्त्रतः बलाल्लोकतश्च भुक्तमेकविंशतिपुरुषान् दहति । तत्र दशपूर्वाः पितृपितामहादयः, परे पुत्रपौत्रादयः, स्वयमेकविंशः । प्रसहनबलयोरान्तरबाह्यभेदेन व्यवस्था, वैदिकलौकिकभेदेन वा । कश्चित् बलाद्गृह्यमाणं प्रयच्छति, स्वयं बलमकृत्वा, कश्चित्तु स्वयमपि बलं करोतीति न

पौनरुक्त्यम् ॥ ३५ ॥ नन्वेवं धर्मशास्त्रे प्रसिद्धे कथं ब्रह्मस्वापहारो भविष्यतीत्याशङ्क्याह **राजान** इति । प्रथमतो राजत्वादेव, तत्रापि राजलक्ष्म्या । चकारादभिजनादिमदैः आत्मनः पातं न विदन्ति, यतस्ते शास्त्रोक्ता राजानः, अन्यथा 'राज्यान्ते नरकं ध्रुव'मिति न स्यात् । अन्यत् क्षत्रियस्य व्याप्यमेव, ब्राह्मण एव परं व्यापकः, ते चेद्ब्रह्मस्वं जानीयुः नरकसाधनत्वेन, तदा न गृह्णीयुः । न हि कश्चिन्नरके पतति । अत एव निरयरूपं ब्रह्मस्वं साधु मन्यन्ते । यतो बालिशः ॥ ३६ ॥

श्रीसुबोधिनी–सारः

विषादपि दारुणमित्याह । हलाहलं विषं नाहं मन्ये यस्य प्रतिक्रिया मंत्रादिना निवारणविधिरस्ति किंतु ब्रह्मस्वं हि विषं प्रोक्तं यतोऽस्य प्रतिविधिः प्रतिवारणक्रिया भुवि पृथिव्यां नास्ति ॥ ३३ ॥ किंच विषं कर्तृ अत्तारं भक्षकमेव हंति वह्निरग्निरद्भिर्वार्भिः प्रशममुपयाति ब्रह्मणः स्वं धनं तदेवारणिस्तस्माज्जातः पावकः पापाग्निः समूलं कुलं भस्मसात्करोति ॥ ३४ ॥ अथावांतरभेदमाह । दुरनुज्ञातं ब्रह्मस्वं कर्तृ त्रिपूरुषं स्वयं पुत्रं पौत्रं च हंति एतेन तुष्ट्या दत्तं न दोषायेति सूचितं युक्तं चैतत् लोकेपि शास्त्रेपि दृश्यते सीतायै आभूषणाद्यनुसूयया दत्तमिति वाल्मीकीये आरण्यकांडे प्रसह्य हठेन बलतो वा भुक्तं सत् दशपूर्वान् दशाऽवरान् आत्मानं च हंति ॥ ३५ ॥ "जानंतोप्येतमिच्छंति ते भूपा नरकैषिणः" इत्याह। राजसंपदांधा राजानो ये ब्रह्मस्वं साधु अभिमन्यन्ते बालिशा मूर्खास्ते आत्मपातं निरयं न पश्यंति ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रतिक्रियानिवृत्त्युपायोऽस्तीति शेषः । स्पष्टमन्यत् ॥३३॥ विषादग्नेश्चापि ब्रह्मस्वमतिघोरम्' इत्याह—हिनस्तीति। विषमत्तारं भक्षितारमेव हन्ति, ब्रह्मस्वं तु दुरनुज्ञातं सम्यगननुज्ञातं सद्भुक्तं स्वं पुत्रं पौत्रं चेति त्रिपुरुषं कुलं हन्ति । प्रसह्य हठात् बलात् राजाद्याश्रयणात् भुक्तं तु दशपूर्वानिति पितृपितामहादीन् दशापरान् पुत्रपौत्रादींश्च भोक्तारं च हन्ति नरके पातयति । अग्निरद्भिर्जलैः प्रशाम्यति दहन्नपि मूलमवशेषयति, ब्रह्मस्वलक्षणारणिजः पावकः पापं तु समूलं कुलं दहति ॥३४॥ 'तर्हि राजानः किमिति वाञ्छन्ति भुञ्जते च' इत्यपेक्षायामाह—राजान इति । ये राजानः ब्रह्मस्वं साधु समीचीनमभिमन्यन्ते आकाङ्क्षन्ते भुञ्जते च ते आत्मनः पातं नरके पतनं न विचक्षते न पश्यन्ति । 'अतोऽर्थाद्ब्रह्मस्वकाङ्क्षया नरकमेवाकाङ्क्षन्त' इत्याह—निरयमिति । तददर्शने हेतुमाह—राजलक्ष्म्यान्धा इति । तत्रापि हेतुमाह—बालिशा इति । अज्ञाः । अन्यथा तन्मदो न स्यादित्याशयः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

नाहमिति ॥ यस्य प्रतिक्रिया शिवकर्तृकपानादिर्निवृत्त्युपायोऽस्ति तं हालाहलं विषं मारकत्वाऽव्यभिचारि न मन्ये हि निश्चितम् । ब्रह्मस्वमेव विषं प्रोक्तम् । अस्य भुवि प्रतिविधिर्नास्ति ॥ ३३ ॥ हिनस्तीति ॥ विषं कर्तृ अत्तारं भोक्तारमेव हन्ति औषधादिना शाम्यति क्वापि गुणमपि करोति । वह्निश्च अद्भिर्जलैः प्रशाम्यति दहन्नपि मूलमवशेषयति । ब्रह्मस्वलक्षणारणिजः पापपावकस्तु कुलं दहति तदपि समूलमिति ॥ ३४ ॥ ब्रह्मस्वमिति ब्रह्मस्वं दुरनुज्ञातं सम्यगननुज्ञातं मित्रधनादिबुध्या भुक्तं स्वं पुत्रं पौत्रं चेति त्रिपुरुषं कुलं हन्ति । प्रसह्य हठात् बलात् राजाद्याश्रयणात् भुक्तं तु दशपूर्वानिति पितृपितामहादीन् दशापरान् पुत्रपौत्रादींश्च भोक्तारं च हन्ति नरके पातयति ॥ ३५ ॥ राजान इति ॥ ये राजलक्ष्म्या अन्धाः बालिशाः मूर्खाः निरयं नरकहेतुं ब्रह्मस्वं साधु समीचीनमभिमन्यन्ते आकाङ्क्षन्ति भुञ्जते च ते आत्मनः पातं नरके पतनं न विचक्षते न पश्यन्ति । साधुबालिशाः अतिमूर्खा इति वा ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ब्रह्मस्वं विषतोऽपि विषमित्याह नेति हालाहलं महाविषं विषं न मन्ये यतः । यस्य महाविषस्य प्रतिक्रियानिवारणोपायोऽस्ति । अस्य ब्रह्मधनरूपविषस्य तु प्रतिविधिर्निवारणोपायो नास्ति ॥ ३३ ॥ ब्रह्मस्वं विषादपि क्रूरतरमस्तीत्याह हिनस्तीति । अत्तारं एकमेव हिनस्ति न बहून् । तर्ह्यग्नितुल्यमिति चेन्नेत्याह वह्निर्दावाग्निः जलैः शाम्यति मूलवर्जितवृक्षादिदहनं च करोति ब्रह्मधनरूपाऽरणिस्तज्जन्यः पापरूपः पावकस्तु समूलं कुलं दहति ॥ ३४ ॥ दुरनुज्ञातं इदं ब्रह्मस्वं भवतीति न ज्ञातं भुक्तं चेत्तर्हि त्रिपुरुषं स्वयं पुत्राः पौत्राश्चेति त्रयाणां पुरुषाणां समाहारस्तत् हंति यर्हि प्रसह्य हठात् । अन्येषां बलाच्च भुक्तं चेत्तर्हि पितरमारभ्य पूर्वान् दश हंति नरके पातयंतीत्यर्थः ॥३५॥ राजलक्ष्म्या अन्धा अन्धीभूता ये राजानः निरयं निरयप्रापकं ब्रह्मस्वं साधु यथा तथाभिमन्यंते ते बालिशाः आत्मपातं न विचक्षते न पश्यन्ति ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च । नाहमिति । अहं, हालाहलं, विषं न मन्ये । कुतः । यस्य हालाहलस्य, प्रतिक्रिया प्रतिकारः, वर्तते इति शेषः । किं तु ब्रह्मस्वं एव विषं प्रोक्तं, हि यस्मात्, भुवि अस्य, प्रतिविधिः प्रतिक्रिया, न अस्तीति शेषः ॥ ३३ ॥ हालाहल-

तोऽस्यान्यं विशेषं वक्ति। हिनस्तीति। विषं, अत्तारं भक्षितारमेकमेव, हिनस्ति मारयति। ब्रह्मस्वविषं तु, अत्तारं तत्कुलं च हिनस्तीति शेषः। संसर्गेण मारकत्वात्किमग्नितुल्यमेतदिति चेन्न। वह्निः अग्निरपि, अद्भिः प्रशाम्यति जलेन प्रशाम्यति, एकमेव दहति चेत्यर्थः। ब्रह्मस्वरूपाग्नेः प्रसिद्धाग्नेरपरं विशेषमाह। ब्रह्मस्वारणिपावकः, समूलं कुलं, दहति। अग्निर्यद्यपि दहत्यथापि मूलान्यवशेष्य दहति, अयं तु समूलमिति ततो महान् विशेष इति भावः॥ ३४॥ किं च। ब्रह्मस्वमिति। ब्रह्मस्वं, दुरनुज्ञातं सम्यगननुज्ञातं सत्, भुक्तं भवेच्चेत्, त्रिपूरुषं स्वं पुत्रं पौत्रं चेति त्रीन् पुरुषानित्यर्थः। हन्ति। बलाद्राजाद्याश्रयवशात्, प्रसह्य हठात् कृत्वा, भुक्तं सत्, दश पूर्वान्, दश अपरान्, हन्ति। पूर्वान् पितृपितामहादीन् परान् पुत्रपौत्रादीन्॥ ३५॥ राजान इति। ये राजानः, साधु यथा तथा, ब्रह्मस्वं अभिमन्यन्ते आकाङ्क्षन्ते। ते राजलक्ष्म्या, अन्धा इति शेषः। केचित्तु राजलक्ष्म्या ये इत्यत्र राजलक्ष्म्यान्धा इति पाठं पठन्ति। तन्मते ये इति तच्छब्दोपादानाद्बोध्यं, यत्तदोर्नित्यसंबन्धात्। बालिशा मूढाः सन्तः, आत्मा पतत्यस्मिन्नित्यात्मपातस्तं, निरयं नरकं, न विचक्षते न विचारयन्ति। वयं मृत्वा नरके पतिष्याम इति विचारमन्धत्वाद्बालिशत्वाच्च न कुर्वन्तीत्यर्थः॥ ३६॥

कृष्णप्रिया

मैं हलाहल विष को विष नहीं मानता, क्योंकि उसकी चिकित्सा होती है। वस्तुतः ब्राह्मणों का धन ही परम विष है; उसको पचा लेने के लिये पृथ्वी पर कोई औषध, कोई उपाय नहीं है॥ ३३॥ हलाहल विष केवल खाने वाले का ही प्राण लेता है, और आग भी जल के द्वारा बुझायी जा सकती है, परन्तु ब्राह्मण के धनरूप अरणि से जो आग पैदा होती है, वह सारे कुल को समूल जला डालती है॥ ३४॥ ब्राह्मण का धन यदि उसकी पूरी-पूरी सम्मति लिये बिना भोगा जाय तब तो वह भोगने वाले, उसके लड़के और पौत्र—इन तीन पीढ़ियों को ही चौपट करता है। परन्तु यदि बलपूर्वक हठ करके उसका उपभोग किया जाय, तब तो पूर्वपुरुषों की दस पीढ़ियाँ और आगे की भी दस पीढ़ियाँ नष्ट हो जाती हैं॥ ३५॥ जो मूर्ख राजा अपनी राजलक्ष्मी के घमंड से अंधे होकर ब्राह्मणों का धन हड़पना चाहते हैं, समझना चाहिये कि वे जान-बूझकर नरक में जाने का रास्ता साफ कर रहे हैं। वे देखते नहीं कि उन्हें अधःपतन के कैसे गहरे गड्ढे में गिरना पड़ेगा॥ ३६॥

गृह्णन्ति यावतः पांसून् [1]क्रन्दतामश्रुबिन्दवः। विप्राणां हृतवृत्तीनां[2] वदान्यानां कुटुम्बिनाम्॥ ३७॥
राजानो राजकुल्याश्च तावतोऽब्दान्निरंकुशाः। कुम्भीपाकेषु[3] पच्यन्ते ब्रह्मदायापहारिणः॥ ३८॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः। षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥ ३९॥
न मे ब्रह्मधनं भूयाद् यद्[4] गृद्ध्वाल्पायुषो [5]नृपाः। पराजिताश्च्युता[6] राज्याद् भवन्त्युद्वेजिनोऽहयः[7]॥४०॥

कर्दमक्षमा

अन्वयः—हृतवृत्तीनाम्, वदान्यानाम्, कुटुम्बिनाम्, विप्राणाम्, क्रन्दताम्, अश्रुबिन्दवः, पांसून्, गृह्णन्ति॥ ३७॥ ब्रह्मदायापहारिणः, निरङ्कुशाः, राजानः, च, राजकुल्याः, तावतः, अब्दान्, कुम्भीपाकेषु, पच्यन्ते॥ ३८॥ यः, स्वदत्ताम्, परदत्ताम्, ब्रह्मवृत्तिम्, वा, हरेत्, सः, षष्टिवर्षसहस्राणि, विष्ठायाम्, कृमिः, जायते, च, कुम्भीपाकेषु, पच्यन्ते॥ ३९॥ न, मे, ब्रह्मधनम्, भूयात्, अल्पायुषः, नृपाः, यत्, गृद्ध्वा, पराजिताः, राज्यात्, च्युताः, उद्वेजिनः, अहयः, भवन्ति॥ ४०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च गृह्णन्तीति॥ ३७-३९॥ गृद्ध्वा अभिकांक्ष्य॥ ४०-४१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदाह—अपि चेति। यावतो यावत्संख्याकान्। पांशून् रजःकणान्। गृह्णन्त्यार्द्रीकुर्वंति। वदान्यानां कुटुंबिनामिति विशेषणद्वयेन कदर्येभ्यः कुटुंबहीनेभ्यो गृहीत्वा तद्धनस्य कुटुंबिने स्वधर्मनिष्ठाय दाने राज्ञो न दोष इति सूचितम्॥ ३७॥ राजकुल्यास्तदधिकारिपुरुषाः। दायो द्रव्यम्। 'कुल्यो मान्ये कुलोद्भवे' इति मेदिनी। "विभक्तव्ये पितृद्रव्ये दाने दायो धनेऽपि च" इति निरुक्तिः॥ ३८॥ ब्रह्मवृत्तिं ब्राह्मणजीविकाम्॥ ३९॥ श्रीकृष्णो लोकसंग्रहमाह—नम इति। उद्वेजितुं भीतं कर्तुं कंपयितुं वा शीलं येषां ते तथा ब्राह्मणोद्वेगकर्तारोऽहयः सर्पयोनिं लभन्त इत्यर्थः। मे मदर्थं मत्संबंधि वा न भवतु न मयि

---

१. रुदता—वीर. विज.। २. वित्तानां—विज.। ३. पाकेन—वीर.; नरके तु विप—विज.। ४. यज्जग्ध्वा—विज.। ५. नराः—श्रीधर. वंशी. जीव. नृपाः—प्रा. पा.। ६. च्युताः स्थानाद्—विज.। ७. वयं—वीर.; ह्युद्वेजिता नृपाः—विज.; हि ये—प्रा. पा.।

पर्यवस्यतु । एतेन विप्रदत्तं भगवान्न किमपि गृह्णातीति न शंकनीयम्, कथम्–छलादिना मत्संबंधि मा भवत्विति भगवतोऽभिप्रायः । तदेवाह—यत् गृद्ध्वा बलेन छलेन याञ्चया वा इदं ग्रहीष्यामीत्यभिकांक्ष्यापि इह जन्मन्यल्पायुषः जीवतोऽपि शत्रुभिः पराजितास्संतो राज्याच्च्युता जन्मांतरे सर्पा भवन्ति, येन लोकेषूद्वेजनं ददति स्वयं च लभन्त इत्येवं महादुःखभाज एव चिरं भवन्तीति भावः ।। ४० ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निरयमेव दर्शयति—गृह्णन्तीति युग्मकेन । वदान्यानाम् आतिथ्यादिपराणाम् अतो हृतचित्तत्वेन तदसिद्धया कुटुम्बभरणाशक्त्या च दुःखेन रुदतां सतां गृह्णन्तीत्यादिकं नरककालसङ्ख्यादर्शनार्थं काचित्कमेवोक्तं रोदनाभावेऽपि नरकप्राप्तेः निरङ्कुशाः स्वतन्त्राः अत एव ब्रह्मस्वापहारवन्तश्च भवन्ति तदा कुम्भीपाकेषु तद्भेदेषु प्रत्येकं तावदब्दान् व्याप्य पच्यन्ते यमदूतैः ।। ३७–३८ ।। अहो कुम्भीपाकानन्तरञ्च महती दुर्गतिरित्याह— तत्रैव वृत्तिहरणमपि विशेष्याह—स्वेति । जायते तत्रैव तावत्कालं पुनः पुनर्मृत्वा जायत इत्यर्थः ।। ३९ ।। किं वक्तव्यं ब्रह्मस्वहरणात् दुर्गतिरिति बलच्छलादिना तज्जिहीर्षयापि जन्मद्वये दुःखं स्यादित्यन्येषाम्भयदर्शनार्थं स्वयमप्यरुच्यतिशयेन भीत इवाह-- नेति । मे मदर्थं मत्सम्बन्धि वा न भूयात् न भवतु न मयि पर्य्यवस्यतु तत्र हेतुः यदिति गृध्वा बलेन छलेन याच्ञया वा इदं गृह्णामीत्यभिकाङ्क्ष्यापि इह जन्मनि अल्पायुषः जीवनेऽपि शत्रुभिः पराजिताः सन्तो राज्यात् च्युता भ्रष्टा अन्यस्मिंश्च सर्पा भवन्ति येन लोकेषूद्वेगं ददति स्वयञ्च लभते इत्यादि महादुःखभाज एव चिरं भवन्तीति भावः नृपा इत्यत्र नरा इति पाठः ।। ४० ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वदान्यानामातिथ्यादिपराणाम्, अतो हृतवृत्तित्वेन तदसिद्धया कुटुम्बभरणाशक्त्या च दुःखेन रुदतां सताम् ।।३७।। राजकुल्या राज्ञां पुत्रादयो भृत्यादयश्च, अतो निरंकुशाः स्वतन्त्राः, अत एव ब्रह्मस्वापहरणशीलाः ।। ३८ ।। अहो विप्रजीविकाहरणाच्च महती दुर्गतिरित्याह—स्वेति । किं वक्तव्यम्, स्वदत्तापहारेणेति, परदत्तां वा, जायते कृमिर्भूत्वा तिष्ठति, किंवा तत्रैव तावत्कालं पुनः पुनर्मृत्वा पुनः पुनर्जायत इत्यर्थः ।। ३७ ।। किं वक्तव्यम्, हरणाद्दुर्गतिरिति, तद्वाञ्छयापि जन्मद्वये दुःखं स्यादित्याह—नेति । मे मदर्थं मत्सम्बन्धि वा न भूयान्न भवतु, न मयि पर्य्यवस्यतु । तत्र हेतुः—यदिति, इह जन्मनि अल्पायुषो जीवनेऽपि शत्रुभिः पराजिताः सन्तो राज्याच्च्युता भ्रष्टाः, अन्यस्मिंश्च लोकोद्वेजनशीलाः सर्पा भवन्ति । उद्वेजितया सदा भयादिना तत्रापि दुःखं सूचितम्, किंवा सर्पतुल्याः, तथापि पुनः पुनर्नरकादिदुर्गतिः सूचितैव । भक्त्या विप्रैरर्पितानां स्वद्रव्याणां भगवतः स्वीकार्य्यत्वेऽपि न मे भूयादिति बलाद्ग्रहणाभिप्रायेण, किंवा लोकशिक्षार्थं निजभगवत्तानपेक्षयेति दिक् ।। ४० ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गृह्णन्तीत्यादिश्लोकद्वयमेकान्वयं हृतं वित्तं येषां तेषामत एव रुदतां विप्राणाम् अश्रुबिन्दवः यावतः पांसून् गृह्णन्ति आर्द्रान् कुर्वन्ति तावतोऽब्दान्वत्सरान् कुम्भीपाकेन निरयेण पच्यन्ते इह दायापहारिणः ब्रह्मस्वापहारिणः निरङ्कुशाः दुर्निवाराः राजादिविशेषणमिदं द्वयम् ।। ३७–३८ ।। स्वदत्तामिति । ब्रह्मवृत्तिं ब्राह्मणस्य जीविकाम् ।। ३९ ।। ब्रह्मस्वं न मां स्पृशेदित्याशास्ते–नम इति । विपर्ययेऽनर्थमाह—यदिति । यद्ब्रह्मधनं गृद्ध्वा अभिकाङ्क्ष्य अल्पायुषः पराजिताश्च राज्यात् भ्रष्टाश्च भवन्त्यतो वयमुद्वेजिनः भीतिमन्तो भवेम ।। ४० ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यद्ब्रह्मस्वं जग्ध्वाऽल्पायुषो भवन्ति ।। ४० ।।

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

यद्गृद्ध्वा अभिकाङ्क्ष्यापि किमुत हृत्वेत्यर्थः ।। ४० ।।

गूढार्थदीपिनी

गृह्णन्तीति युग्मम् । क्रन्दतां रुदतां विप्राणां यावतः यावत्संख्याकान् रजःकणान् आर्द्रीकुर्वन्ति । कुल्याः कुलोद्भवाः । दायो द्रव्यम् ।। ३७–३८ ।। ब्रह्मवृत्तिं ब्राह्मणविकाम् ।। ३९ ।। गृध्वापि अभिकाङ्क्ष्यापि । उद्वेजितुं भयभीतं कर्तुं शीलं येषां ते तथाभूताः सन्त जन्मान्तरे सर्पाः भवन्ति ।। ४० ।।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

गृद्ध्वा अभिकाङ्क्ष्यापि किमुत वक्तव्यं हृतेति ॥ ४०-४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुष्षष्टितमोऽध्यायार्थप्रकाशः ॥ ६४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सामान्यतो नरकमुक्त्वा विशेषत आह गृह्णन्तीति **द्वाभ्याम्**। हृतवृत्तीनां **रुदता**मश्रुबिन्दवो यावतः पांसून् गृह्णन्ति। अन्तःशोके हि रोदनम्, तस्य च परिमितिरश्रुभिर्भवति। **अश्रूणां च परिमाणं** कार्यवशात्, अतो रेणूनां सङ्ख्ययैव शोकसङ्ख्या। निमित्तान्तरं निराकर्तुं **हृतवृत्तीना**मिति। **वदान्याना**मिति लोभादिदोषनिषेधः। **कुटुम्बिना**मिति ह्रियमाणपदार्थावश्यकत्वम्। तदा ब्रह्मस्वता सम्पद्यते अत्यावश्यकत्वात्। निषिद्धायाः क्रियायाः ब्राह्मणविषयायाः पांसुद्वारैवानिष्टनिर्णयो वेदे निरूपितः। 'यावतः प्रस्कन्द्य पांसून् संगृह्णात्, तावतः संवत्सरान् पितृलोकं न प्रजाना'दिति श्रुतेः। एकेन निमित्तमुक्त्वा अपरेण फलमाह **राजानो राजकुल्याश्चे**ति। **राजकुल्याः** राजकुलोत्पन्नाः। चकारात्तत्सम्बन्धिनोऽन्ये च, य एव हरणे समर्थाः। तावतः अब्दान् वर्षानभिव्याप्य कुम्भीपाकेषु पच्यन्ते। प्रासङ्गिकदोषपरिहारार्थमाह **ब्रह्मदायापहारिण** इति। निरङ्कुशा इति। तेषां नियामकश्चेन्न स्यात्, अन्यथा तस्यैव दोषो भवेत् ॥ ३८ ॥ ब्रह्मस्वविशेषस्यापहारे दोषविशेषमाह **स्वदत्ता**मिति। पूर्वं स्वेनैव दत्ता, पश्चाद्ब्राह्मणास्वारस्ये हृता, परेण राज्ञा दत्ता, परराज्यहरणेन हृता। पित्रादिदत्तां स्वदत्तामेवाहुः स्वयमेव पितेति। नात्र धनं विषयः, किन्तु वृत्तिर्भूम्यादिः, यत्र निरन्तरं जीवनसाधनमुत्पद्यते। ब्रह्मवृत्तिर्ब्राह्मणानामेव जीवनसाधनोत्पत्तिस्थानम्। तादृशः षष्टिवर्षसहस्राणि नरकरूपायां विष्ठायां कृमिर्भूत्वा तिष्ठति। षष्टिसंज्ञकः संवत्सरः। प्रभवादयः तस्य संज्ञाः। ते सहस्रधा आवृत्ता इति तावद्वर्षाणि। सर्वतो बीभत्सिता सेति उत्पत्तिरेव तत्रेति न काचिदपि तस्मिन् शरीरे सुखसम्बन्ध इत्युक्तम् ॥ ३९ ॥ एवं ब्रह्मस्वदोषानुक्त्वा स्वकीयेषु तदभावं प्रतिजानीते **न मे ब्रह्मधनं भूया**दिति। स्वतो देववशाद्वा ब्रह्मस्वं सङ्क्रान्तं भवतीति मे न भूयादिति देवप्रार्थनेव वचनम्। प्रमादादागते को दोष इति चेत्, तत्राह **यद्गृद्ध्वाल्पायुष** इति। यद्गृद्ध्वाः यदभिकाङ्क्षिणश्च ते अल्पायुषश्च। ग्रहणमात्र एवायुःक्षयो भवतीत्युक्तम्। आपद्गतानां तथा दोषो न भवतीति **नृपा** इत्युक्तम्। दैवगत्या मरणाभावेऽपि **शत्रुभिः पराजिता भवन्ति**। राज्यात् च्युताः ततो मृताः स्थानभ्रष्टा जनोद्वेजनकर्तारः सर्पा भवन्ति। अत ऐहिकामुष्मिकदोषस्य विद्यमानत्वात् तत्सङ्गमो मा भवत्विति ॥ ४० ॥

श्रीसुबोधिनी-सारः

धनाकर्षणे आक्रोशतां विप्राणां नष्टजीविकानां **वदान्यानां** दानिनां **कुटुंबिनाम्** अश्रुबिंदवो यावतः पांशून्रेणून् गृह्णन्ति आर्द्रीकुर्वंति ॥ ३७ ॥ **तावतोऽब्दान्** वर्षाणि यावत् **ब्रह्मभागभुजो राजानः तत्कुल्याश्च निरंकुशा** उद्वृत्ताः कुंभीपाकेषु पच्यंते ॥ ३८ ॥ किं च स्वेन दत्तां परैर्वा दत्तां ब्रह्मणो विप्रस्य वृत्तिं जीविकां यो हरेत् गृह्णीयात् स षष्टिवर्षसहस्राणि यावत् विष्ठायां पुरीषे कृमिर्जायते ॥ ३९ ॥ ऊर्ध्वबाहुराक्रोशति मे मम ब्रह्मधनं न भूयान्मास्तु। तत्र दोषानाह। **यत्** विप्रधनं गृद्धाभिकांक्ष्य **नृपा अल्पायुषः** क्षीणजीविता मारीमृता भवंति युद्धे **पराजिता** ब्रह्मस्वरसपुष्टत्वात् **राज्यात् च्युता** भ्रष्टा उद्वेजिनः परभयकारिणोऽह्यः **सर्पा भवन्ति** ॥ ४० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सामान्यतो नरकपातमुक्त्वा विशेषतस्तदाह—**गृह्णन्तीति**। क्रन्दतां रुदतां विप्राणामश्रुबिन्दवो यावतो भूपांसून् रेणून् गृह्णन्ति आर्द्रीकुर्वन्ति तावतोब्दान् संवत्सरान् निरङ्कुशाः शास्त्राज्ञोल्लङ्घिनः अत एव ब्रह्मदायापहारिणो राजानो राजकुल्याः राजकुलोद्भवा अमात्यभृत्यादयः तत्सम्बन्धिनश्च कुम्भीपाकेषु नरकविशेषेषु पच्यन्ते विलश्यन्तीति द्वयोरन्वयः। रोदने हेतुमाह—हृतवृत्तीनामिति। हृतवृत्तित्वेपि यदि तदर्थव्यापारपरास्तदा न तथा रोदनं कुर्युः' इत्याशङ्क्याह—वदान्यानामिति। उदारचित्तानां त्यक्तव्यापाराणामध्यापनादिनिष्ठानामित्यर्थः। 'तथाप्येकाकित्वे यथाकथञ्चिन्निर्वाहसम्भवान्न रोदनं सम्भवति' इत्याशङ्क्याह—कुटुम्बिनामिति ॥ ३७-३८ ॥ वृत्तिं जीविकाम् ॥ ३९ ॥ एवं ब्रह्मस्वदोषमुक्त्वा स्वयं तदभावं प्रार्थयते—न मे ब्रह्मधनं भूयादिति। तदाकाङ्क्षादोषमाह—यदिति। यद्ब्रह्मधनं गृद्ध्वा अभिकाङ्क्ष्य नराः अल्पमायुर्येषां ते क्षीणायुषो भवन्ति, शत्रुभ्यः पराजिता भवन्ति, राज्यादैश्वर्यात् च्युता भ्रष्टा भवन्ति, मरणानन्तरं च उद्वेजिनः परोद्वेगजनकाः अह्यः सर्पा भवन्ति ॥ ४० ॥

अन्वितार्थप्रकाशिका

गृह्णन्तीति युग्मम् ॥ हृतवृत्तीनां वदान्यानाम् उदारचित्तानां कुटुम्बिनां विप्राणां क्रन्दतामश्रुबिन्दवो यावतो भुवः पांसून् रेणून् गृह्णन्ति आर्द्रीकुर्वन्ति तावतोऽब्दान् संवत्सरान् निरङ्कुशाः शास्त्राज्ञोल्लङ्घिनः अत एव ब्रह्मदायापहारिणो राजानो

राजकुल्या राजकुलोद्भवा अमात्यभृत्यादयः तत्संबन्धिनश्च कुम्भीपाकेषु अवान्तरभेदभिन्नेषु नरकविशेषेषु प्रति नरकभेदं पच्यन्ते क्लिश्यन्ति । इदं च नरककालसंख्यार्थं रोदनाभावेऽपि नरकावश्यंभवात् ॥ स्वदत्तामिति ॥ यः स्वदत्तां वा परदत्तां वा ब्रह्मवृत्तिं हरेत् स षष्टिवर्षसहस्राणि विष्ठायां कृमिः जायते ॥ ३७-३९ ॥ नेति ॥ मे ब्रह्मधनं न भूयात् यद्ब्रह्मधनं गृध्वा अभिकाङ्क्षयापि किं पुनर्हृत्वा नराः अल्पमायुर्येषां ते क्षीणायुषो भवन्ति शत्रुभ्यः पराजिता भवन्ति । राज्यादैश्वर्यात् च्युता भ्रष्टा भवन्ति मरणानन्तरं च नरके पतित्वा तच्छेषेण उद्वेजिनः परोद्वेगजनकाः अहयः सर्पा भवन्ति ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पांसून् भूरजांसि ॥ ३७ ॥ ब्राह्मणधनहारकः ॥ ३८-३९ ॥ यत् ब्रह्मधनं गृध्वा वांछित्वा राज्याच्च्युताः मृत्वा उद्वेजिनो जनोद्वेगप्रापकाः अहयः सर्पा भवंति ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गृह्णन्तीति ॥ राजान इति च ॥ हृतं वित्तं येषां, तेषां कुटुम्बिनां, वदान्यानामुदाराणां, रुदतां वित्तापहारतो रोदनमाचरतां, विप्राणां, अश्रुबिन्दवः, यावतः पांसून्, गृह्णन्त्यार्द्रीकुर्वन्ति, तावतस्तावत् संख्याकान्, अब्दान् वत्सरान्, अत्यन्तसंयोगे द्वितीया । निरङ्कुशाः दुर्निवाराः, राजानः, राजकुल्याश्च, यतः ब्रह्मदायापहारिणः, ततः, कुम्भीपाकेन कुम्भीपाकनाम्ना निरयेण, पच्यन्ते । कुम्भीपाकनरकयातनां भुञ्जन्तीत्यर्थः । इति द्वयोरेकसंबन्धः ॥३७-३८॥ स्वदत्तामिति ॥ यः स्वदत्तां परदत्तां वा, ब्रह्मवृत्तिं हरेत्, सः षष्टिवर्षसहस्राणि षष्टिसहस्रवर्षपर्यन्तमित्यर्थः । विष्ठायां पुरीषे, कृमिः, जायते । चोऽवधारणे ॥ ३९ ॥ ब्रह्मस्वं मा स्पृशेदित्याशास्ते ॥ न म इति ॥ मे मम तु, ब्रह्मधनं, न भूयादाकाङ्क्षितं मा भवतु । यद्ब्रह्मधनं, गृद्ध्वा अभिकाङ्क्ष्य, नृपाः, अल्पायुषः, पराजिताः, राज्यात् च्युताश्च भवन्ति । उद्वेजिनः सर्वजनोद्वेगकारकाः, अहयः सर्पाश्च, भवन्ति । देहत्यागानन्तरमिति शेषः ॥ ४० ॥

कृष्णप्रिया

जिन उदारहृदय और बहुकुटुम्बी ब्राह्मणों की वृत्ति छीन ली जाती है, उनके रोने पर उनके आँसू की बूँदों से धरती के जितने धूलिकण भींगते हैं, उतने वर्षों तक ब्राह्मण के स्वत्व को छीननेवाले उस उच्छृङ्खल राजा और उसके वंशजों को कुम्भीपाक नरक में दुःख भोगना पड़ता है ॥ ३७-३८ ॥ जो मनुष्य अपनी या दूसरों की दी हुई ब्राह्मणों की वृत्ति, उनकी जीविका के साधन छीन लेते हैं, वे साठ हजार वर्ष तक विष्ठा के कीड़े होते हैं ॥ ३९ ॥ इसलिये मैं तो यही चाहता हूँ कि ब्राह्मणों का धन कभी भूल से भी मेरे कोष में न आये, क्योंकि जो लोग ब्राह्मणों के धन की इच्छा भी करते हैं—उसे छीनने की बात तो अलग रही—वे इस जन्म में अल्पायु, शत्रुओं से पराजित और राज्यभ्रष्ट हो जाते हैं और मृत्यु के बाद भी वे दूसरों को कष्ट देनेवाले साँप ही होते हैं ॥ ४० ॥

विप्रं कृतागसमपि नैव द्रुह्यत मामकाः । घ्नन्तं बहुशपन्तं [1]च नमस्कुरुत नित्यशः ॥ ४१ ॥
यथाहं प्रणमे विप्राननु[2]कालं समाहितः । तथा नमत यूयं च योऽन्यथा मे स दण्डभाक् ॥ ४२ ॥
ब्राह्मणार्थो ह्यपहृतो हर्तारं पातयत्यधः । अजानन्तमपि ह्येनं नृग ब्राह्मणगौरिव ॥ ४३ ॥
[3]एवं विश्राव्य भगवान् मुकुन्दो[4]द्वारकौकसः । पावनः सर्वलोकानां[5] विवेश निजमन्दिरम् ॥ ४४ ॥[6]

इति श्रीमद्भागवते महापुराणे[7] दशमस्कन्धे[8]ऽनिरुद्धानयनं नाम चतुःषष्टितमोऽध्यायः[9] ॥ ६४ ॥

---

[1] वा-श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [2] विप्राः सर्व-विज. । [3] एतद्-वीर. । [4] द्वारिकाप्रजाः-प्रा. पा. । [5] भूतानां-वीर. ।

[6] सद्भिः समागमो राजन् कदाचिन्नाफलो भवेत् । विमुक्तो नरकाद्राजा नृगः साधुसमागमात् ॥ १ ॥
साधूनां दर्शनं स्पर्शः कीर्तनं स्मरणं तथा । तीर्थानामिव पुण्यानां सर्वमेव हि पावनम् ॥ २ ॥
एतच्छ्रुत्वा त्वया सन्तः सदोपास्याः परन्तप । ब्रह्मस्वं नैव हर्तव्यं यदीच्छसि परां गतिम् ॥ ३ ॥

[7] पारमहंस्यां संहितायां-प्रा. पा. । [8] उत्तरार्धे-नास्ति प्रा. पा. । [9] ससाशीति-विज. ।

कर्वमक्षमा

अन्वयः—हे मामकाः ! कृतागसम्, अपि, विप्रम्, नैव, द्रुह्यत, घ्नन्तम्, बहुशपन्तम्, च, नित्यशः, नमस्कुरुत ॥४१॥ यथा, अहम्, अनुकालम्, समाहितः, विप्रान्, प्रणमे, तथा, च, यूयम्, नमत, अन्यथा, सः, मे, दण्डभाक् ॥ ४२ ॥ ब्राह्मणार्थः, अपहृतः, हि, हर्तारम्, अघः, पातयति, हि, अजानन्तम्, अपि, एनम्, ब्राह्मणगौः इव, पातयति ॥ ४३ ॥ भगवान्, मुकुन्दः, द्वारकौकसः, एवम्, विश्राव्य, सर्वलोकानाम्, पावनः, निजमन्दिरम्, विवेश ॥ ४४ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायामुत्तरार्द्धे नृगोपाख्ये चतुष्षष्टितमेऽध्यायेऽन्वयाः समाप्ताः ॥ ६४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रणमे नमामि ॥ ४२ ॥ न केवलमर्थवादबिभीषिकेयं किं तु प्रत्यक्षमित्याह । ब्राह्मणार्थ इति ॥ ४३-४४ ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे श्रीध० टीकायां चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ब्राह्मणो यदि कृतागा भवेत्तर्हि किं कार्यमिति चेदाह—विप्रमिति । द्रुह्यत द्रोहं कुरुत । मामका इत्यनेन 'विप्रद्रोही न मामकः' इत्युक्तम्, तत्र मदीयत्वाभिमानं त्यक्त्वा तान्न रक्षामीति भावः । घ्नंतं ताडयन्तम् । शपंतं गालीप्रदानादि कुर्वतम् ॥ ४१ ॥ प्रणम इत्यात्मनेपदमार्षम् । अनुकालमुहुर्मुहुः । योऽन्यथा मदाचरणविपरीतः । दंडभाक् नरकगामी भवति । तदुक्तं श्रीकृष्णेन पुराणांतरे—"विप्रोत्कर्षाऽसहा ये च नरा लोके नराधिप । ते मद्द्वेष्या न संदेहस्सर्वधर्मबहिष्कृताः ॥ तेषां भक्तिं न मन्येऽहं न दानं न व्रतादिकम् । तीर्थसेवां जपं ज्ञानं यदन्यत्सुकृतं कृतम् ॥ मदिज्याद्वेषिणस्तान्वै प्रक्षिपामि मुहुर्मुहुः । घोरे बहुक्लेशकरे नरके भृशदारुणे ॥ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम् । सर्वं सहे महाराज विप्रनिंदां विना प्रभो ॥ जारजातस्स विज्ञेयो यो निन्दत्यनपत्रपः । ब्राह्मणं मम सर्वस्वं सर्वदेवमयं परम् ॥ दानं व्रतं तथा स्नानं श्राद्धं विप्रमृते वृथा । विप्रस्य देहो राजेन्द्र सर्वदेहिषु सर्वदा ॥ परः शुचिर्विना कर्म सुकृतं किमु कर्मणा । नैव विप्रात्परं मन्ये आत्मानमपरं किमु ॥" इति ॥ ४२ ॥ अर्थवादेन ब्राह्मणोत्कर्षपुरस्सरतद्धनहरणनिषेधबोधकवाक्येन बिभीषिका भयहेतुकोक्तिः । अर्थवादवाक्यं हि स्वार्थप्रतिपादनपरं न भवति किन्तु विधेयनिषेध्ययोः प्राशस्त्यनिंदितत्वे लक्षणया प्रतिपादयन्नस्ति । तल्लक्षणञ्च—'प्राशस्त्यनिंदान्यतरपरं वाक्यमर्थवादः' इति बहुधा निरूपितमक्रूरस्तुतावेतत् । "वेदोक्तिस्तुतिनिंदायां धनार्थशवटेऽपि च । शास्त्रार्थेऽप्यर्थवादोस्ति" इति निरुक्तिः । अजानन्तमित्युक्तेः किमु जानन्तमिति भावः ॥ ४३ ॥ द्वारकौकस इत्युपलक्षणम् । कथनतात्पर्यमाह—पावन इति । पावयति शोधयति सन्मार्गोपदेशे नेति पावनः । लोकानां सन्मार्गप्रवृत्त्यर्थं भगवाञ्छ्रावयामासेति भावः ॥ ४४ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, यदि विप्र एवास्माकं धनं हरेत् कथञ्चित् द्विष्याद्वा तदा किं कार्य्यमित्यपेक्षायामाह—विप्रमिति । मा द्रुह्यत हन्तुमिच्छामपि न कुरुत एवशब्देन सदा सर्वथा च सा निरस्ता हे मामका इति ये मदीयास्ते न द्रुह्यन्तु अन्यथा तु मदीया न स्युर्मयापि न रक्ष्या इति भावः । घ्नन्तं ताडयन्तमपि ॥ ४१ ॥ न चापराधादिनाप्यनादरेण नमस्कारः कार्य्यः किन्तु भवत्यैवेत्याह—यथेति । अनुकालं सदा समाहितः सावधानः सन् विप्रानिति बहुत्वेन तज्जातीन् सर्वानेव सङ्गृह्णाति च अपि यूयमपि यो जनोऽन्यथा करोति स मे दण्डभाग्भवति यमादिद्वाराऽमुत्र साक्षात्स्वयञ्च दण्डयिष्यामीति भावः ॥ ४२॥ एनमिति युष्माभिः साक्षादनुभूतम् ॥ ४३ ॥ विशेषेण प्रत्यक्षदर्शनेन श्रावयित्वा तेषां शिक्षाव्याजेन सर्वेषां लोकानां पावनः तान् पावयितुमित्यर्थः । यथा लोकहितार्थमेव नरावतारं स्वप्रियसखं श्रीमदर्जुनं प्रति गीतोपदेश इति भावः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु यदि कदाचिद्विप्र एवास्माकं धनं हरेत् कथञ्चिद्द्विष्याद्वा, तदा हि किं कार्य्यमित्यपेक्षायामाह—विप्रमिति । मा द्रुह्यत, विप्रं प्रति हन्तुमिच्छामपि न कुरुत; एव-शब्देन सदा सर्व्वथा सा निरस्ता । हे मामका इति ये मदीयास्ते एवं कुर्वन्तु, अन्यथा तु मदीया एव न स्युरिति भावः । घ्नन्तं ताड़यन्तमपि ॥ ४१ ॥ न चापराधादिनाप्यनादरेण नमस्कारः,

किन्तु भक्त्यैव कार्य्य इत्याह—यथेति । अनुकालं सदा समाहितः सावधानः सन् । विप्रानिति बहुत्वेन तज्जातीन् सर्व्वान् संगृह्णाति, च अपि, यूयमपि; यो जनोऽन्यथा करोति, स मे दण्डभाग्भवेत् । यमादिद्वारा अमुत्र साक्षात् स्वयं चात्र तं दण्डयिष्यामीत्यर्थः ॥ ४२ ॥ अतः सर्व्वथा विप्रेषु भक्तिरेव कार्य्या, न च कदाचित् कथञ्चित् किञ्चितेषां हर्त्तव्यामित्युपसंहरति—ब्राह्मणेति । अर्थो धनम्, हि यतः, अजानन्तमपि पातयति, किं पुनर्ज्ञात्वा हर्त्तारमित्यर्थः । हि निश्चितम्, यतस्तत्प्रत्यक्षमेवेत्याह—एनमिति, युष्माभिः साक्षादनुभूतम् ॥ ४३ ॥ एवमीदृशं विशेषेण प्रत्यक्षप्रमाणत्वादिना श्रावयित्वा, यतो भगवान् ब्रह्मण्यदेवत्वाद्यशेष-सद्गुणगणयुक्तः । किञ्च, मुकुन्दो-ब्रह्मस्वहरणादिदोषप्रदर्शनेन लोकानां सर्व्वदुःखान्मुक्तिप्रदः परमानन्ददो वेत्यर्थः । ननु श्रीद्वारकावासिनो यादवादयः सर्व्वे तदनुवर्त्तिनः स्वत एव ब्रह्मण्याः; किमर्थं ते तथा विश्राविताः ? तत्राह—पावन इति । तेषां शिक्षाव्याजेन सर्व्वानपि लोकान् शिक्षयित्वा पावयितुमित्यर्थः । यथा लोकहितार्थं नरावतारं स्वप्रियसखं श्रीमदर्ज्जुनं प्रत्यपि गीतोपदेश इति ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री-श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशम-टिप्पण्यां चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

विप्रमिति । मामका यदि यूयं मदीयास्तर्हि कृतापराधमपि विप्रं नैव द्रुह्यत आर्षत्वात् "क्रुध द्रुहे" इति चतुर्थ्यभावः । किन्तु बहु यथा तथा शपन्तमपि नित्यं नमस्कुरुत ॥ ४१ ॥ इदमेव स्वदृष्टान्तेन द्रढयति—यथेति । अनुकालं त्रिसन्ध्यं प्रणमे नमस्करोमि योऽन्यथा न नमेत्स दण्डभाक् मे मत्त इति शेषः ॥ ४२ ॥ न केवलमर्थवाद इति विभीषिकेयं किन्तु प्रत्यक्षमित्याह—ब्राह्मणार्थ इति । ब्राह्मणार्थो विप्रधनं हर्त्तारमधो नरके पातयति यथाऽजानन्तमप्येनं नृगं ब्राह्मणस्य गौरपातयत्तद्वत् अज्ञानन्तमपीत्यनेन किमु वक्तव्यं जानन्तं पातयतीति कौमुत्यन्यायोभिप्रेतः ॥ ४३ ॥ एतदिति । द्वारकौकसः प्रत्येतदुक्तम् श्रावयित्वा तत्र हेतुः सर्वलोकानां पावनः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

द्रुह्यत द्रोहं न कुरुत ॥ ४१-४३ ॥ सर्वलोकानां पावनः शुद्धिकर्त्ता ॥ ४४ ॥

श्रीशुक उवाच

सद्भिः समागमो राजन् कदाचिन्नाफलोभवेत् । विमुक्तो नरकाद्राजा नृगः साधु समागमात् ॥
साधूनां दर्शनं स्पर्शं कीर्तनं स्मरणं तथा । तीर्थानामिव पुण्यानां सर्वमेव हि पावनम् ॥
एतच्छ्रुत्वा त्वया सन्तः सदोपास्याः परन्तपः । ब्रह्मस्वं नैव हर्तव्यं यदीच्छसि पराङ्गतिम् ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥

(श्रीविजयध्वजतीर्थरीत्या सप्ताशीतितमोऽध्यायः ॥ ८७ ॥)

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

ननु, विप्र एवास्माकं यदि धनं हरेत् विनैवापराधं द्विष्याद्वा किङ्कार्य्यमित्यपेक्षायामाह— विप्रमिति द्वाभ्याम् । हे मामकाः ! इति ये केचन मदीया भवन्ति तानपि प्रत्यादिशामि न केवलं युष्मानेवेति अन्यथा तु तेषु मया मामकत्वाभिमानस्त्यक्तव्य इति भावः ॥ ४१ ॥ प्रणमे प्रणमामि ॥ ४२ ॥ न केवलमर्थवादविभीषिकेयं किन्त्वयमर्थः प्रत्यक्ष एवेत्याह—ब्रह्मणार्थ इति ॥ ४३-४४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । चतुष्षष्टितमोऽध्यायः दशमेऽजनि सङ्गतः ॥ ६४ ॥

गूढार्थदीपिनी

हे मामका ॥ ४१ ॥ अनुकालं त्रिकालम् । प्रणमे । कर्मकर्तरि लट् तङ् च ॥ ४२ ॥ अधो नरके । यथा ब्राह्मणगौ अजानन्तमपि नृगमपातयदिति योज्यम् ॥ ४३ ॥ द्वारकौकसः द्वारकावासिनो जनान् । पावयति उपदेशेनेति पावनः भगवान् ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ननु ब्राह्मणः स्वयं चेदपराधं कुर्यादसह्यम्, तदा किं कर्तव्यमिति चेत्, तत्राह **विप्रं कृतागसम**पीति । **मामका** इत्यनेन ब्रह्मण्यदेवत्वात् स्वस्य देवता, देवता सुतरां मान्या भवतीति अद्रोहे हेतुरुक्तः, नियमेन द्रोहं मा कुरुत । प्रमादापराधविषयमेतदित्याशङ्क्याह **घ्नन्तं बहु शपन्तं चे**ति । मानसापराधे किं वक्तव्यम्, कायिकवाचिकापराधेऽपि द्रोहं मा कुरुत । **बह्वि**त्युभयत्र सम्बध्यते । हननमत्र ताडनम्, न तु शिरश्छेदः । 'जिघांसन्तं जिघांसीया'दिति वाक्यात् । शापोऽवगूरणम् । मदीयानां शापो न भवतीति भयाभावात् न केवलं तूष्णीं स्थातव्यम् । तथा सति ब्राह्मणस्य मयोत्पत्तिसम्भवात् पुनरपकारः स्यात् । किन्तु **नित्यं नमस्कुरुत** शङ्काभावार्थम् ॥ ४१ ॥ ननु सर्वात्मकत्वाद्भगवतः व्यवहारस्यापि न तथाभावात् वेदलोकविरुद्धं कथं कर्तव्यमिति चेत्, तत्राह **यथाह**मिति । **मदीयानां हि मत्कृतं कर्तव्यम्, किं लोकेन वेदेन वा** । अहं तु त्रिकालं सावधानो भूत्वा भृगुमिव, विप्रत्वेनैव विप्रमात्रं प्रणमे, तथा यूयमपि **नमत** । न हि मत्तो यूयमधिकाः । **चकाराद्भगवदीयाश्च** । अनङ्गीकारे बाधकमाह । योऽन्यथा सावधानतया ब्राह्मणं न नमस्करोति, स मे दण्डभाक्, मम दण्डयुक्तो भविष्यति ॥ ४२ ॥ ननु किमेवं निर्बन्ध इति चेत्, तत्राह **ब्राह्मणार्थ** इति । **मदीया ऊर्ध्वगतिमेव यास्यन्ति**, ब्राह्मणार्थस्त्वपहृतः स हर्तारं पातयति । अपहारे कृतेऽधःपातयत्येव । **अजानन्तमपि** अज्ञाने फले न किञ्चिद्वैगुण्यम् । **एनं नृगं ब्राह्मणगौरिवे**ति स्पष्टो दृष्टान्तः ॥ ४३ ॥ एवमुपदेशं कृत्वा प्रसङ्गात्पूर्वद्वारकायामागतः तत्रैव तिष्ठेदित्याशङ्क्य, ततो गतस्य मुख्यद्वारकास्थगृह एव स्थितिमाह **एवं विश्राव्ये**ति । सर्वान् विशेषेण श्रावयित्वा भगवांस्तावतैव कार्यं मत्वा सर्वेषां मोक्षदाता ब्राह्मणातिक्रमाभावे मोक्षो भविष्यतीति । **द्वारकौकस** इति । निरुद्धास्त एवेति मोक्षदात्रा संरक्षिताः, भगवत्स्थान एव स्थिताः, भगवतैव पूताः । तानुद्धृत्य संसारान्निजमन्दिरं स्वगृहं विवेश । अनेन सामान्यतः सात्त्विकानां निरोध उक्तः ॥ ४४ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां **दशमस्कन्धविवरणे उत्तरार्धे पञ्चदशोऽध्यायः** ॥ १५ ॥

श्रीसुबोधिनी-सारः

कर्त्तव्यमुपदिशति । **कृतमागोऽपराधो** येन तमपि विप्रं घ्नंतं प्रहरंतं बहु शपंतं वापि नैव द्रुह्येत यूयं मा द्रोहं कुरुत हे मामकाः किं तु नमस्कुरुत प्रणमत नित्यम् ॥ ४१ ॥ अनुकालं प्रतिसमयं समाहितोहं **विप्रान् प्रणमे** प्रणमामि तथा यूयं च नमत योन्यथा वर्त्तेत स मे दंडभागी ॥ ४२ ॥ न केवलं विभीषामात्रमेतदर्थवादवत् किं तु प्रत्यक्षदृष्टमित्याह अपहृतो ब्राह्मणस्यार्थो हर्त्तारं जनम् अधः पातयति । अजानंतमपि एनं नृगं ब्राह्मणस्य गौरिव हि युक्तम् ॥ ४३ ॥ **भगवान्** मुकुन्द एवं द्वारकावासिनो **विश्राव्य** श्रावयित्वा **नृगद्वारा** सर्वलोकानां पावनः पवित्रकर्त्ता स्वगृहं विवेश ॥ ४४ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायां चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु 'यदि ब्राह्मणः **स्वयमेव** कश्चिदपराधं कुर्यात्तदा किं **कर्तव्यम्**' इत्यपेक्षायामाह—विप्रमिति । हे **मामकाः** ! । स्पष्टोऽयम् ॥ ४१ ॥ इदमेव स्वदृष्टान्तेन द्रढयति—यथेति । अनुकालं त्रिसन्ध्यं **यथाहं** विप्रान् प्रणमे नमस्करोमि तथा यूयमपि नमत । योन्यथा न प्रणमेत् स मे दण्डभाग् भविष्यति ॥ ४२ ॥ 'न केवलमर्थवादविभीषिकेयम्, किं तु प्रत्यक्षसिद्धम्' इत्याह—ब्राह्मणार्थ इति । अपहृतं विप्रधनं हर्तारमधो नरके पातयति । यथा अजानन्तमप्येनं नृगं ब्राह्मणगौरधो नीचयोनावपातयत्तद्वत् । 'अजानन्तम्' इत्यनेन जानन्तं पातयतीति किमुत वक्तव्यमिति कैमुत्यन्यायो दर्शितः ॥ ४३ ॥ मुकुन्दो मुक्तिदो भगवान् कृष्णो द्वारकौकसः प्रति एवं विश्राव्य निजमन्दिरं विवेश । एवं **विशेषतः श्रवणे प्रयोजनापेक्षायां** 'सर्वलोकपावित्र्यार्थम्' इति सूचयन्नाह—पावनः सर्वलोकानामिति ॥ ४४ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र सात्त्विकानां निरोधने । चतुःषष्टितमो यातो नृगोद्धारनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

विप्रमिति ॥ हे मामका मदीयाः ! कृतागसमपि घ्नन्तं ताडयन्तं बहु शपन्तं च विप्रं नैव द्रुह्यत किंतु नित्यशः नमस्कुरुत । अन्यथा यूयं मामका नैव स्थ इति भावः ॥ ४१ ॥ यथेति ॥ अनुकालं त्रिसन्ध्यं यथाऽहं समाहितः विप्रान् प्रणमे नमस्करोमि । कर्मकर्त्तरि लट् तङ् च । तथा यूयमपि नमत योऽन्यथा न प्रणमेत्स मे दण्डभाग् भविष्यति ॥ ४२ ॥ नेयं केवल-

मर्थवादविभीषिकेत्याह—ब्राह्मणार्थ इति ।। अपहृतो ब्राह्मणस्यार्थो धनं हर्तारमधो नरके पातयति। यथा अजानन्तमप्येनं नृगं ब्राह्मणगौः। टजभाव आर्षः। अधो नीचयोनावपातयत्तद्वत् जानन्तं पातयतीति कैमुत्येन सिद्धम् ।। ४३ ।। एवमिति ।। सर्वलोकानां पावनः मुकुन्दो भगवान् द्वारकौकसः प्रत्येवं विश्राव्य निजमन्दिरं विवेश। गीतोपदेशो अर्जुनवद्द्वारकौकस इत्युपलक्षणमात्रम् ।। ४४ ।।

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्। गङ्गासहायो दशमचतुःषष्टितमे व्यधात् ।।

इति श्रीभागवते दशमे स्कन्धेऽन्वितार्थप्रकाशिकायां चतुःषष्टितमोऽध्यायः ।। ६४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भो मामकाः यूयं नैव द्रुह्यत ।। ४१ ।। अन्यथा तान् यो न नमति ।। ४२ ।। अपहृतो ब्राह्मणस्यार्थः पदार्थः ।। ४३-४४ ।।

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंध-व्याख्याने अनिरुद्धद्वारिकानयनं नाम चतुःषष्टितमोऽध्यायः ।। ६४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विप्रमिति ।। अतः, हे मामकाः, यूयं यदि मदीयाः स्थ तर्हि, हे मज्जना इत्यर्थः। कृतागसं अपि, विप्रं नैव द्रुह्यत। आर्षत्वात् 'क्रुधद्रुह'—इति चतुर्थ्यभावः। घ्नन्तं हिंसन्तं, बहु यथा तथा, शपन्तं वाऽपि, विप्रं नित्यशः, नमस्कुरुत ।। ४१ ।। इदमेव स्वदृष्टान्तेन द्रढयति ।। यथेति ।। यथा अहं, समाहित एकमनाः सन्, अनुकालं त्रिसंध्यं, विप्रान् प्रणमे नमस्करोमि, तथा मद्वदेव, यूयं च यूयमपि, नमत विप्रान् नमस्कुरुत। यः अन्यथा न नमेदित्यर्थः। सः, मे मम, दण्डभाक्, भवेदिति शेषः ।। ४२ ।। न केवलमर्थवाद इति विभीषिकेयं किं तु प्रत्यक्षमित्याह ।। ब्राह्मणार्थ इति ।। ब्राह्मणार्थो विप्रधनं अपहृतः सन्, हर्त्तारं, अधः नरकेः, पातयति हि। कथमिव अजानन्तं अपि, एनं नृगं, ब्राह्मणगौः इव, ब्राह्मणगौः यथाऽपातयत्तद्वदित्यर्थः। द्वितीय हिशब्द उक्तार्थदार्ढ्याय ।। ४३ ।। एतदिति ।। सर्वलोकानां, पावनः मुकुन्दः, भगवान् श्रीकृष्णः, द्वारकौकसः द्वारकावासिनो जनान्, एतत् विश्राव्य विशेषतः श्रावयित्वा, निजमन्दिरं विवेश, ।। ४४ ।।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे चतुःषष्टितमोऽध्यायः ।। ६४ ।।

कृष्णप्रिया

इसलिये मेरे आत्मीयों ! यदि ब्राह्मण अपराध करे, तो भी उससे द्वेष मत करो वह मार ही क्यों न बैठे या बहुत सी गालियाँ या शाप ही क्यों न दे, उसे तुमलोग सदा नमस्कार ही करो ।। ४१ ।। जिस प्रकार मैं बड़ी सावधानी से तीनों समय ब्राह्मणों को प्रणाम करता हूँ, वैसे ही तुमलोग भी किया करो। जो मेरी इस आज्ञा का उल्लङ्घन करेगा, उसे मैं क्षमा नहीं करूँगा ! दण्ड दूँगा ।। ४२ ।। यदि ब्राह्मण के धन का अपहरण हो जाय तो वह अपहृत धन उस अपहरण करने वाले को अनजान में उसके द्वारा यह अपराध हुआ हो तो भी अधःपतन के गड्ढे में डाल देता है। जैसे ब्राह्मण की गाय ने अनजान में उसे लेने वाले राजा नृग को नरक में डाल दिया था ।। ४३ ।। परीक्षित् ! समस्त लोकों को पवित्र करने वाले भगवान् श्रीकृष्ण द्वारकावासियों को इस प्रकार उपदेश देकर अपने महल में चले गये' ।। ४४ ।।

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे नृगोपाख्यानं नाम चतुःषष्टितमोऽध्यायः ।। ६ ।।

* * *

अथ पञ्चषष्टितमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
३२	३१	१	३	१४४०	६	५१	११५७	३६	५

श्रीशुक[1] उवाच

बलभद्रः कुरुश्रेष्ठ भगवान् रथमास्थितः । सुहृद्दिदृक्षुरुत्कण्ठः प्रययौ नन्दगोकुलम् ॥ १ ॥
परिष्वक्तश्चिरोत्कण्ठैर्गोपै[2] र्गोपीभिरेव च । रामोऽभिवाद्य पितरावाशीर्भिरभिनन्दितः ॥ २ ॥
चिरं नः पाहि दाशार्ह सानुजो जगदीश्वरः[3] । इत्यारोप्याङ्कमालिङ्ग्य नेत्रैः सिषिचतुर्बलम्[4] ॥ ३ ॥
गोपवृद्धांश्च विधिवद् यविष्ठैश्चाभिवादितः[5] । यथावयो यथासख्यं यथा सम्बन्धमात्मनः ॥ ४ ॥
[6]समुपेत्याथ गोपालान् हास्यहस्तग्रहादिभिः । विश्रान्तं सुखमासीनं पप्रच्छुः पर्युपागताः ॥ ५ ॥
पृष्ट्वाथा[7]नामयं स्वेषु[8] प्रेमगद्गदया गिरा । कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः ॥ ६ ॥[9]

कर्दमक्षमा

अन्वयः—कुरुश्रेष्ठ ! बलभद्रः, भगवान्, सुहृद्, दिदृक्षुः, उत्कण्ठः, नन्दगोकुलम्, प्रययौ ॥ १ ॥ चिरोत्कण्ठैः, गोपैः, च, गोपीभिः, एव, परिष्वक्तः, रामः, पितरौ, अभिवाद्य, आशीर्भिः, अभिनन्दितः ॥२॥ दाशार्ह ! सानुजः, जगदीश्वरः, नः, चिरम्, पाहि, इति, बलम्, अङ्कम्, आरोप्य, च आलिङ्ग्य, नेत्रैः, सिषिचतुः ॥ ३ ॥ विधिवत्, गोपृवृद्धा, न, च, विधिवत् प्रणम्य, यविष्ठैः, अभिवादितः, अथ यथावयः, यथासख्यम्, आत्मनः यथासम्बन्धम् समुपेत्य ॥ ४ ॥ अथ हास्यहस्तग्रहादिभिः, गोपालान्, समुपेत्य, अथ, च, विश्रान्तम्, सुखम्, आसीनम्, पर्शुपागताः, पप्रच्छुः ॥ ५ ॥ अथ प्रेमगद्गदया, गिरा, स्वेषु, अनामयम्, पृष्ट्वा, कमलपत्राक्षे, कृष्णे, संन्यस्ताखिलाराधसः ॥ ६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पंचषष्टितमे रामश्चक्रे गोकुलमागतः । रममाणस्तु गोपीभिः कालिद्याः कर्षणं मदात् ॥ १ ॥
रामस्य चरितं चित्रं कालिद्याकर्षणादि यत् । पौंड्रकांतादि कृष्णस्य पृथगुक्तमतः परम् ॥ २ ॥ १ ॥

आशीर्भिरभिनंदितो बभूव ॥ २ ॥ तदाह । चिरमिति ॥ ३ ॥ गोपवृद्धांश्च विधिवदभिवंद्य यविष्ठैरभिवंदितो बभूवेत्यर्थः । अपि च यथावय इति ॥ ४ ॥ ते सर्वे स्वेषु तं राममनामयमारोग्यं पप्रच्छुः ते च तेन पृष्टा इति ॥५॥ कृष्णप्राप्त्यर्थं संन्यस्ताखिलराधसस्त्यक्तसर्वविषयाः ॥ ६–८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कर्षणमाकर्षणम् (१) । चित्रमद्भुतम् (२) । बलेन भदंते लोकान्कल्याणयुतान्करोतीति बलभद्रः । अथ श्रीपरीक्षितस्तत्तल्लीलानंदमनुभवतो बलादनुगच्छता श्रीगोकुलव्याकुलतास्मरणेन दूयमानं मनो ज्ञात्वा श्रीमन्मुनींद्रः पुनस्तदाश्वासनकथां कथांतरावेशेन त्यक्तामपि पातयति—बलभद्र इति । संबुद्धया श्लाघते—हे कुरुश्रेष्ठेति । अतीवशुद्धकुलोद्भूतस्य तव हृदि श्रीव्रजलीलैव स्फुरति मुहुरिति भावः । सुहृदः श्रीवसुदेवादितोऽपि पितृत्वादिमयशुद्धस्नेहांशेन शोभनः सुहृद्येषां तान्नन्दादीन्दिदृक्षुः सन् यश्चिरविरहेणोत्सुकः नित्यतद्दर्शनोत्कंठस्तदा तु लब्धश्रीकृष्णानुज्ञ इति ज्ञेयम् । तदुक्तं श्रीहरिवंशे—"जगामैको व्रजं रामः कृष्णस्यानुमते स्थितः" इति । अत एव वक्ष्यति—कृष्णस्य संदेशैः सांत्वयामासेति । श्रीकृष्णस्तु श्रीवसुदेवादिभिरनुज्ञात एव तेन सह नागच्छत् । अयं श्रीनंदादिप्रेमबद्धः । पुनरत्रानागमिष्यतीत्यननुज्ञात इति ज्ञेयम् । प्रकर्षेण गोपवेशादिना ययौ । तदुक्तं श्रीहरिवंशे—"स प्रविष्टस्तु वेगेन तं व्रजं कृष्णपूर्वजः । वन्येन रमणीयेन वेशेनालंकृतः प्रभुः ॥" इति । रथस्थितिस्तु शीघ्रगमनार्थैव ॥ १ ॥ पितरौ यशोदानंदौ । परिष्वक्तः सर्वांगसंगतं गाढं बहुविधमश्रुपुलकादिवलितं

---

[1] बादरायणि–प्रा. पा. । [2] गोप–प्रा. पा. । [3] श्वर–प्रा. पा. । [4] जलैः–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [5] रभिवन्दितः–श्रीधर. वंशी. जीव. वीर. विज. विश्व. ; श्चाभिवादितः–प्रा. पा. । [6] तमु–विज. । [7] पृष्टाश्चा–श्रीधर. वंशी. जीव. ; पृष्टश्चाकथयत्—विज. । [8] प्रीताः–च. पु. टि. । [9] ते सर्वे तेषु तं रामं ते च तेनाप्यनामयम्–अधिकः च. पु. टि. ।

चालिंगितः, यतश्चिरोत्कंठः। पितरौ तस्य तयोश्च भावानुसारेण तत्र प्रथममितस्ततो लब्धैर्गोपैर्मिलनम्। व्रजाभ्यंतरे तु गोपीभिर्मातृवयस्याभिर्वृद्धाभिरपि। एवं चेत्यनुक्तसमुच्चये, पुरोहितादिभिरित्यपि ज्ञेयम् ॥ २ ॥ तद् आशीरभिनन्दनम् (नेत्रेभ्यश्चक्षुर्नाडीभ्यो निर्गतानि नेत्राणि तैः 'कारकात्क्रियायुक्ते' इत्यपादानकारकान्निर्गतेऽर्थे अण्, वैकल्पिकणित्वाद्वृद्धाभावः)। 'नेत्रं नाड्यां तरोर्मूले' इति यादवः। चिरं पाहीति वाग्भंग्या दीर्घायुष्ट्वाऽप्रतिहतबलवीर्याद्याशिषः सूचिताः। जगदीश्वरस्सन्नित्यनन्तरं यद्यपि स्वेषामपि दासार्हत्वमस्ति, तथा पाण्डवकौरववत्प्राचुर्यप्रयोगाविवक्षयायादवेष्वेव मुख्यत्वात्तच्छब्दप्रवृत्तिः। वसुदेवपुत्रत्वेनैव तथा संबोधितः। यद्यपि स्वीयोऽपि पुत्रभावस्तस्मिन्नधिकस्तथापि प्रियभ्रातृपुत्रतामाश्रित्यैव स्वयं पुत्रत्वेन पालितस्सौजन्योत्तरसंबंधमेव बहुतरं तेनात्मनश्चैक्यं व्यञ्जयित्वा स्वपुत्र एव विशिष्य दर्शितः। अत एव सानुज इति साक्षात्स्वपुत्रे तदनुजत्वमुक्तम्, तस्यैव प्राधान्यविवक्षया गौणत्वं च। अत एव न इत्यविशेषेणास्मान्यादवांश्चेत्यर्थः। अथवोत्कण्ठया श्लेषेण संप्रति तयोः स्वेष्वौदासीन्यं दर्शितम्, तदनुचितमित्याह—न इति। यथा यादवान्पासि तथाऽस्मान्पाहीत्यर्थः। विश्वनाथस्तु—सानुजोऽपि त्वं जगदीश्वर इति सर्वत्र श्रूयते, तदपि वृद्धौ स्वमातापितरावावां कथं न पालयसीति भावः ॥ ३ ॥ यविष्ठैः कनिष्ठैः। इत्यर्थ इति शेषः। यथोचितं कर्तव्यमाह—अपि चेति। आत्मनः वय आद्यनतिक्रमेण गोपालान्सम्प्राप्येति सार्द्धेनान्वयः। तत्रादिनाऽश्लेषग्रहः ॥ ४ ॥ अथ गोपाः पप्रच्छुः। 'गोपालाः' इति पाठोऽपि साधीयान्। ते च गोपाः। तेन रामेण ॥ ५ ॥ कृष्ण इति निमित्ते सप्तमी। यद्वा—कृष्णे संन्यस्ताः समर्पिता अखिलराधसः सर्वसम्पदः "राधस्तेजसि हिंसायां विषये सिद्धिसम्पदोः" इति धरणिः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ श्रीपरीक्षितस्तत्तल्लीलानन्दमनुभवतोपि बलादनुगच्छता श्रीगोकुलव्याकुलतास्मरणेन दूयमानं मनो विज्ञाय श्रीमन्मुनिराजः पुनस्तदाश्वासनकथां कथान्तरावेशेन त्यक्तामपि पालयति बलभद्र इत्यादिना। सम्बोधनेन तं श्लाघते च हे कुरुश्रेष्ठेति! बलभद्रो भगवानिति च तं प्रति श्लाघागर्भं सुहृदः श्रीवसुदेवादितोपि पितृत्वादिमयशुद्धस्नेहांशेन शोभनं हृद्येषां तान् श्रीनन्दादीन् दिदृक्षुः सन् प्रययौ यः पूर्वत एवोत्कण्ठः चिरविरहेण नित्यतद्दर्शनोत्सुकः तदा तु लब्धश्रीकृष्णानुज्ञ इति ज्ञेयं तथाच हरिवंशे "जगामैको व्रजं रामः कृष्णस्यानुमते स्थितः" इति अत एवात्रापि वक्ष्यति कृष्णस्य सन्देशैः सान्त्वयामासेति एतावद्दिनं तदनुज्ञा च सहैव स्वगमनेच्छयेति लक्ष्यते तच्चश्रीवसुदेवादीनां श्रीनन्दादिप्रेमबद्धोऽसौ तत्रैव तिष्ठेदित्यननुज्ञयैवेति पूर्ववज्ज्ञेयम् अत एव श्रीनन्दादिषु निजागमनसन्देशादिगोपनार्थमेकाकित्वेनैव तत्प्रस्थापनमपि एवमन्तस्तद्भावभावितत्वेन प्रययाविति गोपवेषधारणादिप्रकर्षेण ययावित्यर्थः। तथा च तत्रैव—

"स प्रविष्टस्तु वेगेन तं व्रजं कृष्णपूर्वजः। वन्येन रमणीयेन वेषेणालङ्कृतः प्रभुः ॥"

इति रथस्थितत्वं तु परमोत्कण्ठितत्वाच्छीघ्रगमनार्थमेव ॥ १ ॥ तद्भावभावितत्वमेव दर्शयति—परीत्यादिभिः। परिष्वक्तः परीति सर्वाङ्गसङ्गतङ्गाढं बहुविधमश्रुपुलकादिवलितं चालिङ्गितः यतश्चिरोत्कण्ठैः पितराविति तस्य तयोश्च भावानुसारेणोक्तं तत्र प्रथममितस्ततो लब्धैर्गोपैर्मिलनं व्रजाभ्यन्तरे तु गोपीभिर्मातृवयस्याभिर्वृद्धाभिरपि एवञ्चेत्यनुक्तस्यापि समुच्चायात्पुरोहितादिभिश्चेति ज्ञेयं तत उद्दिश्य प्रथममिलनौ पितरौ श्रीयशोदानन्दावभिवाद्य स्थितो रामस्ताभ्यामपि परिष्वक्तः सन्नाशीर्भिरप्यभिनन्दित इत्यर्थः ॥ २ ॥ चिरं पाहीति वाग्भङ्ग्या दीर्घायुष्ट्वाप्रतिहतबलवीर्याद्याशिषः सूचिताः जगदीश्वरः सन्नित्याशीरनन्तरं यद्यपि स्वेषामपि दाशार्हत्वं वर्त्तते तथापि पाण्डवकौरववत्प्राचुर्य्यप्रयोगाविवक्षया यादवेष्वेव मुख्यत्वात्तच्छब्दप्रवृत्तिरिति श्रीवसुदेवपुत्रत्वेन तथा सम्बोधितं यद्यपि चोक्तरीत्या स्वीयोपि पुत्रभावस्तस्मिन् अधिकस्तथापि स्वप्रियभ्रातृश्रीवसुदेवपुत्रतामवलम्ब्यैव स्वयं पुत्रत्वेनासौ पालित इति सौजन्यात्तत्सम्बन्धमेव बहुतरं मत्वा तेनात्मनश्चैक्यं व्यञ्जयित्वा स्वपुत्रभाव एव विशिष्य दर्शितः अत एव सानुज इत्यनेन साक्षात्स्वपुत्रेपि तदनुजत्वमुक्तं तस्यैव प्राधान्यविवक्षया गौणत्वञ्च अत एव न इत्यविशेषेण यादवानस्मांश्चेत्यर्थः। अथवोत्कण्ठया श्लेषेण सम्प्रति तयोः स्वेष्वौदासीन्यं व्यञ्जितं तत्त्वनुचितमित्याह—न इति। यथा यादवान् पासि तद्वदप्यस्मान् पाहीत्यर्थः ॥ ३ ॥ ततश्च तत्सङ्गतैर्मिलनमाह—गोपैरित्यर्द्धेन, यथेति सार्द्धद्वयकम्। अथ तद्दिनानन्तरदिन इत्यर्थः। गोपालान् वयस्यादीन् सम्यक् स्नेहादरादिपूर्वकम् उपेत्य उप समीपे तत्तद्गृहादौ एत्य स्वयमागत्य तत्रापि आत्मनो वय आद्यनुरूपं हास्यहस्तग्रहणादिभिः समुपेत्य विश्रान्तं तत्तत्कृतोपचारैर्लब्धविश्रामं सन्तं तत्रैव भोजनाद्यनन्तरं सुखमासीनञ्च परि सर्वत उपागताः समीपोपविष्टाः सन्तस्ते स्वेषु सम्बन्धिषु यादवेषु विषयेषु अनामयं पप्रच्छुः तत्र वयस्या यथासख्यं तत्तारतम्येनेत्यर्थः। अन्ये तु यथासम्बन्धं पितृभ्रातृपुत्रवर्गत्वानुरूपं तत्रापि यथावयः वयस्तारतम्येनेत्यर्थः। एव हास्यहस्तग्रहो वयस्यानाम् उद्धवागमनोक्तयुक्तिरीत्या रहसि तेषां मुहुस्तदागमनस्फूर्तेर्मिथो हर्षोदयात् आदिग्रहणात्पितृवर्गादीनां वन्दनादयो ज्ञेयाः। तथाच तत्रैव—

"स तानभाषत प्रीत्या यथापूर्वमरिन्दम। गोपीस्तेनैव विधिना यथान्यायं यथावयः ॥
तथैव प्राह तान् सर्वान् तथैव परिहर्षयन्। तथैव सह गोपीभिर्योजयन् मधुराः कथाः ॥" इति

पृष्टाश्चेति तदनन्तरं ते च तेन पृष्टा इत्यर्थः। तथा पप्रच्छुरित्यत्र पृष्टाश्चेत्यत्र च विशेषणं प्रेमेत्यादि उभयत्रापि हेतुत्वेन तेषां विशेषणं, कृष्ण इत्यादि, कृष्णे स्वभावत एव सर्वाकर्षके कमलपत्राक्षे सौन्दर्य्यतोपि तादृश इत्यर्थः। तथा प्रथमेन सर्वेषामानन्दरूपत्वं द्वितीयेन सर्वतापहरत्वं च व्यञ्जितं तस्मिन्निमित्ते संन्यस्ताखिलराधस इति "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" इत्युक्तरीत्या पूर्वव तदर्था एव सर्वे विषया अतस्तद्विरहिणां स्वतस्तदनभिरुचेरपि तदागमनाशयैव तद्धारिण इत्यर्थः। तस्य दैत्यादिभिः सङ्गरं शृण्वताञ्च तत्तद्विघ्ननिरसनाय संन्यस्तानि देवब्राह्मणेष्वर्पितानि राधांसि गृहान्तर्गतभोग्यानि द्रव्याणि यैस्ते ते श्रीकृष्णार्थमेव सम्प्रति तत्सहायेषु तेष्वनामयं पप्रच्छुः श्रीकृष्णार्थसंन्यस्तसर्वार्थत्वेन परमानुकम्पाचिन्तयोर्विषयत्वात् पृष्टाश्चेत्यर्थः। अत्र प्रकरणे कष्टान्वयतया श्रीमन्मुनीन्द्रस्य तत्स्मरणवैवश्यं व्यज्यते ॥ ४–६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं श्रीकृष्णस्य दीनवात्सल्यमुक्त्वा प्रसंगाच्छ्रीरामस्यापि तदाह—बलेत्यादिना यावत्समाप्ति। सुहृदः श्रीनन्दयशोदादीन् दिदृक्षुः सन्, यत उत्कण्ठश्चिरविच्छेदेन नित्यदर्शनोत्सुकः, अतः शीघ्रगमनार्थं तत्परिचितं रथमास्थित आरूढं सन्, नन्दस्य गोपेन्द्रस्य, किंवा नन्दयति जगद्विशेषतश्च सानुजमात्मानं हर्षयतीति नन्दं यद्गोकुलं तत् प्रकर्षेण गोपवेशधारणादिना ययौ। तथा च श्रीहरिवंशे (विष्णु० प० ४६।३)—'स प्रविष्टस्तु वेगेन तं व्रजं कृष्णपूर्व्वजः। वन्येन रमणीयेन वेषेणालंकृतः प्रभुः ॥' इति। यतो भगवान् परमदयालुः, किंवा सर्वज्ञोऽनुजाभिप्रायं जानन्नित्यर्थः। तथा च तत्रैव (विष्णु–प० ४६।१) 'जगामैको व्रजं रामः कृष्णस्यानुमते स्थितः' इति, अत एवात्रापि वक्ष्यति (भा० १०।६५।१६) 'कृष्णस्य सन्देशैः सान्त्वयामास' इति। बलभद्र इति बुद्ध्यादिबलाधिक्येन महतामाश्वासनादौ समर्थतर इति भावः। हे कुरुश्रेष्ठेति तदर्थं तत्प्रयाणेन प्रहर्षात्, यद्वा, कुरुश्रेष्ठो भवानिवासौ श्रीकृष्णाग्रजतया यदुश्रेष्ठोऽनुजस्यायास्य इत्यादि वाक्यासत्यतासमाधानार्थं प्रयातुमर्हत्येवेति भावः ॥ १ ॥ परितो बहुधा गाढतया सर्वांगसम्मिलनादिना स्वत आलिगतः, यतश्चिरोत्कण्ठैः, एव अपि, गोपीभिरपि, चकाराद् भृत्यपुरोहितादिभिश्च, इति चिरोत्कण्ठतया परमसम्भ्रमादादौ सामान्येन सर्वेषां परिष्वंगमुक्त्वा, अधुना विशेषतो यथार्हव्यवहारमाह—राम इति सार्द्धद्वयेन। पितराविति तदानीमपि तयोस्तस्मिन्नपि पुत्रबुद्ध्यनुवृत्तेः, तथा तस्यापि तौ प्रति तादृङ्मतेरनपगमात् ॥ २ ॥ चिरं पाहीति वाग्भंग्या दीर्घायुष्ट्वाप्रतिहतबलवीर्य्याद्याशिषः सूचिता एव। न इति सर्वव्रजजनापेक्षया जगदीश्वरः सन्नित्याशीरन्तरम्। सानुज इति तस्यानागमनेनात्मविषयकं निर्दयत्वं मत्वा प्रार्थनम्, रक्षायां सत्यामपि तत्सम्बन्धराहित्येनारक्षायामेव पर्य्यवसानात्। दाशार्ह! हे यदुकुलोद्भवेति स्वपरित्यागेन यदूनामेव पालनादीर्ष्यया परमार्त्या वा सम्बोधनम्। तज्जैर्यानि जलानि तैः, नेत्रैरिति वा पाठः, नेत्रभवैरित्यर्थः अन्यत्तैर्व्याख्यातम्। यद्वा, आशीर्भिः—'दीर्घायुरप्रतिहतबलवीर्य्यसमन्वितः। पुत्रपौत्र-धनैश्वर्य्यैर्युक्तो वत्स भवोत्तम ॥' इत्यादिलक्षणाभिः, पितृत्वेनादौ स्नेहभरेणाशीर्भिरभिनन्द्य पश्चाद्दैन्येन प्रार्थयते—चिरमिति। दाशार्ह! हे यदुकुलेश्वरेति तत्पालनपरोऽपि जगदीश्वरत्वेन जगदन्तर्गतानस्मानपि पाहीत्यर्थः। अन्यत् समानम् ॥ ३ ॥ अथ अनन्तरं गोपालानां वयआद्यनतिक्रमेण हास्यादिभिः सम्यगुपेत्य मिलित्वा विश्रान्तं विगतवर्त्मश्रमं सन्तं पश्चात् सुखमासीनम्, किंवा हास्यादिभ्यो विश्रान्तमुपरतम्, यद्वा, चिरप्रवासश्रमरहितम्, अत एव सुखमासीनम्, आदि-शब्दात् प्रियोक्त्यादयः, परितः सर्वत उप समीपे आगताः, आत्मनो यथासम्बन्धमिति श्रीनन्दयशोदयोर्भ्रात्रादिसम्बोधनेनैवात्मनः पितृव्य–मातुलेयत्वादि-सम्बन्धानुसारेणेत्यर्थः। इति पूर्ववदेव सर्व्वो व्यवहारो द्योतितः। तथा च तत्रैव श्रीहरिवंशे (विष्णुः प० ४६।४–५)—

'स तानभाषत प्रीत्या यथापूर्वमरिन्दमः। गोपीस्तेनैव विधिना यथान्यायं यथावयः ॥
तथैव प्राह तान् सर्वांस्तथैव परिहर्षयन्। तथैव सह गोपीभिर्योजयन्मधुराः कथाः ॥' इति ॥

प्रेमगद्गदया गिरेत्यस्य चकारात् पृष्टा इत्यनेन पप्रच्छुरित्यनेन वान्वयः। कृष्णे निजचित्ताकर्षके, यतः कमलपत्रवत् परमसुन्दरे, दृष्टिमात्रेण सर्वतापहरे, परमामोदके चाक्षिणी यस्य तस्मिन्निति तत्साक्षात्सन्दर्शनार्थमित्यर्थः। संन्यस्ताखिलराधसः सन्न्यासिवत् परित्यक्ताशेषविषया इति, श्रीमदुद्धवागमनात् प्राक् श्रीकृष्णस्यागमनाशया तत्प्रीत्यर्थमत्यक्तविषयाणां तेषां व्रजवासिनां पश्चादुद्धवागमनेन तस्यागमने प्रायो निराशतया दीर्घविरहविह्वलतया वा, स्वदेहदैहिकाद्यशेषोपेक्षणात्। अन्यत्तैर्व्याख्यातम्। यद्वा, स्वेषु यत् प्रेम तेन गद्गदया, गोपैः पृष्टश्च कच्चिदित्यादिना वक्ष्यत्येव। अन्यत् समानम् ॥ ६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पितरौ यशोदानन्दगोपौ ॥ २–१० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ प्रत्येकं रामकृष्णयोश्चेष्टितानि वर्णयति—बलभद्र इति। हे कुरुश्रेष्ठ सुहृद्दिदृक्षुरिति समस्तं पदं सुहृदो बन्धून् द्रष्टुमिच्छुः तत्र हेतुरुत्कण्ठः प्रेमयुतः तद्विषयाभिलाषयुतो वा ॥ १ ॥ परिष्वक्त इति। आलिङ्गितः पितरौ यशोदानन्दगोपौ

अभिवाद्य प्रणम्य ताभ्यामाशीर्भिरभिनन्दितश्च ॥ २ ॥ तदेवाह—चिरमिति । हे दाशार्ह ! हे जगदीश्वर ! इदं सम्बोधनद्वयं हेतुगर्भं जगदीश्वरत्वात् स्वाश्रितसंरक्षणार्णं दाशार्हेष्वतीर्णत्वाच्च सानुजस्त्वं नोऽस्मान् चिरं पाहि चिरमात्मरक्षाप्रार्थनयैव तयोर्दीर्घायुष्ट्वादिकं सर्वं प्रार्थितप्रायमेव तेन विना तदनुपपत्तेरित्याशयेनं चिरं पाहीत्युक्तम् । इतीति । आदिश्यास्य नेत्रैर्नेत्रजैर्जलैः हर्षजलैस्सिषिचतुः स्नपयामासतुः ॥ ३ ॥ गोपवृद्धानिति । ततो गोपवृद्धांश्चाभिवन्द्येति शेषः । यविष्ठैः न्यूनवयस्कैरभिवन्दितः किञ्च यथावय इति अथ ततो हास्यादिभिः आदिशब्देनालिङ्गनादिसङ्ग्रहः आत्मनः स्वस्य वयः सख्यसम्बन्धानुरूपं गोपान् समुपेत्य उपविवेश इति शेषः । विश्रान्तमिति सार्द्धमेकान्वयम् अनामयमारोग्यं पृष्ट्वा कमलपत्राक्षे कृष्णे संन्यस्ताः सम्यक् निहिता राधसः बुद्धयो यैस्ते कृष्णैकप्रवणचित्ता इत्यर्थः । प्रेम्णा गद्गदया गिरा परिपप्रच्छुः ॥ ४-६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भगवच्छिक्षितकेशाविष्टस्य शेषावतारस्य बलभद्रस्य हरिमाहात्म्याविनाभूतं माहात्म्यं वर्णयत्यनेन प्रारीप्सितेनाध्यायत्रयेण, तत्र प्रथमे यमुनामदहरणलक्षणं विक्रमं वक्तुं बलस्य गोकुलगमनं वक्ति, द्वितीये द्विविदवधलक्षणं तृतीये कौरवगर्वनिर्वापणार्थं तत्पुराकर्षलक्षणं वक्तुं दुर्योधनसुताहरणं वक्ति ॥ १ ॥ पितरौ यशोदानन्दगोपौ ॥ २ ॥ इति समाप्ताभिवादनादिकर्माणं तं राममङ्कमारोप्य नेत्रैश्चक्षुर्नाडीनिर्गतैः "नेत्रं नाड्यान्तरोर्मूले" इति यादवः ॥ ३ ॥ यविष्ठैः कनिष्ठैः॥ ४॥ हास्येन मन्दस्मितेन हस्तग्रहेण आदिशब्देन परिरम्भणादिकं गृह्यते ॥५॥ संन्यस्ताखिलराधसः समर्पितसमस्तसम्पदः ॥६-८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

बलभद्र इत्यत्र कृष्णस्यानुमते स्थित इत्यपि श्रीहरिवंशाल्लभ्यते । तथाहि—

"कदाचित्त्वथ कालस्य स्मृत्वा गोपेषु सौहृदम् । जगामैको व्रजं रामः कृष्णस्यानुमते स्थितः" ॥

इति । तेन सह स्वागमनस्य सम्प्रत्ययोग्यतायां । तत्तद्व्रजस्थसान्त्वनार्थं तमेकमेव श्रीकृष्णः स्वयमनुगतवानिति भावः ॥ १-२ ॥ सानुजस्त्वं जगदीश्वरस्सन् चिरं सर्वदैवास्मान् पाहीत्याशिषं ददे । तत्र सानुज इति ज्येष्ठत्वमानेन । तथा स्वस्य तस्मिन् पुत्रभावाधिक्येऽपि दाशार्हेति श्रीवसुदेवेन सह स्वाभेदविवक्षया सा चातिस्नेहेन अथ तद्दिनानन्तरे दिने इत्यर्थः ॥ ३-४ ॥ हास्यहस्तग्रहौ वयस्यानाम् उद्धवागमनोक्तयुक्तिरीत्या रहसि तेषां मुहुः तदागमनस्फूर्त्तेः मिथो हर्षोदयात् आदिग्रहणात् पितृवर्गादीनां वन्दनादयो ज्ञेयाः ॥ ५-८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पञ्चषष्टितमे रामो गोष्ठं गत्वा स्वबन्धुभिः । मिलितः स्वीयगोपीभी रेमे कृष्णां चकर्ष च ॥

बलभद्र इति । ननु प्रेममहोदधिः कृष्णः कथं व्रजं न ययाविति चेदुच्यते "प्रेयसीः प्रेमविख्याताः पितरावतिवत्सलौ। प्रेमवश्यश्च कृष्णस्तांस्त्यक्त्वा नः कथमेष्यति ॥ मत्वैव यादवः प्रत्यवध्नन् हरेर्गतौ । व्रजप्रेमप्रवर्द्धिस्वलीलाधीनत्वमीयुषः" ॥ ननु तर्हि बलदेवोपि स्वप्राणप्रेष्ठभ्रातरं कृष्णं त्यक्त्वा एकाक्येव गन्तुं नार्हति तत्राह—उत्कण्ठः अत्युत्कण्ठचुलुकितधैर्य्यविवेकादिरित्यर्थः ॥ १ ॥

नित्यानन्दस्वरूपोपि प्रेमतप्तो व्रजौकसाम् । ययौ कृष्णमपि त्यक्त्वा यस्तं रामं मुहुः स्तुमः ॥

गोपीभिर्मातृवयस्याभिः पितराविति तस्य तयोश्च भावानुसारेणोक्तम् अभिनन्दितो बभूव ॥ २ ॥ सानुजोपि त्वं जगदीश्वर इति सर्वत्र श्रूयसे तदपि वृद्धौ स्वमातापितरावावां न पालयसि कथमित्युक्त्वा प्रथमं नन्दस्ततो यशोदा च बलादङ्कमारोप्य सचुम्बनमालिङ्ग्य नेत्रैः नेत्रजैः ॥ ३ ॥ गोपवृद्धानभिवाद्य यविष्ठैरभिवन्दितो बभूवेत्यन्वयः यथावय इति वय आद्यनुरूपं गोपालान् हास्यहस्तग्रहालिङ्गनादिभिः समुपेत्य तत्समीपगमनादिना मिलित्वा विश्रान्तं भोजनानन्तरं कृतशयनं पुनश्च सुखमासीनं तम् अनामयं कुशलं पप्रच्छुः तेन रामेणापि स्वेषु गोपेषु वा प्रेम्णा गद्गदा गीः तया ते गोपाः कुशलं पृष्टाः ते गोपाश्च कृष्णे सम्यक् प्रकारेण न्यस्तान्यर्पितान्यखिलस्य देहादिव्यवहारस्य राधांसि सिद्धयो यैस्ते कृष्णगमनदिनमारभ्य तेषां स्वाभाविक्योपि शयनभोजनादिक्रियाः नैव सिद्धयन्तीत्यर्थः ॥ ४-६ ॥

गूढार्थदीपिनी

पञ्चषष्टितमे गोपीर्नन्दयन् व्रजमागतः । क्रीडार्थेऽनागतां रामः कालिन्दी माचकर्ष च ॥ १ ॥

परिष्वक्तः आलिङ्गितः ॥ १-२ ॥ नेत्रैः नेत्रजैः जनैः प्रेमाश्रुभिः ॥ ३ ॥ गोपेति त्रयम् । गोपवृद्धान् विधिवत् अभिवन्द्य स्वयं यविष्ठैः कनिष्ठैः अभिवन्दितो बभूव । अथ पुनश्च तान् समुपेत्य उपविवेश ततश्च तेन रामेण पृष्टाः गोपा आसीनं रामं स्वेषु यादवेषु अनामयं कुशलं पप्रच्छुरित्यन्वयः । कथंभूताः कृष्णे निमित्ते समर्पितानि राधांसि कर्मफलानि सकलेन्द्रियव्यापाराः वा यैस्ते ॥ ४-६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अथ कालिन्द्याकर्षणादिकं बलचरितं पौण्ड्रकवधादिकं श्रीकृष्णचरितञ्च पृथमाह—तत्र पञ्चषष्टितमे कालिन्द्याकर्षणं बलचरितमाह—बलभद्र इति ॥ १–३ ॥ गोपवृद्धांश्चाभिवाद्येति शेषः। यविष्ठैरभिवन्दितो बभूवेत्यर्थः। किञ्च आत्मनो यथावयः यथासख्यं यथासम्बन्धं हास्यादिभिर्गोपान् समुपेत्य आसीनो बभूवेति शेषः ॥ ४ ॥ **ते** च रामेण पृष्टाः कृष्णसन्यस्ताः निहिताः अखिलराधसः सर्वेन्द्रियवृत्तयो **यैस्ते** कृष्णैकप्रवणेन्द्रियवृत्तयः सुखासीनं राम स्वेषु यादवेषु अनामयं पप्रच्छुरित्यन्वयः ॥ ४–६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

विशेषे सात्त्विके रोधे तामसादिविभागतः। पूर्वं राजसमापन्नाः सत्त्वभावं तथानयत् ॥ १ ॥
तेषां सात्त्विकरूपाणां सकामत्वाद्बलेन हि। निरोधं कारयामास षोडशे तन्निरूप्यते ॥ २ ॥
ततः स्वरूपभावानां दुष्टानां दोषनुद्धरिः। प्रसङ्गादिदमत्रोक्तं वाराणस्यास्तु दाहनम् ॥ ३ ॥
बलस्तामसभावानां राजसानां तथैव च। सात्त्विकानां तथा मानखण्डकः सुनिरूप्यते ॥ ४ ॥
ततः स्त्रीणां तु भगवान् एकेनैव करिष्यति। समारूह्य एकत्र धर्मिणः पृथगीरिताः ॥ ५ ॥
एवं प्रमेयबलतो निरोधः पञ्चधा भवेत्।

पूर्वाध्याये सात्त्विका निषिद्धात् व्यावर्तिताः। षोडशे त्वध्याये लौकिकात् सात्त्विकभावमापादिताः गोपिका निरुध्यन्ते। ततो वैदिकादपि काशीदाहे निरोधं वक्ष्यति। ततः अशास्त्रभक्तेः द्विविदादीनाम्। ततो भीष्मादीनां शास्त्रभक्तेश्च। ततः शास्त्रप्रवर्तकस्य नारदस्यापि मुख्यभावात्। स्वशक्तिर्द्विधा स्थापितेति साधनशक्तिरूपो बलभद्रः गोपिकानां निरोधं कृतवानिति निरूपणार्थं गोकुले बलभद्रगमनादिकमुच्यते। **बलभद्रः कुरुश्रेष्ठेति**। विश्वासार्थं सम्बोधनम्। भगवानिति निरोधोऽन्यकर्तव्यो न भवतीति साधनरूपो भगवांस्तत्राविष्ट इति भगवान्। **रथमास्थितः**, न तु पूर्ववद्गुप्तः। **सुहृद्दिदृक्षुः** नन्दादिदर्शनेच्छया। पूर्वभावमापन्नान्। **तदर्थपरमोत्कण्ठायुक्तः** नन्दगोकुलं प्रययौ। तेषां निरोधस्तत्र कर्तुं शक्य इति तत्र गतः ॥१॥ पूर्वं तदासक्तिद्वारा पश्चाद्भगवदासक्तिः सुलभेति प्रथमं लौकिकप्रकारेणैव तदासक्तिमाह **परिष्वक्तश्चिरोत्कण्ठै**रिति। गोपानां गोपीनां एक एवपरिचयलक्षणो भाव इति सह निरूपणम्। **गोपीभिरेवे**ति। द्वयोरपि गोपैरालिङ्गितम्, परं वस्तुतो गोपीभिरेवालिङ्गितः। चकारान्नन्दयशोदाभ्याम्। तत्कृत्यमुक्त्वा बलभद्रकृत्यमाह **रामोऽभिवाद्य पितरा**विति। पितृत्वमेव स्थापितमिति नान्यः शब्दो निरूपितः। तौ वैश्यावपि आशीर्भिरेवाभिनन्दितः ताभ्याम् ॥ २ ॥ पूर्वनिरोधस्य गमने उत्तरत्र क्रियमाणो व्यर्थः स्यादिति पूर्वसम्बन्धस्तथैव स्थित इति निरूप्यते **चिरं नः** पाहि दाशार्हेति। अस्मान् चिरं परिपालय। यतस्त्वं दाशार्हः। उभयोरेव पुत्रभाव इति **सानुज** इत्युक्तम्। कृष्णसहितः। **जगदीश्वर** इति। पूर्वं माहात्म्यज्ञानं वृत्तमनूद्यते। लौकिकोऽपि स्नेहः पूर्वसिद्ध एव प्रकटीकृत इत्याह **इत्यारोप्ये**ति। अङ्कमारोप्य प्रौढमपि बालकमेव मत्वा, आलिङ्ग्य नेत्रजैः सिषिचतुः। बलमिति सर्वाङ्गम्, अन्यथा शिखा अनुक्ता एव समागच्छेयुः ॥ ३ ॥ आवश्यकानां प्रणिधानमुक्त्वा अनावश्यकानामाह **गोपवृद्धांश्च विधिवदि**ति। विधिर्गोत्रोच्चारणपूर्वकमभिवादनम्। रामापेक्षया यविष्ठैश्चाभिवादितः। ज्ञातेऽपि माहात्म्ये लौकिकभावस्थापनं निरोधान्तरङ्गम्। **यथावयो यथासख्यं यथासम्बन्ध**मिति कालान्तःकरणदेहधर्माणामनतिक्रम उक्तः। **आत्मन** इति। यद्यपि ते सर्व एव माहात्म्यज्ञानाद्भगवद्भावमेव मन्यन्ते, तथापि स्वयं यथा तान्मन्यते, तथा कृतवानित्यर्थः ॥ ४ ॥ **समुपेत्य** सम्यक् मिलित्वा अभिवादित इति पूर्वेण सम्बन्धः। अथ गोपालान् हास्यहस्तग्रहादिभिः यथायोग्यमभिवादितवानिति अर्थवशाद्विपर्ययेण योजनीयम्। हीनेषु हस्तग्रहः, समेषु हास्यम्, उत्तमेष्वभिवादनमिति। एवं कायिकमुपसंहरन् वाचनिकमाह **विश्रान्तं सुखमासीनं पप्रच्छु**रिति। ज्येष्ठा अपि सन्तीति आसीनमित्युक्तम्। परितः सर्वत उपागताः, न तु कश्चिदपि तत्रोपेक्षां कृतवानित्यर्थः ॥ ५ ॥ प्रथमं लौकिकमाह **पृष्ट्वाथानामयं तेष्विति**। पर्युपागताः प्रथमतः अनामयं पृष्ट्वा, **अथ** भिन्नप्रक्रमेण, प्रेमगद्गदया गिरा पप्रच्छुरिति संबन्धः। अयं विशेषो यद्यपि सर्वेषाम्, तथापि विशेषमाह। **तेषु** ये कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः। सर्वा एव सिद्धयो लौकिका वैदिकाश्च भगवत्येव स्थापिताः। तत्र हेतुः **कमलपत्राक्ष** इति। दृष्टैव सर्वतापनाशं मोहं च सम्पादयतीति ॥ ६ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः। हे कुरुश्रेष्ठ भगवान् बलदेवो रथमारूढः सुहृदो द्रष्टुमिच्छुः उत्कंठः समुत्सुको नंदस्य गोकुलं प्रजगाम॥१॥ चिरमुत्कंठा येषां तैर्गोपैर्गोपीभिश्च परिष्वक्तो मिलितो रामः पितरौ यशोदानंदौ अभिवाद्य प्रणम्य ताभ्यामाशीर्भिरभिनंदितोऽभूत् ॥ २ ॥ हे दाशार्ह सानुजः कृष्णसहितः जगतामीश्वरस्त्वं नोऽस्मान् चिरं बहुकालं यथा भवति तथा पाहि रक्ष इति हेतोरंकमारोप्य नेत्रैः वर्णलोपस्यार्षत्वात् नेत्रजैर्जलैः स्नापयांचक्रतुः ॥ ३ ॥ गोपेषु वृद्धांश्चाभिवाद्य विधिवत् यविष्ठैः कनिष्ठैर-

भिवंदितोऽभूत् आत्मनः स्वस्य वयोवस्थामनतिक्रम्य सख्यं संबंधं च ॥ ४॥ समुपेत्य समागम्य गोपालान् गोपान् हास्यकरग्रहादिभिः पूर्वान्वयी परित उपागतास्ते विश्रांतं विखेदं सुखमासीनं रामं पप्रच्छुः ॥ ५ ॥ पूर्वं रामेण अनामयं कुशलं स्वेषु आत्मीयेषु पृष्टाः कमलपत्राक्षे पद्मदलनेत्रे कृष्णप्राप्त्यर्थं संन्यस्ताखिलराधसः त्यक्त सर्वक्रिया निवृत्तिपराः ॥ ६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

षोडशेऽध्याये। पूर्वाध्यायान्ते सामान्यनिरोध उपसंहृतः। अतः परं विशेषनिरोधः पञ्चाध्याय्या अर्थ इत्याशयेनाहुः **विशेषे** इति। एतादृशरोधे वक्तव्ये सति **तन्निरूप्यत** इत्यग्रिमेणान्वयः। तामसप्रकरणे तामसत्वं निवर्त्य राजसत्वं सम्पादितवान्, ततो राजसप्रकरणे तदपि निवर्त्य सात्त्विकत्वं सम्पादितवान्, ततः सात्त्विकप्रकरणे निर्गुणत्वम्, ततो मुक्तिस्कन्धे मुक्तिमिति विभागो निबन्धे निरूपित इति **तादृशविभागाद्धेतोः पूर्वं तामसप्रकरणे** राजसं भावमापन्नाः, ततः **सत्त्वभावम्**, तथा राजसभावनिवर्तनप्रकारेणानयदिति पूर्वानुवादोऽग्रिमनिरूपणार्थमुक्तः। **तेषा**मिति। सात्त्विकत्वं प्राप्तानां तेषां सकामत्वाद्धेतोर्बलेन निरोधं कारयामास। कामस्य तामसत्वात् सङ्कर्षणस्य च तथात्वात्तद्द्वारैव तादृशानां निरोध इति भावः। एतेन निष्कामत्वे सिद्धे कुरुक्षेत्रप्रसङ्गे स्वयं निर्गुणत्वं सम्पादयिष्यतीति प्रकरणसङ्गतिः। **विशेषनिरोधप्रकरणे** प्रथमाध्यायार्थमुक्त्वा द्वितीयाध्यायार्थमाहुः **तत** इति। स्वरूपमात्रे भावो येषां तादृशाः पौण्ड्रकादयः, परन्तु दुष्टा इति तेषां दोषनुज्जात इति शेषः। दोषमात्रं निवर्तनीयम्। **सारूप्यं** तु स्वरूपभावत्वात्सिद्धमेवेति भावः। **बल** इति। यमुनाया द्विविदादीनां भीष्मादीनां च मानखण्डक इत्यर्थः। पञ्चमाध्यायार्थमाहुः **तत** इति। नारदबोधनार्थं पत्नीनां विशेषतो निरोधं रमणं करिष्यतीत्यर्थः। पूर्ववद्धर्मिनिरूपणमत्राप्याशङ्क्याहुः **सप्तमा** इति। धर्मधर्मिप्रकारेण निरूपणे सप्तमा इत्यर्थः। उपसंहरन्ति **एव**मिति। विशेषप्रकारेण निरूपणे पञ्चधा। पूर्वाध्यायोक्तं सामान्यनिरोधमप्यादाय तु षोढेति भावः। **वैदिकावपी**ति। सात्त्विकभावमापादितानामिति शेषः। अशास्त्रभक्तेः **शास्त्रभक्ते**रित्यपि पञ्चमी। ततः सात्त्विकभावमापादितानां द्विविदादीनां भीष्मादीनां चेत्यर्थः। **शास्त्रप्रवर्तकस्येति**। स्वत एव सत्त्वभावयुक्तस्येत्यर्थः। **मुख्यभावा**दिति। भगवत एव साधनफलरूपत्वं मुख्यो भावस्तस्माद्द्वैविध्यं स्यमन्तकप्रसङ्गे स्थापितम्। पूर्वं स्वस्यैव साधनरूपत्वात्स्वयमेव निरोधं कृतवान्, अधुना तु साधनशक्तेर्विभागाद्बलद्वारा कारयामास। ततः सकामत्वे निवृत्ते फलरूपः स्वयं कुरुक्षेत्रप्रसङ्गे निरोधं करिष्यतीति भावः। **बलभद्र** इत्यत्र। **पूर्वव**दिति। भ्रमरगीतप्रसङ्गवदित्यर्थः। **पूर्वभाव**मिति। सात्त्विकत्वमित्यर्थः। **उत्तरभाव**मिति। नैर्गुण्यमित्यर्थः। तत्र **गतस्ये**ति। रामस्य तत्र गतस्य सतः पूर्वं रामासक्तिद्वारा पश्चाद्भगवदासक्तिः सुलभा भवति। रामस्याधुना तदाविष्टत्वादितिभावः। **परिष्वक्त** इत्यत्र। **गोपै**रिति। एतैरप्यालिङ्गनं तु कृतम्, परन्तु वस्तुतो गोपीभिरेव परिष्वक्तः। आलिङ्गनं सम्पन्नं तासामेव, तथाधिकारादित्येवकारार्थ उक्तः। **द्वयोरपि**। आविष्टावेशिनोरपीत्यर्थः। **विश्रान्त**मित्यत्र। **ज्येष्ठा अपी**ति। ज्येष्ठानामपि तत्र विद्यमानत्वात्स्थितिरेव, न तु शयनमित्यर्थः। प्रथममिति। गोपीप्रश्नात्प्रथममन्यप्रश्नमित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गोपीभी रममाणेन पञ्चषष्टितमे व्रजे। बलभद्रेण कालिन्द्याः कर्षणं विनिरूप्यते ॥ १ ॥

एवं श्रीकृष्णचरितं निरूप्य रामचरितं निरूपयति—बलभद्र इति। हे कुरुश्रेष्ठ ! सुहृदो नन्दादीन् बन्धून् द्रष्टुमिच्छुः, तत्र हेतुमाह—उत्कण्ठ इति। उत्कण्ठा तेषु प्रेम तद्युक्तः अतो रथमास्थितो बलभद्रो नन्दगोकुलं प्रययौ। स्वातन्त्र्यं सूचयन्नाहभगवानिति ॥ १ ॥ चिरोत्कण्ठैः बहुकालदर्शनादीच्छायुक्तैर्गोपैर्गोपीभिश्च परिष्वक्तः आलिङ्गितः रामो पितरौ यशोदानन्दौ अभिवाद्य प्रणम्य ताभ्यामाशीर्भिरभिनन्दितो बभूव ॥ २ ॥ तदेव दर्शयति—चिरमिति। हे दाशार्ह ! सानुजः अनुजेन कृष्णेन सहितस्त्वं नोऽस्मान् चिरं बहुकालं पाहि पालय। ननु 'पुत्रे चिरं जीवेति वक्तव्ये तद्विपरीतं कथमुच्यते' इत्याशङ्क्य तत्र हेतुं सूचयन् संबोधयति—जगदीश्वरेति। इत्येवमुक्त्वा तमङ्कमारोप्य आलिङ्गनं च कृत्वा नेत्रैर्जलैः आनन्दाश्रुभिः सिषिचतुः ॥ ३ ॥ ततो गोपवृद्धांश्च विधिवदभिवन्द्येति शेषः। यविष्ठैर्न्यूनवयस्कैरभिवन्दितो बभूव। ततो हास्यादिभिः आत्मनः स्वस्य वयःसख्यसम्बन्धानुरूपं गोपालान् समुपेत्य उपविवेशेति शेषः। आदिपदेन आलिङ्गनादिसङ्ग्रहः ॥ ४ ॥ ततश्च विश्रान्तं गतश्रमं अतएव सुखं यथा भवति तथाऽऽसीनं रामं परित उपागतास्तेनानामयं पृष्टा गोपाः प्रेम्णा गद्गदाक्षरया गिरा स्वेषु यादवेष्वनामयं पप्रच्छुरिति द्वयोरन्वयः। प्रश्ने हेतुमाह—कमलपत्राक्षे कृष्णे तत्प्राप्त्यर्थं न्यस्ताखिलराधसः परित्यक्तसर्वविषया इति। तदेकचित्ता इत्यर्थः ॥ ५–६ ॥

अन्वितार्थप्रकाशिका

पञ्चषष्टितमे रामो व्रजगोपीररीरमत् ॥ मदाच्चकर्ष यमुनां तत्र श्लोका गुणाग्नयः (३३) ॥
उवाचेत्येक (१) मर्द्धाढ्यास्त्रयस्त्रिंशदनुष्टुभः (३३ ॥) ॥ ५६ ॥

बलभद्र इति ॥ हे कुरुश्रेष्ठ ! सुहृदो नन्दादीन् बन्धून् द्रष्टुमिच्छुः भगवान् बलभद्र उत्कण्ठः प्रेमयुक्तः अथो रथमास्थितो नन्दगोकुलं प्रययौ अत्रैतावन्तं कालं सहैव स्वगमनेच्छया कृष्णेन नानुज्ञातः कृष्णोऽपि नन्दादिप्रेमबन्धात्तत्रैव तिष्ठे-

दिति शङ्कया वासुदेवादिभिर्नानुज्ञातः अधुना तु कृष्णेन स्वागमसंदेशगोपनाय एकाकी प्रस्थापित इति ॥ १ ॥ परिष्वक्त इति चिरोत्कण्ठैः बहुकालं दर्शनादीच्छायुक्तैर्गोपैर्गोपीभिश्च मातृवयस्याभिः परिष्वक्तः आलिङ्गितः रामोऽपि पितरौ यशोदानन्दौ अभिवाद्य प्रणम्य ताभ्यामाशीर्भिरनन्दितो बभूव ॥ २ ॥ तदाह—चिरमिति ॥ हे जगदीश्वर ! हे दाशार्ह ! सानुजः अनुजेन कृष्णेन सहितस्त्वं नोऽस्मान् चिरं बहुकालं पाहि पालय । इत्येवं शौर्यैश्वर्यादिसूचिकामाशिषमुक्त्वा तमङ्कमारोप्यालिङ्गनं च कृत्वा नेत्रजैर्जलैः आनन्दाश्रुभिः सिषिचतुः ॥ ३ ॥ गोपेति त्रयम् ॥ ततो गोपवृद्धांश्च विधिवदभिवन्द्येति शेषः । यविष्ठैर्न्यूनवयस्कैरभिवन्दितो बभूव । ततो द्वितीयदिने हास्यादिभिः आत्मनः स्वस्य वयः सख्यसंबन्धानुरूपं गोपालान् समुपेत्य उपविवेशेति शेषः । आदिपदेन आलिङ्गनादिसङ्ग्रहः । ततश्च विश्रान्तं गतश्रमम् अत एव सुखं यथा भवति तथाऽऽसीनं रामं कमलपत्राक्षे कृष्णे तत्प्राप्त्यर्थं संन्यस्ताखिलराधसः परित्यक्तसर्वविषया इति तदेकचित्ताः परित उपागतास्तेनानामयं पृष्टा गोपाः प्रेम्णा गद्गदाक्षरया गिरा स्वेषु यादवेष्वनामयं पप्रच्छुः ॥ ४–६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इदानीं पंचषष्टितमेऽध्याये रामस्य गोकुलगमनं यमुनाकर्षणं च वर्णयति उत्कंठः प्रेमोद्रिक्तः ॥ १ ॥ चिरोत्कंठैः बहुकालतोमेलनाभियुक्तैः गोपीभिरपि आशीर्भिः अभिनंदितः ॥ २–३ ॥ गोपवृद्धांश्चाभिवंद्य । आत्मनः स्वस्य यथा संबंधं तान्सत्कुर्वन् तैः सत्कृतः ॥ ४ ॥ रामं प्रतिकुशलं पप्रच्छुः ॥ ५ ॥ किंच रामेणापि स्वेषु व्रजवासिषु अनामयं प्रतिपृष्टास्संतः कृष्णे न्यस्तान्यर्पितानि अखिलानि राधांसि समृद्धयो यैस्ते प्रेमगद्गदया गिरा यादवानां कुशलं पप्रच्छुः ॥ ६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आगतो गोकुलं रामः पञ्चषष्टितमेऽकरोत् । गोपीभी रममाणः सन् मदाद्याम्या विकर्षणम् ॥ १ ॥

अथ रामकृष्णयोश्चेष्टितानि पृथक् विवर्णयिषुर्मुनिरादौ रामचेष्टितानि वर्णयति ॥ बलभद्र इति ॥ हे कुरुश्रेष्ठ, सुहृद्दिदृक्षुः सुहृदो बन्धून् द्रष्टुमिच्छुः, उत्कण्ठः प्रेमयुतः, बलभद्रः भगवान्, रथं आस्थितः रथारूढः सन्नित्यर्थः । नन्दगोकुलं, प्रययौ ॥ १ ॥ परिष्वक्त इति ॥ चिरोत्कण्ठैर्बहुकालातीतत्वाद्दर्शनोत्कण्ठावद्भिः, गोपैः गोपीभिश्च, परिष्वक्तः आलिङ्गितः एव, ततः रामः, पितरौ यशोदानन्दौ, अभिवाद्य, यदा स्थितस्तदा पितृभ्यामिति शेषः । आशीर्भिः जय जीवेत्याद्याशीर्वचनैः, अभिनन्दितः, आसीत् ॥ २ ॥ चिरमिति ॥ हे दाशार्ह, हे जगदीश्वर, इदं संबोधनद्वयं हेतुगर्भम् । तत्त्वात्, सानुजः अनुजेन कृष्णेन सहितः सन्, नोऽस्मान् चिरं पाहि, इत्येवं, आदिश्य, आलिङ्ग्य परिष्वज्य च, नेत्रैर्नेत्रोद्भवैः, जलैः प्रेमाश्रुभिः, तं सिषिचतुः ॥ गोपवृद्धानिति ॥ ततः, गोवृद्धांश्च, विधिवत्, अभिवन्द्य स्थितः स इति शेषः । यविष्ठैर्न्यूनवयस्कैश्च, अभिवन्दितोऽभिवादितः, अथ ततः, यथासख्यं, आत्मनः यथासंबन्धं, गोपालान् समुपेत्य, हास्यहस्तग्रहादिभिः, संमान्य च उपविवेशेति शेषः ॥ ४ ॥ विश्रान्तमिति । विश्रान्तं, सुखं आसीनं, पर्युपागताः परितः संवेष्ट्य स्थिताः, स्वेषु अनामयं पृष्टा बलदेवेन गोपेषु कुशलमनुयुक्ताश्च, कमलपत्राक्षे कृष्णे, कमलदलसमनयनश्रीकृष्णप्राप्त्यर्थमित्यर्थः । संन्यस्ताखिलराधसः संत्यक्तसर्वविषया गोपाः, प्रेमगद्गदया गिरा, इति पप्रच्छुः ॥ ५ ॥ अथ प्रश्नमनुवदति ॥ कच्चिदिति ॥ हे राम, सर्वे नोऽस्माकं, बान्धवाः कुशलं यथा तथा, आसते कच्चित् । हे राम, यूयं दारसुतान्विताः सन्तः, नोऽस्मान्, स्मरथ कच्चित् ॥ ६ ॥

कृष्णप्रिया

श्रीशुकदेव जी मुनिराज ने कहा—राजन् ! भगवान् श्री दाऊदयाल जी के हृदय में व्रजराय श्री नन्दरायजी एवं अन्य स्वजन स्नेहीजनों से मिलने की उत्कट उत्कण्ठा हुई । आप इस इच्छा से रथारूढ़ होकर द्वारिका से नन्दगाँव गोकुल की ओर पधारे ॥ १ ॥ यहाँ नन्दगाँव गोकुल में रहने वाले गोपजन एवं गोपिकावृन्द श्रीराम श्रीकृष्ण जी से मिलने को चिरकाल से लालायित थे । गोपजनों ने अपने निकट बलभद्रजी को प्राप्त कर बड़े चाव से अत्यन्त उमङ्ग से कण्ठ से लगाये । श्री दाऊदयालजी ने माता श्री यशोदाजी को एवं पितृपाद श्रीनन्दरायजी को पादस्पर्श करके प्रणाम किये । नन्दबाबा एवं यशोदाजी ने भी आशीर्वाद और अभिनन्दन किया ॥२॥ अभिनन्दन करते हुए नन्दरायजी आदि स्वजनों ने कहा बलभद्रजी ! आप तो जगदीश्वर ही हो । आप एवं लघुबन्धु भगवान् कृष्णचन्द्रजी के साथ निरंतर हमारी रक्षा करते रहो । माता-पिता ने ऐसा कहते हुए अपने उत्सङ्ग में बैठाकर स्नेहाश्रुओं से भिगो दिये ॥ ३ ॥ पुनः जो बुजुर्ग गोपजन थे उन सबको श्री बलभद्रजी ने प्रणाम किया और जो छोटे छोटे गोपजन थे उन लोगों ने श्री बलरामजी को विधिवत् नमस्कार किये । सब व्रजजन अपनी वय मेल-जोल के और स्नेह सम्बन्ध के अनुकूल सबसे मिले जुले ॥ ४ ॥ श्री बलभद्र जी गोपाल बालकों के समीप आये किसी से हस्तधूनन किया, किसी से मधुर-मधुर वार्तालाप किया, किसी को हास्य पुरःसर समालिङ्गन दिया । पुनः श्री बलराम जब श्रममुक्त बने तब विराम के लिए जब विराजे तब सब व्रजजन उनके समीप पहुँचे । इन अनन्य भक्तजनों ने कमललोचन

प्रियतम भगवान् श्रीकृष्ण के लिए ऐहिक सुख-वैभव-भोगविलास और पारलौकिक स्वर्ग मोक्ष पर्यन्त सर्व पदार्थों को त्याग दिया ऐसे समर्पित जन थे । पुनः कृपानिधान श्री बलभद्रजी ने उन भक्तजनों के एवं उनके पारिवारिक कुटुम्बियों के सम्बन्ध में कुशल प्रश्न पूछे, तब सब व्रजजनों ने प्रेममधुरवाणी से श्री बलभद्रजी से प्रश्न किया ॥ ५–६ ॥

कच्चिन्नो बान्धवा राम सर्वे [1]कुशलमासते । कच्चित् स्मरथ नो राम यूयं दारसुतान्विताः ॥ ७ ॥
दिष्ट्या कंसो हतः पापो दिष्ट्या मुक्ताः सुहृज्जनाः । निहत्य निर्जित्य रिपून् दिष्ट्या दुर्गं समाश्रिताः ॥ ८ ॥
गोप्यो हसन्त्यः पप्रच्छू रामसंदर्शनादृताः । कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ॥ ९ ॥
कच्चित् स्मरति वा बन्धून् पितरं मातरं च सः । [2]अपि वा स्मरतेऽस्माकमनुसेवां महाभुजः ॥ १० ॥

कर्दमक्षमा

अन्वयः—राम ! सर्वे, नः, बान्धवाः, कुशलम्, आसते ? दारसुतान्विताः, यूयम्, कच्चित्, नः, स्मरथ ? ॥ ७ ॥ दिष्ट्या, पापः, कंसः, हतः, दिष्ट्या, सुहृज्जनाः, मुक्ताः, रिपून्, निर्जित्य, निर्हत्य, दुर्गम्, समाश्रिताः, दिष्ट्या ॥ ८ ॥ रामसंदर्शनादृताः, गोप्यः, हसन्त्यः, पप्रच्छुः, पुरस्त्रीजनवल्लभः, कृष्णः, सुखम्, आस्ते ? ॥ ९ ॥ सः, कच्चित्, मातरम्, पितरम्, बन्धून्, वा, स्मरति ? अपि, वा, नः, स्मरति ! महाभुजः, नः, स्मरते ? अस्माकम्, अनुसेवाम्, स्मरते ॥ १० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रामस्य संदर्शनेनादृताः सादराः ॥ ९–११ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बान्धवा वसुदेवादयः । यथावयो वयआद्यनुरूपम् । गोपालान् हास्यहस्तग्रहादिभिः समुपेत्य तत्समीपगमनादिना मिलित्वा विश्रान्तं भोजनानन्तरं कृतशयनं पुनश्च सुखमासीनं तम् अनामयं कुशलं पप्रच्छुः । तेन रामेणापि स्वेषु गोपेषु या प्रेम्णा गद्गदा गीस्तया ते गोपाः कुशलं पृष्टाः । ते गोपाश्च कृष्णे सम्यक्प्रकारेण न्यस्तान्यर्पितान्यखिलस्य देहादिव्यवहारस्य राधांसि सिद्धयो यैस्ते, कृष्णगमनदिनमारभ्य तेषां स्वाभाविक्योऽपि शयनभोजनादिक्रियाः नैव सिध्यन्तीत्यर्थः । तोषिण्यान्तु–'यद्धामार्थसुहृत्प्रियात्मतनयाः' इति रीत्या पुरैव तस्मिन्नर्पितसर्वविषया अतस्तद्विरहिणां स्वतस्तदन्भिरुचिरपि तदागमनाऽशयैव तद्धारिण इत्युक्तम् । तत्र वृद्धाः पृच्छंति–कच्चिन्नोऽस्माकमिति । समानवयसः पृच्छंति—कच्चित्स्मरथ नोऽस्मानिति ॥७॥ मुक्ताः दुःखेभ्यः ॥ ८ ॥ कच्चिददितीष्टप्रश्ने । पुरस्त्रीजनवल्लभ इति साभिप्रायोक्तिः, तदर्थं योऽस्मांस्त्यक्तवानिति । गोप्यः श्रीकृष्णप्रेयस्यः । हसंत्य इत्युन्मादबोधकम्, तादृशमहाविरहदुःखे श्रीबलदेवस्याग्रे तादृशपरमलज्जावतीनां कथमन्यथा हासस्संभवेदिति । रामोऽपि तन्महाभावलक्षणमधिगम्यैव ताः संमानयामासैव न त्ववहेलयामासेत्याह—रामेण कर्त्रा संदर्शनेन स्वानुजप्रेमवत्प्रेयसीबुद्ध्या स्वकर्तृकेण सवात्सल्यदर्शनेन कारणेनादृताः । कच्चित्कृष्णस्तत्र सुखमास्ते । ननु युष्मद्विरहे तत्र तस्य कुतः सुखं तत्राहुः—पुरेति । नागरीः सुंदरीः स्त्रीः प्राप्तस्य तस्य कुतोऽस्माकं ग्राम्याणां विरहदुःखं संभवेदतः सुखं घटेतैवेति भावः ॥ ९ ॥ स कृष्णः । स्मरतीति चेत्तच्छ्रुत्वा तदागमनं संभाव्याहुः—सकृदिति । महाः पूज्या राजकन्या भुंक्ते सेवते इति महाभुजः । इगुपधत्वात्कः । अनेन राजकन्याभोक्ता कथमप्यस्मान्स्मरतीति भावः । अस्मान्मा स्मरतु नाम बंधून् पितृव्यमातुलादीन् पितरं नन्दं मातरं यशोदां च किं स्मरति न वा । श्रृंगाररसविलासेनास्मत्तस्ताः पुरस्त्रियोऽधिकात्तमधिकं सुखयन्तीति जानीम एव । किन्तु वनमालाविरचनस्थासकसंपादनकुसुमपल्लवमयव्यजनशय्योल्लोचादिनिर्माणादिषु वयं तस्य स्मृतिपथमवश्यं याम एवेत्यभिप्रायेण पृच्छन्ति—अपि वेति । स्मरते स्मरति । महाभुज इति तस्य पीनभुजयोर्भक्तिच्छेदरीत्या कुंकुमरसचर्चा न जाने सांप्रतं कीदृशी भवतीति भावः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र गोपकर्तृकप्रश्नमेव स्पष्टयंस्तेष्वतिवृद्धानां प्रश्नमाह—कच्चिन्न इति । नोऽस्माकं बान्धवा यादवाः वयस्यानां प्रश्नः कच्चित्स्मरथेति दारसुतैः सह मिलित्वेत्यर्थः । यूयमिति श्रीकृष्णापेक्षया एवं द्वयोर्भ्रात्रोः पुत्रोत्पत्तेरनन्तरमेवास्य तत्रागमनं गम्यते किन्तु दिष्ट्या कंसो हत इत्यादि वक्ष्यमाणात् सन्निहित्यावगमनेन ज्येष्ठपुत्रोत्पत्तेरिति ज्ञेयं यथोक्तं श्रीविष्णुपुराणे "विवाहात्प्रागेव कालयवनवधार्थं मथुरामागतयोस्तद्वधे वृत्ते ततः श्रीकृष्णस्य द्वारकायां गमनमस्य च गोकुले" इति तथा हरिवंशेपि गोमन्थयुद्धे प्रवृत्ते करवीरपुरे श्रृगालवधानन्तरं तयोः श्रीमथुरायामागमने सति चास्य गोकुलागमनम्" इति तत्तु

---

१. ते वै–प्रा. पा. । २. अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति–श्रीधर. वंशी. जीव. ; इदं नास्ति–वीर. विज. ।

कल्पभेदव्यवस्थया स्थाप्यमानमपि तदागते नातिविलम्बरोधने तु समवेतः स्यात् ॥ ७ ॥ पितुस्सवयसां प्रश्नः, दिष्ट्येति । ते च स्वदुःखमप्यनादृत्य तन्मङ्गलमेव बहु मन्यन्ते स्म तत्रापि सम्प्रति तत्सहायानां यादवमात्राणां मङ्गलं बहुमन्यमानाः श्रीरामकृष्णयोः कैमुत्यमानयन्ति स्म । कंसो हत इत्यादिका लीलाः क्रमश एवोक्ताः क्रमेण स्वसुखातिशयव्यञ्जनाय सुहृज्जना इति भवतोः साहाय्यकरणात् सम्प्रत्यस्माभिस्तच्छब्देनैव शंसनीया इत्यर्थः । कांश्चिन्निहत्य कांश्चिन्निर्जित्य दुर्गं समाश्रिताः यत्तदपि दिष्ट्या भद्रम् अस्माकं भाग्येनैवेत्यर्थः । अवशिष्टागमनशङ्कानिवृत्तेः अतोऽस्माकं भवतां दूरगमनमपि शङ्कानिवृत्तेः । अतोऽस्माकं भवतां दूरगमनमपि सुखायैव जातमिति द्योतितम् अन्योऽपि शेषस्तत्रैव—

"तमूचुः स्थविरा गोपाः प्रियं मधुरभाषिणः । रामं रमयतां श्रेष्ठं प्रवासात् पुनरागतम् ॥
स्वागतं वो महाबाहो यदूनां कुलनन्दन । अद्यास्म निर्वृतास्तात यत्त्वां पश्यामहे वयम् ॥
प्रीताश्चैव वयं वीर यत्त्वं पुनरिहागतः । त्रिदशानां वयं मान्या ध्रुवमद्यामलानन ॥
ये स्म दृष्टास्त्वया तात काङ्क्षमाणास्तवागतम् । तव चागमनं दृष्ट्वा सभाग्याः स्म यथा पुरा"॥

इत्यादि किञ्च—

"प्रत्युवाच ततो रामः सर्व्वांस्तानभितः स्थितान् । यादवेष्वपि सर्वेषु भवन्तो मम बान्धवाः ॥
इत्यावयोर्गतं बाल्यमिहाचैवावयोरतम् । भवद्भिर्वर्द्धिताश्चैव यास्यामो विक्रियां कथम् ॥
गृहेषु भवतां भुक्तं गावश्च परिरक्षिताः । अस्माकं बान्धवाः सर्वे भवन्तो बद्धसौहृदाः ॥

इत्यादि अत्र प्रवासात् पुनरागतमिति तदापि तस्मिन् स्वगृहसम्बन्धित्वाभिमानमेव बोधयति तत्र यदूनां कुलनन्दनेति तथाप्यस्माकमेवेति निजप्रणयव्यञ्जना त्वामित्यादौ तव चेत्युत्तरतश्चकारान्वयात् त्वामपीत्यादिस्यर्थः । श्रीकृष्णं प्रत्युत कण्ठाव्यञ्जनया तवागमनमिति तवैवास्मासु दयालुत्वमनुभूयते त्वदनुजस्य त्वौदासीन्यमेवेति दर्शितम् अथ श्रीरामवाक्ये यादवेष्वेति तेषामपि यादवत्वान्निर्द्धारणे सप्तमी शुद्धपितृभावादेः तस्यैव निश्चयाय श्रीकृष्णसाम्येनात्मानं निर्दिशति इत्यावयोरिति बाल्यं जन्मादि तस्य यथागतं तथा ममापि गतमित्यर्थः । रतं बाल्यक्रीडा बर्द्धिता इत्यादावेकत्व एव बहुत्वनिर्द्देशस्तेनात्मसम्भावनया नतु द्वित्वे श्रीकृष्णस्यापि तादृशत्वमुद्देष्टुमसुष्ठुत्वात् अन्यथा द्विवचनप्रकरणद्वर्द्धितावितोवोच्येत यादवेष्वप्याधिक्ये हेतुर्बद्धसौहृदाः स्वाभाविकत्वात् । परित्यागभ्रमेऽपि स्थिरपितृभावादय इति तेषान्तु तथा न तिष्ठेदिति भावः ॥ ८ ॥ गोप्यस्तद्विशेषाः श्रीकृष्णप्रेयस्यः ताश्च तद्वृत्तश्रवणाद्यर्थं नित्यं रहसि मिथो मिलन्त्यः श्रीमदुद्धववदन्विष्य तेनाप्येकत्र प्राप्ता इति ज्ञेयं तादृशदुःखेप्यनुवर्त्तमाने हसन्त्य इत्युन्मादबोधकं श्रीकृष्णोपहासगर्भं हास्यं कुर्वत्य इत्यर्थः । तस्य चोन्मादमयस्योत्कण्ठामयत्वात् स्वकान्तज्येष्ठमपि पप्रच्छुः टीकायां सादरा इति कृतनमस्कारादिका इत्यर्थः । यद्वा रामस्य उद्धवात् परमान्तरङ्गस्य यत्सम्यक् पूर्वपूर्वस्फूर्त्तिमयदर्शनविलक्षणत्वात् पूर्णं दर्शनं तेनादृताः श्रीकृष्णागमनादौ विश्वस्ताः तत्र स्वत्यागजातेर्ष्ययोपहसन्त्योपि शुद्धप्रेमविशेषस्वाभाव्येन तत्सुखैकपुरुषार्थत्वात् तन्मात्रं पृच्छन्ति कच्चिदिति ननु युष्माभिर्विना कथं कस्य सुखं तत्राहुः पुरेति नागरस्त्रीगणप्राप्त्या ग्राम्याबियोगे तस्य सुखं घटेतैवेति भावः ॥ ९ ॥ यद्यपि तस्य सुखेनैव किलास्माकं सुखं तथापि स्वेषु तत्कर्तृकतत्स्मरणमवश्यमपेक्ष्यमित्याशयेन तं पृच्छन्ति—कच्चिदिति बन्धून् सखीन् श्रीदामादिगोपान् वा संशये स च शोकव्यञ्जकः अपि किम् अनुसेवां निरन्तरभजनं यद्वा अनुस्मरते पुरस्त्रीभिः सह गोष्ठ्यनन्तरं प्रसङ्गाद्गौणतयापि स्मरति स्मरते इति पुनरुक्तिरार्ष्या वाशब्दः कटाक्षे महाभुज इति महापुरुषस्यैतदुचितमिति व्यज्यते वस्तुतस्तु भावविशेषोत्कण्ठया बन्ध्वादीनां त्रयाणां यथोत्तरं श्रैष्ठ्यै ततश्च बन्धून् न स्मरतु नाम पितरं तु किमहो स्मरतीत्येवं व्याख्येवं स्वेषान्तु पृथक्कृत्य पश्चादुक्तिर्दैन्येन ॥ १० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नोऽस्माकं बान्धवा यादवाः, राम हे बन्धुवर्गरमण ! इति तस्य बन्धु-वात्सल्येन पुनरपि तथैव सम्बोधनम् । दारेति तत्तदन्वितत्वेनान्येषु स्नेहोत्पत्त्या युष्माकं स्मरणयोग्या न भवाम एव, तथापि किं स्मरथ ? तच्च सम्भवेदिति सम्बोधयति—रामेति । यूयमिति श्रीकृष्णापेक्षया साक्षात्तदनुक्तिः, अनागमनेन तस्य विस्मरणशंकया तदुच्चारणाशक्तेः । एवं द्वयोर्भ्रात्रोरतयोर्विवाहात्तत्रापि पुत्राद्युत्पत्तेरनन्तरमेवास्य तत्रागमनं ज्ञेयम् । यच्चोक्तं श्रीविष्णुपुराणे विवाहात् प्रागेव कालयवनवधार्थं श्रीमथुरामागतयोस्तयोस्तद्वधे वृत्ते ततः श्रीकृष्णस्य द्वारकायां गमनमस्य च गोकुल इति । तथा श्रीहरिवंशेऽपि गोमन्तयुद्धे वृत्ते करवीरपुरे शृगालवधानन्तरं तयोः श्रीमथुरायामागमने सत्यस्य गोकुलागमनमिति; तच्च कल्पभेद-व्यवस्थया सुपरिहार्य्यमेव ॥ ७ ॥ विविधोपद्रवादिनास्मद्दौर्भाग्येन वा मास्तु वा अस्मत्स्मरणमंगलम्, तथापि युष्माकं शत्रुनिर्ज्जयादिना सुखस्थितिरेवास्माकं महामंगलमित्याशयेनाहुः–दिष्ट्येति । पाप इति वधयोग्यतोक्ता, सुहृज्जना आत्मनः सर्व्वे ज्ञातय इत्यर्थः । किंवा सुहृदो जनाश्च भृत्याः । यद्वा, अस्माकं बान्धवा यादवा मुक्ताः कंसाद्युपद्रवदुःखात् रिपून् कांश्चित् नितरां हत्वा कांश्चिच्च

निःशेषेण जित्वापि दुर्गं समुद्रपरिखत्वादिना परैर्गन्तुमशक्यं स्थानं श्रीद्वारकाख्यं सम्यक् सुहृज्जनसाहित्यादिना दृढमाश्रिता इति यत् तच्च दिष्ट्या, अनिहतानां केषाञ्चिद्दुष्टानां तेषां तत्र गमनशंकानिवृत्तेः; अन्योऽपि विशेषस्तत्रैव (श्रीहरिवंशे विष्णु० प० ४६।६-८,१०,१६)—

'तमूचुः स्थविरा गोपाः प्रियं मधुरभाषिणः। रामं रमयतां श्रेष्ठं प्रवासात् पुनरागतम् ॥
स्वागतं वो महाबाहो यदूनां कुलनन्दन। अद्य स्म निर्वृतास्तात यत्त्वां पश्यामहे वयम् ॥
प्रीताश्चैव वयं वीर यत्त्वं पुनरिहागतः। त्रिदशानां वयं मान्या ध्रुवमद्यामलानन ॥
ये स्म दृष्टास्त्वया तात काङ्क्षमाणास्तवागमम्। तव चागमनं दृष्ट्वा सभाग्याः स्म यथा पुरा ॥' इत्यादि।

किञ्च, (श्रीहरिवंशे विष्णु० प० ४६।१७-१९)—

'प्रत्युवाच ततो रामः सर्व्वांस्तानभितः स्थितान्। यादवेष्वपि सर्व्वेषु भवन्तो मम बान्धवा ॥
इहावयोर्गतं बाल्यमिह चैवावयो रतम्। भवद्भिर्वर्द्धिताश्चैव यास्यामो विक्रियां कथम् ॥
गृहेषु भवतां भुक्तं गावश्च परिरक्षिताः। अस्माकं बान्धवाः सर्व्वे भवन्तो बद्धसौहृदाः ॥' इत्यादि ॥ ८ ॥

रामस्य व्रजजनरमणस्य सम्यग् गोपवेशादिना साक्षाद्दर्शनेनादृताः सम्मानिताः प्रहर्षिता इत्यर्थः। अतो हसन्त्यः, स्मितमुपहासं वा कुर्व्वत्यः; यद्वा, रामसन्दर्शनादृता अपि, अकारप्रश्लेषेण—अहसन्त्योऽन्तःशोकभरोदयेनाप्रसन्नमुखाः सत्यः। कृष्णः परमानन्दघन इति सुखार्हतोक्ता; यद्वा, अस्मच्चित्ताकर्षकः। ननु युष्माभिर्विना कथं तस्य सुखम्? तत्राहुः—पुरस्य स्त्रीजनाः सर्व्वाः स्त्रियस्तासां वल्लभः, किंवा ता एव वल्लभा यस्य सः, नागरविदग्धस्त्रीगणप्राप्त्या वन्यविदग्धास्मद्वियोगेऽपि तस्य सुखं घटेतैवेति भावः ॥९॥ यद्यपि तस्य सुखेनैव किलास्माकं सुखम्, तथापि तत्स्मरणमवश्यमपेक्ष्यमित्याशयेन पृच्छन्ति—कच्चिदिति। बन्धून् सखीन्, श्रीदामादिगोपान्; वा संशये शोके वा, अपि किमनुसेवां निरन्तरभजनम्; यद्वा, अनुस्मरते पुरस्त्रीभिः सह गोष्ठ्यनन्तरं प्रसंगाद्गौणतयापि स्मरति, स्मरत इति पुनरुक्तिः परमदैन्येन स्मृतिमात्रापेक्षणात्। वा-शब्दः कटाक्षे; महाभुज इति व्रजरक्षार्थं केशिबधे भुजस्य वृहत्तायाः, किंवा पौर्व्विकगाढ़ालिंगनस्याभिप्रायेणेति स्मरणं सम्भावितम्। बन्धादीनां यथोत्तरं श्रैष्ठ्यम्, ततश्च बन्धून् न स्मरतु नाम, पितरन्तु किमहो स्मरतीत्येवं व्याख्येयम्। यद्वा, अत्यन्तदैन्येनोक्तत्विद्यथोत्तरं न्यूनत्वमूह्यम्। ततश्च बन्धून् स्मरत्येव, पितरं कं स्मरतीत्येवं व्याख्येयम् ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

प्रश्नमेवाह—कच्चिदिति द्वाभ्याम्। हे राम! नोऽस्माकं सर्वे बान्धवाः कुशलमासते कच्चित् दारैः सुतैरन्विताः इदं विस्मृत्यभावसूचकं विशेषणं यूयं नोऽस्मान् स्मरथ कच्चित् ॥ ७ ॥ दिष्ट्येत्यानन्दे अस्माकमयमानन्द इत्यर्थः। सुहृज्जनाः वसुदेवदेवक्यादयः मुक्ताः कंसनिर्बन्धान्मोचिताः कांश्चिद्रिपून् निहत्य कांश्चित् निर्जित्य जलदुर्गं च दुर्गं द्वारकामित्यर्थः ॥८॥ गोप्य इति। रामस्य सन्दर्शने पुनः पुनरीक्षणे आदृताः पप्रच्छुः, प्रश्नमेवाह—कच्चिदास्त इति। पुरस्त्रीजनवल्लभ इत्यनेन ग्राम्यस्त्रीष्वात्मसुतस्य प्रीत्यभावो हेतुगर्भितः ॥ ९ ॥ स कृष्णः पितरं नन्दं मातरं यशोदाञ्च स्मरति कच्चित् अपि वेति। अस्माकमनुसेवामनुवर्त्तनं स्मरते किं वा न स्मरत्येवेति भावः ॥ १० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

रामसन्दर्शनेनादृताः जातबहुमानाः ॥ ९ ॥ अस्माकमनुसेवां स्मरते न वा ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

हसन्त्य इत्युन्मादबोधकं श्रीकृष्णोपहासगर्भं हासं कुर्वत्य इत्यर्थः ॥ ९-१५ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

गोप्यो हसन्त्यः पप्रच्छुरित्यादि। गोप्योऽत्र नित्यसिद्धेतरा मुनिरूपा इति बोद्धव्यम्। हसन्त्य इत्यस्यायं भावः—प्राक् यदुत्तमोऽयमायातीति कृष्णागमनमाशङ्क्यत्वरया गताः पश्चाद्बलदेवमालोक्य स्वाभाग्यं प्रति सासूयं हसनं चक्रुः ॥ ९ ॥ यथागतं तथा निर्वाततमयुक्तमिति समयोचितमेव पृच्छन्ति—कचिदित्यादि। कचिद्बन्धून् स्मरति? बन्धुस्मरणं तु युक्तमेव। अथवा, पुरस्त्रीजनवल्लभश्चेदतो बन्धुस्मरणमपि तस्यासम्भाव्यम्। किं स्मरतीति साभ्यसूयोक्तिः। अपि प्रश्ने, वा कटाक्षे। अस्माकमनुसेवां स्मरते? महाभुज इति गाढ़ालिङ्गनपरम् ॥ १०-१३ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

गोप्यो हसन्त्यः पप्रच्छुरिति हसन्त्य इत्यस्यायं भावः—प्राक् यदूत्तमोऽयमायातीति कृष्णागमनमाशङ्क्य त्वरया गता बलदेवं वीक्ष्य स्वादृष्टं प्रति सासूयत्वेन हसनमेव चक्रुः, यथागतं तथा निर्वर्त्तितुमयुक्तमिति समयोचितं पृच्छन्ति—कच्चिदित्यादि ॥ १०-१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्र वृद्धाः पृच्छन्ति—कच्चिन्नोऽस्माकमिति । समानवयसः पृच्छन्ति स्मरथ नोऽस्मानिति ॥७–८॥ गोप्यः श्रीकृष्णप्रेयस्यः हसन्त्यः इत्युन्मादबोधकं तादृशमहाविरहदुःखे श्रीबलदेवस्याग्रे तादृशपरमलज्जावतीनां कथमन्यथाहासः सम्भवेदिति रामोपि तन्महाभावलक्षणमधिगम्यैव ताः सम्मानयामासैव नत्ववहेलयामासेत्याह—रामेण कर्त्रा सन्दर्शनेन स्वानुजप्रेमवत् प्रेयसीबुद्धया स्वकर्तृकेण सवात्सल्यदर्शनेन कारणेन आदृताः कच्चित् कृष्णस्तत्र सुखमास्ते ननु युष्मद्विरहे तत्र तस्य कुतः सुखं तत्राहुः, पुरेति, नागरीः सुन्दरीः स्त्रीः प्राप्तस्य तस्य कुतोऽस्माकं ग्राम्याणां विरहदुःखं सम्भवेत् अतः सुखं घटेतैवेति भावः ॥ ९ ॥ अस्मान् मास्मरतु नाम बन्धून् पितृव्यमातुलादीन् पितरं नन्दं मातरं यशोदां च किं स्मरति नवा। शृङ्गाररसविलासेनास्मतस्ताः पुरस्त्रियोऽधिकास्तमधिकं सुखयन्तीति जानीमः एव किन्तु वनमालाविरचनस्थासकसम्पादनकुसुमपल्लवमयव्यजनशय्योल्लोचादिनिर्माणादिषु वयं तस्य स्मृतिपथमवश्यं याम एवेत्यभिप्रायेण पृच्छन्ति, अपि चेति । स्मरते स्मरति महाभुज इति तस्य पीनभुजयोर्भक्तिच्छेदरीत्या कुङ्कुमरसचर्चा न जाने साम्प्रतं कीदृशी भवतीति भावः ॥ १० ॥

गूढार्थदीपिनी

कच्चिदिति प्रश्ने । नोऽस्माकं बान्धवाः वसुदेवादयः ॥ ७ ॥ पापः पापी अर्श आद्यजन्तः ॥८॥ गोप्य इति सार्द्धम् । आदृताः प्राप्तादराः ॥ ९ ॥ अपि किम् । महाः पूज्या राजकन्या भुङ्क्ते इति महाभुजः । इगुपधलक्षणः कः ॥ १० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रश्नमेवाह— कच्चिदिति द्वयेन ॥ ७–८ ॥ रामसन्दर्शने आदृताः सादराः ॥ ९–११ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

नन्दादीनां वाक्यान्याह **कच्चिन्नो बान्धवा रामेति** । सर्वे वसुदेवादयः कुशलमासत इति प्रसङ्गात् लौकिकमेतदुक्तम् । स्नेहं च पृच्छन्ति **कच्चित्स्मरथेति** । **नोऽस्मान्** । **रामेति** स्नेहेन सम्बोधनम् । यूयं सर्व एव **दारसुतान्विता** इति विस्मरणे हेतुः । अतः प्रश्नः सोपालम्भ इव ॥७॥ तेषां जातमभ्युदयादिकं स्वस्यात्यन्तमिष्टमिति ज्ञापयन्तोऽनुवदन्ति **दिष्टया कंसो हतः पाप** इति । भाग्येनैव सुहृज्जनाः कंसात् मुक्ताः । स्वरूपगुणयोस्तस्यासामीचीन्यं प्रतिपादयन्तः तस्य वधो न दोषायेत्यपि सूचयन्तो जरासन्धकृतोपद्रवनिवृत्तिमाहुः **निहत्य निर्जित्य रिपूनिति** । निहत्य कालयवनम्, बलं च निर्जित्य बहुधा जरासन्धादीन् । दुर्गाश्रये जयस्याहेतुत्वात् जयसन्देह एव दुर्गाश्रय इति क्त्वाप्रत्ययेन पूर्वकाल एवोच्यते । एतत्सूचयति **दिष्ट्येति** । द्वारकासम्यगाश्रयणं सम्बन्धिभिः सह स्थितिः ॥ ८ ॥ एवं सर्वेषां प्रश्नमुक्त्वा गोपीनां विशेषमाह **गोप्यो हसन्त्य** इति । राजसप्रकरणे ताः शोकरहिताः कृता इति भगवत्स्मरणेऽपि तासां हर्ष एव जात इति हासयुक्ताः । ननु पूर्णानां पुनः किं प्रश्नेनेत्याशङ्क्याह **रामसंदर्शनादृता** इति । रामस्य सम्यक् दर्शनेन स्नेहकृपापूर्वकेण आदृताः आदरयुक्ताः, ततो याः यथाभूताः तथानुवृत्तिः कर्तव्येति, अप्रश्ने औदासीन्यं च भवतीति पप्रच्छुः ॥ ८½ ॥ प्रश्नमाह **कच्चिदास्त** इति **सार्धैः पञ्चभिः** । अर्धं भावो न्यून इति । पूर्वं बहुविधा निरूपिता अपि । प्रकृते तस्याः कथायाः अनुपयोगात् पुराणान्तरस्थां तामाश्रित्य नन्दगोपकुमारिकाः भगवता द्वारकायां नीता एव । याः पुनरन्यपूर्वाः, **ता अपि** विमर्शे क्रियमाणे तासामेव वाक्यानुसारेण उपालम्भवाक्यैः अग्रे च भगवद्वाक्यैः भिन्ना एवेति प्रतिभाति । साधारण्य एव वा अत्र निरूप्यन्ते । सन्ति च ताः शङ्खचूडवधे निरूपिताः । अत एव सान्त्वनमासां पृथक् क्रियते । शब्दबलविवेके त्वाश्रीयमाणे अन्यपूर्वाः सर्वा एकरूपा एवेति प्रतिभाति । बलभद्रोपि भगवानेवेति साम्प्रतं भगवच्छक्तिरत्र प्रविष्टेति । अतः पूर्वभावेन सान्त्वनम्, भगवद्भावेन रमणमित्युभयं न विरुध्यते । अत एव सान्त्वनेनात्र विशेष उक्तः । स हि स्वात्मानं भगवद्रूपं प्रदर्श्य तासां लौकिकभावेऽपि पश्चात्कामनां पूरितवान्, उक्ततया अहमेकरूपेण समागतः, अत एव 'आयास्य' इत्यपि वचनं यथाश्रुतम् । कृष्णः साक्षादक्लिष्टकर्मेति आत्मानमेव रमयतीति यथाकथञ्चित्तत्परतामेव सम्पादयतीति न बहिर्धर्मान् कामं च गणयति । भक्तिमार्गविरोधस्तु निरोधे नाशङ्कनीयः । लौकिकसहितभक्तिमार्ग एव विरोधश्च । अतो गोपिकानां भेदे अभेदे वा विशेषो नास्तीति न पृथङ्निरूपणम् । तथापि भेदेनैव व्याख्येयमिति सम्प्रदायः । लौकिकदृष्ट्या पृच्छन्ति । रामेण लौकिकन्यायेन आदृता इति । कृष्णः स्त्रीणां हितकारी । तासां सुखदुःखैः तथा भवतीति वयं क्लिष्टा इति, अन्याश्च सुखिता इति, समानदेशस्थानामेव आनन्ददातृत्वे सुखित्वम्, साधारण्ये त्व(र्ध)सुखित्वमिति प्रायेणानुक्तेऽप्यङ्गीकृते वा आहुः । सत्यं सुखी, यतः **पुरस्त्रीजनवल्लभ** इति । अस्मद्वल्लभत्वे कदाचिदन्यथापि स्यादिति भावः ॥ ९ ॥ कदाचिदस्मत्स्मरणेनाप्यन्यथा भवतीति सम्भावनया आहुः **कच्चित्स्मरति वा बन्धूनिति** । **बन्धून्** गोपान् गोपीश्च । आवश्यकस्मरणं पृच्छन्ति **पितरं मातरं चेति** । यद्यपि त्वं स्मरसि, तथापि स कृष्णः स्मरति, न वेति

सन्देहः। एवं प्रसङ्गमुक्त्वा स्वस्मरणं सम्भावयन्ति **अपि वा स्मरतेऽस्माकमनुसेवा**मिति। अपेक्षिता सेवा, इच्छानुसारिणी अनुसेवा भवति। **महाभुज** इति क्रियाशक्तिः सर्वापेक्षया महती निरूपिता। अनेन नयने आगमने वा न तस्य काचिच्छङ्का ॥१०॥

श्रीसुबोधिनी-सारः

हे राम सर्वे नोऽस्माकं बांधबाः कुशलं सुखमासते कच्चित्किं हे राम दारसुतैः स्त्रीपुत्रैरन्विता यूयं नोऽस्मान्स्मरथ चिंतयथ कच्चित्किम् ॥ ७ ॥ पापः कंसो हतो दिष्ट्या परममंगलं सुहृज्जना ज्ञातयो वसुदेवाद्या मुक्ता बंधनाद्दुखाद्वा दिष्ट्या भद्रं रिपून् कालयवनादीन् निहत्य जरासंधादीन् निर्जित्य दुर्गं द्वारकामाश्रिता दिष्ट्या ॥ ८ ॥ रामस्य संदर्शनेनादृताः सत्कृता हसंत्यो गोप्यः पप्रच्छुः पुरस्त्रीजनानां वल्लभः प्रियः कृष्णः सुखमास्ते कच्चित् किं "यस्य रुष्टो विधिस्तस्य परस्त्रीभिः समागमः" इति सानुशयोक्तिः ॥ ९ ॥ स कृष्णो बंधून् वा पितरं नंदं मातरं यशोदां च स्मरति कच्चित्किं असौ श्रीकृष्णो मातरं द्रष्टुं सकृदेकवारमायास्यति अपि किम् अस्माकमनुसेवां दासीकर्म महाभुजः स्मरतेऽपि वा किम् ॥ १० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

निहत्येत्यत्र। **पूर्वकाल एवे**ति। नतु हननस्य जयस्य वा तत्र हेतुत्वमित्येवकारः। **गोप्ये** इत्यत्र। **यथाभूता** इति। रामसन्दर्शनप्रकारेणैवंभूता भगवदादृता जाताः, नतु साक्षात्। अतः परोक्षप्रकारेणैवानुवृत्तिः कर्तव्येत्यर्थः। **कच्चिदास्ते** इत्यत्र। सङ्ख्यातात्पर्यमाहुः **अर्धं भाव** इति। षड्गुणो भगवान्पूर्णः। तथा सति षड्भिः श्लोकैः प्रश्नः स्यात्। अत्र वक्तरि भावस्य सावरणत्वेनार्धन्यूनत्वात्सार्धपञ्चभिः प्रश्न इत्यर्थः। ननु प्रश्नकर्तृभावसंख्यया श्लोकसंख्या वक्तव्या भवतीत्याशङ्क्याहुः **पूर्व**मिति। यद्यपि पूर्वं तामसादिप्रकारेण बहुविधा निरूपिताः, तत्र तद्भावसंख्ययैव श्लोकसंख्या निरूपिता, तथाप्यधुना आन्तररमणमेव स्थिरीकृतम्। तच्चैकविधमिति सर्वासामेकविध एव भावः। अतः प्रकृते बहुविधवक्तथाया अनुपयोगान्न तद्भावसंख्यया श्लोकसंख्येत्यर्थः। विभागमाहुः **पुराणान्तरे**ति। एतास्तु नीता एव। 'नन्दगोपसुतं देवि पतिं मे कुरु'ति प्रार्थनादेतासामावेशरमणं न भवतीत्येवकारः। याः पुनरन्यपूर्वाः श्रुतिरूपास्ता अपि भिन्नाः। अतः साधारण्य एव निरूप्यन्ते इत्यर्थः। **शब्दबलविवेके त्वि**ति। एताः श्रुतिरूपाः, बलोऽपि वेदात्मकः। अतः शब्दरूपयोरुभयोर्बलं सामर्थ्यं तस्य विवेके विवेचने इत्यर्थः। **सर्वा** इति। रासस्था अन्यपूर्वाः शङ्खचूडप्रसङ्गस्थाश्चेत्यर्थः। ननु तादृशीनां बलभद्रेण रमणं कथं सम्भवतीत्याशङ्क्याहुः **स हि स्वात्मान**मिति। **लौकिके**ति। विवेचने तु न बाधकमित्युक्तमेव। लौकिकभावपक्षेपि न बाधकमित्यपिशब्दः। **उक्तत**येति। भगवतोक्तत्वाद्भगवता सहैकरूपेण समागतोऽहमित्यर्थः। **साक्षा**दित्यस्यात्मानमित्यनेनान्वयः। **आत्मानं** बलाविष्टमित्यर्थः। नतु तत्र तद्देहमपि व्यापारयतीत्येवकारः। तत्र हेतुर**क्लिष्टे**ति। देहादिरमणे क्लेशः स्यादित्यर्थः। **बाह्यधर्मा**निति। देहस्थानीयस्य बलस्य धर्मानित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रश्नमेव दर्शयति—कच्चिदिति द्वाभ्याम्। हे राम! नोऽस्माकं बान्धवा वसुदेवादयः कुशलमासते कच्चिदिति इष्टप्रश्ने। तदस्माकमिष्टमित्यर्थः। हे राम! नोस्मान् यूयं स्मरथ कच्चित्? 'प्रियबन्धूनां युष्माकं स्मरणं भवेदेवात्र कः सन्देह' इत्याशङ्क्याहुः—दारैः सुतैश्चान्विता इति। तत्रासक्तानामस्मद्विस्मरणसम्भवात् इत्याशयः। संबोधनद्विरुक्तिरादरार्था ॥ ७॥ दिष्ट्येत्यानन्दे, तेनास्माकं महानानन्दो जात इत्यर्थः। कंसो हत इति दिष्ट्या। तत्र हेतुमाहुः-पाप इति। पापाचारत्वादित्यर्थः। सुहृज्जना वसुदेवादयः कंसकृतोपद्रवाद्विमुक्ता इत्यपि दिष्ट्या। रिपून् यवनजरासन्धादीन् निर्जित्य निहत्य च यूयं दुर्गं द्वारकां समाश्रितास्तत्र निवासं कृतवन्तः एतदपि दिष्ट्या ॥ ८ ॥ रामस्य सम्यक् प्रेम्णा दर्शनेन आदृताः प्राप्तादराः, अत एव हर्षेण हसन्त्यो गोप्योपि तं पप्रच्छुः। तत्प्रश्नमेवाह—कच्चिदास्ते सुखं कृष्ण इति। ननु 'युष्मद्विरहे तत्र तस्य कथं सुखम्' इत्याशङ्क्य 'पूर्वं त्वस्मास्वेव तस्य महती प्रीतिरासीत्, इदानीं तु सा नास्ति, ग्रामस्त्रीत्वात् पुरस्त्रीलाभाच्च' इति सूचयन्त्य आहुः—पुरस्त्रीजनवल्लभ इति ॥ ९ ॥ बन्धून् गोपान्। सकृदपि एकदापि। अनुसेवां स्वानुवर्तनम्। 'अत्रागमनं तु तस्य सुकरमेव, क्रियाशक्तेराधिक्यात्' इत्याशयेनाहुः—महाभुज इति ॥ १० ॥

अन्वितार्थप्रकाशिका

वृद्धाः पृच्छन्ति—कच्चिदिति। हे राम! नोऽस्माकं बान्धवाः वासुदेवादयः कुशलमासते कच्चित्। समानवयसः पृच्छन्ति—हे राम! दारैः सुतैश्चान्विताः यूयं नोऽस्माकं स्मरथ कच्चित्। विष्णुपुराणे तु विवाहात्प्रागेव कालयवनवधार्थं तौ मथुरामागतौ तद्वधे कृते कृष्णो द्वारकां गतो रामो व्रजमित्युक्तं तत्कल्पान्तपरम् ॥ ७ ॥ दिष्ट्येति ॥ पापः कंसो हत इति दिष्ट्या सुहृज्जना वासुदेवादयः कंसकृतोपद्रवाद्विमुक्ता इत्यपि दिष्ट्या। रिपून् यवनजरासन्धादीन् निर्जित्य निहत्य च यूयं दुर्गं द्वारकां

समाश्रितास्तत्र निवासं कृतवन्तः एतदपि दिष्ट्या ॥ ८ ॥ गोप्य इति सार्द्धम् ॥ रामस्य सम्यक् प्रेम्णा दर्शनेन आदृताः प्राप्तादराः अत एव प्रेमोन्मादेन विरहेऽपि हसन्त्यो गोप्यः कृष्णप्रेयस्यः एकान्ते गत्वा तं पप्रच्छुः । कच्चिदिति पुरस्त्रीजनवल्लभः कृष्णः सुखम् आस्ते कच्चित् । सः बन्धून् पितरं मातरं च स्मरति वा कच्चित् ॥ ९ ॥ अप्यसाविति ॥ महाभुजोऽसौ सकृदपि मातरं द्रष्टुम् आगमिष्यत्यपि किम् । अपि वा यस्माकम् अनुसेवां स्मरते किम् । तङार्षः ॥ १० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

बांधवाः वसुदेवाद्याः सुहृदः हे राम ॥ ७ ॥ कष्टान्मुक्ताः ॥ ८ ॥ रामसंदर्शने आदृताः कृतनमनादिकाः ॥ ९-१० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दिष्ट्येति ॥ पापः कंसः, हतः दिष्ट्या, दिष्ट्येत्यानन्दे । तेनास्माकमानन्दो जात इत्यर्थः । सुहृज्जनाः वसुदेवदेवक्यादयः, मुक्ताः कंसकृतबन्धनात् मोचिताः, दिष्ट्या । रिपून् निहत्य निर्जित्य च, दुर्गं समुद्रपरिखां द्वारकामित्यर्थः । समाश्रिताः, दिष्ट्या ॥ ७ ॥ गोप्य इति ॥ रामस्य संदर्शने पुनः पुनरीक्षणे आदृता आदरयुक्ताः, हसन्त्यः, गोप्यः, हे राम, पुरस्त्रीजनवल्लभः, कृष्णः, सुखं आस्ते कच्चित् । इति पप्रच्छुः ॥ ८ ॥ कच्चिदिति ॥ हे राम, सः कृष्णः, पितरं मातरं च, बन्धून् वा, स्मरति कच्चित् । किं च असौ कृष्णः, मातरं द्रष्टुं, सकृदेकवारं अपि, आगमिष्यति अपि किम् ॥९॥ अपीति ॥ ता इति च ॥ महाभुजः कृष्णः, अस्माकं अनुसेवामनुवर्त्तनं, स्मरते अपि वा । यदर्थे, मातरं पितरं, भ्रातॄन्, पतीन्, पुत्रान्, स्वसॄर्भगिनीरपि दुस्त्यजान् एतान्, स्वजनान्, हे दाशार्ह, हे प्रभो, जहिम त्यक्तवतीः, ताः नोऽस्मान्, सद्यः परित्यज्य, संछिन्नसौहृदः, गतः । तर्हि तद्गमने युष्माभिः प्रतिबन्धः किं न कृतस्तद्वाक्यविश्वासादिति चेद्विश्वासः किमिति कृतस्तत्राहुः । तादृशं भाषितं, स्त्रीभिरस्माभिः, कथं नु श्रद्धीयेत विश्वस्येत । तादृशमित्यनेन वञ्चनशीलत्वं विवक्षितम् । स्त्रीभिरित्यनेन मौढ्यमभिप्रेतं, अज्ञत्वाद्विश्वसितवत्य इति भावः ॥ १०-११ ॥

कृष्णप्रिया

हे दाऊजी भैया ! हमारे बन्धुजन श्री देवकी, वसुदेवजी आदि सभी सर्वविध कुशल हैं न ? हे राम ! अब तो आप सब पत्नी, पुत्र आदि परिवार के साथ रहते हैं, पुनः वंशविस्तार भी हो गया है, कभी भी आपलोगों को हमारी स्मृति आती है ॥ ७ ॥ यह परम संतोष की बधाई है कि भगवान् श्रीकृष्ण ने पापी कंस का वध किया और अपने स्वजन एवं सुहृज्जनों को महत्कष्ट से मुक्त किये । यह परम सन्तोष की वार्ता है कि आपलोगों ने अन्य भी अनन्त शत्रुओं का उन्मूलन करके और जीत करके समुद्र के मध्य में सुरक्षित दुर्ग में आप सर्वथा निवास करते हैं ॥ ८ ॥ महाराज परीक्षित ! प्रियतम श्री बलरामजी के दर्शन से एवं प्रेममय अवलोकन से व्रज-गोपियाँ कृतार्थ हो गयीं । उन्होंने हँसते-हँसते श्री बलरामजी को पूछा कि भगवान पुर के नर-नारीजनों के प्राणवल्लभ भगवान श्रीकृष्ण सुखी तो हैं न ॥ ९ ॥ दाऊजी ! भगवान् कृष्णजी कभी अपने माता-पिता, बन्धु; स्वजन आदि का स्मरण करते हैं । क्या अपनी वात्सल्यमयी माता यशोदाजी के दर्शन को गोकुल में कभी एक बार भी पधारेंगे महाभुज भगवान श्रीकृष्ण कभी हमारी सेवा का स्मरण करते हैं ? ॥ १० ॥

मातरं पितरं भ्रातॄन् [1]ज्ञातीन् पुत्रान् स्वसॄरपि । यदर्थे जहिम दाशार्ह दुस्त्यजान् स्वजनान् प्रभो ॥११॥
ता नः सद्यः परित्यज्य गतः संछिन्नसौहृदः । कथं नु तादृशं स्त्रीभिर्न श्रद्धीयेत भाषितम् ॥१२॥
कथं नु गृह्णन्त्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः[2] पुरस्त्रियः ।
[3]गृह्णन्ति वै चित्रकथस्य सुन्दरस्मितावलोकोच्छ्वसितस्मरातुराः ॥ १३ ॥
किं नस्तत्कथया गोप्यः कथाः कथयतापराः । यात्यस्माभिर्विना कालो यदि तस्य तथैव नः ॥ १४ ॥

कर्दमक्षमा

अन्वयः—हे दाशार्ह ! यदर्थे, हे प्रभो ! मातरम्, पितरम्, भ्रातॄन्, ज्ञातीन्, पुत्रान्, स्वसॄः, दुस्त्यजान्, अपि, स्वजनान्, जहिम, नः, ताः, सद्यः, परिहृत्य, संछिन्नसौहृदः, गतः, कथम्, नु तस्य, तादृशम्, भाषितम्, स्त्रीभिः, न, श्रद्धीयेत ॥ ११-१२ ॥ अनवस्थितात्मनः, चित्रकथस्य, कृतघ्नस्य, वचः, सुन्दरस्मितावलोकोच्छ्वसितस्मरातुराः, बुधाः, पुरस्त्रियः, कथम्, नु, वै, गृह्णन्ति ॥ १३ ॥ हे गोप्यः ! तत्, कथया, किम्, नः ? अपराः, कथाः, कथयत, यदि, तस्य, कालः, अस्माभिः, विना, याति, तथैव, तस्य, विना, कालः, यास्यति ॥ १४ ॥

---

[1] पतीन्—श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [2] मुधा पर—विज. । [3] कृष्णस्य—विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तर्हि तद्गमने युष्माभिः प्रतिबंधः किं न कृतः। तद्वाक्यविश्वासादिति चेत्। ननु विश्वासः किमिति कृतस्तत्राहुः। कथं न्विति वक्तृबहुत्वान्नानाविधानि वाक्यानि ॥ १२ ॥ तत्रान्या ऊचुः। कथं न गृह्णन्तीति। अन्या ऊचुः। गृह्णन्ति वा इति। चित्रकथस्य चित्रकथाकथनकोविदस्य किंच सुंदरं स्मितं यस्मिस्तेनावलोकनेनोच्छ्वसितः क्षुभितो यः स्मरस्तेनातुराः ॥ १३ ॥ अन्या ऊचुः। किं न इति। कालस्तावत्तस्य चास्माकं च यात्येव किंतु तस्य सुखेनास्माकं तु दुःखेनेत्येतावानेव विशेष इति ध्वनितम् ॥ १४–१५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यदर्थे कृष्णनिमित्तम्। अक्षराधिक्यमार्षम्। ननु भोः कृष्णप्रियाः स प्रेमवान् कृष्णः सदा वः स्मरत्येवेति चेन्न, अनन्यगतीनामस्माकं परित्यागेन तत्प्रेमणि न विश्वसिम इत्याहुः—मातरमिति सार्द्धेन ॥ ११ ॥ ताः सर्वत्यागवतीः। तन्निरोधः कथं न कृत इत्याह—तर्हीति। तस्य कृष्णस्य 'अहं शीघ्रमायास्ये' इत्यादिवाक्ये विश्वासात्सत्यप्रत्ययात्। विश्वासः कथं कृत इत्याशङ्कते—नन्विति। तत्राऽक्षेपे। तादृशं गुडजिह्विकालक्षणं किन्तु श्रद्धेयमेवेत्यर्थः। गुडजिह्विका चेत्थम्—यथा तत्कटुताभीत्या निम्बपानमकुर्वाणस्य जिह्वायां गुडलेपनं कृत्वा तं निम्बं पाययंति, तथा प्रियवाक्यान्युक्त्वा पश्चात्कपटकरोऽपि गुडजिह्विक एवेत्यर्थः। तास्तथाभूता अप्यस्मान्सद्यः परित्यज्य गतः। ननु तद्गमने युष्माभिः प्रतिबन्धः किन्न कृतः, तेन सार्द्धं वा किन्न गतास्तत्राहुः—तृणपत्रवत्संछिन्नं सौहृदं प्रेमश्रृंखला येन सः। अतः कथय किं वयं कुर्म इति भावः। ननु तेन विना प्राणधारणाद्युष्माभिरपि तस्मिन्प्रेम संछिन्नमेवेति चेन्मैवम्, आयास्ये' इति दूतद्वारा मुहुरुक्त्या सञ्छिन्नाया अपि प्रेमश्रृंखलायाः पुनर्ग्रथनान्निर्गच्छन्तोऽप्यस्माकं प्राणाः पुनर्बद्ध्वा तेनैव स्थापिता इति। ननु तर्हि स आयास्यत्येव कथमधीराः स्थ इति चेन्मैवम्, अद्याप्यनागमनेन तेन तदा तन्मृषैवोक्तमित्यधुना विमृशामः। कथं तर्हि तदुक्तौ तदा विश्वस्तं तत्राहुः—कथं न्विति स्त्रीभिरबुद्धिभिरवक्रधीभिरस्माभिस्तादृशं तद्वचः कथं न श्रद्धीयेत ॥ १२ ॥ तत्र तासु। अन्याः किञ्चिद्बुद्धिमत्यः। अन्यास्तच्चरितज्ञाः। न केवलमुक्तिकौविद्येनैव मोहोऽपि तु तद्भावेनापीत्याहुः—किञ्चेति। किञ्च वन्याः स्त्रियो वयं निर्बुद्धय एव स्मः, नागर्यस्ता अतिसुधियस्तद्भाषिते कथं विश्वसन्तीत्याहुः—कथं न्विति। ताः प्रत्यन्याः समादधत्य आहुः—चित्रकथस्य मिथ्या कथापि तन्मुखे विस्मयरसमयी परमस्वाद्वी भवतीति कथारसत्यागाऽसामर्थ्यादेव श्रृण्वन्तीत्यर्थः। हेत्वंतरमप्यस्तीत्याहुः—सुन्दरस्मितपूर्वावलोकेनोच्छ्वसित उद्भूय प्रवृद्धो यः स्मरस्तेनातुराः ॥ १३ ॥ अन्या अर्धकुपिताः। तत्कथया कृष्णवार्तया। अपराः कृष्णभिन्नाः। तस्य कृष्णस्य। तथैव तेन विना। सुखेन तस्यान्यास्वासक्तत्वात्, अस्माकं तु तदासक्तानां तद्विरहाद्दुःखेन। ध्वनितं सूचितम्। ताः सर्वाः प्रत्यन्या असूयाप्रेमसंरंभरता आहुः—किन्न इति। कालस्तावत्तस्य चास्माकं च यात्येव किन्तु तस्य सुखेनास्माकं दुःखेनेतीयानेव विशेषः। संयुक्तो जीवति वियुक्तो म्रियते वयं तु न जीवामो नापि म्रियामह इत्यन्यस्त्रीभ्यो विधात्रैवास्माकं ललाटे लिखितस्तत्र कः प्रतीकार इति भावः। इतीति—स्वीयसुधारसमयप्रहसितादिशल्यपंचकेन तासां हृदयं विद्ध्वा कृष्णचन्द्रेण गतमतस्ताः कथं जीवन्तु कथं वा म्रियंतामिति श्रीबलदेवाग्रेऽपि विह्वलीभूय रुरुदुरेव ॥१४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, बध्वः सदा स्मरत्येवेति चेन्न अनन्यगतीनामस्माकं परित्यागेन सौहृदलक्षणापगमादित्याहुः—मातरमिति सार्द्धेन। दुस्त्यजानपि मात्रादीन् स्वजनांश्च सख्यादीन् मात्रादीनां यथोत्तरं स्निग्धत्वे न्यूनत्वं तत्र भ्रातृभ्योपि पतीनां न्यूनत्वनिर्देशस्तेषु तासामादराभावात् एवमन्यदप्यूह्यं तत्र "पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य तेत्यच्युतागताः" इति प्राक्तनेन तासां वचनेन तेषामतिक्रम एव पूर्वं लभ्यते सम्प्रति तु सर्वथा तत्परित्यागपूर्वकतया संहृत्य सर्वासां वनवास एव जहिमेत्यनेन गम्यते तदुक्तं भ्रमरं प्रति अगृहाणां न इति ततश्च पतिपुत्रशब्दप्रयोगश्च लोकप्रसिद्धिमनुसृत्य गौण्यैव वृत्त्येति बोधितं प्रभो इति तदग्रजत्वाद्भवानेव सर्वेषां प्रभुः ततोन्यस्मै वा कस्मा इमं तस्य दुर्नयं निवेदयामेति लज्जामपि परित्यज्य भवत्पार्श्वमागताः स्म इति भावः। हे दाशार्हेति यदुकुलोद्भवोपि त्वं सौहृदादागतः स तु श्रीगोपेन्द्रनन्दनोपि नागत इति भावः। ताः त्यक्ताशेषस्वजनाः अनन्यगतीर्वा परितः सर्वतोभावेन त्यक्त्वा स गतः ननु वत्साः दुष्टकंसवधार्थं गतोऽधुनाऽवश्यकृत्यं समाधायाचिरादागन्तेति चेन्न सम्भाव्यत इत्याहुः, सम्यक् तृणवच्छिन्नं सौहृदम् अस्मासु प्रेमश्रृङ्खला येन सः अन्यथा परित्यागासम्भवात्। कथं नु तादृशमित्यर्द्धकम्। तादृशं मधुरस्वरविनयशपथादिसम्वलितं न पारयेहमित्यादिलक्षणं स्त्रीभिः कोमलर्जुस्वभावाभिरित्यर्थः। अन्यत्तैः। यद्वा ननु कल्याण्यो युष्माभिर्बतैतादृशार्त्तिप्रदं तस्मिन् सौहार्द्दं किमिति कृतं तत्र तादृशोक्तिप्रतिहतत्वादित्याह–कथन्न्विति ॥ ११–१२ ॥ अहो वन्या वयं निर्बुद्धित्वेन तदुक्तौ विश्वासिन्यः स्मः पुरस्त्रियस्त्वभिज्ञाः कथं विश्वसन्तीत्यत्यन्तप्रेमार्त्तिधर्षिता आहुः कथमिति। नु विस्मये कुतो गृह्णन्ति स्वीकुर्वन्ति श्रद्दधते वा अपितु ग्रहीतुं नार्हन्त्येवेत्यर्थः। कुतः? अनवस्थितात्मनः अस्थिरचित्तस्य अत एव कृतमन्यस्यात्मनश्च सर्वं सौहार्द्दं हन्तीति तथा तस्य पुरस्त्रीत्वाद्बुधा अपि वै स्मरणे

आं ज्ञातमित्यर्थः। वाचा ग्रहणं विना आत्मनासक्तया अस्माकं स्मरणं सम्भवेदित्यभिप्रायेणेति भावः। यद्वा विचित्रवार्त्तां कथयतः सतो यः सुन्दरस्मितावलोकस्तेनोच्छ्वसितस्मरातुराः चित्रकथादिना कामोद्रेकविवशतया हतविचारत्वादित्यर्थः ॥१३॥ अथोद्रिक्तशोकसन्तप्ताः परस्परमाहुः—किमिति। तस्य कथया वार्त्तया किं न किञ्चित्प्रयोजनम् अपि च दुःखमेव स्यादित्यर्थः। गोप्यः हे कोमलर्जुस्वभावा इत्यर्थः। ननु सत्यं तथापि त्यक्तुं न शक्नुमो हन्त शोकार्त्ताः किं करवामेति चेत्तत्राहुः कथा इति। अपरा अन्यदीयाः "गाढशोकप्रहाराणामचिन्त्यैव महौषधिः" इति न्यायेनान्यकथाभिस्तत्कथाच्छादनस्य तेन तच्छोकतरणस्यापि सम्भवादिति भावः। नच मन्तव्यं तं विनाऽस्मात्कालो नः यास्यतीत्याहुः, यातीति। तथैवेति तर्ह्यस्माकमपि तेन विना कालो यास्यत्येवेत्यर्थः। तद्विरहेण चाद्यावध्यस्माकं हि मध्ये काचिदपि दशमीं दशां न प्राप्तेतिभावः। यद्वा तथैव तेन विनाऽस्माकमपि सुखेनैवेत्यर्थः। परमदुःखेप्यदुःखतानिर्देशोयं तज्जन्मदुःखेनैव तत्सहनाङ्गीकारादत्यन्तदुःखमेव ध्वनितम् ॥ १४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु वध्वः ! सदा स्मरत्येवेति चेन्न, अनन्यगतीनामस्माकमपि परित्यागेन सौहृदलक्षणापगमादित्याहुः—मातरमिति सार्द्धेन ! दुस्त्यजानपि मात्रादीन् स्वजनान्, किंवा मात्रादीन्, मात्रादीनां यथोत्तरं स्निग्धत्वे न्यूनत्वम्, तत्र भ्रातृभ्योऽपि पतीनां न्यूनत्वम्, तेषु तासामदराभावात्, एवमन्यदप्यूह्यम्, यद्वा, श्रीकृष्णार्थमत्याज्यतायामाधिक्यम्। प्रभो ! हे सर्व्वज्ञानसमर्थेति तत् सर्व्वं त्वया ज्ञायत एवेत्यर्थः। हे दाशार्हेति यदुकुलोद्भवोऽपि त्वं सौहृदादागतः, स च श्रीगोपेन्द्रनन्दनो नैवागत इति भावः ॥ ११ ॥ तास्त्यक्ताशेषस्वजना अनन्यगतीर्वा, परितः सर्व्वतोभावेन त्यक्त्वा स गतः, ता इत्यत्र स इति पाठो वा। ननु वत्साः ! दुष्टकंसवधाद्यर्थं गतोऽधुनावश्यकृत्यं समाधायाचिरादागन्तेति चेत्तन्न सम्भाव्यत इत्याहुः—सम्यक् तृणवच्छिन्नं सौहृदमस्मासु प्रेमशृङ्खला येन सः, अन्यथा परित्यागासम्भवः। तादृशं शपथादिपूर्वक-विचित्रन्यायवृंहितं स्त्रीभिः कोमलर्जुस्वभावाभिरित्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, ननु कल्याण्यो युष्माभिर्एतैतादृशार्त्तिप्रदं तस्मिन् सौहृदं किमिति कृतम् ? तन्मधुर-मधुरोक्ति-प्रतीति-हतत्वादित्याहुः—कथं न्विति। तादृशम्—(भा० १०।३२।२२) 'न पारयेऽहम्' इत्यादिलक्षणम् ॥ १२ ॥ वक्तृभेदव्यवस्थया पूर्वापरसंगत्यनपेक्षायामपि सतां प्रीतये काचित् संगतिः कार्य्या, तथाहि—अहो वन्या वयं निर्बुद्धित्वेन तदुक्तौ विश्वसिमः स्म, पुरस्त्रियस्त्वभिज्ञाः कथं विश्वसन्तीत्यत्यन्त-तत्प्रेमार्त्तिर्धर्षिता आहुः—कथमिति। नु विस्मये, कुतो गृह्णन्ति स्वीकुर्वन्ति श्रद्दधते वा अपि तु ग्रहीतुं नार्हन्त्येवेत्यर्थः। कुतः ? अनवस्थितात्मनोऽस्थिरचित्तस्य, अत एव कृतमन्यस्यात्मनश्च सर्वं सौहार्दं हन्तीति तथा तस्य; यद्वा, उपकारिजनानां परित्यागादिना द्रोहकारिणः, पुरस्त्रीत्वाद्बुधा अपि, वै स्मरणे, आं ज्ञातमित्यर्थः। वचोग्रहणं विना तास्वनासक्त्यास्माकं स्मरणं सम्भवेदिति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, विचित्रवार्त्तां कथयतः सतो यः सुन्दरस्मितावलोकस्तेनोच्छ्वसितस्मरातुराः—चित्रकथादिना कामोद्रेकविवशतया हतविचारत्वादित्यर्थः। अन्यत् समानम् ॥ १३ ॥ अथोद्रिक्तशोकसन्तप्ताः परस्परमाहुः—किमिति। तस्य वार्त्तया किम् ? न किञ्चित् प्रयोजनम्, अपि च दुःखमेव स्यादित्यर्थः। गोप्यः। हे कोमलर्जुस्वभावा इत्यर्थः। ननु सत्यम्, तथापि तां त्यक्तुं न शक्नुमो हन्त शोकार्त्ताः किं करवामेति चेत्तत्राहुः—कथा इति। अपरा अन्यदीयाः 'गाढशोकप्रहाराणामन्यचिन्ता महौषधिः' इति न्यायेनान्यकथाभिस्तत्कथाच्छादनस्य तेन तच्छोकतरणस्यापि सम्भवादिति भावः। न च मन्तव्यम्, तं विनास्माकं कालो न यास्यतीत्याहुः—यातीति। यद्यस्माभिर्विनापि तस्य कालो याति, तर्ह्यस्माकमपि तेन विना दुःखेनापि यास्यत्येवेत्यर्थः। यद्वा, यथा अस्माभिर्विनापि तस्य कालो याति, तथा तं विनास्माकमपि, तद्विरहेणास्माकं काच्चिद्दशमीं दशां नाद्यापि प्राप्तेत्यर्थः ॥ १४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

जह्मि त्यक्तवत्यः ॥ ११-३० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एतदेव स्पष्टयितुं तस्य सौहार्दाभावमाहुः—मातरमिति सार्द्धेन। हे दाशार्ह ! हे प्रभो ! मात्रादीनन्यांश्च स्वजनान् यदर्थे यन्निमित्तमत्याक्ष्म त्यक्तवत्यः ताः नोऽस्मान् सद्य एव परित्यज्य गतः अत एव सञ्छिन्नं सौहृदं येन तथाभूतः तर्हि तद्गमनं युष्माभिः प्रतिबन्धः किं न कृतः तद्वाक्यविश्वासादिति चेत् विश्वासः किमिति कृतस्तत्राहुः—कथं न्वित्यर्द्धेन। तादृशमित्यनेन वञ्चनशीलत्वं विवक्षितं स्त्रीभिरित्यनेन मौढ्यमभिप्रेतं कथं न श्रद्धीयेत विश्वस्येत अज्ञत्वाद्विश्वसितवत्यस्स्मेति भावः ॥११-१२॥ वक्तृबहुत्वान्नानाविधानि वाक्यानि तत्रान्या ऊचुः कथमिति अनवस्थितः चञ्चलः आत्मा मनो यस्य तस्य कृतघ्नस्य च कथन्नु बुधाः कुशलाः पुरस्त्रियः गृह्णति विश्वसन्ति अन्या ऊचुः गृह्णन्ति वा इति। विचित्राः कथाः भाषणानि यस्य तस्य हेतुगर्भमिदं भाषणेनैव व्यामोहयितुरित्यर्थः। सुन्दरं स्मितं यस्मिन् तेनावलोकनेन उच्छ्वसितः उद्दीपितो यः स्मरः कामः तेनातुराः आकुलाः इदमपि हेतुगर्भं तत्त्वात्ताः गृह्णन्ति वै इति निश्चये ॥ १३ ॥ अपरा ऊचुः, किन्न इति। हे गोप्यस्तस्य कथया वार्त्तया

नोऽस्माकं किं कोवा पुरुषार्थः अतोऽन्याः कथाः कथयत तस्य श्रीकृष्णस्यास्माभिर्विना यदि कालो याति तर्हि तथैव नोऽस्माकमपि यात्येव किन्तु तस्य सुखेनास्माकन्तु दुःखेनेत्येतावानेव विशेष इत्यनेन ध्वनितम् ॥ १४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

यस्य कृष्णस्यार्थे दृढस्नेहनिमित्तं मात्रादीन् स्वजनान् हिन्म अत्याक्ष्म छान्दसप्रयोगः ॥ ११ ॥ स्त्रीभिस्तादृशं गुडजिह्विकालक्षणं भाषितं कथं नु न श्रद्धीयेत श्रद्धेयमेवेत्यर्थः ॥ १२ ॥ अस्मदन्या नैव श्रद्धत इत्याहुः—कथमिति । परस्त्रियः अस्मदन्यस्त्रियः अन्यत्र उत्तमस्त्रियः अनवस्थितात्मनः चञ्चलमनसः अन्यत्र सङ्गरहितस्य कृतघ्नस्य अनुपकारिणः अन्यत्रकारिणः विनाशिनः कृष्णस्य पुमधीनस्यान्यत्र पूर्णानन्दस्य मुधा वचः कथं न गृह्णन्ति अन्यत्र वचः मुधा कथं न गृह्णन्ति सार्थमेव गृह्णन्तीत्यर्थः । वैचित्राः नानाविधाः कथाः वाक्यप्रबन्धाः यस्य स तथा तस्य उभयत्र समं कीदृश्यः सुन्दरस्मितावलोकेन उच्छ्वसितेनोद्धतेन स्मरेण आतुराः अन्यत्र निरन्तरस्मरणपरवत्यः ॥ १३ ॥ हरये प्रेम्णा कम्पन्त्यो मिथो जल्पन्ति—किं न इति । हे गोप्यः ! अपराः कथाः कथयतस्तस्य कृष्णस्य कथया नः किं प्रयोजनं तस्य कृष्णस्य यद्यस्माभिर्विना कालो याति तथा तर्हि तेन विना नः कालोपि यातीत्यन्वयः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

अन्या ऊचुः—किं न इत्यादि । य एवं निष्करुणः तस्य कथया किम् ? अपराः कथाः कथय जीवनत्यागायुक्तः क्रियतामित्यर्थः । तत्कथां विना कालो न यातीति चेत्, तदपि न, इत्यपरा आहुः—यातीत्यादि । अस्माभिर्विना यदि तस्य कालो यथा यास्यति, तथैव नो यास्यतीति सामर्षोक्तिः ॥ १४ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

कथं न्वित्यादि-पृथक् पृथक् वक्तृयुः । अनवस्थितात्मन इत्यादि सासूयत्वपरम् । अन्या ऊचुः । किं न इत्यादि । तत्कथया किम् ? न किमपीत्याक्षेपः, तत्कथां त्यक्त्वा किं कार्यम् ? तत्राह—कथाः कथयतापराः । अपरास्तदन्याः तत्कथां विना कालो न यातीति चेत् यास्यति, तस्य यथा अस्मान् विना कालो याति तथास्माकमपि यास्यतीत्याक्षेपो भावः ॥१३-१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु, भोः कृष्णप्रियाः स प्रेमवान् कृष्णः सदा वः स्मरत्येवेति चेन्न अनन्यगतीनामस्माकं परित्यागेन तत्प्रेमणि न विश्वसिम इत्याहुः—मातरमिति सार्द्धेन । तास्तथाभूता अपि अस्मान् सद्यः परित्यज्य गतः ननु तर्हि तद्गमने युष्माभिः प्रतिबन्धः किं न कृतः तेन सार्द्धमेव वा कथं न गतं तत्राहुः—तृणपत्रवत् सञ्छिन्नं सौहृदं प्रेमशृङ्खला येन सः अतः कथय किं वयं कुर्म इति भावः । ननु तर्हि तेन विना प्राणधारणात् युष्माभिरपि तस्मिन् प्रेमच्छिन्नमेवेति चेन्मैवम् आयास्ये इति दूतद्वारा मुहुरुक्त्याच्छिन्नाया अपि प्रेमशृङ्खलायाः पुनर्ग्रन्थनात् निर्गच्छन्तोऽप्यस्माकं प्राणाः पुनर्बद्ध्वा तेनैव स्थापिता इति ननु तर्हि स आयास्यत्येव कथमधीराः स्थेति चेन्मैवम् अद्याप्यनागमनात्तेन तदा तन्मृषैव भाषितमित्यधुना विमृशामः कथं तर्हि तद्भाषिते तदा विश्वस्तं तत्राहुः कथंन्विति स्त्रीभिरवक्रबुद्धिभिरबुधाभिरस्माभिस्तादृशं भाषितं कथं न श्रद्धीयेत ॥ ११-१२ ॥ किञ्च वन्याः स्त्रियो वयं निर्बुद्धय एव स्म नागर्यस्ताः अतिसुधियः स्त्रियस्तद्भाषिते कथं विश्वसन्तीत्याहुः—कथन्न्विति । ताः प्रत्यन्याः समादधन्यः आहुः—चित्रकथस्य मिथ्या कथापि तन्मुखे विस्मयरसमयी परमस्वाद्वीभवतीति कथारसास्वादत्यागासामर्थ्यादेव शृण्वन्तीत्यर्थः । हेत्वन्तरमप्यस्तीत्याहुः—सुन्दरस्मितपूर्वावलोकेन उच्छ्वसितः उद्भूय प्रवृद्धो यः स्मरस्तेन आतुराः ॥ १३ ॥ ताः सर्वाः प्रत्यन्या अत्यसूयाप्रेमसंरम्भवत्य आहुः—किन्न इति । कालस्तावत्तस्य चास्माकं च यात्येव किन्तु तस्य सुखेन अस्माकं दुःखेनेत्येतावान् तस्माद्विशेषः । संयुक्ता जीवन्ति वियुक्ता म्रियन्ते वयन्तु न जीवामो नापि म्रियामहे इत्यन्यस्त्रीभ्यश्च विशेषो विधात्रैवास्माकं ललाटे लिखितस्तत्र कः प्रतीकार इति भावः ॥ १४ ॥

गूढार्थदीपिनी

मातरमिति सार्द्धम् । हे दाशार्ह । यदुवंशिन् । यदर्थे जहिम त्यक्तवत्यो वयं स कृष्णः गत इत्यन्वयः ॥ ११ ॥ कथमिति अर्द्धम् । तादृशं वञ्चनापूर्णम् कथं न । श्रद्धीयेत विश्वसेत् ॥ १२ ॥ अनवस्थितात्मनः अस्थिरचित्तस्य । अन्या ऊचुः गृह्णन्तीति । सुन्दरस्मितावलोकेन प्रबुद्धो यः स्मरः तेन आतुराः व्याकुलाः ॥ १३ ॥ तेन विना अस्माकमपि कालः याति किन्तु तस्य सुखेन अस्माकं दुःखेन एतावानेव भेदः ॥ १४-१५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सञ्छिन्नं सौहृदं येन सः ॥ १२ ॥ ननु, तादृशे भवतीनां सौहृदं कुतः प्रवृत्तमित्यत्र मौढ्यादित्याहुः—कथमिति । स्त्रीभिरबुधाभिरस्माभिस्तादृशं मनोहारि भाषितं कथं तु न श्रद्धीयेत विश्वसेत काश्चित् आस्तामबुधता अस्माकं कथा, पुरस्त्रियो

बुधास्तद्वचः कथं गृह्णन्तीत्याहुः—अन्या आहुः—गृह्णन्तीति। सुन्दरं यस्मिन् तेनावलोकनेन उच्छ्वसितो यः स्मरस्तेनातुराः चित्रकथस्य चित्रकथाकथनकोविदस्य वचो गृह्णन्त्येव ॥ १३ ॥ अन्या आहुः किं न इति ॥ १४-१६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यद्यपि भगवत्यसूया त्यक्ता, तथापि कालविलम्बात् भवत्येव बुद्धिरन्यथेति पुनस्तासां दोषनिराकरणार्थं निरूपयति **मातरं पितरमि**ति। पश्चावश्यकाः। स्त्रीणां मुख्या माता। भर्तारं परित्यज्येति वक्तव्ये **ज्ञाती**निति साधारण्येनैव तन्निराकरणमपि कृतम्। भर्तृत्वस्य भगवत्येव स्थापितत्वात्। 'पतीन् **पुत्रा**'निति पाठे न कोऽपि सन्देहः। आद्यन्तयोः स्त्रीग्रहणं तासां तदनुरोधो महानिति। सर्वैर्निराक्रियमाणाः तदनुरोधं परित्यज्य भगवानेव गृहीत इति **यदर्थे** जहिमेत्युक्तम्। **दाशार्हे**ति सम्बोधनात् पश्चात्तापेन कथनं वारयति। त्यागो महानिति वक्तुं तान् विशेषयन्ति **दुस्त्यजान् स्वजना**निति। अन्तःकरणदेहसम्बन्धो दृढो निरूपितो। **प्रभो** इति सम्बोधनं सामर्थ्यस्य विद्यमानत्वात् परित्यागे उपालम्भो युक्त इति बोधितम् ॥ ११ ॥ यदर्थमेतन्निरूपणं तमुपालम्भमाहुः **ता नः सद्यः परित्यज्ये**ति। अन्तःकरणेऽपि परित्यागार्थमाहुः **संछिन्नसौहृद** इति। सम्यक्छेदः मरणसमानबाधानामप्युपेक्षणात्। ननु ज्ञायत एव वसुदेवपुत्रो यथाकथञ्चिदत्रागत्य स्थितः, तत् किमिति सर्वपरित्यागेन सेवित इति चेत्, तत्राह **कथं नु तादृशं स्त्रीभि**रिति। युक्त्या यद्यपि त्यक्ष्यतीति निश्चितम्, तथापि हृदयाद्यालम्भनेन यथा विश्वास उत्पद्यते, तथा भाषितं कथं न श्रद्धीयेत। स्त्रियो हि शुद्धभावा न कापट्यं जानन्तीति स्वश्लाघा। अतो वाक्यविश्वासादेवं कृतमिति नास्माकं दोषः। 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' 'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यती'त्यादिवाक्यानि च शास्त्रदृष्ट्या। नु इति वितर्के। कश्चिदेवमप्यस्ति, यो विश्वासं न कुर्यादित्यसम्भावनापि सूचिता ॥ १२ ॥ एवं मात्सर्येण भगवति दोषं सम्भाव्य, साम्प्रतं पुरस्त्रीणां सम्बन्धं करोतीति स्मृत्वा, सुतरामीर्ष्या जाता, ततस्तस्य तद्वैषयिकसुखं मा भवत्विति विचारयन्त्यः पुरस्त्रियोऽपि चेन्निवृत्ता भवेयुः, तदा भवेदिति ता निवर्तयितुं उपालभन्ते **कथं नु गृह्णन्ती**ति। ननु सुखकराणि वाक्यानि सुखं च प्रयच्छन्ति, तत्कथं न विश्वसनीय इति चेत्, तत्राह **अनवस्थितात्मन** इति। न अवस्थिताः एकत्र प्रतिष्ठिताः वेदे लोके वा आत्मानो जीवा यस्य। न हि भगवत्सेवकाः क्वचित्प्रतिष्ठिता भवन्ति। तस्य हि वचनेन तत्सेवकत्वे स्वस्यापि (तथा) भविष्यतीति। अतो भगवदीयानां भगवद्व्यतिरिक्ते प्रतिष्ठितत्वाभावात् ऐहिकाभिलाषिण्यः। नु निश्चयेन कथं गृह्णन्ति। ननु प्रतिष्ठिते साधने कृते कथं प्रतिष्ठां न लभन्ते, 'अस्मिन्नेव लोके प्रतितिष्ठति, अमुष्मिन्नेव लोके प्रतितिष्ठति, प्रतितिष्ठन्ति वा, य एता रात्रीरुपयन्ती'त्यादिवाक्यैः कृते कर्मणि कथं प्रतिष्ठां न लभन्त इति चेत्, तत्राह **कृतघ्नस्ये**ति। स हि कृतमपि हन्ति। अत एवोक्तं 'लोके स्वास्थ्यं तथा वेदे हरिस्तु न करिष्यति। पुष्टिमार्गस्थितो यस्मात् साक्षिणो भवताखिला' इति। नन्वेतन्न जानन्तीति चेत्, तत्राह **बुधा** इति। बुधत्वे हेतुः **पुरस्त्रिय** इति। पुरवासिनो विचक्षणा भवन्तीति। तत्र स्वयमेव वचनग्रहणाग्रहणयोर्दुःखतारतम्यं विचार्य, अग्रहणे महदेव दुःखमिति ग्रहणोपपत्तिमाहुः **गृह्णन्ती**ति। वं निश्चयेन नात्र पूर्वपक्षोऽपि। तत्र हेतुत्रयमाहुः। **चित्रकथस्य** कथावैचित्र्यात् वाचा वशीकृता गृह्णन्ति। सुन्दरस्मितावलोकाभ्यां च मनःकायाभ्यां व्यामोहिताः गृह्णन्ति। त्रयाणां कार्यं जातमित्याहुः। स्मितावलोकाभ्यामुच्छ्वसितो यः स्मरः मर्यादामुल्लङ्घ्य उद्गतो जातः, तेन आतुराः। यथा ज्वरातुरो वैद्यवाक्यं शृणोति। वाक्यात् कटुतिक्तादिकमपि भक्षयति, तद्वदित्यर्थः ॥ १३ ॥ एवं काश्चित्स्वयं दुःखमनुभूय अज्ञानवशाद्दोषनिवर्तके दोषं सम्भावयन्ति, तासां निषेधार्थमन्या आहुः **किं नस्तत्कथया गोप्य** इति। हे गोपस्य स्त्रियः, पामर्यः, तत्कथया नः किम्। भक्तिनिरोधमुक्तीनां दोषोत्पत्तौ प्रयोजकत्वाभावात् सुतरां दोषजनकत्वाच्च तत्कथया नः कोऽपि नोपकारः। भक्तिमार्गे प्रतिबन्धान् दूरीकृत्य स्नेहेन भगवद्भजनं कृतं स्यात्। निरोधे तु क्षणमात्रमपि भगवददर्शने देहेन्द्रियादिकमपि त्यक्तं स्यात्। मुक्तौ वैषम्यग्रहणं न स्यात्। अतो दोषाणामनिवृत्तत्वात् गुणानां चाभावात् तत्कथया नः किम्। ननु कथापि श्रोतव्या, वक्तव्या वा, कथारसावेशादिति चेत्, तत्राहुः **कथाः कथयतापरा** इति। यासु न दोषोत्पत्तिः। ननु कथमेवमौदासीन्यं कर्तुं शक्यम्, तत्राह **यात्यस्माभिर्विना काल** इति। पारमार्थिकप्रयोजनाभावात् लौकिकप्रयोजनार्थं भगवानपेक्ष्यः। तत्रोभयोः विषयता भोक्तृत्वं च। एवं सति अस्माभिर्विना यदि तस्य कालो गच्छति, तदास्माकमपि तं विना गच्छत्येव। नहि वयं मृताः। येन विना यस्य न निर्वाहः, स उपालम्भ्यो भवति। तदा न दोषः शास्त्रे, लोकेऽपि न विगानम्। यथा प्राणात्यये सर्वविषयपरिग्रहस्य। न हि म्रियमाणः निषिद्धादपि जलमन्नं वा गृह्णन् प्रत्यवैति। तथा भगवता विना चेदस्मत्प्राणा गच्छेयुः, तदोपालम्भो निर्दुष्टः। अन्यथा दोष एव स्यात्। उदासीनोपालम्भवत्। अथ भजनानुरूपेण भजनम्, तद्भगवति नास्त्येव। अस्माभिर्विनैव तस्य कालो गच्छतीति। अतः स्वस्य तथाधिकारे भगवच्छास्त्रप्रामाण्ये भगवानेव समागच्छेत्, अप्रामाण्ये तु मरणमेव स्यात्। उभयमपि नास्तीति वृथोपालम्भो न कर्तव्य इत्यर्थः। उभयविधा अप्येताः मूर्च्छापर्यन्तव्यापारयुक्ताः। अतो दुःखात्प्रथमा वदन्ति, मरणाभावाच्च परा निषेधन्ति ॥ १४ ॥

श्रीसुबोधिनी-सारः

तद्यथा यदर्थे यन्निमित्तं मात्रादीन् दुस्त्यजान् स्वजनान् जहिम वयमत्यजाम हे दाशार्ह हे प्रभो ॥ ११ ॥ ता नोस्मान् सद्योऽक्रूरागमनकाले परित्यज्य संछिन्नं सौहृदं येन स गतो मथुरां प्रयातः एतेनायास्य इति दौत्यकैरित्युक्तेऽपि तद्वाक्ये न विश्वासः कथं तर्हि तदागमनमिष्यते तत्राहुः। तादृशं भाषितं वचः स्त्रीभिः कथं नु न श्रद्धीयेत न विश्वस्येत ॥ १२ ॥ अन्या ऊचुः। बुधा विवेकवत्यः पुरस्त्रियो माथुर्यो द्वारकीया न अवस्थितं स्थिर आत्मा चित्तं यस्य तस्य कृतघ्नस्य कृष्णस्य वचः कथं नु गृह्णन्ति स्वीकुर्वंति। अन्या ऊचुः। चित्राः कथा यस्य चित्रं कथयतीति यद्वा विचित्राः कथाः कथयतीति वैचित्रकथोऽण्प्रत्ययः तस्य श्रीकृष्णस्य सुंदरं स्मितं यस्मिस्तेनावलोकनेन दर्शनेन उच्छ्वसितः क्षुभित उद्‌गतो वा यः स्मरः कामस्तेनातुराः पीडिता गृह्णंति वै एव ॥ १३ ॥ धीरा ऊचुः। हे गोप्यः तस्य कथया नोस्माकं किं न किमपि अपरा अन्याः कथाः कथयत अस्माभिः विना यदि तस्य कालो निर्गच्छति तथैव नोस्माकमपि याति ॥ १४ ॥

श्रीविट्‌ठलरायात्मजश्रीवल्लभकृतलेखः

किं नस्तत्कथयेत्यत्र। **भक्तीति**। यद्यपि कथाया भक्तिनिरोधमुक्तिसाधकत्वम्, तथापि दोषोत्पत्तौ दोषारोपे सत्येतस्यां फलप्रयोजकता भक्तिनिरोधमुक्तिसाधकत्वं नास्तीत्यर्थः। **दोषेति**। अन्त्यावस्थाहेतुभूतो भावो दोष इति भ्रमरगीते निरूपितं टिप्पण्याम्। तज्जनकत्वादित्यर्थः। फलाप्रयोजकभक्तिनिरोधमुक्तिजनकत्वं दोषजनकत्वं चेति चकारः। फलाप्रयोजकत्वं व्युत्पादयन्ति **भक्तिमार्गे** इति। दोषोत्पत्तौ सत्यामपि भक्तिमार्गस्य फलाप्रयोजकत्वे इत्यर्थः प्रतिबन्धादित्यादिनोक्तं त्रयाणामपि फलत्रयं ज्ञेयम्। **अत** इति। दोषारोपे सति फलाप्रयोजकत्वादित्यर्थः। **दोषाणा**मिति। प्रतिबन्धा देहेन्द्रियादिकं वैषम्यग्रहणं च दोषास्तेषामित्यर्थः। **गुणानां चेति**। 'तव कथामृत'मित्यत्रोक्तानां षड्‌गुणानामस्मान्प्रत्यप्रकटनादित्यर्थः। **उभयविधा अपीति**। दोषसम्भाविका दोषनिषेधिकाश्चेत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'त्वं चैतद्विचारे कुशलः कृष्णोपालम्भे समर्थश्चासि, ज्येष्ठभ्रातृत्वादनुभूतत्वाच्च' इत्याशयेन द्विःसम्बोधयन्ति—हे दाशार्ह ! हे प्रभो ! इति। यदर्थं यस्य प्रीत्यर्थं वयं मात्रादीन् दुस्त्यजान् जनान् जहिम त्यक्तवत्यः, अतो यद्यपि तेनास्मत्स्मरणमावश्यकम् ॥ ११ ॥ तथापि सतां नोऽस्मान् सद्यः परित्यज्य गतः, अतो भवसि सन्देहोऽस्मान् स्मरति नवेत्याशयः। त्यक्त्वा गमने हेतुमाहुः—सञ्छिन्नं त्यक्तं सौहृदं प्रेम येन स इति। 'तर्हि किमित्येतादृशः कृतघ्नो युष्माभिः सर्वपरित्यागेन सेवित' इति चेत्तत्राहुः—कथं न्विति। 'न पारयेहमनवद्यसंयुजाम्' इत्येतादृशं तद्भाषितं स्त्रीभिः कथं न श्रद्धीयेत न विश्वस्येत ? अतस्तद्वचनविश्वासाद्वयं वञ्चिता इति भावः ॥ १२ ॥ वयं ग्राम्या अविदग्धाः, अतस्तद्वचनेन वञ्चिताः। बुधाः निपुणाः पुरस्त्रियस्तु अनवस्थितात्मनश्चलसौहृदस्य कृतघ्नस्य वचः कथं नु गृह्णन्ति विश्वसन्ति ?। बहुत्वात्तत्रान्या आहुः—गृह्णन्तीति। अस्मदादिवत् चित्राः नानाविधाः कथा यस्य तस्य विविधकथाश्रवणेन विमोहिताः तथा सुन्दरं स्मितं यस्मिस्तेनावलोकेन उच्छ्वसित उद्दीपितो यः स्मरः कामस्तेनातुराः विवशाः सत्यस्तद्वचो गृह्णन्ति। वै शब्दो निश्चये नात्र सन्देहः ॥ १३ ॥ अपरा ऊचुः—किं न इति। सुखदुःखयोः स्वतौल्यं सूचयन्त्यः सम्बोधयन्ति—गोप्य इति। तस्य कृष्णस्य कथया वार्तया नोस्माकं किं फलम् ? तत्स्मृत्या दुःखमेव वर्धते, न कश्चित्पुरुषार्थः सिद्धयतीत्यर्थः। ननु 'कथारसाविष्टानां कथं कथां विना स्थितिः सम्भवति' तत्राहुः—अपराः कृष्णकथातिरिक्ताः कथाः कथयतेति। 'कथमेवं तत्रौदासीन्यं कर्तुं शक्यम्' इत्याशङ्क्य तत्र विचारमाहुः—यदीति। यदि तस्यास्माभिर्विनापि कालो याति तर्हि तथैव तेन विना नोस्माकमपि कालो यात्येव। परन्तु तस्य सुखेन, अस्माकं तु दुःखेन, एतावानेव विशेषः ॥ १४ ॥

अन्वितार्थप्रकाशिका

मातरमिति सार्द्धम् ॥ हे दाशार्ह ! हे प्रभो ! यदर्थं यस्य प्रीत्यर्थं वयं मातरं पितरं भ्रातॄन् पतीन् पुत्रान् स्वसॄरपि दुस्त्यजान् स्वान् जनान् जहिम त्यक्तवत्यः। अनेन तासां प्रायो वन एव वासो गम्यते। अगृहाणामिति भ्रमरं प्रत्युक्तेश्च ता नोऽस्मान् परित्यज्य संछिन्नं सौहृदं येन तादृशः सन् गतः ॥ ११ ॥ वयं तु तेन विश्वास्य वञ्चिता इत्याहुः—कथं न्विति अर्द्धम्। न पारयेऽहं निरवद्यसंयुजामित्येतादृशं तद्भाषितं स्त्रीभिः सरलस्वभावाभिः अस्माभिः कथं न श्रद्धीयेत न विश्वस्येत। अतस्तद्वचनविश्वासाद्वयं वञ्चिता इति भावः। वक्त्रीणां बहुत्वान्नानाविधानि वाक्यानि ॥१२॥ कथं न्विति ॥ बुधाः निपुणाः पुरस्त्रियस्तु अनवस्थितात्मनश्चलसौहृदस्य कृतघ्नस्य वचः कथं नु गृह्णन्ति विश्वसन्ति। अन्या आहुः गृह्णन्तीति। चित्राः नानाविधाः कथाः यस्य नानाकथाकथनकोविदस्य तस्य विविधकथाश्रवणेन अस्मदादिवत् विमोहिताः तथा सुन्दरं स्मितं यस्मिस्तेनावलोकेन उच्छ्वसित उद्दीपितो यः स्मरः कामस्तेनातुराः विवशाः सत्यस्तद्वचो गृह्णन्ति। वैशब्दो निश्चये नात्र संदेहः ॥ १३ ॥ अपरा

मिथ ऊचुः—किं न इति ॥ हे गोप्यः ! तस्य कृष्णस्य कथया वार्तया नोऽस्माकं किं फलं प्रत्युत तत्स्मृत्या दुःखमेव वर्धते । ननु कथारसाविष्टानां कथं कथां विना स्थितिः । अत आहुः अपराः कथाः कथयत । "गाढशोकप्रहाराणामचिन्तैव महौषधिः।" इति न्यायात् । यदि तस्यास्माभिः विनापि कालो याति, तर्हि तथैव तेन विना नोऽस्माकमपि कालो यात्येव । परंतु तस्य सुखेनास्माकं तु दुःखेनैतावानेव विशेषः ॥ १४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे दाशार्ह वयं जहिम जहिमः । त्यजामः छांदसं ह्येतद्रूपं ॥ ११ ॥ नोऽस्मान् सद्यः अन्या ऊचुः तादृशं न पारयेऽहं निरवद्य संयुजामित्यादिरूपं अहमायास्ये इत्यादिरूपं विश्वसनीयं भाषितं सरलचित्ताभिः स्त्रीभिः कथं न श्रद्धीयेत विश्वस्येत अपि तु विश्वस्येतैव ॥ १२ ॥ अपरा ऊचुः कथमिति अनवस्थितः एकस्थिति विधुरः । आत्मा मनो यस्य तस्य हरेः । निश्चयपूर्वकमन्या ऊचुः । चित्राः । वाक्यविचित्रतया मनोहराः कथाः कथनानि यस्य तस्य सुंदराभ्यां स्मितावलोकाभ्यां उच्छ्वसित उद्भूतो यो स्मरस्तेनातुराः व्यग्राः अतस्तद्भाषितं गृह्णन्ति ॥ १३ ॥ अथोद्रिक्तशोकतप्ताः परस्परं प्राहुः किं न इति हे गोप्यः ॥१४-१५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वक्तृबहुत्वान्नानाविधानि वाक्यानि तत्रान्या, ऊचुः । कथं न्विति । तच्छीलमविदुषीभिरस्माभिस्तद्वाक्यमङ्गीकृतमिति शेषः । परं तु हे राम, बुधाः पण्डितत्तोपेताः, पुरस्त्रियः, अनवस्थितात्मनः अस्थिरचित्तस्य, कृतघ्नस्य कृष्णस्य, वचः, कथं नु गृह्णन्ति सत्यं मानयन्ति । अन्या ऊचुः । चित्राः विचित्राः कथा भाषणानि यस्य तस्य, विचित्रभाषणेन विमोहयितुरित्यर्थः । सुन्दरं स्मितं यस्मिन् स चासाववलोकस्तेनोच्छ्वसित उद्दीपितो यः स्मरः कामः तेनातुरा आकुलाः, इदमपि हेतुगर्भम् । तत्वात्, गृह्णन्ति वै निश्चये ॥ १२ ॥ अपरा ऊचुः । किं न इति । हे गोप्यः, तस्य श्रीकृष्णस्य कथा वार्त्ता तया, नोऽस्माकं, किं को वा पुरुषार्थः । ततः, अपराः कृष्णवार्त्तातः, अन्याः, कथा वार्त्ताः, कथयत । तस्य श्रीकृष्णस्य अस्माभिर्विना, यथा यदि, कालः याति, तर्हि तथैव कृष्णवदेव, नोऽस्माकमपि, कालः याति । यास्यत्येवेत्यर्थः । किं तु तस्य सुखेनास्माकं दुःखेनेत्येतावानेव विशेष इत्यनेन ध्वनितम् ॥ १३ ॥ इतीति । इतीत्थं, शौरेः श्रीकृष्णस्य, प्रहसितं, चारु जल्पितं, वीक्षितं, गतिं, प्रेमपरिष्वङ्गं प्रेम्णाऽऽलिङ्गनं, स्मरन्त्यः स्त्रियः, रुरुदुः ॥ १४ ॥

कृष्णप्रिया

हे प्रभो ! हे दाशार्ह ! हे बलरामजी ! क्या कहा जाय ? कुटुम्बीजन एवं स्वजनों का त्याग सर्वथा अशक्य है । लेकिन भगवान् कृष्ण के लिये माता-पिता-भाई-पति-पुत्र एवं बहिन-बेटियों का त्याग किया । इसके बदले में हमारे सौहार्द और स्नेह की दरकार न करके हमसे नाता तोड़कर मथुराजी पधार गये, हमारा सर्वथा त्याग किया । हम चाहतीं तो उन्हें रोक लेतीं, दाऊजी आप तो दयालु एवं सर्वज्ञ हैं । भगवान श्रीकृष्ण के स्वरूप एवं महिमा को हम क्या जानें ? हम तो व्रज की गँवार ग्वालिने रहीं । उन विलक्षण पुरुष की मीठी बातों से मुग्ध बन गयीं । स्वाधीन मन बुद्धि वाले उनकी बातों में नगर की विलक्षण मनातिचतुर स्त्रियां भी मुग्ध हो गयीं और हो रही हैं यह तो आश्चर्य है ॥ ११-१२ ॥ तब दूसरी गोपी कहने लगी—अयि सखि ! भगवान नन्दनन्दन श्रीकृष्ण तो गोष्ठी करने में बड़े चतुर हैं, वे ऐसी तो हृदयङ्गम बातें कहते हैं कि क्या कहा जाय ? उनकी मनोहर मुस्कान और स्नेहमय चितवन से नगर की शिक्षित नारियाँ भी स्नेहवत आकुल-व्याकुल हो जाती हैं और अपनी आत्मा को न्योछावर कर देती होंगी ॥ १३ ॥ तब समीप में बैठी एक गोपी बोली अरी सखियाँ ! उनकी बातों से हमें क्या मतलब है ? यदि समय पसार करना है तो दूसरी बातें करें । यदि उस निरपेक्ष का समय हमारे विना बीत जाता है तो उसकी तरह हमारा समय भी कट जायगा, अन्तर इतना होगा कि भले हमारा समय दुःख से कटेगा ॥१४॥

इति प्रहसितं शौरेर्जल्पितं चारु वीक्षितम् । गतिं प्रेमपरिष्वङ्गं स्मरन्त्यो [1]मुमुहुः स्त्रियः ॥ १५ ॥
संकर्षणस्ताः कृष्णस्य संदेशैर्हृदयंगमैः । सान्त्वयामास भगवान् नानानुनयकोविदः ॥ १६ ॥
द्वौ मासौ तत्र चावात्सीन्मधुं माधवमेव च । रामः क्षपासु भगवान् गोपीनां रतिमावहन् ॥ १७ ॥
पूर्णचन्द्रकलामृष्टे कौमुदीगन्धवायुना । यमुनोपवने रेमे सेविते स्त्रीगणैर्वृतः ॥ १८ ॥

---

[1] रुरुदुः—श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

कर्वमक्षमा

अन्वयः—इति, स्त्रियः, इति, शौरेः, प्रहसितम्, इति, जल्पितम्, इति, तस्य, चारु, वीक्षितम्, इति, तस्य, गतिम्, इति तस्य, प्रेमपरिष्वङ्गम्, स्मरन्त्यः, मुमुहुः ॥ १५ ॥ नानानुनयकोविदः, भगवान्, सङ्कर्षणः, कृष्णस्य, हृदयंगमैः, संदेशैः, सान्त्वयामास ॥ १६ ॥ रामः, तु मधुम्, च, माधवम्, एव, द्वौ, मासौ, तत्र, आवात्सीत्, भगवान्, रामः, क्षपासु, गोपीनाम्, रतिम्, आवहन्, कौमुदीगन्धवायुना, सेविते, पूर्णचन्दकलामृष्टे, स्त्रीगणैः, वृतः, रेमे ॥ १७-१८ ॥

श्रीधरस्वामीविरचिता भावार्थदीपिका

नानाविधेष्वनुनयेषु कोविदः ॥ १६ ॥ मधुं चैत्रम् । माधवं वैशाखम् । गोपीनां रतिमिति । श्रीकृष्णक्रीडासमयेऽनुत्पन्नानामतिबालानामन्यासामित्यभियुक्तप्रसिद्धिः ॥ १७ ॥ पूर्णचंद्रस्य कलाभिर्मरीचिभिरामृष्टे उज्ज्वले कौमुदीगंधवायुना कुमुद्वतीनां गंधबातेन सेविते । यद्वा कौमुदीशब्देन तद्विकासितानि कुमुदानि लक्ष्यंते कुमुदगंधवातेनेत्यर्थः ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्त्रीणां धैर्यशिथिलवचनं वज्रधारोपममिति लोकसिद्धमित्याशयेनाह—इतीति । इतीत्थमुक्त्वा । प्रेम्णा परिष्वंगमालिंगनम् ॥ १५ ॥ ताः गोपीः । नानाप्रकारा येऽनुनया बोधकवाक्यानि तेषु कोविदः । ता इति याः खलु तादृगवस्था अपि 'कच्चिदास्ते' इत्यनेन पद्येन तत्सुखादेव सुखं मन्यमानाः, याश्च 'अपि वा' इत्यर्द्धेन स्वकर्तृकतत्सेवनाय तत्कर्तृकस्मरणमात्रेण कृतार्थं मन्यमानाः, याश्च 'मातरम्' इत्यनेन तदर्थं साक्षादेव मात्रादिकं सर्वमपि त्यक्तवत्यः, याश्च 'ता नः' इत्यर्द्धेन स्वेषां तु तस्मिन्नविचलसौहृद्यं विज्ञापितवत्यः, याश्च 'कथं नु' इत्यर्द्धेन स्वीयभावस्य तदेकनिष्ठकैमुत्याय स्त्र्यंतरभावमपि प्रमाणीकृतवंत्यः, याश्च 'कथं नु गृह्णन्ति' इत्यर्द्धान्तरेण तस्यानवस्थितात्मकत्वं कृतघ्नत्वं च दर्शयित्वा स्वेषां तदव्यभिचारित्वं निश्चितवत्यः, याश्च 'गृह्णन्ति' इत्यर्द्धान्तरेण स्वेषां तदेकहृतचित्तत्वं सूचितवत्यः, याश्च 'किं नु तत्कथया' इत्युक्त्या महद्विरहदुःखासहिष्णुतया स्वमनःकठिनीभावाय निवृत्तप्राया अपि 'इति प्रहसिताम्' इति मुनींद्रवचनेन प्रत्युत तदीयस्नेहवारिधिमग्नतया लब्धद्रवा इत्यवगतास्तादृश्यस्ताः । आसां तावद्धेतुकवधांतसंध्यामारभ्य कुरुक्षेत्रगमनावधितदेकजीवनवर्णनेत्यर्थः । अत एवोत्तरे गोपीनामित्यत्राभियुक्तानामन्या एव मता इति तैर्व्याख्यास्यते । तत्र श्रीसंकर्षणस्यानुनयाः प्रथमतः साश्रावलोकनकलाततस्सश्लाघतानिवेदनाकर्णता, ततः सप्रेमतद्विषयकनिजानुकम्पावर्णना, ततः सानुतापतदागमनविलंबकारणनानोपद्रवसूचना, ततः सयुक्तिकशपथतदानयनप्रतिज्ञा, ततो युष्माकमीदृशरोदनार्तिं श्रुत्वा स तु प्राणकोटिप्रियतमो बहुतरं दुःखं प्राप्स्यतीति बिभीषिकेत्येवंरूपाः । श्रीकृष्णसंदेशानां हृदयंगमत्वं पराशरेण दर्शितम्—"संदेशैः साममधुरैः प्रेमगर्वैरगर्वितैः । रामेणाश्वासिता गोप्यः कृष्णस्यातिमनोहरैः ॥" इति । तत्र साम्ना—स्तुतिपूर्वकाश्वासनेन । मधुरैरभिरुचितैः । स्तुतिश्च—न पारयेयं निरवद्यसंयुजाम्' इत्यादिरूपा । आश्वासनम्—'अचिरान्मामुपैष्यथ' इत्येवंविधम् । प्रेमगर्भत्वम्—'यत्त्वहं भवतीनां वै' इत्यादिरूपम् । अगर्वितत्वम्—'तद्वः प्रतियातु साधुना' इत्येवंप्रकारम् । एवं च पूर्ववन्नित्यप्रियकृष्णसंयोगमयप्रकाशविशेषव्यंजनयातिमनोहरैरित्यर्थः । संकर्षण इति तासां मन आकृष्य श्रीकृष्णं प्रति प्रापकत्वादिति तोषणीकाराः । कृष्णस्य संदेशैरिति उद्धवस्य दास्यभावः, संकर्षणस्य वात्सल्यभावश्च कृष्णेन गणितः । किन्तूभयोः सख्यभाव एव संदेशप्रेषणे हेतुरभूदिति । बहुवचनेन कश्चित्संदेशो ज्ञानगर्भः, कश्चिदनुनयगर्भः, कश्चित्प्रभावगर्भ इत्येवं बहव एव संदेशाः । हृदयंगमैः रहस्यत्वात्सर्वत्र प्रकाशयितुमनर्हैः । नानानुनयकोविद इति—भो वत्स्यः समाश्वसित सांप्रतमहमेव द्वारवतीं गत्वा बलादेव तमिहानयिष्यामि नाहमुद्धव इव तदधीन एव केवलमिति स्वप्रौढिज्ञापक इत्यर्थ इति विश्वनाथः ॥ १६ ॥ तत्र व्रजे । अभियुक्तप्रसिद्धिस्तत्पर प्रसिद्धिः, किंवदन्त्यस्तीत्यर्थः । "अभियुक्तः परै रुद्धे तत्परे त्वभिधेयवत्" इति मेदिनी । गोपीनां गोप्यन्तराणामित्येवार्थः । नानावाचकशब्दानां युक्त एवार्थो गृह्यते सैंधवमानयेतिवत् । न हि सर्वत्र गोपीशब्देन श्रीकृष्णप्रेयस्य एव गृहीता इति नियमः । "गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवम्" इह 'गोप्यस्तूर्णं समभ्येत्य' इति, 'रुदितमनुनिशम्य तत्र गोप्यः' इति, "कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलम्" इह, 'गोप्याददे त्वयि कृतागसि दाम—'इह च तथा "परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेव च" इत्यत्र च व्यभिचारात् । न च पूर्वोत्तराणां प्रसंगप्राप्तत्वेनैकत्वमाशंक्यम्, यथा तत्प्राप्तमत्वेऽपि स्वायंभुवारम्भगतपृथिवीमज्जनेनैव स्वजातिहिरण्याक्षवधानुपपत्त्या तन्मज्जनमन्यदेव समर्थनीयं तथेहायुक्तप्रागुक्तान्यथानुपपत्त्या पूर्वाभ्यस्ता एता अन्या एवेति तस्मात्प्रकरणमिदमेवावतार्यम् । एवं कृष्णप्रियाः सुष्ठु सांत्वयित्वैव याः खलु कुमारगतेन 'गोप्योंतरेण भुजयोः' इत्यनेन या अनुभूतास्ता एव ग्राह्याः ॥ १७ ॥ "कला वृद्धिमरीच्योश्च कला रक्षणमाययोः" इति धरणिः । कुमुदानि सन्त्यास्विति कौमुदाः सरस्यस्तासां कुमुद्वतीनामित्यर्थः । अत्रार्थे कुमुदानां गंधस्य कुमुद्वतीष्वारोपात्सौष्ठवानुपलब्धेरर्थांतरमाह—यद्वेति । इत्यर्थ इति—अयमर्थोपि लक्षणालब्धत्वात्प्राक्तनार्थसदृशो यद्यप्यस्ति तथापि कुमुद्वतीनां गंधासंभवादर्थानुपपत्त्या लक्षणैवोचितेति स्वामिचरणाशयः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति एवं प्रहसितादिकं स्मरन्त्यः प्रहसितं स्मितं प्रशब्दस्य आरम्भे प्रयोगात् चार्विति लिङ्गविपरिणामेनापि सर्वैर्योज्यं प्रेम्णा परिष्वङ्गः सर्वाङ्गगाढालिङ्गनं यद्वा प्रेमस्नेहार्द्रस्वभावः एषां यथोत्तरं स्मरणेन रोदकत्वे श्रैष्ठ्यं शौरेरिति सम्प्रति शूरवंश्यतया प्रकटितात्मन इति गोपिकापक्षपातेन सप्रणयेर्ष्यं वचनं स्त्रिय इति तासां तत्र विवेकराहित्यं व्यञ्जितम् ॥ १५ ॥ सङ्कर्षण इति । अत्र कृष्णस्य सन्देशैरिति तृतीयानिर्द्देशेन साधकतमत्वप्राप्तेरिदं गम्यते यद्यप्यसौ भगवान् सर्वथा समर्थः तथा सङ्कर्षणः श्रीकृष्णज्येष्ठभ्रातृत्वेन गौरवविषयः तथा नानानुनयकोविदः नानाविधेषु सान्त्वनोपायेषु पण्डितः तेनानुनयेनारब्धसान्त्वन इत्यर्थः । तथापि कृष्णस्य स्वभावत एव सर्वेषामपि चित्ताकर्षकस्य किमुत तासामित्येवं रूपस्य सन्देशैरेव ताः सान्त्वयामास यतो हृदयङ्गमैः तैरेव तासां हृदयाभ्यन्तरं प्रविश्य द्रावकैः तत्र हेतुस्ता इत्येव याः खलु तादृगुन्मादवश्या अपि कच्चिदास्त इत्यनेन पद्येन तत्सुखादेव तदीयहितवर्गसुखादेव च सुखं मन्यमानाः याश्च अपि वेत्यर्द्धेन स्वकर्तृकप्राक्तनतत्सेवाथास्तत्कर्तृकस्मरणमात्रेण कृतार्थं मन्यमानाः याश्च मातरमित्यनेन सम्प्रति तदर्थं साक्षादेव मात्रादिकं सर्वमपि त्यक्तवत्यः तच्च स्वयं तस्मै तज्ज्यायसे निवेद्य स्वेषां तदेकनिष्ठत्वं दर्शितवत्यः याश्च तान् इत्यर्द्धेन स्वेषां तु तस्मिन्नविचलसौहृद्यं विज्ञापितवत्यः याश्च कथं न्वित्यर्द्धेन स्वीयभावस्य तदेकनिष्ठत्वकैमुत्याय अस्त्यन्तरभावमपि प्रमाणीकृतवत्यः याश्च कथं नु गृह्णन्तीत्यर्द्धान्तरेण तस्यानवस्थितात्मत्वं कृतघ्नत्वञ्च दर्शयित्वा स्वेषां तदव्यभिचारित्वं निश्चितवत्यः याश्च गृह्णन्तीत्यर्द्धान्तरेण स्वेषां तदेकहृतचित्तत्वं सूचितवत्यः । याश्च किं नस्तत्कथयेत्युक्त्या महातद्विरहदुःखासहिष्णुतया स्वमनःकठिनीभावाय निवृत्तप्राया अपि इति प्रहसितमिति मुनीन्द्रवचनेन प्रत्युत तदीयस्नेहवारिधिमग्नतया लब्धद्र[वा]व्या इत्यवगतास्तादृश्यस्ताः आस्तान्तावद्धेनुकवधान्तसन्ध्यामारभ्य कुरुक्षेत्रगमनावधि तासां तदेकजीवनत्ववर्णनेत्यर्थः । एकादशे च रामेण सार्द्धमित्यादिभिः श्रीभगवता स्वयं तत्तदनुरागविस्तारणया स्वैकप्राप्तिकथनयेत्यर्थः । अत एवोत्तरत्र गोपीनामित्यत्राभियुक्तानामन्या एव मता इति तैर्व्याख्यास्यते तत्र श्रीसङ्कर्षणस्यानुनयाः प्रथमतः शास्त्रावलोकनकला ततः सश्लाघा तानिर्वेदनाकर्णना ततः सप्रेमतद्विषयकनिजानुकम्पावर्णना ततः सानुतापतदागमनविलम्बकारणनानोपद्रवसूचना ततः सयुक्तिकशपथतदानयनप्रतिज्ञा ततो युष्माकमीदृशार्तिरोदनं श्रुत्वा स तु प्राणकोटिप्रियतमो बहुतरं दुःखं प्राप्स्यतीति विभीषिकेत्येवंरूपाः श्रीकृष्णसन्देशानां हृदयङ्गमत्वञ्च श्रीपराशरेण विशिष्य दर्शितम्—

"सन्देशैः साममधुरैः प्रेमगर्भैरगर्वितैः । रामेणाश्वासिता गोप्यः कृष्णस्यातिमनोहरैः ॥" इति

अत्र साम्ना स्तुतिपूर्वकाश्वासनेन मधुरैरभिरुचितैः स्तुतिश्चात्र "न पारयेहं निरवद्यसंयुजाम्" इत्यादिरीतिका आश्वासनम् "अचिरान्मामुपैष्यथ" इत्येवंविधम् प्रेमगर्भत्वं "यत्त्वहं भवतीनां वै" इत्यादिलक्षणम् अगर्वितत्वं 'तद्वा प्रतियातु साधुना' इत्यादिप्रकारम् अन्ते च पूर्ववन्नित्यश्रीकृष्णसंयोगमयप्रकाशविशेषव्यञ्जनयातिमनोहरैरित्यर्थः । किञ्च यस्ताः स्वयं नाम्ना सङ्कर्षणः सान्त्वयामास स मध्ये मध्ये श्रीकृष्णमपि मनसैव समाकृष्य रहसि काञ्चित् प्रति कदाचिदनुभावयतीति तथा स इत्यर्थः । अत एव सान्त्वयामासेति सुष्ठु घटते एवमेवास्य वक्ष्यमाणस्वप्रियाभिः क्रीडापि युक्ता स्यात् तत्र तत्र हेतुः भगवान् सर्वज्ञत्वात् । तासु तन्नित्यप्रेयसीत्वस्य तत्त्वज्ञसुखसर्वशक्तियुक्त इत्यर्थः । अन्यथा व्याख्याने तु द्वारकायामपि मर्य्यादालोपः प्रसज्ज्येत इत्यलमतिविस्तरेण । एवं सन्देशप्रस्थापनेन तस्मिन् तस्य श्रीकृष्णस्य सख्यांशोऽपि दर्शितः । स च युक्तः अतिसमानवयस्त्वाद्बाल्यमारभ्य सहविहाराच्च "गोप्यन्तरेण भुजयोरपि यत्स्पृहाः श्रीः" इति विनयोक्तिदर्शनात् शङ्खचूडवधादौ तथा दृष्टत्वाच्च अग्रजत्वांशस्तु दशमीमिव दशां गतानां तासां रक्षणार्थमस्फुरन्नेवासीत् ॥ १६ ॥ तदेवं ता इत्यस्य व्याख्या प्रघट्टकानुसारेण तमेवालम्बमानानामभियुक्तानां मतप्रामाण्येन च द्वावित्यत्र गोपीनामिति तदेकमतिगतिभ्यस्त्वपरासां गोप्यन्तराणामित्येवार्थः । सामान्यविशेषवाचकाः शब्दाः प्रसङ्गवशादेव तत्तत्प्रतिपादयन्ति यथा ब्राह्मणा नावमन्तव्या इत्युक्ते सर्वे ते गृह्यन्ते ब्राह्मणावरणीया इत्युक्ते तत्तत्कर्मणि योग्या एव ते व्रियन्ते न तु सर्वे न चान्ये तद्वत् नानावाचकशब्दानामर्थः खलु युक्त एव गृह्यते सैन्धवमानयेतिवत् । नहि सर्वत्र गोपीशब्देन श्रीकृष्णप्रेयस्य एव ता गृहीता इति नियमः "गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवम्' इत्यत्र 'गोप्यस्तूर्णं समभ्येत्य' इत्यत्यत्र "रुदितमनुनिशम्य तत्र गोप्यः" इत्यत्र "कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलम्" इत्यत्र "गोप्याददे त्वयि कृतागसि दाम" इत्यत्र 'प्रसादं लेभिरे गोप्य' इत्यत्र च तथात्रैव "परिष्वक्तश्चिरोत्कण्ठैर्गोपैर्गोपीभिरेव च" इत्यत्र व्यभिचारात् । न च प्रसङ्गप्राप्तत्वेनात्र पूर्वोत्तराणामेकत्वमाशङ्क्यं किन्तु यथा पञ्चमस्कन्धे "क्षेत्रज्ञ एता मनसो विभूतीः" इति "क्षेत्रज्ञ आत्मा पुरुषः पुराणः" इत्यव्यवहितेऽपि पद्यद्वये क्षेत्रज्ञशब्दौ जीवात्मपरमात्मकत्वेन पृथगेव व्याख्यातौ यथा च स्वायम्भुवारम्भगतपृथिवीमज्जनेनैव स्वतान्तजाताहिरण्याक्षवधानुपपत्त्या तन्मज्जनमन्यदेव समर्थनीयं तथा ता इत्यत्रोक्ताः प्रागुक्तान्यथानुपपत्त्या पूर्वाभ्यस्ता एता अन्या एव व्याख्यान्तरे तु द्वारकायामपि मर्य्यादालोपः प्रसज्जेतेत्यलमतिविस्तरेण । तस्मात् प्रकरणमिदमेवमवतार्यम् एवं श्रीकृष्णप्रियाः सुष्ठु सान्त्वयित्वा याः खलु कौमारगतेन गोप्यन्तरेण भुजयोरित्यनेन श्रीकृष्णपरिहासेन भावितदङ्गसङ्गत्वेपि सिद्धतया सूचिताः, याश्च शङ्खचूडवधसमयहोरिकाक्रीडायां

श्रीकृष्णप्रेयसीसम्वलिततया वर्णितास्ताश्च प्रागश्रुततदङ्गसङ्गास्तदर्थरक्षितकौमाराः कृष्णस्यानुमते स्थित इत्यनुसारेण तत्प्रार्थनया सान्त्वयामासेत्याह—द्वावित्यादिना। चकारोवान्वाचये सुहृद्दिदृक्षुरुत्कण्ठ इत्युक्तत्वान्मुख्यतया सुहृदां दर्शनमेव वाञ्छितमासीत् आनुषङ्गिकतया गोपीविशेषाणां रतिं चावहन्नित्यर्थः। क्षपास्विति परमगुह्यत्वं व्यञ्जितम्। अत एव यमुनोपवन इति दूरनयनं च राम इति रमणयोग्यताव्यञ्जकं तत्रापि भगवानिति तत्राप्यनेकासाम्॥ १७॥ तदेव विशिष्य वर्णयति—पूर्णेति। श्रीरामस्येच्छया तदा सदा रहसि पूर्णचन्द्रविशेषोदयात्॥ १८॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इति एवं प्रहसितादिकं स्मरन्त्यः, प्रहसितं स्मितं चाविति लिंगविपरिणामेनापि सर्वैर्योज्यम्। प्रेम्णा परिष्वंगं सर्वांगगाढालिंगनम्, यद्वा, प्रेम स्नेहार्द्रस्वभावः; एषां यथोत्तरं स्मरणेन रोदकत्वे श्रैष्ठ्यम्। शौरेरिति निजाशेषभगवत्ताप्रकटनार्थं शूरवंशेऽवतीर्णस्य तस्य तत्तत् सर्वम्। स्त्रिय इति च प्रेमार्त्तस्वभावानां तासामपि तत् युक्तमेवेति भावः॥ १५॥ कृष्णस्य सर्वचित्ताकर्षकस्य, अत एव हृदयंगमैश्चित्तग्राहकैः (उ० स० १०४) 'कच्चिद्भीर्तिं न भजत' इत्याद्युद्धवसन्देशोक्तैः सान्त्वयामास आश्वासयत्, तथा च श्रीविष्णुपुराणे (५।२४।२०) सन्देशैः साममधुरैः प्रेमगर्भैरगर्वितैः। रामेणाश्वासिता गोप्यः कृष्णस्यातिमनोहरैः॥' इति। यतो भगवान् सर्वशक्तियुक्तः, अत एव नानाविधाः—'भ्राता अचिरादेवागत्य युष्मान् प्रीणयिष्यति, युष्माकमीदृशार्त्तिरोदनादिश्रवणेन बहुदुःखं प्राप्स्यति' इत्यादि-सशपथवाक्याश्रुप्रमार्ज्जनादि-लक्षणा येऽनुनयाः सान्त्वनोपायास्तेषु कोविदः, यतः संकर्षणः श्रीकृष्णेन सहापृथग्भूत इत्यर्थः॥ १६॥ एवं प्राक् श्रीकृष्णैकप्रियास्ताः सान्त्वयित्वा निजागमनमुख्यप्रयोजनं विधायात्मनो व्रजजनैकप्रियतादिकं दर्शयन्नन्याश्च वसन्ते रमयामासेत्याह—द्वाविति। त्वर्थे चकारो भिन्नोपक्रमात्, एव अपि, माधवमपि, चकारादन्यानि च कतिचिद्दिनानि मधुं माधवमिति तदानीं श्रीवृन्दावनस्य श्रीबलदेवगमनापेक्षया; तदानीं पुष्पादिरसोद्रेकेण शोभाविशेषः सूचितः। क्षपासु वसन्तज्योत्स्नामयरात्रिषु रतिमाद्यरसम्, आ सम्यग् वहन् प्रापयन्, यतो रामो रतिकुशल इत्यर्थः। तत्र हेतुः—भगवान् कामशास्त्राद्युक्त-तत्तत्प्रकाराभिज्ञ इत्यर्थः। अन्यत्तैर्व्याख्यातम्। अथवा तादृशोऽपि स तादृशैरपि सन्देशैः सान्त्वयामास किम्—काका अपि तु सान्त्वयितुं नाशक्नोदित्यर्थः। यतस्ताः श्रीकृष्णविरहान्यस्तातुरास्तद्दर्शनैक लालसाकुला इत्यर्थः। अपि च, अतः क्षपासु निद्राकालेष्वपि गोपीनां तासां रतिं सुखम् आ ईषदपि वहन् प्रापयितुं द्वौ मासौ चावात्सीत्। चकारात् किञ्चिदधिकौ, तदानीं तासां विरहार्त्तिभरोत्पत्ते, यतो भगवान् परमदयालुः, किञ्च, रामः सर्वसुखकरः॥ १७॥ कथमवात्सीत्तदाह—पूर्णेति। श्रीरामस्य प्रीत्यर्थं श्रीवृन्दावनशोभार्थं वा, तदानीं नित्यं पूर्णचन्द्रोदयात् स्त्रीगणैः श्रीकृष्णरमितेतरैः, ते च तैर्व्यञ्जिता एव, अन्यच्च व्याख्यातम्। यद्वा, कौमुदी शारदी ज्योत्स्नामयी रात्रिः, तथा च कोषे—'कौमुदी चन्द्रिका प्रोक्ता कार्तिकस्य च पूर्णिमा' इति; तस्यामिव कुमुदादिसम्बन्धी यो गन्धस्तद्युक्तेन वायुनेति॥ १८॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीति। प्रेम्णा परिष्वङ्गमालिङ्गनं च स्मरन्त्यः॥ १५॥ सङ्कर्षण इति। नानाविधेष्वनुनयेषु सान्त्वनेषु कोविदो निपुणः ताः गोपीः सान्त्वयामास॥ १६॥ द्वौ इति। मधु चैत्रं माधवं वैशाखं चेत्येतौ द्वौ मासौ तत्रावात्सीदुषितवान् अत्यन्तसंयोगे द्वितीया कथम्भूतः सन् तासु मधुमाधवयोः सम्बन्धिनीषु क्षपासु रात्रिषु गोपीनां पूर्वं स्वपरिगृहीतानां व्रजान्निष्क्रमणानन्तरम् उत्पन्नानां वा रतिमनुरागमावहन्नुद्रेचयन्॥ १७॥ किञ्च, पूर्णेति। पूर्णचन्द्रस्य कलाभिः मरीचिभिरामृष्टे उज्ज्वले कौमुदीगन्धवायुना कुमुद्वतीगन्धवातेन वासिते यद्वा कौमुदीशब्देन तद्विकासितानि कुमुदानि लक्ष्यन्ते कुमुदगन्धवायुनेत्यर्थः। यमुनाया उपवने स्त्रीसमूहैः परिवृतो रेमे क्रीडितवान्॥ १८॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

शुकः स्त्रीणां धैर्यशिथिलं वचनं वज्रधारोपममिति लोकसिद्धमित्याशयेनाह—इतीति। इत्थमुक्त्वा शौरेः कृष्णस्य प्रहसितादि च स्मरन्त्यो रुरुदुरित्यन्वयः॥ १५–१६॥ मधुमाधवं वसन्तर्त्तुम्॥ १७॥ कौमुदी कुमुद्वती तस्याः गन्धेन सम्पृक्तेन वायुना सेविते॥ १८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

हृदयङ्गमैरिति प्रकटलीलोपदेशपर्यन्तत्वात् सन्देशविशेषणानि चैतानि श्रीविष्णुपुराणे—

"सन्देशैः साममधुरैः प्रेमगर्भैरगर्वितैः। रामेणाश्वासिता गोप्यः कृष्णस्यातिमनोहरैः" ॥ इति

सङ्कर्षणः मध्ये मध्ये श्रीकृष्णमपि मनसि समाकृष्य दर्शयतीति च तथेत्यर्थः। ताः श्रीकृष्णप्रेयसीः गोपीनां गोप्यन्तरेण भुजयोरित्यनुसारेण शङ्खचूडवधादिमहोरिकाविहारे श्रीकृष्णप्रेयसीभिः सम्वलितानां तत्प्रेयसीचरीणां गोपीविशेषणा-

मित्यर्थः। अत्र च श्रीकृष्णस्यानुमते स्थित इति कारणं योज्यं पूर्वं ह्यनेन तासामङ्गसङ्गो न वर्णितः किन्त्वनुरागमात्रं ततश्च तदर्थं रक्षितकौमारासु तासु च कृपयासौ तथा प्रार्थितवानिति क्षपास्विति परमगुप्तत्वं व्यञ्जितम् ॥ १६–२४ ॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

इतीत्यादि। अमर्षादिभावशान्तौ स्मृतिभावोदये रुरुदुरित्यर्थः ॥ १५ ॥ सङ्कर्षणस्ता इत्यादि। ताः कृष्णपरिगृहीताः कृष्णस्य सन्देशैः सान्त्वयामास। ननु कथं सन्देशेनैव सान्त्वनमित्याह—हृदयङ्गमैः अचिरादेव मे दर्शनं भविष्यतीत्यादिको य आश्वासस्तेन हृदयङ्गमैः नानानुनयाः कृष्णस्य ये ये नानानुनयास्तेषु कोविदः पण्डितः तस्यै कस्यापि स्मृतिर्न जातेत्यर्थः॥१६॥ गोपीनां रतिमावहन्नित्यादिषु गोपीनां स्वपरिगृहीतानाम्। एवं स्त्रीगणैरित्यत्रापि तथा ॥ १८–३४ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे पञ्चषष्टितमोऽध्यायः,

षट्षष्टितमः, सप्तषष्टितमः, अष्टषष्टितमश्च ॥ ६५–६८ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

गोपीनां रतिमावहन्नित्यादि। गोपीनां पूर्वपरिगृहीतानाम्। एवं स्त्रीगणैरित्यपि ॥ १७–३४ ॥

इति पञ्चषष्टिः एवं षट्सप्तषष्टिः, तथाष्टषष्टिश्च ॥ ६५–६८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

इतीति। स्वीयसुधारसमयप्रहसितादिशल्यपञ्चकेन तासां हृदयं विद्धध्य कृष्णचन्द्रेण गतमतस्ताः कथं जीवन्तु कथं म्रियन्तामिति श्रीबलदेवाग्रेऽपि विह्वलीभूय रुरुदेरेव ॥ १५ ॥ कृष्णस्य सन्देशैरिति उद्धवस्य दास्यभावः सङ्कर्षणस्य वात्सल्यभावश्च कृष्णेन न गणितः किन्तूभयोरनयोः सख्यभाव एव सन्देशप्रेषणहेतुरभूदिति ज्ञेयं बहुवचनेन कश्चित् सन्देशो ज्ञानगर्भः कश्चिदनुनयगर्भः कश्चित् प्रभावगर्भ इत्येवं बहव एव सन्देशाः हृदयङ्गमैरिति रहस्यत्वात् सर्वत्र प्रकाशयितुमनर्हैरितिभावः। नानानुनयकोविद इति भो वत्साः समाश्वसित साम्प्रतमहमेव द्वारवतीं गत्वा बलादेव तमिह आनेष्यामि नाहमुद्धव इव तदधीन एव केवलमिति स्वप्रौढिमज्ञापक इत्यर्थः ॥ १६ ॥ मधुं चैत्रं माधवं वैशाखं गोपीनां रतिमिति श्रीकृष्णक्रीडासमयेऽनुत्पन्नानामतिबालानाञ्चान्यासामित्यभियुक्तप्रसिद्धिरिति श्रीस्वामिचरणाः शङ्खचूडवधसमयहोरिकाक्रीडायां याः कृष्णप्रेयसीसम्वलिततया रामप्रेयस्योऽपि निर्दिष्टास्तासामेवेत्यस्मत्प्रभुचरणाः ॥ १७ ॥ पूर्णचन्द्रस्य कलाभिः कौमुदीभिरामृष्टे उज्ज्वले कौमुदीविकसितत्वात् कुमुद्वतीनां गन्धवत् वायुना सेविते यमुनोपवने श्रीरामघट्टतया प्रसिद्धे स्थले किन्तु यत्र श्रीकृष्णेन रासक्रीडा कृता तत् स्थलमपि रामेण दूरतः परिहृतम् ॥ १८ ॥

गूढार्थबोधिनी

हृदयङ्गमैः विश्वासजनकैः। अनुनयेषु सान्त्वनादानेषु कुशलः ॥ १६ ॥ मधुं चैत्रं वैशाखं च। रतिमावहन् प्रीतिं जनयन् अवात्सीदित्यन्वयः। वासुदेवकलात्वात् चतुर्व्यूहेषु अन्यतमत्वाच्च भगवदादेशेनैव गोपीविहारे रामः प्रवृत्तोऽतो न दोषलेशोऽपीत्यवधेयम् ॥ १७ ॥ कलामृष्टे किरणोज्ज्वले। कौमुदी कुमुदसम्बन्धिनी नदी यमुना तद्गन्धयुक्तवायुनासेविते ॥१८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रतिमनुरागमुद्वहन् श्रीकृष्णे प्रापयन् ॥ १७ ॥ पूर्णचन्द्रस्य कलाभिर्मरीचिभिरामृष्टे उज्ज्वले कौमुदीशब्देन तद्विकासितानि कुमुदानि लक्ष्यन्ते तद्गन्धवता वायुना सेविते यमुनोपवने श्रीकृष्णलीलास्मरणकथनादिभिः रेमे ॥ १८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो मरणपर्यन्तं पीडिताः भगवदिच्छया अन्तस्तापं बहिःकृतवत्य इत्याह इति प्रहसितमिति। प्रहसितमान्तरम्। बहिर्व्यामोहकम्। शौरेरिति सामर्थ्यमुक्तम्। जल्पितं वाचनिकम्। चारुवीक्षितमैन्द्रियकम्। कायिकं द्विविधमप्याह गतिं प्रेमपरिष्वङ्गमिति। एवं पञ्चाङ्गं भगवन्तं स्मरन्त्यः मोहं मूर्च्छां प्राप्ताः ॥ १५ ॥ मरणे तु सम्भाविते भगवानेवागच्छेत्, सायुज्यं च दद्यात्, तदभावात् बलभद्रेण सान्त्वनं कृतमित्याह सङ्कर्षण इति। ताः पूर्वं निरुद्धाः अपहृतशोकाश्च। पुनरुत्पन्ने दोषे उद्धववत् ततोऽपि विशेषप्रकारेण सान्त्वयामास। यतो भगवान् नानाप्रकारानुनये कोविदश्च। यथैव ताः सान्त्विता भवन्ति, तथैव कृताः ॥ १६ ॥ सान्त्वनार्थमेव ह्ययं गतः, वाक्यमात्रेण सान्त्वनं न भवतीति वसन्तसमये तत्रैव स्थितश्चेत्याह **द्वौ मासौ तत्र चावात्सीदिति**। स हि बहुकालं यत्र क्वचित्तिष्ठति, तत्रापि स्थितः। **मधुं माधवमेव चेति**। वसन्त एव कामकृता पीडा

महतीति । तस्मिन् विद्यमाने कामो न पीडयतीति । भगवान् उद्धवद्वारा अलौकिकसमाधानं कृत्वा लौकिकन्यायेन बलभद्रद्वारा कृतवानिति । रामोपि रतिवर्धनः । क्षपासु भगवद्रूपो भूत्वा गोपीनां रतिमावहन् स्वयमपि रेमे इत्यग्रेण सम्बन्धः । **अवात्सीदिति** पूर्वेण वा । चकारात् स वसन्तो मासत्रयात्मक इति ज्ञातव्यम् ॥ १७ ॥ अन्यार्थमेव चेद्गच्छेत्, तदा लोके अनौचित्यं भवतीति भगवदिच्छया स्वयमपि रतिं कृतवानित्याह **पूर्णचन्द्रकलामृष्ट** इति । तत्पतिसम्बन्धे या न विरुध्यन्ते, ता बलभद्रेणापि न विरुध्यन्त एव । अनेन सर्वत्र भगवद्धर्मेषु भगवत्सिद्ध्यर्थं साक्षान्निर्लेपे सम्बन्धाभावात् अनुकल्पाः कृता इति सूचितम् । अनुकल्पोऽपि सानुभाव एव भवति, न तु निरनुभाव इति यमुनाकर्षणं वरुणादिसम्माननं च निरूपयिष्यति । त्याज्य एव देहादिरिति । यथा वस्त्रापावनार्थं जलं वस्त्रे प्रक्षिप्यते, तथा एताः भगवद्धर्मे प्रक्षिप्ताः । रमणे साधनान्याह । पूर्णचन्द्रकलाभिः मृष्टे उज्वले **यमुनोपवन** इति । वनं नदी च रसपोषके । अपेक्षितो वायुरिति देशं निरूप्य निरूपयति **कौमुदीगन्धवायुनेति** । कुमुदसम्बन्धिनी कौमुदी नदी तत्सम्बन्धिगन्धयुक्तेन वायुना सेविते । कौमुदी ज्योत्ना वा, गन्धश्च । उभयसहितेन वायुना सेवितत्वादेव मन्दत्वम् । इदं रमणं पुष्पावचयादिरूपम् । बहिरिति ज्ञापयितुं **स्त्रीगणैर्वृत** इत्युक्तम् । गणशः सर्वविधा एव स्त्रियस्तत्र सन्तीति ज्ञापितम् ॥ १८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

इतीत्यत्र । **सायुज्यं चेति** । सह योगेन परिष्वङ्गादिकं कुर्यादित्यर्थः । **द्वौ मासावित्यत्र** । **तत्र चेति** । चकारस्यार्थमाहुः **स हीति** । **मासत्रयात्मक** इति । स वसन्तः फाल्गुनमप्यादाय मासत्रयात्मक इत्यर्थः । **अन्यार्थमेवेति** । सान्त्वनार्थमेव गमने ज्येष्ठत्वाल्लौकिकदृष्ट्या अनौचित्यं स्यादित्यर्थः । **पूर्णचन्द्रेत्यत्र** । **साक्षान्निर्लेपे** इति । साक्षाद्भगवदीये निर्लेपे पदार्थे बलभद्रसम्बन्धो न भवति । अतो भगवत्सिद्ध्यर्थं भगवत इव रमणसिद्ध्यर्थं सर्वत्र भगवद्धर्मेषु पूर्णचन्द्रादिसर्वपदार्थेष्वनुकल्पा एव कृताः, गोप्योपि तदनुकल्पाः, रामोपि भगवदनुकल्पः । अतः सर्वमेवानुकल्परूपमिति भावः । रामे भगवदावेशवत्सर्वेष्वेव पदार्थेषु तत्तदावेश इत्यनुकल्पत्वम् । निबन्धे 'पश्चाज्जातास्तु गोपिकाः । श्रुतपूर्वा बलं दृष्ट्वा रेमिरे' इत्युक्तम् । अत्र च शङ्खचूडप्रसङ्गस्था इत्युक्तम् । तत्र पश्चाज्जातासु रमणसमये कायिकसान्त्वनसिद्ध्यर्थं पूर्वासामावेश इत्यविरोधः । **त्याज्य एवेति**। पश्चाज्जातानामावेशाधिकरणानां देहादिः पूर्वरूपत्यागेन शोधनीय एवेत्यर्थः । **भगवद्धर्मे** इति । रामनिष्ठे इत्यर्थः ।

श्रीसुबोधिनी-सारः

इत्येवं शौरेः कृष्णस्य प्रहसितं जल्पितं भाषणं चारु दर्शनं गमनं प्रेमालिगनं स्मरंत्यः स्त्रियो रुरुदुः ॥ १५ ॥ ता गोपीः कृष्णस्य हृदयंगमैर्मनोरमैः संदेशैर्नानाविधेष्वनुनयेषु कोविदो निपुणः संकर्षणो भगवान् सांत्वयामास ॥ १६ ॥ तत्र व्रजे मधुं चैत्रं माधवं वैशाखमिति द्वौ मासौ रामोऽवात्सीत् गोपीनां रतिमावहन् प्रीति कुर्वन् भगवान् यतः ॥ १७ ॥ पूर्णचंद्रस्य कलाभिर्मृष्टे उज्ज्वले यमुनाया उपवने कौमुदीशब्देन तद्विकासितानि कुमुदानि तेषां गंधयुक्तेन वातेन पवनेन सेविते स्त्रीगणैर्वृतो रेमे ॥ १८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्येवं वदन्त्यः शौरेः कृष्णस्य प्रहसितादीन् स्मरन्त्यश्च ता व्रजस्त्रियो रुरुदुरित्यन्वयः ॥ १५ ॥ सङ्कर्षणश्च नानाविधेष्वनुनयेषु सान्त्वनेषु कोविदो निपुणः, अतो युक्तिवचनैः तथा हृदयंगमैर्मनोहरैर्विश्वासजनकैः कृष्णस्य सन्देशैश्च ताः गोप्यः सान्त्वयामासेत्यन्वयः । 'गोपीनां भगवति प्रेमाधिक्येन तद्विरहदुःखस्याप्याधिक्यात् अन्येन तच्छान्तिर्दुष्करा' इति सूचयन्नाह—भगवानिति ॥ १६ ॥ क्षपासु रात्रिषु गोपीनां रतिमावहन् प्रीतिं कुर्वन् रामो मधुं चैत्रं माधवं वैशाखं चेत्येतौ द्वौ मासौ तत्र व्रजे अवात्सीदित्यन्वयः । शङ्खचूडवधसमये शङ्खचूडनाशप्रसङ्गे क्रीडायां निर्दिष्टाभिः कृष्णक्रीडितव्यतिरिक्ताभिः रामप्रेयसीभिः तथा कृष्णक्रीडासमयेतिबालाभिरनुत्पन्नाभिश्च सहात्र रामविक्रीडनमित्यभियुक्ता वदन्ति । श्रीमदाचार्यास्तु "बलभद्रद्वारा भगवानेव तासां मनोरथं पूरितवान्, अतो न कश्चन दोष" इत्याहुः । अतएव शुक आह—भगवानिति ॥ १७ ॥ रमणे साधनान्याह—पूर्णेति । पूर्णचन्द्रस्य कलाभिर्मरीचिभिरामृष्टे उज्वले, कौमुदीशब्देन तद्विकासितानि कुमुदानि लक्ष्यन्ते । कुमुदगन्धवायुना सेविते यमुनाया उपवने स्त्रीगणैर्वृतो रामो रेमे इत्यन्वयः ॥ १८ ॥

अन्वितार्थप्रकाशिका

इतीति । इत्येवं वदन्त्यः शौरेः कृष्णस्य प्रहसितं जल्पितं चारु वीक्षितं गति प्रेम परिष्वङ्गं च स्मरन्त्यः ताः स्त्रियः रुरुदुः ॥ १५ ॥ संकर्षण इति । भगवान्संकर्षणश्च नानाविधेष्वनुनयेषु सान्त्वनेषु कोविदो निपुणः अतो युक्तिवचनैः तथा हृदयङ्गमैर्मनोहरैर्विश्वासजनकैः कृष्णस्य सन्देशैश्च ताः गोपीः सान्त्वयामास । अत्र सन्देशप्रेषणेन भगवता रामे सख्यांश एव दर्शितो नत्वग्रजत्वांशस्तासां दशमीं दशां रक्षितुमिति ज्ञेयम् ॥ १६ ॥ द्वाविति । भगवान् रामः क्षपासु रात्रिषु गोपीनां रतिमा-

वहन् प्रीतिं कुर्वन् मधुं चैत्रं माधवं वैशाखं चेत्येतौ द्वौ मासौ तत्र व्रजे अवात्सीदित्यन्वयः। शङ्खचूडवधसमये क्रीडायां निर्दिष्टाभिः कृष्णक्रीडितव्यतिरिक्ताभिः गोप्योऽन्तरेण भुजयोरिति प्राक् सूचिताभिः रामप्रेयसीभिरिति तोषिण्यादयः। कृष्णक्रीडासमयेऽतिबालाभिरनुत्पन्नाभिश्च सहात्र रामविक्रीडनमित्यभियुक्ता वदन्ति इति स्वामिपादाः। बलभद्रद्वारा भगवानेव तासां मनोरथं पूरितवानतो न कश्चन दोष इति केऽप्याहुः॥ १७॥ पूर्णेति। पूर्णचन्द्रस्य कलाभिर्मरीचिभिरामृष्टे उज्ज्वले कुमुदश्चन्द्रस्तत्प्रियत्वात् कौमुदी कुमुद्वती। यद्वा। कौमुदीशब्देन तद्विकासितानि कुमुदानि लक्ष्यन्ते तद्गन्धयुक्तवायुना सेविते यमुनाया उपवने श्रीरामघट्टतया प्रसिद्धे स्थले श्रीकृष्णरासस्थलस्यापि रामेण परिहृतत्वात् स्त्रीगणैर्वृतो रामो रेमे॥ १८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हृदयंगमैर्मनोहरैः। नानाविधा ये अनुनयाः प्रियोक्तिरचनायुक्तानि वाक्यानि तेषु कोविदो निपुणः। ताः कृष्णभक्ता गोपीः सांत्वयामास॥ १६॥ मधुं चैत्रं माधवं वैशाखं गोपीनां रतिमिति। श्रीकृष्णरमणावसरेऽप्राप्तजन्मनामतिबालानां चातो भगवता सह रत्यभिलाषुकानां श्रीकृष्णरमितेतरगोपीनां रतिमावहन् इति विवेकिनो वदंति रात्रिषु स्वप्रेयसीसारतिमावहन् दिनेषु तु कृष्णप्रेयसीः सांत्वयन्निति भावः॥ १७॥ पूर्णचंद्रस्य कलाभिमृष्टे प्रकाशमाने कौमुदीसुगंधयुक्तवायुना सेविते॥ १८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

संकर्षण इति॥ ततः नानाऽनुनयकोविदः, बहुप्रकारप्रीणननिपुणः, भगवान् संकर्षणो बलभद्रः, हृदयंगमैर्मनोहारिभिः, कृष्णस्य संदेशैः, ता गोपीः, सान्त्वयामास॥ १५॥ द्वाविति॥ भगवान् रामः, क्षपासु रात्रिषु, गोपीनां पूर्वं स्वपरिगृहीतानां व्रजान्निष्क्रमणानन्तरमुत्पन्नानां वा, अन्ये तु श्रीकृष्णक्रीडासमयेऽनुत्पन्नानामतिबालानामन्यासामित्यभियुक्तप्रसिद्धिरित्याहुः। रतिमनुरागं, आवहन् उद्रेचयन्, मधुं चैत्रं, माधवं वैशाखं च, इति द्वौ मासौ एव, तत्र च व्रजे एव, अवात्सीत्। केचित्तु मधुमाधवसंबन्धिनीषु क्षपासु, गोपीनां रतिमावहन्नित्याहुः॥ १६॥ पूर्णचन्द्रेति॥ पूर्णचन्द्रस्य कलाभिर्मरीचिभिरामृष्टे उज्ज्वले, कौमुदीगन्धवायुना कुमुद्वतीगन्धवातेन, सेविते वासिते, यद्वा। कौमुदीशब्देन तद्विकासितानि कुमुदानि लक्ष्यन्ते, कुमुदगन्धवायुनेत्यर्थः। यमुनोपवने यमुनाया उपवने, स्त्रीगणैः वृतः रामः, रेमे॥ १७॥ वरुणेति॥ वारुणी सुधया सहोत्पन्ना मदिरा देवी, वरुणप्रेषिता वरुणेन प्रेरिता सती, इदमेव तस्या वारुणीशब्दप्रवृत्तौ निमित्तम्। वृक्षकोटरात्, पतन्ती अधःस्रवन्ती सती, स्वगन्धेन सर्वं तद्वनं, अध्यवासयत् परिमलीचकार॥ १८॥

कृष्णप्रिया

भगवान श्रीकृष्ण की इस प्रकार बातें करने पर उनके नेत्रों को प्रियतम श्रीकृष्ण का मधुर हास्य, मधुर वार्तालाप, हृदयहारी अवलोकन, ललित गति, प्रेमपूर्ण आलिङ्गन आदि नेत्रों के सामने प्रकट हो गये। उन सबका अनुसंधान होने पर गोपीजन रोने लगे॥ १५॥ राजन् परीक्षित! अनुनय एवं विनय करने में अत्यन्त कुशल श्रीबलभद्रजी महाराज ने भगवान् श्रीकृष्ण के हृदयङ्गम और मनःशान्ति करने वाले भाव प्रचुर वचनामृतों को वारंवार सुनाकर गोपियों को शान्त्वन दिया॥ १६॥ पुनः सन्तोष प्रदान करने के लिये बलभद्रजी ने चैत्र-वैशाख दो महीने नन्दजी के गोकुल में बिताये। बलरामजी रात्रि के समय गोपीजन के बीच में रहकर उनके आनन्द की पुष्टि करने लगे। खुद ही राम आनन्द है उनके लिये यह तो स्वाभाविक था॥ १७॥ उस वसन्त ऋतु में कुमुदिनी पुष्पों की सुगन्ध से सुवासित, मन्द-मन्द चलती वायु से सेवित एवं पूर्णिमा के पूर्ण चन्द्रमा की चांदनी फैलकर श्रीयमुनोपकूलवती वन उपवन को उज्वल कर रही हैं और भगवान बलभद्रजी स्त्रीवृन्द के साथ वहाँ विहार कर रहे हैं॥ १८॥

वरुणप्रेषिता देवी वारुणी वृक्षकोटरात्। पतन्ती तद् वनं सर्वं स्वगन्धेना[1]ध्यवासयत्॥ १९॥
तं गन्धं मधुधाराया वायुनोपहृतं बलः। आघ्रायोपगतस्तत्र ललनाभिः [2]समं पपौ॥ २०॥
उपगीयमानचरितो वनिताभिर्हलायुधः। वनेषु व्यचरत् क्षीबो मदविह्वल[3]लोचनः॥ २१॥[4]
[5]स्रग्व्येककुण्डलो मत्तो वैजयन्त्या च मालया। बिभ्रत् स्मितमुखाम्भोजं स्वेदप्रालेयभूषितम्॥ २२॥

---

१. सौरभेणा—विज.। २. पपौ समम्—प्रा. पा.। ३. माहेन्द्र इव बारणः—विज.।

४. उपगीयमान उद्गायन् वनिताशोभिमण्डले। रेमे करेणु यूथेषु माहेन्द इव वारणः॥—अधिकः वीर.।

नेदुर्दुन्दुभयो व्योम्नि ववृषुः कुसुमैर्मुदा। गन्धर्वा मुनयो रामं तद्वीर्यैरीडिरे मुदा॥—अधिक. वीर. विज.।

५. शुभैक—विज.।

कर्दमक्षमा

अन्वयः—वरुणप्रेषिता, वृक्षकोटरात्, पतन्ती, वारुणी, सर्वम्, तत्वनम्, स्वगन्धेन, अध्यवासयत्, बलः, वायुना, उपहृतम्, तम्, गन्धम्, आघ्राय, तत्र, उपगतः, ललनाभिः, समम्, पपौ ॥ १९-२० ॥ वनिताभिः, उपगीयमानचरितः, हलायुधः, मदविह्वललोचनः, क्षीबः, रामः, वनेषु, व्यचरत् ॥ २१ ॥ स्रग्वी, एककुण्डलः, च, वैजयन्त्या, मालया, मत्तः, स्वेदप्रालेयभूषितम्, स्मितमुखाम्भोजम्, बिभ्रत्, व्यचरत् ॥ २२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वारुणी सुधया सहोत्पन्ना मदिरा ॥ १९-२० ॥ क्षीबो मत्तः ॥ २१ ॥ स्वेद एव प्रालेयं हिमं तेन भूषितम् ॥ २२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अध्यवासयत् सुगन्धितं चकार । प्राकृतमदिरातो वैलक्षण्यमाह-देवी देवतारूपा लक्ष्मीसहोदरीत्वादिति भावः ॥१९॥ तमपूर्वम् । यत्र वृक्षात्पतति तत्रेत्यर्थः । 'महेला ललना रामा' इति धरणिः ॥ २० ॥ वन्यंते सेव्यन्ते कामिभिरिति वनिताः स्त्रियः । 'वन-संभक्तौ' कर्मणि क्तः ॥ २१ ॥ वैजयन्त्या पंचरत्नरचितया ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

देवी तन्मदिराधिष्ठात्री वारुणी वरुणकन्या सैव वृक्षकोटरात् श्रीवृन्दावनकदम्बकुहराद्धारारूपेण पतन्तीत्यधिष्ठानाधिष्ठात्र्योरभेदेन निर्देशो नद्यादिवत्, स च द्वयोरपि लाभविवक्षया अस्या वारुण्या निषिद्धवारुणीभिन्नत्वसूचनाय च तथा हरिवंशे तं प्रति तस्या एव वाक्यं "समीपं प्रेषिता पित्रा वरुणेन तवानघ" इति अध्यवासयत् स्वसौरभ्येन पूर्वतोप्यधिकं वासयामास ॥ १९ ॥ तत्रेत्यतितृष्णया तत्र स्थान एव तन्मधु पपौ बल इति बलाविर्भावविशेषं बलात् स्त्रीणां तत्पायनञ्च सूचयति ॥ २० ॥ हलायुध इति स्कन्धन्यस्तलाङ्गलत्वाभिप्रायेण तत्प्रयोजनं चाग्रे व्यक्तं भावि । मदेन विह्वले घूर्णिते लोचने यस्य सः ॥ २१ ॥ स्रग्वीति सार्द्धकम् आपीडादिरूपेणानेकमालायुक्तः वैजयन्त्या च पञ्चवर्णया लक्षितः स्मितयुक्तं मुखाम्भोजं बिभ्रत् धारणस्य विशेषेण तात्पर्य्यं, स च विशेषतो वर्णितः श्रीहरिवंशे—

"शिरसा चारुकेशेन किञ्चिदावृत्तमौलिना । श्रवणैकावलम्बेन कुण्डलेन विराजिता ॥
चन्दनार्द्रेण पीतेन वनमालावलम्बिना । विबभावुरसा रामः कैलासेनेव मन्दरः ॥
नीले वसानो वसने प्रत्यग्रजदलप्रभे । रराज वपुषा शुभ्रस्तिभिरोधैर्यथा शशी ॥
लाङ्गलेनावसक्तेन भुजगाभोगवर्त्तिना । तथा भुजाग्रश्लिष्टेन मुसलेन च भास्वता ॥
स मत्तो बलिनां श्रेष्ठो रराजाघूर्णिताननः । शैशिरीषु त्रियामासु यथा खेदालसः शशी ॥ इति ॥ २२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

देवी अमृतमथनोत्पन्नतया लोकातीता, मदिराधिष्ठात्री देवता वा; वारुणीति वरुणोद्भूतत्वादिना तदाख्ययैव प्रसिद्धत्वात्; तथा च श्रीहरिवंशे तं प्रति तस्या एव वाक्यम्—'समीपं प्रेषिता पित्रा वरुणेन तवानघ' इति बृक्षकोटरात् श्रीवृन्दावनकन्दरकुहरात् पतन्ती धारारूपेण अधि अधिकमवासयदिति; स्वत एव पूर्व्वं विचित्रसौरभ्यवासितमधुना स्वकीयेन गन्धविशेषेण वासितमकरोदित्यर्थः ॥ १९ ॥ उप तद्धारान्तिकमागतः सन्नतितृष्णया तत्र तत्स्थान एव पपौ तन्मधु । बल इति तत्पानाधिक्ये सामर्थ्यम् । तथा बलात् स्त्रीणां तत्पायनञ्च सूचयति—हलायुध इति स्कन्धन्यस्त-लांगलाभिप्रायेण; तत्प्रयोजनञ्चाग्रे व्यक्तं भावि । मदेन स्वभावतो मद्यपानाद्वा मत्ततया विह्वले घूर्णिते लोचने यस्य सः ॥ २०-२३ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

वरुणेति । वारुणी सुधया सहोत्पन्ना मदिरा सा च वरुणेन प्रेरिता सती इदमेव तस्यां वारुणीशब्दप्रवृत्तौ निमित्तं वृक्षकोटरादापतन्ती अधस्स्रवन्ती स्वगन्धेन तद्वनमध्यवासयत्परिमलयाञ्चकारेत्यर्थः ॥ १९ ॥ तमिति तं वायुनोपहृतं घ्राणं प्रत्यानीतं मधुधारायाः गन्धमाघ्राय तत्रागतो बलो रामः स्त्रीभिः सह पपौ पीतवान् ॥ २० ॥ वनितानां शोभिनि मण्डले उपगीयमानः स्वयञ्चोद्गायन् रेमे यथा करेणूनां इभीनाम् यूथेषु माहेन्द्रो वारणो गजः ऐरावतस्तद्वत् ॥ क ॥ नेदुरिति । ववृषुः देवा इत्यध्याहारः मुदा हर्षेण तस्य रामस्य वीर्यैः वीर्यप्रकाशकैर्वचोभिरीडिरे तुष्टुवुः ॥ ख ॥ इत्थमुपगीयमानानि चरितानि यस्य सः क्षीबो मत्तः मदेन विह्वले चञ्चले लोचने यस्य सः वनिताभिः सह वनेषु चचार ॥ २१ ॥ तमेव विशिनष्टि— स्रग्वीति । स्रगस्यास्तीति तथा एकं कुण्डलं यस्य सः वनमालयाऽलङ्कृत इति शेषः । स्वेद एव प्रालेयं हिमं तेन भूषितं स्मितयुक्तं मुखाम्भोजं बिभ्राणः ॥ २२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अध्यवासयत्संस्कारोपेतमकरोत् ॥ १९-२० ॥ ईडिरे तुष्टुवुः ॥ ख ॥ क्षीबः मद्यपानमत्तः ॥ २१ ॥ स्वेदप्रालेयेन धर्महिमजलेन भूषितम् ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देवी तन्मदिराधिष्ठात्री वारुणी वरुणकन्या सैव वृक्षकोटरात् कदम्बकुहराद्धारारूपेण पतन्ती तथा च हरिवंशे तं प्रति तस्या वाक्यं "समीपं प्रेषिता पित्रा वरुणेन तवानघ" इति वारुणीयं सुधया सहोत्पन्ना मदिरेति श्रीस्वामिचरणाः अध्यवासयत् पूर्वतोऽप्यधिकं सुगन्धीचकार ॥ १९-२१ ॥ स्वेद एव प्रालेयं हिमस्तेन भूषितम् ॥ २२ ॥

गूढार्थदीपिनी

कोटरात् रन्ध्रात् निःसरन्ती वारुणी वरुणकन्या देवी मदिराधिष्ठात्री लक्ष्मीसहोदरी अतो दिव्यत्वात् तद्ग्रहणेऽपि न दोषः। अध्यवासयत् सुगन्धितं चकार ॥१९॥ मधुधारायाः मदिरायाः गन्धं उपहृतं घ्राणं प्रत्यानीतं यत्र पतति तत्र उपगतः प्राप्तः ॥ २० ॥ उपेति युग्मम्। क्षीबो मत्तः। वैजयन्ती पञ्चरत्नग्रथिता। स्वेद एव प्रालेयं हिमम् ॥ २१-२२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

देवी मदिराधिष्ठात्री वारुणी "समीपं प्रेषिता पित्रा वरुणेन तवानघ" इति हरिवंशात् वरुणकन्या ॥ १९-२० ॥ क्षीबो मत्तः ॥ २१ ॥ स्वेद एव प्रालेयं हिमस्तेन भूषितं स्मितयुक्तं मुखाम्बुजं बिभ्रत् बिभ्राणः ॥ २२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्यानुभावमाह **वरुणप्रेषिते**ति। वारुणी **काचिल्लक्ष्म्या सह अमृतमथने उत्पन्ना सा अधिष्ठात्री देवता सर्ववृक्षेषु तिष्ठति**। सा दैत्येभ्यो दत्तेति दैत्यराजाधीना सा यस्मिन्नेव वृक्षे अधितिष्ठति, तत एव मधुधारा उत्पद्यते। **सङ्कर्षणश्च तामसी भगवन्मूर्तिः**। मधुना सम्प्रीतो भवतीति दैत्यराजेन वरुणेनाज्ञप्ता देवतात्वात् यथासुखं यथाभिलषितगन्धरसरूपा पतति। अतो वृक्षकोटरात्पतन्ती सर्वमेव तद्वनं स्वगन्धेन अध्यवासयत्। यथा स गन्धः सर्वव्यामोहको भवति ॥ १९ ॥ अत एव गन्धेनैव वशीकृतो बलभद्रः पपावित्याह **तद्गन्धं मधुधारायाः** इति। तत्सर्ववनव्याप्तम्। वायुनोपहृतमिति दूरेऽपि क्रीडन् आघ्रायोपगतः। उभयेषां पूर्णरमणे भगवत्स्मरणेन कदाचित्सङ्कोचः स्यात्, रसो वा नोत्पद्येत, अत एतदर्थं ललनाभिः समं पपौ ॥ २० ॥ ततो गतक्लेशास्ताः रतिपोषिका जाता इति वक्तुं तासां गानमाह **उपगीयमानचरित** इति। उपगीयमानं चरितं यस्येति। तस्मिन् रुचिरुक्ता। यतो **वनिताः** वनमिताः इति। **हलायुध** इति तस्यापि विचाराभाव उक्तः। किञ्च। क्षीबो मत्तः। अनेन बिचाराभावः सम्यक् निरूपितः। मदेन विह्वले लोचने यस्येति लोकान् पश्यन्नपि न पश्यतीत्युक्तम् ॥ २१ ॥ एवमवस्थापन्नस्य आधिदैविकं रूपं प्रकटीभूतमिति ज्ञापयितुं वर्णयति **स्रग्व्येककुण्डलो मत्त** इति। चत्वारि विशेषणानि चतुर्मूर्तित्वसम्पत्तये निरूपितानि। **स्रग्वी** पुष्पमालापरिवीताङ्गः, एकमेव कुण्डलं यस्य। सङ्कर्षणस्य तदसाधारणं चिह्नम्। योग एव, न साङ्ख्यमिति। मत्तः स्वभावतः। वैजयन्त्या नवरत्नखचितया आपादलम्बिन्या मालया स हसितमुखाम्बुजं श्वेतमुखकमलं बिभ्रत्। स्वेदरूपाः प्रालेयाः हिमकणाः। तेन भूषितमिति। अनेन श्रमः सहज एव शोभाकरः, न तु क्लेशजनित इति सूचितम्। ते प्रस्वेदकणाः न शीतला भवन्तीति ॥ २२ ॥

श्रीसुबोधिनी-सारः

वरुणेन प्रेषिता वारुणी देवी मदिरामृतसहजा वृक्षकोटरात् छिद्रात् पतंती सती तत्सर्वं सौगंध्येन व्याप्नोत् ॥ १९ ॥ वायुनोपहृतमानीतं मधुधारायास्तं गंधम् आघ्राय तत्र स्थाने उपगतः प्राप्तो बलो ललनाभिः स्त्रीभिः समं सह पपौ ॥ २० ॥ वनिताभिरुपगीयमानं कीर्त्यमानं चरितं यस्य स हलायुधो रामः क्षीबो मत्तो मदेन विह्वले लोचने यस्य स वनेषु व्यचरत् ॥२१॥ स्रग्वी माली एकं कुडलं यस्य मत्तः वैजयंत्या मालयोपलक्षितः स्वेद एव प्रालेयं मिहिका तेन भूषितं स्मितयुक्तं मुखांभोजं मुखपद्मं बिभ्रत् ॥ २२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तद्गन्धमित्यत्र। भगवत्स्मरणेनेति। रामाविष्टस्य भगवतो ज्ञानेनेत्यर्थः। **स्रग्व्येककुण्डल** इत्यत्र। **चतुर्मूर्तित्वेति।** वासुदेवाविष्टसङ्कर्षणाविष्टशेषो बल इति जन्मप्रकरणे निरूपितम्। तथा च त्रिमूर्तित्वं सर्वदा। अधुना पुरुषोत्तमोऽप्याविष्ट इति

चतुर्मूर्तित्वसम्पत्तिरिति संख्यातात्पर्यमुक्तम्। योग एवेति। सङ्कर्षणो हि वेदात्मकः। सांख्ये चात्मानात्मविवेकः। वेदे सर्वस्यैवात्मरूपत्वादयं विवेको न तत्सम्मत इति भावः। तर्हीति। मत्तत्वे सतीत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्य प्रभावमाह—वरुणेति। वरुणेन रामसेवार्थं प्रेषिता वारुणी तस्य कन्या देवी मदिराधिष्ठात्री देवता वृक्षकोटरात् पतन्ती अधःस्रवन्ती स्वगन्धेन सर्वमेव तद्वनमध्यवासयत् सुगन्धीचकारेत्यर्थः ॥ १९ ॥ वायुनोपहृतं स्वघ्राणं प्रत्यानीतं तं मधुधाराया गन्धमाघ्राय तत्रागतो बलो रामः स्त्रीभिः समं सह तां वारुणीं पपौ ॥ २० ॥ देवगन्धर्वादिभिरुपगीयमानं चरितं यस्य सः क्षीबो मत्तः मदेन विह्वले लोचने यस्य सः हलायुधो बलभद्रो वनिताभिः सह वनेषु व्यचरत् ॥ २१ ॥ तमेव पुनर्विशिनष्टि—स्रग्वी पुष्पमालापरिवीताङ्गः, एकमेव कुण्डलं यस्य सः, मत्तः स्वभावतोपि मत्तसदृशः, वैजयन्त्या नवरत्नखचितया आपादलम्बिन्या मालयालंकृत इति शेषः। स्वेद एव प्रालेयं हिमं तेन भूषितं युक्तं स्मितयुक्तं च मुखाम्भोजं बिभ्रत् बिभ्राणः व्यचरदिति पूर्वेणैवान्वयः ॥ २२ ॥

अन्वितार्थप्रकाशिका

वरुणेति ॥ वरुणेन रामसेवार्थं प्रेषिता वारुणी तस्य कन्या देवी मदिराधिष्ठात्री देवता सुधया सहोत्पन्ना लौकिकनिषिद्धमदिराभिन्ना वृक्षकोटरात् पतन्ती धारारूपेण अधःस्रवन्ती स्वगन्धेन सर्वमेव तद्वनमध्यवासयत् सुगन्धीचकारेत्यर्थ ॥ १९ ॥ तमिति ॥ वायुनोपहृतं स्वघ्राणं प्रत्यानीतं तं मधुधाराया गन्धमाघ्राय तत्रागतो बलो रामः ललनाभिः स्त्रीभिः समं सह तां वारुणीं पपौ ॥ २० ॥ उपेति युग्मम् ॥ देवगन्धर्वादिभिरुपगीयमानं चरितं यस्य सः क्षीबो मत्तः मदेन विह्वले लोचने यस्य सः स्रग्वी पुष्पमालापरिवीताङ्ग एकमेव कुण्डलं यस्य सः मत्तः स्वभावतोऽपि मत्तसदृशः वैजयन्त्या नानारत्नरचितया आपादलम्बिन्या मालयाऽलङ्कृत इति शेषः। स्वेद एव प्रालेयं हिमं तेन भूषितं युक्तं स्मितयुक्तं च मुखाम्भोजं बिभ्रत् बिभ्राणः हलायुधः वनिताभिः सह वनेषु व्यचरत् ॥ २१-२२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वारुणी वरुणपुत्री सर्वमदाधिष्ठात्री देवी वृक्षकोटराद्धारारूपेण पतंतीत्यनेन शास्त्रनिषिद्धवारुणी भिन्नेयमिति बोध्यं ॥ १९-२० ॥ क्षीबो मत्तः ॥ २१ ॥ स्वेद एव प्रालेयं हिमकरणस्तेन भूषितं ॥ २२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ बलः, वायुना उपहृतं घ्राणं प्रत्यानीतं, मधुधाराया वारुणीमदिराधारायाः, तं गन्धं, आघ्राय, तत्र उपगतः सन्, ललनाभिः समं स्त्रीभिः सह, पपौ पीतवान् ॥ १९ ॥ उपगीयमान इति ॥ वनितानां शोभि यत् मण्डलं तस्मिन्, उपगीयमानः वनिताभिरुपगीतः, स्वयं च, उद्गायन्, करेणूनामिभीनां यूथानि तेषु, माहेन्द्रो महेन्द्रसंबन्धी, वारण ऐरावतगजः, यथा तद्वत्, रेमे ॥ २० ॥ उपगीयमान इति ॥ वनिताभिः, उपगीयमानानि चरितानि यस्य सः, मदेन विह्वले लोचने यस्य सः, क्षीबो मत्तः, हलायुधो बलः, वनेषु, व्यचरत् विचचार ॥ २१ ॥ तमेव विशिनष्टि ॥ स्रग्वीति ॥ स्रगस्यास्तीति स्रग्वी, एकं कुण्डलं यस्य सः, मत्तः, वैजयन्त्या मालया च, अलंकृत इति शेषः। स्वेद एव प्रालेयं हिमं तेन भूषितं शोभितं, स्मितमुखाम्भोजं स्मितयुक्तं मुखपद्मं, बिभ्रत् बिभ्राणः ॥ २२ ॥

कृष्णप्रिया

भगवान वरुण द्वारा भेजी हुई वारुणी देवी वृक्ष के कोटर से निकलकर प्रवाहित हो रही थी और उसने अपने सुगन्ध से सम्पूर्ण वन को सुगन्धित कर दिया था ॥ १९ ॥ उस मधुधारा की सुगन्ध को वायुदेवता ने बलरामजी के पास पहुँचाया। अपने आँगन आये अतिथि को उपहार दिया था। उसकी सुगन्ध से आकृष्ट होकर बलरामजी ललना वृन्द के साथ वहाँ आ गये और उस वृन्द के साथ उस मधुधारा का पान किया ॥ २० ॥ उस वन में व्रजवनिता वृन्द श्री बलरामजी के चारो ओर उनके मङ्गलमय चरित्र का गान कर रही थी। श्री बलभद्रजी मदान्विष्ट होकर वन में विचर रहे थे। उस समय उनके लोचन मधुधारा रस के पान से विह्वल हो रहे थे ॥ २१ ॥ कण्ठ में हार था, उनके एक कान में कुण्डल शोभा दे रहा था। आपादलम्बिनि वैजयन्ती माला अधिक शोभा पा रही थी। वह आनन्दमग्न थे, मुखारविन्द पर स्मित हास्य झलक रहा था, पुनः मुख कमल पर प्रस्वेद बिन्दु मुक्तामौक्तिक से झलक रहे थे ॥ २२ ॥

स आजुहाव यमुनां जलक्रीडार्थमीश्वरः ।
[1]निजं वाक्यमनादृत्य मत्त इत्यापगां बलः । अनागतां हलाग्रेण कुपितो विचकर्ष ह ॥ २३ ॥
पापे त्वं मामवज्ञाय यन्नायासि मयाऽऽहुता । नेष्ये त्वां लाङ्गलाग्रेण शतधा कामचारिणीम् ॥ २४ ॥
एवं निर्भर्त्सिता भीता यमुना यदुनन्दनम् । उवाच चकिता वाचं पतिता पादयोर्नृप ॥ २५ ॥
[2]राम राम महाबाहो न जाने तव पौरुषम्[3] । यस्यैकांशेन विधृता जगती जगतः पते ॥ २६ ॥

कर्दमक्षमा

अन्वयः—सः, ईश्वरः, यमुनाम्, जलक्रीडार्थम्, आजुहाव, मत्तः, इति, निजम्, वाक्यम्, अनादृत्य, अनागताम्, आपगाम्, बलः, कुपितः, सन्, हलाग्रेण, ह, विचकर्ष ॥ २३ ॥ पापे, मया, आहुता, त्वम्, माम्, अवज्ञाय, यत्, न आयासि, कामचारिणीम्, त्वाम्, लाङ्गलाग्रेण, शतधा, नेष्ये ॥ २४ ॥ नृप, एवम्, निर्भर्त्सिता, भीता, यमुना, चकिता, पादयोः, पतिता, यदुनन्दनम्, वाचम्, उवाच; राम ! राम ! महाबाहो ! जगतः पते ! यस्य, एकांशेन, जगती, विधृता, इति, तव, विक्रमम्, न, जाने ॥ २६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मत्तोऽयमित्यनादृत्यानागतामापगां नदीम् ॥ २३ ॥ आहुता आहूता यद्यस्मान्नागच्छसि तस्मात् नेष्ये गमयिष्यामि ॥ २४ ॥ चकिता कंपिता ॥ २५ ॥ एकांशेन शेषाख्येन ॥ २६–२७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अयं बलो मत्त इति हेतोरनागतामप्राप्ताम् । मत्तस्य वाक्यं न प्रमाणं यतो नदीमप्याह्वयसे, मज्जले विजिहीर्षा चेत्तर्हि स्वयमेवागच्छत्वित्यनादृत्यानागताम् ॥ २३ ॥ आहुतेति छांदसो ह्रस्वः । वस्तुतस्तु पापे निमित्ते लोकानां पापनिवृत्त्यर्थं स्वेच्छयेतस्ततो बहुधा गामिनीमित्यर्थः । देवी चेयं संज्ञाछायान्यायेन लक्ष्म्या विविधमूर्तिवत्तन्महिषीति ज्ञेयम् । यमुना चेयं समुद्रभार्या । समुद्रस्यापि भगवद्विभूतित्वात्तद्भार्या त्वमपि कालिद्याः संगच्छत एवेति । वस्तुतस्तु द्वितीयव्यूहस्य भार्येयं कांतिरिति ॥ २४ ॥ एवम् 'पापे त्वं माम्' इत्याद्युक्तप्रकारेण ॥ २५ ॥ जगती भूः ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निजमित्यत्र नैतीति पाठः क्वचित् । स दुरन्वयः स्वाम्यसम्मतश्च ॥ २३ ॥ पापे इति युग्मकम् । कामचारिणीं स्वैरिणीं वस्तुतस्तु पापे निमित्ते लोकानां पापनिवर्त्तनार्थं स्वेच्छयेतस्ततो बहुधा गामिनीमित्यर्थः । उवाचेत्युक्त्वाऽपि वाचमिति पौनरुक्त्यं जलमयरूपेणैव तद्वचनात्तत्पादपतनाच्च विस्मयेन देवीरूपा तु सम्प्रति श्रीभगवन्महिषीरूपेति अथवा वाचमिति वाग्वैशिष्ट्यव्यञ्जनाय देवी चेयं श्रीभगवद्रूपानुसारेण लक्ष्म्याः विविधमूर्त्तिवद्भगवन्महिषीवरायाः श्रीकालिन्द्या एव संज्ञाछायान्यायेन तच्छायाविभूतिरूपा भगवत एव महाविभूतेः समुद्रस्य भार्य्यास्वरूपा मूर्त्तिरेका ज्ञेया । तथा च तत्रैव प्रत्युवाचार्णववधूमिति तां प्रति सम्बोधनं च सागराङ्गने इति ॥ २४–२५ ॥ राम हे जगद्रमण ! अतो मां पीडयितुं नार्हसीति भावः । वीप्सा भीतत्वात् किम्वा क्रुद्धस्य तस्याभिमुखीकरणमयदैन्यात् । हे महाबाहो परमबलिष्ठ ! विक्रमं प्रभावं न जाने न ज्ञातुं शक्तास्मीत्यर्थः । तत्र हेतुः, यस्येति अत्र षष्ठीनिर्द्दशादेकांशस्यैव कर्तृत्वं लक्ष्यते अत एकांशत्वमवतारविशेषत्वमेव न त्वङ्गविशेषत्वं तथा च सति यच्छब्दस्य कर्तृत्वे प्राप्ते तृतीयानिर्देश एव स्यादिति विचार्य्य तैरपि व्याख्यातं शेषाख्येनेति जगती पृथ्वी विशेषेणानायासेन धृतास्तीति शेषः । किमर्थं हे जगतः पते जगद्रक्षार्थमित्यर्थः । मादृशनदीसमुद्रादिधारिणी धरणी यस्यैकांशेन विधृते तद्विक्रमज्ञानं मादृशामशक्यमेव स्यादिति भावः ॥ २६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्रग्वी मालानिर्म्मितैक-कर्णाभरणवानित्यर्थः, यद्वा, आपीडादिरूपेणानेकान्यमालायुक्तो वैजयन्त्या च पञ्चवर्णया विशिष्टः, स्मितयुक्तं मुखाम्भोजं बिभ्रत्, धारणस्य विशेषणे तात्पर्य्यम् । स च विशेषतो वर्णितः श्रीहरिवंशे (विष्णु० प० ४६।२५–२९)—

---

[1] नेति–श्रीधर. टि. । [2] यमुनोवाच–च. पु. मू. । [3] विक्रमम्–श्रीधरादयः ।

'शिरसा चारुकेशेन किञ्चिदावृतमौलिना । श्रवणैकावलम्बेन कुण्डलेन विराजता ॥
चन्दनार्द्रेण पीनेन वनमालावलम्बिता । विवभावुरसा रामः कैलासेनेव मन्दरः ॥
नीले वसानो वसने प्रत्यग्रजलदप्रभे । रराज वपुषा शुभ्रस्तिमिरौघैर्यथा शशी ॥
लांगलेनावसक्तेन भुजगाभोगवर्त्तिना । तथा भुजाग्रश्लिष्टेन मुषलेन च भास्वता ॥
स मत्तो बलिनां श्रेष्ठो रराजाघूर्णिताननः । शैशिरीषु त्रियामासु यथा खेदालसः शशी ॥' इति ॥ २४ ॥

ईश्वरस्तदाह्वानादौ समर्थः परस्वच्छन्दो वा, आ सम्यक् अप नीचैर्गच्छतीत्यापगा ताम्, इति गाढ़ाकर्षणान्निम्नखातेनागमनयोग्यतोक्ता, विशेषेण गभीरत्वादिना चकर्ष, यतो बलो वलिष्ठश्रेष्ठ इत्यर्थः । ह स्फुटम्, अन्यत्तैर्व्याख्यातम् । यद्वा, आपगामित्यागमनासामर्थ्यं सूचितम् । तथापि विचकर्ष, कुतः ? मत्त इत्यस्माद्धेतोः, अत एव कुपितः ।२५। कामचारिणीं स्वैरिणीम्, वस्तुतस्तु पापे निमित्ते लोकानां पापनिवर्तनार्थं स्वेच्छयेतस्ततो बहुधा गामिनीमित्यर्थः ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्यैव चरित्रान्तरमाह—स इत्यादिना । एवं सर्वानिशा इत्यतः प्राक्तनेन ग्रन्थेन । ईश्वरः प्रभुः स रामः यमुनामाजुहाव आहूतवान् ततो मत्तोयमित्यात्मवाक्यमनादृत्यानागतामापगां यमुनां कुपितो बलरामः हलाग्रेण विचकर्षाकृष्टवान् हेति विस्मये ॥ २३ ॥ पापे इति । आहुतेति छेदः । हे पापे यद्यतो मया त्वमाहूता मामवज्ञायावहेल्य नागतास्यतस्त्वां स्वैरचारिणीं शतधा नेष्यामि शतकुल्यावतीं करिष्ये ॥ २४ ॥ इत्येवं निर्भर्त्सिताऽत एव भीता यमुना तथैव कर्त्तुमयं प्रभुरिति शङ्किता हे नृप ! पादयोः पतित्वा यदुनन्दनं रामं प्रति उवाच ॥ २५ ॥ वाचमेवाह—रामेति द्वाभ्याम् । तव विक्रमं महिमानं न जाने अपारत्वादिति भावः । तदेव स्पृष्टयितुमाह—यस्येति । हे जगताम्पते षष्ठ्यन्तपाठे तस्य यस्य एकांशेन सहस्रतममूर्द्धैकदेशेन जगती पृथ्वी विधृता विशेषेण धृता तस्य तवेति सम्बन्धः ॥ २६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हे पापे ! आहुता आहूता ॥ २३-२६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवमिति यमुनेयं द्वारकास्थायाः श्रीकृष्णपट्टमहिष्याच्छायारूपैव । एषैव च समुद्रपत्नीति तत्र तत्र प्रसिद्धिः । तथा च हरिवंशे । प्रत्युवाचार्णववधूमिति । तां प्रति सम्बोधनञ्च सागराङ्गने ॥ २५ ॥ राम राम इति ॥ २६-२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मत्त इति । मत्तस्य वचनं न प्रमाणं यतो नदीमपि माम् आह्वयते मदीयजले विजिहीर्षा चेत् स्वयमायातु इत्यनादृत्य नागताम् ॥ २३ ॥ आहुता आहूता यमुना वाचमुवाचेति यमुनेयं नदीरूपा समुद्रभार्य्या कालिन्द्याविर्भूतिर्ज्ञेया नतु सा तथा च हरिवंशे "प्रत्युवाचार्णववधूम्" इति ॥ २४-२५ ॥ एकांशेन शेषाख्येन ॥ २६ ॥

गूढार्थदीपिनी

स इति सार्द्धम् । मत्तोऽयमित्यनादृत्य आपगां नदीम् । ह कोपे ॥ २३ ॥ शतधा शतकुल्यावती करिष्ये । स्वेच्छाचारिणीम् ॥ २४ ॥ चकिता कम्पिता सती ॥ २५ ॥ एकांशेन शेषाख्येन । जगती पृथ्वी ॥ २६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यमुनां कालिन्दीं भगवदवतारस्य भगवत्प्रियाधर्षणलीला न विरुद्धा ॥ २३ ॥ आहुता आहूता ॥ २४ ॥ चकिता शङ्किता ॥ २५ ॥ एकांशेन शेषाख्येन ॥ २६-२७ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तर्हि स्वरूपनाश एव वारुण्या जात इत्याशङ्क्य, तथा प्रतीतवन्तं देवमपि नाशयतीति ज्ञापयितुं यमुनां तथा मन्यमानां निग्रहं चिकीर्षुराकारितवानित्याह स आजुहावेति । केवलं निग्रहार्थमाकारणे सुतरां मत्तता भवतीति यत्रैव पीत्वा तिष्ठति, तत्रैव जलक्रीडा कर्तव्येति जलक्रीडार्थमित्युक्तम् । नन्वेवं क्षीबेऽपि मत्तता भवत्येव, नहीश्वरमर्यादया स्थापिता नद्यः क्वचिदायान्ति, आगता वा कथं न मर्यादाभङ्गं कुर्युः, तत्राह ईश्वर इति । न हि स्वार्थमेव मर्यादा भवति, अन्यथा क्रीडार्थं जगन्निर्माणमिति पक्षो न स्यात् । नहीश्वरः ईशितव्यमुपसर्पति । ततो यमुनया विचारितम्, मत्तोऽयम्, मत्त एव अविचार्यैवा-

कारयतीति बलवाक्यमनादृत्य, आपगां नदीं अनागतां हलाग्रेण विचकर्ष। हलस्याप्याधिदैविकत्वात् देवतासहितां नदीं कूलेऽपि निम्नभावं सम्पाद्य, कुल्यामार्गेण नीतवान्। तदा देवतासहितं जलं स्वभावमार्गेणागच्छत् तेनैव मार्गेण गन्तुं प्रवृत्तम् ॥ २३ ॥ एतदपि मत्तकार्यमेवेत्याशङ्क्य ज्ञानपूर्वकं तथाकरणमित्याह **पापे त्वं मामवज्ञायेति**। मयाहुता आहूता। अथवा। यस्मात्त्वं मामवज्ञाय नागता, अतो मया हुता यथा हुता दग्धा भवति, एवं शुष्केत्यर्थः। न केवलं शुष्कमात्रं निग्रहः, किन्तु अगूहामपि करिष्यामि, यतो वृष्टिजलेनापि लोका नदीत्वं न मंस्यन्त इति तदाह **नेष्ये त्वां लाङ्गलाग्रेणेति**। यथा केदारेण सिक्तं जलं गच्छति, ईश्वरवचनोल्लङ्घने महत्पापम्, पापे च दण्डादिकं न दोषायेति **पाप इति** सम्बोधनम्। तस्या अपराधमाह **कामचारिणी**मिति ॥ २४ ॥ इयं न तस्य प्रतिज्ञा, किन्तु निर्भर्त्सनमात्रमित्याह **एवं निर्भर्त्सितेति**। आकर्षणसामर्थ्यं दर्शनादेव ज्ञातवती। सत्यमेव करिष्यतीति। ततो भीता। **यदुनन्दनं** भक्तकृपालुम्। **चकिता** आश्चर्ययुक्ता सती प्रवाहस्थानात् दूरे नीता उवाच। **पादयोः पतितेति** अपराधक्षमापनार्थम्। **नृपेति** सम्बोधनं परिज्ञानार्थम्। अल्पो न विश्वसतीति ॥ २५ ॥ तस्याः प्रार्थनामाह **राम रामेति**। आदरे वीप्सा। तेनावज्ञा परिहृता। **महाबाहो** इति स्वज्ञातं भगवत्सामर्थ्यमाह। तज्ज्ञानं सामान्यत एव, विशेषतो न जानामीत्याह **न जाने तव पौरुष**मिति। वस्तुतस्त्वं महाबाहुः। अहं परं न जान इति वा। ज्ञात्वैवापराधशान्त्यर्थं तथा वदतीत्याशङ्कायामाह **यस्यैकांशेनेति**। माहात्म्यं हि दृष्टं जानाति। नदी पुनः भूम्या एकदेशे भवति। 'भूमिरेव पञ्चाशत्कोटिविस्तीर्णा यस्य एकदेशेन विधृता भवति भूमण्डलं सर्षपायति यस्य मूर्ध्नी'ति वाक्यात्। तस्मादज्ञात्वा कृतोऽपराध इति क्षमा कर्तव्येति भावः। नन्वज्ञात्वा कृतेऽप्यपराधे दण्डो लोके दृष्ट इति चेत्, तत्राह **जगतः पत** इति। उदासीनव्यवस्थेयम्। पतिस्त्वज्ञानकृते न दण्डं करोति ॥ २६ ॥

श्रीसुबोधिनी-सारः

ईश्वरः स जले क्रीडार्थं विहाराय यमुनामाजुहाव आहूतवान् निजं स्वीयं वाक्यमनादृत्य बलो मत्तः प्रमादीति हेतोरनागतां नायातामापगाम् अद्भिर्गच्छतीति पृषोदरादित्वात्तद्रूपां नदीं हलस्याग्रेण विचकर्ष कुपितः क्रुद्धः ह स्फुटम् ॥ २३ ॥ हे पापे मामवज्ञाय निन्दित्वाऽपमान्य वा मयाहूता त्वं नायासि नागच्छसि यद्यतो हलाग्रेण कामचारिणी यथेष्टगामिनीं त्वां शतधा नेष्यामि ॥ २४ ॥ शुकोक्तिः। एवं निर्भर्त्सिता तिरस्कृता यमुना भीता पादयोः पतिता चकिता ससंभ्रमा यदुनंदनं रामं वाचमुवाच हे नृप ॥ २५ ॥ हे राम राम हे महाबाहो तव विक्रमं पराक्रमं न जाने नाहं वेद्मि हे जगतः पते यस्य एकांशेन शेषाख्येन एकेन शिरसेत्यन्ये जगती भूर्विधृता ॥ २६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्यैव चरितान्तरमाह—स इत्यादिना। स बलो जलक्रीडार्थं यमुनास्थल आजुहाव आहूतवान्। तदा च 'मत्तोऽयम् इति' मत्वा निजं वाक्यमनादृत्य अनागतां तामापगां नदीं कुपितः सन् हलाग्रेण विचकर्षेति सार्धेनान्वयः। ननु 'कथमेवमाह्वानमाकर्षणं च शक्यं' तत्राह—ईश्वर इति। ईश्वरलीलाया आश्चर्यं सूचयति—हेति ॥ २३ ॥ हे पापे! यत् यस्मात् मयाऽऽहूता त्वं मामवज्ञाय अनादृत्य न आयासि अतः कामचारिणीं इच्छाचारिणीं त्वां लाङ्गलाग्रेण शतधा नेष्ये शतकुल्यावतीं करिष्ये इति निर्भर्त्सितवांश्चेति शेषः ॥ २४ ॥ इत्येवं निर्भर्त्सिता अत एव भीता अत एव चकिता प्रकम्पिता पादयोः पतिता यमुना यदुनन्दनं बलं प्रत्युवाच। 'एवं प्रभावो नृपाणामपि दुर्लभ' इति सूचयन् सम्बोधयति—नृपेति ॥ २५ ॥ भयेनैव बहुधा सम्बोधयति—रामरामेति। तव विक्रमं पराक्रमं न जाने विस्मृतवती। 'इदानीं कथं ज्ञातवती' इत्यपेक्षायामाह—यस्येति। जगती पृथ्वी ॥ २६ ॥

अन्वितार्थप्रकाशिका

स इति सार्द्धम् ॥ ईश्वरः सबलो जलक्रीडार्थं यमुनां स्थलं आजुहाव आहूतवान्। तदा च मत्तोऽयमिति मत्वा निजं वाक्यमनादृत्यानागतां तामापगां नदीं कुपितः सन् हलाग्रेण विचकर्ष। यमुनेयं नदीरूपा समुद्रभार्या छायारूपा कालिन्द्या विभूतिरूपा नतु सैव प्रत्युवाचार्णववधूमिति हरिवंशोक्तेः। पूर्वमुक्ता तु भगवत्पत्नी देवतारूपा मुख्या कालिन्दी ॥ २३ ॥ पापे इति ॥ हे पापे! यत् यस्मात् मया आहुता आहूता। ह्रस्वमार्षम्। त्वं मामवज्ञाय अनादृत्य न आयासि अतः कामचारिणीम् इच्छाचारिणीं त्वां लाङ्गलाग्रेण शतधा नेष्ये शतकुल्यावतीं करिष्ये इति निर्भर्त्सितवांश्चेति शेषः ॥ २४ ॥ एवमिति ॥ हे नृप! इत्येवं निर्भर्त्सिता अत एव भीता चकिता प्रकम्पिता पादयोः पतिता यमुना यदुनन्दनं बलं प्रति वाचमुवाच ॥ २५ ॥ रामेति ॥ हे राम! हे राम! हे महाबाहो! हे जगतः पते! यस्य एकांशेन शेषाख्येन जगती पृथ्वी विधृता तस्यानन्तमूर्तेः तव विक्रमं प्रभावम् अहं न जाने विस्मृतवती ॥ २६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मत्तोयमिति ज्ञानेन निजं वाक्यमनादृत्या नागतां आपगां यमुनां ॥ २३ ॥ मया आहुता आहूता यद्यतस्त्वं न आयासि नागच्छसि तस्मात् स्वेच्छाचारिणी त्वां शतधा नेष्ये प्रापयामि ॥ २४ ॥ चकिता वेपिता ॥२५॥ यस्य तव एकांशेन शेषसंज्ञेन। जगती भूमिः ॥ २६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्यैव चरित्रान्तरमाह स इत्यादिना एवं सर्वा निशा इत्यतः प्राक्तनेन ग्रन्थेन । स इति । ईश्वरः प्रभुः, सः बलः, जलक्रीडार्थं, यमुनां आजुहाव, ततः, मत्तः अयं इति ज्ञात्वा, निजं वाक्यमात्मवाक्यं, अनादृत्य अनागतां, आपगां यमुनां, कुपितः सन्, हलाग्रेण, ह स्फुटं, विचकर्ष । हेति विस्मये वा ॥ २३ ॥ पाप इति । हे पापे, यद्यतः, मया आहुता आहूता सत्यपि, त्वं मां अवज्ञाय अवहेल्य, न आयासि । अतः, कामचारिणीं स्वैरचारिणीं त्वां, लाङ्गलाग्रेण हलाग्रेण, शतधा नेष्ये शतकुल्यावतीं करिष्ये इत्यर्थः ॥ २४ ॥ एवमिति । एवं निर्भर्त्सिता, अत एव, भीता यमुना, चकिता यथोक्तं तथैव कर्त्तुमयं प्रभुरिति शङ्किता सती, हे नृप, पादयोः पतिता सती, पतित्वेत्यपि क्वचित्पाठः । यदुनन्दनं प्रति, वाचं उवाच ॥ २५ ॥ रामेति। हे राम, हे राम, हे महाबाहो, तव विक्रमं महिमानं, न जाने । अपारत्वादिति भावः । एतदेव स्पष्टयितुमाह । यस्येति । हे जगतः पते, यस्य तव, एकांशेन सहस्रतममूर्द्धैकदेशेन, केचित्तु एकांशेन शेषाख्येनेत्यूचुः । जगती पृथिवी, विधृता विशेषेण धृता। तस्य तवेति संबन्धः ॥ २६ ॥

कृष्णप्रिया

सामर्थ्यवाले बलभद्रजी ने जलविहार के लिये श्रीयमुनाजी को निमंत्रण दिया। श्रीयमुनाजी ने यह माना कि यह तो मदान्विष्ट हो रहे हैं इसलिये इसके आदेश का अनादर किया और वहाँ नहीं आयी। तब शेषाविष्ट होकर राम ने अपने हल की नोंक से उन्हें खींचा ॥ २३ ॥ आविष्ट बलरामजी ने कहा अयि पापे यमुने! मेरे आमंत्रण की अवज्ञा करके यहाँ नहीं नहीं आ रही है यह मेरा तिरस्कार ही है। बड़ों के अनादर का फल क्या होता है यह देखो। स्वैर विहार करने वाली यमुने! अभी मैं अपने हल की नोक से तेरे सौ-सौ टुकड़े कर देता हूँ ॥ २४ ॥ राजन्! इस प्रकार बलरामजी ने जब यमुनाजी को फटकारा, तब वह चकित होकर श्री बलभद्रजी के चरणकमलों में गिर गयी और गद्गद् कण्ठ से गुणगान करने लगी ॥२५॥ हे आनन्दस्वरूप राम! हे बलराम! आप तो लोकाभिराम साक्षात् अक्षर ब्रह्मस्वरूप हैं! मैं आपकी महिमा क्षणभर विसर गयी थी। लेकिन आपकी कृपा से मैं जान सकी कि हे त्रिलोकनाथ! शेष भगवान् आपका ही अंश हैं, वह इस सारे ब्रह्माण्ड को धारण करते हैं ॥ २६ ॥

परं भावं भगवतो भगवन् मामजानतीम् । मोक्तुमर्हसि विश्वात्मन् प्रपन्नां भक्तवत्सल ॥ २७ ॥
ततो व्यमुञ्चद् [1]यमुनां याचितो भगवान् बलः। विजगाह जलं स्त्रीभिः करेणुभीरिवेभराट् ॥ २८ ॥
कामं विहृत्य सलिलादुत्तीर्णायासिताम्बरे । भूषणानि [2]महार्हाणि ददौ कान्तिः[3] शुभां स्रजम् ॥ २९ ॥
वसित्वा वाससी नीले मालामुन्मुच्य[4] काञ्चनीम्। रेजे स्वलंकृतो [5]लिप्तो माहेन्द्र इव वारणः ॥ ३० ॥

कर्दमक्षमा

अन्वयः—हे, विश्वात्मन्! हे, भगवन्! भगवतः, परम्, भावम्, अजानतीम्, हे भक्तवत्सल! प्रपन्नाम्, माम्, मोक्तुम्, अर्हसि ॥ २७ ॥ ततः, याचितः, भगवान्, बलः, यमुनाम्, व्यमुञ्चत्, इभराट्, करेणुभिः, इव, बलः, स्त्रीभिः, जलम्, विजगाह ॥ २८ ॥ कामम्, विहृत्य, सलिलात्, उत्तीर्णाय, कान्तिः, लक्ष्मीः, असिताम्बरे, महार्हाणि, भूषणानि, शुभाम्, स्रजम्, ददौ ॥ २९ ॥ नीले वाससी, वसित्वा, काञ्चनीम्, मालाम्, उन्मुच्य, स्वलंकृतः, लिप्तः, महेन्द्रः, वारणः, इव, रेजे ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विजगाहावगाहनं कृतवान् ॥ २८ ॥ उत्तीर्णाय निर्गतायासितांबरादीनि कांतिर्ददौ । कांतिर्लक्ष्मीः यथोक्तं वैष्णवे। "वरुणप्रहिता चास्मै मालामम्लानपंकजाम् ॥ समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छत" इति ॥ हरिवंशे च बलं प्रति लक्ष्मी·

---

१. भगवान् याचितो यमुनां बलः–प्रा. पा. । २. विचित्राणि–विज. । ३. कान्तिमयीं–वीर. विज. । ४. मामुच्य–श्रीधर. वंशी. जीव. वीर. विश्व ; माबाब–विज. । ५. स्वलंकृतस्ताभि–विज. ।

वाक्यम् "जातरूपमयं चैकं कुंडलं वज्रभूषणम् ॥ आदिपद्मं च पद्माख्यं दिव्यं श्रवणभूषणम् ॥ देवेमां प्रतिगृह्णीष्व पौराणीं भूषणक्रियाम्" इत्यादि ॥ २९ ॥ वसित्वा परिधाय । आमुच्य कंठे निधाय । चंदनादिभिरालिप्तः ॥ ३०-३१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परं भावं पारमैश्वर्यम् । मोक्तुं त्यक्तुम् । विश्वात्मन्सर्वाधार ॥ २७ ॥ ततः प्रार्थनातः ॥ २८ ॥ "कांतिर्लक्ष्मी रमा माया वार्द्धिजा विष्णुवल्लभा । विभूतिर्भूतिपद्मा मा हिमांशुभगिनी शुभा" इति धरणिः । वैष्णवे विष्णुपुराणे । अस्मै बलाय । मुद्रा लतादिचिह्नम्, तत्सहिते समुद्रे आभाते इत्याभे ते च ते समुद्राभे । यद्वा—मुद्राभिरामा मुद्राभा, तया सहिते समुद्राभे । जातरूपं सुवर्णम् । वज्रो हीरकमणिः । आदिपद्मम् 'महापद्मश्च पद्मश्च' इत्यत्र निधिगणनायां पद्मस्यादिर्महापद्मोऽस्ति, तेन तदधिष्ठितकमलं ददौ । तच्च पद्माख्यं कर्णभूषणमुच्यते, तदपि देवानामेवास्तीत्याह—दिव्यश्रवणभूषणमिति प्रतीयत इति । पौराणीं प्राक्तनशेषरूपदेवदेहसंबंधिनीम् । "कदम्ब कोटरे जाता नाम्ना कादम्बरीति सा । रूपिणी वारुणी तत्र देवानाममतारणी ॥ कादम्बरीम् मदकलं विदित्वा कृष्णपूर्वजम् । तिस्रस्त्रिदशनार्यस्तमुपतस्थुः प्रियंवदाः ॥ मदिरारूपिणी भूत्वा कान्तिश्च शशिनः प्रिया । श्रीश्च देवी वरिष्ठा स्त्री स्वयमेवाम्बुजध्वजा ॥ सांजलिप्रग्रहा देवी रौहिणेयमुपस्थिता । वारुण्या सहिता वाक्यमुवाच मदविह्वलम् ॥ बलं जयस्व देवानां बलदेव दिवीश्वर । अहं ते दयिता कांता वारुणी समुपस्थिता ॥ त्वामेवांतर्हितं श्रुत्वा शाश्वतं वडवामुखे । क्षीणपुण्येव वसुधां पर्येमि विमलानन ॥ पुष्पचक्रानुलिप्तेषु केसरेभूषितं मया । अतिमुक्तेषु चाक्षोभ्य पुष्पस्तबकवत्सु च ॥ अहं कदंबमालीना मेघकाले मुखप्रिया । तृषितं मार्गमाणा त्वां स्वेन रूपेण छादिता ॥ सास्मि पूर्णेन योगेन यथैवामृतमंथने । समीपं प्रेषिता पित्रा वरुणेन तवानघ ॥ सा यथैवार्णवगता तथैव वडवामुखे । त्वयोपभोक्तुमिच्छामि संमतस्त्वं हि मे गुरोः ॥ न त्वानन्त परित्यक्ष्ये भर्त्सितापि त्वयानघ । नाहं त्वया विना लोकानुत्सहे देव सेवितुम् । आदिपद्मं च पद्मं च दिव्यं श्रवणभूषणम् । समुद्रार्हाणि नीलानि कौशेयानि च बिभ्रती ॥ मदिरानन्तरं कान्तिः संकर्षणमुपस्थिता । मदेनागलितश्रोणी किंचिदाघूर्णितेक्षणा ॥ प्रोवाच प्रणयात्कांतिर्बद्धांजलिपुटा सती । जयपूर्वेण योगेन सस्मितं वाक्यमर्थवत् ॥ अहं चंद्रादपि गुरुं सहस्रशिरसं प्रभुम् । स्वैर्गुणैरनुरक्ता त्वां यथैव मदिरा तथा ॥ श्रीश्च पद्मालया देवी विधेया वैष्णवोरसि । रौहिणेयोरसि शुभा मालेवामलतां गता ॥ सा मालाममला गृह्य बलस्योरसि दर्शिता । पद्मास्या पद्महस्ता वै संकर्षणमथाब्रवीत् ॥ राम रामाभिरामस्त्वं वारुण्या समलंकृतः । कांत्या मया च देवेश संगतश्चन्द्रमा यथा ॥ इयं च सा मया मौलिः प्रोद्धृता वरुणालयात् । मूर्ध्नि शीर्षसहस्रस्य याते भानुरिवाबभौ ॥ जातरूपमयं चैकं कुंडलं वज्रभूषितम् । आदिपद्मं च पद्मं च दिव्यं श्रवणभूषणम् ॥ कौशेयानि च नीलानि समुद्रार्हाणि भावतः । हारश्च पीनतरलं समुद्राभ्यंतरोषितम् ॥ देवेमां प्रतिगृह्णीष्व पौराणीं भूषणक्रियाम् । समयस्ते महाबाहो भूषणानामलंक्रिया ॥ संगृह्य तमलंकारं ताश्च तिस्रः सुरस्त्रियः । शुशुभे बलदेवो हि शारदेंदुसमप्रभः ॥" इति । अत्र वडवामुखे वडवाग्निसन्निधौ । पाताले शेषरूपेण नित्यं स्थितं त्वामिदानीमंतर्हितम् । एतेन रामः पूर्ण एव शेषो न तु शेषांश इत्युक्तम् । पर्येमि परिभ्रमामि, अन्वेषयितुमिति शेषः । पुष्पचक्रं विकसितसमुदायः । केसराणां पुष्पविशेषाणामेव तेनानुलिप्तेषु केसरवत्सु कुसुमादिषु अतिमुक्तेषु । बासन्तीलतासु पूर्णेन योगेन सर्वांगसम्पत्त्या युक्ता सती त्वया कर्त्रा आत्मानं भोक्तुमीहे । गुरोः पितुः । कांतिर्मूर्तिमती । जयपूर्वेण योगेन । रामसंबोधनेन हे राम त्वं जयेति शब्देनाभिमुखीकृत्येति शेषः । श्रीश्च वैष्णव्यपी राममेवानुमतेत्याह—श्रीश्चेति । दर्शिता वस्त्रभूषाद्यलंकृता । मौलिर्मुकुटः । वज्रं हीरकम् । समुद्रो मनोरथस्तदर्हाणि । भावतोऽत्यादरेण । भूषणानामेवालंक्रिया त्वया न तु तैस्तवेति भावः । द्वितनुत्वेऽपि तयोरेकरूपत्वात्तत्र लक्ष्मीस्वीकारोऽपि न विरुद्ध इति विष्णुपर्वणि पञ्चनवतितमाध्याये वर्णितम् ॥ २९ ॥ माहेन्द्र ऐरावतः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत एव परं भावं महासङ्कर्षणत्वलक्षणं स्वभावं तच्च त्वया ज्ञायत एवेत्याह, भगवन् हे सर्वज्ञेति तत्र हेतुः विश्वस्य आत्मन् परमात्मन्निति अतो विकर्षणान्मोक्तुमर्हसि ननु मदाज्ञालङ्घिनीं त्वां कुतो मुञ्चेऽहं तत्राह—प्रपन्नां शरणागतां प्रपन्नजने च तव कृपैवोचितेत्याह—हे भक्तवत्सलेति ॥ २७ ॥ विशेषेण समाश्वासनपूर्वकममुञ्चत् तथा तत्रैव "शान्तिं व्रज महाभागे गम्यताञ्च यथासुखम्" इत्यादि विमोचनेन दूराकृष्टिरपि ध्वनिता । तथाच तत्रैव "वृन्दावनस्य मध्ये तु सा नीता यमुना नदी" इति । श्रीविष्णुपुराणे च—

"सा कृष्टा तेन सहसा मार्गं सन्त्यज्य निम्नगा । यत्रास्ते बलदेवोऽसौ प्लावयामास तद्वनम्" ॥ इति

जलं तत्रागतं नदीभागम् ॥ २८ ॥ कान्तिर्लक्ष्म्याः मूर्त्तिविशेषः श्रीविष्णुपुराणादौ तु लक्ष्मीरित्यंशेनाभेदाभिप्रायात् इयमेव द्वितीयव्यूहस्य सङ्कर्षणस्य पत्नी ॥ २९ ॥ वसित्वेति स्पष्टम् ॥ ३० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वाचं काकुयुक्तां दीनाम्, यद्वा, चकितायाः भीतायाः स्त्रियो या वाक् ताम्; यदुनन्दनमिति श्रीकृष्णाग्रजत्वादिना तस्य पादयोः पतनं योग्यमेवेति। हे नृपेति च नृपाद्भीतानां प्रजानामिव भयात्तस्यास्तद्युक्तमेवेति भावः। एवं श्रीयमुनेयं श्रीभगवद्रूपानुसारेण लक्ष्म्या विविधमूर्त्तिवद्भगवन्महिषीवरायाः श्रीकालिन्द्या एव विभूतिरूपा, भगवन्महाविभूतिसमुद्रभार्य्यास्वरूपा मूर्त्तिरेका ज्ञेया। तथा च तत्रैव (श्रीहरिवंशे विष्णु-प० ४६।४९)—'प्रत्युवाचार्णववधूम्' इति, तां इति, तां प्रति तत्सम्बोधनञ्च (विष्णु० प० ४६।५१) 'सागरंगमे' इति ॥ २७ ॥ राम हे जगद्रमण ! अतो मां पीडयितुं मार्हसीति भावः। वीप्सा भीतत्वात्, किंवा क्रुद्धस्य तस्याभिमुखीकरणार्थम्, महाबाहो ! हे परमबलिष्ठ ! विक्रमं प्रभावं न जाने, न ज्ञातुं शक्तास्मीत्यर्थः। तत्र हेतुः—यस्येति। जगती पृथ्वी, विशेषेण लीलातपत्रवदनायासादिना धृतास्तीति शेषः। किमर्थम् ? हे जगतः पते ! जगद्रक्षार्थमित्यर्थः। मादृशानन्तनदी-नद-समुद्र-सर्वतादिसहिता पृथ्वी यस्यैकांशेन विध्रियते, तद्विक्रमज्ञानेऽतिदूरवर्त्तिदुष्टजड़जनस्याशक्तेरित्यर्थः ॥ २९ ॥ अतः परं परमं तव भगवतो भावं भगवत्त्वम्, यद्वा जगतीविधारणादन्यं भगवतः सर्वैश्वर्य्यपूर्णस्य तव भावं माहात्म्यमजानतीम्; तच्च मम ज्ञानं त्वया ज्ञायत एवेत्याह—भगवन् हे सर्वज्ञेति। तत्र हेतुः—विश्वस्य आत्मन् ! परमात्मन्निति। अतो विकर्षणान्मोक्तुमर्हसि। ननु मानिनि ! मदाज्ञालङ्घिकां त्वां कुतो मुञ्चेयम् ? तत्राह—प्रपन्नां शरणागताम्; प्रपन्नजने च तव कृपैवोचितेत्याह—हे भक्तवत्सलेति। अथवा ननु एवं जानास्येव, कथं मिथ्या वदसि न जान इति ? तत्राह—परमिति। भोक्तुमर्हसीत्यत्र हेतुः—भगवन्निति। सर्वज्ञस्याज्ञे कृपा युक्तैवेति भावः। यद्वा, हे परमदयालो ! ननु अपराधिषु दण्डो युक्त एवेति चेत्तत्राह—विश्वस्यात्मन् परमप्रिय ! इत्यपराधस्त्वया न गृह्यत एवेति भावः। यद्वा, सर्वप्रवर्तकेति यथा नियुक्तास्मि, तथा अकरवमिति को मेऽपराध इति। ननु एवं सर्वमर्य्यादारहितं स्यात् ? तत्राह—भक्तवत्सलेति। ननु आज्ञालङ्घिन्याः कुतस्ते भक्तत्वम् ? तत्राह—प्रपन्नां पूर्वं सानुजस्य तव जलक्रीडादि-सुखविस्तारणेन कृतभक्तिमित्यर्थः। यद्वा, श्रीकृष्णमहिष्याः श्रीकालिन्द्या अंशत्वेन मम त्वद्भक्ततासिद्धेः; यद्वा, हलखातपथेन त्वत्पार्श्वागमनादिति दिक् ॥ २९ ॥ ततो दीनोक्तेः प्रपत्तेर्वानन्तरम्, विशेषेण समाश्वासनपूर्वकममुञ्चत्। तथा च तत्रैव (श्रीहरिवंशे विष्णु० प० ४६।५१)—'शान्तिं व्रज महाभागे सम्यताञ्च यथा सुखम्' इत्यादि, यतो भगवान् प्रपन्नवत्सलः, तत्रापि याचितः काकुभिर्मोचनं प्रार्थितः, जलं हृत्वा आकृष्टयाः श्रीवृन्दावनन्तःप्रविष्टायाः श्रीबलदेवान्तिकागतायास्तस्या एव; तथा च तत्रैव (विष्णु प० ४६।४२)—वृन्दावनस्य मध्येन सा नीता यमुना नदी' इति; श्रीविष्णुपुराणे च (५।२५।११)—'सा कृष्टा तेन सहसा मार्गं सन्त्यज्य निम्नगा। यत्रास्ते बलदेवोऽसौ प्लावयामास तद्वनम्।' इति। बल इति स्त्रीभिः सह विचित्रजलक्रीडादौ समर्थतर इति भावः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

भगवतस्तव परं निरवधिकं भावं प्रभावं हे भगवन्नजानतीमधुना प्रपन्नाञ्च मां भोक्तुमर्हसि तदुपयुक्तं सम्बोधयति भक्तवत्सलेति मुञ्चेत्यस्य यथापूर्वं गमयेत्यर्थः ॥ २७ ॥ तत इति। बलो राम इत्थं याचितो यमुनां व्यमुञ्चत् ततः स्त्रीभिः सह जलं विजगाहे च तथा करेणुभिः सहेभराडैरावतः तद्वत् ॥ २८ ॥ काममिति। कामं यथेच्छं विहृत्योत्तीर्णाय निर्गताय रामायासिताम्बरे नीलाम्बरे महार्हाण्यमूल्यानि भूषणानि कान्तिमतीमम्लानश्रियं स्रजं मालाञ्च ददौ यमुनेति कर्तृपदाध्याहारः यथोक्तं—

"वरुणप्रहितां चास्मै मालामम्लानपङ्कजाम्। समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छत" ॥

इति वैष्णवं वचनं तत्रापि लक्ष्मीर्दर्शनीयरूपा मूर्तिधरा यमुनेति व्याख्येयम् ॥ २९ ॥ वसित्वेति। वसित्वा परिधाय काञ्चनीं स्वर्णमयीं मालामाबद्ध्य कण्ठे निधाय काञ्चनीं मालामित्यनुक्तभूषणोपलक्षणम् इत्थं सुष्ठु अलङ्कृतः स्त्रीभिः सह रेजे यथा माहेन्द्रो वारणः तद्वत् ॥ ३० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

भावमभिप्रायं माहात्म्यं वा ॥ २७-२८ ॥ असिताम्बरे नीलवस्त्रे ददौ यमुनेतिशेषः ॥ २९-३० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कान्तिर्लक्ष्म्यंशा ॥ २९-३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

परं भावं महासङ्कर्षणस्वरूपं त्वत्स्वरूपम् ॥ २७–२८ ॥ कान्तिर्लक्ष्म्याः मूर्त्तिविशेषः यदुक्तं वैष्णवे—

"वरुणप्रेषिणां चास्मै मालामम्लानपङ्कजाम् । समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छत" ॥ इति

इयमेव द्वितीयव्यूहस्य सङ्कर्षणस्य स्त्रीति प्राहुः ॥ २९ ॥ वसित्वा परिधाय आमुच्य कण्ठे निधाय लिप्तचन्दनेन वारणः ऐरावतः ॥ ३० ॥

गूढार्थदीपिनी

परं भावं पारमैश्वर्यम् ॥ २७ ॥ ततः प्रार्थनातः । विजगाहे आलोडनपूर्वकं स्नानं कृतवान् । इभराट् गजेन्द्रः यथा हस्तिनीभिः सह ॥ २८ ॥ उत्तीर्णाय निर्गताय बलाय । असिताम्बरे नीलाम्बरे । कान्तिः लक्ष्मीः ॥ २९ ॥ वसित्वा परिधाय । आमुच्य कण्ठे निधाय । माहेन्द्रः ऐरावतः । लिप्तः चन्दनादिना ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

विजगाह अवगाहनं कृतवान् ॥ २८ ॥ कामं यथेच्छं विहृत्य उत्तीर्णाय निर्गताय असिते नीले अम्बरे महार्हाणि अमूल्यानि भूषणानि कान्तिः लक्ष्मीविभूतिभूता ददौ । अत एव वैष्णवे लक्ष्मीशब्दप्रयोगः—

"वरुणप्रहिताञ्चास्मै मालामम्लानपङ्कजाम् । समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छत" ॥ इति ॥ २९ ॥

लिप्तश्चन्दनादिभिः ॥ ३०–३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चषष्टितमोऽध्यायार्थप्रकाशः ॥ ६५ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु ज्ञायत एव सङ्कर्षणो महानिति सर्वशास्त्रसिद्धम्, तत्कथमज्ञानमिति चेत्, तत्राह **परं भावं भगवत** इति । त्वयि मनुष्यभाव एव आधिभौतिकभावो वा लोकसिद्धः, न तु परो भावः । यथा भगवति कृष्णे । स एवात्राविष्ट इति न कोऽपि जानाति । अतः परं भावं साक्षाद्भगवतस्ते अजानतीं मां मोक्तुमर्हसि । भगवन्निति सम्बोधनात् इदानीं ज्ञातमिति नाग्रे अपराधः सम्भविष्यतीति सूचितम् । जातेऽप्यपराधे क्षमा कर्तव्येति सम्बोधनान्तरमाह विश्वात्मन्निति । आत्मापराधः कस्यापि न रोषकर इति । तथाप्यधिकारावेशेन भेददर्शनात् अक्षमेति चेत्, तत्राह **भक्तवत्सलेति** । आत्मनो भक्तत्वमाह **प्रपन्ना**मिति ॥ २७ ॥ एवं कर्मज्ञानभक्तिप्रकारैः प्रार्थनायां तां त्यक्तवानित्याह **ततो व्यमुञ्च**दिति । तयैव मोचनार्थं याचितः, यतो भगवान् । महत इयमेव व्यवस्था । पुनरपकारं न करिष्यतीति बुद्ध्वा तथा कृतवानिति पक्षं व्यावर्तयति बल इति । स्वबलाभिनिवेशादेव तथा कृतवान्, न तु ज्ञात्वेत्यर्थः । तस्यां प्रसन्न इति ज्ञापयितुं क्रीडामाह विजगाह जलं स्त्रीभिरिति । पूर्ववन्मर्यादां त्यक्तवानिति ज्ञापयितुं दृष्टान्तमाह **करेणुभिरिवेभ**राडिति ॥ एतावत्पर्यन्तं भगवत्त्वमुक्त्वा तिरोहितो भगवानिति ज्ञापयितुं तस्य वस्त्राणां क्लेदनात् वस्त्रान्तरपरिधानमाह **कामं विहृत्य सलिलादुत्तीर्णा**येति । कान्तिर्भगवतश्चतुर्थी शक्तिः । अत एव तामसी मूर्तिश्चतुर्थी तद्धितार्थं तस्य प्रिये नीले अम्बरे भूषणानि च तदीयानि शुभां स्रजं कल्याणसूचिकां मालां ददौ । अन्यथा अपराधस्मरणात् जीवितमेव न भवेत् । भगवदीयया सत्कृत इति तस्यान्तस्तापो निवृत्तः ॥ २९ ॥ ततस्तत्परिधानात् बहिर्मालिन्यमपि निवृत्तमित्याह **वसित्वा वाससी नीले** इति । सजातीयेनैव सजातीयं व्यावर्त्यत इति नीले वाससी वसित्वा, मालां च कीर्तिमयीमुन्मुच्य, काञ्चनीं स्वरूपतोऽप्यमृतमयीं नित्यसद्गुणरूपाम् । निर्दोषगुणवान् भूत्वा रेजे । एवं स्वाभाविकीमवस्थामापन्नः स्वलङ्कृतो जातः, लिप्तश्चाङ्गरागैः । सर्वेषां दर्शनीय एव जातः, न तु गुप्त इति दृष्टान्तमाह **माहेन्द्र इव वारण** इति । ऐरावत इव ॥ ३० ॥

श्रीसुबोधिनी–सारः

हे भगवन् भगवतस्तव परं भावम् अजानतीं मां प्रपन्नां शरणं गतां मोक्तुं त्यक्तुमर्हसि हे विश्वात्मन् हे भक्तवत्सल ॥ २७ ॥ ततोऽनंतरं भगवान् बलो याचितः तया संप्रार्थितो यमुनाम् अत्यजत् । स्त्रीभिः सह जलं रामो विजगाह प्रविवेश करेणुभिर्गजीभिरिभराट् दंती बलेंद्र इव ॥ २८ ॥ कामं यथेच्छं विहृत्य क्रीडित्वा सलिलाज्जलादुत्तीर्णाय बहिर्निर्गताय बलाय कांतिर्लक्ष्मीः महार्हाणि अमूल्यानि भूषणानि शुभां स्रजं मालां ददौ ॥ २९ ॥ नीले द्वे वाससी वसित्वा परिधाय काञ्चनीं सुवर्णमयीं मालां कंठे आमुच्य बद्ध्वा धृत्वा सुष्ठु अलंकृतो भूषितो लिप्तश्चंदनेन माहेंद्रो वारण ऐरावत इव ॥ ३० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

कामं विहृत्येत्यत्र। **चतुर्थी शक्तिरिति**। 'श्रिया पुष्ट्ये'तिगणनायां चतुर्थीत्यर्थः। **अन्यथेति**। भगवच्छक्त्या सत्काराभावे भगवदीयाया यमुनाया आकर्षणरूपापराधस्मरणाद् ग्लान्या स्वावतारसमाप्तिं बलः कुर्यादित्यर्थः। रमणं भगवद्वाक्यात्कायिकसान्त्वनार्थं कृतम्। यमुनाकर्षणं तु स्वेच्छया कृतमिति तस्यापराधत्वमिति भावः। **अन्तस्ताप** इति। पूर्वोक्तग्लानिरूप इत्यर्थः। **वसित्वेत्यत्र**। **सजातीयेनैवेति**। वाससी नीले, मालिन्यमपि नीलमितिलोकप्रसिद्धिः। अतः सजातीयत्वम्। **स्वरूपतोऽपीति**। हिरण्मयस्य ब्रह्मधर्मत्वोपपादनान्मरणादिदोषराहित्यं नित्यसद्गुणरूपत्वं च। 'निर्दोषपूर्णगुणविग्रह' इति वाक्यादिति भावः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दुर्ज्ञेयत्वं सूचयन्ती सम्बोधयति—भगवन्निति। मां मोक्तुं त्यक्तुमर्हसि। तत्र हेतुं सूचयन्ती—सम्बोधयति—भक्तवत्सलेति। आत्मनो भक्तत्वमाह—प्रपन्नामिति। 'अज्ञानादेव तवावज्ञा जाताऽतोपि ममापराधः सोढव्य' इत्याशयेनाह—भगवतस्तव परं प्रभावमजानतीमिति। 'तव कोपेन च मम कुतोपि न निस्तार' इति सूचयन्ती सम्बोधयति—विश्वात्मन्निति॥ २७॥ एवं याचितः सम्प्रार्थितो बलः यमुनां व्यमुञ्चत्। ततः स्त्रीभिः सह जलं विजगाह प्रविश्य चिक्रीडे। 'कथमेवं मर्यादां त्यक्त्वा विहारं कृतवान्' तत्राह—भगवानिति। दोषासंस्पर्शित्वात् स्वतन्त्रत्वाच्च। तथाक्रीडायां दृष्टान्तमाह—करेणुभिः सह यथेभराट् मत्तो गजो मर्यादां हित्वा क्रीडति तद्वदिति॥ २८॥ कामं यथेच्छं विहृत्योत्तीर्णाय जलाद्बहिर्निर्गताय रामाय असिते नीले अंबरे, महार्हाणि अनर्घ्याणि भूषणानि, शुभां अम्लानश्रियं स्रजं च, कान्तिर्लक्ष्मीर्ददावित्यन्वयः। अत्र कान्तिर्लक्ष्मीः। यथोक्तं वैष्णवे—'वरुणप्रहिता चास्मै मालामम्लानपङ्कजाम्। समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छत' इति॥ हरिवंशे च बलंप्रति लक्ष्मीवाक्यम्—"जातरूपमयं चैकं कुण्डलं वज्रभूषणम्। आदिपद्मं च पद्माख्यं दिव्यं श्रवणभूषणम्॥ देवेमां प्रतिगृह्णीष्व पौराणीं भूषणक्रियाम्" इत्यादि॥ २९॥ नीले वाससी वसित्वा परिधाय तथा काञ्चनीं स्वर्णमयीं मालामामुच्य कण्ठे निधाय तथान्यैरपि भूषणैः स्वलंकृतस्तथा चन्दनादिना लिप्तो रामः माहेन्द्रो वारण ऐरावतो यथा करेणुभिः सह रमते तथा स्त्रीभिः सह वने रेमे इत्यन्वयः॥ ३०॥

अन्वितार्थप्रकाशिका

परमिति। हे भगवन्! हे विश्वात्मन्! हे भक्तवत्सल! भगवतस्तव परं भावं महासङ्कर्षणरूपं त्वत्स्वरूपमजानतीं प्रपन्नां मां मोक्तुमर्हसि॥ २७॥ तत इति। ततः एवं याचितो भगवान् बलः यमुनां व्यमुञ्चत्। ततः करेणुभिः इभराट् इव स्त्रीभिः सह जलं विजगाहे प्रविश्य चिक्रीड॥ २८॥ काममिति। कामं यथेच्छं विहृत्योत्तीर्णाय जलाद्बहिर्निर्गताय रामाय असिते नीले अम्बरे महार्हाणि अनर्घ्याणि भूषणानि शुभाम् अम्लानश्रियं स्रजं च कान्तिर्लक्ष्मीमूर्तिविशेषः इयमेव द्वितीयव्यूहस्य सङ्कर्षणस्य स्त्रीति प्राञ्चः ददौ। तथा च वैष्णवे समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छतेति॥ २९॥ वसित्वेति। नीले वाससी वसित्वा परिधाय तथा काञ्चनीं स्वर्णमयीं मालामामुच्य कण्ठे निधाय तथान्यैरपि भूषणैः स्वलंकृतस्तथा चन्दनलिप्तो रामः माहेन्द्रो वारण ऐरावतो यथा करेणुभिः सह रमते तथा स्त्रीभिः सह वने रमे॥ ३०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भगवतः समर्थस्य तव परं भावं संकर्षणरूपं॥ २७॥ करेणुभिर्गजीभिः जलं प्रति विजगाह प्रवेशनं चकार॥ २८॥ सलिलात् उत्तीर्णाय बहिर्निर्गताय रामाय असिताम्बरे द्वेश्यामवस्त्रे भूषणादीनि च कांतिर्लक्ष्मीः ददौ तदुक्तं विष्णुपुराणे वरुणप्रहितां चास्मै मालामम्लानपंकजां समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छतेति। हरिवंशे च रामं प्रतिलक्ष्मीवचनं जातरूपमयं चैव कुंडलं वज्रभूषणं। आदि पद्मं च पद्माख्यं दिव्यं श्रवणभूषणं। देवेमां प्रतिगृह्णीष्वपौराणीं भूषणक्रियामित्यादि॥ २९॥ वाससी वस्त्रे वसित्वा परिधाय मालां आमुच्य कंठे धृत्वा लिप्तः। केसरचंदनादिर्चर्चितः॥ ३०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

परमिति॥ हे भगवन्, हे विश्वात्मन्, हे भक्तवत्सल, भगवतस्तव, परं निरवधिकं, भावं प्रभावं, अजानतीं, प्रपन्नामधुना त्वच्छरणं प्राप्तां, मां मोक्तुं अर्हसि॥ २७॥ तत इति॥ ततः, भगवान् बलः, याचितः यमुनयेत्थं कृतप्रार्थनः सन्, यमुनां व्यमुञ्चत्, यथापूर्वं गमयामासेत्यर्थः। ततः इभराडैरावतः, करेणुभिः सह, इव स्त्रीभिः सह, जलं यामुनमम्भः, विजगाह॥ २८॥ काममिति॥ कामं यथेच्छं, विहृत्य जले विहारं कृत्वा, सलिलात् उत्तीर्णाय जलाद्बहिर्निर्गताय रामाय, असिताम्वरे नीलाम्वरे, महार्हाणि महामूल्यानि, भूषणानि, कान्तिमतीमम्लानश्रियं, स्रजं मालां च, ददौ। लक्ष्मीरिति शेषः। तथा चोक्तं वैष्णवे। 'वरुणप्रहितां चास्मै मालामम्लानपङ्कजाम्। समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छत' इति। केचित्तु यमुनेति शेष

इत्युक्त्वा, वैष्णवं वचनं पठित्वा, लक्ष्मीर्दर्शनीयरूपा मूर्त्तिधरा यमुनेति व्याख्येयमित्याहुस्तच्चिन्त्यं, विष्णुपुराणे तट्टीकायां च लक्ष्मीशब्दोपादानात् । तत्र संमतित्वेन लिखिते हरिवंशवाक्येऽपि लक्ष्म्या एवाभिधानात् ॥ २९ ॥ **वसित्वेति** ॥ रामः नीले वाससी, वसित्वा परिधाय, काञ्चनीं स्वर्णमयीं मालां, आमुच्य कण्ठे निधाय, काञ्चनीं मालामित्यनुक्तभूषणोपलक्षणम् । वर्त्तमानः स्वलंकृतः सुष्ठ्वलंकृतः, लिप्तः चन्दनाभिरालिप्तः, माहेन्द्र इन्द्रसंबन्धी, वारणः हस्ती इव, रेजे ॥ ३० ॥

कृष्णप्रिया

हे महाराज ! हे भगवन् ! आप ऐश्वर्यसम्पन्न हैं । मैं इस महिमा को भूल गयी थी । अब आपकी ही अनुकम्पा से आपके वास्तविक स्वरूप को पहिचाना । अज्ञात अवस्था के अपराध क्षम्य माने जाते हैं । हे विश्वात्मन् ! हे भक्तवत्सलनाथ ! मैं आपकी शरणागत हूँ, अब क्षमा कीजिये और अपराध से मुक्त कीजिये ॥ २७ ॥ श्रीनन्दालय से दूर गयी जलधारा पुनः निकट आयी । नन्द यशोदाजी को प्रसन्न देखकर बलरामजी पूर्ण प्रसन्न हो गये, उसकी प्रार्थना स्वीकार करके क्षमा का दान दिया । पुनः सन्तुष्ट बलभद्रजी जैसे बलशाली गजराज हस्तिनियों के साथ क्रीड़ा करता है वैसे ही बलराम महाराज गोपियों के साथ जलविहार करने लगे ॥ २८ ॥ मनोभिलषित जलविहार करके बलरामजी जब यमुनाजी से बाहर पधारे तब भगवती कान्ति-लक्ष्मीजी ने दाऊजी को दिव्य नीलाम्बर महामूल्य आभूषण और अत्यंत सुन्दर सुवर्ण का हार दिया ॥ २९ ॥ श्री श्वेतस्वरूप बलभद्रजी ने नीलाम्बर धारण किया और रमणीय सुवर्ण माला अपने कण्ठ में धारण कर ली । तदनन्तर अंगराग श्रीअङ्ग में लगाया, जब और भी आभूषण धारण कर लिये तब तो आप ऐसे सुशोभित बने मानो कि राजा इन्द्र का श्वेत वर्णवाला ऐरावत सुशोभित हो रहा है ॥ ३० ॥

अद्यापि दृश्यते राजन् यमुनाऽऽकृष्टवर्त्मना । बलस्यानन्तवीर्यस्य वीर्यं सूचयतीव हि ॥ ३१ ॥
एवं सर्वा निशा याता एकेव [1]चरतो व्रजे । रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयोषिताम् ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे[2] दशमस्कन्धे[3] बलदेवविजये यमुनाकर्षणं नाम [4]पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

कर्दमक्षमा

अन्वयः—राजन्, अद्यापि, आकृष्टवर्त्मना, यमुना, अनन्तवीर्यस्य, बलस्य, वीर्यम्, सूचयति, इव, दृश्यते ॥ ३१ ॥ व्रजयोषिताम्, माधुर्यैः, आक्षिप्तचित्तस्य, एवम्, व्रजे, चरतः, रामस्य, सर्वाः, निशाः, एका, इव, याता ॥ ३२ ॥

इति श्रीमद्भागवतस्य दशमस्कन्धस्य निरोधलीलायामुत्तरार्द्धे बलभद्रविजये पञ्चषष्टितमेऽध्याये अन्वयाः समाप्ताः ॥ ६५ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एकेव एकैव निशा यथा तथा माधुर्यैर्विलासैः ॥ ३२ ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे श्रीध० टीकायां पंचषष्टितमोऽध्यायः ॥ ६५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आकृष्टवर्त्मनाऽऽकर्षणमार्गेण उपलक्षिता ॥ ३१ ॥ आक्षिप्तचित्तस्य वशीकृतमनसः । एकैवेति प्रतिरजनि नवनवायमानानुभवात् ॥ ३२ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीबलदेवप्रीत्या तथैवाद्यापि वहतीत्याह—अद्येति । कृष्टेन हलखातेन वर्त्मना लक्षिता किम्वा तेन वीर्यं सूचयन्ती स्वावस्थाविशेषेण किञ्चिज्ज्ञापयन्ती इवेत्यबुद्धिपूर्वकत्वात् किञ्चित्त्वे हेतुः अनन्तेति हि प्रसिद्धो तथाच तां प्रति तस्याज्ञा श्रीहरिवंशे—

"लाङ्गलादिष्ट मार्गात्त्वमिमं मे प्रियदर्शने ।
देशमम्बुप्रदानेन प्लावयस्वाखिलं शुभम् । यावत्स्थास्यति लोकोऽयं तावत्स्थास्यति मे यशः ।। इति ॥ ३१ ॥

एकेवेति । प्रतिरजनि नवनवायमानानुभवात् इति देवीवर्गतोपि तासां माधुर्य्यविशेषो दर्शितः तदेवमपूर्वं भोगवृन्दं श्रीमद्व्रजसान्त्वनसन्तुष्टहृदयेन श्रीकृष्णेनैव तस्मै दूरतोपि दापितमिति गम्यते । अत्र यद्यपि श्रीरामोऽसौ श्रीकृष्णबन्धूनां सर्वेषां

---

१. रमतो—श्रीधर. वंशी. जीव. वीर. विज. । २. पारमहंस्यां संहितायां—प्रा. पा. । ३. उत्तरार्धे बलदेवविजये नास्ति—प्रा. पा. । ४. अष्टाशीति—विज. ।

स्वस्य प्रेयसीनाञ्च स्वगमनसमये पूर्वतोप्यधिकं नित्यलीलानुभावनादिना नूनं सान्त्वनं कृतवानेवास्ति एतदर्थमेवागतत्वात् तथैव हि तेन श्रीकृष्णोपि सान्त्वयिष्यते हरिवंशे "सर्वेषां कुशलं कृष्ण येषां कुशलमिच्छसि" इति तथाप्यापाततः प्रकटलीलादर्शनेन दुःखांशसद्भावमयत्नात्तद्गमनं न वर्णितमिति ज्ञेयं किञ्चित् तूद्दिष्टं विष्णुपुराणे "मासद्वयेन यातश्च पुनः स द्वारकां पुरीम्" इति ततः श्रीकृष्णमिलनन्तु हरिवंशे—

"तथैवाध्वगवेषेण सोपस्पृष्टो जनार्द्दनम् । प्रत्यग्रवनमालेन वक्षसातिविराजता ॥
स दृष्ट्वा तूर्णमात्मानं रामं लाङ्गलधारिणम् । सहसोत्थाय गोविन्दः प्रददावसनोत्तमम् ॥
उपविष्टं ततो रामं पप्रच्छ कुशलं व्रजे । बान्धवेषु च सर्वेषु गोषु चैव जनार्द्दनः ॥
प्रत्युवाच ततो रामो भ्रातरं साधु भाषिणम् । सर्वेषां कुशलं कृष्ण येषां कुशलमिच्छसि ॥
ततस्तयोर्विचित्रार्थाः पौराण्यश्चाभवन् कथाः । वसुदेवाग्रतः पुण्या रामकेशवयोस्तदा ॥" इति

तत्र सभोपविष्टत्वादापाततः सामान्यत एव प्रश्नोत्तरे इमे श्रीकृष्णगोकुलप्रेयसीपर्य्यन्तविषये ज्ञेये विशेषस्त्वेकान्त एवाभवदिति गम्यते ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भूषणानि वज्रखचित-स्वर्णैककुण्डलपद्मादीनि, शुभामम्लानस्वर्णपंकजग्रथितामित्यर्थः । कान्तिः श्रीयमुनाया विकर्षणेन मोचनेन सन्तुष्टाया लक्ष्म्या मूर्त्तिविशेषः । श्रीविष्णुपुराणादौ च लक्ष्मीरिति अंशांशिभेदाभावाभिप्रायेण । इयमेव द्वितीयव्यूहस्य श्रीसङ्कर्षणस्य पत्नी ॥ ३१ ॥ सुष्ठु अलंकृतः कुण्डलादिभिः, लिप्तो मृगमदादिपंकेन, रेजे अशोभत ॥ ३२ ॥ श्रीबलदेवप्रीत्याद्यापि श्रीयमुना तथैव वहतीत्याह—अद्येति । कृष्टेन हलखातेन वर्त्मना विशिष्टा, किंवा तेन वीर्य्यं सूचयन्ती इवेति । तत्त्वतो गाढाकर्षणेन प्रवाहवक्रगतिस्वभावेन वा श्रीवृन्दावनान्तर्भ्रमणलोभेन वान्यत्र गमनाशक्तेः । यद्वा, लौकिकोक्तिरीत्यपेक्षया अनधिकार्थम्, हि निश्चितम् । ननु तद्वीर्य्यसूचनेनात्मनो लघुतैव पर्य्यवस्यति ? नेत्याह—अनन्तेति । यतो बलस्य महत्तमस्य विक्रमसूचनेन महिमैव स्यादिति भावः । यद्वा, तद्वीर्य्यसूचने हेतुः—अनन्तेति । तादृशस्य तस्याज्ञालङ्घनाशक्तेरिति भावः । तथा च तां प्रति तस्याज्ञा श्रीहरिवंशे (विष्णु० प० ४६।५०, ५२)—

'लांगलादिष्टमार्गा त्वमिमं मे प्रियदर्शने । देशमम्बुप्रदानेन प्लावयस्वाखिलं शुभम् ॥
यावत् स्थास्यति लोकोऽयं तावत् स्थास्यति मे यशः ॥

इति । हे राजन् ! इति चिरकालेऽपि तस्यास्तथैव वृत्त्या श्रीबलदेवस्य च वीर्य्यातिशयेन परमकौतुकात् ॥ ३३॥ एवमनेनोक्तप्रकारेण वारुणीपानपूर्वकविचित्रवेशादिना रममाणस्य सर्वाः किञ्चिदधिकमासद्वयवर्त्तिन्यो बहुला अपि निशा रामस्य एकेव याताः । व्रज इति तत्रैव तद्योग्यतां बोधयति । कुतः ? व्रजयोषितां माधुर्य्यैः परमसौन्दर्य्य-वैदग्ध्यादिभिराक्षिप्तमाकृष्टं चित्तं यस्य तस्य, इवेति तत्त्वतो निशानां बाहुल्यात् । पाठान्तरे कण्डुमुनेरिवानुसन्धानाभावेन तस्यैकेति प्रतीतिः । इति द्वारकादौ श्रीरेवत्यादिभिः सह रतेरप्यस्यानन्दविशेष उक्तः । इत्यपूर्वानुभूतसुखार्थमपि स्नेहभरेण श्रीभगवतासौ तत्र प्रस्थापितस्तदुक्तिबलाद्देवताभिः सह तथा रेम इति ज्ञेयम् । ततश्च द्वारकां गत इति वक्तुमपेक्ष्यमपि नोक्तं पुनर्व्रजात्तद्गमनेन तत्रत्यानां द्विगुणित-महार्त्तिवार्त्तयात्मनो राज्ञश्च दुःखविशेषेण किञ्चिद्दृष्टं श्रीविष्णुपुराणे (५।२५।१८)—'मासद्वयेन यातश्च पुनः स द्वारकां पुरीम्' इति; ततः श्रीकृष्णमिलनन्तु श्रीहरिवंशे (विष्णु० प० ४६।५६-६०)—

'तथैवाध्वगवेषेण सोपश्लिष्य जनार्द्दनम् । प्रत्यग्रवनमालेन वक्षसातिविराजता ॥
स दृष्ट्वा तूर्णमायान्तं रामं लांगलधारिणम् । सहसोत्थाय गोविन्दो प्रददावासनोत्तमम् ॥
उपविष्टं तदा रामं पप्रच्छ कुशलं व्रजे । बान्धवेषु च सर्वेषु गोषु चैव जनार्द्दन ॥
प्रत्युवाच ततो रामो भ्रातरं साधुभाषिणम् । सर्वेषां कुशलं कृष्ण येषां कुशलमिच्छसि॥
ततस्तयोर्विचित्रार्थाः पौराण्यश्चाभवन् कथाः । वसुदेवाग्रतः पुण्या रामकेशवयोस्तदा'॥ इति ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री-श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

आकृष्टवर्त्मना सूचयतीत्यन्वयः ॥ ३१-३२ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

हलेनाकृष्टा यमुनेत्येतदसम्भावितं मन्वानस्य राज्ञः संशयनिराचिकीर्षयाह—अद्यापीति। हे राजन्! अनन्तं वीर्यं यस्य तस्य बलस्य रामस्य वीर्यं सूचयतीव "लक्षणहेत्वोः" इति शत्रन्तात् ङीप् सूचयितुमित्यर्थः। आकृष्टवर्त्मना हलाकृष्टमार्गेण यमुना स्यन्दमानेति शेषः॥ ३१॥ एवमिति। आक्षिप्तं रिरंसाप्रवणं चित्तं यस्य तस्य व्रजे रमतो रामस्य माधुर्यैर्विलासैः सर्वा निशाः रात्रयः योषितामेकेव याता गता एकनिशाप्राया बभूवुरित्यर्थः॥ ३२॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां पञ्चषष्टितमोऽध्यायः॥ ६५॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

आकृष्टेन वर्त्मना मार्गेण दृश्यते॥ ३१॥ एका निशेव व्रजस्त्रीणां माधुर्यैः सौन्दर्यैः कर्णरम्यवचनैः आक्षिप्तमाकृष्टं चित्तं यस्य स तथा तस्य॥ ३२॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् पञ्चषष्टितमोऽध्यायः॥ ६५॥

(श्रीविजयध्वजतीर्थरीत्या अष्टाशीतितमोऽध्यायः॥ ८८॥)

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आकृष्टवर्त्मना उपलक्षिता॥ ३१॥ एकेवेति प्रतिरजनि नवनवायमानानुभावात्॥ ३२॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। पञ्चषष्टितमोऽध्यायः दशमेऽजनि सङ्गतः॥ ६५॥

गूढार्थदीपिनी

आकृष्टवर्त्मना हलाकर्षणमार्गेण उपलक्षिता स्यन्दमाना वा॥ ३१॥ माधुर्यैः विलासैः। सर्वानिशा एकेव याता एकनिशावत् बभूवुः प्रतिरजनि नवनवायमानानुभवात्॥ ३२॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां पञ्चषष्टितमोऽध्यायः॥ ६५॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्य माहात्म्यमग्रेऽपि दृश्यत इत्याह **अद्यापि** दृश्यत इति। अन्यथा अग्रे अपकीर्तिः स्यादिति। आकृष्टवर्त्मना हलाकर्षणमार्गेण। महत एव वीर्यस्य वीर्यं सूचयतीव सा जाता, न तु तावदेव बलमिति। वस्तुतस्तु तदप्रयोजकम्, न पूर्णमाहात्म्यसूचकं भवितुमर्हतीति **इव** शब्दः॥ ३१॥ एवमेकदिनकृत्यमुक्त्वा यावत्कालं स्थितः सर्वेष्वेव दिवसेषु तदतिदिशति। **एवं सर्वा निशा याता** इति। **एकेवे**ति प्रकारे विशेषाभावः। **व्रजे चरत** इति स्थानस्य समानत्वाद्वैलक्षण्यं न प्रकाशितवान्, नत्वसामर्थ्यादिति सूचितम्। स्वपौरुषख्यापनमपि न कृतवानित्यत्र हेतुमाह **व्रजयोषितां माधुर्यैराक्षिप्तचित्तस्ये**ति। रामो हि साधनप्रधानः, भगवद्गुणाः तत्र प्रकाशन्त इति तत्साधनार्थमितरापेक्षया तत्समीचीनमिति तावन्मात्रेण पर्यवसितमतिर्माधुर्यैर्भगवद्धर्मैर्वशीकृतचित्तस्य एकेव निशा यातेत्यर्थः॥ ३२॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे षोडशोऽध्यायः॥ १६॥

श्रीसुबोधिनी—सारः

हे राजन् अद्यापीदानीमपि आकृष्टेन वर्त्मना मार्गेणानंतवीर्यस्य बलस्य वीर्यं बलं सूचयतीव यमुना दृश्यते हि युक्तम्॥ ३१॥ माधुर्यैर्वचनादिविलासैर्व्रजस्त्रीणाम् आक्षिप्तमाकर्षितं चित्तं यस्य तस्य रामस्य व्रजे रमतः सतः सर्वा निशा रात्रय एका इव याता व्यतीताः॥ ३२॥

इति श्रीमद्भा॰ दशमस्कन्धे उ॰ सुबोधिन्यां टीकायां पञ्चषष्टितमोध्यायः॥ ६५॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

अद्यापीत्यत्र। **आकृष्टवर्त्मने**ति। बलस्यानन्तं वीर्यं तत्सम्बन्धिना आकृष्टवर्त्मना करणेन वीर्यं सूचयतीव दृश्यते इति मूलेऽन्वयः। **एवं सर्वा** इत्यत्र। **भगवद्गुणाः तत्रे**ति। तत्र व्रजे भगवद्गुणाः प्रकाशन्ते इति हेतोर्भगवद्गुणप्राकट्यसाधनार्थमितरापेक्षया व्रजरूपमेव स्थानं समीचीनमिति हेतोस्तत्रत्ययोषितां माधुर्येषु व्रजसम्बन्धमात्रेण हेतुना पर्यवसितमतिर्जात इत्यर्थः। माधुर्यपदार्थमाहुः भगवद्धर्मैरिति। भगवति प्रकाश्यैरनुकल्परूपैः कटाक्षादिधर्मैरित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'यमुना हलेन आकृष्टा' इत्येतदसम्भावितं मन्वानस्य राज्ञः संशयं निराचिकीर्षयन्नाह—अद्यापीति । हे राजन् ! अनन्तं वीर्यं यस्य तस्य बलस्य वीर्यं सूचयतीव आकृष्टवर्त्मना हलाकृष्टमार्गेण स्पन्दमाना यमुनाद्यापि दृश्यते इत्यन्वयः । हिशब्दः प्रसिद्धिद्योतकः ॥ ३१ ॥ एवमेकदिनवृत्तमुक्त्वा यावत्कालं संस्थितस्तावत्सर्वदिनवृत्तमाह— एवमिति । व्रजयोषितां माधुर्यैर्विलासैः आक्षिप्तं रिरंसाप्रवणं चित्तं यस्य तस्य, अत एव एवं व्रजे रमतो रममाणस्य रामस्य सर्वा निशा एकेव याता एकनिशावद्बभूवुरित्यर्थः ॥ ३२ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र सात्त्विकानां निरोधने । पञ्चषष्टितमो यातो यमुनाकर्षबोधकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

अद्यापीति । हे राजन् ! आकृष्टेन हलखातेन वर्त्मना मार्गेण स्यन्दमाना यमुनाऽद्यापि अनन्तं वीर्यं यस्य तस्य बलस्य वीर्यं सूचयतीव दृश्यते ॥ ३१ ॥ एवमिति । व्रजयोषितां माधुर्यैर्विलासैः आक्षिप्तं रिरंसाप्रवणं चित्तं यस्य तस्य अत एव एवं व्रजे रमतो रममाणस्य । शतार्थः । रामस्य सर्वा निशा एकेव याता एकनिशावद्बभूवुः ॥ ३२ ॥

इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायां पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृष्टेन हलखातेन यद्वा हलाकृष्टेन वर्त्मना उपलक्षिता ॥ ३१ ॥ माधुर्यैर्विलासैः एकेव यथा एका निशा गता तथा सर्वा निशाः याता गताः ॥ ३२ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंध-व्याख्याने बलदेवकृतयमुनाकर्षणं नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हलेनाकृष्टा यमुनेत्येतदसंभावितं मन्वानस्य राज्ञः संशयनिराचिकीर्षयाऽऽह ॥ अद्यापीति ॥ हे राजन्, अनन्तं वीर्यं यस्य तस्य, बलस्य रामस्य, वीर्यं, पश्यती इव, 'लक्षणहेत्वोः'-इति शत्रन्तात् ङीप् । सूचयितुमिवेत्यर्थः । यमुना आकृष्टवर्त्मना हलाकृष्टमार्गेण, स्यन्दमाना इति शेषः । अद्यापि, दृश्यते हि ॥ ३१ ॥ एवमिति ॥ एवं व्रजे रमतो रममाणस्य, व्रजयोषितां, माधुर्यैर्विलासैः, आक्षिप्तं रिरंसाप्रवणं चित्तं यस्य तस्य, रामस्य, सर्वाः निशाः, मासद्वयपरा च, एका इव, एकरात्रिरिवेत्यर्थः । याताः । केचित्तु रामस्य माधुर्यैः योषितां, सर्वाः निशाः, एका रात्रिरिव, याताः इति व्याख्यां चक्रुः ॥ ३२ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्व-यार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

कृष्णप्रिया

राजन् ! यह दृश्य आज भी नेत्रों के सामने ऐसा लग रहा है कि बलभद्रजी के खींचे हुए मार्ग से भगवती यमुनाजी बह रही हैं, मान लीजिये कि अनन्तशक्ति भगवान् बलरामजी का यशोगान गा रही हैं ॥ ३१ ॥ व्रजनिवासिनी गोपियों के माधुर्यों से बलरामजी का चित्त इस प्रकार मुग्ध हो गया कि चैत्र-वैशाख मास की रात्रियाँ कैसे पसार हो गयी इसका अनुसन्धान न रहा, मानो एक रात के समान पसार हो गया ॥ ३२ ॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्द्धे बलदेवकृतयमुनाकर्षणं नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

* * *

अथ षट्षष्टितमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	वं.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.
४३	३८	४	१	२	१४६२	१२	४२	१५१६	४७।

श्रीशुक[1] उवाच[2]

[3]नन्दव्रजं गते रामे करूषाधिपतिर्नृप । वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत् ॥ १ ॥
त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः । इति प्रस्तोभितो बालैर्मेन आत्मानमच्युतम् ॥ २ ॥
[4]दूतं च प्राहिणोन्मन्दः कृष्णायाव्यक्तवर्त्मने । द्वारकायां यथा बालो नृपो [5]बालकृतोऽबुधः ॥ ३ ॥
दूतस्तु द्वारकामेत्य सभायामास्थितं प्रभुम् । कृष्णं कमलपत्राक्षं राजसंदेशमब्रवीत् ॥ ४ ॥[6]

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—नृप, रामे, नन्दव्रजम्, गते, अज्ञः, करूषाधिपतिः, अहम्, वासुदेवः, इति, कृष्णाय, दूतम्, प्राहिणोत् ॥ १ ॥ त्वम्, भगवान्, जगत्पतिः, वासुदेवः, अवतीर्णः, इति, बालैः, प्रस्तोभितः, सः (पौण्ड्रकः) आत्मानम्, अच्युतम्, मेने ॥ २ ॥ यथा, बालकृतः, बालः, नृपः, तथा, मन्दः (पौण्ड्रकः), अव्यक्तवर्त्मने, कृष्णाय, द्वारिकायाम्, दूतम्, च, (सन्देशं), प्राहिणोत् ॥३॥ दूतः, तु, द्वारिकाम्, एत्य, सभायाम्, आस्थितम्, कमलपत्राक्षम्, कृष्णम्, प्रभुम्, राजसन्देशम्, अब्रवीत् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

षड्युक्षष्टितमे काशीं गत्वाऽहन् पौंड्रकं हरिः । तन्मित्रं च ततो वृत्तं सुदक्षिणवधादिकम् ॥ १ ॥ १ ॥

प्रस्तोभितः स्तुत्या प्रोत्साहितः । बालैरज्ञैः ॥ २ ॥ बालकृतो नृपो बालैर्नृपत्वेन क्रीडायां परिकल्पितः ॥ ३–७ ॥

---

१. बादरायणि–प्रा. पा. । २. पञ्चदश अधिकाः–विज. ।

श्रीशुक उवाच—

पौण्ड्रको नाम राजा वै तस्मिन्काले कुरूद्वह । द्वारकां वृष्णिनिलयां निरुध्य बहुसैनिकः ॥ १ ॥
अर्दयामास कृष्णेन विदित्वा रहितां निशि । तं कामपालः शैनेयो वसुदेवोद्धवादयः ॥ २ ॥
उग्रसेनश्च कौरव्य ये चान्ये यदुपुङ्गवाः । अर्पयामासुरायान्तं कालयोग्यमिवातिथिम् ॥ ३ ॥

राजोवाच—

कश्चासौ पौण्ड्रको नाम कस्मिन्देशे महीपतिः । कस्य वा तनयो ब्रह्मन्सर्वमेतद्वदस्व मे ॥ ४ ॥

श्रीशुक उवाच—

अपुत्रः काशिराजो वै कन्यां सुतनुसंज्ञिताम् । प्रायच्छद्वसुदेवाय राज्यशुल्कां कुरूद्वह ॥ ५ ॥
तत्र जज्ञे महाबाहुर्दिवाकरसमद्युतिः । कुमारः पौण्ड्रको नाम बलवीर्यमदान्वितः ॥ ६ ॥
वसुदेवसुतत्वाच्च वासुदेवेति शब्दितः । जाते तस्मिन्महाराजो वसुदेवो महाद्युतिः ॥ ७ ॥
राज्यं तस्मिन्समारोप्य सकोशबलवाहनम् । उवाह कंसावरजां देवकीं देवतोपमाम् ॥ ८ ॥
निरुद्धो भोजराजेन कंसेनानकदुन्दुभिः । कदाचिदपि न प्रायात्करवीरपुरीमपि ॥ ९ ॥
असह्यं मातृसापत्न्यमभ्रातृत्वं तथाऽऽत्मनः । स्मरमाणः स काशीशो यदूनुद्विजतेऽनिशम् ॥ १० ॥
स कृष्णरहितां श्रुत्वा समेत्य द्वारकां निशि । विमृद्य बलभद्रेण शैनेयेनापि निर्जितः ॥ ११ ॥
निहतानेकसाहस्रहयकुञ्जरसैनिकः । जगाम परशर्वर्यां पुरीं वाराणसीं नृप ॥ १२ ॥
प्रभातायां तु शर्वर्यां हरिर्बदरिकाश्रमात् । आययौ तार्क्ष्यमारुह्य द्वारकां रामपालिताम् ॥ १३ ॥
सपताकैः साध्यर्यपाद्यैर्यदुवृष्ण्यन्धकादिभिः । अभिवर्णितवृत्तान्तः प्राविशत्केशवः सभाम् ॥ १४ ॥
कदाचित्पौण्ड्रको नाम काशिराजः प्रतापवान् ॥ १५ ॥

३. इदमर्धं नास्ति–विज. । ४. अयं श्लोको नास्ति–विज. । ५. बालैः–वीर. । ६. कारण उवाच–च. पु. टि. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तन्मित्रं पौंड्रकमित्रं काशीशम् । ततः काशीशमरणोत्तरम् । वृत्तं जातम् । आदिपदात्काशीदाहादिग्रहः (१) । करूषो देशविशेषस्तदधिपतिः ।। १ ।। आत्मानं निजम् ।। २ ।। द्वारकायां कृष्णायेत्यन्वयः । तथा त्वमबुध आत्मानं कृष्णं मेन इति पूर्वेणान्वयः ।। ३ ।। राजसंदेशं पौंड्रकाज्ञाम् ।। ४-५ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं श्रीरामकृतगोकुलसान्त्वनस्मरणेन स्वस्थचित्तस्तस्य व्रजगमनानन्तरं द्वारकायां कौतुकविशेषं स्मृत्वाऽऽह—नन्देति । रामे नन्दव्रजं गते इति श्रीकृष्णमेकाकिनं मत्वेति भावः । अन्यथा तत्र श्रीरामे स्थिते दुर्निवारतत्क्रोधजन्मतो वक्ष्यमाणकौतुकं न स्यादिति च वासुदेवः परमेश्वरोऽहमिति सन्दिश्येत्यर्थः । यतोऽज्ञो निर्बुद्धिः अज्ञत्वादेव स्ववत् श्रीकृष्णेऽपि भगवत्त्वमारोपितं मन्यमान इत्यर्थः । नृपेति सकौतुकं सम्बोधनम् ।। १ ।। अज्ञत्वमेव विवृण्वन् दूतप्रस्थापनं विवृणोति—त्वमिति द्वाभ्याम् । सर्वान्तर्यामित्वेन वासुदेवाख्यो भगवान् सर्वैश्वर्य्ययुक्तः अतो जगत्पतिर्यः स एव त्वमतीर्णोऽसीति अच्युतं सर्वैश्वर्य्यपूर्णं भगवन्तम् ।। २ ।। न केवलं मेने द्वारकायां तादृशदेवमुनिराजादिसम्बलितायां दूतञ्च प्राहिणोदिति तस्यात्यन्तदुर्बुद्धित्वेन कौतुकात् पुनरुक्तिः अतो मन्दोऽत्यधमः निर्बुद्धिः यतो यथा बालैरन्यैर्नृपत्वेन कल्पितः कश्चिदबुधो बालस्तादृश इत्यर्थः । किञ्च न व्यक्तं वर्त्मापि यस्य तस्मै इति तस्य तु सुतरां तत्त्वज्ञानाशक्त्या तद्युक्तमेवेति भावः । यथा स बालः तद्वदबुधः ।। ३ ।। तुशब्देन दूतस्य ततोऽपि निर्बुद्धित्वं बोधयति, तदेवाह—द्वारकामेत्येत्यादिना । तत्र द्वारकां तादृशालौकिकसम्पत्तिमती सभायां तत्तन्महानुभावपालितायां प्रभुं सर्वशक्तियुक्तं कृष्णं स्वयं भगवन्तं कमलपत्राक्षं माधुर्य्येण च सर्वोत्कृष्टमित्यर्थः । एषु क्रमाधिक्यमपिशब्दश्च सर्वत्र गम्यं तेन तेन च तस्मैव भगवत्त्वयोग्यतोक्ता कमलपत्राक्षमित्यनेन दूतं प्रति सकौतुकनिरीक्षणात् श्रीनेत्रयोः प्रसत्तिविशेषश्चाभिप्रेतः ।। ४ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

'रामे नन्दव्रजं गते' इति वक्ष्यमाणपौण्ड्रक-वधादि-श्रीकृष्णचरितस्यास्य तदानन्तर्य्यं बोधयति । किञ्च, एकाकिनैव तेन तद्वधे तथैकाकिनं तं मत्वा दुर्बुद्धिना पौण्ड्रकेण दूतप्रस्थापनादौ चायं हेतुर्द्रष्टव्यः । कृष्णाय साक्षाद्भगवतेऽपि वासुदेवः परमेश्वरोऽहमित्येवं प्राहिणोत्, यतोऽज्ञः, अतोऽतिकौतुकेन सम्बोधयति—नृपेति ।। १ ।। अज्ञत्वमेव दर्शयति—त्वमिति । सर्व्वान्तर्य्यामित्वेन वासुदेवाख्यो भगवान् सर्व्वैश्वर्य्ययुक्तोऽतो जगत्पतिर्यः स एव त्वमवतीर्णोऽसीति; अच्युतं सर्व्वैश्वर्य्यपूर्णं भगवन्तम् ।। २ ।। न केवलं मेने, दूतं प्राहिणोच्चेति । तस्यात्यन्तनिर्बुद्धित्वेनातिकौतुकादुक्तस्यापि पुनरुक्तिः । मन्दोऽधमः, तत्र हेतुः—अभक्तेष्वव्यक्तरूपायेत्यर्थः । यद्वा, आ सम्यक् सर्व्वैश्वर्य्यप्रकटनाद्व्यक्तं रूपं तत्त्वं तद्वतेऽपि प्राहिणोत् । 'अव्यक्तवर्त्मने' इति पाठे पाठान्तरे—न व्यक्तं वर्त्मापि यस्य तस्मा इति । तत्तत्त्वज्ञानाशक्त्या तस्य तद्युक्तमेवेति भावः । किंवा अबुधत्वमेव व्यञ्जितम् । बालकृतो नृपो बालो यथात्मानं नृपं मन्यते, तथा मेन इति पूर्व्वेणान्वयः, यद्वा, यथा स बालस्तद्वदबुधः ।। ३ ।। 'तु' अपि, दूरतोऽपि, इति तस्याप्यबुधत्वं बोधयति, तदेवाह—सभायामित्यादिना । प्रभुं यादवानां जगतो वा ईश्वरम्, यतः कृष्णं साक्षाद्भगवन्तम्, अतः प्रभुं सर्वशक्तिमन्तं कमलपत्राक्षञ्च, इति परमैश्वर्य्यं सौन्दर्य्यञ्चोद्दिष्टम् । तेन च तस्यैव भगवत्त्वयोग्यता चोक्ता । यद्वा, कमलपत्राक्षमिति दूतं प्रति कौतुकेन निरीक्षणाच्छ्रीनेत्रयोः प्रसक्तिविशेषाभिप्रायेणेति दिक् ।। ४ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम

यथा बाला अज्ञतुल्यः बालकृतोऽबुधः बालैरज्ञैरबुधः कृतः ।। १-७ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ श्रीकृष्णस्य चरितं पौण्ड्रकवधकाशीपुरदहनात्मकमनुवर्णयति—नन्दव्रजमित्यादिना । हे नृप ! करूषाणां देशानामधिपतिरहमेव वासुदेव इत्यभिमन्यमानोऽत एवाज्ञः कृष्णाय दूतं प्राहिणोत् प्रेषयामास दूतमुखेन वक्ष्यमाणं वचः प्राहिणोदित्यर्थः ।। १ ।। तदेवाह—त्वमिति । इतीत्थं बालैरज्ञैस्त्वं प्रस्तोभितः स्तुत्या मुधा प्रोत्साहितः अहन्त्वात्मानमेवाच्युतं वासुदेवं मेने मनवै ।। २ ।। दूतमिति । अस्यै तद्व्यक्तमित्यादि न व्यक्तं वर्त्मयाथात्म्यं यस्य तस्मै किं वक्तुमित्यत आह—द्वारकायामिति । बालैरज्ञैर्यथा बालः क्रीडायां नृपः कृतः नृपत्वेन कल्प्यते तथा त्वमपि अबुधोऽज्ञो द्वारकायां नृपत्वेन कल्पित इत्यतस्त्वं वासुदेव इति पूर्वोक्तञ्च वक्तुमित्यर्थः ।। ३ ।। दूत इति । तत् ततः राजसन्देशं राज्ञः पौण्ड्रकस्य सन्देशम् ।। ४ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

षट्षष्टितम ऐश्वर्यं पौण्ड्रकस्याद्यदीश्वरः । तत्तन्मित्रश्च तत्पुत्रः काश्यदह्यत चारिणा ॥

नन्दव्रजं गते सति राम इति कृष्णमेकाकिनं मत्वेति भावः। वासुदेवोऽहमिति मत्वेति शेषः ॥ १ ॥ प्रस्तोभितः स्तुत्या प्रोत्साहितः ॥ २ ॥ **दूतश्च** प्राहिणोदिति तस्यातिनिर्बुद्धित्वेन विस्मयात् पुनरुक्तिः। बालकृतः क्रीडायां बालैर्नृपत्वेन कल्पितः कश्चिद्बालो यथा ॥ ३-४ ॥

गूढार्थदीपिनी

षट्षष्टितम ईशेन समित्रः पौण्ड्रको हतः । सुदक्षिणश्च कृत्याग्नेः दग्धा चक्रेण काशिका ॥ १ ॥

करूषो देशः काशीसमीपवर्ती। तस्य अधिपतिः पौण्ड्रकः। प्राहिणोत् प्रेषयामाम ॥ १ ॥ बालैः अज्ञैः प्रस्तोभितः प्रोत्साहितः ॥ २ ॥ यथा अबुधो बालः क्रीडायां बालैरेव नृपः कृतः कल्पितः आत्मान नृपं मन्यते तथा सोऽपि ॥ ३-४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पौण्ड्रकवधादिकं हरिचेष्टितं वर्णयति-नन्दव्रजङ्गते इति षट् षष्टितमे ॥ १ ॥ प्रस्तोभितः प्रोत्साहितः ॥ २ ॥ यः क्रीडायां बालैर्बालो नृपः कृतस्तद्वत् ॥ ३-७ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

कामस्य पूर्तिमुक्त्वात्र क्रोधस्यापि निरूप्यते । कंसादेरिव दुष्टानां मोक्षोऽत्र विनिरूप्यते ॥ १ ॥
सस्थानस्य सदेवस्य पोषकैः सहितस्य च । विपक्षिणो नाशरूपः पूर्वस्माद्वचसा पृथक् ॥ २ ॥
लौकिकैरपि वाक्यैर्यः कामादौ प्रविशेत् पुमान् । तं कृष्णो मोचयेत् सत्यं सर्वथेति निरूप्यते ॥ ३ ॥
पौण्ड्रकस्य समित्रस्य कर्मोपासनसंयुतौ । साधारवंशमात्रस्य नाशः समदशोऽभवेत् ॥ ४ ॥

पूर्वाध्याये पूर्वोक्तानां तामसप्रभृतीनां सात्त्विकत्वापादनात् गोपिकानां सकामत्वात् सात्त्विकप्रकरणे कामः पूरितः। अधुना कंसवत् प्राकृतैरपि वाक्यैः ये भावं कृतवन्तः, तेषां मोक्षरूपो निरोधो निरूप्यते। दैत्यांशानां द्विष्टानां साक्षान्मोक्षो नास्तीति निरोधरूप एव मोक्षो निरूप्यते। तत्रापि कामक्रोधयोः समानकाले प्रादुर्भाव इति शक्तिरपि विभक्तेति यदेव गोपिकानिरोधार्थं भगवान् रामो गतः, तदेव साक्षाद्भगवतोऽपि नियोगं वक्तुं काशीदाहकथा आरभ्यते। तस्याः प्रस्तावनामाह। 'करूषान्मानवादास'न्निति कारूषा एव करूषाः क्षत्रियाः, ते वस्तुतः उत्तरापथराजानः ब्राह्मणभक्ता धर्मपराश्च। तेषामधिपतिः कश्चित्कस्यचिद्वसुदेवनाम्नः पुत्रः पुराणेषु वासुदेवोऽवतरिष्यतीति श्रुत्वा, वसुदेवपुत्रत्वादहमेव वासुदेव इति भगवदिच्छया तस्य वासुदेवोऽहमिति निरन्तरं भावनोत्पन्ना। तद्देहात्मवादिन एवेति बहिर्मुखस्यैव वासुदेवभावनया स्वदेशं परित्यज्य काश्यां वासे बुद्धिरुत्पन्ना। ततः काशिराजेन सह मैत्री विधाय काश्यामेव स्थितः। एवं स्थितौ वासुदेवद्वैविध्यं शास्त्रसिद्धं न भवतीति स्वस्मिन् वासुदेवभावना दृढेति अन्तर्बहिरेकरूपता युक्तेति बहिरपि भगवच्चिह्नानि धृत्वा, स्थानवशान्महादेवकृपया च सानुभावोऽपि सन्, भगवतो दुर्गाश्रयणादिव्यामोहकलीलां संचिन्त्य, वासुदेवे तदनुपपन्नामिति स्वयमेव वासुदेवः, नान्य इति निश्चित्य, मुख्यनिषेधार्थं कृष्णाय भगवते दूतं प्राहिणोत्। ननु स्वयं वासुदेवो भवत्येव, नापि द्वैधमस्ति, अवतारबाहुल्येऽपि समानकालीने न विरोध इति किमिति प्राहिणोदिति चेत्। तत्राह **अज्ञ** इति। नायं किञ्चिच्छास्त्रतोऽनुभवतो वा जानाति ॥ १ ॥ तर्हि कथमेवं कृतवानित्याशङ्क्याह **त्वं वासुदेवो भगवानि**ति। बाला अनभिज्ञाः दुर्ज्ञमूर्खबालकाः, ते वासुदेवो लोके अवतीर्ण इति श्रुत्वा सन्निहितपरित्यागे कारणाभावात् निकटस्थमेव तं वासुदेवं वासुदेवनामानं पौण्ड्रक इत्यपराभिधेयं **त्वं वासुदेव** इत्याहुः। अतो बालकवाक्यात् तैः प्रस्तोभित आत्मानमच्युतं मेने। वासुदेव इति योगव्यावृत्त्यर्थं **भगवा**निति। तादृशस्य कथं जन्मेत्याशङ्क्याह **अवतीर्ण** इति। किमर्थमवतीर्ण इत्याकाङ्क्षायामाह **जगत्पति**रिति। जगदुद्धरार्थमवतीर्ण इत्युक्तं भवति। एवं प्रस्तोभितः प्रोत्साहितो बालकवत् आत्मानमच्युतमेव मेने ॥ २ ॥ तदा द्वैतबुद्धिर्बाधिकेति अज्ञत्वात् बहिर्मुखत्वात् मुख्याद्वैतमज्ञात्वा बाह्यद्वैतं निराकर्तुं दूतं च प्राहिणोत्। बहिर्मुखस्य तथाभावनमेवैकोपराधः, सुतरां भगवते दूतप्रेषणमिति अपराधसमुच्चयार्थश्चकारः। ननु कथं सद्भिर्न निवारित इति चेत्। तत्राह **मन्द** इति। मन्दस्तुच्छः हीनबुद्धिरिति यावत्। तेन सद्भिरुपेक्षित इत्यर्थः। तर्हि स्वापेक्षयापि भगवत्युत्कर्षं पश्यन् गोवर्धनोद्धरणादिकर्मापि शृण्वन् कथं प्रतिस्पर्धां कृतवानित्याशङ्क्याह **अव्यक्तवर्त्मने कृष्णाये**ति। भगवन्मार्गः कुत्रापि नाभिव्यक्तः, अतो माहात्म्यस्य अस्पष्टत्वात्तथाकरणमुचितमेवेत्यर्थः। तथापि द्वारकायाम्। 'काश्येव द्वारका प्रोक्ता कलौ नान्या कथञ्चने'ति वाक्यात् भ्रान्तपरिकल्पितादन्या द्वारकापि न भवतीति

निश्चित्य, द्वारकायामेव स्थिताय भगवते नाट्यक्रीडायामिव उन्मत्तवाक्यमिव प्रेषितवान्। सर्वथा अप्रसिद्धोर्थः पुरःस्फूर्तिकबाधे सर्वसम्मतो न भवतीति। एतादृशोऽपि लोके व्यवहारोऽस्तीति ज्ञापयितुं दृष्टान्तमाह **यथा बालो नृपो बालकृत** इति। सोऽपि स्वक्रीडायामेव स्वकीयेषु वदति, नतु मुख्ये समागत्येति चेत्। तत्राह **अबुध** इति। एतदपि न जानातीत्यर्थः॥ ३॥ दूतोऽपि स इव भ्रान्त इति तस्य कथं गमनमित्याशङ्कां निवारयन् कृत्यमाह **दूतस्त्वित** । द्वारकां समागत्य, तत्रापि सभायां स्थितम्, **प्रभुं** तत्र सभायां स एव प्रभुरिति सर्वैरङ्गीक्रियमाणम्। वस्तुतोपि **कृष्णं** सदानन्दम्। दृष्ट्यैव सर्वतापनाशकं सानुभावं कमलपत्राक्षम्। राज्ञः पौण्ड्रकस्य सन्देशमब्रवीत्। अनेनावश्यकवक्तव्यत्वं दोषाभावश्च सूचितः॥ ४॥

श्रीसुबोधिनी-सारः

शुकोक्तिः। रामे नंदस्य व्रजं गते सति करूषस्य देशस्याधिपतिर्भूपः वासुदेवोहमिति। हेतोरज्ञो मूढो दूतं कृष्णाय प्रेषयत् हे नृप॥ १॥ जगतां पतिर्वासुदेवो भगवांस्त्वमवतीर्णोऽसीति बालैः प्रस्तोभितः पुण्यजनवत् प्रोत्साहित आत्मानमच्युतं हरिं मेने॥ २॥ अव्यक्तमलक्ष्यं वर्त्म मार्गो यस्य तस्मै कृष्णाय द्वारकायां मंदो मूर्खो दूतं प्राहिणोत् बालैः कृतोबुऽधोऽज्ञो बालो नृपोऽप्राणिराजेव॥ ३॥ दूतो द्वारकामेत्य प्राप्य सभायामास्थितं प्रभुं कमलदलनेत्रं कृष्णं राज्ञः संदेशमब्रवीत्॥ ४॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

सप्तदशेऽध्याये सस्थानस्येति। बाणासुरप्रसङ्गे तस्य स्थानं स्थापितम्। अत्र काशीस्थानसहितस्य विपक्षिणो नाशः। तत्र देवे महारुद्रे प्रसादः। अत्र देवस्याभिचाराग्नेर्नाशः। तत्र पोषकाणां रुद्रगणानां स्कन्दादीनां च स्थापनम्। अत्र पोषकाणां रुद्रगणानां स्कन्दादीनां च स्थापनम्। अत्र पोषकाणां सुदक्षिणर्त्विजां नाशः। तत्र विपक्षिणो दर्पदूरीकरणमात्रम्। अत्र विपक्षिणो नाशः। एवंप्रकारैरयं मोक्षरूपो निरोधः पूर्वस्माद्बाणासुरनिरोधात्पृथग्भिन्नप्रकारकः। तत्र हेतुः वचसेति। तत्र 'प्रह्लादाय वरो दत्त' इति वाक्यात्तथा। अत्र तादृशवचनाभावादित्यर्थः। **लौकिकै**रिति। एता गोप्यः 'श्रुतपूर्वा बलं दृष्ट्वे'ति वाक्यात् लोकवाक्यश्रवणाद्भगवद्विषयककामे प्रविष्टाः। पौण्ड्रकश्च' इति प्रस्तोभितो बालै'रिति वाक्यात् लोकवाक्यश्रवणात् भगवद्विषयकक्रोधे प्रविष्ट इति भावः। **कर्मोपासने**ति। एतत्संयुतो सत्यामित्यर्थः। आधारभूतं यद्वंशमात्रं तत्सहितस्य मित्रकाशीराजसहितस्य पौण्ड्रकस्य नाशोऽभवदिति सप्तदशे निरूप्यते इति पूर्वेणान्वयः। **साक्षान्मोक्ष** इति। भक्तानामिव भगवता सह सर्वकामाशनरूपं 'सोऽश्नुते सर्वान्कामा'निति श्रुत्युक्तं सायुज्यमित्यर्थः। **निरोधरूप** इति। 'निरोधोस्यानुशयन'मितिवाक्यात् भगवतस्तैः सह तदधिकारोचितरूपेण स्थितिस्ततस्तत्र लय इत्यर्थः। **नन्दव्रज**मित्यत्र। **वासुदेव** इतीत्यरयानन्तरं भावयामासेति शेषो ज्ञेयः। **तद्देहात्मवादिन** इति। तद्वासुदेवत्वभावनं देहस्य वसुदेवपुत्रत्वेन वासुदेवत्वादात्मापि वासुदेव इति बुद्धयैव जातम्, नतु भगवतः सर्वरूपत्वात्तद्रूपोहमिति ब्रह्मात्मवादबुद्धयेत्यर्थः। **वासुदेवो भवत्येवे**ति। भगवतः सर्वरूपत्वादिति भावः। **नापि द्वैविध्य**मिति। 'एकमेवाद्वितीय'मिति श्रुतेरित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

षड्युक्षष्टितमेऽध्याये दम्भिनो हरिणा कृतः। पौण्ड्रकस्य समित्रस्य विनाशो विनिरूप्यते॥ १॥

एवं रामचरितं निरूप्य पुनः कृष्णचरितं निरूपयन् तत्प्रसङ्गमाह—नन्देति। हे नृप! रामे नन्दव्रजं गते सति करूषदेशाधिपतिः पौण्ड्रको वासुदेवोऽहमिति मत्वा कृष्णं प्रति दूतं प्राहिणोत् प्रेषितवान्। 'कथमेवं तद्बुद्धिवैपरीत्यं जातं' तत्राह—अज्ञ इति॥ १॥ एतदेव स्पष्टयति—त्वमिति। जगत्पालको भगवान् वासुदेवस्त्वमेवावतीर्णो इत्येवं बालैरज्ञैः प्रस्तोभितः स्तुत्या मुधैव प्रोत्साहितः आत्मानमच्युतं ऐश्वर्यादिपूर्णं भगवन्तं मेने॥ २॥ तत्र दृष्टान्तमाह—यथेति। यथा अबुधो बालः क्रीडायां बालैरेव कृतो नृपः नृपत्वेन कल्पितो आत्मानं नृपं मन्यते तथेति। एवं मत्वा च स मन्दः मन्दबुद्धिर्द्वारकायां वर्तमानाय कृष्णाय दूतं च प्राहिणोत्। ननु 'कृष्णमाहात्म्यस्य प्रसिद्धत्वात् कथं तस्य तथा तथाभिमानः कथं वा निर्भयतया दूतप्रेषणं सम्भवति' तत्राह—अव्यक्तवर्त्मन इति। तं प्रति न व्यक्तं वर्त्म मार्गो माहात्म्यं यस्य तस्मा इत्यर्थः॥ ३॥ दूतस्तु द्वारकामेत्य आगत्य सुधर्मायां सभायामास्थितं कृष्णं प्रति राज्ञः पौण्ड्रकस्य सन्देशमब्रवीत्। कृष्णस्य तत्र मुख्यत्वं सूचयन्नाह—प्रभुमिति। तस्य सर्वतापनिवर्तकत्वं सौन्दर्यं च सूचयन्नाह—कमलपत्राक्षमिति॥ ४॥

अन्वितार्थप्रकाशिका

षट्षष्टितमके मित्रयुक्तपौण्ड्रकमारणम्। सुदक्षिणवधाद्यं च तत्र श्लोकास्त्रिवार्द्धयः (४३)॥
द्वे (२) उवाचेत्यङ्घ्रिपञ्चचत्वारिंशदनुष्टुभः (४५।)॥ ६६॥

नन्देति॥ हे नृप! रामे नन्दव्रजं गते सति अज्ञः करूषदेशाधिपतिः पौण्ड्रकः वासुदेवोऽहमिति मत्वा कृष्णं प्रति दूतं प्राहिणोत् प्रेषितवान्॥ १॥ त्वमिति॥ जगत्पालको भवान् वासुदेवस्त्वमेवावतीर्ण इत्येवं बालैरज्ञैः प्रस्तोभितः स्तुत्या मुधैव

प्रोत्साहितः आत्मानमच्युतं मेने मेनिषे । प्रथम आर्षः ॥ २ ॥ दूतमिति ॥ यथा अबुधो बालः क्रीडायां बालैरेव कृतो नृपः नृपत्वेन कल्पितः आत्मानं नृपं मन्यते तथेति एवं मत्वा च स मन्दः मन्दबुद्धिर्द्वारकायां वर्तमानाय अव्यक्तवर्त्मने तेनाविदित-माहात्म्याय कृष्णाय दूतं च प्राहिणोत् ॥ ३ ॥ दूत इति ॥ दूतस्तु द्वारकामेत्य आगत्य सुधर्मायां सभायामास्थितं प्रभु कमल-पत्राक्षं कृष्णं प्रति राज्ञः पौण्ड्रकस्य संदेशमब्रवीत् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ षट्षष्टितमेऽध्याये स काशीराजपौंड्रकहननं वाराणसीदहनं च कथ्यते । करूषाधिपतिः । करूषदेशाधिपः पौंड्रकः ॥ १ ॥ त्वं वासुदेवः अवतीर्णः इति बालैरज्ञजनैः प्रस्तोभितः प्रशंसया प्रोत्साहितः । आत्मानं स्वं ॥ २ ॥ बालैः कृतः नृपो नृपतित्वेन रमणक्रियायां परिकल्पितः बालो यथाऽबुधः ॥ ३ ॥ राजसंदेशं पौंड्रकसंदेशं ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्णोऽहन् पौण्ड्रकं काशीं गत्वा तन्मित्रमीश्वरः । षड्युक्षष्टितमे चक्रं सुदक्षिणमनाशयत् ॥ १ ॥

अथ पौण्ड्रकवधकाशीपुरदहनात्मकं श्रीकृष्णचरितमनुवर्णयति । नन्दव्रजमित्यादिना एकश्लोकेन ॥ नन्देति ॥ हे नृप, रामे नन्दव्रजं गते, करूषाणामधिपतिः करूषदेशाधिपतिः, अहं एव, वासुदेवः इति, अभिमन्यमान इति शेषः । अत एव, अज्ञः अत एव, कृष्णाय दूतं प्राहिणोत् प्रेषयामास । दूतमुखेन वक्ष्यमाणवचः प्राहिणोदित्यर्थः ॥ १ ॥ तदेवाह ॥ त्वमिति ॥ त्वं तु, वासुदेवः जगत्पतिः, भगवान्, अवतीर्णः, असि । इत्येवं, बालैः प्रस्तोभितः अज्ञैरेव मुधा स्तुत्या प्रोत्साहितः । अहं तु, आत्मानं स्वत एव, अच्युतं वासुदेवं, मेने मनवे ॥ २ ॥ दूतमिति ॥ बालैरज्ञैः, यथा बालः कश्चन बालकः, नृपः कृतः । क्रीडायां नृपत्वेन कल्प्यते, तथा त्वमपि, अबुधोऽज्ञः द्वारकायां, नृपः कृतः, नृपत्वेन कल्पितः । इति दूतं शिक्षयित्वेति शेषः । मन्दः पौण्ड्रकः, अव्यक्तवर्त्मने कृष्णाय, दूतं च प्राहिणोत् ॥ ३ ॥ दूत इति ॥ दूतस्तु, द्वारकां एत्य, सभायां, आस्थितं प्रभुं, कमल-पत्राक्षं कृष्णं, राजसंदेशं पौण्ड्रकसंदेशं, अब्रवीत् ॥ ४ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण के करकमलो से पौंड्रक एवं काशिराज का कल्याण

श्री शुकदेवजी ने कहा—महाराज परीक्षित् ! नन्दगाँव गोकुल में जब श्री बलरामजी पधारे थे भगवान् श्रीकृष्ण द्वारिका में विराजते थे तब करूष देशाधिपति पौण्ड्रक ने अज्ञानवश भगवान श्रीकृष्ण के पास द्वारिका के दरबार में एक दूत भेजकर यह कहलाया कि मैं ही साक्षात् भगवान् वासुदेव हूँ ॥१॥ मूर्ख जनों ने पौण्ड्रक को अतिशय बहकाया था कि पौण्ड्रक ! आप ही भगवान् वासुदेव हैं और विश्व संरक्षण के भूमितल पर अवतीर्ण हुए हैं। इस प्रकार लोगों की बातें सुनकर अपने को ही भगवान् मान बैठा ॥ २ ॥ कभी-कभी बालक खेलने के समय किसी एक बालक को राजा बना देते हैं राजा की तरह उनके साथ व्यवहार करने लगते हैं वह बालक भी अपने को राजा मानकर व्यवहार करता है वैसे मन्दबुद्धि पौण्ड्रक भगवान् कृष्ण की लीलाओं एवं सामर्थ्य को न जानकर द्वारिका में भगवान श्रीकृष्ण के पास दूत भेज दिया ॥ ३ ॥ वह दूत द्वारिका में आया और राजसभा में विराजमान राजाधिराज कमललोचन भगवान् श्रीकृष्ण को अपने राजा पौण्ड्रक का सन्देश सुनाया ॥ ४ ॥

वासुदेवोऽवतीर्णोऽहमेक एव न चापरः । भूतानामनुकम्पार्थं त्वं तु मिथ्याभिधां त्यज ॥ ५ ॥
यानि त्वमस्मच्चिह्नानि मौढ्याद् बिभर्षि[1]सात्वत । त्यक्त्वैहि मां त्वं शरणं नो चेद् देहि ममाहवम् ॥ ६ ॥

श्रीशुक उवाच

कत्थनं तदुपाकर्ण्य पौण्ड्रकस्याल्पमेधसः । उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा ॥ ७ ॥
उवाच दूतं भगवान् परिहासकथामनु । उत्स्रक्ष्ये मूढ चिह्नानि यैस्त्वमेवं विकत्थसे ॥ ८ ॥

कर्दमक्षमा

अन्वयः—भूतानाम्, अनुकम्पार्थम्, अहम्, एक, एव, वासुदेव, अवतीर्णः, न, च, अपरः, इति, त्वम्, तु, मिथ्याभिधाम्, त्यज ॥ ५ ॥ हे सात्वत, त्वम्, तु, मौढ्यात्, अस्मत्, चिह्नानि, बिभर्षि, तानि, त्यक्त्वा, माम्, शरणम्, एहि, नो चेत्,

---

[1] बिभर्ष्यभीतवत्–विज. ।

मम, आहवम्, देहि ।। ६ ।। श्रीशुक उवाच—अल्पमेधसः, पौण्ड्रकस्य, तत्, कत्थनम्, उपाकर्ण्य, तदा, उग्रसेनादयः, सभ्याः, उच्चकैः, जहसुः ।। ७ ।। भगवान्, परिहासकथाम्, अनु, दूतम्, उवाच । यैः मूढ ! चिह्नानि त्वमेवं, विकत्थसे, उत्स्रक्ष्ये ।। ८ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे मूढ उत्स्रक्ष्ये त्वयि प्रक्षेप्स्यामि । यैः सह त्वमेवं विकत्थसे तेष्वपीत्यर्थः । यद्वा यैः कृत्रिमैः सुदर्शनादिभिस्त्वमेवं श्लाघसे तान्युत्स्रक्ष्ये त्याजयिष्यामीत्यर्थः ।। ८ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अस्मच्चिह्नानि चक्रादीनि । सात्वतेति हे यादवविशेषेति अनादरात् । वस्तुतस्तु न चाहं भूतानामनुकंपार्थं वासुदेवोऽवतीर्णः यतोऽपरः अश्रेष्ठस्तुच्छ इत्यर्थः । किन्तु त्वमेवावतीर्णः । अतः शुक्तौ रजतस्येव मयि या तव मिथ्याभिधा तां त्यज त्याजयेत्यर्थः । साक्षात्तं प्रति वक्ष्यते स्वयं भगवानेव "त्याजयिष्येऽभिधानं मे यत्त्वयाज्ञ मृषा धृतम्" इति । तथा मौढ्याद्धेतोर्यान्यस्मच्चिह्नानि कल्पितचक्रादीनि विभर्षि तानि त्यक्त्वा प्रक्षिप्य शरणं मुक्तिदत्वादाश्रयस्तन्मामेहि स्वीकुर्वित्यर्थः । यदि सहसाऽस्त्रविमोक्षं न करोषि तदा मह्यं युद्धं देहीति । युधि मां हत्वा मोक्षं प्रापयेति भावः । "ये ये हताश्चक्रवरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन । ते ते गता विष्णुपुरीं नरेंद्राः क्रोधोऽपि देवस्य वरेण तुल्यः ।।" इत्युक्तेः ।। ६ ।। कत्थनम् व्यर्थभाषणम् । तदहं वासुदेव इत्येवं रूपम् । तदा श्रवणकाले ।। ७ ।। यैः पार्श्वस्थैर्नरैः न इत्यर्थ इति—मूर्खैस्सहितो मूर्ख उच्छृंखलो भवसीत्यतस्तैस्सहैव तव नाश उचित इति भावः । तत्प्रोत्साहकानामत्रानुक्तेरर्थान्तरमाह—यद्वेति । इत्यर्थ इति— अंतर्भावितण्यर्थः उत्स्रक्ष्ये उत्सर्जयिष्यामीति ध्येयम् । यद्वा—चिह्नानि स्वीयसुदर्शनादीनि उत्स्रक्ष्ये प्रक्षेप्स्यामि यैः सह त्वमेवं विकत्थसे भाषसे तेष्वपीत्यर्थः ।। ८ ।।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

भूतानामनुकम्पार्थमेक एव वासुदेवो यः सोऽहमेवावतीर्णः न चापरः कश्चिद्वासुदेवः ईश्वरस्यैकत्वात् अतो मिथ्याभिधां वासुदेव इति मिथ्याभिधां (संज्ञां) त्यज सर्वभूतावासत्वादिनिरुक्त्याविषयत्वात् वसुदेवपुत्रत्वेऽपि रूढिवृत्त्यभावादिति भावः । भूतानामिति कृतेन ससैन्यराजादिवधेन मत्प्रातिकूल्यं तव नोचितमिति भावः । किं वा भूतानामनुकम्पार्थं त्यज अन्यथा आवयोर्युद्धे सर्वप्राणिनां किं वा द्वारकावासिनां पीडा स्यादिति भावः ।। ५ ।। किञ्च, यानीति । अस्मादीयान्येव चिह्नानि चक्रादीनि सात्वत हे यादवविशेष ! इत्यनादरात् वस्तुतस्तु न चाहं भूतानामनुकम्पार्थं वासुदेवोऽवतीर्णः यतोऽपरः अश्रेष्ठस्तुच्छ इत्यर्थः । किन्तु एकस्त्वमेवावतीर्णः अतः शुक्तौ रजतस्येव मयि तव या मिथ्याऽभिधा तां त्यज त्याजय इत्यर्थः । तथा च प्रतिवक्ष्यते साक्षात्तं प्रति भगवानेव "त्याजयिष्येऽभिधानं मे यत्त्वयाऽज्ञ मृषा धृतम्" इति तथा मौढ्याद्धेतोर्यान्यस्मच्चिह्नानि कल्पितानि चक्रादीनि तद्रूपाणि त्वं बिभर्षि नित्यमेव धरसि अतस्तानि त्यक्त्वा प्रक्षिप्य शरणं मुक्तिदत्वादाश्रयस्सन् मामेहि स्वीकुर्वित्यर्थः । नोचेद्यदि सहसास्त्रविमोक्षं न करोषि तदा मम मह्यम् आहवं युद्धं देहीति अत्रास्त्रमोक्षणं यथावदेव प्रतिवक्ष्यते दूतम्प्रति तम्प्रति च "उत्स्रक्ष्ये मूढचिह्नानि" इति तान्यस्त्राणि उत्सृजामि त इति च शरणापत्तिस्तु "मल्लानामशनिः" इत्यादिवत्तस्मिन् समत्सरे सोपहासोक्तेरेव युक्तत्वादन्यथाऽन्यथैव प्रतिवक्ष्यते "भविता शरणं शुनाम्" इति "व्रजामि शरणं तेऽद्य यदि नेच्छामि संयुगम्" इति च ।। ६ ।। कत्थनमात्मश्लाघनम् अल्पमेधसस्तुच्छबुद्धेः उप श्रीभगवत्समीप एवाकर्ण्य ।।७।। परिहासकथामन्विति सभ्यानामुच्चैर्हासानन्तरं या मिथो दूतं प्रति च तत्कथा तदनन्तरमित्यर्थः । तत्रास्त्रत्यागो य आदिष्टः तं करिष्याम्येवेत्याह—उत्स्रक्ष्य इति । तैर्व्याख्यातं यद्वा यैर्मदीयैः चिह्नैरात्मीयत्वेन विकत्थसे संश्लाघसे तान्युत्स्रक्ष्ये त्वयि त्रिक्षेप्स्यामीत्यर्थः ।। ८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भूतानामनुकम्पार्थमवतीर्ण एव प्रवाहं वासुदेवः, न चापरः कश्चिद् वासुदेवः, ईश्वरस्यैक्यात्; अतो मिथ्याभिधां वासुदेव इति नाम मत्सनामत्वात्त्यजेति सूचयति—भूतानामिति । ससैन्यराजादिवधेन मत्प्रातिकूल्यं तव नोचितमिति भावः । किंवा भूतानामनुकम्पार्थं त्यज, अन्यथावयोर्युद्धेन सर्व्वप्राणिनां किंवा द्वारकावासिजनानां दुःखं भवितेति भावः ।। ५ ।। किञ्च, यानीति—अस्मदीयान्येव चिह्नानि चक्रादीनि, सात्वत ! हे यादव ! हे भक्तेति वा, अनादरात्, वस्तुतस्तु दुष्टस्यापि तस्योक्तौ देवोद्भुतोऽयमर्थः—अवतीर्णोऽहमिति मम मिथ्याभिधां त्यज त्याजय, यथा मौढ्यादन्यान्यस्मच्चिह्नानि तानि च मां प्रति त्याजयित्वा मद्गृहमेहि स्वीकुर्व्विति ।। ६ ।। अल्पमेधसस्तुच्छबुद्धेस्तत् उक्तमपूर्व्व-कथनमात्मश्लाघनं गर्गवाक्यं वा, पौण्ड्रकस्येति तत्संज्ञस्य नाम च वासुदेव इति ज्ञेयम् । उप श्रीभगवत्समीप एवाकर्ण्य तथा सद्य एवोच्चकैः सस्वनं जहसुः, सभ्याः सभास्थिताः सर्व्व एव ।। ७ ।। परिहासकथामन्विति । अवहेलया नर्म्मकथया क्षणं विलम्ब्य परिहसन्नेवेत्यर्थः, यतो भगवान्—अनन्ताद्भुतचातुर्य्यादिगुणयुक्तः ।। ८ ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

यैर्विकत्थसे मन्निमित्तं विकत्थसे ॥ ८–१२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह—वासुदेव इति। न चापरः न त्वं वासुदेव इति भावः। किन्तु त्वं भूतानां स्वसम्बन्धविषयभूतानामनुकम्पार्थं मिथ्या वासुदेवोऽतस्तामभिधामाख्यां त्यज ॥ ५ ॥ यानीति। हे सात्वत! अस्मदसाधारणानि यानि चिह्नानि शङ्खचक्रादीनि त्वं मौढ्याद्बिभर्षि तानि त्यक्त्वा मां शरणमेहि आगच्छ नोचेच्छरणं नाभ्येषि तर्ह्याहवं युद्धं देहि युध्यस्व इत्यर्थः ॥ ६ ॥ विकत्थनमिति। तद्दूतोक्तम् अल्पबुद्धेः पौण्ड्रकस्य विकत्थनमाकर्ण्य सभ्याः सभायां स्थिताः जहसुर्हसितवन्तः ॥ ७ ॥ उवाचेति। परिहासकथामनु उग्रसेनादीनां परिहासकथनानन्तरं प्राह, तदेवाह—उत्स्रक्ष्य इति। हे मूढ! चिह्नानि त्वया धृतानि उत्स्रक्ष्ये त्याजयिष्यामि तत्र हेतुत्वेन विशिनष्टि—यैः चिह्नैः त्वमेव विकत्थसे ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यैः काशीराजादिभिः ॥ ८–१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्लोकद्वयस्य सरस्वत्या अभिमतो वास्तवार्थो यथा अवतीर्ण इति भागुरिमतेऽकारलोपे सति पुनर्नञोऽकारः वासुदेवोऽहं न अवतीर्णः किन्तु भूतानामनुकम्पार्थं त्वमेक एव वासुदेवो नान्यः अतः शुक्तौ रजतस्येव मयि या मिथ्याभिधा तां त्यज त्याजयेत्यर्थः। अत एव भगवता प्रतिवक्ष्यते "त्याजयिष्येऽभिधानम्" इति ॥ ५ ॥ मौढ्यादेव हेतोरस्मच्चिह्नानि कृत्रिमशङ्खचक्रादीनि यानि वर्त्तन्ते तानि बिभर्षि अस्मन्निग्रहाकरणात् त्वमेव पालयसि नतु दूरीकरोषि एतदन्याय्यमिति भावः। तस्मान्मां त्यक्त्वा तानि चिह्नानि त्याजयित्वा एहि मोक्षदानार्थं कृपया आगच्छ नोऽस्माकमसुराणां मोक्षदातृत्वात्त्वमेव शरणं संसारात् रक्षिता चेद्भवसि तदा मम मह्यम् आहवं युद्धं देहि युद्धे मां हत्वा मोक्षं प्रापयेति भावः ॥ ६–७ ॥ हे मूढ! चिह्नानि उत्स्रक्ष्ये त्याजयिष्यामीत्यर्थः। यद्वा चिह्नानि स्वीयसुदर्शनादीनि उत्स्रक्ष्ये त्वयि प्रक्षेप्स्यामि यैस्सह त्वमेवं विकत्थसे तेष्वपीत्यर्थः ॥ ८ ॥

गूढार्थदीपिनी

वस्तुतस्तु अहं न यतोऽपरः अश्रेष्ठः तुच्छ इत्यर्थः। किन्तु त्वमेव अवतीर्णः। मौढ्यादेव यानि एतानि अस्माभिः कल्पितानि कृत्रिमाणि सन्ति त्वं तु नित्यान्येव तानि बिभर्षि अतः त्यक्त्वा मयि प्रक्षिप्य शरणं मुक्तिप्रदत्वात् आश्रयः सन् मामेहि स्वीकुरु। न चेदेवं तर्हि आहवं युद्धेन मोक्षं देहीति वागर्थः। त्यज त्याजय ॥ ५–६ ॥ कत्थनम् आत्मश्लाधनम् ॥ ७ ॥ उत्स्तक्ष्ये त्वयि प्रक्षेप्स्यामि। विकत्थसे श्लाघसे ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यैः कृत्रिमैश्चिह्नैस्त्वमेवम्विकत्थसे श्लाघसे तानुत्स्रक्ष्ये त्याजयिष्यामि ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

राजवाक्यमाह द्वयेन। **वासुदेवोऽवतीर्णो**ऽहमिति। स एक एव भवितुमर्हति। उभयोः प्रयोजनाभावात्। तर्हीदं वाक्यं विपरीतं कुतो न भवतीत्याशङ्कयाह **न चापर** इति। अपरः यो न राजा सामान्यभावं च प्राप्तः स न भवतीत्याशयः। किञ्च। कार्यमपि त्वयि विरुध्यते, न मयीत्याशयेनाह **भूतानामनुकम्पार्थ**मिति। त्वया अक्षौहिणीवधेन भूतानुकम्पा न क्रियत इत्यभिप्रायः। नन्वेवमस्तु, दूतः किमिति प्रेष्यत इति चेत्। तत्राह **त्वं त्विति**। **मिथ्याभिधां** वसुदेवपुत्रत्वेन वासुदेव इति संज्ञाम्। सरस्वती तु 'सत्त्वं विशुद्धं वसुदेवशब्दित'मिति वाक्यात् शुद्धसत्त्वे आविर्भूतत्वमेव, अतो मिथ्याभिधात्वमिति ॥ ५ ॥ ननु योगस्य विद्यमानत्वात्कथं मिथ्यात्वम्, कथं वा त्यागः कर्तुं शक्यत इति चेत्। सत्यम्। नहि लोके पितृपुत्रत्वेन नाम भवति। अन्यथा नामकरणं व्यर्थं स्यात्। अतो योगो विद्यमानोऽपि व्यवहारे न वक्तव्यः। अयमेव च त्यागः यल्लौकिकवैदिकव्यवहारेषु तन्नामाख्यापनम्, भ्रमजनकत्वात् मिथ्यात्वमिति मन्यते, वासुदेवः परब्रह्मणोऽपि नामेति, अन्यान्यपि चिह्नानि त्यक्तव्यानीत्याह **यानि त्वमस्मच्चिह्नानी**ति। पूर्वं स्वमिन् वासुदेवत्वं सिद्धमिति अस्मच्चिह्नत्वं चक्रादीनाम्। नन्वस्मास्वन्यचिह्नानि कथं भवेयुः, अतोऽस्मच्चिह्नान्येव तानीत्याशङ्कायामाह **मौढ्याद्बिभर्षी**ति। अस्मन्मौढ्याच्चिह्नानि बिभर्षीति वास्तवोर्थः। जीवा भगवदाविर्भावेऽपि भगवन्तं न जानन्तीति भगवान् चिह्नानि बिभर्ति। अस्मदिति पञ्चमीबहुवचनम्। अस्मद्धेतोः।

तत्रापि प्रयोजकधर्मात् **मौढ्याद्धेतु**रवमुद्धारार्थमेव । नाशस्य पूर्वमेव सिद्धत्वात् । **सात्वते**ति वंशनाम्ना वैष्णवनाम्ना वा सम्बोधनम् । तेन वैष्णवन्यायेन शङ्खचक्रादिधारणं न निषिध्यत इति सूचितम् । सत्त्वप्रधानाः सात्वाः । सात्वत इति तसिल् । विसर्गपाठो वा । लोपो वा द्रष्टव्यः । भक्तजनानुरोधात् बिभर्षीति । एवं विरुद्धनिराकरणं स्वबुद्ध्योक्त्वा, स्वस्य कृपालुतामाविष्कुर्वन्नाह **एहि मां त्वं शरण**मिति । लौकिकदृष्ट्या सामर्थ्यं न दृष्टमिति यदि नागमनम्, तदा मम आहवं देहि । आ समन्तात् त्वं मामेहि प्राप्नुहि । यथा निकटे गते मम सायुज्यसिद्धिर्भवति । अहमितः त्वत्स्थाने गन्तुमशक्त इति । इदमपि कृपाकार्यं स्वयमागत्योद्धरणम् । नोचेत्, मम वं आह । मह्यमेतावत्सुखं दास्यामीति वद । तदा निश्चिन्ततया सन्देहाभावात् त्वत्समीपागमने यत्नं करिष्यामीति ॥ ६ ॥ एतद्वाक्याद्भगवद्भक्तानां क्रोधे उत्पन्ने तस्य परलोकसिद्धिरपि न भवतीति तेषां तच्छ्रवणेन कौतुकरस एव जात इत्याह **कत्थनं तदुपाकर्ण्ये**ति । **कत्थनं** स्वश्लाघाम् । पौण्ड्रकमिति नाम्ना तस्य हीनत्वमुक्तमेव । पुण्ड्रा हीनाः चण्डालविशेषाः, तद्भावादुत्पन्नः पौण्ड्रः, कुत्सितार्थे कप्रत्ययः, अधमस्वभावोत्पन्नेष्वप्यधम इति । तत्रापि न देह एव तस्य दुष्टः, किन्त्वन्तःकरणमपीति ज्ञापयितुमाह **अल्पमेधस** इति । **सभ्याः** सभार्हाः । उग्रसेनो राजा येषामिति धर्मविचारो निरूपितः । सर्व एव विचारकाः प्रमेयमत्यन्तं बाधितमिति **उच्चकैर्जहसुः** । तदेति विचारात्पूर्वमेव ॥ ७ ॥ ततः परिहासकथां कृतवन्तः । अज्ञा इव भूत्वा कीदृशोऽयं वासुदेवः, कथं भक्तपरायण इत्यादिप्रस्तोभनावाक्यैः । उपहासकथामुक्त्वा स्थितेषु तेषु भगवान् दूतमुवाच । भगवद्भावं प्राप्तो वदतीति तस्य वाक्याकरणे तस्याग्रे भगवत्त्वमपि न सेत्स्यतीति तद्वाक्यं यथाकथञ्चित्सत्यं करोति । **उत्स्रक्ष्ये मूढ चिह्नानी**ति । **यै**र्धर्ममौढ्यं प्रतीतं भवति, जीवत्वं वा प्राकृतत्वं वा । मूढेति सम्बोधनम् । लोकप्रतीत्या यैः कृत्वा त्वमेवं विकत्थसे, आत्मानमेव बहु मन्यसे, यद्यहमज्ञत्वादिधर्मप्राकट्यं न कुर्याम्, तदा तवैवं विकत्थनं न भवतीति । अत एव अस्मच्चिह्नानीति जीवधर्माणां ग्रहणं निरूपितम् । मद्धर्मपरित्यागद्वारा मामेव परित्यज्य मां शरणमेहि । शरणरूपं मां प्राप्नुहि । जीवाश्रयो भगवान् भवतीति जीवाश्रितश्च तिष्ठतीति । शिष्टमङ्गीकृतं न विरुद्धमिति ॥ ८ ॥

श्रीसुबोधिनी-सारः

तद्वाक्यानि द्वाभ्यामाह । भूतानामनुकंपार्थं वासुदेव एक एवाहमवतीर्णोऽस्मि अपरोऽन्यो न च त्वं तु मिथ्याभिधां कपटनाम त्यज ॥ ५ ॥ हे सात्वत अस्माकं चिह्नानि शंखचक्रादीनि **यानि** त्वं मौर्ख्याद्धेतोर्बिभर्षि धारयसि तानि त्यक्त्वा मां शरणं त्वमेहि आगच्छ नो चेदेवं नो कुर्यास्तर्हि मम मह्यमाहवं संग्रामं त्वं देहि ॥ ६ ॥ **शुकोक्तिः** । अल्पा तुच्छा मेधा बुद्धिर्यस्य तस्य पौंड्रकस्यैतत्कत्थनमात्मश्लाघावाक्यम् उपाकर्ण्य श्रुत्वा उग्रसेनादयः सभ्याः सभार्हा उच्चैस्तदा जहसुः ॥ ७ ॥ परिहासकथामनु भगवान् दूतमुवाच हे मूढ यैश्चिह्नैस्त्वमेवं **विकत्थसे** आत्मानं श्लाघसे तानि चिह्नानि उत्स्रक्ष्ये त्याजयिष्यामि अंतर्भावितणिचा । यद्वा यैः सह त्वमेवं विकत्थसे तेषु त्वयि च चिह्नानि चक्रादीनि उत्स्रक्ष्ये प्रक्षेप्स्यामि ॥ ८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

यानि त्वमित्यत्र । वास्तवार्थपक्षे सात्वतपदस्यार्थमाहुः **सत्त्वप्रधाना** इति । तथा चास्मदितिपञ्चमीबहुवचनान्तस्य सात्वत इति तसिलन्तं विशेषणम् । **वं आहे**ति व्याख्याने लोटो मध्यमपुरुषस्य च व्यत्ययेन लट्प्रथमपुरुषश्च । मामेहि ततः शरणं शरणमार्गं देहि, नोचेन्मम वं वदेत्यन्वयः । **उत्स्रक्ष्ये मूढे**त्यत्र । **अत एवे**ति । अज्ञत्वादिधर्मप्राकट्यादेव त्वया एवं निरूपितम् । तथापि त्वदुक्तमेवास्तु । अस्मच्चिह्नानि बिभर्षीत्यस्य त्वदभिमतव्याख्यानेपि त्वयैव जीवधर्माणां ग्रहणं निरूपितम् । अतस्त्वया स्वपरत्वेनोक्तं त्यक्त्वैहि मामितिवाक्यं मत्परत्वेन जानीहि । तत्पक्षे मूले मां भगवन्तं परित्यज्य मां भगवन्तं शरणमेहीत्यन्वयः । भगवत्परित्यागपदार्थमाहुः **धर्मपरित्यागद्वारे**ति । धर्माणां भगवतश्च भेदाभेदव्यवस्थापनात्तत्परित्यागः परम्परया भगवत्परित्यागः । तथा च मां परित्यज्येत्यस्य मद्धर्मान्परित्यज्येत्यर्थः । ततो मां शरणमेहीति मूलेर्थः । तद्धर्मेति । तत्त्वदुक्तं जीवधर्मग्रहणं धर्मेत्यादिप्रकारकमित्यर्थः । त्वदभिप्रेतार्थस्तु विरुद्धत्वान्न मन्तव्य इत्याशयेन तदभिप्रेतार्थमनुवदन्ति **जीवाश्रितश्चे**ति । शिष्टमिति । शरणत्वातिरिक्तमित्यर्थः । शरणत्वं तु न मन्तव्यमित्याहुः **यदुक्त**मिति ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पौण्ड्रकवचनमेव दूतोऽनुवदति—वासुदेव इति । भगवान् वासुदेवोऽहमेवावतीर्णः, स च एक एव न चापरः, एकावतारेणैव प्रयोजनसिद्धाववतारान्तरस्य प्रयोजनाभावात् । अवतारप्रयोजनमाह—भूतानां प्राणिनामनुकम्पार्थं अनुग्रहार्थमिति । त्वं तु मिथ्यैव वासुदेव इत्यभिधां धत्से, अतस्तां त्यज ॥ ५ ॥ हे सात्वत ! यान्यस्मदसाधारणानि चिह्नानि शङ्खचक्रादीनि मौढ्यात्त्वं बिभर्षि तानि त्यक्त्वा मां शरणमेहि आगच्छ, नो चेत् शरणं नाभ्येषि चेत् तर्हि ममाहवं युद्धं देहि युद्ध्यस्व ॥ ६ ॥ अल्पमेधसः मन्दभाग्यस्य पौण्ड्रकस्य तत् दूतोक्तं कत्थनं दुर्वचनमाकर्ण्य श्रुत्वा सभ्याः सभायां स्थिताः उग्रसेनादयस्तदा उच्चकैर्जहसुः ॥ ७ ॥ परिहासकथां अनु अनन्तरं भगवान् कृष्णो दूतमुवाच । भगवद्वचनमाह—उत्स्रक्ष्ये इति । हे मूढ ! यैः कृत्रिमैः धृतैश्चिह्नैस्त्वमेवं विकत्थसे आत्मानं श्लाघसे, तानि त्वया धृतानि चिह्नानि उत्स्रक्ष्ये त्याजयिष्यामि ॥ ८ ॥

अन्वितार्थप्रकाशिका

वासुदेव इति ।। भूतानामनुकम्पार्थं भगवान् वासुदेवोऽहमेवावतीर्णः स च एक एव न चापरः त्वं तु मिथ्यैव वासुदेव इत्यभिधां धत्से अतस्तां त्यज । वस्तुतः अपरः अश्रेष्ठः अहं भूतानामनुकम्पार्थं वासुदेवः न अवतीर्णः किन्त्वेकस्त्वमेवावतीर्णः अतस्तव या मयि मिथ्याभिधा तां त्यज त्याजय । "त्याजयिष्येऽभिधानं मे" इति प्रतिवचनात् ।।५।। यानीति ।। हे सात्वत ! यान्यस्मदसाधारणानि चिह्नानि शङ्खचक्रादीनि मौढ्यात्त्वं बिभर्षि तानि त्यक्त्वा मां शरणमेहि आगच्छ । नोचेत् शरणं नाभ्येषि चेत् तर्हि ममाहवं युद्धं देहि युद्धयस्व । वस्तुतः मौढ्याद्धेतोर्यान्यस्मच्चिह्नानि अस्माभिः स्वस्मिन् लक्षणतया कल्पितानि चक्रादिरूपाणि त्वं नित्यमेव धारयसि । अतस्तानि त्यक्त्वा मयि प्रक्षिप्य शरणं मुक्तिदत्वादाश्रयः सन् मामेहि स्वीकुरु । एवञ्च करोषि चेन्ममाहवं देहि युद्धेन मोक्षं देहि ।। ६ ।। कत्थनमिति ।। अल्पमेधसः मन्दभाग्यस्य । असिजार्षः । पौण्ड्रकस्य तत् दूतोक्तं कत्थनं दुर्वचनमाकर्ण्य श्रुत्वा सभ्याः सभायां स्थिताः उग्रसेनादयस्तदा उच्चैर्जहसुः ।। ७ ।। उवाचेति ।। परिहासकथाम् अनु अनन्तरं भगवान् कृष्णो दूतमुवाच । हे मूढ ! यैः काशिराजादिभिः सह त्वमेवं विकत्थसे तेऽपि त्वयि च चिह्नानि चक्रादीनि उत्स्रक्ष्ये प्रक्षेप्स्यामि । यद्वा । यैः कृत्रिमैः धृतैश्चिह्नैस्त्वमेवं विकत्थसे आत्मानं श्लाघसे तानि त्वया धृतानि चिह्नानि उत्स्रक्ष्ये त्याजयिष्यामि ।। ८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तथाहि ।। ५–७ ।। हे मूढ यैः कृत्रिमैः सुदर्शनादिचिह्नैः त्वमेवं विकत्थसे स्वश्लाघां करोषि तानि चिह्नानि अहमुत्स्रक्ष्ये त्याजयिष्यामि ।। ८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह ।। वासुदेव इति ।। भूतानां, अनुकम्पार्थं, अवतीर्णः वासुदेवः, अहं एकः एव अपरः, न च नैव, त्वं तु, मिथ्याभिधां मिथ्यैवाङ्गीकृतं भगवन्नाम, त्यज जहि ।। ५ ।। यानीति ।। हे सात्वत सात्वतकुलोत्पन्न, त्वं यानि अस्मच्चिह्नानि शङ्खचक्रादीनि, मौढ्यात्, बिभर्षि । तानि, त्यक्त्वा, मां शरणं एहि आगच्छ । नो चेत् शरणं नाभ्येषि तर्हि, मम, आहवं युद्धं, देहि । मया युद्धयस्वेत्यर्थः ।। ६ ।। कत्थनमिति ।। अल्पमेधसोऽल्पबुद्धेः, पौण्ड्रकस्य, तत्पूर्वोक्तं, कत्थनं, उपाकर्ण्य, तदा, उग्रसेनादयः, सभ्याः, उच्चकैरुच्चस्वरेण, जहसुर्हासं चक्रुः ।। ७ ।। उवाचेति ।। परिहासकथामनु, उग्रसेनादिकृतपरिहासकथायाः पश्चादित्यर्थः । भगवान् दूतं, उवाच । हे मूढ, यैः चिह्नैः, त्वं एवं, विकत्थसे, तानि चिह्नानि, त्वया धृतानीति शेषः । उत्स्रक्ष्ये त्याजयिष्यामि ।। ८ ।।

कृष्णप्रिया

हे कृष्ण ! इस भूतल पर केवल मैं ही वासुदेव हूँ और कोई वासुदेव नहीं है। भूतमात्र पर अनुग्रह करने के लिए मैंने ही अवतार ग्रहण किया है। आपने मिथ्या ही मेरा नाम धारण किया है। मैं आपको सूचना देता हूँ कि अब संज्ञा को छोड़ दीजिये ।। ५ ।। अबुध पौण्ड्रक भगवान को सन्देश भेजता है कि हे सात्वत् ! हे यदुवंशी कृष्ण ! आपने मूढतावश वासुदेव बनकर गदा-शंखादि मेरे चिह्न धारण कर लिये हैं। प्रथम तो ये सर्व चिह्नों का आप त्याग करें, फिर मेरी शरण में आओ, यदि मेरी इस बात को स्वीकार नहीं करते हो तब आप मेरे साथ संग्राम करें ।। ६ ।। श्री शुकदेवजी ने कहा—राजन् ! अल्पबुद्धि पौण्ड्रक का यह प्रजल्पन सुनकर महाराज उग्रसेन आदि सभासद एवं सारी सभा उच्चस्वर से हँसने लगी ।। ७ ।। जब सभा एवं सभासदों की हँसी समाप्त हो गयी तब भगवान् श्रीकृष्ण ने दूत को कहा-भैया तुम जाकर अपने राजा को कह देना कि हे मूढ ! मैं अपने शंख चक्र आदि शस्त्रों का निष्क्रियता से त्याग नहीं करूँगा लेकिन इन चिह्नों को अस्त्रों को तुझपर ही छोड़ूँगा और साथ-साथ तुझको बहकाने वाले साथियों पर छोड़ूँगा जिनके बहकाने से तू आज इतना बहक रहा है।। ८ ।।

मुखं तदपिधायाज्ञ [1]कङ्कगृध्रवटैर्वृतः । शयिष्यसे हतस्तत्र भविता शरणं शुनाम् ।। ९ ।।
इति दूतस्तदाक्षेपं[2] स्वामिने सर्वमाहरत् । कृष्णोऽपि रथमास्थाय[3] काशीमुपजगाम ह ।। १० ।।
पौण्ड्रकोऽपि तदुद्योगमुपलभ्य महारथः । अक्षौहिणीभ्यां संयुक्तो निश्चक्राम पुराद् द्रुतम् ।। ११ ।।
[4]तस्य काशिपतिर्मित्रं पार्ष्णिग्राहोऽन्वयान्नृप । अक्षौहिणीभिस्तिसृभिरपश्यत् पौण्ड्रकं हरिः[5] ।। १२ ।।

---

१. बलैः–वीर ; गृध्रबलैर्वृतम्–विज. । २. तमाक्षेपं–श्रीधर. टि. । [illegible]. मारुह्य प्रायात्काशीं ससैनिकः–विज. । ३. वहि–वीर. । ४. अयं श्लोको नास्ति–विज. ।

५. तमायान्तं रथोपस्थे सुवर्णं गरुडे स्थितम् । सुवर्णबाहुयुगलमपश्यत्पौण्ड्रकं हरिः ।।–अयमधिकः विज. ।

कर्बमक्षमा

अन्वयः—हे अज्ञ, हतः, तत्, मुखम्, अभिधाय, कंकगृध्रवटैः, वृतः, शयिष्यसे, शूनाम्, शरणम्, भविता ॥ ९ ॥ इति, दूतः, तत्, सर्वम्, आक्षेपम्, स्वामिने, आहरत्, कृष्णः, अपि, रथम्, आस्थाय, काशीम्, उपजगाम, ह ॥ १० ॥ तत्, उद्योगम्, उपलभ्य, महारथः, पौण्ड्रकः, अपि, अक्षौहिणीभ्याम्, संयुक्तः, पुरात्, द्रुतम्, निश्चक्राम ॥ ११ ॥ नृप ! तस्य, मित्रम्, काशिपतिः, तिसृभिः, अक्षौहिणीभिः, पार्ष्णिग्राहः, अन्वयात्, हरिः, पौण्ड्रकम्, अपश्यत ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मां शरणमेहीत्यस्योत्तरम् । मुखमिति । वटाः कंकादिवत्पक्षिविशेषाः । तत्र तदा शुनां शरणमाश्रयो भवितासि ॥९॥ काशीमिति । पौंड्रकस्यापि तदा मित्रपुरेऽवस्थानात् ॥ १०-११ ॥ पार्ष्णिग्राहः पृष्ठतो रक्षकः ॥ १२-१३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्ततोऽर्थान्मदक्षत्यागोत्तरम् । यद्वा—येन मुखेन संप्रत्येवं ब्रूषे तन्मुखम् । अपिधायाच्छाद्य । शुनां सारमेयाणाम् । श्वानस्त्वां सुखेन भोक्ष्यन्तीति भावः ॥ ९ ॥ इत्युक्तम् । स्वामिने पौंड्रकाय । तदा प्रेषणादिसमये । मित्रपुरे काश्याम् ॥ १० ॥ तदुद्योगं कृष्णोद्योगम् । द्रुतं क्षिप्रम् ॥ ११ ॥ तस्य पौंड्रकस्य । काशीशब्दो विभाषया ङीषंतः "कृदिकारादक्तिनः" इति विधानात् । काशते प्रलयेऽपि प्रकाशते तेजोरूपेणेति काशी 'काश्टृ-दीप्तौ' अतो धातोरिः । मित्रमासीदिति शेषः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किन्तु मां शरणमेहीति यदादिष्टं तद्भागधेयं शुनामेव सम्पत्स्यते नान्येषामित्याह—मुखमिति । तत्कत्थनपरं मुखमपिधाय अधोमुखतया निपातेन बालुकादिभिराच्छाद्य अन्योपि शयानो मुखं वस्त्रेणाच्छाद्य शेते कङ्कादिभिर्वृत इति तदाप्याधुनिकवत्सहायास्तव भविष्यन्तीति भावः । वटा मांसाहारितीक्ष्णतुण्डाः भवितेति तृच्प्रत्ययान्तः शयिष्यस इति मध्यमपुरुषेण त्वम्पदलाभात् भवितासीत्यर्थः । अन्यत्तैः यद्वा उत्स्रक्ष्ये त्वयि मोक्ष्यामि यैरुत्सृष्टैस्त्वं शयिष्यसे येनैव विकत्थसे तन्मुखञ्चापिधायेत्यन्वयः ॥ ९ ॥ तं पूर्वोक्तमाक्षेपं पाठान्तरे तदाक्षेपं तत्कृतमाक्षेपम् उप काशीसमीपे जगाम ह हर्षे अन्यत्तैर्व्याख्यातं । यद्वा काशीतिकाशी करुषदेशयोर्नैकट्यात् ॥ १० ॥ महारथः महायोद्धा यद्वा गरुडध्वजरथारोहणात् ॥ ११ ॥ तस्येत्यर्द्धकम् । नृप इति समृद्धि सूचयति नृपेति क्वचित्पाठः अक्षौहिणीभिरिति सार्द्धद्वयकम् । श्रीवत्सोपि पररोमरोपणया कृत्रिम एव वेषं कृत्रिममिति वक्ष्यमाणात् श्रीविष्णुपुराणेपि "वक्षस्यलङ्कृतश्चास्य श्रीवत्सं ददृशे हरिः" इति आदिशब्दात् पद्मादि इति चतुर्भुजत्वं महादेववरेणेति पाद्मोत्तरखण्डे असेः कक्षाधःप्रतिमुक्तत्वात् एतदपि रचितं ज्ञेयम् ॥ १२-१३ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत् कत्थनकरं मुखमपिधाय अधोमुखतया निपातेन बालुकादिभिराच्छाद्य, अन्योऽपि शयानो मुखं वस्त्रेणाच्छाद्य शेते, तदैव त्वत्कत्थनमपयास्यतीति । किंवा कत्थनस्य फलं भोक्ष्यस इति भावः । वटाः—मांसाहारितीक्ष्णतुण्डाः; भवितेति तृच्प्रत्ययान्तम्, भविष्यसि । अतएव तैरपि व्याख्यातम् । भवितासीति, अन्यच्च तैर्व्याख्यातम् । यद्वा, उत्स्रक्ष्ये त्वयि मोक्ष्यामि । यैरुत्सृष्टैस्त्वं शयिष्यसे, येनैव विकत्थसे, तन्मुखञ्चापिधायेत्यन्वयः ॥ ९ ॥ उप काशीसमीपे जगाम, ह हर्षे; अन्यत्तैर्व्याख्यातम् । यद्वा, काशीमिति काशी-करूषदेशयोर्नैकट्यात् ॥ १० ॥ महारथो महायोद्धा; यद्वा, गरुड़ध्वजरथारोहणात् ॥११॥ नृप इति समृद्धि सूचयति । तामेव दर्शयति—तिसृभिरक्षौहिणीभिः सहेति । हरिरिति सहजनिजवेशादिना मनोहरणात्, किंवा कर्त्तव्य-पौण्ड्रकादिप्राणहरणाभिप्रायेण, एवमग्रेऽपि ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

मां शरणमेहीत्यस्योत्तरमाह—मुखमिति । हे अज्ञ । तत् येन इत्थं विकत्थितं तन्मुखमपिधायाच्छाद्य कङ्कादिभिर्वृतः शयिष्यसे वटाः कङ्कादिवत्पक्षिविशेषाः ततः तत्र शयनस्थले भवान् शुनां शरणं भविता भविष्यति मया हतं शायितं च त्वा स्वश्शृगालादयः खादिष्यन्तीति भावः ॥९॥ इतीति । आक्षेपमधिक्षेपं स्वामिने पौण्ड्रकाय समाहरत्—आगत्य न्यवेदयदित्यर्थः । कृष्णोपीति । रथमास्थायाधिष्ठाय काशीमुपजगाम तत्समीपमुपजगामेत्यर्थः ॥ १० ॥ पौण्ड्रकोपीति । तस्य कृष्णस्योद्योगमुपगम्य उपलभ्य ज्ञात्वा द्रुतं शीघ्रं पुरात्कारुषपुरान्निश्चक्राम यद्वा पौण्ड्रकस्य तदा मित्रपुरे अवस्थानात्काशीपुरादिति वार्थः ॥११॥ तस्येति । तस्य पौण्ड्रकस्य मित्रं सखा काशिपतिः काशीराजः पार्ष्णिग्राहः पृष्ठतो रक्षकः सहायभूतस्सन् तिसृभिरक्षौहिणीभिः सहान्वयादनुजगाम तदा हरिः कृष्णः पौण्ड्रकं ददर्श ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

येन मुखेन सम्प्रत्येवं ब्रूषे तन्मुखम् अपिधाय आच्छाद्य वटाः कङ्कादिवत् पक्षिविशेषाः शुनां शरणं भवितासीति श्वानस्त्वां सुखेन भोक्ष्यन्ते इति भावः ॥ ९-१३ ॥

गूढार्थदीपिनी

अपिधाय आच्छाद्य । तत्र रणभूमौ कङ्कः चीलपक्षी वटः (वटेर पक्षी) ॥९॥ हृ हर्षे ॥१०॥ उपलभ्य ज्ञात्वा ॥११॥ पार्ष्णिग्राहः पृष्ठरक्षकः सन् । तमनुजगाम ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

त्यक्त्वैहि मां त्वं शरणमित्यस्योत्तरमाह—सुखमिति ॥ ९ ॥ तदानीं पौण्ड्रकस्य मित्रपुरेऽवस्थानात् काशीमुपजगाम हेत्युक्तम् ॥ १०-११ ॥ पार्ष्णिग्राहः पृष्ठतो रक्षकः ॥ १२-१६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदुक्तमहं शरणार्ह इति, तज्जीवानां नाश्रयत्वम्. किन्तु ब्रह्मण एवेति प्रार्थितं च देयमिति शरणे निर्णयमाह **मुखं तदपिधायेति** । तत्रैव काशीनिकटे त्वं शुनां शरणं भविता । अहोरात्रसमसङ्ख्याताः तद्देवताः यमालये श्वानः तिष्ठन्तीति प्रसिद्धिः । जीवाश्च श्वान इत्यपरे । 'गतिसामान्यात्' । 'क्षुत्परीतो यथा दीन' इति वाक्यात् । इन्द्रियाणि वा कुत्सितरतानि । त एव हि तादृशं शरीरमाश्रयन्ति । कालावयवा जीवा इन्द्रियाणि वा । मुखपिधानकर्ता पुत्रादिर्भवति । सर्व एव मारणीया इति मुखस्यापिधानमेव । अज्ञेति । ज्ञानिनो ज्ञानेन देहो दग्धो भवतीति शेषप्रतिपत्तिः, यथाकथञ्चिदपि भवतीति अपिधानं 'तदा' न दूषणं भवेत् । अतस्तद्व्यावृत्त्यर्थं संबोधनम् । कङ्कास्तामसाः, गृध्रा राजसाः, बकाः सात्त्विका इति त्रिविधैरपि भक्षकैर्वेष्टितः । आधिभौतिकाद्यभिमानिन्यो देवताः सर्वाश्चातः परं न परिपालयिष्यन्तीति । शरणं हि तेषामनुद्वेजकं भवति, तज्जीवतो न भवतीति, हतः सन् यथा शयिष्यसे, तदा शुनां शरणं भवितेति संस्काराभावोऽप्युक्तः । देहस्य येयं प्रतिपत्तिरुक्ता, साऽस्मृता । अन्ते युद्धसमये तत्रासक्तो न भविष्यतीति बोधनार्था । तदेव तस्य मोक्षो भवेदिति मोक्षदात्रा तथैव वक्तव्यम् ॥ ९ ॥ स दूतस्तथैवोक्तवानिति दूतो गुरुस्थाने जात इत्याह **इति दूत** इति । तद्भगवतोक्तमाक्षेपं स्वामिने स पोषक इति तद्धितार्थं सर्वमेवाहरत्, नत्वन्यथाभावं न्यूनं वा कृतवानित्यर्थः । वाक्यं प्रेषयित्वा स्वयमपि प्रस्थित इत्याह **कृष्णोऽपि रथमास्थायेति** । यद्यपि भगवान् तत्रैव प्रादुर्भूतः तस्य मुक्तिं दातुं शक्तः, तत्रापि कृष्णः फलरूपः भक्तकृपालुर्वा । सोऽप्यभेदमार्गेण भक्तो भवतीति, तत्स्त्रीणां दुःखं भवतीति, यद्यपि भगवता न गन्तव्यम्, तथापि रथमास्थाय रथस्थितः सुस्थो भक्तकार्यं करोतीति काशीमुपजगाम । तामसस्थाने भगवदाविर्भावः सहसा न भवतीति स्वयमपि काश्यां न प्रविष्टः, अन्यथा काशीत्वमेव न स्यात् । अत एव उप समीप एव जगाम ॥ १० ॥ सोऽपि ग्रामाद्बहिर्भगवन्तं द्रष्टुमागत इत्याह **पौण्ड्रकोऽपीति** । अन्यथा तस्य काश्यां किंवा भवेदिति तस्य भगवत उद्योगमेतावद्दूरं समागमनम् । **महारथ** इति युद्धाभिनिवेशात् शौर्यलक्षणः स्वधर्म उक्तः । अक्षौहिणीभ्यां सहितः, तस्य तावत् बलं सहजम्, सर्वसामग्र्या सहितो भगवत्समीपं गच्छेदिति । द्रुतं पुरान्निश्चक्रामेति । भगवदिच्छया समागतः कालः तत्रैव शरीरं गृह्णीयादिति भयाद्द्रुतमेव पुरान्निर्गमनम् ॥११॥ काशिराजोऽपि तन्मित्रमिति तस्याप्यर्धगतिर्भविष्यतीति तस्याप्यागमनमाह । **तस्यै काशिपतिरिति** । मित्रत्वात्पार्ष्णिग्राहो भूत्वा अन्वयात् । नृपेति सम्बोधनम् । राजधर्मस्तथाविध इति ज्ञापयितुम् । तिसृभिरक्षौहिणीभिः सहित इति । तस्य तावदेव बलम् । तत्र भगवान् प्रथमं कृपया पौण्ड्रकं दृष्टवानित्याह **अपश्यत्पौण्ड्रकमिति** । भगवज्ज्ञानेन विद्धः स्वाभाविकं दोषं त्यजतीति । यतो हरिः ॥ १२ ॥

श्रीसुबोधिनी-सारः

'त्यक्त्वैहि मां त्वं शरणम्' इति येनोक्तं तन्मुखमपिधाय नावृत्य कंकादिभिः पक्षिविशेषैर्वृतः तत्र युद्धे हतो मया शयिष्यसे शुनां श्वश्रृगालादीनां शरणं भविताश्रयो भविष्यसि ॥९॥ तस्याक्षेपम् इत्येवं सर्वं स्वामिने पौण्ड्रकाय दूत आहरन्न्यवेदयत् कृष्णोपि रथमाश्रित्य काशोमुपाययौ तदानीं मित्रपुरे पौंड्रकस्या वस्थानात् काशीनिरुक्तिरात्मपुराणे "गंगायाः सेवनान्नित्यं महादेवस्य वासतः ॥ सौभाग्यस्य च काशेन काशीत्येषाभवत्पुरी" ॥ १० ॥ तस्य कृष्णस्योद्योगमुद्यममुपलभ्य श्रुत्वा दृष्ट्वा च महारथः पौंड्रकोपि कपटवासुदेवोपि अक्षौहिणीभ्यां द्वाभ्यां संयुक्तो द्रुतं शीघ्रं पुरात्काशीतो निश्चक्राम ॥ ११ ॥ तस्य मित्रं काशीराजो पार्ष्णिग्राहः पृष्ठरक्षकः तिसृभिरक्षौहिणीभिरन्वयात् हे नृप हरिः पौंड्रकमपश्यत् ॥ १२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

मुखं तदपिधायेत्यत्र । पक्षत्रयार्थान् क्रमेणाहुः **कालावयवा** इति । **देहो दग्ध** इति । लिङ्गशरीरं ज्ञानेन दग्धं भवतीत्यर्थः । शेषःप्रतिपत्तिरिति । शेषस्य स्थूलदेहस्य प्रतिपत्तिर्गतिरित्यर्थः । **इति दूत** इत्यत्र । **स्वामिने** इत्यस्यार्थमाहुः **स पोषक** इति । स पौण्ड्रको दूतस्य पोषको भवति इति हेतोस्तस्य हितार्थं सर्वमाहरदित्यर्थः । तथा च स्वामिने इति तादर्थ्यचतुर्थी । स्वामिहितार्थमित्यर्थः । **यद्यपीति** । 'स्वाप्ययसम्पत्त्योरन्यतरापेक्ष'मितिन्यायेन तत्रैव पौण्ड्रकहृदयप्रदेशे प्रादुर्भावेन मुक्तिदानसामर्थ्यस्य विद्यमानत्वात्तत्र गमनं नोचितम्, तथापि कृष्णत्वाद्गत इत्यर्थः । तथापि भक्तार्थमेव गन्तव्यम्, नत्वेतादृशार्थमित्यत आहुः **सोप्यभेदे**ति । सोपि भक्त एव भवति । मार्गभेद एव, न तु प्राप्यभेदः । 'गोप्यः कामा'दित्यत्र तथोक्तेः । अतो गत इत्यर्थः । कृष्णपदस्य फलरूपत्वपक्षे आहुः **तत्स्त्रीणामिति** । हृदये एवाविर्भावे तत्स्त्रीणां भगवद्दर्शनं न स्यात्, तदा तासां दुःखं तिष्ठेदेव । अतस्तासु कृपया स्वदर्शनेन तासां कृतार्थत्वाय तत्र गत इत्यर्थः । भक्तकृपालुतावाचकत्वपक्षे आहुः **यद्यपीति** । ननु भक्तत्वे तु सुतरामत्रैवाकारणीयः, न तु तत्र स्वयं गन्तव्यमिति यद्यपि भवति, तथापि सुस्थो भगवान्भक्तकार्यं करोतीति सूचयितुं जगामेत्यर्थः । हेत्यनेनोक्तमाश्चर्यं **यद्यपि भगवांस्तत्रैवे**त्यारभ्य विवृतम् । एतावत्करणमाश्चर्यं तथापि कृतवानित्यर्थः । ननु हृदये आविर्भावेनापि भक्तकार्यं तु सिध्यत्येवेत्यत आहुः **तामसे**ति । तस्य तामसस्थानस्थितत्वात्तद्धृदये सहसा साधनव्यतिरेकेणाविर्भावो न भवतीत्यर्थः । साधनैस्तामसत्वदोषे निवृत्ते तत्राप्याविर्भावो भवति, नतु साधनव्यतिरेकेणेति सहसेत्युक्तम् । अतो भक्तकृपालुत्वात्तत्कार्यार्थं गत इत्यर्थः । **स्वयमपि ने**ति । तत्राविर्भूतो न भवत्यन्यत्र मथुरायामाविर्भूतोपि स्वयं न प्रविष्ट इत्यपि शब्दः । **अन्यथे**ति । भगवतस्तत्र प्रवेशे काशीत्वमेव गच्छेत् । महत एव प्रसिद्धिहेतुत्वेन विष्णुपुरीत्वापत्त्या मथुरात्वं द्वारकात्वं वा स्यादित्यर्थः । **पौण्ड्रकोपी**त्यत्र । **अन्यथे**ति । बहिर्गमनाभावे काश्यां स्थितस्य तस्य किं वा कार्यं भवेत् । तत्र भगवत्सान्निध्याभावान्मुक्तियुद्धादिकं किमपि कार्यं न भवेदित्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'मां शरणमेहि' इति यदुक्तं तदुत्तरमाह—मुखमिति । हे अज्ञ ! येनैवं विकत्थसे तन्मुखमपिधाय व्यादाय कङ्कादिभिः पक्षिविशेषैर्वृतो यदा हतः शयिष्यसे तत्र रणभूमौ त्वं शुनां शरणं भविता भविष्यसि । मया हतं त्वां श्वसृगालादयः खादिष्यन्तीति भावः ॥ ९ ॥ इत्येवं तत् भगवदुक्तमाक्षेपवचनं सर्वं दूतः स्वस्वामिने पौण्ड्रकायाहरत् आगत्य निवेदितवान् । कृष्णोपीति स्पष्टम् । हेति निर्भयत्वं सूचयति । पौण्ड्रकस्य तदा मित्रपुरे काश्यामेवावस्थानम् ॥ १० ॥ महारथः पौण्ड्रकोपि तस्य कृष्णस्य युद्धोद्योगमुपलभ्य दृष्ट्वा अक्षौहिणीभ्यां संयुक्तो द्रुतं शीघ्रमेव पुरान्निश्चक्राम ॥ ११ ॥ हे नृप ! तस्य पौण्ड्रकस्य मित्रं काशिपतिः पार्ष्णिग्राहः पृष्ठतो रक्षकः सहायभूतः संस्तिसृभिरक्षौहिणीभिः सह अन्वयात् अनुजगाम, तदा हरिः पौण्ड्रकं ददर्श ॥ १२ ॥

अन्वितार्थप्रकाशिका

मुखमिति ॥ हे अज्ञ ! येन मुखनैवं विकत्थसे तन्मुखमपिधाय व्यादाय आच्छाद्य वा कङ्कादिभिः पक्षिविशेषैर्वृतो यदा हतः शयिष्यसे तत्र रणभूमौ भवान् शुनां शरणं भविता भविष्यति । मया हतं त्वां श्वसृगालादयः खादिष्यन्तीति भावः । वटोऽप्यत्र पक्षिविशेष एव ॥ ९ ॥ इतीति ॥ इत्येवं तत् भगवदुक्तमाक्षेपवचनं सर्वं दूतः स्वस्वामिने पौण्ड्रकायाहरत् आगत्य निवेदितवान् । कृष्णः अपि रथमास्थाय काशीमुपजगाम । तत्समीपे पौण्ड्रकस्य तदा मित्रपुरे काश्यामेवावस्थानात् काशीकरूषदेशयोः प्रायो नैकट्याद्वा ॥ १० ॥ पौण्ड्रक इति ॥ महारथः पौण्ड्रकोऽपि तस्य कृष्णस्य युद्धोद्योगमुपलभ्य दृष्ट्वा अक्षौहिणीभ्यां संयुक्तो द्रुतं शीघ्रमेव पुरान्निश्चक्राम ॥ ११ ॥ तस्येति त्रयम् ॥ हे नृप ! तस्य पौण्ड्रकस्य मित्रं काशिपतिः पार्ष्णिग्राहः पृष्ठतो रक्षकः सहायभूतः संस्तिसृभिरक्षौहिणीभिः सह अन्वयात् अनुजगाम । तदा हरिः शङ्खादिविशिष्टं पौण्ड्रकं ददर्श । अरि अरयुक्तं चक्रम् अमूल्यः अनर्घ्यो मौलिरन्यानि चाभरणानि यस्य तं स्पष्टं शेषम् । अत्र श्रीवत्सगरुडादीनि कृत्रिमाणि ज्ञेयानि ॥ १२-१४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मां शरणमेहीत्यस्योत्तरमाह मुखमिति हे अज्ञ तत् स्वश्लाघां कुर्वाणं मुखं अपिधाय व्यादाय बटाः तीक्ष्णतुंडाः पक्षिविशेषाः तत्र तदा ॥ ९ ॥ काशीमुपजगाम । काशीसमीपवर्त्तिनं करूषदेशं जगाम ॥ १०-११ ॥ पार्ष्णिग्राहः पृष्ठतः सहायकारकः ॥ १२-१३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मां शरणमेहीत्यस्योत्तरमाह । मुखमिति ।। हे अज्ञ, तत् मुखं येनेत्थं विकत्थितं, तन्मुखमित्यर्थः । हतः सन्, अपिधायाच्छाद्य, कङ्काश्च गृध्राश्च बटाश्च तैः वृतः, शयिष्यसे, बटाः कङ्कादिवत्पक्षिविशेषाः । तत्र शयनस्थले, भवान् शुनां, शरणं

भविता भविष्यति । मया हतं शयितं च, त्वां शृगालादयः खादिष्यन्तीति भावः ॥ ९ ॥ इतीति ॥ इतीत्थं कृष्णेनाभिहित इत्यर्थः । दूतः, तदाक्षेपं, श्रीकृष्णकृताक्षेपं सर्वमपि, स्वामिने पौण्ड्रकाय, आहरत् व्याजहार । कृष्णः अपि, रथं आस्थाय, काशीं, उपजगाम । हेत्यामर्षिकहर्षे । तत् समीपे जगामेत्यर्थः । गोपालानन्दस्वामिनस्तु काशीसमीपवर्त्तिनं करूषदेशमित्याहुः । अन्ये तु तदा तस्य मित्रपुरेऽवस्थानात् काशीमेवेत्याहुः ॥ १० ॥ पौण्ड्रक इति ॥ पौण्ड्रकः अपि, तदुद्योगं श्रीकृष्णकृतस्वमारणोद्योगं, उपलभ्य ज्ञात्वा, महान् रथो यस्य तथाभूतः, अक्षौहिणीभ्यां संयुक्तः सन्, द्रुतं शीघ्रं, पुरात् करूषपुरात्, काशीपुराद्वा, निश्चक्राम । कृष्णेन योद्धुमिति शेषः ॥ ११ ॥ तस्येति ॥ तस्य पौण्ड्रकस्य, मित्रं सखा, काशीपतिः काशिराजः, पार्ष्णिग्राहः पृष्ठतो रक्षकः, सहायभूतः सन्निति यावत् । तिसृभिः अक्षौहिणीभिः सह, अन्वयात् अनुजगाम । तदा, हरिः, पौण्ड्रकं अपश्यद्ददर्श ॥ १२ ॥

कृष्णप्रिया

हे अज्ञ ! हे मूर्ख ! उस समय तू अपना मुंह छिपाकर-अधोमुख गिरकर चील, गीध, बहरे आदि पक्षियों से घिरा हुआ नींद लेता होगा और मैं तेरा शरणागत नहीं बनूंगा, लेकिन तू उन श्वानों का शरण होगा जो तेरे शरीर का मांस नोंच-नोंच कर खाते होंगे ॥ ९ ॥ राजन् ! पौण्ड्रक के वह दूत ने भगवान श्रीकृष्ण का तिरस्कारपूर्वक यह उत्तर लेकर अपने स्वामी के समीप जाकर सम्पूर्ण सुनाया । यहाँ भगवान् श्रीकृष्ण ने रथारुढ होकर काशीनगर पर आक्रमण किया । कारण कि पौण्ड्रक उन दिनों में अपने मित्र काशिराज के समीप निवास करता था ॥ १० ॥ हे राजन् ! भगवान् श्रीकृष्ण सज्ज होकर आक्रमण के लिए काशीपुर में आ रहे हैं यह वृत्तान्त जानकर प्रतीकार करने के लिये महारथी पौण्ड्रक भी दो अक्षौहिणी सेना से सज्ज होकर वेग से विना विलम्ब किये काशीनगर से बाहर आ गया ॥११॥ काशीनरेश पौण्ड्रक का मित्र था वह भी अपने मित्र की सहायता के लिये तीन अक्षौहिणी सेना के साथ पौण्ड्रक के पीछे-पीछे आया । हे राजन् । भगवान् श्रीकृष्ण ने पौण्ड्रक को देखा ॥ १२ ॥

शङ्खार्यसिगदा[1] शार्ङ्ग श्रीवत्साद्युपलक्षितम् । बिभ्राणं कौस्तुभमणिं वनमालाविभूषितम् ॥ १३ ॥
कौशेयवाससी पीते वसानं गरुडध्वजम् । [2]अमूल्यमौल्याभरणं स्फुरन्मकरकुण्डलम् ॥ १४ ॥
दृष्ट्वा तमात्मन[3]स्तुल्यवेषं कृत्रिममास्थितम् । यथा नटं रङ्गगतं विजहास भृशं हरिः ॥ १५ ॥[4]
शूलैर्गदाभिः परिघैः शक्त्यृष्टिप्रासतोमरैः । असिभिः पट्टिशैर्बाणैः प्राहरन्नरयो हरिम् ॥ १६ ॥[5]

कर्दमक्षमा

अन्वयः—शङ्खार्यसिगदा शार्ङ्गश्रीवत्साद्युपलक्षितम्, कौस्तुभः, मणिम्, बिभ्राणम्, वनमालाविभूषितम्, पीतकौशेयवाससी, वसानम्, अमूल्यमौल्याभरणम्, स्फुरन्मकरकुण्डलम्, गरुडध्वजम्, कृत्रिमम्, आत्मन्, तुल्यवेषम्, आस्थितम्, तम्, यथा, रङ्गम्, गतम्, नटम्, दृष्ट्वा, हरिः, भृशम्, विजहास ॥१३–१५॥ अरयः, शूलैः, गदाभिः, परिघैः, शक्त्यृष्टिप्रासतोमरैः, असिभिः, पट्टिशैः, बाणैः, हरिम्, प्राहरत् ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गरुडः कृत्रिमो ध्वजे यस्य तम् । अमूल्योऽनर्घ्यो मौलिराभरणं च यस्य तम् ॥ १४–१६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अरि चक्रम् । आदिना नंदकादिग्रहः ॥ १३ ॥ मौलिर्मुकुटम् । आभरणं कंकणोर्मिकादिरूपम् । ''मौलिः किरीटे धम्मिल्ले चूडायामनपुंसकम् । नाऽसावद्रौ स्त्रियां भूमौ'' इति मेदिनी । अमूल्योऽल्पमूल्यः कृत्रिमत्वात् ॥१४॥ तं पौंड्रकम् ॥१५॥ अरयः पौंड्रसैनिकाः ॥ १६ ॥

---

१. शार्ङ्गं दधत् श्रीवत्सलक्षितम्–विज. । २. आमुक्तमाल्या–विज. । ३. मात्मना–वीर. ; मात्मना साम्यं–विज. ।

४. क्षणेन तं काशिपतेः सैनिका दृढधन्विनः । शरैराच्छादयामासुः मेघाः शैलमिवांभसा ॥
केचिद् गजान् रथानश्वानास्थाय रणमूर्धनि ॥ १ ॥–अधिकः विज. ।

५. तस्य काशिपतेर्मित्रं पार्ष्णिग्राहोऽपरो नृपः । अक्षौहिणीभिस्तिसृभिरुपायान्नृपसङ्गरम् ॥ १ ॥
प्राच्यपुस्तके ११ श्लोकोऽत्र पाठभेदेन विजये दृश्यते ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अमूल्येति । यत्नतो दिव्यभगवन्मुकुटानुकरणार्थं ज्ञेयम् ॥ १४ ॥ आत्मनस्तुल्यम् आत्मना तुल्यमिति वा पाठः। कृत्रिममिति श्रीभगवच्छङ्खादीनां तु स्वाभाविकत्वं सूचयति ॥ १५ ॥ अरय इति । प्रहारे नैष्ठुर्य्यं सूचितम् ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीवत्सः कृत्रिम एव, वेषं कृत्रिममिति, वक्ष्यमाणत्वात्, श्रीविष्णुपुराणेऽपि (५।३४।१७)-'वक्षःस्थलकृतं चास्य श्रीवत्सं ददृशे हरिः' इति, आदि-शब्दात् पद्मादि, इति चतुर्भुजत्वम्, ततश्च बाहुद्वयमन्यदपि सर्वं प्रयत्नात् किञ्चित्सादृश्येन रचितं ज्ञेयम् । अमूल्येति दिव्यश्रीभगवन्मुकुटानुकारार्थम् ॥ १३-१४ ॥ तुल्यश्चासौ वेषश्च तं कृत्रिममिति श्रीभगवच्छङ्खादीनां नित्यत्वेन सहजत्वं सूचयति—यथेति दृष्टान्तेन; वेषधारणे नैपुण्यादिकं सूचितम्, अतो विशेषेण उच्चैर्जहास ॥ १५ ॥ अरय इति प्रहारनैष्ठुर्य्यं सूचितम् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम

अरि अरयुक्तं चक्रम् ॥ १३-१९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कथम्भूतं शङ्खादिभिरुपलक्षितं तत्र अरि अरयुक्तं चक्रं कौस्तुभमणिं बिभ्राणं वनमालया विराजितम् ॥ १३ ॥ पीते पिशङ्गे कौशेयवस्त्रे वसानं परिदधानं गरुडः कृत्रिमो ध्वजे यस्य तममूल्यमनर्घं मौल्याभरणं यस्य स्फुरन्ती मकरे कुण्डले यस्य तम् ॥ १४ ॥ आत्मना कृष्णेन तुल्यो वेषो यस्य तम् अथापि कृत्रिमं वेषमास्थितं तत्र दृष्टान्तः, यथा नटं रङ्गगतमिति रङ्गे नृत्यस्थले नटमिव गतं स्थितमित्यर्थः । तमेवम्विधं दृष्ट्वा हरिर्भृशं प्रहसितवान् ॥ १५ ॥ शूलैरिति । तदा अरयः शत्रवः कृष्णं शूलादिभिः प्राहरन् प्रत्याहृतवन्तः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वेषं कृत्रिममास्थितमित्यत्र महादेववरप्राप्तित्वादिति पाद्मोत्तरखण्डाल्लभ्यते ॥ १५-२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गरुडः कृत्रिममूर्त्तिर्ध्वजे यस्य तम् अमूल्यः कृत्रिमत्वादल्पमूल्यो मौलिराभरणं यस्य तम् ॥ १४-१६ ॥

गूढार्थदीपिनी

तस्येति त्रयम् अरि चक्रम् । वसानं धारयन्तम् । अमूल्यम् अल्पमूल्यम् । कृत्रिमत्वात् । अत्र अल्पार्थे नञ् । 'तदन्यत्वं तदल्पता' इति भूषणोक्तेः मौलिः मुकुटम् ॥ १३-१५ ॥ परिघो लोहदण्डः । ऋष्टिः उभयतोधारखड्गः । प्रासः प्रक्षेपास्त्रम् । तोमरः (गड़ांसा) पट्टिशः शस्त्रभेदः ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तथा कृपायां तस्य जीवत एव सारूप्यं हेतुत्वेन वर्णयति **शङ्खे**ति । कृत्रिमसहजभुजेषु शङ्खं अरिश्चक्रं च सहजयोर्धृतवान् । गदाशार्ङ्गौ कृत्रिमयोः । श्रीवत्सादिचिह्नान्यपि कृतवान् । कौस्तुभसमानाकृतिमणिं कृत्वा कण्ठे स्थापितवान् । अन्ये तु श्रीवत्सकौस्तुभौ चर्म छित्वा तत्र स्थापितवानित्याहुः । तथा सत्यकृत्रिमता स्यादिति । **वनमालाविभूषित**मिति । यथैव नित्यनूतना भवति, तथा वनमालां सम्पादयतीति ॥१३॥ कौशेयवाससी पीते, भगवानिव वसानः समागतः, न तु कञ्चुकादिकं परिधाय, अन्यथा अन्ते वेषवशादन्यथा गतिः स्यात् । **गरुडध्वज**मिति । चित्रमयीं दारुमयीं वा गरुडमूर्तिं ध्वजे स्थापितवानिति । भजनीयोऽन्यो नास्तीति, धर्मश्चान्यो न कर्तव्य इति, भक्तैः सह स्वयमात्मानमेव पूजयतीति, अमूल्यमेव मौलिमाभरणानि च सम्पादितवान् । तथैव मकराकृतिकुण्डले । ध्यानेन भगवदावेशाच्च सर्व एव भगवद्धर्मास्तत्राविष्टा इति **स्फुरत्**पदेन सूचितम् ॥१४॥ तस्य रूपं दृष्ट्वा भगवान् संतुष्टः अभिनन्दनं कृतवानित्याह । **दृष्ट्वा तमात्मनस्तुल्यं वेषं कृत्रिममास्थित**मिति । परं कृत्रिमम् । **आस्थित**मिति तत्रासक्तिर्महतीति वेषस्य न केनाप्यंशेन भङ्गः सूचितः । कृत्रिमत्वे गतिर्न भविष्यतीत्याशङ्क्य, रसोत्पादकत्वात् 'स्थाय्येव भावो रस' इति 'अधिकं तत्रानुप्रविष्ट'मिति निरूपयितुमाह **यथा नटं रङ्गगत**मिति । अतिहर्षात् भृशं विजहास । तस्य सर्वं भावं स्मृत्वा सर्वस्यैवाभिनन्दनं कृतवानित्यर्थः । यतो हरिः ॥१५॥ ततः सेनायाः प्रथमं भगवत्यतिक्रममाह **शूलै**रिति । शिवप्राधान्यात् प्रथमं शूलग्रहणम् । दशभिरायुधैः सर्वप्रकारेण हरिं तूष्णीं स्थितं तान् गणयन्तं प्राहरन् ॥ १६ ॥

श्रीसुबोधिनी–सारः

शंखः प्रसिद्धोऽरिश्चक्रम् असिः खड्गः गदा शार्ङ्गं श्रीवत्सस्तदादिभिरुपलक्षितं कौस्तुभमणिं बिभ्राणं धरंतं वनमालया विभूषितम् ॥ १३ ॥ पीते कौशेये कृमिकीटोत्थे वाससी वसानं गरुडो ध्वजे यस्य तम् अमूल्यानि मौलौ मुकुटे आभरणानि यस्य तं स्फुरंती मकाराकारे कुंडले यस्य तम् ॥ १४॥ कृत्रिममतात्त्विकमात्मनस्तुल्यं वेषम् आश्रितं तं छद्मवासुदेवं दृष्ट्वा हरिः श्रीकृष्णो भृशम् अत्यर्थं विजहास रंगं गतं नटमिव ॥ १५ ॥ शूलादिभिः शस्त्रैररयः शत्रवो हरिं प्राहरन् ॥ १६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

गरुडध्वजमित्यत्र । ध्वजस्थापनस्य तात्पर्यत्रयमाहुः **भजनीय** इति । **धर्मश्चेति** । भक्तेः सहेति । **दृष्ट्वा तमित्यत्र** । **कृत्रिमत्वे** इति । रसस्य स्थायित्वनियमाद्रसो न हीयते, किन्तु कृत्रिमत्वमधिकं प्रविष्टं व्यभिचारिभाववदिति निरूपयितुं रसोत्पादकत्वमाहेत्यर्थः । **शूलैरिति** । शूलादिदशसंख्यातात्पर्यमाहुः **सर्वप्रकारेणेति** । सगुणनिर्गुणप्रकारेणेत्यर्थः । हरिपदस्यार्थमाहुः । **तूष्णीं स्थितमिति** ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तं विशिनष्टि द्वाभ्याम् । शङ्खादिभिरुपलक्षितम् । अरि अरयुक्तं चक्रम् ॥ १३ ॥ पीते कौशेये कीटनिर्मितकोशजन्यतन्तुनिर्मिते वाससी वसानं परिदधानम् । गरुडः कृत्रिमो ध्वजे यस्य तम् । अमूल्यः अनर्घ्यो मौलिरन्यानि चाभरणानि यस्य तम् । स्फुरती मकराकारे कुण्डले यस्य तम् ॥ १४ ॥ कृत्रिमं आत्मनः स्वस्य तुल्यं वेषमास्थितं स्वीकृतवन्तम् । तत्र दृष्टान्तमाह—यथा रङ्गे नृत्यस्थाने राजादिवेषधारिणं नटमिति । एवंविधं तं पौण्ड्रकं दृष्ट्वा हरिर्भृशं विजहासेति सम्बन्धः ॥ १५ ॥ ततश्चारयः शत्रवः शूलादिभिः शस्त्रैर्हरिं प्राहरन् ॥ १६ ॥

अन्वितार्थप्रकाशिका

दृष्ट्वेति ॥ कृत्रिमम् आत्मनः स्वस्य तुल्यं वेषमास्थितं स्वीकृतवन्तं यथा रङ्गे नृत्यस्थाने राजादिवेषधारिणं नटमिति एवंविधं तं पौण्ड्रकं दृष्ट्वा हरिर्भृशं विजहास ॥ १५ ॥ शूलैरिति ॥ ततश्चारयः शत्रवः शूलादिभिः शस्त्रैर्हरिं प्राहरन् ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वसानं परिदधानं गरुडः कृत्रिमो ध्वजे यस्य तं अमूल्यं बहुमूल्यं मौल्याभरणं मौलिर्मुकुटाख्यमाभरणं यस्य तं ॥ १४-१५ ॥ प्रासतोमरैः महदल्पभल्लैः अरयः शत्रवः ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कथंभूतं ददर्शेत्यतस्तं विशिनष्टि शङ्खेति ॥ शङ्खश्च अरि चक्रं च असिः खड्गश्च गदा च शार्ङ्गं च श्रीवत्सश्च आदिर्यस्य पद्मस्य तेनोपलक्षितस्तं, कौस्तुभमणिं, बिभ्राणं, वनमालया विभूषितस्तम् ॥ १३ ॥ कौशेयेति । पीते पिशङ्गे, कौशेयवाससी कौशेयवस्त्रे, वसानं परिदधानं, गरुडः कृत्रिमः पन्नगारिर्ध्वजे यस्य तं, अमूल्यं मौल्याभरणं यस्य तं, स्फुरती मकराकारे कुण्डले यस्य तम् ॥ १४ ॥ दृष्ट्वेति ॥ आत्मना स्वेन श्रीकृष्णेन, तुल्यं, कृत्रिमं वेषं; आस्थितं तं पुण्ड्रकं, रङ्गगतं नटं यथा तथा, दृष्ट्वा, हरिः भृशं, विजहास ॥ १५ ॥ शूलैरिति ॥ तदा अरयः शत्रवः, शूलैः, गदाभिः, परिघैः, शक्तिश्च ऋष्टिश्च प्रासश्च तोमरश्च तैः, असिभिः, पट्टिशैः, बाणैः, हरिं श्रीकृष्णं, प्राहरन् प्रहृतवन्तः ॥ १६ ॥

कृष्णप्रिया

पौण्ड्रक ने भगवान् श्रीकृष्ण की भाँति शंख, चक्र, तलवार, गदा, शार्ङ्ग धनुष एवं श्रीवत्स चिह्न आदि स्वाङ्ग सजाया था। कौस्तुभमणि तो एक ही होता है लेकिन उसने कृत्रिम बना लिया था और धारण किया था। और कृत्रिम वनमाला भी वक्षःस्थल को विभूषित कर रही थी ॥ १३ ॥ रेशम के दो पीताम्बर धारण किये थे। रथ पर गरुड के चिह्न वाली ध्वजा फहरा रही थी। अनमोल रत्नखचित मुकुट धारण किया था। कानों में मकराकृति दो कुण्डल जगमगा रहे थे ॥ १४ ॥ पौण्ड्रक का यह सारा स्वाङ्ग कृत्रिम था। जैसे रङ्गभूमि पर कोई नट अभिनय करने के लिये सज्ज बनकर आया हो वैसे भगवान् का सम्पूर्ण स्वाङ्ग सजाकर आये हुए पौण्ड्रक को देखकर भगवान् श्रीकृष्ण ने अत्यन्त प्रसन्नतापूर्वक हास्य किया ॥ १५ ॥ पौण्ड्रक एवं उनके सैनिकों ने भगवान् श्रीकृष्ण पर शूल-गदा, परिघ, मुद्गर, शक्ति, ऋष्टि (शस्त्र का नाम ऋष्टि) प्रास (दूर से फेंकने का शस्त्र) तोमर तलवार पट्टिश बाण आदि अस्त्र एवं शस्त्रों से भारी प्रहार किया ॥ १६ ॥

कृष्णस्तु तत्पौण्ड्रककाशिराजयोर्बलं गजस्यन्दनवाजिपत्तिमत् ।
गदासिचक्रेषुभिरार्दयद् भृशं यथा युगान्ते हुतभुक् पृथक् [1]प्रजाः ॥ १७ ॥
आयोधनं तद्रथवाजिकुञ्जरद्विपत्खरोष्ट्रै[2]ररिणावखण्डितैः ।
बभौ चितं [3]मोदवहं मनस्विनामाक्रीडनं भूतपतेरिवोल्बणम् ॥ १८ ॥
अथाह पौण्ड्रकं शौरिर्भो भोः पौण्ड्रक यद् भवान् । दूतवाक्येन मामाह तान्यस्त्राण्युत्सृजामि ते ॥ १९ ॥
त्याजयिष्येऽभिधानं मे यत्त्वयाज्ञ[4] मृषा धृतम् । व्रजामि शरणं तेऽद्य यदि नेच्छामि संयुगम् ॥ २० ॥

कर्वमक्षमा

अन्वयः—युगान्ते, यथा, हुतभुक्, पृथक्, प्रजाः, तथा, कृष्णः, तु, तत्, पौण्ड्रककाशिराजयोः, गजस्यन्दनवाजिपत्तिमत्, तत्, बलम्, गदासिचक्रेषुभिः, भृशम्, आर्दयत् ॥ १७ ॥ तत्, आयोधनम्, अरिणा, अवखण्डितैः, रथवाजिकुञ्जरद्विपत्खरोष्ट्रैः, भूतपतेः, उल्बणम्, आक्रीडनम्, इव, मनस्विनाम्, चितम्, मोदवहम्, बभौ ॥ १८ ॥ अथ, शौरिः, पौण्ड्रकम्, आह, भो भोः! पौण्ड्रक, यद्, भवान्, दूतवाक्येन, माम्, आह, तानि, अस्त्राणि, ते, उत्सृजामि ॥ १९ ॥ हे अज्ञ, यत्, त्वया, मे, अभिधानम्, मृषा, धृतम्, त्याजयिष्ये, यदि, ते, अद्य, संयुगम्, न, इच्छामि, शरणम्, व्रजामि ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गजस्यंदनादिचतुरंगबलमर्दितवान् । पृथक् प्रजाश्चतुर्विधं भूतग्रामं यथा युगांताग्निरिति ॥ १७ ॥ आयोधनं रणस्थानम् । अरिणा चक्रेण चितमाक्रीडनमिव कल्पांत रुद्रस्य क्रीडास्थानमिव ॥ १८–२० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तद्बलम् । युगांते प्रलये ॥ १७ ॥मनस्विनां शूराणाम् 'मनस्वी योगिशूरयोः' इति धरणिः । भूतपते रुद्रस्य ॥ १८ ॥ अथ सेनाछेदोत्तरम् । वासुदेवोऽवतीर्णोऽहं यानि त्वमस्माच्चिह्नानीत्यादिकं यदाह—ते तानि उत्सृजानि मुंचामि ते त्वयि वेत्यर्थः ॥ १९ ॥ त्याजयिष्ये हापयिष्यामि ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तुशब्दो वैशिष्ट्ये अरयः प्राहरन्नेव नतु किञ्चित्कर्त्तुं शक्तवन्तः श्रीकृष्णस्तु भृशमत्यर्थमाद्र्दयत् सञ्जहारेत्यर्थः ॥१७॥ तत्र विशेषतोऽशेषायुधश्रेष्ठचक्रकृतमाह—आयोधनमिति । रथादीनां यथापूर्वं युद्धार्थमग्रेऽभिगमने श्रैष्ठ्यात्तत्तत्क्रमेणावखण्डनम् उल्बणम् अन्येषां भयङ्करमित्यर्थः ॥ १८ ॥ अथ अर्द्दनानन्तरं सम्यग्व्यवधाने गते शौरिः शूरवंशे ऽवतीर्णः स्वयं भगवान् भोभो इत्युपहासात् अत एव भवानिति च यदाह तेन तानि त्वदुक्तानि तुभ्यमुत्सृजामि ॥ १९ ॥ त्वन्तु मिथ्याभिधान्त्यजेति यदुक्तं तत्राह—त्याजयिष्य इति । धातूनामन्तर्भूतण्यर्थतयापि प्रयोगदर्शनादनन्यथार्थमेव करिष्यामीतिभावः । ननु दूतवाक्यानुसारेण व्यवहरसि चेत्तर्हि मां शरणमेहि तत्राह—व्रजामीति । त्यक्त्वैहि मां त्वं शरणमित्यादौ तत्राऽऽह्वस्यैव प्रथमविहितत्वादिति भावः । अद्य त्वद्दर्शनावसरे अज्ञेति पाठेऽपि न विद्यते ज्ञो यस्मादित्युपहासव्यञ्जना ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तु शब्देन तत्तत्प्रहारस्य वैफल्यम्, किं वा तस्मात् प्रागेवेति बोधयति । भृशमत्यर्थमार्द्दयत् संजहारेत्यर्थः । गजादीनां यथोत्तरं सेनांगत्वे तथा गदादीनाञ्चार्द्दनसाधनत्वे न्यूनत्वम्, तत्र चर्म्मणेति चर्म्मावरणकरत्वेनैवार्द्दनसाधनम्, चक्रकृतञ्च वक्ष्यत्येव । पाठान्तरे चक्रेति पाठः स्पष्टः ॥ १७ ॥ तत्र विशेषतोऽशेषायुधश्रेष्ठचक्रकृतमाह—आयोधनमिति । रथादीनां यथापूर्वं युद्धार्थमग्रेऽभिगमने श्रैष्ठ्यात्, तत्तत्क्रमेणावखण्डनम्, उल्बणम्–अन्येषां भयंकरमित्यर्थः ॥ १८ ॥ अथ अर्द्दनानन्तरमेव, शौरिः—निजाशेषैश्वर्य्यप्रकटनार्थं शूरवंशेऽवतीर्ण इति, तादृश्युक्तिस्तस्य योग्यैवेति भावः । 'भो भोः' इति क्रोधादुपहासाद्वा, अत एव भवानिति च यदाह तेन तानि त्वदुद्दिष्टानि, ते तुभ्यमुत्सृजामि ॥१९॥ अभिधानञ्च वासुदेव इति नामाद्य त्याजयिष्ये । अज्ञेति पाठे मौढ्यादेव धृतमित्यर्थः । ननु दूतवाक्यानुसारेण व्यवहरति चेत्तर्हि मां शरणमेहि, तत्राह—व्रजामीति । त्यक्त्वैहि मां त्वं शरणमित्यादिदूतवाक्यानुसारादेव युद्धेऽयं त्वां हस्तीति भावः । अयमाक्षेपविशेषः ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

व्रजामि संयुगं नेच्छामि चेत् संयुगाद्भीतोऽस्मि चेत् त्वां शरणं व्रजामि नाहं भीत इत्यर्थः ॥ २०–२३ ॥

---

१. प्रभावबलन्–विज. । २. रोष्ट्रै रिपुणा च–विज । ३. चिरं–वीर ; च तन्मान वहं–विज । ४. यत् त्वयाद्य मृषा कृतम्–बिज. ।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कृष्णस्त्विति । गजादयोऽस्य सन्तीति तथा चतुरङ्गमित्यर्थः । तत्पौण्ड्रककाशीराजयोर्बलं गदादिभिर्भृशमर्दयत्पीडयामास आजघ्ने इति यावत् **यथा** युगान्ताग्निः पृथक् प्रजाः चतुर्विधभूतग्रामानर्दयिष्यति तद्वत् ॥ १७ ॥ आयोधनमिति । अरिणा चक्रेण चकाराद्गदादिभिश्च खण्डितैः रथादिभिस्तदायोधनं युद्धस्थलं मनस्विनां शूराणां चिरं सन्तोषावहं सद्वेजे आक्रीडनमिव कल्पान्ते रुद्रस्य क्रीडास्थानमिव उल्बणं दारुणं सद्बभौ इति सम्बन्धः ॥ १८ ॥ अथेति । उक्तिमेवाह—भो भो इत्यादिना संयुगमित्यन्तेन । भो भो पौण्ड्रक ! दूतवाक्यमुखेन भवान् मां प्रति यदाह "यानि त्वमस्मच्चिह्नानि" इत्यादि तान्येवास्त्राण्युत्सृजामि प्रयोक्ष्यामि ॥ १९ ॥ हे अज्ञ ! मे मत्सम्बन्धि मदसाधारणमभिधानं नाम ते त्वया मृषा धृतं तत्त्याजयिष्ये यदि संयुगं नेच्छामि संयुगाद्भीतोस्मि चेत्त्वां शरणं व्रजामि नाहं भीत इत्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

हुतभुक् प्रलयाग्निः पृथक् प्रजाः जरायुजादिपृथग्भेद—प्रजाः ॥ १७ ॥ आयोधनं युद्धस्थानं रथादिभिश्चितं व्याप्तम् अरिणा चक्रेण ॥ १८–२१ ॥

गूढार्थदीपिनी

गजादियुक्तं तत् बलं सैन्यं गदादिभिः अमर्दयत् । यथा हुतभुक् प्रलयाग्निः पृथक् चतुर्विधा प्रजाः जरायुजादिभेदेन ॥ १७ ॥ अरिणा चक्रेण खण्डितैः रथादिभिः चितं व्याप्तं तत् आयोधनं युद्धस्थलं बभौ इत्यन्वयः । भूतपतेः रुद्रस्य उल्वणं भयजनकम् । आक्रीडनं श्मशानमिव । 'श्मशानेष्वाक्रीडा' इत्युक्तेः ॥ १८ ॥ **ते** त्वद्वधार्थं उत्सृजामि प्रक्षिपामि ॥ १९–२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पृथक् प्रजाः जरायुजादिचतुर्विधाः प्रजाः ॥ १७ ॥ अरिणा चक्रेण ॥ १८–२० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततोऽक्लिष्टकर्मा भगवान् तां सेनां दूरीकृतवानित्याह कृष्णस्त्विति । तुशब्देन भगवतो जयमाह । तद्बलं प्रहरणकर्तृ । **पौण्ड्रककाशिराजयोरि**ति सात्त्विकतामसभावापन्नयोरपि । राजसा एव हन्तव्या इति तयोरमारणमाशङ्क्य नामग्रहणम् । अङ्गानि गणयति गजेति । तयोरराजसत्वात् सेनाव्यवस्था कदाचिन्न भवेदिति तदर्थं गणना । गदादिभिः चतुर्भिरेव आसमन्तादर्दयत् पीडितवान् । अस्त्रादिसहितैर्बाणैः कृत्वा दाहपर्यन्तं कृतवानिति वक्तुं दृष्टान्तमाह **यथा युगान्त** इति । प्रजानां क्षयो यस्मात् तादृशो हुतभुक् प्रलयाग्निः ॥ १७ ॥ ननु महादेवः कथं तत्साहाय्यं न कृतवानित्याशङ्क्याह **आयोधन**मिति । **चक्रेण खण्डितै रथादिभिः** कृत्वा आयोधनं रणभूमिर्बभौ । तैश्चितं व्याप्तं प्रसारितम् । तर्हि तद्दृष्ट्वा मूलभूतौ पलायितौ भविष्यत इत्याशंक्याह **मोदवहं मनस्विना**मिति । मोदं वहतीति । भूतपतेर्महादेवस्याक्रीडनं क्रीडास्थानं कृतवान् । तत्राप्युल्बणमत्युत्कटम्, येन भक्तोऽपि न स्मृतः ॥ १८ ॥ **अथ** पौण्ड्रकवधार्थमुद्यतः स्वोपदिष्टोर्थस्तेन विस्मृतो मा भवत्विति पुनः स्मारयति **अथाहे**ति **द्वाभ्याम्** । शौरिरिति पितृपितामहनाम्ना भगवत उत्कर्षं पौण्ड्रकेति तस्यापकर्षं चाह **भो भो पौण्ड्रके**ति । तस्य सहजो दोषः भगवता कीर्तित इति तन्नाशो निरूपितः । यद्भवान् दूतवाक्येन मामाह, तान्यस्त्राणि सहजानि **ते** तुभ्यं तदर्थं उत्सृजामि, यैस्त्वं सहजस्तादृशो भविष्यसि । मे अभिधानं वासुदेवेति यत्त्वया मृषा धृतम्, भगवद्भावात् पूर्वमेव बालकवाक्येन स्थापितम्, तत्त्याजयिष्ये । सहजं तु दास्यामीति । यदि संयुगे न हनिष्यामि, तदा निकटे समागत्य सायुज्यं दास्यामि । इदानीं युद्धार्थमेवागत इति सारूप्यमेव प्रयच्छामि । अयं दोषः दूतप्रेषणाज्जातः, अन्यथा सायुज्यमेव भवेत् । यदि तूष्णीं तिष्ठेदित्यर्थः । अनेनैवमपि सूचितम् । इदानीमपि चरणे चेत्पतति, सायुज्यमेव दास्यामीति ॥ २० ॥

श्रीसुबोधिनी–सारः

हस्तिरथाश्वपदातिविशिष्टं चतुरंगं तत् पौंड्रककाशिराजयोर्बलं सैन्यं कृष्णोपि भृशमपीडयत् गदाकृपाणचक्रबाणैः युगान्ते प्रलये हुतभुक् अग्निः पृथक् प्रजाः चतुर्विधं प्राणिसंघम् इव ॥ १७ ॥ अरिणा चक्रेणावखंडितैः छिन्नभिन्नरथाश्वहस्तिनरखरोष्ट्रैः चितं व्याप्तम् उल्वणं घोरं मनस्विनां शूराणां मोदवहमानंदकरं तदाऽऽयोधनं युद्धस्थानं बभौ शुशुभे भूतपतेः श्रीरुद्रस्याक्रीडनमिव विहारभूमिरिव ॥ १८ ॥ अथानंतरं पौंड्रकं शौरिः श्रीकृष्ण आह भो भो पौंड्रक दूतवाक्येन मां भवान् यदाह तानि अस्त्राणि ते तुभ्यम् उत्सृजामि प्रक्षिपामि ॥ १९ ॥ हे अज्ञ मे ममाभिधानं नाम मृषा मिथ्या धृतं त्वया यत्तत् अहं त्याजयिष्ये विमोचयिष्यामि यदि संयुगम् युद्धं नेच्छामि अद्य इदानीं तर्हि ते तव शरणं यामि ॥ २० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

आयोधनमित्यत्र । मूलभूताविति । सेनायां मुख्यौ पौण्ड्रककाशिराजावित्यर्थः । त्याजयिष्य इत्यत्र । व्रजामि शरणमित्यस्यार्थमाहुः सायुज्यं दास्यामीति । तथा च त्वदर्थं शरणत्वं व्रजामि प्राप्नोमीति तदर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कृष्णस्तु गजादिचतुरङ्गयुक्तं पौण्ड्रककाशिराजयोस्तद्बलं गदादिभिर्भृशमार्दयत् पीडयामास नाशितवानित्यर्थः। तत्र दृष्टान्तमाह—यथेति । युगान्ते प्रलयसमये हुतभुक् अग्निः पृथक्प्रजाः जरायुजादिचतुर्विधभूतग्रामान् यथा नाशयति तथेत्यर्था ॥ १७ ॥ चक्रेणावखण्डितै रथादिभिश्चितं व्याप्तं तदायोधनं युद्धस्थलं मनस्विनां शूराणां मोदवहं हर्षकरं बभावित्यन्वयः । तत्र दृष्टान्तमाह—कल्पान्ते उल्बणं भयंकरं भूतपतेः रुद्रस्य क्रीडास्थानमिवेति ॥ १८ ॥ शौरिः कृष्णः पौण्ड्रकमाह। तदुक्तिमाह—भो भो पौण्ड्रक ! दूतमुखेन यान्यस्मदस्त्राणि बिभर्षि तानि त्यजेति यद्भवान् आह, तान्यस्त्राणि ते तुभ्यं त्वद्वधार्थमुत्सृजामि प्रक्षिपामि ॥ १९ ॥ किंच हे अज्ञ ! वासुदेव इति यन्ममाभिधानं मृषैव त्वया धृतं तत्त्याजयिष्ये । यदुक्तं 'शरणमेहि' इति तत्राह—व्रजामीति । संयुगं नेच्छामि संयुगात् यदि भीतः ॥ २० ॥

अन्वितार्थप्रकाशिका

कृष्ण इति ॥ कृष्णस्तु गजस्यन्दनवाजिपत्तिरूपचतुरङ्गयुक्तं पौण्ड्रककाशिराजयोस्तद्बलं युगान्ते प्रलयसमये हुतभुक् अग्निः पृथक् प्रजाः जरायुजादिचतुर्विधभूतग्रामान् यथा नाशयति तथा गदासिचक्रैषुभिः भृशमार्दयत् अपीडयत् ॥ १७ ॥ आयोधनमिति ॥ अरिणा चक्रेणावखण्डितै रथादिभिश्चितं व्याप्तं तदायोधनं युद्धस्थलं कल्पान्ते उल्बणं भयंकरं भूतपतेः रुद्रस्य आक्रीडनं क्रीडास्थानमिव मनस्विनां शूराणां मोदवहं हर्षकरं बभौ ॥ १८ ॥ अथेति ॥ अथ शौरिः कृष्णः पौण्ड्रकमाह स्म । भो भोः पौण्ड्रक ! दूतमुखेन यान्यस्मदस्त्राणि बिभर्षि तानि त्यजेति यद्भवान् आह स्म तान्यस्त्राणि ते तुभ्यं त्वद्वधार्थमुत्सृजामि प्रक्षिपामि ॥ १९ ॥ त्याजयिष्य इति ॥ हे अज्ञ ! वासुदेव इति यन्ममाभिधानं मृषैव त्वया धृतं तत्त्याजयिष्ये। अथ यदि भीतः सन् संयुगं नेच्छामि तर्हि अद्य ते शरणं व्रजामि ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गजादिमत् चतुरंगसैन्यं आर्दयत् पीडितवान् हुतभुक् वह्निः पृथक् प्रजाः उद्भिज्जादिचतुर्विधं जतुवृदं यथा तथा पीडितवान् ॥ १७ ॥ अरिणा चक्रेण अवखण्डितैः हतैः तस्य पौंड्रकस्य रथादिभिः चितं व्याप्तं आयोधनं संग्रामस्थानं प्रलये भूतपतेः रुद्रस्य आक्रीडनं रमणस्थानमिव अन्येषां उल्वणं भयंकरं बभौ ॥ १८–१९ ॥ हे अज्ञ यत् वासुदेवेत्यभिधानं त्वया मृषा धृतमिति यत्त्वया मह्यमुक्तं तदहं त्याजयिष्ये ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्णस्त्विति ॥ तदा कृष्णः तु, गजाश्च स्यन्दनाश्च वाजिनश्च पत्तयश्च अस्मिन् सन्तीति तथा चतुरङ्गमित्यर्थः । तत् पौण्ड्रककाशिराजयोः, बलं गदा कौमोदकी च असिर्नन्दकाख्यः खड्गश्च चक्रं सुदर्शनं च इषवः शार्ङ्गमुक्ता बाणाश्च तैः, युगान्ते हुतभुग्युगान्तकाले वृद्धिं प्राप्तः प्रलयाग्निः, पृथक् प्रजाः, चतुर्विधभूतग्रामान्, यथा तद्वत्, भृशं आर्दयत् पीडयामास, आजघ्ने इति यावत् ॥ १७ ॥ आयोधनमिति ॥ अरिणा चक्रेण, चकाराद्गदादिभिश्च, खण्डितैः, रथाश्च वाजिनश्च कुञ्जराश्च द्विपदः पदातयश्च खराश्च उष्ट्राश्च तैः, तत् आयोधनं युद्धस्थलं, मनस्विनां शूराणां, चिरं मोदवहं सन्तोषावहं सत्, भूतपतेः रुद्रस्य, उल्बणं दारुणं, आक्रीडनं इव, प्रलयकालीनं रौद्रं क्रीडास्थानमिवेत्यर्थः । बभौ ॥ १८ ॥ अथेति ॥ अथानन्तरं, शौरिः श्रीकृष्णः, पौण्ड्रकं, आह । उक्तिमेवाह भो भो इत्यादिना संयुगमित्यन्तेन । भो भो पौण्ड्रक, दूतवाक्येन दूतवाक्यमुखेन, भवान् मां प्रति, यत् आह, 'यानि त्वमस्मच्चिह्नानि' इति प्रोक्तवानित्यर्थः । तान्येव, ते तव, अस्त्राणि उत् सृजामि वियोक्ष्यामि ॥१९॥ त्याजयिष्ये इति ॥ हे अज्ञ, मे मत्संबन्धि, मदसाधारणमित्यर्थः । यत् अभिधानं नाम, त्वया मृषा मिथ्यैव, धृतं तत्, अद्य त्याजयिष्ये । यदि, संयुगं, न इच्छामि, संयुगाद्भीतोऽस्मि चेदित्यर्थः, तर्हि, ते तव, शरणं व्रजामि । नाहं भीत इत्यर्थः ॥ २० ॥

कृष्णप्रिया

जैसे युग समाप्ति में प्रलयकाल में प्रलयाग्नि सर्व प्रकार की प्रजा को भस्म कर देती है उसी प्रकार भगवान् कृष्ण ने गदा, खड्ग, चक्र, बाण इत्यादि शस्त्रास्त्रों से करूषाधिराज पौण्ड्रक एवं काशीराज की दो और तीन अक्षौहिणी सेना के गज, रथ, अश्व एवं पैदल, चतुरङ्ग सैन्य का क्षय कर दिया ॥ १७ ॥ वह समराङ्गण श्रीकृष्ण के तीक्ष्ण नेमि सुदर्शन चक्र से चूर्ण हुए खण्डित हुए दोनों के सैन्य के रथ, अश्व, कुञ्जर-हाथी, पैदल, गर्दभ और ऊँटों से छा गया। तब यह काशिनगर का

समराङ्गण ऐसा लगता था कि भूतनाथ भगवान् त्र्यम्बक का भयानक क्रीड़ाङ्गण बन गया है। उस भयङ्कर समराङ्गण को देखकर वीरवरों में युद्ध का उत्साह बढ़ रहा था ॥ १८ ॥ अब शूरतनय भगवान वासुदेव पौण्ड्रक को कह रहे हैं कि भैया पौण्ड्रक ! आपने दूतमुख से द्वारिका के दरबार में जो सन्देश पहुँचाया था कि मेरे चिह्न सुदर्शनादि अस्त्र-शस्त्रों का त्याग करे। अब मैं उन अस्त्रों को तुझ पर ही छोड़ रहा हूँ ॥ १९ ॥ हे अज्ञ ! हे पौण्ड्रक ! तेरा नाम तो पौण्ड्रक है, फिर लोगों के बहकाने से मोहवश मेरा नाम रख लिया है। अब मैं तेरी देह को छुड़ाकर नाम भी छुड़ा रहा हूँ। बात रही तेरे शरण में होने की, यदि मैं तुझसे समराङ्गण न कर पाया तब शरणागत हो जाऊँगा ॥ २० ॥

इति क्षिप्त्वा शितैर्बाणैर्विरथीकृत्य पौण्ड्रकम् । शिरोऽवृश्चद्[1] रथाङ्गेन वज्रेणेन्द्रो यथा गिरेः ॥ २१ ॥
तथा काशिपतेः कायाच्छिर उत्कृत्य पत्रिभिः । न्यपातयत् काशिपुर्यां पद्मकोशमिवानिलः ॥ २२ ॥
एवं मत्सरिणं हत्वा पौण्ड्रकं ससखं हरिः । द्वारकामाविशत् सिद्धैर्गीयमानकथामृतः ॥ २३ ॥
[2]स नित्यं भगवद्ध्यानप्रध्वस्ताखिलबन्धनः । बिभ्राणश्च हरे [3]रूपं स्वरूपं तन्मयोऽभवत् ॥ २४ ॥

कर्दमक्षमा

अन्वयः—इत्थम्, क्षिप्त्वा, पौण्ड्रकम्, शितैः, बाणैः, विरथीकृत्य, यथा, इन्द्रः, गिरेः, शिरः, इव, रथाङ्गेन, तस्य, शिरः, अवृश्चत् ॥ २१ ॥ तथा, पत्रिभिः, काशिपतेः, कायात्, शिरः, उत्कृत्य, अनिलः, पद्मकोशम्, इव, काशिपुर्याम्, न्यपातयत् ॥२२॥ एवम्, मत्सरिणम्, ससखम्, पौण्ड्रकम्, हत्वा, हरिः, सिद्धैः, गीयमानकथामृतः, द्वारिकाम्, आविशत् ॥२३॥ राजन्, सः, हरेः, स्वरूपम्, बिभ्राणः, नित्यम्, भगवद्ध्यानप्रध्वस्ताखिलबन्धनः, तन्मयः, अभवत् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गिरेः शृंगं यथेति ॥ २१-२४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

रथांगेन चक्रेण । "रथांगं न द्वयोश्चक्रे ना चक्रांगविहंगमे" इति मेदिनी ॥ २१ ॥ यथा पौण्ड्रकस्य रथांगेन तथा काशिपतेः पत्रिभिरिति योज्यम् । पद्मकोशः पद्ममुकुलम् । काशीराजस्य शिरसः काशीमध्यनिक्षेपे इदं कारणमुन्नेयम्—भो भोः काशिस्था अद्य शत्रोः शिर एव काशीमध्य उन्नेष्यामि मात्रसंशेध्वमिति प्रतिज्ञायैव युद्धाय काशीराजो यदगच्छत् अस्मद्भर्तार्द्य द्वारकापतेः शिरोऽवश्यमानेष्यतीति तत्पत्न्योऽपि पापिन्यः सप्रौढिस्ववयस्याः प्रति यदजल्पंस्तत एव हेतोरतस्यैव शिरः काशीमध्ये तत्रत्यजनान्विस्मापयितुं प्रवेशयामास कौतुकी भगवानिति ॥ २२ ॥ एवमुक्तरीत्या ॥ २३ ॥ स पौंड्रकः । तन्मयः कृष्णस्वरूपः कृष्णसारूप्यमेव पेशस्कारीहृतकीटवदिति भावः ॥ २४-२६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

क्षिप्त्वा आक्षिप्य ॥ २१ ॥ अनिल इत्यदृश्यकर्तृत्वेनोपमानीकृतं तथा पत्रिणामपि तत्प्रक्षिप्त्यैव निवृत्तेरदृश्यकरणत्वेन च ॥ २२ ॥ मत्सरिणं भगवदुत्कर्षासहनं सिद्धैर्जीवन्मुक्तैर्विमानगामिभिश्च सर्वैस्तन्महाकौतुकदर्शनार्थमागतैर्गीयमानं कथामृतं पौण्ड्रकवधादिलक्षणं यस्य तथाभूतस्सन् ॥ २३ ॥ मत्सरावेशमपि दर्शयन् द्वेष्यादिवन्मुक्तिमाह—स पौंड्रकः हरेः स्वरूपं स्वीयं रूपं चतुर्भुजत्वादि तद्बिभ्राणः अनुकुर्वाणः तन्मयः प्राचुर्य्येण तद्रूपोऽभवत् सारूप्यं प्रापेत्यर्थः । यतो नित्यमित्यादि तादृशभावनया पेशस्कारिहृतकीटवदिति भावः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इति—एवम्, क्षिप्त्वा आक्षिप्य, यथेति दृष्टान्तेन शिरोव्रश्चने अनायासत्व-शीघ्रत्वादिकं सूचयति । विशेषेण पुरान्तर्महाशब्दादिना अपातयत् ॥ २१ ॥ पत्रिभिरिति बहुत्वं तत्र पातनार्थम्, तेषां बाहुल्याद् गौरवाद्वा । पद्मेति दृष्टान्तेनाकस्मादाकाशवर्त्मना पातनादिकं द्योतयति ॥ २२ ॥ मत्सरिणमिति, तस्य प्रायो भगवदुत्कर्षासहनात्; सिद्धैर्जीवन्मुक्तैर्विमानगामिभिर्वा सर्व्वैः, गीयमानं कथामृतं पौण्ड्रकवधादिलक्षणं यस्य तथाभूतः सन् ॥ २३ ॥ स पौण्ड्रकः, तत् ब्रह्म, तन्मयो भूतः, मोक्षं प्रापेत्यर्थः । कुतः ? नित्यं यद्भगवतो ध्यानं मात्सर्य्येण चिन्तनविशेषस्तेन प्रकर्षेण ध्वस्तमखिलं बन्धनं संसारबन्धः, किंवा

---

[1] हरद्रथा-विज । [2] अयं श्लोको नास्ति-विज. । [3] राजन्-श्रीधर. वंशी. जीव. वीर. बिज. विश्व. ।

वध्यन्ते जीवा एतैरिति बन्धनानि कर्म्माणि प्रध्वस्तानि अखिलानि पापपुण्यलक्षणानि यस्य सः, प्र-शब्देनाखिल-शब्देन च श्रीभगवन्मात्सर्य्यादिदोषध्वंसोऽपि द्योतितः। भोगं विनापि सर्व्वकर्म्मप्रध्वंसो भगवद्ध्यानप्रभावादेव, अन्यथा मोक्षासिद्धिः। नित्यभगवद्ध्याने हेतुः—हरेः स्वकीयमसाधारणं रूपं वेशं विभ्राण इति। चकारात्तन्मित्रं काशिराजश्च; अथवा नित्येति सर्व्वपापबन्धप्रध्वंस उक्तः,—मात्सर्य्यादिना तद्ध्यानेन सदा महादुःखोद्गमात्। पुण्यध्वंसं चाह—विभ्राण इति। च समुच्चये, तद्रूपधारणेन सुखविशेषोदयादिति भावः। हरेरिति रूपस्यापि मनोहरता सूचिता। हे राजन्निति भगवद्ध्यानस्याश्चर्य्य-प्रभावात् ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

स्वरूपं वेषं विभ्राणस्तन्मयोऽभवत् तदीयवेषप्रचुरोऽभवत् शिरश्छेदेन दोषस्य प्रायश्चित्तं कृतम् अतो भगवद्ध्यानस्य फलमनन्तरमित्यभिप्रायः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीति। उक्त्वेति शेषः। रथाङ्गेन चक्रेण शिरोऽवृश्चत् चिच्छेद यथेन्द्रो वज्रेण गिरेः शृङ्गं तद्वदित्यर्थः ॥ २१ ॥ तथेति। पत्त्रिभिर्बाणैः काशिपतेः कायाच्छिर उत्कृत्य उत्प्लुतं यथा तथा छित्वा काशीपुर्यां न्यपातयदनिलो वायुः पद्मकोशमिव ॥ २२ ॥ एवमिति। ससखं सकाशिराजं मत्सरिणं शत्रुं पौण्ड्रकं हत्वा सिद्धैः गीयमाना कथैवामृतं यस्य स हरिर्द्वारकां विवेश ॥ २३ ॥ स इति। स पौण्ड्रकः भगवतः श्रीकृष्णस्य ध्यानेन ध्वस्तान्यखिलानि बन्धनानि कर्मबन्धनानि यस्य सः हेतुगर्भमिदं तथा हरेः कृष्णस्य रूपं रूपतुल्यं स्वरूपं स्ववेषं बिभ्राणम् इत्यपि तत्त्वात्तन्मयस्तदीयवेषप्रचुरो बभूव साधर्म्यं गत इत्यर्थः। शिरश्छेदेन दोषस्य प्रायश्चित्तं कृतमतो भगवद्ध्यानस्य फलं तत्साधर्म्यं लब्धमिति भावः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

काशिराजस्य शिरसः काशीमध्ये निक्षेपे इदं कारणमुन्नेयं भोभो काशीस्थाः! अद्य शत्रोः शिर एव काशीमध्यमानेष्यामि मात्र संशेध्वमिति प्रतिज्ञायैव युद्धाय काशिराजो यदगच्छत् अस्मद्भर्त्ता द्वारकापतिः शिरोऽस्यावश्यमेवानेष्यतीति तत्पत्न्योऽपि पापिन्यः सप्रौढिस्ववयस्याः प्रति यदजल्पंस्तत एव हेतोस्तस्यैव शिरः काशीमध्ये तत्रत्यजनान् विस्मापयितुं प्रवेशयामास कौतुकी भगवानिति ॥ २२–२३ ॥ हरेः स्वरूपं चतुर्भुजत्वम् ॥ २४ ॥

गूढार्थदीपिनी

शितै तीक्ष्णैः। अवृश्चत् चिच्छेद। गिरेः शृङ्गमिति शेषः ॥ २१ ॥ पत्त्रिभिः बाणैः उत्कृत्य छित्त्वा। 'कृतो छेदने' धातुः ॥ २२ ॥ परोत्कर्षासहनं मत्सरः तद्वान् मत्सरी ॥ २३ ॥ बन्धनम् अविधालक्षणम् ॥ २४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यथा गिरेः शृङ्गमित्यध्याहृत्य योज्यम् ॥ २१–२३ ॥ तन्मयोभवत् भगवत्साधर्म्यलक्षणं प्राप्तवानित्यर्थः ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तथाप्यनिवृत्तं भगवान्मारितवानित्याह इति क्षिप्त्वेति। क्षेपो दोषस्मारणम्, सितैः तीक्ष्णैर्बाणैः अश्वान् हत्वा विरथीकृत्य चक्रेण शिरश्चिच्छेद। भक्तवधोऽनुचित इत्याशङ्क्य, परोपद्रवकारित्वात् मारितवानिति ज्ञापयितुं दृष्टान्तमाह वज्रेणेन्द्र इति। यद्यपि 'विष्णुः पर्वतानामधिपतिः' इति तेषां पक्षच्छेदोऽनुचितः, तथापि लोकेत्युपद्रवकर्तृत्वाद्धननमिन्द्रद्वारा। पक्षावेव शिरःस्थानीयौ ॥ २१ ॥ सात्त्विकवधमुक्त्वा तामसवधमप्याह तथा काशिपतेरिति। विरथीकृत्य तमप्याक्षिप्य। चक्रेण हतो मुक्तो भविष्यतीति, छिन्नमपि शिरश्चेद्भगवान् पश्येत्, तथापि मुक्तो भवेदिति कालावयवभूतैः पत्त्रिभिर्बाणैः शिर उत्कृत्य काशिपुर्यां व्यपातयत्। साहाय्यं शरीरेणैव कृतमिति शरीरांशः तस्य मुक्तः कृतः। तस्य मध्ये पतनादिकमाशङ्क्य दृष्टान्तमाह पद्मकोशमिवानिल इति। अनेन व्याजेन भगवान् महादेवे तच्छिरःकमलपूजां कृतवानिति द्योतितम् ॥ २२ ॥ युद्धमुपसंहरन् भगवतो द्वारकागमनमाह एवं मत्सरिणं हत्वेति। भक्तस्यापि हनने मात्सर्यमेव हेतुः, काशिराजवधे तत्सखित्वं हेतुरिति। ततो भगवत्कृतं लोकशास्त्राविरुद्धमिति ज्ञापयितुं सिद्धैर्गीयमानकथामृत इत्युक्तम्। एवं सर्वदुःखहर्ता तेषां दुःखं दूरीकृत्य द्वारकामाविशत् ॥ २३ ॥ पौण्ड्रकस्य हननानन्तरं या गतिर्जाता तामाह स नित्यमिति। स तन्मयोऽभवत्, तेन व्याप्तोऽभवत्। आत्मनि परमात्मा आविष्टः तेनावेशी जातः। शरीरेन्द्रियप्राणान्तःकरणसद्भावे आधिदैविकानि शरीरादीनि तत्राविष्टानि, अन्यथा तु स्वतन्त्रावेशीव भगवद्गणो जातः, तत्र च भगवत इव तस्यापि लीला भविष्यतीति मुख्यः पक्षः।

विष्णुदेवतानुरूपत्वे तु वैष्णवलोके तथात्वमिति शङ्खचक्रादिभावस्यैव प्राधान्यादिति केचित्। तस्य तथात्वे हेतुमाह। नित्यं भगवद्ध्यानेन प्रध्वस्तानि अविद्याकामकर्मादीनि मात्सर्यादीनि च पश्चादुत्पन्नानि उभयविधान्यपि बन्धनानि यस्य। अनेन देहान्तरोत्पादकं कर्म निवर्तितम्। भगवदावेशे हेतुमाह बिभ्राणश्च हरे रूपमिति। हरिः रूप्यते अनेनेति शङ्खचक्रादिभावसमुदायः। तं बहिर्बिभ्रत्। स्वरूपं तु मनसा बिभ्रत्। चकारात्तत्क्रियादीनां सर्वेषामाधानमुक्तम्। एवं सर्वसामग्र्यां तन्मयत्वं युक्तमेव। पौण्ड्रकस्य गतिमुक्त्वा तेन सहागतस्य काशिराजस्यापि कथं सा न गतिरिति शङ्कां वारयितुं तदुत्पन्नानां तदीयानां सर्वेषामेव परमं दोषमाह यावदध्यायपरिसमाप्ति। अर्थात्तेऽपि निरुद्धाः, तीर्थमपि निरुद्धं भवतीति निरूपितम् ॥ २४ ॥

श्रीसुबोधिनी-सारः

इत्येवं क्षिप्त्वाऽऽक्षेपं कृत्वा शितैः तीक्ष्णैर्बाणैः पौंड्रकं विरथीकृत्य रथांगेन चक्रेण तस्य शिरोच्छिनत् गिरेः पर्वतस्य शिरो वज्रेणेंद्र इव ॥ २१ ॥ तथा तद्वत् काशीपतेः सत्सख्युः सेनजितः कायात् शिर उत्कृत्य छित्वा पत्रिभिर्बाणैः काशीपुर्यां न्यपातयत् पद्मकोशमनिलो वायुरिव ॥ २२ ॥ एवं ससखं समित्रं मत्सरिणं परोत्कर्षाऽसहिष्णुं पौंड्रकं हत्वा सिद्धैर्गीयमानं कथामृतं यस्य स द्वारकामाविशत् हरिः प्राविशत् ॥ २३ ॥ नित्यं भगवतो ध्यानेन प्रध्वस्तान्यखिलानि बंधनानि यस्य स हरे रूपं वेषं बिभ्राणः संदधत् स मिथ्यावासुदेवस्तद्रूपोभवत् हे राजन् ॥ २४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तथा काशिपतेरित्यत्र। मुक्तः कृत इति। मस्तकाद्भिन्नः कृतः। शरीरं पौण्ड्रकसमीपे मस्तकं काश्यां पतितमित्यर्थः। अनेनेति। पद्मकोशदृष्टान्तेनेत्यर्थः। स नित्यमित्यत्र। शरीरेन्द्रियेति। 'तमुत्क्रामन्तं प्राणं नूत्क्रामती'ति पक्षे वासनात्मकदेहादिसद्भावे तत्र वासनात्मकदेहादौ आधिदैविकानि शरीरादीन्याविष्टानीत्यर्थः। अन्यथा स्थिति। 'इहैव समवनीयन्ते प्राणा' इति पक्षे तु देहादिकं विनैव 'चिति तन्मात्रेणे'ति न्यायेन भगवत्पार्षदो जात इत्यर्थः। तत्र चेति। भगवत्पार्षदत्वे जाते सतीत्यर्थः। भगवत इवेति। यथा भगवतो देहादिरहितस्यैव लीला, तथैतस्यापीत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्येवं वचनैः क्षिप्त्वा तिरस्कृत्य रथाङ्गेन चक्रेण तस्य शिरोऽवृश्चत् चिच्छेद। यथेन्द्रो वज्रेण गिरेः शृङ्गं तथेति ॥ २१ ॥ तथा पौण्ड्रकशिरवत् तन्मित्रस्य काशिपतेः शिरः पत्त्रिभिर्बाणैः कायादुत्कृत्य च्छित्त्वा काशिपुर्यां न्यपातयत्। तत्र दृष्टान्तमाह—अनिलो वायुः यथा पद्मकोशमुत्कृत्य पातयति तथेति ॥ २२ ॥ एवं ससखं काशिराजसहितं मत्सरिणं स्वोत्कर्षासहं शत्रुं पौण्ड्रकं हत्वा सिद्धैर्गीयमाना कथैवामृतं यस्य स हरिर्द्वारकामाविशत् आगच्छत् ॥ २३ ॥ 'भगवद्ध्यानमाहात्म्याश्चर्यं शृणु' इति सम्बोधयति—राजन्निति। स पौण्ड्रकः नित्यं वैरेणापि भगवतः कृष्णस्य ध्यानेन ध्वस्तान्यखिलानि बन्धनानि कर्मवासनारूपाणि अविद्यादीनि यस्य सः हरेः स्वरूपं समानं रूपं बिभ्राणस्तन्मयोऽभवत् तल्लोकं गत्वा तल्लीलापरिकरे प्रविष्टोऽभूदित्यर्थः ॥ २४ ॥

अन्वितार्थप्रकाशिका

इतीति ॥ इत्येवं वचनैः पौण्ड्रकं क्षिप्त्वा तिरस्कृत्य शितैर्बाणैः विरथीकृत्य च यथेन्द्रो वज्रेण गिरेः शृङ्गं वृश्चति तथा रथाङ्गेन चक्रेण तस्य शिरोऽवृश्चत् चिच्छेद ॥ २१ ॥ तथेति ॥ तथा पौण्ड्रकशिरोवत् तन्मित्रस्य काशिपतेः शिरः पत्त्रिभिर्बाणैः कायादुत्कृत्य छित्त्वा काशिपुर्यां न्यपातयत्। यथा अनिलो वायुः पद्मकोशमुत्कृत्य पातयति तथेति ॥ २२ ॥ एवमिति ॥ ससखं काशिराजसहितम्। बहुव्रीहौ टजार्षः। मत्सरिणं स्वोत्कर्षासहं शत्रुं पौण्ड्रकं हत्वा सिद्धैर्गीयमाना कथैवामृतं यस्य स हरिर्द्वारकामाविशत् आगच्छत् ॥२३॥ स इति ॥ हे राजन्! स पौण्ड्रकः नित्यं वैरेणापि भगवतः कृष्णस्य ध्यानेन प्रध्वस्तान्यखिलानि बन्धनानि कर्मवासनारूपाणि अविद्यादीनि यस्य सः हरेः स्वरूपं समानं रूपं चतुर्भुजत्वादि बिभ्राणस्तन्मयोऽभवत् ॥२४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गिरेः शिखरं यथा तथा शिरोऽवृश्चत् चिच्छेद ॥२१॥ पौण्ड्रकमित्रस्य काशिपतेः ॥२२-२३॥ सः पौंड्रकः तन्मयो हरितेजसि लीन इत्यर्थः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति। इति उक्त्वेति शेषः। क्षिप्त्वा तिरस्कृत्य च, शितैस्तीक्ष्णैः, बाणैः पौण्ड्रकं, विरथीकृत्य, इन्द्रः वज्रेण, गिरेः शृङ्गमिति शेषः। यथा, पर्वतस्य शिखरमिवेत्यर्थः। रथाङ्गेन चक्रेण, तस्य शिरः, अवृश्चत् ॥ २१ ॥ तथेति ॥ तथा,

पत्त्रिभिर्बाणैः, काशिपतेः कायात्, शिरः उत्कृत्य उत्प्लवं यथा तथा छित्त्वा, अनिलः पद्मकोशं इव, काशिपुर्यां, न्यपातयत् ॥ २२ ॥ एवमिति । हरिः श्रीकृष्णः, ससखं सकाशीराजं, मत्सरिणं शत्रुं पौण्ड्रकं हत्वा, सिद्धैः गीयमानं कथैवामृतं यस्य सः, तथाभूतः सन्, द्वारकां आविशत् प्रविवेश ॥ २३ ॥ स इति । सः पौण्ड्रकः, नित्यं भगवतः श्रीकृष्णस्य ध्यानेन प्रध्वस्तान्यखिलानि बन्धनानि कर्मबन्धनानि यस्य सः, हेतुगर्भमिदं, तत्त्वात् हरेः श्रीकृष्णस्य, स्वरूपं तद्रूपतुल्यस्वरूपं, बिभ्राणः संख्य, हे राजन्, तन्मयः, अभवत् । साधर्म्यं गत इत्यर्थः ॥ २४ ॥

कृष्णप्रिया

इस प्रकार वाग् बाणों से पौण्ड्रक के मनोबल का वध करके भगवान् श्रीकृष्ण ने अपने शार्ङ्ग धनुष से छोड़े हुए तीक्ष्ण बाणों से पौण्ड्रक के रथ का सर्वथा नाश कर दिया। पुनः सुदर्शन चक्र की तीक्ष्ण धारा से पौण्ड्रक के मस्तक को ऐसे उतार लिया कि जैसे नाकनरेश इन्द्र ने गिरिवर के शिखर को अपने वज्र से उतार दिया था ॥ २१ ॥ पुनः पृष्ठग्राही काशीनरेश के मस्तक को भी धड़ से उपर उड़ाकर काशीपुरी में गिराया; मानो वायुदेवता ने कमल के पुष्प को कमलनाल से गिरा दिया था ॥ २२ ॥ महाराज परीक्षित् ! इस प्रकार मत्सरवाले पौण्ड्रक को एवं पौण्ड्रक के मित्र काशिराज को युद्ध में मारकर भगवान् श्रीहरि अपनी राजधानी द्वारिका नगरी में पधारे। नाथ के द्वारिका नगर प्रवेश के समय सारे सिद्ध लोग भगवान् श्रीकृष्ण की मङ्गलमयी कथासुधा का गान करते थे ॥ २३ ॥ महाराज परीक्षित् ! कृपानिधान श्रीकृष्ण की करुणा की महिमा सुनें ! पौण्ड्रक भगवान् श्रीकृष्ण का चतुर्भुज स्वरूप का चिन्तन एवं नाटक कर रहा था। उसका भाव भक्तिसंभर हो या मत्सरपूर्ण, लेकिन चिन्तन तो सच्चिदानन्द का ही था। यदि ऐसे मत्सरभाव से भी चिन्तन करने वालों की उर्ध्वगति दयानिधि भगवान् श्रीकृष्ण कर देते हैं तब अनन्य भाव से भजने वालों के लिये क्या कहा जाय ॥ २४ ॥

शिरः पतितमालोक्य राजद्वारे[1] सकुण्डलम् । किमिदं कस्य वा वक्त्रमिति संशिश्यिरे जनाः ॥ २५ ॥
राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबान्धवाः । पौराश्च हा हता राजन् नाथ नाथेति [2]प्रारुदन् ॥ २६ ॥
सुदक्षिणस्तस्य सुतः कृत्वा संस्थाविधिं पितुः । निहत्य पितृहन्तारं यास्याम्यपचितिं पितुः ॥ २७ ॥
इत्यात्मनाभिसंधाय सोपाध्यायो महेश्वरम् । सुदक्षिणोऽर्चयामास परमेण समाधिना ॥ २८ ॥

कर्दमक्षमा

अन्वयः—राजद्वारे, पतितम्, सकुण्डलम्, शिरः, पतितम्, आलोक्य, इदम्, किम् ? वा, कस्य, इदम्, वक्त्रम्, इति, जनाः, संशिश्यिरे ॥ २५ ॥ काशिपतेः, राज्ञः, इति, ज्ञात्वा, महिष्यः, पुत्रबान्धवाः, च, पौराः, हा राजन् ! हा नाथ !, इति, प्रारुदन् ॥२६॥ तस्य, सुतः, सुदक्षिणः, पितुः, संस्थाविधिम्, कृत्वा, पितृहन्तारम्, निहत्य, पितुः, अपचितिम्, यास्यामि ॥२७॥ सुदक्षिणः, इति, आत्मना, अभिसन्धाय, सोपाध्यायः, सुदक्षिणः, परमेण, समाधिना, महेश्वरम्, अर्चयामास ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रथमं किमिदमिति पश्चाद्वक्त्रमिति विभाव्य कस्य चेति संशयं कृतवंत इति ॥२५-२६॥ संस्थाविधिमुत्तरक्रियाम् । अपचितिं निष्कृतिम् ॥ २७ ॥ आत्मनाऽभिसंधाय बुद्ध्या व्यवस्य । सुदक्षिणोऽत्युदारः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्पुत्रस्ततोऽपि दुर्बुद्धिरित्याह—तस्य काशिपतेः । "भवेदपचितिः पूजाव्ययनिष्कृतिहानिषु" इति मेदिनी ॥ २७ ॥ इतीत्थम् । समाधिना ध्यानेन "समाधिर्ना समर्थने । ध्याने नीवाकनियमे काव्यस्य च गुणांतरे" इति मेदिनी । नीवाको धान्यसञ्चयः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

संशिश्यिरे तस्य वाऽन्यस्य वेदमिति नानाप्रकारं तर्कयामासुः जनाः साधारणाः ॥ २५ ॥ हा हताः स्म इति शेषः ॥ २६ ॥ तत्सुतस्तु ततोऽपि दुर्बुद्धिरित्याह—सुदक्षिण इत्यादिना । तत्रादौ द्वयं युग्मकं सुदक्षिणस्तत्संज्ञः सोपाध्यायः पुरोहितसहितः समाधिना एकाग्रचित्ततया ॥ २७-२८ ॥

---

१. द्वारि–वीर. विज. । २. नाथेत्युपाद्रवन्–विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कस्य चेति संशिशियिरे, निश्चेतुं न शक्ता इत्यर्थः। यतो जनाः पौरप्रजाः ॥ २५ ॥ ज्ञात्वा परिचित्य, **यतस्तस्य** महिष्यादयः, अतः प्रकर्षेण उच्चैरार्त्तस्वरादिनाऽरुदन्। कथम् ? राजन् ! हे भूपते ! नाथ ! 'हे अस्मत्स्वामिन् ! हा हताः स्मः' इत्येवं वीप्सादि शोकात् महिष्यादीनां यथापूर्वं ज्ञाने प्ररोदने चाधिक्यम् ॥ २६ ॥ सुदक्षिणस्तत्संज्ञः ॥ २७ ॥ सोपाध्यायः पुरोहितसहितः, समाधिना एकाग्रचित्ततया, अन्यत्तैर्व्याख्यातम्। यद्वा, आत्मना स्वयमेवाभिसन्धाय संकल्प्य; इति तादृशदुष्टसंकल्पे **तस्यैव** प्राधान्यं सूचितम् ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

संशिशियिरे संशयञ्चक्रुः ॥ २५-४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

शिर इति। प्रथमं किमिदमिति पश्चात् सकुण्डलत्वाच्छिर इति ततः कस्येदं मुखमिति संशिशियिरे संशयञ्चक्रुः ॥२५॥ राज्ञ इति। ततः क्रमेण काशीपतेः राज्ञ एवेदं शिर इति ज्ञात्वा निश्चित्य महिष्यस्तस्य भार्याः पुत्रादयश्चेत्थं रुरुदुः ॥ २६ ॥ पुत्र इति। तस्य काशीराजस्य सुदक्षिणो नाम पुत्रः आसीदिति वाक्यान्तरं स च सुदक्षिणः पितुः संस्थाविधिम् उत्तरक्रियां कृत्वा मत्पितृहन्तारं हत्वा पितुरपचितिम् ऋणापनयनात्मिकां निष्कृतिं यास्यामि ॥ २७ ॥ इतीत्थमभिसन्धाय उपाध्यायेन सहितः परमेण समाधिना ध्यानयोगेन महेश्वरं रुद्रमाराधयामासेति सम्बन्धः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

प्रथमं किमिदमिति पश्चाद्वक्त्रमिति संशिशियिरे सन्देहं प्रापुः ॥ २५-२८ ॥

गूढार्थदीपिनी

संशिशियिरे संशयं प्रापुः। 'संशयिरे' इत्यपपाठः ॥२५-२६॥ संस्थाविधिं मृतकक्रियाम्। अपचितिम् आनृण्यम् ॥२७॥ आत्मना मनसा अभिसन्धाय सङ्कल्प्य। समाधिना चित्तैकाग्र्येण ॥ २८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

संशिशियिरे संशयं चक्रुः ॥ २५-२८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

यद्भगवता पत्त्रिभिः शिरश्छिन्नम्, तद्राजद्वारि पतितम्, तदालोक्य। राजत्वज्ञापनाय सकुण्डलमिति। मुखं रुधिराविलमिति कुण्डले अभिज्ञापके निरूपिते। आदौ पतनसमये किमिदं पतितमिति बुद्धिरुत्पन्ना, ततः शिर इति ज्ञात्वा कस्येति, ततो राज्ञो भविष्यतीति ज्ञातेऽपि वक्तुमयुक्तत्वात्संशिशियिरे। संशयं प्राप्ताः ॥ २६ ॥ ततोन्तरङ्गाः समागत्य निश्चयं चक्रुरित्याह **राज्ञः काशिपतेरिति**। महिष्यः स्त्रियः, बान्धवा गोत्रिणः, पौराः सेवकाः, चकारादन्येऽपि साधारणाः, तथा वक्तुमनुचितमित्याशङ्क्य, तेषां तुल्यव्यसनत्वं निरूपयितुमाह **हा हता राजन्निति**। माहात्म्ये **राजन्निति**। स्नेहे **नाथेति**। **यथा स्ववधे** राजा बोध्यते, तद्वद्बोधयांचक्रुरित्यर्थः। चकारात्पितः स्वामिन्नित्याद्यपि। स्ववधे यथा क्लेशेन रोदनम्, तथा मुखतो वदन्त एव रोदनं कृतवन्तः ॥ २६ ॥ ततः क्षत्रिय इति मानभङ्गार्थं भगवतैवं प्रदर्शितमिति वैरं सिसाधयिषुः विष्णोः समानौ ब्रह्मशिवौ ज्ञात्वा तयोराराधनार्थं प्रवृत्त इत्याह **सुदक्षिणस्तस्य सुत** इति। ब्रह्ममहादेवौ पितृहन्ता तस्य सहजो देहादिदोष इति तद्वधार्थं प्रयत्नं करोतीति तूष्णीं स्थितौ। जातश्चार्थस्तथैव। बहुदक्षिणयज्ञादुत्पन्नः। **सुदक्षिण** इति वैदिकप्रकारे तस्य श्रद्धा, अन्यथा राज्ञामनुवृत्तिमेव लौकिकीं कुर्यात्। संस्थाविधिः पारलौकिकी क्रिया। पितृत्वात्तदावश्यकम्। ततोऽपि क्षत्रियो न निष्कृतो भवतीति पितृहन्तारं स्वादृष्टशरीरादिकं हत्वैव अपचितिं यास्यामीति ॥ २७ ॥ स्वबुद्ध्यै विचारितवानित्याह **इत्यात्मनाभिसंधायेति**। सोपाध्यायो ब्राह्मणसहितः। **महेश्वरमिति**। ब्राह्मणादपि महादेवं महान्तं मन्यते। कदाचिद्ब्राह्मणाः, ब्रह्मण्यो भगवानिति पक्षपातं कुर्युरिति। **परमेण समाधिनेति**। योगेन महादेवस्तुष्यतीति। परमः साक्षान्महादेवप्रीतिजनकः। समाधिः चित्तैकाग्र्यम्, तेन तुष्यतीति शैवतन्त्रसिद्धत्वात्तथा कृतवान् ॥ २८ ॥

श्रीसुबोधिनी-सारः

राजद्वारे सकुंडलं पतितं शिर आलोक्य दृष्ट्वा इदं किं कस्य वा वक्त्रं मुखमिदमिति जनाः संशयं चक्रुः ॥ २५ ॥ ततो निश्चित्याह। काशिपतेः संज्ञायां ह्रस्वः राज्ञो ज्ञात्वा तस्य महिष्यः पट्टराज्ञ्यः पुत्रबांधवाः पौरा नागरा हा कष्टं वयं हता मृता इति प्रारुदन् हे नाथनाथ ॥ २६ ॥ तस्य काशिराजस्य सुतः सुदक्षिणः पितुः संस्थाविधिं मरणक्रियां कृत्वा पितुर्हन्तारं

घातकं निहत्य हत्वा पितुरपचितिमानृण्यमहं यास्यामि ॥ २७ ॥ इत्येवमात्मना मनसाऽभिसंधाय संकल्प्य सोपाध्यायः गुरुसहितः सुदक्षिणः परमेण समाधिना महादेवं पूजयामास ॥ २८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

शिरःपतनमित्यस्याभासे । **निरुद्धा** इति । विरुद्धप्रकारेणापि भगवत्येव चित्तवृत्तीनां निरोध इत्यर्थः । **तीर्थमपी**ति । तीर्थस्था अपीत्यर्थः । **सुदक्षिणस्तस्य सुत** इत्यत्र । ननु भगवद्द्रोहार्थं प्रवृत्तो ब्राह्मणैः ऋत्विग्भिर्देवेन महारुद्रेण च कुतो न निवारित इत्यत आहुः **ब्राह्मणे**ति । अयं पितृहन्तृवधार्थं यतते, पितृहन्ता तु सहजोऽस्यैव देहादिदोषः । देहेन साहाय्य कृतमतो मारितः । हेतुत्वेपि प्राधान्यविवक्षया कर्तृत्वम् । तथा च तस्य सुदक्षिणस्य पितृहन्ता पितृदेह एव, तद्वधार्थं प्रयत्नं करोति, न तु भगवति किञ्चित्, अतस्तूष्णीं स्थितौ न निवारितवन्तावित्यर्थः । **जातश्चार्थ** इति । कार्यकारणयोरभेदेन 'आत्मा वै पुत्रनामासी'ति श्रुतेश्च पितापुत्रदेहयोरैक्येन सुदक्षिणदेहनाश एव जात इत्यर्थः । **स्वादृष्टशरीरादिक**मिति । स्वस्य सुदक्षिणस्यादृष्टं उक्तरीत्या भेदेन शरीरादिकं च पितृहन्तृ इत्यर्थः । इत्यात्मनेत्यत्र । भगवत्सांनिध्ये इति पूज्यदेवसांनिध्ये इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

काश्यां राजद्वारे सकुण्डलं शिरः पतितमालोक्य जनाः प्रथमं "किमिदमिति, पश्चात्सकुण्डलत्वात् शिर इति, ततः कस्येदं वक्त्रं मुखम्" इति संशिश्यिरे संशयं चक्रुरित्यर्थः ॥ २५ ॥ ततश्च काशिपतेः राज्ञ एवेदं शिर इति ज्ञात्वा निश्चित्य तस्य महिष्यो भार्याः पुत्रादयः हे राजन् ! हे नाथ नाथ ! त्वयि हते सति त्वदनुयायिनो वयं सर्व एव हताः स्मेति वदन्तः प्रारुदन् ॥ २६ ॥ तस्य काशिराजस्य सुदक्षिणो नाम सुतः आसीत् । स च पितुः संस्थाविधिं उत्तरक्रियां कृत्वा स्वपितृहन्तारं निहत्य पितुरपचितिं ऋणापनयात्मिकां निष्कृतिं यास्यामि ॥ २७ ॥ इत्येवमात्मनाऽभिसन्धाय बुद्ध्या निश्चित्य सोपाध्यायः उपाध्यायेन सहितः सुदक्षिणः सुष्ठु दक्षिणा यस्य स अत्युदारः परमेण समाधिना एकाग्रेण चित्तेन महेश्वरं रुद्रमर्चयामासेत्यन्वयः ॥ २८ ॥

अन्वितार्थप्रकाशिका

शिर इति ॥ काश्यां राजद्वारे सकुण्डलं शिरः पतितमालोक्य जनाः प्रथमं किमिदमिति पश्चात्सकुण्डलत्वात् शिरः इति ततः कस्येदं वक्त्रं मुखमिति संशिश्यिरे संशयं प्रापुः । संशयिरे इति बहुषु पुस्तकेषु दृश्यमानः पाठस्त्वार्षः ॥ २५ ॥ राज्ञ इति ॥ काशिपतेः राज्ञ एवेदं शिर इति ज्ञात्वा निश्चित्य तस्य महिष्यो भार्याः पुत्राः बान्धवाश्च हे राजन् ! हे नाथ नाथ ! त्वयि हते सति त्वदनुयायिनो वयं सर्व एव हताः स्मेति वदन्तः प्रारुदन् ॥ २६ ॥ तत्पुत्रस्ततोऽपि दुर्बुद्धिरित्याह—सुदक्षिण इति ॥ तस्य काशिराजस्य सुदक्षिणो नाम सुतः आसीत् । स च पितुः संस्थाविधिम् उत्तरक्रियां कृत्वा स्वपितृहन्तारं निहत्य पितुरपचितिम् । ऋणापनयात्मिकां निष्कृतिं यास्यामि ॥ २७ ॥ इतीति ॥ इत्येवमात्मनाऽभिसन्धाय बुद्ध्या निश्चित्य सोपाध्यायः उपाध्यायेन सहितः सुदक्षिणः सुष्ठु दक्षिणा यस्य सः अत्युदारः परमेण समाधिना एकाग्रेण चित्तेन महेश्वरं रुद्रमर्चयामास ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

संशिश्यिरे संदेहं चक्रुः ॥ २५ ॥ हा हताः स्मेति शेषः ॥ २६ ॥ संस्थाविधिं मृतस्यौर्ध्वदैहिकीं क्रियां पितुः अपचितिं वैरनिवारणं यास्यामि ॥ २७ ॥ आत्मना मनसा अभिसंधाय विचार्य । समाधिना चित्तैकाग्र्येण ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शिर इति ॥ जनाः प्रथमं, इदं किं इति, पश्चात् सकुण्डलं हेतुगर्भमिदं सकुण्डलत्वादित्यर्थः । शिरः, इति, ततः कस्य वा, इदं वक्त्रं मुखं इति, राजद्वारि पतितं आलोक्य, संशयिरे संशयं चक्रुः ॥ २५ ॥ राज्ञ इति ॥ ततः, हे राजन्, क्रमेण काशीपतेः, राज्ञः शिर एतदिति शेषः । ज्ञात्वा, महिष्यस्तत्पट्टराज्ञ्यः, पुत्राश्च बान्धवाश्च ते, पौराः पुरजनाश्च, हा इति खेदे । हे नाथ, हे नाथ, हताः इति उक्त्वा, प्रारुदन् ॥ २६ ॥ पुत्र इति ॥ सुदक्षिणः सुदक्षिणाख्यः, तस्य राज्ञः, पुत्रः आसीदिति वाक्यान्तरं, स च, पितुः संस्थाविधिमुत्तरक्रियां कृत्वा, पितृहन्तारं, निहत्य हत्वा, पितुः अपचितिमृणापनयनात्मिकां निष्कृतिं, यास्यामि ॥ २७ ॥ इतीति ॥ इतीत्थं, आत्मना बुद्ध्या, अभिसंधाय व्यवस्य, सोपाध्याय उपाध्यायेन सहितः, सुदक्षिणः परमेण समाधिना ध्यानयोगेन, महेश्वरं रुद्रं, अर्च्चयामास ॥ २८ ॥

कृष्णप्रिया

राजन् परीक्षित् ! काशीपुरी में राजमहल के द्वार पर कुण्डल से समलङ्कृत गिरे हुए मस्तक को देखकर नगर के नागरिकजन विविध प्रकार के सन्देह करने लगे एवं विचार करने लगे कि यह मस्तक यहाँ राजमहल के द्वार पर कैसे आया एवं यह मस्तक किस व्यक्ति का होगा ॥ २५ ॥ राजपरिवार को यह पता लगा कि यह मस्तक तो महाराज काशीनरेश का ही है, तब पट्टरानियाँ, पुत्रलोग, बन्धु-स्वजन एवं पौरजन विलाप करते रोने लगे कि हा नाथ ! हा नाथ ! आपके जाने से आज हम सब अनाथ हो गये ॥ २६ ॥ काशिनरेश के वियोग से खिन्न उनके पुत्र सुदक्षिण ने पिता का अग्नि प्रदान संसार करके श्राद्ध आदि संस्कार शास्त्रोक्त विधि से किये। पुनः अपने मन से यह निश्चय किया मेरे पिताजी को मारने वाले को मारकर ही मैं पितृऋण से मुक्त बनूँगा। उस संकल्प की सिद्धि के लिये सुदक्षिण अपने कुलाचार्य एवं कुलपुरोहितों से मिलकर अत्यन्त तन्मयता और निष्ठा से भगवान् काशीनाथ की आराधना करने लगा ॥ २७-२८ ॥

[1]प्रीतोऽविमुक्ते भगवांस्तस्मै वरमदाद् भवः। पितृहन्तृवधोपायं स वव्रे [2]वरमीप्सितम् ॥ २९ ॥
दक्षिणाग्निं परिचर ब्राह्मणैः [3]सममृत्विजम्। अभिचारविधानेन स चाग्निः प्रमथैर्वृतः ॥ ३० ॥
साधयिष्यति संकल्पमब्रह्मण्ये प्रयोजितः। इत्यादिष्टस्तथा चक्रे कृष्णायाभिचरन् [4]कुधीः ॥ ३१ ॥
ततोऽग्निरुत्थितः कुण्डान्मूर्तिमानतिभीषणः। तप्तताम्रशिखाश्मश्रुरङ्गारोद्गारिलोचनः ॥ ३२ ॥

कर्दमक्षमा

अन्वयः—अविमुक्ते, तस्मै, प्रीतः, भगवान्, भव, वरम्, अदात्, सः, पितृहन्तृवधोपायम्, अभीप्सितम्, वरम्, वव्रे ॥ २९ ॥ त्वम्, ब्राह्मणैः, समम्, ऋत्विजम्, दक्षिणाग्निम्, अभिचारविधानेन, परिचर, च, प्रमथैः, वृतः, सः, अग्निः, अब्रह्मण्ये, प्रयोजितः, सङ्कल्पम्, साधयिष्यति, इति, आदिष्टः, व्रती, कृष्णाय, अभिचरन्, तथा, चक्रे ॥ ३०-३१ ॥ ततः, कुण्डात्, मूर्तिमान्, अतिभीषणः, तप्तताम्रशिखाश्मश्रुः, अङ्गारो द्गारिलोचनः ॥ ३२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वरमदात् वृणीष्वेत्युक्तवानित्यर्थः ॥ २९ ॥ ऋत्विजमृत्विजमिव स्वनियोगकारिणम्। "यज्ञस्य देवमृत्विजम्" इति श्रुतेः ॥३०॥ अब्रह्मण्ये प्रयोजित इति कृष्णे प्रयोजितो विपरीतो भविष्यतीति सूचितम्। अभिचरन्नभिचारं कुर्वन्। व्रती गृहीतनियमः ॥३१॥ तप्तं ताम्रमिव शिखा श्मश्रूणि च यस्य सः। अंगारोद्गारीणि ज्वलदंगारान्वमंति लोचनानि यस्य सः ॥३२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अविमुक्तो महादेवः। 'अविमुक्तं हि मे गृहम्' इति हरिवंशे पार्वतीं शिवः। "सो विमुक्ते प्रतिष्ठितः" इति जाबालश्रुतेश्च कुत्र तदविमुक्तमित्याकांक्षायाम्। "वरणायांनास्यां च मध्ये प्रतिष्ठितः" इति श्रुतेर्वाराणसीक्षेत्रं लभ्यते तत्रस्थत्वाच्छिवोप्यविमुक्त इत्युच्यते। तस्मै सुदक्षिणाय। स सुदक्षिणः। इत्यर्थ इति-वरशब्दस्य जामात्राद्यर्थकत्वादित्थं व्याख्येयमिति भावः। प्रीत इति तत्प्रतीत्यपेक्षया अविमुक्तस्तत्रत्याविमुक्ताख्यक्षेत्राधिष्ठातृत्वेन तत्संज्ञः। "अविमुक्ते महाक्षेत्रे भाषितस्तेन शंकरः" इति वैष्णवोक्तेः। भगवानिति—सर्वज्ञत्वादेव सव्याजं वरं ददाविति भावः। वधस्योपायमेव न तु वधमिति तदानीमपि बुद्धिविभ्रंशं चकारेति लक्ष्यते। ब्राह्मणैः सममिति तस्य यज्ञस्य तन्मूलत्वात्तद्भक्ते तु स न द्विष्यात्, एते च ब्राह्मणा न भवन्तीति भावः ॥ २९ ॥ दक्षिणाग्निमन्वाहार्यनामानम्। "अग्निमीडे पुरोहितम्, यज्ञस्य देवं मुख्यं कृष्णस्य ब्रह्मण्यत्वात्, नमो ब्रह्मदेवाय" इति मंत्रात्। 'तद्ब्रह्मण्याग्रणीर्भवान्' इति वसुदेवया गोपाख्याने मुन्युक्तेश्च ॥ ३० ॥ विपरीतः संकल्पनाशकः। अभिचरन्निति शत्रुवधकामः। तथैवाह—अब्रह्मण्यम् इति। ब्रह्मण्ये तु न किञ्चित्करिष्यतीति ब्रह्मण्यदेवे तु तस्मिन्प्रयोजितः सन्प्रयोजयितॄणाम् 'हलांतं ब्रह्मवर्चसम्' इति ब्राह्मण्यादिकं नाशयन्देहनाशमपि करिष्यतीति श्रीरुद्राभिप्रायः, क्वचिद्ब्राह्मणानामपि कृष्णनमनादिश्रवणात्कृष्णस्य विप्रनमस्कारजिघृक्षोर्ब्रह्मण्यता नैवास्तीति सुदक्षिणादेरभिप्रायः। ननु 'ब्राह्मणैस्समम्' इत्युक्तेः कथं हिंसारूपेऽभिचारे विदुषां प्रवृत्तिः। "श्येनेनाभिचरन्यजेत्" इति वेदविहितत्वादिति चेन्न, वेदोक्तोऽभिचारो वेदविहितो न भवति फलत्वात् फलं न विधेयं किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयमिति सिद्धान्तात्। अतोऽभिचारस्याविहितत्वेन प्रत्यवायजनकत्वेन तत्र न विदुषां प्रवृत्तिः किन्तु कर्मणि सा भवत्येवेत्यलम् ॥ ३१ ॥ ततोऽभिचारविधिना यजनोत्तरम्। अंगाराण्युद्गिरंतीत्यंगारोद्गारीणि ॥ ३२ ॥

---

१. विविक्ते-वीर.। २. परमेश्वरम्-वीर.। ३. सम्यगृत्विजम्-वीर. ; सह ऋत्विजः-विज.। ४. व्रती-श्रीधर. वंशी. जीव. ; कुधीः-वीर. ; नृप-विज.।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रीत इति तत्प्रीत्यपेक्षया अविमुक्तः तत्रत्याविमुक्ताख्यतीर्थाधिष्ठातृत्वेन तत्संज्ञः तथा च श्रीविष्णुपुराणे "अविमुक्ते महाक्षेत्रे तोषितस्तेन शङ्करः" इति भगवानिति सर्वज्ञत्वादेव सव्याजं वरं ददाविति भावः। वधस्य उपायमेव नतु वध इति तदानीमपि बुद्धिविभ्रंशं तस्य चकारेति लक्ष्यते ॥ २९ ॥ दक्षिणेति युग्मकम्। ब्राह्मणैस्समिति तस्यापि यज्ञस्य तन्मूलत्वात् तदुक्ते तु स न द्विष्यात् एते च ब्राह्मणा न भवन्तीति भावः। तथैवाह—अब्रह्मण्य इति। ब्रह्मण्ये तु न किञ्चित् करिष्यति ब्रह्मण्यदेवे तु तस्मिन् प्रयोजितः सन् प्रयोजयितृणां हलान्तं ब्रह्मवर्चसमितिवद्ब्रह्मण्यादिकं नाशयन् देहनाशं करिष्यतीति श्रीरुद्राभिप्रायः क्वचिद्ब्रह्मण्यानामपि तस्मिन्नमस्कारादिश्रवणान्न तस्य ब्रह्मण्यत्वमिति सुदक्षिणादीनामभिप्रायः। वस्तुतस्त्वेवं ज्ञेयं सर्वाराध्योऽपि भगवान् क्वचिदाराधकत्वेन च यल्लीलायते तत्रोभयत्र च स्वस्मिन् प्रेमदानमेव मुख्यं प्रयोजनं "भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः" इति श्रीकुन्तीवाक्यात् भक्तियोगविधानार्थमवतीर्णं त्वामिति टीकाश्च मुख्यत्वञ्च तस्य सालोक्येत्यादिवाक्यशतात् तत्प्रेम च तत्कर्तृकाराधनेन विप्रादीनां तद्गौरवातिक्रमरूपं दोषमपि निरस्य हिताय प्रवर्त्तते श्रीनारदादीनां परमतद्भक्तत्वाव्यभिचारश्रवणात् श्रीभगवत्स्फुरणमात्रस्यापि तथा स्वभावः श्रूयते किमुत तत्प्रेम्णः तत्र तत्कर्मकाराधनं तन्महिमज्ञानपूर्वमिति भक्त्यात्मकं प्रेम जनयति तत्कर्तृकाराधनन्तु तादृशमहिम्नोऽपि तस्य विनयादिसाद्गुण्यदर्शनावेशेनापि तेन शुद्धं प्रेम निदधाति यत्खलु क्वचित्तन्महिमस्फूर्त्तिमत्याच्छादयति तदिदं शुद्धप्रेम च परमत्वेन स्तूयते नेमं विरिञ्च इत्यादौ इत्थं सतामित्यादौ नायं श्रियोङ्गेत्यादौ च तस्मादाराधकतयाराध्यतया च ब्राह्मणादीनामेतादृशप्रेमदानाद्ब्राह्मणानां सर्वेषामपि हितमेवाचरतीति न ब्रह्मण्यताव्यभिचारः प्रत्युतान्येषां तथा हिताचरणाशक्तेर्ब्रह्मण्यदेवत्वमेव तस्य सिद्ध्यतीति (नितरामाराधयिष्यतीति भावः।) सम्यगिति पाठे क्रियाविशेषणं अर्थः स एव सङ्कल्पं त्वदभीष्टं कृष्णाय साक्षाद्भगवदर्थमप्यभिचरन् हिंसात्मकक्रियां कुर्वन् ॥३०-३१॥ तत इति युग्मकम्। ततश्चिरकालात्तत्कर्मसमाप्त्यनन्तरम् ॥३२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अविमुक्तस्तत्रत्याविमुक्ताख्य—तीर्थाधिष्ठातृत्वेन तत्संज्ञकः, किंवा भक्तवश्यत्वादविमुक्तोऽस्वतन्त्र इत्यर्थः। यद्वा, अविमुक्ते तीर्थ इति सप्तम्यन्तपाठः। तथा च श्रीविष्णुपुराणे (५।३४।३०)—'अविमुक्ते महाक्षेत्रे तोषितस्तेन शंकरः' इति; भगवान् भक्तवत्सल इति वरदाने हेतुः। यद्वा, सर्वज्ञ इति तदीप्सितवरस्य वैफल्यं वैपरीत्यञ्च जानन्नपि ददौ, यतो भवो भक्तश्रेयोरूप इत्यर्थः। यद्वा, सर्वज्ञत्वांदेवाब्रह्मणा इति सच्छिद्रं वरं ददाविति भावः। वधस्योपायमेव न तु वधम् ॥ २९ ॥ परिचर सेवस्व; समं सहित इति तैः सह परिचरणेन ब्रह्मण्यदेवे स्वत एवाभिचारवैफल्यादिकं सेत्स्यतीति भावः। सम्यगिति पाठे क्रियाविशेषणम्, अर्थः स एव ॥ ३० ॥ संकल्पं त्वदभीष्टम्, कृष्णाय साक्षाद्भगवतेऽपि, अभिचरन् हिंसितुमिच्छन् ॥ ३१ ॥ ततस्तत्पश्चादिति बहुकालविलम्बं बोधयति। अतिभीषणत्वमेव दर्शयति—तप्तेत्यादि तलमित्यन्तेन ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पितृहन्तुरिति। स सुदक्षिणः प्रसन्नं परमेश्वरं रुद्रं प्रति वधोपायमेव वरं वव्रे "शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (१-१-३१) इति न्यायेन महेश्वरं परमेश्वरमिति च मुनिप्रयोगः। प्रीत इति। विविक्ते एकान्ते प्रीतः प्रसन्नो भवो रुद्रस्तस्मै वरम् ददौ ॥ २९ ॥ वरमेवाह—त्वमिति। सम्यक् ऋत्विजो यस्य तं दक्षिणाग्निमभिचारहोमेन परिचर आराधय स च परिचरितोऽग्निः प्रमथैः परिवृतः ॥३०॥ अब्रह्मण्ये प्रयुक्तः (प्रयोजितः) सङ्कल्पं त्वदभिसन्धि साधयिष्यति ब्रह्मण्ये प्रयोजितस्तु स्वयमेव हन्यत इति भावः। इतीति। इतीत्थमादिष्टः कुबुद्धिः सुदक्षिणः तथा यथोक्तं कृष्णायाभिचरन् द्रुह्यन् चक्रे ॥ ३१ ॥ तत इति। कथम्भूतोऽग्निर्मूर्त्तिमान् विग्रहधारी अतिदारुणः तप्तं यत्ताम्रं तद्वच्छिखाः श्मश्रूणि च यस्य अङ्गारोद्गारीणि लोचने यस्य ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अविमुक्तो महादेवः वरमदात् वृणुष्वेत्यवदत् ॥ २९ ॥ ऋत्विजम् ऋत्विजमिव स्वनियोगकारिणं "यज्ञस्य देवमृत्विजम्" इति श्रुतिः। अब्रह्मण्ये प्रयोजित इति श्रीकृष्णे तु प्रयोजितो विपरीतो भविष्यतीति श्रीरुद्राभिप्रायः। क्वचिद्ब्रह्मणानामपि कृष्णे नमस्कारश्रवणात् कृष्णस्य विप्रनमस्कारजिघृक्षोर्ब्राह्मण्यता नैवास्तीति सुदक्षिणादेरभिप्रायः ॥ ३०-३३ ॥

गूढार्थदीपिनी

अविमुक्ते क्षेत्रे प्रथमान्तपाठोऽपि साधीयान् ॥ २९ ॥ दक्षिणेति सार्द्धम्। ब्राह्मणैः समं सह दक्षिणाग्नि परिचर आराधय। कीदृशम्। ऋत्विजमिव कार्यकारिणम्। अभिचारो मारणप्रयोगः ॥३०॥ इतीति अर्द्धम्। अभिचरन् द्रुह्यन् ॥३१॥

वत इति त्रयम्। ततः कुण्डात् उत्थितः मूर्तिमान् अग्निः दश दिशः प्रदहन् सन् द्वारकामभ्यधावदिति त्रयाणामेकान्वयः। कथंभूता। तप्तताम्रवत् शिखाःश्मश्रूणि यस्य अङ्गाराणामुद्गारिणो लोचने यस्य दंष्ट्राभिः उग्रैः भ्रुकुटीदण्डैश्च कठोरं क्रूरं मुखं यस्य। सृक्किणी ओष्ठप्रान्तौ आलिहन् संस्पृशन्। त्रिशिखं त्रिशूलं कम्पयन् सन् ॥ ३२-३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अविमुक्तसंज्ञो भवो महादेवः ॥ २९ ॥ ऋत्विजम् ऋत्विजमिव स्वनियोगकरिणम् "यज्ञस्य देवमृत्विजम्" इति श्रुतेः। सङ्कल्पं त्वदभिसन्धिम् अब्रह्मण्ये प्रयोजितः साधयिष्यति ब्रह्मण्ये प्रयोजितस्तु विपरीतो भविष्यतीति भावः ॥ ३०-३१ ॥ अङ्गारोद्गारीणि लोचनानि यस्य सः ॥ ३२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः प्रीतो महादेवः। ननु भगवत्सान्निध्य एव समाधिः फलसाधक इत्याशङ्क्याह **अविमुक्त** इति। तत्र हि पूर्वं महादेवः पञ्चमं शिरो ब्रह्मणश्छित्वा, ब्रह्महत्यया व्याप्तः, नारायणाश्रमं गत्वा, पृष्टो बदरीनाथः, कथं ब्रह्मवधाद्विमोक इति, तदाह भगवान्, स्वस्थानं गच्छ, यत्र चास्य कपालस्य पतनम्, ततश्चाव्यावृत्तिः कर्तव्येति। ततः काश्यामागतस्य तथा जातमिति, ततःप्रभृति महादेवेन न तद्विमुक्तम्। अतो नित्यसान्निध्यात् महादेवस्तत्र प्रसन्नः, स च भगवान् भवति। तामसकल्पेषु तद्रूप एव भगवानिति। यत उद्भवरूपः। अतस्तस्मै वरं दत्तवान्। वरं ब्रूहि, दास्यामीत्युक्तवानित्यर्थः। ततः स्वाभिलषितमाह **पितृहन्तु**रिति। ननु कथमस्य वरत्वम्, दुःखाभावसुखरूपत्वाभावात्, तत्राह **ईप्सित**मिति। न हि वरो नाम कश्चिन्नियतोऽस्ति। य एव कश्चन मनस्यभिलषितो भवति, स एव वर इति ॥ २९ ॥ तदा महादेवः उभयथाप्यनिष्टमिति ज्ञात्वा, भक्तहितार्थं व्याजेन साधनमुपदिशति, अन्यथा न निवृत्तो भवतीति। शिववाक्यमाह **त्वं दक्षिणाग्निं परिचरे**ति। 'अग्नये रुद्रवते पुरोडाशमष्टाकपालं निर्वपेदभिचरन् एषा वास्य घोरा तनूर्यद्रुद्रःतस्मा एवैनमावृश्चति ता जर्गतिमार्च्छंती'ति श्रुतेः। दक्षिणाग्नावेवाभिचारहोमः। अत आह **त्वं दक्षिणाग्निं परिचरे**ति। तत्राप्येकाकिना न कर्तव्यमिति **ब्राह्मणैः** सममित्युक्तम्। ऋत्विजां मध्ये ऋत्विजां सम्बन्धी वा। तेन चातुर्होत्रविधानेन कर्तव्यमिति, तत्राप्यभिचारविधानेन, इष्टिप्रकृतिकश्चेत्, न शरमयादि। पशुप्रकृतिकत्वे तु तूपरः। पशुः स्फ्यो यूपः शरमयं बर्हिः वैभीतिक इध्मः। अत्र तु पुरोडाश एव। यतोऽग्निरेव देवः। स च प्रमथैर्वृतः। अतो रुद्रवानेवाग्निः। अभिचारसामान्यात् शरमयादिर्वा। ततो यद्भविष्यति, तदाह **स चाग्नि**रिति। तव कः प्रसाद इति चेत्। अग्निरपि प्रसन्नो मत्कृपया, अन्योऽपि प्रसाद इति वक्तुं प्रमथैर्भूतगणैर्वृत इत्युक्तम्। ततस्ते संङ्कल्पं साधयिष्यति। यदि अब्रह्मण्ये प्रयोजितो भविष्यति, अन्यथा विपरीतो भूत्वा त्वामेव भक्षयिष्यतीति भावः। 'तस्मादग्निश्चित्वाभिचरितवै प्रत्यगेनमभिचारस्तृणुत' इति श्रुतेः। सुदक्षिणस्तु भगवन्तं ब्रह्मण्यं न जानाति। चकारात्तदङ्गदेवता अपि कार्यं करिष्यन्तीति सूचितम् ॥ ३०½ ॥ एवं महादेवेनाज्ञस्तथैव चक्रे, परमुद्देश्यो न तदुक्त इति ज्ञापयितुमाह **कृष्णायाभिचर**न्निति। कृष्णो ब्राह्मणानां फलरूपः, ब्राह्मणहितश्च। अतः कुधीः ॥ ३१ ॥ उत्पादने वैगुण्याभावात् अग्निरुत्थित इत्याह **अग्निरुत्थितः कुण्डादि**ति। दक्षिणाग्निकुण्डात्। ज्वालारूपतां वारयति **मूर्तिमा**निति। प्रसन्नदेवतारूपतां वारयति **अतिभीषण** इति। मृत्युरूपतां वक्तुं तं वर्णयति **तप्तताम्रे**ति द्वयेन। तप्तताम्रसदृशानि श्मश्रूणि **यस्य**। अङ्गारानेवोद्गिरन्ति लोचनानि यस्य। यथा कालीयादेः। अङ्गारोद्गारिलोचनः ॥ ३२ ॥

श्रीसुबोधिनी-सारः

अविमुक्तनामा भगवान् भवः शिवस्तस्मै सुदक्षिणाय वरमदात् वरं वृणीष्वेत्याह स सुदक्षिणः पितृहंतुर्वधस्योपायमीप्सितं वाञ्छितं वरं वव्रे ॥ २९ ॥ शिवोक्तिः। ब्राह्मणैः समं सह ऋत्विजमृत्विग्वन्नियोगकारिणम् "यज्ञस्य देवमृत्विजम्" इति श्रुतेः। ऋत्विग्भिः सममित्येके प्रथमांतपाठे दक्षिणाग्निमभिचारस्य कार्मणस्याभिधानेन परिचरत्वमुपास्य स चाग्निः आभिचारीयो वह्निः प्रमथैर्वृतो युक्तः ॥ ३० ॥ अब्रह्मण्ये पापे दुष्टे नीचे वेति यावत् प्रयोजितो नियुक्तः संकल्पं साधयिष्यति ब्रह्मण्ये तु न संकल्पपूरकः किमुत ब्रह्मण्यदेवे इत्येवं शिवेनादिष्ट आज्ञप्तो व्रतमस्यास्तीति कृष्णाय कृष्णमुद्दिश्याभिचारं कुर्वन् तथा चक्रे दक्षिणाग्निमुपासांचक्रे ॥ ३१ ॥ तत्र उपासनाकुंडात् मूर्त्तिमानग्निरुत्पन्नोऽतिभीषणोऽतिभयंकरः तप्तं ताम्रमिव शिखा श्मश्रूणि यस्य अंगारोद्गारीणि लोचनानि यस्य सः ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च भगवान्, भवः प्रीतस्तस्मै वरमदात् वरं गृहाणेत्युक्तवान्। स च सुदक्षिणः स्वेप्सितं पितृहन्तुर्वधोपायं वव्रे। पूर्वं हि महादेवो ब्रह्मणः पञ्चमं शिरश्छित्वा ब्रह्महत्यया व्याप्तः सर्वत्र भ्रमन् बदर्याश्रमे नारायणोपदेशात् अत्र काश्यामागतस्तदा

तद्धस्ते लग्नं ब्रह्मशिरः पतितं हत्यया च विमुक्तो जातस्ततःप्रभृति काशीं कदापि न परित्यजति, अत्राराधितश्च शीघ्रमेव प्रसन्नो भवति, अत एवास्य क्षेत्रस्य 'अविमुक्तम्' इति नाम । तस्याप्यविमुक्त इति नामेत्येतत्सूचयन्नाह—अविमुक्त इति ॥२९॥ एवं वृतो रुद्र आह—ब्राह्मणैः समं सह अभिचारविधानेन शत्रुमारणोक्तप्रकारेण ऋत्विजं "यज्ञस्य देवमृत्विजम्" इति श्रुतेः ऋत्विजमिव स्वनियोगकारिणं दक्षिणाग्निं त्वं परिचर आराधय । स चाग्निः मदनुचरैः प्रमथैर्वृतः तव सङ्कल्पं साधयिष्यति, परं त्वब्रह्मण्ये प्रयोजितः, ब्रह्मण्ये प्रयोजितस्तु विपरीतो भविष्यति । अभिचरन् द्रुह्यन् । व्रती गृहीताहारादिनियमः ॥३०-३१॥ ततः कुण्डात् भीषणत्वं स्पष्टयन्, वितप्तताम्रमिव शिखाः श्मश्रू च यस्य सः, अङ्गारान् उद्गारिणी लोचने यस्य सः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

प्रीत इति ॥ अविमुक्तः अविमुक्ताख्यकाशीक्षेत्राधीशः भगवान्भवः प्रीतस्तस्मै वरमदात् वरं गृहाणेत्युक्तवान् । स च सुदक्षिणः स्वेप्सितं पितृहन्तुर्वधोपायं वव्रे । नतु वधमिति कुम्भकर्णवद्बुद्धिभ्रंशो व्यज्यते । पूर्वं हि महादेवो ब्रह्मणः पञ्चमं शिरश्छित्वा ब्रह्महत्यया व्याप्तः सर्वत्र भ्रमन् बदर्याश्रमे नारायणोपदेशात् अत्र काश्यामागतस्तदा तद्धस्ते लग्नं ब्रह्मशिरः पतितं हत्यया च विमुक्तो जातः । ततः प्रभृति काशीस्थं तत्क्षेत्रं शिवः कदापि न मुञ्चति । अतस्तत्क्षेत्रम् अविमुक्तं नाम अभूत्। सप्तम्यन्तपाठे अविमुक्ते क्षेत्रे ॥ २९ ॥ दक्षिणेति सार्द्धम् । एवं वृतो रुद्र आह स्म । ब्राह्मणैः समं सह अभिचारविधानेन शत्रुमारणोक्तप्रकारेण ऋत्विजं "यज्ञस्य देवमृत्विजम्" इति श्रुतेः । ऋत्विजमिव स्वनियोगकारिणं दक्षिणाग्निं त्वं परिचर आराधय । स चाग्निः अब्रह्मण्ये प्रयोजितश्चेत् यदनुचरैः प्रमथैर्वृतः तव सङ्कल्पं साधयिष्यति । ब्रह्मण्ये कृष्णे प्रयोजितस्तु विपरीतो भविष्यति इति श्रीरुद्राशयः । वैपरीत्यमेवातो जातं सुदक्षिणस्तु श्रीकृष्णे ब्रह्मण्यत्वं न बुद्धवान् ॥ ३० ॥ इतीति अर्द्धम् ॥ इति आदिष्टः कृष्णाय अभिचरन् द्रुह्यन् व्रती गृहीताहारादिनियमः स तथा चक्रे ॥ ३१ ॥ तत इति त्रयम् ॥ ततः कुण्डात् अतिभीषणः तप्तताम्रमिव शिखाः श्मश्रूणि च यस्य सः अङ्गाराणाम् उद्गारिणी लोचने यस्य दंष्ट्राभिरुग्रैः भ्रुकुटीदण्डैश्च कठोरं क्रूरमास्यं यस्य सः स्वजिह्वया सृक्विणी उत्तरोर्ध्वोष्ठप्रान्तौ आलिहन् नग्नः ज्वलन् त्रिशिखं त्रिमूलं विधुन्वन् मूर्तिमान् अग्निः उत्थितः स चाग्निभूतैः प्रमथैर्वृतः सर्वतो दिशः प्रदहन् तालप्रमाणाभ्यां पद्भ्यामवनीतलं कम्पयन् द्वारकामभिमुखीकृत्याधावत् ॥ ३२-३४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अविमुक्तः अविमुक्ताख्यक्षेत्राधीशः भवः शिवः ॥ २९ ॥ ब्राह्मणैः समं सहितं ऋत्विजं ऋत्विजमिव स्वेप्सितकार्यकारिणं अग्निमिले पुरोहितं यज्ञस्य देवमृत्विजमिति श्रुतेः अभिचारविधानेन परिचर आराधय ॥ ३० ॥ व्रती ब्रह्मचर्यादिव्रतयुक्तः ॥ ३१ ॥ उद्गिरंती वमंतीत्येवंशीलानि उद्गारीणि अंगाराणां उद्गारीणि लोचनानि यस्य सः ॥ ३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रीत इति । प्रीतः भगवान् भवः, विविक्ते एकान्ते, तस्मै सुदक्षिणाय, वरं, अदात् । स सुदक्षिणोऽपि, पितृहन्तुः, वधोपायं ईप्सितं वरं, वव्रे ॥ २९ ॥ दक्षिणाग्निमिति । हे सुदक्षिण, ब्राह्मणैः सह, ऋत्विजं ऋत्विग्वत् स्वनियोगकारिणं, दक्षिणाग्निं, अभिचारविधानेन, परिचर । सः अभिचारविधानेन परिचरितः, अग्निश्च प्रमथैः वृतः परिवृतः सन् ॥ ३० ॥ साधयिष्यतीति । अब्रह्मण्ये प्रयोजितश्चेत्, तव संकल्पं, साधयिष्यति । ब्रह्मण्ये प्रयोजितस्तु स्वयमेव हन्यते इति भावः । इतीत्थं, आदिष्टः, अभिचरन् अभिचारं कुर्वन्, व्रती गृहीतनियमः, सः सुदक्षिणः, कृष्णाय कृष्णं हन्तुं, तथा यथोक्तं तथैव, चक्रे । इति द्वयोः संबन्धः ॥ ३१ ॥ तत इति । ततः, मूर्त्तिमान्, अतिभीषणः, तप्तताम्रवच्छिखाश्मश्रूणि शिखाश्मश्रुकेशा यस्य सः। अङ्गारोद्गारिणी अङ्गारानुद्गिरन्तो लोचने यस्य सः । अग्निः, कुण्डात्, उत्थितः ॥ ३२ ॥

कृष्णप्रिया

इस अविमुक्त क्षेत्र श्रीकाशीपुरी में उसकी आराधना से प्रसन्न होकर भगवान् भवनाथ ने उससे कहा कि सुदक्षिण एक अभीष्ट वरदान माँग लीजिये । तब सुदक्षिण ने भगवान् भवानी शंकर से करबद्ध निवेदन किया कि मेरे पितृचरणों को मारने वाले पुरुष को मारने का उपाय दिखलाइये ॥ २९ ॥ भगवान् काशीनाथ ने कहा—सुदक्षिण ! आप अपनी कामना की सिद्धि के लिये वेदज्ञ विप्रों के साथ मिलकर यज्ञ के अधीश्वर ऋत्विग्भूत दक्षिणाग्नि का अभिचार विधि से अनुष्ठान करें । लेकिन इस बात का स्मरण करना कि यदि तुमने यह प्रयोग ब्राह्मणों के अभक्तों पर किया, तभी तुम्हें सफलता मिलेगी। भगवान् काशीश्वर के आदेशानुसार अनुष्ठान के उपयोगी नियम-व्रत को उसने ग्रहण किया और ब्रह्मण्यदेव भगवान् कृष्ण को मारने के लिये अभिचार मारण पुरश्चरण का आरम्भ किया ॥ ३०-३१ ॥ यहाँ अभिचारविधि समाप्त होने पर कुण्ड से भयानक उग्रस्वरूप मूर्तिमान् अग्नि प्रकट हुआ । अग्नि के केश और दाढी-मूँछ संतप्त ताम्र-समान आरक्त वर्ण के थे, उसके नेत्रों से अंगारे बरसते थे ॥ ३२ ॥

दंष्ट्रोग्रभ्रुकुटीदण्ड[1] कठोरास्यः स्वजिह्वया । आलिहन् सृक्किणी [2]नग्नो विधुन्वंस्त्रिशिखं ज्वलन् ॥ ३३ ॥
पद्भ्यां तालप्रमाणाभ्यां कम्पयन्नवनीतलम्[3] । सोऽभ्यधावद्[4]वृतो भूतैर्द्वारकां प्रदहन् दिशः ॥ ३४ ॥
तमाभिचारदहनमायान्तं द्वारकौकसः । विलोक्य तत्रसुः सर्वे वनदाहे [5]मृगा यथा ॥ ३५ ॥
अक्षैः सभायां क्रीडन्तं भगवन्तं भयातुराः । पाहि [6]पाहि त्रिलोकेश वह्नेः प्रदहतः पुरम् ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—दंष्ट्रोग्रभुकुटी, दण्ड, कठोरास्यः, स्वजिह्वया, सृक्किणी, आलिहन्, नग्नः, ज्वलन्, त्रिशिखम्, विधुन्वन्, तालप्रमाणाभ्याम्, पद्भ्याम्, अवनीतलम्, कम्पयन्, भूतैः, वृतः, सः, अग्नि, दिशः, प्रदहन्, द्वारिकाम्, अभ्यधावत्, द्वारकौकसः, आयान्तम्, अभिचारदहनम्; विलोक्य, यथा, वनदाहे; मृगाः, तथा, सर्वे, तत्रसुः ॥ ३३-३५ ॥ भयातुराः, सर्वे, अक्षैः, सभायाम्, क्रीडन्तम्, त्रिलोकेशपुरम्, प्रदहतः, वह्नेः, त्राहि, त्राहि ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दंष्ट्राभिश्चोग्रैर्भ्रुकुटीदंडैश्च कठोरं क्रूरमास्यं यस्य स त्रिशिखं त्रिशूलम् ॥ ३३ ॥ दिशः प्रदहन् ॥ ३४-३५ ॥ त्राहित्राहीत्याहुरिति शेषः ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"भृकुटी भ्रुकुटी चाथो भ्रूकुटिरूदूर्ध्वदेशके । नेत्रयोर्धनुवद्वक्रे रोमसंघसमाकुले ॥" इति शब्दार्थकल्पद्रुमे ॥ ३३ ॥ "अंगुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते । तालः स्मृतो मध्यमया" इति कोशात् । क्वचित्तु 'तालो हस्तचतुष्टयम्' इत्यपि । सोऽभिचाराग्निः ॥ ३४-३५ ॥ अक्षैर्दुरोदरैः ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अतिभीषणत्वमेव दर्शयति—दिश इत्यन्तेन । स्वया विस्तीर्णत्वादितोऽसाधारणया जिह्वया सृक्किणी सृक्किण्यौ आ सर्वतो लिहन् ॥ ३३ ॥ ततश्च पद्भ्यामिति । भूतैः प्रमथैः ॥ ३४ ॥ वनेति दृष्टान्तेन गम्यस्थानान्तराभावादिना त्रासाधिक्यं सूचितम् ॥ ३५ ॥ अक्षैरिति । प्रागुक्तार्थमेव पुरं प्रकर्षेण दहतः दग्धुं समीपमागतस्य वह्नेः सकाशात् त्राहि त्रायस्व पुरं वीप्सातिभयात् त्रिलोकेशेति लोकत्रयरक्षकेण त्वयैतत् सुकरमेवेति भावः ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वया विस्तीर्णत्वादिनासाधारणया जिह्वया सृक्किण्या आ सर्वतो लिहन् ॥ ३३ ॥ भूतैः प्रमथैः, वनेति दृष्टान्तेन गम्यस्थानान्तराभावादिना त्रासाधिक्यं सूचितम् ॥ ३४-३५ ॥ अक्षैरिति प्रागुक्तार्थमेव पुरं प्रकर्षेण दहतो दग्धुमिच्छतो वह्नेः सकाशात् त्राहि त्रायस्व; पुरस्मान् वा, वीप्सातिभयात्; हे त्रिलोकेशेति लोकत्रयरक्षकस्य तवैतत् सुकरमेवेति भावः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

दंष्ट्राभिरुग्रैश्च भ्रुकुट्या दन्तैः कठोरं क्रूरमास्यं यस्य सः स्वजिह्वया सृक्किणीम् उत्तरोष्ठोदूर्ध्वदेशमालिहन्नास्वादयमानः तिस्रः शिखाः यस्य तं शूलं धुन्वन् कम्पयन् ॥ ३३ ॥ स इति । सोऽग्निर्भूतैः प्रमथैर्वृतः ॥ ३४ ॥ तमिति । आयान्तमागच्छन्तं विलोक्य तत्रसुः वनदाहे सति यथा मृगाः त्रस्यन्ति तद्वत् ॥ ३५ ॥ अक्षैरिति । पुरं द्वारकां प्रदहतो वह्नेः सकाशादस्मान् त्राहीत्याहुरिति शेषः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

द्वारकामभिमुखीकृत्य अभ्यधावत् दिशः प्रदहन् ॥ ३४ ॥ आयान्तं दूरादेव विलोक्य वनदाहे भविष्यति सति यथा मृगाः त्रस्यन्ति ॥ ३५ ॥ त्राहि त्राहि त्रायस्व त्रायस्वेत्याहुरिति शेषः ॥ ३६ ॥

गूढार्थदीपिनी

अभिचारदहनं कृत्यानलम् । तत्रसुः बभूवुः ॥ ३५ ॥ त्राहीत्याहुरिति शेषः ॥ ३६ ॥

---

[1] चण्ड—प्रा. पा. । [2] रक्ते—विज. । [3] धरणीतलम्—वीर. विज. । [4] द्रुतैः पादैः—प्रा. पा. । [5] यथा मृगाः—प्रा. पा. ।
[6] त्राहि त्राहि—श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

दंष्ट्राभिरुग्रैर्भ्रूकुटीदण्डैश्च कठोरं क्रूरमास्यं यस्य सः ज्वलत् त्रिशिखं त्रिशूलम् ॥ ३३ ॥ दिशः प्रदहन् ॥ ३४-३५ ॥ त्राहि त्राहि त्रायस्व त्रायस्वेति प्राहुरिति शेषः ॥ ३६-३८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

दंष्ट्रया उग्रः, भ्रुकुटी च दण्डरूपा, एताभ्यां स्वरूपतोऽपि कठोरमास्यं यस्य । **स्वजिह्वया सृक्किणी** आलिहन्निति कार्याभिनिवेशो निरूपितः । **नग्न** इति स्वदेहमपि न जानातीत्युक्तम् । तेनाविचार्यैव क्रूरं करिष्यतीति । साधनमपि तथाविधमाह **विधुन्वंस्त्रिशिख**मिति । ज्वलन्निति क्रोधादिना ॥ ३३ ॥ अग्नित्वात् स्वभावतोऽपि गतिसामर्थ्यार्थमाह पद्भ्यां **तालप्रमाणाभ्या**मिति । अग्रे कार्यं भविष्यतीति ज्ञापयितुमिदानीं तस्य तस्योद्योगमाह **कम्पयन्नवनीतल**मिति । तस्योद्योगमाह **सोऽभ्यधाव**दिति । भूतैः प्रमथगणैर्वृतः ॥ ३४ ॥ ततो द्वारकायामपि तद्दर्शनेन भयं जातमित्याह **तमाभिचारदहन**मिति । यतो दिशः प्रदहन् समागतः । अतस्तं दृष्ट्वा उत्पत्तिविचारेणापि आभिचारदहन इति । **तत्राप्यायान्तम्** । **द्वारकौकस** इति पूर्वमेव स्थानं त्यक्त्वा यथाकथञ्चिदत्र स्थितम् । अत्रापि भये किं कर्तव्यमिति विलोक्यैव तत्रसुः । अहन्यमाना अपि । तत्र बलिष्ठाः शूरा न तथा भविष्यन्तीत्याशङ्क्याह **सर्वे** इति । उपजीव्यनाशात् प्रतिक्रियायामसामर्थ्यात् महतोऽपि भयमिति ज्ञापयितुं दृष्टान्तमाह **वनदाहे यथा मृगा** इति ॥ ३५ ॥ अन्यत्रालब्धशरणाः निश्चिन्तं भगवन्तं विज्ञापयामासुरित्याह **अक्षैः** सभायां क्रीडन्तमिति । अनेनान्तर्बहिः चिन्ताभावो निरूपितः । सभ्याधानार्थं क्रीडयतीति ज्ञापयितुं सभायामित्युक्तम् । **यत** उत्थानं न सम्भवति । **भगवन्त**मिति सर्वथा समर्थम् । **भयातुरा** इति न तेषामवसरानवसरपरिज्ञानमिति सूचितम् । भीतानां वाक्यमाह पाहि पाहि इति । त्राहि त्राहीति क्वचित्पाठः । तत्रापि परस्मैपदं छान्दसमिति केचित् । उभयपदी धातुरित्यपरे । **त्रिलोकेशे**ति । महादेवादिनिराकरणेऽपि सामर्थ्यं सूचितम् । पुरं प्रदहतो वह्नेः सकाशात् पालयेति, यथा पुरदाहो न भवति, तथा यत्नं कुर्विति ॥ ३६ ॥

श्रीसुबोधिनी–सारः

दंष्ट्राभिरुग्रैर्भ्रूकुटीदंडैः कठोरं क्रूरमास्यं मुखं यस्य सः स्वजिह्वया सृक्किणी ओष्ठप्रांतौ आलिहन् ग्रसन् नग्नो दिगंबरः ज्वलत्त्रिशूलं विधुन्वन् कंपयन् ॥ ३३ ॥ तालप्रमाणाभ्यां पद्भ्यां षष्टिहस्तप्रमिताभ्यां पादाभ्यां अवनीतलं भूतलं कंपयन् भूतैर्वृतः सोऽग्निर्दिशः प्रदहन् द्वारकामभ्ययात् ॥ ३४ ॥ आभिचारमभिचारसाध्यं दहनम् अग्निमायांतं तं विलोक्य दृष्ट्वा सर्वे द्वारकावासिनः तत्रसुः त्रासमापुः वनदाहे मृगा इव ॥ ३५ ॥ सभायामक्षैः पाशकैः क्रीडंतं भगवंतम् इत्यूचुरिति शेषः । हे त्रिलोकेश पुरं नगरं प्रदहतो वह्नेः सकाशात् त्वं पाहिपाहि ॥ ३६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

दंष्ट्रोग्र इत्यत्र । **एताभ्या**मिति । द्वाभ्यां भ्रुकुटीभ्यामित्यर्थः । तथा च दंष्ट्रया उग्रो भृकुटीरूपो दण्डस्ताभ्यां कठोरास्य इति विग्रहः । दंष्ट्रोग्रत्वं भृकुटीदण्डस्य न सम्भवतीत्यत आहुः स्वरूपतोऽपीति । तथा च दंष्ट्रया उग्रः । भृकुटी दण्डरूपा यस्य तादृशः । कठोरमास्यं यस्य तादृशश्चेति कर्मधारयः । **तमाभिचारे**त्यत्र । तमित्यस्यार्थमाहुः **यत** इति । **उपजीव्यनाशा**दिति । उपजीव्या द्वारिका, तद्दाहो न भविष्यतीत्यर्थः । अक्षैः **सभाया**मित्यत्र । **सभ्याधानार्थ**मिति । 'शतमक्षान्विजानाती'ति सभ्येषु विद्यास्थापनार्थमित्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दंष्ट्राभिरुग्रैर्भृकुटीदण्डैश्च कठोरं क्रूरमास्यं यस्य सः, स्वजिह्वया सृक्किणी उत्तरोर्ध्वोष्ठप्रान्तौ आलिहन् ॥ ३३ ॥ सोऽग्निः भूतैः प्रमथैर्वृतः सर्वतोदिशः प्रदहन् तालप्रमाणाभ्यां पद्भ्यामवनीतलं कम्पयन् द्वारकां प्रत्यभ्यधावदित्यन्वयः ॥ ३४ ॥ तमग्निम् । स्पष्टम् । त्रासे दृष्टान्तमाह—वनदाह इति ॥ ३५ ॥ पुरं द्वारकां प्रदहतः वह्नेः सकाशादस्मान् त्राहि त्राहीति सभायां क्रीडन्तं भगवन्तं भयातुरा जना विज्ञापयामासुरित्यन्वयः । 'रक्षायां च तव सामर्थ्यमस्ति' इति सूचयन् संबोधयन्ति—त्रिलोकेशेति ॥ ३६ ॥

अन्वितार्थप्रकाशिका

तमिति ॥ सर्वे द्वारकौकसः तम् आभिचारं दहनम् आयान्तं विलोक्य तत्रसुः । यथा वनदाहे मृगास्त्रसन्ति तथा ॥ ३५ ॥ अक्षैरिति ॥ ततश्च भयातुरा जनाः अक्षैः सभायां क्रीडन्तं भगवन्तं प्रति हे त्रिलोकेश ! पुरं द्वारकां प्रदहतः वह्नेः सकाशात् अस्मान्त्राहि त्राहि इत्यवदन् । तङभाव आर्षः । बहुलं छन्दसि इत्यदादिभिन्नेऽपि शप्लुक् ऐकारस्याकारः ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दंष्ट्राभिरुग्रभ्रकुटीदंडैश्च कठोरे क्रूरं आस्यं मुखं यस्य सः सृक्किणीर्हृष्टप्रांतभागौ। ज्वलत् त्रिशिखं त्रिशूलं विधुन्वन् कंपयन् ॥ ३३ ॥ भूतैः प्रमथैः दिशः प्रदहन् ॥ ३४ ॥ आभिचारं अभिचारात् मारणप्रयोगादुत्पन्नं दहनमग्निं वनदाह इत्यनेन गम्यस्थानाभावात् त्रासाधिक्यं व्यज्यते ॥ ३५ ॥ अक्षैः पाशकैः वक्त्रैरनत्वात्। अस्मान्। त्वं त्राहि त्राहीति प्रोचुः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दंष्ट्रेति ॥ दंष्ट्राभिः उग्रैः भृकुट्या कुटिलीकृतभ्रुवा सह दन्तैश्च कठोरमास्यं यस्य सः, क्वचित्तु दन्तस्थाने दण्ड इति पाठः। स्वजिह्वया, सृक्किणीः, आलिहन् ज्वलन् नग्नः, त्रिशिखं त्रिशूलं, विधुन्वन् ॥ ३३ ॥ पद्भ्यामिति ॥ तालप्रमाणाभ्यां पद्भ्यां, अवनीतलं कम्पयन् सोऽभिचाराग्निः, भूतैः प्रमथादिभिः, वृतः दिशः, प्रदहन् द्वारकां, अभ्यधावत्। इति द्वयोरेकसंबन्धः ॥ ३४ ॥ तमिति ॥ तं आभिचारदहनं, आयान्तमागच्छन्तं, विलोक्य, द्वारकौकसो द्वारकावासिनः, सर्वे जनाः, वनदाहे मृगाः, यथा तथा, तत्रसुः ॥ ३५ ॥ अक्षैरिति ॥ भयातुराः जनाः, सभायां, अक्षैः पाशकैः, क्रीडन्तं, भगवन्तं श्रीकृष्णं, हे त्रिलोकेश, पुरं प्रदहतः, वह्नेः, त्राहि त्राहि त्रायस्व त्रायस्व इति आहुरिति शेषः ॥ ३६ ॥

कृष्णप्रिया

उग्र दाढों और वक्र भृकुटियों के कारण उसके मुँह से क्रूरता टपक रही थी। वह दक्षिणाग्नि अपनी जिह्वा से मुख के दोनों कोने चाट रहा था। उसका देह सर्वथा वस्त्ररहित था, हाथ में त्रिशूल धारण किया था और उस त्रिशूल को सतत घूमाता था और त्रिशूल में से अग्नि की ज्वालायें निकल रही थीं ॥ ३३ ॥ ताड़ वृक्ष के समान उनकी लम्बी टाँगे थी। वह अग्निपुरुष अपने चलने के वेग से भूमितल को कम्पाता हुआ और दश दिशाओं को जलाता हुआ द्वारिकापुरी की ओर दौड़ा और क्षण मात्र में द्वारिका आ पहुँचा, वह भूतवृन्द से आवृत्त था ॥ ३४ ॥ उस अभिचाराग्नि को निकट में आये हुए देखकर द्वारिकानिवासी जन वैसे ही भयभीत हो गये जैसे किसी वन में प्रकट हुए दावानल को देखकर मृगवृन्द भयभीत हो जाता है ॥३५॥ अभिचाराग्नि की ज्वाला से भयभीत बने हुए द्वारिका के प्रजाजन भगवान् श्रीकृष्ण के निकट दौड़ कर आये। उस समय भगवान् श्रीकृष्ण सभा में क्षेत्रज खेल रहे थे। तब समीप आकर पुरजनों ने निवेदन किया—नाथ! आप एक ही तीनों लोकों के एकमात्र स्वामी हैं। इस भयानक अग्नि से यह द्वारिकापुरी भस्म होने जा रही है। आप कृपया हमारी रक्षा करें, आपके विना इस पुरी की रक्षा और कोई नहीं कर सकता ॥ ३६ ॥

श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च साध्वसम्। शरण्यः सम्प्रहस्याह मा भैष्टेत्यवितास्म्यहम् ॥ ३७ ॥
सर्वस्यान्तर्बहिःसाक्षी[1] कृत्यां माहेश्वरीं विभुः। विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत् ॥ ३८ ॥
तत् सूर्यकोटिप्रतिमं सुदर्शनं जाज्वल्यमानं प्रलयानलप्रभम्।
स्वतेजसा खं ककुभोऽथ रोदसी [2]चक्रं मुकुन्दास्त्रमथाग्निमार्दयत् ॥ ३९ ॥
कृत्यानलः प्रतिहतः स [3]रथाङ्गपाणेरस्त्रौजसा स नृप भग्नमुखो निवृत्तः।
वाराणसीं परिसमेत्य सुदक्षिणं तं [4]सर्त्विग्जनं समदहत् स्वकृतोऽभिचारः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—स्वानाम्, तत्, जनवैक्लव्यम्, साध्वसम्, दृष्ट्वा, श्रुत्वा, सम्प्रहस्य, आह, मा भैष्ट, अहम्, अविता, अस्मि ॥ ३७ ॥ सर्वस्य, अन्तः, बहिः, साक्षी, विभुः, माहेश्वरीम्, कृत्याम्, विज्ञाय, तद्, विघातार्थम्, पार्श्वस्थम्, चक्रम्, आदिशत् ॥ ३८ ॥ तत्, सूर्यकोटिप्रतिमम्, जाज्वल्यमानम्, प्रलयानलप्रभम्, मुकुन्दास्त्रम्, चक्रम्, सुदर्शनम्, स्वतेजसा, अथ, ककुभः, रोदसी, खम्, अग्निम्, आर्दयत् ॥ ३९ ॥ हे नृप! रथाङ्गपाणेः, अस्त्रौजसा, प्रतिहतः, भग्नमुखः, निवृत्तः, स, स्वकृतः, अभिचारः, सः, कृत्यानलः, वाराणसीम्, परिसमेत्य, तम्, सुदक्षिणम्, सर्त्विग्जनम्, समदहत् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अहमवितास्मि रक्षिष्यामीति ॥ ३७-३८ ॥ रोदसी च प्रकाशयदिति शेषः। यद्वा स्वतेजसा खादीन्प्रति जाज्वल्यमानमत्यर्थं प्रकाशमानमित्यर्थः। आर्दयदपीडयत् ॥ ३९ ॥ अर्दितोऽग्निर्यत्कृतवांस्तदाह कृत्यानल इति सहर्त्विग्भिर्जनैश्च वर्तमानम्। अभिचर्यते मार्यतेऽनेनेत्यभिचारः कृत्यानलः ॥ ४० ॥

---

१. सोऽथ—विज.। २. ग्रसन्—वीर.; चक्रं मुकुन्दस्य सहित्यपूरयत्—विज.। ३. पाणेस्तत्तेजसा—वीर.। ४. संनिर्जितं—विज.; ऋत्विक्समेतमदहत्—प्रा. पा.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तद् त्राहित्राहीत्येवंरूपम् । साध्वसं भयम् ॥ ३७ ॥ अक्षैः सह भवतीति साक्षं ज्ञानं तदत्ति जानातीति साक्षात् ज्ञातेत्यर्थः । तद्विघातार्थं कृत्याविघातार्थम् । यदा भगवदाज्ञापेक्षया मूर्तिमत्त्वेन समीपेऽवतिष्ठमानं सुदर्शनमित्यर्थः ॥ ३८ ॥ अथ भगवदाज्ञानन्तरम् । अध्याहारे गौरवमाशंक्याह—यद्वेति । इत्यर्थ इति—गम्यमानप्रतियोगे द्वितीया । खं व्योम । ककुभो दिशः । अथात्र चार्थे ॥ ३९ ॥ स सुदक्षिणोत्पादितः । अस्त्रोजसा सुदर्शनतेजसा । प्रतिहत आस बभूव ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जनानां पौराणां वैक्लव्यं भयार्तिवाक्यं स्वानां यादवानां साध्वसमापातशङ्कां सम्यगुच्चैः प्रकर्षेण अवहेलया भङ्गीविशेषेण हसित्वेति तदतिलाघवादिबोधनाय तच्च तेषां भयनिवृत्त्यर्थं यतः शरण्यः निजजनरक्षापरः अहमित्याश्वासनार्थं स्वप्रभावं द्योतयति ॥ ३७ ॥ विशेषतः स्वभक्तमहेश्वरस्य तादृशाभिप्रायसमेतं ज्ञात्वा पार्श्वस्थमिति सदा श्रीभगवदाज्ञापेक्षया मूर्त्तिमत्त्वेन समीपेऽवतिष्ठमानमित्यर्थः ॥ ३८ ॥ अथ आदेशानन्तरमेव कात्स्न्येनार्द्दयत् सुदर्शनमिति । तादृशतिग्मतेजोमयत्वेऽपि भक्तैः सुदृश्यत्वं बोधयति मुकुन्देति तद्दग्धानां मुक्तिप्राप्तिश्च ॥ ३९ ॥ कृत्येतियुग्मकम् । रथाङ्गपाणेरिति तस्य सदा चक्रहस्तत्वेन चक्रस्य माहात्म्यं सूचितं विभग्नमुखः पराङ्मुखः सन् वाराणसीं प्रति समेत्य प्रतिकूलतया सम्यग्भूतगणसाहित्येनैत्य सम्यक् भस्मावशेषतयाऽदहत् स्वकृत इत्याश्चर्य्येण आनन्देन च प्रयोगः ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

जनानां पौराणां वैक्लव्यं भयार्त्तिवाक्यम्, स्वानां यादवानां स्नेहभरेण तदर्थभयम्, सम्यगुच्चैः प्रकर्षेणावहेलया भंगीविशेषेण हसित्वेति तदग्रिलाघवत्वादिबोधनाय । तच्च तेषां भयनिवृत्तार्थम्, यतः शरण्यो निजजनरक्षापरः; अहमित्याश्वासनार्थं स्वप्रभावं द्योतयति ॥ ३७ ॥ विशेषतः समूलतया सच्छिद्ररवत्वादिना च ज्ञात्वा, यतः सर्वस्य जगतो बहिरन्तश्च साक्षी साक्षाद्द्रष्टा, यतो विभुः सर्वैश्वर्य्यपरिपूर्णः; यद्वा, ननु प्रियतमस्य महेश्वरस्य कृत्याविघातनेन तदर्च्चक-घातनादिना चानादरः स्यात्तत्राह—सर्वस्येति । 'अब्रह्मण्ये प्रयोजितः' इति तस्य बहिर्वाक्यं तद्दुष्टवधादौ चान्तरिच्छां जानातीति भावः। पार्श्वस्थमिति सदा श्रीभगवदाज्ञापेक्षया मूर्त्तिमत्त्वेन समीपेऽवतिष्ठमानमित्यर्थः ॥ ३८ ॥ अथ आदेशानन्तरमेवार्द्दयत्, यतो मुकुन्दस्य श्रीरुद्रादीनामपि भक्त्यानन्दप्रदस्य भगवतोऽस्त्रम्, अतस्तदग्न्यर्द्दनसामर्थ्याय ततोऽधिकाधिक-माहात्म्यं दर्शयन् विशिनष्टि-सूर्य्येत्यादिना । सुदर्शनमिति तादृश-तिग्मतेजोमयत्वेऽपि सुदृश्यतां बोधयति । स्वेन असाधारणेन तेजसा; अथ च, रोदस्यौ च ॥ ३९ ॥ रथांगपाणेरिति सदा चक्रयुक्तहस्तत्वेन चक्रस्य माहात्म्यं सूचितम् । विभग्नमुखो विनष्टदर्पः पराङ्मुखो वा सन्, हे नृपेति प्रहर्षात्; वाराणसीं प्रति वाराणस्याम्; यद्वा, प्रति प्रतिकूलतया सम्यग् भूतगणसाहित्येनेत्य सम्यग भस्मावशेषतया अदहत् । कुतः ? स्वयमेव कुतः; अस्थाने प्रयुक्तस्याभिचारस्य तस्मिन् वैयर्थ्येन विपरीतफलत्वात्, अत एव तत्सहायान् ऋत्विगादीनप्यदहत् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

श्रुत्वेति । तज्जनानां वैक्लव्यं अधैर्यं (दैन्यं) श्रुत्वा स्वानां साद्ध्वसं भयं च दृष्ट्वा प्रहस्योवाच, तदेवाह—शरण्योऽहं भविता चास्मि भयं माकुरुत दुष्टजनात्संसाराच्च सम्भवद्भयं वो न विद्यते इति ॥ ३७ ॥ सर्वस्येति । सर्वस्य लोकस्यान्तर्बहिश्च साक्षाद्द्रष्टा हेतुगर्भमिदम् अतो माहेश्वरीं कृत्यां विज्ञाय तद्विघातार्थं कृत्यानाशनार्थं पार्श्वस्थं चक्रं सुदर्शनमाज्ञापयामास ॥३८॥ तद्भगवताऽऽदिष्टं चक्रं कर्त्तृ अग्निमार्द्दयत् कथंभूतं चक्रं सूर्याणां कोटिः प्रतिमा तुला यस्य तत् सुदर्शनाख्यमतिशयेन ज्वलत् प्रलयाग्नेरिव प्रभा यस्य तत् स्वतेजसा खमन्तरिक्षं रोदसी द्यावापृथिव्यौ ककुभो दिशश्च प्रकाशयदिति शेषः । मुकुन्दस्यैवासाधारणमस्त्रम् ॥ ३९ ॥ अर्दितस्सन् किमकरोदित्यत आह—कृत्यानल इति । रथाङ्गपाणेस्तेन प्रसिद्धेन तेजसा तेजःप्रचुरेण सुदर्शनेन भग्नं मुखं यस्य सः प्रतिहतश्चात एव निवृत्तः सः प्रसिद्धः कृत्यानलो हे नृप ! वाराणसीं प्रत्यागत्य स्वेन कृतः अभिचारो येन तमृत्विग्जनैः सहितं प्रथमान्तपाठे ऋत्विग्भिर्जनैश्च वर्तमानमभिचरति मारयतीति तथा स कृत्यानलः तं सुदक्षिणमदहत् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

जनानां पौराणां वैक्लव्यं स्वानां तत्पालकानां यादवानाञ्च साध्वसं कारणाज्ञानाद्भयम् ॥ ३७ ॥ चक्रमादिशदित्यल्पस्य कार्यस्य हेतोर्मे द्यूतक्रीडासुखभङ्गो मा भवत्वित्यभिप्रायेण ॥ ३८ ॥ रोदसी च व्याप्येति शेषः चक्रं कर्तृ अग्निं कृत्यानलम् आर्दयत् ॥ ३९-४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । षट्षष्टितमोऽध्यायः दशमेऽस्मिन् सङ्गतः ॥ ६६ ॥

गूढार्थदीपिनी

वैक्लव्यं व्याकुलताम् । साध्वसं भयम् । अवितास्मि रक्षिष्यामि ॥३७॥ साक्षी गता ॥ ३८ ॥ तत् मुकुन्दास्त्रं सुदर्शनं चक्रं कर्तृ अग्निं कृत्यानलम् अमर्दयत् इत्यन्वयः । कथंभूतम् । खादीन् प्रति जाज्वल्यमानं प्रकाशं कुर्वाणम् । रोदसी द्यावाभूमी ॥ ३९ ॥ प्रतिहतः अत एव निवृत्तः सन् सुदक्षिणं समदहत् । स्वेनैव कृतः अभिचारः मारणप्रयोगः स्वस्यैव नाशहेतुरभवत् । यद्वा । सुष्ठु ब्रह्मण्ये अकारपदवाच्ये हरौ कृतः ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

खादीन् व्याप्येति शेषः अग्निं कृत्यानलमार्दयत् ॥ ३९ ॥ स्वकृतः स्वप्रवर्त्तितः अभिचर्य्यतेऽनेनेत्यभिचारः कृत्यानलः ॥ ४० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

क्षणं चेत्ते न वदेयुः, तदा भगवान् तूष्णीं स्थितः दाहप्रारम्भपर्यन्तम् । पश्चादतिक्रोधे पक्षान्तराणां मूलच्छेदमेव कुर्यात् । यथा न कदापि भगवद्विपक्षाणामुद्गमः स्यात् । तावद्विलम्बं लोका न सहन्त इति भगवान् भक्तकृपालुः तद्वैक्लव्यात् सामिकार्यमेव कृतवानित्याह **श्रुत्वा तज्जनवैक्लव्यमिति** । तत्प्रसिद्धं जनानां वैक्लव्यं दृष्ट्वा च निमित्तं तेषां साध्वसं भयं च दृष्ट्वा स्वयं शरणार्हः प्रहस्याह स्वनाशार्थं कृतवानिति । **मा भैष्टे**त्याह । हेतुवाक्यव्यतिरेकेण भयस्यानिवृत्तावाह **अवितास्म्यहमिति** ॥ ३७ ॥ निदानार्थपरिज्ञानेऽपि सुदर्शनं सर्वार्थमिति सुदर्शनावलम्बनेनैव कदाचित्प्रतीकारं कुर्यादित्याशङ्क्याह **सर्वस्यान्तर्बहिःसाक्षीति** । माहेश्वरीं कृत्यां विभुत्वाद्विज्ञाय तद्वधार्थं पार्श्वस्थं चक्रमादिशत्, चक्रं हि सचेतनं चक्ररूपेणैव । विभुत्वान्न चक्रसामर्थ्येन किञ्चित्, किन्तु स्वसामर्थ्येनैवेत्युक्तम् । तस्य विघातः अग्नेः कार्यप्रतिघातः, न तु स्वरूपनाशः । **पार्श्वस्थ** इति स सर्वथा हृदयाभिज्ञः ॥ ३८ ॥ ततो भगवदिच्छानुसारेण चक्रकृत्यमाह **तत्सूर्यकोटिप्रतिमिति** । सूर्यकोटिसमानतेजस्त्वं स्वाभाविकी शक्तिः । जाज्वल्यमानमिति तस्योत्साहो निरूपितः । **प्रलयानलप्रभमिति** तस्य क्रोधावेशः । ततः क्रोधवशादुक्तदृष्टान्तसधर्मा जात इत्याह **स्वतेजसा खं ककुभो रोदसी च अर्दयदिति** । अन्तरिक्षं दश दिशः द्यावापृथिव्यौ च ज्वालयतीव । एतत्सामर्थ्यं न स्वस्य, किन्तु भगवत इति वक्तुं **मुकुन्दास्त्रमित्युक्तम्** । एवं सर्वं दग्ध्वैव, पश्चाद्भिन्नप्रक्रमेण अग्निमार्दयत् । आ सर्वतः सर्वथैव भग्नसङ्कल्पं कृतवान् ॥ ३९ ॥ ततो यज्जातं तदाह **कृत्यानलः प्रतिहत** इति । स स्वतन्त्रोऽपि **रथाङ्गपाणेरि**ति तस्य लौकिकवैदिकसामर्थ्यनाशकत्वमुक्तम् । तत्रापि अप्रतिहतरूपमेव । तत्रापि तस्य ओजःत्वेन हतः सन् भग्नमुखो भूत्वा निवृत्तो जातः । ततो वाराणसीमपि महानिति प्रति समेत्य व्याघुट्य समागत्य स्वस्थाने समागत्य सुदक्षिणं तं स्वोत्पादकं सर्त्विग्जनं ऋत्विग्जनसहितं सम्यगदहत् । अनेन ब्राह्मणा हता इति न भगवद्द्वेषः कोऽपि । यतः स्वकृत एवाभिचारः, आत्मीयश्चेद्बाणः स्वात्मानं विध्यति, तदा न कस्यापि दोष इति ते सर्वे कृत्यानलेन भस्मसात्कृता इत्यर्थः ॥४०॥

श्रीसुबोधिनी-सारः

तत् जनानां वैक्लव्यं विकलतां श्रुत्वा स्वानामात्मीयानां साध्वसं संभ्रमं च दृष्ट्वा सम्यक् प्रहस्य शरण्यः श्रीकृष्ण आह यूयं माभैष्ट अहमविता रक्षकोऽस्मि ॥ ३७ ॥ सर्वस्यांतर्बहिः साक्षी सर्वज्ञो विभुर्माहेश्वरीं कृत्यां विज्ञाय ज्ञात्वा तस्या विघातार्थं नाशार्थं पार्श्वस्थं सुदर्शनं चक्रमाज्ञप्तवान् ॥ ३८ ॥ सूर्यकोटितुल्यम् अतिशयेन ज्वलत् प्रलयाग्निसदृशं मुकुंदस्य हरेरस्त्रं तत्सुदर्शनं चक्रं स्वतेजसा खमाकाशं ककुभो दिशः रोदसी द्यावाभूमी अथाग्निं कृत्यानलमपीडयत् खादीन् प्रकाशयदिति स्वामी ॥ ३९ ॥ रथांगं चक्रं पाणौ यस्य तस्य हरेरस्त्रौजसा चक्रतेजसा स कृत्यानलः प्रतिहत आस बभूव । भग्नं मुखं यस्य सोऽग्निर्निवृत्तः वाराणसीं वराणसोऽदूरभवां काशीं प्रत्येत्य सर्त्विग्जनम् ऋत्विग्जनैः सहितं सुदक्षिणं तं स्वकृतोऽभिचारः समदहत् ॥ ४० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

सर्वस्येत्यत्र । सचेतनमिति । चेतनासहितमित्यर्थः । तत्सूर्यकोटीत्यत्र । उक्तदृष्टान्तसधर्मा जात इति । उक्तदृष्टान्तस्य प्रलयानलस्य कार्यं कृतवानित्यर्थः ।

इति सप्तदशाध्यायव्याख्या समाप्ता ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत् जनानां वैक्लव्यं व्याकुलतां दृष्ट्वा तथा स्वानां भक्तानां तेषां साध्वसं दुःखं च दृष्ट्वा शरण्यः समर्थत्वात् रक्षको भगवान् प्रहस्य 'मा भैष्ट भयं मा कुरुत, अहं अविता रक्षकोऽस्मि' इत्याहेत्यन्वयः ॥ ३७ ॥ यतो विभुः सर्वत्र व्यापकः, अतः

स्थावरजङ्गमात्मकस्य जगतोन्तर्बहिःसाक्षी साक्षाद्द्रष्टा, अतएव तां माहेश्वरीं कृत्यां विज्ञाय तस्य कृत्यानलस्य विघातार्थं स्वपार्श्वस्थं चक्रं सुदर्शनमादिशत् आज्ञापयामास ॥ ३८ ॥ सूर्याणां कोटिः प्रतिमा तुल्या यस्य तत् । अत एव प्रलयानलस्येवातिशयेन ज्वलन्ती प्रभा यस्य तत् । अत एव जाज्वल्यमानम् । अत एव स्वतेजसा खमन्तरिक्षं, ककुभो दिशः, अथ रोदसी द्यावापृथिव्यौ, च प्रकाशयत् तत् मुकुन्दस्यास्त्रं सुदर्शनं चक्रमग्निमार्दयत् पीडयामास ॥ ३९ ॥ 'अर्दितः सन् स किमकरोत्' इत्यत आह—कृत्यानल इति । हे नृप ! स कृत्यानलः सरथाङ्गपाणेः चक्रधरस्यास्त्रौजसा चक्रतेजसा प्रतिहतः, अत एव भग्नमुखः ततो निवृत्तः वाराणसीं परिसमेत्य ऋत्विग्भिरन्यैश्च जनैः सहितं तं सुदक्षिणं सम्यगदहत् । 'नन्वेवं चेद्भगवतोऽपि ब्राह्मणदाहदोषप्रसङ्गः' इत्याशङ्क्याह—स्वकृतोभिचार इति । अभिचरति मारयतीत्यभिचारः कृत्यानलः, तस्य स्वकृतत्वान्न भगवतो दोषप्रसङ्ग इत्यर्थः ॥ ४० ॥

अन्वितार्थप्रकाशिका

श्रुत्वेति ॥ तत् जनानां वैक्लव्यं व्याकुलतां दृष्ट्वा तथा स्वानां भक्तानां तेषां साध्वसं भयं च दृष्ट्वा शरण्यः समर्थत्वात् रक्षको भगवान् प्रहस्य मा भैष्ट भयं मा कुरुत । अहम् अवितास्मि रक्षिष्यामीत्याह स्म ॥ ३७ ॥ सर्वस्येति ॥ यतो विभुः सर्वत्र व्यापकः अतः स्थावरजङ्गमात्मकस्य जगतोऽन्तर्बहिः साक्षी साक्षाद्द्रष्टा अत एव तां माहेश्वरीं कृत्यां कृत्यानलस्य विधातार्थं स्वपार्श्वस्थं चक्रं सुदर्शनमादिशत् ॥ तदिति ॥ सूर्याणां कोटिः प्रतिभा तुल्या यस्य तत् अत एव प्रलयानलस्येवातिशयेन ज्वलन्ती प्रभा यस्य तत् अत एव जाज्वल्यमानम् अत एव स्वतेजसा खमन्तरिक्षं ककुभो दिशः अथ रोदसी द्यावापृथिव्यौ च प्रकाशयत् इति शेषः । यद्वा । स्वतेजसा खादीन् प्रति जाज्वल्यमानं तत् मुकुन्दस्यास्त्रं सुदर्शनं चक्रं कर्तृ अग्निमार्दयत् पीडयामास ॥ ३८–३९ ॥ कृत्येति ॥ हे नृप ! स कृत्यानलः रथाङ्गपाणेः चक्रधरस्यास्त्रौजसा चक्रतेजसा प्रतिहतः अत एव स भग्नमुखः ततो निवृत्तः वाराणसीं परिसमेत्य ऋत्विग्भिरन्यैश्च जनैः सहितं तं सुदक्षिणं सम्यगदहत् । यतः सः अभिचारः कृत्यानलः स्वेन प्रयोक्त्रा एव कृतः अतस्तन्नाशहेतुरेवाभूत् ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

साध्वसं भयं । अहं अवितास्मि रक्षिष्यामि ॥ ३७–३८ ॥ सूर्यकोटयः प्रतिमा उपमा यस्य तत् । स्वतेजसा आकाशादीनप्रकाशयत् सत् । अग्निमार्दयत् पीडयामास रोदसी द्यावापृथिवी ॥ ३९ ॥ एवं सुदर्शनेन पीडितोऽग्निः किं कृतवांस्तत्राह कृत्यानल इति हे नृप प्रतिहतः पराभूतः विभग्नमुखः निर्वृत्तः सन् स्वकृतः अभिचारः मारणप्रयोगरूपः सः कृत्यानलः ऋत्विग्जनैः सहितं सुदक्षिणसंज्ञं काशिराजसुतं समदहत् सम्यक् ददाह ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

श्रुत्वेति । तत् जनवैक्लव्यं जनानां दीनवचनं श्रुत्वा, स्वानामात्मीयजनानां, साध्वसं भयं च दृष्ट्वा, शरण्यः शरणागतसाधुः कृष्णः, संप्रहस्य, अहं अविता रक्षिता, अस्मि । इति हेतोः, मा भैष्ट भयं मा कुरुत इत्याह ॥ ३७ ॥ सर्वस्येति । सर्वस्य लोकस्य, अन्तःबहिश्च, साक्षी साक्षाद्द्रष्टा, हेतुगर्भमिदं, तत्त्वात् विभुः श्रीकृष्णः, माहेश्वरीं कृत्यां विज्ञाय, तद्विघातार्थं कृत्यानाशार्थं, पार्श्वस्थं चक्रं सुदर्शनं, आदिशदाज्ञापयामास ॥ ३८ ॥ तदिति । अथ सूर्याणां कोटिः प्रतिमा तुल्या यस्य तं, अतिशयेन ज्वलतीति जाज्वल्यमानं, प्रलयानलस्येव प्रभा यस्य तत्, स्वतेजसा खमाकाशं, ककुभो दिशः, अथ रोदसी द्यावापृथिव्यौ, प्रकाशयदिति शेषः । मुकुन्दस्य भगवतोऽस्त्रमस्त्रभूतं, तद्भगवदादिष्टं, सुदर्शनं सुदर्शनाख्यं, चक्रं, अग्निं कृत्यानलं, आर्दयत् ॥३९॥ अर्दितः सः किमकरोदित्यत्राह । कृत्यानल इति । हे नृप, रथाङ्गपाणेः श्रीकृष्णस्य, अस्त्रौजसा सुदर्शनास्त्रतेजसा, भग्नमुखः प्रतिहतश्च, अत एव निवृत्तः अभिचर्यतेऽनेनेत्यभिचारः स्वेन कृतः स चासावभिचारः स्वकृताभिचारात्मकः सः, कृत्यानलः, वाराणसीं परिसमेत्य, सर्त्विग्जनं तं सुदक्षिणं, समदहत् ॥ ४० ॥

कृष्णप्रिया

शरणागतवत्सल भगवान् श्रीकृष्ण ने देखा कि द्वारिका के प्रजाजन-हमारे स्वजन भयभीत हो गये हैं, और विह्वल होकर रक्षण के लिये प्रार्थना कर रहे हैं। इस परिस्थिति को अपनी नजरों से निहारकर करुणानिधि ने स्मितपूर्वक कहा—आप डरो मत, मैं आप लोगों की सर्वविध रक्षा करूँगा ॥३७॥ राजन् परीक्षित ! भगवान तो सर्वज्ञ हैं, प्राणीमात्र के अंतर एवं बाहर के ज्ञाता है और सर्वसमर्थ एवं दयालु हैं। वे जानते थे कि यह काशी से आयी हुई माहेश्वरी कृत्या हैं। भगवान् ने कृत्या के प्रतिकार के लिये अपने समीप ही विराजमान सुदर्शन चक्र को आदेश दिया ॥ ३८ ॥ कोटि-कोटि सूर्य के समान तेजोमय, प्रलयकाल की अग्नि के समान प्रज्वलित मुकुन्द भगवान् का अतिशय प्रिय उस तेजोमय सुदर्शन चक्र के तेज से दश

दिशाएँ अन्तरिक्ष आदि सारा ब्रह्माण्ड चमक उठा और तेजोमय सुदर्शन जी ने अभिचार अग्नि की कृत्या को भस्म कर डाला ॥ ३९ ॥ राजन् ! यह तो विश्वविदित वार्ता है कि अभिचार क्रिया का यदि किसी सर्वसमर्थ शक्ति ने प्रतीकार किया तब वह अभिचार विधि करने वालों का ही नाश करती है। भगवान् शंकर ने कहा था कि किसी ब्रह्मदेव पर इस कृत्या का प्रयोग न करना। अन्यथा यह कृत्या प्रयोजक के विनाश का कारण बनेगी। सुदक्षिण ने ब्रह्मण्यदेव और स्वयं ब्रह्म भगवान् श्रीकृष्ण पर प्रयोग किया। भगवान् श्रीकृष्ण के अस्त्र श्री सुदर्शन चक्र ने अपने तेज से कृत्यानल का मुंह तोड़ दिया, कृत्यानल के तेज को नष्ट कर दिया। उसकी शक्ति कुण्ठित हो गयी, पुनः द्वारिका से लौटकर वह काशी आया और वरण किये गये ऋत्विज् आचार्यों के साथ यजमान सुदक्षिण को भस्मसात् कर दिया ॥ ४० ॥

चक्रं च विष्णोस्तदनुप्रविष्टं वाराणसीं साट्टसभालयापणाम्।
सगोपुराट्टालककोष्ठसंकुलाः[1] सकोशहस्त्यश्वरथान्नशालाम्[2] ॥ ४१ ॥

दग्ध्वा वाराणसीं सर्वां [3]विष्णुचक्रं सुदर्शनम्। भूयः पार्श्वमुपातिष्ठत् कृष्णस्याक्लिष्टकर्मणः ॥ ४२ ॥
य [4]एतच्छ्रावयेन्मर्त्य उत्तमश्लोकविक्रमम्[5]। समाहितो वा शृणुयात् सर्वपापैः प्रमुच्यते ॥ ४३ ॥[6]

इति श्रीमद्भागवते महापुराणे[7] दशमस्कन्धे[8] पौण्ड्रकादिवधो नाम [9]षट्षष्टितमोऽध्यायः ॥ ६६ ॥

कर्दमक्षमा

अन्वयः—च, तद्, विष्णोः, चक्रम्, साट्टसभालयापणम्, सगोपुराट्टालक, कोष्ठसङ्कुलाम्, सकोशहस्त्यश्वरथान्नशालाम्, वाराणसीम्, अनुप्रविष्टम्, प्रविश्य, सर्वाम्, वाराणसीम्, दग्ध्वा, विष्णोः, चक्रम्, सुदर्शनम्, भूयः, अक्लिष्टकर्मणः, कृष्णस्य, पार्श्वम्, उपातिष्ठत् ॥ ४१-४२ ॥ यः, मर्त्यः, एतत्, उत्तमश्लोकविक्रमम्, श्रावयेत्, वा, समाहितः, शृणुयात्, सर्वपापैः, प्रमुच्यते ॥ ४३ ॥

श्रीमद्भागवते दशमस्कन्धे षट्षष्टितमोऽध्यायः ॥ ६६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अट्टादिसहिताम्। अट्टा मंचः ॥ ४१-४३ ॥

इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टी० षट्षष्टितमोऽध्यायः ॥ ६६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदनु सुदक्षिणदाहोत्तरम्। "अट्टं भक्ते मंचशुष्के क्षौमेऽत्यर्थे गृहांतरे" इति धरणिः। कोष्ठमंतर्गृहम्। कोशो धनागारम् ॥ ४१-४३ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे षट्षष्टितमोऽध्यायः ॥ ६६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

चक्रं च वाराणसीं प्रति समदहत् इति पूर्वेणान्वयः शालिनीमिति शालामिति वा पाठः ॥ ४१ ॥ सुदर्शनमिति सुदृश्यरूपं सदिति भावः। न चेदमाश्चर्यमिति तस्य स्वभावमनुवदति अक्लिष्टेति ॥ ४२ ॥ एतद्भगवद्बहिर्मुखानां काशीवासिनां दमनरूपमाख्यानम् उत्तमश्लोकस्य विक्रमा यस्मिन् तत् एतमिति पाठः स्पष्टः समाहितः सावधानः सश्रद्ध इत्यर्थः। किं वक्तव्यं स्वपरहितकारी श्रावयित्वा प्रमुच्यत इति केवलमात्महितकर्तृवत् श्रोतापि प्रमुच्यत इति वाशब्दार्थः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां षट्षष्टितमोऽध्यायः ॥ ६६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

चक्रञ्च वाराणसीं समदहत्, तस्याः कृत्याया अनु पश्चात् प्रविष्टं सत्; विष्णोर्विश्वव्यापकस्येति तच्चक्रस्यापि व्यापकत्वं सूचितम्। अतएवाट्टादि-सहितां कोशादिशालासहिताञ्चेति। सर्व्वां शालिनीमिति वा पाठः ॥ ४१ ॥ दग्ध्वेत्यादिपुनरुक्तिः

---

१. तोरणां-विज.; संकुलः-त. पु. मु.। २. वरूथमन्दिराम्-विज.; श्वरथान्न शालिनीम्-श्रीधर. टि.। ३. विष्णोश्चक्रं-श्रीधर. वंशी. जीव. वीर. विज. विश्व.। ४. एनं-त. पु. मू.। ५. चेष्टितम्-वीर.।

६. तावुभौ सर्वपापेभ्यो ब्रह्महत्यादिभिर्नृप। विमुच्य देहावसाने विष्णुलोकं प्रयास्यतः ॥-अधिकः विज.। ७. पारमहंस्यां संहितायां-प्रा. पा.। ८. पौण्ड्रककाशिराजवधः षट्-प्रा. पा.। ९. एकोनसप्ततितमोऽध्यायः-विज.।

सम्यक् सर्व्वतो दाहाद्यभिप्रायेणोक्तपोषन्यायात् । तत्र विष्णुचक्रमित्युक्त्यभिप्रायमेव । यद्वा, तस्य तदेकस्वामित्वं तेनासाधारणत्वञ्चोक्तम्, अतएव भूय उप उपासकतयातिष्ठदाश्रयत् । सुदर्शनमिति सुदृश्यरूपं तदिति भावः । यतः कृष्णस्य सर्व्वगुणरूपादियुक्तस्येत्यर्थः । अतएवाक्लिष्टं सर्व्वसुखावहम्, किंवा अनायासेनैव तत्तदाचरणात् क्लेशरहितं कर्म्म यस्य तस्य ॥ ४२ ॥ अहो किं वक्तव्यम्, महातीर्थ-काशी-तन्निवासिलोकादि-दहनमयुक्तमिति दुष्ट-तत्संग्यादिदण्डेन श्रीभगवतो माहात्म्यविशेषसम्पत्त्या तच्छ्रवणादिनापि समूल-सर्व्वदुःखतो विमुक्तिः स्यादित्याह—य इति । एतदाख्यानम्, उत्तमश्लोकस्य विक्रमो यस्मिंस्तत्; एनमिति पाठः स्पष्टः । मर्त्त्य इति मरणधर्म्मत्वाच्छ्रावणश्रवणयोरपेक्षकताधिकारानपेक्षा चोक्ता । समाहितः श्रद्धयेहितः सन्निति । अन्यथा नास्तिकत्वादिप्रसक्तिः । यद्वा, श्रीकृष्णार्पितचित्तः, किंवा स मर्त्यो मया लक्ष्म्या हितः श्रीभगवद्भक्त्या स्नेहविषयः सन् सर्व्वैः समूलैः फलोन्मुखैश्च पापैः प्रकर्षेण वैकुण्ठप्राप्तियोग्यत्वादिना मुच्यते । अतएवोत्तमश्लोक-शब्दप्रयोगः । किं वक्तव्यम्, स्वपरहितकारी श्रावकः प्रमुच्यत इति केवलमात्महितकृच्छ्रोतोऽपि प्रमुच्यत इति वा-शब्दार्थः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री-श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां षट्षष्टितमोऽध्यायः ॥ ६६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

चक्रं च विष्णोरिति समदहदित्यनुषङ्गः ॥ ४१-४३ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये षट्षष्टितमोऽध्यायः ॥ ६६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किञ्च, चक्रमिति । तद्विष्णोश्चक्रं वाराणसीमनुकृत्यानलमनुसृत्य प्रविष्टं सददहदिति पूर्वेण सम्बन्धः कथम्भूताम् ? अट्टादिभिः सहितां तत्र सभालया सभागृहाणि सभा आलयाश्चेति वा अट्टालकाः उपरीतनप्रदेशाः गोपुरादिसहितैर्गोकुलैर्व्याप्तां सङ्कुलां कोशादीनां शालादिभिस्सहितां तत्र कोशो धनम् ॥ ४१ ॥ दग्ध्वेति । भूयः पुनरक्लिष्टकर्मणः उदारचेष्टितस्य कृष्णस्य पार्श्वमुपातिष्ठत् पार्श्वसमीपे तस्थौ इत्यर्थः ॥ ४२ ॥ उक्तकथाश्रवणादिफलमाह—य इति । यः पुमानेतदुत्तमश्लोकस्य चेष्टितं मर्त्यान्प्रति श्रावयेत् यद्वा समाहितः शृणुयात् स सर्वैः पापैर्मुक्तो भवेत् ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां षट्षष्टितमोऽध्यायः ॥ ६६ ॥

गूढार्थदीपिनी

तदनु वाराणसीं च समदहदित्यनुषङ्गः । अट्टाः मञ्चाः । गोपुरं नगरद्वारम् अट्टालकाः गृहोपरिभागाः (अटारी) ॥४१॥ विक्रमः अस्त्यस्मिन्निति चरितमित्यर्थः मत्वर्थीयोऽच् प्रत्ययः ॥ ४२-४३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां षट्षष्टितमोऽध्यायः ॥ ६६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

चक्रं च वाराणसीं समदहदित्यनुषङ्गः ॥ ४१-४३ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षट्षष्टितमोऽध्यायार्थप्रकाशः ॥ ६६ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः सुदर्शनं भगवद्धृदयं जानातीति काशीमपि पीडितबदित्याह चक्रं च विष्णोरिति । तदनु कृत्यानलमनुप्रविष्टं सत् वाराणसीं समदहदिति सम्बन्धः । विष्णोश्चक्रत्वान्न तस्य भयम् । छर्दीष्येव दग्धानि इति शङ्कां वारयितुं साट्टसभालयापणामित्युक्तम् । अट्टादयः सौधगृहाः । सभास्थानान्यपि । तथा आपणः पण्यवीथी । एते अद्यापि लोके सुधाधवलिता भवन्ति । साधारणा एत इति विशिष्टानामपि दाहं निरूपयति सगोपुरेति । पुरद्वारसहिताम्, अट्टालकाः हर्म्याः धनिनां गृहाः । कोष्ठानि दुर्गादावन्नसंग्रहस्थानानि । सगोकुलाट्टालसगोष्ठसंकुलामिति पाठे गोष्ठादीनां गोकुलस्य । तत्रापि प्रसिद्धगोपानां अट्टालकसहितस्य कदाचिद्दाहं न कुर्यादिति शङ्का स्यात्, तन्निवृत्त्यर्थमेवमुक्तम् । लक्ष्म्या आयतनं न पीडयिष्यतीत्याशङ्क्याह सकोशहस्त्यश्वरथान्नशालामिति । कोशा भाण्डारगृहाः । हस्त्याद्यन्नान्तानां च शालाः । रथनिर्माणं यत्र क्रियते, सा रथशाला । स्थापिता अपि रथा गृहेष्वेव तिष्ठन्ति । अन्यथा घर्माद्युपद्रवो भवतीति ॥४१॥ एवं सामान्यविशेषप्रकारेण दाहमुक्त्वा सर्वदाहो न भविष्यतीत्याशङ्क्य, विशेषं वदन्नुपसंहरति दग्ध्वा वाराणसीं सर्वामिति । विष्णुचक्रत्वात् कार्यसिद्धिः । सुदर्शनमिति ।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं च ॥ चक्रमिति ॥ तदनु कृत्यानलदहनानन्तरं, प्रविष्टं पुरे कृतप्रवेशं, विष्णोः चक्रं चापि, साट्टसभालयापणां, अट्टैः सभाभिरालयैरापणैश्च सहितां, तत्राट्टा मञ्चाः, सभाः सदोगृहाणि, आलयानि गृहाणि, सभा आलयानि चेति वा, सगोपुरा अट्टालकाः कोष्ठाश्च तैः संकुला तां, कोशाश्च हस्तिनश्च अश्वाश्च अन्नानि च तेषां शालाभिः सह वर्त्तमानां तां, वाराणसीं काशीं, समदहदिति पूर्वेण संबन्धः ॥ ४१ ॥ दग्ध्वेति । विष्णोश्चक्रं, सुदर्शनं, सर्वां वाराणसीं, दग्ध्वा, अक्लिष्टकर्मणः कृष्णस्य, पार्श्वं, भूयः उपातिष्ठत् ॥४२॥ य इति ॥ यः मर्त्यः, एनं उत्तमश्लोकविक्रमं, श्रावयेत्, समाहित एकाग्रचित्तः, सन्, शृणुयात् वा, सः, सर्वपापैः, प्रमुच्यते ॥ ४३ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे षट्षष्टितमोऽध्यायः ॥ ६६ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण का सुदर्शन चक्र भगवान् की आज्ञा से कृत्या के पीछे-पीछे चला और काशीपुरी पहुँचा। काशीपुरी विकसित, सुशोभित एवं बड़ी विशाल नगरी थी। काशीपुरी में भवनों की अटारियाँ अतिशय विशाल थीं, अनेक सभा भवन थे, बाजार विशाल थे, नगर के दरवाजे सुंदर और विशाल थे, द्वारों के शिखर कलामय और गगनचूंबी थे, हस्तीशाला, अश्वशाला, रथशाला आकर्षक एवं अत्यन्त विशाल थी, अन्न के कोष्ठों से नगरी सुसज्जित थी, चहारदीवारियाँ सबके चित्त को खींचती थी, खजाने सुरक्षित थे ॥ ४१ ॥ भगवान् श्रीकृष्ण से प्रेरित सुदर्शन चक्र ने सम्पूर्ण काशीनगर को जलाकर भस्म कर दिया। अपना कार्य पूर्ण करके पुनः सुदर्शन चक्र रसमय एवं रहस्यमय लीला करने वाले आनन्दमय भगवान् श्रीकृष्ण के चरण कमलों में लौट आया एवं विनम्रता से श्रीनाथ के चरणों में नमस्कार कर आज्ञा प्राप्त कर आसन किया ॥ ४२ ॥ जो भक्तजन एकाग्रता से उत्तमश्लोक भगवान् श्रीकृष्ण के रसमय अद्भुत चरित्र का श्रवण करेगा, वह पुण्यात्मा सर्व प्रकार के पापों से मुक्त हो जाएगा ॥ ४३ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां पौण्ड्रकवधकथावर्णने षट्षष्टितमाध्यायस्य भाषान्तरं समाप्तम् ॥ ६६ ॥

* * *

[1]अथ सप्तषष्टितमोऽध्यायः

श्लोकाः	अनु.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
२८	२८	२	८९६	१०	४३	९४९	२९॥	५

राजोवाच

भूयोऽहं श्रोतुमिच्छामि रामस्याद्भुतकर्मणः । अनन्तस्याप्रमेयस्य यदन्यत् कृतवान् प्रभुः ॥ १ ॥

श्रीशुक उवाच

नरकस्य सखा कश्चिद् द्विविदो नाम वानरः । सुग्रीवसचिवः सोऽथ भ्राता मैन्दस्य वीर्यवान् ॥ २ ॥
सख्युः सोऽपचितिं कुर्वन् वानरो राष्ट्रविप्लवम् । पुरग्रामाकरात् घोषानदहद् [2]वह्निनोत्सृजन् ॥ ३ ॥
क्वचित् स शैलानुत्पाट्य [3]तैर्देशस्थानमचूर्णयत् । आनर्तान् सुतरामेव [4]यत्रास्ते मित्रहा[4] हरिः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—राजोवाच—भूयः, अहम्, अद्भुतकर्मणः, अप्रमेयस्य, अनन्तस्य, रामस्य, यत्, अन्यत्, कृतवान्, तत्, श्रोतुम्, इच्छामि ॥ १ ॥ श्रीशुक उवाच–द्विविदः, नाम, कश्चिद्, वानरः, नरकस्य, सखा, सुग्रीवः, रुचिरः, अथ, सः, तीर्थवान्, मैन्दस्य, भ्राता (आसीत्) ॥ २ ॥ सः, वानरः, सख्युः, अपचितिम्, कुर्वन्, पुरग्रामाकरान्, घोषान्, वह्निम्, उत्सृजन्, अदहत् ॥३॥ कच्चित्, स, शैलान्, उत्पाट्य, तैः, यत्र, मित्रहा, हरिः, आस्ते, सुतराम्, आनर्तान्, एव, देशान्, समचूर्णयत् ॥४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सप्तषष्टितमे रामो गिरौ रैवतके मदात् । स्वैरं युवतिभिः क्रीडन्नवधीद् द्विविदं खलम् ॥ १ ॥

कालिंदीविदारणानंतरं रामचरित्रं द्विविदवधादिसंगतमप्यनुक्त्वा तत्पूर्वभावित्वेन पौंड्रकवधादि निरूप्येदानीं तदेव प्रस्तौति भूयोऽहमित्यादिना । रामचरित्रश्रवणेच्छायामद्भुतकर्मत्वं हेतुस्तत्र चानंतत्वं तत्राप्यप्रमेयत्वमिति ॥ १ ॥ नरकस्य सखेति हरिणा वैरे कारणम् । सुग्रीवसचिव इति तस्य मंत्रबलम् । मैंदस्य भ्रातेति रामायणेऽतिप्रसिद्धत्वेन वीर्याधिक्यमुक्तमिति ॥ २ ॥ सख्युर्नरकस्यापचितिमानृण्यम् । राष्ट्रस्य विप्लवो नाशो यथा भवति तथा पुरादीनदहदिति ॥ ३ ॥ किंच क्वचिदिति । कदाचित्स द्विविदः मित्रहा सखिहंता ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

द्विविदं वानरम् (१) । तत्पूर्वभावित्वेन द्विविदवधात्प्राक्तनत्वेन । तदेव रामचरितमेव । तत्राद्भुतकर्मत्वे । तत्राप्यनंतत्वेपि । अन्यत् कालिंदीकर्षणेतरत् । यत्कर्म ॥ १ ॥ 'सचिवो मंत्रिचेटयोः' इति मेदिनी । मैन्दोऽपि वानरः नरकस्य सखेति–महाभक्तराजसुग्रीवसचिवत्वेऽपि दुःसंगदोषस्यानर्थकारित्वज्ञापनार्थमुक्तम्, दुःसंगस्यापि कारणं श्रीमल्लक्ष्मणे तस्य पूर्वमनादर आसीदिति यद्यपि मैन्दद्विविदादीनां श्रीरामपूजायामावरणदेवत्वादेव नित्यं सिद्धत्वमेव तदपि महदपराधदुःसंगदोषादिज्ञापनार्थं जयविजयवदेकेन प्रकाशेनैव द्विविदस्य भ्रंशोऽयं दर्शितः । संदर्भस्तु—श्रीरामपूजावरणदेवौ तु तदीयवैकुंठस्थावन्यावेव, एतौ पुनस्तच्छक्त्यावेशिनावेवेत्याह । द्विविदो रात्रौ लंकां गत्वा राक्षसीर्नग्नाः कृत्वा तासां योनीः पस्पर्श तज्ज्ञात्वा ततो रामेण सैन्यान्निष्कासितस्तत्प्रार्थितेन पुनरुक्तम् बलदेवाद्द्वापरे मृत्युं प्राप्य पुनः स्वलोकं गमिष्यतीत्युक्तमन्यत्र ॥२॥ राष्ट्रं श्रीद्वारकानिकटं सौराष्ट्रादि, तस्य विप्लवो येन तद्यथा स्यात्तथादहत् । उत्सृजन्ददहत् ॥ ३ ॥ तैः शैलैः । यत्रानर्तेषु ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृत वैष्णवतोषिणी

कालिन्दीत्यादिटीकायामेवमेव ज्ञेयं प्रस्तुतश्रीरामलीलामध्ये यत् पौण्ड्रकवधादि निरूपितं तत्तस्य तत्रैव जातत्वाद्युक्तमेव अतस्तद्विच्छेदशङ्कया राजा प्रस्तौति पृच्छतीति निरूप्य स्थितं श्रीशुकमिति वाक्यशेषात् भूय इत्यादौ कर्मेति शेषः ।

---

[1] अयमध्यायः क्रमे एकोननवतितमः (८९) इति विजयध्वजक्रमः । [2] वह्निमु–श्रीधर. वंशी. जीव. वीर. विज. विश्व. ; वह्निना भृशम्–प्रा. पा. । [3] देशान् सम–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [4] मेत्य–विज. ।

तदेवाह यदन्यदिति विभुः सर्वशक्तिपूर्णः इति सर्वत्र हेतुः ॥ १ ॥ यद्यपि श्रीसुग्रीवसङ्गी तथापि वक्ष्यमाणदुर्बुद्धित्वे हेतुरयमित्याह—नरकस्येति । एवं दुस्सङ्गस्य दौरात्म्यातिशयो दर्शितः तस्य कारणञ्च बलगर्वितत्वात् श्रीलक्ष्मणादिष्वनादर एवेति ज्ञेयं यौतु मैन्दद्विविदौ श्रीरामपूजायामावरणदेवौ तौ तदीयवैकुण्ठस्थावन्यावेव एतौ पुनस्तच्छक्त्यावेशिनाविवेति च ज्ञेयं तयोस्तदसम्भवात् जयविजयवत् सदपराधफलदर्शनार्थं तादृशबुद्धित्वादेर्बहिरेव व्यञ्जनमिति वा अथेत्यानन्तर्य्ये मैन्दस्यानन्तर एवायं भ्रातेति तेनातिसादृश्यबोधनाय ॥ २ ॥ अपचितिरानृण्यलक्षणः सम्मानः वानर इति पुनरुक्तिर्जात्यैव तावच्चञ्चलदुष्टप्रकृतिरिति व्यञ्जनाय राष्ट्रं श्रीद्वारकानिकटवर्त्तिसौराष्ट्रादि तस्य विप्लवो यत्र तादृशं यथा स्यात् यद्वा राष्ट्रविप्लवरूपामपचितिं पुरादीनां यथोत्तरं न्यूनत्वं कैमुतिकन्यायेन व्याख्येयम् ॥ ३ ॥ तैः प्रक्षिप्तैः ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विभुः सर्व्वशक्तिपूर्णः, अतोऽन्यत् उक्ताच्छ्रीकालिन्द्याकर्षणादेः परं यत् कृतवान्, तत् रामस्य व्रजजनरमणस्य रौहिणेयस्य श्रोतुमिच्छामि । तत्रैव हेत्वन्तरम्—अद्भुतानि श्रीयमुनाकर्षणादीनि कर्म्माणि यस्य तस्येति ॥ १ ॥ कश्चिदेकः, किंवा वीर्य्यादिना लोकोत्तरः । अथ तु, स तु मैन्दस्य भ्रातेति सर्व्वत्र सुविख्यात एवेति भावः । अतो वीर्य्यवान् वानर इति नरतुल्यचेष्टां सूचयति ॥ २ ॥ तामेव दर्शयति—राष्ट्रेत्यादिना । राष्ट्रं श्रीद्वारकानिकटवर्त्तिसौराष्ट्रादिपुरादीनां यथोत्तरं न्यूनत्वं कैमुतिकन्यायेनैव व्याख्येयम् ॥ ३ ॥ तैः प्रक्षिप्तैः सम्यक् चरस्थिरसमेतत्वादिनाचूर्णयत्; हरिरिति तन्मित्रप्राणहरणात् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमन्तरार्गभिणीतिन्यायेन श्रुतश्रीकृष्णचरित्रः पुनः बलभद्रचरित्रबुभुत्सया पृच्छति राजा-भूय इति । अद्भुतं कर्म चेष्टितं यस्य तस्य अनन्तस्य अनन्तावताररूपस्य अप्रमेस्य अपारमहिम्नो रामस्य चेष्टित श्रोतुमिच्छामि किं पूर्वोक्तं नेत्याह-यदन्यदिति । विभू रामः यदन्यत्कृतवांस्तच्चेष्टितम् ॥ १ ॥ द्विविदवधात्मकं कर्माख्यातुं तावद्द्विविदस्य दुश्चेष्टितमाचष्टे—नरकस्येत्यादिना । द्विविदो नाम कश्चिद्वानरः स च नरकस्य सखा सुग्रीवस्य सचिवो मन्त्री मैन्दस्य भ्राता च वीर्यवांश्चेति रामायणादौ प्रसिद्ध इति तात्पर्यम् ॥ २ ॥ सख्युरिति स द्विविदः सख्युर्नरकस्य अपचितिमानृण्यं कुर्वन् "लक्षणहेत्वोः" इति शता कर्त्तुं राष्ट्रस्य विप्लवो नाशो यथा तथा पुरादीन् वह्निमुत्सृजन् ददाह ॥ ३ ॥ क्वचिदिति । स द्विविदः तैरुत्पाटितैः शैलैर्देशांस्तत्राप्यानर्त्तान्सुतरामचूर्णयत् तत्र हेतुत्वेन तान् विशिनष्टि यत्र येष्वानर्त्तेषु मित्रहा नरकघ्नो हरिरास्ते ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अनन्तस्य शेषस्य एन विष्णुना प्रमेयस्य ज्ञेयस्य ॥ १-२ ॥ सख्युर्नरकस्य अपचितिन्निष्कृतिम् ॥ ३-४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

रामस्येति चरितमिति शेषः । तदेवाह—यदन्यदिति ॥ १ ॥ यद्यपि श्रीरामचन्द्रसङ्गी तथापि वक्ष्यमाणदुर्बुद्धित्वे हेतुरयमित्याह—नरकस्येति । दुःसङ्गदोषादिति भावः । तत्कारणञ्च श्रीलक्ष्मणादौ बलगर्वितत्वेनानादर एवेति ज्ञेयम् । यौ तु मैन्दद्विविदौ श्रीरामपूजायामावरणदेवौ तौ तु तदीयवैकुण्ठस्थावन्यावेव एतौ पुनस्तच्छक्त्यावेशिनाविति ॥ २-१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गिरौ रैवतके क्रीडन् प्रेयसीभिरहन् कपिम् । कदर्थयन्तं द्विविदं सप्तषष्टितमे बलः ॥

कृष्णलीलायामत्यावेशाद्रामलीलां काञ्चिदुल्लङ्घ्य महामुनित्वं माधावर्त्तीति पृच्छति—भूय इति । अद्भुतकर्मण इति स्वमज्जनार्थं नदीं कोऽपि स्वान्तिकं नानीतवानिति भावः । नचैतावदेव तत्कर्मेति वाच्यं यतोऽनन्तस्य न च तत्कर्माणि त्वं जानास्येवेति वाच्यं यतोऽप्रमेयस्य मादृशबुद्ध्या प्रमातुमशक्यत्वात् ॥ १ ॥ नरकस्य सखेति महाभक्तराजसुग्रीवसचिवत्वेऽपि दुस्सङ्गदोषस्यानर्थकारित्वज्ञापनार्थमुक्तं दुस्सङ्गस्यापि कारणं श्रीमल्लक्ष्मणे तस्य पूर्वमनादर आसीदिति ज्ञेयं यद्यपि मैन्दद्विविदादीनां श्रीरामपूजायामावरणदेवत्वान्नित्यसिद्धत्वमेव तदपि महदपराधदुस्सङ्गादिदोषज्ञापनार्थं जयविजयवदेकेन प्रकाशेनैव द्विविदस्य भ्रंशोऽयं दर्शितः ॥२॥ सख्युर्नरकस्य अपचितिरानृण्यं राष्ट्रस्य विप्लवो नाशो येन तद्यथा स्यात्तथाऽदहत् ॥३-४॥

गूढार्थदीपिनी

सप्तषष्टितमे स्त्रीभिः क्रीडन् रैवतके गिरौ । दौर्जन्यात् द्विविदं युद्धे मुष्टिभिर्न्यवधीत् बलः ॥ १ ॥

द्विविदो हि रात्रौ लङ्कां प्रविश्य राक्षसीर्नग्नाः कृत्वा तासां योनीः संस्पर्श । ज्ञात्वैतत् रामेण स्वसैन्यान्निष्कासितः। उक्तं च द्वापरे श्रीबलदेवात् मृत्युं प्राप्य स्वर्लोकं प्राप्स्यतीत्येतदभिप्रेत्यैवायमुपक्रमः । मैन्दोऽपि वानरः नरकस्य सखा ॥ १-२॥ अपचितिम् आनृण्यम् । राष्ट्रस्य विप्लवो नाशो यथा भवति तथा अदहत् क्रियाविशेषणम् । उत्सृजन् प्रक्षिपन् ॥ ३ ॥ आनर्तान् द्वारकासमीपवर्तिनो देशान् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पुनर्बलभद्रचरितबुभुत्सुं राजानं प्रति द्विविदवधरूपं तच्चरितं सप्तषष्टितमे वर्णयति ॥ १-२ ॥ अपचितिमानृण्यं राष्ट्रस्य विप्लवो नाशो यथा स्यात्तथा पुरादीनदहत् ॥ ३-४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

बलस्य चरितं वक्ष्यन् तदभावात्तु पौण्ड्रक । तथोक्तवानिति ह्युक्तं अर्थादेतद्बलस्य हि ॥ १ ॥
बलरूपहरेः कार्यं न समाप्तमिति स्थितिः । अतो विशेषतो वक्तुं प्रश्नो राज्ञो निरूप्यते ॥ २ ॥
अष्टादशे तु द्विविदवधः सम्यङ् निरूप्यते । गोपिकानामिवात्रापि स्त्रीणां माहात्म्यबोधने ॥ ३ ॥
बलस्त्रियोऽन्यथा स्वत्र निरुद्धा न भवन्ति हि । तदा विभागो व्यर्थः स्यान्निरोधानुपयोगतः ॥ ४ ॥
ततः सर्वंजनीनं च चरित्रं हि करिष्यति । यस्यावेशस्य चरितमेवं तस्य किमद्भुतम् ॥ ५ ॥

पूर्वाध्याये 'नन्दव्रजं गते राम' इति रामे विद्यमाने नैवं पौण्ड्रको वक्तुं शक्त इति प्रतिभातम् । अतो बलस्य विशेषं (चरित्रं) पृच्छति **भूयोऽहमिति** । यमुनाकर्षणादि माहात्म्यं श्रुतम् । अन्यदपि श्रोतुमिच्छामि । **अद्भुतकर्मण** इति । अलौकिकचरित्रं तस्य वर्तत एव तद्वक्तव्यमिति प्रश्नः । यथा भगवतः कार्यकरणार्थं गते तस्मिन् बह्वेव कार्यं भगवत आपतितम्, तथान्यदपि भविष्यतीत्याशयेन अद्भुतकर्मत्वमुक्तम् । **अनन्तस्ये**ति । चरित्राणामप्यनन्तता, तेन तादृशचरित्रबाहुल्यम् । **अप्रमेयस्ये**ति । स्वतः कल्पयितुमशक्यम् । अत एव तादृशस्य अन्यदपि चरित्रं श्रोतुमिच्छामि । तच्च चरित्रं दैवाज्जातं न वक्तव्यम्, किन्तु समर्थो भूत्वा यत् कृतवान्, तदेव वक्तव्यमिति ॥ १ ॥ निरोधे स्त्रिय एव मुख्या इति तदर्थमेवान्यदिति निरूपयन् द्विविदवधमाह **नरकस्य सखा** कश्चिदिति । नरकासुरो भगवता हत इति, स्त्रीणामेवार्थ इति च, तत्सखाप्येवमेव मारणीय इति, वध्योऽपि स एतावत्कालमुपेक्षित इत्युक्तम् । कश्चिदिति विशेषतः दैत्यत्वेन वा देवत्वेन वा न निर्वक्तव्यः । **द्विविद** इति । द्विधा वित् ज्ञानं यस्येति द्विःस्वभावोऽयम् । तेन रामावतारे भक्तोऽप्ययं सांप्रतमन्यथा जात इति । अनेन द्विःस्वभावा अपि वध्या एवेति निरूपितम् । **वानर** इत्यपेक्षायां हेतुः । भगवतैवार्धनराः कृताः, पुनः किमर्थं वध्या इति । तर्हि तद्वधे रामस्य किं माहात्म्यमित्याशङ्क्य माहात्म्यमाह । **अथ भिन्नप्रक्रमेण** । **सुग्रीवसचिवः** । चत्वारो मन्त्रिणस्तस्य हनुमदादयः, तन्मध्ये परिगणनात् तत्तुल्यतापि निरूपिता । स इति । स्वभावतोऽपि रामायणे प्रसिद्धः । **मैन्दस्य भ्राते**ति रामायणे मैन्दशौर्यं निरूपितम् । तद्भ्रातापि तत्तुल्य इति । ततोऽपि विशेषमाह **वीर्यवा**निति ॥ २ ॥ तर्ह्येतादृशो महान् प्रसिद्धश्च कथं विरुद्धो जात इति चेत्, तत्राह **सख्युः सोऽपचिति**मिति । नरको भगवता मारित इति अपचितिं कुर्वन् । क्षुद्रः केनापि न प्रतिपक्षतया विचार्यत इति राष्ट्रविप्लवं कृतवान् । यथा सर्वमेव राष्ट्रं नष्टं भवति । नाशमेवाह **पुरग्रामे**ति । राष्ट्रविप्लवो यथा भवति, तथेति सर्वक्रियासु सम्बध्यते । **पुराणि** नगराणि । **ग्रामा** अल्पाः । **आकरा** रत्नादिस्थानानि । **घोषा** आभीरग्रामाः । लौकिकास्त्रिविधा निरुक्ताः । वैदिकातिदोषसिद्ध्यर्थं घोषा उक्ताः । **वह्निना** वह्निदाहेन । अनेन चौर्येण दाहो निरूपितः । अन्यथा वह्निपदं व्यर्थं स्यात् ॥ ३ ॥ अग्निना उपद्रवमुक्त्वा पर्वतैराह **क्वचित्स शैलानुत्पाट्ये**ति । स्थानादुत्पाट्य देशोपरि पातयित्वा देशस्थानचूर्णयदिति । सुतरामेव भगवदीयानित्याह **आनर्तान् सुतरामेवे**ति । तत्र हेतुः । यत्रास्ते नरकघाती गोविन्दः ॥ ४ ॥

श्रीसुबोधिनी-सारः

राजोक्तिः । अद्भुतं कर्म यमुनाकर्षणादि यस्य तस्यानंतस्याऽप्रमेयस्य तत्कर्म भूयोऽहं श्रोतुमिच्छामि प्रभुर्बलो यदन्यकृतवान् ॥ १ ॥ शुकोक्तिः । नरकस्य भौमासुरस्य कश्चित्सखा मित्रं द्विविदो नाम वानरः सुग्रीवस्य सचिवो मंत्री मैंदस्य भ्राता वीर्यवान् बली सः ॥ २ ॥ सख्युर्भौमस्यापचितिम् आनृण्यं कुर्वन् राष्ट्रविप्लवं देशनाशं यथा भवति तथा वह्निमग्निमुत्सृजन्ददत् पुराणि ग्रामानाकरान् घोषान् व्रजानदहत् ॥ ३ ॥ क्वचित्कदाचित् शैलान् पर्वतानुत्पाट्य तैः शैलैः स द्विविदो देशानपिनट् आनर्त्तान् द्वारकासन्नान् देशांस्तु सुतरां भृशं समचूर्णयत् । तत्र हेतुः यत्रानर्त्ते मित्रहा भौमादिहंता हरिरास्ते ॥ ४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

अष्टादशेऽध्याये । **इति ह्युक्तमिति** । पूर्वाध्यायारम्भे इदमुपपादितमित्यर्थः । **एतद्बलस्य हीति** । बलस्थित्यभावादेतावज्जातमित्युक्त्या अर्थाद्बलस्यैव माहात्म्यमुक्तं जातमित्यर्थः । बलरूपेति । बलदेवे रूपं स्वरूपं यस्य तादृशस्य । बलाविष्टस्य हरेरित्यर्थः । तथा च पूर्वाध्यायोक्तमपि माहात्म्यं बलाविष्टस्य भगवत एवेति स्थितिर्मर्यादेत्यर्थः । **अतो विशेषत** इति । पूर्वाध्याये आर्थिकत्वात्सामान्यत उक्तम् । अत्र विशेषतो वक्तुं राज्ञः प्रश्नो बलकार्यसमाप्त्यभावान्निरूप्यते इत्यर्थः । **माहात्म्यबोधन** इति । निमित्तसप्तमीयम् । बलस्त्रीणां माहात्म्यज्ञानसिद्ध्यर्थमित्यर्थः । **अन्यथा** त्विति । आवेशातिरिक्तप्रकारेण साक्षा-

द्भगवता बलस्त्रीणां निरोधो न सम्भवतीत्यर्थः। तदेति। एवं प्रकारेण बलस्त्रीणां निरोधाभावे पूर्वमुक्तः शक्तिविभागो निरोधानुपयोगाद्धेतोर्व्यर्थः स्यात्। व्युपसर्गो विरोधार्थकः। स्कन्धार्थविरुद्धः स्यादित्यर्थः। तत इति। इदं गुप्तचरित्रमुक्तम्। तदनन्तरं लक्ष्मणाप्रसङ्गे सर्वजनीनं चरित्रं करिष्यतीत्यर्थः। एवं विशेषनिरोधप्रकरणे चतुर्भिरप्यध्यायैर्बलचरित्रमेव निरूपितमित्युक्तम्। तस्य तात्पर्यवृत्त्या भगवच्चरित्रतामाहुः यस्येति। तथा च कैमुतिकन्यायेन भगवच्चरित्रमेवेदमिति भावः। भूयोऽहमित्यत्र। भगवतः कार्यकरणार्थमिति। गोपिकासान्त्वनं भगवतः कार्यं तत्करणार्थं गते सतीत्यर्थः। चरित्रं श्रोतुमिच्छामीत्येतावतैव चारितार्थ्येऽपि यदन्यत्कृतवानिति यदुक्तं तत्तात्पर्यमाहुः दैवाज्जातमिति। पौण्ड्रकवधरूपमार्थिकं चरित्रं बलस्येत्युक्तम्। तादृशं न वक्तव्यमित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सप्तषष्टितमेऽध्याये रामेण क्रीडता गिरौ। दुष्टस्य द्विविदस्यात्र संहारो विनिरूप्यते ॥ १ ॥

एवं श्रीकृष्णचरितं श्रुत्वा पुनः रामचरितं पृच्छति—भूय इति। रामस्य चरितमहं भूयः श्रोतुमिच्छामि। श्रवणेच्छायां हेतुमाह—अद्भुतकर्मण इति। अद्भुतमाश्चर्यजनकं कर्म यस्य तस्येत्यर्थः। अद्भुतकर्मत्वे हेतुमाह—अप्रमेयस्येति। यो हि प्रमाविषयो भवति तस्य चेष्टायां नाश्चर्यम्, ज्ञातत्वात्। अयं मनोगोचरः, अतो भवति तल्लीलायामाश्चर्यमिति भावः। अप्रमेयत्वे हेतुमाह—अनन्तस्येति। अनन्ताचिन्त्यगुणत्वात् इत्यर्थः। अतो विभुः सर्वकरणसमर्थो रामो यदन्यत् कर्म कृतवान् तद्ब्रूहीति शेषः ॥ १ ॥ एवं पृष्टस्तच्चरितान्तरमाह—नरकस्येति। द्विविदो नाम कश्चिद्वानरः। स च नरकस्य सखेति कृष्णेन सह वैरे कारणम्। 'सुग्रीवसचिव' इति तस्य मन्त्रबलं दर्शितम्। स्वयं च वीर्यवानिति। 'तद्वीर्यं च रामायणे प्रसिद्धम्' इति सूचयन्नाह—मैन्दस्य भ्रातेति ॥ २ ॥ स द्विविदो वानरः मृतस्य सख्युः नरकस्यापचितिं आनृण्यं कुर्वन् राष्ट्रस्य देशस्य विप्लवो नाशो यथा भवति तथा वह्निमुत्सृजन् प्रक्षिपन् पुरग्रामादीन् अदहदित्यन्वयः ॥ ३ ॥ क्वचित् स द्विविदः शैलानुत्पाट्य तैः शैलैः देशान् समचूर्णयत्। आनर्तान् द्वारकासमीपदेशान् एत्य आगत्य तु सुतरां समचूर्णयत्। तत्र हेतुमाह—यत्र मित्रहा नरकासुरहन्ता हरिरास्त इति ॥ ४ ॥

अन्वितार्थप्रकाशिका

सप्तषष्टितमे स्त्रीभिः क्रीडन् रैवतके बलः। अवधीद्द्विविदं तत्र श्लोका विंशतिरष्टयुक् (२८) ॥
उवाचेति वचोद्वन्द्वं २) श्लोकतुल्या (२८) अनुष्टुभः ॥ ६७ ॥

भूय इति। अद्भुतकर्मणः नद्याकर्षणादिकृतः अनन्तस्याप्रमेयस्य रामस्य चरितं भूयः श्रोतुमिच्छामि। अतो विभुः रामो यदन्यत्कर्म कृतवान् तद् ब्रूहीति शेषः ॥ १ ॥ नरकस्येति। द्विविदो नाम कश्चिद्वानरः स च नरकस्य भौमस्य सखा इति वैरहेतुः सुग्रीवस्य सचिव इति मन्त्रबलं मैन्दस्य भ्राता इति रामायणे प्रसिद्धया पराक्रमोत्कर्षः स्वयं वीर्यवांश्चाभूत्। श्रीरामावरणपूजायामावरणदेवत्वान्नित्यसिद्धस्यास्य जयविजयवदेकेन प्रकाशेनैव भ्रंशः न तु स्वरूपेण नरकदुःसङ्गदोषात् तस्यापि कारणं लक्ष्मणे पूर्वमनादरः कल्प्य इति भागवताः ॥ २ ॥ सख्युरिति। स द्विविदो वानरः मृतस्य सख्युर्नरकस्यापचितिम् आनृण्यं कुर्वन् राष्ट्रस्य देशस्य विप्लवो नाशो यथा भवति तथा वह्निमुत्सृजन् प्रक्षिपन् पुरग्रामादीनदहत् ॥ ३ ॥ क्वचिदिति। क्वचित्कदाचित्स द्विविदः शैलानुत्पाट्य तैः शैलैः देशान् समचूर्णयत्। आनर्तान् द्वारकासमीपदेशान् एत्य आगत्य तु सुतरां समचूर्णयत्। यत्र येषु आनर्त्तेषु मित्रहा तन्मित्रनरकासुरहन्ता हरिरास्त इति ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अधुना सप्तषष्टितमेऽध्याये पुनर्द्विविदहननरूपं रामचरित्रं निरूपयति भूय इति। रामस्य तच्चरित्रं श्रोतुमिच्छामि प्रभुः स रामो यदन्यच्चरित्रं कृतवान् ॥ १ ॥ नरकस्य सखेत्यनेन कृष्णेन सह वैरे हेतुः सूचितः सुग्रीवस्य सचिवो मंत्री। मैंदस्य तन्नाम्नो वानरस्य भ्राता अतो वीर्यवान् बलाधिकः। एतद्रामायणे प्रसिद्धं ॥ २ ॥ सख्युर्भौमस्यापचितिं वैरनिवारणरूपां राष्ट्रस्य विप्लवं नाशं कुर्वन् सन् पुरादीन् प्रादहत् ॥ ३ ॥ क्वचित् कदाचित् स द्विविदः मित्रहा नरकहंता ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

क्रीडन् युवतिभिः स्वैरं रामो रैवतके गिरौ। सप्तषष्टितमे दुष्टं द्विविदं चावधीत् मदात् ॥ १ ॥

कालिन्दीविदारणानन्तरं द्विविदवधादिरामचरितं संगतमप्यनुक्त्वा तत्पूर्वभावित्वेन पौण्ड्रकवधादि निरूप्येदानीं तदेव प्रस्तौति भूयोऽहमित्यादिना। भूय इति। प्रभू रामः, यत् अन्यत् कृतवान्, अद्भुतकर्मणः, अनन्तस्य, अप्रमेयस्य, रामस्य, तच्चेष्टितं, भूयः पुनरपि, अहं श्रोतुं, इच्छामि। भूयो रामचरितश्रवणेच्छायामद्भुतकर्मत्वं हेतुस्तत्र चानन्तत्वं तत्राप्यमेयत्वमिति ॥ १ ॥ द्विविदवधात्मकं कर्माख्यातुं तावत् द्विविदस्य चेष्टितमाचष्टे नरकस्येत्यादिना एकश्लोकेन। नरकस्येति।

कश्चित् अथ कार्त्स्न्येन, सुग्रीवसचिवः सः, प्रसिद्धः, सुग्रीवसचिवत्वेन जगत् प्रख्यात इत्यर्थः। मैन्दस्य वानरस्य, भ्राता, वीर्यवान् प्रशस्तबलः, नरकस्य नरकासुरस्य, सखा मित्रं, द्विविदः नाम द्विविद इति नाम्ना प्रसिद्धः, वानरः, आसीदिति शेषः ॥ २ ॥ सख्युरिति। वानरः, स द्विविदः सख्युः, नरकस्य, अपचितिमानृण्यं, कुर्वन्, राष्ट्रस्य विप्लवो नाशो यथा भवति तथा, पुरग्रामाकरान्, घोषान्, वह्निं उत्सृजन्, अदहत् ॥ ३ ॥ क्वचिदिति। क्वचित्, स द्विविदः, शैलान् उत्पाट्य, तैरुत्पाटितैः शैलैः, देशान् तत्रापि, आनर्त्तांस्तु, सुतरामेव, समचूर्णयत्। तत्र हेतुत्वेन तान्विशिनष्टि। यत्र येष्वानर्त्तेषु, मित्रहा स्वमित्रनरकघ्नः, हरिः, आस्ते अतः ॥ ४ ॥

कृष्णप्रिया

महाराज परीक्षितजी ने विनयपूर्वक प्रश्न किया कि महाराज शुकाचार्यजी! श्री बलभद्रजी के पराक्रम अत्यन्त अद्भुत हैं—वह स्वयं भगवान् अनन्तस्वरूप हैं। उनका स्वरूप गुण-लीला आदि भी मन वाणी क्रिया से पर हैं। बलरामजी ने जो और अलौकिक लीला की हो, मैं सारी कथा सुनना चाहता हूँ ॥ १ ॥ भगवान् श्रीशुकाचार्यजी ने कहा—राजन् परीक्षित्! द्विविद् नाम का एक वानर था। वह भौमासुर का सखा, सुग्रीव का सचिव एवं मैन्द का शक्तिमान् भाई था ॥ २ ॥ भगवान् श्रीकृष्ण ने उसके सखा भौमासुर को मार दिया, यह वृत्तान्त जानकर अपने मित्र की मैत्री ऋण से ऋणमुक्ति के कारण राष्ट्रविप्लव करने का उसने निर्णय किया। वह द्विविद वानर बड़े-बड़े नगरों-गाँवों में आकर श्वानों और आहीरों के निवासों में आग लगाकर जलाने लगा ॥ ३ ॥ कभी-कभी तो वह बड़े-बड़े पर्वतों को उखाड़कर उनसे बड़े-बड़े देशों को चूर्ण कर देता था। प्रायः यह विनाशकार्य आनर्त-सौराष्ट्र देश में करता था। कारण कि, उसके मित्र नरक को मारने वाले भगवान् श्रीकृष्ण उसी देश में रहते थे ॥ ४ ॥

क्वचित् समुद्रमध्यस्थो दोर्भ्यामुद्धृत्य[1] तज्जलम्। देशान् नागायुतप्राणो वेलाकूलानमज्जयत् ॥ ५ ॥
आश्रमा[2]नृषिमुख्यानां कृत्वा [3]भग्नवनस्पतीन्। अदूषयच्छकृन्मूत्रैरग्नीन् वैतानिकान् खलः ॥ ६ ॥
पुरुषान् योषितो दृप्तः क्ष्माभृद् द्रोणीगुहासु सः। निक्षिप्य चाप्यधाच्छैलैः[4] पेशस्कारीव कीटकम् ॥ ७ ॥
[5]एवं देशान् विप्रकुर्वन् दूषयंश्च कुलस्त्रियः। श्रुत्वा सुललितं गीतं गिरिं रैवतकं ययौ ॥ ८ ॥

कर्दमक्षमा

अन्वयः—नागायुतप्राणः, क्वचिद्, समुद्रमध्यस्थः, तज्जलम्, दोर्भ्याम्, उत्क्षिप्य, वेलाकूलान्, देशान्, अमज्जयत् ॥ ५ ॥ खलः, ऋषिमुख्यानाम्, आश्रमान्, भग्नवनस्पतीन्, कृत्वा, वैतानिकान्, अग्नीन्, शकृत्, मूत्रैः अदूषयत् ॥ ६ ॥ पेशस्कारी, कीटकम्, इव, दृप्तः, सः, पुरुषान्, योषितः, क्ष्माभृत्, द्रोणीगुहासु, निक्षिप्य, च, शैलैः, अप्यधात् ॥ ७ ॥ एवम्, देशान्, विप्रकुर्वन्, च, कुलस्त्रियः, दूषयन्, सुललितम्, गीतम्, श्रुत्वा, रैवतकम्, गिरिम्, ययौ ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्य समुद्रस्य जलं बाहुभ्यामुत्क्षिप्य वेलायाः कूले वर्तमानान् देशान् प्लावयामासेति ॥ ५ ॥ आश्रमस्थान्वनस्पतीन् भंक्त्वा आहवनीयाद्यग्निषु मूत्रादि कृतवान् ॥ ६ ॥ अप्यधात्पिदधे। पेशस्कारी भ्रमरः ॥ ७-९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वेला समुद्रजलं तस्य कूलं तटं समीपं तत्रत्यान्देशान्। तज्जलं समुद्रांबु। प्लावयामासानाशयदित्यर्थः ॥ ५ ॥ भंक्त्वा त्रोटयित्वा। आहवनीयाद्यग्निषु कुंडस्थेषु। शकृत्पुरीषम्। वितानो यज्ञस्तत्संबंधिनस्तथा तान् ॥ ६ ॥ क्ष्माभृतो गिरेर्द्रोण्यां नितंबदेशे या गुहा गह्वरदेशास्तासु "द्रोणी काष्ठांबुवाहिन्यां गिर्यंतरनितम्बयो" इति धरणिः। स द्विविदः। "पेशस्कारी पक्षिकीटस्स्वगृहे कीटगोपके" इति निरुक्तिः ॥ ७ ॥ एवं वह्निदाहादिना। विप्रकुर्वन्विरूपयन्। विष्णुपुराणे तु—"कामरूपी महारूपं कृत्वा सस्यान्यशेषतः। लुठन् भ्रमणसंमर्दैः संचूर्णयति वानरः ॥" इति तद्दौष्ट्याधिक्यमप्युक्तम् ॥ ८ ॥

---

[1]. मुत्क्षिप्य—श्रीधर. वंशी. जीव. ; मुधृत्य—वीर. विज.। [2]. मुनि—प्रा. पा.। [3]. भस्म—वीर.। [4]. शृङ्गैः—वीर. विज.। [5]. तं देशं विप्रकुर्वन् वै घर्षयंश्च—विज.।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वेलाकूले वर्त्तमानानिति शेषः। कूलानिति पाठेऽपि स एवार्थः। अर्श आद्यच्। प्राणो बलम् ॥ ५ ॥ ऋषिमुख्यानां भगवद्भक्तर्षीणाम् ॥ ६ ॥ योषितश्चेत्यन्वयः दृप्तः बलेन गर्वितः कीटकमिति जात्येकत्वम् ॥ ७ ॥ विप्रकुर्वन् पीडयन् एवमुत्तरोत्तरं तस्य दुष्टत्वाधिक्यं ज्ञेयम्। अन्यच्चोक्तं श्रीविष्णुपुराणे—

"कामरूपी महारूपं कृत्वा स्वस्यान्यशेषतः। लुठन् भ्रमणसम्मर्दैः सञ्चूर्णयति वानरः" ॥ इति ॥ ८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

योषितश्चेत्यन्वयः। दृप्तो बलिष्ठो बलेन गर्व्वितो वा, अतः क्ष्माभृतः द्रोणीषु गुहासु च निक्षिप्यमाण-पुरुषादीनाञ्च महाभयेन किञ्चित् करणासामर्थ्यादिकं सूचयति—पेशस्कारीवेति ॥ ७ ॥ विप्रकुर्व्वन् पीडयन्; एवमुत्तरोत्तरं तस्य दुष्टताधिक्यं ज्ञेयम्; अन्यच्चोक्तं श्रीविष्णुपुराणे (५।३६।९,१०)—'कामरूपी महारूपं कृत्वा संस्थानशेषतः। लुठन् भ्रमणसम्मर्द्दैः संचूर्णयति वानरः।' इति तादृश-दुष्टस्यापि श्रीभगवतोपेक्षणं श्रीरघुनाथावतारे भक्तत्वापेक्षयेति ज्ञेयम् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अप्यधात् पिहितवान् छादितवान् पेशस्कारित्वमपि प्रकुर्वन् अपीडयत् ॥ ७-१४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

क्वचिदिति। दोर्भ्यां बाहुभ्यां तत्सामुद्रं जलम् उद्धृत्य उत्क्षिप्य वेलायां कूले वर्त्तमानान् देशानमज्जयत् तत्र हेतुत्वेन तं विशिनष्टि नागायुतप्राणः नागानां गजानामयुतस्य दशसहस्रस्य प्राणो बलं यस्य सः ॥ ५ ॥ आश्रमानिति। ऋषिमुख्यानामाश्रयभूतान् वनस्पतीन् भस्मसात्कृत्वा दग्ध्वेत्यर्थः। भग्नवनस्पतीनिति पाठे भग्ना वनस्पतयो येषु तथाभूतान् कृत्वा शकृन्मूत्रैः मलमूत्रैर्वैतानिकान् यज्ञीयानाहवनीयादीनग्नीनदूषयत् यतः स खलः दुरात्मा ॥ ६ ॥ पुरुषाविति। दुष्टो द्विविदो गिरेः कन्दरेषु गुहासु च निक्षिप्य शृङ्गैः गिरिशृङ्गैरप्यधात्पिहितवान् पेशस्कारी भ्रमरः कीटमिव ॥ ७ ॥ एवमिति। विप्रकुर्वन् पीडयन् तत्र तत्र कुलस्त्रीर्दूषयंश्च सललितं मधुरं गीतं श्रुत्वा रैवतकं पर्वतं ययौ ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

वेलया समुद्रजलाभिवृद्धया कूलान्नीचभूमीः समुद्रतीरनिकटवर्तिदेशान् अनाशयदित्यर्थः ॥ ५ ॥ वैतानिकान् यज्ञसम्बन्धिनः ॥ ६ ॥ क्ष्माभृद्द्रोणीगुहासु पर्वतनितम्बगुहासु ॥ ७-९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

वेला समुद्रजलं तत्कूलभवान् देशान् पुंस्त्वमार्षम् ॥ ५-६ ॥ अप्यधात् आच्छादयामास ॥ ७-८ ॥

गूढार्थदीपिनी

नागायुतस्येव प्राणो बलं यस्य सः। वेला समुद्रजलं तत्कूलभवान्। अत्र भवार्थेऽण्। संज्ञापूर्वकत्वात् वृद्ध्यभावः। आर्श आद्यजन्तो वा ॥ ५ ॥ वैतानिकान् यज्ञसम्बन्धिनः ॥ ६ ॥ दृप्त गर्वितः। क्ष्माभृतोः पर्वतयोः द्रोणी अन्तरालभूमिः। अप्यधात् आच्छादयामास। पेशस्कारी भृङ्गीसंज्ञकः ॥ ७ ॥ विप्रकुर्वन् पीडयन् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

वेलायाः कूले वर्तमानान् ॥ ५ ॥ भग्ना वनस्पतयो येषु तथाभूतान् कृत्वा शकृन्मूत्रैर्मलमूत्रैः वैतानिकान् यज्ञीयान् ॥ ६ ॥ अप्यधात् छादयामास पेशस्कारी भ्रमरः ॥ ७ ॥ विप्रकुर्वन् पीडयन् ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

जलकृतोपद्रवमाह **क्वचित्समुद्रमध्यस्थ** इति। **दोर्भ्यामुद्धृत्येति** बाह्वोः स्थूलता निरूपिता। देशान् समुद्रतीरस्थान्। आपाततः केनापि मारयितुं न शक्य इति वक्तुं **नागायुतप्राण** इत्युक्तम्। दशसहस्रहस्तिबलः। वेलाकूले यस्येति मज्जने सौकर्यमुपपत्तिश्चोक्ता ॥ ५ ॥ साधारणानामुपद्रवमुक्त्वा वैदिकानामप्युपद्रवमाह **आश्रमानृषिमुख्यानामिति**। तेषां पूर्तस्येष्टस्य च नाशं करोतीति वक्तुं भग्नवनस्पतीन् कृत्वा **वैतानिकान्** वैदिकान् अग्नीन् गार्हपत्यादीन् अदूषयत्। नन्वेवं कृते स्वस्य कः

पुरुषार्थः, न हि ब्राह्मणा नरकस्यान्यस्य वा द्विष्टा भवन्ति, तत्राह **खल इति**। दुरात्मायम्। अतो निष्प्रयोजनमपि परोपतापार्थं करोतीति ॥ ६ ॥ देशोपद्रवं पृथिव्यप्तेजोभिरुक्त्वा, वैदिकान् देशस्थानपि निरूप्य, अन्यान् स्त्रीपुरुषसाधारण्येन तदुपद्रुतान् निरूपयति **पुरुषान्योषितो दृप्त इति**। सहस्थितान् तत्सङ्गभङ्गार्थं रसं च बीभत्सयितुम्। **दृप्त** उच्छृङ्खलः। **क्षमाभृतः** पर्वतस्य द्रोणीगुहासु द्रोण्यां उभयपर्वतमध्ये गुहासु च 'अत्र रमध्व'मिति उपहसन्निक्षिप्य अप्यधात्। शैलैस्तदुपरि पर्वतान् आरोपयति। तथाकरणे हेतुमाह **पेशस्कारीव कीटकमिति**। स हि स्वस्मरणेन स्वतुल्यः कीटो भवत्विति तथा करोति, तथायमपि विश्वस्यैव मदात्मकता भवतु, न भगवदात्मकत्वेति, तथा कृतवान् ॥ ७ ॥ एवं सह्यमुपद्रवं निरूप्य, तदुपसंहरन् असह्यं निरूपयति **एवं देशान्विप्रकुर्वन्निति**। असह्यमेतत् **दूषयंश्चेति**। इतरदूषणं न दोषायेति कुलपदम्। अनेन नरकगृहाद्भगवता समानीतास्ता इति तथा करोतीति सूचितम्। एवमुत्कृष्टे पापे तेनैव मरणार्थं स्वयमेव समुद्यत इत्याह **श्रुत्वा सुललितं गीतमिति**। यथा सर्वे विषयान्तेन निराकृताः सर्वेषाम्, तथा सुललितमपि गीतम्। मयि स्थिते को वा गायतीति तन्निराकरणार्थं रैवतकं ययौ। तेनैव गीतानुमानात् ॥ ८ ॥

श्रीसुबोधिनी–सारः

कदाचित्समुद्रस्य मध्ये स्थितो नागानां हस्तिनामयुतं दशसहस्रं तद्वत्प्राणो बलं यस्य स दोर्भ्यां हस्ताभ्यां तज्जलं समुद्राम्भ उत्क्षिप्य उद्धृत्य वेलायाः कूले वर्त्तमानान् देशान् अबोडयत् ॥ ५ ॥ भग्ना वनस्पतयो येषु तान् ऋषिमुख्यानां वसिष्ठादीनामाश्रमान् कृत्वा वैतानिकान् यज्ञार्हानग्नीन् शकृद्भिर्विष्ठाभिर्मूत्रैः खलो दुष्टोऽदूषयत् ॥ ६ ॥ दृप्तो गर्वितः स द्विविदः पुरुषान् योषितः स्त्रीः क्षमाभृतां भूधराणां द्रोणीषु गुहासु दीर्घह्रस्वासु निक्षिप्य शैलैः शिलाभिर्द्वारमप्यधात् अरुधत् पेशस्कारी भ्रमरः कीटमिव ॥ ७ ॥ एवं देशान् विकारीकुर्वन् कुलस्त्रियो दूषयन् व्यभिचरन् सुललितं मंजुलं गीतं श्रुत्वा रैवतकं पर्वतं ययौ ॥ ८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

श्रुत्वा सुललितमित्यत्र। **तेनैवेति**। पशुत्वेन स्वराद्यज्ञानाल्लालित्येनैव गीतत्वमनुमितम्। अन्यथोच्चैर्भाषणमेव ज्ञातं स्यादित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

क्वचित् समुद्रमध्यस्थो दोर्भ्यां बाहुभ्यां तत्सामुद्रं जलमुद्धृत्योत्क्षिप्य वेलायां तीरे वर्तमानान् देशान् संन्यमज्जयत्। तत्र तत्सामर्थ्यमाह—नागानां गजानां अयुतस्य दशसहस्रस्य प्राणो बलं यस्य स इति ॥ ५ ॥ ऋषिमुख्यानामाश्रमान् भग्ना वनस्पतयो वृक्षा येषां ते तथाभूतान् कृत्वा शकृता मलेन मूत्रैश्च तेषां वैतानिकान्, यज्ञियान् आहवनीयादीन् अग्नीनदूषयत्। 'एवं धर्ममार्गदूषणे को हेतुः' इत्यपेक्षायामाह—खल इति। दुरात्मेत्यर्थः ॥ ६ ॥ दुष्टो द्विविदो वानरः क्षमाभृतः पर्वतस्य द्रोणीषु गुहासु च पुरुषान् योषितश्च निक्षिप्य शैलैः शृङ्गैरप्यधात् पिहितवान्। तत्र दृष्टान्तमाह—पेशस्कारी भ्रमरः कीटमिवेति ॥ ७ ॥ एवं देशान् विप्रकुर्वन् पीडयन् तत्र तत्र च कुलस्त्रीर्दूषयन् सुललितं मधुरं बलेन क्रियमाणं गीतं श्रुत्वा रैवतं पर्वतं ययौ ॥ ८ ॥

अन्वितार्थप्रकाशिका

क्वचिदिति ॥ नागानां गजानाम् अयुतस्य दशसहस्रस्य प्राणो बलं यस्य सः क्वचित्समुद्रमध्यस्थो दोर्भ्यां बाहुभ्यां तत्सामुद्रं जलमुद्धृत्योत्क्षिप्य वेलासमुद्रजलं तत्कूलभवान्। तत्र भव इत्यण्। संज्ञापूर्वकत्वान्न वृद्धिः। यद्वाऽत्र लक्षणा। पुंस्त्वं त्वार्षम्। कूलशब्दादर्श आद्यजित्यन्ये। कूले इत्यपि पाठः। देशान् संन्यमज्जयत् ॥ ५ ॥ आश्रमानिति ॥ खलः सः ऋषिमुख्यानामाश्रमान् भग्ना वनस्पतयो वृक्षा येषां ते तथाभूतान् कृत्वा शकृता मलेन मूत्रैश्च तेषां वैतानिकान् यज्ञियान् आहवनीयादीन् अग्नीनदूषयत्। अग्निषु शकृन्मूत्राण्युत्सृष्टवान् ॥ ६ ॥ पुरुषानिति ॥ स दुष्टो द्विविदः। दृप्त इत्यपि पाठः। क्षमाभृतः पर्वतस्य द्रोणीषु सन्धिषु गुहासु च पुरुषान् योषितश्च निक्षिप्य शैलैः शृङ्गैरप्यधात् पिहितवान्। यथा पेशस्कारी भ्रमरः कीटकमपिदधाति तथा ॥ ७ ॥ एवमिति ॥ एवं देशान् विप्रकुर्वन् पीडयन् तत्र तत्र च कुलस्त्रीर्दूषयन् सुललितं मधुरं बलेन क्रियमाणं गीतं श्रुत्वा रैवतं पर्वतं ययौ ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्य सागरस्य जलं दोर्भ्यां उत्क्षिप्योद्धृत्य गजायुतबलः। वेलायाः कूले जलस्पृष्टस्थानस्योपरिभागे स्थितान् देशान्। अमज्जयन् प्लावयामास ॥ ५ ॥ वैतानिकान् यजनस्थानस्थितान् शकृन्मूत्रैः विण्मूत्रैः अदूषयत् ॥ ६ ॥ क्षमाभृतः पर्वतस्य द्रोण्यो गर्त्ताः गुहाश्च तासु पुरुषान् योषितश्च निक्षिप्य शैलैः शृङ्गैः अप्यधात् आच्छादयामास यथा पेशस्कारी पेशस्कारिणी भ्रमरी कीटकं तथा पुंस्त्वमत्रार्षं ॥ ७ ॥ विप्रकुर्वन् पीडयन् ॥ ८–९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

क्वचिदिति ॥ क्वचित् कदाचित्, नागायुतप्राणः दशसहस्रहस्तिबलः, द्विविदः समुद्रमध्यस्थः सन्, दोर्भ्यां बाहुभ्यां, तज्जलं सामुद्रं जलं, उद्धृत्योत्क्षिप्य, वेलाकूले, वर्त्तमानानिति शेषः। देशान् न्यमज्जयत् प्लावयामास ॥ ५ ॥ आश्रमानिति ॥ खलः सः, ऋषिमुख्यानां आश्रमान्, भग्नाः वनस्पतयो वृक्षा येषां तान् कृत्वा, दग्धवनस्पतीनिति पाठे, दग्धा भस्मसात् कृताः वनस्पतयो येषां तथाभूतान् कृत्वेत्यर्थः। वैतानिकान् यज्ञीयान्, अग्नीनाहवनीयादीन्, शकृन्मूत्रैः, अदूषयत् ॥ ६ ॥ पुरुषानिति। दृप्तो बलगर्वितः, स द्विविदः, पुरुषान्, योषितश्च, क्ष्माभृद्द्रोणीगुहासु पर्वतसंबन्धिकन्दरासु गुहासु चेत्यर्थः। पेशस्कारो भ्रमरविशेषः, कीटकं इव, निःक्षिप्य, शैलैः अप्यधात् पिहितवान् ॥ ७ ॥ एवमिति ॥ एवममुना प्रकारेण, देशान्, विप्रकुर्वन्, पीडयन्, कुलस्त्रियः दूषयंश्च, द्विविदः, सुललितं गीतं श्रुत्वा, रैवतकं गिरिं, ययौ ॥ ८ ॥

कृष्णप्रिया

वह द्विविद वानर दस हजार हाथियों के बल वाला था। कभी-कभी वह खल समुद्र के बीच में खड़ा रहकर दोनों हाथों से रत्नाजल उछालता था कि समुद्र के तट के देश भी डूब जाते थे ॥ ५ ॥ वह खल उत्तम बड़े समर्थ ऋषि मुनियों के आश्रमों के लता-वनस्थलियों को तोड़ मरोड़ कर धराशायी कर देता था और यज्ञसम्बन्धी यज्ञकुण्डों में मल-मूत्र डालकर अग्नियों को दूषित कर देता था ॥ ६ ॥ जैसे भृङ्गी नामका कीट और कीटों को ले जाकर अपने बिल में कैद कर देता है वैसे ही मदोन्मत्त वह द्विविद स्त्रियों को और पुरुषों को ले जाता था और पर्वतों की कन्दराओं में रख देता था और बड़ी-बड़ी चट्टानें रख कर गुहों के द्वारों को बन्द कर देता था ॥ ७ ॥ इस प्रकार देशवासियों को त्रास देता था और कुलीन स्त्रियों को भी दूषित कर देता था। एक दिन वह दुष्ट द्विविद माधुर्यपूर्ण संगीत सुनकर रैवतक गिरिवर पर गया ॥ ८ ॥

तत्रापश्यद् यदुपतिं रामं पुष्करमालिनम्। सुदर्शनीयसर्वाङ्गं ललनायूथमध्यगम् ॥ ९ ॥
गायन्तं [1]वारुणीं पीत्वा मदविह्वललोचनम्। विभ्राजमानं वपुषा [2]प्रभिन्नमिव वारणम् ॥ १० ॥
दुष्टः शाखामृगः शाखामारूढः कम्पयन्[3] द्रुमान्। चक्रे किलकिलाशब्दमात्मानं सम्प्रदर्शयन् ॥ ११ ॥
तस्य धार्ष्ट्यं कपेर्वीक्ष्य तरुण्यो जातिचापलाः[4]। हास्यप्रिया विजहसुर्बलदेवपरिग्रहाः ॥ १२ ॥

कर्दमक्षमा

अन्वयः—तत्र, पुष्करमालिनम्, यदुपतिम्, रामम्, सुदर्शनीयसर्वाङ्गम्, ललनायूथमध्यगम्, अपश्यत् ॥ ९ ॥ वारुणीम्, पीत्वा, गायन्तम्, मदविह्वललोचनम्, वपुषा, विभ्राजमानम्, प्रभिन्नम्, वारणम्, इव, तत्र, अपश्यत् ॥ १० ॥ दुष्टः, शाखामृगः, शाखारूढः, द्रुमान्, कम्पयन्, आत्मानम्, सम्प्रदर्शयन्, किलकिलाशब्दम्, चक्रे ॥ ११ ॥ जातिचापलाः, हास्यप्रियाः, तरुण्यः, बलदेवपरिग्रहः, तस्य, कपेः, धार्ष्ट्यम्, वीक्ष्य, विजहसुः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रभिन्नं मत्तम् ॥ १०-११ ॥ जात्या स्वभावेनैव चापलं यासां ताः ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र रैवतके ॥ ९ ॥ गलन्मदो गजः प्रभिन्नः ॥ १० ॥ किलकिलेति वानरजातिशब्दानुकरणम् ॥ ११ ॥ 'जातिर्ज्ञातिनिसर्गयोः' इति धरणिः। बलदेवस्य परिग्रहाः पत्न्यः "परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः" इति मेदिनी ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्रेति युग्मकम्। यदूनां पतिमिति सर्ववैभवपूर्णत्वं परमसुखित्वादिकञ्चाह रामममिति स्वभावत एव रमणरसिकत्वं पुष्करेति तदुपलक्षितविदग्धवन्यवेषत्वं सुदर्शनीयेति स्वतोऽपि सौन्दर्यं ललनेति तदुचितपरिकरशोभमानत्वम् ॥ ९ ॥ गायन्तमिति। वैदग्धीं विलासञ्च मदेति तत्र स्वाभाविकं विलासं वारुणीमिति तत्र तत्रातिशयं विभ्राजमानमिति तेजस्वित्वं दृष्टान्तस्तु प्राकृतश्रोतृचित्ते तत्तद्विशेषमाधुरीस्फूर्त्तिसोपानत्वाय ॥ १० ॥ एवं शाखारूढत्वेऽपि बहुद्रुमकम्पनमतिघनीभूतत्वात् किलकिलाशब्दमव्यक्तरावमित्यर्थः। प्रकर्षेण बृहत्त्वप्रकटनेन तत्रापि सम्यक्त्वेन पराक्रमप्रकटनेन च दर्शयन् ॥ ११ ॥ विशेषेण उच्चैर्जहसुः यतो हास्यमेव प्रियं यासां ताः तत्र हेतुः जातीति तत्रापि तरुण्य इति नच महादुष्टादपि तस्माद्भयादिकमित्याह—बलेति ॥ १२ ॥

---

१. मदिरां-विज.। २. प्रमत्त-प्रा. पा.। ३. रुषा-प्रा. पा.। ४. चापलं-विज.।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुललितगीतकरणमेव दर्शयितुं श्रीरामस्य क्रीडां वदन् तद्धेतुत्वेन तद्देशादिकं वर्णयति—तत्रेति द्वाभ्याम्। यदूनां पतिमिति सर्व्ववैभवपूर्णत्वं परमसुखित्वादिकञ्च, तथा यदुषु तदपकाराशक्तिञ्च सूचयति। राममिति श्रीरेवत्यादिभिः सह तत्र क्रीडनाभिप्रायेण; पुष्करेति वेशमुद्दिश्य सौन्दर्य्यमाह। ललना परमसुन्दरस्त्रियः श्रीरेवत्याद्यास्तासां यूथं समूहस्तन्मध्यगमिति ॥ ९ ॥ माधुर्य्यमाह—मदेति, प्रभावमाह—वपुषैव पुष्ट्यादिमता महातेजस्विना रत्नालंकाराद्यनपेक्षयापि विशेषतः सूर्य्यचन्द्रादिभ्योऽप्याधिक्येन भ्राजमानम्। विशेषणानामेषां यथोत्तरं क्रीडोपकरणत्वे श्रैष्ठ्यम् ॥ १० ॥ किलकिलेति तज्जातिशब्दानुकरणम्। सम्यक् सर्वांगप्रतारणादिना प्रकर्षेण च निकटागमनादिना दर्शयन् ॥ ११ ॥ विशेषेणोच्चैर्जहसुः, यतो हास्यमेव प्रियं यासां ताः, तत्र हेतुः-जातीति, तत्रापि तरुण्य इति, न च महादुष्टादपि तासां किञ्चिद्भयादिकमित्याह-बलेति ॥१२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्रेति। तत्र रैवतकोपवने पुष्करमाला पद्ममालाऽस्यास्तीति तथा तं व्रीह्यादित्वान्मत्वर्थीय इनिः सुष्ठु दर्शनीयानि सर्वाण्यङ्गानि यस्य तं योषित्समूहमध्यगतम् ॥ ९ ॥ गायन्तमिति। वारुणी मदिरां पीत्वा मदेन विह्वले घूर्णिते लोचने यस्य तं प्रभिन्नं मत्तं वारणमैरावतमिव स्थितं राममपश्यदितिसम्बन्धः ॥ १० ॥ दुष्ट इति। दुष्टश्चासौ शाखामृगश्च शाखामृग इत्यनेन स्वभावत एव दौष्ट्यं व्यज्यते। दुष्ट इत्यनेन तत्रापि किलकिलेत्यनुकरणम् आत्मानं स्वशरीरं दर्शयाञ्चक्रे ॥ ११ ॥ तस्येति। तस्य द्विविदस्य धाष्ट्र्यं दौष्ट्यं प्रागल्भ्यं दृष्ट्वा जात्या स्वभावेनैव चापलं यासां हास्यं प्रियं यासां ताः परिगृह्णन्त इति परिग्रहाः बलदेवस्य परिग्रहाः तत्प्रतिगृहीता इत्यर्थः। हेतुगर्भाण्येतानि अतो विजहसुः प्रहसितवत्यः ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

प्रभिन्नं मदजलस्राविणम् ॥ १०-११ ॥ कपिजातिचापलं दृष्ट्वा ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

प्रभिन्नं मत्तम् ॥ ९-११ ॥ जात्या स्वभावेन चापलमगाम्भीर्य्यं यासां ताः ॥ १२ ॥

गूढार्थदीपिनी

तत्रेति युग्मम्। प्रभिन्नं मत्तं गजमिव ॥ ९-११ ॥ जात्या स्वभावेनैव चापलाः। परिग्रहाः पत्न्यः। परिग्रहः परिजनं पत्न्याम्—इति मेदिनी ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रभिन्नं मत्तम् ॥ ९-१० ॥ जात्या स्वभावेन चापलं यासां ताः तत्रापि तरुण्यः विजहसुः हास्यं चक्रुः ॥ ११ ॥ हेलयामास भ्रूक्षेपैः सन्मुखागमनादिभिः आदिना दन्तप्रदर्शनादिसङ्ग्रहः रामस्य पश्यत इत्यनादरे षष्ठी राममनादृत्य तासां स्वगुदं दर्शयन् ताः हेलयामास अवज्ञातवान् ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो गीतकर्तारं दृष्टवानित्याह **तत्रापश्यदिति**। तस्य मात्सर्योत्पत्त्यर्थं रामस्य दशगुणान्वर्णयति। एतावन्त एव गुणा इति। तत्रादावैश्वर्यं दृष्टवानित्याह **यदुपतिमिति**। यादवानां स्वामी। स्वामिचिह्नानि बिभर्तीति। तथा ज्ञानं परिचयोऽप्यस्तीति वा। अनेन कर्तुमकर्तुमन्यथाकर्तुं सामर्थ्यमुक्तम्। इदं लौकिकम्। अलौकिकमाह राममिति। विभक्तवीर्यत्वात्। सर्वलोकानुरञ्जनमपि तस्यासाधारणो गुणः। स्वरूपतः कार्यतश्चोत्कर्ष उक्तः। **पुष्करमालिनमिति**। कमलमालया लक्ष्म्या वृत इति ज्ञापयन् भूषितत्वमाह इत्यैश्वर्यादयस्त्रय उक्ताः। सुष्ठु दर्शनीयानि सर्वाण्यङ्गानि यस्येति। सौन्दर्येण शारीरकीर्तिरुक्ता। **ललनायूथमध्यगमिति**। बहिः कीर्तिरुक्ता। शोभाजनिवेयं कीर्तिरिति ॥ ९ ॥ **गायन्तमिति**। स्वानन्दपूर्णता ज्ञानफलरूपा निरूपिता। **वारुणीं पीत्वेति**। देहविस्मरणं ज्ञानफलं द्विविधमप्युक्तम्। मदेन विह्वले लोचने यस्येति बहिर्ज्ञानदृष्टिः विह्वला वैराग्यफलरूपा निरूपिता। **बिभ्राजमानं वपुषेति**। विगतभ्राजनं वा विशिष्टभ्राजनं वा विकलतया उभयमपि वैराग्यकार्यं भवति। शरीरेण विराजमानम्। ततो वैराग्यस्वरूपमाह **प्रभिन्नमिव वारणमिति**। स ह्यमर्यादो भवति, यः प्रकर्षेण भिन्नः स्रवन्मदः। एवं कारणफलसहिताः षड्गुणा भगवति निरूपिताः ॥ १० ॥ एतादृशमपि दृष्ट्वा स्वदौष्ट्यं प्रकटितवानित्याह **दुष्टः शाखामृग इति**। भगवन्तं दृष्ट्वा किलकिलाशब्दं चक्रे। तज्जातीयशब्दः तादृशः। यदा स्वस्मिन्महत्त्वबुद्धिर्भवति, तदा स्वजातिशब्दं कुर्वन्ति। प्रवृत्ते तु भगवन्तमपि दृष्ट्वा तथाकरणे हेतुर्दुष्ट इति। दोषस्तस्य सहज इति ख्यापयितुं **शाखामृग इति**। भूमि

भूरुहं वा नाश्रयति, किन्तु शाखा एव । शाखां चारूढ इति स्वल्पः स्वस्थाने स्थितो मत्तो भवतीति सूचितम् । **द्रुमान् कम्पयन्निति** । स्वाश्रयाश्रयाणामप्यवगणना निरूपिता । तादृशस्येश्वरावगणना युक्तेति । निलीय रसजननार्थमपि तथा कुर्यादिति पक्षं व्यावर्तयितुमाह **आत्मानं सम्प्रदर्शयन्निति** । स्वस्वरूपं गुह्यदेशं वा ॥ ११ ॥ अल्पस्यैवंकरणमयुक्तमिति भण्डमिव तं दृष्ट्वा केवलेन तेन क्षोभो न भवेदपीति स्त्रीणां हास्यमाह **तस्य धाष्ट्र्यं कपेर्वीक्ष्येति** । तस्यापराधकरणाद्दूष्यस्य । कपेस्तुच्छजीवस्य । **धाष्ट्र्यं** तथाकरणम् । वीक्ष्य । तरुण्यो जात्यैव चपलाः, वयोऽपि स्वभावोऽपि तासामस्थिरतां सम्पादयतीति । हास्यमेव प्रियं यासामिति इन्द्रियान्तःकरणधर्मोऽपि तादृश इति । बलदेवस्य निर्भयस्य पूर्वोक्तस्य वा परिग्रहाः विवाहिताः स्त्रियः सर्वथा निर्भयाः । अनियामकानां चतुर्विधगुणानां विद्यमानत्वात् विजहसुः । रामस्तु न किञ्चिदुक्तवान्, गणनाया एवाभावात् ॥ १२ ॥

श्रीसुबोधिनी-सारः

तत्र पर्वते यदूनां पतिं कमलमालिनं सुष्ठु दर्शनीयानि सर्वाण्यंगानि यस्य तं ललनानां स्त्रीणां यूथस्य मध्यगं मध्यवर्तिनं राममपश्यत् ॥ ९ ॥ वारुणीं मदिरां पीत्वा गायंतं मदेन विह्वले लोचने यस्य तं वपुषा शरीरेण विभ्राजमानं प्रकाशमानं प्रभिन्नं मत्तं वारणं गजमिव ॥ १० ॥ दुष्टः पापी शाखामृगो द्विविदः शाखामारूढो द्रुमान् वृक्षान् कंपयन् आत्मानं स्वदेहं संप्रदर्शयन् किलकिलाशब्दं चकार ॥ ११ ॥ तस्य कपेः धाष्ट्र्यम् औद्धत्यं वीक्ष्य दृष्ट्वा जात्या स्वभावेनैव चापलं यासां हास्यं प्रियं यासां बलदेवः परिग्रहो रक्षको यासां ताः तरुण्यो युवत्यो जहसुः ॥ १२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तत्रापश्यदित्यत्र । दशगुणानिति । विभ्राजमानमित्यस्यार्थद्वयमभिप्रेत्य दशेत्युक्तम् । संख्यातात्पर्यमाहुः **एतावन्त इति** । दशविधैव लीलेत्यर्थः ।

इत्यष्टादशाध्यायव्याख्या समाप्ता ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र रैवतकोपवने राममपश्यत् । तं विशिनष्टि—यदुपतिं यादवानां पालकम् । पुष्करं कमलं तस्य माला अस्यास्तीति तथा तम् । सुदर्शनीयानि सर्वाण्यङ्गानि यस्य तम् ॥ ९ ॥ मदिरामदेन विह्वले घूर्णिते लोचने यस्य तम् । प्रभिन्नं मत्तं वारणं गजमिव वपुषा विभ्राजमानम् ॥ १० ॥ स दुष्टः शाखामृगो वानरः शाखामारूढः सन् द्रुमान् कम्पयन् तेनात्मानं संप्रदर्शयन् 'किलकिल' इति वानरजातिशब्दं चक्रे ॥ ११ ॥ तस्य द्विविदस्य धाष्ट्र्यं प्रागल्भ्यं दृष्ट्वा तरुण्यो विजहसुरित्यन्वयः । तत्र हेतुगर्भाणि विशेषणान्याह—जात्या स्वभावेनैव चापलं यासां ताः । हास्यं प्रियं यासां ताः । बलदेवस्य परिग्रहो यासां ताः, अनेन तासां भयाभावोऽपि सूचितः ॥ १२ ॥

अन्वितार्थप्रकाशिका

तत्रेति युग्मम् ॥ तत्र रैवतकोपवने यदुपतिं यादवानां पालकं पुष्करं कमलं तस्य माला अस्यास्तीति तथा तं सुदर्शनीयानि सर्वाण्यङ्गानि यस्य तं ललनानां यूथस्य मध्यगं वारुणीं मदिरां पीत्वा गायन्तं मदिरामदेन विह्वले घूर्णिते लोचने यस्य तं प्रभिन्नं मत्तं वारणं गजमिव वपुषा विभ्राजमानं राममपश्यत् ॥ ९-१० ॥ दुष्ट इति ॥ स दुष्टः शाखामृगो वानरः शाखामारूढः सन् द्रुमान् कम्पयन् तेनात्मानं संप्रदर्शयन् किलकिलेति वानरजातिशब्दं चक्रे ॥ ११ ॥ तस्येति ॥ तस्य द्विविदस्य धाष्ट्र्यं दृष्ट्वा जात्या स्वभावेनैव चापलं यासां ताः हास्यं प्रियं यासां ता बलदेवस्य परिग्रहो यासां ता अतो निर्भयाः तरुण्यो विजहसुः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रभिन्नं मत्तं वारणं गजमिव ॥ १० ॥ एकशाखामारूढस्तत्समीपस्थान् बहुद्रुमान् कंपयन् शाखामृगो वानरः किलकीलाशब्दं वानरजातिरवं ॥ ११ ॥ धाष्ट्र्यं दुश्चेष्टितं बलदेवस्य परिग्रहाः युवतयः ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्रेति ॥ गायन्तमिति ॥ तत्र रैवतकोपवने, पुष्करमाला पद्ममालाऽस्यास्तीति तं, व्रीह्यादित्वात् मत्वर्थीय इनिः । सुष्ठु दर्शनीयानि सर्वाण्यङ्गानि यस्य तं, ललनायूथमध्यगं योषित् समूहमध्यगतं, वारुणीं मदिरां, पीत्वा, गायन्तं मदेन विह्वले विघूर्णिते लोचने यस्य तं, प्रभिन्नं मत्तं वारणमैरावतमिव, स्थितं, वपुषा विभ्राजमानं, यदुपतिं रामं, अपश्यत्, द्वयोरेकसंबन्धः ॥ ९-१० ॥ दुष्ट इति ॥ दुष्टः, द्रुमान्, कम्पयन्, शाखां वनस्पतेरिति शेषः । आरूढः सन्, शाखामृगो वानरो द्विविदः,

आत्मानं स्वशरीरं, संप्रदर्शयन्, स्वगुह्याङ्गप्रेक्षणं कारयन्नित्यर्थः। किलकिलाशब्दं, चक्रे ॥ ११ ॥ तस्येति ॥ जातिचापलाः जातित एव चपलतोपेताः, तत्रापि बलदेवपरिग्रहाः, हास्यप्रियाः, तरुण्यः स्त्रियः, तस्य कपेर्वानरस्य, धार्ष्ट्यं प्रागल्भ्यं दौष्ट्यमित्यर्थः। वीक्ष्य, विजहसुः। जातिचापलाः इत्यादीनि विशेषणानि हेतुगर्भाणि। तत्त्वात् जहसुः ॥ १२ ॥

कृष्णप्रिया

वहाँ उसने देखा कि यदुवर भगवान् श्री बलरामजी युवती सर्वाङ्गसुन्दरी व्रजनारियों के वृन्द में विराजमान हैं। श्रीबलभद्रजी सर्वाङ्ग सुन्दर और अत्यन्त दर्शनीय स्वरूप हैं और उनके श्रीवक्षःस्थल पर वनमाला विराजमान है ॥ ९ ॥ श्रीदाऊजी सुगन्धमय मधु का पान करके हृदयंगम संगीत का गान कर रहे थे और बलभद्रजी आनन्दोल्लास से विह्वल हो रहे थे। उनका श्रीविग्रह किसी मदमत्त गजराज के समान शोभायमान हो रहा था ॥ १० ॥ वह दुष्ट द्विविद वानर वृक्षों की शाखाओं पर चढ़ जाता था और सम्पूर्ण शाखाओं को झक-झोर देता था, कभी तो स्त्रियों के सामने किलकारी भी करता था ॥ ११ ॥ तरुणी नारियाँ स्वभाव से चंचल होती हैं। हास-परिहास में सहज अनुराग रखती हैं, अतः इस द्विविद वानर की धृष्टता को देख बलभद्रजी की स्त्रियाँ हंसने लगीं ॥ १२ ॥

ता हेलयामास कपि[1]र्भ्रूक्षेपैः सम्मुखादिभिः। दर्शयन् स्वगुदं तासां रामस्य च निरीक्षतः ॥ १३ ॥
तं ग्राव्णा प्राहरत् क्रुद्धो बलः प्रहरतां वरः। स वञ्चयित्वा ग्रावाणं मदिराकलशं कपिः ॥ १४ ॥
गृहीत्वा हेलयामास धूर्तस्तं कोपयन् हसन्। निर्भिद्य कलशं [2]दुष्टो वासांस्यास्फोटयद् बलम् ॥ १५ ॥
कदर्थीकृत्य बलवान् विप्रचक्रे मदोद्धतः। तं [3]तस्याविनयं दृष्ट्वा देशांश्च तदुपद्रुतान् ॥ १६ ॥

कर्दमक्षमा

अन्वयः—सः, कपिः, भ्रूक्षेपैः, सम्मुखादिभिः, तासाम्, च, रामस्य, निरीक्षतः स्वगुदम्, दर्शयन्, ताः, हेलयामास ॥१३॥ क्रुद्धः, प्रहरताम्, वरः, बलः, तम्, ग्राव्णा, प्राहरत्, सः, कपिः, तम्, ग्रावाणम्, वञ्चयित्वा, मदिराकलशम्, गृहीत्वा, धूर्तः, कलशम्, निर्भिद्य, तम्, हेलयामास, दुष्टः, वासांसि, आस्फालयत् ॥ १४-१५ ॥ मदोद्धतः, बलवान्, सः, तम्, (रामम्) कदर्थीकृत्य, विप्रचक्रे, तस्य, अविनयम्, दृष्ट्वा, च, देशान्, तदुपद्रुतान्, दृष्ट्वा ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हेलयामासावजज्ञे। निरीक्षतो निरीक्षमाणस्य तमनादृत्येत्यर्थः ॥ १३-१४ ॥ आस्फालयद्योषितां वासांस्याकृष्य पाटितवान् ॥ १५ ॥ विप्रचक्रे एवमपकृतवान् ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ता बलदेवपत्नीः। भ्रूक्षेपैर्भ्रूचालनैः। इत्यर्थ इति—अनादराधिक्यषष्ठ्याऽयमर्थ इति भावः ॥ १३ ॥ तं द्विविदम्। ग्राव्णा पाषाणेन 'पाषाणग्रावप्रस्तराः' इति कोशात्। स द्विविदः ॥ १४ ॥ तं बलम्। 'स्फाल—कूर्दनपाटनयोः' चुरादिः ॥१५॥ कदर्थीकृत्य तिरस्कृत्य। तस्य द्विविदस्य। अविनयमौद्धत्यम् "विनया तु कलायां स्त्री शिक्षायां प्रणतौ पुमान्" इति मेदिनी। तदुपद्रुतान् द्विविदकृतोपद्रवयुक्तान् ॥ १६-१७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्यक् नानागतिसुखं यत्र तदादिभिः तासां ताः प्रति ॥ १३ ॥ तमित्यर्द्धकम् ॥ १४ ॥ कोपयन् कोपयितुं हसन् यद्वा पूर्वं कोपयन् पश्चात्तद्दर्शनेन हसन् बलं सर्वतोऽधिकबलमपि कदर्थीकृत्य मुहुः खेदयित्वा यतो मदेन गर्वेणोद्धतः अविनीतः उच्चैर्हत इति तु श्लेषः हेतुः बलत्वानिति ॥ १५ ॥ देशांश्चैतदुपप्लवेनैव भग्नान् दृष्ट्वा अनुसन्धाय ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्मुखं विविधभंग्या मुखप्रदर्शनं मुखविक्रिया वा, आदिशब्दात् दन्तदर्शन-वाग्विकारादयः, तासां ताः प्रत्येव च, अपि निरीक्षमाणस्यापि ॥ १३ ॥ बलत्वात् प्रहरतां मध्ये वरोऽपि तथा क्रुद्धोऽपि ग्राव्णैव प्राहरत्, न तु मुषलेन,—तस्य पूर्वभक्त्यपेक्षयेत्यर्थः। स तु महादुष्टतामेवातनोदित्याह—स इति द्वाभ्याम्। वञ्चयित्वा द्रुतमुप्लुत्यान्यत्र गमनेनातिक्रम्य ॥ १४ ॥

---

१. भृश-विज. । २. दृसो वासांस्याकृष्य योषितां-वीर. ; दुष्टो वासांस्यास्फा-श्रीधर. वंशी. जीव. विज. विश्व. । ३. तस्याप्य-विज. ।

धूर्त्तः खलः, अत एव कोपयन् कोपयितुं हसन्, दुष्टः स्त्रीणां वस्त्रास्फालनात्; बलं सर्वतोऽधिकबलवन्तमपि कदर्थीकृत्य अवज्ञाय, यतो मदेन गर्वेणोद्धतोऽविनीत उच्चैर्हतो वा, मदे हेतुः—बलवानिति। ननु पूर्वभक्त्यपेक्षया तस्याविनयः क्षन्तुं युज्येत, तत्राह—देशांश्चेति। अतः क्रुद्धः सन्, अत एव अरेर्निजप्रातिकूल्येनारित्वं प्राप्तस्य तस्य जिघांसया प्रहरणेच्छया आदत्त ॥१६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

हेलयामास अपराधेन कलुषीचकार ॥ १५ ॥ विप्रचक्रे विकारः अनिष्टाचरणम् ॥ १६–१८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

ता इति। कपिर्द्विविदः भ्रूविक्षेपैः सम्मुखागमनादिभिः आदिशब्देन दन्तप्रदर्शनादिसङ्ग्रहः स्वगुदं तासां दर्शयन् रामस्य पश्यतस्सत एव ताः हेलयामास अवजज्ञे ॥ १३ ॥ तमिति। ग्राव्णा पाषाणेन तं कपिं प्राहरत् स कपिः तं रामं कोपयन् हसंश्च हेलयामास अवमतवान् ॥ १४ ॥ किञ्च; निर्भिद्येति। दृप्तो गर्वितः कलशं मदिरापात्रं निर्भिद्य योषितां वासांसि आकृष्य आत्मानं प्रापितवान् मदेनोद्धतो बलवांश्च कपिरेवं बलं रामं कदर्थीकृत्य तुच्छीकृत्य विप्रचक्रेऽपचकार तं कपिं तस्याविनयं धाष्टर्यं (दौष्ट्यं) तेनोपद्रुतान् देशांश्च विलोक्य ॥ १५–१६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हेलयामास अवज्ञाताश्चक्रे सम्मुखादिभिः पुरः स्थित्यादिभिः ॥ १३–१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हेलयामास अवज्ञातवान् सम्मुखादिभिः सम्मुखस्थितिगतिमूत्रणादिभिः तासां ताः रामस्य निरीक्षमाणस्येत्यनादरे षष्ठी ॥ १३–१४ ॥ वासांसि शय्योपरिस्थितानि आस्फालयत् आकृष्य पाटितवान् ॥१५॥ विप्रचक्रे एवमपकृतवान् ॥१६–१८॥

गूढार्थदीपिनी

ताः पत्नीः। हेलयामास अवज्ञातवान्। भ्रूचालनैः ॥ १३ ॥ तमिति सार्द्धम्। ग्राव्णा पाषाणेन प्राहरत्। कलशं गृहीत्वा ॥ १४ ॥ वासांसि स्त्रीणां वस्त्राणि आस्फालयत् आकृष्य पाटितवान्। कदर्थीकृत्य तिरस्कृत्य। विप्रचक्रे अपकृतवान् ॥ १५ ॥ अविनयम् औद्धत्यम्। आदत्त गृहीतवान् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ग्राव्णा पाषाणेन ॥ १३ ॥ तं रामं कोपयन् हेलयामास अवज्ञातवान् ॥ १४ ॥ आस्फालयत् पाटितवान् इत्थं विप्रचक्रे अपकृतवान् ॥ १५–१७ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

उभयमपि स्वस्य हीनत्वापादकमिति तासामवगणनां कृतवानित्याह **ता हेलयामासेति**। अवहेला मुखतः जातिचेष्टाभिरपीत्याह। भ्रूक्षेपैः तिर्यक् निरीक्षणयुक्तैः। सम्यक् मुखं यत्रेति सम्मुखादिभिर्विकारैः। परितोऽग्रतश्च हेलनमुक्त्वा पृष्ठतोऽप्याह दर्शयन्स्वगुदं तासामिति। तूष्णींभावेनावगणित इति रामस्याप्यवहेलनं कृतवानित्याह रामस्य च निरीक्षत इति। निरीक्षतः सतस्तासामपि निरीक्षतीनां सतीनाम्। दर्शने सर्वेषां साधारणस्यापि सङ्कोचो भवति। अस्य तु तथात्वेऽपि न जातमिति दोषं वक्तुं वर्णितम् ॥ १३ ॥ ततो विचारमकृत्वैव अल्पदोषे अल्पैव शिक्षेति वा ज्ञापयितुं पाषाणप्रक्षेपमात्रं कृतवानित्याह तं ग्राव्णेति। वानराः कृतोपकारा दयाविषयाश्चेति उपेक्षां परित्यज्य किमिति ग्राव्णा प्राहरत्, तत्राह क्रुद्ध इति। क्रोधे तस्याल्पस्य महदतिक्रमो हेतुः। अनावेशात् हलमुशलस्मरणात्पूर्वं सर्वं कृतवान्। तेन नाविचारकृतो दोषः। बल इति। तस्य माहात्म्यं ज्ञात्वापि स्वस्य बलिष्ठत्वादेव तथा कृतवान्। काकादिष्विव केवलं निवारणार्थतां प्रहरणस्य निवारयति प्रहरतां वर इति। ततस्तेनैव व्यथितो भवेदिति तथा प्रकारं कृतवान्। स तु पूर्वं परमेश्वरस्य भक्त आसीदिति भगवत्कृपयैव तस्य जातं सामर्थ्यमनुवदति स वञ्चयित्वेति। तस्योद्धतस्य स्वत एव मरणार्थं प्रवृत्तस्य अपराधे असह्ये क्रोधान्मारणमिति वक्तुं तादृशमतिक्रममाह ग्रावाणं वञ्चयित्वा मदिराकलशं गृहीत्वा हेलयामासेति। यतो धूर्तः। पानव्यसनिनां तदपहारे महान् क्रोधो भवतीति जानाति। अपकारार्थं नेदं करणम्, किन्तु कोपयन्। केवलं कोपार्थताप्रदर्शनार्थं हसन्। तर्हि पानार्थं नयनं भविष्यतीत्याशङ्क्य अग्रे तत्कृतं चरित्रमाह निर्भिद्येति। कलशं निर्भिद्य। तथा कृते जीवनमपि गमिष्यतीति शङ्काभावायाह। ततः स्थापितानि जलक्रीडोत्तरं परिधेयानि स्त्रीणां बलस्य च वासांसि च निर्भिद्य, बहुधा छित्वा, ततो बलमास्फोटयत्। मल्ल इव

युद्धकरणार्थं बाहुस्फोटं कृतवान् ॥ १४-१५ ॥ नन्वल्पः कथमेवं करोतीत्याशङ्क्याह बलवानिति । ननु बलोऽपि बलवान्, नहि तुल्येऽप्येवं क्रियते, तत्राह कदर्थीकृत्येति । तुच्छीकृत्य । तदपि स्वमनस्येवेति वक्तुमाह मदोद्धत इति । विप्रचक्रे अपकारं कृतवान् । ततो बलः विचारपूर्वकं भगवदाविष्टः तद्वधार्थं यत्नं कृतवानित्याह तं तस्याविनयमिति । वस्तुतस्त्विदं द्वारमात्रम्, मुख्यस्तु अपराधः तदुपद्रुतान् देशान् विलोक्येति । यद्यपि पूर्वं दृष्टम्, तथापीदानीं स्मृतमित्येके । इदानीमेव भगवदावेश इति । तस्य चापरोक्षज्ञानमेव सर्वत्रेति इदानीमेव दृष्ट्वेति युक्तम् ॥ १६ ॥

श्रीसुबोधिनी-सारः

भ्रुवः क्षेपैराक्षेपैः संमुखादिभिः ताः स्त्रीः कपिर्हेलयामासावजज्ञे तासां स्त्रीणां स्वगुदं दर्शयन् सन् रामस्य पश्यतः सतः ॥ १३ ॥ प्रहरतां वरः श्रेष्ठो बलः क्रुद्धस्तं कपिं ग्राव्णा दृषदा प्राहरत् ग्रावाणं वञ्चयित्वा स कपिर्मदिरायाः कलशं गृहीत्वा ॥ १४ ॥ धूर्तो हसन् तं रामं कोपयन् हेलयामास ताः कलशं निर्भिद्य भंक्त्वा धृष्टो द्विविदस्तासां वासांस्यास्फालयत् आकृष्यापाटयत् बलं रामं कदर्थीकृत्य तुच्छीकृत्यावज्ञाय तत्र हेतुः बलवान् मदव्याप्तो विप्रचक्रे विकारं कृतवान् ॥ १५ ॥ तस्य कपेस्तमविनयं धृष्टतां दृष्ट्वा तेनोपद्रुतान् दुःखितान् देशस्थान्देशांश्च दृष्ट्वा क्रुद्धो मुसलमादत्तागृहीत् अरेः शत्रोर्हंतुमिच्छया हलं चादत्त ॥ १६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स द्विविदः रामस्य पश्यत एव सतस्तमनादृत्य भ्रूविक्षेपैः संमुखागमनादिभिः, आदिशब्देन दन्तप्रदर्शनादिभिश्च तासां स्वगुदं दर्शयन् ताः स्त्रीर्हेलयामास अवजज्ञे ॥ १३ ॥ बलश्च क्रुद्धस्तं वानरं ग्राव्णा पाषाणेन प्राहरत् । 'तत्प्रहारेणापि तस्य किं स्यात् प्रबलत्वात्' इत्याशङ्क्याह—प्रहरतां वर इति । स च कपिः हसन् बलं कोपयन् ग्रावाणं वञ्चयित्वा मदिराकलशं च गृहीत्वा तं हेलयामास अवमतवान् । तत्र हेतुमाह—धूर्त इति ॥ १४ ॥ ततश्च बलं कदर्थीकृत्य अगणयित्वा विप्रचक्रे तदपकारं कृतवान् । तदपकारमेवाह— मदिराकलशं निर्भिद्य योषितां वासांसि आस्फालयत् आकृष्य पाटितवान् । तत्र हेतुमाह—मदेनोद्धतः विवेकशून्यः । मदे हेतुमाह—बलवानिति । 'बलवत्त्वेपि यदि सुस्वभावः स्यात्तदा तस्य मदो न स्यात्' इत्याशङ्क्याह—धृष्ट इति ॥ १५ ॥ तस्य कपेस्तमविनयं दौष्ट्यं तेनोपद्रुतान् देशांश्च दृष्ट्वा क्रुद्धो रामः अरेस्तस्य जिघांसया हलं मुसलं चाददे ॥ १६ ॥

अन्वितार्थप्रकाशिका

ता इति ॥ स द्विविदः रामस्य निरीक्षतः पश्यत एव सतः । अनादराधिक्ये भावलक्षणे षष्ठी । शता आर्षः । तासां स्त्रीणां स्वगुदं दर्शयन् भ्रूविक्षेपैः संमुखागमनादिभिः आदिशब्देन दन्तप्रदर्शनादिभिश्च ताः स्त्रीर्हेलयामास अवजज्ञे ॥ १३ ॥ तमिति सार्द्धम् ॥ प्रहरतां वरः बलश्च क्रुद्धस्तं वानरं ग्राव्णा पाषाणेन प्राहरत् । स च धूर्तः कपिः हसन् बलं कोपयन् ग्रावाणं वञ्चयित्वा मदिराकलशं च गृहीत्वा तं बलं हेलयामास अवमतवान् ॥ १४ ॥ निर्भिद्येति ॥ ततश्च दुष्टः बलवान् मदोद्धतः सः मदिराकलशं निर्भिद्य योषितां वासांसि शय्योपरिस्थितानि आस्फालयत् आकृष्य पाटितवान् । एवं बलं कदर्थीकृत्य अगणयित्वा विप्रचक्रे तदपकारं कृतवान् ॥ १५ ॥ तमिति ॥ तस्य कपेः तमविनयं दौष्ट्यं दृष्ट्वा तेनोपद्रुतान् देशांश्च श्रुत्वा क्रुद्धो रामः अरेस्तस्य जिघांसया हलं मुसलं चादत्त ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

संमुखादिभिः संमुखमेत्य दंतदर्शनादिभिः ताः हेलयामास ता सामवज्ञां चकारेत्यर्थः ॥ १३ ॥ ग्राव्णा पाषाणेन ॥१४॥ धृष्टो दुष्टः आस्फालयद्विदारयामास कदर्थीकृत्य तिरस्कृत्य ॥ विप्रचक्रे अपमानं चक्रे ॥ १५-१६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ता इति ॥ रामस्य निरीक्षतः पश्यतः सतश्च, तासां स्वगुदं दर्शयन्, कपिर्द्विविदः, भ्रूक्षेपैः संमुखादिभिः संमुखागमनादिभिः, आदिशब्देन दन्तप्रदर्शनादेर्ग्रहणम् । ताः स्त्रियः, हेलयामास अवजज्ञे ॥ १३ ॥ तमिति ॥ प्रहरतां वरः बलः, क्रुद्धः सन्, तं कपिं, ग्राव्णा दृषत् पुत्रेण, प्राहरत् । सः कपिः, ग्रावाणं वञ्चयित्वा, मदिराकलशं गृहीत्वा, धूर्तः हेतुगर्भं, तत्त्वात् हसन् सन्, तं बलं, कोपयन्, हेलयामासावमतवान् ॥ १४ ॥ निर्भिद्येति ॥ दृप्तः द्विविदः, यतः, बलवान् मदोद्धतः, अतः बलं, कदर्थीकृत्य तुच्छीकृत्य, कलशं मदिराकुम्भं, निर्भिद्य, वासांसि योषितां वसनानि, आकृष्येति शेषः । आस्फालयन् विपाटयन्,

विप्रचक्रे तमपकृतवान् ॥ १५ ॥ तमिति ॥ क्रुद्धः बलः, तमुक्तप्रकारं, तस्य अविनयं दृष्ट्वा, देशांश्च, तदुपद्रुतांस्तेन पीडितान् दृष्ट्वा, अरिजिघांसया, मुसलं हलं च, आदत्त गृहीतवान् ॥ १६ ॥

कृष्णप्रिया

अब वह दुष्ट द्विविद श्रीबलदेवजी के सामने ही उन सन्नारियों की अवहेलना और अनादर करने लगा। वह खल कभी अपनी उन नारियों को कभी गुप्ताङ्ग तो कभी भौंहें मटकाता कभी गर्जना करता करता अपमान करता था ॥१३॥ प्रहार करनेवालों में अत्यंत बलवान श्री बलरामजी ने क्रुद्ध होकर उस वानर पर एक पत्थर का टुकड़ा फेंका। लेकिन उस पत्थर प्रहार से अपने को बचाकर उस मधु कलश को उठा लिया और बलभद्रजी का अनादर करने लगा। अन्ततोगत्वा उस धूर्त द्विविद ने मधुकलश को तो तोड़ ही डाला। स्त्रियों के वस्त्र भी फाड़ डाले। पुनः वारंवार हंसकर श्रीबलदेवजी को क्रोधित करने लगा ॥ १४-१५ ॥ महाराज ! जब इस प्रकार यह खल द्विविद वानर श्रीबलभद्रजी को नीचा दिखाने का तथा श्रीबलरामजी को गुस्से करने कुचेष्टा आदि करने लगा तब उसकी दुष्टता को देखकर और समुद्र तट के देशों की दुर्दशा देखकर इस शत्रु का वध करना उचित है ॥ १६ ॥

क्रुद्धो मुसलमादत्त हलं चारिजिघांसया। द्विविदोऽपि महावीर्यः [1]शालमुत्पाट्य[2] पाणिना ॥ १७ ॥
अभ्येत्य तरसा तेन बलं मूर्धन्यताडयत्। तं तु संकर्षणो मूर्ध्नि पतन्तमचलो यथा ॥ १८ ॥
प्रतिजग्राह [3]बलवान् [4]सुनन्देनाहनच्च[5] तम्। मुसलाहतमस्तिष्को विरेजे रक्तधारया ॥ १९ ॥
गिरिर्यथा गैरिकया प्रहारं [6]नानुचिन्तयन्। पुनरन्यं समुत्क्षिप्य कृत्वा निष्पत्रमोजसा ॥ २० ॥

कर्दमक्षमा

अन्वयः—क्रुद्धः, अरिजिघांसया, हलम्, च, मुसलम्, आदत्त, महावीर्यः, द्विविदः अपि, पाणिना, शालम्, उत्पाट्य ।१७। तरसा, अभ्येत्य, तेन, बलम्, मूर्ध्नि, अताडयत्, संकर्षणः, मूर्ध्नि, पतन्तम्, तम्, तु, यथा, अचलः ॥ १८ ॥ प्रतिजग्राह, च, बलवान्, संकर्षणः, सुनन्दनेन, तम्, अहनत्, मुसलाहतमस्तिष्कः ॥ १९ ॥ सः, प्रहारम्, न, अनुचिन्तयन्, किन्तु, गैरिकया, यथा, गिरिः, विरेजे, रक्तधारया, विरेजे, सः, पुनः, ओजसा, तम्, समुत्क्षिप्य, निष्पत्रम्, कृत्वा ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शालं वृक्षम् ॥ १७ ॥ सुनंदेन मुसलेनाहनत्। अहन्नित्यर्थः ॥ तं वानरम्। मस्तिष्कं मस्तकावयवविशेषः ॥ १९ ॥ गैरिकया लोहितधातुना। नानुचिंतयन्नगणयन् ॥ २०-२३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अभ्येत्य संमुखमागत्य। तेन शालेन तं वृक्षम् ॥ १८ ॥ तं कपिम्। इत्यर्थ इति—शबार्षोऽत्रेति बोध्यम्। "सुनन्दो बलदेवस्य मुशले विष्णुपार्षदे" इति वारतांतविः। 'मस्तिष्कं मस्तकांतरम्' इति धरणिः ॥ १९ ॥ अन्यं वृक्षम्। समुत्क्षिप्योत्पाट्य ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

क्रुद्धः पुनरतिक्रुद्धः सन् [पादेनैकेन] पाणिनैकेनोत्पाट्य अभ्येत्य अभिमुखमेत्य ॥१७-१८॥ प्रतिजग्राह स्वीकृतवान् अचलो यथेति तस्य तेनाकिञ्चित् करत्वं सूचितं तदिदं च क्षमा पौनःपुन्यं तस्य श्रीराघवेन्द्रसेवाप्राग्भावमनुसन्धाय कृतमिति गम्यते। मुसलेति युग्मकं। नानुचिन्तयन्नित्यस्य परेणान्वयः ॥ १९-२० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततः सोऽपि क्रुद्धः सन् निजविक्रमं दर्शयामासेत्याह— द्विविदोऽपीति। पाणिनैकेनोत्पाट्य, यतो महावीर्य्यः, अतस्तरसा वेगेनाभिमुखमेत्य तेन सालेन तं सालम्, अचलं यथेति तस्य गुरुत्वादिकं सूचितम्, प्रति आभिमुख्येन जग्राह, पाणिना हलेन वा, यतः संकर्षणो द्वितीयव्यूहः, अतो भगवान् साक्षादीश्वरः, तं द्विविदं प्राहरत्। यद्वा, युगपत् प्रतिग्रहणे हनने च

---

१. शैल–विज. । २. मुद्यम्य–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ३. भगवान्–च. पु. टि. । ४. मुसलेना–विज. । ५. द हरिम्–विज. । ६. नान्व–विज. ।

योग्यतामाह— भगवान् सर्वशक्तिमान्, यतः संकर्षणः श्रीकृष्णादपृथग्भूतः। विशेषेण पूर्वतोऽप्याधिक्येन रेजेऽशोभत। तत्रैव हेत्वन्तरम्—प्रहारमनुचिन्तयन्निति महावीरस्वभावप्रदर्शनादिति भावः। यद्वा, अस्य परेणान्वयः ॥ १९ ॥ अन्यं सालं सम्यक् समूलतयोत्क्षिप्य उत्पाट्य, ओजसा बलेन। सुसंक्रुद्धः सन् अहनत्, तं हन्तुं चिक्षेपेत्यर्थः। सुसंक्रुद्धः इति हननस्य दार्ढ्यादिकं सूचयति; एवमग्रेऽपि। जघ्ने द्विविदः, अभिनत् बलः; भगवतेऽपि, तथापि भक्तवात्सल्येन प्रायस्तत्प्रहारप्रतिकारमेवाकरोत्, न तु तं प्राणतो मारयतीति भावः ॥ २२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सुनन्देनाहनत् मुसलेनाहनत् ॥ १९-२३ ॥ अरूरुजत् अयोधयत् ॥ २४-२८ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

क्रुद्धो रामः हलं मुसलञ्चाददे। द्विविदोपीति। महद्वीर्यं यस्य सः द्विविदोपि सालवृक्षमुत्पाट्य ॥ १७ ॥ बलमूर्द्धनि राममूर्द्धनि तेन सालेनाताडयत्। तमिति। पतन्तं तं सालं प्रतिजग्राह गृहीतवान् तत्प्रहारमङ्गीकृतवानित्यर्थः। यथा पर्वतः तद्वत् ॥ १८ ॥ ततः सुनन्देन मुसलेन हरिं कपिमहनत्ताडयामास। मुसलेनाहतो मस्तिष्कः मस्तकावयवविशेषो यस्य सः अत एव रक्तधारया रेजे ॥१९॥ यथा गिरिर्गैरिकधारया राजते तद्वत् ततस्तं प्रहारमनुचिन्तयन् पुनरन्यं सालमोजसा बलेनोत्पाट्य पर्णरहितं कृत्वा ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

गैरिकया गिरिधातुरसधारया ॥ १९-२० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मस्तिष्कं मस्तकमज्जा ॥ १९-२८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

सुनन्देन मुसलेन मस्तिष्कं मस्तकावयवविशेषः ॥ १९-२३ ॥

गूढार्थदीपिनी

अभ्येत्य सम्मुख आगत्य ॥ १७ ॥ सुनन्देन मुसलेन ॥ १८ ॥ मुसलेति युग्मम्। गैरिकया लोहितधातुना ॥ १९ ॥ समुत्क्षिप्य उत्पाट्य ॥ २० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तं सालं जग्राह तं वानरं सुनन्देन मुसलेन अहनत् ताडयामास ॥ १८ ॥ मुसलेन आहतं मस्तिष्कं मस्तकावयवविशेषो यस्य सः ॥ १९-२२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवता सहैव मुसलादीनामप्यागमनात् मुसलं हलं च तज्जिघांसया आधत्त। आयुधवच्चिह्नार्थमग्रहणमाह क्रुद्ध इति। भक्तत्वशङ्काव्यावृत्त्यर्थमरीति। चकारात् अन्येऽपि धर्मा भगवता आविष्कृता इति अलौकिकं बलमपि ज्ञातव्यम्। तावतापि न निवृत्त इति अक्लिष्टकर्मत्वं भगवतो वदन्नाह द्विविदोऽपीति। युद्धं वक्तुं तस्य प्रसिद्धनामग्रहणम्। महावीर्य इति। रामायणादौ तत्पराक्रमो निरूपितः स्मार्यते, युद्धस्मरणाभिनिवेशाय। एकेन पाणिना शालवृक्षमुत्पाट्येति बलस्य कार्यम्, न तु केवलं प्रशंसापरमिति ज्ञापयितुम् ॥ १७ ॥ अभ्येत्य निकटे समागत्य, तरसा रामोद्यमात्पूर्वमेव तेन शालेन मूर्ध्नि प्रदेशे अताडयत्, गृहीत्वैव लकुटेनेव ताडितवान्। बलपदाच्छ्रोतुर्भयाभावः सूचितः। ततस्तन्निराकरणमाह तं तु सङ्कर्षण इति। पर्वते वृक्षप्रक्षेपः न पर्वतस्य भयजनक इति मूर्ध्नि पतन्तमपि वृक्षं यथा अचलः पर्वतो गृह्णाति ॥ १८ ॥ तस्य हि वृक्षा लोमप्रायाः तं हस्तेन गृहीतवान्, वञ्चनेऽपि भूमिस्ताडिता भवतीति। ततः सुनन्देन मुसलेन तमाहनत् हतवान्। चकारात् वृक्षमपि तेनैव हत्वा तदुपरि प्रक्षिप्तवान्। तस्य वृक्ष इव मुसलमपि कार्यव्यभिचारि भविष्यतीत्याशङ्क्याह मुसलाहतमस्तिष्क इति। मस्तिष्कं मस्तकास्थि। ततो रुधिरप्रवाहोऽपि जातः। तेनापि विरेजे, नतु मूर्च्छितः, हतो वा ॥ १९ ॥ ननु प्रहारेण सकार्येण कथं शोभेत्याशङ्क्य दृष्टान्तमाह गिरिर्यथा गैरिकयेति। नन्वाकृतिसाम्येऽपि अन्तर्दुःखानुभवात् म्लानतैव युक्ता, न तु शोभेति चेत्, तत्राह

प्रहारं नानुचिन्तयन् रेज इति पूर्वेण सम्बन्धः। उत्तरत्र वा पुनरन्यं समुत्क्षिप्येति। 'त्रिषत्या देवा' इति समानमपि युद्धं वारत्रयमुच्यते। त्रिर्यजुषेतिवत्। अन्यं मूलात्समुत्क्षिप्य निष्पत्रं च कृत्वा, अन्यथा सर्वाः अग्रभागे हस्ते धर्तुं न योग्या भवन्तीति मूलभागेन च ताडयितुं निष्पत्रकरणम्। ओजसेति शीघ्रम् ॥ २० ॥

श्रीसुबोधिनी-सारः

महावीर्यो द्विविदोपि पाणिना हस्तेन शालमुद्यम्य गृहीत्वा तरसा बलेनाभ्येत्य प्राप्य तेन शालेन मूर्द्धनि शिरसि अताडयत् बलम् ॥१७॥ अचलः पर्वत इव मूर्ध्नि पतंतं तं शालं बलवान्संकर्षणः प्रतिजग्राह सुनंदेन मुसलेन तं द्विविदं चाहनत् गणकार्यस्यानित्यत्वात् हवामह इत्यादिवत् ॥ १८ ॥ मुसलेनाहतं मस्तिष्कं शिरो यस्य स रक्तस्य रुधिरस्य धारया विरेजे गैरिकया गिरिः पर्वत इव प्रहारं कपिर्नागणयत् ॥ १९ ॥ पुनरन्यं वृक्षमुत्पाट्य ओजसा बलेन निष्पत्रं कृत्वा सुसंक्रुद्धस्तेन वृक्षेणाहनत् बलस्तं शतधाच्छिनत् ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

द्विविदोऽपि पाणिना शालवृक्षमुत्पाट्य तरसाऽभ्येत्य वेगेनागत्य बलं मूर्धन्यताडयत्। तत्र सामर्थ्यमाह— महावीर्य इति ॥ १७ ॥ स्वमूर्धनि पतन्तं तं शालं सङ्कर्षणः प्रतिजग्राह हस्तेन गृहीतवान्। अचलो यथेति। पर्वतवत्तत्प्रहारवेगात् नाचलदित्यर्थः। तत्र सामर्थ्यमाह—भगवानिति। तं द्विविदं च सुनन्दाख्येन मुशलेनाहनत् ॥ १८ ॥ मुशलेनाहतो मस्तिष्को मस्तकावयवविशेषो यस्य सः, अत एव गैरिकधारया यथा गिरिः राजते तथा रक्तधारया रेजे। ततश्च तत्प्रहारं नानुचिन्तयन् सुसङ्क्रुद्धः पुनरन्यं शालं समुत्क्षिप्य उत्पाट्य तं च निष्पत्रं कृत्वा तेन शालेन ओजसा वेगेन तं बलमहनत् तं प्रति चिक्षेप। तं च शालं बलः शतधाऽभिनत् चिच्छेद इति द्वयोरन्वयः ॥ १९-२० ॥

अन्वितार्थप्रकाशिका

द्विविद इति ॥ महावीर्यो द्विविदोऽपि पाणिना शालवृक्षमुत्पाट्य। उद्यम्येति च पाठः। तरसाऽभ्येत्य वेगेनागत्य बलं मूर्धन्यताडयत् ॥ १७ ॥ तमिति ॥ स्वमूर्धनि पतन्तं शालं भगवान् संकर्षणः प्रतिजग्राह हस्तेन गृहीतवान्। अचलो यथेति पर्वतवत्तत्प्रहारवेगात् नाचलदित्यर्थः। तं द्विविदं च सुनन्दाख्येन मुसलेनाहनत्। शब्लुगभाव आर्षः ॥१८॥ मुसलेति युग्मम् ॥ मुसलेनाहतो मस्तिष्को मस्तकावयवविशेषो यस्य सः अत एव गैरिकया गैरिकधारया यथा गिरिः राजते तथा रक्तधारया रेजे। ततश्च तत्प्रहारं नानुचिन्तयन् सुसंक्रुद्धः पुनरन्यं शालं समुत्क्षिप्य उत्पाट्य तं च निष्पत्रं कृत्वा तेन शालेन ओजसा वेगेन तं बलमहनत्। तं प्रति चिक्षेप। शब्लुगभाव आर्षः। तं च शालं बलः शतधाऽच्छिनत् ॥ १९-२० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शालतरुं उद्यम्य उत्पाट्येति वा पाठः ॥ १७ ॥ सुनंदेन तत् संज्ञेन मुसलेन अहनत् अहन् ॥ १८ ॥ मुसलेनाऽऽहतं मस्तिष्कं मस्तकैकदेशो यस्य सः नानुचिंतयन् अगणयन् ॥ १९ ॥ अन्यं तरुं तं वृक्षं अहनत् अहन् ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

द्विविदोऽपीति ॥ महावीर्यः द्विविदः अपि, पाणिना, शाल शालतरुं, उत्पाट्य, तरसा, अभ्येत्य, तेन तरुणा, बलं मूर्द्धनि, अताडयत् ॥ १७ ॥ तमिति ॥ भगवान् संकर्षणः, अचलोपमं पर्वतोपमानं, मूर्ध्नि, पतन्तं तं तरुं तु, प्रतिजग्राह हस्तेन गृहीतवान्, अचलं यथेति पाठे, पतन्तमचलं यथा तथेत्यर्थः। अचलो यथेति पाठे, मूर्ध्नि पतन्तं तरुं यथाऽचलो गृह्णाति, तथा गृहीतवानऽदुःखं यथा तथाऽङ्गीकृतवान्। ततः, सुनन्देन मुसलेन, तं अरिं चापि, अहनत् अहन्। अहनदरिमित्यपि पाठः ॥१८॥ मुसलेति ॥ मुसलेन आहतो मस्तिष्को मस्तकावयवविशेषो यस्य सः, तथापि प्रहारं, न अनुचिन्तयन्, द्विविदः, रक्तधारया रुधिरधारया, गैरिकया गैरिकसंबन्धिन्या धारया, गिरिः पर्वतः यथा तथा, विरेजे ॥ १९ ॥ पुनरिति ॥ द्विविदः पुनः, ओजसा बलेन, अन्यं वृक्षं समुत्क्षिप्य, निष्पत्रं कृत्वा, सुसंक्रुद्धः सन्, तेनान्येन तरुणा, तं बलं, अहनत्। बलः शतधा अभिनदऽच्छिनत् तरुमिति शेषः। सः ततः, अन्येन, रुषा, जघ्ने। बलः तं चापि, शतधा अभिनत् ॥ २० ॥

कृष्णप्रिया

यह निश्चय कर अत्यंत क्रुद्ध श्रीबलभद्रजी ने अपना हल-मुसल उठाया। द्विविद वानर भी अत्यंत बलवान था उसने भी एक हाथ से शाल का एक वृक्ष भूमि से उखाड़कर वह दौड़ा और जाकर मारा ॥ १७ ॥ भगवान् बलभद्रजी गिरिवर की तरह अविचल खड़े रहे बलरामजी ने अपने सिर पर गिरते उस शाल वृक्ष को पकड़ लिया ॥ १८ ॥ पुनः अपने सुनन्द नाम

के मुसल से उसके मस्तक पर प्रहार किया। मुसल लगते ही द्विविद का मस्तक फट गया और उस मस्तक से खून की धारा बहने लगी ॥ १९ ॥ तब ऐसा लग रहा था कि किसी पर्वत से गेरु का स्रोत बह रहा हो। द्विविद वानर ने इस प्रहार की कोई परवाह न करते हुए एक दूसरा तरु उखाड़ा और उस पेड़ को झाड़-झूड़कर शाखाओं और पत्तों से रहित बनाकर बड़े जोर से बलरामजी पर प्रहार किया ॥ २० ॥

तेनाहनत् सुसंक्रुद्धस्तं बलः शतधाभिनत्[1] । ततोऽन्येन रुषा जघ्ने तं चापि शतधाभिनत्[3] ॥ २१ ॥
एवं युध्यन् भगवता भग्ने भग्ने पुनः पुनः । आकृष्य सर्वतो वृक्षान् निर्वृक्षमकरोद् वनम् ॥ २२ ॥
ततोऽमुञ्चच्छिलावर्षं बलस्योपर्यमर्षितः । तत् सर्वं चूर्णयामास लीलया मुसलायुधः ॥ २३ ॥
स बाहू तालसंकाशौ मुष्टीकृत्य कपीश्वरः । आसाद्य रोहिणीपुत्रं [4]ताभ्यां वक्षस्यरूरुजत् ॥ २४ ॥

कर्वमक्षमा

अन्वयः—सुसंक्रुद्धः, तेन, अहनत्, तम्, बलः, शतधा, अच्छिनत्, ततः, तम्, रुषा, अन्येन, जघ्ने, तम्, च, अपि, शतधा, अच्छिनत् ॥ २१ ॥ एवम्, भग्ने, भग्ने, पुनः, पुनः, वृक्षान्, सर्वतः, आकृष्य, भगवता, युध्यत्, वनम्, निवृक्षम्, अकरोत् ॥ २२ ॥ ततः, अमर्षितः, बलस्य, उपरि, शिलावर्षम्, अमुञ्चत्, मुसलायुधः, लीलया, तत्, सर्वम्, चूर्णयामास ॥ २३ ॥ सः, कपीश्वरः, ताल संकाशौ, बाहू, मुष्टीकृत्य, रोहिणीपुत्रम्, आसाद्य, ताभ्याम्, वक्षसि, अरूरुजत् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अरूरुजत्ताडयामास ॥ २४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तेन वृक्षेण । तं वृक्षम् । ततस्तद्वृक्षच्छेदानंतरम् ॥ २१-२२ ॥ ततो वृक्षाभावानंतरम् ॥ २३ ॥ स द्विविदः । तालसंकाशौ तालतरुवल्लंबौ । ताभ्यां मुष्टीकृतबाहुभ्याम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत इत्यर्द्धकम् । जघ्ने द्विविदः अभिनद्बलः ॥ २१ ॥ **भगवतेति** प्रायस्तत्कृतप्रहारप्रतीकारमेवाकरोत् न तु तं तदापि प्राणतो मारयत् लीलामात्रप्रयोजनत्वादिति भावः ॥ २२ ॥ ततो वृक्षाभावे सतीत्यर्थः ॥ २३ ॥ शिलानामप्यभावे सति बाहू मुष्टीकृत्य दृढबद्धकराग्रौ कृत्वा रोहिणीपुत्रमिति श्रीरोहिणीप्रेमस्मरणेन तत्र मुनेर्दुःखोक्तिः ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततो वृक्षाभावे सतीत्यर्थः; शिलानां वर्षं वृष्टिवदविच्छिन्नत्वादिना परम्पराम्; लीलया अनायासेन; मुषलायुध इति मुसलेनैव चूर्णयामासेत्यर्थः ॥ २३ ॥ शिलावर्षेण, शिलानामप्यभावे सति बाहू मुष्टीकृत्य दृढबद्धकराग्रौ कृत्वा; तालसंकाशाविति मुष्टेर्गुरुत्व-दार्ढ्यादिकमभिप्रेतम् । यतः कपीश्वरो वानरश्रेष्ठः; आसाद्य सन्निधौ गत्वा; रोहिण्याः पुत्रमिति तादृशताड़नायोग्यत्वमाह, श्रीबादरायणिर्भक्तिविशेषेण शोकात् । यद्वा, देवक्यां श्रीकृष्णवत्-स्वप्रभावप्रकटनार्थं रोहिण्यामाविर्भूतमिति तस्य सर्व्वशक्तिमत्त्वं सूचयति ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तेन सालेनाहनत् तं सालं बलो रामः शतधा चिच्छेद ततोऽन्यमुत्पाट्य प्रयुक्तं तथा चिच्छेद ॥ २१ ॥ एवमिति । प्रयुक्ते साले भग्ने सति सर्वतो वृक्षानाकृष्य तद्वनं वृक्षरहितं चकार ॥ २२ ॥ **तत** इति । बलस्य रामस्योपरि तच्छिलाजालं सर्वम् ॥ २३ ॥ स बाहू इति । **ताभ्यां** मुष्टीकृताभ्याम् अरूरुजदताड़यत् ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अरूरुजत् चूर्णयामास ॥ २१-२५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

मुष्टीकृत्य मुष्टिमन्तौ कृत्वेत्यर्थः । अरूरुजत् ताडयामास ॥ २४ ॥

---

१. च्छिनत्–श्रीधर. वंशी. जीव. वीर. ; ऽरूजत् विज. । २. ततोऽन्यं तरुमुत्पाद्य–वीर. ; ततोऽन्यमुत्पाट्यजघ्ने–विज. ।
३. च्छिनत्–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ४. दोर्भ्यां–विज. ।

गूढार्थदीपिनी

तत इत्यर्द्धम् ॥ २१-२३ ॥ संकाशौ तालप्रमाणौ । अरूरुजत् अताडयत् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अरूरुजत् अताडयत् ॥ २३ ॥ जत्रौ कण्ठबाहुमूले ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सुतरां सम्यक् **क्रुद्धः** । प्रहारवीर्ययोराविर्भूतत्वात्तस्य प्रतिग्रहो न पौरुषायेति **बलस्तं शतधाभिनत्** विदीर्णं कृतवान् । तृतीयपर्याये पुनराह **ततोऽन्येनेति** ॥ २१ ॥ ततोऽनन्तयुद्धमतिदिशति **एवं युध्यन्निति** । भगवता सह युध्यन् भगवतैव वृक्षे भग्ने क्रमेण सर्वेष्वेव वृक्षेषु पुनः पुनराकृष्य इक्षुदण्डमिव मूलादुत्पाट्य सर्वत्र एवंकरणेन वनं वनभूमि निर्वृक्षमकरोत् । लतागुल्मादीनां विद्यमानत्वात् वृक्षमात्रमेव गतम्, न तु वनमेव ॥२२॥ ततः पाषाणवृष्टिं भग्नोद्यमः सन् कृतवानित्याह **ततोऽमुञ्चच्छिलावर्षमिति** । तत् प्रक्षिप्तं सर्वमेव चूर्णयामासेति तस्य साधनस्य भगवत्प्रतिकूलस्य पुनः साधनतां निवारयति । तत्र क्लेशमाशङ्क्याह **लीलयेति** । अलौकिकप्रकारं वारयितुमाह **मुसलायुध** इति ॥ २३ ॥ ततो भग्नसाधनो बाहुयुद्धार्थमागत इत्याह **स बाहू** इति । **तालसङ्काशाविति** दीर्घस्थौल्यपरुषत्वान्युक्तानि । मुद्गरवन्मुष्टीकरणम् । तथोद्यमे मोहितत्वं शङ्कितं व्यावर्तयितुमाह **कपीश्वर** इति । मारणपर्यन्तं तूष्णीं स्थित इति **रोहिणीपुत्रमित्युक्तम्** । ताभ्यां हस्ताभ्यां मिलिताभ्यां **वक्षसि अरूरुजत्** । पीडां कारितवान् ॥ २४ ॥

श्रीसुबोधिनी-सारः

ततोऽनंतरम् अन्येन वृक्षेण रुषा क्रोधेन जघ्ने **तमपि** शतधाऽच्छिनत् एवं भगवता रामेण युद्धयन् मुहुर्मुहुर्भग्ने भग्ने वृक्षे सति ॥२१॥ सर्वतः चतुर्दिशातो वृक्षानाकृष्य सर्वान् वृक्षानिति साधुः निर्वृक्षं वृक्षशून्यमकरोत् ततो वृक्षाभावाद्ततोबलस्योपरि अमर्षितः क्रुद्धः शिलावर्षमकरोत् तत्सर्वं लीलया चूर्णयामास मुसलमायुधं यस्य स रामः ॥ २२ ॥ तालतुल्यौ बाहू मुष्टीकृत्य स कपीश्वरो द्विविदः रोहिण्याः पुत्रम् आसाद्य प्राप्य ताभ्यां वक्षसि अताडयत् ॥ २३ ॥ यादवेंद्रोपि बलदेवो मुसललांगले त्यक्त्वा दोर्भ्यां तं द्विविदं जत्रौ अभ्यर्दयत् क्रुद्धः रुधिरं वमन्सन् स द्विविदोऽपतत् ॥ २४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततो द्विविदोऽन्येन शालेन रुषा क्रोधेन तं बलं जघ्ने । तमपि शालं स बलः शतधाऽहनत् कृतवानित्यर्थः ॥ २१ ॥ एवं स भगवता स युद्धयन् प्रयुक्ते प्रयुक्ते अस्त्रे वृक्षे भग्ने भग्ने सति सर्वतो वृक्षानाकृष्य उत्पाट्य प्रक्षिपन् तद्वनं निर्वृक्षमकरोत् ॥ २२ ॥ ततश्चामर्षितः क्रुद्धो द्विविदो बलस्योपरि शिलावर्षममुञ्चत् । तत्सर्वं शिलावर्षं हलायुधः रामो हलेन लीलया अनायासेनैव चूर्णयामास ॥ २३ ॥ ततश्च कपीश्वरो तालप्रमाणौ बाहू मुष्टीकृत्य रोहिणीपुत्रं राममासाद्य प्राप्य ताभ्यां मुष्टीकृताभ्यां बाहुभ्यां तस्य वक्षसि अरूरुजत् अताडयत् ॥ २४ ॥

अन्वितार्थप्रकाशिका

तत इत्यर्धम् ॥ ततो द्विविदोऽन्येन शालेन रुषा क्रोधेन तं बलं जघ्ने । तच्छार्षः । तमपि शालं स बलः शतधाऽच्छिनत् कृतवानित्यर्थः ॥ एवमिति । एवं भगवता सह युद्धयन् । शता आर्षः । प्रयुक्ते प्रयुक्ते अस्त्रे वृक्षे भग्ने भग्ने सति सवृतो वृक्षानाकृष्य उत्पाट्य प्रक्षिपन् तद्वनं निर्वृक्षमकरोत् ॥ २१-२२ ॥ तत इति ॥ ततश्चामर्षितः क्रुद्धो द्विविदो बलस्योपरि शिलावर्षममुञ्चत् । तत्सर्वं शिलावर्षं मुसलायुधः रामो हलेन लीलया अनायासेनैव चूर्णयामास ॥ २३ ॥ स इति ॥ स कपीश्वरः तालसंकाशौ तालप्रमाणौ बाहू मुष्टीकृत्य बद्धमुष्टी कृत्वा रोहिणीपुत्रं राममासाद्य प्राप्य ताभ्यां मुष्टीकृताभ्यां बाहुभ्यां तस्य वक्षसि अरूरुजत् अताडयत् ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भगवता बलेन ॥ २१-२२ ॥ अरूरुजत् तताड ॥ २३ ॥ जत्रौ कंठबाहुमूले अभ्यर्दयत् प्रभ्यार्दयत् पीडयामास ॥२४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति । एवं युद्धयन् द्विविदः, भगवता पुनः पुनः, भग्ने भग्ने, सर्वतः वृक्षान्, आकृष्य, वनं निर्वृक्षं, अकरोत् ॥२१॥ **तत इति** । ततः, अमर्षितः द्विविदः, बलस्य उपरि, शिलावर्षं, अमुञ्चत् । तत् सर्वं, मुसलायुधः, लीलया चूर्णयामास ॥ २२ ॥

स इति । ततः सः कपीश्वरः, तालसंकाशौ तालसमानौ, बाहू मुष्टीकृत्य, रोहिणीपुत्रं रामं, आसाद्य, ताभ्यां वक्षसि, अरूरुजत् अताडयत् ॥ २३ ॥ यादवेन्द्र इति । यादवेन्द्रः रामोऽपि, क्रुद्धः सन्, मुसललाङ्गले हलमुसले त्यक्त्वा, तं द्विविदं, दोर्भ्यां, जत्रौ अभ्यर्दयत् । स द्विविदः, रुधिरं वमन्, अपतत् ॥ २४ ॥

कृष्णप्रिया

बलरामजी ने उस वृक्ष के सैंकड़ों टुकड़े कर दिये । तब द्विविद वानर ने दूसरा वृक्ष उखाड़ा । श्री बलरामजी ने उस वृक्ष के सैकड़ों टुकड़े कर डाले । इस प्रकार द्विविद वानर युद्ध करता रहा । एक पेड़ टूटने पर दूसरा बृक्ष उखाड़ता रहा और उससे युद्ध चलता ही रहा । इस प्रकार लड़ते-लड़ते उसने सारे वन को वृक्षहीन कर डाला ॥ २१–२२ ॥ जब वन में वृक्ष न रहा तब द्विविद का क्रोध और बढ़ गया तथा वह अत्यंत चिढ़कर श्री बलरामजी पर बड़ी-बड़ी शिलाओं की वर्षा करने लगा । परंतु श्री बलरामजी ने अपने मूसल से उन सभी शिलाओं को आसानी से चकनाचूर कर दिया ॥ २३ ॥ अन्त में कपिवर द्विविद वानर अपनी ताड़वृक्ष के लम्बी बाँहों से घूंसा बाँधकर बलभद्रजी की ओर झपटा और उनके समीप जाकर उसने उनकी छाती पर प्रहार किया ॥ २४ ॥

यादवेन्द्रोऽपि तं दोर्भ्यां त्यक्त्वा [1]मुसललाङ्गले । जत्रावभ्यर्दयत्क्रुद्धः सोऽपतद् रुधिरं वमन् ॥ २५ ॥
चकम्पे तेन पतता [2]सटङ्कः सवनस्पतिः । [3]पर्वतः कुरुशार्दूल वायुना नौरिवाम्भसि ॥ २६ ॥
जयशब्दो नमःशब्दः साधु साध्विति चाम्बरे । सुरसिद्धमुनीन्द्राणामासीत् कुसुमवर्षिणाम् ॥ २७ ॥
एवं निहत्य द्विविदं जगद्व्यतिकरावहम् । संस्तूयमानो भगवाञ्जनैः स्वपुरमाविशत् ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे[5] द्विविदवधो नाम [6]सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

कर्दमक्षमा

अन्वयः—अथ, यादवेन्द्रः, अपि, क्रुद्धः, मुसललाङ्गले, त्यक्त्वा, तम्, दोर्भ्याम्, जत्रौ, अभ्यर्दयत्, सः, रुधिरम्, वमन्, अपतत् ॥ २५ ॥ कुरुशार्दूलः, तेन, पतता, सटङ्कः, सवनस्पतिः, पर्वतः, वायुना, अम्भसि, नौ, इव चकम्पे ॥ २६ ॥ कुसुमवर्षिणाम्, सुरसिद्धः, मुनीन्द्राणाम्, जयः, शब्दः, नमः, शब्दः, इति, च, साधु, साधु, इति, शब्दः, अम्बरे, आसीत् ॥२७॥ एवम्, जगत्, व्यतिकरावहम्, द्विबिदम्, एवम्, निहत्य जनैः, संस्तूयमानः, भगवान्, स्वपुरम्, आविशत् ॥२८॥

इति श्रीमद्भागवते दशमस्कन्धे सप्तषष्टितमोऽध्याये अन्वयः ॥ ६७ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यादवेंद्रः संकर्षणः क्रुद्धः सन् । जत्रौ कंठबाहुमूले ॥ २५ ॥ टंकाः सतोयविवराणि तत्सहितः ॥ २६–२७ ॥ जगतो व्यतिकरं नाशमावहतीति तथा तम् ॥ २८ ॥

इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टी० सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं द्विविदम् । स द्विविदः ॥ २५ ॥ "टंकस्सतोयविवरे कोपासिग्रावदारणे । मानभेदे खनित्रे च जंघायां स्त्री" इति धरणिः ॥२६–२७॥ "व्यतिकरस्तु संघाते व्यसनव्यतिषंगयोः । अल्पग्राह्यकरे देशे नाशे क्षोभे विपर्यये ॥" इति निरुक्तिः ॥२८॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मुसललाङ्गलो त्यक्त्वेति । तस्य निरायुधत्वेन तन्न्याय्यत्वात् दोर्भ्यां तद्वत् समुष्टिभ्यामेव अभित आर्दयत् आडभाव आर्षः स द्विविदः ॥ २५ ॥ सटङ्क इति । तेन जलप्लावनं व्यञ्जितं "जङ्घायामद्रिभित्तौ च खनित्रे ग्रावदारुणे । कपित्थे चास्त्रियां टङ्कः" इति तु त्रिकाण्डशेषः ततश्च सावरण इत्यर्थः ॥ २६ ॥ साधु साध्विति शब्दश्चासीत् सुरादिषु इन्द्राणां श्रेष्ठानाम् एते च

---

१. ङ्गलौ–प्रा. पा. । २. सकण्टकवनस्पतिः–वीर. विज. । ३. पर्वतो नृप–विज. । ४. पारमहंस्यां संहितायां–प्रा. पा. । ५. न्धे द्विविदवधः सप्त–प्रा. पा. । ६. एकोननवतितमोऽध्यायः–विज. ।

शब्दाः सर्वेषां प्रत्येकमेवानन्दभक्तिविस्मयैर्जाताः भावभेदेन सुरेन्द्रादीनां यथासङ्ख्यमेव वा ॥ २७ ॥ जनैः स्वर्गस्थैर्भूमिष्ठैश्च भगवानिति सार्वज्ञ्यकारुण्यादिव्यञ्जनात् एवं द्रोण्यादिषु द्विविदरुद्धलोकमोचनादिकञ्च ज्ञेयम् । स्वशब्देन स्वजनसमागममहोत्सवश्च सूचितः ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यादवेन्द्र इति तद्वधेनैव यदूनामपि हितं स्यादिति भावः । अतः क्रुद्धः सन् मुषल-लांगले त्यक्त्वेति निरायुधेन सह निरायुधतयैव योद्धव्यमिति युद्धधर्म्मापेक्षया दोर्भ्यां तद्वत् समुष्टिभ्यामेवाभितोऽर्दयत्; स द्विविदः ॥ २५ ॥ वायुनेति दृष्टान्तेन मूलतोऽतिकम्पः सूचितः, हे कुरुशार्दूलेति भारतयुद्धेऽपि तादृशं न वृत्तमिति परमविस्मयात् ॥ २६ ॥ ततश्च यादवानां सर्व्वमनुष्याणां वा, प्रहर्षोऽभूदिति किं वक्तव्यम्, इन्द्रादीनामपि वृत्त इत्याह—जयेति । साध्विति शब्दश्च सुरादिषु इन्द्राणां श्रेष्ठानाम् ॥ २८ ॥ जनैः स्वजनैः सर्व्वलोकैर्वा, सम्यग् भक्त्या भगवत्प्रतिपादनादिना स्तूयमानः सन्; यद्वा, एवं सुरेन्द्रादितिः स्तूयमानो जनैः श्रीरेवत्यादिभिः सह स्वकीयं पुरम् आ सम्यक् मंगलगीतादिमहोत्सवपूर्व्वकमविशत्, भगवान् सर्व्वलोकोपकारक इत्यर्थः । अयं निहनने संस्तवे च हेतुः । एवं द्रोण्यादिषु द्विविदरुद्धलोकमोचनादिकञ्च ज्ञेयम् । स्वशब्देन तादृश-महादुष्टोपद्रववेषेणापि तस्याभिभवं सदामंगलत्वञ्च सूचयति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री-श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यादवेन्द्रो रामोपि मुसललाङ्गली त्यक्त्वा दोर्भ्यामेव तं कपिं जत्रौ कण्ठबाहुमूलेऽभ्यर्द्दयदताडयत् स कपिः रुधिरं वमन्नुद्गिरन् पपात च ॥ २५ ॥ चकम्प इति । पतता तेन द्विविदेन कण्ठादिसहितो गिरिश्चकम्पे चचाल हे कुरुशार्दूल ! यथा वायुना नौरम्भसि कम्पते तद्वत् ॥ २६ ॥ जयशब्द इति । कुसुमानि वर्षन्ते इति तथा तेषां सुरादीनां यथायोग्यं जयशब्दादिरासीत् ॥ २७ ॥ एवमिति । जगतो व्यतिकरं नाशमावहत्यापादयतीति तथाभूतं द्विविदमेवं निहत्य जनैः संस्तूयमानो भगवान् रामः स्वपुरं द्वारकां प्रविवेश ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सकण्टकाः वनस्पतयो यस्मिन् स तथा ॥ २६ ॥ जगतो व्यतिकरं नाशमावहति करोतीति जगद्व्यतिकरावहस्तम् ॥ २७-२८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां सप्तषष्टितमोऽध्यायः ॥ ६७ ॥
(श्रीविजयध्वजतीर्थरीत्या एकोननवतितमोऽध्यायः ॥ ८९ ॥)

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

त्यक्त्वा मुसललाङ्गलाविति तस्य निरायुधत्वे सति स्वस्यापि निरायुधत्वौचित्यात् जत्रौ कण्ठबाहुमूले ॥ २५ ॥ सटङ्कः भित्तिसहितः पर्वतः रैवतकः "जङ्घायामद्रिभित्तौ च खनित्रे ग्रावदारणे । कपित्थे चास्त्रियां टङ्कः" इति त्रिकाण्डशेषः ॥ २६-२८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । सप्तषष्टितमोऽध्यायः दशमेऽजनि सङ्गतः ॥ ६७ ॥

गूढार्थदीपिनी

दोर्भ्यां मुष्टीकृतबाहुभ्याम् । जत्रौ कण्ठबाहुमूले ॥ २५ ॥ सवनस्पतिः वृक्षसहितः । सटङ्कः निर्झरादिसहितः । 'टङ्कः सतायविवरे इति धरणिः ॥ २६ ॥ अम्बरे आकाशे ॥ २७ ॥ जगतो व्यतिकरं नाशम् आवहति प्रापयतीति तथा स्वपुरं द्वारकाम् ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सटङ्कः सजलविवरसहितः ॥ २६-२७ ॥ जगतो व्यतिकरं नाशमावहतीति तम् ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्तषष्टितमोऽध्यायार्थप्रकाशः ॥ ६७ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततः स्वयमपि, अशस्त्रेण सह सशस्त्रो न युध्येदिति, स्वयमपि त्यक्त्वा मुसललाङ्गले, दोर्भ्यां जत्रावभ्यर्दयत्, **तथा सामर्थ्ये धर्मज्ञाने च** लौकिकमेव साधनमित्याह **यादवेन्द्र** इति । यतः पूर्वमपि स **रामभक्त** इति तथा करणम् । **जत्रुः कण्ठाधः-स्थितर्मास्थ । तस्मिन्भग्ने म्रियत एवेति** । अतो रुधिरं वमन् पतितः ॥ २५ ॥ **तस्य पराक्रममुक्त्वा** देहस्यापि महत्त्वमाह **चकम्प** इति । **सटङ्कः प्रसिद्धः** पर्वतः वनस्पतिसहितः । सम्यक् परिज्ञानार्थमेतदुक्तम् । सर्वतश्चकम्पे । टङ्कशब्देन उपरितनो भागः बलभीसदृशः वप्रापरपर्यायः । **तत्सहितः** पर्वत एव भवति । **स पर्वत इति** पाठस्तु सुगमः । विश्वासार्थं सम्बोधनम् । अधिक-दोलनार्थं **दृष्टान्तः । तत्रत्यानां** भयोत्पादनार्थं वा । **तेन** तस्मिन् पतिते सर्वाः स्त्रियो राममालिङ्गितवत्य इति कामरसेन मध्ये **न विघ्नः, किन्तु तत्पोषक** एव जात इति फलति ॥ २६ ॥ भक्तत्वादलपत्वाच्च कदाचिदयुक्तो **भवेदिति** देवानां सम्मतिमाह **जयशब्द** इति । उत्कृष्टानां **जयशब्दः**, मध्यमानां नमःशब्दः, **शिष्टः** साधुशब्द इति त्रिविधानामपि सम्मतिरुक्ता । पूर्वं **जयशब्दः आशीरूपः, पश्चान्मारणार्थं** प्रार्थनारूपो नमःशब्दः, साधु साध्विति **मारणानन्तरम्** । दिवीत्यन्यथावचने ततः पात एव भवेदिति **सूचितम् । सुरसिद्धमुनीन्द्राणामिति** त्रिविधानामपि **तथात्वम् । कुसुमवर्षिणामिति** । कायिको **व्यापारः** । एवं सर्वात्मना **देवानामनुमोदनमुक्तम्** ॥ २७ ॥ भूमिष्ठानामप्याह **एवं निहत्य द्विविदमिति** । हनने हेतुर्जगतो **व्यतिकरं** नाशमावहतीति । अत **एव जनैः संस्तूयमानः** । एतावत्त्वोपपत्तिर्भगवानिति । **पूर्वं** तस्य प्रत्यापत्तिरनुक्तेति । **मध्ये भगवतः** कार्यं पतितम् । अग्रेऽपि **तथा पतिष्यतीत्याशङ्क्य तस्य** द्वारकाप्रवेश उच्यते **स्वपुरमाविशदिति** ॥ २८ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां **दशमस्कन्धविवरणे उत्तरार्धेऽष्टादशोऽध्यायः** ॥ १८ ॥

श्रीसुबोधिनी-सारः

टंकाः तोयविवराणि तैः सहितः सवनस्पतिः सवृक्षः पर्वतः पतता **तेन द्विविदेन** सह **चकंपे** कुरुशार्दूल अंभसि जले **वायुना नौरिव** ॥ २५ ॥ जयशब्दो नमःशब्दः साधुसाध्विति च पुष्पवर्षिणां सुरसिद्धमुनींद्राणामासीत् अंबरे आकाशे ॥ २६ ॥ **जगतो व्यतिकरं** दुःखमावहतीति तथा तं द्विविदमेवं **निहत्य** जनैः संस्तूयमानो **भगवान् स्वपुरमाविशत्** रामो द्वारकां **प्राविशत्** ॥ २७-२८ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायां सप्तषष्टितमोध्यायः ॥ ६७ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यादवेन्द्रो रामोपि मुशललाङ्गले त्यक्त्वा दोर्भ्यामेव तं **कपिं जत्रौ** कण्ठबाहुमूले अमर्दयत् अताडयत् । स **कपी** रुधिरं वमन् उद्गिरन्नपतत् ॥ २५ ॥ हे 'कुरुशार्दूल' इति सम्बोधनं विश्वासार्थम् । **पतता तेन द्विविदेन हेतुना** टण्काः सतोयविवराणि **तत्सहितः पर्वतो** रैवताख्यश्चकम्पे । तत्र दृष्टान्तमाह—यथा वायुना अम्भसि स्थिता नौः कम्पते **तद्वदिति** ॥ २६ ॥ तदा च **बलस्योपरि कुसुमानि वर्षन्त इति तथा तेषां** सुरादीनां यथायोग्यं अम्बरे आकाशे जयशब्दादिरासीत् ॥ २७ ॥ एवं द्विविदं हि **निहत्य तेन** हेतुना जनैः संस्तूयमानो भगवान् बलः स्वपुरं द्वारकामाविशत् आजगाम । जयशब्दादिभिर्देवादीनां तद्धननेन **महानन्दो** जात इति सूचितम् । तत्र हेतुं सूचयन् विशिनष्टि—**जगतो व्यतिकरं** नाशमावहतीति तथा **तमिति** ॥ २८ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र सात्त्विकानां निरोधने । सप्तषष्टितमो यातः कपिनाशनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

यादवेदि ॥ यादवेन्द्रो रामोऽपि द्विविदं निरायुधं दृष्ट्वा स्वयमपि मुसललाङ्गले त्यक्त्वा दोर्भ्यामेव तं कपिं जत्रौ **कण्ठबाहुमूले अभ्यार्दयत् अताडयत्** । आडभाववान्पाठ आर्षः । स कपी रुधिरं वमन् उद्गिरन्नपतत् ॥ २५ ॥ चकम्प इति ॥ हे **कुरुशार्दूल** ! पतता तेन द्विविदेन हेतुना **टङ्काः** सतोयविवराणि इति स्वामिपादाः । यद्वा । **टङ्काः** रैवतस्य भित्तयः "जंघाया-मद्रिभित्तौ च खनित्रे ग्रावदारणे ॥ कपित्थे चास्त्रियां टङ्क" इति त्रिकाण्डशेषः । तत्सहितः सवनस्पतिः वृक्षैर्युतः पर्वतोः रैव-ताख्यश्चकम्पे यथा वायुनाऽम्भसि स्थिता नौः कम्पते तद्वदिति ॥ २६ ॥ जयेति ॥ बलस्योपरि कुसुमानि वर्षन्ति इति तथा **तेषां सुरादीनां यथायोग्यम्** अम्बरे आकाशे जयशब्दो नमःशब्दः साधु साध्विति च शब्दः आसीत् ॥ २७ ॥ एवमिति ॥ जगतो

व्यतिकरं नाशमावहतीति तथा तं द्विविदं निहत्य तेन हेतुना जनैः संस्तूयमानो भगवान् बलः स्वपुरं द्वारकामाविशत् आजगाम ॥ २८ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमे षड्युक्षष्टितमे व्यधात् ॥

इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायां सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तेन द्विविदेन टंकाः सजलाः पाषाणमयाजलाधिकरणभूताः प्रदेशास्तैः सहितः ॥ २५–२६ ॥ जगतो व्यतिकरं नाशमावहतीति तथाभूतं ॥ २७ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने द्विविदवधो नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चकम्प इति । पतता तेन द्विविदेन कृत्वा, सटङ्कः टङ्काः सतोयविवराणि तत्सहितः, सवनस्पतिर्वृक्षसहितः, पर्वतः, हे कुरुशार्द्दूल, अम्भसि वायुना, नौः इव, चकम्पे ॥ २५ ॥ जयशब्द इति । अम्बरे आकाशे, कुसुमानि वर्षन्त इति तेषां, सुरा देवाश्च सिद्धाश्च मुनीन्द्राश्च तेषां, जयशब्दः नमःशब्दः, साधु साध्विति शब्दश्च, आसीत् ॥ २६ ॥ एवमिति । जगतो व्यतिकरं नाशमावहत्यापादयतीति तथाभूतं, द्विविदं एवं निहत्य, जनैः संस्तूयमानः, भगवान् रामः, स्वपुरं, आविशत् ॥ २७ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

कृष्णप्रिया

पुनः यादवशिरोमणि श्री बलभद्रजी ने हल और मूसल अलग रख लिये और क्रोधाविष्ट होकर अपने दोनों हस्तों से उसके जत्रुस्थान पर प्रहार किया। परिणाम में वानर खून उगलता धरती पर गिर पड़ा ॥ २५ ॥ महाराज परीक्षित ! आँधी आनेपर जैसे नाव डगमगाने लगती है वैसे ही उसके गिरने पर बड़े-बड़े तरुवर और शिखरों के साथ गिरिवर हिल उठा ॥२६॥ देवलोक में देवतागण जय हो-जय हो, सिद्धलोक नमो नमः और समर्थ ऋषि मुनिवृन्द साधु-साधु के नारे लगाने लगे और श्री बलरामजी भैयाजू पर पुष्पों की वृष्टि करने लगे ॥ २७ ॥ राजन् परीक्षित ! इस द्विविद वानर ने विश्व में असाधारण उपद्रव मचा रखा था इसलिए भगवान् बलभद्रजी ने उस वानर को इस प्रकार मार दिया। पुनः श्रीबलरामजी द्वारावती नगरी में पधारे। उस अवसर पर सारे पुरजन-स्वजन एवं परिचरजन श्री बलरामजी की स्तुति करने लगे ॥ २८ ॥

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां द्विविदवधो नाम सप्तषष्टितमाध्यायस्य भाषान्तरं समाप्तम् ॥ ६७ ॥

◆

[1]अथाष्टषष्टितमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
५४	५०	३	१	३	१७९६	१८	५३	१८६७	५८।	३

श्रीशुक उवाच

दुर्योधनसुतां राजन् लक्ष्मणां समितिंजयः । स्वयंवरस्थामहरत् साम्बो जाम्बवतीसुतः ॥ १ ॥
[2]कौरवाः कुपिता [3]ऊचुर्दुर्विनीतोऽयमर्भकः । कदर्थीकृत्य नः कन्यामकामामहरद् बलात् ॥ २ ॥
बध्नीतेमं दुर्विनीतं किं करिष्यन्ति वृष्णयः । [4]येऽस्मत्प्रसादोपचितां दत्तां नो भुञ्जते महीम् ॥ ३ ॥
निगृहीतं सुतं श्रुत्वा यद्येष्यन्तीह वृष्णयः । भग्नदर्पाः शमं यान्ति [5]प्राणा इव सुसंयताः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—राजन् ! समिति जयः, जाम्बवतीसुतः, साम्बः, स्वयंवरस्थाम्, दुर्योधनसुताम्, लक्ष्मणाम्, अहरत् ॥ १ ॥ कुपिताः, कौरवाः, उचुः, अयम्, अर्भकः, दुर्विनीतः, नः, कदर्थीकृत्य, कन्याम्, बलात्, अहरत् ॥ २ ॥ इमम्, दुर्विनीतम्, बन्धीत, वृष्णयः, किम्, करिष्यन्ति, ये, अस्मत् प्रसादोपचिताम्, नः दत्ताम्, महीम्, भुञ्जते ॥ ३ ॥ सुतम्, निगृहीतम्, श्रुत्वा, वृष्णयः, यदि, इह, एष्यन्ति, भग्नदर्पाः, सुसंयताः, प्राणा, इव, शमम्, यान्ति ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अष्टषष्टितमे सांबे निरुद्धे कौरवैर्युधि । तद्विमोक्षाय रामेण गजाह्वयविकर्षणम् ॥ १ ॥

रामचरित्रांतरं निरूपयितुमाह । दुर्योधनसुतामिति । समितिंजयः संग्रामजित् ॥ १–२ ॥ नोऽस्माकं महीमस्माभिर्दत्ताम् । न ते भूपतय इति भावः ॥ ३ ॥ यांति यास्यंति । प्राणा इंद्रियाणीव । सुसंपताः प्राणायामादिभिर्दमिताः ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तद्विमोक्षाय सांबवियोक्षाय (१) । "हृतो यदैव प्रद्युम्नः शंबरेणात्मघातिना । मासेऽस्मिन्नेव सांबस्तु जांबवत्यामजायत ॥" इति हरिवंशोक्त्या प्रद्युम्नसवयस्कत्वात्तस्योद्वाहः पूर्वमेव वृत्तोप्यत्र संकर्षणमाहात्म्यप्रसंगादाह—दुर्योधनेति । जांबवतीसुत इति तस्या सौभाग्याधिक्यसूचनेन तस्मिन्पितृस्नेहाधिक्यं दर्शितम् । अतिस्नेहेनान्वया सह वर्तत इति सांब इत्यन्वर्थताज्ञापनार्थं यत्र तत्र जांबवतीसुत इति विशेषणं दीयते । समितिं संग्रामं सभां च जयतीति समितिंजयः । बलेन शास्त्रेण चोभयजयी । "समितिः संपराये स्यात् । सभायां संगमेऽपि च" इति मेदिनी ॥ १ ॥ अकामामजातकामविकाराम् । यद्वा—तद्वरेच्छारहिताम् ॥ २ ॥ इमं सांबम् । दुर्विनीतम शिक्षितम् । ये वृष्णयः । इति भाव इति—यदुशप्तत्वात्तेषां राज्याधिकार एव नास्तीत्याशयः । बध्नीतेति हननिषेधो द्योत्यते । तत्स्पृष्टायाः कन्याया वरान्तरायोग्यत्वेन जामातृत्वावश्यकत्वात्, श्रीभीष्मविदुरादीनां संमतेश्च । अत एवाग्रे जिघृक्षव इति । बंधने हेतुः—दुर्विनीतमिति । अन्यथास्माकं पराभव एव जनैर्दृश्यत इति भावः ॥ ३ ॥ निगृहीतं बद्धम् । इह हास्तिनपुरे । शमं यांति-अस्मद्वश्या भवन्तीति भावः । दुर्वश्यानामपि वश्यत्वे दृष्टांतः—प्राणा इति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

"हृतो यदैव प्रद्युम्नः शम्बरेणात्मघातिनाः । मासेऽस्मिन्नेव साम्बस्तु जाम्बवत्यात्मजायत" ॥

इति श्रीहरिवंशोक्त्या प्रायः प्रद्युम्नसमवयस्कत्वाच्छ्रीसाम्बस्य पूर्ववृत्तमपि विवाहं श्रीबलदेवविक्रमप्रसङ्गादत्राह—दुर्य्योधनेत्यादिना । पूर्वं टीकायां प्रद्युम्नजन्मजाम्बवत्यादिविवाहयोर्व्यतिक्रमेण स्वीकारस्त्वत्र यथाक्रमश्रवणापेक्षयेति ज्ञेयम् । जाम्बवत्याः सुत इति तस्याः सौभाग्याधिक्यसूचनेन तस्मिन् पितृस्नेहाधिक्यं दर्शितम् अत एव तस्यास्तत्समसुन्दरपुत्रप्रार्थनया श्रीभगवता स्वभक्तवरशिवस्य माहात्म्यं तन्वता तमाराध्य स प्राप्त इति दानधर्मे अत एव स्नेहेनान्वया सदा वर्त्तत इति साम्बः

---

१. नवतितमोध्यायः–विज. । २. कुरवः–विज. । ३. प्रोचु–प्रा. पा. । ४. प्रतापोप–वीर. । ५. शीर्णदन्ता इवाहयः–विज. ।

अत एव यत्र तत्र तद्विशेषणत्वं तस्य श्रूयते एवं सति जाम्बवतीसुतस्यास्य नाम्नि दन्त्यएवोष्मा नतु तालव्य इत्यायातम् ॥१॥ कौरवाः दुर्य्योधनादयः अर्भकोपि विनयरहितः सगर्व इत्यर्थः। यद्वा अर्भकोऽयं पित्रादिभिरशिक्षित इति तानप्यधिक्षिपन्ति यतः कदर्थीकृत्य खेदयित्वा तत्रापि अकामां तद्वरणेच्छारहिताम् ॥ २ ॥ बध्नीतेति हननिषेधो द्योत्यते स चाधुना तत्स्पृष्टायाः कन्यायाः वरान्तरायोग्यत्वेन जामातृत्वावश्यकत्वात् श्रीभीष्मविदुरादीनां तथा सम्मतेश्च अत एवाग्रे जिघृक्षव इति बन्धने हेतुः दुर्विनीतमिति अन्यथाऽस्माकं पराभव एव जनैर्दृश्यत इति भावः ॥ ३ ॥ शमं यान्ति अस्माकं वश्या भविष्यन्तीत्यर्थः। दुर्वशोनामपि वश्यत्वे दृष्टान्तः प्राणा इति ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

'हृतो यदैव प्रद्युम्नः शम्वरेणात्मघातिना। मासेऽस्मिन्नेव साम्बस्तु जाम्बवत्यामजायत ॥' इति (विष्णु० प० ११०।१) श्रीहरिवंशोक्त्या प्रायः श्रीप्रद्युम्नसमवयस्त्वाच्छ्रीसाम्बस्य पूर्ववृत्तमपि विवाहं श्रीबलदेवविक्रमप्रसंगादत्राह—दुर्योधनेत्यादिना। समितिञ्जयो महावीर इत्यर्थः। अतोऽहरत्, यद्वा, समितिं जय इति स्वयम्बरे समागतान् तान् सर्वान् राज्ञो युद्धे जित्वेति भावः। हे राजन्निति क्षत्रियस्यायं धर्म्म एवेति भावः। यद्वा, निजशौर्य्यादिना राजमानः सन्, यतो जाम्बवत्याः सुत इति तस्याः प्रेमप्रार्थनया श्रीभगवता प्रियतमस्य श्रीशिवस्य माहात्म्यं तत्वता बहुलतपस्यया तमाराध्य श्रीसाम्बस्य प्राप्त्या श्रीप्रद्युम्नसमसौन्दर्य्यादिकं दानधर्म्मोक्तानुसारेण सूचितम्। अत एव महास्नेहेन अम्बया सदैव वर्त्तत इति साम्ब-नामेति ज्ञेयम् ॥ १ ॥ कौरवा दुर्य्योधनाद्याः, दुर्व्विनीतोऽशिक्षितः, यतोऽर्भकः, किंवा अर्भकोऽपि विनयरहितः सगर्व्व इत्यर्थः। ननु बलाद्धरणं क्षत्रियस्य युक्तमेव ? तत्राहुः—अकामां तद्वरणेच्छारहिताम् ॥ २ ॥ बध्नीतेति, न घ्नतेत्युक्तिः, श्रीभगवत्पुत्रत्वात् जामातृत्वाच्च, अत एवाग्रे च जिघृक्षव इति। बन्धने हेतुः—दुर्विनीतमिति, शिक्षार्थमेवेति भावः। अत एवास्य पुनरुक्तिः, न तु स्वयमुपार्ज्जिताम्, यतोऽस्माभिरेव दत्ताम्, अतो दत्तापहारदोषशंकयापरावैऽप्यनाच्छिद्यमानामिति भावः। यतो नोऽस्मदीयामेव, न तु तेषामराजत्वादिति। तेषां स्वतः सामर्थ्यं निरस्तम्। भुञ्जत इति तथापि भोगमात्रमेव, न तु तेषां तत्स्वामित्वमिति भावः ॥ ३ ॥ ननु तथापि पुत्रस्नेहेन ते त्ववश्यमुद्यमं कुर्य्युरेव, तत्राहुः—निगृहीतमिति। सुतमिति महास्नेहपात्रतोक्ता; वृष्णयः श्रीकृष्णाद्याः, रामं यान्ति, अस्माकं वश्या भविष्यन्तीत्यर्थः। दुर्वशानामपि वश्यत्वे दृष्टान्तः-प्राणा इति ॥४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

रामस्यैव चेष्टितान्तरमनुवर्णयितुमुपोद्घातमाहाष्टषष्टितमेन दुर्योधनसुतामित्यादिना। समितौ सङ्ग्रामे जयतीति तथा समितिश्शत्रुस्तं जयतीति वा स जाम्बवत्याः सुतः साम्बो लक्ष्मणां नाम दुर्योधनस्य सुतां स्वयम्वरस्थां हृतवान् ॥ १ ॥ कौरवा इति। उक्तिमेवाह—दुर्विनीत इत्यादिना सुसंयता इत्यन्तेन। नोऽस्मान् कदर्थीकृत्य तुच्छीकृत्य बलादकामयमानामपि कन्यामहरत् ॥ २ ॥ अत एव दुर्विनीतं मूर्खं बध्नीत बन्धयत वृष्णयः किं करिष्यन्ति न किमपीत्यर्थः। तत्र हेतुः, य इति. ये वृष्णयः अस्माकं प्रतापेन पराक्रमेण उपचितामेधितां समृद्धामिति यावत् नोऽस्माभिर्दत्ताञ्च महीं भुञ्जते अनुभवन्ति ते न भूमिपतयो बभूवुरिति भावः ॥ ३ ॥ निगृहीतमिति। निगृहीतं बद्धं सुतं श्रुत्वा यदि वृष्णयः आगमिष्यन्ति तर्हि भग्नो दर्पो येषां ते तथाभूताः शमं शान्ति यास्यन्ति सुसंयताः प्राणायामादिभिः दारिताः प्राणा इन्द्रियाणीव ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

समितिशब्देन सङ्गरसभे गृह्येते उभे अपि शत्रेण वाचा जयतीति समितिञ्जयः खश्प्रत्ययो मुमागमोऽनुस्वारः समितिः संगरसभयोरित्यभिधानम् ॥ १ ॥ अकामां कुमारिकामविधुरान् ॥ २ ॥ अस्मत्प्रसादेनोपचिताः सम्वर्धिताः अत एव नो महीं भुञ्जते दत्तामस्माभिरिति शेषः ॥ ३ ॥ निगृहीतं बद्धं शोर्णदन्ताः भग्नदन्ताः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अष्टषष्टितमे साम्बे निरुद्धे कुरुभिर्हली। दुरुक्त्या कोपितश्चक्रे गजाह्वयविकर्षणम् ॥

समितिञ्जयः सङ्ग्रामजित् ॥ १-२ ॥ नोऽस्माकं महीमस्माभिर्दत्तां न ते भूपतयः इति भावः ॥ ३ ॥ यान्ति यास्यन्ति प्राणा इन्द्रियाणीव ॥ ४ ॥

गूढार्थदीपिनी

अष्टषष्टितमे साम्बो लक्ष्मणामाहरन् युधि। बद्धस्तैरस्य मोक्षार्थं रामोऽकर्षद् गजाह्वयम् ॥ १ ॥

समितिः संग्रामं सभां वा जयतीति समितिञ्जयः ॥ १ ॥ कदर्थीकृत्य अकामां तद्वरेच्छारहिताम् ॥ २ ॥ उपचित्तां समृद्धाम्। नोऽस्माभिः ॥ ३ ॥ वशे यान्ति यास्यन्ति। सुसंयताः दमिताः प्राणा इन्द्रियाणीव ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अथाष्टषष्टितमे रामचरितान्तरं वर्णयितुं प्रथममुपोद्घातमाह—दुर्योधनसुतामित्यादिना। समितौ सङ्ग्रामे जयतीति तथा॥ १-२॥ ये अस्माकं प्रसादेन पराक्रमेणोपचितां समृद्धां नोऽस्माभिर्दत्तां महीं भुञ्जते न स्वतो महीपतय इति भावः॥३॥ यान्ति यास्यन्ति प्राणा ईन्द्रियाणि॥ ४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अत्यलौकिकमाश्चर्यंचरित्रमधुनोच्यते । एकोनविंशे रामस्य सर्वलोकातिशायिनः॥ १॥
एवं रामस्य कृष्णस्य त्रितयं त्रितयं द्वयोः। चरित्रमीरितं च स्यात् षड्गुणानां विभागकृत्॥ २॥
धर्मः सिद्धो भगवति कामः सिद्धस्तथापरेः। अद्वितीयहरित्वं तु कृष्णे सिद्धं फलत्वतः॥ ३॥
जगद्दोषनिवृत्तिस्तु रामे सिद्धा हि साधने। अलौकिकं साधनस्थं रामे कृष्णे फलं तथा॥ ४॥
अत्रावान्तरभेदानां धर्मिणः पृथगीरिताः। विभागज्ञापनार्थाय यथैवं विनिरूप्यते॥ ५॥
यमुनायां पर्वते च कृतं पूर्वं निरूपितम्। गङ्गायामपि यत्कार्यं तदत्र स्फुटमुच्यते॥ ६॥
लक्ष्मणोद्वहने बद्धः साम्बो रामेण मोचितः। निगृहीता बिपक्षाश्च तदत्र विनिरूप्यते॥ ७॥

पूर्वाध्याये दुष्टनिवारणलक्षणं चरित्रमुक्त्वा शिष्टशिक्षणरूपं चरित्रमाह। तत्र साम्बाहृतलक्ष्मणा प्रसङ्गभूता निरूप्यते दुर्योधनसुतमिति राजनिति राजकन्यायाः स्वयंवर एव धर्म इति ज्ञापयति। लक्षणैर्विशिष्टेति लक्ष्मणा। सर्वत्र भगवदीयाः स्वयंवरे गच्छन्ति, तत्र सकामामकामां वा बलं विचार्याविचार्य वा हरन्ति। तथायमपि अविचार्यैव स्वयंवरस्थाने तूष्णीं स्थितामहरत्। समितिंजय इति तस्य धाष्टर्ये हेतुः। जाम्बवतीसुत इत्यविचारे॥ १॥ एवं हरणे निमित्ते जाते कौरवाणां भगवन्मार्गोल्लङ्घनजातं अपराधं निरूपयति **कौरवा कुपिता** ऊचुरिति त्रिभिः। पाण्डवा अपि कौरवाः, तथापि ते न तत्र तिष्ठन्ति। यद्यपि भीष्मादयः भगवद्भक्ताः, तथापि मर्यादास्थिता इति शास्त्रव्यतिरेकेण भगवदीयानपि न मन्यन्ते। वरणानन्तरमेव कन्या तदीया भवतीति बलाद्धरणं सम्भाव्य कुपिता जाताः। कौरवा महान्तः कुलकर्मभ्यां श्रेष्ठाः। ऊचुः स्वगोष्ठ्यामेव। **दुर्विनीतोऽयमर्भक** इति। महतो बालकस्य विनयोऽपेक्ष्यते, तदत्र नास्तीति बन्धनेऽपि न दोष इति। अथवा। कैश्चिदुक्तं **दुर्विनीतोऽयमिति**, **कैश्चिदर्भक** इति। दोषाभावार्थमनेन हृतापि न दुष्यतीत्यपि सूचितम्। नहि बालकस्पृष्टा दुष्यति। ननु को दोषः, कुतो निवार्यत इति चेत्, तत्र दोषमाह **कदर्थीकृत्येति**। अस्मान् तिरस्कृत्य, क्षत्रियाणां मानं हृत्वा, नोऽस्माकं कन्या कुलीनानाम्। अनेन ऋक्षनप्ता न कुलीन इति सूचितम्। किञ्च। कन्याप्यकामा। वरणं दूरे, इच्छापि तस्या नास्ति। नन्ववश्यं केनचिज्ज्ञेया, देयैव च कन्या, तत्राह **बलादिति**। क्षत्रियामासेभ्य एव बलिष्ठैर्नीयते बलात्॥ २॥ तर्ह्येवं सति किं कर्तव्यम्, तत्राहुः **बध्नीतेमं दुर्विनीतमिति**। दुर्विनय एव बन्धने हेतुः। नन्वेवं कृते यादवाः क्रोधं करिष्यन्तीति चेत्, तत्राहुः **किं करिष्यन्ति वृष्णय** इति। कथं न करिष्यन्तीत्याशङ्कायामाहुः **येऽस्मत्प्रसादोपचिता**मिति। उपजीव्यत्वात् अस्मासु क्रोधं न करिष्यन्ति। स्वयमागत्य युद्धादिकरणसम्भावनैव नास्तीत्याहुः **येऽस्मत्प्रसादोपचिताम्**। जीवनपर्याप्ता तु सेवायामपि प्राप्यते। कृष्यादिना च। अतः पुष्टा प्राप्तव्या। सा यादवानां स्वाभाविकी न भवतीति परकीया ग्राह्या। तत्र परस्य दुर्बलत्वेऽपि न्यायसिद्धत्वात् बलिष्ठैः सेवया रक्ष्यते। तत्र पक्षपाते भूमिस्तस्य गच्छति। तथा यादवानामस्मत्प्रसादोपचिता भूमिर्भवति। किञ्च। मण्डलेश्वरराज्ञा तत्तद्भूमिस्तेभ्यस्तेभ्यो दीयते, यदाभिषिक्तो भवति। अतो वयं पूरुवंशोद्भवत्वात् राजानः। अतः सामान्यविशेषप्रकारेण अस्मद्दत्तामेवं भूमिं भुञ्जते॥ ३॥ ननु पुत्रे धृते भूम्यपेक्षामपि त्यक्ष्यन्तीति चेत्, तत्राहुः **निगृहीतं सुतं श्रुत्वेति**। भग्नो दर्पो यैरिति स्तुतिः। येषामिति निन्दा। यदीति श्रुत्वापि नायास्यन्त्येव, यथा कृपयास्माभिर्भूमिर्दीयते। तत्र पुत्रमपि प्रेषयिष्यन्तीति विश्वासात्, तदा प्रेषयिष्याम इति हृदयम्। अथ यदि अस्मास्वविश्वासं कृत्वा, स्वस्य वा बलोत्कर्षं मत्वा, आयास्यन्ति, तत्रापीह विषमदुर्गे, तदा पूर्वसिद्धोऽपि दर्पः अत्रोपक्षीणो भविष्यतीति शमं शान्तिमेव यान्ति। ते नूनमुपजीवका इति न निराकार्याः, किन्तु बहुकालं निरुद्धाः सन्तः गतदर्पाः प्रार्थनया गृहं गमिष्यन्तीति भावः। वशे वा स्थास्यन्ति। तत्र दृष्टान्तमाह **प्राणा इवेति**। यद्यप्यन्येषां प्राणाः स्वतन्त्रा भवन्ति, तथापि योगिनः संयता एवेति स्वात्मानं योगिस्थानीयं मन्यन्ते॥ ४॥

श्रीसुबोधिनी—सारः

शुकउवाच। हे राजन् दुर्योधनस्य सुतां पुत्रीं लक्ष्मणां स्वयंवरे तिष्ठतीति तथा तां समितिं संग्रामं जयतीति खश् प्रत्ययः जांबवत्याः सुतः सांबोऽहरत्॥ १॥ कुपिताः कौरवाः कुरुवंशीया इत्यूचुः अयमर्भको बालको दुर्विनीतो धृष्टः नोऽस्मान् कदर्थीकृत्यावज्ञायाऽकामामनिच्छतीं कन्यां बलादहरत्॥ २॥ अत एवं कार्यं दुर्विनीतमिमं यूयं बध्नीत न चैवं तत्कुलकोपाद्भयशंकेति वाच्यं वृष्णयः किंकरिष्यंति अस्मदधीनत्वात्तेषामित्याहुः अस्माकं प्रसादोऽनुग्रहस्तेनोपचितां समृद्धां नोऽस्माभिर्दत्तां

महीं भूमिं भुंजते ।। ३ ।। संमंत्र्योचुः निगृहीतं बद्धं सुतं पुत्रं श्रुत्वा यदि वृष्णय एष्यंति आगमिष्यंति इहात्र र्तिह भग्नो दर्पो गर्वो येषां ते शमं यांति निवृत्तिं गमिष्यंति सुसंयताः प्राणायामादिभिः संनिरुद्धाः प्राणा इन्दियाणीव ।। ४ ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अष्टषष्टितमेऽध्याये हस्तिनापुरकर्षणम् । बलभद्रेण साम्बस्य विवाहश्च निरूप्यते ।। १ ।।

रामस्यैव चरितान्तरमनुवर्णयितुं तदुपोद्घातमाह—दुर्योधनेति । हे राजन् ! समितिः शत्रुस्तं जयतीति तथाभूतो जाम्बवतीसुतः साम्बो नाम स्वयंवरस्थां दुर्योधनसुतां लक्ष्मणां जहारेत्यन्वयः ।। १ ।। तदा च कौरवा भीष्मादयः कुपिताः सन्तः परस्परमूचुः । तदुक्तिमेवाह—अयमर्भकः साम्बः दुर्विनीतः । तस्य दुर्विनयमेवाहुः—यो नोऽस्मान् कदर्थीकृत्य तुच्छान् मत्वा अकामां अनिच्छन्तीमेवास्माकं कन्यां बलादहरत् ।। २ ।। अत एनं बध्नीत, दुर्विनीतत्वात् । 'एवं कृते वृष्णयः क्रोधं करिष्यन्ति' इत्याशङ्क्याहुः—वृष्णयो यादवा उग्रसेनादयः किं करिष्यन्ति ? कुपिता अपि ते नास्माकं किमपि कर्तुं समर्था इत्यर्थः । तत्र हेतुमाहुः—ये यादवाः अस्माकं प्रसादेन पराक्रमेणोपचितां समृद्धां नोऽस्माभिर्दत्तां महीं भुञ्जते । अतो न ते भूमिपतय इत्याशयः ।।३।। यदि कदाचित् सुतं निगृहीतं बद्धं श्रुत्वा वृष्णयः युद्धार्थमिह एष्यन्ति आगमिष्यन्ति र्तिह भग्नो दर्पो गर्वो येषां ते तथाभूताः शमं शान्ति यास्यन्ति । तत्र दृष्टान्तमाह—सुसंयताः प्राणायामादिभिर्दमिताः प्राणा इन्द्रियाणीव ।। ४ ।।

अन्वितार्थप्रकाशिका

अष्टषष्टितमे साम्बे निरुद्धे कुरुभिर्बलः ।। गजाह्वयं चकर्षात्र श्लोका जलधिमार्गणाः (५४) ।।
त्रीण्यु (३) वाचेत्यङ्घ्रियुक्ताः षट्पञ्चाशदनुष्टुभः (५६।) ।। ६८ ।।

हृतो यदैव प्रद्युम्नः शम्बरेणात्मघातिना । मासेऽस्मिन्नेव साम्बस्तु जाम्बवत्यामजायत ।।" इति हरिवंशोक्त्या प्रद्युम्नसवयस्त्वात्साम्बविवाहः पूर्ववृत्तोऽपि रामविक्रमप्रसङ्गादत्रोक्तः । स्वामिपादैस्तु यथाश्रुतक्रममनुसृत्य प्रद्युम्नजन्मोत्तरं जाम्बवतीविवाह इति प्रागुक्तम् । दुर्योधनेति ।। हे राजन् ! समितिजयः संग्रामजित् जाम्बवतीसुतः साम्बो नाम स्वयंवरस्थां दुर्योधनसुतां लक्ष्मणां जहार ।। १ ।। कौरवा इति ।। कौरवाः भीष्मादयः कुपिताः सन्तः परस्परमूचुः । यो नोऽस्मान् कदर्थीकृत्य तुच्छान् मत्वा अकामां साम्बवरणमनिच्छन्तीमेवास्माकं कन्यां बलादहरत् । अतोऽयमर्भकः साम्बः दुर्विनीतः ।।२।। बध्नीतेति ।। इमं दुर्विनीतं बध्नीत । वृष्णयो यादवाः किं करिष्यन्ति । ये यादवाः अस्माकं प्रसादेन पराक्रमेणोपचितां समृद्धां नोऽस्माभिर्दत्तां महीं भुञ्जते । न ते स्वयं भूपतय इति भावः ।। ३ ।। निगृहीतमिति ।। यदि कदाचित् सुतं निगृहीतं बद्धं श्रुत्वा वृष्णयः युद्धार्थमिह एष्यन्ति र्तिह भग्नो दर्पो गर्वो येषां ते तथाभूताः सुसंयताः प्राणायामाभिर्दमिताः प्राणा इन्द्रियाणीव शमं यान्ति यास्यन्ति ।। ४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अष्टषष्टितमेऽध्याये चरित्रमेतदुच्यते सांबोहरिशिशुश्चित्रं निरुद्धो वीरहस्तिभिः । मोचितो हलहस्तेन हस्तिनापुरकर्षणात् । सांबप्रद्युम्नयोः समकालजनितत्वात् सांबविवाहं प्रद्युम्नविवाहसमकालिकमपि बलरामविक्रमप्रसंगादत्राह । तथा हि हृतोयदेवप्रद्युम्नः शंबरेणात्मघातिना । मासेस्मिन्नेव सांबस्तु जांबवत्यामजायतेति हरिवंशप्रसिद्धेः दुर्योधनेति । समितिजयः । संग्रामजित् ।। १ ।। कौरवाः दुर्योधनादयः ।। २ ।। दुर्विनीतं पित्रादिभिरशिक्षितं नोऽस्माकं महीं अस्मत्प्रसादेनोपचितां वृद्धिं प्राप्तां अस्माभिर्दत्तां भुंजते । न ते भूमिपा इति भावः ।। ३ ।। सुसंयताः प्राणायामादिभिः वशीकृताः प्राणा इंद्रियाणीव । शमं शांतिं यांति यास्यंति ।। ४ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कौरवैर्युधि संरुद्धे साम्बे तन्मोक्षहेतवे । अष्टषष्टितमे रामो व्यकर्षद्गजसाह्वयम् ।। १ ।।

रामस्यैव चरित्रान्तरं निरूपयितुमुपोद्घातमाह ।। दुर्योधनसुतामिति ।। हे राजन्, जाम्बवतीसुतः, समितिंजयः, साम्बः, स्वयंवरस्थां लक्ष्मणां लक्ष्मणासंज्ञां, दुर्योधनसुतां अहरत् ।। १ ।। कौरवा इति ।। तदा कुपिताः कौरवाः, बक्ष्यमाणप्रकारेणेति शेषः । ऊचुः । दुर्विनीतः विनयवर्जितः, अयं अर्भकः, नोऽस्मान्, कदर्थीकृत्य तुच्छीकृत्य, अकामामकामयमानामपि, कन्यां बलात्, अहरत् ।। २ ।। बध्नीतेति ।। अतः, दुर्विनीतं मूर्खं, इममेनं, बध्नीत बन्धयत । ननु वृष्णिकुमारोऽयं कथं बन्धनीय इत्यत्राहुः । ये वृष्णयः, अस्माकं यः प्रसादः पराक्रमस्तेनोपचिता समृद्धा तां, नोऽस्माभिः दत्तां च, महीं पृथिवीं, भुञ्जते अनुभवन्ति । अस्मद्दत्तभूमिं प्राप्य भूमिपतयो बभूवुरित्यर्थः । ते वृष्णयः, किं करिष्यन्ति । न किमपि कर्त्तुं समर्था इत्यर्थः ।। ३ ।। निगृहीतमिति ।। वृष्णयः, सुतं निगृहीतं श्रुत्वा, यदि इह एष्यन्ति, तदा, सुसंयताः प्राणायामादिभिर्दमिताः, प्राणाः इन्द्रियाणि इव, भग्नदर्पाः विनष्टाजेयतादर्पाः सन्तः, शमं यान्ति यास्यन्तीत्यर्थः ।। ४ ।।

कृष्णप्रिया

श्रीशुकाचार्यजी महाराज ने कहा राजत् ! महान् समरविजयी श्री जाम्बवतीकुमार श्री साम्बजी स्वयंवर में स्थित दुर्योधन राजकुमारी श्री लक्ष्मणाजी को हर लाये ॥ १ ॥ साम्ब के इस कार्य से सर्व कौरवों को क्रोध आया और वे कहने लगे कि यह बालक अत्यंत धृष्ट है इस बालक ने हमको नीचा दिखाया और बलपूर्वक हमारी पुत्री का अपहरण कर लिया ॥२॥ इसलिए इस धृष्ट को पकड़कर बाँध लेना चाहिए। यदि यादवलोग हमपर रूठ जायेंगे तो हमारा क्या बिगाड़ लेंगे ? वे लोग हमारी ही दी हुई धन-धान्य परिपूर्ण पृथ्वी का उपभोग करते हैं ॥ ३ ॥ यदि वे लोग अपने पुत्र साम्ब का बंदी होने का समाचार सुनकर यहाँ आयेंगे तो हमलोग उनका सारा अभिमान चूर्ण कर देंगे और उन लोगों के मिजाज वैसे ही शीतल हो जायेंगे। जैसे किसी संयमी पुरुष के द्वारा प्राणायाम प्रत्याहार आदि साधनों से वश की गई हुई इन्द्रियाँ ॥ ४ ॥

[1]इति कर्णः शलो भूरिर्यज्ञकेतुः सुयोधनः । साम्बमारेभिरे बद्धुं कुरुवृद्धानुमोदिताः[2] ॥ ५ ॥
दृष्ट्वानुधावतः साम्बो धार्तराष्टान् महारथः । प्रगृह्य रुचिरं चापं तस्थौ सिंह इवैकलः ॥ ६ ॥
[3]तं तं जिघृक्षवः क्रुद्धास्तिष्ठ तिष्ठेति भाषिणः । आसाद्य धन्विनो बाणैः [4]कर्णाग्रण्यः समाकिरन् ॥ ७ ॥
[5]सोऽपविद्धः कुरुश्रेष्ठ कुरुभिर्यदुनन्दनः । [6]नामृष्यत्तदचिन्त्यार्भः सिंह क्षुद्रमृगैरिव ॥ ८ ॥

कर्दमक्षमा

अन्वयः—इति, कुरुवृद्धानुमोदिताः, कर्णः, शलः, भूरिश्रवाः, यज्ञकेतुः, सुयोधनः, साम्बम्, बद्धुम्, आरेभिरे ॥५॥ महारथः, साम्बः, धार्तराष्ट्रान्, अनुधावतः, दृष्ट्वा, रुचिरम्, चापम्, प्रगृह्य, सिंह, इव, एकलः, तस्थौ ॥ ६ ॥ कर्णाग्रण्यः, जिघृक्षवः, ते, तम्, क्रुद्धाः, तिष्ठ, तिष्ठ, इति भाषिणः, धन्विनः, तम्, आसाद्य, बाणैः, समाकिरन् ॥ ७ ॥ कुरुश्रेष्ठः ! कुरुभिः, अपविद्धः, सः, यदुनन्दनः, क्षुद्रमृगैः, अपविद्ध, सिंहः, इव, अचिन्त्यार्भः, तत्, नामृष्यत् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कुरुवृद्धो भीष्मस्तेनानुमोदितास्तत्सहिताः षडेत इत्यर्थः ॥ ५-६ ॥ कर्णोऽग्रणीर्येषां ते ॥ ७ ॥ नामृष्यत् असहत् अचिन्त्यस्य भगवतोऽर्भोऽर्भकः । अचिन्त्यश्चासावर्भश्चेति वा ॥ ८-९ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इति एवमुक्त्वा । शलादयस्त्रयो बाह्लीकात्मजसोमदत्तात्मजाः । यज्ञकेतुर्भूरिश्रवाः । यज्ञशब्देनात्र यूपो लक्ष्यते । इत्यर्थ इति-क्षत्रधर्मनिष्ठत्वात्पराभवमसहमानो वृद्धोऽपि भीष्मस्सांबबंधनार्थं ययाविति भावः ॥ ५ ॥ धार्तराष्ट्रसंबंधिनः । एक एवैकलः । स्वार्थे लः । यद्वा—एकान्प्रधानानपि लुनाति छिनत्तीत्येकलः । लुनाविर्डः एके मुख्यान्यकेवलाः' इत्यमरः । 'शूरतमः ॥ ६ ॥ तं सांबम् । ते कर्णादयः ॥ ७ ॥ स सांबः । अपविद्धस्ताडितः । तत्कुरुताडनम् । 'अंधादंधो न जायेत' इति न्यायेन नहि पितृसम एव प्रायः पुत्रो भवतीति भावः । हे कुरुश्रेष्ठेति पूर्वेषां दुर्विनयेन लज्जमानं सांत्वयतीति भावः । अचिन्त्यार्भ इति श्रीभगवल्लीलाविशेषेच्छयैवानिरुद्धवत्तज्जातमिति भावः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृत वैष्णवतोषिणी

शलादयस्त्रयः सोमदत्तपुत्राः तत्र यज्ञकेतुर्भूरिश्रवाः । कुरुवृद्धेति तेषामुत्साहकारणं तेन तु तेषामभिमानव्यञ्जनार्थमेवानुमोदनमिति । ज्ञेयम् ॥ ५ ॥ प्रकर्षेण सज्जीकरणादिना गृहीत्वा ॥ ६ ॥ सम्यगाकिरन् व्याप्नुवन् ॥ ७ ॥ अतिशयेन विद्धः पाठान्तरे अपकर्षणात् विद्धः हे कुरुश्रेष्ठेति पूर्वेषां दुर्विनयेन लज्जमानं राजानं सान्त्वयति यदुनन्दन इति—

"बाल्यात् प्रभृति रामेण सोऽस्त्रेषु विनियोजितः । रामादनन्तरश्चैव मानितः सर्ववृष्णिभिः" ॥

इति श्रीहरिवंशोक्तं माहात्म्यं सूचयति स्वरूपतश्चाऽचिन्त्यार्भः ॥ ८ ॥

---

[1] इति कर्णं समालोक्य भूरिश्रवसुयोधनौ । सदुःशासनगान्धारौ दुर्मन्त्रैकान्तशीलिनौ ॥
एतेऽतिक्रम्य विदुरं गान्धारीं च यशस्विना ।

[2] वृद्धैरसङ्गताः । [3] तं ते-श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [4] कर्णमुख्याः-विज. । [5] सोऽभि-वीर. ; सोऽतिबद्धः-विज. ।
[6] तत्परिभवं दण्डाहत इवोरगः-विज. ।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

शलादयस्त्रयः सोमदत्तपुत्राः, तत्र यज्ञकेतुर्भूरिस्रवाः, कुरुवृद्धेति ज्ञातीनां लज्जया कुलश्रेष्ठस्य लज्जोत्पत्तेस्तेनानुमोदिता इति तेषामुत्साहः सूचितः। वस्तुतश्चायं भावः। दुर्य्योधनादीनां महाभिमानिनां कदाचित् कत्थनं श्रुत्वा तान् प्रति यादवानां माहात्म्यं दर्शयितुमिच्छता तत्तत्त्वाभिज्ञेन भागवतप्रवरेण भीष्मेणावसरं प्राप्य तदर्थं प्रेरिता इति ॥ ५ ॥ अनु पश्चात्, धावतो वेगेन गच्छतः, प्रकर्षेण दृढसज्जीकरणादिना गृहीत्वा, रुचिरं शार्ङ्गजातित्वात्, इति तस्य दार्ढ्यादिकमुक्तम्। एकत्र एव तस्थौ, यतो महारथो वीरप्रवरः, सिंह इवेति निर्भयत्वादिकं द्योतयति ॥ ६ ॥ आसाद्य निकटे प्राप्य; धान्वनो धनुर्विद्यादत्ता इत्यर्थः। अतः सम्यगाकिरन् व्याऽनुवन् ॥ ७ ॥ हे कुरुश्रेष्ठेति तदतिवेधेन शोकात्, किंवा अमर्षेण प्रहर्षात्; यद्वा, पूर्व्वेषां दुर्विनयेन लज्जमानं राजानं सान्त्वयति,—यदुनन्दन इति। यदुवंश्यत्वेनापि तेभ्यः कुरुभ्यः श्रैष्ठ्यं किंवा तदतिश्रेष्ठ्यार्थमेव (विष्णु० प० ११०।२)—'बाल्यात् प्रभृति रामेण सोऽस्त्रेषु विनियोजितः। रामादनन्तरन्चैव मानिनः सर्व्ववृष्णिभिः॥' इति श्रीहरिवंशोक्तं माहात्म्यं सूचयति। यद्वा, यदुनामानन्दनार्थमिति भावः। न च बालकत्वेन तेभ्योऽस्य न्यूनतेत्याह—अचिन्त्योऽद्भुतो लोकातीतोऽर्भकः। क्षुद्रमृगैरुपद्रुतः सिंहो यथा तदुपद्रवं न सहते, किन्तु तान् हन्त्येव, तद्वदित्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीत्थं निश्चित्य कर्णादयः कुरुवृद्धैः धृतराष्ट्रादिभिरनुमोदिताः साम्बं बद्धुमारेभिरे आरब्धवन्तः ॥ ५ ॥ दृष्ट्वेति। अनुधावतः पृष्ठतः आगन्तॄन् दृष्ट्वा एकलोऽसहायः सिंह इव तस्थौ ॥ ६ ॥ तत इति। ते धार्त्तराष्ट्राः तं साम्बं जिघृक्षवः गृहीतुमिच्छवः कर्णः अग्रणीः पुरतो नायको येषां तथाभूताः आसाद्य समीपमेत्य बाणैः समाकिरन् पिदधुः ॥ ७ ॥ स इति। हे कुरुश्रेष्ठ! कुरुभिरमितो विद्धस्ताडितः स यदुनन्दनः साम्ब अचिन्त्यस्य भगवतोऽर्भः अर्भकः हेतुगर्भमिदमतस्तद्वेधनं नामृष्यत् न सहे तत्र दृष्टान्तः क्षुद्रमृगैर्विद्धः सिंह इव ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

एते इत्यवलोक्य साम्बं बद्धुमारेभिरे असङ्गताः विनाभूताः ॥ ५ ॥ एकलः अपुरुषद्वितीयः ॥ ६ ॥ जिघृक्षवः ग्रहीतुकामाः ॥ ७-८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शलादयस्त्रयः सोमदत्तपुत्राः यज्ञकेतुर्भूरिश्रवाः कुरुवृद्धो भीष्मस्तेनानुमोदिताः इत्येतत् स्पृष्टायाः कन्यायाः वरान्तरायोग्यादयमेव वरो भवेत् किन्त्वेतदन्यायस्वशौर्य्ययोर्द्योतनार्थमयं बन्धनीय एव नतु बध्य इति कृतानुमोदनाः ततश्च तेनापि सहिताः कर्णादयः षडित्यर्थः ॥ ५-६ ॥ समाकिरन् सम्यगाकीर्णं चक्रुः ॥ ७ ॥ अपविद्धः अपकर्मणा अन्यायेन विद्धः नामृष्यत् नसहत अचिन्त्यस्य भगवतोऽर्भः ॥ ८-९ ॥

गूढार्थदीपिनी

कुरुवृद्धो भीष्मः तेन सह षट् ॥ ५ ॥ एक एव एकलः। स्वार्थे लः। यद्वा एकान् प्रधानानपि लुनाति छिनत्तीति। लुनातेर्डः। शूरतम इत्यर्थः ॥ ६ ॥ तं समाकिरन् आच्छादितवन्त कर्णः अग्रणी येषां ते ॥७॥ नामृष्यत् न असहत्। अचिन्त्यस्य भगवतः अर्भकः कर्मधारयो वा। अपविद्धः ताडितः ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कुरुवृद्धेन भीष्मेणानुमोदिताः तत्समाहिताः ॥ ५-७ ॥ अचिन्त्यस्य श्रीकृष्णस्यार्भः नामृष्यत् नासहत् ॥ ८-११ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एतादृशं वाक्यं भीष्मादीनामपि चेत्, तदा सम्बद्धार्थमपि भवेदिति वक्तॄन् गणयन्ति इतीति। इतिशब्दः प्रकारवाची। एवंविधान्यन्यान्यपि वाक्यानि। दुष्टाश्चत्वारोऽत्र वक्तारः ये भारते, कर्णः, शलः शल्यः, भूरिश्रवसो भ्राता भूरिः, यज्ञकेतुश्च तेषामेव प्रधानभूतः। त्रय एते मध्ये दोषरूपा गणिताः। चतुर्णां प्रधानभूतावाद्यन्तयोर्गणितौ। दुःशासनोऽप्यत्रानुसन्धेयः। अग्रे 'षड्रथा'निति वचनात्। साम्बं बद्धुमारेभिरे। परितः समागत्य धृत्वा बन्धनीय इति। ननु जामातार्यं जात एव, तथा सति बन्धने कुले दूषणं भवेदित्याशङ्क्याह कुरुवृद्धानुमोदिता इति। अनेनैतत्कथानिरूपणस्य दशमे प्रयोजनमुक्तम्। यतो भक्ता अप्येते बहिर्मुखा जाताः। अतः सात्त्विका अपि निरोधयोग्या इति। अन्यथा निरोधो न युक्तः स्यात् ॥ ५ ॥ ततोऽस्य साम्बस्य त्रिधा गतिः सम्भवति। कन्यया सह पलायनम्, तां त्यक्त्वा वा सम्मुखतया युद्धम्, दैन्यं वेति। तत्र पलायनदैन्ये अकृत्वा

युद्धार्थमुद्युक्त इत्याह **दृष्ट्वानुधावत** इति । स्वपृष्ठभागे स्वात्मानं धर्तुमनुधावतः षड्रथान् दृष्ट्वा साम्बः । तेऽपि पुनः पितुरेव पुत्रा धार्तराष्ट्राः । स्वयं तु महारथः, न पितुर्न मातुरग्रे बद्ध इति इदानीं युध्यतीति । रुचिरं स्वाभिलषितं चापं परिगृह्य स्वान्तरङ्गसेवकेष्वपि पलायितेषु एकल एव तस्थौ । शङ्काभावाय **सिंह इवे**ति । न हि सिंहः सहायमपेक्षते ॥ ६ ॥ ततस्ते स्थितमपि स्वप्रौढिख्यापनार्थं ग्रहणेच्छया न मारणीय इति दूराद्बाणप्रयोगमकृत्वा, **आसाद्य** निकटे समागत्य, धन्विनो भूत्वा, कर्ण एवाग्रणीर्येषां ते धनुर्विद्यायामतिनिपुणाः पश्चाद्बाणैः समाकिरन् ॥ ७ ॥ ततो भीतस्य दैन्यमाशङ्क्य निराकरोति सोऽपि विद्ध इति । न केवलं परितो बाणप्रक्षेपः, किन्तु सोऽपि **विद्धः** । **अपि**शब्दादश्वाः सारथिश्च । निपुणास्त इति न कन्या विद्धा । स्ववंशस्य हीनतां श्रुत्वा श्रवणे विरक्तो भविष्यतीति तन्निराकरणार्थं सम्बोधनं **कुरुश्रेष्ठे**ति । ते तु कौरवमात्रम्, अत एव **कुरुभि**रिति । अग्रे पौरुषं करिष्यतीति **यदुनन्दनः** । तत्तेषां वेधनं नामृष्यत् । यतः अचिन्त्यस्य भगवतः अर्भो बालकः, यस्य पिता अन्यैरपि न चिन्त्यः, स कथं स्वयं चिन्तां कुर्यात् । मौढ्यादप्येवं भवति, ज्ञानादपीति, तत्पक्षद्वयं निराकर्तुं दृष्टान्तमाह **सिंहः क्षुद्रमृगैरिवे**ति । न हि शृगालादिपीडां सिंहो मन्यते ॥ ८ ॥

श्रीसुबोधिनी-सारः

इति हेतोः कर्ण शलो भूरिर्यज्ञकेतुर्दुर्योधनः कुरुवृद्धो भीष्मस्तेनानुमोदिताऽ तत्सहिताः षट् सांबं बद्धुमारेभिरे उद्यताः षट् सांबं बद्धुमारेभिरे उद्यताऽ बभूवुः यज्ञः केतुरिति पाठः साधुः भीष्मस्य संसर्गदोषेणानुमोदन हेतुत्वात् युक्तं चैतत् अनंतरमेव धार्त्तराष्ट्रानित्युक्तेश्च ॥ ५ ॥ अनुधावतः पृष्ठत आयातान् धार्त्तराष्ट्रान् धृतराष्ट्रपक्षीयान् तत्पुत्रांश्च दृष्ट्वा रुचिरं चापं रम्यं धनुः प्रगृह्य महारथः सांब एकल एक एव मत्वर्थीयो लच्प्रत्ययः तस्थौ योद्धुं स्थिरो बभूव ॥ ६ ॥ ग्रहीतुमिच्छंतस्ते क्रुद्धाः तिष्ठतिष्ठेति वदंतो धनुर्धराः कर्णोऽग्रण्यः प्रधानो येषां ते आसाद्य प्राप्य तं सांबं बाणैरावृण्वन् ॥ ७ ॥ हे कुरुश्रेष्ठ कुरुभिरप विद्धस्तिरस्कृतो यदुनंदनः सौर्भो बालकः साम्बः तत्प्रहारं तेषां कर्म वा नाक्षमत अचित्यागणय्य एकपदे तु कर्मधारयः क्षुद्रमृगैरधिक्षिप्तः सिंह इव ॥ ८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इति निश्चित्य कुरूद्वहेन भीष्मेण अनुमोदिताः कर्णादयः साम्बं बद्धुमारेभिरे ॥ ५ ॥ ततश्च साम्बो धार्तराष्ट्रान् दुर्योधनादीन् अनुधावतः पृष्ठतः आगच्छतः दृष्ट्वा चापं धनुः प्रगृह्य सिंह इव एकल एव तस्थौ । तत्र हेतुः—महारथ इति ॥ ६ ॥ कर्णः अग्रणीः नायको येषां ते जिघृक्षवः तं गृहीतुमिच्छन्तः तमासाद्य तं प्रत्यागत्य बाणैः समाकिरन् छादितवन्तः । तत्र हेतुः-क्रुद्धा धन्विनश्चेति ॥ ७ ॥ हे कुरुश्रेष्ठ ! कुरुभिरभितो विद्धस्ताडितः स यदुनन्दनः साम्बः तद्वेधनं नामृष्यत् न सेहे । तत्र हेतुमाह—अचिन्त्यस्य अचिन्त्यप्रभावस्य अर्भः पुत्र इति । तत्र दृष्टान्तमाह-क्षुद्रैर्मृगैस्ताडितः सिंहो यथा तन्न सहते तथेति ॥८॥

अन्वितार्थप्रकाशिका

इतीति ॥ इति निश्चित्य कुरुवृद्धेन भीष्मेणानुमोदिताः तत्सहिताः कर्णादयः इति षडेते साम्बं बद्धुमारेभिरे । मन्द्धुमिति नकारवान्साधुः पाठस्तद्रहितस्त्वार्षः । अत्र शलादयस्त्रयः सोमदत्तस्य पुत्राः यज्ञकेतुर्भूरिश्रवाः यद्वा कुरुवृद्धानुमोदिताः इति कन्यायाः अकामत्वानिश्चयादनेन स्पृष्टतया वरान्तरायोगादयमेव वरो भवेत् परन्त्वेतदन्यायस्वशौर्यसूचनार्थं बयं बन्धनीय एव नतु वध्य इति भीष्मेण कृतानुमोदनास्तेनापि सहिताः षडित्यर्थः ॥ ५ ॥ दृष्ट्वेति ॥ महारथः साम्बो धार्तराष्ट्रान् दुर्योधनादीन् अनुधावतः पृष्ठतः आगच्छतः दृष्ट्वा चापं धनुः प्रगृह्य सिंह इव एकल एव तस्थौ ॥ ६ ॥ तमिति ॥ क्रुद्धा धन्विनश्च कर्णः अग्रणीः नायको येषां ते जिघृक्षवः तं ग्रहीतुमिच्छतः तिष्ठ तिष्ठेति भाषिणश्च सन्तः तमासाद्य प्रत्यागत्य बाणैः समाकिरन् छादितवन्तः ॥ ७ ॥ स इति ॥ हे कुरुश्रेष्ठ ! अचिन्त्यस्य भगवतः अर्भः पुत्रः अचिन्त्यस्य भगवतः अर्भः पुत्रः अचिन्त्यश्चासावर्भश्चेति वा कुरुभिरपविद्धः अपकर्मणा अन्यायेन विद्धः स यदुनन्दनः साम्बः तद्वेधनं नामृष्यत् न सेहे । यथा क्षुद्रैर्मृगैः ताडितः सिंहो यथा तन्न सहते तथा ॥ ८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शलादयस्त्रयः सोमदत्तपुत्राः । भूरिः भूरिश्रवाः । कुरुवृद्धेन भीष्मेणानुमोदिताः तत्सहिताः षडेते इत्यर्थः ॥ ५-६ ॥ कर्णोऽग्रणीर्युद्धे प्रथमं गतो येषां ते बाणैः समाकिरन् बाणान् ववृषुः ॥ ७ ॥ नामृष्यत् नासहत् । अचित्यस्य हरेरर्भकः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति । इतीत्थं, निश्चित्येति शेषः । कर्णः, शलः, भूरिः, यज्ञकेतुः, सुयोधनः एते पञ्च, कुरुवृद्धो भीष्मस्तेनानुमोदिताः, तत्सहिता इत्यर्थः । षडपि, साम्बं बद्धुं, आरेभिरे आरब्धवन्तः ॥ ५ ॥ दृष्ट्वेति । महारथः साम्बः, अनुधावतः

धार्त्तराष्ट्रान्, दृष्ट्वा, रुचिरं चापं प्रगृह्य, सिंहः इव, एकलः असहायः एव, तस्थौ । योद्धुमिति शेषः ॥ ६ ॥ त इति । तिष्ठ तिष्ठ इति भाषिणः, क्रुद्धाः, कर्णाग्रण्यः, धन्विनः ते कौरवाः, जिघृक्षवस्तं ग्रहीतुमिच्छवः सन्तः, आसाद्य तं प्राप्य, तं साम्बं, बाणैः समाकिरन् ॥ ७ ॥ स इति । हे कुरुश्रेष्ठ, यदुनन्दनः, अचिन्त्यो भगवांस्तस्यार्भः पुत्रः, सः साम्बः, क्षुद्रमृगैः सिंहः इव, कुरुभिः अपविद्धः बाणैस्ताडितः सन्, तत् तत्कृतमपवेधनं, न अमृष्यत् न सेहे ॥ ८ ॥

कृष्णप्रिया

ऐसा निर्णय करके कर्ण, शल, भूरिश्रवा, यज्ञकेतु एवं दुर्योधनादि वीर लोगों ने कुरुवंश के वृद्धजनों की अनुमति ली और साम्ब को पकड़ लेने की तैयारी भी की ॥ ५ ॥ महारथी श्रीसाम्बजी ने देखा कि धृतराष्ट्र के पुत्र मेरा पीछा कर रहे हैं तब वह एक सुन्दर धनुष को सज्जकर सिंह के समान अकेले ही रणसंग्राम में डट गये ॥ ६ ॥ यहाँ पर कर्ण को अग्रसर बनाकर कौरववीर धनुष सज्ज करते हुए साम्ब के पास आ पहुँचे । और क्रोध से भयंकर साम्ब को पकड़ लेने की इच्छा से खड़ा रह इस प्रकार ललकारते हुए बाणों की वृष्टि करने लगे ॥ ७ ॥ राजन् परीक्षित् ! हे कुरुश्रेष्ठ ! यदुनन्दन श्री साम्बकुमार अचिंत्य ऐश्वर्य से परिपूर्ण भगवान् श्रीकृष्ण के पुत्र थे । कौरवों के प्रहार से वे उनपर क्रुद्ध हो गये जैसे कोई सिंह क्षुद्र हरिनों का पराक्रम देखकर क्रुद्ध हो जाता है ॥ ८ ॥

विस्फूर्ज्य रुचिरं चापं सर्वान् विव्याध सायकैः । कर्णादीन् [1]षड्रथान् वीरांस्तावद्भिर्युगपत् पृथक् ॥ ९ ॥
चतुर्भिश्चतुरो वाहानेकैकेन च सारथीन् । रथिनश्च [2]महेष्वासांस्तस्य तत्तेऽभ्यपूजयन् ॥ १० ॥
तं तु ते विरथं चक्रुश्चत्वारश्चतुरो हयान् । एकस्तु सारथिं जघ्ने चिच्छेदान्यः शरासनम् ॥ ११ ॥
तं [3]बद्ध्वा विरथीकृत्य कृच्छ्रेण कुरवो युधि । [4]स्वं कुमारं स्वकन्यां च स्वपुरं जयिनोऽविशन् ॥ १२ ॥

कर्दमक्षमा

अन्वयः—रुचिरम्, चापम्, विस्फूर्ज्य, सायकैः, सर्वान्, कर्णादीन्, षड्रथान्, वीरान्, तावद्भिः, सायकैः, पृथक्, पृथक्, विव्याध ॥ ९ ॥ चतुर्भिः, चतुरः, वाहान्, एकैकेन, सारथीन्, च, एकैकेन, महेश्वासान् रथिन्, विव्याध, तस्य, तत्, ते, कर्म, अभ्यपूजयन् ॥ १० ॥ ते, षड्, तु, तम्, विरथम्, चक्रुः, चत्वारः, चतुरः, हयान्, एकेन, सारथिम्, जघ्ने, च, अन्यः, शरासनम् चिच्छेद ॥ ११ ॥ कुरवः, कृच्छ्रेण, युधि, तम्, विरथीकृत्य, कुमारम्, च, कन्याम्, बद्ध्वा, जयिनः, स्वपुरम्, आविशन् ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्प्रपंचयति चतुर्भिरिति चतुर्भिश्चतुर इत्यत्र वीप्साऽनुसंधेया । तत्कर्म ते संमानितवंतः ॥ ९-११ ॥ स्वस्य दुर्योधनस्य कन्यां च नीत्वेति ॥ १२-१३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यावंतस्ते तावद्भिः । षड्भिः तत्रापि प्रत्येकं, तत्रापि युगपदिति शश्लाघिरे ॥ ९ । तत् षट्संख्याकबाणैस्ताडनम् । तस्य सांबस्य । तत्कर्म युगपत्ताडनरूपम् । ते कर्णादयः ॥ १० ॥ तं सांबम् । ते कर्णादयः ॥ ११ ॥ तं सांबम् । जयिनो जेतुकामा न तु लब्धजयाः । कुमारमिति—प्रौढैर्वृद्धैर्बहुभिश्च बालस्यैकस्य बंधनादिकमन्याय्यमिति भावः । गृहीत्वेति शेषः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विस्फूर्ज्येति युग्मकम् । गाढमाकृष्य रुचिरं यथा स्यात् तावद्भिः षड्भिः पृथक् प्रत्येकं तत्रापि युगपत् अभितः अपूजयन् शश्लाघिरे ॥ ९-१० ॥ कथं चक्रुस्तदाह—चत्वार इति पदाभ्याम् एकः कर्णः अन्यो भीष्मः ॥ ११ ॥ विरथीकृत्य पश्चाद्बद्ध्वा अन्यथा तत्राशक्तेः कन्याञ्चादायेतिशेषः । कुमारमिति । प्रौढैर्वृद्धैर्बहुभिश्च बालकस्यैकस्य बन्धनादिकमन्याय्यमिति भावः । जयिनः सन्तः अचिन्त्यार्भ इत्युक्तत्वादेतदपि श्रीमदनिरुद्धवच्छ्रीभगवल्लीलाविशेषेच्छयैव जातमिति भावः ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विस्फूर्ज्य गाढमाकृष्य, रुचिरमिति पुनरुक्तिस्तस्योत्कृष्टत्वबोधनाय । यद्वा, रुचिरं यथा स्यात्, तावद्भिः षड्भिर्युगपत् तत्रापि पृथक् प्रत्येकं पृथक्त्वेन विव्याध, यतः वीरो युद्धसमर्थः ॥ ९ ॥ महेष्वासा इति महावीरत्वमुक्तम्, अतोऽभितोऽ-

---

[1] सहयाग्रण्यांस्तावद्भि–विज. । [2] ष्वासास्त–वीर. विज. । [3] तं तथा–वीर. ; ते तथा विरथं कृत्वा–विज. । [4] कुमारं स्वस्य कन्यां च–श्रीधर. वंशी. जीव. वीर. विश्व. ; कुमारं गृह्य कन्यां च–विज. ।

पूजयन्, साधु साध्विति शशंसुरित्यर्थः। महावीराणामन्यवीर्यविशेषदर्शनेन प्रहर्षोदयात्, यद्वा, 'च' अपि, महेष्वासा अप्यभ्यपूजयन्, आत्मनो महारथादिसद्भावेऽपि तादृशशक्त्यभावादित्यर्थः ॥ १० ॥ कथञ्चक्रुः ? तदाह—चत्वार इति पादाभ्याम्, एकः कर्णः, अन्यो भीष्मः ॥ ११ ॥ युधि कृच्छ्रेणैव विरथीकृत्येत्युभयपोषण्यायात्, विरथीकृत्यैव पश्चाद्बद्धा, अन्यथा तत्राशक्तिरिति भावः। कन्याञ्चादायेति शेषः। कुमारमिति प्रौढैर्वृद्धैश्च बहुभिर्बालकस्यैकस्य बन्धनादिकमन्याय्यमिति भावः, जयिनः सन्तः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

चतुर्भिरिति विव्याध इत्यन्वयः ॥ १०-१५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

विस्फूर्ज्येति। आरोपितज्यं चापं विस्फूर्ज्य वज्रनिर्घोषवत् ध्वनयित्वा वीरस्साम्बः कर्णादीन् पूर्वोक्तान् षट्सङ्ख्याकान् तावतो रथांश्च तावद्भिः सायकैः बाणैः युगपत्पृथक् प्रत्येकं विव्याध ॥ ९ ॥ तथा चतुर्भिश्चतुर्भिः सायकैश्चतुरो वाहानश्वानेकैकेन बाणेन सारथींश्च विव्याध रथिनश्चेति ते रथिनः कर्णादयः तस्य साम्बस्य तत्कर्म अपूजयन्नभ्यनन्दन् ॥१०॥ तमिति। ते कर्णादयस्तं साम्बं विरथं चक्रुः तदेवाह चत्वार इति। आजघ्नुरिति वचनपरिणामेन चत्वार इत्यस्य सम्बन्धः। तमिति। एवं युद्धे तं साम्बं कृच्छ्रेण प्रयासेन विरथीकृत्य जयिनः प्राप्तजयाः कुमारं साम्बं स्वकन्यां स्वस्य दुर्योधनस्य कन्याञ्चादायेति शेषः। पुरं हास्तिनपुरमाविशन् ॥ ११-१२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

हयानामग्रण्यम् अग्रणीभवं कर्म तेन सह वर्तन्त इति सहयाग्रण्यास्तान् यावन्तः तावद्भिः शरैः ॥ ९ ॥ एतदेव विवृणोति—चतुर्भिरिति। साम्बस्य तत्कर्म सन्दृश्य कुरवः किमकुर्वन्नत्राह—महेष्वासा इति ॥ १० ॥ अत्र साम्बस्य पराजयो नास्तीति भावेनाह—चत्वार इति ॥ ११ ॥ गृह्य गृहीत्वा जयिनो जेतुकामा एव न तु लब्धजया इति तात्पर्यार्थः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

चतुर्भिश्चतुर इत्यत्र वीप्साऽनुसन्धेया तत्कर्म ते सम्मानितवन्तः ॥१०-११॥ कुमारं कन्याञ्च गृहीत्वेति शेषः ॥१२-१३॥

गूढार्थदीपिनी

यावन्तस्ते तावद्भिः। तत्रापि प्रत्येकं, तत्रापि युगपदिति विस्फूर्ज्यटङ्कारयित्वा ॥९॥ अपूजयन् प्रशशंसुः ॥१०-१२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

स्वस्य दुर्योधनस्य कन्यां च नीत्वेति शेषः ॥ १२-१५ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततस्तस्य पौरुषमाह विस्फूर्ज्येति। वरो हि क्षत्रियाणां शौर्येणोत्कृष्टो भवति। अतः स्वपरीक्षां प्रयच्छन्निव लघुहस्ततां प्रदर्शयति। सर्वान् कर्णादीन् षड्भिः षड्भिर्बाणैः एकैकं युगपदविध्यत् ॥ ९ ॥ षड्बाणानां विनियोगमाह **चतुर्भिश्चतुरो** वाहानिति। एतदपि कौशलम्, यथा सर्व एव विद्धा भवन्ति समागताः। अन्यथा तं तथा न स्मरेयुः। एकैकेन सर्वानेव सारथीन्, एकैकेनैव रथिनः कर्णादीन्। तर्हि अप्रयोजकास्ते भविष्यन्तीत्याशङ्क्याह **महेष्वासा**निति। अनवहिता भविष्यन्तीत्याशङ्क्याह **तस्य तत्तेऽभ्यपूजयन्**निति। साम्बस्य तत्कर्म महारथिनोऽपि कर्णादयः अभ्यपूजयन्। साधु साध्विति प्रशंसां कृतवन्तः। एतदेव साम्बस्य बन्धने निमित्तं जातम्। तैः स्तुतः प्रतीकारं न कृतवान्। अन्यथा ब्रह्मास्त्रादिभिः युद्धं कुर्यात्॥१०॥ ततो यज्जातं तदाह तं बद्ध्वेति। कृच्छ्रेण आदौ तं विरथीकृत्य, पश्चाल्लौकिकन्यायेन बद्ध्वा, यतः कुरवः, कुरुणा हि भूयान् धर्मः कृत इति, तद्वश्यानामपि मनोरथसिद्धिः। युधीति। बन्धनेऽपि लज्जाभाव उक्तः। युद्धे हि जयपराजययोरनियमात्। किञ्च। **स्वकुमारं स्वकन्यां** चेति। सुतरामेव बन्धने न विमानन्। दुर्योधनो हि बलस्य जामाता, तस्य चैषा कन्या, अत उभयोरपि स्वकीयत्वमेव। **कुमारं स्वस्य कन्या**मिति पाठे स्वकन्यासहितं कुमारमद्यापि विवाहरहितमिति बन्धने हेतुरुक्तः। मध्ये स्थापिते कश्चिन्नेष्यति, पलाय्य वा गमिष्यतीति स्वपुरं प्राविशन्। **जयिन** इति प्रवेशे सन्तोषो निरूपितः ॥ १२ ॥

श्रीसुबोधिनी-सारः

रुचिरं चापं धनुर्विस्फूर्ज्याकृष्य टंकारयित्वेत्यन्ये वीरः शूरः कर्णादीन् षट्रथान्सर्वान् तावद्भिः षड्भिः सायकैर्बाणैः पृथक् एकैकं युगपत्समकालमेव विव्याध ॥ ९ ॥ तद्यथा चतुर्भिः शरैः चतुरोश्वान् एकेकेन सारथीन् महानिष्वासो धनुर्येषां तान् रथिनश्चेति तस्य सांबस्य तत्कर्म तै कर्णादयः साध्विति प्राशंसन् ॥ १० ॥ तं सांबं ते विरथं रथहीनं चक्रुः कथमित्यत आह

चत्वारो भटाः चतुरो वाहानश्वान् जघ्नुः एकस्तु सारथिं जघ्नेऽन्यः षष्ठः शरा अस्यते क्षिप्यंते येन तद्धनुः चिच्छेद ॥ ११ ॥ कुरवः संज्ञायाः प्रधानाश्रयत्वेन निर्देशः युधि संग्रामे कृच्छ्रेण विरथीकृत्य तं सांबं बद्धा स्वस्य दुर्योधनस्य कन्यां च बद्धा गृहीत्वा धातूनामनेकार्थत्वात् जेतुं शीलमेषां ते इति केचित् गुरवस्तु जयोस्त्येषु इत्याहुः स्वपुरं हस्तिनापुरम् आयुः ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

रुचिरं आरोपितज्यं चापं विस्फूर्ज्य निर्घोषयित्वा स वीरः सर्वान् षट्सङ्ख्यायुक्तान् कर्णादीन् तावतो रथांश्च तावद्भिः सायकैः युगपदेकदैव पृथक् प्रत्येकं विव्याध ॥ ९ ॥ षट्बाणानां विनियोगमाह—चतुर्भिरिति । प्रत्येकरथानां चतुर्भिश्चतुर्भिः सायकैः चतुरश्चतुरो वाहान् अश्वान्, एकैकेन च सायकेन सारथीन्, एकैकेन रथिनश्च विव्याध । महाधनुर्धरा अपि ते रथिनः कर्णादयस्तस्य साम्बस्य तत्कर्म अपूजयन् स्तुतवन्तः ॥ १० ॥ ते तु कर्णादयः सर्वे मिलित्वा तमेकं साम्बं विरथं चक्रुः । तु शब्दस्तेषामपकर्षसूचनार्थः । तस्य प्रकारमाह—चत्वार इति । तेषु चत्वारस्तु चतुरो हयान् जघ्नुः । एकस्त्वति स्पष्टम् ॥ ११ ॥ एवं युद्धे तं साम्बं कृच्छ्रेण अतिप्रयासेन विरथीकृत्य बद्ध्वा च जयिनः प्राप्तजयाः कुरवस्तं यदुकुमारं स्वकन्यां चादाय स्वपुरमाविशन् ॥ १२ ॥

अन्वितार्थप्रकाशिका

विस्फूर्ज्येति । रुचिरम् आरोपितज्यं चापं विस्फूर्ज्य निर्घोष्य स वीरः सर्वान् षट्संख्यायुक्तान् कर्णादीन् तावतो रथांश्च तावद्भिः सायकैः युगपदेकदैव पृथक् पृथक् प्रत्येकं विव्याध ॥ ९ ॥ तत्प्रपञ्चयति—चतुर्भिरिति । प्रत्येकं रथानां चतुर्भिश्चतुर्भिः सायकैः चतुरश्चतुरो वाहान् अश्वान् इति वीप्सा ज्ञेया । एकैकेन च सायकेन एकैकान् सारथीन् एकैकेन सायकेन एकैकान् रथिनश्च विव्याध । महेष्वासाः महाधनुर्धरा अपि ते रथिनः कर्णादयस्तस्य साम्बस्य तत्कर्म अपूजयन् स्तुतवन्तः ॥ १० ॥ तमिति । ते तु कर्णादयः सर्वे मिलित्वा तमेकं साम्बं विरथं चक्रुः । तेषु चत्वारस्तु चतुरो हयान् जघ्नुः । एकस्तु सारथिं जघ्ने । तद्भार्थः । अन्यः शरासनं चिच्छेद ॥ ११ ॥ तमिति । एवं युद्धे तं साम्बं कृच्छ्रेण अतिप्रयासेन विरथीकृत्य बद्ध्वा च जयिनः प्राप्तजयाः कुरवस्तं यदुकुमारं स्वकन्यां चादायेति शेषः । स्वपुरमाविशन् । एतदपि अनिरुद्धवद्भगवदिच्छयैवेति ज्ञेयम् ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विस्फूर्ज्यशब्दायमानं कृत्वा । सायकैर्बाणैः ॥९॥ इषवो बाणा अस्यं ते क्षिप्यं ते एभिरिति इष्वासानि धनूंषि महांति इष्वासानि येषां ते महेश्वासाः महाचापाः ते कर्णादयः तस्य सांबस्य तत् कर्म अभ्यपूजयन् ॥१०॥ ते कथं चक्रुस्तदाह तमिति । षण्णां मध्ये चत्वारो राजानो बाणैर्जघ्नुः ॥ ११ ॥ कुमारं सांबं स्वस्य दुर्योधनस्य कन्यां चादायेति शेषः ॥ १२–१३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विस्फार्येति रुचिरं चापं धनुः, विस्फार्य वज्रनिर्घोषवत् ध्वनयित्वा, वीरः साम्ब, कर्णादीन् पूर्वोक्तान् षट, तावतः रथांश्च, तावद्भिः सायकैः, सर्वान्, युगपत्, पृथक् विव्याध ॥ ९ ॥ चतुर्भिरिति । तथा चतुर्भिः सायकैः, चतुरः, वाहानश्वान्, एकैकेन बाणेन, सारथींश्च, रथिनश्च, विव्याध । महेष्वासाः, ते कर्णादयः, तस्य तत् कर्म, अभ्यपूजयन् अभ्यनन्दन् ॥ १० ॥ तमिति ॥ ते कर्णादयः षट् तु, तं साम्बं, विरथं चक्रुरिति संबन्धः ॥ ११ ॥ तमिति ॥ एवं कुरवः, तं साम्बं, युधि कृच्छ्रेण, विरथीकृत्य बद्धा, जयिनः संप्राप्तजयास्ते, कुमारं साम्बं, स्वस्य कन्यां च, आदायेति शेषः । स्वपुरं हास्तिनपुरं, अविशन् ॥१२॥

कृष्णप्रिया

श्री साम्बजी ने अपने दिव्य धनुष का टंकार करके कर्ण आदि छः महावीरों पर जो पृथक् पृथक् अपने रथों पर सवार थे उन सबको एक साथ छः छः बाणों से अलग-अलग प्रहार किया ॥ ९ ॥ उनमें से चार चार उनके चार-चार घोड़ों पर एक-एक उनके सारथियों पर एवं एक एक उन महान् धनुषधारी रथी वीरों पर छोड़ा । साम्ब के इस अलौकिक एवं अद्भूत हस्तलाघवको देखकर विपक्षी वीर लोग भी मुक्त कण्ठ से साम्बकी प्रशंसा करने लगे ॥ १० ॥ तदनन्तर उन छहों वीरों ने एक ही साथ मिलकर साम्ब को रथहीन कर दिया चार वीरों ने एक-एक बाण से साम्ब के चार घोड़ों को मारा, एक ने सारथिको और एक ने साम्ब का धनुष्य तोड़ डाला ॥ ११ ॥ इस प्रकार कौरवों ने संग्राम में अत्यन्त कष्ट से एवं भरसक प्रयास से साम्ब को रथहीन बनाया और बांध लिया, पुनः वे कौरव श्री साम्ब को एवं अपनी पुत्री लक्ष्मणा को लेकर अपनी विजय मनाते हस्तिनापुर की ओर लौट आया ॥ १२ ॥

तच्छ्रुत्वा नारदोक्तेन राजन् संजातमन्यवः। कुरून् प्रत्युद्यमं चक्रुरुग्रसेनप्रचोदिताः ॥ १३ ॥
सान्त्वयित्वा तु तान् रामः [1]संनद्धान् वृष्णिपुङ्गवान्। नैच्छत् कुरूणां वृष्णीनां कलिं कलिमलापहः[2] ॥ १४ ॥
जगाम हास्तिनपुरं रथेनादित्यवर्चसा। ब्राह्मणैः कुलवृद्धैश्च वृतश्चन्द्र इव ग्रहैः ॥ १५ ॥
गत्वा गजाह्वयं रामो बाह्योपवनमास्थितः। उद्धवं प्रेषयामास [3]धृतराष्ट्रबुभुत्सया ॥ १६ ॥

कर्दमक्षमा

अन्वयः—राजन्, तत्, श्रुत्वा, सञ्जातमन्यवः, उग्रसेनप्रचोदिताः, कुरुन्, प्रति, उद्यमम्, चक्रुः ॥१३॥ कलिमलापहः, तु, रामः, कुरुणाम्, वृष्णीनाम्, कलिम्, न, ऐच्छत, सन्नद्धान्, वृष्णिपुङ्गवान्, सान्त्वयित्वा, ब्राह्मणैः, कुलवृद्धैः, वृतः, ग्रहैः, वृतः, चन्द्र, इव, आदित्यवर्चसा, रथेन, हस्तिनापुरम्, जगाम ॥ १४–१५ ॥ रामः, गजाह्वयम्, गत्वा, बाह्योपवनम्, आस्थितः, धृतराष्ट्रं बुभुत्सया, उद्धवम्, प्रेषयामास ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यतः कलिं नैच्छदतः सांत्वयित्वा जगामेति ॥ १४–१५ ॥ धृतराष्ट्रं प्रति बुभुत्सयेति अभिप्रायजिज्ञासयेत्यर्थः ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् सांबबंधनम् ॥ १३ ॥ सन्नद्धान् युद्धार्थे परिणद्धकवचान्। कुरूणां वृष्णीनामिति। श्रीरोहिणीकुंत्यादिसंबंधेनैक्यतां प्राप्तत्वादिति भावः। कलेर्दुर्योधनस्य मलम् भिमानमपहंति तन्मात्रं दूरीकरोति न तु तमपि हंतुमिच्छति करुणस्वभावत्वादितिभावः। युग्मान्वयः। उग्रसेनेति श्रीकृष्णेन न तु प्रेरिताः परमात्मीये ज्येष्ठे बंधुवृंदे सति स्वपुत्रार्थोद्यमानर्हत्वात् ॥ १४–१५ ॥ बुभुत्सया बोधयितुमिच्छया। अंतर्भावितण्यर्थोयम्। तदभिप्रायजिज्ञासया दुर्योधनादीनां दुर्बुद्धेरपि धृतराष्ट्रमूलकत्वात् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नारदेनोक्तमुक्तिस्तेन तद्वारेण उग्रसेनेनैव चोदिता यादवाः नतु श्रीकृष्णेन परमात्मीये ज्येष्ठे च भवद्बन्धुवृन्दे सति स्वयं स्वपुत्राद्यर्थमुद्यमस्यानर्हत्वात् अग्रजाभिप्रायज्ञानात् उग्रसेने दत्तराज्यसम्मानत्वाच्च ॥ १३ ॥ सान्त्वयित्वेति युग्मकम्। कुरूणां वृष्णीनामिति श्रीरोहिणीकुन्त्यादिसम्बन्धेनैकतां प्राप्तत्वादितिभावः। कलिं कलहं नैच्छत् यतः सामान्यतोपि कलहादिकलिकालदोषापहः यद्वा कलेर्दुर्य्योधनस्य मलमभिमानादिकमपहन्ति तन्मात्रं दूरीकरोति नतु तमपि हन्तुमिच्छतीति तथा करुणस्वभावत्वादिति भावः। एवं भगवद्भागवतद्वेषदोषस्य स्वेनापि दुरुन्मूलत्वं दर्शितमिति च ॥ १४–१५ ॥ धृतराष्ट्रमिति। राजत्वात् दुर्योधनादीनां दुर्बुद्धेस्तन्मूलकत्वाच्च ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नारदेनोक्तं यद्वृत्तं तेन, किंवा उक्तमुक्तिस्तेन द्वारेण; तत् साम्बबन्धनादिकं श्रुत्वा; उग्रसेनेनैव, न तु श्रीकृष्णेन, अग्रजाभिप्रायज्ञानात् उग्रसेनप्रतिष्ठार्थं वा, प्रकृष्टेन चोदिता यादवाः। अतएवाग्रे श्रीबलदेवो वक्ष्यति—उग्रसेन इत्यादि। हे राजन्निति प्रहर्षात्, किंवा राज्ञां स्वभावोऽयं भवता ज्ञायत एवेति भावः ॥ १३ ॥ वृष्णिपुंगवान् उग्रसेनादीन्; कलिं कलहं नैच्छत्, यतः कलहादि-कलिकालदोषापह इति शिष्यत्वापेक्षया दुर्य्योधनस्य स्नेहेन गमनं परिहृतम्। एवं कुरुवृष्णिकुलयो रमणाद्रामः ॥ १४ ॥ आदित्यवर्च्चसेति रविवच्छीघ्रगतित्वम्, तेन सद्य एव गमनञ्च सूचयति—ब्राह्मणादिभिर्वृत इति। दुर्बुद्धीनां प्रबोधनार्थम्, तथा निजयुयुत्साहित्य-द्योतनार्थञ्च ॥ १५ ॥ धृतराष्ट्रमिति दुर्य्योधनादीनां दुर्बुद्धेस्तन्मूलकत्वात् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

समीप्सया सुखेप्सया ॥ १६–१९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदिति। हे राजन्! नारदोक्त्या तद्वृत्तान्तं श्रुत्वा सञ्जातो मन्युर्येषां ते उग्रसेनप्रचोदिताश्च यदवः कुरुन्प्रत्युद्यमं प्रतिचिकीर्षां चक्रुः ॥ १३ ॥ सान्त्वयित्वेति। सन्नद्धान् गन्तुमायत्तानाशु सान्त्वयित्वा रामः कुरूणां वृष्णीनाञ्च मिथः कलिं

---

[1] संक्रुद्धान्–विज.। [2] कलहशंकितः–विज.। [3] धृतराष्ट्रं तु–श्रीधर. वंशी. जीव.; राजंस्तेषां–वीर.; धृतराष्ट्राय शान्तये–विज.।

कलहं नैच्छत् यतः स कलिमलं कलहात्मकं मलमपहन्तीति तथा ॥ १४ ॥ किन्तु आदित्यस्येव वर्चो यस्य तेन रथेन गमनसाधनेन ग्रहैर्गुरुशुक्रादिभिः चन्द्र इव ब्राह्मणादिभिः परिवृतो हास्तिनपुरं जगाम ॥ १५ ॥ गत्वेति । गजाह्वयं हास्तिनपुरं हे राजन्! तेषां कुरूणां बुभुत्सयाऽभिप्रायजिज्ञासया उद्धवं प्रेषयामास ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

नारदोक्तेन नारदवचनेन ॥ १३ ॥ कलिं विरोधम् ॥ १४-१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सान्त्वयित्वा जगामेत्यन्वयः यतो नैच्छदित्यादि ॥ १४-१५ ॥ बुभुत्सया तदभिप्रायजिज्ञासया ॥ १६ ॥

गूढार्थदीपिनी

तत् साम्बबन्धनम् । प्रत्युद्यमं युद्धोद्यमम् ॥१३॥ कलिं विरोधोमम् । कलेर्दुर्योधनस्य मलमभिमानाम् अपहन्तीति॥१४॥ वर्चः तेजः ॥ १५ ॥ बुभुत्सया तदभिप्रायजिज्ञासया ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

धृतराष्ट्रं प्रति उद्धवं प्रेपयामास बुभुत्सया तदभिप्रायजिज्ञासया ॥ १६-२१ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

नारदो हि निरोधनिदानमिति सात्त्विकानां स्वासक्तिसिद्धयर्थं नारदः समागत्य वृत्तमित्याह तच्छ्रुत्वेति । भगवान् क्लिष्टकर्मा पुत्रसाहाय्यं न करिष्यतीति उग्रसेनेनैव प्रचोदिताः यादवाः कुरून्प्रत्युद्यमं चक्रुः । सञ्जातमन्युत्वं युक्तमिति राजसम्बोधनम् । उपाहरणे विपक्षस्यैव दोषः, अत्र तु न तथेति तूष्णींभावो भगवतः ॥ १३ ॥ तदा साधनशक्तिर्मुख्या बल इति, अत्रत्यं कार्यं भगवत एवेति, कुरुर्मूलभूतो भगवत इति, यदुवंश इव कुरुवंशेऽपि देवा एवावतीर्णा इति, देवानामन्योन्यविरोधो धर्मनाशकः पापपोषक इति, तान् नप्त्रोपाख्याने शपथकरणाद्य एव प्रथमं द्रुह्यति, स नष्टो भवतीति, बहुदोषदुष्टत्वात् कलहस्य तन्निवारणार्थं रामः प्रवृत्त इत्याह **सान्त्वयित्वेति** । **वृष्णिपुङ्गवानिति** महत्त्वम् । सान्त्वने हेतुः **सन्नद्धानिति** । तत्कार्यं स्वयं चेत्कुर्यात्, तदैव सान्त्विता भवन्तीति ज्ञापितम् । कार्यं साम्बस्य सभार्यस्यानयनम्, तत्प्रीत्यैव चेद्भवति, तदा कलहो व्यर्थ इति कुरूणां वृष्णीनां नैच्छत् । उभयेषां देवभावात् । रामश्च कलिमलापहः । देवविरोधे सत्त्वस्य सर्वथा तिरोभावात्तमः केन हन्येत । कारणसत्त्वेन सह विरोधाभावात् । अन्यथा तमसः तत्कार्याणां च स्थितिर्न स्यात् । अन्यथा कलावुत्पत्स्यमानानामुद्धारो न भवतीति जन्मकारणनिर्धारो व्यर्थः स्यात् । तु शब्दः कुरुपक्षपातं व्यावर्तयति । **तान्** प्रसिद्धानिति हीनभावोऽपि नाश्रयणीय इति सूचितम् । तेन ऋजुमार्गेणासिद्धौ वक्रेणापि तत्करिष्यतीति सिद्धम् । ज्ञानशक्तिरत्र न पूर्णेति केचित् । लोकानुरोधी भगवानित्यपरे । नीतिमार्गानुसारिणी साधनशक्तिः, पुष्टिमार्गानुसारिणी फलशक्तिरिति सिद्धान्तः ॥ १४ ॥ सान्त्वनसिद्धयर्थं रामस्य गमनमाह **जगामेति** । हस्तिनो नात्र सहभाव इति ऋतुभावेन गमनम् । आदित्यवर्चसेति तेषां प्रतिबोधनम् । नीतिमार्गोपयोगिन आह । ब्राह्मणैः कुलवृद्धैः, चकारादन्यैरपि शास्त्रिभिः । कुरूणामनभिप्रेतं साम्बविमोचनं भवतीति, तत्तापार्थं गच्छतीत्याशङ्क्य, तेषां तापापनोदार्थं गच्छतीति वक्तुं दृष्टान्तमाह **चन्द्र इव ग्रहैरिति** । बृहस्पतिप्रभृतिभि ॥ १५ ॥ नीतिपरैवेयं शक्तिरिति ज्ञापयितुं लोकदृष्ट्यापि द्विषतां पुरं न प्रविशेदिति बहिःस्थित एव स्वागमनं ज्ञापितवानित्याह गत्वेति । अत एव रामः । **बाह्योपवनमिति** नगरसीमाप्रवेश उक्तः । आस्थितिस्तत्र विमोचनम् । नीतिज्ञ उद्धवः । धृतराष्ट्रो गन्धर्वो दैत्यावेशसहितो देवांशः । स बुध्यतामिति बुभुत्सा । धृतराष्ट्रं प्रति बोधयितुमिच्छया वा ॥ १६ ॥

श्रीसुबोधिनी-सारः

हे राजन् नारदस्योक्तेन वचसा तद्वृत्तं श्रुत्वा सम्यक् जातो मन्युः क्रोधो येषां ते यादवा उग्रसेनेन प्रचोदिताः प्रेरिता दत्ताज्ञाः कुरून् प्रति उद्यमं चक्रुः ॥ १३ ॥ सन्नद्धान् कवचिनो वृष्णिश्रेष्ठान् तान् सांत्वयित्वा क्षमाप्य रामः कुरूणां यादवानां च कलिं कलहं विरोधमिति यावत् नैच्छत् नावद् तत्र हेतुः कलिरेव मलस्तमपहरतीति ॥ १४ ॥ सूर्यतुल्यप्रभेण रथेन हास्तिनपुरं जगाम ब्राह्मणैः कुलवृद्धैर्जरद्यादवैः वृतः ग्रहैर्भौमादिभिर्वृतश्चंद्र इव ॥ १५ ॥ गजाह्वयं गत्वा प्राप्य बाह्यमुपवनमास्थितो राम उद्धवं प्रैषयांबभूव धृतराष्ट्रं प्रति बुभुत्सया तदभिप्रायजिज्ञासया वस्तुतस्तु स्वागमनविजिज्ञापयिषयेति ॥ १६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

एकोनविंशे । सान्त्वयित्वेत्यत्र । अन्यथा तमस इति । कारणसत्त्वेन सह विरोधे तमसस्तत्कार्याणां च मूलत एव नाशः स्यादित्यर्थः । **अन्यथा कलाविति** । देवविरोधेन सत्त्वतिरोभावे इत्यर्थः । नन्वेते दुष्टा भूभाररूपा अग्रेपि मारणीया एवेति

सोऽभिवन्द्याम्बिकापुत्रं भीष्मं द्रोणं च बाह्लिकम् । दुर्योधनं च विधिवद् राममागतमब्रवीत् ॥ १७ ॥
तेऽतिप्रीतास्तमाकर्ण्य प्राप्तं रामं सुहृत्तमम् । तमर्चयित्वाभिययुः सर्वे मङ्गलपाणयः ॥ १८ ॥
तं संगम्य यथान्यायं गामर्घ्यं च न्यवेदयन् । तेषां ते तत्प्रभावज्ञाः प्रणेमुः शिरसा बलम् ॥ १९ ॥
बन्धून् कुशलिनः श्रुत्वा पृष्ट्वा शिवमनामयन् । परस्परमथो रामो बभाषेऽविक्लवं वचः ॥ २० ॥

कर्वमक्षमा

अन्वयः—सः, अम्बिकापुत्रम्, भीष्मम्, द्रोणम्, वाह्लिकम्, च, दुर्योधनम्, विधिवत्, अभिवन्ध, आगतम्, रामम्, अब्रवीत् ॥ १७ ॥ सुहृत्तमम्, तम्, रामम्, प्राप्तम्, आकर्ण्य, ते, अतिप्रीताः, अर्चयित्वा, मङ्गलपाणयः, सर्वे, अभिययुः ॥ १८ ॥ यथा, न्यायं, तम्, सगम्य, गाम्, च, अर्घ्यं, न्यवेदयन्, तेषाम्, (मध्ये) ये, तत्, प्रभावज्ञाः, ते, बलम्, शिरसा, प्रणेमुः ॥१९॥ बन्धून्, कुशलिनः, श्रुत्वा, परस्परम्, शिवम्, च, अनामयम्, पृष्ट्वा, रामः, अविक्लवम्, वचः, बभाषे ॥ २० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विधिवदभिवंद्य ॥१७॥ तमुद्धवमर्चयित्वा सत्कृत्य । मंगलपाणय उपायनहस्ताः ॥१८॥ वृद्धा अपि प्रणेमुः ॥१९-२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स उद्धवः । युधिष्ठिरादीनामभिवादनेऽनुक्तिस्तु तेषां तदेन्द्रप्रस्थेऽवस्थानात् ॥ १७ ॥ ते भीष्मादयः । सुहृत्तममिति-सुहृदो यादवाः, सुहृत्तराः श्रीवसुदेवादयः, तेष्वपि पौरव्याः श्रीरोहिण्याः पुत्रत्वेन सुहृत्तमम् । यद्वा–दुर्योधनं प्रति गदाविद्याप्रदत्वे न पूज्यं बलरामम् । तमुद्धवम् ॥ १८ ॥ तं रामम् । तेषां मध्ये ॥ १९ ॥ अथ कुशलप्रश्नोत्तरम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अभिवादने श्रीयुधिष्ठिरादीनामनुक्तिस्तदानीमिन्द्रप्रस्थवासात् दुर्योधनञ्चेति चकारो निष्कर्षे स च तस्यानर्हत्वेपि लोकरीत्यैवेदं बहिरभिवन्दनमिति बोधयति अन्तस्तु तद्विधशास्तृसर्वान्तर्यामित्वदृष्ट्यैवेति ॥ १७ ॥ सुहृदो यादवाः सुहृत्तराः श्रीवसुदेवादयः तेष्वपि पौरव्याः श्रीरोहिण्याः पुत्रत्वेन सुहृत्तमं यद्वा परमोपकारिणं दुर्य्योधनं प्रति गदादिशिक्षणात् अतोऽतिप्रीताः यद्वा साम्बमोचनार्थमस्माननुनेतुं प्राप्तमित्यभिप्रेत्यातिप्रीताः ॥ १८ ॥ ये श्रीभीष्मादयः ॥ १९ ॥ श्रुत्वेत्यत्र हेतुः, शिवं क्षेमम् अनामयञ्चारोग्यं परस्परञ्च पृष्ट्वेति तदेवं (दृ) पृष्ट्वा श्रुत्वा स्थितेष्विति शेषः । अथो तत्प्रश्नानन्तमेव अविक्लवं निर्भयम् ॥ २० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतएव प्राक् तमभिवन्द्य, एषामेवाभिवन्दनादिकं कुरुषु मुख्यत्वात्, श्रीयुधिष्ठिरादीनां चानुक्तिस्तदानी तेषामिन्द्रप्रस्थे निवासात्, साम्बबन्धने च साहाय्याद्यभावात् ॥१७॥ सुहृदो यादवाः, सुहृत्तराः श्रीवसुदेवादयः, तेष्वपि पौरव्याः श्रीरोहिण्याः पुत्रत्वेन सुहृत्तमम्; यद्वा, परमोपकारिणं दुर्य्योधनं प्रति गदायुद्धादि-शिक्षणात्, अतः प्रीताः; पाठान्तरेऽपि स एवार्थः । सर्व्व इति प्रत्येकं सर्व्वेषां मंगलपाणित्वादिकं बोधयति ॥ १८ ॥ यथान्यायमिति धृतराष्ट्रादयः साशिर्व्वादालिंगनादिना दुर्य्योधनादयश्च प्रणामादिना संगम्येत्यर्थः । ये श्रीभीष्मादयः, शिरसेति भूमिस्पर्शनेऽतिभक्तिरुक्ता ॥ १९ ॥ शिवं क्षेमम्, अनामयं चारोग्यम्, परस्परं पृष्ट्वा, अथोतत्प्रश्नानन्तरमेव; अविक्लवं स्पष्टाक्षरमदैन्यं वा, निर्भयत्वात् ॥ २० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अविक्लवमिति पदम् ॥ २०-२१ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स इति । उद्धवः अम्बिकायाः पुत्रे भीष्म बाह्लीकेन सहितं दुर्योधनञ्च विधिवदभिवन्द्य ॥१७॥ तेपीति । तेपि भीष्मादयोदि राममागतं श्रुत्वा प्रीताः तमुद्धवं सुहृद्भिर्वृतमर्चयित्वा सर्वे मङ्गलद्रव्याणि पाणिषु येषां तथाभूताः राममभिजग्मुः ॥१८॥ तमिति । तं रामं यथान्यायं स्वस्ववयस्थानाद्यनुरूपमालिङ्गनादिभिः आलिङ्ग्य सम्यक् गां धेनुमर्घ्यञ्च तस्मै न्यवेदयन् तेषां मध्ये ये तत्प्रभावज्ञाः रामप्रभावविदस्ते बलं रामं शिरसा प्रणेमुः ॥ १९ ॥ बन्धूनिति । रामः परस्परं बन्धून् कुशलिन श्रुत्वा अनामयमारोग्यं शिवं शुभं च पृष्ट्वा च अविक्लवमिति छेदः । अदीन वचो उभाषे ॥ २० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

परस्परं शिवं सुखमनामयम् आरोग्यमविक्लवं धाष्टर्यंयुक्तम् ॥ २०-२१ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सोऽभिवन्द्य ॥ १७-२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

युधिष्ठिरादीनामभिवादनेऽनुल्लेखस्तदानीं तेषामिन्द्रप्रस्थेऽवस्थानात् ॥ १७ ॥ तमुद्धवं सत्कृत्य ॥ १८ ॥ **तेषां** मध्ये ये भीष्मादयस्ते प्रणेमुः ॥ १९ ॥ परस्परं श्रुत्वा पृष्ट्वा स्थि**तेषु तेष्वि**ति शेषः ॥ २० ॥

गूढार्थदीपिनी

स उद्धवः । विधिवत् अभिवन्ध ॥ १७ ॥ **ते** भीष्मादयः । मङ्गलम् उपायनम् । दुर्योधन प्रति गदाविद्याप्रदत्वेन **सुहृत्तमं पूज्यम्** ॥ १८ ॥ तं रामम् मिलित्वा । गां धेनुम् । **ते**ऽपि भीष्मादयः ॥ १९ । स्थितेषु तेषु । अनामयम् आरोग्यम् । अविक्लम् उदारम् ॥ २० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तस्य यथोचितं करणमाह **सोऽभिवन्द्ये**ति । अम्बिकापुत्रो धृतराष्ट्रः, बाह्लिकः शन्तनोर्भ्राता, चकारात्कृपादिब्राह्मणान् । दुर्योधनो वरःश्वशुर इति । चकारात्तत्पक्षपातिनः । एवमुभयविधा नमस्कृता बोधिताश्च । **विधिवदित्यन्तेन** तुल्यत्वाय । कथमागमन**मिति** प्रश्नसमये राममागतमब्रवीत् ॥ १७ ॥ ते तां वार्तां श्रुत्वैव प्रीताः । स हि सुहृत्तमः दुर्योधनश्वशुरः गुरुश्च । यादवपक्षपा**ते** परमन्यथा भविष्यति । तमुद्धवमर्चयित्वा आभिमुख्येन ययुर्यथाशास्त्रम् । मङ्गलपाणयः ॥ १८ ॥ सङ्गतावपि सौहार्ददार्ढ्यमाह **तं संगम्ये**ति । प्रह्लादिप्रकारभेदैर्यथान्यायम् । अतिथिवन्मधुपर्कादिना पूजितवन्त इति ज्ञापयितुमाह **गामर्घ्यं चे**ति । **ते**षां पूजकानां मध्ये ये तत्प्रभावाभिज्ञाः माहात्म्यविदः **ते** ज्येष्ठा अपि लौकिकीं दृष्टिं दूरीकृत्य प्रणेमुः । अनेन सर्वे लौकिकाः, केचनैव तत्प्रभावाभिज्ञा इति निरूपितम् । अभिज्ञा अपि बलं बलाधिक्येनैव, नत्वलौकिकानुभावेन । अन्यथा ते विषमान् बोधयेयुः ॥१९॥ एवं कायिकव्यवहारमुक्त्वा वाचनिकमाह **बन्धून्कुशलिन** इति । शिवं कल्याणं सुखरूपम्, अनामयं दुःखाभावरूपम्, **बन्धून्** धर्मिणः परस्परं कुशलिनः श्रुत्वा । एतदपि परस्परं पृष्ट्वा । अथो भिन्नप्रक्रमेण रामोऽविक्लवं अदीनम्, अन्यथा यादवानां दीनता स्यात्, भक्ताश्च ते ॥ २० ॥

श्रीसुबोधिनी-सारः

अंबिकायाः पुत्रं धृतराष्ट्रं भीष्मं द्रोणं बाह्लिकं दुर्योधनं च विधिवदभिवंद्य प्रणम्य स उद्धव आगतं राममब्रवीत् ॥१७॥ सुहृत्तममतिमित्रं तं प्राप्तं राममाकर्ण्य श्रुत्वाऽतिप्रीतास्ते कौरवास्तमुद्धवमर्चयित्वा संपूज्य मंगलं वस्तु पाणिषु येषां तेऽभिययुः संमुखमाजग्मुः ॥ १८ ॥ तं रामं संगम्य मिलित्वा यथान्यायं यथाविधि गां पाद्यमर्घ्यं च समार्पयन् । तेषां मध्ये तस्य रामस्य प्रभावज्ञा ये ते शिरसा बलं प्रणेमुः ॥ १९ ॥ कुशलमारोग्यमस्त्येषां ते तान् बंधून् श्रुत्वा शिवं मंगलं यथा भवति तथाऽनामयं सुखं पृष्ट्वा परस्परं मिथोऽथो अनंतरं रामोऽविक्लवं गंभीरं वचो जगाद ॥ २० ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स उद्धवः अम्बिकापुत्रो धृतराष्ट्रः तदादीन् विधिवदभिवन्द्य आगतं राममब्रवीत् ॥ १७ ॥ ते भीष्मादयो रामं प्राप्तमाकर्ण्य श्रुत्वाऽतिप्रीता जाताः । तत्र हेतुमाह—सुहृत्तममिति । प्रथमं तमुद्धवं समर्चयित्वा अर्ध्यपाद्यासनादिभिः सत्कृत्य मङ्गलद्रव्याणि पाणिषु येषां ते तथाभूताः सर्वे राममभिजग्मुः ॥ १८ ॥ यथान्यायं स्ववयःसम्बन्धाद्यरूपमालिङ्गनादिभिस्तं रामं सङ्गम्य गां धेनुं अर्घ्यं च तस्मै न्यवेदयन् । तेषां मध्ये ये तस्य बलस्य प्रभावं जानन्ति **ते** बलं शिरसा प्रणेमुः ॥ १९ ॥ रामः परस्परं बन्धून् कुशलिनः श्रुत्वा शिवं सुखमनामयं आरोग्यं च पृष्ट्वा अथ अनन्तरं अविक्लवं अदीनं वचः बभाषे ॥ २० ॥

अन्वितार्थप्रकाशिका

स इति ॥ स उद्धवः अम्बिकापुत्रं धृतराष्ट्रं भीष्मादींश्च विधिवदभिवन्द्य आगतं राममब्रवीत् । युधिष्ठिरादीनामिन्द्रप्रस्थे निवासादनुल्लेखः ॥ १७ ॥ त इति ॥ **ते** भीष्मादयः सुहृत्तममुपकारिणं दुर्योधनस्य गदादिशिक्षणात् रामं प्राप्तमाकर्ण्य

श्रुत्वाऽतिप्रीता जाताः । प्रथमं तमुद्धवम् अर्चयित्वा अर्घ्यपाद्यासनादिभिः सत्कृत्य मङ्गलद्रव्याणि उपायनानि पाणिषु येषु ते तथाभूताः सर्वे राममभिजग्मुः ॥ १८ ॥ तमिति ॥ यथान्यायं स्ववयःसम्बन्धाद्यनुरूपमालिङ्गनादिभिस्तं रामं सङ्गम्य गां धेनुं अर्घ्यं च तस्मै न्यवेदयन् तेषां मध्ये ये तस्य बलस्य प्रभावं जानन्ति ते भीष्मादयो वृद्धा अपि बलं शिरसा प्रणेमुः ॥ १९ ॥ बन्धूनिति ॥ रामः परस्परं बन्धून् कुशलिनः श्रुत्वा शिवं सुखमनामयम् आरोग्यं च पृष्ट्वा स्थितेषु तेष्विति शेषः । अथानन्तरम् अविक्लवम् अदीनं वचः बभाषे ॥ २० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

बाह्लिकं सोमदत्तपितरं । कुरुं कुलवृद्धं ॥ १७ ॥ तं उद्धवमर्च्चयित्वा ॥ १८ ॥ गां न्यवेदयन् । तवेयं भूमिरिति कथितवंतः । अर्घ्यं च न्यवेदयत् ॥ १९ ॥ अनामयरूपं शिवं कुशलं अविक्लवं निर्भयं वचः ॥ २० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति ॥ स उद्धवः, अम्बिकापुत्रं धृतराष्ट्रं, भीष्मं गाङ्गेयं, द्रोणं द्रोणाचार्यं, सबाह्लिकं बाह्लीकेन सहितं दुर्योधनं च, विधिवत् यथायोग्यं, अभिवन्द्य, रामं आगतं, अब्रवीत् ॥ १७ ॥ तेऽपीति ॥ सुहृत्तमं, तं रामं प्राप्तं आकर्ण्य, प्रीताः सर्वे अपि, ते कौरवाः, तमुद्धवं, अर्चयित्वा सत् कृत्य, मङ्गलानि मङ्गलद्रव्याणि पाणिषु येषां तथाभूताः, सन्तः, अभिययुः राममभिजग्मुः ॥ १८ ॥ तमिति ॥ तं रामं यथान्यायं संगम्य, गां स्वागतादिवाचं, अर्घ्यमर्घार्थं द्रव्यं च, न्यवेदयन् । तेषां कौरवाणां मध्ये, ये तत् प्रभावज्ञाः रामप्रभावविदः, वृद्धाः, ते बलं, शिरसा, प्रणेमुः ॥ १९ ॥ बन्धूनिति ॥ बन्धून्, कुशलिनः श्रुत्वा, परस्परं शिवं अनामयं, पृष्ट्वा, अथो तदनन्तरं, रामः, अविक्लवमदीनं वचः, बभाषे ॥ २० ॥

कृष्णप्रिया

श्री उद्धवजी ने कौरवों की सभा में पहुँचकर महाराज धृतराष्ट्रजी, श्री भीष्मपितामहजी, श्री द्रोणाचार्यजी, बाह्लिक एवं दुर्योधन को विधि पूर्वक वंदन किया, साथ में निवेदन किया कि महाराज बलभद्रजी वहाँ पधारे हैं ॥ १७ ॥ कौरवों ने अपने परम हित चिंतक एवं अत्यंत प्रिय बलभद्रजी का पधारना जानकर उन लोगों की प्रसन्नता की सीमा न रही और श्री उद्धवजी का विधि पुरःसर सन्मान करके अपने करकमलों में माङ्गलिक सामग्री लेकर श्री बलरामजी का स्वागत करने के लिये चल पड़े । पुनः अपना सम्बन्ध वय एवं स्नेह के अनुसार सब कौरव बलभद्रजी से मिले तथा उनके सत्कार के लिए श्री बलभद्रजी को गौ समर्पण किया । साथ अर्घ्यप्रदान भी किया । इन कौरवों में जो लोग बलभद्रजी की महिमा जानते थे उन्होंने शिर नवाकर दाऊजी को प्रणाम किया ॥ १८-१९ ॥ पुनः उन लोगों ने परस्पर एक दूसरे का कुशल मङ्गल पूछा, और यह सुनकर की सब भाई-बन्धु कुशल है श्री बलभद्रजी ने धैर्य पुरःसर और गंभीरता के साथ सारी बात कही ॥ २० ॥

उग्रसेनः क्षितीशेशो यद् व आज्ञापयत् प्रभुः । तदव्यग्रधियः श्रुत्वा कुरुध्वं माविलम्बितम् ॥ २१ ॥
यद् यूयं बहवस्त्वेकं जित्वाधर्मेण धार्मिकम् । अबध्नीताथ तन्मृष्ये [1]बन्धूनामैक्यकाम्यया ॥ २२ ॥[2]
वीर्यशौर्यबलोन्नद्धमात्मशक्तिसमं वचः । कुरवो बलदेवस्य निशम्योचुः प्रकोपिताः ॥ २३ ॥
अहो महच्चित्रमिदं कालगत्या दुरत्यया[3] । आरुरुक्षत्युपानद् वै शिरो मुकुटसेवितम्[4] ॥ २४ ॥

कर्दमक्षमा

अन्वयः—क्षितिशेशः, उग्रसेनः, प्रभुः, वः, यत्, आज्ञापयत्, अव्यग्रधियः, श्रुत्वा, माविलम्बितम्, कुरुध्वम् ॥ २१ ॥ यत्, बहवः, यूयम्, एकम्, धार्मिकम्, अधर्मेण, जित्वा, बध्नीत, अथ, तत्, बन्धूनाम्, ऐक्यकामया, मृष्ये ॥ २२ ॥ कुरवः, बलदेवस्य, वीर्यशौर्य, बलोन्नद्धम्, आत्मशक्तिसमम्, वचः, निशम्य, प्रकोपिताः, उचुः ॥ २३ ॥ अहो, इदम्, महत्, चित्रम्, दुरत्यया, कालगत्या, वै, उपानत्, वै, मुकुटसेवितम्, शिरः, आरुरुक्षति ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यद्यूयमित्युग्रसेनवाक्यम् । मृष्ये सहे । अथाशु तमानीय समर्पयतेति शेषः ॥ २२ ॥ वीर्यं प्रभावः शौर्यमुत्साहो बलं सत्त्वं तैरुन्नद्धमुच्छृंखलम् । कथम् । आत्मनः शक्तेः सममनुरूपम् ॥ २३ ॥ उपानत्पादरक्षा शिर आरोढुमिच्छतीति हीना अस्मानाज्ञापयंतीत्यर्थः ॥ २४ ॥

---

१. बन्धूनामिष्ट-विज. । ६. श्रीशुक उवाच-च. पु. टि. । ३. त्ययं-विज. ; त्तया-च. पु. टि. । ४. भूषितं-वीर. ।

श्रीवंशीधरकृतो भावार्थबोधिकाप्रकाशः

क्षितीशेशो राजाधिराजः। क्षितीशा यूयं तेषामीशो राजा। तत्र हेतुः-प्रभुः। सुधर्मापारिजाताद्युपायनसमर्पका इंद्रादयो यदाज्ञाकारिणस्तत्र यूयं के वराका इति ययातिना यदूनां राजत्वमात्रं निषिद्धं न तु राजेशत्वमिति भावः। अव्यग्रधियः सन्त इत्यन्यथा स युष्मान् दंडयिष्यतीति भावः ॥ २१ ॥ धार्मिकमितिक्षत्रियधर्मे स्वयंवरे कन्याहरणरूपे स्थितम् ॥ २२ ॥ कुरवो दुर्योधनादयः ॥ २३ ॥ 'दुरंतया' इति पाठः सम्यक्। दुरत्यया' इति पाठे तृतीयार्थे प्रथमार्षत्वात्, दुरत्ययेत्यर्थः। यद्वा—औणादिकक्प्रत्यय एतेर्बोध्यः। तथा चात्येतीत्यत्यो नाशः, दुर्गतोऽत्यो यस्यास्सा दुरत्या तया। पादौ रक्षतीति पादरक्षा। इत्यर्थ इति—सर्वथास्मदतुल्याः स्वाधिक्यवर्णनेन निर्लज्जा इति भावः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आज्ञापनयोग्यत्वमाह—क्षितीशेशः तत्र हेतुः प्रभुः महेन्द्रादीनामप्याज्ञापकः इति राजत्वमात्रं ययातिना निषिद्धं नतु राजेशत्वमिति न्यायाच्च दर्शितः अव्यग्रधियः सावधानास्सन्तः यद्वा तेन साम्नैवादिष्टमिति तत्रान्यथा शङ्कया भयमकुर्वाणा इत्यर्थः ॥ २१ ॥ अधर्मेणेति छेदः। अथ कार्त्स्न्ये ऐक्यमभेदः ॥ २२ ॥ अन्य वाक्यविशेषाकथनं च तेषां तावन्मात्रश्रवणेनैव दुर्वचने प्रवृत्तत्वात् प्रकर्षेण कोपितास्तद्वचसैव ॥२३॥ अहो विस्मये नच चित्रमित्याहुः—कालस्य गत्या गतिः सोः स्थानेटादेशः छान्दसः दुरत्यया दुर्लङ्घ्या कदाचिदसम्भवोदयात् तदेव दर्शयति—आरुरुक्षतीति ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आज्ञापनयोग्यतामाह—क्षितीशानां राज्ञामीशः सम्राडित्यर्थः। यतः प्रभुर्यादवानामस्माकमीश्वरः। यद्वा, अत एव सर्वेषां प्रभुः, अव्यग्रधियः सावधानाः सन्तः, ईदृश्युक्तिश्च तेषां राजत्वाभिमान-नाशनार्थम्, तथा प्रकोपनाय च। तच्च स्वविक्रमप्रदर्शनाय, तदपि कृपया दुर्बुद्धीनां सद्बुद्धयर्थमिति; तत्त्वग्रे व्यक्तं भावि ॥ २१ ॥ अधर्मेणेति। बहूनामेकेन सह युद्धात्, धार्मिकमिति स्वयम्बरे कन्याहरणस्य क्षत्रियधर्म्मत्वादनपराधिनमपीत्यर्थः। यद्वा, बहुभिरेकस्य युद्धे कदाचिद्वैमुख्यमपि सम्भवेत्, तदभावादाभिमुख्यपरमिति। अथ मांगल्ये ॥ २२ ॥ वीर्य्यादिभिर्मन इन्द्रियदेहशक्तिभिरुच्चैर्नद्धं बद्धं ग्रथितम्, तत्र हेतुः—आत्मेति ॥ २३ ॥ अहो विस्मये, कालस्य गत्या गतिः, दूरत्यया दुर्लङ्घ्या, कदाचिदसम्भाव्यस्याप्युद्भवात्, तत्राहुः—आरुरुक्षतीति। वै अपि, मुकुटेन सेवितमपि ॥ २४ ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अधर्मेणेति पदम् ॥ २२ ॥ वीर्यम् अविकृतिः बलं धारणसामर्थ्यम् ॥ २३-२४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तदेवाह—उग्रसेन इति द्वाभ्याम्। तदाज्ञापितमव्यग्रधियः अवहितचित्तास्सन्तः श्रुत्वा कुरुध्वं तन्माविलम्बितम् इणन्तमिदं माविलम्बितव्यमित्यर्थः ॥ २१ ॥ किञ्च यदीति। एकमसहायं धार्मिकञ्च बालं बहवो यूयमधर्मेण जित्वा अबध्नीत बद्धवन्त इति यत्तदहं मृष्ये सोढवानस्मि कुतः बन्धूनामैक्यकाम्यया मिथः सौहार्दकामनया अथाशु तमानीय समर्पयतेति शेषः ॥ २२ ॥ वीर्यमिति। वीर्यं युद्धे म्लान्यभावः शौर्यं तत्र स्वगृह इव प्रवेशसामर्थ्यं बलं धारणसामर्थ्यम् एभिरुन्नद्धमुच्छृङ्खलं बलदेवस्य वचो निशम्याकर्ण्य कुरवः प्रकोपिताः प्रोचुः ॥ २३ ॥ उक्तिमेवाह—अहो इति षड्भिः। दुरत्यया दुरतिक्रमणीयया कालगत्या अहो महदिदं चित्रं जातं किन्तदित्यत आह—आरुरुक्षतीति। उपानत् पादरक्षा मकुटेन भूषितं शिरो मूर्द्धानमारोढुमिच्छति उपानत्स्थानीया यदवः किरीटालङ्कृतशिरःस्थानीयान् अस्मानाज्ञापयन्तीत्येतदतिचित्रम् इति भावः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अधर्मेण अबध्नीत बन्धनमकार्ष्ट मृष्ये सहेयम् ॥ २२-२३ ॥ आरुरुक्षति आरोढुमिच्छति ॥ २४ ॥

श्रीमज्जीवगोस्वामीकृतः क्रमसन्दर्भः

गत्या गतिः। सौटादेशश्छान्दसः ॥ २४-२६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

क्षितीशा यूयं युष्माकमपीशो राजा तत्र हेतुः प्रभुः सुधर्मापारिजाताद्युपायनसमर्पका महेन्द्रादयोपि यस्याज्ञाकारिणस्तत्र के यूयं वराका इति ययातिना यदूनां राजत्वमात्रं निषिद्धं नतु राजेशत्वमिति भावः। अव्यग्रधियः सन्त इत्यन्यथा स

युष्मान् दण्डयिष्यतीति भावः ॥ २१ ॥ यद्यूयमित्युग्रसेनस्य वाक्यम् अधर्मेण जित्वेति तन्मृष्ये सहे तस्मादाशु तमानीय समर्पयेति वाक्यशेषस्याप्रयोगस्तेषां तावन्मात्रश्रवणेनापि दुर्वचने प्रवृत्तत्वात् ॥ २२ ॥ वीर्यं प्रभावः शौर्य्यमुत्साहः बलञ्च तैरुन्नद्धमुच्छ्रितम् आत्मनः शक्तेरनुरूपं समं प्रकोपिताः अर्थाद्वचसैव ॥ २३ ॥ कालगत्या कालगतिः उपानत् चर्मपादुकापि शिरस्तच्चापि मुकुटयुक्तम् ॥ २४ ॥

गूढार्थदीपिनी

वः युष्मान् ॥ २१ ॥ मृष्ये सोढवानस्मि ॥ २२ ॥ शौर्यम् उत्साहः । उन्नद्धम् उच्छृङ्खलम् ॥ २३ ॥ चित्रमाश्चर्यम् । दुरन्तया इति पाठः सम्यक् इति वंशीधरी ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यद्यूयमित्युग्रसेनाज्ञा मृष्ये सहे अथ शीघ्रं तमानीय समर्पयतेति भावः ॥ २२ ॥ वीर्यं प्रभावः शौर्यमुत्साहः बलं सत्वं तैरुद्धमुच्छृङ्खलं बलदेवस्य वचः निशम्य आत्मनः शक्तेः समं यथा भवति तथा प्रोचुः कथम्भूताः प्रकोपिताः वचसेति शेषः ।२३। आरुरुक्षति आरोढुमिच्छति उपानत्स्थानीयाः निकृष्टाः यादवाः शिरस्स्थानीयानुत्कृष्टान् अस्मान् आज्ञापयन्तीति महद्वैपरीत्यमित्यर्थः ॥ २४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सर्वदेवाधिपत्यं भगवतोग्रसेनाय दत्तमिति तदाज्ञा सर्वैरेव देवैः कर्तव्या, अतो यादवान् परित्यज्य उग्रसेनाज्ञापनमाह उग्रसेन इति । तस्याज्ञा भिन्नै राजभिः कथं कर्तव्येत्याशङ्क्याह । क्षितीशानां सर्वेषामेव राज्ञामीश इति । यद्वो युष्मान् प्रति आज्ञापयत् । आज्ञापनावाक्यमग्रे वक्तव्यम्, साम्बः सभार्यः प्रस्थापनीय इति । तद्वाक्यात् पूर्वमेव अपराधक्षमावाक्य एव क्रुद्धाः परुषभाषिणो जाता इति तदकथनम् । तदग्रे विवक्षितं कर्तव्यमिति हितोपदेशो रामस्य । मा विलम्बितमिति द्वितीयम् । अन्यथेश्वरः राज्ञां राज्ञां न सहत इति पश्चात् कृतमपि व्यर्थं स्यादिति ईश्वरवचनोल्लङ्घने अनिष्टं शीघ्रमिति ज्ञापितम् । ईश्वरत्वमाह प्रभुरिति ॥ २१ ॥ कदाचित्कृतापराधस्य दण्डं करिष्यतीत्याशङ्कायामाह । यद्यूयमिति । यद्यपि भवन्तो दण्डार्हाः, तथापि बान्धवानामन्योन्यं कलहो भविष्यतीति तदपराधं मृष्ये । ईश्वरेणापि क्रियमाणे दण्डे बन्धुभिरेव कारितमिति कदाचिद्वैमनस्थं स्यात्, तन्नाभिप्रेतम्, किन्तु ऐक्यमेवाभिप्रेतम्, शास्त्रनिषिद्धं ह्येकेन सह बहूनां युद्धम् । तथाकरणे च दण्डो राज्ञावश्यं कर्तव्यः । ततस्तमपराधमनुवदति । यूयं बहवः । तु शब्देनान्यथाकरणं निवार्यते । महास्त्रप्रयोगः पलायनं चाधर्म इति । अधर्मेण एककाले बहवो युद्धाभिज्ञा बालकं स्त्रीरक्षायां व्यग्रं खण्डशः साधननाशेन जितवन्त इति । बन्धनं चापरो दोषः ॥२२॥ एतावच्छ्रुत्वा रुष्टा जाता इत्याह वीर्येति । वीर्यं क्रियाशक्तिः, शौर्यं स्वभावः, बलं देहस्य, त्रिभिरुन्नद्धं वचः फलपर्यवसायीति । उग्रसेनो युष्मानाज्ञापयदिति वीर्येणोन्नद्धम् । क्षितीशेश इति शौर्येण । मा विलम्बितमिति बलेन । यद्यूयमिति आत्मशक्तिसमम् । कुरव इति अभिमानार्थम् । तद्धर्म एव युक्तः, न तु तदीयाः । राजानमप्रयोजकं जानन्त्येव । बलस्य परं तादृशं वचनम् यदि स्वयं वदेत्, ममाज्ञयैव एतत्कर्तव्यमिति, तदा क्रोधो न भवेत् । वस्तुत ईश्वरत्वात् अस्माकं तेषामपि भक्तत्वाविशेषेपि यद्यादवेष्वेवैश्वर्यं स्थापयित्वा अस्मास्वीशितव्यत्वं स्थापयति, तत्र हेतुर्न कुलीनत्वादिः, तथा सत्यस्मास्वेवोचितं स्यात् । साधारणलीलेयं न भवतीति न स्वेच्छया यथासुखं करणम्, भक्तार्थं हि भगवानवतीर्णः, सा च भक्तिः कारणानुरोधादुद्गता कौरवेष्वेव पुष्टा भवितुमर्हति, नाकौरवेषु । ईश्वरत्वाद्भक्तिमपि तेभ्य एव प्रयच्छतीति चेत् । न । तथा सति वैषम्यं स्यात् । अतः सिद्धामेव भक्तिमाश्रित्य भगवान् वदतीति कारणाधीनत्वं च भक्तेर्ज्ञात्वा स्वोत्कर्ष स्थापयितुं किञ्चिदुक्तवन्त इत्यर्थः । यतस्तेनैव वाक्यैः अन्तर्यामितया वा प्रकर्षेण कोपिताः ॥ २३ ॥ स्वोत्कर्षख्यापकानि पञ्चवाक्यान्याह अहो महच्चित्रमिति । देहेन्द्रियप्राणान्तःकरणात्मधर्मै उत्कर्षः क्रमान्निरूप्यते । तत्र देहोत्कर्षे वस्तुतो विचार्यमाणे यादवा धर्मरहिताः स्वेच्छाचाराः चर्मपुटप्रायाः, कौरवास्तु देवाधिष्ठिताः मुकुटाश्रयशिरस्थानीयाः । अयमर्थः परमार्थिकः । एवं सति कौरवेभ्योऽपि यादवोत्कर्षे वस्तुसामर्थ्याभावात् कालवशादेव तथा भवतीति, कालश्चेश्वरो नियन्तुमशक्य इति, पूर्वं कदाप्येवं न जातमिति, महच्चित्रं भवति । तत्र हेतुः दुरत्यया कालगत्येति । ईश्वरवाक्यात् दुरत्ययत्वम्, अन्यथा असम्बद्धवाक्यतायां न किञ्चिद्दूषणं स्यात् । वै निश्चयेन । उपानच्छिरः आरुरुक्षतीति । मुकुटैर्वस्त्रादिभिर्व्यासादिभिश्च सेवितम् ॥ २४ ॥

श्रीसुबोधिनी-सारः

क्षितीशानां राज्ञामपीशो राजाधिराजः कृष्णेन राज्यप्रदानतः चक्रवर्त्तित्वात् उग्रसेनः प्रभुः वो युष्मान् यदाज्ञापयत् तत् श्रुत्वाऽव्यग्रा धीर्बुद्धिर्येषां ते एकाग्रचित्ता यूयं कुरुध्वं माविलंबितं शीघ्रं यथा भवति तथा ॥ २१ ॥ तद्यथा बहवो यूयम्

अधर्मेणान्यायेन धार्मिकमेकं सांबं जित्वाऽबध्नीतेति यत् तत् बंधूनामैक्यकाम्यया एकत्ववांछयाहं मृष्ये सहे ॥ २२ ॥ वीर्यं प्रभावः शौर्यमुत्साहो बलं सत्त्वं तैरुन्नद्धमुत्कटम् आत्मनः स्वस्य शक्त्या समं तुल्यं बलदेवस्य वचो निशम्य श्रुत्वा प्रकोपिताः कुरवः ऊचुः ॥ २३ ॥ अहो महच्चित्रमिदं भवति किं तत्तत्राहुः दुरत्यया वर्णलोपस्यार्षत्वाद्दुरत्ययया कालगत्या उपानत् पादत्राणं कर्त्री मुकुटयोग्यं शिर आरुरुक्षति आरोढुमिच्छतीति कालगत्येति प्रथमा सोः स्थाने ड्यादेशश्छांदसः। शिश्नेतिवदिति तोषिणी तत्र कालस्य गतिर्दुरतिक्रमणीया इत्यर्थः ॥ २४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

बन्धून् कुशलिन इत्यत्र **बन्धून् धर्मिण** इति। शिवमनामयं च धर्मः। एते धर्मिण इत्यर्थः। धर्मिप्रश्नः स्वरूपतः सन्तीति प्रश्नः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तद्वचनमाह—उग्रसेन इति। उग्रसेनो यत् वो युष्मान् आज्ञापयत् तत् अव्यग्रधियः समाहितचित्ताः सन्तो मत्तः श्रुत्वा मा विलम्बितं शीघ्रं कुरुध्वमित्यन्वयः। आज्ञायां तस्य सामर्थ्यमाह—प्रभुरिति। 'वयं राजानः, अस्मदाज्ञापने कथं स समर्थ' इति चेत्तत्राह—क्षितीशेश इति ॥ २१ ॥ तद्वाक्यमाह—यदिति। यत्तु यूयं बहव एकं धार्मिकं धर्मयुद्धे वर्तमानं बहूनामेकदैवैकप्रहारे प्रवृत्तिरधर्म एव, तेन जित्वा अबध्नीत तदपराधमहं बन्धूनामैक्यकाम्यया सौहार्देच्छया मृष्ये सोढवानस्मि। अथानन्तरमाशु तमानीय समर्पयतेति शेषः ॥ २२ ॥ बलदेवस्य वचो निशम्य तेन वाक्येन प्रकोपिताः कुरव ऊचुः। 'किमित्येवमुक्तवान्, येन तेषां कोपो जातः' इत्यपेक्षायामाह—आत्मनः शक्तेः सामर्थ्यस्य समं योग्यमिति। एतदेव स्पष्टयति—वीर्यं युद्धे म्लान्यभावः, शौर्यं तत्रोत्साहः, बलं शरीरसामर्थ्यम्, एभिरुन्नद्धमुच्छृङ्खलमिति। तथाच तेषां कोपेऽपि स्वस्य भयशङ्काभावात् तथोक्तवानित्याशयः ॥ २३ ॥ तदुक्तिमेवाह—अहो इति षड्भिः। दुरत्यया दुरतिक्रमणीयया कालगत्या अहो आश्चर्यमिदं महच्चित्रं वैपरीत्यं जातम्। 'किं तत्' इत्यपेक्षायामाह—उपानत् पादरक्षा मुकुटेन सेवितं शिरो मूर्धानमारुरुक्षति आरोढुमिच्छति। उपानत्स्थानीया यादवाः किरीटालंकृतशिरःस्थानीयान् अस्मानाज्ञापयन्तीति एतच्चित्रमित्याशयः ॥ २४ ॥

अन्वितार्थप्रकाशिका

उग्रसेन इति। क्षितीशानामीशः प्रभुः उग्रसेनो यत् वो युष्मान् आज्ञापयत् तत् अव्यग्रधियः समाहितचित्ताः सन्तो मत्तः श्रुत्वा मा विलम्बितं शीघ्रं कुरुध्वम् ॥ २१ ॥ यदिति। उग्रसेनवाक्यम् यत्तु यूयं बहव एकं धार्मिकं धर्मयुद्धे वर्त्तमानं बहुनामेकदैवैकप्रहारे प्रवृत्तिरधर्म एव तेन जित्वा अबध्नीत तदपराधमहं बन्धूनामैक्यकाम्यया सौहार्देच्छया मृष्ये सोढवानस्मि। अथानन्तरमाशु तमानीय समर्पयतेति शेषः ॥ २२ ॥ वीर्येति। वीर्यं युद्धे ग्लान्यभावः शौर्यं तत्रोत्साहः बलं शरीरसमर्थ्यं तैरुन्नद्धमुच्छृङ्खलम् आत्मशक्तेः समं योग्यं बलदेवस्य वचो निशम्य तेन वाक्येन प्रकोपिताः कुरव ऊचुः ॥ २३ ॥ अहो इति। अहो कालगत्या हेतुना इदं महच्चित्रं जातं यतः सा कालगतिः दुरत्यया दुरतिक्रमा अस्ति यतः उपानत् चर्ममयी पादरक्षी मुकुटेन सेवितं शिरो मूर्धानमारुरुक्षति आरोढुमिच्छति। उपानह इव यादवाः शिरांसि इवास्मानाज्ञापयन्ति। यद्वा। कालगत्या कालगतिः "सुपां सुलुक्" इति सोर्ड्यादेशः। यद्वा। कालगत्या हेतुना दुरत्यया उपानदिति ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यद्यस्मात् वो युष्मान् ॥ २१ ॥ राम उग्रसेनवाक्यमाह यद्द्वयमिति मृष्ये सहे। अतस्तंकुमारं तां वधूं च शीघ्रं समानीयार्पयतेति भावः ॥ २२ ॥ वीर्यं पराक्रमः शौर्यं युद्धोत्साहश्च बलं सामर्थ्यं च तैः उन्नद्धं उद्धतं आत्मशक्तेः समं योग्यं ॥ २३ ॥ दुरत्यया दुरत्ययया अत्र तृतीयार्थे प्रथमा आर्ष उपानत्। पादत्रणं मुकुटसेवितं शिरोमस्तकं आरुरुक्षति आरोढुमिच्छति यया तथा अतितुच्छाः यादवाः अस्मानाज्ञापयंतीत्यर्थः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह उग्रसेन इति द्वाभ्याम्। उग्रसेन इति ॥ क्षितीशेशः, प्रभुः उग्रसेनः, वो युष्मान्, यत्, आज्ञापयत्। तत् श्रुत्वा, अव्यग्रधियः अवहितचित्ताः सन्तः, कुरुध्वं, मा विलम्बितं इदं मा विलम्बितव्यमित्यर्थः ॥ २१ ॥ यदिति ॥ बहवः यूयं तु, एकमसहायं, धार्मिकं च बालं, अधर्मेण जित्वा, अबध्नीत यत्, तत्, अथ कात्स्न्र्येन, बन्धूनां ऐक्यकाम्यया मिथः सौहार्द्दकामनया, मृष्ये सोढवानस्मि। अतः आशु, तमानीय समर्पयतेति शेषः ॥ २२ ॥ वीर्येति ॥ वीर्यं युद्धे ग्लान्यभावश्च शौर्यं युद्धे स्वगृह इव प्रवेशसामर्थ्यं च बलं धारणसामर्थ्यं च तैरुन्नद्धमुच्छृङ्खलं, केचित्तु वीर्यं प्रभावः शौर्यमुत्साहः बलं सत्त्वमित्याहुः। आत्मशक्तिसमं, बलदेवस्य वचः, निशम्याकर्ण्यः, कुरवः प्रकोपिताः सन्तः, ऊचुः ॥ २३ ॥ उक्तिमेवाह ॥ अहो, इति ॥ अहो

इदं महत् चित्रं, कालगत्या कालगतिरपि, दुरत्यया दुरतिक्रमणीया। हननं हत्येतिवद्गमनं गत्येति प्रथमान्तम्। स्त्रियां 'यजां भावे' इति क्यपि तत् सिद्धेः। केचित्तु गमनं गतिरिति ततस्तृतीयैकवचने गत्येति निश्चित्य दुरन्तयेति तृतीयान्तमामनन्ति, सा तेषां भ्रान्तिरेव। केचित्तु तृतीयार्थे आर्षी प्रथमेत्याहुः। किं कालगत्या दुरत्ययत्वं तत्राह। मुकुटसेवितं शिरः, उपानत्पादत्राणं, आरुरुक्षति आरोढुमिच्छति वै ॥ २४ ॥

कृष्णप्रिया

राजाधिराज महाराज उग्रसेन ने आप लोगों को एक आज्ञा प्रदान किया है कि आप लोग उसको एकाग्रता और सावधानी से सुने और विना विलंब उसका पालन करे ॥ २१ ॥ आप सावधानी से सुनिए—महाराज उग्रसेन जी ने कहा है कि हम सब जानते हैं कि आपलोगों ने समूह में मिलकर अधर्म से, अनीति से अकेले धर्मनिष्ठ श्री साम्ब को पराजित करके बंदी बनाया है, यह सब हम इसलिए सह लेते हैं कि हम सब स्वजनों में परस्पर फूट-फाट न होने पाये और आपस की एकता बनी रहे ॥ २२ ॥ महाराज परीक्षित श्री बलभद्र जी की वाणी, वीरता, शौर्य और बल के उत्कर्ष से परिपूर्ण और उनकी शक्ति के अनुरुप ही थी, यह बात सुनकर कौरव क्रोध से तित्र-मित्र उठे और आपस में कहने लगे कि यह तो अत्यन्त आश्चर्य की बात है, सचमुच काल की गति को कोई रोक नहीं सकता इसलिए तो आज चरणों की जूती पर शिर पर चढ़ना चाहती है के जो स्थान श्रेष्ठ मुकुट से सुशोभित हैं ॥ २३–२४ ॥

एते [1]यौनेन सम्बद्धाः सहशय्यासनाशनाः। वृष्णयस्तुल्यतां नीता अस्मद्दत्तनृपासनाः ॥ २५ ॥
चामरव्यजने शङ्खमातपत्रं च पाण्डुरम्। किरीटमासनं [2]शय्यां भुञ्जन्त्यस्मदुपेक्षया ॥ २६ ॥
अलं यदूनां नरदेवलाञ्छनै[3]र्दातुः प्रतीपैः फणिनामिवामृतम्[4]।
[5]ये नः प्रसादोपचिता हि यादवा आज्ञापयन्त्यद्य गतत्रपा बत ॥ २७ ॥
कथमिन्द्रोऽपि कुरुभिर्भीष्मद्रोणार्जुनादिभिः। अदत्तमवरुन्धीत[6] सिंहग्रस्तमिवोरणः[7] ॥ २८ ॥

कर्दमक्षमा

अन्वयः—एते, वृष्णयः, सहशय्यासनाशनाः, यौनेन, सम्बद्धाः, अस्मद्दत्तनृपासनाः, तुल्यताम्, नीताः ॥ २५ ॥ चामरे, व्यजने, शङ्खम्, आपत्रम्, च, पाण्डुरम्, किरीटम्, आसनम्, शैय्याम्, अस्मदुपेक्षया, भुञ्जन्ति ॥ २६ ॥ फणिनाम्, अमृतम्, दातुः, प्रतीपैः, इव, यदूनाम्, नरदेवलाञ्छनैः, अलम्, ये, यादवाः, वः, प्रसादोपचिताः, अद्य, गतत्रपाः, आज्ञापयन्ति, बत ॥ २७ ॥ कथम्, इन्द्रः, अपि, भीष्मद्रोणार्जुनादिभिः, कुरुभिः, अदत्तम्, सिंहग्रस्तम्, उरणः, इव, अवरुन्धीत ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्यैव प्रपंच एत इति चतुर्भिः। यौनेन पृथाया विवाहेन ॥२५॥ किंच। चामरव्यजने इति। भुंजंत्युपभुंजत इत्यर्थः। अस्मदुपेक्षयाऽस्माकमनाग्रहेण ॥ २६ ॥ अलमिति। अतः परं तान्यपहरिष्याम इत्यर्थः ॥ २७ ॥ अवरुंधीत स्वीकुर्यात्। उरणो मेषः ॥ २८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एते यदवः। ततः किं तत्राह—सहेत्यादि ॥ २५ ॥ न केवलं सिंहासनादिभिरेते मानिता अपि तु राजचिह्नैरपीत्याह—किञ्चेति। इत्यर्थ इति—भुंजंतीति परस्मैपदमार्षम् "भुजोऽनवने" इत्यात्मनेपदविधानादिति भावः। तीर्थस्तु—भुंजंति भजंति अन्योपद्रवमंतरेण रक्षंतीति पालनार्थमभिप्रेत्य परस्मैपदमेवोचितमित्याह। अनाग्रहेणौदासीन्येन ॥ २६ ॥ नैते राजचिह्नार्हा इत्याह—अलमिति। अतः परम् अद्यतनात्परम्। इत्यर्थ इति—मूषिकसिंहन्यायेन पूर्वसदृशान्करिष्याम अर्थान्नृपचिह्नान्येतेभ्य उत्तारयिष्याम इति भावः। दातुरस्मद्वंशस्य। प्रतीपैर्विरोधिभिः। दृष्टांतः—सर्पदत्तममृतोपलक्षितं दुग्धादिरसं यथा विषात्मना परिणतं दातुरेव सर्पस्योपकाराग्रहीतृत्वाद्दंशनद्वारा मृतिप्रदं तथैतान्यपीत्यर्थः। बत खेदे ॥ २७ ॥ अदत्तमप्रत्तम्। अस्माकमिद्रोऽनुकूलोऽस्तीति यदहं कुरुध्वे तत्रापि रे यदवः श्रृणुध्वमित्याह—कथमिति। अवरुन्धीत ग्रहीतुं शक्नुयात्। उरण इति—यदीन्द्रमपि मेषमिव पश्यामस्तत्र यूयं के इति भावः ॥ २८ ॥

---

[1] यौनेय–विच.। [2] मह्यां–विज.। [3] दातृ–विज.; दातुः प्रतीपा चरितोद्धतात्मनाम् च. पु. टि.। [4] मृतैः–विज.। [5] येऽस्मृत–श्रीजर. वंशी. जीव. विज. विश्व.; ये नः–बीर। [6] मुपयुञ्जीत–वीर.। [7] नातः तरंह्युग्रसेनो राजा भवितु मर्हति–च. पु. टि.।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एत इति । साक्षाद्बलदेवोद्देशेन सम्बद्धाः सम्बन्धं प्रापिताः अतः सह एकत्र शय्यादयो येषां ते ॥ २५ ॥ चामरे एव व्यजने ॥ २६ ॥ दातॄणामस्माकं प्रतीपैः प्रतिकूलैः अमृतं क्षीरं तैरित्यर्थः भिसः सुभावोपि छान्दसः नोऽस्माकं प्रसादेनानुग्रहेणै-वोपचितां वृद्धिं प्राप्ताः हि प्रसिद्धौ ॥ २७ ॥ कथमपि तैरर्जुनस्य साहित्याभावेऽपि ग्रहणमात्मनो गौरवार्थम् ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एत इति साक्षाद्वर्त्तमान-श्रीबलदेवोद्देशेन, किंवा अतिदीना इत्यर्थः । सम्बन्धाः सम्बन्धं प्राप्ताः, अतः सह समाना एकत्र वा शय्यादयो येषां ते, किञ्च, अस्माभिर्दत्तं नृपासनं येभ्यस्ते, अराजत्वेन तेषां तदभावात् । एवमात्मतुल्यतां प्रापिताः ॥ २५ ॥ अत एव चामरादीनि राजार्हद्रव्याणि भुञ्जते, चामरे एव व्यजने, न चायोग्यत्वेनास्माभिस्तैर्वाच्छिद्यमानेषु सत्सु भोक्तुं शक्नुवन्तीत्याहुः—अस्मदिति ॥ २६ ॥ दातॄणामस्माकं प्रतीपैः प्रतिकूलैः सद्द्रव्यदानेन हितयोग्येऽपि । प्रतिकूल-तायां दृष्टान्तः—क्षणिनामिति । अमृतं क्षीरम्, नोऽस्माकं प्रसादेनानुग्रहेणैवोपचिता वृद्धिं प्राप्ताः, हि अपि, यादवा अपि । अद्येति प्राक् कदाप्यज्ञापनादुगतत्रपाः, अनाज्ञाप्येषु अप्याज्ञापनात्, वत खेदे, अतो विज्ञापयन्तीत्येवं वक्तुमर्हन्तीति भावः ॥२७॥ ननु अवश्यदेयायाः कन्यायाः क्षत्रियत्वेन हरणात् कथमेतावत् वैरस्यमुत्थाप्यते ? सत्यम्, अस्माकमसम्मतया बलाद्धरणान्मान-हानिः स्यादित्याशयेन, यद्वा, न चास्माभिरदीयमानं न ते किञ्चिद्भोक्तुं शक्नुवन्तीत्याहुः—कथमिति । आदिशब्दात् कर्णाद-यस्तैः, अर्जुनस्य साहित्याभावेऽपि ग्रहणं ज्ञातित्वेनैक्यात्, किंवा तेनाभिन्नतयात्मनो गौरवार्थम् ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

यौनेन विवाहेन ॥ २५-३० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एतदेव प्रपञ्चयति—चतुर्भिः । एते वृष्णयः यौनेन पृथाविवाहेन सम्बद्धाः सम्बन्धिनः सम्बन्धशब्दोत्रार्श आद्यजन्तः अतः सहास्माभिः सह शय्यासनभोजनानि येषां तेऽस्माभिर्दत्तं नृपासनं येषां ते अत एव तुल्यतामस्माभिः साम्यं प्रापिताः वस्तुतो न समा इति भावः ॥ २५ ॥ किञ्च, चामरेति । अस्मदुपेक्षया हेतुभूतया चामरादीन् भुञ्जते उपयुञ्जत इत्यर्थः । तत्रासनं नृपासनम् ॥ २६ ॥ अलमिति । यदूनां नरदेवलाञ्छनैः चामरादिभिरलमतःपरं तान्यपहरिष्याम इति भावः । तत्र हेतुत्वेन तानि विशिषन्ति दातुः प्रतीपैरिति दातॄणमस्काकमेव प्रतीपैः प्रतिकूलैः तत्र दृष्टान्तः फणिनामिवामृतमिति । सर्पाणां पोषणाय यद्दत्तममृतं क्षीरं दातुरेव प्रतीपं तद्वत् एतदेवदार्ष्टान्तिकेऽनुगमयति–य इति । ये यादवा अस्मदनुग्रहेणोपचिता एधिता नोऽस्माने-वाधुना आज्ञापयन्ति अहो बतेति निर्लज्जाः खलु यद्वा गतत्रपाः सन्त आज्ञापयन्ति वतेत्याश्चर्ये ॥ २७ ॥ कथमिति । इन्द्रोऽपि इन्द्रोऽपि भीष्मादिभिः कुरुभिरदत्तं कथम् उपयुञ्जीत सिंहग्रस्तम् उरणो मेष इव ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

यौनेयेन योनिनिमित्तेन सम्बन्धो येषां ते तथा ततः किमत्राह—सह इति ॥ २५ ॥ अस्मद्दत्तेत्युक्तं विवृणोति-चामरेति । मह्यं महनीयम् आसनं भुञ्जन्ति भजन्ति अन्योपद्रवमन्तरेण रक्षन्ति "भुजोनवने" इति पाणिनिः ॥ २६ ॥ दातॄणाम-स्माकं प्रतीपैः विरोधिभिः दत्तैरमृतैः क्षीरादिरसः विषात्मना परिणतैः दातॄणां मरणप्रदत्वेन प्रतीपैः ॥ २७ ॥ अवरुन्धीत प्राप्नोति सिंहग्रस्त उरणः अविर्यथा केवलं न गृह्णाति सिंहग्रस्तमिति पाठे केवलमादातुं न शक्तः ॥ २८ ॥

श्रीमज्जीगोस्वामिकृतः क्रमसन्दर्भः

अमृतं क्षीरं तैरित्यर्थः ॥ २७-५४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एते यौनेन पृथाविवाहेनेति श्यालकभावो व्यञ्जितः ॥२५॥ भुञ्जन्ति अस्माकमुपेक्षयेति अपेक्षालक्षण आदरोऽस्माक-मेषु न सम्भवत्येव किन्तूपेक्षालक्षण अनादर एवास्ति हीनकुलत्वेनादृतत्वादेतदौद्धत्यं वयमुपेक्षामहे इति भावः ॥ २६ ॥ अतः परमेषामपराधोपेक्षाऽनुचितैवेत्याह—अलमिति । तेन एतेभ्यो नृपलाञ्छनान्युत्तारयिष्याम इति भावः ॥ २७ ॥ अस्माकमिन्द्रः खल्वनुकूलोस्तीति यदहङ्कुरुध्वे तत्रापि रे यदवः शृणुध्वमित्याह—कथमिति । अवरुन्धीत गृहीतुं शक्नुयात् उरणो मेष इति यत्रेन्द्रमपि मेषमिव पश्यामस्तत्र यूयं के इति भावः ॥ २८ ॥

गूढार्थदीपिनी

एते यदवः। **यौनेन** कुन्तीविवाहेन। सहैव शय्यादीनि **येषां** ते ॥ २५ ॥ उपेक्षया अनुग्रहेणेत्यर्थः ॥ २६ ॥ **यदूनां** लाञ्छनैः राजचिह्नैः अलं न किञ्चित् प्रयोजनम्। अतः परं तानि अपहर्तव्यानीत्यर्थः। दातुरेव प्रतीपैः प्रतिकूलैः सर्पाणाम् अमृतं दुग्धमिव ये उपचिताः समृद्धाः अस्मान् आज्ञापयन्ति ॥ २७ ॥ **कथम्** अदत्तम् अवरुन्धीत गृहीतुं शक्नुयात्। **उरणो** मेषः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यादवानां निकृष्टत्वं कौरवाणामुत्कृष्टत्वमाहुः—एते इति चतुर्भिः **यौनेन** कुन्त्यादिविवाहेन ॥ २५ ॥ **भुञ्जन्ति** उपयुञ्जत इत्यर्थः ॥ २६ ॥ अलमिति अधुना नृपलाञ्छनान्यपहर्तव्यानीति भावः ॥ २७ ॥ **अवरुन्धीत** उपयुञ्जीत ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ऐन्द्रियकव्यवहारे विवाहशयनादौ हीनत्वमाह **एते यौनेन संबद्धा** इति। यूनो भावो विवाहो यौनम्, तेन संबद्धाः। पूर्वमेकोत्पक्षा अपि व्यवहारे हीना इति त्यक्त्वा अपि पुनः यौनेन संबद्धा इत्यर्थः। पृथादयः स्त्रियः तेभ्यः समानीता इति। ननु तथापि 'स्त्रीरत्नं दुष्कुलादपी'ति न्यायेन न समानयनमात्रेण तुल्यता भवतीति चेत्, तत्राह **सहशय्यासनाशना** इति। शयनमासनं भोजनं चेत् सह, येन सह तत्तुल्य एव भवतीति स्थितिः। अत एव **वृष्णयस्तुल्यतां नीताः**। अनेन अज्ञानान्निषिद्धाचरणे प्रायश्चित्तं कर्तव्यमिति पक्षो निवारितः। एवं कुलधर्मविचारेण स्वस्योत्कर्षमुक्त्वा ऐश्वर्यविचारेणाप्युत्कर्षमाह **अस्मद्दत्तनृपासना** इति। पूर्वं हि ययातिना पूरव एव राज्यं दत्तम्, अन्ये ज्येष्ठा अपि तदधीनाः ॥ २५ ॥ एवं साधनानि स्वाधीनान्युक्त्वा तेषां भोगोऽप्यस्मदधीन एवेत्याह **चामरव्यजने** इति। चामरव्यजने परितः। शङ्खोऽग्रे। आतपत्रं पश्चात्, तत्रापि **पाण्डुरं** श्वेतम्। **किरीटमुपरि**। **आसनमधः**। **शय्या** निद्रावस्थायाम्। एतानि सप्तमहाराजचिह्नानि अन्येषामयुक्तानि राजभिरवश्यं अन्यत्र दृष्टानि निषेद्धव्यानि। तथापि तुल्यतां नीता इति राजभिरस्माभिरुपेक्षितानि भुञ्जते। भोगः प्राणधर्म इति तदुत्कर्षो निरूपितः ॥ २६ ॥ आज्ञापनादिरन्तःकरणधर्म इति तदसहमानाः तन्निषेधपूर्वकं तदपकर्षमाहुः **अलं यदूनामिति**। नरदेवलाञ्छनानि पूर्वोक्तानि उपेक्षाविषयाणि। **अलमिति** निषेधार्थे। नरदेवलाञ्छनैरलम्। अतःपरं पूर्यताम्। अग्रे न स्थापनीयमित्यर्थः। दत्तापहारे हेतुः **दातुः प्रतीपैरिति**। अज्ञानाद्दत्तं स्वानिष्टसम्पादकत्वे निवारणीयमित्यत्र दृष्टान्तमाह **फणिनामिवामृतमिति**। 'सर्पस्य हि पयःपोषः पोषकस्याप्यनर्थकृ'दिति। स हि मत्ततां सम्पादयति, पश्चादन्धः सन् पोषकमपि भक्षयति। तदस्मासु जातमित्याह। ये यादवाः नः प्रसादोपचिताः, अद्य गतत्रपाः सन्तः, अस्मानेवाज्ञापयन्तीति। **बतेति** खेदे ॥ २७ ॥ वस्तुविचारेणात्मधर्ममाश्रित्याहुः **कथमिन्द्रोऽपीति**। भीष्मो हि कालकामपरशुरामादीनां जेता। ततोऽप्यधिको द्रोणः विद्यया तुल्योऽपि ब्राह्मण्यादधिकः। ततोऽप्यर्जुनः तच्छिष्योऽपि महादेवादिप्रसादैरुपचितः। एते त्रय आधिभौतिकादिरूपाः आदिभूता येषां तैः **अदत्तं** इन्द्रोऽपि कथमवरुन्धीत। इन्द्रो वस्तुतः सर्वाधिपतिः, तथाप्येते अधिकृताः, न हि देहादिषु प्रतिकूलेषु ईश्वरोऽपि भोगं प्राप्तुमर्हति। ननु स्वभागः, तेषां का दानापेक्षेत्याशङ्क्य दृष्टान्तमाह **सिंहग्रस्तमिवोरण** इति। यद्यप्युरणस्याल्पमेषस्य पुत्रो भार्या वा भागो भवति, तथापि सिंहग्रस्तः तत्कृपयैव प्राप्यते, तथैव साम्बः सभार्योऽस्मदवरुद्ध इत्यर्थः ॥ २८ ॥

श्रीसुबोधिनी–सारः

यौनेन योनिसंबंधेन संबद्धाः पृथाविवाहात् सह शय्याऽऽसनम् अशनं भोजनं येषां तेऽस्माभिर्दत्तंनृपासनं येभ्यस्ते एते वृष्णयस्तुल्यतां साम्यं नीताः ॥ २५ ॥ चामरं व्यजनं शंखं पांडुरमातपत्रं छत्रं किरीटम् आसनम् शय्यां चास्माकमुपेक्षया भुंजंति उपभुंजते ॥ २६ ॥ फणिनां सर्पाणाममृतं पय इव दातुः प्रतीपैः दुःखंकरैर्नरदेवस्य राज्ञो लांछनैः चिह्नैः चामरादिभिर्यदूनामलं पर्याप्तम् अस्माकं प्रसादेनानुग्रहेणोपचिता ये हि यादवा अद्य इदानीं गता त्रपा लज्जा येषां तेऽस्मानाज्ञापयंति बत खेदे ॥ २७ ॥ न च स्वबलेनैतत्संपादितमिति वाच्यं भीष्मद्रोणार्जुनादिभिः कुरुभिरदत्तं राज्यभागम् इंद्रोऽपि कथं प्राप्नुयात् भुंजीत वा सिंहेन ग्रस्तं बलिमात्मसात्कर्तुमुरणो मेष इव ॥ २८ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतदेव प्रपञ्चयति—एत इति चतुर्भिः। **एते** वृष्णयो **यौनेन** कुन्तीविवाहेन सम्बद्धाः, अतोऽस्माभिः स्वतुल्यतां नीताः, अतोऽस्मदुपेक्षया चामरादीन् राजचिह्नानि भुञ्जन्त उपभुञ्जत इति द्वयोरन्वयः। तुल्यतानयनमेव स्पष्टयन्ति—अस्माभिः सह शय्या शयनम्, आसनं उपवेशनम्, अशनं भोजनं च येषां त इति। अस्माभिरेव दत्तं नृपासनं येषां ते इति ॥ २५-२६ ॥ **यदूनां** नरदेवलाञ्छनैश्चामरादिभिरलं पूर्णम्। अतःपरं तान्यपहरणीयान्येवेत्याशयः। तत्र हेतुमाहुः—दातुरस्मदादेरेव प्रतीपैः प्रति-

कूलैरिति । तत्र दृष्टान्तमाहुः—फणिनां सर्पाणां पोषणाय कृपया दत्तममृतं यथा दातुरेव प्रतीपं भवति तद्वदिति । स्वप्रातिकूल्यमेव स्पष्टयन्ति—ये यादवा नोऽस्माकं प्रसादेनोपचिताः समृद्धा अस्मानेव गतत्रपा निर्लज्जाः सन्तः आज्ञापयन्ति । हि अवधारणे । बतेत्याश्चर्ये ॥ २७ ॥ स्वोत्कर्षमाहुः—कथमिति । इन्द्रोपि भीष्मादिभिः कुरुभिरदत्तं कथमवरुन्धीत उपयुञ्जीत भोक्तुं समर्थो भवेत् ? तत्र दृष्टान्तमाह–सिंहेन ग्रस्तं स्वीकृतं वस्तु यथा तद्दानं विना उरणो मेषो भोक्तुं न शक्नोति तथेति ॥२८॥

अन्वितार्थप्रकाशिका

अस्यैव प्रपञ्चः—एते इति ॥ एते वृष्णयो यौनेन कुन्तीविवाहेन सम्बद्धा अस्माभिः सह शय्या शयनम् आसनम् उपवेशनम् अशनं भोजनम् च येषां ते अस्माभिरेव दत्तं नृपासनम् येभ्यस्ते अतोऽस्माभिः स्वतुल्यतां नीताः ॥ २५ ॥ चामरेति ॥ अतोऽस्मदुपेक्षया अपहरणेच्छाया अभावेन चामरे व्यजने शङ्खं पाण्डुरमातपत्रं चेत्यादिराजचिह्नानि भुजन्त उपभुञ्जते ॥ २६ ॥ अलमिति ॥ दातुरस्मदादेरेव प्रतीपैः प्रतिकूलैः यदूनां नरदेवलाञ्छनैश्चामरादिभिरलं पूर्णम् अतः परं तान्यपहरणीयान्येवेत्याशयः । यथा फणिनां सर्पाणां पोषणाय कृपया दत्तममृतं यथा दातुरेव प्रतीपं भवति तद्वत् ये यादवा नोऽस्माकं प्रसादेनोपचिताः समृद्धाः गतत्रपा निर्लज्जाः सन्तः अस्मानेव आज्ञापयन्ति ॥ २७ ॥ कथमिति ॥ इन्द्रोऽपि भीष्मादिभिः कुरुभिरदत्तं कथमवरुन्धीत उपयुञ्जीत भोक्तुं समर्थो भवेत् । यथा सिंहेन ग्रस्तं स्वीकृतं वस्तु यथा तद्दानं विना उरणो मेषो भोक्तुं न शक्नोति तथा यत्रेन्द्रोऽपि मेषायते तत्र के वराका यादवा इति भावः ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एतदेव विवृणोति चतुर्भिः एत इति एते यादवाः । यौनेन कुंत्याः विवाहेन संबद्धाः । अस्माभिः । सह संबंधं प्राप्ताः । अतः ॥ २५ ॥ चामररूपे द्वे व्यजने एतदादि राज्यपरिच्छदान् । अस्मदुपेक्षया अस्माकमनाग्रहेण भुंजंति भुंजते ॥ २६ ॥ दातृणामस्माकं प्रतीपैरननुकूलैः अलं अतःपरं राजचिह्नानि तेभ्यो गृह्णीम इत्यर्थः ॥ २७ ॥ अदत्तं कथमरुंधीत गृह्णीयात् उरणो मेषः ॥ २८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एत इति ॥ एते वृष्णयः, यौनेन पृथाया विवाहेन, संबद्धाः संबन्धिनः, अतः सहास्माभिः सह, शय्यासनाशनानि येषां ते, अस्माभिर्दत्तं नृपासनं येषां तथाभूताः सन्तः, अस्माभिरेवेति शेषः । तुल्यतां नीताः, वस्तुत एते नास्मत्समा इति भावः ॥ २५ ॥ किं च ॥ चामरेति ॥ चामरव्यजने, शङ्खं, पाण्डुरं श्वेतं, आतपत्रं, छत्रं, किरीटं, आसनं नृपासनं, शय्यां च अस्मदुपेक्षया हेतुभूतया, अस्मदनाग्रहेणेत्यर्थः । भुञ्जन्ति उपभुञ्जते इत्यर्थः ॥ २६ ॥ अलमिति ॥ फणिनां सर्पाणां, अमृतं क्षीरं इव, सर्पाणां पोषणाय दत्तं दुग्धं दातुरेव यद्वत् प्रतीपं तद्वदित्यर्थः । दातुर्दातृणामस्माकमित्यर्थः । प्रतीपैः प्रतिकूलैः, नरदेवलाञ्छनैश्छत्रचामरादिभिः, यदूनां अलं, अतः परं तान्यपहरिष्याम इति भावः । हि यतः, नः अस्माकं, प्रसादोऽनुग्रहः तेन उपचिता एधिताः, ये यादवाः, ते बत इति खेदे । अद्य, गतत्रपा निर्लज्जाः सन्तः, आज्ञापयन्ति । एधयितृभिरस्माभिराज्ञां कारयन्त्यहो दैवविचित्रतां तु पश्यतेति भावः ॥ २७ ॥ कथमिति ॥ इन्द्रोऽपि, भीष्मद्रोणार्जुनादिभिरस्माभिः, कुरुभिः, अदत्तं सिंहग्रस्तं केवलं, उरणो मेषः इव, कथं अवरुन्धीत स्वीकुर्यात् ॥ २८ ॥

कृष्णप्रिया

इन यादवों के साथ किसी भी प्रकार हम लोगों ने विवाह का नाता बना दिया ये हमारे साथ शयन-बैठना एवं एक पंक्ति में सह भोजन करने लगे । अधिक क्या कहा जाय हमलोगों ने हि इन्हें राज-सिंहासन देकर राजा बनाया और अपने समान बना लिया ॥ २५ ॥ ये यदुवंशी हमारी रहम दृष्टि से ही चंवर, पंखा, शंख और छत्र, मुकुट राजसिंहासन और राजोचित शैया इत्यादि का उपयोग कर सकते हैं । अन्यथा उनके भाग्य में उन सब राजोचित चिह्नों का संभव ही कहाँ ॥ २६ ॥ बहुत हो चुका अब यादवों के लिए राजचिह्न रहने की कोई आवश्यकता नहीं है, उन लोगों से सब चिह्नों को छिन लेना चाहिए । सर्प को दूध पीलाना वह दूध पिलाने वाले के लिए विघातक हो जाता है, वैसे हि हमारे समर्पित राजचिह्नों को लेकर यादव हमसे हि विरोध बन चुके हैं । इस बात में कोई संदेह नही, हमारे अनुग्रह से हि इनकी इतनी तरक्की हुई । अब ये लज्जाशून्य होकर हमपर आदेश चलाना चाहते हैं बड़ी शर्म की बात है कि हम मुख बंध करके सह रहे हैं ॥ २७ ॥ औरों की बात छोड़िये स्वयं देवराज इन्द्र भी यदि भीष्म, द्रोण एवं अर्जुन आदि कौरव वीर यदि समर्पित न करे तो किसी वस्तु का उपभोग नहीं कर सके तो औरों के लिए तो क्या कहा जाय । जैसे सिंह का भाग कभी छोटा सा भेड़ा नहीं छीन सकता है तो दूसरे के लिए तो क्या कहना ॥ २८ ॥

नन्वेवं शति यादवाः किमिति निवारिता इत्याशङ्क्य तथा सति वैषम्यं स्यात्, न दण्डः, नहि शत्रुजयादिर्दण्डी भवति, अतो हितकारिण एव वयमिति पूर्वोपक्रान्तां स्वक्रियामाह अहो इति । शान्तिकर्तरि प्रकोपश्चाश्चर्यम् । यदवः सर्वे सुसंरब्धाः मारणोन्मुखाः समर्थाश्च । नन्वदृष्टवशादुर्वरिताः, किं तव पौरुषमिति चेत्, तत्राह **कृष्ण च कुपितमिति** । भगवद्विचारमात्रेणैव सर्वं सिध्यति, किं पुनः कुपिते । कृष्ण इति भक्ताधीनः, कलात्मा वा । तेनादृष्टादयस्तदनुगुणा एवेति तेषां सर्वमेव प्रतिकूलम् । तान् सर्वान् शनैः सान्त्वयित्व न तु बलात्, च स्वसामर्थ्यप्रकाशनेन, तथाकरणे हेतुः अहमिति । अहङ्कारादेते बन्धनं कृतवन्त इति तदधिष्ठाता चाहमिति तेषां शान्तिमेव वाञ्छन्निहागतः ॥ ३२ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । हे भरतर्षभ त्रिमदोद्धतास्ते कौरवा दुर्वाच्यं परुषं वचो राममाश्राव्य श्रावयित्वाऽसभ्याः सभानर्हा दुष्टाः पुरं हस्तिनापुरमाविशन् विनापि प्रत्ययं क्वचित्पूर्वोत्तरपदलोपविधानात् ॥ २९ ॥ कुरूणां बहुत्वेऽणो लुक् दौःशील्यं कुशीलतां दृष्ट्वाऽवाच्यानि वक्तुमयोग्यानि कुवचनानि श्रुत्वाऽच्युतो रामः कोपेन संरब्धो व्याप्तो दुष्प्रेक्ष्यो द्रष्टुमशक्यो मुहुरसकृत्प्रहसन् सन्नवोचत् ॥ ३० ॥ नानामदैरुन्नद्धा असाधवो दुष्टाः शांतिं नेच्छंति नूनं निश्चयेन तेषां प्रशमः शांतिकर्त्ता दंडो हि नान्यः पशूनां लगुडो यथा ॥ ३१ ॥ आत्मनि शोचति सुसंरब्धान् कुपितान् यदून् कुपितं कृष्णं च शनैः सांत्वयित्वा एतेषां शममिच्छन्नहमिहागतोस्मि ॥ ३२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे भरतर्षभ भरतकुलश्रेष्ठ ! कुरव एवं रामं प्रति दुर्वाच्यं परुषं वाक्यं श्रावयित्वा स्वपुरमाविशन् । तान्निन्दति—असभ्याः ते सभायोग्या न भवन्ति । तत्र हेतुमाह—जन्मेति । सत्कुलजन्मना, बन्धुभिः, श्रीभिः सम्पद्भिश्च उन्नद्ध उत्कटो मदो येषां ते ॥ २९ ॥ कुरूणां दौःशील्यं दुष्टत्वं दृष्ट्वा अवाच्यानि दुर्वचनानि च श्रुत्वा कोपेन संरब्धः व्याप्तः । तत्र हेतुमाह—अच्युतः पूर्णपराक्रमः । अतएव दुष्प्रेक्ष्यः भयंकरस्वरूपो रामो मुहुः पुनःपुनः प्रकर्षेण हसन् अवोचत् ॥ ३० ॥ तदुक्तिमेवाह—नूनमिति । नानाधनाभिजनादिमदैरुन्नद्धा उत्पथगामिनः शान्तिं नेच्छन्ति । तेषां हि दण्ड एव प्रशमः शान्तिकरः, न सान्त्वनम् । नूनं निश्चितमेव हि प्रसिद्धं च लोके । तत्र दृष्टान्तमाह—पशूनामुद्धतानामुद्वृत्तानां लकुटो यथा मार्गे प्रवर्तको भवति तद्वदिति ॥ ३१ ॥ अहो आश्चर्यं परमोपकारिणोपि ममापकारः । सुसंरब्धान् क्रोधावेशेन युद्धोन्मुखान् यदून् कुपितं कृष्णं च सान्त्वयित्वा एतेषां शमं शान्तिमिच्छन्नहमिहागतः ॥ ३२ ॥

अन्वितार्थप्रकाशिका

जन्मेति । हे भरतर्षभ ! सत्कुलजन्मना बन्धुभिः वीरैरर्जुनादिभिश्च मुक्तया श्रिया सम्पत्त्या उन्नद्ध उत्कटो मदो येषां ते असभ्याः दुर्जनाः दुर्योधनाद्याः ते कुरवः एवं रामं प्रति दुर्वाच्यं परुषं वाक्यम् आश्राव्य श्रावयित्वा स्वपुरमाविशन् । एतेन भीष्मादयः सभ्यास्तु तत्रैव तस्थुरिति ॥ २९ ॥ दृष्ट्वेति । कुरूणां दौःशील्यं दुष्टत्वं दृष्ट्वा अवाच्यानि दुर्वचनानि च श्रुत्वा कोपेन संरब्धः व्याप्तः अच्युतः पूर्णपराक्रमोऽत एव दुष्प्रेक्ष्यः भयङ्करस्वरूपो रामो मुहुः पुनः पुनः प्रकर्षेण हसन् अवोचत् ॥ ३० ॥ नूनमिति । नानाधनाभिजनादिमदैरुन्नद्धा उत्पथगामिन असाधवः शान्तिं नेच्छन्ति । तेषां हि दण्ड एव प्रशमः शान्तिकरः न सान्त्वनं नूनं निश्चितमेव हि प्रसिद्धं च लोके यथा पशूनां लगुडो मार्गे प्रवर्त्तको भवति तद्वत् ॥ ३१ ॥ अहो इति । अहो सुसंरब्धान् क्रोधावेशेन युद्धोन्मुखान् यदून् कुपितं कृष्णं च सान्त्वयित्वा एतेषां शमं शान्तिमिच्छन्नहमिहागतः ॥ ३२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जन्म च बंधवश्च श्रीःराज्यलक्ष्मीश्च एतेषां समाहारो जन्मबंधु श्रीः जत्र नपुंसकत्वाभाव आर्षः तया एतदुपलक्षितैरन्यैरपि मदकारणैः उन्नद्धो दृढतां प्राप्तो मदो येषां ते दुर्वाच्यं कठिनवाक्यं । असभ्याः खलाः ॥ २९-३० ॥ नानाविधैर्जात्यादिमदैः उन्नद्धा उच्छृङ्खलाः ॥ ३१-३२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

जन्मेति ॥ हे भरतर्षभ, जन्म सत् कुले जनिप्राप्तिश्च बन्धवः प्रचुरबलवद्बन्धुप्राप्तिश्च तैरुपलक्षिता या श्रीः संपत्तिस्तया, उन्नद्ध उत्कटो मदो येषां ते, असम्याः असाधवः, ते कुरवः, रामं दुर्वाच्यं आश्राव्य, तत उत्थायेति शेषः । पुरं आविशन् हस्तिनापुरे प्रवेशं चक्रुः ॥ २९ ॥ दृष्ट्वेति ॥ कुरूणां कौरवाणां, दौःशील्यं दुष्टतां दृष्ट्वा, अवाच्यानि वक्तुमयुक्तानि तद्वचनानि च श्रुत्वा, स्वासाधारणकल्यागुणजातान्न च्यवते इत्यच्युतो रामः, कोपेन क्रोधेन संरब्धः क्षुभितः, अत एव दुष्प्रेक्ष्यः सन्, मुहुः प्रहसन् संश्च; अवोचत् स्वान्तिकस्थोद्धवादीनां पुरतोऽब्रीत् ॥ ३० ॥ उक्तिमेवाह नवभिः ॥ नूनमिति ॥ नानामदैर्धनादिप्राचुर्य-

जनितैर्नानाविधमदैरुन्नद्धा उच्छृङ्खलतां प्राप्ताः, असाधवः दुरात्मानो जनाः, शिक्षां विनेति शेषः। शान्तिमुपशमं, न इच्छन्ति प्राप्नुवन्ति। हि अतः, पशूनां, लगुडः दण्ड, यथा प्रशमः, तथा तेषां प्रकर्षेण शमयतीति प्रशमः, दण्डः, नूनमेव ॥ ३१ ॥ अहो इति ॥ अहो सुसंरब्धान् सुतरां क्रुद्धान्, यदून्, कुपितं कृष्णं च, शनैः सान्त्वयित्वा, एतेषां शमं इच्छन्, अहं इह आगतः ॥ ३२ ॥

कृष्णप्रिया

श्री शुकदेवजी कहते हैं—महाराज परीक्षित! कौरव अपनी कुलीनता एवं बांधव परिवार धन के बल पर एवं धन सम्पत्ति के अभिमान में चकनाचूर हो रहे थे। उन्होंने सामान्य शिष्टाचार की परवा नहीं की और श्री बलराम भगवाम को इस प्रकार के तिरस्कार वचन कहकर हस्तिनापुर की ओर चल पड़े ॥ २९ ॥ श्री बलभद्रजी ने कौरवों की असभ्यता एवं अशिष्टता देखी और उनके दुर्वचन भी सुने अब श्री बलभद्रजी का चेहरा क्रोध से लाल-पीला बन गया उस समय उनकी ओर देखा भी नहीं जाता और वे अट्टाट्ट हास्य करके कहने लगे ॥ ३० ॥ सत्य बात है कि दुष्टजनों को अपनी कुलीनता, बल, वीर्य एवं पुरुषातन का घमंड हो जाता है एवं धन का मद हो जाता है, वे शान्ति नहीं चाहते हैं, उनको दमन करने का और सही रास्ते पर लाने का उपाय समझाना नहीं होता परन्तु दंड देना ही उचित हैं, पशुओं को ठीक रास्ते पर लाने के लिए दंड प्रहार आवश्यक होता है ॥ ३१ ॥ पुनः बलरामजी कहते हैं—देखो तो सही कि सारे यादव एवं भगवान श्रीकृष्ण भी क्रोध से आविष्ट होकर संग्राम के लिये तत्पर हो रहे थे लेकिन मैंने उन लोगों को समझा बुझाकर इन लोगों के साथ समाधान करने का निर्णय करा करके मैं यहाँ आया ॥ ३२ ॥

त इमे मन्दमतयः कलहाभिरताः खलाः। [1]मामवज्ञाय मुहुर्दुर्भाष्यान्[2] मानिनोऽब्रुवन् ॥ ३३ ॥
नोग्रसेनः किल विभुर्भोजवृष्ण्यन्धकेश्वरः। शक्रादयो लोकपाला यस्यादेशानुवर्तिनः ॥ ३४ ॥
सुधर्माऽऽक्रम्यते येन पारिजातोऽमराङ्घ्रिपः। आनीय भुज्यते सोऽसौ न किलाध्यासनार्हणः ॥ ३५ ॥
यस्य पादयुगं साक्षात् श्रीरुपास्तेऽखिलेश्वरी। स नार्हति किल श्रीशो नरदेवपरिच्छदान् ॥ ३६ ॥

कर्दमक्षमा

अन्वयः—ते, इमे, मन्दमतयः, कलहाभिरताः, खलाः, मानिनः, तम्, माम्, अवज्ञाय, मुहुः, दुर्भाष्यान्, अब्रुवन् ।३३। यस्य, शक्रादयः, लोकपालाः, आदेशानुवर्तिनः, सः, भोजवृष्ण्यन्धकेश्वरः, उग्रसेनः, किल, न, विभुः ॥ ३४ ॥ येन, सुधर्मा, आक्रम्यते, येन, पारिजातः, अमराङ्घ्रिपः, आनीय, भुज्यते, सः, असौ, न, किल, अध्यासनार्हणः ॥ ३५ ॥ अखिलेश्वरी, श्रीः, साक्षात्, यस्य, पादयुगम्, उपास्ते, सः, श्रीशः, किल, नरदेवपरिच्छादान्, नः, अर्हति ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दुर्भाषणमनुस्मरति षड्भिः नोग्रसेन इति। विभुराज्ञापयितुं समर्थः ॥ ३४ ॥ अहो धृष्टाः श्रीकृष्णमप्यधिक्षिपंतीति कुपित आह सुधर्मेत्यादिभिस्त्रिभिः ॥ ३५–३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मानिनः श्रीमदांधाः ॥ ३३ न विभुः, अपि तु विभुरेव। यस्योग्रसेनस्य ॥ ३४ ॥ अलं यदूनामित्युक्त्या कृष्णस्य यादवत्वेन तमप्याक्षिपंतीति कुपित आह—सुधर्मेत्यादित्रिभिः येन कृष्णेन। सोऽसौ कृष्णः ॥ ३५ ॥ यस्य कृष्णस्य अर्हति तादृशोऽसौ तदति तुच्छं नार्हत्येवेत्यर्थं एवमग्रेपि ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ते मया चिकीर्षितसमाः मन्दमतित्वादिकमेव दर्शयति–येमामिति तं मामिति क्वचित् ॥ ३३ ॥ ननु, त्वमप्ययुक्तमेवावोचत इति चेत्तत्राह—नेति। किल किमर्थे अनृते वा अपि तु विभुरेवेत्यर्थः। यद्वा उग्रसेनः किल निश्चयेन विभुरिति विरोधलक्षणया ॥ ३४ ॥ टीकायां कृष्णमप्याक्षिपवन्त इत्यत्र समुदायोक्तेरिति भावः। अमराणामङ्घ्रिप इति मनुष्याभोग्यत्वं तथा तदर्थमिन्द्रादिदेवनिर्जयादिकञ्च सूचितं न अध्यासनं सिंहासनम् अर्हतीति तथा सः किल शिरश्चालने उपहासे वा किन्तु सुतरामेव तदर्हण इति यद्वा किल निश्चये तादृशोऽसौ तदति तुच्छ नार्हत्येवेत्यर्थः। एवमग्रेपि ॥ ३५ ॥ अहो कियद्वा तावन्माहात्म्यं यतो यस्येति साक्षाच्छ्रीः स्वरूपशक्तिरूपा वैकुण्ठेश्वरी यद्वा ततोपि पूर्णाविर्भावा रुक्मिणीरूपा अत एवाखिलानां मत्पर्य्यन्तानामीश्वरी तत्र वा का वराकी मायावृत्तिरूपा स्वर्गादिश्रीरित्यर्थः। श्रीश इति पुनरनुवादस्तद्दार्ढ्यार्थः ॥ ३६ ॥

---

[1] तस्मात्तं मामवज्ञाय दुर्भाषां–वीर विज. ; ये मामव–श्रीधर टि.। [2] दुर्भाषान्–श्रीधर. वंशी. जीव. ; दुर्मर्षान्–इति कस्यचित्।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ते मया चिकीर्षितशमा इमे मन्दमतयः कुबुद्धयः. यतः कलहेऽभितो रताः, यतः खला दुष्टाः। खलत्वमेव दर्शयति—ये मामिति। मानिनः सगर्व्वाः सन्तः; यद्वा, इमे तु ये ते सर्व्व एवेत्यर्थः। अन्यत् समानम् ॥ ३३ ॥ ननु त्वमप्यवाच्यमवोच इति चेत्तत्राह—नेति; किल किम् ? अपि तु विधुरेवेत्यर्थः। यद्वा, उग्रसेनः किल न विभुरिति क्रोधावेशोक्तिः, यतो भोजादीनां सर्व्वेषामेव यादवानामीश्वरः; किञ्च, शक्रेति ॥ ३४ ॥ तथापि स्वपूर्व्वपुरुषश्रेष्ठययातिशापापेक्षया नृपासनादिकं किल यादवा नार्हन्तु, साक्षाद्भगवान् श्रीकृष्णो नार्हत्वेव, तमपि तत्राविविच्योचुरिति सक्रोधमाह—सुधर्म्मेति द्वाभ्याम्। अमराणामङ्घ्रिप इति मनुष्याभोग्यत्वं तथा तदर्थमिन्द्रादिदेवनिर्ज्जयादिकञ्च सूचयति। सोऽनिर्व्वचनीयैश्वर्य्यः, नृपस्याध्यासनं सिंहासनमर्हतीति तथा सः; पाठान्तरे किलेति पाठे अध्यासनं किल, अपि असावपि; यद्वा उपहासे; एवमग्रेऽपि ॥ ३५ ॥ अखिलानां श्रीब्रह्मादीनामीश्वरी सेव्यापि साक्षात् स्वयमुपास्ते, यद्वा, रुक्मिणीरूपेण-साक्षाद्भूता, श्रीशः लक्ष्मीपतिरपि, किंवा भक्तेभ्योऽखिलविभूतिप्रदानसमर्थोऽपि, नरदेवस्य राज्ञः परिच्छदान् चामरादीन् ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

त इम इति। खतमूर्खाश्च मामवज्ञाय अवहेल्य मानिनो दुरहङ्कारिणो दुर्वाक्यान्यूचुः ॥ ३३ ॥ दुर्भाषणमेवानुस्मरति नेति। उग्रसेनो विभुः न प्रभुः किलेति काकुः काका सूचितमनुशयमेव व्यञ्जयितुं विशिनष्टि—भोजवृष्ण्यन्धकेश्वर इति। एवमग्रेपि इन्द्रादयो यस्य यदुराजस्य आज्ञानुवर्त्तितः किल पूर्ववद्विशिनष्टि लोकपाला इति ॥ ३४ ॥ सुधर्मेति। सुधर्मा नाम सभा येनाक्रम्यते अधिष्ठीयते सोऽसौ कृष्णः सिंहासनार्हो न किल ॥ ३५ ॥ पुनस्तमेव विशिषन्नेतदेवाह—यस्येति द्वाभ्याम्। अखिलानां ब्रह्मादीनां ईश्वरी लक्ष्मीः साक्षाद्यस्य पादयुग्मम् उपास्ते सोऽसौ भगवान् श्रियःपतिर्नरदेवचिह्नानि नार्हति किल श्रीश इति पाठे त्रिलोकेशः ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सोऽसौ कृष्णः ॥ ३५–३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तं प्रसिद्धमेतेषां हितकारिणमपि माम् ॥ ३३ ॥ दुर्भाषणान्यमनुस्मरति षड्भिः–नोग्रसेन इति ॥ ३४ ॥ अहो धृष्टाः अलं यदूनामित्युक्त्या कृष्णमप्याक्षिपन्तीति कुपित आह–सुधर्मेत्यादिभिस्त्रिभिः अध्यासनं नृपसिंहासनं तदपि नार्हति ॥३५–३६॥

गूढार्थदीपिनी

दुर्भाषान् कटुवाक्यानि खल् प्रत्ययान्तः ॥ ३३–३४ ॥ येन। कृष्णेन न अध्यासनार्हणः न सिंहासनयोग्य ॥ ३५ ॥ परिच्छदान् राजचिह्नानि छत्रचामरादीनि नार्हति ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

दुर्भाषान् अवाच्यान् ऊचुः ॥ ३३ ॥ दुर्भाषणमनुस्मरति–नेति षड्भिः। शक्रादयो देवा लोकपालाः यस्यादेशानुवर्तिनः स उग्रसेनः विभुराज्ञापयितुं समर्थो न भवति नरान् भूखण्डपालकान् कौरवान् प्रतीति भावः ॥ ३४ ॥ अलं यदूनामित्यनेन सामान्यतः श्रीकृष्णमप्याक्षिप्तवन्तः अत एव क्रुद्धः सुधर्मेति त्रिभिराह—येन श्रीकृष्णेन सुधर्मा नाम सभा आक्रम्यते अधिष्ठीयते ॥ ३५ ॥ साक्षात् श्रीरुक्मिणी ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सा च शान्तिर्वाक्यैर्न जातेति क्रियार्थमाह **त इम** इति। यतो मन्दमतयः। तर्हि युद्धोद्यमे लौकिके शान्ता भविष्यन्तीत्याशङ्क्याह **कलहाभिरता** इति। परस्परकलह एव अभितो रतिर्येषाम्। कलहे तु युद्धे मरणमेव, शान्तिर्नेति। नन्वन्तर्यामितया प्रेरणीया इति चेत्, तत्राह **खला** इति। मूलेच्छया तानन्तर्यामी तथैव प्रेरयतीति। तथापि त्वया शमार्थमुद्यमः कृत इति तदेव कर्तव्यमिति चेत्, तत्राह **तन्मामवज्ञायेति**। तादृशशमकर्तारं माम्। तत्तत्र वा। अङ्गीकारे हि वाक्यैः हिताचरणाशिभिश्च प्रबोधो भवति, नान्यथा। ते त्ववज्ञानैव कुर्वन्ति। **मुहुरिति** पुनः। परीक्षा निषिद्धा। अवज्ञया मानसो दोष उक्तः। **दुर्भाष्यान्** दुष्टवाक्यानि चाब्रुवन्। अयं वाचनिको दोषः। **मानिन** इत्यग्रेऽप्यसमाधानम् ॥ ३३ ॥ ननु युक्तमेतेषां वाक्यम्, उग्रसेनवाक्यत्वेन त्वयापि किमित्युच्यत इत्याशङ्क्योग्रसेनस्य सर्वराजाधिपत्यं साधयति **नोग्रसेनः किल विभुरिति**। स्वतो वचनाभावायाह **किलेति**। नाम्नैव तस्येश्वरत्वं पूर्वसिद्धं सूचितम्। तत्रापि **विभुः** लौकिकन्यायेनापि समर्थः। अन्यथा तत्पुत्रः

कंसो राजा न भवेत् । किञ्च । साम्प्रतं भोजवृष्ण्यन्धकानामीश्वरः । त्रिविधानामपि यादवानां प्रभुः । अलौकिकं सामर्थ्यमाह **शक्रादयो लोकपाला** इति । भगवतः इच्छया आज्ञया वा । 'मयि भृत्य उपासीन' इत्यत्रैव तद्विवृतम् । यस्योग्रसेनस्य आदेशमाज्ञां अनुवर्तन्त इति । अन्यथा यथाभिलषितवृष्ट्यादि न भवेत् ॥ ३४ ॥ किञ्च । **येन सुधर्मा आक्रम्यते,** इन्द्रादयोऽपि नमस्कृत्य तां सभामारोहन्ति, तादृशीमाक्रामति । अमराङ्घ्रिपश्च पारिजातः आक्रम्यते । तन्मर्यादादूरीकरणात्तस्याप्याक्रमणम् । इन्द्रादीनामननुमतौ कथमेतद्द्वयं स्यात् । भगवत्सामर्थ्यमेतदिति नाशङ्कनीयम् । भगवतैवोग्रसेने ऐश्वर्यकला स्थापितेति नरत्ववत्तदधीनत्वमप्यङ्गीकृतमिति, 'अङ्गीकृता ग्लानिर्न दोषाय' । अनधिकारिण एतेऽस्माभिस्तुल्यतां नीताः, राज्यं च दत्तमिति यदुक्तम्, तन्निराकरोति **आनीय भुज्यते सोऽसौ न किलाध्यासनार्हण** इति । न हि सर्वे राजानो भवन्ति । यद्येको राज्यार्हो न भवेत्, तदैव तद्वचनं सार्थकं स्यात् । तत्र भाग्यं क्रियाशक्तिश्च प्रयोजिके । तत्रापि क्रियाशक्तिः प्रयोजिका । यदिन्द्रं निर्जित्य पारिजातः आनीय भुज्यते । ननु सा शक्तिः साम्प्रतं कुण्ठिता भविष्यतीति चेत्, तत्राह **सोऽसाविति** । स एव भगवानिदानीं ममाग्रे तिष्ठति, मैवं किलेत्युपलम्भार्थं प्रसिद्धिः ॥ ३५ ॥ भाग्योत्कर्षमाह **यस्य पादयुग**मिति । सर्वेषां भाग्यं लक्ष्म्यधीनम् । अतः सा सर्वेश्वरी । सापि नोचतया भगवच्चरणारविन्दं सेवते । **साक्षा**दित्याधिदैविकी, न तु दिव्यस्त्रीरूपा, नापि राज्यलक्ष्मीरूपा । यदाहुः 'चामरव्यजने शङ्ख'मिति, तद्दूषणार्थं हेतुमुक्त्वा, तदनूद्य दूषयति **स नार्हति किल श्रीश** इति । चामरव्यजनादयो नरदेवपरिच्छदाः । अनर्हत्वे हि तदुपेक्षया भोगो भवति । अन्यथा इन्द्रादीनामपि तथात्वं स्यात् ॥ ३६ ॥

श्रीसुबोधिनी—सारः

ते इमे मंदबुद्धयः कलहप्रिया खलाः दुष्ट मानिनस्तं मामवज्ञाय तिरस्कृत्य मुहुः पुनःपुनर्दुर्भाषान् अवाच्यवादान् अब्रुवन् ॥ ३३ ॥ताननुस्मरति इंद्रादयो लोकपतयो यस्याज्ञाकराः स भोजवृष्ण्यंधकानामीश्वरो राजा उग्रसेनो विभुर्न आज्ञापयितुं न समर्थः किलैव ॥ ३४ ॥ येन सुधर्मा इंद्रसभाऽऽक्रम्यते अमराणामंघ्रिपो वृक्षः पारिजात आनीय भुज्यते सोऽसौ श्रीकृष्णः किल निश्चये अध्यासनयोग्यो नास्ति ॥ ३५ ॥ "अलं यदूनां नरदेवलांछनैः" इत्युत्तरमाह । यस्य चरणद्वंद्वं सर्वेश्वरी श्रीर्लक्ष्मीः साक्षादुपास्ते सेवते स श्रीशो हरिर्नरदेवपरिच्छदान् राज्यचिह्नानि नार्हति किल संभावनायाम् ॥ ३६ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ते इमे तमुपकारिणमपि मामवज्ञाय मुहुः पुनः पुनः दुर्भाषान् दुर्वाक्यानि अब्रुवन् । तत्र हेतुमाह—कलहाभिरता इति । तत्र हेतुमाह—खला इति, दुर्जनाः । तत्र हेतुः—मानिन इति, प्रवृद्धाहङ्काराः । तत्र हेतुः—मन्दमतय इति, विवेकशून्या इत्यर्थः ॥ ३३ ॥ तेषां दुर्भाषणमेवानुस्मरति–नेति । शक्रादयो लोकपाला यस्याज्ञानुर्वर्तिनः स भोजादीनामधिपः उग्रसेनोऽपि न विभुर्भूमिराज्ये समर्थो न किलेति । कुरुवाक्यस्मरणपूर्वकं काकुं सूचयति—एते वदन्ति स न राज्यार्हः । स कथं न तथा स्यात् ? अपि तु तत्र समर्थ एवेत्यर्थः ॥ ३४ ॥ येन सुधर्माख्या सभा आक्रम्यते, अमराङ्घ्रिपः देवतरुः पारिजात आनीय भुज्यते सोऽसौ कृष्णोऽपि अध्यासनार्हणः मनुष्यराजसिंहासनयोग्यः न किलेति पूर्ववत् ॥ ३५ ॥ कृष्णमेव विशिषन् पुनरेतदेवाह–यस्येति द्वाभ्याम् । अखिलानां सम्पदामीश्वरी श्रीर्लक्ष्मीः साक्षात् यस्य पादयुगुलपास्ते स श्रीशः श्रियः पतिः श्रीकृष्णो नरदेवानां परिच्छदान् चामरादि चिह्नानि प्रति नार्हति न योग्यो भवति किल ? ॥ ३६ ॥

अन्वितार्थप्रकाशिका

त इति । मन्दमतयः कलहे अभिरताः खलाः मानिनस्त इमे उपकारिणमपि मामवज्ञाय मुहुः पुनः दुर्भावाम् दुर्वाक्यानि । घ्नन्तोऽयं खलन्तो वा । अब्रुवन् ॥ ३३ ॥ दुर्भाषान् अनुस्मृत्याह—नेति । शक्रादयो लोकपाला यस्याज्ञानुवर्तिनः स भोजादीनामधिपः उग्रसेनोऽपि न विभुर्भूमिराज्ये समर्थो न । किलेति काका समर्थ एवेति ॥ ३४ ॥ अलं यदूनामित्युक्त्या कृष्णेऽप्याक्षेपं मत्वाह—सुधर्मेति । येन सुधर्माख्या सभा आक्रम्यते अमराङ्घ्रिपः देवतरुः पारिजात आनीय भुज्यते सोऽसौ कृष्णोऽपि आध्यासनार्हणः मनुष्यराजसिंहासनयोग्यः न किलेति पूर्ववत्काकुः ॥ ३५ ॥ यस्येति । अखिलानां सम्पदामीश्वरी श्रीर्लक्ष्मीः साक्षात् यस्य पादयुगलमुपास्ते स श्रीशः श्रियः पतिः श्रीकृष्णो नरदेवानां परिच्छदान् चामरादिचिह्नानि प्रति नार्हति योग्यो न भवति किल ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दुर्भाषान् अपशब्दान् ॥ ३३ ॥ रामस्तेषां दुर्वचनानि स्मरन्नाह नेति यस्योग्रसेनस्य ॥ ३४ ॥ अथ रामः श्रीकृष्णपराक्रमं स्मरन्नाह सुधर्मेति आक्रम्यते आनीयते ॥३५॥ यस्य कृष्णस्य स श्रीकृष्णः राजन्यपरिच्छदान् न अर्हति अर्हत्येव ॥३६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त इति ॥ तमेतेषामुपकर्तृतया प्रसिद्धं, मामपि अवज्ञायावमत्य मन्दमतयः, कलहाभिरताः कलहप्रियाः, खलाः, मानिनः, ते इमे कौरवाः, मुहुः, दुभाषानवाच्यशब्दान्, अब्रुवन् ऊचुः ॥ ३३ ॥ नोग्रसेन इति ॥ शक्रादय इन्द्रादयः, लोकपालाः,

यस्योग्रसेनस्य, आदेशानुवर्त्तिन आज्ञानुवर्त्तिनः, भोजाश्च वृष्णयश्च अन्धकाश्च तेषामीश्वरः, विभुः सर्वानाज्ञापयितुं समर्थः, उग्रसेनः, न किल । क्षितीश्वर इति शेषः । क्षितीशेशो न किलेत्यर्थः ॥ ३४ ॥ श्रीकृष्णेनोग्रसेनस्य क्षितीशेशत्वापादनात् तं विशिनष्टि ॥ सुधर्मेति ॥ येन श्रीकृष्णेन, सुधर्मा सुधर्मा नाम सभा, आक्रम्यते अधिष्ठीयते, येन श्रीकृष्णेन, अमराङ्घ्रियः देवतरुः, पारिजातः, आनीय, भुज्यते । सः, असौ, श्रीकृष्णः, अध्यासनार्हणः राज्यासनयोग्यः, न किलेति काकुः ॥ ३५ ॥ पुनस्तमेव विशिषन्नेतदेवाह यस्येति द्वाभ्याम् ॥ यस्येति ॥ अखिलानां ब्रह्मादीनामीश्वरी, साक्षात् प्रत्यक्षा, श्रीर्लक्ष्मीः, यस्य श्रीकृष्णस्य, पादयुगं, उपास्ते । श्रीशो लक्ष्मीकान्तः, स श्रीकृष्णः, नरदेवपरिच्छदान् छत्रचामरादीन्, न अर्हति किल । अत्रापि काकुः ॥ ३६ ॥

कृष्णप्रिया

क्या कहा जाय आखिर तो ये मूर्ख हैं इसलिए ऐसी दुष्टता कर रहे हैं इन लोगों को शान्ति प्रिय नहीं है, लेकिन कलह ही प्रिय हैं। ये इतने उन्मत्त हो रहे हैं कि पुनः पुनः मेरा तिरस्कार करके व्यर्थ गालियाँ सुना गये ॥ ३३ ॥ और नरपतियों की बात को छोड़ दीजिए लेकिन त्रिलोकीनाथ महाराज इन्द्र आदि लोकपाल जिनकी आज्ञा का नित्य पालन करते हैं वे भगवान् श्रीकृष्ण अथवा महाराज उग्रसेन भी राजाधिराज नहीं हैं वे तो मात्र वृष्णि भोज अन्धक वंश के यादवों के ही राजा हैं ॥ ३४ ॥ सुधर्मा नाम की सभा को स्वाधीन करके जो उसी सभा में विराजते हैं और अमरों के तरुवर पारिजातक को नाक लोक से उखाड़कर ले आते हैं उसका यथेच्छ उपभोग करते हैं वे भगवान् श्रीकृष्ण भी राजसिंहासन के अधिकारी नहीं है ॥ ३५ ॥ अखिल विश्व की अधिष्ठात्री भगवती श्रीदेवी जिनके श्रीचरण कमलों की सेवा करती हैं वे पूर्ण पुरुषोत्तम भगवान् श्रीकृष्ण छत्र, सिंहासन चामर आदि राजचिह्नों को धारण नहीं कर सकते हैं ॥ ३६ ॥

यस्याङ्घ्रिपङ्कजरजोऽखिललोकपालै[1]र्मौल्युत्तमैर्धृतमुपासिततीर्थतीर्थम् ।
ब्रह्मा भवोऽहमपि यस्य कलाः [2]कलायाः श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ॥ ३७ ॥
[3]भुञ्जते कुरुभिर्दत्तं भूखण्डं [4]वृष्णयः किल । उपानहः किल वयं स्वयं तु कुरवः शिरः ॥ ३८ ॥
अहो ऐश्वर्यमत्तानां मत्तानामिव मानिनाम् । असम्बद्धा गिरो रुक्षाः कः सहेतानुशासिता ॥ ३९ ॥
अद्य निष्कौरवीं पृथ्वीं करिष्यामीत्यमर्षितः । गृहीत्वा हलमुत्तस्थौ दहन्निव जगत्त्रयम् ॥ ४० ॥

कर्दमक्षमा

अन्वयः—अखिललोकपालैः, उपासीत, तीर्थतीर्थम्, यस्य, अङ्घ्रिपङ्कजरजः, मौल्युत्तमैः, धृतम्, ब्रह्मा, भवः, अहम्, अपि, यस्य, कलायाः, कला, श्रीः, अपि, अङ्घ्रिपङ्कजरजः, चिरम्, उद्वहेम, अस्य, नृपासनम्, क्व ? ॥ ३७ ॥ वृष्णयः, किल, कुरुभिः, दत्तम्, भूखण्डम्, किल, भुञ्जते ? वयम्, किल, उपानहः, कुरवः, स्वयम्, तु, शिरः ॥ ३८ ॥ मत्तानाम्, मानिनाम्, ऐश्वर्यमत्तानाम्, अहो, रुक्षाः, असम्बद्धाः, गिरः, अनुशासिताः, कः, सहेत ? ॥ ३९ ॥ अद्य, निष्कौरवीम्, पृथ्वीम्, करिष्यामि, इति, अमर्षितः, जगत्त्रयम्, दहन्, इव, हलम्, गृहीत्वा, उत्तस्थौ ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मौल्युत्तमैर्मौलियुक्तैरुत्तमांगैः उत्तमैर्मौलिभिरिति वा । उपासितानि तीर्थानि यैर्योगिभिस्तेषामपि तीर्थम् । यद्वा उपासितं सर्वैः सेवितं तीर्थं गंगा तस्यास्तीर्थं तीर्थत्वनिमित्तम् । किंच ब्रह्मा भव श्रीश्चाहमपि उद्वहेम । कथंभूता वयम् । यस्य कलाया अंशस्य कला अंशाः ॥ ३७-३८ ॥ मत्तानामिव मद्यादिना रुक्षाः परुषाः । अनुशासिता स्वयं दंडधरः सन् ॥३९-४०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एकदेशन्यायाश्रयणे गौरवं मत्वाह—उत्तमैरिति । तीर्थानि शास्त्राणि गुरवो वा तीर्थं पावित्र्यापादकम् । सर्वप्रसिद्धिमादाय—यद्वेति । तीर्थत्वं पवित्रहेतुत्वम् । तस्य निमित्तं कारणम्, भगवत्पदोद्भूतत्वमेव गंगायाः पावनत्वे हेतुरिति भावः । न केवलं गंगोत्पत्तिहेतुत्वादेव श्रीकृष्णस्याधिक्यमपि तु ब्रह्माद्युपास्यत्वादपीत्याह—किञ्चेति । उद्वहेम शिरसि धारयामः । अस्य कृष्णस्य । कलायाः पुरुषरूपायाः । ब्रह्मैव युष्मद्विधानां स्रष्टा इन्द्रादिभ्योऽप्यैश्वर्येणाधिकस्ततोपि भवस्ततोपि भवस्ततोऽप्यहं तथाऽस्मत्तः सर्वेभ्योप्यधिका श्रीस्वरूपभूता शक्तिः उत्कर्षेण धारयामः । अस्य नृपासनं क्व किं तेभ्यः सकाशाद्भिक्षित्वैव तत्कृपयैव लभ्यं स्यादिति वक्रोक्तिः ॥ ३७ ॥ उपानहस्तद्दत्ताडनशीलाः । शिरस्तद्दत्ताड्या इति ध्वनिः ॥ ३८ ॥

---

[1] पाल—यीर. विज. । [2] कलाकलांशाः श्रद्धामहे सुचिर—विज. । [3] भुज्यते—विज. । [4] वृष्णिभिः—विज. ।

असंबद्धा अयोग्याः । रूक्षाः शब्दतोऽर्थतश्च कर्कशाः । अनुशासिता दंडकर्ता मादृशः कः सहेत अन्यथाऽनुशासितत्वहान्या सर्वेषामुच्छृंखलता स्यादिति भावः ।। ३९ ।। पालनार्थमवतीर्णत्वादिवोपादानम् । लांगलाग्रेण तदिच्छया वर्द्धितलांगलाग्रेण विचकर्ष बलाज्जलांतिकमानिनाय । किं कर्तुं प्रहरिष्यन्प्रहर्तुं सांबं विना सर्वमेव नगरं स्वजलेनैवं प्रहृत्य बध्यतामिति गंगां प्रत्यादेशात् ।। ४० ।।

श्रीमज्जीवगोस्वामिकृत वैष्णवतोषिणी

अथाखिलानामखिलैश्वर्यास्तस्याश्चोपास्यत्वं विशेषतो दर्शयन्नाह—यस्येति । अङ्घ्रिपङ्कजस्य रज इति जात्यैकत्वविवक्षया यत्किञ्चिदेकमपि रजः कथञ्चित्कुत्रचित्प्राप्तम् अस्य ईदृशस्य नृपासनं क्व अपितु कुत्रापि नास्तीति क्रोधोपहासः वस्तुतस्तु क्वेत्यतिनिकृष्ट एव पद इत्यर्थः ।।३७।। ननु, श्रीभगवन्तमुद्दिश्य नोक्तं किन्त्वन्यानेव यादवानित्याशङ्क्यापि सोपहासमाह—भुञ्जत इति । दत्तमेव तत्रापि भूखण्डं कतिपयानेव देशान् अहोऽस्माकमपि यादवत्वादस्मानप्युद्दिश्योचुरिति पुनः सक्रोधोद्रेकमाह—उपेति ।। ३८ ।। ऐश्वर्य्येण मत्तानां हतविचाराणाम् अतो मानिनामभिमानिनाम् अत एवासम्बद्धा निरर्गला उन्मर्यादा इत्यर्थः । किञ्च रूक्षाः शब्दतश्चार्थतश्च कर्कशाः अनुशासितेत्यन्यथानुशासितृत्वहान्या सर्वेषामप्युच्छृङ्खलतापत्तिः स्यादिति भावः ।।३९।। अतोऽद्यैव करिष्यामि इत्येतद्वदन् अमर्षितः क्रुद्धस्सन् ।। ४० ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उक्तमेव क्रोधभरात् पुनरप्यनुवदन्नाह—यस्येति । अङ्घ्रिपंकजस्य रज एकमेव कथञ्चित् कुत्रापि प्राप्तमखिललोकपालैरिन्द्रादिभिः । एवं विभूतिप्रदत्वमुक्त्वा मुक्तिप्रदत्वञ्चाह—उपासितेति । भक्तिप्रदत्वमप्याह—ब्रह्मेति । अहमधुनाग्रजत्वं प्राप्तोऽपि । ननु यूयं पुत्रत्वादिना तत्तुल्या एव कुतो वहथ? तत्राह—यस्येति । कलायाश्चिच्छक्तेः कला अंशा नित्यभृत्या इत्यर्थः । अस्य ईदृशस्य नृपासनं क, अपि तु कुत्रापि नास्त्येवेति क्रोधोपहासः ।। ३७ ।। ननु श्रीभगवन्तमुद्दिश्य नोक्तम्, किन्तु अन्यानेव यादवानिति चेत्तथाप्ययुक्तमित्याह—भुञ्जत इति । दत्तमेव किल, तत्रापि भूखण्डं कतिपयान् देशान् । अहो अस्माकमपि यादवत्वादस्मानप्युद्दिश्योचुरेवेति क्रोधोद्रेकेणाह—उपेति । एवं दुर्भाषाणां यथोत्तरं श्रैष्ठ्यमूह्यम्, तदपेक्षया क्रोधोद्रेकेणैव वा तदुक्तक्रमातिक्रमणं वा ।। ३८ ।। ऐश्वर्य्येण मत्तानां हतविचाराणाम्, अतो मानिनामभिमानवताम्, अत एवासंबद्धा अयोग्या दुष्टा वा, किञ्च, रूक्षाः कः सहेत, अपि तु न कश्चित् सहेत, अन्यथानुशासितृत्वहान्या सर्वेषामुच्छृङ्खलतापत्तेरित्यर्थः ।। ३९ ।। अतोऽद्यैव करिष्यामीत्येतद्वदन्नमर्षितं क्रुद्धः सन् ।। ४० ।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अधीशः त्रिलोकेशः । उपासिततीर्थतीर्थं परमं पवित्रं यद्वा उपासितगुरुमन्त्राणां सतामपि तीर्थं पावनम् ।। ३७-४२ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

यस्येति । अखिलैर्लोकपालैः कर्तृभिर्मौल्युत्तमैर्मौलियुक्तैरुत्तमैरुत्तमाङ्गैः शिरोभिर्यस्याङ्घ्रिरजो धृतं कथम्भूतम् उपासिततीर्थतीर्थम् उपासितानि तीर्थानि गङ्गादीनि यैर्योगिभिस्तेषामपि तीर्थं पावनं यद्वा उपासितगुरूणां सतामपि पावनम् उपासितानां गङ्गादितीर्थानामपि पावनं वा यस्य च कलायाः कला अशांशभूताः अहमनन्तः श्रीर्लक्ष्मीः उद्वहेम विभुमः अङ्घ्रिरज इत्यनुषज्यते अस्यैवम्भूतस्य नृपासनं क्व कथं वा तदधिकारः इति काकुः ।। ३७ ।। भुञ्जत इति भुञ्जते किल ।। ३८ ।। अहो इति । मत्तानां मद्यादिना प्रमत्तानां मानिनां स्वैरिणाम् इवैषामैश्वर्येण मत्तानामसम्बद्धाः रूक्षाः परुषाश्च गिरः कोवा अनुशासिता दण्डयितुं समर्थश्चेत्सहेत ।। ३९ ।। अतोऽद्य भूमिं निष्कौरवां करिष्यामीत्यभिसन्धायेति शेषः । अतिक्रुद्धो जगत्त्रयं दहन्निव हलं जगृहे गृहीत्वोदतिष्ठत् ।। ४० ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

श्रद्धामहे आकाङ्क्षामहे सर्वैरुपासितं निषेवितं तीर्थं भागीरथी अस्या अपि तीर्थं शुद्धिकरम् अस्य कृष्णस्य ।।३७-३८।। अनुशासिता शिक्षाकरः ।। ३९-४३ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मौल्युत्तमैर्मौल्युत्तमेषु धृतम् उपासिततीर्था योगीन्द्रास्तेषामपि तीर्थरूपं किञ्च ब्रह्मैव युष्मद्विधानां स्रष्टा इन्द्रादिभ्योऽप्यैश्वर्य्येणाधिकः ततोपि भवः ततोऽप्यहमेवमेते ब्रह्मादयो वयं यस्य कलाया एकस्या एव कलाः तथा अस्मत्तः सर्वेभ्योऽप्य-

धिकश्रीः स्वरूपभूता शक्तिः उद्वहेम उत्कर्षेण वहाम। अस्य कृष्णस्य नृपासनं क किन्त्वेतेभ्यः सकाशात् भिक्षित्वैव एतत्कृपयैव लभ्यं स्यादिति वक्रोक्तिः ॥ ३७-३८ ॥ एवं वक्रोक्त्या उपहस्य तत्त्वमाह—सार्द्धपादाधिकेन श्लोकेन अहो इति। मत्तानां मदिरामत्तानामिव मानिनां गर्ववताम् अनुशासिता स्वयं दण्डकर्त्ता सन् मादृशः खलु कः सहेत अन्यः सहतां नामेति भावः ॥ ३९-४० ॥

गूढार्थदीपिनी

मौल्युत्तमैः मुकुटयुक्तशिरोभिः। उपासिततीर्थाः योगिनः तेषां तीर्थं पवित्रत्वापादकम्। उपासिततीर्थं गङ्गा वा। कलाः अंशांशा। सर्वे वयं यत् पाद रजः शिरसा धारयामः ॥ ३७-३८ ॥ मदिरामत्तानामिव अहङ्कारिणां रूक्षा कर्कशाः सिकः मादृशः कः सहेत न कोऽपीत्यर्थः ॥ ३९ ॥ अत्यमर्षितः अतीवक्रुद्धः सन् ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यस्य श्रीकृष्णस्य अङ्घ्रिपङ्कजरजः अखिलैः सकलैर्लोकपालैरिन्द्रादिभिः मौल्युत्तमैः शिरोभूषणयुक्तैः शिरेभिर्धृतम् किम्बहुना यस्य कलायाः कलाभूताः ब्रह्मा अहं श्रीश्च भवः उपासितानां तीर्थानामपि तीर्थं शुद्धेर्निदानम् अङ्घ्रिरजः उद्वहेम अस्य क नृपासनम् ॥३७-३८॥ मत्तानां मदिरादिना मनो गर्वस्तद्वतां रूक्षाः नीरसाः अनुशासिता स्वयं दण्डकर्ता कः ॥३९-४०॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदप्युक्तं 'अलं यदूना'मिति, तत्तदा स्यात्, यदि स्वतः सिंहासनं न स्यादिति वक्तुं तस्य सिंहासनोपपत्तिमाह **यस्याङ्घ्रिपङ्कजरजः** इति। अष्टौ लोकपालाः परितः, उपरि ब्रह्मा, अधः शेषोऽहम्। एतेषां दशानामाशापालकानां मध्ये प्रभुणा भाव्यम्। स एव मुख्यो राजशब्दार्थः। प्रभुत्वं च दिक्पालकानां सर्वथा हीनभावावलम्बने भवति। एतत्तु सर्वैरेव दृष्टमिति सिद्धवन्निरूप्यते। यस्य चरणकमलरजः अखिललोकपालैः सर्वैरेव पूर्वोक्तैः। **मौल्युत्तमै**रिति करणम्। तेषामपि भगवदीयत्वसिद्ध्यर्थं लौकिकन्यायेन स्वामिसेवायां वा ऐश्वर्योत्कर्षमुक्त्वा धर्मोत्कर्षमाह। उपासिता तीर्थानामपि तीर्थभूता गङ्गा यस्य। कीर्तिमाह **ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः** इति। भगवतः कला जगदुत्पत्तिस्थितिविनाशकर्त्री काचित्। तस्यास्त्रयोऽंशाः सत्त्वादयः। तत्र रजो ब्रह्मा तमो भवः। अहं सत्त्वम्, भूधरत्वात्। श्रियमाह **श्रीश्चे**ति। चकारादन्तःस्थिते ज्ञानवैराग्ये निरूपिते। वयं सर्व एव यस्य रजः शिरसि स्थापयामः, तस्य नृपासनं क भवतीति व्यङ्ग्योक्तिः ॥ ३७ ॥ एवमभिप्रेतार्थं निरूप्य साक्षात्तदुक्तमर्थं खण्डयति **भुञ्जते कुरुभिर्दत्त**मिति। यद्दत्तं भूखण्डमात्रमेव भवति। तत्रापि स्वरूपतोऽपि हीनत्वम्। **उपानह किल वय**मिति। उत्कर्षस्य निरूपितत्वादनाधितार्थत्वं स्पष्टमेव ॥ ३८ ॥ तर्ह्येवं सति किं कर्तव्यमिति चेत्, तत्राह **अहो ऐश्वर्यमत्ताना**मिति। तेषां वाक्यं न सोढव्यम्। ततो यत्कर्तव्यम्, तदग्रे वक्ष्यते। आदरणीयानां वाक्यं कर्तव्यम्। लोकेऽपि मत्तास्त्वनादरणीयाः। तत्राप्यैश्वर्येण नितरांमत्ताः। बहिर्व्यवहारे माननीयत्वमाशङ्क्य मत्तत्वज्ञानादेव तथात्वमिति ज्ञापयन् दृष्टान्तमाह **मत्तानामिवे**ति। इवेत्यग्रेऽपि सम्बध्यते। **मानिनामिवे**ति च। आत्मानमेव बहु मन्यमाना उन्मत्ता भवन्ति। ते सर्वदैव न माननीया इति दृष्टान्तद्वयम्। किञ्च। वाक्यान्यप्यसम्बद्धार्थानीत्याह **असम्बद्धा गिरो रूक्षा** इति। स्नेहेन बाधितार्था अपि प्रयोजका भवन्तीति तदभावमाह **रूक्षा** इति। तत्र सहनमुभयेषां सम्भवति, विवेकिनामसमर्थानां च। वयं तु नोभयविधा इत्याह **अनुशासिते**ति। लोके अनुशासनाधिकारिभिर्न सोढव्या इति ॥ ३९ ॥ ततो यत्कर्तव्यं तत्प्रतिजानीते **अद्य निष्कौरवीं पृथ्वीं करिष्यामी**ति। यादवेभ्यः कौरवमात्रस्यैव तैरुत्कर्षो निरूपित इति, भगवद्भक्ते मृतानां स्वर्गोऽस्तीति भूमिमेव निष्कौरवीं प्रतिजानीते। आदौ मनसि उस्योद्यममाह **अमर्षित** इति। कायिकमाह **गृहीत्वा हलमुत्तस्था**विति। तस्योद्यमः सर्वजनीनो जात इति ज्ञापयितुं दृष्टान्तमाह **दहन्निव जगत्त्रय**मिति। सङ्कर्षणो हि प्रलये तथोत्तिष्ठति, यस्य मुखाद्बहिरुद्गच्छति, त्र्यक्षश्च महादेवः, तद्रूपं प्रकटितवानित्यर्थः ॥ ४० ॥

श्रीसुबोधिनी-सारः

सर्वलोकपालैः मौल्युत्तमैः मुकुटवरैर्धृतम् उपासितानि सेवितानि तीर्थानि यैर्योगिभिस्तेषामपि तीर्थं शुद्धिकरम् उपासितस्य तीर्थस्य गंगाया अपि तीर्थं स्थानभूत यस्य चरणकमलरेणु यस्य कलायाः अंशस्य कला ब्रह्मा भवः शिवः अहं संकर्षणः श्रीश्च चिरम् उद्वहेम धारयेम अस्य श्रीकृष्णस्य नृपासनं क इत्यस्मद्दत्तनृपासना इत्युत्तरम् ॥ ३७ ॥ कुरुभिर्दत्तं भूखंडं माथुरादिदेशं वृष्णयो भुंजते किलैव आरुरुक्षतीत्यस्यार्थमाह वयम् उपानहः पादरक्षणस्थानीयाः स्म स्वयं कुरवस्तु शिरः ॥३८॥ ऐश्वर्येण मत्तानां मत्तानां सुरापायिनामिव मानिनां रूक्षाः कर्कशा असंबद्धा अत्यंतानुचिता गिरो वाचोऽनुशासिता शिक्षाकरः कः सहेत न कोपि ॥ ३९ ॥ "शतं दीनोक्तयो ह्येकं बलं तत्राधिकं भवेत्" इति नीतिमाश्रित्याह अद्य इदानीं निष्कौरवीं कौरवशून्यां पृथिवीं करिष्यामीति हेतोरमर्षितः क्रुद्धो रामो जगत्त्रयं त्रिलोकीं दहन्निव हलं गृहीत्वोत्तस्थौ ॥ ४० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

यस्याङ्घ्रिपङ्कजेत्यत्र । उपासितेति विग्रहकथनम् । तदर्थस्तु । यस्य रजसः सम्बन्धिनी तीर्थतीर्थरूपा गङ्गा उपासिता । सर्वैरितिशेषः । संकर्षणस्य तामसत्वात्कथं सत्त्वरूपत्वमित्याहुः भूधरत्वादिति । शेषत्वेन भूधरत्वमात्रधर्ममादाय सत्त्वरूपत्वमित्यर्थः । अद्येत्यत्र । त्र्यक्षश्च महादेव इति । यस्य मुखादुद्गच्छतीति पूर्वेणान्वयः । पञ्चमस्कन्धे पञ्चविंशेऽध्याये इदं निरूपितम् ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अखिलैर्लोकपालैः मौल्युत्तमैर्मौलियुक्तैरुत्तमाङ्गैः शिरोभिर्यस्याङ्घ्रिरजो धृतं तथा ब्रह्मादयोऽपि वयं यस्याङ्घ्रिरजो शिरसा चिरं उद्वहेम तस्यास्य नृपासनं क? कथं वा न तदधिकारयोग्यत्वेति काकुः । रजोमाहात्म्यमाह—उपासितेति । उपासितानां श्रेयोर्थिभिः सेवितानां तीर्थादीनां गङ्गादीनामपि तीर्थं पावनत्वनिमित्तमित्यर्थः । अन्येषां तत्सेवावश्यकत्वेऽत्र हेतुमाह—यस्य कलायाः कलाः अंशांशा इति । अहं शेषः । श्रीर्लक्ष्मीः ॥ ३७ ॥ भुञ्जत इति स्पष्टम् ॥ ३८ ॥ 'एवं चेत्तर्हि किं कर्तव्यम्' इत्यपेक्षाया सहेतुकं दण्डमेव निश्चिनोति—अहो इति । अतिशयेनैश्वर्येण मत्तानामसम्बद्धाः अनन्विता गिरः कः सहेतेत्यन्वयः । सत्पुरुषाणामैश्वर्ये सत्यपि मदो न भवतीति तेषां दुर्बुद्धित्वमाह—मानिनामिति । गुरुशास्त्रानुशासनमशृण्वतामात्मानमेव बहु मन्यमानानामित्यर्थः । 'लोकेपि विवेकिवाक्यान्येवादरणीयानि भवन्ति, न मद्यादिमत्तवाक्यानि' इति दृष्टान्तेनाह—मत्तानामिवेति । स्नेहयुक्तानामसम्बद्धानां मत्तवाक्यानामपि लोके सहनं दृश्यते, अत आह—रूक्षा इति । अविवेकिभिरसमर्थैश्च किं न सोढव्यम्' इत्याशङ्क्याह—अनुशासितेति । तद्विवेकेन दण्डयितुं समर्थ इत्यर्थः ॥ ३९ ॥ अतोऽद्य भूमिं निष्कौरवीं करिष्यामीति निश्चित्य जगत्त्रयं त्रिलोकीं दहन्निव अत्यमर्षितः अति क्रुद्धो हलं गृहीत्वा उत्तस्थावित्यन्वयः ॥ ४० ॥

अन्वितार्थप्रकाशिका

यस्येति ॥ यस्य कलायाः कलाः अंशांशाः ब्रह्मा भवः अहं शेषः श्री लक्ष्मीश्च इति वयं उपासितानि तीर्थानि यैस्तेषां योगिनामपि तीर्थम् । यद्वा । उपासितानां श्रेयोऽर्थिभिः सेवितानां तीर्थादीनां गङ्गादीनामपि तीर्थं पावनत्वनिमित्तमित्यर्थः । अखिलैः लोकपालैः मौल्युत्तमैर्मौलियुक्तैरुत्तमाङ्गैः शिरोभिः उत्तमैर्मौलिभिर्वा धृतं यस्याङ्घ्रिपङ्कजरजः शिरसा चिरं वहेम । तस्यास्य नृपासनं क कथं वा न तदधिकारयोग्यत्वेति काकुः ॥ ३७ ॥ भुञ्जत इति ॥ वृष्णयः किल कुरुभिर्दत्तमेव भूखण्डमेव ननु सर्वां भुवं भुञ्जते । इति वयं उपानहः किल । कुलवस्तु स्वयं शिरः किलेति काकवः ॥ ३८ ॥ अहो इति ॥ अहो ऐश्वर्येण मत्तानाम् उन्मादेन मत्तानामिव मानिनाम् आत्मानमेव बहुमन्यमानां खलानाम् असम्बद्धाः रूक्षाश्च गिरः कर्माणि को नाम अनुशासिता दण्डनसमर्थः सन् सहेत ॥ ३९ ॥ अद्येति ॥ अतोऽद्य पृथ्वीं निष्कौरवीम् उपसर्जनात् । ङीबार्षः । करिष्यामीति निश्चित्य जगत्त्रयं त्रिलोकीं दहन्निव अत्यमर्षित अतिक्रुद्धो हलं गृहीत्वा उत्तस्थौ ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मौलय उत्तमायेषु तैः शिरोभिः कृत्वा धृतं स्वकल्याणायजनैः उपासितं तीर्थं पादजलं येषां तथाभूता ये नारदादयस्तेषामपि तीर्थं सेव्यं । यस्य कृष्णस्य कलायाः कला ऐश्वर्य्यलेशं प्राप्ता इत्यर्थः ब्रह्माभवः शिवः श्रीः अहं संकर्षणोऽपि एते वयं सर्वे यद्रजः उद्वहेम । एवंभूतस्य अस्य हरेः क नृपासनमिति यत् खलावदंति तन्महदाश्चर्य्यमितिभावः ॥ ३७-३८ ॥ मद्यादिनामत्तानामिव । असंबद्धाः नयविरुद्धाः रूक्षाः कठिनाः अनुशासिता शिक्षकः सन् ॥ ३९-४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यस्येति । यस्य श्रीकृष्णस्य, उपासितानि तीर्थानि गङ्गादीनि यैर्योगिभिः तेषामपि तीर्थं पावनं, अङ्घ्रिपङ्कजरजः चरणकमलरेणुः, अखिललोकपालैः कर्त्तृभिः, मौल्युत्तमैर्मौलियुक्तैरुत्तमैरुत्तमाङ्गैः शिरोभिः करणैः, धृतं ध्रियते इत्यर्थः । यस्य श्रीकृष्णस्य, कलाया अंशस्यापि, कला अंशभूताः, ब्रह्मा, भवो रुद्रः, अहं संकर्षणः, एते ब्रह्मादयो वयमित्यर्थः । श्रीश्च स्वयं लक्ष्मीरपि, चिरं उद्वहेम विभृम । अङ्घ्रिरज इत्यनुषज्यते । अस्यैवंभूतस्य कृष्णस्य, नृपासनं क । कथं वा तदधिकार इति काकुः ॥ ३७ ॥ भुञ्जत इति । वृष्णयो यादवाः, कुरुभिः दत्तं भूखण्डं, भुञ्जते किल । इत्यपि काकुः । वयं उपानहः किल । स्वयं कुरवः तु, शिरः किल । अत्रापि काकुः ॥ ३८ ॥ अहो इति । अहो, मत्तानां मद्यपानादिना प्रमत्तानामिव, ऐश्वर्यमत्तानां, मानिनां स्वैरिणां, एतेषां असंबद्धा अनन्विताः, रूक्षाः परुषाश्च, गिरः, अनुशासिता दण्डयितुं समर्थश्चेत्, को वा सहेत ॥ ३९ ॥ अद्येति । अतः अद्य, पृथ्वीं भूमिं, निष्कौरवीं, करिष्यामि इत्यभिधायेति शेषः । अमर्षितोऽतिक्रुद्धः, जगत्त्रयं त्रिलोकीं, दहन्निव, हलं गृहीत्वा, उत्तस्थौ उदतिष्ठत् ॥ ४० ॥

कृष्णप्रिया

जिनके पदपङ्कजों की रज समर्थ संतजन संसेवित गङ्गा आदि महत्तीर्थों को भी तीर्थ बना देती हैं, और समर्थ लोकपाल भी अपने अपने उत्तम किरीटों पर जिनके पदपंकजपराग को आदर से धारण करते हैं, एवं में ब्रह्माजी और लक्ष्मीजी भी जिन भगवान् की कला की भी छोटी कला है उन भगवान् श्रीकृष्ण के लिए राजसिंहासन कहाँ बड़ी आश्चर्य की बात है ॥ ३७ ॥ और भी कौरवों के घमंड का अन्त नहीं, वे मानते हैं कि बेचारे यादव तो कौरवों का अर्पित किया हुआ भूमि का एक अंश-टूकड़ा भोगते हैं और यादव उनकी जूती हैं और वे कुरुवंशी स्वयं मस्तिष्क हैं। ऐसा कौरवों के उन्माद का कोई ठिकाना नहीं वे लोग ऐश्वर्य से उन्मत्त हुए है और घमंडो पागल सरीखे हो गये हैं, इनकी बाते खलता से कटुता से भरी हैं और पागलों के जैसी हैं। शिर रहित कबन्ध जैसी हैं, अब मुझे इन लोगों का शासन कर उनके होश-कोश को ठिकाने लाना चाहिए भला इनकी बातों को कैसे सामान्य जन भी सहन कर सकता है ॥ ३८-३९ ॥ शेषाविष्ट श्री बलभद्रजी ने आखिर में निर्णय किया कि आज मैं इस धरातल को कौरव रहित कर डालुङ्गा, ऐसा कहते हुए बलभद्रजी रोष से ऐसे भर गये कि मानों तीनों लोक को भस्म कर देंगे वे अपने हल-मूशल को लेकर खड़े हो गये ॥ ४० ॥

लाङ्गलाग्रेण नगरमुद्विदार्य गजाह्वयम् । विचकर्ष स गङ्गायां प्रहरिष्यन्नमर्षितः ॥ ४१ ॥
जलयानमिवाघूर्णं गङ्गायां नगरं पतत् । आकृष्यमाणमालोक्य कौरवा जातसम्भ्रमाः ॥ ४२ ॥
तमेव शरणं जग्मुः सकुटुम्बा जिजीषवः[1] । सलक्ष्मणं पुरस्कृत्य साम्बं प्राञ्जलयः[2] प्रभुम् ॥ ४३ ॥
राम रामाखिलाधार प्रभावं न विदाम[3] हे । मूढानां नः कुबु[4]द्धीनां क्षन्तुमर्हस्यधीश्वरः[5] ॥ ४४ ॥

कर्दमक्षमा

अन्वयः—अमर्षितः, सः, लाङ्गलाग्रेण, गजाह्वयम्, विदार्य, गङ्गायाम्, प्रहरिष्यन्, विचकर्ष ॥४१॥ आकृष्यमाणम्, जलयानम्, इव, आघूर्णम्, नगरम्, गङ्गायाम्, पतत्, अवलोक्य, कौरवाः, जातसम्भ्रमाः ॥ ४२ ॥ सकुटुम्बाः, जिजीविषः, प्राञ्जलयः, सलक्ष्मणम्, साम्बम्, पुरस्कृत्य, प्रभुम्, शरत्रम्, ययुः ॥ ४३ ॥ हे राम । राम । अखिलाधारः, प्रभावम्, न, विदाम, अधीश्वरः, मूढानाम्, कुबुद्धीनाम्, नः, क्षन्तुम्, अर्हसि ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

लांगलाग्रेण दक्षिणतः प्राकारमूले निखातेन उद्विदार्य उत्पाट्य ॥४१-४२॥ जिजीविषव इत्यक्षराधिक्यं सोढव्यम् ॥४३॥ मूढानां प्रभावानभिज्ञानाम् । अतिक्रममपराधम् ॥ ४४-४५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स रामः ॥ ४१ ॥ जलयानमुडुपम् । जातसंभ्रमा उत्पन्नभयाः ॥ ४२ ॥ तं रामम् । सोढव्यमार्षत्वात्, यद्वा—'शेषं गाथा' इत्युक्तेर्गाथाख्यवृत्तमिदम् ॥ ४३ ॥ अतिक्रममपराधम् । कथं शरणं जग्मुस्तदाह—रामेति । हे जगत्सुखप्रद वीप्साऽतिभयात् । ननु भक्तानेव रमयामि न त्वन्यानिति चेत्सत्यन्, तथापि जगतस्त्वमेव गतिर्न त्वन्यः कोऽपीत्याहुः—हे अखिलाधार । तत्र हेतुः—अधीश्वरेति । हे ब्रह्मादीनामपीश्वरेति । अतो नास्माकमपराध इति शेषः । यद्वा—नोऽस्मान् क्षंतुमर्हसि । ननु महापराधिनो यूयं न क्षंतव्यास्तत्राहुः—मूढानामज्ञानामत एव कुबुद्धीनां दुरभिमानिनां दुष्टविचाराणां वा यतस्तव प्रभावं न विद्मो अतोऽस्मदादीनामपराधो दीनवात्सल्येन न ग्राह्य एवेति भावः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गङ्गायां विचकर्ष बलादानेतुमारभत किमर्थं प्रहरिष्यन् संहर्तुमित्यर्थः । किं वा गङ्गायां प्रहरिष्यन् प्रकर्षेण पातयिष्यन् निमज्जयितुमित्यर्थः । एवं तदिच्छया लाङ्गलस्य दैर्घ्यादिकं ज्ञेयम् ॥ ४१ ॥ जलेति युग्मकम् । आदावाघूर्णतीत्याघूर्णं पश्चात् पतदालोक्य तत्पश्चाच्चाकृष्यमाणं तेन जिजीविषव एवेति सर्वाभिमानो निरस्तः प्रभुमिति परमेश्वरबुद्ध्या शरणं जग्मुरित्यर्थः । यद्वा सर्वापराधक्षमासमर्थम् इति शरणे योग्यतोक्ता यद्वा साम्बस्य विशेषणं प्रभुभावेन पुरस्कृत्य एतच्च पुरीपतनेनैतयोरनिष्टं स्यादित्यभिप्रायव्यञ्जनेन श्रीरामस्य प्रीतये प्राक् तदपेक्षितसमर्पणेन च श्रीरामस्य तु साम्बपतनशङ्कानपेक्षा

---

१. जिजीविषः-विज. ; जिजीविषवः-श्रीधर. वंशी. जीव. वीर. विश्व. । २. योऽब्रुवम्-वीर. विज. । ३. ते-श्रीधर. वंशी. जीव. वीर. विज. । ४. कुटुंबिना-विज. । ५. स्यधीश्वर-वीर. विज. ; स्यतिक्रमम्-श्रीधर. वंशी. जीव. विश्व. ।

पुर्याकर्षणस्य भीषणतामात्रतात्पर्य्येण ॥ ४२-४३ ॥ कथं शरणं जग्मुस्तदाह— रामेति । हे जगत्सुखप्रद ! वीप्साति भयात् ननु भक्तानेव रमयामि नत्वन्यानिति चेत्सत्यं तथापि जगतस्त्वयेव गतिः नत्वन्यः कोपीत्याहुः हे अखिलानामाधार आश्रयेति तत्र हेतुः अधीश्वर हे ब्रह्मादीनामपीश्वरेति अतोऽस्माकं अपराधमिति शेषः यद्वा नः अस्मान् क्षन्तुमर्हसि ननु महापराधिनो यूयं न क्षमायोग्याः तत्राहुः मूढानामज्ञानाम् अतः कुबुद्धीनां दुरभिमानिनां दुष्टविचाराणां वा यतस्तव प्रभावं न विद्मः अतोस्मदादीनामपराधो दीनवात्सल्येन न ग्राह्य एवेति भावः ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गंगायां विचकर्ष बलादानेतुमारभत । किमर्थम् ? प्रहरिष्यन् संहर्त्तमित्यर्थः । किंवा गंगायां प्रहरिष्यन् पातयिष्यन् निमज्जयितुमित्यर्थः । एवं तदिच्छया लांगलस्य दैर्घ्यादिकं ज्ञेयम् ॥ ४१ ॥ आदावाघूर्णत् सञ्चलन्; आघूर्णमिति पाठे पाठान्तरेऽपि स एवार्थः । पश्चात् पतदालोका, यत आकृष्यमाणं तेन; यद्वा, तत्कारणं तदाकर्षणं बालोक्येत्यर्थः ॥ ४२ ॥ जिजीविषव एवेति सर्व्वाभिमानो निरस्तः, प्रभुमिति परमेश्वर-बुद्ध्या शरणं जग्मुरित्यर्थः । यद्वा, सर्व्वापराधक्षमासमर्थ इति शरणयोग्यतोक्ता, यद्वा, साम्बस्य विशेषणं वा । प्रभुभावेन पुरस्कृत्य, एतच्च पुरीपतनेनैव तयोरप्यनिष्टं स्यादित्यभिप्रायेण; यद्वा, श्रीरामस्य प्रीतये प्राक् तदपेक्षित समर्पणार्थमुपायनवदिति ॥ ४३ ॥ कथं शरणं जग्मुः ? तदाह—रामेति । हे जगत्सुखप्रद ! वीप्सातिभयात् । ननु भक्तानेव रमयामि, न त्वन्यानिति चेत्, सत्यम्, तथापि जगतस्त्वमेव गतिः, न त्वन्यः कोऽपीत्याहुः— हे अखिलानामाधार ! आश्रयेति । तत्र हेतुः—अधीश्वर ! हे श्रीब्रह्मादीनामपीश्वरेति, अतो, नोऽस्माकमपराधमिति शेषः । ननु महापराधिनो यूयं न क्षमायोग्याः, तत्राहुः—मूढानामज्ञानाम्, अतः कुबुद्धीनां दुरभिमानिनां दुष्टविचाराणां वा, यतस्तव प्रभावं न विद्मः, अतो महादीनानामपराधो दीनवत्सलेन भवता न ग्राह्य एवेति भावः । अथवा 'रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि' इत्यादिवचनात् राम हे परब्रह्मन्नित्यर्थः । किञ्च, अखिलाधार ! हे परमात्मन्नित्यर्थः । सर्व्वेन्द्रियादिशक्तेस्तदेकमूलत्वात्; किञ्च, अधीश्वर ! हे परमेश्वर ! अतो न विद्म, अतएव मूढानां कुबुद्धीनाञ्च, अतः क्षन्तुमेवार्हसि, इति जगदीशतया स्तुतिर्महाभयात्, किंवा, अवतारत्वादिना तत्त्वतः श्रीकृष्णेनाभेदात् ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

सलक्ष्मणं लक्ष्मणया स्वभार्यया सहितम् ॥ ४३–४५ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

लाङ्गलाग्रेणेति । स रामः गजाह्वयं नगरमुद्विदार्य दक्षिणतः प्राकारमूले निखातेनोत्पाट्य गङ्गायां प्रहरिष्यन् पातयितुं इत्यर्थः विचकर्षाकृष्टवान् यतोऽमर्षितः ॥ ४१ ॥ जलयानमिवेति । आकृष्यमाणमत एव जलयानं प्लवमिवाघूर्णं भ्रमद्गङ्गायां पतच्च नगरमालोक्य जातः सम्भ्रमः सम्यक् भ्रमः कम्पो येषां ते ॥ ४२ ॥ जिजीविषवः जीवितुमिच्छवः कुटुम्बैः सहिताः तं राममेव शरणं ययुः सलक्ष्मणं लक्ष्मणया सहितं साम्ब पुरस्कृत्य पुरतो निधाय बद्धाञ्जलयः प्रोचुश्च ॥ ४३ ॥ उक्तिमेवाह— रामरामेति पञ्चभिः । कुबुद्धीनां नोस्माकमपराधमिति शेषः ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कुटुम्बीनामिति दीर्घश्छान्दसः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

लाङ्गलाग्रेण तदिच्छया वर्द्धितस्य लाङ्गलस्याग्रेण दक्षिणतः प्राकारमूले निखातेन उद्विदार्य्य उत्पाट्य विचकर्ष बलाज्जलान्तिकमानिनाय किं कर्तुं प्रहरिष्यन् प्रहर्तुं साम्बं विना सर्वमेव नगरं स्वजलेनैव प्रहृत्य बध्यतामिति गङ्गां प्रतीत्यादेशात् निष्कौरवां पृथ्वीं करिष्य इति प्राक्प्रतिज्ञातश्च सर्वनगरनिमज्जनेऽपि साम्बस्य न किमप्यमङ्गलमभविष्यदिति ज्ञेयम् ॥ ४१ ॥ जलयानमुडुपमिव आ समन्तात् घूर्णत इत्याघूर्णं जिजीविषव इत्यक्षराधिक्यं न दोषः नवाक्षरैकपादो वृत्तभेदोस्तीति भाषावृत्तावुक्तः सलक्ष्मणं साम्बं पुरस्कृत्येति रामं सद्यः प्रसादयितुम् ॥ ४२–४५ ॥

गूढार्थदीपिनी

प्रहरिष्यन् घातयितुं तच्च साम्बव्यतिरेकेणेति ज्ञातव्यम् ॥ ४१ ॥ ज्ञातसंभ्रमा उत्पन्नभयाः ॥ ४२ ॥ जिजीविषेति इदं गाथाख्यवृत्तमक्षराधिक्यात् ॥ ४३ ॥ अतिक्रमम् अपराधम् ॥ ४४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उद्विदार्य उत्पाट्य गङ्गायां प्रहरिष्यन् निमज्जयितुमित्यर्थः। विचकर्ष आकृष्टवान् लाङ्गलवृद्धिः साम्बयोविप्रादिरक्षासु तत्सङ्कल्पादेवेति ज्ञेयम् ॥ ४१-४३ ॥ क्षन्तुमर्हसि अपराधमितिशेषः ॥ ४४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

क्रियामाह **लाङ्गलाग्रेणेति** स्त्रियो बालाश्च युद्धे मारयितुमशक्या इति तस्यां भूमाबुत्पन्नाः कौरवा एवेति, लोके प्रसिद्धा भविष्यन्तीति, नगरमेवोद्विदार्य जन्मान्तरेऽपि तथात्वाभावाय गङ्गायां प्रहरिष्यन् विचकर्ष। क्रियाद्वयं निष्पन्नम्, तृतीयां क्रियां निवारयितुं चकारः। प्रहरणे विलम्बहेतुमाह **अमर्षित इति**। अतिक्रोधावेशान्न कृतवान्। अविचारे वा, प्रहरणसङ्कल्पे हेतुः ॥४१॥ कथमेतावता शिक्षा जातेत्याकाङ्क्षायामाह **जलयान**मिति। आ समन्तात् घूर्णा यस्मिन् तदाघूर्णं नगरम्। शत्रन्तं क्रिया वा। भिन्नं वाक्यं गङ्गायां पतदिति। मरणावश्यकताप्रतिबोधनं मरणं च ज्ञापितवान्। तत्र हेत्वन्तरनिराकरणाय बलक्रियादर्शनं कौरवाणामाह **आकृष्यमाण**मिति। कौरवत्वात्सहजदोषाभावः। **जातसम्भ्रमा** भीताः। अनेन गर्वनिवृत्तिरुक्ता। अतो दोषस्य निवृत्तत्वात् गुणस्य च विद्यमानत्वात् तमेव शरणं जग्मुः। ऐकमत्यमाह **सकुटुम्बा** इति। मोक्षाभावायाह **जिजीषव** इति। निमित्ते विद्यमाने शरणागतिमपि नाङ्गीकुर्यादिति साम्बस्य सभार्यस्यानयनमाह **सलक्ष्मण**मिति। लक्ष्मणासहितम्। प्राञ्जलयो विज्ञापनार्थाः। कथमपकर्षोऽङ्गीक्रियत इति चेत्, तत्राह **प्रभु**मिति ॥४२-४३॥ ते हि पूर्वं वार्तामात्रहारित्वं भगवतो ज्ञातवन्तः, पश्चात्क्रोधे कृते भीताः स्तोत्रमाहुः **पञ्चभिः राम रामे**ति। पूर्वं कृतापराधस्य क्षमापनमिहोच्यते।

क्रीडार्थत्वं तत्र हेतुर्महत्त्वं चापि सान्त्वने। अन्यार्थं च समारम्भः शरणं च वयं गताः ॥ १ ॥

तत्रापराधक्षमायां पञ्चहेतूनाह **रामेति**। रमणात्मकस्यादरेण द्विःसम्बोधनम्। अयमपि हेतुः। परं भगवद्धर्मः। **अखिलाधारे**ति। वयमाधेयाः। न हि यो यं बिभर्ति, स तदपराधं मन्यते। अज्ञानमपि हेतुरित्याह **प्रभावं न विदामह** इति। यद्यपि सहजः प्रभावो ज्ञायते, तथाप्यत्राविष्कारं (न) करिष्यसीति न जानीमः। सर्वत्रावतारेषु प्रतिज्ञातार्थमात्रपूरकत्वात्। नन्वेतादृशोऽप्यर्थः प्रतिज्ञासिद्ध एवेति कथमज्ञानम्, तत्राह **मूढाना**मिति। विचाररहितानामिति। ननु सर्वेषां कथं विचाराभावः, तत्राह **कुबुद्धीना**मिति। दुर्बुद्धित्वात् कैश्चिदुक्तमपि न गृहीतमित्यर्थः।

बुद्धिर्न शुद्धा नो शास्त्रं नापि ज्ञानं स्वतः क्वचित्। प्रभुः स्वामी भवांश्चापि धारकः क्षन्तुमर्हति ॥ २ ॥ ४४ ॥

श्रीसुबोधिनी-सारः

हलाग्रेण हस्तिनापुरमुत्पाट्य गंगायां प्रहरिष्यन् प्रहर्त्तुं प्रक्षेप्तुममर्षितः स विचकर्ष ॥ ४१ ॥ जलयानं नौरिवाघूर्णं कंपितं नगरम् आकृष्यमाणं गंगायां पतत् आलोक्य दृष्ट्वा जातः संभ्रमो येषां ते कौरवाः ॥ ४२ ॥ कुटुबेन सहिता जिजीविषवः वर्णलोप आर्षः। लक्ष्मणया सहितं सांबं पुरस्कृत्याग्रे कृत्वा प्रांजलयः तमेव प्रभुं शरणं ययुः ॥४३॥ हे रामराम हे अखिलाधार ते तव प्रभावं वयं न जानीम मूढानां कुत्सिता बुद्धिर्येषां नोस्माकम् अतिक्रममपराधं क्षंतुं त्वमर्हसि ॥ ४४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

राम रामेत्यत्र। **बुद्धिर्न शुद्धे**ति कारिकया पूर्वार्धेन क्षमायां कौरवनिष्ठं हेतुत्रयं प्रातिलोम्येन निरूपितम्। रामनिष्ठं हेतुद्वयमानुलोम्येनाहुः **प्रभु**रिति। **भवांश्चे**ति। **तवाहे**ति। इति कौरवोक्तं जगतो लीलास्थानत्वं **शुक** आहेत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स अमर्षितः संक्रुद्धो रामो गजाह्वयं नगरं उद्विदार्य उत्पाट्य गङ्गायां प्रहरिष्यन् पातयितुं तं लाङ्गलाग्रेण विचकर्ष आकृष्टवान्। **युद्धे** पुरुषमारणेपि स्त्रीबालानामवशिष्टत्वे पुनः पृथ्वी सकौरवा स्यात्, अतः स्त्र्यादिसहितमेव नगरं पातयितुमाकृष्टवानिति ज्ञेयम् ॥ ४१ ॥ आकृष्यमाणमतएव जलयानमिवाघूर्णं भ्रमत् गङ्गायां पतच्च नगरं व्यालोक्य जातः सम्भ्रमो भयं येषां ते कौरवाः सलक्ष्मणं लक्ष्मणासहितं साम्बं पुरस्कृत्य स्वयं च प्राञ्जलयः सन्तस्तमेव प्रभुं रामं शरणं जग्मुरिति द्वयोरन्वयः। तत्र हेतुमाह—जिजीषवः जीवितुमिच्छव इति। तत्र हेतुमाह—सकुटुम्बा इति। कुटुम्बासक्तत्वादित्यर्थः ॥ ४२-४३ ॥ शरणमागतानां स्तुतिमाह—राम रामेति चतुर्भिः। भयमादरं सूचयन्तो बहुधा संबोधयन्ति—हे अखिलाधार हे अधीश्वर ! ते तव प्रभावं वयं न जानीमः, अतो नोऽस्माकपराधं क्षन्तुमर्हसीत्यन्वयः। अज्ञाने हेतुमाहुः—कुबुद्धीनामिति। तत्र हेतुमाहुः—मूढानामिति। **अविद्यया** मोहितानामित्यर्थः ॥ ४४ ॥

अन्वितार्थप्रकाशिका

लाङ्गलेति ।। सः अमर्षितः संक्रुद्धो रामो गजाह्वयं नगरं लाङ्गलस्य तदिच्छया वर्द्धितस्याग्रेण दक्षिणतः प्राकारमूले निखातेन उद्विदार्य उत्पाट्य गङ्गायां प्रहरिष्यन् पातयितुं विचकर्षाकृष्टवान् । बलाञ्जलान्तिकमानेतुमारभत ।। ४१ ।। जलेति युग्मम् ।। आकृष्यमाणमत एव जलयानमुडुपमिवाघूर्णं भ्रमत् गङ्गायां पतच्च नगरमालोक्य जातः सम्भ्रमो येषां ते जिजीविषवः जीवितुमिच्छवः । अक्षराधिक्यं सोढव्यम् । सकुटुम्बाः कौरवाः रामं सद्यः प्रसादयितुं सलक्ष्मणं लक्ष्मणासहितं साम्बं पुरस्कृत्य स्वयं च प्राञ्जलयः सन्तस्तमेव प्रभुं रामं शरणं जग्मुः ।। ४२-४३ ।। रामेति ।। हे राम राम ! हे अखिलाधार ! वयं ते प्रभावं न विदाम न विद्मः । आर्षः प्रयोगः । मूढानां प्रभावानभिज्ञानां कुबुद्धीनां नः अतिक्रममपराधं क्षन्तुमर्हसि ।। ४४ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

लांगलाग्रेण प्राकारमूले धृतेन हलाग्रेण नगरमुद्विदार्य उत्पाट्य गंगायां प्रहरिष्यन् निःक्षेपयिष्यन् सन् ।। ४१ ।। जलयानं नौरिव आघूर्णं कंपमानं ।। ४२ ।। सकुटुंबा जिजीविषव इति द्वितीयपादेऽक्षराधिक्यमार्षं ।। ४३-४५ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

लाङ्गलाग्रेणेति । अमर्षितः स रामः, गजाह्वयं, नगरं, लाङ्गलाग्रेण दक्षिणतः प्राकारमूले निखातेन हलाग्रभागेन, उद्विदार्य उत्पाट्य, गङ्गायां, प्रहरिष्यन् पातयितुमित्यर्थः । विचकर्ष आकृष्टवान् ।। ४१ ।। जलयानमिवेति । आकृष्यमाणमत एव, जलयानं प्लवमिव, आघूर्णं भ्रमत्, गङ्गायां पतच्च, नगरं आलोक्य विलोक्य, जातसंभ्रमाः सम्यक्संजातकम्पाः, कौरवाः ।। ४२ ।। तमेवेति । जिजीविषवः जीवितुमिच्छवः, सकुटुम्बाः कुटुम्बैः सहिताः सन्तः, सलक्ष्मणं लक्ष्मणया सहितं, साम्बं, पुरस्कृत्य पुरतो निधाय, प्राञ्जलयः बद्धाञ्जलयः सन्तश्च, प्रभुं, तं राममेव, शरणं जग्मुः । प्रोचुश्चेति शेषः । द्वयोरेकसंबन्धः ।। ४३ ।। उक्तिमेवाह । रामेति । हे राम, हे राम, हे अखिलाधार, वयं, ते तव, प्रभावं महिमानं, न विदाम, अतः, हे अधीश्वर, मूढानां कुबुद्धीनां नोऽस्माकं, अपराधमिति शेषः । क्षन्तुं अर्हसि ।। ४४ ।।

कृष्णप्रिया

पुनः दाऊजी ने हलकी नोंक से पुनः पुनः भूमि में चोट करते हुए हस्तिनापुर नगर को उखाड़ दिया और नगर को डूबाने के लिए अतिशय आवेश से गङ्गाजी की ओर खींचने लगे ।। ४१ ।। हल की नोंक से उखाड़ के खींचने पर सम्पूर्ण हस्तिनापुर इस प्रकार काँपने लगा कि मानो पानी में कोई नौका डग-मगा रही हैं, जब उन लोगों ने अपनी नजरों से देखा कि हमारी नगरी गङ्गाजी में गिर रही है तब वे लोग घबड़ा गये ।। ४२ ।। पुनः दीन बनकर सारे कौरव श्री लक्ष्मणा जी के साथ साम्ब कुमार को आगे रखकर अपने प्राणों के रक्षण के लिये अपने कुटुम्ब-परिवार को साथ लेकर अंजलिबद्ध होकर सर्व समर्थ भगवान् बलभद्रजी के शरण में गये ।। ४३ ।। शरण में जाकर दैन्य से निवेदन करने लगे हे लोकाभिराम ! हे बलराम ! आप समस्त विश्व के आधार शेष भगवान हैं, हम आपकी महिमा नहीं जानते हे नाथ ! हम लोग मूढ़ बन रहे हैं हमारी मति भ्रष्ट हो चुकी है, अतः आप हम दीन लोगों के अपराध को क्षमा करें ।। ४४ ।।

स्थित्युत्पत्त्यप्ययानां त्वमेको हेतुर्निराश्रयः । लोकान् [1]क्रीडनकानीश क्रीडतस्ते वदन्ति हि ।। ४५ ।।
त्वमेव मूर्ध्नीदमनन्त लीलया भूमण्डलं बिभर्षि सहस्रमूर्धन् ।
अन्ते च यः स्वात्मनि रुद्धविश्वः शेषेऽद्वितीयः परिशिष्यमाणः ।। ४६ ।।
[2]कोपस्तेऽखिलशिक्षार्थो न द्वेषान्न च मत्सरात् । गृह्णतो [3]भगवत्सत्त्वं स्थितिपालनतत्पर ।। ४७ ।।
नमस्ते सर्वभूतात्मन् सर्वशक्तिधराव्यय । विश्वकर्मन् नमस्तेऽस्तु त्वां वयं शरणं गताः ।। ४८ ।।

कर्दमक्षमा

अन्वयः—त्वम्, एकः, निराश्रयः, स्थित्युत्पत्त्यप्ययानाम्, हेतुः, हे ईश !, क्रीडन्, ते, लोकान्, क्रीडनकानि, वदन्ति, हि ।।४५।। अनन्त !, सहस्रमूर्धन्, लीलया, इदम्, भूमण्डलम्, त्वम्, एव, मूर्ध्नि बिभर्षि, च, अन्ते, परिशिष्यमाणः, अद्वितीयः, यः, स्वात्मनि, रुद्धविश्वः, शेषे ।। ४६ ।। स्थितिपालनतत्पर !, भगवत्सत्त्वम्, गृह्णतः, ते, कोपः, अखिलशिक्षार्थं, न, द्वेषात्, न, च, मत्सरात् ।।४७।। सर्वभूतात्मन् !, सर्वशक्तिधर, अव्यय, विश्वकर्मन्, ते, नमः, अस्तु, त्वाम्, वयम्, शरणम्, गताः ।।४८।।

---

१. वहतास्ते—विज. । २. स्ते खिलशिक्षार्थं सर्वेषां—च. पु. टि. ; स्ते खलु—प्रा. पा. । ३. बिभ्रतो भगवन्—श्रीधर. वंशी. जीव. वीरु. विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

शेषे शयनं करोषि शेषपर्यंके परिशिष्यमाणो यः स च त्वमेवेति वा ॥ ४६ ॥ अस्मासु कोपश्च तवायमनुचित एवेत्याहुः । कोपस्तु इति स्थितिपालने तत्परस्ताहत्पर्यवान्कोपः । पाठांतरे संबोधनम् ॥ ४७ ॥ विश्वं कर्म कृत्यं यस्य स त्वमिति सम्बोधनम् ॥ ४८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्थितेरादौ निर्देशः पालनापेक्षया । तेषु तवान्यापेक्षा नास्ति इत्याहुः—निजाश्रयः । 'निराश्रयः' इति पाठेपि स एवार्थः । न च तैः प्रयोजनमस्तीत्याहुः—लोकानिति । 'लोकवत्तु लीलाकैवल्यम्' इति न्यायेनेति भावः । तदुक्तम्—"सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्ष्य तु । कुरुते केवलानंदाद्यथा मत्तस्य नर्तनम् ॥" इति । अतः क्रीडया त्वया वयं यथा नियुक्तास्तथैव प्रवृत्ताः । अतः कुबुद्धित्वेऽपि को नामास्माकं दोष इति भावः । ईशेति पाठे हे सर्वनियन्त इत्यर्थः ॥ ४५ ॥ किमहं जीववन्निद्रालुरित्याशंकायामर्थांतरमाह—शेषे पर्यंके इति । परमकृपालुतया त्वं हे अनन्तापरिच्छिन्न अधुना स्वस्मिन् जगद्बिभर्षि न तद्वृत्तौ किञ्चित्प्रयास इत्याहुः-हे सहस्रमूर्द्धन् । सहस्रमूर्द्धत्वेकस्मिन्नेव धृतमिदमज्ञातप्रायमेवोष्णीषसक्तरोमवदिति भावः ॥४६॥ मत्सरात्परोत्कर्षासहनात् । पाठांतरे निर्विसर्गपाठे । स्थितेः शिष्टमर्यादायाः पालने तत्परस्त्वं, तव कोपः शिक्षार्थमेव यतः पूर्वं दुष्टास्त्वामपश्यंतो मदांधा एव स्म इदानीं शिष्टा जाता इति भावः ॥ ४७ ॥ हे सर्वभूतात्मन्निति, सर्वभूतांतर्गता वयमपीति भावः । अहं दुष्टान्वधिष्याम्येवेति चेत्तत्राहुः—हे सर्वशक्तिधरेति । अस्मन्मारणे पालने च त्वं शक्त एवेति भावः । किञ्च हे विश्वकर्मन्निति बिश्वमिदं तवैव कार्यमतोऽस्मान् जीवयितुमेवार्हसीति भावः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदंशभूतसङ्कर्षणाख्यमहत्स्रष्टृपुरुषाभेदेनाधीश्वरत्वमेवाभिव्यञ्जयन्ति—स्थितीति । स्थितेरादौ निर्द्देशः सम्प्रति पालनापेक्षया न च तेषु तवान्यापेक्षाऽस्तीत्याहुः निजाश्रय इति पाठः क्वचित् नच तैः प्रयोजनमपीत्याहुः लोकानिति । "लोकवत्तु लीलाकैवल्यम्" इतिन्यायेनेति भावः । तदुक्तं नारायणाध्यात्म्ये—

"सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्ष्य तु । कुरुते केवलानन्दात् यथा मत्तस्य नर्त्तनम्" ॥ इति ।

किन्तु सङ्कल्पमात्राद्यथावत्करणाच्च त्वयि सर्वज्ञत्वादिकन्तु विशेष इति भावः । अतः क्रीडता त्वया वयं यथा नियुक्ताः स्मः तथैव प्रवृत्ता इति कुबुद्धित्वेप्यस्माकं को नाम दोषस्तत् क्षन्तुमेवार्हसीति तात्पर्यं निजाश्रय इति पाठे भक्तमात्रापेक्षया स्थित्यादिकर्त्तृत्वानुषङ्गिकतयान्येषामपि स्थित्यादिकर्त्ता भवसीति व्याख्येयम् ॥ ४५ ॥ तत्रापि निजमूर्त्तिविशेषेण परमकृपया पृथ्वीधारणात् पालनमेव तव मुख्यमित्याहुः—त्वमिति । अनन्त हे अपरिच्छिन्नत्वादनन्तसंज्ञक अतो हे सहस्रमूर्द्धन् ! अतो लीलयैव तेष्वेकेन मूर्द्ध्ना इदं सर्वाधारं बिभर्षि नच प्रलयेपि पालकत्वं व्यभिचरसीत्याहुः—अन्तेचेति । नैमित्तिकप्रलये स्वस्य आत्मनि विग्रहे निरुद्धं स्थापितं संरक्षितं विश्वं येन स गर्भोदकशायिरूपेण शेषे अद्वितीय इति तदानीं त्रैलोक्ये न विद्यते द्वितीयो यस्य सः ॥४६॥ अतः कोपोपि तव जगत्पालनायैवेत्याहुः—कोप इति । खलु निश्चितम् अखिलेति पाठे अखिलस्य शिक्षार्थं हितायेत्यर्थः । यतः स्थितये यत्पालनं तत्परः अत एव न द्वेषान्न च मत्सरात् यतः सत्त्वं गुणं श्रीविष्णुरूपेण बिभ्रतः पुष्णतः तेन च न तवोपकृतिरित्याहुः—हे भगवन् ! स्वाभाविकशक्तिविलासैश्वर्यादिप्रशस्तेति अतो लोकदययैव तत्पोषणमिति भावः ॥ ४७ ॥ तथाप्याकर्षणादनिवृत्तं दृष्ट्वा अतिभीत्या तत्प्रियनामसङ्कीर्त्तनेन मुहुः प्रणमन्तः शरणं यान्ति—नम इति । नमस्कारे हेतुः हे सर्वेषाम्भूतानाम् आत्मन् अन्तर्यामिन् ! अत एव सर्वशक्तिधर सर्वेन्द्रियविविधवृत्तिप्रवर्त्तनात् यतोऽव्यय हे सर्वैश्वर्य्यपूर्ण ! अतो विश्वकर्मन् हे जगत्स्रष्टइत्यर्थः । अस्त्विति नमस्कारस्य नित्यसत्तां प्रार्थयन्ते शरणगमनयोग्यता च तैरेव विशेषणैः तत्र सर्वेति परमैश्वर्य्यमुक्तं तत्र हेतुः सर्वशक्तिधरेति तत्राप्यव्ययेति तदेव दर्शयन्ति विश्वेति ॥ ४८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधीश्वरत्वमेवाभिव्यञ्जयन्ति—स्थितीति । स्थितेरादौ स निर्द्देशः सम्प्रति पालनापेक्षया, न च तेषु तवान्यापेक्षास्तीत्याहुः—निजाश्रयेति । नापि तैः प्रयोजनमपीत्याहुः—लोकानिति । क्रीड़तः सदा क्रीड़ापरस्य, वदन्ति तत्त्वज्ञाः, हि निश्चये; ननु क्रीड़ायां को हेतुः ? तत्राहुः—हे ईशेति । ईश्वराभिप्रायस्य दुर्वितर्क्यत्वात् स केन ज्ञातुं शक्य इति भावः । अतः क्रीड़ता त्वया बयं यथा नियुक्ताः स्मस्तथैव प्रवृत्ता इति कुबुद्धित्वेऽप्यस्माकं को नाम दोषस्तत् क्षन्तुमेवार्हसीति तात्पर्य्यम् ॥ ४५ ॥ तत्रापि निजमूर्त्तिविशेषेण परमकृपया पृथ्वीधारणात् पालनमेव तव मुख्यमित्याहुः—त्वमिति । अनन्त ! हे अपरिच्छिन्नत्वादनन्तसंज्ञक ! अतो हे सहस्रमूर्द्धन् ! अतो लीलयैव तेष्वेकेन मूर्द्ध्ना, पाठान्तरेऽपि स एवार्थः । इदं सर्व्वाधारं बिभर्षि । ननु

धरणीधरः शेषोऽहं परमेश्वराद्भिन्नः, कथमभेदेन स्तूये ? तत्राहुः—अन्ते चेति तैर्व्याख्यातम्; यद्वा, न च प्रलयेऽपि पालकत्वं व्यभिचरतीत्याहुः—अन्ते चेति; स्वस्य आत्मनि श्रीविग्रहे निरुद्धं स्थापितं संरक्षितं विश्वं येन सः, किंवा अद्वितीयः, अतः परितः शिष्यमाणो भगवच्छेषतां प्राप्नुवन् शेषे, अतएव शेषनामापि त्वमिति भावः। अथवा अनन्त ! हे अपरिच्छिन्न ! अतो हे सहस्रमूर्द्धन् अपरिमितशीर्षन् ! तच्च पुरुषसूक्तादौ व्यक्तमेव, अतएव लीलया अशेषरूपेणेदं विभर्षि, अन्यत् समानम् ॥ ४६ ॥ अतः कोपोऽपि तव जगत्पालनायैवेत्याहुः—कोप इति। खलु निश्चिते, अखिलेति पाठे, पाठान्तरे अखिलस्य शिक्षार्थं हितायेत्यर्थः। यतः स्थितये यत्पालनं तत्परः, अतएव न द्वेषान्न च मत्सरात् पालकस्य पाल्येषु तदसम्भवादित्यर्थः। यतः सत्त्वं गुणं विभ्रतः पुष्णतः, तच्च सहजकारुण्येनैवेत्याहुः—भगवन् ! हे परमदयालो ! खलेति पाठे दुष्टानां दण्डार्थमित्यर्थः। तत्र हेतुः—स्थितीति। अन्यथा जगत्पालनासिद्धिरिति भावः ॥ ४७ ॥ तथाप्याकर्षणादनिवृत्तं दृष्ट्वातिभीत्या तत्प्रियनामसंकीर्तनेन मुहुः प्रणमन्त आहुः—नम इति। नमस्कारे हेतुः—हे सर्व्वेषां भूतानामात्मन् ! अन्तर्य्यामिन् ! अतएव हे सर्व्वशक्तिधर ! सर्वेन्द्रियविविधवृत्तिप्रवर्त्तनात्। यतोऽव्यय ! हे सर्व्वैश्वर्य्यपूर्ण ! अतो विश्वकर्म्मन् ! हे जगत्स्रष्टुरित्यर्थः। अस्त्विति नमस्कारस्य नित्यसत्तां प्रार्थयन्ते। यद्वा, शरणगमनयोग्यतामाहुः। तत्र सर्व्वेति परमैश्वर्य्यमुक्तम्। तत्र हेतुः—सर्व्वशक्तिधरेति तत्राप्यव्ययेति। तदेव दर्शयन्ति—विश्वेति। अन्यत् समानम् ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अद्वितीयः समाभ्यधिकरहितः रुद्धवीर्यः स्वभावः कार्योन्मुखं कुर्वन् ॥ ४६-४८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

स्थितीति। अप्ययः प्रलयः तेषां त्वमेक एव हेतुराधारतयेतिभावः। कस्तर्हि मम हेतुस्तत्राहुः—निजाश्रय इति। निज आत्मा आधारो यस्य सः हे ईश ! क्रीडतस्ते तवेति क्रीडनकान् क्रीडोपकरणभूतान् वदन्ति त्वद्याथात्म्यविदः ॥ ४५ ॥ त्वमेको हेतुरित्येतदेव प्रपञ्चयति—त्वमिति। हे अनन्त मूर्द्ध्वेत्वस्य सहस्रेत्यादिः सहस्रमूर्द्धा त्वमेक एवेदं कृत्स्नं भूमण्डलं मूर्द्ध्नि लीलयैव विभर्षि अन्ते प्रलये स्वात्मनि रुद्धं लीनं विश्वं यस्य स अत एवावशिष्यमाणोऽत एवचाद्वितोयः समाभ्यधिकरहितः शेषे शयिष्यसे परमात्मदृष्ट्येदमुक्तम् ॥ ४६ ॥ कोप इति। हे क्षितिपालनतत्पर ! हे भगवन् ! सत्त्वं शुद्धसत्त्वमयं शरीरं बिभ्रतस्तव कोपः केवलं शिक्षार्थमेव नतु द्वेषान्नापि मत्सराच्च द्वेषोऽप्रीतिः मत्सरः कौटिल्यम् ॥ ४७ ॥ शरण्यत्वोपयुक्तगुणैः सम्बोधयन्तः शरणं व्रजन्ति—सर्वभूतात्मन्नित्यनेन सार्वज्ञं सर्वशक्तिधरेत्यनेन स्वशक्तित्वम् अव्ययेत्यनेन रागद्वेषादिविकारराहित्यम् अत एव सर्व सुहृत्त्वं विश्वकर्मन् इत्यनेन परत्वञ्चोक्तं भवति क्रियत इति कर्म कार्यं विश्वं यस्य कार्यं तथाभूतेत्यर्थः। सर्वमिदं परमात्मदृष्ट्योक्तम् ॥ ४८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

क्रीडनकान् क्रीडासाधनानि ॥ ४५ ॥ अन्ते जगत्संहारे परिशिष्यमणोऽद्वितीयः शेषे ॥ ४६ ॥ जगद्बिभ्रतः ते कोपोऽखिलशिक्षार्थं सत्त्वं स्थित्यादितत्परः सद्भिरत्र हलधरे यथोचितं ग्राह्यमनुचितमन्तर्यामिविषयमिति तात्पर्यमवगन्तव्यं विश्वस्य प्रपञ्चस्यानुग्रहार्थं कर्म विक्रमलक्षणो व्यापारो यस्य स तथा तस्य सम्बुद्धिः हे विश्वकर्मन् ॥ ४७-४८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

शेषे स्वपिषि शेषपर्य्यङ्केऽद्वितीयः त्रैलोक्ये त्वदन्यस्य तदानीमविद्यमानत्वात् ॥ ४६ ॥ सत्त्व पालनार्थकं सत्त्वगुणमिदानीं विभ्रतस्तव कोपोयमखिलानां शिक्षणार्थमेव कोपः कीदृशः स्थितेः शिष्टमर्य्यादायाः पालने तत्परस्तात्पर्य्यवान् यद्यद्भ्कोपः कृतस्तत एव वयं शिष्टाः सम्प्रत्यभूम पूर्वन्तु दुष्टास्त्वामपश्यन्तो गर्वान्धा एवास्मेति भावः निर्विसर्गपाठे सम्बोधनपदम् ॥ ४७ ॥ दुष्टान् वो वधिष्याम्येति चेत्तत्राह—सर्वशक्तिधर अस्माकं मारणेपि पालनेपि शक्ति दधास्येव अव्ययेत्यस्माकं जीवने मरणे वा तव न किमपि व्येति किञ्च हे विश्वकर्मन्निति विश्वमिदं तवैव कर्म कार्य्यमिति जीवयितुमेवास्मानर्हसीतिभावः ॥ ४८ ॥

गूढार्थदीपिनी

क्रीडनकान् क्रीडोपकरणीभूतान् ॥ ४५ ॥ इदं विश्वं लीलया अनायासेन त्वमेव विभर्षि। अन्ते च प्रलये स्वात्मनि रुद्धं लीनं विश्वं येन सः। शेषे शयनं करोषि। शेषपर्यङ्के वा यः सोऽपि त्वमेवेत्यभेदेन निर्देशः ॥ ४६ ॥ अखिलानाम् उत्पथगामिनाम्। स्थितेः शिष्टमर्यादायाः ॥ ४७-४८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

क्रीडनकान् क्रीडोपकरणान् ॥ ४५ ॥ **अन्ते** संहारे स्वात्मनि **रुद्धविश्वः** **रुद्धं** प्रलीनं विश्वं यस्मिन् सः अत एव परिशिष्यमाणः अत एव अद्वितीयः निस्समानातिशयः शेषे स्वपिष्यसि व्यूहाङ्गिदृष्ट्येदं बोध्यम् ॥ ४६ ॥ **इष्टद्रुहो** दण्ड्या इति **अखिलानां शिक्षार्थम्** ॥ ४७-४८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

किञ्च । अस्माभिरेवमपि न प्रार्थयितव्यम्, अतस्तवैव लीलास्थानं जगदिति, तदाह **स्थित्युत्पत्तीति** । एकेनैवोत्पत्त्यादिकं क्रियते, स्वस्मिन्नेव स्थितेन । तत्र तथा करणे प्रयोजनं लीला । तदाह **लोकान्क्रीडनकानिति** । **ईश** इति सम्बोधनमन्यथा न कुर्यादिति ज्ञापयति । क्रीडनका यन्त्रादयः । अन्यक्रीडार्थपक्षं व्यावर्तयति **क्रीडतस्त** इति । **वदन्तीति** प्रमाणं व्यासादयः । युक्तश्चायमर्थः । पूर्णस्यान्यथा प्रवृत्तिरयुक्ता ॥ ४५ ॥ किञ्च । समानेषु दण्डः **क्रियते**, न तु मशकतुल्येषु, अतोऽतितुच्छत्वादस्मासु क्रोधो न युक्त इत्याशयेनाह **त्वमेव मूर्ध्नीदमिति** । अस्य नगरस्य कियती वार्ता, पञ्चाशत्कोटिविस्तीर्णं भूमण्डलं हे अनन्त मूर्ध्नि लीलया बिभर्षि । तादृशसहस्रमूर्धा भवान् । भूमण्डलादधिकमात्रपरिमाणमायातीति, न व्यापकतेत्यनन्तेति । न केवलमन्यप्रेरणया धारणम्, किन्तु स्वरुच्या । यतः **अन्ते** स्वात्मनि **रुद्धं विश्वं** यतस्तादृशो भवान् **अद्वितीयः शेषे** शिष्टो भवसि । यतः **परिशिष्यमाणः** स्वयमेव । अतः शेषनामेति भावः ॥ ४६ ॥ एवमपि महतः अत्यल्पेषु क्रियाविष्कारोऽनुचित इति निरूप्य **कृतस्य** कोपस्यान्यथा विनियोगमाह **कोपस्त** इति । लोके द्वेधा कोपो भवति, द्विष्टे वा, महत्युत्कर्षासहनाद्वा । तदुभयं न प्रकृते, किन्तु शिक्षार्थमेव । सर्व एव भगवतो बालका इति ज्ञापयितुमखिलपदम् । तत्र हेतुः **गृह्णतो भगवत्सत्त्वमिति** । गुणान्तरैरसंस्पृष्टसत्त्वम् । अन्यथा बाधितं स्यात् । सत्त्वस्य च महत्प्रयोजनमित्याह **स्थितिपालनतत्पर** इति । जगतो मर्यादापालनं चान्यथा न स्यात् ॥ ४७ ॥ शरणागतिं प्रार्थयितुं नमस्यन्ति **नमस्त** इति । नमनमात्रेणैव प्रसादयोगाय । **सर्वभूतात्मन्निति** । आत्मा स्वल्पेनापि तुष्यति । **सर्वशक्तिधरे**त्यस्मदादितामसशक्तयोऽपि तवैव । अस्मदीयं सर्वं धर्माधर्मश्च भवानित्युक्तम् । एवं सत्यस्मदीयदोषसम्बन्धः स्यादित्याशङ्क्याह **अव्ययेति** । किञ्च । एतत्पुरभङ्गे पुनरप्येतत्कर्तव्यं स्यादित्याशयेनाह **विश्वकर्मन्निति** । विश्वं कर्म यस्येति । अन्यदाप्यतिक्रमाभावाय नमनं प्रार्थयन्ते **नमस्तेऽस्त्वि**ति । एवं प्रसन्नं विधायाहुः **त्वां वयं शरणं गता** इति ॥ ४८ ॥

श्रीसुबोधिनी-सारः

पालनोत्पत्तिसंहाराणां त्वमेको हेतुः कारणं स्वयं निराश्रयः स्वाश्रयः हे ईश क्रीडतस्ते तव लोकान् क्रीडनकान् क्रीडासाधनानि आहुः ऋषयो हि युक्तम् ॥ ४५ ॥ हे अनंत हे सहस्रमूर्द्धन् इदं भूमंडलं मूर्ध्नि शिरसि त्वं बिभर्षि लीलया अंते प्रलये स्वात्मनि रुद्धं विश्वं येन सोऽद्वितीयः परिशिष्यमाणः उर्वरितो यस्त्वं शेषे शयनं करोषि शेषपर्यंके वा ॥ ४६ ॥ हे भगवन् सत्त्वं बिभ्रतस्ते तव कोपोऽखिलशिक्षार्थम् एव न द्वेषात् मत्सराच्च न स्थितिपालने तत्परः तात्पर्यवान् अविसर्गपाठे संबोधनम् ॥४७॥ हे सर्वभूतात्मन् हे सर्वशक्तिधर हे अव्यय ते तुभ्यं नमः हे विश्वकर्मन् त्वां शरणं वयं गताः ते नमोस्तु ॥४८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ईश्वरत्वमेवोपपादयति—हे ईश ! स्थित्यादीनां हेतुः उपादानं निमित्तं च द्विविधमपि कारणं त्वमेक एव, हि यस्मात् लोकान् क्रीडतः ते तव क्रीडनकान् क्रीडोपकरणभूतान् सर्वज्ञा ऋषयो वदन्ति । त्वं तु स्वयं निराश्रयः आधारादिकारणरहित एव ॥ ४५ ॥ अखिलाधारत्वं प्रपञ्चयन्ति । 'परिच्छिन्नस्यैतन्न भवति' इति व्यापकत्वेन संबोधयन्ति—हे अनन्तेति । हे सहस्रमूर्द्धन् ! इदं भूमण्डलं लीलयाऽनायासेनैव स्वमूर्ध्नि बिभर्षि धत्से । अन्ते प्रलये च स्वात्मनि रुद्धं लीनं विश्वं यस्य सः, अत एव परिशिष्यमाणः, अत एव चाद्वितीयः एवंभूतो यः शेते त्वमेव शेषे । श्रीनारायणाभेददृष्ट्येदमुक्तम् ॥ ४६ ॥ एवंभूतस्य ते तवायं कोपः अखिलानामुत्पथानां प्राणिनां शिक्षार्थं सन्मार्गे प्रवृत्त्यर्थमेव, न द्वेषान्न च मत्सरात् न चोत्कर्षासहनात् । शिक्षायां हेतुमाहुः—सत्त्वं गुणं बिभ्रत इति । सत्त्वगुणधारणे हेतुमाहुः—हे भगवन् सर्वज्ञ ! यतो भवान् स्थितेर्वर्तमानस्य प्रपञ्चस्य पालने तत्परः, अन्यथा तव कोपेन प्रलय एव स्यादिति भावः ॥ ४७ ॥ शरण्यत्वोपयुक्तगुणैः संबोधयन्तः नमस्यन्तः शरणं व्रजन्ति । सर्वोपादानत्वमाहुः—सर्वभूतात्मन्निति । निमित्तत्वमाहुः—विश्वकर्मन्निति । उभयत्र सामर्थ्यमाहुः—सर्वशक्तिधरेति । अविकारित्वमाहुः—अव्ययेति । स्पष्टमन्यत् ॥ ४८ ॥

अन्वितार्थप्रकाशिका

स्थितीति ॥ त्वम् एक एव स्थित्यादीनां हेतुः स्वयं च निराश्रयः । हे ईश ! हि यस्मात् लोकान् क्रीडतः ते तव क्रीडनकान् क्रीडोपकरणभूतान् सर्वज्ञा ऋषयो वदन्ति ॥ ४५ ॥ त्वमिति । हे अनन्त ! हे सहस्रमूर्द्धन् ! इदं भूमण्डलं लीलयाऽ-

नायासेनैव त्वमेव स्वमूर्ध्नि विभर्षि धत्से । अन्ते प्रलये च स्वात्मनि रुद्धं लीनं विश्वं यस्य सः अत एव परिशिष्यमाणः अत एव चाद्वितीयः त्वं शेषे शयनं करोषि । एवंभूतो यः स शेषे शेषपर्यङ्के परिशिष्यमाणो यः स त्वमेवेति वा श्रीनारायणाभेददृष्ट्येदमुक्तम् ॥ ४६ ॥ कोप इति । हे भगवन् ! सत्त्वं गुणं बिभ्रतस्ते योऽयं कोपः अखिलानामुत्पथानां प्राणिनां शिक्षार्थं सन्मार्गे प्रवृत्त्यर्थमेव न द्वेषान्न च मत्सरात् न चोत्कर्षासहनात् यतस्त्वं स्थितेः शिष्टमर्यादायाः पालने तत्परः असि । यद्वा । स्थितिपालने तत्परः तात्पर्यवान् कोपः निर्विसर्गपाठे सम्बोधनम् ॥ ४७ ॥ नम इति । हे सर्वभूतानामात्मन् ! हे सर्वशक्तिधर ! हे अव्यय ! ते नमः । हे विश्वं कर्म कृत्यं यस्य ते नमोऽस्तु । वयं त्वां शरणं गताः ॥ ४८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अंते निमित्तप्रलये स्वात्मनि स्वदेहे रुद्धविश्वः परिशिष्यमाणः अवशेषतया स्थितः अद्वितीयः तत्र स्थाने भवादृशो द्वितीयो नास्तीति तथाभूतः त्वं शेषे पर्य्यंके स्थितोऽसि यद्वा अवशिष्यमाणस्त्वं शेषे शयनं करोषि ॥ ४६ ॥ हे भगवन् सत्वं सत्त्वगुणं बिभ्रतस्ते कोपः यतस्त्वं स्थितिपालने तत्परः सावधानोऽसि । पाठांतरे स्थितिपालनतत्परेति संबोधनं वा ॥ ४७ ॥ एतावत् स्तवने कृतेपि पुरकर्षणात्यागं दृष्ट्वा भीताः संतस्ते कौरवा मुहुर्मुहुः संबोधयंति नम इति । विश्वं कर्मकृत्यं यस्य तत्संबुद्धिः ॥ ४८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्थितीति । स्थितिश्च उत्पत्तिश्च अप्ययः प्रलयश्च तेषामुत्पत्तिस्थितिप्रलयानामित्यर्थः । हेतुः कारणभूतः, त्वमेव एकः, असि । स्वयं निजाश्रय आत्माऽऽधारः, सर्वेषामाधारः स्वयमनाधार इत्यर्थः । हे ईश, लोकान् क्रीडतः, ते तव, क्रीडनकान् क्रीडोपकरणरूपान्, वदन्ति कथयन्ति हि । त्वद्याथात्म्यविदः इति शेषः ॥ ४५ ॥ त्वमेको हेतुरित्येतदेव प्रपञ्चयति । त्वमिति : हे अनन्त, हे सहस्रमूर्द्धन्, त्वं एव, इदं भूमण्डलं, लीलया मूर्द्ध्नि, बिभर्षि । अन्ते प्रलये च, यस्त्वं, स्वात्मनि रुद्धं लीनं विश्वं यस्य सः, अत एव, परिशिष्यमाणः, अत एव, अद्वितीयः समाभ्यधिकरहितः, शेषे शयिष्यसे । परमात्मदृष्ट्येदमुक्तम् ॥ ४६ ॥ तवास्मासु कोपोऽनुचित एवेत्याहुः । कोप इति । हे स्थितिपालनतत्पर, हे भगवन्, सत्त्वं शुद्धसत्त्वमयं शरीरं, बिभ्रतः ते तव, कोपः केवलं, अखिलशिक्षार्थमेव न तु द्वेषात् । नापि मत्सराच्च, द्वेषोऽप्रीतिः, मत्सरः कौटिल्यम् ॥ ४७ ॥ शरण्यत्वोपयुक्तगुणैः संबोधयन्तः शरणं व्रजन्ति । नम इति । हे सर्वभूतात्मन्, अनेन सार्वज्ञम् । हे सर्वशक्तिधर, अनेन सर्वशक्तिमत्त्वम् । हे अव्यय, अनेन रागद्वेषादिविकाररहिततया सर्वसुहृत्त्वम् । क्रियते इति कर्म कार्यं विश्वं कर्म कार्यं यस्य तत्संबोधने हे विश्वकर्मन्, अनेन परत्वं प्रोक्तं भवति । ते तुभ्यं, नमः । पुनरपि, ते नमः अस्तु, वयं, त्वां, शरणं गताः । सर्वमिदं परमात्मदृष्ट्योक्तम् ॥४८॥

कृष्णप्रिया

आप विश्व की उत्पत्ति, स्थिति और प्रलय के एकमात्र कारण हैं लेकिन आप का कोई आधार नहीं, सर्व समर्थ हे नाथ ! बड़े-बड़े ऋषिमहर्षि कहते हैं कि आप एक खिलाड़ी हैं और यह सारा जगत आपका एक खिलौना है ॥ ४५ ॥ हे अनन्त ! आपके तो अनन्तमस्तक हैं एवं आप खेल-खेल में ही इस समस्त भूमण्डल को अपने एक शिर पर रखते हैं, जब प्रलयकाल आता है तब आप सारे विश्व को अपने भीतर लीन कर देते हैं । और केवल आप ही अवशिष्ट रहकर अद्वितीय स्वरुप से पौढते हैं ॥ ४६ ॥ हे नाथ ! आपका क्रोध समस्त विश्व को शिक्षा के लिये है माने उपदेश के लिये है । द्वेष से नहीं है या मात्सर्य से नहीं है । हे नाथ आप विश्व की उत्पत्ति स्थिति एवं लय के लिये विशुद्ध सत्वमय श्री विग्रह को धारण करते हैं ॥ ४७ ॥ हे समस्त शक्तियों को धारण करने वाले एवं सर्व प्राणी-स्वरुप अविनाशी नाथ आपके श्री चरणों में हम नमस्कार करते हैं, आप अविनाशी हैं, सर्व प्राणी स्वरुप है, समग्र विश्व के विधाता है हे भगवन् ! हम बार-बार आपको नमस्कार करते हैं । हम सब आपकी शरण में हैं हे कृपानाथ कृपा करके आप हमारी रक्षा करें ॥ ४८ ॥

श्रीशुक[1] उवाच

एवं प्रपन्नैः संविग्नैर्वेपमाना [2]यनैर्बलः । प्रसादितः [3]प्रसन्नोऽसौ मा भैष्टेत्यभयं ददौ ॥ ४९ ॥
दुर्योधनः पारिबर्हं कुञ्जरान् षष्टिहायनान् । ददौ च [4]द्वादशशतान्ययुतानि तुरङ्गमान् ॥ ५० ॥
रथानां षट् सहस्राणि रौक्माणां सूर्यवर्चसाम् । दासीनां निष्ककण्ठीनां सहस्रं दुहितृवत्सलः ॥ ५१ ॥
प्रतिगृह्य तु तत् सर्वं भगवान् सात्वतर्षभः । ससुतः सस्नुषः [5]प्रायात् सुहृद्भिरनुमोदितः[6] ॥ ५२ ॥

---

[1]. बादरायणि—प्रा. पा. । [2]. मानैर्हलायुधः—वीर. । [3]. सुप्रसन्नो—श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [4]. द्विशतसाहस्रं हयानामयुतानि च—प्रा. पा. । [5]. प्रागात्—श्रीधर. वंसी. जीव. वीर. विज. विश्व. । [6]. ऽभिनन्दितः—श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—एवम्, प्रपन्नैः, संविग्नैः, वेपमानैः, बलः, प्रसादितः, प्रसन्नः, असौ, मा, भैष्ट, इति, अभयम्, ददौ ॥ ४९ ॥ दुर्योधनः, दुहितृवत्सलः, षष्टिहायनान्, कुञ्जरान्, द्वादशशतानि, पारिबर्हम्, ददौ, च, अयुतानि, तुरङ्गमान्, ददौ ॥ ५० ॥ दुहितृवत्सलः, दुर्योधनः, सूर्यवर्चसाम्, रुक्माणाम्, रथानाम्, षट्सहस्राणि, निष्ककण्ठीनाम्, दासीनाम्, सहस्रम्, ददौ ॥ ५१ ॥ सात्वतर्षभः, भगवान्, तत्, सर्वम्, प्रतिगृह्य, सुहृद्भिः, अनुमोदितः, सुसुतः, सस्नुषः, प्रायात् ॥ ५२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वेपमानमयनं पुरं येषां तैः ॥ ४९ ॥ तुरंगमांश्च द्वादशायुतानि ॥ ५०-५१ ॥ सुहृद्भिः कौरवैः ॥ ५२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"अयनं गमने गेहे ज्ञाने च पुरवर्त्मनोः" इति निरुक्तिः ॥ ४९-५० ॥ रौक्माणां हैमानाम् ॥ ५१-५२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्यगुद्विग्नैर्भीतैः तत्र हेतुः—वेपेति । सम्प्रसन्नस्त्यक्तकोपोऽभूत् ततश्च प्राकारमूलाद्धलमुद्धृत्य सम्वृतवानिति ज्ञेयम् ॥ ४९ ॥ द्वरिति युग्मकम् । तावज्ज्ञाने हेतुः, दुहित्रिति । अनेन श्रीबलदेवे न तत्रत्ये च लोके प्रीते सति मम दुहितुरनादरो न स्यादिति विचिन्त्येति भावः ॥ ५०-५१ ॥ भगवान् सर्वैश्वर्य्यपूर्णोपि प्रतिगृह्य स्वीकृत्य कुतः सात्वतर्षभः श्रीभीष्मादिभक्तवात्सल्यादिति भावः । यद्वा यादवश्रेष्ठः यदुकुलप्रीत्यर्थमिति अभिनन्दितः अनुमोदितः आनन्दप्रदानेन अनुज्ञात इत्यर्थः ॥ ५२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्यग् विग्नैर्भीतैः । तत्र हेतुः—वेपेति । प्रसन्नस्त्यक्तकोपोऽभूत्, यतो बलः कृपाकोमलस्वभाव इति भावः । ततश्च प्राकारमूलाद्धलमुद्धृत्य संवृतवानिति ज्ञेयम् ॥ ४९ ॥ षष्टिहायनान् तरुणानित्यर्थः,—तदानीमेव तेषां यौवनसम्पत्तेः । सूर्य्यवर्च्चसामिति स्वर्णस्योत्कृष्टतां बहुलमहारत्नखचितताञ्च बोधयति । तावद्दाने हेतुः—दुहित्रिति; तच्च सर्व्वं श्रीबलदेवप्रीत्यर्थमेवेति ज्ञेयम् ॥ ५०-५१ ॥ भगवान् सर्व्वैश्वर्य्यपूर्णोऽपि, प्रतिगृह्य स्वीकृत्य; कुतः ? सात्वतर्षभः, भक्तवात्सल्यादिति भावः । यद्वा, यादवश्रेष्ठो यदुकुलप्रीत्यर्थमिति अभिनन्दितोऽनुमोदितोऽनुज्ञात इत्यर्थः । यद्वा, अभितो नन्दितो हर्षितः सन्, प्रायात् प्रस्थानं चक्रे ॥ ५२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

वेपमानैः कम्पमानैः भीतैः ॥ ४९-५४ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

एवमिति । संविग्नैः भीतैरत एव कम्पमानैरत एव प्रपन्नैः प्रसादितः प्रसन्नश्चासौ हलायुधः रामः भयं माकार्ष्टेत्येवमभयं ददौ ॥ ४९ ॥ दुर्योधन इति । पारिबर्हमुपायनं ददाविति सम्बन्धः, तदेव प्रपञ्चयति–द्वितीयान्तैः षष्टि हायना वत्सरा येषां तान् द्विशतञ्च साहस्रञ्च तयोः समाहारः तावतो गजान् ददौ द्वादशसाहस्रमितिपाठान्तरे तु स्पष्टोऽर्थः । तुरङ्गमांश्च द्वादशनियुतानि ददौ ॥ ५० ॥ रथानामिति । रौक्माणां स्वर्णालङ्कृतानां सूर्यस्येव वर्चो येषां तेषां रथानां निष्कं पदकाख्यं भूषणं कण्ठे यासां तासां दासीनां सहस्रं ददौ तत्र हेतुः दुहितृवत्सल इति ॥ ५१ ॥ प्रतिगृह्येति । तत्सर्वम् उपायनं प्रतिगृह्य सात्वतर्षभो रामः सुतेन स्नुषया च सहितः सुहृद्भिः कौरवैरभिनन्दितो ययौ ॥ ५२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सम्विग्नैर्भयसञ्जातैः वेपमानानां कम्पमानानाम् अङ्गोपाङ्गानाम् अवनैराश्रयैः ॥ ४९-५० ॥ रौक्माणि हेमचितान्याभरणान्येषां सन्तीति रौक्मिणस्तेषाम् ॥ ५१-५३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वेपमानमयनं पुरं येषां तैः ॥ ४९ ॥ कुञ्जरान् द्वादशशतानि तुरङ्गमांस्तु द्वादशायुतानि ॥ ५०-५४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । अष्टषष्टितमोऽध्यायः दशमेऽजनि सङ्गतः ॥ ६८ ॥

गूढार्थदीपिनी

प्रपन्नैः शरणागतैः। वेपमानं कम्पमानम् 'अयनं नगरं येषां तैः' ॥ ४९ ॥ पारिबर्हं कन्यादेयद्रव्यम्। द्वादशतानि कुन्जरान्। द्वादश अयुतानि तुरङ्गमानिति योज्यम् ॥ ५० ॥ रौक्माणां हैमानाम्। वर्चः कान्तिः ॥ ५१–५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

वेपमानं कम्पमानमयनं पुरं येषां तैः ॥ ४९ ॥ पारिबर्हं विवाहकाले देयम् कुन्जरान् द्वादशशतानि तुरङ्गमांश्च द्वादशायुतानि ॥ ५०–५४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टषष्टितमोऽध्यायार्थप्रकाशः ॥ ६८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तैः स्वाभिप्रायो ज्ञात इति प्रसन्नो जात इत्याह **एवमिति**। प्रपत्तिः प्रतीकारः। संविग्ना मनसि **पूर्वधर्मरहिताः**। **वेपमानमयनं स्थानं** गृहं शरीरं **च येषामिति** भये हेतुः। शरीरे च **गर्वाभाव** उक्तः। अतश्चैधोत्तमधर्मवद्भिः प्रसादितः **प्रसन्नो** जातः प्रसादकार्यं कृतवानित्याह **मा भैष्टेत्यभयं ददा**विति। वाचा सह कायिकमकृत्वा मानसमभयं **ददौ** ॥ ४९ ॥ **भयात्कन्यासमर्पणं** वारयितुं पारिबर्हदानमाह **दुर्योधन** इति। षष्टिहायनाः पूर्णसंवत्सराः सहस्रं **शतद्वयं** च गजा द्वादशैवायुतानि तुरङ्गमाः ॥ ५० ॥ **रुक्मसम्बद्धानां रथानामिति**। बलप्रीतिः सूचिता। **सूर्यवर्चसां** सर्वलोकप्रसिद्धानाम्। मासाः संवत्सरा ऋतवश्च शतादिसङ्ख्यया प्रीणिता इति कालस्त्रेधा सन्तोषितः। साम्बश्च महादेवावतारः, बलश्च, तथा क्रोधश्च त्रयोऽपि प्रीणिताः। अम्बां प्रीणयति **दासीना**मिति सहस्रेण। **दुहितृवत्सल** इति। दाने तस्याभिप्रायः। अदाने कदाचित्ते दुहितरि कोपं कुर्युरिति ॥ ५१ ॥ तेषां प्रणिपत्तिमुक्त्वा बलभद्रस्य तदङ्गीकारमाह **प्रतिगृह्ये**ति। दानाभिनन्दनार्थं प्रतिग्रहपदम्। अभयं स्वयं दत्तवान्, स्वयं च तद्दत्तं गृहीतवान्। **तत्सर्व**मिति। असङ्कोचात् शुद्धभावः तस्य **स्थापितः**। **तत्र** हेतुर्न **दानम्**, किन्तु स्वपक्षे भगवान्, तत्पक्षे सात्त्वतर्षभ **इति**। **भक्तानां स्वामी**। अन्यजीवाः सापराधा एव भवन्तीति तथाविधस्यानङ्गीकारे भक्तिमार्ग उत्पन्नः स्यात्। **स्वस्य** तद्ग्रहणं वारयति **ससुतः सस्नुष** इति। **सुहृद्भिरनुमोदित** इति। पराक्रमेण वैषम्याभाव उक्तः ॥ ५२ ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः। एवं **प्रपन्नैः शरणं गतैः** संविग्नैः कंपितैर्वेपमानमयनं स्थानं येषां तैः प्रसादितो बलः सुतुष्टो मा भैष्ट यूयम् इत्यभयं ददौ ॥ ४९ ॥ ततो **दुर्योधनः** पारिबर्हम् उपस्करं ददौ षष्टिर्हायनानि वर्षाणि येषां तान् कुंजरान् गजान् द्वादशशतानि ददौ अयुतानि अश्वान् ददौ ॥ ५० ॥ सूर्यप्रभाणां **रौक्माणां** सुवर्णमयानां रथानां षट् सहस्राणि ददौ निष्काः कंठे यासां तासां दासीनां सहस्रं ददौ तत्र हेतुः दुहितृवत्सलः पुत्र्यनुरागी ॥ ५१ ॥ तत्सर्वं प्रतिगृह्य सुतेन सांबेन सहितः स्नुषया पुत्रवध्वा सहितः सात्त्वतर्षभो भगवान् सुहृद्भिः कौरवैरभिनंदितोऽगात् ॥ ५२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

एवं प्रपन्नैरित्यत्र। आभासोक्तं वाक्यार्थं स्पष्टार्थमुपसंहरन्ति **प्रसन्नो जात** इति। तथाच सकार्यः प्रसादो वाक्यार्थः। **दुर्योधन** इत्यत्र। कुन्जरान् द्वादशशतानि तुरङ्गमान् द्वादशायुतानित्यन्वय इत्याशयेनाहुः सहस्रं **शतद्वयं च गजा** इति। अयुतमिति वक्तव्येऽयुतानीति बहुबचनात् द्वादशसंख्या तत्राप्यन्वेति। द्वादशेतिपदस्य सान्निध्यान्न कपिञ्जलन्यायः। **दत्तप्रीति**रिति। बलस्य रूप्यवर्णत्वात् रूप्यसंयुक्तरथदानेन प्रीतिरित्यर्थः। **मासा** इति। द्वादशसंख्यया मासाः प्रीणिताः। हायनेषु षष्टिसंख्यया प्रभवादिसंवत्सराः प्रीणिताः। षट्संख्यया ऋतवः प्रीणिताः। **बलश्च तथे**ति। एवं त्रयोपि कालरूपाः। नगरप्रहरणे साम्बो निमित्तम्। बलः कर्ता। क्रोधः करणमिति विभागः। **प्रतिगृह्ये**त्यत्र। **स्वपक्षे** इति। शुद्धभावस्थापने भगवत्त्वं रामनिष्ठो हेतुः। सात्त्वतत्वं तन्निष्ठो हेतुः। तथाच स्वपक्षे हेतुनिरूपणे भगवानिति पदमुक्तम्। तत्पक्षे हेतुनिरूपणे सात्त्वतर्षभ इति पदमुक्तमित्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वेपमानमयनं गृहं येषां तैः, अतएव संविग्नैर्भीतैः, अत एव प्रपन्नैः कुरुभिः प्रसादितः, अतः सुप्रसन्नश्च बलो मा **भैष्ट भयं** मा कार्ष्टेत्येवमभयं ददावित्यन्वयः ॥ ४९ ॥ तदा दुर्योधनः पारिबर्हमुपायनं ददावित्यन्वयः। **तदेव** दर्शयति— षष्टिर्हायनाः संवत्सरा येषां तथाभूतान् द्वादशशतसङ्ख्यायुक्तान् कुन्जरान्। द्वादशायुतानि तुरंगमान् ॥ ५० ॥ **रौक्माणां** स्वर्णालंकृतानां

सूर्यस्येव वर्चो येषां तेषां रथानां षट्सहस्राणि । निष्कः पदकाख्यं भूषणं कण्ठे यासां तासां दासीनां सहस्रम् । एवं दाने हेतुमाह—दुहितृवत्सल इति । दुहितरि स्नेहाधिक्यादेवं दाने तत्सत्काराधिक्यं स्यादित्याशयेन ददावित्यर्थः ॥ ५१ ॥ तत्सर्वं दुर्योधनदत्तमुपायनं प्रतिगृह्य भगवान् सात्वतर्षभो रामः ससुतः साम्बसहितः सस्नुषः स्नुषया लक्ष्मणया च सहितः सुहृद्भिः कौरवैश्चाभिनन्दितः स्वपुरं प्रायात् ॥ ५२ ॥

अन्वितार्थप्रकाशिका

एवमिति । वेपमानमयनं पुरं येषां तैः अतः एव संविग्नैर्भीतैः अत एव प्रपन्नैः कुरुभिः प्रसादितः अतः सुप्रसन्नश्च बलो मा भैष्ट भयं मा कार्ष्टेत्येवमभयं ददौ । ततः प्राकारमूलाद्धलं निष्कासितवानिति ज्ञेयम् ॥ ४९ ॥ दुर्योधन इति युग्मम् । दुहितृवत्सलः दुर्योधनः षष्टिहायनाः संवत्सरा येषां तथाभूतान् द्वादशशतसंख्यायुक्तान् कुञ्जरान् द्वादशायुतानि तुरङ्गमांश्च पारिबर्हं ददौ ॥ ५० ॥ रथानामिति । रौक्माणां स्वर्णालंकृतानां सूर्यस्येव वर्चो येषां तेषां रथानां षट् सहस्राणि निष्कः पदकाख्यं भूषणं कण्ठे यासां तासां दासीनां सहस्रं पारिबर्हं ददौ इत्यनुषङ्गः ॥ ५१ ॥ प्रतीति । तत्सर्वं दुर्योधनदत्तमुपायनं प्रतिगृह्य भगवान् सात्वतर्षभो रामः ससुतः साम्बसहितः सस्नुषः स्नुषया लक्ष्मणया च सहितः सुहृद्भिः कौरवैश्चाभिनन्दितः स्वपुरं प्रायात् ॥ ५२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

संविग्नै रुद्विग्नैः वेपमानं कंपमानं अयनं नगरं येषां तैः प्रसादितः प्रसन्नीकृतः ॥ ४९ ॥ षष्टिहायनानि वयो वर्षाणि येषां तान् द्वादशशतपरिमितान् कुंजरान् । द्वादशायुतपरिमितान् तुरंगमान् ॥ ५०–५१ ॥ सुहृद्भिः भीष्मादिकौरवैः सस्नुषः पुत्रवधूसहितः ॥ ५२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति । एवं, वेपमानं कम्पमानमयनं पुरं येषां तैः, अत एव, संविग्नैर्भीतैः, अत एव प्रपन्नैः प्रपत्ति गतैः कौरवैः, प्रसादितः, अत एव, सुप्रसन्नः बलः, मा भैष्ट, इति अभयं, ददौ ॥ ४९ ॥ दुर्योधन इति । दुर्योधनः, षष्टिहायना वत्सरा येषां तान्, द्वादश शतानि, कुञ्जरान्, द्वादश अयुतानि, तुरंगमांश्च, पारिबर्हमुपायनं, ददौ ॥ ५० ॥ रथानामिति । दुहितृवत्सलः दुर्योधनः, रौक्माणां स्वर्णालंकृतानां, सूर्यस्येव वर्चो येषां तेषां, रथानां षट् सहस्राणि, निष्ककण्ठीनां दासीनां सहस्रं, पारिबर्हं, ददौ ॥ ५१ ॥ प्रतिगृह्येति । सात्वतर्षभः भगवान् रामः, सर्वं तत्पारिबर्हं, प्रतिगृह्य तु प्रतिगृह्यैव, ससुतः सुतेन साम्बेन सहितः, सस्नुषः स्नुषया लक्ष्मणया, च सहितः, सुहृद्भिः कौरवैः, अभिनन्दितः कृतप्रशंसनः सन्, प्रायात् प्रययौ ॥ ५२ ॥

कृष्णप्रिया

श्रीशुकाचार्य जी ने कहा—महाराज ! कौरवपुरी इस प्रकार डगमगा रही थी और वे सम्पूर्ण घबड़ाहट में थे ऐसी अवस्था में सारे कुरुवंशी श्री बलभद्रजी की शरण में आये और उनकी प्रार्थना की, तब श्री दाऊजी प्रसन्न हो गये और मधुर वचन बोले मत डरो मत डरो ॥ ४९ ॥ राजा दुर्योधन भी अपनी कन्या लक्ष्मणा से अत्यन्त स्नेह रखता था उसने दहेज में साठ-साठ वर्ष के बारह सौ हाथी, दस हजार अश्व सूर्य के समान चमकते हुए सुवर्ण के छः हजार रथ और सुवर्ण के हार वाली दस हजार दासियों को समर्पण की ॥ ५०–५१ ॥ भगवान् यदुकुलनाथ बलभद्रजी अपने साथ समस्त दहेज का स्वीकार करके अपने पुत्र एवं पुत्र वधू श्री लक्ष्मणाजी को लेकर स्वजनों से सन्मानित किये हुए द्वारिका की ओर पधारे ॥ ५२ ॥

ततः प्रविष्टः [1]स्वपुरीं हलायुधः समेत्य बन्धूननुरक्तचेतसः ।
शशंस सर्वं यदुपुङ्गवानां मध्ये सभायां कुरुषु स्वचेष्टितम् ॥ ५३ ॥
अद्यापि च[2] पुरं ह्येतत् सूचयद् रामविक्रमम् । समुन्नतं दक्षिणतो गङ्गायामनुदृश्यते ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] हास्तिनपुरकर्षणरूपसङ्कर्षणविजयो[5]नामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥

---

१. पुरं–श्रीजर. वंशी. जीव. वीर. विज. विश्व. । २. वः–च. पु. टि. । ३. पारमहंस्यां संहितायां–प्रा. पा. । ४. न्धे बलदेव विजयोऽष्ट–प्रा. पा. । ५. नवतितमोऽध्याय–विज. ।

कर्दमक्षम।

अन्वयः—ततः, हलायुधः, स्वपुरीम्, प्रविष्टः, अनुरक्तचेतसः, बन्धून्, समेत्य, **यदुपुङ्गवानाम्**, सभायाम्, मध्ये, कुरुषु, सर्वम्, स्वचेष्टितम्, शशंस ।। ५३ ।। अद्य, अपि, रामविक्रमम्, सूचयत्, एतत्, पुरम्, दक्षिणतः, गङ्गायाम्, समुन्नतम्, अनुदृश्यते ।। ५४ ।।

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्धऽन्वयेषु **अष्टषष्टितमोऽध्याये** ।। ६८ ।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

मध्येसभायां सभामध्ये ।। ५३–५४ ।।

इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायामष्टषष्टितमोऽध्यायः ।। ६८ ।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततस्सुहृदभिनंदनानंतरम् । स्वचेष्टितं नगराकर्षणरूपम् ।। ५३ ।। रामविक्रमोऽचिरविनाशी नेत्याह—अद्यापीति । एतत्पुरं हास्तिननगरम् । गंगाया दक्षिणे पुरीदक्षिणभाग इत्याह—तोषिणी ।। ५४ ।।

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धेऽष्टषष्टितमोऽध्यायः ।। ६८ ।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वीयां पुरीम् **अतः** प्रकर्षेण गीतमङ्गलवादित्रादिनाऽऽविष्टः सन् बन्धून् श्रीकृष्णवसुदेवादीन् यतोऽनुरक्तचेतसः अनुरागेण सदा तद्वर्त्मनिरीक्षकानित्यर्थः । पश्चाद्यदुपुङ्गवानुग्रसेनादीन् प्रति शशंस सभायां विषये **यन्मध्यं** तस्मिन् सभामध्य इति सर्वेषामेव प्रहर्षणाय अतः स्वस्य चेष्टितमेव प्राधान्येन तेषां दुरुक्तिस्तु यत्किञ्चिदेवेत्यर्थः ।। ५३ ।। अहो महान् प्रभावः श्रीमतो **बलदेवस्येति सहर्षमाह**—अद्यापीति । च इति चेति वा पाठद्वयम् एतदिति साक्षाद्दर्शयति दक्षिणतो गङ्गायां गङ्गाया दक्षिण पुरी दक्षिणभाग इत्यर्थः । अनु निरन्तरं दृश्यते ।। ५४ ।।

अहो धाष्टर्यं साहसञ्च सन्तः पश्यन्तु मेऽद्भुतम् । स्वाम्यसौ मौनकृद्यत्र तत्र वाचालतां भजे ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां **अष्टषष्टितमोऽध्यायः** ।। ६८ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततः प्रयाणादनन्तरमेव, सद्य इत्यर्थः । स्वकीयां पुरीम्, अतः प्रकर्षेण मंगलगीतवाद्यादिनाविष्टः सन् । **हलायुध इति** हलेनैव तदभीष्टसाधनाभिप्रायेण, बन्धून् श्रीकृष्णवसुदेवादीनादावालिंगनादिना समेत्य, यतोऽनुरक्तचेतसः—अनुरागेण सदा तद्वर्त्मनिरीक्षकानित्यर्थः, **पश्चाद्** यदुपुंगवान् उग्रसेनादीन् प्रति शशंस । सभामध्य **इति सर्व्वेषामेव प्रहर्षणाय, अतः स्वस्य चेष्टितमेव,** न तु तेषां दुरुक्तिमित्यर्थः ।। ५३ ।। अहो महाप्रभावः श्रीबलदेवस्येति सहर्षमाह—अद्यापीति । 'वः' इति बहुत्वं **कुरुकुलापेक्षया गौरवाद्वा;** हि निश्चितम्; एतदिति तदन्तिक एव कथनात्, किंवा साक्षादेव दक्षिणतो गंगायां गंगायाः दक्षिणे पुरीदक्षिणभाग इत्यर्थः । **सम्यगुन्नतमुच्चम्** । ननु हे राजन्नित्यर्थः ।। ५४ ।।

अहो धाष्टर्यं साहसं वा सन्तः पश्यन्तु मेऽद्भुतम् । स्वाम्यसौ मौनकृद्यत्र **तत्र वाचालतां भजे** ।।

इति श्रीमद्भागवते **महापुराणे** दशमस्कन्धे उत्तरार्द्धे श्री-श्रील-सनातन-गोस्वामिपाद-कृतायां **श्रीबृहद्वैष्णवतोषिण्यां**
श्रीदशम-टिप्पण्यामष्टषष्टितमोऽध्यायः ।। ६८ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत इति । स्वपुरीं द्वारकाम् अनुरक्तं चेतो येषां तान् बन्धून् यदून् समेत्य **यदुपुङ्गवानां** मध्येसभायां सभायामद्ध्ये यत्कुरुषु स्वचेष्टितं तत्सर्वं शशंस कथयामास ।। ५३ ।। यद्धलेन गङ्गायां पुरपातनं तदसम्भावितं मन्वानं राजानं प्रत्याह मुनिः—अद्यापीति । वो युष्माकं पुरं हास्तिनं रामपराक्रमद्यादि सूचयद्वर्त्तते तत्र लिङ्गमाह—समुन्नतमिति । गङ्गायां दक्षिणतः समुन्नतं सत् दृश्यते ननु ।। ५४ ।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां **अष्टषष्टितमोऽध्यायः** ।। ६८ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

रामविक्रमो जलरेखावत् नश्वरो न किन्तु सर्वचक्षुर्विषय इत्याह-अद्यापीति। रामविक्रमं सूचयत् गङ्गायां दक्षिणतः समुन्नतं दृश्यत इत्यन्वयः ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां अष्टषष्टितमोऽध्यायः ॥ ६८ ॥
(श्रीविजयध्वजतीर्थरीत्या नवतितमोऽध्यायः ॥ ९० ॥)

गूढार्थदीपिनी

समेत्य मिलित्वा। स्वचेष्टितं नगराकर्षणरूपम् ॥ ५३ ॥ इदानीं तु तन्नगरं गङ्गायां पतितमिति ज्ञातव्यम्। 'गजाह्वये हृते नद्या इति द्वादशोक्तेः। कथनसमये तु दृश्यते एवेति श्रीवल्लभाचार्याः ॥ ५४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

बलभद्रचरित्रस्य प्रत्यापत्तिमाह **ततः प्रविष्ट** इति। अन्यथा 'नन्दव्रजं गत' इतिवत् भगवतः किञ्चित्कर्तव्यशङ्का स्यात्। **स्वपुरीं** द्वारकाम्। निर्विचारप्रवेशार्थमुक्तम्। **हलायुध** इति विचाराभावः। सर्वान् ज्ञापयित्वा समलङ्कृते पुरे प्रवेष्टव्यम्। विवाहे विरोधो वा न कर्तव्यः, मैत्री वेति उभयकरणाद्विचाराभावः। ततः पुरप्रवेशानन्तरं बन्धून् **समेत्य**। असम्मत्यभावाद्या**नुरक्तचेतस** इति। स्वपौरुषं च स्वयमेवोक्तवान्। **तन्निमित्तं च स्वचेष्टितं नगराकर्षणम्** ॥ ५३ ॥ तस्य चरित्रस्य सर्वलोकप्रसिद्धत्वमाह **अद्यापीति**। एतत् हास्तिनपुरम्। **गङ्गायां** गङ्गासमीपे गङ्गामध्य इव वा। तस्य सहजरूपं तन्न भवतीत्याह **सूचयद्रामविक्रम**मिति। अतो दक्षिणतः समुन्नतं कूलस्थानम्। कूलप्रदेश एवोन्नतो भवति, नत्वपरः। इदं तु विपरीतमिति रामपराक्रमस्य सूचकं भवति। इदानीं तु तन्नगरं पतितम्, गङ्गायां पतितमिति ज्ञातव्यम्। 'गजाह्वये हृते नद्या' द्वादशे वक्ष्यति। अतो न दर्शनविरोधः शङ्कनीयः। भागवतकथनसमये तु दृश्यत एव ॥ ५४ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीसुबोधिनी-सारः

ततोनंतरं स्वपुरं द्वारकां प्रविष्टो हलायुधो रामोऽनुरक्तं स्निग्धं चेतो येषां तान् बंधून् समेत्य संप्राप्य मिलित्वा यदुश्रेष्ठानां सभायां मध्ये कुरुषु स्वचेष्टितम् आत्मकर्म सर्वं शशंस ववाद ॥ ५३ ॥ शुकोक्तिः। अद्यापीदानीमप्येतत् पुरं हास्तिनं रामस्य विक्रमं पराक्रमं सूचयत् प्रदर्शयत्सद्दक्षिणतः समुन्नतं गंगायां सर्वैरनुदृश्यते ॥ ५४ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायामष्टषष्टितमोऽध्यायः ॥ ६८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

ततः प्रविष्ट इत्यस्याभासे **बलभद्रचरित्रस्येति**। भगवता बलभद्रे आविश्य कृतस्य निरोधरूपचरित्रस्य प्रत्यापत्ति स्वस्थाने भगवति समागमनमाह। अध्यायचतुष्टये बलदेवे आविश्य निरोधं कृतवान् अतः परं स्वयमेव करिष्यतीत्यर्थः। अत्र विचाराभावादिकथनेन बलेऽनावेशः सूचित इति वाक्यतात्पर्यार्थः प्रत्यापत्तिरेवेति भावः। **व्याख्याने**। पाठक्रममपेक्ष्याहुः **पुरप्रवेशानन्तरमिति**। **स्वपौरुषं चेति**। पूर्वविचाराभाव उक्तः, अनेनापि विचाराभाव उच्यते इति चकारः। महतः स्वपौरुषं स्वयं न वक्तव्यमिति भावः। अतोपि विचाराभाव इति शेषः। **तन्निमित्तं चेति**। कुरुष्विति निमित्तसप्तमी। तथा च कुरुनिमित्तं चेष्टितं नगराकर्षणम्। मूले सर्वपदाच्चकारेण गमनावधि सर्वमुक्तवानिति पूर्वेणान्वयः।

इत्येकोनविंशाध्यायव्याख्या समाप्ता।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च हलायुधो रामः स्वपुरं द्वारकां प्रविष्टः अनुरक्तं चेतो येषां तान् बन्धून् यदून् समेत्य यदुपुङ्गवानां सभायां मध्ये कुरुषु यत्स्वचेष्टितं नगरकर्षणादिकं तत्सर्वं शशंस कथयामास ॥ ५३ ॥ हस्तिनापुराकर्षणमसंभावितं मन्वानं राजानं प्रत्याह—अद्यापि इति। अद्याप्येतद्धस्तिनापुरं रामविक्रमं सूचयदेव वर्तते। कथं तत्राह—गङ्गायां दक्षिणतः समुन्नतमनुदृश्यते। हीत्यवधारणे ॥ ५४ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र सात्त्विकानां निरोधने। अष्टषष्टितमो यातः सांबोद्वाहनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

तत इति । हलायुधो रामः स्वपुरं द्वारकां प्रविष्टः अनुरक्तं चेतो येषां तान् बन्धून् यदून् समेत्य यदुपुङ्गवानां सभायां मध्ये कुरुषु यत्स्वचेष्टितं नगरकर्षणादिकं तत्सर्वं शशंस कथयामास ।। ५३ ।। अद्यापीति । अद्याप्येतद्धस्तिनापुरं रामविक्रमं सूचयदेव वर्तते । कथं तत्राह । गङ्गायां दक्षिणतः समुन्नतमनु निरन्तरं दृश्यते ।। ५४ ।।

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमस्याष्टषष्टितमे व्यधात् ।।
इति श्रीभागवते दशमस्कन्धे उत्तरार्धेऽन्वितार्थप्रकाशिकायामष्टषष्टितमोऽध्यायः ।। ६८ ।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यदुपंगवानां मध्ये । सभायां सभामध्ये सर्वं शशंस कथयामास ।।५३।। दक्षिणतः समुन्नतं दक्षिणस्यां दिशि उद्ध्वर्गतं गंगायां अनुनतं दृश्यतेजनैरितिशेषः ।। ५४ ।।

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंध-
व्याख्याने स्तिनापुरकर्षणरूपसंकर्षणविजयो नामाष्टषष्टितमोऽध्यायः ।। ६८ ।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति । ततः, स्वपुरीं प्रविष्टः; हलायुधो बलः, अनुरक्तचेतसः स्वस्मिन्ननुरागयुक्तमानसान्, बन्धून् समेत्य, सभायां यदुपुङ्गवानां मध्ये, यत् कुरुषु, स्वचेष्टितं, तत् सर्वं, शशंस ।। ५३ ।। यद्बलेन समारब्धं गङ्गायां पुरपातनं तदसंभावितं मन्वानं राजानं प्रत्याह । अद्यापीति । वो युष्माकं, एतत् पुरं हास्तिननगरं, रामविक्रमं सूचयत्सत्, अद्यापि, दक्षिणतः, गङ्गायां समुन्नतं, अनुदृश्यते हि ननु ।। ५४ ।।

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्व-
यार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे अष्टषष्टितमोऽध्यायः ।। ६८ ।।

कृष्णप्रिया

पुनः श्री बलभद्रजी अपनी नगरी द्वारिकापुरी में पहुँचे और अपने स्नेह संपन्न स्वजन समाचार को जानने के लिये उत्कंठित थे, उन सबको मिले, फिर बलभद्रजी ने अपने यादवों को भरी सभा में अपना सारा प्रसङ्ग सुनाया जो हस्तिनापुर में कौरवों के साथ किया था ।। ५३ ।। हे महाराज परीक्षित ! आज भी दक्षिण दिशा की ओर ऊँचा और गङ्गाजी की ओर कुछ अंश में झुका हुआ हस्तिनापुर भगवान बलभद्रजी के पराक्रम को सूचित कर रहा है ।। ५४ ।।

इति श्रीमद्भागवते दशमस्कन्धे निरोधलीलायां हस्तिनापुर समाकर्षण संज्ञक श्रीसंकर्षणविजयो नाम
अष्टषष्टितमोऽध्याय भाषान्तरं समाप्तम् ।। ६८ ।।

* * *

[1]अथैकोनसप्ततितमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४५	३५	१	६	४	१६७२	२५	४८	१७४५	५७॥	१

श्रीशुक [2]उवाच

[3]नरकं निहतं श्रुत्वा तथोद्वाहं च योषिताम् । कृष्णेनैकेन बह्वीनां तद्[4] दिदृक्षुः स्म नारदः ॥ १ ॥
चित्रं बतैतदेकेन वपुषा युगपत् पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक [5]उदावहत् ॥ २ ॥
इत्युत्सुको द्वारवतीं देवर्षिर्द्रष्टुमागमत् । पुष्पितोपवनारामद्विजालिकुलनादिताम् ॥ ३ ॥
उत्फुल्लेन्दीवराम्भोजकह्लारकुमुदोत्पलैः । छुरितेषु सरस्सूच्चैः कूजितां हंससारसैः ॥ ४ ॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—नरकम्, निहतम्, श्रुत्वा, च, एकेन, कृष्णेन, बह्वीनाम्, उद्वाहम्, श्रुत्वा, तत्, दिदृक्षुः, नारदः ॥ १ ॥ बत, एतत्, चित्रम्, एकेन, वपुषा, युगपत्, एकः, कृष्णः, द्व्यष्टसाहस्रम्, स्त्रियः, उदावहत्, इति, द्रष्टुम्, उत्सुकः, नारदः, देवर्षिः, पुष्पितोपवनारामद्विजालिकुलनादिताम्, द्वारवतीम्, आगमत् ॥ २–३ ॥ उत्फुल्लेन्दीवराम्भोजकल्हार-कुमुदोत्पलैः, छुरितेषु, सरस्सु, उच्चैः, हंससारसैः, कूजिताम् ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एकोनसप्ततितमे गार्हस्थ्यं प्रतिमंदिरम् । कृष्णस्य नारदो दृष्ट्वा विस्मितोऽगात्ततः स्तुवन् ॥ १ ॥ १ ॥

दिदृक्षामभिनयेनाह । चित्रमिति । द्व्यष्टसहस्रस्त्रीरुदावहत्परिणीतवान् ॥ २ ॥ तां द्वारवतीमनुवर्णयति पुष्पितेति सार्धत्रयेण । पुष्पितेषूपवनेष्वारामेषूद्यानेषु च द्विजानामलीनां च कुलानि तैर्नादिताम् ॥ ३ ॥ छुरितेषु व्याप्तेषु ॥ ४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो द्वारकातः (१) । तद्दिदृक्षुस्तस्य वृत्तं तद्वृत्तं तस्य दिदृक्षुरत्र समासावस्थायां मध्यपदलोपः । कृष्णवृत्तं दिदृक्षुरित्यर्थः ॥ १ ॥ अभिनयो निमित्तम् "निमित्तेऽभिनयः प्रोक्तो व्यंजकेऽनुकृतौ नये" इति निरुक्तिः । बताहो सौभर्यादयो हि कायव्यूहं कृत्वा युगपदनैकस्त्रीभी रमन्ते स्म न त्वेकेनैव कायेनेति चित्रम् । उदावहदिति छान्दसः । स च छंदसि "व्यवहिताश्च" इति न्यायेन आसम्यगुदवहदिति योज्यम् ॥ २ ॥ इतीत्थम् । उत्सुको जातोत्कंठः ॥ ३ ॥ "छुरितं मिश्रितं व्याप्तं छिन्नमेकार्थवाचकम्" इति कोशांतरात् । इंदीवरकुमुदोत्पलानि नीलश्वेतरक्तान्युत्पलान्येव । कह्लारं सौगंधिकमपि तद्भेद एव । अंभोजश्च विविधम्, एषामेतत्क्रमेणैव तत्र स्थितेरित्थम् निर्देशः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नरकं हत्वा तद्गृहादानीतानां तासां कन्यकानां विवाहानन्तरमेव तद्दिदृक्षया श्रीनारदागमनसम्भवात्तदानीमेव वक्तुं योग्यमप्येतद्वृत्तं तत्तद्रसेन प्रसक्तानुप्रसक्तं चरितान्तरं समाधाय एकचित्तः प्रस्तौति—नरकमित्यादिना । कृष्णेन नितरां ससैन्यत्वादिना हतं श्रुत्वेति तस्य प्रहर्षः सूचितः तथा चित्रं बतेति वक्ष्यमाणरीत्या तेनैव बह्वीनां योषितामुद्वाहं च श्रुत्वेति तस्य विस्मयश्च सूचितः तत्र सर्वज्ञत्वेन स्वतस्तद्विज्ञानसम्भवेऽपि श्रुत्वेति परमाश्चर्यतया सर्वतोगीयमानत्वेन तयोराधिक्यं

---

[1] अथ सप्तसप्ततितमोऽध्यायः–विज. । [2] बादरायणि–प्रा. पा. ।

[3] **श्रीशुक उवाच**—तथा ताभिर्वरस्त्रीभी रममाणो जनार्दनः । दिनानि हतसापत्नः सुबहून्यत्यवासयत् ॥ १ ॥
राजोवाच—तासां षोडशसाहस्रमहिषीणां जनार्दनः । तृप्तिं कथं चकारैको मानुषं देहमाश्रितः ॥ २ ॥
श्रीशुक उवाच—हन्त ते कथयिष्यामि श्रोतॄणां विस्मयावहम् । यथा चकार बह्वीनामेकस्तृप्तिं जनार्दनः ॥ ३ ॥
विजयेऽधिकाः ।

[4] तं–वीर. । [5] उवाह यत्–प्रा. पा. ।

सूचितम् अत एव तत्तादृशं श्रीकृष्णस्य वैभवं दिदृक्षुरभूत् स्म प्रसिद्धौ एतत्सुविख्यातमेवेत्यर्थः ॥१॥ तस्य विस्मयमेव प्राधान्येन दर्शयंस्तद्धेतुकतादृशश्रीकृष्णवैभवदर्शनार्थद्वारकागमनं कथयंस्तत्पोषणाय द्वारकामपि वर्णयंश्चित्रमित्यादि पञ्चकमाह—अत्र च विस्मयदर्शकेनैकेन द्वारकागमनकथनमर्द्धं प्रथमतो योज्यम् एतद्वत अहो चित्रम् अस्मदाद्यचिन्त्यं शक्तिमयं किं तत् एको द्व्यष्टसाहस्रं स्त्रिय उदावहदिति नन्वन्येषामितोऽप्यधिका विवाहा दृश्यन्ते तत्राह—युगपदिति। ननु, सौभर्य्यादिवच्छ्रीनारदादिष्वपि कायव्यूहकर्तृत्वादिशक्तयः सन्ति तर्हि यौगपद्येऽपि सिद्धे कथं तस्यापि विस्मयस्तत्राह एकेन वपुषेति नन्वेकस्मिन्नेव वपुषि विस्तीर्णानेककरादित्वं विधाय तत् तेषामपि न चित्रं स्यात् सौभर्य्यादितोऽपि महाप्रभावत्वात् तत्राह गृहेषु पृथगिति तत्र गृहे पृथक् आविर्भावादिकं विधायेत्यर्थः। अत एव उदावहदित्यत्रायं प्रयोगः स च छन्दसि व्यवहितश्चेति न्यायेन आ सम्यक् उदवहदिति योज्यम् ॥ २ ॥ अथ तद्धेतुकं तस्य द्वारकायामागमनमाहार्द्धेन—इतीति एतद्विभाव्येत्यर्थः। द्रष्टुं तादृशश्रीकृष्णवैभवमिति शेषः। श्रीद्वारवतीमेव क्रमेण सार्द्धैस्त्रिभिर्वर्णयत्रादौ तस्या बाह्यं भागं वर्णयति पुष्पितेतिसार्द्धेन तैर्नादितां कारितनादामिवेत्यर्थः॥ ३ ॥ उत्फुल्लानि इन्दीवरादीनि तैश्छुरितेषु इन्दीवरकुमुदोत्पलानि नीलश्वेतरक्तान्युत्पलान्येव कह्लारं सौगन्धिकमपि तद्भेद एव अम्भोजञ्च विपिधम् एषामपि क्रमेण निर्द्देशस्तथैव तत्र स्थितेः सरस्सु उपवनाद्यन्तास्तद्बहिश्च वर्त्तमानेषु उच्चैरिति तत्तद्रसपानादिना मत्तत्वात् हंसादीनामेवोक्तिः प्राधान्यात् ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नरकं हत्वा तद्गृहादानीतानां तासां कन्यानां विवाहानन्तरमेव तद्दिदृक्षया श्रीनारदागमनसम्भवात्तदानीमेव वक्तुं योग्यमप्येतद्वृत्तं तत्तद्रसेन प्रसक्तानुप्रसक्तं चरितान्तरं समाधायैकचित्तः प्रस्तौति—नरकमित्यादिना। नितरां ससैन्यत्वादिना हतम्, श्रुत्वेति दिदृक्षाहेतुत्वेन तद्विज्ञानसम्भवेऽपि, श्रुत्वेति परमाश्चर्य्यतया सर्व्वलोकैर्गीयमानत्वेन तद्बाढ्यं तेन प्रहर्षाधिक्यञ्च सूचयति, तथा तेन प्रकारेण तमेवाह—एकेन बह्वीनामिति। यद्वा, तेन प्रतिगृहं श्रीवसुदेवदेवक्यादीनामपि स्थित्याद्रिप्रकारेण, कृष्णेनेति तादृशाश्चर्य्येण सर्व्वचित्ताकर्षणात्। अतएव तस्यैकतमं कृष्णस्य दिदृक्षुः साक्षाद्दर्शनेच्छुः, किंवा तस्य तादृशोद्वाहस्य तत्त्वं ज्ञातुमिच्छुरभूत्, स्म प्रसिद्धौ, एतत् सुविख्यातमेवेत्यर्थः॥ १ ॥ दिदृक्षाहेतुमेव विस्तारयत् उक्तपोषण्यायेनाह—चित्रमिति सार्द्धेन। आश्चर्य्यम्, वत हर्षे; ननु किं नामात्र चित्रम् सौभरिप्रभृतयो मुनयोऽपि बहुरूपधारणेनैवं किल कुर्व्वन्ति, तत्राह—एकेनैव वपुषा, न तु बहुरूपधारणेनेत्यर्थः। एतच्चान्ते व्यक्तं भावि; पृथगित्यत्र वीप्सा द्रष्टव्य, प्रत्येकं सर्व्वेष्वेवैकदोद्वाहात्। यद्वा, पृथग्गृहेषु नानागारेषु तावत्स्वेव, अर्थः स एव। आ सम्यक् पितृमातृपुरोहितादिभिः सह तत्तत्कृत्यविधिना उदवहत्। आकारस्यान्तःप्रयोगः 'छन्दसि व्यवहिताश्च' इति छान्दसत्वाददोषः॥ २ ॥ देवः श्रीभगवत्पार्षदश्चासौ ऋषिश्चेति महाभागवतोत्तमत्वेन श्रीभगवत्प्रियत्वम्, तेन परमकौतुकित्वादिकञ्च सूचितम् श्रीद्वारवतीमेव क्रमेण सार्द्धैस्त्रिभिर्वर्णयन्नादौ तस्या बाह्यं भागं वर्णयति—पुष्पितेति सार्द्धेन॥ ३ ॥ उत्फुल्लानि यातीन्दीवरादीनि तैश्छुरितेषु इन्दीवरकुमुदोत्पलानि वीलश्वेतरक्तान्युत्पलान्येव कह्लारं सौगन्धिकमपि तद्भेद एव, अम्भोजं कमलं द्विविधम्, एषां यथोत्तरं बाहुल्येन छुरिततायामाधिक्यम्, सरःसु उपवनाद्यन्तस्तद्बहिश्च वर्त्तमानेषु। उच्चैरिति तत्तद्रसपानादिना मत्तत्वात्; तत्पक्षिणामन्येषां सद्भावेऽपि हंसादीनामेवोक्तिः प्राधान्यात् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथैको भगवानष्टाधिकषोडशसहस्रपत्नीभिः सह कथं रमते इति दिदृक्षवाऽऽगताय नारदाय प्रदर्शितम्भगवच्चेष्टितमनुवर्णयति—नरकमित्यादिना। एकेन कृष्णेन सह कर्त्रा वा बह्वीनां योषिताम् उद्वाहञ्च श्रुत्वा नारदस्तं कृष्णं दिदृक्षुरासीदिति शेषः। अत्रोद्वाहशब्देन तत्पूर्वकक्रीडा च विवक्षिता॥ १ ॥ दिदृक्षामेवाभिनयति—चित्रमिति। एतच्चित्रं बत इति चित्रमित्यर्थः। किं तद्यदेकेन वपुषा विग्रहेण युगपदेव पृथक् गृहेषु बहुपु गृहेषु योषित्समानसङ्ख्याकगृहेष्वित्यर्थः। द्व्यष्टसाहस्रं षोडशसहस्रसङ्ख्याकाः स्त्रियः स्त्रीः एक उपयेम इत्येतत् ॥ २ ॥ इतीति। इत्थं द्रष्टुमुत्सुको देवर्षिर्नारदः द्वारकां ययौ तां विशिनष्टि—सार्द्धत्रयेण। पुष्पितेषूपवनेष्वारामेषूद्यानवनेषु च द्विजानां पक्षिणामलीनां च कुलैर्नादिताम् ॥ ३ ॥ उत्फुल्लैरिन्दीवरादिभिः छुरितैषु व्याप्तेषु सरस्सु हंसैः सारसैः चोच्चैर्नादिताम् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृता पदरत्नावली

(अस्याध्यायस्यारम्भपठित श्लोकत्रये चतुश्शतसङ्ख्यात्मके पृष्ठे द्रष्टव्यम्)

नरकं निहतं श्रुत्वा तथा एकेन कृष्णेन बह्वीनां योषिताञ्चोद्वाहं श्रुत्वा नारदस्तद्वृत्तिं दिदृक्षुरभूदित्यन्वयः॥ १ ॥ ततः किमिति तत्राह—चित्रमिति। एकः एकेन वपुषा पृथक् गृहेषु द्व्यष्टसाहस्रं स्त्रिय एकस्मिन् मुहूर्ते उदावहदिति यत्तदिदं

विचित्रमाश्चर्यमिति च ॥ २ ॥ सन्तोषादुत्सुको भूत्वा देवर्षिः कृष्णचेष्टितं द्रष्टुं द्वारवतीमागमदित्यन्वयः। कीदृशं द्वारवतीनामपुरं पुष्पिताः उपवनारामाः यस्मिंस्तत् द्विजानामलीनां पक्षिणां कुलेन नादितम् ॥ ३ ॥ उत्फुल्लेन्दीवरादिभिः छुरितेषु मिश्रितेषु सरस्सु हंसादिभिरुच्चैः प्लुतस्वरेण कूजितं यद्वा सामान्यत उक्तं नारदागमनं विशिनष्टि–पुष्पितेत्यादिना। प्रथमतो द्विजादिनादितं पुष्पितोपवनारामं प्राप पश्चादुत्फुल्लेन्दीवरादिभिः छुरितेषु सरस्सु हंसादिभिरुच्चैः कूजितं स्वनमाप ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

चित्रम् ॥ १–३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एकोनसप्ततितमे कृष्णो मुनिमदीदृशत्। स्वस्यैकस्यापि वपुषः प्रकाशान् प्रतिमन्दिरम् ॥

दिदृक्षुरभूत् ॥ १ ॥ एकेनैव वपुषा युगपदेकस्मिन्नेव क्षणे पृथक् पृथक् गृहेषु पृथक् पृथक् प्राचीराद्यावृतद्व्यष्टसहस्रसङ्ख्यगृहाङ्गणेषु उदवहत् परिणीतवान् चित्रं वर्ततदिति। सौभर्य्यादयो हि कायव्यूहं कृत्वैव युगपत् बह्वीभिः स्त्रीभी रमन्ते स्म नत्वेकेनैव कायेनेति भावः। इत्यत एव हेतोः ॥ २–३ ॥ द्वारवतीं वर्णयति सार्द्धत्रयेण। छुरितेषु व्याप्तेषु ॥ ४ ॥

गूढार्थदीपिनी

नवषष्टितमे द्रष्टुं गार्हस्थ्यं श्रीहरेर्मुनिः। गतः प्रत्यालयं सोऽभूत् विस्मितोऽनुस्मरन् ययौ ॥ १ ॥

तत् कृष्णरहस्यं दिदृक्षुः आसीदिति शेषः ॥ १ ॥ चित्रं वर्तेति अत्याश्चर्यं। उदावहत् आ सम्यक् उदवहत् इति योज्यम्। 'छन्दसि व्यवहिताश्च' इति नियमात् ॥२॥ इत्युत्सुकः सन् तं द्रष्टुं द्वारवतीमागमत्। कीदृशीम्। पुष्पितेषु उपवनादिषु पक्षिभ्रमरकुलैः नादिताम्। आरामः क्रीडावनम् ॥ ३ ॥ इन्दीवरं नीलम्। अम्भोजं विविधवर्णम्। कल्हारं सौगन्धिकम्। कुमुदं श्वेतम्। उत्पलं रक्तं चेति कमलजातयः। एतैः छुरितेषु व्याप्तेषु सरःसु हंसैः उच्चैः कूजिताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

बह्वीभिः प्रियाभिः सहैको हरिः कथं रमते इत्येवं सन्दिहानं देवर्षिं प्रति हरिणा प्रतिमन्दिरं दर्शितं रूपं वर्णयति नरकमित्येकोनसप्ततितमे। स्त्रियः स्त्री उदावहत् उपयेमे एतत् चित्रमत्याश्चर्य्यम् ॥ १–२ ॥ इति इत्थं द्रष्टुमुत्सुको देवर्षिर्द्वारवतीमागमत् तामनुवर्णयति—पुष्पितेति सार्द्धैस्त्रिभिः। पुष्पाणि सञ्जातानि येषां तेषूपवनेष्वारामेषूद्यानेषु द्विजानामलीनाञ्च यानि कुलानि तैर्नादिताम् उत्फुल्लैर्विकसितैरिन्दीवरादिभिः छुरितेषु व्याप्तेषु सरस्सु हंसादिभिरुच्चैः कूजितां नादिताम् ॥३ ४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ ताभिर्वरस्त्रीभिः सह रममाणो जनार्दनो यथातथा हतसापत्नो मारितवैरी सुबहूनि दिनान्यत्यवासयदतिक्रम्य वासराकार्षीत् ॥ १ ॥ एकोऽनेकाभिः कामिनीभिः क्रीडां कुर्वन्कथमतर्पयदिति चित्रितचित्तः परीक्षित्पृच्छति। तासामिति। देहं मानुषं तत्सदृशम्। ननु नानेन विनेयेनेयं पृच्छाकर्तुमुचिता। कोट्यादिरमणीरमणचित्रकेत्वादिचरितश्रोतृत्वात्। न च विस्मरणं तस्येति वाच्यम्। महाधिकारवतस्तथात्वस्यासम्भावितत्वात्। ज्ञातैतद्विस्मरणस्वभावस्य स्वभावतः सर्वज्ञस्य शुकस्य प्रवचनप्रवर्तनानुपपत्तैरिति चेन्न। परीक्षिदपेक्षया परीक्षकोऽसि पवित्रकेतुनिकेतनीनां स्मरसि तत्र त्वत्तृप्तिः कृता सम्भाविता च मानिनीनाम्। तस्य चामरपामरत्वात्। साक्षात्सर्वसुपर्वाध्यक्षरमणं रमणीनां वा तर्पणमिति सम्भवतीति प्रच्छताच्छतामृच्छेदेव। अत एव मूले तृप्तिं चकारैक इत्युक्तिः। तृप्तिस्तु बह्वपत्यतयाऽत्रानुमेया। तत्र त्वेकान्यातृप्तिश्च तथेति मन्तव्यमेव। एकस्यैवं तोकस्योत्पत्तेः। अन्यास्वनुत्पत्तेः। अन्यथा कथमरीरमदित्यवक्ष्यत् ॥ २ ॥ हन्त हर्षेण। अरम्यदित इति। अनुकम्पयित्वेति वा। हन्त हर्षे विषादे च वाक्यारम्भानुकम्पयोरिति विश्वः। एको जनार्दनो यथा बह्वीनां तृप्तिं चकार तत्करणं श्रोतृणां विस्मयावहं ते कथयिष्यामीत्यन्वयः ॥ ३ ॥ उद्वाहं विवाहं तत्तृप्त्या चरमकर्म दिदृक्षुर्नारद एकेन वपुषैकः कृष्णो युगपदेकस्मिन्नेव मुहूर्ते पृथकारितगृहेषु द्व्यष्टसाहस्रस्त्रिय उदावहदित्येतच्चित्रमित्येवमुत्सुको देवर्षिः। षष्ठीसमासः कर्मधारयश्चैतत्। दृष्टुमागमत्। पुष्पितान्युपवनानि जलानि येषु त आरामा उपवनानि यस्यां सा ताम्। द्विजाः पक्षिणोऽलयो भृङ्गा द्विजानामान्यस्तत्कुलं सङ्कुरवेन नादिताम् ॥ ३ ॥ उत्फुल्लेति सर्वत्र सम्बन्धनीयम्। तेषु व्याप्तेषु हंसैः श्वेतगरुद्भिः सारसैः। सारसः पक्षिभेदे स्यादिति विश्वः। कूजितम् ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सात्त्विकानां निरोधे तु मुख्यो नारद ईरितः । अतस्तस्यापि वक्तव्यं पूर्वबुद्धेर्निवारणम् ॥ १ ॥
भक्तिमार्गानुरोजस्य पृथक्त्वं स्याद्यतः स्फुटम् । विंशे नारददृष्टानां कृष्णानां चरितं महत् ॥ २ ॥
अलौकिकत्वसिद्ध्यर्थं निरोधे विनिरूप्यते । प्रकीर्णके प्रकरणे न सङ्गतिरिहोच्यते ॥ ३ ॥
तथापि साम्बकथने समायातस्तथाकरोत् । भ्रान्त्यभावाय भगवान् बोधयामास तादृशम् ॥ ४ ॥
निरोधस्तेन संसिद्धः सात्त्विकानामतः परम् ।

पूर्वाध्याये साम्बवृत्तज्ञापनार्थं समागतो नारदः शास्त्रदृष्ट्या निर्दोषपूर्णगुणविग्रहो भगवानिति, लोके च पुत्रं हत्वा तदवरोधात् बह्व्यः स्त्रियः समानीता इति शास्त्रलोकविरोधमाशङ्क्य, तं विरोधं स्वदृष्ट्या साधयन् पश्चादन्यतरनिर्धारं करिष्यन् स्वयं द्रष्टुं प्रवृत्त इत्याह **नरकं निहतं श्रुत्वेति** । केचित्तु इतःप्रभृति सात्त्विकप्रकरणमाहुः त्रयस्त्रिंशदध्यायैः पूर्वं इति च । तत्र नारदः सात्त्विकेषु मुख्य इति स निरूप्य इति । तत्रैवैकादशैकैकादशभिः तेषामवान्तरप्रकरणव्यवस्था । सात्त्विकास्तु द्विविधा एव सकामनिष्कामभेदेनेति । तेषां मते दशेन्द्रियाणि अन्तःकरणं च निरुध्यत इति निरोधसिद्धिः । एतन्मतमवष्टभ्यास्माभिर्निबन्धे निरूपितं **लक्ष्मणाहरणावधी**ति । एतावता स्त्रियः समाप्ताः । तासु भोगो भगवत्कृतः शास्त्रविरोधान्न मन्तव्य इति प्रामाण्यार्थं नारददृष्टिरनुवर्ण्यते । नारदो हि भगवदीयशास्त्रेषु अक्लिष्टचरित्राण्येव श्रुतवानिति नरकवधादिकं न पूर्वं श्रुतवान् । यद्यपि नरकवधमात्रं पूर्वसिद्धम्, तथापि तदवरोधाद्विवाहः साम्प्रतमेव श्रुत इति स विचारणीयः । इदं चरित्रं न पूर्वं ऋषिभिर्विचारितम् । अतः परं सहस्रेष्वपि चरित्रेषु मीमांसितमेव चरित्रं विचार्यते । अत एव जाता लौकिकदृष्टिर्भगवतैवाग्रे निवारणीया । यदैव नरको हतः, तदैव तेनैव प्रक्रमेण योषितामुद्वाहश्च श्रुतः । एकस्मिन् क्षणे नानागारेषु विद्यमानानां एकेन कृष्णेन, तत्र यद्यपि रूपभेदः स्पष्ट एव, 'उरुरूप' इति वाक्यात् । तथा सति अवतारान्तरन्यायेन भिन्नावतारत्वं स्यात् । ततः कृष्णेनैव विवाहिता न भवेयुः । न हि सर्वास्ता देवकीपुत्रवध्वो भवन्ति । तथैवानन्तरूपत्वं तु पूर्वावतारेषु न सिद्धमिति वैमर्शः कर्तुमुचितः । वाक्योक्तं तु युक्त्या बाधितुं शक्यते, न तु दृष्टम् । 'न हि दृष्टे अनुपपन्नं नामे'ति । बह्वीनामेकेन कृष्णेन उद्वाहो विचित्रमिति तद्दिदृक्षुर्नारदो जात इत्यर्थः ॥ १ ॥ ननु भगवच्चरित्रे किमिदमाश्चर्यम्, यतो नारदस्यापि दिदृक्षेत्याशङ्क्य, वैचित्र्यमुपपादयति **चित्रमिति** । **बत** इति हर्षे । **तदा** सर्वत्रैव स्थिता भक्ता भगवता अनुग्राह्या इति न क्वापि गमनक्लेश इति । **एकेन वपुषे**ति । वपुषो ब्रह्मवदचिन्त्यैश्वर्यं न शास्त्रसिद्धम् । वपुर्भेदे तु कृष्णपत्नीत्वं तासु न स्यात् । अतो वपुषो ब्रह्मधर्मत्वं वा अवपुष्टं वा कल्पनीयं स्यात् । तत्रावपुष्टे लौकिकधर्मसम्बन्धो न युक्तः । ब्रह्मधर्मत्वे तु वैलक्षण्यमावश्यकम् । ब्रह्मणोऽप्येकत्र यो धर्मः, स नान्यत्रेति । लोके तथा दर्शनात् । नारदश्च सूक्ष्मदर्शी । तत उभयमपि अनुपपन्नमिति **चित्रम्** । युगपदेकस्मिन् काले एकेन वपुषा करणेन **पृथक्** पृथक् गृहेषु स्थिताः द्व्यष्टसहस्रसङ्ख्या व्याप्ताः । कलानामिवानन्त्यपक्षेऽपि ध्रुवाया नानन्त्यमिति षोडशसहस्रे भवत्येव वैचित्र्यम् । **स्त्रिय** इति तासां योगजधर्मो निवारितः, येनैकत्र जातो दृश्येत । आकाशवत्परिच्छेदभेदेन मायावदयथात्वेन वा विवाहपक्षं व्यावर्तयति **एक** इति । **उद्वाहश्च** यावदवतारं परिपालनीय इति न प्रदर्शनमात्रपरत्वम् ॥ २ ॥ अतो हेतोरुत्सुको जात इत्याह **इत्युत्सुको द्वारवती**मिति । स हि देवगुह्यमपि जानाति । अतो देवर्षिः देवानामपि मन्त्रद्रष्टा । अयं हि गुप्तार्थोपदेष्टा । अतो द्रष्टुमागमत् । नारदस्य द्वारकायां लौकिकबुद्धिसिद्ध्यर्थं तां वर्णयति **पुष्पितोपवनामिति** सार्धैस्त्रिभिः । पुष्पितान्युपवनानि तेषु ये आरामाः क्रीडास्थानानि तेषु द्विजानामलीनां च यानि **कुलानि** अवान्तरजातिभेदाः । तैर्नादितां तच्छब्दप्रचुरामिति सहजो मधुरः शब्दस्तत्रत्यो निरूपितः ॥ ३ ॥ द्वारका वनजलस्थलरूपा त्रिविधा भवति, तत्र वनरूपा निरूपिता, जलरूपां निरूपयति **उत्फुल्लेति** । उत्फुल्लानीन्दीवरादीनि यानि पञ्चविधानि पुष्पाणि तैश्छुरितेषु व्याप्तेषु सरस्सु हंसैः सारसैः तत्र कूजद्भिर्जुष्टामित्यग्रेण सम्बन्धः ॥ ४ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । कृष्णेन निहतं नरकं भौमं श्रुत्वा तथा बह्वीनां योषितां स्त्रीणाम् एकेनोद्वाहं विवाहं च श्रुत्वा नारदः तद्दिदृक्षुर्द्रष्टुमिच्छुः स्म अभूत् ॥ १ ॥ चित्रमाश्चर्यमेतत् तथाहि एकेन वपुषा शरीरेण पृथक् भिन्ना द्व्यष्टसाहस्रम् अनुक्तमपि शतोत्तरं योज्यं युक्तत्वात् स्त्रियः पृथक् गृहेषु एकः परिणीतवान् ॥ २ ॥ इत्येवमुत्सुक उत्कंठितो देवर्षिर्द्रष्टुं द्वारवतीमायात् तां वर्णयति । पुष्पितेषु उपवनेषु आरामेषु द्विजानां पक्षिणामलीनां भ्रमराणां कुलैर्नादिताम् ॥ ३ ॥ उत्फुल्लादिभिः पुष्पभेदैः छुरितेषु व्याप्तेषु सरःसु हंससारसैरुच्चैः कूजितां शब्दायमानाम् । बहुवचनस्याद्यर्थत्वाद्धंससारसादिभिरित्येके ॥ ४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

विंशेऽध्याये ः कारिकासु । **पूर्वबुद्धेर्निवारणमिति** । प्रपञ्चविस्मरणमित्यर्थः । सात्त्विकानां निरोधे वक्तव्ये तन्मुख्यत्वान्नारदस्येदं वक्तव्यमित्यन्वयः । आसक्त्यंशस्तु पूर्वमेवास्तीति भावः । **पृथक्त्वमिति** । स्नेहो भक्तिः । तस्य प्रपञ्चविस्मृति-

साहित्ये निरोध इति पृथक्त्वं नारदस्य प्रपञ्चविस्मृतिकथनात्स्फुटं स्यात्। नारदस्य पूर्वं भक्तिमात्रं स्थितम्, प्रपञ्चविस्मरणे सति निरोधो जात इति ज्ञाने ज्ञातं स्यादित्यर्थः। यतः प्रपञ्चविस्मृतिकथनादित्यर्थः। नरकं निहतमित्यत्र। यद्यपि नरकवधमात्रमिति। तस्यानु शङ्खयवनमुराणां नरकस्य चेति स्वयमेव निरूपणात्तावन्मात्रं योगदृष्ट्या जानाति। श्रुतं त्वधुनैव। योषितामुद्वाहं तु योगेनापि पूर्वं न ज्ञातवान्। स्वच्छन्दचरितस्य योगाद्यगम्यत्वात्। अत एव विवाहं तत्र नोक्तवान्। श्रवणस्य दिदृक्षाहेतुत्वोक्त्या पूर्वं न श्रुतवानिति ज्ञायते इति भावः। पूर्वसिद्धं पूर्वज्ञातमित्यर्थः। श्रुत इति। विवाहस्तु साम्प्रतमेव निर्धारविषयोकृतः। पूर्वं योगेनापि ज्ञातो नेत्येवकारः। चित्रमित्यत्र। अवपुष्ट्वं वेति। ब्रह्मत्वमित्यर्थः। लौकिकधर्मसम्बन्धनिराकरणेनायमग्रे सिद्धान्तः कर्तव्यः। न युक्त इति। अतोऽग्रे सिद्धान्ते निराकर्तव्य इति शेषः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एकोनसप्ततितमे स्वप्रभावमदर्शयत्। श्रीकृष्णो नारदायेति विशेषेण निरूप्यते ॥ १ ॥

कृष्णेन नरकं हतं श्रुत्वा तथा तेनैकेन सह बह्वीनां योषितां विवाहं च श्रुत्वा नारदस्तत् ताभिः सह तस्य रमणं दिदृक्षुरासीत् इति शेषः। स्मेति पादपूरणे ॥ १ ॥ तद्दिदृक्षामेवाभिनयति—चित्रमिति। चित्रं बत एतदत्याश्चर्यम्। किं तत्? यदेको भगवानेकेन वपुषाऽवतीर्णः युगपदेकस्मिन्नेव काले पृथक्गृहेषु योषित्समसङ्ख्याकगृहेषु द्व्यष्टसाहस्रं षोडशसहस्रसङ्ख्याकाः स्त्रियः स्त्रीः उदावहत् तद्वृत्तं द्रष्टव्यमिति शेषः ॥ २ ॥ इत्येवमुत्साहयुक्तो देवर्षिस्तं द्रष्टुं द्वारवतीमागमत्। तां विशिनष्टि—पुष्पितेति सार्धत्रयेण। पुष्पितेषु उपवनेषु आरामेषु उद्यानेषु च द्विजानां पक्षिणां अलीनां च कुलैर्नादिताम् ॥ ३ ॥ उत्फुल्लैरिन्दीवरादिभिः छुरितेषु व्याप्तेषु सरस्सु हंसैः सारसैश्चोच्चैः कूजितां नादिताम् ॥ ४ ॥

अन्वितार्थप्रकाशिका

एकोनसप्ततितमे पश्यन्प्रतिगृहं हरिम्। नारदो विस्मितोऽस्तौत्तं तत्र श्लोकाः शराब्धयः (४५) ॥
चत्वार्युवाचेति (४) सांघ्रिद्वापञ्चाशदनुष्टुभः (५१।) ॥ ६९ ॥

नरकमिति। कृष्णेन नरकं निहतं श्रुत्वा तथा तेनैकेन सह बह्वीनां योषिताम् उद्वाहं च श्रुत्वा नारदस्तत् ताभिः सह तस्य स्थित्यादिकं दिदृक्षुरासीत्। इदं च नारदस्यागमनं षोडशसहस्रविवाहानन्तरमेव। पूर्वमनुक्तिस्तु प्रसक्तानुप्रसक्ततयेति दारैर्वरैस्तत्सदृशैरित्यादिकथनं तु पट्टमहिषीपुत्राभिप्रायकं योगमायाकल्पितं वेत्याहुः ॥ १ ॥ दिदृक्षामभिनयन्नाह—चित्रमिति। चित्रं बत एतदत्याश्चर्यं किं तत् यदेको भगवानेकेन वपुषाऽवतीर्णः युगपदेकस्मिन्नेव काले पृथक् गृहेषु योषित्समसंख्याकगृहेषु द्व्यष्टसाहस्रं षोडशसहस्रसंख्याकाः स्त्रियः स्त्रीः उदावहत् तद्वृत्तं प्रष्टव्यमिति शेषः। अत्र कायव्यूहरीत्या परिणयादिकं नास्ति। अपि तु एकस्यैव वपुषः सूर्यस्येव प्रकाशभेदरीत्यैवेति भागवताः। सूर्यस्य विभुत्वं नास्ति। अस्य विभोरपि सर्वेषामप्रतीतिस्तादृशपुण्याभावात् ॥ २ ॥ इतीति अर्द्धम्। इत्येवमुत्सुक उत्साहयुक्तो देवर्षिस्तं द्रष्टुं द्वारवतीमागमत्। तां विशिनष्टि—पुष्पितेति अर्द्धम्। पुष्पितेषु उपवनेषु आरामेषु उद्यानेषु च द्विजानां पक्षिणाम् अलीनां च कुलैर्नादिताम् ॥ ३ ॥ उत्फुल्लेति। उत्फुल्लैरन्दीवरादिभिः छुरितेषु व्याप्तेषु सरःसु हंसैः सारसैश्चोच्चैः कूजितां नादिताम् ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथैकोनसप्ततितमेऽध्याये नारदः श्रीकृष्णगार्हस्थ्यं दृष्टुकामः एककालपरिणीतानां षोडशसहस्रस्त्रीणां गृहेषु श्रीकृष्णस्य पृथक् पृथक् स्थितिं दृष्ट्वा विस्मितः सन् स्तुतिं चकारेत्याह नरकमिति ॥१॥ स्त्रियः स्त्रीः उदावहद्विवाहो चकार ॥२॥ अथ द्वारकां वर्णयन्नाह पुष्पितेति सार्द्धत्रिभिः पुष्पितेषु उपवनेषु आरामेषु गृहसमीपोद्यानेषु च द्विजालीनां पक्षिभ्रमराणां कुलैर्वृंदैर्नादितां ॥ ३ ॥ उत्फुल्लानि इंदीवराणि नीलपद्मानि च। अंभोजानि नानाविधवर्णपद्मानि च कह्लाराणि सुगंधिपद्मानि च कुमुदानि श्वेतानि च उत्पलानि रक्तानि च तैः छुरितेषु व्याप्तेषु ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गार्हस्थ्यं श्रीहरेर्दृष्ट्वा नारदः प्रतिमन्दिरम्। एकोनसप्ततितमे विस्मितोऽगात्स्तुवंस्तुतः ॥ १ ॥

अथैको भगवानष्टोत्तरशताधिकषोडशसहस्रपत्नीभिः सह कथं रमते इति दिदृक्षयाऽऽगताय नारदाय प्रदर्शितं भगवच्चेष्टितमनुवर्णयति नरकमित्यादिना एकश्लोकेन। नरकमिति। नारदः, नरकं नरकासुरं, कृष्णेन, निहतं श्रुत्वा, तथा एकेन कृष्णेन सह, कर्त्रा वा, बह्वीनां योषितां, उद्वाहं चापि, श्रुत्वा, तद्दिदृक्षुः, आसीत् स्म। अत्रोद्वाहशब्देन तत्पूर्वकक्रीडा च विवक्षिता ॥ १ ॥ दिदृक्षामेवाभिनयति। चित्रमिति। बत एतत्, चित्रम्। किं तत्। यत्, एकेन वपुषा विग्रहेण, युगपत्, पृथक् गृहेषु योषित्समानसंख्याकगृहेष्वित्यर्थः। द्व्यष्टसाहस्रं, षोडशसहस्रसंख्याका इत्यर्थः। स्त्रियः स्त्रीः, एकः, उदावहदुपयेमे

इत्येतत् ॥ २ ॥ इतीति । इतीत्थं, द्रष्टुं उत्सुकः देवर्षिः, द्वारवतीं आगमत् । तां विशिनष्टि सार्द्धत्रयेण । पुष्पितानि यानि उपवनानि आरामा उद्यानानि च तेषु द्विजानां पक्षिणामलीनां भ्रमराणां च कुलानि समूहास्तैर्नादिता ताम् ॥३॥ उत्फुल्लेति । उत्फुल्लानि यानि इन्दीवराम्भोजकह्लारकुमुदोत्पलानि तैः इन्दीवरादयः कमलजातिभेदाः । छुरितेषु व्याप्तेषु, सरस्सु, हंससारसैः उच्चैः, कूजिताम् ॥ ४ ॥

कृष्णप्रिया

महाराज शुकदेवजी कहते हैं—राजन् परीक्षित् ! महर्षि देवर्षिजी के कर्ण पथ पर जब यह वधाई आयी कि भगवान् पूर्ण पुरुषोत्तम श्रीकृष्णचन्द्र ने नरकासुर का वध करके स्वयं अकेले ही समस्त षोडश सहस्र कुमारियों के साथ लग्न कर लिया है, तब मुनिवर के मन में श्रीकृष्ण की रहन-सहन कैसी होगी यह जानने की जिज्ञासा हुई ॥ १ ॥ देवर्षिजी सोचने लगे कि—यह कितने आश्चर्य की वार्ता है कि भगवान् श्रीकृष्ण ने एक ही श्रीविग्रह से एक ही समय सोलह हजार महलों में पृथक्-पृथक् सोलह हजार कुमारियों का पाणिग्रहण किया ॥ २ ॥ देवर्षिवर्य नारदजी इस उत्कण्ठा से प्रेरित होकर पूर्ण पुरुषोत्तम श्रीकृष्णचन्द्रजी की लीलाओं का अवलोकन करने के कारण श्री द्वारिकापुरी आ पहुँचे । द्वारिका के उपवन और उद्यान विकसित विविध रङ्ग के कुसुमों से लदे हुए तरुवरों से परिपूर्ण थे । उन तरुवरों पै तरह तरह के पक्षी चहक रहे थे और भ्रमर गुंजारण कर रहे थे ॥ ३ ॥ स्वच्छ सलिल से परिपूर्ण सरोवरों में श्याम-लाल एवं श्वेत रंग के विविध प्रकार के कमल खिले हुए थे । कुमुद और उत्पल नाम के कमलों की भीड़ लगी हुई थी । उन कमलों के वन में हंस और सारस नाम के पंछी कलरव कर रहे थे ॥ ४ ॥

प्रासादलक्षैर्नवभिर्जुष्टां स्फाटिकराजतैः । महामरकतप्रख्यैः स्वर्णरत्नपरिच्छदैः ॥ ५ ॥
विभक्तरथ्यापथचत्वरापणैः शालासभाभि रुचिरां सुरालयैः ।
संसिक्तमार्गाङ्गणवीथि[1] देहलीं पतत्पताकाध्वजवारितातपाम्[2] ॥ ६ ॥
तस्यामन्तःपुरं श्रीमदर्चितं सर्वधिष्ण्यपैः । [3]हरेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन दर्शितम्[4] ॥ ७ ॥
तत्र षोडशभिः सद्मसहस्रैः समलंकृतम् । विवेशैकतमं शौरेः पत्नीनां भवनं महत् ॥ ८ ॥

कर्दमक्षमा

अन्वयः—नवभिः, प्रासादलक्षैः, स्फाटिकराजतैः, महामरकतप्रख्यैः, स्वर्णरत्नपरिच्छदैः, जुष्टाम्, विभक्तरथ्यापथचत्वरापणैः, शालासभाभिः, सुरालयैः, रुचिराम्, संसिक्तमार्गाङ्गणवीथिदेहलीम्, पतत्पताकाध्वजवारितातपाम्, तस्याम्, सर्वधिष्ण्यपैः, अर्चितम्, हरेः, श्रीमद्, अन्तःपुरम्, यत्र, त्वष्ट्रा, कार्त्स्न्येन, स्वकौशलम्, दर्शितम्, तत्र, षोडशभिः, सद्मसहस्रैः, समलङ्कृतम्, शौरेः, पत्नीनाम्, एकतमम्, महत्, भवनम्, विवेश ॥ ५-८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

महामरकतैः प्रख्यायंते प्रकाशंत इति तथा तैः । स्वर्णरत्नमयाः परिच्छदाः परिकरा येषु तैः ॥ ५ ॥ पतंत्यः प्रचलंत्यः पताका येषां तैर्ध्वजैर्वारित आतपो यस्यां ताम् ॥६॥ तस्यां द्वारकायाम् । सर्वैर्धिष्ण्यपैर्लोकपालैरर्चितम् । षोडशभिः सद्मसहस्रैः समलंकृतं हरेरंतःपुरम् । विवेश । तत्र च तस्य शौरेः पत्नीनां भवनेष्वेकतमं विवेशेत्यन्वयः । यत्र च स्वकौशलं त्वष्ट्रा दर्शितमित्यंतःपुरभवनयोर्विशेषणम् ॥ ७-८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नवभिर्नवसंख्याकैः ॥ ५ ॥ रथ्यापथा रथमार्गाः, चत्वरं पथां श्लेषः, आपणो निषद्या । "चत्वरं तु पथां श्लेषे स्थंडिलांगणयोरपि" इति हैमः । "गृहपंक्तिपुरो मार्गो वीथी प्रोक्ता, गृहेऽपि वीथिरुच्यते" इति निरुक्तिः । विश्वनाथस्तु—रथ्या राजमार्गाः, पथा अन्ये मार्गाः । शाला अश्वादिगृहाः । सभाश्च वर्गशः पृथक्पृथक्त्वस्वस्थान्य इत्याह ॥६॥ तस्यां द्वारकायाम् ।

---

१. वीथिशोभां-प्रा. पा. ।

२. उत्फुल्लेन्दीवराम्भोजकह्लारकुमुदोत्पलैः । छुरितेषु सरस्सुच्चैः कूजितां हंससारसैः ॥
पुष्पितोपवनारामद्विजालिकुलनादिताम् ॥-अधिकः प्रा. पा. ।

३. सर्वविस्मायकं यत्नात्-प्रा. पा. । ४. निर्मितम्-प्रा. पा. ।

अन्तर्मध्ये हरेः पुरं सर्वसंपत्तिपूर्णं स्थानमस्तीति शेषः। पुरं गृहसमुदायो वा। तत्र पुरे। एकतमं भवनम्। यत्र पुरे। 'धिष्ण्यं लोष्टाग्निसद्मसु' इति निरुक्तिः। "पुरं स्याद्गृहसंदोहे नगरे वर्ष्मणि गृहे" इति धरणिः। यत्र त्वष्ट्रा विश्वकर्मणा कौशल्यं शिल्पनैपुण्यं दर्शितं प्रकटितं प्रागुक्तेभ्योऽस्योत्कर्षोऽसूचीत्यनेन। यद्वा—यत्र हरेः स्वकौशलं कार्त्स्न्येन त्वष्ट्रा दर्शितं तमिच्छक्षयैव त्वष्ट्रा सर्वं कृतं न तु स्वशक्त्या किञ्चित्कृतमित्यर्थः। तद्गृहं च श्रीरुक्मिण्या एवेति सहसोत्थितः श्रीपर्यंकत इत्युक्तेः ॥ ७–८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आन्तरं वर्णयति—प्रासादेति। स्फाटिकैः राजतैश्च ॥ ५ ॥ आनन्दादन्ते दीर्घश्छन्दसा मध्यं वर्णयति—विभक्तेति। विभक्ता असङ्कीर्णतया रचिता ये रथ्यादयस्तैः रथ्या राजमार्गाः पन्थानोऽन्ये विविधाः शालाः अश्वादिगृहाः सभाश्च वर्गशः पृथक् पृथक् स्वस्वास्थान्यः ताभि सुरालयैश्च रुचिरां रथ्यादीनां यथोत्तरं रुचिरतासाधनत्वे श्रैष्ठ्यं सम्यक् सिक्ताः सुगन्धिजलादिभिरभ्युक्षिता मार्गादयो यस्यास्तां वीथयो गृहसंलग्नचत्वराणि देहल्यो गृहद्वारवेदिकाः मार्गादीनां यथोत्तरमान्तरत्वम् उपरितमं वर्णयति पतदिति ॥ ६ ॥ तस्यामिति षट्कम्। तत्राद्यद्वयं मिथोऽन्वितं श्रियः सर्वाः शोभाः सम्पत्तयश्च तद्युक्तं स्वीयमसाधारणं कौशलं शिल्पनैपुण्यं त्वष्ट्रा दर्शितं प्रकटितं इति प्रागुक्तप्रासादवर्णेभ्यः सद्मनामेषां महोत्कर्ष उक्तः अत एव सम्यगलङ्कृतं महदित्यनेन सर्वज्येष्ठायाः श्रेष्ठायाः श्रीरुक्मिण्या इति बोध्यते वक्ष्यते च सहसोत्थितः श्रीपर्य्यङ्कन्त इति। अयमेव प्राक् तत्प्रवेशे हेतुश्च अन्यत्तैः यद्वा यत्र हरेः स्वकौशलं कार्त्स्न्येन त्वष्ट्रा दर्शितमिति तच्छिक्षयैव त्वष्ट्रा सर्वं प्रकटितमिति नतु स्वशक्त्या नतु वा रचित इत्यर्थः ॥ ७–८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आन्तरं वर्णयति—प्रासादेति। स्फाटिकै राजतैश्च ॥ ५ ॥ मध्यं वर्णयति—विभक्तेति। विभक्ता असंकीर्णतया रचिता ये रथ्यादयस्तैः; रथ्या राजमार्गाः, पन्थानोऽन्ये विविधाः, शाला अश्वादिगृहाः, सभाश्च वर्गशः पृथक् पृथक् स्वस्वास्थान्यस्ताभिः सुरालयैश्च रुचिराम्। रथ्यादीनां यथोत्तरं रुचिरतासाधनत्वे श्रैष्ठ्यम्। सम्यक् सिक्ताः सुगन्धिजलादिभिरभ्युक्षिता मार्गादयो यस्यास्ताम्, वीथयः; उदुम्बराणि, आपणस्थानेति चित्सुखः, मार्गादीनां यथोत्तरमान्तरत्वम्; उपरितमं वर्णयति—पतदिति ॥ ६ ॥ श्रीः सर्व्वा शोभा सम्पत्तिर्वा, तद्युक्तम्; हरेः सर्व्वमनोहरस्येत्यन्तःपुरस्यापि तादृशत्वं सूचयति, स्वकीयमसाधारणं कौशलं शिल्पनैपुण्यं दर्शितं प्रकटितम्, इति प्रागुक्तप्रासादवर्गेभ्यः सद्मनामेषां महोत्कर्ष उक्तः। अतएव सम्यगलंकृतम्; महदित्यनेन सर्व्वज्येष्ठायाः श्रेष्ठायाः श्रीरुक्मिण्याः इति बोध्यते। अयमेव प्राक् तत्प्रवेशे हेतुश्च। शौरेर्निजाशेषभगवत्ताप्रकटनार्थं शूरवंशे अवतीर्णस्येति लक्ष्मीतः पत्नीनां वैकुण्ठभवनादप्यस्य भवनस्य माहात्म्यं सूचितम् ॥ ७–८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

नवभिः प्रासादानां लक्षैर्जुष्टामित्यर्थः। कथम्भूतैः स्फटिकमयैः रजतमयैश्च महामरकतस्येन्द्रनीलस्य स्वर्णश्रेष्ठस्य रत्नानाञ्च परिच्छदास्तन्मयाः परिच्छदाः उपकरणानि येषु तैः महामरकत प्रख्यैरिति पाठे महामरकतैः प्रख्यान्ति प्रकाशन्त इति तथा तैः स्वर्णरत्नमयाः परिकरा येषु तैः ॥ ५ ॥ किञ्च, विभक्तेति। विभक्तैः रथ्यापथादिभिः शालादिभिः सभाभिसुराणां देवताप्रतिमानामालयैश्च रुचिरां शोभमानां रथ्यापथाः राजवीथयः संसिक्ता मार्गादयो यस्यां तां पतन्तीभिच्चलन्तीभिः पताकाभिर्ध्वजैश्च वारित आतपो यस्यां ताम् ॥ ६ ॥ तस्यामिति। तस्यां द्वारकायामन्तःपुरं तत्रापि शौरेरेकतमं भवनं गृहे विवेशेति उत्तरेण सम्बन्धः। अन्तःपुरं विशिनष्टि—श्रीमत् भोग्यभोगोपकरणादिसमृद्धिमत् सर्वैः धिष्ण्यपैः लोकाधिपतिभिरर्चितम् बहुमतं त्वष्ट्रा विश्वकर्मणा विनिर्मितैः मुक्तादामानि विलम्बयन्ति इति तैः वितानैरुल्लोचनैरुपलक्षितमिति शेषः अर्चितमित्यस्य वानुषक्तस्यालङ्कृतमित्यर्थः। किम्बहुना यत्र यस्मिन्नन्तःपुरे हरेः हरये त्वष्ट्रा स्वकौशलं स्वशिल्पनैपुण्यं कार्त्स्न्येन प्रदर्शितम् ॥ ७ ॥ किञ्च, तत्रेति। षोडशभिः शौरेः पत्नीनां गृहसहस्रैः समलङ्कृतम् ॥ ८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

ततः पश्चात्स्फाटिकराजतैः स्फटिकादिनिर्मितैः नवभिः नूतनैः प्रासादलक्षणैर्जुष्टं स्थलमपि कीदृशैर्महामरकतप्रख्यैः इन्द्रनीलविहितसोपानैः स्वर्णरत्नानि सुवर्णश्रेष्ठानि परिच्छदा येषां तानि यथा अत्युत्तमसुवर्णस्थलविचित्रितानीत्यर्थः तैः ॥५॥ किञ्च, विभक्तैः विभक्तरथ्यापथैः रथमार्गैश्चत्वरैरापणैश्च शोभितां ततः परं शालाभिः सभाभिरतिरुचिरां सुरालयैः देवगृहैश्च मनोरमां गोमयचन्दनोदकादिना संसिक्ता मार्गाश्च अङ्गणानि च वीथयश्च गृहपङ्क्तिपुरोमार्गाश्च संसिक्तमार्गाङ्गणवीथयः ताश्च गेहानि चास्याः सन्तीति संसिक्तमार्गाङ्गणवीथिगेहिनी तां पतन्त्यः विवरणावरणं कुर्वन्त्यः पताका येषां ते पतत्पताकाः तेच ध्वजाः पतत्पताकाध्वजास्तैः वारितस्तम्भितः आतपो यत्र सा तथा ताम् एवंविधायां तस्यां कुशस्थल्यामन्तर्भागे हरेः पुरं सर्वसम्पदा पूर्णं स्थानमस्तीति शेषः। सर्वधिष्ण्यपैः समस्तैः ब्रह्मादिभिरर्चितं धिष्ण्यं गृहं मध्यगृहपतिर्ब्रह्मा। पारतः पतय

इन्द्रादयः यत्र पुरे त्वष्ट्रा विश्वकर्मणा ॥ ६-७ ॥ ततः परितः कृष्णस्य पत्नीनां षोडशभिः सद्मसहस्रैः गृहसहस्रैस्सन्दर्शनीयतयाऽलङ्कृतं भवनानामेकतमं भवनम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यत्र हरेः स्वकौशलं कार्त्स्न्येन त्वष्ट्रा दर्शितमिति तच्छिक्षयैव त्वष्ट्रा सर्व्वं प्रकटितं ननु स्वशक्त्या नतु वा रचितमित्यर्थः ॥ ७-१५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

महामारकतैश्चूडावलभ्यादिगतैः प्रख्या शोभा येषां तैः । स्वर्णरत्नमयाः परिच्छदाः परिकरा येषु तैः ॥ ५ ॥ रथ्या राजमार्गाः पन्थानोऽन्यमार्गाः पतन्त्यश्चलन्त्यः पताकाः येषु तैर्ध्वजैः ॥ ६ ॥ तस्यामन्तःपुरं समलङ्कृतं वर्त्तते । तत्रान्तःपुरे पत्नीनामेकतमं भवनं विवेशेत्यन्वयः ॥ ७-८ ॥

गूढार्थदीपिनी

स्फटिकमयैः रजतमयैः महामरकतैश्च प्रख्यान्ति प्रकाशन्ते तथा तैः । प्रासादलक्षैः जुष्टाम् । परिच्छदाः तन्मयाः विविधसामाग्र्यः येषु तैः ॥ ५ ॥ रथ्याः राजमार्गाः पथाः अवान्तराः । शाला अश्वशाला । सभा विश्रामस्थानम् तदादिभिः रुचिरम् । पतत्पताकाभिः ध्वजैश्च निवारितः आतपो यस्यां ताम् ॥ ६ ॥ तस्यामिति युग्मम् । तस्यां द्वारकायां । सर्वं धिष्ण्यपैः लोकपालैः अर्चितं प्रशंसितम् । त्वष्ट्रा विश्वकर्मणा ॥ ७ ॥ हरेः अन्तःपुरं तत्रापि एकतमं श्रीरुक्मिणीभवनम् विवेश ॥ ८ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रासादानां लक्षैर्नवभिर्जुष्टाम् कीदृशैः स्फटिकमयैः रजतमयैश्च महामरकतैः प्रख्यायन्ते प्रकाशन्ते इति तथा तैः स्वर्णरत्नमयाः परिच्छदाः परिकरा येषु तैः ॥ ५ ॥ विभक्तैः यथास्थानं रचितैः रथ्यादिभिः शालासभाभिश्च सुराणां देवप्रतिमानामालयैश्च रुचिरां संसिक्ताः मार्गाद्याः । यस्यां तां पतन्त्यः पताका येषु तैर्ध्वजैर्वारित आतपो यस्यां ताम् ॥ ६ ॥ तस्यां द्वारवत्यां हरेः अन्तःपुरम् गुह्यस्थानं श्रीमत् श्रीः रुक्मिणी परमा सम्पत् विद्यते यत्र तत् अत एव सर्वैः धिष्ण्यपैः सर्वलोकाधिपतिभिरर्चितं पूजितं त्वष्ट्रा विश्वकर्मणा यत्र अन्तःपुरे स्वस्य कौशलं नैपुण्यं दर्शितम् ॥ ७ ॥ यत्र यस्मिन् अन्तःपुरे शौरेः पत्नीनां षोडशभिः सद्मसहस्रैः समलङ्कृतम् एकतमं भवनं विवेश श्रीनारद इति शेषः । अत एव महत् सर्वेभ्यः सद्मभ्यः श्रेष्ठं रुक्मिण्या भवनमित्यर्थः ॥ ८ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रासादानां लक्षाणि तैः । तत्सङ्ख्यामाह ॥ नवभिरिति । नवलक्षैः । नूतनैरित्यर्थपक्षे नवशब्दपर्यायोऽयं नवशब्द इति ऐसादेशाभावश्छान्दसतया वेति ज्ञेयम् । स्फाटकराजतैस्तदुभयमयैर्महामरकतानां प्रख्याभिरख्या येषां ते तैः । स्वर्णरत्नात्मकपरिकरैश्च जुष्टामित्यन्वयः ॥ ५ ॥ रथ्या रथसङ्घस्तस्य पन्था रथ्यापथो रथसञ्चरणसरणिः । रथ्या रथौघविशिखवर्तनी चत्वरेषु च । रथ्या प्रतोली विशिखेति विश्वामरौ चत्वरैरापणैः शालाभिर्गृहैस्तदेकदेशैस्तरुस्कन्धशाखाभिर्वा । शालागृहे तरुस्कन्धशाखागारैकदेशयोरिति विश्वः । सभाभिरभिरुचिरां मनोहरां सुरालयैर्देवालयै रुचिरां च संसिक्ता मार्गा अङ्गणानि च वीथयश्च यस्यां सा च सा महानि सन्त्यस्यामितीत्यर्थः । प्राशस्त्यं प्रशस्तगृहवतीति गेहिनी च ताम् । पतत्पताकाध्वजेति सुपठम् । पतत्पताकाध्वजेति पाठे पतत्पताका येषां ते च ते ध्वजाश्चेति व्याख्येयम् । तैः । विशेषतः प्राच्युदञ्चितोऽनुसन्धेयः । वारित आतपो यस्यां सा ताम् ॥ ६ ॥ क्रमान्नारदागमनमिति तथैवावर्णयत् । तस्यां कुशस्थाल्यामन्तर्मध्ये सर्वधिष्ण्यपैर्ब्रह्मादिभिरर्चितं श्रीमद्धरेः पुरम् । यत्र पुरे त्वष्ट्रा विश्वकर्मणा स्वकौशलं कार्त्स्न्येन सामस्त्येन दर्शितम् ॥ ७ ॥ तत्र पुरे षोडशभिः सद्मसहस्रैः समलङ्कृतं सम्यगलङ्कृतम् । शौरेः पत्नीनामेकतमं महद्भवनं विवेश । यन्महद्भवनं लोके तद्येन समलं मलसहितं कलङ्कि तुच्छमिति यावत् कृतम् । तन्महद्भवनमिति ॥ ८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भूमिरूपां वर्णयति प्रासादलक्षैरिति । नवलक्षप्रासादाः महतां गृहाः । स्फटिकमयाः रजतमयाश्च भित्तिस्तम्भभेदेन । राजताः स्तम्भाः महामरकतनिर्मिता भूः तया प्रख्याः प्रसिद्धाः प्रासादाः । स्वर्णरत्नमयानि परिच्छदानि येषु । यथा गृहे दारुमयानि, तथा स्वर्णमयानि, यथा शिलामयानि, तथा रत्नानि । गृहोपकरणान्यपि परिच्छदानीत्युच्यन्ते । तथाप्यनव-

सरत्वान्न तानि ग्राह्याणि ॥५॥ एवं पुरीं बहिर्वर्णयित्वा अन्तस्तां वर्णयति **विभक्तेति** । विभक्ताः पृथक् पृथक् कृता रथ्यादयः, न तु सङ्कीर्णाः रथ्या राजमार्गाः पन्थानः । चत्वरमङ्गणम् । आपणः पण्यवीथिका । गतिस्थानान्येतानि । **स्थितिस्थानान्याह** । **शाला** अन्नादिभोजनस्थानानि । **सभा** उपवेशनस्थानानि । ताभिः रुचिराम् । ऐहिकार्यं द्वयमेव । पारलौकिकार्थमाह **सुरालयैश्च रुचिरामिति** । **नैमित्तिकातिशयमाह संसिक्तेति** । सम्यक् सिक्ताः मार्गादिदेशत्यन्ता यस्याम् । उपरिशोभामाह । पतत्पताकाध्वजैः वारितः आतपो यस्यामिति ॥ ६ ॥ सामान्यतो नगरीं वर्णयित्वा विशेषतो भगवद्गृहं वर्णयति, नारददृष्टम् । एवंप्रकारेण नारदो दृष्टवानिति । तदा लौकिकोत्कर्षः सम्पद्यते । तच्च तस्यानभिप्रेतमिति । सिद्धे हि लौकिकत्वे तत्र बुद्धिस्थैर्ये लौकिकस्य निरोधः सम्पद्यत इति । तस्यां द्वारकायाम् । हरेरन्तःपुरं **श्रीमत्**, स्वतः शोभायुक्तम् । अनेन वैकुण्ठातिरेक तत्र निरूपितः । लक्ष्मीस्थितिर्वा । अन्यत्रावतारेषु अवतीर्णैव लक्ष्मीस्तिष्ठति, न मूलरूपेणेति । उपपत्त्या अन्तःपुरं वर्णयति । **सर्वधिष्ण्यपैरर्चितं स्वकौशलं त्वष्ट्रा कार्त्स्न्येन प्रदर्शितमिति** प्रकारद्वयेन । रत्नस्वर्णादयस्तु पुरे एव निरूपिताः न भगवदन्तःपुरे विशेषं सम्पादयन्ति । वक्तव्यश्च विशेषः । अतो भूमिष्ठाः पदार्थाः साधनभावान्निरूपिताः । इन्द्रादयो हि धिष्ण्यपाः लोकपालाः । तेषामपि परम्परोपार्जितान्यतिदुर्लभानि रत्नादीनि पूजासाधनानि भवन्ति । तैरर्चितमिति । तन्निर्माणार्थं तैस्तानि दत्तानीत्येके, यतः अग्रे त्वष्ट्रा विश्वकर्मणा शिल्पाचार्येण हरेरर्थे स्वकौशलं प्रदर्शितम्, अतिनैपुण्येन निर्मितम् । रत्नानि इन्द्रादिभिर्दत्तानि, विश्वकर्मणा तु सम्यग्योजितानीत्यर्थः ॥ ७ ॥ एवं सामान्यतोऽन्तःपुरं वर्णयित्वा, तत्रस्थान् गृहान् प्रत्येकं वर्णयितुं विभागमुक्त्वैकं गृहं वर्णयति **तत्र षोडशभिरिति** । ते गृहाः स्वतः प्रधानभूता अपि परस्परमेकस्यापि सर्वे शोभाजनका भवन्ति । समप्राधान्ये तु विशिष्टो रसो नोत्पद्यत इति यदेव गृहं निकटे स्थितम्, तत्रैव नारदस्य विशिष्टबुद्धिरुत्पन्नेति तत्र प्रविष्टः । एकमपि गृहं षोडशभिः सद्मसहस्रैः समलङ्कृतम् । ते च गृहाः पत्नीनामेव । तन्निकटे गतस्य तदेव गृहं महत्त्वेन भासत इति **महदित्युक्तम्**, न तु गृहेषु न्यूनाधिकभावोऽस्ति । तथा सति भगवतस्तत्र वैषम्यं स्यात् । सर्वत्र विवाहरमणपुत्रसम्पदां तुल्यत्वात् ॥ ८ ॥

श्रीसुबोधिनी–सारः

स्फाटिकमये रजतमयैश्च महामरकतैः प्रख्यायंते प्रकाशंत इति तैः **स्वर्णमया रत्नमयाः परिच्छदा** उपस्करा येषु तैर्नवभिः प्रासादलक्षैर्जुष्टाम् ॥ ५ ॥ **विभक्ते** रथ्यादिभिः शालाभिः सभाभिः सुरालयैर्देवमंदिरै रुचिरां मनोहरां संसिक्ता गंधजलैरार्द्रीकृता मार्गा अंगणानि वीथयो देहल्यो यस्यां तां पतत्यः पताका येषु तैर्ध्वजैर्वारितो दूरीकृत आतपोर्कधर्मो यस्यां ताम् ॥ ६ ॥ तस्यां द्वारकायां हरेरंतःपुरं श्रीमत् कांतियुक्तं सर्वैर्धिष्ण्यपैर्लोकपालैरर्चितं पूजितं मानितं यत्र यस्मिन्नंतःपुरे त्वष्ट्रा विश्वकर्मणा स्वकौशलमात्मचातुर्यं कार्त्स्न्येन साकल्येन दर्शितम् ॥७॥ तत्र च हरेः पत्नीनां स्त्रीणां षोडशभिः गृहसहस्रैः समलंकृतम् एकतमं महद्भवनं गृहं नारदो विवेश ॥ ८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तस्यामित्यत्र । **तच्च तस्येति** । लौकिकोत्कर्षसम्पादनं नारदस्यानभिप्रेतं सन्देह जनकत्वादित्यर्थः । एतत्सम्पादने भगवदाशयमाहुः सिद्धे हीति । लौकिकस्य पूर्वं लौकिकत्वेनैव बुद्धिस्थैर्ये जाते तदनन्तरं लौकिकत्वांशो निवारणीयः, पदार्थास्तु त एवेति भावः । **वैकुण्ठावेश** इति । तस्य रमाक्रीडत्वादिति भावः । **श्रीमदित्यनेनाधारत्वमात्रमुक्तम्**, नतु क्रीडेत्याशयेन पक्षान्तरमाहुः लक्ष्मीस्थितिर्वेति । **साधनभावादिति** । साधनत्वेन इन्द्रादिपूजासाधनानि रत्नान्यत्र भूमिनिर्माणे साधनानि इति प्रकारेण निरूपिता इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नवभिः प्रासादानां महतां गृहाणां लक्षैर्जुष्टां युक्ताम् प्रासादान् वर्णयति—**स्फटिकमयै रजतमयैश्च महामरकतैश्च प्रख्यान्ति** प्रकाशन्ते इति तथा तैः । **स्वर्णमया रत्नमयाश्च परिच्छदाः** परिकरा येषु तैः ॥ ५ ॥ **विभक्तै रथ्यादिभिः** रुचिरां शोभमानाम् । रथ्या राजमार्गाः, पन्थानोऽन्ये मार्गाः, चत्वराणि अङ्गणानि, आपणाः पण्यवीथयः, तैः । शाला अन्नसङ्ग्रहभोजनादिस्थानानि, सभा उपवेशनस्थानानि, ताभिः । सुराणां देवानां आलया मन्दिराणि तैः । संसिक्ता मार्गादयो यस्यां ताम् । पतन्तोभिश्चलन्तीभिः पताकाभिर्ध्वजैश्च वारित आतपो धर्मो यस्यां ताम् । पताकाध्वजयोरल्पत्वमहत्त्वेनावान्तरभेदो ज्ञेयः ॥ ६ ॥ तस्यां द्वारकायां हरेरन्तःपुरं विवेश, तत्रापि शौरेः पत्नीनां भवनेष्वेकतमं भवनं विवेशेति द्वयोरन्वयः । अन्तःपुरं विशिनष्टि—श्रीमत् भोगोपकरणादिसमृद्धिमत् । सर्वैर्धिष्ण्यपैः लोकाधिपतिभिरर्चितं बहुमतम् । तत्र हेतुमाह—यत्र त्वष्ट्रा शिल्पाचार्येण विश्वकर्मणा कार्त्स्न्येन साकल्येन स्वकौशलं शिल्पनैपुण्यं प्रदर्शितम् ॥ ७ ॥ तत्रेति स्पष्टम् ॥ ८ ॥

अन्वितार्थप्रकाशिका

प्रासादेति। स्फटिकमयै रजतमयैश्च महामरकतैश्च प्रख्यान्ति प्रकाशन्ते इति तथा तैः स्वर्णमया रत्नमयाश्च परिच्छदाः परिकरा येषु तैः नवभिः प्रासादानां महागृहाणां लक्षैर्जुष्टाम् ॥ ५ ॥ विभक्तेति। विभक्ता रथ्या राजमार्गाः पथा अन्ये च मार्गाः चत्वराणि अङ्गणानि आपणाः पण्यवीथयस्तैः शाला अन्नसंग्रहभोजनादिस्थानानि सभा उपवेशनस्थानानि ताभिः सुराणां देवानाम् आलया मन्दिराणि तैः रुचिरां शोभमानां संसिक्ता मार्गादयो यस्याम्। कबभाव आर्षः। पतन्तीभिश्चलन्तीभिः पताकाभिः पतद्भिर्ध्वजैश्च वारित आतपो घर्मो यस्यां तां पताकाध्वजश्चयोरल्पत्वमहत्त्वेनावान्तरभेदो ज्ञेयः। पतन्त्यः पताका येषु तैर्ध्वजैरिति व्याख्यातॄणां मते ककारो ह्रस्वः पाठ्यः ॥ ६ ॥ तस्यामिति युग्मम्। तस्यां द्वारकायां यत्र त्वष्ट्रा शिल्पाचार्येण विश्वकर्मणा कार्त्स्न्येन साकल्येन स्वकौशलं शिल्पनैपुण्यं दर्शितम् इति पुरभवनयोर्विशेषणम्। तत् श्रीमत् भोगोपकरणादिसमृद्धिमत् सर्वैर्धिष्ण्यपैर्लोकाधिपतिभिरर्चितं बहुमतं षोडशभिः सद्मनां सहस्रैः समलंकृतं हरेरन्तःपुरं विवेश। तत्रापि शौरेः पत्नीनां भवनेष्वेकतमं भवनं विवेश ॥ ७–८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्फाटिकैः राजितानि शोभितानि तैः महामरकतैः प्रख्यानि प्रकाशमानानि तैःस्वर्णरत्नमयाः परिच्छदाः पर्यंकादि परिकरा येषु तैः जुष्टां ॥ ५ ॥ विभक्ता असंकीर्णाः रथ्या राजमार्गाः पंथानोऽन्यमार्गाश्च चत्वराण्यंगणानि च आपणाः पण्यविथयश्च तैः शालाः धर्मशालाः सभाः स्वस्वसभास्थानानि च ताभिः संसिक्ताः मार्गादयो यस्यां तां। देहल्यो गृहद्वारवेदिकाः पतंत्यः चलंत्यः पताकार्येषु तैर्ध्वजैः निवारितातपां ॥ ६ ॥ तस्यां द्वारवत्यां सर्वे धिष्ण्यपा इंद्रादिलोकाधिपास्तैरर्चितं। त्वष्ट्रा विश्वकर्मणा ॥ ७ ॥ तत्र अंतःपुरे शौरेः पत्नीनां षोडशभिः गृहसहस्रैः सम्यगलंकृतं महत् भवनं। सर्वश्रेष्ठाया रुक्मिण्या गेहमित्यर्थः ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रासादेति। स्फाटिकराजतैः स्फटिकमयैः रजतमयैश्च, महामरकतैः प्रख्यन्ति प्रकाशन्ते इति तथा तैः, स्वर्णरत्नमयाः परिच्छदाः परिकरा येषु तैः, नवभिः प्रासादलक्षैः, जुष्टाम् ॥ ५ ॥ रथ्याश्च पन्थानश्च चत्वराणि च आपणानि च विभक्तान्यसंकीर्णानि यानि रथ्यादीनि तैः, शालाश्च सभाश्च ताभिः, सुराणां देवताप्रतिमानामालयानि तैः, रुचिरामतिसुन्दरां, संसिक्ताः मार्गाः अङ्गणानि वीथयः देहल्यश्च यस्यां तां, पतन्त्यः प्रचलन्त्यः पताकाः ध्वजाश्च तैर्वारित आतपो यस्यां तां, द्रष्टुं, देवर्षिरागमदिति संबन्धः ॥६॥ तस्यामिति। तस्यां द्वारकायां, सर्वधिष्ण्यपैर्लोकपालैः अर्च्चितं, यत्र, त्वष्ट्रा कार्त्स्न्येन, स्वकौशलं, दर्शितं तथाविधं, श्रीमत् हरेः, अन्तःपुरं, भवति ॥ ७ ॥ तत्रेति। शौरेः, पत्नीनां, षोडशभिः सद्मसहस्रैः, युक्ते तत्रान्तःपुरे, समलंकृतं महत्, एकतमं भवनं, विवेश ॥ ८ ॥

कृष्णप्रिया

इस पावन नगरी द्वारिका में श्वेतमणि-स्फटिक मणि और रजत के नव लाख महल थे। वे महल महामरकतमणि प्रभु की कान्ति से जगमगा रहे थे। उन महलों में सुवर्ण और रत्न आदि की विविध सामग्रियां शोभायमान थी। याने उत्तम प्रकार की चीजें भीतर थी। उस नगरी में विशाल राजमार्ग, गलियाँ, चौराहे एवं बाजार अत्यंत मनोहर थे। अश्वशाला–गजशाला पशुओं के निवासस्थान सभाभवन एवं देवालयों के कारण पुरी का सौंदर्य अधिक बढ़ गया था। नगरी के राजमार्ग गली चौक और दरवाजों पर सुगन्धित जल का छिड़काव किया गया था। छोटी-छोटी असंख्य झंडियां एवं बड़े-बड़े झंडे अनेक स्थानों में फहरा रहे थे जिससे मार्ग में धूप नहीं आ सकती ॥ ५–६ ॥ उसी दिव्य नगरी द्वारिका में भगवान् श्रीकृष्ण का अत्यन्त सुन्दर अन्तःपुर विराजमान था। जिसकी लोकपाल भी चर्चा करते थे स्तुति करते थे। उस नगर निर्माण करने में श्री विश्वकर्मा जी ने अपना पूरा कौशल्य और कला दी थी ॥ ७ ॥ उस अन्तःपुर में भगवान की अर्धाङ्गिनीओं के सोलह हजार से अधिक भवन विराजमान थे। उनमें से एक बड़े महल में देवर्षि वर श्री नारद जी ने प्रवेश किया ॥ ८ ॥

विष्टब्धं विद्रुमस्तम्भैर्वैडूर्यफलकोत्तमैः। इन्द्रनीलमयैः कुड्यैर्जगत्या चाहतत्विषा ॥ ९ ॥
वितानैर्निर्मितैस्त्वष्ट्रा मुक्तादामविलम्बिभिः। दान्तैरासनपर्यङ्कैर्मण्युत्तमपरिष्कृतैः ॥ १० ॥
दासीभिर्निष्ककण्ठीभिः सुवासोभिरलंकृतम्। पुम्भिः सकञ्चुकोष्णीष सुवस्त्रमणिकुण्डलैः ॥ ११ ॥
रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वान्तं विचित्रवलभीषु शिखण्डिनोऽङ्ग।
नृत्यन्ति यत्र विहितागुरुधूपमक्षैर्निर्यान्तमीक्ष्य घनबुद्धय उन्नदन्तः ॥ १२ ॥

---

१. जालैः स्तंभैर्मरकतोत्तमैः–वीर. ; जालैर्मरकोत्तमैः। २. वैः सुवासो–प्रा. पा.।

कर्दमक्षमा

अन्वयः—वैडूर्यफलकोत्तमैः, विद्रुमस्तम्भैः, विष्टब्धम्, जगत्याः, इन्द्रनीलमयैः, कुड्यैः, च, आहतत्विषा, मुक्तादामविलम्बिभिः, त्वष्ट्रा, निर्मितैः, वितानैः, दान्तैः, मण्युत्तमपरिष्कृतैः, आसनपर्यङ्कैः, निष्ककण्ठीभिः, सुवासोभिः, दासीभिः, सकञ्चुकोष्णीषसुवस्त्रमणिकुण्डलैः, पुम्भिः, अलंकृतम् ॥ ९-११ ॥ रत्नप्रदीपनिकरद्युतिभिः, निरस्तध्वान्तम्, अङ्ग !, विचित्रवल्लभीषु, शिखण्डिनः, यत्र, विहितागुरुधूपम्, अक्षैः, नियन्तिम्, ईक्ष्य, धनबुद्धयः, उन्नदन्तः ॥ १२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदनुवर्णयति चतुर्भिः। विष्टब्धमिति। विद्रुमस्तंभैर्विष्टब्धं विधृतम्। वैदूर्यमयानि फलकोत्तमानि स्तंभाश्रयणानि छादनानि तैरिंद्रनीलमयैः कुड्यादिभिश्चोपलक्षितम्। जगत्या भूमिकया चेंद्रनीलमय्या। न हता त्विड् यस्यास्तया ॥ ९ ॥ मुक्तादाम्नां विलंबा विविधानि लम्बनानि विद्यंते येषु तैः मण्युत्तमैः परिष्कृतैर्भूषितैः ॥ १०-११ ॥ ईक्ष्य समीक्ष्य। घनो मेघोऽयमिति बुद्धिर्येषां ते ॥ १२ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तद्गृहम्। "स्तंभानामाश्रये तेषां छादने फलकं मतम्" इति स्वामी। न हता त्विट् कांतिर्यस्यास्तया ॥ ९ ॥ मुक्तादामविलंबिभिरवलंबमानमौक्तिकमालैः। दांतैर्गजदंतनिर्मितैः ॥ १०-११ ॥ यत्र सद्मनि। अक्षैर्गवाक्षैः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तच्चैकतमं वर्णयन्नादौ तस्य मुख्याङ्गं वर्णयति—विष्टब्धमिति। अहतत्विषेति कथमपि मालिन्याद्यप्राप्तेरुक्तोयं वर्त्तमान एव ॥ ९ ॥ वितानैरिति द्वयम्। मिथोऽन्वितं तत्र मुख्यपरिच्छदान् वर्णयति—वितानैरिति। त्वष्ट्रा निर्म्मितैरिति पूर्ववत् आसनानि च पर्य्यङ्काश्च तैः ॥ १० ॥ तत्र परिवारान् वर्णयति—दासीभिरिति। पुम्भिश्च बालकादिभिर्दासैरलङ्कृतं सुवस्त्राणि शोभनान्यधः परिधानीयादीनि ॥ ११ ॥ ऊर्द्ध्वशोभां वर्णयति—रत्नेति। एषां गृहान्तःस्थितिरपि बोध्या अनेन रात्रावेवागमनमस्य बोधितं तदेव तस्य युगपत्प्रतिगृहस्थितेः सुष्ठु परीक्षणीयत्वात् अग्रे च श्रीभगवतः प्रियापर्य्यङ्कस्थितत्वेन वर्णयिष्यमाणत्वात् अगुरुधूपस्य शिखण्डिभिर्निश्यपि दर्शनन्तु तादृशरत्नप्रदीपसद्भावादेव यत्र भवने एवमन्यासामपि श्रीमहिषीणां गृहाणि ज्ञेयानि ॥ १२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्रादौ मुख्यांगं वर्णयति—विष्टब्धमिति। अहतत्वियेति बहुललोकसम्मर्द्देनापि क्षुण्णताद्यप्राप्तेः; यद्वा, सूर्य्यादितेजसाप्यहतत्विषा ॥ ९ ॥ मुख्यपरिच्छदान् वर्णयति—वितानैरिति। त्वष्ट्रा विनिर्म्मितैरिति दिव्यातिदिव्यत्वं द्योतयति; अतोऽस्य वचनविभक्तिविपरिणामेनापि सर्व्वैरेवान्वयः। आसनानि च पर्य्यंकाश्च, तैः ॥ १० ॥ मुख्यपरिवारान् वर्णयति—दासीभिरिति। अन्यानेकस्त्रीभूषणसद्भावेऽपि निष्कस्यैवोक्तिः स्त्रीभूषणेषु तस्य श्रैष्ठ्यात् स्त्रीभिरवश्यापेक्षत्वाच्च। एवमग्रेऽपि ज्ञेयम्। पुम्भिश्च बालकादिभिर्दासैरलंकृतम्, सुवस्त्राणि शोभनान्यधः परिधानीयादीनि; कञ्चुकादीनां यथोत्तर स्वरूपत्वेऽलक्ष्यत्वम् ॥ ११ ॥ किञ्च, रत्नेति, अनेनागुरुधूमस्य निश्यपि शिखण्डिदर्शनं बोधयति। यद्वा, दिव्ये रत्नप्रदीपानां सदा सद्भावादन्तर्गृहे ध्वान्तस्य निवासो ज्ञेयः। अतो वितानादिवत् परिच्छदान्त-वर्ण्यस्याप्यस्य शिखण्डिनृत्यादिहेतुत्वेनात्र वर्णनम्; अंगेति महर्षसम्बोधने; यत्र भवने उच्चैर्नदन्त इति धूमस्थानिकः सूचितः, नीलमेघसादृश्यात्; एवं धूमादिभिर्यथोत्तरं शोभाधिक्यमूह्यम्। इत्याद्या गृहे उपलक्षणतयोक्तम्; सर्व्वाण्येवान्यान्यपि श्रीमहिषीणां गृहाणीह ज्ञेयानि ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

पुरं भवनञ्चैव विशिनष्टि-विष्टब्धमिति चतुर्भिः। विद्रुमस्तम्भैः वैदूर्यमयानि फलकोत्तमानि स्तम्भाश्रयाणि छादनानि तैश्च विष्टब्धं प्रतिबद्धम् इन्द्रनीलमयैर्जालैर्गवाक्षैर्मरकतमयैरुत्तमैश्च स्तम्भैर्विष्टब्धम् ॥ ९ ॥ त्वष्ट्रा विश्वकर्मणानिर्मितैः मुक्तादामानि विलम्बयन्तीति तथा तैः वितानैः उल्लोचैः दान्तैः निर्मलैः मणिश्रेष्ठालङ्कृतैश्चासनैः पर्यङ्कैश्च उपलक्षितमितिशेषः। अलङ्कृतमित्युपरिष्टात्सम्बन्धो वा ॥ १० ॥ शोभनानि वासांसि यासान्ताभिर्दासीभिः शोभनानि कञ्चुकादीनि येषां तैः पुम्भिश्चालङ्कृतम् ॥ ११ ॥ रत्नप्रदीपानां ये निकराः समूहास्तेषां द्युतिभिर्निरस्तं तमो यस्मिंस्तत् किञ्च यत्रान्तःपुरे भवने च वलभीषु स्तम्भाग्रप्रसारितवक्रदारुविशेषेषु शिखण्डिनो मयूराः गवाक्षमार्गैः निर्यान्तं कृतमगरुधूपं वीक्ष्य घनो नीलाम्बुदोऽयमिति बुद्धिर्येषां तथाभूताः अत एव उन्नदन्तः उच्चैर्नदन्त नृत्यन्ति तथाभूतञ्च ॥ १२ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

कीदृशं तद्गृहमत्राह—विष्टब्धमिति। मूले अग्रे च फलकोत्तमानि येषां ते तथा तैः जालैः गवाक्षैः ॥ ९ ॥ मुक्तादामविलम्बिभिः अवलम्बमानमौक्तिकमालैः दान्तैर्गजदन्तनिर्मितैः ॥ १०-११ ॥ अक्षैर्गवाक्षैः निर्यन्तं निर्गतं बिहितागुरुचूर्णं धूपं दृष्ट्वा शिखण्डिनो मयूराः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भवनं वर्णयति—चतुर्भिः। विष्टब्धं विधृतं वैदूर्य्यमयानि फलकोत्तमानि स्तम्भाश्रयाणि छादनानि तैर्जगत्या भूमिकया ॥ ९-११ ॥ विहितमगुरुधूमम् अक्षैर्गवाक्षमार्गैः निर्यन्तम् ईक्ष्य वीक्ष्य घनोऽयमिति बुद्धिर्येषां ते ॥ १२ ॥

गूढार्थदीपिनी

कथंभूतं भवनम्। तत् वर्णयति चतुर्भिः। विष्टब्धमिति। वैदूर्यमयानि फलकोत्तमानि स्तम्भाच्छादनानि येषु तैः विद्रुमस्तम्भैः विष्टब्धं धृतम्। पुनश्च। इन्द्रनीलमयैः कुड्यैः भित्तिभिः जगत्या भूमिकया च अलङ्कृतम् ॥९॥ त्वष्ट्रा विश्वकर्मणा विनिर्मितैः वितानैः मण्युत्तमैः परिष्कृतैः अलङ्कृतैः दान्तैः हस्तिदन्तनिर्मितैः आतनैः पर्यङ्कैश्च अलङ्कृतम्। मुक्तानां दामानि माला विलम्बन्ते येषु तैः वितानैः। सूर्यादिभिरपि न हता त्विट् कान्तिर्यस्यास्तया जगत्या। पुनश्च। निष्ककण्ठीभिः दासीभिः पुम्भिश्च अलंकृतम्। कथंभूतैः पुम्भिः। सुष्ठूनि कञ्चुकादीनि येषां तैः ॥ १०-११ ॥ पुनः कथंभूतम्। रत्नप्रदीपानां निकराः समूहाः तेषां द्युतिभिः निरस्तं ध्वान्तं तमो यस्मिन् तत् इति पृथक् भवनविशेषणम्। अङ्ग हे राजन्। यत्र भवने वलभीषु चन्द्रशालोपरि (छज्जा) इति स्थिताः शिखण्डिनः गवाक्षमार्गैः निर्यन्तं अगुरुधूपम् एक्ष्य घनोऽयमिति बुद्धिर्येषां ते तथाभूताः उन्नदन्तश्च सन्तः नृत्यन्तीत्यन्वयः ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भवनं विशिनष्टि—विष्टब्धमिति चतुर्भिः। विद्रुमस्तम्भैः वैडूर्यमयानि फलकोत्तमानि स्तम्भाश्रयाणि छादनानि तैश्च कुड्यादिभिश्च विष्टब्धं विधृतं प्रतिबद्धमित्यर्थः ॥ ९ ॥ मुक्तादाम्नां विलम्बाः विविधानि लम्बमानानि विद्यन्ते येषु तैर्वितानैः मण्युत्तमैः परिष्कृतैर्भूषितैर्दान्तैर्गजदन्तमयैशासनपर्यङ्कैश्च अलङ्कृतमित्युत्तरेण सम्बन्धः ॥ १० ॥ निष्काणि पदकाणि कण्ठे यासां ताभिः शोभनानि वासांसि यासां ताभिः शोभनानि वस्त्रादीनि येषां तैः पुम्भिश्चालङ्कृतम् ॥११॥ रत्नप्रदीपनिकराणां द्युतिभिर्निरस्तं तमो यस्मिन् तं यत्र विहितमगुरुधूपम् अक्षैर्गवाक्षमार्गैर्निर्यन्तम् ईक्ष्य वीक्ष्य घनोऽयमिति बुद्धिर्येषां ते विचित्रवलभीषु शिखण्डिनो मयूराः नन्दतः सन्तः नृत्यन्ति ॥ १२ ॥

श्रीसत्यधर्मकृता भागवतटिप्पणी

तद्भुवनसुभगतामुपवर्णयति। विष्टब्धमिति। विद्रुसस्तम्भैः प्रवालस्तम्भैः। ननु क्वचित्स्थले स्थाणुस्तम्भा अपि वर्तेरन्नित्यप्याह। विद्रुमस्तम्भैरिति। न विद्यन्ते सामानाधिकरण्येन द्रुमात्मकस्तम्भा येषां तैः। विष्टब्धं विवृतं वैडूर्याण्येव फलकोत्तमान्यधोभाग उपरिभागे च येषां ते तैः। मद्दिगिगडपीत्यसमदमभ्रष्टभाषया। इन्द्रनीलात्मकैः कुड्यैर्मितिभिर्मस्कतोत्तमैस्तत्कृतैर्जालैर्गवाक्षैः ॥ ९ ॥ मुक्तादामानि विलम्बीनि येषां ते तैः। त्वष्ट्रा निर्मितैर्वितानैरुल्लोचैर्दान्तैर्दन्तिदन्तविकृतैर्मण्युत्तमपरिष्कृतैरलङ्कृतैः ॥ १० ॥ सुवासोभिर्निष्ककण्ठीभिर्दासीभिरलङ्कृतं तथा कञ्चुकं कवचं उष्णीषं शिरोवेष्टनं सुवस्त्रमुत्तरीयादिकमणिमयानि कुण्डलानि च तैः सहितैः पुम्भिरलङ्कृतम् ॥ ११ ॥ रागात्मकप्रदीपानां निकरस्य द्युतयस्ताभिर्निरस्तं ध्वान्तं गृहान्तर्गतान्वाससं यस्य तत्। यस्य विचित्रवलभीषु वक्रदारुषु शिखण्डिनो मयूरा नृत्यंति घनमण्डलं दृष्ट्वा ताण्डवं कुर्वतां शिखण्डीनां कथमकारणं नटनमित्यत आह। यत्र गृहे विहितोऽगुरुगन्धोऽगुरुधूपस्तमक्षैर्गवाक्षैर्निर्यन्तमीक्ष्य घना एत इति बुद्धिर्येषां ते तथा सन्त उन्नदन्तो नादं कुर्वत इति ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

अतस्तं वर्णयति स्थालीपुलाकन्यायेन विष्टब्धमिति। पुरुषार्थचतुष्टयसम्पन्नमिति ज्ञापयितुं चतुर्भिः। प्रवालस्तम्भैर्विष्टब्धं धृतम्। वैडूर्यनिर्मितफलकैस्तदाच्छन्नम्। अनेन स्तम्भा उपरिप्रसारितदारुरूपाश्च द्विविधा ज्ञातव्याः। उपरिफलकानामेव वैडूर्यमयत्वम्। स्थूलफलकाः स्तम्भेष्वेव विशालाः स्थापिताः। तत्रापि कक्ष्यान्तर्गतस्तम्भानां तथात्वं वक्तव्यमिति धरणीस्तम्भाश्चात्र विद्रुममया ज्ञातव्याः। इन्द्रनीलमयैर्मणिभिः कुड्यानि। जगती भूमिः कुट्टिमा तत्रत्या। अलङ्कृतमिति सम्बध्यते। न सूर्यादिभिरहता त्विड्यस्याः सादृश्या जगत्यालङ्कृतमिति ॥ ९ ॥ वितानैश्चन्द्रातपैस्त्वष्ट्रा निर्मितैरित्यद्भुतत्वम्।

मुक्तादामानि विलम्बन्ते येष्विति । दन्तनिर्मितैरासनैः पर्यङ्कैश्चालङ्कृतम् । मण्युत्तमैर्मणिश्रेष्ठैरलङ्कृता आसनपर्यङ्काः ॥ १० ॥ स्त्रियः पुरुषाश्च दासीदासरूपाः शोभायामवश्यं वक्तव्या इति तान्निर्दिशति **दासीभिरिति** । नित्याभरणेषु सत्स्वेव पदकाभरणमिति **निष्ककण्ठीभिरित्यनेन** कटककुण्डलाद्याभरणानि सूचितानि । **सुवासोभिरिति** । सर्वतः शोभार्थमुक्तम् । यादृशैरेव वस्त्रैः शोभा सम्पद्यते । अन्यथा शोभाकथनं व्यर्थं स्यात् । **पुम्भिरप्यलङ्कृतम्** । **पाश्चात्यो वेष इति** । उत्तमानि कञ्चुकानि उष्णीषाणि मध्ये बन्धकानि मणियुक्तानि कुण्डलानि च येषामिति सर्वतोऽलङ्कारो भगवद्गृहदासानामुक्तः ॥११॥ सार्वकालीनशोभामुक्त्वा रात्रौ विशेषतः शोभामाह **रत्नप्रदीपनिकरेति** । रत्नसमूहकान्तिभिर्निरस्तं ध्वान्तमन्धकारो यत्र । रात्रौ गार्हस्थ्ये कामरसो वर्ण्यत इति उद्दीपनविभावान्वर्णयति । विचित्रवलभीषु मणिमया निर्मितवक्रदारुषु मयूराः स्थिताः सन्तो नृत्यन्ति । **अङ्गेति** सम्बोधनं स्नेहसूचकम् । तेनास्याः कथायाः भगवद्भोगविषयत्वाद्योगिचिन्त्यत्वमेव, न तु बाह्यतया साधारणत्वमिति सूचितम् । नृत्ये अलौकिकं हेतुं वर्णयति । यत्र विहितागुरुधूपं गृहसंस्कारार्थं कृतं गवाक्षमार्गेण निर्यान्तं निरीक्ष्य घनोऽयमिति तेषां बुद्धिरुत्पन्नेति **घनबुद्धयः** । अत एव ऊर्ध्वं नदन्तो जाताः । मेघागमे हि तेषां नृत्यं भवति । नृत्यदर्शने च रस आविर्भूतो भवतीति, गीतवाद्यरहितं नृत्यं न शोभां करोतीति, उन्नादो हि द्विःस्वभावो निरूपितः ॥ १२ ॥

श्रीसुबोधिनी–सारः

तद्विशिनष्टि चतुर्भिः । **वैदूर्यमयानि** फलकोत्तमानि स्तंभाश्रयाणि छादनानि येषु तैर्विद्रुमैः प्रवालमयैः स्तंभैर्विष्टब्धं धृतम् इंद्रनीलमयैः कुड्यैः समं कृतमिति सर्वत्र संबध्यते अहता अखंडिता त्विट् दीप्तिर्यस्या दिव्यभूमित्वात्तया जगत्या पृथिव्या ॥ ९ ॥ त्वष्ट्रा विश्वकर्मणा निर्मितै रचितैर्मुक्तानां दामानि विलंबंते इत्येवं शीलैः मुक्तादामानां विलंबा विद्यंते येष्विति गुरवः तैर्वितानैः दांतैर्गजदंतमयैरासनैः पर्यंकैः शय्याभिः मण्युत्तमैः श्रेष्ठमणिभिः परिष्कृतैः खचितैः ॥ १० ॥ सुष्ठु वासांसि यासां ताभिर्निष्ककंठीभिर्दासीभिरलंकृतं कंचुकादिसहितैः पुंभिः समलंकृतम् ॥ ११ ॥ रत्नमयानां प्रदीपानां निकरः समूहस्तस्य द्युतिभिर्दीप्तिभिर्निरस्तं ध्वांतं तमो यस्मिन् तत् यत्र गृहे विहितं देवार्थं प्रयुक्तमगुरुधूपम् अक्षैर्जालरन्ध्रैर्निर्यांतं बहिर्निर्गच्छंतम् ईक्ष्य घनो मेघोयमिति बुद्धिर्येषां ते शिखिनो मयूरा उन्नदंतः केकां ब्रुवंतो बलभीषु अट्टालोपरि तिर्यक् भूमिषु नृत्यंति हे अंग ॥ १२ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

विष्टब्धमित्यस्याभासे । **स्थालीपुलाकन्यायेनेति** । यथा स्थालीस्थमेकमपि पुलाकमुपमर्द्य तस्मिन्पक्वे सर्वेपि पुलाकाः पक्वा ज्ञायन्ते, तथैकस्मिन्गृहे वर्णिते सर्वेपि गृहास्तादृशा एव ज्ञाता भवन्तीत्यर्थः । अयं न्यायः सप्तमाध्याये चतुर्थचरणे उक्तः । **रत्नप्रदीपेत्यत्र** । **उन्नादो हि द्विःस्वभाव इति** । गीतस्वभावस्ततः सुषिरवाद्याभिव्यक्तस्वरस्वभावश्चेत्यर्थः । नादस्याक्षराद्यभावेन स्वरमात्ररूपत्वाद्द्विःस्वभावत्वं युक्तमिति हिशब्दः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भवनं विशिनष्टि—विष्टब्धमिति । विद्रुमस्तम्भैः वैडूर्यमयानि फलकोत्तमानि स्तम्भाश्रयाणि छादनानि तैश्च विष्टब्धं प्रतिबद्धम् । सूर्यादिभिरप्यहता त्विट् यस्यास्तया जगत्या भूमिकया चालंकृतम् ॥ ९ ॥ त्वष्ट्रा निर्मितैर्मुक्तादामानि विलम्बन्तीति तथा तैर्वितानैर्मण्युत्तमैः परिष्कृतैरलंकृतैर्दान्तैर्हस्तिदन्तनिर्मितैरासनैः पर्यङ्कैश्चालंकृतम् ॥ १० ॥ निष्ककण्ठीभिः सुवासोभिर्दासीभिः तथा शोभनानि कञ्चुकादीनि येषां तैः पुम्भिश्चालंकृतम् ॥ ११ ॥ रत्नप्रदीपानां ये निकराः समूहास्तेषां द्युतिभिः निरस्तं ध्वान्तं तमो यस्मिंस्तत् । यत्रान्तःपुरे भवने च बलभीषु स्तम्भाग्रप्रसारितवक्रदारुविशेषेषु स्थिताः शिखण्डिनो मयूराः अक्षैर्गवाक्षमार्गैर्निर्यान्तं बिहितागुरुधूममीक्ष्य दृष्ट्वा घनबुद्धयः 'नीलाम्बुदोऽयम्' इति बुद्धिर्येषां तथाभूता उन्नदन्तश्च सन्तो नृत्यन्ति ॥ १२ ॥

अन्वितार्थप्रकाशिका

भवनं विशिनष्टि—विष्टब्धमिति । विद्रुमस्तम्भैः वैदूर्यमयानि फलकोत्तमानि स्तम्भाश्रयाणि छादनानि तैश्च विष्टब्धं प्रतिबद्धम् इन्द्रनीलमयैः कुड्यैर्भित्तिभिः सूर्यादिभिरप्यहता त्विट् यस्यास्तया इन्द्रनीलमय्या जगत्या भूमिकया चालंकृतम् ॥९॥ बितानैरिति । त्वष्ट्रा विश्वकर्मणा निर्मितैः मुक्तादाम्नां विलम्बाः विविधानि लम्बनानि विद्यन्ते येषु तैर्वितानैर्मण्युत्तमैः परिष्कृतैरलंकृतैर्दान्तैर्हस्तिदन्तनिर्मितैरासनैः पर्यङ्कैश्चालंकृतम् ॥ १० ॥ दासीभिरिति । निष्ककण्ठीभिः सुवासोभिर्दासीभिः अलंकृतम् तथा शोभनानि कञ्चुकादीनि येषां तैः पुंभिर्दासैश्चालंकृतम् ॥ ११ ॥ रत्नेति । अङ्ग हे राजन् ! रत्नप्रदीपानां ये निकराः समूहास्तेषां द्युतिभिः निरस्तं ध्वान्तं तमो यस्मिंस्तत् यत्रान्तःपुरे भवने च बिचित्रबलभीषु स्तम्भाग्रप्रसारितवक्रदारु-

विशेषेषु चन्द्रशालोपरि वा स्थिताः शिखण्डिनो मयूराः अक्षैर्गवाक्षमार्गैर्निर्यान्तं विहितागरुधूममीक्ष्य दृष्ट्वा ल्यवार्षः एक्ष्येति पाठो वा। घनबुद्धय। नीलाम्बुदोऽयमिति बुद्धिर्येषां तथाभूता उन्नदन्तश्च सन्तो नृत्यन्तः तत् अनेन रात्री मुनेरागमो व्यज्यते। तदैव तस्य युगपत्प्रतिगृहं स्थितिः स्यादित्याशयात् रत्नदीपसद्भावान्निश्यपि शिखण्डिनृत्यादि ॥ १२ ॥

श्रीगोपालामन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इतः श्लोकचतुष्टयेन रुक्मणी भवनं वर्णयति विष्टब्धमिति। विद्रुमस्तंभैः विष्टब्धमवष्टंभित वैदूर्यमयैः फलकोत्तमैः स्तंभमूर्द्धस्थछादनैः। इंद्रनीलमयैः कुड्यैर्भितिकाभिः। न हता त्विट्कांतिर्यस्यास्तया जगत्याक्षित्या च उपलक्षितम् ॥९॥ त्वष्ट्रा विश्वकर्मणानिर्मितैः। रचितैः मुक्तानां दामानि मालास्तेषां विविधलंबाः संति येष तैः। मण्युत्तमैः। परिष्कृतैरलंकृतैः। आसन-पर्यंकैः अलंकृतमित्युत्तरेणान्वयः ॥१०॥ निष्ककंठाभरणं कंठे यासां ताभिः पुंभिर्दासैः उष्णीषं शिरो वेष्टनं ॥११॥ अक्षैर्गवाक्षैः निर्यांतं विहितं कृतं अगुरुधूपं। ईक्ष्यनिरीक्ष्यघनः पयोदोयमिति बुद्धिर्येषां ते। विचित्रवलभीषुस्थिताः शिखंडिनों नृत्यंति ॥१२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेव विशिनष्टि विष्टब्धमिति चतुर्भिः। विष्टब्धमिति। विद्रुमाणां रक्तमणीनां स्तम्भास्तैः, वैदूर्यमयानि फलकोत्तमानि स्तम्भाश्रयाणि छादनानि तैश्च, विष्टब्धं प्रतिबद्धम्। इन्द्रनीलमयैः कुड्यैः, अहतत्विषा जगत्या भूमिकया च, विष्टब्धं विधृतम् ॥९॥ वितानैरिति। त्वष्ट्रा, निर्मितैः मुक्तादामविलम्बिभिः, वितानैरुल्लोचैः, दान्तैर्गजदन्तनिर्मितैः, मण्युत्तमपरिष्कृतैः मणिश्रेष्ठालंकृतैः, आसनपर्यङ्कैरासनैः पर्यङ्कैश्चेत्यर्थः। उपलक्षितं, अलंकृतमित्युपरिष्टात् संबन्धो वा ॥ १० ॥ दासीभिरिति। निष्ककण्ठीभिः कण्ठधृतनिष्काभरणाभिः, सुवासोभिः शोभनवस्त्रयुताभिः, दासीभिः, अलंकृतं, सकञ्चुकोष्णीषैः सुवस्त्रमणि-कुण्डलैः, पुम्भिश्च, अलंकृतम् ॥ ११ ॥ रत्नेति। रत्नप्रदीपानां ये निकराः समूहास्तेषां द्युतिभिः प्रभाभिः, निरस्तं ध्वान्तं तमो यस्मिंस्तत्, किं च। यत्र भवने, अङ्ग हे राजन्, विचित्रवलभीषु स्तम्भाग्रप्रसारितवक्रदारुविशेषेषु, शिखण्डिनो मयूराः, अक्षैर्गवाक्षमार्गैः, निर्यान्तं, विहितागुरुधूपं, ईक्ष्य समीक्ष्य, घनो नीलाम्बुदोऽयमिति बुद्धिर्येषां ते तथाभूताः, अत एव, उन्नदन्तः सन्तः, नृत्यन्ति तथाभूतं च ॥ १२ ॥

कृष्णप्रिया

श्री नारदजी ने जिस भवन में प्रवेश किया उसकी दिव्यता का गान कैसे किया जाय उस भवन के खम्भे विद्रुम मणि के थे और वैदूर्य मणि के प्रासाद पृष्ठ थे और इन्द्रनील मणि की दीवारें जगमगा रही थी। अधिक क्या कहे, इन भवनों के छजने-गजने भी इन्द्रनील मणि से बनी थी जिनकी शोभा किसी भी प्रकार से कम नहीं थी ॥ ९ ॥ विश्वकर्मा जी ने अत्यंत कौशल्य से राजभवन के भीतर अद्भूत चंदोवे बना रखे थे, जिन चंदोवे में शुद्ध मौष्तिक की लड़ियां की झालरे लटक रही थी ध्यानाकर्षण करती थी। महल की शोभा बढ़ाने वाले हाथी दाँत के बने हुए सिहासन और आसन एवं पर्यंक थे, जिन आसन पर्यङ्को में अत्यंत उत्तम मणि जड़ी हुई थी ॥ १० ॥ असंख्य दासियाँ अपने कण्ठ में सुवर्ण के हार पहने एवं कौशेय वस्त्रों से समलङ्कृत होकर और महलों के सेवक जन भी जामा-पगड़ी और उत्तम वस्त्राभूषण धारण कर एवं कुण्डल पहने तथा जड़ाऊ, धारण किये अपने-अपने कार्य में व्यस्त थे और राजमहल का सौंदर्य बढ़ा रहे थे ॥ ११ ॥ अगणित संख्या में रत्नदीप निजी तेज से भवन का अन्धकार निवारण कर रहे थे अगर की धूप देने के कारण वातायनों से धूआँ निकल रहा था। उस धूआँ को देखकर विविध रङ्गवाले रत्नों से रचित छज्जों पर बैठे हुए मयूर बादलों की भ्रान्ति से मधुर-मधुर केका शब्द कर-कर नृत्य करते थे ॥ १२ ॥

तस्मिन् समानगुणरूपवयस्सुवेषदासीसहस्रयुतयानुसवं गृहिण्या।
विप्रो ददर्श चमरव्यजनेन रुक्मदण्डेन सात्वतपतिं परिवीजयन्त्या ॥ १३ ॥
तं संनिरीक्ष्य भगवान् सहसोत्थितः श्रीपर्यङ्कतः सकलधर्मभृतां वरिष्ठः।
आनम्य पादयुगलं शिरसा किरीटजुष्टेन साञ्जलिरवीविशदासनेस्वे ॥ १४ ॥
तस्यावनिज्य चरणौ तदपः स्वमूर्ध्ना बिभ्रज्जगद्गुरुतरोऽपि सतां पतिर्हि।
ब्रह्मण्यदेव इति यद्गुणनाम युक्तं तस्यैव यच्चरणशौचमशेषतीर्थम् ॥ १५ ॥
सम्पूज्य देवऋषिवर्यमृषिः पुराणो नारायणो नरसखो विधिनोदितेन।
वाण्याभिभाष्य मितयामृतमिष्टया[1] तं प्राह प्रभो भगवते करवाम[2] ते किम् ॥ १६ ॥

---

१. याऽमृत जुष्टया च-वीर. ; याऽमृतकल्पया च-विज. । २. हे-श्रीधर. वंशी. जीव. विश्व. ; करवाम किं ते-वीर. विज. ।

कर्दमक्षमा

अन्वयः—तस्मिन्, समानगुणरुपवयस्सुवेषदासीसहस्त्रयुतया, गृहिण्या, अनुसवम्, रुक्मदण्डेन, चामरव्यजनेन, परिवीजयन्त्या, सात्वतपतिम्, विप्रः, ददर्श ॥ १३ ॥ तम्, सन्निरीक्ष्य, सकलधर्मभृताम्, वरिष्ठः, भगवान्, श्रीपर्यङ्कतः, सहसा उत्थितः, किरीटजुष्टेन, शिरसा, पादयुगलम्, आनम्य, साञ्जलिः, स्वे, आसने, अवीविशत् ॥ १४ ॥ जगद्गुरुतरः, अपि, सताम्, पतिः, तस्य, चरणौ, अवनिज्य, तदपः, स्वमूर्ध्ना, अबिभ्रत्, ब्रह्मण्यदेवः, इति, यद्, गुणनाम, तद्युक्तम्, तस्य, एव, यत्, चरणशौचम्, अशेषतीर्थम् ॥ १५ ॥ पुराणः, ऋषिः, नरसखः, नारायणः, उदितेन, विधिना, देवऋषिवर्यम्, सम्पूज्य, अमृतमिष्टया, मितया, वाण्या, अभिभाष्य, प्राह, हे प्रभो ! भगवते, ते, किम्, करवाम ? ॥ १६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनुसवं सर्वकालम् । आत्मना समानानि गुणरूपवयांसि सुवेषोऽलंकारश्च यस्य तेन दासीसहस्रेण युतया गृहिण्या सह ॥ १३ ॥ श्रियो रुक्मिण्याः पर्यंकतः अवीविशदुपवेशयामास ॥ १४ ॥ अबिभ्रदबिभः दधारेत्यर्थः । बिभ्रदिति शत्रंतं वा । तदा संपूज्याभिभाष्य च प्राहेत्युत्तरेणान्वयः । कथंभूतः । यस्य चरणशौचं गंगा अशेषतीर्थं सः । अत एव जगद्गुरुतरोऽपि सतां धर्मभृतां पतित्वादेवमकरोदित्यर्थः । सतांपतित्वे हेतुः । ब्रह्मण्यदेव इति । यद्गुणकृतं नाम तस्यैव यतो युक्तं समंजसमतस्तद्धर्मप्रवर्तनायैवमाचरणमित्यर्थः ॥ १५ ॥ अभिभाष्य दिष्ट्याऽत्र त्वदागमनमित्यादि प्रियमुक्त्वा ॥ १६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्मिन् गृहे । "सवो यागेऽनेहसि च प्रसवे प्रेरणासवे" इति निरुक्तिः । चमरमेव व्यजनं तेन ॥१३॥ तं नारदम् ॥१४॥ तस्य नारदस्य । इत्यर्थ इति—छांदसोऽडागम इति । छांदसकल्पने गौरवं मत्वाह—बिभ्रदिति । ननु स्वदासस्य नारदस्य चरणक्षालनादिकमयुक्तं तत्राह—ब्रह्मण्यदेव इति । यस्य गुणनाम गुणसूचकं नाम तद्युक्तं नारदस्य ब्राह्मणत्वात्तस्य ब्रह्मण्यदेवत्वादेत्तदुचितमेवेति । न च स्वपावित्र्यार्थमिदमिति वाच्यम् । यद्यस्मात्तस्यैव चरणशौचं गंगाऽशेषतीर्थमस्ति, नारदस्तु दास्येऽपि स्वप्रभोरिच्छाप्रातिकूल्ये प्रभुत्वं नाविश्चकारेति ज्ञेयम् । तदा ततः । अशेषांस्तीर्थयति शुद्धीकरोतीत्यशेषतीर्थम् । यद्वा—अशेषाणि तीर्थानि यस्मिस्तत्तथा । अत एवाशेषशोधकत्वादेव । जगद्गुरुः शिवस्ततोऽपि विशिष्टः । इत्यर्थ इति—"संतः स्वधर्मनिष्ठाः स्युः शास्तारोऽनाशिनस्तथा" इत्युक्तेः । ब्रह्म ब्राह्मणसामान्यं देवोऽर्च्यो यस्य स तथा, पृषोदरादित्वात्साधुः । यद्वा—"यस्यात्मात्मजगेहस्त्रीभूधनाद्यखिलं वसु । नाऽदेयं विद्यते लोके ब्राह्मणाय नरोत्तम । ब्राह्मणा हि परं ब्रह्म न तेभ्यो विद्यते परम् । यश्चैवं मन्यते नित्यं स ब्रह्मण्य इतीर्यते ॥" इत्युक्तलक्षणोपेतश्चासौ देवो ब्रह्मण्यदेव इति । गुणेन ब्राह्मणार्चनादिरूपेण कृतं तन्नाम तस्य नाम्न एव । यद्वा—यद्यस्य गुणकृतमिति नाम तस्य हरेरित्यर्थः । यतो हेतोः । अतोऽन्वर्थनामत्वात् । तद्धर्मप्रवर्तनाय नामोचितधर्मप्रवृत्तये—गृहागतब्राह्मणस्य जगत्पूज्येनापि पादप्रक्षालनादिरूपमर्चनं कर्तव्यमेवेति बोधनाय । एवमाचरणं नारदं पूजितवानित्यर्थः । "तुष्यति स्वागतेनाग्निरासनेन शतक्रतुः । पितरः पादशौचेन ह्यन्नाद्येन प्रजापतिः ॥" इति स्मृत्युक्ताचरणं शिक्षितवानिति भावः ॥ १५ ॥ देवऋषीत्यत्र "ऋत्यकः" इति प्रकृतिभावः । तं नारदम् । हे नारद भगवते साक्षात्परमेशमूर्तये त्वामुद्दिश्य किं करवाम इत्याज्ञापयेत्यर्थः । यद्वा—हे भगवः ते किं करवामेत्यन्वयः । विसर्गलोपस्त्वार्षः । विधिवत्पूज्यविज्ञत्वे हेतुः—ऋषिर्मंत्रप्रवर्तकस्तत्रापि पुराणः पुरापि नवः स्वयं भगवत्त्वात् । किञ्च—नारायणो नरसखः । तादृशधर्मप्रवर्तनाय लोकेऽपि तद्रूपेणावतीर्णः । अभेदनिर्देशोयं तत्र श्रीनारायणर्षेरपि प्रवेशाभिप्रायेण । तस्य तत्र तादृशलीलाविर्भावे हेतुः—ऋषिवर्यमिति । पुरोहितादिवद्भक्तविशेषाविर्भावानुरूप्यादिति भावः । ननु स तु सर्वादिऋषिः नारायणत्वे च तस्य साक्षादेव गुरुरिति कथमेतत्पूजनं योग्यमित्यत्रापि सिद्धांतः—विधिमोदितेनेति । संप्रत्यविष्कृतक्षत्रियलीलस्य यस्य ब्राह्मणपूजा योग्यैव लोकवत्तु लीलाकैवल्यादिति भावः । "सत्यं ब्रूयात्प्रियं ब्रूयात्" इति शास्त्रेण मितया सिद्धया तथाभूतवन्मिष्टया वाण्याभिभाष्य स्तुत्वा प्राह प्रार्थयामास । हे प्रभो विप्रत्वेनास्मत्स्वामिन् किं करवाम वयं तदाज्ञापयेत्यर्थः । भवत इति वक्तव्ये भगवत इति गौरवात् । एतच्च सर्वैश्वर्याय तुभ्यं मनुष्या वयं किं करवाम कर्तुं शक्नुमः, अपि तु न किञ्चिदिति व्यंजनायेति कौतुकविशेषाय तं प्रति वचसा तु निजैश्वर्यमत्यंतमाच्छादितं तादृशनिजवैभवं प्रति तस्य तादृशस्याप्याश्चर्यबुद्धित्वं दृष्ट्वा किंचिदुपालब्धमिव चेति तोषिणीकारतंदर्भौ ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तस्मिन् भवने समानगुणादिकेन दासीसहस्रेण युतयाऽपि गृहिण्या गृहेश्वर्या रुक्मिण्या स्वयमेव प्रेम्णा परितः सर्वाङ्गेषु वीजयन्त्या चमरस्य मृगविशेषस्य पुच्छरूपेण व्यजनेन ननु कथमसौ सहसान्तःपुरं प्रविष्टवान् तत्राह—विप्र इति । तज्जातिमात्रत्वमपि तत्र हेतुरिति भावः । सात्वतपतिमिति सात्वतपद्धतिगुरोः श्रीनारदस्य तद्दर्शने भक्तिविशेषोदयद्योतकं श्रीयदूनां

पतिमिति वा तच्चाविर्भावविशेषेण चमत्कारविशेषद्योतकम् ॥ १३ ॥ तमिति । सहसागमनेन सन्निधौ निरीक्ष्य प्रसन्नदृष्ट्याऽविलोक्य सहसा सपदि भगवानपि कौस्तुभादितादृशभगवत्त्वाभिव्यञ्जकपरमकिरीटजुष्टेन तत्सेवार्हेणापि आसक्त्या तत्स्पर्शनादिना नत्वा तत्र हेतुः सकलेति सद्धर्मप्रवर्त्तनतादृशलीलारसाविष्ट इत्यर्थः । स्वे स्वीये ॥ १४ ॥ जगतो गुरुतमः महापूज्योपीत्यर्थः । हि हेतौ अस्य परेणान्वयः । अशेषाणि तीर्थानि यस्मिन् तत् सर्वतीर्थस्वरूपं वा यस्य चरणशौचं सोपि ॥ १५ ॥ विधिवत्पूजाविज्ञतायां हेतुः ऋषिर्मन्त्रप्रवर्त्तकः तत्रापि पुराणः पुरापि नवः स्वयं भगवत्त्वादनादित एव तादृशतया वर्त्तमान इत्यर्थः । यद्वा तथापि तस्याङ्घ्रियुगं नवन्नवमित्याद्युक्तन्यायेन सदा येन व इति न पुराणः किन्तु पुराणवदाचरतीत्येव पुराणः किञ्च नारायणो नरसखः तादृशधर्मविधिप्रवर्त्तनाय लोकेपि तद्रूपेणावतीर्णः अभेदनिर्देशोऽयं तत्र नारायणर्षेरपि प्रवेशोभिप्रायेण तद्युक्तं चतुर्थे—

“ताविमौ वै भगवतो हरेरंशाविहागतौ । भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥”

इति तौ चांशरूपौ कर्तृभूतौ कृष्णौ कर्मभूतौ आगतौ आगतवन्तौ प्रविष्टवन्तावित्यर्थः । “एते चांशकलाः इत्यादेः तस्य तत्र तादृशलीलाविर्भावे हेतुः, ऋषिवर्य्यमिति । भक्ताविर्भावानुरूप्यादितिभावः । ननु, सतु सर्वादि ऋषिर्नारायणत्वे च तस्य साक्षादेव गुरुरिति कथं तेन तत्पूजनं योग्यम् ? इत्यत्रापि सिद्धान्तः विधिनोदितेनेति । सन्प्रत्याविष्कृतक्षत्रियलीलास्य स्वस्य ब्राह्मणपूजाविधियोग्यैव लोकवत्तु लीलाकैवल्यादिति भावः । यद्वा “नारायणस्त्वं नहि सर्वदेहिनाम्” इत्यादिब्रह्मस्तवरीत्या स्वयं भगवानपि नरसखः नरलील इत्यर्थः । अतो विधिनोदितेयेति अतः “सत्यं ब्रूयात्प्रियं ब्रूयात्” इति स्मृत्यनुसारेण प्राक् पूर्वं मितया शास्त्रादिप्रमाणसिद्धत्वेन सत्यतया अमृतमिष्टया प्रियया च वाण्या अभिभाष्य स्तुत्वा प्राह प्रार्थयामासेत्यर्थः । प्रार्थनमेव दर्शयति—प्रभो इति । हे प्रभो विप्रत्वेनास्मत्स्वामिन् अतः किङ्करवाम किं कर्त्तुं शक्नुमः अपितु न किञ्चिदिति व्यञ्जनाय इति कौतुकविशेषाय तं प्रति वचसा तु निजैश्वर्य्यमत्यन्तमाच्छादितं तादृशनिजवैभवं प्रति तस्य तादृशस्याप्याश्चर्य्यबुद्धित्वं दृष्ट्वा किञ्चिदुपालब्धमिव च ॥ १६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तस्मिन् भवने समानगुणादिकेन दासीसहस्रेण युतयापि गृहिण्या गृहेश्वर्य्या श्रीरुक्मिण्या स्वयमेव प्रेम्णा परितः सर्व्वाङ्गेषु वीजयन्त्या । अनुसवमिति दासीनामपि गुणादिनित्यत्वं द्योतयति । तादृश-दासीनां सद्भावोऽपि सर्व्वत्रैव ज्ञेयः । चमरस्य मृग-विशेषस्य पुच्छरूपेण व्यजनेन चामरेणेत्यर्थः । विप्र इत्यन्तः पुरप्रवेशे तादृशदर्शने च हेतुः—ब्राह्मणत्वेनानिवार्य्यगतित्वादात्मीयत्वाच्च, यतः सात्वतपतिं ब्रह्मण्यदेवत्वादिनिजाशेषगुणप्रकटनार्थं यदुकुलेऽवतीर्णमित्यर्थः । किंवा पूर्व्वतोऽप्यधिक-रूप-गुणादिसेवितमिति अशेषभगवत्ताप्रकटनात्; यद्वा, किञ्च, भक्तानां पालकम्, अतो विप्रत्वेन तत्रापि भक्तप्रवरत्वेन तदुचितमेवेति भावः । एवं दर्शनेऽपि प्रेम्णा परमानन्दोदयः सूचितः ॥ १३ ॥ सं सहसा शीघ्रगमनेन सन्निधौ निरीक्ष्य प्रसन्नदृष्ट्यावलोक्य, किंवा अव्ययानामनेकार्थत्वाद्दूरतो दृष्ट्वेत्यर्थः, सहसा सपदि भगवान् साक्षात् परमेश्वरोऽपि किरीटजुष्टेनापि, आ सम्यक् तत्स्पर्शनादिना नत्वा, तत्र हेतुः—सकलेति; सद्धर्म्मप्रवर्तनार्थमित्यर्थः । स्वे स्वकीये, किंवा तदर्थमेव प्राक् कल्पिते ॥ १४ ॥ जगतो गुरुतरो महापूज्योऽपीत्यर्थः । हि हेतौ, अस्य परेणान्वयः । अशेषाणि तीर्थानि यस्मिंस्तत् सर्व्वतीर्थस्वरूपं वा, यस्य चरणशौचं सोऽपि ॥ १५ ॥ पुराण आद्य ऋषिः, यतो नरसखो नारायणः, तस्य वदरिकाश्रमे नित्यतपःपरत्वात्; इति श्रीनारदगुरुत्वमपि सूचितम् । अवतारतया च श्रीकृष्णेन सह तस्याभेदः प्रसिद्ध एव; यद्वा, पुराण ऋषिर्मन्त्रदर्श्यपि, यतो नारायणः परमेश्वरत्वेन सर्व्वजीवाश्रयः, नराणां जीवानां सखा परमात्मतया सत्कर्म्मसु प्रवर्त्तनेन स हितकार्य्यपि; उदितेन शास्त्रोक्तेन विधिना सम्यक् पूजयित्वा, यतो देवर्षिषु देवत्वादिषु वर्य्यम्; यद्वा, पुराणोऽनादिर्भगवान् देव ऋषिवर्य्यं संपूज्य यो विधिनोदितेन चतुर्थस्कन्धे उक्तेन विधिना प्रकारेण; नरसखो नारायण ऋषिः; तथाहि चतुर्थे (भा० ४।१।५७) ‘ताविमौ वै भगवतो हरेरंशाविहागतौ । भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥’ अस्यार्थः—ताविमौ नरनारायणरूपौ हरेरंशौ कर्त्तृभूतौ इह चन्द्रवंशे कृष्णौ कर्म्मभूतौ आगतौ प्रविष्टौ । अतोंऽशेन यो नारायण इति निर्गलितार्थः । अतः प्राक् अभिभाष्य पश्चात् प्रकर्षेणाह । प्र-शब्दार्थमेवाभिव्यञ्जयति—अमृतादपि मिष्टया मधुरया मितया च सहजधैर्य्यात्तद्गौरवाद्वा, अस्योभयतोऽप्यन्वयः । हे प्रभो ! विप्रत्वेनास्मत्स्वामिन् ! अतः किं करवाम वयं सर्व्वे, तदाज्ञापयेत्यर्थः । भवत इति वक्तव्ये भगवत इति गौरवात्; यद्वा, सर्व्वैश्वर्य्यपूर्णाय तुभ्यं मनुष्या किं करवाम करिष्यामः, अपि तु न किञ्चित् कर्त्तुं शक्ताः स्म इत्यर्थः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तस्मिन्निति । तस्मिन्नेव भवने गृहिण्या भार्यया रुक्मिण्या समं सहितमित्यर्थः । सात्वतपतिं श्रीकृष्णं विप्रो नारदो ददर्श कथम्भूतया अनुसवं सर्वकालमात्मना समानानि गुणरूपवयांसि सुवेष अलङ्कारश्च यस्य तेन दासीनां सहस्रेण युक्तया

रुक्ममयो दण्डो यस्य तेन चामरव्यजनेन वीजयन्त्या च ॥ १३ ॥ तमिति । तं दृष्टवन्तं नारदं सम्यक् निरीक्ष्य भगवान् श्रियो रुक्मिण्याः पर्यङ्कादाशूत्थितः तदिष्टदैवतभूतः किमित्युत्थित इत्यतो विशिनष्टि—सकलधर्मभृतां वरिष्ठः धर्मात्मभिर्महत्स्वेवं वर्त्तितव्यमिति प्रदर्शनार्थमिति भावः। अत एव च किरीटालङ्कृतेन शिरसा तस्य पादयुगलं प्रणम्य अञ्जलिना सहितः स्वे स्वकीये आसने अवीविशदुपवेशयामासेत्यर्थः ॥ १४ ॥ तस्येति । स भगवान् जगतां साधुजनानां गुरुतरोपि परमगुरुरपि हि यतः सतां पतिरपि तस्य नारदस्य चरणौ अवनिज्य प्रक्षाल्य तदपः अवनेजनजलानि मूर्द्धिन विभ्रत् विभ्राणः आसेति शेषः। दधारेत्यर्थः। अविभ्रत् इति वा छेदः अविभ्रत् अविभरत् दधारेत्यर्थः। युक्तञ्चेतदित्याह—ब्रह्मण्येति। ब्रह्मणि ब्राह्मणकुले साधवो ब्रह्मण्यास्तेषां देव इति यद्गुणनाम अन्वर्थं नाम तस्यैव यतो भगवत एवासाधारणमित्यर्थः। अतः युक्तं ब्रह्मण्यदेवत्वाद्द्विप्राङ्घ्रिजलधारणमित्येतदुचितमेवेत्यर्थः। अन्यथा तु न घटत इत्यभिप्रयन् विशिनष्टि—यच्चरणशौचं यस्य भगवतश्चरणसम्बन्धाच्छौचं पवित्रता यस्य तथाभूतमशेषं गङ्गादितीर्थं तस्यैवम्विधस्योक्तादेव हेतोस्तदुचितमित्यर्थः ॥ १५ ॥ सम्पूज्येति । नरस्य सखा नारायणः पुराण ऋषिरप्युक्तादेव हेतोर्देवर्षिवर्यं नारदं शास्त्रोक्तेन विधिना सम्पूज्यामतेन जुष्टया अमृतवर्षिण्येत्यर्थः। मितयाचाल्याक्षरया वाण्याऽभिभाष्य सम्बोध्य प्राह—उक्तिमेवाह–प्रभो भगवते करवाम किन्ते। हे प्रभो! भगवते तुभ्यं किङ्करवाम किङ्करा वयमित्यर्थः। किमिष्टं करवामेति वा किं यत्किञ्चिदिष्टमस्ति तत्करवामेति वा ॥ १६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

चामरव्यजनेन चामराख्यव्यजनेन तस्मिन् भवने आविवेश उपविष्टः ॥ १३–१४ ॥ भो परीक्षिन्नैतच्चित्रमित्याह—ब्रह्मण्यदेव इतीति। यस्य चरणशौचजलमशेषांस्तीर्थयति शुद्धान् करोतीति अशेषतीर्थं यद्वा अशेषाणि तीर्थानि यस्मिंस्तत्तस्य हरेः ब्रह्मण्यदेव इति यत्तद्गुणनाम तस्यैव युक्तमित्यवधारयेत्यर्थः ॥ १५ ॥ शास्त्रोदितेन विधिना सम्पूज्य ॥ १६ ॥

श्रीमज्जीवगोस्वामीकृतः क्रमसन्दर्भः

विधिपूजाविज्ञतायां हेतुः ऋषिर्मन्त्रप्रवर्त्तकः तत्रापि पुराणः पुरापि नवः स्वयं भगवत्त्वादिना त्वयेव तादृशतया वर्त्तमान इत्यर्थः। किञ्च नारायणो नरसखः तादृशधर्म्मविधिप्रवर्त्तनाय लोकेऽपि तद्रूपेणावतीर्णः अभेदनिर्द्देशोऽयं तत्र श्रीनारायणर्षेरपि प्रवेशाभिप्रायेण तस्य तत्र तादृशलीलाविर्भावे हेतुः, ऋषिवर्य्यमिति। पूरोहितादिवद्भक्तविशेषाविर्भावानुरूप्यादिति भावः। ननु, सतु सर्व्वादि ऋषिः नारायणत्वे च तस्य साक्षादेव गुरुरिति कथने तत्पूजनयोग्यम् इत्यत्रापि सिद्धान्तः। विधिनोदितेति सम्प्रत्याविष्कृतक्षत्रियलीलस्य स्वस्य ब्राह्मणपूजा योग्यैव लोकवत्तु लीलाकैवल्यादिति भावः। जनतायाः भक्तवृन्दस्यापवर्गं परमपुरुषार्थरूपं ब्रह्मादिभिर्म्मुक्तैरपि हृदि विचिन्त्यं संसारकूपपतितानां मुमुक्षूणामुत्तरणमवलम्बमिति ॥१६–२१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

सम्पूज्येत्यादि। देवः श्रीकृष्णः ऋषिवर्यं नारदं सम्पूज्य प्राह कीदृशः? पुराण आदिः तर्हि किं नारायणः? न, ततोऽपि चर इत्यादि। अनारायणोऽजलशायी अनरसखः अनरा अजीवा सखायो यस्य, ऋषिरलिप्त एवम्भूतो गार्हस्थोऽपि नासक्तः ॥ १६–३७ ॥

श्रीनाथचक्रवर्तिविरचिता चैतन्यमतमञ्जूषा

पुराणो नरसख इत्यादि। पुराणो नारायणो नारायणादपि पुराण इत्यर्थः। अनरा अमर्त्त्या एव सखायो यस्य ॥१६–३६॥

श्रीमद्विश्वनाथचक्रवर्तीकृता सारार्थदर्शिनी

तस्मिन् गृहिण्या सहितं सात्वतपतिं ददर्श। अनुसवं समुचितं प्रतिसमयम् ॥ १३ ॥ अवीविशत् उपवेशयामास ॥१४॥ तस्य चरणौ अवनिज्य प्रक्षाल्य सतां पतिः प्राहेत्युत्तरेणान्वयः। ननु, स्वदासस्य नारदस्य चरणक्षालनादिकमनुचितं तत्राह—ब्रह्मण्यदेव इति। यस्य गुणनाम गुणसूचकं नाम तद्युक्तं नारदस्य ब्राह्मणत्वात् तस्य ब्रह्मण्यदेवत्वादेतत् सर्व्वमुचितमेवेत्यर्थः। नच स स्वपवित्रीकरणार्थमेवेदञ्चकारेति वाच्यमित्याह यत् यस्मात् तस्यैव चरणशौचं गङ्गा अशेषतीर्थं भवति। नारदस्तु दासोऽपि स्वप्रभोरिच्छाप्रातिकूल्ये प्रभुत्वं नाविश्वकारेति ज्ञेयम् ॥ १५ ॥ उदितेन शास्त्रोक्तेन बिधिना सम्पूज्येत्यत्र हेतुः ऋषिर्मन्त्रप्रवर्त्तकः किञ्च पुराणः स्वयं भगवत्त्वात् नवः यः खलु तादृशधर्म्मप्रवर्त्तनार्थमत्र भारतभूमौ नरसखो नारायणो भवतीत्यर्थः मितया परिमितया अमृतेनापि जुष्टया सेवितया परममधुरयेत्यर्थः। हे प्रभो विप्रत्वेनास्मत्स्वामिन् ॥ १६ ॥

गूढार्थदीपिनी

तस्मिन् अन्तर्गृहे विप्रो नारदः गृहिण्या रुक्मिण्या सहितं सात्वपतिं यदुपतिं श्रीकृष्णं ददर्शेत्यन्वयः। कथंभूतया। चमरमेव व्यजनं तेन परिवीजयन्त्या वायुं प्रसारयन्त्या। पुनश्च। आत्मसमानगुणरूपादियुक्तदासीसहस्रेण युतया। अनुसवं

सर्वकालम् ॥ १३ ॥ भगवान् तं नारदं सन्निरीक्ष्य श्रीपर्यङ्कृतः सहसा उत्थितः पादयुगलम् शिरसा आनम्य साञ्जलिः सन् स्वे आसने अवीविशत् उपवेशयामासेत्यन्वयः ॥ १४ ॥ यस्य गुणानुसारि अन्वर्थमिति नाम तत् तस्यैव युक्तं नान्यस्य। यस्य पादशौचं गङ्गाजलम् अशेषाणां लोकानां तीर्थं पावनकरं स गुरुतरः पूज्यतमोऽपि तस्य नारदस्य चरणौ प्रक्षाल्य तदपः स्वमूर्ध्ना बिभ्रत् सन् प्राहेत्युत्तरेणान्वयः ॥ १५ ॥ नारायणः ऋषिः उदितेन शास्त्रोक्तेन विधिना देवर्षि सम्पूज्य वाण्या अभिभाष्य सम्बोध्य च प्राह हे प्रभो भगवते भवते किं करवामेति सम्बन्धः। अमृतवत् मिष्टया मधुरया मितया स्वल्पया। नरस्य अर्जुनस्य सखा। टच् प्रत्ययः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तस्मिन् भवने अनुसवं सर्वसमयम् आत्मना समानानि समानकल्यानि गुणरूपवयांसि सुवेषः सुष्ठ्वलङ्कारश्च यस्य तेन दासीसहस्रेण युतया ददर्श ॥ १३ ॥ तं देवर्षि सन्निरीक्ष्य श्रीपर्यङ्कृतः रुक्मिण्या पर्यङ्कात् आशूत्थितः शिरसा पादयुगलमानम्य स्वे आसने अवीविशत् उपवेशयामास। ननु, सर्वेश्वरस्य सन्निरीक्षणोत्थानादिचेष्टितं किमभिप्रायमत्राह—धर्मभृतां वरिष्ठः धर्मशिक्षकः महत्यागते धर्मभृद्भिरेवं कर्तव्यमिति लोकशिक्षार्थमित्यर्थः। यथोक्तं महाभारते—

"चक्षुर्दद्यान्मनो दद्याद्वाचं दद्यात्सुसूनृताम्। उत्थाय चासनं दद्यात्स यज्ञः पञ्चदक्षिणः ॥ इति ॥ १४ ॥

जगतामनन्तकोटिब्रह्मादीनां सर्वेषां पतिः स्वाम्यपि यत् यस्य चरणशौचं चरणप्रक्षालनजलं श्रीगङ्गादिरूपमशेषतीर्थं स एवम्विधोपि तस्य ब्रह्मपुत्रस्य स्वानन्यदासस्य स्वामिलीलाप्रातिकूल्यभयात् तूष्णींस्थितस्य सर्वत्र प्रसिद्धस्य चरणौ अवनिज्य प्रक्षाल्य स्वमूर्ध्ना बिभ्रत् बिभ्राणः देवर्षिवर्यं सम्पूज्य अभिभाष्य च प्राहेत्युत्तरेणान्वयः। एवम्विधे आचरणे करणे कारणं दर्शयति-ब्रह्मण्यदेव इति। यद्गुणकृतं नाम तस्यैव युक्तं नान्यस्य अयमर्थः ब्राह्मणेभ्यः वेदविप्रपरम्परेभ्यो हितकृतो ब्रह्मण्याः धार्मिकास्तेषु शिक्षकरूपेण नानावतारैर्दीव्यतीति देवः लोकशिक्षायै, तथाविधमाचरणं कृतवानिति फलितार्थः ॥ १५ ॥ ऋषिर्मन्त्रप्रवर्तकः पुराणः पुराहि नवः नारस्य नरसमूहस्य अयममाशयः नरसखः अभिभाष्य स्वागतमित्यादिप्रियमुक्त्वा ॥ १६ ॥

श्रीसत्यधर्मकृता भागवतटिप्पणी

तस्मिन्यस्मिन्प्रविष्टस्तत्र। समानगुणवयः सुवेषं यद्दासीसहस्रं तेन युतेन रुक्मदण्डेन चमरसम्बन्धिव्यजनेन चामरेणानुसवं धारा अविच्छेदेनेत्यनुक्षणं परिवीजयन्त्या गृहिण्या भार्यया सहितं सात्त्वतपतिं विप्रो ददर्श। ब्रह्मपुत्रत्वाद्विप्र इत्युक्तिः ॥ १३ ॥ भगवांस्तं नारदम्। तमित्यावर्तितमागतमित्यर्थं। तकरश्चागत इति विश्वः। सन्निरीक्ष्य सहसा झटिति श्रीपर्यङ्कृतः श्रीमत्पर्यङ्कृत उत्थितः। तत्रोत्तरत्र तन्त्रं धर्मभृतां वरिष्ठ इति। किरीटजुष्टेन शिरसा पादयुगलमानम्य नत्वा साञ्जलिर्घटितकरसम्पुटिः स्वे आसने न्यवीविशदुपवेशयामास ॥ १४ ॥ जगद्गुरुतरोऽपि हि यतः सतां पतिस्ततस्तस्य चरणाववनिज्य प्रक्षाल्य तस्य प्रक्षालनस्य सम्बन्धिनीरपः स्वमूर्ध्ना बिभ्रत्संस्तमभिभाष्याहेत्युत्तरेणान्वयः। अभिभ्रत् अविभ्र इति व्यत्ययेनान्वय इति केचित्। तदा त्वत्रैवान्वयः। अतो ब्रह्मण्यदेवेति यद्गुणनाम गुणलब्धं नामान्वर्थमिति यावत्। तस्यैव कृष्णस्यैव युक्तम्। किं तन्माहात्म्यमित्यत आह। यस्य चरणयोः शौचं शौचनिःसृतसरित्प्रवरोदकमशेषान्धात्रादींस्तीर्थयति पवित्रयतीति स तथा। एवं स्वविभवे सति स्वमूर्ध्ना नारदनीरं दधारेति ब्रह्मण्य देवनामगुणानुरूपमिति तात्पर्यम् ॥ १५ ॥ नरसखो नारायण इत्यादि ऋषिः। पुराणः सकलकलेवरगत उदितेनातिषिपूजनं यथा शास्त्र उदितं तेनोदितेन विधिना देवर्षि सम्पूज्य। उभयत्र ऋत्यक इति प्रकृतिभावः। मितया शब्दतोऽमृतकल्पया वाण्याऽभिभाष्य स्वामिन्मद्वचनं शृण्वित्युक्त्वा स्वमुखं विधायेति यावत्। हे प्रभो भगवतस्तव किं करवामेति प्राह ॥ १६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

यदर्थमेतन्निरूपितं तन्निरूपयति **तस्मिन्निति**। समाना गुणा औदार्यादयः रत्युपयोगिनो वा मृदुत्वादयः। रूपं सौन्दर्यम्। वयस्तारुण्यम्। सुवेषो वस्त्रादिभिः। रसो हि निर्बद्धः शङ्कां करोतीति, स्वल्पश्च न पोषको भवतीति, महारसानुभवार्थं दास्यो निरूप्यन्ते। नायिकानां मेलने भिन्नस्वभावत्वात् रसो नोत्पद्यत इति, तासां च कामना नैवंविधेति, केवलभोगक्षोत्वं वारयितुमाह **गृहिण्येति**। **तनुसवं** सर्वकालं दासीसहस्रयुतया भार्यया चमरव्यजनेन सात्त्वतपतिं वस्तुतः स्वपतिं परिवीजयन्त्या सह सात्वतपतिं ददर्शेति सम्बन्धः। चमरकृतं व्यजनं उद्दीपनकरम्, तथा सुवर्णदण्डयुक्तं च। अयं भगवत्यद्भुतः प्रकारो निरूपितः। नैवंविधः समानानां प्रकारो लोके सामान्यानां सम्भवति। अनेन रात्रावयं भोगकाले गत इति सूचितम् ॥ १३ ॥ तत्र भगवता आतिथ्यप्रकारमाह **तं सन्निरीक्ष्येति त्रिभिः**। कायिकमानसिकवाचनिकैः। कायिकपूजा सर्वेणापि स्वयोग्या कर्तव्या। **अतो भगवान**पि तं दृष्ट्वा स्वपदे निवेशितवानिति निरूप्यते। नह्येतस्मादधिका पूजा सम्भवति। अन्या या लौकिकी सा सर्वसाधारणी अन्यदोषत्वेन निरूप्यते। एवंकरणे हेतुमाह **भगवानिति**। अन्यथा अन्यस्माद्भगवति को

विशेषः स्यात्। यदि स्वपदे नोपवेशयेत्। **सहसोत्थित** इति तं प्रति लौकिकभावस्थैर्यं सूचितम्। अन्यथा स्वधर्माविर्भावे सेवकं प्रति भगवदुत्थानं नोचितं स्यात्। 'ये यथा मां प्रपद्यन्त' इति भगवत्प्रतिज्ञा। स च लौकिकबुद्ध्या भगवन्तं दृष्टवानिति भगवानपि तथैव चकार। **श्रीपर्यङ्कात** इति। अनौचित्यं निरूपितम्। केवललौकिकप्रकारेणापि तथात्वं भवतीति वैदिकप्रकारमाह **सकलधर्मभृतां वरिष्ठ** इति। धर्मभृतो निरन्तरधर्मकर्तारः। **ते** जीवा एव भवन्ति। **तेषां** मध्ये श्रेष्ठ इति सजातीयोत्कर्षात् बहिर्दृष्टिरेव तस्य स्थिरीक्रियते। अत एव भगवान् पादयुगलमानम्य। तत्रापि शिरसा धर्मनिष्ठां सूचयितुम्। **किरीटजुष्टेनेति** लोकनिष्ठा। न केवलं स्वयं तद्धर्मावलम्बनं कृतवान्, किन्तु तं चापि स्वधर्मेयोजितवानित्याह **साञ्जलिः स्वे आसने अवीविशदि**ति। स्वासने तं निवेशयामासेत्यर्थः। अन्तर्भावितणिच्प्रयोगः। भगवानेव तत्र वस्तुतः स्वधर्मं स्थापितवानिति स्वयमेव तत्रापविष्ट इति धर्मव्यत्यासं स्थापयितुं अवीविशदित्युक्तवान्। आसनं च श्रीपर्यङ्कमित्येव लक्ष्यते। तत एवोत्थित इति स्वपदेनापि तदेवेति गम्यते। आसनपदेन स्वसिंहासनमिति। तथापि अग्रे पृथुकोपाख्याने 'निवासितः प्रियाजुष्टे पर्यङ्क' इति वाक्यात् पर्यङ्कमेवासनस्थानीयम्॥ १४॥ **ततस्तस्य चरणाववनिज्येति** कायिकोऽपि व्यापारः मानसशेषत्वेन निरूप्यते। स्वतः प्रक्षालनं भक्त्यैव सम्भवति। **तदपः** पादावनेजनीरापः स्वस्मिन् नारदधर्मावेशाद्भक्तानां भगवच्चरणारविन्दोदकं धार्यमेवेति स्वमूर्ध्ना अबिभ्रत्। नन्वेवमपि लोको भगवन्माहात्म्याभिज्ञः कथं मन्येत, तत्राह **जगद्गुरुतरोऽपीति**। यद्यपि जगतामत्यन्तं गुरुः शास्त्रप्रणेता उपदेष्टा प्रेरकः उपदेशश्च। तथापि सतां पतिर्भवति। 'यद्यदाचरति श्रेया'निति वाक्यात् भगवत्कृतमेव भगवदीयः करोतीति सतां पालनार्थं तथा कृतवान्। अन्यथा गजेन्द्रवद्वैष्णवानामुपद्रवोऽपि सम्भवेत्। तस्माद्भगवता युक्तमेव भक्तरक्षार्थं कृतमिति हिशब्दार्थः। नन्वेवं सति भक्तिमार्गे विरोधः स्यात्, तत्राह **ब्रह्मण्यदेव** इति। ब्राह्मणानां हितस्तेषां कार्यसाधको देवः। ब्रह्मण्यश्चासौ देवश्चेति तेषामेव पूज्यः। इदं भगवतो गुणनाम तदेव युक्तं भवति, यदि तन्मनोरथं साधयेत्। ब्राह्मणाश्च पूजां वाञ्छन्ति, नत्वन्नसत्रम्। तद्भगवत्येव तद्धर्मप्रवर्तके अन्यः प्रवर्तेत, न तु यस्मिन्कस्मिंश्चित्। ननु एतावतापि कथं लोकः प्रवर्तेत, तत्राह **तस्यैव यच्चरणशौच**मिति। अशेषाणि तीर्थानि यस्मिन् गङ्गाजले 'तिस्रः कोट्योऽर्धकोटी चे'ति वाक्यात्। अनेन स्वापकर्षाभावोऽपि निरूपितः॥ १५॥ स्तोत्रमाह **सम्पूज्येति**। पूजाया अनुवादः उत्तरशेषत्वेन। तेन पूजा वाक्यापेक्षया हीना निरूपिता। **देवर्षिवर्य**मिति। अनेन देवा ऋषयश्च पूजितेन प्रीता भवन्तीति। गार्हस्थ्ये ऋणत्रयापाकरणे आवश्यके द्वयमनेनैव भवतीति तस्यावश्यकता सूचिता। ऋषिरिति। नारायणोऽयं अनिरुद्धांशेनैवं करोतीति सूचितम्। पुराणः ऋषिर्नारायण एव, तथापि वेदोद्गमरूपोऽपि भवतीति तन्निराकरणार्थं **नारायणो नरसख** इति निरूपितम्। तस्य च अस्यैव प्रकरणस्यान्ते प्रत्यापत्तिं वक्ष्यति। 'प्रत्येष्यतां निकाशं म' इति वाक्ये। **विधिनोदितेनेति** पूजायां प्रकार **उक्तः**। अन्यथा ऐश्वर्येण राजसी पूजा प्राप्नोति। वाण्या अमृतया अतिमिष्टया आभाष्य, भो भो नारदेत्युक्त्वा, तं नारदं प्राह। सर्वोत्कर्षः स्वस्वामित्वं स्वस्य च तदाज्ञाकारित्वं पदत्रयेणाह **भगवते, हे प्रभो, ते किं करवामेति**। तृतीयं पदत्रयात्मकं त्वत्सेवा त्रिविधाप्यत्र कर्तव्येति सूचनार्थम्। तदाज्ञापयेति वाक्यशेषाभिप्रायः॥ १६॥

श्रीसुबोधिनी-सारः

तस्मिन् गृहे समानान्यात्मतुल्यानि गुणरूपवयांसि सुवेषोऽलंकृतिश्च यस्य तेन दासीसहस्रेण युतया अनुसवं त्रिकालं रुक्मस्य सुवर्णस्य दंडो यस्य तेन चमरव्यजनेन परिवीजनं कुर्वंत्या गृहिण्या श्रिया सह सात्त्वतपतिं श्रीकृष्णं विप्रो नारदो ददर्श॥ १३॥ तं नारदं संनिरीक्ष्य श्रियो रुक्मिण्याः पर्यंकतः शय्यातः सहसा झटिति उत्थितः सर्वधर्मधारिणां श्रेष्ठो भगवान् तस्य पादयुगलं चरणद्वंद्वं मुकुटसेवितेन शिरसाऽऽनम्य प्रणम्य सांजलिः संयतहस्तः स्वे स्वकीये आसने उपावेशयत्॥ १४॥ तस्य नारदस्य चरणौ अवनिज्य प्रक्षाल्य सतां पतिर्जगद्गुरुतरोऽपि श्रीकृष्णः तदपो जलं स्वमूर्ध्नाऽऽत्मशिरसाधारयत् अशेषतीर्थं सर्वतीर्थमयी गंगा यस्य चरणशौचं पादावनेजनं भवति तस्य हरेर्ब्रह्मण्यदेव इत्येव गुणैर्नाम युक्तं हि निश्चये॥ १५॥ देवः स्वप्रकाशः पुराणो नारायण ऋषिर्नरः सखा यस्य नरस्य सखेति स्वरभेदान्निर्णयः उदितेन वेदोक्तेन विधिना ऋषिवर्यं नारदं संपूज्य अमृतवत् मिष्टया मितयाल्पाक्षरया वाण्याभिभाष्य संबोध्य तं नारदं प्राह हे प्रभो भगवते किं करवामेति॥ १६॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तस्मिन्नित्यत्र। **रसो हीति**। कामरसो हि रहसि भोग्यत्वान्निर्बन्धयुक्तो भवति। अतः प्रतिबन्धकागमनशङ्कां करोति। शङ्कायां तु न रसः। अतः प्रतिबन्धकनिवृत्त्यर्थं दास्योऽपेक्ष्यन्त इत्यर्थः। **स्वल्पश्चेति**। स्वल्प एव नायिकारूपो विभावो रसपोषको न भवति, तथाचापुष्ट एव रसोऽनुभूयेत, न तु महारसः। अनेकविभावसत्त्वे तु तैरनेकैरनेककटाक्षादिभिः पोषितो महानेवोद्दीप्तो भवति। ततो मुख्यायामनुभूयेतेत्यर्थः। तर्हि नायिका एव सर्वा मेलनीया इत्याशङ्क्याहुः **नायिकानामिति**। **केवलभोगेति**। धर्मोपयोगित्वं ज्येष्ठाया एव मुख्यम्, अन्यासां गौणम्, अतः **केवलपदम्**। वीजनक्रियायां दर्शनक्रियायां च 'सात्त्वतपति'मित्येव कर्मेति वारद्वयमुक्तम्। **व्याख्याने**। तत्तात्पर्यमाहुः **वस्तुतः स्वपति**मिति। स्वस्यापि भगव-

दीयत्वेन सात्त्वतत्वादिति भावः । **अयमिति** । गृहिण्या परिवीजनरूपः प्रकार इत्यर्थः । **नैवंविध** इति लोके सामान्यानां जनानां मध्ये कुलशीलादिना समानानां पत्नीनां परिवीजनरूपः प्रकारो न सम्भवति, तस्य दासधर्मत्वादिति भावः । **अनेनेति** । गृहिणीसाहित्यकथनेनेत्यर्थः । **तं सन्निरीक्ष्येत्यत्र** । अवीविशदिति यङ्लुगन्ताल्लङा णिजर्थस्त्वन्तर्भावित इत्याहुः **अन्तर्भावितणिच्प्रयोग** इति । **धर्मव्यत्यासमिति** । नारदस्थाने स्वयमुपविष्टः, स्वस्थाने नारद इति वेशनधर्मव्यत्यासः । इदमेव पौनःपुन्यमिति भावः । **तस्यावनिज्येत्यत्र** । **गुरुतर** इति । तरणप्रत्ययार्थमाहुः **शास्त्रेति**पदचतुष्टयेन । नामात्मकमपि भगवत्स्वरूपमेवेत्याशयेन उपदेशरूपोपि स्वयमेवेत्युक्तम् । **सम्पूज्येत्यत्र** । **प्रकरणस्यान्त** इति । **अन्ते** इति सामीप्यसप्तमी । मतान्तरसिद्धस्य सात्त्विकप्रकरणस्यान्तसमीपेऽध्याये । अन्तात्पूर्वाध्याये **द्विजात्मजा अमी** इति श्लोके इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्मिन् भवने गृहिण्या रुक्मिण्या सहितं सात्वतपतिं श्रीकृष्णं विप्रो नारदो ददर्शेत्यन्वयः । रुक्मिण्याः कृष्णे स्नेहाधिक्यं सूचयंस्तां विशिनष्टि—अनुसवं सर्वकालं आत्मना समानानि गुणरूपवयांसि सुवेषः अलंकारश्च यस्य तेन दासीनां सहस्रेण युतयापि रुक्ममयो दण्डो यस्य तेन चामरव्यजनेन तं वीजयन्त्या ॥ १३ ॥ तं नारदं सम्यक् निरीक्ष्य भगवान् श्रियो रुक्मिण्याः पर्यङ्कात् सहसा आशु उत्थितः सन् किरीटजुष्टेन शिरसा तस्य पादयुगलं प्रणम्य साञ्जलिः सन् स्वकीये आसने अवीविशत् उपवेशयामासेत्यन्वयः । एवं मुनिसंमानने हेतुमाह—सकल धर्मभृतां वरिष्ठमिति । धर्मनिष्ठैरेवं साधुसन्माननं कर्तव्यमिति शिक्षार्थम् ॥ १४ ॥ जगतां ब्रह्मादिप्राणिनां गुरुतरोपि पूज्यतमोपि तस्य नारदस्य चरणौ अवनिज्य प्रक्षाल्य तदपः प्रक्षालनजलानि स्वमूर्ध्ना अबिभ्रत् अभिदधारेत्यर्थः । तत्रोक्तमेव हेतुमाह—सतांपतिरिति । हि यस्मात् सतां धर्ममार्गवर्तिनां पतिः पालकः, अतस्तच्छिक्षार्थं तच्चरणोदकं मूर्ध्नि दधारेत्यन्वयः । अतः ब्राह्मणकुले साधवो ब्रह्मण्यास्तेषां देवः प्रवर्तकः फलदश्चेति यद्गुणनाम अन्वर्थं नाम तत्तस्यैव युक्तम् । जगद्गुरुतरत्वमेव स्पष्टयति—यच्चरणेति । यस्य चरणशौचं गङ्गा अशेषाणां ब्रह्मादीनां सर्वेषां तीर्थं पावित्र्यकरमित्यर्थः ॥ १५ ॥ नरस्य सखा नारायणः उदितेन शास्त्रोक्तेन विधिना एवं देवर्षिवर्यं तमृषिं नारदं संपूज्य अमृतेन जुष्टया अमृतवर्षिण्या मितया स्वल्पाक्षरया वाण्या हे प्रभो ! इति तं अभिभाष्य संबोध्य भगवते ऐश्वर्यादिपूर्णाय तुभ्यं किं करवामेति प्राहेत्यन्वयः ॥ १६ ॥

अन्वितार्थप्रकाशिका

तस्मिन्निति ॥ तस्मिन् भवने अनुसवं सर्वकालम् आत्मना समानानि गुणरूपवयांसि सुवेषः अलङ्कारश्च यस्य तेन दासीनां सहस्रेण युतयाऽपि रुक्ममयो दण्डो यस्य तेन चमरव्यजनेन तं वीजयन्त्या गृहिण्या रुक्मिण्या सहितं सात्वतपतिं श्रीकृष्णं विप्रो नारदो ददर्श ॥ १३ ॥ तमिति ॥ तं नारदं सम्यक् निरीक्ष्य सकलधर्मभृतां वरिष्ठो भगवान् श्रियो रुक्मिण्याः पर्यङ्कात् सहसा आशु उत्थितः सन् किरीटजुष्टेन शिरसा तस्य पादयुगलं आनम्य साञ्जलिः सन् स्वे स्वकीये आसने अवीविशत् उपवेशयामास ॥ १४ ॥ तस्येति ॥ ब्राह्मणकुले साधवो ब्रह्मण्यास्तेषां देवः प्रवर्तकः फलदश्चेति यद्गुणनाम अन्वर्थं नाम तत्तस्यैव युक्तं समञ्जसं यस्य चरणशौचं गङ्गा अशेषाणां ब्रह्मादीनां सर्वेषां तीर्थं पावित्र्यकरं सः जगतां ब्रह्मादिप्राणिनां गुरुतरोऽपि पूज्यतमोऽपि हि यस्मात् सतां पतिः पालकः अतः तच्छिक्षार्थं न तु स्वपावित्र्यार्थं तस्य नारदस्य चरणौ अवनिज्य प्रक्षाल्य तदपः प्रक्षालनजलानि स्वमूर्ध्ना बिभ्रत् धारयन् उपविवेशेति शेषः । यद्वा । अविभ्रत् अविभः दधार । आर्षः ॥ १५ ॥ संपूज्येति ॥ पुराणः ऋषिः मन्त्रप्रवर्त्तकः नरस्य सखा नारायणः उदितेन शास्त्रोक्तेन विधिना एवं देवर्षिवर्यं नारदं संपूज्य अमृतेन जुष्टया अमृतवर्षिण्या मिष्टयेति वा पाठः । मितया स्वल्पाक्षरया वाण्या हे प्रभो ! दिष्ट्या त्वदागमनम् इति तम् अभिभाष्य सम्बोध्य भगवते ऐश्वर्यादिपूर्णाय तुभ्यं किं करवामेति प्राह स्म । हे इति पृथक् छेदः ॥ १६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्मिन्गृहे । अनुसवं समग्रकालं समानास्तुल्याः गुणादयो यस्य तेन दासीसहस्रेण युतया गृहिण्या रुक्मिण्या सहितं श्रीकृष्णं ॥ १३ ॥ तं नारदं समीक्ष्य श्रीपर्य्यंकतो भैष्मी पर्यंकात् सहसोत्थितः । स्वे स्वकीये आसने । अवीविशत् उपवेशयां चकार ॥ १४ ॥ तदपः नारदचरणप्रक्षालनावशिष्टानि जलानि । बिभ्रत् दधत् अबिभ्रत् दधारेति वा पदच्छेदः यतः ब्रह्मण्यदेव इति तस्य श्रीकृष्णस्य यत् गुणेन सहितं नाम अभिधानं युक्तं योग्यमस्ति । कीदृशस्य तस्य यस्य चरणशौचं भागिरथी । अशेषाणि तीर्थानि यस्मिंस्तथाभूतं भवति । एवंभूतोपि श्रीकृष्णः सन्माहात्म्यं सूचयन् सन्नेवं कृतवानिति बोध्यं ॥ १५ ॥ अभिभाष्य महाभाग्येन तव दर्शनं जातमित्युक्त्वा । भगवते तुभ्यं ॥ १६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्मिन्निति । तस्मिन् उक्तविधभवने, समानान्यात्मना तुल्यानि गुणरूपवयांसि सुवेषोऽलंकारश्च यस्य सख्य तद्दासीसहस्रं च तेन युता तया, रुक्मदण्डेन चमरव्यजनेन, अनुसवं सर्वकालं, परिवीजयन्त्या च, गृहिण्या रुक्मिण्या भार्यया, सह

वर्त्तमानं, सात्वतपतिं श्रीकृष्णं, विप्रो नारदः, ददर्श ॥ १३ ॥ तमिति । सकलधर्मभृतां वरिष्ठः भगवान् श्रीकृष्णः, तं नारदं, संनिरीक्ष्य, सहसा तत्क्षणमेव, श्रीपर्यङ्कतः रुक्मिण्याः पर्यङ्कात्, उत्थितः सन्, किरीटजुष्टेन शिरसा, पादयुगलं नारदाङ्घ्रिद्वन्द्वं, आनम्य, साञ्जलिः सन्, स्वे स्वकीये, आसने अवीविशदुपवेशयामास ॥ १४ ॥ तस्येति । जगद्गुरुतरः जनानामतिशयेन परमगुरुः अपि, यस्य श्रीकृष्णस्य चरणशौचं गङ्गा अशेषतीर्थं, सः, सतां पतिः श्रीकृष्णः, तस्य नारदस्य, चरणौ, अवनिज्य, तदपो नारदपादावनेजनजलानि, स्वमूर्ध्ना स्वशिरसा, अबिभ्रत् । हि यतः, ब्रह्माणि साधवो ब्रह्मण्यास्तेषां देवः, इति यद्गुणनाम गुणैः कृत्वा जातं यदन्वर्थं नाम, तत् तस्य श्रीकृष्णस्यैव, युक्तं योग्य, अस्ति । ब्रह्मण्यदेवत्वादस्य शिरसि विप्राङ्घ्रिक्षालनजलधारणमुचितमेवेति भावः ॥ १५ ॥ संयुज्येति । पुराणः ऋषिः, कल्पादौ ब्रह्मणोऽप्युपदेष्टृत्वात्पुराणः ऋषिः, गोपालोपनिषदि 'कल्पादौ विरिञ्चि कृष्ण उपादिशत्' इत्युक्तेः । कृष्णस्य पुराणर्षित्वं, न तु नारायणर्ष्यवतारत्वम् 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्' इत्युक्तेर्नारायणस्यांशावतारत्वात् कृष्णस्य पूर्णावतारत्वाच्च । नराणां स्वभक्तजनानां सखेति नरसखः, 'नरैः सार्द्धं विहारित्वान्नरधर्मानुकाराद्वा नरसख इति लघुभागवतामृते दर्शनात् । नारं जीवसमूहः स अयनमन्तर्यामितयाऽऽवासस्थानं यस्य स नारायणः श्रीकृष्णः, उदितेन शास्त्राभिहितेन विधिना, देवऋषिवर्यं नारदं, संपूज्य, अमृतमिष्टया अमृततोऽपि मधुरया, मितया परिमिताक्षरया, वाण्या, तं नारदं, अभिभाष्य दिष्ट्याऽत्र त्वदागमनमित्यादि प्रियमुक्त्वा, हे प्रभो, भगवते पूज्याय तुभ्यं, किं करवामहे भवदीयं किमिष्टं करवामेति, प्राह । अत्र नारायणनरसखशब्दाभ्यां धरिष्यमाणस्वावतारार्थोऽपि संदर्शितः । स यथा नरन्ति स्ववचनानुसारेण धर्मपालनादौ स्वाङ्गानि नयन्तीति नरा मुक्तानन्दब्रह्मानन्दादयो मुनयस्ते सखाय इव यस्येति नरसखः । नरो धर्मस्तस्यापत्यं नारायण इति ॥ १६ ॥

कृष्णप्रिया

राजमहल में प्रवेश करते देवर्षि नारदजी ने देखा कि भगवान् श्रीकृष्णचन्द्रजी उस भवन की महारानीजी श्री रुक्मिणी जी के साथ बैठे हुए हैं, और श्री स्वामिनी श्री रुक्मिणीजी अपने कर कमलों से श्री द्वारिकानाथ जी को सुवर्ण की डाँडीवाले चामर से सेवा कर रही थी ॥ १३ ॥ नारदजी को देखते ही समस्त धार्मिकों के मुकुटमणि भगवान् श्रीकृष्ण रुक्मिणीजो के पलँग से सहसा उठ खड़े हुए । उन्होंने देवर्षि नारद के युगलचरणों में मुकुटयुक्त सिर से प्रणाम किया और हाथ जोड़कर उन्हें अपने आसनपर बैठाया ॥ १४ ॥ परीक्षित् ! इसमें सन्देह नहीं कि भगवान् श्रीकृष्ण चराचर जगत् के परम गुरु हैं और उनके चरणों का धोवन गङ्गाजल सारे जगत् को पवित्र करने वाला है । फिर भी वे परमभक्तवत्सल और संतों के परम आदर्श, उनके स्वामी हैं । उनका एक असाधारण नाम ब्रह्मण्यदेव भी है । वे ब्राह्मणों को ही अपना आराध्यदेव मानते हैं । उनका यह नाम उनके गुण के अनुरूप एवं उचित ही है । तभी तो भगवान् श्रीकृष्ण ने स्वयं ही नारदजी के पाँव पखारे और उनका चरणामृत अपने सिरपर धारण किया ॥ १५ ॥ नरशिरोमणि नर के सखा सर्वदर्शी पुराणपुरुष भगवान् नारायण ने शास्त्रोक्त विधि से देवर्षिशिरोमणि भगवान् नारद की पूजा की । इसके बाद अमृत से भी मीठे किन्तु थोड़े शब्दों में उनका स्वागत-सत्कार किया और फिर कहा—'प्रभो ! आप तो स्वयं समग्र ज्ञान, वैराग्य, धर्म, यश, श्री और ऐश्वर्य से पूर्ण हैं । आपकी हम क्या सेवा करें ?' ॥ १६ ॥

नारद उवाच

नैवाद्भुतं त्वयि विभोऽखिललोकनाथे मैत्री जनेषु सकलेषु दमः खलानाम् ।
निःश्रेयसाय हि [1]जगत्स्थितिरक्षणाभ्यां [2]स्वेच्छावतार उरुमाय विदाय सुष्ठु ॥ १७ ॥
दृष्टं तवाङ्घ्रियुगलं जनतापवर्गं ब्रह्मादिभिर्हृदि विचिन्त्यमगाधबोधैः[3] ।
संसारकूपपतितोत्तरणावलम्बं ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात् ॥ १८ ॥
ततोऽन्यदाविशद् गेहं कृष्णपत्न्याः स[4] नारदः । योगेश्वरेश्वरस्याङ्ग योगमायाविवित्सया ॥ १९ ॥
दीव्यन्तमक्षैस्तत्रापि प्रियया चोद्धवेन च । पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः ॥ २० ॥
पृष्टश्चाविदुषेवासौ कदाऽऽयातो भवानिति । क्रियते किं नु पूर्णानामपूर्णैरस्मदादिभिः ॥ २१ ॥
अथापि ब्रूहि नो ब्रह्मन् जन्मैतच्छोभनं कुरु । स तु विस्मित उत्थाय [5]तूर्णमन्यदगाद् गृहम् ॥ २२ ॥

---

१. जगतां स्थिति–विज. । २. स्वैरा–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ३. बोधं–वीर. । ४. स्म नारदः–श्रीधर. वंशी. जीव. विज. विश्व. । ५. तूष्णी–श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

कर्दमक्षमा

अन्वयः—नारद उवाच—हे बिभो ! अखिललोकनाथे, त्वयि; एतत्, अद्भुतम्, न, यत्, खलानाम्, दमः, सकलेषु, जनेषु, मैत्री, जगत्, स्थितिरक्षणाभ्याम्, निःश्रेयसाय, हि, ते, स्वेच्छावतारः, उरुगाय, सुष्ठु, बिदाम ॥ १७ ॥ अगाधबोधैः, ब्रह्मादिभिः, हृदि, विचिन्त्यम्, जनतापवर्ग, संसारकूपपतितोत्त, रणावलम्बम्, तव, अङ्घ्रियुगलम्, दृष्टम्, ध्यायन्, चरामि, यथा, स्मृतिः, स्यात् ॥ १८ ॥ हे अङ्ग, ततः, सः, नारदः, योगेश्वरस्य, योगमाया, बिवित्सया, कृष्णपत्न्याः, अन्यत्, गेहम् ॥ १९ ॥ तत्र, अपि, प्रियया, च, उद्धवेन, अक्षैः, दीव्यन्तम्, अपश्यत्, तत्र, परया, भक्त्या, प्रत्युत्थानादिभिः, पूजितः ॥ २० ॥ असौ, अविदुषा, इव, पृष्टः, कदा, भवान्, आयातः, इति, अपूर्णैः, अस्मदादिभिः, पूर्णानाम्, किं नु, क्रियते ॥ २१ ॥ ब्रह्मन्, अथ, अपि, नः, ब्रूहि, एतत्, नः, जन्म, शोभनम्, कुरु, सः, तु, विस्मितः, उत्थाय, तूर्णम्, अन्यत्, गृहम्, अगात् ॥ २२ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भगवता स्वस्यार्हणमनर्हं मन्यमानस्तत्संभावयन्नाह । नैवेति । सर्वमित्रत्वादेवमर्हणं न तु मम गौरवात् तर्हि कथं कंसादिष्वमैत्री तत्राह । खलानां दमश्च नैवाद्भुतमिति । कुतः । जगतः स्थितिर्धारणं रक्षणं पालनं ताभ्यां सह तस्य निःश्रेयसाय तवायं स्वेच्छावतार इति वयं सुष्ठु सम्यग्विद्मः । अतः खलदमः साधुसंमाननं च युक्तमिति भावः ॥ १७ ॥ यदुक्तं प्रभो किं करवामेति तत्राह । दृष्टमिति । भक्तजनताया अपवर्गरूपम् । किंच अतिदुर्लभतया ब्रह्मादिभिर्योगेश्वरैरपि हृदि विचिन्त्यम् । किंच संसारकूपे पतितानामुत्तरणायावलंबमाश्रयम् । एवंभूतं तवांघ्रियुगलं मया दृष्टमतः कृतकृत्योऽस्मि । तथापि त्वत्स्मृतिर्यथा स्यात्तथाऽनुगृहाण ततस्तद्ध्यायन्नेव नित्यं चरामीति ॥ १८-१९ ॥ अक्षैर्दीव्यंतमित्यादौ ददर्शेति ज्ञातव्यम् ॥ २०-२३ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् अर्हणम् । संभावयन्संभवं मन्वानः । तत्राक्षेपे । अद्भुताभावमाशंक्य समाधत्ते—कुत इति । तस्य जगतः । लोके हि सेव्यो यदि सेवकमर्चयेत्तदा तस्यामंगलं भवेत्त्वं तु स्वतंत्रः स्वसेवकं संपूज्यापि तस्मात्पूजां गृहीत्वापि तं दंडयित्वापि तस्य यथार्हं मंगलमेव करोषीत्याह—नैवेति । तत्राखिललोकानां नाथत्वादखिललोकानां जीवत्वात्त्वत्सेवकत्वमेव वस्तुतो भवेत् । तदुक्तं पाद्मे—"अकारेणोच्यते विष्णुः श्रीरुकारेण कथ्यते । मकारस्तु तयोर्दासः पंचविंशः प्रकीर्तितः ॥" इति । पञ्चविंशो जीवः । तत्र केषांचिदस्माकं विप्राणां त्वामभीक्ष्णं सेवमानानामपि त्वत्कर्तृकं पूजनमस्मन्मनोतिदुःखदं केषांचिदुद्धवविदुरादीनां त्वां सेवमानानां त्वत्कर्तृकं पूजाग्रहणं तन्मनोतिदुःखदम् । अन्येषां पशुतुल्यसंसारिणां त्वामभजतां त्वत्कर्तृककृपावलोकः । अन्येषां खलानां जरासंधादीनां दमस्त्वत्कर्तृकं सर्वमिदं ते मैत्रीं हितकारित्वमेव यतो जगतः स्थितिर्धारणं रक्षणं पालनं ताभ्यां सह निःश्रेयसाय प्रेमभक्तियोगाय मोक्षाय च स्वैरोऽयमवतार इति जानीम इति विश्वनाथः ॥ १७ ॥ भगवत्प्रश्नोत्तरमाह—भो मुने किमर्थमागमनं किमत्रैव तिष्ठासान्यत्र प्रतिष्ठासेत्यपेक्षायामाह—दृष्टमिति । किमित्याक्षेपे कुत इत्यर्थः । विचिंत्यमेव न तु प्राप्यमित्यर्थः । इतोऽपि विशेषमाह—किञ्चेति । उत्तरणायोपर्य्यागमनाय । अतस्तवांघ्रिदर्शनात् । ततस्तवानुग्रहात् । तत् चरणद्वंद्वम् । ननु तद्ध्यानं तव मनःसाध्यमेव किं प्रार्थनया तत्राह—यथा स्मृतिस्स्यात्तथाऽनुगृहाणेति । तदपि त्वदनुग्रहसाध्यं नान्यसाध्यमित्यर्थः । यद्वा—यथा च स्मृतिर्मद्विषयकं कृपानुसंधानं तव स्यात्तथानुगृहाणेत्यर्थः ॥ १८ ॥ ततो भगवत्प्रार्थनोत्तरम् । स कृष्णसत्कृतः । अंगेति संबोधने । कृष्णपत्न्याः क्रमप्राप्तत्वात्सत्यभामाया गेहमाविशत् योगमाया परमाचिंत्यशक्तिस्तस्या बिवित्सया कार्यद्वारानुभवेच्छया ॥ १९ ॥ तत्रापि तस्मिन्नपि गेहे ॥ २० ॥ असौ नारदः । अविदुषेव पूर्वं गृहे नारदागमनमजानतेव । पूर्णानां विरक्तानां युष्माकम् । अपूर्णैर्गृहस्थैः । गृहकृत्यानामनंतत्वेन पूरयितुमशक्नुवद्भिरित्यर्थः । मनुष्यनाट्यविडंबनमेतत् ॥ २१ ॥ यद्यपि वयमनिच्छास्तथाप्यस्मत्पावनार्थमित्यर्थः । स नारदः ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नैवाद्भुतमिति सामान्यविवक्षया नपुंसकत्वमेकत्वञ्च किं तदित्यपेक्षायां विशेषविवक्षयाह मैत्री यथार्हसत्कारः अखिललोकनाथ इति तद्रूपत्वेन स्वतस्तत्र तत्र तुल्योऽपि तद्द्वयं नैवाद्भुतमित्यर्थः । तत्र हेतुः, निःश्रेयसायेति । तत्र निःश्रेयसे स्वभक्तिप्रचुरमङ्गलं मुक्तिमात्रञ्च तद्द्वयं यथायथं दत्तमित्यर्थः । तत्र तत्र सामर्थ्ये हेतुः, विभो इति । अत एव हे उरुगाय ! सर्वतो गीतकीर्त्ते ॥ १७ ॥ जनतेति सिद्धशुद्धपरिजनभावानां पर्य्यवसानफलरूपं ब्रह्मादिभिरित्यन्येषां परममहतामपि हृदि परमरहस्यहृद्वृत्तिविशेषे विचिन्त्यं यत्नातिशयेन स्मरणीयं संसारेति किं बहुना सर्वेषामपि संसारिणां संसारकूपोत्तरणार्थमाश्रययोग्यं तवाङ्घ्रियुगलं दृष्टम् अहो मम भाग्यमहिमेतिभावः । अथ तादृशस्य भाग्यस्य स्थैर्य्यं दुर्लभं मन्यमानः प्रार्थयते—ध्यायन्निति । चरामि चरेयमित्यर्थः । ननु तत्तव मनःसाध्यमेव किं प्रार्थनया तत्राह यथा स्मृतिः स्यात्तथाऽनुगृहाणेति तदपि त्वदनुग्रहैकसाध्यं नान्यसाध्यमित्यर्थः । यद्वा यथा ध्यायंश्चरामि तथाऽनुगृहाण यथा च स्मृतिर्मद्विषयककृपानुसन्धानं तव

स्यात्तथा चानुगृहाणेत्यर्थः ॥ १८ ॥ तस्तदनंतरम् अन्यत् श्रीरुक्मिणीगृहादपरं पत्न्याः क्रमप्राप्तत्वात् श्रीसत्यभामायाः गेहमाविशत् । योगमाया चित्रं बतैतदित्यादिना तर्किता परमाचिन्त्यशक्तिः तस्या विवित्सया कार्य्यद्वारा अनुभवेच्छया ॥ १९ ॥ तत्रापि श्रीकृष्णं ददर्शेति शेषः । किम्वा अचष्टेति वक्ष्यमाणेनैवान्वयः । उद्धवेन च तत्र साक्षितया स्थापितेन चकाराभ्याम् देवने द्वयोरपि प्राधान्यं बोध्यते साक्षिणोपि तत्क्रोडासाहाय्यात् पूजितोऽसौ श्रीभगवता ॥ २० ॥ पृष्ट इति सार्द्धकम् । अविदुषा तदागमनादिकमजानतैव पृष्टश्च किन्तत् कदेत्यादि क्रियत इत्यादि च । इतिशब्दस्य कुर्वित्यन्तेष्वन्वयात् अस्मदिति बहुत्वं श्रीबलदेवाद्यपेक्षया ब्रूहि किञ्चिदादिश ॥ २१ ॥ अचष्ट अपश्यत् गोविन्दं तादृशलीलाकौतुकाय पृथ्व्यामवतीर्णं साक्षाद्भगवन्तं तत्रापि तथाग्रे सर्वतोपि तस्य पूर्ववत्पूजादिकं ज्ञेयं पूर्वत्र तत्रापीत्यादिशब्दस्वारस्यात् इत्यर्थधर्मकामेष्वित्यत्र तथैव व्याख्यास्यमानत्वाच्च शिशून् सुतानिति सुतान् शिशूनिति वा पाठः ॥ २२ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अखिललोकानां नाथेऽपि त्वयि नैवाद्भुतं मदर्हणादिकमेतदिति शेषः । यतो जनेषु तव मैत्री स्नेहः, न च सा लोकानामिव किञ्चिदपेक्षयेत्याह—विभो ! हे सर्व्वथा परिपूर्णेति । हि हेतौ, स्वैरावतारः स्वेच्छया वैकुण्ठलोकादवतरणम्, अतएव ऊरुगाय । सर्व्वलोकेषु यशो गानं यस्येति तत्सम्बोधनम् । अन्यत्तैर्व्याख्यातम् । यद्वा, जनेषु मादृशेषु भक्तेषु मैत्री, खलानामभक्तानां दमो दण्डश्चेत्येतत् अखिललोकनाथत्वात् सर्व्वत्र तुल्येऽपि त्वयि नैवाद्भुतम्, यतः सम्यक् समीचीनोऽयं स्वैरावतारः सर्व्वेषां निःश्रेयसाय मंगलाय । कथम् ? जगतः स्थितिः स्वभक्तमैत्र्या भक्तिप्रवर्त्तनेन स्थैर्यं पोषणं वा, रक्षणञ्च खलदमेन भक्तिविघ्नविनाशात्, ताभ्याम्; एतत् प्रकारद्वयेनेत्यर्थः । यथा समत्वेन विरुद्धमपि तद्द्वयं त्वयि नैवाद्भुतं तथा दासस्य मम प्रभुणा त्वयार्हणादिकं विरुद्धमपि तव सम्यक् स्वैरत्वादद्भुतं नैवेति भावः ॥ १७ ॥ विचिन्त्यमङ्घ्र्योर्युगलमपि विलम्बेनैव चिन्त्यम्, जनतेति मोक्षापेक्षकैरेव प्रीत्या सेव्यत्वम्, ब्रह्मेति मुक्तैरप्यदृश्यत्वम्, संसारेति मुमुक्षूणां परमापेक्षत्वमिति महादौर्लभ्यमुक्तम् । एवमात्मनो भक्तत्वादिराहित्यं सूचयति,—परमभक्त्या दैन्येन तत्तदभिमानाभावात् । अन्यत्तैर्व्याख्यातम् । यद्वा, जनानां भक्तानां तापस्य विरहजस्य वर्गः साक्षाद्दर्शनादिना वर्ज्जनं यस्मात्तत्; इति भक्तैः प्राप्यत्वं चरामि चरिष्याम्येव; यद्वा, अत्र गृहे गृहे चरामि, यतो दृष्टं साक्षाद्दृष्टतया स्वतः सदान्तःपरिस्फूर्त्तेः, किन्तु यथा कर्त्तृका मत्स्मृतिः स्यात्तथानुगृहाण, सदाविघ्नेन त्वं मां स्मरेस्तमनुग्रहं कुर्व्वित्यर्थः ॥ १८ ॥ ततस्तदनन्तरम्; अन्यत् श्रीरुक्मिण्या गृहाद्भिन्नम्, कृष्णस्य प्रेमभरेण चित्ताकर्षकस्य, पत्न्याः श्रीसत्यभामाया गेहमाविशत्, योग ऐश्वर्य्यम्, तस्य माया विभूतिस्तस्या विवित्सया तत्त्वजिज्ञासया, किंवा विद्लाभे साक्षादनुभवेच्छया योगेश्वराणां श्रीकर्द्दमादीनामपीश्वरस्येति योगमायाया असाधारण्यं सूचितम् । अंग ! हे राजन् ! यद्वा, अंगं श्रीमूर्त्तिस्तस्य योगमाया एकस्यापि बाहुल्ये शक्तिविशेषस्तद्विवित्सया ॥ १९ ॥ अपि तु तत्र तु, दीव्यन्तं भगवन्तम्; यद्वा, तत्रापि कृष्णं ददर्शेति शेषः । किंवा अचष्ट गोविन्दमिति वक्ष्यमाणेनैवान्वयः । च-काराभ्यां देवने द्वयोरपि प्राधान्यम्, तेन चोद्धवं प्रति प्रीतौ तयोः साम्यमपि द्योतयति । पूजितोऽसौ श्रीभगवता, आदि शब्दात् पाद्यादयः ॥ २० ॥ अविदुषा तदागमनादिकमजानतैव, उक्तञ्च क्रियत इत्यादिकम्, अस्मदादिभिर्मनुष्यैर्यादवैरीश्वरैरपि वा, अस्मदिति बहुत्वं श्रीबलदेवाद्यपेक्षया, किंवा निजसर्व्वैश्वर्य्यपूर्णताबोधनार्थं गौरवात् ॥ २१ ॥ ब्रूहि किञ्चिदादिश; किमर्थम् ? तदाह—नोऽस्माकं जन्मेति । ब्रह्मन् ! हे सर्व्ववेदस्वरूपेति तद्योग्यतोक्ता ॥ २२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

नरनारायणीयं हि वैभवं वर्णयन् मुनिः । कृष्णं नारायणश्चाहानन्तमूर्ति स्वशेषिणम् ॥

स्थितिः रक्षणञ्च विरोधिनिरसनं ताभ्यां तदर्थं निःश्रेयसाय मोक्षप्रदानाय स्वैरावतारः स्वेच्छावतारः ॥ १८–१८ ॥ योगमाया आश्चर्यशक्तिः ॥ १९–४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्युक्तः प्राह नारदः—नैवेति द्वाभ्याम् । तावदात्मार्हणमनर्हणम्मन्यमानस्तत्सम्भावयन्नाह—नैवेति । सर्वेषु जनेषु विषयभूतेषु मैत्रीत्येतल्लोकनाथे त्वयि नैव चित्रं सर्वामित्रत्वा देवमर्हणं नतु (मयि) गौरवादातिभावः । कथं तर्हि कसादिष्वमैत्री ? तत्राह—दम इत्यादि । खलानां दमश्च नैवाद्भुतम् इति भावः । कुतः हि यस्मात् हे उरुगाय जगतः स्थितिर्द्धारणं रक्षणं पालनं ताभ्यां चतुर्थ्यन्तमिथं निःश्रेयसाय मोक्षप्रदानाय च ताभ्यां सह मोक्षप्रदानायेति वा स्वैरावतारः स्वेच्छावतारः इति वयं सुष्ठु सम्यक् विद्मः अतः खलदमनः साधुसम्माननञ्च तव युक्तमिति भावः । वयमिति भगवन् कृतार्थत्वादात्मानं बहुमन्यमानः प्राहेत्यर्थः ॥१७॥ यदुक्तं प्रभो भगवते करवाम किं त इति सत्र स्वमनोचितं तत्प्रार्थयते— दृष्टमिति । तावत्तवाङ्घ्रियुगलं

दृष्टं मयेति शेषः । कथम्भूतम् ? जनतायाः प्रपन्नजनसमूहस्यापवर्गमपवर्गसाधनं फलभूतं वा किञ्चातिदुर्लभतया ब्रह्मादिभिर्योगीश्वरैरपि हृदि विचिन्त्यः अगाधः बोधो विज्ञानं यस्मात् तथाभूतं संसारकूपे पतितानाम् उत्तारणायावलम्बमाश्रयम् एवम्भूतं दृष्ट्वा कृतार्थोऽहमस्मीति भावः । अतस्तदेव ध्यायन् चरामि किन्तु तद्विषया स्मृतिर्यथा स्यात्तथाऽनुगृहाण ।। १८ ।। तत इति । स नारदः अन्यत्कृष्णपत्न्यागृहमाविशत् किं कर्त्तुमिच्छया अङ्ग हे राजन् ! योगीश्वरेश्वरस्य भगवतो योगमायायामाश्चर्यशक्ति वेत्तुमिच्छया ।। १९ ।। दीव्यन्तमिति । तत्रापि गृहे प्रिययोद्धवेन च सहाक्षैर्देवनाक्षैर्दीव्यन्तं क्रीडन्तं ददर्शेति शेषः । असौ नारदः प्रत्युत्थानादिभिः उत्कृष्टया भक्त्या तत्पूर्वकं पूजितः ।। २० ।। अविदुषाऽजानतेव भगवता पृष्टश्च, प्रश्नमेवाह—कदेत्यादिना कुर्वित्यन्तेन । इति शब्दः कुर्वित्यनन्तरं योज्यः इति पृष्टश्चेत्यन्वयः । आयात इति छेदः अपूर्णरागन्तुकपूर्त्तिरहितैः स्वत एव परिपूर्णत्वात्समस्तकामैरिति यावत् तैरप्यस्मदादिभिः पूर्णानां युष्माकं किं क्रियते निरपेक्षत्वात् किमपि न क्रियत एवेति भावः ।। २१ ।। यद्यप्येवमथापि हे ब्रह्मन् ? ब्रूहि ममैतज्जन्म शोभनं कुरु सफलं कुर्वित्यर्थः । भागवतकैङ्कर्यमकुर्वतः शरीरमशुभमिति भावः । मत्विति । सतु नारदोपि विस्मितस्तूष्णीम् उत्थायान्यदपि गृहमाजगाम ।। २२ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

तत्र नारदः प्रतिवक्ति-नेति । त्वयि अद्भुतं नैव मानादिदानमितिशेषः । स्वैरावतारः स्वेच्छावतार इति सुष्ठु विदाम ।। १७ ।। अद्य दृष्टं तवाङ्घ्रियुगलं ध्यायन् चरामि यथा स्मृतिः स्यात्तथा अनुगृहाण ।। १८–१९ ।। अक्षभिरक्षैः दीव्यन्तं देवनक्रियां कुर्वन्तम् ।।२०।। अविदुषेव पूर्वं गृहे नारदागमनमजानतेव हरिणा भवान् कदाऽऽयात इत्यसौ नारदः पृष्टः ।।२१–२३।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अन्यत् अन्यस्या इत्यर्थः ।। २२–३६ ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

लोके हि सेव्यो यदि सेवकं पूजयेत् तदा सेवकस्यामङ्गलं भवेत् त्वन्तु स्वतन्त्रः स्वसेवकं सम्पूज्यापि तस्मात् पूजां गृहीत्वापि तं दण्डयित्वापि तस्य यथार्हं मङ्गलमेव करोषीत्याह—नैवेति । अखिललोकनाथे त्वयि नाद्भुतमेतत् किन्तद्वित्यत आह सकलेषु जनेषु मैत्री हितकारित्वमेव । तवाखिललोकनाथत्वादखिललोकानां जीवत्वात् त्वत्सेवकत्वमेव वस्तुतो भवेत् । यदुक्तं पाद्मे प्रणव व्याख्याने "अकारेणोच्यते विष्णुः श्रीरुकारेण कथ्यते । मकारस्तु तयोः दासः पञ्चविंशः प्रकीर्त्तितः ।।" इति पञ्चविंशो जीवः । तत्र केषाञ्चिदस्माकं विप्राणां त्वामभीक्ष्णं सेवमानानामपि त्वत्कर्त्तृकं पूजनम् अस्मन्मनोप्रतिदुःखप्रदं केषाञ्चिदन्येषामुद्धवविदुरादीनां त्वां सेवमानानां त्वत्कर्तृकं पूजाग्रहणं तन्मनोऽतिदुःखप्रदम् अन्येषां पश्वन्त्यसांसारिकजनानां त्वामभजतां त्वत्कर्तृकः कृपावलोकः । अपरेषां खलानां जरासन्धादीनां दमस्त्वत्कर्तृकः सर्वमिदं ते मैत्री हितकारित्वमेव यतो जगतः स्थितिर्धारणं रक्षणं पालनं ताभ्यां सह निःश्रेयसाय प्रेमभक्तियोगाय मोक्षाय च स्वैरोऽयमवतार इति जानीमः ।। १७ ।। भो महामुने ! किमर्थकमिदमागमनं किमत्रैव तिष्ठा सा अन्यत्र वा प्रतिष्ठा सेत्यपेक्षायामाह—दृष्टमिति ।। १८ ।। विवित्सया उपलम्भेच्छया ।। १९ ।। तत्र सत्यभामागृहेऽक्षैः दीव्यन्तं तं ददर्श ।। २०–२१ ।। तूष्णीं स्थितं नारदमतिविस्मितं प्रत्याह—अथापीति ।। २२ ।।

गूढार्थदीपिनी

हे उरुगाय । सकलेषु साधुषु मैत्री खलानां दमश्च एतत् द्वयमपि त्वयि अद्भुतम् असम्भावितं नास्ति । यतः जगतः स्थितिरक्षणाभ्यां सह निःश्रेयसाय तवायं स्वेच्छावतार इति वयं सुष्ठु विद्मः । उरु बहुधा शास्त्रेषु गीयते इति उरुगाय । स्थितिः धारणम् ।। १७ ।। हे भगवन् । तव अङ्घ्रियुगलं दृष्टं न च तृप्तोऽस्मि अतः तदेव ध्यायन् विचरामि स्मृतिश्च यथावत् स्यात् तथा मामनुगृहाणेत्यन्वयः । कथंभूतम् । जनताया अपवर्गो मोक्षो यस्मात् । जनानां तापस्य वर्गो वर्जनं यस्मात् । पुनश्च ब्रह्मादिभिः हृदि विचिन्त्यम् । पुनश्च । संसारकूपपतितानामुद्धरणाय अवलम्बम् आश्रयीभूतं सहायकमित्यर्थः ।। १८ ।। अङ्ग हे राजन् । कृष्णपत्न्याः क्रमप्राप्तसत्यभामायाः गृहम् । विवित्सया ज्ञातुमिच्छया । विन्दतेः रूपम् ।। १९ ।। पाशैः दीव्यन्तं ददर्शेति शेषः । अविदुषेव अजानतेव पृष्टः कदेति ।। २० ।। पूर्णानां विरक्तानां युष्माकम् । अपूर्णः गृहस्थैः किं नु क्रियते अथापि । किञ्चित् कार्यं ब्रूहि । शोभनं सफलम् जन्म च ।। २१ ।। अचष्ट अपश्यत् । एवमग्रेऽपि सर्वत्र योजनीयम् ।। २२ ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इत्थं सत्कृतः श्रीनारद उवाच—नैवाद्भुतमिति द्वाभ्याम् । हे विभो ! सकलेषु जनेषु मैत्रीत्येतल्लोकनाथे त्वयि न चित्रम् सर्वजनमित्रत्वादित्थं मम सत्कारस्त्वया कृतो न तु मयि गौरवादितिभावः । ननु कंसादिषु अमैत्र्यपि प्रसिद्धा तत्कथं

सकलजनमित्रत्वं ममेत्यत आह—दम इति। हि निश्चितं खलेषु दमोपि त्वत्कर्तृको निःश्रेयसाय तेषां कल्याणाय निखिलमित्रत्वं प्रतिपादयति—हे उरुगाय! जगतां स्थितिरक्षणाभ्यां धारणाय पालनाय च स चायं तव स्वैरावतारः जातावेकवचनं तव स्वेच्छावतारा इति वयं सम्यक् विद्मः ॥ १७ ॥ भगवते किं कुर्वामिति यदुक्तं तत्राह—दृष्टमिति। तवाङ्घ्रियुगलं दृष्टमेतावतैव कृतार्थोऽस्मीति भावः। तथापि यथा स्मृतिः तवाङ्घ्रियुगलस्मृतिः स्यात् तथाऽनुगृहाण तदेव ध्यायन् नित्यं चरामि ॥१८–१९॥ दीव्यन्तं क्रीडन्तं ददर्शेति शेषः। तत्रापि भक्त्या पूर्ववत् पूजितः ॥ २० ॥ कदाऽऽयातो भवानिति अविदुषेव पृष्टः एवं पूजनप्रश्नादिकमग्रेपि बोध्यम् ॥ २१–२२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवं देवसत्कृतः किं कृतवान्नारद इत्यत आह। नेति। हे विभो विविधभवनशक्त। अखिललोकनाथे त्वयि मदर्हणमद्भुतम्। नैव जनेषु मैत्री भजतः। अनेन सज्जनमात्रमित्रत्वात्सहजं तव मदर्चनं न त्वर्चनीयमन्माहात्म्यादतोऽद्भुतं नैवेति योजना। खलानां दमं शिक्षां च दधतो हे उरुगाय तवायं जगतां सदसदादीनां स्थितिं च रक्षणं च ताभ्यां सह निःश्रेयसाय सतेऽसते च मोक्षाय स्वैरावतारः स्वेच्छोपात्तोऽवतारो न कर्मायत्त इति सुष्ठु निःसन्देहं विदाम विद्मः ॥१७॥ स्वाशयं प्रकटयति। दृष्टमिति। संसारकूपपतितोत्तरणावलम्बमगाधबोधैर्ब्रह्मादिभिर्हृदि विचिन्त्य जनानां तापस्य वर्गो वर्जनं येन तत्। अनन्तरं जनतायाः खलातिरिक्ताया अपवर्गो मोक्षो यस्मात्तत्। सामान्यजनसङ्गापवर्गो यस्मादिति वा। अङ्घ्रियुगलं पादयुगलं दृष्टं तदेव देव ध्यायंश्चरामि। यथा मम तत्स्मृतिः स्यात्तथाऽनुगृहाणानुग्रहं कुरु ॥ १८ ॥ अन्यदा किञ्चित्कालान्तरेऽन्यत्कृष्णपत्न्या गेहं नारद अविशत्। अङ्ग हे राजन्। योगेश्वरेश्वरस्य कृष्णस्य योगमायां वेदितुमिच्छा विवित्सा तथेति। अङ्गनानां प्रातिस्विकं कलेवराणां योगः सम्बन्धस्तद्विषयिण्या मायायाः शक्तेर्विवित्सा तयाऽऽविशदिति वा ॥ १९ ॥ तत्र तस्मिन्गेहेऽक्षभिरक्षैर्दीव्यन्तं क्रीडन्तम्। दीव्यन्तमक्षैस्तत्रापीति पाठः सरलः। प्रियया तद्गृहगतगृहिण्या उद्धवेन स्वामान्येन चोत्सवेनेत्याप्यर्थः। पत्युत्थानासनादिभिः परया भक्त्या पूजितः ॥ २० ॥ कदा भवानायात इत्यविदुषेव पृष्टश्च। पूर्णानां भवादृशानामपूर्णैरस्मदादिभिः किन्तु क्रियते कर्तव्यान्तराभावादिति भावः ॥ २१ ॥ अथाऽपि तव पूर्णकामत्वे मम पूर्णत्वे सत्यपि हे ब्रह्मन् ब्रूहि करणीयमिति शेषः। एतज्जन्म शोभनं भवेत्सेवोपयातमङ्गलं कुरु। स त्वेवमुक्तो नारदो विस्मित उत्थाय तूर्णमन्यदगात् ॥ २२ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्रोत्तरमाह नारदः नैवाद्भुतमिति। वक्तव्यं तु न किञ्चित्, कृतानुमोदनं तु कर्तव्यं भवति। अन्यथा पूजा कृतैव न स्यात्। अनङ्गीकारात्। तत्स्वतोऽङ्गीकारे अयुक्तं स्यात्, अतो भगवदीयधर्मत्वेनाभिनन्दनमुच्यते। हे विभो, सर्वकरणसमर्थ। एतद्ब्राह्मणपूजनं त्वयि नाद्भुतम्, अखिललोकाः शिक्षणीया इति। भगवांश्चाखिललोकनाथः। त्रिविधं हि कर्म जगद्रक्षार्थं क्रियते। खलानां दमः, अन्तर्यामितया सर्वसख्यम्, एतादृशी ब्राह्मणपूजा च। एतस्य कर्मणः बन्धहेतुत्वमाशङ्क्य निराकरोति निःश्रेयसायेति। अन्येषामपि मोक्षार्थमेतत्करणं श्रोतॄणां कीर्तयितॄणां च। युक्तश्चायमर्थः। अन्यथा त्रिविधानि कर्माणि लोकानां न शान्तानि भवेयुः। सजातीयनिवर्तकाभावात्। एतज्जीवैरपि कर्तुं शक्यत इति भगवतो विशेषं वक्तुमाह जगत्स्थितिरक्षणाभ्यां सहेति। स हि जगत् स्वात्मनि धारयति, पालयति च। स्वेच्छावतारेति सम्बोधनं तादृशस्यापि कर्मकरणं लीलार्थमिति सूचयति। सप्तम्यन्तं वा पदं हेतुप्रकथनाय, अन्यथा कथं लोकाः कीर्तयेयुः, कथं वा मुक्ता भवेयुरिति। अत्र प्रमाणमाह विदामेति। सुष्ठ्विति अनुभवश्रुतिभ्याम्, न तु तर्कमात्रेण ॥ १७ ॥ एवं कृताभिनन्दनं कृत्वा भगवदुक्तं नान्यथा कर्तव्यमित्यभिप्रेत्य स्वाभिलषितं किञ्चित् प्रसङ्गात् प्रार्थयते दृष्टं तवाङ्घ्रियुगलमिति। यदेतत् दृष्टम्, तद्ध्यायन् सर्वत्र चरामीति स्वाध्यवसायः। अत्र यथा स्मृतिः स्यात्, तथा अनुगृहाणेति कर्तव्यप्रार्थना। दुर्लभं ह्येतदेव। प्राप्तेऽपि बहवो बाधकाः। अतः स्मृतिर्भविष्यतीति न विश्वासः। कर्तव्यं च मम नान्यत्। अतश्चरणस्मरणार्थमनुग्रह एव कर्तव्यः। दृष्टमित्यनेन ज्ञानपक्षो निराकृतः। भगवच्चरणयोरेव जीवब्रह्मत्वात् स्वात्मपरमात्मसाक्षात्कारः सिद्ध एव। मोक्षपक्षमपि व्यावर्तयति। जनताया एवापवर्गं करोतीति। तत्रास्मदपवर्गे कः सन्देह इति भावः। एतस्मान्नान्यद्दुर्लभमस्तीत्यभिप्रायेणाह। अगाधबोधैः पूर्णज्ञानैरपि ब्रह्मादिभिर्हृदि विचिन्त्यमेव, न तु साक्षाद्द्रष्टुं शक्यम्। तस्माद्ब्रह्मादीनामप्येतदेव दुर्लभमिति नातः परतरं किञ्चिन्मृग्यम्। अनेन चरणस्य ऐहिकपारलौकिकफलेभ्योऽपि महत्त्वं निरूपितम्। किञ्च। भक्तिमार्गस्यैतदेव प्रवर्तकमित्याह संसारकूपेति। 'यावन्नु काय'मिति न्यायेन शास्त्रानुसारेण ये स्वहितं न कृतवन्तः, 'तान्नो चेत् प्रमत्त'मिति न्यायेन विषयाः कूपे (निपातयन्ति। ते कूपे) पतिताः, तेषामुत्तरणे तीर्थाभावात् पक्षाभावाच्च कर्मवल्ली अन्तरेव संवृता नोपरिनयतीति, ज्ञानं च सूत्रवत् नो पर्याकर्षतीति, भगवच्चरणारविन्दद्वयमेव संसारकूपे पतितानां तत उत्तरणे अवलम्बनं भवति। अतो मार्गत्रयेऽप्येतदेव शरणमिति ध्यायंश्चरामि। एतावदुक्त्वा भगवता अनुज्ञातः निर्गत इति ज्ञातव्यम् ॥ १८ ॥ ततो निर्गतस्य गृहान्तरप्रवेशमाह ततोऽन्यदाविशद्गेहमिति। अन्यत्पूर्वोक्तं समानम्। कृष्णपत्न्या इति। भगवान् पूर्वगृहे दृष्ट इति नारदस्य भगवत्पत्नी वात्र

स्थास्यतीति बुद्धिरिति कृष्णपत्न्या इत्युक्तम्। स तु कृपां प्रार्थयित्वा निर्गतः। ततोऽपि बहिर्मुखत्वाद्गृहान्तरमेव प्रविष्टः। यतो नारं द्यति खण्डयति व्यसनस्वभावः। तस्य गृहान्तरप्रवेशे मनीषितमाह योगेश्वरेश्वरस्येति। योगस्यैव गतिर्दुर्ज्ञेया, अलौकिकत्वात्। तत्रापि योगेश्वरस्य। यो योगमपि वशीकृतवान्, तेषामपीश्वरो भगवान्। तस्यापि योगमाया। तस्या विवित्सा, यस्याः वैभवं भगवानपि न मन्यते एतावदिति। अङ्गेत्यप्रतारणार्थं सम्बोधनम् ॥ १९ ॥ तत्र स्थितस्य भगवतः पूर्वदृष्टापेक्षया भिन्नमेव सन्निवेशमाह दीव्यन्तमक्षैरिति। सर्वत्र तादृश एव सन्निवेशो वक्तव्यः, येन पूर्वगृहे स्थितस्य शीघ्रं समागमनशङ्कापि न सम्भवति। तत्रापि 'भगवन्तं ददर्शे'ति पूर्वा क्रियैवानुसन्धेया। परं प्रियया भार्यया उद्धवेन च सह अक्षैर्दीव्यन्तमिति ॥२०॥ तस्य नारदस्य भगवान् मायया तथा प्रदर्शयतीति बुद्धिव्यावृत्त्यर्थं भगवान् किञ्चिदुक्तवानित्याह पृष्टश्चाविदुषेवासाविति। असौ पूर्वदृष्ट एव भगवान्, प्रत्यभिज्ञानस्य दृष्टत्वात्, तथापि कदायातो भवान् इति पृष्टवान्। असौ नारदो भगवता पृष्टः, यथा सः स्वाकारगोपनं करोति परीक्षार्थम्, तथा भगवानपि कृतवानित्यभिप्रायेणाह तथा अविदुषेवेति। चकारात्पूजा। कृतं सर्वं कृतवान्। स्तुतिं च कृतवानित्याह क्रियते किं नु पूर्णानामिति। पूर्ववद्भगवन्नारदयोः धर्मव्यत्यासो द्रष्टव्यः। तदोपपद्यत एव। पूर्णानां भवतां अपूर्णैरस्मदादिभिः किं कर्तव्यमिति। यथा अज्ञाननाट्यम्, एवं तत्कार्यनाट्यवाक्यमपीति केचित्। लौकिकी वा भाषा तन्मोहार्था, तद्बुद्धौ भगवान्परिच्छिन्नो भासत इति। 'ये यथा मां प्रपद्यन्त' इति न्यायेन भगवद्वचनमित्यपरे ॥ २१ ॥ तथापि समागतस्य भगवद्गुणनिर्धारार्थं प्रवर्तमानस्य हितं कर्तव्यमिति भक्तिशास्त्रमनुसृत्याह अथापि ब्रूहि नो ब्रह्मन्निति। अस्मान्प्रति ब्रूहि, किञ्चित्प्रार्थयेत्यर्थः। ब्रह्मन्निति ब्राह्मणस्य याचनमुचितमिति। किञ्च। एतन्मम जन्म अवतारः भक्तोद्धारक एवेति। तत्र मुख्यो भवानिति स्वात्मानं पूर्णं कुर्वन् जन्म शोभनं कुरु। स्वजन्म वा। ततो यज्जातं तदाह स तु विस्मित उत्थायेति। पारमार्थिकमेतद्वचनं न भवतीति स्वमनसि निश्चित्य, मां वक्ष्यति, शीघ्रं तत आगत्येति सम्भावनां कुर्वन्, शीघ्रमुत्थाय, ततो गत इत्याह। हेत्वदर्शनाद्विस्मितो जातः। भगवतो वैभवेन समागमनं निराकरोति तुशब्दः। उत्थाय तूर्णमेव अन्यद्गृहमगात् ॥२२॥

श्रीसुबोधिनी-सारः

नारदोक्तिः। हे विभो हे अखिललोकनाथ सकलेषु जनेषु मैत्री खलानां पापिनां कंसादीनां दम इत्यद्भुतमाश्चर्यं नैव जगतः स्थितिधारणं रक्षणं पालनं च ताभ्यां सह तव स्वैरं काममवतारो निःश्रेयसाय मंगलार्थं भवतीति सुष्ठु सम्यग् वयं विदामो विद्मः हि युक्तम् ॥ १७ ॥ अगाधो बोधो ज्ञानं येषां तैर्ब्रह्मादिभिर्हृदि मनसि विचिन्त्य जनताया जीवसंघस्यापवर्गं मोक्षरूपं तवांघ्रियुगलं पादद्वंद्वं दृष्टमस्माभिः संसारकूपे पतितानामुत्तारणायावलंबमाश्रयं तत् ध्यायन् अहं चरामि स्वैरं पर्यटामि एतेन कृतार्थतामाशास्ते यथा स्मृतिः स्यात्तथा त्वमनुगृहाण मामनुकंपय ॥ १८ ॥ ततो गृहात् कृष्णपत्न्याः अन्यद्गेहं स नारद आविशत् योगेश्वराणामपि ईश्वरस्य योगमायां वेत्तुमिच्छया ॥१९॥ तत्र द्वितीयगेहेपि प्रियया स्त्रिया उद्धवेन च सहाक्षैः पाशकैर्दीव्यंतं क्रीडंतं ददर्शेति शेषः सम्मुखागमनासनादिभिः परया भक्त्या पूजितः ॥ २० ॥ अविदुषाऽज्ञेनेव श्रीकृष्णे नासौ नारदः पृष्टः भवान् कदायात आगत इति पूर्णानां भवताम् अपूर्णैरस्मदादिभिः किं नु क्रियते ॥ २१ ॥ अथापि एवं सत्यपि हे ब्रह्मन् त्वं ब्रूहि कार्यं प्रार्थयेत्यन्ये नोस्माकमेतज्जन्म शोभनं सफलं कुरु स तु नारदः तूष्णीमब्रुवन्नेवोत्थाय विस्मितोऽन्यद्गृहमगात् ॥२२॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

दृष्टमित्यत्र। भगवच्चरणयोरेवेति। चरणयोरक्षरात्मकत्वाज्जीवब्रह्मणोश्चांशांशिभेदेनाक्षरात्मकत्वादिति भावः। मोक्षपक्षमपीति। मोक्षः प्रार्थनीय इतिपक्षमित्यर्थः। तेषामुत्तरणे इति। संसारकूपपतितानामूर्ध्वतरणेऽवलम्बनाभावात्पक्षिणामिवोर्ध्वगत्यभावाच्चेत्यर्थः। ज्ञानं चेति। यथा कूपे पतितेन ध्रियमाणं सूत्रमवलम्बनाभावे स्वयमपि पतति, कुतस्तमाकर्षेत्, तथा स्वात्मज्ञानमपि भगवच्चरणावलम्बनाभावे स्वयमपि संसारे एवान्ततः पतति, न तु जीवमुपर्याकर्षति, 'ज्ञानिनामपि चेतांसी'तिवाक्यादित्यर्थः। ततोऽन्यदाविशदित्यत्र। भगवत्पत्नी वेति। 'सत्यव्रत'मित्यस्य व्याख्याने 'यद्वा सर्वोत्कृष्ट'मित्यत्र वाशब्द एवकारार्थे टिप्पण्यां व्याख्यातः, तथात्रापि। अत्र गृहेऽन्या भगवत्पत्न्येव स्थास्यति, भगवांस्तु पूर्वगृहे दृष्टस्तत्रैव स्थितो भविष्यतीत्यर्थः। स तु कृपामिति। भगवांस्तत्रैव स्थित इति तद्व्यावृत्त्यर्थं तुशब्दः। बहिर्मुखत्वे हेतुमाहुः यत इति। नरधर्मान्व्यसनानि खण्डयति इति हेतोः खण्डनार्थं व्यसनपर्यालोचनस्वभावाद्बहिर्मुख इत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्युक्तो नारदः प्राह—नैवेति द्वाभ्याम्। हे विभो सर्वथासर्वकरणसमर्थ! सकलेषु साधुजनेषु मैत्री तच्छिक्षार्थमसमत्सन्माननं खलानां परपीडाकराणां दमो दण्डश्च त्वय्यद्भुतं असंभावितं नैव भवति, हि यस्मात् जगतः स्थितिधारणं रक्षणं च ताभ्यां सह निःश्रेयसाय साधुजनानां धर्मादिचतुर्विधपुरुषार्थसिद्धये तवायं स्वैरावतारः स्वेच्छयावतार इति वयं सुष्ठु सम्यक् विदामः विद्मः। 'जनोद्धारार्थकीर्तनयोग्यस्वयशोविस्तारार्थमप्ययमवतार' इति सूचयन् संबोधयति—उरुगाय इति। 'युक्तमेवैतत् स्वामित्वात्, अन्यथा साधनवैफल्यं स्यात्' इत्याशयेनाह—अखिललोकनाथ इति ॥ १७ ॥ यदुक्तं 'किं करवाम' तत्राह—

दृष्टमिति। तवाङ्घ्रियुगुलं मया दृष्टम्, अतो यद्यपि तद्दर्शनेनैव कृतार्थोस्मि तथापि यथा निरन्तरं तत्स्मृतिश्च स्यात्तद्ध्यायन्नेव चरामि तथानुगृहाणेत्यन्वयः। एवं प्रार्थनायां तत्प्रभावं हेतुं सूचयन् विशिनष्टि—जनताया अपवर्गं मोक्षरूपं परमफलमिति। अतएवागाधबोधैः सर्वज्ञैरपि ब्रह्मादिभिः केवलं हृदि विचिन्त्यम्, तद्दर्शनं तु दुर्लभमेव। साधनरूपत्वमप्याह—दुस्तरत्वात् संसार एव कूपः तस्मिन्निपतितानामुत्तरणायावलम्बमाश्रयमिति ॥ १८ ॥ 'हे अङ्ग' इति संबोधनेन 'एतद्रहस्यश्रवणयोग्यस्त्वम्, अस्मदादिवद्विषयविमुखत्वात्' इति सूचयति। भगवतानुगृहीतोनुज्ञातश्च ततो गृहाद्विनिःसृतः स नारदः योगेश्वराणामपि ईश्वरस्य शक्तिप्रदस्य श्रीकृष्णस्य योगमायां अचिन्त्यशक्तिं विवित्सया कृष्णपत्न्याः अन्यद्गेहमाविशदित्यन्वयः ॥ १९ ॥ तत्रापि गृहे प्रियया भार्यया उद्धवेन च सह अक्षैर्दीव्यन्तं क्रीडन्तं भगवन्तं ददर्शेति शेषः। सर्वत्र विलक्षणस्तादृश एव सन्निवेशो भगवता प्रदर्शितः, येन पूर्वदृष्टगृहे स्थितस्य शीघ्रमत्र समागमनशङ्का न स्यादिति ज्ञेयम्। ततश्च तेन पूजित इत्यादि स्पष्टम्। 'भवान्कदा आयात' इत्यविदुषा अजानतेव भगवताऽसौ नारदः पृष्टश्चेत्यन्वयः ॥ २० ॥ अपूर्णैर्धनपुत्रगृहादिष्वासक्तैरस्मदादिभिः पूर्णानां युष्माकं किं नु कार्यं क्रियते कर्तुं शक्यते। तेषामपेक्षारहितत्वादित्याशयः। यद्यप्येवमथापि 'हे ब्रह्मन्! किञ्चित्कार्यं ब्रूहि, स्वनियोगेन ममैतज्जन्म शोभनं सफलं कुरु' इति प्रार्थितश्चेति शेषः। अत्र पूर्णस्यापि भगवतो अपूर्णैरित्याद्युक्तिर्लोकशिक्षार्था, अतो नारदोप्येवमेव ज्ञात्वा दूरत एव तत्र तत्र तद्वृत्तं दृष्टवान्, न समीपतो भाषणपूर्वकमिति ज्ञेयम् ॥ २१ ॥ तत्रापि शिशून् बालान् सुतान् लालयन्तं उपच्छन्दयन्तं अचष्ट अपश्यत् ॥ २२ ॥

अन्वितार्थप्रकाशिका

नेति ॥ हे विभो! हे उरुगाय! सकलेषु साधुजनेषु मैत्री तच्छिक्षार्थमस्मत्सम्माननं खलानां परपीडाकराणां दमो दण्डश्च अखिललोकनाथे त्वयि अद्भुतम् असम्भावितं नैव भवति। सामान्ये नपुंसकमेकत्वं च। हि यस्मात् जगतः स्थितिर्धारणं रक्षणं च ताभ्यां सह निःश्रेयसाय साधुजनानां कल्याणाय तवायं स्वैरावतारः स्वेच्छयावतार इति वयं सुष्ठु सम्यक् विदाम विद्मः। आर्षः। अतः साधुसम्माननं खलदमश्च युज्यते ॥ १७ ॥ किं करवामेत्युक्तं तत्राह—दृष्टमिति ॥ जनताया अपवर्गः मोक्षो यस्मात् यद्वा जनानां तापस्य वर्गो वर्जनं यस्मात् तत् अत एवागाधबोधैः सर्वज्ञैरपि ब्रह्मादिभिः केवलं हृदि विचिन्त्यं तद्दर्शनं तु दुर्लभमेव। संसार एव दुःखदत्वात् कूपः तस्मिन्निपतितानामुत्तरणायावलम्ब आश्रयणं यस्य तत्। व्याख्यानान्तरेऽपवर्गाव-लम्बयोः क्लैब्यमार्षमिति वक्तव्यं स्यात्। तवांघ्रियुगलं मया दृष्टम्। अतो यद्यपि तद्दर्शनेनैव कृतार्थोऽस्मि तथापि यथा निरन्तरं तत्स्मृतिः स्यात्तद्ध्यायन्नेव च चरामि चरेयं तथाऽनुगृहाण। यद्वा। यथा त्वत्स्मृतिः स्यात्तथाऽनुगृहाण। अतस्तद्ध्यायन्नेव चरामीति ॥ १८ ॥ तत इति ॥ अङ्ग हे राजन्! भगवताऽनुगृहीतोऽनुज्ञातश्च ततो गृहाद्विनिःसृतः स नारदः योगेश्वराणामपि ईश्वरस्य श्रीकृष्णस्य योगमायायाः विवित्सया ज्ञातुमिच्छया। इडभाव आर्षः। विन्दतेर्वा उपलम्भार्थता कृष्णपत्न्याः अन्यद् गेहं समीपस्थं सत्यभामागृहमाविशत् ॥ १९ ॥ दीव्यन्तमिति सार्द्धम् ॥ तत्रापि गृहे प्रियया भार्यया उद्धवेन च सह अक्षैर्दीव्यन्तं क्रीडन्तं भगवन्तं ददर्शेति सर्वत्र शेषः। इह सर्वत्र विलक्षणस्तादृश एव सन्निवेशो भगवता प्रदर्शितो येन पूर्वदृष्टगृहे स्थितस्य शीघ्रमत्र समागमनशङ्का न स्यादिति ज्ञेयम्। एवं योगमाययैव यौगपद्यं कालभेदक्रियाभेदेष्वपि ज्ञेयम्। यथा मज्जनाय कृताद्य-ममिति प्रातः पञ्चभिर्मखैरिति मध्याह्नः भुञ्जानमवशेषितमित्यपराह्णः कञ्चिच्छयानमिति रात्रिशेष इत्यादि। ततश्च भगवता नारदः परया भक्त्या प्रत्युत्थानासनादिभिः पूजितो भवान् कदा आयातः इत्यविदुषा अजानतेव भगवताऽसौ नारदः पृष्टश्च ॥ २० ॥ क्रियते इति ॥ अपूर्णैर्धनपुत्रगृहादिष्वासक्तैरस्मदादिभिः पूर्णानां युष्माकं किं नु कार्यं क्रियते कर्तुं शक्यते। तेषामपेक्षारहितत्वादित्याशयः। यद्यप्येवमथापि हे ब्रह्मन्! नोऽस्मान् प्रति किञ्चित्कार्यं ब्रूहि स्वनियोगेन ममैतज्जन्म शोभनं सफलं कुरु इति प्रार्थितश्चेति शेषः ॥ २१ ॥ स इति ॥ स नारदस्तु विस्मितः सन् उत्थाय तूष्णीमन्यद्गृहमगात्। तत्रापि गोविन्दं शिशून् बालान् सुतान् लालयन्तम् अचष्ट अपश्यत् ॥ २२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं भगवत्कृतं स्वपूजनमयोग्यं मत्वा नारदस्तं स्तुवन्नाह नेति सकलेषु जनेषु मैत्री यथा योग्यं सत्कारः जगतः स्थितये धारणाय रक्षणायर्वलनाय च। मुमुक्षूणां निःश्रेयसाय भक्तैः उरु बहुगीयतेत्युरुगायस्तत्संबुद्धिः तवायं स्वैरावतारः स्वेच्छावतार इति वयं सुष्ठु विदाम विद्मः ॥ १७ ॥ तुभ्यं किं करवामेति यदुक्तं तस्योत्तरमाह दृष्टमिति जनतायाः जनसमूहस्यापवर्गं मोक्षप्रदं अगाधः बोधो ज्ञानं येषां तैः संसारकूपे पतितानां उत्तरणाय अवलंबं आश्रणीयं यत्तवांघ्रियुगलमया दृष्टं तद्ध्यायन् सन् लोके चरामिचरेयं तस्य यथा स्मृतिः स्यात्तथा मामनुगृहाण ॥ १८ ॥ अंग हे राजन् ॥ १९ ॥ तत्रापि पूजितः अक्षैर्दीव्यंतं कृष्णम-चष्टेतिचतुर्थश्लोकेनान्वयः ॥ २० ॥ अविदुषा अजानतेव। हरिणा पृष्टः ॥ २१ ॥ ददर्शेत्युत्तरस्थं पदं सर्वत्र योज्यं ॥ २२–२३ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्युक्तो नारदः प्राह नैवेति द्वाभ्याम्। नैवेति। हे विभो, सकलेषु सर्वेषु जनेषु धर्मवर्त्तिषु लोकेषु, मैत्री तव मित्र-भावः, इत्येतत्, अखिललोकनाथे, त्वयि, अद्भुतमाश्चर्यं, नैव। सर्वमित्रत्वादेवं मदर्हणं, न तु मयि गौरवादिति भावः। कथं

तर्हि कंसादिष्वमैत्रीतत्राह। खलानां दमः एतदपि न चित्रम्। कुतः। हि यस्मात्, हे उरुगाय, जगतः स्थितिर्धारणं रक्षणं पालनं च ताभ्यां, चतुर्थ्यन्तमिदम्। निःश्रेयसाय मोक्षप्रदानाय च। यद्वा। ताभ्यां सह मोक्षप्रदानाय, तव स्वैरावतारः स्वेच्छावतारः, भवति। वयं सम्यक् विदाम विद्मः। अतः खलदमनं साधुसंमाननं च तव युक्तमिति भावः॥ १७॥ यदुक्तं 'प्रभो भगवते करवाम किं त' इति तत्र स्वमनीषितं प्रार्थयते। दृष्टमिति। हे भगवन्, जनतायाः प्रपन्नजनसमूहस्यापवर्गमपवर्गसाधनभूतं, फलभूतं वा। किं चातिदुर्लभतया, ब्रह्मादिभिर्विध्यादियोगीश्वरैरपि, हृदि विचिन्त्यं, अगाधः बोधो विज्ञानं यस्मात्तथाभूतं, संसारः एव कूपः प्रहिस्तत्र ये पतितास्तेषामुत्तरणायावलम्बमाश्रयभूतं, तव अङ्घ्रियुगलं, दृष्टं मयेति शेषः। अतः तदेव ध्यायन्, चरामि। किं तु स्मृतिरखण्डं तद्विषयं स्मरणं, यथा स्यात् तथा, अनुगृहाण॥ १८॥ तत इति। ततः, अङ्ग हे राजन्, योगेश्वरेश्वरस्य, योगमायाविवित्सया, सः नारदः, कृष्णपत्न्याः, अन्यत् गेहं, आविशत्॥ १९॥ दीव्यन्तमिति। तत्र तस्मिन् गृहेऽपि, प्रियया स्वपत्न्या, उद्धवेन च साकं, अक्षैः पाशकैः, दीव्यन्तं क्रीडन्तं भगवन्तं, ददर्श। तत्रापि, नारदः भगवता प्रत्युत्थानासनादिभिः, परया भक्त्या, पूजितः च॥ २०॥ पृष्ट इति। भवान् कदा, आयातः इत्येवं, अविदुषा इव, असौ नारदः, पृष्टश्च। अपूर्णैरागन्तुकपूर्त्तिरहितैः स्वत एव परिपूर्णैः, अवाप्तसमस्तकामैरिति यावत्। अस्मदादिभिः, पूर्णानां युष्माकं, किं नु क्रियते। निरपेक्षत्वादपेक्षिताभावाच्च किमपि न क्रियत इति भावः। यद्यप्येवमथापि, हे ब्रह्मन्, नोऽस्मान्, ब्रूहि किमपि कथय। एतत्, जन्म अस्माकमिदं जनुः, शोभनं कुरु सफलं कुर्वित्यर्थः। भागवतकैङ्कर्यमकुर्वतः शरीरमशुभमिति भावः॥ २१॥ स त्विति। स तु स नारदोऽपि, विस्मितः सन्, उत्थाय, तूष्णीं अन्यत् गृहं अगात्। तत्र तस्मिन् गृहेऽपि, गोविन्दं, शिशून् सुतान्, लालयन्तमुपच्छन्दयन्तं, आचष्ट॥ २२॥

कृष्णप्रिया

देवर्षि नारद ने कहा—भगवन्! आप समस्त लोकों के एकमात्र स्वामी हैं। आपके लिये यह कोई नयी बात नहीं है कि आप अपने भक्तजनों से प्रेम करते हैं और दुष्टों को दण्ड देते हैं। परमयशस्वी प्रभो! आपने जगत् की स्थिति और रक्षा के द्वारा समस्त जीवों का कल्याण करने के लिये स्वेच्छा से अवतार ग्रहण किया है। भगवन्! यह बात हम भलीभाँति जानते हैं॥ १७॥ यह बड़े सौभाग्य की बात है कि आज मुझे आपके चरणकमलों के दर्शन हुए हैं। आपके ये चरणकमल सम्पूर्ण जनता को परम साम्य, मोक्ष देने में समर्थ हैं। जिनके ज्ञान की कोई सीमा ही नहीं है वे ब्रह्मा, शङ्कर आदि सदा-सर्वदा अपने हृदय में उनका चिन्तन करते रहते हैं। वास्तव में वे श्रीचरण ही संसाररूप कूएँ में गिरे हुए लोगों के बाहर निकलने के लिये अवलम्बन हैं। आप ऐसी कृपा कीजिये कि आपके उन चरणकमलों की स्मृति सर्वदा बनी रहे और मैं चाहे जहाँ जैसे रहूँ, उनके ध्यान में तन्मय रहूँ॥१८॥ परीक्षित्! इसके बाद देवर्षि नारदजी योगेश्वरों के भी ईश्वर भगवान् श्रीकृष्ण की योगमाया का रहस्य जानने के लिये उनकी दूसरी पत्नी के महल में गये॥ १९॥ वहाँ उन्होंने देखा कि भगवान् श्रीकृष्ण अपनी प्राणप्रिया और उद्धवजी के साथ चौसर खेल रहे हैं। वहाँ भी भगवान् ने खड़े होकर उनका स्वागत किया, आसनपर बैठाया और विविध सामग्रियों द्वारा बड़ी भक्ति से उनकी अर्चा-पूजा की॥ २०॥ इसके बाद भगवान् ने नारदजी से अनजान की तरह पूछा—'आप यहाँ कब पधारे! आप तो परिपूर्ण आत्माराम–आप्तकाम हैं और हमलोग हैं अपूर्ण। ऐसी अवस्था में भला हम आपकी क्या सेवा कर सकते हैं॥ २१॥ फिर भी ब्रह्मस्वरूप नारदजी! आप कुछ-न-कुछ आज्ञा अवश्य कीजिये और हमें सेवा का अवसर देकर हमारा जन्म सफल कीजिये।' नारदजी यह सब देख-सुनकर चकित और विस्मित हो रहे थे। वे वहाँ से उठकर चुपचाप दूसरे महल में चले गये॥ २२॥

तत्राप्यचष्ट गोविन्दं लालयन्तं [1]सुतान्छिशून्। ततोऽन्यस्मिन् गृहेऽपश्यन्मज्जनाय कृतोद्यमम्॥ २३॥
जुह्वन्तं च वितानाग्नीन् यजन्तं पञ्चभिर्मखैः। भोजयन्तं द्विजान् क्वापि भुञ्जानमवशेषितम्॥ २४॥
क्वापि संध्यामुपासीनं जपन्तं ब्रह्म वाग्यतम्। एकत्र चासिचर्मभ्यां चरन्तमसिवर्त्मसु॥ २५॥
अश्वैर्गजै रथैः क्वापि विचरन्तं गदाग्रजम्। क्वचिच्छयानं पर्यङ्के स्तूयमानं च वन्दिभिः॥ २६॥
मन्त्रयन्तं च कस्मिंश्चिन्मन्त्रिभिश्चोद्धवादिभिः। जलक्रीडारतं क्वापि वारमुख्याबलावृतम्॥ २७॥
कुत्रचिद् द्विजमुख्येभ्यो ददतं गाः स्वलंकृताः। इतिहासपुराणानि शृण्वन्तं[2] मङ्गलानि च॥ २८॥

---

१. शिशून् सुतान्–प्रा. पा.। २. गायन्तं–प्रा. पा.।

कर्दमक्षमा

अन्वयः—तत्र, अपि, सुतान्, शिशून्, लालयन्तम्, गोविन्दम्, आचष्ट, ततः, अन्यस्मिन्, गृहे, उन्मज्जाय, कृतो, अपश्यत् ॥ २३ ॥ वितागनीन्, जुह्वन्तम्, पञ्चभिः, मखैः, यजन्तम्, क्व, अपि, द्विजान्, भोजयन्तम्, क्व, अपि, अवशेषितम्, भुञ्जानम् ॥२४॥ क्व, अपि, संध्याम्, उपासीनम्, क्व, अपि, वाग्यतम्, ब्रह्म, जपन्तम्, च, एकत्र, असिचर्माभ्याम्, असिवर्त्मसु, चरन्तम् ॥ २५ ॥ क्व, अपि, अश्वैः, गजैः, रथैः, विचरन्तम्, गदाग्रजम्, क्वचित्, शयानम्, क्वचित्, वन्दिभिः, पर्यङ्के, स्तूयमानम् ॥ २६ ॥ कस्मिन्श्चित्, उद्धवादिभिः, मन्त्रिभिः, मन्त्रयन्तम्, क्व, अपि, जलक्रीडारतम्, वारमुख्याबलावृतम् ॥ २७ ॥ कुत्रचित्, द्विजमुख्येभ्यः, स्वलंकृताः, गाः, ददतम्, मङ्गलानि, इतिहासपुराणानि, शृण्वन्तम्, अपश्यत् ॥ २८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

बितानाग्नीनाहवनीयादीनग्निहोत्रेण । पंचभिर्मखैर्महायज्ञैर्यजंतम् ॥ २४-३१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्राऽप्यन्यगृहेऽपि । अचष्टाऽपश्यदिति सर्वत्राग्रेऽपि ज्ञेयम् । अत्रैकस्य कृष्णवपुषो यथा बहून् प्रकाशानभिमानभेदक्रियाभेदसहितानपश्यन् तथैव एकेषामेवोद्धवादिवपुषामपि बहून्प्रकाशान् । किञ्चैकस्मिन् क्षणे मनोवेगेन प्रत्येकं षोडशसहस्रगृहान् गतो मुनिः पृथक्पृथक्कालभेदान् क्रियाभेदांश्चापश्यदित्यत एकक्षणमध्यमेव षष्टिघटिकं कालं पृथक्पृथक्स्थले प्रातरादिस्वभागांस्तदुचितक्रियाभेदसहितान् प्रकाशयन्प्राविशदित्यतः प्रातरादिकालानां षष्टिघटिकानां क्रियाणामपि सर्वकालवर्तित्वं मुनिर्ज्ञातवानिति ज्ञेयम् । मज्जनायेति प्रातःसमयो व्यंजितः । ततः सुतलालनपरदर्शनानंतरम् ॥ २३ ॥ जुह्वंतं होमं कुर्वंतमिति पूर्वाह्णः । पंचभिः पाठहोमातिथ्यर्चनतर्पणबलिभिर्यजंतमिति मध्याह्नः । क्वापि गृहे ब्राह्मणभोजनादवशिष्टमन्नं भुंजानमित्यपराह्णः ॥ २४ ॥ ब्रह्म गायत्री, गायत्रीजपे सर्ववेदजपस्यांतर्भूतत्वात् 'गायत्री परमं ब्रह्म' इति स्मृतेरिति सायाह्नः । एकत्र एकस्मिन् गृहे । असिवर्त्मसु कौक्षेयकपरिवर्तनावर्तनोद्वर्तनादिमार्गेषु चरंतं शिष्यान् शिक्षयंतमिति पुनः प्रातः ॥ २५ ॥ अश्वैर्गजैरिति पुनर्मध्याह्नः । क्वचिच्छयानमिति रात्रिशेषः ॥ २६ ॥ मंत्रयंतमिति प्रदोषः । जलक्रीडेत्यपराह्णः । वारे द्वारे मुखं गताऽऽगतपुरुषनिरीक्षणार्थं यासां ता वारमुख्याः ताश्च ता अवलाश्चेति वारमुख्याबलास्ताभिरावृतः । मुखमेव मुख्यं स्वार्थे यत् । "वारो द्वारे हरे कुब्जवृक्षे सूर्यादिवासरे । समूहेऽवसरे क्षणे" इति वारतांतविः ॥ २७ ॥ द्विजमुख्येभ्य इत्युक्तेः क्षत्रियादीनां दानस्वीकारानधिकार उक्त इति पूर्वाह्णः । चोत्र पादपूरणे । मंगलानीति पुराणेतिहासविशेषणम् । "इतिहासपुराणानां श्रवणं मंगलं परम् । गीयते सर्वथैतेषु मंगलायतनो हरिः ॥" इति नारदीये । अत्रापराह्णः । "इतिहासपुराणाभ्यां षष्ठसप्तमकौ नयेत्" इति स्मृतेः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत इति सार्द्धत्रयोदशकम् । तत्र तस्य रात्रावागमनेपि योगीन्द्रत्वान्मनोजवत्वेपि वक्ष्यमाणनानासमयलीलादर्शनं योगमायाविलासेनैव युगपत्समयवैचित्र्यात् अन्यथा तस्य विस्मय एव न स्यात् तत्र मज्जनाय स्नानायेति प्रातर्लीला ॥ २३ ॥ "पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलिः" एतैः पञ्चभिः महायज्ञैर्यजन्तम् अवशेषितम् अवशिष्टं भुञ्जानमित्यन्तं मध्याह्नस्य ॥ २४ ॥ क्वापि केषुचित् सन्ध्यामुपासीनं ब्रह्म गायत्रीं वाग्यतं वाचो यतं यमनं यत्र तत्कृतमौनं यथा स्यादित्यर्थः । इति कालत्रयस्यैव असिवर्त्मसु खड्गविद्याशिक्षागतिषु ॥ २५ ॥ क्वापि केषुचित् स्थानेषु अश्वादिभिर्विविधतया चरन्तमिति प्रायः पूर्वाह्णस्य गदाग्रजमिति तत्सहितमिति भावः पर्य्यङ्के शयानमिति रात्रिशेषस्य वन्दिभिः स्तूयमानत्वात् ॥ २६ ॥ आदिशब्दाद्विकद्व्रादिभिः चकाराच्छ्रीबलदेवादिभिश्च एवमुद्धवादीनामपि प्रतिगृहं स्थितिरुद्दिष्टा वारमुख्याबलावृतं वारमुख्या वेश्याश्रेष्ठाः अबला महिष्याद्याः ताभिरावृतम् ॥ २७ ॥ सुष्ठुलङ्कृताः सौवर्णशृङ्गादिभिः इति प्रायो मध्याह्नस्य मङ्गलानि शान्तिसूक्तानि पुण्यगीतादीनीति वा प्रायोऽपराह्णस्य इतिहासपुराणाभ्यां षष्टसप्तमकौ नयेदिति विधानात् ॥ २८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अचष्ट अपश्यत्, गोविन्दं निजाशेषैश्वर्य्यप्रकटनाय पृथ्व्यामवतीर्णं साक्षाद्भगवन्तम्; अत्रापि तथाग्रे सर्व्वत्रापि पूर्व्ववच्छ्रीभगवता तस्य पूजनप्रश्नादिकमपि ज्ञेयम्, सर्व्वत्रैव सद्धर्म्मप्रदर्शनात्; यद्वा, महाश्चर्य्यप्रदर्शनेन सुविस्मितस्य दिदृक्षोद्रेकेण परिभ्रमतो विश्रामाभावेनातिथ्याद्यनपेक्षया वा तत्तन्न सिद्धमिति बोद्धव्यम् । मज्जनाय माध्याह्निक·स्थानाय ॥ २३ ॥ पाठो होमश्च, अतिथीनां सपर्य्या, तर्पणम्, बलिः, एतैः पञ्चभिर्महायज्ञैर्जुह्वन्तमित्यादेः क्वणित्यनेनैवान्वयः । यजनादेर्माध्याह्निककृत्यस्यैव तत्र तत्र दृश्यमानत्वात् । एवं तस्य मध्याह्न एवागमनम्, किंवा श्रीकृष्णसम्भाषणादिना तत्र मध्याह्नो वृत्त इति

ज्ञेयम् ॥ २४ ॥ सन्ध्यां माध्याह्निकीमेव; यद्वा सायन्तनीम्; परमैश्वर्य्यप्राकट्यात् सर्व्वं समञ्जसम्; ब्रह्म गायत्रीम्, वाग्यतं कृतमौनम्, असिवर्त्मसु खड्गविद्याशिक्षागतिषु ॥२५॥ क्वापि गृहे अश्वादिभिर्विविधतया चरन्तमिति तदंगनादेः सुविस्तीर्णतया, किंवा तस्य बहिःप्रदेशोपवनादिषु ज्ञेयम् । एवमग्रेऽपि । क्वचिदेकस्मिन्नेव गृहे अश्वैर्विचरन्तं तदनु गजैस्तदनन्तरं रथैरिति । यद्वा, क्वचिदश्वैः, क्वचिद्गजैः, क्वचित् रथैरिति ज्ञेयम् । गदाग्रज इति तत्सहितमिति भावः । पर्य्यंके शयानमिति मध्याह्नभोजनानन्तरमेव, किंवा रात्रिशेषे, अतएव वन्दिभिः स्तूयमानम्, आदि शब्दाद्विरुद्धादयः, चकाराच्छ्रीबलदेवादिभिश्च ॥ २६ ॥ एवमुद्धवादीनामपि प्रतिगृहं स्थितिरुद्दिष्टा; वारमुख्याबलावृतं वारमुख्या वेश्या श्रेष्ठाः, अबला महिष्याद्यास्ताभिरावृतम् ॥२७॥ सुष्ठ्वलंकृताः सौवर्णश्रृंगादिभिः, इतिहासा भारतादयः, मंगलानि शान्तिसूक्तानि पुण्यगीतादीनि वा ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्रापि गृहे गोविन्दमाचष्ट ददर्श कथम्भूतं लालयन्तम् उपच्छन्दयन्तं । तत इति । मज्जनाय स्नानाय कृत उद्यमो यत्नो येन तथाभूतम् ॥२३॥ जुह्वन्तमित्यादिद्वितीयान्तानां क्वचिदित्यादि ददर्शेत्यन्तः वितानाग्नीन् यज्ञीयानाहवनीयाद्यग्नीन् पञ्चभिर्मखैर्महायज्ञैः । भोजयन्तमिति । अवशेषितं परिवेषणावशेषितम् ॥ २४ ॥ क्वचिद्ब्रह्म स्वात्मानं जपन्तमवलोकयन्तमित्यर्थः । ब्रह्म प्रणवं वा यद्वा ब्रह्म वेदं जपन्तं "वेदमेव जपेन्नित्यम्" इति शास्त्रात् क्वचिद्वाग्यतं मौनीभूतं स्थितम् एकत्र क्वचिदसिचर्मभ्यां खड्गे खेटाभ्या सहासिवर्त्मसु खड्गभ्रामणगतिषु चरन्तं गदाग्रजं कृष्णं । क्वचिच्छयानमिति । वन्दिभिः स्तुतिपाठकैः स्तूयमानञ्च ॥ २५-२६ ॥ स नारदः क्वचिदुद्धवादिभिः मन्त्रिभिर्मन्त्रयन्तं वारमुख्याभिर्गणिकाश्रेष्ठाभिरबलाभिः स्त्रीभिः परिवृतम् ॥ २७ ॥ सुलष्ट्वङ्कृताः धेनूर्ददतं प्रत्यच्छन्तम् मङ्गलानि मङ्गलस्तुतीश्च श्रृण्वन्तम् ॥ २८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

क्वापि गृहे ब्राह्मणदत्तावशेषितमन्नम् ॥ २४ ॥ असिचर्मभ्यां शिष्यवर्त्मसु चरन्तं शिष्याञ्छिक्षयन्तम् ॥ २५-२६ ॥ वारमुख्याभिरबलाभिरावृतं वेष्टितम् ॥२७॥ ददतमिति पाठः । ददन्तमिति पाठे "दद दाने" इत्यस्य धातोः शत्रादेशः ॥२८-३१॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्राप्यचष्ट अपश्यदिति तत्रैव गृहेषु प्रायः कृष्णकर्तृकपूजास्तुत्यादिकं ज्ञेयम् अपश्यदित्येव क्रिया अतः परेष्वपि सार्द्धचतुर्द्दशश्लोकेष्वनुवर्त्तनीया । अत्रैकस्य कृष्णवपुषो यथा बहून् प्रकाशान् अभिमानभेदक्रियाभेदसहितान् अपश्यत् एकेषामेवोद्धवादिवपुषामपि बहून् प्रकाशान् किञ्चैकस्मिन्नेव क्षणे मनोवेगेन प्रत्येकं षोडशसहस्रगृहान् गतो मुनिः पृथक् पृथक् कालभेदान् क्रियाभेदांश्चापश्यदित्यत एक क्षणमध्यमेव षष्टिघटिकं कालं पृथक् पृथक् स्थले प्रातरादिस्वभागांस्तदुचितक्रियाभेदसहितान् प्रकाशयन् प्राविशदित्यतः प्रातरादिकालानामपि षष्टिघटिकीनां क्रियाणामपि सर्वकालवर्त्तित्वं मुनिर्ज्ञातवानिति ज्ञेयं । मज्जनायेति प्रातः समयो व्यञ्जितः ॥ २३ ॥ क्वचिद्वितानाग्नीनाहवनीयादीन् अग्निहोत्रेण जुह्वन्तमिति पूर्वाह्णः क्वापि पञ्चभिर्मखैरिति । "पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलिः" इति पञ्चमहायज्ञैः यजन्तमिति मध्याह्नः भोजयन्तं भुञ्जानमित्यपराह्णः ॥ २४ ॥ सन्ध्यामुपासीनमिति सायाह्नः । असिचर्मभ्यामिति पुनः प्रातः ॥ २५ ॥ अश्वैर्गजैरिति पुनर्मध्याह्नः क्वचिच्छयानमिति रात्रिशेषः ॥ २६ ॥ मन्त्रयन्तञ्चेति प्रदोषः । जलक्रीडारतमित्यपराह्णः ॥ २७ ॥ गाः ददतमिति पूर्वाह्णः इतिहासेत्यपराह्णः । इतिहासपुराणाभ्यां षष्ठसप्तमकौ नयेदिति स्मृतेः ॥ २८ ॥

गूढार्थदीपिनी

मज्जनाय स्नानाय वितानाग्नीन् यज्ञाग्नीन् आहवनीयादीन् । पञ्चभिः मखैः यज्ञैः पाठहोमातिथ्यार्चनतर्पणैः जुह्वन्तम् होमं कुर्वन्तम् । नुमार्षः ॥ २३ ॥ ब्रह्म गायत्रीम् । वाग्यतं मौनं यथा स्यात्तथा ॥ २४ ॥ एकत्र एकस्मिन् गृहे । वर्त्मसु खड्गभ्रमणःमार्गेषु चरन्तं शिष्यान् शिक्षयन्तम् गदाग्रजं श्रीकृष्णम् ॥ २५ ॥ मन्त्रयन्तं षड्गुणचिन्तनं मन्त्रः । गुणाश्च सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाख्या ज्ञेयाः । इति नीतिशास्त्रम् ॥ २६ ॥ वारमुख्या स्वाबला एव न तु वेश्याः वरमेव वारमतिसुन्दरं मुखं यासां ताः । यद्वा । वारे द्वारे मुखं भगवत्प्रतीक्षार्थं यासां ताः ताश्च ताः अबलाश्चेति ताभिरावृतम् । मुखमेव मुख्यं स्वार्थे यत् । 'वारो द्वारे हरे'-इति वारतान्तविः ॥ २७ ॥ अप्यर्थे चकारः । मङ्गलानि 'इतिहासपुराणानां श्रवणं मङ्गलं परम्' इति नारदीये ॥ २८-२९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्राप्याचष्टापश्यत् मज्जनाय कृतोद्यममपश्यत् अपश्यदित्यग्रेऽपि सम्बध्यते ॥ २३ ॥ वितानाग्नीन् आहवनीयादीन् अग्निहोत्रेण जुह्वन्तम् पाठहोमातिथिसपर्य्यातर्पणबलिदानाख्यैः, पञ्चमखैः ॥ २४-३१ ॥

श्रीसत्यधर्मकृता भागवतटिप्पणी

शिशून्सुतान् । वयस्तारतम्यात्पृथगुक्त्युपपत्तिः । शिशून्पौत्रादीन्सुतान्स्वसुतानिति वा । गोविन्दमाचष्टेऽपश्यत् । ततस्तद्गेहान्मज्जनाय स्नानाय ॥ २३ ॥ वितानाग्नीनाहवनीयादीनग्निं जुह्वन्तं पञ्चभिर्मखैर्महायज्ञैर्यजन्तं द्विजान्क्वापि भोजयन्तमवशेषितं तद्भुक्तावशेषं भक्तं भुञ्जानम् ॥ २४ ॥ **ब्रह्मगायत्रीं** जपन्तं वाक् यता नियमिता येनेति वाग्यतम् । **शिष्यवर्त्मसु** शिक्षणीयमार्गेषु । असिश्च चर्म च ताभ्यां चरन्तम् । एवं चरत्वमिति तान्प्रति बोधनाय स्वयं चरन्तम् ॥ २५ ॥ क्वाप्यश्वैः क्वापि रथैः क्वापि च गजैश्चरन्तं पर्यङ्के क्वचिच्छयानं क्वचिद्बन्दिभिः स्तूयमानं ददर्श ॥२६॥ मन्त्रिभिरुद्धवादिभिः कस्मिंश्चिद्गेहे मन्त्रयन्तं क्वापि वारमुख्याबालाभिरावृतम् ॥ २७ ॥ स्वलङ्कृता अत्यलङ्कृता गा ददन्तम् । इतिहासो । इतिहा आसेति बोधनं यत्र स इति तिङां सुपा समासः । भारतादिः पुराणान्यष्टादशसङ्ख्यानि मङ्गलानि तत्प्रदानि शृण्वन्तम् ॥ २८ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तत्र सन्निवेशान्तरमाह **तत्राप्यचष्टेति** । **शिशून्** पुत्रादीन् । तत्र भगवन्तं दूरादेव सन्निवेशान्तरस्थितं दृष्ट्वा, तत्त्वसङ्ख्यापर्यन्तं तत्तद्भावस्थितं भगवन्तं पश्यन्, तत्र तत्र प्रविश्य, ततस्ततो निर्गत इत्याह **ततोऽन्यस्मिन्नित्यादि** । **अथोवाचेत्यतः** प्राक्तनेन । मज्जनाय मर्दनानन्तरं स्नानाय कृत उद्यमो येन ॥ २३ ॥ **वितानाग्नीन्** यज्ञविताने स्थितान् गार्हपत्यादीन् । 'सोमं विधाय अवभृथस्नानानन्तरं सा यावद्रात्रेः संतिष्ठत' इति न्यायेन मध्यरात्रावप्यग्निहोत्रहोमः । तथैवान्यत्र पञ्च मखाः देवयज्ञादयः पञ्चगृहेषु । क्वापि गृहे द्विजान् भोजयन्तं रात्रिभोजनेन । ततोऽवशेषितं भुञ्जानं गृहान्तरे । एते नव गृहाः पूर्वोक्तैः सह द्वादश ॥२४॥ पुरुषार्थचतुष्टयं साधयन्तमाह । तत्र धर्मे क्वापि सन्ध्यामुपासीनम्, अन्यत्र जपन्तम्, तस्यैव विशेषणं **वाग्यतमिति** । मौनव्रतधरं भिन्नमितित्रिमर्शः । **एकत्र असिचर्मभ्यां चरन्तं असिवर्त्मसु** शास्त्रोक्तखड्गमार्गशिक्षासु ॥ २५ ॥ तथैव अश्वै रथैर्गजैः सह विचरन्तम् । गदाग्रजं भक्तरक्षार्थं तथा यतमानमित्यर्थः । **पर्यङ्के क्वचिच्छयानम्** । अन्यत्र बन्दिभिः स्तूयमानम् । दशधाऽयं धर्मो निरूपितः ॥ २६ ॥ अर्थं निरूपयति **मन्त्रयन्तमिति** । कामं निरूपयति **जलक्रीडारतमिति** ॥ २७ ॥ मोक्षं निरूपयन् सर्वाण्यङ्गानि निरूपयति **कुत्रचिद्द्विजमुख्येभ्य** इति । **शृण्वन्तमिति** इतिहासपुराणानीति विशेषः । मङ्गलानि भगवद्गुणान् ॥ २८ ॥

श्रीसुबोधिनी-सारः

तत्र तस्मिन्गृहेपि सुतान् शिशून् बालान् लालयंतं गोविंदमचष्टापश्यत् ततोन्यस्मिन् गेहे मज्जनाय स्नानार्थं कृत उद्यमो येन तं श्रीकृष्णमपश्यत् ॥ २३ ॥ वितानाग्नीन् आहवनीयादीन् जुह्वंतं होमं कुर्वंतमग्निहोत्रविधिना पंचभिर्मखैर्महायज्ञैर्यजंतं क्वापि गृहे द्विजान् ब्राह्मणान् भोजयंतं भोजनं कारयंतम् अवशेषितमुर्वरितमन्नं क्वापि भुंजानम् ॥ २४ ॥ क्वापि संध्यामुपासीनं वाग्यतं मौनं यथा भवति तथा ब्रह्म गायत्रीं ॐकारं वा जपंतं एकत्र एकस्मिन् गृहेसिचर्मभ्याम् असेः खड्गस्य वर्त्मसु मार्गेषु चरंतं मडलाकारेण भ्रमंतम् ॥ २५ ॥ क्वापि गृहेऽश्वैः क्वापि गजैर्हस्तिभिः क्वापि रथैर्विचरंतं गदाग्रजं हरिमपश्यदित्यन्वयः सर्वत्र क्वचित् गेहे पर्यंके शय्योपरि शयानं क्वापि बंदिभिः स्तूयमानं च ॥ २६ ॥ कस्मिंश्चिद्गृहे उद्धव आदिर्येषाम् इत्यतद्गुणो बहुव्रीहिरिति गुरवः । उद्धवद्वयमिति माथुरीयहरिवंशे इति भट्टाः । तैर्मंत्रिभिर्मंत्रयंतं क्वापि गृहे जलक्रीडायां रतं वारमुख्या वेश्या अबलाः स्त्रियस्ताभिर्वृतं कर्मधारयो वा ॥ २७ ॥ कुत्रचिद्गृहे विप्रोत्तमेभ्यः स्वलंकृताः सुभूषिता गा ददतम् इतिहासो भारतं पुराणानि मंगलानि स्वस्तिपठनादीनि च शृण्वंतम् ॥ २८ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तत्राप्यचष्टेत्यत्र । शिशूनिति । बालकान् सुतान्, नतु प्रौढानित्यर्थः । **ततोऽन्यस्मि**न्नित्यस्याभासे । **अत्र तत** इति आनन्तर्यवाचकं पदमुक्तम् । अग्रेऽष्टाविंशतिसंख्यापर्यन्तं मध्ये तत इत्यादिपदाभावादत आरभ्यैकं प्रकरणमित्याशयेनाहुः **तत्त्वसङ्ख्यापर्यन्तमिति** । **भोजयन्तं द्विजा**नित्यत्र । **एते नव गृहा** इति । 'यजन्तं पञ्चभिर्मखै'रिति 'देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञश्चे'ति पञ्चापि मखा भिन्नगेहेषु । 'अतस्ततोऽन्यस्मि'न्नित्यारभ्य 'भुञ्जानमवशेषित'मितिपर्यन्तं नवगृहाः । ते पूर्वोक्तैस्त्रिभिः सहिता द्वादशगृहा जाताः । तत्त्वप्रकारकगणनायां तु पञ्चापि मखा मखत्वप्रकारेणैक एव । अत'स्ततोऽन्यस्मि'न्नित्यारभ्य पञ्चैव प्रकारा जाता इति भावः । अग्रे धर्मसाधने गृहा दश । प्रकारस्तु धर्मरूपेणैक एव । मोक्षसाधने गृहद्वयम् । प्रकारस्तु मोक्षत्वेनैक एव । तथा 'चेतिहासपुराणानि शृण्वन्त'मितिपर्यन्तं षड्विंशतिगृहाः । प्रकारा नव । त्रिविधायां गुरुसेवायां गृहात्रयः । प्रकारस्त्वेक एव । अन्यत्र तु यथाश्रुतमेव ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मज्जनाय स्नानाय कृत उद्यमो येन तम् । वितानाग्नीनाहवनीयादीन् जुह्वन्तम् । पञ्च मखा देवयज्ञादयस्तैर्देवादीन् यजन्तम् ॥ २३ ॥ अवशेषितं ब्राह्मणभोजनावशिष्टम् । ब्रह्म मन्त्रं प्रणवं वा जपन्तम् । वाग्यतं मौनिनम् । अपश्यदिति सर्वत्र

द्वितीयान्तेनान्वयः ॥ २४ ॥ असिचर्मभ्यां खड्गखेटाभ्यां सहासिवर्त्मसु खड्गभ्रामणमार्गेषु चरन्तं गदाग्रजं कृष्णम् ॥ २५-२६ ॥ वराणां समूहो वारं स एव मुख्यो यासां ता वारमुख्या वेश्यास्तासां बलेन गणेनावृतं जलक्रीडारतं क्वापि ददर्श ॥ २७ ॥ मङ्गलानि शुभावहानि इतिहासादीनि शृण्वन्तम् । कदाचित् क्वचित् गृहे प्रियया सह हास्यकथया हसन्तम् ॥ २८ ॥

अन्वितार्थप्रकाशिका

तत इति ॥ ततः अन्यस्मिन् गृहे मज्जनाय स्नानाय कृतोद्यमम् अपश्यत् क्वचिद् वितानाग्नीन् आहवनीयादीन् जुह्वन्तम् । नुमार्षः । क्वचित् पञ्चभिर्मखैः देवयज्ञादिभिर्महायज्ञैः देवादीन्यजन्तम् अपश्यत् ॥ २३ ॥ भोजयन्तमिति ॥ क्वापि द्विजान् भोजयन्तं क्वापि अवशेषितं ब्राह्मणभोजनावशिष्टं भुञ्जानं क्वापि सन्ध्यामुपासीनं क्वापि ब्रह्म गायत्रीमन्त्रं प्रणवं वा जपन्तं वाग्यतं मौनिनम् अपश्यत् । वाचो यतं यमनं यत्रेति जपक्रियाविशेषणं वा ॥ २४ ॥ एकत्रेति ॥ एकत्र क्वचित् असिचर्मभ्यां खड्गखेटाभ्यां सहासिवर्त्मसु खड्गभ्रमणमार्गेषु चरन्तं क्वापि अश्वैः गजैः रथैश्च विचरन्तं गदाग्रजम् अपश्यत् ॥ २५ ॥ क्वचिदिति ॥ क्वचित् पर्यङ्के शयानं बन्दिभिः स्तूयमानं चापश्यत् । कस्मिंश्चित्काले उद्धवादिभिर्मन्त्रिभिर्मन्त्रयन्तम् अपश्यत् । शता आर्षः । निवृत्तप्रेषणाण्णौ वा । प्रतिगृहमुद्धवादिभेदो ज्ञेयः ॥ २६ ॥ जलेति ॥ क्वापि वारमुख्याः वेश्या तासां बलेन गणेनावृतं जलक्रीडारतमपश्यत् । कुत्रचित् द्विजमुख्येभ्यः स्वलंकृताः गाः ददतमपश्यत् ॥ २७ ॥ इतिहासेति ॥ मङ्गलानि शुभावहानि इतिहासादीनि शृण्वन्तं कदाचित्क्वचित् गृहे प्रियया सह हास्यकथया हसन्तमपश्यत् ॥ २८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्रीगोपीनाथजीमहाराजसत्पछे । सर्वेनेनमो हरिकृष्णाये । इत ऊद्ध्र्वंवितानाग्नीन् आहवनीयादीन् अग्निहोत्रेण जुह्वंतं । पंचभिर्मखैर्महायज्ञैः यजंतं ॥ २४ ॥ वाग्यतं वाग्यतानियमिता यस्मिन् तत् । ब्रह्मगायत्रीरूपं वेदाख्यं ॥ २५-२६ ॥ वारमुख्या वेश्या अबला महिष्यश्च ताभिरावृतं । यद्वा वारमुख्याश्च ता अबलाश्च ताभिरावृतं ॥ २७-२९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति । ततः नारदः, अन्यस्मिन् गृहे, मज्जनाय स्नानाय, कृत उद्यमो येन तथाभूतं, अपश्यत् । क्वचित् वितानाग्नीन्, यज्ञीयानाहवनीयादीन् जुह्वन्तं च, अपश्यत् । क्वचित्, पञ्चभिः मखैर्महायज्ञैः, यजन्तं, अपश्यत् ॥ २३ ॥ भोजयन्तमिति । क्वापि, कस्मिंश्चिद्गृहे, द्विजान् भोजयन्तं, क्वापि अवशेषितं परिवेषणावशेषितं, विघसाशमित्यर्थः । भुञ्जानमश्नन्तं, क्वापि संध्यां, उपासीनमुपासितवन्तं, क्वापि, ब्रह्म ब्रह्मस्वरूपं स्वात्मानं, जपन्तमवलोकयन्तं, क्वापि, वाग्यतं मौनीभूय स्थितं, नारदः अपश्यत् ॥ २४ ॥ एकत्रेति । एकत्र एकस्मिन् गृहे, असिचर्मभ्यां खड्गखेटाभ्यां सह, असिवर्त्मसु खड्गभ्रामणगतिषु, चरन्तं, गदाग्रजं श्रीकृष्णं, क्वापि, अश्वैः चरन्तं, क्वापि रथैः चरन्तं, क्वापि गजैः विचरन्तं च, नारदः अपश्यत् ॥२५॥ क्वचिदिति । नारदः, क्वचिद्गृहे, पर्यङ्के शय्यायां शयानं, बन्दिभिः स्तूयमानं च, अपश्यत् । कस्मिंश्चिद्गृहे, उद्धवादिभिः, मन्त्रिभिश्च मन्त्रिभिरपि, मन्त्रयन्तमालोचयन्तं च ॥ २६ ॥ जलक्रीडेति । क्वापि कस्मिंश्चिद्गृहे, जलक्रीडारतं, क्वापि वारमुख्या गणिकाश्रेष्ठाश्च ता अबलाश्च ताभिर्वृतस्तं, कुत्रचिद्गृहे, द्विजमुख्येभ्यः, स्वलंकृताः, गा धेनूः, ददतं अपश्यत् ॥ २७ ॥ इतिहासेति । क्वापि, इतिहासपुराणानि, मङ्गलानि मङ्गलार्थकाः स्तुतीश्च, शृण्वन्तं, कदाचित् क्वचित् गृहे, प्रियया सह, हास्यकथया हसन्तं, अपश्यत् ॥ २८ ॥

कृष्णप्रिया

उस महल में भी देवर्षि नारद ने देखा कि भगवान् श्रीकृष्ण अपने नन्हें-नन्हें बच्चों को दुलार रहे हैं। वहाँ से फिर दूसरे महल में गये तो क्या देखते हैं कि भगवान् श्रीकृष्ण स्नान की तैयारी कर रहे हैं ॥ २३ ॥ (इसी प्रकार देवर्षि नारद ने विभिन्न महलों में भगवान् को भिन्न-भिन्न कार्य करते देखा ।) कहीं वे यज्ञकुण्डों में हवन कर रहे हैं तो कहीं पञ्चमहायज्ञों से देवता आदि की आराधना कर रहे हैं । कहीं ब्राह्मणों को भोजन करा रहे हैं, तो कहीं यज्ञ का अवशेष स्वयं भोजन कर रहे हैं ॥ २४ ॥ कहीं सन्ध्या कर रहे हैं, तो कहीं मौन होकर गायत्री का जप कर रहे हैं। कहीं हाथों में ढाल-तलवार लेकर उनको चलाने के पैतरे बदल रहे हैं ॥ २५ ॥ कहीं घोड़े, हाथी अथवा रथपर सवार होकर श्रीकृष्ण विचरण कर रहे हैं। कहीं पलंगपर सो रहे हैं, तो कहीं वंदीजन उनकी स्तुति कर रहे हैं ॥ २६ ॥ किसी महल में उद्धव आदि मन्त्रियों के साथ किसी गम्भीर विषयपर परामर्श कर रहे हैं, तो कहीं उत्तमोत्तम वाराङ्गनाओं से घिरकर जलक्रीडा कर रहे हैं ॥ २७ ॥ कहीं श्रेष्ठ ब्राह्मणों को वस्त्राभूषण से सुसज्जित गौओं का दान कर रहे हैं, तो कहीं मङ्गलमय इतिहास-पुराणों का श्रवण कर रहे हैं ॥२८॥

हसन्तं हास्यकथया कदाचित् प्रियया गृहे । क्वापि धर्मं सेवमानमर्थकामौ च कुत्रचित् ॥ २९ ॥
[1]ध्यायन्त मेकमासीनं पुरुषं प्रकृतेः परम् । शुश्रूषन्तं गुरून् क्वापि कामैर्भोगैः सपर्यया ॥ ३० ॥
कुर्वन्तं विग्रहं कैश्चित् संधिं [2]चान्यत्र [3]केवलम् । कुत्रापि सह रामेण चिन्तयन्तं सतां शिवम् ॥ ३१ ॥
पुत्राणां दुहितॄणां च काले विध्युपपादनम् । दारैर्वरैस्तत्सदृशैः कल्पयन्तं विभूतिभिः ॥ ३२ ॥
प्रस्थापनोपा[4]नयनैरपत्यानां महोत्सवान् । वीक्ष्य योगेश्वरेशस्य येषां लोका विसिस्मिरे ॥ ३३ ॥
यजन्तं [5]स्वकलान् देवान् क्वापि क्रतुभिरूर्जितैः । पूर्तयन्तं क्वचिद् धर्मं कूपाराम [6]मठादिभिः ॥ ३४ ॥

कर्दमक्षमा

अन्वयः—कदाचित्, हास्यकथया, गृहे, प्रियया, हसन्तम्, क्व, अपि, धर्मम्, सेवमानम्, च, कुत्रचित्, अर्थकामौ, सेवमानम्, अपश्यत् ॥ २९ ॥ प्रकृतेः, परम्, एकम्, पुरुषम्, ध्यायन्तम्, आसीनम्, क्व, अपि, गुरुन्, कामैः, भोगैः, सपर्यया, शुश्रूषन्तम्, अपश्यत् ॥ ३० ॥ केश्चित्, विग्रहम्, कुर्वन्तम्, च, अन्यत्र, केवलम्, सन्धिम्, कुर्वन्तम्, अपि, कुत्र, रामेण, सह, सताम्, शिवम्, चिन्तयन्तम्, अपश्यत् ॥ ३१ ॥ पुत्राणाम्, च, दुहितृणाम्, तत्, सदृशैः, वरैः, च, दारैः, च, विभूतिभिः, काले, विध्युपपादनम्, कल्पयन्तम्, अपश्यत् ॥३२॥ येषाम्, अपत्यानाम्, प्रस्थापनोपानयनैः, योगेश्वरस्य, महोत्सवान्, वीक्ष्य, लोकाः, विसिस्मिरे ॥ ३३ ॥ क्व, अपि, सकलान्, देवान्, उर्जितैः, क्रतुभिः, यजन्तम्, क्वचित्, कूपाराम, मठादिभिः, धर्मम्, पूरयन्तम्, अपश्यत् ॥ ३४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

काले तत्तत्समये विधिना उपयापनं प्रापणं विवाहमित्यर्थः । कल्पयंतं घटयंतम् । विभूतिभिर्विभवैः ॥ ३२ ॥ प्रस्थापनं दुहितृजामात्रादीनां स्वगृहात्तत्तद्गृहं प्रति नयनम् । उपानयनं तत्तगृहात्पुनरानयनम् । तैर्महोत्सवान्कल्पयंतम् । योगेश्वरेशस्य येषामपत्यानां महोत्सवान्वीक्ष्य लोकाः सर्वे विसिस्मिरे विस्मयं चक्रुः । तथाभूतान् कल्पयंतम् ॥ ३३–३५ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कदाचित् रत्यवसरे, इति निशीथः । क्वापि धर्ममित्यादिना दिनरात्री ॥ २९ ॥ गुरूनाचार्यादीन् । अत्र तोषिणी—त्रिवर्गपराणां लीलामुक्त्वा मोक्षपरां तामाह—ध्यायंतमिति । मनुष्यचेष्टानुकरणलीलामात्रत्वान्न वैष्णवसिद्धान्तहानिरिति तयोरावश्यकमुख्यलीलामाह—गुरूञ्छ्रीसांदीपनिगर्गवसुदेवादीन् । कामादिभिः कामा अभीष्टपदार्था, भोगा उपभोगार्हपदार्थाः । सपर्या परिचर्या, देवशुश्रूषा त्वग्रे वक्ष्यते, इति मध्याह्लादिः ॥ ३० ॥ कुर्वंतं कर्तुमिच्छंतमारभमाणं वा केशवं तत्रतत्र ब्रह्मेशयोरपि मोहनादव्यक्तीकृततन्नानार्थम् । सतां पांडवादीनाम् । कथमेषां शिवं स्यादिति चिन्तयन्तम् ॥ ३१ ॥ इत्यर्थ इति—उपयाप्यते प्राप्यते वरकन्याभ्यां श्वशुरगृहं यत्र तदुपयापनमिति निरुक्तेः । विभूतिभिर्बहुसंभारैः 'विभूतिर्विभवो वसु' इति नाममाला ॥ ३२ ॥ तथाभूतान् विस्मयजनकान् । योगेश्वराः सनकाद्यास्तेषां प्रभोर्वैकुण्ठनाथस्य लोका गरुडादयोऽपि विसिस्मिरे ॥ ३३ ॥ पूर्तं करोतीति पूर्तयति, ततः शतृप्रत्ययः । धर्मं धर्मस्वरूपमपि लोकसंग्रहाय तथा चरंतमित्यर्थः । धर्मं पूर्तयंतं पूरयन्तम् । 'पूर्तं कर्मणि पूरणे' इति निरुक्तिकोशात् । स्वस्य कलाः प्रतिमादिरूपान्साक्षाच्छ्रीविष्णवादिरूपांश्च क्रतुभिरर्चनात्मकैर्होमात्मकैर्वा । आलया देवादिगृहाणि तैः । पूर्ततया संपादयन्तम् । विश्वनाथस्तु—क्वचिद्यजन्तं चैत्रादौ चातुर्मास्यादौ युगादौ चेत्याह ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गृहे कस्मिंश्चित् धर्मं सेवमानं भक्त्याऽनुतिष्ठन्तं कामं सेवमानम् उपभुञ्जानम् अर्थं सेवमानं साधयन्तम् ॥ २९ ॥ एवं त्रिवर्गपरतालीलामुक्त्वा मोक्षपरतालीलामाह–ध्यायन्तमिति । मनुष्यचेष्टानुकरणलीलामात्रत्वान्न वैष्णवसिद्धान्तहानिरिति भावः । तयोरावश्यकमुख्याङ्गलीलामाह—गुरून् श्रीसान्दीपनिगर्गवसुदेवादीन् कामादिभिः शुश्रूषन्तं कामाः अभीष्टपदार्थाः भोगा उपभोगार्हपदार्थाः सपर्या परिचर्या देवशुश्रूषयात्वग्रे वक्ष्यत इति मध्याह्लादेः एवमुत्तरत्रापि समया उन्नेयाः ॥ ३० ॥ कुर्वन्तं कर्तुमिच्छन्तमारभमाणं वा केशवं तत्रतत्र ब्रह्मेशयोरपि मोहनादव्यक्तीकृततन्नामार्थं कैश्चिदित्यनेन अन्यैश्चेत्यनेन च

---

[1] मात्मानं–वीर. विज. ; ध्यायन्नास्ते क्व चात्मानं–प्रा. पा. । [2] चान्यैश्च–श्रीधर. टि. । [3] केशवम्–श्रीधर. वंशी. जीव. वीर. विज. विश्व. । [4] नायनं–विज. ; यापतम्–श्रीधर. वंशी. जीव. वीर. विश्व. । [5] सकलान्–श्रीधर. वंशी. जीव. विज. विश्व. ; स्वकलान्–वीर. । [6] रामालयादिभिः–वीर. विज. ।

तत्तत्पृथग्गृहद्वये ज्ञेयम् । अन्यत्रेति क्वचित्पाठः सतां पाण्डवादीनां शिवं कथं स्यादिति विचारयन्तमित्यर्थः ।। ३१ ।। कुलकमध्य एव पुत्राणामिति युग्मकम् । तत्सदृशैः पुत्रसदृशैर्दारैः पुत्राणां दुहितृसदृशैर्वरैर्दुहितॄणां विभूतिभिः कृत्वा अस्य परेणान्वयः । तत्र केषुचिद्गृहेषु पुत्राणां केषुचिद्गृहेषु दुहितॄणामिति ज्ञेयम् ।। ३२ ।। एवमग्रेऽपि लोका, विसिस्मिरे लोकातीतत्वात् तत्कुतः योगेश्वराणामीशस्य यद्वा योगेश्वरस्य सनकादिप्रभोः श्रीवैकुण्ठनाथस्य लोकाः श्रीगरुडादयोऽपि विसिस्मिर ।। ३३ ।। स्वस्य कलाः प्रतिमादिरूपान् साक्षाच्छ्रीविष्ण्वादिरूपांश्च क्रतुभिरर्चनात्मकैर्होमात्मकैश्च ऊर्जितैः समृद्धैः पूर्त्तयन्तं पूर्त्ताख्यतया सम्पादयन्तम् आलया देवादिगृहाणि ।। ३४ ।।

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कयाचित् सुगुह्यया लोकोत्तरया वा प्रियया निजेष्टया हास्यकथया, प्रियया सहेति वा; गृहे कस्मिंश्चिद्धर्म्मं सेवमानं भक्त्यानुतिष्ठन्तं कामं सेवमानमुपभुञ्जानम्, अर्थं सेवमानं साधयन्तम् ।। २९ ।। त्रिवर्गपरतामुक्त्वा मोक्षपरतामाह—ध्यायन्तमिति । आत्मानं निजश्रीविग्रहम्, पुरुषं मनुष्याकारम्, प्रकृतेः परं सच्चिदानन्दघनमित्यर्थः । इति तस्य ध्यानैकशुभाश्रयत्वेन समाधिहेतुतोक्ता । यद्वा, आत्मानमात्मस्वरूपं प्रकृतेः परं पुरुषम्; भक्तिपरतामाह—शुश्रूषन्तमिति । आत्मानमेव श्रीशालग्रामादिभिः शुश्रूयन्तं च शुश्रूषमाणं पूजयन्तं गुरूंश्च सान्दीपनिगर्ग-वसुदेवादीन्, तैरेव शुश्रूषन्तम्, कामा नृत्यगीतादयः, भोगा उपभोगार्हद्रव्याणि, सपर्य्या परिचर्य्या गुरुषु च कामादयो यथायथमूह्याः, कामादीनां यथोत्तरं शुश्रूषणसाधनत्वे श्रैष्ठ्यम् ।।३०।। कुर्व्वन्तं कर्त्तुमिच्छन्तमारभमाणं वा, च अपि, केशवं साक्षात् परमेश्वरमपि; कैश्चिदित्यनेन अन्यैश्चेत्यनेन च तत्तत्पृथग्गृहद्वये ज्ञेयम् । किंवा कुत्रापीति परेणैवान्वयादेकस्मिन् सर्व्वं ततश्च रामेण सहेत्यस्य पूर्व्वेणाप्यन्वयः ।। ३१ ।। तत्सदृशैः पुत्रसदृशैर्दारैः पुत्राणाम्, दुहितृसदृशैर्वरैर्दुहितॄणाम्, विभूतिभिः कृत्वा, अस्य परेणाप्यन्वयः । तत्र क्वचित् क्वचिद् गृहे पुत्राणाम्, क्वचित् क्वचिच्च दुहितॄणामिति विवेचनीयम् । एवमग्रेऽपि । किंवा पूर्व्ववत् क्वापीत्यादेरप्रयोगेण कुत्रापीति पूर्व्वेणैवान्वयात् रामेण सह तत्तत् सर्व्वमेकस्मिन्नेव गृहे ज्ञेयम् । पतिगृहं दुहितुरेकत्वेऽपि दुहितॄणामिति बहुत्वं भ्रातृपुत्रादीनां कन्यापेक्षया अग्रे च बहुत्वं तत्तद्बाहुल्यात् । लोका विसिष्मिरे, लोकातीतत्वात्; तत् कुतः ? योगेश्वराणामीशस्य । अन्यत्तैर्व्याख्यातम् । यद्वा, विभूतिभिः सह उपानयनं पुत्रस्नुषादीनां श्वशुरादिगृहात् स्वसमीपे आनयनम्, योगेश्वरेशस्य श्रीसनकादिप्रभोः श्रीवैकुण्ठनाथस्य लोकाः श्रीगरुडादयः सेवका येषां महोत्सवानां तान् प्रति विसिष्मिरे, वैकुण्ठेऽपि तदभावात् ।। ३२–३३ ।। स्वस्य कला विभूतिरूपान् यजन्तम्, यद्वा, स्वकला अपि देवान् इन्द्रादीन् श्रीविष्ण्वादीन् वा ऊर्ज्जितैः समृद्धैः, पूर्त्तयन्तं पूर्त्ताख्यं धर्म्ममाचरन्तम्, आलया देवादिगृहाणि, कूपादीनां यथोत्तरं श्रैष्ठ्यम् । आदि-शब्दाद्वापी-तड़ागादयः ।। ३४ ।।

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कदाचित् क्वचिद्गृहे प्रियया सह हास्यकथया हसन्तम् ।। २९ ।। प्रकृतेः "भूमिरापोनलो वायुः" इत्यादिश्लोकद्वयोक्तप्रकृतिद्वयात्परं विलक्षणं परमपुरुषभूतं स्वात्मानं ध्यायन्तमनुभवन्तम् सपर्यया पूजया च गुरून् शुश्रूषन्तं परिचरन्तम् ।। ३० ।। कैश्चिद्विग्रहं विरोधं कुर्वन्तमन्यत्र गृहे सन्धिं कुर्वन्तं केशवं सतां साधूनां शिवं योगक्षेमं चिन्तयन्तम् ।। ३१ ।। पुत्राणामिति । काले तत्तत्समये पुत्राणां तत्सदृशैर्दारैः दुहितॄणान्तु तत्सदृशैर्वरैश्च विधिना शास्त्रोक्तेन उपयापनं प्रापणं विवाहमित्यर्थः । तद्विभवैः कल्पयन्तं घटयन्तम् ।। ३२ ।। प्रस्थापनेति । प्रस्थापनं दुहितृस्नुषाजामात्रादीनां स्वगृहं प्रति नयनं तद्गृहात्पुनरानयनम् उपानयनं तैरपत्यादीनां पुत्राणां दुहितॄणां च महोत्सवान् कल्पन्तं तान्विशिनष्टि, योगेश्वरेशस्य भगवत एवमपत्यादीनां महोत्सवान् वीक्ष्य लोकाः सर्वेऽपि विसिस्मिरे विस्मयञ्चक्रुः तथाभूतानुत्सवान्कल्पयन्तमितिसम्बन्धः ।। ३३ ।। यजन्तमिति । स्वकलान् स्वांशभूतान् देवामिन्द्रादीनूर्जितैर्बहुदक्षिणैः क्रतुभिर्यजन्तं कूपादिनिर्माणैर्धर्मं पूरयन्तं पूर्त्तं समाप्तं धर्मं कुर्वन्तमित्यर्थः । पूर्त्तशब्दात्तत्करोतीति णिजन्ताच्छतानविशेषणानां वृत्तिर्नेत्यादिनिषेधस्य विशेष्यविषयत्वात् अत्र पूर्त्तस्य धर्मं प्रति विशेषणत्वात् सापेक्षस्यापि नामधातुवृत्तिरवगन्तव्या ।। ३४ ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

काले प्राप्ते विध्युक्तप्रकारेण उपनायनम् उपनयनं स्वगृहं प्रत्यानयनं ब्राह्मणीकारणं कल्पयन्तं पुत्राणां दारैः सह दुहितॄणां वरैः सह योगं कल्पयन्तम् ।। ३२ ।। प्रस्थापनं परगृहं प्रति दुहितृप्रेषणम् उपनयनं स्वगृहं प्रत्यानयनं येषामिति षष्ठीद्वितीयार्थे लोकाः यानि कर्माणि वीक्ष्य विसिस्मिरे तानि कुर्वन्तं कर्मणामाचरणं वीक्ष्येति वा ।। ३३ ।। कूपादिभिः पूर्तयन्तं पूर्ताख्यधर्ममाचरन्तम् ।। ३४ ।।

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

हास्यकथयेति निशीथसमयः धर्ममर्थकामाविति दिनरात्री ।। २९ ।। ध्यायन्तमिति ब्राह्ममुहूर्त्तः ।। ३०–३१ ।। विधिना उपयापनं प्रापणं विवाहमित्यर्थः । कल्पयन्तं कारयन्तं विभूतिभिर्बहुसम्भारैः । वार्षिकोत्सवसमाप्तौ प्रस्थापनं दुहितृजामात्रादीनां

स्वगृहात्तद्गृहप्रापणं उत्सवारम्भे उपानयनं तद्गृहात् पुनरानयनं तैर्महोत्सवान् कल्पयन्तम् ॥ ३२ ॥ योगेश्वरस्य कृष्णस्य येषाम् अपत्यानां महोत्सवान् वीक्ष्य लोकाः विस्मयं प्रापुः ॥ ३३ ॥ क्वचिद्देवान् यजन्तमिति चैत्रादौ चातुर्मासे वा पुण्यकाले क्वचिद्युगाद्यादौ पूर्त्तयन्तं पूर्त्ततया सम्पादयन्तम् ॥ ३४ ॥

गूढार्थदीपिनी

कामैः अभीष्टपदार्थैः ॥ ३० ॥ कुत्रापीत्यर्द्धम् । सतां भक्तानां शिवं योगक्षेमम् । यद्वा । पाण्डवादीनां शिवं कथं स्यादिति ॥ ३१ ॥ पुत्राणां तत्सदृशैः दारैः दुहितॄणां च तत्सदृशैः वरैः विधिना उपयापनं प्रापणं विवाहमित्यर्थः । उपयाप्यते प्राप्यते वरकन्याभ्यां श्वशुरगृहं यत्र तदुपयापनमिति निरुक्तेः । विभूतिभिः बहुसंभारैः कल्पयन्तं सम्पादयन्तम् ॥३२॥ उपानयनं तत्तद्गृहात्पुनरानयनम् । येषामपत्यानां महोत्सवान् वीक्ष्य लोका जना विस्मयं चक्रुः । णिलोपः छान्दसः विसिस्मियिरे इति भाव्यम् ॥ ३३ ॥ ऊर्जितैः बहुदक्षिणैः । पूर्तयन्तं पूरयन्तम् अपश्यत् । 'पूर्त कर्मणि पूरणे' इति निरुक्तिकोशात् । आरामः क्रीडावनम् । देवान् इन्द्रादीन् ॥ ३४ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

काले तत्तद्विवाहसमये पुत्राणां तत्तत्सदृशैर्दारैः दुहितॄणाञ्च तत्तत्सदृशैर्वरैः विधिना उपयापनं प्रापणं विवाहं तत्तद्विभूतिभिर्विभवैः कल्पयन्तं कारयन्तम् ॥ ३२ ॥ प्रस्थापनानि भार्यानयनार्थं पुत्राणां तत्तद्भर्तृगृहे भर्तृसहितानां दुहितॄणाञ्च स्वगृहात् उपानयनं दुहितॄणां सभार्य्याणां पुत्राणाञ्च स्वगृहं प्रति तैः अपत्यानां पुत्राणां दुहितॄणाञ्च महोत्सवान् कल्पयन्तम् अपश्यत् प्रसङ्गात् लोकविस्मयमाह— योगेश्वरेशस्य येषामपत्यानां महोत्सवान् वीक्ष्य लोकाः विसिस्मिरे विस्मयं प्रापुः ॥ ३३ ॥ कूपारामालयादिभिः क्रियमाणैः धर्मं पूर्तयन्तं पूरयन्तम् ॥ ३४-३५ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कदाचित्प्रियया हास्यकथया हसन्तं क्वापि धर्मं सेवमानं तत्साधनं सेवमानमर्थकामौ तथा साधयन्तम् ॥ २९ ॥ एकं प्रधानं प्रकृतेः परं पुरुषात्मानं स्वामिन्नहरि ध्यायन्तं कामैस्तदपेक्षितैर्भोगैः सपर्यया पूजया गुरून् शुश्रूषन्तं सेवमानं गुरून्सपर्यया स्वकृतया सहैव शुश्रूषन्तं श्रोतुमिच्छन्तं तमिति वा ॥ ३० ॥ विग्रहः कलहः सन्धिः समाधिः रामेणाग्रजेन सह सतां शिवं मङ्गलं चिन्तयन्तम् ॥ ३१ ॥ पुत्राणां तथा दुहितॄणां काले विहिते विधिनोपनायनमुपनीतिकृति स्त्रीणां प्रदानकमेव यथोपनयन तथेत्यादेस्तासामपि तत्सम्भवति । यद्वोपनयनं पतिवसतेः स्ववसति प्रत्यायनं दारैः पुत्राणां तु वरैस्तत्सदृशैरिति दारदारिकावरानपि विभूतिभिः सहालङ्काराद्यैश्वर्येण सह कल्पयन्तमयं वर इयं कन्यावर इति योजयन्तम् ॥ ३२ ॥ प्रस्थापनं श्वश्रूसद्म प्रतिप्रेषणं उपनयनैराकारणैरपत्यानाम् । एवं योगेश्वरेशस्य महोत्सवान् येषामुत्सवानां सकाशाल्लोका विसिस्मिरे । तान्वीक्ष्य स्वयं विसिस्मिरे । ये येषां कर्मणामुत्सवान्वीक्ष्य लोका विसिस्मिरे तान्कुर्वन्तं ददर्शेति वा ॥ ३३ ॥ सकलान्सोमाहीन्स्वकलया सहितानिति वा इष्टिं कृत्वा क्वचित्पूर्तयन्तं रूपादिकं कृत्वा पूर्तरूपधर्मं कुर्वन्तम् ॥ ३४ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ऋणमपाकुर्वन्निवाह हसन्तमिति । त्रैवर्गिकं तत्रैव शेषभूतमाह धर्मं सेवमानमिति ॥ २९ ॥ ध्यायन्तमेकमिति निदिध्यासितम् । शुश्रूषन्तं गुरूनिति । गुरुसेवा त्रिविधा ॥ ३० ॥ एवमलौकिकपुरुषार्थानुक्त्वा लौकिकं व्यवहारमाह कुर्वन्तं विग्रहं कैश्चिदिति । राज्यान्तरशिष्टा नाङ्गीकृताः । सन्धावङ्गीकृताः । केवलमित्यनेन समयभेदेनापि सन्धिविग्रहौ निरूपितौ । ततो लोकन्यायेन बलभद्रेण सह मन्त्रणं कथं सतां शिवं भवेदिति । अलौकिकेन वा कलावुत्पत्स्यमानानाम् ॥ ३१ ॥ पुत्राणां विवाहो दुहितॄणां च । विधिपूर्वकमुपपादनं काले युक्तसमये । किञ्च । पुत्राणां दारैः सह विभूतिभिः कल्पयन्तम् । क्वचिद्गृहे पुत्रं सभार्यं परमोत्सवयुक्तं करोतीत्यर्थः । तथा दुहितॄणामपि तत्सदृशैर्वरैः सहितानां विभूतिभिः कल्पयन्तम् । जामातृसहिता दुहितरः ऐश्वर्यादिसम्पन्नाः कृता इत्यर्थः ॥ ३२ ॥ तासामेव प्रस्थापनं उपनयनं च भर्तृगृहात्स्वगृहे समानयनम् । पुत्रवधूनां वा अपत्यानां महोत्सवान् कल्पयन्तमिति सम्बन्धः । आवश्यकत्वादनभिनिवेशेन करणं सम्भवतीति तद्व्यावृत्त्यर्थं महतीं समृद्धिमुपपादयति वीक्ष्येति । योगेश्वराणामपीश्वरत्वात्सामग्रीमनेकविधां अनायासेन शीघ्रं सम्पादयति । ततो येषां महोत्सवानां सम्बन्धिनो लोकाः तां दृष्ट्वा अभूतपूर्वत्वाद्विसिस्मिरे ॥ ३३ ॥ एवं लौकिकधर्मेषु केवललौकिकानुपपाद्य तदनुरूपधर्मानुपपादयति यजन्तं स्वकलान् देवानिति । स्वस्य कला येषु । भगवदावेशयुक्तान् । ऊर्जितैः लौकिकसाधनैः पुष्टैः । क्रतुभिर्यज्ञादिभिः शान्तिकपौष्टिकैर्वा । पूर्तमप्याह पूर्तयन्तमिति । कूपारामादिप्रतिष्ठार्थं देवतावाहनं कृत्वा अधिवासने उपविष्टमित्यर्थः । आरामा वाटिकाः, तत्र आलयाः गृहाः, देवस्थानानि वा । तामसादिभेदा उक्ता इति । अन्येषां तदादित्वम् ॥ ३४ ॥

श्रीसुबोधिनी-सारः

कदाचिद्गृहे प्रियया पत्न्या सह हास्यकथया नर्मगोष्ठ्या हसंतं क्वापि धर्मं सेवमानं कुर्वंतं कुत्र चिद्गृहेऽर्थकामौ सेवमानम् ॥२९॥ क्वापि प्रकृतेः परं पुरुषम् एकं ध्यायंतमासीनं क्वापि वांछितभोगप्रदानैः सेवया च गुरून् सेवमानमपश्यत् ॥३०॥ कैश्चित्सह विग्रहं विरोधं कुर्वंतम् अन्यत्र गृहे संधिं कुर्वंतं केशवम् अपश्यत् कुत्रापि गृहे रामेण सह सतां भक्तानां शिवं कल्याणं चिंतयंतम् ॥ ३१ ॥ काले समये पुत्राणां पुत्रीणां विधिं विवाहमुपयापनं प्रस्थापनं विभूतिभिः संपद्भिः सह तत्सदृशैर्दारैः स्त्रीभिर्वरैः पुंभिः कल्पयंतं रचयंतम् ॥ ३२ ॥ एषामपत्यानां पुत्रपुत्रीणां प्रस्थापनोपानयनैर्महोत्सवान् वीक्ष्य योगेश्वराणामीश्वरस्य लोका विस्मयं प्रापुः ॥ ३३ ॥ क्वापि गृहे ऊर्ज्जितैः समृद्धैः क्रतुभिर्यज्ञैः सकलान् देवान् यजंतं क्वचित् कूपाराममंदिरादिभिर्धर्मं पूर्त्तयंतं प्रवर्त्तयंतम् ॥ ३४ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रकृतेः परं पुरुषोत्तममेकमात्मानं ध्यायन्तं कुत्रचिद्ददर्श ॥ २९ ॥ सपर्यया पूजासामग्र्या कामैर्वस्त्रादिविषयैस्तज्जन्यभोगैश्च गुरून् शुश्रूषन्तं सेवमानम्। कुत्रचित्कैश्चित्सह विग्रहं विरोधं कुर्वन्तम्। अन्यत्र गृहे च कैश्चित्सह सन्धिं कुर्वन्तम् ॥३०॥ शिवं योगक्षेमं चिन्तयन्तम् ॥ ३१ ॥ काले इति समये पुत्राणां तत्सदृशैर्दारैः, दुहितॄणां तु तत्सदृशैर्वरैश्च विधिना शास्त्रोक्तप्रकारेण उपयापनं प्रापणं विवाहं कल्पयन्तं घटयन्तम्। विवाहितांश्च तान् विभूतिभिः कल्पयन्तं विभवप्रदानेन तत्संपन्नान् कुर्वन्तमित्यर्थः ॥ ३२ ॥ प्रस्थापनं दुहितृजामात्रादीनां स्वगृहात्तद्गृहं प्रतिनयनम्, उपायनं पुनस्तद्गृहात्स्वगृहानयनम्, तैः कल्पितान् येषां योगेश्वरेशस्य कृष्णस्यापत्यानां महोत्सवान् वीक्ष्य लोकाः सर्वे जना विसिस्मिरे विस्मयं चक्रुरित्यन्वयः ॥ ३३ ॥ क्वापि कुत्रचित् गृहे स्वकलान् स्वस्यैव कला अंशा येषु तान् स्वांशभूतान् देवानिन्द्रादीन् ऊर्जितैर्बहुदक्षिणैः क्रतुभिर्यजन्तम्। क्वचिच्च कूपारामादिनिर्माणैर्धर्मं पूर्तयन्तं स्मार्तं पूर्तसंज्ञकं धर्ममनुतिष्ठन्तमित्यर्थः ॥ ३४ ॥

अन्वितार्थप्रकाशिका

कापीति ॥ क्वापि धर्मं सेवमानं कुत्रचित् अर्थं कामं च सेवमानं कुत्रचित् प्रकृतेः परं पुरुषम् एकमात्मनि ध्यायन्तमासीनमपश्यत् ॥ २९ ॥ शुश्रूषन्तमिति ॥ सपर्यया पूजासामग्र्या कामैर्वस्त्रादिविषयैस्तज्जन्यभोगैश्च गुरून् गर्गवसुदेवादीन् शुश्रूषन्तं सेवमानम्। शता आर्षः। कुत्रचित्कैश्चित्सह विग्रहं विरोधं कुर्वन्तं कर्त्तुमारभमाणम् अन्यत्र गृहे च कैश्चित्सह सन्धिं कुर्वन्तं केशवमपश्यत् ॥ ३० ॥ कुत्रापीत्यर्द्धम् ॥ कुत्रापि रामेण सह सतां शिवं योगक्षेमं चिन्तयन्तम् अपश्यत् ॥ ३१ ॥ पुत्राणामिति ॥ काले तत्तत्समये पुत्राणां तत्सदृशैर्दारैः दुहितॄणां च तत्सदृशैर्वरैः विधिना उपयापनं प्रापणं विवाहमित्यर्थः। विभूतिभिः विभवैः कल्पयन्तं घटयन्तम् अपश्यत् ॥ ३२ ॥ प्रस्थापनेति ॥ वार्षिकोत्सवसमाप्तौ प्रस्थापनं दुहितृजामात्रादीनां स्वगृहात्तद्गृहं प्रति नयनम् उत्सवारम्भे च उपानयनं पुनस्तद्गृहात्स्वगृहानयनं तैर्महोत्सवान् कल्पयन्तं येषां योगेश्वरेशस्य कृष्णस्यापत्यानां महोत्सवान् वीक्ष्य लोकाः सर्वे जना विसिस्मिरे विस्मयं चक्रुः। णिलोपश्छान्दसः ॥ ३३ ॥ यजन्तमिति ॥ क्वापि कुत्रचित् गृहे स्वकलान् स्वस्यैव कला अंशो येषु तान् स्वांशभूतान्। सकलान् इति च पाठः। देवानिन्द्रादीन् ऊर्जितैर्बहुदक्षिणैः क्रतुभिर्यजन्तं क्वचिच्च कूपारामादिनिर्माणैः स्मार्त्तं धर्मं पूर्तयन्तं पूर्ततया सम्पादयन्तम् अपश्यत् ॥ ३४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सपर्यया पूजया ॥ ३०-३१ ॥ काले विवाहयितुं योग्ये समये विधिना उपयापनं उद्वाहनं तत्सदृशैः पुत्रसदृशैः दारैः सह पुत्राणां कल्पयंतं कुर्वंतं क्वचिद्गृहेषु दुहितॄणां कन्यानांतत्सत्सदृशैर्वरैः सह विभूतिभिः समृद्धिभिः कृत्वा कल्पयंतं कुर्वंतं ॥ ३२ ॥ प्रस्थापनं स्वगृहात् दुहितृजामात्रादिनां तद्गृहं प्रतिप्रापणं उपानयनं तत्तद्गृहेभ्यः भूयः स्वगृहेषु आनयनं च तैः अपत्यानां महोत्सवान् कुर्वंतं श्रीकृष्णं योगेश्वरेशस्य तस्य येषां पुत्रादीनां महोत्सवांश्चवीक्ष्य। लोकाः विसिष्मरे विसिष्मियिरे। विस्मयं प्रापुः ॥ ३३ ॥ ऊर्ज्जितैर्हिस्ततया शोभितैः पूर्त्तयंतं पूर्त्तसंज्ञं कर्म कुर्वंतं ॥ ३४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कापीति। क्वापि कस्मिंश्चिद्गृहे, धर्मं सेवमानं, कुत्रचिद्गृहे, अर्थकामौ च सेवमानं, कुत्रचित् एकं प्रकृतेः 'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च' इत्यादिश्लोकद्वयोक्तप्रकृतिद्वयात्, परं विलक्षणं, पुरुषं परमपुरुषभूतं, आत्मानं स्वात्मानं, ध्यायन्तमनुभवन्तं, अपश्यत् ॥ २९ ॥ शुश्रूषन्तमिति। क्वापि कामैः, भोगैः, सपर्यया पूजया च, गुरून् शुश्रूषन्तं, क्वापि कैश्चित् विग्रहं कुर्वन्तं, अन्यत्रान्यस्मिन् गृहे, संधिं कुर्वन्तं, केशवं कृष्णं, अपश्यत्। कुत्रापि कस्मिंश्चिद्गृहेऽपि, रामेण सह, सतां साधूनां, शिवं योगक्षेमं, चिन्तयन्तम् ॥ ३० ॥ पुत्राणामिति। क्वचित् काले तत्तत्समये, पुत्राणां दुहितॄणां च, तत्सदृशैः दारैः,

वरैश्च, विध्युपयापनं शास्त्रोक्तेन विधिना विवाहं, विभूतिभिः तद्विभवैः, कल्पयन्तं, अपश्यत् ॥ ३१ ॥ प्रस्थापनेति । येषां योगेश्वरेशस्य अपत्यानां पुत्राणां दुहितॄणां च, प्रस्थापनानि दुहितृस्नुषाजामात्रादीनां स्वगृहं प्रति नयनानि, उपानयनानि तद्गृहात्पुनरानयनानि च तैः, प्राप्तान् महोत्सवान्, कल्पयन्तं भगवन्तं वीक्ष्य, लोकाः, विसिस्मिरे ॥ ३२ ॥ यजन्तमिति । क्वापि कस्मिंश्चिद्गृहे, ऊर्जितैः भूरिदक्षिणैः, क्रतुभिर्यज्ञैः, स्वकलान् देवान्, यजन्तं, क्वचिद्गृहे, कूपारामालयादिभिः, धर्मं पूर्त्तयन्तं, स्मार्त्तं धर्मं कुर्वन्तमित्यर्थः । अपश्यत् । तत्र कूपशब्देन सर्वोपयोगिप्रहिखननं, आरामशब्देन देवसेवोपयोगिपुष्पफलप्रधानतर्वादियुतोपवनविधापनम् । आलयशब्देन विष्ण्वादिदेवतास्थापनार्थकमन्दिरादिविधापनम् ॥ ३३ ॥ चरन्तमिति । क्वापि क्वचित्, मेध्यान् पशून् दृष्ट्वा, सैन्धवं सिन्धुदेशोद्भवं, हयमश्वं, आरुह्य, मृगयां चरन्तं, मृगयां कुर्वन्तं कंचनजनमित्यर्थः । मारयन्तं, स्वस्याहिंसनशीलत्वं जानद्भिः स्वानुगैः वने हिंसां कुर्वन्तं बिलोक्य बद्ध्वा स्वचतुष्कमानीतं तं मृगघ्नं तैरेव ताडयन्तं भगवन्तमित्यर्थः । अपश्यत् । क्वापि यदुपुङ्गवैर्यादवश्रेष्ठैः, परीतं परिवृतं, अपश्यत् ॥ ३४ ॥

कृष्णप्रिया

कहीं किसी पत्नी के महल में अपनी प्राणप्रिया के साथ हास्य-विनोद की बातें करके हँस रहे हैं, तो कहीं धर्म का सेवन कर रहे हैं। कहीं अर्थ का सेवन कर रहे हैं—धन-संग्रह और धनवृद्धि के कार्य में लगे हुए हैं, तो कहीं धर्मानुकूल गृहस्थोचित विषयों का उपभोग कर रहे हैं ॥ २९ ॥ कहीं एकान्त में बैठकर प्रकृति से अतीत पुराण पुरुष का ध्यान कर रहे हैं, तो कहीं गुरुजनों को इच्छित भोग-सामग्री समर्पित करके उनकी सेवा-सुश्रूषा कर रहे हैं ॥ ३० ॥ देवर्षि नारद ने देखा कि भगवान् श्रीकृष्ण किसी के साथ युद्ध की बात कर रहे हैं, तो किसी के साथ सन्धि की। कहीं भगवान् बलरामजी के साथ बैठकर सत्पुरुषों के कल्याण के बारे में विचार कर रहे हैं ॥ ३१ ॥ कहीं उचित समय पर पुत्र और कन्याओं का उनके सदृश पत्नी और वरों के साथ बड़ी धूमधाम से विधिवत् विवाह कर रहे हैं ॥ ३२ ॥ कहीं घर से कन्याओं को बिदा कर रहे हैं, तो कहीं बुलाने की तैयारी में लगे हुए हैं। योगेश्वरेश्वर भगवान् श्रीकृष्ण के इन विराट् उत्सवों को देखकर सभी लोग विस्मित-चकित हो जाते थे ॥ ३३ ॥ कहीं बड़े-बड़े यज्ञों के द्वारा समस्त देवताओं का यजन-पूजन और कहीं कूएँ, बगीचे तथा मठ आदि बनवाकर इष्टापूर्त धर्म का आचरण कर रहे हैं ॥ ३४ ॥

चरन्तं मृगयां क्वापि हयमारुह्य सैन्धवम् । घ्नन्तं ततः पशून् मेध्यान् परीतं यदुपुङ्गवैः ॥ ३५ ॥
अव्यक्तलिङ्गं प्रकृतिष्वन्तः[1] पुरगृहादिषु । क्वचिच्चरन्तं योगेशं तत्तद्भावबुभुत्सया ॥ ३६ ॥
अथोवाच हृषीकेशं नारदः प्रहसन्निव । योगमायोदयं वीक्ष्य मानुषीमीयुषो गतिम् ॥ ३७ ॥
विदाम योगमायास्ते दुर्दर्शा अपि योगिनाम्[3] । योगेश्वरात्मन् निर्भाता भवत्पादनिषेवया ॥ ३८ ॥
अनुजानीहि मां देव लोकांस्ते यशसाऽऽप्लुतान् । पर्यटामि तवोद्गायन् लीला[4] भुवनपावनीः ॥ ३९ ॥

श्रीभगवानुवाच

ब्रह्मन् धर्मस्य वक्ताहं कर्ता तदनुमोदिता[5] । तच्छिक्षयँल्लोकमिममास्थितः पुत्र मा खिदः ॥ ४० ॥

कर्दमक्षमा

अन्वयः—सैन्धवम्, हयम्, आरुह्य, क्व, अपि, मृगयाम्, चरन्तम्, यदुपुङ्गवैः, परीतम्, मेध्यान्, पशून्, घ्नन्तम्, अपश्यत् ॥ ३५ ॥ क्वचित्, अन्तःपुरगृहादिषु, प्रकृतिषु, अव्यक्तलिङ्गम्, तत् भावबुभुत्सया, चरन्तम्, योगेशम्, अपश्यत् ॥३६॥ अथ, नारदः, योगमायोदयम्, वीक्ष्य, प्रहसत्, इव, हृषीकेशम्, उवाच, योगिनाम्, अपि, दुर्दशाः, ते, योगमायाः, मानुषीम्, गतिम्, ईयुषः, वयम्, कथम्, विदाम ? हे योगेश्वरात्मन्, भवत्, पादनिषेवया, निर्भाताः ॥ ३७-३८ ॥ देव ! माम्, अनुजानीहि, यशसा, आप्लुतान्, ते, लोकान्, भुवनपावनीः, ते, लीलाः, उदगायन्, पर्यटामि ॥ ३९ ॥ श्रीभगवान् उवाच—ब्रह्मन्, अहम्, धर्मस्य, वक्ता, कर्ता, तत्, अनुमोदिता, तत्, शिक्षयन्, इमम्, लोकम्, आस्थितः, पुत्र ! मा, खिद ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अव्यक्तलिंगं वेषांतरेण छन्नम् ॥ ३६-३७ ॥ हे योगेश्वर आत्मन् आत्मनि मम मनसि तव स्वरूपे वा निर्भाताः प्रतीतास्तव योगमायाः केवलं विदाम विद्मः न तु त्वत्परमार्थमिति भावः ॥ ३८ ॥ त्वन्मानुष्यनाट्येन मुह्याम्यतो मां प्रस्था-

---

[1] मन्तः—बिज. । [2] मावलं—बिज. । [3] मायिनाम्—श्रीधर. वंशी. जीव. वीर. बिज. विश्व. । [4] लीलां भुवनपावनीम्—श्रीधर. वंशी. जीव. वीर. बिज. विश्व. । [5] तमनुमोदकः—बिज. ।

पयेत्याह । अनुजानीहीति ॥ ३९ ॥ तत्तस्माल्लोकं शिक्षयन्निमं धर्ममास्थितो न तु तत्त्वतः हे पुत्र मा खिदः मोहं मा प्राप्नुहीति ॥ ४० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सैंधवं सिन्धुदेशोद्भवम् । ततो मृगयायाम् मेध्यान् यज्ञियान् ॥ ३५ ॥ प्रकृतिषु राज्यांगेषु । तस्यतस्य प्रकृत्यादेर्भावस्याभिप्रायस्य जिज्ञासया । एते धर्मपरास्तद्धीना वेति ज्ञातुमिच्छयेत्यर्थः । यद्वा—प्रकृतिष्वन्तःपुरादिषु तत्रत्यजनाभिप्रायं ज्ञातुम् अव्यक्तलिंगं वेषान्तरेणाच्छन्नं योगेशं सर्वज्ञमपि प्रेममय्या लीलाशक्त्यैव सर्वज्ञताशक्तेराच्छादनादिति भावः ॥ ३६ ॥ अथानंतलीलादर्शनानन्तरम् । रतिं क्रीडाम् । इवपदमाश्चर्यभावमाह । आत्ममायामन्तर्धाय कोन्वर्थो दुर्घटो भवतीत्युक्तत्वात् । प्रहसन्निवेति—सर्वज्ञत्वेपि बुभुत्सादृष्ट्या प्रहासः । इवेत्याश्चर्यदृष्ट्या संकोचात्तत्संवरणमुद्रा च ॥ ३७ ॥ दुर्दर्शानां मनस्यपि भानं न संभवतीत्यरुच्याह—तवेत्यादि । इति भाव इति—अनंतत्वान्मायाया इत्याशयः । विदाम वेदाम । साक्षादनुभवितुं प्रार्थयामेति प्रार्थनायां लोट् । ननु युष्मद्विधैः सर्वज्ञैः किं दुर्दर्शं तत्राह—योगिनां योगिभी रुद्रादिभिरपि दुर्दर्शा द्रष्टुमशक्याः कुतोऽनुभवितुं कुतोन्तरां कर्तुमिति भावः । हे योगेश्वर आत्मन्नात्मनि त्वय्येव निर्भाता अपि भवत्पादनिषेवया विदाम इति विश्वनाथः ॥ ३८ ॥ तवैता लीला अद्भुता दृष्ट्वा धैर्यं कर्तुं न शक्नोम्यतः स्वेष्टबंधुभ्यो नानादिग्वर्तिभ्यो वक्तुं यामीत्याह—अनुजानीहीति । अतो मोहजनकत्वात् ॥ ३९ ॥ यतोऽहमेव धर्मस्य वक्त्रादिस्तत्तस्माद्धेतोः । न तत्त्वतो वस्तुतः विधिनिषेधातीतत्वान्ममेति भावः । ननु पूर्वं पूजयित्वा पश्चात्कथं पुत्रेत्युक्तं तत्राह—हे पुत्र तद्वत्प्रिय । यद्वा—"स्यादात्मजे च सुहृदि पवित्रे पवने हरौ । अग्नौ मंत्रे च पुत्रोक्तिः" इति निरुक्तिः । यद्वा—पुत्रं कृत्वा त्यक्त इतिवद्वास्यसंबुद्धिः । ननु "पूर्वं संपूज्य तं पश्चान्नैकृष्टयेन न योजयेत्" इति स्मृतिः कथं श्रीकृष्णेन क्रियते किन्तु पूर्णानामपूर्णैरस्मदादिभिः "पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः", 'जन्मै तच्छोभनं कुरु' इत्याद्युक्तेः पुनः पुत्र मा खिद इति निकृष्टता दर्शितेति चेदर्थान्तरमाह—मखानां समूहो माखम् । "तस्य समूहः" इत्यण्, तदस्यास्तीति माखी परिषत् "यस्येदं देवयजनमनुयज्ञं वितन्वते" इत्युक्तेः । पुत्रैः प्रचेतोभिर्यतो माखी पुत्रमाखी, तं दयते पालयति पुरंजनोपाख्यानेन 'तज्जन्म तानि कर्माणि' इत्यारभ्य "नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः" इत्यंतेनोपदेशकदम्बेन संसाराद्रक्षतीति पुत्रमाखिदस्तत्सम्बुद्धौ तथा । अर्थाद्धे सर्वतारक अहं तु लोकशिक्षार्थमेव सर्वमाचरामीति भावः । "तीर्थे देवे गुरौ विप्रे पुत्रः स्यान्नन्दने तथा" इति कोशांतराच्च । हे पुत्र हे विप्र सर्वनियतानियतकालेऽपि शोधक "पूर्णेष्वपि च कालेषु न शुद्धिर्ब्राह्मणैर्विना । अपूर्णेष्वपि कालेषु शोधयन्ति द्विजोत्तमाः ॥" इत्यापस्तम्बस्मृतेः । त्वदेकांतदासस्य मम त्वन्निकटस्थिताविदमेव महद्दुःखं यन्मे शश्वत्पर्यटनदुर्भगौ पादौ स्वहस्तकमलाभ्यां प्रक्षालयसि तत्राह—ब्रह्मन्निति । तत्तस्माल्लोकं शिक्षयन्निमं धर्ममाश्रित आह—तावत् क्षत्रियो गृहस्थस्त्वां ब्राह्मणं गृहागतं यदि नार्चयामि तदा स्वाचरणेन मत्प्रचारितो धर्मः कथं तिष्ठेत् 'यद्यदाचरति श्रेष्ठः' इति न्यायात्तेन धर्मप्रचारणार्थमेव त्वत्पादावद्य क्षालितौ न तु वस्तुतः । यदा तु मया धर्मप्रचारणलीला नारब्धा तदा केशिवधानन्तरं मत्पार्श्वागतस्य तत्कृतस्तुत्यादिकमश्रौषमेव नाणुमात्रमप्यर्हणाद्यकरवमिति विचार्य पश्येति भावः । ननु तदपीदानीं त्वत्कर्तृकावनेजनकर्मणि स्वपदस्पृष्टतत्पाने ममापराधो भवत्येवेत्यत आह—हे पुत्रेति । स्नेहं ज्ञापयित्वा सांत्वयति—यथा पितरि तदंकनिहितपादोऽपि पुत्रस्य नापराधस्तथैव मयि तवेति बुद्ध्यस्वेति भावः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सैन्धवं सिन्धुदेशोद्भवं द्रुतगतित्वाय ततस्तत्र मेध्यानिति यज्ञार्थमिति बोधयति यदुपुङ्गवैः सात्यक्यादिभिः ॥ ३५ ॥ प्रकृतिषु अमात्येषु निजान्तःपुरादिषु चाव्यक्तलिङ्गम् आकारान्तरेणाच्छन्नं यतो योगेशं सर्वज्ञमपीत्युभयत्राप्युपोद्बलकं लीलेच्छया कस्याश्चिच्छक्तेः प्रकटनात् कस्याश्चित्तिरोधानाच्च प्रकृतीनामन्तःपुरस्थादीनाञ्च भावोऽभिप्रायः तस्य बुभुत्सया एवमन्यत्रापि दृष्टं किन्तु विस्तारशङ्कया न सर्वमुक्तमिति यद्वा श्रीनारद एव मुग्धस्तदन्वेषणान्निवृत्त इति ज्ञेयम् ॥३६॥ उवाच तस्मिन्नेवान्ये गेहे हृषीकेशमिति यच्च तेन दृष्टमहैश्वर्य्येण सङ्कोचादव्यक्तमत्र नोक्तं तदपि स्वयं ज्ञातमिति व्यक्तीभावित्वादुचितपदन्यासः इवेति सङ्कोचात् प्रहासस्य सम्वरणमुद्रामपि बोधयति प्रहासे हेतुः मानुषीं रतिमीयुषः मनुष्यक्रीडाविष्टस्यैव योगमायोदयं तदानुकूल्येनैवाचिन्त्यशक्त्याविर्भावं तत्राप्याच्छन्नवेषत्वादिकं वीक्ष्येति ॥ ३७ ॥ विदामेत्यादौ ब्रह्मन्निति वक्ष्यमाणश्रीभगवत्प्रतिवचनानुसारेणेदं गम्यते तदेवं श्रीनारदः सर्वां महाविनोदमयीं लीलां दृष्ट्वा महासुखमेव लब्धवान् किन्तु तत्तद्देवताद्युपासनादिमयधर्माचरणं दृष्ट्वा खेदः तन्तु सङ्कोचेन साक्षादप्रकटयन् भङ्ग्या प्रकटयति—विदामेति द्वाभ्याम् । ते तव योगमायाः स्वरूपभूताचिन्त्यशक्तिवृत्तिरेता विदाम किमर्थं कां प्रकटयसीति वेत्तुं प्रार्थयामहे कीदृशीरपि योगिनां नानाशक्तिधारिणां दुर्दर्शा अपि तथा भवत्पादनिषेवया ये योगेश्वरास्तेषामेवात्मनि मनसि निर्भाताः स्वयम्प्रकाशमाना अपि यद्वा, हे योगेश्वर ! स्वरूपभूतत्वात् आत्मनि त्वय्येव निर्भाताः प्रकाशमाना अपि भवत्पादनिषेवया विदाम ॥ ३८ ॥ तद्यत्रैव स्थित्वा क्रमेण जानीध्वेत्या-

शङ्कयाह—अन्विति । तवान्योपासानां द्रष्टुं न शक्नुम इति भावः तत्र च तद्यशोमाहात्म्योक्तिस्तदत्यन्तायोग्यताव्यक्त्यर्थमेव तथा हे देव ! सर्वाराध्येति च आप्लुतान् व्याप्तान् आप्लुतशब्देन यशसः सर्वतीर्थमयत्वं ध्वन्यते ॥३९॥ हृषीकेशत्वेन तदभिप्रायं विज्ञाय प्रतिवक्ति—ब्रह्मन्निति । यस्माद्धर्मस्य वक्ता तत्तस्मात्कर्त्ताऽनुमोदिता च परैः क्रियमाणस्य प्रीत्याऽभिनन्दकः अन्यथा न कश्चिन्मन्येतेति भावः । अत एव तद्धर्मं लोकं प्रति शिक्षयन् एवं वचसा कर्मणा भावेन चात्मनो धर्मप्रवर्त्तकत्वमुक्तं हे ब्रह्मन्निति वेदमयत्वात्त्वं तद्वेत्स्येवेति वेदमार्गरक्षणेन त्वादृशामेव सुखार्थमिति भावः । आस्थितः अनुतिष्ठन्नस्मि तथापि लीलाकीर्त्तनादिना तद्भक्तिमात्रप्रवर्त्तनेच्छोः तस्य खेदशान्तिमदृष्ट्वा तदनभिमतं भावगौरवं परित्यज्य तदभिमतभावेनानुग्रहेण सलालनं सम्बोधयति पुत्रेति ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सैन्धवं सिन्धुदेशोद्भवम्, द्रुतगतित्वादिना तस्यैव मृगयायोग्यत्वात्, ततस्तया मृगयाया हेतोः, मेध्यानिति यज्ञार्थमिति बोधयति । यदुपुंगवैरुद्धवादिभिः सात्यक्यादिभिर्वा, परीतं वेष्टितम् ॥ ३५ ॥ प्रकृतिष्वमात्येषु, अव्यक्तलिंगं योगेशं सर्व्वज्ञमपि तासां तासां तेषां तेषां प्रकृतीनां भावोऽभिप्रायस्तद्बुभुत्सया, तेषामेवान्तःपुरादिषु चरन्तं भ्रमन्तम्, आदि-शब्दात् सभाचत्वरादयः; यद्वा, यस्यान्तःपुरादिषु चरन्तं चररूपेण वर्त्तमानं तासां तासां महिषीणां प्रेमविलासादिरूपस्य भावस्य बुभुत्सया दिदृक्षयेत्यर्थः । गृहिधर्म्मापेक्षया श्रीभगवतस्तत्तदखिलकर्म्मणां प्रायः एकस्मिन्नेव गृहे सम्भवेऽपि गृहभेदेन कर्म्मभेदोक्तिः श्रीनारदं प्रति तद्वैचित्रीदर्शनार्थम्, तत्र तत्र तस्यागमनादिति । एवमष्टोत्तरशताधिक-षोड़श-सहस्रेष्वेव गृहेषु परिभ्रमन् ददर्श, तस्य च विस्तरेण कथनं बहुदिनसाध्यमिति न विवृतोक्तमिति ज्ञेयम् । यद्वा, सर्व्वासु ज्येष्ठायाः श्रीरुक्मिण्याः प्रियतमायाश्च श्रीसत्यभामाया इति गृहद्वये दृष्ट्वा पश्चादन्यासां जाम्बवतीप्रभृतीनां तावद्गृहेषु दृष्ट्वा कौतुकोद्रेकेण महामुग्धो दर्शनान्निवृत्त इति ज्ञेयम् ॥ ३६ ॥ अथ पश्चादिति महाकौतुक-विवशतया सद्यो वक्तुमशक्तः । उवाच तस्मिन्नेवान्त्ये गृहे प्रहसन् सहजमुखप्रसादात् स्मयमान इव । यद्वा, प्रहर्षवैवश्येन धैर्य्यापगमात् प्रकर्षेणोच्चस्वरादिना हसन्, इवेति लोकोक्तौ, हृषीकेशं सर्व्वेन्द्रिय-प्रवर्त्तकमिति तस्य वैवश्यनिवृत्त्यर्थमन्तर्यामिरूपेण श्रीभगवतैव तत्र प्रवर्त्तित इति भावः । एवमन्तर्य्यामितया बहुधा जीवानां प्रवर्त्तनेन हृदि हृदि सदा क्रीड़तोऽपि तस्य मानुषीं रतिं क्रीड़ामीयुषः प्राप्तस्य, अतएव योगमायाया उदयमुत्कर्षं वीक्ष्य साक्षादनुभूय ॥ ३७ ॥ योगः समाधिर्ब्रह्मप्राप्तिर्वा, तद्वतामपि दुर्दर्शा दुर्ज्ञेयाः, आत्मन्निर्भाता इति तासां नित्यत्वादिकमभिप्रेतम् । तत्र हेतुः—योगश्चिच्छक्तिस्तदीश्वरेति त्वच्छक्तिविशेषादित्यर्थः । भवतः पादयोर्नितरां सेवया विदामो वयम्, बहुत्वं भक्तवर्गापेक्षया, तज्ज्ञानेनात्मनो बहुमानाद्वा; अन्यत्तैर्व्याख्यातम् । यद्वा, योगिनां योगसाधकानां दुर्दर्शा ज्ञातुमप्यशक्याः, योगेश्वराणां सिद्धयोगानामात्मनि मनस्येव निर्भाता अपि भवत्पादनिषेवयैव विदामेति प्रार्थना । परमेश्वरस्य तवेदृशी गृहस्थधर्म्मे रतिः किमर्थं तत्तत्त्वं निजसेवाप्रसादविस्तारणेन विज्ञापयेत्यर्थः ॥ ३८ ॥ देव ! हे गृहक्रीड़ापर ! आप्लुतान् व्याप्तान्, अप्लुत-शब्देन यशसः सर्व्वतीर्थमयत्वं ध्वन्यते, तव भक्तवात्सल्यादियशः सर्व्वत्र शृण्वन्निति भावः । किञ्च, लीला दृष्टा एता गार्हस्थ्यक्रीड़ा उच्चैर्गायन्, किमर्थम् ? भुवनपावनीः चतुर्द्दश भुवनानि भक्तिविघ्नसर्व्वदोषात् शोधयितुमित्यर्थः । एतन्मधुरमधुरलीलाश्रवणेन स्वत एव सर्व्वेषां सर्व्वनैरपेक्ष्येण त्वयि विशुद्धा भक्तिः स्यादेवेति भावः । अन्यत्तैर्व्याख्यातम् । किञ्च, अनुजानीहि । किमर्थम् ? तदाह—लोकानित्यादि । देव ! हे स्वामिन् ! अन्यत् समानम् ॥ ३९ ॥ तस्य धर्म्मस्य तत्तस्माद्वा अनुमोदिता च परैः क्रियमाणस्य प्रीत्याभिनन्दकः । एवं वचसा कर्म्मणा भावेन चात्मनो धर्म्मप्रवर्त्तकत्वमुक्तम् । हे ब्रह्मन्निति वेदमयत्वात्त्वं तद्वेत्स्येवेति । यद्वा, वेदमार्गरक्षणेन त्वादृशामेव सुखार्थमिति भावः । आस्थितोऽनुतिष्ठन्नस्मि, हे पुत्रेति स्वस्नेहपात्रताबोधनेनाश्वासयति । पक्षान्तरे—एवं तत्तत्त्वाज्ञानेन मौग्ध्यदुःखं नाप्नुहीत्यर्थः । मद्भक्तप्रवरेण त्वया मम भावो विज्ञायत एवेत्याशयेन सलालनं सम्बोधयति—पुत्रेति ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

चरन्तमिति । सैन्धवं सिन्धुदेशोद्भवं हयमश्वमारुह्य मृगयां चरन्तं मेध्यान् यागार्हान् पशून् विशसन्तं क्वचिद्यदुश्रेष्ठैः परिवृतम् ॥ ३५ ॥ प्रकृतिष्वमात्यादिष्वन्तःपुरचरादिषु तत्तदभिप्रायं बोद्धुमिच्छया अव्यक्तं वेषान्तरेण छन्नं लिङ्गं स्वासाधारणचिह्नं यस्य तं चरन्तं ददर्श ॥ ३६ ॥ अथेति । मानुषीं गतिं चेष्टां तनुं वा ईयुषः प्राप्तवतः परिगृहीतवत इति यावत् तस्य भगवतो योगमायोदयमाश्चर्य्यशक्तिवैभवमवलोक्य प्रहसन्निव प्राह—अचिन्त्यविविधविचित्रशक्तावस्मिन्नेतच्चित्रम् इतीवशब्दाभिप्रायः ॥ ३७ ॥ उक्तिमेवाह—विदाम इति द्वाभ्याम् । हे योगेश्वर ! योगिनां दुर्दर्शामपि ते तव योगमायामाश्चर्यशक्तिं भवत्पादनिषेवाप्रभावेनात्मन्यात्मनि मनसि निर्भातां नितरां भातां विदामः जानीमः ॥ ३८ ॥ किन्तु, हि हे देव ! मामनुजानीहि आज्ञापय तव यशसा व्याप्तान् लोकान् चरामि भुवनपावनीं तव लीलामुद्गायन् परितः चरामि ॥ ३९ ॥ इत्युक्तः प्राह भगवान्—ब्रह्मन्निति । हे ब्रह्मन् वक्ता उपदेष्टा तद्धर्मोपदेशतदनुष्ठानतदनुमोदनादिकं शिक्षयन् शिक्षयितुं जनान् प्रतीति शेषः

इमं लोकं मनुष्यदेहमास्थितः परिगृहीतवानस्मि प्राकृतचेष्टामनुवर्त्त इति भावः। अतो हे पुत्र ! मा खिदः स्वयमीश्वरोप्यधुना प्राकृतो बभूवेत्येवम्विधं मोहं न प्राप्नुहीत्यर्थः ॥ ४० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

सैन्धवं सिन्धुदेशभवं तीर्थे शास्त्रे विहितान् पात्रे प्राप्ते वा यज्ञे वा ॥ ३५ ॥ अव्यक्तलिङ्गप्रकृतिम् अस्पष्टलक्षणस्वभावं तेषां तेषां भावानां पादार्थानां बुभुत्सया स्वभावजिज्ञासया ॥ ३६ ॥ मानुषीं रतिं मनुष्यक्रीडाम् ॥ ३७ ॥ आत्मनि हृदये निर्भातस्य भवतः पादयोर्निषेवया ॥ ३८ ॥ आप्लुतानिति पाठे यशसा तीर्थेन स्नातानित्यर्थः ॥३९॥ लोकानुकारिचरितदर्शनेन नारदस्यान्यथाज्ञानं निवारयन्निति तत्त्वमुपदिशति—ब्रह्मन्निति। इमं लोकमास्थित। अस्मिन् लोके स्थितः तं धर्मकर्तारम् अनुमोदकः अनुज्ञाता ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मानुषीमपि रतिं क्रीडामीयुषः प्राप्तस्य योगमायानामचिन्त्यानां स्वरूपशक्तीनामुदयमिति ॥ ३७ ॥ कौतुकविशेषो दर्शितः ताश्च यत्किञ्चिज्जाता इति व्यञ्जयितुमात्मनो भावि सम्यक् तज्ज्ञानतां सम्भावयति। भवत्पादनिषेवया विदाम वेदाम वेत्स्याम इत्यर्थः। तन्निषेवाच ममेयमेवेति प्रार्थयते ॥ ३८ ॥ अन्विति। तत्र यज्ञादौ देवतान्तरोपासनादिना जातं तस्य खेदं निवर्त्तयति—ब्रह्मन्निति। श्रीशुकदेवोऽपि धर्म्माचरणे नानात्वे च सिद्धान्तसारमाह—इतीति। गृहीतानां श्रवणादीनामपि पवित्रताहेतून् धर्मान् एकं एकविग्रहम् ॥ ३९-४२ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

विदामेत्यादि। ते तव योगमाया विदाम। कीदृशीः ? योगिनामपि दुर्दर्शा दुर्ज्ञेयाः; तत्कथं भवन्तो विदन्तीति नाशङ्कनीयम् ? वयं भक्ता इति गूढं व्यङ्ग्यम्। तदेव प्रकटयति—योगेश्वरात्मन्नित्यादि। भवत्पादनिषेवया निर्भाताः ॥३९-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

मानुषीं रतिमीयुषः। मनुष्याणामिमां मानुषीं मनुष्यकर्तृकां रतिं स्वीकुर्वतः ॥ ३७ ॥ विदामेत्यादि। तव योगमाया विदाम योगिनामपि दुर्दर्शाः दुर्ज्ञेयाः, न तु भक्तानामस्माकमित्यर्थः। योगिनामपि दुर्दर्शतया कथं यूयं ज्ञातवन्त इत्याह—तत्पादपद्मनिषेवयेति ॥ ३८-४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चरन्तमिति सैन्धवं सिन्धुदेशोद्भवम् ॥ ३५ ॥ प्रकृतिष्वमात्यपुरेषु निजान्तःपुरादिषु च। तत्तद्भावबुभुत्सया तत्रत्यजनानामभिप्रायान् ज्ञातुम् अव्यक्तलिङ्गं वेषान्तरेणाच्छन्नं योगेशं सर्वज्ञमपीति प्रेममय्या लीलाशक्त्यैव सर्वज्ञताशक्तेराच्छादनादिति भावः ॥ ३६ ॥ प्रहसन्निवेति। सर्वज्ञत्वेपि बुभुत्सादृष्ट्या प्रहासः। इवेत्यैश्वर्य्यदृष्ट्या सङ्कोचात्तत्सम्वरणमुद्रा च। मानुषीं रतिमीयुषः स्वीयमनुष्यक्रीडाविष्टस्यापि योगमायोदयं वीक्ष्येति विस्मयो व्यञ्जितः ॥ ३७ ॥ भवतः पादनिषेवया विदाम वेदाम प्रार्थनायां लोट् साक्षादनुभवितु प्रार्थयामह इत्यर्थः। ननु, युष्मद्विधैः सर्वज्ञैः किं दुर्वेद्यं तत्राह योगिनामपि योगिभिः श्रीरुद्राद्यैरपि दुर्द्दर्शाः द्रष्टुमप्यशक्याः कुतोऽनुभवितुं कुतस्तरां कर्तुमिति भावः। हे योगेश्वर आत्मन् आत्मनि त्वय्येव निर्भाताः ॥ ३८ ॥ तवैता अद्भुता लीलाः दृष्ट्वा धैर्य्यं कर्तुं न शक्नोम्यतः स्वेष्टमित्र बन्धुभ्यो नानादिग्देशवर्त्तिभ्यो वक्तुं यामीत्याह—अनुजानीहीति ॥ ३९ ॥ किञ्च। त्वदेकान्तदासस्य मम त्वन्निकटस्थताविदमेव महद्दुःखं यन्मे श्वश्वत् पर्य्यटनकठोरौ दुर्भगौ पादौ स्वहस्थकमलाभ्यां प्रक्षालयसीति, तत्राह—ब्रह्मन्निति। तत्तस्मात् लोकं शिक्षयन् इमं धर्मम् आस्थितः। अहं तावत् क्षत्रियो गृहस्थस्त्वां ब्राह्मणं स्वगृहमायातं यदि नार्च्चयामि तदा स्वाचरणेन मत्प्रचारितो धर्मः कथं तिष्ठेत् ? "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः" इति न्यायात्तेन धर्मप्रचारणार्थमेव त्वत्पादौ मयाद्य क्षालितौ ननु वस्तुतः। यदा तु मया धर्मप्रचारणलीला नारब्धा तदा केशिवधानन्तरं मदन्तिकमायातस्य तव बहुस्तुत्यादिकमश्रौषमेव ननु किमप्यणुमात्रमप्यर्हणमकरवमिति स्मृत्वा पश्येति भावः। ननु तदपीदानीं तत्कर्तृकावनेजनकर्मणि स्वपदस्पृष्ट त्वत्पाने ममापराधो भवत्येवेत्यत आह—हे पुत्रेति। स्नेहं ज्ञापयित्वा सान्त्वयति। यथा पितरि तदङ्कनिहितपादोऽपि पुत्रस्य नापराधस्तथैव मयि तवेति बुध्यस्वेति भावः ॥ ४० ॥

गूढार्थदीपिनी

सैन्धवं सिन्धुदेशोद्भवम्। मृगयामुद्दिश्य चरन्तं विचरन्तम्। मेध्याहान् यज्ञार्हान् घ्नन्तमिवेति लुप्तोपमा। एतच्च लीलानुकरणमेव न वस्तुतस्तस्याविधित्वादिति सिद्धान्तः ॥ ३५ ॥ अव्यक्तं वेषान्तरेण छन्नं लिङ्गं स्वरूपं यस्य तं तथाभूतं कृष्णं प्रकृतिषु अमात्यादिषु चरन्तमपश्यदिति सर्वत्र योज्यम्। प्रकृत्यादेः तत्तद्भावस्य अभिप्रायस्य जिज्ञासया ॥ ३६ ॥ गति

चेष्टाम् ईयुषः प्राप्तवतः भगवतः योगमायाया वैभवं वीक्ष्य प्रहसन्निव कृष्णमवादीदित्यन्वयः ॥ ३७ ॥ विदामेति साक्षादनुभवितुं प्रार्थयामेति प्रार्थनायां लोट् । आत्मन्निति लुप्तसप्तम्यन्तम् । आत्मनि त्वय्येव [illegible] विदामः न तु स्वपरमार्थमिति भावः ॥ ३८ ॥ अनुजानीहि गन्तुमाज्ञां देहि । आप्लुतान् व्याप्तान् ॥ ३९ ॥ [illegible] लोकं शिक्षयन् इमं धर्मं स्वत्सम्माननादिरूपमास्थितः न तत्त्वतः अतो मा खिदः । [illegible] ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अव्यक्तलिङ्गान् गुप्तवेषम् ॥ ३६ ॥ मानुषीं गतिं चेष्टामीयुषः गार्हस्थ्यमेव [illegible] तिष्ठेयमिति द्योतयितुं मनुष्यचेष्टामनुकुर्वत इत्यर्थः ॥ ३७ ॥ स्वस्य भगवतः कृपापात्रतां दर्शयति—विदामेति [illegible] । याः योगिनामपि दुर्दर्शाः द्रष्टुमशक्याः ताः योगमायाः अत्यद्भुताः सतीः आत्मन् आत्मनि बुद्धौ [illegible] अहो ऽस्माकं भाग्यमिति भावः ॥३८॥ योगमायोदयं [illegible] अनुजानीहीति । ३९॥ अक्षिसङ्कोचनेनैव तमनुज्ञाप्य पूर्णकामः पञ्चयज्ञादिकं किमर्थं करोमीति [illegible] लौकिकं प्रवृत्तिनिष्ठं शिक्षयन् धर्मं पूर्वोक्तमास्थितः अतो मा खिदः पूर्णकामस्येदृशं चेष्टितं किमर्थमिति [illegible] फलितार्थः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सैन्धवं हयमारुह्य मृगयां चरन्तं तीर्थे [illegible] मेध्यान्मेध्यत्वेनोक्तान् तीर्थे [illegible] आगतान् इति वा यदुपुङ्गवैः सह घ्नन्तम् ॥ ३५ ॥ अन्तःपुरवरादिष्वव्यक्तं लिङ्गं चिन्हं यस्याः सा प्रकृतिः स्वभावो यस्य [illegible] मिति यावत् । तद्भावस्य बुभुत्सया बोद्धुमिच्छया योगेशं चरन्तमिति तदज्ञाततया तद्व्यापारज्ञानार्थं चरन्तमिति यावत् ॥ ३६ ॥ मानुषीं मनुष्यसम्बन्धिनीं रतिं रमणं क्रीडामीयुषो गतवतो योगमायाबलं च नारदो वीक्ष्य प्रहसन्निव हृषीकेशमथोवाच ॥ ३७ ॥ योगिनामपि दुर्दर्शा द्रष्टुमशक्याः स्वनस्तां ते योगमायां वयं विदाम जानीमः । हे योगेश्वर आत्मन । हृदये निदर्शे निर्भातो ध्यानपथमायातोऽनुगृहाण यथा स्मृतिः स्यादिति प्राक् प्रार्थनात् । [illegible] हे योगेश्वरेष्वात्मा मनो यस्य तत्साम्यबुद्धिरिति वा । निर्भातेति सर्वत्र प्रकाशमानो भक्तपालो [illegible] । सर्वत्र [illegible]देरिति वा ॥ ३८ ॥ एवमेवानुभवनं सदनुग्रहयापादने [illegible] प्रख्यापनीय इति विज्ञापयति । अनुजानीहीति । हे देव [illegible] वा । ते यशसाऽऽप्लुतान् [illegible] लोकान्देवलोकान्वा कर्तुं भुवनपावनीं तव लीलामुद्गायन्पर्यटामि । अतो मामनुजानीहि । [illegible] ॥ ३९ ॥ [illegible] जानन्नामकोऽयं [illegible] धर्मस्य वक्ता तथा कर्ताऽनुमोदकः [illegible] लोके लोकैरेवं कर्तव्यमिति शिक्षणार्थमेवैतं मम प्रवृत्तिर्न कर्मायत्तेति पुत्र मा खिदः स्वाभाविकचर्येयं [illegible] दैन्यं मा त्वं गाः ॥ ४० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततोऽन्तःपुरस्थपर्वतोपवनादिषु सैन्धवं समुद्रोद्भवं हयमारुह्य मृगयां चरन्तम् । गत्वाऽपि गृहे प्रविष्टः गृहस्थैस्तथोक्तः मृगयास्थाने तथाविधं दृष्टवानित्यर्थः । तथैव क्वचिन्मेध्यान्पशून् श्राद्धाद्यर्थं घ्नन्तम् । [illegible] तथा करोतीति ख्यापयितुं परीतं यदुपुङ्गवैरित्युक्तम् ॥ ३५ ॥ गुप्तचर्यां चरन्तं दृष्टवानित्याह अव्यक्तलिङ्गमिति । अव्यक्तानि लिङ्गानि स्वासत्त्वख्यापकानि । यासां प्रकृतीनां स्त्रीणामन्तःपुरे गृहादिकं येषां तेषामपि तस्य तस्य [illegible] बुभुत्सया अव्यक्तलिङ्गं चरन्तम् । गृहरीत्या यथा राज्ञां गुप्तचर्या भवति । तथैव नारदः स्वयमपि तादृशधर्मपर इति । [illegible] भगवान् [illegible] । 'ये यथा मां प्रपद्यन्ते' इति समानशीलत्वात्तत्र भगवत्साक्षात्कारो जातः ॥ ३६ ॥ ततो निकटे मिलितः, पलायनेऽप्यशक्तः, लज्जितः सन् किञ्चिद्भगवन्तमुवाचेत्याह अथोवाचेति । हृषीकेशत्वेन स्वापराधो निवारितः भगवतैव तथा प्रेरित इति । आदावन्योन्यदर्शनेन प्रहसनम् । ततो लज्जया विषादादिरिति । एतावद्दर्शनेन नारदस्य किं [illegible], [illegible] ऐश्वर्यपरिज्ञानेन तथात्वम्, अथवा मायैवेति । मायापक्षे सर्वथा प्राकृतबुद्धिः । प्रथमपक्षे तु नारदस्य सर्वथा प्राकृतत्वम् । मध्यमे तूभयोरुत्तमत्वमिति । [illegible]ऽपि बुद्धिविशेषा नारदबुद्धौ न स्फुरिताः, किन्तु [illegible] तुल्यतया परिज्ञानं मध्यमभावश्च स्फुरित इति ज्ञापयन्नाह योगमायोदयं वीक्ष्येति । योगमाय(ा)या दिव्या अपि गतयो भवन्तीति कर्ममयमेव लीला दृष्टेत्याशङ्क्याह मानुषीमीयुषो गतिमिति । योगेश्वरो हि यादृशीं रतिं वाञ्छति, तदनुरूपा भवति । योगमाया योगस्याधिदैविकी देवता, साधनरूपा वा भगवच्छक्तिस्तथेति ॥ ३७ ॥ तावन्मात्रं ज्ञातं विनिश्चित्य तत्रैव पर्यवसितमतिः अधिकार्थापरिज्ञानात् नायकोत्कर्षाभावे प्रमेयभक्तिमार्गो न साधीयानिति ततो निवृत्तिं वाञ्छन्नपि प्रमाणबलेनैव भक्तिमार्गमुपदेक्ष्यामीति निश्चित्य भगवन्तं प्रार्थयते विदामेति द्वाभ्याम् । ते योगमायाः यथेच्छं प्रवर्तमानस्य तत्तदिच्छापूरकाः विदामः । इदं ज्ञानं

स्वस्यैवाराधनमिति [illegible] दुर्दर्शा अपि योगिनां [illegible] दुर्लभ [illegible] लौकिकपरिज्ञानात्कारणाज्ज्ञानं न [illegible] तव [illegible] योगेश्वरात्मन् भवत्पादनिषेवया निर्भाता इति । योगेश्वराणामस्मदादीनामात्मत्वेन स्फुरन्ति [illegible] हेतुः । अत एतावत्कालं कृता प्रमेयबलात्मकः [illegible] एवोपपत्तिर्जातेति [illegible] कीर्तनमार्गेणैव स्थास्यामीति प्रार्थयते अनुजानीहीति देवलोकानिन्द्रादिस्थानानि ते यशसा आप्लुतान् व्यापयन् उद्गायन् पर्यटामि । भुवनपावनीः लीलाः पूर्वसिद्धा एव । एतासामदृष्टानां साक्षि प्रसिद्ध्यभावात् एता असम्मता इत्यर्थादुक्तं भवति ॥ ३९ ॥ तत्र भगवान् विचारार्थं प्रवृत्तोऽपि अपरिज्ञानात् खिन्नो जातः मामेव पारत्यक्तुं वाञ्छतीति निश्चित्य प्रबोधयति ब्रह्मन् धर्मस्येति । केवलकथने वेदादौ क्रियाप्रवेशाभावे लोको न मन्यते इति धर्मस्याहं वक्तापि यदि क्रियाकरणस्यानुमन्ता न कुर्यां वचनाचरणादिभिः, तदापि लोको न प्रवर्तेतेति तस्य धर्मस्यानुमोदिताप्यहम् । अतो लोके धर्मप्रवृत्त्यर्थं तच्छिक्षयन् लोके धर्मं ग्राहयन् इमं लोकमास्थितः । अयं भावः समाश्रित इत्यर्थः । इति स्वकृतस्य नानाविधधर्मस्याभिप्रायो वर्णितः । ननु त्वद्वञ्चनार्थं माया प्रदर्शितेति पक्षं निवारयितुं सम्बोधनमाह पुत्रेति । लीलायाः तत्त्वापरिज्ञानान्मा खिद । तत्त्वं तूक्तमिति ॥ ४० ॥

श्रीसुबोधिनी-सारः

क्वापि मृगयां गच्छन्तं सैन्धवं सिन्धुदेशजं हयं घोटकमारुह्य ततोऽनन्तरं मेध्यान् पशून् श्राद्धार्हान् घ्नन्तं यदुवरैः परीतं परिवेष्टितम् ॥ ३५ ॥ अव्यक्तं लिङ्गं वेषो यस्य तं प्रकृतिष्वमात्यादिषु अन्तःपुरगृहादिषु चरन्तं वर्तमानं योगेशं [illegible]दपश्यत् तत्तद्भावानां बुभुत्सया बोद्धुमिच्छया ॥ ३६ ॥ अथानन्तरं मानुषीं गतिमीयुषः सेवमानस्य हरेर्योगमायाया उदयं वीक्ष्य दृष्ट्वा प्रहसन्निव नारद उवाच हृषीकेशं श्रीकृष्णम् ॥ ३७ ॥ हे योगेश्वर आत्मन् मनसि त्वयि वा निर्भाताः प्रतीतास्ते तव योगमाया मायिनामपि दुर्दर्शा अलक्ष्या वयं विदाम जानीम भवतः पादयोर्निषेवया ॥ ३८ ॥ हे देव ते तव यशसाऽऽप्लुतान् व्याप्तान् लोकान् तव भुवनपावनीं जगदुद्धारिणीं लीलामुद्गायन्नहं पर्यटामि विचरामि मां त्वमनुज्ञां देहि ॥ ३९ ॥ कृष्णोक्तिः । हे ब्रह्मन् धर्मस्य वक्ता कर्ताऽनुमोदिताहं तद्धर्मादि शिक्षयन् इमं लोकं देहं वा स्थितोऽस्मि हे पुत्र मा खिद मा मोहमेहि ॥ ४० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

अव्यक्तलिङ्गेत्यत्र । अव्यक्तानि लिङ्गानि यासां तादृशीषु प्रकृतिषु स्त्रीषु । **अन्तःपुरे** गृहादिकं येषां तादृशेषु पुरुषेषु चेत्यर्थः । दासीदासादिष्ववाति यावत् । **तथा धर्मपर** इतीति । नारदोऽपि गुप्तचर्याविमर्शपर इति हेतोस्तत्रैव भगवन्तं पृष्टवानिति शेषः । **नारदवादानिति** । आदिशब्दः प्रकारार्थे । नारदप्रकारकानुमतये स्थितानित्यर्थः । **अथोवाचेत्यत्र** । **तथात्वमिति** । **पुरुषोत्तमस्वरूपविस्मृतिमित्यर्थः** । **सर्वथेति** । एतद्बुद्ध्या भगवत्यपि प्राकृतत्वमित्यर्थः । **प्रथमपक्षे त्विति** । मोहपक्षे नारदस्य **प्राकृतत्वम्** । **भगवत्**स्वरूपस्य त्वज्ञानमेवेति तुशब्दः । **मध्यमभाव** इति । **ब्रह्मैवानन्तमूर्तीति भाव उत्तमः** । योगबलेन नाना-**रूपाणि करोतीति** मध्यमभाव इत्यर्थः । **नायकोत्कर्षाभावे** इति । प्रमेयमार्गे साधनान्तराभावाद्भगवानेव नायकः स्वस्वरूपप्रापण-**कर्ता तस्योत्कर्षः** स्वरूपबलप्राकट्यं तदभावे इत्यर्थः । **विदामेत्यत्र** । **लौकिकपरिज्ञानाविति** । लौकिकत्वेन परिज्ञानादित्यर्थः । **एतदर्थपरिज्ञाने चेति** । योगमायापरिज्ञाने मध्यमभावस्फुरणे इत्यर्थः । **ब्रह्मन्धर्मस्येत्यत्र** । **केवलेति** । एतस्यैव विवरणं **वेदादाविति** । केवलमितिहासादिरीत्या कथने वेदादौ क्रियाया धर्मस्य प्रवेशाभावे उपनिबन्धनाभावे इत्यर्थः । तथाच मूले **कर्तेत्यस्य** उपनिबन्धनकर्ता इत्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यदुपुङ्गवैः परीतं सैन्धवं सिन्धुदेशोद्भवं हयं **अश्वमारुह्य क्वापि मृगयां चरन्तम्**, ततस्तस्यां मृगयायां मेध्यान् **श्राद्धादियोग्यान्** पशून् घ्नन्तम् ऐक्षतेत्यन्वयः ॥ ३५ ॥ प्रकृतिष्वमात्यादिष्वन्तःपुरगृहादिषु च तेषां भावानां बुभुत्सया बोद्धुमिच्छया **अव्यक्त**वेषान्तरेणच्छन्नं लिङ्गं स्वसाधारणं **चिह्नं यस्य** तथाभूतं क्वचिच्चरन्तं योगेशं सर्वथाभवनसमर्थं कृष्णम-**पश्यत्** ॥ ३६ ॥ अथानन्तरं मानुषीं गतिं तनुं चेष्टां चेयुषः प्राप्तवतः परिगृहीतवता भगवता योगमायोदयम् अचिन्त्यशक्तिविभवं **वीक्ष्यावलोक्य** प्रहसन्निव नारदः अथानन्तरं हृषीकेशं हृषीकाणि इन्द्रियाणि तेषामीशं नियन्तारं सर्वान्तर्यामिणं श्रीकृष्णमुवाचे-**त्यन्वयः** । 'प्रभावदर्शनात् सङ्कोचोऽप्यस्ति' इति **सूच**यितुमिवशब्दः ॥ ३७ ॥ तदुक्तिमाह— विदामेति द्वाभ्याम् । **'तव** न किञ्चिद-**शक्यम्'** इति सूचयन् संबोधयति—योगेश्वरेति । मायिनां **ब्रह्मादीनामपि** दुर्दर्शा दुर्ज्ञेया**स्ते तव योगमायाः** भवत्पादनिषेवण-प्रभावेणात्मनि स्वमनसि निर्भाताः स्फुरितास्त्वदुक्ता वयं विदाम जानीमः, अतो नेतरवत् मोह इत्याशयः ॥ ३८ ॥ अथ च **भुवनपावनीस्तव** लीला उद्गायन् ते यशसाप्लुतान् **व्याप्तान् कुर्वन्** लोकान् अहं **यथा** पर्यटामि तथा हे **देव !** मामनुजानीहि आज्ञां देहीत्यन्वयः ॥ ३९ ॥ एवमुक्तवति '[illegible] मम पादप्रक्षालनादि कृतं तन्मम जुगुप्सितम्' इति खेदं कुर्वन्तं प्रति

भगवानाह—ब्रह्मन्निति। 'तवाप्येतद्विदितमेव' इति 'ब्रह्मन्' इति संबोधनेन सूचितम्। अहं धर्मस्य वक्ता शास्त्रे उपदेष्टा। उपदिष्टमपि धर्मं यदि स्वयं न कुर्यां तदा तत्र सन्देहाल्लोकस्य प्रवृत्तिर्न स्यात्, तदर्थं तस्य कर्ताप्यहम्। एवमपि यदि तत्र प्रवृत्तस्य फलदानादिनानुमोदनं न कुर्यां तदापि निष्फलतया धर्ममार्गः प्रतिरुद्धः स्यात्, अतस्तस्यानुमोदिताप्यहम्। यस्मादेवं तस्मात् लोकं शिक्षयन् धर्मं ग्राहयितुमिमं त्वत्संमाननादिधर्ममहमास्थितः कृतवान्, अतो हे पुत्र! मा खिदः। संबोधनं स्नेहसूचकम् ॥ ४० ॥

अन्वितार्थप्रकाशिका

चरन्तमिति ॥ यदुपुङ्गवैः परीतं सैन्धवं सिन्धुदेशोद्भवं हयम् अश्वमारुह्य क्वापि मृगयां चरन्तं ततस्तस्यां मृगयायां मेध्यान् श्राद्धादियोग्यान् पशून् घ्नन्तमपश्यत् ॥ ३५ ॥ अव्यक्तेति ॥ प्रकृतिष्वमात्यादिष्वन्तःपुरगृहादिषु च तेषां भावानां बुभुत्सया बोद्धुमिच्छया अव्यक्तं वेषान्तरेण छन्नं लिङ्गं स्वासाधारणचिह्नं यस्य तथाभूतं क्वचिच्चरन्तं योगेशं कृष्णमपश्यत्। एवमन्यदप्यन्यत्र दृष्टमूह्यम्। यद्वा। एतावद्दृष्ट्वा मोहेनाग्रे निवृत्तः ॥ ३६ ॥ अथेति ॥ मानुषीं गतिं तनुं चेष्टां चेयुषः प्राप्तवतः भगवतो योगमायोदयं वीक्ष्य अथ प्रहसन् इव नारदः हृषीकेशं श्रीकृष्णमुवाच ॥ ३७ ॥ विदामेति ॥ हे योगेश्वर! मायिनां ब्रह्मादीनामपि दुर्दर्शा दुर्ज्ञेयास्ते भवत्पादनिषेवया तत्प्रभावेणात्मन् आत्मनि स्वमनसि। ङिलुक् छान्दसः। निर्भाताः स्फुरिताः ते तव योगमायाः विदाम विद्मः। आर्षः। नतु त्वत्स्वरूपमित्यर्थः। यद्वा। प्रार्थनायां लोट्। किमर्थमिमां प्रकटयसीति साक्षादनुभवितुं प्रार्थयामहे ॥ ३८ ॥ अनुजानीहीति ॥ हे देव! भुवनपावनीस्तव लीला उद्गायन् ते यशसा प्लुतान् व्याप्तान् लोकान् अहं यथा पर्यटामि तथा मामनुजानीहि गमनायानुज्ञां देहि ॥ ३९ ॥ ब्रह्मन्निति ॥ हे ब्रह्मन्! अहं धर्मस्य वक्ता उपदेष्टा लोकसङ्ग्रहार्थं स्वयं तस्य कर्ता फलदानादिना तस्य अनुमोदिताऽप्यहं तत् तस्मात् लोकं शिक्षयन् धर्मं ग्राहयितुमिमं त्वत्सम्माननादिधर्ममहमास्थितः नतु तत्त्वतः। अतो हे पुत्र! मा खिदः मोहं मा प्राप्नुहि। आर्षोऽयं प्रयोगः ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सैंधवं सिंधुदेशोत्पन्नं ॥ ३५ ॥ अंतःपुरगृहादिषु प्रकृतिषु प्रधानादि प्रजासु च येषां तेषां भावोऽभिप्रायस्तस्य बुभुत्सया ज्ञातुमिच्छया अव्यक्तं वेषांतरेणच्छन्नं लिंगं वसुदेवपुत्रत्वं येन तं चरंतं ददर्श ॥ ३६ ॥ मानुषीं गतिमनुष्यभावं। ईयुषः प्राप्तस्य योगमायाया योगैश्वर्यस्य उदयं वैभवं ॥ ३७ ॥ मायिनां योगैश्वर्यवतामपि योगिनामित्यपिपाठः दुर्दशाः द्रष्टुमशक्याः याः योगमायाः योगैश्वर्याणि ताः। हे योगेश्वर भवत्पादनिषेवया आत्मन् आत्मनि मम मनसि यद्वा आत्मनि त्वयि निर्भाताः प्रकाशमानाः वयं विदाम वेदाम विद्मः ॥ ३८ ॥ मनुष्यनाट्यं दृष्ट्वा मुह्यन्नाह अन्विति। अनुजानीहि आज्ञापय ॥ ३९ ॥ धर्मस्य कर्त्ता स्थापकः तस्य धर्मस्य अनुमोदिता पालकानां प्रोत्साहजनकः। तत् तं धर्मं लोकं प्रतिशिक्षयन् आस्थितः तस्मिन्ननुतिष्ठन्नहमस्मि। हे पुत्र माखिद। पुत्रेति लालनवचन ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अव्यक्तेति। क्वचित् अन्तःपुरचरादिषु प्रकृतिष्वमात्यादिषु च, तत्तद्भावबुभुत्सया तत्तदभिप्रायाणां बोद्धुमिच्छया, चरन्तं, अव्यक्तं वेषान्तरेणाच्छन्नं लिङ्गं स्वासाधारणचिह्नं यस्य तं, योगेशं, अपश्यत् ॥३५॥ अथेति। मानुषीं मनुष्यसंबन्धिनीं, गतिं चेष्टां तनुं वा, ईयुषः प्राप्तवतः, परिगृहीतवत इति यावत्। तस्य, योगमायोदयमाश्चर्यशक्तिवैभवं, वीक्ष्यावलोक्य, अथ नारदः, प्रहसन्निव, हृषीकेशं उवाच। अचिन्त्यविविधविचित्रशक्तौ त्वयि न चित्रमितीवशब्दाभिप्रायः ॥ ३६ ॥ उक्तमेवाह द्वाभ्याम्। विदाम इति। हे योगेश्वर, योगिनां दुर्दर्शा अपि, ते तव, योगमाया आश्चर्यशक्तीः, भवत्पादनिषेवया भवत्पादसेवाप्रभावेण, आत्मन्नात्मनि मनसि, निर्भाता नितरां भाताः, विदाम ॥ ३७ ॥ अनुजानीहीति ॥ हे देव, मां अनुजानीहि आज्ञापय। ते तव, यशसा आप्लुतान् व्याप्तान्, लोकान्, भुवनपावनीः, तव लीलाः, उद्गायन् पर्यटामि ॥ ३८ ॥ इत्युक्तः प्राह भगवान्। ब्रह्मन्निति। हे ब्रह्मन्, धर्मस्य वक्तोपदेष्टा, कर्त्ता, तदनुमोदिता, अहं भवामि। अतः, तत् धर्मोपदेशतदनुष्ठानतदनुमोदनादिकं, शिक्षयन् जनान् शिक्षयितुं, इमं लोकं मनुष्यदेहं, आस्थितः आश्रितः परिगृहीतवानस्मि। मनुष्यचेष्टामनुवर्त्तयामीति भावः। अतः, हे पुत्र, नारकान् भगवदुपदेशेन तारकः, मा खिद। स्वयमीश्वरः सन्नपि, अधुना मनुष्यचेष्टितः कथं बभूवेत्येवंविधं मोहं न प्राप्नुहीत्यर्थः ॥ ३९ ॥ इतीति। इतीत्थं, नारदः, गृहमेधिनां गृहस्थाश्रमिणां, पावनान्, सद्धर्मान् आचरन्तं, सर्वगेहेषु सन्तं विद्यमानं, एकं एव, तं श्रीकृष्णं, हृत स्फुटमेव ददर्श ॥ ४० ॥

कृष्णप्रिया

कहीं श्रेष्ठ यादवों से घिरे हुए सिन्धुदेशीय घोड़ेपर चढ़कर मृगया कर रहे हैं, और उसमें यज्ञ के लिये मेध्य पशुओं का ही वध कर रहे हैं ॥ ३५ ॥ और कहीं प्रजा में तथा अन्तःपुर के महलों में वेष बदलकर छिपे रूप से सबका अभिप्राय

जानने के लिये विचरण कर रहे हैं। क्यों न हो, भगवान् योगेश्वर जो हैं॥ ३६ ॥ परीक्षित्! इस प्रकार मनुष्य की-सी लीला करते हुए हृषीकेश भगवान् श्रीकृष्ण की योगमाया का वैभव देखकर देवर्षि नारदजी ने मुसकराते हुए उनसे कहा॥ ३७॥ 'योगेश्वर! आत्मदेव! आपकी योगमाया ब्रह्माजी आदि बड़े-बड़े मायावियों के लिये भी अगम्य है। परन्तु हम आपकी योगमाया का रहस्य जानते हैं। क्योंकि आपके चरणकमलों की सेवा करने से वह स्वयं ही हमारे सामने प्रकट हो गयी है॥ ३८॥ देवताओं के भी आराध्यदेव भगवन्! चौदहों भुवन आपके सुयश से परिपूर्ण हो रहे हैं। अब मुझे आज्ञा दीजिये कि मैं आपकी त्रिभुवनपावनी लीला का गान करता हुआ उन लोगों में विचरण करूँ'॥ ३९॥ भगवान् श्रीकृष्ण ने कहा—देवर्षि नारदजी! मैं ही धर्म का उपदेशक, पालन करनेवाला और उसका अनुष्ठान करने वालों का अनुमोदनकर्ता भी हूँ। इसलिये संसार को धर्म की शिक्षा देने के उद्देश्य से ही मैं इस प्रकार धर्म का आचरण करता हूँ। मेरे प्यारे पुत्र! तुम मेरी यह योगमाया देखकर मोहित मत होना॥ ४०॥

श्रीशुक उवाच

इत्याचरन्तं सद्धर्मान् [1]पावनान् गृहमेधिनाम्। तमेव सर्वगेहेषु सन्तमेकं ददर्श ह॥ ४१॥
कृष्णस्यानन्तवीर्यस्य योगमायामहोदयम्। मुहुर्दृष्ट्वा ऋषिरभूद् विस्मितो जातकौतुकः॥ ४२॥
इत्यर्थकामधर्मेषु कृष्णेन श्रद्धितात्मना। सम्यक् सभाजितः प्रीतस्तमेवानुस्मरन् ययौ॥ ४३॥
एवं मनुष्यपदवीमनुवर्तमानो नारायणोऽखिलभवाय गृहीतशक्तिः।
[2]मेनेऽङ्ग षोडशसहस्रवराङ्गनानां सव्रीडसौहृदनिरीक्षणहासजुष्टः॥ ४४॥
यानीह विश्वविलयोद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणि हरिश्चकार।
यस्त्वङ्ग गायति शृणोत्यनुमोदते वा [3]भक्तिं लभेत भगवत्यपवर्गमार्गे॥ ४५॥

इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे[5] कृष्णगार्हस्थ्यदर्शनं [6]नामैकोनसप्ततितमोऽध्यायः॥ ६९॥

कर्दमक्षमा

अन्वयः—श्रीशुक उवाच—गृहमेधिनाम्, पावनान्, सद्धर्मान्, आचरन्तम्, सर्वगेहेषु, सन्तम्, तम्, एव, एकम्, ददर्श, ह॥ ४१॥ अनन्तवीर्यस्य, कृष्णस्य, योगमायामहोदयम्, मुहुः, दृष्ट्वा, जातकौतुकः, ऋषिः, विस्मितः, अभूत्॥ ४२॥ इति, अर्थकामधर्मेषु, श्रद्धितात्मना, कृष्णेन, सम्यक्, सभाजितः, प्रीतः, तम्, एक, अनुस्मरन्, ययौ॥ ४३॥ हे अङ्ग, षोडशसहस्रवराङ्गनानाम्, सवीरसौहृदनिरीक्षणहासजुष्टः, मनुष्यपदवीम्, अनुवर्तमानः, अखिलभवाय, गृहीतशक्तिः, नारायणः, इति, मने॥ ४४॥ हे अङ्ग, विश्वविलयोद्भववृत्तिहेतुः, हरिः, इह, यानि, अनन्तविषयाणि, चकार, तानि, ये, तु, गायति, शृणोति, वा, अनुमोदते, अपवर्गमार्गे, भगवति, भक्तिम्, लभेत॥ ४५॥

इति श्रीदशमस्कन्धे एकोनसप्ततितमेऽध्याये अन्वयाः समाप्ताः॥ ६९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इत्येवमनुगृहीतस्तमेकमेव संतं ददर्शेति॥ ४१॥ मुहुर्मुहुर्दृष्ट्वा जातकौतुको मुनिर्विस्मितोऽभूदिति॥ ४२॥ श्रद्धितः श्रद्धया युक्त आत्मा यस्य तेन॥४३॥ नारददृष्टां श्रीकृष्णलीलां निगमयति। एवमिति अखिलस्य भवायोद्भवाय गृहीताः शक्तयो नानामूर्तयो येन सः सव्रीडं च तत्सौहृदं च तेन निरीक्षणं हासश्च ताभ्यां जुष्टः॥ ४४॥ अनन्यविषयाण्यसाधारणानि। अपवर्गमार्गे मोक्षप्रदे॥ ४५॥

इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायामेकोनसप्ततितमोऽध्यायः॥ ६९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतिशब्दः प्रकारे। सद्धर्मान् वेदविहितान्। तं कृष्णम्॥ ४१-४२॥ इतीत्थम्। तं कृष्णम्॥ ४३॥ हे अङ्ग॥४४॥ असाधारणान्यन्येन कर्तुमशक्यानि। हि यस्माद्भक्तिर्भवति तस्मान्मुमुक्षुणा सेव्यानीति भावः। यद्वा—अनन्यविषयाणि स्वैक-

---

१. नादिष्टान्—वीर.; प्राक् सृष्टान्—विज.। २. रेनेऽङ्ग—श्रीधर. वंशी. जीव. वीर. विश्व.; रेमे च—विज.। ३. भक्तिर्भवेत् भगवति ह्य—श्रीधर. वंशी. जीव. वीर. विज. विश्व.। ४. पारमहंस्यां संहितायां—प्रा. पा.। ५. न्धे एकोन—प्रा. पा.। ६. सप्ततितमोऽध्यायः—विज.।

तात्पर्यकाणि, यद्वा—अनन्या भक्ता विषया उद्देश्या येषां तानि । अपवर्गो मोक्षमार्गः प्राप्त्युपायो यस्य सः संसारक्लेशध्वंसे सत्येव निर्विघ्नभक्तिसिद्ध्या प्राप्यत्वात्, "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥" इति गीताभ्यः । यद्वा—अपवर्गो भक्तियोग एव मार्गो यस्य तत्र । यद्वा—अपवर्गा उपेक्षितचतुर्वर्गास्तैर्मार्ग्यतेऽन्विष्यत इति तोषिणी ॥ ४५ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

[illegible] एवमा[illegible]ण सतां धर्मान् सदाचारान् गृहमेधिनां पावनान् प्रायो ग्रहस्थधर्मशिक्षया तेषामेव सर्वमलशोधनान् यद्वा गृहमेधिनां ये सन्तः उत्तमा धर्मास्तान् तत्सेवनादिना सामान्येन सर्वलोकानां पावनान् एवं सर्वगेहेषु बहुधा स्थितमपि एकमेव तं ददर्श एकत्वाच्चेदं श्रीविग्रहपरमेव श्रीभगवति विग्रहविग्रहिभावस्य निषिद्धत्वात् विग्रह एव विभुत्वादिसिद्धत्वात् विग्रहिणस्तु विभुत्वे साध्ये श्रीनारदस्य सन्देहे तद्रूपगमानुपपत्तेः कृतकायव्यूहैः सौभर्य्यादिभिस्तुल्यतापत्तेश्चाश्चर्यत्वानुपपत्तेश्च अतश्च अमीलितदृग्व्यवधानाद्यदिति मम दृशि गोचर एष आविरात्मेति श्रीविग्रहतात्पर्य्यकेण यथोक्तं श्रीभीष्मेण "प्रतिदृशमिव नैकधाऽर्कमेकं समधिगतोऽस्मि विधूतभेदमोहः" इति अर्कस्य दूरस्थविस्तीर्णमण्डलत्वेन तथात्वं श्रीभगवद्विग्रहस्य त्वाचिन्त्यशक्त्येति विशेषेऽपि दृष्टान्तायैकस्यैव तत्रतत्र स्फुरितत्वांशे एवं "चित्रं बतैतदेकेन वपुषा" इत्यादिचिन्तनानुरूपमेवानुभूतमिति ॥ ४१ ॥ अतः ऋषिः सर्वज्ञोऽपि स्वस्यापि बुद्ध्यगोचरं योगमायामहोदयं सर्वोत्कृष्टाविर्भावं दृष्ट्वा तं च जातकौतुकः सन् मुहुर्दृष्ट्वा विस्मितोऽभूदित्यर्थः ॥ ४२ ॥ अर्थेषु उत्तमपदार्थेषु कामेषु उपभोगेषु धर्मेषु यज्ञादिषु सम्यग्यथा स्यात्तथा सभाजितः श्रीकृष्णकौतुकार्थं स्वकौतुकार्थं परार्थं वा तेषु यत्रयत्र तस्येच्छाऽऽसीत् तत्तत्सम्पाद्य पूजित इत्यर्थः । तत्र हेतुः श्रद्धितात्मनेति [illegible] विलम्बापि बोधितः ॥ ४३ ॥ एवं श्रीनारददृष्टां लीलां निगमयंस्तासामङ्गाङ्गिभावं दर्शयति—एवं मनुष्यपदवीं तल्लीलामनुवर्त्तमानो यो नारायणः "नारायणस्त्वं नहि सर्वदेहिनाम्" इत्याद्युक्तलक्षणः इतरसर्वनारायणानां स्वयमङ्गी अत एव मुख्यो महान् नारायणः स्वयं भगवान् कृष्णः सम्प्रति चाखिलानां भवाय स्वस्मिन् आवृष्टतत्तन्निजांशः [illegible] षोडशसहस्रसङ्ख्यानां वराङ्गनानां सव्रीडो यः सौहृदविशेषः तत्पूर्वकनिरीक्षणहासाभ्यां जुष्टः प्रीतिमवापेति ॥ ४४ ॥ एतत्प्रसङ्गेन सकलानामपि श्रीकृष्णलीलानां गानादिफलमुत्तरोत्तरक्रमेण सकैमुत्यमाह—विश्वविलयादिहेतुरपि हरिरिह परमपूर्णावतारे यानि कर्माणि चकार कीदृशानि अनन्यविषयाणि स्वैकतात्पर्यकाणि स्वस्वरूपैकपर्यवसानानीति यद्वा अनन्या भक्ता एव विषया उद्देश्या येषां तानि ननु विश्वविलयाद्यनन्यविषयाण्यपि भवन्ति "कृष्णस्तु भगवान् स्वयम्" इति प्रसिद्धपूर्णभगवत्त्वे तस्य दौर्लभ्यमाह—अपवर्गो मोक्षमार्गः प्राप्त्युपायो यस्य सः संसारक्लेशध्वंसे सत्येव निर्विघ्नभक्तिसिद्ध्या प्राप्यत्वात्—

"ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्" ॥ इति

श्रीगीताभ्यः यद्वा अपवर्गो भक्तियोगः स एव मार्गो यस्य तस्मिन् यद्वा अपवर्गा अपगतवर्गाः उपेक्षितचतुर्वर्गा भक्तास्तैररति मृग्यत इति तस्मिन् ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सतां धर्म्मान् सदाचारान्, गृहमेधिनां पावनान्, प्रायो गार्हस्थ्यधर्म्मशिक्षया तेषामेव सर्वमलशोधनान्; यद्वा, गृहमेधिनां ये सन्त उत्तमा धर्म्मास्तान् तच्छ्रवणादिना सामान्येन सर्व्वलोकानां पावनान्, आचरन्त [illegible] सर्व्वगृहेष्ववस्थित्या बहुरूप[illegible]। एवं सर्व्वगेहेषु बहुधा स्थितमपि एकमेव तं ददर्श । अतः कायव्यूहं विनापि निजशक्तिविशेषेण तस्यैकस्यैव [illegible] विच्छेदाभावात् सर्व्वत्र स्थितेः । सिद्धान्तोऽयं सूक्ष्मातिसूक्ष्मो भक्तप्रवरहृदयैकगम्यो यथाशक्ति श्रीभागवतामृतोत्तरखण्डे विवृतोऽस्त्येव । एवमारम्भे प्रागुक्तस्य 'एकेन वपुषा' इत्यादेः समाधानं सिद्धम् ॥ ४१ ॥ कृष्णस्य निजाशेषैश्वर्य्यप्रदर्शनार्थं अवतीर्णस्य साक्षाद्भगवतः, अतोऽनन्तं वीर्य्यं शक्तिर्यस्य तस्य, अतएव योगमायायाः महोदयम्, ऋषिः सर्व्वज्ञोऽपि मुहुर्महाद्भुतत्वनिश्चयत्वेनासन्देहार्थं पुनः पुनर्दृष्ट्वा; अन्यत्तैर्व्याख्यातम् । यद्वा, विस्मितोऽत्याश्चर्य्याज्जातकौतुक[illegible] यस्य तथाभूतश्चाभूत् ॥ ४२ ॥ श्रीभगवतः शक्तिविशेषदर्शनात् सम्यक् सभाजने हेतुः—अर्थादिषु तत्साधनेषु [illegible] तच्छिक्षणार्थं श्रद्धायुक्तान्तःकरणेनेति; यद्वा, अर्थाश्चतुः पुरुषार्थास्तद्रूपो धर्म्मो भक्तिलक्षणस्तत्कामेषु जनेषु प्रीतात्मना [illegible] निरन्तरं स्मरन् ॥ ४३ ॥ अखिलेत्यवतारित्वमुक्तम्, यतो नारायणः साक्षाद्भगवान्, तथाप्येवमुक्तप्रकारेण मनुष्यलीलामनुवर्त्तमानोऽनुतिष्ठन् रेमे । यद्वा, मनुष्यलीलां कुर्व्वन्नपि अखिललोकस्य भवाय गार्हस्थ्यधर्म्मप्रदर्शनादिना क्षेमाय गृहीताः [illegible] शक्तयो बहुलमहिषीगृहेषु गृहधर्म्मसमर्था बहुलमूर्त्तयः, किंवाखिलानां गृहाणां भवाय गृहीता शक्तिरेकस्यैव सर्व्वत्र पृथक्त्वेन स्थिति-

लक्षणा येन सः, यद्वा नारायणः सर्व्वजीवैकाश्रयः । तत्र हेतुमाह—अंगेत्यादि । अंग ! हे राजन् ! यद्वा, अंगं निज-श्रीविग्रहस्त-द्विषयत्वमाः [illegible] वियुक्ता वा याः षोडशसहस्रवरांगनास्ताभ्यः । अन्यत्तैर्व्याख्यातम् । यद्वा, सव्रीडो यो सौहृदेन प्रेम्णा निरीक्षणं हासो [illegible] जुष्टः सेवितः, प्रीतो वा सन् ॥ ४४ ॥ तादृशविचित्रगार्हस्थ्यलीलाया मुख्यप्रयोजनमाह—यानीति । इह लोके [illegible] विश्वस्य विलयादिहेतुरपि, विलयः प्रलयः, उद्भवः सृष्टिः, वृत्तिः स्थितिः पालनम्; एतां कर्मणां श्रेष्ठ्यम्, इति तेभ्योऽपि [illegible] माहात्म्यम्, हरेरिति च कर्म्मणामपि मनोहरत्वं सूचितम् । तु—एव, [illegible] पेक्षापि निरपेक्षा [illegible] स्यूनत्वं कैमुतिकन्यायेनैव ज्ञातव्यम् । अंगेति सहर्षसम्बोधने, तच्च तत्र तत्र राज्ञः प्रवर्त्तनार्थम्, तस्य [illegible] भगवति सर्व्वैश्वर्य्यप्रकटनपरे श्रीकृष्णे । तस्य दौर्लभ्यमाह—अपवर्गो मोक्षो मार्गः प्राप्त्युपायो यस्य, [illegible] निर्विघ्नभक्तिसिद्ध्या प्राप्यत्वात् । यद्वा, अपवर्गो भक्तियोगलक्षणः, स एव मार्गो यस्य तस्मिन्; यद्वा, अपवर्गो [illegible] चतुर्वर्गा भक्तास्तैरपि मार्ग्यत इति मार्गस्तस्मिन्निति ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्रीश्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषिण्यां श्रीदशम-टिप्पण्यामेकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पूर्वं बदर्याश्रमे तदाग्रे स्वस्य नारायणत्वात् ॥ ४५ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कदाचिदपि तस्य मोहमभावनामपि निवर्त्तयितुं भगवता प्रदर्शितं सार्वात्म्यं ददर्श विस्मितश्च बभूव मुनिरित्याह—इत्थमिति द्वाभ्याम् । [illegible] विहितान् धर्मान्विभुः आचरन्तं तदेव पुनः सर्वेष्वपि [illegible] तथा सन्तं वर्त्तमानं ददर्श ॥ ४१ ॥ दृष्ट्वेति । अनन्तवीर्यस्य अपरिच्छिन्नस्य कल्याणगुणस्य कृष्णस्य [illegible] वैभवम् उत्सुकस्सन् मुहुर्मुहुः [illegible] विस्मितो बभूव ॥ ४२ ॥ इत्यादि । अर्थादिषु श्रद्धितः लोकसंग्रहार्थं सञ्जातश्रद्धः आत्मा मनो यस्य तेन कृष्णेन [illegible] प्रीतश्च तं कृष्णमेवानुस्मरन् ययौ ॥ ४३ ॥ नारदाय दर्शितं योगमायोदर्कं निगमयति—एवमिति स्वयं नारायणः [illegible] अखिलानां भवायाभ्युदयाय गृहीता उपात्ता शक्तिः दिव्यतनुर्येन सः मनुष्यचेष्टामनुवर्तमानः अङ्ग हे राजन् ! सव्रीडम् [illegible] निरीक्षणं हासश्च ताभ्यां जुष्टः ॥ ४४ ॥ उक्तविधभगवच्चेष्टितगानादिफलमाह—यानीति । विश्वस्य विलयः [illegible] उद्भवः उत्पत्तिः स्थितिरेतासां हेतुर्हरिर्यानि ईदृशेषु अवतारेषु इह लोके वा अनन्यसाधारणानि कर्माणि चकार तानि अङ्ग हे राजन् ! यः पुमान् गायति तस्यापवर्गमार्गे मोक्षप्रापके "अमृतस्यैषसेतुः" इति श्रुतेः । मार्गशब्दः प्रापकपरः भगवति भक्तिर्भवेत् ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकोतसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

उपसंहरति—इतीति । इतिशब्द आदिवचनः ॥ ४१-४२ ॥ इत्यर्थधर्मकामेषु अवहितात्मना कृष्णेन ॥ ४३-४४ ॥ साक्षान्मोक्षहेतुत्वेन भगवच्चरितमिदं बुभूषुभिरभ्यसनीयमादरेणेति [illegible] —यानीति । अङ्ग [illegible] ! विश्वविलयोद्भववृत्तिषु हेतुर्हरिः यानि अनन्यविषयाणि कर्माणि चकार यस्तु तानि गायति शृणोति [illegible] अपवर्गमार्गे भगवति भक्तिर्भवति हि यस्मात्तस्मादवश्यं मुमुक्षुणा सेव्यानीति ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

(श्रीविजयध्वजतीर्थरीत्या सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अर्थेषु [illegible] धर्मेषु यज्ञादिषु कामेषु उपभोगेषु सम्यक् यथा स्यात्तथा सभाजितः श्रीकृष्णकौतुकार्थं स्वकौतुकार्थं परार्थं वा तेन यत्र यत्र तस्येच्छाऽऽसीत् तत्तत् सम्पाद्य पूजित । इत्यर्थः । तत्र हेतुः श्रद्धितात्मनेति ॥ ४३ ॥ एवं कतिचिद्दिनानि [illegible] अपवर्ग [illegible] "ब्रह्मभूतः प्रसन्नात्मा" इत्यादि ॥ ४४-४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

इत्याचरन्तमित्यादि । तमेव श्रीकृष्णमेव सर्वगेहेषु सन्तम्, अथ च एकं ददर्श, नतु पृथगिति ज्ञातवान् । एतेन श्रीकृष्णविग्रहस्य व्यापकत्वमुक्तं भवति । सन्तमिति वर्तमानकालनिर्देशः ॥ ४१ ॥ (१८ श-श्लो०) "योगमाया विदाम" इति यत् पूर्वमुक्तं तदहङ्कारशमनं वर्णयन्नाह—कृष्णस्यानन्तवीर्यस्येत्यादि । योगमाया महोदयं वीक्ष्य जातकौतुकः सन् विस्मतः नतु तत्वं वेद ॥ ४२-४३ ॥ एवमित्यादि । मनुष्यपदवीं मनुष्यवर्त्म मनुष्यलीलामित्यर्थः । नारायणः श्रीकृष्णः । नारो नयः, नृ नये' घञि रूपम्, तस्यायनं यस्मात् । नारायण इति नाम त्रयाणामेव प्रसिद्धम्—शेषशायिनो नारायणस्य भारतवर्ष देवस्य च स्वयं भगवतः श्रीकृष्णस्य च—कृष्णाष्टके पठितत्वात् । आगमेषु 'कृष्णाय नमः, नारायणाय नमः, वासुदेवाय नमः', इत्यादि । तेनायं नारायणनामैव, न त्वहिशयनशायी यमकूराय, दर्शयामास । गृहीता शक्तिर्लीलाख्या नित्यशक्तिर्येन ॥४४-४५॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीनाथचक्रवर्तिविरचिता चैतन्यमतमञ्जूषा

इत्येवंप्रकारेण सर्वेषु गृहेषु एकमेव सन्तं ददर्श, अतः श्रीकृष्णविग्रहस्य व्यापकत्वम्, सर्वेषु गृहेषु एकमेव सन्तमेवेति वर्त्तमान-कालनिर्देशात् ॥ ४१ ॥ (३८ श-श्लो०) "योगमायास्ते विदाम" इति यत् पूर्वमुक्तम्, तस्याऽहङ्कारोपशमनमधुना कृतं वर्ण्यते–कृष्णस्यानन्तवीर्यस्येत्यादि । योगमायामहोदयं मुहुर्दृष्ट्वा जातकौतुकः सन् विस्मितोऽभूत् ॥४२-४३॥ एवमित्यादि । मनुष्य-पदवीं मनुष्यलीलां मनुष्याणां पदवीं धरणीं वा नारायणः श्रीकृष्णेऽखिलानां भवाय प्रेमवृद्धये गृहीता रुक्मिण्याद्याः शक्तयो येन; यद्वा, स्वस्य योगशक्तिः ॥ ४४ ॥ यस्त्वङ्गेत्यादि । अपवर्गस्य मार्गः पन्थास्तस्मिन् तथाभूतेऽपि शक्तिरेव भवति, नापवर्गः ॥ ४५ ॥

इत्येकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

उक्तमर्थमेकेनैव श्लोकेन सङ्क्षिप्याह—इतीति । एकम् एकवपुषम् एकेन वपुषेति पूर्व्वोक्तेः । अत्र नारदस्य तथा द्रष्टुमिच्छया भगवतश्च दर्शयितुमिच्छयैव तथा दर्शनमभूत् किन्तु द्वारकावासिनस्तु ये यत्रत्यास्ते तत्पुर एव कृष्णं पश्यन्ति न त्वन्यत्र पुरेषु कार्य्यान्तराय तत्र तत्र कदाचिद्गच्छन्तोपीति ज्ञेयम् ॥ ४१-४२ ॥ श्राद्धितः श्रद्धायुक्त आत्मा यस्य तेन ॥ ४३ ॥ ननु, परमेश्वरस्य अर्थादिश्रद्धया किमित्यत आह—एवमिति । मनुष्यवर्त्मानुसृत्या तस्य किमित्यत आह । अखिलानां भवाय मनुष्यचेष्टा हि मनुष्यैः सुखेन स्मर्य्यन्त इति तादृशस्वलीलास्मारणया तेषां संसारं निवर्त्तयितुमित्यर्थः । तत्संसारनिवर्त्तनया तस्य किमित्यत आह—गृहीता शक्तिः कृपाख्या येन सः किञ्च शाश्वतिकया मनुष्यचेष्टया न केवलमेतावदेव प्रयोजनं किन्तु स्वरूपभूतस्वप्रेयसीभिर्मानुषीभिः लक्ष्म्यादिभ्योऽप्युत्कृष्टाभिर्मानुषाकृतेः स्वस्य वैकुण्ठनाथादीनामप्यं वांशिनो अनन्या भक्ता एव बिषया येषां तानिति वा । शाश्वतिकं रमणमपीत्याह—रेमे इति ॥ ४४ ॥ नच कृष्णलीला केवलं संसारमोक्षार्थैवा किन्तु प्रेमभक्तिप्रदा चेत्याह—यानीति । विलयश्च उद्भवश्च वृत्तिः स्थितिश्च तासां हेतुरपि कृष्णो यानि कर्माण्यनन्यविषयाणि स्वरूपान्तरासाधारणानि । अनन्या भक्ता एव विषया उद्देश्या येषां तानिति वा । अपवर्गो मोक्षो मार्गे भजनलक्षणे वर्त्मन्येव लभ्यो यस्य तस्मिन् । भगवति भक्तिः प्रेमविलक्षणा तस्य तरेत् संसारान्मोक्षस्तु भजनारम्भ एव स्यादिति ॥ ४५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । एकोनसप्ततितमोऽध्यायः दशमेऽजनि सङ्गतः ॥ ६९ ॥

गूढार्थदीपिनी

एवं भगवताऽनुगृहीतो नारदस्तदा सर्वगेहेषु एकरूपमेव सन्तं श्रीकृष्णं ददर्शेत्यन्वयः । ह हर्षेति शंकानिवृत्यर्थम् ॥४१॥ महोदयं महावैभवं मुहुर्मुहुः दृष्ट्वा जातकौतुकः उत्कण्ठायुक्तः सन् विस्मितोऽभूत् इति ॥ ४२ ॥ इत्येवमर्थादिषु श्राद्धतः श्रद्धायुक्तः आत्मा मनो यस्य तेन कृष्णेन सभाजितः सत्कृतो नारदः तमेव स्मरन् ययौ ॥ ४३ ॥ अङ्ग हे राजन् ! अखिलभवाय जगत्कल्याणाय गृहीताः शक्तयो नानामूर्तया अवताराः येन स भगवान् ताभिः सह रेमे । कथंभूतः । तासां व्रीडासहितं यत् सौहृदं तेन निरोक्षणं हासश्च ताभ्यां जुष्टः सेवितः आकृष्ट इत्यर्थः ॥ ४४ ॥ अङ्ग हे राजन् ! हरिः अनन्यविषयाणि असाधारणानि यानि कर्माणि चकार तानि यस्तु गायति श्रृणोति वा तस्य भगवति भक्तिर्भवेदित्यन्वयः । कथंभूते । अपवर्ग मार्गे मोक्षप्रदे । कथंभूतो हरिः । विश्वस्य प्रलयादौ हेतुः कारणभूतः । उद्भवः सृष्टिः वृत्तिः पालनम् ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यामेकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पावनान् पशुवृत्तिदोषनिर्नाशकान् ॥४१–४३॥ गृहीताः शक्तयो नानामूर्तयो येन सः अखिलानां श्रोतॄणां श्रावयितॄणां भवायोद्भवाय मनुष्याणां पदवीं चेष्टामनुवर्तमानोऽनुकुर्वाणः सव्रीडश्च निरीक्षणं हासश्च ताभ्यां जुष्टः हे अङ्ग राजन् ! रेमे ॥४४॥ भगवल्लीलागानादिफलमाह—यानीति। विश्वस्य संहारोत्पत्तिस्थितिहेतुः अनन्यविषयाणि स्वासाधारणानि कर्माणि चकार तानि अपवर्गमार्गे मुक्तिप्रदे तस्य भक्तिर्भवेत् ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकोनसप्ततितमोऽध्यायार्थप्रकाशः ॥ ६९ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्राक् सृष्टान्स्वेनैव **धर्मान्गृहमेधिनामाचरन्तं** सर्वगेहेषु सन्तमेकं तमेवमिति ददर्श। हेति प्रसिद्धौ ॥ ४१ ॥ **ऋषिर्मुहुर्मुहुर्दृष्ट्वा**। हे अजात उत्पत्तिमदन्य स्वामिन् कौतुको भूमौ तु सर्वत्र कः सम इति विस्मितोऽभूत्। जातकौतुकः सन्विस्मितोऽभूदिति सर्वे ॥ ४२ ॥ कृष्णेन सम्यक् सभाजितः प्रीतः। अर्थधर्मकामेष्ववहित आत्मा मनस्तेनार्थधर्मकामेष्ववहिता हितदा एते न किन्तु बन्धका इत्यात्मना मनसा ऐकान्तिकत्वात्। अर्थकामसन्दष्टो धर्मोऽत्र कामः। इति न हि हितहेतुताऽतत्त्रयाणामिति मन्तव्यम्। तमेवानुस्मरन्ययौ ॥ ४३ ॥ **अखिलभवाय** सर्वमङ्गलाय गृहीता शक्तिर्यस्य स मनुष्यपदवीमनुवर्तमानो नारायणः षोडशसहस्रवराङ्गनानां सव्रीडसौहृदनिरीक्षणो यो हासस्तेन जुष्ट एवं रेमे। व्रीडया व्रीडेन वा सहितो हासः। व्रीडा व्रीडश्चेति द्विरूपकोशः ॥ ४४ ॥ **विश्वविलयोद्भववृत्तिहेतुः** वृत्तिः स्थितिः। यान्वनन्यविषयाणि अन्ये विषयाः कर्तृतया येषां तानि न भवन्तीत्यनन्यविषयाणि। मनसाऽपीतरैः कर्तुमशक्यानि हरिश्चकार तानि। अङ्ग हे राजन्। यो गायति यश्च शृणोति अनुमोदते वा तस्यापवर्गमार्गे भगवति भक्तिर्भवेत्। अवश्यमेतच्छ्रवणादिकमतः कर्तव्यमिति ॥ ४५ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे एकोनाशीतितमोऽध्यायः ॥ १०–७९ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततस्तस्य दृष्टं दर्शनानन्तरमध्यवसायं च श्लोकद्वयेनाह **इत्याचरन्तमिति**। सतां त्रिविधानां सर्वविधान् **धर्मान् गृहमेधिनां पावनान्** पवित्रकरान्। एवं चेत्कश्चिदाचरति भगवानाचचारेति, तदा पवित्रो भवतीति। अतोऽनन्तमूर्ति तमेव सर्वगेहेषु सन्तं ददर्श। ततो यज्जातं तदाह **कृष्णस्येति**। अनन्तानि वीर्याणि यस्येति। लीलयैवं स्त्रीषु स्थितिः, न तु वस्तुतः। यतोऽयं सर्वशक्तिः। तत्रापि योगमायायाः महानुदयोऽयम्। न कदाप्येवं दृष्टः। अतो धर्मधर्मिणोरलौकिको भावो दृष्ट इति विस्मितः। पुनर्दर्शने जातकौतुकश्च जातः ॥ ४१–४२ ॥ ततः सादरदर्शनानन्तरमर्थकामधर्मेषु श्रद्धितात्मना भगवता सम्यक् **सभाजितो** ब्राह्मणबुद्धया ऋषिबुद्धया च यथेष्टं भोजनादिना सन्तुष्टः **तमेव** भगवन्तमनुस्मरन् ययौ न तु प्रमाणबलमाश्रित्य ॥४३॥ एवं नारददृष्टां भगवल्लीलामुपपाद्योपसंहरति **एवं मनुष्यपदवीमिति**। तद्धर्माणामनाचरणे तत्तदनुसर्पणं न भवतीति मनुष्यपदवीमनुवर्तमानः **षोडशसहस्रवराङ्गनानां** सव्रीडादि**भिर्जुष्टो** मेने। मनुष्यपदव्यामप्यागतः मूलरूप एवेति ज्ञापयितुमाह **नारायण इति**। तस्यैवंकरणे किं प्रयोजनमित्याशङ्क्याह **अखिलभवाय गृहीतशक्तिरिति**। सर्वेषामुद्भवार्थं सात्त्विक्यः शक्तयः सर्वाः संगृहीताः। तत्र मनुष्येषु धर्माप्रवृत्तौ सर्वेषामुद्भवो न भवतीति तथा करणम्। **अङ्गे**त्यप्रतारणाय सम्बोधनम्। अष्टमहिषीणां न विवाद इति नरकासुरपरिगृहीतानामेव षोडशसहस्रवराङ्गनानामिति वरशब्देन तत्तद्दास्यो व्यावर्तिताः। अन्या वा गोप्यः संगृहीताः। व्रीडापूर्वको योऽयं सौहृदनिरीक्षणविशेषः तत्पूर्वको हासः तेन जुष्ट इति। त्रिविधो भावो निरूपितः तामससात्त्विकादिभेदेन ॥ ४४ ॥ एवं रमणमुपसंहृत्य लौकिकीयं लीला धर्मार्थिभिर्न श्रोतव्येति शङ्कां वारयितु फलश्रुतिमाह **यानीति**। सर्वविधकर्मकरणे भगवतो हेतुमाह। **विश्वस्य** विलयः। उद्भव उत्पत्तिः, वृत्तिः स्थितिः, तेषां हेतुः। अत एवानन्यविषयाणि कर्माणि **चकार**। नह्यन्यो जगदुत्पत्त्यादिहेतुर्भवति, लीलायां च नान्यं प्रवेशयति, किन्तु स्वयमेव तत्र तत्राविष्टः तथा करोति। अतो नान्या विषयः। विशेषलीलायाः प्रयोजनं हरिरिति। अतो य एतां लीलां गायति, स्वत एवानन्देन कीर्तयति वा, अन्यैर्गीयमानां शृणोति, असन्निहितः सन्निहितो वा, कालान्तरे कथावसाने वा, अनुमोदते, श्रोतृवक्तृकथाः, सः भक्तिं लभेत, भगवति पूर्णपुरुषे। भक्तेरन्यत्र विनियोगाभावायाह **अपवर्गमार्ग** इति। मोक्षे नान्यो मार्गोऽस्तीत्यर्थः ॥ ४५ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे विंशोऽध्यायः ॥ २० ॥

श्रीसुबोधिनी–सारः

शुकोक्तिः। गृहमेधिनां गृहस्थानां पावनान् पावनहेतून् सद्धर्मान् इत्येवमाचरं तं सर्वगेहेषु तमेकं संतं वर्तमानं नारदो ददर्श ह स्फुटम् ॥४१॥ अनंतबलस्य कृष्णस्य योगमायाया महोदयं महद्वैभवं मुहुरसकृत् दृष्ट्वा जातं कौतुकं यस्य स ऋषिर्नारदो

विस्मितोभूत् ॥ ४२ ॥ इत्येवं त्रिवर्गेषु श्रद्धित आत्मा मनो यस्य तेन कृष्णेन सम्यक् प्रशंसितः प्रीतो नारदस्तमेव हरिं स्मरन् जगाम ॥ ४३ ॥ एवं मनुष्यलीलामनुवर्त्तमानो नारायणोऽखिलानां सर्वेषां भवाय समृद्धये गृहीता शक्तिर्येन स षोडशसहस्रं वराः श्रेष्ठा अंगनाः स्त्रियस्तासां सव्रीडं सलज्जितं सौहृदं सप्रेमनिरीक्षणं हासश्च ताभ्यां जुष्टो रेमे हे अंग ॥ ४४ ॥ विश्वस्य विलयोद्भववृत्तोनां संहारोत्पत्तिपालनानां हेतुर्हरिरनन्यविषयाणि आत्मसाधारणानि यानि कर्माणि चकार तानि यो गायति शृणोति अनुमोदति हृष्यति वा हे अंग तस्यापवर्गमार्गे मोक्षप्रदे भगवति भक्तिर्भवेत् हि युक्तम् ॥ ४५ ॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायामेकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

अग्रिमे । त्रिविधानामिति । धर्मार्थकामयुक्तानामित्यर्थः । **अग्रिमे । नतु वस्तुत** इति । नारदबुद्धिमनुसृत्यैवमुक्तम् । **इत्यर्थकामे**त्यत्र । **एवकारस्यार्थमाहुः न तु प्रमाणबल**मिति । **प्रमेयमार्गं** त्यक्तुमिच्छुर्भगवता समाहित इत्यर्थः । **आश्रित्ये**ति । किन्तु प्रमेयमार्गमेवाश्रित इत्यर्थः । **एवं मनुष्ये**त्यत्र । **व्रीडापूर्वक** इति । भावप्रधानमिदम् । व्रीडापूर्वकत्वं निरीक्षणे विशेष इत्यर्थः ।

इति विंशाध्यायव्याख्या समाप्ता ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नारदेन कृष्णचरितदर्शनादिकमुपसंहरति—इतीति द्वयेन । इत्येवं गृहमेधिनां गृहसंबन्धिनां हिंसावतां गृहस्थानां पावनान् पावित्र्यकरान् सद्धर्मान् शास्त्रविहितकर्माणि आचरन्तं अनुतिष्ठन्तं तमेकं कृष्णमेव सर्वेषु गृहेषु सन्तं वर्तमानं ददर्श । भगवच्छक्तेराश्चर्यं सूचयति—हेति । हिंसाश्च गृहस्थानाम्—"कण्डणी पेषणी चुल्ली उदकुम्भो च मार्जनो । पञ्चसूना गृहस्थस्य निरयस्याभिसूचिका" इति स्मृत्युक्ताः तथा स्वतःप्रवृत्तिजन्याश्च विविधा ज्ञेयाः ॥ ४१ ॥ एवं जातकौतुकः सञ्जातदर्शनोत्साहः ऋषिर्नारदः अनन्तवीर्यस्यानन्तशक्तेः कृष्णस्य योगमायामहोदयं अचिन्त्यशक्तिप्रभावं मुहुः पुनः सर्वत्र गृहेषु दृष्ट्वा विस्मितः आश्चर्ययुक्तोऽभूदित्यन्वयः ॥ ४२ ॥ इत्येवं कृष्णेन सम्यक् सभाजितः सत्कृतः, अत एव प्रीतो नारदस्तमेव कृष्णमनुस्मरन् ययावित्यन्वयः । भगवतोपि मुनिसत्कारे हेतुमाह—अर्थेति । लोकप्रवृत्त्यर्थमर्थादिषु श्रद्धितः श्रद्धायुक्तः आत्मा चित्त यस्य तेनेत्यर्थः ॥ ४३ ॥ एवं वर्णितां भगवता पत्नीभिः सह रमणरूपां लीलामुपसंहरति—एवमिति । एतद्रहस्यश्रवणाधिकारित्वं सूचयन् संबोधयति—अङ्गेति । एवं षोडशसहस्रं या वराङ्गना उत्तमस्त्रियस्तासां सव्रीडं च तत् सौहृदं च तेन निरीक्षणं हासश्च ताभ्यां जुष्टः सेवितो नारायणो रेमे इत्यन्वयः । षोडशसहस्रेत्यष्टोत्तरशताधिकस्याप्युपलक्षणम् । ननु 'श्रीनारायणस्यैवं रमणं कथं संभवति ? पूर्णानन्दत्वात्' इत्यपेक्षायामाह—मनुष्याणां पदवीं रीतिमनुवर्तमान इति । एकस्य बह्वीभिः सह रमणे सामर्थ्यं तत्प्रयोजनं चाह—अखिलेति । अखिलानां प्राणिनां भवाय धर्मादिचतुर्विधपुरुषार्थलाभाय गृहीता नानाविधाः शक्तयो येन सः ॥४४॥ भगवल्लीलाकीर्तनादिफलमाह—यानीहेति । उक्ताभिप्रायेण पुनः संबोधयति—अङ्गेति । इह अस्मिन् श्रीकृष्णावतारे यानि कर्माणि हरिश्चकार तानि यस्तु मनुष्यो गायति अनधिकारिणं प्रति कीर्तयति स्वतो वा गायति, शृणोति वा, अनुमोदते श्रुत्वा प्रशंसति वा, तस्य भगवति भक्तिर्भवेदित्यन्वयः । 'तद्भक्तेः किं फलम्' इत्यपेक्षायां 'संसारदुःखनिवृत्तिपूर्वकतत्प्राप्तिलक्षणमोक्ष एव' इत्याशयेनाह—अपवर्गमार्गे मोक्षप्रापके इति । कर्मणां श्रवणादियोग्यत्वमाह—अनन्यविषयाणीति । अन्यैः कर्तुमशक्यानीत्यर्थः । 'श्रीकृष्णस्य किमपि नाशक्यम्, सङ्कल्पमात्रेणेव जगज्जन्मादिहेतुत्वात्' इत्याह—विश्वस्य विलयः प्रलयः, उद्भव उत्पत्तिः, वृत्तिः स्थितिः पालनम्, तद्धेतुरिति ॥ ४५ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । रचिता दशमे तत्र सात्त्विकानां निरोधने ॥ २ ॥
नारददृष्टश्रीकृष्ण-चरितस्य निरूपका । नवषष्टितमोऽध्यायो ह्लादिनीं विवर्ति गतः ॥ ३ ॥

अन्वितार्थप्रकाशिका

इतीति ॥ इत्येवं गृहमेधिनां पावनान् पावित्र्यकरान् सद्धर्मान् शास्त्रविहितकर्माणि आचरन्तम् अनुतिष्ठन्तं तमेकं कृष्णमेव सर्वेषु गेहेषु सन्तं वर्तमानं ददर्श ॥ ४१ ॥ कृष्णस्येति ॥ एवं जातकौतुकः सञ्जातदर्शनोत्साहः ऋषिर्नारदः अनन्तवीर्यस्यानन्तशक्तेः कृष्णस्य योगमायामहोदयं मुहुः पुनः सर्वत्र गृहेषु दृष्ट्वा विस्मितः आश्चर्ययुक्तोऽभूत् ॥ ४२ ॥ इतीति ॥ इत्येवं लोकप्रवृत्त्यर्थमर्थादिषु श्रद्धितः श्रद्धायुक्तः आत्मा चित्तं यस्य तेन कृष्णेन सम्यक् सभाजितः सत्कृतः अत एव प्रीतो नारदस्तमेव कृष्णमनुस्मरन् ययौ ॥ ४३ ॥ एवमिति ॥ अङ्ग हे राजन् ! एवं मनुष्याणां पदवी रीतिमनुवर्तमानः अखिलानां प्राणिनां भवाय

धर्मादिलाभाय गृहीता नानाविधाः शक्तयो मूर्तयो येन षोडशसहस्रं या वराङ्गना उत्तमस्त्रियस्तासां सव्रीडं च तत्सौहृदं च तेन निरीक्षणं हासश्च ताभ्यां जुष्टः सेवितो नारायणो रेमे ॥ ४४ ॥ यानीति ॥ अङ्ग हे राजन् ! इह अस्मिन् श्रीकृष्णावतारे विश्वस्य विलयः प्रलयः उद्भव उत्पत्तिः वृत्तिः स्थितिः पालनं तद्धेतुर्हरिः अनन्यविषयाणि अन्यैः कर्तुमशक्यानि यानि कर्माणि चकार तानि यस्तु मनुष्यो गायति शृणोति वा अनुमोदने श्रुत्वा प्रशंसति वा तस्य अपवर्गमार्गे मोक्षप्रापके भगवति भक्तिर्भवेत् ॥४५॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायामेकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तमेकमेव श्रीकृष्णं सर्वगेहेषु पृथक्पृथक्तया संतं वर्त्तमानं ददर्श ॥ ४१-४२ ॥ श्रद्धितः श्रद्धां प्राप्तः आत्मा अंतःकरणं यस्य तेन सभाजितः सत्कृतः ॥ ४३ ॥ इत्थं नारदावलोकित वसुदेवनंदनलीलामाह एवमिति अखिलानां लोकानां भवाय वृद्धये गृहीताः शक्तयो नानाविधसामर्थ्यानि येन सः । व्रीडया सहितेन सौहृदेन निरीक्षणेन च हासेन च जुष्टः सेवितः ॥ ४४ ॥ वृत्तिःस्थितिः नास्ति अन्यस्य भगवदितरस्य विषयो निर्माणसामर्थ्यं येषां तानि अंग हे राजन् अनुमोदते प्रशंसति । अपवर्गो मार्गो यस्य तस्मिन् भगवति ॥ ४५ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंधव्याख्याने नारदायस्ववैभवप्रदर्शनोनाम एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्णस्येति । हे राजन्, ऋषिर्नारदः, अनन्तवीर्यस्य अनन्तकल्याणगुणगणस्य, कृष्णस्य, योगमायामहोदयमाश्चर्यशक्तेर्महान्तं वैभवं, मुहुः दृष्ट्वा, विस्मितः जातकौतुकश्च, अभूत् ॥ ४१ ॥ इतीति । अर्थकामधर्मेषु, इत्युक्तप्रकारेण, श्रद्धितात्मना संजातश्रद्धात्मना, कृष्णेन, सम्यक् सभाजितः पूजितः, अत एव प्रीतो नारदः, तं श्रीकृष्णं, अनुस्मरन् सन्नेव, ययौ ततः प्रयातः ॥ ४२ ॥ नारदाय श्रीकृष्णेन संदर्शितं योगमायोदयं निगमयति । एवमिति । स्वयं, नारायणः सन्, अखिलभवाय सकलजनाभ्युदयाय, गृहीतोपात्ता शक्तिर्दिव्यतनुर्येन सः; एवमुक्तप्रकारेण, मनुष्यपदवीं मनुष्यचेष्टां, अनुवर्त्तमानः, श्रीकृष्णः, अङ्ग हे राजन्, षोडशसहस्रवराङ्गनानां, सव्रीडं च तत् सौहृदं च तेन निरीक्षणं हासश्च ताभ्यां जुष्टः सेवितः सन्, रेमे ॥ ४३ ॥ अथ विविधभगवच्चेष्टितगानादिफलमाह । यानीति । विश्वस्य विलयः प्रलयः उद्भव उत्पत्तिः वृत्तिः स्थितिः तासां हेतुः, हरिः श्रीकृष्णः, इह भुवि, अनन्यविषयाण्यनन्यसाधारणानि, यानि चरित्राणि, चकार, अङ्ग हे राजन्, तानि यस्तु, शृणोति, गायति, अनुमोदते, वा, तस्य अपवर्गमार्गे मोक्षप्रापके, भगवति, भक्तिः भवेत् हि ॥ ४४ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

कृष्णप्रिया

श्रीशुकदेवजी कहते हैं—इस प्रकार भगवान् श्रीकृष्ण गृहस्थों को पवित्र करनेवाले श्रेष्ठ धर्मों का आचरण कर रहे थे । यद्यपि वे एक ही हैं, फिर भी देवर्षि नारदजी ने उनको उनकी प्रत्येक पत्नी के महल में अलग-अलग देखा ॥४१॥ भगवान् श्रीकृष्ण की शक्ति अनन्त है । उनकी योगमाया का परम ऐश्वर्य बार-बार देखकर देवर्षि नारद के विस्मय और कौतूहल की सीमा न रही ॥ ४२ ॥ द्वारका में भगवान् श्रीकृष्ण गृहस्थ की भाँति ऐसा आचरण करते थे, मानों धर्म, अर्थ और कामरूप पुरुषार्थों में उनकी बड़ी श्रद्धा हो । उन्होंने देवर्षि नारद का बहुत सम्मान किया । वे अत्यन्त प्रसन्न होकर भगवान् का स्मरण करते हुए वहाँ से चले गये ॥४३॥ राजन् ! भगवान् नारायण सारे जगत् के कल्याण के लिये अपनी अचिन्त्य महाशक्ति योगमाया को स्वीकार करते हैं और इस प्रकार मनुष्यों की-सी लीला करते हैं । द्वारकापुरी में सोलह हजार से भी अधिक पत्नियाँ अपनी सलज्ज एवं प्रेमभरी चितवन तथा मन्द-मन्द मुसकान से उनकी सेवा करती थीं और वे उनके साथ विहार करते थे ॥ ४४ ॥ भगवान् श्रीकृष्ण ने जो लीलाएँ की हैं, उन्हें दूसरा कोई नहीं कर सकता । परीक्षित् ! वे विश्व की उत्पत्ति, स्थिति और प्रलय के परम कारण हैं । जो उनकी लीलाओं का गान, श्रवण और गान-श्रवण करनेवालों का अनुमोदन करता है, उसे मोक्ष के मार्गस्वरूप भगवान् श्रीकृष्ण के चरणों में परम प्रेममयी भक्ति प्राप्त हो जाती है ॥ ४५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे कृष्णगार्हस्थ्यदर्शनं नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

* * *

[1]अथ सप्ततितमोऽध्यायः

श्लोकाः	अनु.	मि. उ.	वं.	इ. वं.	ब.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४७	३५	४	१	१	६	६	१७४३	३७	४२	१८२२	५६॥।	६

श्रीशुक[2] उवाच

अथोपस्युपवृत्तायां कुक्कुटान् कूजतोऽशपन् । गृहीतकण्ठ्यः पतिभिर्माधव्यो विरहातुराः ॥ १ ॥
वयांस्यरूरुवन् कृष्णं बोधयन्तीव वन्दिनः । गायत्स्वलिष्वनिद्राणि[3] मन्दारवनवायुभिः ॥ २ ॥
मुहूर्तं तं तु वैदर्भी नामृष्यदतिशोभनम् । परिरम्भणविश्लेषात् प्रियबाह्वन्तरं गता ॥ ३ ॥
ब्राह्मे मुहूर्त उत्थाय वार्युपस्पृश्य माधवः । दध्यौ प्रसन्नकरण आत्मानं तमसः परम् ॥ ४ ॥

कर्बमक्षमा

अन्वयः—श्रीशुक उवाच—अथ, उषसि, उपवृत्तायाम्, पतिभिः, गृहीतकण्ठ्यः, विरहातुराः, माधव्यः, कूजतः, कुक्कुटान्, अशपन् ॥ १ ॥ मन्दार, वायुभिः, अलिषु, गायत्सु, अनिद्राणि, वयांसि, वन्दिनः, इव, बोधयन्ति, अरुरुवन् ॥ २ ॥ परिरम्भणविश्लेषात्, प्रियबाह्वन्तरं, गता, वैदर्भी, अतिशोभनम्, तम्, तु मुहूर्तम्, न, अमृष्यत् ॥ ३ ॥ प्रसन्नकरणः, माधवः, ब्राह्मे, मुहूर्ते, उत्थाय, वारि, उपस्पृश्य, तमसः, परम्, आत्मानम्, दध्यौ ॥ ४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ततस्तु सप्ततितमे कृष्णस्याह्निककर्मणि । दूतनारदयोः कार्ये कार्यमंत्रविचारणम् ॥ १ ॥
जगन्मंगलचारित्रमाह्निकं जगदीशितुः । नारदेन क्वचित्किंचिद्दृष्टमाह यथाक्रमम् ॥ २ ॥

अथेति । "इत्यर्थकामधर्मेषु कृष्णेन श्रद्धितात्मना" इति प्रस्तुतस्य श्रीकृष्णस्याह्निकस्याधिकारेऽथशब्दः । उपवृत्तायामासन्नायाम् । पतिभिः श्रीकृष्णैः । माधव्यो माधवस्य भार्याः ॥ १ ॥ बंदिन इव श्रीकृष्णं बोधयंति संति वयांसि पक्षिणोऽरूरुवन्नतिशयेनाकूजन् । मंदारवनवायुभिर्गायत्स्वलिष्वनिद्राणि निद्रारहितानि वयांसि ॥ २ ॥ वैदर्भीत्युपलक्षणम् । परिरंभणविश्लेषात्तं पर्यालोच्य ॥ ३–४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो नारदगमनोत्तरम् । दूतकार्यं जरासन्धबद्धनृपमोक्षणरूपम्, नारदकार्यं युधिष्ठिरयज्ञे कृष्णप्रेषणरूपमेवमुभयोः कार्ये प्राप्ते कार्यमंत्रविचारणं कर्तव्यमंत्रविमर्शनम् (१) । अह्नि कर्तव्यमाह्निकम् (२) । आसन्नायां व्यतीतप्रायायाम् । माधव्यो रुक्मिण्याद्याः । पतिभिरिति बहुत्वं प्रकाशबाहुल्यात् । अशपन्—रेरे कुक्कुटाः प्रियविच्छेदकप्रातर्बोधक । यूयं शीघ्रमेव म्रियध्वमिति शापं ददुः ॥ १–२ ॥ मुहूर्तं मुहूर्तोपलक्षितं कालम् । तं परिरंभणविश्लेषम् । आलोच्य विमृश्य "ल्यब्लोप–" इति पंचमी । बाह्वन्तरं वक्षःस्थलम् ॥ ३ ॥ ब्राह्मे मुहूर्ते चतुर्घटिकावशिष्टरात्रौ "अरुणोदयकालो हि मुहूर्तो ब्राह्म उच्यते । रात्रेः पश्चिमयामोऽपि मुहूर्तो ब्राह्म उच्यते ॥ ब्राह्मे मुहूर्ते या निद्रा सा पुण्यक्षयकारिणी । तां कुर्वाणो द्विजो मोहात्पादकृच्छ्रेण शुद्ध्यति ॥" इत्याद्युक्तेः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीनारददृष्टसदाचारप्रसङ्गात् श्रीभगवत आह्निकमाह—अथेत्यादिना कथा इत्यन्तेन । गृहीतकण्ठ्य इति पतिभिरङ्के शायितानामुपधानतया कल्पितेन श्रीवामभुजेन । कण्ठग्रहणात् इति महासौख्यमुक्तम् अत एव विरहेण प्रातर्भाविनाप्यातुराः विकलाः सत्यः कुक्कुटान् क्रीडाकुक्कुटविशेषान् अशपन् म्रियन्तामिति मूकीभवन्त्विति वा चुक्रुशुः तत्कूजनेन प्रातर्ज्ञानात् स्नानाद्यर्थं स्वपरित्यागेन पत्युरुत्थानोपपत्तेः पतिभिरिति बहुत्वं प्रकाशभेदात् ॥ १ ॥ वन्दिन इवेति तेऽपि प्रबोधयन्तो बहुधोच्चैरस्तुवन्नित्यर्थः । ननु, तान्येव कथमादौ प्रबुद्धानि तत्राह—गायत्स्विति । प्रातः स्वभावेनादौ शीतवातः ततो महावृक्षाणां

---

१. अथ अष्टसप्ततितमोऽध्यायः–विज. । २. बादरायणि–प्रा. पा. । ३. ध्वनिद्रेषु–वीर. ; ध्वदभ्रेषु–विज. ।

प्रचलनं ततः पुष्पादिस्थितानामलीनां गानं तेनानिद्राणि गतनिद्राणीत्यर्थः। एवं सङ्क्षेपेण प्रातर्वर्णनम् ॥ २ ॥ विश्लेषो विघ्नः ॥ ३ ॥ ब्राह्म इति युग्मकम् "रात्रेश्चतुर्द्दशो भागो मूहूर्त्तो ब्राह्म उच्यते" लोकशिक्षापणार्थमेव नरलीलाकौतुकार्थश्च दध्यावित्यादिकं तत्तदर्थानुकरणलीलाख्यानं तथैव प्रसन्नकरणः प्राणायामादिना स्थिरचित्तः सन्नित्यर्थः। तमसः प्रकृतेः परं परमेश्वररूपमात्मानं दध्यौ ॥ ४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीनारददृष्टसदाचारप्रसंगाच्छ्रीभगवत आह्निकमाह—अथेत्यादिना (२१ श-श्लो०) 'कथाः' इत्यन्तेन। गृहीतकण्ठ्य इति पतिभिरंके शायितानामुपधानतया कल्पितेन श्रीवामभुजेन कण्ठग्रहणादिति महासौख्यमुक्तम्। अतएव विरहेण प्रातर्भाविनाप्यातुरा विकलाः सत्योऽशपन् जगर्हिरे। कुक्कुटान् क्रीड़ाकुक्कुटविशेषान्, तत्कूजनेन प्रातर्ज्ञानात्, स्नानाद्यर्थं स्वपरित्यागेन प्रत्युरुत्थानोपपत्तेः; पतिभिरिति बहुत्वं प्रतिगृहं शक्तिविशेषेण पृथक् पृथगवस्थित्या नानात्वस्यैव प्राप्तेः ॥ १ ॥ कृष्णं रात्रिक्रीड़ानन्दपूर्णम्, किंवा रतिवैदग्ध्यादिना सर्व्वांगोदित-रतिचिह्नैर्वा चित्ताकर्षकम्, अतो रतिश्रान्त्या रात्रिशेषे शयानमिति भावः। अतएव बोधयन्ति, जागरयन्ति सन्ति, वन्दिम इवेति तेऽपि प्रबोधयन्तो बहुधोच्चैरस्तुवन्नित्यर्थः। किंवा तत्स्तुतिवत् कूजनस्य वैचित्र्यादिकं सूचयति। ननु तान्येव कथमादौ प्रबुद्धानि ? तत्राह—गायत्स्विति। प्रातःकाल-स्वभावेनादौ शीतवातः, ततो महावृद्धाणां प्रचलनेन तत्पुष्पादिस्थितानामलीनां गानम्, तेनानिद्राणि गतनिद्राणीत्यर्थः। एवं संक्षेपेण प्रातर्वर्णनम् ॥ २ ॥ प्रियस्य बाह्वोरन्तरं मध्यं श्रीवक्षःस्थलं गता आलिंग्यांके शयनेन प्राप्ता सती शोभनमपि नामृष्यत् नासहत, दुष्टममन्यतेत्यर्थः। कुतः ? परिरम्भणस्य विश्लेषाद्विघ्नात् ॥ ३ ॥ ब्राह्मे श्रीब्रह्मदैवत्ये रात्रेरन्ते, सन्ध्यातः पूर्व्वस्मिन्; तल्लक्षणञ्चोक्तम्—'रात्रेश्चतुर्द्दशो भागो मुहूर्त्तो ब्राह्म उच्यते'; माधवः सद्धर्म्मे प्रवर्त्तनाद्यर्थं मधुकुलेऽवतीर्ण इति सदाचारपरतोक्ता। स्वतएव प्रसन्नानि करणानि सर्व्वेन्द्रियाणि यस्य सः; यद्वा, लोकशिक्षार्थं प्राणायामादिना स्थिरचित्तः सन्नित्यर्थः। तमसः प्रकृतेः परं परमेश्वरं तद्रूपेण दध्यावित्यर्थः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

अथ भगवतो दिनचर्यात्मकं चेष्टितमनुवर्णयन् मागधनिरुद्धराजसन्देशहर्तृसन्निवेदितवृत्तान्तयुधिष्ठिराभिप्रायाभिज्ञ—नारदनिवेदिततद्वृत्तान्तान्यतरनिश्चिचीषाप्रयुक्तमुद्धवोद्देशात्मकं भगवत्प्रश्नमाह— अथेत्यादिना। अथ ननु हे राजन्! यद्वाऽथशब्दो भगवद्दिनचर्याप्रस्तावद्योतकः अथ भगवद्दिनचर्याप्रारभ्यत इत्यर्थः। उषसि प्रभातवेलायामुपवृत्तायामासन्नायां सत्यां पतिभिः कृष्णैर्गृहीताः कण्ठाः यासां ताः माधव्यः श्रीकृष्णस्य स्त्रियः विरहेण भाविना आतुराः कूजतः शब्दायमानान् कुक्कुटानशपन् ॥ १ ॥ वयांसीति। वन्दिन इव कृष्णं बोधयन्ति सन्ति वयांसि पक्षिणो मन्दारवनवायुभिरनिद्रेष्वलिषु गायत्सु सत्सु अरूरुवन् पुनः पुनरकूजन् ॥ २ ॥ मुहूर्त्तमिति। प्रियस्य बाह्वोरन्तरं गता वैदर्भीत्यन्यासामप्युपलक्षणं परिरम्भविश्लेषाद्धेतोस्तं मुहूर्त्तमतिशोभनमपि नामृष्यन्न सेहे असमीचीनममन्यतेत्यर्थः ॥ ३ ॥ ब्राह्म इति। वारि शुद्धं जलमुपस्पृश्य आचम्य प्रसन्नानि करणानि इन्द्रियाणि यस्य सः तमसः प्रकृतेः परं विलक्षणमात्मानं दध्यौ ध्यातवान् स्वात्मावलोकनपरो बभूवेत्यर्थः ॥ ४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

राज्ञां दैनन्दिननित्यनियमप्रकारं कथयत्यस्मिन्नध्याये तत्रादौ माधवीनां ग्राम्यधर्मलौल्यातिशयं कथयति—अथेत्यादिना ॥ १ ॥ वयांसि कोकिलादीनि वन्दिनः कृष्णं बोधयन्तीवोपतस्थुः नित्योद्बुद्धत्वादिवेति। मन्दारवनवायुभिः पारिजातवनवायुभिः सह ॥ २ ॥ तं मुहूर्तोपलक्षितकालं प्रियस्य कृष्णस्य बाह्वन्तरं वक्षःस्थलम् ॥ ३ ॥ नित्यप्रसन्नान्तःकरणः आत्मानं स्वमेव ॥ ४ ॥

श्रीमज्जीवगोस्वामीकृतः क्रमसन्दर्भः

साधारणलोकशिक्षार्थमेव दध्यावित्यादिकं तदर्थानुकरणलीलाख्यानं नृलोके क्रीडापरमित्यर्थः ॥ ४-४० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

दध्यौ प्रसन्नकरण इत्यादि। प्रसन्नानि प्रसादयुक्तानि करणानि कार्याणि लीला यस्य, आत्मानं स्वयमेव स्वं दध्यौ ॥ ४ ॥

श्रीनाथचक्रवर्तिविरचिता चैतन्यमतमञ्जूषा

दध्यौ प्रसन्नकरणः प्रसन्नानि करणानि कार्याणि यस्य ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तीकृता सारार्थदर्शिनी

अध्याये सप्ततितमे प्रातःकृत्यकथा हरेः । सुधर्म्मायां दूतनारदयोः कार्य्यविचारणा ॥

इत्यर्थधर्म्मकामेषु कृष्णेन श्रद्धितात्मनेत्युक्तमतो ब्राह्मयमुहूर्त्तमारभ्य कीदृशं धर्माचरणमित्यपेक्षायामाह—अथेति । उष आधिक्येन वृत्तायां जातायां सत्यां पतिभिरिति प्रकाशबाहुल्याद्बहुत्वं माधव्यो रुक्मिण्याद्याः अशपन् । रे रे कुक्कुटाः प्रियविच्छेदकप्रातःसमयप्रादुर्भावकाः ! यूयं शीघ्रमेव म्रियद्ध्वमिति शापं ददुः ॥ १ ॥ मन्दारवनवायुभिः सुगन्धैः प्रबुद्धय गायत्सु सत्सु अलिषु तद्गानशब्देन अनिद्राणि वयांसि पक्षिणैः कीदृशानि वन्दिन इव कृष्णं बोधयन्ति ॥ २ ॥ परिरम्भणस्य विश्लेषात् विश्लेषहेतुत्वात् तं ब्राह्मयं मुहूर्तं शोभनमपि न अमृष्यत् अशोभनमेव मेने इत्यर्थः । वैदर्भीत्युपलक्षणं सर्व्वा एव ॥३॥ आत्मानं स्वं दध्यौ । यथान्यजनो ब्राह्मयमुहूर्त्ते तं ध्यायति तथैव सोऽपि स्वमेव दध्यौ तमसः प्रकृतेः परम् । एकमितीश्वरस्यैकस्यैवौचित्यात् । अतः स्वयंज्जोति स्वयमेव प्रकाशमानं ननु सङ्कर्षणादयोऽपीश्वराः श्रूयन्ते, तत्राह—अनन्यं न कोऽप्यवतारोऽन्यो यस्मात्तं किञ्च सङ्कर्षणादिषु स्वांशावतारेषु पृथङ्नित्यं वर्त्तमानेष्वप्यव्ययं परिपूर्णमित्यर्थः । प्रादुर्भावे तु कृपैव कारणमित्याह—स्वसंस्थया स्वस्य सम्यक् सर्वजनदृश्यतया स्थित्या निवृत्तं कल्मषमविद्या यस्मात् किञ्च ब्रह्मण आख्या सम्यक् ख्याति प्रकाशो यस्मात् तं यदुक्तमष्टमे "मदीयं महिमानञ्च परं ब्रह्मेति शब्दितं वेत्स्यस्यनुगृहीतं मे" इत्यादि "ब्रह्मणो हि प्रतिष्ठाहम्" इत्यादि च यद्वा "ब्रह्माख्यं ब्रह्मनामकं "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इत्युक्तेः सर्व्वश्रैष्ठ्यमाह अस्य विश्वस्य उद्भवः उद्रिक्तो भवः संसारस्तस्य नाशहेतुभिः स्वशक्तिभिर्ज्ञानप्रदत्वभक्तिप्रदत्वादिभिर्लक्षिता सर्वत्रानुभूता भावानां मर्त्यादीनां निर्वृतिः यस्मात्तं तत्र भक्तानां तद्दत्तप्रेमातिशयेन शिष्टानां तत्पृत्यसुष्ठु पालनेन दुष्टानां तद्वधानन्तरमुक्तिप्राप्त्या निर्वृतिः ॥ ४-५ ॥

गूढार्थदीपिनी

कृष्णस्य सप्ततितमे कृत्यमाह्निकमादितः । देवर्षिदूतसन्देशे किं कार्यं चेति मन्त्र्यते ॥ १ ॥

उषसि प्रभातवेलायाम् उपवृत्तायामासन्नायां सत्याम् माधव्यः कृष्णपत्न्यः रुक्मिण्याद्याः कूजतः प्लुतध्वनिं कुर्वतः कुक्कुटान् अशपन् शापं ददुः । रे रे कुक्कुटाः प्रियविच्छेदप्रातर्बोधका यूयं शीघ्रमेव किं न म्रियध्वम् ॥ १ ॥ वन्दिन इव कृष्णं बोधयन्ति वयांसि पक्षिणः अरुरुवन् अतिशयेन अकूकुजन् । कथंभूतानि । मन्दारवन वायुभिः अलिषु भ्रमरेषु गायत्सु सत्सु अनिद्राणि निद्रारहितानि ॥ २ ॥ प्रियस्य बाह्वन्तरं वक्षःस्थलं गता वैदर्भी परिरम्भणमालिङ्गनं तस्य वियोगात् हेतोः तं पर्यालोच्य नामृश्यत न सेहे ॥ ३ ॥ उपस्पृश्य आचम्य । तमसः प्रकृतेः परम् आत्मानं स्वरूपभूतं ब्रह्म दध्यौ । प्रसन्नकरणः स्वस्थचित्तः सन् । एतच्च लोकशिक्षार्थं लोका अपि एवं कुर्युरिति ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

श्रीकृष्णाह्निकं दूतवर्णिते जरासन्धनिरुद्धराजकार्ये श्रीनारदवर्णिते युधिष्ठिरकार्ये च कर्तव्ये प्रथमं किङ्कर्तव्यमिति उद्धवं प्रति भगवत्प्रश्नञ्चानुवर्णयति । सप्ततितमेनाध्यायेन, क्वापि धर्मं सेवमानमिति श्रीनारदेन दृष्टं लोकसङ्ग्रहार्थं भगवता कृतमाह्निकं तदधिकारीन् ग्राहयितुं विस्तरेण वर्णयति, अथेति । उषसि प्रातर्वेलायाम् उपवृत्तायामासन्नायां पतिभिः । श्रीकृष्णैः माधव्यो माधवभार्य्या विरहातुराः कृत्यकालसूचनेन पतिविरहे हेतवो यूयमाशु म्रियध्वमित्यशपन् शापं ददुः ॥ १ ॥ मन्दारवनवायुभिः हर्षं प्राप्य गायत्सु अलिषु तद्गानेन अनिद्राणि वयांसि पक्षिणः वन्दिन इव कृष्णं बोधयन्ति सन्ति अरूरुवन् अतिशयेनाकूजन् ॥ २ ॥ वैदर्भी रुक्मिणी सर्वैश्वर्याधिष्ठात्री अपि परिरम्भणविश्लेषाद्धेतोः शोभनमपि तं मुहूर्तं नामृष्यत् न सेहे तुशब्दादन्या न सेहिरे इति किमु वक्तव्यम् ॥ ३ ॥ उपस्पृश्याचम्य आत्मानं दध्यौ ध्यातवान् प्रकृतिवैलक्षण्यं भगवतो दर्शयति—तमसः परं प्रकृतिविलक्षणम् ॥ ४ ॥

श्रीसत्यधर्मकृता भागवतटिप्पणी

॥ हरिः ॐ ॥ दैनन्दिनी जनमनुकुर्वतो जनार्दनस्य चर्यां कथयत्यस्मिन्नध्याये । तत्रादौ भगवदङ्गालिङ्गनविरहकातराणां तरुणीनामितरासां ग्राम्यधर्माणां रुक्मिण्या उपलक्षणया सत्यायाश्च नटनं च कथयति । अथेति । उषसि प्रातःसन्ध्यायाम् । सकारान्तःस्त्रीलिङ्गोऽयं सन्ध्यावाची दस्रभार्यावाचिशब्दवज्ज्ञेयः । तमश्विनावूचतुरुषसं स्तुहीति स उषसं तुष्टावेति ब्राह्मणम् । सूर्यो देवीमुषसं रोचमानमित्यादेः । उषः प्रत्युषसी क्लीबं पितृप्रस्वां च योषितीत्यमरभानुः । उपवृत्तायां सन्निहितायां कूजन्तः कुक्कुटास्ताम्रचूडान्पतिभि। कृष्णगृहीताकारविशेषैरिति पतिभिः । गृहीताः कण्ठा न्यासान्ता यैः स्वयं गृहीतकण्ठ्यः । पेषणार्थमन्यगृहीतकण्ठ्य इवापद्रुता इत्यप्यान्तरङ्गिको भावः । माधव्यो माधवयोषितो विरहातुरा अशपन् आचुक्रुशुः । न

पतयोऽन्येऽन्याश्च यादवयोषित इति सरसम्। प्रक्रमातिक्रमात् ॥ १ ॥ अदभ्रेषु मन्दारवनवायुभिः पारिजातवनानिलैः सहालिषु गायत्सु वयांसीतरे पक्षिणो बन्दिनः स्तुतिपाठकः बोधयन्तीवारुरुवन् अशब्दयन् ॥२॥ शोभनं सत्क्रियोपयोगित्वान्मङ्गलरूपमपि तं मुहूर्तं मङ्गलदेवी वैदर्भी नामृष्यन्न सेहे। कीदृशी प्रियस्य बाह्वोरन्तरम्। अथाप्लुतोऽम्भस्यमल इति वक्ष्यमाणत्वात्। तमसः परमिति नाज्ञानहान्येयेदं ज्ञानम्। तथाऽऽत्मानमिति न स्वभिन्नं किन्तु स्वमेवेति भावमावेदयति। प्रसन्नानि करणानीन्द्रियाणि यस्य स दध्यौ। तमश्चाज्ञानं तन्मूलभूतप्रकृतिरिति वा ॥ ४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सात्त्विकानां निरोधे तु प्रमेयबलतः पुरा। षड्भिः सर्वे निरुद्धास्ते साधनेनोच्यतेऽधुना ॥ १ ॥
षड्भिरेव तथाध्यायैर्धर्मोऽत्र भगवत्कृतः। कारितश्च द्विरूपो हि वर्ण्यतेऽन्यनिषेधने ॥ २ ॥
तत्रैकविंशे त्वध्याये धर्मो हि भगवत्कृतः। निरूप्यते यतो लोका जाता हरिपराः स्वतः ॥ ३ ॥
सर्वान् धर्मान् विशेषेण तत्तद्भेदेन चैव हि। पूर्वाध्याये निरूप्यैव ह्याह्निकं ह्यत्र रूप्यते ॥ ४ ॥
तेनैव शुद्धचित्तास्ते राजानः सात्त्विकास्तथा। प्रपन्नाः सर्वथा कृष्णे प्रयोजनमिदं मतम् ॥ ५ ॥
अन्यथा ह्याह्निको धर्मो निष्प्रयोजनतां व्रजेत्। सभायां गमनं चैव रक्षां सूचयति ध्रतात् ॥ ६ ॥

एवं पूर्वाध्यायैः भगवता प्रमेयबलमाश्रित्य सर्वे आत्मसात् कृताः, इदानीं धर्मादिसाधनैर्भगवानात्मसात्करोति, तत्र प्रथमं भगवत आह्निको नित्यो धर्मो निरूप्यते, ततो धर्मपरस्य यत्कृत्यम्, तत्कालनिमित्तकमेवेति अरुणोदयावधि पूर्वाह्णकृत्यं सर्वं निरूपयति अथेति। अवान्तरप्रकरणभेदप्रतिपादकोऽयमथशब्दः। उषस्यरुणोदये। उपवृत्तायामारब्धप्राये। चतस्रो घटिकाः प्रातररुणोदय उच्यत इति धर्मार्थकामानां आवृत्तिर्भगवता क्रियत इति ज्ञापयितुं कामपराणां स्त्रीणां धर्मासहिष्णुत्वमाह कुक्कुटान् कूजतोऽशपन्निति। तत्र हेतुः। पतिभिः कृष्णैर्गृहीतकण्ठ्यः। ननु गार्हस्थ्ये भोजनवत् भोगस्यापि नियतत्वात् प्रातःकालसूचककुक्कुटशापः कथमिति चेत्। तत्राह विरहातुरा इति। तत्र हेतुः माधव्य इति। माधवस्य स्त्रियः। मायाधव इति स्वविश्लेषमात्रेणैव लक्ष्म्याः सम्बन्धसम्भवात्, अतो विरहः सम्भावित इति, प्राप्तफलानां साधने द्वेषो युक्त इति, भगवत्कृतधर्मस्य च सात्त्विकनिरोधपरत्वात्सम्बद्धानामिच्छामात्रेणैव निरोधः सिद्ध इति कुक्कुटशापो युक्तः ॥ १ ॥ ननु कुक्कुटादयो वा किमिति भगवदनभिप्रेतं कुर्वन्तीत्याशङ्कायामाह वयांस्यरूरुवन्निति। वयसामपि पक्षिणां भगवल्लावण्यामृतप्राप्तिरभीष्टेति स्वार्थमेते बोधयन्ति। तथा सत्यपराधो भवेदिति शङ्कां वारयितुं दृष्टान्तमाह बन्दिन इवेति। तेन प्रबोधने अधिकृता अपि पक्षिण इति सूचितम्। ननु बहिरङ्गा एते भगवदभिप्रायमज्ञात्वा कथं नित्यं बोधयन्तीत्याशङ्कायामाह गायत्स्वलिष्विति। ये ह्यन्तरङ्गाः अलयः भगवदभिप्रेतं ज्ञात्वैव गायन्ति। न च स्वभावादेव वयांस्यरूरुवन्नित्याशङ्कनीयम्। यतः अनिद्राणि। तत्रापि निद्राभावः सहेतुक इत्याह मन्दारवनवायुभिरिति। आमोदेनाकृष्टचित्तानि देवताधिष्ठानाच्च साक्षाद्भोगेऽप्यशक्तानि। अत आकाङ्क्षाया विद्यमानत्वात् अनिद्राण्येव ॥ २ ॥ एतत्सर्वस्त्रीणां न भविष्यतीत्याशङ्क्य मुख्याया रुक्मिण्या अप्येतदित्याह मुहूर्तमिति। तं प्रसिद्धं ब्रह्मसम्बन्धिनम्। तुशब्देनान्यथापक्षं व्यावर्तयति। ननु लक्ष्म्या अवतारः कथमेवमवददित्याह वैदर्भीति। दर्भाभावेन कर्मराहित्यमुक्तम्। अतिशोभनमपि सर्वोद्बोधकत्वात्सर्वपुरुषार्थसाधकत्वाच्च। तथापि नामृष्यत्। तत्र हेतुः फलानुभव इत्याह प्रियबाह्वन्तरं गतेति। तादृश्याः परिरम्भणविश्लेषः अनङ्गीकारे हेतुः ॥ ३ ॥ एवं सर्वासामनभिप्रेतत्वे तद्वश्यश्चेद्भगवानपि नोत्तिष्ठेदिति तन्निराकरणार्थं भगवत उत्थानपूर्विकाः सर्वाः क्रिया निरूपयति ब्राह्मे मुहूर्त इति। उत्थानं निद्रापगमलीला शय्यातो वा। ततो वार्युपस्पर्शनम्। हस्तादिप्रक्षालनमात्रमिति केचित्। स्नानमित्यपरे। आचमनमात्रमिति सिद्धान्तः। ध्यानस्यापि शुद्ध्यर्थमेव क्रियमाणत्वात्। अन्तःशुद्धिलीलां कृत्वैव बहिःशुद्धिलीला कर्तव्येति, यथाद्यस्नानेन शौचम्, स्नानान्तरेण च धर्मः, तथा ध्यानेऽपि ज्ञातव्यम्। ननु पूर्णो भगवान् बोभूयमानस्वरूपः परमानन्द एव, अन्तःकरणाद्यभावात् कथं प्रणिधानं कृतवानित्याशङ्क्याह माधव इति। लक्ष्मीं शक्तिं स्वीकरोतीति। मधुवंशे चावतीर्ण इति। यथैषा लीला, तथा ध्यानमपीत्यर्थः। प्रसन्नानि करणानि इन्द्रियाणि यस्येति शुद्धसत्त्वस्य सर्वत्राविर्भावः सूचितः। तत आत्मानमेव दध्यौ। 'अथ योऽन्यां देवतामुपास्त' इति आत्मातिरिक्तदेवतायाः ध्याननिषेधात्। नन्वात्मनः प्रत्यक्षस्य स्फीतालोकवर्तिघटवत् प्रकाशमानस्य किं ध्यानेनेत्याशङ्क्याह तमसः परमिति। कालस्याप्यग्रे तमस्तिष्ठति, तस्याग्रे भगवान्। स एव तमोगुण इति केचित्। सत्त्वगुणो बहिरावरणमिव ॥ ४ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः। अथाह्निककर्मोच्यते उषसि वेलायामुपवृत्तायां प्राप्तौ सत्यां कूजतः शब्दं कुर्वतः कुक्कुटान् पतिभिर्नाना-कृष्णैर्गृहीतकण्ठ्यो माधव्यो रुक्मिण्याद्या विरहेण वियोगेनातुराः पीडिता अशपन् शापमदुः ॥ १ ॥ बन्दिन इव कृष्णं बोधयन्ति वयांसि पक्षिणो रुरुवन् ध्वनिमकृत कल्पवृक्षवनपवनैरलिषु भ्रमरेषु गायत्सु गायमानेषु सत्सु न निद्रा येषां तानि ॥ २ ॥

अतिशोभनं प्रशस्तमपि तं मुहूर्तं ब्राह्मं वैदर्भी रुक्मिणी नासहत् । **तत्र** हेतुः । परिरंभणात्परिष्वंगाद्विश्लेषो वियोगस्तस्मात् प्रियस्य पत्युर्बाह्वोरंतरं गता प्राप्ता सती ।। ३ ।। **ब्राह्मे** मुहूर्ते उत्थाय इत्यनेन तत्समये निद्राया दोषकारित्वमुक्तम् **वा**रिजलमुपस्पृश्याचम्य प्रसन्नकरणः स्वस्थचित्तो माधवस्तमसः परमात्मानं दध्यौ ।। ४ ।।

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

एकविंशेऽध्याये । अथोषसीत्यत्र । उषस्यरुणोदये इति । अग्रे 'ब्राह्मे मुहूर्ते' इत्युक्तेस्तदनुरोधेनात्राप्युषःपदेनारुणोदय एवोच्यते, नत्वष्टपञ्चाशद्घटिका इत्यर्थः । **अतो विरह** इति । लक्ष्मीसम्बन्धे तामेव गृह्णीयात्तदास्माकं विरह एव सिध्येदित्यर्थः । **वयांसी**त्यस्याभासे **आहे**ति । कूजनप्रयोजनमितिशेषः । तथाच पूर्वोक्तकूजनानुवादेन प्रयोजनकथनं वाक्यार्थ इति भावः । पूर्वश्लोके सर्वासां विरहासहने उक्ते रुक्मिण्या अपि तथात्वं प्राप्तमेवेति 'मुहूर्तं तं त्वि'तिश्लोकः किमर्थ इत्याशङ्क्य **तदाभास**माहुः **एतत्सर्वे**ति । कासाञ्चिदेवं भविष्यतीत्याशङ्क्य ज्येष्ठाया **धर्मो**पयोगित्वेपि तथात्वे, अन्यासां तु कैमुत्येनैव तथात्वं प्राप्तमित्यर्थः । **ब्राह्मे मुहूर्ते** इत्यत्र । ननु स्नात्वा ध्यानं कर्तव्यमत आचमनमात्रसिद्धान्तः कथमुक्त इत्यत आहुः **ध्यानस्यापी**ति । इदं ध्यानं शुद्ध्यर्थमेव, नतु कर्माङ्गमित्यर्थः । **बहिरावरणमिवे**ति । भगवतो बहिरावरणं सत्त्वगुणः, तदावरणं तम इति भगवतो गूढत्वात्तत्प्रकाशनार्थं ध्यानमावश्यकमिति जीवान् शिक्षयितुं स्वयं दध्यावित्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सप्ततितम अध्याये कृष्णस्य जगदीशितुः । सर्वमङ्गलहेतुत्वादाह्निकं विनिरूप्यते ॥ १ ॥

अथोशब्दोऽर्थान्तरे । पूर्वोक्तात् प्रकारान्तरेण प्रतिदिनं भगवताऽनुष्ठीयमानं धर्मादि निरूप्यते इत्यर्थः । 'इत्यर्थधर्मकामेषु कृष्णेन श्रद्धितात्मना' इत्युक्त्या 'धर्मार्थकामानामावृत्तिर्भगवता प्रतिदिनं क्रियते' इति सूचितम् । तत्र कामपराणां स्त्रीणां धर्मासहिष्णुत्वमाह—उषसीति । उषसि प्रभातवेलायां उपवृत्तायामासन्नायां सत्यां पतिभिर्नानाकृष्णमूर्तिभिर्गृहीताः कण्ठा यासां ता माधव्यः माधवस्य कृष्णस्य स्त्रियः कूजतः शब्दं कुर्वतः कुक्कुटान् अशपन् 'प्रातःकालसूचनेन सुप्तं कृष्णं प्रबोधयन्तो यूयमाशु म्रियध्वम्' इति शापं ददुः । तत्र हेतुमाह—भाविना तद्विरहेणातुरा दुःखिता इति ॥ १ ॥ मन्दारवायुभिर्हेतुभिः अलिषु भ्रमरेषु गायत्सु सत्सु अनिद्राणि वयांसि पक्षिणो बन्दिन इव सुप्तं कृष्णं बोधयन्ति सन्ति अरूरुवन् पुनःपुनरकूजयन् ॥ २ ॥ स्नानपूजादियोग्यत्वात् तं तु मुहूर्तमतिशोभनमपि वैदर्भी रुक्मिणी नामृष्यत् न सेहे असमीचीन इति अमन्यतेत्यर्थः । 'वैदर्भी' इत्यन्यासामपि तत्पत्नीनां उपलक्षणम् तत्र हेतुमाह—परिरम्भणेति । यतः प्रियस्य कृष्णस्य बाह्वोरन्तरं गता परिरम्भिता, अतस्तस्य परिरम्भणस्य विश्लेषाद्धेतोर्नामृष्यदित्यर्थः ॥ ३ ॥ माधवः कृष्णो ब्राह्मे मुहूर्ते चोत्थाय वारि जलं उपस्पृश्य हस्तपादादिप्रक्षालनपूर्वकमाचम्य प्रसन्नानि सावधानानि करणानीन्द्रियाणि यस्य स तथाभूतः सन् तमसः प्रकृतेः परं शुद्धमात्मानं दध्यौ ध्यातवान् ॥ ४ ॥

अन्वितार्थप्रकाशिका

आह्निके सप्ततितमे दूतनारदकार्ययोः । विचारणमभूत्तत्र सार्धाः श्लोका नगाब्धयः (४७॥) ॥
षड्वाचेति (६) पञ्चाढ्याः पञ्चाशत्स्युरनुष्टुभः (५५) ॥ ७० ॥

इत्यर्थधर्मकामेषु कृष्णेन श्रद्धितात्मनेत्युक्तमतः प्रातरारभ्य कृष्णस्याह्निकमाह-अथेति ॥ अथ उषसि प्रभातवेलायाम् उपवृत्तायामासन्नायां सत्याम् । स्त्रीत्वमार्षम् । भाविना भगवद्विरहेणातुराः पतिभिः कृष्णमूर्तिभिः गृहीताः कण्ठा यासां ता माधव्यः माधवस्य कृष्णस्य स्त्रियः कूजतः शब्दं कुर्वतः कुक्कुटान् अशपन् । प्रातःकालसूचनेन कृष्णविरहहेतवो यूयं निर्हेतुदुःखदा इति पतिभिरिति प्रतीतिभेदाद्बहुत्वम् ॥ १ ॥ वयांसीति ॥ मन्दारवनस्य वायुभिः हेतुभिः अलिषु भ्रमरेषु गायत्सु सत्सु अनिद्राणि वयांसि पक्षिणो वन्दिन इव सुप्त कृष्णं बोधयन्ति सन्ति अरूरुवन् पुनः पुनरकूजन् । अरोरवुरिति वक्तव्ये अभ्यासगुणजुसभावावार्षौ ॥ २ ॥ मुहूर्त्तमिति ॥ प्रियस्य कृष्णस्य बाह्वोरन्तरं गता परिरम्भिता वैदर्भी रुक्मिणी उपलक्षणतया सत्यभामादिरपि स्नानपूजादियोग्यत्वात् तत्तु मुहूर्त्तमतिशोभनमपि प्रियपरिरम्भणस्य विश्लेषाद्धेतोर्नामृष्यन्न सेहे ॥ ३ ॥ ब्राह्म इति ॥ माधवः कृष्णो ब्राह्मे मुहूर्त्ते यामार्धावशिष्टायां रात्रौ चोत्थाय वारि जलम् उपस्पृश्य हस्तपादादिप्रक्षालनपूर्वकमाचम्य प्रसन्नानि सावधानानि करणानीन्द्रियाणि यस्य स तथाभूतः सन् तमसः प्रकृतेः परं शुद्धमात्मानं दध्यौ ॥ ४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ सप्ततिततेऽध्याये श्रीकृष्णाह्निककर्मदूतनारदयोः कार्यविचारणं निरूपयति । अथेत्यादि सार्द्धैकविंशतिभिः श्लोकैर्दिनक्रियामाह । अथेत्यधिकारे उषसि प्रातःकाले उपवृत्तायां आसन्नायां सत्याम् । पतिभिः प्रतिगृहस्थितत्वाद्बहुवचनं

तासां गृहेषु पृथक पृथक् स्थितेन श्रीकृष्णेन गृहीतकण्ठ्यः माधव्यः माधवस्य पत्न्यः प्रभातबोधकशब्दान् कूजतः। कुक्कुटान् म्रियतां मूकावाभवं त्वित्पाद्यशपन् ॥ १ ॥ मंदारवनवायुभिः कृत्वा अलिषु गायत्सु सत्सु। अनिद्राणि गत निद्राणि वयांसि पतत्त्रिणः बंदिन इव कृष्णं बोधयंति संति अरूरुवन्। अतिशयेन शब्दान् अकुर्वन् ॥ २ ॥ प्रियबाह्वंतरंगता वैदर्भी अतिशोभनं मुहूर्त्तमात्रं तं प्रातःकालमपि परिरंभणविश्लेषात् आलिंगनवियोगं प्राप्यनामृष्यत न सेहे ॥ ३ ॥ तमसः प्रकृतेः परं। आत्मानं स्वकीयपुरुषोत्तमस्वरूपं दध्यौ अहं पुरुषोत्तम इत्यचिंतयत् ॥ ४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्णस्य सप्ततितमे प्रोक्तमाह्निककर्मणि। देवर्षिदूतयोः कार्ये कार्यमन्त्रविचारणम् ॥ १ ॥
जगन्नाथाह्निकं कर्म जगन्मङ्गलकारकम्। दृष्टं देवर्षिणा किंचित् क्वचित्तत्क्रमतोऽवदत् ॥ २ ॥

अथ भगवतो दिनचर्यात्मकं चेष्टितमनुवर्णयन् मागधनिरुद्धराजसंदेशहर्त्तृसंनिवेदितवृत्तान्तयुधिष्ठिराभिप्रायाभिज्ञनारदनिवेदिततद्वृत्तान्तान्यतरनिश्चिकीर्षाप्रयुक्तमुद्धवोद्देशात्मकं भगवत्प्रश्नमाहाथेत्यादिना। अथेति। अथेति भगवद्दिनचर्याप्रारम्भमङ्गले। केचित्तु अर्थधर्मकामेषु कृष्णेन श्रद्धितात्मनेति प्रस्तुतस्य श्रीकृष्णस्याह्निकस्याधिकारेऽथशब्द इत्याहुः। उषसि प्रभातवेलायां, उपवृत्तायामासन्नायां सत्यामित्यर्थः। पतिभिः श्रीकृष्णैः, गृहीताः कण्ठा यासां ताः, माधव्यः श्रीकृष्णस्त्रियः, विरहेण भाविना वियोगेनातुराः, अत एव, कूजतः शब्दायतः, कुक्कुटान्, अशपन् ॥ १ ॥ वयांसीति। मन्दारवनवायुभिः, अलिषु भ्रमरेषु, गायत्सु सत्सु, अनिद्राणि निद्रारहितानि, वयांसि पक्षिणः, बन्दिन इव, कृष्णं बोधयन्ति सन्ति, अरूरुवन् ॥२॥ मुहूर्त्तमिति। प्रियस्य श्रीकृष्णस्य बाह्वोर्यदन्तरं तत्, गता, वैदर्भी रुक्मिणी, वैदर्भीत्यन्यासामप्युपलक्षणम्। परिरम्भणं स्वप्रियकृताश्लेषस्ततो यो विश्लेषस्तस्मात् हेतोः, अतिशोभनमपि, तं मुहूर्त्तं तु, न अमृष्यन्न सेहे। असमीचीनमेवामन्यतेत्यर्थः ॥३॥ ब्राह्म इति। माधवः श्रीकृष्णः, ब्राह्मे मुहूर्त्ते, उत्थाय, वारि शुद्धं जलं, उपस्पृश्याचम्य; प्रसन्नानि करणानीन्द्रियाणि यस्य तथाभूतः सन्, तमसः प्रकृतेः, परं विलक्षणं, आत्मानं, दध्यौ ध्यातवान्, स्वात्मावलोकनपरो बभूवेत्यर्थः ॥ ४ ॥

कृष्णप्रिया

भगवान् श्रीकृष्ण की नित्यचर्या और उनके पास जरासन्ध के कैदी राजाओं के दूत का आना

श्रीशुकदेवजी कहते हैं—परीक्षित्! जब सबेरा होने लगता, कुक्कुट (मुरगे) बोलने लगते, तब वे श्रीकृष्ण-पत्नियाँ, जिनके कण्ठ में श्रीकृष्ण ने अपनी भुजा डाल रखी है, उनके विछोह की आशङ्का से व्याकुल हो जातीं और उन मुरगों को कोसने लगती ॥ १ ॥ उस समय पारिजात की सुगन्ध से सुवासित भीनी-भीनी वायु बहने लगती। भौंरे तालस्वर से अपने सङ्गीत की तान छेड़ देते। पक्षियों की नींद उचट जाती और वे बंदीजनों की भाँति भगवान् श्रीकृष्ण को जगाने के लिये मधुर स्वर से कलरव करने लगते ॥ २ ॥ रुक्मिणीजी अपने प्रियतम के भुजपाश से बँधी रहने पर भी आलिङ्गन छूट जाने की आशङ्का से अत्यन्त सुहावने और पवित्र ब्राह्ममुहूर्त को भी असह्य समझने लगती थीं ॥ ३ ॥ भगवान् श्रीकृष्ण प्रतिदिन ब्राह्ममुहूर्त में ही उठ जाते और हाथ-मुँह धोकर अपने मायातीत आत्मस्वरूप का ध्यान करने लगते। उस समय उनका रोम-रोम आनन्द से खिल उठता था ॥ ४ ॥

एकं [1]स्वयंज्योतिरनन्यमव्ययं[2] स्वसंस्थया [3]नित्यनिवृत्तकल्मषम्।
ब्रह्माख्यमस्योद्भवनाशहेतुभिः स्वशक्तिभिर्लक्षितभावनिर्वृतिम् ॥ ५ ॥
अथाप्लुतोऽम्भस्यमले यथाविधि क्रियाकलापं परिधाय वाससी।
चकार संध्योपगमादि [4]सत्कृतो हुतानलो ब्रह्म जजाप वाग्यतः ॥ ६ ॥
उपस्थायार्कमुद्यन्तं तर्पयित्वाऽऽत्मनः कलाः। देवानृषीन् पितॄन् वृद्धान् विप्रानभ्यर्च्य चात्मवान् ॥ ७ ॥
धेनूनां रुक्मशृङ्गीणां[5] साध्वीनां मौक्तिकस्रजाम्। पयस्विनीनां गृष्टीनां [6]सवत्सानां सुवाससाम् ॥ ८ ॥

---

१. परं—विज.। २. मद्वयं—प्रा. पा.। ३. निरस्त—श्रीधर. वंशी. जीव. वीर. विज. विश्व.। ४. सत्तमो—श्रीधर. वंशी. जीव. वीर. विज. विश्व.। ५. शृङ्गाणां—वीर.। ६. सु—वीर.।

कर्दमक्षमा

अन्वयः—एकम्, स्वयंज्योतिः, अनन्यम्, अव्ययम्, स्वसंस्थया, नित्यनिवृत्तकल्मषम्, ब्रह्माख्यम्, अस्य, उद्भवनाशहेतुभिः, स्वशक्तिभिः, लक्षितभावनिर्वृत्तिम् ॥ ५ ॥ अथ, यथाविधि, अमले, अम्भसि, आप्लुतः, वाससी, परिधाय, सत्तमः, संध्योपगमादि, क्रियाकलापम्, चकार, हुतानलः, वाग्यतः, ब्रह्म, जजाप ॥ ६ ॥ उद्यन्तम्, अर्कम्, उपस्थाय, आत्मनः, कलाः, तर्पयित्वा, आत्मवान्, देवान्, ऋषीन्, पितॄन्, वृद्धान्, विप्रान्, अभ्यर्च्य ॥ ७ ॥ रुक्मशृङ्गीणाम्, साध्वीनाम्, मौक्तिकस्रजाम्, सुवाससाम्, सवत्सानाम्, गृष्टीनाम्, पयःस्विनीनाम् ॥ ८ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एकमखंडम् । तत्र हेतुः । अनन्यं निरुपाधिम् अत एवाव्ययं नित्यम् । स्वयंज्योतिष्ट्वे हेतुः । नित्यनिरस्तं नित्यनिवृत्तं कल्मषमविद्या यस्मात्तम् । उपलक्षणमाह । अस्येति । अस्य विश्वस्य लक्षितभावश्चासौ निर्वृतिश्च । भावः सत्ता । निर्वृतिरानंदः । तथाहि । गुणक्षोभात्पूर्वं सत्तामात्रं यः "सदेव सोम्येदमग्र आसीत्" इत्यादिश्रुतेः । स एवानंदश्च "विज्ञानमानंदम्" इत्यादिश्रुतेः । तं सदानंदमित्यर्थः ॥ ५ ॥ आप्लुतः स्नातः संध्याया उपगमउपासनमादिर्यथा भवति तथा क्रियाकलापं चकार । काण्वत्वादुदयात्पूर्वमेव हुतानलः । ब्रह्म गायत्रीं जजाप ॥ ६ ॥ कला अंशान्देवान् ऋषीन्पितॄंश्च तर्पयित्वा ॥ ७ ॥ गृष्टीनां प्रथमप्रसूतानाम् ॥ ८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्राऽखंडत्वे । अत एव निरुपाधित्वादेव । उपलक्ष्यते ज्ञायतेऽनेनेति तथा । तटस्थस्वरूपलक्षणोभयरूपमित्यर्थः । इत्यर्थ इति तात्पर्यम् । सर्वगृहेषु बहुधा स्थितमप्येकमेव तं ददर्श । एकत्वञ्चेदं श्रीविग्रहपरमेव, भगवति विग्रहविग्रहिभावस्य निषिद्धत्वाद्विग्रह एव विभुत्वादेर्दर्शितत्वात् । विग्रहिणस्तु विभुत्वे साध्ये श्रीनारदस्यासंदेहे तदुपगमनानुपपत्तेः, कृतकायव्यूहैः सौभर्यादितुल्यत्वापत्तेश्चित्रत्वानुपपत्तेश्च । विश्वनाथस्तु—एकमित्यस्येत्थमर्थमाह आत्मानं स्वं दध्यौ यथान्यो जनो ब्राह्मे मुहूर्ते तं ध्यायति तथा सोपि स्वमेव दध्यौ । तमसः प्रकृतेः परमेकमितीश्वरस्यैकस्यैवौचित्यात् । अतः स्वयं ज्योतिः स्वयमेव प्रकाशमानम् । ननु संकर्षणादयोऽपीश्वराः श्रूयंते तत्राह–अनन्यं न कोप्यवतारोऽन्यो यस्मात्तं संकर्षणादिषु स्वांशावतारेषु पृथङ्नित्यं वर्तमानेष्वप्यव्ययं परिपूर्णमित्यर्थः । प्रादुर्भावे तु कृपैव कारणमित्याह—स्वसंस्थया स्वस्य सम्यक्सर्वजनदृश्यतया स्थित्या निवृत्तं कल्मषमविद्या यस्मात्तम् । किञ्च—ब्रह्मण आख्या सम्यक्ख्यातिः प्रकाशो यस्मात्तम् "मदीयं महिमानं च परं ब्रह्मेतिशब्दितम्" इति श्रीमत्स्योक्तेः 'ब्रह्मणो हि प्रतिष्ठाहम्' इति गीताभ्यश्च । यद्वा—ब्रह्माख्यं ब्रह्मनामकम् । "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इति प्रथमस्कंधोक्तेः । सर्वश्रेष्ठ्यमाह—अस्य विश्वस्य उद्भव उद्रिक्तोभवः संसारस्तस्य नाशहेतुभिः स्वशक्तिभिः ज्ञानप्रदत्वभक्तिप्रदत्वादिभिर्लक्षिता सर्वत्रानुभूता भावानां मर्त्यादीनां निर्वृतिर्यस्मात्तम् । तत्र भक्तानां तद्दत्तप्रेमातिशयेन शिष्टानां तत्कृतसुष्ठुपालनेन दुष्टानां तद्वधानंतरमुक्तिप्राप्त्या निर्वृतिरिति ॥ ५ ॥ अथात्मस्वरूपध्यानोत्तरम् । एतेन प्रातरुत्थायादावात्मध्यानं कार्यम् "सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक्" इत्याद्युक्तेः । तदभावे त्वीश्वरस्यापि जीवता स्यादिति बोधनायैव भगवदाह्निककर्मण्येतदुक्तमिति भावः । संधौ दिनरात्र्योः पूर्वाह्णापराह्णयोश्च या क्रियते सा संध्या प्राणायामोपस्पर्शनमार्जनादिपूर्वकगायत्र्युपासनरूपानित्यकर्मविशेषः तस्योपगम उपासनं तदादिकर्माणि सत्तमः परमकुशलः क्रियाकलापं संध्योपासनोत्तरामरार्चनादिरूपम् । एतेन सर्वकर्मणामुपक्रमः संध्योपासनमेव । तथाह दक्षः—"संध्याहीनो द्विजो नित्यमनर्हः सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥" इति । कर्म नित्यनैमित्तिकम् । सा च–"उत्तमा तारकोपेता मध्यमा लुप्ततारका । अधमा सूर्यसहिता प्रातःसंध्या त्रिधा मता ॥ उत्तमा सूर्यसहिता मध्यमा लुप्तसूर्यका । अधमा तारकोपेता सायंसंध्यात्रिधा मता ॥" पारिजाते तु—"उदयास्तमयादूर्ध्वं यावत्स्याद्घटिकात्रयम् । तावत्संध्यामुपासीत प्रायश्चित्तमतः परम् ॥" तच्च "संध्याकाले त्वतिक्रांते स्नात्वाऽऽचम्य यथाविधि । जपेदष्टशतं देवीं ततस्संध्यां समाचरेत् ॥" इति शातातपः । देवीं गायत्रीम् । "कालातिक्रमणे चैव चतुर्थार्घं प्रदापयेत्" इति पारिजाते । "गृहे त्वेकगुणा संध्या गोष्ठे दशगुणा स्मृता । शतसाहस्रिका नद्यामनंता विष्णुसंनिधौ ॥" इति व्यासः । मध्याह्नसंध्याकालस्तु शातातपेनोक्तः—"अध्यर्द्धयामादासायं संध्या माध्याह्निकी मता" इति । 'दशधेनुसमा संध्या' इत्यादिभिर्वाक्यैर्वात्स्यादिभिरस्याः फलं बहुधोक्तमित्यलं प्रसक्तानुप्रसक्तेन । उदितात्पूर्वमिति "उदिते जुहोत्यनुदिते च" इति श्रुतेः । दक्षोऽप्याह—"संध्याकर्मावसाने तु स्वयं होमो विधीयते । ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ॥ एभिरपि हुतं यत्स्यात्तद्धुतं स्वयमेव हि" । तच्च 'कुंडे वा स्थंडिले अपि' इति वचनात्स्वेच्छया कुर्यात् । "धमनीमंतरं कृत्वा तृणं वा काष्ठमेव वा । मुखेनाग्निं समिंधीत मुखादग्निरजायत ॥" इति । "अंगुल्यग्रे न होतव्यं न कृत्वांगुलिभेदनम् । अंगुल्युत्तरपार्श्वेन होतव्यमिति हि स्मृतम् । कुंडे दोषबहुत्वाच्च स्थंडिलं शोभनं मतम् ॥" होमस्तु व्याहृतिभिरेव कार्य इत्यलं प्रपञ्चेन । वाससीत्युक्तेः "नैकवस्त्रः प्रवर्तेत स्नानदानादिकर्मणि" इत्युक्तेर्वस्त्रद्वयं धार्यम् । धौतवस्त्र-

मुपवस्त्रं च "स्नात्वैव वाससी धौतेऽक्लिष्टे विपरिधाय च। प्रक्षाल्योरू मृदद्भिश्च हस्तौ प्रक्षालयेन्मृदा॥" इति। अक्लिष्टे रजकाक्षालिते। तेऽपि सदशे "अच्छिन्नाग्रं तु यद्धौतं तच्छुचि मनुरब्रवीत्"। ते अपि शुष्के "नार्द्रमेकं हि वसनं परिदध्यात्कथंचन" इत्युक्तेः। सप्तवाताहतमार्द्रमपि परिदध्यात् 'सप्तवाताहतं शुष्कवद्भवति' इति शातातपोक्तेः। पाद्मे—"प्रत्यहं क्षालयेद्वस्त्रं दैवे पित्र्ये च कर्मणि। तोयैर्विण्मूत्रशुक्रैस्तु दूषितं तु मृदंबुभिः। कार्पासं कटिनिर्मुक्तं कौशेयं भोजने धृतम्। क्षालनाच्छुद्धिमाप्नोति ऊर्णा वातेन शुद्ध्यति॥" इति "ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम्। अहतं तद्भवेद्वासः पावनं सर्वकर्मसु॥" ईषद्धौतमक्षारधौतम्। नवं तद्दिनधौतं प्रत्यहं नवस्यासंभवात्। तत्राप्यकृत्रिमदशम्। तथाच—"अकृत्रिमदशं वस्त्रं प्रशस्तं सर्वकर्मसु। अकृत्रिमा दशा ज्ञेया सिद्धा वायनकर्मणि॥" इति भारते। "अधौतवस्त्रसंस्पृष्टं स्त्रीधौतं क्षालनाच्छुचि" इत्यलम्। ब्रह्म वेदं जाप नियतस्वाध्यायाध्ययनं चकार। गायत्रीं वेत्युक्तं स्वामिना। "जपभोजनहोमेषु मूत्रोच्चारे च वाग्यतः" इत्युक्तेर्जपे मौनमेव न्याय्यम्। "सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत्। प्रोक्ते पारशिके शब्दे प्राणायामं समाचरेत्॥ बहुप्रलापीत्वाचम्य न्यस्यांगानि ततो जपेत्॥" इति तंत्रसारोक्तेः॥ ६॥ उपस्थाय "अदृश्रमस्य केतवः" इत्यादिमंत्रैः संस्तुत्य। पितॄनित्युक्तेर्जीवत्पितृकस्यापि दिव्यपितृतर्पणेऽधिकारात् "देवानृषीन्मनुष्यांश्च दिव्यान्पितॄन्यमांस्तथा। जीवत्पितापि प्रीणीयान्नित्यं स्नात्वा द्विजोत्तमः॥" इति स्मृतेः। वृद्धान् नत्यादिना, विप्रान् दानमानादिना, आत्मा वेदः स विद्यते पाल्यतयायस्य स आत्मवान् "वेदविप्रौ ममात्मानौ मुख्यौ गावस्तथैव हि। वेदगोविप्ररक्षायै सर्वदा ध्रियते तनुः॥" इति श्रीमुखोक्तेः॥ ७॥ गृष्टीनां सकृत्प्रसूतानाम्। साध्वीनां पादबंधनादिक्रियानपेक्षाणाम्॥ ८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

परमेश्वरत्वमेवाह—एकमिति। अस्येत्यादिना जीवात्मतो वैलक्षण्यमुक्तम् उद्धवनाशेत्युपलक्षणम् अन्यत्तैः यद्वा आत्मानं स्वस्वरूपं दध्यौ तस्य तावच्छुद्धत्वमाह—तमसः परमिति। "तमसः परस्तात्" इति श्रुतेः। सङ्घातरूपत्वं निषेधति एकमिति "एकमेवाद्वितीयं ब्रह्म" इतिश्रुतेः। एकत्वेपि स्वाभाविकशक्तित्वं व्यञ्जयति—स्वयञ्ज्योतिरिति। स्वयमात्मनैव ज्योतिर्नानाप्रकाशो यस्य तम् "आत्मप्रकाशम्" इतिश्रुतेः। अत एव न विद्यते अन्यत् यत्र तं "नेह नानास्ति किञ्चन" इतिश्रुतेः अत एव "न तस्य कार्य्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इतिमन्त्रोपि अनयैव शक्त्या प्रकृतीक्षणञ्चाभ्युपगतं भाष्यकृद्भिः अतः प्राकृतविलक्षणत्वादव्ययम् अपक्षयादिशून्यम् एवं तत्स्वरूपस्य स्वतः शुद्धत्वं दर्शयित्वा तत्रान्यच्छायाशाबल्यमपि निषेधति स्वसंस्थया स्वप्रभावेनैव नित्यं निरस्तं निवृत्तं कल्मषं स्वसान्निद्ध्यमात्रे पक्रियमाणया मायया शाबल्याभासोपि यत्र तम् "अयमात्मा अपहतपाप्मा" इतिश्रुतेः। एवं स्वरूपेण गुणेन च सर्वतो बृहत्तमत्वाद्ब्रह्मेत्याख्या यस्य तादृशम् "न तस्य कार्य्यम्" इत्यादेरेव श्रुतेः। तथैव तं कार्य्यद्वारापि लक्षयति—अस्येति। भावः स्वभावः स्वरूपशक्तिरित्यर्थः। निर्वृतिरानन्दैकस्वरूपत्वं तच्छक्तिभिस्ते लक्षिते यत्र तम् अस्येति हि दृश्यमानजाड्यादिदोषयुक्तत्वं सूचयित्वा तदुद्भवादिशक्तीनामपि सदोषत्वं दर्शितं ततो बहिरङ्गत्वञ्च ततस्तद्दोषास्पृश्या तदुपजीव्या चान्या स्वरूपभूता शक्तिर्बोधिता सर्वात्मत्वेन परमानन्दरूपं तत्स्वरूपञ्चेति। यद्वा एकमिति "स एक एवेतरथामिथोभयम्" इत्याद्युक्तन्यायेन ईश्वरस्यैकस्यैव युक्तत्वात् अतः स्वयञ्ज्योतिश्च स्वयमेव प्रकाशमानमित्यर्थः। ननु, सङ्कर्षणादयोपीश्वराः श्रूयन्ते तत्राह—अनन्यं न कश्चिद्व्यूहोऽन्यो भिन्नोस्ति यस्मात्तं स एव लीलया चतुर्व्यूहादिरूपेण वर्त्तते नतु ते ततो भिन्ना इत्यर्थः। तत्तत्प्रादुर्भावकत्वेप्यलं क्षपयिष्णुसरोवरवदव्ययम् अत एव स्वीयया असाधारणरूपया संस्थया सम्यक् स्थित्या निवृत्तं कल्मषं निकर्षरूपं यस्मात्तं किञ्च ब्रह्मणोपि आख्या ख्यातिः प्रकाशो यस्मात्तं तदुक्तमष्टमे श्रीमत्स्यदेवेन—

"मदीयं महिमानञ्च परं ब्रह्मेति शब्दितम्। वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदि॥" इति

श्रीविष्णुपुराणे च "शुभाश्रयः स चित्तस्य सर्वगस्य तथाऽऽत्मनः" इति। श्रीभगवद्गीतासु च "ब्रह्मणो हि प्रतिष्ठाहम्" इति अस्येत्यादि पूर्ववत्॥ ५॥ अथानन्तरमेव अम्भसि तीर्थमये प्रातः स्नाने तीर्थस्यापेक्षत्वात् इति प्रत्यन्तःपुरबहिर्भागगमनं बोध्यते सत्तम इति, सतां धर्मप्रदर्शनार्थमिति भावः। अन्यत्तैः। यद्वा सन्ध्योपगमादिषु कर्मसु सत्तमः परमकुशलः॥ ६॥ क्रियाकलापमेवाह—पक्षान्तरे चादिशब्दार्थमेवाभिव्यञ्जयति-उपस्थायेति त्रिकेण। कला विभूतीः श्रीत्रिविक्रमादिप्रतिमाश्च वृद्धान् कुलवृद्धान् विप्रांश्च आत्मा धृतिर्बुद्धिर्वा तद्वान् तत्तद्विधौ सावधानस्सन्नित्यर्थः॥ ७॥ साध्वीनां गुणरूपलक्षणादिभिरुत्तमानां तेनैवादौ स्वर्णकुण्डलादिभिः अलङ्कृतेभ्यः प्रतिगृहं बद्वदानात्तु एकविंशतिकोटयः सप्तलक्षाणि सप्तपञ्चाशत्सहस्राणि द्वासप्तत्यधिकानि (२१०७५७०७२) दिनेदिने इत्यत्रैव वीप्सया नित्यकर्मत्वे लब्धे बद्वमित्यत्र पुनर्वीप्सातिदार्ढ्याय प्रतिदिनमेव बद्वस्य बहुत्वबोधनाय वा बद्वमित्यत्र दकारसंयोगितया बद्धमित्येव श्रौतेषु प्रसिद्धम्॥ ८-९॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

परमेश्वरत्वमेवाह—एकमिति। अस्येन्यादिना जीवतत्त्वाद्वैलक्षण्यमुक्तम्। अन्यत्तैर्व्यञ्जितम्। यद्वा, एकमिति (भा० ५।१८।२०) 'स एक एवेतरथा मिथो भयम्' इत्याद्युक्तन्यायेनेश्वरस्यैक्योपपत्तेः। अतः स्वयंज्योतिः स्वयमेव प्रकाशमान-

मित्यर्थः। परमात्मत्वेन तस्य सर्व्वप्रवाहकत्वात्तेनान्यप्रवाह्यत्वाभावाच्च। ननु संकर्षणादयोऽपीश्वराः श्रूयन्ते? तत्राह— अनन्यं न कश्चिदन्यो भिन्नोऽस्ति यस्मात्तम्, स एव लीलया चतुर्व्यूहादिरूपेण वर्त्तते, न तु ते ततो भिन्ना इत्यर्थः। किञ्च, अव्ययं सर्व्वशक्तिपरिपूर्णमिति। तच्छक्त्यैव संकर्षणादीनां तत्तच्छक्तिरिति भावः। अतएव स्वकीयया असाधारणया संस्थया परमानन्दघनरूपया सम्यक् स्थित्या विशिष्टम्, अतो नित्यं निवृत्तं कल्मषं भक्तानां सर्व्वदुःखं यस्मात्तम्; यद्वा, स्वेषु भक्तेषु संस्थया सदा साक्षादिव परिस्फूर्त्या कृत्वा नित्यनिवृत्तकल्मषम्; किञ्च, ब्रह्मणोऽखण्डचैतन्यस्य श्रीचतुर्मुखस्य वा आख्या प्रसिद्धिर्यस्मात्, अखण्डत्वस्य तस्मादेवाभिव्यक्तेः, सूर्य्यादिकरश्मिजालस्य च तन्नाभिपद्मोद्भवत्वात्, यद्वा, ब्रह्मस्वरूपमाख्या नाम यस्य तम्, नाम्नो हि सच्चिदानन्दरूपत्वात्। इति तेनापि नित्यकल्मषनिवृत्तिरभिप्रेता। किञ्च, उद्भवनं सृष्टिः, आदिशब्दात् स्थितिप्रलयौ श्रीवैकुण्ठवैभवादिवैचित्र्यञ्च, तद्धेतुभिः, स्वस्य स्वाधीनाभिर्वा शक्तिभिर्मायाचिद्विलासरूपादिभिर्विशिष्टम्, अतएवास्य विश्वस्य लक्षितलक्षणैर्दशभावनिर्वृतिः प्रेमानन्दो यस्मात्तम्। एवं सर्व्वथा जीवतत्त्वाद्वैलक्षण्यम्; विशेषणानां चैषां यथोत्तरं तत्र श्रैष्ठ्यमूह्यम् ॥ ५ ॥ अथ अनन्तरमेव, अम्भसि गोमत्यादेः, प्रातःस्नाने तीर्थस्यापेक्षत्वात्। सत्तम इति सतां धर्म्मप्रदर्शनार्थमिति भावः अन्यत्तैर्व्याख्यातम्। यद्वा, सन्ध्योपगमादिकर्म्मसु सत्तमः परमकुशलः। एवं क्रियाकलापः संक्षेपेणाभिव्यञ्जित एव, तत्तदाख्यश्चोक्तम् ॥ ६ ॥ क्रियाकलापमेवाह, पक्षान्तरे चादिशब्दार्थमेवाभिव्यञ्जयति,—उपस्थायेति। वृद्धान् कुलवृद्धान् विप्रांश्च, च-काराच्छ्रीशालग्रामशिलादींश्चाभ्यर्च्य, देवादीनां यथाक्रमं तर्पणे वृद्धादीनां चाभ्यर्च्चने श्रेष्ठम्, आत्मा धृतिबुद्धिर्वा, तद्वान्, तत्तद्विधौ सावधानः सन्नित्यर्थः ॥ ७ ॥ साध्वीनां रूपगुणादिभिः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

एकं समाभ्यधिकरहितम् अद्वयं जात्यादिकल्पनारहितं स्वसंस्था स्वगतशक्तिभिर्लक्षितभाववृत्ति दृष्ट्या दृग्भिरुपलक्षितम् ॥ ५–१२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

कोसौ तमसः पर आत्मा? तं विशिनष्टि—एकमिति। एकं समाभ्यधिकरहितं जीवस्तु विपरीत इति भावः। स्वयञ्ज्योतिः स्वयं प्रकाशस्वरूपम् अनन्यं न विद्यतेऽन्यदशरीरभूतं वस्तु यस्य तम् अव्ययं जात्यादिकल्पनारहितं स्वस्मिन् संस्था सम्यगविकृतत्वेन अवस्थितिस्तया नित्यं निरस्तं प्रतिक्षिप्तं कल्मषं पुण्यपापात्मकं हेयं यस्य तं ब्रह्मेत्याख्या बृहति बृंहयतीति निरुक्तिर्यस्य तम् अस्य जगतः उत्पत्तिनाश तुभिः स्वशक्तिभिः उद्भवनाशग्रहण स्थितेरित्युपलक्षणं शक्तिरपृथक्सिद्धविशेषणं ततश्चोत्पत्तिकारणत्वस्थितिकारणत्वलयकारणत्वरूपैर्द्धर्मैरित्यर्थः। भावः सत्ता सा च मानसं बन्धार्हत्वरूपा भावशब्दश्चात्र धर्मिपरः लक्षितो भावः सत्ताविशिष्टं स्वरूपं निर्वृतिरानन्दात्मकं यस्य तथाभूतम् अत्रास्येत्यादिना। भावेत्यन्तेन प्रकृतेः परस्यात्मनो लक्षणमभिप्रेतं जगज्जन्मादिकारणत्वं हि ब्रह्मणो लक्षणं निर्वृतिपदेनानन्दवाचिना "सत्यं ज्ञानमनन्तम्" "विज्ञानमानन्दम्" इति स्वरूपशोधकवाक्यार्थः स्मारितः अत्र कोसौ प्रकृतेः पर आत्मेत्यतो ब्रह्माख्यमित्युक्तं ब्रह्मशब्दस्यानेकार्थसाधारण्यात्किं तत् ब्रह्मेत्यपेक्षायामस्येत्यादिना जगत्कारणत्वं लक्षितमिति कारणत्वं चिदद्विशिष्टगतमिति विशेष्यभूतब्रह्मस्वरूपजिज्ञासायां निर्वृतिपदं प्रयुक्तं जगत्कारणत्वस्य हिरण्यगर्भादेरिव सुकृतविशेषप्रयुक्तत्वशङ्काव्युदासाय स्वसंस्थया नित्यनिरस्तकलमषमित्युक्तम् कारणत्वप्रयुक्तविकाराश्रयत्वशङ्काव्युदासायाव्ययमित्यधिष्ठात्रन्तरशङ्काव्युदासायैकमिति कारणत्वप्रयुक्तकार्यानन्यत्वं वक्तुमनन्यमित्युक्तमिति द्रष्टव्यं सच्छब्दापरपर्यायभावशब्देनोक्तार्थे वेदान्तनां प्रमापकत्वं सूचितम् ॥ ५ ॥ अथेति। अथ सत्तमो भगवानम्भस्याप्लुतः स्नातः वाससी परिधाय क्रियाकलापं चकारेति सम्बन्धः। कोसौ क्रियाकलापः? इत्यतस्तं प्रपञ्चयति—सन्ध्येत्यादिना। सन्ध्योपगमादि क्रियाकलापमित्यर्थः। सन्ध्योपगमः सन्ध्योपासनम् आदिशब्दसङ्गृहीतानाह—हुतानल इत्यादिना। हुतः अनलः आहवनीयो येन सः वाग्यतः वाचं यच्छतीति तथा मौनीभूत्वेत्यर्थः। ब्रह्म गायत्रीम् ॥ ६ ॥ उपस्थायेत्यादिश्लोकत्रयमेकान्वयम् आत्मनः स्वस्य कलाः अंशभूतान् देवादींस्तर्पयित्वा वृद्धान् कुलवृद्धान् विप्रांश्चात्मवान् श्रद्धायुक्तस्सन्नभ्यर्च्य दिनेदिने अलङ्कृतेभ्यः विप्रेभ्यः क्षौमकृष्णाजिनतिलैः सह धेनूनां पद्मं पद्मं ददौ पद्मं पद्ममिति महासङ्ख्यायुक्तसङ्ख्याभिधानं कथम्भूतानां रुक्म स्वर्णालङ्कारः शृङ्गयोः यासां मौक्तिकानां स्रजो यासां बहुक्षीराणां गृष्टीनां प्रथमप्रसूतानां शोभनो वत्सो यासां शोभनं वासो यासां तासां रौप्यं रजतालङ्कारः खुराग्रेषु यासां तासाम् ॥ ७–९ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

इतरवस्तुभ्य आत्मानं व्यावर्तयति—एकमिति। एकं मुख्यं स्वरूपभेदशून्यं वा आदित्यादिज्योतिभ्यः परं विलक्षणं "परं ज्योतिरूपं सम्पद्य" इति श्रुतिः। अनन्यम् अन्याधीनस्वभावरहितम् अन्यः स्वतन्त्रो यस्मात्स तथा तं वा अद्वयम् असदृशं स्वसंस्थया स्वव्यवस्थया स्वमहिम्ना स्वाकारेण वा नित्यनिरस्तदोषं किं तस्य नामधेयमत्राह—ब्रह्माख्यमिति। स्वलक्षणैः

स्वरूपलक्षणैः व्यावर्तकधर्मैः अस्य जगतः उद्भवनादिहेतुभिः ब्रह्मादिहेतुभिर्लक्षिता भावनिर्वृतिः स्वरूपानन्दो यस्य स तथा तं "यदेष आकाश आनन्दो न स्यात्" इतिश्रुतेः ॥ ५ ॥ सन्ध्योपगमादि सन्ध्योपासनादिकं क्रियाकलापं चकार ब्रह्म जजाप नियतस्वाध्यायाध्ययनं कृतवान् गायत्रीं वा जप्तवान् ॥ ६ ॥ स आत्मनः कलाः स्वसन्निधानविशेषोपेतान् आत्मवान् स्वाधीनप्रयत्नः स्वाधीनमना वा ॥ ७ ॥ साध्वीनां पादबन्धनादिक्रियानपेक्षाणां गृष्टीनां प्रथमप्रसूतानाम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तदेव स्पष्टयति—एकमित्यादि । एकं ध्येय ध्यातृभावेऽप्येकम्, स्वयं ज्योतिः स्वयमेवानन्दमयमेव ज्योतिः प्रकाशो यस्य इत्यादि सर्वमात्मानमित्युक्तस्य विशेषणम् । पुनः कीदृशम् ? ब्रह्माख्यं ब्रह्मेति आख्यैव यस्य नतु निर्विशेषं ब्रह्मेत्यपि तं केचिदामनन्तीति भावः । अस्य विश्वस्योद्भव-नाशादि-हेतुभिर्ब्रह्मादिभिः स्व-शक्तिर्लक्षिता, भावस्य विलासादि-भावस्य निर्वृतिर्यस्य, तेषु न्यस्त-भावतया स्वस्थ विलासत्वात्, स्वसंस्थया स्वमर्यादया नित्यः शाश्वतो निरस्तकल्मषः क्षीणक्लेशश्च यस्मात्, स च स च तम् । आत्मशब्दोऽत्र विग्रहपरः । स्वमेव विग्रहं दध्यौ इति भावः । स्वविग्रहः स्वस्यापि ध्येय इत्यर्थः । उक्तञ्च—(भा० ३।२।१२) "विस्मापनं स्वस्य च" इत्यादि ॥ ५ ॥ अथेत्यादि । ब्राह्ममुहूर्तोत्थानादात्मध्यानानन्तरमम्भसिकासारादौ, न तूद्धृतेनाम्भसाप्लुतो ब्रह्म निजनाम जजाप । मनुष्यपदवीमनुवर्तमान इत्यस्यायं प्रपञ्चः । एवं सन्ध्योपगमादावपि सच्चिदानन्दघनविग्रहस्य तस्यान्यविग्रहवन्मैत्र्यादिकर्म नास्त्येवेति दर्शयितुमाह्निकानुवर्णनम् । तत्र च ब्राह्ममुहूर्तोत्थानमारभ्य स्नानसन्ध्यादिवर्णनपर्यन्तम् तस्यानुक्तत्वात् ॥ ७–२६ ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

आत्मानमिति विवृणोति—एकमिति । ध्येय-ध्यातृत्वादिभेदरहितम्, ब्रह्माख्यं ब्रह्मणोऽपि आख्या प्रतिष्ठा यस्मात्, स्वशक्तिभिर्ब्रह्म विष्णुमहेशरूपाभिरस्य विश्वस्योद्भव-नाशादिहेतुभिर्लक्षिता भाव-निर्वृतिः सत्त्वानन्दो यस्य सृष्टेः प्रागन्तमध्यवर्त्तिनामित्यर्थः । स्वसंस्थया आत्ममर्यादया अविकारेणैव—(भा० २।९।३२), "अहमेवासमेवाग्रे" इत्युक्तेः । अतएव नित्यनिरस्तकल्मषं नित्यनिरस्ताविल्यमतः स्वयंज्योतिः । एवम्भूतात्मनः श्रीविग्रहं दध्यौ, अहो सौन्दर्यमस्येति चिन्तितवान् । उक्तञ्च—(भा० ३।२।१२) "विस्मापनं स्वस्य च सौभगर्द्धेः" इत्यादि ॥ ५ ॥ अथेत्यादि । ब्राह्ममुहूर्त्तोत्थानादात्मध्यानानन्तरमम्भसि कासारादौ न तूद्धृतजलेनाप्लुतो वाससी परिधाय सन्ध्योपगमादि क्रियाकलापं चकार । सन्ध्योपगमादि क्रियाविशेषणम् कलापस्य पुंस्त्वात् । सच्चिदानन्दमूर्त्तेर्नरवत् मैत्र्यादिकर्म नास्त्येवेत्यादिकमनुवर्णयता दर्शितमिति भावः ॥ ७–२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

क्रियाकलापं चकारेत्यन्वयः । सन्ध्याया उपगम उपासनं तदादिषु सत्तमः परमकुशलः ब्रह्म गायत्रीम् ॥ ६ ॥ आत्मवान् धैर्ययुक्तः ॥ ७ ॥ गृष्टीनां प्रथमप्रसूतानां गवां दिनेदिने प्रतिदिनं बद्धं चतुरशीत्यधिकानि त्रयोदशसहस्राणि ददौ यदुक्तं "बद्धं चतुरशीत्यग्रसहस्राणि त्रयोदश" इति बद्धं बद्धम् एकमेकं बद्धमित्यर्थः ॥ ८–९ ॥

गूढार्थदीपिनी

आत्मानं विशिनष्टि । एकमखण्डं ब्रह्माख्यमात्मानं दध्यौ इति पूर्वेणान्वयः । तस्य पञ्च विशेषणानि क्रमेण योज्यानि । तथाहि । अनन्यं निरुपाधिम् । अत एव अव्ययम् । ज्योतिष्ट्वे हेतुः । स्वरूपस्थित्या नित्यनिवृत्तं कल्मषमविद्या यस्मात् । पुनश्च । अस्य विश्वस्य उद्भवादिषु हेतुभूताभिः स्वशक्तिभिः रज आद्याभिः लक्षितो भावः सत्ता निर्वृतिः आनन्दरूपता च यस्य तम् ॥ ५ ॥ अथ ध्यानानन्तरम् । सत्तमः धर्मनिष्ठो भगवान् अमले अम्भसि जले आप्लुतः स्नातः सन् वाससी च परिधाय सन्ध्योपासनादि क्रियाकलापं चकारेत्यन्वयः । पुनश्च । वाग्यतः मौनी सन् ब्रह्म गायत्रीं जजाप । उपगम उपासनम् ॥ ६ ॥ उपेति त्रयम् क्रियाकलापमाह—आत्मवान् भगवान् अर्कमुपस्थाप्य आत्मनः कलाः अंशान् देवादीन् तर्पयित्वा विप्रांश्च अभ्यर्च्य तेभ्यः धेनूनां बद्धं बद्धं क्षौमवस्त्रादिभिः सह प्रतिदिनं ददौ इति त्रयाणामेकान्वयः । रुक्मं सुवर्णम् । गृष्टीनां सकृत्प्रसूतानाम् । रुक्मं सुवर्णं शृङ्गयोः यासाम् । रूप्यं रजतं खुराग्रे यासाम् । आत्मा वेदः स विद्यते पाल्यतया यस्य स आत्मवान् शब्दार्थः ॥ ७–९ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रकृतिविलक्षणो जीवोपि ततो वैलक्षण्यमाह—एकमिति । निस्समानातिशयं कालादिभ्यो वैलक्षण्यमाह—स्वयञ्ज्योतिरिति । स्वप्रकाशमित्यर्थः । स्वाश्रयत्वमाह—अनन्यं स्वाश्रयम् निर्विकारस्वरूपत्वमाह—अव्ययमिति । स्वभावतोपास्तसमस्तदोषत्वमाह—स्वसंस्थया स्वभावेन निरस्तकल्मषमिति निरतिशयवृहत्त्वं सर्वशक्त्याश्रयत्वं विश्वहेतुत्वञ्च वदन् सत्यत्वादिगुणवत्त्वमाह—अस्य विश्वस्योद्भवादिहेतुभिः प्रकृतिकालादिभिः लक्षितः अनन्तगुणशक्त्याद्याश्रयत्वेन द्योतितो भावः सत्ता

लक्षणश्चासौ निर्वृतिरानन्दश्च स तथा तम् सदानन्दमित्यर्थः ॥ ५ ॥ आप्लुतः स्नातः सन्ध्या उपासनम् आदिर्येषां तेषु सत्तमः क्रियाकलापं चकार ब्रह्म गायत्रीम् ॥ ६ ॥ कलाः अंशानपि लोकसङ्ग्रहार्थं देवादीन् तर्पयित्वा गृष्टीनां प्रथमं प्रसूतानां दिनेदिने प्रतिदिनं प्रतिगृह्य बद्धम् एकमेकं बद्धम् अलङ्कृतेभ्यः तपोव्रताद्यलङ्कारयुक्तेभ्यो ददौ चतुरशीत्यधिकानि त्रयोदशसहस्राणाम् एकं बद्धम् ॥ ७-९ ॥

श्रीसत्यधर्मकृता भागवतटिप्पणी

इतरविलक्षण आत्मा स इति निर्धारयितुं तल्लक्षणानि स्वरूपभूतान्याह । एकमिति । एकं मुख्यं गुणकर्मभिरभिन्नं वा । परंज्योतिः परमित्यव्ययं ज्योतिर्भ्यः सूर्यादिप्रकाशकार्थेभ्यः परमिति परञ्ज्योतिश्च । स्वानन्यश्चेति पदमेकम् । आत्मपदान्वयनाय रूपादिपदाध्याहारवलेशासाधकत्वात् । परञ्ज्योतिरुपसम्पद्येत्यादेः । स्वानधीनवस्तुहीनत्वान्न विद्यतेऽन्यः स्वानधीनो यस्येति विग्रहः । अद्वयं समाधिकरहितम् । तन्त्रभागवतवचनमाचार्यैः श्रुतिगीताव्याख्यावसरे वक्ष्यमाणम् । स्वरूपमस्मरत्कृष्ण एकं स्वस्मिन्नभेदतः । अत्र तन्त्रस्य राहित्यादनन्यं सदृशोज्झितेः । अद्वयं नित्यनिवृत्त्यभावनिवृत्तमीश्वरमित्यनुसन्धेयम् । स्वसंस्थया स्वरूपस्थित्या नित्यं निरस्ताः कल्मषा येन तम् । ब्रह्मेत्याख्या यस्य स तम् । अस्य जगत उद्भवनमुत्पत्तिस्तदेवादिर्यस्य जन्माद्यष्टकस्य हेतुभिः स्वलक्षणैः स्वरूपधर्मैर्लक्षितभावो निर्वृत्तिश्च भावो ज्ञानं निर्वृतिरानन्दश्च ते यस्य स तम् । अत्रात्मेति विशेष्यमिति भावनिर्वृतीति क्वाचित्कः पाठो नादरणीयः । अत एव यत्तत्परञ्ज्योतिरिति पाठो लेखकहस्ते व्यत्यस्थित इति ज्ञेयम् । मान एकं स्वस्मिन्नभेद इति विवृतेः । तथोक्तं सुधापरिमले पूर्वश्लोकोक्तात्मविशेषत्वाद्भावनिर्वृतमित्युक्तम् । ज्योतिरित्यस्यापि ज्योती रूपमित्यर्थः । अत एवानन्यमिति साधु । अत एवानन्यदिति स्यादिति । जन्मादिकारणत्वादिकं स्वरूपलक्षणं न तटस्थमित्यत्र तदेतदनुपपन्नमित्यारभ्य तस्मात्सूत्रकारस्यैवायमभिप्रायो यज्जन्मादिकारणत्वं ब्रह्मणः स्वरूपान्तर्गतमेव लक्षणमिति । तथा च तदीयविस्पष्टवाक्यान्तरबलादस्यापि सूत्रस्य स्वरूपलक्षणपरत्वमेवेत्यन्तग्रन्थसुधाऽनुसन्धेया ।।५।। अथ मन्त्रस्नानानुष्ठेयध्यानानन्तरममलेऽम्भस्याप्लुतः । अनेन तदनुद्धृता ध्वन्यते । यथाविधीति यथायथमन्वेति । क्रियाकलापं जले क्रियमाणक्रियासङ्घम् । कलापः संहतौ बर्हे तूणीरे भूषणे हर इति विश्वः । चकार । अथ वाससी पीते वस्त्रे परिधाय वसित्वा सन्ध्योपगमस्तदुपस्थापनमादिर्यस्य तत्कर्म चकार । सन्ध्योपगमादीति क्रियाकलापपदेनान्वयनपक्षे वाससी परिधायेत्यादितो निधायान्वेतव्यम् । कलापशब्दः पुलिङ्गतया विभक्तिकतया निर्देशः । सन्ध्यापगमादीति स्वीकृत्य चान्वयो वा । सन्ध्योपगम आदिर्यस्मिन्कर्मणि तद्यथा भवति तथा चकारेति क्रियाविशेषणत्वेनान्वयो ज्ञेयः । सन्ध्योपगम आदावादिर्येषां ते च ते सन्तश्च तच्छ्रेष्ठ इति पदमेकं वा । हुतोऽनलोऽग्निर्येन स सन्वाग्यतो यतवाक् ब्रह्म स्वाभिन्नं हरिं वा गायत्रीं वा जजाप । नियतस्वाध्यायाध्ययनं कृतवानिति वा । ननूत्तरत्रोपस्थायार्कमुद्यन्तमिति श्रवणादयमनुदितहोम इति ज्ञायते स च न युक्तः । बव्हृचब्राह्मणे पञ्चमपञ्चकपञ्चमाध्याय एकोनविंशतिखण्डमारभ्यैकविंशतिखण्डपर्यन्तमिति त्रिखण्डया तस्य दोषानाविष्कृत्य फलविलम्बस्य चाभिधानात् । तथा हि । वृषवृष्मो ह वा ताव त उवाच जातकर्ण्यो वक्तास्मो वा इदं देवेभ्यो यद्वैतदग्निहोत्रमुभयेद्युरहूयतान्येद्युर्वाव तर्हैतर्हि हूयत इत्येतदुहैनोवाच कुमारी गन्धर्वगृहीता वक्तास्मो वा इदं पितृभ्यो यद्वैतदग्निहोत्रमुभयेद्युरहूयतान्येद्युर्वाव तर्हि हूयत इत्येतद्वाऽग्निहोत्रमन्येद्युर्हूयते यदस्तमिते सायं जुहोत्यनुदिते प्रातरथैतदग्निहोत्रमुभयेद्युर्हूयते यदस्तमिते सायं जुहोत्युदिते प्रातस्तस्मादुदिते होतव्यं चतुर्विंशो हवै संवत्सरेऽनुदितहोमी गायत्रीं लोकमाप्नोति द्वादश उदितहोमी स यदा द्वौ संवत्सरावनुदिते जुहोत्यथ हास्यैको हुतो भवत्यथ य उदिते जुहोति संवत्सरेणैव संवत्सरमाप्नोति । य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यमेव हवा अहोरात्रयोस्तेजसि जुहोति योऽस्तमिते सायं जुहोत्युदिते प्रातरग्निना वै तेजसा रात्रिस्तेजस्वत्यादित्येन तेजसाहस्तेजस्वदहोरात्रयोर्हास्य तेजसि हुतं भवति । य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यम् ॥ १२ ॥ एते हवै संवत्सरस्य चक्रे यदहोरात्रे ताभ्यामेव तत्संवत्सरमिति स योऽनुदिते जुहोति यथैकतश्चक्रेण यायात्तादृक्तदथ य उदिते जुहोति यथोभयतश्चक्रेण यायात्क्षिप्रमध्वानं समश्नुवीत तादृक्तदेषाभियज्ञगाथा गीयते । बृहद्रथान्तराभ्यामिदमेति युक्तं यद्भूतं भविष्यच्चापि सर्वं ताभ्यामियादग्निनाधाय धीरो दिवैतान्यज्जुहुयान्यस्तमन्यदिति राथन्तरी वै रात्र्यहर्याहतमग्निर्वै रथन्तरमादित्यो बृहदेते हवा एनं देवते ब्रध्नस्य विष्टपं स्वर्गं लोकं गमयतो य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यं तदेषाभियज्ञगाथा गीयते । यथा हवा स्थूरिणैकेन यायादकृत्वाऽन्यदुपयोजनाय एवं यान्ति ते बहवो जनासः पुरोदयाज्जुह्वति येऽग्निहोत्रमिति तां वा एतां देवतां प्रयन्तीं सर्वमिदमनुप्रैति यदिदं किञ्चैतस्यै होदं देवताया अनुचरस्सर्वं यदिदं किञ्च सैषा अनुचरवती देवता विन्दते हवा अनुचरं भवत्यस्यानुचरो य एवं वेद स वा एष एकातिथिः । स एष जुह्वत्सु वसति तद्यददो गाथा भवत्यनेन समेनसासोभिशस्तादेनस्वतो वापहरादेन एकातिथिमपसायं रुणद्धि विसानिस्तेनो अपसो जहारेत्येष हवै सकातिथिः स एष जुह्वत्सु बसत्येतां वाव स देवतामपरुणद्धि यो तमग्निहोत्राय सन्नाग्निहोत्रं जुहोति तमेषा देवतापरुद्धापरुणद्धस्माच्च लोकादमुष्माच्चोभाभ्यां योलमग्निहोत्राय सन्नाग्निहोत्रं जुहोति तस्माद्योलमग्निहोत्राय स्याज्जुहुयात्तस्मादाहुर्न सायमतिथिरुपरुद्ध इत्येतद्ध स्म वैतद्विद्वान्नगरोजानश्रुते य उदितहोमिनमैकादशाक्षं मानुतन्तव्यमुवाच । प्रजायामेनं विज्ञातास्मो

मभिनन्दनं चानुदितोदितहोमयोः स दृष्टान्तमाचष्टे ॥ स इति । अनुदितहोमो पुरुषाय हस्तिन इति तयोरप्रयतेऽप्रसारिते करे आदध्यादन्नम् । तद्यथा तथा तादृगय होमः । यश्चोदिते जुहोति पुरुषाय वा हस्तिने वा तयोः प्रयते प्रसारिते हस्ते आदध्यात्तादृक् तमेवं हविःप्रदमेष आदित्यः । एतेन हविर्ग्रहणार्णं प्रसारितेन करेणोर्ध्वं हृत्वा स्वर्गे लोके आदधाति । शिष्टं स्पष्टम् । उदितं होमं प्रशस्य सत्ये चायं होम इत्युक्त्वोपसंहरति ॥ उद्यन्निति । उद्यन्नसावादित्यः सर्वाणि भूतानि प्रणयति चेष्टयति । प्रणयतीति प्राण इति व्युत्पत्त्या तन्नामायमाहुरित्याह ॥ तस्मादिति । एनमितमस्योदितहोतुः । प्राणे सम्प्रति हुतं साक्षाद्धस्तंविन्यस्तमिति दत्तं वा हुतं वा भवत्यतो य एषः सत्यं वदन्निति सत्ये जुहोति । योऽस्तमिते सायं जुहोत्युदिते च प्रातर्जुहोत्येष पुमान्सत्ये जुहोति सायमग्नेः प्रातः सूर्यस्य सत्त्वान्मन्त्रोऽर्थवाञ्ज्ञात इति सत्ये होता भवतीति भावः । मन्त्रौ तावाह ॥ भूर्भुवः स्वरोमिति । सायन्तनो मन्त्रो भूरादयो लोकास्तदभिमानिनो देवा ओमिममाहुतिमोङ्कुर्वन्तु स्वीकुर्वन्तु । ज्योतिरितरत्सोऽग्निर्देव एव । एवमेव सूर्यो ज्योतिः सूर्य इति प्रातर्मन्त्रः । इतरः प्रकाशात्मने रवये स्वाहुतमिदमस्तु । इति सत्यमुभयोः सत्ता तदेति सत्यं वदतोऽस्य होतुः । पूर्ववदुर्वरितम् । अनुदितहोमिनोऽनृतवादिन इति तन्निन्दनमिषेण भूषयन्तीमुदितहोमं न हि निन्दानयेन काञ्चिद्गाथां प्रतिश्रुत्य वक्ति ॥ तदेषेति । ये उदयात्पुराऽग्निहोत्रं प्रातः प्रातरिति प्रारिप्सया कादाचित्कं नानुदिते सूर्ये उपांस्वन्तर्यामौ जुहुयाद्यदि त्वरेतानुदित उपांशुं जुहुयादुदितेऽन्तर्यामं उभावनुदिते होतव्यावित्येक इति सौमपञ्चकीयमहाराम्नप्रश्नोक्तं उपांस्वन्तर्यामहोमादिबव्हृचाचीनां व्यावर्तयन्ति । तेऽनृतं वदन्ति । सवितुरभावात्तदेत्याह । दिवाकीर्त्यमदिवा सवितुरनाविर्भावसमये कीर्तयन्तोऽसूर्यो ज्योतिः सूर्य इति कीर्तयन्तो येषां तदा सूर्यो न ज्योतिर्ज्योतिर्नेत्यनृतहोमिनस्तदुदिते होतव्यम् । अनेनानेनसां नाथः कुरुतात्करुणां गुरुः ॥ इमावेव श्लोकाबुदाहृत्य सदाचारस्मृतिव्याकृतावानुदिनहोमिनो माध्यन्दिनाः अत एव वाजसनेयं ब्राह्मण उदितहोमिनां विच्छिन्नमग्निहोत्रं मन्यामहे इत्युदितहोमनिन्दापूर्वकमनुदितहोमः समर्थित इति व्याख्यातवन्त आत्माकीना अनेके । परव्याख्याने श्रीधरीये च काण्वत्वादनुदितहोम इत्युक्तेरुदाहृतखण्डत्रिके खण्डमण्डनादनुदितहोमस्येति कथं निर्णय इति चेन्न । सर्ववर्णाः सर्वाश्रमाः सर्वधर्माः । यदा चानियता देवा विधिश्च स्वेच्छानियतस्तदा लोकमनुकुर्वतो हरेर्न वयमनुदितहोममात्रेण तत्त्वतस्तत्त्वमवधारयितुं धीराः किन्तु पूर्णस्य न लभ्यं फलमिति यथायथं होमसम्भवात् । अन्यथा यावदानुबन्धिनोऽसङ्ख्यास्तेषामेतदन्यतरत्वं कल्पनीयम् । अथवाऽऽश्वलादीनां कात्यायनादीनामनुबन्धो वा कल्पनीय इति बहुकल्पनीयं स्यात् । अत एवद्वितकालानले द्वितीयज्वालायामनुदित उदिते बाह्याहुतेर्निदितत्वात्समयपुरुषभेदात्तद्व्यवस्थाऽतिसुस्थेत्युक्त्वा त एकोदितानुदितहोमनिन्दाबलादुभयहोमयोः प्रयोगभेदेन वा शाखाविशेषाध्येतृपुरुषभेदेन वा व्यवस्था युक्तेति निष्कर्षो दुष्कर इति साम्मग्ध्येनाभ्यदधुः । व्युत्क्रमेण वाऽन्वय इति न शङ्काशक इति दिक् । सोमे स्वमूले लसति तत्काले होमदाने तत्तोषस्तत्सन्निधाने जाम्बवत्प्रदर्शिततद्वंश्यरामाकारस्य तत्सम्माननं चावश्यकमित्येव देवश्चकारेति केचिदुत्प्रेक्षयन्ति ॥ ६ ॥ उद्यन्तमर्कमुपस्थाय तदुपस्थानं विधायात्मनः कलाः सन्निधानविशेषसहितान्देवर्ष्यादींस्तर्पयित्वाऽऽत्मवान्यतचित्तोऽभ्यर्च्य पूजयित्वा ॥७॥ गृष्टीनामेकवारं प्रसूता गौर्गृष्टिरित्यभिधीयत इत्युक्तेः सकृत्प्रसूतानां धेनूनाम् ॥८॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

सर्वस्यैवात्मत्वात् सर्वोपासकानामात्मोपासकत्वमाशङ्क्य केवलमात्मोपासकत्वसिद्ध्यर्थं आत्मानं विशिनष्टि एकमिति । तदात्मस्वरूपं षड्गुणैश्वर्ययुक्तं ब्रह्मैवेति वक्तुं सप्त विशेषणान्युच्यन्ते । एकमित्यसहायेन ऐश्वर्यमित्युक्तम् । स्वयंज्योतिरित्यलौकिकवीर्यम् । अनन्यमिति कीर्तिः । अव्ययमिति लक्ष्मीः । स्वसंस्थया स्वरूपस्थित्यैव नित्यनिवृत्तानि कल्मषाणि यस्येति ज्ञानम् । ब्रह्मेत्याख्या यस्येति प्रापञ्चिकसर्ववैलक्षण्येन वैराग्यम् । धर्मिणमाह 'जन्माद्यस्य यत' इति न्यायेन । अस्य जगतः उद्भवनाशहेतुभिः । उद्भवः सत्त्वम्, अभिवृद्धेस्तद्धेतुकत्वात्, नाशस्तमः, हेतू रजः । एताश्च स्वशक्तय एव । तैर्लक्षिता भावाः सात्त्विकादयोऽन्तःकरणस्य तेषां निर्वृतिः अपगतिः, यत्र भावैः सहितं निर्वृतिं चेति वा । अनेन प्रपञ्चकर्ता प्रपञ्चरहितश्चेति विरुद्धसर्वधर्माश्रयत्वेन निरूपितम् । अनेन वा वैराग्यम् । ब्रह्माख्यमिति धर्मी । आत्मत्वेन सर्वत्र भेदनिराकरणार्थं पञ्चभेदनिराकरणार्थं वा एकपदम् । प्रमाणाभावाय स्वयंज्योतिष्ट्वम् । अनन्यत्वं भिन्नधर्मनिराकरणाय । अव्ययत्वं ब्रह्मधर्माणां नित्यत्वाय । साङ्ख्यादिमते अब्रह्मधर्मा एव ब्रह्मणि समागत्य गच्छन्तीति तन्निराकरणार्थमेतदवश्यं वक्तव्यम् । स्वरूपस्थितिश्च संसारात्मवदविद्यानिराकरणाय । नित्यपदेन ज्ञानानन्तरनिवृत्तिर्निराकृता । ब्रह्मपदेन सर्वश्रुतिसमन्वयः । सर्वेषां बन्धमोक्षदातृत्वाय विरुद्धधर्माः ॥ ५ ॥ एवं भगवत्त्वं भावयित्वा तत्कार्यं च स्वनिष्ठः सन्नपि तां निष्ठां परित्यज्य बहिर्धर्मानेव अन्तस्तथाभूतोऽपि भिन्नप्रक्रमेण कृतवानित्याह अथेति । अम्भसि आप्लुत इति । गोमत्यादाववगाह्य स्नानम्, नतूद्धृतजलैः । अमले वाससी परिधायेति विशेषणविशेष्ययोर्दूरे समन्वयः । स्नानेऽपि रात्रिवासःपरित्यागेनामले वाससी परिधाय पुनः स्नात्वामलवाससोः परिधानमाह । यथाविधीति स्नानपरिधानयोः क्रियाकलापे चान्वेति । क्रियाकलापमेव विशेषेणाह संध्योपगमादीति । वाग्यत इति सन्ध्यायां मौनं कर्माङ्गत्वेनैव कृतवानिति ज्ञापयति । अर्घ्यदानान्ता सन्ध्या, ततोऽग्निहोत्रहोमः, ततो ब्रह्मजपः गायत्री-

रथे योजितैनान्यदन्यमश्वमुप्रयोजनाय योजयितुमशक्त्वा स्वान्तरमसंयोज्य यायात्। उपयोजनाय उप समीपे। तत्किमात्मकं सामीप्यमित्यत आह॥ योजनायेति। एकायोजनव्यवहितं स्थानं यायादिति बाकुः। इत्यावृत्त्याऽन्वयः। एवं बहवो जनाः। आञ्जसेरसुगिति असुक्। जना य उदयात्पुराग्निहोत्रं जुह्वति त एवं यन्तीत्यविवेकिन इत्यर्थः। उदितहोम माहात्म्योपयोगिबृहदिति प्रसक्तादित्यमाहात्म्यमाह॥ तामित्यादिना। यत्किञ्चेदं सर्वचराचरं तामेवादित्यनाम्नीं देवतां प्रयतीमुदयास्तमयौयान्ती। अनु पश्चात्प्रैति प्रवर्तते। तथा च शाखान्तरे पठ्यते। योऽसौ तपन्नुदेति स सर्वेषां प्राणानादायोदेति। अथो योऽस्तमेति सर्वेषां प्राणानादायास्तमेतीति। सवितरि सत्युदिते चेष्टते न चेष्टते चास्तं गते लोक इति। एतस्या देवतायाः सर्वमनुचरं भृत्यरूपं सैषा पूषाख्या देवताऽनुचरवत्येतदात्मकभृत्ययुक्ता। एतज्ज्ञानं फललाभेन स्तौति। एवं यः सर्वमनुचरं रवेर्वेदास्य वेदितुरनुचरो यथायोग्यं भृत्यवर्गो भवतीति। पुनः प्रकारान्तरेणादित्यदेवतास्तवनपूर्वकमुदितहोमं विधत्ते॥ एष इति। स एष आदित्य एकातिथिः एकश्चासावतिथिश्च। अकः अतिथिरिति वक्तव्ये एकातिथिरिति वदन्वेदपुरुषः शाखोदितोदितहोमाभावे पूर्वोक्तरीत्यैकातिथिरेव भवतीत्यर्थमपि सूचयामासेत्यवधेयम्। स एष जुह्वत्स्वग्निहोत्रिषु वसति प्रातरागत्य तिष्ठति। काञ्चिद्गाथामस्मिन्नेवार्थे कथयति॥ तददो गाथा भवतीति। तदादित्यैकातिथित्वविषये। अदोगाथेति पदमेकम्। असौ चासौ गाथा चेति विग्रहः। भवति वर्तते। का सेत्यतस्तामुदाहरति॥ अनेनसमिति। पुरा चारब्धे सप्तर्षिसंवादे कश्चित्पुमान् विसस्तेन्यात्मकमपवादं प्राप्तमृषीणामग्रे परिहतुं स्वयं शपथं चकारेति तच्छपथोक्तिरूपिणी चेयं गाथेति माधवः। वस्तुतस्तु परस्परं मुनीनां साऽरुन्धती पशुसखश्च सखानामेव शपथः। यथोक्तमानुशासनिके मोक्षधर्मे। केन क्षुधापरीतानामस्माकं पापकर्मणा। नृशंसेनापनीतानि विसान्याहारकाङ्क्षिणाम्। ते शङ्कमानास्त्वन्योन्यं प्रपच्छुर्द्विजसत्तमाः। त उचुः शपथं सर्वे कुर्म इत्यरिकर्शन। त उक्त्वा बाढमित्येवं सर्व एव तदासनम्। क्षुधार्ताः सुपरिश्रान्ताः शपथायोपचक्रमुः। अत्रिः स गां स्पृशतु पादेनेत्यारभ्य देवतेष्वनमस्कारो विसस्तैन्यं करोति य इत्यन्तेन। न चेयं गाथाऽन्यविषयेति न वस्तुतस्त्विति वचनं सम्भवतीति वाच्यम्। पुरा चारब्धे सप्तर्षिसंवाद इत्येतद्विषयताज्ञापकचिन्हस्यापन्होतुमशक्यत्वात्। अतः कश्चित्पुमानित्यंशशंसनं कथाव्यत्यस्तेति मन्तव्यम्। योपसः कर्मणो विसा निजहारकमलमूलान्यपाहर्षीत् स स्तेन इत्येतत्पापं यायात्। किं तदित्यत आह॥ अनेनसमिति। योऽनेनसमपापं किञ्चिदेनसा केनचित्पातकेनाभिशस्तात् संयोज्य मत्तुल्यं कुर्यात्। तत्पापं विसस्तैनो यायात्। कश्चिदेनस्वतः स्वतः पापवतो यदेनोऽपाहरत् स्वयं तत्पातकनिपाताय स्वकृतगङ्गाश्रीरामसेत्वादिस्नानादिसुकृतं तस्मा अर्पयति कृष्णार्पणपूर्वकं गृहीत्वा वित्तं तस्य यः प्रत्यवायस्तं सायं सायङ्काले प्राप्तमेकातिथिं देशान्तरादसमये निरन्नं चैकमतिथिं अ ईषत्। गुणश्छान्दसो वा। अर्यरुणत् अपारुणत्। नान्नं गच्छेत्युपरुरोध। तेन निःसारणरूपापराधे नेय इत्यादि यथापूर्वम्। अपसोऽजहारेत्यत्र सोऽजहारेत्यन्वयो वा। विसानिनाऽपहृतानि चेदित्थं पापपरम्परा ममागच्छत्विति शपथं चकारेति। प्रस्तुते किमायातमित्यतः सङ्गतिमावेदयति वेदपुरुषः॥ एष ह वा इति। एष एकातिथिः। स क इत्यत आह॥ स इति। जुह्वत्स्वग्निहोत्रिषु होमं मदुदयानन्तरं मह्यं दधुरयेत इति वसति। स एतां देवतामेकमतिथिमिवापरुणन्निरुरोध। न तस्य सामर्थ्यं स किं कुर्यादित्यत आह॥ य इति। यश्चाग्निहोत्राय तदुदयानन्तरं होमायालं समर्थः सन्नप्यग्निहोत्रं न जुह्वति तं पुरुषमेषा देवता स्वयमेव मयि रुद्धा सती अस्माल्लोकात्तथामुष्मात्परस्ताच्च लोकादित्युभाभ्यामपारुणदुभयभ्रष्टं रुष्टा करोति। दार्ढ्याय पुनः सम्पुटीं तनोति॥ योऽलमिति। योऽग्निहोत्रायोक्तरूपायालं स्यात्स जुहुयात्तस्माद्धोमात्सायमनेनातिथिर्भक्तभक्तो यथा नापरुद्धस्तथैवं देवताप्रातरायाता नोपरुद्धेत्याहुः। अनेनैतद्विषये बहुसम्मतिरुक्ता वेदितव्या। एतद्विद्वान् जानश्रुतिस्तस्य पुत्रो राजजात इति नगरी गामवासी। यद्वा जानश्रुतिः काचिद्राजपुत्री सा च कस्यचिदृषेर्भार्या तस्यां जाता जानश्रुतेयः ऋषिर्नगरो मातू राजपुत्रीत्वान्नगरवासी। उदितहोमिनं कञ्चनैकादशाक्षं तन्नामकराजपौत्रम्। तत्पितृनामाप्याह॥ मानुनन्तव्यमिति। न च विनिगमनाविरहः। प्रथमप्राप्तेरेव तथात्वात्। मनुतन्तव्यापत्यमुद्दिश्योवाच। मनस्येव मा लुलोच। किं तदित्यत आह॥ यदि विद्वानिति। यद्ययं विद्वान् जुहोति। अथवा विद्वानिति प्रजायां विद्वान् जुहोति चेत्प्रजाभिवृद्धा भवतीत्येनं तद्विषये विज्ञाताः स्मः। ज्ञास्यामः। विद्वत्वाविद्वत्वविषये नः संशयोऽस्त्यतो विज्ञास्यामः। कार्येण कारणानुमानमिति तदाह॥ तस्येति। एकादशाक्षः। बाह्यादीयन्त इतीकारान्तस्तस्य राष्ट्रमिव व्याप्ता प्रजा बभूव। एतदन्यथाऽनुपपत्त्या चायं विद्वानिति जानीमः। निगमयन्नुपसंहरति। य एवं विद्वानुदिते जुहोति तस्य प्रजा भवति। तस्मादुदिते होतव्यम्। अग्निसूर्यात्मकातिथिद्वयभोजनमेवं होमे भवतीत्युदिते होतव्यमिति॥ ३०॥ प्रकारान्तरेणानुदितहोमोदितहोमनिन्दानिन्दे अभिनयेन दर्शयति॥ उद्यन्निति। स्वयमादित्य उद्यन्नेवोद्गच्छन्नेवाहवनीयेन तन्नाम्नाऽग्निना सह रश्मीन्स्वान्सन्दधाति संयोजयति। खलु वाक्यालङ्कारे। नु निश्चयेन। खलु स्याद्वाक्यभूषायां नु निश्चय इति विश्वः। स योऽधिकारी अनुदिते जुहोति स खलु निषेध्यो मूढ इति यावत्। तत्र दृष्टान्तः। अजाताय कुमाराय गर्भगाय स्तनम्। तथा जाताय वत्साय योषिद्गौश्च प्रतिदध्यात्पातुं समर्पयेत्तत्साऽनुदितहोमस्तादृगेत। अथ यश्चोदिते जुहोति कुमाराय वत्साय वा जाताय यथा स्तनं प्रतिदध्यात्तत्तादृगस्मै प्रतिधीयमानमुभयोर्लोकयोरन्नाद्यमत्रान्नं परत्र सुखमनुप्रतानधीयते। उभयोर्लोकयोरिति स्वयं विवृणोति। अस्मादमुष्मादित्युभाभ्यामस्मिन्नमुष्मिन्नित्युभयोरित्यर्थः। पुनरप्यनन्दन-

मभिनन्दनं चानुदितोदितहोमयोः स दृष्टान्तमाचष्टे ॥ स इति । अनुदितहोमो पुरुषाय हस्तिन इति तयोरप्रयतेऽप्रसारिते करे आदध्यादन्नम् । तद्यथा तथा तादृगय होमः । यश्चोदिते जुहोति पुरुषाय वा हस्तिने वा तयोः प्रयते प्रसारिते हस्ते आदध्यातत्तादृक् तमेवं हविःप्रदमेष आदित्यः । एतेन हविर्ग्रहणार्णं प्रसारितेन करेणोर्ध्वं हृत्वा स्वर्गे लोके आदधाति । शिष्टं स्पष्टम् । उदितं होमं प्रशस्य सत्ये चायं होम इत्युक्त्वोपसंहरति ॥ उद्यन्निति । उद्यन्नमावादित्यः सर्वाणि भूतानि प्रणयति चेष्टयति । प्रणयतीति प्राण इति व्युत्पत्त्या तन्नामायमाहुरित्याह ॥ तस्मादिति । एनमितमस्योदितहोतुः । प्राणे सम्प्रति हुतं साक्षाद्धस्तंविन्यस्तमिति दत्तं वा हुतं वा भवत्यतो य एषः सत्यं वदन्निति सत्ये जुहोति । योऽस्तमिते सायं जुहोत्युदिते च प्रातर्जुहोत्येष पुमान्सत्ये जुहोति सायमग्नेः प्रातः सूर्यस्य सत्त्वान्मन्त्रोऽर्थवाञ्जात इति सत्ये होता भवतीति भावः । मन्त्रौ तावाह ॥ भूर्भवः स्वरोमिति । सायन्तनो मन्त्रो भूरादयो लोकास्तदभिमानिनो देवा ओमिममाहुतिमोङ्कुर्वन्तु स्वीकुर्वन्तु । ज्योतिरितरत्सोऽग्निर्देव एव । एवमेव सूर्यो ज्योतिः सूर्य इति प्रातर्मन्त्रः । इतरः प्रकाशात्मने रवये स्वाहुतमिदमस्तु । इति सत्यमुभयोः सत्ता तदेति सत्यं वदतोऽस्य होतुः । पूर्ववद्दुर्वरितम् । अनुदितहोमिनोऽनृतवादिन इति तन्निन्दनमिषेण भूषयन्तीमुदितहोमं न हि निन्दानयेन काञ्चिद्गाथां प्रतिश्रुत्य वक्ति ॥ तदेषेति । ये उदयात्पुराऽग्निहोत्रं प्रातः प्रातरिति प्रारिप्सया कादाचित्कं नानुदिते सूर्ये उपांश्वन्तर्यामौ जुहुयाद्यदि त्वरेतानुदित उपांशुं जुहुयादुदितेऽन्तर्यामं उभावनुदिते होतव्यावित्येक इति सौमपञ्चकीयमहाराज्ञप्रश्नोक्तं उपांश्वन्तर्यामहोमादिबव्हृचाचीनां व्यावर्तयन्ति । तेऽनृतं वदन्ति । सवितुरभावात्तदेत्याह । दिवाकीर्त्यमदिवा सवितुरनाविर्भावसमये कीर्तयन्तोऽसूर्यो ज्योतिः सूर्य इति कीर्तयन्तो येषां तदा सूर्यो न ज्योतिर्ज्योतिर्नेत्यनृतहोमिनस्तदुदिते होतव्यम् । अनेनानेनसां नाथः कुरुतात्करुणां गुरुः ॥ इमावेव श्लोकावुदाहृत्य सदाचारस्मतिव्याकृतावानुदिनहोमिनो माध्यन्दिनाः अत एव वाजसनेयं ब्राह्मण उदितहोमिनां विच्छिन्नमग्निहोत्रं मन्यामहं इत्युदितहोमनिन्दापूर्वकमनुदितहोमः समर्थित इति व्याख्यातवन्त आत्माकीना अनेके । परव्याख्याने श्रीधरीये च काण्वत्वादनुदितहोम इत्युक्तेरुदाहृतखण्डत्रिकेखण्डमण्डनादनुदितहोमस्येति कथं निर्णय इति चेन्न । सर्ववर्णाः सर्वाश्रमाः सर्वधर्माः । यदा चानियता देवा विधिश्च स्वेच्छानियतस्तदा लोकमनुकुर्वतो हरेर्न वयमनुदितहोममात्रेण तत्त्वतस्तत्त्वमवधारयितुं धीराः किन्तु पूर्णस्य न लभ्यं फलमिति यथायथं होमसम्भवात् । अन्यथा यावदानुबन्धिनोऽसङ्ख्यास्तेषामेतदन्यतरत्वं कल्पनीयम् । अथवाऽऽश्वलादीनां कात्यायनादीनामनुबन्धो वा कल्पनीय इति बहुकल्पनीयं स्यात् । अत एवद्वितकालानले द्वितीयज्वालायामनुदित उदिते बाह्याहुतेर्निदितत्वात्समयपुरुषभेदात्तद्व्यवस्थाऽस्तिसुस्थेत्युक्त्वा त एकोदितानुदितहोमनिन्दाबलादुभयहोमयोः प्रयोगभेदेन वा शाखाविशेषाध्येतृपुरुषभेदेन वा व्यवस्था युक्तेति निष्कर्षो दुष्कर इति साम्मग्ध्येनाभ्यदधुः । व्युत्क्रमेण वाऽन्वय इति न शङ्काशक इति दिक् । सोमे स्वमूले लसति तत्काले होमदाने तत्तोषस्तत्सन्निधाने जाम्बवत्प्रदर्शिततद्वंश्यरामाकारस्य तत्सम्माननं चावश्यकमित्येव देवश्चकारेति केचिदुत्प्रेक्षयन्ति ॥ ६ ॥ उद्यन्तमर्कमुपस्थाय तदुपस्थानं विधायात्मनः कलाः सन्निधानविशेषसहितान्देवर्ष्यादींस्तर्पयित्वाऽऽत्मवान्यतचित्तोऽभ्यर्च्य पूजयित्वा ॥७॥ गृष्टीनामेकवारं प्रसूता गौर्गृष्टिरित्यभिधीयत इत्युक्तेः सकृत्प्रसूतानां धेनूनाम् ॥८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सर्वस्यैवात्मत्वात् सर्वोपासकानामात्मोपासकत्वमाशङ्क्य केवलमात्मोपासकत्वसिद्ध्यर्थं आत्मानं विशिनष्टि एकमिति । तदात्मस्वरूपं षड्गुणैश्वर्ययुक्तं ब्रह्मेवेति वक्तुं सप्त विशेषणान्युच्यन्ते । एकमित्यसहायेन ऐश्वर्यमित्युक्तम् । स्वयंज्योतिरित्यलौकिकवीर्यम् । अनन्यमिति कीर्तिः । अव्ययमिति लक्ष्मीः । स्वसंस्थया स्वरूपस्थित्यैव नित्यनिवृत्तानि कल्मषाणि यस्येति ज्ञानम् । ब्रह्मेत्याख्या यस्येति प्रापञ्चिकसर्ववैलक्षण्येन वैराग्यम् । धर्मिणमाह 'जन्माद्यस्य यत' इति न्यायेन । अस्य जगतः उद्भवनाशहेतुभिः । उद्भवः सत्त्वम्, अभिवृद्धेस्तद्धेतुकत्वात्, नाशस्तमः, हेतू रजः । एताश्च स्वशक्तय एव । तैर्लक्षिता भावाः सात्त्विकादयोऽन्तःकरणस्य तेषां निर्वृतिः अपगतिः, यत्र भावैः सहितं निर्वृति चेति वा । अनेन प्रपञ्चकर्ता प्रपञ्चरहितश्चेति विरुद्धसर्वधर्माश्रयत्वेन निरूपितम् । अनेन वा वैराग्यम् । ब्रह्माख्येमिति धर्मी । आत्मत्वेन सर्वत्र भेदनिराकरणार्थं पञ्चभेदनिराकरणार्थं वा एकपदम् । प्रमाणाभावाय स्वयंज्योतिष्ट्वम् । अनन्यत्वं भिन्नधर्मनिराकरणाय । अव्ययत्वं ब्रह्मधर्माणां नित्यत्वाय । साङ्ख्यादिमते अब्रह्मधर्मा एव ब्रह्मणि समागत्य गच्छन्तीति तन्निराकरणार्थमेतदवश्यं वक्तव्यम् । स्वरूपस्थितिश्च संसारात्मवदविद्यानिराकरणाय । नित्यपदेन ज्ञानानन्तरानिवृत्तिर्निराकृता । ब्रह्मपदेन सर्वश्रुतिसमन्वयः । सर्वेषां बन्धमोक्षदातृत्वाय विरुद्धधर्माः ॥ ५ ॥ एवं भगवत्त्वं भावयित्वा तत्कार्यं च स्वनिष्ठः सन्नपि तां निष्ठां परित्यज्य बहिर्धर्मानिव अन्तस्तथाभूतोऽपि भिन्नप्रक्रमेण कृतवानित्याह अथेति । अम्भसि आप्लुत इति । गोमत्यादाववगाह्य स्नानम्, नतूद्धृतजलैः । अमले वाससी परिधायेति विशेषणविशेष्ययोर्दूरे समन्वयः । स्नानेऽपि रात्रिवासःपरित्यागेनामले वाससी परिधाय पुनः स्नात्वामलवाससोः परिधानमाह । यथाविधीति स्नानपरिधानयोः क्रियाकलापे चान्वेति । क्रियाकलापमेव विशेषेणाह संध्योपगमादीति । वाग्यत इति सन्ध्यायां मौनं कर्माङ्गत्वेनैव कृतवानिति ज्ञापयति । अर्घ्यदानान्ता सन्ध्या, ततोऽग्निहोत्रहोमः, ततो ब्रह्मजपः गायत्री-

मन्त्रजपः । **सत्कृत** इति तिलकावश्यकभूषणादिपरिधानमुक्तम् । एवमेव कृतः धर्मो भवतीति क्रमविधाने निरूपिते । **अरुणकर-ग्रासात्पूर्वं** ध्यानम्, अरुणकरग्रासे स्नानम्, ततः सन्ध्या अर्घ्यान्ता, ततोऽग्निहोत्रम्, ततो जपः सूर्योदयावधि ॥ ६ ॥ **उदिते सूर्ये** तूपस्थानम्, तदाह **उपस्थायार्कमुद्यन्तमि**ति । ततो देवर्षिपितृतर्पणमाह **आत्मनः कलास्तर्पयित्वे**ति । 'ऋषयो मनवो देवा' इति **वाक्यात्** भगवत्कला एव । यथा अवयवादीनां पुष्ट्यर्थमवयविना यत्नः क्रियते, एवं कलानां पोषार्थं यत्नः, न तूपास्यत्वेनेति ज्ञापनार्थं कलापदम् । 'ततः प्रभृति पूज्यन्त' इति वाक्यात् लोकशिक्षापरत्वेनापि सिध्यति । **सप्तम** इति पाठे सप्तमो **भगवान्** **षड्विधं** देशादिनिरूपितं धर्मं कृतवानिति सूचितम् । कला एव गणयति **देवानृषीन्पितॄनि**ति । वृद्धान् स्वजातीयान् क्षत्रियान्, विप्रान् सर्वानेव । एतेषामभ्यर्चनं गन्धादिभिः । **आत्मवा**निति । **निष्कामत्वमुक्तम्** । कामनयाप्येतेषां पूजनसम्भवात् । **अग्रेऽप्ये-तद्विशेषणं** सम्बध्यते ॥ ७ ॥ ततो गोदानस्य नित्यत्वात्प्रत्येकापेक्षया समुदायस्योत्कृष्टत्वात् समुदाये अलङ्करणं न सम्भवतीति विचार्य अलङ्कारगुणान्निरूपयन् दानमाह **धेनूना**मिति **द्वाभ्याम्** । आदौ गावः सवत्साः दोग्ध्र्यः । एतादृश एव समुदाय इति पशूनां भाग्यातिशयो निरूपितः, न हि द्वारकायां कश्चिद्विसदृशादृष्टो भवतीति ज्ञापनार्थमुक्तम् । अन्यथा धेनूनां **बद्धता न** सम्भवेत् । रुक्ममये सुवर्णमये शृङ्गे यासाम् । रौप्यमयाः अङ्घ्रयो यासां प्रत्येकम् । सुष्ठु वाससी प्रत्येकं यासाम् । **साध्व्यः** शान्तस्वभावाः । पयस्विन्यः बहुदोग्ध्र्यः, गृष्टयः सकृत्प्रसूताः । सर्वासां जीवद्वत्सत्वाय सवत्सानामित्युक्तम् । मौक्तिकानां **स्रजो माला** यासाम् । पूर्वार्धविशेषणमेतत् ॥ ८ ॥

श्रीसुबोधिनी-सारः

तं विशिनष्टि । एकं स्वयंप्रभमनन्यं निरुपाधिकम् स्वसंस्थया स्वरूपस्फूर्त्या नित्यं निरस्तं कलमषं विद्यावरणं येन तम् अस्य विश्वस्योत्पत्तिनाशकारणैः स्वशक्तिभिर्गुणैर्लक्षितो भावः सत्ता निर्वृत्तिरानंदो यस्य लक्षिता भावेषु निर्वृत्तिर्यस्य तं ब्रह्मनामकम् ॥ ५ ॥ अथानन्तरं गुदमुखप्रक्षालनत इति बोध्यम् अमले शुद्धेऽम्भसि जले यथाविधि स्नातः वाससी **धौते वस्त्रे परिधाय** संध्योपासनादिक्रियाकलापं चकार । एतेन जले संध्या निषिद्धेति ध्वनितम् । सत्तमः श्रेष्ठः परमार्थसत्यो वा हुतोऽनलो येन स वाग्यतो मौनी ब्रह्मगायत्रीं जजाप ॐकारं वा ॥ ६ ॥ उद्यंतमुद्गच्छंतमर्कं सूर्यमुपस्थाय आत्मनः कला देवादीन् तर्पयित्वा वृद्धान् विप्रान् अभ्यर्च्य संपूज्यात्मवान् जितेंद्रियः ॥ ७ ॥ मौक्तिकानां स्रजो यासां तासां साध्वीनां सुवर्णशृंगीणां दुग्धवतीनां गृष्टीनां सकृत्प्रसूतानां सवत्सानां सुवाससां धेनूनां रूप्यखुराग्राणां बद्वंबद्वं दिनेदिने प्रतिदिनं प्रतिगेहं च क्षौममतसीतंतुनिर्मितम् अजिनं मृगचर्म तिलानि प्रसिद्धानि तैः सह अलंकृतेभ्यो विप्रेभ्यो ददौ "चतुर्दशानां लक्षाणां सप्ताधिकशतां शकः ॥ बद्वं चतुर-शीत्यग्रसहस्राणि त्रयोदश" इति बद्वप्रमाणं सर्वगोसंख्या २१०७५७०७२ एकविंशतिकोटयः सप्तलक्षाणि सप्तपंचाशत्सहस्राणि द्वासप्तत्यधिका चेति प्रत्यहं ददौ इति भावः ॥ ८-९ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

एकमित्यत्र । **निर्वृति चेति** वेति । निर्वृतिरानन्दस्तद्युक्तमित्यर्थः । **अनेने**ति । निर्वृतमितिपाठपक्षे तादृशभाववत्त्वेन प्रपञ्चकर्तृत्वं निर्वृतत्वेन प्रपञ्चराहित्यं चोक्तम् । तथा च विरुद्धधर्मनिरूपणाद्धर्मिस्वरूपं निरूपितमितिभावः । **पञ्चभेदे**ति । वीर्यादिपञ्चगुणेभ्य ऐश्वर्यं भिन्नं नास्ति, किन्तु पञ्चस्वप्यनुस्यूतम् । आद्ये तथा कथनमुपलक्षणेन सर्वेपि गुणा अन्योन्यमनुस्यूता इतिज्ञापनार्थम् । **प्रमाणाभावाये**ति । चक्षुराद्यगम्यत्वायेत्यर्थः । **भिन्नधर्मे**ति । धर्मा 'अहिकुण्डला'दिन्यायत्रयेपि स्वरूपाद्भिन्ना नेत्यर्थः । **अथाप्लुत** इत्यत्र । विशेषणविशेष्ययोर्दूरे कथनस्य तात्पर्यमाहुः **स्नानेपी**ति । स्नानवाक्ये अमले इति **विशेषणकथनं विशेष्यमाकृष्य** स्नानेप्यमलवासःपरिधानसूचनार्थम् । **पुनरि**त्यमलवाससोरित्यनेनान्वेति । स्नात्वा पुनरमलवाससोः परिधान-**मुभयान्वितपदकथनेन** शुक आहेत्यर्थः । **उपस्थायार्क**मित्यत्र । **पितृतर्पण**मिति । अग्निष्वात्तादिसामान्यपितृतर्पणमित्यर्थः । **धेनूना**मित्यत्र । **अन्यथे**ति । विसदृशादृष्टसत्त्वे नवसूतिकानां गोष्ठता न भवेत् । गोष्ठे सर्वा नवसूतिका न भवेयुरित्यर्थः । **एतादृशीः गा** इति । एतन्मते गवामिति संबन्धविवक्षया द्वितीयार्थे षष्ठी । **बद्ध**मितिक्रियाविशेषणम् । बद्धसंख्याकं दानम् । **बद्धं यथा** स्यात्तथा गा ददौ । क्षौमाजिनतिलांश्च ददौ । सर्वेषां दानं मिलित्वा बद्धसंख्याकं दानमित्यर्थः । **समुदाय एवे**ति । अस्मिन्मते क्षौमाजिनतिलसहितानां बद्धसंख्याकानां गवां दानमेकमेवेत्यर्थः । स्वमते तु बद्धशब्दं गोष्ठपर्यायं वक्ष्यन्तीतिभावः । **न तु गार्हस्थ्ये** इति । सम्पूर्णगृहस्थाश्रमवर्षाणां मेलने एतावद्दानं सम्पन्नमिति नेत्यर्थः । **उपक्रमे** इति । **अथोषसी**तिश्लोके **पतिभि**रिति बहुवचनोपक्रमादित्यर्थः ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'कोऽसावात्मा' इत्यपेक्षायामाह—**ब्रह्माख्य**मिति । सकलवेदान्ततात्पर्यगोचरम् । "वेदैश्च सर्वैरहमेव वेद्यः" "सर्वे वेदा यत्पदमामनन्ति" इत्यादिवचनेभ्यः । 'किं तत्स्वरूपम्' इत्यपेक्षायामाह—**अनन्य**मिति । सर्वात्मकमित्यर्थः । तत्र हेतुमाह—

एकमिति । तथात्वे विकारित्वमाशङ्क्याह—अव्ययमिति । तत्र हेतुमाह—स्वसंस्थया स्वरूपसंस्थित्या निरस्तं कलमषमविद्यादिदोषो यस्मात्तम् । अतः स्वयंज्योतिः स्वतःप्रकाशम् । उद्भवनाशशब्दाभ्यां पालनमप्युपलक्ष्यते । तस्य विश्वस्योद्भवादिहेतुभिः स्वशक्तिभिः रजःसत्त्वतमोगुणैर्लक्षितो भावः जडानां रजआदीनां स्वतःप्रवृत्त्यसंभवात्तदधिष्ठातृचैतन्यतया सत्ता यस्य स चासौ निवृत्तिरानन्दरूपश्च तमात्मानं दध्याविति पूर्वेणैवान्वयः ॥ ५ ॥ अथानन्तरं अमले शुद्धे अंभसि जले आप्लुतः स्नातः सन् वाससी परिधाय सन्ध्योपगमादिक्रियाकलापं क्रियासमूहं यथाविधि चकारेत्यन्वयः । सन्ध्योपगमः सन्ध्योपासनम् । आदिशब्दगृहीतानाह—काण्वशाखात्वात् सूर्योदयात् पूर्वमेव हुतः अनलः आहवनीयो येन सः । वाग्यतः वाचं यच्छतीति तथा मौनी सन् ब्रह्म गायत्रीं जजाप ॥ ६ ॥ उद्यन्तमर्कं सूर्यमुपस्थाय प्रत्युत्थानादिपूर्वकमर्घं प्रदाय आत्मनः कलाः स्वस्यांशभूतान् देवादीन् तर्पयित्वा वृद्धादींश्चाभ्यर्च्य तेभ्योलंकृतेभ्यो विप्रेभ्यो क्षौमाजिनतिलैः सह धेनूनां बद्वंबद्वं दिने दिने ददाविति त्रयाणामन्वयः । एवं कर्मानुष्ठानेन प्राप्तां जीवसाम्यशङ्कां वारयन्नाह—आत्मवानिति । स्वरूपज्ञानवानिति । 'तर्हि किमित्येवं कर्मानुष्ठानेन' इत्याशङ्क्याह—सत्तम इति । "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ॥ स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते" इति सिद्धान्तात्तस्य च श्रेष्ठत्वाज्जनशिक्षार्थमेवैतदाचरणमिति भावः ॥ ७ ॥ धेनूः विशिनष्टि—रुक्मं सुवर्णं शृङ्गयोर्यासां तासाम् । साध्वीनां सुस्वभावानाम् । मौक्तिकानां स्रजो माला यासां तासाम् । पयस्विनीनां बहुक्षीराणाम् । गृष्टीनां प्रथमप्रसूतानाम् । सवत्सानां वत्सवतीनाम् । शोभनं वासो यासां तासाम् ॥ ८ ॥

अन्वितार्थप्रकाशिका

एकमिति ॥ आत्मानं विशिनष्टि एकं स्वयंज्योतिः अनन्यं निरुपाधि सर्वात्मकम् अव्ययं स्वसंस्थया स्वरूपसंस्थित्या नित्यं निरस्तं निवृत्तं कलमषमविद्यादिदोषो यस्मात्तम् अस्य विश्वस्य उद्भवनाशौ उपलक्षणतया पालनमपि तेषां हेतुभिः स्वशक्तिभिः रजस्तमःसत्त्वगुणैर्लक्षितो भावः जडानां रजआदीनां स्वतः प्रवृत्त्यसंभवात्तदधिष्ठानचैतन्यतया सत्ता यस्य स चासौ निर्वृतिरानन्दरूपश्च तं ब्रह्माख्यं वेदान्ततात्पर्यगोचरम् आत्मानं दध्यावित्यनुषङ्गः ॥ ५ ॥ अथेति ॥ अथानन्तरं सत्तमो भगवान् अमले शुद्धे अम्भसि जले आप्लुतः स्नातः सन् वाससी परिधाय सन्ध्योपगमादि सन्ध्योपासनादि क्रियाकलापं क्रियासमूहं यथाविधि चकार । तत्र च श्रीकृष्णस्य काण्वशाखावत्त्वात् सूर्योदयात्पूर्वमेव हुतः अनलः आहवनीयो येन स वाग्यतः मौनी सन् ब्रह्म गायत्रीं जजाप ॥ ६ ॥ क्रियाकलापमाह—उपेति त्रयम् ॥ आत्मवान् सावधानः उद्यन्तमर्कमुपस्थाय अर्घं प्रदायोपस्थानं च कृत्वा आत्मनः कलाः स्वस्यांशभूतान् देवादीन् ददौ । तर्पयित्वा कुले वृद्धादींश्चाभ्यर्च्य तेभ्योऽलंकृतेभ्यो विप्रेभ्यः क्षौमं वस्त्रविशेषः अजिनं कृष्णमृगाजिनं तिलाश्च तैः सह रुक्मं सुवर्णं शृङ्गयोर्यासां तासां साध्वीनां सुस्वभावानां मौक्तिकानां स्रजो माला यासां तासां पयस्विनीनां बहुक्षीराणां गृष्टीनां प्रथमप्रसूतानां सवत्सानां वत्सवतीनां शोभनं वासो यासां तासां रूप्यं खुराग्रे यासां तासां धेनूनां बद्वं बद्वं दिने दिने ददौ । बद्वशब्दो बकारोपधो मध्यस्थतवर्गतृतीयश्च दिने दिने इति प्रतिगृहं चेत्यपि ज्ञेयम् । "बद्वं चतुरशीत्यग्रं सहस्राणि त्रयोदश (१३०८४) ॥ गृहे गृहे तद्दानादेकविंशतिकोटयः ॥ सप्तलक्षी सप्तपञ्चाशत्सहस्राणि चाधिका ॥ द्विसप्ततिरिति ज्ञेया गवां संख्या (२१०७५७०७२) दिने दिने ॥" ॥ ७-९ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्स्वरूपं निरूपयति एकमिति । एकं सर्वचेतनाचेतनानां एकमेवनियामकं । अतोऽनन्यं नास्ति तत्तुल्योऽन्यो यस्य तं । अवयं अविनाशिनं स्वयं ज्योतिः स्वयमेव प्रकाशमानं स्वसंस्थया स्वरूपस्थित्या नित्यं निरंतरं निरस्तं नाशितं कल्मषं जनपापं येन । अस्य विश्वस्य उत्पत्यादीनां हेतुभिः स्वशक्तिभिः प्रकृतिपुरुषकालादिविभूतिभिः लक्षितः सूचितो भावः सत्यत्वं च निर्वृत्तिरानंदश्च यस्मिंस्तं । उत्पत्तिस्थिति प्रलयेषु सत्स्वपि ततः । पूर्वमपि सत्यानंदस्वरूपमित्यर्थः । ब्रह्माख्यं परब्रह्मसंज्ञं आत्मानं दध्याविति पूर्वेण संबंधः ॥ ५ ॥ आप्लुतः स्नातः संध्याया उपगम उपासनं आदिर्यथा भवति तथा । क्रियाकलापं यथाविधि चकारः ततः सत्तमः कर्मकर्तृभ्यः श्रेष्ठः । आदौ हुतानलः सन् तदनंतरं वाग्यातो गृहीतमौनः सन् ब्रह्मगायत्रीं जजाप ॥ ६ ॥ श्लोकत्रयेण क्रियाकलापमाह उपेति उपस्थाय वेदमंत्रैः स्तुत्वा आत्मनः । स्वस्य कलाः तनुभूतान् त्रीन् देवादीन् तर्पयित्वा ॥ ७ ॥ गृष्टोनां सकृतप्रसूतानां ॥ ८ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कोऽसौ तमसः पर आत्मा किं जीव एव वाऽतस्तं विशिनष्टि । एकमिति । एकं समाभ्यधिकरहितं, जीवस्तु विपरीत इति भावः । स्वयंज्योतिः स्वयंप्रकाशस्वरूपं, अनन्यं, न विद्यते अन्यदशरीरभूतं वस्तु यस्य तं, अव्ययं तत्त्वादिकल्पनारहितं, स्वस्मिन् संस्था सम्यगविकृतत्वेनावस्थितिस्तया, नित्यनिरस्तं प्रतिभटितं कल्मषं पुण्यपापात्मकं हेयं यस्य तं, वृहति बृंहयतीति ब्रह्म इत्याख्या निरुक्तिर्यस्य तं, अस्य जगतः, उद्भवनाशहेतुभिः उत्पत्तिविनाशहेतुभूताभिः, स्वशक्तिभिः, उद्भवनाशशब्दो स्थितेरप्युपलक्षणम् । शक्तिरपृथक्सिद्धविशेषणम् । ततश्चोत्पत्तिकारणत्वस्थितिकारणत्वलयकारणत्वरूपैर्धर्मैरित्यर्थः । लक्षिते

भावनिर्वृती यस्य तं, तत्र भावः सत्ताविशिष्टं स्वरूपं, निर्वृतिरानन्दात्मकं स्वरूपम् ॥ ५ ॥ अथेति । अथ सत्तमः भगवान्, अम्भसि आप्लुतः स्नातः सन्, अमले वाससी परिधाय, संध्योपगमादि संध्योपासनादि, क्रियाकलापं, यथाविधि, चकार । हुत आहुतोऽनल आहवनीयो येन सः, वाग्यतः मौनीभूयेत्यर्थः । ब्रह्म गायत्रीं, जजाप ॥ ६ ॥ उपस्थायेति । धेनूनामिति । ददाविति । ततः उद्यन्तमुदय मुपगच्छन्तं अर्कं सूर्यं, उपस्थाय उदयसमय एव सूर्योपस्थानं कृत्वेत्यर्थः । आत्मनः स्वस्य, कला अंशभूतान् देवान्, ऋषीन्, पितॄंश्च, तर्पयित्वा, आत्मवान् श्रद्धायुक्तः सन्, वृद्धान् कुलवृद्धान्, विप्रान् ब्राह्मणांश्च, अभ्यर्च्य, रुक्मशृङ्गीणां सुवर्णशृङ्गवतीनां, साध्वीनाममारकत्वदोहनकालपादबन्धनादिक्रियानपेक्षत्वादिसाधुगुणवतीनां, मौक्तिकस्रजां मुक्ताहारवतीनां, पयस्विनीनां प्रशस्तपयोयुक्तानां, गृष्टीनां प्रथमप्रसूतानां, सवत्सानां वत्ससहितानां, सुवाससां प्रावृतशोभनवस्त्राणां, रूप्यखुराग्राणां खुरपरिधारितरूप्यालंकाराणां, धेनूनाम्, बद्वं बद्वं दिने दिने प्रतिदिनं, क्षौमाजिनतिलैः सह, प्रतिगृहमिति शेषः । अलंकृतेभ्यः विप्रेभ्यः, ददौ । तत्र बद्वमिति चतुरशीत्यग्रत्रयोदशसहस्राणि १३०८४ 'बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदश' इत्युक्तेः । नवमस्कन्धे भरतमधिकृत्यैतद्विशदमुक्तमस्ति । अष्टोत्तरशताधिकषोडशसहस्रगृहेषु भगवत्प्रदत्तगवां संख्या २१०, ७, ५७०, ७२, एकविंशतिकोट्यः, सप्त लक्षाणि, सप्तपञ्चाशत्सहस्राणि, द्विसप्ततिपरिमिता बोध्या । इति त्रयाणामेकसंबन्धः ॥ ७-९ ॥

कृष्णप्रिया

परीक्षित् ! भगवान् का वह आत्मस्वरूप सजातीय, विजातीय और स्वगतभेद से रहित एक, अखण्ड है। क्योंकि उसमें किसी प्रकार की उपाधि या उपाधि के कारण होने वाला अन्य वस्तु का अस्तित्व नहीं है । और यही कारण है कि वह अविनाशी सत्य है। जैसे चन्द्रमा-सूर्य आदि नेत्र इन्द्रिय के द्वारा और नेत्र-इन्द्रिय चन्द्रमा-सूर्य आदि के द्वारा प्रकाशित होती है, वैसे वह आत्मस्वरूप दूसरे के द्वारा प्रकाशित नहीं, स्वयंप्रकाश है। इसका कारण यह है कि अपने स्वरूप में ही सदा-सर्वदा और काल की सीमा के परे भी एकरस स्थित रहने के कारण अविद्या उसका स्पर्श भी नहीं कर सकती। इसी से प्रकाश्य-प्रकाशकभाव उसमें नहीं है। जगत् की उत्पत्ति, स्थिति और नाश की कारणभूता ब्रह्मशक्ति, विष्णुशक्ति और रुद्रशक्तियों के द्वारा केवल इस बात का अनुमान हो सकता है कि वह स्वरूप एकरस सत्तारूप और आनन्दस्वरूप है। उसीको समझाने के लिये 'ब्रह्म' नाम से कहा जाता है। भगवान् श्रीकृष्ण अपने उसी आत्मस्वरूप का प्रतिदिन ध्यान करते ॥ ५ ॥ इसके बाद वे विधिपूर्वक निर्मल और पवित्र जल में स्नान करते। फिर शुद्ध धोती पहनकर, दुपट्टा ओढ़कर यथाविधि नित्य-कर्म सन्ध्या-वन्दन आदि करते। इसके बाद हवन करते और मौन होकर गायत्री का जप करते। क्यों न हो, वे सत्पुरुषों के पात्र आदर्श जो हैं ॥ ६ ॥ इसके बाद सूर्योदय होने के समय सूर्योपस्थान करते और अपने कलास्वरूप देवता, ऋषि तथा पितरों का तर्पण करते। फिर कुल के बड़े-बूढ़ों और ब्राह्मणों की विधिपूर्वक पूजा करते। इसके बाद परम मनस्वी श्रीकृष्ण दुधार, पहले-पहल ब्यायी हुई, बछड़ोंवाली सीधी-शान्त गौओं का दान करते। उस समय उन्हें सुन्दर वस्त्र और मोतियों की माला पहना दी जाती। सींग में सोना और खुरों में चाँदी मढ़ दी जाती। वे ब्राह्मणों को वस्त्राभूषणों से सुसज्जित करके रेशमी वस्त्र, मृगचर्म और तिल के साथ प्रतिदिन तेरह हजार चौरासी गौएँ इस प्रकार दान करते ॥ ७-९ ॥

ददौ रूप्यखुराग्राणां क्षौमाजिनतिलैः सह । अलङ्कृतेभ्यो विप्रेभ्यो [1]बद्वं बद्वं दिने दिने ॥ ९ ॥
गोविप्रदेवता[2]वृद्धगुरून् भूतानि सर्वशः । नमस्कृत्यात्म[3]सम्भूतीर्मङ्गलानि समस्पृशत् ॥ १० ॥
आत्मानं भूषयामास नरलोकविभूषणम् । वासोभिर्भूषणैः स्वीयैर्दिव्यगन्धानु[4]लेपनैः ॥ ११ ॥
[5]अवेक्ष्याज्यं तथाऽऽदर्शं गोवृषद्विजदेवताः ।
[6]कामग सर्ववर्णानां पौरान्तःपुरचारिणाम् । [7]प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्यनन्दत ॥ १२ ॥

कर्दमक्षमा

अन्वयः—रूप्यखुराग्राणाम्, क्षौमाजिनतिलैः, सह, अलंकृतेभ्यः, विप्रेभ्यः, दिने, दिने, बद्वम्, बद्वम्, ददौ ॥ ९ ॥ आत्मसम्भूतीः, गोविप्रदेवतावृद्धगुरून्, भूतानि, सर्वशः, नमस्कृत्य, मङ्गलानि, समस्पृशत् ॥ १० ॥ नरलोकविभूषणम्, आत्मानम्, दिव्यगन्धानुलेपनैः, स्वीयैः, वासोभिः, भूषणैः, भूषयामास ॥ ११ ॥ अथ, आज्यम्, आदर्शम्, गोवृषद्विजदेवताः, अवेक्ष्य, च, सर्ववर्णानाम्, पौरान्तःचारिणाम्, कामान्, प्रदाप्य, प्रकृतीः, कामैः, प्रतोष्य, प्रत्यनन्दत ॥ १२ ॥

---

१. द्वन्द्वं-च. पु. टि. ; पद्मं पद्मं-वीर. । २. वृद्धान्-प्रा. पा. । ३. त्मनो भूती-प्रा. पा. । ४. स्रग-श्रीधर. वंशी. जीव. वीर. विज. विश्व. । ५. इदमर्धमर्धत्रयादन्तरं वर्त्तते-वीर. । ६. कामांश्च-श्रीधर. वंशी. जीव. वीर. विश्व. ; कामिनां-विज. । ७. प्रादात्कामान् पृथक् कामैः-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

बद्वमिति। "हिरण्येन परीवृतान् कृष्णाञ्छुक्लदतो मृगान्॥ मष्णारे भरतोऽददाच्छतं बद्वानि सप्त च" इति श्रुत्युक्तानि सप्तोत्तरशतं बद्वान्येकीकृत्य पुराणे चतुर्दशलक्षत्वेन गणितानि। यथोक्तं भरतमेवाधिकृत्य नवमस्कंधे "मृगाञ्छुक्लदतः कृष्णान्सुवर्णेन परिष्कृतान्। अदात्कर्मणि मष्णारे नियुतानि चतुर्दश" इति। ततश्चेयं बद्वसंख्या श्लोकेन संगृह्यते। "चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः॥ बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदश" इति। दिनेदिने च प्रतिगृहं चेति॥ ९॥ आत्मसंभूतीः स्वविभूतीः मंगलानि कपिलादीनि॥ १०॥ नरलोकस्य विभूषणरूपमात्मानम्। स्वीयैः पीतांबरकौस्तुभादिभिः॥ ११॥ कामानभिलषितानर्थान्॥ १२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अलंकृतेभ्यो दानात्प्राक् स्वयमेव स्वर्णकुंडलादिभिर्भूषितेभ्यः। मृगान् गजविशेषान्। ततश्च गणितशास्त्रानुसारात्। यद्यपि किंचिन्न्यूनचतुर्दशलक्षाणि सप्तोत्तरशतबद्वान्येकीकृतानि भवंति तथापि किंचिन्न्यूनमनन्यवदिति न्यायेन तावंत्येवोक्तानि। चतुर्दशलक्षसप्ताधिकशतांशकः बद्वसंज्ञः, स च चतुरशीत्यधिकत्रयोदशसहस्रसंख्यः १३०८४। दिनेदिने प्रत्यहं प्रतिगृहं चेति सर्वगेहेषु स्थितत्वान्मूर्तिभेदेन भगवतः प्रतिगृहं बद्वदानात्तु एकविंशतिकोटयः सप्तलक्षाणि पञ्चायुतानि सप्तसहस्राणि सप्तत्यधिकानि। दिनेदिने इत्यत्र वीप्सया नित्यकर्मत्वे लब्धे बद्वमिह पुनर्वीप्सयातिदार्ढ्यमुक्तम्। बद्वइह दकारधकारसंयोगितयां श्रौतेषु बद्धमित्युक्तम्। क्षौमवस्त्रावृतं सोपस्करं मृगचर्मदानमपि प्रतिदिनमकरोदित्यर्थः। "कृष्णः कृष्णाचलो देवः कृष्णाजिनधरस्तथा। त्वत्स्पृष्ट्या धूतपापस्य प्रीयतां मे नमोनमः॥ त्रयस्त्रिंशत्सुराणां हि त्वामाधारे व्यवस्थितः। कृष्णोऽसि मूर्तिमान्साक्षात्कृष्णाजिन नमोस्तु ते॥" इत्यादिमंत्राणां तद्दाने प्रमाणत्वात्॥ ९॥ "कपिला दधि दूर्वा च हेम शंखोक्षतास्तथा। मौक्तिकं मणयो विप्रा आदर्शो वारि वारिजम्॥ एतान्यन्यानि द्रव्याणि मंगलानि स्पृशेन्नरः। पावित्र्यं परमाप्नोति शुभं क्षेमं च विंदति॥" इत्याद्युक्तेः। "अनलो गौर्हिरण्यञ्च दूर्वा गोरोचनामृतम्। अक्षतं दधि चेत्यष्टौ मंगलानि प्रचक्षते॥" इति नीलकंठोपि। भूतानि स्थावराण्यश्वत्थादीनि, जंगमानां गवादीनामुक्तत्वात्। देवताः श्रीशालग्रामादिरूपाः। नमस्कृत्य प्रत्येकं साक्षादेव किंवा गोभ्यो नमो विप्रेभ्यो नम इत्यभिवाद्य॥ १०-११॥ अवेक्ष्याज्यमित्यनेन नित्यं छायापात्रदानमुक्तम्॥ १२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गाः वन्दनार्थमानीता विप्रानाशीर्वादार्थमागतान् गुरून् श्रीवसुदेवादीन् मिकटगुप्तवर्त्मलब्धनिजनिजगृहस्थितान् सर्वभूतानि मनसि भावितानि अभिवाद्य यतः आत्मसम्भूतीः तेषां सम्माननप्रवर्त्तनार्थमिति भावः। यद्वा आत्मविभूतीरपि नरलीलाकौतुकेनैवेतिभावः॥ १०॥ नरलोकस्य जीवलोकस्य विशिष्टभूषणरूपमपि वासोभिरिति बहुत्वं राजवेषत्वात् स्वीयैरात्मीयत्वेन नित्यप्रसिद्धैस्तैस्तैरिति त्रिष्वेव योज्यं दिव्यशब्देन वनमालादीनामम्लायित्वं बोधयित्वा तदेव कैमुत्येन साधयति॥ ११॥ अवेक्ष्येति सार्द्धकम्। गोवृषः गोषु स्थितोऽशिक्षितो वृषः गोश्रेष्ठो वा द्विजो विप्रः देवता निजेष्टदेवतामूर्त्तिः ताश्चावेक्ष्य प्रागभ्यर्चनादौ तेषां दर्शने सिद्धेपि पुनरवेक्षणं यतो मङ्गलार्थं प्रकर्षेण दातुमाज्ञाप्य प्रत्यनन्दत् तेषां सन्तोषणेन स्वयमधिकं प्रीतोऽभूत्॥ १२॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बद्वमिति वीप्सादिकं चरितकथनेन स्वत एव तद्दानस्य नित्यकृत्यत्वे सिद्धेऽप्यसम्भावनासंशयात् तद्द्रढयति॥ ९॥ देवताः श्रीशालग्रामादिरूपा, नमस्कृत्य प्रत्येकं साक्षादेव; किञ्च, 'गोभ्यो नमः, विप्रेभ्यो नमः' इत्येवमभिवाद्य, यतश्चात्मसंभूतीस्तेषां सम्माननप्रवर्त्तनार्थमिति भावः। यद्वा, आत्मविभूतीरपि सम्यक् श्रीहस्तेन स्वयमेव भक्त्याऽस्पृशत्॥ १०॥ नरलोकस्य विशिष्टभूषणरूपमपि; यद्वा, नरान् मनुष्यान्, अहो किं वक्तव्यम्, तानिति लोकान् सर्व्वान् जीवान् चतुर्दशभुवनानि वा विशेषेण भूषयतीति तथा तम्; दिव्यशब्देन वनमाला-पीतवर्णानुलेपनानीति तथा तेन तद्योग्यताञ्च बोधयति। यद्वा, स्वीयैरित्यस्यात्राप्यन्वयः। दिव्येति स्वरूपमात्रनिर्द्देशः॥ ११॥ तथेति समुच्चये; गोवृषः—गोषु स्थितोऽशिक्षितो वृषः, उत्तमवलीवर्द्दो वा। द्विजो विप्रः, देवता निजेष्टदेवमूर्त्तिः, ताश्च अवेक्ष्य प्रागभ्यर्च्चनादौ तेषां दर्शने सिद्धेऽपि पुनरवेक्षणं यात्रामंगलार्थम्, पौराणामन्तःपुरचारिणाञ्च वामनादि-भृत्यानां प्रकर्षेण तत्तद्गृहादौ प्रस्थापनादिना दापयित्वा दातुमाज्ञाप्य प्रकर्षेण तोषयित्वा प्रत्यनन्दत, तेषां सन्तोषणेन स्वयमधिकं प्रीतोऽभूत्, यद्वा, अन्तर्भूत-ण्यन्तकारितं प्रत्येकमनन्दयदित्यर्थः॥ १२॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

गोविप्रेति। गवादीनां द्वन्द्वः तत्र वृद्धाः कुलवृद्धाः तानात्मनः स्वस्य सम्भूतीर्विभूतिभूतान्नमस्कृत्य मङ्गलानि कपिलादीनि मङ्गलद्रव्याणि समस्पृशत्॥ १०॥ आत्मानमिति। नरलोकस्य भूषणरूपमात्मानं कौस्तुभपीताम्बरादिभिर्भूषयामास॥ ११॥ कामानभिलषितानर्थान् प्रदाप्य प्रकृतीरमात्यादीन् प्रतोष्य तोषयित्वा प्रतिनन्दितवान्॥ १२॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

बद्धं बद्धं द्वयं द्वयं एकैकस्मै विप्राय ॥ ९ ॥ गोविप्रदेवताः वयोवृद्धांश्च गुरुभूतान्यश्वत्थादीनि नमस्कृत्य एतत्सर्वं कीदृशमत्राह आत्मेति आत्मनः सम्भूतिं सन्निधेः प्रतिमां मङ्गलानि तिलादीनि ॥ १० ॥ नरलोकस्य मुक्तामुक्तस्य भूषणं अलङ्कारभूतम् ॥ ११ ॥ आदर्शं दर्पणं गवादींश्च प्रेक्ष्य देवताः प्रतिष्ठिताः कामिनामर्थिनां कामान् काम्यान् पदार्थान् किं बहुना सर्वान् कामैः पृथक् पृथक् प्रतोष्य सन्तोषं जनयित्वा स्वयमपि प्रत्यनन्दत सन्तुष्टोऽभूदित्यन्वयः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मङ्गलानि कपिलादीनि ॥ १०-११ ॥ प्रकृतीर्मन्त्रिणः ॥ १२ ॥

गूढार्थदीपिनी

आत्मसंभूतीः स्वविभूतीः गोविप्रादीन् । भूतानि स्थावराणि अश्वत्थादीनि । मङ्गलानि कपिलादीनि दत्तवान् ॥१०॥ स्वीयैः आत्मीयैः पीताम्बरकौस्तुभादिभिः ॥ ११ ॥ अवेक्ष्येति सार्द्धम् । आज्यं घृतं तदादीन् अवेक्ष्य वर्णानां कामान् अभीष्टपदार्थान् प्रदाप्य तैरेव प्रकृतीः अमात्यादींश्च प्रतोष्य स्वयमपि प्रत्यनन्दत् सन्तुष्टोऽभूत् । अवेक्ष्याज्यमित्यनेन प्रतिदिनं छायापात्रदानमुक्तम् ॥ १२ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आत्मसम्भूतीः स्वविभूतिभूतान् गवादीन् मङ्गलानि कपिलादीनि मङ्गलद्रव्याणि स्पर्शनादिना मङ्गलावहानि ॥१०॥ नरलोकेत्युपलक्षणमन्यलोकानां सर्वलोकानां विभूषणमात्मानं स्वीयैः पीताम्बरकौस्तुभादिभिः भूषयामास ॥ ११ ॥ आज्यादीनवेक्ष्य दृष्ट्वा कामान् वाञ्छितानर्थान् प्रदाप्य प्रकृतीः अमात्यादीन् प्रतोष्य तोषयित्वा प्रत्यनन्दत प्रतिनन्दितवान् ॥ १२ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अलङ्कृतेभ्यो विप्रेभ्यो मनीषी ब्राह्मणेभ्यः बद्धम् । बद्धं बद्धमित्यपपाठः । बद्धपदार्थो नवमे भरतमधिकृत्य प्रवृत्तग्रन्थविवरणे स्फुटं प्रदर्शितः । दिने दिने प्रतिदिनम् । एवं प्रतिग्रहमपि बद्धं शतकोटिसङ्ख्यात्मकमनुसन्धेयम् । गोविप्रदेवता नमस्कृत्येति सर्वान्वयि । आत्मसम्भूतिं स्वप्रादुर्भावमपेक्ष्य वृद्धान्वयसा गुरुभूतान्यचलप्रतिमादीनि सर्वशो मङ्गलानि दधिदूर्वादीन्यस्पृशत्पस्पर्श ददाविति वा । नरदेवास्तल्लोकविभूषणम् ॥ ११ ॥ आदर्शं दर्पणं गा वृषान् द्विजान्देवताश्चावेक्ष्य सर्ववर्णानामविशेषेण कामिनां कामान्काम्यान् पृथक्पृथक्कामैः प्रतोष्य स्वयं प्रत्यनन्दत प्रत्यनन्दत्तुतोष ॥ १२ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

एतादृशीः गाः ददौ । दानक्रियाणां समुदाये बद्धसङ्ख्या सम्बध्यत इति केचित् । समुदाय एव दानमित्यपरे । क्षौमाजिनतिलानां सहभावः शास्त्रीयः । तदेकमेव विशिष्टं दानं भवति । अलंकृतेभ्यो विप्रेभ्य इति देयसमसङ्ख्या ब्राह्मणानां निरूपिता । गोसमसङ्ख्या बद्धसमसङ्ख्या वा । बद्धं बद्धमित्येव पाठः । बद्वं बद्वमिति वैदिकः शब्दः, स नात्रानुसन्धेयः । तत्रापि बद्वशब्दो बद्धपर्यायः । चतुरशीत्यग्रसहस्राणि त्रयोदशेति केचित् । तन्नवमे विचारितं निराकृतं च । तस्माद्गोष्ठपर्यायो बद्धशब्दः । अत्र च विशेषसङ्ख्या उपयोगाभावः । अयुतलक्षादीनामेव नित्यदाने उपयोगाच्च । दिने दिने, न तु गार्हस्थ्ये । नापि वर्षे प्रतिगृहमिति । उपक्रमे बहुवचनस्योक्तत्वादध्यवसेयम् ॥ ९ ॥ ततो नमस्कारादिकमाह गोविप्रेति । गावो हविर्विप्रा मन्त्राः देवताश्च त्रितयं मिलितं यागो भवतीति क्रमो निरूपितः । वृद्धाः सर्वे सभासदः । गुरवः कर्मोपदेष्टारः । सर्वश इति शिष्यप्रशिष्यादिसहितान् । एतेषां नमस्कारे हीनता भवतीति शङ्कां निवारयति आत्मसम्भूतीरिति । एते सर्वे सम्भूतिरूपाः । यथा स्वयं स्वपादक्षालनं करोति, तद्वदित्यर्थः । ततो मङ्गलानि सम्यगस्पृशत् । गोहिरण्यादीनि मङ्गलानि ॥ १० ॥ धर्मपरिष्कारमुक्त्वा धर्मिपरिष्कारमाह आत्मानं भूषयामासेति । स्वस्य सच्चिदानन्दं रूपं देहं भूषयतीति पक्षं व्यावर्तयितुमात्मपदम्, किन्त्वात्मानमेव । अध्यासादात्मपदं शरीरेऽपि वर्तते जीवेषु, न तु भगवतीति । भूषणस्य प्रयोजनमाह नरलोकविभूषणमिति । न हि स्वार्थमलङ्करणं करोति । निरतिशयानन्दत्वात् । किन्तु जगतो भूषणं तद्रूपं जगच्च लौकिकोत्कर्षमपेक्षते । अतो यथा भूषणसंस्कारे भूषितः संस्कृतो भवति, एवं जगद्भगवता संस्कृतमित्यर्थः । पूर्वपरिधानीयवस्त्राद्यपेक्षया भिन्नान्येतानीति ज्ञापयितुं भूषणकरणानां नामतो निरूपणमाह वासोभिरिति । कञ्चुकोष्णीषादिभिः भूषणरूपैः स्वीयैः असाधारणैः मकरकुण्डलादिभिश्च । दिव्यो गन्धो यस्य एतानि अनुलेपनानि बहुविधानि । ततः सर्वाभरणभूषितः ॥ ११ ॥ आत्मानं तेजोमयं कर्तुमाज्यावेक्षणं कृतवान् । येन सर्व एव लोकदृष्ट्या रोगादयो निवृत्ता भवन्ति । ततः कान्तियोगार्थमादर्शं दृष्टवान् । गोवृषद्विजदेवतानां च

दर्शनं कृतवान् । अत्र देवा देवालयस्थाः । ततो लौकिकोचितदानमाह कामगमिति । कामं गच्छति पूरयति प्राप्नोतीति वा कामगाः मनोहरा विषयाः, सर्वेषामेकं न भवतीति ज्ञापयितुं सर्ववर्णानां मुख्यानां गौणानां चेत्युक्तम् । पौरान्तःपुरचारिणामिति । लौकिकप्राधान्यार्थमुक्तम् । साक्षात्तेषां दानं तेषामभीष्टं न भवतीति गोप्यार्थं प्रदाप्येत्युक्तम् । प्रकृतीः । मन्त्रिणः अन्तःपुरस्त्रियो वा । कामैः प्रतोष्य ततस्तत्कृतां पूजां प्रत्यनन्दत ॥ १२ ॥

श्रीसुबोधिनी-सारः

गोब्राह्मणादीनि आत्मनः संभूतीः सर्वशो नमस्कृत्य मंगलानि अष्टौ धर्मशास्त्रोक्तानि समालभत् ॥ १० ॥ नरलोकस्य विभूषणमात्मानं स्वीयैर्वस्त्रैर्भूषणैर्दिव्यैः मालाचंदनैः संचस्कार ॥ ११ ॥ आज्यं घृतम् अवेक्ष्य दृष्ट्वा एतेन छायापात्रदानं सूचितम् । तथादर्शं दर्पणं गां वृषं च द्विजदेवताविप्रान् देवांश्चावेक्ष्य सर्ववर्णानां पौराणामंतःपुरचारिणां कामांश्च भोगान् प्रदाप्य प्रकृतीः मंत्रिभृत्यादीन् कामैरिष्टदानैः प्रतोष्य प्रीणयित्वा सभाजयत् ॥ १२ ॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

रूप्यं खुराग्रे यासां तासाम् । क्षौमं वस्त्रविशेषः । अजिनं कृष्णमृगाजिनम् । तिलाः प्रसिद्धाः । बद्वसङ्ख्या तु नवमस्कन्धे भरताख्याने टीकायामुक्ता—"चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः ॥ बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदश" इति । दिने दिनेति प्रतिगृहं चेति ज्ञेयम् ॥ ९ ॥ ततश्चात्मसंभूतीः स्वविभूतिरूपान् गवादीन्नमस्कृत्य मङ्गलानि कपिलादिमङ्गलद्रव्याणि समस्पृशत् ॥ १० ॥ नरलोकस्य विभूषणभूतमात्मानं स्वीयैर्वासोभिः पीताम्बरादिभिः, भूषणैश्च कौस्तुभादिभिः, दिव्यैः स्रगादिभिश्च भूषयामास ॥ ११ ॥ आज्यं घृतम् । घृतादीनि अवेक्ष्य मङ्गलार्थं दृष्ट्वा पौरादीनां सर्ववर्णानां कामान् अभिलषितार्थान् प्रदापयित्वा प्रकृतीः अमात्यादीन् कामैस्तदभिलषितविषयैः प्रतोष्य प्रत्यनन्दत ॥ १२ ॥

अन्वितार्थप्रकाशिका

गोविप्रेति ॥ आत्मसम्भूतीः स्वविभूतीः गोविप्रादीन् सर्वशः भूतानि च नमस्कृत्य मङ्गलानि कपिलगव्यादिमङ्गलद्रव्याणि समस्पृशत् ॥ १० ॥ आत्मानमिति ॥ नरलोकस्य विभूषणभूतमात्मानं स्वीयैर्वासोभिः पीताम्बरादिभिर्भूषणैश्च कौस्तुभादिभिः दिव्यैः स्रगादिभिश्च भूषयामास ॥ ११ ॥ अवेक्ष्येति सार्द्धम् ॥ आज्यं घृतं तथा आदर्शादीन् अवेक्ष्य मङ्गलार्थं दृष्ट्वा पौरादीनां सर्ववर्णानां कामान् अभिलषितार्थान् प्रदाप्य दापयित्वा दातुमाज्ञाप्य वा । प्रकृतीः अमात्यादीन् कामैस्तदभिलषितविषयैः प्रतोष्य प्रत्यनन्दत । तद्भार्षः ॥ १२ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तासां बद्वं बद्वं दिनेदिने प्रतिदिनं ददौ बद्वसंख्या चोक्ता चतुर्दशानां लक्षाणां सप्ताधिकं शतांशकः बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदशेति अस्यार्थः चतुर्दशलक्षाणां सप्ताऽधिकशततमः भागः बद्वं ज्ञेयं । तत्तु त्रयोदशसहस्राणि चतुरशीतिश्चेति बद्व संख्या ॥१३०॥९४॥९॥ आत्मसंभूतीः स्वविभूतिरूपान् गवादीन् । नमस्कृत्यमङ्गलानि कपिलधेन्वादिमंगलवस्तूनि ॥ १० ॥ स्वीयैः पीतांबरकौस्तुभादिभिः ॥११॥ आज्यादीन् अवेक्ष्य । कामान ईप्सितार्थान् प्रदाप्यदापयित्वा । प्रकृतीः अमात्यान् ॥ १२ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गोविप्रेति । ततः गोविप्रदेवतावृद्धगुरून् गाः विप्रान् देवताः वृद्धान् गुरूंश्चेत्यर्थः । आत्मसंभूतीः स्वस्य विभूतीभूतानि, सर्वशः भूतानि नमस्कृत्य, मङ्गलानि कपिलादीनि मङ्गलद्रव्याणि, समस्पृशत् ॥ १० ॥ आत्मानमिति । ततः नरलोकविभूषणं मनुष्यलोकस्य भूषणभूतं, आत्मानं, वासोभिर्वस्त्रैः, स्वीयैरात्मीयैः, भूषणैः कौस्तुभाद्याभरणैः, दिव्यस्रगनुलेपनैः, दिव्याभिमौक्तिकादिस्रग्भिर्दिव्यैरनुलेपनैश्च, भूषयामास ॥ ११ ॥ अवेक्ष्येति । ततः आज्यं अवेक्ष्य, कांस्यपात्रे घृतं भृत्वा तत्र स्वमुखं वीक्ष्य तत् सदक्षिणं विप्राय दत्त्वेत्यर्थः तथा, आदर्शं अवेक्ष्य, दर्पणे स्वमुखावलोकनं कृत्वेत्यर्थः । गावश्च वृषाश्च द्विजाश्च देवताश्च ताश्च, अवेक्ष्य, शुभानामेतेषां दर्शनं विधायेत्यर्थः । सर्ववर्णानां, पौरान्तःपुरचारिणां स्वपुरस्थान्तःपुरचारिणां, कामानभिलषितार्थान्, प्रदाप्य, प्रकृतीरमात्यादीन्, कामैः, प्रतोष्य च प्रत्यनन्दत ॥ १२ ॥

कृष्णप्रिया

तदनन्तर अपनी विभूतिरूप गौ, ब्राह्मण, देवता, कुल के बड़े-बूढ़े, गुरुजन और समस्त प्राणियों को प्रणाम करके माङ्गलिक वस्तुओं का स्पर्श करते ॥ १० ॥ परीक्षित् ! यद्यपि भगवान् के शरीर का सहज सौन्दर्य ही मनुष्य-लोक का अलङ्कार है, फिर भी वे अपने पीताम्बरादि दिव्य वस्त्र, कौस्तुभादि आभूषण, पुष्पों के हार और चन्दनादि दिव्य अङ्गराग से अपने को

आभूषित करते ॥ ११ ॥ इसके बाद वे घी और दर्पण में अपना मुखारविन्द देखते; गाय, बैल, ब्राह्मण और देव-प्रतिमाओं का दर्शन करते । फिर पुरवासी और अन्तःपुर में रहनेवाले चारों वर्णों के लोगों की अभिलाषाएँ पूर्ण करते और फिर अपनी अन्य (ग्रामवासी) प्रजा की कामनापूर्ति करके उसे सन्तुष्ट करते और इन सबको प्रसन्न देखकर स्वयं बहुत ही आनन्दित होते ॥ १२ ॥

संविभज्याग्रतो विप्रान् स्रक्ताम्बूलानुलेपनैः । सुहृदः प्रकृतीर्दारानु[1]पायुङ्क्त ततः स्वयम् ॥ १३ ॥
तावत् सूत उपानीय स्यन्दनं परमाद्भुतम् । सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्यावस्थितोऽग्रतः ॥ १४ ॥
गृहीत्वा पाणिना [2]पाणिं सारथेस्तमथारुहत् । सात्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः ॥ १५ ॥
ईक्षितोऽन्तःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैः[3] । कृच्छ्राद् विसृष्टो निरगाज्जातहासो हरन् मनः ॥ १६ ॥[4]
सुधर्माख्यां सभां सर्वैर्वृष्णिभिः परिवारितः । प्राविशद् यन्निविष्टानां न सन्त्यङ्ग षडूर्मयः ॥ १७ ॥
तत्रोपविष्टः परमासने विभुर्बभौ स्वभासा [5]ककुभोऽवभासयन् ।
वृतो नृसिंहैर्यदुभिर्यदूत्तमो यथोडुराजो दिवि तारकागणैः ॥ १८ ॥

कर्बमक्षमा

अन्वयः—अग्रतः, विप्रान्, स्रक्ताम्बूलानुलेपनैः, अग्रतः, संविभज्य, ततः, सुहृदः, प्रकृतीः, दारान्, संविज्य, स्वयम्, उपयुङ्क्त ॥१३॥ तावत्, सूतः, परमाद्भुतम्, सुग्रीवाद्यैः, हयैः, युक्तम्, स्यन्दनम्, उपानीय, प्रणम्य, अग्रतः, अवस्थितः ॥१४॥ सुग्रीवाद्यैः, हयैः, युक्तम्, तम्, रथम्, सारथेः, पाणी, पाणिना, गृहीत्वा, भास्करः, पूर्वाद्रिम्, इव, आरुहत् ॥ १५ ॥ अन्तःपुरस्त्रीणाम्, सव्रीडप्रेमवीक्षितैः, ईक्षितः, कृच्छ्रात्, विसृष्टः, नातहाराः, मनः, हरन्, निरगात् ॥ १६ ॥ हे अङ्ग !, सर्वैः, वृष्णिभिः, परिवारितः, सुधर्माख्याम्, सभाम्, प्राविशत्, यन्निविष्टानाम्, षडूर्मयः, न, सन्ति ॥ १७ ॥ तत्र, परमासने, नृसिंहैः, यदुभिः, वृतः, उपविष्टः, विभुः, यदुत्तमः, यथा, दिवि, तारकागणैः, वृतः, उडुराजः, तथा, स्वभासा, ककुभः, अवभासयन्, बभौ ॥१८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विप्रादीन्स्रगादिभिः संविभज्य तेभ्यस्तानि दत्त्वेत्यर्थः । उपायुंक्त भोगार्थमग्रहीत् ॥ १३-१४ ॥ पाणीकृतेंजली गृहीत्वा ॥ १५ ॥ सव्रीडप्रेमवीक्षितैरीक्षितः क्षणं स्थितस्ताभिरेव वीक्षितैः कृच्छ्राद्विसृष्टो निरगादिति ॥ १६ ॥ एवं सर्वगृहेभ्यः पृथक्पृथङ्निर्गत्यानंतरमेक एव सन्सुधर्मां प्राविशत् । यन्निविष्टानां यत्र प्रविष्टानाम् ॥ १७ ॥ नृसिंहैर्नृषु श्रेष्ठैः ॥ १८ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तेभ्यो विप्रादिभ्यः । तानि स्रगादीनि । इत्यर्थ इति—पूर्वं ब्राह्मणेभ्यो दत्त्वाऽन्येभ्यो भोग्यं वस्तु देयम् 'क्षेत्रज्ञं ब्राह्मणाननु' इति नारदोक्तेरिति भावः । गृहस्थस्य शेषभोजित्वविधेः ॥ १३ ॥ ततो विभागानंतरम् । तावत्तदाग्रतोऽवस्थितोऽभूदित्यन्वयः ॥ १४ ॥ अथातः । तं रथम् । पूर्वाद्रिमुदयाचलम् । एतद्दृष्टांतेन रथस्य बृहत्त्वत्वरत्वादिकं श्रीभगवतः स्वतो भूषणादिकांत्या च तेजोमत्त्वं सूचितम् ॥ १५ ॥ श्रीकृष्णः प्रथममीक्षितोऽर्थात्सात्यक्यादिभिः, कीदृश ईक्षितः अंतःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैस्तद्विरहतापं कथं सहामह इति वैयग्र्यव्यंजकैर्बद्ध इति शेषः । ततश्च भो अधीरा एतन्मात्रविरहेण विह्वलीभवथ । अयमहमधुनैव भोक्तुमेष्यामीत्याश्वासव्यंजको हासो जातो यस्य सः । ततश्च मन्ये तादृशहासेनैव मनोहरन् कृच्छ्रादेव विसृष्टस्तत्प्रेमावलोकबंधाद्विमुक्तः सन्निरगादिति विश्वनाथः । ताभिरंतःपुरस्त्रीभिः । निरगान्निरससारेत्यर्थः ॥ १६ ॥ इत्थमेकैकान्मंदिरादेकैकेन प्रकाशेन बहिर्भूय तत्तत्पुरस्थैस्तत्तत्प्रतिवेशिभिश्च जनैरेव लक्षितो न त्वन्यैः पृथक्पृथक्प्रतोल्यां सुधर्मासभागोपुरवर्त्मपर्यंतमागत्य तत्र पुनरेकीभूय सुधर्मां तु पुनरेकेनैव प्रकाशेन प्राविशति स्मेत्याह—सुधर्माख्यामिति । हे अंग प्रियतम । न संति न बाधन्ते ॥ १७ ॥ तत्र सुधर्मायाम् ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततः पश्चादिति गृहस्थस्य शेषभोजित्वात् ॥ १३ ॥ अथ गुरुविप्रादिविसर्जनानन्तरं चरितमाह—तावदिति । अग्रत इति तत्तदन्तःपुरनिष्क्रमणमार्गाणामेकताप्राप्तिपदाग्रभागस्थमहागोपुराग्रभाग इत्यर्थः ॥ १४ ॥ पूर्वाद्रिमिवेति दृष्टान्तेन रथस्य

---

[1] दारान् प्रायुङ्क्त–विज. । [2] पाणी–श्रीधर. वंशी. जीव. ; पार्णिं सारथे रथमारुहत्–वीर. विज. । [3] क्षणं:–प्रा. पा. ।
[4] एवं स सर्वदाराणां गृहेभ्यो भगवान् विभुः । नानारूपो विनिर्गत्य एक रूपः सभां ययौ ॥ च. पु. टि. ।
[5] भो विराजयन्–प्रा. पा. ।

बृहत्तरत्वादिकं तथा श्रीभगवतः स्वतो भूषणादिना च महातेजस्वित्वादिकं तथा तेनैव रथस्य शोभाभरजननादिकञ्च सूचितम् ॥ १५ ॥ अथ पुनस्तद्रथारोहात्पूर्वं वृत्तं दर्शयति—तत्र च पूर्वसूचितसर्वबहिर्जनतानिष्क्रमणानन्तरमेकान्ततामागते तस्मिन् नित्यकृत्यमङ्गलास्पदे सर्वमध्यमान्तःपुर बहिःस्थितकक्ष्याविशेषे प्रस्थानमङ्गलद्रव्यसङ्गततया सङ्गतानां तदङ्गनानां प्रेमपरिपाटीं वर्णयति प्रथममन्तःपुरस्त्रीणां प्रेमवीक्षितैरीक्षितः विषयीकृतः चलितुमुद्यतोपिक्षणं स्थगित इत्यर्थः। पश्चात्कृच्छ्रेण किञ्चित् दृष्टिनमनादिना विसृष्टः प्रस्थानेऽनुमत इत्यर्थः। जातहास इति तत्पश्चाच्च अहो प्रेमावृतविवेके कथं वृथा दूयसे मध्याह्न एव भोजनाद्यर्थमागच्छानीति सूचकेन हासेन तासां सान्त्वनेच्छया व्यञ्जितहास इत्यर्थः ॥ १६ ॥ सर्वैरिति। श्रीभगवदागमनं विना स्वयं सभामप्रविष्टचरैरिति ज्ञेयं प्रकर्षेण गीतवाद्यादिनाऽविशत् सुधर्माख्यामिति सूचितं स्वर्गस्थत्वेपि तत्तन्महिमयुक्तत्वं किमुत श्रीकृष्णपुरस्थत्व इत्याह—यदिति ॥ १७ ॥ तत्र तस्मिन् यत्परमासनं सर्वश्रेष्ठतमासनं तस्मिन् यथा दत्तसारूप्यादावपि स्वगणे तस्य रूपादिपरमत्वेन भासते तद्वत्परमतया विहितेष्वप्युग्रसेनाद्यासनेषु तस्यासनं परमतया भासत इति भावः। तत्र च विभुः परः सहस्रान्तः सद्ममयमहासद्मरूपायां नानासभामय्यां तस्यां सुधर्मायां सर्वस्यामेव भासमान इत्यर्थः। अतः स्वीययैव भासा कान्त्या अव समन्तात् भासयन् तथापि यदुभिर्वृतो बभौ यतो नृसिंहैस्तदीयनिजपरिकरत्वेन सर्वपुरुषश्रेष्ठतया तादृशैरेवेत्यर्थः यतः सोपि यदूत्तमः तज्जातीयश्रेष्ठतयैव विभुत्वं प्रकाशयन्नित्यर्थः। तथैव दृष्टान्तः यथेति ॥ १८ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततः पश्चादिति गृहस्थस्य शेषभोजित्वात् ॥ १३ ॥ उप उपायनवत् समीपे वानीय, परमाद्भुतमप्राकृतत्वादिना लोकातीतम्, किंवा रूपगुणादिनात्यनिर्व्वचनीयमित्यर्थः। आद्य शब्दात् शैव्य-मेघपुष्प-बलाहकाः; प्रणम्य भगवन्तम्, अग्रतस्तस्यैव ॥१४॥ अथ मंगले, सात्यक्युद्धवाभ्यां संयुक्त इति प्रेष्ठसेवकत्वेन ताभ्यां पार्श्वद्वये छत्रचामरादिग्रहणात्। पूर्व्वाद्रिमिवेति दृष्टान्तेन रथस्य बृहत्तरत्वादिकं यथा श्रीभगवतः स्वतो भूषणादिना च महातेजस्वितादिकं तथा तेनैव रथस्य शोभाभरजननादिकञ्च सूचितम् ॥ १५ ॥ जातहास इति सदा सुप्रसन्नचित्ततया स्मितोदयात्, किंवा तासां विरहार्त्तिलाघवार्थं हासेन रसान्तरापादनात्, अतएव तासां मने हरन्; अन्यत्तैर्व्याख्यातम्। यद्वा, विसृष्टः शुभं विजयस्वेति प्रस्थापितः सन् ॥ १६ ॥ सर्व्वैरिति सभाया उत्थायाभिगतैः, किंवा सद्यः स्वस्वगृहादागतैः, ततश्च श्रीभगवतैव सह सर्व्वेषां सभाप्रवेशो न च कस्यापि तस्मात् प्रागिति बोधयति। प्रकर्षेण गीतवाद्यादिना अविशत् सुधर्म्माख्यामिति सूचितम्। दिव्यत्वं दर्शयति—यदिति। 'शोकमोहौ जरामृत्यू क्षुत्पिपासे षडूर्म्मयः'; अंग! हे राजन् ॥ १७ ॥ तत्र तस्यां यत् परमासनं सर्व्वश्रेष्ठतरासनं तस्मिन् विभुः सर्व्वशोभादिपरिपूर्णं, अतः स्वकीययैव भासा कान्त्या अव व्याप्त्या भासयन्नपि यदुभिर्वृतो बभौ अशोभत, यतो नृसिंहैस्तद्भक्तिविशेषेण सर्व्वलोकश्रेष्ठतां प्राप्तैः, किंवा महाविक्रमादिना परमात्मीयत्वेन च श्रीनृसिंहदेवतुल्यैः, भक्तवत्सलस्य भक्तसाहित्येनैव शोभाधिक्यसम्पत्तेरिति भावः। तत्रैव हेतुः—यदुत्तम इति; भक्तवात्सल्याद्यशेषगुणप्रकटनार्थमेव यदुकुले श्रेष्ठतयावतीर्णत्वादिति भावः। स्वतः सर्व्वशोभावतः, तत्रैव हेतुः—यदुत्तम इति। स्थानविशेषे स्वजनैर्वृतस्यैव, स्वतः शोभाभरोदये दृष्टान्तः—यथेति ॥ १८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

विप्रान् सम्विभज्य सम्विभागेन प्रीणयित्वा ॥ १३-१६ ॥ षडूर्मयः अशनायापिपासाशोकमोहजरामृत्यवः ॥१७-२६॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

सम्विभज्येति। अग्रतः पुरतः उपवेशितानितिशेषः। विप्रान् स्रगादिभिः सम्विभज्य सम्यग्विभागेन प्रीणयित्वा आज्यादीनवलोक्य तत्रादर्शो दर्पण सुहृदो मित्राणि दाराः पत्नीश्च उपायुङ्क्त यथायोग्यमन्ववर्त्ततेत्यर्थः ॥ १३ ॥ तावदिति। सुग्रीवाद्यैरित्याद्धिशब्देन मेघपुष्पवलाहकसङ्ग्रहः तैरश्वैर्युक्तं स्यन्दनं रथमानीय प्रणम्याग्रतः अवतस्थौ ॥ १४ ॥ सारथेः पाणि स्वपाणिना गृहीत्वा उदयाद्रिं भास्करः सूर्य इव आरुरोह ॥ १५ ॥ ईक्षित इति। व्रीडाप्रेमाभ्यां युक्तैर्वीक्षितैरीक्ष्यमाणः ताभिस्तैरेव वीक्षितैः कृच्छ्रात्कथञ्चिद्विसृष्टः तासां मनोहरन् सञ्जातः हासो यस्य तथाभूतो निर्जगाम ॥ १६ ॥ सुधर्मामिति। तां विशिनष्टि—यद्यत्र सभायाम् उपविष्टानां षडूर्मयः अशनायापिपासाशोकमोहजरामृत्यवो न सन्ति तथाभूतामित्यर्थः ॥ १७ ॥ तत्र सुधर्मायां स्वभासा स्वदीप्त्या ककुभो दिशः भासयन् नृसिंहैर्यदुश्रेष्ठैर्यदुभिः परिवृतो बभौ यथा दिव्याकाशे नक्षत्रगणैः चन्द्रो भाति तद्वत् ॥ १८ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

द्रव्यसम्विभागक्रममाह—सम्विभज्येति। विप्रादीनुद्दिश्य स्रगादिभिस्तृतीया च द्वितीयार्थे प्रायुङ्क्तः स्वयं स्वीचकार ॥ १३ ॥ तावत्तदा ॥ १४-१५ ॥ स्त्रीणां मनः ॥ १६ ॥ यन्निविष्टानां यत्र सभायामुपविष्टानाम् अशनपानादिषडूर्मयो न सन्ति न बाधन्ते ॥ १७ ॥ नृसिंहैः पुरुषश्रेष्ठैः १८ ॥

श्रीमद्विश्वनाथचक्रवर्तीकृता सारार्थदर्शिनी

सम्विभज्य भागशो दत्त्वा विप्रान् विप्रेभ्यः स्रगादिभिः स्रगादीन् उपायुङ्क्त भोगार्थं जग्राह ॥ १३-१४ ॥ पाणी अञ्जलीभूतौ दक्षिणेन पाणिना गृहीत्वा ॥ १५ ॥ कृष्णः प्रथममीक्षितः अर्थात् सात्यक्युद्धवादिभिः । कीदृशः ईक्षितः अन्तःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैस्त्वद्विरहतापमिमं कथं सहामहे इति वैयग्र्यव्यञ्जकैर्बद्ध इति शेषः । ततश्च भो अधीराः ! एतन्मात्रविरहेणैव विह्वलीभवथ अयमहमधुनैव भोक्तुमेष्यामीत्याश्वासव्यञ्जका हासो जातो यस्य सः । ततश्च मन्ये तादृशहासेनैव मनो हरन् कृच्छ्रादेव विसृष्टः तत्प्रेमावलोकबन्धाद्विमुक्तः सन् निरगात् ॥ १६ ॥ इत्थमेकैकस्मान्मन्दिरादेकैकेन प्रकाशेन बहिर्भूय तत्तत्पुरस्थैस्तत्तत्प्रतिवेशिभिश्च जनैरेव लक्षितो नत्वन्यैः पृथक् पृथक् प्रतोल्यां सुधर्म्मा सभा गोपुरवर्त्मपर्य्यन्तमागत्य तत्र पुनरेकीभूय सुधर्म्मां सभान्त्वेकेनैव प्रकाशेन प्रविशति स्मेत्याह सुधर्म्माख्यामिति । परिवारितः वृतः ॥ १७ ॥ नृसिंहैर्नृषु श्रेष्ठैः ॥ १८ ॥

गूढार्थदीपिनी

स्रगादिभिः विप्रादीन् संविभज्य तेभ्यः पूर्वं दत्त्वा पुनः स्वयम् उपायुङ्क्त भुक्तवान् गृहस्थस्य शेषभोजित्वविधानात् ॥ १३ ॥ यावत् भुक्तवान् तावत् सूतः सारथिः स्यन्दनमुपानीय अग्रे समुपस्थितः ॥ १४ ॥ भगवान् स्वदक्षिणपाणिना सारथेः पाणी अञ्जलीभूतौ गृहीत्वा रथमारुहत् । यथा उदयाचलं सूर्यः आरोहति तथा ॥ १५ ॥ ईक्षितः कटाक्षविषयीकृतस्तदा क्षणं स्थितः मध्याह्ने भोजनार्थमेष्यामीति किमिति खिद्यसे इति प्रत्येकं सूचयन् जातहासश्च सन् ताभिः कृच्छ्रात् क्लेशात् विसृष्टः गन्तुमनुज्ञातः तासां मनो हरन् गृहाद् निरगात् ॥ १६ ॥ अङ्ग हे राजन् । एवं सर्वगृहेभ्यः पृथक् पृथक् निर्गत्य पुनः अभिन्नमूर्तिः एक एव सन् सभां प्राविशत् । यत् यस्यां प्रविष्टानां षड् ऊर्मयः न सन्ति ॥ १७ ॥ तत्र सभायां सिंहासने उपविष्टः भगवान्-यदुभिर्वृतः बभौ । ककुभः अवभासयन् दिशः प्रकाशयन् सन् । यथा दिवि आकाशे तारागणैः वृतः उडुराजः चन्द्रः भाति तथा ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अग्रतः पुरुतः अक्षिगोचरानित्यर्थः । विप्रादीन् यथायोग्यं स्रगादिभिः सम्विभज्य लब्धभागान् विधाय ततः स्वयं भोगार्थमुपायुङ्क्त जग्राह ॥ १३-१४ ॥ सारथेः पाणी अञ्जलीभूतौ पाणिना गृहीत्वा तं स्यन्दनमारुहत् ॥ १५ ॥ अन्तःपुरस्त्रीणां रुक्मिण्यादीनां सव्रीडप्रेमवीक्षितैरीक्षितः भक्तवत्सलत्वात् तत्प्रेमबद्धः क्षणं स्थितः पुनस्ताभिरेव वीक्षितैः कृच्छ्राद्विसृष्टो निरगादित्यर्थः ॥ १६ ॥ गृहेभ्यो बहुभ्यः बहुभिः रूपैर्निर्गत्य सुधर्माख्यां सभान्तु एकामेक एव प्राविशत् इति भावः ॥ १७-१८ ॥

श्रीसत्यधर्मकृता भागवतटिप्पणी

अग्रतः प्राक् । स्रक्ताम्बूलानुलेपनैः सभाजयित्वा संविभज्य सुहृदः प्रकृतीर्दारान्भार्याः । ततः सर्वसत्क्रियानन्तरं स्वयं प्रायुङ्क्त स्वोपयुक्तं तैश्चकार ॥ १३ ॥ तावत्सूतो दारुकः सुग्रीवाद्यैश्चतुर्भिः ॥ १४ ॥ सात्यकिः शैनेय उद्धवश्च ताभ्यां संयुक्तः पूर्वाद्रिमुदयपर्वतम् ॥ १५ ॥ सव्रीडानिव सव्रीडं यथा प्रेमवीक्षितैः स्नेहसहितकटाक्षवीक्षितैः । व्रीडश्च प्रेमा च व्रीडप्रेमे ताभ्यां सहितानि वीक्षितानि च तैर्वा । कृच्छ्रात्कष्टाद्विसृष्टस्तासामन्तःपुरस्त्रीणां मनोहरन् जातहासश्च निरगात् ॥ १६ ॥ अङ्ग हे परीक्षित् । यन्निविष्टानां षडूर्मयोऽशनायादयः षट् ऊर्मयो न सन्ति । तां सुधर्माख्यां वृष्टिभिः परिवारितः प्राविशत् । यो ग्रामः परिवारितः परितो वार्भिरितः संयुतः स तस्मिन्सुधर्माख्यां सभां प्राविशदिति वा ॥ १७ ॥ तत्र सुधर्मायां परमासने उत्तमासने उपविष्टः परेषां मासं यत्तस्या असने निरसने परेषां न आसनं मासनं तस्मिन् । तन्निराश्रयीभवनविषय इति यावत् । उपविष्टः स्वभासा ककुभो दिशोऽवभासयन् । यथा तारकगणैर्दिवि वृत उडुराजो भाति तथा नृसिंहैर्नरवरैर्यदुभिर्वृतो यदूत्तमो बभौ ॥१८॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो भोगं वक्तुं मुख्यत्वात्ताम्बूलादिस्वीकारमाह संविभज्येति । अग्रतः प्रथमं विप्रान् संविभज्य विप्रेभ्यो दत्वा स्रक्ताम्बूलानुलेपनानि । सर्वैः सर्वेषां संविभागः । लौकिकदाने सुहृदः प्रथमाः, प्रकृतयः मन्त्रिणः, ततो दाराः । यद्यपि प्रथमं स्वस्योपयोगः, तथापि संविभागः सर्वेषां प्रथम एव । भगवदुपभोगानन्तरं पदार्थोत्पत्त्यसम्भवात् । अतः पश्चात्स्वयमुपायुङ्क्त । शिष्टस्य सेवकगामित्वात् ॥ १३ ॥ ततस्त्रैलोक्यरक्षार्थमुद्यतस्य सुधर्मायां गमनं निरूप्यते तावत्सूत इति चतुर्भिः । परमाद्भुतमिति । वैकुण्ठात्समागतरथव्युदासः, किन्तु धर्ममयो रथः, स तु सङ्कर्षणोपकारी । अश्वाः सूतश्च त एवेत्याह सुग्रीवाद्यैर्हयैर्युक्तमिति । अनिरुद्धप्राधान्यात्सुग्रीवाद्यैरित्युक्तम् । प्रणामः पूर्वस्माद्वैशिष्ट्यद्योतकः, अग्रे तूष्णीमवस्थानं कार्यस्य लौकिकत्वाभावाय । ततः अप्रेरितोऽपि भगवान् सारथेः पाणिं पाणिना गृहीत्वा रथमारुहत् । तस्य क्रियाशक्तिः स्वक्रियाशक्त्या निबद्धा, अन्यथा धर्मप्रेरकोऽन्यथा प्रेरयेत् । पूर्वाविशिष्टत्वात् । तं रथमारुहदिति । भगवदारूढो धर्मः सर्वत्र सुस्थिरो भवतीति

तमित्युक्तम्। रक्षारूपा क्रियाशक्तिः। भक्तिश्च साधनत्वे धर्मे ग्राह्येति **सात्यक्युद्धवसंयुक्त** इत्युक्तम्। उद्धवो भक्तिः अधिकारिणामेव प्रकाशको भविष्यतीत्याशङ्क्य दृष्टान्तमाह **पूर्वाद्रिमिव भास्कर** इति। प्रातः सर्वेषामेव प्रबोधो भवति, न केवलमधिकारिणाम्। ततो धर्मे कामनिवृत्तिमाशङ्क्य तन्निराकरणार्थमाह। **ईक्षितोऽन्तःपुरस्त्रीणा**मिति। **स्त्रीणा**मिति षष्ठीबहुवचनं न केवलं दर्शनमात्रम्, किन्तु तासां सम्बन्ध्यपि भगवानिति द्योतयति। ज्ञानद्वारा सम्बन्धः। आन्तरः बाह्यो निवर्तक इति ज्ञाने त्रैविध्यमाह **सव्रीडप्रेमवीक्षितै**रिति। व्रीडा तामसी, प्रेम राजसम्, वीक्षितं सात्त्विकमिति। ततो भावेन बद्धः। '**ये यथा** मां प्रपद्यन्त' इति न्यायेन। तासामपेक्षया स्वच्छन्दं धर्मपरता न भविष्यतीति तासां निर्बन्धाभावमाह **कृच्छ्राद्विसृष्ट इति**। कष्टेन ताभिर्विसृष्टः, धर्मानुरोधान्निर्गच्छत्विति विचारितः। ततो निरगात्। **जातहास** इति। तासामपि धर्मानुरोधमालक्ष्य हास्यम्। न हि स्त्रीणां कामादुपरतिरस्ति। तथापि धर्मपरताप्यासां मा भूदिति ज्ञापनार्थं धर्मपरत्वम्। **हरन्मन** इति निरोधार्थम्। अन्यथा लोके धर्मे वा चित्तमासक्तं भवेत्। भगवान् विसृष्ट इति। **सुधर्माख्या**मिति। सुष्ठु धर्मो यत्रेति नाम्नैव धर्मपरत्वं सिध्यति। सभा स्वभावतोऽपि धर्मनिर्णयस्थानम्। **सर्ववृष्णिभिः परिवारित** इत्येकमत्यम्। तस्यामाधिदैविकधर्मत्वज्ञापनार्थम्। कालधर्मातिक्रममाह **यन्निविष्टाना**मिति। यत्रोपविष्टानां षडूर्मयो देहादिधर्माः आवश्यका अपि न सन्ति, तत्रानावश्यकाः सुतरामेव न भविष्यन्तीति अर्थादुक्तम्॥ १७॥ एवं सुधर्मामाहात्म्यमुक्त्वा तत्रोपवेशने धर्म एव केवल इत्याशङ्क्य सच निर्बन्धात्मक इति सुखोपवेशनमाह **तत्रोपविष्ट** इति। **तत्र** सभायाम्। तत्रापि मध्ये भगवदुपवेशनस्थानं परमासनम्। प्रान्ते पश्चिमभागे कुड्यसमीपे राज्ञः स्थानम्, मध्ये तत्सम्मुखे भगवत्स्थानमिति विमर्शः। सभासदां मध्ये भगवतोऽनुप्रवेशं निवारयितुमाह **स्वभासा ककुभोऽवभासयन्नि**ति। तत्र सामर्थ्यं **विभु**रिति। राज्ञो मुख्यत्वादभानमाशङ्क्याह **बभा**विति। सभाधर्मेण देवधर्मेण वा तथात्वमाशङ्क्य **स्वभासेति**। अप्रधानेनापि प्रधानभानं सम्भवतीति तन्निराकरणार्थं दश दिश एवोक्ताः। नतु तत्रत्या एव केवलाः। अनेन सभया भगवद्भानं निवारितम्। एवं तर्हि सभासदामप्रयोजकत्वमेव स्यादित्याशङ्क्य निराकरोति **वृतो नृसिंहै**रिति। तेषामागन्तुकत्वं निराकरोति **यदुभि**रिति। अन्यथा नृसिंहाः परशुरामव्यासादयो भवेयुः। तुल्यतामाशङ्क्याह **यदूत्तम** इति। तेषामेकत्र निवेशनमात्रं भगवतस्ततोऽप्युत्तमत्व एव स्यात्। नतु नियामकत्वम्। ततो धर्म एकमुखो न भवेदिति तेषां पतिर्भगवानिति दृष्टान्तेन निरूपयति **यथोडुराज इति**। **दिवी**त्याधिभौतिकं निवारितम्, यथा देवरूपम्। ग्रहनक्षत्राणामपि केनचिदंशेन तुल्यतापोषकत्वं चास्तीति **तारकागणै**रित्युक्तम्। **उडुराज** इत्यनेन स्वकीयानां तदधीनत्वमुक्तमेव॥ १८॥

श्रीसुबोधिनी-सारः

अग्रतः प्रथमं स्रक्ताम्बूलानुलेपनैर्विप्रान् संविभज्य तानि तेभ्यो दत्त्वेत्यर्थः ततोऽनंतरं सुहृदो मित्राणि प्रकृतीर्दारान् स्त्रीश्च संविभज्य स्वयम् उपायुंक्ताग्रहीत्॥ १३॥ तावदेव सुग्रीवाद्यैर्हयैरश्वैर्युक्तं परमाद्भुतं स्यंदनं रथमुपानीय समीपमानीय श्रीकृष्णं प्रणम्य सूतो दारुकः सारथिरग्रतोग्रेऽवस्थितोऽभूत्॥ १४॥ पाणिना हस्तेन सारथेः पाणी संयतत्वाद्द्विवचनम्। गृहीत्वा सात्यक्युद्धवाभ्यां संयुक्तः श्रीकृष्णस्तं रथमारुहत् पूर्वाद्रिम् उदयाचलं भास्करोर्क इव॥ १५॥ अंतःपुरस्त्रीणां सलज्जप्रेमदर्शनैरीक्षितः कृच्छ्राद्विसृष्टः त्यक्तः सर्वगृहेभ्यः पृथक् पृथक् निर्गत्य तासां मनोहरन् जातो हासो यस्य स निरगात्॥ १६॥ सर्ववृष्णिभिः परिवारितः सर्वतो युक्त एको भूत्वा सुधर्माख्यां सभां प्राविशत् यत् यस्यां सभायां प्रविष्टानां जनानां षडूर्मयः क्षुत्पिपासाशोकमोहजन्ममृत्युरूपा न संति तदुक्तम्। "प्राणस्य क्षुत्पिपासे द्वे शोकमोहौ तथात्मनः। जन्ममृत्यू शरीरस्य षडूर्मिरहितः शिवः॥" हे अंग॥ १७॥ तत्र सभायां परमासने उपविष्टः स्वस्य भासा दीप्त्या ककुभो दिशोवभासयन् नृसिंहैः पुरुषोत्तमैर्यदुभिर्वृतो यदूत्तमो विभुर्हरिर्बभौ शुशुभे दिवि स्वर्गे तारकागणैर्वृत उडुराजश्चंद्र इव॥ १८॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तावत्सूत इत्यस्याभासे। अत्र श्लोकत्रयेण निर्गमनं निरूप्य चतुर्थेन सुधर्माप्रवेश उच्यते। तत्र श्लोकत्रयसंख्यातात्पर्यमाहुः **त्रैलोक्येति**। **व्याख्याने**। **अनिरुद्धेति**। सङ्कर्षणकार्ये सैन्याश्वस्य प्राधान्यात्तदादित्वमुक्तम्। अनिरुद्धकार्ये सुग्रीवस्य प्राधान्यात्सुग्रीवाद्यैरित्युक्तम्। अयं सुष्ठु ग्रीवा यस्येति रजस्तमसोरभावात् धर्मोपयोगी। स तु सैन्यवत्संहारकत्वात्संहारोपयोगीतिभावः। **अन्यथेति**। दारुकक्रियाशक्तेर्निबन्धनाभावे संहारधर्मे प्रेरकः सङ्कर्षणस्तं संहारकार्ये प्रेरयेत्, नतु धर्मकार्ये। तस्य तत्कार्यार्थमेवागतत्वात्। तत्र हेतुः **पूर्वेति**। एतस्यापि रथारोहणस्य संहारार्थरथारोहणतुल्यत्वात्। अनिरुद्धांशेन निर्बन्धने स न तथा कुर्यादित्यर्थः। **रक्षेति**। अधुना सात्यकेः पुराध्यक्षत्वाद्रक्षारूपक्रियाशक्तिरूपत्वम्। **ईक्षित** इत्यत्र। **बाह्य इति**। बाह्यो दाम्पत्यसम्बन्ध एतस्मिन्समये भगवतः सकाशादेतासां निवर्तकः। एतस्य सभागमनकालत्वादित्यर्थः। **तथापि धर्मपरतापीति**। यत्किञ्चिद्धर्मानुरोधेपि धर्मनिष्ठता आसां मा भूदिति भगवदाशय इति हेतोर्लोकेषु धार्मिकत्वं ज्ञापयितुं '**यद्यदाचरति श्रेष्ठ**' इतिन्यायेन लोकान् शिक्षयितुं बाह्यतः **स्वस्य धर्मकरणम्**। **अन्तस्तु** जातहासत्वात्कामरसमनुभवतीत्यर्थः।

धर्मद्वेषवत्केवलधर्मनिष्ठताप्यासामयुक्तेत्यपिशब्दः। **अन्यथेति**। निरोधाभावे स्त्रीणां चित्तं लौकिकपदार्थे धर्मे वासक्तं भवेत्, भगवतो विसृष्टत्वादित्यर्थः। अत एवाभासे कामनिवृत्तिनिराकरणमेव वाक्यतात्पर्यार्थ उक्तः। सुधर्माख्यामित्यस्य वाक्यार्थ- 'स्तावत्सूत' इतिश्लोकाभासे उक्त एवेति नात्राभास उक्तः। **षडूर्मय** इति। 'क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः।' **तत्रोपविष्ट** इत्यस्याभासे। **सुखोपवशनमाहेति**। भगवतो भानस्य स्वतःसिद्धत्वात्तदनुवादेनोपवेशनमेव वाक्यार्थ इति भावः। अत एव बभाविति पदस्याभानशङ्कानिवृत्त्यर्थकत्वमेव वक्ष्यन्ति। **व्याख्याने**। **दिवीत्याधिभौतिकमिति**। आधिभौतिकं रूपं ज्योतिश्चक्रे तिष्ठति, न तु स्वर्गे इत्यर्थः। **परिताष(र्थ)माहेति**। अयं वाक्यतात्पर्यार्थ उक्तः, शक्यार्थस्तूपस्थानमेव।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततोऽग्रतः प्रथमतो विप्रान्, सुहृदो मित्राणि, प्रकृतीर्दाराश्च स्रगादिभिः संविभज्य तेभ्यस्तानि दत्त्वा स्वयमुपायुङ्क्त भुक्तवान्। अत्र भगवद्भोगानन्तरमेव मित्रादिभोगो ज्ञेयः, प्रथमतस्तु विभागमात्रमेव। ततो भगवद्भोगावशिष्टस्य सेवकगामित्वमिति ज्ञेयम् ॥ १३ ॥ यावत् सर्वजनसन्मानपूर्वकं भोजनं भगवान् कृतवान् तावत् सूतः सुग्रीवाद्यैर्हयैर्युक्तं परमाद्भुतं स्यन्दनं रथमुपानीयाग्रतः प्रणम्यावस्थित इत्यन्वयः। आद्यशब्देन मेघपुष्पबलाहकानां सङ्ग्रहः ॥ १४ ॥ स्वपाणिना सारथेः पाणिं गृहीत्वा सात्यक्युद्धवसंयुक्तो भगवांस्तं रथं अथानन्तरमेवारुहत्। तच्छोभातिशयं सूचयन् दृष्टान्तमाह—पूर्वाद्रिं उदयाचलं यथा भास्करः सूर्य आरोहति तथेति ॥ १५ ॥ व्रीडा लज्जा, प्रेम च ताभ्यां सहितैरन्तःपुरस्त्रीणां वीक्षितैः दृष्टिभिरीक्षितः निरीक्ष्यमाणस्ततश्च ताभिः कृच्छ्रात् क्लेशात् विसृष्टः गन्तुमनुज्ञातो जातहासश्च ततो गृहान्निरगात्। हासप्रयोजनमाह—तासां मनो हरन्निति। 'हासो जनोन्मादकरी च माया' इति वचनात्। हासेन परमप्रेमवत्यस्ता मोहयित्वा तदनुमतिं संपाद्य ययौ, अन्यथा विरहेण ता व्याकुलाः स्युरित्याशयः ॥ १६ ॥ एवं सर्वगृहेभ्यः पृथक्पृथक् निर्गत्यानन्तरमेक एव सन् सर्वैर्वृष्णिभिः परिवारितः सुधर्माख्यां सभां प्राविशत्। हे अङ्ग हे राजन्! यस्यां सभायां निविष्टानां क्षुत्पिपासे प्राणस्य, शोकमोहौ मनसः, जरामृत्यू शरीरस्य, इति षडूर्मयो न सन्ति न भवन्ति ॥ १७ ॥ तत्र सभायां परमासने उपविष्टः नृसिंहैर्मनुष्यश्रेष्ठः यदुभिर्वृतः। तत्र हेतुः—यदूत्तमः विभुः कृष्णः स्वभासा स्वदीप्त्या ककुभो दिशोऽवभासयन् बभौ। तत्र दृष्टान्तमाह—यथेति। दिवि आकाशे स्थितस्तारकागणैः वृतः उडुराजः चन्द्रो यथा सर्वा दिशोऽवभासयन् भाति तथेति ॥ १८ ॥

अन्वितार्थप्रकाशिका

संविभज्येति ॥ ततोऽग्रतः प्रथमतो विप्रान् सुहृदो मित्राणि प्रकृतीर्दाराश्च स्रगादिभिः संविभज्य तेभ्यस्तानि दत्त्वा स्वयमुपायुङ्क्त भुक्तवान्। गृहस्थस्य शेषभोजित्वात् ॥ १३ ॥ तावदिति ॥ यावत्सर्वजनसम्मानपूर्वकं भोजनं भगवान् कृतवान् तावत्सूतः सुग्रीवाद्यैर्हयैर्युक्तं परमाद्भुतं स्यन्दनं रथमुपानीयाग्रतः प्रणम्यावस्थितः। यद्वा। अग्रतः तत्तत्स्त्रीगृहनिर्गममार्गाणामेकताप्राप्तिस्थाने तद्गोपुराग्रभागे रथमुपानीय ॥ १४ ॥ गृहीत्वेति ॥ स्वदक्षिणपाणिना सारथेः पाणी अञ्जलीभूतौ गृहीत्वा सात्यक्युद्धवसंयुक्तो भगवांस्तं रथमथानन्तरमेवारुहत्। रुहेरङ् छान्दसः। पूर्वाद्रिम् उदयाचलं यथा भास्करः सूर्य आरोहति तथा ॥ १५ ॥ अथ पुनस्तद्रथारोहात्पूर्ववृत्तं सिंहावलोकनन्यायेनाह—ईक्षित इति ॥ अन्तःपुरस्त्रीणां व्रीडा लज्जा प्रेम च ताभ्यां सहितैः वीक्षितैः दृष्टिभिरीक्षितः निरीक्ष्यमाणस्ततश्च ताभिः कृच्छ्रात् क्लेशात् विसृष्टः गन्तुमनुज्ञातः मध्याह्न एव भोजनार्थमेष्याम्येव किमिति तप्यसे इति प्रत्येकं सूचयन् जातहासश्च तासां मनो हरन् गृहान्निरगात् ॥१६॥ सुधर्मेति ॥ अङ्ग हे राजन्! एवं सर्वगृहेभ्यः पृथक् पृथक् निर्गत्यानन्तरमेक एव अभिन्नमूर्त्तिर्दृष्टः। सर्वैर्वृष्णिभिः परिवारितः सुधर्माख्यां सभां प्राविशत्। यस्यां सभायां निविष्टानां क्षुत्पिपासे प्राणस्य शोकमोहौ मनसः जरामृत्यू शरीरस्येति षडूर्मयो न सन्ति न भवन्ति ॥ १७ ॥ तत्रेति ॥ तत्र सभायां परमासने उपविष्टः नृसिंहैर्मनुष्यश्रेष्ठैः यदुभिर्वृतः यदूत्तमः विभुः कृष्णः स्वभासा स्वदीप्त्या ककुभो दिशोऽवभासयन् बभौ। यथा दिवि आकाशे स्थितस्तारकागणैः वृतः उडुराजः चन्द्रः सर्वा दिशोऽवभासयन् भाति तथा ॥ १८ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विप्रादिदारांतान् स्रगादिभिः संविभज्यतेभ्यस्तानिस्वेसर्थः। तत स्वयमुपायुंक्त तानि जग्राह ॥ १३-१४ ॥ पूर्वाद्रिमुदयाचलमिव ॥ १५ ॥ सव्रीडप्रेमवीक्षितैः। वियोगासहनव्यंजकैः ईक्षितश्चलितुद्यतोऽपिक्षणं स्थिरीकृत इत्यर्थः। पश्चात् कृच्छ्रात् कृच्छ्रेण विसृष्टः दृष्ट्या प्रस्थानेऽनुमतः ॥१६॥ यस्यां निविष्टानां प्रविष्टानां अंग हे परीक्षित् ॥१७॥ ककुभोदिशः ॥१८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

संविभज्येति। ततः, स्रक्ताम्बूलानुलेपनैः, अग्रतः विप्रान्, संविभज्य विप्रेभ्यः स्रगाद्यर्पणं कृत्वेत्यर्थः। सुहृदः, प्रकृतीः, दारान् स्रगादिभिः प्रतोष्य, ततः स्वयं उपायुङ्क्त भोगार्थमग्रहीत् ॥ १३ ॥ तावदिति। तावत् सूतो दारुकः, सुग्रीवाद्यैः हयैः, युक्तं, परमाद्भुतं, स्यन्दनं रथं, उपानीय प्रणम्य, अग्रतः अवस्थितः अभवत् ॥ १४ ॥ गृहीत्वेति। ततः पाणिना स्वहस्तेन,

सारथेर्दारुकस्य, पाणिं गृहीत्वा, अथ तं रथं, भास्करः सूर्यः, पूर्वाद्रिं पूर्वपर्वतं इव, सात्यक्युद्धवसंयुक्तः सन्, आरुहत् समारुरोह ॥१५॥ वीक्षित इति । व्रीडो व्रीडा च प्रेम च ताभ्यां सहितानि वीक्षितानि तैः, व्रीडाप्रेमयुक्तवीक्षणैः अन्तःपुरस्त्रीणां, मनः हरन्, ताभिः, तथैव वीक्षितः, कृच्छ्रात्, विसृष्टः, जातहासः, भगवान् निरगात् चचाल ॥ १६ ॥ सुधर्मामिति । अङ्ग हे राजन्, यन्निविष्टानां यस्यां प्रविश्य कृतोपवेशनानां, षडूर्मयः अशनापिपासाशोकमोहजरामृत्युरूपाः, न सन्ति । तथाभूतां, सुधर्माख्यां, सभां, सर्वैः वृष्णिभिः, परिवारितः सन्, प्राविशत् ॥ १७ ॥ तत्रेति । तत्र सुधर्मायां, स्वभासा स्वस्य दीप्त्या, ककुभो दिशः, अवभासयन्, नृसिंहैः मनुष्येषु शौर्यवीर्यादिभिः सिंहसमानताभाग्भिरित्यर्थः । यदुभिर्यदुवैः वृतः, विभुः, यदूत्तमः श्रीकृष्णः, परमासने, उपविष्टः सन्, दिवि तारकागणैः वृतः, उडुराजश्चन्द्रः, यथा तथा, बभौ ॥ १८ ॥

कृष्णप्रिया

वे पुष्पमाला, ताम्बूल, चन्दन और अङ्गराग आदि वस्तुएँ पहले ब्राह्मण, स्वजनसम्बन्धी, मन्त्री और रानियों को बाँट देते; और उनसे बची हुई स्वयं अपने काम में लाते ॥ १३ ॥ भगवान् यह सब करते होते, तबतक दारुक नामका सारथी सुग्रीव आदि घोड़ों से जुता हुआ अत्यन्त अद्भुत रथ ले आता और प्रणाम करके भगवान् के सामने खड़ा हो जाता ॥ १४ ॥ इसके बाद भगवान् श्रीकृष्ण सात्यकि और उद्धवजी के साथ अपने हाथ से सारथी का हाथ पकड़कर रथपर सवार होते—ठीक वैसे ही जैसे भुवनभास्कर भगवान् सूर्य उदयाचलपर आरूढ़ होते हैं ॥ १५ ॥ उस समय रनिवास की स्त्रियाँ लज्जा एवं प्रेम से भरी चितवन से उन्हें निहारने लगतीं और बड़े कष्ट से उन्हें विदा करतीं । भगवान् मुसकराकर उनके चित्त को चुराते हुए महल से निकलते ॥ १६ ॥ परीक्षित् ! तदनन्तर भगवान् श्रीकृष्ण समस्त यदुवंशियों के साथ सुधर्मा नामकी सभा में प्रवेश करते । उस सभा की ऐसी महिमा है कि जो लोग उस सभा में जा बैठते हैं, उन्हें भूख-प्यास, शोक-मोह और जरामृत्यु—ये छः ऊर्मियाँ नहीं सतातीं ॥ १७ ॥ इस प्रकार भगवान् श्रीकृष्ण सब रानियों से अलग-अलग बिदा होकर एक ही रूप में सुधर्मा-सभा में प्रवेश करते और वहाँ जाकर श्रेष्ठ सिंहासनपर विराज जाते । उनकी अङ्गकान्ति से दिशाएँ प्रकाशित होती रहतीं । उस समय यदुवंशी वीरों के बीच में यदुवंशशिरोमणि भगवान् श्रीकृष्ण की ऐसी शोभा होती, जैसे आकाश में तारों से घिरे हुए चन्द्रदेव शोभायमान होते हैं ॥ १८ ॥

तत्रोपमन्त्रिणो राजन् नानाहास्यरसैर्विभुम् । उपतस्थुर्नटाचार्या नर्तक्यस्ताण्डवैः पृथक्[1] ॥ १९ ॥
मृदङ्गवीणामुरजवेणुतालदरस्वनैः । ननृतुर्जगुस्तुष्टुवुश्च सूतमागधवन्दिनः ॥ २० ॥
[2]तत्रस्थाः ब्राह्मणाः केचिदासीना ब्रह्मवादिनः । पूर्वेषां पुण्ययशसां राज्ञां चाकथयन् कथाः ॥ २१ ॥
तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः । विज्ञापितो भगवते प्रतीहारैः प्रवेशितः ॥ २२ ॥
स नमस्कृत्य कृष्णाय परेशाय कृताञ्जलिः । राज्ञामावेदयद्दुःखं जरासन्ध[3]निरोधजम् ॥ २३ ॥
ये च दिग्विजये तस्य सन्नतिं न ययुर्नृपाः । प्रसह्य रुद्धास्तेनासन्नयुते द्वे गिरिव्रजे ॥ २४ ॥

कर्दमक्षमा

अन्वयः—राजन् ! तत्र, उपमंत्रिणः, नानाहास्यरसैः, नटाचार्याः, च, नर्तक्यः, ताण्डवैः, पृथक् पृथक्, विभुम्, उपतस्थुः ॥ १९ ॥ सूतमागधवन्दिनः, मृदङ्गवीणा मुरजवेणुतालदरस्वनैः, तुष्टुवुः, जगुः, च, ननृतुः ॥ २० ॥ तत्र, आसीनाः, केचित्, ब्राह्मणाः, ब्रह्मवादिनः, पुण्ययशसाम्, पूर्वेषाम्, च, राज्ञाम्, कथाः, च, अकथयन् ॥ २१ ॥ राजन् ! अपूर्वदर्शनः, एकः, पुरुषः, आगतः, प्रतीहारैः, भगवते, विज्ञापितः, च, प्रवेशितः ॥२२॥ कृताञ्जलिः, सः, नमस्कृत्य, परेशाय, कृष्णाय, कृताञ्जलिः, जरासन्धनिरोधजम्, राज्ञाम्, दुःखम्, आवेदयत् ॥ २३ ॥ तस्य, दिग्विजये, ये, नृपाः, सन्नतिम्, न, ययुः, च, तेन, प्रसह्य, द्वे, अयुते, गिरिव्रजे, रुद्धाः, तेषाम्, दुःखम्, आवेदयत् ॥ २४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उपमंत्रिणः परिहासकाः । पृथक्पृथक् स्वस्वसमुदायैः ॥ १९ ॥ मृदंगादयः प्रसिद्धाः । दरः शंखः । सूतादयस्तुष्टुवुः ॥ २० ॥ ब्राह्मणा ब्रह्म वेदमाहुर्मंत्रान्व्याचक्षतेत्यर्थः । वादिनो वदनचतुराः ॥ २१-२३ ॥ गिरिव्रजे तत्संज्ञके दुर्गे रुद्धा आसन् । तेषां च दुःखमावेदयदित्यन्वयः ॥ २४ ॥

---

१. समं-विज. । २. तत्रस्थाः-वीर. विज. ; तत्राहु-श्रीधर. वंशी. जीव. ; तत्रस्था ब्राह्मणाः केचिदाहुर्वै ब्रह्मवादिनः-श्रीधर. टि. । ३. सन्बोध-विज. ; सन्धविरोध-प्रा. पा. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

राजन्निति राजसभायामेतत्संभवत्येवेति भावः । तत्र सभायाम् ॥१९-२०॥ गानोत्तरं कः प्रसंगस्तत्राह-तत्राहुरिति । इत्यर्थ इति । वेदव्याख्यानमकुर्वन्नित्यर्थः । वादिनो वदनचतुराः । केचिदिति तद्भेरल्यमाह—आसीना इत्यनेन वेदेतिहासपुराणवक्तृणामीश्वरेऽप्यागतेऽ नोत्थानं कार्यमिति ध्वनितम्, तच्च ब्राह्मणा इत्युक्तेर्ब्राह्मणस्यैवेति सूचितमत एव सूतस्य बलदेवेनानुत्थाने वधः कृत इत्यग्रे स्फुटीभविष्यति । इत्थभिप्रेत्यैव संहितायाम्—"व्यासासनोपविष्टस्तु विप्रो व्यासो न संशयः । गुरुविप्रनृपेश्चापि वृद्धैः पितृपितामहैः ॥ पूजनीयः प्रयत्नेन तथा धर्मो न हीयते । नो नमेन्नाशिवं चोद्यान्नाभ्युत्थानं तदासनात् ॥ कुर्वीत च महाप्राज्ञः सर्वपूज्यस्तदा हि सः ।" इत्युक्तम् । पुण्ययशसां नलादीनाम् ॥ २१ ॥ तत्र कथावसरे । अपूर्वदर्शनोऽदृष्टपूर्वः ॥ २२ ॥ सोऽपूर्वपुरुषः । ते राजानः ॥ २३ ॥ तस्य जरासन्धस्य । ये राजानः ते । तेन जरासंधेन । द्वे अयुते विंशतिसहस्राणि । साष्टशतानि द्वे अयुते चेत्यपि ज्ञेयम् । शतान्यष्टाविति वक्ष्यमाणत्वात् । रोधनप्रयोजनं चोक्तं सभापर्वणि युधिष्ठिरं प्रति श्रीकृष्णेन । "स हि राजा जरासन्धो यियक्षुर्वसुधाधिपैः । महादेवं महात्मानमुमापतिमरिंदम् ॥" इति प्रथमस्कंधेऽपि राजानं प्रति द्वारकातः समागतेनार्जुनेनाप्युक्तम्—"तेनाहृताः प्रमथनाथमखाय भूपाः" इति लक्षसंख्यराजबलिभिर्महादेवयजने तस्य कामनेति कथा भारतादिप्रसिद्धास्तीति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विभुं सर्वरसपरिपूर्णं हे राजन् इति कौतुकात् ताण्डवैः नृत्यैः उपतस्थुः असेवन्त ॥ १९ ॥ सूतादीनां नर्त्तनगाने पूर्वतो विलक्षणे ज्ञेये ॥ २० ॥ ब्राह्मणाः वेदार्थाभिज्ञाः कथाश्च कथयन् इतिहासपुराणवचनादिना ॥ २१ ॥ अपूर्वदर्शनः अदृष्टपूर्वः प्रतीहारैरित्यस्योभयत्रान्वयः ॥२२॥ परेशायेति । दूतस्य तादृशस्फूर्त्तिद्योतकं कृष्णाय राज्ञां दुःखमावेदयत् अर्थात्तमेव नमस्कृत्य दुःखमिति दुःखोत्तरं वचनमित्यर्थः ॥ २३ ॥ के ते राजानः ! इत्यपेक्षायामाह—येचेति । तस्य जरासन्धयस्य सन्नतिं तस्मिन्नत्यन्तनम्रतां ये न ययुः ये च येन हेतुना तेन जरासन्धेन रुद्धाश्चासन् रोधनप्रयोजनश्चोक्तं सभापर्वणि युधिष्ठिरं प्रति श्रीभगवतैव—

"स हि राजा जरासन्धो यियक्षुर्वसुधाधिपैः । महादेवं महात्मानमुमापतिमरिन्दम ॥" इति ॥ २४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विभुं सर्व्वरसपरिपूर्णम्, हे राजन्निति कौतुकात्, यद्वा, राजन्तः कमनीया ये नानाविधा हास्यरसास्तैः, ताण्डवैर्नृत्यैरुपतस्थुरसेवन्त । तदेवोक्तपोषण्यायेनाह—मृदंगेत्यादिना जगुरित्यन्तेन । यद्वा, ताण्डवैरभिनयैर्नटाचार्य्या उपतस्थुः, नर्तक्यश्च मृदंगादिस्वनैर्ननृतुर्जगुश्च; मुरजो मृदंगभेदः ॥ १९-२० ॥ वादिनो वेदव्याख्यानिपुणाः, किंवा वादपरा इति वेदार्थाभिज्ञतोक्ता; कथा अकथयन् इतिहासपुराणवाचनादिना ॥ २१ ॥ एवमुपलक्षणतया पौर्व्वाह्णिकचरितमुक्त्वा कदाचित्तादृशसमय एव कश्चिद् राजदूत आगत इति प्रसंगसाजात्यादाह—तत्रेति । अपूर्व्वदर्शनोऽदृष्टपूर्व्वः, हे राजन्निति प्रसंगान्तरेण रसविशेषात्; यद्वा, राज्ञामासद्दूतत्वादिना राजमानः; यद्वा, अकारप्रश्लेषेण अराजन्निति स्वामिनां तेषां महादुःखेन म्लायमान इत्यर्थः । भगवते विज्ञापित इति सर्व्वैश्वर्य्यप्रकटनेन तस्मिन् द्वारपालानां तादृशव्यवहारो युक्त एवेति भावः । यद्वा, भगवते सर्व्वज्ञायापि विज्ञापितः सन्, यद्वा, पश्चात्तदाज्ञया प्रवेशितश्च ॥ २२ ॥ कृष्णाय सर्व्वसुखप्रदाय, यतः परेशाय साक्षात्परमेश्वराय; यद्वा, कृष्णाय साक्षाद्भगवते, अतः परेशाय सर्व्वशक्तिमते, अतएवावेदयत्, निभृतं राजभिर्विलिख्य दत्तया विज्ञप्तिपत्रिकया ॥ २३ ॥ सन्नतिमत्यन्तमम्रताम्; ते तेन जरासन्धेन रुद्धा आसन्, अन्यत्तैर्व्याख्यातम् । तत्र च ये सन्नतिं न ययुस्तेन हेतुना, ये जरासन्धनिरुद्धा आसन्निति, अथवा के ते राजान इत्यपेक्षायामाह—ये चेति । अर्थः स एव । रोधने प्रयोजनं चोक्तं सभापर्व्वणि श्रीयुधिष्ठिरं प्रति श्रीभगवतैव-'स हि राजा जरासन्धो यियक्षुर्वसुधाधिपैः । महादेवं महात्मानमुमापतिमरिन्दम ॥" इति ॥२४॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्रेति । तत्र तदा हे राजन् ! उपमन्त्रिणः परिहासकाः हास्यरसैर्विभुं श्रीकृष्णम् उपतस्थुः तथा पृथक् स्वस्थ समुदायैः नटाचार्यास्ताण्डवादिभिः ॥ १९ ॥ मृदङ्गादयः प्रसिद्धाः दरः शङ्खः तेषां स्वनैः ननृतुर्जगुश्च सूतादयः तुष्टुवुः तत्र मागधाः वंशावलीपाठकाः बन्दिनः स्तुतिपाठकाः ॥ २० ॥ तत्रस्थाः सभायां स्थिताः पुण्यं यशो येषां तेषां पूर्वेषां राज्ञां कथाः कथयामासुः ॥ २१ ॥ एवमाह्निकमनुवर्णितम् । अथ जरासन्धनिरुद्धराजसन्देशहरागमनं प्रस्तौति—तत्रेति । इत्थं नीयमानादिनानाम् एकस्मिन् दिने हे राजन् ! अपूर्वदर्शनः न पूर्वं दर्शनं यस्य सः एकोऽसहायः कश्चित्पुरुष आगतः प्रतिहारैर्द्वारपालैर्भगवते ज्ञापितः ततः प्रवेशितश्च ॥ २२ ॥ स इति । स आगतः पुरुषः कृताञ्जलिर्बद्धोऽञ्जलिर्येन सः जरासन्धेन यो निरोधः तत्प्रभवं राज्ञां दुःखमावेदयत् ॥ २३ ॥ येचेति । तस्य जरासन्धस्य दिग्विजये ये ये नृपाः सन्नतिं नम्रतां न ययुः न प्रापुः ते द्वेऽयुते नृपाः गिरिव्रजसंज्ञके दुर्गे तेन जरासन्धेन बलान्निरुद्धाः आसन् तेषां राज्ञामिति पूर्वेण सम्बन्धः ॥ २४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

नानाविधैः हास्यैः हसनविषयैः रसैः रागजनकवचनैः ॥ १९ ॥ नटादयो ननृतुः सूतादयो जगुः ॥ २० ॥ गानानान्तरं कः प्रसङ्ग इत्यत्राह—तत्रस्था इति । ष्ठा गतिनिवृत्ति वाचिना शयित्वमुपतिष्ठत्वं वा सूच्यते अत्र तयोः को विवक्ष्यत इत्यत उक्तम् आसीना इति ॥ २१ ॥ तत्र तस्यामवस्थाम् ॥ २२ ॥ जरासन्धेन कृतोपरोधो निरोधः तस्माज्जातम् ॥ २३ ॥ गिरिव्रजे नगरे ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृता सारार्थदर्शिनी

उपमन्त्रिणः परिहासकाः नटाचार्य्याश्च ऐन्द्रजालिकाद्याः पृथक् स्वस्वसमुदायैः ॥ १९ ॥ ते ते तत्र ननृतुर्जगुश्च । सूताद्यास्तुष्टुवुरेव ॥ २० ॥ ब्राह्मणा ब्रह्म वेदमाहुः वादिनो वदनचतुराः ॥ २१–२३ ॥ जरासन्धनिरोध एव कथमित्यमेपेक्षायामाह—ये चेति । सन्नतिं करदानादिना नम्रत्वेन तदीयत्वस्वीकारं ते प्रसह्य बलात् गिरिव्रजसंज्ञके दुर्गे तेन जरासन्धेन रुद्धा आसन् कियन्तस्ते इत्यपेक्षायामाह द्वे अयुते विंशतिसहस्राणि अत्र लक्षसङ्ख्यराजबलिभिः महाभैरवस्य यजने तस्य कामना इति कथा भारतादिषु प्रसिद्धा ॥ २४ ॥

गूढार्थदीपिनी

तत्रेति युग्मम् । उपमन्त्रिणः परिहासका विदूषका इत्यर्थः हास्यरसैः विभुं श्रीकृष्णमुपतस्थुः सेवितवन्तः । नटाचार्याः मृदङ्गादिस्वनैः सह ताण्डवनृत्यैः उपतस्थुः नर्तक्यश्च पृथक् पृथक् स्वसमुदायैः सह ननृतुः जगुश्च । सूतादयश्च तुष्टुवुरिति योज्यम् । दरः शंखः ॥ १९–२० ॥ तत्र सभायामासीनाः केचित् ब्राह्मणा वेदज्ञा ब्रह्म वेदमाहुः मन्त्रान् व्याख्यातवन्तः । अन्ये वादिनश्च वदनचतुराः कथाः अकथयन् पुण्ययशसां नलादीनाम् । 'पुण्यश्लोको नलो राजा' इत्युक्तेः ॥ २१ ॥ अपूर्वदर्शनः अदृष्टपूर्वः पुरुषः । प्रतीहारैः द्वारपालैः भगवते विज्ञापितः । तदाज्ञया अन्तःप्रवेशितश्च ॥२२॥ कृष्णाय कृष्णं प्रसादयितुम् ॥२३॥ ये नृपाः सन्नतिं नम्रतापूर्वकं साहाय्यं न ददुः तेन जरासन्धेन गिरिव्रजे दुर्गे निरुद्धाः आसन् । द्वे अयुते विंशतिसहस्राणि अष्टौ शतानीति अनुक्तमपि ज्ञेयमत्र अग्रे वक्ष्यमाणत्वात् ॥ २४–२५ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र मृदङ्गादिस्वनैः तदनुसारेण नटा नर्तक्यश्च ननृतुर्जगुश्च सूतादयश्च स्वस्वकर्मणा तुष्टुवुः ॥ २० ॥ तत्र सभायामासीना केचिद्ब्रह्मवादिनः उभयब्रह्मवादिनः ब्राह्मणाः आहुः उभे ब्रह्मणीति कर्मपदाध्याहारः केचिद्ब्राह्मणास्तु राज्ञां कथाश्च अकथयन् कथयामासुः ॥ २१–२३ ॥ तेन जरासन्धेन गिरिव्रजे ये रुद्धा आसन् तेषां दुःखमावेदयदित्यन्वयः ॥ २४ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उपमन्त्रिण इति पाठे विदूषका इत्यर्थः । तत्राथ मन्त्रिण इति पाठे द्वितीयाबहुवचनम् । विभुं तथा मन्त्रिणश्च । हास्यरसैर्ह्लासासादकवचनैरुपतस्थुरुपासाञ्चक्रुः । नटाचार्य इतरनटशिक्षकास्तद्गुरवो नर्तक्योऽप्सरसश्च ताण्डवैः, सममुपतस्थुः ॥ १९ ॥ मृदङ्गः किञ्चिन्महान् मुरजः किञ्चित्सङ्कुचितमुखस्तद्विशेषः । मृदङ्गा मुरजाभेदा इत्यमरः । मृदेवाङ्गं यस्य स मृदङ्गो घटवाद्यं वा । तालस्तलसम्बन्धी दरः शङ्खश्च तेषां स्वनैः । तालतलेति पाठे तालं कांशस्य वाद्यभाण्डम् । वाद्यभाण्डे तु कांशस्य तालमिति विश्वः । नटादयो ननृतुर्मन्थ्यादयस्तुष्टुवुः ॥ २० ॥ तत्रस्थाः सुप्सुपेति समासः । ब्राह्मणा ब्रह्मवादिन आसीनाश्च पुण्ययशसां पूर्वेषां राज्ञां कथाश्चाकथयन् ॥ २१ ॥ अपूर्वदर्शनो न विद्यते पूर्वं दर्शनं यस्य सः । नूतनः कदाऽप्यदृष्टः कश्चित्पुरुष आगतः । प्रतीहारैः प्रतिहारैः । प्रतीहारप्रतिहाराविति द्विरूपकोशः । द्वारपालैर्भगवता विज्ञापितः पुनस्तदाज्ञया तैरन्तःप्रवेशितः ॥ २२ ॥ स पुरुषः परेशाय कृष्णाय नमस्कृत्य तमनुकूलयितुं कृताञ्जलिः सन् राज्ञां जरासन्धोपरोधनं तन्निरोधाज्जातं दुःखमावेदयन्निवेदयामास ॥ २३ ॥ ते च क इत्यत आह । ये त्विति । तस्य जरासुतस्य दिग्विजये ये सन्नतिं प्रावण्यं नाययुर्न गतवन्तस्ते तेन जरासन्धेनायुते द्वे सहस्रे चेत्याहृत्य द्वाविंशतिसहस्राणि तथाऽष्टौ शतानीति शेषे तदुपर्यष्टशतसङ्ख्यालाभः । वक्ष्यति चैवम् । प्रसह्य बलात्कारेण गिरिव्रजे तन्नामके दुर्गे निरुद्धा आसंस्तेषां राज्ञामित्यन्वयः ॥ २४ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

ततो धर्मफलमिव वदन् मनसः परितोषार्थमाह तत्रोपमन्त्रिण इति । उपमन्त्रिणः कौतुकिनः । राजन्निति ज्ञापनार्थं सम्बोधनम् । नानाविधा हास्यरसाः । लौकिकीभाषेयं धर्मे चित्तोद्वेगनिवारणार्थमुक्ता । विभुत्वादप्रेरिता अपि तथा उपतस्थुः । न केवलं हास्यरसा एव, किन्तु शृङ्गारादयोऽपि विभावादिभिः प्रकाशिता इत्याह उपतस्थुरिति । नटाः रसाभिनयनकर्तारः

युद्धस्वाङ्गप्रदर्शकाः। स्त्रियो नर्तक्यः लास्यप्रदर्शिकाः। **उभयविधा अपि** सभात्वात् **ताण्डवैरेव पृथक् पृथक्** उपतस्थुः। **नरानार्यं** इति **वा** पाठः ॥ १९ ॥ भगवतः सभायां गमनमुत्सवरूपमिति ज्ञापयितुं वाद्यमाह **मृदङ्गे**ति। **बड्विधानां स्वनैः** सह ननृतुर्जगुस्तुष्टुवुः। स्तोत्रे नटादयो नात्यन्तमभिज्ञा इति सूतादीन्निर्दिशति **सूतमागधवन्दिन** इति ॥ २० ॥ लौकिकोत्सवमुक्त्वा तस्य **धर्मफलत्वं** ज्ञापयितुमाह **तत्रस्था ब्राह्मणाः केचि**दिति। ते हि सभासदः सभायामधिकृताः धर्मनिर्णयार्थम्, यतो ब्रह्मवादिनः सर्वज्ञाः। अन्ये हि धर्मं न विदुः। **केचि**दिति साधारणाः, न तु **वसिष्ठादयः**। **धर्मः** परम्परागत एव कर्तव्य इति **तादृश** एव **भगवता** क्रियत इति ज्ञापयितुं ब्राह्मणैस्तथा निरूप्यत इत्याह **पूर्वेषां पुण्ययशसामि**ति। इक्ष्वाकुप्रभृतीनां धर्मे यादृशं वर्तनम्। पुण्यं यशो येषामिति लोकेऽप्यविगीतानाम्। **चकाराद्ब्राह्मणादीनामपि** कथाः धर्मोपयुक्ताः अकथयन्। यतो धर्मवार्तैव सभायाम्, नत्वन्यवार्तेति ज्ञापितम् ॥ २१ ॥ यदर्थमेषा धर्मकथा निरूपिता, तं सात्त्विकानां निरोधं निरूपयितुं प्रस्तावनामाह **तत्रैकः पुरुष** इति **त्रिभिः**। धर्मेणालौकिकप्रकारेण निरुद्धाः बहिः जरासन्धद्वारा च उपायान्तरान्निवृत्ताः भगवन्तमेव विज्ञापयामासुः। तथापि भगवान् लोकन्यायेन लीलां करोतीति निश्चित्य दूतं प्रेषितवन्तः। तस्यागमनं निरूप्यते। **एकः** असहायः। **पुरुषः** समर्थः। सम्बोधनं ज्ञापनाय। अपूर्वं दर्शनं **यस्ये**ति अदृष्टपूर्वः। भिन्नप्रक्रमार्थं निरूपितः। स पूर्वं दौवारिकैर्विशेषेण ज्ञापितः। राजधर्म एवै। ततो भगवताभ्यनुज्ञातः प्रतीहारैः प्रवेशितः बहुभिरेकः। नीतिरेषा। तस्य कृत्यमाह **स नमस्कृत्य** इति। कृष्णाय, न तु राज्ञे, अलौकिकत्वात्। तत्र हेतुः **परेशाय**। कालादृष्टादीनामपि नियामकाय। न हि राज्ञा कालादयो निवारयितुं शक्याः। **कृताञ्जलि**रिति। दूतस्यापि सात्त्विकत्वं निरूपितम्। राजत्वाद्दुःखानुभवः। अत एव जरासन्धनिरोधादेव उत्पन्नं दुःखं भगवते आवेदयत्। भगवद्भक्तानां दुःखमनुचितमित्याशङ्क्य भक्तिविरुद्धधर्मसम्भवात् तेषां दुःखमिति वक्तुमभिमानमाह **ये च दिग्विजय** इति। नृपत्वात्सम्यङ्नतिं नम्रतां न ययुः। न तु भगवदीया इति। भगवद्विमुखो जरासन्ध इति। अतोऽन्तर्यामिप्रेरणया प्रसह्य तेनैव रुद्धाः द्वे अयुते गिरिव्रजे आसन्। अहन्ताया ममतायाश्च चतुर्दश चतुर्दश स्थानानीति सहस्रशः शतशश्च तेषां वृत्तय इति विंशतिसहस्राण्यष्टशतानि च सङ्ख्या भवति। अष्टशतान्युपसंहारे निरूपितानि। गिरीणां व्रजो यत्रेति कूटवत् पर्वताः परितो दुर्गत्वाय निरूपिताः ॥ २४ ॥

श्रीसुबोधिनी-सारः

तत्र स्थाने उपमंत्रिणः परिहासका नानाहास्यरसैर्विभुं कृष्णमुपतस्थुः भेजुः नटानामाचार्या नर्तक्यो वेश्याः पृथक् तांडवैरुपतस्थुः मृदंगादिशब्दैः सूतमागधबंदिनो ननृतुर्जगुः तुष्टुवुः ॥ १९-२० ॥ तत्र सभायामासीना वेदवादिनो ब्राह्मणाः केचित् पुण्यं यशो येषां तेषां पूर्वेषां राज्ञां कथा अवर्णयन् ॥ २१ ॥ तत्र स्थानेऽपूर्वदर्शनो नवीन एकः पुरुष आगतः प्रतीहारैर्द्वारपालैर्भगवते श्रीकृष्णाय विज्ञापितोनंतरं प्रवेशितः ॥ २२ ॥ परेषां ब्रह्मादीनामपीशाय नियंत्रे कृष्णाय नमस्कृत्य स पुरुषो राज्ञां जरासंधनिरोधाज्जातं दुःखमावेदयत् ॥ २३ ॥ ये च नृपा दिशां विजये तस्य सन्नतिं प्रणतिं न ययुर्न जग्मुस्ते द्वे अयुते विंशतिसहस्राणि अष्टशतानि चेत्यनुक्तमप्यत्र योज्यम् "अयुते द्वे शतान्यष्टौ" इत्यग्रे निरूपणात्। प्रसह्य बलात् तेन जरासंधेन गिरिव्रजे पर्वतदुर्गे निरुद्धा आसन् ॥ २४ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तत्रोपविष्ट इत्यस्याभासे। **सुखोपवेशनमाहे**ति। भगवतो भानस्य स्वतःसिद्धत्वात्तदनुवादेनोपवेशनमेव वाक्यार्थ इति भावः। अत एव बभाविति पदस्याभानशङ्कानिवृत्त्यर्थकत्वमेव वक्ष्यन्ति। **व्याख्याने। दिवीत्याधिभौतिक**मिति। आधिभौतिकं रूपं ज्योतिश्चक्रे तिष्ठति, न तु स्वर्गे इत्यर्थः। **परितोष(र्थ)माहे**ति। अयं **वाक्यतात्पर्यार्थ** उक्तः, शक्यार्थस्तूपस्थानमेव। **तत्रस्था** इत्यस्याभासे। **धर्मफलत्व**मिति। **धर्मः** फलं यत्र **तादृशार्थत्वं** धर्मार्थत्वमित्यर्थः। **ये च दिग्विजये** इत्यत्र। **अहन्ते**ति। दशेन्द्रियान्तःकरणचतुष्टयमेवं चतुर्दशस्थानान्यहन्ताया **ममतायाश्चे**त्यष्टाविंशतिः। तथा च निरोध्येषु तावत्संख्यया वृत्तिसहिताहन्ताममतास्थानत्वादेते निरुद्धा इत्यभिमानस्य निरोधहेतुत्वं सूचितम्। पूर्वश्लोके **दुःखजनकत्वेन** जरासन्धनिरोधस्योक्तत्वादत्र निरोधानुवादेन तद्धेत्वभिमाननिरूपणं वाक्यार्थ इत्याशयेनाभासे तथोक्तम्।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'राज्ञामेवमेवोत्सवो भवति, तं तु त्वं जानास्येव' इति **सूचयन्** सम्बोधयति—**राजन्नि**ति। **तत्र सभायामुपमन्त्रिणः** परिहासका नानाहास्यरसैर्विभुं कृष्णमुपतस्थुः सेवितवन्तः प्रसन्नं कृतवन्तः। तथा मृदङ्गादिस्वनैः सह नटानामाचार्याः पृथक् स्वस्वसमुदायेन ताण्डवैः नृत्यविशेषैः तमुपतस्थुरित्यन्वयः। **तथा** नर्तक्यश्च पृथक् मृदङ्गादिस्वनैः सह ननृतुः जगुश्चेत्यन्वयः। **तथा सूतादयस्तं तुष्टुवुश्च**। तत्र सूताः पौराणिकाः। मागधाः वंशप्रशंसकाः। बन्दिनस्तावकाः ॥ १९-२० ॥ तत्र सभायामासीनाः केचिद्ब्राह्मणा **ब्रह्म** आहुः मन्त्रान् व्याचक्षतेत्यर्थः। अन्ये च वादिनो वदनचतुराः सूताः पुण्यं यशो येषां पूर्वेषां राज्ञां कथाः **अकथयन्**। 'तत्रस्था' इति पाठे तु ब्रह्मवादिन इति एकमेव पदम्, कथा अकथयन्नित्येक एवान्वयश्च ॥ २१ ॥ एवं

प्रतिदिनं क्रियमाणमुक्त्वा कस्मिंश्चिद्दिवसे जातं वृत्तान्तान्तरमाह—तत्रेति । हे राजन् ! तत्र सभामध्ये न पूर्वं दर्शनं यस्य एवंभूतः कश्चिदेकः पुरुष आगतः प्रतीहारैः द्वारपालैर्भगवते ज्ञापितः ततस्तदाज्ञयान्तःप्रवेशितश्च स कृष्णाय नमस्कृत्य कृताञ्जलिः सन् जरासन्धनिरोधजं राज्ञां दुःखमावेदयदिति द्वयोरन्वयः । 'तस्मै निवेदनेन किम्' इत्यपेक्षायां 'तद्विमोचने तस्यैव सामर्थ्यात्' इत्याशयेनाह—परेषां कालकर्मादीनामपीशाय नियामकायेति ॥ २२-२३ ॥ 'के ते नृपाः कथं च ते निरुद्धा' इत्यपेक्षायामाह—ये चेति । तस्य जरासन्धस्य दिग्विजये ये च नृपाः संनतिं नम्रतां न ययुस्ते द्वे अयुते द्वे शतान्यष्टाविंशत्यपि ज्ञेयम् गिरिव्रजसंज्ञके दुर्गे तेन जरासन्धेन प्रसह्य बलान्निरुद्धा आसन्नित्यन्वयः ॥ २४ ॥

अन्वितार्थप्रकाशिका

तत्रेति युग्मम् ॥ हे राजन् ! तत्र सभायामुपमन्त्रिणः परिहासका नानाहास्यरसैर्विभुं कृष्णमुपतस्थुः सेवितवन्तः । तथा मृदङ्गादीनां दरस्य शङ्खस्य च स्वनैः सह नटानामाचार्याः पृथक् स्वस्वसमुदायेन ताण्डवैः नृत्यविशेषैस्तमुपतस्थुः । नर्तक्यश्च पृथक् ननृतुः जगुश्च । तथा सूतमागधबन्दिनः तुष्टुवुः ॥ १९-२० ॥ तत्राहुरिति ॥ तत्र सभायामासीनाः केचिद् ब्राह्मणा ब्रह्म आहुः स्म मन्त्रान् व्याचक्षतेत्यर्थः । अन्ये च वादिनो वदनचतुराः सूताः पुण्यं यशो येषां तेषां पूर्वेषां राज्ञां कथाः अकथयन् । तत्राहुरित्यत्र तत्रस्था इति पाठे च ब्रह्मवादिन इति एकमेव पदम् एकवाक्यता च ॥ २१ ॥ तत्रैक इति ॥ हे राजन् ! तत्र सभामध्ये न पूर्वं दर्शनं यस्य एवंभूतः कश्चिदेकः पुरुष आगतः । प्रतीहारैः द्वारपालैर्भगवते विज्ञापितः ततस्तदाज्ञयाऽन्तः प्रवेशितश्च ॥ २२ ॥ स इति ॥ पुरुषः परेषां कालादीनामीशाय नियामकाय कृष्णाय कृष्णमनुकूलयितुं नमस्कृत्य कृताञ्जलिः सन् जरासन्धनिरोधजं राज्ञां दुःखं दुःखसूचकं वचनमावेदयत् ॥ २३ ॥ ये चेति ॥ तस्य जरासन्धस्य दिग्विजये ये नृपाः संनतिं नम्रतां न ययुस्ते द्वे अयुते विंशतिः सहस्राणि शतान्यष्टावित्यपि ज्ञेयम् । अग्रे तथोक्तेः गिरिव्रजसंज्ञके दुर्गे तेन जरासन्धेन प्रसह्य बलान्निरुद्धा आसन् । अत्र लक्षसंख्यराजबलिभिर्महाभैरवपूजाकामनयेति भारतादौ प्रसिद्धम् ॥ २४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उपमंत्रिण उपहासकाः पृथक् पृथक् उपतस्थुः सिषेविरे ॥ १९ ॥ दरःशंखः ॥ २०-२१ ॥ प्रतिहारैर्विज्ञापितः प्रवेशितश्च ॥ २२-२३ ॥ संनतिं प्रणामं । कर्तुमितिशेषः गिरिव्रजे गिरिव्रजाख्ये दुर्गे । प्रसह्यबलात् । रुद्धाः आसन् । तेषां दुःखमावेदयदिति पूर्वेणान्वयः ॥ २४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्रेति । हे राजन्, तत्र तदा, उपमन्त्रिणः परिहासकाः, नानाहास्यरसैः, विभुं श्रीकृष्णं, उपतस्थुः परिचेरुः । तथा नटाचार्याः पृथक् स्वस्वसमुदायैः सह, उपतस्थुः । नर्त्तक्यः ताण्डवैः सह, पृथक् उपतस्थुः ॥ १९ ॥ मृदङ्गेति । तत्र नटादयः, मृदङ्गवीणामुरजवेणुतालदरस्वनैः, ननृतुः जगुश्च । सूतमागधबन्दिनः तुष्टुवुः । तत्र सूताः पुराणवार्त्ताप्रवक्तारः, मागधा वंशावलीपाठकाः, बन्दिनः स्तुतिपाठकाः ॥ २० ॥ तत्रेति । तत्र सभायां, आसीनाः सम्यगुपविष्टाः, केचित् ब्राह्मणाः, ब्रह्म वेदमन्त्रान्, आहुर्व्याचक्षन्तः, केचित्, वादिनो वदनचतुराः, ब्राह्मणाः, पुण्ययशसां पवित्रकीर्त्तीनां, पूर्वेषां राज्ञां, कथाश्च, अकथयन् ॥ २१ ॥ एवमादिकमुपोद्घाताय वर्णयित्वाऽथ जरासंधसंरुद्धराजसंदेशहरागमनं प्रस्तौति । तत्रेति । तत्र सभायां, हे राजन्, अपूर्वं दर्शनं यस्य सः अपूर्वदर्शनः, एकोऽसहायः, पुरुषः कश्चित्पुमान्, आगतः । प्रतीहारैर्द्वारपालैः, भगवते, विज्ञापितः, प्रवेशितः । भगवदाज्ञयेति शेषः ॥ २२ ॥ स इति । सः पुरुषः, परेशाय परमेश्वराय, कृष्णाय, नमस्कृत्य, कृताञ्जलिः सन्, राज्ञां जरासंधेन यो निरोधस्तस्माज्जातं, यत् दुःखं, तत् आवेदयत् निवेदितवान् ॥ २३ ॥ ये चेति । तस्य जरासंधस्य, दिग्विजये, ये नृपाः, संनतिं च सम्यक् नमनमपि, न ययुः, ते द्वे अयुते विंशतिसहस्रसंख्याकाः नृपाः, गिरिव्रजे गिरिव्रजसंज्ञके दुर्गे, प्रसह्य, तेन जरासंधेन, रुद्धाः आसन्, तेषां राज्ञामिति पूर्वेण संबन्धः ॥ २४ ॥

कृष्णप्रिया

परीक्षित् ! सभा में विदूषकलोग विभिन्न प्रकार के हास्यविनोद से, नटाचार्य अभिनय से और नर्तकियाँ कलापूर्ण नृत्यों से अलग-अलग अपनी टोलियों के साथ भगवान् की सेवा करतीं ॥ १९ ॥ उस समय मृदङ्ग, वीणा, पखावज, बाँसुरी, झाँझ और शङ्ख बजने लगते और सूत, मागध तथा वंदीजन नाचते-गाते और भगवान् की स्तुति करते ॥ २० ॥ कोई-कोई व्याख्याकुशल ब्राह्मण वहाँ बैठकर वेदमन्त्रों की व्याख्या करते और कोई पूर्वकालीन पवित्रकीर्ति नरपतियों के चरित्र कह-कहकर सुनाते ॥२१॥ एक दिन की बात है, द्वारकापुरी में राजसभा के द्वारपर एक नया मनुष्य आया । द्वारपालों ने भगवान्

को उसके आने की सूचना देकर उसे सभाभवन में उपस्थित किया ॥ २२ ॥ उस मनुष्य ने परमेश्वर भगवान् श्रीकृष्ण को हाथ जोड़कर नमस्कार किया और उन राजाओं का, जिन्होंने जरासन्ध के दिग्विजय के समय उसके सामने सिर नहीं झुकाया था और बलपूर्वक कैद कर लिये गये थे, जिनकी संख्या बीस हज़ार थी, जरासन्ध के बंदी बनने का दुःख श्रीकृष्ण के सामने निवेदन किया ॥ २३-२४ ॥

[1]कृष्ण कृष्णाप्रमेयात्मन् प्रपन्नभयभञ्जन । वयं त्वां शरणंयामो भवभीताः पृथग्धियः[2] ॥ २५ ॥

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं[3] त्वदुदिते भवदर्चने स्वे ।
[4]यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥ २६ ॥

लोके[5] भवाञ्जगदिनः कलयावतीर्णः सद्रक्षणाय खलनिग्रहणाय चान्यः[6] ।
कश्चित् त्वदीयमतियाति निदेशमीश किं वा जनः स्वकृतमृच्छति तन्न विद्मः ॥ २७ ॥

स्वप्नायितं नृपसुखं परतन्त्रमीश शश्वद्भयेन मृतकेन धुरं वहामः ।
हित्वा [7]तदात्मनि सुखं [8]त्वदनीहलभ्यं क्लिश्यामहेऽतिकृपणास्तव माययेह[9] ॥ २८ ॥

तन्नो भवान् प्रणतशोकहराङ्घ्रियुग्मो[10] बद्धान् वियुङ्क्ष्व [11]मगधाह्वयकर्मपाशात् ।
यो भूभुजोऽयुतमतङ्गजवीर्यमेको बिभ्रद् रुरोध भवने [12]मृगराडिवावीः ॥ २९ ॥

यो वै त्वया द्विनवकृत्व उदात्तचक्र भग्नो मृधे खलु भवन्तमनन्तवीर्यम् ।
जित्वा नृलोकनिरतं [13]सकृदूढदर्पो युष्मत्प्रजा [14]रुजति [15]नोऽजित तद् विधेहि ॥ ३० ॥

कर्बमक्षना

अन्वयः—हे कृष्ण ! हे कृष्ण ! हे अप्रमेयात्मन्, प्रपन्नभयभञ्जन, भवभीताः, पृथग्धियः, वयम्, त्वाम्, शरणं, यामः ॥ २५ ॥ अयम्, लोकः, विकर्मनिरतः, कुशले, त्वदुदितेभवदर्चनेस्वे, कर्मणिप्रमत्तः, यः, तावद्, बलवान्, भवान्, अस्य, जीविताशाम्, सद्यः, छिनत्ति, अनिमिषाय, तस्मै, नमः, अस्तु ॥ २६ ॥ लोके, इनः, भवान् , सद्रक्षणाय, खलनिग्रहणाय, कलया, जगद्, अवतीर्णः, हे इशान, च, अन्यः, कश्चित्, ईश, तव, निदेशम्, अतियाति, किम्, जनः, स्वकृतम्, एच्छति, तत्, न, विद्मः ॥२७॥ ईश ! परतन्त्रम्, नृपसुखम्, स्वप्नायितम्, शश्वत्, भयेन, मृतकेन, धुरम्, वहामः, त्वदनीहलभ्यम्, तद्, आत्मनि, सुखम्, हित्वा, अतिकृपणाः, इह, तव, मायया, क्लिश्यामहे ॥ २८ ॥ तत्, प्रणतशोकहराङ्घ्रियुग्मः, भवान्, मगधाह्वयकर्मपाशात्, बद्धान्, वियुङ्क्ष्व, यः, एकः, अयुतमतङ्गजवीर्यम्, बिभ्रद्, मृगराट्, अवीः, इव, भवने, रुरोध ॥ २९ ॥ उदात्तचक्र ! यः, वै, त्वया, द्विनवकृत्वः, मृधे, भग्नः, नृलोकनिरतम्, अनन्तवीर्यम्, भवन्तम्, सकृत्, जित्वा, ऊढदर्पः, नः, युष्मत्प्रजाः, रुजति, तद्, विधेहि ॥ ३० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृष्णकृष्णेति षट्च्छ्लोको राज्ञां विज्ञप्तिस्तत्र प्रथमेन शरणाश्रयणं त्रिभिर्भयानुवादो द्वाभ्यां प्रार्थनमिति ॥ २५ ॥ पृथग्दर्शिनो लोकस्य भवभयं विवृण्वंतो नमंति । लोक इति । विकर्म निषिद्धं काम्यं च तस्मिन्निरतरां रतः । स्वे कुशले धर्मे । भवतोऽर्चने त्वयोदिते पंचरात्रे । सामान्यतश्च गीतासु । "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥" इति । प्रमत्तोऽनवहितो यावदयं लोकस्तावदेवास्य लोकस्य यः सद्यो जीविताशां छिनत्ति तस्मै तुभ्यमनिमिषाय कालात्मने नम इति ॥ २६ ॥ सेयं लोकस्य गतिर्वयं तु त्वद्भक्ता अतोऽस्माकं कुत एतद्दुःखमापन्नमित्याश्चर्यणाहुः । लाक इति । भो ईश । जगत इन ईश्वरः त्वयि सद्रक्षणार्थमवतीर्णेऽपि चेदस्माकं दुःखं स्यात्तर्हि किमन्यः कश्चिज्जरासंधादिस्त्वदाज्ञामपि लंघयति । किंच त्वया रक्ष्यमाणोऽपि जनः स्वकर्मजं दुःखं प्राप्नोत्येवेति न विद्मः न चैतदुभयमपि युक्तमिति भावः ॥ २७ ॥ किं दुःखं तदाहुः । स्वप्नायितमिति । स्वप्नवज्जातं नृपसुखं नृपोचितं सुखम् । यतः । परतंत्रं विषय-

---

१. राजान ऊचुः—त. पु. मू. । २. दृशः—वीर. । ३. ण्यपि—प्रा. पा. । ४. यास्ता—विज. । ५. त्वमीश जगतः—वीर. ; कालो भवान् जगदिदं—विज. ; भवान् भगवतः—च. पु. टि. । ६. चाद्य—वीर. ; चान्यत्—विज. । ७. यदा—विज. । ८. तदनीह—विज. । ९. येति—विज. । १०. युग्मबद्धा—वीर. ; युग्मो रुद्धान्—विज. । ११. मगधाधिप—विज. । १२. हिवाजान्—च. पु. टि. । १३. स तु रूढ—विज. । १४. क्षिपति—विज. । १५. नोऽजितशं—वीर. ; चाशु च तद्—विज. ।

साध्यम् । किंच संप्रति शश्वद्भयं यस्मिस्तेन मृतकतुल्येन शरीरेण धुरं पुत्रदारादिचिंतां केवलं वहामः । अहो कष्टं नः ये वयमितः पूर्वमेव निष्कामाः संतस्त्वां नाश्रिता इत्याहुः । हित्वेति । त्वत् त्वत्तो यदनीहैर्निष्कामैर्लभ्यमात्मनि स्वतः सिद्धं सुखं तद्धित्वा क्लिश्याम इति ॥ २८ ॥ त्वन्मायाकृतं कर्मबंधं त्वमेव निवर्तयेति प्रार्थयंते । तन्न इति । वियुंक्ष्व मोचय । मागधा जरासंधस्तत्संज्ञकात्कर्मपाशात् । भवद्भिरेव विक्रम्य ततो निर्गम्यतामिति चेदत आहुः । य इति । एक एवायुतमतंगजानां वीर्यं बिभ्रत्सन्स्वभवने भूभुजोऽस्मान् रुरोध । सिंहो मेषीरिव ॥ २९ ॥ किंच युष्मदीया वयमित्यस्मानधिकं बाधत इत्याहुः । यो वा इति । हे उदात्तचक्र उद्यतसुदर्शन यो वै द्विनवकृत्वोऽष्टादशवारांस्त्वया सह मृधे वर्तमाने तत्र सप्तदशकृत्वस्त्वया खलु भग्नः पराजितः पश्चादनंतवीर्यमपि नृलोके निरतं नरशरीरविनोदं भवंतं सकृज्जित्वोढदर्पः प्राप्तगर्वो युष्मत्प्रजा नो रुजति पीडयति तत्तत्र यद्युक्तं तद्विधेहीत्यर्थः ॥ ३० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

षण्णां श्लोकानां समाहारः षट्च्छ्लोकी । विज्ञप्तिः प्रार्थना । तत्र षट्सु ॥ २५ ॥ पृथग्दर्शिनो यथार्थज्ञानशून्याः । तस्मिन्निषिद्धे काम्ये च ॥ २६ ॥ अहो त्वद्भक्तानामीदृशी गतिरित्युपालभंत इवाहुः—सेयमित्यादिना । किमत्र संशये वितर्के वा । तदुभयं त्वदाज्ञालंघनम्, त्वद्रक्ष्यमाणस्य दुःखं चेत्युभयम् । किञ्च लोके भवानिति जगदिनः साक्षात्सर्वेश्वर एव कलयांशेन श्रीबलदेवेन अन्यो निगृह्यमाणः खलः किं कस्मादन्यस्मात्कारणादित्यर्थः । हे ईशेति । जरासंधादेरपि त्वदधीनत्वं तज्जनस्यापि कर्माधीनत्वं सूचितम्, तद्वयं न विद्मः । अन्यत्तैः । तत्र चेदस्माकमित्यस्य स्थाने जनः स्वकर्मजमिति पाठोऽसभ्यः । तथा सद्रक्षणार्थमित्यत्र चकारपातश्च ज्ञेयः ॥ २७ ॥ तद्दुःखम् । ननु राज्यसुखं तु मरणलभ्यात्स्वर्गसुखादप्यधिकमिति चेदाहुः—स्वप्नायितमिति । विषयसाध्यमपि नानंदजनकमित्याह–किं चेति । इतो जरासंधबंधात् ॥२८॥ किमिदानीमावश्यकमित्याह—त्वन्मायेति । विक्रम्य पुरुषार्थं कृत्वा । ततः पाशात् । अतोऽत्र । यो जरासंधः । मतंगजानां गजानाम् । वीर्यं पराक्रमम् । ‘अविर्नाथे रवौ मेषे’ इति मेदिनी ॥ २९ ॥ भगवत्कोपमुद्दीपयंत आहुः—किञ्चेति । यो जरासंधः । इत्यर्थ इति—यद्युक्तमित्यध्याहृत्य व्याख्येयमिति भावः ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किं तेषां वचनं तत्राह—कृष्णेति षड्भिः । कृष्ण हे स्वयं भगवन् ! वीप्सादैन्यात् स्वयं भगवत्त्वादेवाप्रमेयात्मन् सर्वातीतवैभव ! एवं सर्वोत्तमत्वेपि प्रपन्नेति अतस्त्वामेव शरणं यामः किमर्थं भवात् संसारदुःखाद्भीताः भवभयात्त्राणार्थमित्यर्थः । तद्भयं कुतः ? पृथग्धियः त्वत्तः पृथग्बुद्धयः त्वद्भक्तिरहितत्वादित्यर्थः ॥ २५ ॥ नन्वेतावन्तं कालं कथं न भजध्वम् ? कथं वा अधुना जातैतादृशबुद्धयो जाताः स्थ ? तत्राहुः—लोक इति । अस्मद्विध इत्यर्थः । कुशल इति सर्वार्थप्रदत्वं सर्वानर्थहरत्वं च स्वे इति सार्ववर्णिकस्वधर्मत्वं त्वदुदित इति अन्योदितधर्मान्तरातिक्रमित्वं भवदर्चन इति त्वदुदितधर्मान्तरातिक्रमित्वञ्च सूचितं यथैवोदितञ्च—

> “सर्वगुह्यतमं भूयः शृणु मे परमं वचः । इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितम् ।
> मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु” ॥

इत्यादि । तथापि तस्मिन् प्रमत्तः जीवितस्याशां शरणानुसन्धाननिरसनेन विकर्मतयोक्ते तद्विरुद्धकर्मणि प्रवर्तनीं कुशले च प्रमादकारिणीं दृढवाञ्छालतां न चासौ कथञ्चित् परिहर्तुं शक्येतेत्याहुः—बलवानिति । अनिमिषायेत्यनेन च तस्याः प्रमत्तता च सूचिता तस्मै नम इति तद्भयेनैवाधुना त्वद्भजनोद्यमात् यथोक्तं “मर्त्यो मृत्युव्यालभीतः पलायन्” इत्यादि ॥२६॥ किञ्च, लोके भवानिति । जगदिनः साक्षात्सर्वेश्वर एव कलया अंशेन श्रीबलदेवेन सह अन्यः अनिगृह्यमाणः खलः किं कस्मादन्यस्मात् कारणादित्यर्थः । हे ईशेति जरासन्धादेरपि त्वदधीनत्वं तज्जनस्यापि कर्माधीनत्वं सूचितं तद्वयं न विद्मः अन्यत्तैः । तत्र चेदस्माकमित्यस्य स्थाने जनः स्वकर्मजमिति पाठोऽसभ्यः तथा सद्रक्षणार्थमित्यत्र चकारपातश्च ज्ञेयः ॥ २७ ॥ तथाप्यद्यापि न वयं तव मायया सम्यक् त्यक्ता इत्याहुः स्वप्नेति । अन्यत्तैः । यद्वा तव मायया अतिकृपणाः अतिशयेन हतबुद्धयः सन्तः क्लिश्यामहे तत्र हेतुः मृतकेन स्वतोऽचेतनत्वेन तद्रूपेण देहेन या धृतां मृतकरूपं भारं वहाम इत्यर्थः । न केवलं मृतकभारवाहित्वमेव क्लेशाय तत्रान्यच्चेत्याहुः—शश्वदिति । पुनःपुनः भूतप्रेतादित इव रोगकालादितो भयं यस्मिन् तेन किमर्थं वहथ तत्राहुः नृपस्य सुखं स्वस्मिंस्तद्यथा स्यात् तत्प्राप्त्यर्थमधुनापि तां न मुञ्चाम इत्यर्थः । तदेतदतीव गर्हितमिति भावः । न च तत्सुखे वास्तवत्वमपि यतः स्वप्नायितं नचैतावत्त्वमेव दोषाय अपितु दुःखमयत्वमपीत्याहुः परतन्त्रं राज्याद्यनेकाङ्गाधीनतामयं भवत्वपि तन्नाम यद्यन्यन्महासुखं स्वतःसिद्धं न स्यादित्याहुः—हित्वेति । तत् सकलनिगमप्रसिद्धमनिर्वचनीयं परमपुरुषार्थरूपं सुखं हित्वेति न चेदं वा परतन्त्रं किन्तु स्वत एवात्मनि प्रकाशमानात् त्वत्तः सकाशादनीहैरेव भक्तैर्लभ्यमिति ॥ २८ ॥ अतोऽस्माकं परमकृपणानामनीहत्वाभावादात्मनि तत्र सिद्ध्येदिति स्वयमेव खं प्रकटयितुं तद्व्याघातकं बन्धं विमोचयेत्याहुः—

तन्न इति । तत्तस्मात् त्वन्मायाकृतकार्पण्याद्धेतोः तद्दृष्ट्वेत्यर्थः । नोऽस्मान् त्वमेव विमोचय यतो भवान् प्रणतानां शोकहरमङ्घ्रियुग्मं यस्य तथाभूतः यद्वा अकारप्रश्लेषेण न विद्यते भवः श्रेयो येषु तान् परमार्त्तानित्यर्थः । मागधेति नाममात्रेणैव जरासन्धः तत्त्वतस्त्वस्माकं कर्मपाश एवायं मूर्तिमान् तस्मादित्यर्थः । अन्यत्तैः । यद्वा अन्यथा तस्येदृशी शक्तिर्न स्यादित्याशयेनाहुः—य इति ॥ २९ ॥ हे उदात्तचक्रेति चक्रग्रहणमात्रेणैव भग्न इति भावः नृलोके निरतामिति मनुष्यलोके क्रीडापरमित्यर्थः ॥ ३० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीभगवदाज्ञया मुद्रामुन्मुच्य पत्रिकां दूतो वाचयति—कृष्णेति । हे साक्षात्परमेश्वर ! वीप्सा दैन्यात्, अतएव अप्रमेयात्मन् ! दुर्वितर्क्यतत्त्व ! किञ्च, प्रपन्नेति, अतस्त्वामेव शरणं यामः' किमर्थम् ? भवात् संसारदुःखाद्भीताः, भवभयात्त्राणार्थमित्यर्थः । तदपि कुतः ? पृथग्धियः, तत्त्वतो जीवानामैक्येऽपि शत्रु-मित्रत्वादिना भेद-दर्शिनः; किंवा अंशत्वेनात्मनस्त्वदधीनत्वेऽपि स्वतन्त्रबुद्धयः; यद्वा, त्वत्तः पृथग्बुद्धयः, त्वद्भक्तिरहिता इत्यर्थः ॥ २५ ॥ कुशल इत्यनेन स्वे स्वकीयेऽपीत्यनेन चात्मनो हितत्वादवश्यकृत्यत्वमुक्तम् । अकरणे चेश्वराज्ञातिक्रमान्महापराध एवेत्याहुः—त्वदुदित इति । तच्चानायास-साध्यं महाफलप्रदं परमसुखमयञ्चेत्याहुः—भवदर्च्चन इति । भवतां भवतो भवदीयानाञ्चार्च्चनरूपे, तथापि तस्मिन् प्रमत्तः, जीवितस्याशां मरणानुसन्धान-निरसनेन विकर्म्मणि प्रवर्त्तिनीं कुशले च प्रमादकारिणीं दृढवाञ्छालताम्, किंवा महादुष्टरोगादिना आशामपि, किमुत जीवितम्; न चासौ कथञ्चित् परिहर्त्तुं शक्यतेत्याहुः—बलवानिति । अनिमिषायेत्यनेन च तस्याप्रमत्तता सूचिता; तथा चोक्तं श्रीमुचुकुन्देन (भा० ४।२४।६६)—'त्वमप्रमत्तः सहसाभिपद्यसे' इति; अन्यत्तैर्व्याख्यातम् । यद्वा, भवभये भवरूपस्य कालस्य मुख्यकारणत्वादादौ तद्भीत्या शरणं याम इत्याशयेन कालमेव प्रणमन्ति—लोक इति, अस्मदादिः । अन्यत् समानम् ॥ २६ ॥ जगदिनः साक्षाज्जगदीश्वर एव कलया अंशेन श्रीबलदेवेन, किंवा सर्व्वशोभया निजाशेषैश्वर्य्येण सह मर्त्यलोकेऽवतीर्णः; यद्वा, सद्रक्षणाद्यर्थमवतीर्णत्वे-हेतुः—जगदिन इति, अन्यथा जगत्स्थित्यसिद्धेः; अन्योऽनिगृह्यमाणः खलः किं कस्मात् कारणादित्यर्थः । हे ईशेति—जरासन्धादेरपि त्वदधीनत्वं त्वज्जनस्यापि कर्म्माधीनत्वं सूचितम् । तद्वयं तद्द्वयकारणं न विद्मः; अन्यत्तैर्व्याख्यातम् । तत्र जन इत्यादिकं तर्हीत्यन्तं केनापि मन्दबुद्धिना अधिकं कल्पितमिति । तथा सद्रक्षणाद्यर्थमिति लेख्ये 'द्य' वर्णपातो लेखकभ्रमादिति ज्ञेयम् । अथवा निदेशमतियाति, सतः पीडयति, खलाननुगृह्णातीत्यर्थः । हे ईशेति तच्च परमेशत्वेन तव स्वातन्त्र्यात् त्वदिच्छया, किंवा जनः स्वकृतं स्वकर्म्मफलं भुङ्क्ते, जरासन्धादेस्त्वज्जनस्यापि तादृशनिजकर्म्मभोगावश्यकतयेति न विद्मः, विचारणे नैवावगच्छामः, सद्रक्षणाद्यर्थमवतीर्णस्य साक्षात् परमेश्वरस्य तत्र तवेच्छया तथा कर्म्मनिबन्धापेक्षयापि तत्तदसिद्धेरिति भावः ॥ २७ ॥ स्वप्नायितमित्यनित्यत्वं मायिकत्वञ्चोक्तम्, तेन तत्र सुखाभावः सूचितः । तद्भोगसाधनदेहस्य नित्यरोगादिना दुःखप्राप्तिश्चाह—शश्वदिति । भयं रोगादिजम्; मृतकेनेति मरणनिर्द्धारात्, किंवा घृणास्पदत्वं तस्योक्तम् । एवमुभयथा जीवने दुःखं बोधितम् । हे ईशेति त्वदीया अपि वयमिति भावः । तत् सुखं यत् त्वत् त्वदनुग्रहाल्लभ्यं स्वतत्त्वानुभवलक्षणम्, किंवा त्वद्ध्यानादिलक्षणम्; इह संसारे क्लिश्यामः, अतस्तत् बहुधा दुःखमनुभवामः, यतस्तवेश्वरस्य मायया दुर्लङ्घ्यया अतिकृपणाः परमनिर्बुद्धयः । अन्यत्तैर्व्याख्यातम्; यद्वा, नृपसुखं राज्योपभोगसुखमेव धुरं भारं वहामः, अतस्तदनिर्व्वचनीयम्, आत्मनि चित्ते स्वस्वरूपे वा, यत्त्वत्तः सुखं त्वत्पादाब्जप्रेमलक्षणम्, तद्धित्वा, इह त्वत्प्राकट्यभूषिते मर्त्यलोकेऽपि; अन्यत् समानम् । पक्षान्तरे न केवलं जरासन्धादेव, त्वन्मायया च सदैव दूयामहे, किंवा स्वदुःखेन जरासन्धं किं दूषयामः, वयं सदात्मदोषेणैव महादुःखिता इत्याहुः—स्वप्नेति; अर्थः स एव ॥ २८ ॥ तत्तस्मात् तन्मायाकृतक्लेशाद्धेतोः, नोऽस्मान्, वियुङ्क्ष्व त्वम्, यतो भवान् प्रणतानां प्रपन्नानां शोकहरमङ्घ्रियुग्मं यस्य तथाभूतः; यद्वा, अकारप्रश्लेषेण न विद्यते भावः श्रेयो येषु तान्, परमार्त्तानित्यर्थः । मगध इति आह्वयो नाममात्रं यस्य कर्म्मपाशस्य तस्मात्; नाममात्रेणैव जरासन्धः, तत्त्वतस्त्वस्माकं कर्म्मपाश एवायं मूर्त्तिमान्, तस्मादित्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, अन्यथा तस्येदृशी शक्तिर्न स्यादित्याशयेनाहुः—य इति ॥ २९ ॥ हे उदात्तचक्रेति चक्रग्रहणमात्रेणैव भग्न इति भावः । वै प्रसिद्धौ, खलु अपि, भग्नोऽपि, अनन्तवीर्य्यमपीत्येव वा युष्माकं प्रजाः पाल्यान् जनानित्यर्थः । युष्मदिति श्रीबलदेवादीनाम्, किंवा महादैन्येन सर्व्वभक्तानामपेक्षया; हे अजितेति तत्त्वतस्तदानीमपि तेनाजितत्वात्; यद्वा, कदापि केनाप्यजित ! हे सदा विजयिन्नित्यर्थः; अन्यत्तैर्व्याख्यातम् । यद्वा, नृलोकनिरतमिति क्षत्रियैः कदाचित् पलायितव्यमपीति नृलोकाचारं शिक्षयन्तमित्यर्थः । किंवा नृलोके नितरां रतं मनुष्यक्रीडापरम्, ऊढदर्पोऽभूत् ; यथा न रुजति तत्तथा विधेहि ॥ ३० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

कश्चित् किं त्वदीयं निदेशनम् आज्ञाम् अतियाति किम्वा तन्निरपेक्ष एव जनः स्वकर्मानुभवति तन्न विद्मः कर्मानुगुणमीश्वरो नियच्छतीत्यविरोधनिष्कर्षस्य दुर्विज्ञेयत्वमुक्तं भवति ॥ २७ ॥ मृतकेन शरीरेण धुरं वहामः शरीराख्यभरं वहामः ॥ २८ ॥ वियुङ्क्ष्व वियोजय अवीन् अजान् ॥ २९–३० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तेषां विज्ञप्तिमेवाह—षड्भिः। तावच्छरण्यत्वोपयुक्तगुण विशिष्टं सम्बोधयन्तः शरणं व्रजन्ति—कृष्णकृष्णेति। "कृषिर्भूवाचकः शब्दः" इत्यादिना निरुक्तेन कृष्णशब्देन निम्नोन्नतानादरेण सर्वलोकानन्दकरत्वमत एव वैषम्यनैर्घृण्यादिराहित्यञ्च विवक्षितम् अप्रमेयात्मन् अपरिच्छेद्यस्वरूप! अनेन अस्मदन्तरात्मतया ऽस्मद्दुःखं जानास्येवेति विवक्षितम् अत एव सर्वज्ञत्वञ्च प्रपन्नभयभञ्जनेत्यनेन वात्सल्यं विवक्षितं तत्त्वां शरणं रक्षणोपायं यामः व्रजामोऽध्यवस्यामः यातिरत्रगत्यर्थः प्रावण्यस्य गतिपूर्वकत्वात् गत्यर्थानां बुद्ध्यर्थत्वात् कार्पण्यद्योतनायात्मनः विशिषन्ति—भवभीताः भवशब्दोऽत्र सांसारिकमरणदुःखपरः भवाद्भीताः पृथग्दृशः (पृथग्दर्शिनः) भिन्नमतयोऽज्ञाः तद्भयनिवर्त्तनोपायानभिज्ञाः इति यावत् ॥ २५ ॥ प्रपन्नभयभञ्जनेत्यनेनाप्रपन्नजनमरणभयाभञ्जनत्वं सूचितं तदेव विवृण्वन्तः प्रणमन्ति–लोक इति। तृतीयस्कन्धे ब्रह्मस्तुतौ पठितोप्ययं श्लोको विज्ञप्तिसाम्यादर्थसौष्ठवाच्च अत्र विपर्यस्तो यो लोको जनः विकर्मणि विविधे कर्मणि वैषयिकसुखार्थं कर्मणीति यावत् निरतः त्वदुदिते पञ्चरात्रगीतादिमुखेन भवतोपदिष्टे भगवदाराधनात्मके कुशले श्रेयस्साधने स्वानुरूपे च शरणवरणादिरूपधर्मे यावत्प्रमत्तः अनवहितस्तावत्तस्य यो जीविताशां सद्यः छिनत्ति तस्मै अनिमिषाय कालात्मने तुभ्यं नमोऽस्तु ॥ २६ ॥ न ह्येतावता लोकहिताचरणैकशीलस्य तव वैषम्यमस्तीत्यभिप्रयन्त आहुः—लोक इति। भ॰ जगत ईश्वर! त्व सतां रक्षणाय खलानां दुष्टानां निग्रहाय च कलयांशेन बलभद्रेण सह अवतीर्णः जगतः आद्यः आदौ भवः कारणभूत इति वा सम्बन्धः खलनिग्रहेण विना सद्रक्षणासम्भवात्तस्यापि तादर्थ्यात् केवलहितैककारीत्वमिति भावः। यद्वा खलानां निग्रहस्यापि तेषामन्ततो हितत्वे पर्यवसानात्सोपि हितमेवेति भावः। तर्ह्येवम्भूते सति मयि कुतः कश्चित् दुःख्यतीत्यत्र कारणद्वयं सम्भावयन्तोऽन्यन्न विद्म इत्याहुः—हे ईश! कश्चिज्जनस्त्वदीयं निदेशमाज्ञामतियात्यतिक्रामति किम्वा स्वकृतं पापफलं प्राप्नोति तदुभयव्यतिरिक्तं कारणान्तरं न विद्मः अन्यतरन्निश्चेतुं न क्षमा इति वा कर्मानुरूपम् ईश्वरो नियच्छतीत्यविरोधः ॥ २७ ॥ प्रकृतं स्वदुःख निवेदयिष्यन्तस्तावदधुनैव न क्लिश्यामः किन्तु सदापीत्यभिप्रयन्त आहुः—स्वप्नायितमिति। हे ईश! नृपसुखं यन्नृपाणां सुखं तत्स्वप्नायितं स्वप्नसुखतुल्यं क्षणिकमतितुच्छञ्चेत्यर्थः तत्र हेतुत्वेन विशिषन्ति परतन्त्रमिति। परतन्त्रं कर्मायत्तम् अतोऽस्माकं बन्धनात्पूर्वमपि न सुखमिति भावः। ननु कल्याणतरनृपदेहसम्बन्ध एव सुखरूप इत्यत आहुः—शश्वदिति। शश्वत्सदा भयममित्रेभ्यो यस्य तेन मृतकेन शवतुल्येन देहेन धुरं वहाम मृतकतुल्यशरीराख्यभारं वहाम इत्यर्थः। मृतकेनेति कर्मणः करणत्वविवक्षया तृतीया यद्वा लोके मृतकेनोह्यमानेन या धूर्भारस्तादृशीं धुरं भारं वहाम इत्यर्थः। नहि शवं वहतां तत्सम्बन्धः सुखरूपः किन्तु भारापादकतया दुःखरूप एव (तथा नृप एव) तथा नृपदेहसम्बन्धोपीति भावः। अतो हे ईश! त्वत्त्वत्तः त्वदनुग्रहादित्यर्थः। यदनीहैः निष्कामैः लभ्यमात्मनि त्वयि विषये सुखं तद्धित्वा ऽत एव नितरां कृपणास्तव मायया मोहिता इति शेषः। इह लोके क्लिश्यामहे ॥ २८ ॥ प्रकृतमात्मदुःखं निवेदयन्तस्तन्निराकरणं प्रार्थयन्ते—तन्न इति। प्रणतानां शोकहरमङ्घ्रियुग्मं यस्य तथाभूतेति सम्बोधनं तानुक्तविधानधुना बद्धांश्च नोऽस्मान् मगधाह्वयो जरासन्धव्याजरूपो यः कर्मपाशस्तस्माद्विमुङ्क्ष्व वियोजय भवद्भिरेव विक्रम्य ततो निष्क्रम्यतामित्यतो मागधं विशिषन्ति—य इति। अयुतसङ्ख्यानां मतङ्गजानां वीर्यं बलमेक एव बिभ्राणः भूभुजोऽस्मान् सिंहो ऽवीः मेषीरिव भवने रुरोध निरुद्धवान् तथाभूतमगधाह्वयकर्मपाशादिति सम्बन्धः। न वयं निर्गन्तुं शक्नुम इति भावः ॥ २९ ॥ किञ्च भवदीया वयमित्यस्मान् भृशं बाधत इत्याहुः—यो वा इति। भो उदात्तचक्र उद्यतसुदर्शन! द्विनवकृत्वः अष्टादशवारं त्वया सह मृधे युद्धे प्रवृत्ते सति तत्र सप्तदशकृत्वो भग्नः पराजितः खलु पश्चादनन्तं वीर्यं यस्य तमपि नृलोकनिरतं मनुष्यचेष्टामनुवर्त्तमानमित्यर्थः। हेतुगर्भमिदम् अतस्त्वां सकृज्जित्वा प्राप्तदर्पः युष्मत्प्रजाः भवदीयान्नः अस्मान् रुजति पीडयत्यतश्शं सुखं विधेहि कुरु ॥ ३० ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पृथग्धियः यथार्थज्ञानशून्याः ॥ २५ ॥ अयथार्थज्ञानी किङ्करोति किञ्च तस्य फलमिति तत्राह लोक इति। उक्तार्थोयम् ॥ २६ ॥ भगवानत्र किमर्थमवतीर्ण इति तत्राह—काल इति। च शब्दः एवार्थे समुच्चये वा सतां रक्षणाय खलानां दुष्टानां निग्रहाय इदं जगत् अस्मिन् जगति कलायाऽवतीर्णो भगवानिति किम्वदन्ती एतद्द्वयं विना मान्यत् कार्यं किं न किमपि कुतः कालेः तत्तत्काले तत्तत्कार्यसाधनसमर्थत्वात् कः खलः कोवाऽसन्निति विशिनष्टि—कश्चिदिति। हे ईश! कश्चिज्जनस्त्वदीयं निदेशमतियाति अतिक्रामति स खलः किं सुकृतमृच्छति किंस्वित्त्वदीयं निदेशमतियाति लङ्घयति सोऽसत्किं सुकृतमृच्छतीति वयं न विद्मः एकः सुखच्छेदकं लोकम् एकः सुखकरम् ऋच्छतीति भवान्वेत्तीति वाक्यार्थः "अतिस्यादधिकार्थोक्तौ प्रशंसायामतिक्रमे" इति ॥ २७ ॥ स्वर्गादिसुखस्य निर्विषयत्वेन राज्यसुखात्परं न किमपीति केषाञ्चित्प्रवादस्तत्राह—स्वप्नायितमिति। स्वप्नायितं स्वप्नवत् क्षणिकं तदपि न स्वाधीनमित्याहुः—परतन्त्रमिति। तत्र तन्नित्यमित्याशयश्च तन्मरणतयोपेतेन मृतकेन शवकल्पेन शरीरेण राज्यधुरं वहामः इत्यस्यान्यत्किं सुखमस्तीति तर्हि तद्धानौ बह्वायासात्क्लेशः स्यादिति तत्राह—हित्वेति। यदनीहलभ्यं निवृत्तिमार्गस्थैः साध्यमात्मनि सुखं तद्धित्वा कृपणा वयं क्लिश्यामहे एवम्विधं ज्ञानमस्तिचेत् किमिति क्लेश

इत्यत उक्तं तवेति ॥ २८ ॥ किमिदानीमावश्यकं तद्वद किम्बहुसिद्धानुवादेनेति तत्राह—तन्न इति । वियुंक्ष्व वियोजय अयुतमतङ्गजवीर्यम् अयुतगजपराक्रमं बिभ्रत् ॥ २९ ॥ उदात्तम् उन्नतं चक्रं सैन्यं यस्य स उदात्तचक्रः आशु च आश्वेव तस्य प्रतिक्रियाम् ॥ ३०–३४ ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

लोके भवानित्यादि । जगदिनः जगत्प्रभुः, कलया बलदेवेन ॥ २७–४२ ॥

श्रीनाथचक्रवर्तिविरचिता चैतन्यमतमञ्जूषा

लोके भवानित्यादि । जगदिनो जगत्प्रभुः कलया बलदेवेन ॥ २७–४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तेषां विज्ञप्तिमाह षड्भिः । तत्र ते प्रथमं शरणमाश्रयन्ते, कृष्ण कृष्णेत्यादेर्द्वित्वम् अप्रमेयात्मन्निति त्वत्स्वरूपमज्ञात्वापि प्रपन्ने इति प्रपन्नपालकत्वमेव ज्ञात्वा शरणं यामः पृथग्धियः तदभक्तौ प्रार्थनां परित्यज्य त्वत्तः पृथग्भूते स्वीयदुःखत्राणे एव धीः येषां ते ॥ २५ ॥ भवभीतस्त्वं विवृण्वन्तो नमन्ति-लोकोऽस्मद्विधः कुशले कर्मणि प्रमत्तः किं पुण्यकर्मणि न त्वदुदवे किं ज्ञानयोगसाधकशमदमयमनियमादिकर्मणि न भवदर्च्चने त्वद्भजने स्व इति तदेव लोकस्य वास्तवं स्वं धनम् भवदुःखनिवर्तकं त्वत्प्रेमसुखभागप्रदायकं चेति भावः । किन्तु विकर्म्मणि स्त्रीपुत्रादिवैषयिकसुखसाधके कर्मणि नितरां रतः किञ्च तत्सुखमपि दुर्भगस्यास्य न सिद्ध्यतीत्याहुः—यस्तावदिति । अनिमिषाय कालाय त्वच्छक्तिरूपाय नम इति त्वदभक्तस्य तेन तथा करणं समुचितमेवेति भावः ॥ २६ ॥ किञ्च साक्षादेव त्वां त्वद्भक्तांश्च यः कश्चिदिह द्वेष्टि स कथं कालसंहृतो न भवतीत्यस्माकं महान् विस्मय इत्याह, लोक इति । जगदिनः जगदीश्वरः "कलना कालयाः कला" इति नानार्थकोशात् कलया कालेनावतीर्णः यद्वा बलदेवेन सह अन्यः खलः कश्चिज्जरासन्धादिस्त्वदीयं निदेशमतिक्राम्यति साधून् द्वेष्टि खलान् पालयतीत्यर्थः । तत्र खलनिग्राहके त्वय्यवतीर्णेऽपि यत् खलो वर्द्धते तत् किं स खलः स्वकृतमृच्छति स्वप्रारब्धकर्मफलं सुखं भुङ्क्ते तथा सद्रक्षके त्वय्यवतीर्णेऽपि साधुजनस्तत्पीडितो यद्भवति तत् किं सोऽपि स्वकर्मफलं दुःखं भुङ्क्ते इदं न विद्मः निश्चेतु न शक्नुमः त्वत्तोऽपि कर्मयोगस्य जडस्य प्राबल्यमनुचितमिति भावः ॥२७॥ ननु, तर्हि यूयं तावत् के मद्भक्ता मद्विद्वेषिणो वा ? तत्र न वयमुभये किन्तु सांसारिका जीवाः साम्प्रतं त्वां प्रपन्ना इत्याहुः—स्वप्नायितम् अचिरस्थायित्वात् स्वप्नतुल्यम् अमात्यसुहृत् सेनाद्यधीनत्वात् परतन्त्रं नृपसुखं नृपा वयमित्यभिमानमात्रेणैव सुखं वस्तुतस्तु धुरं सन्धिविग्रहाद्यायासबाहुल्यप्रदत्वन्महाभारमेव शश्वद्भय यस्मिंस्तेन मृतकतुल्येन शरीरेण वहामः अहो कष्टं नः ये वयमितः पूर्व्वमेव निष्कामाः सन्तः त्वां नाश्रिता इत्याहुः । तत्सकलसज्जनैःस्तुतत्वात् प्रसिद्धं ननु नृपसुखमिव तैर्निन्दितम् आत्मनि स्वतः सिद्धमेव न तु परतन्त्रं । त्वत् त्वत्तः सकाशादेव न तु दुर्विषयेभ्यो जातम् अनीहैर्निष्किञ्चनभक्तैः लभ्यं न तु सकामैः लब्धुं शक्यं सुखं हित्वा क्लिश्यामः ॥ २८ ॥ तस्मात्त्वन्मायाकृतं कर्म्मबन्धं त्वमेव निवर्तयेति प्रार्थयन्ते तन्न इति । वियुङ्क्ष्व विमोक्षय मगधो जरासन्धस्तत्संज्ञकात् कर्मपाशात् भवद्भिरेव विक्रम्य निर्गम्यतामिति चेत्तत्राहुर्य इति । य एक एव अयुतमतङ्गजानां वीर्यं बिभ्रत् सत् स्वभवने भूभुजोऽस्मान् रुरोध सिंहोऽवीर्मवीरिव ॥ २९ ॥ किञ्च स त्वद्विद्वेषी संप्रत्यस्मान् त्वत्प्रपन्नान् ज्ञात्वा प्रतिदिनमधिकं बाधत इत्याहुर्यो वा इति । हे उदात्तचक्र उत्कर्षेण धृतसुदर्शन ! द्विनवकृत्वः अष्टादशवारान् त्वया सह सङ्ग्रामे वर्त्तमाने सप्तदशकृत्वस्त्वया भग्नः पराजितः । नृलोकनिरतं नृणां पलायनधर्मजिघृक्षाकौतुकिनं त्वां सकृदेकवारमेव जित्वा ऊढदर्पस्सन्नस्मान् युष्मत्प्रजाः रुजति पीडयति तत्तत्र यत् युक्तम् तत् विधेहि ॥ ३० ॥

गूढार्थदीपिनी

अयं लोको जनः विकर्मणि निषिद्धे काम्ये कर्मणि निरतः त्वया उदिते कथिते पाञ्चरात्रे स्वे कुशले कर्मणि भवदर्चनलक्षणे यावत्प्रमत्तः तावदेव यो बलवान् कालः अस्य जीविताशां सद्यः छिनत्ति तस्मै अनिमिषाय कालरूपाय ते तुभ्यं नमः ॥ २६ ॥ जगतः इनः स्वामी भवान् सतां रक्षणाय खलानां निग्रहणाय च लोके अवतीर्णः । एवं सति कश्चिदन्यः द्वेष्टा जरासन्धादिः त्वदीयं निदेशमाज्ञामतियाति उल्लङ्घयति स च सुखी किं वा त्वदीयो जनः सेवकः स्वकृतं कर्मफलम् ऋच्छति भुङ्क्ते दुःखं प्राप्नोतीति न विद्मः निश्चेतुं न शक्नुमः इत्यर्थः 'इनः सूर्ये प्रभौ' इत्यमरः । कलया बलदेवेन सह ॥ २७ ॥ नृपसुखं परतन्त्रमस्ति तदर्थं धुरं सन्धिविग्रहाद्यायासरूपं भारमेव मृतकतुल्येन देहेन वहामः अत एव अतिकृपणाः सन्तः क्लिश्याम दुःखमनुभवामः । किं कृत्वा । त्वत्तः त्वदनुग्रहात् अनीहैः निष्कामैः आत्मनि लभ्यं यत् ब्रह्म सुखं तत् हित्वा । शश्वत् निरन्तरं भयं यस्मिन् तेन मृतकेन । हे पृथक् पदम् ॥ २८ ॥ यतः प्रणतानां शोकहरं अङ्घ्रियुग्मं यस्य स भवान् ततस्त्वं मगधाह्वयात् जरासन्धसंज्ञकात् कर्मपाशात् बद्धान् नोऽस्मान् वियुङ्क्ष्व विमोचय । य एक एव भूभुजोऽस्मान् भवने कारागारे रुरोध आवृतवान्

यथा मृगराट् सिंहः अवीः मेषी रुणद्धि तद्वत् । कथंभूतः । अयुतगजानां वीर्यं बलं पराक्रमं च बिभ्रत् । यद्वा । अभवान् इत्यत्र अकार प्रश्लेषेण न विद्यते भवाश्रेयो येषु तान् परमार्तानित्यर्थः ।। २९ ।। हे उदात्तचक्र उद्यतसुदर्शन । वै प्रसिद्धो यो जरासन्धः मृधे युद्धे द्विनवकृत्वः अष्टादशवारान् त्वया भग्नः पराजितः । पश्चात् नृलोकनिरतं त्वां सकृत् एकवारं जित्वा ऊढदर्पः प्राप्तगर्वः सन् युष्मत्प्रजा नः रुजति पीडयति अत्र यत् युक्तं तत् विधेहि । विमोक्षक्षणं वा ।। ३० ।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

राज्ञां विज्ञप्ति तल्लिखितपत्रिकाञ्च कथयति कृष्णकृष्णेति षड्भिः । आदरे द्विरुक्तिः हे कृष्ण ! सदानन्द अप्रमेयात्मन् इयत्तानवच्छिन्न ! परमात्मन् हे प्रपन्नभयभञ्जन ! प्रपन्नानां भवभयभञ्जन वयं सांसारिकानन्दलुब्धाः पृथग्धियः विभिन्नबुद्धयः पृथक्पृथक् अन्तःकरणपरिच्छिन्नस्वस्वरूपाः जीवात्मानः भवभीताः त्वां शरणं यामः ।। २५ ।। एवमात्मपरमात्मविवेकपूर्वकं प्रपन्नानां संसारभयभञ्जनं भगवन्तं शरणीकृत्य स्वविमुखानान्तु संसारभयदोऽसीति वदन्तो नमस्कुर्वन्ति—लोक इति । यावत् लोको जनो विकर्मणि निषिद्धे काम्ये च संसारप्रदे कर्मणि नितरां रतः कुशले मुक्तिप्रदे गीतापञ्चरात्रादिषु त्वयोदिते त्वदाराधनरूपे स्वे स्वधर्मे प्रमत्तोऽनवहितः तावदेवास्य जनस्य यः सद्यो जीविताशां छिनत्ति पुनःपुनर्जन्ममरणलक्षणं संसारं ददाति तस्मै अनिमिषाय कालात्मने तुभ्यं नमः ।। २६ ।। ननु, प्रपन्नभयभञ्जनेत्यनेन प्रपन्नमुक्तिप्रदत्वं जीविताशां छिनत्तीत्यनेन स्वपराङ्मुखसंसारप्रदत्वं मम भवद्भिर्वर्णितं तत्र वैषम्यं नैर्घृण्यञ्च प्राप्नोतीत्यत्र नेत्याहुः—हे ईश ! जनः स्वकृतमृच्छति प्राप्नोतीति वयं किं वा न विद्मः अपितु विद्मः मोक्षप्रदत्वे शुभं संसारप्रदत्वेत्वशुभं जीवकृतं कर्म निमित्तमतो न वैषम्यनैर्घृण्य त्वयि भवतः तथाच सूत्रं "वैषम्यनैर्घृण्ये न कर्मसापेक्षत्वात्" (२–१–३४) इति । अत एव जगदिनः जगदीश्वरोऽपि सर्वसमोऽपि भवान् सद्रक्षणाय खलनिग्रहणाय च कलया बलेन सह लोके अवतीर्णः खललक्षणमाहुः—यः कश्चित्त्वदीयं निदेशमाज्ञामतियाति अतिलङ्घयति स अन्यः खल इत्यर्थः । तद्विपरीतः सदिति सल्लक्षणमर्थादुक्तं भवति ।। २७ ।। जरासन्धकृतनिरोधादिदुःखमप्यस्मत्कर्मफलमेव तद्विमुक्तिमपि भवतो नृपसुखार्थं न प्रार्थयामः किन्तु सुखपूर्वकत्वद्ध्यानार्थमित्याहुः—स्वप्नायितमिति त्रिभिः । हे ईश ! यदर्थं शश्वद्भयं यस्मिन् तेन मृतकेन मृतकतुल्येन देहेन धुरं गृहकलत्रादिचिन्तां वहामस्तत् नृपसुखं नृपाणां सुखं स्वप्नायितं स्वप्नसुखतुल्यमनित्यमित्यर्थः । परतन्त्रं परमतात्मभूतप्राकृतदेहगेहादिकं तत्तन्त्रम् तदस्माकमिष्टं नेति भावः । किमिष्टमित्यतः स्वेष्टं सूचयन्ति–हित्वेति । यत् त्वत्प्रसन्नात् त्वत्तः अनीहैर्निष्कामैर्लभ्यम् आत्मनि सुखं ध्यानानन्दं हित्वा तव मायया शब्दादिविषयरूपया कृपणाः क्लिश्यामहे ।। २८ ।। तत्तथाभूतान् नृपसुखात् विरक्तान् त्वद्ध्यानसुखकामान् नोऽस्मान् मगधो जरासन्धस्तत्संज्ञककर्मपाशात् जरासन्धव्याजेनास्मत्कर्मैव पाशस्तस्मात् वियुङ्क्ष्व विमोचय बहूनामेकेन निरोधे कारणमाहुः—य इति । य एक एवायुतमतङ्गजवीर्यं बिभ्रत् सत् भूभुजो बहून् भूपालान् स्वभवने रुरोध मृगराट् सिंहः अवीः मेषीरिव ।। २९ ।। किञ्च भवद्द्विट् स भवदीयान्नो विशेषेतो बाधते अतो यत्र यद्युक्तं तत्कुर्वित्याहुः—यो वा इति । हे उदात्तचक्र उदूर्ध्वं मात्तं गृहीतं चक्रं येन स तथाभूत ! यः द्विनवकृत्वः अष्टादशवारान् त्वया सङ्ग्रामे प्रवृत्ते सति सप्तदशकृत्वः स्त्वया खलु भग्नः पराजितः पश्चादनन्तवीर्यमपरिमितबलमपि नृलोकनिरतं नृलोककार्यविशेषं पलायनेनैव साधयन्तं सकृज्जित्वा ऊढदर्पो सन् युष्मत्प्रजा नो ऽस्मान् रुजति पीडयति त तत्र यद्युक्तं तद्विधेहि कुरु ।। ३० ।।

श्रीसत्यधर्मकृता भागवतटिप्पणी

आगतः पुरुषोत्तमं प्रति तद्वचनमनुवदन्वदति ।। कृष्ण कृष्णेति । षट्श्लोक्या राज्ञां विज्ञाय तत्र शरणवरणं त्रिभिरुभयविधभयानुवचनं द्वाभ्यां कर्तव्यप्रार्थनमेकेनेति विवेकः । अप्रमेय आत्मा मनो यस्य । प्रपन्नानां भयं भञ्जयतीति स तथा । भयस्य भञ्जनं येनेति वा । अनेनास्मद्भयं गतमिति निश्चित्य प्रवृत्ता वयमिति ध्वनयन्ति । अतो वयं भयभीताः । तत्र तन्त्रं पृथग्धिय इति मूर्खाः ।। २५ ।। तामेव धियं धिक्कुर्वंति तद्वच्चर्याविचनेन । विकर्मणि विपरीते कर्मणि । विना रक्षैरनिवर्त्यतां विनाऽनुग्रहं तवेति दर्शयति । त्वदुदिते पञ्चरात्रादौ भवदर्चने तद्रूपे कर्मणि सति प्रमत्तो यदतः स्वे कुशले स्वक्षेमविषयेऽपि अथ लोकः प्रमत्तः । यश्चैवमस्य लोकस्येह संसृतौ जीविताशां सद्योऽपेक्षितोऽपेक्षणादिना तावच्छिनत्ति । प्रसादमनासाद्य स्थितस्य नापायपरिणोपाय इत्यत्र हेतुमाह ।। बलवानिति । तस्मै अनिमिषाय देवाय कालात्मने वा मत्स्याद्यात्मने वा नमोऽस्तु । प्राग्वितत्य व्याकृतोऽयं श्लोकः ।। २६ ।। यद्यहमीश्वरस्तर्हि किमर्थमत्रागममित्यतः स्वामिन्येतदर्थमेव नापरोऽर्थस्तव पूर्णस्येति वर्णयन्ति ।। काल इति । कालो भवांस्तद्रूपोदं जगदस्मिञ्जगति कलयाऽवतीर्णः सद्रक्षणाय यदन्यत्सद्रक्षणात्तस्मै खलनिग्रहाय चावतीर्णः । कश्चिज्जनः प्रागुक्तः पृथग्धीस्त्वदीयं निदेशं यत्करोषि यदश्नासीत्यादि गीतापञ्चरात्रादिगीतं निदेशमाज्ञामतियात्यतिक्रम्य वर्तते स किं सुकृतमृच्छति प्राप्नोतीति च । ईश वयं न विद्मो न जानीमः । यद्वाऽन्यर्त्किं न किमपि तदुभयातिरिक्तं प्रयोजनं तव । किञ्च खलाखलफलं वयमेतादृगिति न विद्म इति वदन्ति ।। क इति । चित्त्वदीयं चित्ते ज्ञानार्थमुक्तं तव निदेशं योऽतियाति स को जनः कुत्सितः सन्स किं सुकृतमृच्छति न प्राप्नोत्येव । यश्च सन् त्वदीया मतिर्यस्मिन्कर्मणि तद्यथा भवति

तथा तव निदर्शनं याति । **अनुतिष्ठति स किं किं परिमाणं सुकृतं** पुण्यमृच्छति प्राप्नोतीति **तन्नविद्मः** । तस्यापारत्वेन वर्णनासुशका वयमिति न जानीम इति भावः । **जगज्जगति** इ विस्मयावह्या दं कलया पत्नो दं रमा तस्याः कलया रुक्मिण्यादिरूपिण्या सहावतीर्णः । हे **शमीश** । शमिति सुखवाच्यव्ययम् । सुखेशनशील शमिनां शान्तिमतामीश वा । निदेऽप्रदे त्वयि सन्वाऽसन्वा **कश्चित्कोऽपि सुकृतमृच्छति तन्न ऋच्छतीति वयं न विद्मः** । किन्तु सुकृतदुष्कृतप्राप्ती त्वदायत्ते इति भावः । दं कलत्रं बुधैः प्रोक्तमित्यनेकार्थध्वनिपदमञ्जरी । **ब्रह्मादयश्चेदपि तव** निदेशातिक्रान्तिमन्तो यतोऽज्ञा इत्यपि विज्ञापयन्ति । कश्चित्कोऽपि हिरण्यगर्भो मः शिवोऽपि यन्न वित् । पृथक् पृथगन्वयः । अज्ञोऽतो निदेशमतिक्रान्तमिति चेत्सुकृतमृच्छति किं नेत्यर्थः । को ब्रह्मा मः शिवे मा रमायां चेति विश्वो ॥२७॥ प्राज्ये राज्यसुखे सति किं संसृतितो भीतिरित्युच्यत इत्यतस्तत्राहुः । **स्वाप्नायितमिति** । नृपसुखं नृपैः प्राप्यराज्यसुखं स्वप्नायितं स्वाप्नपदार्थसममस्थिरमित्यर्थः । न तत्र रथा इत्यादिना तत्पारतन्त्र्यं प्रतिपाद्यत इदं न तथेति नेत्याह ॥ **परतन्त्रमिति** । तत्त्वतश्चलं सुखमुद्दिश्य शश्वद्भयेन सदा भूयिष्ठभयेन मृतकेन **शवसदृशेन** धुरं संसाराख्यरथधुरं वहामः । किमप्यपश्यन् भित्तिं गृहीत्वा रोदितीति तद्वत्मार्गान्तरं नास्ति किं कर्तव्यमिति न स्वामिन्नित्याहुः ॥ **हित्वेति** । आत्मनि स्वरूपसत् अनीहलभ्यं निष्कामकर्मसाध्यं बहिरन्तरतोऽनीहोऽविलष्टकारीति **त्वयैव** निष्कामकर्म प्रसन्नेन लभ्यमित्यर्थः । **तद्धित्वाऽतिकृपणाः** क्लिश्यामहे ज्ञात्वाऽपि तद्धित्वाऽनुष्ठानं विपरीतस्य कुत इत्यत इत इति वदन्ति ॥ **तव माययेति** । अस्मत्कर्मानुसारिण्या तव बाधकशक्त्याऽतिकृपणा इत्यन्वयः । हे अतिकृपणाः परायुधेन स्वयं क्लिश्यन्तोऽरीनपि क्लेशयन्त इति क्लिश्याम इत्यर्थ इति वा ॥ २८ ॥ यस्मात्त्वं **प्रणतशोकहरमङ्घ्रियुग्मं** यस्य सः । यो **मृगराट्** सिंहोऽवीर्मेषीरिव **तथा** । **अयुतमतङ्गजा** अयुतसङ्ख्या गजास्तेषां वीर्यं **बिभ्रद्दधत्** । अनेन स्वाशक्त्यपरिहृतिस्तदपहृतिस्तदपहृतिरिति ध्वनयन्ति स्म । **भवने** । भूभुजोऽस्मान्नुद्धारस्तस्मान्मगधाधिपरूपात्कर्मपाशाद्बद्धानिति सुबद्धः पाठः । रुद्धानित्यप्यनिरुद्धः । त्वं नो **नियुङ्क्ष्व** । तथा **भवभीता** इति प्रागुक्तसंसारभयं च मोचयेति गदन्ति । भवानिति बहुवचनं प्राप्य नानायोनिभवनविवक्षया । संसारान्नियुङ्क्ष्व वियोजय । अनियमस्तु प्राग्व्युत्पादितोऽनुसन्धेयः । यद्वा भवानित्यननुगुणो वियुङ्क्ष्वेति मध्यमपुरुष इतीव भवमोचनसूचनं नाचारि भवभीता इति वदद्भिरिति शङ्किता कृतान्वय एवमिति ज्ञेयम् ॥२९॥ उदात्तं **चक्रं** सुदर्शनं यस्य स **यस्त्वं तेन त्वया** । द्विनवकृत्वोऽष्टादशवारमुदात्तचक्रं सेना यस्य स इति मगधविशेषणं च । **मृधे** । **भग्नः खलु** । एकदा अनन्तवीर्यं **भवन्तं नृलोकमनुवर्तिनं जित्वा** जित इति विशेषसूचकस्तुः । **स रूढो दर्पो यस्य स** बह्वहङ्कृतः । युष्मत्प्रजाः । **क्षिपति च** । **आशु** तत्संहरणं **विधेहि** कुरु । **चक्रमस्यास्तीति चक्रश्चक्रवत्कृष्णः** । उदात्तश्चासौ चक्रश्च । उदात्तः सारथिर्मत इति तात्पर्योक्तेः ॥ ३० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

दूतस्तेषां वचनान्याह **कृष्ण कृष्णेति षड्भिः** । ऐश्वर्यादयो धर्मा भगवदीयाः क्रमेण निरूप्यन्ते । भगवानेव हि जीवानां स्वगुणैर्मोचक इति । तत्रैश्वर्यं निरूपयन्ति । आदरे वीप्सा स्नेहादरयोर्नैश्वर्यं बाधकम् । अदृष्टकालादीनां बाधकत्वात् साधारणाधिकारित्वाच्च । कथं भवतां दुःखनिवृत्तिरिति चेत् । तत्राह **अप्रमेयात्मन्निति** । प्रमातुं योग्ये हि कालादिविचारः, नत्वयोग्ये । तथाप्युदासीनो भवेदित्याशङ्क्याहुः **प्रपन्नभयभञ्जनेति** । 'सङ्ग्रामे विप्रपन्नाना'मित्यादिवाक्यात् प्रपन्नभयनिवारकत्वं तत्रावश्यकम् । अतो **वयं प्रपन्ना** भवाम इत्याहुः **वयं त्वां शरणं याम** इति । जरासन्धाद्विमोकपक्षं वारयन्ति **भवभीता** इति । नह्येकस्माद्भयात्कश्चिन्निवृत्तिं वाञ्छति, सर्वभयनिवृत्तिसम्भवे । बहिर्मुखानां संसारे सर्वतोभयम्, तदाहुः **पृथग्धिय** इति । अनेन ज्ञानादिपक्षा निवारिताः ॥ २५ ॥ ननु सर्वे येन प्रकारेण संसारनिवृत्तिं वाञ्छन्ति, तेनैव प्रकारेण संसारो निवर्तनीयः, किं मच्छरणागमनेनेत्याशङ्कायामाहुः **लोको विकर्मनिरत** इति । कालरूपश्च **त्वमेव** । अतस्त्वच्छरणागमनेनैव भयनिवृत्तिः, नान्यथा । यतस्तवाज्ञोल्लङ्घने **त्वमेव भक्षयसि** । आज्ञोल्लङ्घनं प्रपञ्चयन्ति **विकर्मणि** निषिद्धे विहितोल्लङ्घने वा **निरतः** तदेवादरेण करोति । लोकस्य तत्रैव महती श्रद्धा । **कुशले** विहिते **प्रमत्तः** असावधानः । तत्पुनरीश्वरवाक्योल्लङ्घनरूपमिति वक्तुमाहुः **त्वदुदित** इति । वीर्यवता वेदादिकर्त्रा त्वयैव तन्निरूपितम् । तत्रापि भवदर्चने भवत्पूजारूपे तन्त्र स्के साक्षाद्भगवतैवावतीर्णेन निरूपिते । तत्रापि **स्वे** श्रवणादिरूपे । त्रिविधं कर्म भगवता निरूपितम्, वैदिकं पाञ्चरात्रं भागवतं च । उत्तरोत्तरं प्राणिनामश्रद्धातिशयः । **अतः प्रमत्तः** । भगवानपि प्रमत्त इव न तूष्णीं तिष्ठति, यतो जगत्कर्ता, तदाहुः **यस्तावदिति** । सह्याधिकृता, अन्यथा प्रलयो न सम्भवेत्, जीवधर्मापेक्षया ब्रह्मधर्मा विशिष्टा इति । **तावदिति** यावत् प्रमत्त एव तिष्ठति । आज्ञोल्लङ्घनसमनन्तरमेव अधः तत्तरणं प्रमाणं वा स्वानुभवरूपं निरूप्यते । एतत्करणे यो गुणः प्रधानभूतः तं निर्दिशति **बलवानिति** । साक्षान्मारणे न जानीयात् । न हि मरणे जन्मान्तरे वा मरणक्लेशस्मृतिरस्ति । अतो जीविताशामेव रोगादिना निराकरोति, येन सर्वेषामेव मरणप्रतीतिर्भवेत् । सर्वथा आज्ञोल्लङ्घने महान्तं व्याध्यादिकमुत्पादयतीत्यर्थः । जीवद्भगवानपि कदाचिदसावधानो भवेदित्याशङ्कायामाहुः **अनिमिषायेति** । अतिसावधानाय । अतस्तस्मै नमः पूर्वापराधक्षमापनार्थम् । शरणागतिस्तु मोक्षार्था । अपराधे विद्यमाने साधनैरपि मोक्षो दुर्लभ इति ॥ २६ ॥ एवमैश्वर्यवीर्ये निरूप्य यशो निरूपयिष्य-

न्तस्थोद्धरणाभावे तत्र न्यूनतां भावायमानाः सिद्धान्तापरिज्ञानात्पृच्छन्त इवाहुः **लोके भवा**निति । जगदिनो जगत्स्वामी भवान् लोके कलया सहावतीर्णः ससहायः । तत्र प्रयोजनद्वयम्, **सद्रक्षणाय खलनिग्रहणाय चे**ति । ईश्वरः साधारण्येन पालनार्थमेव तथा करोति, सुतरां विशेषप्रयत्नवान् । चकाराद्भक्तरक्षार्थम् । एवं त्रिविधकार्यसन्दर्भेऽप्यस्मासु । कस्माद्धेतोरन्यस्तुच्छः अनीश्वरः कारणकार्यप्रेरकस्य तव निदेशमाज्ञामतियाति स्वगर्वादिति चेत्, तत्राहुः **ईशे**ति । संबोधनमुल्लङ्घ्य वाक्यत्वबोधनार्थम् । 'मां प्रपन्नो जनः कश्चिन्न भूयोऽर्हति शोचितुम् । सङ्ग्रामे च प्रपन्नानां तवास्मीति च यो वदेत् । अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम' । साधारणस्तु स्वप्रारब्धमनुभवतीत्याह **किं वा जन** इति । एवं भगवद्वाक्यं साधारणमिति मन्यमाना वयं दुःखं चानुभूय सदत्र निर्णीतं न विद्मः । दुःखानुभवो न निर्णायकः, शास्त्रमात्रोच्छेदप्रसङ्गात् । अतः स्ववाक्यपरिपालनार्थं मोचयेति तात्पर्यम् ॥ २७ ॥ ननु प्रत्यक्षविरोधिनं संदिग्धमिमं मार्गं विहाय ज्ञानमार्ग एव सर्वत्यागात्मको निरभिमानात्मको वा कुतो नाश्रीयत इत्याशङ्कां परिहरन्तो भगवच्छ्रियं निरूपयन्ति **स्वप्नायित**मिति । वस्तुतो ज्ञानमार्गयोग्यो विषयोऽस्ति, तथाप्यपरित्यागे हेतुः **तव माया** श्रीरूपा । अतो वाक्यं वा पालय, मायां वा व्यावर्तयेति । स्वप्नो मायामात्रमिति स्थितम् । नृपाणां सुखं **लोके प्रसिद्धम्**, तन्मायिकमेव, व्यवहारे कापट्याधिक्यात्, माया हि कुहकाधीना, अन्तर्यामिप्रतिनिधित्वेन लोकं निरूपयन् भगवान् प्रतिकूल इति ज्ञापयितुं सुखं विशिनष्टि **परतन्त्र**मिति । अन्तर्यामिणः सख्युः अनुचितमेतदित्याशङ्क्य सम्बोधयति **ईशे**ति । माया स्वकार्यभोग्या, नत्वात्मभोग्येति ज्ञापयितुं साधनमाह **मृतकेने**ति । चेतनसंबन्धाभावाय तथा बचनम् । मायाकार्यं साधने स्पष्टमित्याह **शश्वद्भूयेने**ति । तेन भारवहनमत्यन्तं मायामोहितकार्यम् । लोका मृतकमेव कथञ्चिद्वहन्ति, त्यजन्ति वा, न तु मृतकेन किञ्चिद्वहन्ति, वयं तु तेन धुरं वहाम इति स्पष्टोऽस्मासु मोहः । ननु सुखासक्त्या असाधनेऽपि प्रवर्तते, प्रकारान्तरेण सुखमलभमान इति चेत्, तत्राह **हित्वा तवात्मनी**ति । सुखस्य परमोत्कर्षमाह **तदि**ति । आत्मनीति गमनक्लेशाभावः । क्रियाप्रयासं व्यावर्तयति **अनीहलभ्य**मिति । तुशब्देन न्यायसिद्धान्तवन्निरानन्दात्मपक्षो व्यावर्त्यते । सुखप्राप्तिज्ञानादनीहया च । निरोधादनीहा सम्भवतीति 'सर्वेहोपरतिस्तनु'रिति वाक्यात् सुखप्राप्तिः । तथाप्यन्याभिनिवेशाद्दीनम् । 'भोक्ता तारतम्यं जानाती'ति न्यायात् विषयसुखमेव सर्वोत्कृष्टं भविष्यति, अन्यथा चित्तं कथं प्रवर्तेतेत्याशङ्क्याह **क्लिश्यामहे** इति । **स्वदनीहलभ्यमिति पाठे** त्वत्स्मरणेन तत्सुखस्य सुलभता निरूपिता । क्लेशस्यानुभवसिद्धत्वाद्विपरीतहेतुत्वेन अलौकिकत्वेनानान्तरीयत्वाच्च क्लेशपर्यवसानानुभवेऽपि अनिवृत्तत्वादतिकृपणाः । अनालोचनेन याचनादिना अतिदीनाः । तत्र हेतुस्तवैव माया, अतो विज्ञापना । अन्यथेह विषयेच्छा न स्यात्, वैराग्यहेतूनामानन्त्यात् ॥ २८ ॥ एवं श्रियं निरूप्य भगवतो ज्ञानशक्तिं निरूपयन्तः तत्फलं मोक्षं प्रार्थयन्ते **तन्नो भवा**निति । ब्रह्मज्ञानं मोक्षहेतुः, तदक्षरम्, अवतारे तस्य पादत्वम्, भक्तार्थमेव अवतार इति अस्मद्व्यापारव्यतिरेकेणापि स्वत एव **तवाङ्घ्रिद्वयं प्रणतशोकहरं भवति** । तेन तव या ज्ञानशक्तिः, सा चरणेन संवलिता प्रणतानां शोकं हरति । तत्रापि नो भवान् समानकालावतारान् अतो बद्धान् वियुङ्क्ष्व । नन्वेतादृशलौकिकबन्धनान्मोक्ष इति न ज्ञानसाध्यम्, तत्कथमसाधनेन साध्यप्रार्थनेति चेत् । तत्राहुः । **मगधो** मागधो जरासन्धः कर्मपाशस्यैव नामान्तरं तत् । 'क्षीयन्ते चास्य कर्माणी'ति वाक्यात् । देशनाम्ना स्थितया अधिककर्मणोत्पत्तिसम्भवात् न भोगेन क्षयसिद्धिः । ननु मागधस्य कर्मत्वे किं प्रमाणम्, तत्राहुः **यो भूभुज** इति । न हि कर्माधीनः कश्चिदयुतमतङ्गजवीर्यो भवति । अतो भूभुजामस्माकं भोगहेतुभूतमाधिभौतिकं कर्म निवार्य स्वयमाधिदैविकः । केवलं ज्ञानैकनिवर्त्यो भवति । तर्हि तस्मै राज्यं दत्वा तत्सेवका एव कुतो न भवन्ति, तत्राहुः **मृगराडिवावी**रिति । स हि भक्षणार्थमेव मेषीः स्थापयति । तथायमपि प्रमथनाथमखाय वधार्थमेव स्थापितवानित्यर्थः । अतस्तामसदेवतायै समर्पितानां तत्रैव प्रवेशात् कालान्तरेऽपि मोक्षो नास्तीति मरणात्पूर्वमेव वयं मोचनीया इति भावः । **तद्भवने** निरोधात् न पलायनसम्भावना ॥ २९ ॥ भगवतो भोगासक्तिं निवारयन्त इव, रक्षासक्तिं प्रकटयन्तः भगवदीयत्वं स्वस्य वदन्तः भगवतो वैराग्यशक्तिमुररीकुर्वन्तः वैषम्यनैर्घृण्यपरिहारार्थं पूर्वं भगवद्वृत्तान्तमाहुः **यो वै त्वये**ति । वस्तुतस्त्वष्टादशेऽपि कार्यस्यासिद्धत्वाद्भङ्ग एव, अत आह **द्विनवकृत्व** इति प्रजापतिर्वा विद्या वा न तस्य जयहेतुरिति रजस्तमोगुणावेव इतरसंश्लेषादाधिदैविकादिभेदापन्नौ हेतू इति नवसङ्ख्यायाः आवृत्तिरुक्ता । भगवन्माहात्म्यात्तद्गताधिदैविकैरेव भङ्गं व्यावर्तयितुमाह **उदात्तचक्रे**ति । चक्रेण कालशक्त्यैव भक्षणार्थं व्यात्तया मृधे स भग्नः । **खल्वि**ति । नात्र तिरोहितं किञ्चिदिति सूचितम् । ननु जयापजययोरव्यवस्थितत्वात् कथमेकस्यैव पराजय इति चेत् । तत्राहुः **भवन्तमनन्तवीर्य**मिति । परिमितबलानामेव जयाजयव्यवस्था । तथापि कपटवेषलीलायाः प्रकटितत्वात्तद्विरोधाभावाय नृलोकनिरतम् । सकृद्घुणाक्षरन्यायेन गूढहेतोर्वा जित्वा ऊढदर्पो जातः । वयं तु केवलं भवत्परिपाल्या एव, मर्यादापरित्यागेन पुष्टिमार्गावलम्बनात् । अतो यस्य भवदपेक्षाभावः तेन सर्वथैव बाध्याः । अतो युष्मत्प्रजाः **रुजति** पीडयति । तर्हि लोकन्यायस्य स्वीकृतत्वात् कथं मोचनमिति चेत् । तत्राहुः **हे अजिते**ति । तव स्वरूपमजितेति । 'द्रव्यसंस्कारविरोधे द्रव्यं बलीय' इति न्यायेन लीलाप्रदर्शनं दूरीकृत्य अस्मान् पालयन् तत्स्वस्याजितत्वं विधेहि । अनेन सर्वे सन्देहा अनुपपत्तयश्च निवारिताः ॥३०॥

श्रीसुबोधिनी-सारः

"तेषां विज्ञापनं षड्भिर्नारदागमनं ततः। उद्धवेन परो मंत्रस्ततः कार्यप्रसाधनम्" इति संग्रहः। हे कृष्णकृष्ण हे अप्रमेयात्मन् हे प्रपन्नभयभंजन पृथग्धियो भिन्नमतयः संसारभीता वयं त्वां शरणं यामो व्रजामः॥ २५॥ त्वयोदिते "यत्करोषि यदश्नासि" इत्युक्ते भवतोर्चने पूजनरूपे स्वे स्वकीये कुशले कर्मणि मंगलकार्ये प्रमत्तोऽसमाहितः विकर्मनिषिद्धं काम्यं कर्म बंधनहेतुस्तस्मिन्निरतः "यज्ञार्थात्कर्मणोन्यत्र लोकोयं कर्मबंधनः" इति प्रतिज्ञातत्वात् तावदादौ लोकः सर्वो जनो वा साकल्यार्थत्वात्तावत् इति गुरवः। अस्य लोकस्य जीवनेच्छां बलवान् यः छिनत्ति तस्मै अनिमिषाय कालरूपाय नमोस्तु॥ २६॥ हे ईश जगति इनः सूर्यरूपो भवानवतीर्णः सतां रक्षणाय खलानां निग्रहाय च तत्र भक्तानां दुःखं कश्चित् खलो जरासंधादिः त्वदीयं निदेशमाज्ञामतियाति खंडयति उल्लंघ्य वर्त्तते तत्किं जनः स्वकृतमृच्छति भक्तो वा न इति वयं न बिजानीमः॥ २७॥ राज्यसुखं स्वप्नतुल्यं परतंत्रं देवाधीनत्वात् हे ईश शश्वन्निरंतरं भयं यस्मिन् तेन मृतकतुल्येन शरीरेण धुरं पुत्रभार्यादिभारचिंतां वयं वहामः अहो कष्टमित्यूचुः। त्वत्त्वत्तो यदनीहैर्निष्कामैर्लभ्यम् आत्मनि स्वस्मिन्सुखं तत् हित्वा त्यक्त्वाऽतिकृपणा वयं तव मायया इह लोके क्लिश्यामहे दुःख्यामः॥ २८॥ तत्तस्माद्धेतोः प्रणतानां शोकहरमंघ्रियुग्मं चरणद्वंद्वं यस्य स भवानस्ति यतः मगधेन देशेन सहाह्वयो नाम यस्य स जरासंधस्तद्रूपात्कर्मपाशात् बद्धान्नोस्मान् वियुंक्ष्व त्वं विमोचय अस्मद्विक्रमस्तत्र न फलतीत्याहुः य एकोऽयुतदशसहस्रं मतंगजानां हस्तिनां वीर्यं बलं बिभ्रत् दधत् सन् भूभुजो माण्डलिकनृपान् भवने स्वगृहे रुरोध अवीर्मेषीः सिंह इव॥ २९॥ हे उदात्तचक्र द्विनवकृत्वोष्टादश वारान् मृधे संग्रामे त्वया भग्नः पराजितः सप्तदशवारं यो वारैकं नृलोकनिरतं मनुष्यचेष्टानिरतं भवंतम् अनंतबलं जित्वा ऊढदर्पो जातगर्वः खलु निश्चयेन युष्माकं प्रजा नोस्मान् रुजति पीडयति यदत्र युक्तं तत्त्वं विधेहि कुरु॥ ३०॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

लोको विकर्मेत्यत्र। **वीर्यवते**ति। वीर्यस्य वाक्यार्थत्वादेवमुक्तम्। त्वया एतच्छ्लोकवाक्यार्थरूपेणोदिते इत्यर्थः। **जगत्कर्त्रे**ति। वेदादिकर्ता, अतः स्वाज्ञोल्लङ्घने दण्डयतीत्यर्थः। कालस्य दोषमाशंक्याहुः **स ही**ति। कालो मारणेऽधिकृत इत्यर्थः। कालस्य जीवात् प्राबल्ये हेतुमाहुः **जीवे**ति। प्रमादो जीवधर्मः, अधिकारो भगवद्धर्म इत्यर्थः। **स्वप्नायित**मित्यत्र। **ज्ञानमार्गयोग्य** इति। ज्ञानमार्गीयत्यागयोग्य इत्यर्थः। **अन्तर्यामिप्रतिनिधित्वेने**ति। यथान्तर्यामी प्रेरयति, तथा करोतीति प्रतिनिधित्वम्। त्वदनीहेतिपाठे त्वदितिपञ्चम्येकवचनम्। त्वत्तो हेतोरनीहलभ्यमित्यर्थः। **क्लेशस्ये**ति। विषयसुखानन्तरं क्लेशोनुभवसिद्धः। अतो विषयसुखं विपरीतस्य क्लेशस्य हेतुः। नान्तरीयत्वे सोप्यविगीतो भवेत्, सत्वलौकिकोऽप्रत्यक्षैरविद्यादिभिर्जातोऽतोननान्तरीयकः। **अनिवृत्तत्वात्**। क्लेशस्येतिशेषः। अतोनुत्कृष्टत्वं विषयसुखस्य। तादृशसुखयाचका वयमतिकृपणाः। अतः क्लिश्यामहे इत्यर्थः। **तन्नो भवानि**त्यत्र। **चरणेन संवलिते**ति। धर्मरूपज्ञानात्मकश्चरणः शक्तिरूपं ज्ञानं तत्संवलितमित्यर्थः। नहि **कर्माधीन** इति। मूलेऽ'युतमतङ्गजवीर्यं बिभ्र'दित्युक्तम्। तदर्थोत्र बहुव्रीहिणायुतमतङ्गजवीर्य इत्यनेन विवृतः। **यो वं त्वये**त्यस्याभासे। **वैराग्यशक्ति**मिति। अन्येषु रागाभावो भक्तेष्वेव राग इत्यर्थः। **वैषम्ये**ति। पूर्ववृत्तान्तकथनेन दर्पयुतोऽयमतस्तस्य हितार्थमेव हन्तव्यः। अतो वैषम्यनैर्घृण्यपरिहारः। **व्याख्याने**। **रजस्तमोगुणा**विति। सत्त्वेन तमसा च रजस संश्लेष इतिद्वयम्। तमसश्च सत्त्वेन संश्लेषः। एवं त्रयः। त्रयाणामपि गुणप्रधानभावभेदेन षट्। षण्णामाधिदैविकादिभेदत्रयेऽष्टादशेत्यर्थः। उदात्तचक्रेण करणेन भग्न इति समासः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दूतस्तेषां विज्ञप्तिमेवाह षड्भिः। तत्र प्रथमेन प्रथमं शरणं व्रजन्ति—कृष्ण कृष्णेति। वीप्सा आदरार्था। वयं त्वां शरणं यामो रक्षकतया स्वीकुर्मः। 'कुतो भयमागतम्' इत्यपेक्षायामाहुः—भवात् जन्ममरणादिलक्षणात् संसारात् भीता इति। 'भवभयमपि कथम्' इत्यपेक्षायामाहुः—पृथग्धिय इति। 'भयं द्वितीयाभिनिवेशतः स्यात्' इति सिद्धान्ताद्भेददर्शित्वाद्भयं प्राप्तमित्यर्थः। 'तर्हि मच्छरणत्वेऽपि कथं भयनिवृत्तिः' इत्यपेक्षायामाहुः—प्रपन्नभयभञ्जनेति। 'तत्रापि सामर्थ्यमपेक्षितम्' इति तत् सूचयन्तः सम्बोधयन्ति—अप्रमेयात्मन्निति॥२५॥ 'त्वद्विमुखानां तु संसारभयं नैव निवर्तते' इति सूचयन्तः प्रणमन्ति—लोक इति। इह संसारे अयं लोकः सर्वोपि जनो यावत् विकर्मणि निषिद्धे काम्ये च नरकादिदुःखहेतुभूते पापकर्मणि निरतः स्वे स्वकीये कुशले उद्धारहेतुभूते कर्मणि धर्मे प्रमत्तः असावधानो वर्तते, तावदेव योऽस्य जनस्य जरारोगादिसंपादनेन जीविताशामेव छिनत्ति तस्मै अनिमिषाय निमेषरहिताय सर्वदा सावधानाय कालरूपाय तुभ्यं नमोस्त्वित्यन्वयः। 'त्वदाज्ञोल्लङ्घनेन तव कोपान्न कदापि दुःखान्निस्तार' इत्याशयेनाहुः—त्वदुदित इति। 'न च त्वदुदितं कर्म कृच्छ्रादिवद्दुष्करम्, किंतु सुकरमेव' इत्याशयेनाहुः—भवदर्चने इति। 'प्रमत्तस्यानुसन्धानाभावादायुःपरिमितोऽपि कालः क्षणप्रायो गच्छति' इति सूचयन्त आहुः—सद्य इति। 'कालकृतजरादिप्रतिरोध आराधितैर्देवादिभिरपि दुष्कर' इति सूचयन्त आहुः—बलवानिति॥ २६॥ एवं भगवतः

प्राबल्यमुक्त्वा तद्भक्तानां दुःखासंभवात् आत्मनस्तथात्वेऽपि दुःखानुभवादाश्चर्यं सूचयन्त आत्मदुःखं निवेदयन्ति—लोक इति। हे ईश ! सतां स्वभक्तानां रमणाय तद्रक्षायाः खलनिग्रहंविना असंभवात्तेषां खलानां निग्रहाय च कलया स्वांशेन सङ्कर्षणेन सह भगवान् अस्मिल्लोकेऽवतीर्णः। तत्र हेतुमाहुः—जगदिन इति। जगत इनः स्वामी। अन्यस्य जगद्रक्षायां सामर्थ्याभावात् स्वेनारक्षणे सर्वविलय एव स्यात् इति भावः। एवं सत्यपि कश्चिदन्यो जरासन्धादिजनः त्वदीयं निदेशं "तेषां सततयुक्तानां योगक्षेमं वहाम्यहम्" "कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति" इत्यादिप्रतिज्ञामतियाति उल्लङ्घयति येन त्वद्भक्तानस्मान् पीडयति, किंवा त्वया रक्ष्यमाणोऽप्यस्मदादिजनः स्वकृतमृच्छति स्वकर्मजं दुःखं प्राप्नोत्येव तदेतन्न विद्मः निश्चेतुं न शक्नुमः। उभयत्राप्यसंभावनासत्त्वादित्याशयः॥२७॥ दुःखान्तरमाहुः—स्वप्नेति। 'सर्वनियन्तृत्वात् साक्षित्वाच्च तवाग्रे किं बहु वक्तव्यम्' इत्याशयेन संबोधयन्ति—ईशेति। तत्त्वत्तः त्वदनुग्रहात् अनीहैर्निष्कामैर्लभ्यमात्मनि स्वस्मिन्नेव वर्तमानं यत् स्वरूपसुखं तद्धित्वा उपेक्ष्य स्वप्नायितं स्वाप्नसुखतुल्यं यत् नृपाणां सुखं तदर्थं शश्वद्भयं यस्मिस्तेन, अतएव मृतकतुल्येन देहेन धुरं वहामः स्त्रीपुत्राणामात्मभृत्यादिभारं वहाम इत्यर्थः। तत्र हेतुमाहुः—परतन्त्रमिति। यस्मात्तत्सुखं स्त्र्याद्यधीनमित्यर्थः। अत इह संसारे क्लिश्यामहे। ननु एवं जानतां 'कथं दुःखसाधने प्रवृत्तिः' इत्याशङ्क्याहुः—तव मायया कृपणा मोहेन विषयासक्ता इति॥ २८॥ एवं स्वदुःखं निवेद्य ततो विमोक्षणं प्रार्थयन्ते-तन्न इति। यस्माद्भवान् प्रणतानां शोकहरमङ्घ्रियुग्मं यस्य तथाभूतस्तत्तस्मात्त्वं बद्धान् नोऽस्मान् मगधाह्वयात् जरासन्धाख्यात् कर्मपाशाच्च वियुङ्क्ष्व वियोजय। 'ननु भवद्भिरेव विक्रम्य ततो निर्गम्यताम्' इत्याशङ्क्याहुः—यो जरासन्ध एक एव भूभुजो राज्ञोऽस्मान् स्वभवने रुरोध। अत्र सामर्थ्यमाहुः—अयुतसङ्ख्यानां मतंगजानां वीर्यं बलं बिभ्राण इति। संरोधे दृष्टान्तमाहुः—मृगराट् सिंहः अवी मेषीरिवेति। अतो न वयं स्वप्रयत्नेन ततः विमोक्तुं शक्ता इत्याशयः॥ २९॥ 'त्वयि तु पराजयशङ्कैव नास्ति' इति सूचयन्तः संबोधयन्ति—अजितेति। तत्र हेतुत्वेन साधनसंपत्तिं सूचयन्तः पुनः संबोधयन्ति—उदात्तचक्रेति। द्विनवकृत्वः अष्टादशवारं त्वया सह मृधे युद्धे प्रवृत्ते सति तत्र सप्तदशकृत्वो भग्नः पराजितः, पश्चादनन्तं वीर्यं यस्य तथाभूतमपि भवन्तं सकृदेकदा जित्वा ऊढदर्पः प्राप्तगर्वो यो वै प्रसिद्धो जरासन्धो युष्मत्प्रजा नोऽस्मान् रुजति पीडयति तत्तस्माद्विमोक्षणं विधेहि। 'अजितत्वं पराजितत्वं विरुद्धं कथं संभवति' तत्राहुः—नृलोकनिरतं मनुष्यचेष्टां स्वीकृतवन्तमिति। अतः स्वेच्छयैव पराजय इति। न विरोध इति भावः॥ ३०॥

अन्वितार्थप्रकाशिका

कृष्णेति॥ हे कृष्णेत्यादीनि सम्बोधनानि भवात्संसारात् भीताः पृथग्धियः पृथग्दर्शिनः वयं त्वां शरणं यामः॥ २५॥ लोक इति॥ इह संसारे अयम् अस्मद्विधः लोकः सर्वोऽपि जनो यावत् विकर्मणि निषिद्धे काम्ये च कर्मणि निरतः त्वया उदिते पाञ्चरात्रे "यत्करोषि यदश्नासि" इत्यादि गीतासु चोक्ते भवदर्चने त्वत्पूजनरूपे स्वे स्वकीये कुशले उद्धारहेतुभूते कर्मणि धर्मे प्रमत्तः असावधानो वर्तते। तावदेव यो बलवान् कालः सद्य एव अस्य जनस्य जरारोगादिसम्पादनेन जीविताशामपि छिनत्ति। तस्मै अनिमिषाय कालरूपाय ते तुभ्यं नमोऽस्तु॥ २६॥ लोक इति॥ हे ईश ! सतां स्वभक्तानां रक्षणाय तद्रक्षायाः खलनिग्रहं विना असम्भवात्तेषां खलानां निग्रहाय च कलया स्वांशेन सङ्कर्षणेन सह जगतामिनः स्वामी भवान् अस्मिन् लोकेऽवतीर्णः एवं सत्यपि कश्चिदन्यो जरासन्धादिर्जनः त्वदीयं निदेशं शास्त्ररूपं "न मे भक्तः प्रणश्यति, संग्रामे प्रपन्नो न वध्यः" इत्यादिकम् अतियाति उल्लंघयति येन त्वद्भक्तानस्मान् पीडयति किंवा त्वया रक्ष्यमाणोऽप्यस्मदादिर्जनः स्वकृतमृच्छति स्वकर्मजं दुःखं प्राप्नोत्येव तदेतन्न विद्मः निश्चेतुं न शक्नुमः। उभयत्राप्यसम्भावनासत्त्वादित्याशयः॥ २७॥ स्वप्नेति॥ हे ईश ! तव मायया मोहितत्वात् अतिकृपणाः विषयासक्ताः वयं त्वत् त्वत्तः त्वदनुग्रहात् अनीहैर्निष्कामैर्लभ्यमात्मनि स्वस्मिन्नेव वर्तमानं यत्स्वरूपसुखं तद्धित्वा उपेक्ष्य स्वप्नायितं स्वल्पकालस्थायित्वात् स्वाप्नसुखतुल्यं परतन्त्रं स्त्र्याद्यधीनं यत् नृपाणां सुखं तदर्थं शश्वद्भयं यस्मिस्तेन अत एव मृतकतुल्येन देहेन धुरं वहामः। स्त्रीपुत्राणां चिन्ताभारं वहाम इत्यर्थः। अत इह संसारे क्लिश्यामहे॥ २८॥ तन्नेति॥ यस्मात् भवान् प्रणतानां शोकहरमङ्घ्रियुग्मं यस्य तथाभूतस्तत्तस्मात्त्वं बद्धान् नोऽस्मान् मगधाह्वयात् जरासन्धाख्यात् कर्मपाशाच्च वियुङ्क्ष्व वियोजय। अयुतसंख्यानां मतङ्गजानां वीर्यं बिभ्रत् यो जरासन्धः एक एव भूभुजो राज्ञोऽस्मान् मृगराट् सिंहः अवीर्मेषीः इव स्वभवने रुरोध॥ २९॥ य इति॥ हे अजित ! हे उदात्तचक्र उद्यतसुदर्शन ! द्विनवकृत्वः अष्टादशवारान् त्वया सह मृधे युद्धे प्रवृत्ते सति तत्र सप्तदशकृत्वो भग्नः पराजितः। पश्चादनन्तं वीर्यं यस्य तथाभूतमपि नृलोकनिरतं मनुष्यचेष्टां स्वीकृतवन्तं भवन्तं सकृदेकदा जित्वा ऊढदर्पः प्राप्तगर्वो यो वै प्रसिद्धो जरासन्धो युष्मत्प्रजा नोऽस्मान् रुजति पीडयति तत्तस्माद्विमोक्षणं विधेहि॥ ३०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

षड्भिः श्लोकैः राज्ञां विज्ञप्तिमाह कृष्णेति त्वत्तः पृथक्धियः विषयासक्ताः अतोभीताः। अप्रमेयः प्राकृतकरणैः प्रमातुमशक्यः आत्मास्वरूपं यस्य तत्संबुद्धिः॥ २५॥ विकर्मणि त्वदुपासनविरुद्धे कर्मणि निरतः अत्यासक्तः। त्वदुदिते यत्करोषि

यदश्नासीति मन्मनाभवमद्भक्तो मद्याजिमां नमस्कुर्वित्यादिना त्वया उक्ते भवदर्चनरूपे । स्वे स्वकीये कुशले कर्त्तृहितकारके कर्मणि । प्रमत्तः । असावधानः । यावदयं लोको वर्त्तते तावद्बलवान् यः कालः अस्य लोकस्य इह जीविताशां सद्यः । छिनत्ति तस्मै अनिमिषाय कालप्रवर्त्तकाय । तुभ्यं नमोऽस्तु ॥ २६ ॥ जगतो विश्वस्य इनः पतिः कलया संकर्षणेन सह भवानवतीर्णोऽस्ति खलनिग्रहाय त्वयि अवतीर्णेऽपि अन्यः जरासंधादिः कश्चित् खलजनः त्वदीयं दुःखरहिततया जनपालनरूपं निदेशं आज्ञां अतियाति अस्माकं दुःखदानेन अतिक्राम्यति किंवाजन अस्मदादिजनः समूहः स्वकृतं स्वकर्मजं दुखं मृच्छति प्राप्नोति तयोरुभयोर्मध्ये एकमपि वयं न विद्मः अतोभवतैवाऽऽस्माकं रक्षणं कार्यमितिभावः ॥ २७ ॥ नृपसुखं निंदंत आहुः स्वप्नेति । स्वप्नायितं स्वप्नतुल्यं परतंत्रं पराधीनं । नृपसुखं नृपार्हसुखमालंब्य । हे ईश शश्वत् सदा भयं यस्मिन् तेन मृतकेन मरणधर्मणा देहेन वित्तकलत्रादि चिंतारूपां धुरं वहामः । यतस्तवमायया अतिकृपणाः । हतबुद्धयः अनीहैः विषयाभिलाषा हीनैस्त्वद्भक्तैर्नारदादिभिः आत्मनि मनसि लभ्यं यत्तवध्यानरूपं सुखं तत् हित्वा इह वयं क्लिश्यामः ॥ २८ ॥ स्वदुःखविमोचनाय प्रार्थनां चक्रुः तदिति प्रणतशोकहरांघ्रियुग्मो भवानऽस्ति ततस्माद्धेतोः मगधाद्वयात् जरासंधसंज्ञात् कर्मपाशात् बद्धान् नोऽस्मान् वियुंक्ष्व त्वं मोचय ननु युष्माकं बहूनां एकेन जरासंधेन कथं बंधनमिति चेत्तत्राहुः य एकः अयुतमतंगजानां वीर्यं बलं बिभ्रत् सन् भूभुजोऽस्मान् नृपान् मृगराड् अवीर्मेषीरिव भवने स्वदुर्गे रुरोध ॥ २९ ॥ किंच अस्मान् युष्मदीयान् ज्ञात्वा सोऽधिकतया व्यथां करोतीत्यूचुः य इति । हे उदात्तचक्र आद्विनवकृत्वः । ईषन्नून्यद्विनववारान् एकोनाष्टादशवारानिति यावत् । त्वयामृधे भग्नोजितो यो मागधः सः । अनंतवीर्यं अपरिमितसामर्थ्यं । नृलोकनिरतं मनुष्यचेष्टातत्परं अतो भवंतं सकृत् एकवारं जित्वा । ऊढदर्पः प्राप्तगर्वः । सन् युष्मत्प्रजाः नोऽस्मान् रुजति व्यथते अतः हे अजित अस्मत्पीडानिवर्त्तने यत्कर्त्तव्यं तत् विधेहि ॥ ३० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तेषां विज्ञप्तिमाह षड्भिः । तत्र तावच्छरणत्वोपयुक्तगुणविशिष्टं संबोधयन्तः शरणं व्रजन्ति । कृष्ण कृष्णेति । हे कृष्ण, हे कृष्ण, अनेन सर्वलोकानन्दकरत्वं वैषम्यनैर्घृण्यादिराहित्यं च विवक्षितम् । हे अप्रमेयात्मन् अपरिच्छेद्यस्वरूप, अनेनास्मदन्तरात्मतयाऽस्मद्दुःखं जानास्येवेति सूचितम् । अत एव सर्वज्ञत्वं च । हे प्रपन्नभयभञ्जन शरणागतभीतिनिवर्त्तक, अनेन वात्सल्यं विवक्षितम् । भवभीताः भवाद्भीताः, पृथग्दृशः पृथग्दर्शिनः, वयं तं त्वां, शरणं रक्षणोपायं, यामो व्रजामः ॥२५॥ प्रपन्नभयभञ्जनेत्यनेनाप्रपन्नजन्ममरणभयाभञ्जनत्वं सूचितं तदेव विवृण्वन्तः प्रणमन्ति । लोक इति । अयं लोको जनः, विकर्मणि विविधे कर्मणि वैषयिकसुखार्थे कर्मणीति यावत् । निरतः, त्वदुदिते पञ्चरात्रगीतादिमुखेन भवतोपदिष्टे, भवदर्चने भवदाराधनात्मके, कुशले श्रेयःसाधने, स्वे स्वानुरूपे, कर्मणि धर्मे, यावत्, प्रमत्तोऽनवहितः, तावत्, अस्य इह लोके, जीविताशां, बलवान्, यः सद्यः, छिनत्ति, अनिमिषाय कालात्मने तस्मै तुभ्यं, नमः अस्तु । तृतीयस्कन्धे ब्रह्मस्तुतौ व्याख्यातोऽप्ययं श्लोकः विज्ञप्तिसाम्यादर्थसौष्ठवाच्चात्रापि व्याख्यातः ॥ २६ ॥ न ह्येतावता लोकहिताचरणैकशीलस्य तव वैषम्यमस्तीत्यभिप्रयन्त आहुः । लोक इति । हे कृष्ण, जगदिनः जगदीश्वरः, आद्यः आदौ भवः कारणभूत इत्यर्थः । भवान् त्वं, लोके, सद्रक्षणाय सतां परित्राणाय, खलानां दुष्टानां निग्रहाय च, कलया स्वांशभूतेन बलभद्रेण सह, अवतीर्णः भवति । तर्ह्येवंभूते मयि सति कुतः कश्चित् दुःख्यतीत्यत्र कारणद्वयं संभावयन्तोऽन्यन्न विद्म इत्याहुः । हे ईश, कश्चित् जनः, चाद्यः, स्थाने चान्यः, इतिपाठे अन्यः कश्चित् जरासंधादिः, त्वदीयं निदेशमाज्ञां, अतियात्यतिक्रमते, किं वा स्वकृतं पापफलं, ऋच्छति प्राप्नोति । तत्तदुभयव्यतिरिक्तं कारणं, न विद्मः । अयं भावः । जरासंधस्त्वद्भक्तान्नः पीडयन् प्रजापालनरूपां त्वदाज्ञामतिक्रामति । वयं वा तत्कृतार्दनात्मकं पूर्वदुष्कृतफलं भुञ्ज्मः, एतद्द्वयातिरिक्तं त्वयि विद्यमानेऽन्यत् कारणं न विद्म इति ॥ २७ ॥ एवं प्रकृतं स्वदुःखं निवेदयिष्यन्तस्तावदधुनैव न वयं क्लिश्यामः, किं तु सदापीत्यभिप्रयन्त आहुः । स्वप्नायितमिति । हे ईश, नृपसुखं यदस्माकं नृपाणां सुखं, परतन्त्रं कर्मायत्तं, अतोऽस्माकं बन्धनात् पूर्वमपि न सुखमिति भावः । तच्च, स्वप्नायितं स्वप्नसुखतुल्यं क्षणिकमतितुच्छमित्यर्थः । ननु कल्याणतरनृपदेहसंबन्ध एवेत्यत आहुः । शश्वत् सदा भयममित्रेभ्यो यस्य तेन, मृतकेन राजेत्यभिमतेन शवतुल्येन देहेन, धुरं वहामः । मृतकतुल्यशरीराख्यं भारमात्रमेव वहाम इत्यर्थः । मृतकेनेति कर्मणः करणत्वविवक्षया तृतीया । यद्वा । लोके मृतकेनोह्यमानेन या धूर्भारस्तादृशीं धुरं भारं, वहाम इति । न हि शवं वहतां तत्संबन्धः सुखरूप एव, तथा नृपदेहसंबन्धोऽस्माकमिति भावः । अतः, हे ईश, त्वत्त्वत्तः, त्वदनुग्रहादित्यर्थः । यत् अनीहलभ्यं निष्कामैः संप्राप्यं, आत्मनि त्वयि विषये, सुखं, तत् हित्वा परित्यज्य, अतिकृपणाः वयं, तव मायया, मोहिताः सन्त इति शेषः । इह लोके, क्लिश्यामहे ॥२८॥ प्रकृतमात्मदुःखं निवेदयन्तस्तन्निराकरणं प्रार्थयन्ते । तानिति । प्रणतानां शोकहरमङ्घ्रियुग्मं यस्य तत्संबुद्धौ हे प्रणतशोकहराङ्घ्रियुग्म, भवान् त्वं, तानुक्तविधान्, अधुना बद्धान्, नोऽस्मान्, मगधाह्वयकर्मपाशात् जरासंधव्याजरूपकर्मपाशतः, इत्यर्थः । वियुङ्क्ष्व वियोजय । भवद्भिरेव विक्रम्यतामित्याशङ्कानिवृत्त्यर्थं मागधं विशिषन्ति । यः, अयुतानामयुतसंख्यानां मतंगजानां वीर्यं, एक एव, बिभ्रद्बिभ्राणः, भवति । अतः, भूभुजोऽस्मान्, मृगराट् सिंहः अवीर्मेषीः इव, भवने रुरोध । तथाविधमगधाह्वयकर्मपाशादिति संबन्धः । न वयं ततो निर्गन्तुं शक्नुम इति भावः ॥ २९ ॥ किं च भवदीया वयमित्यस्मान्

भृशं बाधत इत्याहुः। यो वा इति। भो उदात्तचक्र उद्यतसुदर्शन, यो जरासंधः, द्विनवकृत्वः अष्टादशवारान्, त्वया सह, मृधे युद्धे, प्रवृत्ते सति, तत्र सप्तदशकृत्वः, इति शेषः। भग्नः पराजितः, वै खलु। पश्चात्, अनन्तं वीर्यं यस्य तमपि, नृलोकनिरतं मनुष्यचेष्टामनुकुर्वन्तमित्यर्थः। हेतुगर्भमिदम्। तत्त्वात्, भवन्तं त्वां, सकृत् जित्वा, ऊढदर्पः संप्राप्तगर्वः सन्, हे अजित, युष्मत्प्रजाः भवदीयप्रजारूपान्, नोऽस्मान्, रुणद्धि पीडयति। तदत्र यद्युक्तं तदित्यर्थः। विधेहि। अवश्यं नः सुखिनः कुर्विति भावः॥३०॥

कृष्णप्रिया

'सच्चिदानन्दस्वरूप श्रीकृष्ण! आप मन और वाणी के अगोचर हैं। जो आपकी शरण में आता है, उसके सारे भय आप नष्ट कर देते हैं। प्रभो! हमारी भेद-बुद्धि मिटी नहीं है। हम जन्म-मृत्युरूप संसार के चक्कर से भयभीत होकर आपकी शरण में आये हैं॥ २५॥ भगवन्! अधिकांश जीव ऐसे सकाम और निषिद्ध कर्मों में फँसे हुए हैं कि वे आपके बतलाये हुए अपने परम कल्याणकारी कर्म, आपकी उपासना से विमुख हो गये हैं और अपने जीवन एवं जीवनसम्बन्धी आशा-अभिलाषाओं में भ्रम-भटक रहे हैं। परन्तु आप बड़े बलवान् हैं। आप कालरूप से सदा-सर्वदा सावधान रहकर उनकी आशालता का तुरंत समूल उच्छेद कर डालते हैं। हम आपके उस कालरूप को नमस्कार करते हैं॥ २६॥ आप स्वयं जगदीश्वर हैं और आपने जगत् में अपने ज्ञान, बल आदि कलाओं के साथ इसलिये अवतार ग्रहण किया है कि संतों की रक्षा करें और दुष्टों को दण्ड दें। ऐसी अवस्था में प्रभो! जरासन्ध आदि कोई दूसरे राजा आपकी इच्छा और आज्ञा के विपरीत हमें कैसे कष्ट दे रहे हैं, यह बात हमारी समझ में नहीं आती। यदि यह कहा जाय कि जरासंध हमें कष्ट नहीं देता, उसके रूप में—उसे निमित्त बनाकर हमारे अशुभ कर्म ही हमें दुःख पहुँचा रहे हैं; तो यह भी ठीक नहीं। क्योंकि जब हमलोग आपके अपने हैं, तब हमारे दुष्कर्म हमें फल देने में कैसे समर्थ हो सकते हैं? इसलिये आप कृपा करके अवश्य ही हमें इस क्लेश से मुक्त कीजिये॥ २७॥ प्रभो! हम जानते हैं कि राजापने का सुख प्रारब्ध के अधीन एवं विषयसाध्य है। और सच कहें तो स्वप्न-सुख के समान अत्यन्त तुच्छ और असत् है। साथ ही उस सुख को भोगनेवाला यह शरीर भी एक प्रकार से मुर्दा ही है और इसके पीछे सदा-सर्वदा सैकड़ों प्रकार के भय लगे रहते हैं। परन्तु हम तो इसी के द्वारा जगत् के अनेकों भार ढो रहे हैं और यही कारण है कि हमने अन्तःकरण के निष्कामभाव और निस्सङ्कल्प स्थिति से प्राप्त होनेवाले आत्मसुख का परित्याग कर दिया है। सचमुच हम अत्यन्त अज्ञानी हैं और आपकी माया के फंदे में फँसकर क्लेश-पर क्लेश भोगते जा रहे हैं॥ २८॥ भगवन्! आपके चरणकमल शरणागत पुरुषों के समस्त शोक और मोहों को नष्ट कर देने वाले हैं। इसीलिये आप ही जरासन्धरूप कर्मों के बन्धन से हमें छुड़ाइये। प्रभो! यह अकेला ही दस हजार हाथियों की शक्ति रखता है और हमलोगों को उसी प्रकार बंदी बनाये हुए हैं, जैसे सिंह भेड़ों को घेर रक्खे॥ २९॥ चक्रपाणे! आपने अठारह बार जरासन्ध से युद्ध किया और सत्रह बार उसका मान-मर्दन करके उसे छोड़ दिया। परन्तु एक बार उसने आपको जीत लिया। हम जानते हैं कि आपकी शक्ति आपका बल-पौरुष अनन्त है। फिर भी मनुष्यों का सा आचरण करते हुए आपने हारने का अभिनय किया। परन्तु इसी से उसका घमंड बढ़ गया है। हे अजित! अब वह यह जानकर हमलोगों को और भी सताता है कि हम आपके भक्त हैं, आपकी प्रजा हैं। अब आपकी जैसी इच्छा हो, वैसा कीजिये'॥ ३०॥

दूत उवाच

इति मागधसंरुद्धा भवद्दर्शनकाङ्क्षिणः। प्रपन्नाः पादमूलं ते दीनानां शं विधीयताम्॥ ३१॥

श्रीशुक उवाच

राजदूते ब्रुवत्येवं [1]देवर्षिः परमद्युतिः। बिभ्रत् पिङ्गजटाभारं प्रादुरासीद् यथा रविः॥ ३२॥[2]
तं दृष्ट्वा भगवान् कृष्णः सर्वलोकेश्वरेश्वरः। ववन्द उत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा॥ ३३॥
सभाजयित्वा विधिवत् कृतासनपरिग्रहम्। बभाषे [3]सूनृतैर्वाक्यैः श्रद्धया तर्पयन् मुनिम्॥ ३४॥
अपि स्विदद्य लोकानां त्रयाणामकुतोभयम्। ननु भूयान् भगवतो लोकान् पर्यटतो गुणः॥ ३५॥
न हि तेऽविदितं किञ्चिल्लोकेष्वीश्वरकर्तृषु। अथ पृच्छामहे युष्मान् पाण्डवानां चिकीर्षितम्॥ ३६॥

---

[1] देवर्षिः–श्रीधर. वंशी. जीव. वीर. विज.।

[2] प्रियस्य तस्य कृष्णस्य गायन् कर्माणि जन्म च। कृष्णं सर्वांश्च लोकांश्च द्रावयन् रमयन् भृशम्॥–अधिकः वीर.।
गायन् गिरा मधुरया प्रियकर्माणि जन्म च। द्रावयन्सर्वसत्त्वांश्च लोकान्निरमयन् भृशम्॥–विज.।

[3] मधुरै–वीर.।

कर्दमक्षमा

अन्वयः—दूत उवाच—भवद्, दर्शनकाङ्क्षिणः, मागधसंरुद्धाः, इति, ते, पादमूलम्, प्रपन्नाः, दीनानाम्, शम्, विधीयताम् ॥ ३१ ॥ श्रीशुक उवाच—राजदूते, एवम्, ब्रुवति, परमद्युतिः, पिङ्गजटाभारम्, बिभ्रत्, देवर्षिः, रविः, यथा, प्रादुरासीत् ॥ ३२ ॥ सर्वलोकेश्वरः, भगवान्, कृष्णः, तम्, दृष्ट्वा, ससभ्यः, सानुगः, मुदा, उत्थितः, शीर्ष्णा, ववन्दे ॥ ३३ ॥ कृतासनपरिग्रहम्, मुनिम्, विधिवत्, सभाजयित्वा, सुनृतैः, वाक्यैः, श्रद्धया, तर्पयन्, बभाषे ॥ ३४ ॥ अपिस्वित्, अद्य, त्रयाणाम्, लोकानाम्, अकुतोऽभयम्, ननु, भगवतः, लोकान्, पर्यटतः, महान्, गुणः ॥ ३५ ॥ ईश्वर, कर्तृषु, लोकेषु, ते, किञ्चित्, अविदितम्, न, हि, अथ, पाण्डवानाम्, चिकीर्षितम्, युष्मान्, पृच्छामहे ॥ ३६ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दूत आह। इतीति ॥ ३१-३४ ॥ भूयान्महान्गुणो लाभोऽयमस्माकं यत्सर्वलोकवृत्तांतज्ञानमिति ॥ ३५ ॥ ईश्वरः कर्ता येषां तेषु ॥ ३६ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतीत्थं प्रार्थयंतः ॥ ३१ ॥ प्रादुरासीत्तत्राजगाम ॥३२॥ तं देवर्षिम् ॥ ३३-३४ ॥ अद्य त्रयाणां लोकानामकुतोभयम्, अपिस्विदिति वितर्के कुतोऽपि भयं नास्ति। ननु यतः पर्यटतो भगवतस्तव लोकान् लोकानां भूयान् गुणः। सर्ववृत्तांतश्रवणादिति वा योज्यम् ॥ ३५-३६ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं तन्निवेदनद्वारा तद्दुःखं निवेद्य निगमयति—इतीति। इत्येवं महार्त्या प्रपन्नाः यतो मागधेन सम्यक् गिरिद्रोण्यां बन्धनादिना रुद्धाः अतः पित्रोर्बाला इव भवतो दर्शनकाङ्क्षिणः न केवलं संरोधनात्तेषां मोचनं कार्य्यं साक्षाद्दर्शनञ्च देयमिति भावः। तस्माद्दीनानां तेषां मङ्गलं क्रियताम् ॥ ३१ ॥ परमद्युतिरिति। तदानीं तद्दीप्तेरधिकं प्राकट्यं सूचयति तच्च प्रथमतस्तद्वचनमाननाय श्रीभगवत एव तथाऽभिप्रायात् ॥ ३२ ॥ सर्वलोकेश्वराणां ब्रह्मादीनामीश्वरोपि मुदा आसनादुत्थितः सन् शीर्ष्णा ववन्दे यतो भगवान् ब्रह्मण्यदेवत्वाद्यशेषात्मसत्कीर्त्यादिगुणप्रकाशनशील इत्यर्थः। सभ्याः पुरोहितादयः अनुगा उद्धवादयः ॥३३॥ विधिवत् स्वागतादिनीराजनान्तविधिनेत्यर्थः। श्रद्धया प्रीत्या यानि सूनृतानि तैः किम्वा श्रद्धया च तर्पयन् यतो मुनिं परमपूज्यमित्यर्थः। किम्वा श्रीभगवतस्तादृशचेष्टादर्शनादिना परमविस्मयोदयात् कृतमौनम् ॥३४॥ अपिस्वित्प्रश्ने त्रयाणां लोकानां सर्वब्रह्माण्डगतानामित्यर्थः। ईश्वरकर्तृष्विति वक्ष्यमाणात् तत्र तत्र भवतो भ्रमणमस्मद्धितार्थमेवेत्याह—नन्विति वितर्के निश्चये वा भगवतः परमादरणीयाद्भवतः सकाशात् अन्यत्तैः यद्वा नन्वहं तत्सर्वं कथं जानामि तत्राह नन्विति गुणप्रभावः ॥ ३५ ॥ कोसौ ? तमाह—नहीति। ईश्वरकर्तृष्विति लीलया स्वस्य मनुष्यत्वं व्यञ्जयति अथ अतो हेतोः हे अयि पूज्यपादाः एवं पाण्डवानामेव सर्वासु सृष्टिषु निजपरमापेक्षणीयत्वं व्यञ्जितम् ॥ ३६ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं पत्रिकां वाचयित्वा सन्देशं प्रतिपादयन्निव प्रार्थयते—इतीति, पत्रिकासमाप्तिबोधनार्थम्, किवा इत्येवं महार्त्या प्रपन्नाः, यतो मागधेन सम्यग्गिरिद्रोण्यां बन्धनादिना रुद्धाः; किंवा भवद्दर्शनकाङ्क्षिणः, न केवलं संरोधात्तेषां मोचनं कार्य्यम्, साक्षात् दर्शनञ्च देयमिति भावः। एवं शं मंगलं त्वया क्रियताम् ॥ ३१ ॥ राजदूते एवमीदृशं ब्रुवेति सतीति तं प्रति श्रीभगवतः किञ्चिदुत्तरप्रसादे न वृत्ते सति, तद्वाक्यमध्य एवाविर्भूतः, आदौ श्रीभगवतः श्रीयुधिष्ठिरगृहे प्रयाणार्थमिति भावः। पाठान्तरेऽप्यर्थः स एव। परमा द्युतिस्तपो वा दीप्तिर्यस्य सः। अतः पिंगवर्णजटाभारं बिभ्रत्, अतएव रविर्यथेति; इत्थं तदानीमाविर्भावः स्वभावप्रदर्शनेनात्मवाग्ग्रहणार्थं किंवा भाविनापि श्रीयुधिष्ठिरगृहे श्रीभगवतो गमनेन तदिष्टराजसूय-सम्पादनेन च प्रहर्षोदयात्; यद्वा, तदानीं तस्य तथा वर्णनं श्रीयुधिष्ठिरप्रयोजनार्थं तदागमनेन श्रीवादरायणेस्तस्मिन् भक्तिभरोदयादिति। अथवा परमाद्युतिस्तपः प्रभावो यस्य सः इति सर्व्वज्ञत्वमुक्तम्। आदौ श्रीयुधिष्ठिरगृहे श्रीभगवतोऽपि यात्रां जानंस्तत्सिद्धये द्रुतमाविर्भूत इत्यर्थः। तपः प्रभावमेव दर्शयति—बिभ्रदिति। अतएव रविर्यथेति परमं तेजस्वित्वं जगत्पूज्यत्वादिकं वा सूचयति ॥ ३२ ॥ सर्व्वलोकेश्वराणां श्रीनारदजनक-ब्रह्मादीनामीश्वरोऽपि मुदा आसनादुत्थितः सन् शीर्ष्णा ववन्दे, यतो भगवान् ब्रह्मण्यदेवत्वाद्यशेषात्मगुणप्रकटनपर इत्यर्थः। अतएव कृष्णो मुनीनामपि चित्ताकर्षकः; सभ्याः—उग्रसेनादयः, अनुगाः—उद्धवादयः ॥ ३३ ॥ विधिवत् यथाविधीति स्वागतादि-नीराजनान्तविधिनेत्यर्थः। श्रद्धया प्रीत्या यानि सुनृतानि तैः, किंवा श्रद्धया च तर्पयन्, यतो मुनिं परमपूज्यमित्यर्थः। किंवा श्रीभगवतस्तादृशचेष्टादर्शनादिना परमविस्मयोदयात् कृतमौनम् ॥ ३४ ॥ अपिस्वित्

प्रश्ने; अकुतोभयं किम् ? तत्र तत्र भवतो भ्रमणमस्मद्धितार्थमेवेत्याह—नन्विति वितर्के निश्चये वा; भगवतः सकाशात्; भवत इति वक्तव्ये भगवत इत्यादरात्, पर्य्यटनशक्तिविशेषाभिप्रायेण वा ॥ ३५ ॥ हि एव, नैवाविदितमस्ति; ईश्वरकर्त्तृष्विति सर्व्वेष्वेवेत्यर्थः; यद्वा, ईश्वरस्याप्यभिप्रायं वेत्सि, किं पुनस्तत्सृष्टलोकानामिति सर्व्वं विदितमेवेति भावः । अथ अतो हेतोः; हे पूज्यपादाः ! युष्मानिति बहुत्वं गौरवात्; आदावेवेदृशः प्रश्नो जरासन्धवधार्थं श्रीभगवतः श्रीयुधिष्ठिरगृहे प्राग्जिगमिषां द्योतयत्येव ॥ ३६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

शं सुखम् ॥ ३१-३५ ॥ ईश्वरकर्तृषु श्रीभगवत्प्रेरितचिन्तितादिसकलकर्मसु ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इतीति श्लोको दूतवचनम् दीनानां तेषां राज्ञां शं सुखं विधीयतां क्रियताम् ॥३१॥ अथ नारदागमनादिकं प्रस्तौति—राजदूत इत्यादिना । राज्ञां दूते ब्रुवति सति परमा द्युतिर्यस्य सः बिभ्रद्बिभ्राणः प्रियस्य भगवतः कर्माणि जन्म च गायन् तं कृष्णं सङ्घान् सभ्यसङ्घांश्च द्रावयन्नार्द्रचित्तान् कुर्वन् भृशमितरलोकान् रमयंश्चाविरासीदिति सम्बन्धः ॥ ३२ ॥ तमिति तं नारदं मुदा हर्षेण ववन्दे ॥ ३३ ॥ सभाजयित्वेति । यथाविधि सभाजयित्वा पूजयित्वा कृत आसनपरिग्रहो येन तं मुनिं श्रद्धया मधुरैर्वाक्यैश्च तर्पयन् बभाषे ॥ ३४ ॥ तदेवाह—द्वाभ्याम् अपिस्विति । अधुना लोकानामकुतोभयं न कुतश्चिदपि भयं तदपिस्वित् अभयं कश्चिदिति इष्टप्रश्नः ननु हे ब्रह्मन् लोकान्पर्यटतो भगवतः त्वत्तः अस्माकमयं भूयान् महान् गुणः लाभः यत्सर्वलोकवृत्तान्तज्ञानमिति वाक्यशेषः ॥ ३५ ॥ नहीति । ईश्वरकर्तृषु स्वकर्तृकेषु लोकेषु किञ्चिदपि तवाविदितं न किन्तु सर्वं विदितमेवेत्यर्थः अथातः युष्मान् प्रति पृच्छामहे ॥ ३६ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

अद्य त्रयाणां लोकानामकुतोभयमपिस्वित्कुतोपि भयं नास्ति हि लोककुशलाकुशलजिज्ञासया पर्यटतो भवतो महान् गुणो भवतीत्याह—नन्विति ॥ ३५ ॥ पक्षिवत्पर्यटताऽज्ञेन मया किं प्रयोजनमत्राह—नहीति । ईश्वरः कर्ता येषां तथा तेषु अथ तस्मात् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दूत आह—इतीति ॥ ३१-३४ ॥ तवाकुशलासम्भवादेव कुशलप्रश्नानौचित्यात् लोकानामेव कुशलं त्वां पृच्छामीत्याह—अपिस्विदिति । ननु तदहं कथं जानामीति तत्राह—नन्विति । भगवतस्तव पर्यटतो भूयानयं गुणो यतस्त्वत्त एव सर्व्वलोकवृत्तान्तज्ञानं भवेदतः पृच्छामीति भावः ॥ ३५ ॥ ईश्वरः कर्ता येषां तेषु अथेति प्रस्तुतो जरासन्धवधो भीमादेव सम्भवेदिति प्रकारं जानत एव भगवतः पाण्डवचिकीर्षिते प्रश्नोऽयं ज्ञेयः ॥ ३६ ॥

गूढार्थदीपिनी

शं कल्याणं सुखं वा ॥ ३१ ॥ पीतं जटाभारं जटामण्डलम् ॥ ३२ ॥ शीर्ष्णा शिरसा तं ववन्दे इति योज्यम् । सभ्याः सभासदः ॥ ३३ ॥ कृतः आसनस्य परिग्रहः स्वीकारो येन तं नारदं सभाजयित्वा पूजयित्वा सूनृतैः मधुरैः ॥ ३४ ॥ स्वित् वितर्के । अपि किं लोकानां कुतश्चित् भयं तु नास्ति । ननु अहो पर्यटतस्तव अयं भूयान् महान् गुणः सर्वलोकवृत्तान्तज्ञानमिति ॥ ३५ ॥ लोकेषु किञ्चिदपि तव अविदितं नास्ति अथ अतः युष्मान् प्रति पृच्छाम । प्रार्थनायां लोट् । हे इति पृथक् पदम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं राज्ञां वाक्यं श्रावयित्वा दूत आह—इतीति ॥ ३१ ॥ परमा द्युतिः कान्तिर्यस्य सः ॥ ३२ ॥ लोकान् शिक्षयितुं ववन्दे ॥ ३३ ॥ श्रद्धया विधिवत्सभाजयित्वा पूजयित्वा कृतः आसनपरिग्रहो येन तं मुनेर्भयासम्भवात् ॥ ३४ ॥ तदभयप्रश्नमकृत्वैव लोकानामभयं पृच्छति—अपिस्विदिति । ननु निश्चितं लोकान् पर्यटतः भवतः सकाशात् भूयान् महान् गुणः लाभः अस्माकमिति शेषः । त्वत्तोऽस्माकं सर्वलोकवृत्तान्तज्ञानं भवतीत्यर्थः ॥ ३५ ॥ ईश्वरः कर्ता येषां तेषु युष्मान् इति बहुवचनं पूजार्थम् ॥ ३६ ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पुरुषो भाषते । इतीति । दीनानां शं सुखम् ॥ ३१ ॥ पिङ्गाश्च ता जटाश्च तासां भारस्तम् । पिङ्गः पिशङ्गे पिङ्गी तु शम्यापिङ्गे तु चालक इति विश्वः । बिभ्रत् । महाद्युतिर्यथा रविस्तथा प्रादुरासीत् । पक्षी गरुडो यथा विस्तथाऽऽतरिति

वा ॥ ३२ ॥ प्रियस्य कर्माणि प्रियाणि च तानि कर्माणि च तथा जन्म । मधुरया गिरा । गीरत्र स्वरः । अवसङ्गाश्च द्रावयन् लोकान् । नायं निर् किन्तु निः । तेन न ढ्रलोपशाखप्रवृत्तिः । नितरां रमयन्प्रादुरासीदित्यन्वयः ॥ ३३ ॥ तं नारदं ससभ्यः सानुगश्चोत्थितः सञ्छीर्ष्णा ववन्दे ॥ ३४ ॥ कृत आसनस्य परिग्रहो येन तम् । श्रद्धया भक्त्या बहिः । अन्तस्तदीयया भक्त्या तं तर्पयत्सूनृतैर्वाक्यैर्बभाषे ॥ ३५ ॥ हे देवर्ष त्रयाणां लोकनामद्याकुतो भयं कुतोऽपि भयाभावोऽपि स्वित्किलेति पप्रच्छ । सामान्यन्यायेन तद्गुणं सम्मान्यं वक्ति । लोकान्पर्यटतो जनस्य महान्गुणः । कुशलाकुशलवार्तावित्याद्यात्मकः । तस्यास्तु मम किमित्यत आह । भगवतः पूज्यस्य तव स भूयान्ननु निश्चयः । सामानाधिकरण्येनान्वयो वा ॥ ३६ ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तेषां प्रार्थना आज्ञापनरूपत्वात् दोषाय मा भवत्विति प्रपत्तिरूपतां सम्पादयितुं दूतस्तात्पर्यमाह **इतीति** । **इति ते पादमूलं प्रपन्नाः**, **मागधेन च संरुद्धाः**, 'दृष्टं स्मृतैर्विलिष्ट'मिति स्मरणेन कार्यं न सेत्स्यतीति **भवद्दर्शनकाङ्क्षिणः** । दीनानां प्रार्थितदानेन शं विधीयतामिति । दूतस्य भगवत्साक्षात्कारे जाते तत्फलस्यैव प्रार्थना येन प्रार्थनाद्वयं दर्शनफलं चेति भवति साधकत्रयम् ॥ ३१ ॥ एवं राजसानां भगवद्धर्मेण भगवत्परतां निरूप्य सात्त्विकानामपि भगवत्परतां निरूपयितुं सात्त्विकमुख्यस्य नारदस्य सात्त्विककार्यपरस्य समागमनं निरूप्यते । अन्यथा भगवत्कार्यं राजसमात्रपर्यवसायि स्यात् । क्षणमात्रविलम्बेऽपि भगवान् भक्तदुःखे विलम्बं न सुहृत इति राजदूते एवं वदत्येव समागत इत्याह **राजदूत इति** । देवानामपि मन्त्रद्रष्टृत्वात् तदानीमागमनमुचितम् । अन्येषां बाधकानां तेजोदूरीकरणाय **परमद्युतिरिति** । अधिकारिणो नात्यन्तं वचनमादरणीयमिति शङ्कां वारयितुमाह **बिभ्रत्पिङ्गजटाभारमिति** । तपोरूपमेतत् । तत्रत्यानां तमोदोषव्यावृत्त्यर्थं **यथा रविरिति** । रविपदेनैव भगवत्सान्निध्ये तमःसम्भावना सूचिता । अन्यथा दिनरात्रिव्यवस्था न स्यात् । **प्रादुरासीदिति** न दूतवत्तस्यागमनम् ॥ ३२ ॥ ततः तस्यागतस्य वाक्यसन्माननार्थं लौकिकसन्माननं निरूप्यते **तं दृष्ट्वेति** त्रिभिः । कायिकमानसिकवाचनिकैः । तत्र कायिकमुत्थानं वन्दनं च सर्वैः सहेति त्रयम् । हर्षो मानसः । भगवत्त्वादनुचितत्वेऽपि कृष्णत्वेनावतीर्ण इति तथात्वमुचितम् । शिक्षार्थमेतदिति ज्ञापयितुमाह **सर्वलोकेश्वरेश्वर इति** । ऋषित्वाल्लोकस्थानीयः गुरुत्वादीश्वरो वा । अतोऽवनतिर्न दोषाय । सर्वपदेन देवर्षित्वकृतोऽप्युत्कर्षो निवारितः ॥ ३३ ॥ सभाजनं तन्मनःप्रीतिकरणं लौकिकम् । ऋषित्वाद्वेदाभिनिवेश इति, तदप्याह **विधिवदिति** । ईश्वरधर्मविचारेण कदाचिदनङ्गीकारे कृतं व्यर्थं स्यादित्यत आह **कृतासनपरिग्रहमिति** । दत्तासनस्वीकारः परिग्रहः । ततो वाचनिकारम्भमाह **बभाषे सूनृतैरिति** । स हि श्रद्धया परितुष्यति, तदाह **श्रद्धया तर्पयन्निति** । मानसमेतत् । सोऽपि मुनिस्तेनैव परितुष्यति ॥ ३४ ॥ वाचनिकं द्वयेनाह **अपि स्विदिति** । सर्वलोकाधिकारिणो लोकत्रयस्य गृहत्वात् तत्कुशलप्रश्न एव कर्तुमुचितः स्तुतिरूपश्च भवति । **अपि स्विदिति** सन्देहगर्भितसम्भावना । राज्ञां बन्धनस्य श्रुतत्वात् सन्देहः । **अकुतोभयमिति** । स्वत एवाज्ञानाद्भयम्, न त्वन्यत इति रहस्यम् । ननु लोकेश्वरस्य कथं पर्यटनमित्याशङ्क्याह **ननु भूयान् भगवत इति** । लोकान् पर्यटतो भगवतस्तव सतः भूयानेव गुणो भवतीत्यर्थः । अतः सर्वलोकहितार्थं परिभ्रमणमित्यर्थः । अनेन तस्य स्तुतिरुक्ता ॥ ३५ ॥ प्रकृतोपयोगिकार्यं प्रष्टुं तस्य ज्ञानमाह **न हि तेऽविदितं किञ्चिदिति** । अयं हीश्वरस्येच्छाशक्तेराधिभौतिकरूपः, यावद्भगवानिच्छति, करोति च, तत्सर्वमस्य विदितम् । **ईश्वर इति** । मूलभूतः काल इति विमर्शः । अत ईश्वरेच्छया पाण्डवानां यच्चिकीर्षितम्, तत्तव विदितमेवेति युष्मान् पृच्छामहे । **हे आयुष्मन्निति वा** । अथशब्दो हेत्वर्थः आनन्तर्यपर्यायः ॥ ३६ ॥

श्रीसुबोधिनी-सारः

दूतोक्तिः इत्येवं मागधेन संरुद्धाः भवतो दर्शनेच्छवो भूपास्ते तव पादमूलं प्रपन्नाः संति दीनानामनाथानां शं सुखं त्वया विधीयताम् ॥ ३१ ॥ शुकोक्तिः । एवं राज्ञां दूते ब्रुवति वदति सति परमोत्कृष्टा द्युतिर्दीप्तिर्यस्य स पिंगायाः पिशंगवर्णाया जटाया भारं बिभ्रत् देवर्षिर्नारदः प्रादुरभूत् सूर्य इव ॥ ३२ ॥ सर्वलोकेश्वराणामीश्वरो भगवान् कृष्णः सभ्यैः सभार्हैः सहितः सानुगः सभृत्यः तं नारदं दृष्ट्वा उत्थितो मुदा हर्षेण शीर्ष्णा शिरसा ववंदे प्रणनाम ॥ ३३ ॥ विधिवत् कृत आसनपरिग्रहो येन तं मुनिं सभाजयित्वा प्रशस्य श्रद्धया सूनृतैर्मधुरैर्वचनैः तर्पयन् प्रीणयन् उवाच ॥ ३४ ॥ त्रयाणां लोकानाम् अद्य इदानीमकुतोभयमपि स्वित्किं भवतस्तव लोकान् पर्यटतः सतो भूयान्महान् गुणो ननु एव ॥ ३५ ॥ ईश्वररचितेषु लोकेषु अविदितमज्ञातं किंचिदपि ते नहि अथातः युष्मत् भवद्भ्यः सकाशात् पांडवानां कर्त्तुमिष्टं वयं पृच्छामः ॥ ३६ ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

इतीत्यत्र । प्रार्थनाद्वयमिति । भवभयविमोकप्रार्थना मगधकर्मपाशविमोकप्रार्थना चेत्यर्थः । साधकत्रयमिति । मागधवधे त्रयं साधकं हेतुरित्यर्थः । राजदूते इत्यत्र । अन्यथेति । रविं विना भगवत्सान्निध्येनैव तमःसंभावनाभावे भगवल्लीलायां दिनरात्रिव्यवस्थानं न स्यात् । तथा नारदं विना भगवत्सांनिध्येनैवाज्ञानसंभावनाभावे भगवल्लीलायां ज्ञानाज्ञान-

व्यवस्थानं न स्यात् । लीलार्थमज्ञानमपि स्थापनीयमितिभावः । **तं दृष्ट्वेतित्रिभिरिति** । एतच्छ्लोकमारभ्य त्रिभिः प्रकारैः, **नतु श्लोकैरित्यर्थः** । **ऋषित्वादिति** । नारदस्य लोकत्वपक्षे ईश्वरत्वपक्षे वा तस्यापीश्वरस्य भगवतो नारदवन्दनं शिक्षार्थमेव । **अत** इति । **शिक्षार्थत्वादित्यर्थः । अपि स्विदित्यत्र** । **ननु लोकेश्वरस्येति** । पूर्वतरश्लोके गुरुत्वाल्लोकेश्वरत्वेनोक्तस्य **नारदस्येत्यर्थः** ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं राजसन्देशमुक्त्वा **दूतः स्वयमाह—इतीति** । मागधेन संरुद्धा भवद्दर्शनकाङ्क्षिणो राजान इत्येवं ते पादमूलं प्रपन्ना इति अतस्तेषां दीनानां शं सुखं **विधीयताम्** ॥ ३१ ॥ राज्ञा दूते एवं **ब्रुवति सति परमा द्युतिर्यस्य सः** पिङ्गं पीतं जटाभारं बिभ्रत् बिभ्राणः देवर्षिर्नारदः प्रादुरासीत् **अकस्मादागतः** । परमद्युतित्वे **दृष्टान्तमाह— यथा** रविरिति ॥ ३२ ॥ तमागतं नारदं दृष्ट्वा सर्वलोकेश्वरा ब्रह्मरुद्रेन्द्रादयः **तेषामीश्वरो नियन्ता** पालकोपि **भगवान् कृष्णः सभ्यैः** सहितो तथा **अनुगैर्भृत्यादिभिः** सहितश्च उत्थितः सन् मुदा हर्षेण **शीर्ष्णा ववन्दे** इत्यन्वयः ॥ ३३ ॥ **विधिवद्यथाविधि सभाजयित्वा** तं पूजयित्वा **कृत आसनस्य** परिग्रहः स्वीकारः येन तं मुनिं **श्रद्धया** स्नेहविशेषेण **सुनृतैर्मधुरैः** वाक्यैश्च तर्पयन् प्रीणयन् **बभाषे** ॥ ३४ ॥ तद्भाषण**मेवाह**—अपिस्विदिति द्वाभ्याम् । अद्य अधुना त्रयाणां लोकानां किस्विदकुतोभयं अभयमस्ति । ननु हे ब्रह्मन् ! पर्यटतो भगवतस्त्वत्तोऽस्माकमयं भूयान् महान् गुणः लाभः, **यत्सर्वलोकवृत्तान्तज्ञानमिति** शेषः ॥ ३५ ॥ **हि** यस्मादीश्वरः कर्ता येषां तेषु लोकेषु तवाविदितं **किञ्चिन्नास्ति**, अथ तस्मात् पाण्डवानां यच्चिकीर्षितं तत् युष्मान्प्रति **पृच्छामहे** इत्यन्वयः ॥ ३६ ॥

अन्वितार्थप्रकाशिका

दूत आह—इतीति ॥ **मागधेन संरुद्धा** भवद्दर्शनकांक्षिणो **राजान** इत्येवं ते **पादमूलं प्रपन्ना इति** । अतस्तेषां दीनानां शं सुखं विधीयताम् ॥ ३१ ॥ **राजेति** ॥ **राज्ञां दूते एवं ब्रुवति** सति परमा **द्युतिर्यस्य** स **पिङ्गं** पीतं जटाभारं **बिभ्रत्** बिभ्राणः देवर्षिर्नारदः यथा रविस्तथा प्रादुरासीत् ॥ ३२ ॥ तमिति ॥ **तमागतं नारदं दृष्ट्वा सर्वेषां लोकेश्वराणामीश्वरो** भगवान् कृष्णः सभ्यैः सहितः तथा **अनुगैर्भृत्यादिभिः** सहितश्च उत्थितः सन् मुदा हर्षेण **शीर्ष्णा ववन्दे** ॥३३॥ सभाजयित्वेति ॥ **कृत आसनस्य** परिग्रहः स्वीकारो येन तं **मुनिं श्रद्धया** विधिवत्सभाजयित्वा पूजयित्वा **सूनृतैर्मधुरैः** **वाक्यैश्च** तर्पयन् प्रीणयन् **बभाषे** ॥ ३४ ॥ अपीति ॥ अद्य अधुना त्रयाणां लोकानां अपिस्वित् किस्विदकुतोभयम् अभयं **कुशलमस्ति तव** तु सदैव कुशलवत्त्वात्कुशलं न **पृच्छ्यते** इति भावः । ननु हे **ब्रह्मन्** ! **लोकान्** पर्यटतो भगवतस्त्वत्तोऽस्माकमयं भूयान् महान्गुणः लाभः **यत्सर्वलोकवृत्तान्तज्ञानमिति** शेषः ॥ ३५ ॥ **नेति** ॥ हि **यस्मादीश्वरः** कर्ता **येषां तेषु** । कबभाव आर्षः । **लोकेषु** तवाविदितं किंचिन्नास्ति अथ तस्मात् पाण्डवानां यच्चिकीर्षितं तत् युष्मान् प्रति पृच्छामहे । तङार्षः । यद्वा । हे इति पृथक् पदं प्रार्थने लोट् ॥ ३६ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इतिति दूतवचनं ॥ ३१-३२ ॥ **कृत** आसनादिपरिग्रहः । पूजापरिकरो यस्य तं ॥ ३४ ॥ लोकान्पर्यटतः भगवतः सकाशात् भूयान् महान् गुणः निखिलजनवृत्तांतवेदनरूपो लाभोऽस्माकमस्ति ॥ ३५ ॥ ईश्वरः कर्ता येषां तेषु अथ अतः ॥ ३६ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं राज्ञां संदेशमुक्त्वा दूतः **स्वयमाह** । इतीति । हे भगवन्, इतीत्थं, **मागधसंरुद्धाः** नृपाः, भवद्दर्शनकाङ्क्षिणः, **ते तव**, पादमूलं प्रपन्नाः, वर्त्तन्ते । **अतः**, दीनानां **तेषां**, शं सुखं, विधीयतां इति **दूतवाक्यम्** ॥ ३१ ॥ **अथ** तदानीं नारदागमनादिकं **प्रस्तौति** । राजदूत इति । राजदूते, एवं ब्रुवति सति, परमा **द्युतिर्यस्य सः**, पिङ्गजटाभारं पिङ्गलवर्णजटागुम्फं, **बिभ्रत् बिभ्राणः, देवर्षिर्नारदः, रविः यथा तथा**, प्रादुरासीत् ॥ ३२ ॥ तमिति । तं नारदं, **दृष्ट्वा सर्वलोकानामीश्वरा ये ब्रह्मादयस्तेषामीश्वरः**, भगवान् कृष्णः, **ससभ्यः**, सानुगः, मुदा उत्थितः सन्, **शीर्ष्णा** शिरसा, ववन्दे ॥ ३३ ॥ सभाजयित्वेति । **भगवान्**, कृत आसनपरिग्रहो येन तं, मुनिं नारदं, विधिवत् श्रद्धया, सभाजयित्वा, **सूनृतैर्मधुरैः, वाक्यैः** तर्पयन् संप्रीणयन्, **बभाषे** ॥ ३४ ॥ तदेवाह द्वाभ्याम् । **अपि स्विदिति** । अद्य, त्रयाणां लोकानां, **अकुतोभयं** अपि स्वित् । त्रिलोक्यां सर्वे जना **अकुतोभया वर्त्तन्ते** किमु इति भावः । हे **ब्रह्मन्**, लोकान् पर्यटतः, भगवतस्त्वत्तः, अस्माकमयं, **भूयान्** गुणो लाभः ननु । यत् सर्वं लोकवृत्तान्तज्ञानमिति वाक्यशेषः ॥ ३५ ॥ न हीति । **ईश्वरः** कर्त्ता येषां तेषु, लोकेषु, ते तव, अविदितं किञ्चित्, न हि । सर्वं तव विदितमेवास्तीत्यर्थः । अथातो हेतोः, युष्मान्, पाण्डवानां, चिकीर्षितं, पृच्छामहे ॥ ३६ ॥

कृष्णप्रिया

दूत ने कहा—भगवन् ! जरासंध के बंदी नरपतियों ने इस प्रकार आप से प्रार्थना की है। वे आपके चरणकमलों की शरण में हैं और आपका दर्शन चाहते हैं। आप कृपा करके उन दीनों का कल्याण कीजिये ॥ ३१ ॥ श्रीशुकदेवजी कहते हैं—परीक्षित् ! राजाओं का दूत इस प्रकार कह ही रहा था कि परमतेजस्वी देवर्षि नारदजी वहाँ आ पहुँचे। उनकी सुनहरी जटाएँ चमक रही थीं। उन्हें देखकर ऐसा मालूम हो रहा था, मानो साक्षात् भगवान् सूर्य ही उदय हो गये हों ॥ ३२ ॥ ब्रह्मा आदि समस्त लोकपालों के एकमात्र स्वामी भगवान् श्रीकृष्ण उन्हें देखते ही सभासदों और सेवकों के साथ हर्षित होकर उठ खड़े हुए और सिर झुकाकर उनकी वन्दना करने लगे ॥ ३३ ॥ जब देवर्षि नारद आसन स्वीकार करके बैठ गये, तब भगवान् ने उनकी विधिपूर्वक पूजा की और अपनी श्रद्धा से उनको सन्तुष्ट करते हुए वे मधुर वाणी से बोले ॥ ३४ ॥ 'देवर्षे ! इस समय तीनों लोकों में कुशल-मङ्गल तो है न ? आप तीनों लोकों में विचरण करते रहते हैं, इससे हमें यह बहुत लाभ है कि घर बैठे सबका समाचार मिल जाता है ॥ ३५ ॥ ईश्वर के द्वारा रचे हुए तीनों लोकों में ऐसी कोई बात नहीं है, जिसे आप न जानते हों। अतः हम आप से यह जानना चाहते हैं कि युधिष्ठिर आदि पाण्डव इस समय क्या करना चाहते हैं ?' ॥ ३६ ॥

श्रीनारद उवाच

दृष्टा मया ते बहुशो दुरत्यया माया विभो विश्वसृजश्च मायिनः ।
भूतेषु [1]भूमंश्चरतः स्वशक्तिभिर्वह्नेरिवच्छन्नरुचो[2] न मेऽद्भुतम् ॥ ३७ ॥
तवेहितं कोऽर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः ।
[3]यद् विद्यमानात्मतयावभासते[4] तस्मै नमस्ते स्वविलक्षणात्मने ॥ ३८ ॥
जीवस्य यः संसरतो विमोक्षणं न[5] जानतोऽनर्थवहाच्छरीरतः ।
लीलावतारैः स्वयशःप्रदीपकं [6]प्राज्वालयत्त्वा तमहं प्रपद्ये ॥ ३९ ॥
अथाप्याश्रावये ब्रह्म नरलोकविडम्बनम् । राज्ञः पैतृष्वस्रेयस्य[7] भक्तस्य च चिकीर्षितम् ॥ ४० ॥

कर्दमक्षमा

अन्वयः—नारद उवाच—विभो ! भूमन् ! विश्वसृजः, मायिनः, भूतेषु, स्वशक्तिभिः, वह्निः, इव, चरतः, छन्नरुचेः, ते, मायाः, मया, बहुशः, दुरत्यया, दृष्टाः, न, मे, अद्भुतम् ॥ ३७ ॥ स्वमायया, इदम्, सृजतः, नियच्छतः, तव, इहितम्, साधु, वेदितुम्, कः, अर्हति, यद्, विद्यमानात्मतया, अवभासते, स्वविलक्षणात्मने, तस्मै, नमस्ते ॥ ३८ ॥ अनर्थवहात्, शरीरतः, संसरतः, विमोक्षणम्, जीवस्य, न, जानतः, लीलावतारैः, स्वयशः, प्रदीपकम्, प्रज्वालयत्, तम्, अहम्, त्वाम्, शरणम्, प्रपद्ये ॥ ३९ ॥ हे ब्रह्मन्, अथ, अपि, आश्रावये, नरलोकविडम्बनम्, राज्ञः, च, भक्तस्य, पैतृष्वस्रेयस्य, चिकीर्षितम् ॥ ४० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवमविदुषेव सर्वज्ञेन जरासंधवधार्थमेव पांडवचिकीर्षितं पृष्टो नारदो मायेयमिति ज्ञात्वाह दृष्टा इति त्रिभिः। विश्वसृजश्च ब्रह्मणोऽपि मायिनो मोहकस्य ते स्वशक्तिभिर्विद्यादिभिर्भूतेष्वंतर्यामितया चरतो वर्तमानस्य यद्यहं भूतेषु वर्ते तर्हि भूतानि मां किं न पश्यंति तत्राह। वह्नेरिवच्छन्नरुच इति। स्वशक्तिभिरेव छन्ना रुक् प्रकाशो यस्य तस्य अतस्तवेदं प्रश्नादि न मेऽद्भुतम् ॥ ३७ ॥ इदं जगत्। कथंभूतम्। असदेव यत्तव मायया विद्यमानात्मतया भासते तज्जगत्सृजतः किंतु केवलं तुभ्यं नमनमेव शक्यमित्याह। तस्मै नम इति। कुतः। स्वेन रूपेण सर्वतो विलक्षणात्मने अचिन्त्यायेत्यर्थः ॥ ३८ ॥ नन्वेवंभूतस्य किं मायाचेष्टितैरित्यत आह। जीवस्येति। अविद्यातमसावृतत्वेनानर्थ प्रापकाच्छरीरात्संसरतः तेनैव तपसा तस्माच्छरीराद्विमोक्षोपायमजानतः। प्राज्वालयत्प्रदीपितवान् तं त्वा त्वाम्। यशःश्रवणादिभिर्जीवस्य मोक्षार्थमित्यर्थः ॥ ३९ ॥ आश्रावये श्रावयिष्यामि। नरलोकविडंबनं ब्रह्म त्वाम्। ब्रह्मन्निति पाठेऽपि हे ब्रह्मन्परमात्मन्नरलोकानुकारिणं त्वां श्रावयिष्यामीति ॥ ४०-४१ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

श्रीभगवता लोकत्रयाकुतोभयं यत्पृष्टं तस्याज्ञातत्वेन पांडवतात्पर्यकत्वेन चोत्तरमदत्वा त्वस्मिन्सर्वदर्शित्वं यदुक्तं तत्तु तच्छक्तिमयत्वेनैवांगीकरोति—दृष्टा इति। माया मायिककार्याणि नानाब्रह्मांडगतानि तथा विश्वसृजस्तत्तदन्तर्यामि-

---

[1] शश्वच्च–विज. । [2] रुचोऽद्भुताः–विज. । [3] यो विश्व–विज. । [4] तयाऽवसीयते–वीर. विज. । [5] न जायते–विज. ।
[5] प्रज्वालयेस्त्वं तदहं–विज. । [7] ष्वसे–श्रीधर. वंशी. जीव. वीर. विज. विश्व. ।

ब्रह्मविष्ण्वादयो मायिनस्तच्छक्त्यंशधारिणश्च दृष्टाः। तच्च 'त्वं पर्यटन्नर्क इव त्रिलोकीम्' इति व्यासोक्त्यनुसारेण स्वस्य तव शक्तिभिस्त्वद्भक्तिमयमच्छक्तिभिरेव वा सर्बव्यापकवह्नेरिव छन्नरुच आच्छादितसर्वज्ञस्य स्वतो भूतेषु चरतो मम नाद्भुतमिति तोषिणी। वृत्त्यभिप्रायेण बहुत्वं माया इति ॥ ३७ ॥ विद्यमानात्मतया स्वरूपस्थितिं लब्धवत्तया। इत्यर्थ इति। असदपि सत्कुर्वतस्तव मायावैभवमतर्क्यमिति भावः ॥ ३८ ॥ इत्यर्थ इति—"भवेऽस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः। श्रवणस्मरणार्हाणि" इत्याद्युक्तेरिति भावः ॥ ३९ ॥ श्रावये भविष्यति लट् आङ्पूर्वः। ब्रह्मेति पूर्णब्रह्मस्वरूपः। नलोपस्य संबुद्धौ विकल्पः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीभगवता लोकत्रयाकुतोभयं यत्पृष्टं तस्य ज्ञातत्वेन चोत्तरमदत्वा स्वस्मिन् सर्वदर्शित्वं यदुक्तं तत्तु तच्छक्तिमयत्वेनैवाङ्गीकरोति–दृष्टा इति। मायाः मायिककार्य्याणि नाना ब्रह्माण्डगतानि तथा विश्वसृजः तत्तदन्तर्यामिब्रह्मविष्ण्वादयो मायिनस्त्वच्छक्तिधारिणश्च दृष्टाः तच्च त्वं पर्य्यटन्नर्क इव त्रिलोकीमित्यादि प्रथमस्कन्धस्थ श्रीव्यासोक्त्यनुसारेण स्वस्य तव शक्तिभिस्त्वद्भक्तिमयमच्छक्तिभिरेव वा सर्वव्यापकवह्नेरिव छन्नरुचः सतो भूतेषु चरतो मम नाद्भुतमिति ॥ ३७ ॥ किन्तु तवेहितं सर्वज्ञत्वादौ सत्यपीदृशप्रश्नादिना सम्पादयितुमिष्टं को मद्विधो महत्तमो वा साधु सुष्ठु यथा स्यात्तथा वेदितुमर्हति तत्र हेतुः यत्पृष्टव्यं प्रश्नस्य गौणमुख्यकर्मभूतं तदिदं सर्वं सृजतः नियच्छतः नियन्तृतया प्रवर्त्तयतश्चेति किञ्च तत्रेदं सर्वं यस्य विद्यमानस्वरूपतया करतलविद्योतमानस्फटिकगोलकतुल्यतया अवभासते प्रकाशते तस्मै तुभ्यं केवलं नमः नतु स त्वमूहितुमर्हस इत्यर्थः। यतः स्वस्मात् विलक्षण आत्मा यस्य तादृशायेति ॥ ३८ ॥ अहो आस्तान्तावत् त्वदीहितं जीवस्य स्वमोक्षणप्रकारमप्यजानतस्तस्यार्थे यः परमकारुणिकः स्वयशोरूपं प्रदीपकं तद्यदि सर्वार्थप्रकाशकं प्राज्वालयत् तं त्वामेवाहं प्रपद्य इति त्वाज्ञानादिप्रकाशनादिना (मो) मुह्यमानस्यापि मम त्वमेव शरणमिति भावः ॥ ३९ ॥ यद्यप्येवं त्वमेव सर्वज्ञः अथापि आ सम्यक् श्रावयामि कुतः नरलोकविडम्बनं तत्सदृशमित्यर्थः। अतः प्रश्नश्चायं भगवतो योग्य एवेत्याह—पितृष्वसुस्तद्भावप्राचुर्य्येण परमवत्सलायाः श्रीपृथाया अपत्यस्य स्वयमपि तथैव भक्तस्येत्यर्थः ॥ ४० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विभोर्व्यापकस्येति मायाया अपि व्यापकत्वम्; मायिन इति श्रीब्रह्मादिमोहकत्वञ्च सूचितम्; अतो दुरत्यया दुर्वितर्क्या अपि बहुशो दृष्टाः। न च केवलं बाह्या एव, किन्तु आन्तर्य्यश्चेत्याह—भूतेष्विति। भूमन्! हे अपरिच्छिन्न! तथापि प्रत्येकं सर्व्वजीवानामन्तर्यामितया स्वशक्तिभिस्तत्तद्विचित्रसर्व्वेन्द्रियवृत्तिप्रवर्त्तनादिना तेषु चरतो नाद्भुतं मायिकत्वादिति भावः। अन्यत्तैर्व्याख्यातम्। यद्वा, भूमन्! हे सर्व्वव्यापक! अतः काष्ठेषु वह्नेरिव, किंवा अग्निवत् जाज्वल्यमानतया सर्व्वभूतेषु चरतोऽपि तवेदं प्रश्नादिकं स्वस्य तव शक्तिभिर्मायातदंशाविद्यादिभिश्छन्नरुचोऽपि मे नाद्भुतम्। तत्र हेतुः—दृष्टेति, अतोऽयं प्रश्नो माययैवेति भावः। अन्यत् समानम् ॥ ३७ ॥ ननु मया किं प्रयोजनमिति चेत्तत् केन ज्ञातुं शक्यमिति, किंवा न च प्रश्नोऽयं केवलं माययैव, किन्तु केनचिदभिप्रायेणापि, स तु केन ज्ञातुं शक्यतामित्याशयेनाह—तवेति। साधु यथा स्यात्तथा कोऽर्हति, अपितु तत् प्रयोजनादिकं कोऽपि न ज्ञातुं शक्नोतीत्यर्थः। कुतः? स्वस्यैव मायया सृजतो नियच्छतश्च नाशयतः, सृष्टेर्नाशेन सह विरोधादिति भावः। किञ्च, क्वचिन्मायाया अपि सत्यार्थत्वादित्याह—यदिति। अतः स्वत एव सर्व्वतोविलक्षणस्वभावाय नमः। अन्यत्तैर्व्याख्यातम्। यद्वा, यत्तवेहितं विद्यमानात्मतया सर्व्वेषां प्रत्यक्षत्वेन यद्यप्यवभासते द्योतते, तथापि वेदितुं कोऽर्हति? अन्यत् समानम् ॥ ३८ ॥ ननु मदीहिताज्ञानेन भक्त्यसिद्ध्या लोकाः कथं निस्तरेयुः? तत्राह—जीवस्येति। अनर्थवहादपि शरीरात् विशेषतोऽपुनर्भवत्वादिना मोक्षणं न जानतः; यद्वा, अज्ञाने हेतुः—अनर्थेति। स्वयश एव प्रदीपकः, अज्ञानतमोनाशकत्वात्, तं प्रकर्षेणाज्वालयद् यो भवान् तं त्वामहमनन्यगतिः, अभिप्रायाज्ञानेऽपि सति त्वद्यशःश्रवणादिना सुखं निस्तारो भवितैवेति भावः ॥ ३९ ॥ आश्रावये सम्यक् श्रावयाम्येव; कुतः? नरलोकं भूतलम्, किंवा नरान् लोकांश्च सर्व्वान्; यद्वा, सर्व्वजीवलोकान् विडम्बयति, डलयोरेकत्वान्मनुष्यक्रीड़या स्थिरीकरोतीति तथा सः, तम्; किञ्च, राज्ञ इति धर्म्मराजस्य श्रीयुधिष्ठिरस्य राजत्वादीनां यथोत्तरमाश्रावणहेतुत्वे श्रैष्ठ्यमूह्यम्। अन्यत्तैर्व्याख्यातम्, यद्वा, नरलोकस्य विडम्बनमवलम्बनमनुकारकं वा चिकीर्षितम् ॥ ४० ॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मायाः आश्चर्यशक्तयः ॥ ३७ ॥ विद्यमानात्मतया जन्मादिविकाररहिततया अवभासते यत् तत्सदा अस्त्येव अध्यवसीयते स्वतो विलक्षणस्य चिदचिद्वस्तुनः आत्मने शरीरिणे अस्वविलक्षणात्मने न स्वस्मात् स्वरूपात् विलक्षणः आत्मा विग्रहो यस्य तस्मै ॥ ३८ ॥ अनर्थवहात् दुःखवहाच्छरीरात् प्रज्वालय सम्प्रकाशय ॥ ३९–४२ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

इत्थं सर्वज्ञेनाप्यविदुषेव जरासन्धवधार्थमेव पाण्डवचिकीर्षितं पृष्टो नारदः केवलमिदं जनव्यामोहनमिति ज्ञात्वाऽऽह दृष्टेति त्रिभिः । हे विभो ! हे भूमन् ! स्वशक्तितः सर्वज्ञत्वादिस्वशक्तिभिरेव सह भूतेष्वन्तरात्मतया चरतस्तव अनेन पाण्डवादिचिकीर्षितं तव विदितमेवेत्यभिप्रेतं विश्वसृजो ब्रह्मणोपि मायिनो व्यामोहकस्य तव पाण्डवानां चिकीर्षितं पृच्छाम इत्येतत् दुरतिक्रमणीया माया दृष्टा व्यामोहनमात्रमेतदिति निश्चितमित्यर्थः । बहुशो दुरत्ययेत्यनेन त्वत्प्रपन्नैः स्वत्ययैवेति सूचितं यद्वा बहुशो दृष्टेति सम्बन्धः यथा मह्यं योगमायोदयः प्रदर्शितस्तद्वद्वयं प्रश्नोपीति भावः । ननु भूतेषु चरामि तैः किं न दृश्य इत्यतो विशिनष्टि-भस्मना वह्नेरिति-वह्नेः छन्ना गूढा रुक् प्रकाशो यस्य तवेति सम्बन्धः अतस्तदेवं प्रश्नादिकं मम नाद्भुतमित्यर्थः ।। ३७ ।। पाण्डववृत्तान्तप्रश्नव्याजेन मागधजिघांसैवाभिप्रेतेत्यपि न निश्चेतुं शक्नुम इत्यभिप्रयन्नाह—तवेति । ईहितमभिप्रेतं साधु यथा तथा तद्वेदितुं को वार्हति न कोपीत्यर्थः । तत्र हेतुत्वेन तं विशिनष्टि-स्वमायया स्वसङ्कल्पेनेदं जगत् सृजतः नियच्छताऽन्तरात्मतया प्रशासितुश्च तवेति सम्बन्धः त्वत्सृज्यस्त्वन्नियाम्यश्च अयञ्जनः कथं वेत्तुमर्हतीतिभावः । किन्तु यद्विद्यमानात्मतया यस्मिंस्त्वयि विद्यमान आत्मा भावोऽभिप्राय इति यावत् तत्त्वेनाध्यवसीयते निश्चीयते मयेति शेषः यस्य तवायमेवाभिप्राय इति मया न निश्चीयत इत्यर्थः । स्वेन स्वासाधरणस्वभावेन सर्वस्माद्विलक्षण आत्मा स्वरूपं यस्य तस्मै तुभ्यं नमः केवलं नमस्करोमि न त्वीहितं निश्चेतुं शक्नोमीति भावः ।। ३८ ।। यद्यप्येवमथापि त्वदवतारः केवलं साधुपरित्राणाय दुष्कृद्विनाशाय चेत्ये तत्तु निश्चिनोमीत्यभिप्रयन् प्रपद्ये जीवस्येति । यो भवान् संसरतोऽनर्थात् दुःखवहाच्छरीरान्मोक्षणं मोक्षणोपायमजानतश्च जीवस्य यश एव प्रदीपस्तं लीलावतारैः प्रज्वालयन् सन्दीपितवान् तं त्वामहं शरणं प्रपद्ये मुक्त्युपायमजानतः संसरतो जीवस्य यथान्धतमसावृतघटपटादीनजानतस्तद्ज्ञानोपायभूतप्रदीपप्रज्वलनं तद्वत् शृण्वतोऽनुस्मरतः कथयतश्च मुक्त्युपायभूतं यशो विस्तृतवानित्यर्थः ।। ३९ ।। अथापीति । यद्यप्येवमथापि नरलोकं विडम्बयन्ननुवर्त्तसे इति तथा तं त्वां प्रति राज्ञो युधिष्ठिरस्य चिकीर्षितं श्रावये ।। ४० ।।

श्रीविजयध्वजतीर्थकृता पदरत्नावली

मायामाहात्म्यानि मायिनः नित्याव्याहतमाहात्म्यस्य दारुषु छन्नरुचः वह्नेः रुच इव तव रुचोप्यद्भुताः अचिन्त्याः ।।३७।। वह्नेः रुचो मथनादिना व्यज्यन्ते न तथा तव रुच इति भावेनाह— तवेति । कुतो निर्वेदनमिति तत्राह—य इति । यो भवानविद्ययाऽज्ञानेनात्मतया अस्वामितयाऽवसीयते निश्चीयते शरीरिभिरिति शेषः । इति यदतो वेदनं दुःशकमित्यर्थः । तर्हि तत्सत्यं किं नेत्याह स्वेति । स्वतो विलक्षणस्वरूपाय तस्मात्स्वामित्वमेव सत्यमिति तत्राज्ञानमेव कारणमित्यर्थः । स्वरूपतो विरुद्धलक्षणस्वामिने कदाप्यनुपहतस्वामिन इत्यर्थः इति वा ।। ३८ ।। अज्ञानं मां कदापि न स्पृशेत्प्रत्युत ज्ञानमेव नित्यं प्रज्वलितं भूयादिति प्रार्थयते—जीवस्येति । अज्ञानतः संसरतो जीवस्यानर्थवहात् शरीरविमोक्षणं न जायत इति यत्तस्मादेतद्देहहानाय लीलावतारैस्त्वं स्वयशःप्रदीपकं ज्ञानं प्रज्वालयेस्तदर्थमहं शरणं प्रपद्य इत्यन्वयः । अनेन लीलावतारविषयाज्ञानं दूरीकृत्य तत्त्वज्ञानमेव विकसितं कुर्वित्युक्तं भवति ।। ३९ ।। यतस्त्वत्प्रसादादस्मदादेर्विज्ञानं तत्र किञ्चिदपि विज्ञाप्यं न पश्यामि अथापि तथापि अशेषपुरुषार्थप्राप्तौ भगवद्भक्तेः मुख्यहेतुत्वेपि नरदेवानां विडम्बनं यज्ञकरणम् ।। ४० ।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वमाययैव त्रीन् लोकान् मोहयसि अथच तेषामकुतोभयत्वं प्रच्छसीत्यद्भुतं ते चरित्रमपि नरलीलस्य नेदमद्भुतमित्याह—दृष्टा इति । विश्वसृजश्च ब्रह्मादेरपि मायिनो मोहकस्य किञ्च हे भूमन् ! सर्व्वव्यापक ! भूतेष्वपि शक्तिभिर्मायादिभिः सहान्तर्यामितया चरतो वर्तमानस्य माया एव बहुशो दृष्टा किन्तु नरलीलत्वेन छन्ना कौतुकार्थमावृता येन तस्य तवैतादृशप्रश्नादिकं न मे मयि अद्भुतम् ।। ३७ ।। किञ्च यत् विश्वं विद्यमान आत्मा अन्तर्यामी यत्र तत्तयैव अवभासते चेतनीभवति तदेवेदं विश्वं कदाचित् सृजतः कदाचिन्नियच्छतस्तव ईहितमभिप्रायं तस्मात् स्वतःस्वभावादेव सर्व्वतो विलक्षणात्मने अतर्क्याय तुभ्यं नमः ।। ३८ ।। किञ्च विश्वस्याकुतोभयप्रश्नः स इच्छते चेत्याह—जीवस्येति । शरीरतो बन्धरूपात् विमोक्षणं न जानतो जीवस्य सम्बन्धे स्वयशोरूपं प्रदीपकं यः प्राज्वालयत् स्वतत्त्वं दर्शयितुमिति भावः । त्वा त्वां तस्मात् जगत्यस्मिंस्त्वन्मायामोहिताः सभयाश्च दृष्टा त्वदीययशःश्रवणकीर्तनपराः अकुतोभयाश्च बहवो दृष्टा इति श्लोकत्रयेण द्योतितम् ।। ३९ ।। द्वितीयप्रश्नस्योत्तरमाह—अथापीति पञ्चभिः । हे ब्रह्म पूनर्ब्रह्म स्वरुप ! ब्रह्मन्निति पाठेऽपि स एवार्थः । सम्बुद्धौ नलोपस्यवैकल्पिकत्वात् । यद्यपि सर्व्वज्ञत्वात् जानास्येव तदप्याश्रावये यतो नरलोकं विडम्बयतीति व्यतिरेकालङ्कारेण नरलोकसमशीलमित्यर्थः ।।४०।।

गूढार्थदीपिनी

हे विभो ! विश्वसृजश्च ब्रह्मणोऽपि मायिनः मोहकस्य ते माया मायिककार्याणि ब्रह्माण्डगतानि बहुशो दृष्टा । कथंभूता । दुरत्यया दुःखेनापि अत्येतुमुल्लङ्घयितुमशक्या ज्ञातुं वा । कथंभूतस्य ते । भूतेषु अन्तर्यामितया चरतः वर्तमानस्य ।

तर्हि मां कथं न पश्यन्ति । भस्मना छन्नरवह्नेरिवः स्वशक्तिभिः सत्त्वादिगुणैः छन्ना रुक् प्रकाशो यस्य तस्य नाहं प्रकाशः सर्वस्य योगमायासमावृतः इत्युक्तेः । अतः सर्वज्ञस्यापि साधारणजनवत् ते प्रश्नकरणं मेऽद्भुतमाश्चर्यकरं नास्ति ॥ ३७ ॥ तव ईहितं साधु सम्यक्तया को वेदितुमर्हति न कोऽपि । कथंभूतस्य तव । इदं जगत् नियच्छतः संहरतः पालयतश्चेति योज्यम् । किञ्च असदपि यत् जगत् तव मायया विद्यमानात्मतया सत्यस्वरूपतया प्रतीयते तस्मै स्वेन रूपेण विलक्षणात्मने अचिन्त्यरूपाय ते नमः ॥ ३८ ॥ किं च संसरतो नानायोनिषु भ्रमतः जीवस्य हेतोः य लीलावतारैः मुक्तिप्रदं स्वयशोरूपं दीपं प्राज्वालयत् तं त्वामहं शरणं प्रपद्ये इत्यन्वयः । कथंभूतस्य जीवस्य । अनर्थं प्रापकात् शरीरद्वयात् विमोक्षणं न जानतः । अनर्थो दुःखपरम्परा जन्ममरणादिरूपा ॥ ३९ ॥ हे ब्रह्मन् यद्यपि तवाविदितं किञ्चिन्नास्ति अथापि त्वाम् पैतृष्वसेयस्य युधिष्ठिरस्य चिकीर्षितं आश्रावये श्रावयिष्यामि । भविष्यदर्थे लट् । कथंभूतम् । नरलोकं विडम्बयति अनुकरोतीति तथाभूतम् । पितृष्वसा कुन्ती वसुदेवभगिनी ॥ ४० ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इत्थं सर्वलोकेश्वरेश्वरेण सर्वज्ञेन अर्चनपूर्वकं प्रश्नं कृतवता केवलं मयि कृपा कृतेति दृष्ट आह—दृष्टेति । ते तव भक्तवत्सलस्य माया कृपादृष्ट्या अनुभूता कथम्भूता बहुशः बहुभिः प्रकारैः दुरत्यया प्रतिकर्त्तुमशक्या अतो हे विभो ! विश्वसृजो ब्रह्मणोपि मायागुणमयी बन्धनरज्जुस्थानीयास्यास्तीति तथा तस्य नियन्तुरित्यर्थः । मे मयि दासे यद्विधिवदर्चनं शक्तिभिर्ज्ञानादिभिः भूतेषु चराचरेषु चरतः साक्षात् सर्वद्रष्टुः प्रश्नञ्च म अद्भुतम् नन्वित्थं मामन्ये कुतो न जानन्त्यत आह—वह्नेरिवच्छन्नरुच इति । वह्निर्यथा सूक्ष्मरूपः छन्नरुक् भवति काष्ठादिषु वह्नि तदुपासक एव जानाति न सर्वो जन इत्यर्थः । तथा छन्नरुचः छन्ना गुप्ता सर्वजनाविषया रुक् प्रकाशो यस्य तस्य "नाहं प्रकाशः सर्वस्य" इति श्रीमुखवचनात् ॥ ३७ ॥ आस्तान्तावत् दुर्ज्ञेयत्वत्कार्यविश्वं तवाभिप्रेतं च कोपि न जानातीत्याह—तवेति विद्यमानस्य प्रतीयमानस्य वृष्ट्यान्नादेः कार्यजातस्यात्मतया कारणत्वेन यत्प्रतीयते नतु स्वरूपतो विश्वं कोपि जानाति तदिदं विश्वं स्वमायया स्वशक्त्या सृजतो नियच्छतश्च तवेहितं साधु वेदितं कोर्हति न कोपीत्यर्थः । अतः स्वविलक्षणात्मने जीवविलक्षणस्वरूपाय ते केवलं नमः कर्तव्यं जीवेनेति शेषः ॥ ३८ ॥ अज्ञस्यापि त्वद्यशश्श्रवणादिना मुक्तिर्भवतीति दर्शयन् स्वविलक्षणात्मत्वं प्रपञ्चयति—जीवस्येति । त्वां त्वदीहितं त्वत्कृतं विश्वञ्च अजानतः जीवस्य शरीरतः पुनः पुनर्जन्मबीजतया अनर्थवहात् विमोक्षणं मुक्तिदं स्वयशःप्रदीपकं यः प्राज्वालयत् प्रदीपितवान् तं त्वा त्वां प्रपद्ये ॥ ३९ ॥ यद्यपि सर्वज्ञस्य पाण्डवानां चिकीर्षितं पृच्छामहे इति प्रश्नमपि कृपाद्योतकम् अथापि हे ब्रह्मन् ! परमात्मन् । नरलोकविडम्बनं नरलोकानुकारिणं त्वाम् आश्रावये नरलोकानुकारित्वं सम्भावनया श्रावयिष्यामीत्यर्थः ॥ ४० ॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ईश्वरः कर्ता येषां तेषु । यद्यपि नद्यृतश्चेति कपा भाव्यम् । छान्दसस्तदभावः । लोकेषु हिते हितविषये भवद्भिः किञ्चिदविदितं न । न हि तेऽप्यविदितं किं न किमपीत्यन्वयः । सत्येवं युष्मानित्यायुष्मन्विजातीहि सुलग्नमिति । हे मुनयः । अथ पाण्डवानां चिकीर्षितं किमिति युष्मान्पृच्छामः । शृङ्ग्राहिकया पाण्डवानामगृह्णानः स्वस्य सर्वज्ञत्वेऽपि लोकनटनं कुर्वतो मम प्रश्न इति दध्वान । अन्यथा लोकैकदेशपाण्डवचिकीर्षितप्रश्ने करणीये लोकान्पर्यटत इत्युक्तिः किञ्चिदवाङ्मुखी भूयादिति ज्ञेयम् । यद्वा पाण्डवचिकीर्षितत्वे प्रीतिं न वद लोकानटतो नाविदितमस्तीति तद्वेदने हेतूक्तिः । यत्र क्व च नाशनादिव्यासक्तचित्तस्य वार्तावित्तिः सम्भावितेति न प्रीतिं वक्तुं युक्तमिति न वदेति वा तथा सम्बोधयन्वक्ति । अथेति । न विद्यते यमन्नं तदपेक्षेति यावत् । यस्य तत्सम्बुद्धिः । उक्त्वा पृच्छतां वृत्तं कण्ठः शुष्क इति दुष्करं व्याकरणमिति नेत्याह । पृच्छामह इति । तव वक्तुं महे उत्सवे सत्येष मम प्रच्छा प्रश्नोऽयमिति ममापि तद्वार्ता महे सत्येव पृच्छेयमिति वा । अटनमपि न घटितसहयायिजनस्य तवेति वक्तु त इत्येकवचनं । युष्मानिति बहुवचनं तत्पूज्यताया युज्यत इति तथोक्तिर्वा ॥ ३७ ॥ नारदोऽपि तस्य स्थितिं कैश्चिच्छ्लोकैराकलय्य पृष्टं वक्तीति वक्ति । नारद इति । यो भवान्बहुशः पूर्णसुखस्तस्य ते बहुशः । शस् स्वार्थे । बहुला मायाः शक्तयो मया दृष्टास्तदतिक्रमणं च न विना त्वदनुग्रहमित्याह । दुरत्यया इति । विश्वसृजः प्रजासर्जकस्य । सा नौपाधिकीत्याह । मायिन इति । शिखादिः । विभवित्यादिकं तद्दुरत्ययतायां हेतुरिति मन्तव्यम् । सदेति शश्वत् । भूतेषु । चरतस्तव न तत्सम्बन्धबन्धनादिकं तवेत्याह । स्वशक्तिभिरिति । स्वरूपभूतशक्तिभिः । नैकाकिनश्चरणं तवेत्यप्याह । स्वशक्तिभिः शक्यत्वाच्छक्तयो मायाः इत्युक्तेः श्रीभूदुर्गाभिः सहेति । न ता अपि स्वातन्त्र्येण किञ्चिदुदञ्चयितुं शक्ता इत्यपि वक्ति । सु अत्यन्तं न विद्यते शक्तिर्यासां ता इति स्वशक्तिभिरिति । स्वरूपशक्तयः कुतो न व्यक्ता । इत्यत आह । छन्नरुचः काष्ठान्तर्गता रुचो रुचीषि यस्य तस्य वह्नेः । अद्भुता अपि रुचो यथा ता न प्रकाशन्ते तथा तव शक्तय इति ॥ ३८ ॥ ननु तर्हि मथनादिनाऽस्मदाद्युपलम्भात्तद्वन्मम शक्तयः पुरुषप्रयत्नसुमिलव्यक्तय इत्यायातमिति तत्राह । तवेति । साधु सम्यक् स्वमायया स्वेच्छया ।

नैन्द्रजालिकजलादिनिर्माणकृष्मायेवेयमित्यप्याह। सु अमाययेति। सृजतो नियच्छतः संहरतो मध्यमे तु नान्यपथान्यकर्तृताविषयिणीति तदनुक्तिः। तवेहितं चेष्टितं वेदितुं कोऽर्हति न कोऽपि तत्र समर्थः। वेदितुमर्हति चेत्को ब्रह्माऽर्हति। कश्छन्दसां योगमावेदेतिवत्। सोऽपि न साकल्येन वेदितुमर्हतीति तात्पर्यम्। कुतो वेदितुं कोऽपि नार्हतीत्यत इत इत्याह। य इति। यो भवानविद्यया स्वकर्मायत्ताज्ञानेन करणेन प्राणिभिः कर्तृभिरनात्मतयाऽस्वामित्वेनावसीयते निश्चीयते। स्वविलक्षणात्मने स्वत एव बिलक्षण आत्मा स्वरूपं यस्य तस्मै। न स्थानकृतं न वा रूपकृतं नापि व्यापारकृतं वैलक्षण्यं त्वपीत्यप्याह। स्विति। तस्मै ते इव नमः। तस्मा इव तस्मै नमः। अथवा तस्मै वै तन्नारायणात्मन इति वा। तव ईहितमिति छेदः। ई रमा साधु ब्रह्मापेक्षया सम्यग्वेदितुमर्हति। साऽपि साधु साकल्येन नार्हतीति वा॥ ३९॥ यथा तदज्ञानं मां त्यजेद्भवेच्च तव ज्ञानं तथा दयां विधेहि। मया त्वनुष्ठेयं तदर्थमियदित्याह। जीवस्येति। यतोऽज्ञानात्संसारतो जीवस्य वहतीति वहमनर्थस्य वहं तस्माच्छरीरतो बिमोक्षणम्। प्राग्विशिष्टं मया त्वज्ञानरसेनोक्षणं संसक्तता न जायते यतस्ततो विमोक्षणं लिङ्गभङ्गादिर्न जायते। साधनानेधनान्न मोक्षो भवतीति भावः। नान्यः पन्था अयनायेत्यादेः। त्वमेव लीलवतारैरिदमादिभिः स्वयशःप्रदीपकं ज्ञानोद्दीपकं प्रज्वालयेः प्रज्वलयेः। यशःश्रवणेन ज्ञानं प्रज्वलितं भवति। तत्राप्येवं चेद्गात्रं कारणमितीरयति। अनर्थवहाद्द्रव्याद्यविषयवहाच्छरीरतः शरीरादिति। तत्तस्मादहमावृत्त्याऽहम्। अहेयत्वादहं नामेत्युक्तेरहमहेयं त्वां प्रपद्ये॥ ४०॥ त्वत्प्रसादासाधितसंविदा गोविन्दविज्ञातसर्वस्व त्वां प्रति नास्ति विज्ञाप्यं तथाऽपि नाज्ञावज्ञानं कार्यमिति तत्कार्यं विनिवेदयामीति वक्ति। अथाऽपीति। पैतृष्वसेयस्य पितृष्वसुः सुतस्य। पैतृष्वसेयः स्यात्पैतृष्वस्रीयश्च पितृष्वसुः सुत इत्यमरः। राज्ञस्तव भक्तस्य चिकीर्षितं हे ब्रह्मन् पूर्ण नरदेवविडम्बितं नं नरलोकविडम्बनमित्यपि पठन्ति। नरान्देवांश्च विडम्बयत्यज्ञवत्प्रस्तुतप्रश्नादिना देववन्नराशक्यगोवर्धनोद्धारेणेत्युभयविडम्बक इति नरलोकं विडम्बयतीति स तमित्युभयत्रार्थः। तं त्वां श्रावये श्रावयिष्यामि॥४१॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

भगवत्कृतं कायिकं वाचनिकं च तथा नोचितमिति, कदाचिदुपस्थितमन्यथा कुर्यादिति, तन्निराकरणार्थं मायाभावं प्रार्थयते दृष्ट्वा मयेति त्रिभिः। अनेकधा सर्वजनव्यामोहिकाः बहुधा प्रवर्तमाना मया दृष्टाः। तत्र स्वाज्ञानप्रकटनेन हीनभावप्रकटनेन च केवलमेकस्य मम व्यामोहनं किमाश्चर्यमिति वाक्यार्थः। मायायाः स्वरूपज्ञानमेवात्ययोतिक्रमः। तद्भगवन्मायासु न कस्यापि भवतीति दुरत्ययाः। वस्तुव्यभिचारे सकृदवगते पुनः प्रदर्शिता माया ज्ञाता भवतीति शङ्कां वारयितुं बहुश इत्युक्तम्। एका सहस्रधा प्रदर्शितापि न बुध्यत इति। एवं करणे सामर्थ्यमाह विभो इति। प्रयोजनमाह विश्वसृज इति। मायया जीवव्यामोहाभावे विश्वोत्पत्तिर्न स्यात्। चकारात्स्थितिप्रलयौ। किञ्च। मायी भगवान्, मायानामेक एवाश्रयः, तासामप्रदर्शने प्रचार एव न स्यादित्यावश्यकत्वमुक्तम्। किञ्च। मायानामप्रकटीकरणे महत्त्वे वानुपपत्तिरित्यभिप्रायेणाह भूतेषु भूमंश्चरत इति। चरणावश्यकत्वाय संबोधनम्। सकलभूतसम्बन्धो हि भूमा। तद्गतदोषसम्बन्धाभावाय स्वशक्तिभिरित्यसाधारणसामर्थ्यं:। अन्यथाभिमानमात्रे जीवे सर्वावस्थाः प्रवृत्तयश्च न भवेयुः। ननु भगवतः सर्वे गुणाः सर्वत्र प्रसिद्धाः, मायागुणः क प्रसिद्ध इत्याशङ्क्य दृष्टान्तमाह वह्नेरिव छन्नरुच इति। वह्निर्जलादौ प्रविष्टः स्वकार्यं कुर्वन्नपि छन्नरुग्भवति। रूपस्पर्शयोर्मध्ये अन्यतरप्राकट्यं ज्ञातधर्मस्य मायया विना न सम्भवतीति वह्नेः प्रथमोत्पन्नस्य स्वधर्मः प्रकट इत्यर्थः। यस्तु भगवतो माहात्म्यं जीवेषु रामत्वादिकं च पश्यति, तस्य विरुद्धधर्मदर्शनादद्भुतज्ञानं भवति। मम तु दर्शनेऽपि सिद्धान्तार्थपरिज्ञानान्नाद्भुतं आश्चर्यज्ञानजनकं न भवतीत्यर्थः। इममेवार्थं पुरस्कृत्य मायया विरोधसमाधानमिति वाक्यं भ्रमादन्यथा कैश्चिद्योजितम्॥ ३७॥ नन्वद्भुतकर्मा भगवान्, कथं तस्य चरित्रदर्शनेनाश्चर्यमिति चेत्, तत्राह तवेहितं कोऽर्हतीति। इदमित्थतया चरित्रज्ञाने प्रतिनियतधर्मे च चरित्रे विरोधज्ञानादाश्चर्यं भवति। तदेव तु न सम्भवति, यतः को वा तवेहितं साधु इदमित्थतया वेदितुमर्हति। तत्र हेतुः स्वमाययेदं सृजतो नियच्छत इति। मायाबहिर्भूतो हि वस्तुनो मायाया वा याथात्म्यं जानाति, विश्वमेव हि मायया सृजति, हरति, तस्मादिह लोके परलोके वा न कोऽपि तत्त्वं जानाति। ननु बाधितार्थत्वेन मायायास्तत्त्वं कुतो न ज्ञायत इति चेत्, तत्राह यद्विद्यमानात्मतयावसीयत इति। यदविद्यमानमपि विद्यमानात्मतया निश्चीयते। अतो ज्ञानाभावात्केवलं तस्मै ते नमः। जीवस्वरूपान्नमस्कारयोग्यत्वाय सर्ववैलक्षण्यमाह स्वविलक्षणात्मन इति। स्वत एव सर्वविलक्षणः आत्मा यस्येति॥ ३८॥ नन्वेवं सति भगवाननर्थहेतुः कथं सेव्य इति चेत्, तत्राह जीवस्येति। यः स्वयशःप्रदीपकं प्राज्वालयत्, तं त्वामहं प्रपद्य इति सम्बन्धः। तदा भगवाननर्थहेतुः स्यात्, यद्यनन्तं संसारं सृजेत्, द्वाराभावं वा सर्वथाऽज्ञानं वा। प्रत्युत सर्वपदार्थज्ञानाय स्वयशःप्रदीपकं वेदपुराणेषु प्रसिद्धमवतारं गृहीत्वा प्राज्वालयत्। अन्यथा शब्दैकनिष्ठस्य न कदापि धर्मः प्रसिद्धो भवेत्। भगवन्मायान्धकारे यश एव प्रदीपो भवति, न ज्ञानादि, 'ज्ञानकाशये'ति वाक्यात्। प्रज्वालनहेतवोऽपि न दुःखसम्पाद्याः, किन्तु लीलावताराः। तत्प्रपन्नायैव प्रज्वालयतीति तं त्वामहं प्रपद्ये॥ ३९॥ अतो यद्यपि ज्ञात्वैव व्यामोहार्थमज्ञाननाट्यं करोषि, तथापि पृष्टेर्थे उत्तरं दास्ये इत्याह अथापीति। भूमन्निति। तवात्मसङ्गोपनमावश्यकमिति। कथने हेतुः ब्रह्मन्निति। वेदवत्तवाज्ञा सर्वैरेव कर्तुं शक्येति सूचितम्। यदस्मत्सन्तोषार्थं लोककुशलं पृष्टम्, तस्य स्तुतिपरत्वा-

तत्रोत्तरं न दास्यामि, किन्तु पैतृष्वस्रेयस्य युधिष्ठिरस्य चिकीर्षितमाश्रावयिष्ये। राज्ञो हि चिकीर्षितं प्रजानां हितकारि भवति, बन्धोर्बन्धूनां भक्तस्य भगवतः चकारात्सर्वेषां हितकारि गुणवतः ॥ ४० ॥

श्रीसुबोधिनी–सारः

नारदोक्तिः। हे विभो विश्वसृजो जगत्कर्त्तुः मायिन ईश्वरस्य "मायिनं तु महेश्वरम्" इति श्रुतेः भूतेषु चरतोंतर्यामिरूपेण स्वशक्तिभिर्गुणैः छन्नाऽऽवृता रुक् दीप्तिः प्रकाशो यस्य तस्य ते तव बहुशो दुरत्यया अचिंत्या माया मया दृष्टाः श्रीरूपेणेति रहस्यं मे नाद्भुतं नाश्चर्यं हे भूमन् ॥ ३७ ॥ स्वमायया इदं विश्वं सृजतो नियच्छतः तवेहितं चेष्टितं वेदितुं ज्ञातुं साधु यथा स्यात्तथा कोर्हति न कोपि तत्र हेतुः। असदेवेदं विद्यमानात्मतया तद्रूपेण प्रतीयते स्वेन रूपेण विलक्षणः पूर्णसच्चिदानंदरूपं यस्य तस्मै ते तुभ्यं नमः ॥ ३८ ॥ अवर्थवहाद्दोषकर्त्तः शरीरतो विमोक्षणं न जानतो जीवस्य संसरतः संसारं भजतः लीलावतारैः स्वदीपकं स्वप्रकाशकं यशो यः प्राज्वालयत्प्रोद्दीपितवान् तं त्वा त्वां प्रपद्येऽहम् ॥ ३९ ॥ अथापि एवं सत्यपि हे ब्रह्मन् नरलोकविडंबनं यथा भवति तथा ब्रह्मेति पाठे त्वद्विशेषणम्। पितुः स्वसा भगिनी कुंती तस्या अपत्यस्य युधिष्ठिरस्य भक्तस्य च कर्त्तुमिष्टं कार्यमहं वर्णयिष्यामि ॥ ४० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

दृष्टा मयेत्यस्याभासे। उपस्थितमिति। उपस्थितं भगवत्प्रश्नं मल्लक्षणो जनोऽन्यथा कुर्यान्नवदेत्। अनुचितत्वज्ञाने हि न वदेत्। भगवत्कृतेऽनुचितत्वज्ञानं तु मायाकार्यम्, अतो मायाभावप्रार्थनेत्यर्थः। भूतेषु भूमन्नित्यत्र। सकलेति। सकलभूतेषु सम्बन्धो यस्येतिव्यधिकरणपदो बहुव्रीहिः। अन्येष्वेति। एतस्यैव विवरणमभिमानमात्र इति। वस्तुतो भूतेषु चरणं नास्ति, किन्तु अभिमानमात्रमिति सतीत्यर्थः। वह्निर्जलादाविति। उष्णे जले प्रविष्टो वह्निः स्वकार्यं धूमादिकं कुर्वन्नपि छन्नरुग्भवति। यथा 'वह्निरग्नेराप' इतिश्रुत्युक्तक्रमात्स्वस्माज्जातेन स्वधर्मरूपेण जलेन छादकत्वान्मायारूपेण छन्नस्वरूपो भवति, तथा भगवानपि सर्वं प्रकाशयन्नपि मायया स्वशक्त्या छन्नस्वरूप इति वाक्यार्थः। रूपेति। ज्ञाता वह्निधर्मा रूपस्पर्शादयो येन तादृशस्य पुरुषस्याग्रे वह्नेः रूपं वायुसमन्वयेनागतः स्पर्शश्चानयोर्मध्येऽन्यतरस्य स्पर्शमात्रस्य प्राकट्यम्। अप्राकट्यमितिपाठेऽन्यतरस्य रूपमात्रस्याप्राकट्यं मायया स्वाच्छादकधर्मेण विना न सम्भवतीति हेतोर्जलात्प्रथमोत्पन्नस्य वह्नेः स्वधर्मो जलरूपः प्रकटः। तेन वह्निरूपाच्छादनं भवतीति दार्ष्टान्तिके जलस्थानीयया मायया छन्नस्वरूप इति भगवदाच्छादकत्वं मायागुणः प्रपञ्चे प्रसिद्ध इत्यर्थः। प्रकाशकत्वेन स्थिताप्यज्ञाने हेतुमाहुः यस्त्वति। भगवन्माहात्म्यं सर्वप्रकाशकत्वं जीवेषु च सर्वेष्वन्योन्यं सर्वसमत्वं च यः पश्यति, तस्य विरुद्धधर्मदर्शनादतिहीनेषु महतश्चरणमाश्चर्यमिति ज्ञानं भवति। भगवन्माहात्म्यं त्ववाङ्मनोगोचरम्, अतो न कस्याप्यद्भुतत्वज्ञानमित्यर्थः। तर्हि नारदस्याप्यज्ञानादेव नाश्चर्यमित्याशङ्क्य तत्र भिन्नं हेतुमाहुः मम त्विति। माहात्म्यदर्शनेपि नाश्चर्यम्, तत्र हेतुः सिद्धान्तेति। भगवान् स्वशक्त्या छन्नस्वरूपः, अतो हीनेषु स्थितोपि न सम्बध्यते इति ज्ञानादित्यर्थः। इममेवेति। सिद्धान्तार्थमेव पुरस्कृत्य स्थितमिदं भ्रमादन्यथा योजितम्। सर्वं मायिकमतो भगवत्स्थितिरपि मायिक्येवेति प्रकारेण योजितमित्यर्थः। तवेहितमित्यत्र। प्रतिनियतधर्मे चेति। ज्ञाते इति शेषः। यद्यविद्यमानमपीति। माया हि भगवन्तमाच्छादयति, घटत्वादिकं च प्रकाशयति। यद्यस्मादविद्यमानमपि घटत्वादिकं विद्यमानत्वेन निश्चीयते। अतो भगवज्ज्ञानाभावादेतादृशभगवतः स्थितो प्रपञ्चस्य हीनत्वकथनं बाधितार्थमिति ज्ञानाभावेनाच्छादकत्वं मायातत्त्वमपि न ज्ञायते इत्यर्थः। अत इति। अविद्यमानस्यैव विद्यमानत्वनिश्चयाद्भगवज्ज्ञानाभावात्केवल ज्ञानादिमार्गराहित्येन नमनमेवास्त्वित्यर्थः। जीवस्वरूपादिति। भावप्रधानो निर्देशः, स्वस्य जीवस्वरूपत्वाद्भगवतः सर्वविलक्षणत्वान्नमनयोग्यतेत्यर्थः। जीवस्येत्यत्र। सर्वथाऽज्ञानं वेति। साधयेदितिशेषः। अन्यथेति। अवताराभावे शब्दैकनिष्ठस्य श्रुतिभागवतादिष्वेव प्रसिद्धस्य यशोरूपो धर्मः प्रसिद्धो न भवेदित्यर्थः। अथापीत्यत्र। राज्ञः पैतृष्वस्रेयस्य भक्तस्येति पदत्रयस्य तात्पर्यमाहुः राज्ञो हीति। बन्धोरिति। भक्तस्येति। बन्धोश्चिकीर्षितं बन्धूनां हितकारि भवति। भक्तस्य चिकीर्षितं भगवतो हितकारि भवतीत्यर्थः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सर्वज्ञेनाप्यविदुषेव पृष्टो नारद आह—दृष्टेति त्रिभिः। सामर्थ्यं सूचयन् संबोधयति—विभो इति। दुरत्यया अत्येतुमुल्लङ्घयितुं ज्ञातुं वा अशक्या ते तव माया बहुशो मया दृष्टा। दुरत्ययत्वे हेतुं सूचयन् भगवन्तं विशिनष्टि—सर्वभूतेष्वन्तर्यामितया चरतः। विश्वसृजो ब्रह्मणोपि मायिनोपि मोहकस्येत्यर्थः। परिच्छिन्नस्य सर्वप्राणिषु सञ्चरणासंभवात् व्यापकतया संबोधयति—भूमन्निति। 'सर्वत्र वर्तमानश्चेत्तर्हि सर्वे कुतो न पश्यन्ति' इत्याशङ्क्याह—भस्मना वह्नेरिव स्वशक्तिभिः सत्त्वादिगुणैश्च छन्ना रुक् प्रकाशो यस्य तस्येति। अतो भवत्पादनिषेवया भवत्प्रभावस्य विदितत्वात् मनुष्यनाट्येन सर्वज्ञस्या-

प्यज्ञवत्प्रश्नादिकं मे ममाद्भुतमाश्चर्यकरं न भवति ॥ ३७ ॥ त्वदनुग्रहं विना तु स्वमायया स्वेच्छामात्रेणेदं विश्वं सृजतः पालयतः, नियच्छतः संहरतश्च तवेहितं चेष्टितमभिप्रेतं वा साधु सम्यक् वेदितुं ज्ञातुं कोऽर्हति ? अतो यत् यस्य विद्यमानात्मतयाऽवसीयते सर्वं साक्षादेव प्रतीयते तस्मै स्वविलक्षणात्मने स्वेन स्वरूपेण सर्वतो विलक्षणात्मने चिद्रूपतया सर्वसाक्षिणे तुभ्यं नमः ॥ ३८ ॥ 'एवं भगवदनुग्रहंविना तत्प्रभावज्ञानस्य स्वरूपज्ञानस्य संसारादुद्धारस्य च दुर्लभत्वात्तदर्थं स एव समाराधनीय' इति सूचयंस्तं नमस्कृत्येदानीं तदुपकारं दर्शयंस्तमेव शरणं व्रजति—जीवस्येति । अनर्थं दुःखपरंपरामावहतीति तथाभूतात् शरीरतः स्थूलसूक्ष्मशरीरद्वयात्मकाद्बन्धनात् विमोक्षणं विमुक्त्युपायं स्वभजनमात्मस्त्वं चाजानतः, अत एव संसरतः जन्ममृत्युजराव्याधिदुःखदोषाननुभवतो जीवस्य हेतोर्यो भवांल्लीलावतारैः स्वयशोरूपं प्रदीपं आवरकाज्ञाननिवर्तकं आत्मस्वरूपादिप्रकाशकं च प्राज्वालयत् सन्दीपितवान् तं त्वामहं शरणं प्रपद्ये ॥ ३९ ॥ यद्यपि सर्वसाक्षित्वात् तवाविदितं किञ्चिन्नास्ति, अथापि नरलोकं विडम्बयत्यनुसरतीति तथा तं त्वां प्रति राज्ञो युधिष्ठिरस्य चिकीर्षितमाश्रावये । 'संबन्धित्वाद्भक्तत्वाच्च तच्चिकीर्षितं त्वया संपादनीयम्' इत्याशयेनाह—पैतृष्वस्रीयस्य भक्तस्य चेति । 'परब्रह्मत्वेन तवाज्ञाऽवश्यमनुसर्तव्या, अतो विदितवृत्तमपि त्वां श्रावये' इति सूचयन् संबोधयति—ब्रह्मन्निति ॥ ४० ॥

अन्वितार्थप्रकाशिका

सर्वज्ञेनाप्यविदुषेव भगवता पृष्टो नारदो मायेयमिति ज्ञात्वाऽऽह—दृष्टेति ॥ हे विभो ! हे भूमन् ! सर्वभूतेष्वन्तर्यामितया चरतः विश्वसृजो ब्रह्मणोऽपि मायिनोऽपि मोहकस्य भस्मना वह्नेरिव स्वशक्तिभिः सत्त्वादिगुणैश्छन्ना रुक् प्रकाशो यस्य तस्य ते दुरत्यया अत्येतुमुल्लङ्घयितुं ज्ञातुं वा अशक्या ते तव माया बहुशो मया दृष्टाः । अतः सर्वज्ञस्याप्यज्ञवत् प्रश्नादिकं मे ममाद्भुतमाश्चर्यकरं न भवति ॥ ३७ ॥ तवेति ॥ त्वदनुग्रहं विना तु स्वमायया इदं विश्वं सृजतः पालयतः नियच्छतः संहरतश्च तवेहितं चेष्टितमभिप्रेतं वा साधु सम्यक् वेदितुं ज्ञातुं कोऽर्हति । अतो यत् इदं जगदसदपि तव मायया विद्यमानात्मतयाऽवसीयते सर्वं सदिति प्रतीयते । अवभासत इत्यपि पाठः । तस्मै स्वविलक्षणात्मने स्वेन रूपेण सर्वतो विलक्षणात्मने अचिन्त्याय ते तुभ्यं नमः ॥ ३८ ॥ जीवस्येति ॥ अनर्थं दुःखपरम्परां वहतीति तथाभूतात् शरीरतः स्थूलसूक्ष्मशरीरद्वयात्मकाद्बन्धनात् विमोक्षणं विमुक्त्युपायं स्वभजनमात्मतत्त्वं च न जानतः अत एव संसरतः जन्ममरणाननुभवतो जीवस्य हेतोर्यो भवांल्लीलावतारैः स्वयशोरूपं प्रदीपं श्रवणादिभिर्जीवस्य मोक्षार्थम् आवरकाज्ञाननिवर्तकम् आत्मस्वरूपादिप्रकाशं च प्राज्वालयत् दीपितवान् तं त्वामहं शरणं प्रपद्ये ॥ ३९ ॥ अथेति ॥ हे ब्रह्मन् ! यद्यपि तवाविदितं किञ्चिन्नास्ति अथापि नरलोकं विडम्बयत्यनुसरतीति तथा तं त्वां प्रति पैतृष्वसेयस्य । ढकि लोप इति प्राप्त्या रकाररहित एव पाठः साधुः । भक्तस्य च राज्ञो युधिष्ठिरस्य चिकीर्षितमाश्रावये श्रावयिष्यामि ॥ ४० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं भगवतापृष्टो नारद आहत्रिभिः दृष्टा इति । विश्वसृजोविधेरपि मायिनोमोहकस्य । भूतेषु मनुष्येषु स्वशक्तिभिः सत्यज्ञानप्रकाशाद्यैश्वर्यैः सह चरतो विचरतः छन्नरुचः । वह्नेरिव मनुष्यतया वर्त्तमानस्याऽग्नेरिव मनुष्यनाट्यतया छन्नैश्वर्यस्य । ते तव दुरत्यया अचिन्त्या बहुशः मायामहैश्वर्याणि मया दृष्टाः अतोऽजानन्निव मां पृच्छसि । तत्र मेऽद्भुतं नास्ति ॥३७॥ सर्वोत्कृष्टस्य तवेहितं दुर्ज्ञेयमित्याह तवेति स्वमायया स्वसंकल्पेन इदं विश्वं सृजतः । नियच्छतो नियमे प्रवर्त्तयतस्तव ईहितं चेष्टितं साधु सम्यक् वेदितुं कोर्हति एवं कथमिति चेत्तत्राह यत् यस्य तव विद्यमाना । आत्मता चिदचिद्मिश्रे । विश्वे विकासताया अंतर्यामि शक्तिस्तया विश्वं असीयते विभक्तनामरूपं निश्चीयते स्वस्य तव विलक्षणो भिन्नतया ब्रह्मपुरे वर्त्तमानः । आत्मामूर्त्तिर्यस्य तस्मै तुभ्यं नमः ॥ ३८ ॥ नन्वीदृशस्य ममावतारैः । किं प्रयोजनं तत्राह जीवस्येति अनर्थवहात् शरीरात् विमोक्षणं अजानतः । न जानत इत्यपिपाठः । अतएव संसरतो जीव वृंदस्य प्रदीपकं मोक्षप्रकाशकं स्वयशः यो भवान् लीलावतारैः । प्राज्वालयत् प्रकाशयामास तं त्वा त्वामहं प्रपद्ये ॥ ३९ ॥ अथापि नरलोकस्य विडंबनं अनुसरणं यस्य तं त्वां पैतृष्वस्रेयस्य पितृ भगिनी पुत्रस्य चिकीर्षितं आश्रावये श्रावयिष्यामि ॥ ४० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थं सर्वज्ञेनाप्यविदुषेव जरासंधवधार्थमेव पाण्डवचिकीर्षितं पृष्टो नारदः केवलमिदं जनव्यामोहनमिति ज्ञात्वाऽऽह दृष्टा इति त्रिभिः । दृष्टा इति । हे विभो, हे भूमन्, विश्वसृजो ब्रह्मणोऽपि, चकारादन्यस्यापि, मायिनो मोहकस्य, भस्मना वह्नेः इव, छन्ना रुक् प्रकाशो यस्य तस्य, स्वशक्तिभिः सर्वज्ञत्वादिस्वशक्तिभिः सहैव, भूतेषु अन्तरात्मतया, चरतः ते तव, अनेन पाण्डवादिचिकीर्षितं तव विदितमेवास्तीत्यभिप्रेतं, दुरत्यया दुरतिक्रमणीयाः, मायाः बहुशः, मया दृष्टाः । अतस्तवेदं प्रश्नादिकं, मे मम, अद्भुतमाश्चर्यावहं, न ॥३७॥ पाण्डववृत्तान्तप्रश्नव्याजेन मागधजिघांसेवाभिप्रेतेत्यपि न निश्चेतुं शक्नोमि, इत्यभिप्रयन्नाह । तवेति । स्वमायया स्वसंकल्पेन, इदं जगत्, सृजतः, नियच्छतोऽन्तरात्मतया प्रशासितुश्च, तव, ईहितमभि-

प्रेतं, साधु यथा तथा, वेदितुं ज्ञातुं, कः अर्हति । न कोऽपीत्यर्थः । यदि कदाचित् किंचित् ज्ञायते तदपि, यस्मिंस्त्वयि विद्यमाना सा आत्मता तया, अवसीयते । त्वद्ध्याने आत्मानं त्वन्मूर्त्तौ संयोज्य तद्द्वारा कथंचित् ज्ञायते इत्यर्थः । अतः, स्वेन स्वासाधारणस्वभावेन विलक्षणः सर्वेभ्यो विलक्षण आत्मा स्वरूपं यस्य तस्मै, तस्मै प्रसिद्धाय, ते तुभ्यं, नमः ॥ ३८ ॥ यद्यप्येवं तथापि त्वदवतारः केवलं साधुपरित्राणाय दुष्कृतिविनाशाय चेत्येतत्तु यथार्थतया निश्चिनोमीत्यभिप्रयन् प्रपद्यति । जीवस्येति । यो भवान्, संसरतः अनर्थावहात् शरीरतः, विमोक्षणं मोक्षोपायं, न जानतोऽनवबुद्ध्यमानस्य च, जीवस्य, स्वयश एव प्रदीपकस्तं, लीलावतारैः प्राज्वालयत् संदीपितवान्, तं त्वा त्वां, अहं शरणं प्रपद्ये । यथान्धतमसावृतघटपटादीनजानतस्तज्ज्ञानोपायभूतप्रदीपप्रज्वालनं, तद्वत्त्वद्यशः शृण्वतोऽनुस्मरतः कथयतश्च जीवस्य मुक्त्युपायभूतमस्त्यतस्तद्विस्तृतवानित्यर्थः ॥ ३९ ॥ अथापीति । यद्यप्येवमथापि, हे ब्रह्मन् परमेश्वर, नरलोकं विडम्बयत्यनुवर्तते इति तथाभूतं, त्वां प्रति, पैतृष्वस्रेयस्य, भक्तस्य च, राज्ञो युधिष्ठिरस्य, चिकीर्षितं, आश्रावये श्रावयिष्यामि ॥ ४० ॥

कृष्णप्रिया

देवर्षि नारदजी ने कहा—सर्वव्यापक अनन्त ! आप विश्व के निर्माता हैं और इतने बड़े मायावी हैं कि बड़े-बड़े मायावी ब्रह्माजी आदि भी आपकी माया का पार नहीं पा सकते । प्रभो ! आप सबके घट-घट में अपनी अचिन्त्य शक्ति से व्याप्त रहते हैं—ठीक वैसे ही; जैसे अग्नि लकड़ियों में अपने को छिपाये रखता है । लोगों की दृष्टि सत्त्व आदि गुणों पर ही अटक जाती है, इससे आपको वे नहीं देख पाते । मैंने एक बार नहीं, अनेकों बार आपकी माया देखी है । इसलिये आप जो यों अनजान बनकर पाण्डवों का समाचार पूछते हैं; इससे मुझे कोई कौतूहल नहीं हो रहा है ॥ ३७ ॥ भगवन् ! आप अपनी माया से ही इस जगत् की रचना और संहार करते हैं, और आपकी माया के कारण ही यह असत्य होने पर भी सत्य के समान प्रतीत होता है । आप कब क्या करना चाहते हैं, यह बात भलीभाँति कौन समझ सकता है । आपका स्वरूप सर्वथा अचिन्तनीय है । मैं तो केवल बार-बार आपको नमस्कार करता हूँ ॥ ३८ ॥ शरीर और इससे सम्बन्ध रखनेवाली वासनाओं में फँसकर जीव जन्म-मृत्यु के चक्कर में भटकता रहता है तथा यह नहीं जानता कि मैं इस शरीर से कैसे मुक्त हो सकता हूँ । वास्तव में उसी के हित के लिये आप नाना प्रकार के लीलावतार ग्रहण करके अपने पवित्र यश का दीपक जला देते हैं, जिसके सहारे वह इस अनर्थकारी शरीर से मुक्त हो सके । इसलिये मैं आपकी शरण में हूँ ॥ ३९ ॥ प्रभो ! आप स्वयं परब्रह्म हैं, तथापि मनुष्यों की-सी लीला का नाट्य करते हुए मुझसे पूछ रहे हैं । इसलिये आपके फुफेरे भाई और प्रेमी भक्त राजा युधिष्ठिर क्या करना चाहते हैं, यह बात मैं आपको सुनाता हूँ ॥ ४० ॥

यक्ष्यति त्वां मखेन्द्रेण राजसूयेन पाण्डवः । [1]पारमेष्ठ्यकामो नृपतिस्तद् भवाननुमोदताम् ॥ ४१ ॥
[2]तस्मिन् देव क्रतुवरे भवन्तं वै सुरादयः । दिदृक्षवः समेष्यन्ति राजानश्च यशस्विनः ॥ ४२ ॥
श्रवणात् कीर्तनाद् ध्यानात् पूयन्तेऽन्तेवसायिनः । तव ब्रह्ममयस्येश [3]किमुतेक्षाभिमर्शिनः ॥ ४३ ॥
यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते [4]भुवनमङ्गल दिग्वितानम् ।
[5]मन्दाकिनीति दिवि भोगवतीति चाधो गङ्गेति चेह चरणाम्बु पुनाति विश्वम् ॥ ४४ ॥[6]

कर्दमक्षमा

अन्वयः—पारमेष्ठ्यकामः, पाण्डवः, नृपतिः, राजसूयेन, मखेन्द्रेण, त्वाम्, यक्ष्यति, भवान्, अनुमोदताम् ॥ ४१ ॥ देव ! तस्मिन्, क्रतुवरे, भवन्तम्, वै, दिदृक्षवः, सुरादयः, च, यशस्विनः, राजानः, समेष्यन्ति ॥ ४२ ॥ नाथ ! श्रवणात्, कीर्तनात्, ध्यानात्, अन्तेवसायिनः, पूयन्ते, हे ईशः ! ब्रह्ममयस्य, किमुत, ईक्षाभिमर्शिनः ॥ ४३ ॥ हे भुवनमङ्गल, यस्य, ते, अमलम्, यशः, दिवि, भुवि, रसायाम्, दिग्वितानम्, च, चरणाम्बु, दिवि, मन्दाकिनी, च, अधः, भोगवती, च, इह, गङ्गा, इति, विश्वम्, पुनाति ॥ ४४ ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

न चात्रैवानुमोदनं कार्यं किं तु तत्रागंतव्यमित्याशयेनाह । तस्मिन्निति ॥ ४२ ॥ तत्रागताश्च सर्वे त्वद्दर्शनादिना पूता भविष्यंतीत्याह । श्रवणादिति । अंतेवसायिनः श्वपचा अपि । ब्रह्ममयस्य ब्रह्मघनमूर्तेः । ईक्षा च अभिमर्शः स्पर्शनं च तौ

---

[1] नृपतिः पारमेष्ठ्येप्सुः—वीर. ; नृपतिः पारमेष्ठ्येन—विज. । [2] इदमर्धं नास्ति—वीर. । [3] किमुता—वीर. । [4] तेऽमलयशोऽथ दिशां वितानं—विज. । [5] मन्दाकिनी च तव पादरजोवहोर्मि श्रीमत्पदास्पदगताऽथ पुनाति—विज. । [6] अतः परं त्रयः श्लोकाः न सन्ति—विज. ।

विद्येते येषाम् ॥ ४३ ॥ कैमुत्यमतिशयेनाह । यस्येति । हे भुवनानां मंगलरूप दिवि पाताले भूमौ च प्रथितं यस्य यशो विश्वं पुनाति । कथम् । प्रथितं दिग्वितानं दिग्भवनानां वितानवदलंकरणम् । तथा चरणांबु च प्रथितं पुनाति । कथं तत्प्रथितम् । दिवि मंदाकिनीति अधश्च भोगवतीति इह च भूमौ गंगेति । तस्य तवागमनात्सर्वं मंगलं पवित्रं च भविष्यतीति भावः ॥ ४४ ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पारमेष्ठ्यकामः ब्रह्मपदकामः सर्वश्लाघ्यत्वकामो वा । "सर्वश्लाघ्ये पारमेष्ठ्यं हरौ ब्रह्मपदेऽपि च" इति निरुक्तिः ॥४१॥ त्यजतु राज्ञां धर्म एवायमिति चेत्तत्राह—न चेति । किं लाभस्तत्र गमने तत्राह—भवंतमिति ॥ ४२ ॥ अंतेवसायिनो मातंगादयश्चांडालाः ॥ ४३ ॥ अतिशयेन तात्पर्येण । "तात्पर्यं निश्चयाधिक्यजागरूकेष्वतिक्रमे । भवेदतिशयः" इति निरुक्तिः । इति भाव ईति—यस्य नाम्ना त्रैलोक्यशोधकस्य तवागमने यदि तत्रत्याः पूता भविष्यंतीति किमवक्तव्यमित्यर्थः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स राजसूयाख्येन मखेन्द्रेण सर्वराजगणसर्वदेवगणवशीकारितया मखानां श्रेष्ठेन पारमेष्ठ्यकामस्त्वद्यजनोचितपरमसम्पत्तिकामो नृपतिस्त्वां यक्ष्यति मुहुर्गृहागतं सेविष्यते सिषेविषत इत्यर्थः । त्वां विना सर्वसम्पत्तेस्तस्मा अरोचकत्वादितिभावः तदुक्तं प्रथमे—

"किन्ते कामाः सुरस्यार्हा मुकुन्दमनसो द्विज । अधिजह्रुः प्रियं राज्ञः क्षुधितस्य पथेतरः ॥" इति

तथा पारमेष्ठ्यशब्देन तदीयामैहिकमहासम्पत्तिमेवानूद्य तदनुभवसुखे तेषां तदेकचक्षुष्ट्वमुक्त्वाऽन्यथा वृथात्वं वक्ष्यते च—

"सभायां मयक्लृप्तायां क्वापि धर्मसुतोधिराट् । वृतोनुजैर्बन्धुभिश्च कृष्णेनापि स्वचक्षुषा ॥
आसीनः काञ्चने साक्षादासने मघवानिव । पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च वन्दिभिः ॥" इति ॥ ४१ ॥

यशस्विनः साधव इत्यर्थः ॥ ४२ ॥ पूयन्ते जात्यादिदोषात् अन्यत्तैः । यद्वा ईक्षया द्वारा अभिमर्शः स्पर्शोऽनुभवः तच्छालिनो द्रष्टार इत्यर्थः ॥ ४३ ॥ तदेवं श्रवणादिमात्रस्य माहात्म्यमुक्त्वा यशःश्रवणादेर्वैशिष्ट्यं दर्शयति—यस्येति । यस्य वै तव यशः न विद्यते श्रवणादिकर्तृष्वपि मलं यस्मात्तादृशं तथा भुवनमङ्गलं यद्दिशां वितानं सर्वोपरि शोभाकरत्वात्तादृशं तथा भुवनमङ्गलं यद्दिशां वितानं सर्वोपरि शोभाकरत्वात्तदृशञ्च प्रथितं विख्यातमेव तच्च परमपुण्यात्मकसत्ख्यातिरूपत्वाद्युक्तमेवेति भावः । अहो तव चरणाम्बु तत्रतत्र मन्दाकिनीत्यादिनामभिः प्रसिद्धं सत् विश्वं पुनाति तत्तु पादाम्बुनो दूरतः परिवर्जनीयत्वेनाऽन्यत्र प्रसिद्धेः परमाश्चर्य्यमिति भावः ॥ ४४ ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मखेषु इन्द्रः, दिग्विजयादिना साध्यत्वात् परमश्रेष्ठत्वेन त्वामेव, न त्वन्यं यक्ष्यति, यतः पाण्डवः पाण्डुपुत्रत्वेन त्वदेकभक्तत्वादिति भावः । नन्वहं त्वदीय एव, किं यज्ञप्रयासेन ? तत्राह—पारमेष्ठ्यं साम्राज्यं तत्कामः, तेन सर्व्वलोकेषु सुखं त्वद्भक्तिप्रवर्त्तनसिद्धेः; यद्वा, परमे प्रेमलक्षणे भक्तिपदे तिष्ठतीति परमेष्ठी श्रेष्ठ-त्वद्भक्तः, तस्य भावः पारमेष्ठ्यं प्रेमभक्तिमित्यर्थः; किंवा सर्व्वश्रेष्ठपदं त्वत्सामीप्यादि श्रीवैकुण्ठलोकादि, तत्कामः । ननु तस्य तत्प्राप्तिः स्वतोऽधिकं भात्येव, तत्राह—नृपतिः सर्व्वैरेव नृभिः सहेति भावः ॥ ४१ ॥ भवन्तमेव, वै अपि, सुरादयोऽपि, आदि-शब्दान्मुन्यादयो यशस्विनः साधव इत्यर्थः । ध्यानं सर्व्वांगचिन्तनम्, पूयन्ते जात्यादिदोषात्, तच्च त्वत्प्रभावादेवेत्याह—हे ईशेति । ब्रह्ममयस्य वीक्षाभिमर्शौतद्वन्तः; अन्यत्तैर्व्याख्यातम्; यद्वा, ईक्षाया अभिमर्शः स्पर्शस्तच्छालिनो द्रष्टार इत्यर्थः ॥ ४२-४३ ॥ अहो किं वक्तव्यम्, तवेक्षाभिमर्शिनः पूयन्त इति, त्वद्यशसैव जगतः पावित्र्यं मंगलञ्च सम्पन्नमित्याह—यस्येति । हे भुवनमंगलेति यशसा चतुर्द्दशभुवनानां मंगलमभिप्रेतमेव; यद्वा, भुवनमंगलञ्च तद् दिग्वितानं च, अस्योत्तरेणान्वयः । अहो बत किं वक्तव्यम्, यशः पुनातीति पादाब्जशौचमपि तद्वदित्याह—मन्दाकिनीति । च कारत्रयेण सर्व्वासामपि पावने प्राधान्यं बोधयति; दिव्यादीनाञ्च यथोत्तरं भाव्यत्वे श्रैष्ठ्यम् ॥ ४४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अन्तेवसायिनश्चण्डालाः ईक्षाभिमर्शिनः चक्षुषा पश्यन्तः ॥ ४३-४४ ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

किं तदित्यत आह—यक्ष्यतीति । पाण्डवो युधिष्ठिरः राजसूयाख्येन मखश्रेष्ठेन त्वामाराधयिष्यति तत्तदभिप्रेतं भवाननुमोदतां त्वया निर्वर्त्यतामित्यर्थः । अतस्तत्रगम्यताम् इति—भावः ॥ ४१ ॥ तद्व्याजेन शिशुपालादिवधोऽपि भविष्य-

तीत्यभिप्रयन्नाह—दिदृक्षव इति । यशस्विनः प्रसिद्धाः राजानश्चैद्यादयो दिदृक्षवः राजसूयमिति शेषः । समेष्यन्त्यागमिष्यन्ति ॥ ४२ ॥ ततः किमत आह–श्रवणादिति । अन्तेवसायिनश्चण्डालादयोऽपि साक्षात्परब्रह्मभूतस्य तव नामश्रवणादिभिरपि कामक्रोधभयादिकृतैः पूयन्ते किमुत अक्ष्णा अभिमृशन्ति विषयीकुर्वन्तीति तथा ते शिशुपालादयः पूयन्ते इति किमु वक्तव्यं त्वां पश्यन्तो हठाच्च मुक्ता भवन्तीति भावः ॥ ४३ ॥ कैमुत्यनयेन भङ्ग्यन्तरेणाऽऽह—यस्येति । हे भुवनानां मङ्गलरूप ! दिवि पाताले भूमौ च प्रथितं प्रख्यातं यस्य तव यशो विश्वं पुनाति कथं प्रथितम् ? दिग्वितानं दिशां वितानमुल्लोचः तद्वदलङ्करणं तथा चरणाम्बु प्रथितं दिवि मन्दाकिनीत्यध पाताले भोगवतीति इह लोके गङ्गेति च ॥ ४४ ॥

श्रीविजयध्वजतीर्थकृता पदरत्नावली

पारमेष्ठ्येन उत्तमकल्पेन ब्रह्मपदप्राप्तिहेतुना वा ॥ ४१–४२ ॥ अन्त्यावसायिनः अन्त्यजातयोपि ईक्षा दर्शनमभिमर्शनं स्पर्शनादिलक्षणञ्चैषाम् इतीक्षाभिमर्शिनः ॥ ४३ ॥ उक्तमेव स्फोरयति—यस्येति । हे अमलयशः मङ्गलकीर्त्तन ! यस्य तवाथ कल्याणमत एवामलं निर्दोषं यशः विश्वं पुनाति ननु मितत्वे यशसो विश्वपुनानत्वं कथमित्यत उक्त दिवीत्यादि । घटान्तरदीपवत् अस्पष्टस्यापि कथमित्यत उक्तं दिशां वितानमिति दिशामन्तेषु विशेषेण तानो विस्तारो यस्य तत्तथा तथापि न चोरवदित्याह प्रथितमिति । अथ जन्मप्रभृति श्रीमत्पादलक्षणास्पदं गता तव पादरजोवहोर्मिर्मन्दाकिनी च विश्वं पुनाति अतस्तव माहात्म्यं किं वक्ष्यामीत्यतो नमो नम इत्युपरमामीति वाक्यार्थः ॥ ४४–४७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् सप्ततितमोऽध्यायः ॥ ७० ॥

(श्रीविजयध्वजतीर्थरीत्या अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥)

श्रीमज्जीगोस्वामिकृतः क्रमसन्दर्भः

यक्ष्यति त्याम् ॥ ४१ ॥ अस्यानन्तरं दृश्यराजसूयस्य चात्र फलविशेषं खादिरयूपाध्यायेन भगवत्सम्बन्धादेव ज्ञेयः । तस्मिन् क्रतुवरे इति तं क्रतुवरं ये दिदृक्षवः सुरादयो राजानश्च ते तत्र गमनमत्या त्वत् कृपया भवन्तमपि समेष्यन्तीत्यवश्यमेव गन्तव्यमित्यर्थः ॥ ४२–४७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

श्रवणादित्यादि । तव कीदृशस्य ? ब्रह्ममयस्य ब्रह्म परमहः तन्मयस्य ॥ ४४–४७ ॥

इति श्रीदशमे श्रीबृहत्क्रमसन्दर्भे सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमतमञ्जूषा

ब्रह्ममयस्य ब्रह्म परमैश्वर्यं तन्मयस्य ॥ ४४–४७ ॥

इति सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

न केवलमनुमोदनमेवात्र स्थित्वा कार्यं किन्तु तत्र गन्तव्यमेवेत्याह—तस्मिन्निति ॥ ४२ ॥ ननु तेषां मद्दिदृक्षायां किं प्रयोजनं तत्राह–श्रवणादिति । ब्रह्ममयस्य ब्रह्मघनमूर्तेरिति श्रीस्वामिचरणाः ॥ ४३ ॥ तेषां मद्दिदृक्षैव किं कारणा तत्राह । यस्य तव अमलं यशः दिवि रसायां भूमौच प्रथितं दिग्वितान दिग्भवनानां वितानवदलङ्करणं सत् विश्वं पुनात्यतः पूतान्तःकरणत्वादेव तेषां तद्दिदृक्षा अभूदिति भावः । यद्वा । यस्य यशश्चरणाम्बुच त्रिजगत् पावनं स साक्षादेव त्वं तेन राज्ञा निमन्त्रितोऽसि यज्ञे तत्र पावनवस्तूनामपेक्षणीयत्वादिति भावः ॥ ४४ ॥

गूढार्थदीपिनी

पारमेष्ठ्यकामः साम्राज्यकामः ॥ ४१ ॥ क्रतुवरे राजसूये समेष्यन्ति आगमिष्यन्ति । भवन्तं दिदृक्षवः ॥ ४२ ॥ श्रवणादिभिः अन्तेवसायिनः चाण्डालादयोऽपि पूयन्ते तदा ईक्षाभिमर्शिनः दर्शनस्पर्शनकारिणः पूयन्ते इति किमुत वक्तव्यम् । ईक्षा च अभिमर्शश्च नो विद्येते येषां ते । द्वन्द्वगर्भितबहुव्रीहिः ॥ ४३ ॥ दिवि स्वर्गे । रसायां पाताले । हे भुवनमङ्गल । वितानं वितानवत् सर्वदिक्षु व्याप्तम् अलङ्काररूपम् ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पारमेष्ठ्यकामः परमेष्ठिनस्तव यो भावस्तत्प्राप्तिकाम इत्यर्थः । यतस्त्वां यक्ष्यति "यान्ति मद्याजिनोपि माम्" इति वचनात् ॥ ४१ ॥ भवन्तं तस्मिन् क्रतुश्रेष्ठे प्राप्तमिति शेषः । तत्र त्वया गन्तव्यमिति भावः ॥ ४२ ॥ ब्रह्ममयस्य त्वन्मयस्य

जनस्य श्रवणादिना अन्तेवसायिनः अपि पूयन्ते साक्षात्तवैव ईक्षाभिमर्शिनः दर्शनस्पर्शनवन्तः सुरादयः पूयन्ते इति किमुत वक्तव्यम् ॥ ४३ ॥ हे भुवनमङ्गल ! यस्य तव दिग्वितानं दिशां सन्तापहरं शान्तिकरं च दिवि पाताले भूमौ च प्रथितं यशः विश्वं पुनाति तथा दिवि मन्दाकिनीति अधश्च भोगवतीति इह भूमौ च गङ्गेति प्रथितं चरणाम्बु विश्वं पुनाति तत्रागन्ता अहो तत्रत्यानां भाग्यमित्याशयः ॥ ४४ ॥

श्रीसत्यधर्मकृता भागवतटिप्पणी

पाण्डवो धर्मः पतौ राजा मखेन्द्रेण पारमेष्ठ्येन मुख्यतो भीमविवक्षया चतुर्षु वायुरित्युक्तेरेतच्चतुष्टयाविष्टतद्विवक्षया ब्रह्मपदफलकत्वेनेत्युक्तिः। तन्नामाह। राजसूयेनेति। त्वां यक्षति यष्टुमिच्छति तद्यजनं भवाननुमोदताम्। अन्यथा तन्न सिद्ध्येदिति भावः ॥ ४२ ॥ हे देव तस्मिन्क्रतुवरे आरब्धे सुरादयो भवन्तं दिदृक्षवो द्रष्टुमिच्छवः समेष्यन्ति। यशस्विनो राजानश्चात्समेष्यन्तीत्यन्वेतीव दिदृक्षव इत्यप्यन्वेति ॥ ४३ ॥ हे ईश। तव श्रवणाच्चरितस्य तथा कीर्तनाद्ध्यानादन्त्यावसायिनः पुल्कसादयोऽपि पूयन्ते पवित्रिता भवन्ति। न त्वं लोकमध्यकरण इत्याह। ब्रह्ममयस्य साक्षाद्ब्रह्मात्मकस्येति। ब्रह्ममयस्य सर्वप्रधानस्येति वा। ईक्षाभिमर्शिन ईक्षा दर्शनं चाभिमर्शः पादस्पर्शश्च तौ येषां ते तथा पूयेरन्निति किमु वक्तव्यम्। श्रवणादेः पारोक्षिकव्यापाराद्यदाऽन्त्यावसायिनः पूयन्ते तदा पारोक्षिकादीक्षादेः पूयेरन्नित्यवचनेऽपि सोऽर्थो लभ्यत इति भावः ॥ ४४ ॥ बहुषु पुस्तकसम्पुटीषु। यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमङ्गल दिग्वितानम्। मन्दाकिनी च दिवि भोगवती चाधोगङ्गेति चेह चरणाम्बु पुनाति विश्वमिति दृश्यते पाठो दृश्यश्च। न पुनरुक्त्यादिपरिहरणायासश्चेति तमेव धृत्वा व्याचक्रुः। तथा हि। तत्कैमुत्यमुज्जीवयन्नाह। यस्येति। हे भुवनमङ्गल दिग्वितानं दिक्षु वितानो विस्तारो यस्य तत् दिग्गृहवितानरूपं वा। अस्त्री वितानमुल्लोच इत्यमरः। यस्य तव यशोऽमलं दिवि भुवि रसायां प्रथितं विश्वं पुनाति। तथा दिवि मन्दाकिनीति। अधो रसायां भोगवतीति। इह भूमौ च गङ्गेति नामवच्चरणाम्बु विश्वं पुनाति। इतोक्षास्पर्शने पूनीत इति किं वक्तव्यमिति। पाठान्तरे त्वयमर्थः। हे अमलयशः। यस्य यशो यस्य तव दिविरसायां भूमौ च दिशां वितानं विशेषेण तानो यस्य विस्तृतिस्तत्तथा यशः प्रथितम्। तव पादरजसां धूलीनां वहो ऊर्मयो यस्यां तरङ्गाः सा मन्दाकिनी वियद्गङ्गा पादरजोवहत्वं तस्या नासम्भवीत्याह। श्रीमत्पदास्पदं नखान्तं गता प्राप्तेति विश्वं पुनाति। अथ तादृशस्य तवेक्षणस्पर्शनानन्तरं पावित्र्यमिति किं वक्तव्यमिति ॥ ४५ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धेऽशीतितमोऽध्यायः ॥ १०-८० ॥

श्रीमद्वल्लभाचार्य्यकृता सुबोधिनी

तदेवाह **यक्ष्यतीति**। त्रिधा हि यज्ञकृतिः, फलार्था भौतिकी, शुद्ध्यर्थाध्यात्मिकी, भगवदर्थाधिदैविकीति। 'यज्ञेन यज्ञमयजन्त'ति श्रुत्या सैव निरूपिता। तत्र प्रतिबन्धकनिवृत्तिः भगवतैव कर्तव्या, इज्यान्तराभावादित्यभिप्रेत्याह **त्वां यक्ष्यतीति**। 'यज्ञो वै मख' इति श्रुतेः। आधिदैविक एव यज्ञो मखो भवति। प्रकरणवशात् क्षत्रियस्य राजसूयादन्यः यज्ञः श्रेष्ठो नास्तीति। उपरतानां क्षत्रियाणां ब्राह्मणानामेव दीर्घसत्रेष्वधिकारात्। महति च बहवो विघ्नाः। **पाण्डव** इति पाण्डुवाक्यात् अवश्यकर्तव्यत्वम्। भगवान् सर्वभावेन सेव्यः प्राणिना (तदा,) यदा कदाचित् तादृशी सेवा नियतकालसाधनसम्पत्तौ भवति। सा सम्पत्तिः परमेष्ठिन एव, नान्यस्य इति पारमेष्ठ्यकामः। अन्तस्तथा सेवायामनधिकारमाह **नृपतिरिति**। तत्रेज्यानुमतिः प्रयोजिका, तदभावे तोषाभावात्। देवतातः फलमिति पक्षे न फलं कर्मणः। कर्मणः फलमित्यपि पक्षे देवताप्रीतिः साधनत्वेन सिद्धेति तदभावे न फलम्। 'तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयती'ति श्रुतेः। अतः पूजायां पूज्यानुमोदनमावश्यकमिति भवाननुमोदताम्। इदमनुमोदनं समीपे स्थित्वा। पूजापूज्ययोः देशान्यत्वासम्भवात्। अनेनैव यशः स्वर्गहेतुभूतमन्तःकरणशुद्धिश्च भविष्यतः ॥ ४१ ॥ अत एकेनैव त्रैविध्यमपि सेत्स्यतीत्यभिप्रायेणाह **तस्मिन् देव** इति **द्वाभ्याम्**। कीर्तिर्लोकद्वये राजभिर्देवैश्च भवति। तत्र यद्यपि भागाभावात् यागार्थं देवानामनागमनेऽपि त्वां दिदृक्षवः समेष्यन्ति। राजानश्च स्पर्धिनोऽपि। कौतुकार्थमागमने तु न यश इति। **देवेति** सम्बोधनम्। क्रतुवरे यथा महोत्सवे देवदर्शनं महोत्सवकर्तुर्यशस्करं भवति। **यशस्विन** इति। तेषामपि यशोऽत्र मिलितं भवतीत्युक्तं भवति। आदिशब्देन सिद्धादयोऽपि ॥ ४२ ॥ प्रसङ्गादेव शुद्धिमप्याह **श्रवणादिति**। प्रमाणबले आदौ श्रवणकीर्तनस्मरणान्येवोक्तानि। ध्यानमेकाग्रतया स्मरणम्। एवं भक्ता एव कर्मत्यागादिभिः तथात्वमापन्नाः पूर्ववासनया श्रवणादिना तद्दोषं परिहरन्तीति केचित्। अन्यथाप्यन्तेवसायिनां श्रवणादिसम्भवे तादृशजन्मसम्पादकदोषनाशक इति विमर्शः। **तवेति** सम्मत्यर्थं युष्मच्छब्दप्रयोगः। प्राकृतबुद्ध्या श्रवणादौ मर्यादाभक्तानां मते प्रमेयबलाभावात् न फलम्। अन्यथा सर्वेषामेव नाम्नां भगवद्वाचकत्वात् कस्यापि बन्धो न स्यात्। तत आह **ब्रह्ममयस्येति**। ब्रह्मप्रचुरस्य परमानन्दमूर्तेः सच्चिद्रूपप्राचुर्यात् सर्ववेदमयस्य वा। **ईशेति**। शुद्धौ सामर्थ्यम्। ईक्षाभिमर्शनं प्रमेयबलम्। साक्षात्कारसम्बन्धो हि फलरू-

पावितिं तत्सिद्धौ साधनसिद्धिर्नान्तरीयकेति कैमुतिकन्यायेनाह किमुतेति। अन्तेवसायिव्यावृत्त्यर्थमीक्षाभिमर्शयोः सहप्रयोगः ॥ ४३ ॥ भगवद्दर्शनादेः शोधकत्वं कैमुतिकन्यायेन वक्तुं चरणोदकस्य माहात्म्यमाह यस्यामलमिति। भगवतः कीर्तिद्वयं तीर्थरूपं चरणद्वयान्निर्गतं भक्तानां हितार्थम्। तत्रैकममलं यशः दिवि। रसायां भूमौ च प्रथितम्। सर्वाणि कर्माणि दोषसहितानीति 'सर्वारम्भा हि दोषेणे'ति वाक्यादवगत्याह अमलमिति। सन्नियोगशिष्टदोषरहितगुणत्वाद्भगवतः। अतो भगवान् सर्वभुवनेषु मङ्गलरूपः, भुवनमङ्गलत्वाद्वा। तत्रत्यानां यशोगानं लोकत्रयेऽपि। प्रान्तभावेषु तदभावमाशङ्क्याह दिग्वितानमिति। दिशामाच्छादकम्। द्वितीयमाह मन्दाकिनीति। दिवि मन्दाकिनी, अधो भोगवती, पृथिव्यां गङ्गेति चरणाम्बु कमण्डलुसम्भूतं विश्वं पुनाति ॥ ४४ ॥

श्रीसुबोधिनी-सारः

पारमेष्ठ्यकामः ब्रह्मपदाभिलाषुको नृपतिः राजा पांडवो धर्मपुत्रो मखेन्द्रेण यज्ञोत्तमेम राजसूयेन त्वा त्वां यक्ष्यति यजनं करिष्यति तत् भवाननुमोदताम् ॥ ४१ ॥ हे देव क्रतुवरे यज्ञश्रेष्ठे तस्मिन् भवंतं त्वां दिदृक्षवो द्रष्टुमिच्छवः सुरादयो देवादयो यशस्विनः कीर्त्तिमंतो राजानश्च समेष्यंति समागमिष्यंति वै एव ॥ ४२ ॥ ब्रह्ममयस्य ब्रह्मघनमूर्तेस्तव श्रवणात्कीर्त्तनात् ध्यानात् अंतेवसायिनः चांडाला अपि पूयंते ईक्षादर्शमभिमर्शः स्पर्शनं तौ विद्येते येषां ते पूयंते इति किमुत वक्तव्यम् ॥ ४३ ॥ हे भुवनमंगल दिवि स्वर्गे भूमौ रसायां पाताले च प्रथितं विस्तृतं विख्यातं यस्य यशो विश्वं पुनाति दिशां वितानवत् अलंकारमात्रं कथमित्यत आह। दिवि मंदाकिनी अधः पाताले भोगवती इह भूतले गंगेति ते तव चरणांबु पादोदकं तत् ॥ ४४ ॥

श्रीबिट्ठलरायात्मजश्रीवल्लभकृतलेखः

यक्ष्यति त्वामित्यत्र। भगवानिति। नियतकालमपेक्षितसमयेऽलंकारादिसाधनसम्पत्तौ सत्यां कदाचित्तादृशी सेवा यदा भवति, तदा सर्वभावेन सेव्यो भवति, न तु नित्यं सेवा भवति। पारमेष्ठ्यसम्पत्तौ तु नित्यं तादृशसाधनसद्भावात्सेवा भवतीत्यर्थः। तस्मिन् देवेत्यत्र। भागाभावादिति। भगवदवयवत्वेन हि तेषां भागः श्रुतावुक्तः। अत्र साक्षादेव भगवदवयवानां विद्यमानत्वान्न प्रतिनिधीनामाधिभौतिकावयवरूपाणां तेषां भाग इत्यर्थः। श्रवणादित्यत्र। तथात्वमिति। विहितकर्मत्यागेन, आदिपदान्निषिद्धकरणेन अन्तेवसायित्वमापन्ना इत्यर्थः। अत्रापि 'वेदनिन्दाया'मितिवाक्यमनुसन्धातव्यम्। अन्यथापीति। पूर्वजन्मनि भक्तत्वाभावेपीत्यर्थः। ईक्षाभिमर्शनमिति। ईक्षा अभिमर्शनं चेत्यर्थः। मूले ईक्षादर्शनम्, अभिमर्शः सम्बन्धः, तद्युक्ता इति मत्वर्थीय इनिः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं श्रावणं प्रतिज्ञाय तच्चिकीर्षितं श्रावयति—यक्ष्यतीति। पारमेष्ठ्यकामः चक्रवर्तित्वकामो नृपतिः पाण्डवः राजा युधिष्ठिरः मखेन्द्रेण यज्ञश्रेष्ठेन राजसूयेन त्वां यक्ष्यति आराधयिष्यति। तत्तस्याभिप्रेतं भवाननुमोदताम् ॥ ४१ ॥ 'न चात्रैव स्थित्वाऽनुमोदनं कार्यम्, किंतु तत्र गन्तव्यम्, बहूनामुपकारात्' इत्याह—तस्मिन्निति। दिदृक्षायां हेतुं सूचयन् संबोधयति—देवेति। तस्मिन् क्रतुवरे भवन्तं दिदृक्षवः सुरादयो यशस्विनो राजानश्च समेष्यन्ति अवश्यमेव श्रद्धयाऽऽगमिष्यन्ति ॥ ४२ ॥ 'एवं मद्दर्शनेन किं फलम्' इत्यपेक्षायामाह—श्रवणादिति। ईश्वरत्वादिति हेतुं सूचयन् संबोधयति—ईशेति। ब्रह्ममयस्य नराकृतिपरब्रह्ममूर्तेस्तव ध्यानादिभिः अन्तेवसायिनश्चाण्डालादयोपि पूयन्ते शुद्धा भवन्ति। ईक्षया दृष्ट्या अभिमृशन्ति विषयीकुर्वन्तीति तथाभूता वर्णाश्रमादिमन्तः पूयन्ते इति किमु वक्तव्यम् ? ॥ ४३ ॥ उक्तं कैमुत्यन्यायमेव प्रकारान्तरेणाह—यस्येति। हे भुवनानां मङ्गलरूप ! यस्य तव अमलं पापमलनिवर्तकं यशो दिग्वितानं वितानवत् सर्वदिक्षु व्याप्तं तदलंकरणभूतम्, अतएव दिवि स्वर्गे रसायां पाताले भूमौ च प्रथितं ख्यातं च सद्विश्वं पुनाति। तथा दिवि मन्दाकिनीति, अधः पाताले भोगवतीति, इह भूलोके च गङ्गेति त्रिषु लोकेषु स्थितं यस्य चरणांबु विश्वं पुनाति तस्य साक्षाद्दर्शनादिभिः पावित्र्ये कः सन्देहः ? ॥ ४४ ॥

अन्वितार्थप्रकाशिका

यक्ष्यतीति ॥ पारमेष्ठ्यकामः साम्राज्यकामो नृपतिः पाण्डवः राजा युधिष्ठिरः मखेन्द्रेण यज्ञश्रेष्ठेन राजसूयेन त्वां यक्ष्यति आराधयिष्यति। तत्तस्याभिप्रेतं भवाननुमोदताम् ॥ ४१ ॥ तत्र भवता गन्तव्यमपीत्याह—तस्मिन्निति। हे देव ! तस्मिन् क्रतुवरे भवन्तं दिदृक्षवः सुरादयो यशस्विनो राजानश्च समेष्यन्ति आगमिष्यन्ति ॥ ४२ ॥ श्रवणादिति ॥ हे ईश ! ब्रह्ममयस्य नराकृतिपरब्रह्मघनमूर्त्तेस्तव श्रवणात्कीर्त्तनात् ध्यानात् अन्तेवसायिनश्चाण्डालादयोऽपि पूयन्ते शुद्धा भवन्ति। ईक्षया दृष्ट्या अभिमृशन्ति विषयीकुर्वन्तीति तथाभूता ईक्षा चाभिमर्शश्च तौ विद्येते येषामिति वा वर्णाश्रमादिमन्तः पूयन्ते इति किमु वक्तव्यम् ॥ ४३ ॥ यस्येति ॥ हे भुवनानां मङ्गलरूप ! यस्य वै तव अमलं पापमलनिवर्तकं यशो दिग्वितानं वितान-

वत्सर्वदिक्षु व्याप्तं तदलङ्करणभूतम् अत एव दिवि स्वर्गे रसायां पाताले भूमौ च प्रथितं ख्यातं च सद्विश्वं पुनाति तथा दिवि मन्दाकिनीति अधः पाताले भोगवतीति इह भूलोके गङ्गेति त्रिषु लोकेषु स्थितं यस्य चरणाम्बु विश्वं पुनाति तस्य साक्षाद्दर्शनादिभिः पाविञ्ये कः संदेहः ॥ ४४ ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पारमेष्ठ्यकामो स्वोत्कर्षेच्छुः अनुमोदतां संपाद्यतां ॥ ४१ ॥ तत्र सुरादयः राजानश्च समेष्यंति अतस्त्वया तत्र गंतव्यमितिभावः ॥ ४२ ॥ तत्र गतस्य तव दर्शनादिना जनाः पवित्रा भविष्यंतीत्याह श्रवणादिति ब्रह्ममयीं तनुं मयते प्रतिददाति भक्तानिति ब्रह्ममयस्तस्य तव मय इति मेङ्प्रणिदाने इत्यस्य धातोरूपं प्रणिदानं प्रत्यर्पणमिति तदर्थः श्रवणादिना अंतेवसायिनः अंत्यजाः पूयंते ईक्षादर्शनं च अभिमर्शः स्पर्शनं च ते द्वे विद्येते येषां ते पूयंते तत्र किमुत वक्तव्यं ॥ ४३ ॥ तवदर्शनादिना जनाः पवित्रा भवंतीत्युक्तेदानीं त्वत्पादस्पृष्टजलमपि तान् पुनातीत्याह यस्येति हे भुवनमंगल त्रिभुवनानां मंगलरूपदिशां वितानं वितानवच्छोभाकरं यस्य अमलं यशः स्वर्गादिषु त्रिभुवनेषु प्रथितं विख्यातमस्ति । तस्य तव चरणाबु अपि दिवि मंदाकिनीति अधः भोगवतीति च इह भूमौ गंगेति त्रिनामभिः विख्यातं सत् विश्वं पूनाति ॥ ४४ ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं तदित्यत आह । यक्ष्यतीति । पाण्डवः पाण्डोः पुत्रः, नृपतिर्युधिष्ठिरः, राजसूयेन राजसूयाख्येन, मखेन्द्रेण मखश्रेष्ठेन, पारमेष्ठ्यकामः सन्, त्वां यक्ष्यति सर्वथा त्वामाराधयिष्यति । भवान्, तत्तदभिप्रेतं, अनुमोदतां, तत्र त्वया गम्यतामित्यर्थः ॥ ४१ ॥ तद्व्याजेन शिशुपालादिवधोऽपि भविष्यतीत्यभिप्रायन्नाह । तस्मिन्निति । हे देव, तस्मिन् क्रतुवरे राजसूये, भवन्तं दिदृक्षवः सुरादयः, यशस्विनः प्रसिद्धाश्चैद्यादयः, राजानश्च, समेष्यन्ति वै ॥ ४२ ॥ ततः किमत आह । श्रवणादिति । हे ईश, अन्तेवसायिनश्चाण्डालादयोऽपि, ब्रह्ममयस्य परब्रह्मभूतस्य, तव, श्रवणान्नाममात्राकर्णनात्, कीर्त्तनाच्चारत्रवणनात्, ध्यानाच्छ्रीमूर्त्तेश्चिन्तनात्, पूयन्ते कामक्रोधादिकृतैः पापैर्विमुक्ता भवन्ति । तर्हि ईक्षा साक्षाद्दर्शनं च अभिमर्शः स्पर्शनं च तौ विद्येते एषामिति ते पूयन्ते, तत्र किमुत किं वक्तव्यम् । अक्ष्णाभिमर्शिन इति पाठे, अक्ष्णा नेत्रेण, अभिमृशन्ति विषयीकुर्वन्तीति ते शिशुपालादयः, पूयन्ते इति किमु वक्तव्यम् । त्वां पश्यन्तो हताश्च मुक्ता भविष्यन्तीति भावः ॥ ४३ ॥ कैमुत्यनयमेव भङ्ग्यन्तरेणाह । यस्येति । हे भुवनानां मङ्गलरूप, दिवि स्वर्गे, रसायां पातालरूपबिलस्वर्गे, भूमौ च, प्रथितं प्रख्यातं, अमलं निर्दोषं, दिग्वितानं दिग्भवनानां वितानवदलंकरणं, यस्य, ते तव, यशः कीर्त्यात्मकं तीर्थं, विश्वं पुनाति । तथा, चरणाम्बु गङ्गाजलरूपं तीर्थं च, दिवि मन्दाकिनीति, अधः पाताले, भोगवतीति, च, इह भूलोके, गङ्गेति च, प्रथितं सत्, विश्वं पुनाति ॥ ४४ ॥

कृष्णप्रिया

इसमें सन्देह नहीं कि ब्रह्मलोक में किसी को जो भोग प्राप्त हो सकता है, वह राजा युधिष्ठिर को यहीं प्राप्त है। उन्हें किसी वस्तु की कामना नहीं है। फिर भी वे श्रेष्ठ यज्ञ राजसूय के द्वारा आपकी प्राप्ति के लिये आपकी आराधना करना चाहते हैं। आप कृपा करके उनकी इस अभिलाषा का अनुमोदन कीजिये ॥ ४१ ॥ भगवन् ! उस श्रेष्ठ यज्ञ में आपका दर्शन करने के लिये बड़े-बड़े देवता और यशस्वी नरपतिगण एकत्र होंगे ॥ ४२ ॥ प्रभो ! आप स्वयं विज्ञानानन्दघन ब्रह्म हैं। आपके श्रवण, कीर्तन और ध्यान करने मात्र से अन्त्यज भी पवित्र हो जाते हैं। फिर जो आपका दर्शन और स्पर्श प्राप्त करते हैं, उनके सम्बन्ध में तो कहना ही क्या है ॥ ४३ ॥ त्रिभुवनमङ्गल ! आपकी निर्मल कीर्ति समस्त दिशाओं में छा रही है तथा स्वर्ग, पृथ्वी और पाताल में व्याप्त हो रही है; ठीक वैसे ही, जैसे आपकी चरणामृतधारा स्वर्ग में मन्दाकिनी, पाताल में भोगवती और मर्त्यलोक में गङ्गा के नाम से प्रवाहित होकर सारे विश्व को पवित्र कर रही है ॥ ४४ ॥

श्रीशुक उवाच

तत्र [1]तेष्वात्मपक्षेष्वगृह्णत्सु विजिगीषया । वाचःपेशैः स्मयन् भृत्यमुद्धवं प्राह केशवः ॥ ४५ ॥

श्रीभगवानुवाच

त्वं हि नः परमं चक्षुः सुहृन्मन्त्रार्थतत्त्ववित् । [2]तथात्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम तत् ॥ ४६ ॥
इत्युपामन्त्रितो भर्त्रा सर्वज्ञेनापि मुग्धवत् । निदेशं शिरसाऽऽधाय उद्धवः प्रत्यभाषत ॥ ४७ ॥

[3]इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे भगवद्यानविचारे [5]सप्ततितमोऽध्यायः ॥ ७० ॥

---

[1] पक्षेषु अगृह्णत्सु-वीर. । [2] अत्रोऽत्र-वीर. । [3] प्राच्यपुस्तकेऽत्राध्यायसमाप्तिर्नास्ति पराध्यायस्य २० श्लोकाः खण्डिताः सन्ति । [4] पारमहंस्यां संहितायां-प्रा. पा. । [5] अष्टसप्ततितमोऽध्यायः ।

कर्दमक्षमा

अन्वयः—**श्रीशुक उवाच**—तत्र, तेषु, आत्मयक्षेषु, विजिगीषया, (जरासन्ध) अगृणत्सुवाचः, पेशैः, स्मयन्, केशवः, उद्धवम्, प्राह ॥ ४५ ॥ **श्रीभगवान उवाच !**, त्वम्, हि, नः, परमम्, चक्षुः, सुहृत्, मन्त्रार्थतत्त्ववित्, अथ, अत्र, अनुष्ठेयम्, ब्रूहि, तत्, करवाम, श्रद्धमः ॥ ४६ ॥ **श्रीशुक उवाच**—इति, सर्वज्ञेन, अपि, भर्त्रा, मुग्धवत्, पृष्टः, उद्धवः, निदेशम्, शिरसा, आधाय, प्रत्यभाषत ॥ ४७ ॥

श्रीमद्भागवते दशमस्कन्धेऽन्वयलेखने सप्ततितमोऽध्याया ॥ ७० ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्रैवं नारदोक्तं तेषु वर्तमानेष्वात्मीयपक्षेषु यादवेषु जरासंधस्य विजिगीषया अगृह्णत्स्वमन्यमानेषु । वाचःपेशैः पेशलवाग्भिरित्यर्थः ॥ ४५ ॥ चक्षुष्ट्वे हेतुः । मंत्रार्थानां मंत्रसाध्यानां तत्त्ववित्परिपाकवेदिता ॥ ४६-४७ ॥

इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायां सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र तदा । तेषु सभ्येषु । इत्यर्थ इति—'पेशस्सौंदर्यचूर्णयोः' इति धरणिः । वाचो वाण्याः पेशैः सौंदर्यगांभीर्यमाधुर्याल्पाक्षरबह्वर्थादिभिरिति भावः । केशव इति—यथा गोकुलसुखार्थं केशिनं हतवांस्तथोद्धवस्य निजभक्तस्य कीर्त्युत्कर्षेण सुखार्थं तमाहेति भावः ॥४५॥ चक्षुश्चक्षुर्वत्प्रकाशकम् । यथाऽत्रानुष्ठेयं तथा ब्रूहि । अत्र राजमोक्षणराजसूयगमनरूपोभयकार्ये इत्यर्थः । त्वदुक्तौ श्रद्दध्मः श्रद्धां करिष्यामः । तदेव करिष्याम च "सर्वं वाक्यं सावधारणम्" इति न्यायागत एवकारः । उभयत्र भविष्यति लट्लोटौ ॥ ४६ ॥ इतीत्थम् । उपामन्त्रितः पृष्टः । मुग्धवदज्ञातवत् । 'मुग्धः सुन्दरमूढयोः' इति विश्वः ॥ ४७ ॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अगृह्णत्सु मौनमालम्बमानेष्वित्यर्थः । पाठोऽयमसन्धिरेव ससन्धिपाठे ऽगृह्णत्सु चेति क्वचित् । भृत्यमिति स्वभक्तस्य तस्य माहात्म्यविस्तारणार्थमिति भावः । यतः केशवः गोकुलसुखार्थं केशिहन्ता तत्रत्यजनप्रिये तस्मिन् श्रीमदुद्धवेपि स्नेहविशेषवानितिभावः । अत एव वाचःपेशैः प्रकर्षेणाह—यत उद्धवं सर्वेषामुत्सवरूपमिति भावः । स्मयन् उद्धवज्ञेयाभिप्रायविशेषेण स्मयमानः ॥ ४५ ॥ त्वं हि त्वमेव नोऽस्माकं यादवानां चक्षुष्ट्वे हेतुः सुहृन्निरुपाधिकहितकारी मन्त्रार्थतत्त्वविदिति च परममिति प्रसिद्धं चक्षुषः सकाशात् आधिक्यमुक्तं मन्त्रेण भाविदूरस्थादिप्रदर्शनात अथ अतो हेतोः अत्रास्मिन् कृत्यद्वये यदादावनुष्ठेयं तद्ब्रूहि न च वक्तव्यं तदेते न गृहीष्यन्तीत्याह तदेव श्रद्दध्मः श्रद्धया गृह्णीमः गृहिष्यामः करवाम करिष्यामश्चेति अयं भक्तवात्सल्यभरेण प्रोत्साहनविशेषः ॥ ४६ ॥ उपामन्त्रितः स्नेहेन प्रार्थनावदादिष्टः भर्त्रेति तदादेशस्यावश्यपाल्यता सूचिता अत एव भक्त्या स्वशिरसा तस्य निदेशमाधाय शिरोबद्धाञ्जलितयाऽऽदृत्येत्यर्थः ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीमत्सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भृत्यामिति स्वभक्तस्य माहात्म्यविस्तारणार्थमिति भावः । यतः केशवो भक्तवात्सल्याद्यशेषगुणप्रकटनार्थमवतीर्णः साक्षात्परमेश्वरः किंवा गोकुलसुखार्थं केशिहन्ता, इति तत्रत्यजनप्रियत्वेन तस्मिन् स्नेहविशेषः सूचितः । अतएव वाचः पेशैः प्रकर्षेणाह—यत उद्धवं सर्व्वेषामुत्सवरूपमिति भावः । स्मयन् सदा श्रीमुखप्रसादस्वभावात् स्मयमानः, किंवा सङ्केतेनैव स्मितेन स्वाभिप्रायबोधनार्थम्; यद्वा, निजाभिप्रायस्योद्धवैकगम्यस्य तदुक्त्या प्रकाशनार्थमिति दिक् ॥ ४५ ॥ हि एव, त्वमेव, नोऽस्माकं यादवानां परममिति समीपवर्त्ति-द्रव्यमात्रदर्शि-प्रसिद्धचक्षुषः सकाशादाधिक्यमुक्तम् । मन्त्रेण भावि-दुरवस्थादिप्रदर्शनात्, यतः सुहृत् स्वज्ञातिः; यद्वा, अतएव सुहृत् परमोपकारी, किंवा सु शोभनं हृच्च, अथ अतो हेतोः, अनु अनुसन्धानपूर्व्वकं ब्रूहि; पाठान्तरे अत्रास्मिन् कृत्यद्वये यदादावनुष्ठेयं तद्ब्रूहि, न च मन्तव्यम्, तदेते न ग्रहीष्यन्तीत्याह—तदेव श्रद्दध्मः श्रद्धया गृह्णीमः करवाम चेति । अयं भक्तवात्सल्यभरेण प्रोत्साहनविशेषः ॥ ४६ ॥ उपामन्त्रितः स्नेहेनादिष्टः; भर्त्रेति—तदादेशस्यावश्यपाल्यता सूचिता । यद्वा, भर्त्तृत्वेन भृत्ययशोविस्तारणार्थमिति भावः । अतएव भक्त्या स्वशिरसा तस्य निदेशमाधाय शिरोबद्धाञ्जलिनादृत्येत्यर्थः ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्री-श्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषिण्यां
श्रीदशम-टिप्पण्यां सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अगृणत्सु जिगीषया स्वानपेक्षया अन्येषु राजसूयगमनपरेषु क्ष्वेडनं कुर्वत्सु ॥ ४५-४७ ॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीमद्वीरराघवाचार्यकृता भागवतचन्द्रचन्द्रिका

तत्रेति । इत्थं श्रुतराजवृत्तान्तयुधिष्ठिरवृत्तान्तेषु सभास्थेषु आत्मपक्षेषु यदुषु जिगीषया प्रगृणत्सु मगधजिगीषामुत्पादयितुं प्रगृणत्सु तावन्मागधं प्रत्येव गन्तव्यम् इत्येवं वदत्सु सत्सु वाचःपेशैः मृदुवचोभिरुद्धवं प्राह ॥ ४५ ॥ तदेवाह— त्वंहीति । हि यस्मात्त्वं नोऽस्माकं चक्षुस्तत्स्थानीय इत्यर्थः । सुहृत् मन्त्रार्थानामालोचनसाध्यानामर्थानां तत्त्वं याथात्म्यं वेत्सीति तथा चातोऽधुना यदनुष्ठेयं कर्त्तव्यं तत्ब्रूहि तद्भवदुपदिष्टं कर्त्तव्यमर्थं श्रद्दध्मः विश्वसिमः करवाम च ॥ ४६ ॥ इतीति । इत्थं सर्वज्ञेनापि भर्त्रा भगवता मुग्धवदज्ञेनेव उपामन्त्रितः मन्त्रार्थं प्रचोदितः उद्धवः सन्देशमाज्ञां शिरसा आधाय ऊढ्वा प्रत्यभाषत प्रत्युत्तरं ददौ इत्यर्थः ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्र सभायां तेषु यादवेषु आत्मीयपक्षेषु जरासन्धस्य जिगीषया हेतुना मुनेस्तद्वचः अगृणत्सु अमन्यमानेषु सत्सु वाचः वचनस्य पेशैरवयवैः स्वाभिप्रेतैरर्थैरुद्धवहृद्यारोपितैः स्मयमानः उद्धवं प्राहेति तस्यैव मन्त्रणाभिज्ञतोत्कर्षख्यापनार्थमिति भावः ॥ ४१-४७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमे सप्ततितमः सङ्गतः सङ्गतस्सताम् ॥ ७० ॥

गूढार्थदीपिनी

तत्र सभायाम् । तेषु यादवेषु जरासन्धविजिगीषया नारदोक्तं हस्तिनापुरगमनम् अगृह्णत्सु सत्सु कृष्णः उद्धवं प्राहेत्यन्वयः । वाचः पेशैः सुन्दरवचोभिः । 'पेशः सौन्दर्यचूर्णयोः' इति धरणिः ॥ ४५ ॥ चक्षुः चक्षुर्वदर्थप्रकाशकः । मन्त्राणां सन्धिविग्रहादीनामर्थमुपयोगं तत्त्वं परिणामं च वेत्तीति तथा । अत्रपक्षद्वये यथा अनुष्ठेयं तथा ब्रूहि । त्वदुक्तौ श्रद्दध्मः श्रद्धां करवामः तदेव करिष्याम च । उभयत्र भविष्यदर्थे लट्लोटौ ॥ ४६ ॥ उपामन्त्रितः पृष्टः । मुग्धवत् अज्ञातवत् । निदेशम् आज्ञाम् ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्द्धे गूढार्थदीपिन्यां सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

आत्मपक्षेषु यादवेषु जरासन्धस्य विजिगीषया अगृह्णत्सु मुनिवाक्यममन्यमानेषु वाचः पेशैः पेशलवाग्भिरुद्धवमाह ॥ ४५ ॥ चक्षुःकार्या कार्य्यद्रष्टा ॥ ४६-४७ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्ततितमाऽध्यायार्थप्रकाशः ॥ ७० ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवमुभयोर्दूतनारदयोः स्वस्वार्थं प्रार्थनायां यज्जातं तदाह तत्र तेष्विति । तत्र प्रसङ्गे अन्यतरदेशगमने । तेषु तत्रत्येषु सहायभूतेषु । विजिगीषया गृणत्सु सत्सु जरासन्धवधार्थमेव गन्तव्यमिति लौकिकबुद्धेः प्राथम्यात् नारदेष्टाकरणे सति । उभयसमाधानार्थं स्वस्य मध्यस्थत्वात् उभयमताभिज्ञं उद्धवं ब्रह्मशिवयोरपि नियन्ता सुखदाता च वचनोत्तमैः प्राह । स्मयेन तमपि मोहयन् वाङ्माधुर्यात्सादरं शृणुयात् । अन्यथा सर्वेश्वरत्वं जानातीति न शृणुयादपि । नारदहिताकरणे ब्रह्मपक्षहानिः, जरासन्धवधे महादेवपक्षनाश इति यज्ञार्थमेव गमनमायाति । अतोऽङ्गप्रधानयोर्विरोधे क्रीडा सुखदा न भवतीति तदभिज्ञमुद्धवं सर्वसम्मतं बोधयामास ॥ ४५ ॥ भगवद्वाक्यमाह त्वं हि न इति । सर्वज्ञस्य स्वत एव ज्ञात्वा करणमुचितम्, नत्वसर्वज्ञस्य वाक्यात् । व्यामोहकत्वं वा स्यात् । अतस्तत्परिहारार्थमुद्धवं स्वावयवत्वेन निरूपयति त्वं नश्चक्षुरिति । आधिदैविकं परमानन्दरूपम्, चक्षुषश्चक्षुर्वा । तस्यैवायमवतार इति । लोकोक्तिश्च 'मन्त्री ज्ञानचक्षु'रिति । अतो न इति बहुवचनम् । केवलं शास्त्रपरतां वारयितुमाह सुहृदिति । पर्यवसानज्ञानमाह । मन्त्रार्थस्य फलस्य तत्त्वं पर्यवसानं वेत्तीति । अथ अतः कारणादत्रार्थे अनुष्ठेयं ब्रूहि । उभये वयं श्रद्दध्मः । तदेव च करवाम । अन्यतरस्याप्यश्रद्धां करणाभावं च वारयति ॥ ४६ ॥ तत उद्धवो

महामन्त्री तद्वाक्यममोहकं मत्वा उत्तरकथनार्थमुद्युक्त इत्याह **इत्युपामन्त्रित** इति । उद्धवो हि न युद्धादावुपदिश्यते, ज्ञानांशत्वात् । यदि ज्ञानेऽपि न विनियुज्येत, तस्य भरणं व्यर्थं स्यात् । एतत्सूचयति **भर्त्रेति** । दोषं निवारयति **सर्वज्ञेनापीति** । निदेशमाज्ञां प्रति शिरसा आधाय अभाषत अङ्गीकृतवान्, उत्तरं विचार्य वक्ष्यामीति उक्तवानित्यर्थः ॥ ४७ ॥

इति श्रीभागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे उत्तरार्धे एकविंशोऽध्यायः ॥ २१ ॥

श्रीसुबोधिनी-सारः

शुकोक्तिः । तत्र सभायामात्मपक्षेषु यादवेषु जरासंधस्य जेतुमिच्छया नारदोक्तमगृह्णत्सु सत्सु वाचःपेशैः चातुर्यैर्भृत्यमुद्धवं स्मयन् ईषद्धसमानः केशवः प्राह ॥ ४५ ॥ श्रीकृष्णोक्तिः । त्वं हि नोस्माकं परमं चक्षुः नेत्रमसि "चारैः पश्यति राजानः" इत्युक्तेः । मंत्राणामर्थतत्त्वं सिद्धांतं वेत्तीति सुहृत्सखा तथाऽत्र कर्त्तव्येस्माभिर्यदनुष्ठेयं कार्यं तत्त्वं ब्रूहि करवाम श्रद्दध्मो वयं तत् ॥ ४ ॥ इत्येवं सर्वज्ञेनापि भर्त्रा श्रीकृष्णेन उपामंत्रितः पृष्टः उद्धवो निदेशं कृष्णाज्ञां शिरसाधाय गृहीत्वा प्रत्युत्तरमब्रवीत् ॥ ४७ ॥

इति श्रीमद्भा० दशमस्कन्धे उत्तरार्धे सुबोधिन्यां टीकायां सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीविट्ठलरायात्मजश्रीवल्लभकृतलेखः

तत्र तेष्वित्यत्र । नारदेति । दूतवाक्यकरणे नारदहिताकरणात् ब्रह्मपक्षहानिः जरासन्धवधान्महादेवपक्षहानिश्च भवेत् । अतो नारदवाक्यस्यैव कर्तव्यता आयातीत्यर्थः । **अङ्गप्रधानयोरिति । दूतवाक्यकरणे अङ्गयोर्ब्रह्ममहादेवयोर्विरोधः,** नारदवाक्यकरणे भक्तदुःखनिवृत्तौ विलम्बेन प्रधानस्य स्वरूपस्य विरोधः । स्वरूपस्य भक्तदुःखासहिष्णुत्वादित्यर्थः ।

इत्येकविंशाध्यायव्याख्या समाप्ता ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र सभायां तेषु श्रुतयुधिष्ठिरवृत्तान्तेषु आत्मपक्षेषु यादवेषु जरासन्धविजिगीषया नारदोक्तं हस्तिनापुरगमनमगृह्णत्सु अमन्यमानेषु सत्सु । 'गृणत्सु' इति पाठे मागधविजयार्थमेव गन्तव्यमिति वदत्सु सत्सु केशवः ब्रह्मरुद्रयोरपि वशयिता कृष्णः स्मयन् हासस्य मायात्मकत्वात्तान् मोहयितुं प्रहसन् वाचः पेशैः मधुरैर्वचनैः भृत्यमुद्धवं प्राहेत्यन्वयः ॥४५॥ तद्वचनमाह—त्वमिति । हि यस्मात् त्वं नोऽस्माकं परमं चक्षुः चक्षुवदर्थप्रकाशकः । तत्र हेतुमाह—मन्त्रेति । मन्त्रार्थानां आलोचनसाध्यफलानां तत्त्वं याथात्म्यं वेत्तीति तथा । 'एवंभूतोपि यदि दुष्टः स्यात् तदा तन्मन्त्रेण किं स्यात्' इत्यत आह—सुहृदिति । अथ तस्मात् अत्रेदानीं निवेदितपक्षद्वये यदनुष्ठेयं तद्ब्रूहि । तत्त्वदुक्तिमेव श्रद्दध्मः विश्वसिमः, करवाम च । ४६ ॥ इत्येवं सर्वज्ञेनापि भर्त्रा भगवता मुग्धवत् अज्ञेनेव उपामन्त्रितः विचारार्थं प्रचोदित उद्धवस्तस्य निदेशमाज्ञां शिरसाऽऽधाय बहुमानेन स्वीकृत्य प्रत्यभाषत प्रत्युत्तरं ददौ ॥ ४७ ॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥ १ ॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥ २ ॥
रचिता दशमे तत्र सात्त्विकानां निरोधने । विवृतः सप्ततितमः कृष्णाह्निकनिरूपकः ॥ ३ ॥

अन्वितार्थप्रकाशिका

तत्रेति ॥ तत्र सभायां तेषु श्रुतयुधिष्ठिरवृत्तान्तेषु आत्मपक्षेषु यादवेषु जरासन्धविजिगीषया नारदोक्तं हस्तिनापुरगमनमगृह्णत्सु अमन्यमानेषु सत्सु केशवः कृष्णः स्मयन् हासस्य मायात्मकत्वान्मोहयितुं मन्दं हसन् । शतार्षः । वाचः पेशैः मधुरैर्वचनैः भृत्यमुद्धवं प्राह स्म ॥ ४५ ॥ त्वमिति ॥ हि यस्मात् त्वं नोऽस्माकं परमं चक्षुः चक्षुर्वदर्थकाशकः मन्त्रार्थानां आलोचनसाध्यफलानां तत्त्वं याथात्म्यं परिणामं वा वेत्तीति तथा सुहृच्च अथ तस्मात् तथेत्यपि पाठः । अत्रेदानीं निवेदितपक्षद्वये यदनुष्ठेयं तद्ब्रूहि तत्त्वदुक्तिमेव श्रद्दध्मः विश्वसिमः करवाम च ॥ ४६ ॥ इतीति ॥ सर्वज्ञेनापि भर्त्रा इत्येवं मुग्धवत् अज्ञेनेव उपामन्त्रितः पृष्टः उद्धवः तस्य निदेशमाज्ञां शिरसाऽऽधाय प्रत्यभाषत ॥ ४७ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र सभायामेवं नारदेनोक्ते सति तेषु सभायामासीनेषु आत्मपक्षेषु स्वपक्षीयेषु यादवेषु मागधस्य जिगीषया नारदवचनान्यगृणत्सु अमन्यमानेषु सत्सु वाचः पेशैः मधुरवचनैः उद्धवं स्मयन्सन्नाह ॥ ४५ ॥ हे सुहृत् मंत्रार्थानां विचारसाध्यानां

प्रयोजनानां तत्त्ववित् यथार्थवेदिता । त्वं नोऽस्माकं चक्षुः कृत्याकृत्यविवेकदातासि अतोऽत्रोभयविधकार्ये अनुष्ठेयं कर्त्तव्य ब्रूहि तत्र वयं श्रद्दध्मो विश्वासं कुर्मः तत्करवाम ॥ ४६ ॥ मुग्धवदज्ञेन यथा उपामंत्रितः पृष्टः ॥ ४७ ॥

इति श्रीशुद्धैकांतधर्मप्रवर्त्तकगुरुराजेन्द्रश्रीसहजानंदस्वामिशिष्यगोपालानंदमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्य दशमस्कंध-व्याख्याने प्रयाणमंत्रोनाम सप्ततितमोऽध्यायः जेतेस पूरणथयो। ॥ ७० ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्रेति । तत्रैवं नारदेनोक्ते; तेषु आत्मपक्षेषु यादवेषु, विजिगीषया, गृणत्सु, सभायां विश्रुतराजवृत्तान्तयुधिष्ठिर-वृत्तेष्वात्मीययादवेषु प्रथमं मागधविजिगीषामालम्ब्य प्रगृणत्सु सत्स्वित्यर्थः । केशवः श्रीकृष्णः, वाचापेशैर्मृदुवचोभिः, स्मयन् सन्, उद्धवं भृत्यं, प्राह ॥ ४५ ॥ त्वमिति । हे उद्धव, हि यस्मात्, त्वं, नोऽस्माकं, परमं चक्षुश्चक्षुःस्थानीयः । सुहृत्, मन्त्रार्थ-तत्त्ववित् मन्त्रसाध्यानामर्थानां परिपाकवित्, तथा ततो हेतोरित्यर्थः । अत्र, यत् अनुष्ठेयं, तत् ब्रूहि । ननु बलदृप्ता एते मदुक्तं न स्वीकर्त्तार इत्यत्राह । वयं तत्त्वदुक्तमेव, श्रद्दध्मः, तदेव करवाम च ॥ ४६ ॥ इतीति । सर्वज्ञेनापि, भर्त्रा स्वस्वामिना कृष्णेन, मुग्धवदज्ञेनेव, इतीत्थमुक्तप्रकारेण, उपामन्त्रितः मन्त्रार्थं प्रणोदितः, उद्धवः, निदेशं भगवदाज्ञां, शिरसा, आधाय ऊढ्वा, प्रत्यभाषत उत्तरं ददावित्यर्थः ॥ ४७ ॥

इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्व-यार्थविबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे सप्ततितमोऽध्यायः ॥ ७० ॥

कृष्णप्रिया

श्रीशुकदेवजी कहते हैं—परीक्षित् ! सभा में जितने यदुवंशी बैठे थे, वे सब इस बात के लिये अत्यन्त उत्सुक हो रहे थे कि पहले जरासन्धपर चढ़ाई करके उसे जीत लिया जाय । अतः उन्हें नारदजी की बात पसंद न आयी । तब ब्रह्मा आदि के शासक भगवान् श्रीकृष्ण ने तनिक मुसकराकर बड़ी मीठी वाणी में उद्धवजी से कहा ॥ ४५ ॥ भगवान् श्रीकृष्ण ने कहा—'उद्धव ! तुम मेरे हितैषी सुहृद् हो । शुभ सम्मति देनेवाले और कार्य के तत्त्व को भलीभाँति समझने वाले हो, इसीलिये हम तुम्हें अपना उत्तम नेत्र मानते हैं । अब तुम्हीं बताओ कि इस विषय में हमें क्या करना चाहिये । तुम्हारी बातपर हमारी श्रद्धा है । इसलिये हम तुम्हारी सलाह के अनुसार ही काम करेंगे' ॥ ४६ ॥ जब उद्धवजी ने देखा कि भगवान् श्रीकृष्ण सर्वज्ञ होनेपर भी अनजान की तरह सलाह पूछ रहे हैं, तब वे उनकी आज्ञा शिरोधार्य करके बोले ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे भगवद्यानविचारे सप्ततितमोऽध्यायः ॥ ७० ॥

* * *

श्रीहरिः

श्रीकृष्णः शरणं मम

श्रीमद्वल्लभाचार्यचरणा विजयन्तेतमाम्

श्रीकृष्णद्वैपायन-वेदव्यास-महर्षिप्रणीतमनेकव्याख्यासमलङ्कृतं

श्रीमद्भागवत-महापुराणम्

सात्वत-संहिता

दशमस्कन्ध उत्तरार्धः

निरोधलीलायामेकसप्ततितमाध्यायतः नवत्यध्यायपर्यन्तं
सात्त्विकसाधफलगुणप्रकरण-
षोडशदशफलम्
आचार्याणां प्राचेतसाञ्च विविधाष्टीकाः

सङ्कलनकर्ता - भागवतऋषिः कर्दमऋषि-शास्त्री
संपादकः परिवेषकश्च - श्रीकृष्णशङ्करः शास्त्री
प्रकाशकः - श्रीभागवतविद्यापीठः
वि.सं. - २०५८

श्रीकृष्णः शरणं मम

श्रीमद्वल्लभाचार्यचरणा विजयन्तेतमाम्

श्रीकृष्णद्वैपायन-वेदव्यास-महर्षिप्रणीतमनेकव्याख्यासमलङ्कृतं

श्रीमद्भागवतमहापुराणम्

सात्वतसंहिता

दशमस्कन्धः - उत्तरार्द्धः

निरोधलीलायामेकसप्ततितमाध्यायतः नवत्यध्यायपर्यन्तं
सात्त्विकसाधनफलगुणप्रकरणे
षोडशफलम्
आचार्याणां प्राचेतसाञ्च विविधाष्टीका:

◆

श्रीकृष्णशङ्करशास्त्रिविरचिता-कर्दमक्षमा (अन्वयः), **श्रीधरस्वामिविरचिता**- भावार्थदीपिका, **श्रीवंशीधरकृतः**-भावार्थदीपिकाप्रकाशः, **श्रीमज्जीवगोस्वामिकृता** वैष्णवतोषिणी, **श्रीसनातनगोस्वामिकृता** बृहद्वैष्णवतोषिणी, **श्रीसुदर्शनसूरिकृतशुकपक्षीयम्**, **श्रीमद्वीरराघवाचार्यकृता**-भगवच्चन्द्रचन्द्रिका, **श्रीमद्विजयध्वजकृता**-पदरत्नावली, **श्रीमज्जीवगोस्वामिकृतः** क्रमसन्दर्भः, **श्रीमज्जीवगोस्वामिकृतः** बृहत्क्रमसन्दर्भः, **श्रीनाथचक्रवर्तिपादविरचिता**-चैतन्यमञ्जूषा, **श्रीमद्विश्वनाथचक्रवर्तिकृता**-सारार्थदर्शिनी, **गूढार्थदीपिनी**, **श्रीमच्छुकदेवकृतः** सिद्धान्तप्रदीपः, **श्रीसत्यधर्मकृता**-श्रीभागवतटिप्पणी, **श्रीमद्वल्लभाचार्यचरणविरचिता**-श्रीसुबोधिनी, **श्रीसुबोधिनी**-सारः, **गोस्वामिश्रीगिरिधरलालकृता**-बालप्रबोधिनी, **श्रीगङ्गासहायप्रणीता**-अन्वितार्थप्रकाशिका, **श्रीगोपालानन्दमुनिविरचित**-निगूढार्थप्रकाशव्याख्यानम्, **श्रीभगवत्प्रसादाचार्यविरचिता**-भक्तमनोरञ्जनी, **योगिरामानुजाचार्यकृत**-सरला व्याख्या, **श्रीराधारमणदासगोस्वामिकृत**-दीपिकादीपिनी, **श्रीकविचूडामणिचक्रवर्तिकृता**ऽन्वयबोधिनी, **श्रीनिवाससूरिकृत**-तत्त्वदीपिका; इत्येताभिर्व्याख्याभिः कृष्णशङ्करशास्त्रिनिर्वर्तित**कृष्णप्रियाभाषानुवादेन**-च समलङ्कृतम्।

सङ्कलनकर्त्ता-
कर्दमऋषितनुजो भागवतः ऋषिः
विक्रमसंवत् २०५८ - आश्विनशुक्लद्वादशी
सन् २००२ सप्टे.

शालिवाहन १९२४

सम्पादकः परिवेषकश्च
कृष्णशङ्करः शास्त्री

सम्पादकः
कृष्णशङ्करः शास्त्री । श्रीभागवतविद्यापीठम् । कृष्णधाम सोला । कर्णावती-३८००६० अहमदाबाद, गुजरात, भारत

श्रीभागवतविद्यापीठस्य आद्यस्थापकप्रन्यासी नि.ली.-विश्ववन्द्य-पू.श्रीकृष्णशङ्करशास्त्रिचरणाः

— श्रीभागवतविद्यापीठन्यासिपरिषद् —

भागवतऋषिः शास्त्री
जशवन्तराय उपाध्याय
दीपकभाई शेठ
इन्द्रकान्त परीख
नरेन्द्रभाई शास्त्री(पाठक)
सुरेशभाई व्यासः
क्षमा कर्दम शास्त्री
दिनेशभाई महेता
जयंतिलाल रामराम
भोगीलाल यादव
गांडाभाई पटेल
हीराभाई संघवी
नानालाल चोकसी

— सर्वेऽधिकाराः श्रीभागवतविद्यापीठाधीनाः —

प्रकाशकः -
श्रीभागवतविद्यापीठः,
कृष्णधाम (सोला), अमदावाद-६०

-: प्राप्तिस्थाननिर्देशः :-
श्रीभागवतविद्यापीठ :
कृष्णधाम : सोला : कर्णावती अ. ३८००६० दूरध्वनि ७४७३८३९
३०२ रीलीफ शोपींगसेन्टर जी. पी. ओ. पास कर्णावती अ.१ ५५०२९४५

कम्प्यूटरटाईप्-सेटींग - पङ्कज कृ. ठाकरः
मुद्रकः - गुजरात ऑफसेट-वटवा, अमदावाद

॥ श्रीगोपीजनवल्लभाय नमः ॥

—ः विनयाञ्जलिः ः—

निगमागमविनिहितसकलतत्त्वज्ञानसाररूपदशविधभगवल्लीलारसपारावारस्वरूपभगवन्नामरूपात्मकस्याविकलमहिमानमालिखितुं कस्य वा विचक्षणस्यापि क्षितितले लेखिनीसामर्थ्यं भवितुमर्हति ! विचिन्त्यैवं हृदयोद्गताल्पजल्पनयेव सदाचाररूपप्राप्तप्रस्तावनापरिवेषणावसरे पुरस्क्रियते भवतु तदात्मसन्तोषाय विदुषां हास्याय वा। विदिततत्त्वानां भवतां पुरः विनिवेद्यतेऽस्य ग्रन्थप्रकाशनस्याङ्गभूतं प्रासङ्गिकम्।

कतिपयवर्षेभ्यः पूर्वं षट्टीकोपेतं श्रीमद्भागवतं भूवलये भागवतरसमास्वादनचतुराणां कृते दुर्लभमनुभूतं तदानीं विचक्षणानां क्षणार्थं रक्षणार्थं श्रीमद्भागवतस्य यावदुपलभ्यमानदुर्लभं साहित्यं सङ्गृह्य प्रकाशनीयमिति भगवन्नामस्वरूपापूर्वसेवामनोरथः विश्ववन्दनीय-श्रीभागवतविद्यापीठस्थापक-भगवत्कथावर्णनेऽभिनवशुकस्वरूपव्याख्यानवाचस्पतिब्रह्मर्षिवर्य-श्रीकृष्णशङ्करशास्त्रिवर्याणां सुविमले मनसि समुद्भूतः कथाप्रसङ्गप्रवासाद्यनेककार्यनिरतैरप्यस्मिन् परिमितपरिश्रम-द्रव्यसाध्ये प्रकाशनकार्येऽतिरतिभावमावहमानैः मतिमतां वरिष्ठैः शिष्टैरनुमोदितमिदं विशिष्टं कार्यं समारब्धं सम्पूर्णताञ्च नीतम्। भवतु मा सन्देहो भवतां हृदये कथं दशमस्य चरमद्वयस्य प्रकाशनमिति। निःसाधनजनोद्धाराय प्रादुर्भूतस्य श्रीगोवर्धनोद्धरणशीलस्य हृदयरूपस्यापरिमितानन्दसन्दोहस्य श्रीमद्भागवतस्य दशमस्कन्धस्य प्रकाशनं सूचीकटाहन्यायेन चरमं समासादितम्। नवत्यध्यायात्मकस्य अनेकटीकोपेतस्य दशमस्कन्धस्य प्रकाशने सप्तधा विभज्य ग्रन्थानां प्रकाशने अन्तिमग्रन्थसम्पानाय पूज्यवरदादाजीमहानुभावैः स्वजीवनस्यान्तिमक्षणं यावत् प्रयततितम्। किन्त्वस्य ग्रन्थस्य प्रकाशनात् प्रागेव भगवदिच्छया स्वीयं समग्रं जीवनं यापयित्वा चान्तेऽपि भगवदिच्छा-मुररीकृत्य सर्वकार्यजातं परिसमाप्य कृष्णाङ्घ्रिसेवामधिमन्यमानाः पाञ्चभौतिकं कलेवरं विहाय श्रीदादाजीमहानुभावाः श्रीभगवच्चरणारविन्दमुपाविशन्। एतादृशावसरे अस्माकमकिञ्चित्कराणां कृते एतदेव समाधानं "**किं कुर्वे जगदीश यत्पुनरहं दीनो भवानीश्वरः**"। परन्त्वत्र तेषामेव महानुभावानां हृद्गतभावाः भवतां पुरस्तादुपस्थाप्यन्ते।

चरमस्मिन्नस्मिन् प्रकाशने श्रीमद्भागवतस्य **निरोधलीलान्तर्गतसात्त्विक-साधन-फल-गुणप्रकरणो**पनिबद्धाः भगवल्लीलाः भवबन्धननिवारिकाः प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिविधायिकाः दशमस्य ७१ तः ९० पर्यन्ताध्यायेषु प्रवर्णिताश्चोपनिबद्धाः सन्ति। तत्रायं क्रमः श्रीभागवतप्रतिपदमणिवरभावांशुभूषितमूर्तिश्रीवल्लभाचार्य्यैः विनिर्दिष्टः निरूप्यते —

सात्त्विकसाधनप्रकरणे ऐश्वर्यादिषड्गुणानां धर्मिणश्च निरूपणं ७१ तः ७७तमाध्यायेषु विचिन्तयामः - तत्रादौ युधिष्ठिरप्रार्थनया इन्द्रप्रस्थं समुपस्थितस्येश्वरस्य भगवतः युधिष्ठिरादिकृतार्चनादिना ऐश्वर्यम्, भीमे स्वसामर्थ्यस्थापनेन तेन जरासन्धवधप्रसङ्गेन वीर्यम्, जरासन्धेन निगृहीतानां कारागृहतः राज्ञां निर्मोचनम्, तत्सत्कृतौ तेषां स्वाज्ञप्तलौकिकवैदिकसाधनकरणस्य यशोरूपत्वम्। राजसूये यज्ञे भगवत्सपर्यामसहमानेन शिशुपालेन भगवन्निन्दने कृते भगवता शिशुपालवधेन तच्छापो निवारितस्तेन श्रीगुणः। अभक्तसङ्गत्यागरूपं साधनं वक्तुं युधिष्ठिरस्य राजसूये दुर्योधनमानभङ्गप्रसङ्गे मौनं समाश्रितवतः भगवतः भूभारहरणोपायस्य ज्ञानमूलत्वात् ज्ञानम्। शाल्वेन द्वारकायामाक्रमणं प्रद्युम्नस्य पराजयः मूर्च्छायाञ्च तदुपेक्ष्य इन्द्रप्रस्थे भगवतः स्थितिवर्णनात् वैराग्यम्। शाल्वेन सह समरे कैमुतिकन्यायेन शोकमोहादिरहितस्य निर्गुणस्य श्रीकृष्णस्य स्वरूपकथनात् धर्मिवर्णनम्।

एवमेव सात्त्विकफलप्रकरणे ७८ तः ८४तमाध्यायेषु वर्णितलीलाप्रसङ्गः विचार्यते। दुःखाभावरूपफलदानाय शाल्वविदूरथदन्तवक्त्राणां विनाशनानन्तरं द्वारकाप्रवेशावसरे देवमनुष्यमुनिभिः कृतकृष्णस्तवनेन ऐश्वर्यम्। तथा च बलदेवेन सूतं हत्वा ऋषीणामभ्यर्थनया वक्तृस्थाने स्थापयित्वा तं स्वावतारं सम्पाद्य सूतपुत्रस्य स्थापनेन ऐश्वर्यम्। बल्वलदैत्यस्य वधः तीर्थाभिषेकेन तद्गतदोषदहनम्, ऋषीणां ज्ञानोपदेशेन भागवतश्रवणाधिकारसम्पादनम् इति सर्वं वीर्यकार्यम्। सुखोत्कर्षफलदानाय दरिद्रस्य सुदाम्नः ब्राह्मणस्य अर्धऋषित्वं निवार्य पूर्णऋषित्वं भक्तत्वरूपालौकिकसम्पत्तिसम्पादनार्थं भगवता भ्रातृवत् व्यवहारः कृतस्तेन यशः। सुदाम्नानीततण्डुलमुष्टित्रभक्षणेन 'सुदामरङ्कभार्यार्थं भूम्यानीतेन्द्रवैभवे'त्यनेन श्रीः। कुरुक्षेत्रे समागतानां गोपीजनानां सर्वभावेन निरोधं सम्पादयितुं साक्षाद्भगवदुपदेशवर्णनेन ज्ञानम्। द्रौपदीपृष्टाभिः कृष्णमहिषीभिः लोकवेदतः भगवदुत्कर्षज्ञापकस्य स्वविवाहप्रकारवर्णनानन्तरं दास्यप्रार्थनया चरणरजःप्रार्थनया कामाद्यभावज्ञापनेन वैराग्यम्। सर्वसाधनसम्पन्नानामृषीणां भगवद्दर्शनार्थमागमनम्; ऋषीणामात्मसमर्पणेन देव-ऋषिपितृणामतिशयप्रियश्रीकृष्णस्वरूपमेव फलम्। वसुदेवाय नारदेन कृष्णस्यैव यज्ञस्य फलरूपत्वं बोधितम्। यादवानां सात्त्विकत्वं भगवदीयत्वं सिद्धे सर्वभावपूर्णनिरोधेन निर्गुणत्वेऽपि सम्पन्ने; स्वरूपेणैव परमोत्सवलक्षणकविलक्षणफलदानेन धर्मिवर्णनम्, एवं चतुर्दशाध्यायेषु सात्त्विकसाधनफलनिरूपणम्।

श्रीमद्भागवतदशमस्कन्धचरमप्रकाशनस्य भागेऽस्मिन् सात्त्विकसाधनफलनिरूपणानन्तरमितः परं षट्स्वध्यायेषु षण्णां गुणानामनुक्रमेण गुणप्रकरणे विवेचनास्ति।

श्रीकृष्णस्य परत्वभगवत्त्वज्ञापकेऽस्मिन् गुणप्रकरणे वसुदेवाय निजैश्वर्यबलेनान्तरानन्ददानेन वैदिकैश्वर्यम्; भक्तिसिद्ध्यर्थं लौकिकैश्वर्यम्; देवक्याः कंसहतानां षण्णां पुत्राणां मोचनक्रियया-आसुरयोनिं निरस्य मातृस्नेहोत्पादनेन ऐश्वर्यम्; अग्रे पाषण्डसंन्यासवेषधारिणेऽर्जुने नरे स्वावेशं स्थापयित्वा चौर्येण सुभद्राप्रदाने बुद्धिवीर्यप्रकटनात्, स्वस्य मुनीनाञ्चैकेनैव रूपेण जनकश्रुतदेवयोर्गृहे एकस्मिन्नेव समये प्रवेशात्, जनकप्रासादे बहुकालवासे श्रुतदेवगेहे सन्मार्गोपदेशार्थम् एकदिनवासे अग्रे च कालद्वयस्य तुल्यत्वेन विस्मितेषु मुनिषु स्वक्रियावीर्यनिरूपकत्वाद्वीर्यम्। भगवतः सकाशादेव प्राप्तश्रीणां शङ्करादीनां भगवतैव सङ्कटनिवारणात् श्रीः। महर्षीणां भृगुणा सुप्तस्य भगवतः वक्षसि लत्ताप्रहारेण कृताऽपराधेऽपि नमनादिना ज्ञानचिह्नरूपायाः क्षमायाः वर्णनात्; गर्विष्ठस्यार्जुनस्य द्वारकायां ब्राह्मणपुत्रस्य रक्षणार्थं पुरुषार्थे कृतेऽपि अरक्षितत्वात् अनिस्तीर्णप्रतिज्ञस्याग्निं प्रविशतः प्रतिषेधेन ज्ञानचिह्नरूपायाः क्षमायाः दर्शनात् ज्ञानम्।

सर्वविधभोगसमायुक्तश्रीकृष्णस्त्रीणां विरहव्याकुलानां कुर्यादिदशावर्णनेन भगवदतिरिक्ते विरक्तिनिरूपणात् वैराग्यम्; इत्येवं दशमस्कन्धस्य परमनिरोधलीलायाः चरमः ग्रन्थः भगवतः कृपाप्रसादात् परिपूर्णतामेति।

षोडशकलापरिपूर्णस्य भगवतः श्रीपुरुषोत्तमस्य नामस्वरूपस्य श्रीमद्भागवतस्यानेकटीकोपेतस्य सप्तदशग्रन्थानां सम्पादनकार्यं बहुविधप्रत्यूहान्तरितं कोटिशो द्रव्यव्ययसाध्यमसाध्यमिव सुसाध्यं भावयित्वा भगवतो वरिवस्यारूपेणानेककार्यान्तरायान्तरितैरपि श्रीभागवतविद्यापीठस्थापकैरभिनवशुकस्वरूपैः श्रीकृष्णशङ्कर-(दादाजी)शास्त्रिवर्य्यैः महता परिश्रमेण परिपूर्णतां नीतम्। तत् संस्कृतसाहित्यस्येतिहासे सुवर्णाक्षरैरुल्लिखितं भविष्यतीति निश्चप्रचम्।

अद्यावधि सम्मुद्रिताः ग्रन्थाः प्रातःस्मरणीयमहानुभावेभ्यः पूज्यचरणैः दादाजीमहोदयैः सबहुमानं समर्पिताः समर्चिताश्च। तेषां महानुभावानां नामावलिः अस्मिन् ग्रन्थे मुद्रिताऽस्ति।

अस्य ग्रन्थस्य मुद्रणे पूज्यश्रीदादाजीचरणेषु श्रद्धावतः सहकारं विदधतः **गुजरात ऑफसेट मुद्रणालयाध्यक्षान् श्रीयोगेशभाईमहोदयान्** आत्मीयाननेकैः धन्यवादैः संवर्धयामः ।

प्रातःस्मरणीय-पूज्यवर-श्रीदादाजीचरणानां सुचरितं महानिबन्धात्मकं केन मनीषिणा विदुषा मनीषितमपि शब्दैरुपनिबद्धुं सुशकम् ! तथाऽपि रवेः दीपदर्शनमिव निदर्शनमात्रं समुत्साहप्रेरकं सद्भावपोषकं तथाप्यत्यल्पं वरतन्तुविद्यालय-**प्रधानाचार्यश्रीनरेन्द्रशास्त्रि**वर्य्यैरालेखितं तदर्थं तेषामात्मीयभावं दर्शं दर्शं मोमुदीमः ।

प्राध्यापकश्रीकालिदासभाई-ठाकरविदुषा कार्येऽस्मिन् सङ्गणकीयसेवां प्रदाय भृशं सारूप्यमाचरितम् ।

अनेकटीकोपेतसम्मुद्रितस्य श्रीमद्भागवतस्य विशिष्टश्रुतिगीतासमन्वितश्चरमोऽयं ग्रन्थः विद्वन्मतल्लजानां पूज्यश्रीदादाजीचरणानां मनोरथेन सकललोकवन्दनीयवरेण्यश्रीसन्तराममहाराजानां पुरः सप्रणामाञ्जलिना समर्प्यते । महनीययशसां **श्रीसन्तराममहाराजानां** श्रीदादाजीमहाभागेषु विशेषानुरागेण मनोरथेन **श्रीभागवतविद्यापीठे** चतुर्दश**त्रिवेणीमहोत्सवावसरे** [कथाकारसम्मेलने] **गोस्वामिकुलमण्डना-परमविदुषी-सुश्री-इन्दिराबेटीजी**महोदयानां समुपागतवन्दनीय-पू.पा.आचार्यवर्य्यैः सद्वरैः (सन्तवरैः) सङ्ख्यावद्भिः सह **प.पू.पुण्यश्लोकश्रीमुरारिबापू**महाभागानां च करकमलैः अनावृतः ग्रन्थोऽयं भगवच्चरणारविन्देषु विलीनेषु **श्रीकृष्णशङ्कर-(दादाजी)शास्त्रिवर्य्येषु 'तव तुभ्यं समर्पये'** इति सदुक्तिमनुसृत्य समुपायनीक्रियते ।

गच्छतः स्खलनं भवत्येवात्र स्खलनानि स्युरेव । तदर्थं तत्रभवन्तो भवतः कामानुजभावमनाश्रित्य निजात्मीयदृशानुग्रहीष्यन्तीति विश्वसिमः विरमामश्च ।

श्रीमत्कौ वशंवदौ

प्रद्युम्नः ब. शास्त्री - भागवतऋषिः कर्दमऋषि-शास्त्री च

॥ श्रीहरिः ॥

अभिनवशुकविश्ववन्द्यश्रीकृष्णशङ्कररर्षीणां जीवनसुमनस्सुरभिः

(भावकाव्यरूपेण)

श्रीकृष्णशङ्करार्यस्य भास्करस्येव भास्वतः । प्रवर्तितः परिचये मद्वाण्या दीपलेखया ॥
श्रीमान् कृष्णपरः कृष्णः शङ्करश्चैव मूर्तिमान् । प्रादर्शयत् मिष्टवाण्या श्रीकृष्णाख्यां यथा शुकः ॥०॥

जन्म :- औदिच्यसहस्त्रविप्रकुलम् । परमसेवाभाविश्रीदलसुखभाईपाठकः सेवासमर्पितचित्तः मातृश्री डाहीबा । १९१६ भाद्रपदकृष्णाष्टमी ।

जन्मभूमिः :- साधीग्रामः । ता. पादरा । जनपदम् : वटपत्तनम् (वडोदरा)

लब्धौदीच्यकुले जनिर्दलसुखाख्यस्य द्विजस्यामले
गेहे स्नेहसरस्वति स्वजननीडाहीति मातुर्हृदि ।
भाद्रे भद्रकरेऽसितेऽष्टमतिथावेकोनविंशे शतम् ।
वर्षे षोडशके वटोदरपुरान्तःशाधिनामस्थले ॥१॥

अध्ययनम् :- प्राथमिकाध्ययनम् साधीग्रामे । संस्कृताध्ययनम् प्रह्लादनगरे (पेटलाद) श्रीअमृतलालव्यासगुरवः। काश्यां दर्शनशास्त्री । केदारनाथ झा गुरवः । वेदान्ताचार्याः काव्यतीर्थाः इति पदवीद्वयं प्राप्तम् । पितृचरणानामाशीर्वादाः ।

सम्पाद्य विद्यां प्रथमां च शाधि-ग्रामेऽल्पकालेन बटुः पटुः परः ।
सन्दीक्षितो माणवकीबभूव पित्राऽनुरोधात्खलु कृष्णशङ्करः ॥२॥

रम्या पवित्रा सुरवाक्सरिद्धृता प्रह्लादपूर्यत् प्रथमं गुरोर्गृहम् ।
हंसो यथा बालककृष्णशङ्करः सञ्जातपक्षो प्रययौ स्वमानसम् ॥३॥

तत्रामृतलालाख्यानार्यान् वेदास्यमास्यकीकुर्वन् ।
विश्वेश्वरचरणान्तिके वाराणस्यामुवास बहुकालम् ॥४॥

विद्वद्वरेण्यचरणाब्जपरागजुष्टामाद्ये वयस्यवहितो द्युमणिप्रभावान् ।
लक्ष्यैकचक्षुरमलः श्रुतसर्वविद्यः श्रीकृष्णशङ्करगुरुर्गुरुसेवकोऽभूत् ॥५॥

शास्त्राणि सम्पिपठिषुः क्षणशः स्वधीतिं सद्वाक्यसञ्चयमयं विनयान्वितः सन् ।
तद्वाचि मानसवरे च सुभाषितानि श्रीकृष्णशङ्करवरो निदधे क्रियायाम् ॥६॥

कीर्तिर्मृगाङ्कधवला ह्यकलङ्किता च तेने स्वलक्ष्यमवधार्य च पञ्चकाव्यम् ।
किं काव्यतीर्थ इति सा पदवी प्रशस्ता कृष्णेन नो ह्यलमकारि नु शङ्करेण ? ॥७॥
शास्त्रार्थकुशलो नम्रः देशिकैश्च प्रशिक्षितः । वेदान्ताचार्यपदवीं तथैव पर्यभूभुषत् ॥८॥
अतीव नम्रः कलया च कम्रः केदारनाथैर्गुरुभिः प्रपुष्टः ।
अतोऽधिकारीति विवेद कृष्णस्ततः स्वगाथाकथनेऽस्ति योग्यः ॥९अ॥
गार्हस्थ्ये तारया युक्तः श्रद्धया श्रीहरिं जुषन् । क्रमशः कर्दमर्षिं स पुत्ररत्नमवाप सः ॥९ब॥

ब्रह्मसम्बन्धदीक्षा :- पू.पा. गो.श्रीरणछोडलालजीमहाराजाः, असारवा बेठक, अमदावाद (राजनगरम्)

"व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥"
हरिरमुमतिभक्तं शङ्करं कृष्णपूर्वं निजगुणगणगानेऽयोजयद्ब्रह्मदीक्षाम् ।
ज्वलनजननवंशे श्रीरण(त्याग)च्छोडलालं गुरुवरमतिदिव्यं दातुमाज्ञापयच्च ॥१०॥

निवासः कार्यं च :- नडियाद, श्रीमद्भागवतकथायाः विषये पितृचरणानामाशीर्वादाः । समाजसंस्कृतिसेवा । नडियादसत्सङ्गमण्डले बहुवर्षाणि सत्सङ्गरसपानं कारितम् । यदा ग्रामान्तरे कथा तदा पत्रद्वारा सत्सङ्गप्रवाहः ।

ततो नटपुरे वसन् बहुतिथं वृतो वैष्णवैः किरन् हरिकथापरागमकरन्दसञ्चायकः ।
पुरन्तरगतोऽपि पत्रलिखितैः सतां सङ्गमं जहौ न किल कृष्णशङ्करवरो हरेः सत्कथाः ॥११॥

श्रीमद्भागवतसप्ताहायोजने सर्वसम्पन्नाकिञ्चनयोः समानप्रेम्णाभेदः नासीत् ।

दक्षिणा ज्ञानसन्देशः इति सप्ताहयोजने । मुद्रालेखं जगौ भूरि धनिकाधनयोः सदा ॥१२॥

भगवतः श्रीरसराजस्य श्रीमद्वल्लभाचार्यमहाप्रभोराज्ञया श्रीभागवतविद्यापीठस्थापना :- १९६७

कर्दमऋषिगुरुकुलम्, श्रीवरतन्तुसंस्कृतमहाविद्यालयः । श्रीभागवतविद्यापीठस्य अङ्गानि :-

"वेदो वृक्षः मूलकान्यत्र विप्राः" वाक्यञ्चेदं सार्थकं सञ्चिकीर्षुः ।
लक्ष्मीभर्तुर्वल्लभस्याज्ञया च विद्यापीठं कृष्णधामाकरोत्सः ॥१३॥
तत्रावान्तरभागेषु मुख्योऽयं सुरवाग्वृतः । वरतन्त्वभिधायुक्तो विद्यालय इति स्थितः ॥१४॥
तत्रर्षिबालकशतानि सुलालितानि सत्पुत्रवद्गुरुकुले ससुभाषितानि ।
वासोऽन्नपाठननिवासनिवृत्तचिन्तान्यन्तर्वसन्ति खलुकर्दमनामधेये ॥१५॥
वृद्धाः सुसङ्कटरतं शकटं यथैवं संवारयन्ति लोकेप्रसिद्धमिति मनसा विचार्य ।
वृद्धाश्रमोऽस्ति नितरां च निरामयेन तीर्थेन सङ्गत इदं खलु दुर्लभं नो ॥१६॥
त्रयस्त्रिंशत्तु कोटीनां निर्जराणां समागमः । भुव्येकं जङ्गमं तीर्थं गौशालाप्यत्र वर्तते ॥१७॥

चम्पारण्ये शून्यात् वैष्णवसेवासर्जनम् :-

स्थानभोजनजलप्रबन्धः सर्वोत्तमवनम् :-

श्रीगुर्वृणावतरणाय च वल्लभस्य प्रादुःप्रदेशममलं समलङ्करिष्णुः ।
यत्कापथं च जनशून्यमनेन पूर्णं प्रासादमन्दिरसुभोजनसत्प्रपाभिः ॥१८॥

वल्लभनिधिः मुम्बई । विदेशेषु धर्मसंस्कारसिञ्चनम् । मन्दिरार्थं प्रेरणाप्रदानम् । स्थापनम् :-

मोहमय्यां यदा सर्वैर्वैष्णवैः श्रीशशासनम् । कृष्णशङ्करवर्यं च याचितं मोदकारकम् ॥१९॥
तदायं सुमहाभागः रसराजप्रभुप्रियः । श्रीवल्लभनिधौ श्रीशं प्रातिष्ठपदनारतम् ॥२०॥
श्रीमद्भागवतं प्रसार्य मुदितः देशे विदेशे भुवि
पुष्टिं लोकसुखाय वल्लभयुतां सारल्यपूर्णां दधत् ।
नैकेषामृषिदारकप्रियकुटुम्बानां च सन्तारकः
सन्मान्यः किल कृष्णशङ्करवरः ह्यास्ते यशःकायतः ॥२१॥
परोपकाराय कलौ वितन्वन् सत्सङ्गधर्मं बहुदैन्यपूर्णः ।
त्यागान्वितोऽलब्ध पदे पदे यः शताश्वमेधं बुधकृष्णशङ्करः ॥२२॥
"येन ते पितरो याता येन याताः पितामहाः । तेन यायाः सतां मार्गं यत्र गच्छन्न रिष्यसि ॥"
कृष्णेन कथितं यद्यदुपदेशोऽस्ति शङ्करः । रामेणाचरितं यद्यदुपदेशोऽस्ति शङ्करः ॥२३॥

अभिनवशुकश्रीकृष्णशङ्करशास्त्रीचरणपद्मपरागभृङ्गौ

नरेन्द्रः ला. पण्ड्या (प्रधानाचार्यः श्रीवरतन्तु-सं.म.वि.सोला) कालिदास-कृ. ठाकरः (अध्या.)

श्रीकृष्णशङ्करशास्त्रिसङ्कलितग्रन्थाः

श्रीभागवतविद्यापीठप्रकाशनानि

अनेकव्याख्योपेतश्रीमद्भागवतम् । [सप्तदशग्रन्थात्मकम्] श्रीमद्भागवताद्यपद्यव्याख्याशतकम् ।
श्रीमद्भागवतार्थसन्दोहः । तत्त्वसुधा । (स्कन्धत्रयम्) । भक्तिनिकुञ्जम् । श्रीभागवतपीयूषम् ।
श्रीदेवीभागवतम् । आचार्यवर-महाप्रभुजी । पंचामृतम् । (१. शब्दरूपावलिः २. धातुरूपावलिः ।
३. अष्टाध्यायीसूत्रपाठः । ४. तर्कसङ्ग्रहः । ५. समासचक्रम् । [एकाक्षरकोशः])
पाठभेदसहितस्य श्रीमद्भागवतस्य मूलसंहिता ।
श्रीपुरुषोत्तममाहात्म्यम् । (मूलसहितं भाषानुवादसहितम्)
श्रीमद्भागवतसारसङ्ग्रहः ।
श्रीभागवतामृतम् । (मासिकपत्रिका)
इतरलघुपुस्तिकाः नित्यपाठोपयोगिनः विशेषतः पुष्टिमार्गीयानां कृते प्रतिवर्षं पञ्चाङ्गं चेत्यादयः ।

ॐॐॐ

॥ श्रीहरिः ॥

समर्पणम्

"त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये"

अनेकव्याख्यालङ्कृतस्य श्रीमद्भागवतस्यान्तिमग्रन्थप्रकाशनम्
श्रीमद्भागवतस्य दशमस्कन्ध० ७१-९० अध्यायात्मकः
अनन्तविभूषितसन्तवन्दनीयश्रीसन्तराममहाराजचरणेषु विनिवेदितः ग्रन्थोऽयं
परं करुणावरुणालय पू. श्रीसन्तराममहाराजानां मनोरथस्याज्ञया वन्दनीयपूज्य-आचार्यवर्य्यैः
विद्वद्भिः कथाकारैः सह प.पू.गोस्वामिकुलमण्डना-परमविदुषी-सुश्री-इन्दिराबेटीजीमहोदयाभिः
अनावृतोऽयं ग्रन्थः सन्तवर-प.पू.पुण्यश्लोकश्रीमुरारिबापूमहोदयानां च करकमलैः
श्रीरसराजश्रीनाथजीचरणारविन्दस्थितेभ्यः
पूज्यवरश्रीकृष्णशङ्करजी(दादाजी)शास्त्रिवर्येभ्यः सप्रश्रयं

— समर्प्यते —

श्रीकृष्णशङ्करबुधैर्विविधैर्बुधैर्याः व्याख्याः कृताः सरससात्वतसंहितायाः ।
तन्मुद्रितं हि सकलं (भवता) सुमहत्प्रयासैः प्रेम्णाऽर्पितं बुधवरेषु महत्सु सत्सु ॥१॥

श्रीमद्भागवतोऽत्र रम्यदशमे लीलाः निरोधाभिधाः
सत्त्वे साधनकं फलं खलु गुणाः प्राकर्णिकं पुस्तकम् ।
सम्पाद्याद्य परं सुखाय विदुषां श्रीसन्तरामाज्ञया
ग्रन्थो राजतु कृष्णशङ्करकरेऽस्माभिर्हृदा स्थापितः ॥२॥

कृष्णेनालिखितं शुकेन गदितं श्रीकृष्णलीलामृतम् ।
आचार्यैर्विदितैर्मुदा तदमृतं व्याख्याशतैः भूषितम्
श्रीमद्भिः सुबुधैः विवेकनिधिभिःसम्पादितो मुद्रितः
ग्रन्थो राजतु कृष्णशङ्करकरे संस्थापितः तावकैः ॥३॥

॥ इति शम् ॥

दिनाङ्कः
१७-१०-२००२
अधिभागवतविद्यापीठम्

समर्पकाः
वन्दनीयाः आचार्यवराः
समादरणीयाः सद्वराः
समग्रं कथाकारकुलम्

भागवतऋषिः । अनन्तकृष्णः । भक्तिः । नरेन्द्रः । प्रद्युम्नः । अपर्णा । इन्दिरा ...
दादाजीचरणानां परिवारः ।

||श्रीहरिः||

दिनांक	स्कन्ध	समर्पण	समर्पकः	विशिष्टातिथि
१९६५	प्रथम-द्वितीयस्कन्धः	पू.पा.गो.श्रीदीक्षितजी महाराजः	तृतीयपीठा०श्रीकांक.न.गो.श्रीव्रजभूषणलालजीमहाराजाः	१०८ श्रीशंकराचार्यमहाराजाः श्रीअभिन.सच्चि.
१९६५	तृतीयस्कन्धः	पू.श्रीबदरीनाथ शास्त्रीजी	प्रथम पीठाधीश श्रीरणछोडलालजी महाराज	
१९६६	चतुर्थस्कन्धः	श्रीसर्वपल्ली राधाकृष्णन्		
		- राष्ट्रपति - भारत		
कार्तिक १९६६	पञ्चमस्कन्धः	श्रीमति इन्दिरा गांधी -		
		प्रधानमंत्री - भारत		
१४/११/१९६६	षष्ठस्कन्धः	मोरारजीभाई देसाई -	प. पुण्यश्लोक-श्रीकृष्णशंकरशास्त्रीजी	
		वित्तमंत्री - भारत	श्रीभागवत विद्यापीठ	
१९६७	सप्तमस्कन्धः	श्रीहितेन्द्र देसाई	महामण्डलेश्वर श्रीगङ्गेश्वरजी	मङ्गल आशीर्वाद प्रदाता श्रीबदरीनाथ
				शास्त्रीजी
१९६८	अष्टमस्कन्धः	शेठ श्रीअरविंदभाई मफतलाल	प.पू. पुण्यश्लोक-श्रीकृष्णशंकरशास्त्रीजी	
१९६८	नवमस्कन्धः	संतवर श्रीरणछोडदासजी महाराज	प. पू.पुण्यश्लोक-श्रीकृष्णशंकरशास्त्रीजी	
१३/०३/१९८६	दशमस्कन्धः भाग-१	ब्रह्मलीन परमवैष्णव श्रीजयदयालजी-	पू.पा.गो.श्रीव्रजेशकुमारजी	
	अध्याय १-१२	गोयन्काजी		
१६/०२/१९९१	दशमस्कन्धः भाग-२	श्रीचिमनलालजी गोस्वामी -	अध्यक्षः पू.पा.गो.श्रीव्रजरायजीमहाराज	
	अध्याय १३-२८	कल्याण-गोरखपुर		
१९९७	दशमस्कन्धः भाग-३	पू.पा.तिलकायतजी गो.श्रीगोविंदरायजी-	पू.दादाजी भागवत विद्यापीठ	
	अध्याय २९-३५	महाराज - नाथद्वारा		
१९९७	दशमस्कन्धः भाग-४	पू.श्रीहनुमानप्रसादजी पोद्दार	श्रीभागवत विद्यापीठ	
	अध्याय ३६-४९			
२००१	दशमस्कन्धः भाग-५	प.भ.श्रीगिरधरलाल महेता महोदयाः	श्रीभागवत विद्यापीठ	श्रीसुंदरसिंह भंडारीजी म.म.राज्यपालश्री
	अध्याय ५०-७०			गुजरात-राज्य/पू.श्रीमुरारिबापू
२००२	दशमस्कन्धः भाग-६	श्रीनारायणदासजीमहाराजाः	प. पुण्यश्लोक-श्रीकृष्णशंकरशास्त्रीजी	प.पू. विद्वत्कुलमण्डना सुश्रीइन्दिराबेटीजी
	अध्याय ७१-९०	संतराममंदिर-नडियाद		प.पू.पुण्यश्लोक श्रीमुरारिबापू
१३/०४/१९७३	एकादशस्कन्धः	श्रीद्वारकाधीश कांकरोली चरणयुगल	पू.पा.गो.श्रीव्रजरायजी महाराज	गुजरात हाईकोर्ट-मुख्यन्यायाध्यक्षः श्रीप्रफुलभाइ भगवती
		पू.पा.गो.श्रीव्रजभूषणलालजी महाराजानां		स्वागताध्यक्ष - इश्वरभाई पटेल
		करकमलयोः		प्रस्ताव प्रस्तुकर्ता - पू.श्री.बदरीनाथ शास्त्री
८/११/१९७५	द्वादशस्कन्ध	पू.पा.गो.श्रीश्याममनोहरजी महाराजः		पू.पा.श्रीइन्दिरा बेटीजी/प.पा.गो.श्रीरमेशबावाजी पू.श्रीबदरीनाथ शास्त्री/पू.श्रीमोहनभाइ पटेल

श्रीभागवतभूमिका

(श्रीमद्भागवतार्थसन्दोहाद्यपद्यव्याख्याशतकस्य प्रथमावृत्तितः)★

अतिविशाले मनसापि सर्वांशेनावितर्क्ये जगति मानवः सुखप्राप्त्यर्थं सर्वाणि कार्याणि समारभते परन्तु तैः कार्यैः दुःखं विहायाल्पांशेनापि वास्तविकस्य नित्यस्य सुखस्य न प्राप्तिर्भवति। यच्च किञ्चित्सुखमुपलभ्यत इवाभाति, तत्त्वनित्यतया दुःखमिश्रितया च दुःखवदुपलभ्यमानं त्याज्यमेव भासते विदुषां यतो यैर्विषयैस्तदुपलभ्यते मानवैस्ते सर्वथा नश्वरा अतस्तज्जन्यं सुखमपि विनाशीत्यनुभूयते, तदा मानवः स्वान्ते विचारयति, किमहं केवलं दुःखमनुभवितुमोवं मृत्योर्वशो भवितुमेवोत्पन्नोऽस्म ? किमहं शरीरेणैतेन सह म्रियेऽथवा विनष्टेऽपि शरीरे किमपि सर्वथा नित्यं तत्त्वमवशिष्यते[१] ? इति। यदा मानवोऽतिविशालां मनसाप्यवितर्क्यां पृथ्वीं पश्यन् विचारयति इयं कुतः समागता, को वेमां धारयति, इदं को वा सम्यक्तया विजानाति[२], अस्माद्दृश्यमानात्पूर्वं किमपि तत्त्वमस्ति न वा ? यदि स्यात्तर्हि तत्सदसद्वा भवेत्[३] ? इमाः सर्वाः प्रजाः कुत उत्पन्नाः[४] ? वयं कुतो जाताः ? कथं वा जीवामः ? तथान्तेऽस्माकं किं वा भविष्यति[५] ? इत्यादीननेकान् प्रश्नान् सृष्टेः प्रारम्भत एव विचारशीलो मानवः स्वहृदये समालोचयति स्म। अस्यामवस्थायां स विचारको यथाशक्ति स्वीयया बुद्ध्या सर्वत्राज्ञातस्थलेषु किमपि कार्यकारणभावं कल्पयित्वा समाधातुं चेष्टते। तथा किमपि कारणजातं कल्पयित्वापि यदा समाधानं न प्राप्नोति तदा पदार्थजातमीदृशस्वभावमेवेति न तत्र तर्कावसरः इति[६] कथञ्चन संतुष्यति।

परन्तु सात्त्विकान्तःकरणो विचारशीलो मनुष्यो न केवलमनेन प्रकारेण संतुष्यति, यतो जगत्यनेकानि कार्याणि वारं वारं विचारयितुं मनुजं हठात्प्रेरयन्त्येव, यथा क्रमागता ऋतवः, अकस्मात्प्रवृत्तो झञ्झावातः भूकम्पः, प्राणिनां जन्ममरणे इत्यादिकं विचार्य विचार्य सोऽस्य जगतोऽभ्यन्तरे प्रारम्भे च सर्वशक्ति सर्वसमर्थं किञ्चनापूर्वमनिर्वचनीयं च तत्त्वं विराजते, तदेव स्वेच्छामनुसृत्य कञ्चन नियमं चाश्रित्य सर्वमिदमनेकप्रकारेण घटयति, संस्थापयति, संहरति चेति निश्चिनोति।

प्राचीनाः सत्त्वशीला ऋषय इत्थं निश्चित्य तस्यानिर्वचनीयं तत्त्वमार्गमन्वेष्टुं प्रवृत्ताः सन्तः शीघ्रमेवान्वभवन् यद् विषयानुपभोक्तुं प्रवृत्तानीमानीन्द्रियाणि तत्तदवितर्क्यं तत्त्वं ज्ञातुं न प्रभवेयुः, प्रत्युत सर्वेषां चित्तप्रभृतीनां तेजः क्षीयेत, नाभीप्सितं ज्ञानं च भवेत्[७] इत्थं विचार्य ते प्राचीनाः, परमश्रेष्ठा ऋषयः अन्तःकरणशोधनेन ध्यानयोगेन च परमात्मानं जगत्कारणमनन्तशक्तिसम्पन्नं साक्षात्कर्तुं प्राभवन्[८], जगतीतले नास्ति कश्चन धर्मः, यत्रेश्वरस्य सत्ता केनापि प्रकारेण नाङ्गीकृता। जगत्कार्यं कञ्चननियममाश्रित्य स्वेच्छया कर्तुं प्रवृत्ता शक्तिः काचन विद्यत इति बलात्स्वीकरणीयमेवापतति।

★ अस्य समस्तटीकोपेतश्रीमद्भागवतस्य आरम्भं चिकीर्षुभिः श्रीकृष्णशङ्करशास्त्रिवर्यैः प्रथमं श्रीधरस्वामिशिष्यश्रीवंशीधरकृत "श्रीमद्भागवताद्यपद्यटीकाशतक" समन्वितः "श्रीमद्भागवतार्थसन्दोहः" मुद्रापित आसीदतोऽस्मिन्नन्तिमभागद्वये इयं भूमिका समुपन्यस्ता विद्वज्जनपरितोषायेत्यवधेयम्।

१. येयं प्रेते विचिकत्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके (कठ० १।१।२४)

२. को अद्धा वेद क इह प्रवोचत्। कुत आजाता कुत इयं विसृष्टिः ... अथाको वेद यत आबभूव (तैत्तिरी०ब्रा०२।६)

३. नासदासीन्नो सदासीत्तदानीम् (तैत्ति० ब्रा० २।१)

४. भगवान् कुतो ह वा इमाः प्रजाः प्रजायन्ते (प्रश्न० उ० १।३)

५. किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठाः (श्वेताश्व०उ० १)

६. अचिन्त्याः खलु वै भावा न तांस्तर्केषु योजयेत् (विष्णु० पु०)

७. श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः (कठ० १।१।२६)
तथा—न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् (कठ० १।२।६)

८. ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम् (श्वे० उ० ३)
तथा—कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् (कठ० २।१।१)

अतिप्रसिद्धेन तार्किकशिरोमणिनोदयनाचार्येणातिप्रबलाभिर्युक्तिभिरीश्वरसिद्धिः प्रदर्शिता। तत्रत्यानां कासाञ्चन युक्तीनामत्र प्रदर्शनमुचितं प्रतिभाति। तथाहि – ★कार्यभूतपृथिवीप्रभृति पदार्थजातं समालोचयतो मनुजस्य मनसि विचार इत्थं जागर्ति, अस्य कर्त्रा केनचनावश्यं भाव्यमेव, यतः प्रतिकार्यं कर्तृसत्ता सर्वत्र दृश्यते यः सत्तावान् पदार्थो नाशशीलो दृश्यते स निश्चितं केनचित्कर्त्रा निर्मित एव यथा प्रत्यहं प्रतिगृहं दृश्यमानं घटपटप्रभृति पदार्थजातम्। अत्र केषाञ्चन मनसि शङ्केत्थं समुदेति–पृथ्वी, जलं वह्निर्वायुर्वा परमाणुद्व्यणुकादिद्वारा स्वयमुत्पद्यते, स्वभाव एवायं तस्य, तत्र कस्यचन कर्तुर्नास्त्येवापेक्षेति। अस्याः शङ्काया इत्थमिदमुत्तरं समुचितं प्रतिभाति–द्व्यणुकानां समुत्पादिका परमाणुनिष्ठक्रिया कदाचिदुत्पद्यमाना विना कर्तारं नोत्पत्तुमर्हति, यदा विना कर्तारं समुत्पद्येत तदा कार्येण सर्वदैकप्रकारेण भाव्यं न कदाचन समुत्पत्तिः, कदाचन विनाशश्च भवितुमर्हति। परन्तु लोके सर्वथा वस्तुजातमेकरूपं नावलोक्यते। अतः सृष्टेः प्राक्काले कश्चन कर्तावश्यं स्यादेव, स एवेश्वर इति सात्त्विकाः कथयन्ति। किञ्चाकाशे पक्षिभिर्धृतं काष्ठमिव पृथ्वी स्थिरोपलभ्यते न कदाचित्पतति, अत्र कारणे समालोच्यमाने पक्षिवदस्या धारकः स्थिरत्वसम्पादश्च कश्चन चेतनो विद्यते स एवेश्वर इति

किञ्च भूचाले प्रवृत्ते पर्वतादीनां विनाशो भवति, स च कर्तारमनुमापयति, यतो यत्र नाशो जायते तत्र तत्र कर्तारं पश्यामोऽतः पर्वतवृक्षादीनां भूकम्पे सञ्जाते नाशस्य कर्ता कश्चनावश्यं स्यादेव, तमेवेश्वररूपेणास्तिकाः परिगणयन्ति। यद्यपि भूकम्पमेवास्यामवस्थायां नाशस्य कारणं प्रतिपादयितुं शक्नुवन्ति, तथापि भूकम्पस्याकस्मिकस्य कार्यरूपस्य कर्ता विनेश्वरात्को भवितुमर्हति[1] ?

किञ्च संसारे शब्दव्यवहारं कुर्वाणा मानवा घटशब्दाद्घटं कम्बुग्रीवादिमन्तमर्थं जानन्ति पितृपैतामहपरम्परया, परन्तु परम्पराया अस्याः प्राथमिकः कर्ता क इति विचिकित्सायामीश्वर एव प्रथमतो व्यवहारं विरचय्य तं कञ्चन प्रबोध्य प्रवर्तयतीति कल्पनोचिता प्रतिभाति[2]।

किञ्च वेदो वाक्यसमुदायरूपोऽचिन्त्यालौकिकप्रामाणिकपदार्थबोधको विना कस्माच्चन सर्वज्ञ-सर्वसमर्थपुरुषात्प्रवृत्तः (प्रकाशितः) न भवतीति तस्य यः प्रकाशकः स एवेश्वर[3] इत्यादिकम्।

एवं परमेश्वरं केनचित्प्रकारेण कयाचिद्युक्त्या च सर्वधर्मप्रवर्तकाः सर्वदेशस्थाः स्वीकुर्वन्ति, तस्य सर्वैरवश्यं स्वीकृतस्येश्वरस्य स्वरूपं कथं भवेत्, कथं च तं सर्वथा समुचितेन साधनेन विद्म इति जिज्ञासा समुदेति। प्राचीनाः सात्त्विका जिज्ञासवः ऋषयो निरचिन्वन् न विषयसक्तो मानवो विषयासक्तैरिन्द्रियैरन्धोऽन्यमन्धमिव परमेश्वरतत्त्वं प्रबोधयितुं प्रभवति[4]।

★ प्राचीना मन्त्रद्रष्टारः स्फुटमुद्घोषयन्ति —
"द्यावाभूमी जनयन् देव एकः" (ऋ०)
तथा - स दाधार पृथिवीं द्यामुतेमाम् (यजुः० १३।४)
तथा-सत्येनोत्तभिता भूमिः (अथर्व० १४।१।१)
तथा-अनड्वान् दाधार पृथिवीमुतद्यामनड्वान् दाधारोऽर्वन्तरिक्षम् (अथर्व० ४।११।१)

[1] यत् प्रयन्त्यभिसंविशन्तीति (तै० ३।१।१)
त्वमेव केवलं कर्तासि ..... त्वमेव केवलं हर्तासि .... (गणेशोपनि० २।१)

[2] इत्थं सर्वमनुभूय ऋषयः स्वानुभुवमनेन प्रकारेण प्रकाशितवन्तः :-
यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै (श्वे० उ० ६।१८)

[3] अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः .... (बृ० उ० २।४।१०)

[4] अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः।
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥ (कठ० १।२।५)
तथा-न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् (कठ० १।२।६)

इत्थं सर्वथा सम्यग् विचिन्त्येन्द्रियाणि बाह्यान्याभ्यन्तराणि च वशानि कृत्वा शुद्धेन सात्त्विकेन चेतसा परमेश्वरमतिसूक्ष्मं सर्वथा जगतो मूलभूतमचिन्त्यशक्तिं साक्षादकुर्वन्[५] — ईश्वरस्वरूपानुभवं महर्षयोऽकुर्वन् तदनुभवस्वरूपवर्णनं वेदादिमन्त्रादिष्वनेकप्रकारेणोपलभ्यते तत्स्वरूपं किञ्चिदंशेनात्र प्रदर्श्यते - स परमेश्वरो विराट् पुरुषः सहस्रशिरोनेत्रपादोऽस्ति, भूमिं सर्वतो व्याप्यातिष्ठति[६]। स परमात्मा व्यापकः शुद्धः, सूक्ष्मस्थूलकारणशरीररहितः, धर्माधर्मादिवर्जितः, सर्वद्रष्टा, सर्वज्ञः, सर्वत उत्कृष्टः सनातनश्चास्ति[७], एवं सत्यानन्दज्ञानरूपश्च विद्यते[८] इत्याद्यनेकरूपेण परमेश्वरवर्णनमनेकत्रोपलभ्यते, दार्शनिकैरपि श्रुतिसम्मतं स्वाभिप्रेतं परमेश्वरस्वरूपमुपवर्णितम्। श्रीरामानुजाचार्यैरित्थं स्वरूपं प्रोक्तम्। तत्किञ्चित्प्रदर्श्यते। तथाहि-परमेश्वरो जीवान्नियमति जीवाद्यन्तर्यामी सर्वथा जीवादिभ्यो भिन्नोऽस्ति, जीवजडतत्त्वानि तस्य शरीरं, जीवानां कर्मणां फलदाता, स्वयं ज्ञानस्वरूपोऽपि ज्ञानाश्रयोऽस्ति। स जगतो निमित्तोपादानसहकारिकारणरूपो विद्यत इति।

अत्र नैयायिका अभिप्रयन्ति — ईश्वरो जगतः केवलं निमित्तकारणमास्ते, जगति उत्पन्नानां जीवादीनां कर्मफलस्य दाता तथा जीवादिभ्यो भिन्नोऽस्ति। एतत्तुल्यमेव प्रायो मतं वैशेषिकमाध्वयोः केषाञ्चन माहेश्वराणाञ्च। श्रीशङ्कराचार्या इत्थमभिप्रयन्ति स निर्विशेष-निर्लेप-निर्गुणाद्वितीयः, सर्वथा सत्यश्च वर्तते, मायामवलम्ब्य जगतो निमित्तकारणमुपादानकारणं च भवति, जगतः पारमार्थिकसत्ता नास्ति किन्तु व्यावहारिकी सत्ता विद्यते, मायोपाधिकः स ईश्वरः कथ्यते। एवमीश्वरस्वरूपमनेकधा स्वाभिप्रेतं दार्शनिकास्तां तां श्रुतिमाश्रित्य भिन्दन्ति। तत्सर्वथा सर्वस्वरूपे तस्मिन् सत्यमेवास्ति।

अत्र केषाञ्चन हृदये शङ्कैषा समुदेति। ईश्वरो यदि विद्यते तर्हि तस्यानुभवः सर्वैः एकरूपेणैव कर्तव्यः, कुतोऽनुभवो भिद्यते ? अनुभवभेदाच्च सर्वथा स नास्त्येव, येन यथा दृष्टं स तथैव कल्पत इति कुतो न कल्पनीयमिति।

परन्तु सर्वथा नैतदुचितं प्रतिभाति, ते ऋषयः सर्वथा ध्यानयोगेन परमेश्वरतत्त्वं ज्ञातमिति स्पष्टं प्रतिपादयन्ति, परन्तु यथा यथा चित्तं निर्मलं भवति तथा तथा तदचिन्त्यमवितर्क्यं तत्सर्वथा सर्वरूपेण ज्ञातुं शक्यते, तावत्पर्यन्तम् अन्धदृष्टहस्तिन्यायेन दर्शनभेदेन वर्णनभेदेऽपि तद्वर्णनं भिन्नमपि सर्वथा तस्मिन् परमेश्वरे सङ्घटत एव।

अत्र प्रसङ्गतोऽयं विचारोऽपि मनसि समायाति, परमेश्वरः कुतो जगन्निर्माति, किमर्थं वा ? स्वयं च तत्र किमर्थमवतरति ? इति। अत्र विचारे वेदादिपुराणपर्यन्तणाग्रन्थावलोकने, केषाञ्चन मतेन जगद्वस्तुतो नोत्पन्नं, नास्ति। केषाञ्चन मतेन तस्य परमेश्वरस्य लीलाकरणार्थं जगन्निर्माणमिति, परन्तु तस्यावतरणेऽनेककारणानि ग्रन्थेषु समुपलभ्यन्ते, तथाहि —

श्रीमद्भगवद्गीतायां लिखितम्, यदा धर्मस्य ह्रासोऽधर्मस्य चाभ्युन्नतिर्भवति तदा परमेश्वरोऽवतरति, तथा साधूनां संरक्षणं दुष्टानां च विनाशकरणपूर्वकधर्मसंस्थापनार्थं परमेश्वरोऽवतीर्य तत्कार्यं सम्पादयति[१]। श्रीमद्भागवते परमेश्वरो भक्तानां शमिच्छन्नवतारं गृह्णाति। यदि परमात्मा सगुणरूपं न धारयेत्तर्हि भक्तः कथं तं जानीयात्कथं वा तं पूजयेदिति[२]। केचनान्यदवतारकारणं कथयन्ति - परमेश्वरावतरणाभावे श्रवणीय-स्मरणीयचरितानि भक्तानां कथं

---

[५] ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्।
यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः ॥ (श्वेत० १।२)

[६] सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। सभूमिं विश्वतो वृत्वात्यतिष्ठत्० (ऋ० ८।४।१७)

[७] सपर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयम्भूः। (यजु० ४०।८)

[८] सत्यं ज्ञानमनन्तं ब्रह्म (तै० २।१।१) आनन्दो ब्रह्मेति व्यजानात्। (तै० ३।६।१)

[१] द्रष्टव्यम् गीता ४।७,८। भाग० ८।२४।५; १०।२।२९; १०।१४।१०

[२] भाग० १०।२।३४; १।८।३५

प्रादुर्भवेयुरिति[३] । श्रुतिषु तु परमेश्वरावतारकारणं तस्येक्षणमेव, तच्चैकस्य बहुरूपभवनं नाम[४] । अन्यत्र श्रुतौ तु तस्य परमात्मनो रमणेच्छैवावतरणकारणं, यतः एकाकी रन्तुं न कल्पते स द्वितीयमभिप्रैति[५] । अन्ये कथयन्ति परमेश्वरस्यावतरणे स्वकीया तादृक्स्वभावा शक्तिरेव मुख्यं कारणम् । गीतासूक्तम् - अजोऽव्ययः भूतानामीश्वरश्च परमात्मा प्रकृतिमधिष्ठायावतरतीति[६] ।

एतेषां सम्पूर्णानां कारणानामनुगमकमेकं कारणं प्रतिभाति, तच्च तस्य परमेश्वरस्य स्वकीयाचिन्त्या स्वेच्छैवावतारकारणमिति सुनिश्चयं प्रतिभाति । ''परास्य शक्तिर्विविधैव श्रूयते'' अस्यां श्रुतौ परमात्मनः शक्तिरनेकरूपा प्रोक्ता, तत्र मुख्यतया ज्ञानशक्तिः, इच्छाशक्तिः, क्रियाशक्तिश्चेति त्रिविधा विद्यते । तत्रेच्छाशक्तिरवतारकारणमास्ते । तत्रेच्छायाः कश्चन विषयोऽवश्यमस्ति । निर्विषयाया इच्छाया असम्भवादतः कदाचित्तस्या विषयो 'रमणम्' अस्ति । तस्य रमणं नाम जगत उत्पत्तिस्थिति-संहरणरूपमनेकविधमास्ते । एवं रमणेच्छया जगदुत्पादयितुमीक्षणं त्वपेक्ष्यत एव । तस्येक्षणमपि रमणविशेष एव । उत्पन्नस्य जगतोऽनन्तरं जगद्रक्षणरूपं रमणं कदा कदा दुष्टविनाशपूर्वकसाधुसंरक्षणरूपं भवति । कदा कदा धर्मसंस्थापनरूपं, कदाचिद्भक्तानां कल्याणं विधातुं नैकविधलीलाकरणरूपं च भवति । ऋषिप्रदत्तशापरूपमवतारकारणमपि तस्य रमणेच्छयैव भवति एवं च रमण एव सर्वेषामन्तर्भावो भवति ।

लिङ्गपुराणे तु स्पष्टतयोक्तं सर्वेष्ववतारेषु परमात्मन इच्छैवावतरणे कारणमिति । ऋषिप्रदत्तशापेनावतरति भगवानिति स्वीकारेऽपि कर्तुमकर्तुमन्यथाकर्तुं समर्थस्याचिन्त्यशक्तिसम्पन्नस्य तस्येच्छां विना न किञ्चिदपि ऋषिशापः कर्तुं समर्थो भवति । अत एव विष्णुपुराणे प्रोक्तम् —

लीला जगत्पतेस्तस्यच्छन्दतः सम्प्रवर्तते । इति ।

एवं भोजराजेनापि परमेश्वरोऽवतीर्य रमणरूपं पञ्चविधकृत्यं सृष्टिस्थितिसंहारनिरोधतिरोभावरूपं सम्पादयतीत्युक्तम् —

पञ्चविधं तत्कृत्यं सृष्टिस्थितिसंहारनिरोधतिरोभावः इति (सर्वद०सं०शै०द०) यद्यपि परमेश्वरः स्वतन्त्रस्वतन्त्रोऽस्ति स्वेच्छयैवावतरति, तथापि क्वचित्तस्यावतरणे भक्तानामिच्छापि सहकारिकारणरूपेण वर्तते, इमं विषयमग्रे विवेचयामः ।

अत्रेश्वरावतरणप्रसङ्गेऽन्यैका शङ्कोदेति यदि परमेश्वर आकाशवद् व्यापकस्तर्हि कथं परिच्छिन्नरूपेण प्रादुर्भवति, न ह्यपरिच्छिन्नं सर्वदैकरूपं वस्तु कदापि परिच्छिन्नं भवितुमर्हति, तथात्वे तस्यापरिच्छिन्नरूपस्य विनाशः स्यादिति ।

अत्रायं विचारः पुरस्स्फुरति-ईश्वरस्य वर्णनं कुर्वद्भिः ''दृशिस्वरूपं गगनोपमं परम्'' इत्यादिषु तस्याकाशरूपोपमया वर्णनं कृतं दश्यते, तथापि सर्वेष्वंशेष्वीश्वर आकाशतुल्य इति नैव वर्णयतामभिप्रायः, उपमानोपमेययोः किञ्चित्सादृश्यमवलम्ब्यैव प्रवर्तते, यदि सर्वांशेन समानत्वमभिप्रेतं चेत्तर्हि उपमालङ्कारस्वरूपमेव विनश्येदिति साहित्यविदां समयः । यदि प्रकृते स्थले कश्चिद्वास्तविकमाकाशरूपत्वं सर्वांशेनाभिप्रेयात्तर्हि तस्य परमेश्वरस्य स्वीकरणमेव व्यर्थमापद्येत । यतः सृष्ट्यादि सत्कार्यं सर्वथा चेतनकर्तारं विनानुपपन्नं सच्चेतनं कर्तारमनुमापयति । यदि त्वाकाशवदीश्वरो जडः पृथिव्यादेरनत्त्त्पादकः स्यात्तर्हि तस्य कल्पनं व्यर्थं भवेदतः परमेश्वर आकाशवद्व्यापक इत्यंश एव उपमायाश्चारितार्थ्यम् ।

---

[३] भाग० १।८।३५

[४] ''स ऐक्षत बहु स्यां प्रजायेय'' इति । ''स ऐक्षत लोकान्नु सृजा इति''

[५] ''स वै नैव रेमे, तस्मादेकाकी न रमते, सद्वितीयमैच्छत्'' इति ।

[६] अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ।।४।६।। इति ।

आकाशवद्व्यापकोऽपीश्वरो भक्तेच्छया परिच्छिन्नः भवति, यतः स चेतनो विद्यते। अत ऋषयस्तं ध्यानयोगेन यथापश्येयुस्तथैव तस्य स्वरूपमस्तीति ज्ञातुं योग्यम्। ऋषयस्तं यथावालोकयन् तथैव तैरनेकत्र तस्य वर्णनं प्रदर्शितम् —

"अणोरणीयान् महतो महीयान्। नमो-ह्रस्वाय च वामनाय च नमो बृहते वर्षीयसे च" (यजु० सं० १६/३)

अतः सर्वव्यापकः सच्चिदानन्दघनः परमात्मा कुत्रचिद्भक्तकार्यसम्पादनार्थं परमेश्वरः स्वदिव्यरूपं प्रकटयन्नपि अन्यत्र सर्वव्यापकरूपेण स्थितो भवति। श्रुतिरपि वक्ति "पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" (ऋ० ८/८४)

यथा सर्वत्रावस्थितो वायुरेकत्र झञ्झावातरूपेणान्यत्रवात्यारूपेण वहन्नपि तत्रैव स आस्ते नान्यत्रेति कल्पयितुं न शक्यते यतोऽन्यत्र प्राणिनां जीविनामुपलब्धेः।

भागवते परमेश्वरस्यैकत्र स्थितत्वेऽपि भिन्नस्थले तस्य दर्शनं कृतमित्यादिवर्णनमनेकत्रोपलभ्यते, यथा श्रीकृष्णचन्द्रेण रथे सगुणरूपेण तिष्ठतापि भक्ताक्रूरस्य कृते जले स्वदिव्यरूपं प्रदर्शितम्[१]। गोपीनां कृते रासलीलायां प्रतिगोपिकं स्वकीयं रूपं निर्मितम्[२]। ब्रह्मणः कृतेऽनेकविधाकाररूपं प्रदर्शितम्[३]। भौमासुरस्य गृहेऽवरुद्धानामनेककन्यकानां विवाहार्थमेकस्मिन् [४]समयेऽनेकानि रूपणि सर्वथा समानि विधायानेकत्र स्थानेषु तासां पाणिग्रहणं सम्पादितम्[५]। यशोदायाः कृते श्रीकृष्णेन स्वमुखे सम्पूर्णं जगच्च प्रदर्शितम्[६]। आस्ताम्। अवञ्च जगतः सृष्ट्यादिकार्यजातं निर्वोढुं कश्चन सर्वज्ञं सर्वशक्ति तत्त्वमवश्यमङ्गीकरणीयमेव बुद्धिमतामापतति। अतः ऋषिभिरेकाग्रचेतसा तस्य तत्त्वस्य यथा स्वरूपं दृष्टं तत्तथैवास्त इत्यङ्गीकरणं वरं भाति। एवं च तत्तत्त्वं सर्वशक्ति सर्वज्ञमेकत्र सर्वस्वरूपस्थितमपि सर्वशक्तिमत्त्वात्स्वेच्छया अन्यत्रानेकरूपेणावतरतीति स्वीकारे न काचिदनुपपत्तिरिति पश्यामः।

अत्र प्रसङ्गतः केषाञ्चिदैतिहासिकानां श्रीकृष्णचन्द्रावतारस्य सत्यत्वविषये मतमपि समालोचयामः। ते च कथयन्ति श्रीमद्भागवतादिग्रन्थेषु समुपवर्णितं कृष्णचरितं केवलं रूपकमेव, श्रीकृष्णो नाम कश्चनैतिहासिकः पुरुषो न जात एवेति।

अत्रेदमपि विवेचयामः, बहवः श्रीकृष्णचरितमादृत्यानेकप्रकारमाधिभौतिकमाध्यात्मिकं चार्थजातमपि प्रकाशयन्ति। तत्तु वास्तविकं कृष्णचरितं न विपरिणमति, वक्तॄणां भक्तानां दार्शनिकानां च तत्स्वबुद्धेर्विलसन-मात्रमेवेति विद्मः।

श्रीकृष्णो यदि सर्वथा काल्पनिकः स्यात्तर्हि गीतोपदेशस्यार्जुनं प्रति वक्ता कः? यद्यर्जुनोऽपि मनोरूपकेण रूप्यते, गीता च स्वयं व्यासेन विरचय्य काल्पनिकं कृष्णमर्जुनं च निर्माय गीता प्रवर्तितेति कल्प्यते तर्हि मथुरा-वृन्दावन-गोकुल-गोवर्धन-यमुनानदी-प्रभृति श्रीकृष्णचरितविषयभूतं वस्तुजातमुपलभ्यते तच्च कथं व्यवस्थापयितुं

---

[१] सर्वावर्तेषु वै विष्णोर्जननं स्वेच्छयैव तु।
जराकास्त्रच्छलेनैव स्वेच्छया गमनं हरेः।
द्विजशापच्छलेनैवमवतीर्णोऽपि लीलया।

[२] भाग० १०।३९।४१

[३] भाग० १०।३३।३

[४] भाग० १०।१३।१७

[५] भाग० १०।८।३९

[६] भाग० १०।५९।४२

शक्यते । यदि काल्पनिकः श्रीकृष्णः स्यात्तर्हि तस्य मन्दिराणि यात्राद्युत्सवादिकं च कथं सम्भवेत् ? न हि काल्पनिकव्यक्तेर्मन्दिराणि यात्रोत्सवाद्युपलभ्यन्ते । यदा श्रीकृष्णवंशीया यादवादिवंशीयाश्च सम्प्रति विद्यन्ते लोकास्तर्हि कथमेतत्कथनमुचितं स्याद्यत्तन्मूलभूताः श्रीकृष्णप्रभृतयः पुरुषाः काल्पनिका इति । पारीक्षितत्रऋक्त्वेनोपलब्धि-वैदिकवाङ्मयेऽप्यस्ति[1] । वासुदेवस्य तथार्जुनस्य नामनी पाणिनीयसूत्रे समुपलभ्येते[2] तत्रार्जुनसाहचर्येण वासुदेवपदं श्रीकृष्णस्यैव बोधकं विद्यते । एवं स्थिते श्रीकृष्णादयः काल्पनिका इति कथनमतिसाहसमात्रम् । इयं कल्पनैव प्रामाणिकत्वेन यद्यङ्गीक्रियेत तर्हि सम्प्रति विद्यमानकुलानां सर्वेऽपि मूलपुरुषाः काल्पनिकाः सम्भवेयुः । अतः श्रीकृष्णो बलरामः कंसोऽर्जुनः अस्मदादिवत् सर्वेऽपि एकदा अस्यां पृथिव्यां विराजमानाः सन्तः कार्याणि सम्पादयन्ति स्म । अतो न सर्वथा ते काल्पनिकाः सम्भवेयुः ।

एवं भागवतस्य कृष्णवर्णनं न सत्यम्, भागवतस्य रचयिता न विशिष्टो ज्ञानी, भागवतं तु बोपदेवेन रचितमित्यपि केषाञ्चन कथनं न प्रामाणिकम् । यतः श्रीकृष्णस्य वर्णनमनेकासु ऋक्षु समुपलभ्यते, एतन्मतमत्र भागवतग्रन्थे सम्यग्रीत्या प्रतिपादितम्[3] । अनेकासूपनिषत्स्वप्येतादृग् वर्णनमुपलभ्यते[4] । एवमनेकपुराणादिषु देवक्याः पुत्रेषु कृष्णोऽष्टमः, तस्य जन्म मथुरायां कंसस्य कारागृहे जातम्, इत्यादि सर्वं कृष्णचरितं न्यूनाधिकभावेन समुपलभ्यते[5] । अस्यां स्थितौ भागवतेऽपि तथाविधमुपलभ्यमानं प्रामाणिकतया स्वीकृते महाभारतेऽपि सङ्क्षेपेण भागवतवर्णितं कृष्णचरितं संदृश्यते[6] । केचन भारतस्थं कृष्णबाल्यकालक्रीडावर्णनं प्रक्षिप्तमिति वदन्ति, परन्तु प्रक्षिप्तमिति कथयितृभिः कथनातिरिक्तं नान्यत्किञ्चित् प्रबलं प्रमाणं प्रदर्शितम् । यच्च भगवतो व्रती, वेदाग्निसेवकः, वेदार्थबोधकः, भारतस्य रचयिता, कर्मकाण्डादिकस्य प्रवर्तयिता, ब्रह्मसूत्रनिर्माता, ईश्वरभक्तः, योगविदिति ज्ञायते[7] । यच्च बोपदेवेन भागवतं विरचितमिति कथनं तत्त्वज्ञानमूलकमेव । श्रीमता दयानन्दसरस्वतीमहोदयेनैतत् सत्यार्थप्रकाशे लिखितम् । एवं कोलब्रुकादिपाश्चात्यपण्डिता अपीत्थं कथयन्ति । त्रयोदशशताब्द्यां वर्तमानेन देवगिरिस्थेन बोपदेवेन श्रीमद्भागवतमालम्ब्य "मुक्ताफलं", "भागवतानुक्रमणिका" भागवतसारबोधको "मुकुटनामको" ग्रन्थः इति त्रयं विरचितं सम्प्रत्युपलभ्यते । यदि भागवतमपि बोपदेवेन विरचितं स्यात्तर्हि स्वकर्तृकत्वमपि भागवते तेनोल्लेखनीयं भवेत् । परं तु भागवते प्रथमस्कन्धे तस्य व्यासकर्तृकत्वं व्यासाच्च शुकेनाधीतमिति स्पष्टं प्रतिपादितम्[8] । एवं बोपदेवस्याश्रयप्रदाता हेमाद्रिः स्वरचिते "**चतुर्वर्गचिन्तामणौ**" भागवत-स्थानि वचनानि समुद्धरति, तथा दानखण्डेऽनेक-पुराण-दान-प्रसङ्गे भागवतपुराणदानवाक्यान्यप्युद्धरति[9] । यदि हेमाद्रिसमये रचितं भागवतं स्यात्तर्हि प्राचीनानां महापुराणानामन्येषां दानवद् तदात्वे जातस्य भागवतस्य दानं स न लिखेत् । श्रीमध्वाचार्यैस्तु भागवत-तात्पर्यनिर्णयग्रन्थे स्पष्टतया व्यलेखि,

---

१. द्रष्टव्यमैतरेयब्रा० ६।३२ साङ्ख्यायनब्रा० ३०।५ तथा गोपथब्रा० २।६।१२

२. 'वासुदेवार्जुनाभ्यां वुञ्' (अष्टा० २।३।९७)

३. "जज्ञात एव व्यवाधत स्पृह०" "कृष्णं तम एव स्शतः०" (ऋ० ३।५।७) "सद्योजातस्य ददृशानः" (ऋ० ३।४।१) "ऋतस्य हि धेनवो वावशानः" (ऋ० १।५।१२) "यस्मिन् विश्वानि कव्या चक्रे" (ऋ० १०।१३५।१) एतेषां मन्त्राणां भाष्यं द्रष्टव्यम् ।

४. महानारायणोपनिषत् (४।५) वासुदेव० २ गोपी उ० ५, कृष्णोप० ८, मुक्तिकोपनि० १।३९ इत्यादि ।

५. विष्णु० (४।१५।५।३) ब्रह्मवै० (४।७।७४) गरुड० (१।१३९) कूर्म० (१।२४) अग्नि० (१२।७) हरिवं० (१।३५।२।४) ब्रह्माण्ड० (३।७१।२०६) वायु० (२।३४।२०१; २।३४।१७३।१७८) देवीभा० (४।२४।१।५)

६. सभाप० शिशुपालभाषणम् । द्रौपदीवस्त्रहरणप्रसङ्गे द्रौपदीकृतकृष्णाह्वानम् ।

७. (भाग० १।४।१७; १।४।२७; १।७।३,४,६) (भूमिकान्ते च सर्वोपलब्धं व्यासचरित्रं सङ्क्षिप्य प्रदर्शयामः)

८. भाग० १।३।४०-४१) ।

९. दानखण्ड (प्र० ७) ।

श्रीशङ्कराचार्यचित्सुखाचार्यप्रभुतिभिर्भागवते टीकाः कृता आसन्निति[१]। पद्मपुराणस्य वासुदेवसहस्रनामभाष्ये श्रीशङ्कराचार्यैर्भागवतस्थश्लोकस्य स्पष्टतया निर्देशः कृतः[२], एवं "पश्यन्त्यदोरूपमदभ्रचक्षुषा" इति श्लोक उद्धृतः। श्रीशङ्कराचार्याणां परमगुरुगुरुभिः श्रीगौडपादाचार्यैः पञ्चीकरणटीकायामुत्तरगीताटीकायां च भागवतस्थसमुल्लेखः कृतः[३]। तथा जैमिनीयाश्वमेधपर्वणि,[४] शौनककृतऋग्विधाने[५]। गर्गसंहितायां च भागवतस्य समुल्लेखो विद्यते। श्रीशङ्कराचार्याणां श्रीगौडपादाचार्याणां च समयः द्वादशशताब्दीसमुत्पन्नस्य बोपदेवस्य कालादतिप्राचीनः काल इत्यत्र न संशयलेशोऽपि। अतो बोपदेवात्परमप्राचीनैः शौनकैगौडपादाचार्यशङ्कराचार्यप्रभृतिभिः कृतेन भागवतस्य समुल्लेखेन बोपदेवरचितमिति कथनं केवलं स्वाज्ञानप्रदर्शनमात्रमिति। अत एव भागवततात्पर्यनिर्णयकारेण लिखितम् —

बोपदेवकृतत्वे च बोपदेवपुराभवैः।

कथं टीकाः कृताः संस्युर्हनुमच्चित्सुखादिभिः ॥ इति ॥

सम्प्रति शङ्कैका प्रायः सर्वत्र श्रूयते भागवतस्य कर्ता, ब्रह्मसूत्राणां च कर्ता व्यासो भिन्न इति, अत्रेत्थं सत्यं व्यासा अनेके समजायन्त इति। यतो विष्णु-वायु-स्कन्द-देवीभागवत-लिङ्गपुराणेषु अनेकेषां व्यासानां समुपलब्धिर्भवति। मिलित्वा व्यासानां अष्टाविंशतिसङ्ख्याका सत्तोपलभ्यते। व्यासशब्दार्थो महाभारतादिपर्वणि (अ० ६४/११०)।

विव्यास वेदान् यस्मात्स तस्माद् व्यास इति स्मृतः। इति विद्यते। तेषां व्यासानां समुत्पत्तिकालः, नामानि, कार्याणि च विष्णुपुराणे समुपलिखितानि दृश्यन्ते[६]। परन्त्वित्थं तु निश्चितमास्ते भागवतस्य कर्ता व्यासः, यः कोऽपि भवतु, स वेदानां विभागकर्ताऽवश्यं भवत्येव। परन्तु, ब्रह्मसूत्राणां, भारतस्य, गीतायाः, भागवतस्य च कर्ता एक एव व्यासः, एवं स सत्यवत्यां पराशरादुत्पन्नः कृष्णद्वैपायन एवेति कथनं विनिर्णयमर्हतीति। अत्राति सङ्क्षेपेण वयं विनिर्णयामः, यतोऽयं विषयो विषयान्तरमिव प्रतिभायात्।

भगवद्गीतायां त्रयोदशाध्याये —

ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः।

अस्य श्लोकार्धस्य व्याख्याने ब्रह्मसूत्रपदैश्चैवेत्यस्य हेतुमद्भिः, विनिश्चितैरिति विशेषणद्वयमस्ति। एतद्विशेषणद्वयं तदैव चरितार्थं भवेद्यदा ब्रह्मसूत्रपदैश्चैवेत्यस्यार्थो व्यासरचितवेदान्तोपनिषत्प्रतिपाद्यबोधकब्रह्मसूत्ररूपं क्रियेत, ब्रह्मप्रतिपादकौपनिषद्वाक्यमित्यर्थस्वीकरणे विशेषणद्वयं व्यर्थं भवति। ब्रह्मसूत्ररूपार्थस्वीकारे तु सर्वेषु ब्रह्मसूत्रेषु हेतुमन्ति विनिश्चितार्थवन्ति च सूत्राणि गृह्यन्ते न सर्वाणीति वक्तुं शक्यते। किञ्च ब्रह्मसूत्रपदैरित्यत्र सूत्रपदं तथार्थकरणे व्यर्थं भवति। किञ्चैतादृशोऽर्थो रामानुजाचार्य-मध्वाचार्यप्रभृतिभिः कृत एव। तथा ब्रह्मसूत्रेष्वपि गीताया उल्लेखः "स्मृतेश्च" (१/२/६) 'अपि च स्मर्यते' (१/३/४५) इत्यादिस्थलेषु श्रीशङ्कराचार्यप्रभृत्याचार्यैः स्मृतिपदेन गीताया एव ग्रहणं कृतम्। एवं ब्रह्मसूत्रेषु गीताया उल्लेखः गीतायां ब्रह्मसूत्रपदस्योल्लेखः, उभयोर्ग्रन्थयोरेककालिकत्वमेककर्तृकत्वं च

---

१. पुराणनिरीक्षणम् (प्र० २ पृ० ७९)

२. "स आश्रयः परं ब्रह्म परमात्मा परात्परः इति भागवते" इति।

३. "जगृहे पौरुषं रूपमिति" तथा "तदुक्तं भागवते श्रेयः सृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलमात्मलब्धये ..." एवं भागवतभूषणमपि द्रष्टव्यम्।

४. अ० (५८।९५)

५. अस्या यामा ऋत्वं जप्त्वा त्रिवारं विधुमन्दिरे।
फलं भागवतं तस्य लभते नात्र संशयः ॥

६. विष्णु० (३।३।१९-२०)

ज्ञापयति। गीताया महाभारतस्य च कर्त्रैक्यं समस्त्येव उभयोः शब्दसादृश्यमर्थसादृश्यं च अनेकत्रोपलभ्यत एव★। भागवतगीतयोः शब्दसादृश्यं यद्यपि बहुशो नोपलभ्यते तथाप्यर्थसादृश्यं त्वनेकत्रोपलभ्यत एव। प्राचीनानां समेषां ग्रन्थकाराणाम् उभयोरेककर्तृकत्वं सर्वथा मान्यमेव।

अथ श्रीमद्भागवतस्थं श्रीकृष्णस्य चरितमुद्दिश्य बहवो बहुप्रकारं संशेरते, तत्र केचन कथयन्ति ईश्वरो यदि अवतीर्य मनुष्यवद् व्यवहरति तदेश्वरमनुष्ययोर्मध्ये को भेदः, ईश्वरवन्मनुष्यस्य कुतो न पूजास्तुत्यादि क्रियते ? इति।

अत्रेत्थं समुचितं प्रत्युत्तरं प्रतिभाति। ईश्वरोऽवतीर्य जीववद्व्यवहृत्यापि न सर्वांशेन व्यवहरति। किञ्चिदंशेन समानेऽपि परमात्मनोऽवतरणे जीवापेक्षयास्ति महद्वैलक्षण्यम्। यथा कृष्णजन्मसमये श्रीकृष्णः किरीटकुण्डलादि-चतुर्भुजमूर्तिरूपेण दर्शनं दत्तवान्[१] देवकीगर्भगतश्रीकृष्णतेजसा देवक्यपि विशिष्टतेजोयुक्ता बभूव[२]। बाल्ये श्रीकृष्णस्य चरितं महावैलक्षण्ययुक्तमासीद्येन जीवचरितेन सह कथमपि तस्य साम्यं न भवत्येव। अस्माकं पादचलनं, हस्तेन क्रियाकरणमित्यादिसाम्येऽपि जीवापेक्षया परमेश्वरस्य प्रतिकृत्यं विलक्षणश्रैष्ठ्यमासीदेव। एवं पूतनास्तनपानेन तत्प्राणहरणाद्यद्भुतकार्यमपि विचारणीयम्[३]। एकमन्यदपि परमेश्वरस्यानन्दस्य वर्णनं कृतं, जीवेषु य आनन्दो दृश्यते स आनन्दस्वरूपपरमेश्वरस्याल्पीयान् लेशोऽस्ति[३]। एवं परमेश्वरस्य सगुणावतारेऽयमानन्दस्य विशेषो दृश्यते नान्यत्र। सगुणावतारेणानन्दे प्रकाशिते वृक्षपशुपाषाणादयोऽपि आनन्दसागरे निमज्जन्ति तदा मानवजातास्य विषये तु किं वक्तव्यम्। एतद्वैशिष्ट्यं जीवस्य कस्मिन्नपि कार्ये न दृश्यते। श्रीमद्भागवतस्य दशमस्कन्धस्यैकविंशाध्यायेऽस्य माधुर्यरसस्य माहात्म्यं वर्णितम्[४] अतो मोक्षार्थं स्तुतिः परमेश्वरस्य क्रियते न तु कदापि जीवस्य।

अत्र प्रसङ्गतोऽन्यस्याः शङ्काया अपि विचारः क्रियते, – यत्परमेश्वरेण मनुष्येतरेषूत्पद्य किं जीवकल्याणं साधितमिति। भागवतादिग्रन्थावलोकनेन परमेश्वरेण मत्स्य-कच्छ-वराहाद्यवतारान् धृत्वा भक्तानां रक्षणादि कार्यं सम्पादितम्। परमेश्वरस्यावतरणे तस्याचिन्त्यशक्तिरेव मुख्यं कारणम्। भक्तानां प्रार्थना-समय-देशादि तु सहकारिकारणं विद्यते। मत्स्यवराहाद्यवतारास्तदा जाता यदा सृष्टेः पूर्णरूपेण स्थितिर्नासीत्। तस्मिन् समये विद्यमानानां भक्तानां केवलमियमिच्छासीदस्माकं केवलं रक्षणं भवतु, न तु परमेश्वरस्य लावण्यमयरूपं लीला वा द्रष्टव्या इति। अतः केवलं तत्र भक्तरक्षणकार्यं दृश्यते नतूपदेशादिकम्। एतत्तु मत्स्यकच्छवराहाद्यवतारचरितं दृष्ट्वा स्फुटीभवति[५]।

राजा परीक्षिदपीत्थं कदाचिच्छङ्कां कुर्यादिति विचार्य शुकाचार्यः प्रत्युत्तरं दत्तवान् परमेश्वरः गोब्राह्मणदेवतासाध्वादिरक्षां कर्तुमनेकरूपाणि धारयति परन्तु कस्मिन्नपि प्राणिरूपेऽवतरणेऽपि नास्य महत्त्वं घटते यतः स तत्त्वतो निर्गुणोऽस्ति[६]।

इदं तु निश्चप्रचम् — यत्परमेश्वरस्य पश्चाद्यवतारेषु या लीला सञ्जायते, तत्रावश्यमद्भुतताऽधिकास्तीति। यां श्रुत्वा भक्तानां श्रोतृणां हृदयेऽवताररूपे विषये परमेश्वरभावता दृढा भवति। परमेश्वरो यदा मनुष्यरूपं धृत्वा मनुष्यवल्लीलां कुरुते तदा तु परमेश्वरस्य परमेश्वरभावो निगूढो भवति, कदाचित् समयविशेषे प्रादुर्भवन्स विलक्षणमाधुर्यं प्रकाशयति।

★ गीतारहस्यं (श्रीलोकमान्यतिलककृतम्) गीता तथा महाभारतप्रकरणम्।

१. भाग० (१०।३।९-१०)

२. भाग० (१०।२।२०)

३. भाग० (१०।६।१०)

४. भाग० (१०।२१,१३,१४,१९,२१)

५. भागवतस्तुतिसंग्रहस्यास्मल्लिखिता भूमिका द्रष्टव्या (पृ० २५-२६)

६. भागवत० (१।४।२९,-१।५,३)

इदं माधुर्यं प्रकाशयितुं परमेश्वरस्येदमित्थं तात्पर्यमस्ति मनुष्यो तत्स्वरूपं दृष्ट्वा परमेश्वरभक्तः सन् संसारसागरादुत्तीर्णो भवत्विति। अस्य माधुर्यादिरसस्य बोधकं मुख्यं भागवतं महापुराणं विद्यते आस्ताम्। अत्र प्रसङ्गत इदमपि विचार्यते— अष्टादशमहापुराणेषु श्रीमद्वैष्णवभागवतस्य श्रीदेवीभागवतस्य वाऽन्तर्भावो भवतीति। यतः -

अष्टादशपुराणानां कर्ता सत्यवतीसुतः। अनेन वचनेनाष्टादशमहापुराणकर्ता सत्यवतीपुत्रो व्यासोऽस्तीति ज्ञायते भागवतपुराणन्तु अष्टादशं महापुराणानां भारतस्यानन्तरं व्यासदेवेन गुरोर्नारदोपदेशान्निर्मितमिति श्रीमद्भागतवस्थवर्णनेनैव स्पष्टं प्रतीयते[७]। अत इत्थं चेतसि शङ्का प्रादुर्भवति-अष्टादशमहापुराणानि कृत्वा ततो भारतं च कृत्वा चित्ततोषाय निर्मितं नारदोपदेशाद्भागवतं न महापुराणेष्वन्तर्भवति किन्तु किनचित्तन्निर्माय व्यासस्य नाम्ना प्रवर्तितमिति।

अत्र भागवतं, भगवद्गीता, भारतं चैककर्तृकम्; स च कर्ता व्यास इति तु पूर्वं प्रतिपादितमेव। सम्प्रति तु भागवतस्य व्यासकर्तृकत्वेऽपि तन्महापुराणेषु नान्तर्भवतीति भिन्नया रीत्या शङ्क्यते, अत्र भागवतं व्यासेन न कृतमिति न शङ्काया मुख्योंऽशः, किन्तु भागवतमष्टादशमहापुराणेष्वन्तर्भवितुं नार्हति किन्तु महापुराणबहिर्भूतं महापुराणभारतादेरनन्तरं भागवतस्य जनित्वादिति मुख्योंऽशः।

अत्र प्राचीनैः श्रीधरस्वामिप्रभृतिभिर्बहु विवेचितं तत्त्वग्रे समालोचयामः अस्माकं त्वित्थं प्रतिभाति श्रीमद्भागवते व्यासेन स्वचेतसोऽसमाहितत्वस्य यत्कारणं प्रोक्तम् —

किं वा भागवता धर्मा न प्रायेण निरूपिताः।
प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः॥ इति॥ (१/४/३१)

अनेन वचनेनेत्थं प्रतीयते प्रथमतो व्यासेन भागवतधर्माणां वर्णनं सङ्क्षेपेण कृतमिति श्लोकस्थप्रायेण पदेन ज्ञायते, पुनश्चेतसोऽसन्तोषान्नारदकथनानुसारं पूर्वरचितभागवते धर्मा नूतनाः संयोजिताः। अत एवाग्रे प्रथमस्कन्धस्य सप्तमाध्याये लिखितम् —

स संहितां सात्वतीं कृत्वाऽनुक्रम्य चात्मजम्।
शुकमध्यापयामास निवृत्तिनिरतं मुनिम्॥ इति।

अस्मिन् श्लोके 'अनुक्रम्य' इति पदमुपात्तमस्ति, अनुक्रम्य नाम क्रममनुयोज्य, अनुक्रमार्थस्तदैव सङ्गतो भवति, यदा ग्रन्थे नूतनांशयोजनया कश्चन क्रमभङ्गो विपर्ययश्च भवति। पूर्वं पुराणानि लोमहर्षणः पाठयामास, ततः पूर्वरचितभागवते सात्वतसंहितानाम्नी भागवतस्य श्रीकृष्णचरित्रादिका धर्मा लिखिताः। तान् ततो योग्यमधिकारिणं शुकमपाठयत्। तदनन्तरं तस्य ग्रन्थस्य भागवतसंहिताऽथवा सात्वतसंहिता नाम प्रवृत्तम्। प्रथमतश्चैतत्पुराणं सामान्यमितरपुराणवदासीत्ततः श्रुतितुल्यत्वात्सात्वतीश्रुतिशब्देनापि व्यवह्रियते स्म[१]। पूर्वं तस्य सङ्ख्या प्रायो द्वादशसहस्रश्लोका आसन्। एवं भारतरचनातः पूर्वं द्वादशसहस्रश्लोकात्मकं भागवतपुराणमासीत्ततो भारतनिर्माणं ततो नारदोपदेशाद्भागवते धर्मयोजनातोऽष्टादशसहस्रात्मिका सात्वतसंहिता समजायत। अर्थात् पुर्वद्वादशसहस्रश्लोकेषु अधिका षट्सहस्रश्लोकाः संयोजिताः, येन सम्प्रति समुपलभ्यमानो भागवतग्रन्थो विराजते। शुको यदा परीक्षितं भागवतं

---

[७] अष्टादशपुराणानि कृत्वा सत्यवतीसुतः। भारताख्यानमखिलं चक्रे तद्रूपबृंहितम् (मत्स्य० ५३)
तथा-अष्टादश पुराणानि अष्टौ व्याकरणानि च। ज्ञात्वा सत्यवतीसूनुश्चक्रे भारतसंहिताम् (भावि० १)

[१] पद्मपु० (१७९।१५) तत्र प्रथमस्कन्धे ....। व्यासस्य चरितं पुण्यम् .....। (नारद० मत्स्य०) यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः।

श्रावयामास तदात्वे पुनरपूर्वमिमं सात्वतसंहिताग्रन्थं सूतः पुनः शुकमुखाच्छ्रुतवानित्याकारककल्पनाकरणे सर्वथा सङ्गतिर्भवति।

केचनेत्थं शङ्काया अस्याः समाधानं कुर्वन्ति, तद्यथा व्यासो भागवतात्पूर्वं यद्भारतं रचयामास तदाख्यानविरहितं चतुर्विंशतिश्लोकात्मकमासीत् ततो भागवतनिर्माणं तदाऽनेकाख्यानसहितमहाभारतनिर्माणम्। अत एव "भारताख्यानमलिखम्" अस्मिन् श्लोके स्थितमखिलं पदं सङ्गच्छते। यद्येकप्रकारकमेव भारतं स्यात्तदा 'अखिलम्' इति विशेषणं व्यर्थमेव भवेत्। किञ्च भागवतपुराणविषये याऽऽपत्तिः प्रदर्श्यते सा मार्कण्डेयपुराणाग्निपुराणयोरपि प्रदर्शयितुं शक्या। तथाहि मार्कण्डेयपुराणप्रथमाध्याये व्यासेन यद्भारतं कथितं तत् तत्त्वतो ज्ञातुमहं भवतः शरणं समागत इति लिखितम्। अत्रेदं विचारणीयम्। यद्यष्टादशपुराणलेखनानन्तरं भारतलेखने सति मार्कण्डेयपुराणस्थं वर्णनं कथं सङ्गच्छते। एवमग्निपुराणेऽपि "गीतासारं प्रवक्ष्यामि" "कृष्णोऽयमर्जुनायाह" इदमुपक्रम्य "दैवी ह्येषा गुणमयी" "यस्यां जाग्रति भूतानि" इत्यादयः केचन श्लोकाः प्रोक्ताः। यद्याख्यानसहितभारतात्पूर्वमग्निपुराणं निर्मितं स्यात्तर्हि आख्यानसहितभारतस्थगीतावचनानामसङ्गतिर्दुर्वारैव। अतश्चतुर्विंशतिसहस्रश्लोकात्मकं भारतं पुराणेभ्यः पुर्वं निर्मितं पुराणेभ्योऽनन्तरं चाख्यानसहितं महाभारतमित्येव योजना समीचीना प्रतिभातीति। अत्रेदं शङ्कान्तरं जनाः कुर्वन्ति महापुराणेषु वैष्णवभागवतं समायाति नवेति। मत्स्यपुराण-नारदपुराण-पद्मपुराणदृष्ट्या श्रीमद्भागवतं महापुराणेष्वन्तर्भवति।[1] शिवपुराण-देवीयामलादिग्रन्थालोचने महापुराणेषु देवीभागवतस्यान्तर्भावोऽस्तीति ज्ञायते[2], परन्तु स्वयं देवीभागवतमेव महापुराणेषु आत्मानमन्तर्भाव्योपपुराणेष्वन्यद् भागवतमस्तीति कथयति तत्रेदं देवीभागवतदृष्ट्यैव निश्चीयते यद्देवीभागवतनिर्माणतः पूर्वं भागवतं नाम प्रसिद्धं पुराणं स्थितं, यतः तस्य सत्ता देवीभागवतेनापि नाङ्गीकर्तुं सहसा शक्यते, अतस्तस्य परिगणनमुपपुराणेषु कृत्वा तत्स्थानं स्वेन देवीपुराणेन गृहीत्वा स्वीया गणना महापुराणेषु कृतेति। तथा देवीभागवतेन सप्तदशपुराणसङ्ख्या पूरितेति निष्पक्षपातदृशा वक्तुं शक्यते। श्रीमद्भागवते तु महापुराणानि नामतो निर्दिष्टानि —

एवं श्रीमद्भागवते स्थितानां पुराणवर्णनश्लोकानां दर्शनेन देवीभागवतस्य तत्र आभासोऽपि न लभ्यते[3]। अतस्तस्मिन् समयेऽर्थाद्देवीभागवतनिर्माणात्पूर्वं भागवतपुराणनाम्ना श्रीमद्भागवतमेव प्रसिद्धमासीदिति वक्तुमुचितम्। तत इदमत्र निष्पद्यते देवीभागवतात्पूर्वं यद्भागवतमासीत्तदेव महापुराणान्तर्गतं तच्च वैष्णवभागवतमेवेति निश्चितम्।

केचनेत्थं प्रतिपादयन्ति युगभेदेन यथा स्मृतिविषये व्यवस्था "कलौ पराशरस्मृतिः" इति दृश्यतेऽत्रान्यमन्वादिस्मृतीनां प्रामाण्ये विद्यमानेऽपि केषाञ्चन विषयाणां निर्णयः पराशरस्मृतिं मुख्यतया स्वीकृत्य क्रियते, तथात्रापि देवीभागवतस्या शिवपुराण-देवीपुराणादिदृष्ट्या महापुराणत्वेऽपि युगभेदेनात्रापि व्यवस्थापयितुं शक्यते —

कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह।
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः॥ (१/३/४४)

इति भागवतस्थं पद्यं प्रमाणीकृत्यान्ययुगेषु देवीभागवतस्य महापुराणान्तर्गतत्वं कलौ तु श्रीमद्भागवतस्यैव महापुराणत्वमिति युगभेदेन व्यवस्था करणीयेति। अपरे तु ईश्वरतच्छक्त्योरैक्येन तद्वर्णनपरश्रीमद्भागवत-

---

[1] भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते। तत्तु भागवतं प्रोक्तं न तु देवीपुराणकम्। (शि० उ०)
तथा-श्रीमद्भागवतं नाम पुराणं देवसंमितम्। ..... यत्र देव्यावताराश्च बहवः प्रतिपादिताः। (देवीभाग०)
तथा-माहेश्वरं भागवतं वासिष्ठं च सविस्तरम्। (देवीभाग० स्कं १ अ० ३)

[2] भाग० (१२।७।१०-२२)

[3] भाग० (१२।१३।१५)

देवीभागवतयोरैक्यमभिप्रेत्य मिलित्वोभयपुराणस्य महापुराणान्तर्गतत्वम् । यदा शक्तेः प्राधान्यमपेक्ष्यते तदा देवीभागवतं प्रधानम्, यदा च परमेश्वरस्य प्राधान्यं विवक्ष्यते तदा श्रीमद्भागवतस्य च प्राधान्यं महापुराणान्तर्गतत्वं चेति विवक्षाभेदेन व्यवस्थामभिप्रयन्ति । इतरे च केचन —

''अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।'' अथवा
अष्टादशपुराणानि कृत्वा सत्यवतीसुतः ।
भारताख्यानमखिलं चक्रे तदुपबृंहितम् ।।

इति स्कन्दपुराणोक्तवचनेऽष्टादशपुराणानि कृत्वेति नार्थः । किन्त्वष्टादशपुराणानि कृत्वा भारतं च निर्माय नारदोपदेशेन स्वचित्तशान्तकरणसमर्थं भागवतधर्मकीर्तनपरं श्रीमद्भागवतं निर्माय ततोऽपराणि महापुराणानि निर्मितवानित्यर्थः । एवं च नासङ्गतिरिति निर्णयन्ति । अतो महापुराणान्तर्गतं श्रीमद्वैष्णवभागवतमेव, देवीभागवतं तु शिवपुराणादिदृष्ट्या महापुराणं सदपि, वस्तुत उपपुराणमेव । अत एव देवीभागवते भागवतस्य पूर्वं स्थितस्यैकस्य वर्णनमेव श्रीमद्भागवतस्य महापुराणत्वं सूचयतीति प्रथममते स्फुटं प्रतिपादितमेव ।

सम्प्रत्यतिसङ्क्षिप्तं श्रीमद्भागवतस्य माहात्म्यकथनमुचितं प्रतिभाति, श्रीमद्भागवतं सम्पूर्णवेदान्तस्य सारभूतमर्थाद् वेदान्तपठनेऽसमर्थैर्भागवतमेव विशेषतः पठनीयम् । पद्मपुराणे भागवतमाहात्म्यमतिविस्तृतरूपेण वर्णितम् । तत्सारांशोऽयं भागवतकथा मनुजेन सदा सेवनीया, कथाश्रवणेन मानवहृदयं परमेश्वरः स्वयं प्रविशति । अस्य सेवनेनान्यश्रवणेऽभिलाषो हृदये नोदेति[1] । पुराणेषु श्रीमद्भागवतमतीव श्रेष्ठम्, यतस्तत्र प्रतिपदं विष्णुगाथा गीता विद्यते । श्रीमद्भागवतपुराणं ब्रह्मसूत्राणामेवं भारतस्यार्थस्य निर्णायकं विद्यते । श्रीमद्भागवतं गायत्र्या भाष्यरूपं तथा वेदार्थयुक्तं विद्यते[2] । पुनश्च पद्मपुराणे लिखितम् — श्रीमद्भागवतं साक्षात्कृष्णस्य मूर्तिर्विद्यते । श्रीकृष्णेन स्वतेजो भागवते स्थापितमिति[3] । अस्तु ।

एवं भागवतसम्बन्धिनः केचन बहिर्भूता विषयाः समाहिताः । सम्प्रति श्रीकृष्णतत्त्वस्यैवं भागवतग्रन्थान्तर्गतस्तुतिचरित्रादेर्विषये सम्भाव्यशङ्कानां विनिर्णयकरणं समुचितं प्रतिभाति । विद्वांसो भक्ता मत्स्याद्यनेकावताराणां मुख्यं कारणभूतं परमानन्ददायकं वैकुण्ठादिलोकेषु नित्यक्रीडारतं तत्त्वमस्तीत्यामनन्ति । श्रीकृष्णस्य क्रीडारहितं यत्स्वरूपं तदेव वेदान्तिनां मते परब्रह्मास्ति । तदेव योगिनः सहस्रशीर्षा नारायण इति वदन्ति । एवं तदेव सात्वताः भगवान् इति ब्रुवते । तथा तदेव ह्लादिन्याद्यनेकशक्तीनामाधारभूतं विद्यते । सर्वेषु देवेषु कृष्ण एव परमदेवः तस्मान्मृत्युरपि बिभेति[4] । स एव गोलोकादिस्थानेषु स्वभक्तैः सह सर्वदा नित्यक्रीडां कुर्वन्ननेकब्रह्माण्डानि बिभर्ति । स एकः सर्वं चराचरं स्वाधीनं कुर्वन् सर्वव्यापकोऽप्यस्ति[5] । श्रीकृष्णतत्त्वमेकं सदपि अनेकप्रकारेण भासते । तद्विज्ञानरूपमानन्दरूपं कर्मफलदातृ रससरूपमचिन्त्ययोगमायासम्पन्नं परमात्मरूपं समास्ते[7] ।

---

१. भाग० (१२।१३।२५)
२. पद्मपु० अ० ३
३. गो० पू० उ० १
४. गो० पू० उ० १
५. विज्ञानमानन्दं ब्रह्म (बृ० उ० ३।९।२९) रातिदातुः परायणम् (सिद्धान्तरत्न) आनन्दो ब्रह्मेति व्यजानात् (तै० ३।६) रसो वै सः (तै० २।७)
६. भाग० (१०।१४।२२-२३)
७. भाग० (१०।१४।५५।५८)

नित्यसुखज्ञानस्वरूपमात्मनि तुच्छमिदं जगन्मायात उत्पद्य सदिव भाति[1]। परमात्मा श्रीकृष्ण एकः पुराणपुरुषः स्वयंज्योतिरनन्तो नित्यो नाशरहितो निरन्तरसुखयुक्तः पूर्णः सर्वोपाधिरहितः सर्वेषामात्मनामात्मभूतः सर्वजगद्धितायारूपः सन्नपि मायिकं रूपं धारयति, सम्पूर्णचराचरपदार्थेषु तस्यैव स्वरूपं विराजते। येन श्रीकृष्णचन्द्रचरणकमलं शरणं कृतं तं स संसारसागरात्तारयति[2]। गोकुल–परमव्योम–वैकुण्ठादिस्थानेषु श्रीकृष्णो रूपत्रयेण विलसति। [3]तथा विलास–स्वांशभेदेन तस्य तदेकात्मरूपं द्विविधमास्ते[4]। सङ्क्षेपत इत्थं वक्तुं शक्यते अचिन्त्यानन्तशक्त्या पूर्णं कारणानां कारणं नित्यक्रीडारतं तत्त्वमेव श्रीकृष्णतत्त्वमास्त इति।

श्रीकृष्णस्यावतारविषये केचन शङ्कन्ते न स पूर्णावतार इति। अत्रेत्थं वदामः स श्रीकृष्णः पूर्णावतार एव, न त्वंशावतार इति। यद्यपि भागवतादिग्रन्थेषु उभयथा वर्णनमुपलभ्यते यथा "तत्रांशेनावतीर्णस्य" (भाग० १०/१–२) इत्यत्रांशावतारत्वं "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" इत्यत्र पूर्णावतारस्वरूपत्वं वर्णितम्। एवमन्यत्र। तत्र सर्वाणि वचनानि समालोच्य श्रीधरस्वामिना सुबोधिनीकारेण च श्रीकृष्णस्य पूर्णावतारत्वं संसाधितम्। वस्तुतः परमात्मनोऽवतारे कश्चिदपि अंशावतारः कलावतारो वा नास्ति। यतः परमात्मभावदृष्ट्या तस्य सर्वेऽवताराः पूर्णावतारा एव। परन्तु कार्यदृष्ट्या विचारे पूर्णावतार–अंशावतारकल्पना कर्तुं शक्यते। योऽवतारः स्वल्पं कार्यमुद्दिश्य प्रभवति, तदुद्देश्यपूर्तिं सम्पाद्य च तिरोभवति सोंऽशावतारः कलावतारो वा कथ्यते। यथा मत्स्य–कच्छ–वराहाद्यवतारा अंशावताराः। श्रीरामचन्द्रकृष्णचन्द्रादयोऽवताराः पूर्णावताराः सन्ति। परमात्मनो मत्स्याद्यंशाद्यवताराः प्रलयादिकालेषु मन्वादिरक्षणं प्रसङ्गतः प्राप्तहिरण्याक्षादिराक्षसहननादिकार्यं सम्पाद्य तिरोहिताः सन्ति। पूर्णावतारेषु रामचन्द्रादिरूपेषु परमात्मा मनुष्यवदनेककष्टानि सोढ्वा वेदादिशास्त्रीयाचरणं स्वयं सम्पादयति, यथा रामावतारे भ्रातृ–ब्रह्मचर्य–सत्यव्रत–राज–शरणागतपालन–पुत्रकर्तव्याद्यनेकानि विशिष्टानि कार्याणि कुर्वन्ननेकलीलाः समपादयत्। अतः श्रीरामचन्द्रो मर्यादापुरुषोत्तम इति गीयते।

श्रीकृष्णावतारे तु बह्व्यो बहुप्रकारिकाश्च लीलाः समजायन्त। ताः सर्वाः समालोच्य श्रीधरस्वामिकृतामेवं सुबोधिनी–कारनिरूपितां व्यवस्थां च दृष्ट्वा श्रीकृष्णस्य पूर्णावतारांशावतारविषये तेषामभिप्रायोऽत्र प्रदर्श्यते — एकस्मिन् ग्रन्थे यदानेकवचनानि परस्परविरुद्धतया भासमानार्थबोधकान्युपलभ्यन्ते तदा एकार्थप्रकरणे यद्वचनं सर्वथा व्यर्थं भवति, तन्मुख्यमिति स्वीक्रियते भिन्नप्रकरणे समागतानि सम्बन्धिवचनानि विरुद्धताय भासमानान्यपि संकुचिताद्यर्थपरत्वेनाप्युपपद्यन्ते तानि गौणार्थबोधकानीति शास्त्रीया मर्यादा। प्रकृते विषये "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" इदं वचनं चतुर्विंशत्यवतारवर्णनानन्तरमागतमस्ति। अस्माद्वचनात्पूर्वं ऋषीन् प्रत्यंशावतार–कलावतारान् बोधयित्वा अनेन वचनेन श्रीकृष्णस्य पूर्णावतारत्वमुक्तम्। अत्रेदमपि समालोचनीयम् — व्यासः श्रीकृष्णावतारस्य पूर्णत्वादिविषये किं निश्चितवानिति। व्यासोऽनेकावताराणामंशाद्यवतारत्वकथनानन्तरं श्रीकृष्णविषये श्लोकेनानेन निर्णयं कृत्वा कृष्णस्य पूर्णावतारत्वं स्पष्टयति[5], अत एव भिन्नभिन्नप्रकरणेषु समागतानां श्रीकृष्णस्यांशावतारबोधकवचनानां गौणार्थपरत्वमवश्यमङ्गीकर्तव्यं भवति। अतः "तत्रांशेनावतीर्णस्य" अस्य वचनस्यायमर्थः — अंशेन नाम बलरामेण सहावतीर्णस्य इति प्रामाणिकैः कृतः। एवमन्यत्र गौणतयार्थः श्रीधराचार्यप्रभृतिभिः कृतः स तत्र तत्र द्रष्टव्यः। अत्र केचनांशावतारपूर्णावतारविषय इत्थं वदन्ति योऽवतारो

---

१. लघुभागवतामृत० ११

२. लघुभागवतामृत० १४

३. भाग० (९।२४।५५; १०।१।३)

४. सात्वततं० प० ३

५. ऐश्वर्यस्य समग्रस्य शौर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणात्॥

ज्ञानेच्छाक्रियावैराग्यादिभिर्गुणैः पूर्णोऽस्ति स पूर्णावतारः[6], यथा भगवच्छब्दस्यार्थः विष्णुपुराणादौ [7]कृतः । यश्च ज्ञानादिगुणानामंशैर्युज्यते सोंऽशाद्यवतार इति । [8]अवतारविषये पूर्ण–कला–अंश–विभूत्याद्यवतारशब्दार्थः सात्वततन्त्रे द्रष्टव्यः ।

श्रीकृष्णचरित्रे वर्णितं कात्यायनीव्रतं गोपिकाभिराचरितं तद्विषयकं कृष्णचरित्रमनेके आक्षिपन्ति, आस्ताम् । गोपकन्यावस्त्रहरणव्यवहारः श्रीकृष्णस्य नोचित इति । परन्त्वत्र पुराणकारव्यासेनानेकशैल्या चरित्रं प्रदर्शितं दृश्यते इत्यपि ध्येयम् । तत्र रूपकेण क्वचिदध्यात्मविषयस्य वर्णनप्रसङ्गेऽध्यात्मभावान् मानवरूपेण रूपयित्वा वर्णनं, क्वचिच्चातिशयोक्तिद्वारा वर्णनं, क्वचित्स्वात्मस्वरूपप्राप्त्यै मध्ये विघ्नभूतान् लज्जालोभादिकान् भावान् वर्जनीयतया रूपकेण प्रदर्श्य मुख्यस्य भक्त्यादेः परमसाधनस्य सर्वापेक्षया श्रेष्ठत्वप्रतिपादनमिति । कात्यायनीव्रतं सत्यभूतमाश्रित्य तद्द्वारा परमतत्त्वप्राप्त्यै अव्यभिचारिणी भक्तिराश्रयणीया, तद्भक्तिप्राप्तौ कामक्रोधलज्जासांसारिकविषयप्रेमादीन् त्यक्त्वा मनुष्यो यदा निर्वासनचित्तो भवति तदा तस्य परमतत्त्वप्राप्तिर्भवतीति मुख्यं प्रतिपाद्यं व्यासस्यासीत् तच्च कात्यायनीव्रतमिषेण बोधितम् । तथाहि – जले नग्नस्नानं समाचरन्तीनां गोपकन्यानां तटे स्थापितवस्त्राणि गृहीत्वा कदम्बवृक्षं समारुह्य नग्नयावस्थया ग्राहयितुं ता गोपकन्यका हठात् भगवता प्रवर्तिता इत्यंशं शास्त्रकारा इत्थं विवेचयन्ति– परमात्मनोऽवतरणे भक्तानामिच्छा सहकारिकारणं भवतीति प्राग् निवेदितमेव, एवं च परमात्माऽवतीर्य यत् चरित्रं सम्पादयति तत्र ये घटकाः भक्तास्ते अस्मत्सदृशशरीरधारिणोऽपि तेषां सूक्ष्मशरीरस्यान्तरात्मनोऽस्त्येवास्मदपेक्षयातीव श्रेष्ठत्वम् । दिव्याचिन्त्यशक्तियुतः परमात्मा स्वात्मांशरूपधारिभिः सहैव नानाप्रकारं क्रीडति । यथा सर्वे स्वहस्तपादाद्यवयवैरनेकप्रकारेण व्यवहरन्तोऽपि नाल्पीयांसमपि दोषमुत्प्रेक्षन्ते, एवं परमात्मा लीलाकरणार्थं स्वीयाचिन्त्यशक्त्या अनेकानि रूपाणि निर्माय क्रीडति, तत्र निन्दाविषयस्य वस्तुतो नास्त्येवावसरः । यथा मार्कण्डेयपुराणस्थितसप्तशत्यामेकस्मिन् प्रसङ्गे शुम्भेन दुर्गां प्रत्युक्तमन्यासां बलमाश्रित्य त्वं युध्यसे तदा दुर्गयोक्तं ममैवेमाः शक्तयः मया प्रकटिता मयि एव लीना भवन्ति, एवं तथैव तत्र प्रदर्शितमपि । भागवतेऽपि गुहायां गोगोपानां ब्रह्मणा निह्नवे कृतेऽपि बहिः पुनस्तथाविधगोगोपदर्शनं कृत्वा श्रीकृष्णस्यैवाद्भुतं सामर्थ्यमिति ब्रह्मणा ज्ञातम्[1] । श्रुतिभिरपि परमेश्वरस्य स्वशक्त्यानेकरूपत्वं वर्णितम् ।[2] सात्वततन्त्रे सुस्पष्टं प्रतिपादितं सर्वे परमेश्वरस्यावतारा इति ।[3] एवं च कात्यायनीव्रतस्था गोपकन्यकाः परमेश्वरस्य श्रीकृष्णस्याचिन्त्यशक्त्या प्रादुर्भूताः परमेश्वरस्यांशभूताः, अतस्ताभिः सह क्रीडाकरणे अस्माभिः प्राकृतैरवलम्बितानां नियमानां पालनं कर्तव्यमित्याग्रहो व्यर्थः प्रतिभाति । परमेश्वरचरित्रतोऽस्माभिर्लोकानुकूलो धर्मानुकूलश्चैवोपदेशो ग्राह्यः । अत्र महाभागवतपरीक्षितस्याक्षेपस्तत्र परमभक्तमहाभागवतशुकाचार्यस्योत्तरमवश्यं सर्वैर्मननीयमेव[4] । तथाहि —

संस्थापनाय धर्मस्य प्रशमायेतरस्य च ।
स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता ॥
प्रतीपमाचरद्ब्रह्मन् परदाराभिमर्शनम् ।
किमभिप्राय एतं नः संशयं छिन्धि सुव्रते ॥

---

[6] सात्वततन्त्र० ३।९

[7] भाग० (१०।२३।४६)

[8] त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्र० (ग०अ०शी० २) एकं सद्विप्रा बहुधा वदन्ति अ० २।३।२२

[1] सात्वततं० १३

[2] भाग० (१०।३३।२७-३१)

[3] भाग० (१०।९।५०-५२)

[4] भाग० (१०।२२।४)

अस्याः शङ्कायाः समाधानं शुकदेवेनेत्थं कृतम् —

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ।
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥

नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः ।
विनश्यत्याचरन् मौढ्याद्यथा रुद्रोऽब्धिजं विषम् ॥

ईश्वराणां वचः सत्यं तथैवाचरणं क्वचित् ।
तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्समाचरेत् ॥ इति ।

अत्रेश्वराणां वचनं सत्यमस्ति समाचरणं तु क्वचित्सत्यमस्तीति कथनेन सत्यं नाम सामान्यप्राकृतजनानां हितं भवत्वितीच्छया सुविचार्य प्रोक्तमत एव सर्वदा सर्वदेशे काले च तत्परमं सत्यम् । आचरणं तु क्वचित्सत्यं नाम स्वीयाचिन्त्यालौकिकशक्त्या स्वोत्पादितस्वांशभूतैः सह क्रीडादिकरणं प्राकृतजनैर्ज्ञातुमपि दुष्करत्वादसत्यं नामासत्यवदिति, तथा ये पुण्यात्मानो विशिष्टा ऐकान्तिका भक्ता नित्यलीलायां घटकतया भवितुमर्हन्ति तेषां दृष्ट्या तत्सत्यमतः क्वचिदित्युक्तम् । परमेश्वरस्तु ये भक्ता अनेककामनया अनेकजन्मसु कठिनं तपः समाचरन्ति, तेषां तपःपूतात्मनां कृते तत्तत्कामनानुरूपं रूपं धृत्वानेकलीलया तेषां मनोरथं प्रपूर्य तानुद्धरति । यथा नन्देन पूर्वजन्मनि कठिनं तपः समाचरता परमेश्वरे पुत्रभावना कृता, परमात्मनापि परजन्मनि स्वयं पुत्ररूपं धृत्वानेकाः लीलाः प्रदर्शिताः ।[1] अस्तु । कात्यायनीव्रतचरितमिषेण परमेश्वरेणेदं बोधितं परमात्मप्राप्तौ संसारपदार्थप्रेमत्यागवल्लौकिकव्यवहारस्थलज्जादिभावत्यागोऽप्यावश्यकः, नो चेत्परमतत्त्वप्राप्तिरतिदुर्लभा । गोपकन्याभिः कात्यायनीं देवीं पूजयित्वा श्रीकृष्णोऽस्माकं पतिर्भवत्विति प्रार्थितम् ।[2] व्रतनाशकनग्नस्नानरूपदोषं प्रदर्शयितुं तद्द्वारा च परमेश्वरप्राप्तौ लज्जादिसर्वमानसिकभावत्यागोऽप्यावश्यक इति प्रदर्शयितुं श्रीकृष्णः हठं कृत्वा प्राणत्यागापेक्षयापि कठिनत्यागां लज्जां परित्याज्य नग्नाभिस्ताभिर्वस्त्रं ग्राहितवान् । इदं रूपकमेव । इयमेव सर्वात्मनिवेदनरूपा नवमी भक्तिः, सर्वभक्तिषु चरमा श्रेष्ठा च । अस्यां भक्तौ सिद्धायां श्रीकृष्णस्तासां पतिरूपेण वरणप्रार्थनां स्वीकृतवान् ।[3] अत्र कात्यायनीव्रतचरित्रे लौकिकजनदृष्ट्यापि श्रीकृष्णं पतित्वेन कामयमानाभिः गोपकन्याभिः साकं श्रीकृष्णस्य लीलायां नास्ति विशिष्टो दोषः । किञ्च परमात्मविषये पतिभावनया प्रवृत्तानां गोपकन्यकानां कामः कामाय न भवति, किन्तु परमेश्वरप्राप्त्यै[4] इत्यपि भागवतस्थं कथनं ध्येयम् । वस्तुतस्ताः परमात्मनः कृष्णेनोत्पादिता स्वांशरूपशक्तय एव गोपकन्यका आसन्निति पूर्वं प्रदर्शितमेव । किञ्चैषा रूपककथास्ति 'ईश्वराणां वचः सत्यं तथैवाचरणं क्वचित्' इति न्यायेन अचिन्त्यानेकशक्तिमतः परमेश्वरस्य स्वाचिन्त्यशक्तिभिः सह नित्यलीलायाः भक्तजनानां ज्ञानंभवत्वितीच्छया ताः शक्तीः गोपकन्यकारूपेण, स्वयं च परमात्माऽऽत्मानं कृष्णरूपेण रूपयित्वा लीलाः कृतवानित्यपि पूर्वं सूचितमेव । इदमेव कात्यायनीव्रतविषयककृष्णलीलाया रहस्यभूतं तात्पर्यम् । अत्र विषये यज्ञकर्तृषिपत्नीभ्यः श्रीकृष्णेन दत्त उपदेशोऽपि विचारकोटिमर्हति, तथाहि — यज्ञकर्तृब्राह्मणस्त्रियो रामकृष्णदर्शनेच्छया महत्योत्कण्ठया पतीनामाज्ञां तिरस्कृत्यान्नादिकमादाय समागच्छन् । श्रीकृष्णस्तासां स्वागतं कृत्वा कथयामास, दर्शनार्थं समागता भवन्यः, यूयं परावर्तध्वम् । युष्माकं पतयो युष्माभिः सह यज्ञं सम्पादयिष्यन्ति । यदा ताभिरुक्तं पतीनामाज्ञां तिरस्कृत्य वयं समागताः स्मः, यदि लत्र पुनः गमिष्यामस्तर्हि ते

---

[1] भाग० (१०।२२।२५।२७)
[2] भाग० (१०।२२।२६)
[3] भाग० (१०।२३।१८।३२)
[4] भाग० (१०।२९।२९।४१)

पतयोऽस्मान् न ग्रहीष्यन्ति । तदा परमात्मना तासां पत्युर्भीतिरूपं भावं ज्ञात्वा पत्युर्भयं न भविष्यतीत्युक्त्वा मत्प्राप्त्यै स्मरणकीर्तनादिद्वारा मयि भक्तिं वर्धयध्वमित्युक्त्वा ता यज्ञकर्तृब्राह्मणस्त्रियः विसर्जिताः ।[1]

एवं रासपञ्चाध्यायीस्थवर्णितकृष्णचरित्रविषयं सम्यक्तयाऽज्ञात्वा तत्र बहवो भ्रान्त्याऽऽक्षिपन्ति तद्विषये प्राचीनभक्तैर्विद्वद्भिर्वर्णितं रहस्यं प्रकाशयामः । परमात्मा यदा गोपकन्यका गोपीश्च गृहं गन्तुमादिष्टवान्, तदा ता अतिदुःखिताः सत्यः सर्वविषयासक्तिं परित्यज्य केवलं त्वय्येव भावं समर्प्य वयं समागताः स्मः । सांसारिकपुत्रपतिसम्बन्धिषु नास्माकं चित्तं गच्छति, व्रजं गत्वा किं कुर्मः त्वं यद्यस्मान् न स्वीकरिष्यसि तदात्रैव त्वां ध्यायन्त्यो म्रियामहे ।[2] इति तासामेकान्तिकमव्यभिचारिणमत्युत्कटं च भावं वीक्ष्यात्मारामोऽपि भक्तवत्सलः परमात्मा स्वशक्त्यंशभूताभिः परमभक्ताभिस्ताभिः सहानेकरूपाणि स्वीयाचिन्त्यशक्त्या निर्माय स्वर्गस्थदेवतानामपि द्रष्टुं दुर्लभां विलक्षणमधुररसपरिप्लुतां रासक्रीडां कृतवान् । रासलीलावर्णनप्रसङ्गे श्रीशुकदेवेन श्रीकृष्णचन्द्रस्य कृते 'आत्मारामः' 'योगेश्वरः' इदं विशेषणद्वयं ज्ञात्वैव योजितम् । तेन च रासलीलायाः स्वरूपं सर्वथा निर्दुष्टं सिध्यति । गोपीनां मनःस्थितिरपि प्रसङ्गेऽस्मिन् अवश्यं विचारणीया । तासां हृदये परमात्मनः परमलीलादर्शनव्यतिरिक्तः सांसारिकः काममानादिको वा भावो नासीदेव । यदा रासलीलायां तादृशो भावो तासां हृदय उदितः तदा परमात्मा श्रीकृष्णः ता गोपिकाः परित्यज्यान्तर्हितो बभूव ।[3]

अत्र प्रकरणे इदं विचारणीयम् — गोप्यः श्रीकृष्णस्य समीपे कदचित्प्राकृतकामेच्छयागताः स्युरित्यङ्गीकारेऽप्यन्ततस्तासां तादृशीच्छा श्रीकृष्णकृतपरमोदारकृपाकटाक्षपातेन न स्थिता । तदा श्रीकृष्णचन्द्रोऽत्युत्कटप्रेमांशे पूर्वं स्थितः प्राकृतकामांशः विनष्टः, शुद्धात्युत्कटप्रेमैवावशिष्टम् । तदेव तु परमभक्तेः स्वरूपम् । उक्तं च शाण्डिल्येन "स तु परानुरक्तिरीश्वरे" इति । गोप्यः श्रीकृष्णस्यालौकिकसुन्दररूपं प्रत्यहं पश्यन्त्यः सत्यः शनैः शनैस्तासां चेतोवृत्तयः कृष्णाकारेण परिणताः । गोप्यः पूर्वमारुरुक्ष्ववस्थायां श्रीकृष्णसम्बन्ध्यनेकदर्शन-स्मरण-नामोच्चारणादिकार्याणि सम्पादयन्ति स्म । तस्यामवस्थायां तासां संसारोऽपि प्राचलत् । श्रीकृष्णस्वरूपमलौकिकं दृष्ट्वा पतिरूपेणतस्य प्राप्तीच्छा तासां हृदये स्वभावत उत्पन्ना, अतस्ताभिः कौमार्ये कात्यायनीव्रतमप्याचरितम्, तथा श्रीकृष्णेन ताभ्यो वरोऽपि दत्तः । ततो रात्रौ श्रीकृष्णस्य वंशीध्वनिं श्रुत्वा वने तास्तं द्रष्टुमागच्छन् । तत्स्थितौ तासामारुरुक्ष्ववस्था किञ्चिदंशेनासीत्, योगारूढावस्था च किञ्चिदंशेन प्रादुरभूत् । ततः श्रीकृष्णकृतदयौदार्यावलोकनेन तच्चरणस्पर्शेन च अल्पांशेनावशिष्टापि योगारुरुक्षावस्था विनष्टा, सम्पूर्णा योगारूढा चोत्पन्ना । अतस्ताः कृष्णकृतत्यागसम्भावनया प्राणानपि त्यक्तुं प्रवृत्ताः । तासां तामात्यन्तिकीमवस्थामात्मसमर्पणभावमात्यन्तिकमनुरागं च दृष्ट्वाऽऽत्मारामो योगेश्वरोऽपि भगवान् कृष्णस्ताभिः सह दिव्यान्यलौकिकरूपाणि निर्माय रासलीलां चकार । गोपीनामेतामवस्थामवलम्ब्यैवोद्धववचनं 'वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।' इति प्रवृत्तम् । गोपीनां परमात्मनि श्रीकृष्णेऽत्युत्कटप्रेम्णो वर्णनं श्रीकृष्णो यदा गोपीनां हृदये उत्पन्नमभिमानं ज्ञात्वाऽन्तर्हितोऽभवत्तदा श्रीशुकदेवेन कृतं वर्णनं गोप्यः श्रीकृष्णमन्वेषयन्त्यो यदा नापुस्तं तदा संसारं स्वात्मानं च विस्मृत्य श्रीकृष्णैकमनसो भूत्वा श्रीकृष्णं विनैकक्षणमपि पृथक् स्थातुमसहमाना उच्चै रुरुदुः । तदा व्यापकेन सह यः प्रश्नपूर्वकः संवादो भक्तिपूर्णोऽपि किञ्चित् वक्रः जातः तस्य वर्णनमित्थं कृतम् —

भजतोऽनुभजन्त्येके एक एतद्विपर्ययम् ।
नोभयांश्च भजन्त्येक एतन्नो ब्रूहि साधु भोः ॥ इति (१०/३२/१६)

---

१. भाग० (१०।२९।४७।४८)

२. भाग० (१०।३२।१६।२१)

३. भाग० (१०।३३।२४)

परमेश्वरेणात्युत्कटैकान्तिकप्रेमप्रधानतयोद्दिश्योक्तम् - मदर्थं यैर्वैदिकलौकिकस्वार्थः परित्यक्तस्ते मां प्राप्नुवन्ति । एवं च परमात्मनैकान्तिकाव्यभिचारिपरमानुराग एव मुख्यतया परमेश्वरप्राप्तेः साधनरूपेण निर्दिष्टः ।[१] एवं सर्वथा गोप्यः सांसारिक-मोह-दम्भ-क्रोध-मानादिरहिताः केवलं परमात्मैकप्राप्तिभावयुता योगारूढावस्थाः सञ्जातास्तदा ताभिः सह श्रीकृष्णो रासं चक्रे । तत्र सर्वथा वर्णनातीतोऽलौकिको रसप्रकर्षः प्रकटितः, यतः साक्षाद्रसरूपः परमात्मा तदनुकूलाश्च शुद्धानुरागरूपा गोप्यः । देवैरपि तादृशानन्दस्यानुभवः कदापि न कृतः लौकिकेन केनाप्यानन्ददायकेन पदार्थेन तस्य तुलना कर्तुं न शक्यते । तस्मिन् रासे लौकिककामसम्बन्धलेशोऽपि नासीत्, किन्तु दिव्यानुरागो दिव्यश्च परमानन्दः, एतद्बोधयितुमेव शुकदेवेन मध्ये मध्ये "योगेश्वरेण कृष्णेन" "आत्मारामोऽपि लीलया" "सिषेव आत्मन्यवरुद्धसौरतः" इत्यादिवाक्यानि योजितानि । यदा तादृशो रासः प्रवृत्तस्तदा देवताभी रासं द्रष्टुं समागताभिः आकाशतः पुष्पवर्षणं कृतम् ।[२] अस्यां स्थितौ परमात्मनि श्रीकृष्णे गोपिकासु च ग्राम्यकामविषयकोऽत्यल्पोऽपि लेशो नासीदेव । परमात्मनः आनन्दस्वरूपमनुभवन्त्यो गोप्यः सांसारिककार्यं संपादयन्त्योऽपि चेतसा तमेव स्मरन्त्यः सर्वत्र तमेव श्रीकृष्णमन्वभवन् । यतस्तासां योगारुरुक्षुभावः पूर्वमेव विलीनः, योगारूढावस्था एवोपजाता । मथुरास्थेन परमात्मना गोपिकानामान्त्यतिकीं भक्तिं ज्ञातुं स्वभक्त उद्धवः प्रेषितः । स च गोपिका मिलित्वा तासामखण्ड-कृष्णैकभावं दृष्ट्वा ता अस्तौत् ।[३] ताभ्यो ज्ञानमयं कृष्णसन्देशं चाश्रावयत् तथा हि या गोप्यः पतिद्वारा बद्धा रासक्रीडां गन्तुमसमर्थाः श्रीकृष्णं चिन्तयन्त्य एवं श्रीकृष्णं प्राप्ताः ।[४] अतो भवत्योऽपि सम्पूर्णवृत्तिभिर्मत्स्मरणं नित्यं कुर्वन्त्यो मामवश्यं प्राप्नुयुः ।[५] रासलीलायां गोपिकाभिर्यः परमानन्दो वर्णनातीत उपलब्धस्तस्य स्वरूपं कथञ्चिद् विविच्यते — परमात्मा स्वयमानन्दरूपोऽस्ति । तस्यानन्दस्यैकोंऽशो जीवैः संसारेऽनुभुज्यते[६] आनन्देनैव सर्वे जीवन्ति[७] परमात्मनस्तस्यानन्दस्य मीमांसा तैत्तिरीयशाखया ब्रह्मवित्संज्ञकायामुपनिषदि विद्यते । तत्रेत्थं निर्णीतम् — जगति सर्वश्रेष्ठपुरुषेण य आनन्दो लभ्यते ततो गन्धर्वाणामानन्दः शतगुणैरधिकः । अनया रीत्या क्रमेण देवगन्धर्वादीनामानन्दस्य वर्णनं कृत्वा सर्वश्रेष्ठस्य प्रजापतेरानन्दः परमात्मन आनन्दस्यैकोंऽशोस्ति[८], एतादृशानन्दस्वरूपः सर्वाचिन्त्यशक्तिपरिपूर्णः परमात्मैव यत्र रसरूपः सन् प्रकटितः तत्रानन्दस्वरूपस्य वर्णनं सहस्रशीर्षा परमात्मसन्निकृष्टः शेषोऽपि न कर्तुं शक्नोति । तां मनोहारिणीं परमात्मनो मूर्तिं दृष्ट्वा जडवृक्षादीनामपि रोमाञ्चः प्रादुर्भवेत्तत्र गोपीनां विषये किमु वक्तव्यम् । अल्पमपि ज्ञानस्वरूपपरमेश्वरानन्दमनुभूय मनुष्यः तदेकमना भूत्वा नर्तितुं गातुं प्रवर्तत इति वृत्तं भृगूपनिषदि स्पष्टं ज्ञायते ।[९] रासलीलायामानन्दकन्दो रसराजः श्रीकृष्ण एव नृत्यति स्म तत्रानन्दसागरः प्रवहति स्मेति नाश्चर्यम् । परमात्मा यत्रैकाकी आसीत् तत्र पाषाणवृक्षजलादिकमानन्दमनुभूय तस्तम्भ । वंशीध्वनिं श्रुत्वा देवस्त्रियोऽपि स्वात्मानं विसस्मरुः । यदैतादृशः परमात्मा रासलीलायां स्वयमनेकरूपाणि बभार तथा तस्य परमात्मन आनन्दस्य वर्धका वेद-देवता-ऋषिरूपा गोप्यः प्राकटन्, परमात्मा ताभिः साकं नृत्यं तालस्वरयुतमकरोत्, तदा ब्रह्माण्डस्थः प्रत्येकः परमाणुरानन्दसागरे निमज्जत्युन्मज्जति स्मेति किमु वक्तव्यम् । अस्यानन्दस्य वर्णनं कर्तुं शब्दशक्तिरपि कुण्ठिता भवति । यतः परमात्मनः

---

१. भाग० (१०।४७।२५)

२. भाग० (१०।४७।३०)

३. भाग० (१०।४७३६)

४. बृहदारण्यक ४।३।३२

५. तैत्तिरीय ३।६

६. तैत्तिरीय २।७

७. तैत्तिरीय भृगूप० एतत्सामगायन्नास्ते इति ।

८. यतो वाचो निवर्तन्ते (तै० उ० २।९)

९. बृहद्वामनपुराणे उत्तलखिलम्

सामान्यरूपं वर्णयितुं वागप्यसमर्था भवति ।[1] यत्र परमात्मा स्वीयाचिन्त्यशक्त्यानेकानि रूपाणि धृत्वा लीलां कर्तुं प्रयत्नशीलस्तमानन्दमुपभोक्तुं विना गोपीः कः समर्थः, देवताभिरपि कदाप्यानन्दस्यानुभवो न कृतः । तदा लीलासमये आकाशे देवविमानानां सम्मर्दः समजायत, देवता दिव्यपुष्पाणां वर्षणमकुर्वन्, दुन्दुभिं वादयामासुः गन्धर्वाः स्वस्त्रीभिः समं ननृतुः । अस्मिन्नानन्दसागरे परमात्मना सह क्रीडन्तीनां गोपिकानां पादधूलिं सहस्त्रवर्षाणि तपः कृत्वापि ब्रह्म न प्राप[2] उद्धवस्तु अकथयत् —

''आसामहं चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम् ।'' (१०/४७/६१) अत एव प्राचीनाचार्याः पुराणेषु भागवतं तत्र दशमस्कन्धं तत्र च रासपञ्चाध्यायीं सर्वश्रेष्ठामिति प्रतिपादयन्ति । तत्सर्वथोचितमेव ।

आस्ताम्, सम्प्रति श्रीमद्भागवतस्थानामनेकभक्तिमाहात्म्यबोधकवचनानां समालोचने पाठकश्रोतृणां प्रायो निश्चितवन्मतं भवति, परमात्मनः प्राप्तौ विद्यमानानामनेकसाधनानां मध्ये भक्तिरेव सरलं साधनमिति, अतः महत्त्वपूर्णस्य सरलस्य सर्वैः कर्तुं सुयोगस्य भक्तिरूपसाधनस्य सर्वाङ्गपरिपूर्णः विचारः कर्तुमुचित एव ।

भक्तिं केचन भावरूपेणान्ये रसरूपेण वर्णयन्ति । भावगुणक्रियादिषु परिगणयन्ति । रसो नाम अन्तःकरणे प्रतिबिम्बितः परमात्मवस्त्वाकाररूपः स्थायिभावो एव यदा विभावादिभिः साहाय्यकैः प्रकटितो भवति[3] तदा स रसरूपः सम्पद्यते । भक्तिं गुणादिरूपेण वर्णयतां मते परमात्मन आराध्यरूपेण ज्ञानमथवा श्रोत्रादीन्द्रियद्वारा परमात्मविषयकविशेषज्ञानं किं वा छान्दोग्यबृहदारण्यकाद्युपनिषत्सु प्रोक्ता[4] विविधोपासनाऽथवा परमेश्वरविषयकेच्छाविशेषो भक्तिरित्यायाति । अस्यां स्थितौ ज्ञानविशेषस्येच्छाविशेषस्य वा क्षणिकस्वभावताया मनसोऽणुरूपत्वेन चान्तःकरणपरिणामरूपः स्थायीभावः एव न सिद्ध्यति । भक्तिं क्रियारूपेण वर्णयतां मते कीर्तननामोच्चारणादिकं तु इन्द्रियाणां क्रियारूपत्वेनान्तःकरणपरिणामरूपभक्तिर्न सम्पद्यते ।

केचन भक्तिं स्नेहत्वेन वर्णयन्ति, परन्तु स्नेहो नामेच्छाविशेष एव न भिन्नतया प्रसिद्धः । एवमन्ये भक्तिं रसरूपत्वेन स्वीकृत्यापि न स्वतन्त्ररसरूपत्वेनाभिप्रयन्ति, किन्तु शृङ्गाररसेतस्या अन्तर्भावं कृत्वा लौकिकवस्तुविषयकः शृङ्गाररसः सा इति कथयन्ति । अतः समेषामेषां मतानां समालोचनपूर्वकं भक्तिं रसरूपत्वेनाङ्गीकृतवतां मतं प्रदर्शयामः ।

सर्वथा सर्वफलानां त्यागपूर्वकं परात्मनि मनसः स्थिरा स्थितिरिति भक्तिशब्दार्थो गोपालतापनीयोपनिषदि प्रदर्शितः[5] एवमेव नारदपञ्चरात्रे स्नेहशब्देन सा लक्षिता ।[6] शाण्डिल्येन भक्तिसूत्रकारेणास्य परानुरक्तिशब्देन बोधनं कृतम् ।[7] स्नेहस्य पर्यायवाचिशब्देषु प्रेम–अनुरागादिशब्दा उपलभ्यन्ते । एवं नारदपञ्चरात्रदृष्ट्या स्नेहशब्देनेच्छाविशेषो न गृह्यते किन्तु परमेश्वरमाहात्म्यज्ञानपूर्विका परमेश्वरे मनसो दृढा स्थितिर्ग्राह्या, उचितं चैतन्मृते पुत्रे स्नेहस्त्वस्त्येव, परन्त्विच्छा नास्ति, यतस्तस्य प्राप्तिर्भवितुमशक्यैव ''मृतं पुत्रं स्निह्यामि न त्विच्छामि तस्य प्राप्तेरशक्यत्वात्'' इति लौकिकानां जनानामनुभवः ।

---

१. भगवद्भक्तिरसायनम् १।९

२. बृ० उ० १।४।७ तथा छान्दोग्योप० ७।२५।२

३. भक्तिरस्य भजनम्, एतदिहामुत्रोपाधिनैराश्येनामुष्मिन्मनःकल्पनम् ।

४. माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा ॥

५. सा परानुरक्तिरीश्वरे (शाण्डि० भक्तिसू० २

६. द्रुते चित्ते विनिक्षिप्तः स्वाकारो यस्तु वस्तुना (भक्तिर० १।६) इति ।

७. भागवत० (७।१।३०)

केषाञ्चन नैयायिकादीनां दार्शनिकानां मतं वर्जयित्वा प्रायः चित्तं देहपरिमाणानुरूपमामनन्ति, अतश्चेतसः स्थायी परिणामो भवितुं समर्हति । अस्यैव स्थायिभावस्य द्रुतस्य रसग्रन्थेष्वनेकशब्दैर्व्यवहारो दृश्यते ।[1] भक्तिर्ज्ञानविशेषरूपमिति कथनमपि "अधुना मृतं पुत्रं साक्षान्न जानामि किन्तु तं स्निह्यामि" इत्याद्यनुभवानुसारेणानुचितं प्रतिभाति । एवं भक्तेः प्राकृतशृङ्गाररसरसरूपत्वकथनमपि न समुचितम् । यतः शृङ्गारः प्राकृतस्त्रीपुरुषसम्बन्धेन भवति । तस्यालम्बनं नायको नायिका वा भवति, परन्त्ववैधभक्तिवर्णने गोपिकानामिव कंसशिशुपालादिकानामपि वर्णनमुपलभ्यते ।[2] अतश्चित्तद्रुत्यवस्थायां प्रतिबिम्बितवस्तुनः आकारः स्थायीभावस्तथा विभावादिभिस्तस्य प्रकटनं रस इत्येव रसशास्त्रीयकथनं शोभतेतराम् । अयं रसो नवरसेभ्यो भिद्यतेऽथवा परमात्मविषयका नव रसाः प्रत्येकं भक्ति किंवा नवरसमिलितो विशिष्टो रसो भक्तिरिति रसाचार्या वर्णयन्ति ।[3]

यद्यपि शास्त्रीयग्रन्थेषु यथा पुराणादिषु कीर्तनादीनां कृते भक्तिशब्दो व्यवहृतो दृश्यते परन्तु स गौणः । अथवा भक्तिशब्दस्य वाच्यार्थे इयम्[4] भज्येत सेव्यत इति भक्तिः भज्यते—सेव्यते इति भक्तिरिति । एवं च प्रथमव्युत्पत्त्या सिद्धो भक्तिशब्दः प्रधानभक्तेर्वाचकः द्वितीयव्युत्पत्त्या कीर्तनादिर्गौणभक्तिवाचकः ।

रसशब्देन रसशास्त्रकाराणां मते परमात्मैव विवक्षितः यतस्तैत्तिरीयश्रुत्या "रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति"[5] इति स्पष्टतया रसशब्देन परमात्मैव बोधितः । अस्य रसरूपपरमेश्वरस्यानुभवः किञ्चिन्मात्रो लीलासु चेतसो द्रुतिरूपस्य सात्त्विकवृत्तावुदितायां तथा मायाकृतावरणभङ्गे सति प्रत्यक्षो भवति । एवमागमेन तथानुमानेनापि तस्य ज्ञानं भवति ।[6] तं भक्तिरसं केचन कार्यं, ज्ञाप्यं, भोग्यं वा समामनन्ति । गोपालपूर्वतापनीयोपनिषदि, शाण्डिल्यसूत्रेषु वा पूर्वप्रदर्शितभक्तेर्लक्षणस्य परिष्कृतं रूपं मधुसूदनकृतभक्तिरसायने समुपलभ्यते । तत्रोक्तं —

द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता ।
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते ॥ (१/३) । इति ।

श्रीमता भगवता व्यासदेवेन श्रीमद्भागवते कपिलदेवमुखद्वाराऽस्या एव भक्तेर्लक्षणं सुन्दरदृष्टान्तद्वारा प्रकाशितम् । तद्यथा —

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ॥ (भाग० ३/२९/११)

एतादृश्येव भक्तिः परमेश्वरमाकर्षयति । एकादशस्कन्धे परमेश्वरेण श्रीकृष्णेनोद्धवं प्रत्युक्तम्, भो उद्धव ! साङ्ख्यम्, योगः, धर्मः, स्वाध्यायः, तपः तथा त्यागो मां नाकर्षयन्ति यथा केवला निर्गुणा भक्तिराकर्षति ।[7] भक्तिः साधारणतया द्विविधा विद्यते । यद्यपि स्वभावगुणक्रियादिभिरस्या भक्तेर्बहुधा भेदो प्रामाणिकग्रन्थेषु दृश्यते ।[8] भक्तेरेको

---

१. भक्तिरसायनं (१।१) तथा मुक्ताफलैकादशाध्यायटीका द्रष्टव्या ।

२. भक्तिरसायनम् पृ० ६

३. तै० उ० २।७

४. भक्तिरसायनम् तथा तट्टीका ।

५. भागवत० ११।१४।२०

६. भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते ।
स्वभावगुणमार्गेण पुंसां भावो हि भिद्यते ॥ भाग० ३।२९।७

७. द्रष्टव्या पूर्वभागे प्रथमा लहरिः ।

८. मुक्ताफले चतुर्थाध्यायो द्रष्टव्यः ।

भेदः साध्यभक्तिरपरः साधनभक्तिरिति । अनयोरेव भेदयोरनेकग्रन्थेषु विविधा भेदाः समुपलभ्यन्ते, तेषां समेषां किञ्चित्स्वरूपं प्रदर्श्य मुख्यतया साध्यसाधनभक्त्योर्भेदान् प्रदर्शयामः ।

हरिभक्तिरसामृतसिन्धौ साधन-भावप्रेमरूपेण त्रयो भेदास्तथाऽन्येऽपि बहवो भेदाः समुपलभ्यन्ते ।[१] कुत्रचिदधिकारिभेदेन भक्तेर्ज्ञानकर्ममिश्रा, कर्ममिश्रा, ज्ञानमिश्रा, शुद्धेति चत्वारो भेदा उपलभ्यन्ते ।तत्र प्रथमभेदाधिकारी बानप्रस्थः, द्वितीयभेदाधिकारी गृहस्थः, तृतीयभेदाधिकारी भिक्षुः, चतुर्थभेदाधिकारिणः सर्वे । तत्र कर्ममिश्रायां भक्तौ परमात्मनः प्रियकरेषु दासत्वादिभावेषु स्वसंस्कारानुरूपं कञ्चनभावमाश्रित्य श्रवणादिकानामनुष्ठानं क्रियते । अन्यासु भक्तिषु यथाशक्ति उभयोरनुष्ठानं क्रियते ।

श्रीबोपदेवेन स्वकीये मुक्ताफलग्रन्थे विहिताविहितभेदेन भक्तेर्द्वैविध्यं प्रतिपादितम् । विहितभक्तेः कर्ममिश्रादिभेदान् प्रदर्श्य सात्त्विकादिभेदेन चतुर्दशभेदाः प्रदर्शिताः । एवमविहितभक्तेः काम-भय-द्वेष-स्नेहरूपकारणेन चतुर्धा भेदः कृतः[२] । नारदेन स्वसूत्रेषु "गुणमाहात्म्यसक्तिः" इत्यादिरूपेणैकादशभेदाः प्रदर्शिताः ।[३] आस्तामिदम् ।

साध्यभक्तेः स्वरूपं नारदेनेत्थं प्रादर्शि- "सा त्वस्मिन् परमप्रेमस्वरूपा" । अर्थात् परमेश्वरे परमप्रेमैव भक्तिरिति । इयं भक्तिर्येन भक्तेन प्राप्यते तस्य किमपि कर्तव्यं नावशिष्यते । स न कश्चन द्वेष्टि, न विषयभोगं स्निह्यति, न क्रीडति, केवलं मत्तः, स्तब्धः, आत्मारामः, सिद्धः, अमृतस्तथा तृप्तो भवति ।[४] स सर्वं परित्यज्य परमात्मनः शरणं गतः देव-ऋषि-भूत-मनुष्य-पितृणामृणी न भवति ।[५]

एतादृशो भक्तः क्वचित्परमेश्वरचिन्तया रुदति, आनन्दाश्रूणि प्रवाहयति, क्वचिद्धसति, आनन्दति, सर्वथा लौकिकव्यवहाराद्बहिर्भूतो भवति । सर्वदा स परमेश्वरं गायति, एवं सर्वदा परमात्मानमनुशीलयति, एवमन्तेऽत्यन्तसुखसम्पन्नः सन् तूष्णींभवति ।[६]

अथ साधनभक्तेर्भेदान् संक्षेपतो विवेचयामः । भक्तिरसामृतसिन्धौ लक्षणमित्थं दृश्यते[२] —

कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा ।

अस्यायमभिप्रायः — यस्या भक्तेः प्रेमादिरूपो भावः साध्यस्तथा येन्द्रियादिद्वारा स्वयं साध्यास्तीति । अस्याः भक्तेर्विष्णुपुराणे श्रवणादिका नव भेदाः समुपलभ्यन्ते ।[७] भिन्नभीन्नग्रन्थेषु श्रवणादिकानां लक्षणान्यनेकप्रकारकाण्युपलभ्यन्ते । परन्तु विचारे कृते सर्वाणि तानि न भिन्नार्थबोधकानि, सर्वेषां तात्पर्यमेकरूपमेव, अतस्तात्पर्यमादाय श्रवणादिकानां स्वरूपं विवेचयामः । सगुणस्य निर्गुणस्य वा परमात्मनः नाम-स्वरूपपराक्रमबोधकशब्दानां परकृतोच्चारणस्यार्थानुसन्धानपूर्वकं श्रवणं श्रवणभक्तिपदबोध्यं विद्यते । भागवते बहुत्रेदं लक्षितम् दृश्यते ।[८] तत्र भक्तानां मुखान्निष्क्रान्तानां नामादिकानां श्रवणं तु परमश्रेयसे भवत्यतो भागवतेऽनेकत्र "सन्मुखरितां भवदीयवार्ताम्" "महत्तमान्न हृदयान्मुखच्युतः" "स उत्तमश्लोकमहन्मुखच्युतम्" इत्यादिषु महत्-सदित्यादिविशेषणानि सङ्गतानि सन्ति ।

---

१. नार० भक्तिसू० ८२

२. नार० भक्तिसू० ४-५

३. भाग० ११।५।४१

४. भागव० ११।३।३२

५. पूर्वभागे द्वितीया लहरिः ।

६. विष्णुपु० नं० ३ ।

७. भाग० १।१७।१०; ३।३; १।१९।१५; १२।६।२

कीर्तनशब्देन परमात्मनः स्वरूप-चरित्रबोधकशब्दानां नाम्नां चोच्चैरुच्चारणमभिप्रेतमास्ते। तदेव कीर्तनं सवाद्यवादनमनेकजनमिलितं सताललयं सङ्कीर्तनं कथ्यते। अत एव श्रीमद्भागवते सङ्कीर्तनशब्दस्यानेकत्र प्रयोगो दृश्यते। यथा — "श्रुतः सङ्कीर्तितो ध्यातः" "यत्र सङ्कीर्तनेनैव" "यज्ञैः सङ्कीर्तनप्रायैः" इत्यादिषु। कीर्तनमुच्चैः कृतमेव भवति, उपांशुतया करणे जपो भवति। एतदभिप्रेत्य "गायन् विलज्जः" "विलज्ज उद्गायति" "नामान्यनन्तस्य हतत्रपः पठन्" इत्यादिस्थलेषु विलज्जादिविशेषणं कीर्तनकर्तुर्योजितम्। कीर्तनेन मनुष्यः कृतार्थो भवति। पुराणेषु सुस्पष्टमिदमुक्तम्[1]। कीर्तनेनैव शुकनारदप्रभृतयः कृतार्था अजायन्त। अस्मिन् कीर्तनविचारे परमात्मनाम्नोऽप्युच्चारणं समास्ते, अतः अतिसङ्क्षेपतो नामतत्त्वविचारकरणं प्रसङ्गत उचितं प्रतिभाति।

"आत्मैवेदं सर्वम्" इत्यादिश्रुतिभिर्जगति विद्यमानाः सर्वे पदार्थाः परमात्मरूपा इति प्रतिपाद्यते। तत्र पदार्थानां द्विविधो भेदो विद्यते वाच्यरूपोऽर्थादर्थरूपः, वाचकरूपः।

अर्थात् शब्दरूपः। सर्वे शब्दा अन्ततोगत्वा साक्षात्परम्परया वा परमात्मन एव वाचकाः। यतः सर्वपदार्थरूपेण परमात्मैव सर्वत्र विलसति। एतेनाभिप्रायेण यजुर्वेदेऽप्युक्तम्, "सर्वे वेदा यत्पदमामनन्ति" इति। अतो यन्नाममाहात्म्यबोधकग्रन्थेषु नाम परमात्मनः स्वरूपमित्युक्तम्, तत्कथनं सर्वथा समुचितमेव। यथा परमात्मा जगत्यनेकपदार्थरूपेण विराजते तथा स नामरूपेण-शब्दरूपेणापि शोभत एव। नाममाहात्म्यबोधकानां वचनानां विचारे क्रियमाणे स्पष्टमिदं प्रतिभाति। नामापि परमेश्वरस्यैकोऽवतार इति। यतो जगतो रक्षाकरणादिसमस्तकार्यं नामैव सम्पादयति। परमेश्वरस्यावताराणां तथावतारस्वरूपाणामियत्ता नास्ति। भक्तानां कल्याणकरणार्थं योग्यावतारस्वरूपं निर्माय स परमेश्वरो भक्तरक्षणं करोति। द्रौपद्या लज्जारक्षणार्थं वराहरूपं दधौ। एवमनेकभक्तोद्धारार्थं नामरूपेणावततार। तस्योच्चारणमपि संसारसागराद्भक्तान् तारयति, नामनामयुतयोरभेदेन नामिनः सम्पूर्णकार्यं नाम सम्पादयति।[2] व्यवहारेऽपि नामोद्दिश्य यदि स्तौति निन्दति वा तदा नामिनो सुखं दुःखं वा भवतीति प्रत्यहमनुभूयते। एतेनैवाभिप्रायेण।

रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः ॥ इति

रामनाम्नो माहात्म्यं प्रतिपाद्यते। श्रीजीवगोस्वामिना तु नाम्न एव वाच्यवाचकभेदौ कथितौ। तयोरपि वाच्यपरमात्मापेक्षया नामैव परमकरुणमित्युक्तम्।[3] सात्वततन्त्रे परमेश्वरं प्रति कृतापराधान् नामैव नाशयति, परन्तु नाम्नोऽपराधान् दूरीकर्तुं परमेश्वरस्य सामर्थ्यं नास्ति, किन्तु नामजप एव सामर्थ्यमस्तीति सुस्पष्टं प्रतिपादितम्।[4] केवलं नामोच्चारणादेव पापस्य नाशः पुण्योत्पादनं च भवत्येवं वैराग्यं, भक्तिः तत्त्वज्ञानं नामजापकस्य भवति तथा परमात्मरूपेण स्थितिर्भवतीत्यन्यत्र प्रतिपादितम्।[5] अस्तु।

---

[1] तस्माद् गोविन्दमाहात्म्यमानन्दरससुन्दरम्।
शृणुयात्कीर्तयेन्नित्यं स कृतार्थो न संशयः॥
तथा-एतन्निर्विद्यमानानामिच्छतामकुतोभयम्।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम्॥ भाग० २।१।११
तथा भाग० १।५।२२; ५।२५।११; ११।१२।४८; १२।१२।५० इत्यादिस्थलानि द्रष्टव्यानि।

[2] नारदपाञ्चरात्रं तथा पद्मपुराणम्।

[3] वाच्यं वाचकमित्युदेति भवतो नामस्वरूपद्वयं
पूर्वस्मात्परमेव हन्त करुणं तत्रापि जानीमहे॥ इति।

[4] सात्वततं० पटल ७ श्लो० ४६-४७

[5] विष्णोर्नामैव पुंसः शमलमपनुदत्पुण्यमुत्पादयच्च, ब्रह्मादिस्थानभोगाद्विरतिमथ गुरुश्रीपदद्वन्द्वभक्तिम्।
तत्त्वज्ञानं च विष्णोरिह मृतिजननभ्रान्तिबीजं च दग्ध्वा, पूर्णानन्दैकबोधे महति च पुरुषं स्थापयित्वा निवृत्तम्॥
तथा-सात्वततन्त्रसप्तमपटलश्लो० १४।१५

परमात्मनो नाम-रूप-पराक्रमाणां भक्तानां चरितानां च स्मरणं स्मरणपदेन कथ्यते। अर्थात् सर्वविषयेभ्यो मन आकृष्य परमात्मनि तस्य स्थापनम्। श्रीमद्भागवते स्मरणस्यैवं रूपमुपलभ्यते।[४] रागानुरागिण्यां भक्तौ स्मरणमेव मुख्यतया गण्यते। स्मरणस्य फलं भागवतप्रोक्तम् —

अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च।
सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम्॥१२/१२/५४॥

किञ्च स्मरणेन सम्पूर्णपातकनाशो भवति।[५] स्मरणभक्त्यैव प्रह्लादादयो भक्ता मोक्षं प्राप्नुवन्। पादसेवाशब्देन परमात्मनः प्रतिमादेरथवा परमात्मनो मन्दिरादिपवित्रस्थलानां किंवा परमात्मस्वरूपगुरोः सर्वप्रकारिका यथायोग्यं सेवा विवक्षिता। पादादिसेवया सम्पूर्णपापादिकानां नाशे आनन्दावाप्त्यादि भवतीदं पादसेवायाः फलमस्ति[६], पादसेवादिना लक्ष्मीप्रभृतयः कृतार्थाः समपद्यन्त।

अर्चनशब्देन विधिपूर्वकं प्रतिमादिषु आवाहनाद्यनेकोपचाराणां पूजाप[illegible]रहितं समर्पणं विवक्षितम्।[७] गृहस्थानां कृते पूजनं भगवत्प्राप्तेर्मुख्यं साधनमस्ति।[८] भक्तः परमेश्वरपूजया परमात्मन आनन्देनातितृप्तः सन् परमं पदं याति, यथा विष्णुधर्मोत्तरपुराणे —

श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नरा भुवि।
ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम्॥ इति।
पृथुना राज्ञा परमेश्वरप्राप्तिः पूजारूपभक्त्या सम्पादिता।

वन्दनशब्देनार्चनकालाद्भिन्ने काले गुरोः, शालिग्रामादिप्रतिमानां, यमुनादिनदीनां, मथुरादिक्षेत्राणां च साष्टाङ्गप्रणिपातो विवक्षितोऽस्ति। प्रणिपातेनामङ्गलनाशो मुक्तेश्च प्राप्तिर्भवति।[९] वन्दनभक्त्याऽक्रूरः कृतार्थः समभवत्।

दास्यशब्देनाहं सर्वथा परमेश्वरस्य दासोऽस्मि, मदीयं सर्वस्वं परमेश्वरायार्पितमस्ति। दास्यभक्त्या भक्तः सर्वाणि फलानि प्राप्नोति,[१०] परमेश्वरस्य दासो दुर्जयमायामपि जयति।[११] दास्यभक्त्या हनुमान् कृतकृत्यो जातः।

सख्यशब्देन विश्वासपूर्विका मित्रवृत्तिर्विवक्षितास्ति। परमात्मनि सख्यभक्तिं कुर्वतः परमेश्वरेण समाना परमैश्वस्यस्य प्राप्तिर्भवति। इदं सुदामचरित्रतः सुस्पष्टं भवति। ब्रह्मणापि गोपादीनां सख्यभक्तिं दृष्ट्वाऽस्तावि।[१२] अर्जुनादयः सख्यभक्त्या कृतार्थाः समभवन्। आत्मनिवेदनशब्देन देहादेरात्मपर्यन्तानां सर्वप्रकारेण परमात्मनि समर्पणं विवक्षितम्। सर्वस्वे परमात्मनि समर्पिते देहादेः पालनस्य चिन्तापि नश्यति।[१] एवं सति देहादिनिमित्तकोऽहङ्कारोऽपि

---

४. भाग० ११।१३।१४
५. **अशेषसंक्लेशशमं विधत्ते गुणानुवादस्मरणं मुरारेः।**
६. भाग० १९।७१।६।१५
७. **अर्चनं तूपचाराणां स्यान्मन्त्रेणोपपादनम्** (पाञ्चरात्रम्)
८. **अयं स्वस्त्ययनः पन्थाः द्विजातेर्गृहमेधिनः।**
यच्छ्रद्धया सवित्तेन शुक्लेनेज्येत पूरुषः। (सिद्धान्तदर्पणे)
९. भाग० १०।१७।६
१०. भाग० ९।५।१६
११. भाग० ११।६।४६
१२. भाग० १०।१४।३२
१. **चिन्तां न कुर्याद्रक्षायै विक्रीतस्य यथा पशोः।**
तथार्पयन् हरौ देहं विरमेदस्य रक्षणात्॥ (भक्तिविवेके)

न भवति । आत्मनिवेदनं कुर्वन् भक्तः सर्वथा कृतार्थो भवति ।[2] एवं प्रकारेण नवविधैषा भक्तिः साधनरूपा परमेश्वरविषयकमत्युत्कटं प्रेमरूपं साध्यभक्तेः स्वरूपं साधयति । नवविधसाधनभक्तीनां मध्ये कस्याप्येकस्यानुष्ठानं यथाशक्ति कृतं साध्यभक्तेः सिद्धये परमावश्यकमास्ते । एवं कृते मुक्तिरवश्यं सिद्ध्यति ।[3] श्रवणादेर्भक्तेः सिद्धये सत्सङ्गः परमावश्यकोऽस्ति । सत्सङ्गपदेन भगवद्भक्तानां सङ्गोऽपेक्षितो भवति । सोऽपि पूर्वसुकृतेन लभ्यते ।[4] अस्तु ।

परमात्मकृतलीलानां स्मरणेन श्रवणेन च मनुष्यहृदये परमेश्वरसत्ता चेतसि दृढा भवति दुष्टा वासना निवृत्ता जायते इतीदं मुख्यं[5] प्रयोजनम् । परमात्मनः कथां शृण्वतां रसज्ञानां प्रतिपदं माधुर्यरसप्राप्तिर्भवति ।[6] अत्यन्तदुस्तरसंसारसागरं लङ्घयितुं परमात्मनः लीलाकथामृतश्रवणं विना नान्योऽस्त्युपायः ।[7] लीलानां शृण्वताम् एव मननकर्तॄणां चेतो विषयविमुखं सत् परमात्मनः सम्मुखं शनैः शनैर्गन्तुं प्रवर्तते । एवं तस्मिन् प्रवृत्ते मनसि सूक्ष्मवस्तुनो ज्ञानं साक्षाद्रूपेण प्रादुर्भवति ।[8] यत्र यत्र चित्तं स्थाप्यते तत्र तत्र तदाकारं भवति । चेतस एतादृक् स्वभावत्वात् परमात्मनि प्रवृत्तं सत् तत्रैव लीनं[9] भवति । एवं परमात्मनो रसरूपस्य परमप्रेमरूपपरानन्दस्य प्राप्तिर्भवति । सर्वानुष्ठानधर्मादीनां मुख्यं फलं श्रीकृष्णे भक्तेर्भवनं यदि तत्र भवेच्चेत्तुषकण्डनवत्तद्वृथा भवेत् ।[10] एवं प्रकारेण परमात्मनो लीलादेः श्रवणमननादीनां बहूनि फलानि ग्रन्थे चोक्तानि, अनुभवितारो भक्ता अपि वर्णयन्ति । परन्तु ये अपक्वकलुषा विद्यन्ते तेषां चेतसि प्रारम्भतोऽनेकाः कुशङ्काः प्रादुर्भवन्ति, यथा परमात्मनोऽनेकलीलाकरणे किं प्रयोजनम् ? लीलानां यद्वर्णनमुपलभ्यते तद्वस्तुतः परमसत्यमस्ति । कालियमर्दने कालियनागपत्नीभिः कृता मनुष्यवाण्या स्तुतिः किं वास्तविकी ! परमात्माऽतिश्रेष्ठो महान् प्राकृतगोपवत्किमर्थं गाश्चारयति स्म ? परमात्मनोऽवतारे प्रायोऽसुरराक्षसादीनां नाशः कृतः उपलक्ष्यत इति असुरसृष्टेर्विनाशकरणमेव किं परमात्मनोऽवतरणे प्रयोजनम् ? पृथ्वीमागत्य देवता भगवन्तं स्तुवन्ति स्म ? देवताः कलिप्रारम्भपर्यन्तं भूमावागत्य स्तवादिकार्यं सम्पादयन्ति स्म, परन्त्वधुना देवतादीनामागमनं किमवरुद्धम् ? पुराणस्य भूगोलादिवर्णनं तु सम्प्रति प्रत्यक्षविरुद्धमिति जानन्ति सर्वे, अतः कथं विश्वासः कर्तुं शक्यतेऽप्रत्यक्षलौकिकविषये ? इत्यादयः । आसां शङ्कानां कञ्चिद्विचारं प्रसङ्गेऽस्मिन् सम्पादयामस्तेनास्तिकानां भागवतश्रवणादौ प्रवृत्तिरनवरुद्धा भवेत् ।

अनेकलीलाकरणे परमात्मनः प्रवृत्तेर्मुख्यं कारणं भक्ता अनेकविधवासनावन्तः सन्ति । तेषां सङ्कटान्यप्यनेकरूपाणि सन्ति । अतो भक्तवासनाः सङ्कटानि चावलम्ब्यानेकलीलाः सम्भवन्ति, कृतानां लीलानां स्वसंस्कारानुरूपं श्रवणादिकं भक्ताः सम्पाद्य स्वीयोद्धारं कुर्वन्त्वेतावदेव तात्पर्यं भिन्नलीलाकरणे परमात्मनः ।[11] पूर्णावतारस्येदमेव स्वरूपं यदनेकविधलीलाकरणं नाम परमात्मनः श्रीकृष्णस्य चरित्रम् अनेकरसपरिपूर्णमास्ते, भक्ता अप्यनेकसंस्कारयुताः स्वाभीष्टं रसयुक्तं चरित्रमनुसेव्य परमात्मनि प्रेमस्वरूपे चित्तं सुदृढं संयोजयन्ति ।[12] अचिन्त्यालौकिसर्वशक्तिसम्पन्नपरमात्मनो लीलासु किञ्चिज्ज्ञानशक्तानामस्माकं दृष्ट्या कदाचिदसम्भवि वर्णनमुपलभ्यते

---

२. भगवद्गीता ३।१७

४. अन्यथा भगवद्भक्तिर्भक्तसङ्गेन जायते ।
सत्सङ्गः प्राप्यते पुम्भिः सुकृतैः पूर्वसञ्चितैः ॥ (नारदपञ्चरात्रे)

५. भाग० १।२।१७

६. भाग० १।१।१९

७. भाग० १।८।४०

८. भाग० ११।१४।२६

९. भाग० ११।१४।२७

१०. भाग० ११।१४।४

११. भाग० ९।८।३५-३६

१२. द्रष्टव्यं बोपदेवविरचितं मुक्ताफलकम् (अ० ११)

तत् श्रुत्वा तदसत्यमिति कथने का युक्तिः ? यदि परमेश्वरः साधारणमनुज इव व्यवहरेत्तर्हि तस्य चरित्रे किं महत्त्वम् ? कथं वा तच्छ्रवणादिना चेतःसन्तोषो भक्तसमुद्धारश्च, अतो भक्तचेतसः समाकर्षणार्थं तेषां भक्तानां समुद्धारार्थं च परमात्मनो मनुष्यवल्लीलास्वपि मनुष्याणां दृष्ट्याऽद्भुतताऽसम्भावनीयता चावश्यमपेक्ष्यत एव । ये भक्ताः परमेश्वरस्य बाललीला एवाभिप्रयन्ति तासां श्रवणेनैव तेषां चित्तं परमात्मनि लीयते, तेषां भक्तानां कृते गोपबालकवल्लीलाकरणं तथा तत्प्रसङ्गतः प्राप्तराक्षसासुरवधकरणं समुचितमेव । सर्वव्यापकस्य सर्वस्वरूपस्य परमेश्वरस्य कृते गोचारणादि कृत्यं न तस्य महत्त्वं विघटयति । किञ्चास्माभिः पूर्वं निरूपितमेव परमेश्वरकृतलीलाकथा रूपकस्वरूपा अतिशयोक्त्यलङ्कारयुक्ताश्च क्वचित्सन्तीति । असुरराक्षसस्वरूपवर्णनमप्यतिशयोक्त्यलङ्कारयुक्तमेव । असुरा अपि दुष्टसंस्कारयुक्ता भक्तसाधुविनाशकरणप्रकृतयो मनुष्या एव, ते सर्वदा सर्वत्रोपलभ्यन्त एव । तेषां विनाशं कृत्वा साधुरक्षणं परमेश्वरस्यावतरणे मुख्यं प्रयोजनमस्त्येव ।[१]

देवतास्तु सत्त्वगुणयुक्ताः सन्ति । तेषां स्वर्गादयो लोका अपि सत्त्वगुणनिर्मिताः सन्ति । मनुष्या यदा सत्त्वगुणा भवन्ति तदा तेषां लोके गमनं ताभिः साकं वार्तालापादिकं कर्तुं प्रभवन्त्येव ।[२] मनुष्याः कर्म, योगं भक्तिमुपासनादिकं च कृत्वा सत्त्वगुणान् सम्पादयितुं प्रभवन्ति । भोगेन सत्त्वगुणविनाशः सम्पद्यते । सत्त्वगुणस्य नाम पुण्यस्य सदा भोगेन विनाशो भवति तदा पुना रजस्तमोबहुले मृत्युलोके देवताभूतमनुष्याणामागमनं सम्भवति ।[३]

सत्त्वगुणविशिष्टा देवतास्तु सर्वदाऽस्मिन् मर्त्यलोके समागच्छन्त्येव तथा सत्त्वगुणमनुष्यैः सह व्यवहरन्ति च ।[४] श्रीकृष्णचन्द्रो यदाऽस्मिन् भूतलेऽवतीर्णस्तदा तु सत्त्वगुणस्य शुद्धस्य महद्वैलक्षण्यमासीत् । व्रजमण्डलं तु परमेश्वरसान्निध्येन प्रेमसागरस्य मुख्यं स्थानमेवासीत् ।[५] यतः श्रीकृष्णो विशुद्धसत्त्वगुणं स्वीकृत्यैवावतीर्णः[६] तस्य समीप आगत्य सत्त्वगुणविशिष्टदेवतानां स्तुतिकरणं न मिथ्या भवितुमर्हति ।

परमेश्वरस्य सर्वज्ञत्वान्नागपत्नीभिः कृता स्तुतिर्नागभाषायामेव कृतेति सुस्पष्टम् । व्यासदेवेनास्मत्कृते संस्कृतभाषया सोपनिबद्धेति सम्भवति । इयमपि रूपककथेति वक्तुं शक्यते भूगोलवर्णनं सम्प्रत्युपलब्धभूगोलादिना विरुध्यत इति शङ्काया विषयेऽयं विचारः पौराणिकप्रमाणज्यौतिषशास्त्रीयप्रमाणयोः कश्चन सङ्केतभेद उपलभ्यते । तेन परस्परं कश्चन विरोध इव दृश्यते । आधुनिकाः समुद्रान् परित्यज्य केवलं भूखण्डपरिमाणविचारेण प्राचीनपुराणादिषु निर्दिष्टभूखण्डविवरेण सह तुलनां कुर्वन्ति तदैव विरोध इव भवति । परन्तु पौराणिकसङ्केतान् ज्ञात्वा तद्द्वारा यदि तुलनादि क्रियेत तदा तु विरोधो नश्यत्येव । अत्र विषये चतुर्धरनीलकण्ठस्य पौराणिकज्यौतिषभूगोलादिशङ्कापरिहारविषयको ग्रन्थोऽवश्यं समादरणीय आस्ते ।[७] प्लक्षद्वीपादीनां इक्ष्वादिसागराणां च विषये पौराणिकैरेवोक्तमिमे द्विपा अनेन शरीरेण गन्तुं न शक्या इति । अतस्तद्विषये कुतस्ते कथं गन्तव्या इति विचारकरणमेव व्यर्थमस्ति । अस्तु ।

श्रीमद्भागवतस्य तात्पर्यं द्वैते अथवा अद्वैते किं वा विशिष्टाद्वैतेऽस्तीति विषये बहवो मतभेदाः समुपलभ्यन्ते, प्रायः सर्वैर्द्वैताद्वैतप्रभृतिभिः स्वमतबोधिकाः कृताष्टीका भागवतस्योपलभ्यन्ते, अतोऽत्र कश्चन कृतो निर्णयो न सर्वेभ्यो रोचेत इति निश्चितम् । पाठकानां सुखविचाराय कानिचिद् द्वैतपराणि तथाद्वैतपराणि स्थलानि संगृह्यन्ते —

---

१. भगवद्गीता (अ० ४।८)

२. पातं० योगसू० ३।५१

३. भगवद्गीता (९।२१)

४. द्रष्टव्यं भक्तमाल-भक्तविजय-सन्तलीलामृतादेकम् ।

५. भाग० १०।५।१८

६. भाग० १०।२।३४

७. अयं ग्रन्थः संस्कृतब्राह्मणसंमेलनमासिकपत्रिकायां मुद्रिकोऽस्ति ।

८. भाग० १।७।४-५

व्याससमाधिदृष्टपदार्था जीवपरमात्म-मायाप्रभृतयः सन्ति ।[८] सनत्कुमारैर्नित्यवैकुण्ठे सगुणपरमात्मनो दर्शनं कृतम् ।[९] अक्रूरेण परमात्मद्वारा परमात्मलोकदर्शनं कृतम्, तथा तेन परमात्मनः सगुणनित्यरूपस्य दर्शनं कृतम् ।[१०] एतानि स्थलानि द्वैतादिकं बोधयन्ति अद्वैतबोधकानि कानिचित्स्थलानि-परमात्मा स्वयं निर्गुण एकोऽपि मायया जगन्निर्माति (भाग० १/२/३०) निर्गुणपरमेश्वरस्य गुणान् गातुं ब्रह्मणा प्रेरितो नारदोऽनेकान् चरित्रं श्रावयति (भा० २/८/१) एवं (२/९/३१-३२, ३/५/२३) आदिस्थलानि द्रष्टव्यानि ।

अस्यामवस्थितौ पाठका एव स्वस्वमतानुसारं निर्णेतुं प्रभवेयुः । परन्त्वत्र निश्चितमस्ति यद् मुक्तेर्भिन्नभिन्नस्वरूपत्वेऽपि तथा मुक्तेः साधनानां ज्ञानादीनामनेकत्वेऽपि श्रीमद्भागवतदृष्ट्या भक्तिरेव मुक्तेर्मुख्यं साधनमिति प्रतीयते । यतः ब्रह्मनारदसंवादेनैतन्निश्चीयते । तथाहि ब्रह्मणा नारदायोक्तम् —

यथा हरौ भगवति नृणां भक्तिर्भविष्यति । सर्वात्मन्यखिलाधारे इति सङ्कल्प्य वर्णय ॥भाग० २/७/५२

अनेन निश्चीयते मुक्तिसाधनेष्वनेकेषु सत्स्वपि भागवतदृष्ट्या भक्तेर्मोक्षार्थं प्राधान्यमिति । एवं यस्य भक्तिः करणीया स परमात्मा नित्यानेकाचिन्त्यगुणविशिष्टोऽस्ति न तु निर्गुणः । निर्गुणस्य प्रथमतो भक्तिरेव न सम्भवति । भागवतमेव कराले कलिकाले परमात्मनि भक्तेर्वर्धकं तद्द्वारा जगति परमार्तानां च सुखमोक्षसाधनमिति निश्चीयते —

कलौ नष्टदृशामेषां पुराणार्कोऽधुनोदितः ॥ भाग० १/१

श्रीमद्भागवतस्य सूक्ष्मावलोकनं कुर्वतां प्राचीनपरम्पराधीतभागवतरहस्यज्ञानाम् इदं कथनं विद्यते - श्रीमद्भागवते परमात्मनः सर्वस्वरूपभेदानां प्रतिपादनमुपलभ्यते, अतोऽधिकारी भक्तः स्वसंस्कार-बुद्धि-शक्ति-सम्प्रदाय-उपदेशादिकमनुसृत्य भक्त्या परमेश्वरे चित्तं प्रस्थाप्य स्वोद्धारं कुर्यादिति ।

सम्प्रति प्रसङ्गतो व्यासदेवस्य सर्वत्रोपलब्धं चरित्रमेकत्र सङ्कलय्य पाठकमनोविनोदाय लिख्यते । येन सर्वदा सर्वकाले सर्वजनानामुपकारो भवत्विति चित्रया परमभक्त्या श्रीकृष्णचरित्रलेखकस्य कृष्णद्वैपायनव्यासस्य जन्म पराशरऋषिद्वारा सत्यवत्यां यमुनाया अन्तर्गते द्वीपे जातम् ।[१] अतो द्वैपायननाम्ना प्रसिद्धिं गतः । एष पराशर-पाराशर्य-बादरायण-पुराणप्रवक्ता-प्रभृति-नाम्नाऽपि प्रसिद्धः[२] ।

अयं वैवस्वतमन्वन्तरे जातोऽष्टाविंशतिसङ्ख्याको व्यासोऽस्ति । एवं विष्णोरवतारोऽस्ति ।[१] एष सरस्वत्यास्तटे शम्याप्रासनामकाश्रमे वसति स्म । तस्मिन्नाश्रमे खिद्यन् नारदोपदेशात्सात्वतसंहितां (भागवतं) निर्मायात्मारामं निवृत्तिनिरतं शुकमध्यापयामास ।[२] सूतमप्ययं पुराणानि पाठयामास ।[३] एवं जातुकर्ण्याद्धर्मं ज्ञात्वां भारतम् अष्टादश पुराणानि च निर्ममे ।[४] वेदानां शाखाविभजन-सङ्क्षेपादिकरणाद् व्यासनाम्ना प्रसिद्धः । अयं यदा गृहस्थाश्रमं कर्तुमियेष तदा जाबालऋषेः कन्यां वाटिकां नाम उदुवाह । ततः शुको नाम पुत्रो जातः ।[५] वायुपुराणेऽरणीतः शुकोत्पत्तिर्लिखितास्ति ।[६] अनेन

---

९. भाग० ३।१५।३७-४४

१०. भाग० १०।३९।४४-५५

१. महाभार० आदिप० ६४,१२६

२. पद्मपुराण० १।१,६०।११,२१
तथा विष्णुधर्मो० १।७४

१. मत्स्यपु० ५२।३।११ लिङ्गपु० १।२४

२. भाग० १।४।२६-१।७।२७

३. देवीभा० १।३ भारतआदिप० ६४।१३१

४. वायुपु० १।१ ब्रह्मपु० २६

५. स्कन्दपुराणनागरखं० १४७

६. २।१०।८५

ब्राह्मेन्द्रपाद्मरौद्रवायव्यवारुणसावित्रवैष्णवरूपाणि व्याकरणानि निर्मितानि ।[७] अस्य पुत्रः शुको ज्ञानी सदेहं स्वर्गं गतवान् । तदास्य शोकनिवारणार्थं शङ्करेणास्मै सर्वत्र शुकच्छायादर्शनरूपो वरो दत्तः ।[८] स्वमातुः सत्यवत्या आज्ञया धृतराष्ट्रादीनुत्पादयामास ।[९] एष महाभारतीययुद्धादनन्तरं धृतराष्ट्रप्रभृतीन् प्रति मृतपुत्रादीन् दर्शयामास ।[१०] अनेनोपनिषज्ज्ञानसमन्वयार्थं ब्रह्मसूत्राणि विरचितानि, तथा वाराणस्यां निवसता स्मृतिर्निर्मिता ।[११]

अत्रैतिहासिकाः व्यासचरित्रमादाय विवदन्त इति जानीमः । परन्तु सर्वास्तिकजनमनस्तोषाय यत्र यत्र यथोपलब्धं व्यासदेवचरितं तत्सङ्कलनबुद्ध्यात्र सङ्कलितमिति । एवं चापञ्चसहस्रवर्षं सर्वथाऽऽबाल्यात्सर्वथा सर्वप्रकारेण सर्वेषां सुखप्राप्त्यै ज्ञानप्राप्त्यर्थं च सर्वदा यतमानस्य महर्षेर्व्यासदेवस्य धार्मिकं बौद्धिकं चैकाधिपत्यं साम्राज्यं सर्वत्र भारते जगति वा भाषा-सम्प्रदाय-प्रान्तजाति-देश-भेदरहितमद्य यावत्प्रचलति । अग्रे च निःशङ्कमप्रतिहतं च प्रचलिष्यतीति निश्चप्रचम् । अत एव तद्विषये केनचित्परमसश्रद्धहृदयेन विदुषा सूरिणा यदुक्तम् —

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ॥ इति तत्परमसत्यमित्यास्ताम् ।

अस्यां श्रीमद्भागवतभूमिकायां प्रसिद्धानां कासाञ्चन समुत्पद्यमानानां शङ्कानां समाधाने प्रयत्नोऽकारि । विशेषस्तु जिज्ञासुभिरत्र मुद्रितासु श्रीधराचार्यप्रभृतिभिर्विरचितासु टीकासु अस्मल्लिखितभागवतस्तुतिसंग्रहभूमिकायां विस्तृतायां च तत्र तत्र द्रष्टव्यः ।

इदमभूतपूर्वमनन्यसाधारणं द्वादशाधिकप्रसिद्धाप्रसिद्धटीकायुतं श्रीमद्भागवतमुद्रणरूपं कार्यं श्रीपरमेश्वरपरमभक्तैर्वेदान्ताचार्य-काव्यतीर्थ-भागवतभूषणप्रभृतिभिरनेकवास्तविकयथार्थसमुपाधिधारिभिः पाठकोपाह्वश्रीदलसुखरामात्मजैः श्रीकृष्णशङ्करशास्त्रिभिः सम्पाद्यत इत्यहोभाग्यमास्तिकजनानाम् ।

अनेकलक्षरूप्यकद्रव्यव्ययसाध्यमद्य यावत्केनाप्यकृतं पृथग्-पृथग् मुद्रितानाममुद्रितानां च टीकानामेकत्र सङ्कलय्य सुन्दरशुद्धरूपेण मुद्रापणं कर्तुं श्रीकृष्णशङ्करशास्त्रिभिः श्रेष्ठिपरमेशभक्तठाकरसीकुलोत्पन्नश्रीकृष्णराजभाई-महोदयानामाध्यक्ष्ये ''विद्याहितनिधि''नाम्नी काचनाभिनवा संस्था निर्मिता । इदमतिमहत् श्रीमद्भागवतमुद्रापणं कार्यं कुत्र प्रचलत्विति सुदीर्घे सुनिश्चितं च विचार्य श्रीशिवप्रियायामस्यां वाराणस्यां भवति चेत्साधु स्यादित्यभिप्रेत्य तदर्थमाचार्यकुलोत्पन्नाः श्रीभाईशङ्करात्मजा एम्० ए० वेदान्ताचार्य-विशारदोपाधिपदभाजः श्रीप्राणलालशास्त्रिण इमं व्यवस्थाकार्यभारं निर्वोढुं नियुक्ताः ।

अस्यानेकटीकायुतश्रीमद्भागवतग्रन्थस्यानेकाः खण्डाः सम्भवेयुः । प्रारम्भिके खण्डे सम्प्रत्यतिदुर्लभाः भागवतभूषणम् श्रीमद्भागवतप्रथमस्कन्धप्रथमाध्यायप्रथमपद्यस्य ''जन्माद्यस्य यत'' इत्यस्य शताधिकार्थबोधिका टीका श्रीमद्भागवतमाहात्म्यद्वयमित्यादयो मुद्रिताः स्युरेवं चेदमपूर्वमद्भुतमनन्यसाधारणं कार्यं सफलयितुं सर्वेऽप्येते श्रीकृष्णशङ्करशास्त्रिकृष्णराजभाईठाकरसीजयराजभाईप्रभृतयः विद्याहितनिधिसदस्याः सर्वशक्त्या, विपुलधनव्ययेन, सर्वसुन्दरं भवत्वितीच्छया, श्रीपरमेश्वरस्य, तोत्रवेत्रैकपाणेरार्तत्राणस्य, नीलमेघच्छवेः पीतपीताम्बरधारिणः पार्थरथकुटुम्बिनो भगवतः, सात्वतप्रियस्य, सर्वान्तर्गतस्य, श्रीकृष्णस्यैकनिष्ठया भक्त्या च प्रवर्तन्त इति वृत्तं केषां विदुषां हृदयतोषकरमभिमानास्पदं सर्वथा समादरणीयं न भवेत् ?

---

८. भावि० पु० ब्रह्मप० १।६०

९. महाभा० आदिप० ५३।५४

१०. महाभा० आश्र० प० ३०

११. स्मृतिसमुच्चयो द्रष्टव्यः ।

'कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः' इति वचनमाश्रित्य दूषकेऽतिकराले कलावस्मिन् श्रीभगीरथेन भारतभूमौ स्वर्गादानीय प्रवाहिता गङ्गेवेयं श्रीमद्भागवतीया श्रीपरीक्षिद्दृष्टेन श्रीशुकमुखान्निर्गलितैषा वाग्गङ्गा सर्वान् आर्तजनान् पावयितुं सुखाकर्तुं च सम्प्रति उपर्युक्तश्रीकृष्णशङ्करशास्त्रिप्रभृतिभिः प्रवाह्यत इति सर्वास्तिकजनानामिदं कार्यं परमसुखाकरमिति निश्चितम् ।

"अनाहूतोऽध्वरं गच्छेत्" इति न्यायेन अस्य महतोऽनेकटीकासहित-श्रीमद्भागवतमुद्रणरूपमहामन्दिर-निर्माणकार्यस्य प्रारम्भे त्रुटितस्फुटितेष्टिकाप्रक्षेपणमिव यथाशक्ति यथाबुद्धिरनेकत्रुटिपूर्णं भूमिकालेखनकार्यं केवलं भक्तानां कृते श्रीभैरवरूपेण विराजमानवृन्दावनविहारिभक्तत्राणसर्वमोहनबालकृष्णकृपाप्राप्त्यर्थं वृत्तमिति सादरं सप्रश्रयं सप्रणामं च दयालून् हंसक्षीरन्यायव्रतान् विदुषो निवेदयते —

आषाढ व० ११।२०२२
वाराणसी
श्रीअनन्तशास्त्री फडके
व्याकरणाचार्य-मीमांसातीर्थ-वेदान्तकेसरी
भूतपूर्वः अध्यक्षः पुराणेतिहासविभागे वाराणसेयसंस्कृतविश्वविद्यालयस्य ।

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ [1]अथैकसप्ततितमोऽध्यायः ॥

श्लोकाः	अनु.	मि.उ.	व.	रु.	उ.	श्लो.अ.	उ.अ.	अ.अ.	सं.श्लो.अ.	सं.श्लो.	अ.
४६	३३	२	६	५	३	१७६४	१८	४७	१८२९	५७	५

श्रीशुक उवाच

इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोऽब्रवीत् । सभ्यानां मतमाज्ञाय कृष्णस्य च महामतिः ॥१॥

कर्दमक्षमा

अन्वयः :—श्रीशुक उवाच— इति, उदीरितम्, आकर्ण्य, महामतिः, उद्धवः, देवर्षेः, च, सभ्यानाम्, कृष्णस्य, मतम्, आज्ञाय, अब्रवीत् ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

अथैकसप्ततितम उद्धवस्य तु मन्त्रतः । इन्द्रप्रस्थं गते कृष्णे पार्थानां परमोत्सवः ॥
राजसूयामिषं कृत्वा भीमदुर्योधनादिषु । कलिमुत्पाद्य तद्द्वारा भूभारमहरत्प्रभुः ॥

देवर्षेर्मतं राजसूयगमनम् । सभ्यानां मतं राजरक्षा । कृष्णस्य तूभयम् ॥१॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

एकेनाधिकस्सप्ततितम एकसप्ततितमस्तस्मिंस्तथा (१) । तद्द्वारा भीमदुर्योधनद्वारा (२) । एकान्तभक्तानां भक्त्यतिशयजननाय हरेर्बन्धुकृत्याचरणलक्षणं माहात्म्यमाह । तत्रादौ कृष्णकटाक्षसूचिततत्कार्यविशेष उद्धवस्स्वां नीतिं वक्ति- इतीति । महामतित्वादेव सर्वेषां मतं ज्ञातवानिति भावः ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

इत्येतद्भगवत उदीरितमाकर्ण्य देवर्ष्यादीनाञ्च मतम् आ सम्यक् ज्ञात्वा महामतिः सर्वेषामेव मतरक्षया प्रहर्षात् देवर्ष्यादीनां यथोत्तरं स्वीयत्वे श्रैष्ठ्यम् ॥१॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

इत्येवं देवर्षेरुदीरितं किंवा इत्येतत् श्रीभगवदुदीरितमाकर्ण्य देवर्ष्यादीनाञ्च मतम् आ सम्यक् ज्ञात्वा, यतो महामतिः ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१—६॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अनात्मपक्षवद्भगवदभिप्रायानभिज्ञः प्राह—किन्तु तदभिप्रायं जानन्नेव प्रत्यभाषतेत्याह—इतीति । तावत्सभ्यानां मतं

---

[1] अयमध्यायः (७९) एकोनाशीतितमः-विज. ।

च मतमाज्ञायालक्ष्य ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथैक सप्ततितमे प्राप्तेन हस्तिनापुरम् । कृष्णेन तन्निवासिनां वर्ण्यते परमोत्सवः ॥१॥

इत्येवं देवर्षेर्नारदस्य उदीरितं युधिष्ठिरचिकीर्षितानुमोदनं कर्तव्यमिति कथितमाकर्ण्य श्रुत्वा तथा सभ्यानां मतं जरासन्धविजयार्थमेव गन्तव्यमिति, कृष्णस्य च मतम् उभयमेव कर्तव्यमिति, तदाज्ञाय ज्ञात्वा उद्धवः सर्वाविरुद्धं यथा स्यात्तथाऽब्रवीत् । एवं ज्ञाने कथने च सामर्थ्यमाह—महती श्रेष्ठा सूक्ष्मा मतिर्यस्य स इति ॥१॥

अन्वितार्थप्रकाशिका

अथैकसप्ततितमे इन्द्रप्रस्थं गते हरौ । पार्थानामतिहर्षोऽत्र श्लोकाः सार्द्धाः षडब्धयः (४६॥) ॥ उवाचत्रितयं (३) पञ्चपञ्चाशच्चाप्यनुष्टुभः (५५) ॥७१॥ इतीति ॥ इत्येवं देवर्षेर्नारदस्य उदीरितं युधिष्ठिरचिकीर्षितानुमोदनं कर्तव्यमिति कथितमाकर्ण्य श्रुत्वा तथा सभ्यानां चाद्भुतस्य च मतं जरासन्धविजयार्थमेव गन्तव्यमिति कृष्णस्य च मतम् उभयमेव कर्तव्यमिति तदाज्ञाय ज्ञात्वा महामतिः उद्धवः अब्रवीत् ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथैकसप्ततितमे ह्युद्धवप्रोक्तमन्त्रतः । शक्रप्रस्थं गतः कृष्णः पाण्डवप्रीतिमावहन् ॥१॥

इतीति सभ्यानां मतं तु राजरक्षणम् उभयकार्यकरणं श्रीकृष्णमतम् ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

महामतिः, उद्धवः उदीरितं राजसूयार्थगमनात्मकं पूर्वप्रोक्तं, देवर्षेर्नारदस्य, मतं ज्ञात्वा, सभ्यानां मतं राजरक्षणात्मकं, आज्ञाय, कृष्णस्य मतम् उभयकार्यकरणात्मकं च, आज्ञाय, इति वक्ष्यमाणप्रकारेण, अब्रवीत् ॥१॥

कृष्णप्रिया

श्रीशुकदेवजी बोले कि महाबुद्धिमान् उद्धवजी इस प्रकार नारदजी के वचन कों सुन कर और सभासदों के मत को तथा श्रीकृष्ण के मत को जानकर बोलते भए ॥१॥

उद्धव उवाच

यदुक्तमृषिणा देव साचिव्यं यक्ष्यतस्त्वया । कार्यं [1]पैतृष्वस्त्रेयस्य रक्षा च शरणैषिणाम् ॥२॥
यष्टव्यं राजसूयेन [2]दिक्चक्रजयिना विभो[3] । [4]अतो जरासुतजय उभयार्थो मतो [5]मम ॥३॥
अस्माकं च महानर्थो ह्येतेनैव भविष्यति । यशश्च तव गोविन्द राज्ञो [6]बद्धान् विमुञ्चतः ॥४॥
[7]स वै दुर्विषहो राजा नागायुतसमो बले । बलिनामपि चान्येषां भीमं [8]समबलं विना ॥५॥

कर्दमक्षमा

अन्वयः—उद्धव उवाच—देव ! यद्, उक्तम्, ऋषिणा, यक्ष्यतः, पैतृष्वस्त्रेयस्य, साचिव्यं, कार्यं च शरणैषिणाम्, रक्षा कार्या ॥२॥ हे विभो ! दिक्चक्रजयिना, राजसूयेन, यष्टव्यम्, अतः जरासुतजयः, मम, उभयार्थः, मतः ॥३॥ हि, एतेन, एव, अस्माकम्, महान्, अर्थः, भविष्यति, गोविन्द ! बद्धान्, राज्ञः, विमुञ्चतः, तव, च, यशः, भविष्यति ॥४॥ बले, चे, नागायुतसमः, सः, ते, समबलम्, भीमम्, विना, सः, राजा, अन्येषाम्, बलिनाम्, अपि, दुर्विषहः ॥५॥

---

१. स्त्रेयस्य-श्रीधर. वंशी. ; सेयस्य-वीर. विज. विश्व. । २. दिशश्च जयिना-वीर. । ३. पूर्वं गन्तव्यमस्माभिरिन्द्रप्रस्थमितः प्रभो । तत्रैव तदनुज्ञातस्तदर्थं जहि मागधम् ॥१॥ एकः श्लोकोऽधिकः-वीर. । ४. ततो जरासुतजय.-वीर. ; अतो जरासुतवधः-विज. । ५. मे-वीर. विज. । ६. बन्धाद्विमुञ्चतः-वीर. ; बन्धाद्विमुञ्चतः-विज. ; बन्धान्विमुञ्चतः च. पु. टी. । ७. सर्वैर्दुर्विषहो-विज. । ८. भीममुग्रबलं-वीर. ; भीमसेनबलं-विज. ।

जरासन्धजयार्थमेव गन्तव्यमित्येवंविधमभिमतं ज्ञात्वा प्राह, तत्र हेतुत्वेन विशिनष्टि—महती श्रेष्ठा सूक्ष्मा मतिः यस्य सः ॥१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

एकान्तभक्तानां भक्त्यतिशयजननाय हरेर्बन्धुकृत्याचरणलक्षणमाहात्म्यं कथयति—तत्रादौ कृष्णकटाक्षसूचिततत्कार्यविशेष उद्धवः स्वां नीतिं वक्ति, इतीति ॥१॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१—७॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१—८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१—८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

गत्वैकसप्ततितमे गृहीतोद्धवमन्त्रणः । ससैन्यः सप्रियः कृष्ण इन्द्रप्रस्थौकसोऽधिनोत् ॥

देवर्षेः सभ्यानां कृष्णस्य चकारात् राजदूतस्य च उदीरितमाकर्ण्य मतं चाज्ञाय महामतिरिति सर्वमतरक्षणेन सर्वप्रहर्षणात् तत्र राजसूयार्थके गमने देवर्षेः सम्मतिः । सभ्यानां दूतस्य च जरासन्धवधार्थके कृष्णस्य तूभयत्रैव ॥१॥

गूढार्थदीपिनी

एकसप्ततितमे प्रियायुतः सेनया च सममुद्धवोक्तितः । धर्मराजसुयशोऽभिवृद्धये शक्रपत्तनमगात्स माधवः ॥१॥

देवर्षेर्मतं राजसूयगमनम् । सभ्यानां मतं राजरक्षा । कृष्णस्य तूभयम् ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

एकसप्ततितमे उद्धवसम्मत्येन्द्रप्रस्थं गतस्य सभार्यस्य भगवतः पार्थैः कृतमादरमनुवर्णयति—इतीति ॥१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ बान्धवेषु सत्सु बान्धवैः सद्भिरेवं वर्तितव्यमिति लोकाञ्छिक्षयितुं हरिरिमामाटीकत धाटीं पाण्डवविषय इति प्रतिपाद्यतेऽत्र । तत्रादौ मन्त्रित्वान्न तूष्णीकेन भगवच्चित्तावगमयता मया स्थेयमित्युद्धवादुद्धवोऽवददिति वदति ॥ इतीति ॥ सभ्यानां सर्वेषां मतमाज्ञाय ज्ञात्वा कृष्णस्य च मतमाज्ञाय तज्ज्ञानहेतुमाह ॥ महामतिरिति ॥ उद्धवोऽब्रवीत् ॥१॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

द्वाविंशे धर्मरक्षार्थं धर्मस्थानगतिर्हरेः । सर्वसम्मतियुक्तस्य शोभा युक्ता निरूप्यते ॥
एकाकृतिर्हरेरत्र बहुकार्यनिरूपिका । निर्धार्यते सर्वसुखा धर्मे सर्वाधिकारिणी ॥

पूर्वाध्यायान्ते भगवद्वाक्यं शिरसा स्वीकृतं ततो भगवदिच्छानुसारेणैव कथने मन्त्रित्वं व्याहन्येतेति पूर्वापरानुसन्धानार्थम् उद्धवस्य प्रकरणज्ञानपूर्वकम् उत्तरारम्भमाह—इत्युदीरितमिति । दूतवाक्ये तस्यापि विवाद इति देवर्षेः उदीरितम् उत्युक्तं भगवद्वाक्यश्रवणानन्तरमुत्तरस्य वक्तव्यत्वेऽपि पुनर्नारदवाक्यानुसन्धानात् तत्समानार्थमेवोद्धवोऽब्रवीत् धर्मब्राह्मणावेव पुष्टिमार्गे बाधकौ तयोः प्रतिविधानं किञ्चित् पुष्टिविरोधार्थेनेति प्रकरणार्थः विवादे हि मन्त्रिणो वचनमिति पक्षद्वयं निरूपयति—सभ्यानां मतमाज्ञाय कृष्णस्य चेति । सभ्यानां मतं युद्धार्थं गमनं मुख्यं स्वधर्मं पश्चात् दुःखाभावसुखयोः आदौ दुःखप्रतिविधातव्यमिति भगवतोऽप्येवं मतं चकाराद्विपरीतञ्च एवं पौर्वापर्यसन्देहे निर्णयार्थमस्य बुद्धिरस्तीत्याह—महामतिरिति । भक्तिमार्गनारदयोः कोपः प्रतिविधातव्यः मर्यादा च स्थाप्या यावच्छक्यम् अतो धर्मब्राह्मणमर्यादात्रयमेकत्र विरुद्ध्यते अपरत्र भक्तिमार्ग एवैकः ॥१॥

सुबोधिनीसारः

शुकोक्तिः । देवर्षेर्नारदस्येत्युदीरितमुक्तं वच आकर्ण्य श्रुत्वोद्धवोऽभाषत् महामतिरगाधबुद्धिः सभ्यानां सभार्हाणां कृष्णस्य

यशोऽवश्यमपेक्ष्यमितिभावः ॥४॥ कथं जरासुतजयः स्यादित्यपेक्षायामाह-स इति त्रिभिः । वै प्रसिद्धौ, बलिनामप्यन्येषां दुर्व्विषहोऽसह्यविक्रमः, प्रभावविशेषात् सु दुर्ज्जय इत्यर्थः । राजेति महासैन्यसम्पत्तिश्च सूचिता ॥५॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१—६॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

उक्तिमेवाह दशभिः-यदिति । ऋषिणा नारदेन यदुक्तं यागं करिष्यतः पैतृष्वस्रेयस्य पितृष्वसुः पुत्रस्य साचिव्यं साहाय्यं कर्तव्यमिति तदपि कार्यं कर्तव्यमेव तथा शरणार्थिनां राज्ञां च रक्षा च कर्तव्या ॥२॥ तत्र तावद्राजसूयार्थं गन्तव्यं ततो राजसक्षा च कर्तव्येत्याह-यष्टव्यमित्याद्यष्टभिः । दिशश्चक्रजयिना चशब्देन यक्ष्यमाणेन चेत्यस्य संग्रहः तेन युधिष्ठिरेण कर्त्रा राजसूयेन यष्टव्यं तावत्तत्साचिव्यमेव कार्यमिति भावः । दिशश्च जयिनेत्यनेन राजसूयस्य दिग्विजयपूर्वकत्वं तद्दशायामेव राजरक्षा च कृता भवतीत्युभयमभिप्रेतम् — पूर्वं प्रथममस्माभिः इतः द्वारकातः इन्द्रप्रस्थं प्रति गन्तव्यम् । दिशश्च जयिनेत्यनेन अभिप्रेतं विशदयति-तत्रैवेति । तत्रेन्द्रप्रस्थे युधिष्ठिरेणानुज्ञात एव तदर्थं युधिष्ठिरप्रयोजनाय मागधं जहि घातय ॥०॥ ततो दिग्विजयहेतोः जरासुतजयः उभयार्थः राजसूयार्थः यः शरणागतरक्षार्थश्चेति मया मतः बुद्धः ॥३॥ अनेन राजसूयार्थगमनेनैव महान्सर्वोपिसिषाधयिषितोऽर्थो भविष्यति हे गोविन्द ! राज्ञो नृपान् बन्धाद्विमुञ्चतः मोचयतः तव यशश्च भविष्यति ॥४॥ अत्युत्सुकतया प्रथममेव जरासन्धेन सह युयुत्सून् यदूनालक्ष्याह-स वा इति । स वै जरासुतः गजानामयुतेन तुल्यं बलं यस्य सः उग्रं बलं यस्य तं भीमं विना अन्येषां सर्वेषामपि बलिनां दुःखेनापि सोढुमशक्यः भीमादेव तस्य मृत्युर्विहित इति भावः ॥५॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

तद्भवाननुमोदतामिति देवर्षिणा यदुक्तं तस्यायमभिप्रायः हे देव ! त्वया यक्ष्यतः यागं करिष्यतः पैतृष्वस्रेयस्य युधिष्ठिरस्य साचिव्यं साहाय्यं कार्यं कर्तव्यमिति किञ्च शरणैषिणां राज्ञां रक्षा च कार्या ॥२॥ कार्यद्वयसाधनोपायं वक्ति-यष्टव्यमिति । तेन राज्ञा राजसूयेन यज्ञेन यष्टव्यं न ऋष्यादिनेव यागमात्रेण तथापीत्थं कृत्येन भाव्यमित्याह-दिक्चक्रेति । दिङ्मण्डलं जितवता तत्रामृत्वा जरासन्धः करं न ददातीति यदतो जरासुतवधः उभयेषामर्थः प्रयोजनम् ॥३॥ युधिष्ठिरकार्यं सिद्धवत्कृत्वा स्वकार्यमभिष्टौति-अस्माकमिति । एतेन जरासन्धवधेन विमुच्यतः विमोचयतः ॥४॥ दुर्बलैर्दुर्विषहोऽस्तु बलिना सुविषह इत्यत उक्तं बलिनामिति-तर्हीदं दुःखसाध्यं नेत्याह-भीमसेनेति ॥५॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१—७॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१—८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१—८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

यक्ष्यतः यागं करिष्यतः पैतृष्वस्रेयस्य युधिष्ठिरस्य साचिव्यं साहाय्यङ्कार्यमेव यदुक्तमृषिणा जरासन्धवधात् शरणैषिणां रक्षा च कर्तव्यैव या खलु सभ्यानां दूतस्य चाभिमतेति भावः ॥२॥ यत्रैकेनैव कार्येण उभयं कार्य्यं सिद्ध्येत् सैव युक्तिः समीचीनेत्याह-यष्टव्यमिति । उभयार्थ इति राजसूयसिद्धिप्रयोजनकः राजरक्षाप्रयोजनकश्च तथा हि दिग्विजयं विना राजसूययज्ञो न भवति जरासन्धवधं विना दिग्विजयश्च न भवतीति प्रथमं राजसूयनिमन्त्रणमेवाङ्गीकर्तव्यं राजरक्षानिमन्त्रणं तु तदङ्गसिद्ध्यैव सेत्स्यतीति एकक्रिया द्व्यर्थकरी भविष्यतीति भावः ॥३॥ अस्माकं सभ्यानाम् । एतेनैव राजसूयार्थकगमनेनैव । महान् अर्थः जरासन्धवधलक्षणः ॥४॥ सद्य एव जरासन्धं हन्तुमत्युत्सुकान् यादवानालक्ष्याह-स वै इति । अन्येषां ततोऽधिकबलिनामपि यद्यपि समबल एव भीमस्तदपि तं विनेति भीमादेव तस्य मृत्युरिति बृहस्पतेः सकाशादधीतज्योतिरागमादिशास्त्रेण मयैव पूर्वविचारितत्वादिति भावः ॥५॥

गूढार्थदीपिनी

यक्ष्यतः यागं करिष्यतः पितृष्वसुः पुत्रस्य युधिष्ठिरस्य त्वया साचिव्यं साहाय्यं शरणार्थिनां रक्षा च कार्येत्युभयमपेक्ष्यते।

श्रीधरस्वामिकृतभावार्थदीपिका

यक्ष्यतो यागं करिष्यतः पैतृष्वस्त्रेयस्य पितृष्वसुः पुत्रस्य साचिव्यं साहाय्यं तच्च कार्यं तथा शरणार्थिनां राज्ञां रक्षा च कार्या ॥२॥ तत्र प्रथमं राजसूयार्थं गन्तव्यं ततो राजरक्षा कर्तव्येत्याह-यष्टव्यमित्यष्टभिः । अतो दिग्विजयहेतोः उभयार्थो राजसूयार्थः शरणागतरक्षार्थश्च ॥३-४॥ अत्युत्सुकतया सद्य एव जरासन्धं हन्तुमिच्छतो यादवानालक्ष्याह—स वा इति । अन्येषां ततो बलिनामपि यद्यपि समबल एव भीमस्तथापि तं विना भीमादेव तस्य मृत्युर्विहित इति भावः ॥५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

हे देवेति । विचित्रक्रीडापरस्य तवाभिप्रायं न कोऽपि ज्ञातुं शक्त इति भावः । ऋषिणेति ऋषेराज्ञैवादौ सम्पाद्येति भावः ॥२॥ कार्य्यद्वयसाधनोपायं वक्ति — तत्र तयोर्मध्ये । ततस्तत्र गमनादनन्तरम् । ननु राजभिरादौ निमन्त्रणात्तेषां मरणसङ्कटपाताच्चादौ तत्रैव तद्रक्षणार्थं गन्तुमुचितं यज्ञक्रिया तु पश्चादपि-यष्टव्यमिति । यत्रैकेन कार्येणोभयकार्यसिद्धिः सैव युक्तिः समीचीनेति । सा च राजसूयार्थगमनरूपैव । दिग्विजयं विना राजसूयो न स्यात् जरासन्धवधं विना दिग्विजयो नेति । तथा च राजरक्षानिमन्त्रणन्तु तदङ्गसिद्ध्यैव सेत्स्यतीत्येकक्रिया द्व्यर्थकरी भविष्यतीति भावः । उभयाय राजसूयाय शरणागतरक्षणाय चायमुभयार्थः । "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति । 'अर्थेन नित्यसमासो विशेष्यलिङ्गता च' इत्यनुशासनात् ॥३॥ युधिष्ठिरकार्यं सिद्धवत्कृत्वा स्वकार्य्यमभिष्टौति-अस्माकमिति । एतेन जरासन्धवधेन । विमुञ्चतो विमोचयतः, अन्तर्भावितणिजर्थाच्छत्रन्तः ॥४॥ उद्धववाक्यं श्रुत्वा यादवा नोत्कण्ठिता इति चेदत्राह-अत्युत्सुकेत्यादि । ततो जरासन्धात् । इति भाव इति-यद्यपि समबल एव तथापि तं विनेति भीमादेव तस्य मृत्युरिति बृहस्पतेः सकाशादधीतज्योतिरादिशास्त्रेण मयैव पूर्वं विचारितमिति विहितस्य दुर्वार्यत्वेनाल्पबलोऽधिकबलं हन्ति किमुत समबल इति तात्पर्यम् ॥५॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

साचिव्यं यदुक्तं तत्कार्य्यं तत्र हेतुः यक्ष्यतः पैतृष्वस्त्रेयस्येति तच्च तव योग्यत्वमेवेत्याह-देव हे विद्योतमानैश्वर्य्य ! हे विचित्रक्रीडापरेति वा ऋषिणेति तत्रादावृषिवाक्यं परिपाल्यमिति भावः ॥२॥ नन्वेवमपि राजभिः प्रथमनिमन्त्रणात्तेषां मरणसङ्कटापाताच्च तद्रक्षणार्थमेव प्रथमं गन्तुमुचितं यज्ञक्रिया तु पश्चादपि स्यात् तत्राह-यष्टव्यमिति । दिक्चक्रजयोऽस्ति यस्मिन् राजसूये तेन अतो जरासुतस्य राजसूयचिकीर्षुद्वारैव यो जयः स उभयत्राप्यर्थो मतः ननु दुर्घटस्तद्द्वारा तज्जयः तत्राह विभो हे प्रभो त्वत्प्रभावात्सुघट एवेति भावः । जरासुतेति सन्धिस्थानविदारणस्मरणञ्च सूचितम् अतः प्रथमं राजसूयार्थमेव गन्तव्यमिति भावः ॥३॥ न केवलमुभय एवार्थः अपि त्वस्माकं च यादवानामेतेन तज्जयेनैव बलवद्विद्वेषिवधरूपो महानेवार्थो भविष्यति तत्र तच्च राज्ञः कर्मभूतात् बन्धात्सकाशाद्विमुञ्चतस्तव यशस्तदप्यस्माकं महानेवार्थ इति वदन् यादवानपि सर्वान् दृष्ट्वा स्वमन्त्रपक्षपातिनः करोति स्म बद्धान् विमुञ्चतः इति पाठः क्वचित् । हे गोविन्देति भगवत्ताप्रकटनार्थं पृथिव्यामवतीर्णस्य तवैतद्युज्यत एवेति भावः ॥४॥ पाण्डवेष्वपि केन कथं जरासुतो जेतव्य इत्यपेक्षायामाह स इति त्रिभिः । वै प्रसिद्धौ बले तावन्नागायुतसमः तादृशबलिनामप्यन्येषां दुर्विषहः असह्यविक्रमः राजेति महासैन्यसम्पत्तिश्च सूचिता ॥५॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

इत्येवं देवर्षेरुदीरितं किंवा इत्येतत् श्रीभगवदुदीरितमाकर्ण्य देवर्ष्यादीनाञ्च मतम् आ सम्यक् ज्ञात्वा, यतो महामतिः, किं वा सर्व्वेषामेव मतरक्षया प्रहर्षणात् साचिव्यं यदुक्तं तत् कार्य्यम्, तत्र हेतुः-यक्ष्यतः पैतृष्वस्त्रेयस्येति । तच्च तव योग्यमेवेत्याह-देव ! हे विद्योतमानैश्वर्य ! विचित्रक्रीडापरेति वा ऋषिणेति तत्रादावृषिवाक्यं परिपाल्यमिति भावः ॥१-२॥ दिक्चक्रजयिनैव सता राज्ञा, यद्वा, दिक्चक्रजयोऽस्ति यस्मिन् राजसूये तेन । ननु तर्हि दुर्घटोऽयम्, तत्राह-विभो हे प्रभो ! त्वत्प्रभावात् सुघट एवेति भावः । हि एव, उभयार्थ एव, जरासुतेति तस्य जुर्ज्जयत्वं तथा जरया सन्धितदेहस्य तस्य सन्धिस्थानविदारणादेव मरणञ्च सूचितम् ॥३॥ एतेन जरासुतजयेनैव, हि निश्चितम्, अर्थो लाभः, त्वन्महादुष्टनाशेन नैश्चिन्त्यात्, बन्धात् बन्धनात्, विशेषेण स्वभक्तिविस्तारणादिना मुञ्चतः, बद्धानिति पाठे पाठान्तरेऽप्यर्थः स एव चकारौ द्वयोरपि प्राधान्यात् । हे गोविन्देति भगवत्ताप्रकटनार्थं पृथ्व्यामवतीर्णस्य तवैतद् युज्यत एवेति । यद्वा, हे गोकुलेन्द्रेति गोकुलप्रसिद्धात्ममाहात्म्यविशेषानुसारेण त्वयेदं

यवनजयोद्भवं तस्य प्रत्यावृत्तिश्चकारार्थः मोचितेभ्यश्च एतत्सर्वमपि यज्ञार्थवधेनापि भविष्यतीत्याह-एतेनैव भविष्यति। तेन धनेन मोचिताः भक्ताः पोषणीया इति अन्यसम्मेलनाद्यशो न भविष्यतीत्याशङ्क्याह-यशश्च तव गोविन्देति। चकारात् प्रतिज्ञा "अभयं सर्वभूतेभ्यः" इति बन्धाद्विमोचनं तद्वधमात्रेण भवति तत्पुत्रेणापि तत्सम्भवात् अतो विशेषतो मोचनहेतुत्वेनोपदिशति। राज्ञो बन्धादिति। राज्ञा राजशरीराणि आत्मनश्च बन्धादुभयविधात् विशेषतो मोचनं तदेव विमुञ्चतस्तव ॥४॥ ननु, को विशेषः ऋषिरेव वक्तव्यः आवश्यको जरासन्धवधः तं कृत्वा समागमिष्यतीति अस्मिन् पक्षे स्त्रीभिः सह लीलया गमनं बाध्यते मर्यादायामवश्यश्चायं पक्ष इति वक्तुं जरासन्धस्वरूपमाह द्वाभ्यामस वै दुर्विषह इति। केनापि सोढुं न शक्यः यतो राजा क्षत्रियः अनयोर्हि प्रायेण एतदलौकिकं बलं लौकिकमप्याह-नागायुतसम इति। बलविषये अयुतहस्तिसमः एतादृशा अन्येऽपि सन्तीति तद्व्यावृत्त्यर्थमाह-बलिनामपि चान्येषामिति। महाबलिनां सर्वेषामेवायं मिलितानां समः चकाराद्ब्राह्मणादिवरसिद्धमपि तस्य बलं तर्हि मर्यादायामवध्य एवेत्याशङ्क्याह-भीमं समबलं विनेति। भीमोऽप्येतादृशः तथा जयस्तदग्रे वक्ष्यते ॥५॥

सुबोधिनीसारः

हे देव यक्ष्यतो यागं करिष्यतः पैतृष्वस्त्रेयस्यज्ञ युधिष्ठिरस्य साचिव्यं साहाय्यं ऋषिणा नारदेन यदुक्तं तत् त्वया कार्यं शरणार्थिनां रक्षा च कार्या ॥२॥ तत्र प्रथमं राजसूयसाधनमुचितम् इत्याह। हे विभो दिशां चक्रं दिङ्मण्डलं जेतुं शीलं यस्य तेन राज्ञा राजसूयेन यष्टव्यमतः कारणात् जरासुतस्य जय उभयार्थो राजसूयार्थो राजरक्षार्थश्च मम मतः ॥३॥ एतेन यज्ञसम्पादनेनैवास्माकं महानर्थो लाभो भविष्यति भक्तिमार्गप्रचयात् बद्धान् राज्ञो विमुञ्चतस्तव यशश्च भविष्यति हे गोविन्द ॥४॥ तथाप्येवं कर्तव्यमित्याह। स राजा जरासन्धो बले नागायुतसमो हस्तिदशसहस्रतुल्योऽस्ति अन्येऽपि बहवस्तादृशा इति चेत्तत्राह। बलिनामन्येषामपि दुर्विषहः सोढुमशक्यो वै एव समबलं तुल्यवीर्यं भीमं विना एतेन तद्धस्तादेव तन्मृत्युरिति सूचितम् ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह-यदुक्तमिति 'चत्साहाय्येनैवैतद्द्वयं भविष्यति नान्यथा' इति सूचयन् सम्बोधयति-देवेति। देवर्षिणा नारदेन यक्ष्यतः यागं करिष्यतः पैतृष्वस्त्रेयस्य पितृष्वसुः पुत्रस्य युधिष्ठिरस्य साचिव्यं साहाय्यं कर्तव्यमिति यदुक्तं तत्त्वया कार्यम्, तथा शरणार्थिनां राज्ञां रक्षा च त्वया कार्या ॥२॥ तत्प्रकारमाह-यष्टव्यमिति। 'तत्र तवैव सामर्थ्यमस्ति, नान्यस्य' इत्याशयेन सम्बोधयति-विभो इति दिक्चक्रजयिना पुरुषेण राजसूयेन यष्टव्यम्, अतो दिग्विजयप्रसङ्गात् यो जरासुतस्य जयः स उभयार्थः शरणागतरक्षार्थश्च मम सम्मतः ॥३॥ एतेन जरासन्धवधेनैवास्माकमपि महानर्थः निर्भयस्वरूपो भविष्यति। 'अत्र च किञ्चित्तिरोहितं प्रसिद्धत्वात्' इति सूचयति-हीति। 'तव तु निर्भयत्वं सिद्धमेव, वशीकृतकामधेनुत्वात्' इति सूचयन् सम्बोधयति-गोविन्देति। तथापि बद्धान् राज्ञो विमुञ्चतो विमोचयतस्तव यशश्च भविष्यति ॥४॥ 'मम वचनं तव सम्मतं चेत्तर्हि कर्तव्यम्, नो चेन्नोऽस्माकमत्राग्रहः, स्वामित्वात्' इति सूचयन् सम्बोधयति-प्रभो इति। इतो द्वारकातः पूर्वं प्रथममस्माभिरिन्द्रप्रस्थं गन्तव्यं तत्र च तेन युधिष्ठिरेणानुज्ञातः संस्तदर्थं राजसूयार्थं मागधं जरासन्धं जहि घातय। एवं च युधिष्ठिरस्तव महान्तमुपकारं मंस्यते। प्रथमतस्तद्वधे तदुपरि तवोपकारो न स्यादित्याशयः ॥५॥

अन्वितार्थप्रकाशिका

यदुक्तमिति ॥ हे देव ! ऋषिणा नारदेन यक्ष्यतः यागं करिष्यतः पैतृष्वस्त्रेयस्य पितृष्वसुः पुत्रस्य युधिष्ठिरस्य साचिव्यं साहाय्यं कर्तव्यमिति यदुक्तं तत्त्वया कार्यं तथा शरणैषिणां राज्ञां रक्षा च त्वया कार्या ॥२॥ यष्टव्यमिति ॥ हे विभो ! दिक्चक्रजयिना पुरुषेण राजसूयेन यष्टव्यमतो दिग्विजयप्रसङ्गात् यो जरासुतस्य जयः स उभयार्थः राजसूयार्थः शरणागतरक्षार्थश्च मम सम्मतः। तथा हि दिग्विजयं विना न राजसूयसिद्धिः जरासन्धवधं विना न दिग्विजयः। अतः प्रथमं राजसूयनिमन्त्रणमेव ग्राह्यं राजरक्षानिमन्त्रणं तु तदङ्गतयैव सेत्स्यति इति ॥३॥ अस्माकमिति ॥ हे गोविन्द ! एतेन राजसूयनिमन्त्रणाङ्गीकारेणैवास्माकमपि महान् अर्थः जरासन्धवधरूपो भविष्यति तथा बद्धान् राज्ञो विमुञ्चतो विमोचयतस्तव यशश्च भविष्यति ॥४॥ गन्तव्यमिति ॥ प्रक्षिप्तः श्लोकः ॥५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निर्णयमाह। दिक्चक्रजयिना राज्ञा यष्टव्यमतो दिग्जयं विना राजसूयो न स्यात् जरासन्धवधं विना दिग्जयो न स्यात् एवं प्रथमं राजसूयगमनमेवोचितं तेनैवोभयकार्यसिद्धिः एका क्रिया द्व्यर्थकरी प्रसिद्धेति न्यायात् ॥२॥ चक्रं मण्डलम्। उभयार्थः यज्ञाय रक्षणाय च अयमर्थः उभयार्थः। चतुर्थी तदर्थेति-अर्थेन समासो विशेष्यलिङ्गता च इत्यनुशासनात् ॥३॥ एतेनैव यज्ञगमनेनैव महानर्थः जरासन्धवधरूपः यज्ञपूर्तित्वात्। राज्ञो विमुञ्चतः विमोचयतः तव यशोऽपि भविष्यति। अन्तर्भावितण्यन्तात् शतृप्रत्ययः ॥४॥ नागानां गजानामयुतेन समः। भीमं विना अन्येषां बलिनामपि दुर्विषहः। भीमादेव तस्य मृत्युरिति बृहस्पतेः सकाशादधीतज्योतिःशास्त्रेण मयैव स्वयं विचारितं निश्चितं च। अयुतं दशसाहस्रम् ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यदुक्तमृषिणेत्यनेन साचिव्यार्थं प्रथमं गन्तव्यं ततो रक्षाकर्तव्येति द्योतितं तदेवाह-यष्टव्यमित्यष्टभिः। दिक्चक्रजयिना सता युधिष्ठिरेण कर्ता राजसूयेन यष्टव्यम् अतः दिक्चक्रजयिनः सकाशात् जरासुतजयः उभयार्थः राजसूयार्थः शरणागतरक्षार्थश्च तथा हि जरासुतवधं विना दिग्विजयासम्भवाद्राजसूययज्ञः शरणागतरक्षा च न भविष्यतीति ॥३॥ अस्माकं मन्त्रिणाम् एतेनैव कार्यद्वयक्रमाश्रयणेन ॥४-५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एका क्रिया द्व्यर्थकरीति लोकनायकावश्यमनुष्ठेया भवतेति विज्ञापयति॥ यदिति। हे देव ! ऋषिणा नारदेन यक्ष्यतः पितृष्वस्रेयस्य धर्मराजस्य त्वया साचिव्यं साहाय्यं कार्यमिति यदुक्तं तत्कार्यमित्यावृत्त्याऽन्वयः॥ कार्यमिति कार्यति विपरिणतं सच्छरणैषिणां राज्ञां रक्षा च कार्येत्यन्वेति ॥२॥ दिक्चक्रजयिनाऽनेन विना स्यादिदमसाध्यमिति ध्वनयति। दिशां चक्रं मण्डलं तस्य जयोऽस्यास्ति तेन राजसूयेन यष्टव्यम्। राजसूययागः कर्तव्य इति यावत्। अत एतद्धेतोरस्मादिति वा। जरासुतवध उभयार्थो राजसूययागो राज्ञां रक्षणं चेत्युभयप्रयोजनक इति मम मतः ॥३॥ क्षित्यध्यक्षाणां रक्षणेन जरासुतमारणेन च नास्मद्दुःखहानिर्वा सुखमिति नेत्याह॥ अस्माकमिति। एतेन यागेन जरासन्धवधेन वा खलकृतशृङ्खलाबन्धनेन वा महाननर्थो भविष्यति। शत्रुमरणस्य तदुभयरूपत्वात्। राज्ञो जरासुतस्य बन्धाद्राज्ञ एतान् विमुञ्चतो मोचयतस्तव गोविन्द यशो भविष्यति। स एव स्थितश्चेत्तव किमपि नास्माकं कदाचिदेवं भवनं सम्भावितमिति भाषते। महांश्चासावनर्थश्चेति महाननर्थश्च भविष्यति। तदमारणे पुनरेव स किञ्चित्त्वयि परोक्षेणोपद्रवं तनुयाद्दनुज इति भावः। जरासन्धवधे कृत उभयेषां राज्ञां राज्ञो धर्मस्य चेत्येषामुभयोर्वाऽर्थो मे मत इत्यपि योजयन्ति प्राचीनपद्यम् ॥४॥ तत्र मया यदालोच्योच्यतेऽच्युत न तद्विना स मारयितुं शक्य इति तद्बलं लपित्वा स्वमनीषितं भाषते। सर्वा इति। अन्येषां बलिनां स राजा दुर्विषहोऽसुसाध्यहननः। तत्र तन्त्रं बले नागायुत सम इति। तर्हि गर्हितमिदं गमनागमनमित्यतो नेत्याह॥ भीमं समं बलं विनेति।समस्मिन्विषये बलं यस्य स तम्। एतद्धनने समं योग्यं बलं यस् स तमिति वा। भीमसेनबलं विनेति पाठे भीमसेनश्चासौ बलमस्यास्तीति बलश्च तमित्यर्थः। भीमसेनस्य बलं सामर्थ्यं तत्परिवर्तनं गमनमिति यावत्। तद्विना। भीमसेनबलं विनेत्यपि क्वचित्कः पाठः। तत्र बलोऽप्येकः सुशकैतद्धनन इत्युत्प्रेक्षितश्चेदपि नाशरीरगिरा प्रवर्ततेऽत्रेति विना तं त्यक्त्वा भीमसेनं विनेति तत्सुसहतामहोद्धव इति विवृण्वते ॥५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

अतो बहूनामनुग्रहमिति न्यायेन वक्तव्यमिति निश्चित्य पक्षद्वयमनुवदति-यदुक्तमिति। देवेति सम्बोधनं साचिव्यं मन्त्रोपदेशः न तु युद्धेन सहायकरणम् अलौकिकप्रकारस्तु मन्त्रेण वक्तव्यः अतः साचित्वयमेव नारदेनोक्तमनुवदति कर्तुः शास्तुरनुज्ञातुरिति वाक्यात् तथाकरणो धर्मः पैतृष्वस्रेयकार्यकरणं लौकिकं तस्मादत्र लोकवेदविरुद्धौ न भवत इति द्वयं निरूपितं द्वितीयः पक्षः शरणैषिणां रक्षा चकारात् बन्धूनां वाक्यं च तथा सति द्वयोरैक्यं यथा भवति तथा कर्तव्यम् ॥२॥ तत्र यज्ञो मोचने विनियोक्तुमशक्य इति मोचनमेव यज्ञे विनियोक्तव्यमिति आह-यष्टव्यमिति। दिशां चक्रं दश दिशः तत्र जयशीलेन राजसूयः कर्तव्यः अत एव स एव जरासन्धं घातयिष्यति यज्ञार्थं वधे तु न दोषः एवं सति ये दोषास्ते अग्रे परिहर्तव्याः। आदौ यज्ञार्थं तद्वधं स्थापयति अतो जरासुतजय इति तर्हि भक्तिर्माबाधित एवेत्याङ्क्याह-युक्तश्चायं नारदादेः कोपाभावात् ॥३॥ अस्मिन् पक्षे दोषान् परिहरति-अस्माकञ्चेति सार्द्धाभ्याम्। पराक्रमेण जरासन्धवधे तद्धनमर्माभिः प्राप्तव्यं यज्ञार्थवधपक्षे तु तस्याभावः पूर्वं भगवद्धनञ्च तेनापहृतं

श्रीधरस्वामिकृता भावार्थदीपिका

ननु, स्वबलसाम्येऽपि सेनाबलं तस्याधिकमिति चेदत आह- द्वैरथ इति । द्वन्द्वयुद्धे शतेनाक्षौहिणीभिर्युतो मागधो मा न जेतव्य इत्यर्थः । नन्वसौ स्वसैन्यमेव युद्धाय नियुञ्जीत कुतस्तेन द्वैरथमिति तत्राह ब्रह्मण्य इति । न प्रत्याख्याति न निराकरोति ॥६॥ भिक्षेत द्वन्द्वयुद्धं याचताम् तथापि समबलत्वात्साम्यमेव स्यादत आह-तव सन्निधाविति ॥७॥ नन्वकिञ्चित्कुर्वतो मम सन्निधानात्किं स्यादत आह-निमित्तमिति । अयमर्थः यथा तवारूपस्य कालात्मनो विश्वसर्गे निमित्तं केवलं हिरण्यगर्भस्तथा शर्वश्च तन्निरोधे तथात्र त्वमेव सन्निधिमात्रेण हन्ता भीमो निमित्तमात्रमिति ॥८॥ अतोऽनेनोपायेन त्वया स शीघ्रं हन्तव्य इत्याशयेनाऽऽह-गायन्तीति । जरासन्धधृतानां राज्ञां देव्यः पत्न्यस्ते विशदं कर्म स्वगृहेषु बालकलालनादौ गायन्ति, किं तत्कर्म ? स्वशत्रोर्जरासन्धस्य वधमात्मनां पतीनां विमोक्षणञ्च वत्स ! मारोदीः श्रीकृष्ण एवं करिष्यतीति अत्र दृष्टान्ताः गोप्यश्च इत्यादयः यथा गोप्यः शङ्खचूडवधं स्वमोक्षञ्च गायन्ति अवतारान्तरगतं कुञ्जरपतेर्नक्रात् जनकात्मजायाश्च रावणात् पित्रोश्च कंसगृहान्मोक्षम् अत एवम्भूतानां तासां कृपया त्वया तथैव कर्तव्यमिति भावः ॥९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनस्साम्याशङ्कां वारयन्समाधत्ते-नन्वित्यादिना । तस्य जरासन्धस्य । स जरासन्धः । इत्यर्थ इति-महादेवप्रसादादिति भावः । पुनराशङ्क्य समाधत्ते-नन्वित्यादिना । द्वयो रथयो रथिनोरिदं द्वैरथं द्वन्द्वयुद्धमित्यर्थः ॥६॥ तं जरासन्धम् । वृकस्तत्संज्ञोऽग्निरुदरे यस्य स वृकोदरो भीमः । "वृको नाम हि यो वह्निः स सदा उदरे मम । अतिवेलं यदाश्नामि तदा स उपशाम्यति ॥" इति ब्रह्मवैवर्ते व्यासं प्रति भीमोक्तेः । भारतेऽपि "तीक्ष्णश्चैव प्रचण्डश्च वृको नामानलो मतः । स पाण्डवस्य जठरे तेन भीमो वृकोदरः ॥" इति । यद्वा-वृकवत्कृशमुदरं यस्येति बलिष्ठता सूचिता । बलिष्ठानां हि सिंहादीनां कृशमध्यत्वमस्तीति भावः । अतिवेलमतिक्रान्तमर्यादमित्यर्थः । पुनराशङ्क्य समाधत्ते-तथापीत्यादिना । स एव जेष्यति किं मया तत्र गमनेनेति तत्राह-तवेति । तव सन्निधिं विना तु द्वैरथेऽपि हन्तुं स न प्रभविष्यतीति भावः ॥७॥ भगवानाशङ्कते-नन्विति । तात्पर्यमाह-अयमर्थ इति । तन्निरोधे विश्वसंहारे ॥८॥ यतस्त्वमेव हर्ताऽतो हेतोः । अनेन युद्धयाच्ञारूपेण । स जरासन्धः । करुणाकरो दयासमुद्रः । एवं करिष्यति तं मारयित्वा तव पितरं मोचयिष्यतीत्यर्थः । कथं गायन्तीत्यत्र लुप्तोपमयाह-अत्रेति । अत्र गायने । अवतारान्तरगतं कर्मेत्यर्थः । यतो गायन्त्यतो हेतोः । एवं भूतानां त्वत्कर्म गायतीनाम् । तासां राजदेवीनामित्यर्थः । यद्वा-गोप्यश्चेत्यत्र चशब्दः एवोपमार्थको निपातानामनेकार्थत्वात् । यद्वा-लब्धशरणा भक्तजनाः । कुञ्जरपतेरात्मनो देहस्य विमोक्षणं स्वशत्रूणां कामादीनां वधं च मुनयो वाल्मीक्यादयो जनकात्मजाया विमोक्षणं स्वशत्रुवधमिति पूर्ववत् । वयं च यदवः पित्रोर्देवकीवसुदेवयोर्विमोक्षणं च यथा गायामस्तथा गायन्तीत्यर्थः । अत्र विश्वनाथः-दुष्टनिग्रहशिष्टपालनात्मकं तव यशो यद्यपि सद्भिर्गीयमानं पूर्वसिद्धमेवास्ति तदपि जरासन्धे हतेऽधुना विपुलीभविष्यतीत्याह-गायन्तीति । जरासन्धबद्धराज्ञां देव्यः सर्वज्ञश्रीनारदादिप्रबोधिता भाविनमपि जरासन्धवधमात्मनां पतीनां विमोक्षणञ्च हे वत्स मा रोदीः श्रीकृष्णो जरासन्धं हत्वा तव पितरं मोचयिष्यतीति गायन्ति । अत्र गोप्यादयो दृष्टान्ताः । यथा - गोप्यः शङ्खचूडवधं तन्निरोधादात्मविमोक्षणं परस्परसान्त्वनादौ गायन्ति, भोः सख्यः समाश्वसित रुदित्वारुदित्वा मा प्राणांस्त्यक्तुमुपक्रमध्वम् यः खलु तादृशशङ्खचूडमहाव्याघ्रग्रासादरक्षीत्स एव कृपासिन्धुः स्वयमेव स्मृत्वा स्वविरहमहाविपत्कालसर्पदंशादपि रक्षिष्यतीति । तेन जरासन्धं हत्वा ता देव्यस्तत्पतिभिः सङ्गतीकृत्य त्वया यथा रक्षणीयास्तथैव राजसूयादि कृत्यं समाप्य तत आगमनसमये निभृतं व्रजं गत्वा ता गोप्योऽपि स्वसङ्गतीकृत्य त्वया रक्षणीयास्ततश्चास्मदादयोऽपि तत्ते यशो गायाम इत्यवसरप्राप्तस्वाभीप्सितमन्त्रणार्पणं ध्वनितम् । किञ्च-यथा देव्यो गोप्यश्च गायन्ति तथा लब्धशरणा मुनय आत्मारामभक्ता वयं दासभक्ताश्च स्वसुहृदाश्वासनादौ गायामः । किं तत् । कुञ्जरपतेः स्वशत्रोर्नक्रस्य वधं तस्मादात्मविमोक्षणं च । जनकात्मजायाः स्वशत्रो रावणस्या वधं पित्रोश्च स्वशत्रोः कंसस्य वधं तस्मात्तस्मादात्मविमोक्षणं चेति । भोस्तपोधना मा विषीदथ यथा नक्रादिभ्यो गजेन्द्रादीनुद्धार तथैवास्मानपि संसारादुद्धरिष्यतीति । भो भो वयस्या भाविकभक्ता यथैवोद्धृता गजेन्द्रादिभ्यः स्वसामीप्यदानेन स्वाभीष्टसेवामदात्तथैवास्मभ्यमपि दास्यतीति । अथास्य मन्त्रशास्त्रेऽनुष्ठानमपि लिखितं, तच्चेत्थम्-आचमनप्राणायामपूर्वकं सङ्कल्प्य गणेशादीन्सम्पूज्य ओमस्य गायन्तीतिश्लोकात्मकमन्त्रस्य श्रीवेदव्यास ऋषिः । श्रीकृष्णः परमात्मा देवता । जगती छन्दः । सर्वकार्यसिद्ध्यर्थे जपे विनियोगः ॥ गायन्ति ते विशदकर्मेत्यंगुष्ठाभ्यां नमः । गृहेषु देव्यो राज्ञां

यक्ष्यत: राजसूययज्ञं करिष्यत: पार्थस्य यत् साचिव्यं साहाय्यम् ।। तच्चत्वया कार्यं शरणैषिणां राज्ञां रक्षणं च ।।२।। तदुपायमाहाष्टभि: यष्टव्यमिति । दिशां चक्रस्य समूहस्य जयो यस्मिन् तेन यज्ञेन यद्वा दिक्चक्रजयिना राज्ञा । अतो दिग्विजये राजजयाज्जरासुतजय: तेन च राजरक्षणं पार्थयज्ञश्च भवति । एवम् उभयार्थो मम मत: अत एवादौ इन्द्रप्रस्थं गन्तव्यमिति भाव: ।।३।। एतेन राजसूयगमनेन महानर्थ: प्रबलशत्रुवधरूप: ।।४।। जरासन्धवधं प्रशंसन्नाह–स इति भीमं विना अन्येषां दुर्विषह: योद्धुमशक्य: भीमादेव तस्य मरणमिति भाव: ।।५।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह दशभि: ।। यदिति ।। हे देव ! हे कृष्ण, त्वया यक्ष्यत:, पैतृष्वस्रेयस्य, साचिव्यं साहाय्यं, ऋषिणा देवर्षिणा नारदेन, यत् उक्तं तदपि, कार्यम् एव । शरणैषिणां शरणार्थिनां राज्ञां, रक्षा च, कर्तव्या ।।२।। तत्र तावद्राजसूयार्थं प्रथमं गन्तव्यं ततो रक्षा च कर्तव्येत्याह यष्यव्यमित्यादिभि: ।। यष्टव्यमिति ।। हे विमो, युधिष्ठिरेण, दिक्चक्रजयिना, राजसूयेन, यष्टव्यं, आदौ दिङ्मण्डलं जित्वा, ततो राजसूययागो विधेय: दिगविजयो भवता विनाऽसम्भाव्य इति भाव: । तत:, अस्माभि: पूर्वम् इत: शकाशात्, इन्द्रप्रस्थं प्रति, गन्तव्यम् ।।३।। तत्रेति ।। तत्रेन्द्रप्रस्थ एव, तेन युधिष्ठिरेण, अनुज्ञात: सन्, तदर्थं युधिष्ठिरप्रयोजनाय, मागधं जरासन्धं, जहि घातय । अतो दिग्विजयहेतो:, जरासुतजय:, मम मया, उभयार्थ: राजसूयार्थ: शरणागतरक्षार्थश्चेति, मत: ।।४।। अस्माकमिति ।। एतेन राजसूयार्थगमनेन एव, अस्माकं चापि, महान् अर्थ:, सर्वोऽपि सिसाधयिषितोऽर्थ इत्यर्थ: ।। भविष्यति हि । हे गोविन्द, एवं बद्धान् राज्ञ:, विमुञ्चत: मोचयत:, तव, यशश्च भविष्यति ।।५।।

कृष्णप्रिया

उद्धवजी बोले – हे देव ! अप की बूआ के पुत्र राजा युधिष्ठिर यज्ञ करेंगे उस की सहायता आपको अवश्य करनी चाहिए, यह जो नारदजी ने कहा और अपनी रक्षा करने वारी की वांछा करने के बारे में राजाओं की रक्षा भी आप को अवश्य हि करनी चाहिए ।।२।। हे विभो ! सब दिशाओं को जीतने वाला पुरुष राजसूय यज्ञ कर सकता है, इसलिये प्रथम जरासन्ध का जीतना राजसूय यज्ञ का औ राजाओं की रक्षा का कारण है यह मेरा सम्मत है ।।३।। हे गोविन्द ! राजसूय यज्ञ के निमन्त्रण का अंगीकार करने से हि हम को महान् प्रयोजन होवैगा ।। क्यौं कि जरासन्ध के बांधे हुए राजाओं को बन्दीखाने से छुडाने वाले आप महान् यश को प्राप्त करेंगे ।।४।। इसीलिये पहेले यहां से हम को इन्द्रप्रस्थ चलना चाहिए ।। इन्द्रप्रस्थमें हि राजा युधिष्ठिर से अनुमति को प्राप्त होकर आप उन के अर्थ, जरासन्ध को मारना चाहिए ।।५।।

द्वैरथे [१]स तु जेतव्यो [२]मा शताक्षौहिणीयुत: । ब्रह्मण्योऽभ्यर्थितो विप्रैर्न प्रत्याख्याति कर्हिचित् ।।६।।
ब्रह्मवेषधरो [३]गत्वा तं भिक्षेत वृकोदर: । हनिष्यति न सन्देहो [४]द्वैरथे तव सन्निधौ ।।७।।
निमित्तं [५]परमीशस्य विश्वसर्गनिरोधयो: । हिरण्यगर्भ: शर्वश्च [६]कालस्यारूपिणस्तव ।।८।।
गायन्ति ते विशदकर्मगृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च ।
गोप्यश्च कुञ्जरपतेर्जनकात्मजाया: पित्रोश्च लब्धशरणा मुनयो वयं च ।।९।।

कर्दमक्षमा

अन्वय: – द्वैरथे, शताक्षौहिणीयुत:, अभ्यर्थित:, ब्रह्मण्य:, तु, स, मा, जेतव्य, विप्रै: न प्रत्याख्याति कर्हिचित् ।।६।। ब्रह्मवेषधर: वृकोदर: तं गत्वा भिक्षेत तवसन्निधौ द्वैरथे हनिष्यति सन्देह: न ।।७।। विश्वसर्गनिरोधयो:हिरण्यगर्भ: शर्वश्च कालस्य अरूपिण: तव ईशस्य निमित्तं परम् ।।८।। राज्ञां विशदकर्मगृहेषु देव्यो गोप्यश्च स्वशत्रुवधमात्मविमोक्षणं च । वयं कुञ्जरपते: जनकात्मजाया: पित्रोश्च लब्धशरणा मुनय: ते च गायन्ति ।।९।।

---

१. द्वैरथेन तु–वीर. । २. न तथाऽक्षौहिणीशतै:–वीर. ; न शताक्षौहिणीयुत:–विज. । ३. भूत्वा–विज. । ४. द्वैरथं–वीर. । ५. निमित्तं परमीशस्त्वं–वीर. ; निमित्तमात्रमीशस्य–विज. । ६. कालाख्यारूपिण–विज. ।

कृशमध्यत्वात् तत्रापि च त्वत्सान्निध्यप्रभावात् हस्तैवेत्याह-तवेति । कालत्वादेवारूपिणोऽव्यक्तस्य, विश्वसर्गादौ कालस्यैव मुख्यनिमित्तत्वात् । तत्त्वतः स त्वयैव सृज्यत इति, तथा अरूपित्वात् केनापि तद्बोदद्धधुं न शक्यत इति भावः । तच्च युक्तमेवेत्याह-ईश्वरस्येति । तथापि हिरण्यगर्भ-शर्व्वयोर्माहात्म्यार्थं यथा त्वया तत् क्रियते, तथात्रापि भीमसेनयशःप्रदानार्थमेवं कार्य्यमिति भावः ॥७-८॥ एवं स्वयशोवितान-निमित्तमवश्यमसौ शीघ्रं हन्तव्य इत्याशयेनाह-गायन्तीति । गोप्यः स्वशत्रोर्वधमात्मविमोक्षणञ्च तथा मुनयो वयञ्च कुञ्जरपतेर्गजेन्द्रस्य मोक्षणं तच्छत्रोर्नक्रस्य वधं जनकात्मजाया मोक्षणं शत्रो रावणस्य वधं पित्रोर्मोक्षणं शत्रोः कंसस्य वधञ्च, मुनयो मुक्ताः । तेषां तत्तद्गाने हेतुः-लब्धशरणाः, त्वद्विशदकर्म्मश्रवणादेव त्वत्प्रपन्ना इत्यर्थः । वयं भक्ताः, यद्वा, गोप्यस्तु चतुष्टयमेव गायन्ति, अतः श्रीगोपीनां पूर्व्वं यथा शङ्खचूडं हत्वा तस्माद्वयं विमोक्षिताः, यथा च पूर्व्वतरावतारद्वये गजेन्द्रः श्रीसीता च, अधुनापि पितरौ तथा विरहमहाव्याधिं हत्वा ततोऽस्मान्मोचयेत्यभिप्रायेण तदेकासक्त्या गानम्, मुनीनां मोक्षादप्यानन्देन, भक्तानाञ्च तदेकगतित्वेन । एवं गोप्यादीनां यथापूर्व्वं गाने श्रैष्ठ्यम्, तत्र भक्तेभ्यो मुनीनां तद्भक्तप्रवरस्य तस्य विनयभरेणाहत्य परिहारार्थोक्तेः । अन्यत्तैर्व्याख्यातम्; एतदर्थमपीति लेख्ये - अतोऽनेनोपायेनेति लेखकभ्रमादिति । अथवा गायन्ति गास्यन्ति, सामीप्ये वर्तमानम्, च-काराच्छ्रीदामादयो गोपाः, यथा गोप्यादयो वयं कुञ्जरपत्यादीनां शत्रुवधं विमोक्षणं च गायामस्तथेत्यर्थः । यद्वा, स्वशत्रोर्भौमस्य वधं तन्निरोधादात्ममोक्षणञ्च यथा देव्यः श्रीमहिष्यः, यथा च शङ्खचूडादेर्वधं तत आत्मविमोक्षणञ्च गोप्यो गायन्ति, तथा राज्ञां स्वशत्रुवधं स्वकीयशत्रुर्जरासन्धस्तद्वधम्, तेषामेवात्मनां विमोक्षणञ्च, कुञ्जरपत्यादीनामिव तद्गास्यन्तीत्यर्थः । एतदर्थमसौ प्राक् शीघ्रं हन्तव्य इति भावः ॥९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भिक्षेत द्वन्द्वयुद्धमिति शेषः ॥७॥ कालस्य कालात्मनः तव सर्गनिरोधयोः तत्तत्कर्तृकयोः सर्गसंहारयोः हिरण्यगर्भः शर्वश्च निमित्तमात्रमित्यर्थः ॥८॥ राज्ञां देव्यः राजस्त्रियः गायन्तति प्रत्यासत्त्या वर्त्तमाननिर्देशः आत्मविमोक्षणं स्वभर्तृभयनिवृत्त्या स्वतो भयनिवर्तनम् ॥९-१३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

किञ्च द्वैरथेन द्वन्द्वयुद्धेनैव स तु जेतव्यः न तथाऽक्षौहिणीनां शतैरपि नन्वपरिमितसैन्यपरिवृतेन सह भीमस्य कथं द्वन्द्वयुद्धं भविष्यतीत्यत आह- ब्रह्मण्य इति । सत्वित्यनुषज्यते स जरासन्धः ब्रह्मण्यः अतो विप्रैर्याचितो न प्रत्याख्याति ॥६॥ ततः किमत आह-ब्रह्मवेषधर इति । ब्रह्मवेषधरः वृकोदरो भीमो विप्रवेषं दधत् गत्वा तं जरासुतं प्रति भिक्षेत द्वन्द्वयुद्धमिति शेषः । ततोऽपि किमत आह-हनिष्यतीति । द्वैरब्धं द्वन्द्वयोधिनं मागधं हनिष्यति सोऽप्यतिबलःततः किमत आह-ब्रह्मवेषधर इति । ब्रह्मवेषधरः वृकोदरो भीमो विप्रवेषं दधत् गत्वा तं जरासुतं प्रति भिक्षेत द्वन्द्वयुद्धमिति शेषः । ततोऽपि किमत आह-हनिष्यतीति । द्वैरब्धं द्वन्द्वयोधिनं मागधं हनिष्यति सोऽप्यतिबलः तं कथं भीम एव हनिष्यतीत्यत उक्तं तव सन्निधाविति । तव सान्निध्यप्रभावादेव हनिष्यति न तु स्वबलप्रभावादिति भावः ॥७॥ नन्वकिञ्चित्कुर्वतो मम सन्निधिना किं स्यादत आह-निमित्तमिति । विश्वस्य सर्गनिरोधयोः उत्पत्तिप्रलययोस्त्वं परं निमित्तमादिकारणम् अतो भीमरूपेण त्वमेव हनिष्यसीति भावः । यद्यहं परं निमित्तं किं तर्ह्यवान्तरं निमित्तमत आह-हिरण्यगर्भ इति । कालस्य कालशरीरकस्यारूपिणः प्राकृतरूपरहितस्य सर्वस्त्रष्टुः सर्वसंहस्तुश्च तव हिरण्यगर्भो ब्रह्मा शर्वः भवश्च तवेत्यंशांशिभावसम्बन्धे षष्ठी विश्वसर्गनिरोधयोरवान्तरकारणमिति शेषः ॥८॥ कोऽसौ तद्वधादस्माकं लाभस्तत्राह गायन्तीति । राज्ञां मागधरुद्धानां देव्यः पत्न्यः स्वगृहेषु बालकलालनादौ स्वशत्रोः जरासन्धस्य वधम् आत्मनामात्मवज्जीवनहेतुभूतानां पतीनां विमोक्षणं चेत्येवम्विधं तव विशदं निर्मलं कर्म चेष्टितं गायन्ति गास्यन्ति, तत्र दृष्टान्तमाह-गोप्यश्चेति । अस्य यथेत्यादिः यथा गोप्यः शङ्खचूडवधं स्वमोक्षणञ्च गायन्ति यथाचावतारान्तरगतं नक्रात्कुञ्जरपतेर्गजेन्द्रस्य विमोक्षणं यथा च पित्रोर्देवकीवसुदेवयोः कंसाद्विमोक्षणं लब्धशरणाः प्रपन्नाः मुनयोऽस्मदादयश्च गायन्ति तद्वदित्यर्थः ॥९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

द्वैरथे द्वन्द्वयुद्धे तत्रोपायमाह-ब्रह्मण्य इति ॥६॥

"तीक्ष्णश्चैव प्रचण्डश्च वृको नामाऽनलो मतः । स पाण्डवस्य जठरे तेन भीमो वृकोदरः ॥" इति ।

स्वशत्रुवधमिति तर्जनीभ्यां नमः। आत्मविमोक्षणं चेति मध्यमाभ्यां नमः। गोप्यश्च कुञ्जरपतेरित्यनामिकाभ्यां नमः। जनकात्मजायाः पित्रोश्च लब्धशरणा मुनयो वयं चेति कनिष्ठिकाभ्यां नमः। सम्पूर्णमन्त्रेण करतलकरपृष्ठाभ्यां नमः॥ एवं हृदयादिन्यासः॥ अथ ध्यानम्— "ध्यायेद्धरिन्मणिनिभं जगदेवकन्द्यं सौन्दर्यशार्ङ्गमरिशङ्खगदाम्बुजानि। दोर्भिर्दधानमजितं सुनसं सुभूषं सत्यासमेतमखिलप्रदमिन्दिरेशम्॥" ॐ नमो भगवते जरासन्धघातकाय क्लीं क्रों अमुकमाकर्षयाकर्षय ॐ क्लीं कृष्णायाकर्षयाकर्षय स्वाहा॥ इमं मन्त्रमादौ पठित्वा तदनु ॐ गायन्तीति श्लोकं पठेत्। इत्थमष्टोत्तरशतं प्रतिदिनं जपित्वा षड्भिर्मासैरनृणो भवेत् बद्धं च मोचयेत् स्वविमुखं स्वनिघ्नं कुर्यादन्यदप्यभीष्टं लभेत्। घृताक्तलाजैर्जपदशांशं जुहुयात्। सिद्धार्थजातीकुसुमाम्बुजातबिल्वैश्च जुहुयात्। एकविंशतिदिनैरतिकुपितं विप्रं चतुर्दशभिः क्षत्रियं दशभिर्वैश्यं त्रिभिः शूद्रं चाकर्षयेत्। मासेनैकेन देवमप्याकर्षयेत्। पञ्चाधिकत्रिशतोत्तरलक्षजपश्चास्य पुरश्चरणम्॥ ब्राह्मणद्वारा करणे सङ्कल्पवाक्यम्-अद्यामुकगोत्रस्यामुकवर्मणो देशाधिपतेर्वा परचक्रागतदेशोपद्रवजनितजनिष्यमाणसर्वारिष्टनिवृत्तिपूर्वकं देशस्वास्थ्यार्थं सपरिवारस्यात्मनः क्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्ध्यर्थं जरासन्धबद्धराजकृतस्वविमोक्षणविज्ञप्त्यनन्तरश्रीमदुद्धवोक्तवाक्यरूप-श्रीमद्भागवतोक्तगायन्तीति श्लोकामन्त्रस्य सपादलक्षजपं ब्राह्मणद्वारा कारयिष्ये तदङ्गतया ब्राह्मणवरणं च यथोक्तद्रव्यैरहं करिष्य इत्यलम्॥९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

द्वैरथ इत्यर्द्धकम्। तु एव द्वैरथे स एवैको जेतव्यः शताक्षौहिणीयुतस्तु नार्हः स्वपक्षे तस्य राजवृन्दघातनात् राजसूयसम्पद्विनाशात्॥६॥ ब्रह्मण्य इति सार्द्धकम्। तत्र तत्सोपानमाहैकेन ब्रह्मण्य इति भवद्भवदीयविद्वेषनिश्चित-रजस्तमःस्वभावत्वात्प्रतिष्ठकाम एवात्मानं तथा ख्यापितवानित्यर्थः। तस्मात्साक्षाद्भूय भवद्भिरभ्यर्थितो द्वैरथं कर्हिचित्प्रत्याख्यायात् विप्रैस्तदाकारैस्त्वभ्यर्थितः कर्हिचिन्न प्रत्याख्याति अङ्गीकुर्य्यादेवेत्यर्थः। यस्मादेवं तस्माद्ब्रह्मवेषेति वृकस्येव कृशमुदरं यस्येति बलिष्ठता सूचिता बलिष्ठानां हि सिंहादीनां कृशमध्यत्वं समबलत्वेऽपि जयकारणमाह-जयेऽपि हननमप्याह-हनिष्यतीति॥७॥ तव यः कालस्तद्रूपा शक्तिः तस्य निमित्तमात्रं द्वारीकृतमात्रं कालस्यैव विशेषणम् अरूपिणः इति सर्वसम्पादकस्यापि चेष्टाभिरलक्ष्यमाणस्येत्यर्थः। तादृशशक्तित्वञ्च युक्तमेवेत्याह-ईशस्य ईश्वरस्येति हिरण्यगर्भशर्वयोर्माहात्म्यार्थं यथा त्वया तत्क्रियते तथात्रापि भीमसेनयशःप्रदानार्थमप्येवं कार्य्यमिति भावः॥८॥ तथा स्वैकशरणानां स्वैकाशाजीवनानां तादृशदुःखहान्यर्थमपीत्याह-गायन्तीति। सर्वलोकास्तावत् दुष्टहननभक्तरक्षात्मकं ते विशदं कर्म गायन्ति तत्र प्रस्तुतमवधीयतामित्याह-गृहेष्विति। गृहेष्वेव स्थित्वा त्वामुद्दिश्य सदैन्यप्रार्थनया देव्यो राज्यो राज्ञां जरासन्धहतकरुद्धानां भाविनमपि स्वशत्रुवधमात्मविमोक्षणं च गायन्ति तत्र दृष्टान्तमिव कुर्वन् निजाभीष्टविशेषमपि विज्ञापयति-गोप्यश्च स्वशत्रुवधादिकं भूतमपि साम्प्रतं भवद्विरहरूपमहाशत्रुवित्रोटनाय गायन्ति अथ तद्रूपरक्षामेव द्रढयितुमाह-कुञ्जरपतेरिति। लब्धशरणाः मोक्षेच्छया शरणमागताः मुनयो मुक्ताः वयञ्च भक्ताः कुञ्जरपतेर्गजेन्द्रस्य मोक्षणं तच्छत्रोर्नक्रस्य वधं जनकात्मजायाः मोक्षणं शत्रो रावणस्य वधं पित्रोर्मोक्षणं शत्रोः कंसस्य वधञ्च गायामः न तु देवीनां गोपीनामपीत्यर्थः। तासां तत्तदभीष्टस्याद्याप्यसिद्धत्वादिति भावः। तदेवं तत्र तत्र तस्यौत्सुक्यवर्द्धनतात्पर्य्यकं ज्ञेयं तत्र मुक्तानां तत्तद्गुणपरिनिष्ठितोऽपि नैर्गुण्य इति दर्शनात्तद्यशोमाहात्म्येनैव तथा भक्तानाञ्च अत्र पाण्डवा अपि प्रवेशिताः तस्मात्प्रस्तुतेऽपि सर्व एव निजाश्रिता रक्षणीया इति सर्वसमञ्जसमेव कार्य्यमिति भावः। अत्र गोपीनां परमान्तरङ्गत्वेनोत्तरोत्तरश्रेष्ठ्यविवक्षया सर्वान्तपाठे योग्येऽपि स्त्रीजातिप्रसङ्गात् तत्स्मरणेनात्यौत्सुक्यात् मध्यत एवोक्तिः आसाञ्च अकस्मात्प्रस्तावः श्रीमद्व्रजादागमनमारभ्य प्रायेणालब्धावसरतया केनापि मिषेण मध्ये मध्ये तत्स्मारणार्थं तथा सर्वं हन्त सर्वरक्षार्थं मद्विधेन मन्त्रयसि ता एव वा कथं न स्मरसि इत्युपालम्भनप्रायार्थञ्चेति ज्ञेयं यदेव किल मनसि कृत्वा राजसूयादिसम्बन्धपरम्पराप्राप्तदन्तवक्त्रवधान्तकार्य्यं समाप्य श्रीभगवान् स्वयमेव श्रीमद्व्रजं गमिष्यतीत्येतदप्युदाहरिष्यामः किन्तु महासभायां तासां प्रस्तावो गोपीसामान्यतया श्रीमद्व्रजेश्वर्य्यादीनामेव सभ्येषु भानान्न दोषायेति ज्ञेयम्॥९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यत्किञ्चिदभ्यर्थितः सन् प्रत्याख्याति, यतो ब्रह्मण्यः, अन्यत्तैर्व्याख्यातम्। यद्वा, शताक्षौहिणीयुतः स मा जेतव्यः किम्? काक्वा, अपि तु जेतव्य एवेत्यर्थः। कथम्? द्वैरथे॥६॥ वृकस्येव कृशमुदरं यस्येति बलिष्ठता सूचिता, बलिष्ठानां हि सिंहादीनां

स्मृत्वा स्वविरहमहाविपत्कालसर्पदंशादपि रक्षिष्यतीति तेन जरासन्धं हत्वा ता देव्यस्तत्पतिभिः सङ्गतीकृत्य त्वया यथा रक्षणीयाः ततश्चास्मदादयोऽपि तत्ते यशो गायाम इत्यवसरप्राप्तस्वाभीप्सितमन्त्रणार्पणं ध्वनितं किञ्च यथा देव्यो गोप्यश्च गायन्ति तथा लब्धशरणा मुनयः आत्मारामभक्ता वयं दासभक्ताश्च स्वहृदस्वदनादौ गायामः किं तत् कुञ्जरपतेः स्वशत्रोः नक्रस्य वधं तस्मादात्मविमोक्षणञ्च जनकात्मजायाः स्वशत्रोः रावणस्य वधं पित्रोश्च स्वशत्रोः कंसस्य वधं तस्मात्तस्मादात्मविमोक्षणं चेति भोस्तपोधनाः ! मा विषीदथ यथा नक्रादिभ्यो गजेन्द्रादीनुद्धारतथैवास्मानपि संसारदुद्धरिष्यतीति भो भो वयस्याः भावकभक्ता यथैवोद्धृत्य गजेन्द्रादिभ्यः स्वसामीप्यदानेन स्वाभीष्टसेवामदात्तथैवास्मभ्यमपि दास्यतीति ॥९॥

गूढार्थदीपिनी

स तु जरासन्धः । द्वयोः रथयोः रथिनोरिदं युद्धं द्वैरथं द्वन्द्वयुद्धमित्यर्थः । न प्रत्याख्याति न निराकरोति ॥६॥ वृकोदरो भीमः । तं प्रति गत्वा भिक्षेत द्वन्द्वयुद्धमिति शेषः । वृकस्तत्संज्ञकोऽग्निः उदरे यस्य । वृकवत् कृशमुदरं यस्येति वा बलिष्ठता सूचिता ॥७॥ यथा विश्वस्य सृष्टिसंहारयोः ब्रह्मा शिवश्च परं केवलं निमित्तं कर्तृत्वं तु कालरूपस्य ईशस्य तवैव तथाऽत्रापि भोमो निमित्तमात्रं हन्ता तु त्वमेव ॥८॥ निगृहीतानां राज्ञां पत्न्यः ते विशदं विमलं निर्मलं यशः गायन्ति शिशुलालनपालनादौ । किं कर्म जरासन्धवधम् आत्मनां पतीनां मोक्षणं च । अत्र गोप्यश्चेति चकारात् चत्वारो दृष्टान्ताः । गोप्यो यथा शङ्खचूडवधं स्वमोक्षणं च । कुञ्जरपतेः गजेन्द्रस्य नक्रात् मोक्षणं तद्वधं च । सीताया मोक्षणं रावणवधं च । पित्रोः देवकीवसुदेवयोः मोक्षणं कंसवधं च । मुनयः तथा लब्धशरणा वयमपि गायामः गास्याम इत्यर्थः ॥९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

शताक्षौहिणीयुतो मा न जेतव्यः ॥६॥ भिक्षेत द्वैरथमिति शेषः ॥७॥ तव सन्निधिमात्रतः समबलत्वेऽपि वृकोदरो हनिष्यत्येवेत्युक्तमथ वृकोदरो निमित्तमात्रं भवानेव मुख्यो हन्तेत्याशयेनाऽऽह-निमित्तमिति । ईशस्य अखण्डैश्वर्यस्य अरूपिणः रूप्यते सृजते इति रूप्यं प्राकृतं शरीरं तद्रहितस्य सृष्टिसंहाररहितस्येत्यर्थः । कालस्य "ज्ञः कालकालः" इति श्रुतेः । कालकालस्य तव विश्वस्य सर्गनिरोधयोः अवान्तरसृष्टिसंहारयोः सृष्टौ हिरण्यगर्भः संहारे शर्वः निमित्तम् तथा जरासन्धवधे वृकोदरो निमित्तस्त्वं मुख्यस्तद्धन्तेति भावः ॥८॥ किञ्च गोप्यो मुनयः वयं यादवाश्च अनिष्टनाशपूर्वकेष्टसिद्धये यथा लब्धशरणाः तथा लब्धशरणाः श्रीकृष्णो मागधं हत्वाऽस्मत्पतीन्मोचयिष्यतीति त्वां शरणीकृत्येत्यर्थः । राज्ञां देव्यः पत्न्यः कुञ्जरपतेः जनकात्मजायाः पित्रोर्देवकीवसुदेवयोश्च आत्मविमोक्षणं चकारात्तच्छत्रुवधं स्वशत्रुवधरूपबकादिवधञ्च ते स्वपतिविमोक्षणसम्भावनार्थं विशदं कर्म गायन्तीत्यन्वयः ॥९॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स तु जरासुतेऽपि द्वैरथे द्यदवन्द्वयुद्ध एव जेतव्यः शक्यो जेतुं न तु शताक्षौहिणीयुतः । युङ्क्ते पुरत इति शब्दश्रुदितिवत्कर्तरिक्विबन्तः । शताक्षौहितीयुतः सकाशादपि न जेतुं शक्यः । बह्वक्षौहिणीयुतो न जेतव्य इति वा । ननु सदा ससेनः कथं तां त्यक्त्वोपयातः स्यादित्यत आह ॥ ब्रह्मण्य इति । ब्रह्मणे साधुरिति स तथा । ब्रह्मिष्ठो विप्रैरभ्यर्थितः किञ्चिद्विषये याचितः कर्हिचिदपि न प्रत्याख्याति नेति न वदति ॥६॥ ब्रह्मवेषधरस्तस्य धरो भूत्वा वृकोदरस्तं जरासुतो भिक्षेत याचेत । स्वयाचनयाऽऽयातं तं स द्वैरथे हनिष्यति सन्देहः संशयो न । तत्रापीति कर्तव्यान्तरमस्तीत्याह ॥ तव सन्निधाविति । तव सन्निधानं तद्बलोत्तेजकमिति भावः । नागायुतबलश्चेत्तथाऽपि न मर्मज्ञस्य दृढाङ्गः स इति । संशयपदमनिबन्धानो निबन्धो नश्च सन्देहपदं समीचीनो देवतेतरसन्धित इति शोभनो देहो यस्य स न किन्तु जरासन्धितासमीचीनदेहवानित्यप्यर्थं कटाक्षितवानित्यवसेयम् । तवसन् तवेन प्रकाशेनैव सम्वर्तमानः । योगे योगे तवस्तरमित्यृग्भाष्ये तेजस्वितमम् । तट्टीकायां च । तव इति बलस्येव तेजसोऽपि नाम । अन्तर्णीतमतुबर्थं वेत्युक्तेः । यथा तत्रास्मायेति विनिलोपस्तद्वत्तु इति सौत्र धातोः सर्वधातुभ्य इत्यसुनि गुणावादेशयोस्तवसुनिति जाते सलोपेन वेति प्रकाशवाचीति ज्ञेयम् । छान्दोग्यभाष्ये च तवोरूपस्त्वगुच्यत इत्युक्तस्य श्रीवेदेशतीर्थीये प्रकाशरूप इत्युक्तेश्च । सकारान्तत्वेनाकारन्तत्वपक्ष औणादिकेकारप्रत्यये भर्गो भर्ग इत्यादिवद्रूपं ज्ञेयम् । तव सद्यस्मिन्निति तवसन्वा । निधिवन्निधिस्तद्रूपेऽपेक्षितदातरि त्वयि सतीति वा ॥७॥ अहो मोहो भवत उद्धव किमुद्धवतो मम सन्निधानं शंसन्तीत्यह

हननिश्चये को हेतुरित्यत उक्तम् तवेति । त्वया सह गन्तव्यं तदर्थमित्यर्थः ॥७॥ तत्कुत इति तत्राह-निमित्तमात्रमिति । काल इत्याख्यरूपं संज्ञारूपमस्यास्तीति कालाख्यरूपी तस्य ॥८॥ हे कृष्ण ! तत्रेदं कर्म लोकक्षेमकरमिति भावेनाह-गायन्तीति । राज्ञां देव्यः महिष्यः चशब्दाद्देव्यः गृहेषु ते तव इदं कर्म गायन्ति इदमिति किं तत्राह-स्वशत्र्विति । आत्मनः स्वामिनो निरोधान्मोक्षणं कथं गायन्तीत्यतो लुप्तोपमामाह-गोप्य इति । चशब्दो यथावचनः गोप्यः यथा कुञ्जरपतेः गजेन्द्रस्य नक्राद्विमोक्षणं नक्राख्यवधञ्च यद्वा कुवलयापीडस्यात्मविमोक्षणं शरीरवियोगलक्षणं मरणं चाणूरादिस्वशत्रुवधञ्च जनकात्मजायाः सीतायाः रावणबन्धाद्विमोक्षणं रावणाख्यशत्रुवधञ्च मुनयो वाल्मीक्यादयः वयञ्च तथा पित्रोः देवकीवसुदेवयोः कंसविहितशृङ्खलायाः विमोक्षणं कंसाख्यशत्रुवधं गायामस्तथेत्यर्थः । देव्यो देवस्त्रियो गृहेषु विमानेषु स्थित्वा मोक्षणमित्यादि वा ॥९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

न वयः कालस्तद्रूपा शक्तिः तस्य निमित्तं कालस्यैव विशेषणम् अरूपिणमिति सर्वसम्पादकस्यापि चेष्टाभिरलक्ष्यमाणस्येत्यर्थः ॥८॥ गोप्यश्च स्वशत्रुवधादिकमतीतं गायन्ति मुनयो गजेन्द्रजनकात्मजयोर्मोक्षणादिकं गायन्ति वयञ्च यदवः पित्रोः श्रीवसुदेवदेवकढयोस्तत्तद्गायाम इत्यन्वयः ॥९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

गायन्तीत्यादि । गोप्यो बलदेवपरिगृहीताः गोपाङ्गनाः यथा तव विशदं कर्म गायन्ति किं तदित्याह स्वशत्रुवधं शङ्खचूडवधम् आत्मविमोक्षणञ्च कुञ्जरपतेः स्वशत्रुवधं ग्राहवधम् आत्मनस्तस्य विमोक्षणञ्च लब्धशरणा भक्ता गायन्ति जनकात्मजायाः यथा स्वशत्रुवधम् रावणम् आत्मविमोक्षणञ्च मुनयो गायन्ति पित्रोर्वसुदेवदेवक्योः, स्वशत्रुवधं कंसवधम् आत्मविमोक्षणञ्च यथा वयं गायामः तथा देव्यो राजपत्न्यः पतीनां स्वशत्रुवधं जरासन्धवधम् आत्मविमोक्षणं गायन्ति अवश्यमेवैतद्द्वयं कृष्णेन कर्त्तव्यमिति त्वयि विश्वस्ता भाव्यपि भूतवद्गायन्तीत्यर्थः ॥९-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

गायन्तीत्यादि । गोप्यो बलदेव-परिगृहीतगोपाङ्गना यथा तव विशद-कर्म गायन्ति, तत् किम् ? तत्राह-स्वशत्रुवधं शङ्खचूडवधमात्मविमोक्षणञ्च, कुञ्जरपतेरात्मविमोक्षणं ग्राहवधञ्च, यथा लब्धशरणा मुनयो वयञ्च, कुञ्जरपतेरात्मविमोक्षणं ग्राहवधञ्च, यथा लब्धशरणा मुनयो वयञ्च, यथा लब्धशरणा गायन्ति, जनकात्मजाया यथा आत्मविमोक्षणं रावणवधञ्च मुनयो गायन्ति, पित्रोर्वसुदेवदेवक्योरात्मविमोक्षणं कंसवधञ्च यथा वयं गायामस्तथा देव्यश्चात्म-विमोक्षणं पतिविमोक्षणं जरासन्धवधं गायन्ति; भूतवद्गायन्तीत्यर्थः ॥९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

भीमेनापि स द्वैरथ एव जेतव्यः शताक्षौहिणीयुतस्तु मा जेतव्यः ॥६॥ नन्वसौ स्वसैन्यमेव युद्धाय नियुञ्जीत कुतस्तेन द्वैरथ्यमिति तत्राह-ब्रह्मण्य इति । न प्रत्याख्याति न निराकरोति भिक्षेत द्वन्द्वयुद्धं याचेत स एव जेष्यति चेत्तर्हि किं मयेत्यत आह-तवेति । तव सन्निधानं विना तु द्वैरथोऽपि न तं हन्तुं प्रभविष्यतीति भावः ॥७॥ ननु, अकिञ्चित्कुर्वतो मम सन्निधानात् किं स्यात्तत्राह-निमित्तमिति । तव ईशस्य यः कालस्तद्रूपा शक्तिस्तस्य यौ विश्वसर्गनिरोधौ तयोस्तत्र हिरण्यगर्भः शर्वश्च परं केवलं निमित्तमेवेत्यन्वयः । अरूपिण इति कालस्य विशेषणं कालेनैव विश्वं सृज्यते निरुध्यते च तत्र यथा सर्गे हिरण्यगर्भो निमित्तमात्रं शर्वश्च निरोधे तथैव सन्निधिमात्रेण त्वमेव जरासन्धं हनिष्यसि भीमो निमित्तमात्रं हिरण्यगर्भशर्वयोर्माहात्म्यार्थ यथा त्वया तत् क्रियते तथात्रापि भीमसेनाय यशःप्रदानार्थमिदमप्येकं तव कार्यमिति भावः ॥८॥ दुष्टनिग्रहशिष्टपालनात्मकं तव यशो यद्यपि सद्भिर्गीयमानं पूर्वं सिद्धमेवास्ति तदपीदानीं जरासन्धवधे हते सति तदपि विपुलीभविष्यतीत्याह-गायन्तीति । जरासन्धबद्धानां राज्ञां देव्यः पत्न्यः ते विशदं कर्म्म स्वगृहेषु बालकलालनादौ गायन्ति, किं तत् कर्म्म ? स्वशत्रोर्जरासन्धस्य वधं भाविनमपि आत्मनां पतीनां विमोक्षणञ्च सर्वज्ञमुन्यादिप्रबोधितत्वाद्गायन्ति, हे वत्स ! मा रोदीः कृष्णो जरासन्धं हत्वा तव पितरं मोचयिष्यतीति अत्र दृष्टान्तः यथा गोप्यः स्वशत्रोः शङ्खचूडस्य वधं तन्निरोधादात्मविमोक्षणञ्च परस्परसान्त्वनादौ गायन्ति भोः सख्यः ! समाश्वसित रुदित्वा रुदित्वा मा प्राणांस्त्यक्तुमुपक्रमध्वं यः खलु तादृशशङ्खचूडाख्यमहाव्याघ्रग्रासादरक्षीत् स एव कृपासिन्धुः स्वयमेव

सोपवीतवस्त्रद्वयम् ॥७॥ नन्वहं परब्रह्म चेत् तदोदासीनः सर्वात्मा च विष्णुश्चेत् पालक एव न घातकः तेजसा आप्यायनपक्षे ब्रह्मण्ये च वैष्णवं तेजः प्रभवति अतः कथं वध इति चेत्तत्राह निमित्तं परमीशस्येति । स एव त्वमिदानीं रूपमधिकमित्यर्थः ॥८॥ पाण्डवा लब्धशरणा इति केचिन्मुनयोऽपि दण्डकारण्यवासिनः विश्वामित्रादयश्च वयं सर्वे एव भक्ताः चकारान्निर्गुणाः अन्यशत्रुवधं गायन्ति ॥९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अत्युत्सुकतया सद्य एव जरासन्धं हन्तुम् इच्छतो यादवानालक्ष्याह-स वा इति । स वै प्रसिद्धो जरासन्धो भीमं विना विहायान्येषां बलिनामपि दुर्विषहः दुःखेनापि सोढुमशक्यवेगः । तत्र हेतुमाह-बले नागानां गजानामयुतेन समस्तुल्य इति । भीमस्य सोढुं शक्यत्वे हेतुमाह-समं तेन तुल्यं बलं यस्य तमिति ॥६॥ ननु 'स्वबलसाम्येऽपि सेनाबलमस्याधिकं स्यात्' इत्याशङ्क्याह-द्वैरथेति । स तु जरासन्धः द्वन्द्वयुद्धे जेतव्यः, शतेनाक्षौहिणीभिर्युतो मा जेतव्यः । ननु 'असौ युद्धाय यदि सैन्यमेव नियुञ्जीत तदा कथं द्वैरथं स्यात्' इत्याशङ्क्याह-ब्रह्मण्य इति । स तु ब्रह्मण्यो ब्राह्मणभक्तः अतो वीप्रैरभ्यर्थितः याचितः कर्हिचिदपि न प्रत्याख्याति न निराकरोति ॥७॥ अतो ब्राह्मणवेषं दधत् वृकोदरो भीमस्तं प्रति गत्वा द्वन्द्वयुद्धं प्रतिभिक्षेत । 'तथापि बलसाम्यात् कथं विजय' इत्याशङ्क्याह-तव सन्निधिप्रभावात् समबलोऽपि भीमस्तं हनिष्यत्यत्र सन्देहो नास्ति ॥८॥ 'न च किञ्चित्कुर्वतो मम सन्निधिमात्रेण किं स्यात्' अत आह-निमित्तमिति । यथा विश्वस्य सर्गे हिरण्यगर्भः ब्रह्मा निरोधे प्रलये शर्वः रुद्रश्च परं केवलं निमित्तम् अवान्तरकर्ता, वस्तुतस्तु तत्सन्निधिमात्रेण कर्तृत्वं तवैव, तथात्रापि भीमो निमित्तमात्रम्, वस्तुतो निहन्ता त्वमेव । ननु 'गुणणोभादिद्वारा काल एव स्वर्गादिहेतुतया प्रसिद्धः, कथमहम्' इत्याशङ्क्य 'तद्रूपोऽपि त्वमेव' इत्याह-कालस्येति । तत्र हेतुमाह-ईशस्येति । सर्वनियन्तुः । 'एवं सर्वे कुतो न जानन्ति, येन कारणान्तरं वदन्ति' इत्याशङ्क्य-अनुपलम्भादिति । तत्र हेतुं सूचयन् हेतुमाह-अरूपिण इति ॥९॥

अन्वितार्थप्रकाशिका

स वै इति ॥ स वै प्रसिद्धो राजा जरासन्धः बले नागानां गजानामयुतेन समः तुल्यः अतः समं तुल्यं बलं यस्य तं भीमं विना विहायान्येषां बलिनामपि दुर्विषहः दुःखेनापि सोढुमशक्यवेगः भीमादेव तस्य मृत्युर्बृहस्पतिमुखाच्छ्रुत इति भावः ॥६॥ द्वैरथ इति॥ स तु जरासन्धःभीमेनापि द्वैरथे द्वन्द्वयुद्धे जेतव्यः शतेनाक्षौहिणीभिर्युतो मा जेतव्यः राजवृन्दक्षोभप्रसक्तेः। तद्घाते तु यागशोभाविक्षेपात् स च ब्रह्मण्यः ब्राह्मणभक्तः अतो विप्रैरभ्यर्थितः याचितः कर्हिचिदपि न प्रत्याख्याति न निराकरोति ॥७॥ ब्रह्मेति ॥ ब्राह्मणवेषस्य धरो वृकोदरो भीमस्तं प्रति गत्वा द्वन्द्वयुद्धं भिक्षेत याचतां तव सन्निधौ तवैव प्रभावात्समबलोऽपि भीमस्तं द्वैरथे युद्धे हनिष्यत्येव न जयमात्रम् । इत्यत्र सन्देहो नास्ति ॥८॥ सन्निधिमात्रेण कार्यं सेत्स्यतीत्याशयेनाह-निमित्तमिति ॥ यथा विश्वस्य सर्गे हिरण्यगर्भः ब्रह्मा निरोधे प्रलये शर्वः रुद्रश्च परं केवलं निमित्तम् अवान्तरकर्ता वस्तुतस्तु ईशस्य कालस्य अरूपिणस्तवैव कर्तृत्वं तथाऽत्रापि भोमो निमित्तमात्रं वस्तुतो निहन्ता त्वमेव ॥९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जयप्रकारमाह-द्वैरथ इति ॥ स जरासन्धस्तु द्वैरथे युगलयुद्धे जेतव्यः ॥ अन्यथा शताक्षौहिणीयुतः मा जेतुं शक्य इत्यर्थः ॥ ननु तेन सह द्वन्द्वयुद्धं कथं भवेत्तत्राह-ब्रह्मण्य इति । ब्रह्मण्यः प्रतिष्ठाकामेन ब्राह्मणबालकवत् सदाचरणशीलः सः कर्हिचित् कदापि न प्रत्याख्याति ॥ अहं न योत्स्यामीति न वक्तीत्यर्थः ॥६॥ अतस्तं भिक्षेत युगलसङ्गरं याचताम् ॥ द्वैरथे द्वन्द्वयुद्धे ॥७॥ ननु मम सन्निधानेन किंस्यात्तत्राह-निमित्तमिति अरूपिणः ॥ अलक्षितरूपस्य कालस्य तत्प्रवर्तकस्येशस्य तव ॥ विश्वस्य सर्गे निरोधे च हिरण्यगर्भः शर्वश्च परं केवलं निमित्तं निमित्तमात्रं भवति तद्वत्तद्धनने भीमोऽपि निमित्तमात्रमिति भावः ॥८॥ श्रीकृष्णाय नमो नमः ॥ किञ्च त्वदेकशरणानां त्वदेकजीवनानां च जनानां दुःखविनाशनार्थमप्येवं कार्यमित्याशयेनाह-गायन्तीति ॥ मागधरुद्धानां देव्यो भार्याः भाविनं स्वशत्रुवधं जरासन्धवधम् ॥ आत्मविमोक्षणं स्वपतिबन्धमोक्षणं च ॥ एवं रूपं तव विशदं निर्मलं कर्म गृहेषु स्थिताः सत्यः गायन्ति ॥ अत्रैव दृष्टान्तैर्गोप्यादीनां निरूपणं करोति यथा गोप्यः स्वशत्रुवधं शङ्खचूडवधं ततः स्वमोक्षणं च भूतपूर्वं ते विशदकर्म गायन्ति यथा च लब्धशरणाः मुनयो वयं चैते उभये स्वशत्रुवधं कामक्रोधादीनां नाशम् आत्मविमोक्षणं जन्ममरणादिदुःखात् स्वमोचनं च एवं रूपं तव विशदं कर्म गायन्ति ॥ एते सर्वे कुञ्जरपतेर्गजराजस्य ग्राहात् मोक्षणं तद्वधं च

आह ॥ निमित्तमात्रमिति । कालाख्यरूपिण: काल इत्याख्या च रूपं च ते स्तोऽस्येति कालाख्यरूपी कालरूपं च नाम चास्तीश तवेति भाव: । यथोक्तं तत्त्वप्रकाशिकायां टीकाकृत्पादै: । परतन्त्रसंहर्तृत्वपरा श्रुतिरिति भाव: । पारतन्त्र्यं च संहारद्वारत्वमिति भावेनाह ॥ निमित्तेति । काल इत्याख्यारूपे यस्यासौ तथोक्त: । रूपस्यकालत्वं संहर्तृत्वादिगुणसम्पन्नत्वमिति यस्यासाविति टीकेऽन्यार्थविवरणरूपिणी न तु बहुव्रीहिरित्युक्तमिति ज्ञातव्यमित्युक्तम् । ईशस्य तव विश्वस्य सर्गनिरोधयोर्हिरण्यगर्भ: शर्वश्च निमित्तमात्रं मुख्यस्त्वम् । अतस्त्वत्सन्निधानमपेक्षितमिति भाव: ॥८॥ तव तु नानेनानर्थो नाप्यर्थ एतावत्तु स्यात्तेन च लोकोद्धार इत्यवश्यमिदमनुष्ठेयं कृष्णेत्याह ॥ गायन्तीति । देव्यो भट्टारिका: । देवी भट्टारिकायां स्यादिति विश्व: । राजा भट्टारक इति तदुपयुक्तामर: । राजराजीवाक्ष्यो गृहेषु ते विशदं यथा तथा कर्म गायन्ति । विशदं कर्मेति वा । स्वशत्रुवधं तथा राज्ञां पतीनां विमोक्षणं च गायन्तीति कर्मपदार्थविवरणं यथा देव्यस्तव कर्मादि विगायन्ति तथा देव्य: स्वशत्रुवधं राज्ञां विमोक्षणं च गायन्तीति दृष्टान्तदार्ष्टान्तिकतया योजनं वा । गोप्यो लब्धशरणा मुनयो वयं च कुञ्जरपतेर्गजेन्द्रस्य चक्रतो नक्रतो विमोक्षणं जनकात्मजाया: सीताया विमोक्षणं क्षणदाचरत: पित्रोर्देवकीवसुदेवयो: कंसाद्यथा विमोक्षणं गायामस्तथा गायन्तीत्यन्वय: ।अवतारान्तरनैर्विशेष्यबोधनार्थं तापसरामावतारचरितोक्ति: । कुञ्जरपतेर्नरकात्तस्य सुप्रतीकनायकत्वात् । हे जनक जगज्जनकाया आत्मजायास्तदर्थं तप:करणात्तत्त्वेन व्यपदेशस्तासां कशेर्वादिषोडशसहस्रयोषितां तथा या गोप्यस्तासां विमोक्षणं शङ्खचूडव्योमादित: । जनकेत्युक्त्योपजिहास पितृत्वमुद्धवस्तयो: । कुञ्जरपते: कुवलयापीडस्य । जनकश्च तस्यात्मना प्रयत्नेन कंसाद्रक्षिता जाया भार्येति देवकी ताभ्यां सहितौ च । आव्ययम् । आ: सततं पौसकोपौ वा । आ: स्यात्सन्तापकोपयोरिति विश्व: । तौ च पितरौ च यशोदानन्दौ च तयोर्विमोक्षणं कंसात्तृणावर्तादजगरादिति वा ॥९॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

किञ्च तस्यान्यदपि वरप्राप्तं सामर्थ्यमस्तीत्याह–द्वैरथे स तु जेतव्य इति । द्वन्द्वयुद्धेनैव जेतव्य: न त्वपरिमिताक्षौहिणीयुक्त: अनेन तस्य सेनाधिक्यमपि सूचितम् एवं तस्य गुणानुक्त्वा एको गुण: समयविशेषे दोषत्वमापद्यत इति तदाह–ब्रह्मण्य इति स्वभावतो हि ब्राह्मणहितकारी अभ्यर्थितश्चेन्न प्रत्याख्याति कर्हिचिदिति कपटं ज्ञात्वापि धर्मदार्ढ्यादिदमेकं तस्य मरणे छिद्रम् ॥६॥ तर्हि क्षत्रियाणां किमायातमित्याशङ्क्योपायमाह–ब्रह्मवेषधरमिति । कञ्चुकाद्यभावसहितं सोपवीतवस्त्रद्वयं तिलकादिसहितं ब्रह्मवेष: यद्यपि तेजो न सम्पादयितुं शक्यं तथापि प्रार्थितदाने मारणमाह–तव सन्निधाविति ॥७॥ नन्वहं परब्रह्म चेत् तदोदासीन: सर्वात्मा च विष्णुश्चेत् पालक एव न घातक: तेजसा आप्यायनपक्षे ब्रह्मण्ये च वैष्णवं तेज: प्रभवति अत: कथं वध इति चेत्तत्राह निमित्तं परमीशस्येति । ईश्वर: कालरूपोऽपि भवान् सन्निधिमात्रेणैव स्वाभीष्टसमये विश्वमेवोत्पादयसि हंसि च ब्रह्मरुद्रयो: खड्गादिवन्निमित्त एव यत: कालस्य तव कालेनाक्रोडीकृतानां पितृव्याघ्रौ सृष्टिप्रलययोर्निमित्तमेव नन्वहमेव चेत् सर्वदा मारकस्तदा कथं सर्वेषामनुपलम्भ इति तत्राह–अरूपिण इति । स एव त्वमिदानीं रूपमधिकमित्यर्थ: ॥८॥ नन्वेवमपि तथा यशो न भविष्यतीत्याशङ्कायामाह–गायन्ति ते विशदकर्मेति । तव यश: पूर्वमेव लोकत्रये व्याप्य तिष्ठति किमद्योत्पादनक्लेशेनेति वाक्यार्थ: अनेन भगवतो भगवदीयानां वा भगवत्त्वाद्भगवदीयत्वाच्च सिद्धमेव यशो नूतनमुत्पादनीयं ते विशदं कर्म हिरण्यकशिपुरावणवधादिकं रूपं देव्यो देवस्त्रिय: सहजं भगवच्चरितं स स्वशत्रूणां हिरण्यकशिपुप्रभृतीनां वधम् आत्मनो बन्दीकृतानां विशेषणाविघातो मोचनञ्च गायन्ति ते गृहेषु वा देव्यो नरकासुरगृहीता: पूर्वं तत्सर्वं योजनीयं ते राज्ञामुग्रसेनादीनां देव्यो वा भाविनि भूतवदुपचारेण वा मोक्षमानानां किञ्च अन्येऽपि बहवो गायन्तीत्याह–गोप्यश्चेति । चकारात्सम्बन्धिस्त्रियोऽपि स्वशत्रो: वधं गायन्ति एवं कुञ्जरपतेरपि गजेन्द्रस्य शत्रो नक्रस्य वधं तथा जनकात्मजाया: सीताया: शत्रो: रावणस्य पित्रोरपि देवकीवसुदेवयो: शत्रो: कंसस्य एवं प्राकृता अपि स्वस्यान्यस्य वा त्रिविधा गायन्ति तथान्येऽपि त्रिविधा गायन्तीत्याह–लब्धशरणा मुनयो वयञ्च कर्मिणो ज्ञानिनो भक्ता: लब्धशरणा इति विशेषणं वा सर्वत्र मा भैष्टेत्यभयारावौ तस्मान्मच्छरणं गोष्ठम् ''एतद्व्रतं ममे''त्यादिवाक्यसहस्रै: पाण्डवा लब्धशरणा इति केचिन्मुनयोऽपि दण्डकारण्यवासिन: विश्वामित्रादयश्च वयं सर्वे एव भक्ता: चकारान्निर्गुणा: अपि अन्यशत्रुवधं गायन्ति तस्मात्सिद्धैव कीर्त्तिरित्यर्थ: ॥९॥

सुबोधिनीसार:

द्वैरथे द्वन्द्वयुद्धे । ब्रह्मण्य इति स्वभावतो हि ब्राह्मणहितकारी धर्मदार्ढ्यादिदमेकं तस्य मरणे छिद्रम् ॥६॥ कञ्चुकाद्यभावसहितं

१३

गुरून्, अनुज्ञाप्य, भृत्यान्, दारुकजैत्रादीन्, प्रयाणाय, आदिशत् ॥१२॥ शत्रुहन्! अथ, यदुराजम्, च सङ्कर्षणम्, अनुज्ञाप्य, ससुतान्, सपरिच्छदान्, स्वान्, अवरोधान्, निर्गमय्य, सूतोपनीतम्, गरुडध्वजम्, सूतोपनीतम्, स्वरथम्, आरुहत् ॥१३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किञ्च जरासन्धवध इति। भूर्यर्थायेति ततः शिशुपालवधादयोऽपि सुखसाध्याः भविष्यन्तीति भावः। एतच्च सर्वं भविष्यत्येवेति सम्भावयन्नाह-प्राय इति। पच्यत इति पाकः कर्म तस्य विपाकः फलं तेन राज्ञां पुण्यविपाकेन जरासन्धादीनां पापविपाकेनेति पाठान्तरे जरासन्धस्य पापविपाकेनेति तेनायं क्रतुस्तवाभिप्रेतस्तत्र गते त्वयि सर्वं भविष्यतीत्यर्थः ॥१०॥ अच्युतमुपपत्त्या वृद्धम् यदुवृद्धा इति वदता अनिरुद्धादयस्तथा नापूजयन्निति सूचितम् ॥११॥ अनुज्ञाप्यानुज्ञां प्रार्थ्य गुरून् वसुदेवादीन् ॥१२॥ अवरोधान् स्वान् दारान् निर्गमय्य प्रायाणं कारयित्वा ॥१३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

किं बहुना जरासन्धवधोऽनेकप्रयोजनोपेत इत्याह-किञ्चेति। ततो जरासन्धवधात्। इति भाव इति-प्रबलसहायकनाशादित्याशयः। एतच्च शिशुपालवधादिकं च। राज्ञां जरासन्धबद्धानाम्। पुण्यविपाकेनेति त्वद्दर्शनपूर्वकं कारागारनिवृत्त्युत्तरं त्वदुपदेशाचरणात्तेषां मोक्षहेतुत्वात्। जरासन्धादीनामित्यत्रादिना शिशुपालशाल्वदुर्योधनादयो ग्राह्याः। तेषां मृत्युहेतुत्वान्मरणस्य "पुण्याज्जीवनमुद्दिष्टं पापान्मरणसम्भवः" इत्युक्तेः पापफलत्वात्। इहैव महाभारतबीजांकुरोत्पत्तेर्दुर्योधनादीनामपि पापविपाकेनैवायं क्रतुरिति प्रायोग्रहणान्न केवलं पापविपाक एव सर्वत्र तव दर्शनादिसत्त्वाद्वस्तुतः पुण्यविपाक एवेति भावः। पाठान्तरे, प्रायस्तस्य विपाकेनेति पाठे। फलितमाह-तेनेति। तेन पाकविपाकेन हेतुनाऽभिप्रेतोऽभिप्रायविशेष एव। तत्र यागे। इत्यर्थ इति-भूभारावतारणार्थमवतीर्णस्त्वं सर्वमेतत्करिष्यसीति भावः। भूर्यर्थाय राजसूयसिद्धये राजवृन्दरक्षासिद्धये शिशुपालादिवधसुखसाध्यत्वसिद्धये मद्व्यञ्जितार्थविशेषसिद्धये च। पाकः राजसूयस्य निष्पत्तिस्तस्मिन्सति तस्य वा यो विपाकः। विसदृशं फलं कुरुवंशक्षयसूचकदुर्योधनमानभङ्गस्तेन हेतुना क्रतुश्च तवाभिमतः। "पाकः परिणताः शिशौ" इति "विपाकः पाचने स्वेदे कर्मणो विसदृक्फले" इति मेदिनी। एषोऽर्थस्तत्रत्ययादवकौरवैर्मा बुध्यतामित्युद्धवेन दुर्बोधार्थकं पदं प्रयुक्तम्। पापविपाकेनेति पाठे पापानां शिशुपालादीनां विनाशलक्षणपरिणामेन हेतुनेति विश्वनाथः। तोषिण्यां तु-पाकः साक्षादुद्दिष्टोऽर्थः पाण्डवराजस्य पारमेष्ठ्यादिः, विपाकः साक्षादनुद्दिष्टोऽपि मनसि स्थितः शिशुपालदुर्योधनादिलक्षणभूभारहरणरूपः तयोर्द्वन्द्वैक्यं तेन हेतुना क्रतुश्च तवाभिमतोऽभिप्रेतः। प्रायःशब्देन पाण्डवानां वनवासादिदुःखनिदानांशे नानाभिमतोऽपि तेषां परिणामपरमसुखनिदानत्वादेवाभिमत इत्यर्थः। प्राय इति वितर्के वा। पाठान्तरे पापानां जरासन्धादीनां परिणामेन मोक्षादिलक्षणावस्थान्तरप्राप्त्या हेतुना ततश्च पूर्वं राजसूयोद्यतं पाण्डवमाश्वास्य तदनुज्ञया भीमसेनेन जरासन्धं घातयित्वा राजसूयः सम्पादयितव्य इति भावः। हे कृष्णेति परममहिमादिमयनामत्वात्तेनैव सम्बोधनं परममहिमानमेवावेदयति "यस्य नाम महद्यशः" इति श्रुतेः। तस्मादत्र दासभावो नाभासीक्रियते ॥१०॥ प्रत्यपूजयन् प्रत्यक्षरं साधु साध्विति प्रीत्या संश्लाघिरे अच्युतम्। उपपत्त्या युक्त्या वृद्धं युक्तम्। यदुवृद्धा अक्रूरकृतवर्मादयः यथा तद्वाक्यमश्लाघन्त तथाऽनिरुद्धादयो न, तेषां मतं तु प्रथमं राजबन्धनिवृत्त्यर्थं जरासन्धेन युद्धमेवेति भावः ॥११॥ अथोद्धवोक्तिश्रुत्यनन्तरम्। आदिना प्रबलार्हणादिग्रहः ॥१२॥ 'शुद्धान्तश्चावरोधश्च' इत्यमरः। "अवरोधस्तिरोधाने राजदारेषु तद्गृहे" इति मेदिनी च। यद्यप्यवरोधपदं राजदारेषु तद्गृहे चास्ति तथाऽपि भगवतो नृपतित्वाभावेऽपि 'राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ यक्षे शक्रे च पुंसि स्यात्' इति कोशात् प्रभुत्वात्क्षत्रियत्वाच्च राजशब्दवाच्यत्वादवरोधानित्युक्तम् ॥१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उपसंहरति-जरेति। भूर्य्यर्थाय पूर्वोक्तराजसूयादिरूपाय पाकः तन्दुलपाकवत् क्रत्वनुष्ठानं तस्य विपाकेनौदनसिद्धिवत्पाण्डवानां निष्कण्टकपारमेष्ठ्यनिष्पत्तिरूपेण परिणामेन हेतुना तव चासौ क्रतुरभिमतः। प्राय इति वितर्के पाठान्तरेऽपि पापानां शिशुपालादीनां दुर्य्योधनान्तानां विपाकेन परिणामेन विनाशलक्षणेन हेतुनेति पाण्डवानां तादृशतात्पर्यत्वेन तेनेत्यर्थः। ततः प्रथमं राजसूयार्थमुद्यतं पाण्डवराजमाश्वास्य तदनुज्ञया भीमसेनेन जरासन्धं घातयित्वा राज्ञश्च मोचयित्वा राजसूयः सम्पादयितव्य

गुरून्, अनुज्ञाप्य, भृत्यान्, दारुकजैत्रादीन्, प्रयाणाय, आदिशत् ॥१२॥ शत्रुहन्! अथ, यदुराजम्, च सङ्कर्षणम्, अनुज्ञाप्य, ससुतान्, सपरिच्छदान्, स्वान्, अवरोधान्, निर्गमय्य, सूतोपनीतम्, गरुडध्वजम्, सूतोपनीतम्, स्वरथम्, आरुहत् ॥१३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किञ्च जरासन्धवध इति। भूर्यर्थायेति ततः शिशुपालवधादयोऽपि सुखसाध्याः भविष्यन्तीति भावः। एतच्च सर्वं भविष्यत्येवेति सम्भावयन्नाह-प्राय इति। पच्यत इति पाकः कर्म तस्य विपाकः फलं तेन राज्ञां पुण्यविपाकेन जरासन्धादीनां पापविपाकेनेति पाठान्तरे जरासन्धस्य पापविपाकेनेति तेनायं क्रतुस्तवाभिप्रेतस्तत्र गते त्वयि सर्वं भविष्यतीत्यर्थः ॥१०॥ अच्युतमुपपत्त्या वृद्धम् यदुवृद्धा इति वदता अनिरुद्धादयस्तथा नापूजयन्निति सूचितम् ॥११॥ अनुज्ञाप्यानुज्ञां प्रार्थ्य गुरून् वसुदेवादीन् ॥१२॥ अवरोधान् स्वान् दारान् निर्गमय्य प्रायाणं कारयित्वा ॥१३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

किं बहुना जरासन्धवधोऽनेकप्रयोजनोपेत इत्याह-किञ्चेति। ततो जरासन्धवधात्। इति भाव इति-प्रबलसहायकनाशादित्याशयः। एतच्च शिशुपालवधादिकं च। राज्ञां जरासन्धबद्धानाम्। पुण्यविपाकेनेति त्वद्दर्शनपूर्वकं कारागारनिवृत्त्युत्तरं त्वदुपदेशाचरणात्तेषां मोक्षहेतुत्वात्। जरासन्धादीनामित्यत्रादिना शिशुपालशाल्वदुर्योधनादयो ग्राह्याः। तेषां मृत्युहेतुत्वान्मरणस्य "पुण्याज्जीवनमुद्दिष्टं पापान्मरणसम्भवः" इत्युक्तेः पापफलत्वात्। इहैव महाभारतबीजांकुरोत्पत्तेर्दुर्योधनादीनामपि पापविपाकेनैवायं क्रतुरिति प्रायोग्रहणान्न केवलं पापविपाक एव सर्वत्र तव दर्शनादिसत्त्वाद्वस्तुतः पुण्यविपाक एवेति भावः। पाठान्तरे, प्रायस्तस्य विपाकेनेति पाठे। फलितमाह-तेनेति। तेन पाकविपाकेन हेतुनाऽभिप्रेतोऽभिप्रायविशेष एव। तत्र यागे। इत्यर्थ इति-भूभारावतारणार्थमवतीर्णस्त्वं सर्वमेतत्करिष्यसीति भावः। भूर्यर्थाय राजसूयसिद्धये राजवृन्दरक्षासिद्धये शिशुपालादिवधसुखसाध्यत्वसिद्धये मद्व्यञ्जितार्थविशेषसिद्धये च। पाकः राजसूयस्य निष्पत्तिस्तस्मिन्सति तस्य वा यो विपाकः। विसदृशं फलं कुरुवंशक्षयसूचकदुर्योधनमानभङ्गस्तेन हेतुना क्रतुश्च तवाभिमतः। "पाकः परिणताः शिशौ" इति "विपाकः पाचने स्वेदे कर्मणो विसदृक्फले" इति मेदिनी। एषोऽर्थस्तत्रत्ययादवकौरवैर्मा बुध्यतामित्युद्धवेन दुर्बोधार्थकं पदं प्रयुक्तम्। पापविपाकेनेति पाठे पापानां शिशुपालादीनां विनाशलक्षणपरिणामेन हेतुनेति विश्वनाथः। तोषिण्यां तु-पाकः साक्षादुद्दिष्टोऽर्थः पाण्डवराजस्य पारमेष्ठ्यादिः, विपाकः साक्षादनुद्दिष्टोऽपि मनसि स्थितः शिशुपालदुर्योधनादिलक्षणभूभारहरणरूपः तयोर्द्वन्द्वैक्यं तेन हेतुना क्रतुश्च तवाभिमतोऽभिप्रेतः। प्रायःशब्देन पाण्डवानां वनवासादिदुःखनिदानांशे नानाभिमतोऽपि तेषां परिणामपरमसुखनिदानत्वादेवाभिमत इत्यर्थः। प्राय इति वितर्के वा। पाठान्तरे पापानां जरासन्धादीनां परिणामेन मोक्षादिलक्षणावस्थान्तरप्राप्त्या हेतुना ततश्च पूर्वं राजसूयोद्यतं पाण्डवमाश्वास्य तदनुज्ञया भीमसेनेन जरासन्धं घातयित्वा राजसूयः सम्पादयितव्य इति भावः। हे कृष्णेति परममहिमादिमयनामत्वात्तेनैव सम्बोधनं परममहिमानमेवावेदयति "यस्य नाम महद्यशः" इति श्रुतेः। तस्मादत्र दासभावो नाभासीक्रियते ॥१०॥ प्रत्यपूजयन् प्रत्यक्षरं साधु साध्विति प्रीत्या संश्लाघिरे अच्युतम्। उपपत्त्या युक्त्या वृद्धं युक्तम्। यदुवृद्धा अक्रूरकृतवर्मादयः यथा तद्वाक्यमश्लाघन्त तथाऽनिरुद्धादयो न, तेषां मतं तु प्रथमं राजबन्धनिवृत्त्यर्थं जरासन्धेन युद्धमेवेति भावः ॥११॥ अथोद्धवोक्तिश्रुत्यनन्तरम्। आदिना प्रबलार्हणादिग्रहः ॥१२॥ 'शुद्धान्तश्चावरोधश्च' इत्यमरः। "अवरोधस्तिरोधाने राजदारेषु तद्गृहे" इति मेदिनी च। यद्यप्यवरोधपदं राजदारेषु तद्गृहे चास्ति तथाऽपि भगवतो नृपतित्वाभावेऽपि 'राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ यक्षे शक्रे च पुंसि स्यात्' इति कोशात् प्रभुत्वात्क्षत्रियत्वाच्च राजशब्दवाच्यत्वादवरोधानित्युक्तम् ॥१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उपसंहरति-जरेति। भूर्य्यर्थाय पूर्वोक्तराजसूयादिरूपाय पाकः तन्दुलपाकवत् क्रत्वनुष्ठानं तस्य विपाकेनौदनसिद्धिवत्पाण्डवानां निष्कण्टकपारमेष्ठ्यनिष्पत्तिरूपेण परिणामेन हेतुना तव चासौ क्रतुरभिमतः। प्राय इति वितर्के पाठान्तरेऽपि पापानां शिशुपालादीनां दुर्य्योधनान्तानां विपाकेन परिणामेन विनाशलक्षणेन हेतुनेति पाण्डवानां तादृशतात्पर्यत्वेन तेनेत्यर्थः। ततः प्रथमं राजसूयार्थमुद्यतं पाण्डवराजमाश्वास्य तदनुज्ञया भीमसेनेन जरासन्धं घातयित्वा राज्ञश्च मोचयित्वा राजसूयः सम्पादयितव्य

इति भावः । कृष्णेति सर्वाराध्यत्वसर्वेश्वरत्वसर्वभूतत्वसर्वपरममहिमयनामत्वात्तेनैव सम्बोधनं परमहिमानमेवावेदयति ''यस्य नाममहद्यशः'' इति श्रुतेः । तस्मादत्र दासभावो नाभासीक्रियते ॥१०॥ प्रतीति तादृशगिरोद्धवेन कृतस्य तेषां पूजनस्य प्रतिरूपत्वसम्पत्तेः यद्वा प्रतिपदं प्रत्यक्षरं चापूजयन् आद्रियन्त साधु साधु इति प्रीत्या शश्लाघिरे इत्यर्थः । तत्रादौ देवर्षिणा प्रतिपूजनं तदभिमतसिद्धेः अन्ते तु श्रीकृष्णेन यत्तच्च खलु तन्मुखेनैव वाचयित्वा स्वेन तत्पक्षग्रहणमेवेदमिति व्यवच्छिन्नं यदुवृद्धा इति तेषामेव तादृशप्रागल्भ्ये युक्तत्वात् ॥११॥ अथानन्तरं सद्य एवेत्यर्थः । श्रीमत् पाण्डवमिलनाद्यौत्सुक्यात् सन्मुहूर्ताद्यपेक्षामपि तत्याजेति भावः । भगवान् समग्रैश्वर्यादिमानित्यंशत्वं व्यवच्छिन्नं तत्रापि देवकीसुत इत्यसाधारण्यं दर्शितं ''कृष्णस्तु भगवान् स्वयम्'' इति स्वयंशब्दात् इत्यनर्गलवैभवस्मरणाच्चमत्कारो व्यञ्जितः आदिशब्दात्प्रबल्यार्हणादयः विभुः परमस्वतन्त्रोऽपि ॥१२॥ निर्गम्येति सार्द्धकम् । अवरोधानिति तत्रस्थान् सुतशब्देन पौत्रास्तत्तद्वध्वः कन्यकादयश्च ज्ञेयाः स्नेहेन महोत्सवे मिथोऽत्याज्यत्वात् परिच्छदाः पर्य्यङ्कादयः दास्यादिपरिवाराश्च सङ्कस्षणमात्मनो द्वितीयव्यूहमिति योग्यता दर्शिता । तथा यदुराजमुग्रसेनमनुज्ञाप्येति नृपत्वेन परीरक्षायै तत्र स्थापनेन सम्माननार्थं तथा महिषीणां निर्गमनात्पश्चात् सङ्कर्षणयदुराजयोरनुज्ञापनं दूरतोऽनुव्रजनात् हे शत्रुहन्निति स्वशत्रुजरासन्धवधार्थमयमेवोपायो युक्त इति शत्रुवधकारिणा भवता ज्ञायत एवेति भावः । स्वीयमसाधारणं रथं तल्लक्षणमाह गरुडेति । इति शत्रुवर्गमयङ्करत्वं वेगगामित्वादिकञ्च सूचितम् गरुडध्वज इति पाठेऽपि तत्रैव तात्पर्यम् ॥१३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भूर्य्यर्थाय - अस्माकं बहुलप्रयोजनाय, तवैव वा, भारतयुद्धनिदानत्वेन भूभारहरणार्थाय, उप समीपेऽचिरादेव कल्पते समर्थः स्यात् । प्रायोऽभिमत इति प्रायःशब्देन पाण्डवानां वनवासादिदुःखनिदानतयेषदनभिमत इति बोधयति । कृष्ण ! हे भक्तवात्सल्याकृष्टचित्तेति त्वत्प्रसादादहमेवं त्वदभिप्रायं वेद्मीति भावः ॥१०॥ इत्येतत्, हे राजन्निति सर्वैरुद्धववचः प्रतिपूजनेन प्रमोदोदयात्; यद्वा, प्रहर्षाद् राजमानो देवर्षिः, प्रतीति तादृशोक्तोद्धवेन कृतस्य तेषां पूजनस्य प्रतिरूपत्वसम्पत्तेः, यद्वा, प्रतिपदं प्रत्यक्षरं चापूजयन् आद्रियन्त, साधु साध्विति प्रीत्या शश्लाघिरे इत्यर्थः । अन्यथा तत्प्रतिपूजनापेक्षयैवान्यैः प्रतिपूजनमेवेत्येवं शङ्कासम्भवात् । अयं वानुग्रहविशेषः ॥११॥ अथानन्तरं सद्य एवेत्यर्थः । भगवान् साक्षात् परमेश्वरः, तत्रापि देवक्याः सुतो निजाशेषैश्वर्य्यप्रकटनार्थं तस्यां जात इति पाण्डवगृहे निजाशेषैश्वर्य्यप्रदर्शनेन विचित्रक्रीडार्थं सर्व्ववैभवपरिवारसाहित्यादिना प्रयाणार्थमादिशति भावः । आदि-शब्दात् प्रबलार्हणादयः, तदर्थमेवादौ गुरूननुज्ञाप्य, यतः प्रभुः सर्व्वसदाचारसमर्थः, यद्वा, प्रभुः परमस्वतन्त्रोऽपि ॥१२॥ सुत-शब्देन पुत्राः पौत्रास्तत्तद्वध्वः कन्यकादयश्च ज्ञेयाः,-स्नेहेन महोत्सवे मिथोऽत्याज्यत्वात्; परिच्छदाः पर्य्यङ्कादयो दास्यादिपरिवाराश्च; सङ्कर्षणमात्मना सहापृथग्भूतमिति वस्तुतस्तु श्रीयुधिष्ठिर-कर्तव्यायामात्मनोऽग्रपूजायामसङ्कोचार्थम्, यदुराजमुग्रसेनमनुज्ञाप्येति (विष्णु.प.५५/१२१-१२४)-

> **'कृष्ण कृष्ण महाबाहो यदूनां नन्दिवर्द्धन । श्रूयतां यदहं त्वाद्य वक्ष्यामि रिपुसूदन ॥**
> **त्वया विहीनाः सर्व्वे स्म न शक्ताः सुखमासितुम् । पुरेऽस्मिन् विषयान्ते च पतिहीना यथा स्त्रियः ॥**
> **त्वत्सनाथा वयं तात तद्बाहुबलमाश्रिताः । बिभीमो न नरेन्द्राणां सर्व्वेषामपि मानद ॥**
> **विजयाय यदुश्रेष्ठ यत्र यत्र गमिष्यसि । तत्र त्वं सहितोऽस्माभिर्गच्छेथा यादवर्षभ ॥'**

इत्येवं श्रीहरिवंशोक्तेन तस्य मुहुः काकुप्रार्थनेन सङ्गे जिगमिषतो नृपत्वेन पुरीरक्षायै तत्र स्थाप्यस्य सम्माननार्थम्, यद्वा, गुर्व्वादीनां सर्व्वेषामेव तेषामनुज्ञापनं श्रीयुधिष्ठिरगृहे, पथि च विचित्रक्रीडायामसङ्कोचार्थमेव, तत्र श्रीमहिषीणां निर्गमात् पश्चात् सङ्कर्षणयदुराजयोरनुज्ञापनं दूरतोऽनुव्रजनात्, रथान्तिके गमनाद्वा । हे शत्रुहन्निति-स्वशत्रु-जरासन्धवधार्थमयमेवोपायो युक्त इति शत्रुवधकारिणा भवता ज्ञायत एवेति । यद्वा, तत्त्वतोऽसङ्कोचार्थमेव तेषामनुज्ञापनम्, न तु शत्रुभ्यः, पुरीरक्षार्थं तेभ्यो भयाभावादित्यभिप्रायेण सम्बोधयति, तत्प्रभावात्त्वयैव शत्रवो हन्यन्ते, कुतस्तस्य ततो भयमिति भावः । स्वकीयमसाधारणं रथम्; तल्लक्षणमाह-गरुडेति । इति शत्रुवर्गभयङ्करत्वं वेगगामित्वादिकञ्च सूचितम् ॥१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भिक्षेत द्वन्द्वयुद्धमिति शेषः ॥७॥ कालस्य कालात्मनः तव सर्गनिरोधयोः तत्तत्कर्तृकयोः सर्गसंहारयोः हिरण्यगर्भः शर्वश्च निमित्तमात्रमित्यर्थः ॥८॥ राज्ञां देव्यः राजस्त्रियः गायन्तीति प्रत्यासत्त्या वर्त्तमाननिर्देशः आत्मविमोक्षणं स्वभर्तृभयनिवृत्त्या

स्वतो भयनिवर्तनम् ॥९-१३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

किञ्च जरासन्धवध इति । हे कृष्ण ! भूर्यर्थाय अनेकप्रयोजनाय कल्पते ततश्चैद्यादयोऽपि सुखसाध्या भविष्यन्तीति भावः । ततश्च राजसूयार्थगमनेनैव सर्वं सम्पत्स्यते इत्यभिप्रयन्नाह-प्राय इति । कर्मविपाकेनेत्यस्य राज्ञामित्यादिः विपच्यत इति विपाकः फलं प्रायशो जरासन्धनिरुद्धानां राज्ञां कर्मणः पुण्यस्य फलेन हेतुना क्रतुः राजसूयः तव च चशब्दात् युधिष्ठिरस्याप्यभिमतः अतस्तावत्तत्रैव गन्तव्यमिति भावः ॥१०॥ इतीति । सर्वतोभद्रं शुभावहम् उद्धवस्य वचः श्रुत्वा अच्युतादयः सर्वे प्रत्यपूजयन्नन्वमोदन्त ॥११॥ अथेति । दारुकः जैत्र एव आदिः (दारुकजैत्रावादी) येषां तान् भृत्यानादिशदाज्ञापयामास गुरून् वसुदेवादीन् अनुज्ञाप्यानुज्ञां प्रार्थ्य निर्गमय्येत्युत्तरेण सम्बन्धः ॥१२॥ निर्गमय्येति । सुतैः सहितान् परिच्छदैः परिकरैः सहितान् स्वानवरोधान् दारान्निर्गमय्य पुराद्बहिर्गमयित्वा हे शत्रुहन् ! सूतेनोपनीतमानीतं रथमारुरोह ॥१३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

किम्बहुनोक्तेनायं जरासन्धवधोऽनेकप्रयोजनोपेत इत्याह जरासन्धेति । भूभारहरणार्थत्वेनावतीर्णत्वात्तत्र कालान्तरे दुर्योधनादिभारावरोपणहेतुत्वेनाभिमतः क्रतुरित्याह प्राय इति ॥१०॥ सर्वतोभद्रं सर्वप्रकारेण भद्रम् ॥११-१३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

जरेत्यादौ कृष्णेति पाकविपाकेन क्वचिदनुकूलतया क्वचित्तु प्रतिकूलतयाभिप्रायपरिणामेनेत्यर्थः ॥१०-१४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

॥९-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

गायन्तीत्यादि । गोप्यो बलदेवपरिगृहीताः गोपाङ्गनाः यथा तव विशदं कर्म गायन्ति किं तदित्याह स्वशत्रुवधं शङ्खचूडवधम् आत्मविमोक्षणञ्च कुञ्जरपतेः स्वशत्रुवधं ग्राहवधञ्च, यथा लब्धशरणा मुनयो वयञ्च, यथा लब्धशरणा गायन्ति, पित्रोर्वसुदेवदेवक्योरात्मविमोक्षणं कंसवधञ्च यथा वयं गायामस्तथा देव्यश्चात्म-विमोक्षणं पतिविमोक्षणं जरासन्धवधं गायन्ति; भूतवद्गायन्तीत्यर्थः ॥१०-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भूर्य्यर्थाय राजसूयसिद्धये राजवृन्दरक्षासिद्धये त्वच्चिकीर्षितशिशुपालादिवधसुखसाध्यत्वसिद्धये मद्व्यञ्जितार्थविशेषसिद्धये च पाको राजसूयस्य निष्पत्तिस्तस्मिन् सति तस्य वा यो विपाकः विसदृशं फलं कुरुवंशक्षयसूचकदुर्योधनमानभङ्गः तेन हेतुना क्रतुश्च तवाभिमतः "पाकः परिणतौ शिशौ" इति विपाकः पाचने स्वेदे कर्मणो विसदृक् फले इति च मेदिनी एषोऽर्थस्तत्रत्ययादवकौरवाद्यैर्मा बुद्ध्यतामित्युद्धवेन दुर्बोधार्थकं पदम्प्रयुक्तं पापविपाकेनेति पाठे पापानां शिशुपालादीनां विपाकेन विनाशलक्षणपरिणामेन हेतुना प्राय इति वितर्के ॥१०॥ अच्युतं सोऽपपत्तिकत्वात् च्युतिरहितं यदुवृद्धा इत्यनेनानिरुद्धादयः सद्यो युद्धोत्साहवन्तस्तु नापूजयन्निति द्योतितम् ॥११॥ गुरून् वसुदेवादीन् अनुज्ञाप्य अनुज्ञां प्रार्थ्य ॥१२॥ अवरोधान् अवरोधस्थान् दारान् तेषामपि निमन्त्रितत्वात्तदौत्सुक्याच्च ॥१३॥

गूढार्थदीपिनी

भूर्यर्थाय भूरिप्रयोजनाय । यज्ञसिद्धये राज्ञां रक्षासिद्धये च । शिशुपालादीनां वधसिद्धये च । अत्र पापविपाकेन इत्येव पाठः समीचीनः अन्यार्थस्यैतेनैव गतार्थत्वात् क्लिष्टकल्पनया मुख्यार्थस्यानौचित्यात् पाकविपाकयोः पर्यायवाचित्वाच्च । पापविपाकेन जरासन्धस्य पापफलेन । विश्वनाथस्तु शिशुपालादीनां विनाशलक्षणपरिणामेन हेतुना इत्याह । प्रायोग्रहणात् न केवलं पापविपाक एव अपि तु तत्र तव दर्शनादिसत्त्वात् पुण्यविपाक एव । पच्यते इति पाकः कर्म इति व्युत्पत्तिरपि न सङ्गच्छते पच्धातोः करणार्थताया क्वचित् दृश्यमानत्वात् अनुपयोगित्वाच्च । किञ्च अयं क्रतुः तव च तवापि अभिमतः कुरुवंशनाशसूचकदुर्योधनमानभङ्गेन शिशुपालादिदुष्टराजन्यलक्षणभूभारहरणेन च । त्वयि तत्र गते सति सर्वमेतत् सम्पद्यते इति निर्विवादम् ॥१०॥ सर्वतोभद्रम् अभीष्टदम् । अच्युतं युक्तियुक्तं खण्डनानर्हं च । यदुवृद्धाः अक्रूरकृतवर्मादयः । यदुवृद्धा इति

निर्देशेन अनिरुद्धादयो न। तेषां मतं तु राज्ञां बन्धनिवृत्त्यर्थं प्रथमं जरासन्धेन युद्धमेव ॥११॥ गुरून् वसुदेवादीन् अनुज्ञाप्य अनुज्ञां सम्प्रार्थ्य दारुकः सारथिः तदादीन् आदिशत् आज्ञापयामास ॥१२॥ स्वान् अवरोधान् अन्तःपुरस्त्रियः निर्गमय्य प्रयाणं कारयित्वा। यदुराजम् उग्रसेनं च पृष्ट्वा। सपरिच्छदान् ससामग्रीकान् ॥१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भूर्य्यर्थाय दिग्विजयराजविमोक्षणं शिशुपालवधाद्यनेकप्रयोजनसुखसिद्धये पच्यन्ते इति पाकाः दुर्योधनापराधास्तेषां विपाकेन तस्मिन्क्रतौ सम्मानितस्यापि दौर्मनस्यरूपेण फलेन भूभारहरणनिमित्तेन तव भूभारहर्तुरपि क्रतुरभिमतः ॥१०॥ अच्युतं हृद्यम् ॥११॥ गुरून् वसुदेवादीन् ॥१२-१३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वोक्तमुभयार्थायेत्येतत्तन्मात्रार्थकं नेति स्वयं तद्व्याकुर्वन्नाह ॥ जरासन्धवध इति। हे कृष्ण भूयार्थाय शिशुपालादिभूपानां मूलभूतजरासन्धवधे वधः सुलभ इति बहुप्रयोजनाय। कालविपाकेन दुष्टराजन्यमरणकालपरिपाकेन। तव चायं क्रतुरभिमतः। प्रायः पाकविपाकेनेति क्वचित्पाठः। पच्यतेऽनेनेति पाकः कर्म तद्विपाकः फलोन्मुखता तेन पाकविपाकेनेति स्फुटार्थम्। तत्कर्मादिकं न स्वतः फलदं तव सामर्थ्येनैवेति ध्वनयितुं तव चेत्याद्युक्तिः ॥१०॥ उद्धववचनं श्रुत्वा माधवः किमचीचरदिति राजमानससंशयं स्वयं शुकः परिहरन्वक्तीति वक्ति ॥११॥ श्रीशुक इति। सर्वतो भद्रं सर्वप्रकारेणापि मग्लरूपमित्युद्धववचोऽच्युतो देवर्षिर्नारदो यदुवृद्धा उग्रसेनादयो रामो बलश्च प्रत्यपूजयन् आनर्चुर्युक्तमिति श्लाघाञ्चक्रिर इति यावत्। यदुवृद्धानित्यनेन बालानभिमर्तिं ध्वनयति। गुरून्वसुदेवादीननुज्ञाप्य विज्ञाप्य दारुकजैत्रादीननुज्ञाप्याज्ञाप्य ॥१२॥ स्वानवरोधान्दारान्ससुतान्सपरिच्छदान्। स निर्गम्यावरोधात्स्वदिति पाठेऽन्तःपुरान्निर्गम्य बहिरागत्येत्यर्थः। निर्गम्य बहिर्गमयित्वा। सङ्कर्षणं यदुराजमुग्रसेनं च नगरं गन्तुमनुज्ञाप्य सूतेन दारुकेणोपनीतं गरुडध्वजं रथमारुरोह। अत्र नारदागमनमिव स्पष्टम्। गुरुवद्धूतगुरवे प्राहिणोद्दूतमञ्जसा। शीघ्रगेन रथेनाश्विति सभापर्वणि ॥ अयातयत्स्वसारथिमिति महाभारततात्पर्यनिर्णये चोक्तेः सारथ्यागमनं ज्ञेयम् ॥१३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

नन्वलौकिकोपायेन राज्ञां मोचनं शीघ्रं कृत्वा कथं न यागार्थं गम्यत इत्याशङ्क्याह-जरासन्धवध इति। कृष्णेति कालरूपस्यैतदेव कृत्यमिति सूचितं केवलं सम्बोधनवत् कृत्वाभिनिवेशात् प्रसादात्पापक्षयार्थं वा भूर्यर्थायेत्यनेकप्रयोजनाय भक्तिद्रोहे विनश्यतीति भक्तिमार्गसिद्धिः शरणागतरक्षाः यज्ञः कीर्तिः पूर्ववैरिप्रतीकारः भूभारहरणमित्यादिसहस्रप्रयोजनानि सद्ध्यन्ति भक्तिमार्गः सर्वेभ्योऽतिरिच्यते किञ्च प्रायः पाकविपाकेनेति जरासन्धकर्मणां परिपाकस्य विपाकेन समाप्त्या पापविपाकेन वा बहुद्रोहाद्राजसूयो बहिर्भूमेर्निर्वीरत्वं सम्पादयति तेन कारणेन वाप्यभिमतः क्रतुः चकारात् क्रतुश्च भूर्यर्थायोपकल्पते शिशुपालवधदुर्योधनमानभङ्गाद्यर्थत्वात् प्रकारान्तरेण वध्यो भवतीत्यनेनैव युद्धार्थमुद्युक्तः निवारितः सिद्धत्वाद्यशोपेक्षा च निवारिता ॥१०॥ मोचनार्थं समायातीति शङ्कायां प्रमथनाथोऽर्थं प्रमथमेव दद्यात् अत उद्धववाक्यमेव सर्वतो भद्रमिति भगवता तदेव गृहीतमित्याह-इत्युद्धववच इति। एवं कापट्येन वधेन किञ्चित् दूषणम् "मायेत्यासुराः" इति श्रुतेः। तद्वै नानाभूत्वा इति कापट्यव्यतिरेकेण न दैत्यवधः सिध्यतीति न कापट्यस्वीकरणदोषाय राजन्निति सम्बोधनं नराधमोऽपि तादृश इति ज्ञापनार्थं सर्वतो भद्रता निरूपितैव अच्युतमिति न च्युतं कापि क्षतिर्यत्रेति भगवद्रूपोऽयं प्रकारः निर्दोषपूर्णगुणरूपः अत एव चकारादन्येऽपि तरुणानां परं शौर्योत्सिक्तानां नागतं मनसीति सूचितं कृष्णश्चेति चकाराद्वसुदेवादयोऽपि भगवद्भक्ताश्च प्रतिपूजनं साधु साध्विति वचनम् ॥११॥ अथ भिन्नक्रमेण लौकिकानां सुखार्थं गृहस्थितिक्लेशाभावाय निर्गमनोत्सवं निरूपयति-अथेति सार्द्धैः षड्भिः। लौकिक्येषा भाषा देवकीसुत इति स्त्रीप्रभृतीनां सुखदायकः भृत्या अन्तरङ्गसेवकाः कर्मकराः जैत्रोऽपि जयशीलः कश्चिद्रथयोजकः गुरून् पित्रादीन् ब्राह्मणान् वा विभुरिति सर्वकरणसमर्थः ॥१२॥ प्रथमत एवान्तःस्त्रियो निर्गमय्य अवरोधोऽन्तःपुरस्त्रियः पुँल्लिङ्गनिर्देशः स्त्रीभावाभावाय सङ्कर्षणः सहायार्थं यदुराजः उग्रसेनः अनेन राजसतामसौ परित्यज्य अन्ये सर्वे निर्गता इति सूचितं शत्रुहन्निति बहिर्मुखताभावाय प्रद्युम्नादयोऽपि कौतुकात् भगवद्रथमारुहन् भगवान् वा कौतुकात् अन्यरथमारुहत् स्त्रीभिः परिवृतो वा गच्छेत् अतः सूतोपनीतं स्वरथमित्युक्तं गरुडध्वजत्वान्न सहायापेक्षा ॥१३॥

श्रीसुबोधिनीसारः

कृष्णेति कालरूपस्यैतदेव कृत्यमिति सूचितं केवलं सम्बोधनवत् । चकारात् क्रतुश्च भूर्यर्थायोपकल्पते ॥१०॥ उद्धववाक्यमेव सर्वतो भद्रमिति भगवता तदेव गृहीतम् । चकारादन्येऽपि तरुणानां परं शौर्योत्सिक्तानां नागतं मनसीति सूचितम् ॥११॥ निर्गमनोत्सवं निरूपयति-अथेति सार्द्धैः षड्भिः । भृत्या अन्तरङ्गसेवकाः कर्मकराः जैत्रोऽपि जयशीलः ॥१२॥ शत्रुहन्निति बहिर्मुखताभावाय प्रद्युम्नादयोऽपि कौतुकात् भगवद्रथमारुहन् ॥१३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'तव यशश्च भविष्यति इति' यदुक्तं तदेव दर्शयति-गायन्तीति । जरासन्धनिगृहीतानां राज्ञां देव्यः पत्न्यः स्वगृहेषु बालकलालनादौ स्वशत्रोर्जरासन्धस्य वधम् आत्मनाम् आत्मवत्प्रेष्ठानां पतीनां विमोक्षणं च ते तव विशदं सत्कीर्तिकरं कर्म हे वत्स ! मा रोदीः श्रीकृष्ण एवं करिष्यति' इति गायन्ति । तत्र दृष्टान्तमाह-यथा गोप्यः स्वशत्रुशङ्खचूडवधं स्वमोक्षणं च गायन्ति, तथा चावतारान्तरगतं नक्रवधं ततः कुञ्जरपतेर्गजेन्द्रस्य मोक्षणं च । यथा रावणवधं ततो जनकात्मजायाः सीताया विमोक्षणं च, यथा च कंसवधं ततः पित्रोर्देवकीवसुदेवयोर्विमोक्षणं च मुनयो लब्धशरणा वयम् अस्मदादयो भक्ताश्च गायन्ति तथेत्यर्थः ॥१०॥ हे कृष्ण ! जरासन्धस्य वधो भूर्यर्थाय 'भक्तद्रोही विनश्यति' इति 'न मे भक्तः प्रणश्यति' इति च तव प्रतिज्ञासिद्धिः, शरणागतरक्षा, राजसूययज्ञः, तव सत्कीर्तिः, पूर्ववैरप्रतीकारः, भूभारनिवृत्तिश्च, इत्यनेकप्रयोजनाय कल्पते भविष्यतीति । 'अथ राजसूयार्थमेव प्रथमं गन्तव्यम्' इत्यभिप्रायेणाह-प्राय इति । प्रायः पच्यत इति पाकः पुण्यपापात्मकं कर्म तस्य विपाकः फलं तेन राज्ञां पुण्यविपाकेन जरासन्धस्य पापविपाकेन च 'पापविपाकेन' इति पठितुं जरासन्धस्य पापफलेन हेतुनायं क्रतुः राजसूयस्तवाप्यभिमतः सम्मतः । चकारात् युधिष्ठिरादेरभिमतः ॥११॥ 'राजनीतिश्चैवम्भूता' इति सूचयन् सम्बोधयति-राजन्निति । सर्वतो भद्रं शुभावहम् अच्युतं फलाव्यभिचरितम् इत्येवमुक्तप्रकारकमुद्धववचः देवर्ष्यादयः सर्वे प्रत्यपूजयन् साधूक्तमित्यन्वमोदन्त । 'यदुवृद्धा' इत्युक्त्या तरुणा युयुत्सवस्तथा नापूजयन्निति सूचितम् ॥१२॥ अथानन्तरमेव देवकीसुतः कृष्णः दारुकादीन् स्वभृत्यान् प्रयाणाय गमनसाधनसङ्ग्रहाय आज्ञापयामास । ततश्च गुरून् वसुदेवादीन् अनुज्ञाप्य तदनुज्ञां सम्प्रार्थ्य तथा हे शत्रुहन् ! सङ्कर्षणं यदुराजम् उग्रसेनं चानुज्ञाप्य पृष्ट्वा सुतैः सहितान् परिच्छदैः परिकरैश्च । तत्र हेतुमाह-भगवानिति । 'लौकिककौतुकार्थमेव रथारोहणम्, वस्तुतस्तु तस्य वाहनं गरुड एव' इति सूचयन्नाह-गरुडध्वज इति ॥१३-१४॥

अन्वितार्थप्रकाशिका

गायन्तीति ॥ जरासन्धनिगृहीतानां राज्ञां देव्यः पत्न्यः स्वगृहेषु बालकलालनादौ स्वशत्रोर्जरासन्धस्य वधम् आत्मनाम् आत्मवत्प्रेष्ठानां पतीनां विमोक्षणं च ते तव विशदं सत्कीर्तिकरं कर्म । हे वत्स ! मा रोदीः श्रीकृष्ण एवं करिष्यतीति गायन्ति । तत्र दृष्टान्तानाह । यथा गोप्यः स्वशत्रुशङ्खचूडवधं स्वमोक्षणं च गायन्ति । यथा चावतारान्तरगतं नक्रवधं ततः कुञ्जरपतेर्गजेन्द्रस्य मोक्षणं च यथा च रावणवधं ततो जनकात्मजायाः सीतायाः विमोक्षणं च यथा कंसवधं ततः पित्रोर्देवकीवसुदेवयोर्विमोक्षणं च मुनयो लब्धशरणा वयम् अस्मदादयो भक्ताश्च गायन्ति तथेत्यर्थः । महासभायां गोपीनां प्रस्तावो यशोदादीनामेव सभ्येषु भानान्न दोषायेति ज्ञेयम् ॥१०॥ जरेति ॥ हे कृष्ण ! जरासन्धस्य वधो भूर्यर्थाय "भक्तद्रोही विनश्यति" इति । "न मे भक्तः प्रणश्यति" इति च तव प्रतिज्ञासिद्धिः शरणागतरक्षा राजसूययज्ञः तव सत्कीर्तिः पूर्ववैरप्रतीकारः भूभारनिवृत्तिश्चेत्यनेकप्रयोजनाय उपकल्पते भविष्यतीति अतो राजसूयार्थमेव प्रथमं गन्तव्यमित्यभिप्रायेणाह । प्राय इति । प्रायः पच्यते इति पाकः पुण्यपापात्मकं कर्म तस्य विपाकः फलं तेन राज्ञां पुण्यविपाकेन जरासन्धस्य पापविपाकेन च । यद्वा । पाको राजसूयानुष्ठानं तस्य विपाकः पाण्डवानां निष्कण्टकराज्यप्राप्तिस्तेन हेतुना पापविपाकेनेति पाठे तु जरासन्धस्य पापफलेन हेतुना यद्वा पापानां शिशुपालदुर्योधनादीनां विपाकेन नाशरूपेणेत्यर्थः । अयं क्रतुः राजसूयस्तवाप्यभिमतः सम्मतः चकारात् युधिष्ठिरादेरभिमतः । तत्र त्वयि गते सर्वं भविष्यतीति भावः ॥११॥ इतीति ॥ हे राजन् ! सर्वतोभद्रं शुभावहम् अच्युतं बाधशून्यं फलाव्यभिचरितमुपपत्त्या वृद्धं वा इत्येवमुक्तप्रकारकमुद्धववचः देवर्ष्यादयः सर्वे प्रत्यपूजयन् साधूक्तमित्यन्वमोदन्त । यदुवृद्धा इत्युक्त्या युयुत्सवस्तु तथा नान्वमोदन्तेत्याशयः । अत्राच्युतमित्यत्र अच्युत इति कृष्णस्येत्यत्र रामस्येति पाठभेदः ॥१२॥ अथेति ॥ अथ भगवान् विभुः देवकीसुतः गुरून् वसुदेवादीन् अनुज्ञाप्य अनुज्ञां सम्प्रार्थ्य दारुकजैत्रादीन् स्वभृत्यान् प्रयाणाय गमनसाधनसंग्रहाय आदिशत

आज्ञापयामास ॥१३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भूर्यर्थाय यज्ञसिद्धिभूभारहरणादिबहुप्रयोजनाय ॥ विद्यते पाको भोग्यं शुभाशुभं प्रारब्धकर्म तस्य विपाकेन भोगावसानेन जरासन्धशुभकर्मावसानेन राज्ञामशुभकर्मावसानेन च अनेन च हेतुना अयं क्रतुः तवाभिमतः सम्मतः ॥१०॥ सर्वतः सर्वनीतिशास्त्रेभ्यः अच्युतमविरुद्धत्वादपतितं यत् उद्धववचः तत् प्रत्यपूजयन् मानयामासुः यदुवृद्धैरित्युक्तेः युद्धोत्साहिनः अनिरुद्धसाम्बादयो न पूजयामासुरिति भावः ॥११॥ गुरून् वसुदेवादीन् अनुज्ञाप्य अहं गच्छामीत्युक्त्वा ॥१२॥ अवरोधान् कलत्राणि निर्गमय्य प्रस्थानं कारयित्वा ॥१२॥ द्विपाः जगाः भटाः पदातयः सादिनो हयारूढाः ॥ नायका रथादीनां नेतारः तैः करालया दुःसहया स्वचम्वा परिवृतः सन् ततस्तस्याः पुर्याः सकाशात् निराक्रमत् निर्जगाम । कथम्भूतायाः मृदङ्गादिभिर्वादित्रैः यः प्रघोषस्तेन घोषिता नादिताः ककुभो दिशो यस्यास्तस्याः ॥ १३-१४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कोऽसौ तद्वधादस्माकं लाभस्तत्राह ॥ गायन्तीति ॥ हे कृष्ण, राज्ञां देव्यः, मागधरुद्धनृपाणां पत्न्य इत्यर्थः । गृहेषु गृहविधेयबालकलालनपालनान्दोलनादिषु कर्मस्वित्यर्थः । स्वशत्रुवधं स्वपतिसंरोधकत्वाच्छत्रुभूतजरासन्धवधमित्यर्थः । आत्मविमोक्षणमात्मवत् प्रीत्यास्पदस्वपतिविमोक्षणं च, एवंविधं ते तव, विशदकर्म निर्मलं चेष्टितं, गायन्ति । तत्स मा रोदीः करुणार्णवः श्रीकृष्ण एवं करिष्यतीति गायन्तीत्यर्थः । अयं भावः । साम्प्रतमप्येवं गायन्ति, त्वत्कारितजरासन्धवधानन्तरं तत्पतिविमोक्षणविधानानन्तरं चैवमेव गास्यन्तीति । तत्र दृष्टान्तमाह । यथा, गोप्यः, स्वशत्रोः शङ्खचूडस्य वधं तत आत्मविमोक्षणं चेति शेषः । गायन्ति । अवतारान्तरगतं च दृष्टान्तयति । लब्धशरणास्त्वदेकान्तिकभक्ताः, कुञ्जरपतेर्गजेन्द्रस्य, नक्रात् विमोक्षणं नक्रवधं च यथा, गायन्ति । मुनयो वाल्मीक्यादयः, जनकात्मजायाः सीतायाः, रावणात् विमोक्षणं तद्वधं च, यथा गायन्ति । वयं च प्रत्यक्षभगवतस्तव भक्ता वयमपि, पित्रोर्वसुदेवदेवक्योः, कंसकारागृहाद्विमोक्षणं तद्वधं च गायामस्तद्वदित्यर्थः ॥१०॥ जरासन्धेति ॥ किञ्च जरासन्धवधः, हे कृष्ण, भूर्यर्थायानेकप्रयोजनाय, उपकल्पते । तत्र प्रथमतस्तु, अयं क्रतुः राजसूययागः, प्रायः, पच्यते इति पाकः कर्म तस्य विपाकः फलं तेन, जरासन्धनिरुद्धानां राज्ञां कर्मणः पुण्यकालेन हेतुना जरासन्धादीनां पापकर्मविपाकेन हेतुना च, युधिष्ठिरस्याभिमतिं प्राप्त इति शेषः । अन्तर्गतशिशुपालवधात्, तव च, अभिमतः । इदं सर्वं तत्र त्वयि गते सति सम्भविष्यतीति भावः ॥११॥ इतीति ॥ हे राजन्, इत्येवंविधं, सर्वतोभद्रं परितः शुभावहम्, उद्धववचः, अच्युतः स्वयं श्रीकृष्णः, देवर्षिर्नारदः, यदुवृद्धा उग्रसेनादयो वृद्धाः, च, बलश्च स्वयं बलभद्रोऽपि, एते सर्वे, प्रत्यपूजयन् ॥१२॥ अथेति ॥ अथानन्तरं, विभुः, देवकीसुतः, भगवान् श्रीकृष्णः, दारुकश्च जैत्रश्च तावादी येषां तान्, भृत्यान्, प्रयाणाय हस्तिनापुरं प्रति प्रयाणं कर्तुम्, आदिशदाज्ञापयामास । गुरून् वसुदेवादीन् प्रति, अनुज्ञाप्य अनुज्ञां सम्प्रार्थ्य ॥१३॥

कृष्णप्रिया

जिन राजन को जरासन्ध ने बांध राखे हैं, उन की भार्या लोग निज शत्रु जरासन्ध का वध और राजाओं का छूडाना इस आपके विशद कर्म को अपने अपने गृहों में गान करेंगी जैसे गोपीजन शंखचूड के वध को और उस में अपने छूडाने को गान करतीं हैं, जैसे अन्य अवतार में ग्राह का वध और उस में गजेन्द्र का छूडाना इस आपके कर्म को भक्तजन गान करते हैं और रामावतार में रावण का वध तथा जानकीजी का छूडाना इस आपके कर्मका गान करते हैं और जैसे कंस का वध और वसुदेवदेवकी का छूडाना इस आपके कर्म का मुनिजन और आपके शरणागत हम भक्तजन गान करते हैं तैसे ही इन राजा लोगों की भार्या आपके चरित्र का गान करेगी हे कृष्ण ! जरासन्ध का वध अनेक प्रकार के प्रयोजन का हेतु होगा और यह राजसूय यज्ञ राजा लोगों के पुण्यफल करके जरासन्ध के पापफल करके आपको सम्मत है क्योकि इस यज्ञ के निमित्त जरासन्ध मारा जाएगा इस लिए राजा लोगों के पुण्यकर्म के फल करके जरासन्ध के पापकर्म के फल के कारण ही इस यज्ञ का होना है इस लिए आपको अभिमत ही है ॥१०॥ श्रीशुक उवाच । इस लिए आप हे राजन् ! सर्व प्रकार से मंगल प्रापक और फल की च्युति रहित पूर्व उक्त प्रकार युक्त उद्धवजी के वचन को नारदजी तथा यदुवंशी लोगो में वृद्ध वृद्ध और श्रीकृष्णजी भी श्लाघा करने लगे ॥११॥ इस के अनन्तर श्रीकृष्ण भगवान वासुदेवजी से आदि लेकर निज पूज्य पुरुषों की सम्मति लेकर

दारुक जैत्र आदि भृत्यों को प्रयाण के लिए आज्ञा देने लगे ॥१२॥ हे शत्रुहन् ! गरुडध्वज श्रीकृष्ण भगवान्, बलदेवजी और उग्रसेनजी से सम्मति लेकर पुत्रादि सहित तथा शय्यादि सहित निज भार्याओं को प्रथम पुर से बहार प्रयाण कराने के बाद पश्चात् सूत ने पास में प्राप्त कीये निज रथ पर बिराजमान हुए ॥१३॥

ततो रथद्विपभटसादिनायकैः करालया परिवृत आत्मसेनया ।
मृदङ्गभेर्यानकशङ्खगोमुखैः [1]प्रघोषघोषैः ककुभो निराक्रमत् ॥१४॥
[2]नृवाजिकाञ्चनशिबिकाभिरच्युतं सहात्मजाः पतिमनु सुव्रता ययुः ।
वराम्बराभरणविलेपनस्रजः सुसंवृता नृभिरसिचर्मपाणिभिः ॥१५॥
नरोष्ट्रगोमहिषखराश्वतर्यनः[3]करेणुभिः परिजनवारयोषितः ।
स्वलङ्कृताः [4]कटकुटिकम्बलाम्बराद्युपस्करा ययुरधियुज्य [5]सर्वशः ॥१६॥
बलं बृहद्ध्वजपटछत्रचामरैर्वरायुधाभरणकिरीटवर्मभिः ।
दिवांशुभिस्तुमुलरवं बभौ रवेर्यथार्णवः क्षुभिततिमिङ्गिलोर्मिभिः ॥१७॥

कर्दमक्षमा

ततः, रथद्विपभटसादिनायकैः, करालया, आत्मसेनया, परिवृतः, मृदङ्गभेर्यानकशङ्खगोमुखैः, प्रघोषघोषितककुभः, निराक्रमत् ॥१४॥ पतिम्, अनुव्रताः, सुव्रताः, सहात्मजाः, वराम्बराभरणविलेपनस्रजः, नृवाजिकाञ्चनशिबिकाभिः, असिचर्मपाणिभिः, नृभिः, अच्युतम्, सुसंवृताः, ययुः ॥१५॥ परिजनवारयोषितः, कटकुटिकम्बलाम्बराद्युपस्कराः, स्वलङ्कृताः, सर्वतः, अधियुज्य, नरोष्ट्रगोमहिषखराश्वतर्यनःकरेणुभिः, ययुः ॥१६॥ तुमुलरवम्, बलम्, बृहद्ध्वजपटच्छत्रचामरैः, वरायुधाभरणकिरीटवर्मभिः, रवेः, दिवांशुभिः, यथा, अर्णवः, क्षुभिततिमिङ्गिलोर्मिभिः, बलम्, बभौ ॥१७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भटाः पदातयः सादिनोऽश्वारोहाः रथादिनायकैः करालया तीव्रया आत्मसेनया परिवृतो निराक्रमन्निरगात् कुतः सकाशात् मृदङ्गादिभिर्वाद्यैः प्रघोषेण घोषितायाः ककुभः ॥१४॥ नृवाजीति । नृवाजिभिर्नरयानैरश्वैश्च काञ्चनशिबिकाभिश्च अच्युतं पतिमनु ययुः सुव्रताः पतिव्रता वराण्यबरादीनि यासां ताः ॥१५॥ नरोष्ट्रादिभिर्यानैः अश्वतरी गर्दभ्यामश्वाज्जाताः अनः शकटं करेणुर्गजी परिजनयोषितो वारयोषितश्च कटकुटयः उशीरादितृणनिर्मितगृहाः कम्बलाम्बरादयश्चोपस्कराः कुड्यादिरूपा यासां ताः अधियुज्यबलिवर्दादिषु तानुपस्करान् दृढं सन्नह्य ॥१६॥ रवेरंशुभिश्च तद्बलं दिवा बभौ कथम्भूतम् ? तुमुलरवमाकुलस्वनं क्षुभितैस्तिमिङ्गिलैरूर्मिभिश्च ॥१७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो रथारोहणोत्तरम् । रथादीनामुक्तेः परिशेषाद्भटपदं पदातिपरमेवात्र । ककुभो दिशः ॥१४॥ सुसंवृताः परिवारिताः ॥१५॥ "कटः किलिञ्जशरयोर्वीरणेऽपि प्रकीर्तितः" इति कोशात् । कटपदेन गुंद्रवीरणादिशाखा ग्राह्याः । संनह्य बद्ध्वा ॥१६॥ अंशुभिरिति बृहद्ध्वजादेः, क्षुभिततिमिङ्गिलोर्मिभिरिति नरोष्ट्रादेरुदाहरणम् ॥१७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तदनन्तरं किम्वा तस्याः पुर्य्याः सकाशात् तामेव विशिनष्टि-मृदङ्गेत्यादिना । आत्मनः सेनयेति तस्य बलविक्रमपरिच्छदादिभिर्भक्त्या चासाधारण्यमुक्तम् आनकः पटहः गोमुखम् आनकभेदः ॥१४॥ काञ्चनशिबिकानां नरयानान्तर्गतत्वेऽपि पृथङ्निर्देशस्तद्विशेषापेक्षया अच्युतमिति प्रत्येकं सर्वासामग्रतः स्थित्यभिप्रायेण सुसंवृताः सुष्ठु दूरतोऽसङ्कीर्णत्वादिना सम्यक् नैरन्तर्य्यादिनावृता वेष्टिता अन्यत्तैः यद्वा नर एव वाजिवच्छीघ्रगा यत्र नृरूपाः वाजाः पक्षा विद्यन्ते

---

१. प्रघोषघोषिककुभो-श्रीधर. वंशी. ; प्रघोषघोषिताः ककुभो-शुक. वीर. ; सङ्घुष्ट्या वै ककुभो-विज. । २. स्ववाजि-वीर. ; प्रियाश्च काञ्चन-विज. । ३. तर्यः-विज. । ४. पटकुटि-विज. । ५. सर्वतः-श्रीधर. वंशी. वीर. विज. ; सर्वशः-जीव. विश्व. शुक. ।

यत्र वा तादृशीभिः काञ्चनमयशिबिकाभिः ॥१५॥ नरशब्देन नरवाह्ययानानि गावो वृषाः परिजनाः रजकादयः सर्वशः सर्वानेवोपस्करान् सर्वेष्वेव वाहनेषु सर्वतोऽधियुज्य ॥१६॥ तच्च बलं सैन्यमंशुभिर्निजकान्तिभिर्दिवापि रविमतिक्रम्य बभौ कीदृशैरंशुभिः बृहन्ति ध्वजादीनि येषु वराण्यायुधादीनि च येषु तैः तत्र दृष्टान्तः यथेति क्षुभितास्तिमिङ्गिलास्तदादयो येषु तैरूर्मिभिः अत्र पटाः पताकारूपाः ध्वजादीनां तिमिङ्गिलादिभिः सादृश्यम् अंशूनाञ्चोर्मिभिः ॥१७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततस्तदनन्तरम्, किंवा तस्याः पुर्य्याः सकाशात्; तामेव विशिनष्टि-मृदङ्गेत्यादिना । आत्मनः सेनयेति तस्या बलविक्रमपरिच्छदादिभिर्भक्त्या चासाधारण्यमुक्तम्; आनकः पटहः, गोमुखः काहलः ॥१४॥ काञ्चनशिबिकानां नरयानान्तर्गतत्वेऽपि पृथङ्निर्देशस्तद्विशेषापेक्षया; अच्युतमिति प्रत्येकं सर्व्वासामग्रतः स्थित्यभिप्रायेण; सुसंवृताः संरक्षिता इत्यर्थः । यद्वा, सुष्ठु दूरतोऽसङ्कीर्णत्वादिना नृवाजि-काञ्चनशिबिकाभिः, नृणां बह्या नृवाह्या वाजिवच्छीघ्रगा याः काञ्चनशिबिकास्ताभिः । अम्बरादीनां यथोत्तरं यात्रा-मङ्गलद्रव्यत्वे श्रैष्ठ्यम् ॥१५॥ नर-शब्देन नरवाह्ययानानि, गावो वृषाः, परिजना दास्यः, सर्व्वशः सर्व्वानेवोपस्करान्, सर्व्वेष्वेव वाहनेषु, सर्वतोऽधियुज्य ॥१६॥ पटाः पताकारूपाः, बभौ अशोभत, ध्वजादीनां यथा पर्व्वं दूरतोऽधिकदृश्यमानतया; आयुधादीनाञ्च यथोत्तरं देहाधिक-व्यापकतया शोभाहेतुत्वे श्रैष्ठ्यम्; क्षुभितेत्यनेनार्णवस्य तुमुलरवत्वं सूचितम्; तिमिङ्गिलादीनाञ्च ध्वजादिभिः सादृश्यंकथञ्चिदूह्यम् ॥१७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्रघोषघोषि ककुभः गम्भीरघोषिककुभः दिशः प्रतीत्यध्याहारः घोषयन्तीति वा अर्थः ॥१४-२३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तत इति । द्विपा गजाः भटाः पदातयः सादिनोऽश्वरूढास्तेषां नायकैः करालया परमभयङ्करयास्वस्य सेनया परिवृतः मृदङ्गादिभिर्वद्यैर्यः प्रघोषस्तेन घोषिताः ककुभः कुर्वन्नित्यध्याहारः निराक्रमत् निष्क्रान्तवान् प्रघोषघोषीरिति पाठे दिशः प्रति मृदङ्गादिभिर्यो घोषस्तेन घोषयन् ॥१४॥ स्वेति । सुव्रताः पतिव्रताः वैदर्भ्यादयः पतिमच्युतं यान्तं स्वस्ववाजिकाञ्चनशिबिकादिभिरनुययुः कथम्भूताः असिचर्मणी खड्गखेटौ पाण्योर्येषां तैर्नृभिर्भृत्यैः संवृताः वराः श्रेष्ठाः अम्बरादयो यासां ताः ॥१५॥ नरेति । तथा परिजनयोषितः वारयोषितश्च कटकुट्यदयः उपस्कराः कुटीशिबिरादिसाधनभूताः यासां ताः अधियुज्य बलीवर्दादिषु तानुपस्करान् दृढं सन्नह्य नरादिभिर्यानैर्ययुरिति सम्बन्धः । तत्र नरो नरवाह्यं यानं गर्दभ्यामश्वाज्जाता अश्वतरी अनः शकटं करेणुर्गजी कटकुटयः उशीरादितृणनिर्मिताः गृहाः ॥१६॥ बलमिति । तद्बलं ध्वजादिभिर्दिवा बभौ इति सम्बन्धः । कथम्भूतम् ? तुमुलो रवः स्वनो यस्मिस्तत् यथा रवेः सूर्यस्य अंशुभिः क्षुभिताः तिमिङ्गिलादयः तैर्ये महान्तः ऊर्मयः तैरर्णवो भाति तद्वत् ॥१७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

ततः किमभूदिति तत्राह-तत इति । ककुभः दिशः सङ्घुष्टया सङ्घोषयन्त्या ॥१४॥ प्रियाश्चाच्युतं पतिम् अनुययुः वस्त्रैः सुसंवृताः असिचर्मपाणिभिः नृभिः परिवृताः ॥१५॥ ततो बहिर्नरोष्ट्रादिभिः परिवृताः परिजनयुतवारयोषितश्च पटकुटयः वस्त्रनिर्मितमन्दिराणि पटकुटिकम्बलाम्बराणि आदिर्येषां ते तथा ते च उपस्करा येषां ते तथा अधियुज्य संयुज्य आरोप्य वा ॥१६॥ रवेरंशुभिः दिवा दिनं यथा भाति बृहद्ध्वजपटादेरुदाहरणमिदं क्षुभिततिमिङ्गिलोर्मिभिरर्णवो यथेति नरोष्ट्रादेर्निदर्शनम् ॥१७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नृपवाजीति नर एव वाजिनः शीघ्रगामित्वात् तद्वाह्यकाञ्चनशिबिकादिः ॥१५-१९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१०-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१०-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भटाः पदातयः सादिनः अश्वारोहाः नायकाः रथिनः टाबन्तोऽपि ककुभाशब्दो दृष्टः ॥१४॥ नृवाजीति । नरयानैरश्वैः

काञ्चनशिबिकाभिश्च अच्युतं पतिम् अनुययुः सुव्रताः पतिव्रताः ॥१५॥ परिजना रजकादयः कटकुटयः उशीरादिनिर्मिताः गृहाः तदादयः उपस्कराः परिच्छदा यासां ताः सर्वशः सर्वानेव तान् उपस्करान् अधियुज्य उष्ट्रादिषु दृढं सन्नह्य ॥१६॥ दिवा रवेरंशुभिस्तद्बलम् आयुधरत्नकिरीटादिचाकचक्ययुक्तं बभौ ॥१७॥

गूढार्थदीपिनी

ततो रथारोहणोत्तरम्। भगवान् रथादिभिः करालया भीषणया आत्मसेनया परिवृतः निराक्रमत् निश्चक्राम। कुतः सकाशात्। मृदङ्गादिवाद्यैः प्रघोषेण घोषितायाः ककुभः दिशः सकाशात्। यद्वा। आपं चैव हलन्तानाम् इति नियमात् टाबन्तेन ककुभाशब्देन बहुव्रीहौ भगवद्विशेषणम्। ततः पुरीतो वा। इतः परं पञ्चसु रुचिरावृत्तम् ॥१४॥ सुव्रताः पतिव्रता रुक्मिण्याद्याः सहात्मजा नृभिः सुसंवृताः परिवेष्टिताः सत्यः अच्युतं पतिमनुययुरित्यन्वयः काभिः। नृवाजिभिः नरयानैः अश्वैः काञ्चनशिबिकाभिश्च। कथम्भूताः। वराणि अत्युत्तमानि अम्बरादीनि यासां ताः कथम्भूतैः नृभिः। असिचर्मणी पाणौ येषां तैः। यद्वा। नर एव वाजिवत् शीघ्रगा यत्र ॥१५॥ किञ्च परिजनवारयोषतः पारिवारिककुलाङ्गनाः नरोष्ट्रादिभिर्यानैः सुष्ठु अलङ्कृताः सत्यः सर्वतो ययुरित्यन्वयः। कथम्भूताः। कटकुट्यदयः उपस्करा शिबिरादिसाधनभूताः यासां ताः। किं कृत्वा। तानेव उपस्करान् अधियुज्य बलीवर्दादिषु आरोप्य। खरोऽत्र भारवाहकत्वेन निर्दिष्टः। अश्वतरी गर्दभादश्वायां जाता। अनः शकटम्। करेणुः गजी। कटकुटयः उशीरादितृणनिर्मितगृहाः ॥१६॥ भगवतः तद्बलं रवेः अंशुभिः दिवा बभौ इत्यन्वयः। यथा क्षुभितैः तिमिङ्गिलादिभिः अर्णवः भाति तद्वत्। कैर्बभौ। बृहद्ध्वजादिभिः वरायुधादिभिश्च। कथम्भूतम्। तुमुलरवम् मिश्रितध्वनिम् ॥१७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मृदङ्गादिभिर्घोषस्तेन घोषिताः ककुभः कुर्वन् निराक्रमत् निरगात् ॥१४॥ नृभिर्वाजिभिश्च सहिताभिः पदातिभिरश्वारोहैश्च समावृताभिः काञ्चनशिबिकाभिरित्यर्थः। उपलक्षणञ्चैतद्गजरथादीनाम् ॥१५॥ कटकुटयः उशीरादिनिर्मिताः गृहाः कम्बलाम्बरादयश्च उपस्कराः परिच्छदा यासां ताः सर्वशस्तानुपस्करान् बलीवर्दादिषु अधियुज्य दृढं सन्नह्य नरयानानि अश्वतरी गर्दभ्यामश्वाज्जाता अनः शकटम् करेणुर्गजी नरपालादिभिः रवेरंशुभिश्च दिवा बभौ यथा रवेरंशुभिस्तत्क्षुभितैस्तिमिङ्गिलैरूर्मिभिश्च अर्णवो भाति तद्वत् ॥१७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

रथाश्च द्विपा गजाश्च भटाः पत्तयश्च सादिनोऽश्वारोहा इव गजारोहास्त इव रथारोहाश्च तेषां नायकाः प्रवर्तकास्तैः। सादी तुरगमातङ्गरथारोहेषु कथ्यत इति विश्वः। करालयारिकठोरयाऽऽत्मसेनया परिवृतो मृदङ्गादिभिः ककुभो दिशः सङ्घुष्टया घोषयन्त्या निराक्रमत् ॥१४॥ काश्चन प्रियाः सहात्मजाः सुव्रता अच्युतं पतिमनु शिबिकादिः। वराम्बरभूषणविलेपनैः सह स्रजो यासां ताः। असिचर्मपाणिभिर्नृभिः सुसंवृता ययुः ॥१५॥ नरादिगोमहिषखरैस्तथाऽश्वतरीभिर्गर्दभाद्वडवायां जाताभिरनोभिः शकटैः करेणुभिरिभीभिरिभैर्वा स्वलंकृताः परिजनयोषितो वेश्याश्च। पटकुटिर्वस्त्रमात्रकृतं गृहं शिबिरं कम्बलाम्बराणि अन्तःकम्बलसहितान्यम्बराणि तदात्मकाः कुटिका आदयो येषां ते च त उपस्कराश्च परिच्छदा यासां ताः सर्वशः स्वसर्वपदार्थान्नरोष्ट्रादिभिरधियुज्य तदुपर्यारोप्येत्यर्थः ॥१६॥ तद्बृहद्बलं दिवा यथा खेंऽशुभिः किरणैस्तथा बभौ। ध्वजपटाश्च छत्राणि च चामराश्च तैर्वरायुधाभरणकिरीटवर्मभिः क्षुभिततिमिङ्गिला ऊर्मयश्च तैस्ताभिर्वार्णव इव च। ध्वजेत्यादिकस्य तिमिङ्गिलोर्मीणां चोपमानोपमेयभावः। तथांऽशूनां वरायुधाभरणकिरीटवर्मणां स इति विवेकः। क्रमविवक्षया क्रमेण स वा ज्ञेयः ॥१७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः सेनासहितः नानाविधवाद्यसहितोऽपि दिशां प्रतिध्वनिसहितोऽपि निराक्रमत् सादयोऽश्ववाराः चतुरङ्गनायकैः सहिता दर्शनमात्रेणैव भयजनिका केवलं भगवत एव सेना ॥१४॥ ततः असाधारणीनां च प्रयाणप्रकारमाह–नृवाजीति द्वाभ्याम्। नृशब्देन नरयानं दोला वाजिनोऽश्वाः केवलाः शकटयोजिताश्च काञ्चनशिबिकाश्चतुर्दोलाः नृभिर्वाजिभिर्वा युक्ताः अच्युतं पतिमनु सुव्रताः पतिव्रताः रुक्मिण्यादयः सपुत्राः ययुः चतुर्विधालङ्करणयुक्ताः मार्गेऽपि स्वतोऽपि रक्षिताः नृभिरपि सुसंवृताः ॥१५॥ साधारणीनामाह–नरेति। नरादिभिरष्टभिः परिजना वारयोषितश्च निर्गताः गावो वृषभाः अश्वतरी अनः शकटं करेणुः करिणी सर्वा एव स्वलङ्कृताः कृताः तासां जातिस्वभावसामग्रीं वर्णयति–कटकुटीति। कटा नाम कुटी कटः पटकुटी वा कम्बलादयो वृष्टिनिवारकाः तासां

कृष्णमन्विति न नियमः किन्तु सर्वश एव ॥१६॥ सामान्यतो भगवत्कटकं वर्णयति-समुद्रतुल्यतया बलमिति । वस्त्रैरायुधैः सूर्यरश्मिभिः त्रिविधैर्बभौ उपर्याच्छादकाः बृहन्तो ध्वजादयः पटसहितानि छत्राणि भित्तानि वा आयुधानि आभरणानि किरीटानि कवचानि च तुल्यो रवो यत्रेत्यन्तः शौर्यं तस्यापरिमितत्वाय यथार्णव इति क्षुभितास्मिमिङ्गिलाः ऊर्मयश्च ॥१७॥

श्रीसुबोधिनीसारः

नानाविधवाद्यसहितोऽपि दिशां प्रतिध्वनिसहितोऽपि ॥१४॥ वाजिनोऽश्वाः केवलाः शकटयोजिताश्च काञ्चनशिबिकाश्चतुर्दोलाः ॥१५॥ वेश्याः स्वलंकृताः कटकुट्य उशीरादितृणनिर्मितगृहाः कम्बलवस्त्राद्युपस्करास्तांश्च सर्वतो बलीवर्दादिष्वधियुज्यारोप्य ययुः ॥१६॥ दिवा दिवसे तुमुलाः सङ्कीर्णा रवाः शब्दा यस्मिन् तत् बृहद्बलं बभौ ध्वजादिभिः वरायुधादिभिः रवेरंशुभिः किरणैः क्षुभितैस्तिमिङ्गिलैर्महामत्स्यैरूर्मिभिस्तरंगैरर्णवः समुद्र इव ॥१७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथानन्तरमेव देवकीसुतः कृष्णः दारुकादीन् स्वभृत्यान् प्रयाणाय गमनसाधनसङ्ग्रहाय आज्ञापयामास । ततश्च गुरून् वसुदेवादीन् अनुज्ञाप्य तदनुज्ञां सम्प्रार्थ्य तथा हे शत्रुहन् ! सङ्कर्षणं यदुराजम् उग्रसेनं चानुज्ञाप्य पृष्ट्वा सुतैः सहितान् परिच्छदैः परिकरैश्च । तत्र हेतुमाह-भगवानिति । 'लौकिककौतुकार्थमेव रथारोहणम्, वस्तुतस्तु तस्य वाहनं गरुड एव' इति सूचयन्नाह-गरुडध्वज इति ॥१३-१४॥ ततश्च रथादिनायकैः करालया परमभयङ्करया स्वसेनया वृतो मृदङ्गादिभिः वाद्यैः यः प्रघोषस्तेन घोषिता या ककुब्दिक् तस्याः सकाशात् निराक्रमत् निष्क्रान्तवान् । तत्र द्विपाः गजाः । भटाः पदातयः । सादिनः अश्वारूढाः ॥१५॥ ततश्च सहात्मजाः वराणि श्रेष्ठान्यम्बरादीनि यासां ताः असिचर्मणी पाण्योर्येषां तैर्नृभिः संवृताः सुव्रताः पतिव्रता रुक्मिण्यादयः प्रयान्तमच्युतं पतिं नृवाजिकाञ्चनशिबिकाभिरनुययुरित्यन्वयः ॥१६॥ कटकुटयः उशीरादितृणनिर्मितगृहाः कम्बलाम्बरादयश्चोपस्कराः कुड्यादिरूपाः शिबिरादिसाधनभूता यासां ताः स्वलंकृताः परिजनयोषितो वेश्याश्च अधियुज्य बलीवर्दादिषु तानुपस्करान् दृढं सन्नह्य नरादिभिर्यानैः ययुरित्यन्वयः । तत्र नरो नरवाह्यं यानम् । गावो वृषभाः । अश्वतरी गर्दभ्यामश्वाज्जाता । अनः शकटम् । करेणुर्गजी ॥१७॥

अन्वितार्थप्रकाशिका

निर्गमय्येति सार्द्धम् ॥ हे शत्रुहन् ! गरुडध्वजः सङ्कर्षणं यदुराजम् उग्रसेनं चानुज्ञाप्य पृष्ट्वा सुतैः सहितान् सुतपदं पौत्रकन्यास्नुषाद्युपलक्षणम् । परिच्छदैः शय्यादिपरिकरैश्च सहितान् स्वानवरोधान् दारान् अन्तःपुरस्थान् निर्गमय्य तेषामपि निमन्त्रितत्वात् औत्सुक्याच्च पुराद्बहिर्गमयित्वा सूतोपनीतं स्वरथमारुहत् । च्लेरङ्छान्दसः ॥१४॥ तत इति ॥ ततश्च रथद्विपादिनायकैः करालया परमभयङ्कर्या आत्मसेनया परिवृतो मृदङ्गादिभिः वाद्यैः यः प्रघोषस्तेन घोषिता या ककुब् दिक् तस्याः सकाशात् यद्वा ककुभाशब्देन टाबन्तेन बहुव्रीहौ भगवद्विशेषणम् । भान्तककुभ् शब्देन बहुव्रीहौ अध्याहृतपुरीविशेषणं वा निराक्रमत् निष्क्रान्तवान् । दीर्घाभाव आर्षः । रुचिरा छन्दःपञ्चकम् ॥१५॥ नृवाजीति ॥ सहात्मजा वराणि श्रेष्ठान्यम्बरादीनि यासां ताः असिचर्मणी पाण्योर्येषां तैः नृभिः सुसम्यक् संवृताः सुव्रताः पतिव्रता रुक्मिण्यादयः प्रयान्तमच्युतं पतिं नृभिः नरवाहनैः वाजिभिरश्वैश्च तद्विशेषैः काञ्चनशिबिकाभिश्च । यद्वा । नर एव वाजिवच्छीघ्रगा यत्र ताभिः काञ्चनशिबिकाभिरनुययुः ॥१६॥ नरेति ॥ कटिकुटयः उशीरादितृणमयकटनिर्मितगृहाः कम्बलाम्बरादयश्चोपस्कराः कुड्यादिरूपाः शिबिरादिसाधनभूता यासां ताः स्वलंकृताः परिजनयोषितो वेश्याश्च सर्वशः सर्वानेवोपस्करान् सर्वत इत्यपि पाठः । अधियुज्य बलीवर्दादिषु तानुपस्करान् दृढं सन्नह्य नरो नरवाह्यं यानम् उष्ट्राद्याः स्फुटाः अश्वतरी गर्दभादश्वायां जाता अनः शकटं करेणुर्गजी इत्यादिभिः यानैर्ययुः ॥१७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नृवाजीति । वराण्यम्बरादीनि यासां ताः सुव्रताः पतिव्रताः असिचर्मपाणिभिर्नृभिः सुसंवृताः रक्षिताः स्त्रियः नृवाजिकाञ्चनशिबिकाभिः नरयानैः वाजियानैः काञ्चनशिबिकाभिश्च अच्युतं पतिमनुययुः ॥१५॥ नरेति । अश्वतरी गर्दभ्यां हयादुत्पन्ना अनः शकटं करेणुर्गजी एतैः नरादियानैः परिजनयोषितो वारयोषितश्च ययुः अनुजग्मुः ॥ कथम्भूताः कटकुटयः तृणादिनिर्मितकटगृहाः । कंम्बलाम्बरादयश्चोपस्कराः गृहादिरूपाः यासां ताः उष्ट्रादिषे सर्वतः सर्वोपस्करानधियुज्य दृढं बद्ध्वा ॥१६॥ क्षुभितैः तिमिङ्गिलैः ऊर्मिभिश्च अर्णवो यथा तथा तुमुलरवं व्याकुलशब्दम् ॥ तद्बलं ध्वजादिभिः रवेरंशुभिः किरणैश्च दिवा दिवसे बभौ ॥१७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निर्गमय्येति ॥ ससुतान् सुतैः सहितान्, सपरिच्छदान् परिच्छदैः परिकरैः सहितान्, स्वान् अवरोधान् दारान्, निर्गमय्य पुराद्बहिर्गमयित्वा, हे शत्रुहन्, सङ्कर्षणं, यदुराजमुग्रसेनं च, अनुज्ञाप्य तयोरनुज्ञां सम्प्रार्थ्येत्यर्थः । गरुडध्वजः श्रीकृष्णः, द्वितीयान्तपाठे रथविशेषणं, सूतोपनीतं दारुकानीतं स्वरथम्, आरुहत् । इति सार्द्धद्वयस्यैकसम्बन्धः ॥१४॥ तत इति ॥ रथाश्च द्विपा गजाश्च भटाः पदातयश्च सादिनोऽश्वारूढास्तेषां नायकास्तैः, करालया परमभयङ्करया, आत्मसेनया स्वसेनया, परिवृतः मृदङ्गाश्च भेर्यश्च आनकाश्च शङ्खाः कम्बवश्च गोमुखानि रणशृङ्गाणि च तैर्वाद्यैः, प्रघोषस्तेन घोषिताः ककुभो यस्यास्तस्याः, ततो द्वारकायाः, निराक्रमत् निष्क्रान्तवान् । अत्र भेर्यानक इत्यत्र रेफस्य सस्वरोच्चारणे आनकस्य अनकेत्युच्चारणे च, छन्दोभङ्गनिवृत्तिः । तत्र, तर्हि न सन्न चासदुभयमित्यत्रेव रेफस्य सस्वरोच्चारणम्, 'अपि माषं मषं कुर्याच्छन्दोभङ्गं न चाचरेत्' इत्युक्तेरनकेत्युच्चारणं च न दोषाय, ततः 'मृदङ्गभेरयनकशङ्खगोमुखैः' इत्युच्चारणीयम् ॥१५॥ नृवाजीति ॥ सुव्रताः पतिव्रताः, वैदर्भ्यादयः, सहात्मजाः स्वस्वात्मजसहिताः, अम्बराणि वस्त्राणि च आभरणान्याभूषणानि च विलेपनानि काश्मीरगन्धादीनि च स्रजः पुष्पमालाश्च वरा उत्तमा अम्बरादयो यासां तथाभूताः, असिचर्मपाणिभिः नृभिः, सुसंवृताः परितो रक्षिताः सत्यश्च, नृवाजिकाञ्चनशिबिकाभिर्नृभिर्मैनादिनरवाहनैः, वाजिनोऽश्वास्तद्युक्तवाहनैः, काञ्चनशिबिकाभिश्च, अच्युतं पतिम्, अनु पश्चात्, ययुः ॥१६॥ नरेति ॥ परिजनवारयोषितः परिजनयोषितो वारयोषितश्चेत्यर्थः । तत्र परिजनयोषितः स्वसैनिकजनस्त्रियः, स्वलंकृताः सत्यः, कटकुटयः उशीरादितृणनिर्मितगृहाणि कम्बलाम्बरादय उपस्करा यासां तथाभूताः सत्यश्च, सर्वतो बलीवर्दादिष्वित्यर्थः । अधियुज्य कटकुट्याद्युपस्करान् बलीवर्दादिष्वास्थाप्य दृढं तत्सन्नहनं कारयित्वेत्यर्थः । स्वयं नरोष्ट्रगोमहिषखराश्वतर्यनःकरेणुभिः ययुः । नरवाहनादीन्यधिष्ठाय जग्मुरित्यर्थः । तत्र नरा नरवाहनानि, उष्ट्राः क्रमेलकाः, गावो महिषाः सैरिमाः, खरा लम्बकर्णाः, अश्वतर्यो गर्दभ्यामश्वाज्जाताः, अनांसि शकटानि, करेणवो हस्तिन्यः ॥१७॥

कृष्णप्रिया

पश्चात् रथ, गज, शूर वीर सवार सेनापति, इन सब से अति भयंकर निज सेना से युक्त होकर मृदंग भेरी नगाडे शंख गोमुख आदि वाजित्रों के घोष कर सर्व दिशाओं को शब्दायमान कर श्रीकृष्ण भगवान् पुर से बाहर निकले ॥१४॥ पुत्रों सहित और अच्छे अच्छे वस्त्र धारण किए तथा सुंदर आभूषण तथा चंदनमाला धारण किये हाथों में ढाल-तलवार धारण करने वाले शूरवीरों करके चारों तरफ से युक्त एतादृश रुक्मिणी आदि पटराणी मनुष्यों की सवारी में घोडों की सवारी में तथा सुवर्ण की पालखी में बैठ कर श्रीकृष्ण के प्रयाण के पीछे जाने लगी ॥१५॥ सुंदर अलंकार धारण किए और उशीर आदि तृण की चटाइ के घरवारी तथा कम्बल आदि लेकर सामग्री युक्त एतादृश निज भृत्यों की स्त्री और गणिका जन अपनी अपनी सामग्री को बैल आदि पर डाल कर मनुष्य सवारी, उंट की सवारी, बैलों की सवारी में खरों की सवारी खच्चर की सवारी गाडीयों की सवारी हथिनीयों की सवारी में बैठ बैठ कर जाने लगी ॥१६॥ जिस में मनुष्यो आदि का मिला घुला शब्द हो रहा है एतादृश वह सेना बडे बडे ध्वजों के पट और छत्र चामर तथा श्रेष्ठ आयुधों और आभूषण किरीट कवच और सूर्य की किरण इन सब के दिन के समय में इस प्रकार से शोभायमान हुई की जैसे क्षोभ को प्राप्त हुए मत्स्य आदि तथा तरंगों से समुद्र शोभायमान हो रहा हो ॥१७॥

अथो मुनिर्यदुपतिना सभाजितः प्रणम्य तं हृदि [1]विदधद्विहायसा ।
[2]निशम्य तद्व्यवसितमाहृतार्हणो मुकुन्दसन्दर्शननिर्वृतेन्द्रियः ॥१८॥
राजदूतमुवाचेदं भगवान् [3]प्रीणयन् गिरा । मा भैष्ट दूत भद्रं वो घातयिष्यामि मागधम् ॥१९॥
इत्युक्तः [4]प्रस्थितो दूतो यथावदवदन्नृपान् । तेऽपि सन्दर्शनं शौरेः प्रत्यैक्षन्त[5] मुमुक्षवः ॥२०॥
आनर्तसौवीरम[6]रूंस्तीर्त्वा विनशनं हरिः । गिरीन् नदीरतीयाय पुरग्रामव्रजाकरान् ॥२१॥

---

१. निरगा-वीर. ; निदध-विज. । २. निशाम्य-च. पु. टी. । ३. न्देवकीसुतः-वीर. ; प्रेमया गिरा-विज. । ४. प्रहितो-वीर. । ५. प्रत्यैक्षन्यन्-श्रीधर. वंशी. ; प्रत्यैक्षन्त मुमु-वीर. विज. विश्व. शुक. । ६. कुरून्-च. पु. टी. ।

कर्दमक्षमा

अथ, यदुपतिना, सभाजितः, मुनिः, तद्व्यवसितम्, निशम्य, आहृतार्हणः, मुकुन्दसन्दर्शननिर्वृतेन्द्रियः, तम्, प्रणम्य, हृदि, विदधत्, विहायसा, ययौ ॥१८॥ भगवान्, राजदूतम्, गिरा, प्रीणयन्, इन्द्रम्, उवाच, दूत, मा भैष्ट, वः, भद्रम्, मागधम्, घातयिष्यामि ॥१९॥ इति, उक्तः, दूतः, प्रस्थितः, नृपान्, यथावत्, अवदत्, मुमुक्षवः, ते, अपि, शौरेः, सन्दर्शनम्, प्रत्यैक्षन् ॥२०॥ हरिः, आनर्त्तसौवीरमरून्, तीर्त्वा, विनशनम्, गिरीन्, नदीः, तीर्त्वा, पुरग्रामव्रजाकरान्, अतीयाय ॥२१।

श्रीधरस्वामिविरचिता भावार्थदीपिका

मुनिर्नारदो विहायसा ययाविति शेषः ॥१८॥ मा भैष्टेति बहुत्वं राजाभिप्रायेण ॥१९॥ प्रत्यैक्षन् प्रत्यैक्षन्त यद्यस्मात मुमुक्षवः ॥२०॥ आनर्तादयो मार्गस्थदेशास्तांस्तीर्त्वाऽतिक्रम्य विनशनं कुरु क्षेत्रम् अतीयायातिक्रम्य ययौ ॥२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथो सेनाप्रयाणोत्तरम् । तं कृष्णम् । तद्व्यवसितं कृष्णनिश्चितम्, पाण्डवानां बद्धराज्ञाञ्च युगपन्मनोरथसम्पादनरूपम् ॥१८॥ भगवान्सूनृता गिरा इति पाठे सूनृता गिरा प्रेमयुक्तवाचा । 'सूनृतं मङ्गलेऽपि स्यात्प्रियसत्ये वचस्यपि इति मेदिनी' ॥१९॥ इतीत्थम् । तेऽपि नृपा अपि । परस्मैपदमार्षम् ॥२०-२१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ प्रयाणानन्तरमेव यदुपतिना प्रणम्य सभाजितः सन् विहायसा ययौ कथं सभाजितस्तत्राह–आहृतान्यर्हणानि नानापूजाद्रव्याणि यस्मै तथाभूतः सन्निति एवं सर्वैर्यदुभिरपि सभाजित इति भावः । किं कृत्वा ययौ तस्य व्यवसितं पाण्डवानां बद्धराजानाञ्च युगपन्मनोरथसम्पादनरूपं निशम्य श्रुत्वा किं कुर्वन् ययौ तं हृदि विदधत् तथा भावयन्नेवेत्यर्थः । यतो मुकुन्दस्य सर्वदुःखविमोचनशीलस्य सन्दर्शनमात्रेण किमुत तत्तत्सद्व्यवहारेण निर्वृतानि इन्द्रियाणि यस्य स तथेति ॥१८॥ अथ श्रीभगवतः परमदयापारावारत्वं तादृशं शरणागतसन्त्राणव्रतपरायणत्वञ्च स्मृत्वा सगद्गदमाह–राजेति । गिरा मा भैष्टेत्यादिकयैव भीमेन घातयिष्यामि मागधमिति ॥१९॥ प्रत्यैक्षन् प्रत्यैक्षन्त तदेकापेक्षकाबभूवुः यत् यस्मै सन्दर्शनाय मुमुक्षवो जरासन्धान्मोक्षेच्छवो जाता इत्यर्थः ॥२०॥ गिरीन् नदींश्च तीर्त्वा आनर्तादिदेशानतीयाय पुरादीनातीयायेत्यन्वयः । सौवीरपाञ्चाला अत्र तद्वर्त्मस्था एव ज्ञेयाः ॥२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथो प्रयाणानन्तरमेव प्रणम्य सभाजितः, अत एवाहृतानानि अर्पितानि अर्हणानि पूजाद्रव्याणि यस्मिन् सः, यदुपतिनेति तद्दृष्ट्या सर्वैर्यदुभिरपि सभाजित इति भावः । यद्वा, भक्त्या गृहीतार्हणः, कुतः ? मुकुन्दः परमानन्दप्रदः, किंवा मुखे कुन्दरूपा दन्ता यस्येति परमसुन्दर इत्यर्थः । तस्य सम्यक् साक्षाद्दर्शनेन निर्वृतानि इन्द्रियाणि सर्व्वाणि यस्य तादृशः सन्, तत्सन्दर्शनानन्दविवशत्वादित्यर्थः । किंवा तथाभूतोऽपि निर्वृतेन्द्रियत्वादेव तं हृदि विदधत्, विहायसेति स्वर्गादौ तद्यशोगातुमूर्ध्वं ययावित्यर्थः । किं कृत्वा ? तस्य यदुपतेर्व्यवहृतं श्रीयुधिष्ठिरगृहगमनलक्षणं निशम्य उद्धवोक्तादेः श्रुत्वा; यद्वा, तस्य व्यवहृतं ब्राह्मणसम्माननादि–सद्व्यवहारं तत्प्रश्नादेरुद्धवादिमुखाद्वा श्रुत्वा; निशम्येति वा पाठः साक्षादनुभूयेत्यर्थः । व्यवसितमिति पाठे पाठान्तरेऽप्यर्थः स एव ॥१८॥ गिरा मा भैष्टेत्यादिकयैव, किंवा 'ते मदीया एवाचिरात् सिद्धाभीष्टा भवितारः' इत्यादिकया प्रीणयन्, यतो भगवान् परमदयालुरित्यर्थः । भीमेन घातयिष्यामि ॥१९॥ शौरेर्निजाशेषैश्वर्य्यं प्रकटयतो भगवतः, प्रत्यैक्षन्त, तदेकापेक्षका बभूवुरित्यर्थः । मुमुक्षवो बन्धनात् संसारबन्धाच्च; यद्वा, यद्दर्शनं मुमुक्षवो मुनिप्रभृतयः प्रतीक्षन्ते ॥२०॥ तीर्त्वेति तत्तद्देशानां बृहत्तरत्वेन समुद्रत्वं ध्वन्यते, किंवा तत्रत्य–नद्यभिप्रायेण । हरिरिति तत्रत्यानां दुःखहरणस्य, मुकुन्द इति च परमानन्दप्रदानस्याभिप्रायेण, आनर्तादिवर्तिनो गिर्य्यादीनतीयाय ॥२१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१४-२३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अथो इति । यदुपतिना कृष्णेन सभाजितो बहुमतो मुनिः नारदस्तं हृदि प्रणम्य मनसा प्रणम्येत्यर्थः । तस्य कृष्णस्य व्यवसितं वचो निशम्य आहृतं समर्पितमर्हणं यस्य मुकुन्दस्य सन्दर्शनेन निर्वृतानि सुखितानीन्द्रियाणि यस्य सः विहायसा आकाशमार्गेण निरगाद्ययौ ॥१८॥ राजेति । भगवान् राजदूतमुवाच, उक्तिमेवाह–माभैष्टेति ॥१९॥ इतीति । प्रहितः प्रेषितः नृपान्

प्रति यथावद्भगवदुक्तं सर्वमवदत् उवाच ते नृपा अपि शौरेर्दर्शनं प्रतीक्षितवन्तः कथम्भूताः मुमुक्षवः मागधबन्धादिति शेषः ॥२०॥ आनर्तेति । आनर्तादयो मार्गस्था देशास्तांस्तीर्त्वा अतिक्रम्य विनशनं कुरुक्षेत्रमतीयायातिचक्राम ॥२१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

हरेर्व्यवसितं निश्चितं निशम्यागात् ॥१८॥ प्रेम स्नेहं यातीति प्रेमयाः सोमपाशब्दवद्रूपं नेयम् ॥१९-२०॥ विनशनं कुरुक्षेत्रम् आकरं रत्नाद्युत्पत्तिस्थानम् ॥२१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यस्मात् शौरेर्हेतोस्ते मुमुक्षवस्तस्य सन्दर्शनं प्रत्यैक्षन् तदेकापेक्षकावस्तुरित्यर्थः ॥२०॥ गिरीन् नदीश्च तीर्त्वा आनर्त्तादिदेशानतीयाय तत्रापि पूरादीनतीयायेत्यन्वयः ॥२१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥९-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१०-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मुनिर्नारदो विहायसा ययाविति शेषः ॥१८॥ मा भैष्टेति बहुत्वं राज्ञां बहुत्वम् ॥१९॥ प्रत्यैक्षन् प्रत्यैक्षन्त ॥२०॥

गूढार्थदीपिनी

अथो अनन्तरं यदुपतिना कृष्णेन सत्कृतो मुनिः तद्व्यवसितं कृष्णनिश्चितं निशाम्य विहायसा आकाशमार्गेण ययौ इति क्रियाशेषः । कथम्भूतः । आहृतं समर्पितम् अर्हणमर्घ्यं यस्मै सः । पुनश्च । मुकुन्स्य सन्दर्शनेन निर्वृतानि सुखितानि इन्द्रियाणि यस्य । तं विदधत् ध्यायन् ययौ ॥१८॥ प्रोणयन् सन्तोषयन् । भैष्टेति बहुवचनं राजाभिप्रायेण । मागधं जरासन्धम् ॥१९॥ तेऽपि नृपा अपि प्रत्यैक्षन् प्रतीक्षितवन्तः । यतो बन्धनात् मुमुक्षव आसन् ॥२०॥ हरिः आनर्तादीन् देशान् विनशनं कुरुक्षेत्रं च तीर्त्वा मार्गस्थान् गिरीन् नदीश्च अतीयाय अतिक्रम्य ययौ ॥२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मुनिः देवर्षिः तं श्रीकृष्णं प्रणम्य तमेव हृदि विदधत् मुकुन्दसन्दर्शनेन निर्वृतानि सुखितानीन्द्रियाणि यस्य सः विहायसा ययाविति शेषः ॥१८॥ मा भैष्टेति बहुत्वं तत्स्वाम्यभिप्रायेण ॥१९॥ यत् मागधबन्धान्मुमुक्षवः अतः प्रत्यैक्षन् प्रत्यैक्षन्त ॥२०॥ आनर्तादीन् देशान् तीर्त्वा अतिक्रम्य गिर्य्यादींश्च अतीयाय अतिक्रम्य ॥२१।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अथो स्वाभिप्रेतप्रयाणानन्तरं मुनिर्यदुपतिना सभाजितस्तं प्रणम्य तं हृहृदि निदधद्दधानो व्यवसितं निश्चितं निशम्य विहायसाऽऽकाशेन मुकुन्दसन्दर्शननिर्वृतेन्द्रियो मुकुन्दस्य सन्दर्शनं तेन निर्वृतानि सुखितानीन्द्रियाणि यस्य सः । एतत्सुखनिर्वृतेन्द्रियत्वे निदर्शनमनेनैव दर्शयति ॥ मुकुन्दसन्दर्शननिर्वृतेन्द्रिय इति । मुकुन्दस्य निधिविशेषस्य दर्शनेन निर्वृतेन्द्रियो धनायावानिवेति । मुकुन्दकुलाश्चेत्यमरः । आहृतार्हण आहृतं मनसा कृष्णार्पितमर्हणं पूजा येन सः । अगात् । यः सभाजितः सभाजिता प्राप्ता सुधर्मा येन सः । तेन यदुपतिनाऽऽहृतं सम्पादितमर्हणं येनेति स वा ॥१८॥ प्रीणयन् गिरेति सरलः पाठः । प्रेमया गिरेति पाठे प्रेम यातीति प्रेमया विश्वपाशब्दवद्रूपं ज्ञेयमिति । यत्प्रयोजनार्थमयमायातस्तान्राज्ञ उद्दिश्योक्तिरिति मन्तव्यम् । रिपुं घातयिष्यामि । अनेन हन्ताऽन्यो वर्तत इति ध्वनयति । मा भैष्टेत्यन्वयः ॥१९॥ यथावत् भगवदुक्त्यव्यत्यासेन मुमुक्षव इदानीमेकं तदानीमेकमित्युभयविधमोक्षमिच्छन्तति ते तथा ॥२०॥ विनशनं कुरुक्षेत्रमानर्तादयो देशाः पुराणि पत्तनानि ग्रामान्बहुजनावासान्व्रजा गोपालालया आकराः खनयस्तानतीयायातिक्रम्य ॥२१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी-

एवं निर्गम्य नारदवाक्यमिव कृत्वा ततोऽग्रे नारदं प्रेषयामासेत्याह.. अथो मुनिरिति । भिन्नप्रक्रमः समाधिभाषार्थः भगवन्तं विहाय भक्तस्य पुरतो गमनमनुचितमित्याशङ्क्याह-तं हृदि विदधदिति । विहायसा त्वाकाशमार्गेण तस्य भगवतो व्यवसायं गमनात्मकं निशम्य निर्द्धारितं श्रुत्वा बहिरन्तश्चानन्दपूर्णो निर्गत इति वक्तुं विशेषणद्वयम् आहृतमर्हणं यस्मै

मुकुन्दसन्दर्शनेननिर्वृतानीन्द्रियाणि यस्य एवं स्वतः कार्यतश्च सिद्धो गत इत्यर्थः ॥१८॥

ततो दूतसमाधानमाह–राजदूतमिति । इदं वक्ष्यमाणं वाक्यैनैव तस्य प्रीतिं जनयन् मा भैष्टेति वाक्यं मध्यमपुरुषबहुवचनं राज्ञः प्रति दूतेति केवलस्यैव सम्बोधनं तथा कथनाय अन्यथा भगवतैव राजानो बोधिता इति दूतो व्यर्थः स्यात् न केवलं मोचनं किन्तु वो भद्रमपीत्याशीः हेतुभूतकर्तव्यमाह–घातयिष्यामीति ॥१९॥

ततो दूतकर्तव्यतादिकमाह–इत्युक्त इति । यथावज्जातानुपूर्व्याश्रुतानां मनोवृत्तिमाह–तेऽपीति । भगवतैव मोक्तव्य इति भगवद्दर्शनमेव काङ्क्षन्तः स्थिताः अयमेव मोक्षोपायः सर्वेषामिति सूचितम् ॥२०॥

इन्द्रप्रस्थपर्यन्तं च भगवत आगमनमाह–आनर्तेति द्वाभ्याम् । स्थलजलोत्तरणप्रयत्नभेदात् आनर्तो द्वारकादेशः सौवीरः सुराष्ट्रदेशः मरून् मरुदेशः ततो विनशनं कुरुक्षेत्रदेशः अल्पपरिभ्रमणेनागमनं पर्वतवनाद्यभावात् यतो हरिः गिरीन् रैवतकादीन् तत्प्रभावा नदीश्च अतीयाय पादगत्यैवातिक्रान्तवान् पुरग्रामव्रजाकराश्चत्वारो भेदाः जनस्थानानाम् ॥२१॥

श्रीसुबोधिनीसारः

अथो अनन्तरं यदुपतिना श्रीकृष्णेन सभाजितो मुनिर्नारदः तस्य हरेर्व्यवसितं निश्चितकर्तव्यतां निशम्य दृष्ट्वा हृतमर्हणं यस्मै स मुकुन्दस्य सन्दर्शनेन निर्वृतमिन्द्रियं चित्तं यस्य स तं श्रीकृष्णं प्रणम्य हृदि विदधत् धारयन् विहायसाकाशमार्गेणययौ इति शेषः ॥१८॥ गिरा वाण्या प्रीणयन् हर्षयन् भगवान् राजदूतमिदमुवाच हे दूत ! मागधं जरासन्धमहं घातयिष्यामि इति हेतोर्यूयं मा भैष्ट वो युष्माकं भद्रं मङ्गलमिति तदभिप्रायेण बहुत्वं तान्प्रति प्रतिवचनमित्यन्ये ॥१९॥ एवमुक्तः प्रस्थितः प्रत्यावृतो दूतो यथावत् नृपानब्रवीत् मोक्तुमिच्छंस्तेऽपि शौरेः सन्दर्शनं प्रत्यैक्षन्त ॥२०॥ आनर्तादीन् देशान् तीर्त्वातिक्रम्य गिरीन् पर्वतान् नदीः पुरादीनतीयाय हरिरतिचक्राम ॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

बलमिति । तुमुलः सङ्कीर्णः रवः स्वनो यस्मिंस्तद्बलं सैन्यं दिवा दिने बृहद्ध्वजपटादिभिः वरायुधादिभिः रवेः सूर्यस्यांशुभिश्च बभौ । पटछत्रेत्यत्र तुगभाव अपि आर्षः । यथा क्षुभितैस्तिमिङ्गिलैः मत्स्यनक्रादिभिरूर्मिभिश्च यथार्णवः समुद्रो भाति तद्वदिति तत्र हस्त्यश्वनरादीनां मत्स्यादिसाम्यं ध्वजादीनामूर्मिसाम्यं च बोध्यम् ॥१८॥ अथो इति ॥ अथो निर्गमानन्तरं यदुपतिना कृष्णेन सभाजितः सत्कृतः आहृतं समर्पितम् अर्हणं पूजासाधनं यस्मै सः मुकुन्दस्य सन्दर्शनेन निर्वृतानि सुखितानीन्द्रियाणि यस्य सः मुनिस्तस्य व्यवसितं राजसूयाद्यर्थगमननिश्चयं निशम्य आलक्ष्य तं प्रणम्य तमेव हृदि विदधत् ध्यायन् विहायसा आकाशमार्गेण ययौ इति शेषः ॥१९॥ राजेति ॥ ततो भगवान् गिरा प्रीणयन् राजदूतमिदमुवाच । हे दूत ! मा भैष्ट वो युष्माकं भद्रं भूयात् । बहुत्वं राजाभिप्रायेण । मागधं घातयिष्यामि इति राज्ञः प्रति कथयेति शेषः ॥२०॥ इतीति ॥ इत्येवं भगवतोक्तः प्रस्थितश्च दूतः नृपान् प्रति यथावत् भगवदुक्तं सर्वमवदत् । तेऽपि च शौरेः कृष्णस्य संदर्शनं प्रत्यैक्षन् प्रतीक्षितवन्तः । तडभाव आर्षः । यतो जरासन्धबन्धात् संसाराच्च मुमुक्षवः ॥२१॥

अन्वितार्थप्रकाशिका

बलमिति । तुमुलः सङ्कीर्णः रवः स्वनो यस्मिंस्तद्बलं सैन्यं दिवा दिने बृहद्ध्वजपटादिभिः वरायुधादिभिः रवेः सूर्यस्यांशुभिश्च बभौ । पटछत्रेत्यत्र तुगभाव अपि आर्षः । यथा क्षुभितैस्तिमिङ्गिलैः मत्स्यनक्रादिभिरूर्मिभिश्च यथार्णवः समुद्रो भाति तद्वदिति तत्र हस्त्यश्वनरादीनां मत्स्यादिसाम्यं ध्वजादीनामूर्मिसाम्यं च बोध्यम् ॥१८॥ अथो इति ॥ अथो निर्गमानन्तरं यदुपतिना कृष्णेन सभाजितः सत्कृतः आहृतं समर्पितम् अर्हणं पूजासाधनं यस्मै सः मुकुन्दस्य सन्दर्शनेन निर्वृतानि सुखितानीन्द्रियाणि यस्य सः मुनिस्तस्य व्यवसितं राजसूयाद्यर्थगमननिश्चयं निशम्य आलक्ष्य तं प्रणम्य तमेव हृदि विदधत् ध्यायन् विहायसा आकाशमार्गेण ययौ इति शेषः ॥१९॥ राजेति ॥ ततो भगवान् गिरा प्रीणयन् राजदूतमिदमुवाच । हे दूत ! मा भैष्ट वो युष्माकं भद्रं भूयात् । बहुत्वं राजाभिप्रायेण । मागधं घातयिष्यामि इति राज्ञः प्रति कथयेति शेषः ॥२०॥ इतीति ॥ इत्येवं भगवतोक्तः प्रस्थितश्च दूतः नृपान् प्रति यथावत् भगवदुक्तं सर्वमवदत् । तेऽपि च शौरेः कृष्णस्य संदर्शनं प्रत्यैक्षन् प्रतीक्षितवन्तः । तडभाव आर्षः । यतो जरासन्धबन्धात् संसाराच्च मुमुक्षवः ॥२१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथो प्रयाणानन्तरं यदुपतिना प्रणम्य सभाजितो नारदः तं श्रीकृष्णस्य स्तुतिं विदधत् ध्यायन् सन् ॥ विहायसा जगामेति शेषः ॥१८॥ मा भैष्टेति बहुवचनं बहूनां राज्ञामभयप्रदानत्वं सूचयति ॥१९॥ प्रत्यैक्षन् आगमनम् अपश्यन् यद्यस्मात् बन्धनात् मुमुक्षवः ॥२०॥ आनर्तादीन् मार्गस्थदेशान् तीर्त्वा उल्लङ्घ्य विनशनं कुरुक्षेत्रं च । पर्वतादींश्च अतीयाय ॥ अतिक्रम्य ययौ ॥२१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बलमिति ॥ तुमुलाः संकुला रवाः शब्दा यस्मिंस्तत्, तत् बलं सैन्यं, बृहन्तो ध्वजपटाः छत्राणि चामराणि च तैः, वरैः आयुधाभरणकिरीटवर्मभिः, रवेः अंशुभिश्च करणैः, क्षुभिताश्च ते तिमिङ्गिलाश्च तैर्ये ऊर्मयस्तैः, अर्णवः समुद्रः यथा तथा, दिवा दिवसे, बभौ ॥१८॥ अथो इति ॥ अथो अनन्तरं, यदुपतिना श्रीकृष्णेन, सभाजितो बहुमतः, आहृतं समर्पितमर्हणं यस्मै सः, मुकुन्दस्य श्रीकृष्णस्य सन्दर्शनं तेन निर्वृतानीन्द्रियाणि यस्य सः, मुनिर्नारदः, तं श्रीकृष्णं प्रणम्य, तद्व्यवसितं, तेन कृष्णेन निश्चितं, वच इति शेषः । निशम्य, मुदित इति शेषः । हृदि तं ध्यायन्निति शेषः । एवम्भूतः सन्, विहायसा आकाशमार्गेण, निरगाद्ययौ ॥१९॥ राजदूतमिति ॥ भगवान् श्रीकृष्णः, गिरा वाचा, प्रीणयन् प्रसन्नं कुर्वन्, राजदूतम्, इदम् उवाच । हे दूत, मा भैष्ट, वो युष्माकं, भद्रं मङ्गलं, भवितेति शेषः । मागधं घातयिष्यामि ॥२०॥ इतीति ॥ कृष्णेन, इत्युक्तप्रकारेणोक्तः, प्रहितः सम्प्रेषितः, दूतः नृपान्, यथावत्, अवदत् । मुमुक्षवः ते नृपाः अपि, शौरेः श्रीकृष्णस्य, सन्दर्शनं प्रत्यैक्षन् च ॥२१॥

कृष्णप्रिया

श्रीकृष्ण को प्रयाण के अनन्तर श्रीकृष्ण से सत्कार को प्राप्त करनेवाले और पूजा की सामग्री को प्राप्त करनेवाले श्रीकृष्ण के सम्यक् प्रकार दर्शन से मन में आनन्द को प्राप्त करनेवाले ऐसे नारदजी ने श्रीकृष्ण के राजसूय आदि के निमित्त गमन को देखकर और श्रीकृष्ण को प्रणाम कर और हृदय में उन्हीं का ध्यान करते हुए आकाशमार्ग से प्रस्थित हुए ॥१८॥ पश्चात् मधुर वाणी से प्रसन्न करते हुए राजाओं के दूत से श्रीकृष्ण बोले की हे दूत ! भय मत करो आपका मंगल होगा मैं जरासन्ध का घात कराउंगा इस प्रकार तुम राजाओं से कह देना ॥१९॥ इस प्रकार श्रीकृष्ण भगवान् ने दूत से कहा वह वहां से प्रस्थान कर के राजाओं के प्रति श्रीकृष्ण के कहे हुए वचनों को यथावत् कहने लगा और वे राजा लोग भी जरासन्ध से तथा संसार से छूटने की इच्छा कर के श्रीकृष्ण के दर्शन की प्रतीक्षा करने लगे ॥२०॥ श्रीकृष्ण भगवान् ने भी आनर्त सौवीर मरु तथा विनशन (कुरुक्षेत्र) इन देशों का अतिक्रमण करके जाने में अनेक दिनों का तथा पुर ग्राम व्रज आकरों का अतिक्रमण किया ॥२१॥

ततो दृषद्वतीं तीर्त्वा मुकुन्दोऽथ सरस्वतीम् । पञ्चालानथ मत्स्यांश्च शक्र[1]प्रस्थमथागमत्॥२२॥
त[2]मागतमुपाकर्ण्य प्रीतो दुर्दर्शनं नृणाम् । अजातशत्रुर्निरगात्सोपाध्यायः सुहृद्वृतः ॥२३॥
गीतवादित्रघोषेण ब्रह्मघोषेण भूयसा । अभ्ययात् स हृषीकेशं प्राणः [3]प्राणमिवादृतः ॥२४॥
दृष्ट्वा विक्लिन्नहृदयः [4]कृष्णं स्नेहेन पाण्डवः । चिराद्दृष्टं प्रियतमं सस्वजे [5]स्म पुनः पुनः॥२५॥

कर्दमक्षमा

मुकुन्दः, ततः, दृषद्वतीम्, अथ सरस्वतीम्, तीर्त्वा, अथ पाञ्चालान्, च, मत्स्यान्, अथ शक्रप्रस्थम्, अगमत् ॥२२॥ नृणाम्, दुर्दर्शनम्, तम्, उपागतम्, आकर्ण्य, सोपाध्यायः, सुहृद्वृतः, अजातशत्रुः, निरगात् ॥२३॥ भूयसा, गीतवादित्रघोषेण, च, ब्रह्मघोषेण, सः, हृषीकेशम्, प्राणः, प्राणम्, इव, आदृतः, अभ्ययात् ॥२४॥ पाण्डवः, कृष्णाम्, दृष्ट्वा, स्नेहेन, विक्लिन्नहृदयः, चिरात्, दृष्टम्, प्रियतमम्, अथ, पुनः, पुनः, सस्वजे ॥२५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शक्रप्रस्थमिन्द्रप्रस्थम् ॥२२-२३॥ प्राणाः इन्द्रियाणि प्राणं मुख्यं प्राणमिव ॥२४॥ सस्वजे परिरेभे ॥२५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो गिरिनद्यादिलङ्घनोत्तरम् । दृषद्वतीं चक्रनदीम् । अथ दृषद्वतीतरणानन्तरम् । इह पाञ्चालविनशनौ मार्गस्थावन्यौ देशभेदौ

---

१. प्रस्थमुपागमत्-वीर. । २. तमुपागतमा-श्रीधर. वंशी. वीर. विज. जीव. । ३. प्राणमिवागतम्-च. पु. टी. । ४. कृष्णस्नेहेन-वीर. विज. ।

ज्ञेयौ न तु लोकप्रसिद्धाविति सन्दर्भः । एवमग्रेऽपि ॥२२॥ तं कृष्णम् ॥२३॥ स युधिष्ठिरः ॥२४॥ अथ दर्शनानन्तरम् ॥२५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तदतिक्रमणानन्तरम् अथ दृषद्वतीतरणानन्तरं श्रीद्वारकात इन्द्रप्रस्थगमनमार्गे विनशनपाञ्चालादीनाममध्यवर्तित्वेऽपि तत्रतत्र गमनं तत्रतत्रत्यानां भक्तानां सुखसम्पादनार्थमनुषङ्गतः प्राणिनां हितार्थं गमनञ्च स्वल्पेनैव परिच्छदेन प्रस्थाय शिबिराय मुहुः शीघ्रं निवृत्तिमयं ज्ञेयम् ॥२२॥ नृणां जीवमात्राणां दुर्द्दर्शनं दुर्द्दर्शमपि उप समीपे आगतम् अजातशत्रुरिति परमसरलचित्तत्वं दर्शयित्वा तस्य प्रीतेः स्वाभाविकत्वं सूचितम् ॥२३॥ किञ्च गीतेति । हृषीकेशमिति हृष्यो रश्मयः तद्वद्विद्योतमानाः केशा अपि यस्य तं स्वकान्त्या दूरतो विराजमानमित्यर्थः । यद्वा प्रेम्णा सर्वेन्द्रियवशीकारिणमित्यर्थः । अतः आदृतः सादरः आदृतौ सादरार्चिताविति नानार्थवर्गे किम्वा तेनैव स्वगृहागमनादिना रथादवतरणादिना च सम्मानितः यदि कथञ्चित् मूर्च्छादिना प्रगतं प्राणं विना निश्चेष्टाः प्राणाः प्रत्यागतमभिगच्छेयुस्तदैवेदं सम्भवतीत्यभूतोपमा सूचिता ॥२४॥ कृष्णं स्वभावत एव सर्वचित्ताकर्षकं विशेषतः स्वस्य प्रियतमं सर्वप्रियगणशिरोमणिं तत्रापि चिराद्दृष्टम् अतः पुनः पुनः सस्वजे कथञ्चित्ततो निवृत्तस्यापि तृप्त्यभावात् अथ कार्त्स्न्येन ॥२५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततस्तत्तदतिक्रमणानन्तरं श्रीद्वारकात इन्द्रप्रस्थगमनमार्गे विनशन-पाञ्चालादीनां मध्यवर्तित्वेऽपि तत्र गमनं तत्रत्यानां प्राणिनां हितार्थम्; यद्वा, मरुदेशपूर्व्वत एवापरः पञ्चालदेशोऽस्ति, विनशनमित्यतिक्रमणमात्रे तात्पर्य्यम्, न त्वनुक्रमे ॥२२॥ दुर्दर्शनं दुर्द्दर्शमपि, उप समीपे आगतम्; अजातशत्रुरिति सर्व्वत्र द्वेषाभावेन कामक्रोधाद्यरि-राहित्येन च निराकुलचित्तत्वादिकं सूचितम्, अतः प्रीतः सन् ॥२३॥ किञ्च, गीतेति । हृषीकेशमिति भक्त्या सदा सर्व्वेन्द्रियसेव्यमित्यर्थः; यद्वा, हृष्या रश्मयस्तद्वद्विद्योतमानाः केशा अपि यस्य तम्, स्वकान्त्या दूरतो विराजमानमित्यर्थः । अत आदृतः सारदः, किंवा तेनैव स्वयं गृहागमनादिना रथादवतरणादिना वा सम्मानितः, कथञ्चिन्मूर्च्छादिनापगतं प्राणं विना निश्चेष्टाः प्राणा यथा प्रत्यागतमभिगच्छेयुस्तद्वदित्यभियाने परमौत्सक्यादिकं सूचितम् ॥२४॥ कृष्णं सर्व्वथात्मचित्ताकर्षकम्, यतः प्रियतमं प्रियेभ्यः पुत्रदारादिभ्यः प्रियतरादात्मनोऽपि परमप्रियम्, अतः पुनः पुनः सस्वजे, कथञ्चित्ततो निवृत्तस्यापि तृप्त्यभावात्, स्म हर्षे ॥२५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्राणः इन्द्रियगणः प्राणं पञ्चवृत्तिं यद्वा प्राणो जीवः प्राणं परमात्मानम् ॥२४-२६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

दृषद्वतीं नदीं तथा सरस्वतीञ्च तीर्त्वा मत्स्याँश्च देशानतिक्रम्य शक्रप्रस्थम् इन्द्रप्रस्थम् उप समीपं जगाम तत्र पुरं प्राकारयुक्तं ग्रामस्तद्रहितः व्रजः आभीराणामावासः आकरः खनिः मत्स्याँश्चेत्यनन्तरमनुषक्तस्य तीर्त्वेत्यस्यातिक्रम्येत्यर्थः योग्यत्वात् ॥२२॥ तमिति । नृणां दुर्लभं दर्शनं यस्य तं कृष्णमागतं श्रुत्वाऽजातशत्रुर्युधिष्ठिरः निरगात्पुरादिति शेषः ॥२३॥ गीतेति । वादित्राणि वाद्यानि तेषां घोषेण वेदघोषेण च स युधिष्ठिरः कृष्णमभ्यगादभिमुखं जगाम प्राणः इन्द्रियगणः आगतं प्राणं पञ्चवृत्तिप्राणमिवेत्याभिमुख्ये दृष्टान्तः ॥२४॥ दृष्ट्वेति । श्रीकृष्णे यः स्नेहस्तेन विक्लिन्नमार्द्रं हृदयं यस्य सः पाण्डवो युधिष्ठिरः सस्वजे आलिङ्गितवान् ॥२५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

दृषद्वतीं चक्रनदीम् ॥२२-२५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अत्र पाञ्चालविनशने मार्गस्थावेव देशविशेषौ ज्ञेयौ न त्वन्यप्रसिद्धौ ॥२२-४२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥९-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१०-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्राणा इन्द्रियाणि प्राणं यथा अभियन्ति तथा अभ्ययात् ॥२४-२५॥

गूढार्थदीपिनी

ततो मुकुन्दः अन्या अपि नदीः देशांश्च तीर्त्वा अथ शक्रप्रस्थमगमत्। अत्र पाञ्चालविनशनसंज्ञौ 'अन्यावेव देशौ न तु प्रसिद्धौ' इति सन्दर्भः ॥२२॥ प्रीतः सन् तमानेतुं पुरात् निरगादित्यन्वयः । दुर्लभं दर्शनं यस्य दुर्दर्शनम् ॥२३॥ भूयसा महता वेदध्वनिना सह । आदृतः सादरः सन् सम्मुखमगात् । प्राणमागतं प्राणा इन्द्रियाणीव ॥२४॥ स्नेहेन विक्लिन्नहृदयः आर्द्रहृदयः पाण्डवः अथ दर्शनानन्तरं पुनः पुनः सस्वजे आलिङ्गितवान् ॥२५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्राणाः इन्द्रियाणि प्राणमसुम् ॥२४-२५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

दृषद्वतीं गण्डिकामिति केचित् चक्रनदीति पूर्वे पाञ्चालान्मत्स्यांश्चातीयाय शक्रप्रस्थमिन्द्रप्रस्थमगमत् ॥२२॥ नृणां सामान्यपुरुषाणां दुर्दर्शनं दुःसाध्यं दर्शनं मोचकं ज्ञानं यस्य स तम् । सोपाध्यायः सहाचार्यः सुहृद्वृतो निरगाद्ग्रामादिति शेषः ॥२३॥ ब्रह्मघोषेण प्राणा इन्द्रियाणि प्राणं मुख्यप्राणं यथा तथा हृषीकेशम् । अनेन तत्प्रेरणयैव सर्वव्यापार इति द्योत्यते । अभ्ययात्सम्मुखमगमत् ॥२४॥ विक्लिन्नं द्रवद्धृदयं यस्य सः । तत्र निमित्तमाह ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी-

दृषद्वती सरस्वती च तदानीमतिगम्भीरनद्यौ दृषद्वतीसरस्वत्योर्मध्ये मुकुन्द इति पदमग्रे तत्र मोक्षं दास्यतीति सूचयति-अथेत्यग्रे शनैर्गमनं सूचितं पाञ्चालदेशो मत्स्यदेशश्च मध्ये मार्ग एवांशभेदेनेति विमर्शः शक्रप्रस्थमिन्द्रप्रस्थम् अन्वर्थसंज्ञा स्थानस्येति ज्ञापयितुं तथा वचनम् ॥२२॥ ततो निकटे समागमने युधिष्ठिरस्य स्नेहपूर्वकं कृत्यमाह-तमागतमिति चतुर्भिः । नृणां प्राणिमात्रस्य दुर्दर्शनमित्यलभ्यलाभोक्तिः अजातशत्रुरिति भगवद्दर्शनाधिकारः विद्यापरिजनाभिमानाविर्भावाय सोपाध्यायसुहृद्वृत इति ॥२३॥ ततो निकटमागतः गीतादिसहितः यतः स प्रसिद्धः निकटागमनयोग्यः ननु भक्त्या मध्ये विकलः कथं न जातः कथमागत इति शङ्कां वारयति-हृषीकेशमिति । इन्द्रियाधिपतित्वादिन्द्रियाण्येव गतानि न तु तत्प्रयत्नः तत्र जात इत्यर्थः स्वत एव गमने दृष्टान्तः प्राणमिवेति बहिर्निर्गतः प्राणः यथाऽनायासेन प्राणमेव समागच्छति ततः परमादरयुक्तो जातः ॥२४॥ निकटे समागतस्य कृत्यमाह-दृष्ट्वेति । स्मेति प्रसिद्धे अन्यथा जीवस्यैवं धाष्ट्र्यं वर्णयितुमनुचितं भगवता कथमङ्गीकृतमिति शङ्कां वारयितुमाह-विशेषेण क्लिन्नहृदयमिति तस्य विचाराभावेनालिङ्गने हेतुः प्रियतममिति । पुनः पुनरिति अन्तरानन्देन बहिः सम्मूढता सूचिता ॥२५॥

श्रीसुबोधिनीसारः

ततो दृषद्ददतीं नदीमथ सरस्वतीं तीर्त्वा पाञ्चालान् मत्स्यान्देशांश्चातिक्रम्य इन्द्रप्रस्थमायात् ॥२२॥ नृणां दुर्दर्शनम् उपागतं समागतं तं श्रीकृष्णमाकर्ण्य श्रुत्वा प्रीतोऽजातशत्रुर्युधिष्ठिरः स गुरुः सुहृद्भिर्वृतो निरगात् पुरान्निश्चक्राम ॥२३॥ भूयसा महता गीतवादित्रनादेन वेदध्वनिना सहादृतः स राजा हृषीकेशं कृष्णमभ्ययात् सम्मुखमागमत् प्राणं प्राण इन्द्रियाणीव ॥२४॥ कृष्णं दृष्ट्वा स्नेहेन प्रेम्णा द्रवीभूतचित्तः पाण्डवो धर्मराजः चिराद्बहुकालादृष्टं प्रियतमं प्रेष्ठं हरिं मुहुर्मुहुराश्लिक्षत् ॥२५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आनर्तादयो मार्गस्था देशास्तान् गिरीन् तीर्त्वाऽतिक्रम्य मुकुन्दः शक्रप्रस्थम् इन्द्रप्रस्थम् अथानन्तरमेवागमत् । तत्र विनशनं कुरुक्षेत्रम् । पुरं हट्टप्राकारादियुक्तम्, ग्रामस्तद्रहितः । व्रजः आभीराणामावासः । आकरः खनिः ॥२२-२३॥ तं श्रीकृष्णमुपसमीपमागतमाकर्ण्य श्रुत्वा प्रीतः प्रसन्नचित्तः उपाध्यायेन सहितः अजातशत्रुर्युधिष्ठिरस्तमानेतुं पुरान्निरगादित्यन्वयः । प्रीतौ हेतुं सूचयन्नाह-नृणां दुर्लभं दर्शनं यस्य तमिति । युधिष्ठिरस्य तद्दर्शनयोग्यतां सूचयितुमाह-अजातशत्रुरिति ॥२४॥ गीतानि वादित्राणि वाद्यानि च तद्घोषेण तथा भूयसा महता ब्रह्मघोषेण वेदघोषेण च सह स युधिष्ठिरः हृषीकेशं सर्वेन्द्रियनियन्तारं कृष्णमभ्ययात् सन्मुखमाजगाम । तत्र दृष्टान्तमाह-यथादृताः प्राणा इन्द्रियाणि मुख्यं प्राणमभियान्ति तं च प्राप्य सचेष्टानि भवन्ति तथेति ॥२५॥

अन्वितार्थप्रकाशिका

आनर्तेति ॥ हरिः आनर्तादीन् देशान् विनशनं कुरुक्षेत्रं च तीर्त्वा अतिक्रम्य तदतिक्रमणेन तन्मार्गस्थान् गिरिनदीपुरादीन् अतीयाय कुरुक्षेत्रपाञ्चालादीनाममार्गगत्वेऽपि तत्रत्यभक्तानुग्रहार्थं गमनम् ॥२२॥ तत इति ॥ अथ ततो मुकुन्दः दृषद्वतीं तीर्त्वा अथ सरस्वतीं पाञ्चालान्मत्स्यांश्च तीर्त्वा अथ शक्रप्रस्थमिन्द्रप्रस्थमागमत् ॥२३॥ तमिति ॥ नृणां दुर्लभं दर्शनं यस्य तं श्रीकृष्णमुप समीपमागतमाकर्ण्य श्रुत्वा प्रीतः प्रसन्नचित्तः उपाध्यायेन सहितः सुहृद्भिः वृतः अजातशत्रुर्युधिष्ठिरस्तमानेतुं पुरान्निरगात् ॥२४॥ गीतेति ॥ गीतानि वादित्राणि वाद्यानि च तद्घोषेण तथा भूयसा महता ब्रह्मणः वेदस्य घोषेण च सह स युधिष्ठिरः आदृतः सादरः सन् हृषीकेशं कृष्णमभ्ययात् सम्मुखमाजगाम । यथा मूर्च्छापगमानन्तरं प्राणाः इन्द्रियाणि मुख्यं प्राणमभियान्ति तं च प्राप्य सचेष्ठानि भवन्ति तथा ॥२५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शक्रप्रस्थम् इन्द्रप्रस्थमागमत् ॥२२-२३॥ प्राणं सप्राणमागच्छन्तं जीवं प्रति ॥ प्राणा इन्द्रियाणि ॥ इवादृतः अम्ययात् सन्मुखमागच्छत् ॥२४॥ सस्वजे आलिङ्गितवान् ॥२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आनर्तेति ॥ हरिः श्रीकृष्णः, आनर्ताश्च सौवीराश्च मरवश्च तान्, विनशनं कुरुक्षेत्रं, तीर्त्वाऽतिक्रम्य, गिरीन्, नदीः, पुरग्रामव्रजाकरान्, अतीयायातिक्रम्य ॥२२॥ तत इति ॥ ततः मुकुन्दः, दृषद्वतीं नदीं, सरस्वतीं नदीं च, तीर्त्वाऽतिक्रम्य, अथ पाञ्चालान्, अथ मत्स्यान्, अतिक्रम्य, अथ शक्रप्रस्थं च, आगमत् ॥२३॥ तमिति ॥ नृणां, दुर्दुर्लभं दर्शनं यस्य तं, तं श्रीकृष्णम्, उपागतं समीपमागतम्, आकर्ण्य, प्रीतः प्रसन्नतां प्राप्तः, अजातशत्रुर्युधिष्ठिरः, सोपाध्याय उपाध्यायसहितः, सुहृद्वृतः सुहृद्वर्गसहितः, निरगात् पुरादिति शेषः ॥२४॥ गीतेति ॥ स युधिष्ठिरः, भूयसाऽतिशयेन, गीतवादित्रघोषेण, ब्रह्मघोषेण च, प्राणा इन्द्रियाणि, आगतं प्राणं मुख्यासुम् इव, हृषीकेशम्, अभ्ययात् ॥२५॥

कृष्णप्रिया

श्रीमुकुन्द भगवान् तत्पश्चात् दृषद्वती नदी और सरस्वती नदी को पार कर के मत्स्य देशों का अतिक्रमण करने के बाद इन्द्रप्रस्थ पहुंचे ॥२२॥ राजा युधिष्ठिर मनष्यों को जिनका दर्शन दुर्लभ है ऐसे श्रीकृष्ण को समीप में आये जान कर उपाध्याय और सखाओं के साथ श्रीकृष्ण को लाने के लिए पुर से बाहर निकले ॥२३॥ अनेक प्रकार का गान और वार्जित्रों के सहित और बहुत से वेदघोष सहित राजा युधिष्ठिर आदर के साथ श्रीकृष्ण के सन्मुख इस प्रकार से गये की जैसे मूर्च्छा के बाद चक्षु आदि इन्द्रिय गण, प्राण को प्राप्त हो कर चेष्टा वाले हो जाते हैं ॥२४॥ राजा का हृदय प्रेम से आर्द्र हो गया, बहुत काल के बाद श्रीकृष्ण के दर्शन हुए इसी लीये श्रीकृष्ण के दर्शन करके वारंवार श्रीकृष्ण से मिले ॥२५॥

दोर्भ्यां परिष्वज्य [1]रमामलालयं मुकुन्दगात्रं नृपतिर्हताशुभः ।
लेभे परां निर्वृतिमश्रुलोचनो हृष्यत्तनुर्विस्मृतलोकविभ्रमः ॥२६॥
तं मातुलेयं परिरभ्य निर्वृतो भीमः स्मयन् [2]प्रेमजलाकुलेन्द्रियः ।
यमौ किरीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेऽच्युतम् ॥२७॥[3]
अर्जुनेन परिष्वक्तो यमाभ्यामभिवादितः । ब्राह्मणेभ्यो नमस्कृत्य वृद्धेभ्यश्च यथार्हतः ॥२८॥
[4]मानितो मानयामास कुरुसृञ्जयकेकयान् । सूतमागधगन्धर्वा वन्दिनश्चोपमन्त्रिणः ॥२९॥

कर्दमक्षमा

रमामलालयम्, मुकुन्दगात्रम्, दोर्भ्याम्, परिष्वज्य, हताशुभः, नृपतिः, अश्रुलोचनः, हृष्यत्तनुः, विस्मृतलोकविभ्रमः, पराम्, निर्वृतिम्, लेभे ॥२६॥तम्, मातुलेयम्, परिरभ्य, निर्वृतः, प्रेमजलाकुलेन्द्रियः, स्मयन्, भीमः, च, सुहृत्तमम्, यमौ,

---

१. जेऽथ-श्रीधर. वंशी. वीर. विज. । २. रमालयालयं-विज. । जलाकुले-वीर. विज. । ३. "युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवन्दनम्"-इदमर्धमधिकं वीर. ।
४. मानिनो-विज. ।

किरीटी, प्रवृद्धबाष्पाः, मुदा, अच्युतम्, परिरेभिरे ॥२७॥ अर्जुनेन, परिष्वक्तः, यमाभ्याम्, ब्राह्मणेभ्यः, च, वृद्धेभ्यः, यथार्हतः, नमस्कृत्य, अभिवादितः ॥२८॥ कुरुसृञ्जयकैकयान्, मानयामास, च, मानितः, सूतमागधगन्धर्वाः, वन्दिनः, च, उपमन्त्रिणः, ब्राह्मणाः, मृदङ्गशङ्खपटहवीणापणवगोमुखैः, अरविन्दाक्षम्, तुष्टवुः, ननृतुः, जगुः ॥२९-३०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पतमानेन पतता क्षत्रबन्धुना देहेन ब्राह्मणार्थाय विपुलं यशो नेहता नेहमानेनासम्पादयता कोन्वर्थः न कोऽपीत्यर्थः ॥२६॥ एवं निश्चित्याह-हे विप्रा इति ॥२७-२८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

लोकव्यवहारः स्वागतप्रश्नादिरूपः लोकातीतप्रेममग्नत्वात् । रमामलालयमिति रमाया अन्ये ये आलयास्ते सदोषा एवातस्तस्या अनभिरुचेस्तेषु न साक्षात्स्थितिः किन्त्वाभासमात्रेण । अस्य तु निर्दोषसर्वगुणाश्रयत्वात्साक्षादेव स्थितिरिति भावः ॥२६॥ तं श्रीकृष्णम् । अर्जुनस्य पश्चादुक्तिश्चिरालिङ्गनार्था । प्रेम्णा शीघ्रागमनाशक्त्या वा ॥२७॥ इति भाव इति-नरावतारत्वेन मया सम एवायमित्याशयः । यमाभ्यां नकुलसहदेवाभ्याम् । मानिन इति पाठे कुरुषु मान्यान् मानयामासेत्यर्थः । यथार्हतो यथोचितम् ॥२८॥ उप समीपं समेत्य । मन्त्रिणो मन्त्रकर्तारः ॥२९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तादृशं श्रीयुधिष्ठिरादीनां सौभाग्यमनुसन्दधानः प्रेमभरोदयाद्दीर्घच्छन्दसा गायन्नाह-दोर्भ्यामिति द्वाभ्याम् । दोर्भ्यां परिष्वज्येति बहुधा गाढालिङ्गनं बोधयति तत्पुनरुक्तिश्च निवृत्तौ तदेकत्वे हेतुनाभिप्रायेण रमेति रमाया अन्ये ये आलयास्ते सदोषा एव अतस्तस्या अनभिरुचेस्तेषु न साक्षात् स्थितिः किन्त्वाभासमात्रेण अस्य तु निर्द्दोषसर्वगुणाश्रयत्वात्साक्षादेव स्थितिरिति भावः । यतो मुकुन्दस्य सर्वथा सर्वदुःखमोचनपूर्वकं परमानन्दप्रदस्य श्रीकृष्णस्य गात्रम् । अतः परिष्वङ्गेन हतमशुभं चिरविश्लेषदुःखं यस्य परां निर्वृतिं लेभे अतश्चित्तादिविशेषणानां यथोत्तरं परमनिर्वृतिलक्षणत्वेन श्रैष्ठ्यं नृपतिरिति सर्वश्रेष्ठस्य तस्य तादृशभावोदयेनान्येषामपि तदीयानां सर्वेषां तादृशत्वमेव सूचयति ॥२६॥ मातुलेयमिति गौरवादिराहित्येन मिथः स्नेहभरः सूचितः अत एव परिरभ्य निर्वृतोऽभूत् ततश्च स्मयन् प्रफुल्लमुखाम्भोजस्सन् प्रेमजवेन आकुलानि आवृतानि इन्द्रियाणि यस्य तादृशोऽभूत अथ नकुलसहदेवार्जुनाश्च मुदा पूर्वाभ्यामपि प्रहर्षेण समृद्धबाष्पाः सन्तः सुहृत्तममच्युतं परिरेभिरे प्रेमजवाकुलेन्द्रियाश्चाभूवन्निति योज्यम् अच्युतमिति तेषामालिङ्गननिर्वृत्त्या तस्यापि स्थिरतराभिप्रायेण अर्जुनस्य पश्चादुक्तिश्चिरपरिरम्भेच्छया किं वा सौहार्दोद्रेकेणाकुलतया शीघ्रगमनाशक्त्या पश्चादवस्थितेः ॥२७॥ एवमादौ सम्भ्रमात् कृतमालिङ्गनमात्रमुक्त्वा तत्र च सामान्यतः सर्वेषामानन्दमोहमुक्त्वा पश्चात् स्वस्थानां सतां व्यवहारपरिपालनं वदन्नन्तिमत्रयाणां तेषु भावविशेषं सूचयन्नर्जुनं पुनरालिङ्गनात परमसख्यं दर्शयति अर्ज्जुनेत्यर्धकेन तत्र युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवन्दनमिति पूर्वोक्तानुसारेण तयोर्वन्दनमनुक्तमपि ज्ञेयम् ॥२८॥ मानिनः कुर्वादिषु मान्यानित्यर्थः । यथार्हतः यथायोग्यं सूतेति सार्द्धकम् । सूतमागधगन्धर्वाः स्वस्वानुरूपैर्मृदङ्गादिभिः स्वस्वानुरूपं जगुर्ननृतुश्च तथैव वन्दिन उपमन्त्रिणश्च तुष्टुवुर्ननृतुश्च श्रीब्राह्मणास्तु अस्माकमन्येषाञ्च सद्धर्माणां पालयिता त्वं विजयीभवेति तुष्टेरिति विवेचनीयं यद्वा अतिहर्षोदयेन सर्वेऽपि मृदङ्गादिभिः स्तुत्यादि चक्रुः यतोऽरविन्दाक्षं दृष्ट्यैव सर्वतापहरं रमामोदप्रदञ्चेत्यर्थः ॥२९-३०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तादृशं श्रीयुधिष्ठिरादीनां सौभाग्यमनुसन्धानप्रेमभरोदयात् दीर्घच्छन्दसा गायन्नाह – दोर्भ्यामिति द्वाभ्याम् । दोर्भ्यां परिष्वज्येति बहुधा गाढालिङ्गनं बोधयति, तत्पुनरुक्तिश्च निर्वृतौ तदेकहेतुताभिप्रायेण । रमेति सर्व्वगुणरूपादिमत्त्वं सर्व्वसुखकरत्वञ्चोक्तम्, यतो मुकुन्दस्य सर्व्वथा सदा परमानन्दप्रदस्य श्रीकृष्णस्य गात्रम्, परिष्वङ्गेनैव हतमशुभं चिरविच्छेददुःखं यस्य सः; परां ब्रह्मानन्दादप्युत्कृष्टाम्, तल्लक्षणमाह – अश्रिवत्यादि । विशेषणानामेषां यथोत्तरं पुनर्निवृत्तिलक्षणत्वे श्रैष्ठ्यम् । नृपतिरिति सर्व्वश्रेष्ठस्य तस्य तादृशभावोदयेनान्येषामपि तदीयानां सर्व्वेषां तादृशत्वमेव सूचयति ॥२६॥ मातुलेयमिति गौरवादिराहित्येन मिथः स्नेहभरः सूचितः, अतः स्मयमानः । किञ्च, प्रेम्णो जवेनाकुलानि विवशानीन्द्रियाणि यस्य तथाभूतः सन्, अनेन कम्पपुलकाश्रुधारादिकं सूचितमेव । परिरभ्य निर्वृतोऽभूत्; यद्वा, निर्वृतः सन्, अतः स्मयमानः प्रेमजवाकुलेन्द्रियोऽभूत्; यद्वा, किमप्यन्यत् कर्तुं वक्तुं च

नाशक्नोदित्यर्थः । सुहृदो यादवादयः, सुहृत्तराः श्रीमदुद्धवादयः, युधिष्ठिरादयस्तेभ्योऽपि श्रेष्ठत्वात् सुहृत्तमम्, अत एव मुदा प्रकर्षेण कम्पादिभ्योऽप्यतिशयेन वृद्धं बाष्पं येषां तथाभूताः सन्तः, अच्युतमिति तेषामालिङ्गननिर्वृत्या तस्यापि तत्र स्थिरताभिप्रायेण; किरीटिनः पश्चादुक्तिः चिरपरिरम्भणेच्छया, किंवा सौहार्द्दोद्रेकेणाकुलभया शीघ्रगमनाशक्त्या पश्चादवस्थितेः, अतस्तदुद्देशेनैव तदन्तिके प्रयुक्तं सुहृत्तमं परमप्रियसखमिति । तल्लक्षणञ्चोक्तम् - **किरीटी प्राक्-श्रीकृष्णदत्त-स्वकिरीटधारीति** ॥२७॥एवमादौ सम्भ्रमात् कृतमालिङ्गनमात्रमुक्त्वा पश्चात् स्वस्थानां सतां व्यवहारपरिपालनमाह - अर्ज्जुनेनेति । तत्र (भा.१०/५८/४)- 'युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवन्दनम्' इति पूर्व्वोक्तानुसारेण तयोर्वन्दनम्, किंवा तेन तयोर्निर्वृतिसङ्कोचान्नैव कृतमिति पूर्व्वतोऽधुनानन्दविशेषो ज्ञेयः, देशविशेष इव समयविशेषे श्रीभगवद्दर्शनविशेषेणानन्दविशेषोत्पत्तेः । सिद्धान्तोऽयं श्रीभागवतामृते विवृतोऽस्त्येव ॥२८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२६-२९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

दोर्भ्यामिति । रमायाः अमलं निर्दोषमालयं मुकुन्दस्य गात्रं भुजाभ्यामालिङ्ग्य हतमशुभं यस्य सः परां निर्वृतिमानन्दं प्राप तदेव वक्तुं विशिनष्टि-अश्रूण्यानन्दजानि लोचनयोर्यस्य हृष्यन्त्युदञ्चितलोमा तनुर्यस्य विस्मृतः लोकविभ्रमो लोकव्यवहारो येन सः ॥२६॥तमिति । मातुलस्यापत्यं श्रीकृष्णं तं परिरभ्य प्रेमजलैरानन्दाश्रुभिराकुले व्याप्ते पिहिते इन्द्रिये लोचने यस्य सः बभूवेति शेषः । यमौ नकुलसहदेवौ किरीटी अर्जुनश्च मुदा हर्षेण प्रवृद्धानि बाष्पाण्यानन्दाश्रूणि येषां ते परिरेभिरे परिष्वक्तवन्तः ॥२७॥ अर्जुनेन केवलं परिष्वक्त एव समवयस्कत्वात् यमाभ्यां त्वभिवादितश्च भगवान् ब्राह्मणेभ्यो वयोवृद्धेभ्यो युधिष्ठिरादिभ्यो यथायोग्यं नमस्कृत्य स्वयञ्च तैर्बहुमतः कुर्वादीन् बह्वमन्यत सूतादयो ब्राह्मणाश्च मृदङ्गादिभिस्तुष्टुवुः ननृतुर्जगुश्च तत्र सूता मागधाः ब्राह्मणाश्च उपमन्त्रिणश्च तुष्टुवुः इतरे ननृतुः जगुश्च उपमन्त्रिणः परिहासकाः ॥२८-३०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

रमा श्रीरालया भूः तयोरालयं श्रीधराश्रयमित्यर्थः । विस्मृतः लोके विद्यमानः विविधभ्रमो येन स तथा ॥२६॥ प्रेमजलेन आनन्दाश्रुजलेनाकुले नेत्रेन्द्रिये यस्य तथा ॥२७-२८॥ उप समीपे समेत्य मन्त्रणशीलाः ॥२९-३०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२२-४२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥९-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

दृष्ट्वेति ॥ स्नेहेन विक्लिन्नम् आर्द्रं हृदयं यस्य स पाण्डवो युधिष्ठिरः प्रियतमं तं चिरात् बहुकालानन्तरं दृष्टं कृष्णं दृष्ट्वाऽथ पुनः पुनः सस्वजे आलिङ्गितवान् ॥२६॥ दोर्भ्यामिति ॥ दोर्भ्यां भुजाभ्यां रमाया अमलं निर्दोषम् आलयं मुकुन्दस्य गात्रं परिष्वज्यालिङ्ग्य हतम् अशुभं पापं यस्य सः अत एव अश्रूणि आनन्दजलानि लोचनयोर्यस्य सः हृष्यन्ती उदञ्चितरोमा तनुर्यस्य सः विस्मृतो लोकविभ्रमो लोकव्यवहारो येन स नृपतिर्युधिष्ठिरः परां निर्वृतिं परमानन्दं लेभे ॥२७॥ तमिति ॥ मातुलेयं मातुलपुत्रं तं कृष्णं परिरभ्य निर्वृतः परमानन्दपूर्णो भीमः स्मयन् स्मितं कुर्वन् । शता आर्षः । प्रेमजलैरानन्दाश्रुभिराकुले पिहिते इन्द्रिये लोचने यस्य तथाभूतो बभूवेति शेषः । प्रेमजवेति वा पाठः । तथा यमौ नकुलसहदेवौ किरीटी अर्जुनश्च मुदा हर्षेण प्रवृद्धानि बाष्पाणि आनन्दाश्रूणि येषां तेऽपि सुहृत्तममच्युतं कृष्णं परिरेभिरे ॥२८॥ अर्जुनेनेति सार्द्धम् ॥ अर्जुनेन केवलं परिष्वक्त एव समवयस्कत्वात् पादौ पतन्नर्जुनस्तेन हस्ताभ्यां धृत इत्याशयः । यमाभ्यां त्वभिवादितश्च भगवान् ब्राह्मणेभ्यो वृद्धेभ्यः वयोधिकेभ्यो युधिष्ठिरादिभ्यो यथार्हतः यथायोग्यं नमस्कृत्य तैः सम्मानितः कुर्वादीन् मानयामास ॥२९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

रमायाः शोभायाः अमलं निर्दोषमालयं विस्मृतो लोकविभ्रमो लौकिकविलासो येन सः लोकातीतः प्रेमानन्दरससमग्न इत्यर्थः ॥२६-३१॥

गूढार्थदीपिनी

नृपतिः मुकुन्दगात्रं परिष्वज्य अश्रुलोचनः सन् परां निर्वृतिं निरतिशयसुखं लेभे इत्यन्वयः । कथम्भूतम् । रमाया निर्दोषमालयम् ॥ कथम्भूतः नृपतिः । हृष्यन्ती रोमाञ्चिता तनुः यस्य । पुनश्च विस्मृतो लोकव्यवहारो येन सः ॥२६॥ भीमः तं

परिरभ्य निर्वृतः आनन्दितो बभूव । कथम्भूतः । प्रेमजलैः प्रेमाश्रुभिः आकुले व्याप्ते इन्द्रिये लोचने यस्य सः । यमौ किरीटी अर्जुनश्च त्रयोऽपि परिरेभिरे आलिङ्गितवन्तः । प्रवृद्धानि बाष्पाणि अश्रूणि येषां ते तथाभूताः सन्तः ॥२७॥ अर्जुनेनेति सार्द्धम् । परिष्वक्तः आलिङ्गितः । वृद्धब्राह्मणान् युधिष्ठिरादींश्च नमस्कृत्य कुर्वादीन् मानयामास स्वयं तैर्मानितः सन् ॥२८॥ सूतेति सार्द्धम् । सूतादयः मृदङ्गादिवाद्यैः सह श्रीकृष्णं ब्राह्मणाश्च तुष्टुवुः नर्तक्यो ननृतुः गायकाश्च जगुः ॥२९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विभ्रमो व्यवहारः ॥२६-३१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

कृष्णस्नेहेनेति । चिराद्दृष्टं विभक्तिप्रतिरूपकमव्ययम् । बहुदिनव्यवहित्वा दृष्टं कृष्णम् । चिरादृष्टमिति पाठोऽपि सुन्दरः । चचिरिमदृष्टस्तमिति तदर्थः । पुनः पुनः परिष्वङ्गे हेतूक्तिः ॥२६॥ नृपती राजा स्वदोर्भ्यां रमालयालयं रमाया आलयो गृहं तद्रूपस्य श्रीवत्सस्यालय आश्रयस्तम् । अलयः कदापि तद्विरहविरहित आलयः श्रीवत्सो यस्मिंस्तदिति वा । रमामलालयमिति पाठस्तु बहुकोशेष्वदर्शनादेतदर्थाप्रतिभाननिदानकः । मुकुन्दगात्रं परिष्वज्य हताशुभः सन् अश्रूण्यानन्दजानि लोचनयोर्यस्य सः । हृष्यन्ती तनुः । तनुशब्देन रोमाञ्चो लक्ष्यते । यस्य स विस्मृतो लोकविभ्रमो व्यापारो येन सः । विस्मृतेतरबहिर्व्यापारः । परां निर्वृतिं महानन्दं लेभे । परां निर्वृतिं स्वरूपानन्दं परिष्वज्य सायुज्यभाक् यथा लभते तथा लेभ इति लुप्तोपमा वा । कृतकृत्य आसीदित्यादिवत् ॥२७॥ भीमस्तं मातुलेयं मातुलस्य स्त्री मातुली । मातुलोपाध्यायोरित्यादिवार्तिकेनेन्द्रभवेत्यादिविहितस्यानुगागमस्य विकल्पविधानात्पुंयोगङीषि मातुली ततः स्त्रीभ्यो ढगिति ढकीयादेशे तस्यापत्यं मातुलेय इति भवति । मातुलानी तु मातुलीत्युपयुक्तामरः । केचित् । वस्तुतस्तु शुभ्रादिगुणसन्निवेशाड्ढकिण्यादेशे रूपमित्याहुः । परिरभ्य । प्रेमजलाकुलमिन्द्रियं चक्षुर्यस्य स स्मयमानः पुरत एतीति यन्सन् परिरभ्येत्यन्वयो वा स्म तदीयगुणजातं स्मृत्वा निर्वृतः सुखितोऽभूदिति शेषः । स्मयोऽस्यास्तीति स्मयस्तद्वदाचरन्निति वा । यमौ नकुलसहदेवौ तथा किरीटी अर्जुनेत्येतौ सुहृत्तममच्युतकमुदा प्रवृद्धा बाष्पा येषां ते तथा । बाष्पेति पातितः शब्दः । परिरेभे । ननु कानिष्ठ्यादर्जुनानन्तरं यमौ वक्तव्यौ तत्कुतो व्यत्यास इति चेन्न । यथायथं पञ्चकगुणप्रपञ्चने तात्पर्यं ग्रन्थकृत इति सम्भवात् । हन्त तर्हि धर्मादनन्तरं भीमो धर्तव्यस्तेनासूचयन्ग्रन्थकृत्क्रमो ममाभिप्रेत इति पुनस्तदनुत्तार इति चेन्न । यमौ न साक्षान्मातृष्वस्रेयाविति किञ्चित्प्रेमव्यत्यासः । कृष्णस्यामीष्वपि कश्चन सहोदरत्वात्सहोदरत्वकृतो वर्ततेति सन्देहो नोहनीय इति तात्पर्यवानेवं प्रयुयोजेत्यवेहि । अत एव यक्षप्रश्ने नकुलोत्थापनविषयो धर्मप्रयत्नोऽप्यस्मत्साचित्वयमचरदित्युक्तमुपपन्नम् ॥२८॥ क्रियातारतम्यमस्तीति क्रममनुस्मरंश्चाह ॥ अर्जुनेनेति । अभिवन्दितो नमस्कृतो वृद्धेभ्यो वयसा ब्राह्मणेभ्योऽविशेषेण ॥२९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो यज्जातं तदाह-दोर्भ्यामिति । रमाया अमलालयम् अनेन लौकिकन्यायेनापि दोषाभावाय सुखाय यत्र हेतुरुक्तः मुकुन्दगात्रमिति मोक्षानन्दोऽपि ततः सर्वपापक्षयः ततः तरमानन्दस्फूर्तिः अन्तर्बहिर्लोचनयोः शरीरे च तदुल्लासः ततो लौकिकमोहनिवृत्तिः ॥२६॥ उत्तमाधिकारित्वादस्यैतावन्निरूप्य ततो न्यूनं भीमकृत्यं निरूपयति-तं मातुलेयमिति । सम्बन्ध एव तस्य हृदये प्रतिभातः तथापि वस्तुसामर्थ्यान्निर्वृतः भगवत्सम्बन्धाद्बलाविर्भावे जाते स्मयन् मन्दहासं कुर्वन् ततोऽधिकारित्वात्प्रेमजवेनाकुलानीन्द्रियाणि यस्य यमौ माद्रीपुत्रौ ततो लौकिकत्वात् भीमानन्तरं कथनं किरीटी अर्जुनः तत्र चकारः राजधर्ममन्यधर्मञ्च समुच्चिनोति परिष्वङ्गे हेतुः सुहृत्तममिति मुदा प्रवृद्धबाष्पा इत्यविचारे भगवांस्त्वच्युत इति न कापि तस्य क्षतिरित्यनुमोदनं सूचितम् ॥२७॥ प्रेमकार्यं निरूप्य लौकिककृत्यमर्जुनादीनां निरूपयति अर्जुनेनेति द्वाभ्याम् । समस्यालिङ्गनं कनिष्ठौ चेदभिवादनम् अतः अर्जुनेन परिष्वक्तः यमाभ्यां चाभिवादितः ततो भगवान् भीमादयो ज्येष्ठा इति तान् सर्वानेव नमस्करोति इत्याह-ब्राह्मणेभ्यो नमस्कृत्य अन्येभ्यश्चेति । यथार्हतः यथायोग्यतः ॥२८॥ सर्वैर्मानितः सर्वानेव मानयामास "ये यथा मां प्रपद्यन्ते" इति लौकिकभावेन प्रपन्नान् लौकिकभावं बोधयतीति निरूप्यते कुरवः सृञ्जयाः कैकयाश्च सात्त्विकादिभेदा इति त्रिविधा निरूपिताः बन्धुत्वोपजीवकानुक्त्वा विद्योपजीवकानाह-सूतमागधवगन्धर्वानिति । गन्धर्वा गायकाः उपमन्त्रिणः परिहासकर्तारः समीचीनाः ॥२९॥

श्रीसुबोधिनीसारः

रमाया लक्ष्म्या अमलं निर्दोषमालयम् आश्रयं मुकुन्दस्य गात्रं शरीरं दोर्भ्यां परिष्वज्यालिङ्ग्य हतमशुभं मूलाज्ञानं यस्य अश्रूणि लोचनयोर्यस्य हृष्यती तनूर्मूर्तिर्यस्य विस्मृतो लोकविभ्रमो येन स नृपतिर्युधिष्ठिरः परां निर्वृतिम् आनन्दं लेभे प्राप ॥२६॥ मातुलस्य पुत्रं तं श्रीकृष्णं परिरभ्य मिलित्वा निर्वृतः प्रसन्नो भीमः स्मयन् प्रेमवेगेन विक्षिप्तचित्तः किरीटी अर्जुनो यमौ नकुलसहदेवौ च सुहृत्तमं परममित्रम् अच्युतं परिरेभिरे मुदा हर्षेण प्रवृद्धबाष्पाः प्रेमाश्रुनेत्राः ॥२७॥ सखित्वादर्जुनेन परिष्वक्तः सम्पृक्तः यमाभ्यां कनिष्ठत्वादभिवादितः ब्राह्मणेभ्योऽथ वृद्धेभ्यो यथायोग्यं नमस्कृत्य तैर्मानितः कुरुसृञ्जयकेकयान् मानयामास पूजयाम्बभूव सूतादीन् उपमन्त्रिणश्च ॥२८-२९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्नेहेन विक्लिन्नम् आर्द्रं हृदयं यस्य स पाण्डवो युधिष्ठिरः कृष्णं दृष्ट्वाऽथ पुनः पुनः सस्वजे आलिङ्गितवान् । तत्र हेतुमाह-प्रियतमं तं चिरात् बहुकालानन्तरं दृष्टमिति ॥२६॥ दोर्भ्यां भुजाभ्यां रमाया अमलं निर्दोषम् आलयं मुकुन्दस्य गात्रमालिङ्ग्य हतम् अशुभं पापं यस्य सः, अत एव अश्रूणि आनन्दजलानि लोचनयोर्यस्य सः हृष्यन्ती उदञ्चितरोमा तनुर्यस्य सः विस्मृतो लोकविभ्रमो लोकव्यवहारो येन स नृपतिर्युधिष्ठिरः परां निर्वृतिं परमानन्दं लेभे ॥२७॥ मातुलेयं मातुलपुत्रं तं कृष्णं परिरभ्य निर्वृतः परमानन्दपूर्णो भीमः स्मयन् स्मितं कुर्वन् प्रेमजलैरानन्दाश्रुभिराकुले पिहिते इन्द्रिये लोचने यस्य तथाभूतो बभूवेति शेषः । तथा यमौ नकुलसहदेवौ किरीटी अर्जुनश्च मुदा हर्षेण प्रवृद्धानि बाष्पाणि आनन्दाश्रूणि येषां तेऽप्यच्युतं पूर्णानन्दमूर्तिं कृष्णं परिरेभिरे ॥२८॥ अर्जुनेन केवलं परिष्वक्त एव, समवयस्कत्वात् । पादौ पतन्नर्जुनस्तेन हस्ताभ्यां धृत इत्याशयः । यमाभ्यां त्वभिवादितश्च भगवान् ब्राह्मणेभ्यो वयोधिकेभ्यो युधिष्ठिरादिभ्यो यथा योग्यं नमस्कृत्य ॥२९॥

अन्वितार्थप्रकाशिका

दृष्ट्वेति ॥ स्नेहेन विक्लिन्नम् आर्द्रं हृदयं यस्य स पाण्डवो युधिष्ठिरः प्रियतमं तं चिरात् बहुकालानन्तरं दृष्टं कृष्णं दृष्ट्वाऽथ पुनः पुनः सस्वजे आलिङ्गितवान् ॥२६॥ दोर्भ्यामिति ॥ दोर्भ्यां भुजाभ्यां रमाया अमलं निर्दोषम् आलयं मुकुन्दस्य गात्रं परिष्वज्यालिङ्ग्य हतम् अशुभं पापं यस्य सः अत एव अश्रूणि आनन्दजलानि लोचनयोर्यस्य सः हृष्यन्ती उदञ्चितरोमा तनुर्यस्य सः विस्मृतो लोकविभ्रमो लोकव्यवहारो येन स नृपतिर्युधिष्ठिरः परां निर्वृतिं परमानन्दं लेभे ॥२७॥ तमिति ॥ मातुलेयं मातुलपुत्रं तं कृष्णं परिरभ्य निर्वृतः परमानन्दपूर्णो भीमः स्मयन् स्मितं कुर्वन् । शता आर्षः । प्रेमजलैरानन्दाश्रुभिराकुले पिहिते इन्द्रिये लोचने यस्य तथाभूतो बभूवेति शेषः । प्रेमजवेति वा पाठः । तथा यमौ नकुलसहदेवौ किरीटी अर्जुनश्च मुदा हर्षेण प्रवृद्धानि बाष्पाणि आनन्दाश्रूणि येषां तेऽपि सुहृत्तममच्युतं कृष्णं परिरेभिरे ॥२८॥ अर्जुनेनेति सार्द्धम् ॥ अर्जुनेन केवलं परिष्वक्त एव समवयस्कत्वात् पादौ पतन्नर्जुनस्तेन हस्ताभ्यां धृत इत्याशयः । यमाभ्यां त्वभिवादितश्च भगवान् ब्राह्मणेभ्यो वृद्धेभ्यः वयोधिकेभ्यो युधिष्ठिरादिभ्यो यथार्हतः यथायोग्यं नमस्कृत्य तैः सम्मानितः कुर्वादीन् मानयामास ॥२९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

रमायाः ॥ अमलमतिशुद्धम् आलयं निवासस्थानम् ॥ विस्मृतो लोकविभ्रमो लोकव्यवहारो येन ॥२६॥ प्रेम्णो जवेन वेगेनाकुलेन्द्रियः ॥ प्रवृद्धबाष्पाः प्रकृष्ट प्रेमाश्रुबिन्दवः ॥२७-२८-२९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दृष्ट्वेति ॥ पाण्डवो युधिष्ठिरः, कृष्णं दृष्ट्वा, स्नेहेन, विक्लिन्नमार्द्रं हृदयं यस्य स तथाभूतः सन्, चिरात् बहुना कालेन, दृष्टं प्रियतममतिप्रियं श्रीकृष्णम्, अथ कार्त्स्न्येन, पुनः पुनः, सस्वजे परिरब्धवान् ॥२६॥ दोर्भ्यामिति ॥ नृपतिर्युधिष्ठिरः, रमाया लक्ष्म्याः अमलं निर्दोषमालयं निवासस्थानभूतं, मुकुन्दगात्रं श्रीकृष्णशरीरं, दोर्भ्यां द्वाभ्यां हस्ताभ्यां, परिष्वज्यालिङ्ग्य, हतान्यशुभानि पापानि यस्य तथाभूतः, अश्रूणि प्रेमाश्रूणि लोचनयोर्यस्य सः, हृष्यत्तनुः पुलकिताङ्गः, विस्मृतो विस्मृतिं प्राप्ः लोकविभ्रमो लोकव्यवहारो यस्य तथाभूतः सन्, परां सर्वोत्तमां, निर्वृतिं सुखं, लेभे प्राप ॥२७॥ तमिति ॥ भीमः, मातुलेयं मातुलस्यापत्यं, तं श्रीकृष्णं, परिरभ्य निर्वृतः सुखितः, स्मयन्नानन्दजहासयुतः, प्रेमजलैः प्रेमाश्रुभिः आकुले पिहिते इन्द्रिये लोचने यस्य तथाभूतः, बभूवेति शेषः । किरीट्यर्जुनः, यमौ सहदेवनकुलौ चैते, मुदा हर्षेण, प्रवृद्धानि बाष्पाण्यानन्दाश्रूणि येषां तथाभूताः सन्तः,

सुहृत्तमम् अच्युतं श्रीकृष्णं, परिरेभिरे परिष्वक्तवन्तः ॥२८॥ तत्र विवेकमाह ॥ अर्जुनेनेति ॥ अर्जुनेन, केवलं परिष्वक्तः एव । समवयस्कत्वात् । यमाभ्यां नकुलसहदेवाभ्यां तु, अभिवादितश्च भगवान्, ब्राह्मणेभ्यः, वृद्धेभ्यो वयोवृद्धेभ्यः युधिष्ठिरादिभ्यश्च, यथार्हतः यथायोग्यं, नमस्कृत्य, मानितः स्वयं च तैर्बहुमतः सन्, कुरुसृञ्जयकैकयान्, मानयामास बह्वमन्यत ॥२९॥

कृष्णप्रिया

लक्ष्मी का निर्दोष निवासस्थान, श्रीकृष्ण के दिव्य गात्र का राजा ने दोनों भुजाओं से आलिंगन किया इसी लिये राजा के समस्त पाप नष्ट हो गये और राजा के नेत्रों से अश्रुपात बहने लगे तथा शरीर में रोम खडे हो गये, लोक के व्यवहार को भूल कर राजा परमानन्द को प्राप्त हुए ॥२६॥ भीमसेन भी मामा के पुत्र श्रीकृष्ण करो दोनों भुजाओं से मिलकर परमानन्द से परिपूर्ण हुए मन्द हास युक्त आनन्द के अश्रुपातों से आकुल नेत्रवाले हुए और नकुल, सहदेव तथा अर्जुन ये तीनों हर्ष से आनन्द के अश्रुपातों से युक्त परममित्र श्रीकृष्ण को मिले ॥२७॥ अर्जुन समान अवस्था के थे इस लिये उसने श्रीकृष्ण का आलिंगन मात्र ही किया और नकुल-सहदेव दोनों श्रीकृष्ण से छोटी अवस्था के होने के कारण उन्हों ने श्रीकृष्ण, ब्राह्मणों के अर्थ नमस्कार करके और वृद्ध पुरुषों को भी यथायोग्य नमस्कार किया ॥२८॥ इस प्रकार सम्मान को प्राप्त होकर कुरु, संृजय, केकय देश के राजा तथा मान्य पुरुषों का सम्मान किया ॥२९॥

मृदङ्गशङ्खपटहवीणापणवगोमुखैः[1] । ब्राह्मणाश्चारविन्दाक्षं तुष्टुवुर्ननृतुर्जगुः ॥३०॥
एवं सुहृद्भिः पर्यस्तः पुण्यश्लोकशिखामणिः । संस्तुयमानो भगवान्विवेशालङ्कृतं पुरम् ॥३१॥
संसिक्तवर्त्म करिणां मदगन्धतोयैश्चित्रध्वजैः कनकतोरणपूर्णकुम्भैः ।
मृष्टात्मभिर्नवदु[2]कूलविभूषणस्त्रग्गन्धैर्नृभिर्युवतिभिश्च विराजमानम् ॥३२॥
उद्दीप्तदीप[3]बलिभिः प्रतिसद्म जालनिर्यातधूपरुचिरं विलसत्पताकम् ।
मूर्धन्यहेमकलशै रजतोरुशृङ्गैर्जुष्टं ददर्श भवनैः कुरुराजधाम ॥३३॥

कर्दमक्षमा

एवम्, आवेदितः, राजा, मागधः, उच्चैः, जहास, स्म, च, अमर्षितः, आह, मन्दाः, तर्हि, वः, युद्धम्, ददामि ॥३०॥ युधि, विक्लवचेतसा, त्वया, भीरुणा, न, योत्स्ये, स्वपुरीम्, मथुराम्, त्यक्त्वा, समुद्रम्, शरणम्, गतः ॥३१॥ अयम्, अर्जुनः, वयसा, तुल्यः, न, अतिसत्त्वः, न, मे, समः, योद्धा, न, भवेत्, भीमः, मम, तुल्यबलः ॥३२॥ इति, उक्त्वा, भीमसेनाय, महतीम्, गदाम्, प्रादात्, स्वयम्, द्वितीयाम्, आदाय, पुरात्, बहिः, निर्जगाम ॥३३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

राजन्यतामेव प्रपञ्चयति ॥२९-३०॥ यतो मद्भिया समुद्रं शरणं गतः ॥३१॥ वयसाप्यतुल्यो नातिसत्त्वो नातिबलश्च न च देहेन मया समोऽतोर्जुनो योद्धा न भवेत् भीमस्तु भवेत् यतो मम तुल्यबलः ॥३२॥ प्रदाय दत्त्वेत्यर्थः ॥३३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ब्राह्मणास्तुष्टुवुश्चान्नर्तक्यो ननृतुर्गायकाश्च जगुः । यद्वा-ब्राह्मणा एव भक्त्या ननृतुर्जगुश्च । तदुक्तम्- "ब्रह्मणो वासुदेवार्थ गायमानोऽनिशं परम् । नववर्षसहर्स्राणि कुबेरभवने वसत् ॥ गीतनृत्यादि कुर्वीत द्विजदेवाग्नितुष्टये । न जीवनार्थं युञ्जीत विप्रः पापभिया क्वचित् ॥" इति वाराहे । श्रुतदेवोऽच्युतं प्राप्तमित्यारभ्य धुन्वन्वासो ननर्त ह इत्यन्तेनाग्रे वक्ष्यत्यपि । यद्वा - अस्माकमन्येषां च सद्धर्माणां पालयिता त्वं विजयी भवेति विप्रास्तुष्टुवुः । अरविन्दाक्षं दृष्ट्यैव सर्वतापहरं परमामोदप्रदं चेत्यर्थः ॥३०॥ एवमुक्तप्रकारेण । पर्यस्तः परिवृतः पुण्यो मनोज्ञः साक्षाद्धर्मरूपो वा श्लोको येषां युधिष्ठिरादीनां तेषां शिखामणिर्मुख्यो न तादृशपुण्यश्लोकोऽन्योस्तीति भावः ॥३१॥ पुरं वर्णयति-संसिक्तेति । संसिक्तवर्त्म कुरुराजधाम ददर्शेति द्वितीयेनान्वयः । संसिक्तानि वर्त्मानि यस्मिंस्तत्तथा । 'धाम देहे गृहे पुरे ' इति कोशात् ॥३२-३३॥

---

१. वेणुभिः-वीर. विज. । २. वरदुकूल-विज. । ३. दीपावलिभिः-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पर्य्यस्तः परिवृतः सम्यक् स्तूयमानश्च यतः पुण्यो मनोज्ञः साक्षाद्धर्मरूपो वा श्लोको यशो येषां ते युधिष्ठिरादयस्तेषां शिखामणिः भगवान् इति ॥३१॥ श्रीभगवत्प्रवेशलीलापरिकरताङ्गततया धन्यतमं तत्पुरं वर्णयति-संसिक्तेति युग्मकेन। मदैः स्वभावसिद्धैश्चन्दनादिगन्धतोयैश्च कल्पितैः सम्यक् सिक्तानि वर्त्मानि यस्य तत् नृभिर्युवतिभिर्नरनारीभिस्तदानीं नवदुकूलादिसमुज्वलितगात्राभिः सतीभिर्विशेषतो राजमानं प्रतिसद्मेत्यस्योभयतोऽप्यन्वयः कुरूणां महावैभवादिना प्रसिद्धानां (पू)सर्वेषामपि साक्षाच्छ्रीकृष्णप्रेष्ठत्वेन राजा युधिष्ठिरस्तस्य धामेति तद्योग्यतोक्ता ॥३२-३३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मानिनः कुर्व्वादिषु मान्यानित्यर्थः। यथार्हतो यथायोग्यं कांश्चिदभिवादनेन कांश्चिदालिङ्गनेन कांश्चिच्च कुशलप्रश्नादिनेत्येवं सम्मानितवान्। सूत-मागध-वन्दिनो ब्राह्मणाश्च तुष्टुवुः, गन्धर्वा जगुः, उपमन्त्रिणश्च मृदङ्गादिभिर्ननृतुः, नर्तक्यो वेति विवेचनीयम्। मृदङ्गादीना यथोत्तरं हर्षनृत्यहेतुत्वे श्रैष्ठ्यम्। यद्वा, अत्यन्तहर्षोदयेन सूताद्या ब्राह्मणान्ताः सर्व्वेऽपि मृदङ्गादिभिर्विशिष्टाः स्तुत्यादि चक्रुः, यतोऽरविन्दाक्षं दृष्ट्यैव सर्व्वतापहरं परमानन्दरसप्रदञ्चेत्यर्थः। सूतादीनां यथोत्तरं स्तवनादौ श्रैष्ठ्यम् ॥३०॥ पर्यस्तः परिवृतः, सम्यक् स्तूयमानश्च, यतः पुण्यो मनोज्ञः साक्षाद्धर्म्मरूपो वा श्लोको यशो येषां ते, पुण्यश्लोका युधिष्ठिरादयस्तेषां शिखामणिः, यतो भगवान् निजाशेषैश्वर्य्यप्रकटनार्थमवतीर्णः साक्षात् परमेश्वरः ॥३१॥ श्रीभगवत्प्रवेशेन पुरस्य परमधन्यतामालोच्य प्रहृष्यन् पूर्व्ववत्तद्वर्णयति - संसिक्तेति। मदैर्गन्धतोयैश्चन्दनादिगन्धयुक्तैर्जलैः सम्यक् सिक्तानि वर्त्मानि यस्य तत्, पुम्भिर्दुकूलादिभिर्मृष्टात्मभिरुज्ज्वलगात्रैः स्वभावतः सदा राजमानं शोभमानमेव, तदानीं श्रीभगवत्प्रवेशापेक्षयालंकृतत्वेन विशेषतो राजमानम्; यद्वा, विशेषेण अमरावत्यादिभ्योऽप्याधिक्येन राजमानम्; प्रतिसद्मेत्यस्योभयतोऽप्यन्वयः। कुरूणां महावैभवादिना प्रसिद्धानां राजा श्रीयुधिष्ठिरस्तस्य धामेति तद्योग्यतोक्ता ॥३२-३३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्रेमजलाकुलेन्द्रियाः आनन्दाश्रुपिहिताक्षाः ॥२७-३५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमिति। पर्यस्तः परिवृतः पुण्यश्लोकश्रेष्ठः पुरमिन्द्रप्रस्थं विवेश ॥३१॥ तद्विशिनष्टि-संसिक्तवर्त्मेति द्वयेन। करिणां मदगन्धजलैः संसिक्तानि वर्त्मानि पुरवीथयो यस्मिंस्तत् कनकतोरणैः परिपूर्णकुम्भैश्च मृष्टः स्नापित आत्मा शरीरं यैः नवाः दुकूलादयो येषां तैः नृभिर्पुम्भिस्तथाभूताभिर्युवतीभिः स्त्रीभिश्च विराजमानम् ॥३२॥ किञ्च उद्दीप्तेति। प्रतिगृहं उद्दीप्तैः दीपैर्बलिभिः पुष्पादिभिश्च जुष्टं जालेभ्यो गवाक्षेभ्यः निर्यातैः धूपैः रुचिरं विलसन्त्यः पताका यस्मिंस्तत् मूर्द्धन्याः मूर्द्धनि भवास्ते हेमकलशा येषां तैः रजतमयान्युरूणि स्थूलानि शृङ्गाणि कलधौताः स्तम्भभूमिका येषां तैश्च गृहैर्जुष्टम् एवम्भूतं कुरुराजधामेन्द्रप्रस्थपुरं ददर्श ॥३३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

उप समीपे समेत्य मन्त्रणशीलाः ॥२९-३०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२२-४२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥९-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

सूतेति सार्द्धम् ॥ मृदङ्गादिशब्दैः सह सूतमागधबन्दिनो ब्राह्मणाश्चारविन्दाक्षं तुष्टुवुर्ननृतुर्जगुश्च ॥३०-३१॥ एवमिति ॥ पुण्यावहः श्लोको यशो येषां तेषां शिखामणिरिव श्रेष्ठो भगवान् एवं सुहृद्भिर्युधिष्ठिरादिभिः पर्यस्तः परिवृतः सूतादिभिः संस्तूयमानश्चालंकृतं हस्तिनापुरं विवेश ॥३२॥ पुरं विशिनष्टि-संसिक्तेति ॥ करिणां गजानां मदगन्धयुक्तैस्तोयैर्जलैः संसिक्तानि वर्त्मानि पुरवीथयो यस्मिंस्तत् चित्रध्वजैः कनकतोरणैः परिपूर्णकुम्भैः तथा मृष्टः आत्मा येषां तैः तथा नवा दुकूलादयो येषां तैर्नृभिः तथाभूताभिर्युवतिभिश्च विराजमानम्। उद्दीप्तेति। प्रतिसद्म बलिभिः पुष्पादिप्रकारैश्च जुष्टं जालेभ्यो गवाक्षेभ्यो निर्यातैर्धूपै रुचिरं शोभितं विरसन्त्यः पताका यस्मिंस्तत् मूर्धन्याः मूर्ध्नि भवा हेमकलशा येषां तैः रजतमयानि उरूणि स्थूलानि शृङ्गाणि

कलशाधस्तनभूमिका येषां तैर्भवनैश्च जुष्टं कुरुराजस्य युधिष्ठिरस्य धाम अन्तःपुरं भगवान् दूरत एव ददर्श ॥३३-३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुरं वर्णयति-संसिक्तेति द्वयेन । करिणां मदगन्धतोयैः संसिक्तानि वर्त्मानि यस्मिन् तत् चित्रध्वजादिभिर्विराजमानम् उद्दीप्तैर्दीपैः बलिभिः पुष्पादिभिश्च प्रतिसद्म प्रतिगृहं जालेभ्यः गवाक्षेभ्यो निर्गतैः धूमै रुचिरं विलसन्त्यः पताकाः यस्मिन् तत् मूर्द्धनि भवा मूर्द्धन्याः हेमकलशाः येषां तैः रजतमयान्युरूणि स्थूलानि शृङ्गाणि कलशाधस्था भूमिका येषां तैर्भवनैश्च जुष्टम् कुरुराजस्य धाम पुरं ददर्श ॥३२-३३॥

गूढार्थदीपिनी

पुण्यः श्लोको यशो येषां युधिष्ठिरादीनां शिखामणिः मुख्यः ॥३०॥ पुरं वर्णयति । कथम्भूतम् । करिणां मदगन्धतोयैः संसिक्तानि वर्त्मानि यस्य तत् । पुनश्च चित्रध्वजादिभिः तथा मृष्टः आत्मा शरीरं येषां तैः गौरवर्णैः नृभिः तथाभूताभिः युवतिभिश्च विराजमानम् । कथम्भूतैः । नवा अभिनवा दुकूलादयो येषां तैः नृभिः । तोरणं वन्दनमालिका ॥३१॥ पुनश्च । नानाभवनैः जुष्टमलङ्कृतं कुरुराजस्य युधिष्ठिरस्य धाम पुरं ददर्श । दीदृशम् । प्रतिसद्म उद्दीप्तैः प्रज्वालितैः दीपैः बलिभिः पुष्पादिभिश्च जुष्टम् । पुनश्च जालेभ्यो गवाक्षेभ्यो निर्गतैः धूपैः रुचिरम् । पुनश्च । विलसन्त्यः पताकाः यस्मिन् । मूर्ध्नि भवा हेमकलशा यस्मिन् । रजतमयानि उरूणि बहूनि शृङ्गाणि कलशाधःस्थलानि यस्मिन् तथाभूतम् ॥३२॥ नरेन्द्रमार्गे राजमार्गे प्राप्तं श्रीकृष्णं निशम्य युवतयः सद्यः झटिति गृहकर्म तल्पे पतींश्च विसृज्य द्रष्टुं ययुरित्यन्वयः । स्म साश्चर्यम् । कथम्भूतम् । लोचनानां पात्रम् अवलोकनविषयम् । कथम्भूताः युवतयः । औत्सुक्यात् विश्लथिता शिथिलीभूताः केशानां दुकूलानां च बन्धा ग्रन्थयो यासां ताः ॥३३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुरं वर्णयति-संसिक्तेति द्वयेन । करिणां मदगन्धतोयैः संसिक्तानि वर्त्मानि यस्मिन् तत् चित्रध्वजादिभिर्विराजमानम् उद्दीप्तैर्दीपैः बलिभिः पुष्पादिभिश्च प्रतिसद्म प्रतिगृहं जालेभ्यः गवाक्षेभ्यो निर्गतैः धूमै रुचिरं विलसन्त्यः पताकाः यस्मिन् तत् मूर्द्धनि भवाः मूर्द्धन्याः हेमकलशाः येषां तैः रजतमयान्युरूणि स्थूलानि शृङ्गाणि कलशाधःस्था भूमिका येषां तैर्भवनैश्च जुष्टम् कुरुराजस्य धाम पुरं ददर्श ॥३२-३३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मानिनः स्वप्राप्यभानवतो मानित इति पाठे स्वयं मानितः प्रागित्यर्थः । उपमन्त्रिणो हासकाः ॥३०॥ सूतेत्याद्यानुपूर्व्यनुसारेण ननृतुर्जगुस्तुष्टुवुरिति वक्तव्यम् । तथाऽपि ब्राह्मणस्तवनस्य तदैहिकपारत्रिकफलोपलम्भकतया मुख्यत्वात्प्रागुक्तिः क्रममतिक्रम्येति ज्ञेयम् ॥३१॥ पर्यस्तः परिवीतः पर्यस्तो यः प्रस्तुतो वैरी जरासुतासुतादिनिरस्त एवेति सुहृद्भिः संस्तूयमान इत्यन्वयो वा । अलंकृतं पुरं विवेश ॥३२॥ धर्मधामानुवर्णयति ॥ संसिक्तेति । करिणां मदस्य यो गन्ध आमोदो येषां तानि च तानि तोयानि दानोदकानीति यावत् । तैः संसिक्तं वर्त्म यस्य तत् । गन्धतोयपदं चन्दनाम्बुपरं चेन्न बरीभरीति सरसमन्वयेन करिपदमिति मननीयम् । मदस्य गन्धो हिंसनं प्रच्योतनमितियावत् । तद्रूपतोयैरिति व्याकुर्वते । चित्रध्वजैः कनकतोरणपूर्णकुम्भैर्विराजमानमित्यन्वयः । एवमुत्तरत्रापि । मृष्टा आत्मानो देहा यासां तास्ताभिर्युवतीभिस्तथा वरदुकूलविभूषणसहिताः स्रजो गन्धाश्च येषां तैर्विभूषणस्रग्गन्धैर्नृभिश्च वरदुकूलविभूषणस्रग्गन्धैः गृहात्मभिर्युवतीभिर्नृभिश्च विराजमानमिति वा ॥३३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो भगवता मानिताः मानयामासुरित्याह-मृदङ्गेति । चकारात् क्षित्रियादयोऽपि अरविन्दाक्षमिति दृष्ट्यैवाप्यायिताः ज्ञानिनस्तुस्तुष्टुवुः भक्ता ननृतुः जगुः कर्मिणः सामगाः ॥३०॥दर्शनस्थानकृत्यमुपसंहरन् अग्रिमकृत्यमाह-एवं सुहृद्भिरिति । एवम्भूतैः सुहृद्भिः पर्यस्तो व्याप्तः तैरेव स्तूयमानः पुरमविशत् भगवतो महत् नगराद्बहिरेव स्थातुं युक्तं कथमन्तः प्रवेशनमिति शङ्कां वारयति-पुण्यश्लोकशिखामणिरिति । पुण्यश्लोकाः युधिष्ठिरादयस्तेषां शिखामणिर्मुकुटमणिः भगवतः प्रवेशाभावे कोऽपि पुण्यश्लोको न प्रविशेदिति तदनुरोधेन प्रार्थनया वा प्रविष्ट इत्यर्थः । भगवत्त्वादनन्यत्वं सर्वैरेव स्तूयमानत्वान्न लज्जा सर्वानुमोदनार्थं विशेषणम् अलङ्कृतमिति ॥३१॥भगवत्प्रविष्टं पुरं वर्णयति द्वाभ्यामसंसिक्तेति । करिणां मदगन्धतोयैः संसिक्तवर्त्मेति अधो वर्णितं

कनकतोरणैः पूर्णकुम्भैश्चेत्युपरि, मध्ये वर्णयति-मृष्टात्मभिरिति । मृष्टा उद्वर्तनादिभिः शोधिताः आत्मानो देहा येषां नवानि दुकूलानि स्त्रजो माला गन्धाश्च एतादृशैर्नृभिर्युवतिभिः स्त्रीपुरुषैर्विराजमानमिति साधारणपुरुषाणां शोभा निरूपिता प्रसिद्धपुरुषाणां तु पुरमेव शोभाकरम् ॥३२॥साधारणं पुरं वर्णयित्वा राजगृहात्मकं वर्णयति उद्दीप्तेति । राजगृहाः सर्वे भोगस्थानभूता इति तत्रोद्दीप्ता दीपावलयश्च पुष्पमण्डलानि पूजासाधनानि भवन्ति प्रतिसद्म सर्वेष्वेव गृहेषु ये जाला गवाक्षाः तन्मार्गेण निर्याता ये धूमास्तैः रुचिरं विलासयुक्ताः पताका यस्मिन् सात्त्विकराजसतामसोत्कर्षो निरूपितः क्रमेण पदत्रयेण गृहाणां स्वाभाविकोत्कर्षमाह-मूर्द्धनि स्थितैः हेमकलशैः राजतानि उरुशृङ्गाणि च तैर्जुष्टं सेवितं ज्ञापकत्वेन तानि स्थितानि अयमर्थः भगवान् दूरादेव दीपविशेषैः पताकाभिः सुवर्णकुम्भैः राजतशृङ्गैश्च राजगृहमिदमिति ज्ञातवानिति ॥३३॥

श्रीसुबोधिनीसारः

मृदङ्गादिभिर्ब्राह्मणा अरविन्दाक्षं पद्मनेत्रं हरिं तुष्टुवुः ननृतुः प्रेम्णा भक्त्या जगुरेतेन तत्तुष्ट्यर्थं गीतनृत्यं विधेयमिति सूचितम् ॥३०॥ एवं सुहृद्भिः पर्यस्तः परिवृतः पुण्यश्लोकमुकुटमणिर्भगवान्संस्तूयमानोऽलंकृतं पुरमिन्द्रप्रस्थं विवेश ॥३१॥ तत् विशिनष्टि करिणां हस्तिनां मदगन्धयोस्तोयानि जलानि इत्येके मद एव गन्धजलानि तैः सम्यक् सिक्तानि आषिञ्चितानि वर्त्मानि यस्मिन् तत् चित्रैर्ध्वजैः सुवर्णतोरणैः पूर्णकलशैः मृष्ट उज्ज्वलित उद्वर्तनादिनात्मा देहो यैः नवानि दुकूलानि वस्त्राणि विभूषणानि स्त्रजो माला गन्धा येषां तैर्नृभिः पुम्भिः युवतिभिः स्त्रीभिश्च विराजमानम् ॥३२॥ प्रतिसद्म प्रतिगृहम् उद्दीप्तैर्दीपैर्बलिभिः पुष्पादिप्रकरैश्च जुष्टं जालेभ्यो गवाक्षेभ्यो निर्यातैर्निर्गतैर्धूपै रुचिरं नमोरमं विलसन्त्यः पताका यस्मिंस्तत् मूर्द्धन्या मूर्द्धनि भवा हेमकलशा येषां रजतमयानि उरूणि बहूनि शृङ्गाणि येषां तैर्भवनैर्गृहैर्जुष्टं कुरुराजस्य युधिष्ठिरस्य धाम स्थानं ददर्श ॥३३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तैः सम्मानितो गुर्वादीन् जनान् मानयामास सत्कृतवानिति सार्धान्वयः । मृदङ्गादिशब्दैः सह सूतमागधबन्दिनो ब्राह्मणाश्चारविन्दाक्षं तं तुष्टुवुर्ननृतुर्जगुश्च ॥३०-३१॥ पुण्यावहः श्लोको यशो येषां तेषां शिखामणिरिव श्रेष्ठो भगवान् एवं सुहृद्भिर्युधिष्ठिरादिभिः पर्यस्तः परिवृतः सूतादिभिः संस्तूयमानश्चालंकृतं हस्तिनापुरं विवेशेत्यन्वयः ॥३२॥ अलंकृतत्वमेवाह-संसिक्तेति । करिणां गजानां मदगन्धयुक्तैर्जलैः संसिक्तानि वर्त्मानि पुरवीथयो यस्मिंस्तत् । चित्रध्वजैः कनकतोरणैः परिपूर्णकुम्भैः मृष्टः आत्मा शरीरं येषां तैः तथा नवा दुकूलादयो येषां तैः तथाभूताभिर्युवतिभिश्च विराजमानम् ॥३३॥

अन्वितार्थप्रकाशिका

सूतेति सार्द्धम् ॥ मृदङ्गादिशब्दैः सह सूतमागधबन्दिनो ब्राह्मणाश्चारविन्दाक्षं तुष्टुवुर्ननृतुर्जगुश्च ॥३०-३१॥ एवमिति ॥ पुण्यावहः श्लोको यशो येषां तेषां शिखामणिरिव श्रेष्ठो भगवान् एवं सुहृद्भिर्युधिष्ठिरादिभिः पर्यस्तः परिवृतः सूतादिभिः संस्तूयमानश्चालंकृतं हस्तिनापुरं विवेश ॥३२॥ पुरं विशिनष्टि-संसिक्तेति ॥ करिणां गजानां मदगन्धयुक्तैस्तोयैर्जलैः संसिक्तानि वर्त्मानि पुरवीथयो यस्मिंस्तत् चित्रध्वजैः कनकतोरणैः परिपूर्णकुम्भैः तथा मृष्टः आत्मा येषां तैः तथा नवा दुकूलादयो येषां तैर्नृभिः तथाभूताभिर्युवतिभिश्च विराजमानम् । उद्दीप्तेति । प्रतिसद्म बलिभिः पुष्पादिप्रकारैश्च जुष्टं जालेभ्यो गवाक्षेभ्यो निर्यातैर्धूपै रुचिरं शोभितं विरसन्त्यः पताका यस्मिंस्तत् मूर्धन्याः मूर्ध्नि भवा हेमकलशा येषां तैः रजतमयानि उरूणि स्थूलानि शृङ्गाणि कलशाधस्तनभूमिका येषां तैर्भवनैश्च जुष्टं कुरुराजस्य युधिष्ठिरस्य धाम अन्तःपुरं भगवान् दूरत एव ददर्श ॥३३-३४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ब्राह्मणाः तुष्टुवुः ॥ अन्ये तु यथा योग्यञ्चक्रुः ॥३०॥ पर्यस्तः परिवृतः ॥३१॥ तत्पुरं वर्णयति संसिक्तेति द्वाभ्याम् । करिणां मदैः गन्धतोयैः स्त्रग्गन्धिजलैश्च संसिक्तमार्गचित्रध्वजादिभिः विराजमानम् ॥३२॥ प्रतिसद्म प्रतिगेहम् ॥ उद्दीप्ताः दीपाः बलयः कुसुमादिसमूहाश्च तैर्जुष्टं जालेभ्यो वातायनेभ्यः निर्यातधूपैः रुचिरम् । मुर्द्धनि उपरिस्थिताः हेमकलशा येषु तैः रजतमयानि स्थूलानि शृङ्गाणि कलशाधोभूमिका येषां तैः भवनैः जुष्टं कुरुराजस्य युधिष्ठिरस्य धाम इन्द्रप्रस्थं प्रविष्टः सन् ददर्श ॥३३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सूतेति ॥ सूतमागधगन्धर्वाः, बन्दिनः, उपमन्त्रिणः उपहासकाश्च, मृदङ्गशङ्खपटहवीणापणववेणुभिः, ननृतुः जगुश्च । ब्राह्मणाश्च, अरविन्दाक्षं कमलनयनं कृष्णं तुष्टुवुः ॥३०॥ एवमिति ॥ एवं सुहृद्भिः, पर्यस्तः परिवृतः, पुण्यश्लोकशिखामणिः,

भगवान् श्रीकृष्णः, संस्तूयमानः बन्द्यादिभिर्गीतयशाः सन्, अलंकृतं पुरं, विवेश ॥३१॥ पुरं विशिनष्टि ॥ संसिक्तेति ॥ करिणां मदगन्धतोयैः मदगन्धजलैः, संसिक्तानि वर्त्मानि पुरवीथयो यस्मिस्तत्, चित्रध्वजैः, कनकतोरणपूर्णकुम्भैः, मृष्ट आत्मा शरीरं यैस्तैः, नवाः दुकूलविभूषणस्त्रग्गन्धा येषां तैः, नृभिः युवतिभिश्च, विराजमानम् ॥३२॥ उद्दसेति ॥ प्रतिसद्म प्रतिगृहम्, उद्दीप्तदीपबलिभिः प्रज्वालितप्रदीपकैः पुष्पादिभिश्च, जुष्टं, जालेभ्यो गवाक्षेभ्यः निर्याता ये धूपा धूपधूमास्तै रुचिरं, विलसन्त्यः पताका यस्मिस्तत्, मूर्द्धन्या मूर्ध्नि भवा हेमकलशाः सुवर्णकलशाः येषां तैः, रजतमयान्यूरूणि स्थूलानि शृङ्गाणि येषां तैः भवनैर्गृहैः, जुष्टं कुरुराजधाम इन्द्रप्रस्थपुरं, ददर्श ॥३३॥

कृष्णप्रिया

सूत मागध गन्धर्व बन्दी उपमन्त्रि लोग मृदंग शंख पटह वीणा पणव गोमुख आदि वाजित्रों के साथ स्तुति नृत्य गान करने लगे और ब्राह्मण भी स्तुति करने लगे ॥३०॥ पवित्र यशस्वियों के बिच श्रेष्ठ श्रीकृष्ण भगवान् इस प्रकार सखाओं से युक्त होकर और सूत आदियों से स्तुति को प्राप्त होते हुए अलंकृत पुरमें प्रविष्ट हुए ॥३१॥ जिस पुर में मतवारे हस्तियों के मद और गन्ध से युक्त जलों से राजमार्गों का छिटकाव हो रहा है और चित्र-विचित्र ध्वजाओं और सुवर्ण के तोरण तथा जल से भरे कुम्भों से शोभायमान वह पुर है। और उज्ज्वल शरीर वाले नवीन रेशमी वस्त्र भूषण माला सुगन्ध धारण करने वाले पुरुष और स्त्रीयों से वह पुर शोभायमान हो रहा है ॥३२॥ श्रीकृष्ण भगवान् युधिष्ठिरजी की राजधानी को देखकर जहां घर घर में प्रकाश दीपावली से शोभायमान हैं और गवाक्षों से निकले हुए अगरु धूप से परिमल युक्त है और जिनके शिखरों पर चांदी के स्थान में सुवर्ण कलश और पताका से अलंकृत अनेक भवनों से भूषित राजधानी को देखा ॥३३॥

प्राप्तं निशम्य नरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदुकूलबन्धाः ।
सद्यो विसृज्य गृहकर्म पतींश्च तल्पे द्रष्टुं ययुर्युवतयः स्म नरेन्द्रमार्गे ॥३४॥
तस्मिन्सुसंङ्कुल इभाश्वरथद्विपद्भिः कृष्णं सभार्यमुपलभ्य गृहाधिरूढाः ।
नार्यो विकीर्य कुसुमैर्मनसोपगुह्य सुस्वागतं विदधुरुत्स्मय[2]वीक्षणेन[3] ॥३५॥
ऊचुः स्त्रियः पथि निरीक्ष्य मुकुन्दपत्नीस्तारा यथोडुपसहाः किमकार्यभूमिः ।
यच्चक्षुषां पुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति ॥३६॥
तत्र तत्रोपसङ्गम्य पौरा मङ्गलपाणयः । चक्रुः सपर्यां कृष्णाय श्रेणीमुख्या हतैनसः ॥३७॥

कर्दमक्षमा

ततः, रणदुर्मदौ, वीरौ, समे, खले, इतरेतरौ, संयुक्तौ, वज्रकल्पाभ्याम्, गदाभ्याम्, संयुक्तौ ॥३४॥ रङ्गिणोः, नटयोः, इव, सव्यम्, च, दक्षिणम्, एव, विचित्राणि, मण्डलानि, चरतोः, युद्धम्, शुशुभे ॥३५॥ राजन् ! ततः, दन्तिनोः, दन्तयोः, इव, क्षिप्तयोः, गदयोः, वज्रनिष्पेषसन्निभः, चटचटाशब्दः, (समभवत्) ॥३६॥ तीव्रमन्य्वोः, संयुध्यतोः, द्विरदयोः, इव, उपेत्य, अन्योऽन्यतः, अंसकटिपादकरोरुजत्रून्, भुजबलेन, निपात्यमाने, वै, ते, गदे, अर्कशाखे, यथा, चूर्णीबभूवतुः ॥३७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नराणां लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं किंपुनर्नारीणामित्यर्थः ॥३४॥ सुष्ठु स्वागतं तत्प्रश्नादिकं प्रियमुत्स्मयवीक्षितेनैव विदधुः ॥३५॥उडुपसहाः चन्द्रसहचरा इत्यर्थः । अमूभिः किं पुण्यमकारि ॥३६॥ श्रेण्यः एकशिल्पोपजीविनां सङ्घास्तेषु मुख्याश्च ॥३७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति-नारीणां तु रम्यपुरुषावलोकनमत्यादन्दकरमिति भावः । मध्याह्नभोजनोत्तरं केषाञ्चिद्विषयासक्तानां शय्यायां निवेशादित्युक्तं तल्पे इति । 'तल्पं दाराट्टशय्यायाम्' इति कोशात् ॥३४॥ उत्स्मयो विनयस्तेन वीक्षितं तेन । "अगर्वे विनये ईषद्धास्याधिक्येऽपि चोत्स्मयः" इति निरुक्तिः । तस्मिन्राजमार्गे ॥३५॥ इत्यर्थ इति । उडुपशब्दस्यानेकार्थत्वादित्थं व्याख्येयमिति भावः । "चन्द्रे प्लवे शिवेऽब्धौ च कीर्त्यत उडुपध्वनिः" इति निरुक्तिः । यासां चक्षूंषि यच्चक्षूंषि तेषाम् ॥३६॥ तत्रतत्र

---

१. युवतयश्च नरेन्द्रमार्ग-वीर. । २. रुच्छ्रित-विज. । ३. वीक्षितेन-श्रीधर. वंशी. वीर. विज. जीव. ।

स्थलेस्थले "श्रेणी राजौ तथा सङ्घ एकशिल्पोपजीविनाम्" इति धरणिः । यद्वा-श्रेणीमुख्या नगरप्रधानाः ॥३७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुरस्त्रीणां च सौभाग्यं तथैव वर्णयति-प्राप्तमिति त्रिभिः । औत्सुक्येन विश्लथितः स्रस्तप्रायः केशस्य दुकूलस्य च बन्धो यासां ताः तल्प इति मध्याह्नभोजनानन्तरे केषाञ्चिद्विषयासक्तानां शय्यायां निवेशात् किम्वा पाण्डवादिभिः परिरम्भणादिना राज्यप्राप्तेः तदेतद्वर्णनं तदागमनश्रवणसमयपूर्वभागभागेव ज्ञेयम् ॥३४॥इभादिभिः सुसङ्कुले अतिव्याप्तेः उपलभ्य साक्षाद्दृष्ट्वा पश्चात् सम्यग्दर्शनार्थं पुष्पविक्षेपार्थञ्च गृहाधिरूढाः सत्यः उत् उत्कृष्टः स्मयः स्वरतिव्यञ्जकं स्मितं तद्युक्तेन वीक्षितेन कटाक्षेणैव सुस्वागतं स्वागतप्रश्नादिकं विदधुः तद्धि प्रीत्यर्थं विधीयते तादृशवीक्षितेन त्वतिशयेन सा जायत इति तत्स्थाने तत्प्रयोगात् अत एव तैरपि व्याख्यातं प्रियमिति यद्वा सुस्वागतशब्देनात्र तदुपलक्षणत्वेनातिथ्यमात्रं लक्षितं यद्वा विशेषेण व्यञ्जनाय दधुश्चक्रुः ॥३५॥ मुकुन्दपत्नीः मुकुन्दसहितास्तत्पत्नीरित्यर्थः । स्त्रियोऽत्रान्तःपुरवासिन्यः पथीत्यन्तःपुरप्रवेशार्थं निर्जनीकृत्य योषिद्भिरेवाधिष्ठिते तद्बहिः कक्षमार्गे तारा यथेति दृष्टान्तेन सहैव गमनादिकं द्योतयति तद्दृष्टान्तत्वञ्च तासां महाजनसङ्गतदावरणदर्शनमात्रेण तत्स्फूर्तेरेव न तु साक्षाद्दर्शनात् यासां चक्षुषाम् उदार उत्कृष्टः सर्वानन्दप्रदो वा हासः तद्युक्ताया लीलयाऽवलोककलाकटाक्षः अवलोकनभङ्गी वा तयोत्सवं सुखविशेषम् आ सम्यक् तनोति यतः पुरुषमौलिः पुरुषोत्तमः इत्यशेषसुन्दररूपगुणादिसेवितत्वमुक्तं विविधमधुरालापक्रीडासम्भवेऽपि केवलावलोककलाया एव वर्णनम् ताभिस्तस्या अपि परमदौर्लभ्येन बहुमननात् यद्वा धाष्ट्र्यपरिहाराभिप्रायात् ॥३६॥पुनरनुसन्धाय नगरवृत्तं वर्णयति-तत्रतत्रेति । हतैनसः सर्वे तदन्तरायकर्मरहितास्तत्प्रभृतिजाताः तत्स्मरणस्य सदानुगतेः चतुर्थी तादर्थ्ये ॥३७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पुरस्त्रीणां सौभाग्यञ्च तथैव वर्णयति - प्राप्तमिति त्रिभिः । औत्सुक्येन विश्लथितः प्रस्तप्रायः केशस्य दुकूलस्य च परिहितपट्टवस्त्रस्य बन्धो यासां ताः; तल्प इति प्रातर्भोजनानन्तरं शय्यायां निवेशात्, किंवा पाण्डवादिभिः सह परिरम्भणादिना रात्र्यापत्तेः नरेन्द्रमार्गे राजमार्गे ययुः ॥३४॥ इभादिभिः सुसंकुलेऽत्यन्तं व्याप्ते गृहाधिरूढाः कृष्णं स्वचित्ताकर्षकमुपलभ्य साक्षाद्दृष्ट्वा; यद्वा, समीपे लब्ध्वा, यतः कृष्णं सर्व्वसुखप्रदं पश्चात् सम्यग्दर्शनार्थं पुष्पविकिरणार्थञ्च गृहाधिरूढाः सत्यः, उत् उत्कृष्टः स्मयः स्मितं तद्युक्तेन, किंवा उत्स्मयेनात्यन्ताद्भुतेन वीक्षितेन कटाक्षेणैव सुस्वागतं स्वागतप्रश्नादिकं विदधुः, वचसा स्वागतप्रश्नादपि तेनैव तस्य प्रीत्युत्पत्तेः; अत एव तैरपि व्याख्यातम् - प्रियमिति ॥३५॥ पथीत्यन्तःपुरप्रवेशार्थं राजमार्गे गच्छन्तीरित्यर्थः । मुकुन्दस्य पत्नरिति तासामपि परमानन्दप्रदत्वं सूचयति । तारा यथेति दृष्टान्तेन सहैव गमनादिकं द्योतयति । यासां चक्षुषामुदार उत्कृष्टः सर्व्वानन्दप्रदो वा हासस्तद्युक्ता लीलयावलोककला कटाक्षः, अवलोकनभङ्गी वा, तयोत्सवं सुखविशेषम् उत सम्यक् तनोति, यतः पुरुषमौलिः पुरुषोत्तम इत्यशेष-रूप-गुणादि-सेवितत्वमुक्तम् । विविधमधुरान्यक्रीडया तासां सर्व्वेन्द्रियोत्सव-विस्तारणे सत्यपि केवलमस्या एवोक्तिः, ताभिस्तस्या अपि मरमदौर्लभ्येन बहुमननात्; यद्वा, धाष्ट्र्यपरिहारार्थमिति ॥३६॥ तत्र तत्र मार्गमध्ये प्रतिस्थानं पौराः पुरवासिजना मङ्गलं दध्यक्षतादि-द्रव्यं तद्युक्ताणयः कृष्णाय सर्व्वकर्षकायेति गृहस्थितैरशेषैरेव द्रव्यैस्तत्सपर्य्याभिप्रेता । यतो हतैनसो विशुद्धचित्ताः, किंवा अन्येषामपि पापघ्ना इत्यर्थः ॥३७॥ प्रीत्या फुल्लानि लोचनानि येषां तैः, यतो मुकुन्दो लोचनानां परमानन्दप्रदरूप इत्यर्थः । अतः सम्भ्रमः साध्वस आदरो वा तत्सहितैः, अभिमुखे उपेतः सङ्गतः सन् प्रकर्षेण लीलागत्या सकलपरिवारसाहित्यादिनाविशत् ॥३८॥ भ्रात्रेयमिति परमस्नेहविषयत्वम्, त्रिभुवनेश्वरमिति परमैश्वर्य्यं दौर्लभ्यञ्चोक्तम् । अतो विलोक्य साक्षाद्दृष्ट्वा प्रीतात्मा हृष्टचित्ता सती, अतः पर्य्यङ्कादुत्थायेति स्वगृहे स्थिता दूरतो विलोक्य स्वपर्य्यङ्कादुत्थायागम्येत्यर्थः । यद्वा, श्रीभगवत्सन्दर्शनापेक्षया प्रागेव मुख्यराजमन्दिरे समागता पश्चात्तत्साक्षाद्दर्शनेन प्रेमोद्रेकातुरा सती पर्य्यङ्कादुत्थातुमशक्तापि कथञ्चित्थायेत्यर्थः । परितः सष्वजे आलिङ्गितवती ॥३९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

किमकारि किङ्कृतमाचरितम् ॥३६-३८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

प्राप्तमिति । नराणां लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं किम्पुनर्नारीणामित्यर्थः । तं कृष्णं प्राप्तमागतं

श्रुत्वा युवतयः पौरस्त्रियः सद्य एव गृहव्यापारं पल्पे पर्यङ्के पतिञ्च विसृज्यौत्सुक्याद्विश्लथिताः केशानां दुकूलानां च बन्धा ग्रन्थयो यासां ता द्रष्टुं नरेन्द्रमार्गं राजवीथीं ययुः ॥३४॥ तस्मिन्निति । गृहेषु प्रासादेष्वधिरूढा युवतयः रथादिभिश्चतुर्भिः सेनाङ्गैः सुसङ्कुले सङ्कीर्णे तस्मिन्नरेन्द्रमार्गे सभार्यं कृष्णमुपलभ्य दृष्ट्वा कुसुमैर्विकीर्य मनसा उपगूह्यालिङ्ग्य स्मययुक्तवीक्षितेनैव सुस्वागतं स्वागतप्रश्नं विदधुः चक्रुः तासामुत्स्मयवीक्षितं स्वागतप्रश्नं विदधदिवासेत्यर्थः ॥३५॥ ऊचुरिति । उडुपेन चन्द्रेण सहितास्तारा इव स्थिताः कृष्णपत्नीः पथि निरीक्ष्य स्त्रियः प्रोचुः उक्तिमेवाह किम् इति अभूमिः कृष्णपत्नीभिः किमकारि किं सुकृतमाचरितं तत्र हेतुत्वेन विंशिषन्ति यद्यासां चक्षुषां पुरुषमौलिः पुरुषोत्तमः उदारो गम्भीरो यो हासस्तद्युक्तो लीलयावलोकस्तस्य कलया लेशेव सुखं वितनोति तथाभूताभिरमूभिरिति सम्बन्धः ॥३६॥ तत्र तत्रेति । उपसङ्गम्य समीपमागत्य पौराः श्रेणयः एकशिल्पोपजीविनां सङ्घाः तेषु मुख्याश्च मङ्गलानि गन्धपुष्पताम्बूलादिशुभद्रव्याणि पाण्योर्येषां ते कृष्णाय पूजाञ्चक्रुः अतो हतं निरस्तमेनः पापं येषां तथा बभूवुरिति शेषः ॥३७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

उच्छ्रितवीक्षितेन समनिरीक्षणेन ॥३५॥ उडुपसहाः उडुपेन चन्द्रेण सहिताः ताराः अभूमिः किं शुभमकारि ॥३६॥ श्रेणीमुख्याः नगरप्रधानाः ॥३७-३८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२२-४२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥९-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥११-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नरलोचनानां पानस्य पातव्यस्य रूपस्य मात्रं रूपनिधिमित्यर्थः ॥३४-३५॥ उडुपसहाः ताराधिपसहिताः तारा यथा शोभमानाः अमूभिः किमकारि किमद्भुतं पुण्यमाचरितम् ॥३६॥ श्रेण्य एकशिल्पोपजीविन्यो जनतास्तासु मुख्याः ॥३७-३९॥

गूढार्थदीपिनी

गृहारूढा नार्यः इभादिभिः सुसंकुले तस्मिन् राजमार्गे सभार्यं कृष्णमुपलभ्य दृष्ट्वा सुस्वागतं विदधुरित्यन्वयः । केन । उत्स्मयवीक्षितेन सस्मितनिरीक्षणेन । किं कृत्वा । कुसुमैः विकीर्य आच्छन्नं कृत्वा । मनसा उपगुह्य हृदि कृत्वा । गृहं प्रासादः इभो गजः । द्रुपात् पदातिः ॥३४॥ यथा उडुपसहाः चन्द्रसहिताः ताराः तथा मुकुन्दपत्नीः पथि निरीक्ष्य स्त्रियः परस्परम् ऊचुरित्यन्वयः । अमूभिः स्त्रीभिः किं पुण्यम् अकारि । यासां चक्षुषां पुरुषोत्तमो भगवान् उत्सवम् आनन्दमातनोति । कया । उदारः आकर्षको यो हासः तद्युक्तलीलावलोकः दृष्टिपातः तस्य लेशेन । उडुपं सहन्ते इति उडुपसहाः ॥३५॥ तत्र तत्र स्थले स्थले । श्रेणीमुख्या नगरप्रधानाः पौराः पुरवासिनः । यद्वा । श्रेण्यः एकशिल्पोपजीविनः । सपर्यां पूजां चक्रुरित्यत्र हेतुः । हतैनसः पुण्यात्मानः । हतमेनः पापं येषां ते । मङ्गलं पूजनद्रव्यं पाणौ येषां ते ॥३६॥ अभ्युपेतः अभ्युत्थानेन सत्कृतः । सम्भ्रमः स्नेहवैवश्यम् ॥३७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नरलोचनानां पानस्य पातव्यस्य रूपस्य मात्रं रूपनिधिमित्यर्थः ॥३४-३५॥ उडुपसहाः ताराधिपसहिताः तारा यथा शोभमानाः अमूभिः किमकारि किमद्भुतं पुण्यमाचरितम् ॥३६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उद्दीप्तानां दीपानामावलिभिः पङ्क्तिभिरुद्दीपैर्दीपैर्बलिभिः पूजोपहारादिभिरिति तत्पाठेऽर्थः । प्रतिसद्मान्वागारं जलैर्गवाक्षैर्निर्यातो धूप आगरवादिस्तेन रुचिरं विलसन्त्यः पताका यस्य तत् मूर्धन्याः शिरसि भवा हेमकलशा येषां तानि तै रजतात्मकान्युरूणि शृङ्गाणि कलशोपरि शिखराणि येषां तानि तैः कलशजलान्तः किमपि न यतेदिति रजतशृङ्गाणि कृतानीत्यर्थः । तेषां चातिलघुद्वारकत्वात्कलशोपरि तत्स्थापनमिति भावः । तद्वन्मूर्धन्यहेमकलशैर्भवनैरितरावान्तरगृहैर्जुष्टं कुरुराजधाम ददर्शापश्यत् ॥३४॥ नराणां लोचनानां पानस्य सादरं निरीक्षणस्य पात्रं विषयम् । नराणामियं रीतिश्चेद्रीतिर्नारीणां का कीर्तनीयेति नरपदेन ध्वनयति । नार्यनराश्च पुंशेषो वा । यद्वा नरा देवास्तेषां लोचनपानपात्रं प्राप्तं निशम्यौत्सुक्येन गमनलालस्येन विश्लथितो गलितः

केशदुकूलबन्धो यासां ताः सद्यः श्रवणसमनन्तरमेव युवतयो गृहकर्मावश्यकं विसृज्य तथा स्वतल्पे पतीनपि विसृज्य नरेन्द्रमार्गे तं द्रष्टुं ययुः स्म । गृहकर्मपतीन् गृहकर्मणि पतींस्तत्तदधिपतीन्विसृज्य स्वयमेव तत्तद्देयकुसुमादिकमतन्मार्गनिरीक्षणेन गृहीत्वेति यावत् । स्वतल्पे स्वास्तल्पानि भार्या यस्य तस्मिन्सङ्घे सद्यो विसृज्य । हे नरेन्द्रमार्ग एवं प्राप्तं निशम्य गतवति सति युवतयोऽपि ययुरित्यन्वयो वा । एतेन नरलोचनपात्रमित्युक्तिदौर्मुख्यं तथा पत्नीभ्योऽपि पतीनामजाग्रत्त्वं जगदीश्वरविषये सम्भवदपहस्तितं वेदितव्यम् । तल्पं तु शयनीये स्यात्तल्पमट्टकलत्रयोरिति विश्वः ॥३५॥ इभाश्वरथपदातिभिरस्मिन्राजमार्गे सुसङ्कुलेऽतिनिबिडे स्वयं वध्वोऽध्वानमचक्षाणा गृहाधिरूढाः स्वस्वगृहाधिरूढाः सभार्यं कृष्णमुपलभ्य दृष्ट्वा स्वागतमतिसमीचीनमागमनं तत्र स्वामिन्नित्यभिनयेन विदधुश्चक्रुर्दर्शयामासुरिति यावत् । एता गृहाण्येतानि भार्या इति आधिर्गृहाधिः सरूढायास्ता गृहाधिरूढा इति वा । अत एव किमकार्यमभूदिति सुलग्ना ॥३६॥ स्त्रियो यथोडुपसहाश्चन्द्रसहितास्तारा अश्विन्याद्यास्तथा भासमाना मुकुन्दपत्नीः पथि निरीक्ष्य ऊचुः । किमाहुरित्यत आह ॥ यच्चक्षुषामिति । यासां चक्षुषां पुरुषमौलिरुदारहासलीलावलोकस्य कलया लेशेनोत्सवमातनोत्यमूभिस्ताभिः किं सुकृतमकारि किं कृतं प्राक् सुकृतं तन्न विद्म इत्यूचुः ॥३७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी-

ततः पुरं प्रविष्टस्य भगवतः प्रकारान्तरेण स्वरूपं वर्णयितुं तत्रत्यानामौत्सुक्यमाह-प्राप्तं निशम्येति । नराणां यानि लोचनानि लावण्यामृतसारज्ञानयुक्तानि तेषां लावण्यामृतपाने भगवान् पात्रं यत्रत्यं रूपामृतं चक्षूंषि पिबन्ति ततो रूपदर्शनेन उन्मथिताशयानां देहवैक्लव्यमाह-औत्सुक्येति । दर्शनानन्तरं वा योत्सुकता औत्सुक्यं तेन विश्लथिताः केशदुकूलयोः बन्धो यासां केशबन्धापगमे मनो वैक्लव्यं दुकूलबन्धापगमे देहकार्श्यं अन्तर्बहिः क्लेशो निरूपितः ततः पूर्वावस्थायाम् स्थातुमशक्ताः सद्य एव गृहकर्म पतींश्च तल्पे त्यक्त्वा क्रियाफलानि च त्यक्त्वा नरेन्द्रस्यैव मार्गे युवतयो भगवन्तं द्रष्टुं ययुः तल्पे पतीनां निरूपणान्न ते भगवद्भक्ताः राजा तु भगवत्सम्मुखं गत इति पतिगृहेभ्यो राजमार्ग एव श्रेष्ठ इति तत्रैव निविष्टा येन भगवान् दृश्येतेत्यर्थः ॥३४॥ गृहाः कर्माणि पतयश्चेति वा तामसादिभेदास्त्रयः यागार्हा एव अर्थाद्राजमार्गो गुणातीत एव भवति अत एव तत्र गतानां भगवद्दर्शनं जातमित्याह-तस्मिन्निति । चतुरङ्गसेनासङ्कुले तस्मिन् मार्गे सभार्यं भगवन्तमुपलभ्य गृहाधिरूढाः सत्यः आरोहदोषपरिहाराय कुसुमैर्विकीर्य विवाहमिव कृत्वा पश्चान्मनसोपगूह्य उत्स्मयवीक्षणेन हासपूर्वकनिरीक्षणेन सुष्ठु स्वागतं विदधुः सर्वनिरूपणेन ह्यपराधक्षमा तत्र विधानपूर्वकं भगवन्तं परिगृह्य प्रमाणविरोधं परिहृत्य आत्मानं भगवति योजयित्वा प्राप्तं भगवन्तं पूरितमनोरथाः दास्येनाधिकरतिं दास्याम इति सूचिषन्त्यः मोहयन्त्यो वा ततः साभिलाषं स भगवन्तं सम्यगागतमिति सन्मानतां वृतवत्य इत्यर्थः ॥३५॥ एवं भगवति स्त्रीणां भावमुक्त्वा पुरुषाणां भावमाह-तत्रतत्रेति । पौराः पुरवासिनः सर्व एव कृष्णस्य सपर्यां पूजां चक्रुः श्रेणीमुख्यानां विशेषमाह-एकशिल्पोपजीविनः वणिग्विशेषाः श्रेणीमुख्याः ते भगवता तत्तच्छिल्पसहिताः विशेषतो दृष्टाः सर्वात्मना हतैनसो जाता इत्यर्थः । मङ्गलद्रव्ययुक्तपाणित्वन्तु समानमेव सपर्या गन्धपुष्पादिभिः ॥३६॥ एवं सर्वैः सभाजनमुक्त्वा स्त्रिभिः कृतं मुकुन्दपत्नीनां पुनराह-ऊचुरिति । स्त्रीत्वभक्तत्वाविशेषेऽपि एता एव धन्या न तु वयं यद्यपि वयमुपरि तथापि भगवान् भूमौ समागत इति भूमिरेव स्वर्गमिति निरूपयन्त्यो दृष्टान्तमाहुः-यथोडुपसहा इति । "वेदगृहा वै नक्षत्राणि" इति श्रुत्या तासामिन्द्रियाणां देववद्भोगाधिक्यं सूचितं केन धर्मेणायमर्थः प्राप्तः इति तासां विमर्शनमाहुः-किमकार्यमभूमिरिति । ननु किमाश्चर्यं बह्वीनामेव तथा भावादित्याशङ्क्य तासां सर्वोत्तमफलभोगमाह-यच्चक्षुषामिति । यासां चक्षुषां भगवान् स्वयमुत्सवमातनोति भगवानेव सर्वकर्तेति किमाश्चर्यमिति शङ्कां वारयितुं भगवति विशेषमाह-पुरुषमौलिरिति । न हि पुरुषोत्तमः स्त्रिया उत्सवं सम्पादयति तथा सत्युत्तमत्वमेव चिन्त्यं स्यात् तत्रापि उदारो यो हासः सर्वेषां माया येन सर्वपुरुषार्थदाता तत्सहितो यो लीलावलोकः पूर्णसर्वपुरुषार्थोऽपि भक्तिज्ञानसहितः उदारो गुणत्रयाणाञ्च हासलीलावलोकानां तेषामपि या कला नैपुण्यातिशयः तेन स्वसर्वस्वेनापि तासां नेत्राणामुत्सवं करोतीति तासां महती स्तुतिः ॥३७॥

श्रीसुबोधिनीसारः

नराणां लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं योग्यं वा "योग्यभाजनयोः पात्रम्" इत्यमरात् । प्राप्तं श्रीकृष्णं निशम्य श्रुत्वा औत्सुक्येन विश्लथिताः केशदुकूलबन्धा यासां ता युवतयः स्त्रियः सद्यः तत्काल एव गृहकर्म गेहकार्यं विसृज्य त्यक्त्वा तल्पे शय्यायां पतींश्च त्यक्त्वा द्रष्टुं नरेन्द्रमार्गे राजमार्गे ययुः स्म प्रसिद्धम् ॥३४॥ गजाश्वरथपदातिभिः सुसंकुले

तस्मिन् मार्गे सभार्यं स्त्रीभिः सहितं कृष्णमुपलभ्य विज्ञाय गृहेष्वधिरूढा गृहाण्यधिरूढा वा नार्यः स्त्रियः कुसुमैः पुष्पैस्तं विकीर्याच्छाद्य मनसा उपगुह्यालिङ्ग्य उत्स्मययुक्तेन वीक्षितेन सुस्वागतं विदधुः चक्रुः ॥३५॥ उडुपसहाश्चन्द्रसहिताः तारा इव मुकुन्दपत्नीर्निरीक्ष्य दृष्ट्वा पथि स्त्रियः तत्रत्या ऊचुः अमूभिः स्त्रीभिः किं पुण्यमकारि पुरुषमौलिः पुरुषोत्तमो यासां चक्षुषां नेत्राणाम् उदारहासस्य लीलयावलोकः प्रेक्षणं तस्य कलया उत्सवं हर्षमातनोति ॥३६॥ मङ्गलहस्ताः पौराः पुरवासीयाः श्रेणीप्रधानाः ताम्बूलिकादयः हतपापाः तत्रतत्र उपसङ्गम्य प्राप्य कृष्णाय सपर्यां पूजां चक्रुः ॥३७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रतिसद्म उद्दीप्तैर्दीपैः बलिभिः पुष्पादिप्रकरैश्च जुष्टम् । जालेभ्यो निर्गतैर्धूपै रुचिरं शोभितम् । विलसन्त्यः पताका यस्मिंस्तत् । मूर्धन्यः मूर्ध्निभवा हेमकलशा येषां तैः रजतमयानि उरूणि स्थूलानि शृङ्गाणि कलशाधस्तनभूमिका येषां तैर्भवनैश्च जुष्टम् । एवं कुरुराजस्य युधिष्ठिरस्य धाम पुरं भगवान् दूरत एव ददर्श ॥३४॥ नराणां किं पुनर्नारीणां यानि लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं कृष्णं प्राप्तं निशम्य श्रुत्वा औत्सुक्याद्विश्लथिताः जाताः केशानां दुकूलानां च बन्धा ग्रन्थयो यासां ता युवतयः सद्य एव गृहकर्म तल्पे शय्यायां सुप्तान् पतींश्च त्यक्त्वा नरेन्द्रमार्गे द्रष्टुं ययुरित्यन्वयः । 'अत्र सन्देहो न कार्य' इति सूचयति-स्मेति ॥३५॥ गृहेषु गृहप्रासादेषु अधिरूढा नार्यः इभादिभिश्चतुर्भिः सेनाङ्गैः सङ्कुले सङ्कीर्णे तस्मिन्नरेन्द्रमार्गे सभार्यं कृष्णं उपलभ्य दृष्ट्वा कुसुमैर्विकीर्य मनसा उपगुह्यालिङ्ग्य उत्स्मययुक्तेन तदीक्षितेनैव सुस्वागतं विदधुः स्वागतप्रश्नं चक्रुः । तासामुत्स्मितवीक्षितं स्वागतप्रश्नं विदधदिव आसेत्यर्थः ॥३६॥ उडुपेन चन्द्रेण सहितास्तारा इव स्थिताः कृष्णपत्नीः पथि निरीक्ष्य ताः स्त्रिय ऊचुः । तदुक्तिमाह-किमिति । यासां चक्षुषां पुरुषमौलिः पुरुषोत्तमः उदारः सर्वमनोरथपूरको यो हासस्तद्युक्तो यो लीलावलोकस्तस्य कलया लेशेन उत्सवं सुखमातनोति, ताभिरमूभिः कृष्णपत्नीभिः किं सुकृतमकारि कृतमित्यन्वयः ॥३७॥ तत्र तत्र मार्गे मङ्गलानि गन्धपुष्पताम्बूलादिशुभद्रव्याणि पाण्योर्येषां ते पौराः पुरवासिनः श्रेणीनामेकशिल्पोपजीविनां मुख्या उपसङ्गम्य समीपमागत्य कृष्णस्य सपर्यां पूजां चक्रुः । 'एवं श्रीकृष्णपूजनम् अनेकजन्मानुष्ठितसुकृतत्वेन निरस्तसमस्तपापानामेव सुलभम्, अमीषां पापिनां तु दुर्लभमेव' इति सूचयन्नाह-हतैनस इति । हतं एनः पापं येषां ते ॥३८॥ सम्भ्रमेण सहितैः, अत एव फुल्ले विकसिते लोचने येषां तैरन्तःपुरजनैः प्रीत्याऽभ्युपेतः अभ्युपगम्य सत्कृतः मुकुन्दो राजमन्दिरं प्राविशत् ॥३९॥

अन्वितार्थप्रकाशिका

प्राप्तमिति ॥ नराणां सर्वलोकानां यानि लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं कृष्णं प्राप्तं निशम्य श्रुत्वा औत्सुक्याद्विश्लथिताः केशानां बन्धा ग्रन्थयो यासां ता युवतयः सद्य एव गृहकर्मतल्पे शय्यायां सुप्तान् पतींश्च विसृज्य त्यक्त्वा नरेन्द्रमार्गे राजमार्गे द्रष्टुं ययुः स्मेति पादपूर्तौ ॥३५॥ तस्मिन्निति । गृहप्रासादादिषु अधिरूढा नार्यः इभादिभिश्चतुर्भिः सेनाङ्गैः सुसंकुले सङ्कीर्णे तस्मिन्नरेन्द्रमार्गे सभार्यं कृष्णम् उपलभ्य दृष्ट्वा कुसुमैर्विकीर्य मनसा उपगुह्यालिङ्ग्य उत्स्मययुक्तेन तदीक्षितेनैव सुस्वागतं विदधुः स्वागतप्रश्नं चक्रुः । तासामुत्स्मितवीक्षितं स्वागतप्रश्नं विदधदुवास ॥३६॥ ऊचुरिति ॥ उडुपं चन्द्रं सहन्ते ताश्चन्द्रसहितास्तारा इव स्थिता मुकुन्दपत्नीः पथि निरीक्ष्य ताः स्त्रियः ऊचुः । तदुक्तिमाह । किमिति सायां चक्षुषां पुरुषमौलिः पुरुषोत्तमः उदारः सर्वमनोरथपूरको यो हासस्तद्युक्तो यो लीलावलोकस्तस्य लीलया लेशेन उत्सवं सुखमातनोति ताभिरमूभिः मुकुन्दपत्नीभिः किं सुकृतमकारि कृतम् ॥३७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नरलोचनानां पानस्य प्रेमवीक्षणस्य पात्रं भोग्यं भवति तर्हि नारीणां लोचनानां तु किमु औत्सुत्क्येन प्रेमभरेण विश्लथिता केशानां दुकूलानां बन्धाः यासां ताः । तल्पे पतीन् गृहकर्म च विसृज्य ॥ नरेन्द्रमार्गे राजमार्गे ॥३४॥ इभादिभिः सुसंकुले सङ्कीर्णे मार्गे कुसुमैः विकीर्य अभिवर्ष्य मनसा उपगुह्य आलिङ्ग्य ॥ सुस्वागतं स्वागतप्रश्नादियोग्यम् उत्स्मयवीक्षितेन तिव्यञ्जकस्मितयुक्तकटाक्षावलोकनेन विदधुः ॥३५॥ उडुपसहाः चद्रसहचर्य्यः ताराः यथा तथा मुकुन्दपत्नीः पथि निरीक्ष्य ॥ अमूभिः कृष्णपत्नीभिः किं पुण्यमकारि यासां चक्षूंषि तेषाम् उत्सवमातनोति पुरुषमौलिः पुरुषोत्तमः ॥३६॥ श्रेणयः कशिल्पोपजीविजनसमूहास्तेषु मुख्याः कृष्णाय कृष्णस्य ॥३७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्राप्तमिति ॥ नराणां लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं, किं पुनर्नारीणामित्यर्थः । तं श्रीकृष्णं, प्राप्तमागतं निशम्य श्रुत्वा, युवतयः पौरस्त्रियः, सद्यस्तत्क्षणमेव, गृहकर्म गृहव्यापारं, विसृज्य, तल्पे शय्यायां, पतींश्च विसृज्य, औत्सुक्यात् विश्लथिताः केशानां दुकूलानां च बन्धा ग्रन्थयो यासां तथाभूताः सत्यः, द्रष्टुं नरेन्द्रमार्गे, ययुः, स्म प्रसिद्धौ ॥३४॥ तस्मिन्निति ॥ गृहेषुप्रासादेष्वधिरूढाः, नार्यः युवतयः, इभाः कुञ्जराश्च अश्वाः सैन्धवाश्च रथाः स्यन्दनाश्च द्विपद पदातयश्च तैः, सुसंकुले अतिसङ्कीर्णे, तस्मिन्नरेन्द्रमार्गे, सभार्यं भार्याभिः सहितं श्रीकृष्णम्, उपलभ्य दृष्ट्वा, कुसुमैः विकीर्य, मनसा उपगुह्य, उत्स्मयवीक्षितेन अधिकस्मययुक्तवीक्षितेनैव, सुस्वागतं स्वागतप्रश्नं, विदधुः, चक्रुः ॥३५॥ ऊचुरिति ॥ उडुपसहाश्चन्द्रेण सहिताः ताराः यथा, तारका इवेत्यर्थः । स्थिताः, मुकुन्दपत्नीः श्रीकृष्णाङ्गनाः, पथि मार्गे, निरीक्ष्य, स्त्रियः पौराङ्गनाः, अमूभिः श्रीकृष्णपत्नीभिः, किमकारि किं सुकृतमाचरितं स्यात् । कुतः, यच्चक्षुषां यासां नेत्राणां, पुरुषमौलिः पुरुषोत्तमः, उदारो गम्भीरो हासस्तद्युक्तो लीलयाऽवलोकस्तस्य कलया लेशेन, उत्सवं सुखम्, आतनोति, इति ऊचुः ॥३६॥ तत्रेति ॥ मङ्गलानि गन्धपुष्पताम्बूलानि शुभद्रव्याणि पाण्योर्येषां ते, श्रेण्य एकशिल्पोपजीविनस्तेषां मुख्या, पौराः, तत्र तत्र, उपसङ्गम्य समीपमागत्य, कृष्णाय सपर्यां, चक्रुः । अतः, हतं निरस्तं एनः पापं येषां तथाभूताः, बभूवुरिति शेषः ॥३७॥ अन्तरिति ॥ ससम्भ्रमैः सम्भ्रमेण सहितैः, अत एव फुल्ले विकसिते लोचने येषां तैः, अन्तःपुरजनैः, प्रीत्या, अभ्युपेतः अभिसङ्गतः, मुकुन्दः कृष्णः, राजमन्दिरं, प्राविशत् प्रविवेश ॥३८॥ पृथेति ॥ पृथा कुन्ती, भ्रात्रेयं भ्रातृपुत्रं, त्रिभुवनेश्वरं कृष्णम्, अवलोक्य, प्रीत आत्मा मनो यस्याः सा, सस्नुषा द्रौपदीसहिता सती, पर्यङ्कात्, उत्थाय, परिषस्वजे आलिङ्गितवती ॥३९॥

कृष्णप्रिया

जिनके केशपाश और वस्त्रबन्ध खूल जाते हैं ऐसे स्त्रीलोग अपने घर के कार्यों को तथा अपने पतिओं को भी शय्या में ही छोडकर श्रीकृष्णजी के दर्शन करने के लिये राजमार्ग में चली आई ॥३४॥ उस राज के मार्ग में हाथी घोडा रथ इन की भीड होने से अपने प्रासादों पर चढ कर भार्या रुक्मिणी देवी सहित श्रीकृष्ण के दर्शन कर के पुष्पों की वर्षा कर के स्मित युक्त कटाक्ष से ही कुशल समाचार पूछने लगी ॥३५॥ आकाश में नक्षत्र-गण युक्त चन्द्रमा के समान श्रीरुक्मिणीजी आदि पटरानी सहित श्रीकृष्ण को राजमार्ग में देखकर वे स्त्रीलोग आपसमें कहने लगे की इस श्रीकृष्ण की भार्याओं ने पूर्वजन्म में क्या पुण्य किया है श्रीपुरुषोत्तम श्रीकृष्णजी के मन्दहास युक्त लीला-कटाक्ष का अनुभव करती हैं ॥३६॥ जहां जहां श्रीकृष्ण पधारते हैं वहां वहां संत पुरुष हाथ में मंगल पदार्थों से पूजा करने लगे ॥३७॥

अन्तःपुरजनैः प्रीत्या मुकुन्दः फुल्ललोचनैः । ससम्भ्रमैरभ्युपेतः प्राविद् राजमन्दिरम् ॥३८॥
पृथा विलोक्य भ्रात्रेयं कृष्णं त्रिभुवनेश्वरम् । प्रीतात्मोत्थाय पर्यङ्कात्सस्नुषा परिषस्वजे ॥३९॥
गोविन्दं गृहमानीय देवदेवेशमादृतः । पूजायां नाविदत्कृत्यं प्रमोदोपाहतेन्द्रियः[1] ॥४०॥
पितृष्वसुर्गुरुस्त्रीणां कृष्णश्चक्रेऽभिवादनम् । स्वयञ्च कृष्णया राजन्भगिन्या चाभिवन्दितः॥४१॥

कर्दमक्षमा

अभ्युपेतः, मुकुन्दः, ससम्भ्रमैः, फुल्ललोचनैः, अन्तःपुरजनैः, राजमन्दिरम्, प्रीत्या, प्राविशत् ॥३८॥ पृथा, त्रिभुवनेश्वरम्, भ्रात्रेयम्, कृष्णम्, विलोक्य, पर्यङ्कात्, उत्थाय, सस्नुषा, प्रीतात्मा, परिषस्वजे ॥३९॥ देवदेवेशम्, गोविन्दम्, गृहम्, आनीय, आदृतः, प्रमोदोपहतेन्द्रियः, नृपः, पूजायाम्, कृत्यम्, न, अविदत् ॥४०॥ पितृष्वसुः, गुरुस्त्रीणाम्, कृष्णः, अभिवादनम्, चक्रे, च, स्वयम्, कृष्णया, च, भगिन्या, अभिवन्दितः ॥४१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अभ्युपेतोऽभिगमनेन सत्कृतः ॥३८॥ सस्नुषा द्रौपदीसहिता ॥३९॥ कृत्यंप्रकारविशेषं प्रमोदेनोपहतोऽभिभूतः ॥४०॥ गुरुस्त्रीणाञ्च कृष्णया द्रौपद्या च भगिन्या सुभद्रया ॥४१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

---

[1] पहतो नृप-श्रीधर. वंशी. वीर. विज. जीव. शुक. ।

अभिगमनेन सम्मुखगमनेन स्नुषा पुत्रवधूः । स्नुषया सह सस्नुषा पृथा परिषस्वजे । स्नुषा तु पश्चात्स्थित्वैव नम्रत्वादिना तमादृतवतीत्यग्रे वक्ष्यते । यद्यपि विद्यमानता मात्रार्थस्य सहशब्देन समासः किन्त्वेकक्रियायोगिन एवेति शब्दस्मृतिस्तथाप्यत्र वक्ष्यमाणरीत्या समासस्यार्षत्वमङ्गीकार्यम् ॥३९॥ गोविन्दं शब्दमात्रैकगोचरम् । कथञ्चित्प्राकट्येऽपि । देवदेवानां श्रीब्रह्मादीनामपीशम । आदृत इति । कथं सम्भ्रान्त इतस्ततो धावस्यहं त्वदधीन एवालं पूजाप्रयासेन सुखमत्रोपविश त्वां पश्यानीत्येवं बहुधा कृष्णेनादृतः सन् नृपः सर्वपूजोपयोगिसम्पादने समर्थोऽपि नाविन्दत् । तत्र हेतुः-प्रमोदेन भगवदागमनजन्याह्लादेन ॥४०॥ पितृष्वसुः पृथायाः । गुरुस्त्रीणां बाह्लीकादिभार्याणाम् । भगिन्येत्युक्तेर्ज्येष्ठभ्रातुः कनिष्ठभगिन्या अप्यभिवादनं कर्तव्यमेवेति सूचितम् । ईश्वरत्वाद्वा सर्वनमस्य इति ॥४१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथानुक्रमप्राप्तमन्तःपुरप्रवेशवृत्तमेव वर्णयितुमाह-अन्तरिति । प्रीत्या फुल्लानि लोचनानि येषां तैः अतः सम्भ्रमस्त्वरा तत्सहितैः अभिमुखे उपेतः सङ्गस्तस्सन् प्रकर्षेण मधुरगमनेन तत्तत्परिकरशोभाविशेषेण चाविशत् ॥३८॥ भ्रात्रेयमिति परमस्नेहविषयत्वं तञ्च त्रिभुवनेश्वरमिति परमोल्लासहेतुत्वं पर्य्यङ्कादुत्थायेति श्रीभगवत्सन्दर्शनापेक्षया प्रागेव मुख्यराजमन्दिरे समागत्योपविष्टा पश्चात्साक्षाद्दर्शनेन प्रेमोद्रेकादातुरा सती पर्य्यङ्कादुत्थातुमशक्तापि कथञ्चिदुत्थायेत्यर्थः स्नुषया सह वर्तमानो पृथा परिषस्वजेस्नुषा तु तत्पश्चात् स्थित्वैव नम्रत्वादिना तमादृतवतीत्यग्रे वक्ष्यते यद्यपि विद्यमानतामात्रार्थस्य सहशब्दस्य न समासः किन्त्वेकक्रियायोगिन एवेति शब्दस्मृतिस्तथाप्यत्र वक्ष्यमाणया रीत्या समासस्यार्षत्वमप्यङ्गीकार्य्यम् ॥३९॥ गोविन्दं शब्दमात्रगोचरं कथञ्चित्प्राकट्येऽपि देवदेवानां श्रीब्रह्मादीनामपीशम्एवं परमदौर्लभ्यमुक्तम् आदृतः सादरः यद्वा कथंसम्भ्रान्तोऽसि ततस्ततो धावसि अयंत्वदधीन एव अलं पूजाप्रयासेन सुखमत्रोपविशाचिरात्त्वां पश्यानीत्येवं बहुधा कृष्णेनादृतस्सन् नृप इति सर्वकर्मकौशलादिकपूजासाधन-सहायादिसम्पन्नत्वञ्च सूचितं तथापि नाविदत् अनुसन्धातुमपि नाशक्नोत् यतः प्रमोदोपहतः ॥४०॥ श्रीकृष्णस्त्वेवं तेषामत्यन्तहर्षसम्भ्रमेण व्यवहारस्यापूर्णत्वेऽप्यतिपूर्णत्वं मत्वाऽनन्तरकृत्यं चकारेत्याह-पितृष्वसुरिति । हे राजन्निति अहो भाग्यं यत्तादृशकुले जातोऽसीति भावः ॥४१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रीत्या फुल्लानि लोचनानि येषां तैः, यतो मुकुन्दो लोचनानां परमानन्दप्रदरूप इत्यर्थः । अतः सम्भ्रमः साध्वस आदरो वा तत्सहितैः, अभिमुखे उपेतः सङ्गतः सन् प्रकर्षेण लीलागत्या सकलपरिवारसाहित्यादिनाविशत् ॥३८॥ भ्रात्रेयमिति परमस्नेहविषयत्वम्, त्रिभुवनेश्वरमिति परमैश्वर्य्यं दौर्लभ्यञ्चोक्तम् । अतो विलोक्य साक्षाद्दृष्ट्वा प्रीतात्मा हृष्टचित्ता सती, अतः पर्य्यङ्कादुत्थायेति स्वगृहे स्थिता दूरतो विलोक्य स्वपर्य्यङ्कादुत्थायागम्येत्यर्थः । यद्वा, श्रीभगवत्सन्दर्शनापेक्षया प्रागेव मुख्यराजमन्दिरे समागता पश्चात्तत्साक्षाद्दर्शनेन प्रेमोद्रेकातुरा सती पर्य्यङ्कादुत्थातुमशक्तापि कथञ्चित्थायेत्यर्थः । परितः सष्वजे आलिङ्गितवती ॥३९॥ गोविन्दं पृथ्व्यामवतीर्णं साक्षाद्भगवन्तम्, अतो देवदेवानां श्रीब्रह्मादीनामपीशम् । एवं परमदौर्लभ्यमुक्त; आदृतः सादरः; यद्वा, कथं सम्भ्रान्तोऽसि, ततस्ततो धावसि, अहं त्वदधीन एव, अलं पूजाप्रयासेन, सुखमत्रोपविश, चिरात्त्वां पश्यमीत्येवं बहुधा कृष्णेनादृतः सन्; नृप इति सर्व्वकर्म्मकौशलादिकं पूजासाधनसहायादिसम्पन्नत्वञ्च सूचितम् । तथापि नाविददनुसन्धातुमपि नाशक्नोत्, यतः प्रमोदोपहतः ॥४०॥ एवं तेषामत्यन्तहर्षसम्भ्रमेण व्यवहारस्यासिद्धिं दृष्ट्वा स्वयमेवापालयदित्याह - पितृष्वसुरिति । गुरुस्त्रियः श्रीद्रौपदीव्यतिरिक्ताः श्रीयुधिष्ठिर-भीमयोर्भार्य्याः, तत्पुरोहितादीनां वा पत्न्यस्तासाम्; कृष्णः व्यवहारेणापि सर्व्वचित्ताकर्षकः; हे राजन्निति अहो महाभाग्यं ते, यत्तादृशकुले जातोऽसीति भावः; यद्वा, निजगुणाद्यतिप्रकटनेन प्रेमाश्रुपीतादिना वा राजमानः ॥४१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भ्रेत्रेयं भ्रातृपुत्रम् ॥३९-४०॥भगिन्या सुभद्रया ॥४१-४६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अन्तरिति । सम्भ्रमेण सहितैरत एव फुल्ले विकसिते लोचने येषां तैरन्तःपुरजनैरभ्युपेतोऽभिसङ्गतः राजमन्दिरं प्रविवेश ॥३८॥ पृथेति । पृथा कुन्ती भ्रात्रेयं भ्रातृपुत्रं कृष्णमवलोक्य प्रीतः आत्मा मनो यस्याः सा पर्यङ्कादुत्थाय स्नुषया द्रौपद्या सहिता

परिषस्वजे आलिङ्गितवती ॥३९॥ गोविन्दमिति । देवानां देवो ब्रह्मा तस्यापीशं गोविन्दं गृहं प्रत्यानीय नृपो युधिष्ठिरः प्रमोदेनोपहतः अभिभूतः परवशः इति यावत् पूजायां कृत्यं क्रमविशेषं नाविन्दत् ॥४०॥ पितृष्वसुरिति । कृष्णो भगवान् पितृष्वसुः पृथायाः गुरुस्त्रीणां पूज्यस्त्रीणां चाभिवादनं चक्रे स्वयं कृष्णया द्रौपद्या भगिन्या सुभद्रयाचाभिवादितश्च ॥४१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

श्रेणीमुख्याः नगरप्रधानाः ॥३७-३८॥ भ्रात्रेयं भ्रातुः पुत्रम् ॥३९-४०॥ भगिन्या सुभद्रया च ॥४१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥९-३८॥ पृथाविलोक्येत्यादि सस्नुषा द्रौपद्या सह उत्थिता परिषस्वजे इत्युत्थान एव तत्साहित्यम् ॥३९-४६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

पृथाविलोक्येत्यादि सस्नुषा द्रौपद्या सह उत्थिता परिषस्वजे इत्युत्थान एव तत्साहित्यम् ॥३९-४६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

सस्नुषा परिषस्वजे-द्रौपदी-सहिता उत्थाय परिषस्वजे, उत्थाने च साहित्यं पश्चात् कृष्णा तं ननामेत्यर्थः ॥४०-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कृत्यं समुचितप्रकारम् ॥४०॥ कृष्णया द्रौपद्या । भगिन्या सुभद्रया ॥४१॥

गूढार्थदीपिनी

पृथा कुन्ती । भ्रातुः वसुदेवस्य पुत्रं परिषस्वजे आलिङ्गितवती । स्नुषा पुत्रवधूः द्रौपदी तत्सहिता ॥३८॥ प्रमोदेन आगमनाह्लादेन उपहतोऽभिभूतः । आदृतः सादरः । नाविदत् विस्मृतवान् । विन्दतेर्लुङ् ॥३९॥ पितृष्वसुः पृथायाः । गुरुस्त्रीणां गुरूणां ब्राह्मणानाम् । कृष्णया द्रौपद्या । भगिन्या सुभद्रया ॥४०॥ श्वश्र्वा कुन्त्या । कृष्णा द्रौपदी । सर्वशः सर्वा ॥४१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रेणीमुख्याः एकशिल्पोपजीविप्रधानाश्च सम्भ्रमेण स्नेहवैवश्येन सहितैः अभ्युपेतः अभिसङ्गतः ॥३८॥ सस्नुषा पुत्रपत्नीसहिता ॥३९॥ प्रमोदेनोपहतोभिभूतः पूजायां क्रियमाणायां कृत्यं समुचितप्रकारम् ॥४०॥ पितृष्वसुः पृथायाः गुरूणां पूज्यानां याः स्त्रियः तासाञ्च कृष्णया याज्ञसेन्या भगिन्या सुभद्रया ॥४१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मङ्गलानि शुभवस्तूनि येषां ते श्रेणीमुख्याः शिल्पश्रेष्ठाः । श्रेणी स्यात्कारुसंहताविति विश्वः । प्रकृतिमुख्या वा । हतमेनोंऽहो येषां ते मङ्गलपाणयः कृष्णाय सपर्याञ्चक्रुः ॥३८॥ फुल्लानि लोचनानि येषां ते तैरन्तःपुरजनैः ससम्भ्रमैः प्रीत्याऽभ्युपेताम् । मुकुन्दो राजमन्दिरं प्राविशत् ॥३९॥ भ्रात्रेयं भ्रातृसुतं पृथा विलोक्य प्रीत आत्मा मनो यस्याः सा डाबन्तो वा । सस्नुषा सहद्रौपदी पर्यङ्कादुपविष्टादुत्थाय परिषस्वजे आलिलिङ्गे । उत्थानमात्रे स्नुषासाहित्यं नालिङ्गन इत्यपि वदन्ति । सहपुत्रा भारं वहती गर्दभीत्यादिवदिति समाधत्ते च पुत्रीसमतया साऽप्यालिलिङ्गेति समे ॥४०॥ प्रमोदेनोपहितो मोहित इति नृपः पूजायां तद्विषये किमाचमनं प्राक् प्रागावा मधुपर्क इति कृत्यं नाविदन्न व्यजानात् ॥४१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

पुरवासिनां कृत्यमुक्त्वा अन्तःपुरवासिनामाह-अन्तःपुरजनैरिति । अन्तःकरणेन्द्रियशरीराणि तेषां भगवत्पराणीति वक्तुं विशेषणत्रयं प्रीत्या फुल्ललोचनैः ससम्भ्रमैरिति सम्भ्रमो देहधर्मः एवं सर्वभावैः प्रपन्नैः अभ्युपेतः सन् राजमन्दिरं प्राविशत सन्माननाया अविच्छेदं वक्तुम् ॥३८॥ पृथादिकृतसन्माननामाह-पृथा विलोक्येति । भ्रातृपुत्रोऽपि कृष्णः त्रिभुवनेश्वरः महान सम्बन्धीति प्रीतात्मा सती सस्नुषा पर्यङ्कादुत्थाय परिषस्वजे महति लज्जाभये भवतः तत्परित्यज्य परिष्वङ्गाज्जातिदेहधर्मनिवृत्तिः पर्यङ्कादुत्थायेति सुखसाधनपरित्यागः सस्नुषेति निरन्तरत्वम् अन्तःकरणप्रीत्या दोषाभावपूर्वकं सर्वे गुणा निरूपिताः पर्यङ्कस्थितिः भगवत्कृपां सूचयति भगवदर्थं गृहकार्ये स्थितायां वा पर्यङ्के स्थितिः एतावदेव ययोः कृत्यं प्रेम्णा विकलयोर्नाधिकम् ॥३९॥ततो गृहागते भगवति राज्ञः कृत्यमाह-गोविन्दमिति । देवमात्रेऽपि गृहागते महती पूजा कर्तव्या भगवांस्तु देवानामपि देवः तस्मिन्नप्यागते

स्वयमेव गृहमानाय्य पूजनीयः पूजायां कर्तव्यायाम् आदरे विद्यमानेऽपि सत्यं कृत्यं कर्तव्यं नाविन्दत् भगवद्व्यतिरेकेण न तस्यान्यत्र पूजासाधने दृष्ट्यभावात् बलाच्चित्तप्रेरणे कैवल्यसम्भवात् न पूजाज्ञानं प्रमोदेन च उपहतानीन्द्रियाणि सुखासक्तानि न क्रियायां प्रवर्तन्त इत्यर्थः ॥४०॥ एवं सर्वेषु प्रेम्णा विकलेषु सत्सु भगवत्कृत्यमाह–पितृष्वसुरिति। येन भगवच्चरित्रेण मोहकेन तेषां सावस्था दूरे भवति अन्यथाऽग्रिमकार्यं न स्यात् तच्चरित्रमाह स्वापेक्षया ज्येष्ठानां स्त्रीणां पितृष्वसुश्च भगवानभिवादनं चक्रे ततस्तासां देहधर्मयुक्तानां कृत्यमाह–स्वयञ्चेति। स्त्रीत्वैकगृहत्वैकगोत्रादिभिः सर्वा एकभावमापन्ना इति वृद्धनमस्कारेऽप्यासामपि देहे धर्मसम्बन्धः कृष्णा द्रौपदी भगिनी सुभद्रा चकारादन्यदपि ॥४१॥

श्रीसुबोधिनीसारः

फुल्लानि लोचनानि येषां तैः सम्भ्रमयुक्तैरन्तःपुरजनैरभ्युपेतो युक्तो मुकुन्दः प्रीत्य राजगृहं प्रविवेश ॥३८॥ भ्रात्रेयं भ्रातृपुत्रं त्रिभुवनेश्वरं कृष्णं विलोक्य दृष्ट्वा प्रीतात्मा हृष्टचित्ता पृथा कुन्ती पर्य्यङ्काच्छय्यात उत्थाय सस्नुषा पुत्रवधूसहिता आलिलिङ्ग ॥३९॥ देवदेवेशं ब्रह्मादीनां प्रवर्तकं गोविन्दं गृहमानीयादृतो नृपो युधिष्ठिरः प्रमोदेनातिहर्षेणोपहतो व्याप्तः पूजने कृत्यं विधिं पूर्वापरं नावैत् ॥४०॥ पितृष्वसुः कुन्त्याः गुरुपत्नीनाम् अभिवादनं प्रणतिं कृष्णश्चकार। भगिन्या सुभद्रया कृष्णया द्रौपद्या स्वयमभिवन्दितोऽभूत् हे राजन् ॥४१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र तत्र मार्गे मङ्गलानि गन्धपुष्पताम्बूलादिशुभद्रव्याणि पाण्योर्येषां ते पौराः पुरवासिनः श्रेणीनामेकशिल्पोपजीविनां मुख्या उपसङ्गम्य समीपमागत्य कृष्णस्य सपर्यां पूजां चक्रुः। 'एवं श्रीकृष्णपूजनम् अनेकजन्मानुष्ठितसुकृतत्वेन निरस्तसमस्तपापानामेव सुलभम्, अमीषां पापिनां तु दुर्लभमेव' इति सूचयन्नाह–हतैनस इति। हतं एनः पापं येषां ते ॥३८॥ सम्भ्रमेण सहितैः, अत एव फुल्ले विकसिते लोचने येषां तैरन्तःपुरजनैः प्रीत्याऽभ्युपेतः अभ्युपगम्य सत्कृतः मुकुन्दो राजमन्दिरं प्राविशत् ॥३९॥ पृथा कुन्ती भ्रात्रेयं भ्रातृपुत्रं कृष्णमवलोक्य प्रीतः आत्मा मनो यस्याः सा पर्यङ्कादुत्थाय स्नुषया द्रौपद्या सहिता तं परिषस्वजे आलिङ्गितवती। दुर्लभलाभात्तद्भाग्यस्याश्चर्यं सूचयन्नाह–त्रिभुवनेश्वरमिति ॥४०॥ आदृतः आदरयुक्तो नृपो युधिष्ठिरः गोविन्दं गृहमानीय तत्पूजायां कृत्यं क्रमविशेषं नाविदत् विस्मृतवान्। तत्र हेतुमाह–प्रमोदेनोपहतः अभिभूत इति। एवं प्रमोदे भगवतो दुर्लभत्वं हेतुमाह–देवानां देवा ब्रह्मरुद्रकालादयस्तेषामपीशं नियन्तारमिति ॥४१॥

अन्वितार्थप्रकाशिका

तत्रेति ॥ तत्र तत्र मार्गे हतम् पापं येषां ते मङ्गलानि गन्धपुष्पताम्बूलादिशुभद्रव्याणि पाण्योर्येषां ते पौराः पुरवासिनः श्रेणीषु एकशिल्पोपजीविजनतासु मुख्याश्च उपसङ्गम्य समीपमागत्य कृष्णस्य सपर्यां पूजां चक्रुः। कृष्णायेत्यपि पाठः ॥३८॥ अन्तरिति ॥ सम्भ्रमेण सहितैः फुल्ले विकसिते लोचने येषां तैरन्तःपुरजनैः प्रीत्याभ्युपेतः अभ्युपगम्य सत्कृतः मुकुन्दो राजमन्दिरं प्राविशत् ॥३९॥ पृथेति ॥ पृथा कुन्ती त्रिभुवनेश्वरं भ्रात्रेयं भ्रातृपुत्रं कृष्णमवलोक्य प्रीतः आत्मा यस्याः सा पर्यङ्कादुत्थाय स्नुषया द्रौपद्या सह स्थिता सा कुन्त्येव तं परिषस्वजे आलिङ्गितवती। द्रौपदी तु पश्चादेव स्थिता वन्दनादिनाऽऽदृतवतीत्यग्रे वक्ष्यते। एवं चाध्याहृतायां स्थितिक्रियायामन्वितत्वात्सस्नुषेति समासः ॥४०॥ गोविन्दमिति ॥ प्रमोदेनोपहतः अभिभूत आदृतः आदरयुक्तो नृपो युधिष्ठिरः देवदेवेशं गोविन्दं गृहमानीय तत्पूजायां कृत्यं क्रमविशेषं नाविदत् विस्मृतवान्। विन्दलेर्लुङ् ॥४१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ससम्भ्रमैः दर्शनव्याकुलैः ॥ अभ्युपेतः सन्मुखप्रयाणेन आदृतः ॥३८॥ स्नुषया कृष्णया सहिता ॥३९॥ गतव्यवहारानुक्रमस्मृतिः पूजायां कृत्यम् अनुक्रमभेदम् ॥४०॥ गुरुस्त्रीणां द्विजपत्नीनां वृद्धस्त्रीणां च ॥ कृष्णया पाञ्चाल्या सुभद्रया च ॥४१-४२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्तरिति ॥ ससम्भ्रमैः सम्भ्रमेण सहितैः, अत एव फुल्ले विकसिते लोचने येषां तैः, अन्तःपुरजनैः, प्रीत्या, अभ्युपेतः अभिसङ्गतः, मुकुन्दः कृष्णः, राजमन्दिरं, प्राविशत् प्रविवेश ॥३८॥ पृथेति ॥ पृथा कुन्ती, भ्रात्रेयं भ्रातृपुत्रं, त्रिभुवनेश्वरं कृष्णम्, अवलोक्य, प्रीत आत्मा मनो यस्याः सा, सस्नुषा द्रौपदीसहिता सती, पर्यङ्कात्, उत्थाय, परिषस्वजे आलिङ्गितवती ॥३९॥

गोविन्दमिति ॥ देवानां देवो ब्रह्मा तस्यापीशस्तं, गोविन्दं श्रीकृष्णं, गृहं प्रति, आनीय, प्रमोदेनोपहतोऽभिभूतः परवश इति यावत् । नृपो युधिष्ठिरः, आदृतः सन्, पूजायां, कृत्यं क्रमविशेषं, न अविदत् ॥४०॥ पितृष्वसुरिति ॥ कृष्णः भगवान्, पितृष्वसुः पृथायाः, गुरुस्त्रीणां पूज्यस्त्रीणां च, अभिवादनं, चक्रे । हे राजन्, स्वयं कृष्णश्च, कृष्णया द्रौपद्या, भगिन्या सुभद्रया च, अभिवन्दितः ॥४१॥

कृष्णप्रिया

ऐसा पुरवासी जनों से पूजित होकर राजा युधिष्ठिर के प्रासाद में प्रवेश किया ॥३८॥ कुन्तीजी अपने भ्राता के पुत्र तीन लोक के नाथ श्रीकृष्ण को देखकर बहुत प्रीति से शय्या से उठ कर द्रौपदी सहित श्रीकृष्णजी से मिले ॥३९॥ राजा युधिष्ठिर को श्रीकृष्ण को अपने गृहमे आवाहित करके उनकी पूजा करने की विधिको आनन्द के कारण भूल कर कैसा किस प्रकार करुं ? इस प्रकार चकित हुए ॥४०॥ हे राजन् ! श्रीकृष्णजी ने अपने बुआजी तथा पूज्य नारीओं को प्रणाम किया द्रौपदी तथा अपनी बहन ने श्रीकृष्ण को प्रणाम किया ॥४१॥

श्वश्र्वा सञ्चोदिता कृष्णा कृष्ण[१]पत्नीस्तु सर्वशः । आनर्च रुक्मिणीं सत्यां भद्रां जाम्बवतीं तथा ॥४२॥
कालिन्दीं मित्रविन्दां च शैब्यां नाग्नजितीं सतीम्[२] । अन्याश्चाभ्यागता यास्तु वासःस्रङ्मण्डनादिभिः ॥४३॥
सुखं निवासयामास धर्मराजो जनार्दनम् । ससैन्यं सानुगामात्यं सभार्यं च नवं नवम् ॥४४॥
तर्पयित्वा खाण्डवेन वह्निं फाल्गुनसंयुतः । मोचयित्वा मयं येन राज्ञे दिव्या सभा [३]कृता ॥४५॥
उवास कतिचिन्मासान्राज्ञः प्रियचिकीर्षया । विहरन्रथमारुह्य फाल्गुनेन भटैर्वृतः[४] ॥४६॥

इति श्रीमद्भागवते महापुराणे [५]दशमस्कन्धे कृष्णस्येन्द्रप्रस्थगमनं
[६]नामैकसप्ततितमोऽध्यायः ॥७१॥

कर्दमक्षमा

श्वश्र्वा, सञ्चोदित, कृष्णा, सर्वशः, कृष्णपत्नीः, रुक्मिणीम्, सत्याम्, भद्राम्, जाम्बवतीम्, तथा, कालिन्दीम्, मित्रविन्दाम्, शैब्याम्, च, सतीम्, नाग्नजितीम्, च, अन्याः, याः, अभ्यागताः, सर्वशः, वासःस्रङ्मण्डनादिभिः, आनर्च ॥४२-४३॥ धर्मराजः, ससैन्यम्, सानुगामात्यम्, च, सभार्यम्, नवम् नवम्, सुखम्, जनार्दनम्, निवासयामास ॥४४॥ फाल्गुनसंयुतः, खाण्डवेन, वह्निम्, तर्पयित्वा, मयम्, मोचयित्वा, येन, राज्ञे, दिव्या, सभा, कृता ॥४५॥ फाल्गुनेन, भटैः, वृतः, रथम्, आरुह्य, विहरन्, राज्ञः, प्रियचिकीर्षया, कतिचित्, मासान्, उवास ॥४६॥

इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे अन्वयलेखने एकसप्ततितमोऽध्यायः ॥७१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आनर्चाऽर्चितवती ॥४२॥ अन्याश्च याः कृष्णपत्न्योऽभ्यागतास्ता अपि ॥४३॥ प्रत्यहं नवन्नवं यथा भवति तथा सुखं निवासयामास ॥४४॥ कथम्भूतम् ? यः प्रेम्णा नित्यं फाल्गुनेन संयुतः अत एव तस्य सहायेन सता येन खाण्डवेन वह्निं तर्पयित्वा तत्र च मयं प्रयुज्य युधिष्ठिराय दिव्या सभा कृता तं जनार्दनम् अनेन राज्ञः कृष्णोपकारानुस्मरणं दिव्यत्वात्सभाया यथामनोरथं सर्वावकाशसम्पादनञ्च दर्शितम् ॥४५-४६॥

इति श्रीमद्भागवते उत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायामेकसप्ततितमोऽध्यायः ॥७१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

श्वश्र्वा पृथया । शैब्यामिति मित्रविन्दाविशेषणं द्वितीयतथाशब्देनानुक्तसमुच्चायकेन लक्ष्मणा च गृहीता । यद्वा-शिवं शुभं तद्युक्तां सर्वसुखपूर्णां लक्ष्मणामित्यर्थः ॥४२॥ अन्याः अनुक्तनाम्न्यः । अभ्यागतास्तत्रागताः । मण्डनानि भूषणानि ''मण्डनं

---

१. पत्नीश्च सर्वशः-श्रीधर. वंशी. वीर. ; पत्नीः सुवर्चसः-विज. । २. तथा-गो.प्रे.टी. । ३. सभापिता-इति कस्यचित् ; सभा हृताः-वीर. विज. । ४. रथैर्वृतः-वीर. । ५. पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. पु. । ६. एकोनाशीतितमोऽध्यायः ॥७९॥-विज. ।

भूषणे क्लीबं स्यात्त्रिष्वलंकरिष्णुनि" इति मेदिनी ॥४३॥ ता अपि कृष्णपत्नीरपि ॥४४॥ यः कृष्णः । अत एव नित्यसंयुतत्वादेव तस्यार्जुनस्य । येन कृष्णेन । तत्र च खाण्डवे च । मयं दैत्यम् । तं खाण्डववह्निमुक्तं प्रयुज्य प्रेर्य अनेन सभाकारणादिकथनेन । राज्ञो युधिष्ठिरस्य ॥४५॥ तर्पयित्वेत्यादिश्लोकद्वयेनाष्ट-पञ्चाशत्तमाध्यायोक्तैव कथा पुनरत्रावेशादेवानुकथिता । ततश्चायं क्रमः । इन्द्रप्रस्थे खाण्डवदाहगाण्डीवादिप्राप्तिमृगयाकालिन्दी-प्राप्तिवार्षिकचातुर्मासवासास्ततो द्वारकागमनकालिन्दीभद्रादिविवाहनरकवधादिबहु-कथान्ते एव राजसूयनिमन्त्रणादिकमिति ज्ञेयम् ॥४६॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्ध एकसप्ततितमोऽध्यायः ॥७१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्वश्र्वेति युग्मकम् । सम्यक् तत्तदनुरूपपूजाद्रव्योपदेशसहायवर्गनियोजनादिना मोदिता सती कृष्णपत्नीरिति कृष्णस्येव तासामप्यर्च्यत्वं चकारात्तत्पुत्रादिवधूः कन्याद्याश्च सर्वश इति सर्वा एव प्रत्येकं सर्वप्रकारैश्चेत्यर्थः । शैब्यामिति मित्रविन्दाया एव विशेषणं द्वितीयतथाशब्देना-नुक्तसमुच्चयार्थकेन लक्षणा च गृहीता यद्वा शैब्यां शिवं शुभं तद्युक्ता सर्वसुखलक्षणां लक्ष्मणामित्यर्थः ॥४२-४३॥ सुखमिति च युग्मकम् । तथा निवेशने हेतुः धर्मराजः किञ्च जनैर्भक्तैः सदा द्रष्टुं याच्यत इति जनार्दनम् अतो भक्तप्रवरेण तेन तस्य तथाकर्तुं युज्यतैवेति भावः ॥४४॥ तथाप्येतन्मात्रोपकारस्य निष्क्रयं राजा न मेने इत्याह-तर्पयित्वेति । हृता अर्पिता कृतेति पाठे सम्पादिता ॥४५॥ स तु प्रियान्तरचिकीर्षयोवास फाल्गुनेन सह भटैः श्रीसात्यक्यादिभिः ॥४६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकसप्ततितमोऽध्यायः ॥७१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्यक् तत्तदनुरूपपूजाद्रव्योपदेशसहायवर्गनियोजनादिना चोदिता सती; कृष्णस्य पत्नीरिति कृष्णस्येव तासामप्यर्च्चयत्वं सूचितम् । च-कारात्तत्पुत्रादिवधूकन्याद्याश्च । सर्व्वश इति सर्व्वा एव प्रत्येकं सर्वप्रकारेणेत्यर्थः । श्रीसत्यभामाजाम्बवत्योर्मध्ये श्रीभद्राया अर्च्चनं पितृभ्यां तयोरिवास्या अपि भक्त्या भ्रातृभिर्दनेन ताभ्यां साम्यात् तथेति समुच्चये; यद्वा, शैब्यां सर्व्वशुभलक्षणां लक्ष्मणामित्यर्थः । नाग्नजित्याः प्राक् तस्या अर्च्चनं तस्या भगवति भावविशेषात्, स च कुरुक्षेत्रयात्रायां तद्वाक्यादेव व्यक्तो भावी । शैब्यामिति मित्रविन्दाया एव विशेषणम्; द्वितीय-तथा-शब्देनानुक्तसमुच्चयार्थकेन लक्ष्मणा च गृहीतैव । तथेत्यस्य परेणान्वयः । यथाष्टौ ता मुख्यास्तेनैव प्रकारेण अन्याः श्रीकृष्णपत्न्यः पुत्र-पौत्रवध्वादयश्च; आदिशब्दात् भोग्यवेश-शय्यादयः ॥४३॥ निवेशयामास बाह्यान्तरादिविभागकल्पनया विश्वकर्म्मणा पुरनिर्म्माणे प्रागेव तदर्थरचिते महाविस्तीर्णनिवेशने न्यवासयत्, यतो धर्म्मराजः सर्व्वसद्धर्म्मश्रेष्ठ इत्यर्थः । किञ्च, जनैर्भक्तैः सदा द्रष्टुं याच्यत इति जनार्दनम्, अतो भक्तप्रवरेण तेन तस्य तथा कर्तुं युज्यतैवेति भावः । अनुगाः पुत्रपौत्रादय उद्धवादयश्च, अमात्याः कृतवर्म्माद्याः, तैः सहितम् ॥४४॥ पूर्व्वकृतादप्युपकारादधुना अधिकं तं चिकीर्षंश्चिरं न्यवसदिति वक्तुं प्राक् कृतमुपकारमाह - तर्पयित्वेति । कृता सम्पादिता, अत एव प्रियान्तरचिकीर्षयोवास । फाल्गुनेन सह भटैः श्रीसात्यक्यादिभिरिति राज्ञोऽत्यन्तप्रीतिसम्पादनं सूचितम् ॥४५-४६॥

इति श्रीभद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्रीश्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यामेकसप्ततितमोऽध्यायः ॥७१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भगिन्या सुभद्रया ॥४१-४६॥

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकसप्ततितमोऽध्यायः ॥७१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

श्वश्र्वा श्वशुरस्य स्त्रिया पृथया सञ्चोदिता कृष्णा द्रौपदी कृष्णस्य पत्नीः सर्वप्रकारैरानर्च पूजितवती कृष्णपत्नीरेव निर्दिशति-रुक्मिणीमित्यादिना । शैब्यां लक्ष्मणामन्याश्चेति । एता अन्याश्चागताः स्त्रियः वस्त्रादिभिरानर्चेति सम्बन्धः मण्डनमलङ्कारः ॥४२-४३॥ सुखमिति । प्रत्यहं नवन्नवं यथा भवति तथा सुखं निवासयामास ॥४४॥ कथम्भूतम् ? यः प्रेम्णा नित्यं फल्गुनेन अर्जुनेन सङ्गतः अत एव तस्य साहाय्येन खाण्डवेनाग्निं प्रीणयित्वा तत्र मयञ्च मोचयित्वा तं मयं प्रयुज्य राज्ञे युधिष्ठिराय दिव्या सभा

आहृता आनीता येन तथाभूतं जनार्दनमिति सम्बन्धः ॥४५॥ उवासेति । मासानित्यत्यन्तसंयोगे द्वितीया राज्ञो युधिष्ठिरस्य प्रियं कर्तुमिच्छया फल्गुनेन सह रथमारुह्य रथैः परिवृतो विहरन् कतिचिन्मासानुवास उषितवान् ॥४६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकसप्ततितमोऽध्यायः ॥७१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

श्वश्र्वा पृथया ॥४२॥ येन मयेन दिव्या सभा राज्ञे आहृता भगवदाज्ञया निर्माय दत्ता ॥४३-४६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजकृतायां पदरत्नावल्याम् एकसप्ततितमोऽध्यायः ॥७१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

शैब्यामिति मित्रवृन्दाविशेषणं द्वितीयेन तथाशब्देनानुक्तसमुच्चयार्थकेन लक्ष्मणा च गृहीता ॥४३-४६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकसप्ततितमोऽध्यायः ॥७१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

पृथाविलोक्येत्यादि सस्नुषा द्रौपद्या सह उत्थिता परिषस्वजे इत्युत्थान एव तत्साहित्यम् ॥३९-४६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे एकसप्ततितमोऽध्यायः ॥७१॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥४०-४६॥

॥ इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे श्रीनाथचक्रवर्तिपादविरचितायां चैतन्यमञ्जूषायाम् एकसप्ततितमोऽध्यायः ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्वश्र्वा कुन्त्या ॥४२-४३॥ प्रत्यहं नवं नवं यथास्यात्तथा निवासयामास ॥४४॥ येन दिव्या सभा कृता तं मयं मोचयित्वा उवास तर्पयित्वेत्यादि-श्लोकद्वयेनाष्टपञ्चाशत्तमाध्यायप्रोक्तैव कथा पुनरत्रावेशादेवानुकथिता ततश्चायं क्रमः ॥४५॥ इन्द्रप्रस्थे खाण्डवदाहगाण्डीवा-दिप्राप्तिमृगयाकालिन्दीप्राप्तिवार्षिकचातुर्म्मासवासाः ततो द्वारकागमनकालिन्दीभद्रादिविवाहनरकवधादिबहु-कथान्त एव राजसूयनिमन्त्रणादिकमिति ज्ञेयम् ॥४६॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तिचेतसाम् । अत्रैकसप्ततितमो दशमोऽजनि सङ्गतः ॥७१॥

गूढार्थदीपिनी

शैब्यां कल्याणमयीं मित्रविन्दामित्यस्या विशेषणं कार्यम् । शैब्ये रोहिणीलक्ष्मणे इति वक्ष्यमाणपद्ये शैब्ये मित्रविन्दे इति स्वामिचरणव्याख्यानात् । चकारोऽनुक्तसमुच्चयार्थ इति नियमात् च शब्देन लक्ष्मणा ग्राह्या । अतो नानुपपत्तिः । अन्या या आगता ता अपि आनर्चेति योज्यम् । मण्डनानि भूषणानि । मण्डनं भूषणे क्लीबम् ॥४२॥ प्रत्यहं नवं नवं प्रतीयते यथा तथा निवासयामासेत्यन्वयः ॥४३॥ खाण्डवेन इन्द्रवनेन । फाल्गुनोऽर्जुनः ॥४४-४५॥

इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यां टीकायाम् एकसप्ततितमोध्यायः ॥७१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्वश्र्वा पृथया आनर्च अर्चितवती ॥४२॥ धर्मराजः जनार्दनं प्रत्यहं नवन्नवं यथा भवति तथा निवासयामास ॥४३-४४॥ जनार्दनोऽपि राज्ञो धर्मराजस्य प्रियचिकीर्षया वह्निं तर्पयित्वा येन सभा कृता तं मयं मोचयित्वा कतिचिन्मासानुवासेति द्वयोरन्वयः ॥४५-४६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकसप्ततितमाध्यायार्थप्रकाशः ॥७१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पितृष्वसुः कुन्त्या गुरुस्त्रीणां पुरोहिताद्यार्यभार्याणाभिवादनं कृष्णश्चक्रे । स्वयं कृष्णया द्रौपद्या तथा भगिन्या सुभद्रया चाभिवादितो नमस्कृतः ॥४२॥ श्वश्र्व्या कुन्त्या । कृष्णपत्नीरानर्च्य । लिट् । अपूजयत् । पत्नीति विशदयति ॥ रुक्मिणीमित्यादिना । अन्या भार्या अभ्यागताः सुवासिनीरिति वा । मण्डनादिभिरलङ्कारादिभिः ॥४३॥ नवं नवो नित्यनूतनं यथा तथा ॥४४-४५॥

पाण्डवसंयुतः खाण्डवेन वनेन वह्निं तर्पयित्वा स्थितो यो येन च तद्दाहकालेऽन्तर्निविष्टं मयं दैतेयं तक्षाणं मयं प्रेरयित्वा राज्ञः सभा कारिताऽऽहृता दत्ता च । तं सुखं निवासयामासेत्यतीतेनान्वयः । स उवासेत्युत्तरेण वाऽन्वयः ॥४६॥ राज्ञः प्रियचिकीर्षया कतिचिन्मासान्फल्गुनेन भटैर्वृतो रथमारुह्य विहरन्नुवास । यद्यपि खाण्डववनदहनकाले षडवशेषितास्तथाऽपि तत्कृतकार्याभावात्पञ्चानामनुक्तिरिति ज्ञेयम् । तस्य पूर्वं शिरोग्रस्तं पुच्छं तस्य निगीर्यते । निगीर्यमाणा सा क्रामत्सुतं नागी मुमुक्षयोर्ध्वमाचक्रमे सा तु पन्नगी पुत्रगर्धिनी तस्याः शरेण तीक्ष्णेन पृथुधारेण पाण्डवः । शिरश्चिच्छेद गच्छन्त्यास्तमपश्यच्छचीपतिः । तं मुमोचयिषुर्वज्री वातवर्षेण पाण्डवम् । मोहयामास तत्कालमनश्वनस्त्वमुच्यत । तक्षकपुत्रोऽश्वसेनोऽयमेव कर्णतुणीरगः । तस्मिन्वने दह्यमाने षडग्निर्न ददाह च । अश्वसेनं मयं चैव चतुरः शार्ङ्गिकास्तथेत्यादि-पूर्वोक्तेः । ते च जरितार्यादयश्चत्वारः ॥४७॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे एकाशीतितमोऽध्यायः ॥१०-८१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो भगवत्पत्नीनां पूजामाह-श्वश्र्वेति । पृथया सम्प्रेषिता कृष्णा सर्वशः सर्वप्रकारेण कृष्णपत्नीरर्चयामास तुशब्देन न्यूनाधिकभावेन पूजा निवारिता समुदायेन पूजां निवारयितुं प्रत्येकं नामान्याह-रुक्मिण्यादिपदैः । सत्या सत्यभामा शैब्या लक्ष्मणा नाग्नजित्येव सती सत्या एवम् अष्टमहिष्यो नाम्ना निरूपिताः ॥४२॥ षोडशसहस्राण्यवशिष्टानि एकभावापन्नत्वात् समुदायेनाह-अन्याश्चेति । किं बहुना प्रद्युम्नादिपत्न्योऽपि याः काश्चन समागताः ताः सर्वा एव वासस्स्रङ्मण्डनादिभिः आनर्चेति सम्बन्धः ॥४३॥ तात्कालिकं पूजाविशेषमुक्त्वा राज्ञः स्थिरकृत्यमाह-सुखं निवासयामासेति । वस्तुतस्तु सुखरूपं भगवन्तं स्थापयित्वा स्वयं सुखी जात इत्यर्थः । जनार्दनमविदानाशकं यथैव भगवतो मनःप्रीतिर्भवति तथा स्थापितवान् न केवलं भगवतः किन्तु सर्वेषामित्याह-ससैन्यमिति । भगवतश्चत्वार्यङ्गानि सैन्यं सेवकाः अमात्या भार्याश्चेति तत्सहितं प्रत्यहं नवनवं यथा भवति ॥४४॥ एवं सर्वभावेन सेवायां क्रियमाणायां लौकिकधर्माभिनिविष्टे राजनि भगवता यत् कृतं तदाह-तर्पयित्वेति द्वाभ्याम् । देवेषु अग्निः प्रधानभूत इति खाण्डवेन तमादौ तर्पयामास दैत्याधिपतिं मयञ्च मोचयामास एवं देवासुररूपाणीन्द्रियाणि स्वाधिदैविकतर्पणेन च तृप्तानि सन्ति युधिष्ठिरं सर्वथा लौकिकवैदिकभावेन तर्पयिष्यन्ति दैत्यभागस्य शीघ्रफलत्वज्ञापनाय मयकृतमुपकारमाह-येन मयेन राज्ञे दिव्या सभा कृतेतिकृत्वाप्रययान्तयोः उवासेत्यनेन सम्बन्धः ॥४५॥ न केवलं कृत्वैव तं सुखीचकार किन्तु स्थित्यापीत्याह-उवासेति । कतिचिन्मासानिति कार्यतरमकृत्वा राज्ञः प्रियार्थं निरन्तरं राजसन्निधान एवोवास मासचतुष्टयमिति विमर्शः भगवतः शयनकाल एव तादृश इति निर्बन्धेन स्थितिं वारयति विहरन् रथमारुह्येति । तत्रत्यान् स्वकीयाँश्च प्रीणयन्निति वक्तुं फाल्गुनेन भटैर्वृत इत्युक्तं फाल्गुनस्तत्रत्योपलक्षकः भटाः स्वकीयाः उभयैर्वृतः वेष्टनेन निरन्तरं सर्वेषां सुखदानां निरूपितम् ॥४६॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे द्वाविंशाध्यायविवरणम् ॥२२॥७१॥

श्रीसुबोधिनीसारः

श्वश्र्वा कुन्त्या सञ्चोदिता कृष्णा द्रौपदी सर्वशः सर्वाः कृष्णस्य पत्नीरानर्च पूजयामास तथा हि रुक्मिणीमिति स्पष्टम् ॥४२॥ शैब्यां लक्ष्मणामधिकारप्राप्त्या अन्याश्च याः षोडशसहस्रम् शतोत्तरमभ्यागतास्ताः वस्त्रमालाविभूषणादिभिः ॥४३॥ सेनाभृत्यमन्त्रिस्त्रीसहितं जनार्दनं श्रीकृष्णं धर्मराजो युधिष्ठिरः सुखं यथा स्यात्तथा निवासयामास तथापि प्रतिदिनं नवीनं नवीनमित्यनेन तद्भक्त्या तस्यातिशयो दर्शितः ॥४४॥ फल्गुनेनार्जुनेन संयुतः श्रीकृष्णः खाण्डवेन वनेन वह्निं तर्पयित्वा मयं दैत्यमग्नेर्मोचयित्वा कोऽसौ मय इत्यपेक्षायामाह । येन राज्ञे युधिष्ठिरार्थं दिव्या सभा कृता इति ॥४५॥ राज्ञः प्रियकरणेच्छया कतिचिन्मासान् उवास तत्रार्जुनेन भटैः पुम्भिर्वृतो रथमारुह्य विहरन् सन् ॥४६॥

इति श्रीमद्भा०दशमस्क०उत्त०एकसप्ततितमाध्यायसुबोधिनीसार ॥७१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वयं च कृष्णया द्रौपद्या भगिन्या सुभद्रया चाभिवादितः कृष्णः पितृष्वसुः पृथायाः गुरुस्त्रीणां ब्राह्मणादिपूज्यस्त्रीणामभिवन्दनं चक्रे ॥४२॥ स्वस्रा सुभद्रया सञ्चोदिता कृष्णा द्रौपदी सर्वाः कृष्णपत्नीरानर्च पूजितवती । ताः

कृष्णपत्नीर्निदिशति-रुक्मिणीमित्यादिना ॥४३॥ शैब्यां लक्ष्मणाम्। अन्याश्च या अभ्यागताः स्त्रियस्ताश्च वस्त्रादिभिरानर्चेत्यन्वयः। मण्डनमलङ्कारः कुङ्कुमादिः ॥४४॥ धर्मराजो युधिष्ठिरः प्रत्यहं नवं सत्कारं यथा भवति तथा सैन्यादिसहितं जनार्दनम् अविद्यानिवर्तकं श्रीकृष्णं सुखं तस्य प्रीत्यनुरूपं यथा स्यात्तथा निवासयामास ॥४५॥ एवं सत्कारे भगवत उपकारं हेतुमाह-तर्पयित्वेति। फाल्गुनसंयुत इति प्रथमा तृतीयार्था। येनार्जुनसहायभूतेन खाण्डवेनेन्द्रोपवनेन वह्निं तर्पयित्वा तत्र च दह्यमानं महामायाविनं मयं मोचयित्वा तं मयं प्रयुज्य राज्ञे युधिष्ठिराय दिव्या सभा कृता तं जनार्दनं सुखं निवासयामासेति पूर्वेणान्वयः ॥४६॥ भगवांश्च राज्ञो युधिष्ठिरस्य प्रियं कर्तुमिच्छया अर्जुनेन रथमारुह्य भटैर्वृतो विहरन् कतिचिन्मासांस्तत्रैवोवास ॥४७॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र सात्त्विकानां निरोधने ॥ एकसप्ततितमोऽगात् पाण्डवोत्सवबोधकः ॥३॥॥७१॥

अन्वितार्थप्रकाशिका

पित्रिति ॥ हे राजन्! कृष्णः पितृष्वसुः पृथायाः गुरुस्त्रीणां ब्राह्मणादिपूज्यस्त्रीणां चाभिवादनं चक्रे। स्वयं च कृष्णया द्रौपद्या भगिन्या सुभद्रया च अभिवन्दितो बभूव ॥४२॥ श्वश्र्वेति युग्मम् ॥ श्वश्र्वा कुन्त्या संचोदिता कृष्णा द्रौपदी रुक्मिण्यादिकाः सर्वशः सर्वाः कृष्णपत्नीः शैब्यामिति मित्रविन्दाया एव विशेषणम्। तथापदेन लक्ष्मणा गृहीता। वासःस्त्रङ्मण्डनादिभिः आनर्च पूजितवती। मण्डनं कुंकुमादि तथा अन्याश्च या अभ्यागताः स्त्रियस्ताश्च चात् स्नुषाद्याः कन्याश्च वस्त्रादिभिरानर्च ॥४३-४४॥ सुखमिति ॥ धर्मराजो युधिष्ठिरः प्रत्यहं नवं नवं यथा भवति तथा सैन्यादिसहितं जनार्दनं श्रीकृष्णं सुखं तस्य प्रीत्यनुरूपं यथा स्यात्तथा निवासयामास ॥४५॥ तर्पयित्वेति युग्मम् ॥ फाल्गुनसंयुतः अर्जुनसहायभूतो भगवान् खाण्डवेनेन्द्रोपवनेन वह्निं तर्पयित्वा तथा येनोपकारगुणज्ञेन मयेन युधिष्ठिराय दिव्या सभा कृता। अर्पिता इति वा पाठः। तं खाण्डवाग्नौ दह्यमानं मयं दैत्यशिल्पिनं मोचयित्वा राज्ञो युधिष्ठिरस्य प्रियं कर्तुमिच्छया अर्जुनेन रथमारुह्य भटैर्वृतो विहरन् कतिचिन्मासांस्तत्रैवोवास। परे तु तर्पयित्वेति श्लोकस्य यो नित्यं फाल्गुसंयुतः आसीत्। येन च खाण्डवेनाग्निं तर्पयित्वा तत्र मयासुरं मोचयित्वा तद्द्वारा युधिष्ठिराय दिव्या सभा कृता। तं तादृशं जनार्दनं निवासयामासेति पूर्वेणान्वयः इत्याहुः। अनेन राज्ञः कृष्णोपकारानुस्मरणम्। दिव्यत्वात्सभाया यथामनोरथं सर्वावकाशसम्पादनं च दर्शितम्। अत्र चक्रवर्ती। तर्पयित्वेत्यादिश्लोकद्वयेनाष्टपञ्चाशत्तमाध्यायप्रोक्तैव कथा पुनस्तत्रावेशादेवानुकथिता ततश्चायं क्रमः। इन्द्रप्रस्थे खाण्डवदाहः कालिन्दीप्राप्तिः चातुर्मास्यवासः द्वारकागमनं कालिन्दीभद्रादिविवाहः नरकवधादिबहुकथान्त एव राजसूयनिमन्त्रणादिः ॥४६-४७॥

इति श्रीमद्भागवते दशमेऽन्वितार्थप्रकाशिकायामेकसप्ततितमोऽध्यायः ॥७१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अन्याश्च या अभ्यागताः ॥ कृष्णस्त्रियः ताः सर्वाः वस्त्रादिभिः आनर्च्च ॥४३॥ प्रतिदिनं नवं नवं यथा भवति तथा सुखं निवासयामास ॥४४॥ तत्र निवसता हरिणा किं कृतमित्याशङ्क्याह-तर्पयित्वेति ॥ खाण्डवेन तत्संज्ञकवनेन दहनाय वनदाहेनेत्यर्थः ॥ मयं दाहात् मोचयित्वा येन मयदानवेन राज्ञे युधिष्ठिराय ॥ दिव्या मनोहरा दुर्योधनमोहिनी सभा कृता। तं जनार्दनं निवासयामासेति सम्बन्धः ॥४५॥ विहरन् सन् उवास ॥४६॥

इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्र-श्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने इन्द्रप्रस्थनिवासो नाम एकसप्ततितमोऽध्यायः ॥७१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

श्वश्र्वेति ॥ श्वश्र्वा श्वशुरस्य स्त्रिया पृथया, सञ्चोदिता सम्प्रेरिता, कृष्णा द्रौपदी, सर्वशः कृष्णपत्नीरपि, आनर्च पूजितवती। श्रीकृष्णपत्नीर्निर्दिशति। रुक्मिणीं, सत्यां, भद्रां तथा जाम्बवतीम् ॥४२॥ कालिन्दीमिति ॥ कालिन्दीं, मित्रविन्दां, शैब्यां, लक्ष्मणां, सतीं नाग्नजितीं च, एवमेताः पट्टराज्ञीः, अभ्यागताः ताः, यास्तु अन्याश्च अन्या अपि, स्त्रीः, ताः वासःस्त्रङ्मण्डनादिभिः आनर्च। मण्डनमलङ्कारः। द्वयोरेकसम्बन्धः ॥४३॥ सुखमिति ॥ धर्मराजः युधिष्ठिरः, ससैन्यं सैन्यसहितं, सानुगामात्यमनुगैरमात्यैश्च

सहितं, सभार्यं सपत्नीकं, जनार्दनं श्रीकृष्णं, नवं नवं प्रतिदिनं नवीनं यथा भवति तथा, सुखं यथा तथा च, नियवासयामास ॥४४॥ कथम्भूतं तत्राह ॥ तर्पयित्वेति ॥ यः, नित्यं फाल्गुनेनार्जुनेन संयुतः सङ्गतः सन्, खाण्डवेन, वह्निमग्निं, तर्पयित्वा प्रीणयित्वा, तत्र मयं च मोचयित्वा, तं मयं प्रयुज्येति शेषः । राज्ञे युधिष्ठिराय, येन कृष्णेन, दिव्या सभा, कृता मयेन कारिता । तं जनार्दनमिति सम्बन्धः । अनेन राज्ञः कृष्णोपकारानुस्मरणं दिव्यत्वात् सभाया यथामनोरथं सर्वावकाशसम्पादनं च दर्शितम् ॥४५॥ उवासेति ॥ भटैः वृतः कृष्णः, फाल्गुनेनार्जुनेन सह, रथम् आरुह्य, विहरन् सन्, राज्ञो युधिष्ठिरस्य, प्रियचिकीर्षया, कतिचित् मासान्, अत्यन्तसंयोगे द्वितीया । उवास तत्रोषितवान् ॥४६॥

इति श्रीधर्मधुरन्धर-श्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिताया-मन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवत-टीकायां दशमस्कन्धोत्तरार्द्धे एकसप्ततितमोऽध्यायः ॥७१॥

कृष्णप्रिया

कुन्ती ने द्रौपदी को आज्ञा दी, द्रौपदी ने रुक्मिणी सत्यभामा भद्रा जाम्बवती का सत्कार किया और श्रीकृष्ण की अन्यभार्याओं का सत्कार किया तथा कालिन्दी मित्रविन्दा शैब्या और पतिव्रता नाग्नजिती तथा पुत्रवधू आदि से जो अन्य स्त्रीगण उपस्थित है उन सब का वस्त्र माला कुंकुम आदि से सन्मान किया ॥४२-४३॥ राजा युधिष्ठिर सेना सहित भृत्य सहित भार्या सहित श्रीकृष्ण की प्रीति के अनुरूप प्रतिदिन विविध सत्कार युक्त श्रीकृष्ण को निवास करवाया ॥४४॥ श्रीकृष्ण भगवान् भी अर्जुन सहित इन्द्र के खांडव वन के लिये अग्नि को तृप्त करवाने के लिये जिसने राजा के लिये दिव्य सभा बनाई उस खांडव वन के अग्नि से जले ऐसे मय नामक दैत्य को अग्नि से छूडाकर राजा युधिष्ठिर का प्रिय करने की इच्छा से अर्जुन के साथ रथ में बैठकर शूरवीर पुरुषों से संयुक्त होकर विहार करते हुए कुछ मास तक इन्द्रप्रस्थ में ही निवास करने लगे ॥४५-४६॥

श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे कृष्णप्रियाख्यहिन्दीभाषान्तर एकसप्ततितमोऽध्यायः ॥७१॥

॥ श्रीहरिः ॥

★श्रीगणेशाय नमः★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ द्विसप्ततितमोऽध्यायः ॥

श्लोकाः	अनु.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४६	४१	५	६	१६२४	३९	४४	१७०७	५३।	३

[1]श्रीशुक उवाच

एकदा तु सभामध्ये आस्थितो मुनिभिर्वृतः । ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्च [2]युधिष्ठिरः॥१॥
आचार्यैः कुलवृद्धैश्च ज्ञातिसम्बन्धिबान्धवैः । शृण्वतामेव चैतेषामाभाष्येदमुवाच ह ॥२॥

कर्दमक्षमा

अन्वयः :—श्रीशुक उवाच— शुक उवाच :- एकदा, मुनिभिः, ब्राह्मणैः, क्षत्रियैः, वैश्यैः, भ्रातृभिः, आचार्यैः, कुलवृद्धैः, च, ज्ञातिसम्बन्धिबान्धवैः, वृतः, आस्थितः, युधिष्ठिरः, एतेषाम्, शृण्वताम्, एव उवाच ह ॥१-२॥

श्रीधरस्वामिकृतभावार्थदीपिका

ततो द्विसप्ततितमे राज्ञा कार्ये कार्ये निवेदिते । दुर्जयं मागधं बुद्ध्वा भीमेनाघातयद्धरिः ॥

आस्थितः आसनमिति शेषः ॥१॥ शृण्वतामेवेति । यत्प्रसन्नः कृष्णः करोति न तदन्यः कश्चिदपि कर्तुं समर्थ इति निश्चित्य सर्वानेवताननादृत्य कृष्णमुवाचेत्यर्थः । आभाष्य भो भो कृष्ण भक्तवत्सलेत्येवं सम्बोध्य ॥२॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः सभाप्राप्त्याद्यनन्तरम् । राज्ञा युधिष्ठिरेण । कार्ये यज्ञरूपे (१) । एकदा कतिपयदिनविश्रामोत्तरं योग्यसमय इत्यर्थः । आसनं नृपोचितासनम् ॥१॥ एतेषां मुन्यादीनाम् । इत्यर्थ इति । अनादरे षष्ठीयमिति ध्येयम् । इदं वक्ष्यमाणम् ॥२॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

एकदेति युग्मकम् । दिनकतिपयविश्रमानन्तरं योग्यं समयं लब्ध्वेत्यर्थः । तुर्भिन्नोपक्रमे समयमेव दर्शयति – सभामध्य इत्यादिना एतदपेक्षयैव भगवानप्येतावन्तं कालं न प्राप्तवान् चकाराद्भ्रातृपुत्रादिभिश्च द्वितीयचकारादन्यैश्च वृद्धैः ॥१॥ बान्धवा मित्राणि तैश्च वृतः तत्रैषां युगपत्समागमो राजस्वभावात् विशेषतः सपरिवारस्यैवागतस्य श्रीभगवतो दर्शनेन नित्याकर्षणात्केषाञ्चित्तन्मन्त्राद्यर्थं राज्ञैवाह्वानाच्च चकाराद्भृत्यादीनाञ्च शृण्वताम् अन्यत्तैः यद्वा आस्थितः वक्ष्यमाणस्तुतियोग्यत्वेन विज्ञप्त्यर्थमासनादवतीर्य्य आ सम्यक् बद्धाञ्जलित्वादिना भूमौ स्थितः सन् शृण्वतां शृण्वत्सु सत्स्वेव तेष्विति तेषामप्यवश्यश्रावयितव्यानां तदनुमोदनेनैवानुमोदनार्थं ह हर्षे ॥२॥

---

[1] बादरायणिरुवाच-गो.प्रे.टी.। [2] समन्वितः-विज.।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तु-शब्दो भिन्नोपक्रमे; एकदेति-विज्ञाप्यस्यार्थस्य श्रीकृष्णस्य चातिगौरवेणावसरमलभमानः कदाचित्तस्मिन् सुसम्पन्ने सतीत्यर्थः । तमेव दर्शयति-सभामध्य इत्यादिना । मुनिभिः श्रीव्यासादिभिः, ब्राह्मणैर्धौम्यादिभिर्नित्यभोज्यमानैर्वान्यै राजभिः श्रीद्रुपदाद्यैः, वैश्यैर्युयुत्सोर्मातुलादिभिः, भ्रातृभिः श्रीभीमादिभिः, चकारान्मातृपुत्रादिभिश्च, आचार्य्यैः श्रीद्रोणादिभिः, श्रीकुलवृद्धैः श्रीभीष्मादिभिः, ज्ञातयः सपिण्डाः, सम्बन्धिनो विवाहादिरम्बन्धवन्तः, सर्व्वेषामप्येषां तदानीं तत्र समागमो यज्ञे मन्त्राद्यर्थश्रीयुधिष्ठिरेणैवाह्वानात्; किंवा सपरिवारस्य श्रीभगवतो दिदृक्षयाकर्षणात्; चकाराद्भृत्यादीनाञ्च शृण्वत्सु सत्स्वेतेषु सर्व्वेष्विति तेषां तत्रानुमोदनार्थम्, किंवा शृण्वतामेषामग्रे मत्प्रतिष्ठार्थमवश्यमेव श्रीभगवता मद्याञ्चा मन्तव्येत्याशयेन; ह हर्षे ॥१-२॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१—२॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथ जरासन्धाघातनात्मकं भगवच्चेष्टितं वक्तुं प्रस्तौति - एवदेति । तृतीयान्तानां वृत्त इत्यनेनान्वयः ॥१॥ एतेषां मुनिप्रभृतीनां शृण्वतां सतामेवाभाष्य सम्बोध्य कृष्णमिति शेषः । इदं वक्ष्यमाणमुवाच ॥२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

राजसूययज्ञार्थाय पाण्डवानां दिशां जयो जरासन्धवधश्च श्रीनारायणप्रसादायत्त इति तन्माहात्म्यत्वेन प्रतिपादयत्यस्मिन्नध्याये तत्रादौ युधिष्ठिरः आगतं श्रीकृष्णं स्वचिकीर्षितं विज्ञापयति - एकदेति ॥१॥ आभाष्य अभिमुखीकृत्य एतेषां सर्वेषां श्रोत्रादीन्द्रियतृप्तिजनकम् इदं वक्ष्यमाणं वचनमुवाच हेत्यनेन कर्तव्यतां सूचयति ॥२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१—५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१—३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१—३॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

द्विसप्ततितमे राज्ञः कार्य्ये दत्तस्वसम्मतिः । भीमेनाघातयत् कृष्णो मागधं प्रार्थ्य मन्त्रतः ॥

आ सम्यक्तया स्थितः शृण्वतामित्यनादरे षष्ठी ॥१-२॥

गूढार्थदीपिनी

एकदेति युग्मम् । एकदा सिंहासनमास्थितः मुन्यादिभिर्वृतः युधिष्ठिरः सर्वेषां शृण्वतां सतां कृष्णमाभाष्य संबोध्य इदं वक्ष्यमाणमुवाचेत्यन्वयः ॥१-२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

भगवान् युधिष्ठिराभिप्रायमवधार्य्य तं कार्यसिद्ध्यर्थं जरासन्धं भीमेनाघातयदिति द्विसप्ततितमे वर्णयति-एतेषां मुन्यादीनां शृण्वताम् आभाष्य हे भक्तमनोरथपूरकेत्यादि सम्बोध्य विभूतिर्देवादीन् ततं क्रतुराजं सम्पादय निवर्तय ॥१-३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ दिक्चतुष्टयजयो जयादिभिश्चतुर्भिस्तत्रापि भीमसेनेन जरासुतमारणं तदनन्तरं क्रत्वारम्भसम्भारसम्पादनयत्नः सर्वोऽप्ययं श्रीवासुदेवप्रसादासादनीय इति प्रतिपाद्यतेऽत्राध्याये । तत्रादौ धर्मः स्वहार्दं हृषीकेशं प्रति विज्ञापयतीत्याह ॥ एकदेति । स मुनिभिर्भ्रातृभिर्ब्राह्मणैर्वैश्यैः क्षत्रियैर्वृतः सभामध्य आस्थितो समन्वितो मनुननाऽऽलोचनरूपमन्त्रेणोतः । पृक् पृथगन्वयो वा ॥१॥ आचार्यैः परिवृतः आचार्यैः परिवृतः सर्वेषामेतेषां शृण्वतां सतामाभाष्याभिमुखीकृत्य कृष्णमिदमुवाच । हेति विनैतन्मम मनःस्वास्थ्यं नेति सूचयति ॥२॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

निरोधः सात्त्विकानां हि सगुणानां निरूपितः । धर्मप्रसङ्गे शुद्धानां तेषां दुःखं निवार्यते ॥
त्रयोविंशे जरासन्धवधः क्लेशहरो महान् । निरूप्यते यतः सर्व सात्त्विकाः सुखिनोऽभवन् ॥
त्रिविधाः सात्त्विकाः प्रोक्ता राजानो यादवास्तथा । पाण्डवाश्च ततस्तेषु द्वयोरिष्टवधः स्फुटः ॥
पाण्डवानामिष्टतायै प्रसङ्गोऽप्यत्र रूप्यते । भक्तानां कर्मिणां चेत्स्यादिष्टं मागधनाशनम् ॥
तदैव नाशनं युक्तं ब्रह्मण्यस्य दयावतः । ब्राह्मणस्याप्याभरणं यज्ञार्थं हि निरूप्यते ।
ब्रह्मण्ये तत्र कोऽमर्षः क्षत्रिये विमुखे हरेः ॥

पूर्वाध्यायान्ते स्वगृहे भगवन्तं सुखेन स्थापितवानित्युक्तं ततो यदर्थं स्थापनं तद्विज्ञापनार्थं प्रसङ्गमाह - एकदात्विति द्वाभ्याम् । साधारणासाधारणसम्बन्धिसहभावभेदात् एकान्ते विज्ञापनमभिमाननिवर्तकं न भवतीति सम्भावनायां सर्वसन्निधानं निरूप्यते एकदा शुभलग्ने तुशब्दः कालान्तरसन्निधानं वारयति आस्थितः उत्थितः धर्मार्थमेव विज्ञापनमिति ज्ञापनमिति ज्ञापयितुमादौ मुनीनां सहभावः अन्येसाधारणा ब्राह्मणास्त्रयो वर्णाः क्रमेण निरूप्यन्ते शूद्रस्तु यज्ञे अनवक्लृप्तः भ्रातरो भीमादयः चकारात् दुर्योदनादयश्च ॥१॥ आचार्याः द्रोणादयः कुलवृद्धाः भीष्मादयः ज्ञातयोऽन्ये गोत्रजाः सम्बन्धिनो विवाह्याः बान्धवा दूरस्थाः सर्वे एव तद्द्वारा स्त्रीणामभ्यनुज्ञा सिद्धेति न कस्यापि परोक्षता सर्वे सावधानाः शृण्वन्त एव स्थिताः एवकारेण व्यासङ्गो वार्यते चकारेणानुद्दिष्टानामपि आभाष्य हे कृष्ण ! स्वामिन् ! इत्युक्त्वा एवमभिमानपरित्यागः आश्चर्ययेति हेत्युक्तम् ॥२॥

सुबोधिनीसारः

शुकोक्तिः । एकस्मिन्समये सभामध्ये मुनिभिर्ब्राह्मणैः । क्षत्रियैर्वैश्यैर्भ्रातृभिर्वृतो युधिष्ठिर आस्थितः ॥१॥ आचार्यादिभिर्वृतः एतेषां शृण्वतां सतामाभाष्य संबोध्य कृष्णमुवाचेदम् ह स्फुटम् ॥२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

द्विसप्ततितमेऽध्याये यज्ञार्थे यज्ञभुग्घरिः ॥ अघातयज्जरासन्धं भीमेनेति निरूप्यते ॥१॥

एकदा तु सभामध्ये राजासनमास्थितो मुन्यादिभिर्वृतश्च युधिष्ठिर एतेषां मुन्यादीनां शृण्वतामेव सतां प्रसन्नः कृष्णो यत्करोति तदन्यः कश्चिदपि कर्तुं न समर्थः इति निश्चयेन तान् सर्वाननादृत्य आभाष्य हे कृष्ण भक्तवत्सलेति सम्बोध्य इदं वक्ष्यमाणमुवाचेति द्वयोरन्वयः ॥१-२॥

अन्वितार्थप्रकाशिका

द्वासप्ततितमे राजसूयकार्ये विनिश्चिते ॥ जरासन्धमहन्भीमः श्लोका अत्राङ्कवार्द्धयः (४९) ॥१॥
उवाच षट्कं (६) पादोनास्त्रिपञ्चाशदनुष्टुभः (५२॥।) ॥७२॥ एकदेति युग्मम् ॥२॥

एकदा तु सभामध्ये राजासनमास्थितो मुन्यादिभिर्वृतश्च युधिष्ठिर एतेषां मुन्यादीनां शृण्वतामेव सतां कृष्णेन तुल्यः कोऽपि कर्तुं न शक्त इति ताननादृत्य आभाष्य हे प्रभो ! इत्यादि सप्रेम सम्बोध्य इदं वक्ष्यमाणमुवाच ॥१-२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

द्विसप्ततितमेऽध्याये कृत्ये नृपतिवेदिते । मागधं दुर्जयं ज्ञात्वा भीमेनानाशायत्प्रभुः ॥१॥

एकदेति आस्थितः आसनमिति शेषः ॥१॥ आभाष्यभीमो कृष्णभक्तवत्सलकरुणानिधे इत्यादिमहासम्बोधनैः श्रीकृष्णं सम्बोध्य ॥२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

द्विसप्ततितमे चाथ कार्ये राज्ञा निवेदिते । मागधं दुर्जयं ज्ञात्वाऽघातयद्भीमतो हरिः ॥१॥

अथ जरासन्धघातनात्मकं भगवच्चेष्टितं वक्तुं प्रस्तौति । एकदेति । आचार्यैरिति च । तृतीयान्तानां वृत इत्यनेनान्वयः।

एकदा कदाचित्, युधिष्ठिरः तु, सभामध्ये मुनिभिः, ब्राह्मणैः, क्षत्रियैः, वैश्यैः, भ्रातृभिश्च, आचार्यैः, कुलवृद्धैः, ज्ञातिसम्बन्धिबान्धवैश्च, वृतः परिवेष्टितः, आस्थितः सन्, एतेषां मुनिप्रभृतीनां, शृण्वतां सताम् एव, आभाष्य सम्बोध्य च, श्रीकृष्णमिति शेषः । इदं वक्ष्यमाणं, ह स्फुटं यथा तथा, उवाच । इति द्वयोरेकान्वयः ॥१-२॥

कृष्णप्रिया

श्रीशुकदेवजीने कहा कि - राजन् परीक्षित् किसी एक सुमंगल दिवस महाराज धर्मराज अनेक मुनिवरों से ब्राह्मणों, क्षत्रियों, वैश्यों, भीमसेन आदि भाइयों, आचार्यों, कुलवृद्धों, ज्ञातिबन्धुओं, सम्बन्धि जनों एवं कुटिम्बियों के साथ राजसभा में बैठे हुए थे । उसी अवसर सब के सन्मुख ही भगवान् श्रीकृष्णचन्द्रजी को सम्बोधित करके यह बात कही ॥१-२॥

युधिष्ठिर उवाच

क्रतुराजेन गोविन्द राजसूयेन पावनीः । यक्ष्ये विभूतीर्भवतस्तत्सम्पादय नः प्रभो ॥३॥
त्वत्पादुके अविरतं परि ये चरन्ति ध्यायन्त्यभद्रन[1]शने शुचयो गृणन्ति ।
विन्दन्ति[2] ते कमलनाभ भवापवर्गमाशासते यदि त आशिष ईश नान्ये ॥४॥
तद्देवदेव भवतश्चरणारविन्दसेवानुभावमिह पश्यतु लोक एषः ।
ये त्वां भजन्ति न [3]भजन्त्युत वोभयेषां निष्ठां प्रदर्शय विभो कुरुसृञ्जयानाम् ॥५॥
न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः ।
[4]संसेवतां सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न विपर्ययोऽत्र ॥६॥

कर्दमक्षमा

अन्वयः—युधिष्ठिर उवाच :- हे प्रभो ! हे गोविन्द ! क्रतुराजेन, राजसूयेन, भवतः, विभूतीः, यक्ष्ये, तत्, नः, सम्पादय ॥३॥ ये, शुचयः, अविरतम्, अभद्रनशने, त्वत्पादुके, परिचरन्ति, च, ये, गृणन्ति, यदि, आशिषः, भवापवर्गम्, आशासते, कमलनाभ, ईश, ते, विन्दन्ति, अन्ये, न ॥४॥ तद् देवदेव, एषः, लोकः, इह, भवतः, चरणारविन्दसेवानुभावम्, पश्यतु, हे विभो, ये, त्वाम्, भजन्ति, उत, वा, न, भजन्ति, उभयेषाम्, कुरुसृञ्जयानाम्, निष्ठां, प्रदर्शय ॥५॥ सर्वात्मनः, समदृशः, स्वसुखानुभूतेः, ब्रह्मणः, तव, स्वपरभेदमतिः, न, स्यात्, त्वाम्, सेवताम्, सुरतरोः, इव, ते, प्रसादः, सेवानुरूपम्, उदयः, अत्र, न, विपर्ययः ॥६॥

श्रीधरस्वामिकृतभावार्थदीपिका

विभूतीरंशान् ॥३॥ एष चक्रवर्तिनां मनोरथः कथं त्वया क्रियत इति चेदत आह-त्वत्पादुके इति । परि ये चरन्तीति यच्छब्दव्यवधानमार्षम् ये परिचरन्ति देहेन ध्यायन्ति मनसा अभद्रस्य नशने नाशके गृणन्ति वाचा ते भवस्यापवर्गं मोक्षं विन्दन्ति यद्याशासते तर्ह्याशिषोऽपि त एव विन्दन्ति नान्ये चक्रवर्तिनोऽपि ॥४॥ भगवतो भक्तपक्षपातमाविष्कारयन्नाह-तद्देवदेवेति । तत्तस्मात्पश्यतु साक्षात् एवं निश्चितेऽपि ये कर्मादिप्रधानाः केचित्कुरुसृञ्जया भगवद्भक्तिं न बहुमन्यन्ते तेषां मोहनिवृत्तये ये त्वां भजन्ति यदि वा न भजन्ति तेषामुभयेषां निष्ठां स्थितिं प्रदर्शय ॥५॥ ननु रागादिरहिते मयि कथमिदं वैषम्यं स्यात्तत्राऽऽह-नेति । स्वः पर इति भेदमतिस्तव न स्यादेव कुतः ब्रह्मणो निरुपाधेः किञ्च सर्वस्याऽऽत्मनोऽतः समदृशः किञ्च स्वसुखानुभूतेः अतो रागाद्यभावादिति भावः तथापि संसेवमानानामेव त्वत्प्रसादो नान्येषाम् तत्रापि सेवानुरूपमुदयः फलं नन्वत्र विपर्ययोऽन्यथा भावः । यथा कल्पद्रुमस्य रागादिराहित्येऽपि सेवकेष्वेव फलजनकत्वं नान्येषु ॥६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः सभाप्राप्त्याद्यनन्तरम् । राज्ञा युधिष्ठिरेण । कार्ये यज्ञरूपे (१) । एकदा कतिपयदिनविश्रामोत्तरं योग्यसमय इत्यर्थः । आसनं नृपोचितासनम् ॥१॥ एतेषां मुन्यादीनाम् । इत्यर्थ इति । अनादरे षष्ठीयमिति ध्येयम् । इदं वक्ष्यमाणम् ॥२॥ पावनीः

---

१. शमने सुधियो-वीर. ; नशने सुधियो.-विज. । २. विन्दन्ति ये-विज. । ३. भजन्त्यपि वो-विज. । ४. संसेवया-विज. ।

त्वद्दर्शनेनात्मनः पावयन्तीति तथा च ता अपि त्वद्दर्शनदापनेन कृतार्थीकर्तुमिति । "तस्मिन्नेव क्रतुवरे भवन्तं वै सुरादयः । दिदृक्षवः समेष्यन्ति राजानश्च यशस्विनः ॥ श्रवणात्कीर्तनाद्ध्यानात्पूयन्तेऽन्तेवसायिनः । तव ब्रह्ममयेशस्य किमुतेक्षाभिमर्शनम् ॥" इत्युद्धवोक्तेः । हे गोविन्देति । निजाशेषैश्वर्यप्रकटनार्थं भुव्यवतीर्णस्य तव भक्तानामस्माकमीदृगिच्छा युक्तैवेति भावः । देवादीनामपि त्वद्विभूतिबुद्ध्यैव यजनादात्मनोऽनन्यपरत्वमेव भरतवद्दर्शितम् । पावनीः त्वद्भक्तिविघ्नादिदोषनिरसनीस्तृप्तत्वात् । 'त्वां सेवतां सुरकृता बहवोऽन्तरायाः' इत्युक्तेः । अंशान् इन्द्रादीन् । "विभूतस्सम्पदैश्वर्योत्पत्त्यंशेषु च भस्मनि इति धरणिः"। । प्रभो इति त्वच्छक्त्यैव राजसूयः सेत्स्यतीति भावः । यद्वा- हे नः पाण्डवानां प्रभो त्वदेकपराणामस्माकं मनोरथः कथं न सेत्स्यतीति भावः ॥३॥ भगवदाक्षेपाशङ्कां वारयति-एष इत्यादिना । परिचरन्ति नित्यं पूजयन्ति । अभद्रं नश्यत आभ्यामित्यभद्रनशने आशासत इच्छन्ति आशिषोऽभिलषितार्थात् त एव पादसेवका एव तव पादुके उपानहावपि किं पुनः साक्षात्त्वच्चरणाब्जद्वयं परिचरन्ति इति कैमुत्यं ज्ञेयमेवमग्रेऽपि ततोऽप्यनायासेन ये कदापि गृणन्ति श्रीकृष्णपादुके एव मम गतिरिति कीर्तयन्तिमात्रं यतस्ते स्वत एवाभद्रनशने अतः शुचयो बहिरन्तर्भक्तिविघातकाभद्ररहितास्ते भक्तिमात्रपुरुषार्था अपि यदि कथञ्चिद्भक्त्युपयुक्तत्वेनाशासते तदाऽपवर्गं संसारध्वंसमाशिषः सर्वाप्राकृतांश्च कामान्विन्दन्ति । "सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा । स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छति ॥" इति स्वयं भगवदुक्तेः । न त्वन्ये "सर्वासामपि सिद्धीनां मूलं त्वच्चरणार्चनम्" इत्यादेः । उभयत्रापि हेतुः-हे कमलनाभ स्वांशेन सर्वाश्रय । हे ईश सर्वेश्वरेति तोषिणीकाराः । अत्र विश्वनाथः-त्वच्चरणसरोजं पश्यतां त्वयाप्यपारकृपयात्मसात्कृतानामस्माकं राजसूये खलु न कोऽप्याग्रहः किं तु त्वामत्रत्या दुष्टान्तःकरणाः केचित्परमेश्वरं न मन्यन्ते नरमेव मत्वा प्रत्युत दोषदर्शिनो निन्दन्त्येतदस्माकं शल्यमतो राजसूयमिषेण ब्रह्मरुद्रादीन्सर्वज्ञान्ब्रह्मर्ष्यादीनपि देवादीनपि चतुर्दशलोकस्थानाहूय काचित्सभा कार्या । तत्र सर्वाग्रिमपूजा तैर्यस्य स्थापयिष्यते स एव परमेश्वर इति साक्षाद्दर्शयित्वा हृच्छल्यं तन्निष्कासनीयमित्येव मदभीप्सितमित्याह-त्वदिति त्रिभिः । अभद्रस्याविद्यापर्यन्तस्य नशनं याभ्यां ते ये ध्यायन्ति यद्याशासते तर्हि त एव विन्दन्ति न त्वन्ये त्वच्चरणानर्चकाः कर्मिप्रभृतयः । किन्तु त्वद्भक्ता नैवाशासत इत्यर्थः । अस्माकं तु त्वच्चरणाश्रितानां त्वां साक्षादेव पश्यतामन्यकामनाभावे कैमुत्यमेवेति भावः ॥४॥ आविष्कारयन् यतो भवच्चरणसेवाफलमनुभवसिद्धमतो लोकोऽपि प्रत्यक्षप्रमाणोत्थमाहात्म्यं दृग्विषयं करोत्विति प्रार्थयन्नित्यर्थः । यद्यस्मादीदृशस्ते सेवानुभावस्तत्तस्माद्धेतोः । एवं निश्चितेऽपि भगवद्भक्तिरैहिकामुष्मिकफलदास्तीत्येवं निर्णीतेऽपि । तेषामभक्तानाम् ॥५॥ भगवानाशङ्कते-नन्विति । ननु कुतस्तर्हि मद्भक्तिमहिमज्ञेन त्वया परिचर्यादिकं हित्वा राजसूयमिष्यते तत्राह-तदिति । यस्मादेवमेव सत्यं तत्तस्मात् हे देवदेव सर्वाराध्यानामप्याराध्य एवं यद्यपि तव परिचर्ययैव सर्वदेवतृप्तिः सिध्यतीति वयं जानीमस्तथापीत्यर्थः । तत्किमित्यत आह - इह सर्वलोककृपामये भवदवतारे एष प्रायो बहिःसम्पत्तिमात्रदर्शनचमत्कारी लोको भवतश्चरणारविन्दसेवानुभावं पश्यतु तदेव दर्शय । ये इति । येऽस्मल्लक्षणाः कुरुसृञ्जयास्त्वां भजन्ति ये उत वा दुर्योधनादयस्त्वां न भजन्ति तेषामुभयेषामपि बहिर्मुखेष्वपि त्वद्भक्तिमहिमप्रदर्शनार्थमेवायमस्माकमुद्यम इति भावः । सेयमानुषङ्गिकी कामना श्रीनारददर्शितपारमेष्ठ्यकामत्वाभिप्रायस्तु तत्सेवोपयोगो नेति सङ्कोचत्वाद्गोपितः । अत्र विश्वनाथः-तत्तस्मात्तादृशसभायां वृत्तायां तैर्ब्रह्मादिभिस्तव परमेश्वरत्वे स्थापिते सति एष भूर्लोकस्थजनः पश्यतु ततश्च कुरुसृञ्जयादीनां मध्ये त्वामीश्वरं नत्वा ये भजन्ति ये वा प्राकृतमानुषं मत्वोत न भजन्ति तेषामुभयेषां निष्ठां सद्गतिमसद्गतिं च तैरुच्यमानां त्वं दर्शय । करणीयेऽस्मिन्राजसूये स्वसम्मतिप्रदानेनेति भावः । सुरतरोरिवेति । तस्य यथायोग्योऽयं भजत्वयोग्योऽयं मा भजत्विति वैषम्यं नास्ति किन्तु सम्यक्सादरं सेवमानमात्राणां सम्बन्धे प्रसाद एव स्यात् । तथा तवेत्यर्थः । तथाप्यत्र भजने तद्वत्सेवानुरूपमेवोदयः फलं न स्यात्किन्त्वधिकोऽपि स्यात्, दैवात्सेवावैगुण्ये विपर्ययः फलाभावोऽपि न स्यात् । तत्र पूर्वं "तुलसीदलमात्रेण जलस्य चुलकेन च । विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सलः ॥" इति विष्णुधर्मोक्तेः । तत्र भक्तेभ्य इत्युक्तत्वाद्भावाख्यभक्तितारतम्येनैव फलतारतम्यमिति भावः । अथोत्तरं त्यक्त्वा स्वधर्ममित्यादिवत्, अत्र च विश्वास एव कारणमिति भावः । अत्र कर्मप्रवाहपतितं सर्वमेव प्रति स्वकर्मणि प्रेरयसि । समदृश इति त्वमेवेश्वरस्तत्तदनुरूपमेव शुभमशुभं वा फलं ददासि न तु क्वापि ते पक्षपात इति भावः । किञ्च तैः सुखिभिर्दुःखिभिर्वा तव न किमपि कृत्यमित्याह-स्वसुखानुभूतेः । ननु तर्हि मम वात्सल्यौदार्यादयो गुणाः किंविषयकास्तत्राह-संसेवतां त्वां सम्यक्सेवमानेषु तेषु प्रसादो वात्सल्यं यत एव कर्मबन्धनकर्तृकात्मपर्यन्तप्रदानलक्षणमौदार्यं च ते भवेत् । ननु तर्ह्यायातं ममापि वैषम्यं तत्राह-सुरतरोरिवेति । गुणदोषादिकमविचार्यतस्तस्य स्वाश्रितमात्रे यथा प्रसादस्तथा तवापि । यः कोऽपि सेवतां तत्रैव

प्रसादस्तत्रापि सेवानुरूपमेवोदयः । सेवातारतम्येनैव प्रसादफलस्याप्युदयतारतम्यमेव नात्र वैषम्यं विपर्ययोऽन्यपथाभावस्तस्मादवैषम्येऽपि तव भक्तेषु वात्सल्यवशादेव पक्षपाते सिद्धे तेषामनुकूलप्रतिकूलेषु तवाप्यानुकूल्यप्रातिकूल्ये आयात एवेति भावः । तत्राक्षेपे हेतुमाशङ्कते-कुत इति । न केवलं निरुपाधिरेव त्वमित्याह-किञ्चेति । अतः सर्वात्मत्वात् । अन्यदाह-स्वसुखस्य स्वरूपानन्दस्यानुभूतिरनुभवः पूर्णानन्दोऽहमिति यस्य तथा तस्य । अतः स्वानन्दपूर्णत्वात् । इति भाव इति-पूर्णानन्दस्वरूपस्य रागद्वेषादयो जीवधर्मा नोदयन्त इत्याशयः । नन्वसुराणां दुःखप्रदत्वं सुराणां सुखप्रदत्वं मम प्रसिद्धमिति चेदाह-तथापीति । यद्यपि त्वं सम एव तथापि तत्रापि प्रसादेऽपि ॥६॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

क्रतुराजेन दुष्करत्वमपेक्ष्यत्वञ्च सूचितं भवतो विभूतीरिति देवादीनामपि तद्विभूतिबुद्ध्यैव यजनादात्मनोऽनन्यपरत्वं द्योतितं दैन्येन श्रीनारदवत्पारमेष्ठ्य कामत्वं निर्दिश्य तद्यजने हेत्वन्तरमाह-पावनीः त्वद्भक्तिविघ्नादिदोषनिरसनीः एतच्चातृप्तत्वादेव हे गोविन्देति निजाशेषैश्वर्य्यप्रकटनार्थं भुव्यवतीर्णस्य तव भक्तानामस्माकं तादृशेच्छा युक्तेति भावः । यक्ष्ये इत्येकत्वं यजने तस्यैकस्यैव प्राधान्यात् न इति बहुत्वन्तु भ्रात्रादिमुन्यादिसङ्ग्रहेण तेषामपि सर्वेषां तद्यज्ञापेक्षकत्वात् तच्च तव शक्त्यैव सुसम्पाद्यमित्याशयेन सम्बोधयति प्रभो हे सर्वशक्तियक्तेति अत एव सिद्धवन्निर्देशमेवाकरवं यक्ष्य इतीति भावः । यद्वा नोऽस्माकं पाण्डवानां त्वदेकगतीनां प्रभो स्वामिन् अतो युक्तमेवैतदिति भावः ॥३॥ तव पादुके उपानहौ अपि किं पुनः साक्षात्त्वत्पादाब्जद्वयम् अविरतं ये परिचरन्ति एवमग्रेऽपि कैमुत्यमेवाभिप्रेयते ततोऽप्यनायासेन ये वा कदाचिदपि ध्यायन्ति ततोऽप्यनायासेन ये वा कदाचिदपि गृणन्ति श्रीकृष्णपादुके एव मम गतिरित्यादि कीर्तयन्ति मात्रं यतस्ते स्वत एवाभद्रनशने अतः शुचयो बहिरन्तर्भक्तिविघातका भद्ररहिताः ते भक्तिमात्रपुरुषार्था अपि यदि कथञ्चिद्भक्त्युपयुक्तत्वं न आशासते तदापवर्गं संसारध्वंसम् आशिषः सर्वान् प्राकृतानप्राकृतांश्च कामान् विन्दन्ति-

"सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा । स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छति" ॥ इति

स्वयं भगवद्वाक्यात् न त्वन्ये "सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम्" इत्यादेः उभयत्रापि हेतुः हे कमलनाभ ! हे स्वांशेन सर्वलोकाश्रयेति हे ईश ! सर्वेश्वरेति च यद्वा आशिषो विन्दन्तीत्यत्रैवाविरतमिति योज्यम् ॥४॥ ननु, कुतस्तर्हि मद्भक्तिमहिमज्ञेन त्वया परिचर्य्यादिकं हित्वा राजसूयमिष्यते ? तत्राह-तदिति । यस्मादेवमेव सत्यं तत्तस्मात् हे देवदेव ! सर्वाराध्यगणानामप्याराध्य एवं यद्यपि त्वत्परिचर्य्ययैव सर्वदेवतृप्तिः सिद्ध्यतीति वयं जानीमस्तथापीत्यर्थः । तत्किमित्यतः आह-इह सर्वलोककृपामये भवदवतारे एष प्रायो बहिः सम्पत्तिमात्रदर्शनचमत्कारी लोको भवतश्चरणारविन्दसेवानुभावं पश्यतु तदेव दर्शयति - ये इति । येऽस्मल्लक्षणाः कुरुसृञ्जयास्त्वां भजन्ति य उत वा ये च दुर्य्योधनादयस्त्वां न भजन्ति तेषामुभयेषां निष्ठां प्रदर्शय बहिर्मुखेष्वपि त्वद्भक्तिमहिमप्रदर्शनार्थमेवायमस्माकमुद्यम इति भावः । हे विभो ! सर्वमपि कर्तुं समर्थेति किमुतैतावदिति भावः । सेयमानुषङ्गिकी कामना श्रीनारददर्शितपारमेष्ठ्यकामत्वाभिप्रायस्तु तत्सेवोपयोग्येनेति सङ्कोचाद्गोपितः ॥५॥ सुरतरोरिवेति तैर्व्याख्यातम् । यद्वा तस्य यथायोग्योऽयं भजतु अयोग्योऽयं मा भजत्विति वैषम्यं नास्ति किन्तु सम्यक् सादरं सेवमानमात्राणां सम्बन्धे प्रसाद एव स्यात् तथा तवेत्यर्थः । तथाप्यत्र तव भजने तद्वत् सेवानुरूपमेवोदयः फलं न स्यात् किन्त्वधिकोऽपि स्यात् दैवात्सेवावैगुण्येऽपि विपर्य्ययः फलाभावोऽपि न स्यात् तत्र पूर्वं -

"तुलसीदलमात्रेण जलस्य चुलुकेन च । विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सलः" ॥

इति श्रीविष्णुधर्मवचनात् अत्र भक्तेभ्य इत्युक्तत्वाद्भावाख्यभक्तितारतम्येनैव फलतारतम्यमिति भावः । अथोत्तरं "त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्" इत्यादिवत् अत्र विश्वास एव कारणमिति भावः ॥६॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

क्रतुराजेनेति दुष्करत्वमपेक्ष्यत्वञ्च सूचितम् । भवतो विभूतीरिति-देवादीनामपि तद्विभूतिबुद्ध्यैव यजनादात्मनोऽनन्यपरत्वं द्योतितम् । यक्ष्ये यष्टुमिच्छामीत्यर्थः । कुतः ? पावनीस्त्वदभक्तिविघ्नादिदोषनिरसनीः, एतच्चातृप्तत्वादेव, हे गोविन्देति

निजाशेषैश्वर्य्यप्रकटनार्थं भुव्यवतीर्णस्य तव भक्तानामस्माकं तादृशेहोपपत्तेरिति । यक्ष्य इत्येकत्वं यजने तस्यैकस्यैव प्राधान्यात्, 'नः' इति च बहुत्वं मुन्यादिसंग्रहेण, तेषामपि सर्व्वेषां तद्यज्ञापेक्षकत्वात्; तच्च तव शक्त्यैव सुसम्पाद्यमित्याशयेन सम्बोधयति-प्रभो ! हे सर्व्वशक्तियुक्तेति । यद्वा, नोऽस्माकं त्वदेकगतीनां पाण्डवानां प्रभो ! स्वामिन् ! अतो युक्तमेवैतदिति भावः ॥३॥ तव पादुके उपानहावपि, किं पुनः साक्षात् त्वत्पादाब्जद्वयम् (भा. १-८-३९) 'त्वत्पदैरङ्किता भाति स्वलक्षणविलक्षितैः' इति प्रथमस्कन्धोक्तश्रीकुन्तीवाक्यानुसारेण श्रीधरण्यनुग्रहार्थम्, तत्रापि पादुकयोरधारणेन, तयोरभावे बोध्यमानेऽपि तदुक्तिर्भक्तमहाराजोपचारवर्गमध्येऽर्पणेन; यद्वा, दैन्यभरेण, किम्वा प्रियजनानां केषाञ्चिदाग्रहेण कदाचित् स्वीकारात्; यद्वा, परिच्छदवर्गमध्ये स्वतस्तयोर्विद्यमानत्वादविरतं परिचर्यादित्रयं कुर्व्वन्तीति स्वदेहादित्रयसाफल्यार्थं सदा तत्र तत्र सल्लोकानां किम्वा रसोदयेन भक्तानां स्वत एव प्रवृत्तेः; यद्वा, अविरतमभद्रनशने सदा समूलाशेषदुःखनाशके शृण्वन्ति, वेति विकल्पोऽनुसन्धेयः, त्रयाणामेकेनैव सर्व्वप्राप्तेः । शुचय इति सङ्कर्म्मादिभिः शुद्धचित्तानामेव तत्र प्रवृत्तेः, इति सर्व्वधर्म्माणां तत्साधनत्वमभिप्रेतम् । यद्वा, जगत्पावना अग्निवद्दीप्तिमन्तो वा सन्तो विन्दन्ति, परिचर्य्यादीनां यथोत्तरमनायाससाध्यत्वे न्यूनत्वं कैमुतिकन्यायेनैव व्याख्या । तत्र च प्राणायामादिपूर्व्वकाद्ध्यानदुच्चारणस्य न्यूनत्वं व्यक्तमेव, भवस्य विधिदुःखमयस्य संसारस्यापवर्गम्; यद्वा, भवोऽभ्युदयस्तद्रूपमपवर्गं मोक्षं श्रीवैकुण्ठलोकमित्यर्थः । हे कमलनाभेति-सर्व्वलोकमयत्वस्य श्रीब्रह्मयोनिपद्मोद्भवनामित्वेन तस्य सर्व्वेश्वरत्वमनन्ताद्भुतशक्तिमत्त्वञ्च सूचितम् । अयं परिचरणादौ भवापवर्गलाभेऽपि हेतुर्ज्ञेयः; यद्वा, कमलाकारा नाभिर्यस्येति सौन्दर्य्यं परमेश्वरलक्षणं चोक्तम् । यदीति भक्तिरसिकत्वेन न वाञ्छन्त्येव, यदि कदापि केनापि हेतुनाशासत इत्यर्थः । आशिषः कामान् अभीष्टार्थान् वा विन्दन्ति; हे ईशेति तासामपि त्वदेकाधीनत्वात्, किम्वा त्वत्परिचर्य्याद्यभावेन चक्रवर्तिनामप्यनाथतया तत्र शक्त्यभावादिति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, भवापवर्गं मोक्षम्, आशिषश्च तत्तत्कामस्वसेवकाद्यपेक्षया भवत्परिचर्य्योपयोगित्वेन वा; यद्वा, आशासते अन्ये परिचर्य्यादिहीना योगयागादिनापि न विन्दन्तीत्यर्थः । अन्यत् समानम् ॥४॥ ननु कुतस्तर्हि मद्भक्तिरसिकेन त्वया परिचर्य्यादिकं हित्वा राजसूयमिष्यते ? तत्राह-तदिति । तस्मात्तद्भक्तैकप्राप्यसर्व्वार्थत्वाद्धेतोः, इह मर्त्यलोके मद्गृहे वा, एष विविधवावासनः किंवा जगति वर्तमानः सर्व्वोऽपि; यद्वा, अधुनातन इत्यर्थः । हे देवानां जगत्पूज्यानां श्रीब्रह्मादीनामपि देवेति सेवानुभावस्यासाधारण्यमभिप्रेतम्, उभयेषां भक्त्यभक्तिभ्यां द्विविधानां कुरुसृञ्जयानां निष्ठाम्, भक्ताः सिद्धसर्व्वार्थाः सदा सुखिनः, अभक्ताश्च विपरीता इत्येतल्लक्षणां लोके प्रकर्षेण सर्व्वेषां प्रत्यक्षत्वादिना दर्शय; तत्र च त्वं सर्व्वथा समर्थतर एवेत्याशयेनाह-विभो हे परमेश्वरेति । ततश्च कर्म्मादिपरा अपि सर्व्वे त्वद्भक्तिमेवाश्रयिष्यन्तीति, त्वद्भक्तिविस्तारणार्थमेव राजसूयं चिकीर्षामीति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, कर्म्मणि षष्ठी, उभयेषां जनानां निष्ठां कुरून् सृञ्जयांश्च प्रति प्रदर्शय, तथापि भावः स एव पर्य्यवस्यति । साक्षात्तथानुक्तिश्च विनयात्; यद्वा, प्रायस्तेषां त्वदभक्ततया तत्प्रदर्शनेनानन्दोत्पत्तेरिति भावः । यद्वा, हे कुर्व्वादीनां प्रभो ! त्वदीयानां सर्व्वेषामेषां प्रीत्यर्थमिति भावः । अन्यत् समानम् ॥५॥ अतो वाञ्छित-वाञ्छातीत-फलप्रदानेन वयमनुग्राह्याः, जरासन्धादयश्च निग्राह्या इति गूढोऽभिप्रायः । सेवानुरूपमुदय इति बहुलया सेवया बहुल उदयः, स्वल्पया च स्वल्प इत्यवैषम्यमेव सेवायां सर्व्वेषां सम्यक् प्रवृत्त्यर्थमुक्तम् । अत एवोक्तं सम्यक् सेवतामिति । एवं सेवाया माहात्म्यमेवाभिप्रेतम् । अन्यत्तैर्व्याख्यातम् । यद्वा, न च वक्तव्यं जगदीश्वरस्य मम सर्व्वत्र साम्येन केषुचिदनुग्रहः केष्वपि निग्रहो न सम्भवेदित्याह-नेति । ब्रह्मणः सर्व्वकारणस्यापि सर्व्वस्यात्मनोऽन्तर्यामिनोऽपि, अतः समदृशोऽपि, स्वो भक्तः परोऽभक्त इति भेदमतिर्नास्ति किम् ? - काक्वा, अस्त्येवेत्यर्थः । कुतः स्वेभ्यो भक्तेभ्य एव सुखानुभूतिर्यस्य तस्य भक्त-वत्सलत्वादिति भावः । अतः संसेव्यमानानाम्, सप्तम्यां षष्ठी, तेष्वेव ते प्रसादः स्यात्, संशब्दः सेवास्वभावेनैव तत्र सम्यक् प्रवृत्त्या स्वरूपनिर्देशमात्रे, न तु सेवासम्यक्त्वापेक्षया । तदेव दर्शयति-सुरतरोरिव सेवानुरूपमुदयो न भवति, किन्तु विपर्य्ययः स्यात्, स्वल्पसेवयापि बह्वर्थलाभात्; इति परमेश्वरत्वेन तस्य सुरतरोः सकाशादाधिक्यमुक्तम्, तदेव हि युक्तमिति ॥६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

विभूतीः देवान् ॥३॥ आशिषो नाशासते यदि अपवर्गं विन्दन्ति अन्ये अपवर्गात् बहिर्भूताः ॥४-५॥ स्वपरभेदमतिस्तव न स्यात्सर्वसुहृत्त्वादित्यर्थः ॥६-२४॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथ जरासन्धाघातनात्मकं भगवच्चेष्टितं वक्तुं प्रस्तौति - एवदेति । तृतीयान्तानां वृत्त इत्यनेनान्वयः ॥१॥ एतेषां मुनिप्रभृतीनां शृण्वतां सतामेवाभाष्य सम्बोध्य कृष्णमिति शेषः । इदं वक्ष्यमाणमुवाच ॥२॥ तदेवाह - क्रतुराजेनेत्यादि चतुर्भिः । पावनीस्तव विभूतीः विभूतिभूतान् देवान् यक्ष्ये आराधयिष्यामि तन्मदमभिप्रेतं यजनं नोऽस्माकं सम्पादय निवर्तय ॥३॥ नन्वयं चक्रवर्तिनां मनोरथः कथं त्वया क्रियते इत्यत आह - त्वत्पादुके इति । अभद्रं शमयतीति तथा ते तव पादुके ये जनाः परिचरन्ति देहेन ध्यायन्ति मनसा गृणन्ति वाचा ते शुचयः परिशुद्धान्तःकरणाः भवस्यापवर्गं नाशकं मोक्ष इति यावत् विन्दन्ति हे ईश ! हे कमलनाभ ! ते यद्याशिषः कामाः नाशंसेत तर्हि अपि विन्दन्ति अन्ये परिचर्यादिरहिताश्चक्रवर्तिनो न विन्दन्तीत्यर्थः । अतो भक्तपक्षपातिनस्तव चरणारविन्दं समाश्रितानां नस्सर्वमनोरथपूर्तिस्सुकरैवेति भावः ॥४॥ एतदेव निदर्शयेत्याह - तदिति । तत्तस्मात् देवानामपि देव ! एष लोकस्तव चरणारविन्दसेवाप्रभावं पश्यतु भवतश्चरणारविन्दसेवाप्रभावं दृष्ट्वा त्वत्पादुके इत्यादिनोक्तमर्थं निश्चिनोत्वित्यर्थः । तन्निश्चेतुं भक्तानाञ्च स्थितिं लोकस्य दर्शयेत्याह - ये इति । कुरूणां सृञ्जयानाञ्च मध्ये येऽस्मदादयस्त्वां भजन्ति उत वा ये त्रा दुर्योधनादयस्त्वां न भजन्ति तेषामुभयेषां निष्ठां स्थितिं प्रदर्शयाभ्युदयतदभावौ दर्शयेत्यर्थः ॥५॥ ननु, वैषम्यनैर्घृण्यादिरहितं मां किमिति विषयकृत्ये चोदयसीत्यत आह - नेति । ब्रह्मणः हेयप्रत्यनीककल्याणगुणपरिपूर्णस्य तव स्वः पर इति च भेदमतिर्न स्यात् यद्यपि नास्त्येव तत्र हेतुत्वेन विशिनष्टि - सर्वात्मनः सर्वेषामन्तरात्मनः स्वशरीरेष्वेव केषुचिदवयवेषु स्वीयमतिः केषुचित्परकीयमतिर्न दृष्टेति भावः । अत एव समदृशः समा दृक् स्वशरीरेषु सर्वेषु आत्मीयत्वबुद्धिर्यस्य तस्य किञ्च वैषम्यनिमित्तं रागद्वेषादिकं तदपि तव नास्तीत्यभिप्रयन् विशिनष्टि - स्वसुखानुभूतेः इति । स्वसुखस्य स्वासाधारणापरिच्छिन्नानन्दस्यानुभूतिरनुभवो यस्य तस्य केवलं स्वानन्दजुषो न तु रागादिजुष इत्यर्थः । तथापि संसेवनानानामेव विषयभूतानां तव प्रसादोऽनुग्रहः तत्रापि सेवानुरूपमेव उदयः फलं यथा सुरतरोः कल्पद्रुमस्य संसेवमानेष्वेव फलप्रदत्वं न ह्येतावतात्र कल्पतरौ विपर्ययो वैषम्यमस्ति तद्वत् ॥६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

राजसूययज्ञार्थाय पाण्डवानां दिशां जयो जरासन्धवधश्च श्रीनारायणप्रसादायत्त इति तन्माहात्म्यत्वेन प्रतिपादयत्यस्मिन्नध्याये तत्रादौ युधिष्ठिरः आगतं श्रीकृष्णं स्वचिकीर्षितं विज्ञापयति - एकदेति ॥१॥ आभाष्य अभिमुखीकृत्य एतेषां सर्वेषां श्रोत्रादीन्द्रियतृप्तिजनकम् इदं वक्ष्यमाणं वचनमुवाच हेत्यनेन कर्तव्यतां सूचयति ॥२॥ पावनीः शुद्धिकरीः भवतः विभूतीः सन्निधानविशेषस्थानेन्द्रादिदेवताः यष्टुकामः ॥३॥ तत्कार्यं भवदनुग्रहेणैतद्दुःसाधनमित्याह-त्वत्पादुकेति । अभद्रनशने अशुभविध्वंसनसमर्थे परिचरन्ति नित्यं पूजयन्ति "व्यवहिताश्च" (१-४-८२) इति छन्दसिव्यवधानेऽप्युपसर्गाणां क्रियायोगः सिद्धः प्रद्यान्वस्यमहतो महनीत्यादौ अनेन भागवतस्य वेदतुल्यत्वेनाध्येयत्वादौ तात्पर्यं दर्शयति - भवापवर्गं संसारत्यागं विन्दन्ति ननु तर्हि नानेनाभीष्टसिद्धिरिति तत्राह आशासत इति यदि ते सेवकाः आशासते आशिष ऐहिकसिद्धीः कामयन्ते तर्हि ता अपि विन्दन्ति अन्ये अनुपासका नोभयं विन्दन्तीति भयं विन्दन्तीति शेषः ॥४॥ यतो भवच्चरणसेवाफलमनुभवसिद्धमतो लोकोऽपि प्रत्यक्षप्रमाणोऽस्य माहात्म्यं दृग्विषयं करोत्वित्याह - तदिति । अपि कृष्णत्वमपि भजदभजतामुभयेषामपि जयलक्षणोत्कर्षं व्यवस्थापयेत्याह - ये त्वामिति । "निष्ठोत्कर्षे व्यवस्थायां नाशेऽन्ते व्रतयाञ्चयोः" इति यादवः । "अनुभावः प्रभावे स्यात्" इति ॥५॥ सर्वसमस्य हरेर्वैषम्यं मयापाद्यत इति बिभ्यदिव परिहरति - नेति । ब्रह्मणः पूर्णस्य सर्वात्मनः सर्वस्वामिनः ननु परापूर्वेषां सङ्ख्यावृणक्तीत्यादि कथमित्यत्राह - समदृश इति । यथावस्तुदर्शिनः स्वरूपसुखस्यानुभूतिरनुभवः पूर्णानन्दोऽहमिति यस्य स तथा तस्य अयमपि स्वपरबुद्ध्यभावे हेतुः नन्वसुराणां दुःखोदयः सुराणां सुखोदय इत्ययं विशेषः कस्मादत्राह - संसेवयेति । उदयतीत्युदयः अतोऽत्र जगति विपर्ययो न विषमो नोदेति ॥६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

॥१—५॥ एष प्रायो बहिस्सम्पत्तिदर्शनमात्रचमत्कारी बहिरङ्गादिलोकसुरतरोर्यथायोग्योऽयं मा भजत्विति वैषम्यं नास्ति । किन्तु संसेव्यमानानामेव सम्बन्धे प्रसाद एव स्यात् तथा तवेत्यर्थः तथाप्यत्र तव भजनसेवानुरूपमेवोदयः फलं न स्यात् किन्तु

अधिकोऽपि स्यात् दैवात् सेवावैगुण्ये विपर्यय: फलाभावोऽपि न स्यादित्यर्थ: । "तुलसीदलमात्रेण" इत्यादे: "त्यक्त्वा स्वधर्मम्" इत्यादेश्च ॥६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भ:

॥१—५॥ त्वत्पादुके इत्यादि । अस्तु तावत्तव पादयो: परिचरणं तव पादुकसेवैव किं न करोतीति भाव: । अस्तु दूरे त्वत्पादयो: परिचरणं ध्यानमेव किं न करोतीत्याह - ध्यायन्तीति । अस्तु ध्यानं कीर्तनमपि तयो: किं न करोतीत्याह - गृणन्तीति । भवापवर्गं संसारमोक्षं ननु भवतामपि भवापवर्ग एव भावी किमन्येनेत्याह - आशासत इत्यादि । भवापवर्गस्त्वावश्यक एव किन्तु अन्यदप्याशिष आशास्ते तदा त एव विन्दन्ति नान्ये अतोऽस्माकमिदानीमिदमेवेप्सितं सम्पाद्यतामिति भाव: ॥४॥ ननु किमनया परमभक्तानां व: कर्मवासनया सत्यं तव भक्तानामभक्तानां च मर्य्यादां सर्वे पश्यन्तु लोके च त्वन्महिमा चायमेव प्रकटो भवत्विति हेतोरेव न तु फलान्तरकाम्ययेत्याह - तद्देवदेवेत्यादि । देवानां ब्रह्मरुद्रादीनामपि देव ! न भजन्त्युतेति दुर्य्योधनादीन् प्रत्याक्षेप: ॥५॥ ननु मे स्वपरभेदो नास्ति भजदभजतोरेवाहं सम: किमनेन मद्वैषम्यप्रकटनेनेत्याह - न ब्रह्मण इत्यादि । तव ब्रह्मणो मूर्तानन्दस्य बृहत: न परभेदमतिर्न स्यादेव सत्यं यत: सर्वात्मन: अत: समदृश: यत: स्वसुखानुभूते: स्वानन्दविलासविधायकस्य किन्तु सुरतरोरिव प्रसाद: सुरतरुर्यथा भजत एव कामान् पूरयति नाभजत: भजनमात्रं प्रति कामदत्वात्तस्य न वैषम्यं यदि यदि भजतां मध्ये कुत्रापि प्रसीदति कुत्रापि न तदैव वैषम्यापत्ते: तद्वत्तवापि भजनमात्रं प्रतिकामदत्वान्न वैषम्यं भजत: किल द्विजान् वा श्वपचान् वा सर्वथा अनुगृह्णत: कुतो वैषम्यम् अत: सेवानुरूप एव सेवकानामुदयो नात्र विपर्ययव्यभिचार: ॥६-४८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१—३॥

त्वत्पादुके-अस्तु तावत्तव पादयो: परिचरणं पादुकासेवैव किं करोमि, भवस्यापवर्गस्त्यागो भवादपवर्गो मुक्ति: प्रेमाकारा वृत्तिर्वा, तं विन्दन्ति । भद्रं भो भवापवर्ग एव मवतां भावी, किमन्येन ? तत्राह-आशिषोऽपीप्सितान्यपि त एव विन्दन्ति, नान्ये यदि आशासते । अतोऽस्माकमिदानीमिदमेवेप्सितं कारयितव्यम् ॥४॥ ननु किमनया परमभक्तानां व: कर्मवासनया ? सत्यम्, तव भक्तानामभक्तानाञ्च तत्त्वं सर्वे पश्यन्त्विति लोके त्वन्महिम-व्यक्तिहेतोरेवेत्याह-तद्देवदेवेत्यादि । न भजन्त्यत्रेति दुर्योधनादीन् प्रत्याक्षेप: ॥५॥ स्वमहिमपरभेदो नास्ति, भजदभजतोरेव समोऽहमिति चेत्तत्राह-न ब्रह्मण इति । ते तव ब्रह्मण: परमानन्दानुभवस्य महिम्न: स्वपरभेदमतिर्न स्यात् । ब्रह्म विशिनष्टि-सर्वात्मन इत्यादि । अपि तु ते तव सर्वेश्वरस्य भक्तानुकम्पकस्य प्रसाद: सम्यक् सेवापराणामेवेत्याह-संसेवतामिति सम्यक्सेवमानेष्वेवेति यावत् । सुरतरोरिव सुरतरुं ये सेवन्ते तक्षामेवाभिषलाषमसौ ददाति, तेन तस्य किं वैषम्यम् सेव्यमानो हि यदि योग्यायैव ददाति, नायोग्याय, तदा विषम्यापत्ति:, तद्वत्तवापि, एव तु भक्तानुकम्पिताया महिमा ॥६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

विभूतिरिति । देवादीनापि त्वद्विभूतिबुद्ध्यैव यक्ष्ये इत्यादिभरतवत् स्वस्य तदनन्यपरत्वं द्योतितम् । पावनी: त्वामालोक्यात्मन: पावयन्तीरिति त्वद्दर्शनया ता अपि कृतार्थीकर्तुमिति भाव: । तद्यजनम् ॥३॥ त्वच्चरणसरोजं पश्यतां त्वयाप्यपारकृपया आत्मसात्कृतानामस्माकं राजसूये खलु न कोऽप्याग्रह: किन्तु त्वामत्रत्या: दृष्टान्त:करणा: केचित् परमेश्वरं न मन्यन्ते नरमेव मत्वा प्रत्युत दोषदर्शिनो निन्दन्त्येतदेवास्माकं हृच्छल्यमतो राजसूयमिषेण ब्रह्मरुद्रादीन् सर्वज्ञान् ब्रह्मर्ष्यादीनपि देवादीनपि चतुर्दशलोकस्थानाहूय काचित् सभा कर्तव्या तत्र सर्वाग्रिमपूजा तैर्यस्य व्यवस्थापयिष्यते स एव परमेश्वर इति साक्षाद्दर्शयित्वा हृच्छल्यं तन्निष्कासनीयमित्येवमदभीप्सितमित्याह-त्वदिति त्रिभि: । परि ये चरन्तीति यच्छब्दव्यवधानमार्षम् अभद्रस्याविद्यापर्यन्तस्यापि नशनं नाशो याभ्यां ते । ये वा ध्यायन्ति यद्याशासते तर्हि त एव विन्दन्ति न त्वन्ये त्वच्चरणानर्च्चका: सर्वेऽऽपि कर्म्मिप्रभृतय: । किन्तु त्वद्भक्ता नैववाशासते इत्यर्थ: । अस्माकन्तु त्वच्चरणाश्रितानां त्वां साक्षादेव पश्यतामन्यकामनाभावे कैमुत्यमेवेति भाव: ॥४॥ तत्तस्मात्तादृशसभायां वृत्तायां तैर्ब्रह्मवादिभिस्तव परमेश्वरत्वे व्यवस्थापिते सति एष भूलोकस्थजन: पश्यतु ततश्च कुरुसृञ्जयादीनां मध्ये त्वामीश्वरं मत्वा ये भजन्ति ये वा प्राकृतमानुषम्मत्वा उत न भजन्ति तेषामुभयेषां निष्ठ सद्गतिमधोगतिं च तैरुच्यमानां त्वं दर्शय करणीयेऽस्मिन् राजसूये स्वसम्मतिप्रदानेनेति भाव: ॥५॥ ननु, किं ममापि मत्सरताऽसि

यदनुकूलानामुत्कर्षं प्रतिकूलानामपकर्षं दर्शयामीति तत्राह-नेति । स्वपर इति भेदमतिस्तव न स्यादेव कुतो ब्रह्मणो निरुपाधेः किञ्च सर्वस्यात्मनः त्वमेवान्तर्यामी भूत्वा अनादिकर्म्मप्रवाहपतितं सर्वमेव प्रति स्वकर्मणि प्रेरयसि समदृश इति त्वमेवेश्वरस्तत्तदनुरूपमेव शुभमशुभं वा फलं ददासि न तु क्वापि ते पक्षपात इति भावः किञ्च तैः सुखिभिः दुःखिभिर्वा तव न किमपि कृत्यमित्याह-स्वसुखानुभूतेः ननु तर्हि मद्वात्सल्यौदार्यादयो गुणाः किं विषयकास्तत्राह-संसेवतां त्वां सम्यक् सेवमानेषु तेषु प्रसादो वात्सल्यं यत एव कर्मबन्धकर्तनपूर्वकात्मपर्यन्तप्रदानलक्षणमौदार्य्यञ्च ते भवेत् ननु तर्ह्यायातं ममापि वैषम्यं तत्राह सुरतरोरिवेति । गुणदोषादिकमविचारयतस्तस्य स्वाश्रितमात्रे यथा प्रसादस्तथा तवापि यः कोऽपि सेवतां तत्रैव प्रसादस्तत्रापि सेवानुरूपमेव उदयः सेवातारतम्येनैव प्रसादफलस्याप्युदयतारतम्यमित्यवैषम्यमेव नात्र विपर्य्ययोऽन्यथाभावस्तस्मादवैषम्योऽपि तव स्वभक्तेषु वात्सल्यवशादेव पक्षपाते सिद्धे तेषामनुकूलप्रतिकूलेषु तवाप्यानुकूल्यप्रातिकूल्ये आयाते एवेति भावः ॥६॥

गूढार्थदीपिनी

विभूतीः अंशान् इन्द्रादीन् यक्ष्ये पूजयिष्यामि नोऽस्माकं तत् अभीष्टम् ॥३॥ त्वत्पादुके परिचरन्ति सेवन्ते । छन्दसि व्यवहिताश्चेति नियमात् यच्छब्दव्यवधानं न दोषाय । अभद्रनशने अविद्यानिवर्तके ये मनसा ध्यायन्ति वचसा गृणन्ति ते एव भवस्य अपवर्गं मोक्षं विन्दन्ति यदि ते आशिषः आशासते भोगान् इच्छन्ति तर्हि ता अपि विन्दन्ति नान्ये चक्रवर्तिनोऽपि । शुचयः श्रद्धालवः ॥४॥ तत् तस्मात् एषः लोकः प्राणिसमूहः ते चरणसेवानुभावं साक्षात् पश्यतु । ये सृञ्जयाः पाण्डवाः अस्मदादयः त्वां भजन्ति । कुरवो दुर्योधनादयस्तु न भजन्ति तेषामुभयेषां निष्ठां बलम् उत्कर्षापकर्षौ लोकान् प्रदर्शय ॥५॥ यद्यपि ब्रह्मणः तव स्वः पर इति भेदमतिर्नास्ति तथापि त्वां संसेवतां पुंसां कल्पवृक्षस्येव ते प्रसादो भवति तदनुरूपः उदयः फलं च भवति अत्र विपर्ययः अन्यथाभावः वैषम्यादिदोषो नास्ति । समदृशः इत्यत्र हेतुः सर्वात्मनः । स्वसुखेति रागाद्यभावे हेतुः ॥६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

त्वदाराधनेन पुरुषार्थसिद्धिः त्वद्बहिर्मुखत्वेन सर्वपुरुषार्थाभावो यद्यप्यस्ति तथापि त्वद्विभूतियजनात्मकेन राजसूयेन कर्मणा स्वभक्तानामस्माकमात्मन आदरणीयत्वं स्वाभक्तानां शिशुपालदुर्योधनादीनां निरादरणीयत्वं लोकः पश्यत्वित्याह-द्वाभ्याम्-त्वत्पादुके इति । अभद्रस्यानिष्टमात्रस्य निरसने नाशके परि ये चरन्ति यच्छब्दस्य व्यवधानमार्षम् ये परिचरन्ति शरीरेण ध्यायन्ति मनसा गृणन्ति वाचा ते भवस्य संसारस्य अपवर्गं नाशं विन्दन्ति संसारान्मुक्ता भवन्तीत्यर्थः । यद्याशिष आशासते तर्हि ताः अपि विन्दन्ति अन्ये त्वद्विमुखाः भवापवर्गम् आशिषश्च न विन्दन्ति अत्राशीःशब्देन धर्मार्थकामाः गृह्यन्ते

"या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति नरो नारायणाश्रयः ॥"

इत्यादिवाक्यान्यत्रानुसन्धेयानि ॥४॥ तर्हि राजसूयसम्पादनप्रार्थनायाः किं प्रयोजनमत आह तत्तस्माद्राजसूयसम्पादनाद्धेतोः चरणारविन्दसेवानुभावं त्वदादरणीयत्वम् इह सम्पादनीये राजसूये लोकः साक्षात्पश्यतु एतदेव दृढीकर्तुं प्रार्थयते कुरुसृञ्जयानां मध्ये येऽस्मदादयस्त्वां भजन्ति उव तव ये शिशुपालदुर्योधनादयो न भजन्ति तेषामुभयेषां निष्ठाम् आदरणीयतां निरादरणीयतां च दर्शय लोकान् प्रतीति शेषः ॥५॥ एवमुभयस्थितिप्रदर्शकेऽपि वैषम्यं नेत्याह-नेति । स्व आदरणीयः परो निरादरणीयः इति भेदमतिः ब्रह्मणः सर्वकारणकारणस्य सर्वेषामन्तर्यामिणः समदृशः अविषमदृष्टेः स्वमुखानुभूतेः स्वानन्दपूर्णस्य न भवति यद्याप तथापि संसेवतां संसेवमानानामेव त्वत्प्रसादः न पराङ्मुखानां तत्रापि सेवानुरूपमुदयः फलं न त्वत्र विपर्ययः सुरतरोः संसेवतामेव प्रसादो यथा भवति नैतावता तस्य वैषम्यदोषगन्धवातस्पर्शप्रसङ्गोऽपि तद्वदित्यर्थः ॥६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे गोविन्द राजसूयेन क्रतुराजेन भवतः पावनीर्विभूतीस्तद्यजनं नः सम्पादय साधय । न मम शक्तिरिति वदेति वक्ति ॥ प्रभ्विति ॥३॥ राम आरामं गते सति या भरताराधिता सा साथितमैहिकपारलौकिकप्रज्यसाम्राज्याभूत्किल दूरदूरवर्तिनि विश्वामित्रसत्रसाधकसाक्षात्तदात्मके त्वयि यशोदास्तनन्धय ममाशक्यं न किञ्चिदिति श्लोकत्रिकेण धर्मः कर्मानुष्ठेयमुक्त्वा तत्स्थितिं शंसति ॥ त्वत्पादुकेति । ये जनास्त्वत्पादुकेऽभद्रनशनेऽभद्रस्य नशनं नाशो याभ्यां ते । छन्दसि परे व्यवहिताश्चेत्यादे-

न्याविध्यत्प्रघान्वस्येत्यादाविव परीत्यस्य व्यवहितस्यापि चरन्तीत्याख्यातेनान्वयः । ततश्च क्रियायोगादुपसर्गसंज्ञा सिध्यति । परिचरन्ति कायकीं सेवां कुर्वन्ति मनसा ध्यायन्ति वचसा गृणन्ति त आदौ सुधियो विषयवैचित्र्याद्बहुवचनम् । ज्ञानानि विन्दन्ति । अनन्तरं भवापवर्गत्यागं विन्दन्तिप्राप्नुवन्ति । हे कमलनाभ अच्प्रत्यये त्यजिति योगविभागादच् । ये च अद्याशिष ऐहिकीः सम्पद आशासते काङ्क्षन्ति ते ता अपि विन्दन्ति । ते चान्ये पूर्वोदीरितेतरे इति वा । ये च ज्ञाने सम्पन्ने ये ज्ञानिन इतौ यद्यत आशिषो नाशासते तत ईशानानि । बहुवचनमाद्यर्थे । यदि ए अशब्दवाच्ये त्वयि आशा आस तर्हि स्वधामनियमनादीनि त एकत्र परत्र च विन्दन्तीति वा काङ्क्षति चेत्त्वामेवैत्यप्याह ॥ यदि आसेति । आ आशिषोऽपेक्षणीया येषां त आशिषः साभिलाषाः पुरुषा अन्ये त एतेन येषां ते त्वद्विषयिणी आशा आसावर्तत । आसते असत आशिष आशास आन्ये त्वच्चेष्ट्ये सद्वर्गे नेति वेति योजयन्ति । अविरतमवौ सूर्ये रतम् । ध्येयः सदा सवितृमण्डलमर्तीत्यादेः । अवयः शैलमेषार्का इत्यमरः । य आशिष आशासते त ईशानन्ये । ईप्रदमीशनं नियमनमीशनं तस्मादन्ये । सम्पत्करनियमनविषयसदन्य इत्यर्थः । हे ईश रमानियामक । यदितो येन यच्छब्दवाच्येन त्वया । इतोऽयं त्वामितो भक्तस्त्वान्ये नियम्ये आसते । आसते विनियामकमिति तलवकारटिप्पणे गत्यर्थस्य रूपमित्युक्तेरत्र प्राचिवृत्त्याऽस्माभिरुक्तेश्चानुसन्धेयम् । तस्याशिषत्वादितरस्याशात्पदार्थस्याशामेति स ईशनेन त्वन्नियमनेनैव चेष्ट्यसङ्घ एवासत इत्यावृत्त्याऽन्वयो वा । यथा बाह्ये तैवान्तस्ततो यदिति चोच्यत इति बृहदारण्यकभाष्योक्तेः ॥४॥ यच्चरणारविन्दसम्बन्धात्पादुकार्थसम्पादिकाऽऽसीत्तस्य साक्षाद्भगवतश्चरणारविन्दसेवयाऽनुभावं सामर्थ्यं प्रभावं वा । एष लोक इह पश्यतु । अनितरसुशकक्रतुकरणेन पश्यतु साक्षात्करोतु । मन्त्रिदर्शनेनेदं दर्शयेति सामान्यमुखेन वक्ति ॥ य इति । ये त्वां भजन्ति ये च न भजन्तीत्युभयेषां निष्ठां स्थितिं कुरुसृञ्जयानां प्रदर्शय । भजका उत्कर्षभाजोऽभजका अपकर्षभाज इति व्यवस्थां प्रदर्शय सर्वसम्भावितमिति द्योतयितुं विभाविति ॥५॥ तर्हि मम विषमता त्वयापादीत्यत आह ॥ नेति । ब्रह्मणस्तव स्वपरभेदमतिरस्वे स्व इति परस्मिन्न पर इत्यन्यथामतिर्न स्यात् । तत्र निमित्तमाह । सर्वात्मनः सर्वस्वामिनः समदृशस्तत्तद्योग्यतासाम्येन दृग्यस्य स्वसुखानुभूतेः स्वरूपसुखानुभववतः । अनेन प्राप्यप्रयोजनाभावादेव न तव वैषम्यमिति । दृश्यते किल सतां शुभमसतामशुभमित्यत आह ॥ संसेवयेति । तथा ते प्रसादः सुरतरोर्यथा सेवानुरूपस्तदनुगुण उदय उन्नतिः । उदयः पूर्वपर्वते चोन्नतावपीति विश्वः । तथा ते प्रसादः सेवानुरूपः । अत्र विपर्ययो वैषम्यघटको विपर्यासः स बाधिका फलमनधिकरूपमित्यादिरूपो नेति न विषमस्त्वमिति तत्त्वम् । समदृशः । नञ् योग्यतयाऽनिमान इत्यादिवत्प्रागन्वेति । असन्दृशः समीचीनज्ञानरहितस्य सु असुखानुभूतेर्दुःखानुभवयोग्यस्यात्र परत्र च उदये न ऊनो हीनो विपर्ययस्तमआद्यनर्थरूपो भवतीत्यसदसत्फलोक्तिपरतयाऽपि योजयन्ति । यः सु अपरोऽनिन्न इति भेदमतिरन्यथामतिः स्वपरः स्वाभिन्न इति भेदो भेदवानिति मतिर्यस्य सोऽभेददर्शनाद्याति । तथा भेदाभेदस्य दर्शनादित्याद्युक्तेः । तस्य समदृशस्त्वत्समोऽस्तीति समविषयिणी दृग्यस्य तस्य । पूर्ववदुर्वरितम् । समदृशः पण्डितस्य यस्य स्वः स्वतन्त्रपरस्तस्माद्विलक्षणोऽहमस्वतन्त्र इति भेदमतिस्तस्य न ब्रह्मणः । पूर्णस्य सर्वात्मनः स्वसुखानुभूतेस्तव सेवानुरूप उदयः सुरतरोः प्रसाद इव भवति नात्र विपर्यय इति वा ॥६॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

विज्ञापनामाह – क्रतुराजेनेति । गोविन्देति सम्बोधनमिन्द्र एव यष्टव्य इति मर्यादास्थापनार्थं यथा राजा पुरुषाणां तथा राजसूयो यज्ञानामिति क्रतुराजत्वं यद्यपि नारदेन त्वां यक्ष्यतीत्युक्तं तथापि सर्वरूपस्य परिच्छेदः समायातीति भगवदंशानामेव विभूतिरूपाणां देवानां यागं निरूपयति – पावनीस्तव विभूतीः यक्ष्य इति । पावनीरित्यादिदैविकीः दैत्यसम्बन्धव्यावृत्त्यर्थं वा तत्तस्मात् तद्वा यजनं नोऽस्माकं सम्पादय सामर्थ्याय सम्बोधनम् ॥३॥ ननु, भगवद्भक्ता न किञ्चन वाञ्छन्ति पुंसां किलैकान्तधियामिति शास्त्रानुसारेणापि भगवदीयानां कार्यसिद्धिः तत्कथं प्रार्थनेनेत्याशङ्क्याह – त्वत्पादुक इति । यद्यपि कायवाङ्मनोभिस्त्वां प्रपन्नाः नैतादृशं वाञ्छन्ति तथापि यदि वाञ्छन्ति तदा प्राप्नुवन्ति इति सिद्धान्तस्तेषां सहजं फलं निरूपयन्ति त्वत्पादुके इति ये त्वत्पादुके भक्तिमार्गानुसारेण परिचरन्ति कायिको व्यापारो निरूपितः ध्यायन्तीति मानसः ननु चित्तमस्थिरं योगव्यतिरेकेण कथं ध्यानसिद्धिः इत्याशङ्कां वारयितुं विशेषणमाह – अभद्रनशने इति । पादपवशादेव चाञ्चल्यं ध्यानार्थमुद्यतस्य प्रथमस्मरणेन पापनाशे व्यापारनिवृत्तिः सर्वपापक्षयः शुद्धिश्च तेषां प्रसङ्गात् उक्ताः अतस्ते भवस्य संसारस्यापवर्गं समाप्ति विन्दन्ति ननु कर्मज्ञानाभावे कथं भगवद्भजनमात्रेण प्रमाणाभ्यनुज्ञाभावात् भवापवर्ग इत्याशङ्क्य सम्बोधनमाह – कमलनाभेति ।

भुवनकोशात्मकं कमलं नाभौ यस्य एतत्प्रवर्तित एव सर्वोऽपि संसार इति एतत्परिचर्यायां न प्रमाणाभ्यनुज्ञेति भावः । ते यदि बहिर्मुखाः सन्तः बालपुत्रवदाशिषः आशासते लौकिकी वैदिकीर्वा तदा त एव विन्दन्ति अन्ये तु कर्मादिभिः हुतमेव प्राप्नुवन्ति नाक्लृप्तमिति भावः । एकान्तधियामित्यत्रान्तर्निष्ठां एवं गृहीता इति न विरोधः प्रथमप्रवृत्तस्यैव धनादिहरणम् अन्यथा सर्वसेव्यता न स्यात् ॥४॥ ततो लोके ये स्वोत्कर्षं वाञ्छन्ति भक्ताः सन्तः भक्तिमार्गोत्कर्षार्थं वा तेषामानुगुण्यं भवता कर्तव्यमित्याह - तद्देवदेवेति । तथापि कस्यचिद्वधं सर्वात्मा न करिष्यतीत्याशङ्क्य सम्बोधनं हे देवदेवेति । अनेन दैत्यवधोऽभिप्रेतमिति सूचितं तत्तस्मात् कारणात् अस्योत्कर्षस्य बहिर्मुखविषयत्वादयुक्तकथनत्वमाशङ्क्य लोकप्रतीत्यर्थमाह - भवतश्चरणारविन्दसेवानुभावमिह लोकः पश्यत्विति । ननु राज्यवद्राजसूयसिद्धावपि कथमेतद्भक्तस्यैव नान्यस्येति ज्ञायते तत्राह - ये त्वां भजन्तीति । ये पाण्डवादयः त्वां भजन्ति ये वा शिशुपालदुर्योधनजरासन्धादयः त्वां न भजन्ति तेषामुभयेषां निष्ठां फलपर्यवसानं त्वमेव दर्शय मारणमानभङ्गवञ्चितत्वादयः विमुखेषु कीर्तिधनधर्मादयः सेवकेष्विति तान् सर्वान् सङ्क्षेपतो निर्दिशति - कुरुसृञ्जयानामिति । सृञ्जयवंशः द्रुपदस्य अतस्तत्पक्षपातेन पुष्टा इति वा ख्यातिं परित्यज्य पाण्डवा सृञ्जयाः ख्यातिमेव मन्यन्ते तेन कौरवाः धार्तराष्ट्राः विमुखाः सृञ्जयाः पाण्डवाः भक्ताः इति अनेन स्वस्य मात्सर्य्याभिनिवेशः सूचितः ॥५॥ नन्वेतदल्पदेवान परिच्छिन्नमतीनामेव कार्यं न मे इत्याशङ्क्य सत्यं परं भक्तानुरोधेन कर्तव्यमिति प्रार्थयन्नाह - न ब्रह्मण इति । भगवान् स्वार्थं चेत् कुर्यात् तदैवं न कुर्यात् अन्यार्थत्वेत्वन्येच्छानुसारेणैव कर्तव्यम् अन्यथा भगवतः पुरुषार्थसाधकत्वं न स्यात् प्थमपक्षमङ्गीकृत्याह - तव ब्रह्मणः सर्वसमस्य यद्यपि स्वपरभेदमतिर्नास्ति तथापि तव स्यादेव भक्तानुरोधादिति न भवेदिति विध्यर्थता वा स्वपरभेदमतिस्त्रिविधानां भवति येदेहात्मभावेन परिच्छिन्नाः ततो भोगसिध्यर्थं विषयेषु विषमदृष्टयः ततो विषयभोक्तारः भगवांस्तु नैवम्विध इति विशेषणत्रयं सर्वात्मनः समदृशः स्वसुखानुभूतेरिति अन्यार्थत्वे तु नन्वेतादृशस्यापि विषमकार्यकर्तृत्वं सदृष्टान्तमाह - संसेवतामिति । सुरतरुः स्वभावत एव तथातया भगवानपि भगवद्धर्माभिव्यक्तिरेव सर्वत्रेति स धर्म्मोऽस्मदर्थे प्रकटीकर्तव्य इति भावः धर्मिणि तु दोषो न भविष्यति धर्मानुरोधे अतः सेवानुरूपमुदयोस्तु अतोऽत्र धर्मिसम्बन्धाभावान्न विपर्ययः ॥६॥

सुबोधिनीसारः

हे गोविन्द क्रतुराजेन राजसूयेन पावनीः शुध्दिकर्त्रीर्भवतस्तव विभूतीर्देवादीनहं यक्ष्यामि तत् नोऽस्माकं त्वं संसाध हे प्रभो ॥३॥ त्वत्पादसेवनात्सर्वं सुलभमित्याह । अविरतं निरन्तरं तव पादुके ये परिचन्ति सेवन्ते छन्दसि व्यवहिताश्चेति कर्तृप्रक्षेपो नासङ्गतो मध्ये ध्यायन्ति अभद्रस्य पापस्य नशने नाशार्थं शुचयः पूतात्मानो गृणन्ति भजन्ति । हे कमलनाभ ते यदि आशिषः कामान् आशासते वाञ्छन्ति भवापवर्गं मोक्षं वा इच्छन्ति तर्हि विन्दन्ति प्राप्नुवन्ति तत्त्वत्तः हे ईशा नान्ये ॥४॥ तत्तस्मात् हे देवदेव इह लोके भवतस्तव चरणारविंदयोः पादपद्मयोः सेवाया अनुभावं प्रभावं लोकः पश्यतु एष इदानीं वा ये त्वां भजन्ति ये न भजन्ति उतापि वा उभयेषां कुरुसृञ्जयानां निष्ठां स्थितिं त्वं प्रदर्शय हे विभो ॥५॥ सर्वस्या त्मनः तुल्यदृष्टेः स्वसुखस्यानुभूतिर्यस्य तस्य ब्रह्मणस्तव स्वः पर इति भेदबुद्धिर्नास्ति तथापि संसेवतां भक्तानां सुरतरोः कल्पवृक्षस्येव ते प्रसादः स्यात् । वैषम्याभावमाह सेवानुसारी उदयः फलं न त्वत्र विपरीतता ॥६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'त्वत्सहाय्येनैव सेत्स्यति, नान्यथा' इत्याशयेन सम्बोधयति-गोविन्देति, हे प्रभो ! इति । क्रतुराजेन यागश्रेष्ठेन राजसूयेन तव विभूतिभूतान् देवान् अहं यक्ष्ये आराधयिष्यामि । नोऽस्माकं तदभिप्रेतं यजनं सम्पादय निर्वर्तय । 'तदाराधने किं फलम्' इत्यपेक्षायां 'सर्वपापनिवृत्त्या विशुद्धिरेव' इत्याशयेनाह-पावनीरिति । ननु 'एष चक्रवर्तिनां मनोरथस्त्वया कथं क्रियते' इति चेत्तत्राह-त्वत्पादुके इति । परि ये चरन्तीति यच्छब्दव्यवधानमार्षम् । ये जनास्त्वत्पादुके अविरतं निरन्तरं परिचरन्ति देहेन सेवन्ते, मनसा ध्यायन्ति, वचसा गृहन्ति त्वत्प्रभावं कीर्तयन्ति, त एव शुचयः परिशुद्धान्तःकरणाः सन्तो भवस्यापवर्गं समाप्तिलक्षणं मोक्षं विन्दन्ति । ते यदि आशिषः विषयान् आशासते वाञ्छन्ति तदा ता अपि विन्दन्ति । अन्ये परिचर्यादिरहितास्तु चक्रवर्तिनोऽपि न विन्दन्तीत्यन्वयः । तत्र हेतुमाह-अभद्रनशनेति । अभद्रस्य चतुर्विधफलप्रतिबन्धलक्षणपापस्य नशने नाशके इत्यर्थः । 'कथमेवं मच्चरणपादुकाप्रभाव' इत्याकाङ्क्षायां 'ईश्वरत्वात्' इति सूचयन् सम्बोधयति-ईशेति । ईशत्वे सर्वकारणत्वं हेतुं सूचयन् पुनः सम्बोधयति-त्रिभुवनकोशात्मकं कमलं नाभौ यस्येति ॥३-४॥ यस्मात्त्वद्भक्तानामेव मनोरथाः सफलाः नान्येषां तत्तस्मात्

हे देवदेव ब्रह्मादिनियामक अत एव हे विभो सर्वकरणे समर्थ ! कुरुसृञ्जयानां मध्ये ये त्वां भजन्ति उत अथवा ये च त्वां न भजन्ति तेषामुभयेषां निष्ठां स्थितिं फलम् अभ्युदयतदभावौ प्रदर्शय । ननु 'मम भक्ता न किमपि वाञ्छन्ति, तव तु कथं यज्ञादिविषयको मनोरथ' इत्याशङ्क्याह-भवत इति । मम विषयभोगाभिलाषाभावेऽपि इह संसारे एष लोकः प्राणिसमूहः भवतश्चरणारविन्दसेवायाः प्रभावं फलं पश्यत्वित्यभिलाषोऽस्तीत्यर्थः । ननु एवं सति मम वैषम्यादिदोषः स्यात् इत्याशङ्क्याह-नेति । यद्यपि स्व-पर इति भेदमतिस्तव न स्यात् नास्ति तथापि संसेवतां त्वां सम्यक् सेवमानानामेव त्वत्प्रसादो भवति, नान्येषाम् । अत्र एवं सत्यपि तव विपर्ययो वैषम्यनैर्घृण्यादिदोषो नास्ति । तत्र हेतुमाह-सेवेति । यतः सेवानुरूपमेवोदयः फलं भवतीत्यर्थः । तत्र दृष्टान्तमाह-सुरतरोरिवेति । यथा कल्पद्रुमस्य समत्वेऽपि सेवकेष्वेव फलजनकत्वं नान्येषां तथापि न वैषम्यं, तथैव तवापीत्यर्थः । भगवतः भेदबुद्ध्यभावे हेतुमाह-समदृश इति । सर्वत्र सममात्मानमेव पश्यत इत्यर्थः । तत्र हेतुमाह-सर्वात्मनः । एवं सति विकारित्वं स्यात् इत्याशङ्क्याह-स्वसुखानुभूतेरिति । स्वरूपात्मकपरमानन्दमनुभवत इत्यर्थः । ननु एवम्भूतं तु वेदान्तेषु परं ब्रह्म प्रसिद्धम् इत्याशङ्क्य तदेव सत्यम् इत्याह-ब्रह्मण इति ॥५-६॥

अन्वितार्थप्रकाशिका

क्रत्विति ॥ हे गोविन्द ! क्रतुराजेन राजसूयेन पावनीः पापापहा भवतः विभूतीः अंशान् देवान् अहं यक्ष्ये आराधयिष्यामि । नोऽस्माकं तदभिप्रेतं यजनं सम्पादय निर्वतय इति ॥३॥ त्वदिति ॥ हे कमलनाभ ! हे ईश ! ये जनाः अभद्रस्य नशनं याभ्यां ते पापनाशिके त्वत्पादुके उपानहौ किं पुनः साक्षात्पादौ अविरतं निरन्तरं परिचरन्ति देहेन सेवन्ते । परीत्यस्य व्यवहिताश्चेति यच्छब्दव्यवधानं छान्दसम् । मनसा ध्यायन्ति वचसा गृणन्ति त एव शुचयः परिशुद्धान्तःकरणाः सन्तो भवस्यापवर्गं समाप्तिलक्षणं मोक्षं विन्दन्ति । ते यदि आशिषः विषयान् आशासते वाञ्छन्ति तदा ता अपि विन्दन्ति नान्ये । चक्रवर्तिनोऽपि अतः त्वत्पादुकासेविनो मम राजसूयो न दुष्करः ॥४॥ तदीति ॥ हे देववेव ! हे विभो ! इह संसारे एष लोकः प्राणिसमूहः भवतश्चरणारविन्दसेवायाः अनुभावं फलं पश्यतु तथा कुरुसृञ्जयानां मध्ये ये त्वां भजन्ति उत अथवा ये च कर्मप्रधानाः अथवा दुर्योधनाद्याः त्वां न भजन्ति तेषामुभयेषां निष्ठां स्थितिं फलम् अभ्युदयतदभावौ प्रदर्शय ॥५॥ नेति ॥ यद्यपि ब्रह्मणः निरुपाधेः सर्वस्यात्मनः समदृशः स्वसुखानुभूतेः रागाद्यभावेन आत्मानन्दानुभवरूपस्य तव स्वः पर इति भेदमतिर्न स्यात् नास्ति तथापि संसेवतां त्वां सम्यक् सेवमानानामेव । शता आर्षः । त्वत्प्रसादो भवति नान्येषाम् । अत्र एवं सत्यपि तव विपर्ययो वैषम्यनैर्घृण्यादिदोषो नास्ति । यतः सेवानुरूपमेवोदयः फलं भवति । यथा सुरतरोः कल्पद्रुमस्य गुणदोषादिकमविचारयतः अयं भजत्वयं मा भजत्विति वैषम्यरहितस्य तस्य समत्वेऽपि सेवकेष्वेव फलजनकत्वं नान्येषां तथापि न वैषम्यं गण्यते तथैव तवापीत्यर्थः । यद्वा । कल्पद्रुमसाम्येऽपि तत्र सेवानुरूपमेवोदयस्त्वत्प्रसादे तु तथा न किन्त्वधिकमपि सेवावैगुण्येऽपि विपर्ययो नास्ति धावन्निमील्य वा नेत्रे इत्याद्युक्तेः ॥६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विभूतीर्विभूतिभूतान् देवान् यक्ष्ये पूजयिष्यामि ॥३॥ ननु महतो राजन्यानजित्वा कथं यक्ष्ये इति चेत्तत्राह त्वदिति ॥ अभद्रनशने अमङ्गलध्वंसके त्वत्पादुके अविरतं सदा ये परिचरन्ति चित्तेन ध्यायन्ति ॥ व्यवहिताश्चेति छान्दसपाणिनिसूत्रानुरोधात् यच्छब्दव्यवधानेऽप्युपसर्गप्रयोगः वचनेन गृहन्ति स्तुवन्ति ते जनाः शुचयः शुद्धाः सन्तः भवापवर्गं विन्दन्ति लभन्ते यदि आशिषः सन्मनोरथान् आशासते वाञ्छन्ति ॥ तर्हि ता अपि त एव जनाः विन्दन्ति हे ईश ॥ अन्ये त्वदुपासकभिन्नाः न विन्दन्ति ॥ सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनमित्युक्तेः ॥४॥ त्वं भक्तपक्षं दर्शयेत्याह तदिति तत्तस्मात् एष लोकः इह प्रत्यक्षस्य भवतः चरणारविन्दसेवानुभावम् ॥ पश्यतु कुरुसृञ्जयानां कुरुसृञ्जयदेशस्थानां जनानां भक्तस्थितिज्ञानाय उभयेषां भक्ताभक्तानां निष्ठां स्थितिं प्रदर्शय ॥५॥ एवं सत्यपि समदृशि त्वयि वैषम्यं न स्यादित्याह नेति ब्रह्मणः अति महतः अत एव सर्वेषाम् आत्मनः अन्तर्यामिणः सर्वेभ्यो यथाकर्मफलप्रदानेन समदृशः स्वसुखानुभूतेः स्वसुखज्ञानपरिपूर्णस्य तव स्वः अयं स्वकीयः परः अयं परकीय इति भेदमतिः भेदबुद्धिर्न स्यात् ननु तर्हि कथं भक्तपक्षपातित्वमिति चेत्तत्राह संसेवतामिति । सुरतरोः कल्पवृक्षस्य समत्वेऽपि ते संसेवतां सेवमानानां जनानां सेवाया अनुरूपं योग्यं यथा तथा उदय इव समृद्धिर्यथा स्यात् तथा तव भक्तानां ते प्रसादः स्यादेव । अत्र विपर्ययो नास्ति ॥६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह क्रतुराजेनेत्यादिचतुर्भिः ॥ क्रतुराजेनेति । हे प्रभो, हे गोविन्द, क्रतुराजेन क्रतुश्रेष्ठेन राजसूयेन, पावनीः भवतस्तव, विभूतीर्विभूतिभूतान् देवान्, यक्ष्ये आराधयिष्यामि । तन्मदभिप्रेतं यजनं, नोऽस्माकं, सम्पादय निवर्तय ॥३॥ नन्वयं चक्रवर्तिनां मनोरथः त्वया कथं क्रियते इत्यत आह । त्वत्पादुक इति ॥ हे कमलनाभ, हे ईश, अभद्रं शमयत इत्यभद्रशमने, क्वचिदभद्रशमने इत्यपि पाठस्तत्त्वेऽप्येक एवार्थः । त्वत्पादुके, ये जनाः, अविरतं परि चरन्ति देहेन सेवन्ते, ध्यायन्ति मनसा चिन्तयन्ति, गृणन्ति वाचोच्चारयन्ति महिमोक्तिपूर्वं स्तुवन्तीत्यर्थः । शुचयः पवित्रान्तःकरणाः , ते भवापवर्गं मोक्षं, विन्दन्ति । यदि ते, आशिषः कामान्, आशासते वाञ्छन्ति, तर्हि ताः अपि, विन्दन्ति । अन्ये त्वत्परिचर्यादिरहिताश्चक्रवर्तिनः सन्तोऽपि, न विन्दन्तीत्यर्थः ॥४॥ तदिति । तत्तस्माद्धेतोः, हे देवदेव, इह लोके, भवतस्तव, चरणारविन्दसेवानुभावं, त्वच्चरणारविन्दसेवाप्रभावमित्यर्थः । पश्यतु त्वत्पादुक इत्यादिनोक्तमर्थं निश्चिनोत्वित्यर्थः । एतन्निश्चेतुं भक्तानामभक्तानां च स्थितिं लोकस्य दर्शयेत्याह । ये इति । कुरुसृञ्जयानां च मध्ये इत्यर्थः । ये अस्मदादयः, त्वां भजन्ति, उत वा, ये दुर्योधनादयः, त्वां न भजन्ति, तेषामुभयेषां, हे विभो, निष्ठां स्थितिं, प्रदर्शय । अभ्युदयतवभावौ सम्प्रदर्शयेत्यर्थः ॥५॥ ननु वैषम्यनैर्घृण्यादिरहितं मां किमिति विषमकार्ये चोदयसीत्यत आह । नेति । ब्रह्मणः प्राकृतगुणप्रत्यनीककल्याणगाुणगणपरिपूर्णस्य, सर्वात्मनः सर्वान्तरात्मनः, समदृशः सर्वेषु चिदचिदात्मकस्वशरीरेष्वात्मीयताबुद्धिमतः, स्वसुखस्य स्वासाधारणापरिच्छिन्नानन्दस्यानुभूतिरनुभवो यस्य तस्य । केवलं स्वानन्दजुषो न तु रागादिजुष इत्यर्थः । तव, स्वपरभेदमतिः, न स्यात् । अनेन वैषम्यनिमित्तं रागद्वेषादिकं तव नास्तीति सूचितम् । तथापि, संसेवतां संसेवमानानाम् एव, ते तव, प्रसादः, उदयः फलमपि, सेवनुरूपमेव । कथमिव । सुरतरोः, इव । यथा कल्पद्रुमस्य संसेवमानेष्वेव फलप्रदत्वम्, अत्र विपर्ययः न । एतावता कल्पतरौ वैषम्यं नास्ति, तद्वत्त्वत्सेवानुरूपैव सेवकस्य फलसिद्धिरिति भावः ॥६॥

कृष्णप्रिया

श्रीधर्मराज युधिष्ठिरजी ने निवदन किया की - हे गोविन्द ! श्रीराजसूय क्रतुराज के माध्यम से आपका और आपके परम पुनीत दिव्य स्वरूपों का समर्चन करना चाहता हूँ । हे नाथ ! आपश्री अनुकम्पा करके मेरे इस मनोरथ को परिपूर्ण करें ॥३॥ हे पद्मनाभ ! भगवन् ! आपके चरणपंकजों की पादुकाएँ समग्र अमंगलों का विनाश करने वाली हैं । जो भक्तजन उनका सेवन स्तवन करते हैं वास्तविक में वे ही पुण्यात्मा हैं । वे जन्म-मरण के बन्धन से मुकक्त हो जाते हैं । यदि वे लौकिक सुखों की कामना करें, तो उन्हें उनकी भी प्राप्ति हो जाती है । लेकिन चरणारविन्द की प्राप्ति नहीं ग्रहण करते । उन्हें मुक्ति तो मिलती नहीं लेकिन भौतिक भोग भी मिलते नहीं ॥४॥ तब हे देवाधिदेव ! मेरी अभिलाषा है कि इस संसारीजन भी आपके चरणारविन्दों की सेवा का सामर्थ्य जाने । हे कृपानिधान ! कुरुवंशज एवं सृंजय वंशज नरेशों में जो जो लोग आपके श्रीचरणों का सेवन करते हैं और नहीं करते हैं उनका आप जगत् को बताने की कृपा करें ॥५॥ हे नाथ ! आप तो परब्रह्म ही हो । यह वस्तु स्पष्ट है की जो भक्तजन आप की सेवा करते हैं उनकी भावनानुसार फल मिलता है - जैसे कल्पतरु की सेवा करने वाले को फल प्राप्त होता है । सेवक को फल में जो फलभेद होता है वह तो भावना-भेद और क्रिया-भेद के भेद से ही है ॥६॥

श्रीभगवानुवाच

सम्यक् व्यवसितं राजन्भवता शत्रुकर्शण [1]। कल्याणी येन ते कीर्तिर्लोकाननु [2]भविष्यति ॥७॥
ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो । सर्वेषामपि भूतानामीप्सितः क्रतुराडयम् ॥८॥
[3]विजित्य नृपतीन्सर्वान्कृत्वा च जगतीं वशे । सम्भृत्य सर्वसम्भारानाहरस्व महाक्रतुम् ॥९॥
एते ते भ्रातरो राजन्लोकपालांशसम्भवाः । [4]जितोऽस्म्यात्मवता तेऽहं दुर्जयो योऽकृतात्मभिः ॥१०॥

१.शत्रुकर्शन-श्रीधरं. वंशी वीर. विज. ; शत्रुकर्शण-विश्व. । २. चरिष्यति-वीर. । ३. निजित्य-वीर.। ४. वशेस्मि तव ताताहं ।

कर्दमक्षमा

श्रीभगवानुवाच :- राजन्, शत्रुकर्शण, भवता, सम्यक्, व्यवसितम्, येन, ते, राजन्, कीर्तिः, लोकान्, कल्याणी, अनुभविष्यति ॥७॥ हे प्रभो ! ऋषीणाम्, पितृदेवानाम्, च, सुहृदाम्, अपि, नः, सर्वेषाम्, भूतानाम्, अयम्, क्रतुराड्, ईप्सितः ॥८॥ सर्वान्, नृपतीन्, विजित्य, च, जगतीम्, वशे, कृत्वा, सर्वसम्भारान्, सम्भृत्य, महाक्रतुम्, आहरस्व ॥९॥ राजन् ! ते, एते, भ्रातरः, लोकपालांशसम्भवाः, यः, अकृतात्मभिः, दुर्जेयः, ते, अहम्, आत्मवता, जितः, अस्मि ॥१०॥

श्रीधरस्वामिकृता भावार्थदीपिका

सत्यं मद्भक्तानामेव कैवल्यादि नान्येषामित्यनुमोदमान आह-सम्यगिति। शत्रुकर्शनेति सम्बोधयन् सर्वराजविजयशक्तिं सञ्चारयति अनुभविष्यति द्रक्ष्यति सर्वलोकव्याप्तो भविष्यतीत्यर्थः ॥७-८॥ किमत्र मयान्येन वा सम्पादनीयं तव तु सुकर एव राजसूय इत्याह-विजित्येति । जगतीं सर्वां पृथिवीम् सम्भारान् यज्ञोपस्करान् सम्भृत्य सम्पाद्याऽऽहरस्व अनुतिष्ठेत्यर्थः ॥९॥ ननु नृपतिविजयादि कथं शक्यं स्यादत आह-एत इति । किञ्च आत्मवता जितेन्द्रियेण ते त्वया अहञ्च जितोऽस्मि वशीकृतोऽस्मि अकृतात्मभिरजितेन्द्रियैः ॥१०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नृपोक्तमङ्गीकुर्वन्नाह-सत्यमित्यादि। येन व्यवसितेन क्रतुराजनिश्चयेन। इत्यर्थ इति-नहि जडायाः कीर्तेर्लोकानुभवोऽस्ति तथापि तदभिमानिदेवतामालक्ष्येत्थमुक्तिमिति भावः । "राजा राजसूयेन यजेत" इति श्रुत्या हे राजन्निति महाराजकर्तव्यत्वमेव राजसूयस्योक्तमिति भावः। शत्रुकर्षणेति सर्वराजजयशक्तिं सञ्चारयति यद्येतादृश्यापि सम्पत्त्या शत्रून्नोच्छेदयिष्यति तर्हि किमनयेति भावः । लोकाननुलक्ष्यीकृत्य भविष्यतीति त्वत्कीर्तिरेव मया सर्वथा निष्पादनीयेति भावः ॥७॥ न केवलं तवैवाभीष्टोऽयं क्रतुः ऋष्यादीनां सर्वेषामेवेत्याह-ऋषीणामिति। ऋष्यादीनां पूजाप्तेः सुहृदां मानाप्तेरन्येषां केषाञ्चित्कौतुकदर्शनाप्तेः, केषाञ्चित्स्थावरादीनां यज्ञार्थं निजव्यापादात्स्वदेहसाफल्याप्तेश्च सर्वेषामभिमत एवेति भावः ॥८॥ श्रीकृष्ण आह-किमत्रेति। अत्र यागनिमित्तम्। इत्यर्थ इति-उपसर्गादनुष्ठानार्थेऽपीति भावः ॥९॥ साम्प्रतं सर्वजयो दुःशक इत्याशङ्कते-नन्विति। कैमुत्याभिसन्ध्याह-किञ्चेति। आत्माहमेव सेव्यत्वेन विद्यते यस्य तेनात्मवता मत्परमभक्तेनेत्यर्थः । न कृतो मयि नार्पित आत्मा यैस्तैर्मदभक्तैः वस्तुतस्तु लोकपाला अंशसम्भवा यषां ते स्वयं भगवतोऽन्तरङ्गपरिकरत्वात्। 'यूयं नृलोके बत भूरिभागाः' इत्याद्युक्तेः। तेभ्योऽपि तस्य श्रैष्ठ्यमाह-हे राजन्निति । नाहं त्वां विना कस्यापि वशवर्तीति चाह-जितोऽस्मीति ॥१०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथैव सुरतरुतो वैलक्षण्येन तादृशानुग्रहमयवचनादिकमुदाहृत्य प्रसादमेव विशिष्य दर्शयति-श्रीभगवानुवाचेत्यादिना। अत्राप्युत्तरत्राधिक्यमुन्नेयं सम्यक् साध्वेवेदं भवता व्यवसितं निश्चितं कर्तुमिष्टं वा तच्च युक्तमेवेत्याह-हे राजन्निति। महाराजकर्तव्यत्वात् कल्याणी उत्तमा जगन्मङ्गलकरी वा अत्र सर्वजनेषु मद्भक्तिजननीति निगूढो भावः लोकाननु तान् व्याप्येत्यर्थः ॥७॥ न केवलं कीर्तिद्वारा सर्वसुखप्रदोऽसौ स्वद्वारापीत्याह-ऋषीणामिति। पितृणां देवानां च नोऽस्माकं सुहृदामपीति स्नेहभरोदयार्थं परमेश्वरदृष्टिं वारयति यद्वा विनयस्वभावादेव हे प्रभो ! तत्र समर्थ ! ॥८॥ तदेव दर्शयन् प्रोत्साहयति-विजित्वेति द्वाभ्याम्। विशेषेण जरासन्धादिभ्योऽप्याधिक्येन स्वरसत एव दासतासम्पादनादिना जित्वा एवं जगतीमेव स्ववशे कृत्वा अन्यत्तैः यद्वा स्वीयं त्वदधीनमेव महाक्रतुम् आहर ॥९॥ एत इति। तेषां प्रोत्साहनार्थं माहात्म्यं निर्दिशन्निव श्रीहस्तेनैव दर्शयति, माहात्म्यमेवाह-ते भ्रातर इति लोकेति च-किम्वदन्त्यपेक्षयैवेदमुक्तं वस्तुविचारे तु लोकपाला अंशसम्भवा येषां ते स्वयं भगवतोऽन्तरङ्गपरिकरत्वात् "यूयं नृलोके बत भूरिभागाः" इत्यादेः हे राजन्निति तेभ्योऽपीति तस्य श्रैष्ठ्यं सूचयंस्तं विशेषतः प्रोत्साहयति-अहन्तु तवाधीन एवेति वदन् सर्वश्रेष्ठ्यमेव विशेषतो दर्शयति - जितोऽस्मीति। नित्यं त्वद्वश्यतयैव वर्त इत्यर्थः । तत्र हेतुः आत्मा अहमेव सर्वस्वत्वेन विद्यते यस्य तेन अन्येषान्तु तदभावातिशयेन तदेव दृढयति, दुर्जय इति। न कृतो मयि नार्पितोऽपि आत्मा चित्तं यैः ॥१०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं सद्विज्ञप्त्या सुप्रीतस्तदर्थितमनुमोदमान आह-सम्यगिति। साध्वेवेदं भवता व्यवसितं निश्चितं कर्तुमिष्टं वा, तच्च युक्तमेव तवेत्याह-हे राजन्निति, महाराजकर्तव्यत्वात् धर्म्मराजत्वाद्वा, किंवा सर्व्वसद्गुणेन राजमानत्वादित्यर्थः। कल्याणी उत्तमा जगन्मङ्गलकरी वा, लोकाननु तान् व्याप्येत्यर्थः ॥७॥ पितॄणां देवानाञ्च नोऽस्माकं सुहृदामिति स्नेहभरोदयार्थं परमेश्वरदृष्टिं वारयति। यद्वा, विनयस्वभावादेव, तथापि भावः स एव। हे प्रभो इति तत्र त्वं महासमर्थ एवेति सूचयति ॥८॥ तदेव दर्शयति-विजित्येति, विशेषेण जरासन्धादिभ्योऽप्याधिक्येन दासतापादनादिना जित्वा। एवं जगतीमेव स्ववशे कृत्वा; अन्यत्तैर्व्याख्यातम्। यद्वा, विभक्तिलोप आर्षः। स्वयं स्वीयं त्वदधीनमेव महाक्रतुमाहर ॥९॥ एते बलवीर्य्यादिप्रसिद्धाः; किंवा एत इति तेषां प्रोत्साहनार्थं माहात्म्यं निर्दिशन्निवाङ्गुल्या दर्शयति; माहात्म्यमेवाह-लोकपाला अंशसम्भवा येषां ते, नित्यपार्षदप्रवराणामेव तत्तदवतारत्वात्, तच्च श्रीभागवतामृतोत्तरखण्डे विवृतमेव। हे राजन्निति तेभ्योऽपि तस्य श्रैष्ठ्यं सूचयंस्तमपि प्रोत्साहयति। अहन्तु तवाधीन एवेति वदन् श्रैष्ठ्यमेव दर्शयति-जितोऽस्मीति। नित्यं त्वद्वश्यतयैव वर्त इत्यर्थः। अजयस्यापि जयेन श्रैष्ठ्यमेव दृढयति-दुर्ज्जय इति। इन्द्रियाण्येव दुर्ज्जयानि, तज्जयेनाप्यहमजेय एव, त्वया तु तानि जित्वाहमपि जित इति भावः ॥१०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥६-२४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमुक्तस्तद्वचोऽनुमोदमानः प्राह श्रीभगवान् - सम्यगिति पञ्चभिः हे राजन्! हे शत्रुकर्शन! सम्यग्व्यवसितं निश्चितं कुतः एवं व्यवसितविधानेन कल्याणी तव कीर्तिर्लोकाननुचरिष्यति व्याप्ता भविष्यतीत्यर्थः ॥७॥ ऋषीणामिति। पितॄणां देवानाञ्च सुहृदां नोऽस्माकं किम्बहुना सर्वेषामपि भूतानामयं क्रतुश्रेष्ठ ईप्सितः इष्टः ॥८॥ निर्जित्येति। जगतीं सर्वां पृथ्वीं वशे कृत्वा स्वाधीनां कृत्वेत्यर्थः। सर्वान् सम्भारान् यागार्थपदार्थान् सम्भृत्य सम्पाद्य महाक्रतुं राजसूयमाहरस्वानुतिष्ठस्वेत्यर्थः ॥९॥ कथमहं जेतुं प्रभुरित्यत आह - एत इति। ते तव। भ्रातरः भीमादयः लोकपालानां वाय्विन्द्रादीनामंशसम्भवाः अत एभिः सर्वे नृपाः सुजया एवेति भावः। किञ्च अकृतात्मभिरजितेन्द्रियैर्दुःखेनापि जेतुं वशीकर्तुमशक्योऽहमात्मवता मद्भक्तिप्रवणचित्तवता त्वया जितो वशीकृतोऽस्मि अतः अतः किं तव दुस्साध्यमिति भावः ॥१०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

येन व्यवसितेन क्रतुराजेन अनुभविष्यति स त्वयाऽनुवर्त्यते ॥७॥ न केवलं तवाभीष्टोऽयमृष्यादीनां सर्वेषामपि हृदयङ्गम इत्याह - ऋषीणामिति ॥८॥ तत्रेत्थं भावमाह - विजित्येति। सर्वसम्भारान् सम्भृत्य सम्पाद्य आहरस्व कुरुष्व ॥९॥ साम्प्रतं सर्वजयो दुश्शको नेति भावेनाह - एत इति। लोकपालांशैः सम्भवो येषां ते तथा योऽहम् अकृतात्मभिः अनुत्पादितमत्प्रसादैः ॥१०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥७-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥६-४८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥७-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

भो मन्महिमरसमहामेघराजन्नत्र मम सम्मतिरस्त्येवेति लोकरीतिमाश्रित्याह-सम्यगिति। शत्रुकर्षणेति सम्बोधयन् सर्व्वराजविजयशक्तिं सञ्चारयति। यद्येतादृश्यपि सम्पत्त्या शत्रून् नोच्छेदयिष्यति तदा किमनयेति भावः। लोकान् अनु लक्षीकृत्य भविष्यतीति त्वत्कीर्तिरेव सर्व्वप्रकारेण मम निष्पादनीयेति भावः ॥७-८॥ सम्भृत्य सम्पाद्य आहरस्व अनुतिष्ठ ॥९॥ आत्मवता जितेन्द्रियेण। यद्वा आत्मा अहमेव सर्व्वस्वत्वेन विद्यते यस्य तेन त्वया अहमपि जितः वशीकृतः। अकृतात्मभिरजितेन्द्रियैः ॥१०॥

गूढार्थदीपिनी

व्यवसितं निश्चितम् । अनुभविष्यति लोकेषु व्याप्ता भविष्यति । शत्रुकर्शनेति सम्बोधनेन तस्य हृदि विजयशक्तिं स्फोरयति ॥७॥ क्रतुराट् राजसूयः ईप्सितः अभीष्टः ॥८॥ सम्भारान् सामग्रीः सम्भृत्य सम्पाद्य महाक्रतुम् आहरस्व कुरुष्व ॥९॥ आत्मवता मन्त्रिष्ठेन । न कृतः मयि नार्पितः आत्मा यैः तैः बहिर्मुखैरित्यर्थः ॥१०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सम्यक् व्यवसिते सम्यक् निश्चितं तेन निश्चितेन लोकान् अनुभविष्यति सर्वलोकव्याप्ता भविष्यतीत्यर्थः ॥७-८॥ सम्भारान् यज्ञोपस्करान् सम्भृत्य सम्पाद्य आहरस्व अनुतिष्ठ ॥९॥ आत्मा परमात्माऽहं विद्यते यस्य तेन अकृतत्मभिः अजिज्ञासितपरमात्मतत्त्वैः ॥१०॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे शत्रुकर्शन राजन् । भवता व्यवसितं निश्चितं सम्यग्येन क्रतुकरणेन तव कल्याणी कीर्तिर्लोकान्सर्वाननुभविष्यति ज्ञास्यति व्याप्ता भविष्यतीति यावत् । सुरते सर्वदारुःशब्दो यस्येत्यपहसनं कृतं धर्मेणान्तस्तस्य शत्रुकर्शनेति सम्बोधयन्नुपाहसत्प्राहुणिकमिति ज्ञेयम् । तन्मात्रं भावीत्यसूचयद्वा ॥७॥ अनेनेयतां तोष इति भाषते । ऋषीणां पितरश्च पितृपितामहाप्रपितामहाद्याः । तथा पितामहाद्यास्तु पितरो नाम कीर्तिता इत्यैतरेयभाष्योक्तेः । देवाश्च तेषां सुहृदां नश्च सर्वेषां भूतानामयं क्रतुराडीप्सित इति भवता व्यवसितं सम्यगित्यन्वयः ॥८॥ परन्त्वेवं कृत्वा तत्कुर्विति तत्पूर्वरङ्गमाह ॥ विजित्येति । सर्वान्नृपतीन्विजित्य जगतीं भूमिं वशीकृत्वा सर्वसम्भारांस्तदुपयुक्तपदार्थान्सम्भृत्यैकदा सम्पाद्य महाक्रतुमाहरस्व । अनेनात्मगामि तत्फलमिति लपितं भवति । तन्महाफलस्य भीमैकलभ्यत्वविवक्षायां हे स्व आहर कुर्वित्यर्थः । उक्तं चाचार्यैः । कर्ता हि तस्य परमेष्ठिपदं प्रयाति यद्यन्यसद्गुणवरैः परमेष्ठितुल्यः । भीमे मखस्य फलमभ्यधिकं विधातुमित्यारभ्यासाधारणहेतुश्च भीम एव प्रकीर्तितः । यज्ञस्यास्य जरासन्धवधात्कर्णजयादपि जयाच्च कीचकादीनामन्यैर्जेतुमशक्यतः । स्वेत्यात्यत्वस्फोरणाय ॥९॥ कथं भवतीदं कथय मधुनाथेत्यतः कथयति ॥ एत इति । त भ्रातर एते चत्वारो लोकपालांशसम्भवा लोकपालानां वाय्वादीनामंशास्तेभ्यः सम्भवन्तीति ते तथा । ननु वायोरिन्द्रस्य लोकपालत्वमिति भीमार्जुनयोस्तदंशसम्भवत्वं घटेत न घटेत नकुलसहदेवयोरश्विनोरतथात्वादिति चेत् । तयोरपीन्द्रपदप्राप्तेः क्रमेण तथात्वसम्भवात् । तथा ह्यभ्यधुराचार्याः । अतीतेन्द्रा एव ते विष्णुषष्ठाः । पूर्वेन्द्रोऽसौ यज्ञनामा रमेशः । स वै कृष्णो वायुरथ द्वितीयः । स भीमसेनो धर्म आसीत्तृतीयः । युधिष्ठिरोऽसावाथ नासत्यदस्रौ क्रमात्तावेतौ माद्रवतीसुतौ च । पुरन्दरः षष्ठ उतात्र सप्तमः स एवैको फल्गुनो ह्येत इन्द्रा इति द्वादशे । तथाष्टादशेऽध्याये । पूर्वेन्द्रान्मारुतवृषनासत्यांश्चतुरः स्थितानिति । अकृतात्मभिर्योऽहं दुर्जयः स तात तव वशे स्थितोऽस्मि ॥१०॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

भगवांस्तु तेन स्वान्तरो दोषो निरूपित इति सन्तुष्टः सन् चिकीर्षितस्य गुणरूपत्वं वदन्नभिनन्दति - सम्यग्व्यवसितमिति । प्रकारान्तरेण नेष्टं सिध्यतीति राजन्निति सम्बोधनात् राज्ञो बहिर्मुखता युक्तेति सूचितं तत्रापि रूढ्या राज्यपरिपालनमात्रतायां तथा न भवेदिति विशेषणान्तरं शत्रुकर्शनेति एवं कृते धर्मभगवत्प्रीत्यादेरभावात् यत्फलं तत् निर्दिशनति कल्याणी येन ते कीर्तिरिति । वधजयादिनापि कीर्तिर्भवति परं सा न कल्याणी पुष्टा च भविष्यतीत्याह-लोकाननुभविष्यतीति । यत्राश्रियामेव परिश्रम इति पक्षो निरूपितः ॥७॥ अन्येनापि धर्मेण यशो भवति तथापि राजसूय इति प्रारीप्सितं स्तौति-ऋषीणामिति । राज्ञः तथा स्वाध्यायनिष्ठताभावात् राजसूयेनैव ऋषयः प्रीता भवन्ति राजसूयकर्तुरेव पितर इन्द्रसभायां तिष्ठन्ति अन्ये तु यमसभायां तथा देवानाम् अमृतान्धस्कप्रयोगात् विशेषतृप्तः सुहृदामपि स्वकार्योत्कर्षहेतुत्वात् तत्रापि नोऽस्माकमेव न दुर्योधनादीनां प्रभोः कालस्यापि भूभारहरणहेतुत्वात् उद्धतहननात् सर्वेषामेव भूतानां क्रतुराट् राजसूय ईप्सितः तत्राप्ययं त्वया क्रियमाणः उत्तमप्रकारत्वात् न तु वरुणादिकृतः ॥८॥ अतः प्रथममेवारम्भमकृत्वा स्वाधिकारं सम्पादयेत्याह-विजित्येति । सर्वराजसूयाधिकारः सार्वभौमस्यैवाधिकारात् यञ्च लोका न मन्यन्ते तस्यापि नाधिकार इति अत आह - कृत्वा तु जगतीं सर्वामेव वशे ततो यज्ञसम्भाराः आदावेव साधनीयाः अन्यथा यज्ञः सम्भृतो न भवतीति तत्कालसम्भरणे समारम्भेण सर्वः समारभ्यो भवेदिति यथा जनने हस्तपादादयः यद्यपि तदा

नोपयुज्यन्ते तथाप्यविकलेनैव भाव्यं तथा सम्भाराः तदनन्तरमाहरस्व नित्यमेव भगवद्रूपं हृदयात् प्रतिमायामिव मूलस्थानात् स्वस्मिन्नाहरणं कर्तव्यमिति भावः । तमाहरेत्तेनायजतेति पृथङ्निर्देशात् केचिदारम्भमाहरणमाहुः, तन्न श्रौतं किन्तु महातेजा वह्निः स्वस्थानादाहरणमेव महाप्रयत्नमेव हेतुमाह–महाक्रतुमिति ॥९॥ तत्र दिग्विजये साधनं बोधयति – एते ते भ्रातर इति । तव एते भीमादिभ्रातरः लोकपालानां वाय्वादीनाम् अंशसम्भवो येषाम् अनेन देवानां मनुष्यजयः सुगम इति दिग्विजयो निस्सन्दिग्धो निरूपितः अनेनैव जगतो वशीकरणञ्च सिद्ध्यति राजन्निति सम्बोधनं भ्रातृणामपि सेवकत्वात् तज्जये स्वजय एवेति सूचयितुं यज्ञावेशस्तु मन्त्रादिना न भवति भगवद्रूपत्वात् स्वतन्त्रत्वाच्च भगवतः परमन्येनैवोपायेन यदि भवान् वशो भवति सोऽपि तवास्तीत्याह–जितोऽस्म्यात्मवता तेऽहमिति हृषीकेशो हि भगवान् हृषीकाणामत्यन्तजये जितो भवति तद्रूपः अनेनासिधाराव्रतकृतमित्यन्यत्र प्रसिद्धम्–

“सर्वालङ्करणोपेता भार्यैकशयने यदा । शेते सम्वत्सरं पूर्णं स्वयं पुष्टस्तथाविधः ॥
मनसापि न तां वाञ्छेत् स्पृशन्नपि शिलामिव । असिधाराव्रतमिदं विष्णुप्रीतिकरं महत्” ॥ इति

इयमेवात्मवतां मर्यादामार्गे अनेनैव प्रकारेण भगवज्जयः अकृतात्मभिरजितान्तःकरणैः ॥१०॥

सुबोधिनीसारः

सत्यमित्याह । श्रीकृष्णः हे शत्रुकर्शन हे राजन् भवता त्वया सम्यक् व्यवसितं सुनिश्चितं येन हेतुना कल्याणी ते कीर्तिर्लोकान् व्याप्स्यति ॥७॥ हे प्रभो ऋष्यादीनां नोऽस्माकं सुहृदां सर्वेषां भूतानाम् अयं राजसूयः क्रतुराट् ईप्सितः वाञ्छितः ॥८॥ सर्वान् नृपतीन् राज्ञो विजित्य जगतीं पृथिवीं वशे कृत्वा सर्वसम्भारान् यज्ञोपस्करान् सम्भृत्य सम्पाद्य महाक्रतुं राजसूयाख्यं यज्ञमाहरस्व कुरु ॥९॥ “काले सम्पत्स्यते सर्वं सर्वदा न हि तद्भवेत्” इति नीतिमाश्रित्याह । हे राजन् एते ते भ्रातरो लोकपालानां धर्मादीनामंशेभ्यः सम्भवो जन्म येषां ते तथा सन्ति अकृतात्मभिरसंयतचित्तैर्यो दुर्जेयोऽहं स आत्मवता जितचित्तेन त्वया जितोऽस्मि ॥१०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सर्वराजविजयशक्तिं सञ्चारयन् सम्बोधयति–हेराजन् ! हे शत्रुकर्शन ! भवता सम्यक् व्यवसितं निश्चितम्, येन व्यवसितयज्ञानुष्ठानेन कल्याणी पुण्यावहा तव कीर्तिर्लोकाननुभविष्यति सर्वलोकेषु व्याप्ता भविष्यतीत्यर्थः ॥७॥ हे प्रभो ! ऋष्यादीनां सर्वेषां भूतानां तथा नोऽस्माकं सुहृदामप्ययं क्रतुराट् ईप्सितः इष्टः ॥८॥ सर्वान्नृपतीन् विनिर्जित्य जगतीं पृथ्वीं सर्वां वशे कृत्वा सर्वसम्भारान् यज्ञसाधनानि सम्भृत्य सम्पाद्य महाक्रतुं राजसूयमाहरस्व अनुतिष्ठ ॥९॥ कथमहं सर्वविजये समर्थ इत्यपेक्षायामाह- एत इति । तव भ्रातरो भीमादयो लोकपालानां वाय्विन्द्रादीनामंशसम्भवाः, अत एभिरेव तव सर्वनृपविजयः सुकर इति भावः । किञ्च यः अकृतात्मभिरवशीकृतदेहेन्द्रियादिसङ्घातैर्दुःखेनापि जेतुं वशीकर्तुमशक्यः सोऽहमात्मवता जितेन्द्रियत्वेन मदेकप्रवणचित्तवता ते त्वया जितोऽस्मि वशीकृतोस्मि । अतोऽपि तव किं दुःसाध्यमित्याशयः ॥१०॥

अन्वितार्थप्रकाशिका

सम्यगिति । हे राजन् ! हे शत्रुकर्शन ! इति सम्बोधयन् सर्वराजविजयशक्तिं सञ्चारयति भवता सम्यक् व्यवसितं निश्चितं वक्तुमिष्टं वा येन व्यवसितयज्ञानुष्ठानेन कल्याणी पुण्यावहा तव कीर्तिर्लोकाननुभविष्यति सर्वलोकेषु व्याप्ता भविष्यति ॥७॥ ऋषीणामिति ॥ हे प्रभो ! ऋष्यादीनां सर्वेषां भूतानां तथा नोऽस्माकं सुहृदामप्ययं क्रतुराट् ईप्सितः इष्टः ॥८॥ विजित्येति । सर्वान्नृपतीन् विजित्य जगतीं पृथ्वीं सर्वां वशे कृत्वा सर्वसम्भारान् यज्ञसाधनानि सम्भृत्य सम्पाद्य महाक्रतुं राजसूयमाहरस्व अनुतिष्ठ ॥९॥ एते इति । तव भ्रातरो भीमादयो लोकपालानां वाय्विन्द्रादीनामंशसम्भवाः किञ्च यः अकृतात्मभिरिन्द्रियैर्दुःखेनापि जेतुं वशीकर्तुमशक्यः सोऽहमात्मवता जितेन्द्रियेण ते त्वया जितोऽस्मि वशीकृतोऽस्मि । अतोऽपि तव किं दुःसाध्यमित्याशयः ॥१०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नृपवाक्येन प्रसन्नः श्रीकृष्णः आह सम्यगिति ॥ हे शत्रुकर्शन शत्रुकर्षणेति वा पाठः ते तव कीर्तिर्लोकान् प्रति

अनुभविष्यति प्रत्यक्षा भविष्यतीत्यर्थः ॥७॥ राजसूयकृतिप्रकारमाह विजित्येति जगतीं भूमिं सर्वान् सम्भारान् यज्ञसामग्रीः सम्भृत्य निष्पाद्य महाक्रतुमाहरस्व ॥८-९॥ नृपतिविजयप्रकारमाह एते इति ॥ आत्मवता वशीकृतात्मानः सेन्द्रियदेहेन ते त्वया अहं जितोऽस्मि अकृतात्मभिरस्वाधीनीकृतदेहे इन्द्रियैर्जनैस्तुयोऽहं दुर्जयो जेतुमशक्यो भवामि अस्माकं युष्मत्पक्षाश्रयणत्वाद्भवतो जयो भविष्यतीति भावः ॥१०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमुक्तस्तद्वचोऽनुमोदमानः भगवान् प्राह । सम्यगित्यादिपञ्चभिः । सम्यगिति । हे शत्रुकर्शन, हे राजन्, भवता सम्यक्, व्यवसितं निश्चितम् । येनेत्थंभूतव्यवसितविधानेन, कल्याणी, ते तव, कीर्तिः, लोकान् अनुभविष्यति अनुचरिष्यति, लोकेषु व्याप्ता भविष्यतीत्यर्थः ॥७॥ ऋषीणामिति । हे प्रभो राजन्, अयं क्रतुराट्, सर्वेषाम् ऋषीणां, पितृदेवतानामपि, सुहृदां नोऽस्माकमपि, किं बहुना । सर्वेषां भूतानामपि, ईप्सितः इष्टो भवति ॥८॥ विजित्येति । हे राजन्, सर्वान् नृपतीन्, विजित्य, जगतीं च पृथिवीमपि, वशे कृत्वा, सर्वसम्भारान् यागार्थकपदार्थान्, सम्भृत्य सम्पाद्य, महाक्रतुं राजसूयम्, आहरस्व अनुतिष्ठस्वेत्यर्थः ॥९॥ ननु कथमहं सर्वभूपतीन् जेतुं प्रभुरित्यत आह ॥ एत इति ॥ हे राजन्, एते ते तव, भ्रातरः लोकपालांशसम्भवाः वाय्विन्द्रादीनामंशत उत्पन्नाः, अत एभिः सर्वे नृपाः सुजय्या एवेति भावः । किं च, अकृतात्मभिरजितेन्द्रियैः, दुर्जयो दुःखेनापि जेतुं वशीकर्तुमशक्यः, यः अहं, सः आत्मवता मद्भक्तिप्रवणचित्तवता, ते त्वया, जितो वशीकृतोऽस्मि । अतः किं तव दुःसाध्यमस्तीति भावः ॥१०॥

कृष्णप्रिया

श्रीभगवानुवाच - भगवान् श्रीकृष्णचन्द्रजी ने कहा - धर्मराज ! आप तो अरि विजयी हो । आप का राजसूय यज्ञ करने का मनोरथ अतिश्रेष्ठ है । राजसूय यज्ञ करने से चतुर्दश लोको में आपका सुमंगल यश का विस्तार होगा ॥७॥ महाराज ! आपका यह पुण्यमय राजसूय यज्ञ ऋषिवरों, पितृओं, देवों, सुहज्जनों, स्वजनों एवं सगे-स्नेहीजन और अधिक क्या कहें ? समस्त प्राणियों को सर्वथा अतिशय इष्ट है ॥८॥ धर्मराज ! महाराज भूमि के नृपतियोंको जीतकर धरणी को अपने स्वाधीन करके यज्ञमें उपयुक्त समग्र सामग्री संकलित करके पुनः राजसूय महाक्रतु अनुष्ठान कीजिये ॥९॥ धर्मराज महाराज ! आपके चारों भ्राताओं इन्द्रदि लोकपालों के अंश से उत्पन्न हुए हैं । वे सर्व समर्थ वीर हैं आप समर्थ मनस्वी एवं संयमी वीर हैं । पुनः आप सर्व भाईयों ने अपने उत्तम गुणों से मुझे आपके वश कर लिया है । एक बात ध्यान में रखिये, जिन सजंजनों ने अपनी इन्द्रियों और मन को स्वाधीन नहीं किया है वे लोग मुझे नहीं वश नहीं कर सकते ॥१०॥

न कश्चिन्मत्परं लोके तेजसा यशसा श्रिया । विभूतिभि[1]र्वाभिभवेद्देवोऽपि किमु पार्थिवः ॥११॥

श्रीशुक उवाच

निशम्य भगवद्गीतं प्रीतः [2]फुल्लमुखाम्बुजः । भ्रातॄन्दिग्विजयेऽयुङ्क्त विष्णुतेजोपबृंहितान् ॥१२॥
सहदेवं दिक्षणस्यामादिशत्सह सृञ्जयैः । दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनम् ।
प्राच्यां वृकोदरं [1]मत्स्यैः केकयैः सह मद्रकैः ॥१३॥
[2]ते निर्जित्य नृपान्वीरा [3]आजह्रुर्दिग्भ्य [4]ओजसा । अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते ॥१४॥

कर्दमक्षमा

लोके, तेजसा, यशसा, श्रिया, वा, विभूतिभिः, न, कश्चित्, मत्परम्, देवः, अपि, भवेत्, तर्हि, किमु, पार्थिवः, ॥११॥

श्रीशुक उवाच :- भगवद्गीतम्, निशम्य, प्रीतः, फुल्लमुखाम्बुजः, विष्णुतेजोपबृंहितान्, भ्रातॄन्, दिग्विजये, अयुङ्क्त ॥१२॥ सृञ्जयैः, सह, सहदेवम्, दक्षिणस्याम्, आदिशत्, प्रतीच्याम्, दिशि, नकुलम्, उदीच्याम्, दिशि, सव्यसाचिनम्, प्राच्याम्,

---

१. र्वा विभवैर्देवोपि-विज. । २. प्रीत्युत्फुल्ल-विज. । १. राजन्- विज. । २. ते विजित्य-श्रीधर. वंशी. वीर. विज. जीव. । ३. आजुग्मुः-इति कस्यचित् । ४. दिव्यमञ्जसा-विज. ।

दिशि, मत्स्यैः, कैकयैः, मद्रकैः, सह, वृकोदरम्, आदिशत् ॥१३॥ नृप ! ते, वीराः, यक्ष्यते, अजातशत्रवे, ओजसा, दिग्भ्यः, नृपान्, निर्जित्य, भूरि, द्रविणम्, आजह्रुः ॥१४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आस्तान्तावदेवम्भूतस्य तव परैरभिभवशङ्का अकिञ्चनमपि मत्परं कोऽपि नाभिभवितुं प्रवतीत्याह-न कश्चिदिति । तेजसा प्रभावेण विभूतिभिः सैन्यादिसामग्रीभिः ॥११॥ अयुङ्क्त नियुक्तवान् विष्णोस्तेजसोपबृंहितान् संवर्द्धितान् तेजोपबृंहितानिति सन्धिरार्षः ॥१२॥ नकुलादीनां मत्स्यादिभिः सहायैर्यथासङ्ख्येन सम्बन्धः ॥१३॥ कथम्भूताय यक्ष्यते यागं करिष्यते ॥१४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तावदधुना । एवम्भूतस्य मद्वशीकर्तुर्लोकपालांशोद्भवभ्रातृयुक्तस्य । मत्परं मत्परायणमात्रं किमुत युष्मानिति भावः ॥११॥ विष्णोर्विश्वव्यापकस्य तेजसोपबृंहितान्दिग्विजयार्थं तदानीं निजतेजोऽर्पणादिति भावः ॥१२॥ यथासङ्ख्यमाह-सहदेवं सृञ्जयैः भीमं मत्स्यैर्नकुलं कैकयैस्सव्यसाचिनं मद्रकैश्च सहेति तत्रातिवात्सल्येन नकुलसहदेवौ प्रति दक्षिणप्रतीच्यौ व्यदिशत्तत्र बहुलदुर्गमदुर्जयाभावात् । सर्वदुर्गमसञ्चारित्वेन सर्वजयित्वेन च सव्यसाचिनमुदीच्यां महापर्वतमयत्वेन तस्या अतिदुर्गमत्वात्, दुर्जयबहुलदेवगन्धर्वमयत्वाच्च । अत एव सव्येनापि पाणिना धनुर्गुणाकर्षणादिना तस्य माहात्म्यमप्युक्तम् । भीमश्च प्राच्यां तत्समबलजरासन्धजयापेक्षयेति ज्ञेयम् ॥१३॥ ते सहदेवादयस्त्रयः । अजातशत्रवे इति जितोऽपि कश्चित्तस्मिन्द्वेषं नाऽकरोत्किन्तु भक्तिमेव स्वभावतस्तस्य कस्मिंश्चिदपि द्वेषाभावात् । विजयस्तु केवलं राजसूयापेक्षयैवेति भावः । आजिग्युरिति पाठे जयतेर्द्विकर्मकत्वान्नृपान् द्रविणं विजित्येत्यन्वयः । हे नृपेति स्वपूर्वेषामिदं यशः कर्णपुटैरापीयतामिति भावः ॥१४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

व्यतिरेकमुखेन कैमुत्येनापि तदेव दृढयति – नेति । भुवने कश्चिदपि तत्रापि देवो लोकपालादिरपि मत्परमात्रमपि किमुत युष्मानित्यर्थः । श्रिया शोभया ॥११॥ भगवतः सर्वैश्वर्य्यपरिपूर्णस्य गीतं प्रीत्या गाथातुल्यं वाक्यम् इति तस्य सर्वसिद्धिकरत्वमुत्साहविवर्द्धनत्वादिकञ्च सूचितं विष्णोर्विश्वव्यापकस्य तस्य तेजसोपबृंहितानिति दिग्विजयार्थं सर्वव्यापकतया तदानीं निजतेजोऽर्पणात् सदैव वा तेषां तादृशत्वात् ॥१२॥ कथमयुङ्क्त तत्राह – सहदेवेति सार्द्धकेन । तत्रातिवात्सल्याद्बालत्वेन प्रतीतौ श्रीसहदेवनकुलौ प्रति दक्षिणप्रतीच्योरादेशस्तत्र तत्रबहुलदुर्गमदुर्ज्जयाभावात् सर्वदुर्गमसञ्चारित्वेन सर्वजयित्वेन च निश्चितं सव्यसाचिनमुदीच्यां महापर्वतमयत्वेन तस्या अतिदुर्गमत्वात् दुर्जयबहुलगन्धर्वदेवमयत्वाच्च अत एव सव्यसाचिनमिति सव्येनापि पाणिना धनुर्गुणाकर्षणादिना तस्य माहात्म्यं सूचितम् भीमञ्च प्राच्यां तत्समबलजरासन्धजयापेक्षया तत्तत्क्रमेणादेशो यथोत्तरमग्रजत्वेन गौरवाधिक्यात् ॥१३॥ ओजसा वेगेनैव विजित्य यतो वीराः अजातशत्रव इति जितोऽपि कश्चित्तस्मिन् द्वेषं नाकरोत् किन्तु भक्तिमेव स्वभावतस्तस्य कस्मिंश्चिदपि द्वेषाभावात् विजयश्च केवलं राजसूयापेक्षयेति भावः आजह्रुरित्यत्राजिग्युरिति पाठे जयतेर्द्विकर्मकत्वात् नृपान् द्रविणं विजित्येत्यन्वयः । तच्चाजातशत्रवे तदर्थमिति हे नृपेति स्वपूर्वजानामपूर्वमिदमपि माहात्म्यं कर्णपुटेनापीयतामिति प्रोत्साहनम् ॥१४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

लोके कस्मिंश्चिदपि भुवने नाभिभवेत्; यद्वा, लोके वर्तमानं लौकिकमपि, किं पुनर्लोकापेक्षारहितमित्यर्थः । श्रिया सम्पत्त्या देहादिशोभया वा ॥११॥ भगवतः सर्व्वैश्वर्य्यपूर्णस्य गीतं प्रीत्या गाथवद्वाक्यम्, इति तस्य सर्व्वसिद्धिकरत्वमुत्साहविवर्द्धनत्वादिकञ्च सूचितम् । विष्णोर्विश्वव्यापकस्य तस्य तेजसोपबृंहितानिति दिग्विजयार्थं सर्वव्यापकतया तदानीं निजतेनोऽर्पणात्, सदैव वा तेषां तादृशत्वात् ॥१२॥ कथमयुङ्क्त ? तदाह-सहदेवमिति । तदा सहदेवनकुलौ प्रति दक्षिणप्रतीच्योरादेशस्तत्र तत्र बहुलदुर्गमदुर्ज्जयाभावात्, सव्यसाचिनञ्च उदीच्यां सर्व्वत्र भयत्वेन तस्या दुर्गमत्वाद्दुर्ज्जय-बहुलदेशमयत्वाच्च, अत एव सव्यसाचिनमिति सव्येनापि पाणिना धनुर्गुणकर्षणादिना तस्य माहात्म्यं सूचितम् । भीमञ्च प्राच्यां तत्समबल-जरासन्धजयापेक्षया, तत्तत्क्रमेण देशो यथोत्तरमग्रजत्वेन गौरवाधिक्यादिति दिक् ॥१३॥ ओजसा वेगेनैव विजित्य, यतो वीराः, अजातशत्रव इति

विजितोऽपि कश्चित्तस्मिन् द्वेषं नाकरोत्, कीन्तु भक्तिमेव, स्वभावतस्तस्य कस्मिंश्चिदपि द्वेषाभावात्, विजयश्च केवलं राजसूयापेक्षयैवेति भावः । हेनृपेति स्वपूर्व्वजानां माहात्म्यामृतमिदं कर्णपुटेन आपीयतामिति तं हर्षयति ॥१४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥६-२४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

आस्तान्तावदेवम्भूतस्य तव परैरभिभवशङ्का यतोऽकिञ्चनमपि मत्परं कोऽपि नाभिभवितुं प्रभुरित्याह - न कश्चिदिति । मत्परम् अहमेव परो यस्य तं मय्यासक्तचित्तमित्यर्थः । देवोऽपि तेज आदिभिर्नाभिभवेत् किमुत पार्थिवा नाभिभवेयुरिति तत्र तेजः प्रभावः श्रीः सम्पद्विभूतयः सैन्यादिसमृद्धयः ॥११॥ निशम्येति । प्रीतः अत एव फुल्लं विकसितं मुखाम्बुजं यस्य सः युधिष्ठिरः दिग्विजये निमित्ते विष्णोस्तेजसा उपबृंहितान् वर्द्धितान् भ्रातॄन् भीमादीन् प्रायुङ्क्त ॥१२॥ सहदेवमिति । सृञ्जयैः सह दक्षिणस्यां दिश्यादिशदाज्ञापयामास सव्यसाचिनमर्जुनं वृकोदरं भीमं मत्स्यादिभिस्सह ॥१३॥ त इति । हे नृप ! यक्ष्यते यागं करिष्यमाणायाऽजातशत्रवे धर्मराजाय ते भ्रातरः भूरि बहु द्रविणं वित्तमाजह्रुराहृत्य समर्पयामासुः ॥१४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

भवतो दुर्जयत्वेन किमस्माकमिति तत्राह - नेति । मत्परं मद्भक्तं विभूतिरुपस्करसम्पद्भिः ॥११॥ विष्णोस्तेजसा प्रभावेण उपबृंहितान् परिपूरितान् ॥१२-१३॥ यक्ष्यते यष्टुकामाय ॥१४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥७-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥६-४८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥७-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नात्र विपक्षैः स्वाभिभव आशङ्कनीयः । यदिदमहं साटोपं ब्रवीमीत्याह–न कश्चिदिति । मत्परं यं कञ्चन विभूत्यादिरहितमपि किं पुनस्त्वाम् ॥११॥ तेजसा उपबृंहितान् सन्धिरार्षः । तेजसब्दोऽदन्तो वा ज्ञेयः ॥१२॥ नकुलादीनां मत्स्यादिभिः सहायैः यथासङ्ख्येन सम्बन्धः ॥१३॥ द्रविणं समर्पयामासुरिति शेषः ॥१४॥

गूढार्थदीपिनी

अहमेव परः आराध्यो यस्य तं मत्परं देवोऽपि न अभिभवेत् पराभवितुं न शक्नुयात् किमुत पार्थिवः । विभूतिभिः अस्त्रशस्त्रसैन्यादिसाधनैः ॥११॥ फुल्लं विकसितं मुखाम्बुजं यस्य सः नृपः दिग्विजये निर्मिते अयुङ्क्त नियुक्तवान् । उपबृंहितान् वर्धितान् ॥१२॥ सहेति सार्द्धम् । सहदेवं सृञ्जयैः भीमं मत्स्यैः नकुलं केकयैः सव्यसाचिनमर्जुनं मद्रकैश्च सहेति योज्यम् । आदिशत् प्रैषयत् । सव्येन वामेनापि साचितुं धनुं सन्धातुं शीलमस्येति सव्यसाचिशब्दार्थः ॥१३॥ ते सहदेवादयः ओजसा बलेन नृपान् विजित्य यक्ष्यते यागं करिष्यमाणाय युधिष्ठिराय भूरि द्रविणं धनमाजह्रुः समर्पयामासुः ॥१४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अहं परो यस्य स तथा तम् ॥११॥ विष्णुतेजसोपबृंहितान् सम्वर्द्धितान् सन्धिरार्षः ॥१२-१३॥ यक्ष्यते यागं करिष्यते ॥१४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भ्रातृलोकपालांशसम्भवत्वं स्वतोऽप्रयोजकं त्वद्दुर्जयत्वेऽपि मम किमित्यतः सामान्यतः स्वभक्तानामिदं भाग्यमित्याह ॥ नेति । कश्चिदपि देवो मत्परं मदासक्तमहं परो यस्य स तं वा लोके तेजआदिभिर्विभूतिभिर्विविधभूविषयिणीभिरूतिभिः स्वाभिप्रायैस्ताभिर्वा नाभिभवेन्नतिरस्कुर्यात् । पार्थिवाः पृथिवीपतयो न तिरस्कुर्युरिति किमु व्यवहार्यमिति भावः । विभ्विति भावप्रधानं वा । विभुत्वविषयाभिरूतिभिरभिप्रायैरिति वा ॥११॥ भगवद्गीतं सम्यग्व्यवसितमित्यारभ्य किमु पार्थिवा इत्यन्तेन भगवतोक्तं निशम्य प्रीत्युत्फुल्लं मुखाम्बुजं यस्य स धर्मं विष्णुतेजोपबृंहितं विष्णोस्तेजसा कृष्णस्य सामर्थ्यविशेषेणोपबृंहिता-

नित्यर्थः । कश्चिदर्थव्यपाश्रयः । मां हि पार्थ व्यपाश्रित्य मदपाश्रय इत्यादिवदपेत्युपार्थकम् । सान्तत्वाकारान्तत्वनयेन तेजःशब्दपर्यायोऽयं तेजशब्दः । विस्तृतं प्रागेधोदकमुपस्कुरुत इत्यादितत्त्वसुबोधिन्याद्युदाहरणपूर्वकमस्माभिरनुसन्धेयम् । श्रीधरीये तेजोपबृंहितानिति सन्धिरार्ष इति व्याख्यानं स्वकृतमां हि पार्थ व्यपाश्रित्येत्यादिगीताव्याख्यानस्य तेऽपि मां व्यपाश्रित्य संसेव्यव्यपाश्रय आश्रय एव व्यपाश्रय इत्यादेर्विस्मृतिविजृम्भितमिति मन्तव्यम् । अनन्यगतिकत्व एवैवमङ्गीकार्यत्वात् । भ्रातृंश्चतुरो दिग्विजयेऽयुङ्क न्ययुङ्क ॥१२॥ तद्विनियोगक्रममाह ॥ सहदेवमिति । दक्षिणस्यां दिशि सहदेवं सृञ्जयैः सहकारिभिः सह प्रतीच्यां नकुलं मत्स्यैः सहोदीच्यां कैकयैः सह सव्यसाचिनमर्जुनं प्राच्यां मद्रैः सह वृकोदरं भीममित्यन्वयः । वृकोदरं मत्स्यैरिति पाठः सन् राजन्कैकयैरिति पाठेऽन्यतमस्य निःसहायतापत्तेः ॥१३॥ ये वीरा आरब्धान्तगामिनस्तानपि नृपांस्ते विजित्य । यक्ष्यते यष्टुकामायाजातशत्रवे धर्माय दिव्यं द्रविणमञ्जसाऽऽजह्रुः ॥१४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

कदाचिज्जयारम्भे भ्रातुः कस्यचिदभिभवः किं कर्तव्यमित्याशङ्कायामाह-न कश्चिदिति । अहमेव परो नियन्ता स्वामी यस्य तस्य कोऽप्यभिभवितुं न शक्तः अभिभवस्त्रेधा भवति वषयातिक्रमेण शरीरातिक्रमेण च ततो विशेषणत्रयं तेजसा यशसा श्रियेति तेनोभिभवे तं बिभृयान्नानयेद्वा यशोभिभवे अकीर्त्या मृत एव श्रिया अभिभवे मानभङ्गात् साधारणान्तरायं राज्ञां विशेषमाह विभूतिभिर्वेति यथा आरण्यके घोषयात्रायामभिभवार्थमुद्यमः त्रैलोक्ययात्राकाङ्क्षायां त्रिलोकीमपि जीयात् तत्र देवस्यापि जयः प्राप्नोति तादृशे देवोऽपि नाभिभवितुं शक्त इति वाक्यसम्भवः पार्थिवो राजा पृथिवी विकारः कथं शक्त इति मत्परत्वान्महज्जयव्यतिरेकेण न तज्जय इति ॥११॥ एवं भगवदाज्ञां प्राप्य तथा कृतवानित्याह-निशम्येति । गीतं भगवता सर्वेषां श्रुतिप्रियकरं प्रोक्तं प्रीत्युत्फुल्लमुखाम्बुजं यस्य प्रीतः स तुष्टश्चिकीर्षितं सेत्स्यतीति भगवत्स्पर्शाद्विष्णुतेजोपबृंहिताः भ्रातरः पालकं हि तत्तेजो दैत्यनाशकम् ॥१२॥ प्रत्येकं भगवता तेजः समर्पितमिति ज्ञापयितुं विभागेन दिग्विजयार्थं प्रेषणमाह-सहदेवमिति । दक्षिणस्यां दिशि जयार्थं सहसृञ्जयैः क्षत्रियविशेषैः सह समादिशत् प्राक्प्रकारेण दिग्विजयः तथा नकुलं प्रतीच्याम् अनन्तमुत्तरापथमिति तत्र समर्थोऽर्जुनः प्राच्यां जरासन्धादयस्तिष्ठन्ति सेनाधिक्यं बलिष्ठस्य भीमस्य च प्रेषणं कनिष्ठक्रमेण विनियोगो धर्म्यः उत्तमानामिवावशेषात् ॥१३॥ तेषां कार्यसिद्धिमाह-विजित्येति । ओजसा स्वपौरुषेण न तु धर्मार्थं स्नेहेन वा तैर्दत्तं नन्वेवं सर्वजयकर्तुः कथं यागाधिकार इत्याशङ्कायामाह-अजातशत्रव इति । आज्ञयैव तथा कृतवान् न तु तस्य हृदये कश्चिच्छत्रुरस्ति भ्रातृणां वा वैषम्याभावाय कृषीवलादिव राजभ्यो द्रव्यसमानयनं स्वद्रव्येनैव याग इति अजातशत्रव इति । तादृगर्थमुक्तम् ॥१४॥

श्रीसुबोधिनीसारः

मत्परं जनं लोके तेजसा प्रभावेण यशसा श्रिया लक्ष्म्या विभूतिभिः सम्पद्भिः कश्चित् कोऽपि नाभिभवेत् न तिरस्कुर्यात् देवोऽपि पार्थिवो राजा नाभिभवेदिति किमु वाच्यम् ॥११॥ शुकोक्तिः । कृष्णगीतं निशम्य श्रुत्वा प्रीतो राजा फुल्लं विकसितं मुखाम्बुजं मुखपद्मं यस्य स विष्णोस्तेजसोपबृंहितान् संवर्द्धितान् भ्रातॄन् दिग्विजयेऽयुङ्क नियुक्तवान् सन्धिरार्षः ॥१२॥ तथा हि सृञ्जयैः सह सहदेवं दक्षिणस्यां दिशि प्रैषयत् प्रतीच्यां पश्चिमायां दिशि नकुलम् उदीच्यामुत्तरस्यामर्जुनं प्राच्यां भीमसेनं मत्स्यैः केकयैर्मद्रकैः सहेति क्रमेण योज्यम् ॥१३॥ ते वीराः पाण्डवा नृपान् विजित्य ओजसा बलेन यक्ष्यते यजनं करिष्यमाणायाजातशत्रवे युधिष्ठिरार्थं बहुद्रव्यं दिशात आजह्रुरानिन्युः हे नृप ॥१४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु त्वया वशीभूतेन कथं सर्वविजयः सुक इत्यपेक्षायामाह-नेति । मत्परम् अहमेव परः उपास्यो यस्य तं देवोऽपि तेजआदिभिर्नाभिभवेत् अभिभवं कर्तुं न शक्नुयात् । पार्थिवो मनुष्यस्तत्र न शक्नुयादिति तु किं वक्तव्यम् ? तत्र तेजः प्रभावः । श्रीः धनादिसम्पत् । विभूतयः सैन्यादिसमृद्धयः ॥११॥ भगवता गीतमुक्तं निशम्य प्रीतः, अत एव फुल्लं विकसितं मुखाम्बुजं यस्य स युधिष्ठिरः दिग्विजये निमित्ते विष्णोः कृष्णस्य तेजसा उपबृंहितान् संवर्धितान् सन्धिरार्षः भ्रातॄन् प्रायुङ्क ॥१२॥ तद्विभागमाह-सहदेवमिति सार्धेन । आदिशत् प्रेशयामास । मत्स्यैः सह नकुलं प्रतीच्यां दिशि । कैकेयैः सह सव्यसाचिनमर्जुनमुदीच्यां दिशि ।

मद्रकैः सह वृकोदरं भीमं प्राच्यामादिशत् ॥१३॥ न केवलं त्वमेव प्रभाववान् जातः, किन्तु तव पूर्वजा बहवोऽपि इति सूचयन् सम्बोधयति–हे नृप ! ते भीमादयो वीरा ओजसा स्वपौरुषेण नृपान् विजित्य यक्ष्यते यागं करिष्यमाणाय अजातशत्रवे युधिष्ठिराय भूरि बहु द्रविणं धनमाजह्रुः आहृत्य समर्पयामासुः ॥१४॥

अन्वितार्थप्रकाशिका

नेति । अहमेव परः उपास्यो यस्य तं मत्परं लोके कश्चित् देवोऽपि तेजसा प्रभावेण यशसा श्रिया शोभया विभूतिभिः सैन्यादिसाधनैः नाभिभवेत् अभिभवितुं न शक्नुयात् । पार्थिवो मनुष्यस्तत्र न शक्नुयादिति तु किं वक्तव्यम् ॥११॥ निशम्येति । भगवता गीतमुक्तं निशम्य प्रीतः अत एव फुल्लं विकसितं मुखाम्बुजं यस्य स युधिष्ठिरः दिग्विजये निमित्ते विष्णः कृष्णस्य तेजसा उपबृंहितान् संवर्धितान् । सन्धिरार्षः । तेजःशब्दोऽपि क्वाप्यदन्त इति केऽप्याहुः । भ्रातृन् अयुङ्क्त नियुक्तवान् ॥१२॥ सहदेवमिति सार्द्धम् । सृञ्जयैः सह सहदेवं दक्षिणस्यामादिशत् प्रैषयत् मत्स्यैः सह नकुलं प्रतीच्यां दिशि कैकेयैः सह सव्यसाचिनमर्जुनमुदीच्यां दिशि मद्रकैः सह वृकोदरं भीमं प्राच्यामादिशत् ॥१३॥ ते इति । हे नृप ! ते भीमादयो वीरा ओजसा स्वपौरुषेण नृपान् विजित्य यागं करिष्यमाणाय अजातशत्रवे युधिष्ठिराय राजसूयाङ्गभूतकरग्रहणार्थमेव विजयेन तस्य कुत्रापि दोषाभावात् दिग्भ्यः भूरि बहु द्रविणं धनमाजह्रुः आहृत्य समर्पयामासुः ॥१४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मदाश्रितं न कश्चिदपि पराभवतीत्याह नेति कश्चिदत्रस्थः योगसिद्धो जनो देवोऽपि च तेजसा पराक्रमेण विभूतिभिः पृतनादियुद्धोपस्करैः मत्परं ममैकान्तिकभक्तं नाभिभवेन्न पराभवेत् तर्हि पार्थिवो भूपसमूहः किमु अभिभवेन्नेत्यर्थः ॥११॥ विभुतेजसा हरिप्रभावेण उपबृंहितान् युक्तान् तेजोपबृंहितानिति सन्धिरार्षः अयुङ्क्त प्रेरयामास ॥१२॥ सृञ्जयैः सृञ्जयदेशस्थक्षत्रियैः सह सहदेवं मत्स्यैः सह नकुलं कैकेयैः साकं अर्जुनं मद्रकैः सह वृकोदरम् ॥१३॥ यक्ष्यते यज्ञं करिष्यमाणाय ॥१४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आस्तां तावदेवम्भूतस्य तव परैरनभिभवशङ्का यतोऽकिञ्चनमपि मत्परं कोऽपि नाभिभवितुं प्रभुरित्याह ॥ न कश्चिदिति ॥ अहमेव परो यस्येति मत्परस्तं, मय्यासक्तचित्तं जनमित्यर्थः । लोके, कश्चित् देवः अपि, तेजसा प्रभावेण, यशसा कीर्त्या, श्रिया लक्ष्म्या, विभूतिभिः सैन्यादिसामग्रीभिर्वा, न अभिभवेत्, तदा, पार्थिवा राजानः, किमु, नाभिभवेयुरेवेत्यर्थः ॥११॥ निशम्येति । भगवद्गीतं, भगवतोदितं वच इत्यर्थः । निशम्याकर्ण्य, प्रीतः प्रसन्नतां प्राप्तः युधिष्ठिरः, फुल्लं विकसितं मुखाम्बुजं मुखकमलं यस्य सः, एवम्भूतः सन्, विष्णोः श्रीकृष्णस्य तेजसैवश्वर्येणोपबृंहिताः संवर्द्धितास्तान्, भ्रातृन्, दिग्विजये निमित्ते, अयुङ्क्त नियुक्तवान् ॥१२॥ सहदेवमिति । सृञ्जयैः सृञ्जयदेशाधिपतत्सैन्यैः सह, दक्षिणस्यां दिशि, सहदेवं, आदिशदाज्ञापयामास । मत्स्यैर्मत्स्यदेशाधिपतत्सैन्यैः सह, प्राच्यां पूर्वस्यां दिशि, वृकोदरं भीमम्, आदिशत् ॥१३॥ त इति । वीराः ते सहदेवादयः, ओजसा बलेन, नृपांश्चतुर्दिग्गतान् राज्ञः, विजित्य, हे नृप, यक्ष्यते यागं करिष्यमाणाय, अजातशत्रवे धर्मराजाय, भूरि बहु, द्रविणं वित्तं, दिग्भ्य, आजह्रुः आहृत्य समर्पयामासुः ॥१४॥

कृष्णप्रिया

इस विश्व में कोई बड़े से बड़ा देव भी तेज, कीर्ति यश, लक्ष्मी, सौन्दर्य एवं ऐश्वर्य आदि के द्वारा मेरे भक्त का तिरस्कार नहीं कर सकता तब कोई नृपति उसका तिरस्कार कर दे इसकी सम्भावना ही कैसे ॥११॥ श्रीशुकमहर्षिजी कहते हैं कि राजन् परीक्षित् ! भगवान् श्रीकृष्णचन्द्रजी की बात का श्रवण करके धर्मराज युधिष्ठिरजी का मन आनन्द विभोर बन गया और मुखारविन्द विकसित हो गया । पुनः महाराज ने अपने बन्धुओं को दिग्विजय के लिये आदेश दिया । पुनः कृपानिधान भगवान श्रीकृष्णने पाण्डवों में अपने दिव्य तेज का सन्निवेश करके अत्यन्त तेजःसम्पन्न कर दिया ॥१२॥ श्रीधर्मराज महाराज ने सृंजय वंशके वीरों के साथ वीर बन्धु सहदेवजीको दक्षिण दिशा के दिग्विजय के लिये भेज दिये । मत्स्यदेशीय वीरों के साथ नकुल कुमार को पश्चिम

दिशा के विजय के लिये भेज दिये । श्रीअर्जुनजी को कैकय देशीय वीरों के साथ उत्तर दिशा में भेजे । श्री भीमसेनजी को मद्रदेशीय वीरों के साथ पूर्व दिशा के दिग्विजय के लिये आदेश दिया ॥१३॥ राजन् परीक्षित् भीमसेन आदि वीर बन्धुओं ने वीर्य और पराक्रम से चारों दिशाओं के राजाओं को जीत कर राजसूय यज्ञ के लिये महाराज धर्मराज को बहुत धन समर्पित किया ॥१४॥

श्रुत्वाजितं जरासन्धं नृपतेर्ध्यायतो हरिः । अहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥१५॥
भीमसेनोऽर्जुनः कृष्णो ब्रह्मलिङ्गधरास्त्रयः[1] । जग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः ॥१६॥
ते [2]गत्वाऽऽतिथ्यवेलायां गृहेषु गृहमेधिनाम् । ब्रह्मण्यं [3]समयाचेरन्राजन्या ब्रह्मलिङ्गिनः ॥१७॥
राजन्विद्ध्यतिथीन्[4]प्राप्तानर्थिनो दूरमागतान् । तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे ॥१८॥
किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः । किन्न[5] देयं वदान्यानां कः परः समदर्शिनाम् ॥१९॥
योऽनित्येन शरीरेण सतां गेयं यशो ध्रुवम् । नाचिनोति स्वयं कल्पः स वाच्यः शोच्य एव सः ॥२०॥
हरिश्चन्द्रो रन्तिदेव उञ्छवृत्तिः शिबिर्बलिः । व्याधः कपोतो बहवो ह्यध्रुवेण ध्रुवं गताः ॥२१॥

कर्दमक्षमा

जरासन्धम्, अजितम्, श्रुत्वा, ध्यायतः, नृपतेः, हरिः, उद्धवः, यम्, उवाच, तम्, एव, उपायम्, अद्य, उवाच ह ॥१५॥ तात ! यतः, बृहद्रथसुतः, गिरिव्रजम्, भीमसेनः, अर्जुनः, कृष्णः, त्रयः, ब्रह्मलिङ्गधराः, जग्मुः ॥१६॥ ते, गृहमेधिनाम्, गृहेषु, राजन्याः, ब्रह्मलिङ्गिनः, गत्वा, ब्रह्मण्यम्, आतिथ्यवेलायाम्, समयाचेरन् ॥१७॥ राजन् ! अर्थिनः, दूरम्, आगतान्, अतिथीन्, विद्धि, तत्, न, यत्, वयम्, कामयामहे, तत्, प्रयच्छ, ते, भद्रम् ॥१८॥ किम्, अकार्यम्, असाधुभिः, तितिक्षूणाम्, अकार्यम्, वदान्यानाम्, किम्, न, देयम्, समदर्शिनाम्, कः, परः ॥१९॥ यः, अनित्येन, शरीरेण, सताम्, गेयम्, ध्रुवम्, यशः, स्वयम्, न, कल्पः, आचिनोति, सः, वाच्यः, एव, सः ॥२०॥ हरिश्चन्द्रः, रन्तिदेवः, उञ्छवृत्तिः, शिबिः, बलिः, व्याधः, कपोतः, बहवः, अध्रुवेण, ध्रुवम्, गताः ॥२१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आद्यो हरिः श्रीकृष्णः ॥१५॥ गृहेषु वर्तमानं समयाचेरन् सम्यगयाचन्तेत्यर्थः ॥१७-१८॥ नन्विदं कामयामह इति विशेषो निर्दिश्यताम् अन्यथा यस्य पुत्रादेर्वियोगो दुस्सहः स कथं देयः तथा राजमण्डनं किरीटाद्यदेयं यत्तद्भिक्षुभ्यः कथं देयम् तथातिरम्यं रत्नाभरणादियोग्यं कथं परस्मै देयमिति चेदत आहुः-किं दुर्मर्षमित्यादि । अथ दृष्टान्तत्वेनार्थान्तरमाहुः-किमकार्यमिति । यथा साधूनामकार्यं नास्ति तथा तितिक्षूणां दुर्मर्षं दुस्सहं नास्ति वदान्यानामत्युदाराणामदेयं नास्ति समदर्शिनां परश्च नास्ति अतः किं विशेषनिर्देशेनेत्यर्थः ॥१९॥ किञ्च अर्थिने धीरेण मुद्गलादिवत्प्राणा अपि न वञ्चनीया इत्याशयेनाऽऽहुः-योऽनित्येनेति । नाचिनोति न सम्पादयति स वाच्यः निन्द्यः ॥२०॥ विश्वामित्रार्थानृण्याय हरिश्चन्द्रो भार्यात्मजादिसर्वं विक्रीय स्वयं चाण्डालतां प्राप्तोऽप्यनिर्विण्णः सहायोध्यावासिभिर्जनैः स्वर्गं गतः रन्तिदेवः सकुटुम्बोऽष्टचत्वारिंशदहानन्ययलब्धान्नोदकोऽपि कथञ्चिल्लब्धान्नोदकाद्यर्थिभ्यो दत्त्वा ब्रह्मलोकं गतः उञ्छवृत्तिर्मुद्गलः षण्मासं सीदत्कुटुम्बोऽप्यातिथ्यदानेन ब्रह्मलोकङ्गतः शिबिः शरणागतकपोतरक्षणाय स्वमांसं श्येनाय दत्त्वा दिवं गतः बलिः सर्वस्वं ब्राह्मणवेषधारिणे हरये दत्त्वा तमेवात्मसाच्चकार कपोतश्चातिथये व्याधाय कपोत्या सहाऽऽत्ममांसं दत्त्वा विमानेन दिवं गतः व्याधस्तयोः सत्त्वं वीक्ष्य स्वयमतिनिर्विण्णो महाप्रस्थाने वनाग्निदग्धदेहो विष्कल्मषो दिवमारुरोह एवमन्ये च बहवोऽध्रुवेण शरीरेण ध्रुवं लोकं गता इति ॥२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु ''जरासन्धं निहत्यैव पाण्डवैस्तु दिशो जिताः '' इति पुराणान्तरविरोधस्य कः परिहार इति चेदत्राह-शिष्टोक्तिरेवेति

---

१. धरास्ततः-इति कस्यचित् । २. तं गत्वा-वीर. विज. । ३. समयाचन्त राजन्या-वीर. विज. । ४. नस्मानर्थिनो गृहमागतान्-वीर. विज. । ५. किमदेयं-वीर. ।

गृहाण । सा च - "पूर्वाः कथाः परं ब्रूयुः पराः पूर्वं तथैव च । मोहनार्थाय दुष्टानां सर्वव्यत्यास इष्यते ॥" इति विजयध्वजः ॥१५॥ हेति सूचितमितिहासमाह-ब्राह्मणलिङ्गानि वेदपाठादीनि । सभापर्वणि तु "तपस्विनां ब्राह्मणानां स्नातकानां परिच्छदाम्" इत्युक्तं जरासन्धवधार्थं भीमस्यैव गन्तव्येऽर्जुनगमने हेतुरपि तत्रैवोक्तः । "मयि नीतिर्बलं भीमे रक्षिता चावयोर्जयः । मागधं साधयिष्याम इष्टिं त्रय इवाग्नयः ॥" इति ॥१६॥ तं जरासन्धम् । आतिथ्यवेलायामादित्ये दिनमध्यं गाहमाने । इत्यर्थ इति-अतीते लिङार्ष इत्याशयः ॥१७॥ तद्वस्तु ॥१८॥ स आक्षिपति-नन्विति । विशेषो याच्यवस्तुभेदः । अन्यथा निर्देशाभावे । अतोऽत्र दुर्मर्षत्वे यतस्तितिक्ष्वादीनामित्थं गतिरतो हेतोः । इत्यर्थ इति-देवभेदकथनं त्वब्रह्मण्याग्रे एवोचितं न तु तव ब्रह्मण्यस्यापीति भावः । यद्वा-असाधुभिः ओ वासुदेवः साधुः साधयिता येषां तेषां किमकार्यं कर्तुमशक्यमपि तु सर्वमेव शक्यमेवेत्यर्थः । ननु किमिच्छथ तद्ब्रूत अन्यथा यदि मत्पुत्र एव वः कामितः स्यात्तर्हि स ममतास्पदपुत्रविच्छेदः कथं सोढव्यस्तत्राहुः-किं दुर्मर्षमिति । विश्वामित्रादिभ्यो । दशरथादिकर्तृकपुत्रादिसमर्पणात् । नन्वेवं प्रार्थयन्तो यदि गृहजनैस्तिरस्क्रियध्वे यूयं तर्हि किं स्यात्तत्राहुः-किमकार्यमिति । ननु यदि मच्छरीरमेव याचथ तर्हि तत्कथं देयं तत्राहुः-किमदेयमिति । दध्यगादौ देवेभ्यः शरीरदानस्यापि दृष्टत्वात् । ननु यदि मच्छत्रवो भवथ तर्हि शत्रुभ्यः कथं देयं तत्राहुः-कः पर इति । समदर्शिनां ज्ञानिनां न हि त्वयि विषमयदर्शनरूपमज्ञानमस्तीति भावः ॥१९॥ पुरुषेण यशःसम्पाद्यमाह-किञ्चेति । वाच्यो निन्द्यः । "वाच्यस्तु कुत्सिते हीने वचनार्हे च वाच्यवत्" इति मेदिनी ॥२०-२१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रुत्वा ध्यायत इति नारदेन कथितमुद्धवमन्त्रं कथमयं श्रीभगवान्नोट्टङ्कयति कथं वा प्रकारान्तरं तत्र चिन्तयतीति मनसि चिन्तयतः विचारयत इत्यर्थः । स्वतो महावरस्वभावत्वेऽपि विष्णुतेजसोपबृंहितत्वेऽपि दिग्विजये प्रवृत्तस्य तस्य भीमस्य तु तमजित्वैवागमनं श्रीभगवत एव रह उपदेशादिति गम्यं ह हर्षे अत्र टीकायामाद्यो हरिरित्यन्वयः । श्रीकृष्णस्य सर्वाविर्भावमूलरूपत्वं सूचयति, यथा ब्रह्मसंहितायाम्—

"ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः । अनादिरादिर्गोविन्दः सर्वकारणकारणम् " ॥ इति ॥१५॥

ब्रह्मलिङ्गमत्र स्नातकविप्रवेषः तद्धराः तथा च सभापर्वणि —

"तपस्विनां ब्राह्मणानां स्नातकानां परिच्छदम् । आच्छाद्य सुहृदां वाक्यैर्मनोज्ञैरभिनन्दिताः" ॥ इति

अनेन रथादिपरित्यागो ज्ञेयः त्रय इत्यत्र तत इति पाठे ततस्तदनन्तरं जरासन्धवधार्थं श्रीकृष्णेन सह भीमस्य गन्तव्यतायामर्जुनस्यापि गमने कारणं श्रीभगवता तत्रैवोद्दिष्टम् —

"मयि नीतिर्बलं भीमे रक्षिता चावयोर्जयः । मागधं घातयिष्याम इष्टिं त्रय इवाग्नयः" ॥ इति ।

एतदपि प्रायो जयने व्याज एव वस्तुतस्तु सख्यमेव कारणं गिरिव्रजं राजगृहं हे तातेति तेषां ब्रह्मलिङ्गत्वादिना कौतुकोद्रेकात् बृहद्रथस्य सतु इति तद्वंशधरत्वप्रसिद्धिसूचनया महावीरत्वादिकं सूचितम् ॥१६॥ गृहेषु गत्वा गृहान्तः प्रविश्य यतो ब्रह्मण्यं ब्रह्मलिङ्गिन इति आतिथ्यवेलायां माध्याह्निकभोजनावसरे सम्यग्वाक्यपाठवादिना स्तुतिपूर्वकमयाचेरन् प्रयोगश्चायं "व्यत्ययोबहुलम्" (३-१-८५) इति छान्दससूत्रात् याच्ञायां हेतुः गृहमेधिनं गृहिधर्मपरं तत्रापि ब्रह्मण्यं गृहमेधिनामिति पाठे आतिथ्यवेलायामित्यनुषङ्गः ॥१७॥ अतिथीन् तत्राप्यर्थिनो याचकान् तत्रापि दूरमागतान् विद्धि विप्रानित्यनुक्तिरनृतपरिहारार्था अतः प्रयच्छ तच्च युक्तमेव तवेत्याहुः - हे राजन्निति । राज्ञा विप्रप्रार्थितस्यावश्यदेयत्वादिति भावः । ततश्च तव मङ्गलं भावीति विप्रोचिताशीर्भिः प्रोत्साहयन्ति भद्रन्त इति भूयादिति शेषः । वस्तुतस्तु मोक्षापेक्षयेदमुक्तं यद्वयं कामयामहे तत्ते तव भद्रमेवेत्यर्थः । यद्वा यद्यस्मात् ते त्वत्तो वयं भद्रमेव कामयामहे यथाऽस्माकं भद्रं भवतीति ॥१८॥ किन्दुर्मर्षमित्यादिना तितिक्षा वदान्यता समदर्शिता च त्वय्यस्ति इत्यस्मात्कामितं त्वं दातुमर्हस्येवेति भावः । यदि च ता न सन्ति तदा तु दातुं नार्हस्येवेत्याह - किमकार्य्यमिति । इयञ्च याचकरीत्या प्राक् स्तुतिनिन्दाचातुरी ॥१९॥ अथ केवलां निन्दामपि दर्शयन्ति - य इति । ध्रुवं नित्यं किञ्च सतां सद्भिर्गेयम् इति लोकद्वयमङ्गलत्वेन महावाणिज्यं सूचितं स्वयं स्वत एव कल्पः समर्थोऽपि नत्वन्यसाहाय्येन यद्वा स्वयं परप्रेरणं विना नाचिनोतीत्यर्थः । दोषदर्शिनां वाच्यः अदोषदर्शिनामपि स एव शोच्यः शोकयोग्यः स इति पुनरुक्तिस्तस्यैव शोच्यतानिर्धारणार्थम् ॥२०॥ तत्र च सतां व्यवहारं प्रमाणयन्ति हरिश्चन्द्र इति ॥२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रुत्वा ध्यायतस्तज्जयोपायं चिन्तयतः, किंवा दुःखेन चिन्तां कुर्व्वतः, सप्तम्यां षष्ठी, ध्यायति सतीत्यर्थः । किंवा कर्मणि ध्यायन्तमाह-हरिरिति, तस्य चिन्तादुःखहरणात्; आद्यः श्रेष्ठ इति भगवत्ताप्रकटनात् । यद्वा, भक्तेषु मन्त्रिषु चाद्य उद्धवः, ह हर्षे ॥१५॥ ब्रह्मलिङ्गं स्नातकविप्रवेषस्तद्धराः, तथा च सभापर्व्वणि (म.भा.,सभा.प.२०-२२)-'तपस्विनां ब्राह्मणानां स्नातकानां परिच्छदम् । आच्छाद्य सुहृदां वाक्यैर्मनोज्ञैरभिनन्दिताः ॥' इति; अनेन रथादिपरित्यागो ज्ञेयः । ततस्तस्मादुपायादेव हेतोः, किंवा उपायगदनानन्तरं सद्य एवेत्यर्थः । यद्वा, इन्द्रप्रस्थात् जरासन्धवधार्थं श्रीकृष्णेन सह भीमस्यैव गन्तव्यतायामर्ज्जुनस्यापि गमने कारणं तत्रैवोद्दिष्टं श्रीभगवता (म.भा.,सभा.प.२०-३०) 'मयि नीतिर्बलं भीमे रक्षिता चावयोर्जयः । मागधं घातयिष्यामि इष्टिं त्रय इवाग्नयः ॥' इति, एतदभिप्रायो नयने व्याजमेव, वस्तुतस्तु सख्यादेव; गिरिव्रजं राजगृहम्; हे तातेति तेषां ब्रह्मलिङ्गधरत्वादिना प्रेमोद्रेकात्; बृहद्रथस्य सुत इति महावीरत्वं सत्कुलजन्मादिकञ्च पितृमाहात्म्येन सूचितम् । तच्चोक्तं श्रीयुधिष्ठिरं प्रति तत्रैव तेन (म.भा.,सभा.प. १७/१३-१५)-

'अक्षौहिणीभिर्बह्वीभिरासीत् समरदर्पितः । राजा बृहद्रथो नाम मगधाधिपतिः पुरा ॥
रूपवान् वीर्य्यसम्पन्नः श्रीमानतुलविक्रमः । नित्यं दीक्षाङ्कितनुः शतक्रतुरिवापरः ॥
तेजसा सूर्य्यसदृशः क्षमया पृथिवीसमः । यमान्तकसमः कोपे श्रिया वैश्रवणोपमः ॥' इत्यादि ॥१६॥

गृहेषु स्थितं किंवा गृहेषु गत्वा गृहान्तः प्रविश्य, यतो ब्रह्मलिङ्गिन आतित्यवेलायां माध्याह्निकभोजनावसरे सम्यगवाक्पाटवादिना स्तुतिपूर्व्वकं समयाचेरन्, यतो गृहमेधिनं गृहिधर्मपरम्, तत्रापि ब्रह्मण्यम् ॥१७॥ अतिथीन् अभ्यागतान्, तत्राप्यर्थिनो याचकान्, तत्रापि दूरमागतान् विद्धि, विप्रानित्यनुक्तिरनृतपरिहारार्थम् । अतः प्रयच्छ, तच्च युक्तमेव तवेत्याहुः-हे राजन्निति । राज्ञा विप्रप्रार्थितस्य अवश्यदेयत्वादिति भावः । ततश्च तव मङ्गलं भावीत्याशयेनाहुः-भद्रं त इति । इयं प्रोत्साहनार्थं ब्रह्मलिङ्गित्वानुरूपाशीः ॥१८॥ किं दुर्मर्षमित्यादिना तितिक्षा वदान्यता समदर्शिता च त्वयास्तीत्यस्मत्कामितं त्वं दातुमर्हस्येवेति भावः । इयं याचकरीत्या प्राग्वाक्चातुर्य्येण स्तुतिः ॥१९॥ किञ्च, सतां सद्भिर्गेयम्, इति लोकद्वयमङ्गलत्वेन महावाणिज्यं सूचितम् । स्वयं स्वत एव कल्पः समर्थोऽपि न त्वन्यसाहाय्येन; यद्वा, स्वयमेव, न त्वन्यप्रेरणादिना विनेति, स एव शोच्यः शोकयोग्यः, स इति पुनरुक्तिस्तस्यैव शोच्यतानिर्धारार्था ॥२०॥ तत्र च सतां व्यवहारमेव प्रमाणयन्ति-हरिश्चन्द्र इति ॥२१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥६-२४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

श्रुत्वेति । जरासन्धमजितं श्रुत्वा नृपतेर्युधिष्ठिरस्य ध्यायतः चिन्तयतः सतः हरिः श्रीकृष्णो यमुपायम् उद्धवो "बलिनामपि चान्येषां भीमं समबलं विना" इति प्राह तमेवोपायमाह ॥१५॥ भीमसेन इति । ब्रह्मरूपधरा विप्रवेषधरास्ततः इन्द्रप्रस्थाद्गिरिव्रजमिति सम्बन्धः ॥१६॥ तमिति ब्रह्मलिङ्गिनः विप्रवेषिणः राजन्याः भीमादयः गृहेषु वर्तमानं तं जरासन्धमयाचन्त ॥१७॥ याञ्चाप्रकारमेवाह-राजन्निति चतुर्भिः । गृहं प्रत्यागतानस्मानर्थिनो विद्धि जानीहि तन्नोऽस्मभ्यं प्रयच्छ देहि किन्तत् यद्वयं कामयामहे ते तुभ्यं भद्रं मङ्गलमस्तु ॥१८॥ ननु, यत्कामयामह इति सामान्यतो निर्दिष्टं न विशेषतः तद्यदि दुस्सहमदेयञ्चेत्कथं कामयध्वम् इत्यत आहुः - किमिति दुर्मर्षं दुस्सहं किं न किमपीत्यर्थः । किमकार्यमसाधुभिः कः परः समदर्शिनामिति च दृष्टान्तार्थं यथाऽसाधुनामकार्यं नास्ति तथा तितिक्षूणां दुर्मर्षं नास्ति यथा समदर्शिनां सर्वं ब्रह्मात्मकं पश्यतां परोऽन्यः अब्रह्मात्मकस्वतन्त्रपदार्थो नास्ति तथाऽत्युदाराणामदेयं नास्तीत्यर्थः । अतः किं विशेषनिर्देशेनेति भावः । वदान्यानामर्थिने देहोऽपि देय एवेत्यभिप्रेतम् ॥१९॥ तदेव सहेतुकं व्यञ्जयन्तो विपर्यये निन्द्यतामाहुः । य इति । सतामितिकर्तरिषष्ठी सद्भिर्गेयम् । ध्रुवं शाश्वतं यशो यः स्वयं समर्थः सन्नचिनोति न सम्पादयति स एव वाच्यः निन्द्यः अत एव शोच्यः अहो किमस्य दौर्भाग्यम् इति कृपालुभिः शोच्य इत्यर्थः ॥२०॥ अनित्यशरीरेण नित्ययशःसम्पादनं किं क्वचित्प्रसिद्धं तत्राहुः - हरिश्चन्द्र इति । विश्वामित्रानृण्याय हरिश्चन्द्रो भार्यात्मजादिसर्वं विक्रीय स्वयं चाण्डालतां प्राप्तोऽप्यनिर्विण्णः सहायोध्यावासिभिर्जनैः स्वर्गं गतः रन्तिदेवः सकुटुम्बोऽष्टचत्वारिंशदहान्यलब्धान्नोदकोऽपि कथञ्चिल्लब्धान्नोदकाद्यर्थिभ्यो दत्वा ब्रह्मलोकं गतः उञ्छवृत्तिर्मुद्गलः षण्मासं सीदत्कुटुम्बोऽप्यातिथ्यदानेन ब्रह्मलोकं गतः शिबिः शरणागतकपोतरक्षार्थं

स्वमांसं श्येनाय दत्त्वा दिवं गतः बलिर्विप्रवेषाय विष्णवे सर्वस्वं दत्त्वा तमेवात्मसाच्चकार कपोतश्चातिथये व्याधाय कपोत्या सहात्ममांसं दत्त्वा विमानेन दिवं गतः व्याधस्तयोः सत्त्वं वीक्ष्य स्वयमतिनिर्विण्णो महाप्रस्थाने वनाग्निदग्धदेहो निष्कल्मषो दिवमारुरोह एवमन्ये च बहवोऽध्रुवेण शरीरेण ध्रुवं यशः सञ्चितवन्त इत्यर्थः ॥२१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अत्र दिग्विजये जरासन्धो जितो मारितो वेति तत्प्रसङ्गो नाकर्णित इति राज्ञो हार्दां शङ्कां परिहरन्निव दिग्विजयात्प्रागेव तद्वधो वृत्त इति नात्र प्रसक्त इति वृत्तं तद्धननमनुवदति - श्रुत्वेति। ननु दिशां जयादनन्तरं तद्वधः किं न स्याद्यथास्थितमन्यथानूद्यते किमर्थमिति चेन्न निर्णयग्रन्थविरोधात् ननु पूर्वापराभावे किं प्रमाणं किं प्रयोजनमिति चेदुच्यते पूर्वाः कथाः परं ब्रूयुः पराः पूर्वं तथैव च "मोहनाथाय दुष्टानां सर्वव्यत्यास इष्यते" इत्यादिवाक्यं किञ्च "जरासन्धं निहत्यैव पाण्डवैस्तु दिशो जिताः" इत्यादिस्पष्टवचनं भगवत एव जरासन्धमजितं श्रुत्वा तज्जयः कथमिति ध्यायतो युधिष्ठिरस्य उद्धवो यमुपायमुवाच तमाह हरिरित्यन्वयः ॥१५॥ हेति सूचितमितिहासं स्पष्टयति - भीमसेन इत्यादिना। ब्रह्मलिङ्गधराः ब्राह्मणलक्षणानि बिभ्राणाः यतो यत्र ॥१६॥ आतिथ्यवेलायाम् आतिथ्यपूजासमये आदित्ये दिनमध्ये गाहमान इत्यर्थः ॥१७-१८॥ दुर्मर्षं दुस्सहं परः शत्रुः "परोऽरिपरमात्मनोः" इति ॥१९॥ आचिनोति सञ्चिनोति उपार्जितं करोति वाच्यो निन्द्यः ॥२०॥ अध्रुवेण शरीरेण ॥२१-२३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥७-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥६-४८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥७-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आद्यो हरिः ॥१५॥ गृहमेधिनां या आतिथ्यवेला तस्यां समयाचेरन् समयाचन्त ॥१७-१८॥ ननु, किं कामयध्वे तद्विशेषं ब्रूत अन्यथा याचकैर्युष्माभिर्यदि मत्प्रियः पुत्र एव कामितः स्यात्तदा तदतिममतास्पदस्वपुत्रविच्छेददुःखं कथं मया सोढव्यं तत्राहुः-किं दुर्मर्षमिति। विश्वमित्रादिभ्यो दशरथाद्यैरतिप्रियपुत्रार्पणस्यापि दृष्टत्वादिति भावः। नन्वेवं प्रार्थ्यमानैः गृहस्थलोकैः यदि यूयं तिरस्क्रियध्वे तर्हि किं स्यात्तत्राहुः-किमकार्य्यमिति। ननु यदि मच्छरीरमेव युष्मत्कामितं स्यात्तदा तदहन्तास्पदं कथं देयं तत्राहुः-किमदेयमिति। दध्यङ्ङादौ देवप्रार्थनायां स्वशरीरदानस्यापि दृष्टत्वादिति भावः। ननु यदि यूयमेव मच्छत्रवो भवथतदा शत्रुभ्यस्तत् कथं देयं तत्राहुः-कः पर इति। समदर्शिनां ज्ञानिनां न हि त्वय्यपि विषमदर्शनलक्षणमज्ञानं सम्भवेदिति भावः ॥१९॥ नाचिनोति न सम्पादयति ॥२०॥ विश्वामित्रानृण्याय हरिश्चन्द्रो भार्यात्मजादि सर्वं विक्रीय स्वयं चाण्डालतां प्राप्तोऽप्यनिर्विण्णः सह अयोध्यावासिभिः जनैः स्वर्गं गतः। रन्तिदेवः सकुटुम्बोऽप्यष्टचत्वारिंशदहान्यलब्धोदकोऽपि कथञ्चिल्लब्धान्नोदकादिकमर्थिभ्यो दत्त्वा ब्रह्मलोकं गतः। शिबिः शरणागतकपोतरक्षणाय स्वमांसं श्येनाय दत्त्वा स्वर्गं गतः। बलिः सर्वस्वं विप्रवेषधारिणे हरये दत्त्वा तं वशे चकार। कपोतश्चातिथये व्याधाय कपोत्या सहात्ममांसं दत्त्वा विमानेन दिवं गतः। व्याधस्तयोः सत्त्वं वीक्ष्य स्वयमपि निर्विण्णो महाप्रस्थाने वनाग्निदग्धदेहो दिवमारुरोह। एवमन्येऽप्यध्रुवेणैव शरीरेण ध्रुवं चिरकालस्थायिलोकं गताः ॥२१॥

गूढार्थदीपिनी

आद्यो हरिः श्रीकृष्णः। ह स्पष्टम् ॥१५॥ लिङ्गं वेषः। हे तात परीक्षित्! यतः यत्र। गिरिव्रजं राजधानीम् ॥१६॥ गृहेषु गत्वा तत्र वर्तमानं गृहमेधिनं सद्गृहस्थं तं समयाचेरन् सम्यगयाचन्त। ब्रह्मलिङ्गिनः ब्रह्मवेषिणः। राजन्याः क्षत्रियाः ॥१७॥ यत् कामयामहे तत् वस्तु नोऽस्मभ्यं प्रयच्छ देहि ॥१८॥ तितिक्षूणां सहनशीलानां किं दुर्मर्षं किं दुःसहं न किमपि। किमकार्यं न किमपि। वदान्यानाम् अत्युदाराणां किमदेयं न किमपि। कः परः परकीयः न कोऽपि। परः शत्रुर्वा ॥१९॥ ध्रुवं नित्यं यशः नाचिनोति न सम्पादयति स्वयं कल्पः समर्थोऽपि स वाच्यः निन्द्यः। साधुभिः शोचनीयश्च जन्मवैफल्यात् ॥२०॥ हरिश्चन्द्रस्य कथा स्पष्टैव। रन्तिदेवोऽष्टचत्वारिंशत् दिनानि सकुटुम्बो निराहारः कथञ्चिल्लब्धान्नजलादि याचकेभ्यो दत्त्वा ब्रह्मलोकं गतः।

उञ्छवृत्तिः मुद्गलः षण्मासं सीदत्कुटुम्बोऽप्यातिथ्येन ब्रह्मलोकं गतः । शिबिः शबणागतकपोतरक्षणार्थं श्येनाय स्वमांसं दत्त्वा स्वर्गं गतः । बलेः कथाऽष्टमस्कन्धे स्पष्टा । कपोतः व्याधाय कपोत्या सहात्ममांसं दत्त्वा दिवं गतः । व्याधस्तयोर्धैर्यमातिथ्यं च वीक्ष्य वनाग्निदग्धदेहो दिवं गतः एवमन्येऽपि बहवोऽध्रुवेण शरीरेण ध्रुवं लोकं गताः ॥२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आद्यो विश्वहेतुः ॥१५॥ ततः स्वस्थानतः ब्रह्मलिङ्गधराः विप्रवेषधारिणः यतो यत्र ॥१६॥ गृहेमेधिनां या आतिथ्यवेला तस्यां गृहेषु वर्तमानं ब्रह्मण्यं जरासन्धं समयाचेरन् सम्यगयाचन्त ॥१७-१८॥ ननु, भवत्कामितं यदि अदेयं स्यात्तत्कथं दास्यामीत्यत आहुः-किं दुर्मर्षमित्यादि । यथा तितिक्ष्वादीनां दुर्मर्षादिकं किं न किमपि तथा वदान्यानामुदाराणां किमदेयं न किमपि सर्वं देयमेवेत्यर्थः ॥१९॥ नाचिनोति न सम्पादयति स जनैर्वाच्यो निन्द्यः दयालुभिः दुष्टपुत्रवत् शोच्यश्च ॥२०॥ हरिश्चन्द्रादयो बहवः अन्यत्र इह च प्रसिद्धाः अध्रुवेण शरीरेण ध्रुवं चिरकालस्थायिलोकं गताः ॥२१-२३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अत्रोत्तमक्रमं विहायाधमक्रमं विहायाधमक्रमं धरता मया दिग्विजयजराकुमारमारणादिकथाऽत्र व्यत्यस्य कथिता मानानुसारमेतदर्थो ज्ञेय इत्यसूसुचद्बादरायण इति । श्रुत्वा जितं जरासन्धमिति श्लोकोऽपेक्षितमनुवर्त्य स्वयं व्याख्याय सभापर्व स्मारयित्वा पौर्वापर्योक्तिप्रयोजनं च शब्दनिर्णयमानाननतः प्रदर्श्य जरासन्धवधानन्तरमेव दिग्विजय इत्यर्थस्थेम्ने मानान्तरसंवादं च दर्शयति ॥ अजितमिति । अजितं जरासन्धं भगवद्भीतमित्यस्यानुवृत्तिः । तस्य षष्ठ्यन्तता । नलोपः प्रातिपदिकान्तस्येत्यादिवदिति सूचयितुं भगवदित्युक्तिः । सर्वं वाक्यं नयेन वाऽध्याहारेण वैवेत्यस्य तेन योजनेति दर्शयितुं भगवत एवेत्युक्तिः । श्रुत्वा । न भीमादिभिरित्येवकारव्यावर्त्यं ज्ञेयम् । तथा सभापर्वणि पश्चाद्दिग्विजयोक्तेरित्युक्तिस्तद्वाक्यानुक्तिश्च ग्रन्थबाहुल्यदरतो न त्वनादरत इति ज्ञेयम् । तच्च किञ्चिदुदञ्चयामः । घातयित्वा जरासन्धं बुद्धिपूर्वमरिन्दमः । धर्मराजमनुप्राप्य पृथां कृष्णां च भारत । सुभद्रां भीमसेनं च फल्गुनं यमजौ तथा । धौम्यमामन्त्रयित्वा तु प्रययौ स्वां पुरीं प्रति । दुर्हृदामप्रहर्षाय सुहृदां नन्दनाय च । विजयस्ते ध्रुवं पार्थ प्रियं काममवाप्स्यसि । इत्युक्तः स ययौ पार्थः सैन्येन महता वृतः । अग्निदत्तेन दिव्येन रथेनाद्भुततेजसा । तथैव भीमसेनोऽपि यमौ च पुरुषर्षभौ । ससैन्याः प्रययुः सर्वे धर्मराजेन पूजिताः । दिशं धनपतेरिष्टामजयत्पाकशासनः । भीमसेनस्तथा प्राचीं सहदेवस्तु दक्षिणाम् । प्रतीचीं नकुलो राजन्दिशं व्यजयतास्त्रवित् । खाण्डवप्रस्थमध्यस्थो धर्मराजो युधिष्ठिरः । आसीत्परमया लक्ष्म्या सुहृद्गणवृतः प्रभुरित्यादौ ग्रन्थबाहुल्ये । आचार्या अपि । क्व राजसूयमद्येत्यारभ्यैकविंशेऽध्याये बहुना ग्रन्थेनाभ्यधुः । एवं पश्चाज्जरासन्धवधानन्तरदिग्विजयस्योक्तेर्व्यत्यासेन व्यासेन शंसने किं निमित्तमित्यत आह ॥ पूर्वाः कथा इति । पूर्वाः पूर्वमीरयितव्याः कथाः परमनन्तरं ब्रूयुः । एतेन नैकत्र तत्राप्येक एवेति नेति सूचयति । तथैव परा उत्तरत्र वक्तव्याः पूर्वम् । ब्रूयुरित्यन्वेति । प्रयोजनञ्चैतदित्याह ॥ मोहनार्थायेति । मोहनमेवार्थस्तदर्थम् । तदधिकरण आह । दुष्टानां तमोयोग्यानां सर्वं व्यत्यास एवमिष्यत इति । नामादिसर्वव्यत्यासः शतं दुर्योधनादींस्ते धनञ्जयशरैर्हतान्प्रदर्शयिष्य इत्यादौ भीमशरैर्हतानिति वक्तव्य एवमुक्तिरिति सर्वव्यत्यासः । केचित्तु समग्रग्रन्थार्थव्यत्यास इति शैवादिभ्यः पुरेत्याद्यर्थमभ्यधुः । तर्हि भागवतस्येव भारतस्यापि तत्कृतत्वाविशेषादेतदनुसारेण तदर्थो वा तदनुसारेणैतदर्थो वा ज्ञेय इत्यनिर्णयो वा तदुत्तरत्वेन तद्व्याख्यारूपत्वादेतदनुरोधेन तदर्थ एव ज्ञेय इति च प्राप्ते तत्राह ॥ विस्तार इति । विस्तर एव विस्तारः । तर एव तार इतिवत्प्रज्ञाद्यण् । शब्दतो विस्तृते ग्रन्थ इत्यर्थः । यदुक्तं स्यात्तदेवाविरोधतोऽप्रतिरोधात् । सङ्क्षिप्योक्तेर्ग्रन्थस्यैतदप्रतिमल्लत्वात् । अत एवाह ॥ सङ्क्षेपोक्तमिति । विरोधे तु विस्तरग्रन्थे प्रतिरोधे सङ्क्षेपोक्तं नेति शेषः । न ग्राह्यम् । तुरेवार्थकः । अविरोधतो विरोधे तत्संवादसहित इति यावत् । ग्राह्यम् । तत्रापि परमप्रमेयेऽवश्यमेवं स्वीकर्तव्यमित्याह ॥ यथा सतां गुणोक्तिः स्यादिति । श्रीदामानं कृष्णउवाहेत्युक्तौ भगवतो न गुणः प्रतीयतेऽतस्तत्र विभक्तिव्यत्यासः । प्रस्तुते च भीमादिभिर्जरासन्धमजितं श्रुत्वेत्युक्तौ न हि भीममाहात्म्यं सेत्स्यति । तदज्ञानेऽनर्थः स्यादिति सतां गुणोक्तिर्यथा स्यात्तथा तद्ग्राह्यमित्यन्वयः । एककत्वादिति न सम्यगुत्तरितकिञ्चिन्नाशिकां कर्षन्तं प्रत्याह ॥ जरासन्धमिति । पाण्डवैर्जरासन्धं निहत्यैव दिशो जिताः वासुदेवप्रसादाद्राजसूयः क्रतुः पाण्डवैः कृत इति मात्स्योक्तेश्च । ससंवादित्वाद्भारतस्य प्रतिरोधत्वात्तदनुसारेण भागवतार्थो वधरूपप्रयोजनमुद्दिश्य राजसूयमुपाक्रमत्तत्कर्तुमालुलोचेति । अत्र निर्णय आचार्योक्ता भारताद्यनुसारिण्यो बाणासुरसमराद्याः कथा एतत्प्राक्तन्योऽनुसन्धेयाः ॥ ततश्चायं श्लोकार्थः ॥ स्वस्मादेव जरासन्धं

कैश्चिदप्यजितमपराजितं श्रुत्वा ध्यायतस्त्यागो वा यागस्य वरः करणं न विना जराशरीरजमरणं स सेत्स्यतीति कथं कर्तव्यमिति ध्यानं गतवतो नृपतेराद्ये प्रथमभाविनि कार्ये उद्धवो यमुपायं तदानीमुवाच तमेवाद्याह ॥ हेति । तस्यैव स्वादिसर्वसम्मतत्वमाह ॥१५॥ यतो यस्मिन्बृहद्रथसुतो वर्तते तं गिरिव्रजम् । तत उद्धवालोचनतः । ब्रह्मलिङ्गधरा भीमसेनोऽर्जुनः कृष्ण इति त्रयो जग्मुः ॥१६॥ गृहमेधिनां गृहस्थाश्रमिणां गृहेष्वातिथ्यवेलायां मध्याह्नवेलायां मध्याह्नसमये ब्रह्मलिङ्गिनो ब्रह्मणां ब्राह्मणानां लिङ्गं येषामस्तीति ते राजन्याः क्षत्रियाः सन्तोऽपीति न कापट्यं निन्दितं चेदपि प्रयोजनवशात्कृतमिति द्योत्यते । गत्वा समयाचन्त । सं अयाचतेति द्विपदे । पूर्वमालोचितं सारं ययाचिरे। यथोक्तं काठकभाष्यादौ । हीनत्वादखिलैर्दोषैस्सारूपत्वतो हरिः । हंस इत्युच्यत इति । स्वं स्वकार्यसाधकं व्यापारमिति वा । सः कोपे वारणे स स्यात्तथा शूलिनि साधक इति विश्वः । नाज्ञावज्ञानं सम्भवतीत्याह ॥ ब्रह्मण्यमिति । हे राजन् । तव गृहमागतान्नोऽर्थिनोऽर्थकाङ्क्षिणोऽतिथीन्विद्धि जानीहि । तत्तस्माद्वयं यत्कामयामहे तन्नःप्रयच्छ। वेषधारिभी रीतिरेतादृशी लोकेऽनुष्ठेयेति बोधयितुं तदाशिष इति आशासते ॥ ते भद्रमिति । तव मङ्गलमस्त्विति बहिरान्तरङ्गिकस्तु ते भद्रं नः प्रयच्छेति। मयि किमपि नास्ति किं कुर्यामित्यत आहुः ॥ अर्थिनोऽर्थवतस्तव गृहमागताननिति। अतो नातिथ्यर्थ्यन्यतरातिरेक इति योजना ॥१८॥ स्वयाचितवितरणस्थिरतां जनयन्तस्तं निदर्शनप्रदर्शनमुखेन श्लोकत्रिकेण प्रोत्साहयन्ति ॥ किं दुर्मर्षमिति ॥ तितिक्षूणामिति । सहनशालिनां दुर्मर्षं दुःसहं किं ते सर्वं सहन्ते । वदान्यानां दातॄणामदेयं किं न किमपि । समयेते प्राणमपि ददतीति भावः । समदर्शिनां सर्वत्र सर्वत्राता हरिरिति समतीतानां परः शत्रुः कः । न योग्यतामतिहाय समदर्शिनामस्तीत्यर्थः । बहुजीवजातसहितपर्वतदाहादि न तुष्टितो दुष्टं भवतेति सामान्यवचनेनान्तरङ्गतस्तन्मर्मस्पृशन्त इव शंसति । असाधुभिरकार्यं किं न किमपि सर्वं निषिद्धमपि सन्नद्धः कर्तुमसाधव इति भाव इति ॥१९॥ योऽधिकार्यनित्येन शरीरेण स्वयं कल्पः शक्तः सन् सतां गेयम् । कृत्यानां कर्तरि वेति स्मरणात् षष्ठी । ध्रुवं शाश्वतिकं यशो नाचिनोति नापार्जयति स दुर्जन इह वाच्यो निन्द्यः परत्र नरकादौ शोच्यश्च ॥२०॥ हरिश्चन्द्रश्चण्डालतामुपायातोऽपि हर्षेण हरिं भजञ्जनैः सहायोऽध्यावासिभिरुत्तमां गतिं भेजे । रन्तिदेवोऽष्टचत्वारिंशद्दिनान्यलब्धोदकान्नः कथञ्चिल्लब्धतत्को हरये पुल्कसवेषधारिणे तदपि दत्त्वा सद्गतिं गतः । उञ्छवृत्तिर्मुद्गलोऽतिथिसन्तर्पणं सीदत्सुदत्यादिकुटुम्बोऽपि कृत्वा हरिं यातः । शिबिः परीक्षार्थमागादग्नीन्द्रात्मकयोः कपोतश्येनयोः स्वमांसं श्येनाय दत्त्वा कपोतमरक्षत् । बलिस्तु सर्वस्वं सर्वस्वामिने दत्त्वा बद्धो न चुक्रोश तस्मै । कपोतः कपोत्या सह स्वमांसं दत्त्वा परमात्मानमाप । स तद्गृहीतमांसो व्याधोऽपि निर्विण्णो महाप्रस्थाने दवदग्धदेहो हरिपुरमाप । धर्मव्याधो वा । एवं बहवोऽन्ये दधीचिप्रभृतयोऽध्रुवेण ध्रुवं हरिं गता इति न विविच्यास्माभिरुक्तमतो यत्कामयामहे तत्प्रयच्छ । हिराहैतत्प्रसिद्धिम् ॥२१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्र ब्रह्मण्यं विष्णुतेजो नाभिभवतीति जरासन्धो न जितः तस्याप्यजये यागो न भवेदिति नृपतेर्ध्यानं चिन्तारूपं पूर्वमेव भगवान् विनियुक्तमिति तस्याप्यशक्यभावनया चिन्ता तथापि तस्यापि दुःखनिवारको हरिः स्वस्मिन् तस्यालौकिको भयो जात इति उपायमेवाह-तत्रापि उद्धवोक्तमुपायमाह अन्यथा भगवान् कृत्रिमवेषं न सम्पादयेत् ॥१५॥ अर्जुनस्य तदंशत्वात् नरनारायणयोर्धर्मावतारात् पूर्णत्वायार्जुनस्य गमनम् अद्येदानीं भगवतोऽपि तथा वचनमाश्चर्यं भगवान् सर्वरूप इति ब्रह्मलिङ्गधरत्वं न दोषः तथार्जुनेऽपि पूर्वजन्मनि तथाभावात् अत एव वासनया संन्यासिवेषः पूर्वमपि कृतः अत एवोद्यमः भीमस्यैव वेषमाह-अनुवादे त्रयाणां वेषः क्रमेण निरूप्यते वेषान्तरे समानलीलत्वं नोपपद्यत इति अतो नूतनत्वाद्भीमपुरःसराः गिरिव्रजं जग्मुः इदानीं राजगृहमिति प्रसिद्धं यतो यस्मात् कारणात् तत्र बृहद्रथसुतो जरासन्धः यत इति सप्तम्यर्थे वा ॥१६॥ गतानां कृत्यमाह- ते गत्वेति। अतिथिवेला वैश्वदेवः अप्रत्याख्यातिथिः महाराजत्वात् कथमन्तः प्रवेश इत्याशङ्कायामाह-गृहमेधिनमिति । गृहस्थन्यायेन स्थितं तत्र हेतुर्ब्राह्मण्यमिति अन्यथा ब्राह्मणाः पराङ्मुखा गच्छेयुः एतेऽपि ब्रह्मलिङ्गिनः प्रविष्टाः ॥१७॥ तद्वद्याचनमपि कृतवन्तः सर्वथा अनृतत्वाभावाय राजन्निति अतिथिशब्दो ग्रामब्राह्मणव्युदासार्थः दूरमागताननिति बहुदानाय दयार्थञ्च अस्मद्दाने कीर्तिरपि भविष्यतीति सूचितम् अतः साधारण्येन वचनमाहुः-तन्नः प्रयच्छेति । ब्राह्मणत्वाज्ञापनाय मध्ये आशीः मिथ्यावेष इति ब्राह्मणस्याप्यफलत्वं वस्तुतस्तु मोक्षपर्यवसानात् भद्रमेव अथवा ते भद्रं प्राणादिरूपं कामयामहे तत्प्रयच्छेत्यर्थः ॥१८॥ ननु, दानं धर्मत्वात् सुखार्थं भवति यद्यस्मिन् दत्ते महत् दुःखं भवेत् वृत्तिर्वा विपद्येत न तद्देयमिति कथं सामान्येन प्रार्थनायां दानप्रतिज्ञासम्भव इत्याशङ्क्याह-किं दुर्मर्षमिति । ये तितिक्षवः सर्वातिक्रमसहनशीलाः अन्यथा ब्रह्मण्यता न स्यात् तथाचेत् किं दुर्मर्षं महद्दुःखमिति

सोढव्यमित्यर्थः नाप्येवं मन्तव्यम् एते महद्दुःखं नदास्यन्तीत्यभिप्रायेणाहुः-सहजवेषा भवन्ति अश्वसा सहितश्च "धूञ् कम्पने" इति धूर्वायुश्च त एते त्रयः अथवा किमित्येवमस्मभ्यं दुःखं दीयत इत्याशङ्कायामाहुः-किमकार्यमिति। दुष्टैर्भवद्भिः किमकर्तव्यं यज्ञविघातमपि करिष्यन्तीति मारणमुचितमिति भावः। ननु दानं शास्त्रसिद्धं तद्येषामेव विधिर्भवति तान्येव दातुं शक्यन्ते न तु निषिद्धानीति-

"आत्मा च धर्मो दासश्च धर्मपत्नी तथैव च। सर्वस्वं च प्रपन्नश्च न देयानि विदुर्बुधाः" ॥

इति विशेषनिषेधात् तत्राहुः-किं न देयं वदान्यानामिति। वदान्या दध्यङ्शिबिप्रभृतयः अयं साधारणानामेव विषयः न तु वदान्यविषयः ते ह्यात्मानमेव प्रयच्छन्ति कः सन्देहोऽन्येषु अनेन तस्य स्तुतिरपि कृता तथापि शत्रुभ्यो न देयम् अन्यथा नीतिशास्त्रं विरुध्येत हीनाः शत्रवो मरणं प्रार्थयेयुरिति तत्राहुः कः परः समदर्शिनामिति। समदर्शिनां सर्वत्र ब्रह्मदृष्टीनां कः परः शत्रुः सर्वस्यैवात्मत्वात् ॥१९॥ तथापि देहाध्यासो दृढ इति देहव्यतिरिक्तं सर्वमेव दास्यामीत्याशङ्कायामाहुः-योऽनित्येन शरीरेणेति। अदाने अयशः नित्यं शरीरमनित्यं दाने तु यशो नित्यं शरीरं नित्यमेव यशसा नित्यं दिव्यं शरीरमिति अयशसा नारकिशरीरम् एवं तारतम्यं ज्ञात्वा अनित्येन शरीरेण सतां गेयं वैकुण्ठादिशरीरजनकं यशो नाचिनोति सर्वतोऽपगच्छन् न सञ्चिनोति यथा वस्त्राभासेन हीरकादिबन्धनं वस्त्रनाशो भविष्यतीति शङ्कयास्वयं समर्थो भूत्वा स वाच्यः अस्मिन् लोके निन्द्यो भवति शोच्यश्च परलोके हीनशरीरप्राप्त्या एवकारेणोत्तमशरीरशङ्कां वारयति यतः स अधुना यशस्सञ्चयमकुर्वन् कथमन्यथा करिष्यति न हि कदाचिदपि सोऽन्यथा भवति ॥२०॥ ननु, तथापि यत्कैश्चिदपि न दत्तं तत्कथं देयमिति शङ्कायामाहुः-हरिश्चन्द्र इति। स हि सर्वस्वमपि दत्त्वा चण्डालत्वमङ्गीकृतवान् रन्तिदेवः पिपासया सृप्यमाणः पुल्कसायापि जलं दत्तवान् तेनोञ्छवृत्तिः क्षुधा म्रियमाणः सर्वमेवान्नं दत्तवान् श्येनकपोतसंवादे बलिः सर्वस्वं विष्णवे व्याधो ब्राह्मणरक्षायां व्याघ्रेण भक्षितः कपोतः चोररूपातिथिसन्तर्पणार्थं तदग्नौ स्वयं पतितः सभार्य एव बहव एव अध्रुवेण शरीरेण ध्रुवं फलं गताः ॥२१॥

श्रीसुबोधिनीसारः

जरासन्धमेकमजितं श्रुत्वा ध्यायतश्चिन्तयतो नृपतेः उद्धवो यमुवाच तमेवोपायमाद्यः श्रीकृष्ण आह ह स्फुटम् ॥१५॥ तथा कर्तुं प्रवृत्ता इत्याह। भीमसेनोऽर्जुनः कृष्ण इति त्रयो विप्रचिह्नधरा गिरिव्रजं ययुः यतो यत्र बृहद्रथस्य सुतो जरासन्धस्तिष्ठति हे तात ॥१६॥ आतिथ्यसमये ते गत्वा गृहेषु गृहमेधिनं गृहस्थं ब्रह्मण्यं जरासन्धं ब्रह्मलिङ्गिनो ब्राह्मणवेषधारिणो राजन्याः क्षत्रियाः कृष्णाद्याः समयाचन्त ॥१७॥ हे राजन् दूरमागतान् अर्थिनो याचकान् प्राप्तानतिथीन् त्वं विद्धि जानीहि यत् वस्तु वयं वाञ्छामः तत् नोऽस्मभ्यं त्वं प्रयच्छ देहि ते भद्रमित्याशीर्वादः ॥१८॥ प्रत्याख्यानं निषेधयति। तितिक्षूणां क्षमावतां दुर्मर्षं दुःसहं क किम् असाधुभिरसाधूनाम् अकार्यं किम् "पापः किं न करोति हि" इत्युक्तेः। वदान्यानामत्युदाराणां न देयं किमपि तु सर्वमेव देयं समदृष्टीनां परः कः न कोऽपि ॥१९॥ किं च सतां गेयं गातुं योग्यं ध्रुवं निश्चलं बहुकालस्थायि यशोऽनित्येन विनाशिना शरीरेण कल्पः समर्थः स्वयं न सञ्चिनोति न सम्पादयति स वाच्यो निन्द्यः शोच्यश्च ॥२०॥ हरिश्चन्द्रकथा मार्कण्डेयपुराणेऽस्ति उञ्छवृत्तेर्मुद्गलस्य शिबेराख्यानं वनपर्वणि बलिरन्तिदेवयोरत्र व्याधकपोतयोर्भारते एवं बहवोऽध्रुवेण शरीरेण ध्रुवं यशो गताः कीर्तिरूपेण तेषां प्रसिद्धत्वात् ॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जरासन्धमजितं श्रुत्वा कथं स जेतव्य इति ध्यायतो नृपतेर्युधिष्ठिरस्य यमुपायं 'बलिनामपि चान्येषाम्' इत्यादिना उद्धव उवाच, तमेवोपायं हरिराहेत्यन्वयः। हीत्याश्चर्ये। तत्र हेतुमाह-आद्य इति। सर्वकारणभूतोऽपि मन्त्रविचारमुद्धवमनुसरतीत्याश्चर्यमिति भावः ॥१५॥ स्नेहं सूचयन् सम्बोधयति-तातेति। भीमादयस्त्रयो ब्रह्मलिङ्गधरा ब्राह्मणरूपधारिणः सन्तो यतो यत्र बृहद्रथसुतो जरासन्धोऽभूत्तद्गिरिव्रजसंज्ञकं स्थानं जग्मुरित्यन्वयः ॥१६॥ ते ब्रह्मलिङ्गिनः ब्राह्मणवेषधारिणो राजन्याः क्षत्रिया भीमादयः आतिथ्यवेलायां दानसमये तद्गृहेषु गत्वा गृहमेधिनं गृहे वर्तमानं ब्रह्मण्यं ब्राह्मणभक्तं जरासन्धमयाचेरन् ॥१७॥ हे राजन्! अस्मान् प्राप्तानतिथीन् विद्धि जानीहि। अस्मद्याचितमवश्यं देहि इत्याशयेनाहुः-दूरमागतानिति। तत्र हेतुमाहुः-अर्थिन इति। अतो यद्वयं

कामयामहे तन्नोऽस्मभ्यं प्रयच्छ देहि ॥१८॥ ननु यत्कामयामह इति सामान्यतो निर्दिष्टं, न विशेषतः, तत्र यस्य दानं दुःसहं तददेयं कथं देयम् इत्याशङ्क्य सदृष्टान्तमाह–किमिति। असाधुभिः विषयाविष्टचित्तैः अकार्यं निन्दितं नास्ति। तथा तितिक्षूणां सहनशीलानां दुर्मर्षं दुःसहं नास्तीति । यथा च समदर्शिनां सर्वं ब्रह्मात्मकं पश्यतां परः अब्रह्मात्मकः पदार्थो नास्ति । तथा वदान्यानाम् अत्युदाराणामदेयं किञ्चिन्नास्तीत्यर्थः । अतः किं विशेषनिर्देशेनेति भावः ॥१९॥ विपर्यये दोषमाह–य इति । यः प्राणी स्वयं कल्पः समर्थः सन्नपि सतां सद्भिर्गेयं ध्रुवं नित्यं यशोऽनित्येन शरीरेण नाचिनोति न सम्पादयति स वाच्यः निन्द्य एव, 'अहो किमस्य दौर्भाग्यम्' इति कृपालुभिः शोच्यश्च स इत्यर्थः ॥२०॥ अनित्येन शरीरेण नित्यसम्पादनं क्व प्रसिद्धं तत्राहुः–हरिश्चन्द्र इति । विश्वामित्रार्थानृण्याय हरिश्चन्द्रो भार्यात्मजादि सर्वं विक्रीय स्वयं चण्डालत्वं प्राप्तोऽप्यनिर्विण्णः अयोध्यावासिभिः सह स्वर्गं गतः । रन्तिदेवः सकुटुम्बोऽष्टचत्वारिंशदहान्यलब्धोदकोऽपि कथञ्चिल्लब्धान्नोदकाद्यर्थिभ्यः दत्त्वा ब्रह्मलोकं गतः । उञ्छवृत्तिर्मुद्गलः षण्मासं सीदत्कुटुम्बोऽप्यातिथ्यदानेन ब्रह्मलोकं गतः । शिबिः शरणागतकपोतरक्षणाय स्वमांसं श्येनाय दत्त्वा दिवं गतः । बलिर्ब्राह्मणवेषधारिणे हरये सर्वस्वं दत्त्वा तमेवाऽऽत्मसाच्चकार। कपोतश्चातिथये व्याधाय कपोत्या सहात्ममांसं दत्त्वा विमानेन दिवं गतः । व्याधश्च तयोः सत्त्वं वीक्ष्य स्वयमतिनिर्विण्णो महाप्रस्थाने वनाग्निदग्धदेहो निःकल्मषो दिवमारुरोह। एवमन्येऽपि बहवः अध्रुदवेण शरीरेण ध्रुवलोकं गताः ॥२१॥

अन्वितार्थप्रकाशिका

श्रुत्वेति। जरासन्धमजितं श्रुत्वा कथं स जेतव्य इति ध्यायतो नृपतेर्युधिष्ठिरस्य यमुपायं बलिनामपि चान्येषामित्यादिना उद्धव उवाच तमेवोपायम् आद्यो हरिराह स्म ॥१५॥ हे तात ! भीमादयस्त्रयो ब्रह्मलिङ्गधरा ब्राह्मणरूपधारिणः सन्तो यतो यत्र बृहद्रथसुतो जरासन्धोऽभूत्तद्गिरिव्रजसंज्ञकं स्थानं जग्मुः ॥१६॥ ते इति । ते ब्रह्मलिङ्गिनः ब्राह्मणवेषधारिणो राजन्याः क्षत्रिया भीमादयः आतिथ्यवेलायां दानसमये तद्गृहेषु गत्वा गृहमेधिनं गृहे वर्तमानं ब्रह्मण्यं ब्राह्मणभक्तं जरासन्धं समयाचेरन्। समयाचन्त इत्यर्थः । झस्य रन् एत्वं चार्षे ॥१७॥ राजन्निति । हे राजन् ! दूरमागतानर्थिनोऽस्मान् प्राप्तान् अतिथीन् विद्धि । अतो यद्वयं कामयामहे तन्नोऽस्मभ्यं प्रयच्छ देहि ते भद्रं भूयात् जरासन्धस्य मोक्षप्राप्तेः ॥१८॥ ननु विशेषकथनं विना कथमङ्गीकुर्यामन्यथा पुत्रादिकमदेयमपि भवद्भिर्याच्येत तत्राहुः–किमिति। यथा असाधुभिः अकार्यम् अकर्तव्यं किं किमपि नास्ति यथा च तितिक्षूणां सहनशीलानां दुर्मर्षं दुःसहं किमस्तीति यथा च समदर्शिनां परः शत्रुः परकीयो वा कोऽस्ति तथा वदान्यानाम् अत्युदाराणामदेयं किञ्चिन्नास्तीत्यर्थः ॥१९॥ य इति । यः प्राणी स्वयं कल्पः समर्थः सन्नपि सतां सद्भिर्गेयं ध्रुवं नित्यं यशो नित्येन शरीरेण नाचिनोति न सम्पादयति स वाच्यः निन्द्य एव साधुभिः शोच्यश्चेत्यर्थः ॥२०॥ हरिश्चन्द्र इति । हरिश्चन्द्रो विश्वामित्रार्थानृणभावाय भार्यात्मजादिविक्रीयाप्यनिर्विण्णः स्वर्गं गतः । बलिरन्तिदेवयोः कथा भागवत एव स्फुटा । उञ्छवृत्तिर्मुद्गलः षण्मासं सीदत्कुटुम्बोऽप्यातिथ्यदानेन ब्रह्मलोकं गतः । शिबिः शरणागतकपोतरक्षणाय स्वमांसं श्येनाय दत्त्वा दिवं गतः । कपोतश्चातिथये व्याधाय कपोत्या सहात्ममांसं दत्त्वा विमानेन दिवं गतः । व्याधश्च तयोः सत्त्वं वीक्ष्य स्वयमतिनिर्विण्णो महाप्रस्थाने वनाग्निना दग्धदेहो निष्कल्मषो दिवमारुरोह। एवमन्ये च बहवः अध्रुवेण शरीरेण ध्रुवं लोकं गताः ॥२१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नृपतेर्युधिष्ठिरस्य ध्यायतः सः तमेवोपायं आद्यो हरिराह यमुपायं आदौ प्राक् उद्धव उवाच ॥१५॥ विप्रवेशधारिणः यतो यत्र बृहद्रथसुतो मागधस्तत्र हे तात राजन् ॥ १६॥ गृहमेधिनामातिथ्यवेलायां गत्वा गृहेषु वसन्तं ब्रह्मण्यं ब्राह्मणपालकं मागध समयाचेरन् याचयामासुः ॥ समयाचन्तेति वक्तव्ये समयाचेरन्नित्युक्तिः ॥१७॥ प्रयच्छ देहि ॥१८॥ नन्वदेयं वस्तु भिक्षुभ्यः कथं देयमिति चेत्तत्राहुः किमिति दुर्मर्षमसह्यम् ॥ अकार्यं विरुद्धाचरणं किं न क्रियते वदान्यानां दानशूराणां देहपुत्रादिवस्तु किं देयमस्ति समदर्शिनां शत्रुमित्रयोः कमनीयाकमनीयप्राकृतविषयेषु च समदर्शनशीलानां कः परः शत्रुः कः श्रेष्ठश्च ॥१९॥ तमुत्साह जनयत आहुः द्वाभ्यां य इति ॥ स्वयं कल्पः समर्थः सन् ध्रुवं निश्चलं यशः नाचिनोति नोत्पादयति स वाच्यः गर्ह्यः ॥२०॥ हरिश्चन्द्रः पुत्रभार्यादि सर्वं विक्रीयापि विश्वामित्राय सर्वधनं दत्तवान् रन्तिदेवः सर्वमर्थिभ्यो दत्त्वा अकिञ्चनः सन् ऊनपञ्चाशत्त दिने लब्धान्नोदकमर्थिभ्यो दत्त्वा सकुटुम्बः प्रसन्नोऽभूत् उञ्छवृत्तिः मुद्गलः बहुदिनेषु गतेषु सत्सु प्राप्तमन्नमतिथये दत्त्वा प्रसन्नोऽभू शिबिः स्वमांसं श्येनाय दत्त्वा शरणागतकपोतं तस्मादपात् ॥ बलिर्वामनाय स्वराज्यं दत्तवान् कपोत्या सह कपोतः अतिथ

व्याधाय स्वदेहभक्षं दत्त्वा दिवं गतः तथा व्याधोऽपि तयोर्धैर्यं दृष्ट्वा स्वयमतिनिर्विण्णः सन् दावदग्धो दिवं गतः एते हरिश्चन्द्रादयः एवमन्येऽपि बहवः अध्रुवेण क्षणभङ्गुरेण शरीरेण ध्रुवं निश्चलं स्थानं गताः ॥२१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

श्रुत्वेति । जरासन्धम्, अजितं श्रुत्वा, ध्यायतः नृपतेर्युधिष्ठिरस्य, ध्यायतः सत इत्यर्थः । आद्यः सर्वकारणरूपः, हरिः श्रीकृष्णः, यम् उपायम्, उद्धवः उवाच, तमेवोपायं, ह स्फुटं यथा तथा, आह ॥१५॥ भीमसेन इति । भीमसेनः, अर्जुनः, कृष्णः, एते त्रयः, ब्रह्मवेषधराः ब्राह्मणवेषधारिणः सन्तः, हे तात, यतो यत्र, बृहद्रथसुतः जरासन्धः, आस्ते । तं गिरिव्रजं, जग्मुः । त्रय इत्यत्र तत इति पाठे, तत इन्द्रप्रस्थात् ॥१६॥ त इति । ब्रह्मलिङ्गिनः विप्रवेषिणः, राजन्याः ते कृष्णादयस्त्रयः, गृहेषु वर्तमानं, गृहमेधिनं गृहाश्रमे यथावत्तद्धर्मान् पालयन्तं, ब्रह्मण्यं ब्राह्मणेषु साधुं, जरासन्धम्, आतिथ्यवेलायां वैश्वदेवं कृत्वाऽतिथिप्रतीक्षाकाले, गत्वा, समयाचेरन् सम्यगयाचन्तेत्यर्थः ॥१७॥ याञ्चाप्रकारमेवाह राजन्निति चतुर्भिः ॥ राजन्निति ॥ हे राजन्, प्राप्तान् त्वद्गृहं सम्प्राप्तान्, अस्मान् दूरम् आगतान् दूरप्रदेशादायातान्, अर्थिनः, अतिथीन्, विद्धि सञ्जानीहि । यत् वयं कामयामहे, तदस्मद्याचितं, नोऽस्मभ्यं, प्रयच्छ । ते तुभ्यं, भद्रं, मङ्गलम्, अस्तु ॥१८॥ ननु यत् कामयामह इति सामान्यतः निर्दिष्टं न विशेषस्तद्यदि दुःसहमदेयं स्याच्चेत् कथं प्रदेयं स्यात्तत्राहुः ॥ किमिति ॥ तितिक्षूणां दुर्मर्षं, किं, न किमपीत्यर्थः । असाधुभिः अकार्यं किम्, अस्ति । वदान्यानां दातॄणां, न देयं, किं, समदर्शिनां परः कः । अयं भावः । यथा असाधूनामकार्यं नास्ति, यथा तितिक्षूणां दुर्मर्षं नास्ति, यथा समदर्शिनां सर्वं ब्रह्मात्मकं पश्यतां परोऽन्योऽब्रह्मात्मकस्वतन्त्रपदार्थो नास्ति, तथाऽत्युदाराणामदेयं किञ्चनापि न भवतीति किं विशेषनिदर्शनेनेति । वदान्यानामर्थिने देहोऽपि देय एवेत्यभिप्रेतम् ॥१९॥ तदेव सहेतुकं व्यञ्जयन्तो विपर्यये निन्द्यतामाहुः । य इति । यः सतां, गेयं, सतामिति कर्तरि षष्ठी । सद्भिर्गेयमित्यर्थः । ध्रुवं शाश्वतं, यशः, अनित्येनापि शरीरेण, स्वयं कल्पः समर्थः सन्, नाचिनोति सर्वथा न सम्पादयति, सः वाच्यो निन्द्यः । अत एव, सः शोच्यः । अहो किमस्य दौर्भाग्यमिति कृपालुभिः शोच्यत इत्यर्थः ॥२०॥ अनित्यशरीरेण नित्यं यशःसम्पादनं किं क्वचित् प्रसिद्धं तत्राहुः ॥ हरिश्चन्द्र इति ॥ हरिश्चन्द्रः, रन्तिदेवः, उञ्छवृत्तिर्मुद्गलः षण्मासं सदत्कुटुम्बोऽप्यातिथ्यदानेन ब्रह्मलोकं गतः, शिबिः स्वशरणागतकपोतरक्षणार्थं स्वमांसं श्येनाय दत्त्वा दिवं गतः । बलिर्विप्रवेषाय विष्णवे सर्वस्वं दत्त्वा तमेवात्मसाच्चकार, कपोतश्चातिथये व्याधाय कपोत्या सहात्ममांसं दत्त्वा विमानमारुह्य दिवं गतः । व्याधस्तयोः, सत्त्वं वीक्ष्य स्वयमतिनिर्विण्णो महाप्रस्थाने वनाग्निदग्धदेहो निष्कल्मषो दिवमारुरोह । तदाख्यायिका महाभारतीयापद्धर्मेषु त्रयोदशाध्यायमारभ्य षड्भिरध्यायैरुक्ता ततो बोध्या ॥२१॥

कृष्णप्रिया

श्रीधर्मराज महाराज ने यह बात जानी की वब तक राजा जरासन्ध पर विजय नहीं प्राप्त कर सके तब महाराज गहरी चिन्ता में पड़ गये । तब सर्वोपायविद् भगवान् श्रीकृष्णने महाराज को यही उपाय सुनाया जो आरम्भ में श्रीउद्धवजी ने सुनाया था ॥१५॥ राज ! पुनः श्रीकृष्ण भगवान् अर्जुनजी, एवं भीमसेनजी; ये तीनों ही विप्रवेष धारण करके गिरव्रज पधारे । जो राजा जरासन्ध की राजधानी थी ॥१६॥ राजा जरासन्ध ब्रह्मण्य-ब्राह्मणों का महान् भक्त था और गृहस्थाश्रम के धर्म का पालक था । जब ये तीनों क्षित्रिय श्रीकृष्ण, भीमसेन और फाल्गुन विप्रवेष धारण करके आतिथ्य के अवसर पर जरासन्ध के समीप पहुँचे और जरासन्ध से याचना करने लगे ॥१७॥
भगवान् श्रीकृष्ण ने कहा - राजन् जरासन्ध ! आपका कल्याण हो । हम आपके आंगन अतिथि अत्यन्त दूर से आये हैं । हम आप के समीप किसी अभिलाषा को लेकर आये हैं । अम जो कछु चाहते हैं कृपया आप हमें अवश्य दीजिये ॥१८॥ सहनशील सजंजन क्या सह सकते ! जो दुष्ट जन है वह बुरा से बुरा क्या नहीं कर सकते ! उदार पुरुष के लिये अदेय क्या है ! यो समदर्शी है उस के लिये पराया कौन है ! ॥१९॥ जो मनुष्य स्वयं शक्तिमान् होकर इस नश्वर देह से अनश्वर यश का संचय नहीं करता जिस यश की समर्थ से समर्थ पुरुष भी प्रशंसा करे, सच कहा जाय तो उस यशः की प्राप्ति नही करने वाले की जितनी निंदा कीय जाय वह अल्प है । उसका जीवन शोचनीय है

।।२०।। महाराज मागध ! आपके ध्यान में हो बात होगी; महाराजा हरिश्चन्द्र, राजा रन्तिदेव, उञ्छवृत्ति महामना मुद्गलजी, शिबिराजा, बलिमहाराजा, व्याध और कपोत आदि अनेक विभूतियों ने अतिथि को अपना सर्वस्व प्रदान कर इस विनाशशील शरीर द्वारा अविनाशी पद को प्राप्त हो चुके हैं। आप के द्वार हम आशा से आये हैं ।।२१।।

श्रीशुक उवाच

स्वैराकृतिभिस्तांस्तु प्रकोष्ठैर्ज्याहतैरपि । राजन्यबन्धून्विज्ञाय दृष्टपूर्वानचिन्तयत् ।।२२।।
राजन्यबन्धवो [1]ह्येते ब्रह्मलिङ्गानि बिभ्रति । [2]ददामि भिक्षितं तेभ्य आत्मानमपि दुस्त्यजम् ।।२३।।
बलेर्नु [3]श्रूयते कीर्तिर्वितता दिक्ष्वकल्मषा । ऐश्वर्याद्भ्रंशितस्यापि विप्रव्याजेन विष्णुना ।।२४।।
श्रियं जिहीर्षतेन्द्रस्य विष्णवे द्विजरूपिणे । जानन्नपि महीं प्रादाद्वार्यमाणोऽपि दैत्यराट् ।।२५।।
जीवता ब्राह्मणार्थाय को न्वर्थः क्षत्रबन्धुना । देहेन पतमानेन [4]नेहता [5]विपुलं यशः ।।२६।।
इत्युदारमतिः प्राह कृष्णार्जुनवृकोदरान् । हे विप्रा विप्रतां [6]कामं ददाम्यात्मशिरोऽपि वः ।।२७।।

कर्दमक्षमा

श्रीशुक उवाच :- स्वैरैः, आकृतिभिः, प्रकोष्ठैः, ज्याहतैः, अपि, दृष्टपूर्वान्, राजन्यबन्धून्, विज्ञाय, अचिन्तयन् ।।२२।। एते, राजन्यबन्धवः, ब्रह्मलिङ्गानि, बिभ्रति, तेभ्यः, भिक्षितम्, दुस्त्यजम्, आत्मानम्, अपि, ददामि ।।२३।। विष्णुना, विप्रव्याजेन, अपि, ऐश्वर्यात्, भ्रंशितस्य, बलेः, दिक्षु, वितता, अकल्मषा, कीर्तिः, नु, श्रूयते ।।२४।। इन्द्रस्य, श्रियम्, जिहीर्षता, द्विजरूपेण, विष्णवे, जानन्, अपि, वार्यमाणः, अपि, दैत्यराट्, महीम्, प्रादात् ।।२५।। ब्राह्मणार्थाय, पतमानेन, देहेन, विपुलम्, यशः, नेहता, जीवता, क्षत्रबन्धुना, को, नु, अर्थः ।।२६।। इति, उदारमतिः, कृष्णार्जुनवृकोदरान्, प्राह, हे विप्राः! कामम्, क्रियताम्, वः, आत्मशिरा, अपि, ददामि ।।२७।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ज्याहतैर्ज्याघातकिणाङ्कितैः दृष्टपूर्वान् द्रौपदीस्वयंवरादिषु ।।२२-२३।। इन्द्रस्य श्रियं जिहीर्षता विप्रव्याजेन विष्णुना भ्रंशितस्यापि बलेः नु अहो नेति पाठे न श्रूयते इति ।।२४।। तं श्लाघते -विष्णव इति। शुक्रेण वार्यमाणोऽपि अत एव विष्णुरिति जानन्नपि ।।२५।। पतमानेन पतता क्षत्रबन्धुना देहेन ब्राह्मणार्थाय विपुलं यशो नेहता नेहमानेनासम्पादयता कोन्वर्थः न कोऽपीत्यर्थः ।।२६।। एवं निश्चित्याह-हे विप्रा इति ।।२७-२८।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तानर्थिनः । प्रकोष्ठैः मणिबन्धकूर्परान्तरैः । "प्रकोष्ठो मणिबन्धस्य कूर्परस्यान्तरेऽपि च" इति मेदिनी । 'किणश्चिह्नं व्रणादीनाम्' इति धरणिः । आदिना रुक्मिणीविवाहादिग्रहः । स्वैरैर्गम्भूरैः । आकृतिभिर्हृष्टपुष्टसुन्दराकारैः । क्षत्रबन्धून् विप्रवेशेन याचनपरत्वेन निकृष्टक्षत्रियान् ।।२२।। तदेवाभिप्रेत्याह-राजन्येति । एतेऽर्थिनः ।।२३।। नेतिपाठे काकूक्त्या श्रूयत एवेत्यर्थः । कश्यपाज्जातस्यास्य विप्रव्याजेनेति । तर्हि तदिन्द्रस्यापि प्रसज्जेत क्षत्रियवृत्त्या त्विन्द्रस्य तल्लुप्तं चेत्तर्ह्युपेन्द्रलिप्सया वामनस्य चैतदलुप्तत्वेऽपि दम्भमयविप्रत्वमेव गम्यत इति भावः ।।२४।। तं बलिम् । अत एव वार्यमाणत्वेऽप्यनिवृत्तेरेव । शुक्रेणेति शेषः ।।२५।। जीवता क्षत्रबन्धुना को न्वर्थ इति सम्बन्धः । इत्यर्थ इति-अर्थावगतोऽर्थ इति ।।२६।। वो युष्मभ्यम् ।।२७।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वैरगम्भीरैः इति याच्ञासिद्ध्यर्थमङ्गाङ्गिभावे तत्र पाणौ मुक्तिर्ज्ञेया आकृतिभिर्हृष्टपुष्टबलिष्ठसुन्दराकारैः स्वरादीनां यथोत्तरं तज्ज्ञानहेतुत्वे श्रैष्ठ्यं राजन्यबन्धूनिति विप्रवेषेण याञ्चया निकृष्टक्षत्रियमननात् एवमग्रेऽपि ।।२२।। इदमप्यचिन्तयदित्याह - राजन्येति । बन्धवोऽपीत्यत्र बन्धवो हीति पाठः क्वचित् ददामीत्यत्र ददानीति आत्मानं देहम् ।।२३।। नन्वेते किल शत्रव इति चेत्तर्ह्यतीव सम्यगेव ज्ञात्वापि शत्रुभ्यो विप्रवेषमात्रेण विप्रत्वमभ्युपगम्याभीष्टदानतः श्रीबलेरिव कीर्तिविशेषसिद्धेरित्याह - बलेरिति युग्मकेन । विप्रव्याजेनेत्यत्र कश्यपादितिजातत्वेनास्य विप्रत्वमेव सग्च्छत इति चेत्तर्हीन्द्रस्यापि तत्प्रसज्जेत

---

१. बधवोऽप्येते-इति कस्यचित् । २. ददानि-इति कस्यचित् । ३. नं श्रूयते-वीर. । ४. नेहता-विज. । ५. विमल-विज. । ६. कामो-श्रीधर. वंशी. वीर. विज. ।

क्षत्रियवृत्त्यात्विन्द्रस्य तल्लुप्तंचेत्तर्ह्यन्तरूपेन्द्रत्वलिप्सया वामनाख्यस्य चैतन्यलुप्तमपि दम्भमयमेव विप्रत्वं गम्यत इति भावः । विष्णुनेति पश्चात्सर्वव्याप्तिस्मरणेन कीर्तिमेव निर्दिशति - विष्णव इति । प्रकर्षेण सश्रद्धमात्मार्पणपर्यन्तमदात् यतो दैत्यराट् ब्रह्मत्वादिना दैत्यश्रेष्ठः महीमिति प्रथमत एव श्रीवामनदेवस्य छलनज्ञानाभिप्रायेण ॥२४-२५॥ नन्वेते तर्हि प्राणानेव याचेरन् न तु राज्यादीन् इति चेद्दिष्ट्या देहोऽयं सफल एव वृतः तदन्यथा व्यर्थ एवेत्याह - जीवतेति । ब्राह्मणार्थायेति श्रीबल्यनुसारेण तद्वेषेष्वपि तदभ्युपगमात् तृतीयान्तं सर्वं देहस्य विशेषणं किम्वा पतता देहेन कृत्वा नेहमानेन क्षत्रबन्धुना जीवता कोऽन्वर्थ इत्यन्वयः क्षत्रबन्धुनेति क्षत्रियकुलोत्पन्नेनेत्यर्थः । किम्वा ब्राह्मणार्था सम्पादनेनाधमत्वात् ॥२६॥ उदारा दानशीलाः विचारेण महती वा मतिर्यस्य अतः प्रकर्षेण प्रसन्नमुखत्वादिनाह - श्रीकृष्णादीनां तत्तत्क्रमेणोक्तिः यथापूर्वं वाक्चातुर्य्याश्रैष्ठ्यात् "अर्जुनः कृष्णमन्वेतु भीमोऽन्वेतु धनञ्जयम्" इति सभापर्वोक्तश्रीयुधिष्ठिरादेशानुसारेण स्थितश्च विप्रा इति पूर्वाभिप्रायं सोपहासञ्च ॥२७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वैर्गभीरैः, इति याञ्चासिद्ध्यर्थं युगपत्त्रयाणामेवोक्तिर्ज्ञेया । आकृतिभिर्हृष्ट-पुष्टप्रकाण्डबलिष्ठसुन्दराकारैः, स्वरादीनां यथोत्तरं राजन्यज्ञानहेतुत्वे श्रैष्ठ्यम्, राजन्य-बन्धुमिति विप्रवेशेन याञ्चया च निकृष्टक्षत्रियमननात्; एवमग्रेऽपि ॥२२॥ आत्मानं देहम् ॥२३॥ नन्वेते किल शत्रव इति चेत्तर्हि अतीव सम्यगेव ज्ञात्वापि शुत्रुभ्यो विप्रवेषमात्रेणाभीषदानतः श्रीबलेरिव कीर्तिविशेषसिद्धेरित्याह-बलेरिति द्वाभ्याम् । दिक्षु वितता दशदिग्व्यापिनीत्यर्थः, अकल्मषा विशुद्धा । यद्वा, अन्येषामपि श्रवणादिना कलुषनाशिनी । विष्णुनेति पश्चात्त्रिविक्रममूर्त्या विश्वव्यापनाभिप्रायेण; कीर्तिमेव निर्दिशति-विष्णव इति । प्रकर्षेण श्रद्धायात्मार्पणादिदानात्, यतो दैत्यराट् ब्रह्मण्यत्वादिना दैत्यकुलश्रेष्ठः, किंवा दैत्यराडपि, किं पुनः क्षत्त्रिय इत्यर्थः । महीमिति श्रीवामनदेवार्थितत्रिपदमात्रभूमेः सङ्कल्पाभिप्रायेण, वस्तुतस्तु त्रिलोकीमेव प्रादात् ॥२४-२५॥ नन्वेतैर्हि त्वप्राणा एव याच्याः, न तु राज्यादय इति चेत्तर्हि देहोऽयं सफल एवाभूदन्यथा तु व्यर्थ एवेत्याह-जीवतेति तृतीयान्तं सर्वं देहस्यैव विशेषणम्, किवंवा पतता देहेन कृत्वा नेहमानेन क्षत्रबन्धुना जीवता को न्वर्थ इत्यन्वयः । क्षत्त्रियबन्धुनेति क्षत्त्रियकुलोत्पन्नेनेत्यर्थः, किंवा ब्राह्मणार्थासम्पादनेनाधमत्वात् ॥२६॥ उदारा दानशीला विचारेण महती वा मतिर्यस्य सः, अतः प्रकर्षेण प्रसन्नमुखत्वादिनाह; कृष्णादीनां तत्तत्क्रमेणोक्तिर्यथापूर्वं वाक्चातुर्य्यादौ श्रैष्ठ्यात्, किम्वा 'अर्ज्जुनः कृष्णमन्वेतु भीमोऽन्वेतु धनञ्जयम्' इति सभापर्व्वोक्त-श्रीयुधिष्ठिरादेशानुसारेण स्थितेः; विप्रा इति विप्रबुद्ध्यैव दाने प्रवृत्तेः ॥२७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

इन्द्रस्य इन्द्रार्थम् ॥२५॥ ब्राह्मणार्थाय जीवता विपुलं यशो नेहता इत्यन्वयः ईहता सम्पादयता ॥२६-३६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स्वर्गैरिति । इत्यमुक्तो जरासुतः ज्याहतैर्ज्याघातकिणाङ्कितैः प्रकोष्ठैः सर्वैर्लिङ्गैराकृतिभिश्च तानर्थिनो राजन्यबन्धून् विज्ञायानुमीय दृष्टपूर्वान् पूर्वं द्रौपदीस्वयम्वरादिषु दृष्टान्विज्ञाय अचिन्तयत् ॥२२॥ चिन्ताप्रकारमेवाह - राजन्मबन्धव इति चतुर्भिः । ब्रह्मलिङ्गानि विप्रवेषान् बिभ्रति दधति तथाप्येतेभ्यः दुस्त्यजमात्मानं देहमपि भिक्षितं याचितं ददामि ॥२३॥ बलेरिति । इन्द्रस्येन्द्रार्थः श्रियं हर्तुमिच्छता विप्रव्याजेन विष्णुनैश्वर्याद्भ्रंशितस्यापि बलेर्वैरोचनस्याकीर्तिर्निर्दुष्टा दिक्षु व्याप्ता सा च न श्रूयते किं साऽधुनापि श्रूयत एवेत्यर्थः । तं श्लाघते - विष्णव इति । जानन्नपि विचार्यमाणो(वार्यमाणो)ऽपि शुक्रेणेति शेषः । दैत्यराट् बलिः महीं प्रादाद्ददौ ॥२४-२५॥ जीवतेति । पतमानेन विनङ्क्ष्यता क्षत्रबन्धुना देहेन ब्राह्मणार्थाय विमलं विपुलमिति पाठान्तरं यशः कीर्तिं नेहता नेहमानेन असम्पादयता को न्वर्थः किं प्रयोजनं न किमपीत्यर्थः ॥२६॥ इतीति, उक्तिमेवाह - हे विप्रा इति । वः युष्मभ्यमात्मनो मम शिरोऽपि ददामि ॥२७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

श्रूयते किं श्रूयते एवं हीतियोज्यम् इन्द्रस्य श्रियं बलाज्जिहीर्षता हर्तुकामेन विष्णुना ऐश्वर्याद्भ्रंशितस्य ॥२४॥ वार्यमाणः शुक्रेणेति शेषः ॥२५॥ यः क्षत्रबन्धुः पतमानेन देहेन विपुलं यशो नेहतां नेहते नापादयति तेन ब्राह्मणार्थाय जीवता क्षत्रबन्धुना कोन्वर्थो भवति न कोऽपीति विचिन्त्य ॥२६-२७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदैव सुरतरोर्वैलक्षण्येन तादृशानुग्रहवचनादिकमुदाहृत्य प्रसादमेव विशिष्य दर्शयति - श्रीभगवानुवाचेत्यादिना लोकपालाः अंशसम्भवा येषां ते । आत्मा अहमेवास्मि सेव्यत्वेन यस्य तेन मत्परमभक्तेनेत्यर्थः । न कृतः मयि नार्पित आत्मा यैस्तैः ॥२७-४८॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥६-४८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥७-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ज्याहतैर्ज्याघातकठोरीकृतैः । राजन्यबन्धून् विप्रवेषेण याचकीभूतत्वान्निकृष्टक्षत्रियान् दृष्टपूर्वान् द्रौपदीस्वयम्वरादिषु ॥२२-२३॥ ननु तर्हि कपटिभ्यः एतेभ्यः किं भिक्षितदानेन तत्राह बलेरिति । विप्रव्याजेन कपटिविप्रेणेत्यर्थः । अहो नेति पाठेन श्रूयते किम् अपि तु श्रूयत एव । इन्द्रस्येति बलेरित्यस्य विशेषणं ततश्च विष्णवे विष्णुरिति जानन्नपि शुक्रेण वार्य्यमाणोऽपि ॥२४-२५॥ पतमानेन पतनशीलेन देहेन ताच्छील्ये शानच् । विपुलं यशो न ईहता नेहमानेन क्षत्रबन्धुना को न्वर्थः । न कोऽपि एतादृशेन क्षत्रियाधमेन प्रयोजनं नास्तीत्यर्थः ॥२६॥ इति एवं निश्चित्य ॥२७-२९॥

गूढार्थदीपिनी

स्वरैः गम्भीरैः **आकृतिभिः** हृष्टपुष्टाङ्गैः । **ज्या** प्रत्यञ्चाख्या । **प्रकोष्ठः** कलाईसंज्ञकः **राजन्यबन्धून्** निकृष्टक्षत्रियान् **विप्रवेषेण** याचनापरत्वेन । **दृष्टपूर्वान्** पूर्वं दृष्टान् द्रौपदीस्वयम्वरादिषु । **तान्** अर्थिनः ॥२२॥ **एते**ऽर्थिनः **आत्मानमपि** शरीरमपि ॥२३॥ **बलेरिति** युग्मम् । इन्द्रस्य श्रियं जिहीर्षता विष्णुना वामनेन भ्रंशितस्यापि बलेः नु अहो **अकल्मषा** निर्दोषा कीर्तिः श्रूयते । यतः शुक्रेण वार्यमाणोऽपि दैन्यराट् बलिः अयं विष्णुरिति जानन्नपि द्विजरूपिणे वामनाय महीं प्रादादिति द्वयोरन्वयः ॥२४-२५॥ **पतमानेन** देहेन ब्राह्मणार्थाय विपुलं यशो **नेहता** न सम्पादयता अथापि जीवता क्षत्रबन्धुना **को नु अर्थः** किं प्रयोजनं न किमपि तस्य मरणमेव वरमित्यर्थः ॥२६॥ **कामो**ऽभीष्टपदार्थः । **द्वन्द्वशः** द्वन्द्वयुद्धम् । शस् प्रत्यय आर्षः ॥२७-२८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इन्द्रस्य श्रियं जिहीर्षता विष्णुना ऐश्वर्य्याद्भ्रंशितस्यापि नु अहो बलेः कीर्तिः श्रूयते इति सपादश्लोकान्वयः ॥२४॥ शुक्रवाक्यादयं विष्णुरिति जानन्नपि महीं प्रादात् ॥२५॥ पतमानेन विनङ्क्ष्यमाणेन क्षत्रबन्धुना देहेन ब्राह्मणार्थाय विपुलं यशो नेहता नेहमानेन जीवता को न्वर्थः न कोऽपीत्यर्थः ॥२६॥ इतीत्थमुदारमतिः ॥२७-३१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्वरैराकृतिभिर्ज्यामौर्वीतद्धतैस्तद्गुणकिणैः प्रकोष्ठैः कर्पूरादधरप्रदेशैः । प्रोकष्ठः कर्पूरादधरप्रदेशे चापीति विश्वः । तान्राजन्यबन्धून्विज्ञायोहयित्वा दृष्टपूर्वान् दृष्टादृष्टपूर्वांस्ताननन्तरमविचिन्तयत् । सामान्यत एते मया दृष्टाइत्यस्मरत् ॥२२॥ एतेराजन्यबन्धवः क्षत्रिया ब्रह्मलिङ्गानि ब्राह्मणचिह्नानि बिभ्रति धरन्ति । ज्ञातैतत्को न नेति वक्तुमहं क्षम इत्याह । तेभ्यो भिक्षितं ददामीति । न प्रकटितस्तैरभिप्रायः प्रायो दुर्देयो भवेन्न निश्चयो मया कार्य इति तदपि दास्ये किमन्यदिति भावेन चेतस्यालोच्य सङ्कल्पयति ॥ दुस्त्यजमात्मानं शरीरमिति । एभ्य इति वक्तव्ये तेभ्य इति वचनेनाधुनाऽप्यप्रकाशवचनमिव स्मृतत्वनिश्चयं ध्वनयति ॥२३॥ यो दैत्यराड्वार्यमाणः शुक्रेण सर्वस्वं विष्णवे दत्त्वा मूढ वर्तिष्ये कथमिति वार्यमाणः कपटबटुरयमिति जानन्नपि महीं द्विजरूपिणे विष्णवे प्रादात् । तदर्थं श्रियं तत्काले बलिसम्बन्धिनीं सम्पदं जिहीर्षता हर्तुकामेन विप्रव्याजेन ब्राह्मणापदेशिना विष्णुनैश्वर्याद्भ्रंशितस्यापि बलेः कीर्तिरकल्मषा स्वच्छा । नोऽस्माभिः प्रथम उदितान्हरिश्चन्द्रादीन्परित्यज्य बलिमात्रग्रहणे किन्निमित्तमिति चेत् । तदा कपटवेषिणे बलिर्दत्तवानेतर्ह्येते तथेति दानवतया च तद्ग्रहणसम्भवादिति ज्ञेयम्। वितता दिक्षु श्रूयतेऽतो भिक्षितं ददामीत्यन्वयः । नो बले इत्यप्यन्वयः ॥२५॥ न दुष्कर इति पुनरालोचयति ॥ जीवतेति । जीवता क्षत्रबन्धुना यतमानेन पतता देहेन ब्राह्मणार्था यदर्थं विपुलं यशो नेहताऽनीहमानेनार्थः को नु सम्पादितः स्यान्न कोऽपि ॥२६॥ प्रकाशं शंसति ॥ इतीति । इत्येवमालोच्य कृष्णार्जुनवृकोदरान्प्रति । हे विप्राः । कामः काम्यो युष्माभिर्व्रियताम् । अदेयत्वेन सम्प्रतिपन्नमपि सम्प्रति दास्यामीत्याह ॥ व आत्मशिरोऽपीति ॥२७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी-

एवं दाने प्रोत्साहं प्राप्तः क एत एवं धर्मवक्तार इति तान् विचार्य निश्चित्य स्वरैराकृतिभिरिति अथ मेने विमर्शततश्चतुर्भिर्वाक्यानि ततो निश्चित्य प्रतिज्ञाप्य स्वरा मेघगम्भीरा क्षत्रियाणामेव भवन्ति आकृतयः आजानुबाहुरूपाः अन्तर्बहिर्धर्मा क्षत्रियनियामका उक्ताः तत्कर्मपरत्वनियामकानाह प्रकौष्ठैर्ज्याहतैर्याति त्रिभिर्धर्मैर्व्यभिचारिभिः ॥२२॥ राजन्यबन्धव एत इति ज्ञातवान् प्रायेण तैः सह युद्धमपि कृतमिति दृष्टपूर्वत्वात् क एते इत्यचिन्तयत् कथं क्षत्रिया एवं वेषेण समागता इति स्वधर्मनिरतत्वाभावात् राजन्यबन्धुत्वं मन्यन्ते बन्धुशब्दो वा अश्रेष्ठक्षत्रियः आत्मा अदेयः क्षत्रियाश्चेत् स्वजात्यभिमानं परित्यज्य ब्राह्मणवेषेण मद्याचका जाताः तदा अहं क्षत्रियाणां मानरक्षार्थं दध्यङ्शिबिवत् आत्मानं शरीरमपि ददामि तद्वस्तुतो दुस्त्यजम् ॥२३॥ कपटेन समागतस्य बलिरेव दातेति तस्य प्रशंसां स्वहृदयं समागतां निरूपयति-बलेर्नु कीर्तिरीति । दैत्यांशत्वात् दैत्यकृतिरेव हृदये समायाति दिक्षु विततेति तादृशी कीर्तिस्तस्याभिलषितेति ज्ञापितम् अकल्मषा शुद्धभावयुक्ताः आत्मदानमभिप्रेत्याह-ऐश्वर्याद्भ्रंशितस्यापि सङ्कल्प्यस्तु भ्रंशात्पूर्वमेव जातः त्रैलोक्यपरिग्रहश्च भ्रंशो बन्धनात्मकः तत्राप्येवं विष्णुर्ब्राह्मणरूपेणैव समागतः तेन मत्तुल्यता अतस्तद्धर्माणामनुवादः ॥२४॥ एतदर्थमेव ज्ञात्वा दानमनुवदति-श्रियमिति । जिहीर्षत इन्द्रस्येति वक्तव्ये सन्धिरार्षः इन्द्रस्यार्थराज्यश्रियं जिहीर्षते विष्णवे जानन्नपि प्रादादिति सम्बन्धः शुक्राचार्येण वार्यमाणोऽपीति यदि मां कश्चिद्वारयिष्यति तदापि दास्यामीत्येतदर्थमुक्तं दैत्यराडिति राजधर्मः प्रजाभिरपि कर्तव्य इति निश्चयः ॥२५॥ ननु, तथापि वाक्यात्तस्य तथा निश्चयः प्रतिज्ञा च पूर्वमेव तेन कृता तव तु बलिना दर्शनात् प्रतिज्ञाभावाच्च कथं न निर्वृत इत्याशङ्कायामाह-जीवतेति । अब्राह्मणार्थाय ब्राह्मणप्रयोजनाभावाप्रयोजनान्तराय वा जीवता क्षत्रबन्धुना किं न किञ्चित्प्रयोजनमित्यर्थः । एवं जीवनवैकल्पमुक्त्वा देहवैकल्पमाह-देहेनेति । स्वत एव पतमानेन यस्योपचयस्तस्यापचय इति विपुलं यशो नेहता न सम्पादयता ब्राह्मणार्थप्राणत्वं तस्य स्वाभाविकं यशःसञ्चयनं त्वेतैरेवोपादिष्टं बलिधर्मास्तु स्मारिताः ॥२६॥ एवं त्रिभिः कृत्वा दास्यामीति निश्चित्य प्रतिज्ञां कृतवानित्याह-इत्युदारमतिरिति । एवं बलिधर्माभिनिवेशेन उदारमतिर्भूत्वा प्रत्येकं तान् व्रियतामित्याह-दानसिद्ध्यर्थं तेषां ब्राह्मण्यं स्थापयति-हे विप्राः ! इति । कामं स्वाभिलषितं कदाचिदेते मया सह युद्धे अशक्ताः मच्छिरः प्रार्थयिष्यन्ति चेत् तदपि देयमित्याह-ददाम्यात्मशिरोऽपीति । वो युष्मभ्यं ब्राह्मणेभ्यः ॥२७॥

श्रीसुबोधिनीसारः

शुकोक्तिः । स्वैर्ध्वनिभिराकृतिभिः ज्या मौर्वी तया हतैः प्रकोष्ठैरपितान् राजन्यबन्धून् क्षत्रियान् विज्ञाय बुद्ध्वा दृष्टपूर्वान् द्रौपदीस्वयंवरादिषु अचिन्तयत् अस्मरत् ॥२२॥ निश्चित्य आह । एते क्षत्रबन्धवो ब्रह्मलिङ्गानि विप्रवेषाणि धारयन्ति तेभ्यो भिक्षितं याचितं दुस्त्यजम् आत्मानमप्यहं ददामि ॥२३॥ विप्रच्छद्मना विष्णुना ऐश्वर्याद्राज्यपदाद्भ्रंशितस्यापि बलेर्दैत्यस्य दिक्षु दिशासु अकल्मषा निर्दोषा कीर्तिर्वितता विस्तृता श्रूयते नु एव ॥२४॥ इन्द्रस्य श्रियं हर्तुमिच्छता प्रत्यानेतुमिच्छता पूर्वान्वयि शुक्रेण वार्यमाणोऽपि दैत्यराट् बलिः विष्णुरयमिति जानन्नपि द्विजरूपिणे वामनाय विष्णवे महीं प्रादात् ॥२५॥ पतमानेन पतता क्षत्रबन्धुना क्षत्रियेण जीवता देहेन ब्राह्मणार्थं विपुलं महद्यशो नेहता न सम्पादयता को न्वर्थो न कोऽपि ॥२६॥ इत्येममुदारबुद्धिः कृष्णादीनाह । हे विप्राः कामो वाञ्छितार्थो व्रियतां भवद्भिः वो युष्मभ्यमात्मनो मम शिरोऽप्यहं ददामि ॥२७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवमुक्तो जरासुतः स्वैः आलापैः आकृतिभिः शरीरावयवसंस्थानविशेषैः ज्याहतैः ज्याघातकिणाङ्कितैः प्रकोष्ठैश्च लिङ्गैस्तान् दृष्टपूर्वान् द्रौपदीस्वयंवरादिषु पूर्वं दृष्टान् राजन्यबन्धून् विज्ञाय अनुमाय अचिन्तयत् विचारितवान् ॥२२॥ चिन्तामेवाह-राजन्मबन्धव इति चतुर्भिः । हीति निश्चये । बिभ्रति भयादिति शेषः । दुस्त्यजमात्मानं देहमपि ददामि ॥२३॥ एवं दानस्य किं फलं क्व च दृष्टम् इत्यपेक्षायामाह-बलेरिति । इन्द्रस्यार्थं श्रियं हर्तुमिच्छता विप्रव्याजेन विष्णुना ऐश्वर्याद्भ्रंशितस्यापि बलेः अकल्मषा पवित्रा दिक्षु व्याप्ता कीर्तिः श्रूयते इति द्वयोरन्वयः । नु निश्चये नात्र सन्देहः ॥२४॥ अहो तस्य धैर्यम्, शुक्रेण वार्यमाणोऽपि अतोऽयं विष्णुर्मदीयं सर्वस्वं हरिष्यतीति जानन्नपि दैत्यराट् बलिर्द्विजरूपिणे विष्णवे महीं प्रादादित्यन्वयः ॥२५॥ अन्यथा जन्मवैफल्यं स्यात् इत्याह-जीवतेति । पतमानेन प्रतिक्षणं क्षीयमाणेन ब्राह्मणार्थाय विपुलं यशो नेहमानेन असम्पादयता क्षत्रबन्धुना देहेन को

न्वर्थः किं प्रयोजनं सिद्ध्यति ? न किमपीत्यर्थः ॥२६॥ इत्येवमुदारा दातुमुत्सुका मतिर्यस्य स जरासन्धो कृष्णादीन् प्राह । तदुक्तिमेवाह-हे विप्राः ! कामः स्वाभिलषितः पदार्थो व्रियताम्, आत्मनो मम शिरोऽप्यभिलषितं चेत्तर्हि वो युष्मभ्यं ददामि । 'अत्र विलम्बो नास्ति' इति सूचयितुं वर्तमानप्रयोगः । इत्युक्तो भगवानाह ॥२७॥

अन्वितार्थप्रकाशिका

स्वैरैरिति । एवमुक्तो जरासुतः स्वैः दैन्यरहितैः आलापैः याञ्चापुष्ट्यर्थमङ्गाङ्गिभावेन त्रयाणामुक्तिर्ज्ञेया । आकृतिभिः शरीरावयवसंस्थानविशेषैः ज्याहतैः ज्याघातकिणाङ्कितैः प्रकोष्ठैश्च लिङ्गैस्तान्दृष्टपूर्वान् द्रौपदीस्वयंवरादिषु पूर्वं दृष्टान् राजन्यबन्धून् याचकत्वान्निकृष्टक्षत्रियान् विज्ञाय अनुमायाचिन्तयत् विचारितवान् ॥२२॥ राजन्येति । एते राजन्यबन्धवः भयाद्ब्रह्मलिङ्गानि बिभ्रति । अतस्तेभ्यो भिक्षितं दुस्त्यजमात्मानं देहमपि ददामि ॥२३॥ बलेरिति द्वयम् । इन्द्रस्यार्थं श्रियं हर्तुमिच्छता विप्रव्याजेन विष्णुना इन्द्रस्य स्वर्गस्वामिन इति बलिविशेषणं वा । ऐश्वर्याद्भ्रंशितस्य चालितस्यापि बलेः अकल्मषा पवित्रा वितता दिक्षु व्याप्ता कीर्तिः श्रूयते । यतः शुक्रेण वार्यमाणोऽपि अयं विष्णुर्मदीयं सर्वस्वं हरिष्यतीति जानन्नपि दैत्यराट् बलिर्द्विजरूपिणे विष्णवे महीं प्रादात् ॥२४-२५॥ जीवतेति । पतमानेन प्रतिक्षणं क्षीयमाणेन । शानजार्षः । चानश् वा । ब्राह्मणार्थाय विपुलं यशो नेहता असम्पादयता । शता आर्षः । क्षत्रबन्धुना देहेन जीवता को न्वर्थः किं प्रयोजनं सिध्यति न किमपीत्यर्थः ॥२६॥ इतीति । इत्येवमुदारा दातुमुत्सुका मतिर्यस्य स जरासन्धः कृष्णादीन् प्राह स्म । तदुक्तिमेवाह-हे विप्राः ! कामः स्वाभिलषितः पदार्थो व्रियताम् । आत्मनो मम शिरोऽप्यभिलषितं चेत्तर्हि वो युष्मभ्यं ददामि ॥२७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ज्याहतैः मौर्व्याघातचकितैः प्रकोष्ठैः मणिबन्धैः वैदर्भी द्रौपदी स्वयंवरादिषु दृष्टपूर्वान् ॥२२-२३॥ बलिं स्तुवन्नाह युग्मेन ॥ विप्रव्याजेन द्विजच्छद्मना ॥ इन्द्रस्य श्रियं बलेः सकाशात् जिहीर्षता हर्तुमिच्छुना विभुना ऐश्वर्याद्राज्यलक्ष्म्याः भ्रंशितस्य पातितस्यापि दिक्षु वितता अकल्मषा कीर्तिः अहो श्रूयते ॥ कुतः गुरुणा वार्यमाणोऽपि दैत्यराट् बलिः ॥ विभुं जानन्नपि द्विजरूपिणे तस्मै महीं प्रादात् ॥२४-२५॥ यर्हि ते प्राणान् याचेरंस्तर्हि किं स्यादित्याह जीवतेति ॥ पतमानेन क्षणभङ्गुरेण ॥ जीवता ब्राह्मणार्थाय ॥ विपुलं यशः नेहताऽनुत्पादयता क्षत्रबन्धुना देहेन नरस्य क्षत्रशरीरेण को नु अर्थः न कोऽपीत्यर्थः ॥२६॥ इति इत्थं निश्चित्य प्राह हे विप्राः वो युष्मभ्यं स्वशिरोऽपि ददामि ॥२७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वैरैरिति ॥ जरासन्धः, स्वैः, आकृतिभिः, ज्याहतैः ज्याघातकिणाङ्कितैः, प्रकोष्ठैः अपि, तान् कृष्णादींस्त्रींस्तु, राजन्यबन्धून्, विज्ञाय अनुमाय, दृष्टपूर्वान् द्रौपदीस्वयंवरादिषु पूर्वं दृष्टानपि, विज्ञाय, अचिन्तयत् ॥२२॥ चिन्ताप्रकारमेवाह राजन्यबन्धव इति चतुर्भिः ॥ राजन्यबन्धव इति ॥ एते यद्यपि, ब्रह्मलिङ्गानि विप्रवेषान्, बिभ्रति धरन्ति, तथापि, राजन्यबन्धवः क्षत्रियाः, हि निश्चितमेव सन्ति । तदपि, तेभ्य एतेभ्यः, भिक्षितं याचितं, दुस्त्यजं, आत्मानमपि, ददामि ॥२३॥ बलेरिति ॥ विप्रव्याजेन ब्राह्मणच्छद्मना, विष्णुना, ऐश्वर्यात् भ्रंशितस्यापि, बलेः कीर्तिः, अकल्मषा सती, दिक्षु वितता श्रूयते नु ॥२४॥ श्रियमिति ॥ इन्द्रस्येन्द्रार्थमित्यर्थः । श्रियं त्रैलोक्यलक्ष्मीं, जिहीर्षता हर्तुमिच्छता, द्विजरूपिणे विप्रव्याजाय विष्णवे, जानन्नयं विष्णुरेव मत्तः श्रियं हृत्वेन्द्राय मद्रिपवे दास्यतीति विदन्नपि, वार्यमाणोऽपि, शुक्रेणेति शेषः । दैत्यराट् बलिः महीं, प्रादात् ॥२५॥ जिवतेति ॥ क्षत्रबन्धुना, पतमानेन यदा कदापि विनङ्क्ष्यमाणेन कर्त्रा, ब्राह्मणार्थाय, विमलं विपुलमिति पाठान्तरं, यशः कीर्तिं, नेहता नेहमानेन असंपादयतेत्यर्थः । जीवता, देहेन करणेन, को नु अर्थः किं प्रयोजनम् । न किमपीत्यर्थः ॥२६॥ इति मनसा निश्चित्याह ॥ इतीति ॥ उदारमतिः जरासन्धः, हे विप्राः, कामः, व्रियताम् । वो युष्मभ्यम्, आत्मशिरः मन्मस्तकमपि, ददामि । इतीत्थं, कृष्णार्जुनवृकोदरान्, प्राह ॥२७॥

कृष्णप्रिया

श्रीशुकदेव महर्षि कहते हैं - राजन् ! राजा जरासन्ध ने उन तोनों की आवाज, कान्ति, आकृति और मणिबन्धों पर पडे हुए, धनुयकी प्रत्यंचा की रगड के चिह्नों को देखकर पहिचान लिया कि ये तो ब्राह्मण नहीं

है लेकिन क्षत्रिय मालुम होते है । पुनः यक्ह सोचने लगा कि मैने कहीं न कहीं इन तीनोंको अवश्य देखे भी है ॥२२॥ अब मागध निश्चय पर आया कि ये क्षत्रिय होने परभी मेरे भयसे विप्रवेश धारणकर आये है । अब ये भिक्षा मांगने के लिये वे नीचे उतर गये है, तब वे जो कुछ मांग ले मैं इन्हे दे दूंगा । याचना करनेपर अपना अतिशय प्रिय दुरत्यज देह देने में कोई क्षोभ नहीं ॥२३॥ भगवान् विष्णुने विप्रवेष स्वीकार करके महाराज बलिका धन-ऐश्वर्य आदि सर्व कुछ हर लिया फिरभी महाराज बलिकी पुण्यकीर्ति दश-दिशाओंमें फैली हुई हैं और आजभी सब लोग अत्यंत सद्भाव से उसका गान करते हैं ॥२४॥ इस विषयमें संदेह नहिं कि विष्णु भगवान ने स्वर्गपति महाराज इन्द्रकी राज्यलक्ष्मी बलिसे छीनकर उन्हें लौटाने के लिए ही विप्रवेष धारण किया था और दैत्यपति बलि को यह बाद विदित हो गईथी और श्रीशुक्राचार्यजीने बलिको रोका भी था परन्तु उन्होंने पृथ्वीका दान कर हि दिया ॥२५॥ सचमुच मेरा तो या परिपश्व निश्चय है कि यह देह नश्वर है इस देह से जो पुष्कल यश नही कमाता और जो क्षत्रियजन ब्राह्मण के लिये जीवन नहीं धारण करता उसका जीवन निरर्थक है ॥२६॥ राजन् परीक्षित ! जरासंध उदारमति था उपर्युक्त विचार करके विप्रवेषधारी श्रीकृष्ण, अर्जुन और भीमसेन से कहा हे विप्रवर्य आप सर्व मनोभिलषित वर्तु मांग ले, यदि आप चाहे तो मैं आप लोगोलाको अपना शिर भी दे सकता हुं ॥२७॥

श्रीभगवानुवाच

युद्धं नो देहि राजेन्द्र द्वन्द्वशो यदि मन्यसे । युद्धार्थिनो वयं प्राप्ता राजन्या [1]नान्नकाङ्क्षिणः ॥२८॥
असौ वृकोदरः पार्थस्तस्य भ्रातार्जुनो ह्ययम् । अनयोर्मातुलेयं मां कृष्णं जानीहि ते रिपुम् ॥२९॥
एवमावेदितो राजा जहासोच्चैः [2]स्म मागधः । आह चामर्षितो मन्दा युद्धं तर्हि [3]ददामि वः ॥३०॥
न त्वया भीरुणा योत्स्ये युधि विक्लवचेतसा । मथुरां स्वपुरीं त्यक्त्वा समुद्रं शरणं गतः ॥३१॥
अयं तु वयसा तुल्यो नातिसत्त्वो न मे समः । अर्जुनो न भवेद्योद्धा भीमस्तुल्यबलो मम ॥३२॥

कर्दमक्षमा

श्रीभगवान् उवाच :- राजेन्द्र! वयम्, राजन्याः, न, अन्नकाङ्क्षिणः, युद्धार्थिनः, प्राप्ताः, मन्यसे, द्वन्द्वशः, युद्धम्, देहि ॥२८॥ अयम्, वृकोदरः, पार्थः, तस्य, भ्राता, अयम्, अर्जुनः, हि, अनयोः, मातुलेयम्, ते, रिपुम्, माम्, कृष्णम्, जानीहि ॥२९॥ एवम्, आवेदितः, राजा, मागधः, उच्चैः, जहास, स्म, च, अमर्षितः, आह, मन्दाः, तर्हि, वः, युद्धम्, ददामि ॥३०॥ युधि, विक्लवचेतसा, त्वया, भीरुणा, न, योत्स्ये, स्वपुरीम्, मथुराम्, त्यक्त्वा, समुद्रम्, शरणम्, गतः ॥३१॥ अयम्, अर्जुनः, वयसा, तुल्यः, न, अतिसत्त्वः, न, मे, समः, योद्धा, न, भवेत्, भीमः, मम, तुल्यबलः ॥३२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

राजन्यतामेव प्रपञ्चयति ॥२९-३०॥ यतो मद्भिया समुद्रं शरणं गतः ॥३१॥ वयसाप्यतुल्यो नातिसत्त्वो नातिबलश्च न च देहेन मया समोऽतोर्जुनो योद्धा न भवेत् भीमस्तु भवेत् यतो मम तुल्यबलः ॥३२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतोऽग्रे क्वचित्पुस्तकेषु श्लोकद्वयं प्रक्षिप्तमपि दृश्यते 'किं देवा' इत्यादिरूपम् । द्वन्द्वशो द्वन्द्वयुद्धम् । द्वन्द्वश इति द्वन्द्वशब्दाच्छस् प्रत्यय आर्षः ॥२८॥ इदमेतदावंगुलिनिर्दिष्टपरौ ॥२९॥ वो युष्मभ्यम् ॥३०॥ कृष्णं प्रत्याह-न त्वयेति । विक्लवमस्थिरं चेतो यस्य तेन ॥३१॥ अयमर्जुनः अतुल्यः । नातिसत्त्वः न प्रशस्तपराक्रमः । मत्तुल्यगदायुद्धावित्त्वात् । अतो न मे मया सदृशः । असमत्वादेव योद्धा नेति सम्बन्धः ॥३२॥

---

[1] नान्यकाङ्क्षिणः-इति कस्यचित् । [2] स मागधः-वीर. विज. । [3] ददानि-गो. प्रे. टि. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं तस्य प्रतिज्ञां प्राप्य स्वयमेव प्रागल्भ्यात्तं भिक्षेत वृकोदर इत्युद्धववाक्यमतिक्रम्यापि याचेत - युद्धमिति । हे राजेन्द्रेति तव युद्धं सम्मतमेवेति साम्ना तत्र प्रवर्तयति यदीति निश्चये ततश्च यदि निश्चितमेव मन्यसे इच्छसीति चातुर्य्यात्तदेव दृढयति युद्धार्थित्वे हेतुः राजन्या इति । अतो विप्रवदन्नकाङ्क्षिणो न भवामः अन्येति पाठे युद्धेतरकाङ्क्षिण इति ॥२८॥ हि निश्चये मात्र संशयं कुर्वित्यर्थः । कृष्णमिति त्वद्विधप्राणाकर्षकमिति भावः । यतस्ते रिपुम् अतस्तद्वधार्थं मयैवेतौ आनीताविति भावः ॥२९॥ उच्चैर्जहास तेषां ब्रह्मवेषादिदैन्यदर्शनेनान्तः सन्तोषादुपहासाच्च राजेति तन्मानिनस्तत्रासङ्कोचं दर्शयति - मागध इति तत्रामर्षा योग्यत्वेऽपि मगधदेशजानां तत्स्वभावत्वादिति भावः मन्दाः हे स्वल्पवीर्य्याः ! तत एव ब्राह्मणवेषेण गमनादिति भावः तत्त्वतस्तु स्थिरबुद्धय इत्यर्थः । आकारप्रश्लेषेण सर्वोत्कृष्टा इति वा ॥३०॥ गतो यस्त्वामिति शेषः । तत्त्वतस्तु अभीरुणेति छेदः अभीरुत्वादेव विचित्रक्रीडार्थं स्वपुरीमपि हित्वा समुद्रं शरणं गृहं प्राप्तः कृतवान् इति ॥३१॥ अति सत्त्वो महाबलोऽपि वयसा तुल्यो न भवतीति तत्त्वार्थः ॥३२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं तस्य प्रतिज्ञां प्राप्य स्वयमेव प्रागल्भ्याद् याचते-युद्धमिति । राजेन्द्रेति तव युद्धं सम्मतमेवेति साम्ना तत्र प्रवर्तयति; यदि मन्यसे इच्छसीति चातुर्य्यात्तदेव द्रढयति । युद्धार्थित्वे हेतुः-राजन्या इति । अतो विप्रवदन्नकाङ्क्षिणो न भवामः; पाठान्तरे युद्धेतरकाङ्क्षिण इति ॥२८॥हि निश्चये, मात्र संशयं कुर्व्वित्यर्थः । कृष्णमिति त्वत्प्राणाकर्षकमिति भावः । यतस्तव रिपुम्, अतस्त्वद्वधार्थं मयैव एतावानीताविति भावः ॥२९॥ उच्चैर्जहास अवज्ञया भयाभावाच्च, यतो राजा क्षत्रियवरः, तत्रापि मागधो जरासन्धः, अमर्षितो युद्धार्थं महाक्रुद्धः सन्; यद्वा, अयमेवोच्चैर्हासे हेतुः-अतिक्रोधेन तदुदयात् । मन्दा हे स्वल्पवीर्य्या इत्यर्थः । तत्त्वतस्तु स्थिरबुद्धयः, अकारप्रश्लेषेण सर्व्वोत्कृष्टा वा ॥३०॥ भीरुत्वादेव युधि विक्लवं वाकुलं दीनं वा चेतो यस्य तेन, अत एव मथुरामित्यादि, तत्त्वतस्तूभयत्राप्यकारप्रश्लेषेण-अभीरुणा अयुधि युद्धाभावे सत्येव विक्लवचेतसा, अतः सर्व्वनिर्ज्जयेन नैश्चिन्त्याद्विचित्रक्रीडार्थं स्वपुरीमपि हित्वा समुद्रमेव शरणं गृहं प्राप्तः कृतवानिति ॥३१॥ अतिसत्त्वो महाबलोऽपि वयसा तुल्यो न भवतीति तत्त्वार्थः । प्रकर्षेण प्रसन्नमुखत्वादिना आ सम्यक् हस्तेऽर्पणादिना दत्त्वा, महतीं भीमस्य योग्यत्वात्; इति धर्मयुद्धापेक्षया निष्कपटत्वं सूचितम् । बहिर्निर्गमः समेखलार्थम्, पौराणां साक्षाद्दुःखपरिहारार्थं वा ॥३२-३३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२६-३६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थमुक्तः प्राह श्रीभगवान् - युद्धमिति । द्वन्द्वशो युद्धं द्वन्द्वयुद्धं देहि यदि मन्यसे इच्छसि तर्हि देहीति सम्बन्धः वयं राजन्या युद्धार्थिनः नत्वन्नकाङ्क्षिणो ब्राह्मणा इत्यर्थः ॥२८॥ असाविति । असौ पार्थः पृथायाः पुत्रो भीमः तस्य वृकोदरस्य भ्राताऽनयोर्भीमार्जुनयोर्मातुलस्यापत्यं मां कृष्णं ते तव रिपुं जानीहि ॥२९॥ एवमिति । उच्चैर्जहास अमर्षितः क्रुद्धः प्राह उक्तिमेवाह हे मन्दा इत्यादिना । हे मन्दास्तर्हि यदि युद्धं वाञ्छथ तर्हि इत्यर्थः । वो युष्मभ्यं ददामि ॥३०॥ त्वया सह न योत्स्ये तत्र हेतुत्वेन विशिनष्टि - भीरुणा युधि युद्धे विक्लवम् अधृष्टं चेतो यस्य तेन एतदेव स्मारयति मथुरामिति ॥३१॥ अयं त्विति । अयं वयसा अतुल्य इति छेदः अयमर्जुनस्तु वयसा न तुल्यः किन्त्वपटुः नातिसत्त्वः अनतिबलश्चातो न मम समः अतश्च योद्धा न भवेत् भीमस्तु मम तुल्यबलः अतस्तेनैव सह योत्स्य इति भावः ॥३२॥

श्रीमद्विजयध्वजकृता पदरत्नावली

द्वन्द्वशो युद्धं द्वन्द्वयुद्धम् ॥२८॥ वीप्सां त्रीन्प्रति स्पष्टयन्निर्दिशति - असाविति ॥२९-३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२७-४८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥६-४८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥७-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जहासेति ब्रह्मवेषरूपदैन्येनान्तस्सन्तोषात् । मन्दा इति हे दुर्ब्बलाः ! युद्धपरिश्रमेणालं मच्छिर एव कथं न गृह्णीतेति भावः । याचकविप्रवेषधारणादेव युष्माकं शौर्यम् अस्तीभूतमेव तदपि यदि तन्न जिहासथ तर्हि युद्धं ददामि । अमन्दा इत्यर्थस्तु वाग्देव्याः ॥३०॥ अभीरुणा महाबलवता त्वया सह युधि विक्लवेन विह्वलेन चेतसा युक्तोऽहं न योत्स्ये स्वपुरीमपि त्यक्त्वा स्वेच्छयैव समुद्रं शरणं स्वगृहं गत इति वास्तवोऽर्थः ॥३१-३२॥

गूढार्थदीपिनी

असाविति अङ्गुल्या निर्देशेन परिचिनोति ॥२९॥ स्म आह इत्यत्रान्वेति । अमर्षितः क्रुद्धः सन् । हे अमन्दाः इतिच्छेदः युद्धे आलस्यरहिताः । युद्धनिपुणा वा ॥३०॥ वस्तुतस्तु अभीरुणा निर्भयेन त्वया विक्लवचेतसा युक्तोऽहं न योत्स्ये । मथुरामुपलक्षणतया द्वारकां त्यक्त्वा सैन्यरहित एव त्वं मां हन्तुं समुद्रं प्राकारादि कृतमुद्रणयुक्तं मदीयं शरणं गृहं प्राप्तोऽसि ॥३१॥ नातिसत्त्वः न प्रशस्तपराक्रमः ॥३२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नातिसत्त्वो नातिबलः ॥३२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तत्प्रतिश्रुतं श्रुत्वा जातप्रायमिदमुपायतोऽभिप्रेतमिति मतिमान् कृष्णः स्वाशयं प्रकाशयति ॥ युद्धमिति । हे राजेन्द्र ! वयमन्नकाङ्क्षिणोऽर्थिनो न किन्तु युद्धार्थिनो राजन्याः प्राप्ताः । चेदित्थं वित्तवृत्तोऽपि मन्यसेऽस्मभ्यं देयं तर्हि द्वन्द्वशो युद्धं देहि । त्रयाणां मध्य एकतम एकस्त्वमेक इति द्वन्द्वश इत्यर्थः ॥२८॥ आच्छादितनिजरूपैरिच्छापूर्तिः सम्पादिताऽत उत्तरं वा यूयं किन्नामानः क्त्यास्तद्वर्णयताकर्ण्य कर्तव्यं कुर्म इत्यत आह ॥ असाविति । प्रथमत एतस्योक्तिः पुरत एतदाह्वानबीजावापरूपिणीति मन्तव्यम् । पार्थ इत्युभयान्वयि । अनयोर्मातुलेयं मातुलसुतं कृष्णं मां विद्धि जानीहि । प्राक्तनं स्मारयन्नीरयति ॥ ते रिपुं सहजवैरिणमिति ॥२९॥ एवमावेदितो निवेदितवृत्तान्तो मागधो राजोच्चैर्जहास । अहो वेषो महतां भवतामिति हासः । अमर्षितो मन्दो वो युद्धं तर्हि ददामीत्याह ॥३०॥ तत्र स्वयं गुणागुणोत्कीर्तनेनैकतमं रणधुरीणमन्वाचिनोति ॥ नेति । त्वया युधि विक्लवचेतसा भीरुणा न योत्स्ये । भीरुत्वं तव जगद्विततमित्युक्तमुपपादयति ॥ मधुरामिति । स्वपुरीं मथुरां त्यक्त्वा समुद्रं शरणं गृहं गतः । ततो भीरुरित्यर्थः ॥३१॥ अयमर्जुनस्तु मम वयसाऽतुल्योऽसमः कनीयानिति यावत् । कनीयांश्चेत्किं बलीयानिति युद्ध्यस्वेति नेत्याह ॥ नातिसत्त्वो न विद्यतेऽतिसत्त्वं बलं यस्य स इति । इति स मे समः प्रतिमल्लो न भवेत् । स्वोक्तयोर्मध्य एकमर्थान्निषिध्यापरमुररीकृत्य परिशेषतः सिद्धमाह ॥ मम भीमस्तुल्यबल इति ॥३२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं सत्यप्रतिज्ञस्य प्रतिज्ञां श्रुत्वा कर्तव्यमूढयोः भीमार्जुनयोः सतोः भगवांस्तन्मनोरथं दूरीकर्तुं कापट्यं दूरीकृत्य सत्यमाह-युद्धं नो देहीति । युद्धप्रार्थनया सर्वथा युक्तेति भावः किञ्च युद्धविशेषं प्रार्थयितुमागता इत्याह-द्वन्द्वश इति । एको भवान् त्वमस्मासु चैकः त्रयाणाम्मध्ये कोऽपि न छलवाक्येनाङ्गीकारं कारयित्वा वदामः किन्तु यदि मन्यसे कथञ्चित् द्वन्द्वयुद्धे श्रद्धा भवतीति अर्थः न तु निर्बन्धेनायमर्थः स्वीकर्तव्यः अस्माकन्तु युद्धस्वीकारे युद्धानन्तरं जयपराजयनिर्णयः अस्वीकारे तु प्रथमत एवेति उभयथापि समीचीनम् इदमत्यन्तं स्वोत्कर्षख्यापकं वचनं किञ्च जगति द्वन्द्वयुद्धं कोऽपि कर्तुं न शक्त इति त्वत्समीपमागता इत्यभिप्रायेणाह-युद्धार्थिनो वयं प्राप्ता इति । देवदैत्यरक्षसामन्यतरत्वे भयान्नाङ्गीकरिष्यतीत्याशङ्क्याह-नान्नकाङ्क्षिण इति । "ब्राह्मणो भोजनप्रियः" इति अन्नकाङ्क्षिणो ब्राह्मणा न भवामः अन्नार्थं वा न ब्राह्मणवेषः किन्तु महान् क्षत्रियः अल्पेन सह युद्धं न करोति ब्राह्मणेन तु सह तदिच्छापूर्त्यर्थमल्पेनापि करोतीति ब्राह्मणवेष इत्यर्थः ॥२८॥ यथा रू पमन्यथा तथा वागपि भविष्यतीत्याशङ्क्य क्षत्रियत्वसिद्ध्यर्थं स्वनामान्याह-असौ वृकोदरेति । वृको दशविधः प्राणः उदरे यस्येति बलञ्च सूचितं पार्थ इति स्वसम्बन्धार्थं कपटागमनार्थं वा न त्वप्रयोजकत्वाय तस्यैव भ्राता पार्थिवः अर्जुनोऽयं द्वितीयः हि युक्तश्चायमर्थः आकृतिसाम्यात् यदर्थमेतयोर्मातृनाम्ना निरूपणं तदाह-अनयोर्मातुलेयं मां कृष्णं जानीहि इति । तर्हि प्रसिद्धाः कथं न समागताः इत्याशङ्क्याह-ते रिपुमिति । रिपोः स्थाने कार्यपर्यन्तं वशेनैव स्थातव्यमिति नीतिः ॥२९॥ एवं भगवता पार्थे निरूपिते अतिथिश्रद्धायां गतायां बालभावेनैते समागता इत्यवहेलेव तेषूत्पन्ना तत आगमनमाश्चर्यमिव मत्वा प्रथमतो हास्यमुत्पन्नमित्याह-एवमावेदित इति ।

आवेदनं स्वरूपख्यापनं यतो राज्ञा राज्यमत्ता उच्चैर्जहासेति कथमेते अकस्माच्छत्रुगृहे पतिताः दैवगत्येति ननु भगवन्तं दृष्ट्वा भक्तिः कथं नोत्पन्ना वस्तुसामर्थ्यात् कथमवहेलेत्याशङ्कायामाह-मागध इति । देशदोषात् न सद्बुद्धिः तर्ह्युपेक्षा भवितुमर्हतीति आशङ्कायामाह-आह चेति । पूर्वं भगवदतिक्रमं श्रुत्वा अमर्षितः ततः क्रोधेन मारयिष्यामीति विचार्य स्वप्रतिज्ञां च स्मृत्वा उभयथापि मारणं सम्भवतीति किमिति प्रतिज्ञा हातव्येति स्वस्य कार्यमुभयथापि समीचीनमेवेति तेषामेवोभयथाऽसमीचीनमिति ज्ञापयितुं मन्दा इति सम्बोधनमाह-अस्तु वा तेषां मन्दत्वं स्वप्रतिज्ञां तु पूरयाम्येवेत्याशयेनाह-युद्धं तर्हि ददामि व इति बहुवचनात् त्रयोऽपि भवन्त एकतो भवन्तु अहमेकत इति सूचितम् ॥३०॥तथापि द्वन्द्वतायां निर्बन्धो यदि तदाह-न त्वयेति । त्वया न योत्स्ये अभीरुणेति परमार्थः व्याजेन भीरुणेत्याह-भीरुत्वे कथमेवमागमनमित्याशङ्क्याह-युधि विक्लवचेतसेति । युद्धे चेत् स्थिरता बुद्धेर्भवेत् तदा क्षत्रियो युद्धसम्भवभूमिं परित्यज्य युद्धरहितभूमौ न गच्छेदित्याशयेनाह-मथुरां स्वपुरीं त्यक्त्वेति मध्ये समुद्रस्थितिः समुद्रशरणागतिः दुर्गाश्रयवत् ॥३१॥ अर्जुनञ्च निराकरोति-अयमिति । अयन्तु योद्धा भवति परन्तु वयसाऽतुल्यः वयोऽत्र बलहेतुभूतम् अन्यथा भीमोऽपि वयसा न तुल्यः भीमार्जुनयोर्वर्षत्रयव्यवधानात् तदेव ज्ञापयितुमाह-नातिसत्त्व इति । यादृशे लग्ने उत्पन्ने तादृशे बलं भवति तद्भीमबलभद्रमद्रराजादीनामेव अत एव न मे समः दिव्यं तु बलं ममापि ब्रह्मण्यत्वादधिकमेवेति तन्मन्यते कनिष्ठ इति भीमस्यापि निराकरणे व्याजोत्तरत्वं भविष्यतीति तमङ्गीकरोति भीमस्तुल्यबलो ममेति वस्तुतस्तु नरनारायणौ परित्यज्य कालकन्यापुत्रत्वात् मुख्यप्राणं तुल्यं मन्यते सोऽपि दैत्यप्राणरूप इति जीवजीवेति वाक्यात् ॥३२॥

श्रीसुबोधिनीसारः

कृष्णोक्तिः । हे राजेन्द्र यदि मन्यसे सत्करोषि तर्हि नोऽस्मभ्यं द्वन्द्वशो युद्धं देहि युद्धयाचका राजन्याः क्षत्रिया वयं प्राप्ता अन्नयाचका न स्मः ॥२८॥ पार्थः पृथायाः पुत्रोऽसौ वृकस्योदरमिवोदरं यस्य वृकोऽग्निरुदरे यस्येति वा बह्वशित्वात्स भीमोऽस्य भ्रातार्जुनोऽयम् अनयोर्मातुलस्य पुत्रं कृष्णं ते रिपुं शत्रुं मां त्वं जानीहि ॥२९॥ एवमावेदितो विज्ञापितो मागधो राजा उच्चैर्जहास अमर्षितः क्रुद्ध आह तर्हि वो युष्मभ्यं युद्धं ददामि हे मन्दाः स्मेति प्रसिद्धम् ॥३०॥ कृष्णमाह । भीरुणा कातरेण त्वया नाहं योत्स्यामि युधि संग्रामे विक्लवं चेतो यस्य तेन कारणं वा हेतौ मथुरां स्वपुरीं त्यक्त्वा समुद्रं शरणं गतः ॥३१॥ अयं तु वयसावस्थयाऽतुल्यो न समो नातिसत्त्वोऽल्पवीर्यः अतो मे मम योद्धार्जुनो न भवेत् । भीमो मम तुल्यबलः ॥३२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदाह-युद्धमिति । तव वदान्यत्वं निश्चित्यैव याचने प्रवृत्ता इति सूचयन् सम्बोधयति-हे राजेन्द्रेति । यदि मन्यसे यथेष्टं दातुमिच्छसि तर्हि नोऽस्मभ्यं द्वन्द्वशो युद्धं देहि, यतो वयं युद्धार्थिनो राजन्या इह प्राप्ताः, नान्नकाङ्क्षिणो ब्राह्मणाः ॥२८॥ तर्हि के यूयम् इत्यपेक्षायामाह-आसौ पार्थः पृथायाः पुत्रः वृकोदरः भीमः हि प्रसिद्धपराक्रमः । अन्यत् स्पष्टम् ॥२९॥ एवमावेदितो भगवता विज्ञापितः स मागधो राजा उच्चैर्जहास, अमर्षितः क्रुद्धः सन्नाह च । तदुक्तिमाह-मन्दा इति । दुर्बलानामेवं युद्धार्थं प्रयत्नो बुद्धिमान्द्यादेव इति सूचयन् सम्बोधयति-मन्दा इति । यदि युद्धमेवाकाङ्क्षितं तर्हि तद्ददामि वो युष्मभ्यम् ॥३०॥ परन्तु त्वया सह न योत्स्ये । तत्र हेतुमाह-भीरुणेति । अत एव युधि युद्धे विक्लवमधृष्टं चेतो यस्य तेन । क्वैवं दृष्टं तत्राह-मथुरामिति । अन्यथा स्वदेशत्यागेन समुद्रमध्यगतद्वारकाश्रयणं न स्यादिति भावः ॥३१॥ अयमर्जुनस्तु न योद्धा मया सह युद्धयोग्यो भवेत् । तत्र हेतुमाह-वयसा अतुल्य इति । वयसा अतुल्यत्वेऽपि यदि बलेनाधिकस्तदा योद्धा कुतो न स्यात् इत्याशङ्क्याह-नातिसत्त्व इति । सत्त्वेन बलेनापि न्यूनः । न च देहेनापि मया समः । अत एवम्भूतस्य विजयेऽपि मम लज्जा निन्दा च स्यात्, न सत्कीर्तिरिति भावः । भीमस्तु मम योद्धा स्यात्, यतस्तुल्यबलः ॥३२॥

अन्वितार्थप्रकाशिका

युद्धमिति । हे राजेन्द्र ! यदि मन्यसे यथेष्टं दातुमिच्छसि तर्हि नोऽस्मभ्यं द्वन्द्वशो युद्धं देहि । यतो वयं युद्धार्थिनो राजन्याः क्षत्रिया इह प्राप्ताः तत्त्वन्नकाङ्क्षिणो ब्राह्मणाः ॥२८॥ असाविति । स्पष्टम् ते रिपुमिति मयैवैतावानीताविति भावः ॥२९॥ एवमिति । एवमावेदितो भगवता विज्ञापितः स मागधो राजा उच्चैर्जहास । अमर्षितः क्रुद्धः सन्नाह स्म च हे मन्दाः ! वस्तुतः अमन्दा इतिच्छेदः । यदि युद्धमेव काङ्क्षितं तर्हि वो युष्मभ्यं युद्धमेव ददामि ॥३०॥ नेति । भीरुणा अतो युधि विक्लवचेतसा त्वया न योत्स्ये । यः त्वं मथुरां स्वपुरीं त्यक्त्वा समुद्रं शरणगतोऽभूः । वस्तुतः अभीरुणा बहुशो मां जितवता निर्भयेन त्वया सह युधि

विक्लवचेतसा युक्तोऽहं न योत्स्ये । यतः मथुरामुपलक्षणतया द्वारकां च स्वपुरीं त्यक्त्वा सैन्यरहित एव त्वं मां हन्तुं समुद्रं प्राकारादिकृतमुद्रणयुक्तं शरणं मदीयं गृहं गतः प्राप्तोऽसि ॥३१॥ अयमिति । अयमर्जुनस्तु वयसा अतुल्यः न्यूनः नापि अतिसत्त्वः बलाधिकः अतोऽर्जुनो योद्धा न भवेत् । भीमस्तु मम तुल्यबलः अतो योद्धा भवेत् ॥३२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

द्वन्द्वशः युद्धम् ॥२८॥ हरिः स्वराजन्यत्वं दर्शयन्नाह असाविति ॥२९॥ हे मन्दाः इति अमर्षित आह ॥३०॥ मद्भीत्या समुद्रं शरणं आश्रयं गतः ॥३१॥ अयम् अर्ज्जुनस्तु मम वयसाऽतुल्यः नातिसत्त्वः अति बलवान्नास्तति ॥ यतः मे समो नास्ति अतो मया सह योद्धा न भवेत् तुल्यबलो भीमस्तु योद्धा भवेत् ॥३२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इति तेनोक्ते प्राह भगवान् ॥ युद्धमिति ॥ हे राजेन्द्र, यदि मन्यसे दातुमिच्छसि, तर्हीत्यर्थः । नोऽस्मभ्यं, द्वन्द्वशः युद्धं देहि । राजन्याः वयं, युद्धार्थिनः प्राप्ताः । अन्नकाङ्क्षिणः न । वयमन्नार्थिनो ब्राह्मणा न भवाम इत्यर्थः ॥२८॥ असाविति ॥ असौ पार्थः पृथापुत्रः, वृकोदरः, तस्य भ्राता, अयम् अर्जुनः, हि । अनयोर्द्वयोः, मातुलेयं ते तव, रिपुं, मां, कृष्णं, जानीहि अवेहि ॥२९॥ एवमिति ॥ एवम् आवेदितः श्रीकृष्णेनाभिहितः, सः मागधः राजा, उच्चैः जहास । ततः अमर्षितः क्रुद्धः सन्, आह च । हे मन्दाः, तर्हि यदि युद्धं वाञ्छथ, तर्हीत्यर्थः । वो युष्मभ्यं, युद्धं ददामि ॥३०॥ नेति ॥ हे कृष्ण, युधि विक्लवचेतसा दुष्टचित्तेन, भीरुणा त्वया, न योत्स्ये । यस्त्वं, मथुरां स्वपुरीं त्यक्त्वा, समुद्रं शरणं गतः ॥३१॥ अयमिति ॥ अयम्, अर्जुनः तु, वयसा अतुल्यः, नातिसत्त्वः, अतः मे मम समः, न । अतः योद्धा मया सह युद्धकर्ता, न भवेत् । भीमः, मम तुल्यबलः ॥३२॥

कृष्णप्रिया

भगवान श्रीकृष्णने कहा - राजेन्द्र ! जरासंघजी हम अन्न के अभिलाषुक विप्र नहीं है; हम क्षत्रिय है हा आपके समीप संग्राम की ईच्छा से आये है, यदि आप चाहे तो हमें द्वन्द्ध युद्ध की भिक्षा दिजीए ॥२८॥मागधजी सुनिए यह पाण्डुपुत्र भीमसेन है और यह इनका भाई अर्जुन है और मै इन दोनों का ममेरा भाई तथा आपका पुरातन शत्रु कृष्ण हुं ॥२९॥इस प्रकार भगवान श्रीकृष्णने अपना परिचय दिया, तब मागध जरासंध अट्टाह-हास्य करके हृष्ट होकर बोला - अरे ! मन्दमतियो यदि आपको युद्ध की हि अभिलाषा है तो लीजिए मैं आपकी ईच्छा का स्वीकार करता हूं ॥३०॥लेकिन हे कृष्ण ! आप तो अत्यंत डरपोक हो युद्धमें आप गभरा जाते हो, आपको विदित है कि आपने मेरे भय से अपनी मथुरा नगरी भी छोड दी और समुद्र का आश्रय लिया है इसलिये मैं आपके साथ संग्राम नहीं करुंगा ॥३१॥यह अर्जुन भी कोई वीर योद्धा नही है और वयसे मुझसे छोटा है । इसलीये यह भी मेरे समान न होने से मैं इसके साथ भी संग्राम नहीं करुंगा ॥३२॥

इत्युक्त्वा भीमसेनाय [1]प्रादाय महतीं गदाम् । द्वितीयां स्वयमादाय निर्जगाम पुराद्बहिः ॥३३॥
ततः [2]समे खले वीरौ [3]संयुक्तावितरेतरौ [4]। जघ्नतुर्वज्रकल्पाभ्यां गदाभ्यां रणदुर्मदौ ॥३४॥
मण्डलानि विचित्राणि सव्यं दक्षिणमेव च । चरतोः शुशुभे युद्धं [5]नटयोरिव रङ्गिणोः ॥३५॥
ततश्चटचटाशब्दो वज्रनिष्पेष[6]सन्निभः । गदयोः क्षिप्तयो राजन्दन्तयोरिव दन्तिनोः ॥३६॥

कर्दमक्षमा

इति, उक्त्वा, भीमसेनाय, महतीम्, गदाम्, प्रादात्, स्वयम्, द्वितीयाम्, आदाय, पुरात्, बहिः, निर्जगाम ॥३३॥ ततः, रणदुर्मदौ, वीरौ, समे, खले, इतरेतरौ, संयुक्तौ, वज्रकल्पाभ्याम्, गदाभ्याम्, संयुक्तौ ॥३४॥ रङ्गिणोः, नटयोः, इव, सव्यम्, च, दक्षिणम्, एव, विचित्राणि, मण्डलानि, चरतोः, युद्धम्, शुशुभे ॥३५॥ राजन् ! ततः, दन्तिनोः, दन्तयोः, इव, क्षिप्तयोः, गदयोः, वज्रनिष्पेषसन्निभः, चटचटाशब्दः, (समभवत्) ॥३६॥

---

[1] प्रदाय-वीर ; दत्वा स-विज. । [2] समे स्थले-वीर.; समबलौ-विज. । [3] संसक्ता-विज. । [4] वितरेतरम्-वीर. । [5] गजयो-वीर. । [6] निर्घोष-गो. प्रे. टि. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रदाय दत्त्वेत्यर्थः ॥३३॥ समेखले युद्धाङ्गणे ॥३४॥ मण्डलानि गदायुद्धगतिभेदान् सव्यं दक्षिणञ्च यथा भवति तथा रङ्गिणोः रङ्गगतयोर्नटयोरिवेति निर्भयत्वेनोपमा ॥३५॥ चटचटेति गदयोः परस्पराघातशब्दानुकरणं वज्रस्य निष्पेषः पातस्तत्सदृशः युध्यतोर्दन्तिनोर्दन्तघातशब्द इव शुशुभे ॥३६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भारतीयबाहुयुद्धविरोधस्तु महतीं पूज्यां गदां वाचं प्रादाय भीमाय 'भीमस्तुल्यबलो मम' इत्युक्तेः। द्वितीयां द्वैरथायोग्यां स्वयं कोऽर्थः स्वयं भगवते 'न त्वया भीरुणा योत्स्ये' इत्युक्तेरादाय दत्त्वेति। पुराद्गिरिव्रजात् ॥३३॥ ततः पुराद्बहिर्गमनोत्तरम्। मेखला परितः कृता मृण्मयमर्यादा तया सहिते। गदाभ्यां वाग्भ्यां निष्ठुरोक्तिभ्याम् ॥३४॥ नटयोरिवेत्युक्तेन शस्त्रयुद्धमिति। अन्यथा दृष्टान्तवैषम्यापत्तेः ॥३५॥ ततो युद्धप्रवृत्त्यनन्तरम्। गदयोः क्षिप्तयोरन्योन्यं निष्ठुरोक्त्योः सत्योश्चटचटाशब्दस्तलताडनोत्थ एव ज्ञेयः ॥३६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रकर्षेण प्रसन्नमुखत्वादिना आ सम्यक् हस्तेऽर्पणादिना दत्त्वा महतीं भीमसेनस्य योग्यत्वात् अनुत्क्षेप्येयमिति मननाद्वा बहिर्निर्गमः समेखलार्थं पौरजनेषु स्वमहिमकौतुकदर्शनार्थञ्च ॥३३॥ संयुक्तौ युद्धेऽभिनिविष्टौ सन्तौ मिथो जघ्नतुः यतो रणे दुर्मदौ अतिमत्तौ ॥३४॥एव चेति कदाचिदभिमुखादिकमपि चरतोः ॥३५॥ टीकायां तत्सदृशस्तच्छब्दसदृशः क्षिप्तयोः प्रहरणार्थमन्योन्यं प्रयुक्तयोः ॥३६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततो निर्गमादनन्तरमेव संयुक्तौ युद्धेऽभिनिविष्टौ सन्तौ, मिथो जघ्नतुः, यतो रणे दुर्मदौ अतिमत्तौ ॥३४॥एव अपि, मण्डलेषु च कदाचिद्दक्षिणमपि, च-कारादभिमुखादिकं चरतोः, यतो रङ्गिणोर्युद्धरङ्गवतोः, अत एव शुशुभे ॥३५॥ क्षिप्तयोः प्रहारार्थमन्योन्यं प्रयुक्तयोः हे राजन्निति विस्मयाद्युद्धकौतुकाद्वा ॥३६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२६-३६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इतीति। महतीं गुर्वीं गदां प्रादाय दत्त्वा पुराद्बहिर्निर्जगाम ॥३३॥ तत इति। समे निम्नोन्नत्यरहिते स्थले युद्धाङ्गणे संयुक्तौ वीरौ मागधभीमसेनौ रणे दुष्टो मदो ययोस्तौ जघ्नतुः ॥३४॥सव्यं दक्षिणञ्च यथा भवति तथा मण्डलानि गदायुद्धगतिभेदांश्चरतोः युद्धं शुशुभे रङ्गिणोः रङ्गगतयोर्गजयोरिवेति नटयोरिवेति पाठे निर्भयत्वे दृष्टान्तः ॥३५॥ ततश्चेति। चटचटेति गदयोः परस्पराघातानुशब्दानुकरणं वज्रस्याशनेर्निष्पेषः निष्पातस्तत्सदृशः युध्यतोर्दन्तिनोर्गजयोर्दन्तघातशब्द इव शुशुभे ॥३६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

ररङ्गिणोः रङ्गगतयोः मण्डलं वल्गतोर्वा ॥३५-३६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२७-४८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥६-४८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥७-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

महतीमित्यतिथेस्तव तुष्टिर्मदपेक्षणीयेति बृहतीं त्वं गृहाण मम तु यथा तथा गदयापि युद्धं सेत्स्यतीति गूढगर्व्वव्यञ्जिका तस्योक्तिरभूदिति भावः ॥३३॥ समेखले युद्धाङ्गणे ॥३४॥ मण्डलानि गदायुद्धगतिभेदान् सव्यं दक्षिणं च यथा स्यात् तथा नटयोरिति निर्भयत्वेन सदा शास्त्रविचक्षणत्वेन चोपमा ॥३५॥ चटचटेति गदयोः परस्पराघातशब्दानुकरणम्। वज्रस्य निष्पेषः पातस्तत्सदृशः युद्ध्यमानयोः दन्तिनोः दन्ताघातशब्द इव शुशुभे ॥३६॥

गूढार्थदीपिनी

पुरात् गिरिव्रजात् ॥३३॥ समे खले युद्धीयसमतलभूमौ ॥ खलः कल्वो भुवि स्थाने इत्यमरः ॥ इतरेतरं परस्परं संयुक्तौ मिलितौ । दुर्मत्तौ उन्मत्तौ ॥३४॥ मण्डलानि गदायुद्धीयपादविक्षेपान् । पैतरासंज्ञकान् । चरतोः कुर्वतोः द्वयोर्युद्धम् रङ्गिणोः रङ्गभूमिगतयोर्नटयोरिव ॥३५॥ प्रक्षिप्तयोः गदयोः शब्दः वज्रपातसदृशोऽभूत् । दन्तिनोः हस्तिनोः दन्तयोर्यथा भवति । 'दन्ती दन्तावलो हस्ती इत्यमरः' ॥३६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रदाय दत्त्वा ॥३३॥ समे निम्नोन्नतत्वादिदोषवर्जिते स्थले गदायुद्धरङ्गे ॥३४॥ सव्यं दक्षिणञ्च यथा भवति तथा मण्डलानि गदायुद्धगतिभेदान् चरतोः रङ्गिणोः रङ्गस्थयोः युद्धं शुशुभे इत्यन्वयः निर्भयत्वे दृष्टान्तमाह-नटयोरिव ॥३५॥ युद्धवेलायां दन्तयोः चटचटाशब्द इव गदयोश्चटचटाशब्दो बभूव कथम्भूतः वज्रस्य निष्पेषः घातस्तत्सदृशः ॥३६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

वचनमात्रं न च रचनमेवमभूदित्यत आह ॥ इतीति । द्वितीयां गदाम् ॥३३॥ ततः समरबले समराङ्गणे । समबलावित्यपि पठन्ति । इतरेतरसंसक्तौ मिलितौ वज्रकल्पाभ्यां तत्सदृशीभ्याम् । इतरेतराविति पाठे जघ्नुरित्यनेनान्वयः ॥३४॥ रङ्गिणो रङ्गस्थयोः सव्यं दक्षिणप्रदेशमुद्दिश्याभिनयेन चरतोर्नटयोरिव मण्डलानि गदायुद्धविहितानि चरतोर्युद्धं शुशुभे । अनेन द्वयोरपि भयोज्झितता द्योत्यते ॥३५॥ दन्तिनोर्गजयोर्दन्तयोः परस्परं सङ्घर्षे यथा तथा क्षिप्तयोर्गदयोर्वज्रनिष्पेषसन्निभश्चटचटेत्यनुकारशब्दः । उक्तं च तृतीयतात्पर्ये । फट्कारश्चैव फूत्कारस्तथा किलकिलादयः । अनुकारशब्दा विज्ञेया ये चान्ये तादृशा मता इति । शुशुभ इत्यन्वयः । परस्परं रोगरूपयोरिति ध्वनिः ॥३६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एतेषान्तु सर्वत्रैवाभ्यनुज्ञा बलन्तु भगवतः क्वापि संवारणीयमिति तदङ्गीकारे जरासन्धकृत्यमाह-इत्युक्त्वेति । द्वन्द्वयुद्धं शरीरबलनिमित्तकमिति गदायामेव शरीरबलं योजयितुं शक्यमिति निरायुधेन युद्धं न युक्तमिति तस्मै महतीं गदां प्रादात् द्वितीयां तत्तुल्यां स्वयमादाय स्वरूपतो साधनतश्च फलरूपो भूत्वा स्थानबलं स्वगृहे स्वस्याधिकमिति स्वपुरं परित्यज्य युद्धार्थं पुराद्बहिर्निर्गतः ॥३३॥ ततो युद्धप्रकारं लौकिकमाह-ततः समेखल इति । कोमला भूमिः मेखलशब्देनोच्यते असहायसमागमने हेतुः वीरावीति संयुक्तावितरेतराविति समारम्भे तुल्यता निरूपिता वज्रकल्पाभ्यामिति गदामाहात्म्यं रणदुर्मदाविति ॥३४॥तयोर्मण्डलानि गदायुद्धे प्रोक्तानि सव्यं दक्षिणं यथा भवति एवेत्युभयोरवधारणं चकारादुभयोः सभयं कदाचित् एवं चरतोर्युद्धं शुशुभे दृष्टानां तद्युद्धं सुखदं जातमित्याह-नटयोरिवेति युद्धाभास एवायम् अनुकरणमिति शङ्कायामाह-रङ्गिणोरिति । रङ्गस्तयोर्वर्तते इति रसयुक्तौ न त्वाभासावित्यर्थः ॥३५॥ लोकानां रसजननान्यथानुपपत्त्या आभास एव भविष्यतीत्याशङ्क्य युद्धे शब्दं वर्णयति-ततश्चटचटाशब्द इति । वज्रनिष्पेषो वज्रपातस्तत्सन्निभस्तत्सदृशः अन्योन्यं क्षिप्तयोरेव शब्दादपि महद्भयं सम्भवति सर्वेषां तेषां प्रहारेऽपि न तदिति ।माहात्म्यं गदयोः परित्यागशङ्काभावाय अपरित्यागाय वा दृष्टान्तः दन्तयोरिव दन्तिनोरिति ॥३६॥

श्रीसुबोधिनीसारः

इत्युक्त्वा महतीं गदां भीमसेनाय प्रादाय दत्त्वा द्वितीयां गदां स्वयमादाय पुरान्नगराद्बहिर्निश्चक्राम ॥३३॥ ततोऽनन्तरं समे खले युद्धभूमण्डले इतरेतरौ वीरौ द्वौ संयुक्तौ सम्पृक्तौ रणे दुष्टो मदो ययोस्तौ वज्रेण कल्पाभ्यां तुल्याभ्यां गदाभ्यां जघ्नतुः प्रहारं चक्रतुः ॥३४॥ विचित्राणि मण्डलानि गदायुद्धगतिभेदरूपाणि सव्यं वामं दक्षिणमेव चरतोः परिभ्रमतोः युद्धं शुशुभे रङ्गिणो रङ्गभूमिगतयोर्नटयोरिव ॥३५॥ ततोऽनन्तरं क्षिप्तयोर्गदयोः चटचटाशब्दोऽभूत् वज्रस्य निष्पेषः पातस्तत्सन्निभः तत्तुल्यः दन्तिनोर्हस्तिनोर्दन्तयोः चटचटा शब्द इव ॥३६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्युक्त्वा जरासन्धः स्वकीयामेव महतीं गुर्वीं गदां भीमसेनाय प्रदाय दत्त्वा तथाभूतां द्वितीयां गदां स्वयमादाय युद्धार्थं पुराद्बहिर्निर्जगाम ॥३३॥ ततश्च समे निम्नौन्नत्यरहिते खले कोमलप्रदेशे, यद्वा मेखला भित्तिविशेषस्तत्सहिते भूमिनिखननादिना युद्धार्थं सम्पादिते युद्धाङ्गणे रणदुर्मदौ यतो वीरौ परस्परं गदाभ्यां जघ्नतुः ॥३४॥ सव्यं दक्षिणं च यथा भवति तथा विचित्राणि मण्डलानि गदायुद्धगतिभेदान् चरतोस्तयोर्युद्धं शुशुभे । तयोर्निर्भयत्वे दृष्टान्तमाह–रङ्गभूमिगतयोर्नटयोर्युद्धमिवेति ॥३५॥ ततश्च हे राजन्! प्रक्षिप्तयोः सञ्चालितयोर्गदयोः परस्पराद्याघातजन्यो वज्रस्य निष्पेषः सम्पातस्तच्छब्दसदृशोऽतिभयङ्करश्चटचटाशब्दो बभूवेति शेषः । गत्र गदयोदार्ढ्ये अपरित्यागेनैव प्रक्षेपे च दृष्टान्तमाह–युद्ध्यतोर्दन्तिनोर्गजयोर्दन्तयोरिवेति ॥३६॥

अन्वितार्थप्रकाशिका

इतीति । इत्युक्त्वा जरासन्धः स्वकीयामेव महतीं गुर्वीं गदां भीमसेनाय प्रदाय दत्त्वा तथाभूतां द्वितीयां गदां स्वयमादाय युद्धार्थं पुराद्बहिर्निर्जगाम ॥३३॥ तत इति । ततश्च समे निम्नोन्नतत्वरहिते खले कोमलप्रदेशे यद्वा मेखलाभित्तिविशेषस्तत्सहिते भूमिनिखननादिना युद्धार्थं सम्पादिते युद्धाङ्गणे रणदुर्मदौ वीरौ इतरेतरं परस्परं संयुक्तौ मिलितौ वज्रकल्पाभ्यां गदाभ्यां जघ्नतुः ॥३४॥ मण्डलानीति । सव्यं दक्षिणं च यथा भवति तथा विचित्राणि मण्डलानि गदायुद्धगतिभेदान् चरतोस्तयोः रङ्गिणोः रङ्गभूमिगतयोर्नटयोरिवेति निर्भयत्वेनोपमा युद्धं शुशुभे ॥३५॥ तत इति । ततश्च हे राजन् ! क्षिप्तयोः क्षेपणकर्मीभूतयोर्गदयोः दन्तिनोर्गजयोर्दन्तयोरिव परस्पराद्याघातजन्यो वज्रस्य निष्पेषः सम्पातस्तच्छब्दसदृशोऽतिभयङ्करश्चटचटेति शब्दो बभूवेति शेषः ॥३६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भीमसेनाय गदां प्रदाय दत्त्वा ॥३३॥ समे समभूमिके खले रणाङ्गणे ॥३४॥ सव्यं दक्षिणं च यथास्यात्तथा मण्डलानि गदासङ्ग्रामगमनविशेषान् ॥ रङ्गिणोः रङ्गस्थितयोर्नटयोरिव मत्तयोरिव युद्धं शुशुभे ॥ नटोपमानं निर्भयत्वसूचनाय ॥३५॥ वज्रनिष्पेषसन्निभो वज्रपातशब्दतुल्यः गदयोः चटचटेति शब्दः युध्यतोः दन्तिनोरिभयोः ॥ दन्तयोः परस्पराघातशब्द इव शुशुभे इति पूर्वेण सम्बन्धः ॥३६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं, उक्त्वा, भीमसेनाय, महतीं गदां प्रादाय, स्वयं द्वितीयाम् आदाय, पुरात् बहिः, निर्जगाम ॥३३॥ तत इति ॥ ततः समे निम्नौन्नत्यरहिते, खले युद्धाङ्गणे, संयुक्तौ वीरौ, रणे दुष्टो मदो ययोस्तौ मागधभीमसेनौ, वज्रकल्पाभ्यां गदाभ्याम्, इतरेतरं परस्परं, जघ्नतुः ॥३४॥ मण्डलानीति ॥ सव्यं दक्षिणं च यथा भवति तथा, विचित्राणि नानाविधानि मण्डलानि गदायुद्धगतिभेदान्, चरतोराचरतोर्मागधभीमयोः, रङ्गिणोः रङ्गगतयोः, नटयोः इव, युद्धं शुशुभे एव ॥३५॥ तत इति ॥ हे राजन्, ततः क्षिप्तयोः गदयोः, वज्रस्य निष्पेषः पातस्तत्सन्निभः, चटचटाशब्दः, दन्तिनोः दन्तयोः परस्पराघातशब्द इति शेषः । इव, शुशुभे ॥३६॥

कृष्णप्रिया

अब अवशिष्ट रहे भीमसेन । ये निश्चय मेरे समान बलवान् मेरे समकक्ष है । मागध जरासन्धने यह कहकर भीमसेन को एक बहुत बडी गदा देदी और स्वयं दूसरी गदा लेकर नगरसे निकल आया ॥३३॥अब दोनों वीर दायें बायें विविध प्रकारके पैंतरे बदलते हुए ऐसे देदीप्यमान हो रहेथे जैसे किसी रंगमञ्च पर मानो दो उत्तम नट युद्धका नाटक कर रहे हो ॥३५॥महाराज परीक्षित ? जब एकको गदा दूसरेकी गदासे टकराती, तब तो एसा मालूम होता कि मानो संग्राम खेलने वाले दो गजराजके दांत आपसमें भिडकर चटपटा रहे हों या बडे जोरसे बिजली तडक रही हो ॥३६॥

ते वै गदे भुजजवेन [1]निपात्यमाने अन्योन्य[2]तोंऽसकटिपादकरोरुजत्रून् ।
चीर्णीबभूवतुरुपेत्य यथार्कशाखे संयुध्यतोर्द्विरदयोरिव [3]तीव्रमन्व्वोः ॥३७॥
इत्थं तयोः [4]प्रहतयोर्गदयोर्नृवीरौ क्रुद्धौ स्वमुष्टिभिरयः[5]स्पर्शैरपिष्टाम् [6]।
शब्दस्तयोः [7]प्रहरतोरिभयोरिवासीन्निर्घातवज्रपरुषस्तलताडनोत्थः ॥३८॥
तयोरेवं प्रहरतोः समशिक्षाबलौजसोः । निर्विशेषमभूद्युद्धमक्षीण[8]जवयोर्नृप ॥३९॥
[[9]एवं तयोर्महाराज युध्यतोः सप्तविंशतिः । दिनानि नरगंस्तत्र सुहृद्वन्निशि तिष्ठतोः ॥
एकदा मातुलेयं वै प्राह राजन्वृकोदरः । न शक्तोऽहं जरासन्धं निर्जेतुं युधि माधव ॥]
शत्रोर्जन्ममृती विद्वान् जीवितं च जराकृतम् । पार्थमाप्याययन्स्वेन तेजसाचिन्तयद्धरिः ॥४०॥

कर्दमक्षमा

तीव्रमन्व्वोः, संयुध्यतोः, द्विरदयोः, इव, उपेत्य, अन्योऽन्यतः, अंसकटिपादकरोरुजत्रून्, भुजबलेन, निपात्यमाने, वै, ते, गदे, अर्कशाखे, यथा, चूर्णीबभूवतुः ॥३७॥ तयोः, गदयोः, इत्थम्, प्रहतयोः, क्रुद्धौ, नृवीरौ, अयःस्पर्शैः, स्वमुष्टिभिः, अपिष्टाम्, इभयोः, इव, प्रहरतोः, तयोः, तलताडनयोः, शब्दैः, निर्घातवज्रपरुषः, इव, आसीत् ॥३८॥ नृपः, समशिक्षाबलौजसोः, अक्षीणजवयोः, प्रहरतोः, तयोः, इत्थम्, निर्विशेषम्, युद्धम्, अभूत् ॥३९॥ महाराज ! सुहृद्वत्, निशि, तिष्ठतोः, युध्यतोः, तयोः, एवम्, सप्तविंशतिः, दिनानि, तत्र, निरगमन् ॥४०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अंसकट्यादीनुपेत्य दीप्तो मन्युर्ययोस्तयोर्द्विरदयोर्गजयोरर्कशाखाभ्यां समं युध्यतोस्ते यथा चूर्णीभवतस्तद्वत् ॥३७॥ अपिष्टां चूर्णीचक्रतुः ॥३८॥ शिक्षा अभ्यासः बलं सत्त्वमोजः प्रभावः समानि तानि ययोस्तयोः ॥३९-४०-४१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ते गदे तयोर्गृहीते । सन्ध्यभाव आर्षः । भुजजवेन पाणिवेगेन । निपात्यमाने अधःक्रियमाणे । चूर्णीबभूवतुर्निष्फले बभूवतुः । पूर्वोक्तप्रशस्तवाचौ संरम्भावेशात् अंसकट्यदीनुपेत्य अहं तेंऽसं भनज्म्यहं ते कटिमित्याद्युक्त्वा । अर्कशाखादृष्टान्तस्तु नाशमात्र एव ज्ञेय इत्येवं परिहार्यः । एवमग्रेऽपि ॥३७॥ प्रहतयोश्चूर्णीभूतयोः । वज्रस्य निर्घातो वज्रनिर्घातस्तद्वत्पुरुषो निष्ठुरः । राजदन्तादिवत्समासः ॥३८॥ तयोर्भीमजरासन्धयोः । निर्विशेषमनुपमम् 'विशेषो भेदतुल्ययोः' इति धरणिः ॥३९॥ तत्र गिरिव्रजे ॥४०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ते वज्रसारतुल्ये अपि अंसेति अत्र प्राण्यङ्गद्वन्द्वत्वेऽपि नपुंसकत्वाभाव आर्षः । यथाऽर्कशाखे चूर्णीभवतस्तथा चूर्णीबभूवतुः अन्यत्तैः तत्र गजयोरर्कशाखाभ्यां समं युद्ध्यतोरित्यभूतोपमा ज्ञेयेति ॥३७॥ प्रहतयोर्नष्टयोः सत्योः अयस्स्पर्शैः तत्तुल्यैः अपिष्टां मिथो गात्रं निर्घातो निरभ्रमहागर्जितं वज्रं वज्रपातः ततोऽपि परुषः तलेन करतलेन यत्ताडनं मिथः प्रहारः तदुत्थः ॥३८॥ एवं प्रहरतोरप्यक्षीणजवयोरिति श्रमाद्यभावेन युद्धाद्यनिवृत्तिरुक्ता ॥३९-४१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत एव गायन्निव दीर्घच्छन्दसा युद्धं वर्णयति-ते इति द्वाभ्याम् । वै अपि, ते वज्रसारतुल्ये अपि, अंसादिषु नितरां पात्यमाने सत्यौ उपरि एवत्य प्राप्य, नपुंसकत्वाभाव आर्षः, यथार्कशाखे तथा चूर्णीबभूवतुरिति तयोरकिञ्चित्करत्वं सम्यक् चूर्णीत्वादिकं चोक्तम् । अन्यत्तैर्व्याख्यातम् । तत्र गजयोरर्कशाखाभ्यां समं युध्यतोरित्यभूतोपमा ज्ञेयेति । तयोर्द्वन्द्वयुद्धार्थं गृहीतयोरनिर्व्वचनीययोर्वा ॥३७॥ प्रकर्षेण हतयोर्नष्टयोः सत्योः, नृषु वीरो अयःस्पर्शैर्लोहतुल्यैरपिष्टां मिथो गात्रम्, निर्घातो निरभ्रमहादारुणघोरशब्दः, वज्रो वज्रपातस्ताभ्यामपि परुषः, तलेन करतलेन यत्ताडनं मिथः प्रहारः, तस्य वा ताडनं हननम्, तदुत्थः ॥३८॥एवं प्रहरतोरपि अक्षीणजवयोरिति अक्षीणजवत्वेन निर्व्विशेषत्वेन वा विस्मयात् ॥३९॥ जरया राक्षस्या

---

[1] बलेन निहन्यमाने वीर. । [2] अन्योन्ययोः सकटि-विज. । [3] दीप्तमन्व्वोः-श्रीधर. वंशी. वीर. विश्व. ; दीप्तमन्व्वोः-विज. । [4] प्रहरतो-वीर. । [5] रयस्सदृशै-वीर. । [6] स्पर्शैर्व्यपिष्टां-विज. । [7] प्रहरतोर्घनयो-विज. । [8] बलयोर्नृप-वीर. । [9] आचार्यवरपाठे तथा विज. पाठे एतत् श्लोकद्वयं नास्ति ।

शकलद्वयसंयोजनेनैव कृतम्, पार्थमिति पृथापुत्रत्वेन स्नेहभरपात्रत्वं सूचितम्, अतः स्वकीयेनैव तेजसा शक्त्या निक्षिप्तया आप्याययन् सन्, किंवा स्वबुद्धिप्रभावेणाप्याययितुम्; हरिरिति शत्रुप्राणहरणे प्रवृत्तेः ॥४०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

जत्रव इति जत्रुष्वित्यर्थः । उपेत्य परस्परं सङ्गत्य जङ्घादीन् उपेत्येति वान्वयः ॥३७-३९॥अपिष्टां पेषणमकुर्वताम् ॥४०-४१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ते वा इति । अन्योन्यतः परस्परं भुजबलेन निहन्यमाने ते गदे अंसादीनुपेत्य चूर्णीबभूवतुः तत्रांसः स्कन्धः दीप्तो मन्युर्ययोः गजयोरर्कशाखाभ्यां संयुध्यतोस्ते यथा चूर्णीभवतः तद्वदित्यर्थः ॥३७॥ इत्थमिति । अयस्सदृशैः कृष्णायसवन्निष्ठुरैः मुष्टिभिर्गदयोरपिष्टां चूर्णीचक्रतुः गदयोरिति कर्मणः शेषत्वविवक्षया षष्ठी प्रहरतोरित्यत्र करणस्य कर्तृत्वविवक्षायां लटः शत्रादेशः "उगितश्च" (४-१-१४) इति ङीबभाव आर्षः । प्रहरतोर्भीममागधयोः ये गदे तयोरिति गजयोरिव मुष्टिभिः प्रहरतोः तयोः भीममागधयोः करतलताडनादुत्थः उत्पन्नः शब्दः निर्घातवज्रपरुषः वज्रनिर्घातवत्परुषः आसीत् निर्घातशब्दस्य पूर्वनिपात आर्षः ॥३८॥ तयोरिति । शिक्षाऽभ्यासः बलं सत्त्वम् ओजः प्रभावः समानि एतानि ययोस्तयोरक्षीणबलयोर्युद्धं निर्विशेषं निरुपममासीदित्यर्थः ॥३९-४१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अन्योन्ययोः परस्परसङ्गतयोः सकटिपादकरोरुजत्रून् प्रति निपात्यमाने अर्कस्य गुल्मस्य शाखे दीप्तसन्ध्योः प्रकाशितसन्धिस्थानयोः ॥३७॥ अयस्स्पर्शैः स्वमुष्टिभिर्वपिष्टां विपेषतुः जघ्नतुरित्यर्थः । प्रहतयोः सतोर्निर्घातवज्रवन्निष्ठुरः ॥३८-४१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२७-४८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥६-४८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ते गदे अंसकट्यादीनुपेत्य चूर्णीबभूवतुः । दीप्यमन्य्वोरुद्दीप्तकोपयोः ॥३७॥ गदयोः प्रहतयोः सतोरपिष्टां परस्परं चूर्णीचक्रतुः ॥३८-४१॥

गूढार्थदीपिनी

भुजवेगेन हस्तकौशलेन प्रक्षिप्यमाणे ते गदे अन्योन्यतः परस्परम् अंसादीन् उपेत्य प्राप्य चूर्णीबभूवतुरित्यन्वयः । अर्काशाखाभ्यां युद्ध्यतोः गजयोः अङ्गानि प्राप्य यथा अर्कशाखे चूर्णीभवतस्तथा । दीप्तमन्य्वोः क्रोधपूर्णयोः द्विरदयोः गजयोः । द्वौ रदौ दन्तौ यस्येति द्विरदशब्दार्थः । अंसः स्कन्धः तदुभयतः संलग्ने अस्थिनी जत्रुणी ॥३७॥ इत्थं गदयोः प्रहतयोः भग्नयोः सत्योः क्रुद्धौ नृवीरौ स्वमुष्टिभिरन्योन्यं अपिष्टां ताडयामासतुः । अयोवत् लोहवत् कठोरः स्पर्शो येषां तैः । गजयोरिव प्रहरतोः तयोः शब्दः निरभ्रवज्रपातवत् परुषः कठोरः भीषण आसीत् । तलः चपेटः ॥३८॥ समानि शिक्षादीनि ययोः । बलं शारीरम् । ओजः एन्द्रियम् । निर्विशेषम् अनुपमम् । विशेषो भेदतुल्ययोः इति धरणिः । जवोऽत्र बलम् ॥३९॥ निरगमन् व्यतीतानि ॥४०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अंसादीन् उपेत्य चूर्णीबभूवतुः ॥३७॥ इत्थं गदयोः प्रहतयोः चूर्णीभूतयोः मुष्टिभिः अपिष्ट शिथिलीचक्रतुः अंसादीनिति शेषः ॥३८-४१॥मूर्द्धनि भवाः मूर्द्धन्याः हेमकलशाः येषां तैः रजतमयान्युरूणि स्थूलानि शृङ्गाणि कलशाधःस्था भूमिका येषां तैर्भवनैश्च जुष्टम् कुरुराजस्य धाम पुरं ददर्श ॥३२-३३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अन्योन्यतोऽसकटिपादेति पाठः सरलो विरलार्थश्च । अन्योन्ययोः सकटिपादकरोरुजत्रूनिति पाठे विशेषाध्याहारेण वा मध्ये सहपूर्वपदसमासेन वा निर्वाहः कर्तव्यः । किञ्चोत्तरत्र स्तनांसक इत्यंसानुवादोऽप्येतदंशे वादानुकूलो न भवतीति क्लिष्टो मार्गः । स्कन्धे ताभ्यां समाहत्येति भारतोक्तेः । अन्योन्यतो भुजजवेन निपात्यमाने ते गदे । अंसकटिपादकरोरुजत्रून् । उपेत्य स्पष्टप्रतिपत्त्यर्थं प्राण्यङ्गत्वैकवद्भावो नाश्रितः । अभिमानत्वाङ्गकृतानङ्गत्वानुसन्धानं द्वयोरिति दर्शयितुं ग्रन्थकर्तृक एवं निर्दिदेशेति

वाऽवसेयम् । दीप्तो मन्युः क्रोधो ययोस्तौ तयोः संयुद्ध्यतोर्द्विरदयोर्गजयोरन्तरास्थिते अर्कशाखे इव चूर्णीबभूवतुः । अनेनोभयोरभङ्गुरताऽङ्गयोरिति ध्वनिः । प्रतिध्वनिर्देहद्रढिम्न इति ज्ञेयम् ॥३७॥ इत्थमभङ्गाङ्गसङ्गेन तयोर्धृतयोर्गदयोः प्रहरतोश्चूर्णितयोः सत्योः क्रुद्धौ नृवीरौ । अयःस्पर्शैरपि माषं नीत्या स्पर्शैः स्वमुष्टिभिर्वपिष्टां पिपेषतुः । घनयोर्मेघयोस्तत्सम्बन्धिनिर्घातवज्रपरुषस्तयोर्निष्ठुरः शब्द इव तलताडनोत्थः शब्द आसीत् ॥३८॥ समानि शिक्षाबलौजांसि ययोः । एवं प्रहरतोस्तयोरक्षीणजवयोर्युद्धं निर्विशेषं सममेवाभूत् ॥३९॥ शत्रोर्जन्म जरासन्धानविहितं तथा मृतिं तत्त्रोटनादिति जन्ममृती विद्वान् । जराकृतं तज्जीवितं विद्वान् । स्वेन तेजसापार्श्वमाप्याययन्वर्धयन्पूरयन्निति यावत् । हरिरचिन्तयत् । अविदितं परेण यथा स्यात्तथा । कथमयं मया बोधनीय इति विचारयामास ॥४०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

गदयोरेवान्योन्यप्रहारो न तु देहयोरिति शङ्कां वारयितुं प्रहारं वर्णयति-ते वै गदे इति । गदापेक्षया देहोऽत्यन्तं कठिन इति देहस्पर्शे गदानाश उच्यते भुजजवेनान्यस्योपरि निपात्यमाने अंसकटिपादकरोरुजत्रून् षडङ्गान्युपेत्य चूर्णीबभूवतुः देहगदयोस्तारतम्यार्थं दृष्टान्तमाह-यथार्कशाखे हस्तिभ्यां निक्षिप्ते यथार्कवृक्षशाखे तदभावे भविष्यतीत्याशङ्क्याह-संयुध्यतोरिति । साधनमवयवा एवेति दृष्टान्तः द्विरदयोरिवेति नन्ववयवस्य कथं साधनत्वं प्रहारे स्वस्याप्यन्यथा सम्भवादित्याशङ्क्याह-तीव्रमन्व्योरिति तीव्रो मनुर्मन्युर्ययोः ॥३७॥ एवं गदायुद्धमुपसंहृत्य मुष्टियुद्धमाह-इत्थमिति । तयोर्गदयोः प्रहतयोः सत्यः तथापि नृवीरौ क्रुद्धौ सन्तौ अयःसदृशैः मुष्टिभिः अपिष्टाम् अन्योन्यं शरीरं पेषयामासतुः तत्रापि पूर्ववच्छब्दमाह-शब्दस्तयोरिति । तयोर्देहयोः सम्बन्धी शब्दः उभयोरिव गर्जनरूपो जातः । वीररसेन तयोरेव वा वाक्शब्दः उभयोरपीत्येके अन्योऽपि तत्रशब्दो जात जात इत्याह-निर्घातवज्रपरुषैस्तलताडनोत्थायेति निर्घातो निरभ्रविद्युत्पातः तादृशपातयुक्तो वज्रः ततोऽपि यः परुषः तलताडनं च यो दृढः तेनोत्थानं यस्य अनेन महाप्रहारो निरूपितः ॥३८॥ उपसंहरति-तयोरेवमिति । समतायां हेतूनाह-समशिक्षाबलौजसोरिति । युद्धे पराक्रमो बलं शिक्षा च हेतवः तत्तुल्यत्वात् युद्धे विशेषाभावः आवृत्त्याऽन्यबलक्षये युद्धे विशेषो भविष्यतीत्याशङ्क्याह-आक्षीणजवयोरिति । नृपेति सम्बोधनं विश्वासाय ॥३९-४१॥

श्रीसुबोधिनीसारः

भुजयोर्जवेन वेगेन निपात्यमाणे प्रक्षिप्यमाने ते गदे अन्योन्यतो मिथोंऽसादीन् उपेत्य प्राप्य चूर्णीचक्रतुः दीप्तो मन्युः क्रोधो ययोस्तयोर्द्विरदयोर्हस्तिनोः संयुद्ध्यतोः सतोरर्कस्य शाखे इव ॥३७॥ इत्थमेवं प्रकारेण गदयोः प्रहतयोः स्फुटितयोः सत्योः नृवीरौ भीमजरासन्धौ क्रुद्धौ अयो लोहस्तद्वत्स्पर्शो येषां तैः स्वमुष्टिभिरपिष्टाम् अघ्नतां तयोः प्रहरतोः तलतालनादुत्थो जातः शब्दो वज्रपाततुल्य आसीत् इभयोर्गजयोरिव ॥३८॥ समानि शिक्षाबलौजांसि ययोः तयोरेवं प्रहरतोः सतोरक्षीणोऽनष्टो जवो वेगो ययोस्तयोर्निर्विशेषं तुल्यं युद्धमभूत् हे नृप ॥३९॥ हे महाराज एवं तयोर्युध्यतोः सतोः निशि रात्रौ सुहृद्वत् मित्रवत्तिष्ठतोः सप्तविंशतिर्दिनानि निरगमन् निर्गतानि आर्षो वर्णलोपः ॥४०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्योन्यतः परस्परं भुजबलेन निपात्यमाने ते गदे अंसादीनुपेत्य प्राप्य चूर्णीबभूवतुः । अंसः स्कन्धः । जत्रु तत्संलग्नास्थिविशेषः । एवं सूचितं गदापेक्षयापि देहावयवस्यापि काठिन्यं दृष्टान्तेन स्पष्टयति-दीप्तो मन्युः क्रोधो ययोस्तयोरर्कवृक्षशाखाभ्यां युद्ध्यतोर्द्विरदयोर्गजयोरङ्गानि प्राप्य यथाऽर्कशाखे चूर्णीभवतस्तथेति ॥३७॥ इत्थं तयोर्गदयोः प्रहतयोर्भग्नयोः सत्योः क्रुद्धौ नृवीरौ भीमजरासन्धौ अयोवल्लोहवत्स्पर्शो येषां तैः स्वमुष्टिभिरन्योन्यशरीरमपिष्टां ताडयामासतुः । एवमिभयोरिव परस्परं प्रहरतोस्तयोस्तलेन ताडनं चपेटस्तत उत्थः शब्दश्च वज्रनिर्घातो निरभ्रविद्युत्पातस्तच्छब्दवत् परुषः भयङ्करः आसीदित्यन्वयः । निर्घातशब्दस्य पूर्वनिपात आर्षः ॥३८॥ शिक्षा अभ्यासः, बलं शारीरम्, ओजः इन्द्रियसामर्थ्यम्, समान्येतानि ययोस्तयोरक्षीणबलयोरेवं प्रहरतोर्निर्विशेषं निरुपमं युद्धमभूदित्यन्वयः ॥३९॥ अस्य युद्धस्याश्चर्यं सूचयन् सम्बोधयति-महाराजेति । एवं युद्ध्यतोर्निशि सुहृद्वत् मित्रवत् तत्र जरासन्धगृहे तिष्ठतोस्तयोः सप्तविंशतिर्दिनानि निरगन् व्यतीतानि ॥४०॥

अन्वितार्थप्रकाशिका

ते इति । अन्योन्यतः परस्परं भुजबलेन । भुजजवेनेत्यपि पाठः । निपात्यमाने ते गदे अंसादीनुपेत्य प्राप्य चूर्णीबभूवतुः । अंसः स्कन्धः जत्रु तत्संलग्नास्थिविशेषः जत्रूनित्येकत्वाभाव आर्षः । यथा दीप्तो मन्युः क्रोधो ययोस्तयोरर्कवृक्षशाखाभ्यां संयुध्यतोः । शता आर्षः । द्विरदयोर्गजयोरङ्गानि प्राप्य यथाऽर्कशाखे चूर्णीभवतस्तथा ॥३७॥ इत्थमिति । इत्थं तयोर्गदयोः प्रहतयोर्भग्नयोः सत्योः क्रुद्धौ नृवीरौ भीमजरासन्धौ अयोवल्लोहवत्स्पर्शो येषां तैः स्वमुष्टिभिरन्योन्यं शरीरमपिष्टां ताडयामासतुः । एवमिभयोरिव परस्परं प्रहरतोस्तयोस्तलेन ताडनं चपेटस्तत उत्थः शब्दश्च निर्घातो निरभ्रगर्जितं वज्रः वज्रपातस्तच्छब्दवत् परुषः भयङ्करः आसीदित्यन्वयः ॥३८॥ तयोरिति । हे नृप ! शिक्षा अभ्यासः बलं शारीरम् ओज इन्द्रियसामर्थ्यं समान्येतानि ययोस्तयोरक्षीणबलयोरेवं प्रहरतोर्निर्विशेषं समानं युद्धमभूत् ॥३९॥ एवमिति । श्लोकद्वयं प्रक्षिप्तमिति काशीनाथः । हे महाराज ! एवं युद्ध्यतोः शता आर्षः । निशि सुहृद्वत् मित्रवत् तत्र जरासन्धगृहे तिष्ठतोस्तयोः सप्तविंशतिर्दिनानि व्यतीतानि । निरगन्नित्यार्षम् ॥४०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्कन्धकट्यादीनुपेत्य द्वे गदे चूर्णीबभूवतुः ॥ यथा अर्कशाखाभ्यां कृत्वा संयुध्यतोर्द्विरदयोः कुञ्जरयोः अर्कशाखे चूर्णीभवतस्तद्वत् ॥३७॥ इत्थं तयोः गदयोः प्रहतयोर्भग्नयोः सत्योः तौ नृवीरौ अपिष्टां परस्परं हतवन्तौ स्वस्वबाहौ पाणितलेन ताडनोत्थ उत्पन्नो वज्रस्य निर्घातः पातस्तद्वत्परुषः कठोरः शब्द आसीत् ॥ करवत्प्रहरतोरिभयोरिव ॥३८॥ शिक्षाऽभ्यासः बलं सामर्थ्यं ओजः प्रभावः समानि एतानि ययोस्तयोः प्रहरतोः परस्परम् ॥ प्रहारं कुर्वतोः ॥३९-४०-४१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ते वा इति ॥ अन्योन्यतः परस्परं, भुजजवेन, निपात्यमाने ते गदे, अंसकटिपादकरोरुजत्रून्, उपेत्य, चूर्णीबभूवतुः वै । तत्रांसः स्कन्धः । के इव । दीप्तः मन्युर्ययोस्तयोः, संयुद्ध्यतोः अर्कशाखाभ्यां समं युद्धं कुर्वतोः, द्विरदयोर्गजयोः, अर्कशाखे यथा, चूर्णीभवतः तद्वत् ॥३७॥ इत्थमिति ॥ इत्थं, तयोः गदयोः, प्रहतयोर्भग्नयोः सत्योः, क्रुद्धौ नृवीरौ, अयःस्पर्शैः, स्वमुष्टिभिः, अपिष्टां चूर्णीचक्रतुः । अङ्गानीति शेषः । प्रहरतोर्मुष्टिप्रहारान् कुर्वतोः तयोः, तलताडनोत्थः शब्दः, इभयोर्गजयोः इव, निर्घातवज्रपरुषः वज्रनिर्घातवत् परुष इत्यर्थः । आसीत् । निर्घातशब्दस्य पूर्वनिपात आर्षः ॥३८॥ तयोरिति ॥ हे नृप, समशिक्षाबलौजयोः, तत्र शिक्षा अभ्यासः, बलं सत्त्वम्, ओजः प्रभावः, एवमुक्तप्रकारेण, प्रहरतोः, अक्षीणजवयोः तयोः, युद्धं निर्विशेषम्, अभूत् ॥३९॥ शत्रोरिति ॥ शत्रोर्जरासन्धस्य, जन्म शकलरूपं च मृतिः पुनः शकलीभावश्च ते, जरया कृतं जरानाम्न्या राक्षस्या कृतं, जीवितं च, विद्वान् सम्यक् जानन्, हरिः स्वेन तेजसा, पार्थं भीमम्, आप्याययन्नुपबृंहयन्, अचिन्तयत् कथमसौ शकलीभवेत् इति विचारमकरोत् ॥४०॥

कृष्णप्रिया

जब दो गजराज क्रोधाविष्ट बनकर परस्पर संग्राम करते है औ अर्कको डालियां तोड कर परस्पर प्रहार करते है उस अवसर परस्परकी चौटसे वे डालियां चूर्ण हो जाती है वेसे ही जब जरासन्ध और भीमसेनभी डटकर वेगसे गदा चलाकर परस्पर के कंधा, कमरो, पैरों हाथों जांभा और हंसलियों पर प्रहार करने लगे, तब उनकी गदाए उनके अड्गसे टकरा टकरा कर चकना चूर होने लगी ॥३७॥अब जब दोनो गदाएं चूरचूर बन गयी, तब दोनों वीर कांधाविष्ट होकर अपने घूंसोसे परस्परको कुचल डालनेकी चेष्टा करने लगे । उन दोनों के भूंसे भी एसी चोट करते, मानो कि लोहेका घन गिर रहा हो । एक दूसरे पर खुलकर चोट करतो हुए दो हाथियोंकी तरह उनके थप्पडों और घूंसोंका कठोर शब्द बीजलीकी कडकडाहटके समान जान पडता था ॥३८॥महारा परीक्षित वीर जरासन्ध और वीर भीमसेन दोनोंकी गदायुद्धमें निपुणता, बल और उत्साह समान थे । दोनों की शक्ति स्वल्प भी क्षीण नहीं हो रही थी । इस प्रकार लगातार प्रहार करते रहने पर भी दोनों में से किसीकी जीत या हार न हुइ ॥३९॥दोनों वीर रात्रीके समय मित्र के समान रहते और दिनमें छूटकर एक दूसरे पर प्रहार करते और युद्ध करते । महाराज इस प्रकार उनके संग्राम करते सत्ताईस दिन बीत गये ॥४०॥

सञ्चिन्त्यारिवधोपायं भीमस्यामोघदर्शनः । दर्शयामास विटपं पाटयन्निव संज्ञया ।।४१।।
तद्विज्ञाय महासत्त्वो भीमः प्रहरतां वरः । गृहीत्वा पादयोः शत्रुं पातयामास भूतले ।।४२।।
एकं पादं पदाऽऽक्रम्य दोर्भ्यामन्यं प्रगृह्य सः । गुदतः पाटयामास शाखामिव [1]महागजः ।।४३।।
एकपादोरुवृषणकटिपृष्ठस्तनांसके । एकबाह्वक्षिभ्रूकर्णे शकले ददृशुः प्रजाः ।।४४।।

कर्दमक्षमा

राजन् ! एकदा, वृकोदरः, मातुलेयम्, वै, प्राह, माधव ! अहम्, वै, युधि, जरासन्धम्, निर्जेतुम्, न, शक्तः ।।४१।। हरिः, शत्रोः, जन्ममृती, विद्वान्, च, पार्थम्, अपि, स्वेन, तेजसा, आप्याययन्, अचिन्तयत् ।।४२।। अमोघदर्शनः, अरिवधोपायम्, सञ्चिन्त्य, भीमस्य, विटपम्, पाटयन्, इव, संज्ञया, दर्शयामास ।।४३।। प्रहरताम्, वरः, महासत्त्वः, भीमः, तद्, विज्ञाय, शत्रुम्, पादयोः, गृहीत्वा, भूतले, पातयामास ।।४४।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

जन्मशकलरूपं मृतिः पुनः शकलीभावस्ते विद्वान् जानन् जरानाम राक्षसी तत्कृतम् अचिन्तयत्कथमसौ शकलीभवेदिति ।।४२।। विटपं शाखां करेण विटपं गृहीत्वा हरिर्भीमस्य यथाऽहं विटपं पाटयामि तथा त्वमेनं विपाटयेति संज्ञया सङ्केतेनारिवधोपायं दर्शयामासेत्यर्थः ।।४३-४५।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मातुलेयं श्रीकृष्णम् ।।४१।। शत्रोर्जरासन्धस्य । आप्याययत् वर्द्धयामास ।।४२।। "विटपो न स्त्रियां स्तम्बशाखाविस्तारपल्लवे" इति मेदिनी । इत्यर्थ इति-विना शकलीकरणमस्य मृत्युः कदापि नेति भावः ।।४३-४४।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जरया राक्षस्या शकलद्वयसंयोजनेनैव कृतं पार्थमिति पृथापुत्रत्वेन स्नेहभरपात्रत्वं सूचितम् ।।४२।। यत अमोघमकुण्ठितं सत्यं वा दर्शनं ज्ञानं यस्य सः इवेति वाक्यालङ्कारे ।।४३।। यतो महासत्त्व महाबलः किञ्च प्रहरतां वरः युद्धे निपुण इत्यर्थः ।।४४।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत एव गायन्निव दीर्घच्छन्दसा युद्धं वर्णयति-ते इति द्वाभ्याम् । वै अपि, ते वज्रसारतुल्ये अपि, अंसादिषु नितरां पात्यमाने सत्यौ उपरि एवत्य प्राप्य, नपुंसकत्वाभाव आर्षः, यथार्कशाखे तथा चूर्णीबभूवतुरिति तयोरकिञ्चित्करत्वं सम्यक् चूर्णीत्वादिकं चोक्तम् । अन्यत्तैर्व्याख्यातम् । तत्र गजयोरर्कशाखाभ्यां समं युध्यतोरित्यभूतोपमा ज्ञेयेति । तयोर्द्वन्द्वयुद्धार्थं गृहीतयोरनिर्व्वचनीययोर्वा ।।३७।। प्रकर्षेण हतयोर्नष्टयोः सत्योः, नृषु वीरो अयःस्पर्शैर्लोहतुल्यैरपिष्टां मिथो गात्रम्, निर्घातो निरभ्रमहादारुणघोरशब्दः, वज्रो वज्रपातस्ताभ्यामपि परुषः, तलेन करतलेन यत्ताडनं मिथः प्रहारः, तस्य वा ताडनं हननम्, तदुत्थः ।।३८।।एवं प्रहरतोरपि अक्षीणजवयोरिति अक्षीणजवत्वेन निर्व्विशेषत्वेन वा विस्मयात् ।।३९।। जरया राक्षस्या शकलद्वयसंयोजनेनैव कृतम्, पार्थमिति पृथापुत्रत्वेन स्नेहभरपात्रत्वं सूचितम्, अतः स्वकीयेनैव तेजसा शक्त्या निक्षिप्तया आप्याययन् सन्, किंवा स्वबुद्धिप्रभावेणाप्याययितुम्; हरिरिति शत्रुप्राणहरणे प्रवृत्तेः ।।४०।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पार्थं भीमम् ।।४२-४८।।

इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये द्विसप्ततितमोऽध्यायः ।।७२।।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

शत्रोरिति । हरिः शत्रोर्जरासन्धस्य जन्म शकलरूपं मृतिः पुनः शकलीभावः ते जरानाम राक्षसी तत्कृतं जीवितं च विद्वान् जानन् स्वेन तेजसा पार्थम् अचिन्तयत् भीममाप्याययन्नुपबृंहयन् कथमसौ शकलीभवेत् ।।४२।। सञ्चिन्त्येति । विटपं शाखान्तरं गृहीत्वा हरिर्भीमस्य यथा विटपं पाटयामि तथा त्वमेनं पाटयेति संज्ञया सङ्केतेनारिवधोपायं दर्शयामास ।।४३।। तदिति । तत्साङ्केत्यं विदित्वा शत्रुं जरासन्धम् ।।४४।।

---

१. मतङ्गजः-विज ।

श्रीमद्विजयध्वजकृता पदरत्नावली

जरया राक्षस्या कृतशरीरशकलसन्धानात् जन्म तद्विघटनान्मरणं च जानन् ॥४२॥ भीमस्यारिवधोपायं संज्ञया दर्शयामास केयं सञ्ज्ञेत्याह - विटपमिति ॥४२-४८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२७-४८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥६-४८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥६-४८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शत्रोः स्वभक्तद्विषः जन्मशकलरूपं मृतिः पुनः शकलीभावः ते जरा राक्षसी तत्कृतं जीवितं शकलयोरेकीभावञ्च विद्वान् जानन् पार्थं भीमं स्वतेजसा आप्याययन् बृंहयन् कथमसौ शकलीभवेदिति चिन्तयत् ॥४२॥ सञ्चिन्त्य तु एवमिमं पाटयेति संज्ञया सङ्केतेन विटपशाखां पाटयन् इव भीमस्य अरिवधोपायं दर्शयामासेत्यन्वयः ॥४३॥

गूढार्थदीपिनी

वै एवार्थे । न वैनैव शक्तोऽहमिति योज्यम् ॥४१॥ जन्म खण्डद्वयरूपं मृतिश्च खण्डयोः पृथक्करणं जीवितं च खण्डद्वयसाधनेन जराराक्षस्या कृतमिति जानन् हरिः पार्थम् स्वेन तेजसा आप्याययन् संवर्धयन् प्रबलीकुर्वन् सन् अचिन्तयत् । किमिति । भीमः खण्डयोः पृथक्करणं कथं जानीयादिति ॥४२॥ अमोघदर्शनः यथार्थज्ञः विटपं शाखां पाटयन्निव भीमं दर्शयामास । संज्ञया सङ्केतेन । यथाऽहं शाखां पाटयामि तथा त्वमपि एनं मध्यतः पाटयेति वधोपायं दर्शयामासेत्यर्थः ॥४३॥ महासत्त्वो महाबलः ॥४४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शत्रोः स्वभक्तद्विषः जन्म शकलरूपं मृतिः पुनः शकलीभावः ते जरा राक्षसी तत्कृतं जीवितं शकलयोरेकीभावञ्च विद्वान् जानन् पार्थं भीमं स्वतेजसा आप्याययन् बृंहयन् कथमसौ शकलीभवेदिति चिन्तयत् ॥४२॥ सञ्चिन्त्य तु एवमिमं पाटयेति संज्ञया सङ्केतेन विटपं शाखां पाटयन् इव भीमस्य अरिवधोपायं दर्शयामासेत्यन्वयः ॥४३॥ महासत्त्वो महाबलः ॥४४-४५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सञ्चिन्त्यैवं सूचनीयमरिवधोपायं निश्चित्यामोघदर्शनोऽव्यर्थीभवदवगमो विटपं वृक्षशाखां पाटयन्निव संज्ञयैतत्पाटनरूपिण्याऽह यथा शाखां पाटयामि तथैनं पाटयेति सङ्केतेन दर्शयामास । इदं वार्यं पापो मया कृष्णयुक्तः स्यादनुरोधितुम् । प्राणेनेत्यारभ्य बलं भीमसेनं जरासन्धे दर्शयाशु तदद्य वेत्यन्तानां सभापर्वश्लोकानां तात्पर्यकथनमिति मन्तव्यम् ॥४१॥ तत्तन्मर्म विज्ञाय महासत्त्वः शत्रुं पादयोर्गृहीत्वा भूतले पातयामास ॥४२॥ मतङ्गजो गजः । अनेन स कृष्णः शाखामित्यपि निदर्शनान्तरं ध्वन्यते पदा स्वस्यैकं पादं तस्याक्रम्यान्यं पादं दोर्भ्यां प्रगृह्य गुदतो जरासन्धितप्रथमसन्धिस्थानमारभ्य शिखास्थानपर्यन्तमर्यन्तराविदितं मर्मस्थानं पाटयामास ॥४३॥ कटिपदेन तद्भागग्रहणम् । एकः पादादिर्ययोस्ते एकाक्षिकर्णभ्रूबाहुशकले इति सुपठम् । अन्यथाऽक्षिकारलाघवं कार्यं स्यात् । एतद्युते शकले प्रजा ददृशुः । समरवासरास्तु पञ्चदशसङ्ख्याः । यथोक्तं सभापर्वणि । कार्तिकस्य तु मासस्य प्रवृत्तं प्रथमेऽहनि । चतुर्दश्यां निशायां वै निवृत्तो मागधः क्रमादित्यादि ॥ विवृतं चाचार्यैः । मानयित्वा वरं धातुर्दिवसान्दशपञ्च चेति ॥४४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

आवृत्त्या जरासन्धस्य क्षीणा भविष्यतीति अभिप्रेत्य आवृत्तिः कृता तज्जरयाऽरिर्निर्मितोऽयमिति सर्वस्माद्बलं समाहृत्य जराऽस्मै प्रयच्छतीति न कदाचिदप्यस्य बलक्षयः आसन्यत्वाद्भीमस्य नास्त्येव एवं तुल्यत्वे प्रयोजनं न सिद्ध्यतीति भगवान् भीममधिकबलं कृतवानित्याह-शत्रोरिति । शत्रोर्जरासन्धस्य सिद्धफलाच्छकलभूताज्जन्म शकलभूतस्यैव शकलयोश्च क्षयत्वं जराकृतेन सन्धानेनैव च जीवितं शकलयोः स्वरूपतो नाशाभावात् विश्लेषादेव मरणम् अतिबलादेव च विश्लेषः सम्भवतीति पार्थं स्वेन तेजसा आप्याययन् स्वकालशक्तिं तत्र स्थापितवानित्यर्थः ॥४२॥ कालकन्यापेक्षया कालशक्तेराधिक्यात् ततस्तस्य वधोपायमचिन्तयत् यतः सतां दुःखहर्ता ततो विश्लेषमेवोपायं विनिश्चित्य भीमस्य दर्शयामास चिन्तनमन्यथा न भवतीति

ज्ञापनार्थमाह-अमोघदर्शनमिति । भीमस्य वा ज्ञानार्थं विशेषेण दर्शनं स्वयं भीमसम्मुखो भूत्वा विटपस्य कस्यचिच्छाखां मध्ये विपाटयत् संज्ञया अभिज्ञानेन पाटयामास एवमयं पाटनीय इति ॥४३॥ एवम्भवत्कृपया ज्ञानक्रियाशक्तियुक्तः प्रहरतां मध्ये श्रेष्ठः मल्लयुद्धमुखेन तं भूमौ पातयामास पूर्ववदेव यथा तस्य शङ्का नोदेति नन्वेवं मारणमनुचितमित्याशङ्क्याह-शत्रुमिति । शत्रुः शातयिता यथाकथञ्चिद्वध्यः पादयोः गृहीत्वा पातितो विकलता च जाता ॥४४॥

श्रीसुबोधिनीसारः

एकदा एकस्मिन् काले वृकोदरो भीमसेनो मातुलेयं श्रीकृष्णं प्राह हे राजन् । जरासन्धं निर्जेतुमहं न शक्तोऽस्मि युधि हे माधव वै निश्चये ॥४१॥ तदा शत्रोर्जरासन्धस्य जन्ममृती विद्वान् उत्पत्तिनाशौ जानन् जरया राक्षस्या कृतं जीवितं च जानन् सन् स्वेन तेजसात्मबलेन पार्थं भीममाप्याययन् पोषयन् हरिः श्रीकृष्णोऽचिन्तयत् ॥४२॥ अरेर्वधस्योपायं सञ्चिन्त्य विचार्य अमोघं दर्शनं यस्य स हरिर्विटपं शाखां पाटयन्निव संज्ञया सङ्केतेन भीमस्य दर्शयामास ॥४३॥ तद्विज्ञाय बुद्ध्वा महासत्त्वो महाबलो भीमः प्रहरतां श्रेष्ठः पादयोः शत्रुं जरासन्धं गृहीत्वा भूतलोपरि पातयामास एतेन भुजबलमधिकमस्योक्तम् ॥४४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे राजन् ! एकदा वृकोदरो भीमो मातुलेयं मातुलपुत्रं कृष्णं प्राह । तदाह-हे माधव ! युधि जरासन्धं निर्जेतुमहं न शक्त इति। क्वचित्पुस्तके 'एवं तयोः' इत्यादिश्लोकद्वयं नास्ति ॥४१॥ शत्रोर्जरासन्धस्य जन्म शकलद्वयरूपेण, मृतिश्च पुनः शकलीभावेन ते जरा नाम राक्षसी तया शकलसन्धानेन कृतं तज्जीवितं च विद्वान् जानन् हरिः भक्तदुःखहर्ता कृष्णः स्वेन तेजसा पार्थं भीममाप्याययन् उपबृंहयन् कथमसौ पुनः शकलीभवेत् इत्यचिन्तयत् ॥४२॥ सञ्चिन्त्य तदुपायं ज्ञात्वा विटपं शाखां विपाटयन्निव यथाहं विटपशाखां पाटयामि तथा त्वमेनं पाटयेति संज्ञया सङ्केतेनेति भीमस्य अरेः शत्रोर्जरासन्धस्य वधोपायं दर्शयामासेत्यन्वयः । तदुपायज्ञाने हेतुमाह-अमोघदर्शन इति । सर्वज्ञत्वादित्यर्थः ॥४३॥ भीमश्च तत् भगवता सूचितमुपायं विज्ञाय पादयोः शत्रुं गृहीत्वा भूतले पातयामास । तत्र हेतुमाह-प्रहरतां वर इति । तत्र हेतुमाह-महत् सत्त्वं बलं यस्य स इति ॥४४॥

अन्वितार्थप्रकाशिका

एकदेति । हे राजन् ! एकदा वृकोदरो भीमो मातुलेयं मातुलपुत्रं कृष्णं प्राह स्म । तदाह-हे माधव ! युधि जरासन्धं निर्जेतुमहं न शक्तः ॥४१॥ शत्रोर्जरासन्धस्य जन्म शकलद्वयरूपेण मृतिश्च पुनः शकलीभावेन ते जरानाम राक्षसी तया शकलसन्धानेन कृतं तज्जीवितं च विद्वान् जानन् हरिः स्वेन तेजसा पार्थं भीममाप्याययन् उपबृंहयन् सन् कथमस्य शकलीभावं भीमो जानीयादित्यचिन्तयत् ॥४२॥ सञ्चिन्त्येति । अमोघदर्शनः भगवान् सञ्चिन्त्य तदुपायं ज्ञात्वा विटपं शाखां पाटयन्निव यथाऽहं विटपशाखां पाटयामि तथा त्वमेनं पाटयेति संज्ञया सङ्केतेनेति अरेः शत्रोर्जरासन्धस्य वधोपायं भीमस्य दर्शयामास ॥४३॥ तदिति । महासत्त्वः प्रहरतां वरश्च भीमः तत् भगवता सूचितमुपायं विज्ञाय पादयोः शत्रुं गृहीत्वा भूतले पातयामास ॥४४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जन्म द्विशकलरूपेण जनिः मृतिः पुनर्द्विशकलीभावान्मृत्युः ते उभे विद्वान् जानन् यतः ॥ जरासंज्ञया राक्षस्या ॥ शकलद्वयस्य सन्धानेन कृतं जीवितम् ॥ अतः कथमसौ शकलीभवेदिति चिन्तयामास ॥४२॥ अमोघज्ञानो हरिः करेण विटपमत्यल्पवृक्षशाखां पाटयन् यथाहं विटपं पाटयामि तथा त्वमेनं विणपाटयेति संज्ञया सङ्केतेनारिवधोपायं भीमस्य दर्शयामासेत्यर्थः ॥४३॥ महासत्त्वो महाबलः ॥४४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सञ्चिन्त्येति ॥ अमोघदर्शनः श्रीकृष्णः, अरिवधोपायं सञ्चिन्त्य, भीमस्य, विटपं पाटयन् इव, संज्ञया यथाऽहं विटपं पाटयामि, तथा त्वमेनं पाटयेति सङ्केतेन, दर्शयामास अरिवधोपायमादिष्टवान् ॥४१॥ तदिति ॥ महासत्त्वो महाबलः, प्रहरतां वरः, भीमः, तत् कृष्णप्रदर्शितं सङ्केतं, विज्ञाय, पादयोः, गृहीत्वा, शत्रुं भूतले, पातयामास ॥४२॥ एकमिति ॥ एकं पादं, पदा आक्रम्य सुदृढमवष्टभ्य, स भीमः, दोर्भ्याम्, अन्यं पादं प्रगृह्य, मतङ्गजो हस्ती, शाखाम् इव, गुदतः पाटयामास ॥४३॥ एकेति ॥ प्रजाः शकले, ददृशुः । कथम्भूते शकले । एकपादोरुवृषणकटिपृष्ठस्तनांसके, एकं पादादि ययोस्ते तथाभूते, एकबाह्वक्षिभ्रूकर्णे च ॥४४॥

कृष्णप्रिया

राजन् परीक्षित् अट्ठाइसवेदिन श्रीभीमसेनजीने अपने मातुलेय श्रीकृष्णसे निवेदन किया हे श्रीकृष्णसे निवेदन किया हे श्रीकृष्ण मैं युद्धमें जरासंधको जीत नहीं सकता ।।४१।। भगवान श्रीकृष्ण जरासन्धके जन्म औ मृत्यु का रहस्य जानते थे और यह भी जानते थे कि जरा राक्षसीने जरासन्धके शरीरके दो टुकडोको जोडकर इसे जीवनदान दिया है । इसलिये भगवानने भीमसेन के शरीरमें अपनी शक्तिका सञ्चार किया और जरासन्धके वधका उपाय सोचा ।।४२।। महाराज परीक्षित् ! भगवानका ज्ञान त्रिकालाबाधित है अब भगवानने उसकी मृत्युका उपाय जानकर एक वृक्षकी डालीको बीचोबीच से चीर दिया और संकेतसे भीमसेनको सूचित किया ।।४३।। महान् शक्तिशाली एवं वीर शिरोमणि भीमसेनने भगवान श्रीकृष्णका अभिप्राय जान लिया और जरासंध के पैर पकडकर उसे भूमि पर पटक दिया ।।४४।।

हाहाकारो महानासीन्निहते मगधेश्वरे । पूजयामासतुर्भीमं परिरभ्य जयाच्युतौ ।।४५।।
[1]सहदेवं तत्तनयं भगवान् भूतभावनः । अभ्यषिञ्चदमेयात्मा मगधानां पतिं विभुः [2]।
मोचयामास राजन्यान् संरुद्धा मागधेन ये ।।४६।।

इति श्रीमद्भागवते महापुराणे [3]दशमस्कन्धे जरासन्धवधो[4]
नाम [5]द्विसप्ततितमोऽध्यायः ।।७२।।

कर्दमक्षमा

सः, एकम्, पादम्, पदा, आक्रम्य, दोर्भ्याम्, अन्यम्, प्रगृह्य, महागजः, शाखायाम्, इव, गुदतः, पाटयामास ।।४५।। एकपादोरुवृषणकटिपृष्ठस्तनांसके, एकबाह्वक्षिभ्रूकर्णे, शकले, ददृशुः, प्रजाः ।।४६।। मगधेश्वरे, निहते, महान्, हाहाकारः, आसीत्, जयाच्युतौ, भीमम्, परिरभ्य, पूजयामासतुः ।।४७।। भूतभावनः, भगवान्, तत्तनयम्, सहदेवम्, मगधानाम्, पतिम्, अभ्यषिञ्चत्, अमेयात्मा, विभुः, मागधेन, ये, संरुद्धाः, तान्, राजन्यान्, मोचयामास ।।४८।।

इति कर्दमक्षमाख्यान्वयपदच्छेदे द्विसप्ततितमोऽध्यायः ।।७२।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

एकैकः पादादिर्ययोस्ते शकले ।।४६-४७।। दुर्वृत्तत्वादसौ हतो न तु राजाभिलाषेणेति दर्शयन्नाह-सहदेवमिति ।।४८।।

इति श्रीधरस्वामिविचरचितायां भावार्थदीपिकायां द्विसप्ततितमोऽध्यायः ।।७२।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यं द्वितीयपादम् । स भीमः ।।४५-४६।। मगधेश्वरे जरासन्धे । जयोऽर्जुनः ।।४७।। तत्तनयं जरासन्धात्मजम् । दुर्वृत्तत्वाद्वाममार्गेण रुद्राराधकत्वात् । ननु तन्मार्गस्यापि शास्त्रविहितत्वेन तदाश्रयणे कथं दुर्वृत्तत्वमिति चेत्पुराणान्तराख्यानेन तदाह । तथा हि वाराहे गौतमशप्तविप्राणां कलौ वामाचारे प्रवृत्तिः-

''पुरा सर्वजनानां तु मोक्षमार्गे व्यवस्थितम् । दृष्ट्वा स्वर्गादिवैफल्यं देवैरुक्तः स्वयं हरिः ।।
भगवान्सृष्टिनाशं त्वं शमयानुग्रहेण नः । तदाऽहं विष्णुना प्रोक्तो मोहशास्त्रमकल्पयम् ।।
वेदमार्गाविरुद्धं यत्तद्रौद्रं मत्प्रवर्तितम् । मदट्टहासपतिता मह्यां तोयस्य बिन्दवः ।।
असङ्ख्यातास्तु ते रौद्रा भविष्यन्ति कलौ युगे । कल्पयिष्यन्ति शास्त्राणि सुरामांसप्रिया नराः ।।
मयापि कल्पिता विष्णोराज्ञया संहिता पुरा । निःश्वासाख्या वेदबाह्या वामाचारप्रवर्तिका ।।
तत्र मच्छासनरता मदाचारास्तु ये द्विजाः । तेषां वासस्तु नरके भविष्यति न संशयः ।।
शूद्रैस्तदधमैर्ग्राह्य आचारो वामसंज्ञितैः । न द्विजैः सर्वथा ग्राह्य इति सत्यं वचो मम ।।'' इति रुद्रोऽगस्त्यं प्रत्याह ।

---

१. ''कृष्णेन च परीरब्धो विरुजोभूद्वृकोदरः'' । -इदमर्धमधिकं वीर. पाठे । २. प्रभुः-श्रीधर. वंशी. वीर. विज. जीव. । ३. पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. टी. । ४.वधे एकस-गो. प्रे. टी. । ५. अशीतितमोऽध्यायः-विज. ।

कलिसन्धित्वाज्जरासन्धस्तस्मिन्नाचारे प्रवृत्त इति ज्ञेयम् । असौ जरासन्धः ॥४८॥

इति वंशीधरकृते श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे द्विसप्ततितमोऽध्यायः ॥७२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पादं शत्रोः ॥४५॥ पादादीनां यथोत्तरमूर्द्धाङ्गत्वम् ॥४६॥ पूजयामासतुः साधु साध्वित्येवं वीजनादिना च सम्मानितवन्तौ जयाच्युताविति नामविशेषग्रहणं तत्सहाय्ययोग्यत्वज्ञापनाय जयस्य पूर्वनिपातस्तेषां माहात्म्याय च तञ्च प्रतिस्वयमच्येतेन स्वतोऽपि मानप्रदानादभ्यर्हितत्वसाम्यात् ॥४७॥ सहेति सार्द्धकम् । मागधानां पतित्वेनाभ्यषिञ्चत् कुतः भगवान् सर्वैश्वर्य्यपूर्णः भूतभावनः सर्वजगत्स्रष्टा अमेयात्मा सर्वव्यापकः प्रभुः सर्वेषामेव स्वामी चेति सर्वविभूतमत्तया सद्य एव तादृशराज्यपरार्द्धकोटिसृष्टिशक्तिमत्त्वात् तुच्छातितुच्छे तद्राज्येऽभिलाषाभावादित्यर्थः । यद्वा भगवानिति तद्राज्यादौ अपेक्षाराहित्यात् किञ्च भूतभावनः सर्वभूतभावनः सर्वभूतपरिपालक इति दयालुत्वात् किञ्च अमेयात्मा अपरिच्छिन्नबुद्धिः स्वयमभिषेके कृते त्वनेन तच्छ्रद्धया मदाज्ञापरिपालनादिना राजसूयादौ पाण्डवानां साहाय्यं कुर्य्यादित्याशयात् किञ्च प्रभुः सर्वार्थः किम्वा जगदीशः तस्यैव तद्योग्यत्वादिति भावः । विशेषणानामेतेषां यथोत्तरमभिषेकहेतुत्वे श्रैष्ठ्यम् ॥४८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् द्विसप्ततितमोऽध्यायः ॥७२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सञ्चिन्त्य ज्ञात्वेत्यर्थः; यतोऽमोघमकुण्ठितं सत्यं वा दर्शनं ज्ञानं यस्य सः । विटपं पाटयन्निवेति मुष्टीकृतकरद्वयेन विटपपाटनमुद्रयेत्यर्थः ॥४१॥ तत्संज्ञया दर्शनं विज्ञाय सम्यग्बुद्ध्या, यतो महत् सत्त्वं बुद्धिर्यस्य सः, प्रहरतां मध्ये वर इति बलविक्रमादौ श्रैष्ठ्यं सूचितम् । अतः पातयामास; यद्वा, यतो महासत्त्वो महाबलं; किञ्च, प्रहरतां वरो युद्धेऽतिनिपुण इत्यर्थः ॥४२॥ एकं पादं शत्रोः पदा स्वस्य दोर्भ्याञ्च प्रगृह्य प्रकर्षेण गाढं गृहीत्वा; शाखामिवेति दृष्टान्तेनानायासादिकं सूचितम् ॥४३॥ पादादीनां यथोत्तरमूर्द्ध्वाङ्गत्वम्; प्रजाः सर्व्वा एव तत्रत्यलोका ददृशुरिति तत्र न संशयः कोऽपि कार्य्य इति भावः; यद्वा, परमाद्भुतत्वेन ददृशुरित्यर्थः ॥४४॥ नितरां हते क्षणाद्गतप्राणे सतीत्यर्थः । हाहाकारः प्रजानामेव, यतो मगधस्य तद्देशस्येश्वरे स्वामिनि, पूजयामासतुः-साधु साध्वितित्येवं वीजनादिना च सम्मानितवन्तौ, जयेत्यर्ज्जुनस्यापि तज्जये शक्तिः सूचिता; यद्वा, स्नेहभरेणाग्रज-जयेनैवात्मजयमननात्; अच्युत इति चिरपरिरम्भणाद्यत्यागात्तस्य पश्चादुक्तिः, स्वेनैव स्वयं स्नेहवशतः प्राक् तत्परिरम्भणादावर्ज्जुनस्य प्रवर्तनात्; यद्वा, स्वयमसङ्कोचेन चिरं तल्लालसया ॥४५॥ मगधानां पतित्वेनाभ्यषिञ्चत् । कुतः ? भगवान् सर्व्वैश्वर्य्यपूर्णः भूतभावनः सर्व्वजगत्स्रष्टा, अमेयात्मा सर्व्वव्यापकः, प्रभुः सर्व्वेषामेव स्वामी, चेति सर्व्वविभूतिमत्तया सद्य एव तादृशराज्यकोटिकोटिसृष्टिशक्त्या तुच्छातितुच्छे तद्राज्येऽभिलाषाभावादित्यर्थः; यद्वा, भगवानिति तद्राज्यादावपेक्षाराहित्यात् । किञ्च, भूतभावनः सर्व्वजीवपरिपालक इति दयालुत्वात् । किञ्च, अमेयात्मा अपरिच्छिन्नबुद्धिः, मया स्वयमभिषेके कृते श्रद्धया अनेन मदाज्ञापरिपालनादिना भक्तो भवेदित्याशयात् । किञ्च, प्रभुः सर्व्वार्थसमर्थः, किंवा जगदीशः, तस्यैव तद्योग्यत्वादिति भावः । विशेषणानामेषां यथोत्तरमभिषेकहेतुत्वे श्रैष्ठ्यम् । यद्वा, प्रभुरित्यस्य परेणान्वयः, सर्व्वाभीष्टप्रदानसमर्थः, अतः सम्यग्गिरिद्रोण्यां प्रक्षेपपादशृङ्खलादिना रुद्धा ये तान् सर्व्वानिव; सहदेवं प्रेर्य्य, स्वयमेव वा गत्वा मोक्षयामास ॥४६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्रीश्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशम-टिप्पण्यां द्विसप्ततितमोऽध्यायः ॥७२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४२-४८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीसुदर्शनसूरिकृते शुकपक्षीये द्विसप्ततितमोऽध्यायः ॥७२॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एकमिति । पदा पादेनाक्रम्य दृढमवष्टभ्यान्यं पादं दोर्भ्यां हस्ताभ्यां प्रगृह्य महागजः शाखामिव गुदतः आरभ्य पाटयामास विदारयामास ॥४५॥ एकेति । एकैकः पादादिर्ययोस्तयोस्ते शकले ददृशुः ॥४६॥ हाहाकार इति । मगधेश्वरे निहते सति जयाच्युतौ जयोऽर्जुनः भीमं परिरभ्यालिङ्ग्य पूजयामासतुः बह्वमन्येतां तत्र जयोऽर्जुनः कृष्णेन परिरब्ध आलिङ्गितः हेतुगर्भमिदं

तत्त्वाद्विरजो विगतग्लानिर्बभूव ॥४७॥ दुर्वृत्तत्वादसौ मागधो हतो न राज्याभिलाषेणेति दर्शयन्नाह - सहदेवमिति । अमेयात्माऽपरिच्छेद्यस्वरूपस्वभावः । भूतानि लोकान् भावयत्यभ्युदयतीति तथा हेतुगर्भमिदम् अतस्तत्तनयं जरासन्धपुत्रं सहदेवाख्यं मागधानां देशानां पतिमभ्यषिञ्चत् तेषामधिपतिं चकारेत्यर्थः । ततो मागधेन ये सन्निरुद्धाः तान् राजन्यान् मोचयामास ॥४८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां द्विसप्ततितमोऽध्यायः ॥७२॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥४२-४८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् द्विसप्ततितमोऽध्यायः ॥७२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥२७-४८॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे द्विसप्ततितमोऽध्यायः ॥७२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥६-४८॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे द्विसप्ततितमोऽध्यायः ॥७२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥ इति श्रीनाथचक्रवर्तिकृतबृहत्क्रमसन्दर्भे दशमोत्तरार्धे द्विसप्ततितमोध्यायः ॥७२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

महासत्त्वो महाबलः ॥४४-४५॥ एकैकः पदादिर्ययोस्ते शकले समौ कायभागौ ॥४६-४७॥
इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । अत्र द्विसप्ततितमो दशमेऽजनि सङ्गतः ॥७२॥

गूढार्थदीपिनी

एकमिति स्पष्टम् ॥४५॥ एकैकः पादादिर्यस्मिन् । तथा एकैकः बाह्वादिर्यस्मिन् । शकले खण्डद्वयम् ॥४६॥ जयाच्युतौ अर्जुनकृष्णौ पूजयामासतुः आदरं चक्रतुः । परिरभ्य आलिङ्ग्य ॥४७॥ तत्तनयं जरासन्धपुत्रम् । मगधानां देशानाम् ॥४८॥ मोचयेत्यर्द्धम् ॥ मागधेन ये संरुद्धाः तान् मोचयामास ।

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्द्धे गूढार्थदीपिन्यां द्विसप्ततितमोऽध्यायः ॥७२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एकैकः पादादिर्ययोस्ते शकले समौ कायभागौ ॥४६-४७॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्वसप्ततितमाऽध्यायार्थप्रकाशः ॥७२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

जयाच्युतौ जयश्चार्जुनश्चाच्युतश्च कृष्णश्च तौ भीमं परिरभ्य पूजयामासतुः । परिरभ्यार्जुनाच्युतावित्युक्तावपि न वृत्तविच्छित्तिस्तथाऽपि किञ्चिदप्रसिद्धजयपदसन्धानेन जयो वैरिविजयश्चाच्युतः कृष्णश्च पूजयामासतुः । तत्रैकोऽर्हणार्हं चकार चैकस्तु तच्चकारेत्यर्थविशेषं ध्वनयामास व्यास इत्यवसेयम् । कीर्त्यङ्गनालिङ्गित इति नाटकाद्युक्ते रिपुविजयपरिरम्भणं च गौणं ज्ञेयम् । नन्वभ्यर्हितमित्युक्तेरच्युतविजयाविति वक्तव्यमिति चेत् । सत्यम् । अच्युतौ जरासन्धकृतच्युत्यभावो जयेति भीमं जयाच्युतौ परिरभ्य पूजयामासतुरित्यपि शंसनीयस्य प्रमेयस्य तत्त्वात्तदनादरणेन निर्बबन्ध ग्रन्थकृदित्यवेहि । किं विदाङ्गाद्यगताविति यावत् । च्युताङ्गताविति स्मृतेः ॥४५॥ तत्तनयं जरासुतसुतं मागधानां पतिं तत्त्वेन । अमेयात्मा प्रभुः सहदेवमभ्यषिञ्चत् । यद्यपि तस्याभिषेको जरासन्धाज्ञप्तः । यथोक्तं सभापर्वणि । एवमुक्त्वा जरासन्धः सहदेवाभिषेचनम् । आज्ञापयत्तदा राजेत्यादि । तथाऽऽचार्यैरपि । राज्ये निजं चात्मजमभ्यषिञ्चदित्यभ्यधायि । तन्मारणानन्तरं तत्कृताभिषेकस्याकिञ्चित्करत्वात्कृष्णाभिषेक एव प्रयोजक इति तदुक्तिः । यथोक्तं पुनस्तत्रैव । अभ्यषिञ्चत् तत्रैव जरासन्धात्मजं मुदेति । न च जरासन्धवद्दुरात्मा भवत्स इति तदभिषेचनं हरिणा कृतमिति वाच्यम् । तस्य साधुत्वात् । यथोक्तमाचार्यैः । पुरा ख्यातं पत्रतापाख्यरुद्रमिति ॥४६॥ मागधेन ये

संरुद्धास्तान्राजन्यान्मोचयामास । मोक्षयामासेति पाठे नामधातुरिति ज्ञेयम् । न विद्यते नयो यस्य सोऽनयस्तस्मिन्मागधे मृते सति । सहदेवमाज्ञाप्य मोचयामास । मोचयामास नृपतीन्सहदेवेन केशव इति तत्रोक्तेः ॥४७॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे द्व्यशीतितमोऽध्यायः ॥१०-८२॥ ॐ ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो मारणप्रकारमाह-एवं पादमिति । पादौ त्वश्लिष्टौ एव अतो गुदतः पाटयामास पूर्वं तस्मिन् ब्राह्मणबुद्धिर्जातेति कालशक्त्या गृहीत इति न प्रत्यक्षं कमपि कृतवानिति ज्ञापयितुं दृष्टान्तमाह-शाखामिवेति । अनायासेन दृष्टान्तो महागज इति ॥४५॥ ततस्तस्य वधः सर्वजनीनो जात इत्याह-एकपादेति । एकमापादः पादादिर्यस्य पादः जानुः वृषणः कटिः पृष्ठः स्तनमंसकं वेत्यष्टाङ्गानि द्वन्द्वरूपाणि भिन्नानि जातानि द्वादशाङ्गेष्वथ पराणि चत्वार्याह-बाहुरक्षिभ्रूः कर्णश्च एको ययोः एतादृशे शकले सर्वा एव प्रजा ददृशुः ॥४६॥ ततो यज्जातं तदाह-हाहाकार इति । महान् सर्वैः कृतत्वात् बद्धानामपि यथा श्रवणं भवति भगवान् तथा सम्पादितवान् मगधेश्वरमरणानन्तरमेव तथा भवतीतिबोधयितुं तदानन्तर्यमनुदितं ततो भीमात्तेजो ग्रहीतुं व्याजेनालिङ्गनं प्रशंसां च कृतवानित्याह-पूजयामासतुर्भीममिति । अर्जुनोऽपि भगवदंश इति द्वयोर्निरूपणं स्तोत्रेण स्मये जाते तेजोपगच्छतीति स्तुतिः जयोऽर्जुनः अच्युतश्च उभयोर्गुणः तस्मिन्न गच्छतीति तथायं वृतः ॥४७॥ ते अराजकराज्ये स्थितिरयुक्तेति अन्यस्तस्मिन् देशे स्थापयितुमशक्त इति अनुकूलस्तत्पुत्र इति सहदेवं तत्तनयं तत्रत्यानां भूतानामनुकम्पार्थमभ्यषिञ्चत् यतो भगवान् सर्वसमः ननु शत्रुं हत्वा तद्राज्यं स्वयं ग्राह्यं कथं तत्तनयाय दत्तवानित्याशङ्कायामाह-अमेयात्मेति । भगवान् हितमहितं वा करोतीति न कस्यापि मेयः आत्मा यस्य मागधानां स्वभावतोऽपि स पतिर्भवति तस्य विपरीतत्वेऽपि न काचित् क्षतिरिति ज्ञापयितुमाह विभुरिति यदर्थमेतावत् कृतं तदाह मोचयामासेति ननु येन निमित्तेन धृताः तदपगमाभावे कथं मोचनमित्याशङ्क्याह-मागधेन संरुद्धानिति मागधस्यैव मृतत्वात् हेत्वपगमः सुतरामेव जात इत्यर्थः ॥४८॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्द्धे
त्रयोविंशाध्यायविवरणम् ॥२३॥७२॥

श्रीसुबोधिनीसारः

एकं पादं स्वपदाऽऽक्रम्य तस्यान्यं पादं दोर्भ्यां हस्ताभ्यां प्रगृह्य स भीमो गुदतः पाटयामास द्विधाचकार महागजः शाखामिव ॥४५॥ एकैकः पादादिर्ययोस्ते शकले द्वे खण्डे प्रजा ददृशुः ॥४६॥ मगधानामीश्वरे राजनि निहते मृते सति हाहाकारो ध्वनिर्महानासीत् जयाच्युतौ श्रीकृष्णार्जुनौ परिरभ्य मिलित्वा भीमं प्रशशंसतुः ॥४७॥ तस्य जरासन्धस्य तनयं पुत्रं सहदेवं भूतरक्षको भगवानभ्यषिञ्चत् मागधानां पतिं राजानमभिषिक्तवान् अमेयोऽप्रमाण आत्मा यस्याचिन्त्यस्वरूप इत्यर्थः । प्रभुः समर्थो राजन्यान् भूपान् मोचयामास मागधेन जरासन्धेन ये संरुद्धास्तान् ॥४८॥

इति श्रीमद्भा० दशमस्कन्धे उ०सुबोधिन्यां टीकायां द्विसप्ततितमोऽध्यायः ॥७२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पदा पादेन एकं पादमाक्रम्य दृढमवष्टभ्यान्यं पादं दोर्भ्यां हस्ताभ्यां प्रगृह्य स भीमः महागजो यथाऽनायासेन शाखां पाटयति तथा तं गुदतः आरभ्य पाटयामास विदारितवान् ॥४५॥ एकैकः पादादिर्ययोस्ते शकले तत्रस्थाः प्रजा ददृशुः ॥४६॥ एवं मगधेश्वरे निहते सति तत्प्रजाकृतमहान्हाहाकारशब्द आसीत् । जयोऽर्जुन अच्युतः कृष्णः तौ भीमं परिरभ्य पूजयामासतुः स्तुत्यादिना सत्कृतवन्तौ ॥४७॥ कृष्णेन परिरब्धो वृकोदरस्तु विरुजः पीडारहितः स्वस्थचित्तः सुखी निर्व्रणः क्षतरहितः बलेन वीर्येण तेजोविशेषेण समन्वितश्चाभूत् ॥४८॥ 'दुर्वृत्तत्वादेव जरासन्धो हतः, न राज्यलोभेन' इति सूचयन्नाह-सहदेवमिति । तस्य जरासन्धस्य तनयं सहदेवं भगवान् मगधानां देशानां पतिम् अभ्यषिञ्चत् राज्याभिषेकपूर्वकं चकारेत्यर्थः । तत्र हेतुमाह-भूतभावन इति । सर्वपालकत्वात् । अराजके दुष्कृतोपद्रवेण प्राणिविनाशः स्यादित्याशयः । प्रजापालने तस्य सामर्थ्यमाह-प्रभुमिति । ननु 'पितृवधस्मरणेन पुनस्तत्कृतभयसम्भवात् कथं पुनस्तमेव राज्यं दत्तवान्' इत्याशङ्क्याह-अमेयात्मेति । अचिन्त्यबलपराक्रमादिमत्त्वेनामेयो दुर्ज्ञेय आत्मा स्वरूपं यस्य सः । अतो न तस्य भयशङ्कालेश इति भावः । मोचयामासेति स्पष्टम् ॥४९॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥ श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रोबधिनी ॥२॥ रचिता दशमे तत्र सात्त्विकानां निरोधने । द्विसप्ततितमः प्रागान्मागधघातनिरूपकः ॥३॥

अन्वितार्थप्रकाशिका

एकमिति । पदा स्वपादेनैकं शत्रोः पादमाक्रम्य दृढमवष्टभ्यान्यं पादं दोर्भ्यां हस्ताभ्यां प्रगृह्य स भीमः महागजो यथाऽनायासेन शाखां पाटयति तथा तं गुदतः आरभ्य पाटयामास विदारितवान् ॥४५॥ एकेति । एकैकः पादादिस्तथा एकैको बाह्वादिर्ययोस्ते शकले तत्रस्थाः प्रजा ददृशुः ॥४६॥ हाहेति । एवं मगधेश्वरे निहते सति तत्प्रजाकृतः महान् हाहाकारशब्द आसीत् । जयोऽर्जुनः अच्युतः कृष्णः तौ भीमं परिरभ्य पूजयामासतुः स्तुत्यादिना सत्कृतवन्तौ ॥४७॥ दुर्वृत्तत्वादसौ हतो न तु राज्यलोभेनेति दर्शयन्नाह–सहदेवमिति । भूतभावनः अप्रमेयात्मा प्रभुर्भगवान् तस्य जरासन्धस्य तनयं सहदेवं मगधानां देशानां पतिं पतित्वेन अभ्यषिञ्चत् ॥४८॥ मोचयामासेत्यर्द्धम् । ये च मागधेन संरुद्धाः आसन् तान् राजन्यान् मोचयामास ॥४९॥

इति श्रीमद्भागवते दशमेऽन्वितार्थप्रकाशिकायां द्विसप्ततितमोऽध्यायः ॥७२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अरेरेकं पादं पदा स्वपादेन ॥ स भीमः ॥४५॥ एकैकः पादादिर्ययोस्ते शकले ॥४६॥ जयाच्युतौ विजयश्रीकृष्णौ ॥४७॥ ततः किं जातमिति चेत्तत्राह सहदेवमिति ॥ मागधेन जरासन्धेन ॥४८॥

इति श्रीशुद्धाद्वैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने जरासन्धवधो नाम द्विसप्ततितमोऽध्यायः ॥७२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हाहेति ॥ मगधेश्वरे जरासन्धे, निहते सति, महान् हाहाकारः, आसीत् । जयाच्युतौ कृष्णार्जुनौ, भीमं परिरभ्य, पूजयामासतुर्बह्वमन्येताम् ॥४५॥ सहदेवमिति ॥ दुर्वृत्तत्वादसौ हतो न राज्याभिलाषेणेति दर्शयन्नाह ॥ सहदेवमिति ॥ अमेयात्मा अपरिच्छेद्यस्वरूपस्वभावः, प्रभुः भगवान् कृष्णः, भूतानि लोकान् भावयत्यभ्युदयतीति भूतभावनः, हेतुगर्भमिदम् । तत्त्वात् सहदेवं सहदेवाख्यं, तत्तनयं जरासन्धपुत्रं, मगधानां देशानां पतिम्, अभ्यषिञ्चत् । तेषामधिपतिं चकारेत्यर्थः । ततः मागधेन जरासन्धेन, ये संरुद्धाः, तान्, राजन्यान्, मोचयामास ॥४६॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनु-भगवत्प्रसादाचार्यविरचितायामन्वयार्थबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्द्धे जरासन्धवधो नाम द्विसप्ततितमोऽध्यायः ॥७२॥

कृष्णप्रिया

पुनः उसके एक पैरको अपने पैर के नीचे दबाया और दूसरेको अपने दोनों हाथोंसे पकड लिया । तदनन्तर भीमसेनने उसे गुदाकी ओरसे इस प्रकार चीर दिया कि जैसे गजराज तरुवरकी डाली चीर डाले ॥४५॥ लोगोने देखा कि जरासंध के देक्ह के दो टूकडे हो गये है और इस प्रकार उनके एक एक पैर जांघ अंडकोश और पीठ स्तन स्कंध भुजा नेत्र भौंह और कान अलग अलग हो गये है ॥४६॥ मगधेश जरासंधकी मृत्यु हो जातेपर वहांकी प्रजा बडे जोर से हाय हाय पुकारने लगी । भगवान श्रीकृष्ण एवं अर्जुनजीने श्रीभीमसेनका समालिंगन किया और उसका सत्कार किया ॥४७॥ सर्व समर्थ भगवान श्रीकृष्ण के स्वरुप एवं विचारोको कोईभी समझ नहीं सकता वास्तविक रूपसे वे ही समस्त प्राणियोंके जीवनदाता है भगवान ने जरासंध के राजसिंहासन पर उसके ही पुत्र सहदेव का अभिषेक कराया । और जरासंध ने जिन नरपतियों को कैदी बनाये थे उन सबको कारागार से मुक्त कर दिया ॥४८॥

इति श्रीमद्भागवते हिन्दीभाषान्तरे दशमस्कन्धे उत्तरार्धे जरासंधवधोनाम द्विसप्ततितमोऽध्यायः ॥७२॥

★★★★★

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ त्रिसप्ततितमोऽध्यायः ॥

श्लोकाः	अनु.	मि.उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
३५	३२	३	५	११६८	३०	४२	१२४०	३८॥।	

श्रीशुक उवाच

अयुते द्वे शतान्यष्टौ लीलया युधि निर्जिताः । ते निर्गता गिरिद्रोण्यां मलिना मलवाससः॥१॥

कर्दमक्षमा

अन्वयः :—श्रीशुक उवाच :- लीलया, युधि, निर्जिताः, अयुते, द्वे, अष्टौ, शतानि, गिरिद्रोण्याम्, मलिनाः, मलवाससः, क्षुत्क्षामाः, शुष्कवदनाः, संरोधपरिकर्शिताः, ते, निर्गताः, पीतकौशेयवाससम्, ददृशुः ॥१-२॥

श्रीधरस्वामिकृतभावार्थदीपिका

ततस्त्रिसप्ततितमे मोचयित्वा नृपान् हरिः । राजार्हभोगैः स्वान् देशान् प्रस्थाप्य पुनरागमत् ॥ अत्युन्नद्धजरासन्धवधात्तद्रुद्धभूपतीन् । विमोक्ष्य कृपया कृष्णो निजरूपमदर्शयत् ॥ ये निर्जिता जरासन्धेन निरुद्धाश्च गिरिद्रोण्यां ते ततो निर्गताः सन्तो घनश्यामं ददृशुरित्युत्तरेणान्वयः ॥१॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो जरासन्धवधोत्तरम् (१) ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

अयुतेति सार्धकम् । मलिन इतीन् प्रत्ययानतम् ॥१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अष्टौ शतानि च, लीलया अनायासेनैव, निःशेषेण; यद्वा, स्वगृहानयनेन जिता इति लज्जादिना महादैन्यं सूचितम् । तदेव दर्शयति-मलिन इत्यादिपदत्रयेण । मलिना मलयुक्ताः, स्नानाद्यभावात्; किञ्च, मलयुक्तवाससः ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-५॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

नकेवलं मोचयामासापि च तैः संस्तुतस्तान् बहुमानयामास चेत्याह त्रिसप्ततितमेन-अयुते इत्यादिना । द्वे अयुते अष्टौ शतानि च ये राजन्या युद्धे जरासन्धेन लीलया अनायासेन निर्जिताः गिरिद्रोण्यां सन्निरुद्धाश्च ते ततो निर्गताः सन्तो घन इव श्यामं श्रीकृष्णं ददृशुरित्युत्तरेणान्वयः । कथम्भूताः मलिनाः अभ्यङ्गोन्मर्दनस्नानाद्यभावान्मलिनानि मलिनानि वासांसि येषां ते ॥१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

जरासन्धरोधादिलक्षणतपसा प्रसन्नो भगवान् यज्ज्ञानसाध्यं स्वरूपं दर्शितवान् तदुपासकानां भक्त्यतिशयजननार्थकृतमिति कृत्वा तन्माहात्म्यं कथयत्यस्मिन्नध्ययाये, तत्रादौ तत्सङ्ख्यां निर्दिशति । अयुतेति । गिरिद्रोण्यां निरुद्धास्ततो विनिर्गताः ॥१-४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

त्रिसप्ततितमे भूपैर्मोचैतैर्वीक्षितः स्तुतः । भक्तिप्रदो हरिः सन्तोष्यैतान् पार्थपुरीमगात् ॥ये निर्जिता जरासन्धेन निरुद्धाश्च ते गिरिद्रोण्याः सकाशान्निर्गताः ॥१॥ **गूढार्थदीपिनी**

प्राक्त्रिसप्ततितमे कृपानिधिः संविमोच्य नृपतीन् स्तुतस्तु तैः । प्रैषयत् सुविभवैः प्रतोष्य तान् राजसद्म पुनरागमद्धरिः ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

विमुक्तैः राजभिः संस्तुतो भगवान् तान् बहुसत्कृत्य प्रेषयामास स्वयं सहदेवेन पूजितः पार्थाभ्यां सहेन्द्रप्रस्थमगादिति त्रिसप्ततितमे वर्णयति-अयुते इति । गिरिद्रोण्याः सकाशात् निर्गतास्ते घनश्यामं ददृशुरित्युत्तरेणान्वयः ॥१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ दिक्चतुष्टयजयो जयादिभिश्चतुर्भिस्तत्रापि भीमसेनेन जरासुतमारणं तदनन्तरं क्रत्वारम्भसम्भारसम्पादनयत्नः सर्वोऽप्ययं श्रीवासुदेवप्रसादासादनीय इति प्रतिपाद्यतेऽत्राध्याये । तत्रादौ धर्मः स्वहार्दं हृषीकेशं प्रति विज्ञापयतीत्याह ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

चतुर्विंशे विमुक्तानां ज्ञानं सम्मोचनं तथा । विषयात्मसमृद्धिश्च प्राह कृष्ण इतीर्यते ॥ स्वधर्मैश्चेन्न पुष्टाः स्युर्निरोधस्तर्ह्यनर्थकः । अतः स्वासक्तिसिद्ध्यर्थं ज्ञानराज्ये ददौ हरिः ॥ पूर्वाध्यायान्ते निरुद्धा राजानो मोचिता इत्युक्तं तेषां मुक्तानां भक्त्याधिक्येन पूर्ववत् स्थितिर्निरूप्यते तत्र प्रथमं निरोधस्थानात् निर्गमनमाह-

एकविंशतिसाहस्त्रे वधस्तेषां हि सम्मतः । ततः शतद्वयं न्यूनास्तेन पूर्वं न मारिताः ॥

एतत् ज्ञापयितुं सङ्ख्यामाह-अयुते द्वे शतान्यष्टाविति । उलूखबन्धनवदत्रापि शतद्वयं न्यूनता एतावतामेकत्र कथं स्थितिरित्यत्र हेतुमाह-लीलया युधि निर्जिता इति । गिरिद्रोण्याः सकाशात् निर्गताः मलिनाः असंस्कृतदेहाः मलवाससोऽप्रक्षालितवाससः अनेन बहिःस्थितिरधमा निरूपिता ॥१॥

सुबोधिनीसारः

शुक उवाच । तेषां सङ्ख्यामाह । द्वे अयुते विंशतिसहस्राणि अष्टौ शतानि युधि लीलया निर्जिताः गिरिद्रोण्यां निरुद्धास्ते निर्गता बहिर्निःसृता मलिना मलिनवस्त्राः ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्रिसप्ततितमे राज्ञां मोचनं तत्प्रपूजनम् । इन्द्रप्रस्थागमो राज्ञो हर्षश्च विनिरूप्यते ॥१॥

अन्वितार्थप्रकाशिका

त्रिसप्ततितमे रुद्धान् मोचयित्वा नृपान् हरिः । देशान्प्रस्थाप्यागमच्च तत्र श्लोकाः शराग्नयः (३५)॥ उवाचपञ्चकं (५) सार्द्धाः स्युः षट्त्रिंशदनुष्टुभः (३६॥) ॥७३॥ अयुते इति सार्द्धम् ॥ द्वे अयुते अष्टौ शतानि च ये राजन्या युद्धे जरासन्धेन लीलया निर्जिताः गिरिद्रोण्यां सन्निरुद्धाश्च ते स्वरूपतो मलिनाः अभ्यङ्गोद्वर्तनस्नानाद्यभावात् तथा मलानि मलयुक्तनि वासांसि येषां ते क्षुधा क्षामा दुर्बलाः शुष्काणि वदनानि येषां ते संरोधेन परिकर्शिता । क्लेशिताः गिरिद्रोण्याः निर्गताः ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ त्रिसप्ततितमेऽध्याये गिरिव्रजाद्धरिकृतं राज्ञां मोचनं स्वस्वदेशे तेषां प्रस्थापनं च पुनर्हरेरिन्द्रप्रस्थागमनं च निरूपयति अयुत इति । ये जरासन्धेननिर्जिताः नितरां जिताः अत एव गिरिद्रोण्यां संरुद्धा इति शेषः ततो निर्गताः मलिनाः मलिनाङ्गाः मलवाससो मलयुक्तवस्त्राः ते घनश्यामं हरिं ददृशुरित्युत्तरेण सम्बन्धः ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हरिर्विमोच्य भूपालान् त्रिसप्ततितमे ततः । भोगै राजोचितैर्देशान् स्वान् संप्रेष्यागमत्पुनः ॥१॥

कृष्णप्रिया

जरासंघके वध से मुक्त हुए महाराजाओंकी विदाय ।

श्रीशुक उवाच - अयुतेद्वे शातान्यष्टौ लीलया युधिनिर्जिताः ।
ते निर्गताः गिरिद्रोष्यां मलिना मलवाससः ॥१॥ श्रीशुकदेव महर्षि कहते है - महाराज परीक्षित ! राजा जरासंघने विनाश्रम ही बीस हजार आठसौ नरपतियोंको जीतकर पर्वतोंकी घाटीमें एक कील्लेके भीतर कैद कर रखे थे । भगवान् श्रीकृष्णके छोड देने पर जब वे वहांसे नीकले तब उनके देह और देह के वस्त्र मलिन हो गये थे ॥१॥

युधिष्ठिर उवाच

क्षुत्क्षामाः शुष्कवदनाः संरोधपरिकर्शिताः । ददृशुस्ते घनश्यामं पीतकौशेयवाससम् ॥२॥
श्रीवत्साङ्कं चतुर्बाहुं पद्म[१]गर्भारुणेक्षणम् । चारुप्रसन्नवदनं स्फुरन्मकरकुण्डलम् ॥३॥
पद्महस्तं गदाशाङ्खरथाङ्गैरुपलक्षितम् । किरीटहारकटककटिसूत्राङ्गदाचितम्[२] ॥४॥
भ्राजद्वरमणिग्रीवं निवीतं वनमालया । पिबन्त इव चक्षुर्भ्यां लिहन्त इव जिह्वया ॥५॥

कर्दमक्षमा

ते (नृपाः), श्रीवत्साङ्कम्, चतुर्बाहुम्, पद्मगर्भारुणेक्षणम्, चारुप्रसन्नवदनम्, स्फुरन्मकरकुण्डलम्, पद्महस्तम्, गदाशङ्खरथाङ्गैः, उपलक्षितम्, किरीटहारकटककटिसूत्राङ्गदाचितम्, भ्राजद्वरमणिग्रीवम्, वनमालया, निवीतम्, चक्षुर्भ्याम्, पिबन्तः, इव, जिह्वया, लिहन्तः, इव, नासाभ्याम्, जिघ्रन्तः, इव, बाहुभिः, रम्भन्तः, इव, नृपाः, हतपाप्मानः, मूर्धभिः, पादयोः, प्रणेमुः ॥ कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः, नृपाः, प्राञ्जलयः, गीर्भिः, हृषीकेशम्, प्रशशंसुः ॥३-७॥

श्रीधरस्वामिकृतभावार्थदीपिका

क्षुधा क्षामाः कृशाः संरोधेन परिकर्शिताः क्लेशिताः ॥२-४॥ भ्राजन् भ्राजमानो वरमणिः कौस्तुभो यया सा ग्रीवा यस्य तम् निवीतं कण्ठलम्बितया व्याप्तम् पिबन्त इवेत्यादीनां हरेः पादयोः प्रणेमुरित्युत्तरेणान्वयः ॥५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्युन्नद्धोऽत्युच्छृङ्खलः । तद्वद्धाञ्जरासन्धबद्धान्नृपान् (२) । हे अयुत वासुदेवभक्त 'ईः करुणो द्वार्पुरि' इत्यनेकार्थमालोक्तेः । द्वाया भूम्या ईशो द्वेश ईश्चासौ द्वेश ईद्वेशस्तत्सम्बुद्धौ हे ईद्वेश । यद्वा-अयुतपदेन पुनः कर्मधारयेण अयुतेद्वेशेत्येकैव सम्बुद्धिः । तथा च-हे कृष्णभक्तयालो धरित्रीश तानि षट् । 'टाद्या नव' इति केरलोक्तेस्तशब्दः षट्सङ्ख्यापरः । अष्टौ च 'अङ्कानां वामतो गतिः' इति रीत्या षडशीतिसङ्ख्या सम्पद्यते । "राज्ञां षडशीतिर्जातिः शेषाश्चैव चतुर्दश" इति भारतविरोधोऽपहृतः । ततो गिरिद्रोण्याः । ते राजानः ॥१-४॥ पिबन्त इत्यादिभिः सर्वेन्द्रियैर्भगवत्सेवोक्ता ॥५-७॥

---

१. पद्मपत्रनिभेक्षणं-वीर. विज. । २. गदान्वितं-वीर. विज. ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

ददृशुरिति त्रिकम्। घनश्याममिति वर्णमुक्त्वा तेन शोभितं तत्प्रसङ्गाद्वस्त्रं चोक्त्वा विलक्षणानि लक्षणान्याह-श्रीवत्सेत्यादिना । पद्मस्य गर्भः अन्तर्दलं तत्तुल्ये अन्तारुणे ईक्षणे यस्य तं चारु अवयववर्णाभ्यां वयःसन्धिशोभया च सुन्दरं सदा स्मेरत्वेन प्रसन्नं च वदनं यस्य तम् अधुना भूषणादीनि च वर्णयन्नुत्तमाङ्गस्य मुख्यशोभाहेतुत्वेन तत्प्रसङ्गादादौ कुण्डलं वर्णयति-स्फुरन्ती स्वर्णरत्नादिना श्रीगण्डाभ्यां च राजन्ती मकराकृतिनी कुण्डले यस्य तम् ॥२-३॥ उपलक्षितम् उपलक्षणरूपैस्तैः परिचितं दक्षिणाधःकरमारभ्य दक्षिणावर्तेनाधोक्षजस्य लक्षणमिदं पद्मं कौमोदकीं शङ्खं चक्रं धत्तेऽप्यधोक्षज इति सिद्धार्थसंहितातः श्रीकृष्णत्वे च ब्रह्मलिङ्गधरत्वे च तस्य तैस्तथा दर्शनं भक्त्यनुरूपाविर्भावरूपत्वात् किरीटादीनामक्रमो नानादृष्टीनामक्रमात् ॥४॥ चिरं क्षुत्तृष्णादिपीडितानां दैवादमृतादिप्राप्त्येव महादुःखितानां तेषां सहसा श्रीमगवत्सन्दर्शनेनातृप्तया तस्मिन् परमासक्तिमाह-पिबन्त इति सार्धकेन । इवशब्दः सर्वत्रोत्प्रेक्षायां सा च परमासक्तिं द्योतयति तस्याः प्रवृत्तिस्तु चक्षुषोर्विस्तारप्राप्त्या जिह्वायाः श्लाघावचनाय चासनादिना तत्सौरभ्यमत्तयोर्नासयोः फुल्लत्वादिना बाह्वोर्मिथस्तद्दर्शनायैव मुहुश्चालनादिना ज्ञेया अत्र बाह्वोश्चालनावशेन वहतामिव गतयोर्बहुत्वोक्तिः ज्ञानेन्द्रियगणे चैतयोरुक्तिस्त्वगिन्द्रियधर्मस्पर्शसुखस्य तत्रैव प्रधानत्वेन श्रवणयोरनुक्तिस्तावत्तद्वचनाद्यश्रवणात्स्वतो नावेशेन तच्चतष्टयावेशाच्छून्यत्वेन च तेषां तादृशत्वे हेतुः हतः प्रागेव दूतप्रेषणादिना प्रपत्त्या नाशितः पाप्मा सर्वोऽपि तदनासक्तिहेतुदोषो यैस्ते यद्वा हतस्तच्छ्रवणादेव पाप्मा यैस्ते ॥५-६॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

शुष्काणि स्वच्छन्दभोजन-पानाभावेन चिन्तया च वदनानि येषां ते । तत्र हेतुः-संरोधेति । ते महादुःखिता, चिरं तं दिदृक्षवो वा; यद्वा, ये निर्ज्जिता निर्जित्य रुद्धा आसन्, ते निर्गता इति वाक्यभेदात् इत्यस्यापौनरुक्त्यम् । घनश्याममिति वर्णमुक्त्वा तेन शोभितं तत्प्रसङ्गाद्वस्त्रं चोक्त्वा असाधारणानि लक्षणान्याह-श्रीवत्सेत्यादिना। पद्मस्य गर्भोऽन्तर्दलम्, तद्वदन्तेऽरुणे ईक्षणे यस्य तम्, चारु सुन्दरं प्रसन्नं च सदा स्मेरत्वेन वदनं यस्य तम्, वदनस्य चारुतया सुकोमलत्वादिना वयःसन्धिः सूचित एव, अधुना भूषणादीनि च वर्णयन् श्रीमुखशोभाहेतुत्वेन तत्प्रसङ्गादादौ कुण्डलमाह-स्फुरन्तीरत्नादिना श्रीगण्डाभ्यां च राजन्ती मकराकृतिस्वर्णकुण्डले यस्य तम् ॥२-३॥ पद्मयुक्तदक्षिणोर्ध्वहस्तम्, उपलक्षितं विशिषष्टं शोभितं वा, गदादीनां दक्षिणाधः कराद् वामोर्ध्वन्तं क्रमेण धारणात्तथैवोक्तिः । किरीटादिभिरञ्चितं सेवितम्, करकंकणं प्रकोष्ठे अङ्गदं च बाहौ; परिधेयब्रह्मलिङ्गधरत्वेऽपि तस्य तैस्तथा दर्शनं श्रीनारदादिकथिततादृशरूपेण भक्त्या तच्चिन्तनात्तथैव परिस्फूर्तेरिति ज्ञेयम् ॥४॥ चिरं क्षुत्तृडाद्यार्तानां दैवादमृतादिप्राप्त्येव महादुःखितानां तेषां सहसा श्रीभगवत्सन्दर्शनेनातृप्त्या तस्मिन् परमासक्तिमाह-पिबन्त इति। एवं चतुर्ज्ञानेन्द्रियाणामभर्भिर्निवेश उक्तः, तत्र चालिङ्गनेन त्वगिन्द्रियस्यायात एव, श्रवणस्यानुक्तिः प्रत्यक्षत्वात्, तस्याप्यग्रे साक्षाच्छ्रीमुखवचनामृतेन सेत्स्यत्येव । बाहुभिरिति विशेषतोऽत्र बहुत्वं गाढालिङ्गनाभिप्रायेण; इव-शब्देनात्यन्ताभिनिवेशेन साक्षादिव पानादिभिस्तत्तदभिनयो बोध्यते; तत्र यथोत्तरं तेषामाधिक्यमूह्यम्। तेषां तादृशाभावादौ हेतुः-हताः प्रागेव दूतप्रेषणादिना प्रपत्त्या नाशिताः पाप्मानः, तच्छ्रवणादिकृतां कारकाणां वा सर्व्वेषां दुष्प्रारब्धा यैस्ते; पादयोर्न्यस्तैर्मूर्धभिरिति तेषां प्रीत्यर्थं कृपया प्रत्येकं स्वशक्तिविशेषेण साक्षादवस्थितिं द्योतयति-हरेरिति। तेषां पाप्मनः किंवा तादृशदर्शनेन मनसो हरणाभिप्रायेण ॥५-६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-५॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

क्षुधा क्षामाः कृशाः शुष्काणि वदनानि येषां ते संरोधेन परिकर्शिताः क्लेशिताः ॥२॥ कथम्भूतं श्रीवत्सोऽङ्कश्चिह्नं यस्य चारु सुन्दरं प्रसन्नं च वदनं यस्य स्फुरन्ती मकराकारे कुण्डले यस्य पद्मं रेखात्मकं हस्ते यस्य तं तथा गदादिभिरुपलक्षितं स्वासाधारणैर्धृतपद्मादिभिश्चतुर्भिर्बाहुभिरुपलक्षितं यथा किरीटादिभिराचितं युक्तम् ॥३-४॥ भ्राजमानो वरमणिः कौस्तुभो ग्रीवायां यस्य तं वनमालया निवीतं कण्ठलम्बितया व्याप्तम् ॥५॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

राजसूययज्ञार्थाय पाण्डवानां दिशां जयो जरासन्धवधश्च श्रीनारायणप्रसादायत्त इति तन्माहात्म्यत्वेन प्रतिपादयत्यस्मिन्नध्याये तत्रादौ युधिष्ठिरः आगतं श्रीकृष्णं स्वचिकीर्षितं विज्ञापयति - एकदेति ॥१॥ आभाष्य अभिमुखीकृत्य एतेषां सर्वेषां श्रोत्रादीन्द्रियतृप्तिजनकम् इदं वक्ष्यमाणं वचनमुवाच हेत्यनेन कर्तव्यतां सूचयति ॥२॥ पावनीः शुद्धिकरीः भवतः विभूतीः सन्निधानविशेषस्थानेन्द्रादिदेवताः यष्टुकामः ॥३॥ तत्कार्यं भवदनुग्रहेणैतद्दुःसाधनमित्याह-त्वत्पादुकेति। अभद्रनशने अशुभविध्वंसनसमर्थे परिचरन्ति नित्यं पूजयन्ति "व्यवहिताश्च" (१-४-८२) इति छन्दसिव्यवधानेऽप्युपसर्गाणां क्रियायोगः सिद्धः प्रद्यान्वस्यमहतो महनीत्यादौ अनेन भागवतस्य वेदतुल्यत्वेनाध्येयत्वादौ तात्पर्यं दर्शयति - भवापवर्गं संसारत्यागं विन्दन्ति ननु तर्हि नानेनाभीष्टसिद्धिरिति तत्राह आशासत इति यदि ते सेवकाः आशासते आशिष ऐहिकसिद्धीः कामयन्ते तर्हि ता अपि विन्दन्ति अन्ये अनुपासका नोभयं विन्दन्तीति भयं विन्दन्तीति शेषः ॥४॥ यतो भवच्चरणसेवाफलमनुभवसिद्धमतो लोकोऽपि प्रत्यक्षप्रमाणोऽस्य माहात्म्यं दृग्विषयं करोत्वित्याह - तदिति। अपि कृष्णत्वमपि भजदभजतामुभयेषामपि जयलक्षणोत्कर्षं व्यवस्थापयेत्याह - ये त्वामिति। "निष्ठोत्कर्षे व्यवस्थायां नाशेऽन्ते व्रतयाञ्चयोः" इति यादवः। "अनुभावः प्रभावे स्यात्" इति ॥५॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-४॥

पिबन्त इत्यादि ॥५-३५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

भ्राजन् भ्राजमानो वरमणिः कौस्तुभो यया सा ग्रीवा यस्य तं निवीतं युक्तम् ॥२-६॥

गूढार्थदीपिनी

ददृशुरिति त्रिकम्। पीते कौशेयवाससी यस्य। श्रीवत्साङ्को भृगुलता वक्षसि यस्य। पद्मगर्भवत् अरुणे ईक्षणे यस्य स्फुरन्ती मकराकृती कुण्डले यस्य। उपलक्षितं शोभितम्। किरीटादिभिः आचितमलङ्कृतम्। भ्राजन् वरमणि कौस्तुभौ यया सा ग्रीवा यस्य। निवीतं वेष्टितम्। रथाङ्गं चक्रम् ॥२-४॥ पिबन्त इति सार्धम्। पिबन्त इव लिहन्त इव जिघ्रन्त इव बाहुभ्यां रम्भन्तः आलिङ्गन्त इव मुक्ताः नृपाः मूर्धभिः पादयोः प्रणेमुरित्यन्वयः ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

क्षुधा क्षामाः कृशाः संरोधेन कर्शिताः क्लेशिताः अत एव शुष्कवदनाः ॥२-४॥ भ्राजत् भ्राजमानो वरमणिः कौस्तुभो ग्रीवायां यस्य वनमालया निवीतं युक्तं पिबन्त इवेत्यादीना हरेः पादयोः मूर्धभिः प्रणेमुरित्युत्तरेण सम्बन्धः ॥५-७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ राजानः कियन्त इत्यत आह ॥ अयुते द्वे इति। अयुते विंशतिसहस्रं द्वे सहस्रे तथाऽष्टौशतानीत्याहत्य द्वाविंशत्सहस्राष्टशतसङ्ख्याः ॥ अन्यथाऽयुते इति द्विवचनेन विंशत्सहस्रसम्पत्तेर्द्वे इत्यवक्तव्यं स्यात्। तेनैतत्सङ्ख्यामाख्यातवान् ग्रन्थकृदिति मन्तव्यम्। नृपा अयुतद्वयेन सोऽष्टविंशकैः शतैरपीति महाभारततात्पर्यनिर्णय आचार्य विवृतवन्त इति। मलिनोऽनङ्गाभ्यङ्गात्। मलवाससोऽधावनात्। मलवाससोऽधावनात्। गिरिद्रोण्या विनिर्गताः ॥१॥ संरोधेन निरोधेन। घनश्यामं मेघश्यामम् ॥२॥ चतुर्बाहुमुपलक्षणतया वा तन्मात्रतयादर्शनेन वेति चतुष्ट्वं भुजानां ज्ञेयम् ॥३॥ निवीतं व्याप्तं कण्ठमारभ्यापादम्। आपादलम्बिनीं कटाद्वनमालेति तां विदुरित्यादेः ॥५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

अन्तः स्थितिं निरूपयति- क्षुत्क्षामाः रोगाद्यभावेऽपि भक्ष्याभावात् कृशाः अन्तः सन्तोषाभावात् शुष्कवदनाः इन्द्रियाणां पीडामाह-संरोधपरिकर्शिता इति । परितः कर्शिताः क्लिष्टाः सर्वेन्द्रियेषु जातक्लेशाः एवं बाह्याभ्यन्तरभेदेन परमापदमापन्नाः तत्क्षणादेव सर्वनिवृत्त्यर्थं भगवन्तं तं दृष्टवन्त इत्याह ददृशुस्ते घनश्याममिति । यादृशमात्मानं भगवान् प्रदर्शितवान् द्वादशलक्षणोपेतं तादृशमनुवर्णयति-घनश्यामादिभिः पदैः । मनसो हि द्वादशवृत्तयः क्लिष्टा इति सर्वक्लेशनिवृत्त्यर्थं द्वादशधर्मप्राकट्यं तच्च शुष्कानामाप्यायनार्थं घनवत् श्याममिति नीलमेघो ह्याप्यायकः अनेन देहक्लेशो निवारितः अथवा क्लेशव्यावृत्त्यर्थमाह-पीतकौशेयवाससमिति । पीतं वासो हि वेदात्मकं तत्रापि स्वकर्मबद्धजीवकोशनाशेन प्रादुर्भूतं निवृत्तिबोधिका श्रुतिरिति यावत् अनेन ज्ञानसहिता वागाविर्भवतीति सूचितम् ॥२॥ ततो वसनक्लेशाभावाय अपामोषधीनां च रसरूपं पद्मं हस्ते प्रदर्शनार्थं यस्य ततो ममेत्यहङ्कारस्त्रिविध इति तन्निवृत्त्यर्थं गदाशङ्खरथाङ्गैः उपलक्षितः स्त्रीपुन्नपुंसकहेतिप्रयोगेण त्रिविधानामपि छेदनं एतावन्त एव हि ममताविषयाः उपलक्षणत्वन्तु सकृदेव निराकरणात् पुनः प्रयोजनाभावं ज्ञापयति किरीटादिभिः पञ्चविधैरलङ्कारैः पूजितश्चक्षुःक्लेशाभावाय पञ्चविधं हि रूपमिति नीलश्वेतपीतरक्तचित्रभेदात् अन्येषामत्रैवान्तर्भावः ॥३॥ श्रीवत्साङ्कमिति । पादक्लेशाभावः ब्रह्मणः पादक्लेशः तत्रैव निवारितः चतुर्बाहुमिति हस्तयोः क्रियया द्विगुणीकरणात् पद्मगर्भवदरुणे ईक्षणे यस्येति मनसः क्लेशाभावः नासिकयोर्वा चारु प्रसन्नं वदनं यस्येति सर्वकामनापूर्णा कायक्लेशनिवृत्तिः स्फुरन्मकरकुण्डलमिति श्रोत्रस्य ॥४॥ भ्राजत्प्रकाशमानो यो मणिः स ग्रीवायां यस्येति ज्ञानक्रिययोर्मध्यस्थत्वेन जीवोत्क्रमक्लेशो निवारितः निवीतं वनमालयेति व्यापिकया कान्त्या त्वक्स्पर्शक्लेशो निवारितः तादृशं भगवन्तं दृष्ट्वा सर्वेन्द्रियाण्यहमहमिकतया रूपरसगन्धस्पर्शार्थं प्रवृत्ता इति वदन् तेषां भगवति सर्वभावप्रवृत्तिमाह-पिबन्त इव चक्षुर्भ्यामिति । चक्षुषा हि रूपलावण्यामृतं पीयते दर्शनं बहिः स्थितावेव पानमन्तःप्रवेशनमिति विशेषः । उभाभ्यां पानं द्विहस्तभोजनवदत्यासक्तिबालभावं बोधयति रसग्रहणार्थमाह लिहन्निव जिह्वयेति गौर्वत्समिव तथाभूतं भगवन्तं दृष्ट्वा तेषां तथाभावो जात इत्यर्थः ॥५॥

सुबोधिनीसारः

क्षुधा क्षामाः क्षीणाः कृशाः शुष्कं वदनं मुखं येषां ते संरोधेन परिकर्शिताः ते पीताम्बरं घनश्यामं ददृशुः ॥२॥ श्रीवत्सचिह्नं चतुर्बाहुं पद्मस्य गर्भवदरुणे ईक्षणे यस्य तं सुन्दरप्रफुल्लमुखं स्फुरती मकराकारे कुण्डले यस्य तम् ॥३॥ पद्मकरं गदादिभिरुपलक्षितं किरीटाद्यङ्गदान्तैराचितं व्याप्तम् ॥४॥ भ्राजन् प्रकाशमानो वरमणिः श्रेष्ठमणिः कौस्तुभो यया सा ग्रीवा यस्य भ्राजती वरमणिना ग्रीवा यस्य सः इति वा तं वनमालया निवीतं व्याप्तं चक्षुर्भ्यां पिबन्त इव जिह्वयाऽऽस्वादयन्त इव नासाभ्यां जिघ्रन्त इव बाहुभ्यां रम्भन्त आलिङ्गन्त इव हतः पाप्मा येषां ते मूर्द्धभिः शिरोभिर्हरेः पादयोः प्रणेमुः ॥५-६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

निरोधाद्विमुक्तानां राज्ञां भगवद्दर्शनानन्दमाह-अयुते द्वे इत्यादिना । द्वे अयुते अष्टौ शतानि च ये राजन्या युद्धे जरासन्धेन निर्जिताः गिरिद्रोण्यां संनिरुद्धाश्च ते ततो निर्गताः सन्तो घनश्यामं कृष्णं ददृशुरित्युत्तरेणान्वयः । तेषां सन्निरोधजं क्लेशं सूचयन्नाह-स्वरूपतो मलिनाः, अभ्यङ्गोद्वर्तनस्नानाद्यभावात् । तथा मलानि मलयुक्तानि वासांसि येषां ते ॥१॥ क्षुधा क्षामा दुर्बलाः । शुष्काणि वदनानि येषां ते । संरोधेन परिकर्शिताः क्लेशिताः । तैर्दृष्टं भगवन्तं वर्णयति-घनवत् श्यामम् । पीते कौशेये वाससी यस्य तम् ॥२॥ श्रीवत्सो रोमरेखाविशेषोऽङ्को वक्षसि चिह्नं यस्य तम् । पद्मगर्भवदरुणे ईक्षणे नेत्रे यस्य तम् । चारु सुन्दरं प्रसन्नं च वदनं यस्य तम् । स्फुती मकराकारे कुण्डले यस्य तम् ॥३॥ पद्महस्तम् । गदादिभिरुपलक्षितं शोभितम् । किरीटादिभिरर्चितम् अलङ्कृतम् ॥४॥ भ्राजत् भ्राजमानो वरमणिः कौस्तुभो ग्रीवायां यस्य तम् । वनमालया आपादकण्ठावलम्बितया निवीतं व्याप्तम् । पिबन्त इवेत्यादीनां हरेः पादयोर्मूर्धभिः प्रणेमुरित्युत्तरेणान्वयः ॥५॥

अन्वितार्थप्रकाशिका

ददृशुरिति त्रिकम् । ते राजानः घनमिव श्यामं पीते कौशेये वाससी यस्य तम् । श्रीवत्सो रोमरेखाविशेषोऽङ्को वक्षसि यस्य तं चतुर्बाहुं पद्मगर्भतुल्ये अरुणे ईक्षणे नेत्रे यस्य तं चारु सुन्दरं प्रसन्नं च वदनं यस्य तं स्फुरती मकराकारे कुण्डले यस्य तं पद्महस्तं गदादिभिरुपलक्षितं शोभितं किरीटादिभिरर्चितम् अलङ्कृतं भ्राजत् भ्राजमानो वरमणिः कौस्तुभो यया सा ग्रीवा यस्य तं वनमालया आपादकण्ठविलम्बितया निवीतं व्याप्तं कृष्णं ददृशुः ॥२-४॥ पिबन्त इति सार्द्धम् ॥ चक्षुर्भ्यां पिबन्त इव जिह्वया लिहन्त इव नासाभ्यां जिघ्रन्त इव बाहुभिः रम्भन्तः आलिङ्गन्त इव । शता नुम् च आर्षौ । भगवद्दर्शनेन हतपाप्मानः ते नृपाः मूर्द्धभिः हरेः पादयोः प्रणेमुः ॥५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्षुधा कर्शितदेहाः संरोधेन परिकर्शिताः ॥ शोकाऽऽकुलाः ॥२॥ तं विशिनष्टि सार्धत्रिभिः ॥३-४॥ भ्राजन् भ्राजमानः प्रकाशमानो वरमणिः कौस्तुभो यया सा ग्रीवा यस्य तम् ॥ वनपुष्पमालया निवीतं संयुतम् ॥५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

घातयित्वा जरासन्धं रुद्धांस्तेन महीपतीन् । श्रीकृष्णः कृपयाऽऽमोच्यादर्शयद्रूपमात्मनः ॥२॥ न केवलं कृष्णस्तान् मोचयामासैवापि तु तैः संस्तुतः सन् तान् बहुमानयामास चेत्याह ॥ अयुत इति ॥ क्षुत्क्षामा इति च ॥ द्वे अयुते, अष्टौ शतानि च, ये राजन्याः, युधि संग्रामे, लीलया निर्जिताः, गिरिद्रोण्यां संनिरुद्धाश्च, ते ततः, निर्गताः । मलिना अभ्यङ्गोन्मर्दनाद्यभावान्मलिनाङ्गाः, मलानि मलिनानि वासांसि येषां ते, क्षुत्क्षामाः क्षुधासहनेन कृशाङ्गाः, शुष्काणि वदनानि येषां ते, संरोधेन परिकर्शिताः क्लेशिताश्च सन्तः, ते पीतकौशेयवाससं, घनश्यामं श्रीकृष्णं, ददृशुः ॥१-२॥ तं विशिनष्टि सार्धद्वाभ्याम् ॥ श्रीवत्साङ्कमिति ॥ श्रीवत्साङ्कं श्रीवत्सलक्ष्माणं, चतुर्बाहुं चतुर्भुजं, पद्मगर्भवदरुणे ईक्षणे यस्य तं, चारु सुन्दरं प्रसन्नं वदनं यस्य तं, स्फुरन्ती मकराकारे कुण्डले यस्य तम् ॥३॥ पद्मेति ॥ पद्मं कमलं हस्ते यस्य तं, गदा च शङ्खश्च रथाङ्गं चक्रं च तैः, उपलक्षितं, किरीटं च हारश्च कटके च कटिसूत्रं च अङ्गदं च तैराचितो युक्तस्तं, भ्राजद्भ्राजमानः वरमणिः कौस्तुभः ग्रीवायां यस्य तं, वनमालया निवीतं, कण्ठलम्बितवनमालमित्यर्थः ॥४॥ पिबन्त इति ॥ ततः, नृपाः, तं चक्षुर्भ्यां, पिबन्तः इव, जिह्वया लिहन्तः इव, नासाभ्यां नासिकाभ्यां, जिघ्रन्तः इव, बाहुभिः रम्भन्त परिरम्भं कुर्वन्तः इव, हरेः पादयोः, मूर्धभिः, प्रणेमुः । ततः, हतपाप्मानश्च अभवन्निति शेषः ॥५॥

कृष्णप्रिया

वे क्षुधा से दुर्बल हो रहे थे और उनके मुख सुख गये थे जेलमें बन्द रहने के कारण उनके शरीर का प्रत्येक अङ्ग शिथिल हो गया था बन्धन प्रदेशमेंसे निकलते समय उन नृपतियोंने देखा कि भगवान् श्रीकृष्ण खडे है । वर्षा काल के मेघ के समान उनका श्याम सुंदर श्रीविग्रह है और भगवान श्रीकृष्णने उस पर पीत वर्णका रेशमी वस्त्र धारण किया था ॥२॥ भगवान चतुर्भुज है इन चार भुजाओंमे गया शंख और सुदर्शन चक्र एवं कमल सुशोभित है । बन्धन स्थल पर सुवर्ण वर्णक श्रीवत्सचिह्न विराजमान है । कमलके मध्य भागके समान रक्तवर्ण नेत्र है । सुन्दर मुखारविन्द प्रसन्नताका प्रत्यक्ष सन्दन है, कानोंमें मकराकृति कुण्डल हिलमिला रहे है । श्रीमस्तक पर रत्न मुकुट सुशोभित है कण्ठमें मौक्तिक माला सुशोभित है । मौक्तिक कंकण कडे कर धनी और बाजूबंध अपने स्थान पर सुशोभित है ॥३-४॥ कंठमें कौस्तुभमणि शोभा दे रहा है । औ वैजयंती माला शोभा दे रही है । भगवान श्रीकृष्ण का दर्शन करते ही नृपतियों की एसी स्थिति हो गई मानो कि वे नृपति नेत्रों से कृष्ण का पान कर रहे है जिह्वा से आलिहन कर रहे है बाहुओं से आलिङगन कर रहे है उनके सारे पाप तो भगवानके दर्शनसे ही धुल गये थे । उन लोगोंने भगवान श्रीकृष्ण के श्रीचरणों पर अपना मस्तक रख कर प्रणाम किया ॥५-६॥

जिघ्रन्त इव नासाभ्यां[1] रम्भन्त इव बाहुभिः। प्रणेमुर्हतपाप्मानो मूर्धभिः पादयोर्नृपाः[2] ॥६॥
कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः । प्रशशंसुर्हृषीकेशं गीर्भिः प्राञ्जलयो नृपाः ॥७॥

राजान ऊचुः

नमस्ते देवदेवेश प्रपन्नार्तिहराव्यय । प्रपन्नान् पाहि नः कृष्ण निर्विण्णान् घोरसंसृतेः ॥८॥
नैनं[3] नाथान्वसूयामो मागधं मधुसूदन । अनुग्रहो यद्भवतो राज्ञां राज्यच्युतिर्विभो ॥९॥

कर्दमक्षमा

राजानः ऊचुः :- देवदेवेश ! प्रपन्नार्तिहर ! अव्यय ! हे कृष्ण ! घोरसंसृतेः, नः, प्रपन्नान्, पाहि ॥८॥ हे नाथ ! हे मधुसूदन ! एनम्, मागधम्, न, अन्वसूयामः, राज्ञाम्, यत्, राज्यच्युतिः, हे विभो ! नः, भवतः, अनुग्रहः ॥९॥

श्रीधरस्वामिकृता भावार्थदीपिका

रम्भन्तः परिरम्भमाणा इव ॥६॥ कृष्णदर्शनाह्लादेन ध्वस्तः संरोधनक्लमो येषां ते ॥७॥ संरोधाद्रक्षितानस्मान् घोरायाः संसृतेरपि पाहि मोचय ॥८॥ ननु भवन्तो जरासन्धासूयाविष्टा इहामुत्र भोगासक्ताश्च कथं संसृतेर्मोचनीया इत्याशङ्क्य सम्प्रति न वयं तथाभूता इत्याहुः-नैनमित्यष्टभिः । हे नाथ ! वयमेनं नान्वसूयामः अन्वनुदोषदृष्ट्या न पश्यामः कुत इत्यत आहुः अनुग्रह इति यद्यस्मात् ॥९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यथा शुनो रक्षितः सिंहादपि रक्ष्यत इत्याशयेनाहुः-संरोधादिति ॥८॥ हरिराशङ्कते-नन्विति । तथाभूता असूयावेशलोकद्वयभोगासक्ताः । एनं जरासन्धम् । हेतुमाशङ्क्य समादधते-कुत इत्यादिना ॥९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हृषीकेशमिति । पूर्वरीत्या सर्वेन्द्रियाप्यायनस्य किम्वा तेनैव कृपया तादृशस्तुतौ प्रवर्तनस्याभिप्रायेण गीर्भिरित्यधिकपदोपादानं तत्प्राशस्त्यविवक्षया नृपा इति तादृशस्तुत्या सर्वे नरा रक्षिता इति भावः ॥७॥ घोरायाः त्वद्वैमुख्यकर्तृत्वेन भयानकायाः संसृतेः पाहि कुतः प्रपन्नान् शरणागतान् नन्वत्रास्ति विषयभोगे सुखं मदर्पणेन कथञ्चिद्भक्तिहेतुत्वं च तत्राहुः-निर्विण्णान् भूयो दुःखानुभावाद्विषयसम्बन्धाद्विरक्तान् ननु तदर्थमन्यदेवं प्रार्थयध्वं तत्राहुः-देवदेवेश हे ब्रह्मादिप्रभो ! इति परमेश्वरत्वेन त्वमेव तत्र योग्यो न त्वन्य इति भावः । नन्वीदृशश्चेदहं तर्हि भवद्विधेषु कथं मदवधानं स्यात्तत्राहुः-प्रपन्नेति नन्वेवं चेत्प्रपन्नास्त्वनन्ता एव भवेयुस्तत्राहुः, हे अव्यय अक्षयशक्त्यादिक ! तत्रापि हे कृष्ण ! अहो बकीयमित्यादि प्रसिद्धतादृशमहाकीर्ते इत्यर्थः । भवन्त्वनन्ताः का हानिः प्रत्युत तव कीर्तिर्योग्या एव त इति भावः ॥८॥ नैनमिति तैरवतारितम् । तच्च सपरिहासं ज्ञेयम् । मागधमित्यवज्ञोक्तिः । एनमिति प्रत्यक्षं दर्शयन्ति । अन्वादेशप्रयोगात् । तद्द्वेष्टृत्वेनासूयाविषयतया मुहुर्निर्दिष्टमपि नानुसूयामः । असूयेत्यकाराभाव आर्षः । निजराज्यव्यापकत्वेन तु दोषदृष्ट्या न पश्यामः । ततः सुतरामन्यन्तु नैवेत्यर्थः । हे नाथेति अधुना त्वया सनाथा अपि जाता वयमिति भावः । हे मधुसूदन ! इति आदिदैत्योऽप्यसौ त्वया हतः अयं को वराकः । अस्य वधे को वा तव महिमा । महिमा तु दीनानुग्रह एवेति भावः । हे विभो ! सर्व्वं कर्तुं समर्थेति तत्रोपोद्बलकम् ॥९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नन्वत्यन्तक्लेशेन क्षुभितानां तादृश्यासक्तिर्न सम्भवेत्तत्राह-कृष्णस्य परमानन्दघनमूर्तेर्भगवतः सन्दर्शनेन साक्षात् तादृशदर्शनेन य आह्लादस्तेन ध्वस्तसंरोधनक्लमाः, गीर्भिः सर्व्वगुणयुक्ताभिः प्रशशंसुस्तुष्टुवुः । हृषीकेशमिति-पूर्व्वोक्तप्रकारेण

---

१. ईहन्त इव चेतसा-विज. । २. हरेः-श्रीधर. वंशी. वीर. विज. शुक. । ३. नैनं नाथाभ्यसूयामो-वीर. ; नैव नाथाभ्यसूयामो-विज. ; नैनं नाथाभ्यसूयामः-विश्व. ।

सर्व्वेन्द्रियाप्यायनस्य किंवा तेनैव कृपया तादृशस्तुतौ प्रवर्तनस्याभिप्रायेण । नृपा इति तादृशस्तुत्या सर्व्वे नरा रक्षिता इति भावः ॥७॥ घोरायाः सदात्यन्तदुःखावलीप्रदानेन भयानकायाः संसृतेः पाहि । कुतः ? प्रपन्नान् शरणागतान्; तदपि कुतः ? निर्व्विषण्णान् विविधसंसारदुःखभोगेनार्तान् विषयभोगेभ्यो विरक्तानिति वा । ननु तर्हि तदर्थमन्यं देवं प्रार्थयध्वमिति चेत्तत्राहुः-देवदेवेश ! हे श्रीब्रह्मादि-प्रभो ! इति परमेश्वरत्वेन त्वमेव तत्र योग्यो न त्वन्य इति भावः । विशेषतश्च दीनवात्सल्यादित्याहुः-प्रपन्नानां दुःखेन शरणागतानां सतामार्तिहरेति; किञ्च, हे अव्ययेति सर्वशक्तिपरिपूर्णत्वादिति; किञ्च हे कृष्णेति तत्रापि निजाशेषभगवत्ताप्रकटनादिति भावः । यद्वा, प्रपत्तौ हेतवः-देवेत्यादयः ॥८॥ हे नाथेति अधुना त्वया सनाथाः सन्त इति भावः । राज्याच्च्युतिरेवानुग्रहः, हे मधुसूदनेति आदिमहादैत्यो मधुरपि त्वया हतः, अयं को नाम वराकोऽस्य वधेन को वा तव महिमा ? महिमा तु दीनानुग्रह एवेति भावः । श्लेषेण मधुवत् तुच्छविषयसुखं सूदयतीति तथाभूतेति राज्याच्च्यावनं युक्तमेवेति, तच्च त्वत्प्रभावादेव, न त्वन्यथा कथञ्चिदित्याशयेनाहुः-विभो ! हे सर्व्वं कर्तुं समर्थेति ॥९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

रम्भन्तं परिरम्भं कुर्वन्तम् ॥६-१०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

पिबन्त इवेत्यादीनां हरेः पादयोः प्रणेमुरित्युत्तरेणान्वयः चेतसा रम्भन्त इव परिरम्भमाणा इव हरन्त इवेति पाठान्तरम् इत्थं तेषां भगवति प्रेमातिशयः प्रदर्शितः ॥६॥ कृष्णसन्दर्शनाद्य आह्लादस्तेन ध्वस्तः संरोधनश्रमो येङ्गं ते नृपा बद्धाञ्जलयः प्रशशंसुस्तुष्टुवुः ॥७॥ प्रशंसामेवाह-नमस्त इति नवभिः । देवानां देवो ब्रह्मा तस्यापीश ! अनेन परत्वमुक्तं प्रपन्नार्तिहरेत्यनेन वात्सल्यं हे अव्यय ! विकाररहितेत्यनेन रागद्वेषादिराहित्यं समत्वं सर्वसर्वभूतसुहृत्त्वं च कृष्णेत्यनेन भक्तानां सुखापादनायावतीर्णत्वं प्रपन्नान्नः पाहीत्यनेन गोसृत्ववरणं ननु भवन्तो बन्धाद्विमोचिताः सुख्यन्तु किमर्थमधुना मां प्रपद्यन्त इत्यत आत्मनो विशिंषन्ति, घोरसंसृतेः घोरायाः संसृतेर्निर्विण्णानतः संसृतेरपि भवान् पात्वित्येतदर्थं प्रपन्ना इत्यर्थः ॥८॥ ननु, भवन्तो जरासन्धासूयाविष्टाः विषयभोगलालसाश्च कथं संसृतेर्निर्विण्णा इत्याशङ्क्याधुना न वयं तथाभूताः इत्याहुः नैनमित्यष्टभिः । हे नाथ ! हे मधुसूदन ! एनं मागधं नाभ्यसूयामः अस्मिन् दोषान्नाविष्कुर्मः किन्तु गुणानेवेति भावः । कुत इत्यत आहुः-अनुग्रह इति । हे विभो ! यद्यस्माद्राज्ञामस्माकं राज्याच्च्युतिः भवताऽनुग्रहः जरासन्धमुखेन भवता कारितोऽनुग्रहः एवेत्यर्थः ॥९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

निवीतं पर्यासितम् ॥५॥ चेतसा आलिङ्गनार्थमीहन्तः चेष्टमाना इव ॥६-९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

रम्भन्तः परिरम्भमाणाः ॥६-७॥ देवदेवेशेति पारमैश्वर्य्यम् । प्रपन्नेति भक्तवात्सल्यम् अव्ययेति कूटस्थत्वं चोक्तम् ॥८॥ नानुसूयामः एनम् अनु लक्षीकृत्य न दोषानारोपयामः । अकारलोप एनादेशश्चार्षः । यत् यतो मागधादेव राज्ञामस्माकं राज्यच्च्युतिः यतश्च राज्यच्युतेर्भवतोऽनुग्रह इति ॥९॥

गूढार्थदीपिनी

कथम्भूताः । कृष्णसन्दर्शनाह्लादेन ध्वस्तो निवृत्तः संरोधखेदो येषां ते । गीर्भिः वचोभिः प्रशशंसुः ॥६॥ संरोधात् रक्षितानस्मान् घोरायाः संसृतेः संसारादपि निर्विण्णान् खिन्नान् पाहि । प्रपन्नानां शरणागतानामार्तिं हरन्तीतितत्सम्बुद्धौ ॥७॥ हे नाथ एनं मागधं जरासन्धं न अन्वसूयामः दोषदृष्ट्या न पश्यामः । कुतः । यत् यस्मात् अस्माकं राज्यच्युतिरिति भवतोऽनुग्रह एव जातः ॥८॥ राज्यम् ऐश्वर्यं च ताभ्यां मदेन उन्नद्धः उच्छृङ्खलो नृपः अनित्या अपि सम्पदः अचलाः शाश्वतीः मन्यते ॥९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

संरोधान्मोचिताः नतिपूर्वकं संसारादपि मोक्षं प्रार्थयन्ते नम इति प्रपन्नान् त्वां शरणं गतान् निर्विण्णान् ऐहिकामुष्मिकपदार्थेभ्यो विरक्तान् अतः घोरायाः संसृतेः पाहि मोचय ॥८॥ अथ सर्वतो निर्विण्णत्वं मोक्षाधिकारित्वं चात्मात आविष्कुर्वन्ति अथो इति षड्भिः । अनेन राज्ञामस्माकं राज्यच्युतिः कृता यत् येन निमित्तेन भवतोऽयमनुग्रहः प्रथमं जरासन्धकृता राज्यप्रच्युतिः तन्निमित्तास्मत्प्रपन्नता तन्निमित्तोऽनुग्रह इत्यर्थः । अतः एनं परमोपकारकं न अनुसूयामः अकारलोप आर्षः । अन्वसूयामः एवं दोषदृष्ट्या न पश्याम इत्यर्थः ॥९॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

चेतसेहन्त ईहमानास्तत्र ध्यातुमिच्छन्त्यः । प्रणेमुरित्यत्र पूर्वत्र च सम्बन्ध्यते । हतपाप्मानो मूर्धभिर्हरेः पादयोः प्रणेमुः ॥६॥ क्लमस्तन्द्री प्राञ्जलयो नृपा गीर्भिः प्रशशंसुः । तत्प्रेरणयैवायाताभिर्गीर्भिरिति बोधयितुं हृषीकेशमित्युक्तिः । षडशीतिः समानीताशेषराजश्चतुर्दशेति सभापर्ववचनं तु मूधाभिषिक्तं नृपतिमिति पूर्वोक्तिबलात्प्रधानपुरुषमिति न विरुणद्धि । बाहुवत्प्रादिचतुष्टयं च ज्ञेयम् ॥७॥ अभिवन्दनपूर्वकं स्वाभीष्टं कृष्णं प्रति शंसन्ति ॥ नम इति । इदं च मोचनं जातमन्यच्च त्वयाऽवश्यं कार्यमित्यपि विज्ञापयन्ति ॥ घोरसंसृतेर्निर्विण्णान्प्रपन्नान्नः पाहीति ॥८॥ माधव मागधोऽपि नागस्कृदस्माकमिति तत्कृतोपकृतिरियमपदेशेनेतीशं प्रति वदन्ति ॥ नेति । हे मधुसूदन । मागधं वयं नाभ्यसूयामस्तस्मै नासूयां कुर्मः । द्वितीयया प्रागसूयया विषय इदानीमेतद्धेतुत्वान्न सोऽसूयास्पदमिति द्योतयन्ति । भार्यामीर्ष्यति शिष्यं क्रुध्यतीति शब्दशक्तिप्रकाशिकोक्तेर्द्वितीया वा । यद्यस्माद्राज्ञां राज्यच्युतिर्भवतोऽनुग्रहस्तद्रूपिणी ॥९॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

गन्धानुभावार्थमाह–जिघ्रन्त इव नासाभ्यामिति । पूर्ववद्व्याख्येयं स्पर्शार्थमाह रम्भन्त इव बाहुभिरिति । रम्भणमालिङ्गनं परिरम्भ इति यावत् अत्र बहुवचनं नानाविधस्पर्शग्रहणार्थमवयवगतमभिप्रेतं चतुर्भुजत्वलक्षणसारूप्यदानं वा बोधयति एवं लौकिकभावेन भगवन्तमात्मसात्कृत्वा ततस्तृप्ताः सन्तः क्लेशनाशे ज्ञानोदये विदितभग[illegible]र्याः नमो नम इत्येतावत् सदुपशिक्षितमिति शास्त्रानुसारेण कर्तव्यान्तराभावात् स्नेहपूर्वकं नमस्कारं कृतवन्त इत्याह–प्रणेमुरिति । प्रशब्देन स्नेहं बोधयति नमोनम इति वीप्सया स एवाभिप्रेत इति नन्वेतादृशी बुद्धिः कथमेतेषां सञ्जाता तादृशा एवेति न वक्तव्यं निरुद्धत्वादित्याशङ्क्याह–हतपाप्मान इति । दर्शनेन भोगस्मरणाभ्यां च त्रिविधमपि पापं नष्टं ततः शुद्धाः सन्तः स्वस्य ज्ञानरूपमात्मानं परब्रह्मण्यक्षरे भगवच्चरणारविन्दे योजयन्त इवान्तर्याम्यवतारभेदेनोभयत्राप्यन्तर्बहिः सायुज्यार्थं पादयोः मूर्द्धभिरित्युक्तं नृपा इति विचक्षणाः अनेनैव राज्यभोगार्थभावः सूचितः ॥६॥ ननु क्लेशाभावार्थं कथं नमस्कृता इत्याशङ्क्याह–कृष्णसन्दर्शनाह्लादध्वस्तसंरोधनक्लमा इति । सदानन्दस्यान्तःप्रवेशरूपेण दर्शनेन जातानन्देन सूर्योदये तम इव ध्वस्तसंरोधनग्लानिर्येषाम् एवं सर्वभावेन सिद्धसमस्तपुरुषार्थाः एतादृशस्थितिदार्ढ्यार्थं भगवत्प्रेरणयैव भगवत्सन्तोषार्थं भगवत्स्तोत्रं कृतवत् इत्याह–प्रशशंसुरिति । भगवत्प्रेरिता वाक् यथासुखं तं स्तौति तेषां न कापि चिन्तेति बोधयति हृषीकेशमिति प्राञ्जलय इति [illegible]तशरीरसाधनतानीति ज्ञानार्थमाह–नृपा इति । सम्बोधनपक्षेऽपि तथोचितत्वं बोधयति ॥७॥

सगुणास्ते महात्मानो गुणातीतं हरिं मुदा । नवभिः श्लोकयामासुर्निर्गुणत्वाय सर्वशः ॥

प्रार्थना मत्सराभावो गतराज्यानुमोदनम् । युक्तिस्तत्र स्वदोषोक्तिः स्वराज्यस्याभिनन्दनम् ॥

वैराग्यमुपदेशस्य प्रार्थना स्वाधिकारिता । क्रमान्निरूपिता ह्यर्था यतस्तान् सुष्ठ्वबोधयत् ॥

आदौ प्रार्थयितुं नमस्यन्ति–नमस्त इति । तुभ्यं नमः प्रार्थितदानसामर्थ्यार्थमाह–देवदेवेश इति । देवानामपि देवाः कालादयस्तेषामपि नियन्तेति विद्यमानेऽपि सामर्थ्ये परदुःखप्रहाणेच्छामृग्यन्त इति तामाह प्रपन्नार्तिहरेति अनुभवसिद्धश्चायमर्थः भक्तार्थं व्यावृत्तावपि भगवतो न काचित् क्षतिरित्याह–अव्ययेति । प्रपन्नानामेवार्तिं हरतीति तस्य स्वभावमुक्त्वा स्वस्य प्रपत्तिमाहुः प्रपन्नान् पाहि नः कृष्णेति रक्षणस्थानं निर्दिशन्त इत्याहुः निर्विण्णा घोरसंसृतेरिति । घोरत्वमनुभूतमेव जन्ममरणपरम्परा संसृतिः ॥८॥ एवं पालनं प्रार्थयित्वा पूर्वं भगवता कृतं मोचनं लौकिकं चेत् फलत्वेन मन्यन्ते तदा दुःखहारिवत्सुखमपि भगवान्

लौकिकमेव दास्यतीति तन्निषेधार्थं दुःखदातरि मात्सर्याभावामाहुः-नैनं नाथानुसूयाम इति । एनं हतं पातितं जरासन्धं ननु त्वदर्थमेवायं मारितः कथमेव मुच्यत इत्याशङ्कायामाहुः हे नाथेति । नाथत्वादेव कृतं न त्वस्मत्प्रेरणयेत्यर्थः । असूया दोषारोपेण दर्शनं निर्दुष्टानस्मान् दोषयुक्ताननुकरोति दुष्टोऽयमिति किञ्च मागधोऽयं देशदोषादस्याप्येवं बुद्धिः तव च नायं पराक्रमः यतस्त्वं मधुसूदनः असूयाभावे हेतुं स्पष्टयन्ति अनुग्रहो यद्भवत इति । राज्ञां राज्यच्युतिः रन्निपातनिवृत्तिर्भवतोऽनुग्रहः न ह्यनुग्रहः सम्पादकः असूयार्हो भवति नन्विष्टसाधनं राज्यं तस्मिन् गते कथमिष्टं भविष्यतीत्याशङ्कायामाहुः विभोरिति ॥९॥

सुबोधिनीसारः

कृष्णस्य सन्दर्शनेनाह्लादो हर्षस्तेन ध्वस्तो नष्टः संरोधनस्य क्लमो ग्लानिर्येषां ते नृपाः कृताञ्जलयो गीर्भिर्वाणीभिर्हृषीकेशं श्रीकृष्णं प्रशशंसुः तुष्टुवुः ॥७॥ हे देवदेवेश हे प्रपन्नानामार्तिहर हे अव्यय ते तुभ्यं नमः हे कृष्ण निर्विण्णान् उदासीनान् भोगेष्वनासक्तान् प्रपन्नान् शरणागतान् नोऽस्मान् घोरायाः संसृतेः संसारात्त्वं पाहि ॥८॥ हे नाथ हे मधुसूदन हे विभो एनं मागधं जरासन्धं नानुसूयामो न निन्दयामो वयम् । तत्र हेतुः । राज्ञां राज्याच्च्युतिर्भ्रंश इति यत् यः सोऽनुग्रहो भवतस्तव ॥९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

रम्भन्त इवालिङ्गन्त इव । निरन्तरध्यातभगवद्दर्शनादिना हतपाप्मानः ॥६॥ कृष्णस्य सन्दर्शनादेव यः आह्लादः तेन ध्वस्तो निरस्तः संरोधनजः क्लमः खेदो येषां ते नृपा बद्धाञ्जलयः सन्तो हृषीकेशमन्तर्यामिणं कृष्णं गीर्भिः प्रशशंसुः तुष्टुवुः ॥७॥ प्रशंसामेवाह-नम इति नवभिः । सर्वोत्तमत्वं सूचयन्तः सम्बोधयन्ति-देवानां देवो ब्रह्मा तस्यापीशेति । भक्तवात्सल्यं सूचयन्तः सम्बोधयन्ति-प्रपन्नार्तिहरेति । रागद्वेषादिविकारराहित्यं सूचयन्तः सम्बोधयन्ति-अव्ययेति । सदानन्दमूर्तित्वं सूचयन्तो नमस्यन्ति-हे कृष्ण ! ते तुभ्यं नमः । सन्निरोधाद्विमोचितानस्मान् घोरायाः संसृतेरपि पाहि मोचय । तत्र हेतुमाह-निर्विण्णानिति । दुःखानुभवेन सर्वतो विरक्तानित्यर्थः । 'मुक्तिसाधनमस्माकमस्ति' इत्याहुः-प्रपन्नानिति ॥८॥ ननु 'भवन्तो जरासन्धासूयाविष्टाः, अतः कथं मोक्षाधिकारिणः' तत्राहुः-नैनमिति । अस्मत्प्रार्थनां तु मोचनमात्र एव, न त्वेतस्य हननेऽपि । तथा च यथा स्वामित्वादेव वात्सल्येनैतद्धननं त्वया कारितं, तथा संसारदुःखादप्यस्मान् मोचय इत्याशयेन सम्बोधयन्ति-नाथेति । सामर्थ्यं तु तवास्त्येव इत्याशयेन पुनः सम्बोधयन्ति-विभो इति । प्रसिद्धं च तव सामर्थ्यं, ब्रह्मणोऽपि दुर्जयत्वेन प्रसिद्धस्यादिदैत्यस्य मधोरपि हननात् इत्याशयेन पुनः सम्बोधयन्ति-मधुसूदनेति । वयं त्वेनं मागधं नान्वसूयामः अस्मिन् दोषान्नाविष्कुर्मः । तत्र हेतुमाहुः-अनुग्रह इति । यत् यस्मात् जरासन्धात् राज्ञामस्माकं राज्याच्च्युतिः भ्रंशो जातस्ततश्च भवतोऽनुग्रहो जात इत्यर्थः । ततश्च तेन महानुपकार एव कृतः, न कश्चिदपकार इत्याशयः ॥९॥

अन्वितार्थप्रकाशिका

कृष्णेति ॥ कृष्णस्य सन्दर्शनादेव यः आह्लादः तेन ध्वस्तो निरस्तः संरोधजनितः क्लमः खेदो येषां ते नृपा बद्धाञ्जलयः सन्तो हृषीकेशं गीर्भिः प्रशशंसुः ॥६॥ नम इति ॥ हे देवदेवेशेत्याद्याः सम्बुद्धयः ते तुभ्यं नमः । प्रपन्नान् निर्विण्णान् दुःखानुभवेन सर्वतो विरक्तान् सन्निरोधाद्विमोचितानस्मान् घोरायाः संसृतेरपि पाहि मोचय ॥७॥ नेति ॥ हे नाथ ! हे मधुसूदन ! हे विभो ! वयं त्वेनं मागधम् अनुलक्षीकृत्य नासूयामः अस्मिन् राज्यापहारकत्वादिदोषान्नारोपयामः । एनादेश आर्षः । यद्यस्मात् राज्ञामस्माकं राज्याच्च्युतिः भ्रंशो जातस्ततश्च भवतोऽनुग्रहो जातः ॥८॥ राज्येति ॥ राज्ये यदैश्वर्यं तेन यः ईश्वरोऽहं यथेष्टं व्यवहरिष्यामीत्याकारको मदस्तेनोन्नद्धः उच्छृङ्खलः नृपः श्रेयो न विन्दते । किन्तु त्वन्मायामोहितः सन्ननित्या चञ्चलाः अपि सम्पदोऽचलाः शाश्वतीर्मन्यते ॥९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

रम्भन्तः आलिङ्गित इव ॥६॥ कृष्णसन्दर्शनेन य आह्लाद आनन्दस्तेन ध्वस्ता नष्टाः संरोधनस्य क्लमाः येषां ते ॥७॥ एवं बन्धनमुक्तास्ते राजानः संसृतिमोचनं प्रार्थयन्ते नम इति ॥ घोरसंसृतेः ॥ क्लेशबहुलसंसारात् निर्विण्णान् उदासीनान् ॥८॥ ननु भवन्तो निर्विण्णाश्चेत् तर्हि कथं मागधायेर्ष्यन्तीति चेत् तत्राहुः नैनमित्यष्टभिः ॥ हे नाथ ! एनं मागधं नानुसूयामो नाऽन्वसूयामः ॥ अलोप आर्षः ॥ यद्यतो राज्यात् च्युतिः ॥ पतनं या सैव भवतः अनुग्रहः ॥९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्णेति ॥ ततः कृष्णसंदर्शनाद्य आह्लादस्तेन ध्वस्तो नष्टः संरोधनस्य क्लमः श्रमो येषां ते, नृपाः, प्राञ्जलयः सन्तः, गीर्भिः हृषीकेशं प्रशशंसुः ॥६॥ प्रशंसामेवाह नवभिः ॥ नमस्त इति ॥ देवानां देवो ब्रह्मा तस्यापीशः तत्सम्बोधनं हे देवदेवेश, अनेन परत्वमुक्तम् । प्रपन्नाः शरणागतास्तेषामार्तिस्तां हरति तत्सम्बोधनं हे प्रपन्नार्तिहर, अनेन वात्सल्यमुक्तम् । हे अव्यय विकाररहित, अनेन रागद्वेषादिरहितत्वं समत्वं सर्वभूतसुहृत्त्वं चोक्तम् । हे कृष्ण, अनेन भक्तानां सुखापादनायावतीर्णत्वमुक्तम् । घोरसंसृतेः, निर्विण्णान्, प्रपन्नांस्त्वच्छरणं प्राप्तान्, नोऽस्मान्, पाहि, ते नमः । अनेन गोप्तृत्ववरणं सूचितम् ॥७॥ ननु भवन्तो जरासन्धासूयाविष्टाः इहामुत्र च विषयभोगलालसाश्च कथं संसृतेर्मोचनीयाः, इत्याशङ्क्य, सम्प्रति वयं न तथाभूताः, इत्याहुरष्टभिः ॥ नैनमिति ॥ हे नाथ, हे मधुसूदन, वयम् एनं, न अनुसूयामः न अभ्यसूयामः । अस्मिन् दोषान्नाविष्कुर्मः । किं तु गुणानेवेति भावः । हे विभो, यद्यस्मात्, राज्ञामस्माकं, राज्यच्युतिः राज्यभ्रंशः, भवता अनुग्रहः कृतः । जरासन्धमुखेन भवता कारितोऽनुग्रह एवेत्यर्थः ॥८॥ कथं राज्यच्युतावनुग्रहरूपता इत्यत आहुः ॥ राज्येति ॥ राज्यैश्वर्याभ्यां यो मदस्तेनोन्नद्धः उच्छृङ्खलः नृपः, श्रेयः, न विन्दते नैव लभते । कुतः । त्वन्मायामोहितः सः, अनित्याश्चला अपि सम्पदः भोग्यभोगोपकरणादिसमृद्धीः, अचलाः शाश्वतीः, मन्यते । यद्वा सम्पदः नित्याः, अत एव अचलाः, मन्यते ॥९॥

कृष्णप्रिया

भगवान श्रीकष्णचन्द्रके दर्शनसे बन्धन मुक्त नृपतियोंको अत्यंत अधिक आनन्द कि अब जो कैदमें रहनेका लेश अल्पांश में भी न रह पाया । वे नृपलोग करबद्ध होकर अति विनम्र वाणी से भगवान श्रीकृष्णचन्द्रजी की स्तुति करने लगे ॥७॥ राजानः उचुः - शरणागतों समस्त भय और कष्टोंको हरने वाले देवदेनेश सच्चिदानन्द स्वरुप नाथ कारागृहसे तो हमको मुक्त कर ही दिया लेकिन अब जन्म मरण नामका घोर संसार चक्रसे भी छुडा दीजिये; क्योंकि हम संसारमें कष्टका कटु अनुभव करके उससे उब गये है । पुनः आपके शरणमें आये है । हेनाथ अब आप हमारी रक्षा कीजिये ॥८॥ हे नाथ ? हे मधुसूदन ? मगधनाथजरासन्धको असूया करते नहीं लेकिन आपका असाधारण अनुग्रह मानते है कि आपकी कृपासे जो कभी न छुटनेवाली राज्यासक्ति अनायास इनके माध्यमसे छुट गई ॥९॥

राज्यैश्वर्यमदोन्नद्धो न श्रेयो विन्दते नृपः । त्वन्मायामोहितोऽनित्या मन्यते सम्पदोऽचलाः ॥१०॥
मृगतृष्णां यथा बाला मन्यन्त उदकाशयम् । एवं वैकारिकीं मायामयुक्ता वस्तु चक्षते ॥११॥
वयं पुरा श्रीमदनष्ट[1]बुद्धयो जिगीषयास्या इतरेतरस्पृधः ।
घ्नन्तः प्रजाः स्वा अतिनिर्घृणाः प्रभो मृत्युं [2]पुरस्त्वाविगणय्य दुर्मदाः ॥१२॥
त एव कृष्णाद्य गभीररंहसा दुरन्तवीर्येण विचालिताः[3] श्रियः ।
कालेन [4]तन्वा भवतोऽनुकम्पया विनष्टदर्पाश्चरणौ [5]स्मराम ते ॥१३॥

कर्दमक्षमा

राज्यैश्वर्यमदोन्नद्धः, त्वन्मायामोहितः, नृपः, अनित्याः, सम्पदः, अचलाः, मन्यते, अतः, श्रेयः, न, विन्दते ॥१०॥ बालाः, यथा, मृगतृष्णाम्, उदकाशयम्, मन्यन्ते, एवम्, अयुक्ताः, वैकारिकीम्, मायाम्, वस्तु, चक्षते ॥११॥ पुरा, वयम्, श्रीमदनष्टबुद्धयः, अस्याः, जिगीषया, इतरेतरस्पृधः, दुर्मदाः, अतिनिर्घृणाः, मृत्युम्, अविगणय्य, स्वाः, प्रजाः, घ्नन्तः, हे कृष्ण ! अद्य, गभीररंहसा, दुरन्तवीर्येण, कालेन, भवतः, तन्वा, श्रियः, विचालिताः, विनष्टदर्पाः, भवतः, चरणौ, ते, अनुकम्पया, स्मराम ॥१२-१३॥

---

१. नष्टदृष्टयो-श्रीधर. वंशी. ; नष्टबुध्दयो-विज. । २. पुरस्तादगणय्य-वीर. ; परं त्वामगणय्य-विज. । ३. विचालितश्रियः-वीर. । ४. तद्वै-विज. । ५. नमाम ते-वीर. ; स्मरामहे-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतदेव व्यतिरेकेणोपपादयन्ति-राज्यैश्वर्येति। राज्यैश्वर्याभ्यां मदस्तेनोन्नद्ध उच्छृङ्खलो नित्य अचलाश्च सम्पदो मन्यते यद्वा अनित्याः सतीरचलाः शाश्वतीर्मन्यते ॥१०॥ किञ्च अवस्तु सद्वस्तुतया पश्यन्तीत्याहुः-मृगतृष्णामिति । वैकारिकीं सृष्ट्यादिविकारापन्नाम् अयुक्ता अविवेकिनः ॥११॥ राज्यस्य योगवियोगयोरनर्थार्थावहत्वमस्मास्वेव दृष्टमित्याहुः वयमिति द्वाभ्याम् । श्रीमदेन नष्टा दृष्टिर्येषां ते अस्याः पृथिव्याः इतरेतरस्पृधः परस्परं स्पर्धमानाः पुरः पुरतः त्वा त्वां मृत्युमविगणय्य पुरा ये दुर्मदा वयम् ॥१२॥ हे कृष्ण। त एव वयमद्य विनष्टदर्पास्ते चरणौ स्मरामः स्मर्तुमाशास्महे कथम्भूताः भवतस्तन्वा मूर्त्या कालेन श्रियो विचालिता विभ्रंशिताः अतो राज्यच्युतिर्भवदनुग्रह एवेत्यर्थः ॥१३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतदेवानुग्रहणमेव। व्यतिरेकेण पूर्वोक्तार्थवैपरीत्येन। नित्याचलयोरर्थाभेदं मत्वार्थान्तरमाह-यद्वेति ॥१०॥ इत्थं ज्ञातारो मूर्खा एवेत्याह-किञ्चेति । सत् भवत् । मृगतृष्णामम्बरप्रदेशसंसृष्टदिवाकरकरनिकरम् । उदकाशयं जलपूरम् । मायां महिमानं सम्पल्लक्षणम् । वस्तु प्रतिहतिरहितं नित्यम् । चक्षते पश्यन्ति । "गोअश्वेत्यादिमहिमेत्याचक्षते" इति श्रुतेः ॥११॥ स्वदृष्ट्यन्तेनोक्तमर्थमाहुः-राज्यस्य योगेत्यादिना। अतिनिर्घृणा अतिनिर्दयाः ॥१२॥ स्मरामेत्याशिषि लोट्। यतो राज्यमनर्थहेतुरतो हेतोः। इत्यर्थ इति- "मा राज्यश्रीरभूत्पुंसः श्रुयस्कामस्य मानद" इत्यादिवक्ष्यमाणत्वादिति भावः ॥१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रेयः तद्भक्त्यादिरूपं फलं नृपो न विन्दत एव अन्यस्तु कथञ्चिल्लभेतापीत्यर्थः । यद्वा नृपो नरश्रेष्ठोऽपि न विन्दते तत्र हेतुः राज्येति यतः धनादिसम्पत्तीरचला मन्यते ननु प्रत्यक्षादिप्रमाणैरनित्याश्चापि कुतः स्थिरा मन्यते तत्राहुस्त्वदिति अयमेव त्वन्मायाप्रभावः इति भावः ॥१०॥ बाला निर्बुद्धयो हरिणादयः वैकारिकीं विकाराः शब्दादिविषयाः तत्तद्रूपेण परिणतामित्यर्थः। वस्तुतः सत्यरूपायाः अर्थक्रियाकारित्वादिना मृगतृष्णातो वैलक्षण्येऽपि असारांशत्वे दृष्टान्तोऽयम् ॥११॥ राज्यच्युतेरनुग्रहहेतुत्वेन वयमिति युग्मकम् स्वाः ज्ञातिवत् परिपाल्या अपि प्रजाः परस्परसम्मर्देन घ्नन्तः यतो अतिनिर्घृणा महानिर्दयाः पुर इत्यवश्यं भावित्वात् पित्रादिमरणदृष्ट्यानुभूयमानत्वाच्च पुरतो वर्तमानमपि मृत्युं कालरूपेण संहारकं त्वां प्रभोस्तव रूपत्वादेवासौ महाप्रभाव इति व्यञ्जयितुमाह-हे प्रभो इति । अतस्त्वत्तो रक्षणे कस्यापि शक्तिर्नास्तीति भावः । तथाप्यविगणय्य अनादृत्य अन्यत्तैः तत्र योगवियोगयोरनर्थार्थावहत्वमिति योगेनार्थावहत्वं वियोगेऽर्थावहत्वमित्येतत् द्वयं क्रमेण द्वाभ्यामाहेत्यर्थः ॥१२॥ तदतिक्रमे तु कस्यापि शक्तिर्नास्तीत्याहुः-गम्भीरं दुर्बोधं रंहः वेगो यस्य तेन सूक्ष्मत्वाद्दुर्बोधनिर्गमप्रवेशेनेत्यर्थः । तथा दुरन्तमप्रतिकार्य्यं वीर्य्यं शक्तिर्यस्य तेन यतो भगवतस्तन्वा शक्त्या भगवत इत्यस्योभयतोऽन्वयः अतस्तेन कृतं यत्तद्भवतैवेति तया च विचारतो भवत एवानुकम्पारूपेण हेतुना विनष्टदर्पाः सस्तयैव स्मराम किमर्थं तत्राहुः-कृष्ण! हे आत्मारामादीनां सर्वेन्द्रियाकर्षकत्वेन तन्नामन्त्रिति अ त्थम्भूतगुणत्वमेव महद्भिः सिद्धान्तितं वयं कथं तत्प्रयोजनं कथयेमेति भावः ॥१३॥●

सनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी●

पो न विन्दत एव, अन्यस्तु कश्चिल्लभेतापीत्यर्थः। यद्वा, नृपो नरश्रेष्ठोऽपि न विन्दते, तत्र हेतुः-राज्येति; यतः सम्पदो ध दिरम्पत्तीरचलाः स्थिरा मन्यते। ननु प्रत्यक्षाः प्रमाणैरनित्याश्चापि कुतः स्थिरा मन्यन्ते ? तत्राहुः-त्वदिति। अयमेव त्वन्मायाप्रभाव इ त भावः ॥१०॥ बाला निर्ब्बुद्धयो हरिणादयः, वैकारिकीं विकाराः शन्दादिविषयास्तद्रूपेण परिणतामित्यर्थः, वस्तुसत्यरूपाम् ॥११॥ स्वाः स्वीयत्वात् पुत्रवत् परिपाल्या अपि प्रजा घ्नन्तो धनसञ्चयार्थं युद्धार्थं वा अधिककरग्रहणादिना निपीडयन्तः, यतोऽतिनिर्घृणा महानिर्दयाः, पुरः, अवश्यम्भावित्वात्, पित्रादिदृष्टान्तेन साक्षादनुभूयमानत्वाच्च, पुरतो वर्तमानमपि मृत्युं कालरूपेण संहारकं त्वाम्। अत एव महाप्रभावमित्याह-हे प्रभो इति। अतस्त्वत्तो रक्षणे कस्यापि शक्तिर्नास्तीति भावः। तथाप्यविगणय्य अनादृत्य, अन्यत्तैर्व्याख्यातम्। तत्र चानर्थार्थावहत्वमिति लेख्ये अर्थपातो लेखकभ्रमाज्ज्ञेयः, वियोगेऽर्थावहत्वस्य निरन्तरपद्ये वक्ष्यमाणत्वादिति ॥१२॥ विशेषेण गिरिद्रोण्यां संरोधनादिना चालिताः, तदतिक्रमे तु कस्यापि शक्तिर्नास्तीत्याहुः-गभीरं गुरुतरमनन्तं च रंहो वेगो यस्य तेन, अतो दुरन्तमपरिच्छिन्नं वीर्य्यं शक्तिर्यस्य तेन, यतो भवतस्तन्वा, भवत इत्यस्योभयतोऽन्वयः। अतस्तेन

कृतं यत्तद्भवतैवेति भवत एवानुकम्पया कृत्वा विनष्टदर्पाः सन्तः यद्वा, एवं भवतोऽनुकम्पया हेतुना स्मराम। किमर्थम् ? तदाहुः, कृष्ण ! हे परमानन्दघनमूर्ते ! त्वच्चरणस्मरणस्यैव परमानन्दमयत्वात्तदेव हि प्रयोजनमिति भावः ॥१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वैकारिकीं मायां स्रक्चन्दनादिशब्दादिविकारात्मिकां प्रकृतिं वस्तु चक्षते प्रकृतिपरिणामरूपं भोग्यं नित्यं मन्यत इत्यर्थः ॥११॥ अस्याः भूमेः इतरेतरस्पृधः परस्परं स्पर्धमानाः नष्टबुद्धय इत्यर्थः ॥१२-१३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

कथं राज्यच्युतेरनुग्रहरूपतेत्यत आहुः-राज्येति। राज्यैश्वर्याभ्यां यो मदस्तेन उन्नद्ध उच्छृङ्खलः श्रेयो न विन्दते न लभते किन्तु तव मायया मोहितः अनित्याश्चलाः अपि सम्पदः भोग्यभोगोपकरणादिसमृद्धीरचलाः शाश्वतीर्मन्यते एवं मन्यमानोन्तः स्थावरतां यातीति भावः ॥१०॥ त्वन्मायामोहितः शाश्वतीर्मन्यत इत्येतदेव सदृष्टान्तमुपपादयन्ति-मृगतृष्णामिति। मृगतृष्णा मरीचिका तामुदकाशयं जलाश्रयं नदीतटाकादिरूपं मन्यन्ते तथाऽयुक्ताः अविवेकिनो नृपाः वैकारिकीं मायां स्रक्चन्दनादिविकारात्मिकां प्रकृतिं वस्तु चक्षते प्रकृतिपरिणामभोग्यं मन्यन्त इत्यर्थः। अतथाभूतायास्तथात्वावभासे दृष्टान्तः ॥११॥ तदेवं राज्यादियोगवियोगादनर्थावहत्वमुक्तं तदेतदस्मास्वेव दृष्टमित्याहुः-वयमिति द्वाभ्याम्। अस्या भूमेः जिगीषया परस्परं स्पर्द्धमानाः अतिनिर्घृणाः नितरां निष्कृपाः वयं पुरस्तात्पुरोवर्तिनमित्यर्थः। मृत्युमविगणय्य प्रजाः घ्नन्तः पुरा ये दुर्मदाः ॥१२॥ ते वयमद्य हे कृष्ण ! गम्भीरं रंहः वेगो यस्य दुरन्तमपारं वीर्यं प्रभावो यस्य तेन भवन्तः तन्वा शरीरभूतेन कालेन विचालिता भ्रंशिता श्रीर्येषां ते तथाभूताः भवतोऽनुकम्पया हेतुभूतया विनष्टो दर्पो येषां ते तव चरणौ निरतिशयपुरुषार्थभूतौ नमाम नतिपूर्वकं शरणं प्राप्ताः स्मेत्यर्थः ॥१३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

राज्यच्युतिः कथमनुग्रहोऽभूदित्यत्राह-राज्येति। कुतो न विन्दते इति तत्राह-त्वन्मायामोहिता इति। चलाः क्षणिकाः सम्पदो नित्याः शश्वद्रूपा मन्यन्ते यत्तस्मात् ॥१०॥ एतमर्थं निदर्शयति-मृगतृष्णामिति। मृगतृष्णाम् अम्बरप्रदेशसंसृष्टदिवाकरकरनिकरं दृष्ट्वा उदकाशयं जलाधारं जलपूरमित्यर्थः। एवमयुक्ता मनोयोगाकुशलाः अज्ञाः वैकारिकीं विकारोपेताम् अनित्यां मायां "गो अश्वमहिमेत्याचक्षते" इति श्रुतेर्महिमानं सम्पल्लक्षणं वस्तु प्रतिहतिरहितं नित्यं चक्षते पश्यन्ति ॥११॥ अस्याः जगत्याः ये वयं पुरः स्थितं मृत्युं त्वामगणय्य स्थिताः ॥१२॥ ते च वयं कालेन श्रियो विचालिता अभूम तत्तस्मात् भवतोऽनुकम्पया चरणौ स्मरामहे ॥१३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

राज्याच्च्युतेरनुग्रहहेतुत्वमुपपादयन्ति-राज्यैश्वर्येति त्रिभिः। उन्नद्धः उच्छृङ्खलः अनित्या अपि सम्पदः अचलाः शाश्वतीर्मन्यते ॥१०॥किञ्च राज्यादिसम्पदः खलु सम्पद एव न भवन्तीत्याहुः-मृगतृष्णामिति। विकाराः शब्दादयो विषयास्तेभ्य उद्भूतां भोगसम्पत्तिं मायां मायिकीम् अयुक्ता अविवेकिनः वस्तु चक्षते यथा मृगतृष्णायां तेज एव उदकं पश्यन्ति तथैव भोगसम्पत्तौ दुःखमेव सुखं पश्यन्तीत्यर्थः ॥११॥ अत्रोदाहरणान्यस्मदादय एवेत्याहुर्वयमिति। अस्याः पृथिव्याः इतरेतरस्पृधः परस्परं स्पर्द्धमानाः मृत्युं त्वां पुरः अग्रवर्तिनम् अविगणय्य पुरा ये वयं दुर्मदा आस्म त एव वयं अद्य इदानीं भवतस्तन्वा तनुरूपेण कालेन श्रियो विचालिता भ्रंशिताः सन्तः भवतोऽनुकम्पया प्राप्तया चरणौ स्मराम प्रार्थनायां लोट् स्मर्तुं कामयामहे। अतो राज्यच्युतिर्भवदनुग्रहहेतुरित्यनुभवामः ॥१२-१३॥

गूढार्थदीपिनी

बाला अज्ञा यथा मृगतृष्णां मरुमरीचिकाम् उदकाशयं सरोवरं मन्यन्ते। एवमयुक्ता अविवेकिनः वैकारीकीं विकारोत्पादिकां मायां भोगसम्पत्तिं वस्तु वस्तुत्वेन परमार्थत्वेन चक्षते पश्यन्तीत्यर्थः ॥१०॥ वयमिति युग्मम्। हे प्रभो ! पुरा राज्यकाले अस्या भूमेः विजिगीषया पुरो वर्तमानं मृत्युरूपं त्वामपि अविगणय्य तुच्छीकृत्य प्रजा घ्नन्तः करादिना पीडयन्तः ये वयं दुर्मदा मदोन्मत्ता जाताः हे कृष्ण ते एव वयमद्य कालेन विनष्टदर्पाः सन्तः ते चरणौ स्मराम स्मर्तुमाशास्महे इति द्वयोरन्वयः। आशिषि लोट्। घ्नन्त इत्यत्र हेतुः। अतिनिर्घृणाः अतिनिर्दयाः कुतः श्रीमदेति। तत्कुतः। रंहसा अलक्ष्यवेगेन कालेन श्रियो विचालिता पृथक् कृताः। दुरन्तमनन्तम् ॥११-१२॥ अत एव अथो अनन्तरं रुजां रोगाणां भुवा जन्मक्षेत्रेण देहेन उपासितव्यं सेव्यं मृगतृष्णासदृशं राज्यं न स्पृहयामहे प्रेत्य परलोके च सेव्यं क्रियाफलं स्वर्गादिभोगमपि न स्पृहयामहे। कथम्भूतम्। कर्णयोः रोचनं केवलं रुच्युत्पादकम्। शश्वत्पतिता प्रतिक्षणं क्षीयमाणेन देहेन ॥१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

राज्यैश्वर्याभ्यां यो मदस्तेनोन्नद्धः उच्छृङ्खलः विषयरूपाः सम्पदः अनित्या अपि अचला नित्या मन्यन्ते तदा स त्वत्प्रपन्नो न भवति अतः राज्यप्रच्युतिहेतुरयमस्माकं हितकृदिति भावः ॥१०॥ ननु अनित्यासु नित्यतां कुतो मन्यन्ते इत्यत्राज्ञानादित्याहुः मृगतृष्णां तेज आत्मिकामुदकाशयं मन्यन्ते यथा एवं वैकारिकीं प्रकृतिविकारसम्भूतां मायां शब्दादिविषयरूपाम् अयुक्ता आज्ञाः वस्तु चक्षते नित्यभोग्यं मन्यते ॥११॥ राज्ययोगस्यानिष्टहेतुत्वं तद्वियोगस्येष्टहेतुत्वमाहुः-वयमिति द्वाभ्याम्। अस्याः भूमेः पुरः पुरस्तात्त्वां मृत्युमविगणय्य पुरा ये दुर्मदाः ॥१२॥ ते एवाद्य विनष्टदर्पास्ते चरणौ स्मराम त्वत्कृपाफलभूता त्वच्चरणस्मृतिर्लब्धेति भावः। कथम्भूताः भवतस्तन्वा भवदधिष्ठितेन कालेन श्रियः राज्यश्रियः विचालिताः ॥१३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सा कथं कथय तत्तद्रूपिणीत्यतो निरूपयन्ति ॥ राज्येति। राज्यैश्वर्यमदेनोन्नद्धा नृपाः श्रेयो न विन्दते न लभन्ते। यद्वा श्रेयःकर्तृ न इति शेषः। तत्र विन्दत इति न मन्यन्त इत्यन्वयः। ये मन्यन्ते ताञ्छ्रेयो न विन्दत इति यत्तच्छब्दाध्याहारेणान्वयो वा। विन्दत इत्येकवचनाद्बिभ्यतो राज्यैश्वर्यमदोन्नद्ध इत्याद्येकवचनान्ततया पठतः परस्य क्रमातिक्रमभवान्वयास्फूर्तिश्चोपर्येव ज्ञायते। एवं मदो भवति तेषां कुत इत्यत आहुः ॥ त्वन्मायामोहित इति। साध्यान्तरं च दर्शयन्ति। चला अस्थिरा सम्पदो नित्या इति मन्यन्ते चेति ॥१०॥ स्वोक्तं दृष्टान्तप्रदर्शनेन दृढीकृत्य दार्ष्टान्तिके पर्यवसाययन्ति ॥ मृगतृष्णामिति। यथा बाला अज्ञा मृगतृष्णामातपफेनमुदकाशयं जलायशं मन्यन्ते। तया वैकारीकीं च विकारोपेतामत एवानित्यां मायां मयस्य सम्बन्धिनं मायामिव नश्वरतमां सम्पदमिति शेषः। वस्तुशाश्वतिकीं चक्षते पश्यन्ति। कुत इत्यत आहुः। अशोधं नावा गतम्। अयुक्ता अयोगकुशला इति ॥११॥ अन्य एवमित्यहमपि मन्ये न किल तथा भवन्त इत्यतो वदन्ति ॥ वयमिति। पुरा त्वद्दर्शनात्प्राक्। श्रीमदनष्टबुद्धयः श्रीमदेन नष्टाऽदर्शनं गता बुद्धिः सद्बुद्धिर्येषां ते तथा। अस्याः श्रियो जिहीर्षया हर्तुमिच्छयेतरेतरं स्पृद्येषां त इति ते। स्वा अपि प्रजा घ्नन्तो हरन्तः। तत्र तन्त्रं निर्घृणा दुर्मदा इति। बाधकाभाव एवमेव करणं गुणावहमित्यत आहुः ॥ प्रभविति। परमनतिक्रमणीयं मृत्युं त्वामगणय्य। अगणय्येति पुरेत्युक्तं किलेदानीं कथमित्यतोऽप्यनेनैव तद्दशां शंसति ॥ वयमिति। श्रीमन्तश्च तेऽनष्टबुद्धयश्चास्या बन्धकीभूतसम्पदो जिहीर्षया त्यागेच्छयेतरेतरस्पृधस्तदपेक्षया प्राग्वयं त्यजाम इतीतरेतरस्पर्धाः स्वा अपि प्रजा अपत्यादीन्घ्नन्तोऽत्यन्तबन्धुनिधनं त्याग एवेत्युक्तेस्त्यजन्तो निर्घृणास्तेषु घृणारहिताः पुरा यथा परं मृत्युमगणय्य दुर्मदा न तथेदानीमिति वा। त्वां विगणय्येति पाठः सरलः ॥१२॥ इदानीं दानवारिं हरिं प्रति स्वां संसारासारत्वमत्यतदनास्थामिव तदास्थां सूचयन्तः स्वस्थितिमधुनातनीं विज्ञापयन्ति ॥ त एवेति। हे कृष्णेत्यन्वयः। त एव प्राक् प्रमत्ता वयमद्य गभीररंहसा गभीरामितराशक्यं कुण्ठनमिति गभीरं रंहो यस्य तेन कालेन करणेन तथाऽनन्तवीर्येण कर्त्रा त्वया। अनन्तरस्तन्नामा विः पक्षी ईर्यः प्रेर्यो वाह इति यावत्। येन स तेन हे अनन्ताबद्ध। वीर्येणेति पूर्ववत्। श्रियो विचालिता भवतः संसृतेरपि तद्विचालनं जातप्रायं वै। भवत इत्यावृत्तमन्वेति। भवतोऽनुकम्पया विनष्टदर्पा गभीररंहसाऽनन्तवीर्येण कालेन श्रियो विचालिता भवतोऽनुकम्पया विनष्टदर्पा इति तत्तस्मात्। भवत इत्यत्राप्यन्वेति। तव चरणौ स्मराम इति वा। अन्तर्लीपिप्रोक्तं स्पष्टयन्ति ॥ त एवेति। आद्येति वा। हे आद्य

। आद्य इत्युपजीव्य इति गम्यतेऽवगम्यत इति तत्सम्बुद्धिः । चतुर्मुखान्तर्गतं वा । प्राग्दुरन्तवीर्येण कालेन श्रियो विचालिताः सम्पदो गता इत्यर्थः । इदानीं कालेऽरंहसा कृतकार्यतयाऽवेगेन भवतो न भीर्यत्ततः । शिष्टं पूर्ववत् ॥१३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

राज्यस्यानर्थहेतुत्वमाहुः-राज्ये यदैश्वर्यम् ईश्वरोऽहं यथासुखं करिष्यामीति यो मदः तेनोन्नद्धो मत्तः यतः स्वस्य श्रेयो धर्मादिकं तन्न जानाति कदापि न प्राप्नोति वा न च तस्य कामः दशा सेति धर्मादिकं नास्त्येवेति मन्तव्यं यतो नृपः प्रजारक्षाधर्मवान् तदपि न करोतीति तात्पर्यं नन्वर्थोऽपि श्रेयो भवति तत्सम्पादनं करोतीति कथमेवमुच्यत इत्यत आहुः-त्वन्मायामोहित इति । सत्यं सम्पदः श्रेयो भवति परं समूलाश्चेत् तासां मूलं धर्मादिः तदभावे अमूलाः सत्यः क्षणान्निवर्तन्ते एतादृशीस्सम्पदः भगवन्मायामोहितः नित्या एव मन्यते अचलाश्च अल्पनाशश्चलनं सर्वनाशोऽनित्यता तस्मान्मोहजनकत्वात् निर्मूलाः सम्पदः न समीचीनाः ॥१०॥ किञ्च सम्पदां सर्वथा दुष्टत्वं नास्ति किन्तु निर्मूलानामेवेति निरूप्य सर्वथा दुष्टत्वं दृष्टान्तेनाहुः-मृगतृष्णामिति । दृष्टिमात्रेण सम्पदात्वं वस्तुतस्त्वर्थशून्यत्वात् आपदात्वमेव यथा मरुमरीचिकायां जलबुद्धिः प्रत्युत ग्रीष्मे धावनं कारयन्ती अनर्थहेतुरेव तथापि बालाः विवेकशून्याः युक्त्या बाधितजलदेशेऽपि तां जलाशयमेव मन्यन्ते एवमयुक्तास्त्वच्चरणारविन्दयोगरहिताः वैकारिकीं नानाविकाररूपां बाधितार्थामपि मायां वस्तु चक्षते न ह्यात्मनि विकल्पे नानाविधत्वं वा भवति तथा विकारजातं वस्तुत्वेन मन्यमानः मायामोहित एव भवति ॥११॥ ननु, भ्रान्तानामेव सम्पदोऽनर्थहेतवः नः युष्माकमित्याशङ्कायामाहुः-वयं पुरेति । श्रीमदेन नष्टा बुद्धिर्येषां वयन्तु सुतरामेव पुरैव नष्टाः यतः अस्याः पृथिव्याः जिगीषया इतरेतरस्पृधो जाताः स्पर्धा ह्यात्मनो मुख्यो नाशहेतुः न केवलं समानशीलेषु स्पर्धैव दोषः । किन्तु तदीयाः प्रजाः अतिनिर्घृणाः सन्तो घ्नन्तो जाताः स्वा अपि प्रजाः दण्डादिभिः प्रभो इति सम्बोधनं तेषामप्रभुत्वं सूचयति ननु राज्यदानसमय एव भगवता राज्यस्थिताः सर्व एव तेभ्यो दत्ता इति स्वकीया यथासुखं कुर्वन्तु को दोष इति चेत्तत्राहुः-त्वां मृत्युं पुरस्थितमविगणय्येति । स हि मृत्युर्भगवान् किमयं करिष्यतीत्यग्रे निलीय तिष्ठति अन्यथा कृते मारयिष्यतीति ज्ञात्वापि तमवगणय्य स्थिताः एवं मतिविभ्रमे हेतुः दुर्मदा इति ॥१२॥ तर्हि भगवान् किमुपेक्षां कृतवान् मारितवान् वा इत्याशङ्कायामाहुः-त एवेति । कृष्णेति स्नेहात् संवादेन जातधाष्ट्र्यानां सम्बोधनम् अद्येति नैतत्परोक्षं किं जातमित्याकाङ्क्षायामाह-गम्भीरवीर्येण गभीररयेण कालेन श्रियः सकाशाद्विचालिताः कालस्य सामर्थ्ये तत्र द्वेषाभावे तु हेतुः भवतस्तन्वेति कालं वञ्चयितुं देशान्तरगमनं वारयति-गभीररंहसेति । प्रतीकारं वारयति दुरन्तवीर्येणेति ननु मम तन्वेति कथं निश्चितं तत्राहुः-यतो राज्यभ्रंशानन्तरं भवतोऽनुकम्पया विनष्टदर्पाः गतदोषास्सन्तः चरणौ स्मराम महान्तं गुणं प्राप्ताः यदि भगवानेव तथा न कुर्यात् तदा राज्यभ्रंशे सुतरामेव सद्बुद्धिर्न स्यात् भगवांस्त्वतिकृपालुः अनर्थात्त्याजयित्वा परमार्थे योजितवानिति कार्यानुरोधात् कालस्य तव शरीरत्वमध्यवसीयते ॥१३॥

श्रीसुबोधिनीसारः

राज्यैश्वर्यमदाभ्यामुन्नद्धः राज्यैश्वर्याभ्यां मदस्तेन तैर्वा उन्नद्ध उच्छृङ्खलो नृपो राजा तव मायया मोहितो नित्याः सम्पदोऽचला ध्रुवा मन्यते चला वा सम्पदो नित्या जानातीति वा ॥१०॥ यथा बाला मूर्खा मृगतृष्णां जलाश्रयं मन्यन्ते एवं वैकारिकीं विकारजातां मायामयुक्ता बहिर्मुखा अज्ञा वस्तु सत्यं चक्षते पश्यन्ति ॥११॥ पुरा पूर्वं श्रीमदेन नष्टा दृष्टिर्येषाम् अस्याः पृथिव्या जेतुमिच्छया इतरेतरस्पृधः मिथः स्पर्धमानाः स्वा आत्मीयाः प्रजा घ्नन्तः पुरोऽग्रं मृत्युं कालरूपं त्वा त्वामविगणय्य दुर्मदा अतिनिर्दयाः वयमास्म हे प्रभो ॥१२॥ ते एव वयमद्य इदानीं दुरन्तमपारं वीर्यं यस्य तेन गम्भीरवेगेन कालेन भवतस्तव तन्वा मूर्त्या श्रियः सम्पदो विचालिता विभ्रंशिता विनष्टो दर्पो गर्वो येषां ते तेऽनुकम्पया । कृपया चरणौ स्मराम ॥१३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

राज्यच्युतेः कथं मदनुग्रहहेतुत्वम् इत्यपेक्षायां राज्यस्य तत्प्रतिबन्धकत्वात् प्रतिबन्धकाभावस्य हेतुत्वप्रसिद्धेः इत्याशयेनाहुः-राज्येति । राज्ये यदैश्वर्यं तेन यः ईश्वरोऽहं यथेष्टं व्यवहरिष्यामि इत्याकारको मदस्तेनोन्नद्धः उच्छृङ्खलः नृपः श्रेयो न विन्दते परमफलमोक्षहेतुभूतं त्वच्चरणस्मरणनमस्कारादि न लभते । किन्तु त्वन्मायामोहितः सन्ननित्याः चञ्चलाः अपि सम्पदो भोग्यभोगोपकरणादिसमृद्धीरचलाः शाश्वतीर्मन्यते ॥१०॥ एतदेव सदृष्टान्तमुपपादयन्ति-मृगतृष्णामिति । बाला अज्ञा यथा मृगतृष्णां

मरीचिकां उदकाशयं नदीतटाकादिकं मन्यन्ते एवमयुक्तास्त्वत्सम्बन्धरहिता अविवेकिनो वैकारिकीं स्रक्चन्दनवनितादिनानाविकाररूपेण परिणतां मायां प्रकृतिं वस्तु चक्षते चरमपुरुषार्थतया पश्यन्तीत्यर्थः ॥११॥ राज्यस्य योगवियोगयोरनर्थार्थावहत्वमस्मास्वेव दृष्टम् इत्याहुः-वयमिति द्वाभ्याम् । प्राणिबन्धमोक्षयोस्तवैव सामर्थ्यमस्ति, सदानन्दरूपे नित्यं प्रतिष्ठितत्वात् इति सम्बोधनद्वयेन सूचयन्ति-हे प्रभो इति । हे कृष्ण ! ये वयं पुरा राज्यस्थित्यवस्थायां स्वाः स्वकीयाः प्रजाः घ्नन्तः युद्धार्थं प्रयुज्य धनाद्यर्थं वा प्रपीड्य नाशयन्तः अतिनिर्घृणाः अतिभयङ्करस्वभावा अभवाम । तत्र हेतुमाहुः-अस्याः भूमेर्जिगीषया इतरेतरस्पृधः परस्परं स्पर्धमानाः इति । यथा पुरस्थितं मृत्युरूपं त्वा त्वामविगणय्य दुर्मदा अतिगर्विता अभवाम । तत्र हेतुमाहुः-श्रीमदेन नष्टा दृष्टिर्बुद्धिर्येषां ते इति ॥१२॥ त एवाद्य विनष्टदर्पा गतगर्वाः भवतोऽनुकम्पया ते तव चरणौ स्मरामेति द्वयोरन्वयः । गतगर्वत्वे हेतुमाहुः-गभीरम् अलक्षितं रंहो वेगो यस्य तेन तथा दुरन्तं वीर्यं पराक्रमो यस्य तेन भवतस्तन्वा मूर्तिविशेषेण कालेन श्रियः सकाशाच्चालिता भ्रंशिता इति ॥१३॥

अन्वितार्थप्रकाशिका

मृगतृष्णामिति ॥ बालाः अज्ञाः यथा मृगतृष्णां मरीचिकाम् उदकाशयं नदीतटाकादिकं मन्यन्ते । एवमयुक्तास्त्वत्सम्बन्धरहिता अविवेकिनो वैकारिकीं विकाराः शब्दादिविषयास्तेभ्य उद्भूतां भोगसम्पदं मायां मायिकीमपि वस्तु चक्षते परमपुरुषार्थतया पश्यन्ति ॥१०॥ वयमिति युग्मम् ॥ हे प्रभो ! हे कृष्ण ! अस्या भूमेर्जिगीषया इतरेतरस्पृधः परस्परं स्पर्धमानाः । स्पर्द्धतेः स्पृधभाव आर्षः । श्रीमदेन नष्टा दृष्टिर्येषां ते मृत्युरूपं त्वा त्वामविगणय्य दुर्मदा ये वयं पुरा राज्यस्थित्यवस्थायां स्वाः स्वकीयाः प्रजा घ्नन्तः युद्धार्थं प्रयुज्य धनाद्यर्थं वा प्रपीड्य नाशयन्तः अतिनिर्घृणाः निर्दयाः अभवाम । त एवाद्य गभीरम् अलक्षितं रंहो वेगो यस्य तेन तथा दुरन्तं वीर्यं पराक्रमो यस्य तेन भवतस्तन्वा मूर्तिविशेषेण कालेन श्रियः सकाशाच्चालिता भ्रंशिताः अतो नष्टदर्पाः गतगर्वाः भवतोऽनुकम्पया ते तव चरणौ स्मराम स्मर्तुमाशास्महे । प्रार्थने लोट् । अतो राज्यच्युतिभवदनुग्रह एवेत्यर्थः ॥११-१२॥ अथो इति ॥ अथो तस्मात् मृगतृष्णिर्मृगतृष्णा तया रूपितं तत्सदृशम् । मृगतृष्णिनिरूपितमिति बोपदेवसम्मतः पाठः । अर्थः स एव । यद्वा । मृगतृष्णिभिः मृगतृष्णावद्भिरेव रूपितं सुन्दरीकृतं शश्वत्पतता क्षीयमाणेन तत्र हेतुः रुजां रोगाणां भुवा उत्पत्तिस्थानभूतेन देहेन उपासितव्यं संसेवितव्यं राज्यं न स्पृहयामहे । तथा कर्णयोः रोचनं रुचिजनकमात्रं प्रेत्य परलोकं स्वर्गादिकं प्राप्य उपासितव्यम् । भोग्यं यत्क्रियाफलं स्वर्गादिसुखं तदपि क्षयातिशयादियुक्तत्वान्न स्पृहयामहे । ईप्साप्रकर्षाभावेऽपि तद्विवक्षया द्वितीया ॥१३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

राज्यं तु श्रेयोविरोधीत्याहुः-राज्येति ॥ राज्यस्य ऐश्वर्येण संपत्त्या यो मदस्तेन उन्नद्ध उन्मत्तः अनित्याः सम्पदः अचलाः निश्चलाः मन्यते ॥१०॥ अयुक्ता अज्ञाः वैकारिकीं देहपुत्रकलत्रवित्तादिरूपां अनित्यां मायां वस्तु चक्षते नित्यतया पश्यन्ति ॥११॥ पूर्वं राज्ये स्थितान् स्वान् निन्दन्ति वयमिति ॥ अस्या भूमेर्जिगीषया इतरेतरस्पृधः ॥ परस्परेर्ष्यवः स्वाः स्वकीयाः प्रजाः घ्नन्तः पुरः पुरतोऽवस्थितं मृत्युं कालरूपं त्वाम् अविगणय्य अनादृत्य दुर्मदा वयं बभूविम ॥१२॥ यद्राज्याच्च्यवनं तत्त्वच्चरणसेवोपयोग्यमित्याहुः-त इति ॥ त एव वयं भवतस्तन्वा कालेन श्रियो राज्यसम्पत्तेः सकाशाद्विचालिताः अत एव त्वदनुकम्पया विनष्टदर्पाः सन्तस्तव चरणौ स्मरामः ॥१३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त्वन्मायामोहितः शाश्वतीर्मन्यत इत्येतदेव सदृष्टान्तमुपपादयन्ति ॥ मृगतृष्णामिति ॥ यथा बालाः, मृगतृष्णां मरीचिकाजलम्, उदकाशयं जलाशयं, नदीतडागादिरूपमित्यर्थः । मन्यन्ते । एवं तथा, अयुक्ता अविवेकिनो नृपाः, वैकारिकीं मायां, स्रक्चन्दनादिशब्दादिविकारात्मिकां प्रकृतिं, वस्तु वसत्येकरूपेणेति वस्तु, चक्षते मन्यन्ते । प्रकृतिपरिणामरूपत्वाद्वस्तुतस्त्ववस्तु भोग्यं नित्यं मन्यन्त इत्यर्थः । अतथाभूतस्य तथाभूतत्वेन मनने दृष्टान्तः ॥१०॥ तदेवं राज्यादियोगायोगयोरनर्थावहत्वमुक्तं तदस्मास्वेव दृष्टमित्याहुः । वयमिति द्वाभ्याम् ॥ वयमिति ॥ अस्याः भूमेः, जिगीषया भूम्यर्थमित्यर्थः । इतरेतरस्पृधः परस्परं स्पर्धमानाः, अतिनिर्घृणाः नितरां निष्कृपाः, श्रीमदेन नष्टा दृष्टिर्ज्ञानं येषां ते, वयं, पुरा, स्वाः स्वीयाः, प्रजाः घ्नन्तः सन्तः, हे

प्रभो, पुरोऽग्रे, मृत्युं मृत्युं शरीरकं, त्वा त्वां, अविगणय्य, दुर्मदाः बभूविम ॥११॥ त एवेति ॥ ते एव, वयं, हे कृष्ण, अद्य गभीररंहसा अतिगम्भीरवेगेन, दुरन्तवीर्यैष्णापारसामर्थ्येन, भवतः तव, तन्वा तनुरूपेण, कालेन, श्रियो राज्यलक्ष्म्याः सकाशात्, विचालिताः सम्यक् भ्रंशिताः, अनुकम्पया भवतो दयया, विनष्टो दर्पो गर्वो येषां ते तथाभूताः सन्तः, ते तव, चरणौ नमाम नतिपूर्वकं त्वच्छरणं प्राप्ताः स्म इत्यर्थः ॥१२॥ अथो इति ॥

कृष्णप्रिया

क्योंकि जो नृपति अपने एश्वर्यके मदसे उन्मत्त होते उसको वास्तविक सुख की कल्याणकी प्राप्ति कभी नही हो सकती । वह तो आपकी माया से मुग्ध होकर नश्वर सुखोंको नित्य अविचल मान बैठता है ॥१०॥जैसे अझजन मृगतृष्णा के जलको ही स्वच्छ और सत्य जलाशय मान लेते है वैसे ही इन्द्रिय सुखके ललसुजन भी और अज्ञानी जन भी वैकारिकी माया को सत्य मान लेता है ॥११॥ राजाअने कहा - महाराज पहले हमलोग श्रीमद् के नशेमें चकचूर होकर अंधे हो रहे थे और रस धराको जीतलेने के लिये एकदूसरे की स्पर्धा करते थे, और अपनी ही प्रजाका विनाश कर रहे थे । सचमुच हमारा जीवन अतिशय निष्ठुरता एवं क्रुरता से सभर था । और हम सब इतने मदान्ध थे कि आप काल रुचसे हमारे सामने खडे है इस विषयकी हम अल्प भी परवा करते नहीं थे ॥१२॥हे भगवन् सचिदानन्द श्रीकृष्ण ! उस कालकी गति अति विलक्षण है । वह इतना बलिष्ठ है कि किसीके टाले नहीं टलता । ऐसा क्यों यह काल आखिर में आपका शरीर ही है ! अब उस कालने हमलोगोंको निःश्रीक-धनहीन कर दिया है । केवल आपकी अहैतुक अनुकम्पासे आज हमारे घमंड का चूर्ण हो गया । हे नाथ ! अब हम सब आपके श्रीचरणोंका स्मरण करते है ॥१३॥

अथो न राज्यं [१]मृगतृष्णिरूपितं देहेन शश्वत् पतता [२]रुजां भुवा ।
उपासितव्यं स्पृहयामहे विभो क्रियाफलं प्रेत्य च कर्णरोचकम्[३] ॥१४॥
तं नः समादिशोपायं येन ते चरणाब्जयोः । स्मृतिर्यथा न विरमेदपि संसरतामिह ॥१५॥
कृष्णाय वासुदेवाय हरये परमात्मने । प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥१६॥

श्रीशुक उवाच

संस्तूयमानो भगवान् राजभिर्मुक्तबन्धनैः । तानाह करुणस्तात शरण्यः श्लक्ष्णया गिरा॥१७॥

कर्दमक्षमा

हे विभो ! रुजाम्, भुवा, देहेन, शश्वत्, उपासितव्यम्, मृगतृष्णिरूपम्, राज्यम्, अथ, न, स्पृहयामहे, त्वम्, उपायम्, समादिश, हे नाथ ! येन, उपायेन, इह, संसरताम्, अपि, ते, चरणाब्जयोः, स्मृतिः, यथा, न, विरमेत् ॥१४-१५॥कृष्णाय, वासुदेवाय, हरये, परमात्मने, प्रणतक्लेशनाशाय, गोविन्दाय, नमः, नमः ॥१६॥ श्रीशुक उवाच :- हे तात ! निर्मुक्तबन्धनैः, राजभिः, स्तूयमानः, शरण्यः, करुणः, भगवान्, श्लक्ष्णया, गिरा, तान्, आह ॥१७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अत एवाथो अनन्तरं मृगतृष्णिसदृशं राज्यं शश्वत्पतता प्रतिक्षणं क्षीयमाणेन तथा रुजां रोगाणां भुवा जन्मक्षेत्रेण देहेनोपासितव्यं सेव्यं न स्पृहयामहे प्रेत्य परलोके च क्रियाफलं स्वर्गादिभोगमुपासितव्यं न स्पृहयामहे कथम्भूतम् कर्णयोः रोचनं रुचिजनकमात्रम् तत्र गतस्य स्पर्शाद्यनपगमेन सुखाभावादित्यर्थः ॥१४॥ यद्येवम्भूता यूयं तर्हि मम चरणौ स्मरत ततोऽनायासेन मुक्तिर्भविष्यतीति किं मदपेक्षयेति चेदत आहुः-तं न इति । त्वच्चरणस्मृतिरपि त्वत्प्रसादफलमेवेत्यर्थः ॥१५-१६॥ श्लक्ष्णया मञ्जुलया ॥१७॥

---

१. मृगतृष्णिरुपितं-इति वोपदेवसंमतःपाठः। २. रुजोभुवा-विज. । ३. रोचनम-श्रीधर. वंशी. वीर. विज. विश्व. शुक. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत एव भवदनुग्रहादेव । यत्र स्वर्गे । इत्यर्थ इति- "एवं लोकं परं विद्वान्नश्वरं कर्मनिर्मितम्" इत्याद्युक्तेरिति भावः ॥१४॥ एवम्भूता इहामुत्र भोगविरक्ताः । ततो मच्चरणस्मरणात् । मदपेक्षया मत्प्रसादेन । इत्यर्थ इति-न हि त्वत्प्रसादं विना त्वच्चरणानुरागः स्यादिति भावः ॥१५॥ कृष्णायेत्यादिश्लोकरूपमन्त्रजपात्सर्वेप्सितावाप्तिः । कामबीजसम्पुटितेन च शीघ्रमेवेष्टलाभः । बन्दीमोक्षोऽप्यस्य लक्षजपाद्भवति । ध्यानं चात्र गायन्ति मन्त्रवत् । ॐ अस्य श्रीकृष्णायेत्यादिमन्त्रस्य श्रीकृष्णो देवता । व्यास ऋषिः । अनुष्टुप् छन्दः । कामो बीजम् । सर्वाभिलषितावाप्तये जपे विनियोगः ॥ ॐ कृष्णायेत्यंगुष्ठाभ्यां नमः । वासुदेवाय तर्जनीभ्यां नमः । हरये मध्यमाभ्यां नमः । परमात्मनेऽनामिकाभ्यां नमः । प्रणतक्लेशनाशाय कनिष्ठिकाभ्यां नमः । गोविन्दाय नमोनम इति करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादिन्यासः ॥ यद्वा- "ददृशुस्ते घनश्यामम्" इत्यारभ्य "निवीतं वनमालया" इत्युक्तमेवाध्यायारम्भोक्तमेव ॥१६॥ तान्राज्ञः । मञ्जुलया मनोज्ञया ॥१७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मृगतृष्णिर्मृगतृष्णा मृगतृड् निरूपितमिति वोपदेवपाठे मृगतृट् मृगतृष्णा किञ्च देहेनेति विभो हे स्वामिन्निति त्वयि स्वामिनि लब्धे तत्कथं रोचतामिति भावः ॥१४॥ ननु तर्हि किमिच्छथेत्यपेक्षायामुपक्रमे दैन्येन परोक्षवादेनैवोक्तमपि उपसंहारे परमोत्कण्ठया स्वहृदयमुद्घट्य्यैव निवेदयन्ति-तमिति । सम्यक् अस्माकं ग्राह्यत्वेन कर्तुं शक्यत्वेन चादिश यथेति तत्र येन प्रकारेण तमप्यादिशेत्यर्थः । यद्वा यथावन्निजेच्छानुरूपा स्मृतिर्न विरमेत् किन्तु सदा सिद्ध्येदित्यर्थः । पूर्वं स्मृतिविघातकत्वेनैव घोरसंसृतितो रक्षणं प्रार्थितम् इदानीं यदि स्मृतिः स्यात्तदा सापि भवत्वित्याहुः-इह विविधयोनौ संसरतां जायमानानामपीति तत्र स्मृतेरुपायस्यैव न तु साक्षात्तस्य तत्राप्यादेशमेव न तु तत्तत्सिद्धेः प्रार्थनम् इदं विनयभरात्तस्याः अतिगौरवाद्वा किं वा उपायज्ञाने सति तत्स्थैर्य्यं सिद्ध्येदित्यभिप्रायेणेति पूर्ववत्सर्वथा दैन्यमेव ॥१५॥ तत्प्रार्थनायामप्यात्मनामनर्हत्वादिकम्मन्वानास्तत्सिद्धये मधुरेण तत्प्रियनामसङ्कीर्तनेनोपसंहरन्तः साष्टाङ्गं प्रणमन्ति कृष्णायेति स्वयं भगवते तत्र च वासुदेवाय सर्वलोककृपया श्रीवसुदेवं प्रकटीकृत्य तस्मात्प्रकटीभूताय अत एव हरये अधिकारानपेक्षया दैत्यादीनामपि संसारदुःखहर्त्रे अपूर्वसौन्दर्य्यादिना सर्वमनोहराय च किञ्च स्वरूपतोऽपि परमात्मने तद्रूपत्वात् सर्वेषामपि निरुपाधिप्रेमास्पदायेत्यर्थः । किञ्च प्रणतानां स्वभक्तानां क्लेशो भक्तिविघ्नादिदुःखं तं नाशयति यस्तस्मै स्वभक्तिप्रवर्तकाय भक्तवत्सलायेत्यर्थः । तदेवं विशिष्य दर्शयन्ति-गोविन्दाय । वनभ्रमणादिनापि कृतगोपालनायेत्यर्थः । नमो नम इति वीप्सया पुनः पुनः प्रणम्य बोधयन्ति ॥१६॥ सम्यक् तद्भक्तिमात्रापेक्षया स्तूयमानः यतो मुक्तबन्धनैः साक्षात्तादृशतत्कारुण्यानुभवेन जातमहाभक्तिभिरित्यर्थः । श्लक्ष्णया मधुरया गिराऽऽह यतः सर्वत्र करुणः विशेषतः शरणागतवत्सलश्च ॥१७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथो अनन्तरमधुनेत्यर्थः । यद्वा, अतो हेतोर्न स्पृहयामहे; कुतः ? तत्त्वतो मायिकत्वादित्याहुः-मृगेति । मृगतृष्णिर्मृगतृष्णा, मृगतृड्निरूपितमिति वोपदेवः । मृगतृट् मृगतृष्णा; किञ्च, तत्तद्दृष्ट्यभावेऽपि तद्भोगसाधनस्यासामर्थ्यादित्याहुः-देहेनेति । ननु तर्हि जरामरणादिदोषरहितमक्षयं स्वर्गादिकमिच्छथ, तत्राहुः-क्रियेति । विभो ! हे स्वामिन्निति त्वत्कृपयेदीनं त्वत्प्रपन्नेभ्योऽस्मभ्यमन्यत् किमपि न रोचत इति भावः ॥१४॥ ननु तर्हि किमिच्छथेत्यपेक्षायामाहुः-तमिति । सम्यक् अस्माकं हृदयग्राह्यत्वेन कर्तुं शक्यत्वादिना चादिश, यथेति तत्र च येन प्रकारेण तमप्यादिशेत्यर्थः । यद्वा, यथावन्निजेच्छानुरूपा स्मृतिर्न विरमेत्, किन्तु सदा सिध्येदित्यर्थः । इह विविधयोनौ संसरतां जायमानानामपि, इति मोक्षास्पृहापि द्योतितैव, तत्र च स्मृतेरुपायस्यैव, न तु साक्षात् तस्याः, तत्राप्यादेशमेव, न तु तत्सिद्धेः प्रार्थनं विनयभरात्तस्या अतिगौरवाद्वा, किंवा उपायज्ञाने सति तत्स्थैर्य्यं सिद्ध्येदित्यभिप्रायेणेति ॥१५॥ इति तत्रात्मनामयोग्यत्वादिना तस्याः परमदौर्लभ्यं मन्वानास्तत्सिद्धये 'मधुरेण समापयेत्' इति न्यायेन तत्प्रियनामसङ्कीर्तनेनोपसंहरन्तः साष्टाङ्गं प्रणमन्ति-कृष्णायेति । साक्षाद्भगवते, तत्र च वासुदेवाय निजाशेषैश्वर्य्यप्रकटनार्थं वसुदेवाज्जाताय, इति श्रीनारायणतोऽप्याधिक्यमुक्तम् । अत एव हरये अधिकाराद्यनपेक्षया संसारदुःखहर्त्रे किंवा, अपूर्व्वसौन्दर्य्यादिना सर्व्वमनोहराय; किञ्च, परमात्मने सर्व्वेषामपि प्रियतमायेत्यर्थः । किञ्च, प्रणतानां क्लेशो भक्तिविघ्नादिदुःखं तस्य नाशो यस्मात्तस्मै, स्वभक्तिप्रवर्तकाय किंवा भक्तवत्सलायेत्यर्थः । तदेव दर्शयति-गोविन्दाय तत्तत्क्रीडाभिः स्वभक्तिप्रवर्तनेच्छया भक्तिवत्सलतया

वा गोपालनेन गोकुलेन्द्रतां प्राप्ताय, नमो नम इति वीप्सया अत्यन्तदैन्येन पुनःपुनः प्रणामा बोध्यन्ते ॥१६॥ सम्यग् विषयादिपरित्यागेन श्रीपादाब्जस्मृतिमात्रापेक्षया स्तूयमानः, यतो मुक्तबन्धनैः, साक्षान्महोपकारेण परमभक्त्युत्पत्तेरिति भावः; यद्वा, त्यक्तविषयादिवासनैरित्यर्थः । श्लक्ष्णया मधुरया गिरा आह, यतो भगवान् निजाशेषसद्गुणगणप्रकाशनार्थं स्वयमवतीर्णः परमेश्वरः, अतः करुणो महादयालुः, किंवा स्नेहेन साक्षात् करुणारसरूपः; किञ्च, शरण्यः शरणागतवत्सलः; हे तातेति श्रीभगवतो दीनवात्सल्यभरानुसन्धानेन प्रेमोद्रेकात् ॥१७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

रुजां भुवा दुःखोत्पादकेन कर्णयोः रोचनं क्रियाफलमपेक्षमाण इत्यर्थः ॥१४-३५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अत इति । राज्यादियोगायोगयोरेवंविधत्वाच्छश्वत्सदा रुजां रोगाणां भुवा उत्पत्तिर्थानभूतेन पतता पतिष्यमाणेन देहेन मृगतृष्णिरूपितं मृगतृष्णात्वेन निरूपितं तत्तुल्यमित्यर्थः राज्यं नोपासितव्यं न सेवितव्यम् अनेनात्मनामैहिकविषयविरागः आविष्कृतः तथा हे विभो ! कर्णयोः श्रोत्रयोरेव रोचनं प्रीत्यावहम् "अपामसोमममृता अभूमः स एवैनम्भूतिं गमयति" इत्यर्थवादैः श्रुतिसुखमात्रावहं नन्वनुभवदशायां पतनभयशङ्कास्पदत्वेन दुःखमिश्रत्वादिति भावः । प्रेत्य लोकान्तरं प्राप्यानुभूयेति शेषः । क्रियायाः श्रौतस्मार्तरूपायाः फलं स्वर्गादिरूपं न स्पृहयामहे ॥१४॥ तर्हि किं स्पृहयध्वे इत्यत्र तदाविष्कुर्वन्तः तदनुगृहाणेति विज्ञापयन्ति-तदिति । तत्तस्मात्सकलविषयविरक्तत्वान्नोऽस्माकं तं इति छेदे तम् उपायं समादिश देहि कोऽसौ ? येनोपायेनास्माकमिह प्रकृतिमण्डले संसरतामपि यथा तव चरणाब्जयोर्विषयभूतयोस्स्मृतिर्न विरमेन्न विच्छिन्ना भवति तथाऽनुगृहाणेत्यर्थः ॥१५॥ एवं स्वाभिप्रायमाविष्कृत्य तन्निष्पत्तिनिदानं भगवत्प्रसादोपायोऽञ्जलिरेवेत्यभिप्रयन्तो मन्त्रविशेषेण नमस्कुर्वन्ति-कृष्णायेति । प्रणतानां प्रणतिमात्रं कुर्वतां क्लेशं नाशयतीति तथा तस्मै ॥१६॥ संस्तूयमान इति । मुक्तं बन्धनं मागधकृतं यैर्येषां वा तैः राजभिः संस्तुतः करुणः करुणायुक्तः अत एव शरण्यः श्लक्ष्णया मृद्व्या गिरा तान् राज्ञः प्राह ॥१७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

रजोभुवा रजोगुणोत्पन्नेन शश्वत्पतता देहेन राज्यं नोपासितव्यमिति स्पृहयामहे प्रेत्य यत्क्रियाफलं स्वर्गादिकं तदपि न कामयामहे कीदृशं कर्णरोचनं श्रवणसुखजनकमापातरमणीयमित्यर्थः ॥१४॥ येनोपायेन ॥१५-१७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथो अत एव मृगतृष्णिरूपितं मृगतृष्णावद्भिरेव जनैः रूपितं सुन्दरीकृतं राज्यं न स्पृहयामहे द्वितीयान्तत्वमार्ष कीदृशं शश्वत् पतता क्षणभङ्गुरेण रुजां भुवा रोगमन्दिरेण देहेन उपासितव्यमिति राज्यस्य दुःखप्रदत्वमेव दर्शितं तर्हि राज्योपगतैर्बहुधनैरश्वमेधादयो यागाः कर्तव्यास्तत्राहुः-क्रियाफलं स्वर्गं च न स्पृहयामहे कुतः कर्णरोचनं कर्णाभ्यामेव रोचनं तत्र गतस्यापि स्पर्द्धाद्यनपगमेन सुखाभावादिति भावः ॥१४॥ ननु, तर्हि सायुज्यमुक्तिर्दीयते गृह्यतां तत्र न हि नहीत्याहुः-तमिति । तम् उपायं सम्यक्तया ग्रहीतुं कर्तुं च शक्यत्वेन आदिश येन स्मृतिर्न विरमेत् इह विविधयोनौ संसरतामपीति न संसारभङ्गे कामना किन्त्वतिलोभ्यायां प्रेमभक्तावप्यतिदैन्योदयेनैव न कामना नापि तदङ्गभूतायां स्मृतावपि किन्तु तस्या उपाये एव तत्रापि देहीत्यप्रयुज्य समादिशत्यनेनापि साक्षात्तत्रापीति भक्त्यधिकारोचितानां निष्कामत्वदैन्यविनयादीनां परमावधिरेव दर्शितः ॥१५॥ अयमयोग्येभ्योऽप्यस्मभ्यं कृपयैव समादेष्टव्य इति दण्डवदवनिप्रणिपातपुरस्सरं साष्टाङ्गं नामानि संकीर्तयन्तः प्रणमन्ति । कृष्णाय स्वयं भगवते वासुदेवाय सर्व्वजीवेषु कृपयैव वसुदेवात् प्रकटीभूताय । हरये दैत्यादीनामपि संसारदुःखहन्त्रे परमात्मने शान्तभक्तानां परमात्मत्वेन दासादिभक्तानां

परमप्रेमास्पदत्वेन च भासमानाय । प्रणतानां साधकभक्तानां भक्तिप्रतिबन्धकक्लेशहन्त्रे गोविन्दाय सम्प्रत्यस्माकं गाः नयनश्रवणनासादीन्द्रियाणि । सौन्दर्य्यस्वैश्वर्यसौरभ्यादिसुधाप्रदानार्थं विन्दते प्राप्नुवते तुभ्यं पुनः पुनर्नमामः ॥१६-१७॥

गूढार्थदीपिनी

इह संसारे संसरतां नानायोनिषु भ्रमतामपि यथास्मृति न विरमेत न च लुप्येत तमुपायं समादिश बोधय ॥१४॥ प्रणतानां शरणागतानां क्लेशं नाशयतीति तथा ॥१५॥ श्लक्ष्णया मधुरया ॥१६॥ यथा भवद्भिः आशंसितं प्रार्थितं तथा वो युष्माकं मयि भक्तिः जायतां बाढं निश्चितम् ॥१७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अत एव अथोऽनन्तरं शश्वत् प्रतिक्षणं पतता क्षीयमाणेन रुजां रोगाणां भुवा च उत्पत्तिस्थानेन देहेन मृगतृष्णिरूपितं मृगतृष्णात्वेन रूपितमुपासितं राज्यं नोपासितव्यं न सेवनीयं किन्तु त्वदाराधनमेवास्माभिर्देहेन कर्तव्यमिति भावः । किञ्च हे विभो ! सर्वगतत्वेन सर्वसाक्षिन् ! कर्णरोचनं कर्णयोः रुचिजनकं क्रियाफलं प्रेत्य लोकान्तरं प्राप्य न स्पृहयामहे किन्तु त्वत्प्राप्तिमिति भावः ॥१४॥ अथ चरणौ स्मराम ते इति भगवत्कृपाफलभूतायाः पूर्वोक्तायाः स्मृतेः स्थैर्य्योपायं प्रार्थयन्ते-तन्न इति । तदर्थं नमः कुर्वन्ति कृष्णायेति ॥१५-१६॥ श्लक्ष्णया मृद्व्या ॥१७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ऐहिकं राज्यादिकं पारत्रिकं स्वर्गादिकं च नेच्छाम इति विज्ञापयन्ति ॥ अथो इति । अथो त्वच्चरणस्मरणानन्तरम् । मृगतृष्णादृष्टान्तत्वेनास्तीत्यर्शआद्यच् । तदिति रूपितं निरूपितं रजोभुवा रजसो भवतीति रजोभूस्तेन शश्वत्पतता । सुप्सुपेति समासः । सार्वकालिकपतनयोग्यतया स्थितेन । पतनस्यायं काल इति देह्यनिर्णयात्सर्वकालः पतनकाल इति शश्वत्पतन्यस्तेनेति भावः । राज्यमत्र नोपासितव्यमिति स्पृहयामहे । तथा प्रेत्य च यत्कर्णरोचनं श्रवणमात्रमनोहरं क्रियाफलं ज्योतिरादिफलं स्वर्गादिकं न स्पृहयामहे ॥१४॥ हे सम श्रीरमासमेत । येने ते चरणाब्जयोरङ्कुरिता स्मृतिः संसरतामपि नो यथा न विरमेत्तथोपायमादिश । त्वत्प्रसादादेव सिद्धा सा सव्यापारीकरणीया त्वयेत्याशयः ॥१५॥ नम इति प्रह्वत्वमेवार्हणं नातोऽन्यदस्मच्छक्यमित्यर्थात्सूचयन्तः साक्षात्कृतं नमन्ति ॥ कृष्णायेति ॥१६॥ करुणयती करुणा साऽस्यास्तीति वा करुणः ॥१७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु, दोषसहितानामेव राज्यमनर्थहेतुः, यद्वा ज्वरसहितानामन्नम् अतः साम्प्रतं दोषस्य निवृत्तत्वात् राज्यं गृह्णन्त्वित्याशङ्कायामाहुः-अथो न राज्यं मृगतृष्णिरूपितमिति । अर्थशून्यमिति यावत् अस्य करणन्त्वतिदुष्टमित्याह-देहेनोपासितव्यमिति न हि राज्यमात्मना सेव्यं किन्तु देहेनैव देहस्तु विद्यमानदशायाम् अग्रे च दुष्टमिति दोषद्वयमाह-शश्वत्पतता सर्वदा मृत्युग्रस्तेन रुजां भुवा रोगोत्पत्तिस्थानेन अतः स्वतःपरिकरतश्च दुष्टत्वात् वयं न स्पृहयाम इति क्रिया यागादिस्तस्य फलं स्वर्गादिः तदपि प्रेत्यैव मृत्वैव प्राप्तव्यं लोका जातिभ्रंशप्राप्यमपि न मन्यन्ते कथं प्रत्युत प्राप्यं बुधो मन्यते तत्रापि कर्णमात्ररोचनं दूरात्समीचीनमिति श्रूयते न तु समीचीनं स्पर्धाऽसूयाभयादीनां तत्रैवाधिक्यात् ॥१४॥ एवमैहिकामुष्मिकफलं वैराग्यं निरूप्य ज्ञानोपदेशे स्वयमधिकारीति ज्ञापयित्वा प्रार्थयते .... तन्नः समादिशोपायमिति । चरणस्मरणेनैवैतावद्दूरे समागतमिति निरन्तरस्मरणहेतुमेव प्रार्थयते उपायश्चेत् ज्ञायते तदैव साध्यं स्वाधीनं भवत्यन्यथा येनोपायेन ते चरणाब्जविषयिका मतिर्विरमेत स्वतो मतिस्थानमशक्यमिति वक्तुं तद्विघातकं निर्दिशति अपिसंसरतामिहेति संसृतिरेव जननमरणरूपा भगवच्चरणस्मरणविस्मारिका तर्हि तदभाव एव प्रार्थनीयं स्यात् कथं स्मरणोपायप्रार्थना तत्राहुः-अपीति संसरणं त्वभीष्टं भगवदीयमार्गोपयोगित्वादिति भावः ॥१५॥ एवं प्रार्थयित्वा भगवतः षड्गुणाख्यापकानि नामान्यनूद्य नमस्यन्ति-कृष्णायेति । सदानन्दात्मकत्वात् कालरूपत्वात् वा वैराग्यहेतुः वासुदेवो ज्ञानहेतुः हरिः श्रीहेतुः बाह्यं दुःखं श्रियैव गच्छति इति परमात्मा यशोहेतुः सर्वोत्कर्षे एव यशः कारणं प्रणतानां क्लेशानाशे हेतुर्वीर्यं कार्यं गोविन्दम् ईदृक्त्वादीश्वरः आदरेण वीप्सा आदरेण नमनं सर्वकार्यसाधकमिति सूचितम् ॥१६॥ ततो यज्जातं तदाह-स्तूयमानो भगवानिति । महास्तुतिप्रियो भवत्येव अत उक्तं भगवानिति महद्भिः स्तुतस्तुष्यतीति ज्ञापयितुं राजभिरिति मोचनेन गतार्थतां वारयति मुक्तबन्धनैरिति ।

सकृत्प्राप्तफलैर्वा, धार्ष्ट्ये क्रोधमकृत्वा वरदाने हेतुः करुण इति। तातेति परीक्षित्सम्बोधनमप्रतारणाय शरण्य इति सत्यस्य सहजो धर्म इति श्लक्ष्णा वाणी श्रवणमात्रेण सुखदात्रीति शब्दोऽपि पञ्चमो विषयो निरूपितः ॥१७॥

श्रीसुबोधिनीसारः

शश्वत् प्रतिक्षणं पतता विनाशिना रुजां रोगाणां भुवा जन्मक्षेत्रेण देहेन उपासितव्यं सेव्यं मृगतृष्णातुल्यं राज्यं नेच्छामः प्रेत्य परलोके क्रियाफलं यज्ञादिकर्मफलं स्वर्गादि कर्णरोचनं श्रवणतो रम्यं भवति हे विभो ॥१४॥ याचमाना आहुः येन ते तव चरणकमलयोः स्मृतिस्स्मरणं यथा न विरमते न नश्यति तमुपायं संसारतां नोऽस्माकम् इह त्वं कथय ॥१५॥ कृष्णायेति परमो मन्त्र आर्तानां त्राणपर इति रहस्यं व्याख्या स्पष्टा ॥१६॥ शुकोक्तिः। मुक्तं त्यक्तं बन्धनं यैः बन्धनान्मुक्ता वा तै राजभिः स्तूयमानः शरण्यो भगवान् करुणो दयालुः श्लक्ष्णया मनोहरया गिरा वाण्या तानाह हे तात ॥१७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ तस्मात् अनर्थहेतुत्वात् राज्यं न स्पृहयामहे। स्पृहाभावे हेत्वन्तरमप्याहुः-मृगतृष्णिरूपं मरुमरीचितोयवदाशुतरविनाशि दुर्लभं चेत्यर्थः। तत्रापि हेतुमाहुः-शश्वत्पतता क्षीयमाणेन। तत्र हेतुः-रुजां रोगाणां भुवा उत्पत्तिस्थानभूतेन देहेन उपासितव्यं सेवितव्यमिति। तथा हे विभो ! प्रेत्य परलोकं स्वर्गादिकं प्राप्य उपासितव्यं भोग्यं यत् क्रियाफलं सुखं तदपि न स्पृहयामहे। तत्र हेतुमाहुः-कर्णयो रोचनं रुचिजनकमात्रमिति। तत्र गतस्यापि स्पर्धाविनाशाद्यनपगमेनापेक्षितसुखाभावादित्याशयः ॥१४॥ अतः येनोपायेन यथाऽनुष्ठितेनेह संसारे संसरतां भ्रमतामपि नोऽस्माकं ते तव चरणकमलयोः स्मृतिर्न विरमेत् विच्छिन्ना न भवेत्तमुपायं समादिश विज्ञापयेत्यन्वयः ॥१५॥ एवं भगवन्तं सम्प्रार्थ्य प्रार्थितदानस्य तत्प्रसादहेतुकत्वात्तत्प्रसादादेव दैन्ये नमनमेव हेतुरिति निश्चित्य प्रणमन्ति-प्रणतानां भक्तानां प्रणतिमात्रं कुर्वतां क्लेशं नाशयतीति तथा तस्मै कृष्णाय नमो नम इति। वीप्सा आदरार्था। एवं परक्लेशविनाशने तस्य किं प्रयोजनम् इत्यपेक्षायामाह-हरय इति। स्वप्रयोजनाभावेऽपि भक्तक्लेशहरणस्वभावायेत्यर्थः। तत्कृतं क्लेशहरणं क्व दृष्टम् इत्यपेक्षायां तदर्थं वसुदेवपुत्रोऽपि ज्ञात इति, को वाऽत्र विशेषो वक्तव्य त्तत्त्याशयेनाहुः-वासुदेवायेति। ननु क्लेशस्यान्तःकरणधर्मत्वाद्बहिष्ठेनान्येन तस्य सर्वथा विनाशः कथं कर्तुं शक्यः ? इत्याशङ्क्य तस्य सर्वान्तर्यामित्वं वदन्तः प्रणमन्ति-परमात्मन इति। बहिरैश्वर्यादिप्रदानेनापि क्लेशं नाशयति इत्याशयेन प्रणमन्ति-गोविन्दायेति ॥१६॥ मुक्तं मागधकृतं बन्धनं येषां तै राजभिरेवं संस्तूयमानो भगवान् श्लक्ष्णया गिरा तानाह। एवं परिभाषणे हेतुमाह-शरण्य इति। आश्रययोग्यः। अत्र विश्वासार्थं स्नेहेन सम्बोधयति-तातेति। शरण्यत्वे हेतुमाह-करुण इति। स्वप्रयोजनं विनैव स्वभावत एव दयापूर्णइत्यर्थः ॥१७॥

अन्वितार्थप्रकाशिका

तमिति ॥ येनोपायेन यथानुष्ठितेनेह संसारे संसरतां भ्रमतामपि नोऽस्माकं ते तव चरणाब्जयोः स्मृतिर्न विरमेत् विच्छिन्ना न भवेत्तमुपायं समादिश आज्ञापय ॥१४॥ कृष्णायेति ॥ प्रणतानां क्लेशं नाशयति तस्मै। स्पष्टं शेषम् ॥१५॥ संस्तूयमान इति॥ हे तात ! मुक्तं मागधकृतं बन्धनं येषां तै राजभिरेवं संस्तूयमानः शरण्यः करुणश्च भगवान् श्लक्ष्णया मञ्जुलया गिरा तानाह स्म ॥१६॥ अथेति ॥ हे भूपाः ! युष्माभिर्यथा आशंसितं प्रार्थितं तथा बाढं निश्चितं वो युष्माकमद्यप्रभृति आत्मनि अखिलेश्वरे मयि सुदृढा भक्तिर्जायेत जायताम्। निरन्तरं मत्स्मरणं भवत्वित्यर्थः ॥१७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथो अनन्तरम् उपासितव्यं पुनः सेवनीयम् ॥ मृगतृष्णिरूपितं मृगतृष्णातुल्यं राज्यं शश्वत्पतता प्रतिक्षणं क्षपिष्णुना॥ रुजां भुवा रोगाणामुत्पत्तिक्षेत्रेण देहेन न स्पृहयामहे ॥ हे विभो ! कर्णरोचनं श्रवणं प्रियमात्रं प्रेत्य परलोके सेव्यम्। क्रियाफलं यज्ञक्रियाफलरूपं स्वर्गादिकमपि न स्पृहयामहे ॥१४॥ सम्प्रति स्वकरणीयं प्रार्थयन्ते-तदिति ॥ इह संसारे संसरतां वर्तमानानां नोऽस्माकं तत्तमुपायम् ॥१५-१६॥ शरण्यः शरणागतवत्सलः श्लक्ष्णया मनोहरया ॥१७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथो अनन्तरम्, अत इति पाठे, अतः राज्यादियोगायोगयोरेवंविधत्वात्, शश्वत् सदा, रुजां रोगाणां, भुवा उत्पत्तिस्थानभूतेन, पतता पतिष्यमाणेन, देहेन, मृगतृष्णिरूपितं मृगतृष्णात्वेन निरूपितं, मृगतृष्णातुल्यमित्यर्थः । राज्यम्, उपासितव्यं सेव्यम्, अनेनात्मनामैहिकविषयविराग आविष्कृतः । तथा, हे विभो, प्रेत्य च मृत्वाऽपि, कर्णरोचनं श्रोत्रयोरेवं प्रीत्यावहम्, 'अपाम सोमममृता अभूम' 'स एवैनं भूतिं गमयति' इत्याद्यर्थवादैः श्रुतिसुखमात्रावहं न त्वनुभवदशायां, पतनभयशङ्कास्पदत्वेन दुःखमिश्रत्वादिति भावः । क्रियाफलं श्रौतस्मार्तरूपायाः क्रियायाः फलरूपस्वर्गादिकं च, न स्पृहयामहे । स्वर्गं गतस्यापि स्पर्धाद्यनपगमेन विषयविरक्तत्वात् इत्यर्थः । नोऽस्माकं, तमिति शेषः । उपायं समादिश उपदिश । कोऽसौ । येनोपायेन, इह प्रकृतिमण्डले, संसरतामपि, अस्माकं, यथा ते तव, चरणाब्जयोः, स्मृतिः, न विरमेत् विच्छिन्ना न भवेत् ॥१४॥ एवं स्वाभिप्रायमाविष्कृत्य भगवत्प्रसादोपायोऽञ्जलिरेवेत्यभिप्रयन्तः मन्त्रविशेषेण नमस्कुर्वन्ति ॥ कृष्णायेति ॥ वासुदेवाय वसुदेवपुत्राय, कृष्णाय, हरये भविष्यत्स्वजन्मनि हरिनामधारिणे, उभयावतारधारित्वेऽपि, परमात्मनेऽजहत्स्वस्वभावत्वात्परमात्मस्वरूपायैवेत्यर्थः । प्रणतानां प्रणतिमात्रं कुर्वतां ये क्लेशास्तेषां नाशाय नाशकाय, गोविन्दाय, नमो नमः ॥१५॥ संस्तूयमान इति ॥ मुक्तं बन्धनं मागधकृतं यैर्येषां वा तैः, राजभिः, संस्तूयमानः संस्तुतः, करुणः करुणायुक्तः, शरण्यः स्वशरणागतरक्षकः भगवान्, हे तात, श्लक्ष्णया मृद्व्या, गिरा वाचा, तान् राज्ञः, आह ॥१६॥ यदाह तदाह षड्भिः ॥ आद्येति ॥ हे भूपाः, भवद्भिः, बाढं साधु यथा तथा, यथा आशंसितं निश्चितं, तथा, आत्मनि अन्तः प्रविश्य धारके, अखिलेश्वरे सर्वेषां प्रशास्तरि मयि, वो युष्माकम्, अद्यप्रभृति, सुदृढा भक्तिः, जायते भविष्यतीत्यर्थः । केचित्तु यथा भवद्भिराशंसितं तथा बाढं निश्चितं वो मयि भक्तिर्जायते जायन्तामित्यर्थ इत्यूचुः ॥१७॥

कृष्णप्रिया

हे विभो ! हे श्रीकृष्ण! यह देह दिन प्रतिदिन क्षीण हो रहा है । अधिक क्या कहें रोगों का तो यह मन्दिर हे । अब हमें इस देह से उपभोग किये जाने वाले राज्यकी लालसा नहीं है । क्योंकि हम सब को यह बात ध्यानमें आ चुकी है कि मृगतृष्णा के जल के समान सर्वथा मिथ्या है । यही नहीं हमें कर्म के फल स्वर्गादि लोकोंकी भी जो मृत्यु के बाद मिलते है इनकी इच्छा नहीं है । यह बात भी जानते है कि वे सब निःसार है । मात्र सुननेमें रोचक है ॥१४॥ नाथ ! अब यह ही मार्ग बताईए कि जिस उपायसे आपके श्रीचरणोंकी विस्मृति कदापि न होने पावे । सदा सर्वदा स्मृति बनी रहे । फिर इस संसारमें किसी भी योनिमें जन्म कभी न लेना पडे ॥१५॥ चरणोंमे प्रणाम करने वालोंको क्लेशसे मुक्त करने वालोंके क्लेशका नाश करनेवाले श्रीकृष्ण श्रीवासुदेव श्रीहरि एवं परमात्मा श्रीगोवीन्दजी के चरणकमलों अनेक और अनन्त प्रणाम है ॥१६॥ श्रीशुक उवाच - भगवान श्रीशुक महर्षिजीने कहा महाराज परीक्षित ! कारागृहसे मुक्त नृपतियोंने जब शरणागतवत्सल भगवान श्रीकृष्णचन्द्रजीका स्तवन किया तब भक्त संरक्षकनाथने अतिशय मधुर वाणीसे नृपतियोंको कहा ॥१७॥

श्रीभगवानुवाच

अद्यप्रभृति वो भूपा मय्यात्मन्यखिलेश्वरे । सुदृढा [1]जायतां भक्तिर्बाढमाशंसितं [2]तथा ॥१८॥
दिष्ट्या व्यवसितं भूपा भवन्त ऋतभाषिणः । श्रियैश्वस्यमदोन्नाहं [3]पश्य उन्मादकं नृणाम् ॥१९॥
हैहयो नहुषो वेनो रावणो नरकोऽपरे । श्रीमदाद्भ्रंशिताः स्थानाद्देवदैत्यनरेश्वराः ॥२०॥

---

१. जायते-श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक. । २. यथा-वीर. । ३. पश्तोन्मादनं-विज. ; पश्य उन्मादनं-वीर. । ४. यैत्ता:-विज ।

भवन्त एतद्विज्ञाय देहाद्युत्पाद्यमन्तवत् । मां यजन्तोऽध्वरैर्युक्ताः[४] प्रजा धर्मेण रक्षथ ॥२१॥

कर्दमक्षमा

श्रीभगवान् उवाच :- भो भूपाः ! अद्य, प्रभृति, मयि, अखिलेश्वरे, आत्मनि, सुदृढा, भक्तिः, जायताम्, बाढम्, तथा, आशंसितम् ॥१८॥ भूपाः, दिष्ट्या, व्यवसितम्, भवन्तः, ऋतभाषिणः, श्रिया, ऐश्वर्यमदोन्नाहम्, नृणाम्, उन्मादकम्, पश्य ॥१९॥ हैहयः, नहुषः, वेनः, रावणः, नरकः, अपरे, देवदैत्यनरेश्वराः, श्रीमदात्, स्थानात्, भ्रंशिताः ॥२०॥ भवन्तः, एतत्, विज्ञाय, देहादि-उत्पाद्यम्, अन्तवत्, युक्ताः, अध्वरैः, माम्, यजन्तः, प्रजाः, धर्मेण, रक्षथ ॥२१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यथा भवद्भिराशंसितं तथा बाढं निश्चितं वो मयि भक्तिः जायते जायतामित्यर्थः ॥१८॥ हे भूपाः ! मद्भजनमेव कर्तव्यमिति भवद्भिर्व्यवसितं कल्पितं दिष्ट्या भद्रम्भवद्भिरुक्तञ्च सत्यमेवेत्याह-भवन्त इति । श्रीश्च ऐश्वर्यञ्च ताभ्यां मदस्तेनोन्नाहमुद्बन्धनं स्वैराचारमित्यर्थः । पश्ये पश्यामि ॥१९॥ तदेवाऽऽह-हैहय इति । हैहयः कार्तवीर्यश्चक्रवर्ती नरेश्वरः पितुः कामधेनुहरणात्परशुरामेण सपुत्रो हतः नहुषः देवेन्द्रतां प्राप्त उन्मत्तः शचीसङ्गाय ब्राह्मणान् शिबिकां वाहयंस्तैरेव ततो भ्रंशितोऽजगरत्वमवाप वेनोऽप्युन्मत्तो ब्राह्मणानधिक्षिपंस्तैरेव हुङ्कृतैर्हतः रावणो राक्षसेश्वरः सीतामभिलषन् राघवेण हतः नरको दैत्येश्वरोऽदितिकुण्डलाद्याहरणान्मयैव हतः अपरेऽपि श्रीमदात् स्थानाद्भ्रंशिताः ॥२०॥ यदुत्पाद्यं देहादि तदन्तवत् एवं विज्ञाय युक्ता अप्रमत्ताः रक्षथ रक्षतेत्यर्थः ॥२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति-भवदुक्तं मया स्वीकृतमिति भावः ॥१८॥ उन्मादकं बुद्धिभ्रंशकत्वमेव । तैरेवागस्त्यादिविप्रैरेव । अपरे मुदुक्तेतरे त्रिशंक्वादयः ॥२०-२१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीभगवांस्तु स्वस्मिंस्तादृशस्मृतिनद्याः परमाश्रयाक्षयिष्णुसरसीरूपा भक्तिरेवानन्तरं सन्तमेव स्फीतीभविष्यतीति सिद्धतया निर्दिशति-अद्यप्रभृतीति । आत्मनि परमात्मनीति प्रेमयोग्यता अखिलेश्वर इति गौरवयोग्यताऽभिहिता तस्माद्भक्तिशब्देनैवोक्तं तद्द्वयमिश्रतायामेव हि तच्छब्दः प्रयुज्यते यथा पञ्चरात्रे —

"माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः । स्नेहो भक्तिरिति प्रोक्तः तया साष्टर्यादि नान्यथा" ॥ इति ॥

सुदृढेति भक्तिरस्त्येव किन्तु अद्यप्रभृति सुदृढा विघ्नानवच्छेद्या बाढमतिशयेन जायते सम्प्रत्येव प्रादुर्भविष्यतीत्यर्थः । "वर्तमानसामीप्ये वर्तमानवद्वा" अत एव विचरिष्यथ यास्यथे(ते)त्यपि भावः । अन्यत्तैः तत्र यथेत्येव पाठस्तत्सम्मतः तस्याशंसितमित्यनेन योजनादिति तथेति पाठस्तु बहुत्र ॥१८॥ भक्तिदाढर्यार्थमेव तान् श्लाघमानस्तदुक्तमनुमोदते-दिष्ट्येति । ऋतभाषित्वे हेतुः श्रियेति श्रीर्धनादिसम्पत् ऐश्वर्य्यमिति वक्तव्ये श्रियैश्वर्य्यमिति तन्वादीनां विकल्पेनेषड्वडाविति छान्दसवार्तिकात् त्रियम्बकादिवत् ॥१९॥ एते अपरेऽपि देवदैत्यनरेश्वराः ॥२०॥ अथ सिद्धायामपि मद्भक्तौ मत्प्रीत्यर्थं धर्मं लोकं च पालयितुमिच्छतो ममाज्ञया यथा स्वं तत्तत्पालनं च करिष्यथेत्यादिशति-भवन्त इति सार्धद्वयेन । युक्ता मत्पराः सन्तो लोकसङ्ग्रहार्थैर्यज्ञैरपि मां यजन्तः धर्मेण प्रजा रक्षथ रक्षिष्यन्तीत्यर्थः । टीकायां लोकतया परिणामे लेखकभ्रमादेव रक्षतेति किन्तु रक्षत्वित्येव ज्ञेयं हे भवन्त इति वा समाधेयम् ॥२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आत्मनि सर्व्वान्तर्यामिन्यपि अखिलेश्वरेऽपि मयि श्रीदेवकीनन्दने श्रीयादवदेवबुद्ध्येत्यर्थः । सुदृढेति-भक्तिरस्त्येव, किन्तु अद्यप्रभृति सुदृढा जायतामित्यर्थः । हे भूपाः ! इति मद्भक्त्या युष्माभिरेव पृथ्वी पालितेति भावः । अन्यत्तैर्व्याख्यातम् । तत्र यथेत्येव पाठस्तत्सम्मतः । तस्याशंसितमित्यनेन योजनादिति, अथवा अद्यप्रभृति भूपाः पृथ्वीपालका यूयमेव वृत्ताः, यतो मयि भक्तिर्जायते जातेत्यर्थः । यद्वा, ननु तर्ह्यस्मत्प्रार्थितं सम्पादयेति चेत्तत्राह-जायते स्वतो जायमानास्त्येव, किं मया सा सम्पाद्येत्यर्थः । एवं वाक्परिपाट्य वरो दत्त एव । भक्तिजन्मलिङ्गमाह-यतो युष्माभिर्यथावद्बाढमाशंसितम्, स्मृत्युपायादेशप्रार्थनात् ॥१८॥ भक्तिर्दार्ढ्यार्थमेव तान् श्लाघमानस्तदुक्तमनुमोदते-दिष्ट्येति । ऋतभाषित्वे हेतुः-श्रियेति । धनादिसम्पदाश्रयैश्वर्य्यमिति वक्तव्ये

श्रियेत्यार्षः; यद्वा, श्रिया ऐश्वर्य्येण च मदोन्नाहम्, समासान्तर्गतस्यापि मदोन्नाहमित्यस्याकर्ष आर्यः । उन्मादकमुन्मत्ततापादकं पश्यामि ॥१९॥ हैहयादीनां यथोत्तरं श्रीमदादौ श्रैष्ठ्यम्; एते हैहयादयः कथम्भूताः ? देव-दैत्य-नरेश्वराः; यद्वा, अपरेऽपि देवदैत्यनरेश्वराः; तत्र देवेश्वर इन्द्रः श्रीमदेनैव बलिना स्थानाद्भ्रंशितः; हिरण्यकशिपुः श्रीमदेनैव श्रीविष्णुवैष्णवद्रोहाच्छ्रीनृसिंहेन विदारितः, नरेश्वराः पौण्ड्रजरासन्धादयः श्रीमदादुन्मार्गवर्तिनो मयैव हताः; एवमन्येऽप्यूह्याः ॥२०॥ अधुना सदा स्मृत्युपायमादिशति- भवन्त इति सार्धद्वयेन । उत्पाद्यमिति उत्पत्तिमतोऽस्यानियतत्वादित्यर्थः । यद्वा, एतदात्मीयत्वेन गृह्यमाणं देहम्, आदि-शब्दात् पुत्रादिकं तेन तेन चोत्पाद्यं धनादिकमपि सर्व्वम्; युक्ता मत्परा भवन्तः सन्तः, किंवा भवन्तो युक्ता एवेति पृथग्वाक्यम्; धर्म्मेण मद्भक्तिलक्षणेन कृतार्था अपि यूयं प्रजासु मद्भक्तिप्रवर्तनार्थं गृहस्थधर्म्मानाचरन्तो राज्यं स्वीकुरुतेति भावः । तत्र रक्षथ रक्षत्वित्यर्थ इति लेख्ये लेखकभ्रमात् रक्षतेति ॥२१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१४-३५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह-अद्येति षड्भिः । आत्मन्यन्तःप्रविश्य धारके अखिलानामीश्वरे प्रशासितरि मयि वो युष्माकमद्यप्रभृति सुदृढा भक्तिर्जायते भविष्यति कथं यथा बाढं साधु यथा तथा आशंसितं समीहितं तथा सुदृढेति सम्बन्धः ॥१८॥ सन्निश्चितमभिनन्दति-दिष्ट्येति । हे भूपाः ! भूतं यथा स्थितं तात्त्विकमिति यावत् तद्भाषन्त इति तथा तैर्भवद्भिर्व्यवसितं निश्चितं दिष्ट्या आनन्दः सम्यगिति यावत् तदेवोपपादयति श्रियैश्वर्याभ्यां यो मदोन्नाहः मदेनोद्बन्धनम् उद्वृत्तिः तं नृणामुन्मादनं पश्ये पश्यामीत्यर्थः ॥१९॥ तदेवाह-हैहय इति । हैहयः कार्तवीर्यः नहुषः नरेश्वरश्चक्रवर्ती एते श्रीमदाद्धेतोः स्थानाद्राज्याद्भ्रंशिताः तावद्धैहयः पितुः कामधेनुहरणात्परशुरामेण सपुत्रो हतः तथा नहुषो देवेन्द्रतां प्राप्तः उद्वृत्तः शचीसङ्गाय ब्राह्मणान् शिबिकां वाहयन् तैरेव ततो भ्रंशितः अजगरत्वमवाप वेनोऽप्युन्मत्तो ब्राह्मणानधिक्षिपन् तैरेव हुङ्कृतैर्हतः रावणः राक्षसेश्वरः सीतामभिलषन् राघवेण संग्रामे हतः नरकोऽपि दैत्यश्चादितेः कुण्डलाद्याहरणात् मयैव हतः एवमपरेऽपि श्रीमदात्स्थानाद्भ्रंशिता इत्यर्थः ॥२०॥ अतो भवन्तो यदुत्पाद्यं देहादि तदन्तवद्विज्ञाय युक्ताः अवहितचेतसो यज्ञैर्मामाराधयन्तः धर्मेण प्रजाः रक्षथ रक्षन्तु इत्यर्थः । मध्यमपुरुष आर्षः ॥२१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

बाढमभिमतमाशंसितमाकाङ्क्षितं च जायते "बाढं त्वभिमते भृशे" इति च ॥१८॥ भवतां व्यवसितं दिष्ट्या मङ्गलं तत्र हेतुः भवन्त इति ऋतभाषिणः ब्रह्मवादिनः यथार्थवादिनो वा अनुभावयति श्रियेति यूयं श्रियैश्वर्यमदानामुन्नाहमभिवृद्धिमुन्मादनं बुद्धिभ्रंशकरं पश्यत ॥१९॥ कान् पश्याम इति तत्राह-हैहयेति । ध्वंसिताः भ्रंशिताः ॥२०॥ शिक्षयति-सञ्चिन्तयतेति । उत्पाद्यम् उत्पत्तियोग्यम् अन्तवन्नाशवत् ॥२१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हे भूपा इति तत्र: समादिशेति वाक्येनैव मद्भक्तजनस्वभावप्रख्यापकेन सर्वा भूरपि मद्भक्तिरीतिसुधावितरणेन पालितैवेति भावः । बाढमिति प्रतिज्ञायां इदमहं प्रतिजाने इत्यर्थः । यथा आशंसितमाकाङ्क्षितं तथा तेनैव प्रकारेण भक्तिः सुदृढा जायते मत्कर्तृक उपायादेशः युष्मत्कर्तृकमुपायज्ञानम् उपायानुष्ठानं ततो दृढा स्मृतिस्तया च सुदृढेति प्रेमभक्तिरधुनैव क्षणमात्रेणैवोपायोपेयतद्दार्ढ्यदिकयुक्ता जायते क्रमेणानुभवतेति भावः । अद्य प्रभृति नित्यनवीनीभवन्तीत्यर्थः ॥१८॥ भक्तिरेव कर्तव्येति यद्व्यवसितं तद्दिष्ट्या । यतः श्रिया सम्पत्त्या यदैश्वर्य्यं तेन यो मदस्तेन चोन्नाहम् उद्बन्धनम् उच्छृङ्खलत्वमित्यर्थः । पश्येत्यार्षम् ॥१९॥ स्थानात् स्वपदात् ॥२०॥ किन्तु मदाज्ञया लोकरीतिरेवानुसरणीयेत्याह-भवन्त इति ॥२१॥

गूढार्थदीपिनी

हे भूपा भवन्तः सत्यभाषिणः अतः यत् भवतां व्यवसितं सङ्कल्पितं तत् दिष्ट्या शोभनमेव यतः श्रिया हेतुभूतेन नृणाम्

ऐश्वर्यमदाभ्यामुन्नाहम् मर्यादोल्लङ्घनम् उन्मादकं पश्ये पश्यामि स्वार्थे कः ॥१८॥ हैहयादयः श्रीमदात् हेतोः स्थानात् भ्रंशिताः तथा अपरेऽपि त्रिशंक्वादयः । हैहयः कार्तवीर्यः वसिष्ठस्य कामधेनुहरणात् परशुरामेण सपुत्रो हतः । नहुषः शचीमभिलषन् अजगरत्वं प्राप्तः । वेनो धर्मं ब्राह्मणांश्च अधिक्षिपन् हुङ्कारैर्हतः । रावणः सीतामभिलषन् रामेण हतः । नरकस्तु अदितिकुण्डलहरणान्मयैव हतः ॥१९॥ हे भवन्तः ! एतत् उपाद्यं जन्यं यत् देहादि तत् अन्तवत् विज्ञाय यज्ञैः मां यजन्तः प्रजा रक्षत यूयमिति शेषः । सामीप्ये लट् ॥२०॥ प्रजातन्तून् पुत्र-पौरादिसन्ततीः सन्तन्वन्तः विस्तारयन्तः सुखदुःखे भवाभवौ सम्पद्विपदौ च सेवन्तः मच्चित्ताः सन्तः विचरिष्यथ कालं यापयिष्यथ ॥२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे भूपाः ! यथा भवद्भिराशंसितं समीहितं तथा बाढं निश्चितं वो युष्माकम् आत्मनि सर्वाश्रये मयि सुदृढा सुस्थिरा भक्तिः स्मृतिर्जायते जायताम् ॥१८॥ हे भूपाः ! चरणाब्जयोः स्मृतिर्यथा न विरमेदिति भवद्भिर्व्यवसितं सङ्कल्पितं दिष्ट्या शोभनमेवेत्यर्थः । किञ्च राज्यैश्वर्य्यमदोन्नद्धो न श्रेयो विन्दते इत्यादि ऋतं यथा भाषन्ते इति ऋतभाषिणो यूयं श्रियैश्वर्याभ्यां यो मदस्तेनोन्नाहमुद्बन्धनं स्वेच्छाचारं नृणामुन्मादकं पश्ये पश्यामि ॥१९॥ तदेवाह-हैहय इति । तत्र हैहयः परशुरामेण हतः नहुषो मुनिभिः दैवलोकात्पातितः वेनो ब्राह्मणैर्हतः रावणो राघवेण हतः नरको मया हतः अपरे देवदैत्यनरेश्वराश्च इन्द्रहिरण्यकशिपुपौण्ड्रकादयः तत्र स्थानादिन्द्रो बलिना भ्रंशितो हिरण्यकशिपुपौण्ड्राद्या नृसिंहादिभिर्हताः ॥२०॥ रक्षथ रक्षत ॥२१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हे भूपाला अद्यप्रभृत्येतद्दिनमारभ्याखिलेश्वरेऽखण्डेशे आत्मनि सर्वान्तर्यामिणि मयि भक्तिः सुदृढा स्मरणोपयोगिनीति सुदृढा जायते । किञ्च तथाऽऽशासितं बहुकालमपेक्षितं संसृतिमोचनं च बाढं दृढं यथा स्यात्तथा जायते ॥१८॥ हे भूपाः ! भवतां व्यवसितं दिष्ट्या शोभनं भवन्तश्च ऋतभाषिणः । मृगतृष्णमित्यादिकमृतं भाषितुं शीलमेषामित्यृतभाषिणः । नृणामुन्मादनमुन्मादयतीत्युन्मादनस्तं श्रीरैश्वर्यमदोन्नाहं श्रीः सम्पत्तया सहितं यत्तदुभयहेतुको यो मदस्तस्योन्नाह उच्छ्रयस्तं पश्ये पश्यामि । अहमप्येवमवजाने । युष्मदीयैतदवलोकनफलं ममैवेत्यात्मनेपदप्रयोगतो ध्वनयति । धातुमात्रत्वात् । परस्मैपदि नात्मगामिनि फल आत्मनेपदमिति पक्षमाश्रित्येदमुदितम् । पश्येति पाठः । वयं पुरा श्रीमदनष्टबुद्धय इत्यादिना तैरेव स्वविदितत्वेनोक्तस्य पुनरुपदेशासम्भवादहमप्येवं पश्यामीत्यस्य सुलग्नत्वादलग्नः । ऋतभाषिण इत्यनुमोद्य पुनस्तथोक्त्यस्वारस्याच्च ॥१९॥ के त्वयाऽऽलोकितास्तथाविधा इत्यतः कांश्चनाभिधत्ते ॥ हैहय इति । कार्तवीर्योऽर्जुनः परशुरामेण नहुषोऽगस्त्यजटास्थभृगुणा वेनो ब्राह्मणै रावणो रामेण नरको मयाऽपरे देवदैत्यनराश्च परैर्मदान्मदनिमित्तीकृत्य स्थानाद्भ्रंशिताः । तद्द्वारा मृता इत्यर्थः ॥२०॥ एवं वर्तितव्यमिति ताञ्छिक्षयति ॥ सञ्चिन्तयतेति । देहादिकमुत्पाद्यं पुनरुत्पत्तियोग्यमन्तवन्नाशवच्चेति विज्ञाय मां चिन्तयत । तत्रस्थां त्यक्त्वा मयि तां कुरुतेत्यर्थः । अध्वरैर्यजन्तः पूजयन्तो यत्ता प्रजाधर्मेण रक्षत । युक्ता इत्यप्रमत्ता इत्यर्थः ॥२१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी-

जिज्ञासार्ता तदधिकारे द्वमस्तीति वै हरिम् । सात्त्विकेभ्यो मुख्यशास्त्रं सगुणप्राह योग्यतः ॥
स्वकीयान् षड्गुणान् प्राह षड्भिः सर्वत्र दुर्लभान् । भक्तिदानं बुद्धिशंसे राज्यदोषः कृपा कृतिः ॥
ऋणत्रयं निराकृत्य तत्र चिन्ता विरागता । एवं धर्मैर्हरिप्राप्तिरिति वाक्यार्थसंग्रहः ॥

जरासन्धवधेन तेषां शरीराणि मोचयित्वा स्तुत्या तुष्ट आत्मनो मोचयति-अद्यप्रभृतीति षड्भिः । आदौ तैर्यत् प्रार्थितं स्मृतिविच्छेदो मा भवत्विति तत्रोत्तरमाह-अद्यप्रभृति वो नित्यं स्मरणमिति सिद्धान्तः प्रयोजनसाधकत्वं त्वौपाधिकसंस्मरणहेतुः तदप्याह-मयि आत्मनि अखिलेश्वर इति अन्तर्बहिरावश्यकसेव्य इति भूपा इति सम्बोधनं तारतम्यज्ञानार्थं बाढं यथेष्टम् इदं यथा आशंसितं तमेव दत्तं न त्वपूर्वम् ॥१८॥ तर्हि आशंसायां दोषो भविष्यतीत्याशङ्क्य साध्वाशंसितमित्याह-दिष्ट्या व्यवसितं भूपा इति । एतादृशो व्यवसायो न साधारणानां भवति निरन्तरस्मरणोपायप्रार्थनाविषयः किञ्च भवन्त ऋतभाषिणः राज्यस्यानर्थहेतुत्वं भाषणं भवतां मतमन्तःकरणपूर्वकं सत्यमेव यतः अहमपि श्रियैश्वर्यमदोन्नाहं नृणामुन्मादकमेव पश्ये श्रीसहितं यदैश्वर्यं तेन यो मदोन्नाहः मदबन्धनं सर्वदा मदवस्थितिः तत् नृणामुन्मादकं भ्रान्तिं जनयतीत्यर्थः ॥१९॥ अत्र प्रमाणमहं पश्य इति । अत एव बहवः मया तस्मान्मदात् त्याजिताः दैत्या इत्याह-हैहय इति । यद्यद्यैव एत एव त्याजिताः स्युः तदा अविवेकदशायां मात्सर्यमपि

भवेत् पूर्वमप्येवं भावे तु न दुःखं पञ्चभिः सहेतिवन्न दोषः सम्भवति सुतरां ते चेन्महान्तः अतस्तेषां महत्त्वसिद्ध्यर्थं नामानि गृह्णाति हैहयः सहस्रार्जुनः नहुषः ययातिपिता परशुरामेण इन्द्राण्या च भ्रंशितो वेनो ब्राह्मणैः रावणो रामेण नरको मयैव अपरे चैवम्भूताः हिरण्यकशिपुप्रभृतयः शतशः सन्ति श्रीमदात् स्थानाच्च च्याविताः राज्यं शरीरं च दूरीकृतमिति देवा नहुषादयः दैत्या हिरण्यकशिपुप्रभृतयः नरेश्वरा अर्जुनादयः चेति त्रिगुणा अपि स्थानभ्रष्टाः क्रियन्ते ॥२०॥ अतो मदे सति स्थानभ्रंशो भविष्यतीति निश्चित्य मदं परित्यज्य मदुक्तं कुरुतेत्याह- भवन्त इति। एतत्पूर्वोक्तं भ्रंशरूपमनुभवयुक्तिभ्यां विशेषतो ज्ञात्वा देहादौ वैराग्यं कर्तव्यम् इति वदन् प्रथमं देहदोषमाह- देहादिदेहराज्यादिकमुत्पाद्यं केनचिदुत्पाद्य तेन तु नित्यं सहजम् अत एव अन्तवत् नश्वरम् एतत् ज्ञात्वा देहरक्षायां शिथिलप्रयत्नाः सन्तः तेन स्वत एव दैववशाद्विद्यमानेनाध्वरैः यागैः मां यजन्तः धर्मेण प्रजाः रक्षथ राज्ञः प्रजापालनं यज्ञाश्च धर्माः ॥२१॥

श्रीसुबोधिनीसारः

हे भूपा अखिलानां सर्वेषामीश्वरे आत्मनि मयि वो युष्माकं सुदृढा भक्तिर्जायतेऽद्यप्रभृति इदानीमारभ्य यथा भवद्भिराशंसितमिष्टं तथा ॥१८॥ हे भूपा भवद्भिर्व्यवसितं निश्चितं दिष्ट्या मङ्गलं साध्वित्यर्थः। सत्यवादिनो भवन्तः श्रिया ऐश्वर्यमदेनोन्नाहं समुत्कृष्टं नृणाम् उन्मादकमहं पश्यामि आत्वमार्षम् ॥१९॥ हैहयोऽर्जुनः नरको भौमोऽन्ये देवादयः श्रीमदाद्धेतोः स्थानात् पदात् भ्रंशिताः च्याविताः ॥२०॥ यदुत्पाद्यं जनिमद्देहादि तदेतदन्तवत् विनाशीति विज्ञाय बुद्ध्वाऽध्वरैर्यज्ञैर्मां यजन्तो युक्ताः संयतचित्ता धर्मेण प्रजाः पालयत ॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यत्प्रार्थितं स्मृतिविच्छेदो मा भवत्विति तत्राह- अद्येति। हे भूपाः! युष्माभिर्यथा आशंसितं प्रार्थितं तथा वो युष्माकमद्यप्रभृति मयि सुदृढा भक्तिर्जायते जायतां निरन्तरं मत्स्मरणं भवत्वित्यर्थः। अत्र संशयो न कर्तव्य इत्याह- बाढमिति। मत्स्मरणं च सुकरमेव, सर्वात्मत्वात् सर्वेश्वरत्वाच्च इत्याह- आत्मन्यखिलेश्वर इति ॥१८॥ हे भूपाः! भवद्भिर्यद्व्यवसितं मत्स्मरणमेव कर्तव्यमिति निश्चितं तदपि दिष्ट्या आनन्दकरमेवेत्यर्थः। यच्च राज्यस्यानर्थहेतुत्वमुक्तं तदपि सत्यमेव इति सूचयन्नाह- भवन्त ऋतभाषिण इति। एतदेव स्पष्टयति- श्रिया धनेन सहितं यदैश्वर्यं गजाश्वादि तेन यो मदोन्नाहो मदबन्धनं तं नृणामुन्मादकं श्रेयःप्रतिबन्धकमहं पश्ये पश्यामीति ॥१९॥ केषामुन्मादो दृष्ट इत्यपेक्षायामाह- हैहय इति। हैहयः सहस्रबाहुरर्जुनश्चक्रवर्ती नरेश्वरः पितुः कामधेनुहरणात् परशुरामेण सपुत्रो हतः। नहुषो देवेन्द्रतां प्राप्त उन्मत्तः शचीसङ्गमाय ब्राह्मणान् शिबिकां वाहयंस्तैरेव ततो भ्रंशितः अजगरत्वमवाप। वेनोऽप्युन्मत्तो ब्राह्मणानधिक्षिपंस्तैरेव हुंकृतैर्हतः। रावणो राक्षसेश्वरः सीतामभिलषन् रामेण हतः। नरको दैत्येश्वरः अदितिकुण्डलाद्याहरणात् मयैव हतः। एवमपरेऽपि बहवः श्रीमदाद्धेतोः स्थानाद्राज्यात् भ्रंशिताः ॥२०॥ अतो भवन्तो यदुत्पाद्यं देहादि तदन्तवद्विज्ञाय युक्ताः सावधानचित्ताः अध्वरैर्यज्ञैर्मां यजन्तः पूजयन्तो धर्मेण प्रजा रक्षथ रक्षतेत्यर्थः ॥२१॥

अन्वितार्थप्रकाशिका

दिष्ट्येति॥ हे भूपाः! भवन्तः ऋतभाषिणः सत्यवचनाः सन्ति अतः भवद्भिः मत्स्मरणादिकं दिष्ट्या व्यवसितं निश्चितं यतः श्रिया धनेन हेतुना ऐश्वर्यमदोन्नाहम् ईश्वरत्वाभिमानाधिक्यं नृणामुन्मादकं श्रेयःप्रतिबन्धकमहं पश्ये पश्यामीति। तद्वार्षः ॥१८॥ हैहय इति॥ हैहयाद्याः अपरे च देवदैत्यनरेश्वराः श्रीमदाद्धेतोः स्थानाद्राज्याद्भ्रंशिताः एतेषां कथा भागवत एव द्रष्टव्या ॥१९॥ भवन्त इति॥ अतो हे भवन्त इति सम्बुद्धिः। एतत् यदुत्पाद्यं हादितदन्तवद्विज्ञाय युक्ताः सावधानचित्ताः अध्वरैर्यज्ञैर्मां यजन्तः पूजयन्तो धर्मेण प्रजा रक्षथ रक्षिष्यथ। सामीप्ये लट्। रक्षतेत्यर्थः। यूयमिति शेषः ॥२०॥ सन्तन्वन्तः इति ॥ प्रजातन्तून् पुत्रपौत्रादिसन्ततीः सन्तन्वन्तः विस्तारयन्तः सुखं दुःखं भवाभवौ विभवतद्विनाशौ एतेषु च प्राप्तं सेवन्तः समत्वेन सेवमानाः। शता आर्षः। मयि विषयभूते चित्तं येषां ते मच्चित्ताः मां स्मरन्तो विचरिष्यथ कालं नेष्यथ ॥२१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यथा युष्माभिराशंसितं प्रार्थितं ते तथा बाढं सत्यम्। अद्यप्रभृति इमं दिनमारभ्य वो युष्माकं मयि भक्तिर्जायते जायताम् उत्पद्यताम् ॥१८॥ हे भूपाः! युष्माभिः व्यवसितं करणीयतया यन्निश्चितं तद्दिष्ट्या समीचीनम्॥ श्रिया सम्पत्या ऐश्वर्य्यमदेन राज्याधिकारदर्पेण॥ उन्नाहं स्वतन्त्राचरणं नृणामुन्मादकमस्तीत्यहं पश्ये पश्यामि। यथाऽहं पश्यामि तथा भवन्तोऽपि ऋतभाषिणः

सत्यवक्तार: सन्ति भवदुक्तं सत्यमित्यर्थ: ॥१९॥ तथा हि हैहय: सहस्रार्जुन: ॥२०॥ यदुत्पाद्यं देहादिप्राकृतं तदेतत्सर्वम् अन्तवद्विनाशि ॥ विज्ञाय युक्ता: सावधाना: सन्त: ॥२१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तन्निश्चितमभिनन्दति ॥ दिष्ट्येति ॥ हे भूपा:, भवन्त: ऋतं यथास्थितं तात्त्विकमिति यावत्तद्भाषन्त इति यथाविधा:, भवन्ति । तैर्भवद्भिरिति शेष: । व्यवसितं निश्चितं, दिष्ट्या, तच्छ्रवणेनास्माकमानन्दो जात इति भाव: । तदेवोपपादयति । श्रीश्च ऐश्वर्यं च ताभ्यां यो मदोन्नाहो मदोद्रेकस्तं, नृणाम् उन्मादकं, पश्ये पश्यामीत्यर्थ: ॥१८॥ तदेवाह ॥ हैहय इति ॥ हैहय: कार्तवीर्य:, नहुष:, वेन:, रावण:, नरको नरकासुर:, अपरे एतेभ्योऽन्येपि, देवाश्च दैत्याश्च नरेश्वराश्च ते, श्रीमदात्, स्थानात्, भ्रंशिता: भ्रंशं प्रापिता:, तत्र हैहयश्चक्रवर्ती नरेश्वर: पितु: कामधेनुहरणात् परशुरामेण सपुत्रो हत: । नहुषो देवेन्द्रतां प्राप्त उन्मत्त: शचीसङ्गाय ब्राह्मणान् शिबिकां वाहयन् तैरेव ततो भ्रंशितोऽजगरत्वमवाप । वेनोऽप्युन्मत्तो ब्राह्मणानधिक्षिपंस्तैरेव हुंकृतैर्हत: । रावणो राक्षसेश्वर: सीतामभिलषन् राघवेण हत: । नरको दैत्येश्वरो दितिकुण्डलाद्याहरणात् मयैव हत: । एवमपरेऽपि श्रीमदात् स्थानाद्भ्रंशिता: ॥१९॥ भवन्त इति ॥ अत:, भवन्तोऽपि, यत् उपाद्यं देहादि, एतत् अन्तवत् विज्ञाय, युक्ता: अव्याहतचेतस:, अध्वरैर्यज्ञै:, मां यजन्त: आराधयन्त: सन्त:, धर्मेण प्रजा:, रक्षथ रक्षध्वम् रक्षन्त्वित्यर्थ: । मध्यमपुरुष आर्ष: ॥२०॥ संतन्वन्त ॥ प्रजातन्तून् पुत्रपौत्रादिसन्तती:, सन्तन्वन्तो विस्तारयन्त:, सुखं, दु:खं, भव उत्पत्ति: अभवो भवेतरश्च तौ तदन्यार्थेऽत्र नञ् । मरणमित्यर्थ: । तौ भवाभवौ जन्ममृत्यू, एतेषां मध्ये यस्मिन् काले यद्यत्, प्राप्तं प्राप्तं भवेत्, एतच्च, सेवन्त: सेवमाना:, मयि चित्तं येषां तथाभूता: सन्त:, विचरिष्यथ कालं नयतेत्यर्थ: ॥२१॥

कृष्णप्रिया

श्रीभगवानुवाच - भगवान श्रीकृष्णचन्द्रजीने कहा- हे राजाओ आप लोगोंने जैसी अभीलाषा व्यक्ति की है तदनुसार आज से मुजमें आप लोगोंका सुदृढ स्नेह होगा । इस विषयको आप अवश्य जानें कि सर्वका आत्मा एवं स्वामी हुं ।।१८।।हे राजाओं ! आप लोगोंने जो निश्चय किया है वह सचमुच आपके लिये बडे सौभाग्य और आनन्द का विषय है कि क्योंकि मैं देखता हुं कि धन सम्पत्ति और ऐश्वर्य मद से चूर होकर बहुत से लोग उच्छ्रृंखल और मतवाले हो जाते है हैहय, रावण, नरकासुर, आदि दनेक देवता, दैत्य, एवं नृपति श्रीमदके कारण अपने अधिकारसे-पदसे च्युत हो चुके है ।।२०।।आप सुज्ञ यह समझ लीजिये कि देह और देह के सम्बन्ध वाले उत्पन्न होते है इसलिये उनका विनाश भी अवश्य ही है । इसलिये इन पदार्थोमें आसक्ति मत करो । बडी सावधानी से अपना मन और अपनी इन्द्रियोंको वशमें रखकर यज्ञोंका अनुष्ठान कर मेरा आराधन करो और धर्मपुर:सर प्रजाका संरक्षण करो ।।२१।।

[1]नितन्वन्त: प्रजातन्तून् [2]सुखं दु:खं भवाभवौ । प्राप्तं प्राप्तं च सेवन्तो मच्चित्ता विचरिष्यथ ॥२२॥
उदासीनाश्च देहादावात्मारामा धृतव्रता: । मय्यावेश्य मन: सम्यङ्मामन्ते ब्रह्म यास्यथ ॥२३॥

श्रीशुक उवाच

इत्यादिश्य नृपान् कृष्णो भगवान् भुवनेश्वर: । [3]तेषां न्ययुङ्क्त पुरुषान् स्त्रियो मज्जनकर्मणि ॥२४॥
सपर्यां कारयामास सहदेवेन भारत । नरदेवोचितैर्वस्त्रैर्भूषणै: स्रग्विलेपनै: ॥२५॥

कर्दमक्षमा

प्रजातन्तून्, वितन्वन्त:, सुखम्, दु:खम्, भवाभवौ, प्राप्तम्, च, सेवन्त:, मच्चित्ता:, विचरिष्यथ ॥२२॥ देहादौ,

---

[1] संतन्वन्त:-श्रीधर. वंशी. वीर. विज. । [2] सुखदु:खे-विज. । [3] तेषामयुङ्क्त गो. प्रे. टी. ।

उदासीनाः, आत्मारामाः, धृतव्रताः, मनः, सम्यक्, मयि, आवेश्य, माम्, ब्रह्म, अन्ते, यास्यथ ॥२३॥ श्रीशुक उवाच :- भुवनेश्वरः, भगवान्, कृष्णः, इत्थम्, नृपान्, आदिश्य, तेषाम्, मज्जनकर्मणि, पुरुषान्, स्त्रियः, न्ययुङ्क्त ॥२४॥ भारत ! सहदेवेन, नरदेवोचितैः, वस्त्रैः, भूषणैः, स्त्रग्विलेपनैः, सपर्याम्, कारयामास ॥२५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रजातन्तून् पुत्रादिसन्ततीः प्राप्तं प्राप्तं समत्वेन सेवमानाः ॥२२॥ मां ब्रह्म यास्यथ ॥२३॥ स्त्रियश्च तेषां मज्जनकर्मण्यभ्यङ्गस्नानादौ न्ययुङ्क्त ॥२४-२५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भवाभवौ मङ्गलामङ्गले ॥२२॥ अन्ते देहावसानेऽज्ञानान्ते वा ॥२३॥ तेषां बन्धच्युतराज्ञाम् । स्त्रियः स्त्रीः ॥२४-२५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किञ्च प्रजातन्तून् सम्यक्तन्वन्तः भवाभवौ सम्पद्विपदौ तेषु च प्राप्तं प्राप्तं यत्तदेवेति समत्वेनेत्येवार्थः । विचरिष्यथ गृहस्थाचारं करिष्यथ कुरुतेत्यर्थः ॥२२॥ननु तर्हि गृहाद्यासक्त्या श्रीमदेन पुनस्त्वद्भक्तिरहिताः हन्त दुर्गतिं यास्यामः नेत्याह-उदासीना इति । आत्मा एवारामो मत्क्रीडावनं येषां तथाभूताः आत्मनो मम आरामरूपा वा सन्तः तथा धृतं दृढं गृहीतं व्रतं मन्महत्पूजादिनियमो यैस्तथाभूताश्च सन्तो मयि मन आवेश्य सम्यक् सदा सामीप्यादि यथा स्यात्तथा ब्रह्म परब्रह्मरूपं मां यास्यथ ॥२३॥ कृष्णः परमानन्दघनोऽपि तथा भगवान् ब्रह्मादिदुर्लभाज्ञामयपारमैश्वर्य्यादियुक्तोऽपि भुवनैश्वर्य्यलीलाविष्कारकः सन् इति पूर्वोक्तरीत्या नृपानादिश्य पुरुषान् साक्षादभ्यङ्गादौ स्त्रियस्तत्साधनादौ ज्ञेयाः ॥२४॥ सपर्यामिति युग्मकम् । वस्त्रादिभिः सपर्यां कारयामास हे भारतेति श्रीभगवतो दीनवात्सल्येन निजाशारक्षया प्रहर्षोदयात्, किं कृत्वा कारयामास ? तदाह-भोजयित्वेति । कथम्भूतानित्यत्र क्रमेणाह सुस्नातानित्यादि ॥२५-२६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तर्हि गृहाद्यासक्त्या श्रीमदेन पुनस्त्वद्भक्तिरहिता हन्त दुर्गतिं यास्यामः, नेत्याह-उदासीना इति । देहे, आदि-शब्दात् तदीये च पुत्रादौ उदासीना निरपेक्षाः, केवलमात्मनि स्वस्मिन्नेव मयि वा, आ सम्यक् अन्याशेषनैरपेक्ष्येण रमन्त इति तथाभूताः सन्तः, अतो धृतं दृढं गृहीतं व्रतं मत्पूजादिनियमो यैस्तथाभूताश्च सन्तः । एवं मत्स्मृत्युपायप्राप्त्या मयि मन आविश्य सम्यक् सदा सामीप्यादि यथा स्यात्तथा ब्रह्म परब्रह्मरूपं माम्; यद्वा, ब्रह्मरूपा विमुक्ताः सच्चिदानन्दविग्रहाः सन्तो मां प्राप्स्यथ ॥२३॥ कृष्णः सर्व्वानन्दप्रदः; किञ्च, भगवान् महादयालुः, अतो न्ययुङ्क्त । ननु सद्यस्तत्र तावन्तः स्त्रीपुरुषाः कथं सिद्धाः ? तत्राह-भुवनानां चतुर्दशलोकानामीश्वरः, तदिच्छामात्रेण सर्व्वसिद्धेरिति भावः ॥२४॥ वस्त्रादिभिः सपर्य्यां कारयामास हे भारतेति श्रीभगवतो दीनवात्सल्येन निजदासरक्षया प्रहर्षोदयात् ॥२५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१४-३५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

सन्तन्वन्त इति । प्रजातन्तून् पुत्रपौत्रादिसन्ततीः । सन्तन्वन्तो विस्तारयन्तः भव उत्पत्तिरभवः भवेतरः तदन्यार्थोऽत्र नञ् मरणमित्यर्थः । सुखादिकं प्राप्तं समत्वेन सेवमानाः मयि विषयभूते चित्तं येषां ते विचरिष्यथ कालं नयतेत्यर्थः ॥२२॥ देहादावित्यादिशब्देन तदनुबन्धिनां संग्रहः उदासीना अहंममतारहिताः आत्मारामाः स्वात्मपरमात्मयाथात्म्यावलोकनपराः मयि सम्यक् मन आवेश्यान्ते प्रारब्धावसाने ब्रह्म परब्रह्मभूतं मां यास्यथ प्राप्स्यथ ॥२३॥ इतीत्थमादिश्यानुशिक्ष्य तेषां नृपाणां मज्जनकर्मण्यभ्यङ्गस्नानादौ निमित्ते पुरुषान् स्त्रियः स्त्रीश्च न्ययुङ्क्त ॥२४॥ सपर्यामिति । हे भारत ! सहदेवेन जरासन्धसुतेन प्रयोज्यकर्त्रा नरदेवानामर्हैर्वस्त्रादिभिः साधनैः सपर्यां कारयामास ॥२५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

भवाभवौ मङ्गलामङ्गले ॥२२॥ आत्मारामत्वं विवृणोति-मयीति ॥२३-२५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१...२२॥

मय्यावेश्येत्यादि । मयि श्रीवासुदेवे मन आवेश्य यदि मुक्तिवासनाः स्थ, तदा मां यास्यथ, मद्भक्तरूपेणैव स्थास्यथेत्यर्थः । यदि वा कैवल्यकामाः स्थ, तदा मद्वैभवं ब्रह्म यास्यथेति भावः ॥२४-३५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...२२॥

मय्यावेश्येत्यादि । मयि श्रीवासुदेवे मन आवेश्य यदि मुक्तिवासनाः स्थ, तदा मां यास्यथ, मद्भक्तरूपेणैव स्थास्यथेत्यर्थः । यदि वा कैवल्यकामाः स्थ, तदा मद्वैभवं ब्रह्म यास्यथेति भावः ॥२४-३५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रजातन्तून् पुत्रादिसन्ततीः । भवाभवौ भूत्यभूती । प्राप्ते च प्राप्तौ चेति प्राप्तम् एकशेषः ॥२२-२३॥ स्त्रियश्च मज्जनकर्म्मणि अभ्यङ्गस्नानादौ ॥२४-२६॥

गूढार्थदीपिनी

उदासीनाः आसक्तिरहिताः । सम्यक् निर्वासनम् मनः । अन्ते देहावसाने मां प्राप्स्यथ ॥२२॥ मज्जनकर्मणि स्नानादिकर्मणि स्त्रींश्च नियुक्तवान् ॥२३॥ सहदेवेन जरासन्धपुत्रेण प्रयोज्यकर्त्रा सपर्यां सत्कारम् ॥२४॥ वरान्नेन पायसादिना ॥ 'अमृतं क्षीरभोजनम्' इत्युक्तेः ॥२५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भवाभवौ पुत्रपित्रादीनामुत्पत्तिविनाशौ ॥२२-२५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रजातन्तून् प्रजाः पुत्र्यस्तन्तून्पुत्रानिति वा । पुत्रपौत्रपरम्परां सन्तन्वन्तो विस्तारयन्तः । प्रजातन्तुमिति तैत्तिरीय एवमेव व्याख्यातत्वात् । सुखदुःखे भवाभवौ मङ्गलामङ्गले प्राप्तमप्राप्तं च । ईश्वरेच्छयेह यत्प्राप्तं तदेव सेवन्तः सेवमाना मच्चित्ता विचरिष्यथ ॥२२॥ देहादावुदासीना आत्मारामाः स्वमनसैवारमन्ते तथा प्राशस्त्यं यत्र मनसस्तत्रैव रममाणा धृतव्रता धृतं व्रतं यैस्ते मयि मनः सम्यगावेश्यान्ते मां ब्रह्म यास्यथ ॥२३॥ कृष्णो भगवान् भुवनेश्वरो नृपानित्यादिश्य तेषां मज्जनकर्मणि मलिनाङ्गत्वादभ्यङ्गे पुरुषान् स्त्रियश्च न्ययुङ्क्त ॥२४॥ सहदेवेन जरासुतसुतेन नरदेवोचितैर्भूषणैः स्रग्विलेपनैर्वस्त्रैः सपर्यां कारयामास ॥२५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

साधारणं धर्ममाह-वितन्वन्तः प्रजातन्तूनिति । गृहस्थस्यैवैष धर्मः सर्वत्रैव पुरुषार्थसिद्धिरिति वक्तुं नाश्रमान्तरमुपदिशति-प्रजातन्तून् सन्ततिपरम्परां वितन्वन्तः विशेषेण सम्पादयन्तः तदनन्तरं सुखं दुःखम् उद्भवः अभवो हानिः एतच्चतुष्टयं साध्यसाधनरूपं दैववशात् प्राप्तं प्राप्तं सकृत् क्लेशं प्राप्य निवृत्ते रोगे पुनरागते पूर्वानुभूतदुःखभयात्तन्निराकरणार्थं यत्नः कर्तव्य इति सूचयितुं वीप्सा चकारादन्यान्यपि सुखदुःखसाधनानि प्राप्तानि सहने साधनं मच्चित्तानि इति कृष्णोस्ति मामकमनेन समीचीनेन वेति निश्चित्य यथाप्राप्तार्थानुभवः कर्तव्य इत्यर्थः ॥२२॥ एवं कृते यद्भविष्यति फलं तत्साधनसहितं निर्दिशति उदासीना इति । स्वेषु धनबन्धादिषु देहधर्मादिषु च उदासीनाः भवन्तु मा भवन्त्विति रागद्वेषरहिताः न केवलं बहिर्मुखताभाव एव प्रयोजकः किन्त्वात्मरमणमपि एतदुभयसिद्ध्यर्थं धृतभगवद्व्रताः एवं साधनैर्यावज्जीवमपि सम्यक् मन आवेश्य अन्ते मरणसमये ब्रह्मस्वरूपं यास्यथ गमिष्यथ मध्यदेहनाशार्थं प्रयत्ने देहजीवं तिष्ठेत अतो देहान्तस्यैव प्रतीक्षा कर्तव्या मत्स्मरणमेव कर्तुं शक्यं कार्यसाधकं च ततश्च मत्प्राप्तिरेव भविष्यति मम ब्रह्मत्वात् फलं मोक्ष एवेति फलं तत्स्तुतिश्चोक्ता ॥२३॥ एवं निरभिमानस्थितं प्रेमभक्ति निरन्तरस्मरणम् अन्ते मोक्षञ्च तेभ्यो दत्त्वा कृतार्थानपि लोकपुरस्कारार्थं लौकिक्या परिचर्यया संस्कृतान् कृतवानित्याह-इत्यादिश्येति त्रिभिः । यतः कृष्णः सदानन्दः भक्तसुखार्थमेव गृहीतावतारः साधनसम्पत्त्यर्थमाह-भुवनानामीश्वर इति तेषां प्रथमं मज्जनकर्मणि स्नानकर्मणि पुरुषान् स्त्रियश्च न्ययुङ्क्त आश्रमापनोदः पुरुषैः सौष्ठवं स्त्रीभिरित्युभयाविनियोगः अमज्जनकर्मणि वा येषु कर्मसु कृतेषु मज्जनममज्जनं वा प्राप्नोति श्मश्रुकर्मोन्मर्दनादिषु मज्जनं तिलकादिष्वमज्जनमिति ॥२४॥ ततस्ते राजानो गृहे समागता इति सहदेवेन जरासन्धपुत्रेण कृतां तेषां सपर्यां पूजां विधिवत्कारयामास भारतेति धर्मकर्मणि विश्वासार्थं पूजायां प्रकारमाह नरदेवोचितैरिति । उत्कृष्टैः कञ्चुकोष्णीषादिभिः भूषणैः कुण्डलादिभिः स्रग्भिः चन्दनादिभिः ॥२५॥

श्रीसुबोधिनीसारः

प्रजातन्तून् पुत्रादिसन्ततीः संतन्वन्तो विस्तृण्वन्तः प्राप्तं प्राप्तं सुखदुःखादि सेवन्तो मच्चित्ता यूयं विचरिष्यथ ॥२२॥

देहादौ उदासीना ममतारहिता आत्मक्रीडा व्रतनिष्ठा मयि मनः सम्यक् प्रकारेणावेश्यान्ते प्रारब्धान्ते ब्रह्म मां प्राप्स्यथ ॥२३॥ शुकोक्तिः। इत्येवमादिश्य नृपान् भुवनेश्वरो जगत्पतिर्भगवान् तेषां राज्ञां मज्जनकर्मणि स्नानादौ पुरुषान् स्त्रियो न्ययुङ्क्त प्रयुक्तवान् ॥२४॥ हे भारत सहदेवेन तेषां सपर्यां पूजां कारयामास कैरित्यत आह राजयोग्यैर्वस्त्रादिभिः ॥२५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रजातन्तून् पुत्रपौत्रादिसन्ततीः विस्तारयन्तः सुखादिकं च प्राप्तं प्राप्तं सेवन्तः समत्वेन सेवमानाः मयि विषयभूते चित्तं येषां ते मच्चित्ताः मां स्मरन्तो विचरिष्यथ कालं नेष्यथेति स्मरणाविच्छेदोपायो दर्शितः। भवः विभवः, अभवस्तद्विनाशः ॥२२॥ यच्च संसाराद्विमोक्षणं प्रार्थितं तत्रोपायमाह-उदासीना इति। आदिशब्देन धनपुत्रकलत्रादिग्रहणम्। आत्मन्येवारामो रमणं येषां ते तथा सर्वदा स्वरूपानुसन्धानपराः धृतव्रताः गृहीतपूजानमस्कारादिनियमाः सम्यक् विगतविषयवासनं मनो मय्यावेश्य अन्ते प्रारब्धावसाने परब्रह्मात्मकं मां यास्यथ प्राप्स्यथ ॥२३॥ कृष्ण इत्येवं नृपानादिश्य अनुशिष्य तेषां मज्जनकर्मणि अभ्यङ्गस्नानादौ निमित्ते पुरुषान् स्त्रियः स्त्रीश्च न्ययुङ्क्त। एवं तेषां सन्माननं तस्य युक्तमेव, पालकत्वेन सन्मार्गप्रवर्तकत्वात् इत्याशयेनाह-भुवनेश्वर इति अत्र हेतुमाह-भगवानिति ॥२४॥ हे भारत ! सहदेवेन जरासन्धपुत्रेण प्रयोज्यकर्त्रा नरदेवानां राज्ञामुचितैर्योग्यैर्वस्त्रादिभिः सधनैस्तेषां सपर्याम् अलङ्कारं च कारयामास ॥२५॥

अन्वितार्थप्रकाशिका

उदासीना इति॥ देहधनपुत्रादौ उदासीनाः आत्मन्येवारामो रमणं येषां ते तथा धृतव्रताः गृहीतसन्नियमाः सम्यक् निर्वासनं मनो मय्यावेश्य अन्ते प्रारब्धावसाने परब्रह्मात्मकं मां यास्यथ प्राप्स्यथ ॥२२॥ इतीति॥ भुवनेश्वरो भगवान् कृष्णः इत्येवं नृपानादिश्य अनुशिष्य तेषां मज्जनकर्मणि अभ्यङ्गस्नानादौ निमित्ते पुरुषान् स्त्रियः स्त्रीश्च न्ययुङ्क्त ॥२३॥ सपर्यामिति॥ हे भारत ! सहदेवेन जरासन्धपुत्रेण प्रयोज्यकर्त्रा नरदेवानां राज्ञामुचितैर्योगैर्वस्त्रादिभिः साधनैस्तेषां सपर्याम् अलङ्कारं च कारयामास ॥२४॥ भोजयित्वेति॥ एवं सुस्नातान् समलङ्कृतान् भोगैश्च युक्तानन् वरेणान्नेन भोजयित्वा पुनः सहदेवेन तेषां सपर्यां कारयामास इति ॥२५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रजातन्तून् पुत्रपौत्रादिसन्तानानि सन्तन्वन्त उत्पादयन्तः भवाभवौ समृद्धेरुत्पत्तिनाशौ॥ विचरिष्यथ गृहस्थाचारं कुरुतेत्यर्थः ॥२२॥ ब्रह्म बृहत् मां यास्यथ ॥२३॥ तेषां मज्जनकर्मणि न्ययुङ्क्त प्रेरयामास स्त्रियो जलानयने पुरुषान् मज्जने इति विवेकः ॥२४॥ सपर्यां सन्मानम् ॥२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उदासीना इति॥ देहादौ आदिशब्देन तदनुबन्धिसंग्रहः। उदासीनाः अहंममतारहिताः, आत्मारामाः स्वात्मपरमात्मयाथात्म्यावलोकनपराः, धृतानि व्रतानि यैस्तथाभूताश्च सन्तः, मयि मत्स्वरूपे, सम्यक् मनः, आवेश्य, अन्ते प्रारब्धावसाने, ब्रह्म ब्रह्मस्वरूपं, मां यास्यथ प्राप्स्यथ ॥२२॥ इतीति॥ भुवनेश्वरः, भगवान् कृष्णः, नृपान्, इतीत्थं, आदिश्य अनुशिक्ष्य, तेषां नृपाणां, मज्जनकर्मणि अभ्यङ्गस्नानादौ निमित्ते, पुरुषान्, स्त्रियः स्त्रीश्च, न्ययुङ्क्त नियोजितवान् ॥२३॥ सपर्यामिति॥ हे भारत, कृष्णः, सहदेवेन जरासन्धसुतेन प्रयोज्यकर्त्रा, नरदेवोचितैः नरदेवानामर्हैः, वस्त्रैः, भूषणैः, स्रग्विलेपनैः साधनैः, सपर्यां पूजां, कारयामास ॥२४॥ भोजयित्वेति॥ सुस्नातान् समलंकृतान् तान्, वरान्नेन श्रेष्ठान्नेन, भोजयित्वा, भुजिकर्मणोऽन्नस्य तत्करणत्वविवक्षायां तृतीया। ततः पुनः, तान्नृपोचितैः, ताम्बूलाद्यैः, विविधैः, भोगैश्च युक्तान्, कारयामासेत्यनुषङ्गः ॥२५॥

कृष्णप्रिया

आप लोग अपने वंश परम्पराके संरक्षणके लिये किन्तु भोगके लिये नहीं संतति को उत्पन्न करें और अपने प्रारब्धके अनुसार जन्म-मृत्यु-सुख-दुःख-हानि-लाभ आदि जो कुछ भी प्राप्त हो उन्हें समभावसे मेरा प्रसाद मान कर सेवन करो और अपना मन मुझमें लगाकर जीवन आनन्द से पसार करें ॥२२॥ देह और देहके साथ सम्बन्ध वाले परिवारमें-पदार्थोमें किसी भी प्रकारकी आसक्ति न रखकर उदासीन रहो; अपने मनसे व्रतोंका सेवन करें और अपना मन भली भांति मुझमें रखकर अन्तमें आप लोग मुझ ब्रह्मस्वरुपको ही प्राप्त हो जाओगे ॥२३॥   श्रीशुक उवाच - श्रीशुक महर्षिने कहा - राजन् ! चौदह भुवनोंके नाथ भगवान

श्रीकृष्णने सर्वराजाओंको यह आदेश देकर उन्हें स्नान आदि कराने के लिये अनेक स्त्री पुरुष नियुक्त कर दिये ।।२४।।हे भारत ! जरांघके पुत्र श्रीसहदेवसे उन नृपतियोंको राजोचित वस्त्र अलंकार माला गन्ध आदि दिलवाकर राजाओंका उत्तम आदर करवाया ।।२५।।

भोजयित्वा वरान्नेन सुस्नातान् समलङ्कृतान् । भोगैश्च विविधैर्युक्तांस्ताम्बूलाद्यैर्नृपोचितैः ।।२६।।
ते पूजिता मुकुन्देन राजानो मृष्टकुण्डलाः । विरेजुर्मोचिताः क्लेशात् प्रावृडन्ते यथा ग्रहाः ।।२७।।
रथान् सदश्वानारोप्य मणिकाञ्चनभूषितान् । [1]प्रीणय्य सूनृतैर्वाक्यैः स्वदेशान् प्रत्ययापयत् ।।२८।।
त एवं [2]मोचिताः कृच्छ्रात् कृष्णेन सुमहात्मना । ययुस्तमेव ध्यायन्तः कृतानि च जगत्पतेः ।।२९।।

कर्दमक्षमा

सुस्नातान्, समलङ्कृतान्, वरान्नेन, भोजयित्वा, विविधैः, भोगैः, युक्तान्, च, नृपोचितैः, ताम्बूलाद्यैः, सपर्याम्, कारयामास ।।२६।। मुकुन्देन, पूजिताः, मृष्टकुण्डलाः, ते, राजानः, क्लेशात्, मोचिताः, प्रावृडन्ते, ग्रहाः, यथा, विरेजुः ।।२७।। मणिकाञ्चनभूषितान्, सदश्वान्, रथान्, आरोप्य, सूनृतैः, वाक्यैः, प्रीणय्य, स्वदेशात्, प्रत्ययापयत् ।।२८।।कृष्णेन, सुमहात्मना, एवम्, ते, कृच्छ्रात्, मोचिताः, च, जगत्पतेः, कृतानि, च, तम्, एव, ध्यायन्तः, ययुः ।।२९।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

सुस्नातान् सम्यगलङ्कृतान् भोगैश्च युक्तान्वरेणान्नेन भोजयित्वा पुनस्तेषां सपर्यां सहदेवेन कारयामास ।।२६।। ग्रहाश्चन्द्रादयो यथा ।।२७।। प्रीणय्य नन्दयित्वा ।।२८-२९।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वरान्नेन पायसादिना ।।२६।। ते राजानः ।।२७-२८।। ते नृपाः तं श्रीकृष्णम् ।।२९।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वरान्नेन पायसादिना ।।२६।। ते राजानः ।।२७-२८।। ते नृपाः तं श्रीकृष्णम् ।।२९।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

किं कृत्वा कारयामास ? तदाह-भोजयित्वेति । कथम्भूतान् सतः ? आदौ सुष्ठु श्मश्रुवपनादिपूर्व्वकतैलमर्दनशिरोभ्यङ्गादिना स्नातान्, ततः सम्यक् सद्वस्त्रालङ्कारमाल्यानुलेपनैरलङ्कृतान्, ततो भोगैर्युक्तांश्च सतः । आद्य-शब्देन फलमूलादयो विचित्रपानकादयश्च ।।२६।। मुकुन्देन परमानन्दप्रदेन भगवता पूजिताः सम्मानिताः पूजां कारिता वा सन्तः, अत एव मृष्टकुण्डलाः सन्तो विशेषेण पूर्व्वतोऽप्याधिक्येन रेजुरशोभन्त । अन्यशेषालङ्काराणामुज्ज्वलत्वेऽपि मृष्टकुण्डला इति मुखशोभाविशेषापेक्षया । किञ्च, क्लेशात् संरोधजात् सांसारिकाच्च मोचिताः सन्तः, अयमपि मुखप्रसादादिना शोभाविशेषे हेतुविशेषः । संरोधनादिना क्लिष्टानां तदभावेन शोभाभरोदये दृष्टान्तः-प्रावृडन्त इति । तत्र प्रावृट् मेघमयवर्षाकालः शोभाच्छादकसंरोधादिस्थानीयः ।।२७।। सन्तो वेगवत्तादिनोत्तमा अश्वा येषु तानारोप्य बलात् स्वसाक्षादेवाधिरोप्य सूनृतैः 'भवन्तो मदीया अहं च भवदीय एव; मत्प्रियतमस्य श्रीयुधिष्ठिरस्य यज्ञमहोत्सवो भवद्भिर्गत्वालङ्कार्य्यः' इत्यादिभिः, स्वस्वदेशान् प्रति पुनर्जीवयित्वेव अयापयत् प्रस्थापयामास श्रीभगवान् ।।२८।। कृष्णेन परमानन्दघनमूर्तिनेति साक्षाद्दर्शनानन्दिताश्चेति भावः । यतः सु शोभनः महांश्च आत्मा, दयालुत्वादिति भावः; किंवा सर्व्वगुणैः श्रेष्ठ आत्मा श्रीविग्रहो यस्य तेन, अतस्तमेव ध्यायन्तस्तथैव चिन्तयन्तः; किञ्च, जगत्पतेः साक्षात् परमेश्वरस्यापि, कृतानि तादृशस्वस्त्ययनादीनि जरासन्धघातनादीनि वा कर्म्माणि च ध्यायन्तः ।।२९।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ।।१४-३५।।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

भोजयित्वेति । वरान्नेन श्रेष्ठान्नेन भुजिकर्मणोऽन्नस्य तत्करणत्वविवक्षायां तृतीया ततः पुनस्ताम्बूलाद्यैर्विविधैर्भोगैर्युक्तान कारयामासेत्यनुषङ्गः ।।२६।। त इति । ते राजानः सहदेवेन पूजिताः कृष्णेन क्लेशान्मोचिताः विरेजुः यथा प्रावृडन्ते शरदि

---

[1] प्रीणीय-च. पु. टी. । [2] मोचिताः-श्रीधर. वंशी. वीर. विज. ।

ग्रहाश्चन्द्रादयस्तद्वत् ॥२७॥ रथानिति । सन्तः समीचीनाः अश्वा येषान्तान् रथानारोप्य रथेषु उपवेश्य सूनृतैर्मधुरैर्वाक्यैः प्रीणीय हर्षयित्वा स्वस्वदेशान् प्रत्ययापयत् प्रस्थापयामास ॥२८॥ त इति कृच्छ्रात् क्लेशान्मोचितास्तमेव श्रीकृष्णमेव जगत्पतेः कृष्णस्य कृतानि चेष्टितानि च ध्यायन्तः जग्मुः ययुः ॥२९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

भोगैः स्रक्चन्दनादिलक्षणैर्धनैर्वा ॥२६॥ ग्रहाः आदित्यादयः ॥२७॥ प्रीणय्य प्रीतिं जनयित्वा ॥२८॥ कृतानि कार्याणि ॥२९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२४-३५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२४-३५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ग्रहाश्चन्द्रादयः ॥२७-३४॥

गूढार्थदीपिनी

ते राजानः विरेजुः प्रावृडन्ते शरत्काले यथा ग्रहाः चन्द्रादयः विराजन्ते तथा । प्रावृट् वर्षर्तुः ॥२६॥ राज्ञः रथान् आरोप्य रथेषूपवेश्य सूनृतैः मधुरवाक्यैः प्रीणय्य हर्षयित्वा च स्वस्वदेशान् प्रत्ययापयत् प्रेषयामास ॥२७॥ सुमहान् अतिदयालुः आत्मा चित्तं स्वभावो वा यस्य तेन कृष्णेन मोचितास्ते नृपाः तमेव ध्यायन्तः तस्य कृतानि चरितानि गायन्तः ययुरित्यन्वयः ॥२८॥ ते नृपाः प्रकृतिभ्यः अमात्यादिभ्यः चेष्टितम् ऊचुः यथा च अन्वशासत् शिक्षितवान् तथा चक्रुः अतन्द्रिताः आलस्यरहिताः सन्तः ॥२९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नृपोचितैस्ताम्बूलाद्यैर्विविधैर्भोगैर्युक्तान् कारयामासेत्यनुषङ्गः ॥२६-२७॥ सूनृतैः मधुरैर्वाक्यैः प्रीणय्य नन्दयित्वा ॥२८॥ तं कृष्णं कृतानि च ध्यायन्तः ॥२९॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सुस्नातान्समलङ्कृतान्वरान्नेन भोजयित्वा भोगादिभिर्युक्तान्कारयामास ॥२६॥ प्रावृडन्ते वर्षाकालान्ते ग्रहा मङ्गलाद्या भाविन्या मायासम्पद उचिता इत्यप्यर्थः ॥२७॥ सदश्वान्रथान्सूनृतैर्वाक्यैः प्रीणय्य प्रीणयित्वा स्वदेशान्स्वस्वदेशान्प्रत्ययापयत् ॥२८॥ तमेव तत्कृतानि च ध्यायन्तः ॥२९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो वरान्नेन पक्वेन भोजयित्वा पुनः सायं सुस्नातान् समलङ्कृतान्विविधैर्भोगैः नृत्यगीतादिभिर्युक्तान् चकार नृपभोगे प्रथमं ताम्बूलमिति अन्नवस्त्राणां सर्वसाधारणत्वात् अवान्तरभेद एव भवति तत्रापि नृपोचितैः ॥२६॥ भगवत्संस्कृतांस्तान् वर्णयति- ते पूजिता इति । पूर्वमन्यद्वारा संस्कृता अपि वाक्यैरुत्तमपदार्थदानैश्च मुकुन्देन पुनः पूजिताः सर्व एव राजानः मृष्टकुण्डलाः रत्नोज्ज्वलत्कुण्डलाः सन्तः राजलक्षणं प्राप्य विशेषेण रेजुः पूर्वावस्थापेक्षयापि तत्र हेतुः क्लेशाद्विमोचिता इति । क्लेशभोगानन्तरं पुनः संस्कारे अधिका कान्तिर्भवति अत्र दृष्टान्तमाह-प्रावृडन्ते यथा ग्रहा इति पूर्वापेक्षयापि मेघापगमे ग्रहाः शुक्रादयः सोज्ज्वला भवन्ति वृष्ट्या मेघगत्या च मध्ये स्थिता भूरेणव अपगच्छन्ति मलिनानां व्यवधायकत्वाभावात् ग्रहा उज्ज्वला भवन्ति एवं पुरुषा अपि भोगेन पापनाशात् संस्कारेण बहिर्मालिन्याभावाच्च भूषणैरत्युज्ज्वला भवन्तीत्यर्थः ॥२७॥ ततो भगवान् स्वसङ्गे समानेष्टतीति शङ्कां वारयितुमाह-रथान् सदश्वानिति । सर्वे रथारूढाः कृताः उत्तमाश्च रथेषु योजिताः ते च रथाः मणिकाञ्चनादिभिर्भूषिताः ततः सूनृतैरपि वाक्यैः तान् नृपान् प्रीणय्य एवं कायवाङ्-मनोभिः तान् सर्वात्मना सुखिनः कृत्वा स्वदेशान् तत्तद्देशान् प्रत्ययापयत

प्रस्थापितवान् प्रत्यापत्तिः निरोधे आवश्यकी सा च गृहस्थितिपर्यन्ता अन्यथा सामिकृता स्यात् ॥२८॥ एवं भगवत्पुरस्कृतानां स्वदेशगमनमाह–त एवमिति । लोके ये मोक्ष्यन्ते तेभ्यः प्रत्युत किञ्चिद्गृहीत्वा अगृहीत्वा वा शृङ्खलादिभ्यः केवलं पृथक् क्रियन्ते न त्वेवं सर्वसुखसाधनैः संयुज्यन्ते एते त्वेवं मोक्षिताः तत्रापि कृच्छ्रात् किञ्चिद्विलम्बे प्रमथनाथाय छिन्ना भवेयुरिति यतः कृष्णेन सदानन्देन मोक्षे मोचकधर्मानुप्रवेशादेवमित्यर्थः । महात्मा परं स्वोपकारव्यतिरेकेणैव परं मुञ्चति अयं तु सुमहात्मेति स्वतः सर्वदानन्दयुक्तः अतस्तमेव ध्यायन्तो ययुः भगवत्कृतानि च सम्माननादीनि एतच्च स्मरणं तेषां युक्तमेव भगवान् भर्तेति आवश्यकत्वात् न त्वनेनापि कृतनिष्क्रिया इति ज्ञापयन्नाह–जगत्पतेरिति ॥२९॥

श्रीसुबोधिनीसारः

सुस्नातान् समलङ्कृतान्राजान् आरोप्य सूनृतेर्मधुरैर्वाक्यैः प्रीणय्य प्रसाद्य तान् स्वदेशान् प्रैषयत् ॥२८॥ एवं सुमहात्मना कृष्णेन मोचितास्ते भूपाः तं कृष्णं तत्कृतानि कर्माणि च ध्यायन्तः चिन्तयानाः कृच्छ्रात् कष्टेन ययुः कृच्छ्रान्मोचिता इति वा ॥२९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सुस्नातान् समलङ्कृतांश्च तान् वरेण श्रेष्ठेनान्नेन भोजयित्वा ताम्बूलाद्यैरन्यैश्च नृपोचितैर्विविधैर्भोगैर्युक्तान् कारयामासेत्यन्वयः ॥२६॥ ते राजानो मुकुन्देन क्लेशात् मोचिताः पूजिताः, अत एव मृष्टानि शुद्धानि कुण्डलानि येषां ते प्रावृडन्ते शरत्काले ग्रहाश्चन्द्रादयो यथा विराजन्ते तथा विरेजुः ॥२७॥ ततश्च मणियुक्तैः काञ्चनैर्भूषणैर्भूषितांस्तान् राज्ञः सन्तः समीचीना अश्वा येषु तान् रथानारोप्य रथेषूपविश्य सूनृतैर्मधुरैर्वाक्यैः प्रीणय्य हर्षयित्वा स्वस्वदेशान् प्रत्ययापयत् प्रस्थापयामास ॥२८॥ ते राजानः सुमहात्मना अत्युदारचित्तेन कृष्णेनैवं कृच्छ्रात्क्लेशान्मोचितास्तं कृष्णं जगत्पतेस्तस्य कृतानि कर्माणि च ध्यायन्त एव ययुरित्यन्वयः ॥२९॥

अन्वितार्थप्रकाशिका

ते इति ॥ ते राजानो मुकुन्देन क्लेशात् मोचिताः पूजिताः अत एव मृष्टानि शुद्धानि कुण्डलानि येषां ते प्रावृडन्ते शरत्काले ग्रहाश्चन्द्रादयो यथा विराजन्ते तथा विरेजुः ॥२६॥ रथानिति ॥ मणियुक्तैः काञ्चनैर्भूषितांस्तान् राज्ञः सन्तः समीचीना अश्वा येषु तान् रथानारोप्य रथेषूपवेश्य सूनृतैर्मधुरैर्वाक्यैः प्रीणय्य हर्षयित्वा । ल्यबार्षः । स्वस्वदेशान् प्रत्ययापयत् प्रस्थापयामास ॥२७॥ त इति ॥ ते राजानः सुमहात्मना अत्युदारचित्तेन कृष्णेनैवं कृच्छ्रात् क्लेशान्मोचितास्तं कृष्णमेव ध्यायन्तः तथा जगत्पतेस्तस्य कृतानि कर्माणि च ध्यायन्त एव ययुः ॥२८॥ जगदुरिति ॥ गृहं गत्वा च ते महापुरुषस्य चेष्टितं जरासन्धघातादिप्रकृतिभ्यः अमात्यादिभ्यो जगदुः ऊचुः । भगवान् यथा अन्वशासत् अनुशिक्षितवान् । "बहुलं छन्दसि" इति शपो लुक् न । तथा अतन्द्रिताः सावधानाः सन्तश्चक्रुश्च ॥२९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भोजनानन्तरं ताम्बूलाद्यैः सन्मानं कारयामास ॥२६॥ प्रावृडन्ते वर्षाकालान्ते ग्रहाः सूर्यचन्द्रादयो यथा ॥२७॥ प्रीणय्य प्रसाद्य प्रस्थापयामास ॥२८-२९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त इति ॥ ते राजानः, पूजिताः, सहदेवेनेति शेषः । मुकुन्देन श्रीकृष्णेन, क्लेशात् मोचिताः, जरासन्धकृतबन्धनजदुःखाद्रहिताः कृता इत्यर्थः । मृष्टकुण्डलाः सन्तः, प्रावृडन्ते शरदि, ग्रहाश्चन्द्रादयः, यथा, तद्वत् विरेजुः ॥२६॥ रथानिति ॥ मणिकाञ्चनभूषितान्, सन्तः समीचीना अश्वा येषां तान्, रथान् आरोप्य, रथेषूपवेश्येत्यर्थः, सूनृतैर्मधुरैः, वाक्यैः, प्रीणय्य हर्षयित्वा, स्वदेशान्, प्रत्ययापयत् प्रस्थापयामास ॥२७॥ त इति ॥ एवं सुमहात्मना कृष्णेन, कृच्छ्रान्निरोधदुःखात्, मोचिताः ते राजानः, जगत्पतेः श्रीकृष्णस्य, कृतानि चेष्टितानि, ध्यायन्तः, तमेव श्रीकृष्णमेव, ध्यायन्तः सन्तश्च, ययुः ॥२८॥ जगदुरिति ॥ ते राजानः, महापुरुषचेष्टितं, प्रकृतिभ्योऽमात्यादिभ्यः, जगदुरूचुः । भगवान् श्रीकृष्णः, यथ अन्वशासदनुशिक्षितवान्, तथा, अतन्द्रिताः सन्तः, चक्रुः ॥२९॥

कृष्णप्रिया

जब सब नृपति स्नान करके वस्त्रालंकारसे समलंकृत हो चुके तब भगवानने उन सर्व राजाओंको उत्तम पदार्थोंका भोजन करवाया और ताम्बूल आदि विविध प्रकारके राजोचित पदार्थोंसे सम्मान करवाया ।।२६।। कृपानिधान भगवान श्रीकृष्णने इस प्रकार उन बंदी नृपतियोको सम्मानित किया । अब वे समस्त क्लेशोंसे मुक्त होकर कानोंमे देदीप्यमान सुन्दर कुण्डल धारणकर ऐसे शोभायमान हुए जैसे वर्षाऋतुकी समाप्ति होने पर तारे ।।२७।।कृपानिधान भगवान श्रीकृष्णने उन राजाओंको मणिमंडित और सुवर्ण विभूषित उत्तम अश्वोंसे संयुक्त रथों पर चढाया, पुनः सुधामय वाणीसे तृप्त किया तदन्तर उन्हें अपने अपने देशों को भेज दिया ।।२८।।परमोदार शील भगवान श्रीकृष्णने उन नरेशोंको महाकष्टसे मुक्त किया । तदनन्तर वे नरपति भगवान श्रीकृष्णके नाम-रूप-गुण-शील आदिका चिन्तन करते करते अपनी अपनी राजधानीको प्रस्थान कर गऐ ।।२९।।

जगदुः प्रकृतिभ्यस्ते महापुरुषचेष्टितम् । यथान्वशासद्भगवांस्तथा चक्रुरतन्द्रिताः ।।३०।।
जरासन्धं घातयित्वा भीमसेनेन केशवः । पार्थाभ्यां संयुतः प्रायात् सहदेवेन पूजितः ।।३१।।
गत्वा ते खाण्डवप्रस्थं शङ्खान्[1] दध्मुर्जितारयः । हर्षयन्तः स्वसुहृदो दुर्हृदां चासुखावहाः।।३२।।
तच्छ्रुत्वा प्रीतमनस इन्द्रप्रस्थनिवासिनः । मेनिरे मागधं शान्तं राजा चाप्तमनोरथः ।।३३।।

कर्दमक्षमा

ते, प्रकृतिभ्यः, महापुरुषचेष्टितम्, जगदुः, अतन्द्रिताः, भगवान्, यथा, अन्वशासत, तथा, चक्रुः ।।३०।। केशवः, भीमसेनेन, जरासन्धम्, घातयित्वा, सहदेवेन, पूजितः, पार्थाभ्याम्, संयुतः, प्रादात् ।।३१।। जितारयः, खाण्डवप्रस्थम्, गत्वा, स्वसुहृदः, हर्षयन्तः, च, दुर्हृदाम्, असुखावहाः, ते, शङ्खान्, दध्मुः ।।३२।। तत्, श्रुत्वा, इन्द्रप्रस्थनिवासिनः, प्रीतमनसः, मागधम्, शान्तम्, च, राजा, आप्तमनोरथः, इति, मेनिरे ।।३३।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

जगदुः ऊचुः ।।३०-३१।। खाण्डवप्रस्थमिन्द्रप्रस्थम् ।।३२।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ते नृपाः । प्रकृतिभ्यः सुहृदादिभ्यः । यथाऽन्वशासत् 'भवन्त एतद्विज्ञाय' इत्यारभ्य 'मामन्ते ब्रह्म यास्यथ' इत्यन्तेन ।।३०-३१।। ते कृष्णार्जुनभीमाः । दुर्हृदां शत्रूणाम् ।।३२।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महापुरुषस्य चेष्टितं लोकोत्तरव्यवहारं स्वमोचनादिप्रतियापनान्तं जगदुः हर्षादुच्चैः कीर्तयामासुः प्रहर्षस्वभावात् वरमाश्चर्य्यात् प्रेमतश्च तत्तु तेषां मन्त्र्यादिष्वपि भगवद्भक्तये जातमिति भावः । किञ्च यथेति भगवान् परमाप्तशिरोमणिरिति तदनुशासने विश्वासः सूचितः अत एवातन्द्रिता अनलसाः सावधानाश्च सन्तः ।।३०।। केशवः पुनश्चक्रादिधारणवैलक्षण्येन तदाकारस्सन्निति सर्वाविर्भावस्पदता दर्शनेन स्वयं भगवत्त्वमेव दर्शितं प्रायात् जरासन्धस्य दिव्यरथमारुह्य ततः प्रयाणं चक्रे तथा च सभापर्वणि - "जरासन्धरथं कृष्णो योजयित्वा पताकिनम् । आरोप्य भ्रातरौ चैव" इत्यादि किञ्च —

"न स सज्जति वृक्षेषु शस्त्रैश्चापि न हीयते । दिव्यो रथवरो राजन् दृश्यते नैव मानुषे ।।
तमास्थाय रथं दिव्यं पर्जन्यसमनिस्वनम् । निर्ययौ पुरुषव्याघ्र पाण्डवाभ्यां सहाच्युतः" ।। इति ।।

तादृशरथादिबहुलरत्नाद्यर्पणेन पूजितः सन् ।।३१।। शङ्खान् पूर्वं वर्त्मनि स्थापिते स्वरथे स्थितान् दूर्हृदां दुर्योधनादीनाम् ।।३२।। तच्छङ्खध्वनिम् ।।३३।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

---

[1] ङ्खं दध्मु-गो. प्रे. टी. ।

महापुरुषस्य पुरुषोत्तमस्य चेष्टितं लोकोत्तरव्यवहारं स्वमोचनादिप्रतियापन्नं जगदुर्हर्षादुच्चैः कीर्तयामासुः, प्रहर्षस्वभावात परमाश्चर्याद्वा; वस्तुतस्तु मन्त्रिणामपि भगवति भक्त्यर्थं तथा तैः प्रजासु भक्तिप्रवर्तनार्थञ्च । किञ्च, यथेति भगवान् सर्व्वैश्वर्य्यपूर्णः परमाप्तशिरोमणिरिति तदनुशासने विश्वासः सूचितः । अत एवातन्द्रिता अनलसाः सावधाना वा सन्तः ॥३०॥ केशवः साक्षात्परमेश्वरः, किंवा व्रजजनानन्दार्थं केशिहस्तेति भक्तवात्सल्यं सूचितम् । अतः स्वभक्तभीमसेनयशोविस्तारणमभक्तजरासन्धघातनञ्च युक्तमेवेति भावः । प्रायात् जरासन्धस्य दिव्यरथमारुह्य ततः प्रयाणं चक्रे, तथा च सभापर्व्वणि (म.भा.सभा.प.२४/२२)- '**जरासन्धरथं कृष्णो योजयित्वा पताकिनम् । आरोप्य भ्रातरौ चैव**' इत्यादि । किञ्च, (म.भा.सभा.प.२४/२६-२७)

न स सज्जति वृक्षेषु शस्त्रैश्चापि न हीयते । दिव्यो रथवरो राजन् दृश्यते नैव मानुषैः ॥
तमास्थाय रथं दिव्यं पर्जन्यसमनिस्वनम् । निर्ययौ पुरुषव्याघ्र पाण्डवाभ्यां सहाच्युतः ॥
इति बहुलरत्नाद्यर्पणेन पूजितः सन् ॥३१॥

शङ्खान् तद्रथस्थितान्, किंवा स्मृतिमात्रेणागतान् स्वकीयानेव दध्मुः । किमर्थम् ? स्वसुहृदः श्रीयुधिष्ठिरादीन् हर्षयन्तो हर्षयितुमित्यर्थः । किञ्च, तद्द्वेष्टॄणां शोकं विस्तारयितुमित्याह-दुर्हृदामिति दुर्य्योधनादीनाम् ॥३२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१४-३५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

जगदुरिति । नृपाः महापुरुषस्य श्रीकृष्णस्य चेष्टितं प्रकृतिभ्योऽमात्यादिभ्यो जगदुरूचुः यथा भगवानन्वशासदनुशिक्षितवांस्तथा निरवद्याः चक्रुः ॥३०॥ जरासन्धमिति । भीमसेनेन प्रयोज्यकर्त्रा घातयित्वा सहदेवेन जरासन्धसुतेन पूजितः पार्थाभ्यां भीमार्जुनाभ्यां च संयुतः प्रायात् ययौ ॥३१॥ तत इति । ते कृष्णभीमार्जुनाः आखण्डलप्रस्थम् इन्द्रप्रस्थं गत्वा शङ्खान् ध्वनयामासुः तत्र हेतुः जितोऽरिः शत्रुर्यैस्ते दुर्हृदाममित्राणामसुखं दुःखमावहन्तीति तथा सुहृदो मित्राणि हर्षयन्तश्च ॥३२॥ तदिति तच्छङ्खध्वननं श्रुत्वा मागधं शान्तं हतं मेनिरे अमन्यन्त राजा युधिष्ठिरस्वाप्तः मनोरथो येन तथाभूतश्चासीत् ॥३३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

प्रकृतिभ्यः विश्वस्तभृत्येभ्यः ॥३०-३१॥ खाण्डवप्रस्थमिन्द्रप्रस्थं दुर्हृदां शत्रूणाम् ॥३२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२४-३५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२४-३५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ॥२७-३४॥

गूढार्थदीपिनी

भीमसेनेन प्रयोज्यकर्त्रा पार्थाभ्यां भीमार्जुनाभ्यां संयुतः कृष्णः इन्द्रप्रस्थं प्रायात् प्रत्यागमत् ॥३०॥ ते कृष्णार्जुनभीमाः खाण्डवप्रस्थम् इन्द्रप्रस्थं गत्वा दुर्हृदां शत्रूणाम् असुखं दुःखमावहन्ति प्रापयन्तीति तथा । शङ्खान् दध्मुः ध्वनयामासुः ॥३१॥ शान्तं मृतम् । आप्तमनोरथः पूर्णमनोरथो जातः ॥३२॥ आत्मना यत् अनुष्ठितं तत्सर्वमित्यन्वयः ॥३३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

जगदुः ऊचुः ॥३०-३१॥ खाण्डवप्रस्थमिन्द्रप्रस्थम् ॥३२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रकृतिभ्यः स्वमन्त्रिभ्योऽतन्द्रिता अनालस्याः ॥३०॥ पार्थाभ्यां भीमार्जुनाभ्यां प्रायात् बृहद्रथरथेन । उक्तं च सभापर्वणि । शुशुभे रथवर्येऽसौ दुर्जयः सर्वधन्विभिः । शक्रविष्णू हि सङ्ग्रामे चेरतुस्तारकामये । रथेन तेन वै कृष्ण उपारुह्य ययौ तदेत्यादि ॥३१॥ स्वसुहृदो धर्मादीन् दुर्हृदां वैरिणाम् ॥३२॥ शान्तं संहृतम् । अन्यथा नैवं शङ्खशब्दापनमिति भावः ॥३३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स्वगृहं गताः आश्चर्याभिनिविष्टेभ्यः स्वगृहस्थेभ्यो जगुरित्याह जगदुः प्रकृतिभ्यस्त इति । एवमेव हि महापुरुषचेष्टितं

भवतीति महापुरुषस्य भगवतश्चेष्टितं ततो निरभिमानतयैव पालनं कृतवन्त इत्याह-यथान्वशासदिति ॥३०॥ एवं तेषां जीवन्मुक्तावस्थायां निरूप्य जरासन्धवधस्य मुक्त्युपयोगित्वमुक्त्वा भक्तिधर्मोपयोगित्वं वक्तुमिन्द्रप्रस्थं प्रत्यागमनमुच्यते जरासन्धं घातयित्वेत्यादिपञ्चभिः । भीमसेनेन करणेन जरासन्धहननं ब्रह्ममहादेवयोः तद्रक्ष्याभावे हेतुः केशव इति कश्च ईशश्च तयोर्मोक्षदातृत्वादुपजीव्य इति ततः अक्षताभ्यां पार्थाभ्यां संयुतः सन् पितृवधमस्मृत्वापि सहदेवेन पूजितः प्रायात् पूर्ववत् द्वेषं परित्यज्य प्रकर्षेण निर्गत इत्यर्थः ॥३१॥ एवं समागत्य दूरादेव स्वागमनं ख्यापितवन्त इत्याह-गत्वा ते खाण्डवप्रस्थमिति । इन्द्रप्रस्थनिकटे खाण्डवदाहानन्तरं तत्र नगरं निर्मितमस्ति भगवता कौतुकातिशयमुक्तं तत्र गत्वा इन्द्रप्रस्थज्ञापनार्थं शङ्खान् दध्मुः पाञ्चजन्यं हृषीकेश इति श्लोकोक्तान् यतो जितारयः उत्साहेन वादितवन्तः तस्य वादनस्य स्वसुहृदां हर्षजननप्रयोजनं दुर्हृदां दुःखजननञ्च प्रायेण रात्रौ समागताः ॥३२॥ यदर्थवादितवन्तस्तज्जातमित्याह-तच्छ्रुत्वेति । इन्द्रप्रस्थनिवासिनः सर्वे प्रीतमनसो जाताः शब्दं श्रुत्वैव मागधं शान्तं मेनिरे राजा च प्राप्तमनोरथो जातः ॥३३॥

श्रीसुबोधिनीसारः

ते राजानो गत्वा प्रकृतिभ्यो मन्त्र्यादिभ्यो महापुरुषस्य हरेः चेष्टितं जगदुरूचुः भगवान् यथान्वशासत् "मां यजन्त" इत्यादिना तथातन्द्रिताः निरलसाः चक्रुः ॥३०॥ भीमसेनेन जरासन्धं घातयित्वा केशवः श्रीकृष्णः पार्थाभ्यां भीमार्जुनाभ्यां संयुतः सहदेवेन पूजितः प्रायात् आगमत् ॥३१॥ जितोऽरियैस्ते स्वसुहृद आत्ममित्राणि हर्षयन्तः दुर्हृदां वैरिणाम् असुखावहा दुःखङ्करास्ते कृष्णादयः इन्द्रप्रस्थं गत्वा शङ्खान् दध्मुः ॥३२॥ तत् श्रुत्वा प्रसन्नचित्ता इन्द्रप्रस्थनिवासिनो जना मागधं जरासन्धं शान्तं हतं मेनिरे राजा युधिष्ठिरः प्राप्तमनोरथोऽभूत् ॥३३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गृहं गत्वा च ते महापुरुषस्य कृष्णस्य चेष्टितं जरासन्धघातादि प्रकृतिभ्यः अमात्यादिभ्यो जगदुः ऊचुः । भगवान् यथा अन्वशासत् अनुशिक्षितवान् तथा अतन्द्रिताः सावधानाः सन्तश्चक्रुश्च ॥३०॥ भीमसेनेन प्रयोज्यकर्त्रा जरासन्धं घातयित्वा तत्पुत्रेण सहेवेन पूजितः पार्थाभ्यां भीमार्जुनाभ्यां संयुतश्च केशवः कृष्णः इन्द्रप्रस्थं प्रायात् ॥३१॥ ते कृष्णभीमार्जुनाः खाण्डवप्रस्थं इन्द्रप्रस्थं गत्वा शङ्खान् दध्मुः । तत्प्रयोजनमाह-स्वसुहृदो मित्राणि हर्षयन्तः हर्षयितुम् । तथा शत्रूणां खेदं चोत्पादयितुं शङ्खान् दध्मुरित्याशयेनाह-दुर्हृदां शत्रूणामसुखं दुःखमावहन्तीति तथा ते इति । कथं शङ्खध्वनिश्रवणमात्रेणैतदुभयसिद्धिः इत्यपेक्षायां शत्रुविजयसूचकत्वात् इत्याशयेनाह-जितारय इति । जितः अरिः शत्रुर्यैस्ते ॥३२॥ तच्छङ्खशब्दं श्रुत्वा इन्द्रप्रस्थनिवासिनो जनाः प्रीतं प्रसन्नं मनो येषां ते तथाभूता जाताः, यतो मागधं शान्तं मृतं मेनिरे । राजा युधिष्ठिरश्च आप्तः पूर्णो मनोरथो यस्य तथाभूत आसीत् ॥३३॥

अन्वितार्थप्रकाशिका

जरासन्धमिति ॥ भीमसेनेन प्रयोज्यकर्त्रा जरासन्धं घातयित्वा तत्पुत्रेण सहदेवेन पूजितः पार्थाभ्यां भीमार्जुनाभ्यां संयुतश्च केशवः कृष्णः मागधस्य दिव्यं रथमारुह्य इन्द्रप्रस्थं प्रायात् ॥३०॥ गत्वेति ॥ जितारयः स्वसुहृदो हर्षयन्तः दुर्हृदां दुर्योधनादीनाम् असुखं दुःखमावहन्तीति तथा ते कृष्णभीमार्जुनाः खाण्डवप्रस्थम् इन्द्रप्रस्थं गत्वा शङ्खान् दध्मुः ॥३१॥ तदिति ॥ तच्छङ्खशब्दं श्रुत्वा इन्द्रप्रस्थनिवासिनो जनाः प्रीतं प्रसन्नं मनो येषां ते तथाभूता जाताः । यतो मागधं शान्तं मृतं मेनिरे । राजा युधिष्ठिरश्च आप्तः पूर्णो मनोरथो यस्य तथाऽभूत् आसीत् ॥३२॥ अभीति ॥ अथानन्तरं भीमादयः आगत्य राजानं युधिष्ठिरमभिनन्द्य आत्मना आत्मभिर्यत्कर्मानुष्ठितं कृतं तत्सर्वमाश्रावयामासुः ॥३३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जगदुः कथयामासुः ॥३०-३१॥ खाण्डवप्रस्थं शक्रप्रस्थम् ॥३२॥ शान्तं हतम् ॥३३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

जरासन्धमिति ॥ केशवः श्रीकृष्णः, भीमसेनेन प्रयोज्यकर्त्रा, जरासन्धं घातयित्वा, सहदेवेन जरासन्धसुतेन, पूजितोऽर्चितः, पार्थाभ्यां भीमार्जुनाभ्यां, संयुतः सन्, प्रायाद्ययौ ॥३०॥ त इति ॥ जितारयो जितशत्रवः, स्वसुहृदः हर्षयन्तः, दुर्हृदाममित्राणाम्,

असुखावहाश्च, ते कृष्णादयः, खाण्डवप्रस्थं गत्वा, शङ्खान् दध्मुः ॥३१॥ तदिति ॥ तच्छङ्खध्वननं, श्रुत्वा, इन्द्रप्रस्थनिवासिनः, प्रीतमनसः सन्तः, मागधं जरासन्धं, शान्तं मृतं, मेनिरे। राजा च युधिष्ठिरोऽपि, आप्तो मनोरथो येन तथाभूतः, आसीत् ॥३२॥ अभिवन्द्येति ॥ अथानन्तरं, भीमार्जुनजनार्दनाः, राजानम् अभिवन्द्य, आत्मना आत्मभिः यत्, अनुष्ठितं तत्, सर्वम् आश्रावयाञ्चक्रुः ॥३३॥

कृष्णप्रिया

अपनी राजधानीमें पहुंचकर उन राजाओंने अपने अपने प्रजाजनोंसे पूर्ण पुरुषोत्तम भगवान श्रीकृष्ण अद्‌भुत लीला और अपार कृपाका श्रीवण कराया पुनः पूर्ण सावधानीसे भगवान श्रीकृष्णके आदेशको अनुसरते हुए अपना जीवन व्यतीत करने लगे ।।३०।।महाराज परीक्षित ! इस प्रकार दयानिधि भगवान द्वारिकानाथ श्रीपाण्डुनन्दन भीमसेनजीके करकमलोंसे जरासन्धका वध करवाकर भाई श्रीभीमसेन और पार्थ अर्जुनके साथ जरासन्ध सुपुत्र सहदेवसे सन्मानित होकर इन्द्रप्रस्थ की और प्रस्थान कर चले ।।३१।। भगवान श्रीकष्ण और वीर अर्जुनजीने इन्द्रप्रर्थ पहुंचकर अपने पाञ्चजन्य और देवदत्त नामके दिव्य शङख बजाये वे दोनों विजयी थे । वह शंखध्वनी अपने मित्र और स्वजनोंको आनंद और उनके शत्रुओंको बडा कष्टकर बना ।।३२।।इन्द्रप्रस्थ निवासी प्रजाजनका मन उस शंखध्वनि का श्रवण कर प्रसन्न हो उठा । उन नागरिकोंने निर्णय किया कि जरासन्ध मर गया और धर्मराज श्रीयुधिष्ठिरजी का राजसूय यज्ञ करनेका मनोरथ एक प्रकारसे पूर्ण हो गया ।।३३।।

अभिवन्द्याथ राजानं भीमार्जुनजनार्दनाः । सर्वमाश्रावयाञ्चक्रुरात्मना यदनुष्ठितम् ॥३४॥
निशम्य धर्मराजस्तत्[1] केशवेनानुकम्पितम् । आनन्दाश्रुकणान्मुञ्चन्[2] प्रेम्णा नोवाच किञ्चन ॥३५॥

इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] कृष्णाद्यागमने [5]त्रिसप्ततितमोऽध्यायः ॥७३॥

कर्दमक्षमा

अथ, भीमार्जुनजनार्दनाः, राजानम्, अभिनन्द्य, आत्मना, यद्, अनुष्ठितम्, तत्, सर्वम्, आश्रावयाञ्चक्रुः॥३४॥ केशवेन, अनुकम्पितम्, तत्, धर्मराजः, निशम्य, आनन्दाश्रुकणान्, मुञ्चन्, प्रेम्णा, किञ्चन, न, उवाच ॥३५॥

इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे कर्दमक्षमाख्यान्वयपदच्छेदे त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शान्तं मृतम् आप्तमनोरथो बभूव ॥३३-३५॥

इति श्रीधरस्वामिविरचितभावार्थदीपिकायां दशमस्कन्धोत्तरार्धे त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तच्छङ्खवादनम् ॥३३-३५॥

इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथानन्तरं शङ्खध्वानाव्यवहितकालमेवेत्यर्थः । इत्यत्यन्तवेगेनागमनाद्राज्ञोऽभिगमनाद्यकरणकारणं च सूचितं भगवता पश्चादभिवन्दनं विनयविशेषात् स्नेहविशेषेण तत्र प्रागर्जुनप्रेरणञ्च जरासन्धघातनाद्युपकारेण साधुशिरोपणेर्लज्जया पश्चादेवस्थितेश्च अनेनैवाभिप्रायेणोक्तं जनं दुर्जनमर्द्दयति हिनस्तीति जनार्द्दन इति आत्मना स्वयमिति समूहापेक्षयैव न तु स्वस्वापेक्षया अनौचित्यात् प्रेम्णा परस्परमानन्दत्वाच्च अतः परस्परमेव चातुर्य्यादिकं वर्णितमिति ज्ञेयम् ॥३४॥ केशवेनेति पूर्ववदस्त्रधारणस्थितेः

---

१. धर्मराजस्तु-वीर. विज. । २. श्रुकलां-श्रीधर. वंशी. वीर. विज. जीव. । ३. पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. टी. । ४. दशमस्कन्धे राजसूयदिग्विजयो द्विसप्त-गो. प्रे. टी. । ५. एकाशीतितमोध्यायः-विज. ।

गाम्भीर्य्येणानन्दाश्रूणां कला विन्दूनेव मुञ्चन् अतस्तद्रुद्धकण्ठत्वेन किं वानौचित्येन नोवाच वक्तुं नाशक्नोत् तत्तत्कुतः प्रेम्णा तच्च कुतः धर्मराजः श्रीभगवद्धर्मे श्रेष्ठ इत्यर्थः ॥३५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथानन्तरं शङ्खध्वानसमकालमेवेत्यर्थः । इत्यत्यन्तवेगेन गमनाद्राज्ञाभिगमनाद्यकरणकारणं सूचितम् । भगवता पश्चादभिवन्दनं विनयविशेषात्, किंवा स्नेहविशेषेण तत्र प्रागर्ज्जुनप्रेरणात्; यद्वा, जरासन्धवधाद्युपकारेण साधुशिरोमणेः परमलज्जया पश्चादवस्थितेः । अनेनैवाभिप्रायेणोक्तमजनं दुष्टमर्दयति हिनस्तीति जनार्दन इति । आत्मना स्वयं यदनुष्ठितं तत् सर्व्वम् आ सम्यक् श्रावयाञ्चक्रुः अश्रावयन्त ॥३४॥ तत् केशवेन साक्षटात्परमेश्वरेण, किंवा गोकुलानन्दार्थं केशिघ्नेनानुकम्पितमनुकम्पया कृतमिति भीमार्ज्जुनयोरनुष्ठानस्यापि तदनुकम्पयैव सिद्धेः । आनन्दाश्रूणां कला बिन्दून् धारा वा मुञ्चन्, इति तदविरामः सूचितः । नोवाच वक्तुं नाशक्नोत् । कुतः ? प्रेम्णा प्रेमबाष्परुद्धकण्ठत्वादित्यर्थः । तच्च कुतः ? धर्म्मराजः, श्रीभगवद्धर्म्मे श्रेष्ठ इति भावः ॥३५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्रीश्रीलसनातनगोस्वामिपादकृतायां श्रीबृद्वैष्णवताषण्यां
श्रीदशमटिप्पण्यां त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१४-३५॥

इति श्रीसुदर्शनसूरिकृते शुकपक्षीये दशमस्कन्धोत्तरार्धे त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अपि च, अभिवन्द्येति । आत्मनाऽऽत्मभिर्यदनुष्ठितं कृतं तत्सर्वमाश्रावयामासुः ॥३४॥ निशम्येति । आनन्दाश्रूणां कलाः बिन्दून् मुञ्चन्किञ्चिदपि नोवाच तूष्णीमासेत्यर्थः ॥३५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवकृतभागवतचन्द्रचन्द्रिकायां त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

शान्तं मृतं प्राप्तमनोरथोऽभूदिति शेषः ॥३३-३५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१४-३५॥

॥ इति श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

मय्यावेश्येत्यादि । मयि श्रीवासुदेवे मन आवेश्य यदि मुक्तिवासनाः स्थ, तदा मां यास्यथ, मद्भक्तरूपेणैव स्थास्यथेत्यर्थः । यदि वा कैवल्यकामाः स्थ, तदा मद्वैभवं ब्रह्म यास्यथेति भावः ॥२४-३५॥

॥ इति श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

मय्यावेश्येत्यादि । मयि श्रीवासुदेवे मन आवेश्य यदि मुक्तिवासनाः स्थ, तदा मां यास्यथ, मद्भक्तरूपेणैव स्थास्यथेत्यर्थः । यदि वा कैवल्यकामाः स्थ, तदा मद्वैभवं ब्रह्म यास्यथेति भावः ॥२४-३५॥

॥ इति श्रीनाथचक्रवर्तिपादविरचितायां चैतन्यमञ्जूषायां त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ग्रहाश्चन्द्रादयः ॥२७-३४॥

॥ इति श्रीमद्विश्वनाचक्रवर्तिकृतायां सारार्थदर्शिन्यां दशमस्कन्धोत्तरार्धे त्रिसप्ततितमोऽध्यायः ॥७३॥

गूढार्थदीपिनी

केशवेन अनुकम्पितं कृपया सम्पादितम्। प्रेम्णा किञ्चित् नोवाच मनोरथसाफल्यात् तूष्णीमासेत्यर्थः ॥३४॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्द्धे गूढार्थदीपिन्यां त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्राप्तमनोरथो बभूव ॥३३-३५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्रिसप्ततितमाऽध्यायार्थप्रकाशः ॥७३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भीमार्जुनजनार्दनः। जनार्दननमनं नटनामात्रमित्यभ्यर्हितस्यान्ते निबन्धेन ध्वनयति। राजानमभिवाद्यात्मना यदनुष्ठितं तत्सर्वमात्मनेत्येकवचनोपपत्तिः प्राक्कृतानुसन्धेया। श्रावयाञ्चक्रुः ॥३४॥ केशवेनानुकम्पितं निशम्य। अनुकम्पित इति पाठः सरलः। यच्छ्रावयामासुस्तत्सर्वं निशम्य केशवेनैवमनुकम्पितो धर्मराजः प्रेम्णा तदीयेनानन्दाश्रुकलान्मुञ्चन् किञ्चन बाष्पकण्ठप्रतिरुद्धत्वान्न वक्तुं शक्तोऽभूदिति भावः। प्रेम्णाऽश्रुकणान्मुञ्चन्किञ्चन नोवाच। आननन्द च बाहुभ्यां बबन्धालिलिङ्ग इति यावदित्यर्थः ॥३५॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे त्र्यशीतितमोऽध्यायः ॥१०-८३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवमानन्दयुक्तेषु पुरवासिषु पश्चात्त्रयनानन्दं दातुं समागता इत्याह-अभिवन्द्याथ राजानमिति। त्रयोऽपि क्रमेण प्रस्तावानुसारेण वृत्तान्तमाश्रावयाञ्चक्रुः आत्मना भगवता स्वेन वा यद्यप्यर्जुनेन कृतं न स्पष्टं तथापि शस्त्रयुद्धादिसम्प्राप्तौ रक्षा तेनैव कृतेति ज्ञातव्यम् अनुष्ठितस्य साधारण्येन निरूपात् ॥३४॥ एवं श्रावणे युधिष्ठिरस्य भगवति भक्तिर्जातेत्याह-निशम्येति। यतो धर्मराजः अधिकारी एतत्सर्वं केशवेनानुकम्पितं कृपया कृतमिति ज्ञातवान् न तु स्वभ्रातृपौरुषमिति ततः प्रेमातिशयानन्दाश्रुकणान् मुञ्चन् वाक्स्तम्भे जाते प्रशंसाभिनन्दनादिकं किमपि नोक्तवानित्यर्थः ॥३५॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्द्धे
चतुर्विंशाध्यायविवरणम् ॥२४॥७३॥

श्रीसुबोधिनीसारः

अथानन्तरं राजानं प्रणम्य भीमार्जुनकृष्णा आत्मना स्वयं यदनुष्ठितं तत्सर्वमाश्रावयामासुः ॥३४॥ केशवेनानुकम्पितं तत् वृत्तं निशम्य श्रुत्वा धर्मराजः प्रेम्णा आनन्दाश्रूणां कलां मुञ्चन् त्यजन् न किमप्युवाच ॥३५॥

॥ इति श्रीमद्भा०दशमस्कन्धे उ० सुबोधिन्यां टीकायां त्रिसप्ततितमोऽध्यायः ॥७३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथानन्तरं भीमादयः आगत्य राजानं युधिष्ठिरमभिवन्द्य आत्मना आत्मभिर्यत्कर्मानुष्ठितं कृतं तत्सर्वमाश्रावयामासुः ॥३४॥ धर्मराजो युधिष्ठिरः केशवेन ब्रह्मरुद्रयोरपि पूज्येन कृष्णेनानुकम्पितं कृपया सम्पादितं तत्स्वकार्यं जरासन्धवधं निशम्य श्रुत्वा आनन्दजान् अश्रुबिन्दून् मुञ्चन् प्रेम्णा किञ्चनापि प्रशंसनाभिनन्दनादिकं नोवाच, किन्तु तूष्णीमासेत्यर्थः ॥३५॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र सात्त्विकानां निरोधने। त्रिसप्ततितमः प्रागादध्यायो विवृतिं शुभाम्।
जरासन्धनिरुद्धानां राज्ञां मोक्षनिरूपकः ॥३॥॥७३॥

अन्वितार्थप्रकाशिका

निशम्येति ॥ धर्मराजो युधिष्ठिरः केशवेनानुकम्पितं कृपया सम्पादितं तत्स्वकार्यं जरासन्धवधं निशम्य श्रुत्वा आनन्दजान् अश्रुबिन्दून् मुञ्चन् प्रेम्णा संस्तब्धः किञ्चनापि प्रशंसनाभिनन्दनादिकं नोवाच किन्तु तूष्णीमास ॥३४॥

॥ इति श्रीमद्भागवते दशमेऽन्वितार्थप्रकाशिकायां त्रिसप्ततितमोऽध्यायः ॥७३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आत्मना परमात्मना श्रीकृष्णेन जरासन्धवधाय यदनुष्ठितं विटपपाटनादि कृतं तत्सर्वम् ॥३४-३५॥

॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने इन्द्रप्रस्थागमनं नाम त्रिसप्ततिमोऽध्यायः ॥७३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निशम्येति ॥ धर्मराजो युधिष्ठिरः, तत्केशवेन, अनुकम्पितं, निशम्य, प्रेम्णा, आनन्दाश्रूणां कलाः बिन्दून्, मुञ्चन्, किञ्चन किञ्चिदपि, न उवाच ॥३४॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुप्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धे त्रिसप्ततितमोऽध्यायः ॥७३॥

कृष्णप्रिया

श्रीभीमसेनजी अर्जुनजी और द्वारिकानाथ श्रीकृष्णचन्द्रजीने धर्मराज महाराज को वन्दन करते हुए जरासन्धके वधके लिये जो करना पडा वह सारा वृत्तान्त सुनाया ॥३४॥ भगवान श्रीकृष्णचन्द्रजी की दिव्यानुकम्पा का श्रवण कर प्रेम से भर गये, नेत्रोसे आनन्दाश्रु बहने लगें और कृपानिधान भगवान श्रीकृष्णजीको कुछ नहीं कह पाये ॥३५॥

॥ दशमस्कन्धे-उत्तरार्धे-हिन्दी-भाषान्तरे त्रिसप्ततिमोऽध्यायः ॥

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ चतुःसप्ततितमोऽध्यायः ॥

श्लोकाः	अनु.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
५४	५३	१	३	१७६८	१९	४६	१८३३	५७।	१

श्रीशुक[1] उवाच

एवं युधिष्ठिरो राजा जरासन्धवधं विभोः[2] । कृष्णस्य चानुभावं [3]तं श्रुत्वा प्रीतस्तमब्रवीत् ॥१॥

कर्दमक्षमा

श्रीशुक उवाच :- एवम्, राजा, युधिष्ठिरः, विभोः, कृष्णस्य, अनुभावम्, च, जरासन्धवधम्, श्रुत्वा, प्रीतः, तम्, अब्रवीत् ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

चतुर्युक्सप्ततितमे राजसूयक्रिया द्विजैः । अग्रपूजाप्रसङ्गेन चैद्याघातादि वर्ण्यते ॥

राजसूयमुखे हत्वा जरासन्धं तदन्तरे । चैद्यं तदन्तं कुर्वन्तं बीजं कलिमिवावपत् ॥

कृष्णस्य चानुभावमिति चकारात्तस्य स्वाज्ञाऽनुविधायित्वञ्चालक्ष्येत्यर्थः ॥१॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

(१) । मुखे आदौ । तदन्तरे राजसूयमध्ये । तदन्ते यज्ञान्ते (२) । श्रोतृचित्तरञ्जकं क्षमाजनकं वीरवीर्यवर्धनं श्रीकृष्णकर्तृकशिशुपालवधमाह-एवं ब्राह्मणवेशादिना । इत्यर्थ इति-अहो सर्वेश्वरा मदाज्ञां कुरुत इति विमृश्येति भावः ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

ततश्च दिनान्तरे तं श्रीकृष्णमब्रवीत् राजेति जरासन्धवधादिना साम्राज्याभिप्रायेण एव मग्रेऽपि ज्ञेयं जरासन्धवधं श्रीकृष्णस्य भीमाप्यायनादकस्माच्चतुर्भुजत्वाविर्भावनादिलक्षणानुभावात्मकं जरासन्धवधं यद्वा जरासन्धवधं श्रीकृष्णस्य तमनुभावं चेति विभो हे प्रभो ! इति तत्पूर्वजेषु तादृशभगवत्कृपास्मृत्या परमादरात् सविसर्गपाठे निजप्रभोः ॥१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततश्च क्षणात् स्वस्थः सन् दिनान्तरे वा, तं कृष्णमब्रवीत्, राजेति, जरासन्धवधादिना साम्राज्याभिप्रायेण; एवमग्रेऽपि ज्ञेयम् । कृष्णस्य तेन प्रकारेण चित्ताकर्षकस्य जरासन्धवध एवानुभावः प्रभावस्तम्, तं पूर्वोक्तप्रकारम्; यद्वा, तमनिर्व्वचनीयमनुभावं जरासन्धवधचातुर्य्यं राजवर्गमोक्षणप्रकारादि-माहात्म्यञ्च श्रुत्वा; विभो ! हे प्रभो ! इत्ति तत्पूर्व्वजेषु तादृश-श्रीभगवत्कृपास्मृत्या

---

[1] बादरायणिरुवाच-गो. प्रे. टी. । [2] प्रभोः-गो. प्रे. टी. । [3] च-गो. प्रे. टी. ।

प्रेमोद्रेकात्; यद्वा, तद्वंशजातस्त्वं परमधन्य एवेति भावः । सविसर्गपाठे-निजप्रभोः, यद्वा, जगदीशस्य; ततश्च श्रीस्वामिपादैर्व्याख्यातम्; च-शब्दार्थेन सम्बन्धः ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-४॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथ राजसूययाजनशिशुपालवधात्मकं भगवच्चेष्टितमनुवर्णयति चतुस्सप्ततितमेन-एवमिति । युधिष्ठिरो राजा तं जरासन्धघातनात्मकं कृष्णस्यानुभावं प्रभावं च श्रुत्वा तं श्रीकृष्णमब्रवीत् ॥१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

श्रोतृमनोहरं क्षमाजनकं वीरवीर्यवर्धनं हरेः समवृत्तिनिदर्शनं शिशुपालवधं निगदत्यस्मिन्नध्याये, तत्रादौ युधिष्ठिरो भगवन्तं स्तुत्वा तदनुज्ञया राजसूयप्रारम्भणं वक्ति एवमित्यादिना ॥१॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

चतुर्युक्सप्ततितमे द्विजैर्मखविधौ हरेः । अग्रपूजा चैद्यवधो दुर्योधनरुडप्यभूत् ॥जरासन्धवधं कृष्णस्य तमनुभावञ्च ॥१॥

गूढार्थदीपिनी

चतुर्युक्सप्ततितमे श्रीकृष्णस्याग्रपूजनम् । यज्ञे चैद्यवधः पश्चात् द्वारकागमनं हरेः ॥१॥

कृष्णस्य चानुभावमिति चकारात् तस्य स्वाज्ञानुवर्तित्वं चालक्ष्येत्यर्थः । तं श्रीकृष्णम् ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अथ चतुस्सप्ततितमे भगवतो भक्तयज्ञप्रवर्तकत्वाग्रपूज्यत्वयज्ञयजमानयज्ञपुरुषविद्विड्घातकत्वं वर्णयति - एवमिति । जरासन्धवधात्मकं कृष्णस्य अनुभावं चकारात् स्वाज्ञानुविधायित्वं चालक्ष्य ॥१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ केशवतो मागधवधं श्रुत्वा धर्मः सद्यः किमकरोदकरोन्न वा सवमित्यतः श्रेयःसाधनत्वेनेदं तथा शिशुपालसंहारं निगदत्यस्मिन्नध्याये । अत्रैव भ्रातृदिग्विजयप्रेषणवृत्तमनुसन्धेयम् । जरासन्धवधं कृत्वा कृष्णतः कृष्णस्य चानुभावं भ्रातृभ्यां च श्रुत्वा प्रीतस्तं कृष्णमब्रवीत् ॥१॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

पञ्चविंशे निरुद्धस्य राज्ञो धर्मो निरूप्यते । प्रतिबन्धविहीनस्य प्रेमगद्गदचेतसः ॥१॥
आधिदैविकयज्ञोऽपि धर्मेऽत्र विनिरूप्यते । तत्रापि बाधकं कृष्णो न्यवादयदितीर्यते ॥२॥
मोचनादेव राज्ञां हि तत्सेवात्र निरूपिता । ब्रह्मण्यत्वान्मागधस्य ब्राह्मणेष्वत्र संशयः ॥३॥
अतः सर्वेऽत्र ऋषयो निरूप्यन्ते स्वनामतः । आधिदैविकयज्ञस्य सर्वोऽप्युत्कर्ष उच्यते ॥४॥
अध्यात्मिकस्तु तच्छेषः प्रधानार्थो यतः परः ।

पूर्वाध्यायान्ते भक्त्यानन्दपूर्णो जात इति निरूपितम् इदानीं तादृशस्य मनोरथसिद्धिर्निरूप्यते आदौ स भक्तो जात इति वक्तुं पूर्वमाज्ञापनेन भक्तविरुद्धकारीभूत्वा साम्प्रतं तत्परिहारं कृतवानिति निरूप्यते पञ्चभिः, तत्र दोषपरिहारार्थं प्रथममुद्यममाह-

एवं युधिष्ठिर इति । स्वधर्मनिष्ठो महान् भगवदुपकारं श्रुत्वा ज्ञातभगवन्माहात्म्यः विभोः स्वामिनः कृष्णस्य भक्तिरूपं स्वस्मिंश्चानुभावं ज्ञात्वा नारदादिमुखतस्तन्निर्धारं च श्रुत्वा कृतार्थता जातेति प्रीतस्सन् पूर्वकृतस्वापराधनिवृत्त्यर्थं तं भगवन्तं प्रति किञ्चिदब्रवीदित्यर्थः ॥१॥

सुबोधिनीसारः

शुकोक्तिः । एवं राजा युधिष्ठिरो जरासन्धस्य वधं मृत्युं विभोः कृष्णस्य तं प्रभावं च श्रुत्वा प्रीतः तं श्रीहरिमुवाच ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

चतुर्युक्सप्ततितमे राजसूयमहोत्सवः । अग्रपूजाप्रसङ्गेन चैद्यघातश्च वर्ण्यते ॥१॥

राजा युधिष्ठिरो जरासन्धवधं श्रुत्वा तं जरासन्धघातनात्मकं विभोः समर्थस्य कृष्णस्यानुभावं च श्रुत्वा एवं पूर्वोक्तप्रकारेण प्रीतः प्रेम्णा विनिमग्नोऽपि पुनः किञ्चिदाश्वासितचित्तः सन्निति शेषः तं कृष्णमब्रवीत् ॥१॥

अन्वितार्थप्रकाशिका

चतुर्युक्सप्ततितमे यज्ञेऽग्रे पूजनं हरेः । शिशुपालवधाद्यत्र श्लोकाः सार्द्धाश्चतुःशराः ॥(५४॥) ॥ त्रीण्युवाचेति (३) पादाढ्याः पञ्च बाणा (५५।) अनुष्टुभः ॥७४॥ एवमिति ॥ राजा युधिष्ठिरो जरासन्धवधं श्रुत्वा तं जरासन्धघातनात्मकं विभोः कृष्णस्यानुभावं प्रभावं च श्रुत्वा एवं पूर्वोक्तप्रकारेण प्रीतः प्रेम्णा विनिमग्नोऽपि पुनः किञ्चिदाश्वासितचित्तः सन्निति शेषः । तं कृष्णमब्रवीत् ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ चतुःसप्ततितमेऽध्याये युधिष्ठिरराजसूयकरणं तत्र श्रीकृष्णाग्रपूजनं च श्रीकृष्णकृतशिशुपालहननं च वर्ण्यते । एवमिति जरासन्धवधं श्रुत्वा । तं वधरूपं कृष्णस्यानुभावं च ॥ श्रुत्वा तं श्रीकृष्णम् ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चतुर्युक्सप्ततितमे विप्रैः कर्ममहाक्रतोः । अग्रपूज्यप्रसङ्गेन चैद्यनाशादि कथ्यते ॥१॥

क्रतोर्मुखे जरासन्धं हत्वा चैद्यं तदन्तरे । तदन्ते कौरवान्ताय कलिं बीजमिवावपत् ॥२॥

अथ राजसूययागे शिशुपालवधात्मकं भगवच्चेष्टितमनुवर्णयति ॥ एवमिति ॥ हे विभो, एवं युधिष्ठिरः राजा, तं जरासन्धवधात्मकं, कृष्णस्य च श्रीकृष्णस्यैव, अनुभावं श्रुत्वा, प्रीतः सन्, तं श्रीकृष्णम्, अब्रवीत् ॥१॥

कृष्णप्रिया

श्रीशुकदेव महर्षिजीने कहा - राजन् परीक्षित् ! धर्मराज महाराज युधिष्ठिर जरासन्श्रीशुकदेव महर्षिजीने कहा - राजन् परीक्षित् ! धर्मराज महाराज युधिष्ठिर जरासन्ध का वध एवं महान समर्थ भगवान् श्रीद्वारिकानाथ श्रीकृष्णचन्द्र की महत्त महिमा सुनकर श्रीधर्मराज प्रसन्न हुए और कहने लगे ॥१॥

युधिष्ठिर उवाच

ये [1]स्युस्त्रैलोक्यगुरवः सर्वे लोकाः [2]सहेश्वराः । वहन्ति दुर्लभं लब्ध्वा [3]शिरसैवानुशासनम् ॥२॥
स भवानरविन्दाक्षो [4]दीनानामीशमानिनाम् । धत्तेऽनुशासनं भूमंस्तदत्यन्तविडम्बनम् ॥३॥
न ह्येकस्याद्वितीयस्य ब्रह्मणः [5]परमात्मनः । कर्मभिर्वर्धते तेजो ह्रसते च यथा रवेः ॥४॥
[6]न वै तेऽजित भक्तानां ममाहमिति माधव । त्वं तवेति च नानाधीः पशूनामिव [7]वैकृता ॥५॥

१.यस्य त्रिलोक-विज. । २. लोकमहेश्वराः- श्रीधर. वंशी. वीर. विज. । ३. २शिरसा मेऽनु-गो. प्रे. टी. । ४. जनान-वीर. । ५. परमेष्ठिनः-वीर. ।

कर्दमक्षमा

युधिष्ठिरः उवाच :- ये, लोकमहेश्वराः, त्रैलोक्यगुरवः, स्युः, सर्वे, दुर्लभम्, अनुशासनम्, लब्ध्वा, शिरसा, एव, वहन्ति ॥२॥ दीनानाम्, ईशमानिनाम्, सः, भवान्, अरविन्दाक्षः, अनुशासनम्, धत्ते, हे भूमन्! तत्, अत्यन्तविडम्बनम् ॥३॥ एकस्य, अद्वितीयस्य, ब्रह्मणः, परमात्मनः, हि, तेजः, कर्मभिः, रवेः, यथा, वर्धते, च, ह्रसते ॥४॥ हे अजित! हे माधव! अहम्, मम, इति, मतिः, ते, भक्तानाम्, एवम्, त्वम्, तव, इति (मतिः), नानाधीः, भवतः, भवति ॥५॥

श्रीधरस्वामिकृतभावार्थदीपिका

तदाह-ये स्युरिति। ये त्रैलोक्यस्यापि गुरवः स्युः सनकादयः सर्वे च लोकपालाश्च ते शिरसैव तवानुशासनं वहन्ति दुर्लभं लब्ध्वेति भाग्येनैतल्लब्धमिति बहुमानेनेत्यर्थः ॥२॥ स भवान् परमेश्वरोऽस्माकमनुशासनं धत्ते तदत्यन्तविडम्बनमननुरूपमनुकरणम् स्वतेनोहानिप्रसङ्गादित्यर्थः ॥३॥ अथवा तव पूर्णस्याज्ञापनाज्ञाधारणाभ्यां न तेजसो हानिवृद्धीअतः कृपया सर्वं सङ्गच्छत इत्याह-न ह्येकस्याद्वितीयस्येति। समानासमानरहितस्य ब्रह्मणस्तवोभयं माया परमात्मन इति सर्वजीवनियन्तुस्तव नियम्यत्वं सुतरां नवास्तवम् अतः परानुग्रहार्थैरेतैः कर्मभिस्तव तेजो न वर्धते न च ह्रसति रवेरिवोदयास्तमयादिकर्मभिरित्यर्थः। तथा च श्रुतिः "न कर्मणा वर्धते नो कनीयान्" इति ॥४॥ नन्वेवमप्यहंपरमेश्वरो ममेनं न च कर्मायोग्यमिति मनसि कथं न भवेदत आह-न वै त इति। हे अजित! तव भक्तानामेव तावदियं नानाधीर्भेदमतिर्नास्ति यथा पशूनामज्ञानां वैकृता शरीरविषया तव तु नास्तीति किम्पुनर्वक्तव्यमित्यर्थः ॥५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्स्वाज्ञानुवर्तित्वम्। इत्यर्थ इति-अहो अस्मद्भाग्यं यदीश्वरेश्वरोऽस्मानाज्ञापयतीति भावः ॥२॥ दीनानामज्ञानामीशमानिनाम्, 'ईश्वरोहमहं भोगी' इत्याद्यभिमानवताम्। तदनुशासनधारणम्। अननुरूपमयुक्तम्। इत्यर्थ इति-लोके प्रभुकर्तृकप्रेष्याज्ञाकरणस्य हासास्पदत्वादिति भावः ॥३॥ पक्षान्तरमाह-अथ वेति। यतो न तेजोहनिवृद्धी स्तः अतो हेतोः। सर्वमुच्चावचकर्मकरणम्। उभयमाज्ञास्वीकाराज्ञापनस्वरूपम्। माया असदेव लीलैव वा। यतो माया अतो हेतोः। इत्यर्थ इति-न हि सर्वदैकरसतेजोवतो रवेस्तेजसो ह्रासवृद्धी यथा तथा भवतोऽपीति भावः। अत्र प्रमाणम्-तथा चेति। न कनीयान् अत्यल्पोऽपि न भवतीत्यर्थः ॥४॥ भगवदाक्षेपं समाधत्ते कैमुत्येन-नन्वित्यादिना। वै एवार्थे। विकृतं शरीरं तद्विषया वैकृता। इत्यर्थ इति-अर्थावगतं कैमुत्यमत्रेति ॥५॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

ये स्युरिति। सर्वानेव परामृशति अनुशासनं तवेति शेषः तच्च साक्षाच्छ्रीमुखेन वेदादिद्वारा वा शिरसैव वहन्ति भक्त्या स्वीकुर्वन्ति ॥२॥ दीनानाम् अकिञ्चनानां बहुधा दुःखितानां वा तथापीशत्वेनाभिमानवतामस्माकं धत्ते पालयति परमादरेण स्वीकरोति वा हे अरविन्दाक्षेति तदानीं कृपामयतत्सौन्दर्य्यानुभवमयप्रेम्णा सम्बोधनं भूमन् हे अपरिच्छिन्नप्रभावेति स्वस्तुतिपोषकत्वेन अतोऽत्यन्तविडम्बनं वयमात्मनो विडम्बनमनधिकारित्वाल्लोकोपहासास्पदत्वमेव मन्यामह इत्यर्थः। यद्वा सर्वथा कर्तुमयुक्तमित्यर्थः ॥३॥ तव तु तेनापि न हानिरित्याह-न ह्येकस्येति। तच्च तैर्व्याख्यातं तत्र सर्वमिति आज्ञापनाज्ञाधारणतेजोवृद्धिहान्यादिकमित्यर्थः। वृद्धिहानी तत्प्राकट्यप्राकट्यार्थे ज्ञेये कृपयैव तत्सङ्गतौ हेतुः न ह्येकस्येत्यादि व्याख्यां समानेत्यादि समानरहितस्येतीश्वरान्तराभावादाज्ञाधारणं न सम्भवति असमानरहितस्येति स्वांशस्वशक्त्यात्मकवस्तुव्यतिरिक्तराहित्यादाज्ञापना न सम्भवति न हि स्वांशे स्वशक्तौ वाऽऽज्ञापनापेक्षा विद्यते इच्छामात्रेण सिद्धेः तस्मादुभयमाज्ञापनाज्ञाधारणरूपं वस्तुतो न सम्भवति तदसम्भवातिशयार्थं परमात्मन इत्यस्य व्याख्यानं समानासमानराहित्ये हेतुः ब्रह्मण इति सर्वात्मन इत्यर्थः। अतस्तन्माययैवेति प्राप्ते भक्तेषु कापट्यानौचित्यात् दुर्घटघटनाकारीण्या कृपामय्या स्वेच्छयैव सम्भवतीति युक्तमेवोक्तम् अतः कृपयेतीति भावः। न वर्धते न च ह्रसति किन्तु प्रकटीभवत्यप्रकटीभवति चेत्येवार्थः। तत्र योग्यदृष्टान्तव्याख्या रवेरिति ॥४॥ न वै इति च तैर्व्याख्यातं परमसौशील्यादेवेति भावः वैकृतीति विकृतस्य शुद्धस्वरूपगुणविपरीततया परिणतो यः कुत्सितो देहस्तत्र भवतीति कुत्सितैवेत्यर्थः। वैकृतेति पाठः क्वचित् तस्य तु तदभावकैमुत्ये हेतुः सम्बोधनद्वयं हे अजित मायावैभवावशीकृत! हे माधव! परमस्वरूपशक्तिपते! इति अथवा न च

---

१. न च तेजित-वीर. विज.। २. विक्रिया-गो. प्रे. टी.; वैकृति-इति पाठः।

यज्ञभोक्तुस्तव स्वार्थमेवेदं कर्म यतो न हीयते न च त्वदीयानामस्माकं स्वाभिमानमयमेतत् यतो न वै इति तस्मात्तव कृपैव कारणमस्माकं च भक्तिरेवेति भावः ॥५॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

ये स्युरिति सर्व्वानेव तान् परामृशति, अनुशासनं कदाचित् कथञ्चित् साक्षात् श्रीमुखेन, किंवा स्वभक्तादिद्वारा कृतं शिरसैव वहन्ति, भक्त्या स्वीकुर्व्वन्ति, सदा सम्पादयन्ति वा ॥२॥ दीनानामकिञ्चनानां बहुधा दुःखितानां वा; तथापीशाभिमानवतामप्यस्माकम्, धत्ते पालयति परमादरेण स्वीकरोति वा, ह अरविन्दाक्षेति तच्च कृपावलोक-श्रीमुखप्रसादादिना धत्त इति; यद्वा, स्वसौन्दर्य्यमात्रेण दृष्टिमात्रेणैव वा सर्व्वतापापहरणानन्दरसप्रदानादौ सिद्धेऽपि धत्ते इति भावः । भूमन् हे अपिच्छिन्नप्रभाव ! अतोऽत्यन्तविडम्बनम्, वयमात्मनो विडम्बनं वरं मन्यामह इत्यर्थः ॥३॥ हि यतः, तेजः प्रभावो न वर्द्धते न ह्रसति च; तत्र हेतुः-ब्रह्मणः सर्व्वमयत्वेन तत्त्वतो भेदरहितस्य, यतः 'एकस्य' इति स्वजीतीयभेदराहित्येनाज्ञापयितुरभावः; किञ्च, 'अद्वितीयस्य' इति विजातीयभेदराहित्येनाज्ञाविषयाभाव इति विवेचनीयम् । अन्यत्तैर्व्याख्यातम् । यद्वा, ब्रह्मणोऽपि परमात्मनोऽपि तव कर्म्मभिस्तेजः सन्तोषविशेषो न वर्द्धते किम् ? - काक्वा; अपि तु वर्द्धत एव, सर्वत्र लोकहितमहायशोगानेन भक्तानां परमानन्दात् । तदभावे च सति न ह्रसति किम् ? अपि तु ह्रसति क्षयत्येवेत्यर्थः, - भक्तानां सुखविशेषापरिपोषणप्रसङ्गात् । तत्र दृष्टान्तः-यथा ग्रीष्मादौ विस्तारणेन रवेस्तेजो वर्द्धते, शीतादौ च सङ्कोचनेन ह्रसति, तद्वदिति । अतः परमदयालुत्वादिना तवास्मदनुशासनध्यानमपि युक्तमेवेति भावः ॥४॥ वै प्रसिद्धौ, निर्द्धारे वा । ममैते पुत्रादय उत्तमाः, अहं जात्यादिनोत्तम इति तथा त्वं नीचस्तवैते नीचा इति पशूनामिव नानाधीः, वैकृती विकृतं देहो माया वा तत्सम्बन्धिनी नास्ति, किन्तु एते वैष्णवा मम, अहमेतेषाम्, किंवा मम भगवान्, अहं भगवदीय इति, तथा त्वमभक्तः, तवैतेऽप्रभक्ता इति, किंवा त्वमीश्वरः, तवाहमित्येवं पारमार्थिकी भेदमतिरस्त्येवेत्यर्थः । तत्र हेतुः-अजित ! हे मायया वशीकृतेति; किञ्च, विशेषतोऽधुना मायानिरसनेन निजाशेषैश्वर्य्यप्रकटनार्थं मधुकुलेऽवतीर्णेति; तथा चोक्तं श्रीब्रह्मणा (भा० १०/१४/१६) 'तत्रैव मायाधमनावतारे' इति । अतस्त्वद्भक्तानामपि त्वत्सादृश्येन मायाराहित्यादिति भावः । यद्वा, माधवेति मधुवंशोद्भवत्वान्माधव एवोच्यसे, न च कौरवादि, किंवा लक्ष्म्या एव, न तु शच्यादीनां पतिरित्येवात्र प्रमाणमिति भावः । अतः सेव्य-सेवकादिभेददृष्ट्या भक्तानां प्रेमभक्तिसम्पत्त्या तेषु तवानुग्रहविशेषेण तदधीनत्वं सङ्गच्छतैवेति तात्पर्य्यम् ॥५॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-४॥

नानाधीः स्वदेहपरदेहतत्सम्बन्धिष्वनात्मभूतेषु अनात्मीयेषु आत्माभिमानात्मीयत्वाभिमानरूपतया नानारूपा धीः ॥५-१६॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

उक्तिमेवाह-य इति चतुर्भिः । ये त्रैलोक्यस्यापि गुरवः स्युः सनकादयः ये च सर्वे लोकाः जनास्तत्पराश्च ते यस्यानुशासनं दुर्लभं लब्ध्वा भाग्यैरेव तल्लब्धमिति बहुमानेनेत्यर्थः । शिरसा वहन्ति ॥२॥ स भवान् हे अरविन्दाक्ष ! ईशमात्मानं मन्यन्त इति तथा तेषां जनानामनुशासनं धत्ते करोतीति यत्तदत्यन्तविडम्बनं मनुष्यचेष्टाभिनयमात्रमन्यथा सर्वनियन्तुः सङ्कल्पमात्रक्लृप्तजगदुत्पत्तिस्थितिलयस्य तवैतत् साक्षाच्छत्रुविजयादिरूपं कर्म न घटत इति भावः ॥३॥ ननु प्रभावातिशयार्थमेवाहमपीतरवत्तावानुशासनं दध इत्यत आह-नहीति । एकस्याविभक्तनामरूपचिदचिद्विशिष्टतया जगदुपादानकारणभूतस्याद्वितीयस्य निमित्तकारणस्य च ब्रह्मणस्तदुभयकारणत्वोपयुक्तस्वाभाविकसार्वज्ञ्यसर्वशक्तित्वादिकल्याण-गुणबृहत्त्वशालिनः एवं लीलाविभूतिनायकत्वमुक्तम् । परमे नित्यविभूत्याख्ये तिष्ठतीति तथा तस्य तव कर्मभिः प्राकृतशत्रुजयादिरूपैस्तेजःप्रभावो न वर्धते नापि ह्रसते च यथा रवेरुदयास्तमयादिकर्मभिर्न वर्धते न क्षीयते च तद्वत् ॥४॥ उक्तमेव सहैतुकं कैमुत्यनयाभिप्रायेणाह-न चेति । हे माधव ! हे अजित ! तव भक्तानामेव पशूनामिव पशुतुल्यानां देहात्माभिमानिनामिव ममाहमिति त्वं तवेति च नानाधीः स्वदेहपरदेवतत्सम्बन्धिष्वनात्मभूतेषु आनात्मीयेष्वात्माभिमानात्मीयत्वाभिमानरूपनानाधीर्न च नास्ति कुतः तद्धेतुकतेजोवृद्धिह्रासौ किं पुनस्तव तौ न स्त इतीति भावः ॥५॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

यस्य तव त्रिलोकगुरवः ब्रह्मादयः ॥२॥ ईशमानिनाम् ईश्वरोऽहमहं भोगीत्याद्यभिमानवतां दीनानामात्मतत्त्वज्ञानाभावात्कोष्ठगत्या कृपणानामनुशासनं दुर्मार्गप्रवृत्तित्यागेन सन्मार्गवर्तनम् ॥३॥ प्रेक्षावत इव हरेरनुशासनादिप्रवृत्तिः स्वप्रयोजनोद्देशपूर्विकेत्यकृतार्थत्वप्रसङ्ग इति तत्राह–नहीति । तेजः प्रभावलक्षणा प्रभा कर्मभिः शुभाशुभलक्षणैः "न कर्मणा वर्धते नो कनीयान्" इति श्रुतेः । एकस्यापि समाधिकसद्भावे तौ किं नस्यातामिति तत्राह–अद्वितीयस्येति । अस्यापि परिच्छिन्नत्वे कथमिति मन्दाशङ्कां परिहरति–ब्रह्मण इति । बहिस्तथाऽस्तु जीवात्परत्वेन पूर्णत्वेन मीयमानस्य परमात्मन इत्यर्थः । रवेः प्रभा मन्दोष्णत्वादिविशेषः कालोपाधिको न स्वाभाविक इति भवत्येवं निदर्शनं हरेस्तूक्तविशेषणसामर्थ्यात्सोऽपि नेत्यवगमयितव्यम् ॥४॥ हरेरद्वितीयत्वं किम्पुनर्न्यायेनाह–न चेति । हे अजित ! माधव लक्ष्मीपते ! ते तव भक्तानां पुत्रादौ ममेति देहादावहमिति देहान्तरे त्वमिति तदीयक्षेत्रादौ तवेति नानाधीर्नास्ति चशब्दः सर्वत्रेश्वरसत्तां पश्यतामित्यस्मिन्नर्थे वर्तते कीदृशी नानाधीः यथा पशूनां संस्काररहितानां बुद्धिर्वैकृता विविधप्रकारा स्वार्थे तद्धितः ॥५॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

॥१-३॥ न च यज्ञभोक्तुस्तव स्वार्थमेवेदं कर्म्म यतो नहीति । न च त्वदीयानामस्माकं स्वाभिमानमयमेतत् ॥४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

ये त्रैलोक्यस्यापि गुरवस्तेऽपि तवानुशासनमाज्ञां वहन्ति ॥२॥ स भवान् दीनानामतिनिकृष्टानामस्माकं न तूत्कर्षः । हन्त हन्त परमेश्वरमपि स्वाज्ञाकारिणमिमे कुर्वन्तीति लोकैरुपहस्यामह एवेत्यर्थः ॥३॥ अस्मद्विधस्यापि जीवस्याज्ञाकारित्वे तव तु न काप्यप्रतिष्ठेत्याह–नहीति । एकस्य ईश्वरान्तराभावात् सजातीयभेदरहितस्य अद्वितीयस्य मायाजीवयोस्त्वच्छक्तित्वेन त्वद्रूपत्वाद्विजातीयभेदरहितस्येति कैस्तवाप्रतिष्ठा कर्तव्येति भावः । किञ्च ब्रह्मण इति । सर्वव्यापकस्य तव व्याप्यतालक्षणो निकर्षो नास्ति परमात्मन इति सर्वजीवनियन्तुस्तव मादृशजीवनियम्यत्वलक्षणश्च स नास्तीति राज्ञा दैन्येनैव व्यञ्जितं वस्तुतस्तु भक्तवश्यत्वं भगवतो न निकर्षः प्रत्युतकृपाप्रकर्षव्यञ्जकत्वात् सर्वोत्कर्ष एव स च सर्वदा तस्य वर्तत एव "दर्शयंस्तद्विदां लोक आत्मनो भक्तवश्यताम्" इत्यादिवचनेभ्यः यथा रवेरिति रविर्हि भूलोके श्वपचगृहमपि प्रकाशयति सुमेरूपरि परमेष्ठिगृहमपि प्रकाशयतीत्यर्थः ॥४॥ नन्वेवमप्यहं परमेश्वरो ममेदं नीचं कर्म अयोग्यमति मनसि कथं न सम्भवेदत आह–नेति । हे अजित ! तव भक्तानामेवं तावत् ममाहमिति मम महापाण्डित्यमतोऽहं सर्वश्रेष्ठः कस्याज्ञां वहामि त्वं तवेति तव शास्त्रज्ञानाभावात्त्वं मूर्खः सर्वस्यैव दास्यं कुर्विति पशूनामिव वैकृता वैकृतीति च पाठः विकारमयी प्राकृती नानाधीर्नास्तीति तेन सिद्धानां तेषां चिन्मयी सात्वस्त्येवेति भावः । तव तु किं पुनर्वक्तव्यमस्तीति भावः ॥५॥

गूढार्थदीपिनी

ये गुरवः पूज्या ब्रह्मादयः ये च लोकपाला महेश्वरा इन्द्रादयः ते सर्वे तव अनुशासनं वहन्ति पालयन्ति ॥२॥ स भवान् अस्माकमनुशासनं धत्ते अनुसरति तत् अत्यन्तविडम्बनमननुरूपमेव वात्सल्यद्योतकत्वात् । दीनानामज्ञानाम् । हे भूमन् अपरिच्छिन्नमहिमन् ॥३॥ तव तेजः कर्मभिः उत्कृष्टनिकृष्टैः न वर्धते न च ह्रसति यथा रवेरुदयास्तमयादिकर्मभिः । 'न कर्मणा वर्धते नो कनीयान्' इति श्रुतेः ॥४॥ हे अजित ! यथा पशूनामज्ञानां वैकृती शरीरविषया नाना धीः भवति तथा तव भक्तानां तु न वै नैव किमुत तवेत्यर्थः वैकृतीति पाठः प्रशस्तः ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अनुशासनमाज्ञाम् ॥२॥ स भवान् दीनानामत्यन्तनिकृष्टानामस्माकमनुशासनं यद्धत्ते तदत्यन्तं विडम्बनं मनुष्यचेष्टानुकरणं तत्त्वस्मदुत्कर्षसूचकमित्यर्थः ॥३॥ किञ्च एकस्याद्वितीयस्य निस्समानातिशयस्य ब्रह्मणः बृहत्स्वरूपादेः अत एव परमात्मनः तेजः कर्मभिः शत्रुवधादिभिः न वर्धते स्वभक्तहिताचरणादिरूपैः कर्मभिश्च न ह्रसते यथा शीतादिनिराकरणकर्मभिः लोकहिताचरणकर्मभिश्च रवेस्तेजो न वर्धते नापि ह्रसते च तद्वत् ॥४॥ तेजो हानिवृद्धी नानाभिमानवतां भवतः तथा त्वं तु तव भक्तानामपि नास्ति तव नास्तीति किमुत वक्तव्यमित्याह न वै इति ॥५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यस्य तव त्रिलोकगुरवः । लोकशब्दस्तत्समुदायपरः । ततश्च त्र्यवयवो लोकस्तस्य गुरव इति विग्रहे न समाहारद्विग्वादिप्रसङ्गः । यथोक्तं मनोरमायाम् । दिक्सङ्ख्ये संज्ञायां नियमार्थमिति । कथं तर्हि त्रिलोकनाथेन सतां मखद्विष इति कालिदासः । त्रिलोकस्यासंज्ञात्वात् । न च समाहारद्विगुः । द्विगोरिति डीप्प्रसङ्गात् । न च पात्राद्यत्वं कल्प्यम् । यस्य त्रिलोकीगणनापरा स्यादित्यादिप्रयोगविरोधात् । न चोत्तरपदेति समासः । त्रिपदतत्पुरुषस्येह दुर्लभत्वात् । अत्रोच्यते । लोकशब्दोऽत्र लोकसमुदायपरः । त्र्यवयवो लोकस्त्रिलोकः । शाखापार्थिवादिः । एतच्च द्विगोर्लुगनपत्य इति सूत्रभाष्य एव स्पष्टम् । एतेन न वरसरुचिरामित्यादि व्याख्यातमिति । इह कस्मान्न भवति । त्रैविद्यः पञ्चनदः षट्कुल इत्यारभ्य किं तर्हि षण्णां कुलं षट्कुलं षट्कुले भवः षट्कुल इतीत्यन्तं च तत् । लोकानां गुरवो लोकगुरवस्त्रयाणां लोकगुरवस्त्रिलोकगुरव इति वा । सर्वलोकमहेश्वरा ब्रह्मरुद्रेन्द्रादयो दुर्लभमनुशासनं तव लब्ध्वाऽहोऽस्मद्भाग्यमित्यनुमान्य शिरसा वहन्ति । न विलमवलम्बत इत्येवकारेणाह । सर्वलोकमहेश्वरश्चासावश्च स भवानित्युत्तरेणान्वयः । यद्वा त्रिलोकस्य गौर्ज्ञानं येन स त्रिलोकगुर्वेदस्तस्य रवो यस्य स्तावकत्वेन त्रिलोकगुरव इति वा । अन्वयनं तु पूर्ववत् । गोस्त्रियोरुपसर्जनस्येति ह्रस्वः । इति नार्थतोऽन्यतरातिरेकः ॥२॥ यदाद्भुत्यज्ञापनायेदमुपन्यस्तं तदिदानीमाह ॥ स इति । हे भूमन् । स भवांश्चतुराननशासनकर्ताऽपि । ईशमानिनां वस्तुतस्त्वनीशानां दीनानामस्माकमनुशासनं कृष्णैवं कुर्वित्यादिकं धत्ते विधत्ते । तत्कार्यकरणेन तत्करणज्ञेयमिति यत्तदत्यन्तविडम्बनम् ॥३॥ न कनीयसा कृतेन कर्मणा कनीयस्त्वं तथा महीयसा महीयस्त्वं तवेति व्यतिरेकदृष्टान्तेनाचष्टे ॥ न हीति । एकस्य प्रधानस्याद्वितीयस्य समाधिशून्यस्य ब्रह्मणो गुणपूर्णस्य परमात्मनो विशिष्टचेतनस्य कर्मभिरुत्तमैस्तेजो न हि वर्धते तथा दूत्यादिभिर्न ह्रसते च । रवेर्यथा दिवा वर्धते ह्रसते रात्राविति । अथवा कालाद्युपाधिकृतमुत्तेजनमनुत्तेजनं स्वाभाविकं रवेरिवेत्यन्वयो वा । सर्वं श्रुतिप्रतीकरूपमिति न कृत्यचिन्ता कर्तव्या । न कर्मणा वर्धते नो कीनयानित्यादेः ॥४॥ हे अजित माधव तव भक्तानां ममाहं त्वं तव इति नानाविधा धीर्देहेऽहमिति पुत्रादौ ममेति तथा परदेहे त्वमिति तदीयदायादौ तवेति नास्ति । तर्हि सा क्वास्तीत्यत आह । पशूनां तत्प्रायाणां यथा प्राकृता । भावे क्ते विकृतं विकृतिस्तस्यैयं वैकृता । णप्रत्ययः । विकारसम्बन्धिनी विकृतेरियमिति वा नानाधीर्वर्तते न तथेति । चस्तव तु नास्तीति किं वक्तव्यमिति कैमुत्यसूचकः । माधव । निःस्वस्वामिकं ते जितभक्तानां ते जिता उत्तेजिताश्च ते भक्ताश्च तेषां विशेष्ये विशेष्यार्थविशेषानर्पकं सत्तेजितपदं तद्विशेषणे भक्तौ परमधार्मिक इत्यादाविवोत्तेजितत्वमुद्रिक्तत्वं समर्पयत्सार्थकमिति मन्तव्यम् । अच्छिन्नभक्तिमतामिति यावत् ॥५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

आदौ भगवन्माहात्म्यमाह–ये स्युरिति । त्रैलोक्यगुरवः त्रैलोक्ये उपदेष्टारः आज्ञापकाः ब्रह्मादयः वेदोक्तऋषयो वा सर्वे च लोकाः प्राणिनो भूराद्यभिमानिदेवा वा सहेश्वरा इन्द्रादिसहिताः एवं वेदलोकपराः भगवतः अनुशासनं स्वस्यानधिकारित्वेन दुर्लभं लब्ध्वा शिरसा वहन्ति इत्यादरेण कुर्वन्तीत्यर्थः ॥२॥ किमतो यद्येवं तदाह–भगवानरविन्दाक्ष इति । सर्वेश्वरः पुरुषोत्तमो भगवान् भक्तानुकम्पार्थमरविन्दाक्षः दृष्ट्यैवाप्यायनकर्ता जातः एतादृशः दीनानां शोच्यानां तत्रापीशमानिनां दोषयुक्तानाम् अनुशासनं स्वयं धत्ते तत्कपटमानुषलीलाप्रदर्शनापेक्षयापि अत्यन्तविडम्बमनुकरणं हीनानुशासनकरणस्यायुक्तत्वं स्थापयित्वा अयुक्तं करोतीत्यप्ययुक्तमिति ॥३॥ भूम्नोऽपि तदुक्तमिति निरूपयति–नह्येकस्येति । यदि बहवो भवन्त्यात्मानः तदा गौणप्रधानभावे अन्यधर्माश्रयणं निषिद्धं भवति एकत्वे तु यद्यन्यस्याप्यधमाङ्गस्य उत्तमाङ्गं सेवां करोतीति यथा पादप्रक्षालनं हस्तेन क्रियते तथा न

विरोध इति भगवत एव जगत्येकस्य सत्त्वान्न विरोधः युक्तिस्तु हि शब्दवाच्या निरूपिता किञ्च यत्र द्वैतमिव भवति तत्र अन्योन्यहीनभावं मन्यते अद्वितीयो भगवानेव सर्वत्र जगति वर्तत इति न भगवति किञ्चिद्दूषणमित्याह–अद्वितीयस्येति। किञ्च जीवानामयं धर्मः यत्कार्यप्रेरणं कार्यकारणं चेति न तु ब्रह्मणः शुद्धस्य लीलयान्यधर्मस्वीकारे तु क उत्कर्षापकर्ष इत्याह–ब्रह्मण इति। किञ्च सर्वेषां नियन्ता भगवान् परमात्मा प्रेरकः सर्वानेव यथासुखं सर्वत्र प्रेरयति तत्र किमुत्कर्षमपकर्षं वा सर्वस्यापि भगवदधिष्ठितत्वाविशेषात् अन्यधर्मसम्बन्धेऽपि न काचित् क्षतिः यथा आकाशे अभ्रतमः प्रकाशाः तद्वद्भगवतीत्याशयेनाह–परमात्मन इति अत एव कर्मभिः स्वकीयैः कर्मरूपस्य पराकाष्ठापन्नस्य निर्लेपस्य तेजो न वा वर्धते न वा ह्रसते अलौकिकत्वात् दृष्टान्तमाह–यथा रवेरिति उच्चनीचस्थाने किरणानां सम्बन्धेऽपि न काचिन्न्यूनता सर्वग्रहसम्बन्धेन न क्वाप्युदयास्तमयौ ॥४॥ नन्वेवं सति कथं भगवान् सर्वेश्वरत्वमेव मन्येत तेन हीनभावं तथा सति जीवानामपकर्षबुद्ध्या नाशो भविष्यतीति चेत् तर्हि प्रकृतेऽपि तथेत्याशङ्कायामाह–न वै तेऽजितभक्तानामिति। हे अजित ! कस्याप्यवकाशात् भक्तानां ममाहमिति स्वाभिमानः कदाचिदपि स्वोत्कर्षख्यापको भवति उत्कर्षस्तु जीवानां पाञ्चभौतिकदेहयुक्तानां लक्ष्मीकृत एव भवति तस्यास्तु त्वमेव धवः अतस्त्वयि को वाऽभिमानो भविष्यति इति भावः। किञ्च त्वद्भक्तानां कस्मिंश्चिदपि त्रिविधां द्वैतयुक्तानां द्रव्यादिभेदार्थं त्वयीक्षां चक्रुरित्यर्थः। अभ्युच्छादयामीतिवत् अस्याप्याम् प्रत्यय इतिच्छान्दसः यज्ञे यथार्थसमृद्धिमाह–हैमा इति। किलेति लोकोऽत्र प्रमाणं वरुणो निधिपतिरिति सोऽत्र दृष्टान्तीक्रियते पुरेति तस्यापीदानीं दुर्लभ इति सर्वोत्कर्षः देवादयो लोकपालाः द्वीपान्तरस्था राजानश्च नागता भविष्यन्तीति तेषामाकारणमागमनञ्च इन्द्रादय इति विरिञ्चिशिवाभ्यां संयुताः ॥५-१३॥

सुबोधिनीसारः

त्रैलोक्यस्य गुरवो ये सनकाद्या मुनयः सर्वे लोकपतयोऽन्यैर्दुर्लभं लब्ध्वा प्राप्य तवानुशासनमाज्ञां शिरसैव वहन्ति बिभ्रति ॥२॥ सोऽरविन्दाक्षः पद्मनेत्रो भवान् ईशमानिनां दीनानामस्मदादीनाम् अनुशासनं धत्ते सम्पादयति तत् अत्यन्तविडम्बनं भवति हे भूमन् ॥३॥ त्वमेकरसः सदेत्याह। एकस्याद्वितीयस्य परमात्मनो ब्रह्मणः ते तव कर्मभिरेभिस्तेजो न वर्द्धते न ह्रसते च न क्षीयते रवेः सूर्यस्येव ॥४॥ हे अजित हे माधव ते भक्तानां ममाहमिति त्वं तवेति च नानाबुद्धिः वैकृता विकारजाता न वै पशूनामिव ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह–य इति। ये त्रैलोक्यस्य गुरवः पूज्याः सन्मार्गोपदेष्टारो ब्रह्मरुद्रादयः ये च सर्वलोकस्य महेश्वराः पालका इन्द्रादयः स्युः ते सर्वे दुर्लभं लब्ध्वा स्वभाग्यैरेतद्दुर्लभं लब्धमिति मत्वा यस्यानुशासनं शिरसा वहन्ति बहुमानेन पलायन्ति ॥२॥ हे भूमन् महत्तम ! स अरविन्दाक्षो दृष्ट्यैव भक्तसन्तापनाशको भवान् दीनानां विषयासक्तचित्तानां वृथैवेशमानिनामस्माकमनुशासनं धत्ते आज्ञामनुसरतीति यत्तदत्यन्तविडम्बनं मनुष्यचेष्टाभिनयमात्रमित्यर्थः ॥३॥ ननु 'एवं मनुष्यानुकरणमपि कथं घटते तेजोहानिकरत्वात्' इत्याशङ्क्याह–नहीति। कर्मभिर्मनुष्यानुकरणरूपैर्देवमनुष्यादिपूजनाज्ञापनादिभिस्तव तेजो नैव वर्धते, तथाऽनुग्रहेण पराज्ञानुसरणादिभिश्च तेजो नैव ह्रसते, हिशब्दोऽवधारणे। ननु कथं कर्मभिः प्रभाववृद्धिहानी न स्तो लोके तथा दर्शनात् इत्याशङ्क्य जीववैलक्षण्यमाह–एकस्येति, मुख्यस्येत्यर्थः। तत्र हेतूनाह–अद्वितीयस्येति, सर्वोपादानत्वेन सर्वाभिन्नस्येत्यर्थः। ब्रह्मणो व्यापकस्याचिन्त्यानन्तशक्तिपूर्णस्य चेत्यर्थः। परमात्मनः सर्वनियामकस्येत्यर्थः। तत्र दृष्टान्तमाह–यथा रवेरिति। उदयास्तमयादिकर्मभिर्यथा रवेरुच्चनीचसम्बन्धेनापि तेजो न वर्धते, न च ह्रसते तद्वदित्यर्थः ॥४॥ हे माधव लक्ष्मीपते ! हे अजित मायाविद्यादिप्रेरकतया तदनभिभूत ! इदं कर्म मम योग्यमिदमयोग्यमित्यभिमानस्तु पशूनामिव। देहादौ ममाहमिति त्वं तवेति नानाधीः सा च वैकृता विकृतदेहादिविषया धीस्तावत्तव भक्तानामपि नैव भवति, तव तु सा नास्तीति किं पुनर्वक्तव्यम् ? इत्यतो नीचोच्चकर्मसु तव प्रवृत्तिर्घटत एवेत्यर्थः ॥५॥

अन्वितार्थप्रकाशिका

ये स्युरिति ॥ त्रैलोक्यस्य गुरवः पूज्याः ब्रह्मरुद्रादयः ये च सर्वलोकस्य महेश्वराः पालका इन्द्रादयः स्युः ते सर्वे दुर्लभं लब्ध्वा स्वभाग्यैरेतद्दुर्लभं लब्धमिति मत्वा यस्य तवानुशासनं शिरसा वहन्ति बहुमानेन पालयन्ति ॥२॥ स इति ॥ हे भूमन् महत्तम ! सः

अन्वितार्थप्रकाशिका

अरविन्दाक्षो नारायणो भवान् दीनानां विषयासक्तचित्तानां वृथैवेशमानिनामस्माकमनुशासनं धत्ते आज्ञामनुसरतीति यत्तदत्यन्तमनुरूपं विडम्बनं मनुष्यचेष्टानुकरणं स्वतेजोहानिप्रसङ्गादित्यर्थः । यद्वा । यदस्मदनुशासनं धत्ते तदस्माकं विडम्बनमपकर्ष एव न तूत्कर्षः । यतः परमेश्वरमिमे आज्ञापयन्ति इति लोकैर्वयमुपहस्यामहे ॥३॥ अस्मदनुशासनधारणेन तव तु न काऽप्यप्रतिष्ठेत्याह–न हीति । तथापि एकस्य मुख्यस्य अद्वितीयस्य समानासमानरहितस्य ब्रह्मणः परमात्मनः सर्वजीवनियन्तुस्तव नियम्यत्वं सुतरां न वास्तवम् । अतः परानुग्रहार्थैः एतैः कर्मभिः आज्ञापनादिभिस्तव तेजो नैव वर्धते । तथाऽनुग्रहेण पराज्ञानुसरणादिभिश्च तेजो नैव ह्रसते । तङार्षः । यथा उदयास्तमयादिकर्मभिः रवेरुच्चनीचसम्बन्धेनापि तेजो न वर्धते न च ह्रसति तद्वत् ॥४॥ नेति ॥ हे अजित ! हे माधव ! वैकृता विकृतदेहादिविषया । डीबभाव आर्षः । क्वचित्तु वैकृतीत्यपि पाठः । ममाहमिति त्वं तव इति च नानाधीः पशूनां यथा भवति तथा ते तव भक्तानां न भवति । तव तु कुतो भवेत् । अतः ममेदं कर्म योग्यम् इदमयोग्यम् इत्यभिमानस्तव नास्त्येव । अतो नीचोच्चकर्मसु तव प्रवृत्तिर्घटते ॥५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ये त्रैलोक्यस्यापि गुरवः सङ्कर्षणनारदसनकादयः स्युः तथा ईश्वरैर्ब्रह्मशिवादिलोकपालैः सहिताः सर्वे लोकाः ते उभये दुर्लभं यस्यानुशासनम् आज्ञां लब्ध्वा शिरसा वहन्ति बहु मानयनेनेति भावः ॥२॥ स भवान् दीनानाम् ईशमानिनाम् अस्माकम् अनुशासनं धत्ते करोति यत् तदत्यन्तविडम्बनम् ॥ परमेश्वरस्यतस्यातिशयमनुष्यत्वानुकरणं भक्तोपरि कृपयेति भावः ॥३॥ एवं सत्यपि तव तेजोहनिर्नस्यादित्याह–नहीति ॥ अद्वितीयस्य नास्ति द्वितीयः स्वरूपस्वभावादिभिः अन्यस्तुल्यो यस्य सः अत एव एकस्य ब्रह्मणो बहत्त्वाद्यसङ्ख्यगुणगणयुक्तस्य ॥ परमात्मनः परमेश्वरस्य ॥ तव तेजो न वर्धते न ह्रसते च यथा रवेस्तथा ॥ तत्र श्रुतिः न पुण्येन कर्मणा भूयान्न पापेन कर्मणा कनीयानिति ॥४॥ हे अजित तव भक्तानां ममाहमिति अहं देहोऽस्मि मम इमे पुत्रादयः सन्ति इत्येवम्भूता ॥ त्वं तवेति च त्वं देहोऽसि तवेमे पुत्रादयः सन्ति इत्येवं रूपा च नानाधीः देहदैहिकेषु नानाविधा बुद्धिर्नास्ति पशूनां यथा वैकृता विषयविकारयुक्ता बुद्धिरस्ति एवं त्वद्भक्तानां नास्ति तर्हि तव तु कुत इति भावः ॥५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह चतुर्भिः ॥ य इति ॥ ये त्रैलोक्यस्यापि गुरवः, सनकादय इति शेषः । स्युः, ये च सपालकाः पालैः सह वर्तमानाः, सर्वे लोका जनाः, ते यस्य, अनुशासनं दुर्लभं, लब्ध्वा भाग्यैरेतल्लब्धमिति बहुमानेनेत्यर्थः । शिरसा एव, वहन्ति ॥२॥ स भवानिति ॥ हे अरविन्दाक्ष, हे भूमन्, सः भवान्, दीनानाम्, ईशमात्मानं मन्यन्त इति तेषां जनानाम्, अनुशासनं, धत्ते, तत्, अत्यन्तविडम्बनं मनुष्यचेष्टाभिनयमाात्रम्, अन्यथा सर्वनियन्तुः सङ्कल्पमात्रजगदुत्पत्तिस्थितिलयस्य तवैतत् साक्षाच्छत्रुमित्रजयादिरूपं कर्म न घटत इति भावः ॥३॥ ननु प्रभावातिशयार्थमेवाहमपीतरवदनुशासनं दध इत्यत आह ॥ न हीति ॥ एकस्य अविभक्तनामरूपचिदचिद्विशिष्टतया जगदुपादानकारणभूतस्य, अद्वितीयस्य निमित्तकारणस्य च, ब्रह्मणः तदुभयकारणत्वोपयुक्तस्वाभाविकसार्वज्ञसर्वशक्तित्वादिकल्याणगुणबृहत्त्वशालिनः, एवं लीलाविभूतिनायकत्वमुक्तम् । परमे नित्यविभूत्याख्ये तिष्ठतीति तस्य, अनेन स्वधामस्थस्य नित्यविभूतिनायकत्वमुक्तम् । एवम्भूतस्य तव, कर्मभिः, प्राकृतशत्रुजयादिरूपैः, तेजः प्रभावः, न वर्द्धते न ह्रसते च । कथमिव । यथा उदयास्ताभ्यां कृत्वा, रवेः तेजः, न वर्द्धते न ह्रसते च, तद्वत् हि ॥४॥ उक्तमेव हेतुं कैमुत्यनयाभिप्रायेणाह ॥ न वै त इति ॥ हे अजित, हे माधव, ते तव, भक्तानां पशूनाम् इव, पशुतुल्यानां देहात्माभिमानिनामिवेत्यर्थः । वैकृता शरीरविषया, मम अहम् इति, त्वं तव इति च, नाना धीः स्वदेहपरदेहत–त्सम्बन्धिष्वनात्मीयेष्वात्माभिमानरूपनानामतिः, न वै नास्त्येव । तर्हि तद्धेतुकतेजोवृद्धिह्रासौ तव न स्त इति किमु वक्तव्यमित्यर्थः ॥५॥

कृष्णप्रिया

युधिष्ठिर उवाच :- महाराज धर्मराजने कहा ! सच्चिदानंद स्वरुप भगवान् श्रीकृष्ण ! त्रिलोक के स्वामी ब्रह्मा-शंकर आदि इन्द्रादि लोदकपाल सर्व आपकी आज्ञा पाने के लिए तलसते रहते है और यदि वह आज्ञा मिल

गयी तो बडी श्रद्धा से उस आज्ञा को शिरोधार्य करते है ॥२॥ श्रीयुधिष्ठिरजी महाराज भगवान् श्रीकृष्णचन्द्रजी को विनयपूर्वक निवेदन करते है कि महाराज हमलोग है तो सर्वथा दीन लेकिन मानते है अपने को पृथ्वीपति और प्रजापति इस लिये है तो शिक्षा योग्य परंतु आप बडे उदार होकर हमारी आज्ञा का स्वीकार करते है फिर पालन भी करते है। हे भूमन् हे अनन्त ! सर्वसमर्थ अरविन्दनेत्र भगवान के लिये यह तो मनुष्य लीला का केवल अभिनय ही है ॥३॥ हे नाथ ! सूर्योदय एवं सूर्यास्त के कारण भगवान सूर्य के तेजस् की न बढती वृद्धि और घटती होती है वैसे किसी प्रकार के कर्मो से न तो आपका विकास या तो ह्रास होता है क्योंकि आप स्वयं परब्रह्म है इस लिये आप सजातीय-विजातीय एवं स्वगत मेदसे रहित हो ॥४॥ हे अजित भगवन् ! हे लक्ष्मिपिते ! यह मैं हूं और यह मेरा है; एवं यह तू है और तेरा-एसी अज्ञानकृत भेदमति आप के भक्तजनोंकी होती नहीं है यह तो पशुमति है। आपके अनन्य भक्तो को यदि एसी मति नहीं होती तब आपमें एसे विचारोंकी सम्भावना ही कहां ? ॥५॥

श्रीशुक उवाच

इत्युक्त्वा [1]याज्ञिये काले वव्रे युक्तान् स ऋत्विजः । कृष्णानुमोदितः पार्थो ब्राह्मणान् ब्रह्मवादिनः ॥६॥
द्वैपायनो भरद्वाजः सुमन्तुर्गौतमोऽसितः । वसिष्ठश्च्यवनः कण्वो मैत्रेयः कवषस्त्रितः ॥७॥
विश्वामित्रो वामदेवः सुमतिर्जैमिनिः क्रतुः । पैलः पराशरो [2]गर्गो वैशम्पायन एव च ॥८॥
[3]अथर्वा कश्यपो धौम्यो रामो भार्गव आसुरिः । वीतिहोत्रो मधुच्छन्दा वीरसेनोऽकृतव्रणः ॥९॥

कर्दमक्षमा

श्रीशुक उवाच :- इति, उक्त्वा, पार्थः, कृष्णानुमोदितः, यज्ञिये, काले, युक्तान्, ऋत्विजः, ब्रह्मवादिनः, ब्राह्मणान्, वव्रे ॥६॥ द्वैपायनः, भरद्वाजः, सुमन्तुः, गौतमः, असितः, वसिष्ठः, च्यवनः, कण्वः, मैत्रेयः, कवषः, त्रितः, विश्वामित्रः, वामदेवः, सुमतिः, जैमिनिः, क्रतुः, पैलः, पराशरः, गर्गः, वैशम्पायनः, एव, च, (७-८) अथर्वा, कश्यपः, धौम्यः, रामः, भार्गवः, आसुरिः, वीतिहोत्रः, मधुच्छन्दाः, वीरसेनः, अकृतव्रणः (९) अन्ये, द्रोणभीष्मकृपादयः, सहसुतः, धृतराष्ट्रः, च, महामतिः, विदुरः, तथा, उपहूताः, हे नृप ! यज्ञदिदृक्षवः, ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राः, सर्वराजानः, राज्ञाम्, प्रकृतयः, तत्र, ईयुः ॥७-८-९-१०-११॥

श्रीधरस्वामिकृता भावार्थदीपिका

यज्ञिये यज्ञोचिते वसन्तादिकाले युक्तानभियुक्तान् स युधिष्ठिरः ऋत्विजो होतृप्रमुखान् वव्रे वृतवान् ॥६॥ तानाह द्वैपायन इति त्रिभः ॥७-८॥ अकृतव्रणान्तानेतानृत्विगुपद्रष्टादिभेदेन वव्रे ॥९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अभियुक्तान्कल्पोक्तन्यायवेदिनः ॥६॥ तानृत्विजो नामतो निर्दिशति-द्वैपायन इति त्रयेण ॥७-८॥ उपद्रष्ट्राद्या ऋत्विजां संज्ञाः । ताश्च ऽयज्ञविद्यातोऽवेयाः ॥९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत्र श्रीशुक उवाचेति क्वचित् यज्ञिये काले पूर्वमेव विचार्य्य निर्णीते शुभसमयविशेषे इति पूर्वोक्तमुक्त्वा निवेद्य ब्रह्मवादिनः पाठतोऽर्थतश्च सदा वेदाभ्यासपरान् ॥६॥ द्वैपेति त्रिकम् । द्वैपायनादीनां मुख्यत्वादेत एव वृताः न त्वन्ये इत्येवकारार्थः चकारः प्रत्येकमुक्तसमुच्चये तत्र सर्वमुख्यो ब्रह्मा द्वैपायनः तथा च सभापर्वणि स्वयं "ब्रह्मत्वमकरोत् तत्र सत्यवतीसुतः" इत्यादि ॥७-९॥

---

[1] यज्ञिये-श्रीधर. वंशी. वीर. विज. जीव. सुदर्शन. विश्व. शुक. । [2] ऽगस्त्यो-वीर. । [3] दुर्वासा-च. पु. टी. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्युक्त्वेति श्रीभगवत्स्तुतेः पश्चादेव क्रियमाणस्यान्यकृत्यस्य सिद्धेः; यज्ञिये काले तदानीमेवोपस्थिते कृष्णेन साक्षाद्भगवतावतरणार्थं विज्ञापितेनानुमोदित इति, तत्प्रीत्यर्थमेव क्रियमाणानां सर्व्वकर्मणां सुसिद्ध्यर्थं तथा ब्राह्मणानामुत्साहविवर्द्धनार्थं च, यतः पार्थः श्रीकृष्णैकभक्तायाः पृथायाः पुत्र इति तस्य परमाभिज्ञत्वं सर्व्वकर्म्मकौशलादिकञ्च सूचितम् । ब्रह्मवादिनः पाठतोऽर्थतश्च सदा वेदाभ्यासपरान् ॥६॥ द्वैपायनादीनां यज्ञे मुख्यत्वादेत एव वृताः, न त्वन्ये । तत्र सर्व्वमुख्यो ब्रह्मा द्वैपायनः; तथा च सभापर्व्वणि —

'स्वयं ब्रह्मत्वमकरोत्तत्र सत्यवतीसुतः' इत्यादि ॥७॥

एव अपि, वैशम्पायनोऽपि, च-कारस्य परेणान्वयः ॥८-९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥५-१६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इतीति । यज्ञिये यज्ञार्हे वसन्तादिरूपकाले स पार्थो युधिष्ठिरः कृष्णेनानुमोदितः युक्तानभियुक्तान् ब्रह्मवादिनः ब्राह्मणान् ऋत्विजो वृतवान् ॥६॥ तानेव निर्दिशति-द्वैपायन इति त्रिभिः । अकृतव्रणान् एतान् ऋत्विगुपद्रष्टादिभेदेन वव्र इति सम्बन्धः ॥७-९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

यज्ञिये यज्ञकरणयोग्ये युक्तान्काल्पोक्तन्यायवेदिनः ॥६-९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यतो न वै इति । तस्मात्तव कृपैव कारणमस्माकञ्च भक्तिरेवेति यद्यपि मेनिरे कृष्णभक्तस्य सूपपन्नमित्युक्तं तथाप्यनैकान्त्यादिति यदुच्यते तत् खलु ब्राह्मणत्वादि व्यवहारमाश्रित्यैव ज्ञेयम् ॥५-४४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

यज्ञिये यज्ञोचिते वदन्तादौ ॥६-११॥

गूढार्थदीपिनी

यज्ञिये यज्ञार्हे वसन्तादिकाले युक्तान् अभियुक्तान् वव्रे वरणीकृतवान् । ऋत्विजः होतृप्रमुखान् । ब्रह्मविदः वेदज्ञान् ॥६॥ ऋत्विजो नामतो निर्दिशति । द्वैपायन इति त्रयेण । अकृतव्रणान्ता ऋत्विजो वृताः । भार्गवो भृगुवंशीयो रामः परशुरामः इत्येकं नाम ॥७-९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यज्ञिये वसन्तादिकाले वव्रे वृतवान् ॥६॥ तान्निर्दिशति - द्वैपायन इति त्रिभिः ॥८-९॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यज्ञिये यज्ञोचिते काले कार्तिके जरासन्धवधस्तदनन्तरं दिग्विजयस्तदुपरितने काले माघादिपञ्चकैकतमे कार्तिकस्य मासस्य प्रवृत्तं प्रथमेऽहनि । चतुर्दश्यां निशायां वै निवृत्तौ मागध इत्यादिना सभापर्वोक्तेः । यज्ञर्त्विग्भ्यां घखञाविति तत्कर्मार्हतीत्यर्थे घे तस्येयादेशे यज्ञियमिति भवति । तत्कर्मार्हं तु यज्ञियमित्यमरः । यज्ञिय इति पाठे पुनः स्वार्थेऽण् प्रत्ययः । युक्तान्योग्यान्ब्रह्मवादिन ब्राह्मणान् कृष्णानुमोदितो वव्रे सङ्कल्पपूर्वकमवृणोत् ॥६॥ तन्नामानि वर्णयतामाकर्णयतां चाशुभहराणीति कीर्तयति ॥ द्वैपायन इति

वाग्देवपदोत्तरं वा भरद्वाजपदोत्तरं वा सुमन्तुरिति सुमतिरिति यथायथं पठनीयम् ॥७-८॥ भार्गवः परशुरामः। भार्गवेयरामव्यावृत्तये भार्गव इति रामौ भार्गवेय इति बह्वृचब्राह्मणम्। आसुरिः सन् अकृतवर्णपर्यन्तानेतानृत्विगादित्वेन वव्रे ॥९॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

॥५-१३॥

सुबोधिनीसारः

शुकोक्तिः। एवमुक्त्वा यज्ञयोग्ये काले युक्तान् समाहितान् ऋत्विजो होतॄन् ब्रह्मवादिनो ब्राह्मणान् कृष्णेनानुमोदितः पार्थः स युधिष्ठिरो वव्रे ॥६॥ तेषां नामानि अनुक्रामति द्वैपायनो व्यासः शेषं स्पष्टम् ॥७-९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स पार्थो युधिष्ठिरो इत्येवमुक्त्वा कृष्णेनानुमोदितः अनुज्ञातः सन् यज्ञिये यज्ञार्हे वसन्ते काले युक्तान् योग्यान्। तत्र हेतुमाह-ब्रह्मवादिन इति। अध्ययनादिना वेदार्थाभिज्ञान् ब्राह्मणान् ऋत्विजो होतृप्रमुखान् वव्रे वृतवानित्यर्थः। तानेव निर्दिशति त्रिभिः। द्वैपायनाद्यकृतव्रणान्तानेतान् ऋत्विगुपदेष्ट्रादिभेदेन वव्रे इति सम्बन्धः ॥६-९॥

अन्वितार्थप्रकाशिका

इतीति॥ स पार्थो युधिष्ठिरः इत्येवमुक्त्वा कृष्णेनानुमोदितः अनुज्ञातः सन् यज्ञिये यज्ञार्हे वसन्ते काले ब्रह्मवादिनः युक्तान् योग्यान् ब्राह्मणान् ऋत्विजो होतृप्रमुखान् वव्रे वृतवान् ॥६॥ द्वैपायन इति त्रिकम्॥ द्वैपायनाद्या अकृतव्रणान्ताः ऋत्विजो वृता इति शेषः ॥७-९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृष्णेनानुमोदित आज्ञप्तः स राजा ऋत्विजो होतृप्रभृतीन् ॥६॥ नाभिस्तान् दर्शयति द्वैपायन इति त्रिभिः श्लोकैः ॥७-८॥ भार्गवो रामः परशुरामः अकृतव्रणस्तत्संज्ञक ऋषिः द्वैपायनाद्यकृतव्रणान्तान् विप्रान् वव्रे इति पूर्वेण सम्बन्धः ॥९-१०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति॥ इति उक्त्वा, कृष्णानुमोदितः सः पार्थो युधिष्ठिरः, यज्ञीये यज्ञार्हे, यज्ञिये इति ह्रस्वत्वं छन्दोऽनुरोधात्। काले वसन्तादिसमये, युक्तानभियुक्तान्, ब्रह्मवादिनः ब्राह्मणान्, ऋत्विजः, वव्रे वृतवान् ॥६॥ तानेव निर्दिशति त्रिभिः॥ द्वैपायन इति॥ द्वैपायनो व्यासः, भरद्वाजः, सुमन्तुः, गौतमः, असितः, वसिष्ठः, च्यवनः, कण्वः, मैत्रेयः, कवषः, त्रितः ॥७॥ विश्वामित्र इति॥ विश्वामित्रः, वामदेवः, सुमतिः, जैमिनिः, क्रतुः, पैलः, पराशरः, गर्गश्च, वैशम्पायनः एव। एवकारोऽप्यर्थे ॥८॥ अथर्वेति॥ अथर्वा, कश्यपः, धौम्यः, भार्गवः रामः जामदग्न्यः, वीतिहोत्रः, मधुच्छन्दाः, वीरसेनः, अकृतव्रणः ॥९॥

कृष्णप्रिया

श्री शुकराचार्यजी महर्षिजी कहते है राजन् परीक्षित् ? एसा नम्र निवेदन करते हुए श्रीयुधिष्ठिरजी महाराजने भगवान श्रीद्वारिकाधीशजी सम्मति से यज्ञ के योग्य अवसर मुहूर्त आने पर यज्ञीय विधिके निष्णात वेदज्ञ-वेदनिष्ठ विप्रवर-ऋत्विझ आचार्य-ब्रह्मा होता उद्गाता के स्वरूपमें वरण किया ॥६॥ वरण किये हुए महर्षिओंमें ३० महर्षिओं का नाम संकेत (१) श्रीकृष्णद्वैपायन व्यासमहर्षि (२) भरद्वरज ऋषि (३) समन्तुमुनि (४) गौतम महर्षि (५) असितमुनि (६) वसिष्ठ ऋषि (७) च्यवन (८) क्वज ऋषि (९) मैत्रेय महर्षि (१०) कवषऋषि (११) त्रितमुनि (१२) विश्वामित्र महामुनि (१३) कामहे महर्षि (१४) सुमति मुनि (१५) जैमिनिजी ऋषि (१६) क्रतुमुनि (१७) पैलमुनि (१८) पराशर ऋषि (१९) गर्गाचार्य (२०) वैशम्पायन मुनि (२१) अथर्वा ऋषि (२२) कश्यप

कृष्णप्रिया

ऋषि (२३) धौम्य ऋषि (२४) परशुराम ऋषि (२५) शुक्राचार्यजी (२६) आसुरिमुनि (२७) वीतिहोत्र (२८) मधुच्छन्दा (२९) नीरसे (३०) अकृतव्रण आदि महर्षिओं का अनुराग से और श्रद्धा से वरण किया ॥७-९॥

उपहुतास्तथा चान्ये द्रोणभीष्मकृपादयः । धृतराष्ट्रः सहसुतो विदुरश्च महामतिः ॥१०॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा यज्ञदिदृक्षवः । तत्रेयुः सर्वराजानो राज्ञां प्रकृतयो नृप ॥११॥
[1]ततस्ते देवयजनं ब्राह्मणाः स्वर्णलाङ्गलैः । कृष्ट्वा तत्र यथाम्नायं दीक्षयाञ्चक्रिरे नृपम् ॥१२॥
हैमाः किलोपकरणा वरुणस्य यथा पुरा । इन्द्रादयो लोकपाला [2]विरिञ्चिशिवसंयुताः ॥१३॥

कर्दमक्षमा

ते, ब्राह्मणाः, ततः, देवयजनम्, स्वर्णलाङ्गलैः, कृष्ट्वा, नृपम्, यथाम्नायम्, दीक्षयाञ्चक्रिरे ॥१२॥ यथा, पुरा, वरुणस्य, उपकरणाः, किल, हैमाः, तथा, राजसूयस्य, उपकरणाः, हैमाः, आसन्, इन्द्रादयः, लोकपालाः, विरिञ्चिशिवसंयुताः, सगणाः, सिद्धगन्धर्वाः, विद्याधरमहोरगाः, मुनयः, यक्षरक्षांसि, खगकिन्नरचारणाः, राजानः, च, समाहूताः, सर्वशः, च, राजपत्न्यः, पाण्डुसुतस्य, वै, राज्ञः, राजसूयम्, समीयुः ॥१३-१४-१५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अन्ये चोपहूता यज्ञदिदृक्षवस्तत्रेयुरित्यन्वयः ॥१०-११॥ देवयजनं यज्ञभूमिं कृष्ट्वा कर्षणादिभिः संशोध्य दीक्षायाञ्चक्रिरे दीक्षासंस्कारयुक्तमकुर्वन् ॥१२॥ उपकरणा उपस्काराः वरुणस्य राजसूये यथा आसन्निति शेषः । किञ्च इन्द्रादयो देवगणाः ॥१३-१४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उपहूता मुनयस्तथान्येऽनुपहूता अपि द्रोणादयस्तूपहूता एव । महामतिः सदोचितोपदेष्टा ॥१०॥ तत्र यज्ञे ॥११॥ ततो वरणानन्तरम् । ते ऋत्विजः । तत्र यज्ञे । स्वर्णलाङ्गलैः हेमहलैः ॥१२॥ तत्र यज्ञे केवलं राजान एव नागताः किन्तु देवा अपीत्याह-किञ्चेति ॥१३-१५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उपेति युग्मकम् । अन्ये च ऋषयः द्रोणादयश्च तथा तेनोक्तेन श्रीकृष्णानुमोदनप्रकारेणैव हस्तिनापुरे श्रीनकुलं प्रेष्य उपहूताः आमन्त्रिताः आदिशब्दाद्बाह्लीकसोमदत्तादयः महामतिरिति ऐहिकपारलौकिकसर्वधर्मविदित्यर्थः । तथा च तत्रैव "तत्र व्ययकरश्चासीद्विदुरः सर्वधर्मवित्" इति ब्राह्मणाह्वानञ्च यथा तत्रैव श्रीयुधिष्ठिराज्ञया श्रीसहदेववाक्यम् —

आमन्त्रयध्वं राज्येषु ब्राह्मणान् क्षत्रियानपि । विशश्च मान्यान् शूद्रांश्च सर्वानानयतेति च ॥ इति ॥१०-११॥ यथाम्नायं वैदिकविध्यनुसारेण अस्योभयतोऽप्यन्वयः ॥१२॥ हैमा इत्यर्धकम् । उपकरणा उपकरणानि यज्ञयात्रादीनि किल निश्चये अत्रासम्भावनां मा कुर्वित्यर्थः । इन्द्रेति त्रिकम् । विरिञ्चिभवाभ्यां संयुता इति तयोस्तेषु यथा प्राधान्यम् ॥१३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अन्ये च ऋषयो द्रोणादयश्च, तथा तेनोक्तेन श्रीकृष्णानुमोदनप्रकारेणैव; हस्तिनापुरे श्रीनकुलं प्रेष्योपहूता आमन्त्रिताः; आदि-शब्दाद्बाह्लीक-सोमदत्तादयः, सुता दुर्य्योधनादयस्तत्सहितः; द्रोणादीनां यथापूर्व्वं यज्ञेऽधिकापेक्ष्यत्वे श्रैष्ठ्यम् । महामतिरिति द्रव्यव्ययादौ विदुरस्य नैपुण्यविशेषेणाह्वाने हेतुविशेषः । तथा च तत्रैव (म.भा.सभा.-प. ३५/७) - 'तत्र व्ययकरश्चासीद् विदुरः सर्व्वधर्म्मवित्' इति । सर्व्वधर्म्मवित् कालदेशपात्रादिज्ञानेन दानादिसर्व्वधर्म्मतत्त्ववेत्ता श्रीभगवद्भक्त्येकनिष्ठो वेति ॥१०॥ ब्राह्मणादयश्च

---

१. ततस्तद्देव-विज. । २. विरिञ्चिभवसंयुताः-श्रीधर. वंशी. वीर. विज. ; विरिञ्चिभवसंयुता-जीव. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नानाराष्ट्रे स्थिता यज्ञं दिदृक्षवः सन्तःस्वयमेवेषु, किंवा दूतद्वारेपहूता विशेषतश्च यज्ञं दिदृक्षव ईयुः। तथा च तत्रैव श्रीयुधिष्ठिराज्ञया दूतान् प्रति श्रीसहदेववाक्यम् – 'आमन्त्रयध्वं राज्येषु ब्राह्मणान् क्षत्रियानपि। विशश्च मान्यान् शूद्रांश्च सर्व्वानानयतेति च ॥' इति तत्र क्षत्रियास्तज्जातिमात्रेण सामान्याः, राजानश्च राज्याधिकारिणस्तद्विशेषाः सर्व्वे, प्रकृतयश्च सर्व्वाः, हे नृपेति प्रहर्षात् परमविस्मयाद्वा ॥११॥यथाम्नायं वेदोक्तविध्यनुसारेण; अस्योभयतोऽप्यन्वयः ॥१२॥ उपकरणानि यज्ञपात्रादीनि, किल निश्चये, अत्रासम्भावनया मा संशयं कुर्व्वित्यर्थः। विरिञ्चि-भवाभ्यां संयुता इति तयोस्तेषु प्राधान्यम् ॥१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥५-१६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उपहूता इति अन्ये च द्रोणादयः उपहूतास्सन्तो यज्ञं द्रष्टुमिच्छवः तत्रेयुराजग्मुरित्यन्वयः ॥१०-११॥ तत इति। देवयजनं देवा इज्यन्तेऽस्मिन्निति तद्यज्ञभूमिं स्वणमयैर्लाङ्गलैर्हलैः कृष्ट्वा कर्षणादिभिः संशोध्य नृपं युधिष्ठिरं दीक्षासंस्कारयुक्तमकुर्वन् ॥१२॥ स पुरा पूर्वकाले यथा वरुणस्य तद्वदस्यापि उपकरणाः हेममया आसन्निति शेषः तृतीयान्तपाठे हैम्यैर्यज्ञः प्रावर्ततेति शेषः ब्रह्मरुद्राभ्यां संयुता इन्द्रादयो देवगणाः ॥१३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

उपहूताः मुनयः यथान्ये अनुपहूता अपि तत्राजग्मुः तत्र द्रोणादयोऽप्युपहूताः ॥१०-११॥ यत्र यज्ञकरणमभीष्टतमं तद्देवयजनं स्वर्णलाङ्गलैः सुवर्णमयहलैः कृष्ट्वोल्लिख्य संशोध्य शालां कृत्वा तत्र यथान्यायं नृपं दीक्षयाञ्चक्रुरित्यन्वयः ॥१२॥ वरुणस्य यज्ञे वरुणम् अनूक्तं समाहृत्य तात्पर्यात्पुनरुक्तं करोति इन्द्रादय इति ॥१३-१५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-४४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देवयजनं यज्ञभूमिं कृष्ट्वा कर्षणादिभिः संशोध्य दीक्षयाञ्चक्रिरे दीक्षासंस्कारयुक्तमकुर्वन् ॥१२॥ वरुणस्य राजसूये यथासन्निति शेषः ॥१३-१५॥

गूढार्थदीपिनी

उपहूता इति युग्मम्। प्रकृतयोऽमात्यादयः। ईयुः आजग्मुः ॥१०-११॥ देवा इज्यन्तेऽस्मिन्निति देवयजनं यज्ञस्थलं कृष्ट्वा कर्षणादिना संशोध्य नृपं यज्ञीयदीक्षासङ्कल्पयुक्तमकुर्वन्। यथाम्नायं यथाशास्त्रम् ॥१२॥ हैमा इत्यर्धम्। हैमाः स्वर्णमयाः पात्रादयः यथा वरुणस्य राजसूये तथात्राप्यासन् ॥१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अग्रे उपहूताः यज्ञदिदृक्षवस्तत्रेयुरिति द्वयोरन्वयः ॥१०-११॥ देवा इज्यन्ते यत्र तद्देवयजनं यज्ञस्य स्थलं कृष्ट्वा कर्षणादिना शोधयित्वा ॥१२॥ पुरा पूर्वकाले वरुणस्य यथातथा उपकरण आसन्नीति शेषः ॥१३-१६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सा कथं कथय तत्तद्रूपिणीत्यतो निरूपयन्ति ॥ राज्येति। राज्यैश्वर्यमदेनोन्नद्धा नृपाः श्रेयो न विन्दते न लभन्ते। यद्वा श्रेयःकर्तृ न इति शेषः। तत्र विन्दत इति न मन्यन्त इत्यन्वयः। ये मन्यन्ते ताञ्छ्रेयो न विन्दत इति यत्तच्छब्दाध्याहारेणान्वयो वा।

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

विन्दत इत्येकवचनाद्विभ्यतो राज्यैश्वर्यमदोन्नद्ध इत्याद्येकवचनान्ततया पठतः परस्य क्रमातिक्रमभवान्वयास्फूर्तिश्चोपर्येव ज्ञायते। एवं मदो भवति तेषां कुत इत्यत आहुः ॥ त्वन्मायामोहित इति । साध्यान्तरं च दर्शयन्ति । चला अस्थिरा सम्पदो नित्या इति मन्यन्ते चेति ॥१०॥ स्वोक्तं दृष्टान्तप्रदर्शनेन दृढीकृत्य दार्ष्टान्तिके पर्यवसाययन्ति ॥ मृगतृष्णामिति । यथा बाला अज्ञा मृगतृष्णामातपफेनमुदकाशयं जलायशं मन्यन्ते । तया वैकारीकीं च विकारोपेतामत एवानित्यां मायां मयस्य सम्बन्धिनं मायामिव नश्वरतमां सम्पदमिति शेषः । वस्तुशाश्वतिकीं चक्षते पश्यन्ति । कुत इत्यत आहुः । अशोधं नावा गतम् । अयुक्ता अयोगकुशला इति ॥११॥ अन्य एवमित्यहमपि मन्ये न किल तथा भवन्त इत्यतो वदन्ति ॥ वयमिति । पुरा त्वद्दर्शनात्प्राक् । श्रीमदनष्टबुद्धयः श्रीमदेन नष्टाऽदर्शनं गता बुद्धिः सद्बुद्धिर्येषां ते तथा । अस्याः श्रियो जिहीर्षया हर्तुमिच्छयेतरेतरं स्पृद्धेषां त इति ते । स्वा अपि प्रजा घ्नन्तो हरन्तः । तत्र तन्त्रं निर्घृणा दुर्मदा इति । बाधकाभाव एवमेव करणं गुणावहमित्यत आहुः ॥ प्रभविति । परमनतिक्रमणीयं मृत्युं त्वामगणय्य । अगणय्येति पुरेत्युक्तं किलेदानीं कथमित्यतोऽप्यनेनैव तद्दशां शंसति ॥ वयमिति । श्रीमन्तश्च तेऽनष्टबुद्धयश्चास्या बन्धकीभूतसम्पदो जिहीर्षया त्यागेच्छयेतरेतरस्पृधस्तदपेक्षया प्राग्वयं त्यजाम इतीतरेतरस्पर्धाः स्वा अपि प्रजा अपत्यादीन्घ्नन्तोऽत्यन्तबन्धुनिधनं त्याग एवेत्युक्तेस्त्यजन्तो निर्घृणास्तेषु घृणारहिताः पुरा यथा परं मृत्युमगणय्य दुर्मदा न तथेदानीमिति वा । त्वां विगणय्येति पाठः सरलः ॥१२॥ इदानीं दानवारिं हरिं प्रति स्वां संसारासारत्वमत्यतदनास्थामिव तदास्थां सूचयन्तः स्वस्थितिमधुनातनीं विज्ञापयन्ति ॥ त एवेति । हे कृष्णेत्यन्वयः । त एव प्राक् प्रमत्ता वयमद्य गभीररंहसा गभीरामितराशक्यं कुण्ठनमिति गभीरं रंहो यस्य तेन कालेन करणेन तथाऽनन्तवीर्येण कर्त्रा त्वया । अनन्तरस्तन्नामा विः पक्षी ईर्यः प्रेर्यो वाह इति यावत् । येन स तेन हे अनन्ताबद्ध । वीर्येणेति पूर्ववत् । श्रियो विचालिता भवतः संसृतेरपि तद्विचालनं जातप्रायं वै । भवत इत्यावृत्तमन्वेति । भवतोऽनुकम्पया विनष्टदर्पा गभीररंहसाऽनन्तवीर्येण कालेन श्रियो विचालिता भवतोऽनुकम्पया विनष्टदर्पा इति तत्तस्मात् । भवत इत्यत्राप्यन्वेति । तव चरणौ स्मराम इति वा । अन्तर्लोपिप्रोक्तं स्पष्टयन्ति ॥ त एवेति । आद्येति वा । हे आद्य। आद्य इत्युपजीव्य इति गम्यतेऽवगम्यत इति तत्सम्बुद्धिः । चतुर्मुखान्तर्गतं वा । प्राग्दुरन्तवीर्येण कालेन श्रियो विचालिताः सम्पदो गता इत्यर्थः । इदानीं कालेऽरंहसा कृतकार्यतयाऽवेगेन भवतो न भीर्यत्ततः । शिष्टं पूर्ववत् ॥१३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

॥५-१३॥

श्रीसुबोधिनीसारः

तथान्ये उपहूताः द्रोणभीष्मकृपादयः आहूताः सपुत्रो धृतराष्ट्रो महामतिर्विदुरश्चाहूतः ॥१०॥ यज्ञस्य दर्शनेच्छया ब्राह्मणाद्याश्चत्वारो वर्णाः तत्र यज्ञे ईयुराजग्मुः सर्वे राजानो राजमन्त्रिभृत्यादयश्चेयुः हे नृप ॥११॥ ततोऽनन्तरं ते ब्राह्मणाः सुवर्णहलैः यथाम्नायं यथाशास्त्रं देवयजनं यज्ञभूमिं कृष्ट्वा संशोध्य तत्र मण्डले नृपं युधिष्ठिरं दीक्षयामासुः ॥१२॥ यथा पुरा पूर्वं वरुणस्य राजसूये उपस्करास्सर्वे हैमाः सुवर्णमयाः किलैव तथासन् इन्द्रादयो लोकपाला ब्रह्मशिवसहिताः ॥१३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्ये च द्रोणादयः उपहूताः सन्तो यज्ञं द्रष्टुमिच्छवस्तत्रेयुराजग्मुरिति द्वयोरन्वयः ॥१०-११॥ ततस्ते ब्राह्मणाः स्वर्णमयैर्लाङ्गलैर्देवयजनं देवा इज्यन्तेऽस्मिन्निति तत् यज्ञभूमिं कृष्ट्वा कर्षणादिभिः संशोध्य यथाऽऽम्नायं विध्यनुसारेण नृपं युधिष्ठिरं दीक्षयाञ्चक्रिरे दीक्षाख्यसंस्कारयुक्तमकुर्वन् । वरुणस्य राजसूये यथा हैमा हेममया उपकरणाः पात्रादयः आसंस्तथाऽत्राप्यासन्नित्यर्थः ॥१२॥ विरिञ्चिभवाभ्यां ब्रह्मरुद्राभ्यां संयुताः स्वगणेन सहिताश्चेन्द्रादयो लोकपालाः तथा सिद्धादयः मुन्यादयः ये समाहूता राजानस्तत्पत्न्यस्ते सर्वे पाण्डुसुतस्य राज्ञो युधिष्ठिरस्य राजसूयं समीयुरिति त्रयाणामन्वयः । आगताश्च ते सर्वे अविस्मिताः आश्चर्यरहिता एव सन्तस्तस्य राजसूयं सूपपन्नं मेनिरे । 'वरुणस्य देवत्वात्तद्यज्ञसादृश्यं चेन्मनुष्ययज्ञस्य तदाश्चर्यं कुतो न' इत्याशङ्कायामाह–कृष्णभक्तस्येति । भगवत्कृपया न तस्य किमपि दुर्लभम् अतो न तत्राश्चर्यमित्याशयः ॥१३-१५॥

अन्वितार्थप्रकाशिका

उपहूता इति युग्मम् ॥ हे नृप तथा अन्ये च द्रोणादयः शूद्रान्ताः सर्वे राजानः ! टजभाव आर्षः । राज्ञां प्रकृतयश्च उपहूताः सन्तो यज्ञं द्रष्टुमिच्छवस्तत्रेयुराजग्मुः ॥१०-११॥ तत इति ॥ ततस्ते ब्राह्मणाः स्वर्णमयैर्लाङ्गलैर्देवयजनं देवा इज्यन्तेऽस्मिन्निति तत् यज्ञभूमिं कृष्ट्वा कर्षणादिभिः संशोध्य तत्र यथाऽऽम्नायं विध्यनुसारेण नृपं युधिष्ठिरं दीक्षयाञ्चक्रिरे दीक्षाख्यसंस्कारयुक्तमकुर्वन् ॥१२॥ हैमा इत्यर्धम् ॥ पुरा वरुणस्य राजसूये यथा हैमा हेममया उपकरणाः पात्रादयः । पुंस्त्वमार्षम् । आसंस्तथाऽत्राप्यासन्नित्यर्थः ॥१३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रकृतयः अमात्यादयः ॥११॥ देवयजनं यज्ञस्थानम् ॥ स्वर्णलाङ्गलैः हेमहलैः ॥ कृष्ट्वा विलेखनेन शोधयित्वा ॥ तत्र यज्ञे यथाम्नायं यथाविधि नृपं दीक्षयाञ्चक्रिरे दीक्षणीयेष्ट्यादिसंस्कारयुक्तं चक्रुः ॥१२॥ उपकरणाः यज्ञपात्रादयः हैमाः सुवर्णमयाः वरुणस्य राजसूये पुरा यथा बभूवुस्तथा अत्रापि आसन् ॥ इन्द्रादयः राजसूयं समीयुः कृष्णभक्तस्य सूपपन्नं सुसम्पादितं यज्ञम् ॥ अविस्मिताः सन्तो मेनिरे इति तृतीयेन्वयः ॥१३-१५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उपहूता इति ॥ तथा अन्ये च, अन्येऽपीत्यर्थः । द्रोणश्च भीष्मश्च कृपश्च ते आदयो येषां ते, उपहूताः सन्तः, तत्र ईयुरित्युत्तरतोऽनुषञ्जनीयम् । सहसुतः पुत्रैः सहितः धृतराष्ट्रः, महामतिः विदुरश्च ॥१०॥ ब्राह्मणा इति ॥ ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राः, सर्वराजानः, राज्ञां प्रकृतयोऽमात्यादयः, हे नृप, यज्ञदिदृक्षवः सन्तः, तत्र ईयुः ॥११॥ तत इति ॥ ततः ते पूर्वोक्ताः, ब्राह्मणाः, देवयजनं यज्ञभूमिं, स्वर्णलाङ्गलैः सौवर्णीयहलैः, कृष्ट्वा कर्षणादिभिः संशोध्य, नृपं युधिष्ठिरं, तत्र स्थाने, यथाम्नायं, दीक्षयाञ्चक्रिरे ॥१२॥ हैमा इति ॥ पुरा पूर्वकाले, वरुणस्य यथा तद्वत्, अस्य उपकरणाः, हैमाः हेममयाः, किल आसन्निति शेषः । तृतीयान्तपाठे, हैमैः उपकरणैः, यज्ञः प्रावर्ततेति शेषः । विरिञ्चिभवसंयुताः ब्रह्मरुद्राभ्यां सहिताः, इन्द्रादयः लोकपालाः, सगणाः, सिद्धगन्धर्वाः, विद्याधरमहोरगाः ॥१३॥

कृष्णप्रिया

राजन् परीक्षित् इना आचारशास्त्र सम्पन्न महर्षिओं के साथ आप के पितामह चरणों ने आपजनो को भी सादर निमंत्रित किये - गुरुवर्य श्रीद्रोणाचार्यजी, पितामह चरण श्रीभिष्मदादा, कृपा महाराज, श्रीधृतराष्ट्रजी एवं धृतराष्ट्र महाराजजी के दुर्योधन आदि कुमारों को और महामहि श्रीविदुर आदि आप्तजनो को आदरसे निमंत्रित कियें ॥१०॥ राजन् परीक्षित् ? श्रीधर्मराजने राजसूय महायज्ञ के दर्शन के लिये देश देशावर के सर्व राजा राजाओं के मन्त्री तथा अधिकारी कर्मचारी ब्राह्मण क्षत्रिय वैश्य शूद्र आदि सर्व लोग यज्ञ दर्शन के वहां पधारे ॥११॥ पुनः यज्ञमें वरण किये वेदज्ञविप्रोने सुवर्ण तो हलों से यज्ञभूमिको जुतवाकर महाराज धर्मराज को शास्त्र अनुसार यज्ञ की दीक्षा प्रदान की ॥१२॥ पूर्वकाल में श्रीवरुणदेव महाराज श्री के यज्ञमें जैसे यज्ञीय सर्व आज्यस्थाली चरुस्थाली आदि पात्र सुवर्ण के बनु हुए थे वैसे ही युधिष्ठिरजी के राजसूय यज्ञ में सुवर्ण के पात्र थे महाज धर्मराजने निमंत्रित किये गये देववर ब्रह्माजी भगवान् कैलासपति और इन्द्रदि लोकपाल यज्ञमें पधारे थे ॥१३॥

सगणाः सिद्धगन्धर्वा विद्याधरमहोरगाः । मुनयो यक्षरक्षांसि खगकिन्नरचारणाः ॥१४॥
राजानश्च समाहूता राजपत्न्यश्च सर्वशः । राजसूयं समीयुः स्म राज्ञः पाण्डुसुतस्य वै ॥१५॥
मेनिरे कृष्णभक्तस्य सूपपन्नमविस्मिताः । अयाजयन् महाराजं याजका देववर्चसः ।
राजसूयेन विधिवत् प्राचेतसमिवामराः ॥१६॥
[1]सुत्येऽहन्यवनीपालो याजकान् सदसस्पतीन् । अपूजयन् महाभागान् यथावत् सुसमाहितः ॥१७॥

---

[1] सौत्येऽहन्यवनी-वीर ; सुत्येऽहन्यवनी-श्रीधर. वंशी. विज. सुदर्शन. विश्व. शुक. ।

कर्दमक्षमा

कृष्णभक्तस्य, सूपपन्नम्, अविस्मिताः, मेनिरे, देववर्चसः, याजकाः, अमराः, प्राचेतसम्, इव, विधिवत्, राजसूयेन, महाराजम्, अयाजयन् ॥१६॥ सुत्ये, अहनि, अवनीपालः, सुसमाहितः, यथावत्, महाभागान्, सदसस्पतीन्, याजकान्, अपूजयन् ॥१७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ये च राजादयः समाहूतास्तत्र समीयुः स्म ते सर्वे श्रीकृष्णभक्तस्य पाण्डुसुतस्य राज्ञो युधिष्ठिरस्य राजसूयमविस्मिताः सन्तः सूपपन्नं सुसम्पन्नं मेनिरे इत्यन्वयः ॥१५॥ याजकाः ऋत्विजः ॥१६॥ सुत्येऽहनि सोमाभिषवदिने ॥१७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्राचेतसं वारुणम् ॥१६-१७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथा सगणा इत्यत्र सगणानामपि सूचितं गणाः श्रीगरुडादयो वैकुण्ठपार्षदाः मुनयः आत्मारामाः श्रीसनकादयः खगाः श्रीगरुडपुत्रादयः चकारात् ब्राह्मणादयश्च सम्यक् स्वस्वगुणप्रदर्शनादिना ईयुः स्म हर्षे वै निश्चये मनने हेतुः पाण्डुसुतस्य सुतरूपेण स्वेन तद्यशोविस्तारकस्येत्यर्थः। तत्रापि कृष्णस्य स्वयं भगवतो भक्तस्येति अत एवाविस्मिता आश्चर्य्यबुद्धिरहिताः देवादधिकं वर्चो दीधितिर्येषां ते व्यासादयः मध्यपदलोपी समासः अमराः देवर्षयः दृष्टान्तोऽयं प्राचीना सा परिपाटी यथाऽन्यत्र श्रुतास्ति तथैवात्र ज्ञेयेति सङ्क्षेपार्थो दर्शितः ॥१४-१६॥ सदसस्पतीन् सभाश्रेष्ठान् यतो महाभागान् परमपुण्यवतः यथावत्तद्योग्यमेवापूजयत् यतः अवनीपालः दिग्विजयादिना पृथ्वीपतिः सुसमाहितः श्रद्धादिमांश्चेति ॥१७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तथा सगणा इति च गणानामपि प्राधान्यमुक्तम्, गणाः श्रीगरुडादयो वैकुण्ठपार्षदाः, मुनय आत्मारामाः श्रीसनकादयः, खगाः श्रीसौपर्णादयः, च-काराद्ब्राह्मणादयश्च, सम्यक् स्वस्वगुणप्रदर्शनादिनेषु, स्म हर्षे, वै निश्चये; मनने हेतुः- पाण्डुसुतस्य महाराजपुत्रस्येति सर्व्वसाद्गुण्यमुक्तम्; तत्रापि कृष्णस्य साक्षाद् भगवतो भक्तस्येति, अत एवाविस्मिता निःसंशया आश्चर्य्यबुद्धिरहिता वा सन्त इत्यर्थः ॥१४-१५॥ महाराजं प्राप्तसाम्राज्यम्, देववत् वर्च्चो दीप्तिर्येषां ते, तपोबलात्, किंवा विचित्ररत्नालङ्कारैर्भूषितत्वात् सततविविधार्च्चया स्फीतत्वाच्च ॥१६॥ सदसस्पतीन् सभ्यश्रेष्ठान्, यतो महाभागान् परमपुण्यवतः, किंवा महान् भागो यज्ञे दक्षिणादिना देयांशो येषां तान्, अतो यथावदपूजयत्; त्र सर्व्वसामर्थ्यमाह - अवनीपालो दिग्विजयादिना पृथ्वीपतिरिति। श्रद्धादिकञ्चाह - सुसमाहित इति ॥१७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥५-१६॥ सुत्येऽहनि सोमाभिषवदिने ॥१७-१८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ये च समाहूताः राजानः तेषां पत्न्यश्च तत्र समीयुः ॥१४॥ ते सर्वे कृष्णभक्तस्य पाण्डुसुतस्य राज्ञः राजसूयं सुसम्पन्नं मेनिरे इत्यन्वयः। अयाजयन्निति देवानामिव वर्चो येषां ते याजका ऋत्विजः देवाः प्राचेतसं वरुणमिव महाराजं युधिष्ठिरं यथाविधि राजसूयेनायाजयन् ॥१५-१६॥ सौत्य इत्। सौत्येऽहनि सोमाभिषवदिने अवनीपालो युधिष्ठिरः अपूजयत् पूजयितुमुद्युक्तवानित्यर्थः ॥१७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

प्राचेतसं वरुणम् ॥१६॥ सूत्ये सोमाभिषवसम्बन्धिन्यहनि पशुसंज्ञपनदिवसे वा ॥१७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-४४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अविस्मिता इति। कृष्णभक्तस्यास्य किमसम्भवमिति भावः ॥१६॥ सुत्येऽहनि सोमाभिषवदिने ॥१७॥

गूढार्थदीपिनी

इन्द्रादय इति त्रयम्। ये समीयुः आजग्मुः ते सर्वे राजसूयं सूपपन्नं सुसम्पन्नं मेनिरे स्म प्रसिद्धौ वै एवार्थे ॥१४-१६॥ याजका ऋत्विजः। यथा अमरा प्रचेतसं वरुणम्। अयमेव पाठः न तु प्राचेतसमिति ॥१७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सुत्ये अहनि सोमाभिषवदिने अपूजयत् पूजयितुमुद्युक्तवान् ॥१७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सगणाः सिद्धगन्धर्वाः ॥१४॥ सर्वशः समाहूता इत्यविशेषेण करणं सूचयति ॥१५॥ कृष्णभक्तस्येदं सूपपन्नमित्यविस्मिताः। यस्य कृष्णः कारिता तस्येदं नाद्भुतमिति विस्मयहीनाः। देववर्चसो याजका भरद्वाजादयः प्रचेतसं वरुणममरा इवायाजयन्। सुत्येऽहनि। सुत्या संज्ञायामिति क्यप्। साऽस्यास्तीति सुत्यम्। सौत्य इति पाठो क्वचिद्दृश्यते स च दृश्यः। सदसस्पतीन्याजकांश्च यथावत्तत्तद्योग्यतामनतिक्रम्यापूजयत्। सत्सु महेन्द्रादिषूत्तमेषु किं वरुणवरणं निदर्शन इति चेत्। अश्रान्तमालोच्य श्रान्तोऽसि। हेम्नः समुद्रजत्वात्प्राय इतरेषां ततस्तदाप्तिरिति तदधिपतिग्रह उचित इत्यवेहि। हैमः किलोपकरणो वरुणस्येत्युक्तेः ॥१६॥ सूपपन्नं सुयुक्तं सूपाद्द्विदलविकृताः पदार्थाः पन्नाः सम्पन्नाः पूर्णाः पतिता यथेच्छं यत्र तं मेनिर इति वा ॥१७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सगणाः सेवकसहिताः आदित्यविश्वादयो वा गणदेवाः सिद्धगन्धर्वादयश्च मुनयोऽधिकारिणः सप्तर्षिरूपाः यक्षरक्षांसि कुबेरपुलस्तिविभीषणादयः खगाः गरुडादयः किन्नराश्चारणाश्च ॥१४॥ ततो द्वीपान्तरस्थाः राजानश्च समाहूताः चकाराद्ब्राह्मणवैश्यादयश्च राजपत्न्यश्च सर्वश इति अगम्यस्थानेभ्योऽपि यतो राजसूयं समीयुः स्मेति प्रमाणं राज्ञः पाण्डुसुतस्येति महता क्रियत इति तत्रागमनं न लज्जायै ननु सर्वेषां निश्शङ्कमागमने को हेतुरित्याशङ्क्य तमाह–मेनिरे कृष्णभक्तस्येति अन्यस्य देशादिशुद्धिर्न भवतीति सूपपन्नत्वम् अत एवातिसमृद्धिमपि दृष्ट्वा अविस्मिताः ॥१५॥ ततो द्वीपान्तरस्थाः राजानश्च समाहूताः चकाराद्ब्राह्मणवैश्यादयश्च राजपत्न्यश्च सर्वश इति अगम्यस्थानेभ्योऽपि यतो राजसूयं समीयुः स्मेति प्रमाणं राज्ञः पाण्डुसुतस्येति महता क्रियत इति तत्रागमनं न लज्जायै ननु सर्वेषां निश्शङ्कमागमने को हेतुरित्याशङ्क्य तमाह–मेनिरे कृष्णभक्तस्येति अन्यस्य देशादिशुद्धिर्न भवतीति सूपपन्नत्वम् अत एवातिसमृद्धिमपि दृष्ट्वा अविस्मिताः ॥१५॥ ततो याजकाः ऋत्विजः राजसूयेन महाराजमयाजयन् देववर्चसः तेषां यज्ञाभिव्यक्तिसामर्थ्यं सूचितं विधिवदिति नानुकल्पः कस्मिन्नप्यंशे पूर्ववदेव दृष्टान्तः प्रचेतसमिवामरा इति ततो मुख्ये "सुत्येहनि मध्ये सवने दक्षिणा नीयते" इति "यावन्तो वै सदस्यास्ते सर्वे दाक्षिण्याः" इति च दक्षिणादानप्रस्तावे ॥१६॥ सूत्येऽहनि राजा याजकान् ऋत्विजः सदसस्पतीन् सभ्यान् अन्यानपि महाभागान् अपूजयत् यथावदात्रेयादिपूजाप्रकारेण सुसमाहित इति। क्रोधलोभादिरहितः ॥१७॥

श्रीसुबोधिनीसारः

गणैः सहिताः सिद्धादयः स्पष्टम् ॥१४॥ राजानः सर्वशो राजपत्न्यश्च समाहूता पाण्डुसुतस्य राज्ञो युधिष्ठिरस्य राजसूयं यज्ञं समीयुः समाजग्मुः वै एव ॥१५॥ अविस्मिता आश्चर्यरहिताः कृष्णस्य भक्तस्य राज्ञः सूपपन्नं सर्वं वस्तुजातं सुपम्पन्नं मेनिरे देवानां वर्चसमिव वर्चसं येषां ते याजका राजसूयेन यज्ञेन विधिवत् महाराजं युधिष्ठिरम् अयाजयन् प्राचेतसं वरुणममरा देवा इव ॥१६॥ सौत्येऽहनि सोमाभिषवदिने सदसस्पतिसहितान् महाभागान् याजकान् यथावत् यथायोग्यमपूजयत् सुसमाहितो राजा ॥१७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

देवानामिव वर्चस्तेजो येषां ते याजका: ऋत्विजो यथाविधि राजसूयेन महाराजं युधिष्ठिरं अयाजयन् । तत्र दृष्टान्तमाह- अमरा देवा यथा प्राचेतसं वरुणमयाजयंस्तथेति ॥१६॥ सुत्येऽहनि सोमाभिषवदिने अवनीपालो राजा युधिष्ठिरः याजकान् अन्यांश्च महाभागान् पूजार्हान् सदसस्पतीनपूजयत् पूजयितुमुद्युक्तवान् इत्यर्थः ॥१७॥

अन्वितार्थप्रकाशिका

इन्द्रादय इति त्रयम् । विरिञ्चभवाभ्यां संयुता: सगणाः स्वगणेन सहिताश्चेन्द्रादयो लोकपालाः तथा सिद्धादयः मुनयः सनकादयः मुनयः सनकादयः यक्षरक्षांसि खगाः गरुडादयः ये समाहूता राजानो राजपत्न्यश्च ते सर्वे पाण्डुसुतस्य राज्ञो युधिष्ठिरस्य राजसूयं समीयुः । स्मेति पादपूर्तौ । आगताश्च ते सर्वे अविस्मिताः आश्चर्यरहिता एव सन्तः कृष्णभक्तस्य तस्य राजसूयं सुसम्यक् उपपन्नं सम्पन्नं मेनिरे ॥१४-१६॥ अयाजयन्निति ॥ देवानामिव वर्चस्तेजो येषां ते याजका ऋत्विजो यथाविधि राजसूयेन महाराजं युधिष्ठिरम् अयाजयन् । तत्र दृष्टान्तमाह । अमरा देवा यथा प्रचेतसं वरुणमयाजयंस्तथेति ॥१७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रचेतसं वरुणम् ॥१६॥ सौत्येऽहनि सोमवल्लीखण्डनदिवसे अपूजयत् पूजयितुमारभत ॥१७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मुनय इति ॥ मुनयः, यक्षरक्षांसि, खगकिन्नरचारणाः, समाहूताः राजानश्च, सर्वशः राजपत्न्यश्च ॥१४॥ राजसूयमिति ॥ पाण्डुसुतस्य राज्ञः, राजसूयं, समीयुः स्म वै । ईक्षितुमिति शेषः । सर्वे, अविस्मिताः सन्तः, कृष्णभक्तस्य, राज्ञः, राजसूयं, सूपपन्नं, सुसम्पन्नं, मेनिरे। एवं त्रयाणामेकसम्बन्धः ॥१५॥ अयाजयन्निति ॥ देवानामिव वर्चो येषां ते, याजकाः ऋत्विजः, अमराः देवाः, प्राचेतसं वरुणम् इव, महाराजं युधिष्ठिरं, विधिवद्यथाविधि, राजसूयेन अयाजयन् ॥१६॥ सौत्य इति ॥ सौत्ये अहनि सोमाभिषवदिने, महाभागः, अवनीपालो युधिष्ठिरः, सुसमाहितः सन्, याजकान् सदसस्पतीन्, यथावत्, अपूजयत्पूजयितुमुद्यतवानित्यर्थः ॥१७॥

कृष्णाप्रिया

अपने गणोके साथ सिद्ध और गन्धर्व विद्याधर नाग मुनि यज् राज्स खग किन्नर चरणादि महापुरुष पधारेथे ॥१४॥ और महाराज के प्रेम से राजा महाराज और महारानियां चारों औरसे निमंत्रित किये गये थे वे सर्व पाण्डुपुत्र युधिष्ठिरजी के राजसूय महायज्ञ में समुपस्थित हुए ॥१५॥ भगवान् श्रीकृष्णचन्द्रजी के अनन्य भक्त श्रीधर्मराजजी को राजसूय यज्ञ के लिये विवाकुतूहल सर्वथा सर्वविधि से सयोग्य मानने लगे । देवों के समान तेजस्वी महर्षि याजको ने महाराज धर्मरा से शास्त्रोक्त विधि के अनुसार राजसूय यज्ञ का प्रारम्भ कराया; जैसे पूर्वकाल में समर्थ देवताओंने देववर श्रीवरुणजी को यज्ञ करवाया था ॥१६॥ सौत्ये अहनि - सोमवर्ला से सोमरस निकालने का सौत्य दिवस कहा जाता है उस दिन धर्मराज श्रीयुधिष्ठिरजी महाराजने पुज्यवर भाग्यवान याजको का और यज्ञविधि का अवेक्षण करने वाले सदसम्पतिवरो का श्रद्धा पूर्वक एकाग्रता और सावधानी पूर्वक समर्चन किया ॥१७॥

श्रीभगवानुवाच

सदस्याग्र्यार्हणार्हं वै [1]विमृशन्तः सभासदः । नाध्यगच्छन्ननैकान्त्यात् सहदेवस्तदाब्रवीत् ॥१८॥
अर्हति ह्यच्युतः श्रैष्ठ्यं भगवान् सात्वतां पतिः । एष वै देवताः सर्वा देशकालधनादयः ॥१९॥

---

[1] विमृशंश्च-वीर ।

यदात्मकमिदं विश्वं क्रतवश्च यदात्मकाः । अग्निराहुतयो मन्त्राः साङ्ख्यं योगश्च [1]यत्परः ॥२०॥
एक एवाद्वितीयोऽसावैतदात्म्यमिदं जगत् । आत्मनाऽऽत्माश्रयः [2]सभ्याः सृजत्यवति हन्त्यजः ॥२१॥

कर्दमक्षमा

सभासदः, सदस्याग्र्यार्हणार्हम्, विमृशन्तः, वै, ऐकान्त्यातत्, न, अध्यगच्छन्, तदा, सहदेवः, अब्रवीत् ॥१८॥

सात्वताम्, पतिः, अच्युतः, श्रेष्ठ्यम्, अर्हति, एषः, वै, भगवान्, सर्वाः, देवताः, यदात्मकम्, विश्वम्, इदम्, यदात्मकाः, क्रतवः, देशकालधनादयः, अग्निः, मन्त्राः, च, आहुतयः, साङ्ख्यम्, योगः, यत्परः, असौ, एकः, एव, अद्वितीयः, इदम्, जगत्, एतदात्म्यम्, हे सभ्याः ! आत्माश्रयः, आत्मना, अजः, सृजति, अवति, हन्ति ॥१९-२०-२१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अग्र्यार्हणमग्रपूजा तस्यार्हं योग्यं अनेकान्त्याद्योग्यानां बहुत्वेनैकस्यानिश्चयात् ॥१८-१९॥ साङ्ख्यं ज्ञानं योग उपासना ॥२०॥ ननु साङ्ख्यं केवलपरं योगः सविशेषणपरः कथमुभयोरेकपरत्वम् ? तत्राह-एक एवाद्वितीयोऽसावतः साङ्ख्यस्यैतत्परत्वं युक्तं विशेषणभूतस्य सर्वप्रपञ्चस्य तन्मयत्वात्सविशेषणविषयस्य योगस्यापि युक्तमद्वितीयपरत्वमित्याह-ऐ तदात्म्यमिति एष श्रीकृष्ण आत्मा यस्य तदेतदात्म तस्य भावः ऐतदात्म्यम् भवितर्येव भावनिर्देशः । "ऐतदात्म्यमिदं सर्वम्" इति श्रुतेः । अत्र हेतुः आत्मनेति, हे सभ्याः ! आत्माश्रयोऽन्यनिरपेक्षः स्वयमजः इदं जगत्सृजत्यवति हन्ति चेति ॥२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदाऽनिश्चयवेलायाम् ॥१८॥ अच्युतः स्वरूपतो गुणतो वा न क्षीणः श्रीकृष्णः । श्रैष्ठ्यं गुणज्येष्ठयोग्याग्रपूजनम् । "गुणाः श्रुताः सुविरुद्धाश्च देवे सन्ति" इत्यादिश्रुतिवाक्यं हिना सूचयति । सात्वन्तस्तन्त्रप्रणेतारस्तेषां स्वामी । गतिश्च । इदं चाग्रपूजायोग्यत्वे लिङ्गम् । "इन्द्रो वै सर्वेषां श्रेष्ठः, अग्निर्वै देवानां मुखम्" इत्यादिश्रुतेः । कथमयमर्हणार्ह इति चेदाह-एष कृष्णः । "यो देवानां पुरोहितः पूर्वो यो देवेभ्यो जातः" इत्यादिश्रुतेः । अचेतनमप्येतदधीनसत्ताकमेवेत्याह-देशेत्यादि ॥१९॥ किं बहुना सर्वमेतदात्मकमेवेत्याह-यदात्मकमिति । तात्पर्यात्पुनरुक्तं करोति-क्रतव इति । यः कृष्णः परस्तात्पर्यविषयो यस्य स तथा ॥२०॥ साङ्ख्ययोगयोरेकपरत्वमाक्षिपन्समाधत्ते-नन्विति । केवलपरमद्वितीयपरम् । तत्राक्षेपे । असौ कृष्ण एवैकोऽद्वितीयो यतोऽतो हेतोः । एतत्परत्वं कृष्णतात्पर्यकत्वं तन्मयत्वात् । "सर्वं खल्विदं ब्रह्म" इति श्रुतेः कृष्णस्वरूपत्वात् । हे सभ्याः सर्वार्थनिपुणाः । भवितरि भवनशीले कृष्णे । अत्र सर्वात्मकत्वे । अज इत्युपलक्षणममृतत्वस्य ॥२१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ते महाप्राज्ञा अपि वै निश्चये विशेषेणामृशन्तो विचारयन्तोऽपि नाध्यगच्छन् न निश्चेतुं शेकुः कुतः अनैकान्त्यात् तत्राज्ञाः स्वबुद्धेर्नानासन्देहास्पदत्वात् विज्ञाश्च तस्याश्चैद्यादिसंवलितसभाया नानामतत्वेन विवादापत्तेः स्वीकृतचरणक्षालनाधिकारस्य श्रीभगवत इच्छान्यथापत्तेश्चेति ज्ञेयं सहदेवस्तदाब्रवीदिति तु सहदेवस्तु पूजायामिति वक्ष्यमाणानुसारेण तत्र प्राप्ताधिकारत्वादैकान्त्याच्चेति भावः ॥१८॥ हि एव अच्युतः सदा सर्वगुणपरिपूर्णः श्रीकृष्ण एव अर्हति तदेव दर्शयन्नाह-भगवान् स्वाभाविकसमग्रैश्वर्य्यादिमान् किञ्च सात्वता भगवता एव तावत्सर्वतः पूज्या भवन्ति तेषामपि पतिः किम्वा तत्रापि सात्वतां यादवानां पतिरिति स्वयं भगवानित्यर्थः । किञ्च एष इति वै प्रसिद्धौ ये देवतादयो यज्ञे तेप्येष एव एतच्छक्त्यैव तेषां देवादित्वमित्यर्थः । आदिशब्दाच्छ्रीभीष्मेणाग्रपूजायां निर्दिष्टा आचार्य्यादयोऽपि तथा च सभापर्वणि —

"आचार्य्यमृत्विजञ्चैव संयुक्तं च युधिष्ठिर । स्नातकञ्च प्रियं प्राहुः षडर्घ्यार्हान् नृपं तथा" ॥ इति ॥

तदिदमनेन स्थानान्तरविधानमेवानूद्यात्र तु साक्षाद्भूते स्वयं भगवति न तु तत्प्रथमतो युज्यत इत्यभिप्रेतम् ॥१९॥ तत्रैव हेतुमाह-यदिति । यः श्रीकृष्ण एव आत्मा रश्मीनां तेजो मण्डलमिव मूलं स्वरूपं यस्य तम् विश्वमशेषं ततः सुतरां रतवश्चेत्यादि

---

१. यत्परं-वीर. । २. सर्वान्-वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

क्रत्वङ्गान्यग्न्यादयश्च यदात्मकाः अतो मोक्षादिसाधनं च सर्वं तदर्थमेवेत्याह-साङ्ख्यमिति । यत्परो यदाश्रयः ॥२०॥ एकशब्देन सजातीयसहायम् अद्वितीयशब्देन विजातीयसहायम् एवशब्देन तत्रतत्रासम्भावनाञ्च निराकरोति अतः ऐतदात्म्यमिति सिद्धं तदेव दर्शयति-आत्मनेति । स्वरूपसिद्धतादृशशक्तिकेन स्वरूपेणैवेत्यर्थः । अत एवान्यनिरपेक्षः अत एव स्वयमज इति अन्यत्तैः यद्वा विश्वस्य तदात्मकत्वमेव विवृणोति एक इति ॥२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ते महाप्राज्ञा अपि, वै निश्चये, मृशन्तो विचारयन्तः, पाठान्तरे विशेषेण बुद्ध्यभिनिवेशादिना मृशन्तोऽपि नाध्यगच्छन्, न निश्चेतुं शेकुः । कुतः ? अनेकान्त्यात् । सहदेव इति श्लेषेण देवेन श्रीकृष्णेन सह सदा हृदि वर्तते इति तस्य परमभक्तिः सूचिता ॥१८॥ हि एव, अच्युतः सर्व्वगुणपरिपूर्णः श्रीकृष्ण एवार्हति; तत्र हेतुत्वेनाच्युतत्वमेव दर्शयन्नाह-भगवान् साक्षात् परमेश्वरः, अतः सात्वतां भक्तानां पतिः पालकः; यद्वा, तत्रापि निजाशेषैश्वर्य्यप्रकटनार्थं यदुकुलेऽवतीर्य्य तत्र श्रैष्ठ्यं प्राप्त इति । वै एव, अत एष एव, आदि-शब्दादृत्विगादयः ॥१९॥ तत्रैव हेतुमाह-यदिति । यः श्रीकृष्ण एव आत्मा तत्त्वतोऽंशतया तस्मादभिन्नत्वेन स्वरूपं यस्य तत्, क्रत्वङ्गान्यग्न्यादयश्च यदात्मकाः, मोक्षादिसाधनञ्च सर्व्वं तदर्थमेवेत्याह - साङ्ख्यमिति । अन्यत्तैर्व्याख्यातम् । यद्वा, योगः समाधिः सायुज्यलक्षणमोक्षो वा ॥२०॥ एवकारेण चतुर्व्यूहादिमूर्तिभिः सजातीयभेदस्य, तथा जीवानां बहुवैचित्रीभिर्विजातीयभेदस्य चाभावं निर्द्धारयति । असौ श्रीकृष्णः, आत्मनेत्यनन्यप्रयोजकत्वम्, आत्माश्रय इति साधनादीनामपि तन्मयत्वम्, तथा जगदिव न जायते, किन्तु स्वयमेव प्रादुर्भवतीत्यज इति परमेश्वरत्वञ्चोक्तम् । हे सभ्याः ! इति साधुत्वेन तत् सर्व्वं युष्माभिर्बुध्यत एवेति भावः । पक्षान्तरे च सर्व्वथान्याभावेन ज्ञानमोक्षयोरपि तत्परतैव स्यादिति भावः ॥२१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अच्युतः परब्रह्म नारायणत्वात् भगवान् —

"ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः" ॥

इति वचनात् शक्तितेजोभ्यां जातस्यानिरुद्धव्यूहस्यावतारत्वात् भगवान् "वासुदेवपरा वेदाः" "नारायणपरा वेदाः" इत्युपक्रमोक्तस्याभ्यासमाह-यदात्मकमिति ॥१९-२०॥ असौ नारायणः एकः नामरूपविक्तचिदचिद्विशिष्टः सृष्टेः पूर्वकाले च अद्वितीयः असहायः इदं स्थूलनामरूपविभक्तचिदचिद्रूपं जगत् ऐतदात्म्यम् एतदात्मकं सर्वदात्माश्रयः चिदचिदाश्रयं स्वसङ्कल्पेन सृष्ट्यादि करोति ॥२१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

सदसीति । सदसि सभायामग्र्यार्हणार्हमग्रपूजार्हं विमृशन्नपि नाध्यगच्छन्न निश्चितवान् कुतः अनैकान्त्याद्योग्यानां बहुत्वेनैकस्याप्यविशेषात् एवं सति तदा सहदेवो माद्रीसुतः सभासदः सभ्यानब्रवीत् ॥१८॥ तदेवाह-अर्हतीति । श्रैष्ठ्यं श्रेष्ठस्योचितमर्हणमर्हति तत्र हेतुत्वेन विशिनष्टि-सात्वतां ब्रह्मविदां पूर्वोक्तद्वैपायनादीनां पतिः स्वामी किञ्च "एष वै सर्वा देवताः" इत्यादि एष भगवान् इज्याः सर्वदेवताः शरीरात्मभावनिबन्धनमिदं सामानाधिकरण्यं "स आत्मा अङ्गान्यन्या देवताः" इति श्रुतेरिति भावः देशः "समे यजेत" इत्युक्तविधः कालो वसन्तादिः धनानि यज्ञोपयुक्तान्यादिशब्दो यजमानर्त्विगादिसङ्ग्राहकः ॥१९॥ यदिति । देशादयो विप्रान्ता इत्येतद्विश्वं सर्वं यदात्मकं यो भगवानात्मा यस्य तथाभूतं क्रतवश्च साङ्ख्यं प्रत्यगात्मयाथात्म्यानुचिन्तनं योगः परमात्मोपासना तत्सर्वं स भगवान् परोनिर्वाहको यस्य तथाभूतम् ॥२०॥ किम्बहुनेत्याह-एकेति । इदं चिदात्मकं जगदैतदात्म्यम् एष भगवानात्मा अन्तरात्मा यस्य तथाभूतं स्वार्थे यञ् "एकएवाद्वितीयोऽसौ" आसीदिति शेषः "सदेवेदमग्र आसीत्" "एकमेवाद्वितीयम्" इतिवदयं निर्देशः अविभक्तनामरूपचिदचिद्विशिष्टपरः एकशब्दः निमित्तान्तरव्युदासार्थः अद्वितीयशब्दः एक इत्यनेन कारणावस्थचिदचितोस्तादात्मकत्वमुक्तम् ऐतदात्म्यम् इत्यनेन कार्यावस्थयोः एवम्भूतोऽसावात्मा स्वयमाश्रय आधारो यस्य सः आत्मनोपकरणभूतेन सर्वान्समष्टिपदार्थान् सृजत्यवति रक्षति हन्ति संहरति । एवमप्यजः स्वशरीरभूतचिद्गतोत्पत्त्यादि-विकाररहितः "ब्रह्मवनं ब्रह्म स वृक्ष आसीत्" इति श्रुत्यर्थोऽत्रानुसन्धेयः ॥२१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अग्रार्हणार्हम् अग्रपूजास्वीकारयोग्यं विमृशन्तः विचारयन्तः अनैकान्त्यान्नानाबुद्धित्वात् सर्वेषां गुणानामेकत्वानियमाद्वा ॥१८॥ अच्युतः गुणतः स्वरूपतो वा न क्षीणः श्रैष्ठ्यं गुणज्येष्ठयोग्याग्रपूजनं गुणाः श्रुताः सुविरुद्धाश्च देवे सन्तीत्यादि श्रुतिवाक्यं हि ना सूचयति सात्वन्तः तन्त्रप्रणेतार एतेषां पतिः स्वामी गतिश्च इदं चाग्रपूजायोग्यत्वे लिङ्गम् इन्द्रो वै सर्वेषां श्रेष्ठः "अग्निर्वै देवानां मुखम्" इत्यादेः इन्द्रादिषु सत्स्वस्य कथं सम्भवो भवतीति तत्राह एष वा इति । यो देवानामिति श्रुतिं वा इत्यनेन गृह्णाति अचेतनमपि तदधीनसत्ताकमित्याह-देशेति ॥१९॥ किम्बहुना सर्वमपि तद्व्याप्तमित्याह-यदात्मकमिति । तात्पर्यात्पुनरुक्तं करोति क्रतव इति साङ्ख्यं यथार्थज्ञानं योगः कर्मलक्षणः यः परो विषयो यस्य स तथा ॥२०॥ उपसंहरति-एक इति । एतदात्माधीनं हे सभ्याः एतदात्म्यविवरणमात्मेति उक्तार्थसमर्थनं सृजतीत्यादि ॥२१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सदस्येषु मध्ये अग्र्यार्हणम् अग्रपूजा तस्यार्हं योग्यम् अनैकान्त्यात् योग्यानां बहुत्वेनानिश्चयात् सभासदोऽल्पज्ञा एव न तु बहुज्ञास्ते तु ब्रह्मरुद्रद्वैपायनादयो वयमधुना न पृष्टाः कथं ब्रूमहे किञ्चौत्पत्तिकसर्वपरीक्षाप्रावीण्यविख्यातः सहदेवोऽत्र पूजायामधिकृत एव वर्तते सचेन्न ब्रवीत वक्तुं दैवान्न जानीयाद्वा तदा वयमपृष्टा अपि वक्ष्यामह एवेति मनसि निश्चित्य तूष्णीमेव तत्र वर्तन्ते स्मेति ज्ञेयम् ॥१८॥ श्रैष्ठ्यमात्यन्तिकम् आपेक्षिकमपि श्रैष्ठ्यं वस्तुतोऽस्यैवेति कैमुत्येनाह-एष वै इति ॥१९॥ उक्तमर्थं विवृणोति । यदात्मकमिति साङ्ख्यं ज्ञानं योगोऽष्टाङ्गः यत्परः यद्विषयकः ॥२०॥ उक्तमर्थं प्रतिपादयति एक एव सजातीयभेदरहितः परमेश्वरान्तराभावादिति भावः । अद्वितीयो विजातीयभेदरहितश्च तत्र हेतुः ऐतदात्म्यमिति स्वार्थे ष्यञ् एतदात्मकमित्यर्थः एतच्छक्तिकार्यत्वादेव ऐतदात्मकमित्याह-आत्मना प्रकृत्या आत्माश्रयः अनन्याश्रयः हे सभ्याः ! इति अत्र विप्रतिपत्तिश्चेद्विप्रतिपद्यतां मयैव सर्वं समाधेयमिति भावः ॥२१॥

गूढार्थदीपिनी

षुञ् अभिषवे इत्यस्मात् सुत्यं तस्मिन्नहनि सोमलताभिषेकदिने । अयं दिव्यौषधिः सम्प्रति विरलैरेव भिषग्भिर्दृश्यो भवति । अवनीपालो युधिष्ठिरः ॥१८॥ सदसि अग्राहणमग्रपूजायोग्यं विचारयन्तोऽपि सभ्या यदा तं नाध्यगच्छन् न निश्चितवन्तः । कुतः । अनैकान्त्यात् योग्यबाहुल्येन एकस्यानिश्चयात् तदा सहदेवः माद्रीपुत्रः पूजायां प्राप्ताधिकारत्वात् व्यासाज्ञया अब्रवीत् । अग्र्येति यकारघटितोऽपपाठः । स्वेनैव स्वीयप्रशंसाया अनौचित्यात् स्वारस्यभङ्गाच्च जरासन्धपुत्र एव ग्राह्यः इति केचित् । 'अन्तो निश्चये' इति हैमः । स्वार्थे व्यम् ॥१९॥ श्रेष्ठस्येदं श्रैष्ठ्यमग्रपूजनम् । सात्वतां ब्रह्मविदाम् । देवता देवतादिरूपः एतच्छक्त्यैव तेषां देवादित्वम् ॥२०॥ यदात्मकं यत्स्वरूपम् । यत्परः यत्प्रतिपादनपरः ॥२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अग्र्यार्हणार्हं विमृशन्तोऽपि नाध्यगच्छन् न ज्ञातवन्तः कुतः अनैकान्त्यात् एकस्मिन् अन्तः श्रेष्ठत्वेन पर्य्यवसानं यस्य तदा सहदेवः माद्रीयः अब्रवीत् श्रीव्यासादीनां तादृशज्ञानवतां तूष्णीभावः सहदेवस्यैव श्रीव्यासाद्याज्ञया तत्राधिकृतत्वात् ॥१८-१९॥ साङ्ख्यं चेतनाचेतनविवेकः योगः परमात्मध्यानयोगः ॥२०॥ एकः अद्वितीयः निस्समानातिशयः आत्मनात्माश्रयः स्वाश्रयः स्वयमज इदं सृजत्यवति हन्ति अत एवेदं जगदैतदात्म्यम् ॥२१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सभासदः सदस्याग्रहणार्हं प्रथमतः पूजनीयं विमृशन्तोऽपि नाध्यगच्छन् अयमिति न निर्णयं जग्मुः । तत्र तन्त्रमनैकान्त्यादिति । बह्व्यो बुद्धयो मतभेदादिति । मत्यनवस्थितेः । यद्वा बहूनां महतां समूहमिदमित्यमित्यंगुलिनिर्देशासम्भवमूलकादनैकान्त्यात् । यदा तदा सहदेवोऽब्रवीत् । सात्त्वन्तः सात्त्वततन्त्रप्रणेतारस्तेषां पतिर्यादवानां वाऽच्युतो गुणतः क्षणतो देशतश्च्युतिप्रच्युतो भगवान्

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

श्रैष्ठ्यं तत्प्रयोजकाग्रपूजामर्हति। नाच्युतत्वाद्धः प्रसिद्धतां सूचयति ॥१९॥ इन्द्रो वै सर्वेषां श्रेष्ठः। एको रुद्रो न द्वितीयाय तस्थे। ब्रह्मा देवानां प्रथमः सम्बभूव। अग्निर्वै देवानां मुखमित्यादाविन्द्रादीनां श्रैष्ठ्यं प्रतीयते तत्कथं कथयसि कृष्णश्रैष्ठ्यमित्यतस्तत्तन्नामाऽयमेवेति मनसि कृत्वा समाधत्ते॥ एष इति। एषः सर्वदेवतास्तत्तच्छब्दवाच्योऽयमेवेत्यर्थः। सर्वं तदधीनमित्याह॥ देशेति। द्रव्यं कर्म चेत्यादिकं वैशब्देन कटाक्षयति। इदं विश्वं यदात्मकं यत्स्वामिकं यदर्थमियं क्रिया। सोऽपि यत्स्वामिक इत्याह॥ क्रतव इति। यदात्मका यत्स्वामिका वराहादिरूपिणो यस्यात्मानस्तनव इति। यज्ञतनुर्वराह इत्यादेः ॥२०॥ आदिपदग्राह्यं किञ्चिद्विविच्याह॥ अग्निराहूतय इति। शुद्धात्मतत्त्वविज्ञानं साङ्ख्यं योगोऽपि समाध्यादिः कर्म वा यत्पर इत्यग्न्यादियोग्यान्वयि। ऐतदात्म्यं ष्यञ् स्वार्थे ॥२१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अत्राधिदैविकपूजार्थं मुख्योऽयमेव याग इति विचार आरभ्यते-सदस्येत्यादि ऋत्विग्भ्य इत्यन्तेन। सदस्याग्र्याहां बहुदक्षिणे यागे सुप्रसिद्धा यथा याज्ञवल्क्याय गोसहस्ररूपा दत्ता ब्राह्मणेषु ब्रह्मविदेव तदर्हतीति यद्यत्र परब्रह्म न भवति मूर्तिं धृत्वा तत्र जीवानां मध्ये तदभिज्ञोऽपि महान् भवति यत्र पुनर्भगवानेवाविलुप्तमहिमा मूर्तीः परिगृह्य तिष्ठति तत्र किं पूर्वन्यायेन अनुकल्प एव कर्तव्यः आहोस्विद्भगवते देयमिति अनुकल्पेनापि समारम्भे तेनैव समाप्तिः कर्तव्येति सर्वयागेषु ऋषिभिरनुकल्प एव समारब्धः तस्मादत्रापि ब्रह्मविदाम्मध्ये केनाप्यतिशयेन यो महान् भवति स एव पूजामर्हतीति केचित् तथा सति व्यासो वसिष्ठो वा भवति यज्ञानां सर्वत्र संस्थितः उक्तत्वात् प्रक्रियान्तरे मुख्ये सम्भवति गौणकल्पनाया अन्याय्यत्वात् भगवानेवार्हतीत्यन्ये एवमपि व्यासस्योभयरूपत्वात् कुलवृद्धत्वासितामहत्वाच्च स एवार्हतीत्यपरे सर्वधर्माभिज्ञः भीष्मस्ततोऽपि ज्येष्ठ इति स एवार्हतीति केचित् तस्यापि गुरुः परशुराम इत्यन्ये सर्वत्र च नानाविधा युक्तयः प्रसरन्ति तत्र साधको हेतुः कोऽप्यव्यभिचारी नास्ति ब्रह्मवित्त्वं भगवत्त्वं नान्यत्त्वं श्रेष्ठ्यत्वमन्यद्वा साक्षात्परब्रह्मत्वं सर्वकलापूर्णत्वं सच्चिदानन्दविग्रहत्वं कृष्णस्य भगवतः कश्चिदेव जानाति अतोंशत्वमेव साधारणमिति न सर्वेषां प्रथमतः सम्मतः ततः श्रेष्ठत्वं विमृशन्तः सर्व एव सभासदः कमपि सर्वोत्कृष्टं नाध्यगच्छन् तत्र हेतुः हेतोरनैकान्त्यादिति तत्र सहदेवः साक्षात्पूर्णपरब्रह्मत्वं सर्वदोषरहितं हेतुं मन्यमानः कृष्णे भगवति तत्साधयितुमब्रवीत् स हि ज्ञानकलावतारः सर्वज्ञो द्वादशवार्षिकमेष्यं जानाति तथाप्यपृष्टो न वदति अत्र तु जिज्ञासायां सर्व एव पृष्टा भवन्ति इति भगवत्प्रेरणया अब्रवीत् ॥१८॥ आदौ साध्यं निर्दिशति-अर्हत्यच्युतः श्रैष्ठ्यमिति तत्र हेतुर्भगवानिति भगवत्त्वं व्यासादिष्वप्यस्तीत्याशङ्क्याह सात्वतां पतिरिति अन्ये हि कार्यार्थं भगवदंशपुरुषनिर्मितप्रपञ्चैकदेशार्थसिद्ध्यर्थं केनचिदंशेनावतीर्णाः कृष्णस्तु वैष्णवानां पतिरिति कालगृहे समागतान् कालं वञ्चयित्वा नेतुमागत इति मर्यादारक्षार्थं पतित्वात्समागतः अतो भगवदिच्छयैव कालसम्बन्धिनो न तं जानन्ति तस्मादयमव्यभिचारी हेतुः पूर्णभगवत्त्वमिति ननु तथापि प्रकरणानुरोधेन पदार्थनिर्णयः कर्तव्यः प्रकरणमत्र देवानां प्रीतिः यक्ष्ये विभूतीरिति वाक्यात् न हि यत्सेवकेभ्यो देयं तत् स्वामिनो दातुं शक्यते लोकाः स्वामिदर्शनेऽपि न सेवकेभ्यो प्रयच्छन्तीत्याशङ्कायामाह-एष वै देवताः सर्वा इति यदि सर्वे देवाः प्रीणनीयाः तदास्थानापेक्षया स्वरूपमुत्तममिति यावतीर्वै देवताः यस्यास्ति भक्तिर्भगवत्यकिञ्चनेति वाक्यानुरोधं परित्यज्य साक्षात्सर्वदेवतारूपं भगवन्तमेव पूजयन्त्वित्यर्थः। वै निश्चये नेति उपचारव्यावृत्तिरुक्ता यथाग्निः सर्वादेवताः "आपो वै सर्वादेवताः" इति तत्र तत्रोपाख्याने सर्वदेवत्वं तेषां गौणभावत्वेन निरूपितं यथा "देवासुराः संयत्ता आसन् ते देवा बिभ्यतोऽग्निं प्राविशन् तस्मादाहुरग्निः सर्वा देवताः" इति तथाग्निरपि अपः प्राविशत् सन्निलीयतमोपः प्राविशदिति एवं केनचिन्निमित्तेनैव सर्वेषां सर्वदेवतारूपत्वं गौणमेव स्वभावत एव भगवान् सर्वदेवतारूपः कदाचित्सर्वमात्मैव भवतीति पक्षे त एव देवा अत्र पूज्याः "इन्द्रादयो बाहवः" इत्यादिवाक्याद्वा आधिदैविका एव यज्ञभाज एव ननु तथापि कस्मिंश्चिद्देशे कस्मिंश्चित्काले तत्र प्रवर्तमानस्य यागस्य ऋषीणां तदधीनत्वात् तद्देशतत्कालाभिमानी दैवतैव प्रकरणवशात् पूजामर्हतीत्याशङ्क्याह-देशे कालेऽपि ननु तथापि योग्यं योग्येन सम्बद्ध्यत इति प्राकृता धनादयः पदार्थाः कथं साक्षाद्भगवते दातुं शक्याः लोकेऽपि विप्राय गुरवे स्वामिने न हि शूद्रः स्वकन्यां प्रयच्छति किन्तु शूद्रायैवाधमायापि दातुं वाञ्छतीत्याशङ्कायामाह-धनादय इति आदिशब्देन वस्त्राभरणानि गवादयश्चोच्यन्ते ॥१९॥ एवं ब्रह्मत्वमङ्गीकृत्य तस्मिन् दानं समर्पितं ब्रह्मत्वं तु साधयति यदात्मकमिदं विश्वमिति विश्वस्यैतदात्मत्वे यशोदाप्रमाणेन केवलं लौकिकात्मत्वे ब्रह्मत्वमिति वेदार्थरूपत्वमप्याह-क्रतवश्च यदात्मका

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

इति क्रतूनां तदात्मकत्वे वराहाद्यवतार एव प्रमाणं सर्वयज्ञस्वरूपत्वं प्रकटयन् तेन रूपेण प्रादुर्भूतो भगवान् सर्वमग्नौ हुयत इति अग्निः प्रीतिः कर्तव्येति प्रकरणपक्षेऽप्याह अग्निरिति "अयमेवाग्निः ब्रह्म तर्हि अग्निः" इति श्रुतेः तादृश एव च होमः यज्ञत्वाय आहुतीनां भगवत्त्वमाह आहुतय इति मन्त्राभिमानिनी देवता प्रकणवशान्मुख्येत्याशङ्क्याह-मन्त्रा इति। तथापि शास्त्रानुसारेण यो महान् भवति स एव ग्राह्योऽनुयुक्त्या किञ्चित्कर्तव्यमित्याशङ्कायामाह "साङ्ख्यं योगश्च यत्पर" इति वेदादीनि पञ्च शास्त्राणि तत्र ब्रह्मत्वयज्ञत्वे च सिद्धे वेदार्थः सिद्धः साङ्ख्यस्य त्वत्रैव तात्पर्यम् एतस्यैव सर्वात्मत्वं स्नेहान्निश्चितं योगस्यापि ध्यानमूर्तिरमयेवेति आत्मेति च एतदर्थमेव चित्तवृत्तिरोधमिति "आत्मन्येव वशं नयेदि"ति वाक्यात्तात्पर्यं चकारात् पशुपतिमतस्याप्यत्रैव स्कन्दपुराणे महादेवेन स्कन्दं प्रत्युक्तत्वात् —

परमो विष्णुरेवैकस्तत् ज्ञानं परमं मतम्। शास्त्राणां निर्णयस्त्वेष तदन्यन्मोहनाय हि॥ इति।

वैष्णवसिद्धान्ते तु न सन्देह एव अतः सर्वशास्त्राणामत्रैव तात्पर्यमित्यर्थः ॥२०॥ ननु तथापि ब्रह्मलक्षणाभावे कथं ब्रह्मत्वमिति चेत्तत्राह "एक एवाद्वितीयोऽसौ" इति वेदान्तेषु "एकं ब्रह्म अद्वितीयं ब्रह्म" इति क्वचित् ब्रह्मलक्षणं क्वचिन्निर्णयशास्त्रे "विश्वम्ब्रह्मे"ति अत एव विश्वमिति प्रथमं नाम किञ्च "स आत्मानं स्वयमकुरुत" इति श्रुतेः "यो ह्यात्मानं स्वयं करोति स आत्मा ब्रह्मे"ति यस्त्वात्माश्रयः स ब्रह्मेति "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुतिभिः सृष्टिप्रलयकर्ता ब्रह्मैव वस्तु सर्वान्तर्यामी सर्वप्रेरकः स ब्रह्मेति "अन्तरो यमयति" इति श्रुतेः एवम्बहुवाक्यानुरोधेन सर्वमेव धर्मजातं भगवद्गतमित्यनुवदति एकमेवायं महतां दृष्टिरत्र प्रमाणं ते हि सर्वत्र कृष्णमेव पश्यन्ति अद्वितीयश्च ज्योतींषि विष्णुरित्यादिवाक्यात् तेषामनुभवोऽपि प्रमाणं सोऽन्यो भविष्यतीत्याशङ्क्याह-असाविति —

सर्वेषामेव भूतानां पिता माता स माधवः। तमेव शरणं यात शरण्यं कौरवर्षभाः॥

इति मार्कण्डेयवाक्यात् पर्णपुटे तेनायमेव दृष्ट इति अभिज्ञानाच्च किञ्च ऐतदात्म्यमिदं जगत् दुर्वाससा आरण्यके पर्वणि निर्धारितं अन्यथा शाकान्नमुष्टिभक्षणेन कथं ते तृप्ता भवेयुः किञ्च अयमेव आत्मनात्माश्रयो भूत्वा जगदात्मस्वरूपं सृजत्यवति हन्ति स्वयं त्वजः अत्र प्रमाणं सभ्या इति सम्बोधनं सम्मत्यर्थम् ॥२१॥

श्रीसुबोधिनीसारः

तत्राग्र्यपूजार्हः क इति विचारे पाण्डवीयसहदेववचनमित्याह। सदस्यानां मध्येऽग्र्यं प्रथममर्हणं पूजा तदर्हं तद्योग्यं विमृशन्तो विचारयन्तः सभासदः सभास्था नाप्नुवन् अनैकान्त्यात् अनिश्चयात् योग्यानां बहुत्वे तदा सहदेव उवाच ॥१८॥ सात्वतां पतिरच्युतो भगवान् कृष्णः श्रैष्ठ्यं सर्वाग्रपूजनमर्हति सर्वा देवता देशकालधनादय एष वै एव ॥१९॥ इदं विश्वं यद्रूपं क्रतवो यज्ञा यदात्मका यद्रूपाः अग्न्यादयश्च साङ्ख्यं शास्त्रं ज्ञानं च योगश्च यत्परो यन्निष्ठः ॥२०॥ असौ कृष्ण एक एवाद्वितीयः इदं जगत् ऐतदात्म्यम् एतद्रूपम् आत्माऽनात्मनामाश्रयः स्वाश्रयो वाऽजो जन्मरहित एष सृजति अवति हन्ति च विश्वम् ॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सदसि सभायां अग्र्यार्हणं अग्रपूजा तस्यार्हं योग्यं विमृशन्तो विचारयन्तोऽपि नैकान्त्यात् योग्यानां बहुत्वेनैकत्र श्रेष्ठत्वनियामकहेतोरभानात् दृश्यमानानां चे हेतूनां व्यभिचारित्वात् यदैकत्र श्रेष्ठत्वनिश्चयं नाध्यगच्छंस्तदा माद्रीसुतः सहदेवोऽब्रवीत् ॥१८॥ तदुक्तिमेवाह-अर्हतीति षड्‌ यज्ञस्वरूपोऽप्ययमेवेतोऽपि श्रेष्ठतया प्रथममयमेव पूजनीयः इत्याशयेनाह-क्रतवश्च यदात्मका इति। य आत्मा येषां ते। यज्ञात्मकत्वमेवोपपादयन् यज्ञाङ्गदेवताद्यात्मकत्वमाह-एष एव सर्वा देवताः। देशादयः अग्न्यादयश्चैष एव। साङ्ख्यं ज्ञानकाण्डे यत्प्रतिपादनपरः। योगश्चाष्टाङ्गो यत्परः यदाराधनमार्गः। किं बहुना ? इदं विश्वं यदात्मकम् ॥१९-२०॥ तत्र हेतुमाह-यस्मात् असौ अद्वितीयः सजातीयविजातीयभेदरहितः एक एव सृष्टेरग्रे आसीदतः सर्वोपादानत्वादिदं जगदेतदात्म्यं एष श्रीकृष्णो आत्मा यस्य तत् स्वार्थे ष्यञ्। एवमुपादानत्वेन सर्वात्मकत्वमुक्त्वा निमित्तत्वेन सर्वेश्वरत्वमाह-आत्मनेति। भवन्तोऽपि विचारकुशलाः अतोऽस्मदुक्तं विचारणीयम् इत्याशयेन सम्बोधयति-सभ्या इति। स्वयं त्वजः। तत्र हेतुमाह-आत्माश्रय इति। आत्मा स्वयमेवाश्रयो यस्यात्मनः सः स्वरूपस्थः आत्मना उपकरणभूतेन विश्वं सृजत्यवति हन्ति च ॥२१॥

अन्वितार्थप्रकाशिका

सुत्येति ॥ सुत्येऽहनि सोमाभिषवदिने । सौत्य इत्यपि पाठः । अवनीपालो राजा युधिष्ठिरः सुसमाहितः सन् याजकान् अन्यांश्च महाभागान् पूजार्हान् सदसस्पतीन् यथावत् अपूजयत् पूजयितुमारभत ॥१८॥ सदसीति ॥ सभासदः सदसि सभायां सदस्या इति दीर्घपाठे सदस्याः सभ्या तेषु अग्र्यार्हणम् अग्रपूजा तस्यार्हं योग्यं विमृशन्तो विचारयन्तोऽपि अनैकान्त्यात् योग्यानां बहुत्वेनैकस्यानिश्चयात् दृश्यमानानां च हेतूनां व्यभिचारित्वात् । यदेकत्र श्रेष्ठत्वनिश्चयं नाध्यगच्छंस्तदा माद्रीसुतः सहदेवोऽब्रवीत् । अयं भावः । ये साधारण्येन सभासदस्ते स्वयमेव पूर्वमग्र्यपूजार्हं विमृशन्तो नाध्यगच्छन् । सर्वज्ञास्तु द्वैपायनादयः चैद्यादिदुर्जनविवादभयात्तूष्णीमेव स्थिताः तदा पूजायामधिकृतः सहदेवो विशेषज्ञोऽब्रवीत् ॥१९॥ अर्हतीति ॥ सात्वतां नारदादीनां पूज्यानामपि पतिः भगवान् अच्युतः श्रीकृष्ण एव श्रैष्ठ्यम् अग्रपूजामर्हति । यतः एष एव सर्वा देवताः देशकालधनादयश्चेति ॥२०॥ यदिति ॥ इदं विश्वमपि यदात्मकं क्रतवश्च अग्न्यादयश्च चात् आचार्यादयश्च यदात्मकाः साङ्ख्यं ज्ञानकाण्डं यत्परं यत्प्रतिपादनपरं योगश्चोपासना च यत्परः यदाराधनमार्गः । पुंशेष आर्षः । लिङ्गविपरिणामेन वाऽन्वयः ॥२१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सदस्येषु सभास्थनृपेषु अग्रार्हणम् अग्रपूजनं तस्यार्हं योग्यं अनैकान्त्यात् एकस्मिन् योग्यत्वानिश्चयात् सभासदो विमृशन्तः सन्तः यदा नाध्यगच्छन् न प्रापुः तदा तस्मिन् सवे प्राप्तपूजाधिकारत्वादैकान्त्याच्च सहदेवो माद्रिपुत्रः अब्रवीत् ॥१८॥ श्रेष्ठम् अग्रपूज्यत्वम् ॥१९॥ यः श्रीकृष्ण आत्मा अन्तर्यामी यस्य तत् यदात्मकं साङ्ख्यं क्षेत्रे क्षेत्रज्ञज्ञानम् ॥ योगो भक्तियोगः यः श्रीकृष्णपरः प्राप्यतया श्रेष्ठो यस्मिन् सः ॥२०॥ नास्ति द्वितीयः समानो यस्य सः एक एव पूज्यः एषः श्रीकृष्ण एवात्मा आत्मतया यथाकर्म प्रवर्तको यस्य तदेतदात्मं तदेव ऐतदात्म्यमिदं चराचरं जगत् ॥ आत्माश्रयः ॥ आत्माधारः सन् हे सभ्याः आत्मना स्वेनैव सृजति ॥२१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सदसीति ॥ सदसि सभायाम्, आग्र्यार्हणार्हमग्रपूजार्हं, सभासदः विमृशन्तः वै अप्यर्थे । विचारयन्तः सन्तोऽपीत्यर्थः । न अध्यगच्छन् न निश्चितवन्तः । कुतः । अनैकान्त्यात् । योग्यानां बहुत्वेनैकस्याप्यविशेषात्, एवं सति, तदा सहदेवः, अब्रवीत् । सभासदः प्रति उवाचेत्यर्थः । अत्र सहदेवो जरासन्धपुत्र इति केचित् । माद्रिपुत्र इत्यन्ये । देवैः सह वर्तते इति सहदेवो देवव्रतः भीष्म इति यावदिति वयं, महाभारते तद्वचनादग्र्यपूजायां श्रीकृष्णपूजनविधानोक्तेः । तथा च सभापर्वणि षट्त्रिंशेऽध्याये 'ततो भीष्मः शान्तनवो बुद्ध्या निश्चित्य वीर्यवान् । वार्ष्णेयं मन्यते कृष्णं पूजनीयतमं भुवि ॥ एष ह्येषां समस्तानां तेजोबलपराक्रमैः । मध्ये तपन्निवाभाति ज्योतिषामिव भास्करः ॥ तस्मै भीष्माभ्यनुज्ञातः सहदेवः प्रतापवान् । उपजह्रेऽथ विधिवद्वार्ष्णेयायार्घ्यमुत्तमम् ॥ प्रतिजग्राह तत् कृष्णः शास्त्रे दृष्टेन कर्मणा । शिशुपालस्तु तां पूजां वासुदेवे न चक्षमे' इति ॥१८॥ तदेवाह षड्भिः ॥ अर्हतीति ॥ सात्त्वतां पतिर्यदूनां नाथः, भगवान् अच्युतः, श्रैष्ठ्यम्, अर्हति । श्रेष्ठस्योचितं यदर्हणं तस्य योग्यो भवतीत्यर्थः । हि निश्चितं, सर्वाः देवताः, एषः वै । शरीरात्मनिबन्धनमिदं सामानाधिकरण्यं, 'स आत्मा अङ्गान्यन्या देवताः' इति श्रुतेः । देशश्च कालश्च धनं च तान्यादयो येषां ते, तत्र देशः 'स मे यजेत' इत्युक्तविधः । कालो वसन्तादिः, धनानि यज्ञोपयुक्तानि, आदिशब्दो यजमानर्त्विगादिसंग्राहकः । देशादयोऽप्येष एवेत्यर्थः ॥१९॥ यदिति ॥ इदं देशादिविप्रान्तं, सर्वं, यो भगवानात्मा यस्य तदिति यदात्मकम्, अस्ति । क्रतवश्च, यदात्मकाः, अग्निः, आहुतयः, मन्त्राः, साङ्ख्यं, योगश्च, तत् सर्वं, यो भगवान् परो निर्वाहको यस्य तत्तथाभूतम्, अस्ति । तत्र साङ्ख्यं प्रत्यगात्मयाथात्म्यानुचिन्तनं, योगः परमात्मोपासना ॥२०॥ किं बहुनेत्याह ॥ एक एवेति ॥ इ चिदचिदात्मकं जगत्, एष भगवानात्मान्तरात्मा यस्य तथाभूतम्, अस्ति । स्वार्थे ष्यञ् । असौ भगवान् एकः एव, अद्वितीय आसीदिति शेषः । 'सदेवेदमग्र आसीत्' 'एकमेवाद्वितीयम्' इतिवदयं निर्देशः । अविभक्तनामरूपचिदचिद्विशिष्टपर एकशब्दः निमित्तान्तरव्युदासार्थोऽद्वितीयशब्दः । एक इत्यनेन कारणावस्थचिदचितोस्तादात्म्यमुक्तम् । 'ऐतदात्म्यम्' इत्यने कार्यावस्थयोस्तयोस्तथात्वमुक्तम् । हे सभ्याः, स्वयं तु, आत्माश्रयः आत्माधारः स्वस्याश्रयः स्वयमेवेत्यर्थः । आत्मना उपकरणभूते स्वात्मनैव, सृजति, अवति, हन्ति । एवं स्वशरीरभूतचिदचिद्गतोत्पत्त्यादिविकाररहित एव, आस्ते ॥२१॥

कृष्णप्रिया

अब महत्वकी मीमांसा चली कि इस राजसूय यज्ञ में समुपश्चित महापुरुषोंमें से किस महापुरुष कि अग्र पुजा की जाय ? जिनते महामति जन उतने मत इसलिये सर्वानुमति से कोई निर्णय हो न पाया तब पाण्डुकुमार श्रीसहदेवजी नम्र निवेदन किया ।।१८।। मेरा सदैन्य नम्र निवेदन है कि उपस्थि सदस्यों मे सात्वत कुल शिरोमणि भरुवत्सल भगवान् श्रीद्वारिकाधीश श्रीकृष्णचन्द्रजी ही सर्व सभासदों सर्वप्रकारसे सर्वोत्तम है एव अग्रपूजा के लिये योग्य है । कारण कि सर्व देववरों के स्वरुप श्रीकृष्ण ही है और सर्वदेश सर्वकाल और धन आदि जितने भी पदार्थ है उन सबके स्वरुप में भी ये श्रीकृष्ण है ।।१९।। यह सम्पूर्ण श्रीकृष्ण का ही स्वरुप है और समस्त यज्ञ भी भगवान् श्रीकृष्ण स्वरुप ही है । भगवान् श्रीकृष्ण ही अग्न, आहूति एवं मन्त्रों के रुपमें है । सांख्य ज्ञानमार्ग औ योग कर्म मार्ग में दोनो भगवान श्रीकृष्ण की पत्नि के सुपाय है ।।२०।। हे सभासदो ! हे सभ्यो ? कृपया श्रव करें मैं कहां तक वर्णन करुं ? भगवान श्रीकृष्ण वह एकरस और अद्वितीय ब्रह्म है । भगवान श्रीकृष्ण में सजाती विजातीय स्वगत भेद नाममात्र का भी नहीं है यह सारा जगत् कृष्ण का स्वरुप है । वे श्रीकृष्ण अपने आत्मस्वरू संकल्प से ही जगतकी सृष्टि पालन और संहार करते है ।।२१।।

विविधानीह कर्माणि जनयन् यदवेक्षया । ईहते यदयं सर्वः श्रेयो धर्मादिलक्षणम् ॥२२॥
तस्मात् कृष्णाय महते दीयतां परमार्हणम् । एवं चेत् सर्वभूतानामात्मनश्चार्हणं भवेत् ॥२३॥
सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने । देयं शान्ताय पूर्णाय दत्तस्यानन्त्यमिच्छता ॥२४॥
इत्युक्त्वा सहदेवोऽभूत्तूष्णीं कृष्णानुभाववित् । तच्छ्रुत्वा तुष्टुवुः सर्वे साधु साध्विति सत्तमाः ॥२५॥

कर्दमक्षमा

यदवेक्षया, इह, विविधानि, कर्माणि, जनयन्, इह, धर्मादिलक्षणम्, श्रेयः, सर्वः, यद्, अयम्, ईहते ॥२२॥ तस्मात्, महते, कृष्णाय, परमार्हणम्, दीयताम्, एवम्, चेत्, सर्वभूतानाम्, च, आत्मनः, अर्हणम्, भवेत् ॥२३॥ दत्तस्य, आनन्त्यम्, इच्छता, सर्वभूतात्मभूताय, कृष्णाय, अनन्यदर्शिने, शान्ताय, पूर्णाय, देयम् ॥२४॥ कृष्णानुभाववित्, सहदेवः, इति, उक्त्वा, तूष्णीम् अभूत्, सर्वे, सत्तमाः, साधु, साधु, इति तुष्टुवुः ॥२५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किञ्च विविधानीति यस्यावेक्षयाऽनुग्रहेण विविधानि कर्माणि तपोयोगादीनि जनयन् कुर्वन् यद्यस्मादयं सर्वोऽपि जनो धर्मादिलक्षणं श्रेय ईहते साधयति कर्माणि तत्फलानि च यदधीनानीत्यर्थः ॥२२-२३॥ श्रीकृष्णानुभाववित् सहदेव इत्युक्त्वा तूष्णीमभूत् ॥२४-२५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कर्मफलदातृत्वादप्ययमेव योग्य इत्याह-किञ्चेति । 'अवेक्षानुग्रहेक्षणः' इति निरुक्तिः । यस्य कृष्णस्य । यस्मात्कृष्णात् । तत्फलानि कर्मफलानि । यदधीनानि कृष्णायत्तानि । इत्यर्थ इति-सर्वकर्मफलप्रदस्यैवाग्रार्हणमुचितमिति भावः ॥२२॥ यतोऽसौ कर्मफलदाता तस्माद्धेतोः अस्य तृप्तौ सर्वं तृप्तं स्यादित्यशयेनाह-एवं चेत् श्रीकृष्णार्चने कृते सति ॥२३॥ पुनराशङ्क्य समाधत्ते-आत्मनेत्यादि । अपूर्णेषु दत्तमेव नश्यतीति चेदाह-पूर्णायेत्यादि ॥२४॥ देवैः सह वर्तत इति सहदेवो देवव्रतोऽपि ग्राह्यो, भारते तद्वचनादग्रपूजादानाद्युक्तेः । यद्वा-देवेन देवशब्देन सह वर्तत इति सहदेवो देवव्रतो भीष्म इत्यर्थः । तत्सहदेववचः । सत्तमा मुन्यादयः ॥२५-२६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीकृष्णस्य कृपयैव सर्वेषां सर्वाणि कर्माणि तत्फलानि च सिद्ध्यन्तीति तदर्थमप्यग्रेऽर्हितुं युज्यत इत्याह-विविधानीति। इह कर्मक्षेत्रे आदिशब्देन अर्थादित्रयं तद्भक्तिश्च अन्यत्तैः यद्वा यदवेक्षया यदर्थमित्यर्थः ''तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन'' इत्यादिश्रुतेः ॥२२॥ उपसंहरति-तस्मादिति। महते सर्वात्मकाय सर्वश्रेष्ठाय वेत्यर्थः। अतश्च एवमिति अतोऽत्र कस्यापि विप्रतिपत्तिर्न स्यादिति भावः ॥२३॥ उपसंहृत्यापि तर्हि किं स्यादित्यपेक्षायामुत्कण्ठया पुनरुक्तानुवादेनाह-सर्वेति। अत्र सर्वभूतात्मभूतत्वं स्वरूपतः अन्यदर्शित्वं ज्ञानतः शान्तत्वं ततो विक्षेपाभावात् पूर्णत्वन्तु ततस्तत एवेति अथ च तत्र तत्रोक्ता दानपात्रगुणा एव दर्शिताः तथा सर्वभूतानामात्मभूतायापि अनन्यदर्शिने भक्तासक्ताय शान्ताय निरीहाय सर्वपूर्णायेति श्लेषेण परमाश्चर्य्यगुणोऽपि दर्शितः अतो अत्तस्यानन्त्यमिच्छता अस्मा एव देयमिति ॥२४॥ इत्युक्त्वेत्यत्र हेतुः कृष्णानुभावविदिति तच्छ्रुतेति तादृशनैकान्त्यादेव तत्र किञ्चिदवलम्बनापेक्षयैवं ते पूर्वन्तूष्णीमासन्निति भावः। सत्तमा अत्र द्विजाः श्रुत्वा द्विजेरितमिति वक्ष्यमाणात् ॥२५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीकृष्णस्य कृपयैव सर्व्वेषां सर्व्वाणि कर्म्माणि तत्फलानि च सिद्ध्यन्तीति तदर्थमप्ययमेवाग्रेऽर्हयितुं युज्यत इत्याह-विविधानीति। इह कर्म्मक्षेत्रे, आदि-शब्देन धर्मफलं स्वर्गादि; अन्यत्तैर्व्याख्यातम्। यद्वा, मोक्षादपि सुदुर्लभं परमोत्कृष्टञ्च तद्भक्त्यादिकं यत्कृपया लभ्यत इत्याह-विविधानीति। अयमिदानीन्तनो जनो धर्म्मो भगवद्भक्तिलक्षणः, आदि-शब्दात् प्रेमा श्रीवैकुण्ठादिपदं च। एवं सर्व्वकर्म्मणां भक्तिसाधनत्वमभिप्रेतम्; अन्यत् समानम् ॥२२॥ तस्माद् दीयताम्, यत उक्तन्यायेन सर्व्वथा महते सर्व्वश्रेष्ठाय, यतः कृष्णाय साक्षाद्भगवते। इत्थमेवान्येषामपि सर्व्वेषां पूजा सम्पद्येतेत्याह-एवमिति। च अपि, सर्व्वेषां भूतानां प्राणिनाम्, आत्मनः स्वस्यापि, अतोऽत्र कस्यापि विप्रतिपत्तिरपि न स्यादेवेति भावः ॥२३॥ सर्वेति। तत्त्वतो जीवानां तदंशतया भेदाभावाभिप्रायेण, एवमनन्यदर्शिने, अतः शान्ताय सदा प्रसन्नचित्ताय, यतः सर्वैश्वर्य्यपूर्णाय, यतः कृष्णाय साक्षात् परमेश्वराय; यद्वा, तत्रापि निजाशेषैश्वर्य्यप्रकटनार्थं कृष्णत्वेनावतीर्णाय, अतः सत्पात्रत्वेन दानस्यापि महाफलत्वं स्यादित्याह-दत्तस्येति। किञ्च, बहिर्दृष्ट्यासत्पात्रपरत्वादपीत्याह-दत्तस्येति। अन्यत्तैर्व्याख्यातम्। यद्वा, एवं तत्त्वदृष्ट्यायमेवाग्रपूजार्हः। किञ्च, बहिर्दृष्ट्या सत्पात्रत्वादपीत्याह-सर्वेति। सर्वभूतानामात्मभूताय परमात्मने प्रियतमायेत्यर्थः। अतः कृष्णाय सद्गुणैः सर्वचित्ताकर्षकाय; किञ्च अनन्यदर्शिने समायेत्यर्थः। यद्वा, अनन्या अकिञ्चना एकान्तिनो वा, तानेव कृपया द्रष्टुं शीलमस्येति तथा तस्मै, भक्तवत्सलत्वेन बहुकुटुम्बिन इत्यर्थः। किञ्च, शान्ताय लोभादिदोषरहिताय, विशेषणानामेषां यथोत्तरं सत्पात्रलक्षणत्वे श्रैष्ठ्यम्, अन्यत् समानम्। एवम्- 'आचार्य्यमृत्विजञ्चैव संयुक्तञ्च युधिष्ठिर। स्नातकञ्च प्रियं प्राहुः षडर्घ्यार्हान् नृपं तथा॥' इत्यादिना सभापर्वणि श्रीभीष्मेणोक्तमग्रपूजार्हाणां षण्णां मुख्यतमस्यैकस्य वाग्रे पूजनमपि समर्थितम् ॥२४॥ तूष्णीमभूत्। कुतः ? कृष्णस्य प्रेम्णा जगच्चित्ताकर्षकस्य भगवतोऽनु निरन्तरं यो भावः प्रेमा तं विन्दतीति तथा सः; तस्य माहात्म्य-वर्णनेन प्रेमविवशत्वादित्यर्थः; यद्वा, कृष्णस्य सर्वसद्गुणनिधेरनुभावो लज्जादि-स्वभावस्तं वेत्तीति तथा सः, सभामध्ये वर्ण्यमाननिजगुणश्रवणेन श्रीकृष्णस्य लज्जोत्पत्तेरित्यर्थः। साधु साध्विति तुष्टुवुः, श्रीसहदेवं प्रशशंसुः, यतः सत्तमा जातिबुद्ध्यादिना परमश्रेष्ठतरा इत्यसत्तमो व्यवच्छिन्नः, स चाग्रे व्यक्तो भावी ॥२५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

ईहते लोकाभिवृद्धये ॥२२-२६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवम्भूतश्चेदसौ किमित्यस्मदादिवच्चेष्टत अत आह-विविधानीति। यदपेक्षया यस्य लोकस्यापेक्षयाऽनुजिघृक्षया धर्मादिलक्षणं धर्मादिरूपम् आदिशब्दः काममोक्षसङ्ग्राहकः सर्वं श्रेयः जनयन् ''लक्षणहेत्वोः'' इति शत्रादेशः सम्पादयितुमित्यर्थः। विविधानि कर्माणि ईहते चेष्टते यत् यस्मादेवं तस्मादित्युत्तरेण सम्बन्धः ॥२२॥ तस्मादिति। महते सर्वोत्कृष्टाय कृष्णाय दीयतां क्रियताम् एवञ्चेत्कृष्णाय दीयते चेत्सर्वभूतानामात्मनो दातुश्चार्हणं बहुमानं कृतं भवेत् सर्वान्तरात्मत्वादिति भावः ॥२३॥ एतदेव व्यञ्जयन् पुनर्हेतुतया विशिंषन्नाह-सर्वभूतानामन्तरात्मभूतायात एवानन्यदर्शिने अन्यत् स्वस्वात्पृथग्भूतं पश्यतीत्यन्यदर्शी ततो

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

नञ्समासः तस्मै सर्वशरीरकायेत्यर्थः । इतरेत्वन्यदर्शिनः न हि तेषामन्यतमाय दत्तमितरेभ्यो दत्तं भवतीति भावः । शान्ताय रागद्वेषादिरहिताय इतरेत्वशान्ताः न हि तेषां दत्तमन्यतमाय दत्तमितरे सहन्त इति भावः । पूर्णाय स्वभावतोऽवाप्तसमस्तकामाय नित्यसन्तोषिणे इति यावत् । न हि असन्तोषिणे दत्तमनन्तं भवतीति भावः । अतो दत्तस्य दानस्यानन्त्यं फलानन्त्यम् इच्छता कामयमानेन उक्तविधाय कृष्णायैव देयम् ॥२४॥ इतीति । कृष्णप्रभाववित् सहदेवस्तूर्ष्णी बभूव तत्सहदेवोक्तं श्रुत्वा सर्वे सत्तमाः द्वैपायनादयः साधुसाध्विति तुष्टुवुः ॥२५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

फलहेतुत्वाच्चायमेवात्र योग्यतम इत्याह-यदयमिति ॥२२॥ एतत्तृप्तौ सर्वं तृप्तं स्यादिति भावेनाह-एवञ्चेति । स्वस्मादन्यस्यास्वातन्त्र्यं न पश्यतीत्यनन्यदर्शी तस्मै देवैः सह वर्तत इति सहदेवो देवव्रतोऽपि ग्राह्यः भारते तद्वचनादग्रपूजादानाद्युक्तेः ॥२३-२४॥ सत्तमाः सतां श्रेष्ठाः ॥२५-३०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-४४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१...५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रीकृष्णस्य कृपयैव सर्वलोकस्य सर्वकर्माणि तत्फलानि च सिद्ध्यन्तीति-तदर्थमप्ययमग्रेऽर्हितुं युज्यत एवेत्याह विविधानीति इह भूर्लोके यदवेक्षया यत् कृपालोकेनैव तपोयोगादीनि जनयन् कुर्वन् यत् यस्मादयं सर्वोऽपि जनो धर्मादि लक्षणं श्रेय ईहते साधयति कर्माणि तत्फलानि च यदधीनानीत्यर्थः ॥२२-२३॥ न केवलमिदमिदानीमेव रजन्यस्मिन्नेव वधीयते किन्तु विधिरयं सार्वकालिकः सार्वलौकिकश्चेत्याह-सर्वेति अनन्यदर्शिने स्वाभिन्नदर्शिने ॥२४-२५॥

गूढार्थदीपिनी

हे सभ्याः एक एव असौ अजः स्वयमात्मना स्वशक्त्या इदं जगत् सृजति अतो जगत् एतच्छक्त्या कार्यत्वादैतदात्म्यम् । एष श्रीकृष्णः आत्मा यस्य तत् एतदात्मम् एतत्स्वरूपमेव स्वार्थे ष्यञ् । आत्माश्रयः स्वतन्त्रः अद्वितीयः सजातीयविजातीयभेदरहितः ॥२२॥ यस्य अवेक्षया प्रेरणया अनुग्रहेण वा सर्वोऽपि जनः कर्माणि कुर्वन् यस्मादेव धर्मादेः श्रेयः फलमीहते साधयति प्राप्नोतीत्यर्थः ॥२३॥ यतोऽसौ कर्मफलदाता तस्मात् हेतोः कृष्णाय परमार्हणमग्रपूजनं दीयताम् एवं चेत् आत्मनः पूजकस्य च अर्हणं तृप्तिजनकं भवेत् ॥२४॥ आत्मभूताय अन्तर्यामिणे । अनन्यदर्शिने भददृष्टिरहिताय । आनन्त्यम् अक्षयत्वमिच्छता ॥२५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यस्य प्रेरकस्य अवेक्षया अवलोकनेन विविधानि कर्माणि जनयन् कुर्वन् यत् यस्मात् कर्मफलदात् सर्वोऽपि जनः धर्मादिलक्षणं श्रेयः ईहते साधयति ॥२२॥ यस्मादेवं तस्मात् कृष्णाय परमार्हणं दीयताम् ॥२३॥ सर्वेषां भूतानामात्मभूताय उपादानभूताय अत एवानन्यदर्शिने अन्यत्स्वस्माद्भिन्नं पश्यतीति अन्यदर्शी तन्न भवतीति अनन्यदर्शी तस्मै सर्वभूतभिन्नाभिन्नायेत्यर्थः ॥२४-२६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एवमनैकान्त्य एकान्तोक्तिं कः शृणोति करोति वेत्यत आह ॥ हे सभ्या इति । ऐतदात्म्यमिदं रूपमित्याह ॥ आत्मनाऽऽत्माश्रय इति । स्वयं स्वस्याश्रयः स्वयमेवात्मनः जीवानामाश्रय इति वा । उक्तार्थसर्वस्वसम्भावनामुन्मूलयितुमाह । अज उत्पत्तिरहितोऽनपेक्षया विना फलापेक्षां विविधानि कर्माणि जनयन् सृजत्यवति हन्ति उत्पादयति पालयति संहरतीति ॥२२॥ यद्यतोऽयं धर्मादिलक्षणं चिह्नं यस्य तच्छ्रेय ईहते दातुमिच्छति । दाता फलस्यायमेव तस्मात् । महते मदुपपादितप्रकारेण महात्मने कृष्णाय परमार्हणमग्रपूजा दीयताम् । विविधानि कर्माणि यदपेक्षया निरीक्ष्य जनयन्कुर्वन् अयं धर्मादिलक्षणं श्रेयस्तदर्थमीहते

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यदुद्देश्येन तस्मात्तस्मै दीयतामिति वा ॥२३॥ निगमयति ॥ एवञ्चेदिति । एतत्तृप्तौ सर्वतृप्तिरिति सर्वभूतानां तथाऽऽत्मनश्चार्हणे मान्यता लोके भवेत् । सर्वभूतात्मभूतायानन्यदर्शिने स्वभिन्नस्वातन्त्र्यादिकं न पश्यतीति तस्मै । इदानीं बह्वालोचनेऽपि स्वव्यतिरिक्तमर्हणीयं दर्शयितुं शीलमस्यास्तीत्यन्यदर्शी स न भवतीत्यात्मानमेव दर्शयतीति यावत् तस्मै । दत्तस्यानन्त्यमिच्छता पुंसा शान्ताय सर्वसुखनिर्णायकाय पूर्णायैतदूनादानकृतमहत्त्वहीनाय स्वतः पूर्णाय । न केवलमिदानीमेवायं दानपात्रं किन्तु सन्ततमिति द्योतयति परोक्षोक्त्येति ज्ञेयम् ॥२५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तस्मात् साक्षात् पूर्णपरब्रह्मत्वात् सर्वानुपपत्त्यभावाच्च कृष्णायैव दीयतां परमार्हणं तथाप्यस्मदपेक्षया कनिष्ठः मातुलेयः कथं दानमर्हतीत्याशङ्कायामाह–महत इति । विश्वरूपप्रदर्शनात् पितामातेति वाक्याच्च महत्त्वं सिद्धं मोहार्थमेव च तस्याल्पत्वमिति परन्त्वल्पार्हणं न देयं किञ्च परमार्हणं नन्वेवंकृते को विशेषः अलौकिकं च भवति अतो व्यासादिरेव कश्चित् पूजार्हो भवत्वित्याशङ्कायामाह–एवञ्चेदिति । अत्रैव बहवः समानास्तिष्ठन्ति सर्वे एवैकदा पूजयितुमशक्याः त एकपूजायामन्यद्रोहो भवतीति प्रत्यक्षविरोधः अन्योन्यादेव तामुपास्त इति श्रुतिविरोधश्च अतस्तादृशाय देयं यस्मिन् दाने सर्वे एव तृप्ता भवन्ति सोऽयमेवेत्याह–एवं चेत्सर्वभूतानामात्मनश्चार्हणं भवेदिति ॥२३॥ तत्र हेतुः सर्वभूतात्मभूतायेति सर्वभूतभूतः आत्मभूतश्च वेदव्यासव्यावृत्त्यर्थं कृष्णायेत्येकवचनकथनं ननु तथापि गृहीतावतारः कदाचिदपि आत्मानं परिच्छिन्नं मन्येत तदा दोषाद्दानमनुचितं स्यादित्याशङ्क्याह अनन्यदर्शन इति न तस्य क्वचिदप्यन्यदर्शनमस्ति किन्तु सर्वमात्मत्वेनैव पश्यतीत्यर्थः प्रसङ्गाद्दोषान्तरमपि वारयति शान्ताय पूर्णायेति शान्तो दानपात्रं पूर्णश्च लोलुपताक्रोधदोषौ एवं निर्दोषपूर्णगुणपात्रे दाने अनन्तं फलं भवति ॥२४॥ एवं युधिष्ठिरमुक्त्वा स्वमुद्यममकृत्वा तूर्ष्णींभूतः अन्यथा पूजार्थं स्वयमेव बलात् सामग्रीं सम्पादयेत् तत्र हेतुः कृष्णानुभावविदिति स्वयमेव भगवदनुभावः सर्वेषां हृदयं प्रेरयिष्यति यद्यभिप्रेतोऽर्थो भविष्यति अत्र भगवद्धर्माः प्रकटीभविष्यन्तीति भगवदिच्छायां सन्देहात् तूर्ष्णीं भावः ततो भगवदिच्छया तद्वाक्यं सर्वसम्मतं जातमित्याह–तच्छ्रुत्वेति । सर्व एव सोऽर्थः सर्वयुक्तिसह इति साधु साध्विति त्यक्त्वा भगवन्तं सहदेवं तुष्टुवुः दैत्यांशानां स्तोत्रं तेषां नाशप्रतिबन्धकमिति तत्र भगवदिच्छाभावात् सत्तमा एव तथोक्तवन्तः ॥२५॥

श्रीसुबोधिनीसारः

विविधानि नानाप्रकाराणि कर्माणि इह लोके जनयन् स्वयं कुर्वन्सन् यस्यावेक्षयाऽनुग्रहेणायं सर्वो जनो यद्यस्मात् धर्मादिलक्षणं श्रेयो मङ्गलमीहते चेष्टते सर्वेषां यद्रूपत्वादेवं चेत्कुर्यात् सर्वभूतानामात्मनश्च तर्हि अर्हणं पूजनं स्यात् ॥२२-२३॥ परमपात्रत्वादस्मै दत्तमनन्तफलमित्याह । सर्वभूतानामात्मभूतायानन्यदर्शिने एकरूपं पश्यते शान्ताय पूर्णाय कृष्णाय दत्तस्य दानस्यानन्त्यमिच्छता पुंसा देयं दातव्यम् ॥२४॥ एवमुक्त्वा कृष्णस्यानुभावं वेत्तीति सहदेवो मौनी आसीत् तत् श्रुत्वा सर्वे सत्तमाः अतिश्रेष्ठाः साधु साध्विति तुष्टुवुः प्रशशंसुः ॥२५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्तर्यामित्वात् फलदातृत्वाच्चास्मत् श्रेष्ठत्वमित्याह–विविधानीति । "तं साधु कर्म कारयति यमूर्ध्वं निनीषति" इति श्रुतेः । यदवेक्षया यस्य प्रेरणया अयं सर्वोऽपि जनः इह संसारे विविधानि कर्माणि जनयन् कुर्वन् यतः यस्मादेवं धर्मादिलक्षणं श्रेयः फलमीहते साधयति प्राप्नोति सः श्रैष्ठ्यमर्हतीत्यन्वयः ॥२२॥ तस्मात्सर्वथा सर्वश्रेष्ठत्वान्महते कृष्णायैव परमार्हणम् अग्रपूजासाधनं दीयताम्, एवं कृष्णः प्रथमं पूज्यते चेत् तेनैव सर्वभूतानामात्मनः पूजकस्य चार्हणं पूजनं भवेत् ॥२३॥ पूर्वोक्तं स्पष्टयन् न केवलं पूजनमात्रयोग्योऽयम्, किन्तु सर्वस्वार्पणयोग्य एवायम् इत्याह–सर्वेति । दक्षस्य दानस्यानन्त्यं फलानन्त्यमिच्छता कामयमानेन यद्देयं तत्कृष्णाय देयमित्यन्वयः । फलस्यानन्तत्वे हेतुमाह–शान्तायेति । रागलोभादिराहित्येनात्युदारायेत्यर्थः । शान्तत्वे हेतुमाह–पूर्णायेति । पूर्णानन्दरूपायेत्यर्थः । ननु 'कृष्णस्यार्हणमात्मनः कथं स्यात्' इत्याशङ्क्य तस्य सर्वात्मकत्वात् इत्याह–सर्वभूतानामात्मभूतायेति । तस्य सर्वात्मकत्वादेवं भेददर्शनाभावादेव फलादाने सङ्कोचो नास्ति इत्याशयेनाह–अनन्यदर्शन इति ॥२४॥ कृष्णप्रभावाभिज्ञः सहदेव इत्येवमुक्त्वा तूर्ष्णीं बभूव । तत्सहदेवोक्तं श्रुत्वा सर्वे सत्तमाः श्रेष्ठाः द्वैपायनादयो द्विजाः 'साधूक्तं साधूक्तम्' इति तं तुष्टुवुः प्रशशंसुः ॥२५॥

अन्वितार्थप्रकाशिका

एक इति ॥ हे सभ्याः ! यस्मात् असौ अद्वितीयः सजातीयविजातीयभेदरहितः अजः एक इव सृष्टेरग्रे आसीदतः सर्वोपादानत्वादिदं जगदैतदात्म्यम् एष श्रीकृष्ण आत्मा यस्य तत् । स्वार्थे ष्यञ् । एष एव च आत्मा स्वयमेवाश्रयो यस्यात्मनः सः स्वरूपस्थः आत्मना उपकरणभूतेन विश्वं सृजत्यवति हन्ति च ॥२२॥ विविधानीति ॥ यदवेक्षया यस्य प्रेरणया यदनुग्रहेण च अयं सर्वोऽपि नः इह संसारे विविधानि कर्माणि जनयन् यतः यस्मादेव धर्मादिलक्षणं श्रेयः फलमीहते साधयति प्राप्नोति । कर्माणि तत्फलानि यदधीनानि इत्यर्थः ॥२३॥ तस्मादिति ॥ तस्मात्सर्वथा सर्वश्रेष्ठत्वान्महते कृष्णायैवपरमार्हणम् अग्रपूजासाधनं दीयताम् । एवं कृष्णः प्रथमं पूज्यते चेत् तेनैव सर्वभूतानामात्मनः पूजकस्य चार्हणं पूजनं भवेत् ॥२४॥ सर्वेति ॥ दत्तस्य दानस्यानन्त्यं फलानन्त्यमिच्छता कामयमानेन पुरुषेण यद्देयं तत् सर्वभूतानाम् आत्मभूताय अनन्यदर्शिने भेददृष्टिरहिताय शान्ताय रागादिरहिताय आत्मलाभेन पूर्णाय कृष्णाय देयम् ॥२५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यस्यावेक्षया अनुग्रहदृष्ट्या नानाविधकर्माणि स्वधर्मलक्षणानि भक्तिलक्षणानि च जनयन् कुर्वन् सन् अयं सर्वो जनः यद्यस्मात् श्रीकृष्णात् धर्मादिचतुर्वर्गलक्षणं श्रेय ईहते निष्पादयति ॥२२॥ आत्मनः स्वस्य सभासद्वृन्दस्य च ॥२३॥ नन्वेकस्यैव पूजनेन सर्वेषां पूजनं कथं स्यादिति चेत्तत्राह सर्वेति ॥ सर्वभूतानां चेतनाचेतनवृन्दानामात्मभूताय अन्तर्यामिरूपाय अनन्यमेकान्तिकभक्तं पश्यतीत्येवं शीलः अनन्यदर्शी तस्मै ॥ २४-२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवंभूतश्चेदसौ किमित्यस्मदादिवच्चेष्टते अत आह ॥ विविधानीति ॥ यदवेक्षया यस्य लोकस्य अवेक्षया अनुजिघृक्षया, धर्मादिलक्षणं धर्मादिरूपम्, आदिशब्दः मोक्षसंग्राहकः । सर्वं, श्रेयः जनयन्, 'लक्षणहेत्वोः' इति शत्रादेशः । श्रेयः सम्पादयितुमित्यर्थः । इह लोके, विविधानि कर्माणि, अयं कृष्णः, यद्यस्मात्, ईहते चेष्टते । तस्मादित्युत्तरेण सम्बन्धः ॥२२॥ तस्मादिति ॥ तस्मात्, महते सर्वोत्तमाय, कृष्णाय, परमार्हणं दीयताम् । अग्र्यपूजायां श्रीकृष्णस्यैवार्चनं क्रियतामित्यर्थः । एवं चेत् श्रीकृष्णायार्हणं दीयते चेत्, सर्वभूतानाम्, आत्मनो दातुश्च, अर्हणं भवेत् । श्रीकृष्णस्य सर्वान्तरात्मत्वात्सर्वेषां बहुमानं कृतं भवेदिति भावः ॥२३॥ एतदेव व्यञ्जयन् पुनर्हेतुतया विशंषन्नाह ॥ सर्वेति ॥ सर्वभूतात्मभूताय सर्वभूतानामन्तरात्मभूताय, अत एव, अनन्यदर्शिने अन्यत् स्वस्मात् पृथग्भूतं पश्यतीति अन्यदर्शी ततो नञ् समासः । तस्मै, सर्वशरीरायेत्यर्थः । शान्ताय रागद्वेषादिरहिताय, पूर्णाय स्वभावतोऽवाप्तसमस्तकामाय नित्यसंतोषिणे इति यावत् । कृष्णायैव, दत्तस्य आनन्त्यम्, इच्छता, देयम् ॥२४॥ इतीति ॥

कृष्णप्रिया

यह अखिल विश्व भगवान् श्रीकृष्णचन्द्रजी के अनुग्रह से विविध प्रकार के कर्मो का अनुष्ठान करता हुआ धर्म अर्थ काम एवं मोक्षरूप पुरुषार्थों का सम्पादन करता है ॥२२॥ मेरा तो विनम्र मन्तव्य है कि सर्वश्रेष्ठ भगवान श्रीकृष्ण की ही अग्रपूजा होनी चाहिये । इनकी अग्रपूजा में सर्व विश्वका समर्चन हो जायेगा । इनकी अर्चना करने में समस्त प्राणियोंकी और साथमें अपनी भी अर्चना हो जाती है ॥२३॥ जो धर्मानुरक्त सज्जन अपने दान-धर्मको अनन्त भावसे युक्त करना चाहता हो तो उसे चाहिये कि समस्त प्राणियोंके और समस्त पदार्थों के अन्तरात्मा भेदभावरहित परमशान्त और परिपूर्ण भगवान श्रीकृष्ण की ही अग्रपूजा की जाय ॥२४॥ राजन् ? सहदेवजी भगवान श्रीकृष्णका स्वरुप सामर्थ्य और महिमा प्रभावको अच्छी तरह से जानते थे धर्मराजजी को इतना ही कहकर शान्त हो गये । उस समय महाराज धर्मराज की राजसूय परिषद्य में जितने सज्जन समुपस्थित थे सर्वने एक मतसे अच्छा बहुत अच्छा ठीक है बहुत ठीक है एसा कहकर के सहदेव की बातका अनुमोदन किया ॥२५॥

श्रुत्वा द्विजेरितं राजा [1]ज्ञात्वा हार्दं सभासदाम् । समर्हयद्धृषीकेशं प्रीतः प्रणयविह्वलः॥२६॥
तत्पादाववनिज्यापः शिरसा लोकपावनीः । सभार्यः सानुजामात्यः[2] सकुटुम्बोऽवहन्मुदा॥२७॥
वासोभिः पीतकौशेयैर्भूषणैश्च महाधनैः । अर्हयित्वाश्रुपूर्णाक्षो नाशकत् समवेक्षितुम्॥२८॥
इत्थं सभाजितं वीक्ष्य सर्वे प्राञ्जलयो जनाः । नमो जयेति नेमुस्तं [3]निपेतुः पुष्पवृष्टयः॥२९॥

कर्दमक्षमा

राजा, द्विजेरितम्, श्रुत्वा, सभासदाम्, हार्दम्, ज्ञात्वा, प्रीतः, प्रणयविह्वलः, राजा, हृषीकेशम्, समर्हयत् ॥२६॥ तत्पादौ, अवनिज्य, लोकपावनीः, आपः, सभार्यः, सानुजामात्यः, सकुटुम्बः, शिरसा, मुदा, अवहत् ॥२७॥ पीतकौशेयैः, वासोभिः, च, महाधनैः, भूषणैः, अर्हयित्वा, अश्रुपूर्णाक्षः, समवेक्षिणुम्, न, अशकत् ॥२८॥ इत्थम्, सभाजितम्, वीक्ष्य, सर्वे, जनाः, प्राञ्जलयः, तम्, नमः, जय, इति, तम्, नेमुः, पुष्पवृष्टयः, निपेतुः ॥२९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

द्विजेरितं साधु साध्विति घोषं श्रुत्वा हार्दमभिप्रायम् ॥२६-३१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्पादौ कृष्णाङ्घ्री ॥२७-२८॥ सभाजितमर्चितम् । तं कृष्णम् ॥२९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सभासदामन्येषां च सर्वेषां हार्दं सम्मतिमित्यर्थः । यद्वा श्रीकृष्णे स्नेहं ज्ञात्वा च प्रीतः सानन्दस्सन् निजाभीष्टसिद्धेः अत एव प्रणयेन तत्प्रेम्णा विह्वलोऽपि समर्हयत् सम्यगर्हयत् कुतः हृषीकेशं प्रणयकोपेन तत्र मुहुः कृतवर्जनमपि स्वभावतः कृतसर्वेन्द्रियाकर्षम् ॥२६॥ सम्यक्त्वमेव दर्शयति-तदिति द्वाभ्याम् ॥२७॥ महाधनैरमूल्यैरित्यर्थः । इदं वास आदीनां सर्वेषामेव विशेषणम् ॥२८॥ नम इति केचित् जयेति केचित् केचित्त्वत्यन्तहर्षेण नमो जयेति च वदन्तः ॥२९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

द्विजा विप्रास्त्रैवर्णिका वा, तेषामीरितं सभासदामन्येषां च सर्वेषां च मत्वा तेनैव तेषां हार्दं सम्मतिमित्यर्थः; यद्वा, श्रीकृष्णे स्नेहं ज्ञात्वा च प्रीतः सन् निजाभीष्टसिद्धेः, अतः प्रणयेन विह्वलः सन् सम्यगर्हयत् । हृषीकेशमिति राज्ञः प्रीत्यर्थमेव द्विजादीनामन्तर्यामितया तत्र प्रेरणाभिप्रायेण; यद्वा, प्रणयविह्वलोऽपि समर्हयत् । कुतः ? हृषीकेशं तेनैव कृपया तत्र तत्रेन्द्रियप्रवर्तनादित्यर्थः ॥२६॥ सम्यक्त्वमेव दर्शयति-तदिति द्वाभ्याम् । शिरसा वहन् सन्, इति तत्र भक्त्यतिशय उक्तः, यतो लोकपावनी गङ्गारूपेण त्रिलोकपावित्र्यकरीः, किंवा लोका ये पूर्वपुरुषा भूत्याः पौराः प्रजाश्च, तेषां सर्वेषां पावनीः, स्वयं वहनेन तेषामपि पावित्र्यसिद्धेः । भार्य्या द्रौपदी, कुटुम्बानि पुत्रादयः, भार्य्यादीनां यथापूर्वं नैकट्याधिक्येन तत्तत्क्रमेण वहनम्, तत्र भार्य्यायाः सर्वतोऽधिकनैकट्यतया पादप्रक्षालनार्थं जलार्पणात्; मुदेत्यस्य परेणाप्यन्वयः । सभार्य्य इत्यादिकञ्चाग्रेऽप्यनुवर्त्यम्; अकारप्रश्लेषे च सति पृथग्वाक्यम् ॥२७॥ सुमहाधनैरमूल्यैरित्यर्थः । वासआदीनां सर्वेषामेव विशेषणम्; यद्वा, अन्यैश्च सुमहाधनैर्महारत्नादिभिस्तम्, महाधनैरिति पाठे तं कृष्णं सम्यगवधानेनेक्षितुं नाशकत्, किन्तु तं दिदृक्षुरपि प्रेमवैवश्येनेषदेव द्रष्टुं शक्त इत्यर्थः । यत आनन्दाश्रुभिः पूर्णे अक्षिणी यस्य सः ॥२८॥ इत्थमिति । तादृक्प्रेमसभाजनेन तद्वीक्षकाणामपि सर्वेषां प्रेमोदयं सूचयति – नम इति केचित्, जयेति च केचिदित्येवं किंवा सर्व एवात्यन्तहर्षेण नमो जयेति वदन्तः, नितरां सभादिव्यापनेन, पेतुराकाशात् ॥२९॥

---

१. जातहार्द-वीर. । २. जोऽव्यग्रः-गो. प्रे. टी. । ३. खात्पेतुः-विज. ।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अवनिज्य प्रक्षाल्य ॥२७-४५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

श्रुत्वेति। द्विजेरितं साधु साध्विति घोषं श्रुत्वा सभासदां सभ्यानां जातं हार्दमभिप्रायं ज्ञात्वा चेति शेषः। यद्व जातमभिव्यक्तं हार्दमभिप्रायो यस्मात्तद्द्विजेरितं श्रुत्वेत्यर्थः राजा युधिष्ठिरः प्रीतः प्रीतियुक्तः प्रणयेन स्नेहेन विह्वलः परवशः समार्चयत् ॥२६॥ अर्चनप्रकारमेवाह-द्वाभ्याम्। तस्य भगवतः पादाववनिज्य प्रक्षाल्य लोकान्पावयन्ति पुनन्तीति तथा ता अपः भार्यादिसहितः शिरसा वहन् ॥२७॥ पीतैः कौशेयैश्च वासोभिर्महाधनैर्बहुमूल्यैरनर्घ्यैरिति यावत् भूषणैश्चार्हयित्वा अश्रुभिः आनन्दाश्रुभिः पूर्णे अक्षिणी यस्य सः तं भगवन्तमवेक्षितुं नालं न प्रबभूव ॥२८॥ इत्थमिति। इत्येवं सभाजितं सम्पूजितं भगवन्तमवलोक्य नमो जयेति वदन्त इति शेषः। तं श्रीकृष्णं नेमुः नमश्चक्रुः ॥२९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

॥२५-३०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-४४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

द्विजानामीरितं साधुसाध्विति घोषं समर्हयत भो कृष्ण त्वं सर्वलोकानां पादावनेजनकर्मणि स्वगृहीते व्यग्रो वर्तसे साम्प्रतं परन्तु ब्रह्मरुद्रादिसर्वाग्रपूज्यस्य तव पादावनेजनार्थं व्यग्रो राजा त्वामाकारयति तत्त्वं शीघ्रं गच्छेति सान्देशिकलोकद्वारा सम्यक्प्रकारेणानीय अर्हयत् पूजयामास आडभाव आर्षः। हृषीकेशं स्वपादावनेजने मैवम्मैवं कुर्विति प्रणयकोपिनमपि सर्वेन्द्रियाण्याकर्षन्तम् ॥२६-२९॥

गूढार्थदीपिनी

साधूक्तं साधूक्तमिति वदन्तः सर्वे सत्तमा श्रेष्ठा-मुन्यादयः अन्वमोदन् तुष्टुवुश्च ॥२६॥ हार्दं हृद्गताभिप्रायम्। समार्हयत् पूजयामास ॥२७॥ राजा सकुटुम्बः पादौ प्रक्षाल्य ताः अपः शिरसा अवहत् धारयामास ॥२८॥ महाधनैः बहुमूल्यैः भूषणैः अर्हयित्वा पूजयित्वा द्रष्टुं न शशाक यतोऽश्रुपूर्णाक्षः ॥२९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ॥२७-३१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सहदेव इत्युक्त्वा तूष्णीमभूत्। युक्तियुक्तं वचो ग्राह्यं बालादपीति सन्तो वसन्तस्तत्र सर्वमन्वमोदन्तेत्याह॥ तदिति। ननु भारते कस्मै भवान्मन्यते धर्मस्तस्मै कुरुनन्दन। उपनीयमानं युक्तं च तन्मे ब्रूहि पितामहेत्यारभ्य सदा हि न इत्यन्तग्रन्थेन भीष्मोक्त्यवगमात्सहदेवमात्रोक्तिरत्र। तथा जानमानोऽपि नृपतिः सर्वपूज्यतमं हरिम्। संशयं भूभृतां भेत्तुं भीष्मं पप्रच्छ धर्मवित्। इत्यारभ्य सन्ति राजान एव चेति धर्मपृष्टः। इति पृष्टोऽब्रवीद्भीष्मः कृष्णं पूज्यतमं हरिमित्याचार्योक्तेश्च कथमिति चेत्सत्यम्। प्रथमवक्ता देवव्रतः सहदेवं प्रति सहदेवस्तु सभ्यान्प्रति वक्तेति वचनशाबल्येनार्थः सम्भावित इत्यनुक्तौ सम्भवतः। उक्तं च तत्रैव भारते। तस्मै भीष्माभ्यनुज्ञातः सहदेव इति। अत्र देवव्रतस्तत्र सहदेवश्च ग्राह्याविति न विरोधः। न च बादरायणे जामदग्न्ये च सति मूलपुरुषे गुरौ च साम्ये च भगवत्त्वेन कृष्णमेवायमपि किमित्युवाचेति वाच्यम्। देव एव देवव्रतं भाविकार्यविवक्षयाऽत्रैरयत्तथेश्वरः। न च तयोरपि कृतेऽग्रपूजने तत्सम्पद्येतेति वाच्यम्। विप्रत्वात्तयोः पूज्यता विहितैवेति न कलहः स्यात्। न स स्याच्चेच्छिशुपालसङ्कलनं न स्यात्। अतोऽवतारो यदर्थस्तदनिष्पत्तिरिति। अतोऽप्यवदन्नाचार्यः।

यद्यप्येकस्त्रिधा विष्णुर्वसिष्ठभृगुवृष्णिषु । प्रादुर्भूतस्तथाऽप्येते नृपा हि व्यासरामयोः ॥
विप्रत्वान्न विरुद्ध्यन्ते तत एव हि युक्तताम् । मन्यन्ते न विरोधश्च तेषां तत्र हि तादृशः ॥
अविवादे प्रसिद्धिश्च नैवास्य भवति क्वचित् । तस्मात्कृष्णाय दातव्यमिति भीष्मेण चिन्तितम् ॥
कृष्णस्य दत्ते राजानो विवादं कुर्युरञ्जसा । विवादेन च कीर्तिः स्याद्वासुदेवस्य विस्तृता ।
ततः कृष्णायाग्रपूजा दत्ता पार्थैर्जगत्पुरः । व्यासभार्गवयोः साक्षात्तदैक्यात्तदनन्तरमिति ॥
सत्तमाः साधुश्रेष्ठाः साधु साध्विति तुष्टुवुः । कनीयानप्ययं महीयानिति स्तुतिं चक्रुः ॥२६॥

अनुजेन सहदेवेनेरितं सभासदां च हार्दं प्रीतः प्रणयविह्वलो हृषीकेशं समर्हयत्समार्हयत् ॥२७॥ तत्पादाववनिज्यापो लोकपावनीः शिरसा सभार्यः सभास्वामी । अर्यः स्वामिवैश्ययोरिति स्मरणात् । सकुटुम्बः कुटुम्बसहितो दीक्षितत्वेन सहभार्य इति । भार्यायाः कुटुम्बात्पृथक्कृत्योक्तिरिति वा । आवहद्दधार ॥२८॥ पीतकौशेयैर्वासोभिर्महाधनैरतुल्यमौल्यैर्भूषणैरर्हयित्वा सम्पूज्याश्रुपूर्णाक्षस्तं समवेक्षितुं नाशकन्न शशाक ॥२९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः सर्वसम्मतिं ज्ञात्वा शापादिभयं परित्यज्य भगवत्पूजार्थं प्रवृत्त इत्याह-श्रुत्वा द्विजेरितमिति । सर्वैरेव द्विजैरीरितं राजत्वात्तेषां भावमपि जानाति तदाह ज्ञात्वा हार्दं सभासदामिति अत्र वादिनामविवादं मन्यन्ते सभासदां तत इन्द्रियप्रेरकमन्तर्यामिनं तत्प्रेरितस्सन् समर्हयन् प्रीत इत्यन्तःकरणेन पूजनं प्रणयविह्वल इतीन्द्रियैः शरीरेण तु पूजयत्येव ॥२६॥ तत्पूजाप्रकारमाह-तत्पादाववनिज्येति । चरणोदकधारणमतिश्रद्धाबोधकम् अन्यथा अश्रद्धयेति दानं व्यर्थं स्यात् अतः अपि लोकपावनीः शिरसा अवहत् सभार्य इति सम्पूर्णः सानुगामात्य इति सेवकामात्यसहितः सकुटुम्बश्च अनेन सर्वेषां श्रद्धा सम्मतिश्चोक्ता ॥२७॥ ततः पीताम्बरादिभिः पूजनमाह-वासोभिरिति । योग्यत्वाय पीतकौशेयैः पीतपट्टवस्त्रैः महाधनैर्भूषणैश्च पूजनं हर्षश्चान्तरस्थः भक्त्या पूजनं नाङ्गविकलं भवतीति ज्ञापयितुमाह-अर्हयित्वेति । अश्रुभिः पूर्णे अक्षिणी यस्येति भगवद्दर्शनेन चक्षुस्तेजःप्रसवसहितं जातमित्यर्थः । ततो यथाभिलषितेनापि न द्रष्टुं शक्त इत्याह नाशकत्समवेक्षितुमिति दृशनोपभोगेनापि तत्र व्ययितमिति तस्याधिदैविकसमाराधनं पूर्णमेव स्थितमिति सूचितम् ॥२८॥ अयमुत्तमाधिदैविको धर्मो भवतीति ज्ञापयितुं सर्वसभाजनमाह-इत्थं सभाजितमिति । कायवाङ्मनोभिः स्तोत्रं मात्सर्याभावश्चोच्यते प्राञ्जलय इति कायिको व्यापारः नेमुरिति मानसः जयेति वाचनिको मात्सर्याभावश्च न केवलं तत्रत्यानां किन्तु दिविष्ठानामपीति ज्ञापयितुमाह-निपेतुः पुष्पवृष्टय इति अयं धर्मः सर्वोत्तमो जात इति ज्ञापनार्थम् ॥२९॥

श्रीसुबोधिनीसारः

द्विजैर्ब्राह्मणैरीरितं कथितं साध्विति श्रुत्वा सभासदां सभास्थितानां हार्दं मनोभिप्रायं ज्ञात्वा प्रीतो राजा स्नेहविह्वलो हृषीकेशं श्रीकृष्णं समार्चयत् ॥२६॥ तस्य कृष्णस्य पादौ चरणाववनिज्य प्रक्षाल्य लोकपावनीर्विश्वशुद्धिकर्त्रीः तदपो जलानि स्त्रीसहितः अनुजैर्भीमादिभिरमात्यैः सहितः सकुटुम्बो युधिष्ठिरो मुदा हर्षेण शिरसावहत् अधात् ॥२७॥ पीतपट्टैर्वस्त्रैर्महाधनैरमूल्यैर्भूषणादिभिरर्हयित्वा पूजित्वाश्रुभिः पूर्णे अक्षिणी यस्य स संद्रष्टुं नो समर्थोऽभूत् ॥२८॥ इत्थमेवंप्रकारेण सभाजितं श्रीकृष्णं त निरीक्ष्य दृष्ट्वा कृताञ्जलयः सर्वे जना नमो जयेति नेमुः प्रणामं चक्रुः पुष्पवृष्टयः पेतुः ॥२९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

द्विजेरितं साधु साध्विति वचनं श्रुत्वा सभासदां सभ्यानामपि हार्दम् अभिप्रायं तथैव ज्ञात्वा राजा युधिष्ठिरः प्रीतः प्रसन्नचित्तः प्रणयेन स्नेहेन विह्वलः परवशः हृषीकेशं सर्वेन्द्रियनियन्तारं श्रीकृष्णं सम्यक् अर्हयत् अडवाभ आर्षः पूजयामास ॥२६॥ तत्प्रकारमाह-तस्य कृष्णस्य पादाववनिज्य प्रक्षाल्य लोकान् पावयन्तीति तथाभूतास्ता अपः भार्यादिसहितः शिरसा वह मूर्धनि धारयन् ॥२७॥ पीतैः कौशेयैर्वासोभिः महाधनैर्बहुमूल्यैः भूषणैश्च कृष्णमर्हयित्वा आनन्दाश्रुभिः पूर्णे अक्षिणी यस्य स अतस्तं सम्यक् अवेक्षितुं नाशकत् ॥२८॥ इत्येवं कृष्णं सभाजितं सम्पूजितं वीक्ष्य सर्वे जनाः प्राञ्जलयः सन्तो नमो जयेति वदन्तस्तं नुमुः, आकाशात्पुष्पवृष्टयश्च पेतुः ॥२९॥

अन्वितार्थप्रकाशिका

इतीति ॥ कृष्णानुभाववित् सहदेव इत्येवमुक्त्वा तूर्ष्णी बभूव । तत्सहदेवोक्तं श्रुत्वा सर्वे सत्तमाः श्रेष्ठाः द्वैपायनादयो द्विजाः साधूक्तं साधूक्तमिति तं तुष्टुवुः प्रशशंसुः ॥२६॥ श्रुत्वेति ॥ द्विजेरितं साधु साध्विति वचनं श्रुत्वा सभासदां सभ्यानामपि हार्दम् अभिप्रायं तथैव ज्ञात्वा राजा युधिष्ठिरः प्रीतः प्रसन्नचित्तः प्रणयेन स्नेहेन विह्वलः परवशः हृषीकेशं श्रीकृष्णं सम्यक् आर्हयत् । आडभाववान् पाठस्तु आर्षः ॥२७॥ तदिति ॥ कृष्णस्य पादाववनिज्य प्रक्षाल्य लोकान्यावयन्तीति तथाभूतास्ता अपः मुदा भार्यादिसहितः शिरसाऽवहत् मूर्धनि अधारयत् ॥२८॥ वासोभिरिति ॥ पीतैः कौशेयैर्वासोभिः महाधनैर्बहुमूल्यैः भूषणैश्च कृष्णमर्हयित्वा आनन्दाश्रुभिः पूर्णे अक्षिणी यस्य अतस्तं सम्यक् अवेक्षितुं नाशकत् ॥२९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

द्विजैरीरितं साधु साध्वित्यादिनादं श्रुत्वा ॥ हार्दमभिप्रायम् ॥२६॥ अवनिज्य प्रक्षाल्य अपः पादप्रक्षालनजलानि ॥२७-२९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

राजा युधिष्ठिरः, द्विजेरितं ब्राह्मणैरुच्चारितं साधु साध्विति घोषं श्रुत्वा, सभासदां हार्दं ज्ञात्वा, प्रीतः प्रीतियुक्तः सन्, प्रणयविह्वलः संश्च, हृषीकेशं श्रीकृष्णं, समर्हयत्समार्चयत् ॥२६॥ अर्चनप्रकारमेवाह द्वाभ्याम् ॥ तत्पादाविति ॥ तत्पादौ श्रीकृष्णस्य चरणौ, अवनिज्य प्रक्षाल्य, लोकान् पावयन्ति पुनन्तीति लोकपावन्यस्ताः अपः, सभार्यः भार्यासहितः, सानुगामात्योऽनुगैरमात्यैश्च सहितः, सकुटुम्बः कुटुम्बिजनसहितः सन्, मुदा शिरसा, अवहत् ॥२७॥ वासोभिरिति ॥ पीतकौशेयैः वासोभिः, पीतवर्णैः कौशेयैर्वसनैरित्यर्थः । महाधनैः भूषणैश्च, अर्हयित्वा सम्पूज्य, अश्रुपूर्णाक्षः आनन्दाश्रुपूर्णनयनः राजा, समवेक्षितुं सम्यक् अवेक्षितुमित्यर्थः । न अशकत् समर्थो नाभूत् ॥२८॥ इत्थमिति ॥ इत्थमुक्तप्रकारेण, सभाजितं राज्ञा सम्पूजितं, भगवन्तं वीक्ष्य, प्राञ्जलयः सर्वे जनाः, नमः, जय, इत्युक्त्वा, तं कृष्णं, नेमुः, पुष्पवृष्टयः निपेतुः ॥२९॥

कृष्णप्रिया

श्रीयुधिष्ठिरजी महाराजश्री ने सज्जनो की और विप्रवरों की यह आज्ञा और अनुमति सुनकर और पिषद्य के पुण्यजनों का अभिप्राय जानकर बडे हर्षसे एवं स्नेहसे विह्वल होकर भगवान् श्रीकृष्णचन्द्रजी की अग्रपूजा की ॥२६॥ आपनी धर्माङ्गना अपने भाइ मन्त्री और कुटुम्बिजनों के महाराज धर्मराजने अत्यंत प्रेम और आनन्द से भगवान के चरणकमलों का और पादावनेजन लोकपावन जलको अपने मस्तक पर धारण किया ॥२७॥ महाराज युधिष्ठिरजी ने भगवान् श्रीकृष्णचन्द्रजी को पिताम्बर और अनमोल अलंकार समर्पित किये । उस सुमंगल अवसर पर महाराज धर्मरा के नेत्र भावाश्रुओं से और आनन्दाश्रुओंसे इस प्रकार भर गये कि वे भगवान श्रीकृष्णचन्द्रजी को भलीभांती देख नही सकते थे ॥२८॥ राजसूय सभा के सर्व सभासद भगवान् श्रीकृष्णचन्द्रजी को समर्चित देखकर एवं सत्कृत देख कर करसंपुटबद्ध होकर नमोनः जय जय इस प्रकार के नारे लगाते हुए प्राणप्यारे नन्ददुलारे द्वारिकाधीशजी को नमस्कार करने लगे । उस सुअवसर पर आकाश से स्वयं ही पुष्पवर्षा होने लगी ॥२९॥

इत्थं निशम्य दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजातमन्युः ।
उत्क्षिप्य बाहुमिदमाह [1]सदस्यमर्षी संश्रावयन् भगवते परुषाण्यभीतः ॥३०॥
ईशो दुरत्ययः काल इति सत्यवती श्रुतिः । वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ॥३१॥
यूयं पात्र विदां श्रेष्ठा मा मन्ध्वं बालभाषितम् । सदसस्पतयः सर्वे कृष्णो यत् सम्मतोऽर्हणे ॥३२॥
तपोविद्याव्रतधरान् ज्ञानविध्वस्तकल्मषान् । परमर्षीन् ब्रह्मनिष्ठान् लोकपालैश्च पूजितान् ॥३३॥

---

[1] स्यमर्षा त्संश्राव-विज. ।

कर्दमक्षमा

दमघोषसुतः, इत्थम्, निशम्य, कृष्णगुणवर्णनजातमन्युः, स्वपीठात्, उत्थाय, सदसि, अमर्षी, बाहुम्, उत्क्षिप्य, अभीतः, भगवते, परुषाणि, संश्रावयन्, इदम्, आह ॥३०॥ श्रुतिः, सत्यवती, कालः, दुरत्ययः, ईशः, यत्, बालवाक्यैः, वृद्धानाम्, अपि, बुद्धिः, विभिद्यते ॥३१॥ यूयम्, सर्वे, सदसस्पतयः, पात्रविदाम्, श्रेष्ठाः, यत्, कृष्णः, अर्हणे, सम्मतः, इति, बालभाषितम्, मा, मन्ध्वम् ॥३२॥ तपोविद्याव्रतधरान्, ज्ञानविध्वस्तकल्मषान्, लोकपालैः, पूजितान्, च, ब्रह्मनिष्ठान्, परमर्षीन्, सदस्पतीन्, अतिव्रज्य, कुलपांसनः, गोपालः, वर्णाश्रमकुलापेतः, सर्वधर्मबहिष्कृतः, स्वैरवर्ती, गुणैः, हीनः, काकः, यथा, पुरोडाशम्, सपर्याम्, कथम्, अर्हति ॥३३-३४-३५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

हे सदसस्पतयः ! यूयं सर्वे बालस्य भाषितं मा मन्यध्वं मा जानीत मा गृह्णीतं किं तत्तु यद्यतः कृष्णोऽर्हणे अग्रपूजायां सम्मतस्तत् ॥३२-३३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्थं साधु साध्विति उत्क्षिप्योर्ध्वं कृत्वा। इदं वक्ष्यमाणम्। परुषाणि निष्ठुराणि ॥३०॥ सत्यवती अबाधितार्था। तदुपपादयति-वृद्धानां वयःश्रुतजात्याद्यधिकानाम्। यद्यस्मात्। बालवाक्यैः पौर्वापर्यविचारशून्योक्तिभिः ॥३१॥ अक्षराधिक्यमार्षम्। तद्बालभाषितं किम् ॥३२-३३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत्र यद्यपि शिशुपालदन्तवक्त्रयोर्जयविजयत्वेन नान्तरासुरभावः किन्तु बहिस्तदनुकरणमेवेति हिरण्याक्षयुद्धटीकाकृद्भिर्मुहुर्दर्शितमस्ति युक्तञ्च तत् अन्यथा लीलेयं भक्तसौख्याय स्वसौख्याय च न कल्पतेति तदुद्देश्यविरोधः स्यात् अन्तरानुकूल्यादेव सिद्धायामेव पूजायां तादृशं वक्तुमारेभे तस्मादनयोर्वचस्यर्थान्तरं वास्तवम् अन्येषान्तु गीर्देवीप्रेरितमेव तथापि युद्धरसपोषणार्थं यथादृष्टमेव स्पष्टमाह-इत्थमिति। निशम्य श्रीसहदेववचनमारभ्य नमो जयेत्यन्तं श्रुत्वा दमघोषसुत इति पितुरपि दुष्टत्वेन तस्य तदाधिक्यं सूचितं तथैव श्रीहरिवंशे गोमन्थदाहमन्त्रणे व्यक्तं श्रीकृष्णस्य गुणवर्णनेनापि किम्पुनरर्हणेन जातो मन्युः क्रोधो यस्य सः यस्मादमर्षी असहिष्णुः मत्सरीत्यर्थः। यद्वा जातमन्युर्जातशोकः अमर्षी क्रुद्धश्च सन् अत एव वस्वपीठादुत्थाय बाहुं दक्षिणमुत्क्षिप्य च सम्यक् समीप एवोच्चैर्भाषणादिना अश्रावयत् यस्मादभीतः महासाहसिक इत्यर्थः ॥३०॥ आदौ स्वमतग्रहणार्थमुपालम्भगर्भं सभ्याननुनयन्नाह-ईशः दुर्घटघनाशक्तः न च परिहर्तुं शक्य इत्याह दुरत्यय इति सत्यवती सत्या श्रुतिरैतिह्यं वेदो वा कुतः अपूर्वप्रवर्तनादित्याह वृद्धानामिति यद्यस्मात् कालात् ॥३१॥ ननु, सा बुद्धिः कानामेत्यपेक्षायामाह-यूयमिति। बालस्य सहदेवस्य भाषितं मा मन्यध्वम् अधुनापि पूजां परिवर्तयध्वमित्यर्थः। तत्र हेतुः पात्रविदां श्रेष्ठाः अग्रपूजापात्रं यूयमेव वेत्थ न त्वयं बाल इत्यर्थः। यद्यस्मात् भाषितात् कृष्ण इति मूलनामग्रहणमनादरेण वास्तवार्थे सा श्रुतिः सत्यैव किन्तु यूयं बालस्य मूर्खस्य मम भाषितं मा मन्यध्वं यतः पात्रविदां श्रेष्ठाः तत्र हेतुः यद्यस्मात् श्रीकृष्णो नराकृतिरपरब्रह्मरूपोऽयमर्हणे सम्मत इति ॥३२॥ किञ्च, पूजायोग्यान्याभावे कथञ्चिदर्हतु अत्र च तद्योग्येषु महत्सु कथमयमर्हतीत्याह-तप इति युग्मकेन। तपः स्वधर्मः विद्याः चतुर्दश व्रतं कृच्छ्रादि तद्धरान् अतिव्रज्य अति क्रम्येति वा पाठः। कुलपांसनः मातुलवधादिना स्वकुलदूषणः वास्तवार्थे त्वेवमवतारिका किन्तु तप इत्यादि वाख्या चेयं ज्ञेया गोपालः आभीरजातिरिति प्राकृतदृष्ट्या तद्वाक्येऽप्यस्मिन् वेदागमोक्तमहामन्त्रगणाधिदैवत्वेनाप्राकृततल्लीलत्वात् स्वतः परममाहात्म्यविशेषः सिद्धः तथापि बाह्यमहिमदृष्ट्यैव वेदपृथिव्यादिपालक इति व्याख्यातम् ॥३३-३४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्थमनेनोक्तप्रकारणेन निशम्य नमो जयेत्यादिकं श्रुत्वा, निशाम्येति वा पाठः। ईदृशं सभाजनं दृष्ट्वा, दमघोषस्य सुत इति पितुरपि दुष्टत्वेन तस्य तदधिकं सूचितम्। तच्च श्रीहरिवंशोक्तेन दमघोषस्य गोमन्त-दाहमन्त्रप्रदानादिना व्यक्तमेव। कृष्णस्य सर्वचित्ताकर्षकस्य, अतस्तादृशानां गुणानां वर्णनेनापि, किं पुनरर्हणेन जातो मन्युः क्रोधो यस्य सः, यतोऽमर्षी असहिष्णुर्मत्सरीत्यर्थः;

यद्वा, जातमन्युर्जातशोकः, अमर्षी क्रुद्धश्च सन्, अत एव स्वपीठादुत्थाय बाहुं दक्षिणमुत्क्षिप्य च, सम्यक् समीपे उच्चैर्भाषणादिना श्रावयन्, यतोऽभीतो मरणभयरहितो महासाहसिक इत्यर्थः ॥३०॥ आदौ स्वमतग्रहणार्थं सभ्याननुनयन् अकृत्यस्यापि करणे कालमेव कारणमाह-ईश इति, दुर्घटमपि सर्वं कर्तुं शक्तः, न च केनापि कथञ्चिदयं परिहर्तुं शक्य इत्याह-दुरत्यय इति। सत्यवती सत्या श्रुतिर्वेदः, लोकतः श्रवणं वा। कुतः ? अपूर्वप्रवर्तनादित्याह-वृद्धानामिति। यद्यस्मात् कालात् ॥३१॥ ननु सा च बुद्धिः का नामेत्यपेक्षायामाह-यूयमिति। बालस्य शिशोः श्रीसहदेवस्य भाषितं मा मन्यध्वम्। तत्र हेतुः - पात्रविदां श्रेष्ठाः, अग्रपूजापात्रं यूयमेव वेत्थ, न त्वयं बाल इत्यर्थः। यद्यस्माद्भाषितात्, कृष्ण इति सुश्यामवर्णाभिप्रायेण ॥३२॥ पूजायोग्यान्याभावे कथञ्चिद्वा अहर्तु, अत्र च तद्योग्येषु बहुषु महत्सु सत्सु कथमयमर्हेदित्याह-तप इति द्वाभ्याम्। तपः स्वधर्म्मः, विद्याश्चतुर्दश, व्रतं कृच्छ्रादि तद्धरान्, विशेषणानामेषां यथोत्तरं श्रैष्ठ्यम्, अतिव्रज्य अतिक्रम्य।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥२७-४५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थमेवम्भूतं श्रीकृष्णस्य गुणवर्णनं श्रुत्वा दमघोषसुतः शिशुपालः जातो मन्युर्यस्य सः स्वासनादुत्थाय बाहुमुत्क्षिप्य उद्धृत्य अमर्षी क्रुद्धोऽभीतश्च भगवते परुषाणि वचांसि संश्रावयन् संश्रावयितुम् इदं वक्ष्यमाणमाह इत्यर्थः ॥३०॥ तदेवाह-ईश सप्तभिः। ईशः ब्रह्मादीनामपि प्रभुः कालो दुरत्ययः दुरतिक्रमणीयः इत्येवंविधा श्रुतिः किम्वदन्ती सत्यवत् यथार्था कुतः यत् यस्मात् वृद्धानामपि बुद्धिः बालस्य सहदेवस्य वाक्यैः भिद्यते विपरीता क्रियते इत्यर्थः ॥३१॥ यूयमिति। हे सदसस्पतयः बालभाषितं मा मन्ध्वं मा गृह्णीत किन्तत् यदर्हणे कृष्णः सम्मत इति तत् ॥३२॥ तपइत्यादि। तपोऽनशनादि विद्या शास्त्रजन्यं ज्ञानं व्रतं कृच्छ्रादि एतानि धरन्तीति तथा तान् ज्ञानं परमात्मोपासनात्मकं तेन विध्वस्तं कल्मषं पापं येषां तान् ब्रह्मणि परस्मिन् निष्ठा येषां तान् साक्षात्कृतब्रह्मस्वरूपानित्यर्थः। एवम्भूतान् परमर्षीनतिक्रम्यानादृत्य कुलाधमोऽसौ गोपालः काकः पुरोडाशमिव सपर्यां प्रति कथमर्हति ॥३३-३४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

ईशः कालो दुरत्ययः इति श्रुतिः सत्यवती अबाधितार्था तदुपपादयति। वृद्धानामिति ॥३१॥ मा मन्ध्वं हे सर्वे सदसस्पतयः ! किं बालभाषितं तदाह कृष्ण इति ॥३२-३३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-४४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥५-४४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥५-४४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अमर्षी असहिष्णुरतो जातमन्युः अत्र पूजाया आरम्भकाले नोक्तं किन्तु पूजासमाप्त्यनन्तरमेवेत्यत्र शिशुपालस्यायमभिप्रायः यद्यहमधुनैव विप्रतिपद्य बहूनेव हेतूनुपन्यस्य कृष्णस्यापूज्यत्वं प्रतिपादयामि ततो निरस्तीकर्तुमशक्यतमस्य ममैव मतं गृहीत्वा सभ्याः कृष्णमपूजयित्वा कमप्यन्यमेव योग्यमग्रपूजायां व्यवस्थापयिष्यन्ति यज्ञश्च साधुप्रवर्तिष्यते तस्मात् यज्ञं विजिघांसुरहं साम्प्रतं तूष्णीमेव वर्तिष्ये कृष्णे खलु पूजिते सत्येव तस्यापूज्यत्वे मत्प्रतिपादिते —

अपूज्या यत्र पूज्यन्ते पूज्यानां च व्यतिक्रमः। प्रति बध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥

इत्यादिस्मरणात् युधिष्ठिरस्यायं यज्ञो नष्ट इत्युक्त्वा मयि मत्सङ्गिषु च बहुषु राजसु वेदविद्विप्रेषु चास्य भ्रातृबन्धुषु दुर्योधनादिषु चोत्थाय गतेषु हाहाकारे प्रवृत्ते मदभीष्टं सेत्स्यतीति ॥३०-३१॥ हे सदसस्पतयः मा गृह्णीतेत्यर्थः। वाग्देवीमते दुर्योधनादिषु विपक्षेषु बालभाषितमिदं मा मन्ध्वं किन्त्विदमेव तत्त्वं वेदभाषितमित्यर्थः ॥३२॥ तपोविद्येत्यादि विशेषणानि सदसस्पतीन् प्रीणयित्वा स्वपक्षे स्थापयितुमुपन्यस्तानि ॥३३॥

गूढार्थदीपिनी

कृष्णं सभाजितं पूजितं वीक्ष्य सर्वे प्राञ्जलयः सन्तः नमो नमो जय जय इति वदन्तः नेमुः । तदैव खात् आकाशात् पुष्पवृष्टयश्च पेतुः ॥३०॥ इत्थं निशम्य दमघोषसुतः शिशुपालः बाहुमुत्क्षिप्य सदसि अभीतः सन् इदं वक्ष्यमाणमाहेत्यन्वयः । किं कुर्वन् सन् । भगवते परुषाणि कटुवचनानि संश्रावयन् । कथम्भूतः । कृष्णगुणवर्णनेन जातो मन्युर्यस्य सः अमर्षी प्रशंसाम् असहमानः ॥३१॥ कालः ईशः सर्वसमर्थः दुरत्ययोऽनुल्लङ्घ्यः । बालवाक्यैः अज्ञवाक्यैः विभिद्यते विपरीता क्रियते ॥३२॥ हे सदसस्पतयः । सर्वे यूयं बालभाषितं मा मन्यध्वं किन्तु सत्यमेव । यत् अर्हणे सम्मत एव ॥३३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

॥२७-३१॥ हे सदसस्पतयः ! बालभाषितं मा मन्यध्वं मा जानीत मा गृह्णीत यत् कृष्णोऽर्हणे सम्मतस्तत् ॥३२-३६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तं कृष्णं जयेत्युक्त्वा नेमुः । खात्पुष्पवृष्टयः पेतुः ॥३०॥ दमघोषसुतः शिशुपालः कृष्णगुणवर्णनेनोत्पन्नकोपो भगवतेऽमर्षात्परुषाणि संश्रावयन् । अभीतो बाहुमुत्क्षिप्य सदसीदमाह ॥३१॥ ईशः कालः दुरत्यय इति श्रुतिः सत्यवती सत्यभूता । गतेरर्थवत्त्वमिति यथा । किं तद्याथार्थ्यं पश्यसीत्यत आह ॥ वृद्धानामपीति । बालवाक्यैर्वृद्धानां ज्ञानेन वयसा च बुद्धिर्विभिद्यते भिन्ना भवत्यतः कालो बलीयान्कालो बलीयानिति साधुवाद इत्यादेः । सर्वेषां मौग्घ्य(मौग्ध्य)मेकदैवायातमिति भावः ॥३२॥ हे सदसस्पतयः पात्रविदां श्रेष्ठा यूयं सर्वे बालभाषितं सहदेवभाषितं मा मङ्ध्वं न जानीत न तथा कुरुत । किं तदित्यत आह ॥ यत्सम्मतोऽर्हण इति । कृष्णोऽर्हणे सम्मत इति यत्तन्मा मङ्ध्वम् ॥३३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

दैत्यांशस्यानभिनन्दनं प्रद्वेषो निन्दा च भगवतश्चाभिप्रेतोऽर्थ इति स्वतस्तन्मारणं सर्वात्मकत्वात् तस्यापि भोगार्थं बाधकांशं निराकृत्य सायुज्यमपि निरूप्यते तत्रादौ तद्दर्शनेन दैत्यक्षोभमाह इत्थं निशम्येति सर्वेषामनुमोदनं स्तोत्रं च निशाम्य विपरीतमदस्य दुष्टमदस्य यो घोषः सर्वलोकेषु वम्बारवः तदात्मको दमघोषः सत्सुतः बीजयोनिदोषेण दुष्टः स्वतोऽपि उपविष्टश्चेत् ब्रूयात् तदा सर्वोऽपि न श्रोष्यतीति स्वपीठादुत्थाय भगवता स्वधर्मप्राकट्ये कृते सिंहासने भगवद्धर्मः प्रकटो जात इति सन्तत उत्थापित इति वस्तुस्थितिः तस्यानधिकारं सूचयति कृष्णगुणवर्णनेन जातो मन्युर्यस्येति स एव दैत्यांशो ज्ञेयः भगवत्सम्बन्धिनमर्थं श्रुत्वा न सहते सन्तप्तश्च भवति प्रतिकूलं च वदति ततश्च दैत्यसन्धानं यज्ञे न युक्तमिति भगवत्प्रेरणयैव तस्यातथावचनम् अन्यथा वध्यो न भवति देवा मनुष्याः पितर एकत्र असुरा रक्षांसि पिशाचाश्चैकत्र "अपहता असुरा रक्षांसि पिशाचा वेदिषः" इति मन्त्रलिङ्गात्सर्वथा निराकार्याः असुरादयः तत्रायं बन्धुवेषेण गुप्त इति अशक्यवधो भवति तदर्थमेतावन्निरूप्यते उत्क्षिप्य बाहुमिति क्रियाशक्तिः स्वस्य महती सूचयति इदं वक्ष्यमाणमाह सदसस्यतीति तस्यापराधः सर्वजनीनो भवत्विति ज्ञापितं सदसि वा सर्वानेव भगवतः अपरुषाणि अभीक्ष्णशः श्रावयन्निति सर्वेषामेव शत्रुरयमिति ज्ञापितम् अभीत इति सर्वेषामशक्यवधः ॥३०॥ तादृशस्य सर्वोपालम्भवाक्यमाह-ईशो दुरत्ययः काल इति । सदसस्पतयो हि सभायां युक्तायुक्तं विचारयन्ति अतस्तान् प्रत्युपालम्भ उचितः यत् दैत्यांशः समीपे स्थितोऽपि न निवार्यत इति यदत्रानुचितं जायते धर्मस्थाने हेतुः काल एव स हि कदाचित् धर्ममङ्गीकरोति कदाचिदधर्ममिति द्विःस्वभावः स च ईशः कस्याप्यनुल्लङ्घ्यः इति कालमाहात्म्यवादिनी श्रुतिः सत्यैव स कालो यद्वशे लोक इति कालस्य त्वया विपरीते धर्मदृष्ट इत्याकाङ्क्षायामाह-वृद्धानामपि यद्बुद्धिरिति उभयथापि सभासदो वृद्धाः निन्दापक्षे सहदेवो बालः स्तुतिपक्षे शिशुपालः नाम्ना शिशुश्चासौ पालश्चेति पलसमूहः पालः मांसराशिः न तु कश्चित् तत्र धर्महेतुरिन्द्रियवर्गो जीवो वा तिष्ठति इति पलाशानामेव योग्यः कालस्यैतद्विपरीतं यदेतद्वाक्येनापि वृद्धानामपि बुद्धिः भेदं प्राप्स्यतीति स्वस्यानुगुणः काल इति एकोऽपि सभायां तथा विरुद्धं वदामीति ज्ञापितवान् एतत् द्वितीयं सभासदां दूषणम् ॥३१॥ पुनः स्ववाक्यश्रवणार्थं तान् स्तौति यूयं पात्रविदां श्रेष्ठा इति न केवलया विद्यया तपसा वापि पात्रतेति पात्रस्वरूपं ते जानन्तीति ते पात्रविदः तेषां श्रेष्ठाः पात्रसूक्ष्मविदः अत एव वा निर्धारो न कर्तव्यः किन्तु स्वबुद्ध्यैव कर्तव्यः यतो यूयं सदसस्पतयः सभायां निवृत्तिहेतवः तादृश एव सर्वे भवन्त इत्यपि स्तुतिः तादृशानामनुचितांशमाह कृष्ण इति कृष्णशब्दो दुष्टमुखान्निर्गतः मालिन्ययोगात् मलिनमेव वक्ति तथैव

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

शिशुपालाभिप्रायश्च ततो योगात् तादृशः शिशुपाल एव भवति तादृशोऽयं यद्यस्मात् अर्हणसमीपे सम्मतः तिष्ठत्विति सम्मतः इदं सभासदामुचितमित्यर्थः । यतो यज्ञे कालविलम्बो भविष्यति ॥३२॥ ननु भगवानपि क्षत्रियः सन्निहितबन्धुः ततश्च समीपस्थितौ को हेतुरिति चेत् तत्राह–तपोविद्याव्रतधरानिति । निन्दापक्षे लोकप्रसिद्ध एवार्थः तपोविद्ययोः पात्रलक्षण एव साधनं स्पष्टं व्रतस्यापि हेतुत्वमाचारहीनं न पुनन्ति वेदा इति व्रतशब्दो नियमवाचकः किं बहुना भगवद्व्रतधारका अत्र सन्ति पात्रगुणानुक्त्वा दोषाभावमाह ज्ञानविध्वस्तकल्मषानिति । ज्ञानाग्निः सर्वकर्माणीति वाक्यात् सर्वापेक्षया ज्ञानं पापनिवर्तकम् एतावत्साधारणब्राह्मणेष्वपि सम्भवति यूयन्तु परमर्षयः मन्त्रद्रष्टारः अनेन पूर्वकाण्डप्रवर्तकत्वमुक्तं तत्रापि ब्रह्मनिष्ठाः उत्तरकाण्डस्य प्रवर्तकाः लोके च तथात्वेन सम्मता इत्याह–लोकपालैश्च पूजिता इति । लोकपानामपि फलं दातुं शक्ताः ॥३३॥

श्रीसुबोधिनीसारः

एवं श्रुत्वा कृष्णस्य गुणानां वर्णनेन कथनेन जातो मन्युः क्रोधो यस्य स दमघोषस्य सुतः पुत्रः शिशुपालः स्वपीठात्स्वासनादुत्थाय सदसि सभायां बाहुं भुजम् उत्क्षिप्य ऊर्ध्वं कृत्वाऽभीतो निर्भयोऽमर्षी क्रुद्धो भगवते परुषाणि क्रूरवचनानि संश्रावयन् इदमाह ॥३०॥ काल ईशः प्रेरको दुरत्ययो दुरतिक्रमणीय इति श्रुतिः सत्यवती सत्या यत् यतो वृद्धानामपि बुद्धिर्बालानां ज्ञस्य वाक्यैर्विभिद्यते ॥३१॥ पात्रविदां श्रेष्ठाः सर्वे यूयं बालोक्तं मा मन्यध्वं किं तदित्यत आह अर्हणे पूजने प्रथमे कृष्णः सम्मत इति यत् हे सदसस्पतयः ॥३२॥ ज्ञानेन विध्वस्तं विनष्टं कल्मषं पापं येषां तान् तपोविद्याव्रतधारिणो लोकपालैरिन्द्राद्यैः पूजितान् ब्रह्मनिष्ठान् परमर्षीन् ॥३३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्थं कृष्णगुणवर्णनं निशम्य श्रुत्वा दमघोषसुतः शिशुपालः स्वपीठात् स्वासनादुत्थाय सदसि सभामध्ये बाहुमुत्क्षिप्योद्धृत्य भगवते कृष्णाय परुषाणि निन्दावचनानि संश्रावयन् इदं वक्ष्यमाणमाहेत्यन्वयः । एवं निन्दने हेतुमाह–कृष्णगुणवर्णनेन जातो मन्युः क्रोधो यस्य स इति । क्रोधे हेतुमाह–अमर्षीति, कृष्णोत्कर्षमसहमान इत्यर्थः । ननु तथापि तत्र कृष्णपक्षपातिनां बहुत्वात् कथं तन्निन्दने प्रवृत्तः ? तत्राह–अभीत इति ॥३०॥ तदुक्तिमाह–ईश इति सप्तभिः । काल ईशः सर्वं कर्तुं समर्थः, अत एव दुरत्ययः केनाप्यनुल्लङ्घ्यः इति कालमाहात्म्यवादिनी श्रुतिः सत्यवती यथार्था, यत् यस्मात् कालप्रभावात् ज्ञानवयोवृद्धानामपि बुद्धिर्बालस्य न्यूनवयस्कस्याज्ञस्य वाक्यैर्विभिद्यते भ्रान्ता भवति ॥३१॥ एवं कृष्णार्चनानुमोदनकर्तॄनाक्षिप्य तूष्णीं स्थितान् प्रत्याह–यूयमिति । हे सदसस्पतयः ! यूयं सर्वे पूजापात्रविदां मध्ये श्रेष्ठाः, अतः अर्हणे पूजायां कृष्णः सम्मत इति यत् बालस्याज्ञस्य भाषितं तत् मा मन्ध्वं मागृह्णीत ॥३२॥ तत्र हेतुमाह–तपः अनशनादि, विद्या अध्ययनाद्यभ्यासः, व्रतं कृच्छ्रादि, तान् धरन्तीति तथा तान् ज्ञानेन आत्मपरमात्मविषयकयथार्थज्ञानेन विध्वस्तं पापं येषां तान् परमर्षीन् मन्त्राद्यर्थज्ञान् ब्रह्मनिष्ठान् सात्कृतब्रह्मस्वरूपान् अत एव लोकपालादिभिः पूजितान् ॥३३॥

अन्वितार्थप्रकाशिका

इत्थमिति ॥ इत्येवं कृष्णं सभाजितं सम्पूजितं वीक्ष्य सर्वे जनाः प्राञ्जलयः सन्तो नमो जयेति वदन्तस्तं नेमुः । खात् आकाशात्पुष्पवृष्टयश्च पेतुः । निपेतुः इत्यपि पाठः ॥३०॥ इत्थमिति ॥ इत्थं कृष्णगुणवर्णनं निशम्य कृष्णगुणवर्णनेन जातो मन्युर्यस्य सः अमर्षी अभीतश्च दमघोषसुतः शिशुपालः स्वपीठात् स्वासनादुत्थाय सदसि सभामध्ये बाहुमुत्क्षिप्योद्धृत्य भगवते परुषाणि निन्दावचनानि संश्रावयन् इदं वक्ष्यमाणमाह स्म । अत्र तोषिणी । शिशुपालदन्तवक्त्रयोः पार्षदत्वाद्बहिरेवासुरभावानुकरणम् । अतः साङ्गोपाङ्गपूजानन्तरमेव कृष्णनिन्दनं तस्मात्तद्वचसि अर्थान्तरं वास्तवम् । अन्येषु गीर्देवीप्रेरणात् युद्धरसपोषार्थमेतद्वच इति ॥३१॥ ईश इति ॥ काल ईशः सर्वं कर्तुं समर्थः अत एव दुरत्ययः केनाप्यनुल्लङ्घ्यः इति कालमाहात्म्यवादिनी श्रुतिः । सत्यवती यथार्था यत् यस्मात् कालप्रभावात् ज्ञानवयोवृद्धानामपि बुद्धिर्बालस्य न्यूनवयस्कस्याज्ञस्य सहदेवस्य वाक्यैर्विभिद्यते भ्रान्ता भवति ॥३२॥ यूयमिति ॥ हे सदसस्पतयः ! यूयं सर्वे पूजापात्रविदां मध्ये श्रेष्ठाः । अतः अर्हणे पूजायां कृष्णः सम्मत इति यत् बालस्याज्ञस्य भाषितं तत् मा मन्ध्वं मा गृह्णीत । श्यनो लोपः आर्षः । क्वचिन्मा मन्यध्वमिति नवाक्षरपादपाठः । वास्तवार्थस्तु सहदेववचनं बालभाषितं मा मन्यध्वं किन्तु सत्यमेव । अतः कृष्णोऽर्हणे सम्मत एव ॥३३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इत्थं निशम्य ॥ सहदेवोक्तमारभ्य नमो जयेत्यन्तं श्रुत्वा ॥ अमर्षी मत्सरी सन् ॥ परुषाणि कठोरवचनानि ॥३०॥ यत् यस्मात्कालात् ॥३१॥ हे सदसस्पतयः सर्वे यूयं श्रीकृष्णोऽर्हणे सम्मत इति यत् बालभाषितं तत् मा मन्ध्वं मा मन्यध्वमिति वक्तव्ये मन्ध्वमिच्युच्चारणमार्षम् ॥३२-३३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमिति ॥ इत्थमेवम्भूतं श्रीकृष्णगुणवर्णनं निशम्य, दमघोषसुतः शिशुपालः, कृष्णगुणवर्णनजातमन्युः सन्, स्वपीठात् स्वकीयासनात् उत्थाय, बाहुम् उत्क्षिप्य उद्धृत्य, अमर्षी संक्रुद्धः, अभीतो भयवर्जितः, भगवते, पुरुरुषाणि वचांसि, सदसि सभायामेव, संश्रावयन् संश्रावयितुम्, इदम् आह ॥३०॥ तदेवाह ईश इति सप्तभिः ॥ ईश इति ॥ ईशः कालः, दुरत्ययः, इति श्रुतिः, सत्यवत्यबाधितार्था । यद्यस्मात्, बालवाक्यैः मूर्खवचनैः, बालः 'वाच्यलिङ्गोऽर्भके मूर्खे' इति मेदिनी । वृद्धानामपि, बुद्धिः विभिद्यते ॥३१॥ यूयमिति ॥ हे सदसस्पतयः, पात्रविदां श्रेष्ठाः सर्वे यूयं, कृष्णः अर्हणे सम्मतः यत्, तत् बालभाषितं मूर्खवचनं, मा मन्ध्वं सत्यं मा गृह्णीत ॥३२॥ तप इति ॥ तपोऽनशनादिकं च विद्या शास्त्रजन्यं ज्ञानं च व्रतं कृच्छ्रादि च एतानि धरन्तीति तान्, ज्ञानं परमात्मोपासनात्मकं तेन विध्वस्तं कल्मषं पापं येषां तान्, ब्रह्मणि परब्रह्मणि निष्ठा येषां तान्, साक्षात्कृतब्रह्मस्वरूपानित्यर्थः । लोकपालैः पूजितांश्च, परमर्षीन् ॥३३॥

कृष्णप्रिया

दमघोषसुत शिशुपाल यह अर्चना और सत्कार प्रसङ्ग अपने आसन पर बेठा हुआ देख रहा था और सुन रहा था और वह सत्कार और गुणगान भावान श्रीगोविन्द का था तब सुनते ही क्रोध हो आया और वह उठकर खडा हो गया पुनः शिशुपाल भरे दरबार में अपना हाथ उठाकर सम्पूर्ण असहिष्णुता परन्तु निर्भयता के साथ भगवान को सुनाता अत्यन्त कठोर वचनें कहने लगा ॥३०॥ हे सभासद ! भगवती श्रुति का यह कहना सर्वथा सत्य हैउ कि काल ही इश्वर है । वह काल अपना कार्य करा ही लेता है इसका प्रत्यक्ष प्रमाण हमने देख लिया कि जहां बालकों और मूर्खों की बात से बडे बडे बुद्धिमान वयोवृद्ध और ज्ञानवृद्धों की बुद्धि भी चकरा गयी है ॥३१॥ लेकिन मेरा मंतव्य है कि आप लोक अग्रपूजा के योग्य पात्र का नीर्णय करने में सर्वथा सर्वविध समर्थ है । इसलिए, हे सदसस्पतियों आप सर्व बालक सहदेव की यह बात ठीक न मानें कि कृष्ण ही अग्रपूजा के योग्य है ॥३२॥ इस परिषदमें एक से एक श्रेष्ठी तपस्वी, विद्यासंपन्न्, व्रतधारी, ज्ञान के माध्यम से अपने समस्त पाप-ताप-संताप को समाप्त करने वाले एवं परमज्ञानी महर्षि, ब्रह्मनिष्ठ आदि उत्तम पुरुष समुपस्थित है कि जिनकी पूजा समर्थ लोकपाल भी करते है ॥३३॥

[1]सदस्पतीनतिव्रज्य [2]गोपालः कुलपांसनः । यथा काकः पुरोडाशं सपर्यां कथमर्हति ॥३४॥
वर्णाश्रमकुलापेतः सर्वधर्मबहिष्कृतः । स्वैरवर्ती गुणैर्हीनः [3]सपर्यां कथमर्हति ॥३५॥
ययातिनैषां हि कुलं शप्तं सद्भिर्बहिष्कृतम् । वृथापानरतं शश्वत् सपर्यां कथमर्हति ॥३६॥
ब्रह्मर्षिसेवितान् देशान् [4]हित्वैतेऽब्रह्मवर्चसम् । समुद्रं दुर्गमाश्रित्य बाधन्ते दस्यवः प्रजाः ॥३७॥

कर्दमक्षमा

ययातिना, एषाम्, कुलम्, हि, शप्तम्, च, सद्भिः, बहिष्कृतम्, शश्वत्, वृथापानरतम्, सपर्याम्, कथम्, अर्हति ॥३६॥ ब्रह्मर्षिसेवितान्, देशान्, हित्वा, अब्रह्मवर्चसम्, समुद्रम्, एते, दुर्गम्, आश्रित्य, दस्यवः, इव, प्रजाः, बाधन्ते ॥३७॥

---

१. क्रम्य-श्रीधर. वंशी.वीर. विज. । २. गोपोऽयं-वीर.विज. । ३. मत्तं सपर्यां-विज. । ४. तद्ब्रह्मवर्चसम् - वीर. ; ते ब्रह्मवर्चसः विजः ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्यैव वास्तवोऽर्थः पूर्ववदुन्नेयः गोपाल इति वेदपृथिव्यादिपालक इत्यर्थः। कुत्सितं वेदविपरीतं लपन्तीति कुलपाः पाषण्डास्तान् अंसते समाघातयतीति तथा सः अकाकः कञ्च अकञ्च काके सुखदुःखे ते न विद्येते यस्य सोऽकाकः आप्तकाम इत्यर्थः। स यथा आप्तकामो देवयोग्यं केवलं पुरोडाशमात्रं नार्हत्यपि तु सर्वस्वमपि तथाऽयं श्रीकृष्णोऽपि ब्रह्मर्षियोग्यं सपर्यामात्रं कथमर्हति किन्त्वात्मसमर्पणमप्यर्हतीत्यर्थः ॥३४॥ वर्णाश्रमकुलेभ्योऽपेतो ब्रह्मत्वात् "अनामगोत्रम्" इति श्रुतेः अत एवानधिकारित्वात्सर्वैर्धर्मैर्बहिष्कृतः स्वैरवर्ती जीवानां योग्यं तुच्छं सपर्यामात्रं कथमर्हतीत्यर्थः ॥३५॥ अपि च कथं वर्णनीयो मादृशैरेषां यदूनां महिमा यस्मादेषां कुलं ययातिना शप्तमपि किं सद्भिर्बहिष्कृतमपि तु शिरसा धृतं किञ्चास्मदादिकुलवर्त्कि वृथा पानरतमपित्वातिनियताचारमित्यर्थः। अहो यदूनामेव तावदीदृशं माहात्म्यं यदुकुलवृद्धस्य ययातेः शापो न प्राभूदित्यादि अयं तु साक्षादीश्वरोऽतः सपर्यामात्रं कथमर्हतीत्यर्थः ॥३६॥ किञ्च ये राजानो दुष्टानुच्चाटयन्ति तदर्थं कीकटादिदेशानप्याश्रयन्ति एते तु ब्रह्मर्षिसेवितानेव देशानाश्रित्याब्रह्मवर्चसं समुद्रं दुर्गमपि हित्वा हापयित्वेत्यर्थः। बाधन्ते, तथा याः दस्यवः प्रजास्ताश्च अयमर्थः वेदतदर्थाभियोगो ब्रह्मवर्चसं तद्विरुद्धमब्रह्मवर्चसं समुद्रं मुद्रात्र लिङ्गं तत्सहितं समुद्रं वेदविरुद्धलिङ्गधारिणं पाषण्डमित्यर्थः। तल्लिङ्गं त्याजयित्वा बाधन्ते दण्डयन्ति कथम्भूतं दुर्गं धर्मवत्प्रतीतेरधर्मतया दुर्ज्ञेयमित्यर्थः। तथा दस्यवो दस्यूनपि प्रजावेषेण वर्तमानान् दण्डयन्ति अतो यदुभ्योऽन्यः कोनामा धार्मिकोऽस्तीति पारुष्यन्तूक्तार्थमेव ॥३७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति-गोशब्दस्यानेकार्थत्वादिति ज्ञेयम्। इत्यर्थ इति - 'आप्तकामः' इत्यादिश्रुतेः साक्षाद्ब्रह्मरूपिणः कृष्णस्य। 'द्रव्यं तथा ब्रह्मणि कर्म नर्च्छति' इति दक्षोपाख्याने शिवं प्रकृत्योक्तेरिति भावः। परमेश्वरत्वात्प्रयोजकान्तराभावात्। "जगद्वशे वर्ततेऽदः कृष्णस्य सचराचरम्" इति स्मृतेः। अत एव परमेश्वरत्वादेव। एवम्भूतः साक्षात्परमात्मरूपः श्रीकृष्णः। इत्यर्थ इति-सर्वस्वार्पणमर्हतीति भावः ॥३५॥ ननु कथमयं वर्णाश्रमाद्यपेतो गृहस्थाश्रमोपेतक्षत्रवर्णययातिकुले जातत्वात्तत्राह-ययातिनेति। परमार्थमाह-अपि चेति। इत्यर्थ इति-यत्र शापो न प्रबभूवेति भावः। अन्यदाह-किञ्चेति-वृथापानं मद्यम्। तदुक्तं मेरुतन्त्रे- "वृथापानं तु देवेशि सुरापानं प्रकीर्तितम्। तन्महापातकं ज्ञेयमिति वेदे निरूपितम्॥" इत्यर्थ इति-काकुना सर्वोत्कृष्टाचारमिति भावः। अतः साक्षादीशत्वादेव। इत्यर्थ इत्युक्तार्थ एव ॥३६॥ अन्यत्तदुत्कर्षमाह-किञ्चेति। तदर्थं दुष्टोद्घाटनार्थम्। कीकटादिदेशानशुचिदेशान् "कीकटः कृपणे निःस्वेऽशुचिदेशेभगण्डयोः" इति निरुक्तिः। इत्यर्थ इति- 'ओहाक्-त्यागे' इत्यत्र त्यागपदं त्यजनं त्याजनं वा त्याग इति निरुक्तरुभयार्थपरत्वादिति भावः। अस्याशयमाह-अयमर्थ इति। तदर्थाभियोगः वेदार्थाभ्यासः 'अभ्यासे त्वभियोगः स्यादुद्यमे योजनेऽपि च' इति। "मुद्रा चिह्ने मुद्रणे च लक्ष्मीकार्षापणोर्मिषु" इति च निरुक्तिः। इत्यर्थ इति-वेदविरुद्धाचार्येव पाखण्ड इत्याशयः। तल्लिङ्गं पाखण्डचिह्नम्। इत्यर्थ इति-मूढानां पाखण्डमार्गेऽपि धर्मबुद्ध्या प्रवेशो भवतीति भावः। परुषार्थे तु समुद्राश्रयणाद्दाससाम्यमापादितम् ॥३७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, महादुष्टकंसवञ्चनार्थं गोपालनेन तस्य च वधेन को नाम दोषः इति स्वयमेवाशङ्क्याह-वर्णेति। यथाश्रुतार्थः स्पष्टः वास्तवार्थे ब्रह्मत्वेश्वरत्वपक्षस्तैर्व्याख्यातः नरलीलापक्षेऽपि यदि वर्णाश्रमकुलपितादिरूपः स्यात्तदा सपर्य्यां देवमुन्यादिभिः क्रियमाणत्वेन सर्वतः प्रसिद्धां कथमर्हति नार्हेदेवेत्यर्थः ॥३५॥ यतो ययातिनेति तं निन्दन् तत्सम्बन्धिनो यादवानपि सर्वान् निन्दति द्वाभ्याम् हि यतः शप्तं तदनुसारेण सद्भिश्च बहिष्कृतं परित्यक्तमित्यर्थः। वास्तवार्थे सद्भिर्महामुनिभिस्तत्तद्यजनादिना बहिष्कृतं तस्माच्छापादित्यर्थः। अतः पानं पृथिवीपालन यत्तत्र रतमासक्तं तर्हि कथं सपर्य्यां वृथाऽर्हति अपि तु सार्थकमेवेत्यर्थः ॥३६॥ अब्रह्मवर्चसं वेदादिरहितं समुद्रं दस्यवः पश्यतामेव सर्वस्वप्राणलुण्ठकास्सन्तः वास्तवार्थे नन्वेते समुद्रदुर्गाश्रयाद्रावणादिवदेव मन्तव्याः तत्राह ब्रह्मर्षीति अयमर्थः अन्ये रावणादयः अमनुवंशजत्वात्प्रजारूपा अपि दस्यवः सन्तो ब्रह्मर्षिसेवितान् देशान् हित्वा समुद्रं दुर्गमाश्रित्य ब्रह्मवर्चसं ब्राह्मणानां वेदानां वा तेजस्सत्कर्मादिकं बाधन्ते काक्वा तथा एते किं बाधन्ते अपि तु पालयन्त्येव तदिति महानेव विशेष इति ॥३७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अन्यत्तैर्व्याख्यातम् । तत्र गोपाल इत्युक्तेऽपि वेदागमोक्त-महामन्त्राधिदैवत्येन स्वत एव माहात्म्यविशेषे सिद्धे वेद-पृथिव्यादिपालक इति केवलगोपत्वाभिप्रायेणेति, अथवा गोपानेव, न तु यादवादीन् स्वबन्धून् आ सम्यक् लाति आदत्ते बन्धुतया स्वीकरोतीति तथा सः, इति निन्दार्थे। वास्तवार्थे च महाकारुण्यादिना संस्तुतिः सिद्धैव, कुलपांसनो मातुलवधादिना स्वकुलदूषकः ॥३४॥ ननु महादुष्टकंस-वञ्चनार्थं गोपालनेन तस्य च वधेन को नाम दोष इति स्वयमेवाशङ्क्याह-वर्णेति । लौकिकदृष्ट्या सत्क्षत्रियत्वादिना श्रीकृष्णस्य तादृशत्वाभावेऽपि तादृशी दुरुक्तिः क्रोधेन केवलमविचारादेव ॥३५॥ अतः स्वयमेवान्यथा दूषयंस्तत्सम्बन्धिनो यादवानपि सर्वान् निन्दति - ययातिनेति द्वाभ्याम्। हि यतः, शप्तम्, अतः सद्भिर्बहिष्कृतं परित्यक्तमित्यर्थः ॥३६॥ नन्वपराधाभावेऽपि केवलकामोपभोगपरेण ययातिना शप्तोऽपि श्रीयदुः सद्धर्मरतो भगवता श्रीदत्तेनानुगृहीतः परमपूज्य एवेति तद्वंश्या अपि तादृशा एवेत्याशङ्क्यान्यथा निन्दति-ब्रह्मर्षीति। देशान् आर्य्यावर्तवर्तिनस्तत्रापि मध्यत्वेन श्रेष्ठान्माथुरानित्यर्थः, अब्रह्मवर्च्चसं वेदादिरहितम्, समुद्रं दस्यवः साक्षात् सर्व्वस्वप्राणलुण्ठकाः सन्तः ॥३७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२७-४५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

किञ्च, वर्णेति। वर्णादिभ्योऽपेतः भ्रष्टः सर्वस्माद्वर्णादिप्रयुक्ताद्धर्माद्बहिष्कृतश्च स्वैरं स्वेच्छं वर्तत इति तथा गुणैर्निरवद्यैर्हीनो रहितः ॥३५॥ ययातिनेति। एषां यदूनां कुलं ययातिना तत्कूटस्थेन शप्तं सद्भिः कुलीनैर्बहिष्कृतञ्च शश्वत्सदा वृथा पापे रतं तत्परम् ॥३६॥ ब्रह्मर्षिसेवितानार्यावर्तादीन् देशान् हित्वा तपो ब्रह्मवर्चसञ्च त्यक्त्वा समुद्रं तन्मध्यस्थं दुर्गं निषिद्धं च देशमाश्रित्य दस्युवत् दुष्टसत्त्ववत्प्रजाः जानन् बाधन्ते ॥३७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अतिव्रज्यातिक्रम्य कुलकर्मणि एते इत्याह गोप इति ॥३४॥ एतदेव विवृणोति वर्णेति ॥३५॥ यदोर्वंशे जातत्वाकथं कुलाभाव इति तत्राह-ययातिनेति ॥३६॥ अब्रह्मवर्चसः गायत्रीजपसम्बन्धतेजोरहिताः ब्रह्म वेदस्तत्सम्बन्धवचोयुक्तान् देशान् वा समुद्रमित्यादिना दाशसाम्यमापादयति ॥३७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-४४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मातुलवधादिना कुलपांसनः पक्षे कुत्सितं लपन्तीति कुलपाः तान् अंसयति घाययतीति सः यथावदेव न विद्यते कं सुखमकं दुःखं च यस्य स इति प्राकृतसुखदुःखातीतस्वरूप इत्यर्थः पुरोडाशार्पणमात्रीं सपर्य्यामिन्द्रादिवत् कथमर्हति अपि तु स्वात्मार्पणमेवेत्यर्थः ॥३४॥ वर्णाश्रमेति स्पष्टम् पक्षे वर्णाश्रमकुलानि आ सम्यक्प्रकारेण आप्नुवन्तीति वर्णाश्रमकुलपाः श्रीवसुदेवादयस्तैः पुत्रादित्वेन इतः प्राप्तः सर्वैर्धर्मैर्बहिष्कृतो रहितः स्वैरवर्ती च परमेश्वरत्वात् गुणैः सत्त्वादिभिर्हीनः शुद्धसत्त्वस्वरूपत्वात् एवम्भूतोऽयं सपर्य्यामात्रं कथमर्हति अपि तु स्वात्मार्पणमपि ॥३५॥ ययातीति स्पष्टम्, पक्षे ययातिना शप्तमपि सद्भिस्तस्मात् शापात् बहिष्कृतं (किम्) अत एव कार्तवीर्य्यादिभिः साम्राज्यमपि प्राप्तम् अत एव पानं पृथ्वीपालनं तत्र रतं तस्माद्वृथा सपर्य्यां कथमर्हति अपि तु सार्थकमेव ॥३६॥ एते यदवो दस्यवः अब्रह्मवर्चसं ब्रह्मतेजोरहितं समुद्रं समुद्रगतं दुर्गं द्वारकाख्यम् आश्रित्य प्रजा बाधन्ते पक्षे ब्रह्मर्षिसेवितानपि देशान् माथुरान् हित्वा तत्र दुर्गाभावात्त्यक्त्वा ब्रह्मवर्चसं ब्रह्मतेजोमयं समुद्रगतं द्वारकाख्यं दुर्गमाश्रित्य बाधन्ते कानित्यपेक्षायामाह-दस्यवः शिशुपालाद्याः प्रकर्षेण बलवत्त्वे जायन्ते उत्पद्यन्त इति प्रजास्तानित्यर्थः ॥३७॥

गूढार्थदीपिनी

तप इति युग्मम्। कुलं क्षत्रियकुलं पांसयति समाघातयति। पसि समाघाते धातुः। यद्वा। कुलस्य पांसुं धूलिं करोतीति। पांसुशब्दात् तत्करोतीति णिच् ल्युट्। पुरोडाशं देवभोग्यम्। तण्डुलपिष्टनिर्मितकूर्माकारो बलिः पुरोडाश उच्यते। वस्तुतस्तु कुत्सितं वेदविपरीतं लयन्तीति कुलपाः पाखण्डाः तान् अंसयति समाघातयतीति तथा। अंस समाघाते धातुः। यथा यथावत् गोपालः वेदपालकः। न विद्यते कं सुखमकं दुःखं च यस्य स काकः पूर्णकामः स सपर्यामात्रं कथमपि तु आत्मसमर्पणमपि ॥३४-३५॥ निन्दा तु स्पष्टैव। स्तुतिस्तु। अपेतो हीनो निर्गुणत्वात् ब्रह्मत्वाच्च 'अनामगोत्रम्' इति श्रुतेः। अत एव अनधिकारित्वात् बहिष्कृतः। अत एव च जीवभोग्यं तुच्छं सपर्यामात्रं कथमर्हति ॥३६॥ ययातिना शप्तमपि कुलं किं बहिष्कृतं नेत्यर्थः। अपि तु शिरसा धृतम्। पाने पृथ्वीपालने रतमासक्तम्। वृथा कथमपि तु सफलमेव। निन्दापक्षे तु वृथापाने मद्यपाने। "वृथापानं तु देवेशि सुरापानं प्रकीर्तितम्। तन्महापातकं ज्ञेयमिति वेदे निरूपितम् ॥" इति मेरुतन्त्रे ॥३७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अब्रह्मवर्चसं ब्रह्मतेजोरहितं समुद्रदुर्गम् ॥३७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तर्हि त्वमर्हितं वद भवत्ययं गर्हित इत्यतो नान्यत्र विचार्या अत्रैवार्या वर्तन्ते तानतिहायायं वृत इत्यभिधत्ते ॥ तप इति। तपो विद्याव्रतानां धरतीति धरस्तान् ज्ञानविध्वस्तपापान् ब्रह्मनिष्ठान्परमर्षीन् व्यासादींल्लोकपालान् महेन्द्रादीन्। नैतेऽपि तादृशा इत्यत आह॥ पूजितानिति। उभयान्वयीदम् ॥३४॥ सदसस्पतींश्चातिव्रज्यातिक्रम्य कुलपांसनं कुलधूलीकारकः काकः पुरोडाशम्। पुरोडाशो हविर्भेद इति विश्वः। पुरो दाश्यत इति पुरोडाशः। दाशृ दाने कर्मणि घञ्। पौराडाशपुरोडाशात्ष्ठन् इति निपातनाड्डस्य डत्वम्। यथा नार्हति तथाऽयं सपर्यामग्रपूजां कथमर्हति। श्रद्धाजाड्यकृतो काकः कं चाकं च दुःखं च न विद्यते यस्येत्याद्यर्थः प्रकृतानुगणत इति न प्रदर्शितोऽस्माभिः प्रत्युत विरुद्धश्च।

एवमुक्त्वा ततः कृष्णमब्रवीद्यदुनन्दनं शिशुपालस्यापराधान् क्षमेथास्त्वं महाबल ॥

मत्कृते यदुशार्दूल विद्ध्येनं मे वरं प्रभो।

श्रीकृष्णः।

अपराधशतं क्षाम्यं मया ह्यस्य पितृष्वसः। पुत्रस्य ते वधार्हस्य मा त्वं शोके मनः कृधा ॥

इति सभापर्वोक्तेः। तथा स्थानान्तरे —

शृण्वन्तु मे महीपाला येनैतत्क्षमितं मया। अपराधशतं क्षाम्यं मातुरस्यैव याचने ॥

दत्तं मया याचितं च तद्वै पूर्णं च पार्थिवाः। अधुना मारयिष्यामि पश्यतां वो महीक्षिताम् ॥ इत्यादेश्च दोषाविष्कार एवं तात्पर्यं चेदपराधस्तत्सहनं च सम्भवतः सदभिप्रायस्तु। क्व नामातीव दुर्वच इति ॥३५॥ नन्दनन्दनं पुनः पुनर्निन्दति ॥ वर्णेति। तदपेतत्त्वं तद्विहितधर्माननुष्ठात इति ज्ञेयम्। स्वैरवर्ती स्वेच्छाचारी गुणैर्हीनः ॥३६॥ येषां कुलं ययातिना शप्तं जराया अग्रहणाग्रहतो न केवलं शप्तं किन्तु सद्भिश्च विगर्हितं वृथा पानरतम्। यागविशेषे सुरापानमपि विहितं नेदं तथेति वृथेत्यनेन द्योतयति। कुलं सपर्यां कथमर्हति ॥३७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एतादृशान् सदसस्पतीनतिव्रज्येति अतिक्रमदोषोऽप्युक्तः तेषामेव समीपे स्थितिरुचिता न ममेति तत्र हेतुत्वेन स्वदूषणान्याह- गोपाल इति। यथा काक इति च पञ्चगुणा सदसस्पतिषु त्रयो दोषाः स्वस्य इन्द्रियपालकः भूपालको वा क्षत्रियाधमः दशवेश्यासमो नृप इति दोषश्रवणात् तत्रापि कुलपांसनः कुलाधमः येन चैद्यवंशः सर्वोऽपि निन्दितः ते तु आसहस्रात्पङ्क्तिं पुनन्ति किञ्च यथा काकः पुरोडाशं यदि कृष्णशकुनिरुपरि उपरि अतिपतेदिति सामीप्येऽपि दोषश्रवणात् स बहिः स्थितमेव बलिमर्हति न तु वेद्यां स्थितं पुरोडाशं तत्सामीप्येऽपि हविषो नाशात्तथा अहं सपर्यां पूजां सामीप्येन कथमर्हामि निन्दायान्तु बाल्येऽन्यायवृत्तित्वं पश्चात्

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

परस्त्रीहरणादिना कीर्तिजनकत्वं यथा वा अकाकः पुरोडाशं नार्हति कं सुखमकं दुःखम् उभयरहितः अकाकः शुकादितुल्यः स यथा पुरोडाशं कर्ममार्गं नार्हति तथा अहमपि सपर्यां नार्हामीत्यर्थः । वेदरक्षकः कुलपान् कुलपवित्रीकरणदक्षान् कुलरक्षकान् वा अंसे नयतीति सत्परिपालकत्वं निरूपितं भौतिककर्माध्यक्षत्वं च नार्हतीति भगवत्परत्वेऽपि केचिद्योजयन्ति तच्छब्ददुष्टत्वादुपेक्ष्यम् ॥३४॥ पुनः स्वनिन्दार्थं दूषणान्तरमाह-ययातिनेति । ययातिना हि चत्वारः पुत्रा निन्दिताः एकः पूरुः स्तुतः अथवा ययातिना एषां पाण्डवानां कुलं शप्तं यत्पुत्रवयसा मातुः सम्भोगः कृतः स कथं परम्परयापि दोषसम्बन्धात् कथं पूतो भवेत् अत एषां गृहे कथं भगवान् सपर्यामर्हति सद्भिश्च तेन वा हेत्वन्तरेण वा विगर्हितं शश्वद्वृथापानरतं च एवमेतत्साधारणदूषणं तद्ययातिवंशोद्भवः सपर्या समीपं वा कथमर्हति ॥३५॥ कुलनिन्दां कृत्वा कुलोद्भवं निन्दति-वर्णाश्रमेति । वर्णाः आश्रमाश्चत्वारः कुलं क्षत्रियत्वजातिः एतत् त्रितयेनाप्यपेतः भगवानेव वर्णाश्रमकुलरूप इति तदपेतः शिशुपाल इति तस्य तथात्वं सर्वैरेव धर्मैर्भगवद्वैमुख्याद्बहिष्कृतः ततः स्वैरवर्ती स्वैर्बन्धुभिः सह वर्तनशीलोऽपि न भवति अन्यथा स्नेहमेव न कुर्यात् अत एव गुणैः तपसादिभिर्विहीनः सपर्यां समीपं वा कथमर्हतीत्यर्थः । केचिद्भगवत्पक्षेऽपि गुणातीत इति वर्णाश्रमकुलरहितत्वं देहाभावात् धर्मराहित्यम् इन्द्रियाभावात् स्वैरवर्तित्वं स्वेच्छावर्तित्वं तेनान्तःकरणाभावश्चेति तेन त्रितयरहितः त्रितयसहितयोग्यसपर्यां कथमर्हतीत्याहुः ॥३६॥ कुलस्वरूपनिन्दे निरूप्य व्यवहारतो निन्दामाह-ब्रह्मर्षिसेवितानिति । ननु को दोषो भवत्वित्याशङ्कायामाह-एते वयं ब्रह्मर्षिसेवितान् कुरुक्षेत्रादिदेशान् विद्याद्यर्थमनाश्रित्य अब्रह्मवर्चसं समुद्रं मुद्रासहितं भगवन्तं चक्रपाणिं दुर्गमाश्रित्य अदस्यवो भूत्वा इन्द्रियादिद्वारा कस्यापि विषयस्य ग्रहणमकृत्वा प्रकर्षेण जाताः इन्द्रियवृत्तीर्बलिष्ठाः बाधन्त इति भगवदाश्रयत्वादेव भवन्तः कृतार्था इति तेषां स्तुतिः समुद्रस्याब्रह्मवर्चस्त्वप्रदत्वात् शप्तत्वात् "सिन्धोस्तटं चन्द्रभागाम्" इति वाक्यानुसारेण अब्रह्मवर्चसि स्थित्या वस्तुतस्तु भगवन्मोहितः क्रीडार्थं स्वीकृतानि चान्यधर्मान् अनादृत्य निन्दतीति स्वकीयस्योपालम्भ इव महत्त्वख्यापका स्तुतिरेव भवति ॥३७॥

श्रीसुबोधिनीसारः

सदसस्पतीन् अतिक्रम्य युक्तमिति निषेधति गोपालः कुलनीचः सपर्यां पूजां कथमर्हति पुरोडाशं यज्ञीयं हविः काक इव ॥३४॥ वर्णाश्रमकुलेभ्योऽपेतः त्यक्तो बहिष्कृतः सर्वधर्मबाह्यः स्वेच्छाचारी गुणैर्हीनोऽयं सपर्यां कथमर्हति ॥३५॥ किञ्च ययातिना राज्ञा एषां कुलं शप्तं सद्भिरुत्तमैर्बहिष्कृतं त्यक्तम् अवज्ञातं वा वृथा प्रयोजनं विना मद्यस्य पाने रतं कथं पूजामर्हतीति ॥३६॥ ब्रह्मर्षिभिः सेवितान् माथुरादिदेशान् हित्वा त्यक्त्वाऽब्रह्मवर्चसं ब्रह्मतेजोविनाशकं समुद्रं दुर्गमाश्रित्य दस्यवः चौरा एते प्रजा बाधन्ते पीडयन्ति ॥३७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सदसस्पतीन् सभायां समीपे स्थितान् अपि अतिक्रम्य अनादृत्य कुलपांसनः क्षत्रियकुले दूषणभूतः । तत्र हेतुमाह-गोपाल इति । एवम्भूतः कृष्णः सपर्यां पूजां कथमर्हति ? अयोग्यत्वे दृष्टान्तमाह-देवयोग्यं पुरोडाशं यथा काको नार्हति तथेति ॥३४॥ पूजनार्हत्वे हेत्वन्तराण्यप्याह-वर्णादिभ्योऽपेतः भ्रष्टः । तत्र हेतुमाह-सर्वेभ्यो वर्णाश्रमप्रयुक्तेभ्यो धर्मेभ्यो बहिष्कृतः विहीनः । तत्रापि हेतुमाह-स्वैरं यथेच्छं वर्तत इति स्वैरवर्तीति । गुणैर्विवेकधैर्यदमादिभिः हीनः कृष्णः सपर्यां कथमर्हति ? ॥३५॥ एवं भगवन्निन्दां कृत्वा सर्वान्यादवान्निन्दति-ययातिनेति । कुलवृद्धेन ययातिना एषां यादवानां कुलं शप्तं राज्यानर्हं कृतम्, अतः सद्भिरपि बहिष्कृतं राज्यान्निराकृतम्, शश्वत् सदा वृथापापरतं परपीडाकरम्, 'वृथापानरतम्' इति पाठे तु यज्ञादिव्यतिरिक्ते देवताप्रसादं विनापि मद्यपाने रतम्, तत्र कुले जातः कृष्णः सपर्यां कथमर्हति ? ॥३६॥ ब्रह्मर्षिसेवितान् मथुरादिदेशान् हित्वा ब्रह्मवर्चसं वेदाध्ययनादिजनितं तेजस्तन्नाशकमब्रह्मवर्चसं दुर्गं दुर्गमं समुद्रं समुद्रमध्यस्थं द्वारकादेशमाश्रित्य दस्यव एते यादवाः प्रजा बाधन्ते ॥३७॥

अन्वितार्थप्रकाशिका

तप इति युग्मम् ॥ तपः अनशनादि विद्याभ्यासः व्रतं कृच्छ्रादि तेषां धरान् धारकान् ज्ञानेन विध्वस्तं कल्मषं पापं येषां तान् परमर्षीन् मन्त्राद्यर्थज्ञान् ब्रह्मणि निष्ठा स्थितिर्येषां तान् अत एव लोकपालादिभिः पूजितान् सदसस्पतीन् अतिक्रम्य अनादृत्य कुलं क्षत्रियकुलं पांसयति पांसुं करोति । पांसुशब्दात् तत्करोतीति णिच् ल्युट् । गोपालः सपर्यां पूजां कथमर्हति तथा देवयोग्यं

अन्वितार्थप्रकाशिका

पुरोडाशं काको नार्हति तथा वस्तुतस्तु गोपालो वेदपृथिव्यादिपालक: कुत्सितं वेदविरुद्धं लषन्ति कुलपा: पाखण्डा: तान् अंसयति समाघातयति। 'अंस समाघाते'। स परमेश्वर: कं सुखं च अकं दु:खं च काके ते न विद्येते यस्य स: आप्तकाम इत्यर्थ:। स यथा देवयोग्यं पुरोडाशमात्रं नार्हति किन्तु सर्वस्वमपि। तथाऽयं ब्रह्मर्षियोग्यं सपर्यामात्रं नार्हति किन्तु आत्मार्पणमपि अतोऽहमात्मानमेवार्पयिष्यामि ॥३४-३५॥ वर्णेति ॥ वर्णादिभ्योऽपेत: भ्रष्ट: सर्वधर्मेभ्यो बहिष्कृत: स्वैरवर्ती स्वेच्छाचार: गुणैर्हीनश्च सपर्यां कथमर्हति। वस्तुतो ब्रह्मरूपत्वात् वर्णाश्रमादिरहित: "अनामगोत्र"मिति श्रुते:। अत एवानधिकारित्वात्सर्वैर्द्धर्मैर्बहिष्कृत: स्वैरवर्ती परमेश्वरत्वात्। अत एव निर्गुण: स जीवयोग्यं तुच्छं सपर्यामात्रं कथमर्हति ॥३६॥ यादवानपि निन्दति-ययातिनेति ॥ कुलवृद्धेन ययातिना एषां यादवानां कुलं शप्तं राज्यानर्हं कृतमत: सद्भिरपि बहिष्कृतं राज्यान्निराकृतं शश्वत् सदा वृथा पापरतं परपीडाकरं वृथापानरतमिति पाठे तु सौत्रामणीयज्ञादिव्यतिरिक्तेऽपि मद्यपाने रतं तत्र कुले जात: कृष्ण: सपर्यां कथमर्हति। वस्तुत: ययातिना शप्तमपि सद्भिर्मुनिभिस्तत्तद्यजनादिना तस्माच्छापाद्बहिष्कृतं मोचितम्। यद्वा। ययातिना शप्तमपि किं सद्भिर्बहिष्कृतम् अपि तु शिरसा धृतम्। अत: पानं पृथ्वीपालनं तत्र रतमासक्तं वृथा सपर्यां कथमर्हतीति किन्तु सफलामेवेत्यर्थ:। यद्वा। वृथा स्वार्थानपेक्षमेव पालने रतम् ॥३७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सदसस्पतीन् सभासदां श्रेष्ठान् ॥३४॥ अपेतो रहित: ॥३५॥ एषां यदूनां कुलं ययातिना राज्ञा शप्तम् ॥३६॥ ब्रह्मणे वेदस्य वर्च्चो ब्रह्मवर्च्चसं नास्ति ब्रह्मवर्च्चसं पठनपाठनाभ्यां जातं सद्धर्मपालनरूपं तेजो यस्मिन् तम् ॥ दुर्गं गन्तुमशक्तं समुद्रमाश्रित्य स्थिता एते दस्यवश्चौररूपा यादवा: प्रजा: जनान् बाधन्ते लण्ठन्ते ॥३७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सदसस्पतीनिति ॥ सदसस्पतीन्, अतिक्रम्य अनादृत्य, कुलपांसन: कुलाधम:, गोपाल: श्रीकृष्ण:, काक: पुरोडाशं यथा, तथा, सपर्यां पूजां, कथम् अर्हति। इत्युभयोरेकसम्बन्ध: ॥३४॥ वर्णाश्रमेति ॥ किञ्च वर्णो ब्राह्मणादिश्च आश्रमो ब्रह्मचर्यादिश्च कुलं गोत्रं च तेभ्योऽपेतो भ्रष्ट:, सर्वेषां सर्ववर्णानां यो धर्मस्तस्मात् बहि: कृत:, स्वैरं स्वच्छन्दतया वर्तते इति स्वैरवर्ती, गुणैर्निरवद्यत्वादिभि: हीन:, सपर्यां, कथम् अर्हति ॥३५॥ ययातिनेति ॥ एषां यदूनां, कुलं, ययातिना शप्तम्। शश्वत्, वृथा, पापरतं पापतत्परं, पाठान्तरे वृथा सौत्रामण्यादिनिमित्तं विनैव मद्यपानासक्तमित्यर्थ:। अत एव, सद्भि: कुलीनै:, बहि: कृतम्। अतस्तत्कुलजनोऽयं कृष्ण इति शेष:। सपर्यां, कथम् अर्हति ॥३६॥ ब्रह्मर्षीति ॥ एते यादवा:, ब्रह्मर्षिसेवितान्, देशानार्यावर्तादीन् हित्वा, ब्रह्मवर्चसं ब्रह्मतेजोऽपि, हित्वा, समुद्रं समुद्रमध्यस्थं, दुर्गं निषिद्धदेशम्, आश्रित्य, दस्युवत् दुष्टसत्त्ववत्, प्रजा: जनान्, बाधन्ते व्यथयन्ति ॥३७॥

कृष्णप्रिया

यज्ञ की क्षति को बतलाने वाले एसे सदसस्पतियोंको त्यागकर यह कुलकलंक, गोपाल भला अग्रपूजा का अधिकारी बन सकता है ॥३४॥ इस ग्वाला का कोई वर्ण है और न तो आश्रम है, कुल भी इस कृष्ण का उत्तम नहीं है। यह सर्व धर्मो से बहिष्कृत है वेद और लोकमर्यादाओं का समुल्लङ्घन करके इसमें कोई गुण भी नही है एसी स्थिति में यह अग्रपूजा का अधिकारी कैसे हो सकता है ॥३५॥ आप सबको विदित है कि राजा ययाति ने इसके कुल को शाप दिया है इस लिए सज्जन लोगोने इस वंश का ही बहिष्कार किया है यह सर्वदा निरर्थक मधुपानमें मस्त रहते है फिर भी अग्रपूजा के योग्य कैसे हो सकते है ॥३६॥ इन सबने ब्रह्मर्षियों द्वारा संसेवित मथुरादि देशो का परित्याग कर और ब्रह्मवर्चस के विरोधी वेद चर्चा से वंचित स्थल समुद्रमें दुर्ग बनाकर निवास किया है, जब वे बाहर निकलते है तब डाकुओंकी नाइ समस्त प्रजा को सताते है ॥३७॥

एवमादीन्यभद्राणि बभाषे नष्टमङ्गलः । नोवाच किञ्चिद् भगवान् यथा सिंहः शिवारुतम् ॥३८॥
भगवन्निन्दनं श्रुत्वा दुःसहं [1]तत् सभासदः[2] । कर्णौ पिधाय निर्जग्मुः शपन्तश्चेदिपं रुषा ॥३९॥
निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा । ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः ॥४०॥
ततः पाण्डुसुताः क्रुद्धा मत्स्यकैकयसृञ्जयाः । उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥४१॥

कर्दमक्षमा

नष्टमङ्गलः, एवम्, आदीनि, अभद्राणि, बभाषे, सिंहः, शिवारुतम्, इव, यथा, तथा, भगवान्, किञ्चित्, न, उवाच ॥३८॥ सभासदः, तत्, दुःसहम्, भगवन्निन्दनम्, श्रुत्वा, रुषा, चेदिपम्, शपन्तः, कर्णौ, पिधाय, निर्जग्मुः ॥३९॥ भगवतः, च, तत्परस्य, जनस्य, वा, निन्दाम्, शृण्वन्, ततः, यः, न, अपैति, सः, अपि, सुकृतात्, च्युतः, अधः, याति ॥४०॥ ततः, क्रुद्धाः, पाण्डुसुताः, मत्स्यकैकयसृञ्जयाः, शिशुपालजिघांसवः, उदायुधाः, समुत्तस्थुः ॥४१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शिवा फेरुस्तस्या रुतं श्रुत्वा यथा सिंहो न किञ्चिद्ब्रूते तद्वत् ॥३८-४२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'शिवा क्रोष्ट्री शिवाऽभया' इति कोशात् । एवमादीनीत्युक्तेः । तस्य शतापराधक्षमणस्य भगवता प्रतिज्ञातत्वात् ।

"अपराधशतं क्षाम्यं मातुरस्यैव याचने । दत्तं मया याचितं च तानि पूर्णानि पार्थिवाः ॥
अधुना वधयिष्यामि पश्यतां वो महीक्षिताम् ॥" इति सभापर्वणि ॥३८॥

तत्सभायां सीदन्तीति तथा ॥३९॥ कुतो निर्जग्मुरिति चेदाह-निन्दामिति । तत्परस्य भगवद्भक्तस्य । ततो निन्दनस्थानात् । अपैति गच्छति । सोऽपि हरिहरिजननिन्दाश्रोतापि ॥४०॥ ततो निन्दाश्रुतेः ॥४१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नष्टमङ्गलः सन्निहितमृत्युरित्यर्थः । वस्तुस्त्वनष्टं गूढमेव स्थितं मङ्गलं पार्षदत्वात्मकं यस्य तथाभूतम् इति पुनस्तथाविर्भावयोग्य एवासावित्यर्थः । तथैव सप्तमे श्रीयुधिष्ठिरं प्रति श्रीनारदवाक्ये "कृष्णचक्रहतांहसौ" इत्यत्र तैर्व्याख्यातं तयोः पापमेव हतं न तु तावित्यर्थ इति । तृतीये च करालदंष्ट्रा इत्यादौ चक्षुर्भ्यां दहन्निव सञ्चक्षाणः पश्यन् इवेति वस्तुतः क्रोधाभावमाहेति हिरण्याक्षभावो व्याख्यातः तथा परानुषक्तमित्यादौ प्रचण्डमन्युत्वमधिक्षेपादिकञ्चानुकरणमात्रं दैत्यवाक्यभीतानां देवानां भयनिवृत्तये वस्तुतस्तेन तथाऽनुक्तत्वेन कोपादिहेत्वभावादिति श्रीभगवद्भावोऽपि व्याख्यातः अतोऽनयोस्तत्तद्दुर्वचने स्वभावतो वास्तवार्थव्यञ्जना भगवदिष्टयुद्धलीला रक्षार्थमेव त्वर्थान्तरानुकरणम् अन्यदैत्यानान्तु स्वभावतोऽर्थान्तरप्रतिपादनं वास्तवार्थस्तु गीर्देव्यैव प्रतिपादित इति ज्ञेयम् अभद्राणि नष्टभद्राणीति बाह्यार्थानुसारेण वास्तवार्थस्तु न विद्यन्ते भद्राणि येभ्यस्तानि बभाषे इति नोवाचेति बाह्यार्थे महाशयत्वमुक्तं तत्र दृष्टान्तः यथेति वास्तवार्थेऽप्यवचने गाम्भीर्य्यमेव कारणं दृष्टान्तः सिंहो नृसिंहः शिवस्यारुतं सम्यक् स्तुतिमिवेति ॥३८॥ अत्र वास्तवार्थविदां तद्विदित्वेऽप्यन्येषां च तदनुकरणमप्यसहिष्णूनां चेष्टितमाह-भगवदिति । शपन्तः सद्यः प्राणैर्वियुज्यस्वेत्याक्रोशन्तः यतो दुस्सहं साधुत्वेन सोढुमशक्यत्वात्तथा निर्जग्मुरित्युक्तम् ॥३९॥ किञ्च, दुर्गतिपरिहारार्थमपीत्याह-निन्दामिति । अधो महानरकं सुकृतक्षयेन तस्य कदापि सद्गतिर्न स्यादिति सूचितम् ॥४०॥ कर्णौ पिधाय निरियाद्यदकल्पईश इत्यादि चतुर्थस्कन्धोक्तानुसारेणाशक्तानां निर्गममुक्त्वा शक्तानां कृत्यमाह-तत इति । सम्यक् उत्प्लुत्य उत्तस्थुः यादवास्तु श्रीभगवन्मतानुसारेण नोत्थिता न च किञ्चिदूचुरिति ज्ञेयम् ॥४१॥

---

[1] ते सभासदः-वीर. । [2] श्रीशुक उवाच-च. पु. टी. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नष्टमङ्गलः सन्निहितमृत्युरित्यर्थः । अत एवासम्बद्धानि अवज्ञया च नोवाच, यतो भगवान् धैर्य्य-गाम्भीर्य्याद्यशेषगुणयुक्तः, अतोऽन्तःक्षोभादिकमपि निरस्तमेव, तत्रैव दृष्टान्तः-यथेति ॥३८॥ भगवतो जगदीशस्य, किंवा सर्वसद्गुणपूर्णस्यापि निन्दनं दोषोत्कीर्तनकदुःसहमिति साधुत्वेन सोढुमशक्त्या तथा निर्जग्मुरित्युक्तम् ॥३९॥ किञ्च, दुर्गतिपरिहारार्थमपीत्याह-निन्दामिति । स भगवानेव परः श्रेष्ठः पूज्यो यस्य तस्य, ततस्तस्माद्भगवन्निन्दनश्रवणात् तत्र स्थानाद्वा सुकृतात् स्वयमर्ज्जिताशेषपुण्यात् च्युतो भ्रष्टः, अधो नरकं याति, इति सुकृतक्षयेण तस्य कदापि सद्गतिर्न स्यादिति सूचितम् ॥४०॥ (भा.४/४/१७) 'कर्णौ पिधाय निरियाद्यदकल्प ईशे' इत्यादिचतुर्थस्कन्धोक्त-श्रीसतीदेवीवचनानुसारेणाशक्तानां निर्गममुक्त्वा शक्तानां कृत्यमाह-तत इति । मत्स्यादयः पाण्डवानामेव बान्धवास्तत्सदृशाः सम्यक् कुर्दित्वासनपरित्यागादिना वेगेनोत्तस्थुः, यादवास्तु तत्रैव वर्तमानाः परमसमर्था अपि श्रीभगवन्मतानुसारेण नोत्थिताः, न च किञ्चिदूचुरिति ज्ञेयम् ॥४१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥२७-४५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमिति । नष्टं मङ्गलं यस्य सः हेतुगर्भमिदम् अत एवमादीन्यभद्राणि परुषाणि बभाषे भगवान् तु यथा सिंहः शिवारुतं शिवा फेरुस्तस्याः रुतं शब्दं श्रुत्वा तूष्णीमासीत्तथा किञ्चिदपि नोवाच तूष्णीं बभूवेत्यर्थः ॥३८॥ भगवन्निन्दनमिति । कर्णौ पिधायाच्छाद्य रुषा चेदिपं चैद्यं शिशुपालं शपन्तो जग्मुः ॥३९॥ कुतो विनर्जग्मुरित्यत्रानिर्गमने प्रत्यवायमाह-निन्दामिति । तत्परस्य भगवत्परस्य च जनस्य निन्दां श्रुत्वा यः जनः पुमांस्ततो नापैति न निर्गच्छति सोऽपि श्रोतापि अपिशब्दान्निन्दकोऽपि सुकृतात् च्युतो भ्रष्टोऽधः नरके पततीत्यर्थः ॥४०॥ ततः सभासदां निर्गमनानन्तरं मत्स्यादयश्च उत्थाय क्रुद्धाः शिशुपालं हन्तुम् इच्छवः उदायुधाः उद्धृतान्ययुधानि यैस्ते उत्तस्थुः ॥४१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

शिवारुतं शृगालशब्दितम् ॥३८-३९॥ कुतो निर्गमनमिति तत्राह-निन्दामिति ॥४०-४२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-४४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शिवा शृगालास्तस्या रुतं श्रुत्वेति शेषः । द्वितीयेऽर्थे तु न विद्यन्ते भद्राणि येभ्यस्तानि सिंहः श्रीनृसिंहः शिवस्य आरुतं स्तुतिम् ॥३८॥ शपन्तः अरे शिशुपाल ! सद्यः प्राणैर्वियुज्यस्वेत्याक्रोशन्तः ॥३९॥ निष्क्रमणे प्रमाणं शास्त्रवाक्यमाह-निन्दामिति ॥४०॥ पाण्डुसुताः भीमादयः सम्यगुत्प्लुत्य तस्थुः ॥४१-४२॥

गूढार्थदीपिनी

देशान् मथुराप्रदेशान् हित्वा पोषयित्वा ब्राह्मतेजश्च सम्पोष्य समुद्रं दुर्गं द्वारकामाश्रित्य दस्युरूपा मादृश्यः दुष्टाः प्रजाः ता एव बाधन्ते दण्डयन्ति अत एव दस्युनाशात् स्वयम् अदस्यवः दस्युरहिता जाता 'सरसामपि सागरः' इति गीतोक्तेः समुद्रस्य भगवद्रूपत्वात् ब्रह्मतेजस्त्वं सुस्थिरमेव ॥३८॥ नष्टमङ्गलः नष्टपुण्यः । शिवारुतं शृगालीशब्दं श्रुत्वा सिंहो न किञ्चित् ब्रूते ॥३९॥ तत्सभायां सीदन्तीति तथा । चेदिपं शिशुपालं शपन्तः म्रियतामयं दुरात्मा इत्याक्रोशन्तः ततः सभातः निर्जग्मुः ॥४०॥ तत्परस्य भगवद्भक्तस्य । ततः स्थानात् नापैति नापगच्छति सोऽपि तद्भक्तहरिनिन्दाश्रोताऽपि अधो नरकं याति निन्दकस्तु यात्येव ॥४१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शिवारुतं श्रुत्वा यथा सिंहस्तूष्णीभवति तद्वत् ॥३८-४५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ब्रह्मर्षिसेवितान्देशान्हित्वा त्यक्त्वाऽब्रह्मवर्चसो ब्रह्म च वेदश्च वर्चः सत्कान्तिश्च न विद्यते येषां ते तथा । अतो ब्रह्मास्तीत्यच्प्रसङ्गः । समुद्रं दुर्गं तद्रूपमाश्रिय दस्यवश्चोरा यथेति लुप्तोपमा । प्रजा बाधन्तेऽत एव दस्यव इति वा ॥३८॥ नष्टं मङ्गलं यस्य सः । भगवान् सिंहः शिवारुतं श्रुत्वा न नादं करोति किन्तु घातयत्येव तथा किञ्चिन्नोवाच । शिवाश्च शृगालयोषितः । अनेन न तत्रापि पुंरुतं किन्तु स्त्रीरुतमित्यलक्ष्यता ध्वन्यते । स्वरे च विशेषः । यथोक्तम् —

शृगालश्चापि टङ्कारैः प्रणेदुरशिवः शिवा । इति ।

तात्पर्ये स्वरस्तत्र शृगालानां शिवानां चान्यथास्वर इत्याग्नेय इत्युक्तेः ॥३९॥ तत्सभासदोऽशक्ताश्चेदपि रुषा मनसि शपन्तः कर्णौ पिधाय निर्जग्मुः ॥४०॥ अशक्ताश्चेदपि न ततो गतवांश्चेतसाऽपि पापमात्रमिति गमनं विहितमित्यत्र दण्डं प्रदर्श्याह ॥ निन्दामिति । भगवतो निन्दां तथा तत्परस्य तदासक्तस्य तद्भृत्यजनस्य निन्दां शृण्वन् ततस्तत्स्थलाद्यो नापैति नापगच्छति सोऽपि निन्दाकर्तृवत्सुकृताच्च्युतः सन्नधो याति । ततोऽधिकमेव व्यक्तं यान्ति तेषामनिन्दका इतिवत् ॥४१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो यजंजातं तदाह–एवमादीनिति । अभद्राण्यमङ्गलवाक्यानि अन्तर्मङ्गलस्य नष्टत्वात् यद्धि मनसा ध्यायतीति वाक्यात् च अमङ्गलवाक्यान्येवोक्तवान् तदा भगवानप्येतच्छ्रुत्वा न किञ्चि दुवाच प्रतीकारार्थं कायिकं वाचिकं मानसं वा न सम्पादितवान् तूष्णीं भावो वधानुकल्प इति केचित् अवगणनया कृतत्वात् वधानुकल्पः स्वद्रोह इति वस्तुतस्तु धर्मे वाक्यानां बाधकत्वाभावात् कुबुद्धिरियमित्युपेक्षितः ननु वाग्बाणाः बाणापेक्षया परुषा इति कथमुपेक्षेत्याशङ्क्य दृष्टान्तमाह–यथा सिंह इति । न हि शृगालशब्दे सिंहसमीपेऽपि जायमाने सिंहनिन्दारूपार्थोऽस्ति अभिमानेन कल्पयित्वा तञ्च सदृशीकृत्यान्य एव शृगालः शब्दङ्करोति न तु सिंहः सिंहतुल्यो वा सिंहपदेन मारको निरूप्यते वर्णविपर्ययात् अतो मारयिष्याम्येवैनं किमनेनेति तूष्णीं स्थितः नापि तदुक्ता धर्मा भगवति सन्ति येन मर्मभेदः स्यात् नापि निन्दितानर्थान् भगवान् परिगृह्णाति येन निन्दके क्रोधः स्यात् अतो भ्रान्तवाक्यादुपेक्ष्यमेव ॥३८॥ अन्ये पुनः बहिर्मुखाः भगवन्निन्दनमेतदिति मत्वा तच्च स्वस्य निरुद्धत्वाच्च न श्रोतव्यमिति शापं दत्त्वा गतवन्त इत्याह–भगवन्निन्दनं श्रुत्वेति । तत्तु दुःसहं कर्णयोरपि कठिनं निन्दासहितसभायां ये स्थिताः ते कर्णौ स्वस्य पिधाय चेदिपं शिशुपालं रुषा शपन्तो निर्जग्मुः ॥३९॥ एवं करणे धर्म इत्याह–निन्दा भगवतः शृण्वन्निति । अपकर्षवाक्यं निन्दा येनैव वाक्येन भगवत्यपकर्षप्रतीतिर्भवति तन्न श्रोतव्यं तथा भगवद्भक्तस्य जनस्य अपकर्षप्रतीतिर्भवति जनस्येति साधारणस्यापि ततः कर्णौ पिधाय नोपयाति सोऽपि स्वकृतात् च्युतस्सन्नधो याति भगवदुत्कर्षज्ञानार्थं हि सर्वोऽपि प्रयत्नः तदपकर्षे ह्यागते विपरीतं जातमिति स्वकृतस्य धर्मस्य वृथा नाशात् स्वयं विपरीतज्ञानात् अधो याति इदमशक्तविषयं शक्तानां तु धर्मं चतुर्थे प्रतिपादितः "छिन्द्यात्प्रसह्य रुशतीमसतीं प्रभुश्चेजंजिह्वामसूनपि ततो विसृजेत्स धर्मः" इति ॥४०॥ पाण्डवास्तु मर्तुं मारयितुं च समर्था इति तन्मारणार्थं प्रवृत्ता इति ततः पाण्डुसुता इति पितृनाम्ना शूरत्वाय व्यपदेशः क्रुद्धाः अन्यथा मातृभगिनीपुत्रत्वात् स्नेहः प्रतिबन्धको भवेत् मत्स्याः विराटवंशोद्भवाः कैकेयाश्च भरतपूर्वजा वैष्णवाः सृञ्जयाः द्रुपदवंशजाः एते चतुर्विधा इति उदायुधाः समुत्तस्थुः स्वमरणसन्देहं वारयति शिशुपालजिघांसयेति ॥४१॥

श्रीसुबोधिनीसारः

एवमादीनि मातृघ्नगोवत्सहन्तृवृक्षभञ्जकचौरजारादीनि शतमभद्राणि परुषाणि वचनानि उवाच नष्टं मङ्गलं पुण्यं यस्य स शिशुपालः भारते चैतत्सुप्रसिद्धं भगवान् किञ्चिन्नोवाच शिवायाः शृगाल्या रुतं शब्दं सिंह इव ॥३८॥ दुःसहमसह्यं भगवतो निन्द श्रुत्वा तत्सभासदः तत्र सभायां वर्तमाना जना रुषा क्रोधेन चेदिपं शिशुपालं निन्दन्तो धिक्कुर्वन्तः कर्णौ पिधाय रुन्ध्वा निर्ययुः ॥३९॥ तत्र कारणमाह । भगवतः तत्परस्य भक्तस्य वा निन्दां शृण्वन् ततः स्थानात् यो नापगच्छति स सुकृतः पुण्याच्च्युतो भ्रष्टोऽधो याति नरकं प्रपद्यते ॥४०॥ ततोऽनन्तरं पाण्डोः सुता भीमादयो मत्स्यादयः क्रुद्धा उदायुधा उद्यतशस्त्राः शिशुपाल हन्तुमिच्छन्तः समुत्तस्थुः ॥४१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवमादीनि अन्यान्यपि अमङ्गलानि भगवन्निन्दावचनानि शिशुपालो बभाषे। तत्र हेतुमाह-नष्टमङ्गल इति। नष्टं मङ्गलं जीवनैश्वर्यादिकारणं पुण्यं यस्य सः। भगवांस्तु किञ्चिदपि नोवाच। तत्र दृष्टान्तमाह-शिवारुतं शृगालभाषितं श्रुत्वापि यथा सिंहो न किमपि ब्रूते तद्वदित्यर्थः ॥३८॥ भगवन्निन्दनं श्रुत्वा सभासदो रुषा क्रोधेन चेदिपं शिशुपालं शपन्तो म्रियतामयं दुरात्मेति वदन्तः कर्णौ पिधाय ततो निर्जग्मुः। तत्र हेतुमाह-दुःसहमिति ॥३९॥ न केवलं दुःसहत्वमेव ततो निर्गमने हेतुः, किन्त्वनिर्गमे दोषोऽपि इत्याह-निन्दामिति। भगवतस्तत्परस्य भगवद्भक्तस्य जनस्य वा निन्दां शृण्वन् यः पुमांस्ततः स्थानान्नापैति न निर्गच्छति स श्रोतापि सुकृतात् पुण्यात् च्युतो भ्रष्टोऽधो नरकं याति। अपिशब्दान्निन्दकः सुकृताद्भ्रष्टो भवति, नरकं यातीत्यत्र किं वक्तव्यमिति सूचितम् ॥४०॥ ततः सभासदां निर्गमनानन्तरं उद्धृतान्यायुधानि यैस्तथाभूताः पाण्डवादयः यतो भगवन्निन्दनेन क्रुद्धाः, अतः शिशुपालस्य जिघांसवः हन्तुमिच्छवः सन्त उत्तस्थुः ॥४१॥

अन्वितार्थप्रकाशिका

ब्रह्मेति॥ ब्रह्मर्षिसेवितान् माथुरादिदेशान् हित्वा ब्रह्मवर्चसं वेदाध्ययनादिजनितं तेजस्तन्नाशकमब्रह्मवर्चसं दुर्गं दुर्गमं समुद्रं समुद्रमध्यस्थं द्वारकादेशमाश्रित्य दस्यव एते यादवाः प्रजाः कर्मभूताः बाधन्ते। वस्तुतः ब्रह्मर्षिसेवितान् देशान् हित्वा 'डुधाञ् पोषणे' पोषयित्वेत्यर्थः। तेन ब्रह्मवर्चसं ब्राह्मं तेजश्च संपोष्य अदस्यवः प्रबलशत्रुरहिता अपि लीलया समुद्रं दुर्गमाश्रित्य स्थिता एते यादवाः प्रजा बाधन्ते किं काक्वा नैवेत्यर्थः ॥३८॥ एवमिति॥ नष्टं मङ्गलं यस्य स शिशुपालः एवमादीनि अन्यान्यपि अमङ्गलानि भगवन्निन्दावचनानि बभाषे भगवांस्तु किञ्चिदपि नोवाच। यथा शिवारुतं शृगालभाषितं श्रुत्वाऽपि सिंहो न किमपि ब्रूते तद्वत् ॥३९॥ भगवदिति॥ तद्दुःसहं भगवन्निन्दनं श्रुत्वा सभासदो रुषा क्रोधेन चेदिपं शिशुपालं शपन्तो म्रियतामयं दुरात्मेति वदन्तः कर्णौ पिधाय ततो निर्जग्मुः ॥४०॥ निन्दामिति॥ भगवतस्तत्परस्य भगवद्भक्तस्य जनस्य वा निन्दां शृण्वन् यः पुमांस्ततः स्थानान्नापैति न निर्गच्छति स श्रोतापि सुकृतात् पुण्यात् च्युतो भ्रष्टोऽधो नरकं याति। अपिना निन्दकस्तु नरकं यात्येव ॥४१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शिवारुतं शृगालशब्दितम् ॥३८-४१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति॥ एवमादीनि, अभद्राणि वचनानीति शेषः। नष्टं मङ्गलं यस्य सः, हेतुगर्भमिदं, नष्टमङ्गलत्वादित्यर्थः। बभाषे। तथापि, सिंहः शिवारुतं यथा, शिवारुतं श्रुत्वा, सिंहो यथा तथेत्यर्थः। भगवान् किञ्चित्, न उवाच ॥३८॥ भगवन्निति॥ ते प्रसिद्धाः, सभासदः, दुःसहं, भगवन्निन्दनं श्रुत्वा, रुषा चेदिपं शिशुपालं, शपन्तः सन्तः, कर्णौ पिधाय, निर्जग्मुः। सदस इति शेषः ॥३९॥ कुतो निर्जग्मुरित्यत्रानिर्गमने प्रत्यवायमाह॥ निन्दामिति॥ भगवतः निन्दां शृण्वन्, तत्परस्य भगवत्परस्य, जनस्य वा, वाशब्दश्चार्थे। निन्दां शृण्वन्, यः जनः, चेत् ततः, न अपैति न निर्गच्छति, सोऽपि तच्छ्रोता जनोऽपीत्यर्थः। अपिशब्दान्निन्दकश्चेत्यर्थः। सुकृतात् पुण्यात्, च्युतो भ्रष्टः सन्, अधः याति। नरके पततीत्यर्थः ॥४०॥ तत इति॥ ततः क्रुद्धाः क्रोधं प्राप्ताः, पाण्डुसुताः, तथाविधाः मत्स्यकैकयसृञ्जयाः, शिशुपालजिघांसया, उदायुधा उद्यतायुधाः सन्तः, समुत्तस्थुः ॥४१॥

कृष्णप्रिया

महाराज परीक्षित। सच्चा पूछो तो शिशुपाल का सम्पूर्ण शुभ नष्ट हो चुका था, इसके कारण उसने और भी अनेक कठोर बातें भगवान श्रीकृष्ण को सुनाइ। लेकिन वैसे ही भगवान श्रीकृष्ण मूक रहे, भगवान कृष्णने उसकी बातों का कुछ भी उत्तर न दिया ॥३८॥ लेकिन सभासद लोगों के लिए भगवान की निन्दा का श्रवण असह्य था कई लोग उनमें से अपने अपने कर्णद्वार को बन्ध करके क्रोध से शिशुपाल को गाली देते हुए बहार चले गये ॥३९॥ भैया परिक्षित ! जो भगवान की अथवा भगवद्य चरणानुरागी भक्तो की निन्दा सुनकर निकल नही जाता

कृष्णप्रिया

वह अपने सर्व शुभ कर्मो से भ्रष्ट हो जाता है और अधोगति पाता है ।।४०।। राजन् ! उस अवसर पर शिशुपाल को मार डालने के लिए पाण्डव मत्स्य कैकेय अवध और सुरञ्जय वंश के नरनाथ कृद्ध होकर अपने हस्तों में शस्त्र ले उठ खडे हुए ।।४१।।

ततश्चैद्यस्त्वसम्भ्रान्तो जगृहे खड्गचर्मणी । भर्त्सयन् कृष्णपक्षीयान् राज्ञः सदसि भारत ।।४२।।
तावदुत्थाय भगवान् स्वान् निवार्य स्वयं रुषा । शिरः क्षुरान्तचक्रेण [१]चिच्छेदापततो रिपोः ।।४३।।
शब्दः [२]कोलाहलोऽप्यासीत् शिशुपाले हते महान् । [३]तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ।।४४।।
चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत् । पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ।।४५।।

कर्दमक्षमा

भारत ! ततः, तु, असम्भ्रान्तः, चैद्यः, सदसि, कृष्णपक्षीयान्, राज्ञः, भर्त्सयन्, खड्गचर्मणी, जगृहे ।।४२।। भगवान्, तावत्, उत्थाय, स्वान्, निवार्य, रुषा, स्वयम्, आपततः, रिपोः, क्षुरान्तचक्रेण, शिरः, चिच्छेद ।।४३।। शिशुपाले, हते, महान्, कोलाहलः, शब्दः, अपि आसीत्, जीवितैषिणः, तस्य, अनुयायिनः, भूपाः, दुद्रुवुः ।।४४।। चैद्यदेहोत्थितम्, ज्योतिः, पश्यताम्, सर्वभूतानाम्, खात्, च्युता, उल्का, भुवि, इव, वासुदेवम्, उपाविशत् ।।४५।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तावदुत्थायेत्यस्यायमभिप्रायः एष मत्पार्षदो मत्तुल्यबलः सर्वानेतान् हन्यादतो मयैव शीघ्रं हन्तव्य इति तत्क्षणमेवोत्थाय शिरो जहारेति ।।४३-४५।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो मत्स्यादिराज्ञामुत्थानोत्तरम् । असम्भ्रान्तो निर्भयः ।।४२।। ननु सत्स्वनन्तभगवद्योधेषु भगवानेव कथं तद्वधायोत्थित इत्याशङ्कायामाह-अयमभिप्राय इति । यतो मत्तुल्योऽतो हेतोः ।।४३।। तस्य शिशुपालस्य ।।४४।। ज्यतिर्जयचैतन्यात्मकम् ।।४५।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तुशब्देनान्येषां विपक्षाणान्तु सम्भ्रमः सूचितः ।।४२।। तावदुत्थायेति जन्मत्रयान्तेऽधुना विप्रशापान्मोचयित्वा पुनः श्रीवैकुण्ठपार्षदतां प्रापयितुं पूर्वपूर्ववन्मयैव स्वहस्तेन हन्तुं योग्य इति पाण्डवादीनां तद्वधोद्यमात् प्रागेवोत्थाय यतो भगवान् तत्तद्विज्ञानभक्तवात्सल्याद्यशेषगुणयुक्तः आपततः अभिमुखमागच्छतः ।।४३।। अथानन्तरं महान् शब्द आसीत् अपीति क्वचित्पाठः उक्तसमुच्चयार्थः कथम्भूतः कोलाहलः केषाञ्चिच्च जयजयेत्यादिभिर्वाक्यैरुच्चावचः ।।४४।। ज्योतिः तद्रूपेण लीनतया स्थितं पार्षदवपुरेव तस्यानश्वरत्वात् ।।४५।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तु अपि, चैद्योऽपि, कृष्णस्य साक्षाद्भगवतोऽपि पक्षीयान् अनुवर्तिनः; हे भारतेति चैद्यस्यातिदुर्बुद्ध्या विस्मयात् क्रोधोदयाद्वा; यद्वा, भयान्तःशङ्कमानं राजानमाश्वासयति । महावंशजत्वेन बुद्ध्या मिथ्याशङ्कां निरस्य स्वस्थो भवेति भावः ।।४२।। स्वान् पाण्डवादीन्, रुषा आपततो वेगेनाभिमुखमागच्छतः शिरः, क्षुरवत्तीक्ष्णोऽन्तः प्रान्तभागो यस्य चक्रस्य तेन, इति शीघ्रमनायासेन मूलतो हरणमुक्तम्; तावदुत्थायेति जन्मत्रयान्ते अधुना विप्रशापान्मोचयित्वा पुनः श्रीवैकुण्ठं च पार्षदत्वं प्रापयितुं पूर्व्वपूर्व्ववन्मयैव स्वहस्तेनायं हन्तुं योग्य इति पाण्डवादीनां तद्वधोद्यमात् प्रागेवोत्थाय, यतो भगवान् तत्तद्विज्ञान-भक्तवात्सल्याद्यशेषगुणयुक्तः; यद्वा, तावदिति तेषां समुत्थानात् प्रागेवेत्यर्थः । यतो भगवान् असाधारणसर्व्वशक्तिपूर्णः ।।४३।। अथानन्तरं महान् शब्द आसीत्। कथम्भूतः ? कोलाहलः, केषाञ्चित् हाहेति, केषाञ्चित् साधु साध्विति, केषाञ्चिच्च जय जयेत्यादिभिर्वाक्यैरुच्चावचः; यद्वा,

---

१. जहारा-श्रीधर. वंशी. वीर. विज. विश्व. । २. थासीत् -इति कस्यचित् । ३. तत्राततायिनो-विज. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

केषाञ्चिच्छोकेन, केषाञ्चिच्च प्रहर्षेण व्यक्तत्वात् कलकलः, इदं शब्दानुकरणमात्रम्; जीवितमेव, न तु धर्म्मादिकमेष्टुं शीलमेषां तथा त इति मरणभयेन तद्यज्ञोत्सवमपि परित्यज्य वेगेनापसृता इत्यर्थः ॥४४॥ वासुदेवं वसुदेवाज्जातं साक्षाद्भगवन्तम्, उप समीपे, सद्य एवाविशत्। पुनः पार्षदत्वप्राप्त्या श्रीभगवता सह सङ्गत इत्यर्थः। कथम्भूतं तज्ज्योतिः ? तदाह–उल्केवेति। अत एवाश्चर्य्येण सर्वभूतेषु पश्यत्सु सत्सु पार्षदत्वेन सच्चिदानन्दविग्रहतया तादृशज्योतिष्ट्वासम्भवेऽपि तथा प्रवेशः पुनः पार्षदत्वप्राप्तिबोधनेन तत्तत्त्वज्ञानां भक्तानां प्रहर्षणार्थम् ॥४५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥२७-४५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तत इति। असम्भ्रान्तोऽवहितः हे भारत ! कृष्णपक्षीयान् राज्ञो भूपान् भर्त्सयन् खड्गखेटौ जग्राह ॥४२॥ तावदिति। तावत्तत् क्षणमेव उत्थाय स्वान् स्वकीयान्निवार्य्य रुषा क्षुरस्येवान्तो धारा यस्य तेन चक्रेणापततो रिपोः शिरो जहार चिच्छेद ॥४३॥ शब्द इति। शिशुपाले हते सति महानुच्चैः कोलाहलः कलकलशब्दः आसीत् तस्य चैद्यस्यानुयायिनोऽनुवर्तिनो भूपाः जीवितेच्छवः दुद्रुवुः ॥४४॥ चैद्येति। सर्वभूतानां पश्यतां सतां खादाकाशात् च्युता उल्का भुवीव चैद्यस्य देहादुत्थितं तेजो जीवात्मकं वासुदेवं श्रीकृष्णम् उपाविशत्तावत्प्रविश्य ततस्तत्साधर्म्यमवाप इत्यर्थः ॥४५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

स्ववचनं सत्यं कर्तुं तावत्ततः पूर्वमेव कृष्णः क्षुरान्तचक्रेण क्षुरधारसुदर्शनेन रिपोः शिरो जहारेत्यन्वयः ॥४३-४४॥ ज्योतिर्जयचैतन्यात्मकं खादाकाशाच्च्युतोल्का भुवीव ॥४५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः **॥५-४४॥**

कृष्ण एव स्वयं हि तथा लीलाव्यवहारमाश्रितवानिति ज्योतिस्तद्रूपेण लीलया स्थितं पार्षदवपुरेव तस्यानश्वरत्वात् प्रविशंश्च तन्मयतां तद्रूपप्राचुर्यं तत्सदृशाकारतामित्यर्थः ॥४५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः **॥१-५४॥**

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा **॥१-५४॥**

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तावदुत्थायेत्यत्र भगवतोऽयमभिप्रायः यद्यहं तूष्णीमेव वर्ते तदैते परस्परं युद्ध्यमानाः यज्ञप्रदेशमिमं रुधिरप्रदेशमेव करिष्यन्ति यदि च स्वसेनासहितो रथमारुह्यानेन सह योत्स्ये तदपि स्थलमिदं रक्तकर्दममयं भविष्यति उभयथापि मत्प्रेष्टस्य युधिष्ठिरस्य राजसूययज्ञो नङ्क्ष्यति सन्धिस्त्वत्र सर्वथैव दुष्करस्तस्मादेवं विधेयमिति निश्चित्य तत्क्षण एवोत्थाय शिरो जहार तथा यथा तत्र यज्ञस्थले रुधिरबिन्दुरपि न पपातेति ॥४३-४४॥ ज्योतिः तद्रूपेण लीनताय स्थितं पार्षदवपुरेव तस्यानश्वरत्वात् खात् च्युता उल्केवेति खं वैकुण्ठपर्य्यन्तमुत्प्लुत्य तत्रस्थवैकुण्ठनाथस्य श्रीकृष्णस्यैक्यमवधार्य्य कृष्णमेव उपाविशत् कृष्णवपुषि प्रविश्य स्वप्रभोर्वैकुण्ठनाथस्य पार्श्वे एव स्थितं बभूवेत्यर्थः। लीलान्ते स्वप्रभुणा वैकुण्ठनाथेन सार्धं प्रभासक्षेत्राद्वैकुण्ठ एव यास्यति राजसूयसमये तु कृष्णे चैद्यः सायुज्यं प्रापेति लोकप्रसिद्धिरभूत् ॥४५॥

गूढार्थदीपिनी

जिघांसवः शिशुपालं हन्तुमिच्छवः। ततो निन्दाश्रवणात् मत्स्यादयः पाण्डवपक्षीयाः ॥४२॥ असम्भ्रान्तो निर्भयः ॥४३॥ तावत् तत्क्षणमेव आपततः हन्तुमागच्छतः रिपोः शिरः जहार चिच्छेद। केन क्षुरस्येव अन्तो धारा यस्य तेन चक्रेण। एष मत्पार्षदो महाबलः सर्वानेव हन्यादतो मयैव हन्तव्य इति तावदित्यस्य तात्पर्यम् ॥४४॥ शब्द इति स्पष्टम् ॥४५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शिवारुतं श्रुत्वा यथा सिंहस्तूष्णीभवति तद्वत् ॥३८-४५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

शिशुपालं जिघांसवः । न लोकेति षष्ठीप्रतिषेधात् ॥४२॥ कृष्णपक्षहितकारिणः पक्षे भवान्वा । गहादिच्छुः । राज्ञो नृपान् राज्ञो धर्मराजस्य सदसीति वा ॥४२॥ तावत्तन्मध्य एव तानुदायुधान् राज्ञो निवार्य स्वयं रुषा तदीयया निमित्तेन । आपततो रिपोः शिरः क्षुरान्तवद्विद्यमानारोपितेन चक्रेण जहार। मयैव वध्यौ भवतं त्रिजन्मस्वित्याद्युक्तवचनं सत्यं कर्तुं – तन्निवारितवानिति ज्ञेयम् ॥४४॥ तत्राततायिनः शिशुपालानुकूलाः । जीवितैषिण इति द्रवणकारणेरणम् ॥४५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

शिशुपालोऽपि क्रियाशक्तौ सर्वाधिक इति जिघांसन्तं जिघांसीयादिति पाण्डववधार्थम् असम्भ्रान्तो भूत्वा खड्गचर्मणी जगृहे ततोऽन्यैः अनुचितं क्रियत इत्युक्तः तान् भर्त्सयन् कृष्णपक्षीया एत इति साक्षाद्वधसाधनं गृहीतवान् स्वस्य च रक्षासाधनं राज्ञः सदसीति नात्र ब्राह्मणशायशङ्केति सूचितं भारतेतीति विश्वासार्थम् ॥४२॥ भगवान् एनं तदपेक्षया बलिष्ठं मत्वा अमोघवीर्यं च स्वार्थं यतन्त इति भक्तद्रोहे वधः स्मृत इति शास्त्रं पुरस्कृत्य स्वयं मारणार्थं प्रवृत्त इत्याह–तावदुत्थायेति । भगवत्त्वात् स्वस्य पूर्णा शक्तिः अत एव स्वान् भक्तान् निवार्य स्वयं चक्रेण शिरश्चिच्छेद येन मार्गेण सा वाङ्निर्गच्छति अलौकिकेन भगवत्सामर्थ्येन स मारित इति शङ्काव्यावृत्त्यर्थमाह–क्षुरान्तेति । क्षुरान्तवत्तीक्ष्णेन तथासति लोके भगवन्माहात्म्यं न स्यात् साधनोत्कर्षस्तु कर्तुर्नापकर्षं सम्पादयति आपततोरिपोरिति तस्यापराधो वधहेतुरुक्तः ॥४३॥ ततस्तद्वधे महान् शब्दो जातः कोलाहलश्च सर्वैः कृतः शिशुपाले हत इति निमित्तम् अनायासेन तन्मारणं चोक्तं ततस्तत्पक्षपातिनः दैत्यांशाः सर्व एव जीवरक्षार्थं युद्धमकृत्वैव जीवनार्थं दुद्रुवुः ॥४४॥ एवं धर्मार्थं तस्य वधं निरूप्य सचेज्जीवो न मुक्तो भवेत् तदा श्मशानत्वं तस्य ख्यापनस्य भवेदिति तद्दोषपरिहारार्थं मुक्तिमाह–चैद्यदेहोत्थितं ज्योतिरिति । हृदये स्थितं जीवाख्यं तज्ज्योतिः भगवदिच्छया सहजक्रियायुक्तं वासुदेवं मोक्षदातारम् उपाविशत् भगवत्पादयोः प्रविष्टं वैकुण्ठात्मकं तत्पुनर्लोकाय अन्तिकमित्यादिपदैः व्यापिवैकुण्ठस्यैव निरूपणम् अन्यथा कृत्रिमवैकुण्ठात् त्याजनं व्यर्थं स्यात् "प्रक्षालनाद्धि पङ्कस्य" इति न्यायात् एतदन्यथानुपपत्त्यैव आराग्रजीवपक्ष एव मुख्य इत्यङ्गीकर्तव्यं सात्त्विकशरीरांशशेषेनेति मते सङ्गतं ज्योतिरिति वाक्यात् अन्यत्रात्मज्योतिप्रकाराच्च गृहीत्वैतानि संयातीतिवाक्यात् तस्य सहजक्रियापि सिद्धा केवलजीवस्य यथैतादृशं रूपं सिध्यति तथोपपादितं निबन्धे पश्यतां सर्वभूतानामिति सायुज्ये प्रमाणमुक्तं जीवस्वरूपनिर्धारश्च प्रवेशः सर्वैर्दृष्ट इति ज्ञापयितुं दृष्टान्तमाह–उल्केवेति । निर्गमनप्रवेशनयोस्तस्यादर्शनं खात् आकाशात् च्युता ॥४५॥

श्रीसुबोधिनीसारः

ततः चैद्यः शिशुपालोऽपि असम्भ्रान्तो निःशङ्को राज्ञः सदसि सभायां कृष्णस्य पक्षे भवान् भर्त्सन् निन्दन् खड्गचर्मणी जग्राह हे भारत ॥४२॥ तावत् वरसङ्ख्यापूर्तौ भगवान् स्वयं स्वानात्मीयान् निवार्य रुषा पतत आगच्छतो रिपोर्वैरिणः तीक्ष्णधारेण चक्रेण शिरः चिच्छेद ॥४३॥ शिशुपाले हते सति महान्कोलाहलः शब्दोऽभूत् तस्य शिशुपालस्यानुयायिनोऽनुचरा भूपा जीविताभिलाषुका दुद्रुवुः पलायिता बभूवुः ॥४४॥ चैद्यस्य देहादुत्थितं ज्योतिः तेजः भुवि पृथिव्यां खादाकाशाच्च्युता उल्का विद्युदिव सर्वप्राणिनां पश्यतां सतां वासुदेवमुपाविशत् ॥४५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वपूर्वेषां वृत्तं सावधानतया श्रोतव्यम् इत्याशयेन सम्बोधयति–भारतेति । ततश्च सदसि सभायां कृष्णपक्षीयान् युधिष्ठिरादीन् राज्ञो भर्त्सयन् वचसा तिरस्कुर्वन् असम्भ्रान्तो निर्भयश्चैद्यः शिशुपालोऽपि तान् हन्तुं खड्गचर्मणी जग्राह ॥४२॥ एष मत्पार्षदो महाबलः, अत एतान् सर्वानेव हन्यादिति मत्वा तावत्तत्क्षणमेव भगवान् कृष्णः उत्थाय स्वान् पाण्डवादीन्निवार्य रुषा क्षुरस्येवातो धारा यस्य तेन चक्रेण स्वयमेव आपततो रिपोः शत्रोस्तस्य शिरो जहार चिच्छेद ॥४३॥ एवं शिशुपाले निहते सति महानुच्चैः कोलाहलः कलकलः सङ्कीर्णः शब्द आसीत् । तस्य चैद्यस्यानुयायिनो भूपा दुद्रुवुः । तत्र हेतुमाह–जीवितैषिण इति ॥४४॥ चैद्यस्य

देहादुत्थितं ज्योतिर्जीवात्मकं तेजः सर्वभूतानां पश्यतामेव सतां वासुदेवं श्रीकृष्णमुपाविशत् तत्सायुज्यं प्राप। तत्र दृष्टान्तमाह-खात् आकाशात् च्युता उल्का तेजोविशेषो यथा भुवि प्रविशति तद्वदिति ॥४५॥

अन्वितार्थप्रकाशिका

तत इति ॥ ततः उद्यतान्यायुधानि यैस्तथाभूताः पाण्डुसुताः मत्स्यादयश्च भगवन्निन्दनेन क्रुद्धाः सन्तः शिशुपालं जिघांसवः हन्तुमिच्छवः सन्तः उत्तस्थुः ॥४२॥ तत इति ॥ हे भारत ! ततश्च सदसि सभायां कृष्णपक्षीयान् युधिष्ठिरादीन् राज्ञो भर्त्सयन् वचसा तिरस्कुर्वन् असम्भ्रान्तो निर्भयश्चैद्यः शिशुपालोऽपि तान् हन्तुं खड्गचर्मणी जग्राह ॥४३॥ तावदिति ॥ एष मत्पार्षदो महाबलः अत एतान् सर्वानेव हन्यादिति मत्वा तावत्तत्क्षणमेव भगवान् कृष्णः उत्थाय स्वान्पाण्डवादीन्निवार्य रुषा क्षुरस्येवान्तो धारा यस्य तेन चक्रेण स्वयमेव आपततो रिपोः शत्रोस्तस्य शिरो जहार चिच्छेद ॥४४॥ शब्द इति ॥ एवं शिशुपाले निहते सति महानुच्चैः कोलाहलः महाशब्द आसीत्। तस्य चैद्यस्यानुयायिनो जीवितैषिणो भूपा दुद्रुवुः ॥४५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

असम्भ्रान्तः सावधानः भर्त्सयन् तिरस्कुर्वन् ॥४२॥ आपततः समीपमागच्छतः रिपोः शिरो मस्तकम् ॥ क्षुरस्यान्तो धारेव धारा यस्य तेन चक्रेण जहार चिच्छेद ॥४३॥ कोलाहलः हा हा साधु जयेत्यादिवचनैर्नानाविधः ॥४४॥ खात् गगनात् च्युता पतिता उल्का विद्युत् ॥ भुवि भूमाविव चैद्यदेहोत्थं ज्योतिः वासुदेवमुपाविशत् ॥४५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ हे भारत, ततः सदसि, कृष्णपक्षीयान् श्रीकृष्णपक्षपातिनः, राज्ञो नृपान्, भर्त्सयन्, चैद्यः शिशुपालः तु, असम्भ्रान्तः सन्, खड्गचर्मणी, जगृहे ॥४२॥ तावदिति ॥ तावत्तत्क्षणमेव, स्वयं भगवान् श्रीकृष्णः, उत्थाय, स्वान् स्वकीयान्, निवार्य, रुषा, क्षुरस्येवान्तो धारा यस्य तद्यच्चक्रं तेन, आपततः रिपोः शिशुपालस्य, शिरः जहार चिच्छेद ॥४३॥ शब्द इति ॥ शिशुपाले, हते सति, महानुच्चैः, कोलाहलः कलकलः शब्दः, आसीत्। तस्य शिशुपालस्य, अनुयायिनोऽनुवर्तिनः, भूपा राजानः अपि, जीवितैषिणः सन्तः, दुद्रुवुः पलायनं चक्रुः ॥४४॥ चैद्येति ॥ चैद्यस्य देहः तस्मात् उत्थितं, ज्योतिर्जीवात्मकं तेजः, सर्वभूतानां पश्यतां सतां, खादाकाशात्, च्युता उल्का विद्युत्, भुवि पृथिव्याम् इव, वासुदेवं कृष्णम्, उपाविशत्तावत् प्रविश्य ततस्तत्साधर्म्यमवापेत्यर्थः ॥४५॥

कृष्णप्रिया

राजन् परीक्षित् ! लेकिन शिशुपाल को इससे कोइ घबडाहट और चिन्ता न हुई। शिशुपाल ने बीना किसी प्रकार का आगा पिछा सोचे अपना खड्ग ढाल उठाई और वह भरी सभामें श्रीकृष्ण के पक्षपाती नरेशों को ललकारने लगा ॥४२॥ उन लोगोको आपसमें लडते झगडते देखकर भगवान श्रीकृष्ण खडे हो गये और उन्होंने अपने अनुयायी सावक राजाओं को शान्त किया। और स्वयं कृध्द होकर अपने उपर आक्रमण करते हुए शिशुपाल का मस्तिष्क छुरे के समान तीक्ष्ण धार वाले चक्र से काट दिया ॥४३॥ उस समय शिशुपाल के मारे जाने पर बडा कोलाहल मच गया। शिशुपाल के अनुयायी राजाओं अपने अपने प्राणों की रक्षा के लीये वहां से भाग गये जैसे गगन से गिरा हुआ लोंक पृथ्वी में समा जाता है वैसे सब प्राणियों के देखते हुए शिशुपाल के देह से एक तेज निकलकर भगवान श्रीकृष्ण में समा गया ॥४४॥ राजन् परीक्षित् ! इसमें आश्चर्य नहीं क्योंकि शिशुपाल के हृदयमें लगातार तीन जन्म से वैरभाव की सर्वथा वृद्धि हो रही थी और इस प्रकार वैरभाव से ही ध्यान करते करते शिशुपाल कृष्णमय हो गया और पार्षद हो गया। सत्य बात है कि मृत्यु के बाद होनेवाली गति में भाव ही कारण है ॥४५-४६॥

जन्मत्रयानुगुणितवैरसंरम्भया[१] धिया । ध्यायंस्तन्मयतां यातो भावो हि भवकारणम् ॥४६॥
ऋत्विग्भ्यः ससदस्येभ्यो दक्षिणां विपुलामदात् । सर्वान् सम्पूज्य विधिवच्चक्रेऽवभृथमेकराट् ॥४७॥
साधयित्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः । उवास कतिचिन्मासान् सुहृद्भिरभियाचितः ॥४८॥
ततोऽनुज्ञाप्य राजानमनिच्छन्तमपीश्वरः । ययौ सभार्यः सामात्यः स्वपुरं देवकीसुतः ॥४९॥

कर्दमक्षमा

जन्मत्रयानुगुणितवैरसंरम्भया, गिरा, ध्यायन्, तन्मयताम्, यातः, हि, भावः, भवकारणम् ॥४६॥ एकराट्, ससदस्येभ्यः, ऋत्विग्भ्यः, विपुलाम्, दक्षिणाम्, दत्त्वा, विधिवत्, सर्वान्, सम्पूज्य, विधिवत्, अवभृथम्, चक्रे ॥४७॥ योगेश्वरेश्वरः, कृष्णः, राज्ञः, क्रतुम्, साधयित्वा, सुहृद्भिः, अभियाचितः, कितिचित्, मासान्, उवास ॥४८॥ ततः, देवकीसुतः, ईश्वरः, अनिच्छन्तम्, अपि, राजानम्, अनुज्ञाप्य, सभार्यः, सामात्यः, स्वपुरम्, ययौ ॥४९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वेवं निन्दकस्य कथं वासुदेवे प्रवेशस्तत्राह-जन्मत्रयेति । जन्मत्रयेऽनुगुणितमनुवर्तितं यद्वैरं तेन संरब्धयाऽऽविष्टया तन्मयतां तत्स्वरूपतां यातः पुनः पार्षदो बभूवेत्यर्थः । अत्र हेतुः भावो हीति भावो भावता अनुध्यानं भवस्य ध्येयाकारजन्मनः कारणं पेशस्कारिध्यानेन कीटादौ तथा दृष्टत्वादित्यर्थः ॥४६-५१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्स्वरूपतां पार्षदः पुनर्बभूवेत्यर्थः । अत्रतत्स्वरूपत्वे । इत्यर्थ इति- "यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥" इति श्रीमुखोक्तेरत्यस्मृतरूपावाप्तिर्भवत्येवेति भावः ॥४६॥ एकराट् चक्रवर्ती ॥४७-४८॥ ततो यज्ञान्तस्नानानन्तरम् ॥४९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रविशंश्च तन्मयतां तद्रूपप्राचुर्य्यं तत्सदृशाकारतामित्यर्थः कीटदृष्टान्तेन च तथैवायाति कीदृशधियापि किं कुर्वन् तत्राह-जन्मेति तत्र हेतुः भाव इति भावोऽत्र तद्रूपभावनामिश्रपार्षदभावस्यासंस्कारः स च दैत्यभावस्यौपाधिकत्वेन बहिरङ्गत्वादन्तर्निगूढो वर्तत एव अत एव दन्तवक्त्रविशेषणमिदं तैरपि व्याख्यास्यते परमार्थस्तु दुर्मदो गत(मद)इति एवं तस्य श्रीभगवति प्रवेशोऽपि सर्वाविर्भावेनैकीभूयावतारात् समयालाभेनैव ज्ञेयः प्रकटलीलासमाप्तौ तु तत्र तत्र तत्तदंशगमने निजाभीष्टस्य श्रीविकुण्ठासुतरूपस्य भगवतः पार्षदत्वाय बहिःप्राकट्यमपि लभ्यते यथा सप्तमे-

"वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम् । नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ" ॥ इति ॥४६॥

ततश्च विघ्नविनाशेन यज्ञः सुष्ठु समाप्त इत्याह-ऋत्विग्भय इति अवभृथं यज्ञावसानकर्म एक एव राडिति साम्राज्यसिद्धेः ॥४७॥ योगेश्वरेश्वर इति तादृशोऽपि सुहृद्भिरभियाचितस्तेषां प्रार्थनावशः सन्नित्यर्थः । यद्वा योगेश्वरेश्वर इति "चित्रं बतैतदेकेन वपुषा युगपत्पृथक्" इत्यादिवत् सदा सर्वसुहृद्वर्गेषु निजाविर्भावानन्ददानं सूचितम् ॥४८॥ ईश्वरः परमस्वतन्त्रोऽप्यनुज्ञाप्य ययौ याने हेतुः देवकीति मातापित्रादिसुखार्थमिति भावः ॥४९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तन्मयतामिति श्रीभगवता सह पार्षदानां प्रायो भेदाभावात्, सच्चिदानन्दविग्रहत्वाभिप्रायेण वा, हि एव, अन्यत्तैर्व्याख्यातम् । यद्वा, तथा ध्यायन्नपि यातः । ननु तथापि द्वेषेण ध्यानात् पुनः पार्षदत्वं न सम्भवेत्तत्राह-हि यतो भावः पार्षदत्वे हेतुः पार्षदत्वे च तस्य प्राक्तनी भक्तिरेव भवस्य पार्षदत्वलक्षणश्रेयसः कारणम् । श्रीभगवदिच्छया विप्रशापेनैव द्वेषानुकरणम्, तत्त्वतस्तु भक्तत्वादेवेत्यर्थः ॥४६॥ ततश्च विघ्नविनाशेन यज्ञः सुष्ठु समाप्त इत्याह-ऋत्विग्भ्य इति । अन्यांश्च सर्व्वान् सम्यक् पूजयित्वा,

---

[१] रब्धया-श्रीधर. वंशी. वीर. विज. विश्व. शुक. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अवभृथं यज्ञावसानकर्म्म, एकराडिति साम्राज्यसिद्धेः ॥४७॥ योगेश्वराणां श्रीदामादीनां सनकादीनां वा ईश्वरः, यतः कृष्णः साक्षाद्भगवानिति तत्तदुपायेन तत्तच्छक्त्या चानयासेनैव सम्यक् साधयित्वेति; यद्वा, योगेश्वरा वशीकृतभक्तियोगास्तेषामीश्वर इति भक्तवात्सल्यादिति भावः। सुहृद्भिः श्रीयुधिष्ठिरादिभिः, अभि अभीक्ष्णं याचितस्तत्र वा सम्प्रार्थितः सन् ॥४८॥ ईश्वरः परमस्वतन्त्रोऽप्यनुज्ञाप्यैव ययौ, यतो देवक्याः सुतो भक्तवात्सल्यादिप्रकटनार्थं तस्यां जातः। यद्वा, याने हेतुः-देवकीति। मातापित्रादिसुखार्थमिति भावः। यानं च सुहृदां प्रार्थनया, चिरं तत्र वासेन सुहृदादीनां सर्व्वेषां स्वस्वस्थानगमनात् पश्चाद्भाव्यपि प्रसङ्गादत्रोक्तम्, तच्च सविशेषमग्राध्याये व्यक्तमेव भावि ॥४९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भावश्चित्तवृत्तिः भवकारणम् शुभाशुभजन्मनोः फलोदयकारणम् ॥४६-४९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेव व्यञ्जयन् कथं तन्निन्दकस्य तत्साधर्म्यप्राप्तिरिति शङ्कांञ्च निराकुर्वन्नाह-जन्मत्रय इति। जन्मत्रयेणानुगुणितमनुवर्तितं यद्वैरं तेन संरब्धया आविष्टया धिया ध्यायंस्तन्मयतां तत्प्रचुरतां तत्साधर्म्यमिति यावत् यातः प्राप्तः पार्षदो बभूवेत्यर्थः। हि यस्माद्भावश्चित्रवृत्तिर्भवकारणं शुभाशुभजन्मनोः निदानम् अतः शुभाश्रयविषयो भावः शुभभवकारणं बभूवेत्यर्थः ॥४६॥ ऋत्विग्भ्य इति। एकराट् युधिष्ठिरः सदसि भवाः सदस्याः तैस्सहितेभ्यः ऋत्विग्भ्यः विपुलां महतीं दक्षिणां ददौ ततो विधिवदवभृथं नाम स्नानं चक्रे ॥४७॥ साधयित्वेति। राज्ञो युधिष्ठिरस्य क्रतुं राजसूयं साधयित्वा सुहृद्भिः पृथादिभिर्याचितः प्रार्थितः कतिचिन्मासानुवास उषितवान् मासानित्यत्यन्तसंयोगे द्वितीया ॥४८॥ तत इति। ईश्वरो भगवान् स गमनमनिच्छन्तमपि राजानं युधिष्ठिरमनुज्ञाप्य राजानं प्रत्यनुज्ञां प्राप्येत्यर्थः। स्वपुरं द्वारकां प्रति ययौ ॥४९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

जन्मत्रयेऽनुगुणितेन सम्वर्धितेन वैरेण शत्रुभावेन विशिष्टेनेतरेण ज्ञानेन संरब्धया समुद्रिक्तया धिया ध्यायंस्तन्मयतां द्वेषमयताम् असुरो भगवत्प्रधानतां जयो यातः तथा हि भावो भक्तिर्भवकारणं माङ्गल्यकारणं भवति ॥४६॥ भगवतेऽग्रपूजासमर्पणेन युधिष्ठिरः कृतकृत्यः किमुत ऋत्विगादिभ्योऽपि यथाविहितदक्षिणामदादिति तत्राह-ऋत्विग्भ्य इत्यादिना-एकराट् चक्रवर्ती ॥४७-४९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कीदृशधियाऽपि किं कुर्वन् तत्राह-जन्मेति। तत्र हेतुः भावो हीति भावोऽत्र तद्रूपभावनामिश्रपार्षदभावस्य संसारः स च भगवल्लीलेच्छया बहिरेव प्रवर्तितस्य दैत्यभावस्योपाधिकत्वात् निगूढं वर्तत एवेति ॥४६-५१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जन्मत्रये अनुगुणितम् अनुवर्तितं यद्वैरं तेनैव संरब्धया आविष्टया धिया तन्मयतां तत्स्वरूपतां यातः पुनः पार्षदो बभूवेत्यर्थः। तत्र हेतुः भावो भावना भवस्य तत्प्राप्तेः कारणं भूप्राप्ताविव्यस्मात् तदुक्तं—

"वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम्। नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ" ॥ इति ॥४६-४७॥

योगेश्वरेश्वर इति। योगेश्वराणां श्रीरुद्रादीनामीश्वरः एव श्रीयुधिष्ठिरस्य तु प्रेमवश्यत्वादीशितव्यो निदेशवर्त्येव तदीयराजसूयसकलभारं स्वमेवोवाहेति भावः ॥४८-५३॥

गूढार्थदीपिनी

ज्योतिः जीवाख्यम् । यथा खात् आकाशात् च्युता उल्का ज्वाला भुवि प्रविशति तद्वत् ॥४६॥ जन्मत्रये अनुगुणितं दृढीकृतं यत् वैरं तेन संरब्धया आविष्टया धिया कृष्णं ध्यायन् तन्मयतां तत्सरूपतां पार्षदभावं प्राप्तः । भावो भावना भवस्य जन्मनः कारणम् । यं यं वापि स्मरन् भावम् इति गीतोक्तेः । अत्र पेशस्कारिदृष्टान्तोऽनुसर्तव्यः ॥४७॥ दिग्विजयत्वात् एक एव राजते इत्येकराट् चक्रवर्ती युधिष्ठिरः । अवभृथं यज्ञान्तस्नानं चक्रे ॥४८॥ साधयित्वा सम्पन्नं कृत्वा ॥४९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

द्वेषेणापि हरिप्रावण्यं तत्प्राप्तिकारणमित्याह-जन्मत्रयेति । जन्मत्रये अनुगुणितं दृढीकृतं यद्वैरं तेन संरब्धया आक्रान्तया धिया तन्मयतां तत्प्राचुर्यतां तत्साधर्म्यं यातः भूयस्तत्पार्षदो बभूव हि यतः भावो ध्यानं भवकारणं भवस्य ध्येयाकारजन्मनः कारणं निदानम् ॥४६-५०॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

खादाकाशाच्च्युतोल्का भुवि प्रविशति तथा चैद्यस्थितं ज्योतिर्जयाह्वयं वासुदेवमुपाविशत् । सर्वप्रत्यक्षसिद्धमिदमित्याह ॥ पश्यतां सर्वभूतानामिति । सभापर्वणि च —

ततश्चेदिपतेर्देहात्तेजोऽग्र्यं ददृशुर्नृपाः । उत्पतन्तं महाराज गगनादेव भास्करम् ॥

ततः कमलपत्राक्षं कृष्णं लोकनमस्कृतम् । ववन्दे तत्तदा तेजो विवेश च नराधिप ॥ इत्यादि ॥४६॥ हिरण्यकशिपुहिरण्याक्ष-रावणकुम्भकर्णजन्मनी इदं चेति जन्मनां त्रयम् । तदनुगुणितं तत्सम्बन्धि तत्सञ्चितमिति यावत् । वैरं तेन संरब्धया धिया समुद्रिक्तया ध्यायंस्तन्मयतां द्वेषरूपतामेकोऽपरस्तत्प्रधानकतां जयो यातः । द्वयोरप्येकदेवहतयोः किं कृतं वैषम्यमित्यत आह ॥ भाव इति । भावो भक्तिर्भवस्य मङ्गलस्य हि यतः कारणं ततस्तद्वान् प्रविष्टः प्रविष्टश्चापरः क्रमात्तम इति मन्तव्यम् । अभवोऽभक्तिर्भवस्य संसृतेः कारणं तद्दुःखस्येत्यर्थः । अहिभवस्य वृत्रभवं यत्तमस्तस्य कारणमित्यपरत्रार्थ इत्यपि वर्णयन्ति ॥४७॥ तदुपाख्यानं मया ते बहुविस्तरं वैकुण्ठवासिनोर्जयविजययोर्विप्रशापात्पुनः पुनर्जन्म च वर्णितं तृतीयसप्तमादौ ॥४८॥ विपुलां कल्पोक्तां एकराट् चक्रवर्ती । अवभृथं चक्रे ॥४९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं निश्शङ्कप्रवेशमुक्त्वा भगवन्निन्दाकर्तुः कथं सायुज्यमिति शङ्कां वारयति-जन्मत्रयेति । वैकुण्ठात्पतितस्य हिरण्यकशिपुरावणशिशुपाललक्षणजन्मत्रये अनुगुणितमावर्तितं यद्वैरम् अपकारं वधादिना तेन यः संरम्भः क्रोधसंरम्भः तद्युक्तया धिया वैरबुद्ध्या तं भगवन्तं ध्यायन् तन्मयतामेव जातः तेन पेशस्कारिवत् भगवद्ध्यानेन भगवद्रूपो भूत्वा भगवति सायुज्यं प्राप्तवान् अन्यथा जीवाभावे भगवति स्थितजगत इव न सायुज्यता स्यात् तस्मादिदं भगवद्रूपेण तज्जन्म तत्र कारणं भाव एव निरन्तरस्मरणमेव यमेवार्थं निरन्तरं स्मरति स एव भवति ॥४६॥ एवं प्रसङ्गात् दोषनिवृत्तिं मोक्षं च निरूप्य प्रारब्धं यागं शि निरूपयति-ऋत्विग्भ्य इति । ततो ऋत्विग्भ्यो दक्षिणा ततः सदस्येभ्यो यावन्तो वै सदस्या इति सर्वेभ्य एव विपुलां वाञ्छितादप्यधिकामदात् ततः सवनत्रयानन्तरं साद्यस्कृद्विरात्रसत्रानन्तरं सर्वानिवदेवान् यज्ञभागभुजः तत्तत्स्थाने सम्पूज्य लौकिकानि दानमानादिभिः ततोऽवभृथस्नानं कृतवान् एकराडिति एकराज्यं तस्य सिद्धमिति यागफलस्यानुवादः ॥४७॥ एवं सफलं यागमनू भगवतैवैतत्सर्वं कृतमिति भगवच्चरित्रमुक्त्वा उपसंहरन् भगवतः प्रयाणमाह-साधयित्वेति द्वाभ्याम् । राज्ञः क्रतुं राजसूयं साधयित्वा कृष्णः फलात्मापि साधनत्वेन स्वनियोगं कारयित्वा सम्मोहनमुत्पाद्य यथा न ज्ञातं तथा योगं साधयित्वा योगेश्वराणामपीश्व दुर्ज्ञेयः योगचर्या दुर्ज्ञेयेति सिद्धेऽपि योगे ते स्वात्मानं न ज्ञास्यान्तीति निश्चित्य कौतुकार्थमज्ञैः सुदृद्भिरभियाचितः स कतिचिन्मासानुवास ॥४८॥ ततो लीलान्तरं कर्तुं राजानमनुज्ञाप्य स्नेहवशादनिच्छन्तमपि ईश्वरत्वात् स्वातन्त्र्यमवलम्ब्य यथाग सभार्यः सानुगामात्यः स्वपुरं ययौ ननु भगवत्कार्यं किमपि न सिद्धं महत्या सम्भृत्या किमित्यागतः किमिति गतः इत्याशङ्कायामाह देवकीसुत इति । भक्तवात्सल्येन देवक्याश्च पुत्रो जातः तथेदमपि कृतवानित्यर्थः ॥४९॥

श्रीसुबोधिनीसारः

जन्मत्रयेणानुगुणितं सम्बद्धं यद्वैरं तेन संरब्धया व्याप्तया धिया बुद्ध्या तं ध्यायन् चिन्तयन् तन्मयतां तत्स्वरूपतां यातः प्राप्तः तत्पार्षदो जातः पुनरित्यर्थः । युक्तं चेदमित्याह भावो हि भवस्य जन्मनः कारणं भवति ॥४६॥ सदस्येभ्यः सहितेभ्यः ऋत्विग्भ्यो विपुलां महतीं दक्षिणाम् अदात् विधिवत् सर्वान् सम्पूज्य एकराट् चक्रवर्ती अवभृथं यज्ञान्तस्नानं चकार ॥४७॥ राज्ञो युधिष्ठिरस्य क्रतुं यज्ञं साधयित्वा योगेश्वराणामीश्वरः कृष्णः सुहृद्भिर्मित्रैरभियाचितः कतिचिन्मासानुवास ॥४८॥ ततोऽनन्तरमनिच्छन्तमपि राजानं पाण्डवम् अनुज्ञाप्य सामात्यः सभृत्यः सस्त्रीक ईश्वरो देवक्याः सुतो ययौ जगाम ॥४९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु निन्दकस्य कथं तत्प्राप्तिः इत्याशङ्क्याह-जन्मेति । हिरण्यकशिपुरावणशिशुपाललक्षणजन्मत्रये अनुगुणितमनुवर्तितं यद्वैरं द्वेषस्तेन संरब्धया आविष्टया धिया कृष्णं ध्यायन् तन्मयतां यातः लोके विमुक्तिप्रख्यापनार्थं भगवदिच्छया तत्सायुज्यं प्राप्य पुनस्तल्लोके पार्षदो बभूवेत्यर्थः । तत्सात्मतां नीतौ पार्श्वं जग्मतुः इति सप्तमस्कन्धे स्पष्टोक्तेः । हि यस्मात् भावोऽनुचिन्तनमेव भवस्य ध्येयाकारशुभाशुभजन्मनः कारणम् । पेशस्कारिध्यानेन कीटादौ तत्प्रसिद्धेरित्यर्थः ॥४६॥ दिग्विजयस्य जातत्वात् एव एव राजत इत्येकराट् युधिष्ठिरः सदसि भवाः सदस्यास्तैः सहितेभ्यः ऋत्विग्भ्यः विपुलां महतीं दक्षिणामदात्, पूजार्हांश्च सर्वान् सम्पूज्य विधिवदवभृथं नाम स्नानं चक्रे ॥४७॥ एवं राज्ञो युधिष्ठिरस्य क्रतुं राजसूयं साधयित्वा सुहृद्भिः पृथार्जुनादिभिरभियाचितः प्रार्थितः कृष्णः कतिचिन्मासांस्तत्रैवोवास । तत्साहाय्येनैव राजसूयसिद्धिर्जाता, अन्यथा सा न स्यात् इत्याशयेनाह-योगेश्वर इति ॥४८॥ स्वगमनमनिच्छन्तमपि राजानं युधिष्ठिरमनुज्ञाप्य पृष्ट्वा भार्यादिसहितो देवकीसुतः स्वपुरं द्वारकां ययौ । तदिच्छां विनापि गमनं कथं सम्भवति तत्राह-ईश्वर इति, स्वतन्त्र इत्यर्थः ॥४९॥

अन्वितार्थप्रकाशिका

चैद्येति ॥ चैद्यस्य देहादुत्थितं निःसृतं ज्योतिर्जीवात्मकं तेजः पार्षदवपुरेव वा तस्या नश्वरत्वात् सर्वभूतानां पश्यतामेव सतां वासुदेवं श्रीकृष्णमुपाविशत् तत्सायुज्यं प्राप । यथा खात् आकाशात् च्युता उल्का तेजोविशेषो यथा भुवि प्रविशति तद्वत् ॥४६॥ जन्मेति ॥ हिरण्यकशिपुरावणशिशुपाललक्षणजन्मत्रये अनुगुणितमनुवर्तितं यद्वैरं द्वेषस्तेन संरब्धया अविष्टया धिया कृष्णं ध्यायन् तन्मयतां यातः पुनस्तल्लोके पार्षदो बभूव पार्श्वं जग्मतुरिति सप्तमस्कन्धोक्तेः । हि यस्मात् भावोऽनुचिन्तनमेव भवस्य ध्येयाकारशुभाशुभजन्मनः कारणम् । पेशस्कारिध्यानेन कीटादौ तत्प्रसिद्धेः ॥४७॥ ऋत्विग्भ्य इति ॥ दिग्विजयस्य जातत्वात् एक एव राजत इत्येकराट् युधिष्ठिरः सदसि भवाः सदस्यास्तैः सहितेभ्यः ऋत्विग्भ्यः विपुलां महतीं दक्षिणामदात् पूजार्हांश्च सर्वान्सम्पूज्य विधिवदवभृथं नाम यज्ञान्तस्नानं चक्रे ॥४८॥ साधयित्वेति ॥ एवं राज्ञो युधिष्ठिरस्य क्रतुं राजसूयं साधयित्वा सुहृद्भिः पृथार्जुनादिभिरभियाचितः प्रार्थितः योगेश्वरेश्वरः कृष्णः कतिचिन्मासांस्तत्रैवोवास ॥४९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नन्वेवं हरिनिन्दकस्य चैद्यस्य कृष्णे प्रवेशः कथमिति चेत्तत्राह जन्मेति-जन्मत्रयेणानुगुणितमनुबद्धं यद्वैरं तेन संरब्धा व्याप्ता तया धिया सततं ध्यायन् सन् तन्मयतां वृक्षे पक्षिवत्तत्स्वरूपे लीनतां यातः प्राप्तः तदनन्तरं पार्षदत्वं प्राप्तः तथा च सप्तमे ॥ वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम् । नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदाविति ॥ हि तथाहि भावः पदार्थस्य निरन्तरानुस्मरणं भवस्य ध्येयाकारसम्भवस्याकारणमस्ति ॥४६॥ अवभृथं यज्ञान्तस्नानम् एकराट् चक्रवर्ती ॥४७-५१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेव व्यञ्जयन् कथं तन्निन्दकस्य तत्साधर्म्यप्राप्तिरिति शङ्कां च निराकुर्वन्नाह ॥ जन्मत्रयेति ॥ जन्मनां त्रयं तेनानुगुणितमनुवर्तितं यद्वैरं तेन संरब्धा आविष्टा तया, धिया बुद्ध्या, ध्यायन्, तन्मयतां तत्प्रचुरतां तत्साधर्म्यमिति यावत् । यातः प्राप्तः, पुनः पार्षदो बभूवेत्यर्थः । हि यस्मात्, भावश्चित्तवृत्तिः, भवकारणं शुभाशुभजन्मनोर्निदानम्, अतः शुभाश्रयविषयभावः शुभभवकारणं, बभूवेत्यर्थः ॥४६॥ ऋत्विग्भ्य इति ॥ एकराट् स युधिष्ठिरः, सदस्येभ्यः, ऋत्विग्भ्यः, विपुलां पुष्कलां, दक्षिणाम्, अदात् । सर्वान्

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विधिवन् सम्पूज्य, विधिवत्, अवभृथं चक्रे ।।४७।। साधयित्वेति ।। योगेश्वरेश्वरः कृष्णः, राज्ञो युधिष्ठिरस्य, क्रतुं राजसूयं, साधयित्वा, सुहृद्भिः अभियाचितः सन्, कतिचित् मासान्, उवासोषितवान्। मासानित्यत्यन्तसंयोगे द्वितीया ।।४८।। तत इति ।। ततः ईश्वरः, देवकीसुतः श्रीकृष्णः, अनिच्छन्तम् अपि, राजानं युधिष्ठिरम्, अनुज्ञाप्य, राज्ञः सकाशादनुज्ञां प्राप्य, सभार्यः सामात्यः सन्, स्वपुरं ययौ ।।४९।।

कृष्णप्रिया

यहां शिशुपाल की सद्गति होने के बाद चक्रवर्ती श्रीयुधिष्ठिर महारज सभासदो और ऋत्विजों को बहुत दक्षिणा देकर और सबका सन्मान करके विधि पुरः सर सवभृथ स्नान किया ।।४७।। राजन् परीक्षित् ! इस प्रकार योगेश्वर भगवान श्रीकृष्णने धर्मनिष्ठ युधिष्ठिर महाराज का राजसूय यज्ञ सम्पूर्ण किया और अपने स्वजन सुहृदजनो का अनुराग से कुछ महीनों तक वहां ही निवास किया। इसके बाद महाराजा धर्मराज की इच्छा न होने पर भी सर्व समर्थ भगवान श्रकीष्ण धर्मराजसे अनुमति संपादन करली और अपनी गृहिणियों औ मंत्रियों के साथ इन्द्रप्रस्थ से द्वारिकापुरी ओर प्रस्थान किया ।।४८-४९।।

वर्णितं तदुपाख्यानं मया ते बहुविस्तरम् । वैकुण्ठवासिनोर्जन्म विप्रशापात् पुनः पुनः ।।५०।।
राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः । ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ।।५१।।
राज्ञा सभाजिताः सर्वे सुरमानवखेचराः । कृष्णं क्रतुं च शंसन्तः स्वधामानि ययुर्मुदा ।।५२।।
[1]दुर्योधनमृते पापं कलिं कुरुकुलामयम् । यो न सेहे श्रियं स्फीतां दृष्ट्वा पाण्डुसुतस्य ताम् ।।५३।।
य इदं कीर्तयेद्विष्णोः कर्म चैद्यवधादिकम् । [2]राज्ञां मोक्षं वितानं च सर्वपापैः प्रमुच्यते ।।५४।।

।। इति श्रीमद्भागववते महापुराणे[3] दशमस्कन्धे शिशुपालवधो[4] नाम
[5]चतुःसप्ततितमोऽध्यायः ।।७४।।

कर्दमक्षमा

तद्, बहुविस्तरम्, वैकुण्ठवासिनोः, पुनः, पुनः, जन्म, उपाख्यानम्, वर्णितम् ।।५०।। राजसूयावभृथ्येन, स्नातः, राजा, युधिष्ठिरः, ब्रह्मक्षत्रसभामध्ये, सुरराड्, इव, शुशुभे ।।५१।। राज्ञा, सर्वे, सुरमानवखेचराः, सभाजिताः, कृष्णम्, च, क्रतुम्, शंसन्तः, स्वधामनि, मुदा, ययुः ।।५२।। पापाम्, दुर्योधनम्, कलिम्, कुरुकुलामयम्, ऋते, शंसन्तः, सर्वे, ययुः, पाण्डुसुतस्य, स्फीतम्, श्रियम्, दृष्ट्वा, यः, न, सेहे ।।५३।। यः, इदम्, विष्णोः, चैद्यवधादिकम्, कर्म, राज्ञाम्, मोक्षम्, वितानम्, कीर्तयेत्, च, सर्वपापैः, प्रमुच्यते ।।५४।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे चतुःसप्ततितमोऽध्यायान्वयाः ।।७४।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

सुरा मानवाः खेचराः प्रमथाश्च ।।५२।। पापं धर्मद्विषम् अत्र हेतुः कलिं कलेरंशम् अत एव कुरुकुलस्याऽऽमयं व्याधिवन्नाशकम् ।।५३।। वितानं यज्ञञ्च ।।५४।।

इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां
भावार्थदीपिकायां चतुःसप्ततितमोऽध्यायः ।।७४।।

---

[1] अयं श्लोको विज. पाठे नास्ति। [2] राजमोक्षं-श्रीधर. वंशी. वीर. विज.। [3] पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. पु.।
वधस्त्रिसप्त-गो. प्रे. टी.। [5] द्वयशीतितमोऽध्यायः-विज.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाश:

वैकुण्ठवासिनोर्जयविजययो: ॥५०-५२॥ ऋते विना । अत्र धर्मद्वेष्टृत्वे । अत एव कल्यंशत्वादेव ॥५३॥ चैद्यस्य भगवद्विरोधित्वेन पाखण्डत्वात्तद्वधश्रवणमपि पापनाशकमित्याह-कर्म चैद्येत्यादि ॥५४॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे चतु:सप्ततितमोऽध्याय: ॥७४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वैष्णवैस्तु कथमपि विप्रा नावमन्तव्या इत्यानुषङ्गिकतया बोधयन् महाकथामुपसंहरति-वर्णितमिति । तत् त्वया सप्तमे पृष्टं प्रसिद्धं वा बहुविस्तर: शब्दप्रपञ्चो यस्मिन् तत् क्रियाविशेषणं वा किं तदाह-वैकुण्ठेति । तादृशयोरपि वैकुण्ठेति पाठ: क्वचित् ॥५०॥ पुनरुत्कण्ठया तदभिषेकं स्तौति-राजेति । स्नात इत्यत्र स्वयं श्रीभगवता द्रौपदीसहितस्य तस्य केशसंस्कारपूर्वकाभिषेकादिविशेषो महाभारते दृश्य: ॥५१॥ ततश्च राजेति युग्मकमिदं सुरा: श्रीब्रह्मादय: मानवा राजादय: खेचरा: सिद्धादय: कृष्णमिति-

> **"यद्धर्मसूनोर्बतराजसूये निरीक्ष्य दृक् स्वस्त्ययनं त्रिलोक: ।**
> **कार्त्स्न्येन चाद्येहगतं विधातुरर्वाक् स्मृतौ कौशलमित्यमंस्त" इति ।**

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं विस्मापनं स्वस्य च सौभगर्द्धे: परंपदं भूषणभूषणाङ्गमित्यादिर्णितरूपादिकमित्यर्थ: क्रतुं च तत्सान्निध्यात्सर्वविलक्षणतां यातम् एवं साधव: सर्वे हृष्टा: ॥५२॥ दुष्टास्तु स्वपापेनैवादूयन्तेति बोधयितुं तन्मुख्यस्य तापं निदर्शयति-दुर्य्योधनमिति । स तु कृष्णं क्रतुं च न प्रशशंस न च मुदा स्वधाम ययौ किन्तु केवलं शोकसन्तप्तोऽभूदित्यर्थ: । तत्र हेतु: पापमिति । पाण्डुसुतस्येत्यसहने हेत्वन्तरं भ्रातृत्वेन स्पर्धया तत्रापि धर्मनिष्ठत्वेन मात्सर्य्यापत्तिरिति भाव: ॥५३॥ एवं श्रीकृष्णं साक्षात्पश्यतामपि दुर्य्योधनादीनामभक्त्या दु:खमेव कथञ्चिद्भक्त्या च सर्वेषां सदा सुखमेवेत्याशयेनाह-य इति । अनेनाधिकारापेक्षा निरस्ता विष्णो: स्वमाहात्म्यविशेषप्रकटनेनापि विश्वव्यापकस्य श्रीकृष्णस्य आदिशब्देन युधिष्ठिरप्रतिष्ठापनादिकं सर्वै: पापैस्तद्भक्त्यन्तरायै: ॥५४॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां चतुस्सप्ततितमोऽध्याय: ॥७४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वैष्णवैस्तु कथमपि विप्रा नावमन्तव्या इत्याशयेन प्रसङ्गादाह-वर्णितमिति । तत् त्वया सप्तमस्कन्धे पृष्टं प्रसिद्धं वा बहुविस्तरो विस्तारो यस्मिन् तत्, क्रियाविशेषणं वा; किम् ? तदाह-वैकुण्ठेति; मोक्षाधिकमहापदप्राप्तयोरपि ॥५०॥ प्रस्तुतमाह-राजेति । स्नात इत्यत्र स्वयं श्रीभगवता श्रीद्रौपदीसहितस्य केशसंस्कारपूर्वकाभिषेकादिर्महाभारतोक्तो विशेषो ज्ञेय: ॥५१॥ सुरा: श्रीब्रह्मादय:, मानवा राजादय:, खेचरा सिद्धादय:; कृष्णं भक्तवात्सल्यादिना सर्वचित्ताकर्षकं शंसन्त: स्तुवन्त:, -तथा तथा क्रतुसाधनात्तेन निजरूप-गुण-लीलाविशेष-प्रकटनाच्च, क्रत्वङ्ग-श्रीवरुणादिकृतादप्यधिकाधिकगुणसम्पत्ते: ॥५२॥ एवं साधव: सर्वे प्रहृष्टा:, दुष्टाश्च स्वपापेनैवादूयन्तेत्याह-दुर्य्योधनमिति । स तु कृष्णं क्रतुं च, न प्रशशंस, न च मुदा स्वधाम ययौ, किन्तु केवलं शोकसन्तप्तोऽभूदित्यर्थ: । तत्र हेतु:-पापमिति, स्फीतां समृद्धां तां राजसूयोत्थामनिर्वचनीयां वा; पाण्डुसुतस्येति असहने मात्सर्य्योत्पत्तेरिति भाव: ॥५३॥ एवं श्रीकृष्णं साक्षात् पश्यतामपि दुर्य्योधनादीनामभक्त्या सदा दु:खमेव, कथञ्चित्तद्भक्त्या च सर्वेषां सदा सुखमेवेत्याशयेन; यद्वा, चैद्य-जरासन्धादीनां श्रीकृष्णात्तु साक्षान्मरणेन मोक्षोऽभूदिति किमाश्चर्य्यम्, तद्वधादिश्रवणादपि श्रीभगवत्प्रभावेण परमपदप्राप्ति: स्यादित्याह-य इति । अनेनाधिकारापेक्षा निरस्ता; विष्णो: स्वमाधुर्य्यविशेषप्रकटनेन विश्वव्यापकस्य श्रीकृष्णस्य; आदि-शब्देन श्रीयुधिष्ठिरप्रतिष्ठादिकं सर्वै: समूलै: सप्रारब्धैश्च पापै: प्रकर्षेण मुच्यते, - मोक्षाधिकश्रीवैकुण्ठलोकप्राप्ते: ॥५४॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्रीश्रील-सनातन-गोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
श्रीदशम-टिप्पण्यां चतु:सप्ततितमोऽध्याय: ॥७४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वैकुण्ठवासिनोः वैकुण्ठप्राप्तिश्च अत्र वक्तव्यं सर्वं पूर्वं प्रपञ्चितमिति ॥५०-५४॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये चतुस्सप्ततितमोऽध्यायः ॥७४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

जन्मत्रयानुगुणितवैरविस्तरबुभुत्सुमालक्ष्याह-वर्णितमिति। वैकुण्ठवासिनोर्जयविजययोः विप्राणां सनकादीनां शापाद्धेतोः पुनःपुनर्जन्म तद्विषयं यदुपाख्यानं तत् मया तुभ्यं बहुविस्तरं यथा तथा वर्णितम् ॥५०॥ राजसूयेति। राजसूयसम्बन्धिना अवभृथेन स्नातः सुरराडिन्द्र इव शुशुभे ॥५१॥ अनुचराश्च शंसन्तः स्तुवन्तः मुदा हर्षेण स्वधामानि स्वस्थानानि प्रति ययुः ॥५२॥ किं सर्वे मुदा ययुर्नेत्याह-दुर्योधनमिति। दुर्योधनमेकं विना सर्वे मुदा ययुः तत्र हेतुत्वेन तं विशिनष्टि पापोऽत एव कलिं धर्मद्विषं कुरुकुलस्यामयं रोगवन्नाशनिदानं किञ्च दुर्योधनः समृद्धां पाण्डुसुतस्य श्रियं सम्पदं दृष्ट्वा न सहे न सोढवान् ॥५३॥ उपवर्णितोपाख्यानकीर्तनफलमाह-य इति। राज्ञां जरासन्धबन्दीकृतानां मोक्षणं ततस्त्याजनं वितानं यज्ञं च यः कीर्तयेदनुवर्णयेत्स सर्वैः पापैः प्रमुच्यते ॥५४॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां चतुस्सप्ततितमोऽध्यायः ॥७४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

तयोरुपाख्यानं वैकुण्ठवासिनोर्जयविजययोर्विप्रशापात्पुनः पुनर्जन्म ॥५०॥ राजसूयावभृथविहितकर्मणा ब्रह्मणां विप्राणां क्षत्राणां मण्डलेश्वराणां सभामध्ये स्वराडिन्द्रः ॥५१-५३॥ बन्धुभूतशिशुपालवधलक्षणं हरेः कर्म न पुण्यसाधनं किन्तु तद्विपरीतकारणमिति मन्दाशङ्कां परिहरन् फलमाह-इदमिति ॥५४॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां चतुस्सप्ततितमोऽध्यायः ॥७४॥
(श्रीविजयध्वजतीर्थरीत्या चतुरशीतितमोऽध्यायः ॥८४॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

क्रतुश्च कृष्णसम्बन्धेन शंसन्तः ॥५२-५४॥

इति श्रीमद्भागवते दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे चतुस्सप्ततितमोऽध्यायः ॥७४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

॥१-५४॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे चतुस्सप्ततितमोऽध्यायः ॥७४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥१...५४॥

॥ इति श्रीमद्भा० म०पु० दशमस्कन्धे श्रीनाचचक्रवर्तिपादविरचितायां चैतन्यमञ्जूषायां चतुःसप्ततितमोऽध्यायः ॥७४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वितानं यज्ञम् ॥५४॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्। चतुस्सप्ततितमोऽध्यायो दशमेऽजनि सङ्गतः ॥७४॥

गूढार्थदीपिनी

स्वपुरं द्वारकाम् अनुज्ञाप्य पृष्ट्व ॥५०॥ वैकुण्ठवासिनो: जयविजययो: ॥५१॥ आवभृथ्येन यज्ञसम्बन्धिस्नानेन। सुरराट् इन्द्र इव ॥५२॥ सभाजिता: सम्पूजिता: खे आकाशे चरन्तीति खेचरा: प्रमथादय:। शंसन्त: प्रशंसन्त: ॥५३॥ दुर्योधनम् ऋते विना सर्वे प्रशंसन्त: ययुरिति पूर्वेणान्वय:। कुरुकुलस्य आमयं रोगवन्नाशकम्। कलिं कलेरंशम्। पापं पापिनम् अर्थआद्यजन्त:। यो दुर्योधन: स्फीतां समृद्धां दृष्ट्वा न सेहे। स्फायी ओप्यायी वृद्धौ इति धातु: ॥५४॥ वितानं यज्ञं च। 'क्रतुविस्तारयोरस्त्री वितानम्' इत्यमर:। राज्ञां जरासन्धनिरुद्धानां राज्ञां मोक्षम् ॥५५॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यां चतु:सप्ततितमोऽध्याय: ॥७४॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

॥५१॥ खेचरशब्द उपदेववाचक: ॥५२-५३॥ वितानं राजसूयम् ॥५४॥

॥ श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवसिद्धान्तप्रदीपे चतुस्सप्ततितमाध्यायार्थप्रकाश: ॥७४॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

राज्ञ: क्रतुं साधयित्वा यथासुखं विजहार ॥५०॥ राजसूयावभृथविहितकर्मणा सुरराडिन्द्र: ॥५१॥ खेचराश्चारणादय: ॥५२॥ यो राज्ञां मोक्षविधानं मागधप्रतिरुद्धानां मोक्षविधानं चैद्यवधादिकं च कीर्तयेत् स सर्वपापै: प्रमुच्यते। यद्यपि पद्य आद्यतो जातो राज्ञां मोक्ष इति स एवादौ वक्तव्यस्तथापि श्रीकृष्णमहाविजय इति चैद्यवधाधिकमित्यादावुदितमिति मन्तव्यम् ॥५३॥

॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे चतुरशीतितमोऽध्याय: ॥१०-८४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

उपसंहरति-वर्णितं तदुपाख्यानमिति। नन्वत्र शिशुपालस्य स्वरूपं न सम्यगुक्तं तदकथने कथा न रसवतीत्याशङ्क्याह-मया पूर्वमेव वैकुण्ठवासिनोर्जन्म विप्रशापात् पुन: पुन: जातमिति बहुविस्तरं यथा भवति तथा तस्य शिशुपालस्य उपाख्यानं मया वर्णितं तृतीये सप्तमे च ॥५०॥ ततो राज्ञ: सर्वपापक्षये महती शोभा जातेत्याह-राजसूयावभृथेनेति। राजसूयावभृत्यमवभृथकर्म तत्र स्नातो राजा सर्वपापक्षये जाते ब्रह्मक्षत्रसभामध्ये सर्वेभ्य: अधिकं शुशुभे समानजातीयोऽपि ब्राह्मणाद्धीनोऽपि सर्वोत्कर्षेण भात इत्यत्र दृष्टान्तमाह-सुरराट् देवेन्द्र इवेति ॥५१॥ राजसूयस्य साङ्गस्य फलमनूद्य प्रत्यापत्तिं वदन् सर्वेषां राज्ञां प्रतियानमाह-राज्ञा सभाजिता इति। सर्वे सुरादय: सभाजिता: सात्त्विका राजसा: तामसाश्च आधिदैविकमाध्यात्मिकञ्च उभयसमाराधनं मध्ये अंशत्वेन प्रसङ्गाच्च स्वयं प्रीणिता: मुदा स्वधामानि ययु: ॥५२॥ राजसूयस्य फलं स्वाराज्यं सर्वसन्तोषं चोक्त्वा भूभारहरणमपि तस्य प्रयोजनमिति तस्यापि बीजं तत्र जातमिति निरूपयति-दुर्योधनमृते पापमिति। दैत्यांशा: पूर्वमेव निराकृता: अयं सन्निहितबन्धुत्वेन छन्न: अन्त: स्थित: तथापि फले सिद्धे स्वदोषं प्रकटितवान् ततो मानभङ्गं प्राप्य विमनागत: यत: स पापरूपकलेरवतार: तादृश: कथं बन्धुरिति चेत्तत्राह-कुरुकुलस्यामयमिति। ब्रह्मकल्पाद्येतत्पर्यन्तं कुरुवंशे यावत्पापमभूत् तदेवैकीभूतं दुर्योधनरूपेणाविर्भूतम् अतस्तस्य बन्धुत्वं पापत्वञ्चाविरुद्धमिति अर्थ: आमयो रोग: प्राणिनां सहज: धात्वन्नवैषम्येन नित्यं भवति स कदाचित् प्रवृद्ध: रोगव्यपदेशं प्राप्नोति तथायमपि पापरूप इति भाव: तस्योद्बोधे किं निमित्तमित्याकाङ्क्षायामाह-यो न सेहे श्रियं स्फीतामिति धर्मफलधर्मो न सहते यथा आमयो गुरुभोजनं दृष्टादृष्टोपायाभ्यां पाण्डुसुतस्य श्री: स्फीता जाता तादृशीं प्रसिद्धां न सहेत इति कुरुकुले रोगत्वम् ॥५३॥ एतदुपाख्यानश्रवणस्य फलमाह-य इदं कीर्तयेदिति। प्रत्यहं पठेत् किमित्येतत्पठिष्यतीत्याशङ्क्यामाह-विष्णो: कर्मेति। इदन्तु राजसूयाख्यं राज्ञ: कर्म कथं भगवत्कर्मेत्यत आह-चैद्यवधादिकमिति। शिशुपालवध: आदिर्यस्य तत:प्रभृति सर्वं भगवत्कर्मैव तर्हि तावदेव श्रोतव्यमित्याशङ्क्याह-राज्ञां मोक्षं वितानञ्चेति त्रयमेतत् तामसं राजसं सात्त्विकञ्चेति

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एतत्कीर्तनेन श्रवणेन च सर्वपापैः प्रमुच्यत इति श्रवणादिफलं निरूपयन् तस्य धर्मस्योत्तमत्वमाह–यथास्वरूपत उत्तमत्वं वर्ण्य तथा दृष्टफलसाधकत्वेनापि माहात्म्यमिति फलोक्तिः ॥५४॥

॥ इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे
पञ्चविंशाध्यायविवरणम् ॥२५॥७४॥

श्रीसुबोधिनीसारः

आश्चर्यं मन्वानं प्रत्याह। तदुपाख्यानं बहुविस्तरं यथा भवति तथा मया ते तुभ्यं वर्णितं वैकुण्ठवासिनोर्जयविजययोर्विप्रा सनकादीनां शापात् पुनः पुनर्जन्मेति ॥५०॥ राजसूययज्ञान्तस्नानेन स्नातो युधिष्ठिरो राजा ब्राह्मणानां क्षत्रियाणां सभामध्ये शुशु रराज सुरराट् इन्द्र इव ॥५१॥ सर्वे देवमनुष्यादयो राज्ञा सभाजिताः प्रशंसिताः कृष्णं क्रतुं राजसूयं शंसन्तः कथयन्तो मुदा हर्षे स्वधामानि स्वगृहाणि ययुः जग्मुः ॥५२॥ पापं पापिनं कलेरंशं कुरुकुलस्यामयं रोगरूपं दुर्योधनमृते विना तत्र हेतुः पाण्डुसुत युधिष्ठिरस्य स्फीतां वृद्धां श्रियं तां दृष्ट्वा यो न सेहे न चक्षमे ॥५३॥ शिशुपालवधादिकं विष्णोरिदं कर्म राज्ञां मोक्षं मोचनं यज्ञस् वितानं चैतत् यः कीर्तयेत्स सर्वपापैः प्रमुच्यते ॥५४॥

इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायां चतुःसप्ततितमोऽध्यायः ॥७४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जन्मत्रयानुगुणितवैरविस्तारबुभुत्सामालक्ष्याह–वर्णितमिति। वैकुण्ठवासिनोर्जयविजययोर्विप्राणां सनकादीनां शापाद्धेतो पुनः पुनर्यज्जन्म तद्विषयकमुपाख्यानं च तन्मया ते तुभ्यं बहुविस्तरं यथा तथा वर्णितम् ॥५०॥ राजसूयसम्बन्धिनाऽवभृथेन स्नात युधिष्ठिरः ब्राह्मणादिसभामध्ये सुरराट् इन्द्र इव शुशुभे ॥५१॥ राज्ञा युधिष्ठिरेण सम्पूजिताः सुरादयः सर्वे कृष्णं क्रतुं च शंसन स्तुवन्तो मुदा हर्षेण स्वस्वधामानि प्रतिययुः ॥५२॥ यो दुर्योधनस्तां सर्वजनानन्दकरीं स्फीतां समृद्धां पाण्डुसुतस्य युधिष्ठिरस्य श्रि सम्पदं दृष्ट्वा न सेहे तमेकं दुर्योधनं विना सर्वे मुदा ययुरिति पूर्वेणैवान्वयः। तत्र हेतुमाह–कुरुकुलस्यामयं रोगवन्नाशकमिति। त हेतुमाह–पापमिति, पापाचारमित्यर्थः। तत्र हेतुमाह–कलिमिति, कलेरंशमित्यर्थः ॥५३॥ उपवर्णितोपाख्यानकीर्तनादिफलमाह- इति। कीर्तयेदिति श्रवणस्मरणयोरप्युपलक्षणम्। यः पुमान् इदं चैद्यवधादिकं विष्णोः कर्म राज्ञा जरासन्धनिरुद्धानां ततो मोक्ष वितानं यज्ञमहोत्सवं च कीर्तयेत् शृणुयात् स्मरेद्वा स सर्वपापैः प्रमुच्यते ॥५४॥

।इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना ॥ श्रीमन्मुकुन्दरायाणां पादसेवाधिकारणि ॥१॥

श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये ॥ श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥

रचिता दशमे तत्र सात्त्विकानां निरोधने ॥ चतुःसप्ततितमोऽगाद्राजसूयनिरूपकः ॥३॥

अन्वितार्थप्रकाशिका

तत इति ॥ स्वगमनमनिच्छन्तमपि राजानं युधिष्ठिरमनुज्ञाप्य पृष्ट्वा भार्यादिसहितः ईश्वरो देवकीसुतः कृष्णः स्वपुरं द्वार ययौ ॥५०॥ वर्णितमिति ॥ वैकुण्ठवासिनोर्जयविजययोर्जिप्राणां सनकादीनां शापाद्धेतोः पुनः पुनर्यज्जन्म तद्विषयकमुपाख्यानं तन्मया ते तुभ्यं बहुविस्तरं यथा तथा वर्णितम् ॥५१॥ राजेति ॥ राजसूयसम्बन्धिनाऽवभृथेन स्नातो युधिष्ठिरः राजा ब्राह्मणादिसभाम सुरराट् इन्द्र इव शुशुभे ॥५२॥ राज्ञेति ॥ राज्ञा युधिष्ठिरेण सभाजिताः सम्पूजिताः सुरा मानवाः खेचराश्च सर्वे कृष्णं क्रतुं च शंसन स्तुवन्तो मुदा हर्षेण स्वस्वधामानि प्रति ययुः ॥५३॥ दुर्योधनमिति ॥ यो दुर्योधनस्तां सर्वजनानन्दकरीं स्फीतां समृद्धां पाण्डुसुत

अन्वितार्थप्रकाशिका

युधिष्ठिरस्य श्रियं सम्पदं दृष्ट्वा न सेहे। तमेकं कुरुकुलस्यामयं रोगवन्नाशकं पापं धर्मद्विषं कलिं कलेरंशं दुर्योधनं विना सर्वे मुदा ययुरिति पूर्वेणैवान्वयः ॥५४॥ य इति ॥ यः पुमान् इदं चैद्यवधादिकं विष्णोः कर्म राज्ञां जरासन्धनिरुद्धानां ततो मोक्षं वितानं यज्ञमहोत्सवं च कीर्तयेत्। उपलक्षणतया शृणुयात्स्मरेद्वा स सर्वपापैः प्रमुच्यते ॥५५॥

इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायां चतुःसप्ततितमोऽध्यायः ॥७४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सुराः ब्रह्मेन्द्रादयः मानवाः मुनिनृपादयः खेचराः सिद्धगन्धर्वादयः ॥५२॥ पापमधर्मिणं कलिं कलेरवतारं दुर्योधनम् ॥ ऋते विना शंसन्तो मुदा ययुरिति पूर्वेणान्वयः। यो दुर्योधनः पाण्डुसुतस्य स्फीतां लोकप्रसिद्धाम् ॥ तां श्रियं शोभां न सेहे ॥५३॥ वितानं राजसूययज्ञं च ॥५४॥

॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते
निगूढार्थप्रकाशके श्रीमद्भागवतस्थ-दशमस्कन्ध व्याख्याने
शिशुपालवधो नाम चतुःसप्ततितमोऽध्यायः ॥७४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

जन्मत्रयानुगुणितवैरविस्तरबुभुत्सुमालक्ष्याह ॥ वर्णितमिति ॥ वैकुण्ठवासिनोर्जयविजययोः, विप्राणां सनकादीनां शापस्तस्माद्धेतोः, पुनः पुनः जन्म, तदुपाख्यानं तद्विषयं तदुपाख्यानं तदित्यर्थः। मया, ते तुभ्यं, बहुविस्तरं यथा तथा, वर्णितम् ॥५०॥ राजसूयेति ॥ राजसूयावभृथ्येन राजसूयसम्बन्धिनाऽवभृथेन, स्नातः युधिष्ठिरः राजा, ब्रह्मक्षत्रसभामध्ये, सुरराडिन्द्रः इव, शुशुभे ॥५१॥ राज्ञेति ॥ राज्ञा युधिष्ठिरेण, सभाजिताः सम्पूजिताः, सर्वे, सुरा देवाश्च मानवा मनुष्याश्च खेचराः प्रमथाश्च ते, कृष्णं, क्रतुं, राजसूयं च, शंसन्तः स्तुवन्तः सन्तः, मुदा, स्वधामानि ययुः ॥५२॥ किं सर्वे मुदा ययुर्नेत्याह ॥ दुर्योधनमिति ॥ पापं पापरूपं, कलिं कल्यवतारं मूर्तं कलहमिति वा। कुरुकुलामयं कुरुकुलस्य रोगवन्नाशनिदानं, दुर्योधनम् ऋते, कुतः। यो दुर्योधनः, स्फीतां समृद्धां, पाण्डुसुतस्य युधिष्ठिरस्य, तां लोकप्रसिद्धां, श्रियं दृष्ट्वा, न सेहे ॥५३॥ उपवर्णितोपाख्यानकीर्तनफलमाह ॥ य इति ॥ विष्णोः श्रीकृष्णस्य, चैद्यवधात्मकं, कर्म, राजमोक्षं जरासन्धबन्दीकृतनृपाणां ततो विमोक्षणं, वितानं राजसूयक्रतुं च, इदं सकलं, यः कीर्तयेत्, स सर्वपापैः, प्रमुच्यते ॥५४॥

॥ इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुत-
श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचिताया-मन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां
श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्धे चतुःसप्ततितमोऽध्यायः ॥७४॥

कृष्णप्रिया

राजन् परीक्षित् ! मैने यह वृत्तांत आपको बहुत विस्तारसे सप्तम स्कन्धमें श्रवण कराया है कि वैकुण्ठवासी जय विजय को सनकादि ऋषियोंके शाप से बार-बार जन्म लेना पडा था ॥५०॥ महाराज युधिष्ठिर राजसूय यज्ञका दीक्षान्त स्नान करके ब्राह्मण और क्षत्रियोंकी सभा में देवधिदेव इन्द्रके समान दैदीप्यमान होने लगे ॥५१॥ महाराज युधिष्ठिर ने देव-मनुष्य और गगन विहारी जनों का यथा योग्य सत्कार किया। और वे सब भगवान श्रीकृष्ण और राजसूय यज्ञ की प्रशंसा करते पूर्ण आनन्द से अपने अपने लोक को प्रस्थान किये ॥५३॥ राजन् परीक्षित् ! सबतो सुखी हुए किन्तु दुर्योधन खूद पाण्डवों का वह उज्वल

कृष्णप्रिया

पाण्डवोंका यह उत्कर्ष एश्वर्य और आनन्द का उत्सव सहन न कर सका। क्योंकि खूद ही स्वभाव से पापी कलह प्रेमी और कुरुफुल के नाश के लिए प्रकट हुआ महान रोग था। महाराज परीक्षित जो कोई पुरुष पुरुषोत्तम श्रीकृष्ण की इस लीला का एवं शिशुपाल वध का जरासंध वध का और बंदी राजाओं के मोक्ष का और यज्ञानुष्ठान का कीर्तन करेगा वह समग्र पापों से मुक्त हो जायेगा।

।। इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे चतु:सप्तितमाध्यायस्य

भाषाटीका समाप्ता ।।७४।।

॥ श्रीहरिः ॥

★श्रीगणेशाय नमः★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ पञ्चसप्ततितमोऽध्यायः ॥

श्लोकाः	अनु.	मि. उ.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४०	३३	१	६	२	१४६४	९	४८	१५२१	४७॥	१

राजोवाच

अजातशत्रोस्तं दृष्ट्वा राजसूयमहोत्सवम् । सर्वे मुमुदिरे [1]ब्रह्मन् नृदेवा ये समागताः ॥१॥
दुर्योधनं वर्जयित्वा [2]राजानः सर्षयः सुराः । इति श्रुतं नो भगवंस्तत्र कारणमुच्यताम् ॥२॥

कर्दमक्षमा

राजा उवाच :- ब्रह्मन् ! तम्, अजातशत्रोः, राजसूयमहोदयम्, दृष्ट्वा, ये, नृदेवाः, समागताः, ते, सर्वे, मुमुदिरे ॥१॥ दुर्योधनम्, वर्जयित्वा, राजानः, सर्षयः, सुराः, मुमुदिरे, इति, श्रुतम्, भगवन्, तत्र, नः, कारणम्, उच्यताम् ॥२॥

श्रीधरस्वामिकृतभावार्थदीपिका

पञ्चयुक्सप्ततितमे यज्ञावभृथसम्भ्रमः । सुयोधनस्य चाक्षान्त्या मानभङ्गो दृशि भ्रमात् ॥

दुर्योधनस्यैव दुःखे कारणं प्रष्टुमुक्तमनुवदति-अजातशत्रोरिति ॥१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सम्भ्रम उत्सवः (१) । अजामविद्यां तनोति विस्तारयतीत्यजातः कलिस्तद्रूपो दुर्योधनस्स एव शत्रुर्यस्य सोऽजातशत्रुः । यद्वा-अजातः श्रीकृष्णस्तेन हताः शत्रवो यस्य स तथा । मध्यमपदलोपी समासः । यद्वा-शत्रुरिति भावप्रधानो निर्देशः । तथा च न जातं शत्रुत्वं यस्य स तथा । तस्य युधिष्ठिरस्य । तमलौकिकम् ॥१॥ तत्र दुर्योधनाप्रसन्नतायाम् ॥२॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

पापमित्यादिना प्रागुक्तस्यापि कारणस्य विशेषं बुभुत्सुरुक्तानुवादपूर्वकं पृच्छति-अजातेति युग्मकेन । इति दुष्टदुर्य्योधनेऽपि तस्य द्वेषाभावः सूचितः दुर्य्योधनस्य तु मात्सर्य्ये हेतुः राजानम् आत्मन्येव तदभिमानिनमित्यर्थः । श्रुतं परम्परया श्रीभगवन्मुखेन तु निश्चिततयेत्यर्थः ॥१-२॥

---

[1] ब्रह्मन्देवा ये च-विज. [2] राजानमृषयः-सुराः-वीर. ; राजान ऋषयः-विज. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पापमित्यादिना प्रागुक्तस्यापि कारणविशेषप्रकारं बुभुत्सुरुक्तानुवादपूर्वकं पृच्छति – अजातशत्रोरिति द्वाभ्याम् । अनेन दुष्टदुर्य्योधनेऽपि तस्य द्वेषाभावः सूचितः । तमनिर्व्वचनीयम्, राजसूय एव महानुदय उत्सवो विभूतिर्वा, तेनोत्कर्षो वा तम्, नृदेवा राजानो ये चान्ये समागतास्ते सर्व्वे; ब्रह्मन् ! हे साक्षाद्वेदरूपेति तत् त्वया विज्ञायत एवेति भावः ॥१॥ सुराश्च राजानमिति राजत्वेन परद्रव्यानपेक्षया राजान्तरवत्तस्यापि मद्योग्यतोक्ता; तथापि तं वर्ज्जयित्वा विना; वर्ज्जयित्वेति नृदेवादिकृतोपेक्षया तस्य मोदो नाभूदिति भावः । नोऽस्माभिः; भगवन् ! हे सर्व्वज्ञेति तद्वक्तुं त्वमेव जानासीति भावः ॥२॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-३१॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

"दुर्योधनमृते" पापम् इत्येतस्यैव विस्तरबुभुत्सया प्रष्टुमुक्तमनुवदति राजा-अजातशत्रोरिति द्वाभ्याम् । राजसूयस्य महोदयं महोत्सवं दृष्ट्वा मुमुदिरे सन्तुष्टुवुरिति नोऽस्माभिः श्रुतं त्वन्मुखादेवेत्यर्थः । हे भगवन् ! तत्र दुर्योधनासन्तोषे कारणमुच्यताम् ॥१-२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

अनेनानन्तरातीताध्यायोक्तमेव प्रश्नपूर्वकं विस्तृत्य कथयति, अजातशत्रोरित्यादिना ॥१-७॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

पञ्चसप्ततितमे क्रतुकृत्ये तत्र कः किमकरोदिति वर्ण्यम् ।
आवभृथ्यकुतुकञ्च विमानो मन्युमांश्च धृतराष्ट्रतनूजः ॥१॥

श्रुतं त्वन्मुखात् ॥१॥ यो न सेहे श्रियं स्फीतामित्यनेनोक्तं मात्सर्य्यमेकं कारणं कारणान्तरमपि विवक्षुः स्मृत्यारूढमवर्णितं राजसूयपरिशिष्टभागमपि सिंहावलोकन्यायेन वर्णयति-पितामहस्येत्यादिना ॥२॥

गूढार्थदीपिनी

पञ्चसप्ततितमे क्रतुराजस्नानदानसुमहोत्सव उक्तः ।
दृग्भ्रमात्सदसि सम्पततोऽस्यातोषहेतुरिह मानविभङ्गात् ॥१॥

अजातशत्रोरिति युग्मम् । नृदेवा राजानः नरश्च देवाश्चेति वा । अजामविद्यां कलहं तनोति विस्तारयतीति अजातः कलिः तद्रूपो दुर्योधनः शत्रुः यस्य । यद्वा । अजातः श्रीकृष्णः तेन हताः शत्रवो यस्य सः । मध्यमपदलोपी समासः । यद्वा । शत्रुरिति भावप्रधानो निर्देशः न जातं शत्रुत्वं यस्य सः । वस्तुतस्तु । 'दुर्योधनादयः सर्वे त्वजाता जज्ञिरे घटात्' इति भारतोक्तेः 'अजाता दुर्योधनादयः शत्रवो यस्ये'ति । ये समागतास्ते सर्वे मुमुदिरे एकं वर्जयित्वा इति नोऽस्माभिः त्वत्तः श्रुतं तत्र दुर्योधनस्य असन्तोषे कारणमुच्यताम् ॥१-२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पञ्चसप्ततितमे दुर्योधनासन्तोषहेतुतया राजसूयावभृथोत्सवो दुर्योधनदौरात्म्यञ्च वर्ण्यते-यो न सेहे श्रियं स्फीतामिति । दुर्योधनासन्तोषे कारणं पष्षष्टमुक्तमनुवदति, अजातशत्रोरिति ॥१॥ इति श्रुतं त्वत्त इतति शेषः ॥२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ क्वचित्पुस्तके राज्ञा सभाजिता इति श्लोकोत्तरं —

"**दुर्योधनमृते पापं कलिं कुरुकुलामयम् । यो न सेहे श्रियं स्फीतां दृष्ट्वा पाण्डुसुतस्य ता**मि"ति श्लोको वर्तते ॥

तत्पक्षे सर्वे तुतुषुः कुतः कुतो दुर्योधनो न तुतोषेति कारणमजानानो राजा पृच्छति ॥ अजातशत्रोरिति । बहुषु पुस्तकेषु न श्लोक इति पक्षे दुर्योधनो नैव तुतोषेति किं वदन्तीं श्रुत्वा राजा तत्कारणं पृच्छति राजेतीत्यवतारणमिति ज्ञेयम् । समागताः सर्वे राजानो ये च समागता देवा ब्रह्माद्याः ॥१॥ इति श्रुतमुपपादितरीत्या तत्र तदसहने कारणं त्वयोप्यताम् ॥२॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

षड्विंशे राजसूयस्य भूभारहरणे यथा । कारणत्वे तदर्थं हि मानभङ्गो निरूप्यते ॥१॥
यथान्यद्भगवत्कर्म मुख्यं कंसवधादिकम् । राजसूयकृतिस्तद्वद्भूभारहृतिकारणम् ॥२॥
स्वातन्त्र्ये तु हरेरत्र गौणतेति निरूपणम् । हरेः कथायां तस्यात्र न युक्तमिति निश्चयः ॥३॥
लौकिक्येव समृद्धिर्हि तस्याभिमतिकारणम् । अतः सैवात्र पूर्वोक्तादधिका वर्ण्यते स्फुटा ॥४॥
तस्माद्भाषा लौकिकीयं भावादङ्गं न सर्वथा । न विरोधस्ततः पूर्वैर्नाग्रिमैरपि वाचकैः ॥५॥

एवं पूर्वाध्यायान्ते दुर्योधनमृते पापम् इत्युक्तम् । तत्र राजा विस्तारं पृच्छति अजातशत्रोरिति द्वाभ्याम् । स्वयं सर्वं सावधानताय श्रूयत इति ज्ञापयितुं सार्धेन पूर्वोक्तमनुवदति अजातशत्रोरिति ॥ वैरे कारणाभावः तामलौकिकीं राजसूयेन महानुदयो यस्या इति तां समृद्धिं दृष्ट्वा । पुंल्लिङ्गपाठो वा । तस्य सर्वाह्लादकत्वमाह सर्वे मुमुदिर इति । ब्रह्मवादिनो वाक्यं सत्यमिति सम्बोधनम् । सात्त्विका राजसा एव निरूपिताः । नृदेवा इति नरश्च देवाश्चेति । राजानो ऋषयः सुराश्च इति त्रिविधा लोकान्तरस्थाः । इति श्रुतमिति श्रुतं समर्थनीयमिति त्वत्त एव च श्रुतमस्ति नोऽस्माभिः सर्वैरेव । भगवन्निति ज्ञानार्थं प्रशंसा । दुर्योधनस्य बन्धोरपि कथं न मुत् तस्य सन्तोषाभावे कारणमुच्यतामित्यर्थः ॥१-२॥

सुबोधिनीसारः

राजोक्तिः । अजातशत्रोर्युधिष्ठिरस्य तं राजसूये महोदयं सर्वौत्कृष्ट्यं दृष्ट्वा ये नृदेवाः समायातास्ते सर्वे तुतुषिरे हे ब्रह्मन् ॥१॥ राजानः ऋषिभिः सहिताः सुरा देवा दुर्योधनमेकं वर्जयित्वा इति नोऽस्माभिः श्रुतं तत्र तस्याप्रसन्नतायां कारणमुच्यतां हे भगवन् ॥२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पञ्चयुक्सप्ततितमे महाभारतकारणम् । दुर्योधनस्य दौरात्म्यान्मानभङ्गो निरूप्यते ॥१॥

उक्तानुवादपूर्वकं दुर्योधनस्यासन्तोषे कारणं पृच्छति - अजातशत्रोरिति । सर्वज्ञतां सूचयन् सम्बोधयति - ब्रह्मन्निति । एकं दुर्योधनं वर्जयित्वा ये तत्र समागतास्ते सर्वे नृदेवादयः अजातशत्रोर्युधिष्ठिरस्य तं राजसूयस्य महोदयं महान्तमुत्सवं दृष्ट्वा मुमुदिरे इति नोऽस्माभिस्त्वत्तः श्रुतम्, हे भगवन् ! तत्र दुर्योधनस्यासन्तोषे कारणमुच्यतामिति द्वयोरन्वयः ॥१-२॥

अन्वितार्थप्रकाशिका

पञ्चयुक्सप्ततितमे यज्ञस्यावभृथोत्सवः । दुर्योधनापमानोऽत्र श्लोकाः सार्द्धाः खवार्द्धयः (४४॥) ॥
द्वे (२) उवाचेति पादोनास्तर्कवेदा (४०॥।) अनुष्टुभः ॥७५॥

अजातशत्रोरिति युग्मम् ॥ हे ब्रह्मन् ! एकं दुर्योधनं वर्जयित्वा ये तत्र समागतास्ते सर्वे नृदेवादयः अजातशत्रोर्युधिष्ठिरस्य तं राजसूयस्य महोदयं महान्तमुत्सवं दृष्ट्वा मुमुदिरे । इति नोऽस्माभिस्त्वत्तः श्रुतम् । हे भगवन् ! तत्र दुर्योधनस्य असन्तोषे कारणमुच्यताम् ॥१-२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ पञ्चसप्ततितमेऽध्याये यज्ञान्तस्नानोत्सवं च ॥ पाण्डवश्रीदर्शनेन दुर्योधनासहनं च तस्य जलस्थलभ्रमेण मानभङ्गं च राजप्रश्नोत्तरेण वदति ॥ अजातशत्रोरिति ॥१॥ नोऽस्माभिः त्वन्मुखत इति श्रुतम् ॥२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

॥ सपञ्चसप्ततितमे यागावभृथसम्भ्रमः ॥ अथ दुर्योधनाक्षान्त्या भङ्गो मानस्य दृग्भ्रमात् ॥१॥

'दुर्योधनमृते पापम्' इत्यस्यैव विस्तरबुभुत्सया प्रष्टुमुक्तमनुवदति ॥ अजातशत्रोरिति ॥ दुर्योधनमिति च ॥ अजातशत्रोर्युधिष्ठिरस्य, तं सर्वत्र प्रसिद्धं, राजसूयमहोदयं, दृष्ट्वा, हे ब्रह्मन्, समागताः, नृदेवाः नृणां देववन्मान्याः, ये राजानः, ऋषयः, सुराः, ते सर्वे, दुर्योधनं वर्जयित्वा, मुमुदिरे। इत्येवं, नोऽस्माभिः, हे भगवन्, त्वन्मुखादिति शेषः। श्रुतम्। तत्र कारणं, उच्यताम् ॥१-२॥

कृष्णप्रिया

महाराज परीक्षित्जी ने प्रश्न किया कि - भगवन् श्रीशुक्राचार्यजी ? अजातशत्रु महाराज श्रीधर्मराज के राजसूय यज्ञ महोत्सव का दर्शन कर जितने नरनाथ ऋषिमहर्षि मुनि महामुनि देववृन्द आदि पधारे थे वे सर्व आनन्दित हुए। परंतु दुर्योधन महाराज को अत्यंत दुःख हुआ एवं पीडा भी हुइ वह प्रसंड्ग आपके मुखकमलसे मैने सुनी। तो हे नाथ ! तो कृपया इसका कारण भी सुनाइये ॥१-२॥

[1]ऋषिरुवाच

पितामहस्य ते यज्ञे राजसूये महात्मनः। बान्धवाः परिचर्यायां तस्यासन् प्रेमबन्धनाः ॥३॥
भीमो महानसाध्यक्षो धनाध्यक्षः सुयोधनः। सहदेवस्तु पूजायां नकुलो द्रव्यसाधने ॥४॥
[2]सतां शुश्रूषणे जिष्णुः कृष्णः पादावनेजने। परिवेषणे द्रुपदजा[3] कर्णो दाने [4]महामनाः ॥५॥
युयुधानो [5]विकर्णश्च हार्दिक्यो विदुरादयः। बाह्लीकपुत्रा भूर्याद्या ये च सन्तर्दनादयः ॥६॥

कर्दमक्षमा

ऋषिः, उवाच।

ते, पितामहास्य, महात्मनः, राजसूये, यज्ञे, तस्य, प्रेमबन्धनाः, बान्धवाः, परिचर्यायाम्, आसन् ॥३॥ भीमः, महानसाध्यक्षः, सुयोधनः, धनाध्यक्षः, सहदेवः, पूजायाम्, नकुलः, तु, द्रव्यसाधने, (४) गुरुशुश्रूषणे, जिष्णुः, कृष्णः, पादावनेजने, परिवेषणे, द्रुपदजा, महामनाः, कर्णः, दाने, (५) युयुधानः, च, विकर्णः, हार्दिक्यः, विदुरादयः, बाह्लीकपुत्राः, ये, च, सन्तर्दनादयः, भूर्याद्याः, हे राजेन्द्र ! तदा, ते, राज्ञः, प्रियचिकीर्षवः, तदा, नानाकर्मसु, महायज्ञे, नियोजिताः, प्रवर्तन्ते स्म ॥४-५-६-७॥

श्रीधरस्वामिकृतभावार्थदीपिका

दुर्योधनस्यासहनकारणत्वेन यागमहोत्सवमेव पुनः सिंहावलोकनेन निरूपयति-पितामहस्येत्यादिना, एकदाऽन्तःपु तस्येत्यतःप्रक्तनेन ग्रन्थेन। प्रेमबन्धनाः प्रेमयन्त्रिताः ॥३॥ पूजायां सम्मानने द्रव्यसाधने नानावस्तुसम्पादने ॥४॥ गुरूणां शुश्रूषणे चन्दनालेपनादौ ॥५-६॥

---

[1] बादरायणिरुवाच-गो. प्रे. टी.। [2] गुरुशुश्रूषणे-वीर. विज. जीव.। [3] द्रुपदः-च. पु. टी.। [4] महात्मनः-इति कस्यचित्। [5] विराक्ष-इति कस्यचित्।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य युधिष्ठिरस्य । प्रेमैव बन्धनमायत्तीकरणसाधनं येषां ते ॥३॥ महानसाध्यक्षः पाकशालाध्यक्षः ''महानसः पाकशालाप्रभूतशकटालये'' इति निरुक्तिः । धनाध्यक्षः सूतस्ततस्समागतधनस्वीकारपरः । तद्धस्ते धनवर्द्धिनी रेखाभूदतः श्रीकृष्णानुज्ञया स एव धनाध्यक्षः कृतस्तद्धस्तगतधनस्याक्षय्यत्वादिति ग्रन्थान्तरादवसेयम् ॥४-७॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

ते पितामहस्येति श्रोतुस्तस्य प्रहर्षणार्थं यज्ञे परिचर्य्यायां विविधक्रियायां तस्या बान्धवाः महात्मनः उत्कृष्टस्वभावस्य अतस्तत्प्रेमबन्धनाः प्रेम्णा बध्यन्त इति तथा ॥३॥ भीम इति चतुष्केण तदेव विविच्य वदन्नादौ मुख्यकर्मसु स्थिता नाह द्वाभ्याम् अध्यक्षो नियोक्ता क्वचित् स्थाने समये क्वचित्स्वयं कर्ता च भीमादीनां तत्तत्कर्मणि प्रवृत्तिस्तत्र तत्र तेषां नैपुण्यादिच्छाविशेषाच्च अत एव सर्वेषां विशेषणत्वेन निर्दिष्टं महामना इति महात्मन इति पाठः क्वचित् ॥४॥ सतां श्रीभगवत्पक्षपातिनां शुश्रूषणे जिष्णुरध्यक्षः सतामेव पादप्रक्षालने श्रीकृष्णोऽध्यक्षः अयं भावः नास्मिन् कर्मण्यसौ श्रीयुधिष्ठिरेण नियुक्तः किन्तु प्रेमबन्धना इत्युक्तत्वात् स्वयमेव प्रवृत्तः तत्त्वन्येषामभिमानित्वात्तेन कर्मणा हीनो यज्ञः सच्छिद्रः स्यात्तच्च मदेकबन्धोरस्य मा भूदिति कृपयैवेति ॥५॥ विकर्णो दुर्य्योधनभ्राता शिष्टः विरा इति पाठः स्पष्टः हार्दिक्यः कृतवर्मा आदिशब्दाच्छ्रीभीष्मद्रोणादयो दुश्शासनादयश्च तत्र ''कृताकृतपरिज्ञाने भीष्मद्रौणौ महामती'' इति सभापर्वोक्त्या तत्रैव तौ ज्ञेयौ बाह्लीकपुत्रः सोमदत्तः तत्पुत्रो भूरिः आदिशब्दाद्भूरिश्रवःप्रभृतयः तथापि बाह्लीकपुत्रा इति पुत्रपौत्रयोरभेदात् सन्तर्दनः केकयः श्रीपृथाभगिनी श्रुतिकीर्तिपुत्रः आदिशब्दात्तद्भ्रातरश्च ॥६॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

ते पितामहस्येति श्रोतुस्तस्य प्रहर्षणार्थं यज्ञे परिचर्य्यायां विविधक्रियायां तस्य बान्धवाः, महात्मन उत्कृष्टस्वभावस्य, अतस्तत्प्रेमबन्धनाः ॥३॥ तदेव चतुर्भिर्विविच्य वदन्नादौ मुख्यकर्म्मसु स्थितानाह-भीम इति द्वाभ्याम् । भीमादीनां तत्तत्कर्म्मणि प्रवृत्तिस्तत्र तेषां श्रद्धाविशेषात्, तेन नैपुण्याच्च; अत एव सर्व्वान्ते निर्दिष्टं 'महामनाः' इति प्रत्येकं सर्वेषामेव विशेषणं ज्ञेयम् ॥४॥ सतां वैष्णवानाम्, जिष्णुरिति शुश्रूयणेन तेषां वशीकरणात्, सतामेव पादप्रक्षालने कृष्ण इति तेन सर्वचित्ताकर्षणात्; भीमादीनां यथापूर्वं तत्तत्कर्म्मविस्तारापेक्षया तत्तत्क्रमेण निर्देशः । एवमग्रेऽप्यूह्यम् ॥५॥ विकर्णो दुर्य्योधनभ्राता शिष्टः, पाठन्तरं स्पष्टम्, विराट् इति पाठश्च स्पष्टः, हार्दिक्यः कृतकर्म्मा, आदिशब्दाच्छ्रीभीष्मद्रोणादयो दुःशासनादयश्च; तत्र च 'कृताकृतपरिज्ञाने भीष्मद्रोणौ महामती' इति सभापर्वोक्त्या तत्रैव तौ ज्ञेयौ । वाह्लीकपुत्रः सोमदत्तस्तत्पुत्रो भूरिः, आद्यशब्दाद्भूरिश्रवःप्रभृतयश्च । तथापि वाह्लीकपुत्रा इति पुत्रपौत्रयोरभेदात्, सन्तर्दनः कैकेयः, श्रीपृथाभगिनीश्रुतकीर्तिपुत्रः, आदिशब्दात्तद्भ्रातरश्च ॥६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-३१॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

तद्वक्तुं प्रस्तौति-पितामहस्येति । ते तव पितामहस्य महात्मनो राज्ञो युधिष्ठिरस्य राजसूये तस्य राज्ञो बान्धवाः प्रेमबन्धनाः प्रेमयन्त्रिताः परिचर्यायामासन् परिचेरुरित्यर्थः ॥३॥ तदेव प्रपञ्चयति-भीम इति । महानसाध्यक्षः पाकशालाध्यक्षो बभूव सुयोधनः धनाध्यक्षः पूजायां सम्मानने सहदेवः द्रव्यसाधने नानावस्तुसम्पादने नकुलोऽभवदित्यर्थः ॥४॥ जिष्णुरर्जुनः सतां शुश्रूषणे चन्दनलेपनादौ कृष्णः पादावनेजने पादप्रक्षालने द्रुपदजो धृष्टद्युम्नः परिवेषणे भक्ष्यभोज्यादिविनियोगे कर्णस्तु दाने निरूपित इति वचनपरिणामेनोत्तरत्र सम्बन्धः ॥५॥ युयुधानः सात्यकिस्तत्प्रभृतयः ॥६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ॥१-७॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

॥ १-४॥ कृष्णः पादावनेजने ॥५-७॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

प्रेमबन्धना इत्यनेन स्वेच्छयैव स्वरोचिते कर्मणि प्रवृत्ताः न तु राज्ञा प्रवर्तिताः अतः पादावनेजनकर्मणि साभिमानानामशक्ये कृष्ण एव प्रवृत्तः ॥३-१०॥

गूढार्थदीपिनी

तदेव स्पष्टयति-पितेत्यादिना । महात्मनः उदारचित्तस्य 'उदारो दातृमहतोः' इति कोशः ॥३॥ महानसं पाकशाला। धनाध्यक्षः दुर्योधनः तद्धस्ते धनवर्द्धिनी रेखाऽऽसीदतः श्रीकृष्णाज्ञया स एवात्र नियुक्तः इति रहस्यं तद्धस्तगतधनस्याक्षयत्वादिति वंशीधरी । साधने यज्ञीयवस्तुसम्पादने ॥४॥ जिष्णुः अर्जुनः । पादावनेजने पादप्रक्षालने । णिजिर्-शौचे धातुः ल्युट् ॥५॥ युयुधानः सात्यकिः विकर्णो दुर्योधनभ्राता । हार्दिक्यः कृतवर्मा । सन्तर्दनः पृथाभागिनेयः ॥६-७॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रेमबन्धनाः स्नेहबद्धाः ॥३-४॥ जिष्णुरर्ज्जुनः ॥५-६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ते पितामहस्य महात्मनो धर्मस्य यज्ञे राजसूये तन्नामके प्रेमबन्धनाः प्रेम्णैव बन्धनं तेषां ते स्नेहबद्धा बान्धवास्तस्य परिचर्यायामासन् ॥३॥ के के कां कां चक्रुरित्यतो विशदमुपदिशति ॥ भीम इति । महानसाध्यक्षो रसवती नियन्ता सुयोधनो धनाध्यक्षः पूजायामागतानां द्रव्यसाधने तन्मेलने ॥४॥ सतां शुश्रूषणे सेवायां पादावनेजने पादप्रक्षालने द्रुपदजा द्रौपदी महामनाः स्वतो दाता ॥५॥ विकर्णो दुर्योधनानुजो भूर्याद्या भुरिभूरिश्रवाः शल इति त्रयः सन्तर्दन आदिर्येषां ते ॥६॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

लौकिकसम्पत्तिमाह-पितामहस्येति । सम्बन्धेन श्रवणप्रोत्साहो निरूप्यते, महात्मन इति महानुभावत्वात् । अन्येषां परिचर्यायां न काचन लज्जा, अत एव बान्धवाः परिचर्यायां तस्यासन् । यज्ञे बहूनि कार्याणि तत्र प्रतिनियतकार्यकर्तृत्वं सर्वेषां वक्तुं सामान्यतो निरूप्यते ॥३॥ विशेषतो निरूपयति भीमो महानसाध्यक्ष इति । स एव तत्र नियुज्यते यो यस्मिन् कर्मणि महत्येव प्रीतो भवति । तत्र बहुभक्षकत्वात् भीम एव महानसाध्यक्षः कृतः, स हि बहु पाचयति । तथा धनाध्यक्षः धनरक्षकः दुर्योधनः, स हि पद्महस्तः यमर्थं स्पृशति सोऽक्षयो भवति । सहदेवो ज्ञानवान् ब्राह्मणादिपूजायां नियुक्तः। नकुलस्तु अश्विनीकुमारपुत्र इति द्रव्याणां गुणदोषाभिज्ञत्वात् द्रव्यसाधने द्रव्याणां विनियोगार्थं परीक्षायां नियुक्तः ॥४॥ तथा सतां सेवायां जिष्णुरर्जुनः, स ह्युपासितवृद्धः सेवां जानाति । कृष्णः पादावनेजन इति । भगवतः अनङ्गत्वे दुर्योधनदृष्टौ सर्वोत्तमत्वं न स्फुरिष्यतीति ब्रह्मण्यत्वात्तत्र विनियोगो वर्ण्यते । इदमेव हि भगवत आधिक्य भृगुपरीक्षायां निरूपयिष्यते। परिषेवणे द्रुपदजा द्रौपदी अमृतहस्ता । कर्णो दाने अत्युदारत्वात् । महात्मन इति बहुदानेऽपि राज्ञः सन्तोष एवेत्येतदर्थमुक्तम् ॥५॥ युयुधानादयः सर्व एव नानाकर्मसु वैषम्याभावार्थं नियुक्ताः । युयुधानः सात्यकिः यादवोऽप्यर्जुनशिष्यः । विकर्णादयोऽपि बान्धवाः बाह्लीकः शंतनोर्भ्राता, तस्य पुत्रा भूरिश्रवआदयः । सन्तर्दनादयश्च गोत्रजाः । सर्वेषां कथनं सम्भ्रमार्थम् ॥६॥

सुबोधिनीसारः

शुकोक्तिः । महात्मनस्ते पितामहस्य यज्ञे राजसूये तस्य परिचर्यायां प्रेमबन्धना बान्धवा आसन् ॥३॥ तथाहि महानसस्य पाकस्थानस्याध्यक्षः स्वामी भीमसेनोऽभूदिति सर्वत्र क्रियाशेषः । धनस्याध्यक्षो दुर्योधनः, पूजायां सहदेवः, द्रव्याणां साधने

सुबोधिनीसारः

योग्यतासम्पादने नकुलः ॥४॥ गुरूणां शुश्रूषणे सेवायां जिष्णुरर्जुनः, पादावनेजने चरणधावने श्रीकृष्णः, परिवेषणे द्रुपदजा धृष्टद्युम्नादयः विसर्गाभावे तु द्रौपदीति गुरवः । दाने महामना अत्युदारो दानी कर्णः ॥५॥ युयुधानः सात्यकिरर्जुनशिष्यत्वात्, विकर्णो धृतराष्ट्रसुतः, हार्दिक्यो विदुरादयो बाह्लीकपुत्रा भूरिराद्यः प्रधानो येषां ते ये च संतर्दनप्रभृतयः ते सर्वे यज्ञे नानाकर्मसु नियुक्तास्तदा प्रवर्तन्ते स्म हे राजेन्द्र राज्ञः प्रीतिकरणेच्छया ॥६-७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इति पृष्ट उत्तरमाह - पितामहस्येति ते बत पितामहस्य युधिष्ठिरस्य राजसूये यज्ञे तस्य बान्धवाः परिचर्यायामासन् तत्तत्कार्यसाधका बभूवुरित्यर्थः । तत्र हेतुमाह - प्रेमबन्धना इति । तस्य प्रेमैव बन्धनं येषां ते । स्नेहे हेतुमाह - महात्मन इति । विनयौदार्यादिगुणपूर्णचित्तस्येत्यर्थः ॥३॥ एतदेव प्रपञ्चयति - भीम इति चतुर्भिः । महानसः पाकशाला तदध्यक्षो 'बभूव' इति सर्वत्र क्रियापदशेषः । सुयोधनो दुर्योधनः कोषाध्यक्षः । सहदेवः पूजायां सम्मानने । नकुलः द्रव्यसाधने नानावस्तुसम्पादने ॥४॥ गुरूणां पूज्यानां शुश्रूषणे चन्दनलेपनादिपूजायां जिष्णुरर्जुनः । पादावनेजने पादप्रक्षालने कृष्णः । परिवेषणे भक्ष्यभोज्यादिविनियोगे द्रुपदजा द्रौपदी । दाने कर्णः । कर्णस्य दाने विनियोगे हेतुमाह - महामना इति, अत्युदारमनाः । एवम्भूतस्य दानाध्यक्षत्वे दानाधिक्येन धर्मयशोवृद्धिर्भवतीति आशयः ॥५॥ युयुधानः सात्यकिः ॥६॥

अन्वितार्थप्रकाशिका

प्रश्नमुत्तरयिष्यन् पूर्वविणितयागमहोत्सवशेषं वर्णयति - पितामहस्येति ॥ महात्मनः ते तव पितामहस्य युधिष्ठिरस्य राजसूये यज्ञे प्रेमबन्धनाः प्रेमैव बन्धनं येषां ते तस्य बान्धवाः परिचर्यायामासन् । तत्तत्कार्यसाधका बभूवुरित्यर्थः । प्रेमबन्धना इत्यनेन ते स्वयमेव तत्तत्कर्मणि प्रवृत्ताः न तु राज्ञा प्रवर्तिताः । अतः साभिमानानामशक्ये पादावनेजनकर्मणि कृष्णः स्वयमेव प्रवृत्तः ॥३॥ भीम इति ॥ भीमो महानसं पाकशाला तत्र अध्यक्षो नियोक्ता क्वापि पाककर्ता च आसीत् । इत्यादिर्द्वयोरन्वयः स्फुटः । द्रव्यसाधने नानावस्तुसम्पादने ॥४॥ गुर्विति ॥ गुरूणां शुश्रूषणे चन्दनालेपादौ द्रुपदजा द्रौपदी । पुँल्लिङ्गपाठे धृष्टद्युम्नः । महामनाः कार्यकुशल इति सर्वेषां विशेषणम् ॥५॥ युयुधान इति ॥ युयुधानः सात्यकिः विकर्णो दुर्योधनभ्राता हार्दिक्यः कृतवर्मा बाह्लीकपौत्रो भूरि आदिना भूरिश्रवःप्रमुखाः पुत्रा इति पुत्रपौत्रयोरभेदात् ये च सन्तर्दनः पृथाभागिनेयः तद्भ्रातृप्रमुखाः तदादयः स्वस्वकर्मसु आसन् ॥६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

राजकृतप्रश्नोत्तरकरणायपुनर्यागमहोत्सवं निरूपयन्नाह पितेति । महात्मनस्तव पितामहस्य युधिष्ठिरस्य ॥३॥ महानसस्य पाकशालाया अध्यक्षः ॥ अधिपतिः पूजायां सन्माने द्रव्याणां नानाविधपदार्थानां साधने निष्पादने ॥४॥ सतां सत्पुरुषाणां शुश्रूषणे निरन्तरसेवायां जिष्णुरर्जुनः ॥५॥ युयुधानः सात्यकिः विकर्णो दुर्य्योधनकनिष्ठभ्राता हार्दिक्यः कृतवर्माभूर्याद्याः बाह्लीकपौत्रो भूरिः आदिशब्देन भूरिश्रवःप्रभृतयः पुत्रा इति पुत्रपौत्रयोरभेदात् सन्तर्दनः पृथाभागिनेयः आदिना भ्रातरः ॥६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदुत्तरं वक्तुं प्रस्तौति ॥ पितामहस्येति ॥ हे राजन्, ते तव, पितामहस्य, महात्मनो युधिष्ठिरस्य, राजसूये यज्ञे, तस्य राज्ञः, बान्धवाः, प्रेमबन्धनाः प्रेमयन्त्रिताः सन्तः, परिचर्यायाम्, आसन् । प्रेम्णा राज्ञः परिचर्यां चेरुरित्यर्थः ॥३॥ एतदेव प्रपञ्चयति ॥ भीम इति ॥ भीमः, महानसाध्यक्षः, बभूव । सुयोधनो दुर्योधनः, धनाध्यक्षः, बभूव । सहदेवः, पूजायां संमानने, बभूव । नकुलः तु, द्रव्यसाधने नानावस्तुसम्पादने, बभूव ॥४॥ सतामिति ॥ जिष्णुरर्जुनः, सतां शुश्रूषणे, अभवत् । कृष्णः, पादावनेजने पादप्रक्षालने, अभवत् । द्रुपदजो धृष्टद्युम्नः, परिवेषणे भक्ष्यभोज्यादिविनियोगे, अभवत् । केचित्तु । 'परिवेषणे द्रुपदजा' इति

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पठन्ति । महामनाः, कर्णः, दाने नियुक्त आसीत् ॥५॥ युयुधान इति ॥ युयुधानः सात्यकिः, विकर्णः, हार्दिक्यः, विदुरादयश्च । ये च भूर्याद्याः, बाह्लीकपुत्राः, ये च संतर्दनादयः ॥६॥

कृष्णप्रिया

महर्षि श्रीशुकदेवजी ने कहा - महाराज परीक्षित ! आपके पितामह श्रीधर्मराज पुण्यात्मा संत थे । उनके स्नेह से ष्धकर सर्व स्वजनोंने राजसूय यज्ञ में विविध सेवाओंका स्नेह से स्वीकार किया था ॥३॥ श्रीभीमसेनजी पाकशाला की देखभाल करते थे क्योंकि वे पाकशास्त्र के पण्डित थे । महाराज दुर्योधनजी कोषाध्यक्ष थे क्योंकि उनके हस्तमें पद्मचिन्ह था । श्रीसहदेवजी स्वागताध्यक्ष थे क्योंकि लक्षणज्ञ थे । श्रीनकुलजी आपणाध्यक्षजी थे क्योंकि वस्तु कि महिमा को अच्छी तरह से जानते थे ॥४॥ विष्णु जितेन्द्री श्री अर्जुनजी गुरुजनों की सेवामें नियुक्त किये थे क्योंकि वे विवेक विनय सम्पन्न थे । द्वारिकानाथ भगवान श्रीकृष्णचन्द्रजी समागत संगणन ऋषिजन महात्मा पुरुषोंकी चरण प्रक्षालनकी सेवा करते थे क्योंकि इनके हाथमें अमृत था । परमोदार महाराज कर्ण को दान विभाग दिया क्योंकि वे महोदार और महाभना थे ॥५॥ राजन् ! श्री सात्यकि जी विकर्णजी हार्दिक्यजी विदुरजी और बाह्लिक के कुमार भूरिश्रवा आदि एवं संतर्दन आदि राजसूय यज्ञ में भिन्न कार्योमें नियुक्त थे ॥६॥

निरूपिता महायज्ञे [1]नानाकर्मसु ते तदा । प्रवर्तन्ते स्म राजेन्द्र राज्ञः प्रियचिकीर्षवः[2] ॥७॥
ऋत्विक्सदस्यबहुवित्सु सुहृत्तमेषु स्विष्टेषु [3]सूनृतसमर्हणदक्षिणाभिः ।
चैद्ये च सात्वतपतेश्चरणं प्रविष्टे चक्रुस्ततस्त्ववभृथस्नपनं द्युनद्याम् ॥८॥
मृदङ्गशङ्खपणव[4]धुन्धुर्यानकगोमुखाः । वादित्राणि विचित्राणि [5]नेदुरावभृथोत्सवे ॥९॥
नर्तक्यो ननृतुर्हृष्टा गायका यूथशो जगुः । वीणावेणुतलोन्नादस्तेषां स दिवमस्पृशत् ॥१०॥

कर्दमक्षमा

सूनृतसमर्हणदक्षिणाभिः, स्विष्टेषु, ऋत्विक्सदस्यबहुवित्सु, सुहृत्तमेषु, च, चैद्ये, सात्वतपतेः, चरणम्, प्रविष्टे, ततः, द्युनद्याम्, अवभृथस्नपनम्, चक्रुः ॥८॥ आवभृथोत्सवे, मृदङ्गशङ्खपणवधुन्धुर्यानकगोमुखाः, विचित्राणि, वादित्राणि, नेदुः ॥९॥ हृष्टाः, नर्तक्यः, ननृतुः, यूथशः, गायकाः, जगुः, तेषाम्, सः, वीणावेणुतलोन्नादः, दिवम्, अस्पृशत् ॥१०॥

श्रीधरस्वामिकृता भावार्थदीपिका

निरूपिताः नियुक्तास्सन्तो नानाकर्मसु प्रवर्तन्ते स्म ॥७॥ ऋत्विजश्च सदस्याश्च सभासदो बहुविदश्च तेषु स्विष्टेषु सम्यक् पूजितेषु सूनृतं प्रियवाक् समर्हणमलङ्कारादि दक्षिणाश्च प्रसिद्धास्ताभिः द्युनद्यां गङ्गायाम् ॥८-१०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः कालव्यवधानाभावेन ॥८-९॥ तेषां वाद्यानाम् । स वाद्यगायननृत्यादिध्वनिः ॥१०-१३॥

---

[1] कर्मविशारदाः-विज. । [2] चिकीर्षया-विज. । [3] सूनृतमहार्हण-विज. । [4] दुन्दुभ्यानक-वीर. ; सतूर्यानक-विज. ।
नेदुरारान्महोत्सवे-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदा तत्क्षण एव प्रवर्तते स्म ।।७।। बहुविद: ऋत्विक्सदस्येतरे विद्वांसो विप्रादय: अवभृथे श्रीयुधिष्ठिरस्य स्नपनमृत्विगादयश्चक्रु: ततस्तत्पश्चादिति तत्तत्प्रसिद्ध्यैव स्वस्थचित्ततया तस्य कृत्यत्वादिति विशेषद्योतनार्थं तदद्वयेऽप्यतिशयद्योतनार्थं चैद्ये चेति पश्चान्निर्देश: द्युनद्यां गमनस्य कर्मणो यमुनासम्बन्धवद्गङ्गासम्बन्धोऽपि स्यादिति स्पृहया कौलिकराजधान्या: सम्माननापेक्षया च ।।८।। धुन्धुरी आनकभेद: पटहो दुन्दुभिर्वा ।।९।। वीणा कच्छपी वेणुरूपाङ्गं तलं करतालं नर्तकीनामुचिते लास्ये तेषामेव प्राधान्यात् ।।१०।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तदा तत्क्षण एव प्रवर्तन्तेस्म; तत्र हेतु: - राज्ञ इति । हे राजेन्द्रेति पूर्व्वेषां तेषां तादृशमाहात्म्येन तव सर्वराजवर्गश्रेष्ठत्वम्, किंवा राजेन्द्रस्य तव पितामहस्य तस्य तद्युक्तमेवेति भाव: ।।७।। बहुविद: ऋत्विक्सदस्येतरे विद्वांसो विप्रादय:, अवभृथे नृप आत्मनोऽन्येषाञ्च स्नपनं चक्रे, तु-शब्दस्तस्यैव तत्कर्म्मयोग्यत्वापेक्षया; चक्रुस्तत इति पाठे पाठान्तरे चावभृथे श्रीयुधिष्ठिरस्नपनमृत्विगादयश्चक्रु:; ततस्तत्पश्चादिति तत्तत्सिद्ध्यैव स्वस्थचित्ततया तस्य कृत्यत्वादिति; द्युनद्यामिति दिव्यत्वेन तस्यामेव तद्विधेयत्वात्, तथादूरगमनेन शोभाभरसम्पत्तेश्च; सा चाग्रे व्यक्तीभविष्यति ।।८।। मृदङ्ग-धुन्धुरी-पणवगोमुखा आनकभेदा:, आनक: पटह: दुन्दुभिर्वा ।।९।। तेषां गायकानां स उत्सवो नृत्यसम्बन्धी वीणादिभिरुच्चैर्नाद:, तलं करतलम्, नृत्ये मृदङ्गादीनामपेक्ष्यत्वेऽपि वीणादीनामेवोक्तिर्नृत्ये मधुरवाद्यत्वेन तदपेक्षाविशेषात् ।।१०।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ।।१-३१।।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

महायज्ञे नानाकर्मसु निरूपितास्सन्तो राज्ञो युधिष्ठिरस्य प्रियं कर्तुमिच्छव: यथानियोगं प्रवर्तन्ते स्म प्रावर्तन्त ।।७।। ऋत्विगिति । ऋत्विजश्च सदस्याश्च बहुविदश्च तेषु सुहृत्तमेषु च सूनृतादिभि: स्विष्टेषु सम्यक् पूजितेषु सत्सु श्रीकृष्णस्य चरणं प्रविष्टे सति द्युनद्यां गङ्गायामवभृथस्नपनं चक्रु: ।।८।। तदेव प्रपञ्चयितुं तावत् गङ्गां प्रति गमनारम्भं प्रस्तौति मृदङ्गेति । अवभृथे अवभृथसम्बन्धिन्युत्सवे मृदङ्गादयो अन्यानि वादित्राणि वाद्यानि च विचित्राणि नेदुर्दध्वनु: ।।९।। नर्तक्य इति । तेषां च तासाञ्च तेषां "पुमान् स्त्रिया" इत्येकशेष: गायकानां नर्तकीनाञ्चेत्यर्थ: । वीणादीनां नाद: यद्वा तेषां मृदङ्गादीनां वीणादीनाञ्च स प्रसिद्धो नाद: दिवमन्तरिक्षमस्पृशद्व्याप्तवान् ।।१०।।

श्रीमद्विजयध्वजकृता पदरत्नावली

ऋत्विजश्च सदस्याश्च बहुविदश्च ते तथा तेषु सुहृत्तमेषु स्विष्टेषु सुष्ठु पूजितेषु सत्सु तत: कालव्यवधानमन्तरेण ।।८।। आराद्दूरे समीपे च ।।९-१३।।

श्रीमज्जीवगोस्वामिकृत: क्रमसन्दर्भ:

द्युनद्यामित्यनेन तत्रैव तस्य विधानादिति गम्यते ।।८-१५।।

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भ: ।।१-४०।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ।।१-४०।।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।।३-१०।।

गूढार्थदीपिनी

ऋग्विगादिषु सूनृतादिभि: स्विष्टेषु सम्यक् पूजितेषु सत्सु सर्वे द्युनद्यां गत्वा अवभृथस्नपनं यज्ञान्तस्नानं चक्रुरित्यन्वय: । कदा । चैद्ये शिशुपाले सात्वतपते: यदुपते: श्रीकृष्णस्य चरणं प्रविष्टे सति । सूनृतं मधुरवाणी । समर्हणमलङ्कारादि ।।८।।

गूढार्थदीपिनी

अवभृथसम्बन्धिनि उत्सवे धुन्धुरो वाद्यभेदः ॥९॥ तेषां तासां च तेषाम् । 'पुमान् स्त्रिया' इत्येकशेषः तेषां वाद्यानां वा दिवमन्तरिक्षम् ॥१०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

निरूपितास्सन्तः नानाकर्मसु प्रवर्तन्ते ॥७॥ सूनृतेन प्रियवचनेन समर्हणेन अलङ्कारवस्त्राद्यर्पणेन दक्षिणया च स्विष्टेषु अवभृथस्नपनं क्रतुसमाप्तौ अवभृथाख्यं स्नानं चक्रुः ॥८-१०॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रवर्तन्ते स्म प्रावर्तन्त ॥७॥ ऋत्विजश्च सदस्याश्च ते च ते बहुविदश्च तथा सुहृत्तमेषु च सूनृतं वचो महार्हणं दक्षिणातिरिक्तं दक्षिणाभिः स्वेष्टेषु सम्यग्जितेषु सत्सु चैद्ये शिशुपाले सात्वतपतेः श्रीकृष्णस्य चरणं चक्रं निमित्तीकृत्य प्रविष्टेऽन्तर्निविष्टे सत्यतो न चैद्यदेहस्थितं ज्योतिर्वसुदेवं समाविशदिति विसंवादः । द्युनद्यामवभृथस्नापनं चक्रुः ॥८॥ धुन्धुर्यानकगोमुखा मृदङ्गादिकम् । धुन्धुरीति वाद्यविशेषः । आराद्दूरे दिवि भुविसमीपे च ॥९॥ गायका यूथशः सङ्घशो जगुर्वीणावेणुतलानामुन्नादो दिवं सहस्रधनुःप्रमाणोत्तरप्रदेशमस्पृशत् ॥१०॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

महायज्ञोऽयमिति आकारणप्रेषणद्रव्यसमानयनादिनानाकर्मसु नियुक्ताः सन्तः प्रवर्तन्ते स्म । राजसूयस्य परमधर्मत्वात् तत्कर्तुर्मनःप्रीतिं सर्व एव कर्तुं प्रवृत्ताः । एवमारम्भे सर्वेषां बन्धूनां विनियोगलक्षणः महान् सम्भ्रम उक्तः ॥७॥ अन्ते तु महानेव सम्भ्रमो जात इति वक्तुं मध्ये वैदिकं सङ्क्षेपेणाह-ऋत्विक्सदस्येति । ऋत्विजः सदस्या बहुविदश्च विवितदानेन संतर्पिताः । सुहृत्तमास्तु लौकिकदानेन । स्विष्टाः इच्छापूरणेन प्रीणिताः । सूनृतं वाचा तर्पणम् । समर्हणं कायिकम् । दक्षिणा द्रव्यकृता । मानसं त्वेभिरेव ज्ञायते । एवं मित्राणां संतोषं कृत्वा अमित्राणां च नाशव्याजेनेष्टं कृतवानित्याह चैद्ये च सात्वतपतेश्चरणं प्रविष्ट इति । चक्रुस्ततस्त्ववभृथस्नपनमिति । लौकिकोत्सवोऽवभृथे भवति । द्युनदी यमुनैव देवरूपित्वात् । इयमपि सूर्यमण्डलादेव समागतेति, वैदिकविरोधाभावे गङ्गायां वा गताः । अनेनालौकिकसामर्थ्यं च द्योतितम् ॥८॥ तत्र मृदङ्गादिवाद्यानां वादनमाह-मृदङ्गेति । लौकिकोत्कर्षार्थमेव वादित्राणां सिद्धानामपि वर्णनम् ॥९॥ अवभृथनिमित्तमाश्रित्य लौकिके उत्सवे उत्सवकार्यं सर्वमेवाह नर्तक्यो ननृतुरिति । हृष्टाः उत्सवासक्ताः । यूथशः समूहशः । वीणा वेणवश्च तलस्तालः हस्ततलोन्नादो वा । दिवमस्पृशदिति लौकिकोक्तिः ॥१०॥

सुबोधिनीसारः

सूनृतं मिष्टवचनं समर्हणं भूषादि दक्षिणाः प्रसिद्धास्ताभिः ऋत्विजश्च सदस्याश्च बहुविदश्च तेषु सुहृत्तमेषु स्विष्टेषु सुपूजितेषु सत्सु सात्वतपतेः श्रीकृष्णस्य चरणं प्रविष्टे सति चैद्ये शिशुपाले ततोऽनन्तरं द्युनद्यां गङ्गायामवभृथस्नपनं यज्ञान्तस्नानं चक्रुः ॥८॥ तत्स्नानोत्साहे मृदङ्गादयो विचित्राणि वाद्यानि नेदुः ॥९॥ नर्तक्यो वेश्या हृष्टा ननृतुः । गायका यूथशः सङ्घशो जगु तेषां गायकवादकानां वीणावेणुतलोद्भूत उन्नादो ध्वनिः स दिवं स्वर्गमस्पृशत् ॥१०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे राजेन्द्र ! ते युयुधानादयस्तदा महायज्ञे नानाकर्मसु निरूपिताः प्रयुक्ताः सन्तो राज्ञो युधिष्ठिरस्य प्रियं कर्तुमिच्छ यथानियोगं प्रवर्तन्ते स्म प्रावर्तन्तेति ॥७॥ ऋत्विजश्च सदस्याश्च बहुविदः सर्वज्ञाश्च तेषु सुहृत्तमेषु मित्रसम्बन्धिबान्धवादिषु सूनृतादिभिर्यथोचितं स्विष्टेषु सम्यक् पूजितेषु सत्सु चैद्ये च सात्वतपतेर्भक्तपालकस्य श्रीकृष्णस्य चरणं प्रविष्टे सति सर्वे त द्युनद्यां गङ्गायामवभृथसंज्ञकस्नपनं चक्रुः । सूनृतं प्रियं वाक्यम् । अर्हणमलङ्कारादि ॥८॥ स्नानप्रकारमेव प्रपञ्चयति-मृदङ्गेति

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आवभृथे अवभृथसम्बन्धिनि उत्सवे मृदङ्गादयो यानि च विचित्राणि वादित्राणि नेदुः ॥९॥ स तेषां गायकादीनां वीणादिनादो दिवमन्तरिक्षमस्पृशत् व्याप्तवान् ॥१०॥

अन्वितार्थप्रकाशिका

निरूपिता इति ॥ हे राजेन्द्र ! एवं भीमादयः तदा महायज्ञे नानाकर्मसु निरूपिताः प्रयुक्ताः सन्तो राज्ञो तेषु सुहृत्तमेषु मित्रसम्बन्धिबान्धवादिषु च सूनृतं प्रियवचः समर्हणमलङ्कारादिदक्षिणा च ताभिः यथोचितं स्विष्टेषु सम्यक् पूजितेषु सत्सु चैद्ये सात्वतपतेः श्रीकृष्णस्य चरणं प्रविष्टे सति सर्वे ततो द्युनद्यां गङ्गायामवभृथसंज्ञकस्नपनं चक्रुः ॥८॥ मृदङ्गेति ॥ अवभृथसम्बन्धिनि उत्सवे मृदङ्गादयोऽन्यानि च विचित्राणि वादित्राणि नेदुः । धुरन्धुरो आनद्धवाद्यभेदः ॥९॥ नर्तक्य इति ॥ पूर्वार्धं स्पष्टम् । स तेषां गायकादीनां वीणादिकानामुन्नादो दिवमन्तरिक्षमस्पृशत् व्याप्तवान् ॥१०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

महायज्ञे नानाकर्मसु निरूपिताः सन्तः प्रवर्तन्ते ॥७॥ ऋत्विगिति । ऋत्विजः यज्ञे वृता द्विजाश्च सदस्याः सभासदश्च बहुविदः वृतेभ्योऽन्ये विद्वांसश्च तेषु सूनृतं सुन्दरवाणी च समर्हणं भूषणवस्त्रादि च दक्षिणा विख्याताश्च ताभिः स्विष्टेषु समीचीनतया पूजितेषु सत्सु ॥ द्युनद्यां गङ्गायाम् अवभृथस्नपनं यज्ञान्तस्नानं चक्रुः ॥८॥ धुन्धुरी महानकः आनकः अल्पानकश्च अवभृथे भव आवभृथीय उत्सवस्तस्मिन् ॥९-१०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निरूपिता इति ॥ ते युयुधानादयः, हे राजेन्द्र, तदा महायज्ञे, नानाकर्मसु, निरूपिताः सन्तः, राज्ञो युधिष्ठिरस्य, प्रियचिकीर्षया प्रवर्तन्ते स्म । यथानियोगं प्रावर्तन्तेत्यर्थः ॥७॥ ऋत्विक्सदस्येति ॥ ऋत्विजश्च सदस्याश्च बहुविदश्च तेषु, सुहृत्तमेषु च, सूनृतं प्रियभाषणं च समर्हणं चन्दनादिकं च दक्षिणा च ताभिः, स्विष्टेषु सम्यक् पूजितेषु सत्सु, चैद्ये च शिशुपालेऽपि, सात्वतपतेः श्रीकृष्णस्य, चरणं प्रविष्टे सति, नृपः अपि, द्युनद्यां गङ्गायाम्, अवभृथस्नपनं चक्रे ॥८॥ सामान्यत उक्तमेतत्पुनः प्रपञ्चयितुं तावद्गङ्गां प्रति गमनारम्भं प्रस्तौति ॥ मृदङ्गेति ॥ आवभृथोत्सवे अवभृथसम्बन्धिनि उत्सवे, मृदङ्गशङ्खपणवधुन्धुर्यानकगोमुखाः, अन्यानि विचित्राणि वादित्राणि च, नेदुर्दध्वनुः ॥९॥ नर्तक्य इति ॥ तदा, नर्तक्यः, ननृतुः, गायकाः हृष्टाः सन्तः, यूथशः जगुः । ताश्च ते च ते तेषां, 'पुमान् स्त्रिया' इत्येकशेषः । नर्तकीनां गायकानां च सम्बन्धी, वीणावेणुतलोन्नादः, स मृदङ्गादीनां नादश्च, दिवम्, अस्पृशत् । दिवमन्तरिक्षम्, अस्पृशद्व्याप्तवान् ॥१०॥

कृष्णप्रिया

महाराज परीक्षित ! महायज्ञ भी राजसूय यज्ञमें विविध कार्योमें बाह्लिक के पुत्र नियुक्त किये गये थे । वे सब जिस काम में नियुक्त थे उस काम को करते थे, जिससे धर्मराज महाराज युधिष्ठिरका प्रिय और हित हो रहा था ॥७॥ महाराज परीक्षित ! राजसूय यज्ञमें जब ऋत्विज सदस्य एवं विशेषज्ञ पुरुषों का एवं स्वकीय इष्ट मित्र और बन्धुजनों का सुमधुर वचनावली से विविध प्रकारकी अर्चन सामग्री और दक्षिणा आदि से अच्छी तरह से सत्कार हो जाने के बाद शिशुपाल भक्तजनपाल भगवान श्रीकृष्ण के चरण कमलों में समागया तब महाराज धर्मराज भगवती गड्गाजी में अवभूथ स्नान करने के लिये गये ॥८॥ उस सुमड्गल अवसर पर जब वे अवभृथ स्नान करने लगे तब मृदंग शंख ढोल नौबत-नगाडे और नरसिंगे आदि विविध प्रकार के वाजित्र बजने लगे ॥९॥ नर्तकियां परमानन्द से झूम झूम कर नृत्य करने लगी, वृन्द के वृन्द उत्तम गायक गाने लगे साथमें बीना बांसुरी झांझ और मंजीरे बजने लगे । इन सबकी तुमुल ध्वनि सारे गगनमें फैल गयी ॥१०॥

चित्रध्वजपताका[1]ग्रैरिभेन्द्रस्यन्दनार्वभिः । स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः ॥११॥
यदुसृञ्जयकाम्बोजकुरुकेकयकोसलाः । कम्पयन्तो भुवं सैन्यैर्यजमानपुरःसराः[2] ॥१२॥
सदस्यर्त्विग्द्विजश्रेष्ठा ब्रह्मघोषेण भूयसा । देवर्षिपितृगन्धर्वास्तुष्टुवुः पुष्पवर्षिणः ॥१३॥
स्वलंकृता नरा नार्यो गन्धस्त्रग्भूषणाम्बरैः[3] । [4]विलिम्पन्त्योऽभिषिञ्चन्त्यो विजह्रुर्विविधै रसैः ॥१४॥

कर्दमक्षमा

चित्रध्वजपताकाग्रैः, स्वलङ्कृतैः, इभेन्द्रस्यन्दनार्वभिः, रुक्ममालिनः, भूपाः, निर्ययुः ॥११॥ यदुसृञ्जयकाम्बोजकुरुकेकयकोसलाः, सैन्यैः, भुवम्, कम्पयन्तः, यजमानपुरःसराः, (१२) सदस्यर्त्विग्द्विजश्रेष्ठाः, भूयसा, ब्रह्मघोषेण, च, देवर्षिपितृगन्धर्वाः, पुष्पवर्षिणः, तुष्टुवुः ॥१२-१३॥ स्वलङ्कृताः, नराः, नार्यः, गन्धस्त्रग्भूषणाम्बरैः, विलिम्पन्तः, विविधैः, रसैः, अभिषिञ्चन्त्यः, विजह्रुः ॥१४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चित्राणि ध्वजपताकाग्राणि येषु तैरिभेद्रैः स्यन्दनैरर्वभिरश्वैर्भटैश्च एवं चतुरङ्गैः सैन्यैर्निर्ययुः ॥११॥ यजमानो युधिष्ठिरः पुरस्सरो येषां ते ॥१२॥ सदस्या ऋत्विजोऽन्ये च द्विजश्रेष्ठा निर्ययुः ॥१३॥ किञ्च गन्धादिभिः स्वलंकृताः नराः नार्यश्च मिथो विजह्रुः ॥१४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न केवलं निर्ययुरेवेत्याह–किञ्चेति ॥१४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमवभृथोत्सवं सामान्यतो वर्णयित्वा तदर्थं प्रस्थानमारभ्य विशेषतो वर्णयति–चित्रेत्यादिभिर्विरेजुरित्यन्तैः । चित्रेति सार्धद्वयकम् रुक्ममालाः स्वर्णपुष्पमाल्यानि किम्वा किरीटादिस्वर्णपङ्क्तयः तद्युक्ताः ॥११॥ भूपानेवाह–यद्विति । काम्बोजाः सुदक्षिणादयः ॥१२॥ देवर्षीत्यर्द्धकम् ॥१३॥ स्वलमिति सार्द्धकम् । विलिम्पन्त्य इत्यादौ स्त्रीत्वं नार्य्य इत्यस्यैव विशेषणत्वात् अर्थान्तराणामेव विविधतया लिम्पन्त्योऽभितः सिञ्चन्त्यश्च ॥१४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

रुक्ममालाः सौवर्णपुष्पनिर्म्मितमाल्यानि, किंवा किरीटकुण्डलादिभिर्विकारैः स्वर्णपङ्क्तयस्तद्युक्ताः ॥११॥ भूपानेवाह–यद्विति । काम्बोजा महाभारते प्रसिद्धाः सुदक्षिणादयः, अन्येषां बहूनां सद्भावेऽप्येषामेवोक्तिः स्नेहसम्बन्धेन सैन्यादिसमृद्ध्या वा श्रैष्ठ्यस्यापेक्षया ॥१२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-३१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

चित्रेति । रुक्ममालाः स्वर्णमाला एषां सन्तीति तथा व्रीह्यादित्वान्मत्वर्थीय इनिः ते भूपाः चित्रा ध्वजादयो येषां तैरिभेन्द्रादिभिः स्वलङ्कृतैर्भटैश्च सह निर्जग्मुः ॥११॥ यद्विति । यजमानो युधिष्ठिरः पुरस्सरः पुरोयायी येषां ते यद्वादयः सैन्यैर्भुवं कम्पयन्तो निर्ययुरिति पूर्वेण सम्बन्धः ॥१२॥ सदस्येति । सदस्यादयो भूयसा ब्रह्मघोषेण निर्ययुः तदा देवादयः पुष्पवर्षिणः तुष्टुवुश्च ॥१३॥ किञ्च गन्धादिभिः स्वलङ्कृताः नराः नार्यश्च विविधैः रसैः विलिम्पन्तोऽभिषिञ्चन्तश्च मिथो विजह्रुः ॥१४॥

---

[1] पताकाधै–विज. । [2] पुरः सरैः–विज. । [3] भूषणादिभिः–गो. प्रे. टी. । [4] विलिपन्ताभिषिश्चन्तो–वीर. विज. ।

श्रीमद्विजयध्वजकृता पदरत्नावली

॥९-१३॥ रसैश्च हरिश्च हरिद्रादिरागजलैः ॥१४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥८-१५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चित्राणि ध्वजपताकाग्र्याणि येषु तैः इभेन्द्रादिभिश्चतुरङ्गसैन्यैः सह निर्ययुः अर्वाणोऽश्वाः ॥११-१३॥ नृदेव्यो नृदेवस्य युधिष्ठिरस्य पत्न्यः द्रौपदीयौधेयीप्रभृतय एव एतत् सुखमुपलब्धुं यथा दिवि विमानवरैर्देव्यस्तथैव रथादिभिर्निरगमन् मातुलेयेति यथा पत्युर्भागिनेये भागिनेयशब्दः प्रयुज्यते तथैव पत्युर्मातुलेयोऽपि मातुलेय उच्यते तस्य देवरत्वात्तेनैव सह परिहासौचित्यात् ता देवरानुत सखीनित्युत्तरवाक्यदृष्टेश्च स एवात्र गृहीतः न तु स्वमातुलेयस्तेन सह परीहासानौचित्यात् तस्मात् मातुलेयः प्रसिद्धः कृष्ण एव ततश्च मातुलेयैः कृष्णगदसारणादिभिः सखिभिर्भीमार्जुनादिभिश्च ॥१४॥

गूढार्थदीपिनी

इभेन्द्रैः स्पन्दनैः अर्वभिः अश्वैः भटैश्च एवं चतुरङ्गैः सैन्यैः सह ते भूपाः स्नानार्थं निर्ययुरित्यन्वयः । पताका जयशब्दाङ्किता ध्वजस्तत्सहितः रुक्मं सुवर्णम् । व्रीह्यादित्वादिनिः ॥११॥ यजमानो युधिष्ठिरः तत्पुरःसराः तेऽपि सैन्यैः सह निर्ययुरिति पूर्वेणान्वयः ॥१२॥ द्विजश्रेष्ठा अपि भूयसा महता ब्रह्मघोषेण वेदध्वनिना सह निर्ययुः ॥१३॥ विविधैः रसैः केशरजलादिभिः नरा नार्यश्च परस्परम् अभिषिञ्चन्त्यः विजह्रुः ॥ कुंकुमादिभिः मुखं विलिम्पन्त्यः ॥१४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

चित्राणि ध्वजपताकाग्राणि येषु तैरिभेन्द्रैस्स्यन्दनैः रथैः अर्वभिरश्वैः ॥११॥ सदस्यादयः भूयसा ब्रह्मघोषेण निर्ययुः देवादयश्च तदा पुष्पवर्षिणस्तुष्टुवुः ॥१३-१५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

चित्रध्वजपताकाढ्यैरिति पताकाग्र्यैरिति वा पाठौ । भटैः सहरुक्ममालिनो रुक्मात्ममाला येषामस्ति ते व्रीह्यादिः ॥११॥ यजमानो धर्मराजः पुरःसरो येषां ते तैः ॥१२॥ ब्रह्मघोषो वेदघोषस्तेन ॥१३॥ विविधै रसैर्हरिद्राकुंकुमकेसरजलैर्विलिम्पन्त्यश्च विलिम्पन्त एनमभिषिञ्चन्तः ॥१४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं निर्गमने सम्भ्रममुक्त्वा सर्वेषां राज्ञां युधिष्ठिरेण सह निर्गमनप्रकारमाह-चित्रध्वजेति । गरुडादिचिह्निता ध्वजाः, जयपत्राङ्किताः पताकाः, आश्चर्यहेतुत्वं चित्रत्वं ध्वजानां पताकानां च । अग्र्याः श्रेष्ठाः । इभेन्द्राः स्यन्दनानि च अर्वाणश्च अश्वाः । एते स्वलंकृता भटाश्च । चतुरङ्गाणाम् अलङ्करणमुक्तम् । तैः सह भूपा निर्ययुः । रुक्मालङ्करणसमूहयुक्ताः । रुक्मं तु सुवर्णम् ॥११॥ यदुसृञ्जयादयः क्षत्रियावान्तरभेदाः तत्तत्कुलाभिमानयुक्ता अपि सह निर्ययुरित्युत्कर्षः । स्वस्वसैन्यैर्भुवं कम्पयन्तः । यजथमानो युधिष्ठिरः पुरःसरो येषाम् ॥१२॥ एवं केवललौकिकपराणां निर्गमनमुक्त्वा आलैकिकानामपि सह निर्गमनमाह-सदस्येति । त्रिविधा अपि ब्राह्मणाः ब्रह्मघोषेण सह निर्गताः । भूयसेति वाद्यापेक्षया ब्रह्मघोषस्यैव निकटे जायमानत्वात् भूयस्त्वम् । अलौकिकपङ्क्तौ देवानामप्यागमनमाह देवर्षीति । देवादय उपरि गच्छन्तः पुष्पवृष्टिं स्तोत्रं च कृतवन्तः ॥१३॥ ततः कामकलाभिः

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

गच्छतामुत्सवमाह स्वलङ्कृता इति । गन्धादिभिः स्वलङ्कृताः विविधै रसैर्विलिम्पन्तः तैलगोरसादिभिर्हृष्टाः सन्तः कामकलाभिर्विजह्रुः । याभिः सह लीलोपयुज्यते तास्ते च विजह्रुरिति विमर्शः ॥१४॥

श्रीसुबोधिनीसारः

चित्राणि ध्वजपताकाग्राणि येषु तैः इभानां हस्तिनामिन्द्रैः स्यन्दनै रथैरर्वभिरश्वैः सुष्ठु अलङ्कृतैर्भटैः पुरुषैः सह सुवर्णमालिनो भूपाः करहारिणो निर्ययुर्निर्जग्मुः ॥११॥ यजमानो युधिष्ठिरः पुरःसरोऽग्रेचरो येषां ते यदुसृञ्जयादयः सैन्यैर्भुवं पृथिवीं कम्पयन्तो निर्ययुः ॥१२॥ सदस्यास्तु सभासदः ऋत्विजो द्विजश्रेष्ठाः तेऽपि महता वेदपाठेन निर्ययुः देवादयः पुष्पवर्षिणः तुष्टुवुः ॥१३॥ गन्धमालाभूषणवस्त्रैः सुष्ठु अलङ्कृता नरा नार्यः स्त्रियो विविधैर्नानाप्रकारै रसैर्विलिम्पन्त्यो मिथोऽभिषेकं कुर्वन्त्यो विजह्रुः चिक्रीडुः ॥१४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

रुक्ममालाः स्वर्णमाला एषां सन्ति ते भूपाः चित्राणि ध्वजपताग्र्याणि येषां तैरिभेन्द्रैर्गजैः, स्यन्दनैः रथैः, अर्वभिः अश्वैः, स्वलङ्कृतैर्भटैश्च एवं चतुरङ्गसैन्यैर्निर्ययुः । तत्र गरुडादिचिह्निता ध्वजाः, जयपत्राङ्किताः पताकाः, तेषामग्र्याणि उत्तमानि ॥११॥ यजमानो युधिष्ठिरः पुरःसरः पुरोयायी येषां ते यादवादयः सैन्यैर्भुवं कम्पयन्तो निर्ययुरिति पूर्वेणैवान्वयः ॥१२॥ सदस्याश्च ऋत्विजश्च अन्ये च द्विजश्रेष्ठा भूयसा महता ब्रह्मघोषेण वेदपाठघोषेण सह निर्ययुः । देवादयस्तु पुष्पवर्षिणः सन्तस्तुष्टुवुः ॥१३॥ किञ्च गन्धादिभिः स्वलङ्कृता नरा नार्यश्च विविधै रसैः परस्परं विलिम्पन्त्योऽभिषिञ्चन्त्यश्च विजह्रुः ॥१४॥

अन्वितार्थप्रकाशिका

चित्रेति ॥ रुक्मस्य स्वर्णस्य माला एषां सन्ति ते भूपाः चित्राणि ध्वजपताकाग्र्याणि येषां तैरिभेन्द्रैः स्यन्दनैः रथैः अर्वभिः अश्वैः स्वलङ्कृतैर्भटैश्च एवं चतुरङ्गसैन्यैर्निर्ययुः ॥११॥ यद्विति ॥ यजमानो युधिष्ठिरः पुरःसरः पुरोयायी येषां ते यादवादयः सैन्यैर्भुवं कम्पयन्तो निर्ययुरित्यनुषङ्गः ॥१२॥ सदस्येति ॥ सदस्याश्च ऋत्विजश्च अन्ये च द्विजश्रेष्ठा भूयसा महता ब्रह्मघोषेण वेदपाठघोषेण सह निर्ययुः । देवादयस्तु पुष्पवर्षिणः सन्तस्तुष्टुवुः ॥१३॥ स्वलङ्कृता इति ॥ गन्धादिभिः स्वलङ्कृता नरा नार्यश्च विविधै रसैः परस्परं विलिम्पन्त्योऽभिषिञ्चन्त्यश्च विजह्रुः ॥१४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विचित्राणि ध्वजपताकाग्राणि येषु तैः इभेन्द्राश्च स्यन्दनाश्च अर्वाणो हयाश्च तैः भटैश्च एवं चतुरङ्गसेनाभिः निर्ययुः ॥११॥ यजमानोधर्मपुत्रः पुरःसरः अग्रगो येषां ते ॥१२॥ सदस्या ऋत्विजश्च अन्ये द्विजश्रेष्ठाश्च निर्ययुः ॥१३॥ गन्धादिभिः स्वलङ्कृताः रसैर्गोरसादिभिः ॥१४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

चित्रेति ॥ चित्राणि ध्वजपताकाग्राणि येषां तैः, इभेन्द्राः करीन्द्राश्च स्यन्दना रथाश्च अर्वाणो हयाश्च तैः, स्वलङ्कृतैः भटैश्च सहिताः, रुक्ममालिनः स्वर्णस्रगादिधारिणः, भूपा राजानः, निर्ययुः । चतुरङ्गसेनायुक्ता निर्जग्मुरित्यर्थः ॥११॥ भूपेषु कांश्चित्तान्निर्दिशन् किञ्चिद्विशेषवत्तया तदेवाह ॥ यद्विति ॥ यदवश्च सृञ्जयाश्च काम्बोजाश्च कुरवश्च कैकयाश्च कोसलाश्च ते, सैन्यैः, भुवं पृथिवीं, कम्पयन्तः, यजमानो युधिष्ठिरः पुरःसरो येषां तथाभूताः सन्तः, निर्ययुः ॥१२॥ सदस्येति ॥ सदस्याश्च ऋत्विजश्च द्विजश्रेष्ठाश्च ते, भूयसा, ब्रह्मघोषेण वेदध्वनिना सह, निर्ययुः । देवाश्च ऋषयश्च पितरश्च गन्धर्वाश्च ते, तदा पुष्पवर्षिणः सन्तः, तुष्टुवुः ॥१३॥ अथ युधिष्ठिरस्य भवनतो निर्गमनात् प्राग्भवं वृत्तमाह ॥ स्वलङ्कृता इति ॥ गन्धस्रग्भूषणाम्बरैः, स्वलङ्कृताः नराः, विविधैः रसैः, विलिम्पन्तः, अभिषिञ्चन्तः, विजह्रुः । नार्यश्च तैरेव, विलिम्पन्त्यः, अभिषिञ्चन्त्यश्च सत्यः, विजह्रुः ॥१४॥

कृष्णप्रिया

सुवर्णकी मालम धारण किये हुए यदु सुंजय कम्बौज कुरु कैकेय पुनः सजे धजे मदमत्त गजराज रथ वृन्द अश्व वृन्द आदि से सुसज्ज वीर सैनिको के साथ धर्मराज युधिष्ठिरजी को आगे करके धरणी को कम्पाते हुए चलने लगे ।।११-१२।। राजसूय यज्ञ के सदसस्पति ऋत्विक एवं बहुत से श्रेष्ठ विप्रर्षि वेदमंत्रो को उंचे स्वरसे गान करते हुए आगे चले । पुनः देववृन्द ऋषिवृन्द, पितृवृन्द एवं गन्धर्ववृन्द नभो देश से सुमनसो की वृष्टि करते हुए उनकी स्तुति करने लगे ।।१३।। महाराज परीक्षित् ! इन्द्रप्रस्थ के नर नारी जन इत्र-फुलैल, कुसुमोंकी माला, पचरंगी शाटिका और अतिमूल्य अलंकारों से सज धज कर परस्पर जल-तैल, दूध, मक्खन आदि पदार्थ डालकर सबको भिगो देते और परस्पर के शरीरमें लगा देते, रस-प्रचूर क्रिडा करते हुए चलने लगे ।।१४।।

तैलगोरसगन्धोदहरिद्रासान्द्रकुंकुमैः । पुम्भिर्लिप्ताः प्रलिम्पन्त्यो विजह्रुर्वारयोषितः ।।१५।।
गुप्ता नृभिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा दिवि विमानवरैर्नृदेव्यः ।
ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीडहासविकसद्वदना विरेजुः ।।१६।।
ता देवरानुत सखीन् सिषिचुर्दृतीभिः क्लिन्नाम्बरा विवृतगात्रकुचोरुमध्याः ।
औत्सुक्यमुक्त[१]कबराच्च्यवमानमाल्याः क्षोभं दधुर्मलधियां [२]रुचिरैर्विहारैः ।।१७।।
स सम्राड् रथमारूढः सदश्वं रुक्ममालिनम् । व्यरोचत स्वपत्नीभिः क्रियाभिः क्रतुराडिव ।।१८।।

कर्दमक्षमा

पुम्भिः, तैलगोरसगन्धोदहरिद्रासान्द्रकुङ्कुमैः, लिप्ताः, प्रलिम्पन्त्यः, वारयोषितः, विजह्रुः ।।१५।। दिवि, विमानवरैः, यथा, देव्यः, तथा, नृदेव्यः, नृभिः, गुप्ताः, एतत्, उपलब्धुम्, निरगमन्, मातुलेयसखिभिः, परिषिच्यमानाः, सव्रीडहासविकसद्वदनाः, विरेजुः ।।१६।। विचित्रगात्रकुचोरुभाराः, क्लिन्नाम्बराः, औत्सुक्यमुक्तकबरात्, च्यवमानमाल्याः, सखीन्, उत, देवरान्, दृतीभिः, सिषिचुः, रुचिरैः, विहारैः, मलधिया, क्षोभम्, दधुः ।।१७।। सः, सम्राट्, सदश्वम्, रुक्ममालिनम्, रथम्, स्वपत्नीभिः, आरूढः, क्रियाभिः, क्रतुराड्, इव, व्यरोचत ।।१८।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

रसानेवाह-तैलेति । किञ्च सान्द्रकुङ्कुमादिभिः पुम्भिर्लिप्तास्तान् प्रलिम्पन्त्यो वारयोषितश्च विजह्रुः ।।१५।। नृभिर्गुप्ता रथादियानैर्नृदेव्यो यथा तद्वत् मातुलेयैः सखिभिश्च परितः सिच्यमानाः सव्रीडेन हासेन विकसन्ति वदनानि यासां ताः ।।१६।। देवरान् पतिभ्रातॄन् उत सखीन् सखीनपि दृतीभिरुदकनोदनचर्मयन्त्रैः सेचनपात्रैश्च मलधियां कामिनाम् ।।१७।। क्रियाभिरङ्गक्रियाभिः क्रतुराट् सशरीरो राजसूय इव ।।१८।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदाह्लादलीलामाह-किञ्चेति ।।१५।। एतत् क्रीडनम् । उपलब्धुं चक्षुर्विषयीकर्तुम् । देव्यो देवाङ्गनाः । मातुलेयैरिति कृष्णपट्टराज्यभिप्रायेण सहदेवादिभिरित्यर्थः । सखिभिः पतिकनिष्ठसखिभिः । ता नृदेव्यः ।।१६।। ता नृदेव्यः । 'दृतिश्चर्मपुटे मत्स्ये' इति मेदिनी । 'स्याद्दृतिर्भेदने सेकपात्रे च साध्वसे तथा' इति निरुक्तिः । आर्द्रचर्मस्पर्शस्याशुचित्वापादकत्वादाह-सेचनपात्रैश्चेति, वंशदलादिनिर्मितैरित्यर्थः । मला मलिना कामाविष्टा धीर्येषां तेषाम् ।।१७।। स युधिष्ठिरः ।।१८।।

---

५. कबरच्च्यवमान-वीर. विज. । ५. रुचिरैः-समेताः-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुम्भिरित्यर्धकम् । तैलादिभिः प्रकर्षेण पुम्भ्योऽप्याधिक्येन लिम्पन्त्यः ॥१५॥ नृदेव्यः नृदेवस्य श्रीयुधिष्ठिरस्य पत्न्यः श्रीद्रौपदीयौधेयीप्रभृतयः गङ्गातीरगमनानन्तरं तदुत्सवोचितां तासां क्रीडामाह-सार्धेन ताश्च श्रीद्रौपद्याद्या एव श्रीरुक्मिण्याद्यास्तु प्रायः कौतुकदर्शिन्यः तस्मिन् यज्ञकर्मणि द्रौपद्यादीनामेव मुख्यत्वात् मातुलेयशब्दाच्च यथापत्युर्भागिनेये भागिनेयता प्रयुज्यते तथा मातुलेयोऽप्यत्र पत्युर्मातुलेय एव गृह्यते स एव युक्तः स्वमातुलेयेन परिहासस्यानर्हत्वात् स च श्रीकृष्ण एव च प्रसिद्धः प्रसिद्धस्यैव च ग्रहणं युक्तं "हन्तायमद्रिरबला हरिदासवर्य्यः" इत्यत्र श्रीगोवर्धनवत् ततः श्रीकृष्णो देवर इति तत्सहयोगेनान्ये च देवरा गृह्यन्ते ते च निकटा भीमादयः सखायस्तु तेषामेव भ्रातृप्राया ज्ञेयाः अत एव देवरानुतसखीनिति वक्ष्यमाणेनैकवाक्यत्वञ्च अतो लोके विञ्चिन्नर्मप्राप्तेस्तत्र योग्या अन्तरङ्गसम्बन्धान्न दुष्टदृष्ट्यास्पदानि च ते ॥१६॥ गोत्रत्वेन प्राप्तावपि वैशिष्ट्यविवक्षया कुचादिप्रयोगः किन्त्वौत्सुक्येन सेकाभिनिवेशेन च मुक्तकबराश्च ताश्च्यवमानमाल्याश्च अत्र कबराच्च्यवमानेति कबराः पतमानेति पाठविकल्पो दृश्यते मलधियां दुर्योधनादीनामेव न तु साधूनां किमुत तद्विधदेवरादीनामित्यर्थः ॥१७॥ अथ पुनाराज्ञो गमनं वर्णयति-स इति । स्वस्य पत्न्यः श्रीद्रौपद्याद्याः ताभिः सह ॥१८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गोरसा दध्यादयः, प्रकर्षेण पुंभ्योऽप्याधिक्येन लिम्पन्त्यः । अन्यत्तैर्व्याख्यातम् । तत्र तैलादिभिरेवेति लेख्ये सान्द्रकुंकुमादिभिरिति लेखकभ्रमात् । किञ्च, प्रलिम्पन्त्य इत्यस्यैव व्याख्या विलिम्पन्त्य इति । किंवा, अत्रापि प्र-शब्दस्थाने वि-शब्दो लेखकभ्रमात्; यद्वा, मूलपाठ एव तादृशो ज्ञेय इति ॥१५॥ नृदेव्यः श्रीद्रौपद्याद्याः श्रीरुक्मिण्याद्याश्च, यथा देव्य इति तासां महाकान्त्यादिकं सूचितम्, तथा देवीनां व्योम्नागमनञ्चोक्तम् । मातुलेयस्य श्रीकृष्णस्य साखिभिः, सखीभिः पत्नीभिरिति केचित्; विशेषेण पूर्व्वतोऽप्याधिक्येन रेजुरशोभन्त ॥१६॥ सखीन् श्रीद्रौपद्याद्याः श्रीकृष्णादीन्, श्रीरुक्मिण्याद्याश्च सहदेवादीन् (सहदेवरादीन् (ग)), क्लिन्नाम्बरत्वादेव विवृतमभिव्यक्तं गात्रे देहे किंवा गात्रं सर्व्वाङ्गम्, तत्रापि विशेषतः कुचादिकं यासां ताः; यद्वा, क्लिन्नाम्बरा अपि अविवृतगात्रकुचोरुमध्या इत्यत्र कर्म्मधारयः, औत्सुक्येन सेकाभिनिवेशेन मुक्तकबराश्च ताः, च्यवमानमाल्याश्च, विशेषणानामेषां यथोत्तरं सेकाभिनिवेशप्रकारे श्रैष्ठ्यम् । विहारैर्देवरादिसेकलक्षणैरप्याद्यरसमयैः, क्षोभमसहिष्णुतया दुःखम्, मलधियां दुर्य्योधनादीनामेव, न तु साधूनामित्यर्थः ॥१७॥ स्वस्य पत्न्यः श्रीद्रौपदी यौधेयीप्रभृतयश्च, ताभिः सह विशेषेण सर्वेभ्य आधिक्येनारोचत अशोभत ॥१८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१-३१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

रसानेवाह-तैलेति । पुम्भिः कर्तृभिस्तैलादिभिर्लिप्ताः वारयोषितः पुनस्तैर्विलिम्पन्त्यः विजह्रुः गोरसो दधिक्षीरादि गन्धोदकं चन्दनोदकम् ॥१५॥ गुप्ता इति । दिवि यथा विमानवरैर्दैव्यो देवपत्न्यः देवस्त्रियः तथानृदेव्यः राज्ञां स्त्रियो नृभिर्भटैर्गुप्ताः रथादियानैरेतदवभृथस्नपनम् उपलब्धुं द्रष्टुं निर्जग्मुः ता नृदेव्यः मातुलेयैः सखिभिश्च सिच्यमानाः सव्रीडे हासेन विकसन्ति वदनानि यासां ताः विरेजुः ॥१६॥ ता इति । ता नृदेव्यः दृतीभिरुदकनोदनचर्मयन्त्रैः देवरान् पतिभ्रातृनु सखीनपि सिषिचुः स्वयञ्च तैः सिक्ताः क्लिन्नानि सिक्तानि अम्बराणि यासां ताः अत एव विवृतं व्यक्तं गात्रं शरी कुचावूरुप्रदेशश्च यासां ता औत्सुक्यात्तत्प्रयुक्तजलक्रीडातिशयान्मुक्तेभ्यः श्लथेभ्यः कबरेभ्यः च्यवमानानि गलिता माल्यानि पुष्पाणि यासां ता रुचिरैर्विहारैर्मलधियां कामिनां क्षोभं चित्तचाञ्चल्यं कामोद्रेकमिति यावत् दधुश्चक्रुः ॥१७ स इति । सन्तः समीचीनाः अश्वाः सन्त्यस्येति तथा तं रथमारूढः सम्राट् युधिष्ठिरः क्रियाभिरङ्गक्रियाभिः प्रयाजादिभि क्रतुराट् राजसूय इव स्वपत्नीभिर्व्यरोचत रराज ॥१८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

एतदेवाह-तैलेत्यादिना ॥१५॥ नृदेव्यः राज्ञः एतदुपालब्धुं चक्षुर्विषयं स्थलं निरगमन्नित्यन्वयः । देव्यः देवस्त्रियः मातुलेयैः सखिभिश्च ॥१६॥ दृतीभिः जलसेचनपात्रैः मलधियां विषयाविष्टानां रुचिरैर्भूषणैः समेताः ॥१७-१८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नृदेव्यः द्रौपद्याद्याः श्रीयुधिष्ठिरपत्न्यः मातुलेयोऽत्र पत्युर्म्मातुलेयः श्रीकृष्णसखायश्च पत्युरेव भ्रातरः श्रीभीमादयः तत्तुल्या अन्ये च केचित् । देवरान् श्रीकृष्णभीमादीन् तत्तुल्यानन्यांश्चेति ॥१६॥ मलधियामेव न तु साधूनां किमुत तद्विधदेवरादीनामित्यर्थः ॥१७-३९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दृतीभिरुदकनोदनविचित्रचर्मयन्त्रैः मलधियां दुर्योधनादीनामेव न तु साधूनाम् ॥१५-१७॥ स्वपत्नीभिर्जलविहारानन्तरमुत्थिताभिः जलविहारपूर्ववृत्तवर्णनमिदं वा ज्ञेयं क्रियाभिरङ्गक्रियाभिः क्रतुराट् सशरीरो राजसूय इव ॥१८॥

गूढार्थदीपिनी

किञ्च सान्द्रकुंकुमादिभिः पुम्भिर्लिप्ताः तान् प्रलिम्पन्त्यो वारयोषितो देवाङ्गनाः अत एव सव्रीडेन हासेन विकसन्ति प्रफुल्लानि वदनानि यासां ता विरेजुः ॥१६॥ ता नृदेव्यः देवरान् प्रति भ्रातृन् उत अपि सखीनपि दृतीभिः सेचनवंशिकाभिः सिषिचुरित्यन्वयः । कथम्भूताः । क्लिन्नाम्बराः आर्द्रशाटिकाः । पुनश्च । विवृतं व्यक्तीभवत् गात्रं कुचौ ऊरू मध्यभागश्च यासां ताः । पुनश्च । क्रीडौत्सुक्यात् मुक्तकबरेभ्यः शिथिलकेशपाशेभ्यः च्यवमानानि गलितीभवन्ति माल्यानि पुष्पाणि यासां ताः । एवं विहारैः मलधियां कामिनां दुर्योधनादीनां क्षोभं दधुः कामोद्वेगं चक्रुः । मला मलिना कामासक्ता धीर्येषां तेषाम् ॥१७॥ स युधिष्ठिरः सन्तः श्रेष्ठाः अश्वा यस्मिन् तं रथमारूढः तथा व्यरोचत यथा क्रतुराट् राजसूयःक्रियाभिः प्रयाजादिभिः विरोचते । रुक्ममालाः स्वर्णमाला अस्य सन्तीति तथा ॥१८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यथा दिवि विमानवरैर्देव्यः देवपत्न्यः तथा नृदेव्यः राजपत्न्यः नृभिर्गुप्ताः रथादिभ्भिः निरगमन् निरगुः ताः मातुलेयैः श्रीकृष्णगदादिभिः सखिभिश्च परिषिच्यमानाः सव्रीडहासेन विकसन्ति वदनानि यासां ताः विरेजुः । एतत्सुखमुपलब्धुमनुभूतं तद्द्रष्टृभिरिति शेषः ॥१६॥ दृतीभिः उदकनोदचर्ममयैर्यन्त्रैः मलधियां कामिनाम् ॥१७॥ क्रियाभिः अङ्गक्रियाभिः क्रतुराट् राजसूय इव ॥ १८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तैलं गन्धादेः पुम्भिः परैर्लिप्ता स्वयं प्रतिलिम्पन्त्यो वारयोषितो वेश्या विजह्रुः ॥१५॥ नृदेव्यो राजराजीवाक्ष्यो नृभिर्भटैर्गुप्ता देव्यः । यथा विमानवरैर्दिव्यागमंस्तथा । एतदुपलब्धुं चक्षुर्विषयं कर्तुं निरगमन्यास्ता मातुलेयैर्मातुलपुत्रैः सखिभिश्च परिषिच्यमानः प्रागुक्ततैलादिभिः सव्रीडं हासेन विकसद्वदनं यासां ताः सत्यो विरेजुः ॥१६॥ ता देववरान्पतिभ्रातृन्दृतिभिश्चर्मपुटैः । यद्यपि दृतिश्चर्मपुटे स इति विश्वस्तथापि क्तिचि कृदिकारडीषि दृतीत्यपि भवतीति ज्ञेयम् । सखींश्च सखीनपि सिषिचुः । ताश्चैतादृश्य इति शंसति क्लिन्नाम्बराः क्लिन्नं जलादिनाऽङ्गसंलग्नं चाम्बरं यासां ताः । अत एव विवृतगात्रकुचोरुमध्या गात्राणीतराङ्गानि च कुचाश्चोरवश्च मध्यानि च गात्रकुचोरुमध्यं विवृतं प्रकाशितं गात्रकुचोरुमध्यं यासां ताः । औत्सुक्यान्मुक्ताश्च ते कबराश्च

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तेभ्यश्च्यवमानानि गलन्ति माल्यानि माला वा प्रसूनानि वा यासां ताः । रुचिरैरलङ्कारैः समेता किञ्चित्समेता मिलिता मलधियां कामिनां क्षोभं चित्तचाञ्चल्यं दधुः ॥१७॥ सदश्वं रुक्ममालिनं रथं स सम्राट् क्रियाभिः क्रतुराट् प्रस्तुतराजसूयादिरिव स्वपत्नीभिः स्वकर्तृकयज्ञफलभोक्त्रीभिरारूढो व्यरोचत् । रुक्ममालिनमिति न सरसलग्नं विशेष्येणेति तद्विशेषणाश्वपदार्थेन सम्बध्यते । रुक्ममालिसमीचीनाश्वोपेतमित्यर्थः । पूर्वं विवृतमेतत्सजातीयस्थानप्रदर्शनेनास्माभिरेतत्प्रकारतस्ततोऽनुसन्धेयः ॥१८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

साधारणीनां भेदेनाह तैलगोरसेति । इदमर्धं देहलीप्रदीपवत् । पुम्भिर्विटैः प्रकर्षेण लिप्ताः स्वयमपि लिम्पन्त्यः । वारयोषितः वेश्याः । वराणां समूहो वारं तस्य योषित इति । धर्ममध्येऽपि लौकिकभाषात्वात् तथावर्णनं न दोषः ॥१५॥ शस्त्रपाणिभिः पदातिभिर्गुप्ताः । एतदवभृथाख्यं कर्म । देव्यः राजस्त्रियः नरयानैर्निर्गताः नरयानानां तासां चोत्तमत्वं दृष्टान्तेनाह विमानवरैर्नृदेव्य इति । तासामपि लेपनादिलीलामाह ता मातुलेयसखिभिरिति । मातुलेयैः सखिभिश्च परिषिच्यमानाः । मातुलेया एव वा सखायः । मातुलेयस्य भगवतः सखीभिरित्यपव्याख्यानम् । सर्वराज्ञां स्त्रीणां प्रक्रान्तत्वात् मातुलेयपदं च तासोव मातुलेयं गमयति । न भर्तुर्मातुलेयं ता देवरानुत सखीनित्यग्रे विरोधश्च । मातुलेयकन्यापरिणये ज्यष्ठस्य कनिष्ठा देवरा मातुलेयाश्च भवन्ति ।मातुलेयपदं पैतृष्वस्त्रेयस्याप्युपलक्षणम् । देवरैः सह सखीनां परिहासविलासः लौकिकः सर्वदेशप्रसिद्धो न निषिद्धः । यथा राजभोग्याः पदार्थाः सर्वेषामुपयुज्यन्ते तथा स्त्रीणामपि बाह्या लीलाः सम्बन्धिनामपि युज्यन्ते । मातुलेयपदेन धर्म्यो विवाहो निराकृतः । धर्मविवाहवतीनां तु सुतरां पतिव्रतानां तु विलासा एव न भवन्ति सुतरामन्यैः सह । तस्मात्सुष्टूक्तं मातुलेयैः सखिभिश्चेति । तथापि संवृता इति सव्रीडहासविकसद्वदना इति पूर्वोक्ताभ्यो विशेषः । परिषेचनं तु जलमध्ये न तु मध्येमार्गं तत्रैव कमलानीव विरेजुः ॥१६॥ ता अपि प्रतियोगिनां सेचनं चक्रुरित्याह ता देवरानिति । त एव मातुलपुत्रा देवराः । उतेति सखीनां भिन्नत्वाय । दृतयः वंशचर्मकृताः । स्वयं च ताः क्लिन्नाम्बराः सूक्ष्मवस्त्रपरिधानाद्विवृतगात्राः । रसस्थानानामपि दर्शनार्थं विशेषतो निरूपणम् । कुचोरुमध्या इति शृङ्गारस्थानत्वाय तासां तथा वर्णनम्, मध्यं नाभिस्थानम् । क्रीडौत्सुक्येन मुक्तं कब यासाम् । अत एव च्यवमानमाल्याः । तासां दर्शनेन कन्दर्पाविर्भावो भवतीति तेन प्रकारेण विशेषो वर्णितः । दोषजनकत्वं व्यवस्थया परिहरति मलधियामिति । अजितान्तःकरणानामेव तद्दर्शनेन क्षोभः । अनेन कीर्तनश्रवणादावपि दोषः परिहृतः । रुचिरैरिति रसाभासव्यतिरिक्तैः ॥१७॥ ततो युधिष्ठिरस्य निर्गमनमाह स सम्राडिति । साम्राज्यं कर्मणा तेनैव प्राप्तमिति रथविशेषणम् सदश्वं रुक्ममालिनमिति । सत्पदेन दान्तत्वमपि गम्यते । सुवर्णालङ्कारोपेतम् । स्वपत्नीभिः असाधारणीभिः, पूर्ववैलक्षण्यार्थमुक्तम् तस्यालौकिकत्वमाह क्रियाभिः क्रतुराडिवेति । प्रकरणेन प्राप्तं लौकिकत्वं परिह्रियते । क्रतुराडपि योगजदृष्ट्या दृश्यते अभिव्यक्तिदशायां तु सर्वैरेव क्रियाभिर्नित्याभिः ॥१८॥

श्रीसुबोधिनीसारः

तैलादिद्रव्यैः पुम्भिनरैर्लिप्ताः स्वयं तान् प्रलिम्पन्त्यो वारस्त्रियो विजह्रुः ॥१५॥ नृभिर्गुप्ता नृदेव्यो राज्यो निराग विमानवरै रेतदुत्सवकर्म उपलब्धुं द्रष्टुं दिवि देव्य इव मातुलेयस्य श्रीकृष्णस्य सखिभिः परिषिच्यमानास्ता स्त्रियः सव्री हासेन विकसन्ति वदनानि यासां ता विरेजुः ॥१६॥ देवरान् पतिभ्रातृन् उत सखीन् अपि ताः सिषिचुः दृतीभिः चर्म रेचकैः क्लिन्नानि आर्द्राणि अम्बराणि यासां ता विवृतानि गात्रादीनि यासां ताः औत्सुक्यान्मुक्तः कबरः केशबन्धनं तस् च्यवमानानि पतन्ति माल्यानि यासां ताः रुचिरैर्मनोरमैर्विहारैः क्रीडाभिर्मलधियां कामिनां क्षोभं दधुः ॥१७॥ सन्तोऽश्वा य रुक्मस्य माला विद्यतेऽस्येति तं रथमारूढः सम्राट् सार्वभौमः स राजा धर्मपुत्रो व्यरोचताशोभत स्वस्त्रीभिः सह क्रिया क्रतुराट् राजसूय इव ॥१८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

रसान् दर्शयन् स्पष्टयति-तैलेति । पुम्भिः कर्तृभिस्तैलादिभिर्लिप्ता वारयोषितो वेश्यास्तैरेव तान् प्रलिम्पन्त्यो विजह्रुः । गोरसो दधिक्षीरादिः । गन्धोदकं चन्दनाद्युदकम् ॥१५॥ नृभिर्भटैः गुप्ता नृदेव्यो राज्ञां स्त्रियः एतदवभृथस्नपनमुपलब्धुं द्रष्टुं रथादिभिर्निरगमन् निर्जग्मुः । ताश्च मातुलेयैः सखिभिश्च परिषिच्यमानाः सव्रीडेन लज्जासहितेन हासेन विकसन्ति वदनानि यासां ता विरेजुः ॥१६॥ क्लिन्नानि सिक्तानि अम्बराणि यासां ताः । अत एव विवृतं व्यक्तं गात्रं शरीरं कुचावुरू मध्यप्रदेशश्च यासां ताः । औत्सुक्यात्तत्प्रयुक्तजलक्रीडातिशयात् मुक्तेभ्यः श्लथद्बन्धेभ्यः कबरेभ्यः च्यवमानानि गलितानि माल्यानि पुष्पाणि यासां तादृश्यस्तादृशीभिरुदकनोदनचर्मयन्त्रैर्देवरान् पतिभ्रातॄन् उत अपि सखीनपि सिषिचुः, एवं च रुचिरैर्विहारैः मलधियां काममलवासितान्तःकरणानां दुर्योधनादीनां न तु साधूनां क्षोभं चित्तचाञ्चल्यं कामोद्रेकं दधुः चक्रुः ॥१७॥ सन्तः समीचीना अश्वा यस्य तं रुक्ममाला अस्य सन्तीति तथा तं रथमारूढः स सम्राट् युधिष्ठिरः स्वपत्नीभिर्व्यरोचत रराज । तत्र दृष्टान्तमाह - क्रियाभिः प्रयाजादिभिर्यथा क्रतुराट् मूर्तिमान् राजसूयो व्यरोचत तथेति ॥१८॥

अन्वितार्थप्रकाशिका

रसाथेवाह - तैलेति ॥ पुम्भिः कर्तृभिस्तैलादिभिर्लिप्ता वारयोषितो वेश्यास्तैरेव तान् प्रलिम्पन्त्यो विजह्रुः । गोरसो दधिक्षीरादिः गन्धोदकं चन्दनाद्युदकम् ॥१५॥ गुप्ता इति ॥ यथा एतदवभृथस्नपनमुपलब्धुं दिवि देव्यो देवाङ्गना विमानवरैर्नरगमन् तथा द्रष्टुं नृभिर्भटैः गुप्ता नृदेव्यो युधिष्ठिरपत्न्यः द्रौपदीयौधेयीप्रभृतयः रथादिभिर्नरगमन् निर्जग्मुः । ताश्च मातुलेयैः पत्युर्मातुलपुत्रैः कृष्णगदसारणादिभिः सखिभिर्भीमार्जुनादिभिश्च परिषिच्यमानाः सव्रीडेन लज्जासहितेन हासेन विकसन्ति वदनानि यासां ता विरेजुः । अत्र यथा पत्युर्भागिनेये भागिनेयशब्दः प्रयुज्यते तथा पत्युर्मातुलेये मातुलेयशब्दः प्रयुक्तः । तस्य देवरत्वेन परिहासौचित्यात् स्वमातुलेयस्य तु भ्रातृत्वेन परिहासानौचित्यात् ॥१६॥ ता इति ॥ क्लिन्नानि सिक्तानि अम्बराणि यासां ताः अत एव विवृतं व्यक्तं गात्रं शरीरं कुचावुरू मध्यप्रदेशश्च यासां ता औत्सुक्यात्तत्प्रयुक्तजलक्रीडातिशयात् मुक्तेभ्यः कबरेभ्यः च्यवमानानि गलन्ति माल्यानि पुष्पाणि यासां तादृश्यस्तादृशीभिरुदकनोदनचर्मयन्त्रैर्देवरान् पतिभ्रातॄन् उत अपि सखीनपि सिषिचुः । एवं च रुचिरैर्विहारैः मलधियां काममलवासितान्तःकरणानां दुर्योधनादीनां न तु साधूनां क्षोभं चित्तचाञ्चल्यं कामोद्रेकं दधुः चक्रुः ॥१७॥ स इति ॥ सन्तः समीचीना अश्वा यस्य तं रुक्ममाला अस्य सन्तीति तथा तं रथमारूढः स सम्राट् युधिष्ठिरः स्वपत्नीभिर्द्रौपद्यादिभिः व्यरोचत । क्रियाभिः प्रयाजादिभिर्यथा क्रतुराट् मूर्तिमान् राजसूयो व्यरोचत तथेति ॥१८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तान् सरानाह तैलेति ॥ पुम्भिः तैलादिभिः लिप्ताः वारयोषितो वेश्याः तान् प्रलिम्पन्त्यः सत्यः विजह्रुः विहारं चक्रुः सान्द्रकुङ्कुमं घनघर्षितकुङ्कुमम् ॥१५॥ दिवि विमानवरैः देव्यो यथा तथा स्यन्दनादियानैः नृदेव्यो राजपत्न्यः एतदवभृथस्नानमुपलब्धुं प्राप्तुं निरगमन् ॥ मातुलेयैः श्रीकृष्णादिभिः सखिभिः स्वपतिसमानवयोभिर्नरैः परितः सिच्यमानाः ॥१६॥ ताः पूर्वोक्ताः सर्वा राजपत्न्यः देवरान् ॥ श्रीकृष्णादीन् सखीन् पतिसमानवयसः दृतीभिः ॥ चर्म्मार्दितजलसेचनयन्त्रैः सिषिचुः । क्लिन्नाम्बरा आर्द्रवस्त्राः अत एव विवृतानि जनदृश्यानि गात्रादीनि यासां ताः ॥ मलधियां मलिनबुद्धीनां विहारैः क्षोभं दधुः ॥१७॥ क्रतुराडिव मूर्तिमान् यज्ञ इव ॥१८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

रसानेवाहार्धेन ॥ तैलेति ॥ तैलगोरसगन्धोदहरिद्रासान्द्रकुङ्कुमैः, वारयोषितः पुम्भिः, लिप्ताः, पुंसः, प्रलिम्पन्त्यश्च सत्यः, विजह्रुः ॥१५॥ गुप्ता इति ॥ ता इति च ॥ दिवि, विमानवरैः, देव्यो देवाङ्गनाः, यथा, तथा, या नृदेव्यो राज्ञां स्त्रियः, ताः मातुलेया मामकसुताश्च सखायः, सख्यश्च तैः, पुंस्त्वमार्षम् । परिषिच्यमानाः, सव्रीडेन हासेन विकसन्ति वदनानि यासां तथाभूताः सत्यश्च, विरेजुः । ता नृदेव्यः, देवरान् उताथ च, सखीन्, दृतीभिरुदकनोदनयन्त्रैः, सिषिचुः । अतः, क्लिन्नाम्बरा आर्द्रवसनाः,

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विवृतानि गात्रकुचोरुमध्यानि यासां ताः, औत्सुक्यप्रयुक्तजलक्रीडातिशयान्मुक्तेभ्यः श्लथेभ्यः कबरेभ्यः च्यवमानानि गलितानि माल्यानि पुष्पाणि यासां तथाभूताः सत्यः, रुचिरैः विहारैः, मलधियां कामिनां, क्षोभं चित्तचाञ्चल्यं, कामोद्रेकमिति यावत् । दधुश्चक्रुः । ततः, नृभिः, गुप्ताः सत्यः, एतदवभृथस्नपनम्, उपलब्धुं प्राप्तुं, रथैरिति शेषः । निरगमन् । इति द्वयोरेकान्वयः ॥१६-१७॥ स इति ॥ सन्तः समीचीना अश्वा सन्त्यत्रेति तथा तं, रुक्ममालिनं सौवर्णोपस्करमित्यर्थः । रथम्, आरूढः, सम्राट्, स युधिष्ठिरः, गङ्गातीरप्राप्त्यवसरे इति शेषः । क्रियाभिः प्रयाजादिभिः, क्रतुराट् इव, स्वपत्नीभिः, व्यरोचत रराज ॥१८॥

कृष्णप्रिया

पुनः वार नारियां पुरुषों को तैल, गोरस, सुगन्धित जल, हरिद्रा और सान्द्रसेसर मल देती थी और पुरुष लोग भी वाराङ्गनाओं को यही पदार्थोंसे सराबोर कर देते थे ॥१५॥ उस रसपूर्ण अवसर पर इस दिव्य उत्सवको देखने के लय्ए जैसे उत्तमोत्तम विमानों पर चढकर आकाश में अनन्त देवियां आयी थी वैसे ही सैनिको से सुरक्षित इन्द्रप्रस्थ की बहौत सी राजमहिलाएं भी उत्तमोत्तम पालकियोंमें बिराजकर वहां आयी थी । पांडवोके ममेरे भाई और अनुराग वाले पुरुष रानियों पर विविध तरह के रंग जल डाल रहे थे, इससे रानियों के मुखारविन्द लज्जामय मुस्कुराहट से विकसित हो उठते थे एवं उस दर्शनकी शोभा समृद्ध हो रही थी ॥१६॥ अपने देवर और अनुरागीओंके रंगयुक्त पिचकारी जलसे और फलों से भरे हुए जलके छिंटकावसे उनके श्रीअंगके वस्त्री भीगे हो गये थे इससे उनके शरीर के अंग-प्रत्यंग, वक्षस्थल, जंघा और कटिप्रदेश कुछ कुछ दीख रहे थे । वे सन्नरी ओभी पिचकारी भर और पात्रोंमें रंगजल भर भरकर अपने देवरों और उनके सखाओं पर उडेल रही थी । उस अवसर पर स्नेहमयी उत्सुकताके कारण उनकी चोटियां और जूडोके बन्धन शिथिल हो गये थे एवं उनमें गुंथे हुए कुसुम गिरते जा रहे थे । राजन् उन उत्तम जनों के यह हृदयंगम और विशुद्ध विहार का अवलोकन करने वाले मलिन मन वाले पुरुषों के चित्त चञ्चल हो जाते थे ॥१७॥ सम्राट महाराजा युधिष्ठिरजी द्रौपदी आदि रानियोंके साथ उत्तम अश्वोंसे जोते हुए सुवर्णकी मालाओं से अलंकृत रथमें बिराजमान एसी शोभा दे रहे थे कि मानो स्वयं राजसूय यज्ञ प्रयान आदि क्रियाओंके साथ मूर्तिमान होकर प्रकट हो गया हो ॥१८॥

श्रीभगवानुवाच

पत्नीसंयाजावभृथ्यैश्चरित्वा ते तमृत्विजः । आचान्तं स्नापयाञ्चक्रुर्गङ्गायां सह कृष्णया ॥१९॥
[1]देवदुन्दुभयो नेदुर्नरदुन्दुभिभिः समम् । मुमुचुः पुष्पवर्षाणि देवर्षिपितृमानवाः ॥२०॥
सस्नुस्तत्र ततः सर्वे वर्णाश्रमयुता [2]जनाः । [3]महापातक्यपि यतः सद्यो मुच्येत किल्बिषात् ॥२१॥
अथ राजाहते क्षौमे परिधाय स्वलंकृतः । ऋत्विक्सदस्य[4]ब्रह्मादीनानर्चाभरणाम्बरैः ॥२२॥

कर्दमक्षमा

ते, ऋत्विजः, पत्नीसंयानावभृथ्यैः, चरित्वा, आचान्तम्, तम्, कृष्णया, सह, गङ्गायाम्, स्नापयाञ्चक्रुः ॥१९॥ नरदुन्दुभिः, समम्, देवदुन्दुभयः, नेदुः, देवर्षिपितृमानवाः, पुष्पवर्षाणि, मुमुचुः ॥२०॥ ततः, तत्र, सर्ववर्णाश्रमयुताः, जनाः, सस्नुः, यतः, महापातकी, अपि, सद्यः, किल्बिषात्, मुच्यते ॥२१॥अथ, राजा, अहते, क्षौमे, परिधाय, स्वलङ्कृतः, ऋत्विक्सदस्यब्रह्मादीन्, आभरणाम्बरैः, आनर्च ॥२२॥

---

१. दिवि-विज. । २. नराः-श्रीधर. वंशी. वीर. विज. । ३. विज. पाठे इदमर्ध नास्ति । ४. विप्रा-श्रीधर. वंशी. वीर. विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

पत्नी संयाजो यागविशेषः अवभृथसम्बन्धि आवभृथ्यञ्च तैश्चरित्वाताननुष्ठायेत्यर्थः ॥१९-२१॥ अहते नूतने आनर्चार्चितवान् ॥२२-२३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति छान्दसत्वात्कर्मणि तृतीयेति भावः। तं युधिष्ठिरम्। आचान्तं कारिताचमनम्। णिजन्ताच्चमेः क्तः ॥१९-२०॥ तत्र गङ्गायाम्। ततो युधिष्ठिरस्नानानन्तरम्। यतोऽवभृथस्नानात्। सद्यस्स्नानसमकालमेवेत्यर्थः ॥२१॥ अथ स्नानोत्तरम्। क्षुमा अतसी तज्जे क्षौमे। अहतं नवमम्बरमिति पूर्वोक्तलक्षणम् वेत्यर्थः ॥२२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ गङ्गां गतस्यावभृथकृत्यं वर्णयति-पत्नीति। ते पूर्वोक्ताः श्रीद्वैपायनादयः ॥१९॥ देवादीनां यथापूर्वं पुष्पवर्षणे श्रैष्ठ्यम् ॥२०॥ ततस्तस्मात् युधिष्ठिरस्नपनात्पश्चात् वर्णा ब्राह्मणादयः तत्र चाश्रमयुता आश्रमिण इत्यर्थः। वर्णाश्रमाभ्यां युता इत्यन्त्यजा अपि गृहीताः किन्तु तत्सहयोगस्तेषां न युक्त इति पश्चादेव ते ज्ञेयाः, श्रीविष्णुपुराणे शतधन्वनो मयूरजन्मन्यपि तत्स्नाने शुद्धिश्रवणात् यतो यत्रावभृथतीर्थे किमुत श्रीयुधिष्ठिरादिश्रीवेदव्यासाद्यधिष्ठिते किमुततरां गाङ्गे किमुततमां साक्षाच्छ्रीकृष्णसनाथे इति भावः ॥२१॥ अथानन्तरमेव ॥२२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ते पूर्वोक्ताः श्रीद्वैपायनादयः, किंवा सर्व्वकर्म्मकौशलादिना सुप्रसिद्धाः आचान्तं कृताचमनं सन्तं कृष्णया भार्य्यामुख्यया श्रीद्रौपद्या सहितम् ॥१९॥ देवादीनां यथापूर्व्वं पुष्पवर्षणे श्रैष्ठ्यम् ॥२०॥ ततस्तस्मात् श्रीयुधिष्ठिरस्नपनात् पश्चात् तत्र तस्यां गङ्गायां तत्स्नपनतीर्थे वा, वर्णाश्रमाभ्यां तुता इति तेषामेव श्रद्धाविशेषात्, इत्यनधिकारादिनान्त्यजा व्यावर्तिताः; यद्वा, अकारप्रश्लेषेण वर्णाश्रमरहिता अपि, यतो यत्र यस्माद्वा गङ्गास्नानेन स्वत एव सर्व्वकिल्बिषमोक्षोऽपि, महापातकीति साक्षाद्ब्रह्महत्यादिभ्यः सद्योमुक्तिविशेषापेक्षयेति ॥२१॥ अथानन्तरमेव, आदि-शब्दात् क्षत्रियादीन् ॥२२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-३१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

पत्नीति। पत्नीसंयाजाः यागविशेषाः अवभृथस्य सम्बन्धि आवभृथ्यं तच्च कर्म चरित्वाऽनुष्ठाय ते ऋत्विजः तं सम्राजमाचान्तं कृताचमनं कृष्णया द्रौपद्या सहितं स्नपयाञ्चक्रुः ॥१९॥ देवेति। नराणां दुन्दुभिभिः समं सह देवानां दुन्दुभयो नेदुः देवादयः पुष्पवर्षाणि मुमुचुः ॥२०॥ सस्नुरिति। ततः स्नापनानन्तरं चातुर्वण्यचातुराश्रम्यव्यवस्थया अवस्थिताः सर्वे जनाः सस्नुः स्नानं चक्रुः तत्र कारणमाह, महापातक्यपीति। यतः स्नानान्महापातक्यपि किल्बिषाद्ब्रह्महत्यादिपातकान्मुच्येत किम्पुनरितरे पातकिनस्ततो मुच्येरन्निति कैमुत्यनयद्योतनार्थोऽपिशब्दः पापनिवृत्तये सस्नुरिति भावः ॥२१॥ अथेति। राजा युधिष्ठिरोऽहते नूतने क्षौमे वस्त्रे परिधाय आभरणादिभिः ऋत्विगादीनानर्चार्चितवान् ॥२२॥

श्रीमद्विजयध्वजकृता पदरत्नावली

पत्नीसंयाजावभृथ्याख्येष्टिभिश्चरित्वा कृत्वा ॥१९-२१॥ अहते अधौते ॥२२-३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१७-३९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पत्नीसंयाजो यागविशेषः आवभृथ्यानि अवभृथसम्बन्धिकर्माणि च तैश्चरित्वा तान्यनुष्ठायेत्यर्थः ॥१९-२४॥

गूढार्थदीपिनी

पत्नीसंयाजो यागविशेषः अवभृथसम्बन्धिकर्माणि च तैः चिरत्वा तानि अनुष्ठाय तं युधिष्ठिरं कृष्णया द्रौपद्या सह स्नापयाञ्चक्रुः । आचान्तं कारिताचमनम् । णिजन्ताच्चमेः क्तः ॥१९॥ समं सह ॥२०॥ तत्र सर्वे गङ्गायां सस्नुः स्नानं चक्रुः ॥२१॥ अथ स्नानोत्तरम् । राजा अहते नूतने वाससी । क्षौमे क्षुमा अतसी तन्निर्मिते वस्त्रे परिधाय ऋत्विगादीन् आनर्च भूषणवस्त्रैः ॥२२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पत्नीसंयाजा यागविशेष आवभृथ्यानि अवभृथसम्बन्धिकर्माणि च तैः चरित्वा तान्यनुष्ठायेत्यर्थः । आचान्तं कृताचमनं कृष्णया द्रौपद्या सह स्नापयाञ्चक्रुः ॥१९-२१॥ अहते नूतने ॥२२-२३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पत्नीसंयाजो यागविशेषो जाघन्यादिनिवर्त्यः । आवभृथ्यौ अवभृथसम्बन्धिकर्मभिस्तदादिकं चरित्वा कृत्वा ते ऋत्विज आचान्तं कृताचमनं गङ्गायां सह कृष्णया स्नापयाञ्चक्रुः ॥१९॥ दिवि दुन्दुभयो नेदुः स्वयमेवावाद्यन्त । नरदुन्दुभिरत्रेतरवादितैः समं साकम् ॥२०॥ आहते आहूते वा नूतने क्षौमे परिधाय वसित्वा ॥२१॥ मित्रसुहृदोऽन्याश्चेतो पाठो हि मित्रां मित्रानिति पाठे मित्राणामित्यर्थः । आनर्चापूजयत् ॥२२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ऋत्विजां वा यागा नानाशाखासु प्रकारभेदेन भवन्तीति पत्नीसंयाजान्ताः संस्थाः साम्प्रतं प्रचरन्ति । स(ह)स्नान्ता वा, तस्मिन् पक्षे स्वतन्त्रतया पत्नीसंयाजाः पृथगेव क्रियन्ते जाघन्यादिद्रव्यैः । आवभृथ्याश्च इष्टयः आवभृथ्यैः कर्मभिः । चरित्वा चरणं कृतिः । ततस्ते एव ऋत्विजः आचान्तं कर्मसमाप्त्यनन्तरं स्नापयाञ्चक्रुः अभिषेकविधिना । अभिषेको मुख्ययैवेति सह कृष्णयेत्युक्तं मुख्याभिषेक्त्री इति वाक्यात् । गङ्गायामिति अप्स्ववगाह्याभिषेकः ॥१९॥ तस्य यागकृतिः सर्वसम्मता जातेति ज्ञापयितुं देवदुन्दुभीनां वादनम् । नरदुन्दुभयय् लौकिकाः । अभिषलषितसमये नरदुन्दुभिवादनं तदैव देवदुन्दुभीनामपीति देवा इच्छानुसारिणो जाता इति ज्ञापयितुं सहभावो निरूपितः । देवत्वसम्पादककर्मापेक्षयापि राजसूयो महानिति ज्ञापयितुं मुमुचुः पुष्पवर्षाणीतित्याह ॥२०॥ ततो राजसन्निधौ सर्व एव सस्नुः । पतितपाखण्डानां तत्र प्रवेशाभावाय वर्णाश्रमयुता जना इत्युक्तम् । माहात्म्यमाह महापातक्यपीति । सद्यः स्नानानन्तरमेव अकस्मात्समागतः अभ्यनुज्ञया स्नाति चेति ॥२१॥ ततो राज्ञः लौकिकोत्कर्षार्थमलङ्करणमाह अथेति । एतावत्कालं त्वनलंकृतः नियमे न्यस्तभूषणत्वात् । अहते नूतने । क्षौमे "सौम्यं वै क्षौमम्" इति सोमेन वरदत्ते इव परिधाय स्वलंकृतो जातः । ततोऽन्यानपि ऋत्विगादीन् स्वसमानवेषान् कृतवान् ॥२२॥

श्रीसुबोधिनीसारः

पत्नीसंयाजावभृथ्यानि कर्मविशेषरूपाणि तैः चरित्वाताननुष्ठायाचान्तं कृताचमनं तं राजानं ते ऋत्विजः कृष्णया द्रौपद्या सह गङ्गायां स्नापयाम्बभूवुः ॥१९॥ मनुष्यदुन्दुभिः सह देवानां दुन्दुभयो नेदुः देवादयः पुष्पवर्षाणि मुमुचुः ॥२०॥ तत्र गङ्गायां ततः राजस्नानानन्तरं सर्वे वर्णाश्रमसम्पन्ना नराः सस्नुः स्नानं चक्रुः यतो गङ्गास्नानात् महापातकी गोब्राह्मणहन्तापि सद्यः तत्क्षणादेव किल्बिषात् पापान्मुच्येत ॥२१॥ अथ मङ्गलेऽनन्तरार्थे वा अहते नवीने क्षौमे पट्टाम्बरे परिधाय सुभूषितो राज युधिष्ठिर आभरणाम्बरैः ऋत्विगादीनानर्च पूजयामास ॥२२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पत्नीसंयाजो यागविशेषः अवभृथसम्बन्धिकर्माणि आवभृथ्यानि तैश्चरित्वा ताननुष्ठाय ते ऋत्विजः आचान्तं कृताचम कृष्णया द्रौपद्या सहितं तं राजानं गङ्गायां स्नापयाञ्चक्रुः ॥१९॥ देवेति ॥ नराणां दुन्दुभिभिः समं सह देवानां दुन्दुभयो नेदुः देवादयः पुष्पवर्षाणि मुमुचुः ॥२०॥ सस्नुरिति ॥ यजमानस्नानानन्तरं चातुर्वर्ण्यचातुराश्रम्यवन्तः सर्वे नरास्तत्र गङ्गायां सस्नुः स्ना चक्रुः । यतः स्नानात् महापातकी ब्रह्महत्यावानपि किल्बिषात् ततः पातकात् सद्यो विमुच्येत, किं पुनरितरे पातकिन

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इतरपातकाद्विमुच्येरन् इति वक्तव्यमति कैमुत्यन्यायद्योतनार्थोऽपिशब्दः । स्वपातकनिवृत्त्यर्थं सर्वे सस्नुरिति भावः ॥२१॥ अथ स्नानानन्तरम् अहते नूतने क्षौमे वस्त्रे परिधाय स्वलङ्कृतो राजा आभरणादिभिः ऋत्विगादीन् आनर्च पूजितवान् ॥२२॥

अन्वितार्थप्रकाशिका

पत्नीति ॥ पत्नीसंयाजो यागविशेषः अवभृथसम्बन्धिकर्माणि आवभृथ्यानि तैश्चरित्वाताननुष्ठाय ते ऋत्विजः आचान्तं कृताचमनं कृष्णया द्रौपद्या सहितं तं राजानं गङ्गायां स्नापयाञ्चक्रुः ॥१९॥ देवेति ॥ नराणां दुन्दुभिभिः समं सह देवानां दुन्दुभयो नेदुः । देवादयः पुष्पवर्षाणि मुमुचुः ॥२०॥ सस्नुरिति ॥ यजमानस्नानानन्तरं चातुर्वर्ण्यचातुराश्रम्यवन्तः सर्वे नरास्तत्र गङ्गायां सस्नुः स्नानं चक्रुः । यतः स्नानात् महापातकी ब्रह्महत्यावानपि किल्बिषात् ततः पातकात् सद्यो विमुच्येत । अतः पातकनिवृत्त्यर्थं सर्वे सस्नुः ॥२१॥ अथेति ॥ अथ स्नानानन्तरम् अहते नूतने क्षौमे वस्त्रे परिधाय स्वलङ्कृतो राजा आभरणादिभिः ऋत्विगादीन् आनर्च पूजितवान् ॥२२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ऋत्विजः पत्नीसंयाजो यागविशेषश्च आवभृथ्यानि अवभृथसम्बन्धीष्टयश्च तैः तं राजानं चरित्वा ॥ तानि कारयित्वेत्यर्थः । आचान्तं कृताचमनीयं राजानं द्रौपद्या सह ॥१९-२१॥ अहते नवीने । आनर्च्च पूजयामास ॥२२-२३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पत्नीति ॥ पत्नीसंयाजा यागविशेषास्ते च आवभृथ्यमवभृथसम्बन्धि कर्म च तैश्चरित्वा तामनुष्ठायेत्यर्थः । पत्नीसंयाजावभृथ्याख्येष्टिभिश्चरित्वेत्यन्ये । पत्नीसंयाजा गार्हपत्ये क्रियमाणा यागाश्चावभृथ्यं च तैश्चित्वेत्यपरे । ते प्रसिद्धाः, ऋत्विजः, तं सम्राजम्, आचान्तं कृताचमनं सन्तमित्यर्थः । कृष्णया द्रौपद्या सह, गङ्गायां, स्नापयाञ्चक्रुः ॥१९॥ देवेति ॥ तदा, नरदुन्दुभिभिः समं, देवदुन्दुभयः, नेदुः । देवाश्च ऋषयश्च पितरश्च मानवाश्च ते, पुष्पवर्षाणि, मुमुचुः ॥२०॥ सस्नुरिति ॥ ततः, तत्र वर्णाश्रमयुताः, सर्वे जनाः, सस्नुः स्नानं चक्रुः । तत्र कारणमाह । यतः स्नानात्, महापातकी अपि, सद्यः, किल्बिषात् ब्रह्महत्यादिपातकात्, मुच्येत । किं पुनरितरे पातकिनस्ततो विमुच्येरन्निति कैमुत्यनयद्योतनार्थोऽपिशब्दः । पापनिवृत्तये सस्नुरिति भावः ॥२१॥ अथेति ॥ अथ स्नानविधानानन्तरं, राजा युधिष्ठिरः, अहते नूतने, क्षौमे क्षुमातन्तुनिर्मिते वाससी, परिधाय, स्वलङ्कृतः स्वाभरणालङ्कृतः सन्, आभरणाम्बरैः, ऋत्विजश्च सदस्याश्च विप्राश्च ते आदयो येषां तान्, आनर्चार्चितवान् ॥२२॥

कृष्णप्रिया

यज्ञके ऋत्विजोंने पत्नी संयाज एवं यज्ञान्त स्नान सम्बन्धी कर्म करवाकर रानी द्रौपदी के साथ सम्राट महाराज युधिष्ठिरको आचमन करवाया और इसके बाद गंगा स्नान करवाया ॥१९॥ उस अवसर मनुष्यो की दुंदुभियों के साथ ही देवताओं की दुंदुभियां भी बजने लगी, बडे बडे देवता ऋषिमुनिवृन्द, पितृवृन्द और मनुष्यवृन्द पुष्पोंकी वर्षा करने लगे ॥२०॥ धर्मराज युधिष्ठिरके अवभृथ स्नान करलेने के बाद सर्व वर्ण और सर्व आश्रमके लोगोने गंगाजी में स्नान किया । क्योंकि इस स्नान से बडे से बडे महापापी भी अपने अघराशि से तत्काल मुक्त हो जाते है ॥२१॥ पुनः धर्मराज महाराज युधिष्ठिरने नये रेशमी दुकूल धोती और उपरण धारण किया तथा विविध प्रकारके अलंकारों से अपने श्रीअंग को समलंकृत किया । पुनः ऋत्विज, सदस्य, ब्राह्मण आदि महापुरुषोंको वस्त्रालंकार देकर उनकी अर्चना की ॥२२॥

बन्धुज्ञातिनृपान् मित्रसुहृदोऽन्यांश्च सर्वशः । अभीक्ष्णं पूजयामास नारायणपरो नृपः ॥२३॥
सर्वे जनाः सुररुचो मणिकुण्डलस्त्रगुष्णीषकञ्चुकदुकूलमहार्घ्यहाराः ।
नार्यश्च कुण्डलयुगालकवृन्दपुष्ट[1]वक्त्रश्रियः कनकमेखलया विरेजुः ॥२४॥
अथर्त्विजो [2]महाशीलाः सदस्या ब्रह्मवादिनः । ब्रह्मक्षत्रियविट्शूद्रा राजानो ये समागताः ॥२५॥
देवर्षिपितृभूतानि लोकपालाः सहानुगाः । पूजितास्तमनुज्ञाप्य स्वधामानि ययुर्नृप[3] ॥२६॥

कर्दमक्षमा

नारायणपरः, नृपः, बन्धुज्ञातिनृपान्, मित्रसुहृदः, अन्यान्, सर्वशः, अभीक्ष्णम्, पूजयामास ॥२३॥ सर्वे, जनाः, सुररुचः, मणिकुण्डलस्त्रगुष्णीषकञ्चुकदुकूलमहार्घ्यहाराः, च, कुण्डलयुगालकवृन्दपुष्टवक्त्रश्रियः, नार्यः, कनकमेखलया, विरेजुः ॥२४॥ नृप ! अथ, ऋत्विजः, महाशीलाः, ब्रह्मवादिनः, सदस्याः, ब्राह्मणक्षत्रियविट्शूद्राः, राजानः, ये, समागताः, देवर्षिपितृभूतानि, सहानुगाः, लोकपालाः, पूजिताः, तम्, अनुज्ञाप्य, स्वधामानि, ययुः ॥२५-२६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सुराणामिव रुक् कान्तिर्येषां मणिकुण्डलैः सहिताः स्त्रगुष्णीषादयो येषां ते कुण्डलयुगेनालकवृन्देन च जुष्टा वक्त्रश्रीर्यासां ताः ॥२४-२९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यांस्तत्रागतान् ॥२३-२४॥ अथावभृथस्नानानन्तरम् ॥२५॥ तं युधिष्ठिरम् ॥२६-२७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आदिशब्दगृहीतानेव विवृणोति-बन्धुज्ञातिनृपानिति । बन्धून् श्रीकृष्णादीन् ज्ञातीन् श्रीभीष्मादीन् मित्राणि विराटादीनि सुहृदः सम्बन्धिनः द्रुपदादीन् नृपानिति सर्वत्र विशेष्यम् अन्यानुदासीननृपांश्च बन्ध्वादीनां यथापूर्वश्रैष्ठ्येन तत्तत्क्रमेण पूजनं नारायणः "नारायणस्त्वं न हि सर्वदेहिनामात्मासि" इत्याद्युक्तमाहात्म्यः श्रीकृष्णः तत्परस्सन् तत्प्रीत्यर्थमिति भावः ॥२३॥ जनाः पुमांसः ॥२४॥ अथेति युग्मकम् । अथावभृथपूजानन्तरगृहागमनानन्तरं महाशालाः परमकुलीनाः परमपूज्या इत्यर्थः । लोकपाला देवेष्वपि मुख्याः श्रीब्रह्मादयः ऋत्विगादीनामेषां क्रमेणानुज्ञापनं ज्ञेयम् ॥२५॥ हरिः सर्वदोषहरो रूपगुणादिना स्वस्यापि मनोहरः श्रीकृष्णः तस्य दासो भक्तस्तस्य अत एव राजा चासौ ऋषिश्च सर्वज्ञानादिपूर्णस्तस्येति राजसूयमहोदयस्य तस्य सर्वगुणपूर्णतादिकं सूचितम् अत एव प्रशंसन्तोऽपि नैवातृप्यन् किन्तु प्रीत्यानारतमेव प्रशंसन्ति स्मेत्यर्थः । तत्र दृष्टान्तः मर्त्यो मरणधर्मा नित्यं रोगार्तः अमृतं मरणादिदुःखहरं परमसुखकरं च दिव्यरसं पिबन् यथा न तृप्यति तद्वत् ॥२६-२७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बन्धून् श्रीकृष्णादीन्, ज्ञातीन् श्रीभीष्मादीन्, मित्राणि विराटादीनि, सुहृदश्च सम्बन्धिनः, द्रुपदादीन्, अन्यांश्च उदासीना नृपान्; बन्धादीनां यथापूर्व्वं श्रैष्ठ्येन तत्तत्क्रमेण पूजनम् । नारायणः साक्षात् परमेश्वरः श्रीकृष्णस्तत्परः सन् तत्प्रीत्यर्थमित्यर्थः ॥२३॥ जनाः पुमांसः, सुररुक्त्वे हेतुः - मणीति । दुकूलमधःपरिधानपट्टवस्त्रे नारीणामन्याशेषभूषणसद्भावेऽपि कुण्डलयुगस्यैवोक्तिर्मुखस्य, कनकमेखलयेति च मध्यदेशस्य शोभाविशेषापेक्षया । अन्यत्तैर्व्याख्यातम् । यद्वा, यत मणिकुण्डलादयस्तेषु सन्ति, कुण्डलयुगेनालकवृन्देन च जुष्टा वक्त्रश्रीर्यासां ताः । अन्यत् समानाम् ॥२४॥ अथ पूजानन्त महाशीलाः कुलीनाः परमपूज्या इत्यर्थः ॥२५॥ लोकपालाः श्रीब्रह्मादयः, तेषां देवान्तर्गतत्वेऽपि पृथगुक्तिः पूजाविशेषाद्यपेक्ष तं श्रीयुधिष्ठिरं स्वधामानि स्वस्वगृहान्, हे नृपेति यज्ञसमाप्त्यादिना सन्तोषात् ॥२६॥

---

१. जुष्ट-श्रीधर. वंशी. वीर. विज. । २. महाशिक्षाः-विज. । ३. मुंदा-विज. ।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-३१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

बन्धूनिति । मित्रानिति पुंस्त्वमार्षं तत् नृपानित्यस्य विशेषणम् अभीक्ष्णं पुनःपुनः पूजयामास तत्र हेतुत्वेन विशिनष्टि नारायणः परो यस्य सः सर्वस्य नारायणात्मकत्वबुद्धियुक्त इत्यर्थः ॥२३॥ सर्व इति । सर्वे जनाः नराः सुराणामिव रुक्कान्तिर्येषां ते मणिकुण्डलादीनां द्वन्द्वः ततो मत्वर्थीयोऽच् मणिकुण्डलाभ्यां सहिताः स्रगादयो येषामिति वा तथाभूता विरेजुः नार्यस्तु कुण्डलयुगेनालकवृन्देन च जुष्टस्य मुखस्य श्रीर्यासां तथाभूताः कनकमेखलयोपलक्षिता विरेजुः ॥२४॥ अथेति । महच्छीलं सुस्वभावः सद्वृत्तिर्वा येषाम् ऋत्विगादयः पूजिताः सन्तः हे नृप ! तमनुज्ञाप्य तदनुज्ञामुपादायेत्यर्थः स्वधामानि स्वगृहाणि ययुः ॥२५-२६॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥२२-३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१७-३९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

महाशीलाः परमकुलीनाः ॥२५-३०॥

गूढार्थदीपिनी

किं बहुना सर्वशः सर्वानेव ॥२३॥ सर्वे जनाः तथा सर्वा नार्यश्च विरेजुरित्यन्वयः । कथंभूता नराः । सुराणामिव रुक् कान्तिर्येषां ते । पुनश्च मणिकुण्डलैः सहिताः स्रगादयो येषां ते तथाभूताः । कथंभूता नार्यश्च । कुण्डलयुगेन अलकवृन्देन च जुष्टा संपृक्ता मुखश्रीः यासां ताः । कया विरेजुः कनकमेखलया । कञ्चुकः चोलकः कवचं वा ॥२४॥ अथेति युग्मम् । महाशीलाः सरलस्वभावाः । महाशाला इति पाठे परमकुलीनाः ये समागताः पूजिताश्च ते सर्वे तं राजानम् अनुज्ञाप्य पृष्ट्वा स्वधामानि ययुरित्यन्वयः ॥२५-२६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सुराणामिव रुक् कान्तिर्येषां ते मणिकुण्डलाभ्यां सहिताः स्रगादयो येषां ते कुण्डलयुगेनालकवृन्देन च जुष्टा वक्त्रश्रीर्यासां ताः ॥२४॥ महत् शीलं येषां ते ॥२५-३१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

नारायणपर इत्यनेनर्त्विगादिषु सन्निहितो भगवांस्तुष्यत्वित्यनुसन्धानं तस्य ध्वन्यते ॥२३॥ कुण्डलयुगैरलकवृन्दैर्जुष्टं च तद्वक्त्रं च तस्य श्रीर्यासां ताः कनकमेखलया च विरेजुः ॥२४॥ महती शिक्षा येषां ते तथा ॥२५॥ तं धर्मराजम् ॥२६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

यथायोग्यं बन्धुज्ञातिनृपान् मित्रान् सुहृदश्च अन्यांश्च समागतान् सर्वप्रकारेण पूजायामत्र कालो न नियामकः किन्तु पुरुषा एवेति ज्ञापयितुमभीक्ष्णमित्युक्तम् । पूजयामासेति विधिरुक्तः न तु लौकिकम् । अनेनास्मिन् प्रकरणे राज्ञः केवलस्य वैदिकी चेष्टा, अन्येषां तु लौकिक्येवेति । ननु विहिताः परिच्छिन्ना एव भवन्ति यागाङ्गभूताः किमिति सर्वानेव पूजयामासेत्याकाङ्क्षायामाह नारायणपर इति । तस्य भगवत्पूजायामेव तात्पर्यं तेन तदात्मकः सर्व इति श्रद्धया सर्वपूजनम् । नृपत्वात्समृद्धिः ॥२३॥ अन्तर्बहिश्च दोषा निवृत्ताः । इच्छापूरणादाभरणैश्च कान्त्या सुररुचो जाताः । तत्र हेतुभूतं विशेषणं मणिकुण्डलेति । मणियुक्ते कुण्डले स्रजः उष्णीषं कञ्चुकं दुकूलं मध्यबन्धनं महार्घ्यश्च हारो येषाम् । नार्यश्च तथालंकृताः । चकारेण तद्धर्मोक्तिः । विशेषमाह

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

कुण्डलयुगेनालकवृन्देन च पुष्टा वक्त्रश्रीर्यासाम् । सुतरां कनकमेखलया विरेजुः । एतदन्ता लौकिकी शोभा ॥२४॥ अग्रे वक्ष्यमाणमानभङ्गः प्रत्यापत्तिपर्यन्तं मध्येकेनाप्यंशेन न्यूनतायां तेनैव दुष्टानां सन्तोष इति न मात्सर्यं पुष्टं भवेदिति प्रत्यापत्तिपर्यन्तं वर्णना । महाशालाः श्रोत्रियाः । तेषामेवार्त्विज्यम् । सदस्यास्तु ब्रह्मवादिनः । त एव सर्वज्ञाः । एवमुभये अपेक्षितधर्मयुक्ता निरूपिताः । अन्ये विप्रादयः । तेषामागमनमेव प्रयोजकं तदाह ये समागता इति ॥२५॥ तथा देवादीनामपि । ते सर्वे पूजिताः सन्तः मुदा स्वधामानि ययुः । नृपेति सम्बोधनं समाप्तौ संतोषाय ॥२६॥

श्रीसुबोधिनीसारः

बन्धून् ज्ञातीन् नृपान् मित्रादीनन्यांश्च सर्वान् अभीक्ष्णं मुहुः पूजयामास नारायणपरो नृपो यतः ॥२३॥ सुराणामिव रुक् दीप्तिर्येषां ते मणिकुण्डलादयो विद्यन्ते येषामिति भट्टाः । मणिकुण्डलस्रग्भिः सहिता उष्णीषादयो येषामिति वा ते सर्वे जनाः कुण्डलयुगेनालकानां केशानां वृन्देन जुष्टा वक्त्रश्रीर्यासां ताः नार्यः स्त्रियः सुवर्णमेखलया शुशुभिरे ॥२४॥ अथानन्तरं महाशीला ऋत्विजः, वेदवादिनः सदस्याः, चत्वारो वर्णाः ये राजानश्च समागताः ॥२५॥ देवर्षिपितृभूतानि पूजितानि सहानुचरा लोकपाला इन्द्राद्याः पूजिताः तं युधिष्ठिरमनुज्ञाप्य स्वधामानि जग्मुः हे नृप ॥२६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

बन्ध्विति ॥ नारायणपरायणो नृपो युधिष्ठिरः बन्ध्वादीन् सर्वानभीक्ष्णं पुनः पुनः पूजयामास ॥२३॥ सुराणामिव रुक् कान्तिर्येषां ते तथा मणिकुण्डलाभ्यां सहिताः स्रगादयो येषां ते सर्वे जना विरेजुः तथा कुण्डलयुगेन अलकवृन्देन च जुष्टस्य वक्त्रस्य श्रीर्यासां ता नार्यश्च कनकमय्या मेखलया कटिसूत्रेण विरेजुः ॥२४॥ अथेति युग्मम् ॥ हे नृप ! ये समागताः पूजिताश्च ते महाशीलाः सुस्वभावाः महाशाला इति पाठे परमकुलीनाः ऋत्विगादयः अथानन्तरं तं राजानमनुज्ञाप्य पृष्ट्वा स्वधामानि ययुरिति द्वयोरन्वयः ॥२५-२६॥

अन्वितार्थप्रकाशिका

बन्ध्विति ॥ नारायणपरायणो नृपो युधिष्ठिरः बन्ध्वादीन् सर्वानभीक्ष्णं पुनः पुनः पूजयामास ॥२३॥ सर्वे इति ॥ सुराणामिव रुक् कान्तिर्येषां ते तथा मणिकुण्डलाभ्यां सहिताः स्रगादयो येषां ते सर्वे जना विरेजुः तथा कुण्डलयुगेन अलकवृन्देन च जुष्टस्य वक्त्रस्य श्रीर्यासां ता नार्यश्च कनकमय्या मेखलया कटिसूत्रेण विरेजुः ॥२४॥ अथेति युग्मम् ॥ हे नृप ! ये समागताः पूजिताश्च ते महाशीलाः सुस्वभावाः महाशाला इति पाठे परमकुलीनाः ऋत्विगादयः अथानन्तरं त राजानमनुज्ञाप्य पृष्ट्वा स्वधामानि ययुः ॥२५-२६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मणिखचितकुण्डलादीनि येषां ते ॥ सुररुचो देवतुल्या कान्तयो । जना नराः कुण्डलयुगलं च अलकवृन्दं च ताभ्य जुष्टा वक्त्रश्रीर्यासां ताः नार्यश्च ते उभये विरेजुः ॥२४-२५-२६-२७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बन्ध्विति ॥ ततः, नारायणः श्रीकृष्णः परः प्रधानं यस्य तादृशः, नृपः, बन्धवश्च ज्ञातयश्च नृपाश्च तान्, मित्राणि सुह तान्, सर्वशः, अन्यांश्च, अभीक्ष्णं, पूजयामास ॥२३॥ सर्व इति ॥ सर्वे जनाः, मणयश्च कुण्डले च स्रजश्च उष्णीषं च कञ्चु दुकूलानि च महार्घ्यहाराश्च ते विद्यन्ते येषाम् एवं द्वन्द्वान्तरं मत्वर्थीयोऽच् । मणिकुण्डलाभ्यां सहिताः स्रगादयो येषामिति अत एव, सुराणामिव रुक् कान्तिर्येषां तथाभूताः सन्तः, विरेजुः । नार्यश्च, कुण्डलयुगेन अलकवृन्देन च जुष्टस्य वक्रस्य श्री ता एवम्भूताः सत्यः, कनकमेखलया, विरेजुः ॥२४॥ अथेति ॥ अथानन्तरं, महाशीलाः सुस्वभावाः सद्वृत्तयो वा । ऋत्वि ब्रह्मवादिनः, सदस्याः, ब्रह्मक्षत्रियविट्शूद्राः, समागताः ये राजानः ॥२५॥ देवेति ॥ देवाश्च ऋषयश्च पितरश्च भूतानि च ता सहानुगा अनुगैः सह वर्तमानाः, लोकपालाः, पूजिता नृपतितः सम्प्राप्तपूजनाः सन्तः, तं युधिष्ठिरम्, अनुज्ञाप्य युधि गमनाज्ञामुपादायेत्यर्थः । हे नृप, स्वधामानि, ययुः । इति द्वयोरेकान्वयः ॥२६॥

कृष्णप्रिया

धर्मराज युधिष्ठिर भगवत्परायण परम भक्त थे, उन्हें सबमें भगवान के ही दर्शन होते थे, इसलिए वे अपने भाई बन्धु कुटुम्बी नरपति इष्ट मित्र हितैषि और सर्व लोगों की बार बार अर्चना करते थे ॥२३॥ उस अवसर पर सभी लोग जडाव कुण्डल कुसुमोंके हार उष्णीष् लम्बे अंगरखे दुपट्टा एवं रत्न के महामूल्य हार पहनकर देवताओंके समान देदीप्यमान हो रहे थे । राजसूय यज्ञमें समुपस्थित सन्नारियोंके मुखारविन्दोंकी उत्तम शोभा हो रही थी उनके दोनों कानों के कर्णफूल और घुंघराली अलकोसे अच्छी शोभा बढ रही थी । उनके कटिभागमें कुन्दनकी करधरियां अत्यंत सशोभित हो रही थी ॥२४॥ महाराज परीक्षित ! आपके पितामह धर्मराज के राजसूय यज्ञमें जितने लोग पधारेथे वे परम सम्पन्न ऋत्विज ब्रह्मवादी सदस्य ब्राह्मण वृन्द क्षत्रियगण वैश्यवर्य शुद्रवृन्द राजामहाराजा देववृन्द ऋषि मुनिगण पितृगण और पधारे हुए प्राणीमात्र और इनसबके अनुचर सेवक लोकपाल आदि सर्वकी महाराज धर्मराजने आदरसे अर्चना की । पुन वे अतिथि जन धर्मराज से अनुमति प्राप्त कर अपने अपने निवास स्थानको पधारे ॥२६-२६॥

हरिदासस्य राजर्षे राजसूयमहोदयम् । नैवातृप्यन् प्रशंसन्तः पिबन् मर्त्योऽमृतं यथा ॥२७॥
ततो युधिष्ठिरो राजा सुहृत्सम्बन्धिबान्धवान् । प्रेम्णा [1]निवासयामास कृष्णं च त्यागकातरः॥२८॥
भगवानपि तत्राङ्ग न्यवात्सीत्तत्प्रियङ्करः । प्रस्थाप्य यदुवीरांश्च साम्बादींश्च कुशस्थलीम् ॥२९॥
इत्थं राजा धर्मसुतो मनोरथमहार्णवम् । [2]सुदुस्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः ॥३०॥

कर्दमक्षमा

मर्त्यः, अमृतम्, अपिबत्, यथा, तथा, राजर्षेः, हरिदासस्य, राजसूयमहोदयम्, प्रशंसन्तः, न, एव, अतृप्यन् ॥२७॥ ततः, त्यागकातरः, राजा, युधिष्ठिरः, कृष्णम्, च, सुहृत्सम्बन्धिबान्धवान्, प्रेम्णा, निवासयामास ॥२८॥ अङ्ग राजन् ! भगवान्, अपि, यदुवीरान्, च, साम्बादीन्, कुशस्थलीम्, प्रस्थाप्य, तत्प्रियङ्करः, तत्र, एव, न्यवात्सीत् ॥२९॥ इत्थम्, राजा, धर्मसुतः, कृष्णेन, सुदुस्तरम्, मनोरथमहार्णवम्, समुत्तीर्य, गतज्वरः, आसीत् ॥३०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गतज्वरो निश्चिन्त आसीत् ॥३०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत ऋत्विगादिप्रस्थानोत्तरम् ॥२८॥ तत्र युधिष्ठिरनगरे । युधिष्ठिरप्रियार्थम् ॥२९॥ इत्थं पूर्वोक्तरीत्या ॥३०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं यज्ञसम्बन्धिनः प्रस्थाप्य स्वीयांस्तु स्वस्वगृहं जिगमिषतोऽपि स्नेहभरेण तत्र न्यवासयत् इत्याह-तत इति । यत्तूक्तं "ततोऽनुज्ञाप्य राजानमनिच्छन्तमपीश्वरः । ययौ सभार्य्यः सामात्यः स्वपुरं देवकीसुतः" इति तत्र सङ्क्षिप्ते क्रमः पुनरुत्तरेणानेनैव प्रकरणेन ज्ञेयः ततस्तस्मात् ऋत्विगादीनां स्वस्वधामयानात्पश्चात् सुहृदः श्रीभीष्मादयः सम्बन्धिनो द्रुपदादयः बान्धवा मित्राणि तथा कृष्णं स्वयं भगवन्तं च तस्य निवासने पूर्वोक्तमेव हेतुं कार्य्यद्वारा विशिष्य दर्शयति त्यागे कातरः विरहदुःखाद्भीतः इति ॥२८॥ न च तेन स्वातन्त्र्यभङ्गाच्छ्रीकृष्णस्य तत्रानिच्छाशङ्कया प्रत्युत भक्तप्रीतेरेव तत्प्रीतित्वात् प्रीतिरेवाभूदित्याह-भगवानपीति । परमस्वतन्त्रोऽपि तत्र इन्द्रप्रस्थे नितरां श्रीमहिषीवर्गसाहित्यादिना अवात्सीत् यतस्तस्य परमभक्तस्य श्रीयुधिष्ठिरस्य प्रियङ्करः ननु

---

१. निवारयामास-वीर. । २. सुसमृद्धं-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

द्वारकावासिनामपि चिरविरहातुराणां प्रियाचरणं योग्यं तत्राह-प्रस्थाप्येति । तेषामाश्वासनार्थमेवेति भावः । ननु तेषां प्रस्थापनेन कथं तेषामाश्वासनं स्यात्तत्राह-स्वान् स्वांशभूतानिति श्रीप्रद्युम्नस्य द्वारकायां स्थितत्वात् साम्बादीनित्युक्तं साम्बादिभिः पुत्रैस्तु तन्मातरोऽपि गृह्यन्ते ॥२९॥ मनोरथमहार्णवं यक्ष्ये विभूतीर्भवत इत्यारभ्य तद्देवदेवभगवतश्चरणारविन्देत्याद्यन्तेनोक्तलक्षणं कृष्णेन हेतुना सम्यक् सुखेन सम्पूर्णतया चोत्तीर्य ॥३०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हरिः सर्व्वदोषहरो रूपगुणादिना च सर्व्वमनोहरः श्रीकृष्णस्तस्य दासो भक्तस्तस्य, अत एव राजा चासौ ऋषिश्च सर्व्वज्ञानादिपूर्णस्तस्य, इति राजसूयमहोदयस्य सर्वगुणतादिकं सूचितम् । अत एवं प्रशंसन्तः स्तुवन्तोऽपि नैवातृप्यन्, प्रीत्यानारतमेव प्रशंसन्ति स्मेत्यर्थः । तत्र दृष्टान्तः – मर्त्यो मरणधर्मा नित्यरोगार्तोऽमृतं मरणदुःखादिहरं परमसुखकरञ्च दिव्यरसं पिबन् यथा न तृप्यति, तद्वत् ॥२७॥ एवं यज्ञसम्बन्धिनः प्रस्थाप्य स्वकीयांस्तु स्वस्वगृहं जिगमिषतोऽपि स्नेहभरेण तत्र न्यवासयदित्याह – तत इति । तस्मात् ऋत्विगादीनां स्वस्वधामयानात् पश्चात्, सुहृदः श्रीभीष्मादयः, सम्बन्धिनो द्रुपदादयः, बान्धवा मित्राणि विराटादयस्तान्, च अपि, कृष्णं साक्षाद्भगवन्तमपि । ननु महासाहसं धार्ष्ट्यादिकञ्चापद्येत, तत्राह – त्यागे कातरोऽसमर्थः, किंवा त्यागे विवशः ॥२८॥ न च तेन स्वातन्त्र्यभङ्गाच्छ्रीकृष्णस्य तत्रानिच्छा शङ्क्या, किन्तु प्रीतिरेवाभूदित्याह – भगवानिति । परमस्वतन्त्रोऽपि तत्र इन्द्रप्रस्थे नितरां श्रीमहिषीवर्गसाहित्यादिनावात्सीत्, यतस्तस्य श्रीयुधिष्ठिरस्य प्रियङ्करः, भक्तवश्यत्वादिति भावः । अत एवाङ्गेति सप्रेमसम्बोधनम् । ननु श्रीद्वारकावासिनामपि चिरविरहाकुलानां प्रियाचरणं योज्यम्, तत्राह – प्रस्थाप्येति । तेषामाश्वासनार्थमेव यदुवीरान् कृतवर्मादीन्, आदि-शब्दात् सपरिवाराः श्रीप्रद्युम्नानिरुद्धादयः । ननु तेषां प्रस्थापनेन कथं तेषामाश्वासनं स्यात् ? तत्राह – स्वानात्मतुल्यानित्यर्थः, श्रीप्रद्युम्नस्य सर्व्वज्येष्ठत्वेऽपि साम्बादित्वं साम्बस्य मातुस्त्यागाशक्त्या यत्नेन भगवता प्रेषणाभिप्रायेण; सात्यक्यादीनिति पाठः स्पष्टः । ततश्च स्वानिति प्रद्युम्नादीनित्यर्थः । अन्यथाग्राध्याये साम्बसेनापतिना सह वक्ष्यमाणश्रीप्रद्युम्नयुद्धस्यासङ्गतेः ॥२९॥ श्रीकृष्णेन साक्षाद्भगवता हेतुना सम्यक् सुखेन सम्पूर्णतया उत्तीर्य्य; धर्म्मसुत इति तत्र तस्य योग्यता सूचिता ॥३०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-३१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

हरिदासस्येति । राजसूयमहोत्सवं प्रशंसन्तो नातृप्यन् यथा मर्त्योऽमृतं पिबन्न तृप्यति तद्वत् ॥२७॥ तत इति । सुहृदश्च सम्बन्धिनो ज्ञातींश्च बान्धवांश्च जिगमिषून् प्रेम्णा निवारयामास त्यागाद्विश्लेषात्कातरः दीनः त्यागमसहमान इत्यर्थः । प्रेम्णा च श्रीकृष्णं निवारयामास ॥२८॥ भगवानपीति । तस्य युधिष्ठिरस्य प्रियङ्करः प्रियचिकीर्षुः कुशस्थलीं द्वारकां प्रति साम्बादीन्यदुवीरान् प्रस्थाप्य प्रयास्य स्वयं तत्रैवान्यानि कतिचिद्दिनानि अवात्सीत् उषितवान् ॥२९॥ इत्थमिति । सुदुस्तरं तर्तुमशक्यं मनोरथं राजसूयचिकीर्षारूपं महार्णवं कृष्णेन कर्णधारस्थानीयेन समुत्तीर्य गतज्वरो निश्चिन्त आसीत् इत्यन्वयः ॥३०॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥२२-३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१७-३९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

महाशीलाः परमकुलीनाः ॥२५-३०॥

गूढार्थदीपिनी

महोदयं महोत्सवम् । यथा मर्त्यः मरणधर्मा अमृतं पिबन् न तृप्यति तथा तं प्रशंसन्तः नैवाऽतृप्यन् ॥२७॥ त्यागात् वियोगात् कातरः विह्वलः सन् कृष्णमपि ॥२८॥ अङ्ग हे राजन् ! कुशस्थलीं द्वारकाम् ॥२९॥ कृष्णेन सहायीभूतेन गतज्वरः निश्चिन्तः । ज्वरः सन्तापे धातुः । मनस्ताप एव चिन्तापदार्थः ॥३०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सुराणामिव रुक् कान्तिर्येषां ते मणिकुण्डलाभ्यां सहिताः स्रगादयो येषां ते कुण्डलयुगेनालकवृन्देन च जुष्टा वक्त्रश्रीर्यासां ताः ॥२४॥ महत् शीलं येषां ते ॥२५-३१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

मर्त्योऽमृतं पिबंश्चेद्यथा न तृप्येत्तथा प्रशंसन्तो नैवातृप्यन् ॥२७॥ त्यागहेतुककातर्ययुतो विरहभीरुरिति यावत् ॥२८॥ तत्प्रियङ्करः साम्बादीन्यदुवीरान्कुशस्थलीं प्रति प्रस्थाप्य स्वयं तत्र न्यवात्सीत् ॥२९॥ राजसूययागसम्पत्तिरूपमनोरथमहार्णवं कृष्णेन समुत्तीर्य गतज्वर आसीत् ॥३०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तेषां मानसं कायिकं चोक्त्वा वाचनिकमाह हरिदासस्येति । राजर्षेः स्वधर्मनिरतस्य हरिदासस्य च प्रमाणप्रमेयबलपुष्टस्य । तत्रापि राजसूयस्य तत्रापि महोदयम्, अत एव प्रशंसन्तः स्वयमेव नैवातृप्यन् । अन्येच्छया वर्णनायां तदिच्छापूर्तौ निवृत्तिरपि भवेत् । इदं तु स्वार्थमेवेति निरन्तरं प्रशंसा । प्रतिक्षणं तु रुच्याधिक्याय दृष्टान्तमाह मर्त्यो मरणधर्मा, अमृतं स्वादिष्ठं मरणनिवर्तकं चेति । अनुभवपर्यवसानाभ्यामुत्कृष्टान्न निवर्तते । अत्रापि तदासक्त्या वर्णनायां "यो यच्छ्रद्धः" इति न्यायेन राजतुल्यत्वसम्पादकत्वादनिवृत्तिर्युक्तेत्यर्थः ॥२७॥ लौकिकं बन्धुषु विशेषतो वक्तव्यमिति साधारणतुल्यत्वे न शोभेति साधारणेषु गतेषु बन्धून् स्थापयामासेत्याह तत इति । भगवदिच्छैवैषा यतोऽनर्थोऽग्रे भविष्यतीति । सुहृदो मित्राणि । सम्बन्धिनो विवाह्याः । बान्धवा गोत्रिणः । प्रेम्णेति यागसमये बान्धवाः परिचर्यायामेव व्यापृताः न सुखेन भोगं प्राप्तवन्तः । अतः सम्मर्दे निवृत्ते सहभोगेच्छया स्नेहेन तेषां स्थापनमित्यर्थः । कृष्णं चेति विशेषार्थमुक्तम् । बहुकालं स्थापनं सूचयति त्यागकातर इति ॥२८॥ सर्वे बान्धवा अविशेषात्तत्र स्थिताः, भगवतस्तु कार्यान्तरमप्यस्तीति कदाचिदस्थितिमाशङ्क्याह- भगवानेवेति ।अङ्गेत्यप्रतारणे तत्रैवावात्सीदिति । एवकारेण सभार्यस्य वसतिर्निरूपिता । कार्यान्तरार्थं स्वप्रतिनिधितया अन्यान् प्रस्थापितवानित्याह प्रस्थाप्येति । भगवति विद्यमाने रक्षा विलासश्च द्वारकायां भवेत् तत्रैकेन द्वयं न सिद्ध्यतीति रक्षार्थं यदुवीरान् विलासार्थं साम्बादींश्च प्रस्थापितवान् । तच्च स्वभावतः समयं स्थानमाह कुशस्थलीमिति । कुशो दैत्य इति तस्यां भूमौ दैत्योपद्रवसम्भवः ॥२९॥ यागपूर्वं मध्ये अन्ते च यावदभीप्सितं तावद्राज्ञो जातमिति राजकृत्यमुपसंहरति इत्थं राजेति । राजेति स्वधर्मवत्त्वम् । धर्मसुत इति बीजशुद्धिः । मनोरथ एव महानर्णवः महत्त्वात् प्रतिबन्धकनक्रसद्भावाच्च । अत एव सुदुस्तरमन्यैः स्वस्यापि । परं कृष्णेन समुत्तीर्य गतमानसज्वर आसीत् । यथा वैष्णवधर्मैः ज्वरादिकं समुद्रे निक्षिप्य उत्तीर्णो विज्वरो भवतीत्यर्थः ॥३०॥

श्रीसुबोधिनीसारः

हरेर्दासस्य राजर्षेः पारण्डवेयस्य राजसूयमहिमानं प्रशंसन्तो नैवातृप्यन् अलं बुद्धिं नाकुर्वन् अमृतं पिबन्मर्त्य इव ॥२७॥ ततोऽनन्तरं त्यागे कातरो युधिष्ठिरो राजा सुहृत्सम्बन्धिबान्धवान् कृष्णं च प्रेम्णा निवासयाम्बभूव ॥२८॥ तत्रेन्द्रप्रस्थे तस्य राज्ञः प्रियङ्करो भगवानपि न्यवात्सीत् वसति स्म । हे अङ्ग यदूनां वीरान् साम्बादीन् च द्वारकां प्रतिप्रस्थाप्य ॥२९॥ एवं धर्मस्य सुतो राजा मनोरथसमुद्रं सुदुस्तरं समुत्तीर्य कृष्णेन गतज्वर आसीत् । आनन्दयुक्तोऽभूत्कृतकृत्य इत्येके ॥३०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

राजर्षेर्विवेकिनो युधिष्ठिरस्य राजसूयमहोत्सवं प्रशंसन्तः सर्वे नैवातृप्यन् तत्र दृष्टान्तमाह–यथा यथा मर्त्यो मरणधर्मकोऽमृतं पिबन् न तृप्यति तद्वदिति । 'राजसूयोत्कर्षे हेतुर्भगवदनुग्रह एव, राज्ञस्तद्दासत्वात्' इति सूचयन्नाह–हरिदासस्येति ॥२७॥ ततः साराधणानामागमनानन्तरं राजा युधिष्ठिरः सुहृदो मित्राणि सम्बन्धिनो विवाह्याः बान्धवाः गोत्रिणः तान् कृष्णं च प्रेम्णा निवासयामास । तत्र हेतुमाह–त्यागात् विश्लेषात् कातरो भीतः । यज्ञानुष्ठानसमये सर्वे व्यापृताःक्लिष्टाः वियुक्ताश्चासन्, अतः सहसम्भोगसुखानुभवार्थं निवासयामासेत्याशयः ॥२८॥ हे अङ्ग ! तस्य युधिष्ठिरस्य प्रियङ्करः प्रियं चिकीर्षुः भगवानपि कुशस्थलीं द्वारकां प्रति साम्बादीन् यदुवीरान् प्रस्थाप्य स्वयं तत्रैव न्यवात्सीत् ॥२९॥ इत्थं धर्मसुतो राजा युधिष्ठिरः अन्यैर्दुस्तरमपि मनोरथं राजसूयसमाप्तीच्छारूपं महार्णवं कृष्णेन कर्णधारस्थानीयेन समुत्तीर्य समाप्य गतज्वरो निश्चिन्त आसीत् ॥३०॥

अन्वितार्थप्रकाशिका

हरीति ॥ हरिदासस्य राजर्षेः युधिष्ठिरस्य राजसूयमहोत्सवं प्रशंसन्तः सर्वे नैवातृप्यन् । यथा मर्त्यो मरणधर्मको मनुष्यादिरमृतं पिबन् न तृप्यति तद्वत् ॥२७॥ तत इति ॥ ततः त्यागात् विश्लेषात् कातरो भीतः राजा युधिष्ठिरः सुहृदो मित्राणि सम्बन्धिनो विवाह्याः बान्धवाः गोत्रिणः तान् कृष्णं च प्रेम्णा निवासयामास ॥२८॥ भगवानिति ॥ अङ्ग हे राजन् ! तस्य युधिष्ठिरस्य प्रियङ्करः प्रियं चिकीर्षुः भगवानपि कुशस्थलीं द्वारकां प्रति साम्बादीन् यदुवीरान् प्रस्थाप्य स्वयं तत्रैव न्यवात्सीत् ॥२९॥ इत्थमिति ॥ इत्थं धर्मसुतो राजा युधिष्ठिरः अन्यैर्दुस्तरमपि मनोरथं राजसूयसमाप्तीच्छारूपं महार्णवं कृष्णेन कर्णधारस्थानीयेन समुत्तीर्य समाप्य गतज्वरो निश्चिन्त आसीत् ॥३०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

त्यागे कातरो व्याकुलः ॥२८॥ न्यवात्सीत् निवासं चकार ॥२९॥ गतज्वरो गतसन्तापः ॥३०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हरिदासस्येति ॥ हरिदासस्य भगवतो दासभावं भजतः, राजर्षेर्युधिष्ठिरस्य, राजसूयमहोदयं राजसूयमहोत्सवं, प्रशंसन्तः, अमृतं पिबन् मर्त्यः यथा, तथा, नैव अतृप्यन् । ऋत्विगादयस्तृप्तिं नापुरित्यर्थः ॥२७॥ तत इति ॥ ततः युधिष्ठिरः, रा सुहृत्सम्बन्धिबान्धवान्, त्यागकातरः विश्लेषतो दीनः सन्, कृष्णं च, प्रेम्णा, निवासयामास । निवारयामासेति पाठे, जिगमिष निवारणं कृतवानित्यर्थः ॥२८॥ भगवानिति ॥ हे अङ्ग राजन्, तस्य युधिष्ठिरस्य प्रियङ्करः प्रियं चिकीर्षुः, भगवान् श्रीकृ अपि, साम्बादीन्, यदुवीरांश्च चोऽप्यर्थे । कुशस्थलीं द्वारकां प्रति, प्रस्थाप्य, तत्र च तत्रैव, न्यवात्सीत् ॥२९॥ इत्थमिति ॥ इ धर्मसुतः राजा युधिष्ठिरः, सुदुस्तरं तर्तुमशक्यं, मनोरथो राजसूयचिकीर्षारूपो मनःसङ्कल्पः स एव महार्णवस्तं, कृ कर्णधारस्थानीयेन, समुत्तीर्य, गतज्वरः निश्चिन्तः, आसीत् ॥३०॥

कृष्णप्रिया

राजन् परीक्षित ! तीन हरिदास है उद्धवजी युधिष्ठिरजी और श्रीप्रहलादजी और श्रीगिरिराज महारा श्रीहरिदासवर्य माने गये है । आपके पितामह चरण श्रीयुधिष्ठिरजी महाराजजीके लिये हरिदास पदसे सम्मा करते हुए श्रीशुक्राचार्यजी कह रहे है कि राजन् ? लोग अमृत पान करते अधाते नही है वैसे सर्वलोग भ हरिदास महाराज युधिष्ठिरजी के राजसूय महायज्ञकी स्तुति करते यशोगान गाते तृप्त नही होते थे ॥२७॥ समाप्ति के बाद धर्मराज श्रीयुधिष्ठिर महाराजने अत्यंत स्नेहसे अपने हितैषि स्नेही स्वजन सुहृद सम्बन्धियों बन्धुजन और भगवान् श्रीकृष्णचन्द्रजी को भी रोक लिया । क्योंकि धर्मराज उनके विद्रोहकि कल्पना से ही दुःख हो रहा था ॥२८॥ राजन् भगवान श्रीकृष्णचन्द्रजीने यदुकुलकुमार वीर सम्ब आदि सबको श्रीद्वारिकापु और भेज दिया और स्वयं महाराज धर्मराज का मनोरथ को पूर्ण करने के लिये वहां रह गये ॥२९॥ इस

कृष्णप्रिया

धर्म कुमार महाराज युधिष्ठिर मनोरथ-महासागर को जोर पार करना सर्वथा कठिन था उसको भगवान श्रीकृष्ण कि अनंन अनुकम्पा से अनायास ही पार कर गये और चित्त की संपूर्ण चिन्ता नष्ट हो गयी ॥३०॥

एकदान्तःपुरे तस्य वीक्ष्य दुर्योधनः श्रियम् । अतप्यद् राजसूयस्य महित्वं चाच्युतात्मनः ॥३१॥
यस्मिन् नरेन्द्रदितिजेन्द्रसुरेन्द्रलक्ष्मी[1]र्नाना विभान्ति किल विश्वसृजोपक्लृप्ताः ।
ताभिः पतीन्[2] द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत् ॥३२॥
यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदङ्घ्रिशोभम् ।
[3]मध्ये सुचारुकुचकुंकुमशोणहारं श्रीमन्मुखं [4]चपलकुण्डलकुन्तलाढ्यम् ॥३३॥
सभायां मयक्लृप्तायां क्वापि धर्मसुतोऽधिराट्[5] । वृतोऽनुजैर्बन्धुभिश्च कृष्णेनापि स्वचक्षुषा॥३४॥

कर्दमक्षमा

एकदा, अच्युतात्मनः, तस्य, अन्तःपुरे, श्रियम्, च, राजसूयस्य, महित्वम्, वीक्ष्य, अतप्यत् ॥३१॥ यस्मिन्, विश्वसृजा, उपक्लृप्ताः, नरेन्द्रदितिजेन्द्रसुरेन्द्रलक्ष्मीः, नाना, विभान्ति, तस्मिन्, द्रुपदराजसुता, ताभिः, पतीन्, उपतस्थे, यस्याम्, विषक्तहृदयः, कुरुराट्, अतृप्यत् ॥३२॥ यस्मिन्, तदा, मधुपतेः, महिषीसहस्रम्, श्रोणीभरेण, शनकैः, क्वणदङ्घ्रिशोभम्, मध्ये, सुचारुकुचकुंकुमशोणहारम्, श्रीमन्मुखम्, चपलकुण्डलकुन्तलाढ्यम्, दृष्ट्वा, कुरुराट्, अतप्यत् ॥३३॥ क्व, अपि, अधिराट्, धर्मसुतः, मयक्लृप्तायाम्, सभायाम्, अनुजैः, च, बन्धुभिः, च, स्वचक्षुषा, कृष्णेन, अपि, काञ्चने, आसने, साक्षात्, मघवान्, इव, आसीनः, पारमेष्ठ्यश्रिया, जुष्टः, वन्दिभिः, च, स्तूयमानः, आसीत् ॥३४-३५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अच्युते आत्मा यस्य तस्य ॥३१॥ नरेन्द्रादीनां लक्ष्मीर्लक्ष्म्यो विभूतयो विश्वसृजा मयेनोपक्लृप्ताः विरचिताः ताभिः सह कुरुराट् दुर्योधनोऽतप्यत् ॥३२॥ महिषीसहस्रमिति बहुत्वोपलक्षणं क्वणद्भिरङ्घ्रिभिः शोभा यस्य मध्ये सुचारु सुचारुमध्यमित्यर्थः । कुचकुङ्कुमैः शोणाः हाराः यस्य तत् श्रीमन्ति मुखानि यस्य तत् चलैः कुण्डलैः कुन्तलैश्चाढ्यं सम्पन्नमशोभतेति शेषः ॥३३॥

क्वापि कदाचित् स विरेज इति शेषः । स्वस्य चक्षुषा हिताहितज्ञापकेन ॥३४-३५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्तःपुरे पुरवद्विस्तीर्णे विमानेऽतस्तन्मध्ये । तस्य युधिष्ठिरस्य ॥३१॥ यस्मिन्नन्तःपुरे । ताभिर्नरेन्द्रादिविभूतिभिः । यस्यां द्रुपदराजसुतायाम् । कुरुराट् कुरुनगरहस्तिनापुरेश इत्यर्थः ॥३२॥ तदा यज्ञान्तोत्सवे । इत्यर्थ इति-मध्यशब्दस्यैदन्तत्वं निपात्यते । मध्यं सुचारु यस्य तन्मध्येसुचारु इति विग्रहादिति ध्येयम् ॥३३-३५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं दुर्य्योधनस्यानुतापबीजत्वेन श्रीयुधिष्ठिरस्य राजसूयं वर्णयित्वा तदनुतापोत्थाने हेत्वन्तरञ्चाह-एकदेत्यादिना तद्दृशेत्यन्तेन । एकदेति महाभिमानिनस्तस्य प्रायो निजशिबिर एव स्थितिर्बोध्यते ततश्च एकदा नित्यतत्श्रवणमात्सर्य्योद्दीपिततया कदाचिदागतौ सत्यां श्रियं साम्राज्यलक्ष्मीं राजसूयसम्बन्धिमहित्वं प्रभावं प्रतिष्ठां च वीक्ष्येति पूर्वं राजसूयसमये लोकसम्मर्दादिना कार्य्यव्यग्रतया च नात्यवधानं कृतवान् अधुना तु तत्तदपगमे विशेषतो दृष्ट्वेत्यर्थः । अतप्यत साक्षादेव तापं व्यञ्जितवानित्यर्थः । श्रीयुधिष्ठिरस्य तु सा श्रीः तच्च महित्वं युक्तमेव न च तत्र गर्वादिदोषोऽभूदित्यत आह-अच्युते सर्वैश्वर्य्यसर्वमाधुर्यपरिपूर्णे श्रीकृष्णे आत्मा चित्तं यस्य तस्येति ॥३१॥ तत्र राजसूयमाहात्म्यं दर्शितं श्रियञ्च दिग्दर्शनयोपदिशंस्तद्धेतुकं तत्तापमनुवदति-यस्मिन्निति । अन्तःपुरे

---

१. लक्ष्म्यो नाना-वीर. विज. । २. पति-इति कस्यचित् । ३. वक्षः-विज. । ४. प्रचल-श्रीधर. वंशी. विज. ; चपल-वीर. । ५. विराट्-वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नानाविधाः विशेषेण नरेन्द्रादिलक्ष्मीतोऽप्याधिक्येन भान्ति स्म किल निश्चये तत्र हेतुः विश्वसृजा मयेन सभानिर्माणद्वारा किं वा विश्वकर्मणोपक्लृप्ताः तेनैव पुरनिर्माणात् पतिं श्रीयुधिष्ठिरं पतीनिति चित्सुखः द्रुपदराजस्य सुतेति तद्यज्ञ एव तस्याविर्भावसूचनेनालौकिकरूपगुणादिमत्त्वं सूचितं यस्यां पूर्वोक्तायां श्रियां विषक्तहृदयो मात्सर्य्यादिना आविष्टचित्तः कुरुराडिति कुरूणां राजाऽहमेवेत्यभिमानेन मात्सर्य्योदयादिति भावः ॥३२॥ किम्बहुना "रेमे रमाभिर्निजकामसम्प्लुतः" इत्युक्तरीत्या श्रीकृष्णलक्ष्मीरूपास्ता एव यत्र स्वयं खेलन्ति स्मेत्याह यस्मिंस्तदेति । तदा राजसूयानन्तरं मधुपतेः स्वयं भगवतः श्रीकृष्णस्य श्रोणीभरेणोपलक्षितम् अत एव शनकैः क्वणद्भिरङ्घ्रिभिः शोभा यस्य तत् श्रीमन्मुखत्वे हेतुः चपलेति तेनान्यदपि सौन्दर्य्यादिकं बोध्यते ॥३३॥ एकदेत्यादिकं विवृणोति–सभायामित्यादिषड्भिः । तत्र सभायामिति युग्मकम् । पूर्वोक्तायां सभायामासीनः मयक्लृप्तायामिति परमाद्भुतत्वमभिप्रेतं तच्चोक्तं सभापर्वणि–

"सभा तु सा महाराज शातकुम्भमयद्रुमा । दशकिष्कुसहस्त्राणि समन्तादायताभवत् ॥
यथा वह्नेर्यथार्कस्य सोमस्य च यथैव भाः । भ्राजमानाः तथात्यर्थं बभार परमं वपुः" ॥ इत्यादि; किञ्च —
"तां स्म तत्र मयेनोक्ताः किङ्करा नाम राक्षसाः । सभामष्टौ सहस्त्राणि रक्षन्ति च वहन्ति च" ॥ इत्यादि ।

अधिराट् सम्राट् तथाप्यभिमानाद्यभावन सद्धर्मपरत्वं सूचयति धर्मसुत इति तत्रैव हेतुः स्वचक्षुषेति अन्यत्तैः यद्वा स्वे स्वीये च चक्षुषी यस्मिन् तेन यद्वा स्वे आत्मन्येव चक्षुषी यस्य तेन यद्वा स्वचक्षुषेति यथा चक्षुर्विना न तादृश्यपि सम्पत्सुखकरी तथा तं विनेति रूपकेण प्रतिपादितम् अहो किं वाच्यं मघवानिवेति परमेष्ठितुल्यसम्पत्त्यापि सेवित इति ॥३४-३५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं दुर्य्योधनस्यानुतापहेतुत्वेन श्रीयुधिष्ठिरस्य प्रभावं वर्णयित्वा तदनुतापोत्थाने हेत्वन्तरं चाह – एकदेत्यादिना दृशेत्यन्तेन। प्रियं विभूतिं महित्वं माहात्म्यं साम्राज्यादिसम्पादनलक्षणम्; यद्वा, करणे षष्ठी, राजसूयेन महित्वं सर्व्वलोकपूज्यतादिलक्षणम्, श्रियां महित्वे च हेतुमाह – अच्युते सर्व्वैश्वर्य्यपूर्णे श्रीकृष्णे आत्मा चित्तं यस्य तस्येति, अयमप्यनुतापे हेतुविशेषः । किंवा अनेन श्रिया महित्वस्य चासाधारण्यमभिप्रेतम् ॥३१॥ कदा कथमित्यपेक्षायां विवृणोति – यस्मिन्निति । अन्तःपुरे नानाविधा विशेषेण नरेन्द्रादिलक्ष्मीतोऽप्याधिक्येन भान्ति राजन्ते, किल निश्चये; तत्र हेतुः – विश्वसृजा मयेन सभानिर्म्माणद्वारा, किंवा विश्वकर्म्मणोपक्लृप्तः, तेनैव पुरनिर्म्माणात्; पतिं श्रीयुधिष्ठिरम्, पतीनिति चित्सुखः । द्रुपदराजस्य सुतेति तद्यज्ञे तस्या जन्मना सर्व्वरूपगुणादिमत्त्वं सूचितम् । यस्यां द्रुपदराजसुतायां श्रियां वा, विषक्तहृदयो मात्सर्य्यादिनाविष्टचित्तः । कुरुराडिति कुरूणां राजाहमित्यभिमानेन मात्सर्य्यादयादिति भावः ॥३२॥ तदा राजसूयानन्तरं मधुपतेर्निजाशेषरूपगुणादिप्रकटनार्थं मधुकुलेऽवतीर्य्य श्रेष्ठतां गतस्येति तन्महिषीणामपि तादृशत्वमभिप्रेतम् । श्रोण्या भरेणातिशयेन भारेण वा हेतुना शनकैश्चलदिति शेषः । अत एव क्वणदङ्घ्रिशोभम्; यद्वा, श्रोणीभरेण विशिष्टम्, अत एव शनकैः क्वणद्भिरङ्घ्रिभिः शोभा यस्य तत् । श्रीमन्मुखत्वे हेतुः - चपलेति, चञ्चलेति पाठे पाठान्तरेऽपि स एवार्थः । च-कारस्त्वनुक्तसमुच्चये, तेनान्यदपि सौन्दर्य्यादिकं बोध्यते ॥३३॥ सभायामासीनः, मयेन दैत्यशिल्पिना क्लृप्तायामिति परमाद्भुतत्वमभिप्रेतम् ; तच्चोक्तं सभापर्व्वणि —

"सभा तु सा महाराज शातकुम्भमयद्रुमा । दशकिष्कुसहस्त्राणि समन्तादायताभवत् ॥
यथा वह्नेर्यथार्कस्य सोमस्या च यथैव भाः । भ्राजमाना तथात्यर्थं बभार परमं वपुः" ॥ इत्यादि ॥

किञ्च, 'त स्म तत्र मयेनोक्ताः किङ्करा नाम राक्षसाः । सभामष्टौ सहस्त्राणि रक्षन्ति च वहन्ति च ॥' इत्यादि ॥

अधिराट् सम्राट्,तथाप्यभिमानाद्यभावेन सद्धर्म्मपरत्वं सूचयति – धर्म्मसुत इति ॥ तत्रैव हेतुः – स्वचक्षुषेति, एवं तस्य चित्ताकर्षणात् कृष्णेनेति; अन्यत्तैर्व्याख्यातम् । यद्वा, स्वे स्वकीये चक्षुषी यस्मिन् तेन, अतृप्त्या सदा दृग्भ्यां साक्षाद्दृश्यमानेन सहेत्यर्थः । अतः श्रीकृष्णाभिनिविष्टदृशा तेन वक्ष्यमाणदुर्य्योधनपतनादिकं न सम्यग् दृष्टमिति ज्ञेयम् । अन्यथा कृपया भ्रातरमेकं प्रेष्यासावानीतः स्यादिति ॥३४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

यस्मिन्नन्तःपुरे लक्ष्मीः सम्पदः ताभिरुपलक्षिताः पतीन् कुरुराट् दुर्योधनः ॥३२॥ मधुपतेः कृष्णस्य महिषीसहस्रम् आस्ते इत्यर्थः । अनेन महत्त्वं कथितं तस्मिन् अन्तःपुरे श्रियं दृष्ट्वा दुर्योधनः अतप्यदिति पूर्वेणान्वयः ॥३३॥ स्वचक्षुषा नेत्रभूतेन ॥३४-३७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एकदेति । अच्युते भगवत्यात्मा मनो यस्य तस्य युधिष्ठिरस्य अन्तःपुरे श्रियं सम्पदं राजसूयस्य महत्त्वञ्चालोक्य दुर्योधनोऽतप्यत् तस्मै मनसि परितापं प्राप्त इत्यर्थः ॥३१॥ श्रियमेव प्रपञ्चयंस्तत्परितापमाह-यस्मिन्निति द्वाभ्याम् । यस्मिन्नन्तःपुरे विश्वकर्मणोपक्लृप्ताः रचिताः ननाविधाः नरेन्द्रादीनां लक्ष्मीर्भोग्यभोगोपकरणभोगस्थानादिलक्ष्म्यः भान्ति द्रुपदराजसुता द्रौपदी ताभिर्लक्ष्मीभिः पतीन् युधिष्ठिरादीनुपतस्थे पर्यचरत् यस्यां द्रुपदराजसुतायां विषक्तमासक्तं हृदयं यस्य सः कुरुराट् दुर्योधनोऽतृप्यत् ॥३२॥ यस्मिन्निति । तदा दुर्योधनपरि(हास)तापकाले यस्मिन्नन्तःपुरे यदुपतेः श्रीकृष्णस्य महीषीसहस्रं पत्नीसहस्रं परि(हासा)तापावहत्वेन आसेति शेषः । सहस्रमिति बहुत्वोपलक्षणं कथम्भूतं श्रोणीभरेण नितमबभरेण शनकैः क्वणद्भिः चरणाभरणद्ध्वननपूर्वकं चलद्भिरङ्घ्रिभिः शोभा यस्य तत् मध्ये सुचारु चारुमध्यमित्यर्थः । कुचकुङ्कुमैः शोणा रक्ताः हाराः यस्य तत् श्रीमन्ति शोभायुक्तानि मुखानि यस्य तत् चपलैः कुण्डलैः कुन्तलैश्चाढ्यं सम्पन्नम् ॥३३॥ सभायामिति । क्वापि कदाचित् मयेनैव दत्तायां मयविद्यायां इति पाठे विद्याप्रभावरचितायामित्यर्थः । स्वचक्षुषा हिताहितज्ञापकेन श्रीकृष्णेन च परिवृतो रेजे इति शेषः ॥३४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

यस्मिन्पुरे विश्वसृजा कृष्णेन तस्मिन् ताभिः सह द्रुपदराजसुता पतिमुपतस्थ इत्यन्वयः ॥३२-३३॥ स्वचक्षुषा स्वदृष्टिभूतेन ॥३४-३५॥ [मूलं] उपास्यमानो विप्रेन्द्रैर्नानादेशसमागतैः । दोधूयमानो धवलैर्वालव्यजनसङ्कुलैः ॥ रराज राजशार्दूलो दिविदेवपतिर्यथा ॥०॥ वालव्यजनसङ्कुलैः चामरस्तिमितवायुभिः दोधूयमानः वीज्यमानः ॥०॥

(श्रीविजयध्वजतीर्थरीत्या दशमस्कन्धे त्र्यशीतितमोऽध्यायः ॥८३॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१७-३९॥
श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-४०॥
श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दुर्योधनमानभङ्गप्रकारमाह-एकदेति अच्युतात्मनः कृष्णासक्तमनसः ॥३१॥ नरेन्द्रादीनां लक्ष्म्याः सम्पदो नानाविधाः भान्ति विश्वसृजा मयेन उपक्लृप्ताः विरचिताः ताभिर्लक्ष्मीभिः सहिता द्रौपदी यस्यां यासु लक्ष्मीषु विषक्तहृदयः मात्सर्याविष्टचित्तः कुरुराट् दुर्योधनः ॥३२॥ महिषीणां सहस्रं सहस्राणि श्रीमन्ति मुखानि यस्य तत् व्यराजतेति शेषः ॥३३॥ स्वस्य चक्षुषा हिताहितज्ञापकेन कृष्णेनापि वृतः व्यरोचतेति शेषः ॥३४-३५॥

गूढार्थदीपिनी

अच्युते आत्मा मनो यस्य तस्य राज्ञः श्रियं राज्यलक्ष्मीं महित्वं यज्ञवैभवं च वीक्ष्य दुर्योधनः अतप्यत स्वस्य तथाभावादित्यर्थः ॥३१॥ यस्मिन् अन्तःपुरे विश्वसृजा मयेन दानवेन उपक्लृप्ता रचिताः नरेन्द्रादीनां लक्ष्मीः लक्ष्म्यः विभूतयो नाना भान्ति ताभिः सह द्रुपदसुता द्रौपदी तान् पतीन् उपतस्थे सेवितवती । यस्यां द्रौपद्यामासक्तहृदयः दुर्योधनोऽतप्यदित्यन्वयः ॥३२॥ तदा महोत्सवे । यस्मिन् अन्तःपुरे मधुपतेः श्रीकृष्णस्य महिषीसहस्रमशोभतेति शेषः । कीदृशम् । तस्य षड् विशेषणानि क्रमेण योज्यानि । तथाहि । श्रोणीभरेण भारेण शनैः शनैः गच्छत् । पुनः । क्वणद्भिः नूपुरैः अङ्घ्रिशोभा यस्य तत् । पुनश्च । मध्ये

गूढार्थदीपिनी

सुचारु चारुमध्यमित्यर्थः । एदन्तत्वं निपातनात् । पुनः । कुचकुंकुमैः शोणा लोहिता हारा यस्य तत् । पुनः । श्रीमन्ति सुन्दराणि मुखानि यस्य तत् । पुनश्च । प्रचलैः कुण्डलैः केशैश्च आढ्यं सम्पन्नम् ॥३३॥ सभायामिति युग्मम् । क्वापि कदाचित् धर्मसुतो युधिष्ठिरः सभायां काञ्चने सिंहासने आसीनः मघवानिव रेजे इति शेषः । कथंभूतः । चक्षुषा सत्परामर्शदात्रा । कृष्णेन बन्धुभिश्च वृतः । पुनश्च । पारमेष्ठ्यश्रिया राजलक्ष्म्या जुष्टः सेवितः स्तूयमानश्च । क्लृप्तायां रचितायाम् । वन्दिनः स्तुतिपाठकाः ॥३४-३५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

लक्ष्मीर्लक्ष्म्यः विश्वसृजा मयेनोपक्लृप्ताः संस्थापिताः कुरुराट् सुयोधनः ॥३२॥ क्वणद्भिरङ्घ्रिभिः शोभा यस्य तत् कुचकुंकुमैः शोणाः हाराः यस्मिन् तत् श्रीमन्ति शोभायुक्तानि मुखानि यस्य तत् चलैः कुण्डलैश्च आढ्यं सम्पन्नम् अशोभतेति शेषः ॥३३॥ चक्षुषा हेयोपादेयबोधकेन च वृतः आसीत् इत्युत्तरेणान्वयः ॥३४-३५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अच्युतात्मनो हरिमनस्कस्य राजसूयस्य महित्वं महित्वमस्त्विति व्याख्यातं महत्त्वं तथा श्रियं च वीक्ष्यातप्यत्सन्तप्तोऽभूत् ॥३१॥ विश्वसृजा कृष्णेनोपक्लृप्ता नरेन्द्रदितिजेन्द्रसुरेन्द्रलक्ष्म्या नानाप्रातिस्विकमेतत्सम्पदो विभान्ति ताभिः पतिं द्रुपदराजसुता यस्मिन्निन्द्रप्रस्थे उपतस्थे । यस्यां लक्ष्म्यां ताभिरित्युक्त्वा पुनर्यस्यामित्येकवचनं प्रयोगतोऽयं कुरुराज एकैकस्यां विषक्तहृदयोऽतप्यत् । एकैका सम्पद्व्यक्तिर्यदा तापदा किमुवक्तव्यं समवेताः सर्वा इति कैमुत्यं सूचयतीति मन्तव्यम् ॥३२॥ यस्मिन् पुरे महिषीणां सहस्रं षोडशसहस्रं श्रोणीभरेण नितम्बबिम्बभरेण शनकैः क्वणन्तो मञ्जीरादिभिरङ्घ्रयः पादास्तैः शोभा यस्य तत् व्यस्तं समस्तं वा । शनकैरिति चलनाबलत्वादिति भावः । वक्षः सुचारुकुरुकुंकुमशोणहारं वक्षसि सुचारवः कुचास्तेषु कुंकुमा वा कुंकुमं वा तेन शोणो रक्तवर्णो हारो मुक्तामाला यस्य तत् । व्यधिकरणो बहुव्रीहिः । यद्वा यस्य वक्ष इत्यन्वयः । हारो मुक्तावलाविति विश्वः । कुंकुमोपाधिकस्तत्र रक्तिमेति भावः । चलकुण्डलकुन्तलाढ्यं चलेत्युभयविशेषणम् । श्रीमन्ति मुखानि यस्य तत् । व्यभादिति वा तमुपतस्थ इति वा ॥३३॥ विराजत इति विराट् । अधिराडिति पाठे नाधिः । स्वचक्षुषा तत्समेन क्वापि कस्मिंश्चित्प्रदेशे कदाचिदिति वा साक्षान्मघवान् कृष्णः स इव । कर्मनिर्णयाद्युदाहृत्य स्कन्धान्तरे विवृतमस्माभिरवलोकनीयम् । यस्य साक्षान् मघवानर्जुनः ॥३४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अतः परं भूभारहरणाख्यं भगवच्चरित्रं वक्तुं दुर्योधनमानभङ्गमाह एकदेति । दुर्योधनादिष्वपि भीष्मादयो ज्येष्ठा गृहे गताः । यैर्यागे कर्माणि कृतानि त एव स्थिताः । पूर्वं यागावेशात् न मात्सर्योत्पत्तिः । पश्चात्तु सहजदोषाविर्भावात् मात्सर्यं जातमित्याह तस्यान्तःपुरे श्रियं स्त्रीरूपां धनरूपां च दृष्ट्वा दैदिकोत्कर्षं राजसूयं च दृष्ट्वा । अच्युतात्मन इति भक्त्यतिशयं च दृष्ट्वा मार्गत्रयसम्पत्तौ स्वस्यापि युधिष्ठिरतुल्यत्वं मन्यमानः त्रितयमध्ये एकस्याप्यभावादतप्यत् ॥३१॥ नरेन्द्रा मनुष्यराजानः तेषां सम्पत्तिर्मानुषी । दितिजेन्द्रा दैत्यश्रेष्ठाः तेषां सम्पत्तिरलौकिकी विचित्रा । ताः सर्वा अपि नानाविधाः ताः सर्वा एव राज्ञोऽन्तःपु विभान्ति । किलेति प्रमाणम् । ननु प्रतिनियताः कथं मनुष्ये सर्वा जाता इत्याशङ्क्याह विश्वसृजोपक्लृप्ता इति । भगवता नूतन रचिताः । तेन तत्तदपेक्षयाप्युत्कर्ष उक्तः । ताभिः समृद्धिभिः सह स्वपतिं द्रुपदराजसुता उपतस्थे । ततः किमत आह यस्यां विषक्तहृदय इति । सर्वोत्कर्षोयमर्थः यथा कथञ्चित् प्राप्तः यथा पञ्चभिर्भुज्यते तथास्माभिरपि भोक्तव्यं इति तस्येच्छा, अतस्तस्यां विषक्तहृदयः कुरुराट् तदतिशयसर्वविषययुक्तः अतप्यत् परमं कामसन्तापं प्राप्तवान् ॥३२॥ एवमाद्यन्तौ दोषौ वर्णितौ, मोहं वर्णयितुं भगवत्सम्बन्धिलीलां तत्र वर्णयति यस्मिन्निति । तदा तद्दर्शनसमये मधुपतेर्भगवतः व्यामोहकस्य कोटिकन्दर्परूपस्य महिषीसहस्रं वीक्ष्य इति पूर्वेणैव सम्बन्धः । भगवतोऽपि कामपूरकत्वेन बाहुल्याच्च मोहकत्वं निरूपितम् । मोहककरणमि विशेषणमाह श्रोणीभरेणेति । नितम्बभारेण शनकैः क्वणन्तावङ्घ्री नूपुरादिभिः शोभा यस्य, नूपुरदर्शनं तच्छब्दो वा व्यामोहक इत्यर्थः । मध्ये सुचारु यत् कुचकुङ्कुमम् अनेन प्रकारविशेषेण समर्पितं कुचकुङ्कुमं निरूपितम् । मकरिकापत्रमध्ये कुङ्कुमं

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

निरूपितमिति अतिसूक्ष्मवस्त्रव्यवधानं रसजनकमेव न दृष्टिप्रतिबन्धकं तेन मोहार्थं वर्णनमुपपद्यते। तेन यः शोणो हारः कमलपत्राणीव तन्मध्ये श्रीमन्मुखं कार्यविशे भावार्थं वा चपलकुण्डलकुन्तलैः आढ्यम्। मध्ये सुचार्विति भिन्नं वा, प्रान्तस्त्रिय अपेक्षयापि मध्यस्त्रीणां रुक्मिण्यादीनामत्युत्कृष्टत्वात् ॥३३॥ एवं स्त्रीणां मोहहेतुत्वमुक्त्वा नरदेवकृतमोहहेतुं सम्पाद्य दैत्यकृतं स्थानतो मोहहेतुमाह सभायामिति। मयेन विशेषत एतदर्थमेव क्लृप्ता सभा। क्वापि कालस्यापि तथारूपे। धर्मसुतः अर्थादधर्मभङ्गं करिष्यतीति सूचितम्। अधिराडिति सामर्थ्यम्। वृतोऽनुगैर्बन्धुभिश्चेति सहायः क्रियामयः। ज्ञानक्रियारूपं सहायमाह कृष्णेनापि स्वचक्षुषेति। अनेन दुर्योधनापेक्षयापि भगवतः सन्मानना भगवत्कृतमेव प्रमाणमिति च सूचितम् ॥३४॥

श्रीसुबोधिनीसारः

एकस्मिन् कालेऽन्तःपुरे तस्य युधिष्ठिरस्य श्रियं सम्पत्तिं वीक्ष्य दृष्ट्वाच्युते कृष्णे आत्मा चित्तं यस्य तस्य महित्वं महिमानं च वीक्ष्य राजसूयस्य दुर्योधनोऽतप्यत् ॥३१॥ यस्मिन् स्थाने नरेन्द्राणां राज्ञां दितिजेन्द्राणां दैत्यानां सुरेज्यानामिन्द्रादीनां लक्ष्मीर्नानाप्रकारा विभाति किलैव विश्वसृजा मयेनोपक्लृप्ता रचिता बहुवचनपाठे तु लक्ष्मीस्थाने लक्ष्म्य इति बोध्यतामार्षत्वात्। ताभिः सम्पद्भिः सह द्रुपदराजस्य सुता द्रौपदी पतीनुपतस्थे भेजे यस्यां द्रौपद्यामासक्तचित्तः कुरुराट् दुर्योधनोऽतप्यत् ॥३२॥ यस्मिन् स्थाने श्रोण्या भरेण भारेण शनैः क्वणद्भिरङ्घ्रिभिः पादैः शोभा यस्य तत् मध्ये सुचारुरु चारुमध्यं कुचकुंकुमेन शोणा रक्तवर्णा हारा यस्य तत् श्रीमन्ति मुखानि यस्य तत्। प्रचलैर्हिण्डोलमानैः कुण्डलैः कुन्तलैराढ्यं मधुपतेः श्रीकृष्णस्य स्त्रीसहस्त्रमस्ति तदा ॥३३॥ मयरचितायां सभायां क्वापि समये काञ्चने आसनेऽधिराट् चक्रवर्ती अनुजैर्भीमादिभिर्बन्धुभिर्वृतः स्वचक्षुषा ज्ञानदेन कृष्णेनापि वृतो धर्मसुतो युधिष्ठिरः आसीनः साक्षात् मघवानिन्द्र इव पारमेष्ठ्यस्य श्रिया जुष्टः सेवितो बन्दिभिः स्तूयमानश्च ॥३४-३५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं राजसूयसमाप्तिं भगवद्गमनं च निरूप्य ततः पूर्वमेव दुर्योधनस्य मानभङ्गं सप्रसङ्गमाह-एकदेति। तस्य युधिष्ठिरस्यान्तःपुरे श्रियं सम्पदं तथा राजसूयस्य महित्वं च वीक्ष्य स्वस्य तदभावात् दुर्योधनः अतप्यत्। 'तस्य सम्पदाद्यतिशये भगवत्परत्वेन तदनुग्रह एव हेतुः' इत्याशयेनाह-अच्युते आत्मा मनो यस्य तस्येति ॥३१॥ श्रियमेव प्रपञ्चयंस्तत्परितापमाह-यस्मिन्निति द्वयेन। यस्मिन्नन्तःपुरे विश्वसृजा विश्वकर्मणा मयेन भगवता वा उपक्लृप्ता रचिता नानाविधा नरेन्द्रादीनां योग्या लक्ष्मीर्लक्ष्म्यो भोग्या विभूतयो भान्ति ताभिर्विभूतिभिः सह द्रुपदराजसुता द्रौपदी पतीन् युधिष्ठिरादीन् उपतस्थे सेवितवती। यस्यां विभूतियुक्तायां द्रौपद्यां विषक्तं हृदयं यस्य सः कुरुराट् दुर्योधनोऽतप्यत् ॥३२॥ यस्मिंश्चान्तःपुरे तदा दुर्योधनपरिहासकाले श्रोणीभरेण नितम्बभरेण च हेतुना शनकैर्गच्छदिति शेषः। क्वणद्भिरङ्घ्रिभिः शोभा यस्य तत् मध्ये सुचारु चारुमध्यमित्यर्थः। कुचकुङ्कुमैः शोणा हारा यस्य तत् श्रीमन्ति मुखानि यस्य तत् प्रचलैः चपलैः कुण्डलैः कुन्तलैश्चाढ्यं सम्पन्नम् ॥३३॥ मयदानवेन क्लृप्तायां सभायां क्वापि कदाचित् अनुजैर्बन्धुभिश्च स्वचक्षुषा चक्षुर्वद्धिता हितज्ञापकेन श्रीकृष्णेनापि परिवृतः पारमेष्ठ्यश्रिया चक्रवर्तियोग्यच्छत्रचामरादिशोभया जुष्टः सेवितः बन्दिभिश्च स्तूयमानः काञ्चने आसने आसीनः अधिराट् राजा धर्मसुतो युधिष्ठिरः साक्षात् मघवानिन्द्र इव विरेजे इति शेषेण द्वयोरन्वयः ॥३४-३५॥

अन्वितार्थप्रकाशिका

एकदेति ॥ एकदा अच्युते आत्मा मनो यस्य तस्य युधिष्ठिरस्यान्तःपुरे श्रियं सम्पदं तथा राजसूयस्य महित्वं च वीक्ष्य स्वस्य तदभावात् दुर्योधनः अतप्यत् ॥३१॥ यस्मिन्निति ।ज्ञ यस्मिन्नन्तःपुरे विश्वसृजा विश्वकर्मणा मयेन भगवता वा उपक्लृप्ता रचिता नानाविधा नरेन्द्रादीनां योग्या लक्ष्मीर्लक्ष्म्यो भोग्या विभूतयो भान्ति। पूर्वसवर्णदीर्घः आर्षः। ताभिर्विभूतिभिः सह द्रुपदराजसुता द्रौपदी पतीन् युधिष्ठिरादीन् उपतस्थे सेवितवती। राज्ञो देवांशत्वात्तङ् यस्यां विभूतियुक्तायां द्रौपद्यां विषक्तं हृदयं यस्य सः कुरुराट् दुर्योधनोऽतप्यत् ॥३२॥ यस्मिन्निति ॥ यस्मिंश्चान्तःपुरे तदा दुर्योधनपरिहासकाले श्रोणीभरेण नितम्बभरेण च

अन्वितार्थप्रकाशिका

हेतुना शनकैर्गच्छदिति शेषः । क्वणद्भिरङ्घ्रिभिः शोभा यस्य तत् मध्ये सुचारु चारुमध्यमित्यर्थः । कुचकुङ्कुमैः शोणा हारा यस्य तत् श्रीमन्ति मुखानि यस्य तत् प्रचलैः चपलैः कुण्डलैः कुन्तलैश्चाढ्यं सम्पन्नं मधुपतेः श्रीकृष्णस्य महिषीणां सहस्रमशोभतेति शेषः । इदं च बहुत्वोपलक्षणम् ॥३३॥ सभायामिति युग्मम् ॥ तस्मिन्नन्तःपुरे मयदानवेन क्लृप्तायां सभायां क्वापि कदाचित् अनुजैर्बन्धुभिश्च स्वचक्षुषा चक्षुर्वद्धिता हितज्ञापकेन श्रीकृष्णेनापि परिवृतः पारमेष्ठ्यश्रिया चक्रवर्तियोग्यच्छत्रचामरादिशोभया जुष्टः सेवितः बन्दिभिश्च स्तूयमानः काञ्चने आसने आसीनः अधिराट् राजा धर्मसुतो युधिष्ठिरः साक्षात् मघवानिन्द्र इव विरेजे ॥३४-३५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अच्युतात्मनः श्रीकृष्णासक्तमानसस्य ॥ युधिष्ठिरस्य श्रियं राज्यलक्ष्मीं ॥३१॥ यस्मिन्नन्तःपुरे नरेन्द्रादीनां लक्ष्मीर्लक्ष्म्यः ॥ विश्वसृजा विश्वकर्मणा मयेन वा उपक्लृप्ताः रचिता नाना विभान्ति ॥ ताभिः राज्यसमृद्धिभिः सह द्रुपदराजसुता कृष्णा ॥ पतीन् उपतस्थे सिषेवे यस्यां यासु एवम्भूतासु अन्तःपुरशोभासु ॥ विषक्तहृदय आसक्तचित्तः ॥ कुरुराट् दुर्योधनः मात्सर्येणातप्यत् ॥३२॥ यस्मिन् अन्तःपुरे तदा तस्मिन् काले मधुपतेः श्रीकृष्णस्य ॥ महिषीसहस्रं शुशुभे सहस्रमिति पदं षोडशसहस्रस्त्रीणामुपलक्षकं तत्कथम्भूतं क्वणद्भिर्नूपुरशब्दितैः अङ्घ्रिभिः शोभा यस्य तत् ॥ मध्ये सुचारु सुचारुमध्यमित्यर्थः कुचकुङ्कुमैः शोणा रक्ता हारा यस्य तत् श्रीमन्ति शोभितानि मुखानि यस्य तत् ॥ चपलैः कुण्डलैः कुन्तलैश्च आढ्यं युक्तम् ॥३३॥ क्वापि कदाचित् ॥ स्वस्वचक्षुषा हिताहितबोधकेन नेत्रेण यद्वा स्वस्मिन् चक्षुर्दृष्टिस्यस्य तेन ॥ यद्वा स्वकीयं चक्षुर्दृष्टिर्यस्मिन् तेन वृतः शुशुभे इति शेषः ॥३४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एकदेति ॥ मनसि परितापं प्राप्त इत्यर्थः ॥३१॥ श्रियमेव प्रपञ्चयंस्तस्य परितापमाह ॥ यस्मिन्निति ॥ यस्मिन्नन्तःपुरे, विश्वसृजा विश्वकर्मणा, उपक्लृप्ताः संरचिताः, नाना नानाविधाः, नरेन्द्रा राजानश्च दितिजेन्द्रा दैत्यवर्याश्च सुरेन्द्रा इन्द्रादयो लोकपालाश्च तेषां लक्ष्म्यः भोग्यभोगोपकरणभोगस्थानादिलक्ष्म्यः, विभान्ति किल । द्रुपदराजसुता द्रौपदी, ताभिर्लक्ष्मीभिः, पतीन् युधिष्ठिरादीन्, उपतस्थे पर्यचरत् । यस्यां द्रुपदराजसुतायां, विषक्तमासक्तं हृदयं यस्य सः, कुरुराट् दुर्योधनः, अतप्यत् परितापयुक्त आसीत् ॥३२॥ यस्मिन्निति ॥ तदा तस्मिन् काले, यस्मिन्नन्तःपुरे, मधुपतेः श्रीकृष्णस्य, महिषीसहस्रं, सहस्रमिति बहुत्वोपलक्षणम् । आसेति शेषः । कथंभूतं महिषीसहस्रं, श्रोणीभरेण नितम्बभारेण, शनकैः क्वणन्तश्चरणाभरणध्वननपूर्वकं नदन्तश्च तेऽङ्घ्रयस्तैः शोभा यस्य तत्, मध्ये, सुचारु चारुमध्यमित्यर्थः । कुचकुङ्कुमैः शोणा रक्ता हारा यस्य तत्, श्रीमन्ति शोभायुक्तानि मुखानि यस्य तत्, प्रचलैः कुण्डलैः कुन्तलैश्च आढ्यं सम्पन्नम् ॥३३॥ सभायामिति ॥ क्वापि कदाचित्, मयेन दैत्यशिल्पिनाऽसुरेण क्लृप्ता रचिता तस्याम् अपि, मयदत्तायामिति पाठे, मयेन विरच्य समर्पितायामित्यर्थः । मयविद्यायामिति पाठे, मयेन स्वविद्याप्रभावरचितायामित्यर्थः । सभायाम्, अधिराट् धर्मसुतः, स्वचक्षुषा हिताहितज्ञापकेन, कृष्णेन अपि, अनुजैः बन्धुभिश्च, वृतः परिवृतः ॥३४॥

कृष्णप्रिया

राजन् परीक्षित् ! किसी एकदिन की बात है कि भगवान के परमप्रिय भक्त महाराज धर्मराज के अन्तः पुर की सौंदर्य और संपत्ति को राजसूय यज्ञ के अवसर पर विलसित देखकर राजा दुर्योधन का मन असूया से जलने लगा ॥३१॥ राजन् परीक्षित् ! मय दानवने पांडवोके लिये जो राजभवन बना दिये थे उन महलोंमें नरपति दैत्य पति एवं सुरपतियो की अनेक विभूतियां तथा उत्तम सोंदर्य स्थान ठिकाने सुशोभित हो रहे थे उन विभूतियों के द्वारा महारानी द्रौपदी अपने पतिदेवों की सेवा करती थी । उस राजभवनमें उन दिनोमें भगवान श्रीकृष्णचन्द्र की हजारो रानियां निवास करती थी । स्थूल नितम्बो के भार के कारण जब वे उस राजभवनमें मन्द गति से चलती थी तब उनके पायलोंकी झनकार चारों ओर फैल जानी थी, उनका कटिभाग अतिशय सुंदर था एवं उनके वक्ष

स्थलो पर लगी हुई केसर की लालिमा से श्वेत मुक्ता मणियोंके श्वेत हार भी पद्मराग मणि का भ्रम कराता था कर्ण पुरो की और घुंघराली अलको की चंचलतासे उनकी वदन कमलोंकी शोभा और बढ जाती थी। यह सब दिव्य दर्शन से दुर्योधन के हृदयमें बडी जलन होती थी वास्तविक बात पूछो तो दुर्योधन का दुष्ट हृदय द्रौपदीमें आसक्त था और यही उसकी जलनका मुख्य कारण था ॥३२-३३॥ राजन् ! कीसी एक दिन की बात है राजाधिराज धर्मराज महाराज श्रीयुधिष्ठिरजी अपने भाईयों सम्बन्धियों एवं नयनों के तारे परम हितकारी भगवान श्रीकृष्ण के साथ मय दानवकी बनायी सभामें स्वर्ण सिंहासन पर देवराज इन्द्र के समान बिराजमान थे, उनकी भोग सामग्री एवं उनकी राज्य लक्ष्मी ब्रह्माजी के दीव्य ऐश्वर्य के समान दिव्य थी वन्दीजन उनकी स्तुति कर रहे थे ॥३४-३५॥

आसीनः काञ्चने साक्षादासने मघवानिव । पारमेष्ठ्यश्रिया [1]पुष्टः स्तूयमानश्च वन्दिभिः॥३५॥[2]
तत्र दुर्योधनो [3]मानी परीतो भ्रातृभिर्नृप[4] । किरीटमाली न्यविशदसिहस्तः क्षिपन् [5]रुषा॥३६॥
स्थलेऽभ्यगृह्णाद्वस्त्रान्तं जलं[6] मत्वा स्थलेऽपतत्[7]। जले च स्थलवद् भ्रान्त्या मयमायाविमोहितः॥३७॥
जहास भीमस्तं दृष्ट्वा स्त्रियो [8]नृपतयोऽपरे। निवार्यमाणा अप्यङ्ग राज्ञा कृष्णानुमोदिताः ॥३८॥[9]

कर्दमक्षमा

तत्र, मानी, दुर्योधनः, भ्रातृभिः, परीतः, किरीटमाली, असिहस्तः, रुषा, क्षिपन्, न्यविशत् ॥३६॥ मयमायाविमोहितः, स्थले, जलम्, मत्वा, वस्त्रान्तम्, अभ्यगृह्णात्, जले, च, भ्रान्त्या, स्थलवत्, मत्वा, अपतत् ॥३७॥ भीमः, स्त्रियः, अपरे, नृपतयः, राज्ञा, निवार्यमाणाः, अपि, कृष्णानुमोदिताः, हे अङ्ग, जहास, च, जहसुः ॥३८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मानी साहङ्कारः किरीटश्च माला च विद्येते यस्य सः न्यविशद्विवेश क्षिपन् द्वाःस्थादीनधिक्षिपन् ॥३६॥ तत्र स्थले वस्त्रान्तमभ्यगृह्णादाकुञ्चितवान् कुतः तस्मिन् स्थले एव भ्रान्त्या जलं मत्वा जले चापतत् कुतः स्थलवद्भ्रान्त्या ॥३७-३८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र सभायाम् ॥३६॥ आकुञ्चितवान् सङ्कोचितवान् । तत्र हेतुमाशङ्कते - कुत इति । भ्रान्तिरपि कुतस्तत्राह- मयमायेत्यादि ॥३७॥ तं दुर्योधनम् ॥३८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र तस्यां सभायां मानित्वादेव निजविभूतिबोधनार्थं किरीटमालां प्रशंसायां मत्वर्थीयः तेन तयोर्महाधनत्वं बोध्यते किञ्च वीरत्वदर्शनार्थमसिहस्तः किञ्च सहायप्रदर्शनार्थं भ्रातृभिः परीतः अत एव मानी रुषा क्षिपंश्च नितरामसङ्कोचेनाविशत् हे नृपेति। मानिनमीदृशत्वं स्यादेवेति भावः । अत एव द्वाःस्थादिभिर्भयादिनाभिगमनाद्यभावाज्जलादिपरिचायकाभावेन किं वा

---

१. जुष्टः-श्रीधर. वंशी. वीर. विज. । २.

"उपास्यमानो विप्रेन्द्रैर्नानादेशसमागतैः-दोधूयमानो धवलैबलिव्यजनसंकुलैः । रराज राजशार्दूलो दिवि देवपतिर्यथा ॥ १ ॥"

विज पाठे सार्धश्लोकोऽधिकः । अत्र त्र्यशीतितमाध्यायसमाप्तिः विज. पाठे। ३. राजा-विज. । ४. भ्रातृभिः प्रियैः-विज. । ५. न्नृपान्-वीर. । ६. हरिनीलोपलाचिते-विज. । ७. अत्र विज. पाठे सार्धश्लोकोऽधिकः

"स्थलं पुष्करिणीं मत्वा सर्वे तं जहसुर्जनाः । आगच्छन्नेवमुर्वीशः पुरः पुष्करिणीं क्वचित् ।
विलोक्य स्फाटिकां भूमिं मन्वानो न्यपतज्जले ॥१॥"

तथा "जले......."आरभ्य अर्धश्लोको नास्ति । ८. भूपाश्च केचन-विज. । ९. अत्र विज. पाठे श्लोकद्वयमधिकं दृश्यते ।

"अजातशत्रुराकर्ण्य वस्त्रस्रग्भूषणादिकम् । संप्रेषणयाह्वापयास साम्ना योगेश्वरेण च ॥१॥
तदनादृत्य सत्कारं व्रीडावनतकन्धरः । जाज्वल्यमानहृदयो न जगाम तदन्तिकम् ॥२॥"

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अभ्यस्तस्यापि वर्त्मनः प्रगाढमात्सर्य्यादिसंरम्भात्परित्यागेन विशेषतस्तु सभापर्वोक्तेन सभाशोभादर्शनार्थमितस्ततो भ्रमणेन तत्तदपरिचयाद्वस्त्राकुञ्चनादिकं ज्ञेयं तत्तद्विशेषणं च जलान्तःपतन-किरीटादिभ्रंशव्य तथा तादृशस्यापि पतनादिना व्रीडाभरस्य च द्योतनार्थमिति दिक् ॥३६॥ अन्तशब्दः स्वरूपे अधोवस्त्रमेवेत्यर्थः । स्थलवत् स्थलतुल्ये जले या भ्रान्तिस्तया जले चापतत् यतो मयस्य मायया विपरीतदृष्टिकारिशिल्पपरिपाट्या विशेषेण निजाभिमानध्वंसनादिना मोहितः अस्तु तावल्लोकपालादिमाया किञ्चास्तुतरां भगवन्मायेति तं दुर्मानिनं प्रति सोपहासो भावः तथा च सभापर्वणि —

स्फाटिकस्थलमासाद्य जलमित्यभिशङ्कया । स वस्त्रोत्कर्षणं राजा कृतवान् बुद्धिमोहितः ॥
ततः स्फाटिकतोयां तां स्फाटिकाम्बुजशोभिताम् । वापीं मत्वा स्थलमिव सवासाः प्रापतज्जले ॥

किञ्च —

जले निपतितं दृष्ट्वा किङ्करा जहसुर्भृशम् । वासांसि च शुभान्यस्मै प्रददू राजशासनात् ॥
तथागतन्तु तं दृष्ट्वा भीमसेनो महाबलः । अर्जुनश्च यमौ चोभौ सर्वे ते प्राहसंस्तदा ॥
नैवामृष्यत्तस्तेषामवहासममर्षणः । आकारं लक्ष्यमाणन्तु न स तान् समुदैक्षत ॥
पुनर्वसनमुत्क्षिप्य प्रतरिष्यन्निव स्थलम् । आरुरोह ततः सर्वे जहसुस्ते पुनर्जनाः ॥
द्वारं च विवृताकारां समापेदे पुनश्च सः । वृतेयञ्चेति मन्वानो द्वारदेशादुपारमत् ॥ इत्यादि ॥३७॥

तं दुर्योधनमिति भ्रातृभिः साहित्येऽपि तस्यैव पतनादिकमग्रगामित्वात् अपरे पाण्डवानामात्मीया नृपतयः यद्वा अन्ये च किङ्कराख्यराक्षसादयः श्रीभीमादीनां यथापूर्वं हासे श्रैष्ठ्यं कृष्णेन हासे सर्वचित्ताकर्षकेन भगवतानुमोदिताः श्रीनेत्रान्तस्मितादिना प्रेरिता इत्यर्थः । अङ्गेति श्रीभगवदनुमोदनेन राज्ञोऽपि निवारणाशक्त्या हासप्रौढत्वानुस्मरणेन सहासं सम्बोधनम् ॥३८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

साक्षान्मघवानिव पारमेष्ठ्यं साम्राज्यं तस्य श्रिया जुष्टः सेवितः; यद्वा, अहो किं वाच्यं मघवानिवेति साक्षाच्छ्रीब्रह्मैवेत्याह - पारमेष्ठ्येति; तत्र तस्यां सभायां मानित्वादेव निजविभूतिबोधनार्थं किरीटमाली; किञ्च, वीरत्वदर्शनार्थमसिहस्तस्तः; किञ्च, रुषा क्षिपन्नितरामसङ्कोचेनाविशत्; भ्रातृभिः परीत इति वक्ष्यमाणव्रीडाधिक्यबोधनार्थम् । हे नृपेति मानिनामीदृशत्वं स्यादेवेति भावः । अत एव द्वाःस्थादिभिर्भयादिनाभिगमनाद्यभावाज्जलादि-परिचायकाभावेन, किंवा नित्याभ्यस्तस्यापि वर्त्मनः प्रागाढमात्सर्य्यसंरम्भात् परित्यागेन; यद्वा, सभापर्व्वोक्तेन सभाशोभादर्शनार्थमितस्ततो भ्रमणेन तत्तदपरिचयाद्वस्त्राकुञ्चनादिकं ज्ञेयम्, तत्तद्विशेषणञ्च जलान्तःपतनेन किरीटादिभ्रंशस्य तथा तथांशस्य पतनादिना व्रीडाभरस्य द्योतनार्थमिति दिक् ॥३६॥ अन्त-शब्दः स्वरूपे अधोवस्त्रं सर्व्वमेवेत्यर्थः । वतिप्रत्ययाल्लौकिकोक्तिरीत्यानधिकार्थः, भ्रान्त्या स्थलवत् स्थलमेव मत्वा, यतो मयस्य महामायाविनो मायया विपरीत-दृष्टिकारिण्या शिल्पपरिपाट्या विशेषेण निजाभिमानध्वंसनादिना मोहितः; तथा च सभापर्व्वणि (म.भा., सभा.प. ४७/३-९) —

'स्फाटिकं स्थलमासाद्य जलमित्यभिशङ्कया । स वस्त्रोत्कर्षणं राजा कृतवान् बुद्धिमोहितः ॥
ततः स्फाटिकतोयां तां स्फाटिकाम्बुजशोभिताम् । वापीं मत्वा स्थलमिव सवासाः प्रापतज्जले ॥'

किञ्च,

'जले निपतितं दृष्ट्वा किङ्करा जहसुर्भृशम् । वासांसि च शुभान्यस्मै प्रददू राजशासनात् ॥
तथागतं तु तं दृष्ट्वा भीमसेनो महाबलः । अर्ज्जुनश्च यमौ चोभौ सर्व्वे ते प्राहसंस्तदा ॥

---

१. धर्मराजस्तु-वीर. विज. । २. श्रुकलां-श्रीधर. वंशी. वीर. विज. जीव. । ३. पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. टी. । ४. दशमस्कन्धे राजसूयदिग्विजयो द्विसप्त-गो. प्रे. टी. । ५. एकाशीतितमोध्यायः-विज. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नामर्षयत्ततस्तेषामवहासममर्षणः । आकारं लक्ष्यमाणस्तु न स तान् समुदैक्षत ॥
पुनर्वसनमुत्क्षिप्य प्रतरिष्यन्निव स्थलम् । आरुरोह ततः सर्व्वे जहसुस्ते पुनर्जनाः ॥
द्वारं च विवृताकारं समापेदे पुनश्च सः । वृतेयञ्चेति मन्वानो द्वारदेशादुपारमत् ॥' इत्यादि ॥३७॥

अपरे पाण्डवानामात्मीया नृपतयः; यद्वा, अन्ये च सभापर्व्वोक्त-मयनियुक्त-किङ्कराख्य-राक्षसादयः; श्रीभीमादीनां यथापूर्व्वं हासे श्रैष्ठ्यम्; कृष्णेन हासे सर्व्वचित्ताकर्षकेण भगवतानुमोदिताः, श्रीनेत्रान्तनिकुञ्चनादिना प्रेरिता इत्यर्थः । अङ्गेति श्रीभगवदनुमोदने राज्ञोऽपि निवारणाशक्त्या हासप्रौढत्वानुस्मरणेन सहास-सम्बोधनम् ॥३८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥३८-४०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

किञ्चासीन इति । पारमेष्ठ्यश्रिया चतुर्मुखसम्पत्सदृशा श्रिया जुष्टः सेवितः इन्द्र इवासीनः उपविष्टवान् ॥३५॥ तत्रेति । किरीटमालेऽस्य स्त इति तथा मानी साहङ्कारः असिः खड्गः हस्ते यस्य सः भ्रातृभिः दुश्शासनादिभिः परीतः परिवृतः नृपान् क्षिपन्निन्दन् तत्र सभायां न्यविशद्विवेश रुषेति पाठे द्वारपालान् क्षिपन्नित्यर्थः ॥३६॥ स्थल इति । शत्रूणां जलस्थलबुद्धिविपर्यासकारिणीं सभामाविशन् दुर्योधनः तावत्स्थले जलभ्रान्त्येति शेषः । वस्त्रान्तमभ्यगृह्णादुद्धृतवान् तथा क्वचित्स्थले जलं मत्वा न्यपतत् तथा जले च स्थलवद्भ्रान्त्या न्यपतत् जलविषयकज्ञानस्य स्थलविषयकज्ञानसारूप्यज्ञापनाय वत्करणं तदात्मिकया भ्रान्त्येत्यर्थः । भ्रान्तौ कारणं वदन्विशिनष्टि-मयस्य मायया विमोहित इति ॥३७॥ जहासेति । तमेवम्भूतं दुर्योधनं दृष्ट्वा भीमो जहास हासितवान् तथाऽन्ये नृपाश्च राज्ञा युधिष्ठिरेण निवार्यमाणा अपि भगवताऽनुमोदितास्तं पश्यतेत्येवं प्रबोधिताः जहसुः ॥३८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

द्वित्रेष्वध्यायेषु शाल्ववधमाहात्म्यं कथयति-तत्रादौ भूभारहरणहेतुदुर्योधनस्य तेजःक्षतिञ्च वक्ति तत्रेत्यादिना-तत्र सभायाम् ॥३६॥

स्थलेभ्यगृह्णाद्वस्त्रान्तं हरिनीलोपलाचिते । स्थलं पुष्करिणीं मत्वा सर्वे तं जहसुर्जनाः ॥ क ॥
आगच्छन्नेवमुर्वीशः पुरः पुष्करिणीं क्वचित् । विलोक्य स्फाटिकां भूमिं मन्वानो व्यपतज्जले ॥ ख ॥
आचितं निचितं व्याप्तम् इति हलायुधः ॥ क ॥
पुरः अग्रतः स्फटिकमणिनिबद्धाम् ॥ ख ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१७-३९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

क्षिपन् द्वाःस्थादीनाक्रोशन् ॥३६॥ स्थले वस्त्रान्तमभ्यगृह्णात् आकुञ्चितवान् तस्मिन् स्थल एव जलं मत्वा तथा जले चापतत् कुतः तस्मिन् जलेऽपि स्थलवत् स्थल एव या भ्रान्तिस्तया स्थलं मत्वेत्यर्थः । मयस्य माया द्वेष्टृजनविज्ञापनीशक्तिर्या तया विमोहितः ॥३७॥

गूढार्थदीपिनी

तत्र सभायां मानी अभिमानी न्यविशत् । किं कुर्वन् । रुषा द्वारपान् क्षिपन् निर्भर्त्सयन् सन् । किरीटं माला च विद्येते यस्य । यद्वा किरीटं मुकुटं मलते धारयतीति तथा । प्रशंसायामिनिः । **'मल मल्ल'** धारणे धातुः ॥३६॥ स्थले जलं मत्वा जले च स्थलं मत्वा अपतत् । किञ्च तत्रैव स्थले वस्त्रम् उपर्याकृष्टवान् जले च अधः कृतवानित्येवमार्द्रत्वात् स्पष्टमेव हास्यविषयः ॥३७॥ निवार्यमाणा अपि सर्वे जहसुः । कुतः । कृष्णेन अनुमोदिताः कटाक्षेण प्रेरिताः सन्तः ॥३८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

क्षिपन् द्वारपालादीनिति शेषः ॥३६॥स्थले जलं मत्वा वस्त्रान्तम् अभ्यगृह्णात् उद्धृतवान् जले च स्थलवद्भ्रान्त्या अपतत् ॥३७-३८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यश्च पारमेष्ठ्यश्रिया भाविस्वायम्भुवसम्पदा जुष्टो भीमश्च ताभ्यां पुनर्द्वाभ्यां चेत्यनुजैः साक्षान्मघवानिन्द्र इव । पारमेष्ठ्यश्रियाऽमुख्यतया राजसूयफलरूपसम्पदमिति वा । जुष्टो वन्दिभिः स्तूयमानः ॥३५॥ बालव्यजनानां संकुलानि सङ्घास्तैर्दोधूयमानोऽतिशयेन वीज्यमानः । दोधूयमान इति पाठे यङन्तात्कर्मणि शानच् यङलुङन्ततायां तु एकयकारकः पाठ इति ज्ञेयम् । दिवि देवपतिर्यथा तथा रराज ॥३६-३७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तस्य दुर्योधनप्रदर्शनार्थं विशेषतः सिंहासनस्थितिमाह आसीन इति । सुवर्णसिंहासने सर्वोत्कर्षं प्राप्य भगवानिव आसीनो जातः, साक्षादासन इति । आसनशक्तिस्तत्रैव स्थापिता । यागफलरूपपारमेष्ठ्यश्रियापि पुष्टः । बन्धुभिः स्तूयमान इति मानोन्नतिः ॥३५॥ सोऽभिमानी मां सेवकं कर्तुं अक्षपीडां वा जनयितुं स्थापयतीति भ्रातृभिः सहितः असम्मतं युद्धं वा करिष्यामीति वा निश्चित्य क्षिपन्नितस्ततः सर्वान् । किरीटमाली भूत्वा असिहस्तः प्रायेण कञ्चिन्मारयितुमिव न्यविशत् । रुषेति लौकिकन्यायेनापि तस्यादर्शनहेतुरुक्तः ॥३६॥ काचादिभिः कृत्वा तथा कृतवान् ततः स्थल एव जलबुद्ध्या वस्त्रान्त स्वभावादभ्यगृह्णात् । तत्र हेतुः जलं मत्वेति । न केवलं वस्त्रग्रहणमात्रं किन्त्वेतन्निम्नस्थानमिति जले प्रविशन्निव स्थल एवापतत् । एवं जले च स्थलबुद्ध्या सवस्त्र एव प्रविष्टः निम्नत्वात् पतितः । तत्र हेतुः स्थलवद्भ्रान्त्येति यथा स्थले पूर्वं जलभ्रमो जात । एवमत्रापि स्थले जात इत्यर्थः । तत्राप्रत्याख्येयहेतुमाह मयमायाविमोहित इति । यो हि दुष्टः साभिमानः क्रोधेन तं देशं प्रविशति तस्य भ्रमो भवतीति काचिन्माया देवतारूपा तस्यां सभायां मयेन स्थापिता सा तथैव विरुद्धं भ्रामयतीति मायया विमोहित ॥३७॥ ततो यज्जातं तदाह जहासेति । तमन्धमिव दृष्ट्वा भीमस्तत्प्रतिकूलैकस्वभावः । स्त्रियः सर्वाः स्वभावतः । अपरे नृपतय ये न दुर्योधनसम्बन्धिनः । ननु राजसभायां हास्यमनुचितमिति चेत् । तत्राह निवार्यमाणा अपीति । राज्ञा निवार्यमाणा अ स्वतोऽनुचितस्य का वार्ता । तत्र हेतुः कृष्णानुमोदिता इति । अन्तःकरणे बहिश्च । एतदर्थमेवैतावानुद्यम इति ॥३८॥

श्रीसुबोधिनीसारः

तत्र तस्यां सभायां मानी साभिमानो दुर्योधनो भ्रातृभिः परीतः सर्वत आवृतः किरीटं मुकुटं च माला च विद्यन्ते यस्य सोऽसिहस्तः खड्गकरः रुषा क्रोधेन क्षिपन् द्वाःस्थान् अभिभवन् न्यविशत् ॥३६॥ स्थले जलं म वस्त्रान्तमाकुञ्चितवान् ऊर्ध्वं कृतवान् । जले च स्थलवत् भ्रान्त्याऽपतत् । तत्र स्थले मयस्य मायया विमोहितः ॥३७॥ दुर्योधनं दृष्ट्वा भीमो जहास । नृपतयो राजानोऽपरे जनाः स्त्रियश्च जहसुः । राज्ञा युधिष्ठिरेण निवार्यमाणा अपि कृष्णेनानुमोदि एवं कुरुत इति प्रेरिताः हे अङ्ग ॥३८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मानी साहङ्कारः, अनेन तस्य दुष्टचित्तत्वं लक्ष्यते। अत एव भ्रातृभिर्दुःशासनादिभिः परीतः परिवृतः असिहस्तः किरीटं च माला च विद्येते यस्येति किरीटमाली। यद्वा। महार्घ्यकिरीटमालाः किरीटाग्राणि तद्वान्। प्रशंसायामिनिः। दुर्योधनः रुषा द्वारपालादीन् क्षिपन् क्रोशन् हे नृप ! तत्र सभायां न्यविशदित्यन्वयः ॥३६॥ तत्र च स्थले वस्त्रान्तम् अभ्यगृह्णात् उद्धृतवान्। तत्र हेतुमाह - स्थले एव भ्रान्त्या जलं मत्वेति। तथास्थलवद्भ्रान्त्या जलमेव स्थलं मत्वा जले च अपतत्। तत्र भ्रान्तौ हेतुमाह- मयमायाविमोहित इति सभानिर्माणकर्त्रा मयेन यो हि कश्चिद्दुष्टचित्तोऽत्र प्रविशेत्स एवं भ्रान्तो भवत्विति काचिन्माया देवतारूपा तत्र स्थापिता, तया विमोहित इत्यर्थः ॥३७॥ तमेवम्भूतं दुर्योधनं दृष्ट्वा भीमो जहास तथा स्त्रियः परे नृपतयश्च राज्ञा युधिष्ठिरेण निवार्यमाणा अपि कृष्णेनानुमोदिताः कटाक्षेण प्रेरिताः सन्तो जहसुः ॥३८॥

अन्वितार्थप्रकाशिका

तत्रेति मानी साहङ्कारः भ्रातृभिर्दुःशासनादिभिः परीतः परिवृतः असिहस्तः किरीटं च माला च विद्येते यस्येति किरीटमाली। यद्वा। महार्घ्यकिरीटमालाः किरीटाग्राणि तद्वान्। प्रशंसायामिनिः। दुर्योधनः रुषा द्वारपालादीन् क्षिपन् क्रोशन् हे नृप ! तत्र सभायां न्यविशत्। तडभाव आर्षः ॥३६॥ स्थल इति ॥ सभानिर्माणकर्त्रा मयेन यो हि कश्चिद्दुष्टचित्तोऽत्र प्रविशेत्स एवं भ्रान्तो भवत्विति काचिन्माया देवतारूपा तत्र स्थापिता। तया विमोहितः सः स्थले एव भ्रान्त्या जलं मत्वा तत्रैव स्थलेऽपि वस्त्रान्तम् अभ्यगृह्णात् आकुञ्चितवान्। इत्येकवाक्येऽपि स्थलशब्दद्वयान्वयः सह्यः। तथास्थलवद्भ्रान्त्या जलमेव स्थलं मत्वा जले च अपतत्। अत्राधिक्षेपभयादेव द्वाःस्थादयो मार्गदर्शनार्थं नागमन्निति ज्ञेयम् ॥३७॥ जहासेति ॥ अङ्ग हे राजन् ! तमेवम्भूतं दुर्योधनं दृष्ट्वा भीमो जहास तथा स्त्रियः परे नृपतयश्च राज्ञा युधिष्ठिरेण निवार्यमाणा अपि कृष्णेनानुमोदिताः कटाक्षेण प्रेरिताः सन्तो जहसुः ॥३८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पारमेष्ठ्यश्रिया चक्रवर्तित्वशोभया ॥३५॥ भ्रातृभिः दुःशासनादिभिः परीतः वृतः द्वे किरीटमाले विद्येते यस्य सः क्षिपन् द्वारपालादीन् तिरस्कुर्वन् ॥३६॥ स्थले काचरचितभूम्यां जलं मत्वा ॥ स्थले वस्त्रान्तं परिधानीयं वस्त्रप्रान्तम् अभ्यगृह्णात् ऊर्ध्वं कृतवान् जले स्थलवद्भ्रान्त्या चाऽपतत् ॥ गर्वपर्वतमारूढं दुर्योधनमनो बत ॥ तद्देहः पतितो गोष्ठ्यां चूर्णितो गर्वपर्वत इति वदन्त्यभियुक्ताः ॥३७॥ राज्ञा निवार्यमाणा अपि कृष्णेनानुमोदिताः ॥ नेत्रप्रान्तभागेन स्मितेन च प्रेरिताः सन्तः जहसुः ॥३८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आसीन इति ॥ काञ्चने स्वर्णनिर्मिते, आसने आसीनः, अत एव पारमेष्ठ्यश्रिया, जुष्टः सेवितः, साक्षात् मघवानिन्द्रः इव, बन्दिभिः स्तूयमानश्च सन्, विरेजे इति शेषः। इति द्वयोरेकसंबन्धः ॥३५॥ तत्रेति ॥ किरीटं च माला च ते विद्येतेऽस्येति, मानी साहङ्कारः, असिःखड्गः हस्ते यस्य सः, रुषा क्रोधेन, क्षिपन् द्वाःस्थादीनधिक्षिपन्, भ्रातृभिः परीतः संवृतः, दुर्योधनः, हे नृप, तत्र सभायां, न्यविशत्। नृपानिति पाठे, क्षिपन्नित्यस्य नृपानित्यनेनान्वयः ॥३६॥ स्थल इति ॥ स्थले काचचातुर्याज्जलभ्रान्तिकरभूप्रदेशे इत्यर्थः। स्थले सत्यपि, जलं मत्वा, वस्त्रान्तम्, अभ्यगृह्णात्। जले च, स्थलवद्भ्रान्त्या, काचचातुर्यजभ्रान्त्या जलवति प्रदेशेऽपि स्थलभ्रमत इत्यर्थः। अपतत्। कुतः। मयमायाविमोहितः मयमायाकृतविमोहवशत इत्थं जातमिति भावः ॥३७॥ जहासेति ॥ तत् दुर्योधनपतनं दृष्ट्वा, भीमः, जहास। अङ्ग हे राजन्, राज्ञा युधिष्ठिरेण, वार्यमाणाः अपि, कृष्णानुमोदिताः सन्तः, अपरे नृपतयः, स्त्रियश्च, जहसुः ॥३८॥

कृष्णप्रिया

उस अवसर पर अविनयी अभिमानी दुर्यधन अपने दुःशासन आदि भ्राताओंके साथ वहां आया, उसके मस्तक पर मुकुट गलेमें माला और हाथमें खडग था। राजन् क्रोधवश दुर्योधन द्वारपालो और सेवको को झाड रहा था ॥३६॥ उस सभामें मयदानवनें एसी माया फैला रखी थी की दुर्योधनने उस माया से मोहित होकर स्थल

कृष्णप्रिया

को जल समझकर अपने वस्त्र समेट लिये और जल को स्थल समझकर दुर्योधन उसमें चीपक गया और गीर पड़ा ॥३७॥ उसको चिपकते देखकर भीमसेन, राजा-रानियां तथा दूसरे नरपति हंसने लगे । महाराज युधिष्ठिर एसा करने से रोक रहे थे परन्तु उन्हे इशारों से भगवान श्रीकृष्ण का अनुमोदन प्राप्त हो चूका था ॥३८॥

स व्रीडितोऽवाग्वदनो रुषा ज्वलन्निष्क्रम्य तूष्णीं प्रययौ गजाह्वयम् ।
हाहेति शब्दः सुमहानभूत्[१] सतामजातशत्रुर्विमना इवाभवत् ।
बभूव तूष्णीं भगवान् भुवो भरं [२]समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा ॥३९॥
[३]एतत्तेऽभिहितं राजन् यत् पृष्टोऽहमिह त्वया । [४]दुर्योधनस्य दौरात्म्यं राजसूये महाक्रतौ ॥४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे [५]पञ्चसप्ततितमोऽध्यायः ॥७५॥

कर्दमक्षमा

सः, व्रीडितः, अवाग्वदनः, रुषा, ज्वलन्, तूष्णीम्, निष्क्रम्य, गजह्वयम्, प्रययौ, तदा, सताम्, हा हेति, महान्, शब्दः, अभूत्, अजातशत्रुः, विमनाः, इव, अभवत्, भुवः, भारम्, सञ्जिहीर्षुः, भगवान्, तूष्णीम्, बभूव, यद्-दृशा, भ्रमति स्म ॥३९॥

राजन्, राजसूये, महाक्रतौ, दुर्योधनस्य, दौरात्म्यम्, त्वया, यत्, अहम्, पृष्टः, तत्, ते, अभिहितम् ॥४०॥

॥ इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे पञ्चसप्ततितमाध्यायान्वयाःऽध्यायः ॥७५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भुवो भरं भारं जिहीर्षुरिति अद्य सम्पादितेन कलहबीजेन कुरूणां संहारं करिष्यामीति मत्वेति किञ्च यस्य दृशा दृष्टिमात्रेण दुर्योधनो भ्रमति स्म भ्रान्तिं प्राप मयमाया तु निमित्तमात्रम् । स भूभारहरणबीजं दुर्योधनस्य भ्रमं भीमादिहास्येन च तस्य पराभवं विधाय तूष्णीमासीदित्यर्थः ॥३९-४०॥

॥ इति श्रीमद्भागवते दशमस्कन्धे श्रीधरस्वामिविरचितायां भावार्थदीपिन्यां पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स दुर्योधनः । बीजहेतुमाह-किञ्चेति । यस्य कृष्णस्य । स कृष्णः । तस्य दुर्योधनस्य । इत्यर्थ इति - भीमं हास्या वारितवान् दुर्योधनं च न सांत्वितवानिति भावः ॥३९॥ यत्त्वया दुर्योधनस्य दौरात्म्यमुद्दिश्येति शेषः । अहं पृष्ट एतदिति योज्य ॥४०॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अर्वाग्वदनोऽधोमुखः हाहेति महादुष्टात्तस्मादनिष्टशङ्कया अजातशत्रुत्वाद्राजा तु सहजकृपया विमना इवाभूत् ईषद्दुःखितोऽभू बभूवेत्यर्धकं तूष्णीं बभूव निजाभीष्टसिद्धेः अभीष्टमेवाह-भुव इति । अत्र जिहीर्षुरुच्चैरिति पाठः टीकासम्मतः समुज्जिहीर्षुरि पाठो बहुत्र ॥३९॥ राजसूय इति तदन्त इत्यर्थः ॥४०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स दुर्य्योधनः, तूष्णीं निष्क्रम्य सभाया निःसृत्य; तत्र हेतुः - व्रीडित इत्यादि । व्रीडितत्वादेवावाग्वदनोऽधोमुखः स

---

१०. नभूत्तदा वीर. विज. । ११. जिहीर्षुरात्मेहितमात्मनि स्मरन्-विज. । १२. विज.पाठे श्लोको नास्ति । १३. सुयोधनस्य-श्रीधर. वंशी. वीर. विज.। पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. टी. ।

किञ्च, रुषेति प्रसभं श्रीयुधिष्ठिरेण भृत्यादिद्वारा, किंवा तद्भ्रातृभिरनुनीयमानोऽपि हठाद् ययौ ॥ हाहेति महादुष्टात्तस्मादनिष्टशङ्कया; अजातशत्रुरिति तस्मिन्नपि स्वतो द्वेषाभावः सूचितः। अतः सहजकृपया विमना इव ईषद् दुःखितोऽभूत्; यद्वा, इवेति श्रीकृष्णप्रसादात्

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सर्व्वमङ्गलं भावीत्यनुसन्धानेन तत्त्वतो वैमनस्याभावात् तूर्ष्णीं बभूव, निजाभीष्टसिद्धेः। अभीष्टमेवाह - भुव इति। तत्रैव हेतुः- भगवान् दुष्टसंहारेण शिष्टपालनेन च स्वभक्तिविस्तारणायाशेषैश्वर्य्यप्रकटनार्थमवतीर्णः साक्षात् परमेश्वरः; यद्वा, भगवान् सर्व्वज्ञः पाण्डवादिदुःखबीजं जानन्नपि तूर्ष्णीं बभूव। तत्र हेतुः - भुव इति। यद्वा, सर्व्वशक्तिमान्, अत एवोच्चैर्भ्रमति स्म, अन्यथा मयमायायास्तादृशशक्त्यसम्भवादिति ॥३९॥ यद्दुर्य्योधनस्य दुःखकारणमिह सभामध्येऽहं पृष्टः; यद्वा, इह गङ्गातीरे एतत्तेऽभिहितं मया, अतोऽन्यत्रान्यथात्वं नास्ति, कारणान्तरं च न मन्तव्यमिति भावः। तदेव विवृणोति - दुर्य्योधनस्येति। महाक्रतावपि दौरात्म्यं दुष्टचित्तत्वमेव, न च केनापि कृतं तदवमानादिकमन्यत् किञ्चिदित्यर्थः। तत्रैव हेतुं सूचयति - सुष्ठु युध्यत इति तथा तस्येति। महावीराभिमानादिति हे राजन्निति च सर्व्वसद्गुणवता त्वया तच्च बुध्यत एवेति भावः ॥४०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्द्धे श्रीश्रीलसनातनगोस्वामिपाद-कृतायां श्रीबृहद्वैष्णवतोषण्यां
दशमटिप्पण्यां पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥३८-४०॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स इति। स दुर्योधनो लज्जितोऽधोमुखो गजाह्वयं हास्तिनपुरं ययौ तदा सुमहानुच्चैर्हाहा दुर्योधनोऽवमानित इति शेषः। इत्येवम्विधः शब्दो बभूव अजातशत्रुर्युधिष्ठिरो विमनाः खिन्नमना इवाभवत् इवशब्दोऽनतिरिक्तार्थकः ॥३९॥ प्रश्नस्योत्तरमुक्तं निगमयति-एतदिति। हे राजन्! यत्प्रत्यहं त्वया पृष्टः तस्यैतदुत्तरं तुभ्यम् इतीत्थमभिहितं किं तत् यत् दुर्योधनस्य दौरात्म्यं युधिष्ठिरसम्पदवलोकनजपरितापरूपं दौर्जन्यमिति ॥४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

॥३७-४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यस्यां पूर्वोक्तायां श्रियाम् ॥४०॥

॥ इति श्रीमद्भागवते दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-४०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे **श्रीनाथचक्रवर्तिपादविरचितायां चैतन्यमञ्जूषायां**
पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्त्र्यादयोऽपि जहसुः राज्ञा नेत्रेङ्गितेन मा हसतेति निवार्यमाणा अपि कुतः कृष्णेनानुमोदिताः हसतेति भ्रुवा दत्तानुमतय इत्यर्थः । भुवो भारं हर्तुमिच्छुः कलहबीजोत्थापनादिति भावः । यस्य दृशा दृष्टिमात्रेणैव दुर्योधनो भ्रमति स्म मयमाया तु निमित्तमात्रमिति भावः ॥३८-४०॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । पञ्चसप्ततितमोऽध्यायो दशमेऽजनि सङ्गतः ॥७५॥

गूढार्थदीपिनी

दुर्योधनः व्रीडितः सन् अधोमुखो भूत्वा सभातो निष्क्रम्य तूष्णीमेव गजाह्वयं हस्तिनापुरं प्रययौ । तदा सतां हाहेति भाव्यनर्थसूचकः शब्दोऽभूत् । युधिष्ठिरस्तु अजातशत्रुत्वात् तद्दुःखेन दुःखितमना एवाभवत् । एवार्थे इव शब्दः ॥३९॥ बभूवेत्यर्द्धम् । भगवांस्तु तूष्णीं बभूव किञ्चिन्नोवाच । भीमं हास्यान्न निवारितवान् दुर्योधनं च न सान्त्वितवान् । कुतः । भुवो भारं कलहबीजेन सम्यं उद्धर्तुमिच्छुः । दुर्योधनस्तु यस्य भगवतो दृशा भ्रमति स्म भ्रान्तिं प्राप मयदानवमाया तु निमित्तमात्रम् ॥४०॥ राजसूये सुयोधनस्य दौरात्म्यमसन्तोषकारणमुद्दिश्य यत् त्वयाऽहं पृष्टः तत् एतदिति योज्यम् ॥४१॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यां पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यमभीमादिरूपो जनो दुर्योधनो वा यद्दृशा भ्रमति स्म स भगवान् तूष्णीं बभूव ॥३९-४०॥

श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवसिद्धान्तप्रदीपे पञ्चसप्ततितमाध्यायार्थप्रकाशः ॥७५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ इति श्रीभागवतटिप्पण्या सत्यधर्मकृतायां दशम उत्तरार्धे पञ्चाशीतितमोऽध्यायः ॥१०-८५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो यज्जातं तदाह स व्रीडित इति । अवाग्वदनो बहिः । ततोऽपमानेन जातो महान् रोषः तेन ज्वलन्निव तस्मात् स्थानात् भीमभर्त्सनमकृत्वैव तूष्णीं निष्क्रम्य तूष्णीं राजानं गमिष्यामीत्यननुज्ञाप्य गजाह्वयमेव प्रययौ । यमुनामुत्तीर्य गत एव । ततो महान् बन्धुरेवं गत इति हाहेति शब्दः सुमहानभूत् सोऽपि सतामेव भूतानुकम्पिनाम् । राजा च अजातशत्रुत्वाद्विमना अभवत् । इवेति भगवदनुमोदनात्किञ्चिदस्तीति ज्ञातवान् । भगवांस्तु नोपहासं न वा विषादं किमपि कृतवानित्याह बभूव तूष्णीमिति । पुनः सन्माननायां भूभारहरणं न भवेत् तन्मारणे वा पाण्डवानां गर्वो न गच्छेदिति । भगवान् सर्वसमस्तूष्णीमास । यतो भुवो भा जिहीर्षुः । नन्वेवं कृते कथं भूभारहरणं भविष्यतीत्याशङ्क्याह यद्यस्मात् कारणात् भगवान् दृशा ज्ञानचक्षुषा ज्ञानेनैव सह भ्रमति साध्यसाधनभावः सर्वोऽपि तस्य प्रत्यक्ष इत्यर्थः । स्मेति सर्वलोकवेदप्रसिद्धिरत्र प्रमाणं निरूपितम् ॥३९॥ उक्तमुपसंहरति एतत्तेऽभिहितमिति । राजन्निति स्नेहान्महत्सम्बोधनम् । एतस्य चरित्रस्य निरोधोपयोगित्वं नास्तीति शङ्काव्युदासार्थं त्वया पृष्टं चे तदोक्तमित्याह यत्पृष्टोऽहमिह त्वयेति । त्वया मानभङ्गे हेतुः पृष्टः । तत्र दुर्योधनस्य दौरात्म्यमेव मानभङ्गहेतुरित्युत्तरं दौरात्म्यं निरूपितमभिमानरूपम् । तच्च राजसूये समागतस्य कर्तुमनुचितं न हि धर्मार्थमागतोऽभिमानं करोति तत्रापि महाक्रतौ निरभिमानतयै तत्र गन्तुमुचितमित्यर्थः ॥४०॥

इति श्रीभागवतसुबोधिन्यां लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धोत्तरार्धविवरणे
षड्विंशाध्यायविवरणम् ॥२६॥७५॥

श्रीसुबोधिनीसारः

व्रीडितो लज्जितोऽवाग्वदनोऽधोमुखः स दुर्योधनो रुषा ज्वलन् ततो निष्क्रम्य तूष्णीं मौन। हस्तिनापुरं जगाम । स सज्जनानां तत्र स्थितानां वा हाहा इति सुमहान् शब्दोऽभूत् । अजातशत्रुर्युधिष्ठिरो विमना इवाभवत् । भुवः पृथिव्या भरं भा

श्रीसुबोधिनीसारः

समुज्जिहीर्षुः संहर्तुमिच्छुर्भगवान् तूष्णीं बभूव । "कलिमुत्पाद्य कुरुषु भूभारमहरत्प्रभुः" इत्युक्तेः । यस्य हरेर्दृशा दृष्टिमात्रेण दुर्योधनो भ्रमति स्म एतेन मयमायानिमित्तं स्वयं च परनिमित्तमिति ध्वन्यते ॥३९॥ हे राजन् । महाक्रतौ राजसूये दुर्योधनस्य दौरात्म्यमप्रसन्नता इतीह यत् त्वयाहं पृष्टः तदेतत्ते तुभ्यमभिहितमुक्तम् ॥४०॥

॥ इति श्रीमद्भा० दशमस्कन्धे सुबोधिन्यां टीकायां पञ्चसप्ततितमोऽध्यायः ॥७५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स दुर्योधनः तेनोपहासेन व्रीडितो लज्जितः अत एव अवाग्वदनः अधोमुखः रुषा क्रोधाग्निना ज्वलन् तूष्णीं राजानं प्रति स्वगमनप्रश्नादिकमकृत्वैव सभातो निष्क्रम्य गजाह्वयं हस्तिनापुरस्थं स्वपुरं ययौ । एतस्य दुर्योधनापानस्य द्वेषद्वारा समग्रकुलविनाशहेतुत्वात् भाव्यनर्थसूचकः सतां सत्पुरुषाणां हा हेति महान् शब्दोऽभूत् । अजातशत्रुः युधिष्ठिरः विमना इवाभवत् । सर्था मनोराहित्ये निश्चेतनत्वप्रसङ्गाद्व्याकुलतामात्रसूचकः इवशब्दः ॥३९॥ भगवान् श्रीकृष्णस्तु तूष्णीमेव बभूव । तत्र हेतुमाह-भुवो भारं समुज्जिहीर्षुरिति । दुर्योधनसान्त्वने परस्परवैराभावेन भूभारावतारहेतुः युद्धं न स्यादित्याशयः । 'वस्तुतस्तु भूभारहरणहेतुकलहबीजदुर्योधनापमानः स्वदृष्टया तद्भ्रान्त्युत्पादनेन तेनैव कृतः, तस्य तत्र विदमानत्वे तदिच्छां विना मयमायया अकिञ्चित्करत्वात्' इत्याह-यस्य दृशा दृष्टिमात्रेण दुर्योधनो भ्रमति स्म भ्रान्तिं प्रापेति ॥४०॥ उक्तं प्रश्नोत्तरं निगमयति-एतदिति । हे राजन् ! त्वया यत् इह महाक्रतौ राजसूये दुर्योधनस्यासन्तोषकारणमहं पृष्टस्तदेतत् सुयोधनस्य दौरात्म्यं ते तुभ्यं मयाऽभिहितं कथितमित्यन्वयः ॥४१॥

इति श्रीवल्लभाचार्य-वंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र सात्त्विकानां निरोधने । पञ्चसप्ततितमोऽगादध्यायो विवृतिं शुभाम् ॥३॥
दुर्योधनस्य दौरात्म्यान्मानभङ्गनिरूपकः ॥७५॥

अन्वितार्थप्रकाशिका

स इति ॥ स दुर्योधनः तेनोपहासेन व्रीडितो लज्जितः अत एव अवाग्वदनः अधोमुखः रुषा क्रोधाग्निना ज्वलन् तूष्णीं राजानं प्रति स्वगमनप्रश्नादिकमकृत्वैव सभातो निष्क्रम्य गजाह्वयं हस्तिनापुरं ययौ । तस्माद्दुष्टानिष्टशङ्कासूचकः भाव्यनर्थसूचको वा सतां सत्पुरुषाणां हा हेति महान् शब्दोऽभूत् । अजातशत्रुर्युधिष्ठिरः विमना इव । इव एवार्थे । अजातशत्रुत्वात्तद्दुःखेन दुःखितः अभवत् ॥३९॥ बभूवेत्यर्द्धम् ॥ भुवो भरं भारं समुज्जिहीर्षुः अद्य सम्पादितेन कलहबीजेन कुरूणां संहारं करिष्यामीति मत्वा भगवान् श्रीकृष्णस्तु तूष्णीमेव बभूव । यस्य भगवतः दृशा दृष्टिमात्रेण दुर्योधनो भ्रमति स्म भ्रान्तिं प्राप । मयमाया तु निमित्तमात्रम् । भूभारहरणबीजं दुर्योधनस्य भ्रमं भीमादिहास्येन च तस्य पराभवं विधाय तूष्णीमासीदित्यर्थः ॥४०॥ एतदिति ॥ हे राजन् ! त्वया यत् इह महाक्रतौ राजसूये दुर्योधनस्यासन्तोषकारणमहं पृष्टस्तदेतत् सुयोधनस्य दौरात्म्यं ते तुभ्यं मयाऽभिहितं कथितम् ॥४१॥

॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे व्यदधात्पञ्चसप्तते: ॥

॥ इति श्रीमद्भागवते दशमेऽन्वितार्थप्रकाशिकायां पञ्चसप्ततितमोऽध्यायः ॥७५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अवाग्वदनः अधोमुखः रुषा ज्वलन् सन् जलात् निष्क्रम्य तूष्णीं भूत्वा ॥ सतां साधुपुरुषाणां तदेति वा पाठः । भुवो भारं सम्यक् उज्जिहीषुर्भगवान् तूष्णीं बभूव ॥ यस्य श्रीकृष्णस्य दृशा दृष्ट्यैव दुर्योधनो भ्रमति स्म भ्रान्तिं प्राप्तवान् इदं कलहरूपं भूभारहरणबीजं श्रीकृष्णेनैवोत्पादितं मयमाया तु निमित्तमात्रमस्तीति भावः ॥३९-४०॥

॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्र-श्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने दुर्योधनमानभङ्गो नाम पञ्चसप्ततितमोऽध्यायः ॥७५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति ॥ स दुर्योधनः, व्रीडितो लज्जितः, अत एव, अवाग्वदनोऽधोमुखः, रुषा क्रोधेन, ज्वलन् सन्, निष्क्रम्य, तूष्णीं, गजाह्वयं हस्तिनापुरं, प्रययौ। सतां सुमहानुच्चैः, हाहा इति, दुर्योधनोऽपमानित इत्येवंविध इत्यर्थः। शब्दः, अभूत्। अजातशत्रुर्युधिष्ठिरः, विमनाः इव, अभवत्। यद्दृशा यस्य दृष्टिमात्रेण, भ्रमति स्म दुर्योधनः भ्रान्तिं प्राप। भुवः पृथिव्याः, भरं भारं, समुज्जिहीर्षुः, सः भगवान्, तूष्णीं बभूव ॥३९॥ एतदिति ॥ हे राजन्, इह यत् अहं, त्वया पृष्टः, तस्य एतत् उत्तरं, ते तुभ्यम्, अभिहितम्। किं तत्, महाक्रतौ राजसूये, सुयोधनस्य, दौरात्म्यं, युधिष्ठिरसंपदवलोकनजातपरितापरूपदौर्जन्यमित्यर्थः ॥४०॥

॥ इति श्रीधर्मधुरंधरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुत-
श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां
दशमस्कन्धोत्तरार्धे पञ्चसप्ततितमोऽध्यायः ॥७५॥

कृष्णाप्रिया

इस प्रसंगसे दुर्योधन लज्जित हो गया और उसका रोम रोम क्रोधसे जलने लगा और वह दुर्योधन अपना मुंह लटकाकर इस सभामंडपसे निकल कर हस्तिनापुर चल पडा इस घटना को देखकर सत्पुरुषों में हा हा कार मच गया और धर्मराज युधिष्ठिर का मन भी सर्वथा खिन्न सा हो गया। महाराज ! यह सब होने पर भी भगवान श्रीकृष्ण चूप थे, क्योंकि उनकी ईच्छा थी कि किसीभी प्रकार पृथ्वी का भार उतर जाय और सच पूछो तो उन्हीं की दृष्टि से दुर्योधन को वह भ्रम हुआ था ॥३९॥ महाराज ! आपने मुझसे यह पूछा था कि उस महान राजसूय यज्ञमें दुर्योधन को जलन क्यों हुइ, सो वे सब प्रसंग मेने तूम्हें बतला दिया ॥४०॥

॥ अध्याय ७५ समाप्त हुआ ॥

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ षट्सप्ततितमोऽध्यायः ॥

श्लोकाः	अनु.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
३३	३३	२	१०५६	१२	४०	११०८	३४॥	४

श्रीशुक उवाच[1]

अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप । क्रीडानरशरीरस्य यथा सौभपतिर्हतः ॥१॥

कर्दमक्षमा

नृप ! क्रीडानरशरीरस्य, कृष्णस्य, अन्यद्, अपि, अद्भुतम्, कर्म, यथा, सौभपतिः, हतः, तत्, शृणु ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

ततः षट्सप्ततितमे वृष्णिशाल्वमहामृधे । द्युमद्गदाप्रहारेण रणात्प्रद्युम्ननिर्गमः ॥

सम्पाद्य धर्मराजस्य राजसूयमहोदयम् । निहत्य सौभराजादीनथोपारमदच्युतः ॥

॥१-३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो महाभारतबीजवपनोत्तरम् (१) । अथ सौभराजादिवधोत्तरम् (२) । अथ युधिष्ठिरराजसूयानन्तरम् ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

अथानन्तर्ये तदानीमेवेन्द्रप्रस्थाच्छ्रीद्वारकामागतेन भगवता साल्वस्य वधात् तच्चाग्रे व्यक्तं भावि अद्भुतत्वे हेतुः क्रीडामयं नरशरीरं प्रसिद्धमनुष्याकारो विग्रहो यस्य तस्य तेन विचित्रमधुरक्रीडाविस्तारणादित्यर्थः । किं तदित्यपेक्षायामाह-यथेति । येन प्रकारेण हतस्तत्प्रकारकं कर्म ॥१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ आनन्तर्ये, तदानीमेवेन्द्रप्रस्थाच्छ्रीद्वारकामागतेन श्रीभगवता साक्षात्तस्य वधात्, तच्चाग्रे व्यक्तं भावि । अद्भुतत्वे हेतुः क्रीडामयं नरशरीरं मनुष्याकारो यस्य तस्य तेन विचित्रमधुरक्रीडाविस्तारणादित्यर्थः; यतः कृष्णस्य जगच्चित्ताकर्षकलीलस्य । हे नृपेति तच्छ्रवणे सर्वलोकपालकस्त्वमेव योग्य इति भावः । किं तदित्यपेक्षायामाह-यथेति । येन प्रकारेण हतस्तत्प्रकारं कर्म, किंवा यथा यत् सौभस्य पतिरिति कृच्छ्र(कृष्ण)वध्यत्वं सूचितम् ॥१॥

---

[1] विज. पाठे एतदारभ्यद्वौ श्लोको न स्तः ।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-३॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथ साल्ववधात्मकं भगवच्चेष्टितमनुवर्णयितुं प्रस्तौति षट्सप्ततितमत्वेन-अथेति । क्रीडार्थं नरस्येव शरीरं यस्य तस्य श्रीकृष्णस्याद्भुतमन्यदपि चेष्टितं शृणु किन्तदित्यत आह-यथेति । यथा सौभपतिः सौभं नाम पुरं तस्य पतिः शाल्वो यथा येन प्रकारेण हतः तथा तस्य हननमित्यर्थः ॥१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

(मूलम्)

बभूव तूष्णीं भगवान् भुवो भरं जिहीर्षुरात्मेहितमात्मनि स्मरन् ।
तदाऽऽविरासीज्जगदीशसंज्ञितौ मुनिः सुराराधितपादपङ्कजः ॥क॥
उपेत्य नारदः सर्वैः सदस्यैरभिपूजितः । कृष्णेनाभ्यर्चितः सम्यगुपविष्टो नृपान्तिके ॥ख॥
उवाच धर्मराजस्तं प्रणिपत्य यथाविधि । भवान् सर्वत्रगो ब्रह्मन् सर्वकालेष्वसङ्गतः ॥ग॥
नृपाणां शौर्ययुक्तानां सर्वमण्डलवासिनाम् । इदानीं कतमः शूरो नित्योद्योगेन वर्तते ॥घ॥
इति तेनोदितां वाणीमाकर्ण्यमुनिरब्रवीत् ॥ङ॥
नारद उवाच
भग्नदर्पा नृपाः सर्वे कृष्णेनाऽप्रतिमोजसा । वसन्ति विषये स्वे स्वे नष्टचेष्टा गतश्रियः ॥च॥
एक एव महोत्साहः क्षत्रियाणां दुराग्रही । जातः शाल्वेषु नृपतिर्बहुपादातिवाहतः ॥छ॥
भ्रातर्युपरते युद्धे विष्णुना लोकजिष्णुना । ब्रह्मदत्तसुते हंसे यमुनायां महात्मना ॥ज॥
कृष्णाद्विडेत्य राज्ञोऽसौ रुक्म्यादीन् कुण्डिने पुरे । समाजं कारयामास भ्रातुरानृण्यकाङ्क्षया ॥झ॥
शिशुपालद्रुममुखैर्दन्तवक्त्रपुरःसरैः । पराजितेषु संग्रामे जरासन्धादिषु प्रभो ॥ञ॥
योगेश्वरेण श्रीकृष्णेनानुज्ञातः साम्ना सान्त्ववचनेन ॥★॥

आत्मना स्वेनैव ईहितं चेष्टितम् आत्मनि मनसि स्मरन् भद्रमिति शेषः तत्र कथान्तरं वक्तुं तन्नारदागमनमाह तदेति ॥ क-ज ॥ रुक्म्यादीन् राज्ञः समाजं सम्मेलनम् आनृण्यम् ऋणाभावकरणम् ॥झ॥ शिशुपालद्रुमदुर्मुखै सहजरासन्धादिषु सत्सु ॥ञ॥

॥१-३॥

अनेनानन्तरातीताध्यायोक्तमेव प्रश्नपूर्वकं विस्तृत्य कथयति, अजातशत्रोरित्यादिना ॥१-७॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३३॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

षट्सप्ततितमे साल्वे स्वप्राप्ते रणे वरम् । कुर्वति द्युमतः शस्त्राद्युक्तं प्रद्युम्ननिष्क्रमः ॥१॥

क्रीडाप्रधानश्चासौ नरशरीरश्चेति शाकपार्थिवादिः ॥१-४॥

गूढार्थदीपिनी

षट्सप्ततितमे शाल्वो वृष्णिभिर्युयुधे द्युमान् । प्रद्युम्नं प्राहरत् सूतो मूर्च्छितं तमपानयत् ॥१॥

अथ राजसूयानन्तरं क्रीडार्थं नरशरीरं यस्य तस्य । सौभं तत्संज्ञकं विमानात्मकं पुरं तस्य पतिः । शाल्वः ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

षट्सप्ततितमे वृष्णिशाल्वयुद्धे प्रद्युम्नप्रभुत्वं चाह-अथेति । अथेति क्रीडार्थं नरस्येव शरीरं यस्य तस्य अप्राकृतेन देहेनैव नरवद्विहरत इति भावः ॥१-३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

॥ हरिः ॐ ॥ साल्वादिवधो द्वित्रिष्वध्यायेषु निरूप्यते । तत्रादौ सर्वसर्वं सहाभारभूतदुर्भूपतिहिंसासाधनं दुर्योधनमानहानिं तावदाह ॥ तत्रेति ॥ रुषा ज्ञातज्ञातिसम्पज्जनितया रुषाऽसिहस्त इति तं क्षिपन्भ्रातृभिः प्रियैः परीतः । अनेन पाण्डवानामप्रियभ्रातृत्वं ध्वन्यते । किरीटं च माला चास्यतास्त इति किरीटमाली । व्रीह्यादित्वादाकारान्तादपीन्प्रत्ययः । परिस्फुरत्कुण्डलमौलिमालिनामित्येतद्व्याख्यासुधायां परिस्फुरत्कुण्डलमौलयश्च ते मालिनश्चेति विग्रह इत्यभिधाय यद्वा परिस्फुरन्त्यश्च ताः कुण्डलमौलिमालाश्चेति कर्मधारयं विधाय पश्चादिनिरुत्पाद्य इति । तथा तट्टिप्पणे ननु परिस्फुरन्त्य इत्यारभ्य सर्वबीजी सर्वकेशी नट इत्याद्यभियुक्तप्रयोगानुपपत्तिप्रसङ्गात्तदुपपादनार्थं प्रवृत्तात्सर्वादेः कर्मधारयादिनिरिति महाभाष्यवचनं चोपन्यस्य मध्ये शून्यमायिनोरित्यत्र द्वन्द्वात्तदन्तविध्यभ्युपगमेन प्रागिनिः समर्थित इति द्रष्टव्यमित्यन्तेनोक्तोचितप्रकारेण ज्ञेयः । किरीटं मलतेरिति णिनिर्वा । मल मल्ल धारणे । धत्त इति किरीटमाली । क्षिपन्मार्गान्मार्गार्थं वा ॥१॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

सात्त्विकानां निरोधस्तु षड्भिरेवं निरूपितः । साधनांशः फलांशस्तु षड्भिरग्रे निरूप्यते ॥१॥
फलं तु त्रिविधं प्रोक्तं शत्रुनाशो यशस्तथा । अलौकिकी तथा सम्पद्द्वाभ्यां द्वाभ्यां निरूप्यते ॥२॥
बन्धूनां च तथांशस्य मित्रस्येति पृथक्पृथक् । बन्धूनां कृष्णसद्भावान्नान्यत्रेच्छा कथञ्चन ॥३॥
सहागतस्य त्वंशस्य कीर्तिरेवेप्सिता भुवि । मित्रस्य लक्ष्मीवैमुख्यात्सम्पत्तिर्वाञ्छिता क्वचित् ॥४॥
परोक्षे दारदृष्टो हि मित्रत्वमुपयाति हि । अत्रादौ द्वारकास्थानां बन्धूनां च तथा क्वचित् ॥५॥
अनिवार्यं दुःखमुक्तं द्वितीयेन निवार्यते । सप्तविंशे तथाध्याये यादवानां महद्भयम् ॥६॥
महादेवादिपुष्टेभ्यः शाल्वादिभ्यो निरूप्यते । अप्रत्याख्येयतासिद्ध्यै प्रद्युम्नाय जयो महान् ॥७॥
निरूपितः समस्तानां यतः स्यात्तु महद्भयम् ।

स्वतन्त्रतया फलप्रकरणमारभते अथेति । तदैव निरुद्धानां भगवत्परता भवति । एतच्चरित्रमुत्तममिति श्रवणार्थं विशेषेण प्रेरयति अन्यदपि कृष्णस्य शृण्विति । यतः अद्भुतं कर्मेति । अस्माच्चरित्राद्भगवतोद्भुतानि कर्माणि बहूनि भवन्ति । इदं च चरित्रमद्भुतम् । तदेवाद्भुतं यदेवार्थमन्यार्थमारब्धमन्यार्थं भवति । अत एव विश्वमेवाद्भुतं चरित्रमिति भगवच्छास्त्रं, धर्मार्थं प्रयत्नं कुर्वन् अधर्मं करोति, अर्थार्थमनर्थम्, एवं पुरुषार्थान्तरेऽपि । किम्बहुना सुखार्थं यतमानो दुःखं प्राप्नोति । एवं सर्वाश्रमादिधर्मेषु भगवदनुसन्धानव्यतिरेकेषु बोद्धव्यम् । अत्रापि फलं भगवदनुभवः साधनत्वेन मन्यते । तथा सर्व एव भगवत्सम्बन्धी पदार्थः । इदं रहस्यं सर्वदैव भगवदीयैरनुसन्धेयम् । अतो यद्यपि सर्वमेवाद्भुतं तथापीदं महत् ।

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

तस्याद्भुतत्वमुपपादयति क्रीडानरशरीरस्येति । क्रीडार्थं नरशरीरमङ्गीकृतम् । यत्र क्रीडासम्भावनापि नास्ति । नराणां सुखस्यैव नरकत्वात् तत्किमित्याकाङ्क्षायां निर्दिशति यथा सौरभपतिर्हत इति । मायिकं पुरं सौभशब्देनोच्यते तस्य पतिः शाल्वः स चेत्

प्रयत्नं न कुर्यात् जीवेद्वा कियत्कालं दुर्योधनादिवत्। अयं तु शीघ्रमेव हतः ॥१॥

सुबोधिनीसारः

शुकोक्तिः। हे नृप अथान्यदपि कृष्णस्याद्भुतं कर्म त्वं शृणु। ईश्वरस्य किमाश्चर्यमिति चेत्तत्राह। क्रीडार्थं नरशरीरं यस्य तस्येति सौभस्य विमानस्य पतिः स्वामी ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

षट्सप्ततितमाध्याये शाल्वानां यदुभिः सह। असुराणां यथा देवैर्घोरं युद्धं निरूप्यते ॥१॥

श्रीकृष्णस्य चरितान्तरं प्रस्तौति–अथेति। हे नृप! सौभं नाम पुरं, तस्य पतिः शाल्वो यथा हतस्तथा तद्धननात्मकमन्यदपि कृष्णस्याद्भुतं कर्म शृणु। ननु तस्य परमेश्वरत्वात्तेन तस्य तुच्छस्य हनने किमद्भुतत्वम् इत्याशङ्क्याह–क्रीडार्थं नरस्येव शरीरं यस्य तस्य। मनुष्यदृष्ट्याश्चर्यं भवत्येवेत्यर्थः ॥१॥

अन्वितार्थप्रकाशिका

षट्सप्ततितमे शाल्ववृष्णियुद्धे तु सारथिः। प्रद्युम्नमनयद्युद्धात् तत्र श्लोकास्त्रिवह्नयः (३३) ॥

द्वे (२) उवाचेति कथिते श्लोकतुल्या (३३) अनुष्टुभः ॥७६॥

अथेति। हे नृप! सौभं नाम पुरं, तस्य पतिः शाल्वो यथा हतस्तथा तद्धननात्मकमन्यदपि क्रीडार्थं नरस्येव शरीरं यस्य तस्य कृष्णस्याद्भुतं कर्म शृणु ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथेदानीं षसप्ततितमेऽध्याये वृष्णिशाल्वयुद्धं तत्र द्युमत्सेन गदया प्रद्युम्नमूर्च्छां च कथयति अथान्यदिति ॥ सौभं पतिः शाल्वः ॥१-३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तः षट्सप्ततितमे शाल्वयादवसंयुगे। द्युमद्गदाभिघातेन रणात् कार्ष्णेर्विनिर्गमः ॥१॥

अथ शाल्ववधात्मकं भगवच्चेष्टितमनुवर्णयितुं प्रथमं तद्युद्धमाह ॥ अथेति ॥ अथानन्तरं, हे नृप, क्रीडार्थं नरस्येव शरीरं यस्य तस्य, कृष्णस्य, अन्यत् अपि, अद्भुतं कर्म चेष्टितं, शृणु। किं तदित्यत आह। सौभं नाम पुरं तस्य पतिः शाल्वः, यथा येन प्रकारेण, हतः, तद्धननात्मकमित्यर्थः ॥१॥

कृष्णप्रिया

महर्षि शुकदेवजी ने कहा - राजन् परीक्षित ! आपने दुर्योधनका मानभंग प्रसंग सुना अब मानव विग्रह धारण करके भगवान श्रीकृष्णकी मानव लीलाका अद्‌भुत और एक चरित्र का श्रवण करें! जिस लीला प्रसंगमें सौभ विमानका अधिपति शाल्व किस प्रकार भगवान श्रीकृष्ण के करकमलों से मारा गया ॥१॥

शिशुपालसखः शाल्वो रुक्मिण्युद्वाह आगतः[1]। यदुभिर्निर्जितः संख्ये जरासन्धादयस्तथा ॥२॥[2]
शाल्वः प्रतिज्ञामकरोत् शृण्वतां सर्वभूभुजाम्। अयादवीं क्ष्मां करिष्ये पौरुषं मम पश्यत ॥३॥
इति मूढः प्रतिज्ञाय [3]देवं पशुपतिं प्रभुम्। आराधयामास नृप पांसुमुष्टिं सकृद् ग्रसन् ॥४॥
संवत्सरान्ते भगवाना[4]शुतोष उमापतिः। वरेणच्छन्दयामास शाल्वं शरणमागतम् ॥५॥

---

[1] आगतैः- गो. प्रे. टी.। [2] - अत्र देयाः विजयध्वजीयपाठान्तरश्लोकाः तट्टीकायां द्रष्टव्याः (मूलम् विज.)

[3] इति मूढः प्रतिज्ञाय (तपसे प्राविशद्वनम्। गते तस्मिन्बहून्वर्षान्प्रतीक्ष्य तदुपागमम् ॥ तदनन्तरजोऽमात्यैरभिषिक्तो नृपार्थिभिः। तपस्तप्त्वा स नृपतिः) देवं पशुपति प्रभुम् ॥ कुण्डलान्तर्गतः पाठोऽधिकः विज.।

[4] भगवान्संतुष्टः स उमापतिः-विज.।

कर्दमक्षमा

शिशुपालसखः, शाल्वः, रुक्मिण्युद्वाहे, आगतः, तदा, शाल्वः, तथा, जरासन्धादयः, सङ्ख्ये, यदुभिः, निर्जिताः ॥२॥ तदा, शाल्वः, सर्वभूभुजाम्, शृण्वताम्, प्रतिज्ञाम्, अकरोत्, मम, पौरुषम्, पश्यत, अपि, अयादवीम्, क्ष्माम्, करिष्ये ॥३॥ मूढः, इति, प्रतिज्ञाय, पांसुमुष्टिम्, सकृत्, ग्रसन्, देवम्, पशुपतिम्, प्रभुम्, आराधयामास ॥४॥ उमापतिः, भगवान्, आशुतोषः, संवत्सरान्ते, शरणम्, आगतम्, शाल्वम्, वरेण, छन्दयामास ॥५॥

श्रीधरस्वामिकृतभावार्थदीपिका

प्रत्यहं सकृत्पांसुमुष्टिमेकां ग्रसन् भक्षयन् ॥४॥ संवत्सरान्त इति आशु तोषोऽपि भगवानुमापतिः श्रीकृष्णविद्विषि शाल्वे वरस्य वैफल्यं मन्यमानो न शीघ्रं प्रादुरभूत् तस्यातिनिर्बन्धमालक्ष्य संवत्सरान्ते च वरेणच्छन्दयामासेच्छां कारितवान् वरं वृणीष्वेत्युवाचेत्यर्थः ॥५-६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तथा निर्जिताः ॥२-३॥ इति उक्तरीत्या। पांसुर्धूलिः "पांसुर्धूलौ च सस्यार्थचिरसंचितगोमये" इति मेदिनी ॥४॥ इत्यर्थ इति-कृष्णद्विषि वरदानानौचित्येऽपि भक्ताभीष्टदत्वात्तं वरार्थं प्रेरयामासेति भावः ॥५॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

तत्रोपदद्घातकथामाह-शृण्विति । सङ्ख्ये युद्धे तस्य का वार्ता जरासन्धादयोऽपीत्यर्थः ॥२॥ तथापि प्रतिज्ञामकरोत् अनादरे षष्ठी अशक्येऽर्थे प्रतिज्ञा नोचितेति तेषां वाक्यमनादृत्येत्यर्थः । यद्वा शृण्वत्स्वित्यर्थः ततश्च प्रतिज्ञाया दार्ढ्यं बोधयति ॥३॥ इत्येतत्प्रतिज्ञाय यतो मूढः निर्बुद्धिः श्रीकृष्णनाथानामन्यतो(ग्ला)हान्यभावाननुसन्धानात् तमेव कथमाराधयामासेत्यत्र योग्यपदान्येवोपन्यस्यति देवं निजेष्टदैवतं पशूनां स्वसदृशानां तु प्रथमानां पतिं प्रभुम् आश्वभीष्टदानसमर्थञ्चेति नृपः सुखभोगयोग्योपीत्यर्थः पांस्विति योग्यमेव तस्य प्रथमतस्तद्भोजनमित्युपहासव्यञ्जना ॥४॥ भगवानिति वरवैफल्यज्ञाने कारणम् अत एव तादृशवरेणाऽपिछन्दयामास अत उमाया मायांशत्वात्पतिरिति वञ्चनाभिप्रायेण । ननु तर्ह्यनागमनमेवोचितं तत्राह-शरणमागतम् अन्यथा शरणागतोपेक्षा लोके प्रवर्ततेति शङ्कयेति भावः । अत्र सामान्यतो यत्तस्य पशुपतित्वं तच्छ्मशानवासादिनैव तादृशसङ्गेन निजगोपनायैव दत्तात्रेयस्य स्त्र्यादिसङ्गवत् यच्च भगवद्विरोधिभ्योऽपि वरप्रदानं तत्पुनस्तानुत्साह्य बलसहायादिसम्पादने न योग्यांश्च कृत्वा श्रीभगवदत्यभीष्टयुद्धादिलीलायां प्रवर्तनायेति वास्तवं ज्ञेयम् ॥५॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

शिशुपालस्य सखेति जरासन्धादिभ्योऽपि तस्य द्वेषविशेषश्च ॥२॥ अत एव प्रतिज्ञामकरोत्, अनादरे षष्ठी । अशक्येऽर्थे प्रतिज्ञा नोचितेत्यादिकं तेषां वाक्यमनादृत्येत्यर्थः । अत एव देवं निजेष्टदैवतं दैत्यानामाराध्यं वा आराधयामास । पशुपतिमिति श्लेषेण पशुतुल्यानामपि जनानां पालकत्वेन परमदयालुत्वज्ञानादिति सूचितम्। अयमाराधने हेतुः । किञ्च, प्रभुमाश्वभीष्टदानसमर्थम्, नृपः सुखभोगयोग्योऽपीत्यर्थः ॥३-४॥ भगवान् सर्व्वज्ञो देय-तदिष्टवरस्य वैफल्यं जानन्नपीत्यर्थः । किञ्च, उमा श्रीभगवद्भक्ता पार्व्वती, तस्याः पतिरपि छन्दयामास । कुतः? शरणमागतं महादुष्करव्रतेन प्रपन्नमित्यर्थः । अन्यथा शरणागतोपेक्षादोषप्रसक्तिः कर्म्मवैयर्थ्यापत्तिश्च । वरेण छन्दनं चान्तःसन्तोषाभावादप्रत्यक्षीभूतेनाकाशवाण्यैवेति ज्ञेयम्, आविर्भावाद्यनुक्तेः ॥५॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

पांसुमुष्टिं भस्ममुष्टिम् ॥४-१६॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

शिशुपालसख इति। तदा साल्वो रुक्मिणीविवाहे आगतः सङ्ख्ये युद्धे निर्जितः जरासन्धादयश्च जिताः स तदा सर्वभूतानां शृण्वतां सतां प्रतिज्ञामकरोदिति सम्बन्धः । प्रतिज्ञा ज्ञामेव दर्शयति-अयादवीं यादवरहितां क्ष्मां भूमिं करिष्यामि मे पराक्रमं पश्य ॥२-३॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

इतीत्थं प्रतिज्ञाय प्रतिज्ञां कृत्वाऽत एव मूढः पशुपतिं देवं रुद्रमाराधयामास किं कुर्वन् प्रत्यहं सकृत्पांसुमुष्टिमेकं ग्रसन् भक्षयन् आराधयामासेति सम्बन्धः ॥४॥ संवत्सरान्त इति । आशुतोषः ईषत्सन्तोषवान् भगवद्विद्वेषित्वादिति भावः । वरेणेति-हेत्वर्थे तृतीया वरार्थं छन्दयामास वरं वरयेत्युवाचेत्यर्थः ॥५॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

तस्य साल्वस्यान्तरजोऽनुजः ॥४॥ छन्दयामास दृप्तमकरोत् ॥५-६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

तमेव कथमाराधयामासेत्यत्र योग्यपदान्येवोपन्यस्यति-देवं निजेष्टदैवतं पशूनां सदृशं प्रमथानां पतिं प्रभुम आश्वभीष्टार्थदानसमर्थं चेति ॥४॥ भगवानिति वरवैफल्यज्ञाने कारणम् अत एव तादृशवरेणापि छन्दयामास । ननु तर्ह्यनागमनमेवोचितं तत्राह शरणमागतम् अन्यथा शरणागतोपेक्षा लोके प्रवर्तेतेति शङ्क्येति भावः ॥५-३३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३३॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

वरेण दित्सितेन छन्दयामास वशीचक्रे "अभिप्रायवशो छन्दौ" इत्यमरः ॥५-६॥

गूढार्थदीपिनी

सङ्ख्ये युद्धे । तथा जरासन्धादयोऽपि निर्जिता इति योज्यम् ॥२॥ अयादवीं यदुशून्यां क्ष्मां पृथ्वीं करिष्ये । वस्तुतः । अयः शुभावहो विधिः तेन दैवेन अदवीं तापरहिताम् । 'टुदु' उपतापे धातुः । अपौरुषमितिच्छेदः ॥३॥ पांसुः धूलिः तस्य मुष्टिं ग्रसन् भक्षयन् ॥४॥ छन्दयामास वरार्थं प्रेरयामास ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रत्यहं सकृदेकवारम् ॥४॥ आशु तोषोऽपि श्रीकृष्णविद्विषं शाल्वं संवत्सरान्ते वरेण दित्सितेन छन्दयामास वरं वरयेति चोदयामास ॥५-६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

स्थलेऽपि निर्जलप्रदेशे हरिनीलोपलैरिन्द्रनीलमणिभिराचिते व्याप्ते जलमिति भ्रमेण वस्त्रान्तमगृह्णात् आर्द्रं भवेदित्युपरि धृतवान् स्थलं पुष्करिणीं मत्वा । एवं कृतवानिति सर्वे जनास्तं जहसुरपाहसन् ॥२॥ एवमेवागच्छन्क्वचित्पुष्करिणीं विलोक्य स्फाटिकां स्फटिकस्येयं स्फाटिका णप्रत्ययान्तो भूमिं मन्यमानो जले न्यपतत्पपात । निवार्यमाणा अपि कृष्णानुमोदिता भूभारावतारमूलमित्यनुमोदनं माधवस्येति ज्ञेयम् । भीमो जहास । भूभारहरणे विष्णोः प्रधानाङ्गं हि मारुतिः । तस्याङ्गं प्रथमं वायुरित्युक्तेर्हि सहेतुरयं हास इति ज्ञेयम् । स्त्रियो भूपाश्च केचन जहसुः ॥३॥ सम्प्रेष्य यत्र पतितस्तत्रैव दूतैर्योगेश्वरेण कृष्णेन च बोधित आह्वापयामासाकारयामास । आतामिति णिजन्तात्पुगागमः ॥४॥ सत्कारं धर्मप्रेषितं भूषणादिकमनादृत्य न्यक्कृत्य व्रीडया व्रीडेन वा नता कन्धरा यस्य स जाज्वल्यमानं हृदयं यस्य स यतस्ततस्तदन्तिकं धर्मसमीपं न जगाम ॥५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

तस्य हननार्थमुपाख्यानमाह शिशुपालसख इति । शपथपूर्विका तेन सह मैत्री । शिशुपालसखित्वेनैव प्रसिद्धः शाल्वः । अत एव रुक्मिण्युद्वाहे आगते उपस्थिते आगतो वा यदुभिर्निर्जितः । आगतं वा सख्यं युद्धे तदा यदुभिर्निर्जितः । न केवलमेक किन्तु जरासन्धादयोऽपि तथा मित्राणि निर्जिताश्च ॥२॥ एवं सर्वेष्वेव तथाभूतेषु सर्वहितान्वेषी यादवानां मारणं विचारितवान्-

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

ततस्तत्सिद्ध्यर्थं शाल्वः प्रतिज्ञामकरोत्। क्लेशेऽप्यनिवृत्त्यर्थं सर्वभूभुजां शृण्वतामकरोत्। प्रतिज्ञामाह – अयादवीं क्ष्मां करिष्य इति। यस्यां क्ष्मायां यादवा न तिष्ठन्ति इति सबीजनिर्हरणमर्थः। किं ब्रह्मशापेनैव नेत्याह पौरुषं मम पश्यतेति। पश्यतेति पौरुषं स्वकीयं साक्षात् पश्यतेति ॥३॥ ततोऽन्यानप्याह – इत्युक्त्वा मूढः असाध्यसाधनार्थं प्रवृत्तः भूमिर्यादवोपजीविनी कथं यादवरहिता स्वरूपं लप्स्यत इति। तथापि मौढ्यात् प्रतिज्ञाय तत्राप्यसमर्थं देवं सेवितवान्। यतः स पशूनामेव पतिः तत्रापि प्रभुः न त्वन्तर्यामी। यदि पुरुषोत्तममन्तर्यामिणं वा भजेत् भक्तो ज्ञानी वा भवेत् तदा जगज्जननसामर्थ्यं विश्वोपसंहारसामर्थ्यं वा भवेत्। विश्वामित्रस्येव तद्बहुकालसाध्यमिति मत्वा क्षिप्रप्रसादं स्वस्य पशुत्वात् प्रभुमाराधयामास। तत्राराधनप्रकारः पांशुमुष्टिं सकृद्ग्रसन्निति। भगवद्वैमुख्यात्स्वहस्तेनैव स्वमुखे धूलिप्रक्षेपः ॥४॥ ततो यज्जातं तदाह संवत्सरान्त इति। महादेवः कालप्रेष्यः, संवत्सरात्मकस्तु कालः, शाल्वो दुर्वृत्तः भगवद्विरोधार्थं यतते अस्मांश्च प्रार्थयते। तत्राद्भुतकर्मत्वाद्भगवदभिप्रायो न ज्ञायते। किमस्मा एष वरो देयो न वेति। तदर्थं संवत्सरप्रतीक्षा कृता। यदि संवत्सरेणायं मार्यते तदा स्वामिहितकर्त्रा संवत्सरेणैव कार्यं सिद्धम्। अथ यदि क्लेशमेव दत्त्वा जीवयिष्यति तदा मयापि क्लेशदानार्थमेव वरो देय इति विचार्य संवत्सरं तूष्णीं स्थितः। नन्वग्रेऽपि कथं न स्थितः तत्राह – आशुतोष इति। स परमदयालुः अल्पमप्यन्यस्य क्लेशं न सहते, तथाप्यस्थाने यत्नं करोतीति तावद्विलम्बं कृतवान्। ननु तथापि स्वामिद्रोही उपेक्षणीय एव, किमिति वरो दत्त इत्याकाङ्क्षायामाह – उमापतिरिति। उमापि तपः कुर्वाणा मया उपेक्षिता, सा पश्चात्तपसा पुष्टा सती गले पतिता, तथायमपि भविष्यतीति विचार्य ततो विघ्नार्थमेव वरेण छन्दयामास। वरं ब्रूहीत्युक्तवान्। ननु तस्य को धर्मः येन वरार्थं छन्दयामास। तपस्तु नास्त्येव भगवद्वैमुख्यात्। न हि नारकिणो रोगिणो वा तपः कुर्वन्ति। किन्तु कर्मानुभव एव तेषां तादृशः तस्मादुपेक्षणीयः एवेत्याशङ्कायामाह – शरणमागतमिति। शरण्योपेक्षादोषभियेति ॥५॥

सुबोधिनीसारः

शिशुपालस्य सखा मित्रं शाल्वो दैत्यो रुक्मिण्या उद्वाहे आगतः सङ्ख्ये सङ्ग्रामे यदुभिरभिभूतः जरासन्धादयस्तथाभिभूताः ॥२॥ सर्वराजानां शृण्वतां सतां शाल्वः प्रतिज्ञामकरोत्। अयादवीं क्ष्मां पृथिवीं करिष्यामि। मम पौरुषं बलं यूयं पश्यत ॥३॥ इति प्रतिज्ञां कृत्वा पशुपतिं प्रभुं देवं श्रीमहादेवं मूढः सेवयामास। सकृदेकवारं पांसोर्धूल्या मुष्टिं ग्रसन् सन् हे नृप ॥४॥ संवत्सरस्य वर्षस्यान्ते समाप्तौ आशुतोषः शीघ्रप्रसाद उमापतिः शिवो भगवान् शरणं प्राप्तं शाल्वं वरेण छन्दयामास प्रलोभितवान् ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सङ्ख्ये युद्धे निर्जितः। तथा जरासन्धादयोऽपि निर्जिताः ॥२॥ तदा सर्वभूभुजां राज्ञां शृण्वतामेव शाल्वः क्ष्मां भूमिमहमयादवीं यादवरहितां करिष्यामि, यूयं मम पौरुषं पश्यतेति प्रतिज्ञामकरोदित्यन्वयः ॥३॥ स इत्येवं प्रतिज्ञाय प्रत्यहं सकृत् एकवारं पांसूनां धूलीनामेकं मुष्टिं ग्रसन् भक्षयन् पशुपतिं महादेवम् आराधयामासेत्यन्वयः। शिवस्य वरदानसामर्थ्यमाह–प्रभुमिति। तत्र हेतुमाह–देवमिति। तथापि भगवद्द्वेषित्वात्तन्मनोरथपूर्तिरेव नैव भविष्यति, प्रत्युत मरणमेव स्यात् इत्याशयेनाह–मूढ इति ॥४॥ उमापतिः शिवः आशुतोषोऽपि आशु शीघ्रमेव तुष्यतीति तथाभूतोऽपि श्रीकृष्णद्वेषित्वाच्छाल्वे वरस्य वैफल्यं मन्यमानः प्रथममुपेक्षां कृतवान्। ततः संवत्सरान्ते तं शाल्वं वरेण छन्दयामास वरं वृणीष्वेति प्रेरितवान् इत्यन्वयः। संवत्सरान्ते किमिति नोपेक्षितवांस्तत्राह–शरणमागतमिति। तथापि किमिति नोपेक्षितवांस्तत्राह–भगवानिति। न हि भगवतः शरणागतोपेक्षा युक्ता, यशोहानिप्रसङ्गात् इत्याशयः ॥५॥

अन्वितार्थप्रकाशिका

शिश्विति॥ रुक्मिण्युद्वाहे आगतः शिशुपालस्य सखा शाल्वः सङ्ख्ये युद्धे यदुभिर्निर्जितः तथा जरासन्धादयोऽपि निर्जिताः ॥२॥ शाल्व इति॥ तदा सर्वभूभुजां राज्ञां शृण्वतामेव शाल्वः क्ष्मां भूमिमहमयादवीं यादवरहितां करिष्ये। उपसर्जनान्ङीबार्षः। यद्वा। यदूनामियं यादवी यदुसम्बन्धवती न यादवी अयादवी तादृशीं करिष्ये। यूयं मम पौरुषं पश्यतेति प्रतिज्ञामकरोत् ॥३॥ इतीति॥ हे नृप! मूढः स स इत्येवं प्रतिज्ञाय प्रत्यहं सकृत् एकवारं पांसूनां धूलीनामेकं मुष्टिं ग्रसन्। शता आर्षः। देवं पशुपतिं प्रभुं

अन्वितार्थप्रकाशिका

शिवम् आराधयामास ॥४॥ संवत्सरेति ॥ भगवान् आशुतोषोऽपि उमापतिः शिवः श्रीकृष्णद्विषि वरवैफल्यं मन्वानो न तु शीघ्रं प्रादुरभूत्। ततश्चातिनिर्बन्धनेन शरणमागतं शाल्वं संवत्सरान्ते वरेण छन्दयामास वरं वृणीष्वेति प्रेरितवान्। अन्यथा शरणागतोपेक्षादोषः स्यात् ॥५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सकृदेकवारं प्रतिदिनं धुलिकामुष्टिं ग्रसन् अदन् ॥४॥ वरेणच्छन्दयामास याचनां कारयामास ॥ वरं वृणीष्वेत्युक्तवानित्यर्थः ॥५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शिशुपालसख इति ॥ यदा, शिशुपालसखः शाल्वः, रुक्मिण्युद्वाहे आगतः, तदा, सङ्ख्ये युद्धे, यदुभिर्यादवैः, निर्जितः। तथा, जरासन्धादयश्च, जिताः ॥२॥ शाल्व इति ॥ तदा, सर्वभूभुजां शृण्वतां सतां, शाल्वः, क्ष्मां पृथिवीं, अयादवीं यादवरहितां, करिष्ये करिष्यामि। मम पौरुषं, पराक्रमं, पश्यत। इति, प्रतिज्ञाम् अकरोत्। इति द्वयोरेकसंबन्धः ॥३॥ इतीति॥ मूढः शाल्वः, इतीत्थं, प्रतिज्ञाय, हे नृप, सकृदेकवारं, पांसुमुष्टिं, ग्रसन् भक्षयन् सन्, प्रभुं पशूनां सर्वप्राणिनां पतिं, 'तिर्यग्जातौ पशुः प्रोक्तः सर्वप्राणिनि पुंस्ययम्' इति व्याख्यासुधायां पुपतिशब्दव्याख्याने पशुशब्दस्य सर्वप्राणिरूपार्थोक्तेः। देवम्, आराधयामास ॥४॥ संवत्सरान्त इति ॥ आशुतोषः शीघ्रं प्रसन्नीभवनशीलः, भगवान् उमापतिः शिवः, संवत्सरान्ते, शरणं आगतं, शाल्वं, वरेण, छन्दयामास वरं वरयेत्युवाचेत्यर्थः ॥५॥

कृष्णप्रिया

शाल्व शिशुपाल का मित्र था वह रुक्मिणीजी के लग्न प्रसंग पर शिशुपाल की औरसे बारातमें आया था। उस समय यदुवंशियों ने संग्राममे जरासन्ध आदि के साथ-साथ शाल्व को भी जीत लीया था ॥२॥ उस दिन सब नरपतियों के सामने शाल्व ने प्रतिज्ञा की थी कि मैं इस पृथ्वी से यादवों को सफा कर छोडुंगा, आप सब लोग मेरा सामर्थ्य और बल-पराक्रम को देखिये ॥३॥ महाराज परीक्षित ! बुद्धिमंत शाल्वने ऐसी प्रतिज्ञा करके देवाधिदेव भगवान भवानीशंकर की आराधना शुरु की शाल्व उन दिनों में केवल दिवस में एक बार मुट्ठीभर धूलि फाक कर तपश्चर्या करता था ॥४॥ भगवान आशुतोष भवानीशंकर वरदान देनेमें विलंब नहीं करते और वे दानी भी है, फिरभी वे शाल्व का घोर संकल्प जानकर एक वर्ष के अंत में प्रसन्न हुए, आशुतोष शरणागत वत्सल भगवान शंकर ने शाल्व को अभीष्ट वरदान मांगने की सूचना दी ॥५॥

देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् । अभेद्यं कामगं वव्रे स यानं वृष्णिभीषणम् ॥६॥
तथेति गरिशादिष्टो मयः परपुरञ्जयः । पुरं निर्माय शाल्वाय प्रादात्सौभम[1]यस्मयम् ॥७॥[2]
स लब्ध्वा कामगं यानं तमोधामं दुरासदम् । ययौ द्वारवतीं शाल्वो वैरं[3] वृष्णिकृतं स्मरन् ॥८॥
[4]निरुध्य सेनया शाल्वो महत्या भरतर्षभ । पुरीं बभञ्जोपवनान्युद्यानानि च सर्वशः ॥९॥

कर्दमक्षमा

सः, देवासुरमनुष्याणाम्, गन्धर्वोरगरक्षसाम्, अभेद्यम्, कामगम्, वृष्णिभीषणम्, यानम्, वव्रे ॥६॥ तथा, इति, गिरिशादि

---

१. मयोमयं-वीर.। २. अत्र प्रदेयविजयध्वजीयपाठान्तश्लोकाः तट्टीकायां स्थापिताः (मूलम्-विज.)। ३. वैरिकृष्णमनुस्मरन्-गो. ; वैरं कृष्णकृतं-इति कस्यचित्। ४. तमावसन्नन्तरिक्षे युयुधे भरतर्षभ-विज.।

कर्दमक्षमा

परपुरञ्जयः, मयः, शाल्वाय, अयस्मयम्, पुरम्, निर्माय, सौभम्, प्रादात् ॥७॥ शाल्वः, दुरासदम्, तमोधामम्, कामगम्, यानम्, सः, लब्ध्वा, वृष्णिकृतम्, वैरम्, स्मरन्, द्वारवतीम्, ययौ ॥८॥ हे भरतर्षभ ! शाल्वः, महत्या, सेनया, पुरीम्, निरुद्ध्य, सर्वशः, उद्यानानि, च उपवनानि, बभञ्ज ॥९॥

श्रीधरस्वामिकृता भावार्थदीपिका

तथेति प्रतिज्ञाय गिरिशेनाऽऽदिष्टोऽयस्मयं लोहमयं पुरं सौभसंज्ञं निर्माय रचयित्वा प्रादात् ॥७॥ तमसोऽन्धकारस्य धामाऽऽश्रयम् अन्यैर्दुरासदं दुष्प्राप्यम् ॥८-९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स शाल्वः । यानं गमनवत्पुरम् "यानं वाहनमुद्दिष्टं यानं गमनवत्पुरम्" इति धरणिः । अभेद्यमिहाकारवाच्येन वासुदेवेन भेद्यमिति वाचोऽभिप्रायः । अत एव "तत्कृष्णहस्तेरितया विचूर्णितं पपात तोये गदया सहस्रधा" इत्युक्त्या विरोधो नेति ॥६॥ "अयस्मयादीनि छन्दसि" इति पाणिनिः ॥७॥ स शाल्वः । तमोधाम नीलरश्मिपुञ्जात्मकत्वात् ॥८॥ वृष्णिकृतं रुक्मिणीविवाहादिषु जातम् ॥९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत एव वृष्णीनां भीषणमेव वव्रे न तु घातकमिति श्रीशिवेनान्तस्तथा प्रेरणादिति भावः ॥६॥ परपुरञ्जय इति । सौभसदृशपुरादिनिर्माणमय्या माययेति शेषः । पुरं तदाकारं महारथं प्रकर्षेण दैत्यपक्षत्वादुत्कृष्टया अदात् ॥७॥ तमोधामत्वादेव दुरासदं चक्षुषाऽप्यगम्यम् अत्र वृष्णिकृतं कृष्णकृतमिति पाठद्वयम् ॥८॥ निरुद्ध्येति त्रिकम् । तत्र विहारान् स इत्यन्तमेकं वाक्यं दिश इत्यन्तन्त्वन्यत् पुरीं श्रीद्वारकां निरुद्ध्य सर्वतो बहिरावृत्य इति महाविस्मयात्सम्बोधयति-भरतर्षभेति । यद्वा अनिष्टाशङ्किनं तमाश्वासयति महावंशश्रेष्ठत्वेन त्वया श्रीभगवन्माहात्म्यं ज्ञायत एवेति कापि शङ्का न कार्येति भावः । बभञ्ज भङ्क्तुमुद्यतवान् "वर्तमानसामीप्ये वर्तमानवद्वा" ॥९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कामगं स्वेच्छया भूमौ जले गिरौ वियत्यपि गच्छतीति तथा तत्, यानं रथं स साल्वो वृष्णीनां भीषणं भयङ्करमेव, न तु घातकमिति । श्रीशिवेनैवान्तस्तथाप्रेरणादिति ज्ञेयम् ॥६॥ गिरौ कैलासे शेते निश्चलतया वसतीति तथा, तेनादिष्ट इत्याकाशवाण्यैव मयं प्रत्यादेश इति । तथा परेषां शत्रूणां पुरं जयतीति तथा सः, इति सौभस्यापि तादृशत्वं सूचितम् । पुरमिति श्रीरुद्राज्ञादरेण दैत्यपक्षपातेन च दैत्यशिल्पिना मयेन तदशेषसैन्याद्याधारतया पुरवत् यानस्यैव निर्म्मार्णात् । अत एव प्रकर्षेण श्रीगिरिशादिष्टादप्युत्कृष्टतयादात् ॥७॥ स महादुष्टत्वेन प्रसिद्धः । अन्यत्तैर्व्याख्यातम् । यद्वा, तमोधामत्वादेव दुरासदमस्त्राद्यनतिक्रम्यं चक्षुषादृश्यमिति वा ॥८॥ पुरीं श्रीद्वारकां निरुद्ध्य सर्वतो बहिरावृत्य; इति महाविस्मयात् सम्बोधयति-भरतर्षभेति । यद्वा, अनिष्टाशङ्किनं तमाश्वासयति; महावंश्यश्रेष्ठेन त्वया श्रीभगवन्माहात्म्यं ज्ञायत एवेति कापि शङ्का कार्य्येति भावः । बभञ्ज भङ्क्तुमैच्छत् ॥९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥४-१६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

देवेति । स साल्वः यानं विमानं वव्रे वृतवान् कथम्भूतं देवादीनां भेत्तुमशक्यं कामं यथेच्छं गच्छतीति तथा तद्वृष्णीनां यदूनां भीषणं भयङ्करम् ॥६॥ तथेति । तथेत्यङ्गीकृत्य गिरिशेनादिष्टो मयः सौभं नाम अयोमयं लोहमयं पुरं निर्माय ददौ ॥७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स लब्ध्वेति। स साल्वः तमसोऽन्धकारस्य धामाऽऽश्रयं यानं लब्ध्वा अधिष्ठायेत्यर्थः। कृष्णस्य कृतं वैरं स्मरन् द्वारवतीं ययौ ॥८॥ निरुद्ध्येति। हे भरतर्षभ! पुरीं द्वारवतीं निरुध्य उपवनादीन् बभञ्ज ॥९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

(मूलम्)

आययौ स्वं जनपदं समग्रबलवाहनम्। इदानीं राजपुत्राणां स एवोद्योगवान्नृप ।।क।।

इति धर्मसुतः श्रीमान् श्रुत्वा तन्नारदोदितम्। पार्श्वे भगवतः शौरेः शनैर्मुखमवैक्षत ।।ख।।

निशम्य तद्वासुदेवो धैर्यसारो निराकुलः। किञ्चित्प्रहस्यास्तु नामेत्याह सा हि महात्मता ।।ग।।

पूजयित्वा ऋषिं सम्यक् सूनृतैर्गीर्भिरच्युतः। चिराभिलषितः सोऽपि प्राप्तः साध्वित्यचिन्तयत् ।।घ।।

उग्रसेनं यदुपतिं युयुधानं च माधवः। अक्रूरं कृतवर्माणमन्यांश्च यदुपुङ्गवान् ।।ङ।।

प्रेषयामास रक्षायै द्वारवत्याः स्वसैनिकान् ।।च।।

श्रीविजयध्वजरीत्या चतुरशीतितमोऽध्यायः समाप्तः ।।८४।।

श्रीशुक उवाच

तथा वसति गोविन्दे शक्रप्रस्थे महात्मनि। स सानुजे चैव नृपे कृतकृत्ये युधिष्ठिरे ।।छ।।

आकर्ण्य शाल्वः संक्रुद्धो दमघोषसुतं हतम्। जरासन्धं च सुहृदं राजसूयं क्रतुं कृतम् ।।ज।।

अयस्मयम् अयोमयम् ''अयस्मयादीनि छन्दसि'' (१-४-२०) इति पाणिनिः ।।७।। नीलरश्मिपुञ्जात्मकत्वात्तमोधामेत्युच्यते ।।क-ग।। सूनृतैः सूनृताभिः ।।घ-ङ।। स्वसैनिकान् स्वसेनानायकान् ।।च।। तथा महोत्सवसमेतत्वेन साल्वः संक्रुद्धोऽभूदिति शेषः ।।छ-ज।। आगत्य चान्तरिक्षे तं विमानमावसंस्तस्मिन् विमाने स्थितः युयुधे इत्यन्वयः। सम्प्रहारप्रकारमाह-पुरीमिति ।।८-९।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।।५-३३।।

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।।१-३३।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ।।१-३३।।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

सौभं सौभसंज्ञम् अयस्मयं लोहमयम् ।।७-९।।

गूढार्थदीपिनी

कामं यथेच्छं कामेन वा गच्छतीति कामगम्। यानं गमनवत्पुरम् इति धरणिः। वृष्णयो यदुवंशीयाः। अभेद्यम् (अक वासुदेवः तेन भेद्यं च अत एव तत्कृष्णहस्तेरितया विचूर्णितमिति वक्ष्यमाणोक्तेर्न विरोधः।) ।।६।। सौभं सौभसंज्ञकम्। अयस्म लोहमयम्। 'अयस्मयादीनि छन्दसि' इति नियमात् सुट् ।।७।। स शाल्वः। तमोधाम अन्धकारपूर्णम् अत एव दुरासदम् अ दुष्प्रापम् ।।८।। निरुध्येति सार्धद्वयम्। पुरीं निरुध्य स शाल्वः उपवनादीनि सर्वाणि बभञ्ज भङ्क्तुमुद्यतवान्। उपवनं फलप्रधान उद्यानं पुष्पप्रधानम्। गोपुरं नगरद्वारम्। प्रासादो देवभूभुजाम्। तोलिका अट्टालिका भित्तीः। विहारान् क्रीडास्थानानि। विमानाग्र श्रेष्ठविमानात्। शिलादयोऽपि पेतुः। आसारशर्कराः धारासम्पातवत् जलीयपाषाणाः ।।९-१०।।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सौभसंज्ञं पुरम् ।।७-९।।

व्रीडि

परस्परम्। ततस

आयुधध्वनिरभूत्

चामरपामरमिति

आह ।। बभूवेति

भगवांस्तूष्णीं बभू

समीपे आविरासीत

सबल एवायातस्त

नारदप्रमुखास्तथेति

सर्वत्र गच्छतीति स

प्रत्ययः। को नित्यो

द्विबह्वर्थे प्रत्ययविधा

आह। बहूनां जाति

बहुषु द्व्येकयोः पुन

उपाध्यानर्थक्यमिति

वा बहूनामित्यत्र जाति

डतमच उत्सर्गस्य द्व

किमेतदित्यादि परिह

ग्रन्थस्योपयोगः स्यात्

इतीति च जातिपरिप्रश्न

डतम्। तर्ह्यत्र न जातिब

न जातिश्च परिप्रश्नश्चेति

व्यक्तिबहुत्वाभिप्रायेण

महीनमहीयसश्चरणे यत्र

इति शक्यं वक्तुम्। यथो

इत्युक्तमिति दिक्। आर

स्वे विषये स्वस्वदेशे ।।१

जातः। दुराग्रहवान् वर्त

कृष्णद्विट् तद्द्वेषी रुक्म

शिशुपालद्रुममुख्यैः सह

विद्यन्ते यस्यां साऽयादवी

।।१९।। नृपार्थिभिर्नृपमर्थय

।।२०।। सकृदेकदा। पांसु

छन्दयामास। वरं वरयेत्यू

कामगमभेद्यं यानं व्योमया

तद्रूपं सौभं नाम्ना तदात्मक

वृद्धिरादैच्। कुत्वं कस्मान्न

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

व्रीडितः पातायातव्रीडावान् अवाग्वदनो हसतो विलोक्यावाकृतं वदनं यस्य केऽपि न न्यवारयन्निति रुषा ज्वलन्निष्क्रम्य परस्परम् । ततस्तूष्णीं किमप्यवदन्गजाह्वयं प्रययौ ॥६॥ तदा सुमहान् हाहेति शब्दोऽभूत् । मरणकारणमिदमेवेति हेति शब्द आयुधध्वनिरभूत् । हा इति हाहेतिशब्द इत्यावृत्त्याऽप्यन्वेतव्यम् । अजातशत्रुर्विमना दुर्मना इवाभवत् । इवेत्यनेन यद्भावि तद्भवत्येवेत्यपि चामरपामरमिति निष्कर्षोऽन्तरङ्गतोऽस्यास्तीति ध्वन्यते । किमिति मतिमान् कृष्णः स्वयं तत्समाधिना तनुताधिं धर्मराजस्य दृष्ट्वाऽपीत्यत आह ॥ बभूवेति । आत्मनि मनस्यात्मेहितं स्वेप्सितमिति स्मरन् ज्ञ तत्कुत इत्याह ॥ भुवो भरं जिहीर्षुर्हस्तुकाम इति ॥७॥ भगवांस्तूष्णीं बभूव । यदा तदा सुराराधितपादपङ्कजो मुनिर्जगदीशसन्निधावाविरासीत् । सुराराधितपादपङ्कजस्त्वं जगदीशेति सन्निधौ समीपे आविरासीत्प्रादुरभूदिति वा । सुराराधिपपादपं कल्पवृक्षमिव विद्यमानब्रह्मसुतो मुनिरुपेत्येत्युत्तरेणान्वयः । नारदो यद्यपि पूर्वं सबल एवायातस्तथापि बहुकालं नैकत्र स्थातेति गत्वागतिरूह्या । यथोक्तं सभापर्वणि । अन्तर्वेदी प्रविविशुः सत्कारार्हा महर्षयः । नारदप्रमुखास्तथेति ॥८॥ कृष्णेन लोकमनुकुर्वता ॥९-१०॥ सर्वत्रगोऽन्तीत्यन्तेत्यत्र सर्वत्र पन्नयोरुपसङ्ख्यानमित्युक्तेर्गमेर्डः । सर्वत्र गच्छतीति स तथा । एकस्मिन् काले गन्तव्यमेतस्मिन् काले गन्तव्यमित्यसज्यमानत्वात् । कतमोऽखण्डशब्दः । स्वार्थेऽयं प्रत्ययः । को नित्योद्योगेन वर्तते वदेति शेषः । वा बहूनां जातिपरिप्रश्ने डतमच् । बहूनां मध्ये निर्धारणे डतमज्वा स्यात् । किमिदानीं द्विबह्वर्थे प्रत्ययविधानादुपाधिग्रहणमनर्थकं किं कारणम् । बहिर्धारणे निर्धारणमिति । यावता द्वयोरेकस्यैव बहिर्धारणं भवति । अपर आह । बहूनां जातिपरिप्रश्ने डतमजित्यत्र बहुग्रहणमनर्थकम् । किं कारणम् । किमित्येतत्परिप्रश्ने वर्तते । परिप्रश्नश्चानिर्ज्ञातं च बहुषु द्व्येकयोः पुनर्निर्ज्ञातं निर्ज्ञातत्वात् । द्व्येकयोः परिप्रश्नो न परिप्रश्नाभावात्किमेव नास्ति कुतः प्रत्यय इति महाभाष्ये उपाध्यानर्थक्यमिति । अयं भावः । द्वयोरित्यनर्थकम् । बहूनपि निर्धारणे डतच इष्टत्वात् । अजातिपरिप्रश्नेऽपि कतमशब्ददर्शनात् । वा बहूनामित्यत्र जातिपरिप्रश्नग्रहणं न कर्तव्यम् । अथवा द्वयोरित्यस्य निर्धारणषष्ठ्यन्तत्वादेकस्येति न वक्तव्यम् । बहुग्रहणमिति । डतमच उत्सर्गस्य द्वयोरेकस्य निर्धारणे डतरचोपपादस्य विधा बहूनामेव निर्धारणे डत उ भविष्यतीत्यर्थः । किं कारणम् । किमेतदित्यादि परिहारग्रन्थः । किमः सङ्ख्यापरिमाणेऽति चेत्यत्रत्य एवायं ग्रन्थ इत्याहुः । न हीह सङ्ख्याग्रहणमस्ति येनास्य ग्रन्थस्योपयोगः स्यात् । अत्यन्तासम्बद्धश्चेहायं ग्रन्थः । एकद्विविषयस्यापि परिप्रश्नस्य सम्भवात् । को भवान् कतरो भवतोः कट इतीति च जातिपरिप्रश्न इत्यस्य प्रत्याख्यानात्तथा व्याख्यानाच्च । कतमाकतमर्क इति छान्दोग्यपरभाष्ये । ननु वा बहुनां जातिपरिप्रश्ने डतम् । तर्ह्यत्र न जातिबहुत्वं कथं डतमच्प्रयोगः । नैष दोषः । जातेः परिप्रश्नो जातिपरिप्रश्न इति विग्रहे जातिव्यक्तेर्बहुत्वोपपत्तेः । अतो न जातिश्च परिप्रश्नश्चेति विगृह्यते । ननु जातेः परिप्रश्न इति विग्रहे कथं कतमः कट इत्याद्युदाहरणम् ॥ तत्रापि कटादिजातावेव व्यक्तिबहुत्वाभिप्रायेण परिप्रश्न इत्यस्मिन् विग्रहे कतमः कट इत्याद्युदाहरणमुपपन्नमिति विग्रहान्तरग्रहणेन समाध्यभिधानं महीनमहीयसश्चरणे यत्र तत्र शरासनस्थिरासनं क्व कर्तव्यमित्याभाणकमनुकरोतीति मन्तव्यम् । न च सूत्रमात्रविवृतिपरोऽयं ग्रन्थ इति शक्यं वक्तुम् । यथोत्तरमुनीनां प्रामाण्यमित्यङ्गीकृतिभङ्गीभङ्गापदापत्तेः । अत एव कौमुद्यां जातिपरिप्रश्न इति प्रख्यातमित्याकर इत्युक्तमिति दिक् । आस्माकीनव्याख्यायां तु कतमः क इत्येवोक्तमिति तथा व्याख्यातम् ॥११॥ तेन धर्मेण ॥१२॥ भग्नदर्पाः स्वे स्वे विषये स्वस्वदेशे ॥१३॥ दुर्दुष्टश्चासावाग्रहोऽभिनिवेशश्च सोऽस्यास्तीति स तथा । साल्वेषु तद्देशेषु नृपती राजा बहुपदातिवाहनो जातः । दुराग्रहवान् वर्तत इत्यर्थः ॥१४॥ भ्रातरि हंसे ब्रह्मदत्तसुत इति भ्रातृत्वानुबन्धसूचकम् । उपरते मृते सति ॥१५॥ इति कृष्णद्विट् तद्द्वेषी रुक्म्यादीन्राज्ञ एत्य भ्रातुर्हंसस्यानृण्यकाङ्क्षया हरिं हत्वा तदृणापहारेच्छया समाजं मेलनं जरासन्धादिषु शिशुपालद्रुममुख्यैः सह पारिजातेषु सत्सूर्वरितैर्दन्तवक्त्रपुरःसरैः साकम् ॥१७॥ सर्वभूभुजां शृण्वतां क्ष्मां महीमयादवीं यादवा न विद्यन्ते यस्यां साऽयादवी तां करिष्ये । मम पौरुषं भवन्तः पश्यन्त्विति प्रतिज्ञामकरोत् ॥१८॥ तपसे तत्कर्तुं तस्योपगम आगमनम् ॥१९॥ नृपार्थिभिर्नृपमर्थयन्त इति ते । णिनिः । तदनन्तरजः साक्षात्तदवरजोऽमात्यैस्तदादिभिरभिषिक्तो नृपतिः साल्वस्तपः कृत्वा ॥२०॥ सकृदेकदा । पांसुमुष्टिं पांशुमसष्टिमिति वा समर्थौ पाठौ । संवत्सरान्ते स आराधितः ॥२१॥ शरणमागतं साल्वं वरेण छन्दयामास । वरं वरयेत्यूचिवान् । स चायाचतेदमिति वदति ॥ देवेति ॥२२॥ वृष्णिभीषणमिति स्वप्रतिश्रुतपारणार्थमिति मन्तव्यम् । कामगमभेद्यं यानं व्योमयानं वव्रे । तथा कुर्वित्यादिष्टो मयः परपुरञ्जयः सुरवर्धकीकृतपुरजययुतोऽसुरतक्षा ॥२३॥ शिवशंसितः पुरं तद्रूपं सौभं नाम्ना तदात्मकमित्ययस्मयम् । अयस्मयादीनि छन्दसीति स्मरणादुभयसंज्ञाकार्यं निपातनाज्ज्ञेयम् । यथोक्तं महाभाष्ये । वृद्धिरादैच् । कुत्वं कस्मान्न भवति । चोः कुः पदान्तत्वात् । कथं भसंज्ञा । अयस्मयादीनि छन्दसीति छन्दसीत्युच्यते । न चेदं

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

छन्दः । छन्दोवत्सूत्राणि भवन्ति । उभयसंज्ञान्यपि छन्दसि दृश्यन्ते । तद्यथा । स सुष्टुभा स ऋक्वतागणेन । पदत्वात्कुत्वं भत्वाज्जस्त्वं न भवतीति । भसंज्ञया न रुत्वोत्वे पदसंज्ञया च तस्य विकार इति सुबन्तत्वेन मयट्चेति कार्यद्वयं ज्ञेयम् । अयोविकृतं निर्माय कृत्वा । प्रागेव नितरां मया यस्य निर्मायायः स चासौ साल्वश्च तस्मा इति वा । मर्कटमधुपाननीतिर्जातेति भावः । तमोधाम । पश्यतामदृश्यमन्धकारेणेत्यर्थः । उत्तरत्र स्वभर्तुस्तम एव धाम येन तदित्यप्यन्तरङ्गिको भावः । दुरासदमितरैः ॥२४॥ समग्रबलवाहनं जनपदं देशं राजपुत्राणां मध्ये ॥२५॥ भगवतः शौरेः पार्श्वे नारदोदितं श्रुत्वा शनैर्भगवतो मुखमवैक्षत । स्वामिन्नयमेकः प्राघूर्णिकस्तवायात इति ॥२६॥ तन्निशम्य नारदेरितं श्रुत्वा किञ्चित्प्रहस्यास्तु नाम । अनेनालक्ष्यता द्योत्यते । अत एव सामान्यार्थान्तरन्यासेन शंसति ॥ सा हि महात्मतेति । श्रुत्वैवं धृतिस्थितिः महात्मता महात्मत्वं तज्ज्ञापिकेत्यर्थः ॥२७॥ गीर्भिरच्युतो वचनं च रचनमिति वाक् च्युतिरहितः कृष्णः सूनृतैर्वाक्यैर्मुनिं सम्यक् पूजयित्वा सोऽपि चिराभिलषितो बहुदिनं वध्यत्वेनाकाङ्क्षितः प्राप्त इति साध्वित्यचिन्तयत् ॥२८॥ अनन्तरमनन्तः स्वयं स्वपुरं गतवानुत कांश्चित्प्रैषिषदथवा स यत्रास्ते तत्र गत इत्यत आह ॥ उग्रसेनमिति । स्वसैनिकान् सेनासमवेतान् ॥२९-३०॥

(सत्यधर्मकृतभागवतटिप्पण्यनुसारम् अत्र षडशीति-(८६)तमाध्यायस्य समाप्तिः ज्ञेया । सप्तमश्लोकप्रभृत्येतत्पर्यन्तानां श्लोकानामर्थाः अधोदत्तश्रीविजयध्वजपाठान्तरानुसारिश्लोकानुसन्धानपूर्वकं ज्ञेयाः । इत ऊर्ध्वं मूलश्लोकार्थाः एतट्टीकाकारसम्मतसप्ताशीति-(८७)तमाध्यायानुसारमनुसन्धेयाः ।)

॥ हरिः ॐ ॥ कृतकृत्ये अनुष्ठितेष्टौ ॥१॥ अमघोषसुतं शिशुपालं जरासन्धं च सुहृदं हतमित्यन्वयः । आकर्ण्य साल्वः संक्रुद्धः सन् द्वारावतीं ययौ । वृष्णिकृतवैरं स्मरन्साल्वोऽन्तरिक्षे समावसन् युयुधे ॥२-३॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

ततस्तस्यान्तर्यामिणैव बुद्धिनाशो जात इति यत्किञ्चित् प्रार्थयते देवासुरेति । देवासुरमनुष्यास्त्रिगुणप्रधानाः गन्धर्वोरगराक्षसाः मिश्रगुणप्रधानाः । एवं षड्भिः सर्व एव सगुणाः परिगृहीताः । तेषां सर्वेषामेवाभेद्यम् अस्मदधीनं च कामगमन्यथा समुद्रवदस्मत्पुरुषार्थाय न स्यात् । किञ्च । यदर्थस्तु त्वया सह तदर्थं किञ्चिद्याचनीयमिति तस्य यानस्यापरं धर्मं प्रार्थयते - वृष्णिभीषणमिति । वृष्णीनां भयजनकम् ॥६॥ महादेवोऽपि भगवति न किञ्चिद्बाधकमिति तथेत्यङ्गीकृतवान् वरमात्रसिद्धो नित्यो भविष्यतीति अनित्यत्वे कृतकत्वं प्रयोजकमिति मयं प्रत्याज्ञां दत्तवानित्याह तथेति । गिरिशादिष्ट इति परपुरञ्जय इति । शत्रूणां पुरजयशीलः । स हि जानाति पुरं जेयमजेयं च । अतो यथा अजेयं तथा करिष्यतीत्यर्थः । अतस्तादृशं पुरं निर्माय शाल्वाय प्रादात् । तस्य नामस्वरूपे आह सौभमयस्मय इति । सुष्ठु भा येषां ते सुभाः । तेषां सम्बन्धि पुरं सौभम् उत्कृष्टलोहनिर्मितं दृढं भवति ॥७॥ ततः कृतार्थो भूत्वा युद्धार्थं द्वारकां समागत इत्याह स लब्ध्वेति । कामगम् इच्छामात्रेणैवेष्टदेशप्रापकम् । तमोधाम अन्धकारप्रचुरं तस्मिन्नन्धकारस्तिष्ठतीति स न दृश्यते । दुरासदं च केनापि प्राप्तुमशक्यम् । एवं प्राप्तदेववरस्य भगवद्विरोध एव फलमिति । द्वारवतीमेव ययौ । वृष्णिकृतं वैरं रुक्मिणीहरणात्मकं शिशुपालवधात्मकं च पूर्वं दृष्टं श्रुतं च स्मरन् ॥८॥ ततो वैरेण यत्कृतवांस्तदाह निरुद्ध्येति । सौभमात्रं तु तस्य वरप्राप्तं सेना तु स्वाभाविक्यधिका अतस्तदा या पुरीं विरुध्य उद्यानोपवनानि सर्वशो बभञ्ज ॥९॥

सुबोधिनीसारः

देवादीनां गन्धर्वसर्पराक्षसानाम् अभेद्यं कामगमिच्छाचारि वृष्णीनां यादवानां भीषणं भयङ्करं यानं विमानं स शाल्वो ॥६॥ तथास्त्विति शिवेनाज्ञप्तो मयः परेषां वैरिणां पुरञ्जयोऽस्मयं लोहमयं सौभसंज्ञं पुरं निर्माय रचित्वा शाल्वाय प्रादात् ॥ तमोधाम अन्धकाराश्रयं दुरासदं परैर्दुष्प्रापं कामगं यानं लब्ध्वा प्राप्य वृष्णिभिः कृतं वैरं स्मरंश्चिन्तयन् शाल्वो द्वारकां ययौ ॥ भरतर्षभ ! महत्या सेनया सह शाल्वो दैत्यः पुरीं द्वारकां निरुध्य सर्वशः सर्वाणि उपवनानि उद्यानानि च बभञ्ज चूर्णयामास ॥ गोपुरैः सहितानि द्वाराणि प्रासादा गृहा, अट्टालास्तदुपरिगृहाः, तोलिकास्तत्पर्यन्तकुड्यानि विहारान् बभञ्जेति पूर्वेणान्वयः विमानो शस्त्रवृष्टयो निपेतुः ॥१०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स शाल्वः देवादीनामभेद्यं भेत्तुमशक्यं कामं यथेष्टं गच्छतीति तथाभूतं वृष्णीनां यादवानां भीषणं भयङ्करं यानं विमानं वव्रे वृतवान् ॥६॥ तथास्त्वित्यङ्गीकृत्य गिरिशेनादिष्टो मयो दैत्यः अयोमयं सौभाख्यं पुरं विमानं निर्माय शाल्वाय प्रादात्। मय एव तत्प्रार्थितविमाननिर्माणे शक्तः इत्याशयेनाह-परेषां शत्रूणां पुरं जयतीति तथा स इति ॥७॥ स शाल्वः तमसोऽन्धकारस्य धाम आश्रयम् अत एव दुरासदं कामगं विमानं लब्ध्वा वृष्णिकृतं वैरं स्मरन् द्वारावतीं ययावित्यन्वयः ॥८॥ हे भरतर्षभ ! शाल्वो महत्या सेनया पुरीं द्वारवतीं निरुद्धय उपवनादीन् बभञ्ज। उपवनानि फलप्रधानानि, उद्यानानि पुष्पप्रधानानि ॥९॥

अन्वितार्थप्रकाशिका

देवेति ॥ स शाल्वः देवादीनामभेद्यं भेत्तुमशक्यं कामं यथेष्टं गच्छतीति तथाभूतं वृष्णीनां यादवानां भीषणं भयङ्करं न तु घातकं शिवेनान्तःप्रेरणात्तथावरणं यानं विमानं वव्रे वृतवान्। भगवांस्तु देवादिभ्यो भिन्नः अतः सौभं भेत्स्यत्येवेति भावः ॥६॥ तथेति ॥ तथास्त्वित्यङ्गीकृत्य परेषां शत्रूणां पुराणि जयति तथा सः। मुमार्षः। गिरिशेनादिष्टो मयो दैत्यः अयस्मयं लोहनिर्मितम्। अयस्मयादीनिच्छन्दसि इति भत्वाद्रुत्वाभावः। सौभाख्यं पुरं नगराकारं व्योमगं रथं सौभसंज्ञं निर्माय शाल्वाय प्रादात् ॥७॥ स इति ॥ स शाल्वः तमसोऽन्धकारस्य धाम आश्रयम् अत एव अन्यैर्दुरासदं दुष्प्रापं कामगं विमानं लब्ध्वा वृष्णिकृतं वैरं स्मरन् द्वारावतीं ययौ ॥८॥ निरुद्ध्येति सार्द्धद्वयम्। तत्र बभञ्जेत्यन्तमेकं वाक्यम्। शर्करा इत्यन्तमपरम्। हे भरतर्षभ ! सः शाल्वो महत्या सेनया पुरीं द्वारवतीं निरुद्धय उपवनादीन् बभञ्ज। उपवनानि फलप्रधानानि, उद्यानानि पुष्पप्रधानानि गोपुराणि पुरद्वाराणि, तत्सहितानि द्वाराणि प्रासादाः गृहाः अट्टालास्तदुपरितना गृहाः तोलिका तत्पर्यन्तभित्तीः विहारान् क्रीडास्थानानि च सर्वशः सर्वाणि बभञ्ज भङ्क्तुमारब्धवान्। किञ्च विमानाग्र्यात् विमानश्रेष्ठात् तस्मात्सौभात् शस्त्रवृष्टयः शिलादयश्च निपेतुः। आसारो धारासम्पातः शर्कराः सूक्ष्मोपलाः ॥९-१०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अभेद्यमविदार्यं यानं सौभसंज्ञं वाहनम् ॥६॥ तथास्तु इत्युक्तो गिरिशेन शङ्करेण आदिष्ट आज्ञप्तः पराणि अन्यकृतानि पुराणि स्वकौशल्येन जयतीति तथाभूतो मयः अत्र मुमागमआर्षः। अयस्मयं लोहमयम् ॥ अयस्मयादीनिच्छन्दसीति सूत्रानुरोधात्साधु ॥ सौभं सौभाभिधपुरसदृशं विमानं निर्माय विरचय्य शाल्वाय प्रादात् ददौ ॥७॥ तमोधाम अन्धकारपूर्णम् अत एव दुरासदम् अन्यैर्दुर्गम्यम् ॥८॥ उपवनानि ग्रामसमीपवाटिकाः उद्यानानि गृहसमीपवाटिकाः ॥९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

देवेति ॥ देवाश्च असुराश्च मनुष्याश्च तेषां, गन्धर्वाश्च उरगाश्च रक्षांसि च तेषाम्, अभेद्यं देवादिभिर्भेत्तुमशक्यमित्यर्थः। कामगं पुरपेच्छानुसारिगतिमत्, वृष्णीनां यादवानां, भीषणं भयङ्करं, यानं विमानं, स शाल्वः, वव्रे वृतवान् ॥६॥ तथेतीति ॥ तथेति तथास्त्वित्यङ्गीकृत्येत्यर्थः। गिरिशेन शिवेनादिष्टः, परपुरञ्जयः मयः, अयस्मयं लोहमयं, सौभं नाम पुरं निर्माय, शाल्वाय, प्रादात् संप्रददौ ॥७॥ स इति ॥ सः शाल्वः, तमोधामान्धकाराश्रयं, दुरासदं दुःखेनाप्यासादितुमशक्यं, कामगं यानं सौभं, लब्ध्वा, वृष्णिकृतं वैरं स्मरन्सन्, शाल्वः द्वारवतीं, ययौ ॥८॥ निरुद्ध्येति ॥ हे भरतर्षभ, शाल्वः, महत्या सेनया, पुरीं द्वारकां, निरुद्ध्य, सर्वशः, उपवनानि उद्यानानि च, बभञ्ज ॥९॥

कृष्णप्रिया

तब शाल्व ने यह वरदान मांगा कि हे आशुतोष नाथ ! आप मुझे एक ऐसा विमान दीजिये जो विमान सुर असुर नर गन्धर्व, नाग, राक्षसों से तोडा न जा सके और इच्छागामी हो और यदु वंशियों के लिये अत्यन्त भयानक हो ॥६॥ आशुतोष भगवानने कह दिया **तथास्तु** इसके बाद उनकी आज्ञा से शत्रुओं के नगरों को जीतने वाले मय दानवने लोहे का सौभ नामका विमान बनाया और शाल्व को दे दिया ॥७॥ वह केवल विमान

कृष्णप्रिया

नहीं था किन्तु एक नगर ही था । वह विमान इतना अन्धकारमय था कि उसे देखना या पकडना अतिशय कठिन था । विमान चालक सौभ को जहां ले जाना चाहता वहां वह इच्छा करते ही चला जाता था । शाल्व ने सौम को प्राप्त करके द्वारिकानगर पर चढाइ कर दी । कारण वह तृष्णिवंशी यादवों द्वारा किये हुए बैर का सतत स्मरण रखता था ॥८॥ राजन् परीक्षित ! शाल्वने अपनी अतिशय महती सेना से द्वारिकापुरी को चारों ओरसे घेर लिया और नगर के फल फूलों से लदे हुए उपवन और उद्यानों को उजाडने और नगर के द्वारों फाटकों राज महलों अटारियों दीवारों और नागरिकों के मनोविनोद श्रेष्ठ स्थानों को नष्ट भ्रष्ट करने लगा भयानक विमान से शस्त्रों की लग गयी ॥९-१०-॥

स गोपुराणि द्वाराणि [1]प्रासादाट्टालतोलिकाः । विहारान्[2] स विमानाग्र्यान्निपेतुः शस्त्रवृष्टयः ॥१०॥
शिला[3]द्रुमाश्चाशनयः [4]सर्पा आसारशर्कराः । प्रचण्डश्चक्रवातोऽभूद्रजसाऽऽच्छादिता दिशः ॥११॥
इत्यर्द्यमाना सौभेन कृष्णस्य नगरी भृशम् । नाभ्यपद्यत शं राजंस्त्रिपुरेण यथा मही ॥१२॥
प्रद्युम्नो भगवान् वीक्ष्य [5]बाध्यमाना निजाः प्रजाः । मा भैष्टेत्यभ्यधाद्वीरो [6]राथारूढो [7]महायशाः ॥१३॥

कर्दमक्षमा

सगोपुराणि, द्वाराणि, प्रासादाट्टालतोलिकाः, स, विमानाग्र्यान्, विहारान्, शस्त्रवृष्टयः, निपेतुः ॥१०॥ शिलाः, द्रुमाः, च, अशनयः, सर्पाः, आसारशर्कराः, प्रचण्डः, चक्रवातः, अभूत्, रजसा, दिशः, आच्छादिताः ॥११॥ राजन् ! इति सौभेन, भृशम्, अर्द्यमाना, कृष्णस्य, नगरी, त्रिपुरेण, अर्द्यमाना, यथा, मही, शम्, न, अभ्यपद्यत ॥१२॥ निजाः, प्रजाः, बाध्यमानाः, वीक्ष्य, भगवान्, प्रद्युम्नः, मा भैष्ट, इति, महायशाः, रथारूढः, वीरः, अभ्यधावत् ॥१३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रासादा गृहा अट्टालास्तदुपरिगृहास्तोलिकास्तत्पर्यन्तकुड्यानि ताः विहारान् क्रीडास्थानानि च स बभञ्ज किञ्च विमानाग्र्यात्तस्माच्छस्त्रवृष्ट्यादयः पेतुः ॥१०॥ आसारशर्कराधारा सम्पातवज्जलोपलाः ॥११॥ शं सुखं नाभ्यपद्यत ॥१२-१५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदुपरि प्रासादोपरि । तत्पर्यन्तमट्टालिकापर्यन्तम् । स शाल्वः । न केवलं स एव बभञ्जापि तु तस्मान्महादेवप्रसादलब्ध-विमानादपीत्याह-किं चेति ॥१०॥ जलपलाः करकाः ॥११। सौभेन तत्संज्ञपुरेण तत्रत्यशाल्वेन च ॥१२-१४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गोपुराणि पुर्या बहिर्द्वाराणि तत्सहितानि द्वाराण्यन्यानि भञ्जनार्थमेव नितरां नैरन्तर्य्यादिना पेतुः प्रचण्डश्चासौ चक्रवातश्च वात विमानार्थमेव नितरां नैरन्तर्य्यादिना पेतुः प्रचण्डश्चासौ चक्रवातश्च वात्या विमानाग्र्यादेवाभूत् शीघ्रभ्रमणोर्ज्जित्यात् रजसा चक्रवातभ्र ॥१०-११॥ भृशमर्द्यमाना हंस्यमाना श्रीकृष्णस्य पुरीति साश्चर्य्यदुःखवचनं तस्य दुर्बोधलीलस्य तादृश्येवेच्छेति भावः ॥१२॥ बाध्यमान बोधितुमारभ्यमाणाः मा भैष्टेत्यभ्यधात् अब्रवीत् यतो भगवान् स्वयं भगवत एव तृतीयव्यूहः तथा लौकिकलीलया च वीरः शू तत्रापि महारथः योधवर्गश्रेष्ठः तत् किमिदमाश्चर्य्यं किन्तु तादृशक्षुद्रैरपि लीलाकौतुकमिति भावः ॥१३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गोपुराणि पुर्य्या बहिर्द्वाराणि तत्सहितानि, द्वाराण्यन्यानि, भञ्जनार्थमेव नितरां नैरन्तर्य्यादिना पेतुः ॥१०॥ प्रचण्डश्चासौ

---

१. प्राकाराट्टाल-गो. प्रे. टी. । २.विहायसो विमानाग्या-विज. । ३. शैलाद्रुमा-विज. । ४. हासारशर्कराः-श्रीधर. वंशी. वीर. विज.। मथ्यमाना-विज. । ६. वाचः पित्रोरनुस्मरन्-विज. । ७. महारथः-गो. प्रे. टी. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

चक्रवातश्च वात्या विमानाग्र्यादेवाभूत्। सविसर्गपाठे पाठान्तरेऽपि स एवार्थः। रजसा चक्रवात-भरेण तद्विमानादेव निपतितेन वा ॥११॥ भृशमर्द्यमाना शस्त्रवृष्ट्यादिभिर्हिंस्यमाना (हन्यमाना [ग]) सती कृष्णस्य परमानन्दघनस्य, अतः परमानन्दमय्यपि नगरी शं न अभितोऽपद्यत लेभे। नन्वेतदसम्भाव्यमिव, तत्राह-त्रिपुरेणार्दिता मही सर्वा यथा शं नाभ्यपद्यत तद्वदिति, त्रिपुरदाहादिना पूर्वं यथा श्रीरुद्रस्य माहात्म्यं श्रीभगवता विस्तारितम्, तथाधुनापि तदर्थं तदिच्छयैवेति भावः। तच्च त्वया बुध्यत एवेत्याह-हे राजन्निति। यद्वा, मही त्रिपुरेण यथार्दिता तथार्द्यमानापि शं नाभ्यपद्यत किम्? - काक्वा; अपि त्वभ्यपद्यतैव, यतः कृष्णस्य। अन्यत् समानाम् ॥१२॥ बाध्यमाना बाधितुमारभ्यमाणा वीक्ष्य आलक्ष्य मा भैष्टेति प्रजा आश्वास्य अभ्ययादभिमुखं गतः। अभ्यधादिति पाठे पाठान्तरेऽब्रवीत्। यतो भगवान् सर्वशक्तियुक्तः, अतो वीरोऽभयदानादौ समर्थः। किञ्च, महारथो योधवर्गश्रेष्ठः, पाठान्तरपक्षेऽपि निर्ययाविति ज्ञेयमेव ॥१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४-१६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अत्राट्टालाः प्राकारोपरिगृहाः तोरणाः बहिर्द्वाराणि विहाराः क्रीडास्थानानि विमानाग्र्यात्तस्मात्सौभाच्छस्त्रवृष्टयः शिलादयश्च निपेतुः ॥१०॥ तत्रासारो धारासम्पातः शर्कराः सूक्ष्मशिलाः प्रचण्डो निष्ठुरश्च वातो बभूव दिशश्च रजसाधूलिताः छादिताः बभूवुः ॥११॥ इतीति। इतीत्थं सौभेन यानेन भृशमर्द्यमाना पीड्यमाना कृष्णस्य नगरी द्वारका हे राजन्! शं सुखं नाभ्यपद्यत न प्राप यथा त्रिपुरेणार्द्यमाना मही शं नाभ्यपद्यत तद्वत् ॥१२॥ प्रद्युम्न इति। भगवान् षड्गुणसम्पन्नः प्रद्युम्नः बाध्यमानाः पीड्यमानाः निजाः स्वकीयाः प्रजाः प्रेक्ष्य इतीत्यन्तरमुक्त्वेति शेषः अभ्ययादभ्यद्रवत् ॥१३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अट्टालोऽट्टः तोलिका वीथिका गृहपङ्क्तिमध्यपद्धतिरित्यर्थः। विहायस आकाशात् ॥१०॥ आसारो वेगवान् वर्षः तत्सहिताः शर्कराः क्षुद्रपाषाणाः चक्रवातो मण्डलवायुः ॥११॥ शं सुखम् ॥१२-१६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तोलिका भित्तिः विहारान् क्रीडास्थानानि स साल्वः ततश्च विमानश्रेष्ठात् सौभात् ॥१०-१२॥ प्रद्युम्नो भगवान्वीक्ष्येति युद्धार्थं बलभद्रे निर्जिगमिषति सति वयमेव शाल्वं वधिष्यामस्त्वया तु सुखेनात्रैव स्थेयमित्युक्त्वा साम्बादिभिः सह प्रद्युम्न एव निर्जगामेति ज्ञेयम् ॥१३-१६॥

गूढार्थदीपिनी

प्रचण्ड इत्यर्धम् ॥११॥ सौभेन सौभस्थशाल्वेन अर्द्यमाना पीड्यमाना नगरी शं सुखं न प्राप। त्रिपुरेण त्रिपुरासुरेण यथा मही तत्र स्थिता जनता ॥१२॥ अभ्ययात् अभ्यधावत्। इत्येव पाठः ॥१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स शाल्वः सगोपुराणि गोपुरसहितानि द्वारादीनि बभञ्जेति शेषः। तोलिकाः कुड्यानि विमानाग्र्यात् सौभात् शस्त्रवृष्टयश्च निपेतुः ॥१०॥ शिलादयश्च निपेतुरित्यनुषङ्गः आसारेण जलधारासम्पातेन सह शर्करा जलोपलाः ॥११-१२॥ अभ्ययात् अभ्यद्रवत् ॥१३-१५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उपवनानि तथोद्यानानि तोलिकाः प्रतोलिका बभञ्ज ॥४॥ विहायसाऽऽकाशाद्विमानाग्र्याच्छस्त्रवृष्टयो निपेतुः । आसारो धारासम्पातः शर्कराः क्षुद्रपाषाणाः ॥५॥ यदा नीतेन रजसा दिश आच्छादिताः स प्रचण्डचक्रवातो मण्डलानिलोऽभूत् । इत्येवं नगरी द्वारावत्यर्द्यमाना शं नाभ्यपद्यत् तदन्तर्गतो लोकः शं नाभ्यपद्यतेत्यर्थः । त्रिपुरेणेत्येकवचनेन कदाचित्त्रयाणामप्येकीभावविवक्षटया । महीतस्था जनाः ॥६॥ पित्रो रामकृष्णयोः ॥७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो दुर्गमध्येऽप्युपद्रवं कृतवानित्याह सगोपुराणि द्वाराणीति । गोपुरद्वारसहितानि द्वाराण्यालक्ष्य शस्त्रवृष्टयो निपेतुरिति सम्बन्धः । बभञ्जेति केचित् । प्राकारा अट्टालास्तोलिकाश्च प्राकारस्था एवैताः । तोलिकाश्छिद्रपङ्क्तयः यत्र स्थितैः पाषाणाः क्षिप्यन्ते । प्रतोलिका वा शोभास्थानानि । विहारान् विश्रामस्थानानि तानि विमानाग्र्यसहितानि तेषां भञ्जनार्थं तत्र स्थितपुरुषाणां पीडार्थं वा शस्त्रवृष्टयो निपेतुः । साधारणमेतद्युद्धम् ॥१०॥ दैत्ययुद्धमाह शिलाद्रुमा इति । पाषाणा वृक्षाश्च बहिरुत्पाटिताः अन्तः प्रक्षिप्ताः अशनयोऽपि तस्य वरप्राप्त्या आसुरमायया अशनयोऽपि तदधीनाः तथा सर्पाश्च प्रासारशर्कराः प्रकृष्य आकाररूपाः शर्कराः सूक्ष्मपाषाणवृष्टिं कृतवन्तः, शिला द्रुमास्तामसाः अशनयः सात्त्विकाः सर्पप्रासारशर्करा राजसाः । एवं त्रैविध्येन सर्व एव प्रकार उक्तः । ततः कृत्रिममाह – प्रचण्डश्चक्रवातोऽभूदिति । भ्रमं जनयतीति भिन्नतया च निरूपितम् । चक्रवातो वात्या रजसा रेणुसमूहेन दिशः आच्छादिताः । एवं प्राकारतन्मध्यस्थितानां क्रियाविघातकं ज्ञानविघातकं च कृतवन्त इत्यर्थः ॥११॥ तेषामुपद्रवेण जातं फलमाह इत्यर्द्यमानेति । सौभेनाधमेन पीड्यमाना अतदर्हा यतः कृष्णनगरी अतिसुकुमारी शं नाभ्यपद्यत निरोधत्वात् न भक्तिमार्गविरुद्धं वर्णनम् । राजन्निति विश्वासार्थम् । पीडाया इयत्तां वक्तुं दृष्टान्तमाह त्रिपुरेण यथा महीति ॥१२॥ एवं महादेवप्रीत्यर्थं तस्योत्कर्षमुक्त्वा सर्वथा भग्नोपाय एव भगवत्परो भवतीति उपायान्तरं दूरीकर्तुं प्रद्युम्नादीनां रक्षार्थं युद्धमाह उद्यम्येति । तस्य प्रथमतो गमने हेतुर्भगवानिति । भगवत्त्वात्स्वरूपज्ञानमुपायज्ञानं च निजाः प्रजा इति रक्षाभिनिवेशार्थमुक्तम् । आदौ मनसा रक्षां विचारितवान् । ततो वचनेनाप्याह मा भैष्टेत्यभयात् मुखतो मा भैष्टेत्युक्त्वा पश्चाद्रथेन युद्धदेशमभ्ययात् इत्यर्थः ॥१३॥

श्रीसुबोधिनीसारः

तद्यथा शिला वृक्षा वज्रा सर्पा आसारो धारापातः तद्युक्तशर्करा जलोपलाः प्रचण्डस्तीव्रश्चक्रवातोऽभूत् । रजसा रेणु दिश आवृताः ॥११॥ इत्येवं सौभेन सौभस्थजनेनार्द्यमाना पीड्यमाना कृष्णस्य नगरी द्वारका तत्स्था प्रजा लक्षणा चोभयत्र भृशमत्यर्थं शं सुखं नाप्नोत् । हे राजन् ! त्रिपुरेण तत्स्थजनेन मही पृथिवीव ॥१२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गोपुराणि पुरद्वाराणि, तत्सहितानि द्वाराणि । प्रासादाः गृहाः । अट्टालास्तदुपरितना गृहाः । तोलिका भित्तीः । विहारा क्रीडास्थानानि । किञ्च विमानाग्र्यात् विमानश्रेष्ठात् तस्मात् सौभात् शस्त्रवृष्टयः शिलादयश्च निपेतुः । आसारो धारासम्पातः शर्कराः सूक्ष्मोपलाः । प्रचण्डो निष्ठुरचक्रवातोऽभूत् । दिशश्च रजसा आच्छादिता बभूवुः ॥१०-११॥ इत्येवं सौभेन भृशमर्द्यमाना पीड्यमाना कृष्णस्य नगरी द्वारका हे राजन् ! शं सुखं नाभ्यपद्यत न प्राप । तत्र दृष्टान्तमाह–यथा त्रिपुरेण पीड्यमाना मही सु न प्राप तद्वदिति ॥१२॥ प्रद्युम्नस्तदा निजाः प्रजाः बाध्यमानाः पीड्यमानाः वीक्ष्य मा भैष्टेत्युक्त्वा रथारूढः युद्धप्रदेशमभ्ययात् । तत्र तस्य भयाभावे हेतुमाह–वीर इति । तत्रापि विशेषमाह–महाराथ इति । तस्य तथात्वे किं वक्तव्यम् यतो भगवान् भगवदंशावतार इत्यर्थः ॥१३॥

अन्वितार्थप्रकाशिका

प्रचण्ड इत्यर्धम् । प्रचण्ड निष्ठुरचक्रवातोऽभूत् । दिशश्च रजसा आच्छादिता बभूवुः ॥११॥ इतीति ॥ हे राजन् ! इ सौभेन भृशमर्द्यमाना पीड्यमाना कृष्णस्य नगरी द्वारका शं सुखं नाभ्यपद्यत न प्राप । यथा त्रिपुरेण पीड्यमाना मही सुखं न तद्वत् ॥१२॥ प्रद्युम्न इति ॥ भगवान् भगवदंशः वीरो महायशाश्च प्रद्युम्नस्तदा निजाः प्रजाः बाध्यमानाः पीड्यमानाः वीक्ष्य

अन्वितार्थप्रकाशिका

भैष्टेत्युक्त्वा रथारूढः सन् युद्धप्रदेशमभ्ययात् । अभ्यधादित्यपि पाठः । तत्र युद्धदेशमभ्ययाच्चेति शेषः । अत्र चक्रवर्ती । युद्धार्थं बलभद्रे निर्जिगमिषति सति वयमेव शाल्वं बाधिष्यामस्त्वया तु सुखेनात्रैव स्थेयम् । इत्युक्त्वा साम्बाद्यैः सह प्रद्युम्न एव निर्ययाविति प्राह ॥१३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गोपुरसहितानि अन्यानि द्वाराणि प्रासादाः महागृहाः अट्टालाः गृहोपरिभूमिकाः तोलिकाः तत्पर्यन्तभित्तिकाः विहारान् रमणस्थानानि च सः बभञ्जेति पूर्वेण सम्बन्धः । विमानाग्र्यात् विमानश्रेष्ठात् सौभात् शस्त्रवृष्टिप्रभृतयो निपेतुः ॥१०॥ आसारशर्कराः आसारो जलधारासम्पातः शर्कराः जलकरकाश्च ॥११॥ सौभेन विमानेन कृत्वा शाल्वेन अर्द्यमाना ॥१२-१३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सगोपुराणीति ॥ सगोपुराणि गोपुरैः सहितानि, द्वाराणि, प्राकाराश्च अट्टालकाश्च तोलिकाश्च ताः, तत्र प्राकाराः प्रसिद्धाः, अट्टालाः प्राकारोपरितनगृहाः, तोलिकास्तत्पर्यन्तकुड्यनि, प्राकारा इत्यत्र प्रासादा इत्यपि पाठः । विहारांश्च, बभञ्जेत्यनेनान्वयः । तत्र विहाराः क्रीडास्थानानि, विमानाग्र्यात् विमानेषु श्रेष्ठात्तस्मात् सौभात्, शस्त्रवृष्टयः बाणादिशस्त्राणां वृष्टयः, निपेतुर्न्यपतन् ॥१०॥ शिला इति ॥ शिलाः, द्रुमा वृक्षाः, अशनयः, सर्पाः, आसारा धारासंपाताश्च शर्कराः सूक्ष्मशिलाश्च, निपेतुः । प्रचण्डो निष्ठुरः, चक्रवातः मण्डलवायुः, अभूत् । दिशः जरसा, आच्छादिताः, बभूवुः ॥११॥ इतीति ॥ इतीत्थं, सौभेन भृशं अर्द्यमाना, कृष्णस्य नगरी द्वारका, हे राजन्, यथा त्रिपुरेण, अर्द्यमाना, मही, शं, न अभ्यपद्यत । तद्वत्, शं सुखं, न अभ्यपद्यत ॥१२॥ प्रद्युम्न इति ॥ भगवान् षड्गुणसंपन्नः, वीरः महारथः, प्रद्युम्नः, बाध्यमानाः सौभेन पीड्यमानाः, निजाः प्रजाः वीक्ष्य, मा भैष्ट इति उक्त्वेति शेषः । रथारूढः सन्, अभ्ययात् ॥१३॥

कृष्णप्रिया

अब सौभ विमान से श्रीद्वारिकानगरी पर बडी और भारी चट्टाने बरसने लगी, वृक्ष वज्र सर्प और ओले बरसने लगे । बडे भयंकर बवंडर उठने लगे । चारों और धूल ही धूल छा गटी ॥११॥ राजन् ! एकबार जैसे त्रिपुरासुरने सारी भूमि को पीडित कर रखा था वैसे ही शाल्य विमानने श्रीद्वारिकानगरी को अत्यंत पीडित कर दीया । द्वारिकापुरीमें निवास करने वाले नर-नारियों को कही एक क्षण के लिये भी शान्ति नही मिलतीथी ॥१२॥ परम यशस्वी वीर प्रद्युम्न भगवान ने देखा कि द्वारिकाकी प्रजा को भारी कष्ट हो रहा है तब वीर प्रद्युम्नजीने रथ पर सवार हो कर सब का उत्साह बढाया और कहा कि मत डरो ॥१३॥

सात्यकिश्चारुदेष्णश्च साम्बोऽक्रूरः [1]सहानुजः । हार्दिक्यो भानुविन्दश्च गदश्च शुकसारणौ ॥१४॥
अपरे च महेष्वासा रथयूथपयूथपाः । निर्ययुर्दंशिता गुप्ता [2]रथेभाश्वपदातिभिः ॥१५॥
ततः प्रववृते युद्धं शाल्वानां यदुभिः सह । यथासुराणां विबुधैस्तुमुलं लोमहर्षणम् ॥१६॥
[3]ताश्च सौभपतेर्माया दिव्यास्त्रै रुक्मिणीसुतः । क्षणेन नाशयामास नैशं तम इवोष्णगुः ॥१७॥

कर्दमक्षमा

सात्यकिः, च, भानुविन्दः, च, गदः, च, शुकसारणौ, च अपरे, महेष्वासाः, रथयूथपयूथपाः, रथेभाश्वपदातिभिः, गुप्ताः, दंशिताः, निर्ययुः ॥१४-१५॥ ततः, यथा, असुराणाम्, विबुधैः, सः, लोमहर्षणम, तुमुलम्, यदुभिः, सह, शाल्वानाम्, युद्धम्, प्रववृते ॥१६॥ च, सौभपतेः, ताः, माया, रुक्मिणीसुतः, दिव्यास्त्रैः, उष्णगुः, नैशम्, तम, इव, क्षणेन, नाशयामास ॥१७॥

---

[1] सहानुजैः-वीर. विज. । [2] रथनागाश्वपत्तिभिः-विज. । [3] तां च सौभपतेर्मायां-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तुमुलं व्याकुलम् लोमहर्षणं रौद्रम् ।।१६।। नैशं निशिभवं तम उष्णगुः सूर्य इव ।।१७।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दंशिताः सन्नद्धाः ।।१५।। ततः पुरात् प्रद्युम्ननिर्गमनोत्तरम् ।।१६।। ताः शिलाद्रुमवर्षणादिरूपाः । उष्णा गावः किरणा यस्य स तथा ।।१७।। दंशिताः सन्नद्धाः ।।१५।। ततः पुरात् प्रद्युम्ननिर्गमनोत्तरम् ।।१६।। ताः शिलाद्रुमवर्षणादिरूपाः । उष्णा गावः किरणा यस्य स तथा ।।१७।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सात्यकिरिति युग्मकम् । चारुदेष्णः प्रद्युम्नानुजः अक्रूरानुजाः आसङ्गसारमेयादयश्चतुर्दश भानुविन्दः श्रीसत्यभामाज्येष्ठपुत्रो भानुरेव शुकः कश्चित् सारणः श्रीरोहिणीसुतः चकारात् सर्वेषां निर्य्याणे प्राधान्यापेक्षया पुरीरक्षार्थं श्रीबलदेववसुदेवोग्रसेनादयोऽभ्यन्तर एवासन्निति ज्ञेयम् रथादीनां यथापूर्वं सेनाङ्गत्वे गुप्तिसाधनत्वे च श्रैष्ठ्यम् ।।१४-१५।। साल्वानां साल्वदेशोद्भवानां यद्वा साल्वस्य(त्व)तदीयानाञ्चेत्यर्थः ।।१६।। रुक्मिण्याः श्रीमहिषीवर्गश्रेष्ठायाः सुतः ज्येष्ठपुत्र इति माहात्म्यभरः सूचितः ।।१७।। स्वर्गपुङ्खैरित्यादिविशेषणैः शराणाङ्गाढवेधकत्वं सूचितम् ।।१८।। एकैकेनेति । प्रत्येकमेकैकेन शरेणेत्यर्थः । एवमग्रेऽपि ।।१९।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

चारुदेष्णः श्रीप्रद्युम्नानुजः, अक्रूरानुजा आसङ्गसारमेयादयश्चतुर्दश, भानुविन्दः श्रीसत्यभामापुत्रो भानुरेव, शुकः सारणः श्रीरोहिणीसुतः, च-काराः सर्व्वेषां निर्य्याणे प्राधान्यापेक्षया । अपरे च श्रीभगवत्पुत्र-भ्रात्रादयः, महान् सर्वतः श्रेष्ठतर इष्वासो येषां ते; अतो रथानां यूथानि पान्ति ये तेषामपि यूथपाः, यादववीरवर्गमुख्यतमा इत्यर्थः । दंशिताः सन्नद्धा रथादिभिर्गुप्ताश्च निर्ययुः । पुरादिति पुरीरक्षणार्थं श्रीबलदेव-वसुदेवोग्रसेनादयोऽपिते चासन्निति ज्ञेयम् । रथादीनां यथापूर्वं सेनाङ्गत्वे गुप्तसाधनत्वे च श्रैष्ठ्यम् ।।१४-१५।। साल्वानाम्, यद्वा, साल्वस्य तदीयानां चेत्यर्थः । साल्वदेशोद्भवानां यथेति सुप्रसिद्धदेवासुरमहायुद्धोपमया महत्त्वम्; यद्वा, काक्वा ततोऽप्याधिक्यं सूचयति । तदेवाह-तुमुलमिति विशेषणाभ्याम् ।।१६।। ताः पूर्व्वोक्ताः शस्त्रवृष्ट्यादि-निपातलक्षणाः सर्वमहिषीवर्गज्येष्ठायाः (सर्व्वमहिषीश्रेष्ठायाः[ग]) सुतः ज्येष्ठपुत्र इति माहात्म्यभरः सूचितः । अतः क्षणेन सद्य एव नाशयामास । नैशमिति दृष्टान्तेन निर्गम-मात्रेणानायासेन युगपदशेषमायानाशनं द्योतयति । स्वर्णपुङ्खैरित्यादिविशेषणैः शराणां गाढवेधकत्वमुक्तम् ।।१७-१८।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ।।४-१६।।

उष्णगुः आदित्यः ।।१७-२०।।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तथा सात्यकिप्रभृतयोऽपरे च यदुवीरा महान्तः इष्वासाः धनूंषि येषां ते रथयूथपानामपि यूथपा दंशिताः कवचिताः रथादिभिश्चतुर्भिरङ्गैर्गुप्ताश्च निर्ययुः द्वारकाया इति शेषः ।।१४-१५।। तत इति । युद्धं प्रवृत्तमभूत् यथा विबुधैर्देवैः सह असुराणां तद्वत् कथम्भूतं तुमुलं व्याकुलं रोमहर्षणं शृण्वतामपि रोमोद्गमम् ।।१६।। ताश्चेति । याः शस्त्रवृष्ट्यादयो मायास्ताः क्षणे नाशयामास उष्णा गावः किरणाः यस्य स सूर्यो नैशं निशासम्बन्धि तमोऽन्धकारं नाशयति तद्वत् ।।१७।।

श्रीमद्विजयध्वजकृता पदरत्नावली

उष्णा गावो यस्य स उष्णगुः सूर्यः ।।१७-१९।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।।५-३३।।

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।।१-३३।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ।।१-३३।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नैशं निशाभवम् उष्णगुः सूर्यः ।।१७।।

गूढार्थदीपिनी

चारुदेष्णः प्रद्युम्नानुजः । भानुविन्दो भानुः सत्यभामाज्येष्ठसुतः । शुकनामा यादवः । सारणः रौहिणेयः । महान्त इष्वासा धनूंषि येषां ते । यूथपा विशिष्टसेनापतयः । दंशिता धृतकवचाः । रथेति चतुरङ्गसैन्यैः गुप्ताः सन्तः निर्ययुः ॥१४-१५॥ तुमुलं घोरं लोमहर्षणं रोमाञ्चकारी ॥१६॥ सौभपतेः शाल्वस्य ताः शस्त्रवृष्ट्यादिरूपा मायाः प्रद्युम्नः क्षणेन नाशयामास । उष्णगुः सूर्यः यथा नैशं निशायां भवं तमः नाशयति । उष्णाः तीक्ष्णाः गावः किरणाः यस्येति ॥१७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तुमुलं व्याकुलम् ॥१६-१८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हार्दिक्यः कृतवर्मा ॥८॥ रथयूथपानां यैथपा दंसिताः कवचिनो रथनागाश्वपत्तिभिर्गुप्ताः ॥९॥ तुमुलं विबुधैरसुराणां यथा तथा साल्वानां यदुभिः सह युद्धं प्रववृते ॥१०॥ नैशं निशासम्बन्धितमोऽन्धकारः । उष्णगुरुष्णा गावो यस्य स उष्णगुः सविता ॥११॥ रुक्मिणीसुतः॥१२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तथा सात्यकिरपि चारुदेष्णः प्रद्युम्नभ्राता, अक्रूरो भ्रातृसहितः हार्दिक्यादयो यादवा गदादयो भ्रातरः । शुकसारणौ दूतौ परं भ्रातरौ ॥१४॥ अपरे च यादवाः महेश्वासाः धनुर्धरा रथयूथपानामपि यूथपाः दंशिताः रथादिभिर्वेष्टिता निर्ययुः । फलप्रकरणत्वाल्लौकिकी भाषा फलं सर्वत्रानुभवसिद्धत्वाल्लौकिकमेव । अतः स्वतो महान्तः साधनसहिता युद्धार्थं निर्गता इति स्वतः प्रतीकारार्थं प्रवृत्तिः तद्भगवान् दूरी करिष्यति । लौकिकी भाषेयमिति न पूर्वविरोधः । बलभद्रो विद्यमानोऽपि महादेवप्रेरितोऽयमित्युपेक्षित इति केचित् क्वचिदन्यत्र गत इति च ॥१५॥ तत उभयोः शूरत्वख्यापनाय युद्धं वर्णयति ततः प्रववृते युद्धमिति । शाल्वानामिति बहुवचनं प्राणभृन्न्यायेन प्रधानव्यपदेशन्यायेन वा । उभयेषां युद्धे दार्ढ्यमाह यथासुराणां विबुधैरिति । असुराणां यथा देवैस्तुमुलमधिकं लोमहर्षणं प्रचण्डप्रहारयुक्तम् । यस्मिन् श्रुते रोमाञ्चो भवति ॥१६॥ ततो मायया तैर्या बिभीषिका प्रदर्शिता तां प्रद्युम्नो निवारितवानित्याह ताश्च सौभपतेर्माया इति । दिव्यास्त्रैराग्नेयादिभिः नारायणास्त्रेण पाशुपतेन वा मूले छेदमकृत्वा अर्धप्राकृतबुद्ध्या युद्धं करोतीति अपरितोषेणाऽऽह रुक्मिणीसुत इति । यदर्थं कृतवान् तज्जातमित्याह क्षणेन नाशयामासेति । नैशं तमो रात्रेः सम्बन्ध्यन्धकारः सूर्यस्य सहजनिराकार्यः । तेन निरायासेन निराकरणमुक्तम् ॥१७॥

श्रीसुबोधिनीसारः

सात्यक्यादयः शूराः स्पष्टार्थाः ॥१४॥ अपरेऽन्ये महेष्वासा महाधनुर्धारिणो रथयूथपानां यूथपाः दंशिता धृतकवचाः चतुरङ्गबलेन गुप्ता रक्षिता निर्ययुः योद्धुं निर्गताः ॥१५॥ ततोऽनन्तरं शाल्वानां यदुभिः सह युद्धं प्रववृते असुराणां दैत्यानां विबुधैर्देवैः सह यथा तुमुलं सङ्कीर्णं रोमहर्षणम् ॥१६॥ सौभपतेः शाल्वस्य ता माया रुक्मिण्याः सुतः प्रद्युम्नः दिव्यैरस्त्रैः क्षणेनैव नाशयामास । नैशं निशिभवं तम उष्णगुः सूर्य इव ॥१७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तथा महान्त ईष्वासा धनूंषि येषां ते यथयूथानि पान्ति ते तेषामपि यूथपाः दंशिताः कवचिताः रथादिभिश्चतुर्भिः सैन्याङ्गैः गुप्ताश्च सात्यकिप्रभृतयोऽपरे निर्ययुरिति द्वयोरन्वयः ॥१४-१५॥ ततश्च यथा पूर्वमसुराणां विबुधैः सह युद्धमभूत् तथा तुमुलं व्याकुलं शृण्वतां पश्यतां च रोमहर्षणं रोमोद्गमकरं शाल्वानां यदुभिः सह युद्धं प्रववृते ॥१६॥ ताश्च सौभपतेः शाल्वस्य शस्त्रादिवृष्टिरूपा माया रुक्मिणीसुतः प्रद्युम्नः क्षणमात्रेण दिव्यास्त्रैर्नाशयामासेत्यन्वयः । तत्र दृष्टान्तमाह–उष्णा गावः किरणा यस्य स सूर्यो यथा नैशं निशासम्बन्धि तमोऽन्धकारं नाशयति तद्वदिति ॥१७॥

अन्वितार्थप्रकाशिका

सात्यकिरिति युग्मम् ॥ तथा महान्त इष्वासा धनूंषि येषां ते यथयूथानि पान्ति ते तेषामपि यूथपाः दंशिताः कवचिताः रथादिभिश्चतुर्भिः सैन्याङ्गैः गुप्ताश्च सात्यकिप्रभृतयोऽपरे निर्ययुः ॥१४-१५॥ तत इति ॥ ततश्च यथा पूर्वमसुराणां विबुधैः सह युद्धमभूत् तथा तुमुलं व्याकुलं शृण्वतां पश्यतां च रोमहर्षणं रोमोद्गमकरं शाल्वानां यदुभिः सह युद्धं प्रववृते ॥१६॥ ता इति ॥ ताश्च सौभपतेः शाल्वस्य शस्त्रादिवृष्टिरूपा माया रुक्मिणीसुतः प्रद्युम्नः क्षणमात्रेण दिव्यास्त्रैर्नाशयामास । यथा उष्णगुः सूर्यः निशायां भवं तमः नाशयति तद्वत् ॥१७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

चारुदेष्णः प्रद्युम्नानुजः भानुविन्दो भानुः सत्यभामाज्येष्ठसुतः शुकाभिधो यादवः सारणो रौहिणेयः ॥१४॥ तुमुलं सम्भ्रमजनकम् ॥१५-१६॥ उष्णगुः रविः नैशं रात्रिभवं तमः ॥१७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सात्यकिरिति ॥ ततः सात्यकिः, चारुदेष्णः, साम्बः, सहानुजोऽनुजैः सह वर्तमानः, अक्रूरश्च, हार्दिक्यः, भानुविन्दश्च, गदः, शुकश्च सारणश्च तौ च ॥१४॥ अपरे इति ॥ महेष्वासाः रथयूथपयूथपाः, अपरे च, दंशिताः कवचिताः, रथाश्च इभाश्च अश्वाश्च पदातयश्च तैः, गुप्ताः सन्तः, निर्ययुः ॥१५॥ तत इति ॥ ततः, शाल्वानां शाल्वसैनिकानां, यदुभिः सह, असुराणां विबुधैर्देवैः सह, यथा तथा, तुमुलं व्याकुलं लोमहर्षणं युद्धं, प्रववृते प्रवृत्तमभूत् ॥१६॥ ताश्चेति ॥ सौभपतेः ताश्च, मायाः, रुक्मिणीसुतः प्रद्युम्नः, दिव्यास्त्रैः, नैशं रात्रिभवं, तमो ध्वान्तम्, उष्णगुः सूर्यः इव, क्षणेन नाशयामास ॥१७॥

कृष्णप्रिया

श्रीप्रद्युम्नजी पीछे-पीछे सात्यकि, चारुदेष्ण, साम्ब भाईयों के साथ अक्रुर कृतवर्मा भानुविन्द, गद, शुक सारण आदि बहुत से वीर बडे बडे धनुष् करके ले निकल पडे । ये सर्व महाबली थे सबने कवच धारण किया था, और सबकी रक्षा के लिये अनन्त रथ, हाथी, घोडे एवं पैदल सेना साथ साथ चल रही थी ॥१४-१५॥ जैसे पूर्वकालमें देवताओं के साथ असुरों का भयानक संग्राम हुआ था वैसे ही शाल्व के सैनिको के साथ यादव सैनिको का संग्राम होने लगा था । इस युद्ध को देखकर लोगों की रोमावली जाग्रत हो जाती थी ॥१६॥ जो शाल्वने माया फैलायी श्रीप्रद्युम्नजीने अपने अमोघ दिव्य अस्त्रों से सारी माया नष्ट कर डाली । जैसे दिनमणि भगवान दिव्य किरणों से रात्रीका तिमिरको क्षणभरमें ही मिटा देते है ॥१७॥

श्रीभगवानुवाच

विव्याध पञ्चविंशत्या स्वर्णपुङ्खैरयोमुखैः । शाल्वस्य ध्वजिनीपालं शरैः संनतपर्वभिः ॥१८॥
शतेनाताडयच्छाल्वमेकैकेनास्य सैनिकान् । [1]दशभिर्दशभिर्नेतॄन् वाहनानि त्रिभिस्त्रिभिः ॥११॥
[2]तत्तस्य चाद्भुतं कर्म प्रद्युम्नस्य महात्मनः । दृष्ट्वा तं पूजयामासुः सर्वे [3]स्वपरसैनिकाः ॥२०॥
बहुरूपैकरूपं तद्दृश्यते न च दृश्यते । [4]मायामयं मयकृतं दुर्विभाव्यं परैरभूत् ॥२१॥

कर्दमक्षमा

अयोमुखैः, सुर्णपुङ्खैः, सन्नतपर्वभिः, पञ्चविशत्या, शरैः, शाल्वस्य, ध्वजिनीपालम्, विव्याध ॥१८॥ एकेन, शतेन,

---

१. विव्याध दशभि-विज. । २. तदद्भुतं महत् कर्म-श्रीधर. वंशी. वीर. विज. । ३. सर्वेऽस्य पुरवासिनः-वि
१३. मयमायाकृतं यान दुर्विभाव्यं जनै-विज. ।

कर्दमक्षमा

शाल्वम्, एकेन, एकेन, अस्य, सैनिकान्, दशभिः, दशभिः, नेतॄन्, त्रिभिः, त्रिभिः, वाहनानि, अताडयत् ॥१९॥ च, तस्य, महात्मनः, प्रद्युम्नस्य, अद्भुतम्, कर्म, दृष्ट्वा, सर्वे, स्वपरसैनिकाः, तम्, पूजयामासुः ॥२०॥ मयकृतम्, तत्, बहुरूपैकरूपम्, (यानम्) दुर्विभाव्यम्, परैः, दृश्यते, न, दृश्यते, इति, परैः, दुर्विभाव्यम्, अभूत् ॥२१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किञ्च विव्याधेति स्वर्णमयानि पुङ्खानि पृष्ठप्रान्ता येषां तैः अयो लोहं तन्मयानि मुखान्यग्राणि येषां तैः ध्वजिनीपालं सेनान्यं सन्नतानि निम्नानि पर्वाणि ग्रन्थयो येषां तैः ॥१८॥ सैनिकान् भटान् नेतॄन् सारथीन् ॥१९॥ स्वपरसेनयोर्वर्तमानाः सर्वे पूजयामासुः सम्मानितवन्तः ॥२०॥ कदाचिद्बहुरूपं कदाचिदेकरूपं क्वचिद्दृश्यते क्वचिन्न दृश्यते एवं दुर्विभाव्यं दुर्वितर्क्यमभूत् ॥२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

माया विनाश्य युद्धं चकारेत्याह-किञ्चेति ॥१८-१९॥ तच्छाल्वादिताडनरूपम् । तं प्रद्युम्नम् ॥२०॥ तत्पुरम् ॥२१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अद्भुतं लोकातीतम् अतो महत् सर्वतः श्रेष्ठं तच्च तस्य नात्यद्भुतमित्याह-महात्मनः अपरिच्छिन्नशक्तेरित्यर्थः ॥२०॥ ततश्च श्रीप्रद्युम्नभयात्तत्सौभमलक्ष्यमस्थिरञ्चाभूदित्याह-बह्विति द्वाभ्याम् ॥२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एकैकेनेति प्रत्येकमेकेनैकेन शरेणेत्यर्थः । एवमग्रेऽपि । वाहनानि ध्वजिनीपालं साल्वादीनामश्वादीन् ॥१९॥ अद्भुतं लोकातीतम्, अतो महत् सर्वतः श्रेष्ठम्; यद्वा, महदद्भुतं परमाश्चर्य्यम्, क्षणेनैव तादृशसर्वमायानाशनात्, तथा ध्वजिनीपालादीनां सर्वेषां शरैर्युगपत्तथाप्रहरणाच्च; तच्च तस्य युक्तमेवेत्याह-महात्मनोऽपरिच्छिन्नशक्तेरित्यर्थः ॥२०॥ ततश्च श्रीप्रद्युम्नभयात्तत्सौभमलक्ष्यमस्थिरं चाभूदित्याह-बह्विति द्वाभ्याम् । बहूनि रूपाणि वर्णा आकारा वा यस्य, तच्च तदेकरूपं च; यद्वा, बहुरूपं बहुलं च तदेकरूपमेकं चेति तथा । तत् मयेन महामायाविना कृतमिति मायामयत्वेऽपि विशेष उक्तः । परैर्यादवैः क्वचित् कदाचिद्गिरे रैवतस्य मूर्ध्नि कदाचित् ॥२१-२२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मायामयम् आश्चर्यं द्रव्यमयं मूर्च्छित इति भयादपक्रमणम् अकीर्तिकरं न तु मूर्च्छायामित्यर्थः ॥२१-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

विव्याधेति । स्वर्णमया पुङ्खाः पृष्ठप्रान्ताः येषां तैरयो लोहं तन्मयानि मुखान्यग्राणि येषां तैः सन्नतानि निमग्नानि पर्वाणि येषां तैः पञ्चविंशत्या शरैः साल्वस्य ध्वजिनीपालं सेनान्यं विव्याध ॥१८॥ साल्वं तु शतेन च बाणानामिति शेषः अताडयत् सैनिकान् भटानेकैकेन शरेणाताडयत् नेतॄनवान्तरसेनानायकान् सारथीन् वा दशभिर्दशभिः शरैर्वाहनानि गजाश्वरथादीनि त्रिभिस्त्रिभिः शरैरताडयत् ॥१९॥ तदिति । तत्प्रद्युम्नविक्रमात्मकं महदतिकौशलं कर्म दृष्ट्वा स्वपरसेनयोः वर्तमानाः सर्वे तं प्रद्युम्नं पूजयामासुः बहुमेनिरे ॥२०॥ बह्विति । तन्मयकृतं सौभं क्वचिद्बहुरूपं क्वचिच्चैकरूपं क्वचिच्च दृश्यते क्वचित्तु न दृश्यते एवं परैर्दुर्विभाव्यमवितर्क्यमभवत् ॥२१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अस्य प्रद्युम्नस्य ॥२०-२१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ध्वजिनीपालं सेनान्यं सन्नतानि निम्नानि पर्वाणि ग्रन्थयो येषां तैः ॥१८॥ नेतॄन् सारथीन् ॥१९॥ तत् सौभम् ॥२०-२३॥

गूढार्थदीपिनी

प्रद्युम्नः पञ्चविंशत्या शरैः शाल्वस्य ध्वजिनीपालं सेनापतिं विव्याधेति योज्यम्। पुङ्खाः मूलप्रान्ताः। सन्नतानि निम्नीभूतानि पर्वाणि ग्रन्थयो येषां तैः शरैः ॥१८॥ नेतॄन् सारथीन् अताडयत् ॥१९॥ महात्मनः महाबलिनः। उभयपक्षीयाः सैनिकाः पूजयामासुः प्रशशंसुः ॥२०॥ परैः शत्रुभिः दुर्विभाव्यमतर्क्यमभूत् ॥२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नेतॄन् सारथीन् ॥१९-२०॥ माया अद्भुतरूपा मयशक्तिस्तन्मयं तया रचितम् अत एव दुर्विभाव्यमतर्क्यम् ॥२१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अयोमुखैः स्वर्णपुङ्खैः पञ्चविंशत्या साल्वस्य ध्वजिनी सेना तत्पालं तन्नायकं सन्नतपर्वभिः शरैः शतेन साल्वमताडयत्। एकैकेनास्य साल्वस्य सैनिकानताडयत्। नेतॄन् सैनिकान् दशभिर्वाहनानि त्रिभिस्त्रिभिः ॥१३॥ अस्य प्रद्युम्नस्येत्यन्वयः। तं पूजयामासुः ॥१४॥ विमानमाहात्म्यमाह ॥ बहुरूपेति। एकदा बहुरूपमनेकाकारं किञ्च सुवर्णात्मकं च बह्वेकरूपेति वक्तुं शक्ये बहुरूपैकरूपमिति प्राह तस्य सुवर्णात्मकतामभिप्रैति। बहुरूपं च पुरुटं कार्तस्वरमितीर्यत इति काठकभाष्योक्तेः। एकं रूपमेकाकारं कदाचिद्दृश्यते न दृश्यते कदाचित्। मयमायाकृतं जनैर्दुर्विभाव्यमभूत् ॥१५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो विशेषयुद्धमाह विव्याधपञ्चविंशत्येति। पञ्चविंशतितत्त्वात्मकाः सर्वे सर्वभावेन विद्धा इति ज्ञापयितुं शाल्वस्य ध्वजिनीपालं सेनापतिं शरैर्विव्याध। सुवर्णपुङ्खैरिति प्रत्यञ्चातः शीघ्रनिर्गमनार्थम्। अयोमुखैरिति उत्तमवेधार्थम्। मध्ये शराः सन्नतपर्वाणः ॥१८॥ ततः शतेन शाल्वमताडयत्। एकैकेन चास्य सैनिकान् दशभिः सारथीन् अश्वांस्त्रिभिस्त्रिभिः ॥१९॥ एवमेकेन सर्वेषां प्रहारः अत्याश्चर्यत्वात् शत्रुभिरपि स्तुत इत्याह तत्तस्येति। अद्भुतमाश्चर्यकरं मन्त्रसामर्थ्यात्पितृसामर्थ्याद्वा एतदिति पक्षं वारयति महात्मन इति। स्वयमेव महानुभावः। अत एवाश्चर्यम्। स्वस्य परस्य शत्रोश्च सैनिकाः ॥२०॥ ततः शाल्वः स्वयं युद्धं करिष्यतीति वक्तुं तस्य स्वरूपमाह बहुरूपैकरूपमिति। कदाचिद्बहुरूपम् अनेकरूपं दृश्यते कदाचिदेकरूपं कदाचिद्दृश्यते कदाचिन्न दृश्यते इति प्रमाणप्रमेययोरपि वैलक्षण्यमुक्तम्। तत्र हेतुः मायामयमिति। तर्हि दिव्यास्त्रेण नाशं यास्यतीत्यत आह मयकृतमिति। तर्ह्यन्यैस्तादृशैः सूक्ष्मेक्षिकया तन्नाशोपायो ज्ञातो भविष्यतीत्याशङ्क्याह परैरन्यैर्दुर्विभाव्यं तर्कितुमशक्यमभूदित्यर्थः ॥२१॥

श्रीसुबोधिनीसारः

स्वर्णमयानि पुङ्खानि पृष्ठप्रान्तानि येषाम् अयो लोहं मुखे येषां तैः पञ्चविंशत्या बाणैः सन्नतपर्वभिस्तीक्ष्णधारैः शाल्वस्य ध्वजिनी सेना तस्याः पालं विव्याध। सेनापतिं जघान ॥१८॥ शतेन शाल्वमताडयत्। अस्य शाल्वस्य सैनिकान् सेनाभवान् एकैकेन नेतॄन् सारथीन् दशभिर्दशभिः वाहनानि त्रिभिः त्रिभिः विव्याध ॥१९॥ महात्मनः प्रद्युम्नस्य तदद्भुतं महत्कर्म दृष्ट्वा सर्वे उभयसैनिका जनाः तं प्रद्युम्नं पूजयामासुः श्लाघयाम्बभूवुः ॥२०॥ तत् विमानं बहुरूपमेकरूपं दृश्यते क्वचिन्न दृश्यते यतो मयेन कृतं मायामयं परैः शत्रुभिर्दुर्विभाव्यमवितर्क्यमभूत् ॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वर्णमयानि पुङ्खानि पृष्ठप्रान्तानि येषां तैः अयो लोहं तन्मयानि मुखानि अग्राणि येषां तैः पञ्चविंशत्या शरैः शाल्वस्य ध्वजिनीपालं सेनान्यं विव्याध ॥१८॥ शाल्वस्तु बाणानां शतेन, सैनिकान् भटान् एकैकेन शरेण, नेतॄन् सारथीन् दशभिर्दशभिः शरैः, वाहनानि गजाश्वरथादीनि त्रिभिस्त्रिभिः शरैरताडयत् ॥१९॥ महात्मनः महाशूरस्य प्रद्युम्नस्य तदेकदैवैवं सर्वताडनात्मकं महदतिकौशलयुक्तम् अत एवाद्भुतमाश्चर्यकरं कर्म दृष्ट्वा स्वपरसैन्ययोर्वर्तमानाः सर्वे तं प्रद्युम्नं पूजयामासुः प्रशंसितवन्तः ॥२०॥ तन्मयकृतं सौभं क्वचिद्बहुरूपं क्वचिद्दृश्यते क्वचित्तु न दृश्यते, एवं परैर्दुर्विभाव्यम् अवितर्क्यमभवत्। तत्र हेतुमाह-मायामयमिति ॥२१॥

अन्वितार्थप्रकाशिका

विव्याधेति ॥ स्वर्णमयानि पुङ्खानि पृष्ठप्रान्ता येषां तैः अयो लोहं तन्मयानि मुखानि अग्राणि येषां तैः सन्नतानि पर्वाणि ग्रन्थयो येषां पञ्चविंशत्या शरैः शाल्वस्य ध्वजिनीपालं सेनान्यं विव्याध ॥१८॥ शतेनेति ॥ शाल्वं तु बाणानां शतेन अताडयत् । अस्य शाल्वस्य सैनिकान् भटान् एकैकेन शरेण, नेतॄन् सारथीन् दशभिर्दशभिः शरैः, वाहनानि गजाश्वरथादीनि त्रिभिस्त्रिभिः शरैरताडयत् ॥१९॥ तदिति ॥ महात्मनः महाशूरस्य प्रद्युम्नस्य तदेकदैवैवं सर्वताडनात्मकं महदतिकौशलयुक्तम् अत एवाद्भुतं कर्म दृष्ट्वा स्वपरसैन्ययोर्वर्तमानाः सर्वे तं प्रद्युम्नं पूजयामासुः प्रशंसितवन्तः ॥२०॥ बह्विति ॥ तत् मायामयं सौभं क्वचिद्बहुरूपं क्वचिच्चैकरूपं क्वचित् दृश्यते क्वचित्तु न दृश्यते एवं परैर्दुर्विभाव्यम् अवितर्क्यमभूत् ॥२१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विव्याधेति ॥ स्वर्णरचितानि पुङ्खानि येषां तैः ॥ अयो लोहं तन्मयानि मुखानि येषां तैः सन्नतानि निम्नानि पर्वाणि ग्रन्थयो येषां तैः एतेनातिवधकत्वं सूचितम् । ध्वजिनीपालं सेनापतिम् ॥१८॥ सैनिकान् भटान् नेतॄन् सारथीन् ॥१९-२०॥ सौभस्य कामगत्वं दर्शयन्नाह-बह्विति द्वाभ्याम् ॥ क्वचित्समये बहुरूपं क्वचिदेकरूपं च कदाचित् दृश्यते कदाचिन्न दृश्यते एवं बहुदुर्विभाव्यं दुर्ज्ञेयमभूत् ॥२१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विव्याधेति ॥ प्रद्युम्नः स्वर्णपुङ्खैः, अयोमुखैः, संनतपर्वभिः पञ्चविंशत्या शरैः, शाल्वस्य ध्वजिनीपालं सेनापतिं, विव्याध ॥१८॥ शतेनेति ॥ शतेन बाणानां शतकेन, शाल्वम्, अताडयत् । अस्य शाल्वस्य, सैनिकान्, एकैकेन बाणेन, अताडयत् । दशभिः दशभिः शरैः, नेतॄन् अवान्तरसेनानायकान्, सारथीन्वा, वाहनानि गजाश्वादीनि, त्रिभिः त्रिभिः शरैः, अताडयत् ॥१९॥ तदिति ॥ महात्मनः प्रद्युम्नस्य, अद्भुतं तत् महत् कर्म दृष्ट्वा, सर्वे स्वपरसैनिकाः, तं प्रद्युम्नं, पूजयामासुर्बहु मेनिरे ॥२०॥ बहुरूपेति ॥ बहुरूपैकरूपं कदाचित्तद्बहुरूपं कदाचिदेकरूपमित्यर्थः । दृश्यते । न च दृश्यते । क्वचित् दृश्यते क्वचिन्न दृश्यत इत्यर्थः । एवं मायामयं तन्मयकृतं सौभं, परैः दुर्विभाव्यम्, अभूत् ॥२१॥

कृष्णप्रिया

सुवर्ण के पंख और लोहे के फल लगे हुए प्रद्युम्नजी के पचीस बाणोने शाल्व के सेनाधीपति को घाटल कर दीया । उन बाणोंकी गांडे जान ही नहीं पडती थी ॥१८॥ महान मनस्वी श्रीप्रद्यम्नजी ने सेनाधिपति के साथ ही शाल्व को भी सो बाण लगाये; पुनः प्रत्येक सैनक को एक एक बाण और सारथीयोंको दस दस बाण तथा वाहनो को तीन तीन बाणो से घायल कर दिया ॥१९॥ महात्मा श्रीप्रद्युम्नजी के इस अलौकिक ओर उत्तम कार्य को देखकर अपने ओर पराये लोग ओर सभी सैनिक लोग उनकी स्तुति करने लगे ॥२०॥ महाराज परीक्षित मयदानव निर्मित शाल्व का यह विमान अत्यन्त मायासभर था । आर इतना विलक्षण था कि कभी अन्य स्वरुपोमें दीख पडता तो कभी एक रूपमें दीखता तो कभी नही दिखता । यादवोंको इस विषय का पता ही न चलता कि वह सौभविमान वर्तमानमें कहां है ॥२१॥

क्वचिद्भूमौ क्वचिद्व्योम्नि [1]गिरिमूर्ध्नि जले क्वचित् । अलातचक्रवद् भ्राम्यत्सौभं तद्दुरवस्थितम् ॥२२॥
यत्र यत्रोपलक्ष्येत [2]स सौभः सहसैनिकः । शाल्वस्ततस्ततोऽमुञ्चन् शरान् सात्वतयूथपाः ॥२३॥
[3]शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः । [4]पाट्यमानपुरानीकः शाल्वोऽमुह्यत्[5]परेरितैः ॥२४॥
शाल्वानीकपशस्त्रौघैर्वृष्णिवीरा भृशार्दिताः । न तत्यजू रणं स्वं स्वं [6]लोकद्वयजिगीषवः ॥२५॥

---

[1] क्वचित्सिन्धौ क्वचिद्गिरौ-विज. । [2] तस्य सौभस्य सैनिकः-विज. । [3] सङ्काशै-वीर. विज. । [4] पीड्यमान-श्रीधर. वंशी. वीर. विज. विश्व. शुक. । [5] त्परैरिति-विज. । [6] लोकत्रय-वीर. ।

कर्दमक्षमा

क्वचित्, भूमौ, क्वचित्, व्योम्नि, क्वचित्, गिरिमूर्ध्नि, च, क्वचित्, जले, अलातचक्रवत्, भ्राम्यत्, तत्, सौभम्, तत्, दुरवस्थितम् ॥२२॥ यत्र, यत्र, ससौभः, सहसैनिकः, शाल्वः, उपलक्ष्येत, (तत्र, तत्र) ततः, ततः, सात्वतयूथपाः, शरान्, अमुञ्चन् ॥२३॥ परेरितैः, अग्न्यर्कसंस्पर्शैः, आशीविषदुरासदैः, शरैः, पाट्यमानपुरानीकः, शाल्वः, अमुह्यत् ॥२४॥ शाल्वानीकपशस्त्रौघैः, भृशार्दिताः, वृष्णिवीराः, लोकद्वयजिगीषवः, स्वम्, स्वम्, रणम्, न, तत्यजुः ॥२५॥ क्वचित्, भूमौ, क्वचित्, व्योम्नि, क्वचित्, गिरिमूर्ध्नि, च, क्वचित्, जले, अलातचक्रवत्, भ्राम्यत्, तत्, सौभम्, तत्, दुरवस्थितम् ॥२२॥ यत्र, यत्र, ससौभः, सहसैनिकः, शाल्वः, उपलक्ष्येत, (तत्र, तत्र) ततः, ततः, सात्वतयूथपाः, शरान्, अमुञ्चन् ॥२३॥ परेरितैः, अग्न्यर्कसंस्पर्शैः, आशीविषदुरासदैः, शरैः, पाट्यमानपुरानीकः, शाल्वः, अमुह्यत् ॥२४॥ शाल्वानीकपशस्त्रौघैः, भृशार्दिताः, वृष्णिवीराः, लोकद्वयजिगीषवः, स्वम्, स्वम्, रणम्, न, तत्यजुः ॥२५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किञ्च क्वचिदिति एवं तद्दुरवस्थितञ्चाभूत् ॥२२-२३॥ अग्निवद्दाहकोऽर्कवद्युगपत्सर्वतः संस्पर्शो येषां तैः आशीविषवदेकदेशस्पर्शमात्रेण मारकत्वाद्दुरासदैर्दुस्सहैः पीड्यमानं पुरमनीकानि च यस्य सः परैर्यदुभिरीरितैर्मुक्तैः ॥२४॥ भृशार्दिता अपि स्वं स्वं रणं स्वां स्वां युद्धभूमिम् ॥२५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्पुरगतमन्यदद्भुतमाह-किञ्चेति। तत्पुरम् ॥२२॥ यत्र यत्र भूम्यादौ। ततस्ततस्तत्र तत्र ॥२३-२७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

क्वचित् कदाचित् गिरेः रैवतकस्य मूर्ध्नि ॥२२॥ उपहीने यत्किञ्चिदपि लक्ष्यते ॥२३॥ अग्नयः दाहकतया तद्रूपत्वेन रूपिता इत्यर्थः। अर्कसंस्पर्शा अर्कस्येव रश्मिद्वारा सर्वत्र संस्पर्शस्तापमयो येषां ते च ते च तैः ॥२४॥ लोकद्वयस्य जिगीषवः क्षात्रधर्मप्रवर्तनार्थं यशोधर्मप्रवर्तनार्थं यशोधर्माद्यपेक्षकास्सन्तः यद्वा जगद्धितार्थं निजकीर्तिविस्तारेणोर्ध्वाधोलोकद्वयवशीकरणेच्छव इत्यर्थः ॥२५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उप समीपे, उपलक्षणतयापि वा लक्ष्येत, सात्वतयूथपा यादवमहावीराः ॥२३॥ अर्कोऽर्करश्मिः, स यथा सर्वानप्येकदैव सम्यक् स्पृशति, तद्वदित्यर्थः। अन्यत्तैर्व्याख्यातम्। तत्र सर्वत इति सर्वेष्वित्यर्थः ॥२४॥ लोकद्वयस्य जिगीषवः क्षात्रधर्मप्रवर्तनार्थं यशोधर्म्माद्यपेक्षकाः सन्तः; यद्वा, जगद्धित्यर्थं निजकीर्तिविस्तारणेन ऊर्ध्वाधोलोकद्वयवशीकरणेच्छव इत्यर्थः ॥२५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२१-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

किञ्च क्वचिदिति। एवं दुरवस्थितमनवस्थितं चाभूत् ॥२२॥ यत्र यत्रेति। उपलक्ष्येत दृश्येत सात्वतयूथपाः यदुवीराः ॥२३॥ शरैरिति। अग्निवद्दाहकोऽर्कवत् संशोषकः युगपत् सर्वतः संस्पर्शो येषां तैराशीविषवत् स्पर्शमात्रेण दुरासदैः दुःसहैः परेरितैर्यदुवीरप्रयुक्तैः शरैः पीड्यमानं पुरमनीकानि च यस्य स साल्वोऽमुह्यत् मुमोह ॥२४॥ साल्वेति। साल्वसैन्यपानां शस्त्रौघैः भृशं पीडिता अपि यदुवीराः स्वं स्वं रणं रणभूमिं न तत्यजुर्न त्यक्तवन्तः तत्र हेतुत्वेन विशिनष्टि-लोकत्रयमपि जेतुमिच्छवः ॥२५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

दुरवस्थितं नैकत्रस्थितमभूदिति शेषः ॥२२॥ तस्य सौभस्य सैनिकः सेनासहितः शाल्वः यत्र यत्रोपलक्ष्येत सात्वतयूथपाः ततः शरानमुञ्चन्नित्यन्वयः ॥२३॥ इति परैः शरैः प्रपीड्यमानः पुरस्थितानीकः ॥२४॥ शाल्वस्यानीकपाः सेनानायकाः ते शस्त्राणामोघैः ॥२५-२६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अग्न्यर्कयोरिव स्पर्शो येषां तैः आशीविषैः सर्पैरिव दुरासदैः दुःसहैः पीड्यमानं पुरम् अनीकानि च यस्य सः परैर्यदुभिरीरितैर्मुक्तैः ॥२४-२५॥

गूढार्थदीपिनी

मूर्ध्नि शिखरे। अलातचक्रं ज्वलत्काष्ठं तद्वत् भ्राम्यत् तत् सौभं विमानं दुरवस्थितं सर्वथास्थिरमभूत् ॥२२॥ ससौभः सौभेन सहितः शाल्वः । ततस्ततः तत्र तत्र सात्वतयूथपाः यदूनां सेनापतयः ॥२३॥ परैः यदुभिः ईरितैः प्रक्षिप्तैः शरैः पीड्यमानं पुरम् अनीकानि सेनाश्च यस्य स शाल्वः अमुह्यत् किंकर्तव्यमूढोऽभूत् । अग्निवत् दाहकः अर्कवत् सर्वत्र विततः स्पर्शो येषां तैः । आशीविषः स्पर्शमात्रेण मारकः सर्पः तद्वत् दुरासदैः दुःसहैः । आशिषि दंष्ट्रायां विषं यस्येति विग्रहः । 'आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति ।' इति सर्पशास्त्रम् ॥२४॥ शाल्वस्य अनीकपाः सेनापतयः तेषां शस्त्रौघैः भृशमर्दिता अपि वीराः रणं रणभूमिं न तत्यजुः ॥२५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

दुरवस्थितमभूत् ॥२२-२३॥ परैः शत्रुभिरीरितैः शरैः पीड्यमानं पुरमनीकं च यस्य सः मुह्यत् विस्मृतकार्याकार्योऽभूत कथम्भूतैः अग्निवत् सद्यो मारकत्वात् अर्कवदनिवार्यत्वात् स्पर्शो येषां तैः आशीविषवदेकदेशस्पर्शमात्रेण मारकत्वाद्दुरासदैः दुःसहैः ॥२४॥ रणं युद्धस्थानम् ॥२५-२६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

अलातचक्रमिवोल्कामण्डलमिव भ्राम्यद्दुर्विभाव्यं दुरवस्थितं सुःसाध्यैकत्रावस्थानमभूत् ॥१६॥ सात्वतयूथपा यत्र यत्र तस्य भौमस्य तत्स्थत्वात्तत्सम्बन्धी सैनिकः सेनासमवेतः साल्वश्चोपलक्ष्येत दृश्येत ततस्ततस्तत्र तत्र शरानमुञ्चन् । सौभस्य सैनिक इति पाठे सैनिकानामपि तत्रोपवेशो ज्ञेयः ॥१७॥ आशीविषवद्दुरासदो दुष्प्राप्यः पीड्यमानः पुरानीकः पुरस्थितात्मसेनाः । पीड्यमानपुरानीक इति पाठे पीड्यमानानि पुरमनीकानि च पश्येत्यर्थः । पाट्यमानपुरानीक इति पाठस्तु स्फुटार्थः । परैर्यदुभिरित्यमुह्यन्मोहितोऽभूत् ॥१८॥ विष्णुवीराः सात्यक्यादयो भृशार्दिता अपि रणं लोकद्वयजिगीषवो व्यवस्थया स्वं स्वं न तत्यजुः ॥१९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तस्य देशोऽपि दुर्लक्ष्य इत्याह क्वचिद्भूमाविति । लक्ष्यं दृष्ट्वा पश्चाच्छस्त्र प्रयोगः । तत्स्थिरे चरे च भवति । चरे च लक्ष्यभूमिः ज्ञातुं शक्या भवति । अस्य तु सर्वमेवाशक्यमिति क्षणमात्रव्यवधानेऽपि विरुद्धदेशान् वर्णयति आकाशभूम्योरतिव्यवधानम् । एवं गिरिमस्तकजलयोरपि अलातचक्रवद्भ्राम्यच्च भवति तेनाविद्यमानस्थलेऽपि दृश्यत इति, तन्निराकरणार्थं न शस्त्रप्रयोगः कर्तुं शक्यः । केनचिन्मन्त्रादिना तथात्वे तत्प्रतीकारेण प्रतिकर्तव्य इति शङ्कां वारयति तत्सौभं स्वभावत एव दुरवस्थितमिति ॥२२॥ एवं माहात्म्यमुक्त्वा तादृशमपि यादवैः निराक्रियत इत्याह यत्र यत्रेति । उपलक्षणविधयापि यत्र प्रतीयेत ससौभः सशाल्वः सैनिकसहितश्च अतः सात्वतयूथपाः शरानमुञ्चन् । तत इति तस्माद्देशाच्छाल्वस्य गमनं सूचयति । अन्यथा तत्र तत्रेत्युक्तं स्यात् ॥२३॥ एवं सर्वतः शरप्रक्षेपे सूक्ष्मोऽपि गन्तव्यदेशो रुद्ध इति सौभं सैनिकाश्च शाल्वस्य पीडिता जाता इत्याह शरैरग्न्यर्कसंस्पर्शैरिति । स्पर्शे अग्न्यर्काभ्यां तुल्यता । पर्यवसाने आशीविषतुल्यता । अत एव दुरासदैः अप्रतिकार्यैः शरैः पाट्यमानं पुरमनीकाः सैनिकाश्च यस्य एतादृशः शाल्वः अमुह्यत् । तर्हि पलायनं तेषां प्रार्थना वा कर्तव्येति तत्राह परेरितैः । शत्रुप्रेरिता एते बाणाः अतः शत्रुजयो

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

भरणं वा उपाय: नान्य इति मोहं प्राप्तवान् । एवं यादवानां पौरुषमुक्त्वा शाल्वस्य सैनिकानामपि पौरुषमाह तुल्यत्व शाल्वानीकपशस्त्रौघैरिति । शाल्वस्याप्यनीकपा: सेनारक्षका: तेषां च शस्त्रौघा: तै: सर्वश: पीडिता अपि वृष्णिवीरा: स्वं स्वं न तत्यजु: । अनेन भागक्लृप्त्या युद्धं जायत इति लक्ष्यते । अपरित्यागे हेतु: लोकद्वयजिगीषव इति । जये मरणे वा इहलोके कीर्ति परलोके स्वर्ग इति अतो लोकद्वयजयार्थमपरित्याग: ॥२५॥

श्रीसुबोधिनीसार:

तथा हि । क्वचिद्भूमौ क्वचिदाकाशे गिरे: पर्वतस्य मूर्ध्नि शिखरे क्वचित् । अलातं ज्वलदुल्मुकं तस्य चक्रव मण्डलमिव भ्राम्यत् तत्सौभं विमानं चलमभूत् ॥२२॥ सैनिकै: सह वर्तमान: ससौभ: सहित: शाल्वो यत्र यत्र दृश्यते ततस्तत तत्र सात्वतयूथपा यादवा: शरान् अमुञ्चन् बाणान् प्राक्षिपन् ॥२३॥ अग्निसूर्यवत्संस्पर्शो येषां तै: आशीविषा: सर्पास्तद्वद्दुरास दु:सहै: शरै: परै: शत्रुभिर्यदुभिरीरितै: प्रक्षिप्तै: पीड्यमानं पुरमनीकं सैन्यं यस्य स शाल्वो मोहमैत् ॥२४॥ शाल्वस्यानीकप शस्त्रौघैर्वृष्णिवीरा भृशमत्यर्थमर्दिता: पीडिता: लोकद्वयं जेतुमिच्छवो रणभूमिं स्वां स्वां न तत्यजु: ॥२५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भूम्यादिषु भ्राम्यत् तत्सौभमलातचक्रवत् उल्काभ्रमणवत् दुरवस्थितम् अनवस्थितं चाभूत् ॥२२॥ सौभेन सहि सैनिकै: सेनापतिभिश्च सह वर्तमान: शाल्वो यत्र यत्रोपलक्ष्येत दृश्यते स्म ततस्तत: सात्वतानां यूथपा: मुख्या: शरानमु ॥२३॥ अग्निवद्दाहक: अर्कवत् युगपत्सर्वत: संस्पर्शो येषां तैराशीविषवदेकदेशस्पर्शमात्रेणापि मारकत्वात् दुरास सुदु:सहै: परै: शत्रुभिर्यदुभिरीरितै: प्रयुक्तै: शरै: पीड्यमानं पुरमनीकानि च यस्य स: शाल्वोऽमुह्यत् ॥२४॥ शाल्वसैन्यप शस्त्रौघैर्भृशम् अर्दिता: पीडिता: अपि यदुवीरा: स्वं स्वं रणं रणभूमिं न तत्यजु: न त्यक्तवन्त: । तत्र हेतुमाह–लोकद्वयजिगी इति । विजये संशयेऽपि विजये सति इहलोके सत्कीर्तिर्मरणे च स्वर्गप्राप्तिरित्यत्र सन्देहाभावात् लोकद्वयविजयार्थं रणभू न त्यक्तवन्त इत्यर्थ: ॥२५॥

अन्वितार्थप्रकाशिका

क्वचिदिति ॥ भूम्यादिषु भ्राम्यत् तत्सौभमलातचक्रवत् उल्काभ्रमणवत् दुरवस्थितम् अनवस्थितं चाभूत् ॥२२॥ य ॥ सौभेन सहित: सैनिकै: सेनापतिभिश्च सह वर्तमान: शाल्वो यत्र यत्रोपलक्ष्येत दृश्यते स्म ततस्तत: सात्वतानां यूथपा: मु शरानमुञ्चन् ॥२३॥ शरैरिति ॥ अग्निवद्दाहक: अर्कवत् युगपत्सर्वत: संस्पर्शो येषां तैराशीविषवदेकदेशस्पर्शमात्रेणापि मारक दुरासदै: सुदु:सहै: परै: शत्रुभिर्यदुभिरीरितै: प्रयुक्तै: शरै: पीड्यमानं पुरमनीकानि च यस्य स: शाल्वोऽमुह्यत् ॥२४॥ शाल्वे शाल्वस्यानीकपानां शस्त्रौघैर्भृशम् अर्दिता: पीडिता: अपि लोकद्वयजिगीषवो विजये सत्कीर्तिर्मरणे च स्वर्गप्राप्तिरिति लोकद्वयजये वृष्णिवीरा: स्वं स्वं रणं रणभूमिं न तत्यजु: ॥२५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्वचिद्भूमौ दृश्यते इत्यादि सर्वं योज्यम् एवं तद्दुरवस्थितमस्थिरं चाभूत् ॥२२॥ ततस्तत: तत्र तत्र ॥२३॥ अग्निव दाहक: स्पर्शो येषां तै: आशीविषवत् सर्पवत् ईषत्स्पर्शेनापि मृत्युजनकत्वात् दुरासदै: सु:सहै: परै: शत्रुभि: ईरितै: प्रेरितै: पीड्यमानं पुरं सौभम् अनीकानि सौन्यानि च यस्य स: ॥२४॥ लोकद्वयं जेतुं कीर्त्या इमं लोकं प्राप्त्या परं लो स्वाधिनीकर्तुमिच्छव: अतो भृशार्दिता अपि स्वं स्वं रणं युद्धस्थानं न तत्यजु: ॥२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

क्वचित् भूमौ, क्वचित् व्योम्नि, क्वचित् गिरिमूर्ध्नि, क्वचित् जले, अलातचक्रवत्, भ्राम्यत् तत् सौभं, दुरव अभूत् ॥२२॥ यत्रेति ॥ ससौभ: सौभसहित:, सहसैनिक: सैनिकजनसहित:, शाल्व:, यत्र यत्र उपलक्ष्येत दृश्येत, ततस्त

तत्र, सात्त्वतयूथपा:
संस्पर्शवद्भिरित्यर्थ: ।
पाट्यमानं पुरम् अनी
शाल्वस्य अनीकपा:
लोकद्वयमपि जेतुमिच

वह सौभ
चल जाता तो कभी
कहीं ठहरता न था ।
के और सैनीको की
यादव सेनापति के
शल्व का नगराकार
खूद ही मूर्छित हो
अत्यन्त पीडीत थे,
बनेगा और जीतेंगे

शाल्वामात्यो
[1]तं द्युम्नगद
लब्धसंज्ञो मु
न यदूनां कु

प्राक्, प्रपीडि
द्युमद्गदया, शीर्णवक्ष:स्थ
कार्ष्णि:, सारथिम्, अब्र
माम्, विना, यदूनाम्, कु

मौर्व्या कार्ष्णि
त्वया सूतेन ॥२९॥

अपसर्पणं बहि
स एवार्थ: ॥२९॥

प्रद्युम्नाद्धेतो: प्र

---

१. प्रद्युम्नास्त्रप्रपीडि
शुक. । ५. किल्बिषात्–श्रीध

तत्र, सात्त्वतयूथपाः यदुवीराः, शरान्, अमुञ्चन् ॥२३॥ शरैरिति ॥ अग्न्यर्कसंस्पर्शैः अग्निवद्दाहकैः अर्कवद्युगपत् सर्वतः संस्पर्शवद्भिरित्यर्थः । आशीविषदुरासदैः आशीविषवदेकदेशस्पर्शमात्रेण मारकत्वात् दुःसहैरित्यर्थः । परेरितैर्यदुवीरप्रयुक्तैः शरैः, पाट्यमानं पुरम् अनीकानि च यस्य सः, पीड्यमानपुरानीक इत्यपि पाठः । शाल्वः, अमुह्यत् मुमोह ॥२४॥ शाल्वानीकेति ॥ शाल्वस्य अनीकपाः सैन्यपास्तेषां शस्त्रौघास्तैः, भृशार्दिता अत्यन्तं पीडिताः अपि, वृष्णिवीरा यदुवीराः, लोकद्वयजिगीषवः लोकद्वयमपि जेतुमिच्छवः सन्तः, स्वं स्वं रणं स्वां स्वां युद्धभूमिमित्यर्थः । न तत्यजुः ॥२५॥

कृष्णप्रिया

वह सौभविमान कभी मूमि पर आ जाता तो कभी गगनमें उडने लगता । कभी गिरिवरकी चोटी पर चल जाता तो कभी जलमैं तैरने लगता । वह अलातचकक्र के समान - घूमता रहता था अेक क्षणके लिये भी कहीं ठहरता न था । अैसा समजो कि कोइ द्वीमुखी लुंकारियों की वनेडी मांज रहा हो ॥२२॥ शाल्व सौभ विमान के और सैनीको की साथ जहां जहां दिखाइ पडता, वहीं वहीं यादव सेनापति बाणो की वृष्टि करते थे ॥२३॥ यादव सेनापति के बाण सूर्य और अग्नि के समान जलते हुए एवं जहरीले सर्प के समान असह्य होते थे । उनसे शल्व का नगराकार विमान और सैन्य सम्पूर्ण पीडित हो गया, परिणाम यह आया कि यादवों के बाणो से शाल्व खूद ही मूर्छित हो गया ॥२४॥ शाल्व के सेनाधिपतियोने भी यादवो पर खूब शस्त्रवृष्टि कर रखी थी, इससे वे अत्यन्त पीडीत थे, परन्तु उन यादवोने अपना अपना रणस्थल छोडा नहीं । वे सोचते थे कि मरेंगे तो दिव्य लोक बनेगा और जीतेंगे तो परम विजयकी प्राप्ति होगी ॥२५॥

शाल्वामात्यो द्युमान् नाम [1]प्रद्युम्नं प्राक्प्रपीडितः । आसाद्य गदया [2]मौर्व्या व्याहत्य व्यनदद्बली ॥२६॥
[3]तं द्युम्नगदया शीर्णवक्षःस्थलमरिन्दमम् । अपोवाह रणान् सूतो धर्मविद्दारुकात्मजः ॥२७॥
लब्धसंज्ञो मुहूर्तेन कार्ष्णिः सारथिमब्रवीत् । अहो असाध्विदं सूत यद्रणान्मेऽपसर्पणम् ॥२८॥
न यदूनां कुले जातः श्रूयते रणविच्युतः । विना [4]मां क्लीबचित्तेन सूतेन [5]प्राप्तकल्मषात् ॥२९॥

कर्दमक्षमा

प्राक्, प्रपीडितः, द्युमान्, नाम, शाल्वामात्यः, प्रद्युम्नम्, आसाद्य, बली, मौर्व्या, गदया, व्याहत्य, व्यनदत् ॥२६॥ द्युमद्गदया, शीर्णवक्षःस्थलम्, अरिन्दमम्, तम्, धर्मवित्, दारुकात्मजः, सूतः, रणात्, तम्, अपोवाह ॥२७॥ मुहूर्तेन, लब्धसंज्ञः, कार्ष्णिः, सारथिम्, अब्रवीत्, अहो सूत ! रणात्, मे, अपसर्पणम्, ते इदम्, असाधु ॥२८॥ क्लीबचित्तेन, सूतेन, प्राप्तकल्मषात्, माम्, विना, यदूनाम्, कुले, रणविच्युतः, जातः, न, श्रूयते ॥२९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मौर्व्या कार्ष्णायसमय्या व्याहत्य प्रहृत्य ॥२६॥ अपोवाहाऽन्यतो निनाय ॥२७-२८॥ मत् मत्तो क्लीबं चीत्तं यस्य तेन त्वया सूतेन ॥२९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अपसर्पणं बहिर्निर्गमनम् ॥२८॥ प्राप्तं कल्मषमपवादोयेन तस्मात् 'कल्माषं पापनिन्दयोः' इति निघण्टुः । किल्बिषपाठेऽपि स एवार्थः ॥२९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रद्युम्नाद्धेतोः प्राक् प्रकर्षेण पीडितः अस्त्रप्रहारेण दुःखितः विशेषेणाहत्य प्रहृत्य ॥२६॥ अशीर्णवक्षःस्थलमप्यपोवाह

---

१. प्रद्युम्नास्त्रप्रपीडितः-वीर. । २. गुर्व्या-विज. । ३. प्रद्युम्नं गदया-श्रीधर. वंशी. वीर. विज. विश्व. । ४. मत् -श्रीधर. वंशी. वीर. विज. शुक. । ५. किल्बिषात्-श्रीधर. वंशी. वीर. विज. विश्व. शुक. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किमर्थमरिन्दमं क्षणं विश्रम्य निजारिं दमयितुमित्यर्थः । तथापि रणादपवाहनमयुक्तं तत्राह धर्मवित् सारथिः रथिरक्षणधर्मं जानन् यतो दारुकस्यात्मजः ॥२७॥ कार्ष्णिः तदपत्यत्वेन तद्वल्लीलावैचित्र्याकृष्टचित्त इत्यर्थः । अतो मोहाद्यनुकरणं सर्वं सङ्गच्छेतैवेति भावः । अहो खेदे मे मम श्रीयादवेन्द्रसुतस्येत्यर्थः ॥२८॥ क्लीबं पौरुषहीनं चित्तं यस्य तेन सूतेन त्वया हेतुना प्राप्तं त्वया किल्बिषं पापं येन तस्मात् ॥२९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रद्युम्नात् प्राक् प्रकर्षेण पीडितोऽस्त्रप्रहारेण दुःखितः । प्रद्युम्नमिति पाठे पाठान्ते प्रद्युम्नमासाद्येत्यन्वयः । प्राक् प्रपीडितस्तेनैव विशेषेणाहत्य प्रहृत्य व्यनदत् अत्युच्चैर्नादमकरोत्, यतो बली ॥२६॥ अशीर्णवक्षःस्थलमप्यपोवाह । किमर्थम् ? अरिन्दमं क्षणं विश्रम्य स्वस्थतया निजारिं दमयितुमित्यर्थः । ननु तथापि रणादपवहनमयुक्तम्, तत्राह–धर्म्मवित्, अस्वस्थस्य सतो रथिनोऽवेक्षणं सारथिः कुर्य्यादिति धर्म्मं जानन्; यतो दारुकः श्रीभगवत्सारथिस्तस्यात्मजः ॥२७॥ कार्ष्णिः लीलाकौतुकाकृष्टचित्तस्य भगवतः पुत्र इति तस्यापि तादृशत्वं सूचितम् । अतो वैचित्र्यादिकं सर्व्वं तस्य सङ्गच्छेतैवेति भावः । यद्वा, लब्ध्वा संज्ञा वीरेषु ख्यातिर्येन सः, अतो मुहूर्तेन स्वस्थः सन्नब्रवीदित्यर्थः । अहो खेदे, मे श्रीयादवेन्द्रपुत्रस्य मम ॥२८॥ रणाद्विच्युतोऽपसृतः कोऽपि न श्रूयते, क्लीबं पौरुषहीनं चित्तं यस्य तेन, सुतेन त्वया हेतुना प्राप्तं किल्बिषं पापं येन; यद्वा, प्राप्तं किल्बिषमपराधो यं तस्मात् ॥२९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२१-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

साल्वामात्य इति । द्युमान्नाम द्युमदाख्यः बली मौर्व्या कार्ष्णायसमय्या गुर्व्येति पाठान्तरं व्याहत्य प्रताड्य व्यनदत् ॥२६॥ प्रद्युम्नमिति । गदया तत्प्रहारेण विशीर्णं वक्षःस्थलं यस्य तं प्रद्युम्नं रणाद्रणस्थानादपोवाह अपसारयामास तत्र हेतुत्वेन सूतं विशिनष्टि–धर्मवित् सूतः कृच्छ्रगतं रक्षेद्रथिनं इत्येवंविधधर्मवित् दारुकस्य कृष्णसारथेरात्मजश्च ॥२७॥ लब्धसंज्ञ इति । तावन्मूर्च्छितस्ततो मुहूर्तेन लब्धा संज्ञा चेतना येन स कार्ष्णिः प्रद्युम्नः सारथिमुवाच, उक्तिमेवाह–अहो इति सार्द्धैश्चतुर्भिः । हे सूत ! इदमसाधु किं तन्मम रणादपसर्पणम् इति यत् ॥२८॥ कुतस्तस्यासाधुत्वमत आह–नेति । यदूनां कुले जातः कोऽपि रणाद्विच्युतः पलायितः न श्रूयते किं पुनर्न दृश्यत इति भावः । क्लीबमधृष्टं चित्तं यस्य तेन त्वया सूतेन हेतुना प्राप्तं कल्मषमयशो येन तस्मान् मन्मत्तः विनाऽन्यः कोऽपि रणविच्युतो न श्रूयत इति सम्बन्धः ॥२९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

"रथिनि प्राणसन्दिग्धे सारथी रथमाहरेत् । जीवयेद्युद्धतः साधु युद्धकर्मविशारदः ॥"

इति युद्धधर्मवित् ॥२७॥ अपसर्पणम् अपसरणम् ॥२८॥ कुतोऽसाध्वित्यतस्तदाह–नेति मद्विना ॥२९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५-३३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रद्युम्नाद्धेतोः प्राक् प्रथमं पीडितः प्रद्युम्नप्रयुक्तेनास्त्रेण बाधितः मौर्व्या कार्ष्णायसमय्या ॥२६॥ तं प्रद्युम्नं शीर्णवक्षःस्थलमिति प्रकृत्या द्युमतो गदया चिदानन्दमयवक्षसस्तस्य शीर्णत्वासम्भवेऽपि लीलाशक्त्यैव तस्य युद्धोत्साहरसवर्धनार्थमावेगमात्रे उत्पादिते तं गदयैव शीर्णवक्षःस्थलं मत्वा अपोवाह–अन्यत्र निनाय यतो धर्मवित् "सूतः कृच्छ्रगतं रक्षेत्" इति धर्मज्ञः वस्तुतस्तु अकारप्रश्लेषेण सच्चिदानन्दविग्रहत्वलक्षणं तस्य धर्मं न वेत्तीत्यधर्मवित् तच्च तदज्ञानं तस्य परमसुसङ्गतमेव यतो दारुकात्मजः "परीक्षिति भवेद्रागो दारुके च तथोद्धवे" इति भक्तिरसामृताब्धेर्महाप्रेमवतो दारुकस्यात्मजः

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रद्युम्नविषयकमहास्नेहवानिति भावः ॥२७॥ ततश्च लब्धा सम्यक् ज्ञा अनेन युद्धस्थलादहमपसारित इति ज्ञानं येन सः कृतावधान इत्यर्थः । यद्वा लब्धा संज्ञा अर्थसूचना अपसारणव्यापारेण स्वमूर्च्छाज्ञापना सूतकृता येन सः अत एव तं प्रति कुपितः सन्नब्रवीत्-असाविति "सञ्ज्ञा स्याच्चेतनानामहस्ताद्यैः स्वार्थसूचना" इत्यमरः । मुहूर्तेन क्षणेन ॥२८॥ सूतेन त्वया हेतुना प्राप्तं किल्बिषं कलङ्को येन तस्मात् ॥२९॥

गूढार्थदीपिनी

प्राक् प्रपीडितः द्युमान् प्रद्युम्नमासाद्य गदया व्याहत्य प्रहृत्य व्यनदत् । मौर्व्या लोहमय्या ॥२६॥ सूतः सारथिः प्रद्युम्नं रणात् अपोवाह अपसारयामास दूरे नीतवानित्यर्थः । वस्तुतः अशीर्णेति पदच्छेदः । शीर्णं विदीर्णं धर्मवित् । सूतः कृच्छ्रगतं रथेत् रथिनं सारथिं रथी । इति धर्मशास्त्रम् ॥२७॥ कार्ष्णिः कृष्णपुत्रः प्रद्युम्नः रणात् यत् मे मम अपसर्पणं पलायनं तदिदमसाधु अनुचितं कृतम् । अहो खेदे ॥२८॥ मत् मत्तो विना यदुकुले जातः कोऽपि रणात् विच्युतः पलायितः न श्रूयते इत्यन्वयः । कथम्भूतात् । सूतेन निमित्तभूतेन त्वया प्राप्तं किल्बिषमपवादो येन तस्मात् । क्लीबमधीरम् । 'कल्मषं पापनिन्दयोः' इति निघण्टुः ॥२९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अपोवाह अपसारयामास ॥२७-२८॥ क्लीबमधृष्टं चित्तं यस्य तेन प्राप्तकिल्बिषात् मत् मत्तो विना रणविच्युतस्त्यक्तयुद्धस्थानः न श्रूयते ॥२९-३०॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आसाद्यानन्तरम् ॥२०॥ द्युमतो गदया शीर्णं वक्षःस्थलं यस्य तं रथिनं रक्षेदिति धर्मविन्नवीनस्य यन्तुरयं धर्मः कथमिति कथयेति कथयति ॥ दारुकात्मज इति । परम्परातः सारथ्यं कुलकलितमिति भावः । रणात्तदङ्गणादपोवाहापनिनाय ॥२१॥ कार्ष्णिः कृष्णसुतः ॥२२॥ क्लीबचित्तेनाधीरधियेति यावत् । सूतेन त्वया प्राप्तकिल्बिषात् मद्विना यदूनां कुले जातो रणविच्युतो न दृश्यते ॥२३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं साधारणयुद्धमुक्त्वा प्रधानयुद्धमाह शाल्वामात्य इति । अमात्यो मुख्यमन्त्री शाल्वतुल्यः नाम्ना द्युमान् कान्तियुक्तश्च पूर्वं प्रद्युम्नात् पीडितः सन् आसाद्य निकटे आगत्य मौर्व्या कृष्णलोहनिर्मितया तृणविशेषबद्धया वा गदया व्याहत्य ताडयित्वा व्यनदच्छब्दं कृतवान् । जितं जितमिति । यतो बली गदायां बलं प्रधानं तेन महती पीडा जातेति सूचितम् ॥२६॥ ततो यज्जातं तदाह तं द्युमदिति । शरीरस्यैव महती पीडा जाता । यः कश्चनात्रापकर्षः स सर्वोऽपि महादेवसन्मानार्थः । द्युमतः प्रसिद्धस्य गदया शीर्णं वक्षःस्थलं यस्येति । स्वभावोऽप्यप्रयोजकत्वं वारयति अरिन्दममिति । तदा रणस्थानात् तस्य सूतः अपोवाह दूरे नीतवान् । सोऽपि शत्रुपक्षपातीति शङ्काव्युदासार्थमाह दारुकात्मज इति । तस्य भयान्नयनं वारयति धर्मविदिति ॥२७॥ ततः किं जातमित्याकाङ्क्षायामाह लब्धसंज्ञो मुहूर्तेनेति । मुहूर्तमात्रं मूर्च्छितः प्रद्युम्नस्य रुक्मिणीपुत्रत्वात् मातुलादिपक्षपाताद्वा । ततो भगवदनुग्रहात मुहूर्तानन्तरं लब्धसंज्ञः यतः कार्ष्णिः कृष्णपुत्रः अग्रे सारथिं दृष्ट्वा अनभिप्रेतं पलायनमिति बोधयन्नब्रवीत् । अहो इति तस्य तिरस्कारवचनम् । इदं ममापसर्पणम् अत्यन्तमसाधु सर्वत्र निन्दितम् । सूतेति सम्बोधनपरिज्ञानार्थम् ॥२८॥ ननु लोके पलायमाना अपि शूरा दृश्यन्ते तत्राह न यदूनां कुले जात इति । रणविच्युत इति । रणस्थानादपसरणं न स्मृतपूर्वं मरणं वा जयो वेति न तृतीयः पक्षः । नन्वद्य चेज्जातः तदापि व्याप्तिर्भग्नैवेत्याशङ्क्याह विना मां क्लीबचित्तेन सूतेनेति । अहमेवैकः सोऽपि सूतेन तथा जातः सूतोऽपि अद्यैव तथा ज्ञातः क्लीबचित्त इति । अतः प्राप्तकल्मषोऽहम् ॥२९॥

श्रीसुबोधिनीसारः

शाल्वस्याऽमात्यो मन्त्री द्युमान् नाम प्राक् पूर्वं प्रपीडितो मूर्च्छितः प्रद्युम्नम् आसाद्य प्राप्य मौर्व्या गदया व्याहत्य बली व्यनदत् सिंहनादमकरोत् ॥२६॥ गदया शीर्णं स्फुटितं वक्षःस्थलं यस्य तं प्रद्युम्नमरिन्दमं शत्रुञ्जयं धर्मज्ञो दारुकपुत्रो सूतो रणात्

श्रीसुबोधिनीसारः

निवर्त्यानयत् ॥२७॥ मुहूर्तेन घटिकाद्वयेन प्राप्तचेष्टः कार्ष्णेः कृष्णस्यापत्यं प्रद्युम्नः सारथिमब्रवीत् । हे सूत ! मे मम रणादपसर्पणं पलायनमावर्तनं वा इति यत् अहो इदमसाधु न समीचीनमित्यर्थः ॥२८॥ रणात्सङ्ग्रामाद्विच्युतो भ्रष्टो यदूनां कुले जातो न श्रूयते। क्लीबं भीरु चित्तं यस्य तेन सूतेन प्राप्तं किल्बिषमपकीर्तिर्यस्य तस्मान्मत्तो विना ॥२९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं साधारणयुद्धमुक्त्वा प्रधानयुद्धमाह-शाल्वेति । शाल्वस्यामात्यो मुख्यमन्त्री नाम्ना द्युमान् प्राक् पूर्वं प्रद्युम्नेन प्रपीडितः, अतस्तमासाद्य निकटमागत्य मौर्व्या मुरुर्लोहविशेषः तन्निर्मितया गदया व्याहत्य ताडयित्वा व्यनदत् जितं जितं मयेत्युच्चैः शब्दं कृतवान् । तत्र हेतुमाह-बलीति । गदायुद्धे बलस्य प्रधानत्वात् ॥२६॥ अरिन्दमं शत्रुहन्तारं गदया गदाप्रहारेण शीर्णं भग्नं वक्षःस्थलं यस्य तं प्रद्युम्नं रणस्थानात् सूतोऽपोवाह अपसारयामास । तत्र हेतुमाह-धर्मविदिति । तत्रापि हेतुमाह-कृष्णस्य सारथेर्दारुकस्यात्मज इति ॥२७॥ स प्रथमं तावन्मूर्च्छितस्ततो मूहूर्तेन लब्धा संज्ञा चेतना येन सः कार्ष्णिः प्रद्युम्नः सारथिमब्रवीत् । तदुक्तिमेवाह-अहो इति सार्धैश्चतुर्भिः । हे सूत ! रणात् यन्मे ममापसर्पणं पलायनं तदिदमहो असाधु अत्यसमीचीनं जातमित्यन्वयः ॥२८॥ ननु लोके पलायमाना अपि दृश्यन्ते, कुतस्तस्यासाधुत्वम् इत्याशङ्क्य तथाप्यस्मत्कुले तु दूषणमेवैतदित्याह-नेति। क्लीबमधृष्टं चित्तं यस्य तेन त्वया निमित्तभूतेन प्राप्तं कल्मषम् अपयशो येन तस्मात् मत् मत्तो विना अन्यो यदूनां कुले जातः कोऽपि रणाद्विच्युतः पलायितः न श्रूयते इत्यन्वयः ॥२९॥

अन्वितार्थप्रकाशिका

शाल्वेति ॥ बली शाल्वस्यामात्यो मुख्यमन्त्री नाम्ना द्युमान् प्राक् पूर्वं प्रद्युम्नेन प्रपीडितः अतस्तमासाद्य निकटमागत्य मौर्व्या लोहविशेषनिर्मितया गदया व्याहत्य ताडयित्वा व्यनदत् जितं मयेत्युच्चैः शब्दं कृतवान् । प्रद्युम्नं प्रागित्यत्र प्रद्युम्नादिति पाठे प्रद्युम्नाद्धेतोरित्यर्थः ॥ अरिन्दमं शत्रुहन्तारं गदया गदाप्रहारेण शीर्णं भग्नं वक्षःस्थलं यस्य तं प्रद्युम्नं रणस्थानात् धर्मवित् दारुकात्मजः सूतः अपोवाह अपसारयामास। अत्र भगवद्व्यूहावतारस्य प्रद्युम्नस्य प्राकृत्या गदया वक्षोविदारणवर्णनं प्रतीतिमात्रम् । यद्वा । प्रद्युम्नं शीर्णवक्षःस्थलं मत्वेति व्याख्येयम् ॥२७॥ लब्ध्वेति ॥ स प्रथमं तावन्मूर्च्छितस्ततो मूहूर्तेन लब्धा संज्ञा चेतना येन सः कार्ष्णिः प्रद्युम्नः सारथिमब्रवीत् । हे सूत ! रणात् यन्मे ममापसर्पणं पलायनं तदिदमहो असाधु अत्यसमीचीनं जातम् ॥२८॥ नेति । क्लीबमधृष्टं चित्तं यस्य तेन त्वया निमित्तभूतेन प्राप्तं कल्मषम् अपयशो येन तस्मात् मत् मत्तो विना अन्यो यदूनां कुले जातः कोऽपि रणाद्विच्युतः पलायितः न श्रूयते ॥२९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रद्युम्नमासाद्य प्राप्य मौर्व्या श्यामलोहमय्या गदया व्याहत्य सन्ताड्य बली व्यनदत् ॥२६॥ सूतः रणादपोवाह अन्य प्रापयामास ॥२७-२८॥ रणात् विच्युतः पलायितः सूतेन प्राप्तं किल्बिषं दोषो यस्य तस्मात् मद्विनान्यो न श्रूयते ॥२९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शाल्वेति ॥ बली बलवान्, द्युमान् नाम शाल्वस्यामात्यः, प्राक् प्रपीडितः प्रद्युम्नेति शेषः । अतः प्रद्युम्नम् आसा मौर्व्या कार्ष्णायसमय्या गदया, व्याहत्य प्रहृत्य, व्यनदत् ॥२६॥ प्रद्युम्नमिति ॥ गदया, शीर्णवक्षःस्थलम्, अरिन्दमं प्रद्यु धर्मवित्दारुकात्मजः सूतः, रणात् अपोवाह । धर्मविदित्यनेन 'रथिनि प्राणसंदिग्धे सारथी रथमाहरेत् । जीवेयद्यु साधुयुद्धकर्मविशारदः' इति वचनस्मृतिमत्त्वमस्य सूचितम् ॥२७॥ लब्धसंज्ञ इति ॥ मुहूर्तेन लब्धसंज्ञः, कार्ष्णिः प्रद्यु सारथिम्, अब्रवीत्। उक्तिमेवाह अहो इति सार्द्धैश्चतुर्भिः । हे सूत, मे मम, रणात् अपसर्पणं यत्, इदम्, अहो असाधु, जातम्॥ कुतस्तस्यासाधुत्वमत आह॥ नेति॥ क्लीबमधृष्टं चित्तं यस्य तेन, सूतेन हेतुना, प्राप्तं किल्बिषमयशो येन तस्मात्, मत् मत्तः वि अन्यः कोऽपि, यदूनां कुले, रणविच्युतः जातः, न श्रूयते ॥२९॥

कृष्णप्रिया

राजन् परीक्षित ! शाल्व के मंत्री का नाम दुमान था, उसको पहले श्रीप्रद्युम्नजीने पचीस बाण मारे थे । द्युमान अतिशय बलवान था, उसने आवेशमें आकर प्रद्युम्नजी पर अपनी फौलादी गदा से अत्यन्त जोरसे प्रहार किया और आवेशमें आकर गर्जना करने लगा कि मार लिया मार लिया ॥२६॥ राजन् ! गदाके प्रहारसे शत्रुदमन श्रीप्रद्युम्नजी का वक्षस्थल मानो फट गया । दारुक सारथीका पुत्र श्रीप्रद्युम्नजी का रथ हांक रहा था उसने राथी धर्म के अनुसार श्रीप्रद्युम्नजी को रणभूमि से हटा ले गया ॥२७॥ केवल दो घडीमें श्रीप्रद्युम्नजी मूर्छा हट गयी । तब उन्होंने अपने सारथि से कहा कि भैया तुने यह अतिशय अनुचित कार्य किया हाय हाय भैया ? तू रणसंग्राम भूमिसे हटा लाया ॥२८॥ हे सारथी ! हमलोगों ने एसा कभी नही कि हमारे कु के कोई भी वीर कभी युद्ध स्थली को छोडकर प्राणरक्षा के लिये हट गया हो । यह कलंकका टीका तो मेरे ही सिर लगा । भैया सारथे ! सचमुच तु कायर है या तो क्लिब है ॥२९॥

किं नु वक्ष्येऽभिसङ्गम्य पितरौ रामकेशवौ । युद्धा[1]द्धर्म्यादपक्रान्तः पृष्टस्तत्रात्मनः क्षमम् ॥३०॥
व्यक्तं मे कथयिष्यन्ति हसन्त्यो भ्रातृजामयः । क्लैब्यं कथं[2] कथं वीर तवान्यैः कथ्यतां मृधे ॥३१॥

कर्दमक्षमा

तत्र, पितरौ, रामकेशवौ, अभिसङ्गम्य, धर्म्यात्, युद्धात्, अपक्रान्तः, पृष्टः, आत्मनः, क्षमम्, किम्, नु, वक्ष्ये ॥३०॥ मे, भ्रातृजामयः, हसन्त्यः, कथयिष्यन्ति, हे वीर, तव, अन्यैः, मृधे, कथम्, कथम्, क्लैब्यम्, जातम्, (तत्) कथ्यताम् ॥३१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पितरौ रामकृष्णावभिसङ्गम्य तत्पार्श्वं गत्वा ताभ्यां पृष्टः स्वयोग्यं किन्नु वक्ष्यामीति ॥३०॥ भ्रातृजामयो भ्रातृभार्याः व्यक्तं निश्चितं मत्क्लैब्यं कथमयिष्यन्ति तत्कथनमनुकरोति-कथं कथमिति ॥३१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र पितृपार्श्वे । किं वक्ष्यामि न किमपि वक्तुं योग्यो भविष्यामीत्यर्थः ॥३०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वैरिवधादिना स्वान् रमयतीति रामः केशवश्च हेलया केशिसूदनात् ताविति तयोर्महाविद्यत्वं सूचितम् धर्मादिवश्यकृत्यत्वमुक्तम् आत्मनः क्षमं योग्यं कर्म ॥३०॥ एवं मम महती लोकधर्मविच्युतिर्जाता उपहासश्चातीवाभूदित्याह-व्यक्तमिति । मन्य इत्यर्थः । भ्रातरोऽत्र ज्येष्ठाः पितृव्यादिपुत्राः ज्ञेयाः क्लैब्यमित्यस्य परेणान्वयः अन्यैः शत्रुभिर्हेतुभिः तव दैन्यं कथमभूत् तत्त्वया कथ्यतां तत्र वीप्सा च हे वीरेति चोपहासातिशयात् यद्वा अन्यैर्जनैः कथं कथ्यताम् अपि तु नैकेनापि कथयितव्यमिति मा लज्जस्वेत्यर्थः । तदिदं तु सारथिभर्त्सनार्थमेवारोप्य प्रोक्तम् मर्मभेदकस्येदृशवाक्यस्य ताभिरात्मीयाभिरव्यक्तत्वात् ॥३१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वैरिवधादिना स्वान् रमयतीति रामः, केशवश्च अवहेलया महादैत्यकेशि-सूदनात्; 'तौ' इति तयोर्महावीर्य्यत्वं (महावीर्य्यं [घ,ङ] ।) सूचितम् । धर्म्यात् पुण्यजात् शुभकरात् स्वधर्म्मयोग्याद्वा, इत्यवश्यकृत्यत्वमुक्तम् । अपक्रान्तो भङ्गं प्राप्तः, आत्मनो मे क्षमं योगयं कर्म्म किं कतरद् वक्ष्ये, अपि तु न किञ्चिदपीत्यर्थः; यद्वा, क्षमं हितं स्वधर्म्मपालनलक्षणं पृष्टः सन् । एवं मम महती लज्जा जाता ॥३०॥ उपहासश्चातीवाभूदित्याह-व्यक्तमिति । निश्चितं स्फुटं वा क्लैब्यमित्यस्य परेणाप्यन्वयः । अन्यैः शत्रुभिः कृत्वा मृधे युद्धमध्ये तव क्लैब्यं कथमभूत्तत्त्वया कथ्यताम्, तत्र वीप्सा च । वीर ! हे शूरेति चोपहासादेव; यद्वा, अन्यैर्जनैः कथं कथ्यताम् ? अपि तु न केनापि कथयितव्यमिति मा लज्जस्वेत्यर्थः । अन्यत्समानम् ॥३१॥

---

[1] सम्यग-श्रीधर. वंशी.; धर्म्याद-वीर. विज. । [2] कथंगतो-वीर. विज. ।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥२१-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

किञ्च, किन्त्विति । रामकेशवावभिसङ्गम्य तत्पार्श्वं गत्वेत्यर्थः ताभ्यां पृष्टः न्याय्याद्युद्धादपक्रान्तः पलायितोऽहमात्मनः क्षमं योग्यं किन्नु वक्ष्यामि ॥३०॥ किञ्च, व्यक्तमिति । मे भ्रातृजामयो भ्रातृभार्याः मृधे युद्धे प्राप्तं क्लैब्यं कथं कथम् इति हसन्त्यः कथयिष्यन्ति व्यक्तं नूनं हे वीर! तथाऽन्यैरपि कथं कथं कथ्यताम् सम्भावनायां लोट् ॥३१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

धर्मसाधनाद्युद्धादपगतोऽहं पितृभ्यां पृष्टः तत्र पित्रोरात्मना मया कृतमक्षमं किन्नु कथन्नु वक्ष्य इत्यन्वयः ॥३०॥ किञ्चे दुःसहमित्याह–व्यक्तमिति । जामयः सहोदर्यः कथं कथयन्तीति तत्राह–क्लैब्यमिति । हे वीर ! मृधेऽन्यैः सह कथं क्लैब गतस्तत्कथ्यतामिति ॥३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२१-३३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

क्षमं योग्यम् ॥३०॥ भ्रातृजामयो भ्रातृभार्याः हे वीर! अन्यैः सह मृधे तव क्लैब्यं कथं कथमभूत् विस्मये द्वित्वम् ॥३१-३२

गूढार्थदीपिनी

पितरौ अभिसङ्गम्य मिलित्वा ताभ्यां पृष्टः सन् तत्र आत्मनः क्षमम् उचितवृत्तं किं नु वक्ष्ये । पलायितोऽहमित्येव कि ॥३०॥ जामयः भ्रातृभार्या व्याक्तं निश्चितं मे क्लैब्यं नपुंसकत्वं कथयिष्यन्ति । तदेवाह–त्वं मृधे सङ्ग्रामे अन्यैः शत्रुभिः सह यु कथं पलायितोऽसि कथं पलायितोऽसीति मे क्लैब्यमधीरतामित्यर्थः । विस्मये द्विरुक्तिः ॥३१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भ्रातृणां जामयो भार्याः ॥३१-३२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

पितरौ रामकेशवावभिगम्य धर्म्याद्धर्मादनपेताद्युद्धादपक्रान्तोऽहं ताभ्यां दृष्ट आत्मना क्षमं वक्तुं योग्यं किन्नु यक्ष रणापसरणमकारि मयेति हा सूतैवं कुतः कृतवानसि किञ्चेदं ततोऽपि दुःसहमितो रणमरणं वरमित्याह ॥२४॥ व्यक्तमिति भ्रातृजा भ्रातृभार्या हसन्त्यः कथयिष्यन्ति । एतादृशा जयशालिनोऽस्मद्भर्तृभ्रात इति । यद्वा भ्रातरश्च जामयः स्वसारश्च हसन्त्यः कथयं येषां यासां च न हसनानुबन्धस्ते ता अप्यवमाननाय तं हसन्ति का कथा तदनुबन्धयुतानां भ्रातृभार्यादीनामिति भाव यथोक्तमृग्भाष्यटीकाटिप्पणीषु । अम्बयोयन्त्यत्यष्वभिर्जामयः कारणत्वात्सहोदराः । जगतो जामयो यस्मात्सह ताभिर्विव जामयो भगिन्यश्च । जामिः श्वसृकुलस्त्रियेति नानार्थरत्नमालोक्तेश्चेति । भ्रातृभार्येति व्याख्यायां कुलललनात्वेन तद्ग्रह इति ज्ञेय तत्कथनमभिनयेनाह ॥ क्लैब्यमिति । हे वीर । तवान्यैस्त्वद्वैरिभिर्मृधे क्लैब्यं कथं गतस्तत्कथ्यतामिति । यद्वा हे वी सारथ्यकर्मोपयुक्तवीरयुक्त दारुक दारुकमृधेऽन्यैर्विरिभिः क्लैब्यं कथं गतः कथ्यतां बत खेदः ॥२५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु किमेतावता तत्राह किन्नु वक्ष्य इति। पितरौ रामकेशवावपि सङ्गम्य। नु इति वितर्के किं वक्ष्ये। वचने प्रकारः कोऽपि नास्तीति। ननु प्रहार एव वर्तते तत्राह युद्धाद्धर्म्यादपक्रान्त इति। धर्मादनपेतं युद्धम् अतस्तस्मादपक्रमः अधर्मो भवति। तर्हि तूष्णीं

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स्थातव्यमिति चेत् तत्राह पृष्ट इति। तर्हि अशक्तिर्वक्तव्येति चेत् आत्मनः क्षममिति। न हि मया अशक्तिर्वक्तुं शक्या ॥३०॥ किञ्च। सूतदोषेत्युक्ते कदाचित् पित्रा अङ्गीकर्तव्यम्। न तु भ्रातृपत्नीभिः हास्यस्वभावाभिरित्याह व्यक्तं मे कथयिष्यन्तीति। उक्तेऽप्युपाये विपरीतं ज्ञात्वा हसन्त्यो भविष्यन्ति यतो भ्रातृजामयः कुलस्त्रियः एवं च वक्ष्यन्तीत्याह क्लैब्यं कथं कथं वीरेति। हे वीर विपरीतार्थं सम्बोधनम्। अन्यैः सह ते क्लैब्यं कथं कथमिति श्रवणादरे वीप्सा। क्लैब्यं वा कथयिष्यन्ति। हानिकथनेऽप्युपहासः अन्यैः सह कथं कथमिति ॥३१॥

श्रीसुबोधिनीसारः

युद्धादपक्रान्तोऽपयातोऽहम् आत्मनः क्षमं क्षेमं पृष्टः पितरौ रामकृष्णौ अभिसङ्गम्य सम्यक् किं नु वक्ष्यामि ॥३०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अतः युद्धात्सम्यगपक्रान्तः प्रसिद्धतया पलायितोऽहं रामकेशवौ पितरौ अभिसङ्गम्य तत्पार्श्वं गत्वा ताभ्यं पृष्टश्च तत्रात्मनः क्षमं योग्यं किं नु वक्ष्यामीत्यन्वयः ॥३०॥ किञ्च हसन्त्यो मे भ्रातृजामयो भ्रातृभार्या व्यक्तं निश्चितमेतत्कथयिष्यन्ति। तत्कथनमेवानुकरोति-क्लैब्यमिति। हे वीर! मृधे युद्धे अन्यैः शत्रुभिस्तव क्लैब्यं व्याकुलत्वं कथं जातं येन त्वं पलायितोऽसि तत्कथ्यतामित्यन्वयः। कथं कथमिति द्विरुक्तिरुपहासार्था ॥३१॥

अन्वितार्थप्रकाशिका

किमिति॥ अतः युद्धात् सम्यगपक्रान्तः प्रसिद्धतया पलायितोऽहं रामकेशवौ पितरौ अभिसङ्गम्य तत्पार्श्वं गत्वा ताभ्यं पृष्टश्च तत्रात्मनः क्षमं योग्यं किं नु वक्ष्यामि ॥३०॥ व्यक्तमिति॥ हसन्त्यो मे भ्रातृजामयो भ्रातृभार्या व्यक्तं निश्चितमेतत्कथयिष्यन्ति-हे वीर! मृधे युद्धे अन्यैः शत्रुभिस्तव क्लैब्यं व्याकुलत्वं कथं जातं येन त्वं पलायितोऽसि तत्कथ्यताम् ॥३१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

युद्धात् सम्यगपक्रान्तो विनिवृत्तोहं रामकृष्णावभिसङ्गम्य प्राप्य ताभ्यं पृष्टः तत्र रामकृष्णसमीपे आत्मनो मम क्षमं योग्यं वचनं किं नु वक्ष्ये ॥३०॥ भ्रातृणां जामयः पत्न्यः व्यक्तं स्फुटम् अन्यैः शत्रुभिः सह मृधे तव कथं क्लैब्यं कथं कथमिति वीप्सा तु उपहासातिशयाय ॥३१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं न्विति॥ पितरौ रामकेशवौ, अभिसङ्गम्य, तत्पार्श्वे गत्वेत्यर्थः। ताभ्यां पृष्टः, युद्धात् सम्यक् अपक्रान्तः पलायितः, अहम्, आत्मनः क्षमं योग्यं, तत्र पितृसन्निधौ किं नु वक्ष्ये वक्ष्यामि ॥३०॥ व्यक्तमिति॥ मे मम, भ्रातृजामयः भ्रातृभार्याः, व्यक्तं निश्चितं, हे वीर, अन्यैः सह, मृधे, तव क्लैब्यं, कथं कथं कथ्यताम्। इति हसन्त्यः सत्यः, कथयिष्यन्ति ॥३१॥

कृष्णप्रिया

अब ही भैया तू मुझे बतला कि मेरे पूज्य पिताजी श्रीबलदाउजी और पिता श्रीकृष्णचन्द्र के सन्मुख क्या कहुंगा ? मुझे तो केवल मुं ही छिपाना पडेगा । अब तो सर्व परिवा के सामने मुंह छिपाना मेरे भाग्य में रह गया ॥३०॥ सब की बात छोडो कि मेरी भाभियां हसती हुई मुझसे स्पष्ट शब्दोमें पूछेंगी कि हे वीर देवराजी आप निर्वीर कैसे हो गये ? शत्रुओंने युद्धमें आपको नीचा कैसे दिखा दिया ? हे सारथे अवश्य ही तुमने मुझे रणभूमि से भगानक अतिशय अनुचित कार्य कंकिया ॥३१॥

[1]सारथिरुवाच

धर्मं विजानताऽऽयुष्मन् कृतमेतन्मया विभो । सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी ॥३२॥
एतद्विदित्वा तु भवान् मयापोवाहितो रणात् । [2]उपस्पृष्टः परेणेति मूर्च्छितो गदया हतः ॥३३॥
॥ इति श्रीमद्भागवते महापुराणे[3] दशमस्कन्धे[4] शाल्वयुद्धे [5]षट्सप्ततितमोऽध्यायः ॥७६॥

कर्दमक्षमा

सारथिः, उवाच । हे आयुष्मन्, हे विभो, रथी, कृच्छ्रगतम्, सारथिम्, रक्षेत्, इति, धर्मम्, विजानता, मया, एतत्, कृतम् ॥३२॥ एतत्, विदित्वा, मया, रणात्, भवान्, अपोवाहितः, परेण, गदया, हतः, मूर्च्छितः, उपस्पृष्टः ॥३३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे षट्सप्ततितमाध्यायान्वयाः ॥७६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विभो हे समर्थ ! एतदपसर्पणम् धर्ममाह-सूत इति ॥३२॥ अपोवाहितोऽपनीतः उपसृष्ट उपसर्गं पीडां प्राप्त इति कृत्वा यतः परेण शत्रुणा गदया हतस्सन् मूर्च्छितो निस्संज्ञतां गतो भवानिति ॥३३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां
भावार्थदीपिकायां षट्सप्ततितमोऽध्यायः ॥७६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तासां कथनं तत्कथनम् ॥३१-३२॥ एतद्वचनम् ॥३३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीवंशीधरविरचिते
भावार्थदीपिकाप्रकाशे षट्सप्ततितमोऽध्यायः ॥७६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आयुष्मन्निति नित्ययोगे मतुप् हे सर्वकालव्यापक ! विभो ! हे सर्वदेशव्यापकेति त्वयि कथमप्यनिष्टशङ्का नास्त्येवेति भावः । तथापि कृतं कुतः धर्मं विशेषेण जानता कृच्छ्रगतं कष्टप्राप्तं सारथिं च रथी रक्षेत् ॥३२॥ एतदिति । परेणोपसृष्टो गदया हतो मूर्च्छितश्चेतद्विदित्वेत्यन्वयः । अपोवाहित इत्यस्मिन्नोकारमध्यत्वमार्षम् ॥३३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणयां षट्सप्ततितमोऽध्यायः ॥७६॥

---

१. सूत उवाच-गो. प्रे. टी. । २८. उपसृष्टः-श्रीधर. वंशी. वीर. विज. जीव. विश्व.; उपस्पृष्टः-शुक । २९. पारमहंस्यां संहिता उत्तरार्धे-गो. प्रे. । ३०.दशमस्कन्धे सौभवधे-गो. प्रे. टी. । ३१. पञ्चाशीतितमोऽध्यायः-विज. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न मया किल क्लीबचित्ततया त्वमपवाहितः, किन्तु स्वधर्मापेक्षयैवेत्याह-धर्म्ममिति । आयुष्मन् ! हे नित्यविग्रहेति हे विभो ! इति च त्वयि कथमप्यनिष्टशङ्का नास्त्येवेति भावः । तथापि कृतम्; कुतः? धर्मं विशेषेण जानता, कृच्छ्रगतं कष्टं प्राप्तं सारथिं च रथी रक्षेत् ॥३२॥ स्वदोषं परिहर्तुं तदेव द्रढयन्नुक्तपोषण्यायेनाह-एतदिति । तु एव, एतदेव ज्ञात्वा, न त्वन्यथेत्यर्थः । कृच्छ्रगतत्वमेवाभिव्यञ्जयति-उपसृष्ट इति । अन्यत्तैर्व्याख्यातम् । यद्वा, गदया हतोऽपि मूर्च्छितः, समुच्छ्रितस्तेजोवृद्धिं प्राप्तः, महावीरत्वस्वभावात्; अतः परेण परमेश्वरेण श्रीकृष्णेनोपसृष्टः पुनर्जनित इति मत्वा क्षणं विश्रामार्थं मयोपोवाहितोऽपोढः ॥३३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रील-सनातन-गोस्वामिपाद-कृतायां
श्रीबृहद्वैष्णवतोषण्यां श्रीदशम-टिप्पण्यां षट्सप्ततितमोऽध्यायः ॥७६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥२१-३३॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये षट्सप्ततितमोऽध्यायः ॥७६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थमुक्तः प्राह सूतः-धर्ममिति । हे विभो ! धर्मं विजानतेति हेतुगर्भम् अतो मया एतदपसारणं कृतं कोऽसौ धर्मः ? तत्राह-सूत इति । कृच्छ्रगतं विपत्तिप्राप्तं रथिनं रक्षेद्रथी तु तथाभूतं सारथिमिति ॥३२॥ अतस्त्वयं धर्मः किं मयाऽधुना प्राप्तं कृच्छ्रं यतो मामपोवाहितवान् तत्राह-एतदिति । परेण शत्रुणा कर्त्रा गदया आहतस्ताडितः उपसृष्टः पीडां प्राप्तो मूर्च्छितश्चेत्येतद्विदित्वा उपसृष्ट इति पाठे परेणोपह्रियेतेत्येतद्विदित्वेत्यर्थः । मया भवान् रणादपोवाहितः ॥३३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
षट्सप्ततितमोऽध्यायः ॥७६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

कोऽयं धर्म इति तत्राह-सूत इति ॥३२॥ उपसृष्टः उपद्रुतः ॥३३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयतीर्थकृतपदरत्नावल्यां षट्सप्ततितमोऽध्यायः ॥७६॥
(श्रीविजयध्वजतीर्थरीत्या पञ्चाशीतितमोऽध्यायः ॥८५॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥५-३३॥

॥ इति श्रीमद्भागवते दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे षट्सप्ततितमोऽध्यायः ॥७६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

॥१-३३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे षट्सप्ततितमोऽध्यायः ॥७६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥१...३३॥

॥ इति श्रीनाथचक्रवर्तिपादविरचितायां चैतन्यमञ्जूषायां षट्सप्ततितमोऽध्यायः ॥७६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अपोवाहित: अपनीत: उपसृष्ट: पीडित इत्यर्थ: । यतो गदया हतो भवांस्तदानीं मूर्च्छितोऽभूत् इति ज्ञात्वैव मया अपोवाहित: ततश्च धिङ्मूढ मां नैवत्वमज्ञासीरिति प्रत्युक्तिर्ज्ञेया ॥३३॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तिचेतसाम् । षट्सप्ततितमोऽध्यायो दशमेऽजनि सङ्गतः ॥७६॥

गूढार्थदीपिनी

हे आयुष्मन् ! नित्ययोगे मतुप् । एतत् अपसारणं कृतं धर्मस्वरूपमाह–सूत इति ॥३२॥ परेण शत्रुणा हत: उपसृष्ट: पीडां प्राप्त: मूर्च्छितश्च भवान् जात: एतत् विदित्वैव मया रणात् अपोवाहित: पृथग् नीत: ॥३३॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यां षट्सप्ततितमोऽध्याय: ॥७६॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

परेण शत्रुणा गदया हत: अत एव स्पृष्ट: रथोपस्थे पतितो मूर्च्छितो गतसंज्ञ: अत: सूत: कृच्छ्रगतं रथिनं रक्षेदिति एतद्विदित्वा मयाऽपोवाहितोऽपनीत: ॥३३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षट्सप्ततितमाऽऽध्यायार्थप्रकाश: ॥७६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भगवत: शौरे: पार्श्वे नारदोदितं श्रुत्वा शनैर्भगवतो मुखमवैक्षत । स्वामिन्नयमेक: प्राघूर्णिकस्तवायात इति ॥२६॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तन्निशम्य नारदेरितं श्रुत्वा किञ्चित्प्रहस्यास्तु नाम । अनेनालक्ष्यता द्योत्यते । अत एव सामान्यार्थान्तरन्यासेन शंसति ॥ सा हि महात्मतेति । श्रुत्वैवं धृतिस्थिति: महात्मता महात्मत्वं तज्ज्ञापिकेत्यर्थ: ॥२७॥ गीर्भिरच्युतो वचनं च रचनमिति वाक् च्युतिरहित: कृष्ण: सूनृतैर्वाक्यैर्मुनिं सम्यक् पूजयित्वा सोऽपि चिराभिलषितो बहुदिनं वध्यत्वेनाकाङ्क्षित: प्राप्त इति साध्वित्यचिन्तयत् ॥२८॥ अनन्तरमनन्त: स्वयं स्वपुरं गतवानुत कांश्चित्प्रैषिषदथवा स यत्रास्ते तत्र गत इत्यत आह ॥ उग्रसेनमिति । स्वसैनिकान् सेनासमवेतान् ॥२९-३०॥ सारथी रथिकं प्रति विज्ञापयति । धर्ममिति । हे आयुष्मन् । अनेन नोचेत्तव मरणमेव भावीत्यरुन्तुदवचं पर्यायतो ध्वनयामासेति ज्ञेयम् । धर्मं विजानता कृतम् । तमेवाविष्करोति ॥ सूत इति । कृच्छ्रगतं रथिनं रक्षेत् । रथ्यपि कृच्छ्रगतं सारथिं रक्षेदिति विहितमिति ॥२६॥ मयैतद्विहितमित्याह ॥ एतदिति । परेण गदया हतो मूर्च्छितो यतोऽत उपसृष्ट उपसर्गं पीडां प्राप्त इति मया रणादपोहित: । अतो धर्ममेव मया कृतं तन्मर्म त्वया विदितमिति भाव: ॥२७॥

॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे षडशीतिरध्याय: ॥१०-८६॥ (॥७६॥)

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवमुपालब्धस्या सूतस्य वचनं धर्मं विजानतेति । धर्मस्वरूपमग्रे वक्तव्यम् । तर्हि मरणमस्तु किमित्यपसरणमिति चे तत्राह आयुष्मन्निति । आयुर्वर्तते । एवं सत्युपेक्षा महद्दोषाय । अत आयुर्धर्मं च विजानता मयैतत् कृतम् । धर्ममाह सूत: कृच्छ्र रक्षेदिति । ममाप्येवम्भावे त्वया रक्षणीय इत्युपदेशार्थं वचनम् ॥३२॥ इदं त्वया कुतोऽवगतमित्याशङ्क्याह एतद्विदित्वा तु भवानि तुशब्द: अज्ञानादागमनं वारयति । एतद्धर्मं ज्ञात्वैव भवान् रणादपोवाहित: । किं मम जातमित्याशङ्कायामाह उपस्पृष्ट: परेणेति इत्यमुना प्रकारेण हृदयविदारणरूपेण परेणोपस्पृष्ट: शत्रुणा ताडित: । ताडनमाह गदया हत: । ततो मूर्च्छित इति । एतत् कृच्छ्रगमन अतो धर्मकीर्तिविरोधे धर्मो रक्षणीय इति सिद्धान्त: ॥३३॥

॥ इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां

दशमस्कन्धोत्तरार्धविवरणे सप्तविंशाध्यायविवरणम् ॥२७॥७६॥

श्रीसुबोधिनीसारः

भ्रातृणां जामयः पत्न्यो हसन्त्यो मे मम क्लैब्यं कातर्यं व्यक्तं निश्चितं कथयिष्यन्ति । हे वीर मृधे सङ्ग्रामे तवान्यैः सह क्लैब्यं कथं कथमिति कथ्यताम् ॥३१॥ सारथ्युक्तिः । हे आयुष्मन् ! हे विभो ! धर्मं विजानता मया एतत्कृतं तथा हि । कृच्छ्रं कष्टं गतं प्राप्तं रथिनं स्वामिनं सूतो रक्षेत् कृच्छ्रगतं सारथिं रथीति ॥३२॥ एतद्विदित्वा ज्ञात्वा रणाद्भवान् मयापोवाहितोऽपनीतः । न च मयि किं कष्टमिति वाच्यम् । परेण शत्रुणा गदया हत उपसृष्टः पीडितो मूर्च्छित इति ॥३३॥

॥ इति श्रीमद्भा० दश० उत्त०सुबो०टी०षट्सप्ततितमोऽध्यायः ॥७६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जीवतः स्वामिनः उपेक्षायां महान् दोष इति सूचयन् सम्बोधयति–हे आयुष्मन् ! हे विभो ! धर्मं विजानता मया एतत् रणादपसारणं कृतम् । कोऽसौ धर्म इत्यत्राह–सूत इति । कृच्छ्रगतं कष्टं प्राप्तं रथिनं सूतो रक्षेत्, तथाविधं सारथिं तु रथी रक्षेदित्यन्वयः ॥३२॥ एतत् धर्मरहस्यं विदित्वैव मया भवान् रणात् अपोवाहितः अपसारितः, यतो मूर्च्छितः । तत्र हेतुमाह–उपसृष्टः उपसर्गं पीडां प्राप्तः । तत्र हेतुमाह–परेण शत्रुणा गदया हत इति । इतिशब्दो वाक्यसमाप्तिसूचकः ॥३३॥

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र सात्त्विकानां निरोधने । षट्सप्ततितमः प्रागाच्छाल्वयुद्धनिरूपकः ॥३॥ ॥७६॥

अन्वितार्थप्रकाशिका

धर्ममिति ॥ हे आयुष्मन् ! हे विभो ! धर्मं विजानता मया एतत् रणादपसारणं कृतं धर्ममाह–सूत इति । कृच्छ्रगतं कष्टं प्राप्तं रथिनं सूतो रक्षेत् तथाविधं सारथिं तु रथी रक्षेत् ॥३२॥ एतदिति ॥ भवान् परेण शत्रुणा गदया आहतः ताडितः अतः मूर्च्छितः उपसृष्टः पीडां प्राप्तः इत्येतत् विदित्वा मया भवान् रणात् अपोवाहितः अपसारितः । पकारोत्तर ओकार आर्षः ॥३३॥

॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे षट्सप्ततितमे व्यधात् ॥

॥ इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां षट्सप्ततितमोऽध्यायः ॥७६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

धर्ममाह सूत इति हे आयुष्मन् ! ॥३२॥ परेण शत्रुणा गदया हतः उपसृष्टः पीडितः अतो मूर्च्छितः इत्येतत् दुःखं विदित्वा मया भवान् रणादपोवाहितः अन्यत्र नीतः अपोवाहित इत्यत्र पकारोत्तर ओकार आर्षः ॥३३॥

॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्य-

गोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने

प्रद्युम्नशाल्वसङ्ग्रामो नाम षट्सप्ततिमतोऽध्यायः ॥७६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

धर्ममिति ॥ हे आयुष्मन्, हे विभो, धर्मं विजानता मया, एतत् भवतः रणात् अपसर्पणं, कृतं विहितं, कोऽसौ धर्मस्तत्राह सूतः सारथिः, कृच्छ्रगतं विपत्तिं प्राप्तं, रथिनं रक्षेत् । रथी अपि, कृच्छ्रगतं सूतं सारथिं, रक्षेत् । इति ॥३२॥ अस्त्वयं धर्मः किं मया अधुना प्राप्तं कृच्छ्रं यतो मामपोवाहितवानित्यत्राह ॥ एतदिति ॥ परेण शत्रुणा कर्त्रा, गदया करणेन, हस्तताडितः, इति हेतोः,

उपसृष्टः पीडां प्राप्तः, मूर्च्छितश्च, एतत् विदित्वा तु ज्ञात्वैवेत्यर्थः । भवान् मया, रणात्, अपोवाहितः । अतो भवतो मम च न दोष इति भावः ॥३३॥

॥ इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुत-
श्रीरघुवीराचार्यसूनुभगवत्प्रसादविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धे
षट्सप्ततितमोऽध्यायः ॥७६॥

कृष्णप्रिया

सारथि भी अत्यंत विचक्षण और बुजर्ग है इसलिये अतिशय वात्सल्य को हृदयोमें रखकर कह रहा है। आयुष्मन वत्स आपने क्षत्रोचित योग्य बात कही मैने तो संग्राम के नियमों यथार्थ रहस्य समझ कर समुचित कार्य किया है। हे विभो ? हे समर्थनाथ युद्धा का एसा धर्म है कि संकट आ पडने पर सारथी रथकी रक्षा करले और रथी सारथी कि ॥३२॥ इस धर्म को समझते हुए ही मैने आपको रणभूमि से हटाया है। शल्वने आप पर गदा का प्रहार कीया था प्रहारसे आप मूर्छित हो गये थे बडे संकटमें थे इस कारणसे मुझे आपको उस भूमि से हटाना पडा ॥३३॥

॥ अध्याय ७६ भाषान्तर संपूर्ण ॥

।। श्रीहरिः ।।

★श्रीगणेशाय नमः★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

।। अथ सप्तसप्ततितमोऽध्यायः ।।

श्लोकाः	अनु.	इ.वं.	मि.उ	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
३७	३०	३	६	२	१३११	१३	४४	१३६८	४२।।।	

श्रीशुक[1] उवाच

स [2]तूपस्पृश्य सलिलं दंशितो धृतकार्मुकः । नय मां द्युमतः पार्श्वं वीरस्येत्याह सारथिम् ।।१।।

कर्दमक्षमा

श्रीशुकः, उवाच। सः, तु, सलिलम्, उपस्पृश्य, दंशितः, धृतकार्मुकः, सारथिम्, इति, आह, वीरस्य, द्युमतः, पार्श्वम्, नय ।।१।।

श्रीधरस्वामिकृतभावार्थदीपिका

सप्तयुक्सप्ततितमे नानामायाविचक्षणः । कृष्णेनागत्य शाल्वस्तु हतः सौभश्च चूर्णितम् ।।

दंशितः सन्नद्धः ।।१।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आगत्य राजसूयात् (१) । स प्रद्युम्नः ।।१।।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

तुशब्दो भिन्नोपक्रमे दंशित इति सल्लक्षणार्थं मध्ये सूतेनोत्तारणात् धृतमुद्यतं कार्मुकं येन स इति परमोत्साहो दर्शितः अतस्तत्रैव नयने हेतुमाह–वीरस्येति ।।१।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तु-शब्दो भिन्नोपक्रमे । दंशित इत्यनेन प्रागवज्ञया कवचाद्यग्रहणं सूचयति । धृतमुद्यतं कार्मुकं येन सः । क्रोधभरेण दूरत एव शरैर्द्युमतो जिघांसया । ननु दुष्टपार्श्वे पुनर्गमनमयोग्यम् । तदन्यत्र नेयम् । तत्राह–वीरस्य मत्प्रतियोधस्य । अत आदौ तद्वधार्थं तत्पार्श्वे नयनमेवोचितमिति भावः ।।१।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।।१-१०।।

---

[1] बादरायणिरुवाच-गो. । [2] स उप-श्रीधर. वंशी. वीर. जीव. शुक. ;इदमर्ध नास्ति-विज. ; तत्स्थाने अर्धत्रयं वर्तते —

इति सूतोदितां वाणीमाकर्ण्य यदुनन्दनः ।

पुनरात्तप्रहणः सूतमाह रणाङ्गणे । पश्य सूत द्युमानेष दंशितो धृतकार्मुकः ।।१।।

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथ पुनः सन्नद्धेन प्रद्युम्नेन द्युमति हते सति यदुषु च युध्यमानेषु भगवानागत्य साल्वं जघानेत्याह सप्तसप्ततितमेन-स त्विति । स तु प्रद्युम्नः सलिलमुपस्पृश्याचम्य मूर्च्छात उत्थितत्वादिति भावः । दंशितः सन्नद्धः धृतं कार्मुकं धनुर्येन सः सारथिमाह-किमिति । वीरस्य द्युमतः पार्श्वं समीपं मां नय प्रापयेति ॥१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

यदून्नन्दयतीति यदुनन्दनः एष द्युमान् दंशितो रणाङ्गणे आस्ते इति शेषः ततः किं तत्राह-नयेति ॥०॥

॥१-४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-२९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

सप्तसप्ततितमे हरिरिन्द्रप्रस्थतो निजपुरीं समुपेत्य । साल्वमात्तबहुमायमरीन् द्राक् सौभसक्तमरिणैव जघान ॥

स त्विति । सूतेन सारथ्यधर्मसावधानेन तथा कृतं स प्रद्युम्नस्तु क्षात्रधर्मप्रवीणः । रणविच्युतिरूपप्रत्यवायपरिहारार्थं सलिलमुपस्पृश्य दंशितः धृतकवचः ॥१॥

गूढार्थदीपिनी

सप्तसप्ततितमे नृपधान्या द्वारकां कुशकुनात् समुपेत्य ।

मायिनं सपुरमुद्धतशाल्वं चक्रतो निहतवान् स मुकुन्दः ॥१॥

सः प्रद्युम्नः उपस्पृश्य आचम्य वीरस्य द्युमतः पार्श्वं मां नयेति सारथिमाहेत्यन्वयः । दंशितो धृतकवचः ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सप्तसप्ततितमे शाल्वं भगवानवधीदित्याह-तत्रादौ परावृत्य प्रद्युम्नो यत्कृतवान् तदाह-स इति । उपस्पृश्य आचम्य दंशितः सन्नद्धः ॥१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

(सत्यधर्मानुसार ८८ तमोऽध्यायः एतन्मूलानुसारं सप्तसप्ततितमेऽनुसन्धेयः)

(अत्र चतुर्भिरिति श्लोकः श्रीभागवतटिप्पण्याः अष्टाशीतितमस्य चतुर्थः मूलस्य तु सप्तसप्ततितमस्य तृतीयः । प्रायः विजयध्वजमतमनुवर्ततेऽयं टिप्पणीकारः । अत्र श्लोकक्रमः टीकाकारानुसार्येव स्थापितोऽस्ति । एवमग्रिमेष्वध्यायेष्वपि अ दत्तपाठान्तराद्युट्टङ्कनानुसन्धानपूर्वकमूह्यम् ॥)

॥ हरिः ॐ ॥ यदुनन्दनो यदस्ति तत उच्चत्वादित्यादिवचनात्सर्वोच्चस्य कृष्णस्य नन्दनः पुत्रः सूतोदितां वाणीं श्रुत्व पुनरात्तानि प्रहरणान्यन्यायुधानि येन स सन् रणाङ्गणे सूतमाह । स्वापहासकं दारुकदारकमाहेत्युक्तम्-तत्किमाकारमीरणमीरयति पश्येति । द्युमान् साल्वामात्यो वीरस्य द्युमतः पार्श्वं नयेत्याह । पूर्ववन्न कुर्विति बोधनाय पुनः सारथिमितीर्ष्यावचनम् । प्रतिहत्याद्रव स्वसैन्यानि प्रति स्वसैन्यान्याद्रावयन्तं वा । स्मरन् पुरानुभूतपराभवमष्टभिर्नाराचै रुषाऽविध्यत्तताड ॥१-३॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

अष्टाविंशेऽतिपीडायां भगवत्स्मरणे कृते । तद्दुःखवारणं कृष्णश्चकारेति निरूप्यते ॥१॥

द्युमतोऽपि वधं कृष्णश्चेत्कुर्यात्स्वयमागतः । तदा प्रद्युम्नदुःखस्य न निवृत्तिर्भवेत् क्वचित् ॥२॥

अतः प्रद्युम्नहस्तेन मारणं तस्य रूप्यते । भक्तानां दुःखदानं तु न युक्तमिति वै हरिः ॥३॥

मतान्तरेणाशक्यत्वं बोधयामास वाक्यतः । अन्यथा श्रीशुको लीलां तादृशीं नैव वर्णयेत् ॥४॥

तादृग्लीलान्तरमिव वर्णितां वा न दूषयेत् । एवं सिद्धान्तमज्ञात्वा लोको भ्राम्यति सर्वथा ॥५॥

कल्पान्तरे तथा चक्रे सूक्ष्मांशस्यावतारतः । निरोधे यदि नो ब्रूयात् सिद्धान्तो हि विरुध्यते ॥६॥

शास्त्रार्थे दोषनाशाय निराकरणमुच्यते । अतः स्कन्धार्थशास्त्रार्थौ पक्षाभ्यामिह रूपितौ ॥७॥

पूर्वाध्यायान्ते द्युमतोऽपकर्षे पश्चात्तापो निरूपितः । प्रद्युम्नस्य तदानीं द्युमद्वधार्थं प्रवृत्तिरुच्यते स तूपस्पृश्येति । मूर्च्छानन्तरं तथाकर्तव्यमिति सलिलोपस्पर्शनमाचमनं स्नानमित्येके । ततः पुनः दंशितो बद्धकवचः । नारायणकवचादिना लौकिकेन च । ततो धृतकार्मुकः । अनेन पूर्वं कवचरहित एव स्वपौरुषाभिमानात् गत इति लक्ष्यते । अत एव गर्वनाशार्थं भङ्गोऽपि । ततः मां द्युमतः पार्श्वं नयेति सूतं प्रति वचनम् । शत्रोः प्रशंसामाह–वीरस्येति ॥१॥

सुबोधिनीसारः

सलिलं जलमुपस्पृश्याचम्य दंशितो बद्धकवचो धृतधन्वा स प्रद्युम्नः सारथिमित्याह । द्युमतः शाल्वमन्त्रिणः पार्श्वं समीपं मां नय प्रापय ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सप्तयुक्सप्ततितमे यादवैर्हस्तिनापुरात् । सहागतेन कृष्णेन शाल्ववधो निरूप्यते ॥१॥

स तु प्रद्युम्नः सलिलमुपस्पृश्य आचमनं कृत्वा दंशितो बद्धकवचः धृतकार्मुकश्च सन् वीरस्य द्युमतः पार्श्वं मां नयेति सारथिं प्राह ॥१॥

अन्वितार्थप्रकाशिका

सप्तयुक्सप्ततितमे कृष्णेनागत्य चूर्णितम् । सौभं शाल्वश्च निहतस्तत्र श्लोका गजाग्नयः (३८) ॥ द्वे (२) उवाचेति सार्धैकचत्वारिंशदनुष्टुभः (४१॥) ॥७७॥

स इति । स तु प्रद्युम्नः सलिलमुपस्पृश्य आचमनं कृत्वा दंशितो बद्धकवचः मध्ये सूतेन कवचोत्तारणात् धृतकार्मुकश्च सन् वीरस्य द्युमतः पार्श्वं मां नयेति सारथिं प्राह स्म ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सप्तसप्ततितमे नानामायासुकोविदं शाल्वं निहतवान् कृष्णः तद्विमानमचूर्णयत् ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सप्तयुक्सप्ततितमे नानामायाविदांवरः । शाल्वस्तु हरिणागत्य सौभं सञ्चूर्ण्य संहतः ॥१॥

अथ पुनः संरब्धेन प्रद्युम्नेन द्युमति स्वशत्रौ हते सति यदुषु च युध्यमानेषु भगवानागत्य शाल्वं जघानेत्याह ॥ स इति ॥ स तु सप्रद्युम्नस्तु, सलिलं जलम्, उपस्पृश्याचम्य, मूर्च्छित उत्थितत्वादिति भावः । दंशितः संनद्धः, धृतं हस्ते उपात्तं कार्मुकं धनुर्येन तथाभूतः सन्, हे सूत ! मां वीरस्य द्युमतः, पार्श्वं नय । इति सारथिम् आह ॥१॥

कृष्णप्रिया

महर्षि शुकदेवजी ने कहा- राजन् ? अब श्रीप्रद्युम्नजीने अपने हस्त और मुंह धोकर कवच धारण किया और धनुष्य धारण करके सारथि को कहा भैया ! वीर द्युमान के समीप पुनः ले चलो ॥१॥

युधिष्ठिर उवाच

[1]विधमन्तं स्वसैन्यानि द्युमन्तं रुक्मिणीसुतः । [2]प्रतिहत्य प्रत्यविध्यान्नाराचैरष्टभिः स्मयन् ॥२॥
चतुर्भिश्चतुरो वाहान् सूतमेकेन चाहनत् । [3]द्वाभ्यां धनुश्च केतुं च [4]शरेणान्येन वै शिरः ॥३॥
गदसात्यकिसाम्बाद्या जघ्नुः सौभपतेर्बलम् । पेतुः समुद्रे [5]सौभेयाः सर्वे संछिन्नकन्धराः ॥४॥
एवं यदूनां शाल्वानां निघ्नतामितरेतरम् । युद्धं त्रिणवरात्रं तदभूत्तुमुलमुल्बणम् ॥५॥

कर्दमक्षमा

रुक्मिणीसुतः, स्वसैन्यानि, विधमन्तम्, द्युमन्तम्, प्रतिहत्य, स्मयन्, अष्टभिः, नाराचैः, प्रत्यवध्यत् ॥२॥ चतुर्भिः, चतुरः, वाहान्, च, एकेन, सूतम्, अहनत्, च, द्वाभ्याम्, धनुः, च, केतुम्, अन्येन, शरे, वै, शिरः, अहनत् ॥३॥ गदसात्यकिसाम्बाद्याः, सौभपतेः बलम्, जघ्नुः, सौभेयाः, सर्वे, सञ्छिन्नकन्धराः, समुद्रे, पेतुः ॥४॥ एवम्, इतरेतरम्, निघ्नताम्, यदूनाम्, च, शाल्वानाम्, उल्बणम्, त्रिणवरात्रम्, तत्, तुमुलम्, युद्धम्, अभूत् ॥५॥

श्रीधरस्वामिकृतभावार्थदीपिका

विधमन्तं क्षपयन्तं प्रतिहत्य प्रतिरुध्य ॥२॥ अष्टानां विनियोगमाह-चतुर्भिरिति ॥३॥ सौभेयाः सौभस्थाः ॥४॥ नवानां रात्रीणां समाहारो नवरात्रम् त्रयाणां समाहारस्त्रिणवरात्रम् सप्तविंशतिमहोरात्राणीत्यर्थः । तुमुलमाकुलम् उल्बणं घोरम् ॥५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उपसर्गवशाद्धमतिरत्र नाशने । शतृप्रत्ययः ॥२॥ अष्टानां बाणानाम् । विनियोगं कृत्यम् ॥३-४॥ तद्युद्धम् ॥५॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

प्रतिहत्य स्वसैन्यं रुन्धानं तं तस्मान्निरुध्य प्रत्यविध्यत तत्कृतवेधप्रतियोगितयाऽविध्यत् । नाराचैर्बाणविशेषैः स्मय स्मयमान इति वीरस्वभावत्वेनोत्साह एव जातो न तु क्रोध इति श्लाघितम् ॥२॥ वै समुच्चये शिरोऽपीत्यर्थः ॥३॥ न केवलं स ए स्वविक्रमं दर्शयामास तेन विवर्धितोत्साहा अन्येऽपि यदुवीरा इत्याह-गदेति । सर्वे प्रायश इत्यर्थः ॥४॥ त्रिनवरात्रं व्याप्य ॥५॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

प्रतिहत्य स्वसैन्यक्षपणप्रतिघातं कृत्वा प्रतिहत्येति पाठे पाठान्तरे तद्विधमर्दनं प्रत्यक्षं निरस्येत्यर्थः । प्रति प्रतिरूपत प्रत्यङ्गव्याप्त्या वाविध्यत् । नाराचैर्बाणविशेषैः स्मयन् स्मयमानः लीलयेत्यर्थः । यद्वा, प्रौढिमाविष्कुर्वन् ॥२॥ वै अ शिरोऽपि च-कारैर्वै-शब्देन च तत्तद्धनने यौगपद्यं बोधयति ॥३॥ न च केवलं स एव स्वविक्रमं दर्शयामास विवर्धितोत्साहा अन्येऽपि यदुप्रवीरा इत्याह-गदेति । आद्यशब्दात् पूर्वोक्ताश्चारुदेष्णादयः सर्वे प्रायश इत्यर्थः ॥४॥ त्रिनव सप्तविंशत्यहोरात्राणि व्याप्येत्यर्थः ॥५॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-१०॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

विधमन्तमिति । रुक्मिणीसुत इत्यस्य द्युमत्पार्श्वं गत इत्यादिः स्वसैन्यानि विधमन्तं ताडयन्तं द्युमन्तं प्रतिरुध्य स स्मयन्ननेनानायासः सूच्यते अष्टभिः शरैः प्रत्यविध्यत् प्रत्यताडयत् ॥२॥ तत्राष्टानां विनियोगमाह-चतुर्भिरिति । वाहानश्वानेकेन का एकेन ध्वजम् एकेन सूतम् एकेन तु द्युमच्छिरोऽहनत् ॥३॥ एवमिति । इतरेतरं परस्परं निघ्नतां सम्बन्धि तद्युद्धं त्रिनवरात्रमभूत् रात्रीणां समाहारः नवरात्रं त्रयाणां समाहारस्त्रिनवरात्रं सप्तविंशत्यहोरात्राणीत्यर्थः । तुमुलमाकुलमुल्बणं घोरम् ॥५॥

---

१. आद्रवन्तं-विज. । २. प्रतिरुध्य प्रत्यविध्यत्-वीर. ; प्रतिहत्य रुषाऽविध्यत्-विज. : ३. द्वाभ्यां च केतुधनुषी-विज. । ४. द्यु मत वै-वीर. । ५. बहवः साल्वेया भिन्न-विज. ।

त्रिनवरात्र

प्रतिहत्य
विनियोगमाह-चतु
व्याप्येत्यर्थः ॥५-७

विधमन्तं
बाणैः प्रत्यविध्यत्
सौभपतेः शाल्वस्य
त्रिणवरात्रं (नवानां र
रणे । उल्बणं भीषण

विधमन्तं क्ष
रात्रीणां समाहारः त्रिण

उत्सृष्टानामष्ट
पृथक् लक्ष्यवेधकौ श
सेनाम् ॥५॥ साल्वेयाः
रणः कोणघुणाजिष्वि
इति लिङ्गानुशासने
एवैतद्ज्ञानात्तत्प्रयोगाज्ञ

स तु वञ्चितः
एवेत्यर्थः । तथाप्याक्रो
ससामग्रीकं नाशितवा
वाहानिति । द्युमतः शि
प्रधाने मारिते तद्बलं मा
गदायामेव शौर्यं बलं च
सन्तः ॥४॥ एवं भगवत्
। त्रिणवरात्रं सप्तविंशत्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

त्रिनवरात्रं सप्तविंशद्रात्रम् ॥५॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-२९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

प्रतिहत्य रे रे यावत्सामर्थ्यं प्रहरेत्युक्त्वा तदस्त्रघातानन्तरं तस्मै प्रत्यस्त्रघातं समर्प्येत्यर्थः । नाराचैः शरैः ॥२॥ अष्टानां विनियोगमाह-चतुर्भिरित्यादि ॥३॥ सौभेयाः सौभस्थाः ॥४॥ त्रयाणां नवरात्राणां समाहारस्त्रिणवरात्रम् सप्तविंशतिमहोरात्राणि व्याप्येत्यर्थः ॥५-७॥

गूढार्थदीपिनी

विधमन्तं (उपसर्गवशात् धमधातुरत्र नाशने । शतृप्रत्ययः।) नाशयन्तं तं द्युमन्तं प्रतिहत्य प्रतिरुध्य अष्टभिः नाराचैः बाणैः प्रत्यविध्यत् अताडयत् स्मयन् सकोपं हसन् सन् ॥२॥ वाहान् अश्वान् । सूतं सारथिम् । द्युमतः शिरश्छिच्छेद ॥३॥ सौभपतेः शाल्वस्य बलं सैन्यम् । सौभेयाः सौभस्थसैनिकाः सञ्छिन्ना कन्धरा ग्रीवा येषां ते पेतुः ॥४॥ इतरेतरं परस्परम् । त्रिणवरात्रं (नवानां रात्रीणां समाहारो नवरात्रं त्रयाणां नवरात्राणां समाहारः त्रिणवरात्रम् ।) सप्तविंशत्यहोरात्रम् । तुमुलं व्याकुले रणे । उल्बणं भीषणम् ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

विधमन्तं क्षपयन्तं प्रतिहत्य प्ररुध्यत प्रत्यताडयत् ॥२-३॥ सञ्छिन्नाः कन्धराः येषां ते सौभेयाः सौभस्थाः ॥४॥ नवानां रात्रीणां समाहारः त्रिणवरात्रं सप्तविंशतिमहोरात्राणि व्याप्येत्यर्थः ॥५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

उत्सृष्टनामष्टानां शराणां क्व क्व विनियोग इत्यत आह-चतुर्भिरिति । चतुरो वाहानश्वांश्चतुर्भिः शरैरेकदोन्मुच्यैवं पृथक् पृथक् लक्ष्यवेधकौ शल्यमप्यस्तीत्याह-चतुर इति । सूतं चैकेनाहनद्धहन् द्वाभ्यां केतुधनुषी द्युमतोऽन्येन शिरोऽहनत् ॥४॥ बलं सेनाम् ॥५॥ साल्वेयाः शुभ्रादि ढक् ॥६॥ त्रिनवरात्रं सप्तविंशद्रात्रम् । सङ्ख्यापूर्वा रात्रिरिति नपुंसकलिङ्गता । रणम् । यद्यपि विश्वादौ रणः कोणघुणाजिष्विति पुंल्लिङ्गे रणशब्द इत्युक्तम् । तथापि कर्षापणस्वर्णसुवर्णव्रणचरणऋणलवणापर्णतोरणोरणोष्णानि नपुंसक इति लिङ्गानुशासनोक्ते स्तल्लिङ्गोऽपि । अस्त्रियां समरानीकरणा इति क्वाचित्कोऽमरोऽपि सङ्गच्छते । अत एवैतदज्ञानात्तत्प्रयोगाज्ञानाद्युद्धमिति पठन्ति । अभूदिति शेषः । शेषश्चक्रुरिति वा ॥७॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

स तु वञ्चितः सन् लज्जया आक्रोशेन मारित इति दोषव्यावृत्त्यर्थमाह-विधमन्तं स्वसैन्यानीति । स्वबलघातकत्वान्मारणीय एवेत्यर्थः । तथाप्याक्रोशेन मारणादाह-रुक्मिणीसुत इति । प्रतिहृत्य अन्विष्य भर्त्सयित्वा वा अष्टभिर्नाराचैः प्रत्यविध्यत् । ससामग्रीकं नाशितवानेवेत्यर्थः । स्मयन्निति । अधुनास्य बलं द्रष्टव्यमित्यर्थः ॥२॥ अष्टबाणानां विनियोगमाह-चतुर्भिश्चतुरो वाहानिति । द्युमतः शिरः अन्येनाष्टमेन । यानारुह्य येन प्रेरितो येन करणेन येन लब्धप्रतिष्ठः तत्सर्वमच्छिनत् ॥३॥ ततोऽन्येऽपि प्रधाने मारिते तद्बलं मारितवन्त इत्याह-गदसात्यकिसाम्बाद्या इति । गदया प्रद्युम्नो मारित इति स्वबलेन तत्सैन्यं मारितवन्तः । गदायामेव शौर्यं बलं च व्यापृतं भवति । ततः सौभेयाः सर्वे अन्तरिक्षे युद्धार्थमागताः पलायमाना वा समुद्रे पतिताः । संच्छिन्नकन्धराः सन्तः ॥४॥ एवं भगवत्प्रतीक्षार्थं यादवशाल्वानां जयापजयरहितानां युद्धानुवृत्तिमाह-एवं यदूनामिति । इतरेतरं निघ्नतामिति समता । त्रिणवरात्रं सप्तविंशत्यहोरात्रम् । तुमुलमत्याक्रोशयुक्तम् । उल्बणं क्रूरं च ॥५॥

सुबोधिनीसारः

स तथा कृतवान् सूत इति सम्बन्धयोजना । स्वसैन्यानि विधमन्तं घ्नन्तं द्युमन्तं रुक्मिणीपुत्रः प्रतिहत्य निवार्य स्मयन्सन्नष्टभिर्नाराचैरविध्यत् ॥२॥ तन्नियोगमाह सफलम् । चतुर्भिर्बाणैः चतुरोश्वान् एकेन सूतं द्वाभ्यां धनुः केतुं ध्वजम् अन्येनाष्टमेन शरेण शिरोऽहनत् ॥३॥ गदसात्यकिः साम्बमुख्याः सौभपतेः शाल्वस्य बलं जघ्नुः । सौभेयाः सौभस्थाः सर्वे संछन्ना कन्धरा येषां ते समुद्रे पेतुः ॥४॥ एवम् इतरेतरं मिथो निघ्नतां यदूनां शाल्वानां सतां तत्तुमुलं युद्धं त्रिनवरात्रं सप्तविंशतिरात्रिपर्यन्तमभूत् ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च द्युमत्पार्श्वं रुक्मिणीसुतः स्वसैन्यानि विधमन्तं ताडयन्तं द्युमन्तं प्रतिहत्य प्रतिरुध्य स्मयन् हसन् अनायासेनैव अष्टभिः शरैः प्रत्यविध्यत् अताडयत् ॥२॥ तत्राष्टानां विनियोगमाह–चतुर्भिरिति । चतुर्भिः शरैः चतुरो वाहान् अश्वान् अहनत् । एकेन शरेण सूतमहनत् । द्वाभ्यां शराभ्यां धनुश्च केतुं ध्वजं च चिच्छेद । अन्येनैकेन शरेण तस्य शिरश्चिच्छेद ॥३॥ तथा गदादयो अपि सौभपतेः शाल्वस्य बलं सैन्यं जघ्नुः । सञ्छिन्ना कन्धरा येषां ते सर्वे सौभेयाः सौभस्थाः समुद्रे पेतुः ॥४॥ एवं इतरेतरं परस्परं निघ्नतां यदूनां शाल्वानां च सम्बन्धि त्रिनवरात्रं नवानां रात्रीणां समाहारो नवरात्रं त्रयाणां नवरात्राणां समाहारस्त्रिनवरात्रम्, सप्तविंशत्यहोरात्राणीत्यर्थः । तुमुलमाकुलमुल्बणं भयङ्करं युद्धमभूदित्यन्वयः ॥५॥

अन्वितार्थप्रकाशिका

विधमन्तमिति ॥ द्युमत्पार्वनीतो रुक्मिणीसुतः स्वसैन्यानि विधमन्तं ताडयन्तं द्युमन्तं प्रतिहत्य प्रतिरुध्य स्मयन् हसन् । शता आर्षः । अनायासेनैव अष्टभिः शरैः प्रत्यविध्यत् अताडयत् ॥२॥ अष्टानां विनियोगमाह–चतुर्भिरिति । चतुर्भिः शरैः चतुरो वाहान् अश्वान् अहनत् । बहुलं छन्दसीति शब्लुगभावः । एकेन शरेण सूतमहनत् । द्वाभ्यां शराभ्यां धनुश्च केतुं ध्वजं च चिच्छेद । अन्येनैकेन शरेण तस्य शिरश्चिच्छेद ॥३॥ गदेति ॥ गदादयो अपि सौभपतेः शाल्वस्य बलं सैन्यं जघ्नुः । संछिन्नाः कन्धराः येषां ते सर्वे सौभेयाः सौभस्थाः समुद्रे पेतुः ॥४॥ एवमिति ॥ एवम् इतरेतरं परस्परं निघ्नतां यदूनां शाल्वानां च सम्बन्धि त्रिनवरात्रं नवानां रात्रीणां समाहारो नवरात्रं त्रयाणां नवरात्राणां समाहारस्त्रिणवरात्रं सप्तविंशत्यहोरात्राणीत्यर्थः । तुमुलमाकुलमुल्बणं भयङ्करं युद्धमभूत् ॥५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स इति प्रद्युम्नः उपस्पृश्य आचम्य दंशितः सूतेन मध्ये कवचोत्तारणात् पुनर्धृतकवचः धृतं कर्मुकं धनुर्येन सः विधमन्तं नाशयन्तं प्रतिहत्य निरुध्य नाराचैर्बाणैः प्रत्यविध्यत् ॥२॥ अष्टशराणां विनियोगप्रकारमाह–चतुर्भिरिति ॥३॥ सौभेयाः सौभे वर्तमानाः भटाः ॥४॥ नवानां रात्रीणां समाहारो नवरात्रम् । त्रयाणां नवरात्राणां समाहारास्त्रिणवरात्रम् सप्तविंशतिरात्रिदिवसपर्यन्तमित्यर्थः । तुमुलं महत् उल्बणं घोरम् ॥५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विधमन्तमिति । रुक्मिणीसुतः प्रद्युम्नः, स्वसैन्यानि, विधमन्तं ताडयन्तम्, द्युमन्तं प्रतिहत्य सन्निरुध्य, स्मयन् अष्टभिर्नाराचैः बाणैः, प्रत्यविध्यत् ॥२॥ तत्राष्टानां विनियोगमाह–चतुर्भिरिति । चतुर्भिर्नाराचैः, चतुरः वाहान् द्युमतः रथाश्वान् अहरत् । एकेन नाराचेन चापि, सूतं द्युमतः सारथिम्, अहनत् । द्वाभ्यां नाराचाभ्याम्, द्युमतः केतुम्, धनुश्च, अहनत् । अन्य नाराचेन चापि, द्युमतः शिरः, अहनत् । पातयामासेत्यर्थः । वै ॥३॥ गदेति । गदश्च सात्यकिश्च साम्बश्च ते आद्या येषां ते, सौभप बलं सैन्यं, जघ्नुः । सौभेयाः सौभस्थाः सर्वे, संच्छिन्नाः कन्धराः ग्रीवा येषां ते तथाभूताः सन्तः, समुद्रे, पेतुः ॥४॥ एवमिति एवमितरेतरं परस्परम्, निघ्नतां हतवतां, यदूनां शाल्वानां सौभेयानां च, सम्बन्धि, तुमुलमाकुलम्, उल्बणं घोरं च, तद्युद्धं, नव रात्रीणां समाहारो नवरात्रम्, त्रयाणां नवरात्राणां समाहारस्त्रिणवरात्रम्, सप्तविंशत्यहोरात्रमित्यर्थः । अभूत् ॥५॥

कृष्णप्रिया

उस अवसर द्युमान यादव सैन्य को नष्ट भ्रष्ट कर रहा था । श्रीप्रद्युम्नजी ने द्युमान के समीप पहुं कर उसको एसा करने से रोक दिया और स्मित हास्य कर द्युमान को आठ बाण मारे ॥२॥ श्रीप्रद्युम्नजी ने चार बाण से उसके चार अश्व और एक एक बाण से सारथि धनुष्य ध्वज और मस्तक काट डाला ॥३॥ दुसरी ओर गद सात्यकि साम्ब प्रभृति यादव वीर भी शाल्व का सैन्य का संहार करने लगे । सौभ विमानें रहे हुए सैनिको की भी गरदने कट जातीं और सागरमें गिर पडते ॥४॥ इस प्रकार यादव वीर शाल्व सैनीक परस्पर प्रहार करते रहे । बडा ही घनघोर और भयानक युद्ध हुआ और वह युद्ध लगातार सत्ताइस दिनों तक संग्राम चलता रहा ॥५॥

[१]इन्द्रप्रस्थं गतः कृष्ण आहूतो धर्मसूनुना । राजसूयेऽथ निर्वृत्ते शिशुपाले [२]च संस्थिते ॥६॥
[३]कुरु वृद्धाननुज्ञाप्य मुनींच ससुतां पृथाम् । निमित्तान्यतिघोराणि पश्यन् द्वारवतीं ययौ ॥७॥
आह चाहमिहायात आर्यमिश्राभिसङ्गतः । राजन्याश्चैरुपक्षीया नूनं हन्युः पुरीं मम ॥८॥
वीक्ष्य तत् कदनं स्वानां निरूप्य [४]पुररक्षणम् । सौभं च शाल्वराजं च दारु कं प्राह केशवः ॥९॥

---

१. इन्द्रप्रस्थगतः-वीर. २. राणे हते-विज. । ३. कुरुवृद्धानुपामन्त्र्य-वीर. ; विज. पाठे इत्यारभ्य अष्टादशश्लोकपर्यन्तानां द्वादशश्लोकानां स्थाने २६ श्लोकाः सन्ति । ते च —

करुद्धननुक्षाप्य मुनींश्च ब्राह्मणैः सह । अन्वीयमानः सामात्यै पाण्डवैर्निर्ययौ पुरात् ॥१॥
स गत्वा किंचिदध्वानं स्थापयित्वा पुरौकसः । पृथासुताननुक्षाप्य प्रणतानश्रुलोचनान् ॥२॥
सुवर्णशिबिकारुढैरवरोधवधूजनैः । गजाश्वरथपादातिसहस्त्रैरपि संयुतः । अन्वित राजकटकः प्रतस्थे पश्चिमामुखः ॥३॥
शाल्वोपि कुरुशार्दूल विमानेन खचारिणा । अपावृत्य रणाद्रष्ट्रं स्वमेवाभ्यर्दितो ययौ ॥४॥
गच्छमानस्य शाल्वस्य सांबोऽभिद्रुत्यपृष्ठतः । शाल्वामात्यं क्षेमधूर्ति बाणैर्निन्ये यमक्षयम् ॥५॥
सनेपतिं विविन्दाख्यं शाल्वस्याखिलवल्लभम् । नरुध्य पथि गच्छन्तं प्रधुम्नः प्राहरच्छरै ॥६॥
प्रधुम्नेनातिविध्दोऽसौ गृहीत्वा खड्गचर्मणी । ससज्ज रौक्मिणे येन तदभूद्रणमद्भुतम् ॥ ७॥
मण्डलानि विचित्राणि चरतस्तस्य सङ्गरे । कृपाणेन यदुश्रेष्ठः शिरः कायादपाहरत् ॥८॥
विभ्रष्टमार्गा सा सेना हतप्रवरयूथपा । विदुद्राव यथाकामं प्राणत्राणपरायणा ॥९॥
देवोपि द्वारकामेत्य वेगेन गरूडध्वजः । ददर्श नगरीं भग्नप्रासादाट्टालगोपुराम् ॥१०॥
विशीर्णतोरणां रुग्णतु ङ्गसालप्रतोलिकाम् । विध्वस्तोपवनोधानां प्रस्तरापूर्णदीर्धिकाम् ॥११॥
निःस्वाध्यायवषट्कारामालोक्य द्वारकां पुरीम् । अपृच्छत्कृतवर्माणं किमेतदिति दुर्मनाः ॥१२॥
तेनोक्त्ल सर्वमाकर्ण्य शाल्वराजविचेष्टितम् । प्रतिजज्ञे यदुपतिः श्रृण्वतां सर्वसात्वताम् ॥१३॥
अनुद्रुत्य तमधैव सौभं हत्वा दुरात्मकम् । सौभं निपात्य जलधौ प्रवेक्ष्य द्वारकामिति ॥१४॥
स रथं शैष्यसुग्रीवमेधपुष्पबलाहकैः। युक्त बहुप्रहरणमग्रावस्थितदारु कम् ॥१५॥
आरुह्य भगवान्विष्णुर्गरुडध्वजमुत्तमम् । प्रययौ सौभपदवीं मनोमारुनरंहसा ॥१६॥
तथा गत्वा सुदूरं तमभोधेः कुक्षिमाश्रितम् । ददर्श सौभं तन्मध्ये शाल्वं च समलङ्कृतम् ॥१७॥
शाल्वश्च कृष्णमालोक्य हतप्रायबलेश्वरः । प्राहरत्कृष्णसूताय शक्त्लि भीमां दृढां मृधे ॥१८॥
तामापतन्तीं नभसि महोल्कामिव रंहसा । भासयन्तीं दिशः शौरिः सायकैः शतधाऽच्छिनत् ॥१९॥
तं च पोडशभिर्बाणैर्विध्वा सौभं च खेचरम् । अविध्यच्छरसन्दोहैः खं सूयं इव रश्मिभिः ॥२०॥
शाल्वः शौरेस्ततः सव्यं सशार्ङ्गशा र्ङ्गधन्वनः । बिभेद न्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतम् ॥२१॥
हाहाकारो महानासीधदूनां तत्र पश्यताम् । विनध सौभराडुच्चैरिदमाह जनार्दनम् ॥२२॥
यत्त्वया युधि दुर्बुद्धे भ्रातरौ मे महाबलौ । निहतौ हंसडिभिकौ यमुनायां दुरात्मना । यद्भूयो मूढ नः सख्युर्भार्याप्यपह्वता त्वया ॥२३॥
यच्च मन्द सभामध्ये दमधोषसुतः सखा । व्यापादितःक्षत्रियाणां पश्यतां हतचेतसाम् ॥२४॥
तं त्वाऽध निशितैर्बाणैरपराजितमानिनम् । नयाम्यपुनरावृत्ति यदि तिष्ठेर्ममाग्रतः ॥२५॥
इति तेनोदितां वाणीमाकर्ण्य मधुसूदनः । प्राहार्दितो बाणगणैः पुनरात्तशरासनः ॥२६॥ ४. रामं निरुप्य पुररक्षणे-वीर. ।

कर्दमक्षमा

धर्मसूनुना, आहूतः, कृष्णः, इन्द्रप्रस्थम्, गतः, अथ, राजसूये, निर्वृत्ते, च, शिशुपाले, संस्थिते, कुरुवृद्धान्, च, मुनीन्, च, ससुताम्, पृथाम्, अनुज्ञाप्य, अतिघोराणि, निमित्तानि, पश्यन्, कृष्णः, द्वारवतीम्, ययौ ॥६-७॥ च, कृष्णः, आह, यत्, आर्यमिश्राभिसङ्गतः, अहम्, इह, आगतः, चैद्यपक्षीयाः, राजन्याः, नूनम्, मम, पुरीम्, हन्युः ॥८॥ स्वानाम्, तत्, कदनम्, वीक्ष्य, च, सौभम्, शाल्वराजम्, च, वीक्ष्य, पुररक्षणम्, निरूप्य, केशवः, दारुकम्, प्राह ॥९॥

श्रीधरस्वामिकृता भावार्थदीपिका

परमतमुपन्यस्यति–इन्द्रप्रस्थं गत इत्यादिना ॥६-७॥ आहचेति–स्वागतमेव पथि चिन्ताविजृम्भितभाषणम् आर्यमिश्राभिसङ्गतो बलभद्रसहितः ॥८॥ दुर्निमित्तदर्शनाकुलचित्तः एवं चिन्तयन् द्वारकामागत्य स्वानां कदनं वीक्ष्य सौभ शाल्वराजञ्च वीक्ष्य रामं पुररक्षणं प्रति निरूप्य नियुज्य दारुकं प्राहेत्यन्वयः ॥९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परमतं व्यासेतरमतम्। उपन्यस्यति कथयति शुकः ॥६-८॥ तच्छाल्वकृतम्। कदनं मर्दम् 'कदनं मर्दपापयोः' इति

मेदिनी ॥९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इन्द्रेति युग्मकम्। आहूत इवाहूतः श्रीनारदद्वारा तादृशविज्ञापनात् राजसूय इत्यादेरिन्द्रप्रस्थगमनप्रयोजने सर्वस्मिन् समा इत्यर्थः। अथेति चेति वा पाठः निमित्तानि पथि पश्यन् ॥६-७॥ आर्यो गुरुः श्रीबलभद्रः स एव मिश्रः पूज्यः यद्वा आर्येण ते मिश्राः सहिता ये तैरपि सङ्गतः ॥८॥ वीक्ष्येति टीकायां दुर्निमित्तेत्यादिकमागत्येत्यन्तमध्याहृतम् ॥९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वयं वक्ष्यमाणस्य सत्यस्य श्रीभगवच्चरितस्य श्रीवैशम्पायनाद्युक्तेन विरोधमाशङ्क्य तद्दूययित्वा परिहर्तुमुत्थापय इन्द्रेत्यादिना उद्यत इत्यन्तेन। आहूतो दूतद्वारा एतच्च सभापर्वोक्तानुसारेण श्रीबादरायणिमते च श्रीनारदोक्त्या श्रीमदुद्धव-मन्त्र स्वयमेव गमनं तच्च प्रागुक्तमेव एवमन्यदपि बहुलं विरुद्धमग्रेऽप्यूह्यम्। तच्च यथास्थानमभीव्यञ्जयितव्यम्। धर्मसूनु श्रीयुधिष्ठिरस्य सद्धर्मपरत्वमभिप्रेतम्। अत एव तदाह्वानेननाकृष्टत्वात् कृष्ण इति। अथागमनानन्तरं सपरिकरे राजसूये निष्प शिशुपाले मृते चेति तदर्थमपीन्द्रप्रस्थगमनप्रयोजने सर्वस्मिन् समाप्त इत्यर्थः ॥६॥ कुरुवृद्धान् श्रीभीष्मादीन् मुनीन् श्रीव्यासा सुताः श्रीयुधिष्ठिरादयस्तत्सहितां निमित्तानि शकुनानि सखि पश्यन् ॥७॥ इह इन्द्रप्रस्थे नूनं वितर्के ॥८॥ प्रकर्षेण न्यायप्रदर्शना प्रणयेन वा आह। यतः केशवः साक्षात् परमेश्वरस्तत्स्वामी वै एव ॥९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१-१०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अत्र कैश्चिदृषिभिरुक्तं दूषयितुमनुवदति शुकः–इन्द्रप्रस्थ इत्यादिना एवं वदन्ति राजर्षय इत्यतः प्राक्तनेन। धर्मसू युधिष्ठिरेणाहूतः श्रीकृष्णः राजसूये संवृत्ते परिसमाप्ते सति शिशुपाले संस्थिते मृते च सति तत्रैव कतिचिद्दिनानि स्थितः अति निमित्तानि पश्यन् कुरुवृद्धादीन् भीष्मादीन् ससुतां पृथां कुन्तीं मुनींश्चामन्त्र्य पृष्ट्वा द्वारवतीं ययावाह चेत्युत्तरेण सम्बन्धः ॥ उक्तिमेवाह–आह चेति। आर्यमिश्रो बलभद्रः तेनाभिसङ्गतः सहितोऽहम् इहागतः चैद्यपक्षीया राजन्या मम पुरीं हन्युः अतोऽहं गमिष्यामीति शेषः ॥८॥ वीक्ष्येति। अस्यागमनानन्तरम् इत्यादिः स्वानां तत्कदनं युद्धं सौभं साल्वं च वीक्ष्य रामं पु प्रति निरूप्य नियुज्य दारुकं प्राहेत्यन्वयः ॥९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अस्मिन्नवसरे कृष्णागमनं वक्ति-इन्द्रप्रस्थमिति ॥६॥

(मूलम्)

अलक्ष्यदुःखशकुनान् घोरान् सङ्ग्रामशंसिनः ॥क॥
कुरुवृद्धाननुज्ञाप्य मुनींश्च ब्राह्मणैः सह। अन्वीयमानः सामात्यैः पाण्डवैर्निर्ययौ पुरात् ॥ख॥
स गत्वा किंचिदध्वानं स्थापयित्वा पुरौकसः। पृथासुताननुज्ञाप्य प्रणतानश्रुलोचनान् ॥ग॥
सुवर्णशिबिकारूढैरवरोधवधूजनैः। गजाश्वरथपादातिसहस्रैरपि संयुतः। अन्वीतराजकटकः प्रतस्थे पश्चिमामुखः ॥घ॥
शाल्वोऽपि कुरुशार्दूल विमानेन खचारिणा। अपावृत्य रणाद्राष्ट्रं स्वमेवाभ्यर्दितो ययौ ॥ङ॥
गच्छमानस्य शाल्वस्य सांबोऽभिद्रुत्य पृष्ठतः। शाल्वामात्यं क्षेमधूर्तिर्बाणैर्निन्ये यमक्षयम् ॥च॥
सेनापतिं विविन्दाख्यं शाल्वस्याखिलवल्लभम्। निरुध्य पथि गच्छन्तं प्रद्युम्नः प्राहरच्छरैः ॥छ॥
प्रद्युम्नेनातिविद्धोऽसौ गृहीत्वा खड्गचर्मणी। ससज्जरौक्मिणेयेन तदभूद्रणमद्भुतम् ॥ज॥
मण्डलानिविचित्राणि चरन्तं तस्य सङ्गरे। कृपाणेन यदुश्रेष्ठः शिरः कायादपाहरत् ॥झ॥
विभ्रष्टमार्गा सा सेना हतप्रवरयूथपा। विदुद्राव यथाकामं प्राणत्राणपरायणा ॥ञ॥
देवोऽपि द्वारकामेत्य वेगेन गरुडध्वजः। ददर्शनगरीं मग्नप्रासादाट्टालगोपुराम् ॥ट॥
विशीर्णतोरणां रुग्णतुङ्गसालप्रतोलिकाम्। विध्वस्तोपवनोद्यानां प्रस्तरापूर्णदीर्घिकाम् ॥ठ॥
निःस्वाध्यायवषट्कारामालोक्य द्वारकां पुरीम्। अपृच्छत्कृतवर्माणां किमेतदिति दुर्मनाः ॥ड॥
तेनोक्तं सर्वमाकर्ण्य शाल्वराजविचेष्टितम्। प्रतिजज्ञे यदुपतिः शृण्वतां सर्वसात्वताम् ॥ढ॥
अनुदृत्य तमद्येव सौभं हत्वा दुरात्मकम्। सौभं निपात्य जलधौ प्रवेक्ष्ये द्वारकामिति ॥ण॥
सरथं शैब्यसुग्रीवमेघपुष्पबलाहकैः। युक्तं बहुप्रहरणमग्रावस्थितदारुकम् ॥त॥
आरुह्य भगवान् विष्णुर्गरुडध्वजमुत्तमम्। प्रययौ सौभपदवीं मनोमारुतरंहसा ॥थ॥
तथागत्वा सुदूरं तमम्भोधेः कुक्षिमाश्रितम्। ददर्श सौभं तन्मध्ये शाल्वं च समलङ्कृतम् ॥द॥

॥क-घ॥ रणादपावृत्य रणं विहायेत्यर्थः ॥ङ-च॥

अखिलात् समस्तप्रकृतिजनात् वल्लभं प्रियतमम् ॥छ॥ ससज्ज सङ्गतः ॥ज-ट॥ सालः प्राकारः प्रतोली विशिखा रथ्येति हलायुधः प्रतोलिरेव प्रतोलिका प्रस्तरा पूर्णदीर्घिकां पाषाणपूरितपरिखां गन्तुमिति शेषः ॥ठ-ण॥ ॥त-द॥ ॥७-१४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-२९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

आह चेति स्वगतम् आर्यः श्रीबलभद्रः स एव मिश्रः पूज्यस्तेनाभिसङ्गत इति न शुकमतं किन्तु परमतमेवोक्तम्। तथैवोपरिष्टाद्व्याख्यास्यमानत्वात् ॥८॥ एवं विचिन्तयन्नेव द्वारकामागत्य तत्र च शाल्वप्रापितं स्वानां कदनं वीक्ष्य पुराणामन्तःपुरस्थानां श्रीरुक्मिण्यादीनां रक्षणं निरूप्य ताः सर्वाः पट्टमहिषीः सेनानीद्वारा गुप्तमार्गेण द्वारकावासमध्यञ्च प्रवेश्येत्यर्थः। शाल्वराजं च वीक्ष्य ॥९-१०॥

गूढार्थदीपिनी

निर्वृत्ते समाप्ते । संस्थिते मृते सति ॥६॥ कुरुवृद्धानिति युग्मम् । अनुज्ञाप्य पृष्ट्वा । अतिघोराणि भयसूचकानि निमित्तानि अपशकुनान् पश्यन् आर्यो ज्येष्ठः श्रीबलदेवः स एव मिश्रः पूज्यः तेन सङ्गतः तत्सहितः । हन्युः नाशयेयुः । सम्भावनायां लिङ् आह स्वमनस्येव ॥७-८॥ कदनं ('कदनं मर्दपापयोः' इति मेदिनी ।) मर्दनम् । पुररक्षणं प्रति रामं निरूप्य सौभादिकं च वीक्ष्य दारुकं सारथिं प्राहेत्यन्वयः ॥९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

इन्द्रप्रस्थमित्यादिना एवं वदन्तीत्यन्तेन परमतमुपन्यस्यति ॥६-७॥ आर्यमिश्राः बलभद्रसहिताः महारथाः सात्यक्यादयः तैः सङ्गतः ॥८॥ द्वारवतीमागत्य सौभं शाल्वराजं च वीक्ष्य स्वानां कदनं युद्धं च वीक्ष्य रामं पुररक्षणं प्रति निरूप्य दारुकं प्राह ॥९-१०॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

धर्मसूनुनाऽऽहूतः कृत इन्द्रप्रस्थतो माधवासन्निधानं मत्वैव स आयात इति भावः । अलक्षयदपश्यत् । अन्वीयमान इति सर्वान्वयी । पुरादिन्द्रप्रस्थात् ॥८-९॥ किञ्चिदित्यव्ययम् । अश्रुलोचनान् विरहाऽसहिष्णुतया ॥१०॥ अवरोधवध्वोऽन्तःपुरस्त्रियः ॥११॥ अन्वीतराजकटकोऽन्वीतो राजकटकः सेनाऽयं सः । ई इति प्रश्लिष्टस्येट किटीत्यत्र ईधातोरिडा वा गत्यर्थस्य रूपम् । तत्र का वार्ता प्रवृत्तेत्यत आह-साल्वोऽपीति । अर्दित इत्यपावर्तनहेतुकीर्तनम् ॥१२॥ यमक्षयं नाशशून्यं स व्यज्ञासीत्तमपि यमक्षयं निन्य इत्यावृत्त्याप्यन्वयः ॥१३॥ अखिलवल्लभं सर्वतः प्रीतिपात्रं ससज्ज समसज्जतस्तद्रणमद्भुतमभूत् ॥१४-१५॥ तस्य विविदस्य ॥१६॥ सा सेना । साल्वसैन्यं प्राणत्राणपरायणा सती यथाकामं विदुद्राव । प्राणत्राणमेव परमयनं यस्याः सा । परमयनमिति व्युत्पत्तिमात्रप्रदर्शनपरम् । वस्तुतस्तु रूढ इति सञ्ज्ञारूपः सशब्द इति पूर्वपदात्सञ्ज्ञायामग इति णत्वम् । आश्रये तु परार्थे परायणपदं विदुरिति शाश्वतः । साकल्यासङ्गवचने पारायण तुरायण इत्यमरः ॥१७॥ गरुडध्वजो देवोऽपि वेगेन द्वारकामेत्य भग्नप्राकारगोपुरां पुरीं ददर्श ॥१८॥ विशीर्णतोरणां रुग्णा भग्नाः । तुङ्गेत्युभयान्वयि । सालः प्राकारः । सालः पदपमात्रे स्यात्प्राकारे इति विश्वः । प्रतोल्येव प्रतोलिका यस्यां सा तां प्रस्तरैः पाषाणैरापूरिता दीर्घेव दीर्घिका । स्वार्थे संज्ञायां कन् । वापी वा पीडिता यस्यां सा ताम् । वापी तु दीर्घिकेत्यर्थः । ग्रामीणजनानुपयोगिपयोविधानमनेन द्योत्यत इवान्तर्गमनमार्गार्थमिति च द्योत्यते ॥१९॥ निर्गता स्वाध्यायो वेदाध्ययनं षट्कारा नित्याग्निहोत्राङ्गानि यस्यां सा बहिः सम्मुखमागतं कृतवर्माणं दुर्मना इव एतदेव किमित्यपृच्छत् ॥२०॥ तेन कृतवर्मणा ॥२१॥ प्रतिश्रवप्रकारांस्ताञ्छ्रावयतीति वक्ति । अनुद्रुत्येति । मं दुरात्मकमनुद्रुत्याद्यैव तं हत्वा सौभं तद्विमानं जलधौ समुद्रे निपात्य द्वारकां पुरीं प्रवेक्ष्येऽहमिति द्वारकामित्युक्तिस्वास्थ्य केचित् इदानीं तन्मार्गतो गत्वा तमहत्वा न प्रवेक्ष्ये इति भावमाविर्भावयन्ति ॥२२॥ शैब्यसैन्येत्यपि पठन्ति । अग्रेऽवस्थितो दारुको यस्य तम् ॥२३॥ गरुडो ध्वजे यस्य तं पूर्वं मनः प्रययौ गन्तव्यमिति मनश्चकार । अनन्तरं सौभपदवीं साल्वमार्गं मारुतरंहसा समीरसमवेगेन प्रययौ । मनोवन्मारुतं निःशब्दं हस्तेनेति वा । पक्षद्वन्द्वेऽपि प्रतिद्वन्द्वस्य पलायनं वा निलायनं वा भवेदिति निःसङ्गमनं नीरुतं च तदिति मन्तव्यम् । मनोवन्मारुतं प्रमाणोक्तं रंहो यत्तेनेति वा । मानोक्तत्वाच्च मारुत इत्युभयार्थं । अतोऽपि नैकतरातिरेकः ॥२४॥ कुक्षिं मध्यं सौभं ददर्श । तन्मध्ये सौभान्तः समलंकृतं साल्वं च ददर्शेत्यन्वयः । प्रद्युम्नादि समलंकृतं मलमङ्कतत्सहितं कृतमित्यर्थः । हतप्रायेत्यादेः ॥२५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

एवं यादवानां दुरत्ययं व्यसनं गतानां महद्दुःखं निरूप्य भगवत एवमुपेक्षाऽयुक्तेति दोषपरिहारार्थं मतान्तरमाह इन्द्रप्रस्थं गत इति । मतान्तरे पूर्वोक्तन्यायेन न गमनागमनेनाऽपि सम्भ्रमस्तथा । तदर्थं तत्रत्यां कथामेवाह-धर्मसूनुना स्वयमेकाकी इन्द्रप्रस्थं गतः पश्चाद्बलभद्रोऽप्याहूतः । मानभङ्गस्तु तस्मिन् काले नास्ति । विद्यमानोऽपि प्रकारान्तरे भविष्यति अतः बलभद्रसद्भावोऽपि न दोषाय । ततो राजसूये निर्वृत्ते भिन्नप्रक्रमेण समाप्ते शिशुपाले च मृते तदनन्तरमेव ॥६॥ कुरुवृद्धान् पुत्रसहितां पितृभगिनीं च पृष्ट्वा अपशकुनेषु जायमानेषु द्वारकाऽस्वास्थ्यज्ञापकेषु प्राप्तशङ्क इव घोराणि निमित्तानि पश्यन् ययौ ॥७॥ मध्ये गच्छतश्चिन्तामाह-आह चेति । प्रथमतः अहमिह इन्द्रप्रस्थे समागतः । पश्चादार्यमिश्रेण बलभद्रेण अभि

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

मिलितः। सहैव वा आगमनम्। ततो रक्षार्थमवतीर्णाशङ्कयमपि द्वारकायां नास्तीति चैद्यपक्षीया राजन्या दैत्याः नूनं मे पुरीं हन्युः ॥८॥ "निमित्तदर्शनं चिन्ताभङ्गश्चेति निरूप्यते। मतान्तरे दोषभावं मोहका वर्णयन्ति हि" ॥

सुबोधिनीसारः

परमतमुपन्यस्यति। धर्मस्य सूनुना पुत्रेणाऽऽहूतः कृष्णः इन्द्रप्रस्थं गतः राजसूये निवृत्ते समाप्ते सति शिशुपाले संस्थे मृते सति ॥६॥ कुरुवृद्धान् मुनींश्च व्यासादीन् सुतैः पुत्रैः सहितां पृथां कुन्तीम् अनुज्ञाप्य पथि अतिघोराणि दुःखसूचकानि निमित्तानि शकुनानि पश्यन् द्वारकां जगाम ॥७॥ आर्यमिश्राभिसङ्गतो बलदेवसहितोऽहमिह चायातोऽस्मि। अपशकुनान्नूनं चैद्यपक्षीयाः शिशुपालपक्षगा राजन्या भूपा मम पुरीं द्वारकां हन्युरित्याह ॥८॥ द्वारकामागत्य स्वानां प्रद्युम्नादीनां तत्कदनं विनाशं संग्रामं सौभं विमानं शाल्वं च वीक्ष्य दृष्ट्वा पुरस्य रक्षणं रामं प्रति निरूप्य केशवो दारुकं प्राह ॥९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अत्र कैश्चिदृषिभिरुक्तं दूषयितुमनुवदति-इन्द्रप्रस्थ इत्यादिना 'एवं वदन्ति राजर्षे' इत्यतः प्राक्तनेन ग्रन्थेन। धर्मसूनुना युधिष्ठिरेण आहूतः कृष्णः इन्द्रप्रस्थं गतः, अथ शिशुपाले संस्थिते मृते सति राजसूये च निवृत्ते परिसमाप्ते सति कतिचिद्दिनानि तत्रैव स्थित इति पूर्वोक्तत्वाच्छेषो ज्ञेयः ॥६॥ ततश्चातिघोराणि भयसूचकानि निमित्तानि पश्यन् आर्यमिश्रेण बलभद्रेणाभिसङ्गतः सहितोऽहमिहागतः अतश्चैद्यपक्षीयाः राजन्या नूनं मम पुरीं हन्युर्नाशयेयुरिति स्वमनस्याह। ततश्च कुरुवृद्धान् भीष्मादीन् ससुतां पृथां कुन्तीं मुनींश्चानुज्ञाप्य पृष्ट्वा द्वारवतीं ययाविति द्वयोरन्वयः ॥७-८॥ तत्रागत्य च स्वानां प्रजानां तच्छाल्वकृतं कदनं पीडां वीक्ष्य तथा सौभं शाल्वराजं च वीक्ष्य रामं पुररक्षणे नियुज्य प्रतिनिरूप्य केशवो दारुकं सूतं प्राह ॥९॥

अन्वितार्थप्रकाशिका

अत्र कैश्चिदृषिभिरुक्तं विचारयितुमनुवदति-इन्द्रप्रस्थ इत्यादिना॥ एवं वदन्ति राजर्ष इत्यतः प्राक्तनेन ग्रन्थेन धर्मसूनुना युधिष्ठिरेण आहूतः कृष्णः इन्द्रप्रस्थं गतः। अथ शिशुपाले संस्थिते मृते सति राजसूये च निर्वृतेर परिसमाप्ते सति कतिचिद्दिनानि तत्रैव स्थित इति पूर्वोक्तत्वाच्छेषो ज्ञेयः ॥६॥ कुरुवृद्धानिति युग्मकम्॥ ततश्चातिघोराणि भयसूचकानि निमित्तानि पश्यन् आर्यो बलभद्रः स एव मिश्रः पूज्यस्तेनाभिसङ्गतः सहितोऽहमिहागतः अतश्चैद्यपक्षीयाः राजन्या नूनं मम पुरीं हन्युर्नाशयेयुरिति स्वमनस्याह स्म। ततश्च कुरुवृद्धान् भीष्मादीन् ससुतां पृथां कुन्तीं मुनींश्चानुज्ञाप्य पृष्ट्वा द्वारवतीं ययौ ॥७-८॥ वीक्ष्येति। तत्रागत्य च स्वानां प्रजानां तच्छाल्वकृतं कदनं पीडां वीक्ष्य तथा सौभं शाल्वराजं च वीक्ष्य रामं पुररक्षणे नियुज्य प्रतिनिरूप्य केशवो दारुकं सूतं प्राह स्म। चक्रवर्ती तु एवं चिन्तयन्नेव द्वारकामागत्य तत्र च स्वानां कदनं वीक्ष्य पुराणमन्तःपुरस्थानानां श्रीरुक्मिण्यादीनां रक्षणं निरूप्य ताः सर्वाः महिषीः सेनानीद्वारा गुप्तमार्गेण द्वारकावासमध्यं प्रवेश्येत्यर्थः। इत्याह ॥९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

संस्थिते मृते ॥६-७॥ आर्यमिश्राभिपूज्यस्तेन सङ्गतस्तेन सहितोऽहम् इह आयात इति पथि स्वजनानाह इत्युक्त्वा श्रीकृष्णे इन्द्रप्रस्थं गते सति पश्चात् द्वारिकारक्षणाय प्रद्युम्नं निधाय रामोऽपीन्द्रप्रस्थं गत इति बोध्यम् ॥८॥ एवं चिन्तयन् द्वारिकामेत्य सौभादीन् वीक्ष्य पुररक्षणं प्रति रामं निरूप्य नियुज्य दारुकं प्राह ॥९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अत्र कैश्चिदृषिभिरुक्तं भगवदनर्हं दूषयितुमनुवदति इन्द्रप्रस्थमित्यारभ्य एवं वदन्ति राजर्षे इत्यतः प्राक्तनेन ग्रन्थेन। इन्द्रप्रस्थमिति। धर्मसूनुना युधिष्ठिरेण, आहूतः कृष्णः, इन्द्रप्रस्थम्, गतः। अथ तत्र राजसूये, निर्वृत्ते परिसमाप्ते सति, शिशुपाले संस्थिते मृते सति च ॥६॥ कुरुवृद्धानिति ॥ तत्रैव कतिचिद्दिनानि स्थितः श्रीकृष्णः, कुरुवृद्धान् भीष्मादीन्, ससुतां स्वपुत्रैः सहिताम्, पृथां कुन्तीं च, मुनींश्च, अनुज्ञाप्यामन्त्र्य, सम्पृच्छ्येति यावत्। अतिघोराणि निमित्तानि, पश्यन् सन्, द्वारवतीं द्वारकां, ययौ।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आह चेत्त्युत्तरेण सम्बन्धः । द्वयोरेकसम्बन्धश्च ॥७॥ उक्तिमेवाह । आह चेति ॥ अहं चाहमपि, इह आयातः, आर्यमिश्रो बलभद्रः, राजसूये समासेऽपि कृष्णस्य तत्र कथं बहुकालातिक्रमो जातः, यदा स जातस्तदा तत्र किञ्चिदनिष्टं जातं स्यादेवेति सन्दिह्येति शेषः। अभिसङ्गतो मामिह स[illegible]ासः, अतः । चैद्यपक्षीयाः राजन्याः, नूनं मम, पुरीं, हन्युर्नाशयेयुः । अतः अहं गमिष्यामीति शेषः । इति आह ॥८॥ वीक्ष्येति । [illegible]वं विचार्य, शीघ्रं स्वपुरागमनानन्तरमिति शेषः । स्वानां स्वजनानाम्, तत्पूर्वोक्तम्, कदनं वीक्ष्य, सौभं च शाल्वराजं च वीक्ष्य, [illegible]मिति शेषः । पुररक्षणं निरूप्य पुररक्षणार्थम् अवस्थाप्य, केशवः, दारुकं प्राह ॥९॥

कृष्णप्रिया

महाराज श्रीयुधिष्ठर के निमंत्रण से उन दिनोंमें भगवान श्रीकृष्ण इन्द्रप्रस्थ पधारे थे अब राजसुय यज्ञ संपूर्ण हो चूका था और शिशुपाल की भी मृत्यु हो गई थी ॥६॥ इन्द्रप्रस्थमें भगवान श्रीकृष्णने देखा की कल्पनातीत अपशुकन हो रहे है । तब भगवानने कुरुकुल के वृद्धजनों को ऋषिमुनियोंको कुन्तीजी को और पाण्डवों को नम्र भाव से द्वारिका पधारने के लीये निवेदन किया और अनुमति प्राप्त कर प्रस्थान किया ॥७॥ भगवान श्रीकृष्ण मन ही मन में विचारने लगे कि मैं बडे भाई श्रीबलरामजी के साथ यहां चला आया। अब शिशुपाल के पक्षपाती आप्तजन अवश्य ही द्वारिकापुरी पर आक्रमण कर रहे होंगे ॥८॥ भगवान श्रीकृष्णने द्वारिकामें पहोंचकर देखा कि सचमुच यादवों पर असाधारण आपत्ति आयी है । भगवान श्रीकृष्णने श्रीबलभद्रजी को नगरकी रक्षा के लिए नियुक्त कर दिया और सौभपति शाल्व को देखकर अपने सारथि दरूक से कहा ॥९॥

रथं प्रापय मे सूत शाल्वस्यान्तिकमाशु वै । [1]सम्भ्रमस्ते न कर्तव्यो मायावी सौभराडयम् ॥१०॥
इत्युक्तश्चोदयामास रथमास्थाय दारुकः । विशन्तं ददृशुः सर्वे स्वे परे चारुणानुजम् ॥११॥
शाल्वश्च [2]कृष्णमालोक्य हतप्रायबलेश्वरः । प्राहरत् कृष्णसूताय शक्तिं भीमरवां मृधे ॥१२॥
तामापतन्तीं नभसि महोल्कामिव रंहसा । भासयन्तीं दिशः शौरिः सायकैः शतधाच्छिनत् ॥१३॥

कर्दमक्षमा

सूत, मे, रथम्, आशु, शाल्वस्य, अन्तिकम्, प्रापय, ते, सम्भ्रमः, न, कर्तव्यः, वै, अयम्, सौभराट्, मायावी ॥१०॥ इत्युक्तः, दारुकः, रथम्, आस्थाय. चोदयामास, च, स्वे, परे, सर्वे, अरुणानुजम्, विशन्तम्, ददृशुः ॥११॥ हतप्रायबलेश्वरः, शाल्वः, मृधे, कृष्णम्, आलोक्य, च, कृष्णसूताय, भीमरवाम्, शक्तिम्, प्राहरत् ॥१२॥ महोल्काम्, इव, नभसि, रंहसा, आपतन्तीम्, ताम्, दिशः, भासयन्तीम्, शौरिः, सायकैः, शतधा, अच्छिनत् ॥१३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ते त्वया ॥१०॥ आस्थाय सम्यगधिष्ठाय अरुणानुजं ध्वजे वर्तमानं गरुडम् ॥११॥ हतप्रायस्य बलस्य सैन्यस्येश्वरः ॥१२-१३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सम्भ्रमो भयम् "सम्भ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि" इति मेदिनी ॥१०-१२॥ तां शक्तिम् ॥१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वै एव आश्वेव सम्भ्रमः साध्वसानुभावः आवेगो न कर्तव्यः यतो मायावी न तु स्वतो वीरः सौभेन च मायामयेनैव इति तथा ॥१०॥ विशन्तं युद्धमिति शेषः ॥११॥ हतप्रायबलेश्वरोऽपि मृधे प्राहरत् प्रहार्थं चिक्षेप ॥१२॥ नभस्याप नभस्येवाच्छिनदित्यर्थः ॥१३॥

---

[1] सङ्ग्रामस्तेन-वीर. । [2] रथमालोक्य-गो. प्रे. टी. ।

आश्वे

यतोऽयं शाल्वो

॥१०॥ विशन्तं

शाल्वस्त्विति श्र

स्वसखशिशुपाल

महोल्कामिवेति

साक्षाद्भगवान् ॥१

अरुणानु

उक्तिमेव

मायावी सौभराट् च

गरुडध्वजं रथं विश

कृष्णमवलोक्य भी

उल्कामिव सर्वा दि

ततश्च अरुण

सम्भ्रमो भय

स्वकीयाः परकीयाश्च

शाल्वः कृष्णसूतं हन्तुं

बाणैः अच्छिनत् । शौरि

अरुणानुजं ध्व

हतप्रायं हतभूयि

। विरम्योपस्थितिकत्वात्त

शतप्रकारेणाच्छिनत् ॥२७

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आश्वेव मायावीति सम्भ्रमः साध्वसं यद्वा, सम्भ्रमो न कर्तव्यः व्याकुलचित्तेन न भाव्यं किन्तु सावधानेनैवेत्यर्थः । यतोऽयं शाल्वो मायावी तत्र हेतुः-सौभेन मयमायामययानेन राजत इति तथा सः यद्वा, स्वतो मायावी पुनश्च सौभराट् सौभपतिः ॥१०॥ विशन्तं पुरीं युद्धस्थलं वा प्रविशन्तं दूरादेव ददृशुः । रथध्वजोपरि वर्तमानत्वात् स्वे यादवाः परे शाल्वादयः ॥११॥ न तु शाल्वस्त्विति श्रीगरुडदर्शनेन यादवानां परमानन्दे जातेऽपि तत्रैव दुष्टस्य तस्य क्रोधाद्युत्पादकतया भिन्नोपक्रमात् कृष्णं स्वसखशिशुपालादीनां प्राणाकर्षकमिति भावः । हतप्रायबलेश्वरोऽपि मृधे प्राहरत् चिक्षेप ॥१२॥ रंहसा वेगेन नभस्यापतन्तीं महोल्कामिवेति रंहसा पतने दिशां भासने च दृष्टान्तः । नभस्येवाच्छिनदिति वा यतः शौरिर्निजाशेषैश्वर्यप्रकटनार्थं शूरवंशेऽवतीर्णः साक्षाद्भगवान् ॥१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अरुणानुजं ध्वजस्थगरुडम् ॥११-१४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उक्तिमेवाह-रथमिति । हे सुत ! साल्वस्यान्तिकं प्रत्याशु रथं प्रापय तेन साल्वेन सह सङ्ग्रामः कर्तव्यः अयं साल्वो मायावी सौभराट् चेति ॥१०॥ इतीति । आस्थाय सम्यगधिष्ठा चोदयामास गमयामास अश्वानिति शेषः । अरुणस्यानुजो यस्मिस्तं गरुडध्वजं रथं विशन्तं रणभूमौ इति शेषः स्वे यदवः परे शाल्वपक्षीयाश्च ददृशुः ॥११॥ साल्व इति । हतप्रायस्येश्वरः युद्धे साल्वः कृष्णमवलोक्य भीमो रवो ध्वनिर्यस्यास्तां शक्तिं कृष्णस्य सूताय प्राहरत् प्रायुङ्क्त ॥१२॥ तामिति । रंहसा वेगेन नभस्यापतन्तीम् उल्कामिव सर्वा दिशो भासयन्तीं तां शक्तिं शतधा चिच्छेद ॥१३॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥७-१४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-२९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च अरुणानुजं ध्वजे प्रवर्तमानं श्रीगरुडम् ॥११॥ हतप्रायाः बलेश्वराः सेनान्यो यः सः ॥१२-१३॥

गूढार्थदीपिनी

सम्भ्रमो भयम् । 'सम्भ्रमः साध्वसेऽपि स्यात्' इति मेदिनी । सौभराट् सौभेन राजते इति शाल्वः ॥१०॥ स्वे परे स्वकीयाः परकीयाश्च सर्वे सैनिकाः रणे प्रविशन्तं ध्वजस्थमरुणानुजं गरुडं ददृशुः ॥११॥ हतप्रायस्य बलस्य सैन्यस्य ईश्वरः शाल्वः कृष्णसूतं हन्तुं शक्तिं प्राहरत् चिक्षेप ॥१२॥ महोल्कां निर्गतज्वालामिव रंहसा वेगेन आपतन्तीं तां नभसि आकाशे एव बाणैः अच्छिनत् । शौरिः श्रीकृष्णः ॥१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अरुणानुजं ध्वजस्थं गरुडम् ॥११॥ हतप्रायस्य बलस्येश्वरः ॥१२-१३॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

हतप्रायं हतभूयिष्ठं यद्बलं यस्येश्वरः स्वामी कृष्णसूताय कृष्णेन सु सम्यक् ऊतो रक्षितस्तस्मै । एतेन शक्तेरशक्तता द्योत्यते । विस्म्योपस्थितिकत्वात्तत्सूतायेत्यनुक्तिः । दारुकाय ॥२६॥ महोल्कामिव रंहसाऽऽपतन्तीं दिशो भासयन्तीं तां शक्तिं शतधा शतप्रकारेणाच्छिनत् ॥२७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो यज्जातं तदाह–वीक्ष्य तत्कदनमिति। अहोरात्रं युद्धक्लेशं वीक्ष्य पुररक्षणमर्थाद्बलभद्रं निरूप्य यथाकथञ्चित् कथया अनुवादान्नात्रासमर्पकतादोषः नापि क्रियायाः क्रियान्तरोल्लङ्घनदोषः। सौभं च निरीक्ष्य शाल्वराजं च निरीक्ष्य स्वसारथिं दारुकं प्रति प्राह। स्वतः समर्थस्य सूतप्रेरणमयुक्तमित्याशङ्क्याह–केशव इति। यथा ब्रह्मशिवौ प्रेरयति तथैनमपीत्यर्थः। तस्मिन् कल्पे सारथिः प्राकृत इति सम्बोधयति–रथं प्रापयेति। सम्भ्रमो भयम्। ते त्वया। यतः सौभराट् मायावीति तस्य स्तुतिः। पूर्वं प्रेरणायां दारुको विकलः स्थित इति ॥१०॥ एवं भगवता उक्तः भगवन्तं मानयामास तथैव करिष्यामीति भयं त्यक्त्वा प्रवृत्त इत्यर्थः। रथं सम्यगास्थाय यतो दारूणां शिरोरूपः सुखरूपो वा अतस्तदिच्छानुसारेण दारूणां चलनमुक्तम्। ततो रथस्य शीघ्रगत्या रेणुभिराच्छादने रथमदृष्ट्वैव सर्व एव स्वे परे च अरुणानुजं गरुडमेव विशन्तं ददृशुः ॥११॥ ततः शाल्वेनैव कृष्णो दृष्ट इत्याह–शाल्वश्चेति। अतप्रायबलस्येश्वरः सोऽपि निरन्तरयुद्धेन क्लिष्टः। ततः क्रोधेन सूतेन रथः शीघ्रमानीत इति कृष्णसूताय भीमरवां शक्तिं प्राहिणोत्। मृधे युद्धे सावधानदशायाम् ॥१२॥ ततस्तन्निराकरणमाह–तामापतन्तीति। दर्शनेनापि भयजनकत्वायाऽऽह–महोल्कामिवेति। रंहसा आपतन्तीमिति प्रतीकारान्तरं निराकृतम्। भासयन्तीं दिश इति तस्या माहात्म्यं फलावश्यकत्वाय। ततो भगवान् सायकैः बहुभिरेव शतधाऽच्छिनत् ॥१३॥

श्रीसुबोधिनीसारः

हे सूत शाल्वस्यान्तिकं समीपं मे रथं त्वं प्रापय आशु शीघ्रम्। अयं सौभराट् शाल्वो मायावीति हेतोः त्वया सम्भ्रमो न कर्तव्यः ॥१०॥ एवमुक्तो दारुको रथमास्थाय प्रेरयामास। सर्वे स्वे परे चारुणस्यानुजं गरुडं विशन्तं ध्वजे वर्तमानं ददृशुः ॥११॥ नष्टप्रायबलपतिः शाल्वः कृष्णमालोक्य दृष्ट्वा कृष्णस्य सूताय सारथये तमुद्दिश्य मृधे संग्रामे भीमरवां भयङ्करशब्दां शक्तिं प्राहिणोत् ॥१२॥ महोल्कां विद्युतमिव रंहसा वेगेनापतन्तीं तां शक्तिं दिशः प्रकाशयन्तीं सायकैर्बाणैः शौरिः श्रीकृष्णः शतधाच्छिनत् ॥१३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह–हे सूत ! मे रथं शाल्वस्यान्तिकमाशु प्रापय, ते त्वया सम्भ्रमो भयं न कर्तव्यः, यतोऽयं सौभराट् मायावी ॥१०॥ भगवतेत्युक्तो दारुकः रथमास्थाय अश्वान् चोदयामास गमयामास। ततश्च स्वे यादवाः परे शाल्वपक्षीया रणे प्रविशन्तं अरुणानुजं ध्वजे वर्तमानं गरुडं ददृशुः ॥११॥ हतप्रायस्य बलस्येश्वरः शाल्वो युद्धे कृष्णमवलोक्य भीमो रवो ध्वनिर्यस्यास्तां शक्तिं कृष्णसूताय आहरत् ॥१२॥ रंहसा वेगेन आकाशे आपतन्तीं महोल्कामिव सर्वा दिशो भासयन्तीं तां शक्तिं शौरिः श्रीकृष्णः सायकैः शतधा अच्छिनत् ॥१३॥

अन्वितार्थप्रकाशिका

रथमिति ॥ हे सूत ! मे रथं शाल्वस्यान्तिकमाशु प्रापय। ते तव सम्भ्रमो भयं न कर्तव्यः। यतोऽयं सौभराट् मायावी ॥१०॥ इतीति ॥ भगवता इत्युक्तो दारुकः रथमास्थाय अधिष्ठाय अश्वान् चोदयामास गमयामास। ततश्च स्वे यादवाः परे शाल्वपक्षीयाश्च रणे प्रविशन्तम् अरुणानुजं ध्वजे वर्तमानं गरुडं ददृशुः ॥११॥ शाल्व इति ॥ हतप्रायस्य बलस्येश्वरः शाल्वो युद्धे कृष्णमवलोक्य भीमो रवो ध्वनिर्यस्यास्तां शक्तिं कृष्णसूताय प्राहरत् ॥१२॥ तामिति ॥ रंहसा वेगेन आकाशे आपतन्तीं महोल्कामिव सर्वा दिशो भासयन्तीं तां शक्तिं शौरिः श्रीकृष्णः सायकैः आकाश एव शतधा अच्छिनत् ॥१३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ते त्वया ॥१०॥ अरुणानुजं ध्वजस्थं गरुडम् ॥११॥ हतप्रायबलस्येश्वरः ॥१२॥ महोल्कामिव महाविद्युत्सदृशीम् ॥१३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

रथमिति ॥ हे सूत ! मे मम, रथं, आशु शीघ्रम्, वै निश्चितमेव, शाल्वस्य अन्तिकम्, प्रापय। हे दारुक ! अयं सौभराट् शाल्वः, मायावी मायारचनास्वतीव कुशलः, वर्तते। अतः ते त्वया, सम्भ्रमः, न कर्तव्यः ॥१०॥ इतीति ॥ इत्युक्तप्रकारेण श्रीकृष्णेनाभिहितः, दारुकः, रथम् आस्थाय चोदयामास। ततः स्वे यदुसैनिकाः, परे शाल्वसैनिकाश्च, सर्वे, विशन्तमायोधनम्

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रवेशं कुर्वाणम्, अरुणानुजं गरुडम्, ददृशुः गरुडध्वजरथारूढं रणभूप्रविष्टं विलोकयाञ्चक्रुरित्यर्थः ॥११॥ शाल्वश्चेति ॥ हतप्रायस्य बलस्येश्वरः, शाल्वश्च सौभराडपि, कृष्णमालोक्य, मृधे, कृष्णसूताय श्रीकृष्णसूतं दारुकं हन्तुमित्यर्थः । भीमरवां भयङ्करध्वनिमतीं शक्तिं प्राहरत् ॥१२॥ तामिति ॥ रंहसा वेगेन, नभस्याकाशे, महोल्कामिव, दिशः सर्वाः दिशः, भासयन्तीम् आपतन्तीं तां शक्तिं, शौरिः श्रीकृष्णः, सायकैः, शतधा अच्छिनत् ॥१३॥

कृष्णप्रिया

भैया दारुक तुम शीघ्र से शीघ्र मेरा रथ शाल्व के पास ले चलो । ध्यान रखना कि यह शाल्व बडा मायावी है फिरभी तुम अल्प भी भय न करना ॥१०॥ भगवान श्रीकृष्ण का ऐसा आदेश प्राप्त कर दारुक रथ पर चढ गया और रथ को शाल्व की ओर ले चला । भगवान कृष्ण के रथका ध्वज गरुड चिन्ह से अंकित था । उस ध्वज को देखकर यादवों को तथा शाल्व की सेना के सैनीको को पता चला कि कृष्ण भगवान रणभूमि में प्रवेश कर रहे है यह निश्चय हुआ ॥११॥ परीक्षित शाल्वका संपूर्ण सैन्य प्रायः अबतक नष्ट हो चुका था । भगवान कृष्णचन्द्र को देखते ही शाल्वने भगवान के सारथी पर एक बहुत बडी शक्ति फैंकी । वह शक्ति अत्यन्त भयानक शब्द करती हुई आकाशमें उग्रवेशसे चल रही थी और बडे लूकके समान दीख पडती थी उसके प्रकाशसे दिशायें चमक उठी थी । उस शक्ति को सारथी की ओर आते देखकर भगवानने अपने बाणों से उस शक्ति के सैंकडों टुकडे कर डाले ॥१२-१३॥

तं च [1]षोडशभिर्विद्ध्वा बाणैः सौभं च खे भ्रमत् । अविध्यच्छरसन्दोहैः खं सूर्य इव रश्मिभिः ॥१४॥
शाल्वः शौरेस्तु दोः सव्यं सशार्ङ्गं शार्ङ्गधन्वनः । बिभेद न्यपतद्धस्तात् शार्ङ्गमासीत्तदद्भुतम् ॥१५॥
हाहाकारो महानासीद् भूतानां तत्र पश्यताम् । विनद्य सौभराडुच्चैरिदमाह जनार्दनम् ॥१६॥
यत्त्वया मूढ नः [2]सख्युर्भ्रातुर्भार्या हृतेक्षताम् । प्रमत्तः स सभामध्ये त्वया व्यापादितः सखा ॥१७॥

कर्दमक्षमा

तम्, च, खे, भ्रमत्, सौभम्, षोडशभिः, बाणैः, च, सूर्यः, रश्मिभिः, इव, शरसन्दोहैः, अविध्यत् ॥१४॥ शाल्वः, तु, शार्ङ्गधन्वनः, शौरेः, सशार्ङ्गम्, सव्यम्, दोः, बिभेद, तत्, हस्तात्, शार्ङ्गम्, न्यपतत्, तत्, अद्भुतम्, आसीत् ॥१५॥ तत्र पश्यताम्, भूतानाम्, महान्, हाहाकारः, आसीत्, सौभराट् , उच्चैः, विनद्य, जनार्दनम्, इदम्, आह ॥१६॥ हे मूढ ! यत्, त्वया, नः, सख्युः, (तव) भ्रातुः, भार्या, ईक्षताम्, हृता, नः, सखा, सभामध्ये, प्रमत्तः, सः, व्यापादितः ॥१७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तञ्च शाल्वं शरसन्दोहैः शरजालैः खं सूर्य इव रश्मिभिरिति सुनीलत्वविपुलत्वादिभिराकाशोपमा सौभस्य अचिन्त्यवेगबालुल्यादिभिः शराणां रश्मिसादृश्यम् अयन्तेनैव रश्मिवच्छरजालप्रसारणात्सूर्यतुल्यः श्रीकृष्ण इति ॥१४॥ दोर्बाहुम ॥१५-१६॥ सख्युः शिशुपालस्य ईक्षतामस्माकं प्रमत्तोऽनवहितः व्यापादितो निहतः ॥१७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं शाल्वम् ॥१४॥ तच्छार्ङ्गपतनम् ॥१५॥ तत्र युद्धे । इदं वक्ष्यमाणम् ॥१६॥ सखित्वादेव भ्रातुरित्युक्तम् । स शिशुपालः ॥१७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

खे भ्रमदपि ॥१४॥ दोषो नपुंसकत्वं च दृश्यते सव्यं दोरच्छिनत्तस्येति रघुकाव्याच्छार्ङ्गधन्वनोऽपि ॥१५॥ जनानां

---

१. भिर्बाणैर्विद्ध्वा सौभं गो. प्रे. टी. । २. भार्या चापहृतेक्षतां-वीर.; भ्रातृभार्या-गो. प्रे. टी. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तादृशानां दुष्टानां मर्दनमपि लीलयैव तादृशतामनुकुर्वन्तं तमाहेति धृष्टता निर्बुद्धिता च सूचिता ॥१६॥ यदिति युग्मकम्। यत् येन त्वया अस्माकं सख्युस्तव तु भ्रातुः पैतृष्वसेयस्य सभामध्ये न तु युद्धमध्ये अतः प्रमत्तः अनवहितः अत एव व्यापादितः त्वयेति पुनरुक्त्या व्यापादनस्य तदेककर्तृत्वेन परमद्वेष्यत्वं तथा सखेति चान्तः शोकविशेषं सखेति मित्रार्थकृत्यस्यावश्यकत्वं च सूचयति यदीत्यधुनैव मद्भयात्किल पलायिष्यस इति भावः। गीर्देवीमते अमूढ हे परमविद्वन्! अस्माकं सख्युर्भ्रातुश्च शिशुपालस्य तथा नोऽस्माकं च ईक्षतामीक्षमाणानां तं चास्मांश्चानादृत्येत्यर्थः। येन त्वया भार्या लक्ष्मीत्वान्निजा जायैव हृता तथा प्रमत्तः पीतमद्यादिवन्नानादुर्वचनाद्युन्मत्तचेष्टः सोऽस्मत्सखा व्यापादितः ॥१७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

खे भ्रमदपि ॥१४॥ अग्रे सन्यायमतिदूषयितुं सर्वथा विरुद्धं परमतमुपहसन्निवाह-साल्व इत्यादिना। शार्ङ्गधन्वनोऽपि एतदतिविरुद्धमेव। सच्चिदानन्दघनविग्रहस्य भेदनासम्भवात् सरस्वतीस्तुतेरत्र वास्तवोऽर्थो वर्तमानोऽपि न व्याख्येयः। परमतस्य दुष्टत्वात्। अत एव तैरपि न सूचितः। जनानां तादृशानां दुष्टानां मर्दनमप्याहेति धृष्टता निर्बुद्धिता सूचिता ॥१५-१६॥ सखित्वादेवास्माकं भ्रातुः स्वपैतृष्वसेयस्य वा सभामध्ये न तु युद्धमध्ये अतः प्रमत्तोऽनवहितः अत एव व्यापादितः अन्यथा त्वयाऽसौ हन्तुं न योग्य इति भावः। त्वयेति पुनरुक्त्या व्यापादनस्य तदेक-कर्तृकत्वेन परमद्वेष्यत्वं तथा सखेति चान्तःशोकविशेषं मित्रार्थमवश्यप्रतिकृत्यं च सूचयति ॥१७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

न्यपतदिति मनुष्यभावानुकारः ॥१५-२७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तामिति। खे आकाशे भ्रमद्भ्राम्यमाणं सौभं तं सौभपतिं च आविध्य खमाकाशं रश्मिभिः सूर्य इव शरजालैः पुनः सौभमाविध्यत् सुनीलत्वविपुलत्वादिभिराकाशोपमा सौभस्याचिन्त्यवेगत्वबाहुल्यादिभिः शराणां रश्मिसादृश्यमयत्नेनैव रश्मिवच्छरजालप्रसारात् सूर्यतुल्यः श्रीकृष्ण इत्यवगन्तव्यम् ॥१४॥ साल्व इति। शार्ङ्गधन्वनः कृष्णस्य शार्ङ्गसहितं दोर्भुजं बिभेद विव्याध हस्ताच्छार्ङ्गं न्यपतत् तदद्भुतमभूदभूतपूर्वत्वादिति भावः ॥१५॥ अत एवाह-हाहाकार इति। महानुच्चैर्विनद्येति अयं शार्ङ्गपातजसन्तोषातिशयादित्यादिः उच्चैः विनद्य इदं वक्ष्यमाणमाह ॥१६॥ तदेवाह-यदिति द्वाभ्याम्। यत् यस्मात् हे मूढ नोऽस्माकं सख्युः चैद्यस्य भार्यात्वेन सङ्कल्पिता रुक्मिणी त्वयाऽस्माकम् ईक्षतां पश्यतां सतामपहृता तथा नः सखा सभामध्ये व्यापादितो हतः तत्र हेतुत्वेन सखायं विशिनष्टि, प्रमत्तः तदाऽनवहितः इत्यर्थः ॥१७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

सव्यं हस्तम् ॥१५-१६॥ सख्युर्भार्या शिशुपालस्य सङ्क्लृप्ता जाया रुक्मिणी ॥१७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः **॥१-२९॥**

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

खं सूर्य इवेति सौभस्य श्यामत्वरितत्वाभ्यामाकाशेनोपमा शराणामसङ्ख्यत्वतापकत्वाभ्यां रश्मिभिः कृष्ण सर्वतेजःपराभावकतया सूर्येण ॥१४॥ साल्व इत्यादि श्लोकद्वयं न शुकसम्मतम् दोः सव्यमिति दोषो नपुंसकत्वमपि दृश्यते दोरच्छिनत्तस्येति रघुकाव्यात् तत् शार्ङ्गपतनम् अद्भुतं तद्भुजबलस्यापरिमेयत्वात् ॥१५-१७॥

तं शा

आकाशमाच्छाद

॥१४॥ शौरेः श्री

ततः तस्य हस्तात्

सौभराट् शाल्वः

हता अथ च स

अस्मांश्च अनादृत्य

शराणां

षोडशभि

तथा शराणां च प्रक

शरसन्दोहैः स्वहस्त

एते हीदं सर्वमाददा

ज्ञेयम्। शराश्च किर

भुजबाहुप्रविष्टो दो

तद्धस्तात्। तत्ताडित

। तथैव तन्मयेन की

हाहाकार आसीत्। सं

। भूयः पुनः शृणु।

इत्यनेन रणाङ्गणे मार

ततः प्रहार

भ्रमदेव न तु स्थितम्

दृष्टान्तः खं सूर्य इवेति।

सौभातिक्रमे कृते शाल

च। यतोऽयं शार्ङ्गधन्वे

॥१५॥ (तत्र पराक्रम

विनद्येति। जितं जित

सन्निदमाह-यत्त्वयेति

ईक्षतामस्माकं सतामेव

आत्मसात्कृता किन्तु

युद्धे अतः स सखेति हे

गूढार्थदीपिनी

तं शाल्वं षोडशभिः बाणैः आकाशे भ्रमत् सौभं विमानं च शरसन्दोहैः बाणसमूहैः अविध्यत् । यथा सूर्यो रश्मिभिः आकाशमाच्छादयति तद्वत् । तत्राकाशस्थानीयं सौभं रश्मिस्थानीयाः शराः सूर्यस्थानीयो भगवान् श्रीकृष्ण इति सादृश्यमवधेयम् ॥१४॥ शौरेः श्रीकृष्णस्य सव्यं दोः (ककुद्दोषणी इति भाष्यप्रयोगात् दोःशब्दस्य क्लीबत्वम् ।) वामं भुजं बिभेद शरेण विव्याध ततः तस्य हस्तात् शार्ङ्गं न्यपतत् । तत् पतनमाश्चर्यजनकमासीत् । अभूतपूर्वत्वात् पतनं च तस्य वीर्यख्यापनाय ॥१५॥ तत्र युद्धे । सौभराट् शाल्वः विनद्य गर्जित्वा इदं वक्ष्यमाणमाह ॥१६॥ यत् यस्मात् नोऽस्माकमीक्षतां सतां सख्युः भ्रातुश्च शिशुपालस्य भार्या हृता अथ च स व्यापादितः मारितश्च भ्रातुरिति सखित्वादेवोक्तम् । हे मूढ ! सर्वज्ञसख्युः शिशुपालस्य नोऽस्माकं च ईक्षतां तं च अस्मांश्च अनादृत्य लक्ष्मीत्वात् स्वस्यैव भार्या आहृता आनीता । प्रमत्तः अनधिकारचेष्टायुक्तत्वात् स निहतश्चेति वागर्थः ॥१७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शराणां सन्दोहैः समूहैः ॥१४॥ दोर्बाहुम् ॥१५-१६॥ सख्युः शिशुपालस्य व्यापादितः निहतः ॥१७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

षोडशभिः सूर्यो रश्मिभिर्यथा पूरयति तथा शरसन्दोहैरविध्यत् । तमोधाम दुरासदमिति प्रागुक्तेरनुरूपं निरूपितनिदर्शनं तथा शराणां च प्रकाशपुञ्जत्वादिति मन्तव्यम् । प्रागेव षोडशशरविसर्जनं तव षोडशश्राद्धानि सत्वरं भवन्तीति ध्वनयितुमिति च । शरसन्दोहैः स्वहस्तगृहीतोदकसन्दोहैस्तथा रश्मिभिश्चेति दृष्टान्तेऽपि योजयन्ति । तथा हि ऋग्भाष्यटीकयोः । आददानः प्रयाति । एते हीदं सर्वमाददाना यन्तीति । आदित्याज्जायते वृष्टिरित्यादेः । आकाशे नीलिमिवेति श्रुतेस्तमोधाम्नः सौभस्य चोपमानुपमेति ज्ञेयम् । शराश्च किरणानुकाराः कृष्णश्च रविसमः ॥२८॥ शार्ङ्गधन्वनः शौरेः सशार्ङ्गं दोः सव्यमिति पदम् । सव्यं वामं दोर्हस्तम् । भुजबाहुप्रविष्टो दोरित्यस्त्रियां वदन्नमरः पामरः । ककुद्दोषणीति भाष्यात् । प्रयोगाश्च दक्षिणं दोर्निशाचर इत्याद्याः । बिभेद तद्धस्तात् । तत्ताडितान् शार्ङ्गान्न्यपतत् । तत्पतनमद्भुतमाश्चर्यकरमभूत् । ततः सव्यमिति पाठे यत्सव्यं बिभेद तस्माद्धस्तादित्यन्वयः । तथैव तन्मयेन कीर्तिर्मम स्यात्किन्तु वर्धनं कृत्वा मर्दनं कार्यमित्येतत्कार्यं कृतमीशेनेति ज्ञेयम् ॥२९॥ तत्र पश्यतां यदूनां महान् हाहाकार आसीत् । सौभराट् साल्व उच्चैर्विनद्य जनार्दनमिदमाह ॥३०॥ यमुनायामित्यनेन न न्यायतः किन्त्वन्यायत इति कटाक्षयति । भूयः पुनः शृणु । नः सख्युः शिशुपालस्य भार्या तत्त्वं कर्तुं निश्चिता ॥३१॥ मम सखा दमघोषसुतः शिशुपालः । सभामध्य इत्यनेन रणाङ्गणे मारणम् । न योद्धृधर्मिष्ठतां ध्वनयति । हतचेतसामश्विनां क्षत्रियाणां पश्यतां व्यापादितो हिंसितः ॥३२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः प्रहारकर्तुरपि प्रहारं कृतवानित्याह-तञ्चेति । षोडशभिर्बाणैरष्टाङ्गेषु द्वाभ्यां द्वाभ्यां वेधः । सौभं च षोडशभिः खे भ्रमदेव न तु स्थितम् आदौ तं विद्ध्वा रक्षाया अभावे सौभं च अविध्यत् । तत्र तु शरसन्दोहा एव बहव एव उपर्यधश्च वेधार्थं दृष्टान्तः खं सूर्य इवेति । अनेनाकाशस्य पीडाभाव इव सौभस्यापि पीडाभावो निरूपितः । महादेवप्रशंसेयम् ॥१४॥ ततो महादेवभक्त्या सौभातिक्रमे कृते शाल्वोऽप्यतिक्रमं कृतवानित्याह-शाल्वः शौरेरिति । तुशब्दः सिद्धान्तं वारयति । सव्यं दोहो वामं बाहुं सायुधं च । यतोऽयं शार्ङ्गधन्वेति प्रसिद्धः । एवं प्रसिद्धहेतुसहितं महाप्राक्रमसहितं निराकृतवानिति महादेवप्रशंसा, हस्तात् न्यपतदित्यपि ॥१५॥ (तत्र पराक्रमसहितम्) तत्र पश्यतां भूतानाम् अभूतपूर्वत्वाद्धाहाकारः । एवं कायिकनिराकरणमुक्त्वा वाचनिकमाह-विनद्येति । जितं जितमिति विनदनमुक्त्वा । ततः सौभराट् सौभे विराजमानः । जनार्दनमविद्याया अपि नाशकम् ॥१६॥ भ्रान्तः सन्निदमाह-यत्त्वयेति द्वाभ्याम् । तस्य वाक्यं निरूप्यते । अमूढेति छेदः । नः सख्युः शिशुपालस्य तव भ्रातुः भ्रातृरूपसख्युर्वा ईक्षतामस्माकं सतामेवाकिञ्चित्कराणामग्रे हृता । अनेन स्वाभाविकशौर्यात्तव महच्छौर्यमिति स्तुतिरुक्ता । न केवलं तद्भार्या आत्मसात्कृता किन्तु सोऽपीत्याह-प्रमत्तः स सभामध्य इति । सोऽपि समर्थः तथापि प्रमत्तत्वात्सभायां त्वया व्यापादितः न तु युद्धे अतः स सखेति हेत्वर्थं पुनः कथनम् ॥१७॥

श्रीसुबोधिनीसारः

षोडशभिर्बाणैः तं शाल्वं विद्ध्वा खे आकाशे भ्रमत् सौभं विमानं शराणां सन्दोहैर्जालैः अविध्यत्। रश्मिभिः किरणैः खं सूर्य इव ॥१४॥ शार्ङ्गेण सहितं सव्यं वामं दोर्भुजं शार्ङ्गधन्वनः शौरेर्बिभेद तस्य हस्तात् शार्ङ्गं धनुर्न्यपतत् तदद्भुतमासीत् ॥१५॥ तत्र युधि पश्यतां भूतानां महान् हाहाकार आसीत्। उच्चैर्विनद्याट्टहासं कृत्वा जनार्दनं हरिं सौभराट् शाल्व इदमाह ॥१६॥ हे मूढ नोऽस्माकम् ईक्षतामीक्षमाणानां सतां सख्युः शिशुपालस्य भ्रातुर्भार्या त्वयाहृता इति यत् त्वया प्रमत्तः स सखा मम शिशुपालः सभामध्ये व्यापादितो हतः ॥१७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तं च शाल्वं षोडशभिर्बाणैर्विद्ध्वा खे आकाशे भ्रमत् भ्राम्यमाणं सौभं च शरसन्दोहैरविध्यत्। तत्र दृष्टान्तमाह-खं सूर्य इव रश्मिभिरिति। सुनीलत्वविपुलत्वादिभिः सौभस्याकाशसाम्यम्। अचिन्त्यवेगत्वबाहुल्यादिभिः शराणां रश्मिसादृश्यम्। अयत्नेनैव रश्मिवच्छरजालप्रसारणात् श्रीकृष्णस्य सूर्यतुल्यत्वं बोध्यम् ॥१४॥ शाल्वोऽपि शार्ङ्गधन्वनः कृष्णस्य शार्ङ्गसहितं सव्यं वामं दोर्भुजं बिभेद शरेण विव्याध, ततस्तस्य हस्तात् शार्ङ्गधनुर्न्यपतत्। अभूतपूर्वत्वात् तत्पतनमद्भुतमाश्चर्यकरमासीत् ॥१५॥ तत्र पश्यतां भूतानां महान् हाहाकारशब्दः आसीत्। तदा सौभराट् शाल्वः उच्चैः विनद्य जनार्दनं प्रतीदमाह ॥१६॥ तदुक्तिमेवाह-यदिति द्वाभ्याम्। हे मूढ ! यत् यस्मात् नोऽस्माकमीक्षतां पश्यतामेव सतामस्माकं सख्युः शिशुपालस्य भार्या त्वया हृता, तथा सोऽस्माकं सखा सभामध्ये त्वया व्यापादितः निहतः, तदा स प्रमत्तः अनवहितः अन्यथा त्वया हतो न स्यादित्याशयः ॥१७॥

अन्वितार्थप्रकाशिका

तमिति ॥ तं च शाल्वं षोडशभिर्बाणैर्विद्ध्वा खे आकाशे भ्रमत् भ्राम्यमाणं सौभं च शरसन्दोहैरविध्यत्। यथा सूर्यः खं रश्मिभिर्विध्यति तथा सुनीलत्वविपुलत्वादिभिः सौभस्याकाशोपमा। अचिन्त्यवेगबाहुल्यादिभिः शराणां रश्मिसादृश्यम्। अयत्नेनैव रश्मिवच्छरजालप्रसारणात् श्रीकृष्णस्य सूर्यसाम्यम् ॥१४॥ शाल्व इति ॥ शाल्वोऽपि शार्ङ्गधन्वनः कृष्णस्य शार्ङ्गसहितं सव्यं वामं दोर्भुजं बिभेद शरेण विव्याध। "दक्षिणं दोर्निशाचर" इति रघुवंशे प्रयोगात्। "ककुद्दोषणी" इति भाष्यप्रयोगाच्च दोःशब्दस्य क्लैब्यमपि। ततस्तस्य हस्तात् शार्ङ्गं धनुर्न्यपतत्। अभूतपूर्वत्वात् तत्पतनमद्भुतमाश्चर्यकरमासीत् ॥१५॥ हाहेति ॥ तत्र पश्यतां भूतानां महान् हाहाकारः शब्दः आसीत्। तदा सौभराट् शाल्वः उच्चैः विनद्य जनार्दनं प्रतीदमाह स्म ॥१६॥ यदिति ॥ हे मूढ! यत् यस्मान्नोऽस्माकमीक्षतां पश्यतामेव सताम्। शता आर्षः। सख्युः शिशुपालस्य भार्या त्वया हृता। तथा प्रमत्तः अनवहितः सोऽस्माकं सखा सभामध्ये त्वया व्यापादितः निहतः। वस्तुतः हे अमूढ ! नः सख्युरीक्षमाणस्य सतः अस्माकं चेक्षमाणानांताननादृत्य येन त्वया भार्या स्वजायैव हृता गृहीता तथा प्रमत्तः उन्मत्तचेष्टः स व्यापादितः ॥१७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तं शाल्वं षोडशभिर्बाणैः सौभं च शराणां सन्दोहैः समूहैः श्रीकृष्णसादृश्यं सौभशरवृन्दयोर्गगनकिरणवृन्दाभ्यां सादृश्यं भ्रमणस्य तु न कस्यापि ॥१४॥ सव्यं दोः वामं बाहुम्। बिभेद तताड ॥१५-१६॥ नोऽस्माकं सख्युस्तव भ्रातुः पैतृष्वसेयस्य शिशुपालस्य ईक्षणामस्माकं पश्यतां सतां प्रमत्तः असावधानः स मम सखा सभामध्ये एव व्यापादितो निहतः न तु युद्धे ॥१७

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तं चेति ॥ किञ्च, तं शाल्वम्, षोडशभिः बाणैः, विद्ध्वा, खे आकाशे, भ्रमत् सौभं, च, खमाकाशं, रश्मिभिः, सूर्य इव शरसन्दोहैः, अविध्यत्। सुनीलत्वविपुलत्वादिभिराकाशासम्यं सौभस्य। अचिन्त्यवेगत्वबाहुल्यादिभिः शराणां रश्मिसादृश्यम् अयत्नेनैव रश्मिवच्छरजालप्रसरणात् सूर्यतुल्यः श्रीकृष्णः इत्यवगन्तव्यम् ॥१४॥ शाल्व इति ॥ शाल्वः तु, शार्ङ्गधन्वः श्रीकृष्णस्य शौरेः, सशार्ङ्गशार्ङ्गधनुःसहितं, सव्यं वामम्, दोर्भुजम्, बिभेद विव्याध। ततः, हस्तात्, कृष्णस्य, वामपाणेः सकाशात् शा न्यपतत् तत् अद्भुतमासीत् ॥१५॥ हाहाकार इति ॥ तत्र तत्पश्यतां भूतानां प्राणिनां महान् हाहाकारः आसीत्। सौभराट् शाल्व उच्चैः विनद्य जनार्दनं श्रीकृष्णम् इदम् आह ॥१६॥ तदेवाह द्वाभ्याम्। यदिति। हे मूढ ! यद्यस्मात् नोऽस्माकं सख्युः तव भ्रा

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शिशुपालस्य भार्या भार्यात्वेन स्वीकृता रुक्मिणी त्वया नः ईक्षतां हृता अस्माननादृत्यापहृतेत्यर्थः । सः सखा सोऽस्माकं सखा शिशुपाल इत्यर्थः । सभामध्ये प्रमत्तोऽसावधान एव त्वया व्यापादितः ॥१७॥

कृष्णप्रिया

शक्ति के टुकडे करने के बाद भगवानने शाल्व को सोलः बाण मारे पुनः सौभ विमानको भी जो गगनमें घूम रहा था; असंख्य बाणोसे छिद्रित कर दिया जैसे भगवान सूर्य अपनी किरणों से आकाशको भर देता है ॥१४॥ तदनन्तर शाल्वने भगवान श्रीकृष्ण की वामभुजामें बाण मारा, जिस भुजामें शांग धनुष्य शोभायमान था, इस बाणके प्रहारसे शांग धनुष्य भगवान कृष्ण के हाथ से छूट कर भूमि पर गिर पडा यह एक विलक्षण घटना घट गयी ॥१५॥ जो लोग आकाशसे और पृथ्वी से यह युद्ध देख रहे थे बडे जोर शोरसे हाहाकार पुकारने लगे तब शाल्वने गर्जना करते हुए भगवान श्रीकष्णसे ऐसा कहा कि मूढ तूने हम लोगोंके देखते देखते हमारे भाइ और सखा शिशुपाल की माया को हर लिया और भरी सभामें जब हमारा मित्र शिशुपाल असावधान था तब तुमने उसे मार डाला ॥१६-१७॥

तं त्वाद्य निशितैर्बाणैरपराजितमानिनम् । नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः ॥१८॥

कर्दमक्षमा

यदि, मम, अग्रतः, तिष्ठेः, (तर्हि) अपराजितमानिनम्, तम्, त्वा, अद्य, निशितैः, बाणैः, अपुनरावृत्तिम्, नयामि ॥१८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपराजितोऽहमिति मानिनं मानवन्तम् अपुनरावृत्ति मृत्युं तिष्ठेः स्थास्यसि ॥१८-२२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं सखिहन्तारम् ॥१८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तं न विद्यते पुनरावृत्तिस्तथाभूतं तथा अपराजितः केनाप्यनभिभूतो मानः पूजा तद्वत्तं च त्वां त्वदीयैरेव निशितैर्बाणैर्हेतुभिर्नयामि गच्छामि प्रविशामीत्यर्थः । "नय पय गतौ" किन्तु मद्वाग्यमेव तत्र साधकतममित्याह यदीति ॥१८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यदीत्यधुनैव मद्भयात्किल पलायिष्यस इति भावः ॥१८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१५-२७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तमिति । तुशब्दोऽत्र हेत्वर्थः । तस्मात्तं सख्युर्भार्यापहर्तारं हन्तारं चापराजितमात्मानं मन्यमानं च त्वामपुनरावृत्तं मृत्युं नयाम्यतो युद्धे ममाग्रतस्तिष्ठ ॥१८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अपुनरावृत्ति मरणं यमगृहं वा ॥१८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-२९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हे मूढ ! अपुनरावृत्तिं मृत्युं नयामि प्रापयामि भारतीपक्षे न भवति । मूढो यस्मात्तथाभूत ! न सख्युः भ्रातुस्त्वत्पैतृष्वसेयस शिशुपालस्य ईक्षमाणानामस्माकञ्चेत्यनादरे षष्ठी भार्या लक्ष्मीत्वात् स्वस्त्री हृता गृहीता निशितैर्बाणैः अपराजितश्चासौ मा आदरपात्रश्च तम् अपुनरावृत्तिं मोक्षं नयामि नाययामीत्यर्थः । यद्वा न भवति पुनरावृत्तिः संसारो यस्मात्तं मोक्षदायिनं त नयामि प्राप्नोमीत्यर्थः ॥१८-२०॥

गूढार्थदीपिनी

तं त्वा त्वामद्य अपराजितं मन्यमानम् अपुनरावृत्तिं मृत्युं नेष्यामि यदि मम अग्रतः तिष्ठेः स्थास्यसि । वस्तुतः त्वदीयैरेव बाणैः अपुनरावृत्तिं मोक्षप्रदं त्वां प्राप्स्यामि यदि कृपया ममाग्रतः तिष्ठेः । नास्ति पुनरावृत्तिर्यस्मात्तम् । अपराजितश्चा मानी आदरवांश्च ॥१८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तिष्ठेः स्थास्यसि ॥१८-२२॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

तमेतादृशाधर्मनिरतमपराजित इत्यात्मानं मन्यत इत्यपराजितमानी स इति मानोऽहङ्कारोऽस्यास्तीति वा । यदि ममाग्रतो तिष्ठेस्तर्हि निशितैर्बाणैस्त्वा त्वामपुनरावृत्तिं न विद्यते पुनरावृत्तिस्तस्मात्तं यमलोकं नयामि । हे अपराजित अनिनं प्राणवन्तं मामवा पुनरावृत्ति पुनरावृत्तेरमी अमो गमनमस्यास्तीत्यमी । अम गत्यादिष्विति स्मरणादित्यावृत्त्याऽन्वयेन जयः पङ्कस्तम्भ इत्यनिर्णय वचनमिति शूरस्वभावो द्योत्यते ॥३३॥ बाणगणैरर्दितस्तथाऽऽत्मानं दर्शयन्पुनरात्तशरासनः प्राह ॥३४॥ यस्याति कौतुकं न बले ततो वृथा कत्थसे नस्तत्पौरुषमप्रकाशितमस्ति चेन्नः प्रति प्रकाशय । शूराणां भाषणं यत्तत्फल्गु । अकिञ्चित्करमिति ॥३५॥ स साल्वोऽसृग्रक्तं वमन् चकम्पे ॥३६॥ ततः स्वस्थतानन्तरं साल्वः समुत्पत्यानकदुन्दुभेः शिर उत्कृत्यादायैव पुनः सौभं समाविशत् । अनेनावहानिर्वाहान्मायामतनुतदानव इति भावः सूचित इति ज्ञेयम् । अथ मां पुरुषः कश्चिद् द्वारकानिलयो । त्वरितो रथमारोप्य सौहृदादिव भारतेत्यारभ्य ततो मुहूर्तात्प्रतिलभ्य संज्ञामहं तदा वीर महाविमर्दे । न तत्र सौभं न रिपुं न पश्यामि वृद्धं पितरं चापीत्यन्तेन वनपर्ववचनेनात्र विशेषो ज्ञेयः ॥३७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी-

ततः स्वकर्तव्यमाह-तं त्वेति । निशितैरिति स्वपौरुषख्यापनम् ॥१८॥

श्रीसुबोधिनीसारः

अद्य इदानीं निशितैस्तीक्ष्णैर्बाणैरपराजितमानिनं तं त्वा त्वाम् अपुनरावृत्तिं मृत्युं नयामि प्रापयामि यदि तिष्ठेस्तदा ॥१८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तुशब्दो हेत्वर्थकः । तस्मादात्मानमपराजितं मन्यमानं तं सख्युर्हन्तारमद्य निशितैस्तीक्ष्णैर्बाणैरपुनरावृत्तिं मृत्युं यदि युद्धे ममाग्रतस्तिष्ठेः स्थास्यसि ॥१८॥

अन्वितार्थप्रकाशिका

तमिति ॥ तु हेतौ । तस्मादात्मानमपराजितं अपरैरजितोऽहमिति मन्यमानं तं सख्युर्हन्तारं त्वा त्वामद्य निशितैस्तीक्ष्णैर्बाणैरपुनरावृत्तिं मृत्युं नयामि । यदि युद्धे ममाग्रतस्तिष्ठेः स्थास्यसि । वस्तुतः अपराजितश्चासौ मानी पूजावांश्च तं नास्ति पुनरावृत्तिर्यस्मात् तं त्वां नयामि प्राप्स्यामि यदि मद्भाग्येनाग्रतः तिष्ठेः ॥१८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यदि ममाग्रतस्तिष्ठेः स्थास्यसि तर्हि त्वाम् अपुनरावृत्तिं मरणं नयामि प्रापयामि ॥१८-१९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ ततः अपराजितमानिनं तं मत्सख्युर्भार्याहर्तारं त्वा त्वां युद्धे यदि मम अग्रतः तिष्ठेः तर्हि अद्य निशितैः बाणैः अपुनरावृत्तिं मृत्युं नयामि । त्वां मृत्युना योजयिष्यामीत्यर्थः ॥१८॥

कृष्णप्रिया

अच्छी तरहसे मैं जानता हुं कि आप अपने को अजय मानते है । यदि मेरे सामने आज ठहर गया तो म आज तुमे अपने तीव्र बाणोंसे वहां पहुंचा दुंगा जहां से फिर कोई लौटकर नही आया ॥१८॥

श्रीभगवानुवाच

वृथा त्वं कत्थसे मन्द न [1]पश्यस्यन्तिकेऽन्तकम् । पौरुषं [2]दर्शयन्ति स्म शूरा न बहुभाषिणः ॥१९॥
इत्युक्त्वा भगवाञ्छाल्वं गदया भीमवेगया । तताड जत्रौ संरब्धः स चकम्पे वमन्नसृक् ॥२०॥
[3]गदायां सन्निवृत्तायां शाल्वस्त्वन्तरधीयत । ततो मुहूर्त आगत्य पुरुषः शिरसाच्युतम् ।
देवक्या प्रहितोऽस्मीति नत्वा प्राह वचो रुदन् ॥२१॥
कृष्ण कृष्ण महाबाहो पिता ते पितृवत्सल । बद्ध्वापनीतः शाल्वेन सौनिकेन यथा पशुः ॥२२॥
निशम्य विप्रियं कृष्णो मानुषीं प्रकृतिं गतः । विमनस्को घृणी स्नेहाद्बभाषे प्राकृतो यथा ॥२३॥
कथं राममसम्भ्रान्तं जित्वाजेयं सुरासुरैः । शाल्वेनाल्पीयसा नीतः पिता मे बलवान् विधिः ॥२४॥

कर्दमक्षमा

हे मन्द ! त्वम्, वृथा, कत्थसे, अन्तिके, अन्तकम्, न, पश्यसि, शूराः, पौरुषम्, दर्शयन्ति, बहुभाषिणः, न (भवन्ति) ॥१९॥ इति, उक्त्वा, संरब्धः, भगवान्, भीमवेगया, गदया, शाल्वम्, जत्रौ, तताड, सः, असृक्, वमन्, चकम्पे ॥२०॥ गदायाम्, सन्निवृत्तायाम्, शाल्वः, तु, अन्तरधीयत, ततः, मुहूर्ते, पुरुषः, आगत्य, शिरसा, अच्युतम्, नत्वा, रुदन्, वचः, प्राह, देवक्या, प्रहितः, अस्मि ॥२१॥ हे कृष्ण ! हे कृष्ण ! हे महाबाहो ! हे पितृवत्सल ! सौनिकेन, यथा, पशुः, (तथा) ते, पिता, शाल्वेन, बद्ध्वा, अपनीतः ॥२२॥ कृष्णः, विप्रियम्, वचः, निशम्य, मानुषीम्, प्रवृत्तिम्, गतः, विमनस्कः, स्नेहात्, घृणी, यथा, प्राकृतः, (तथा) बभाषे ॥२३॥ सुरासुरैः, अजेयम्, असम्भ्रान्तम्, रामम्, जित्वा, अल्पीयसा, शाल्वेन, मे, पिता, नीतः, विधिः, बलवान् ॥२४॥

---

[1] न यस्यास्त्यतिकौतुकम्-विज. । [2] पौरुषं दर्शय त्वं नः शूराणां फल्गु भाषणम्-विज. । [3] एतदारभ्य षट् श्लोका न दृश्यन्ते (२१-२६)

श्रीधरस्वामिविरचिता भावार्थदीपिका

॥१८-२२॥

घृणी दयावान् ॥२३-२५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्तकं तवान्तकर्तारं मामित्यर्थः ॥१९॥ स शाल्वः ॥२०॥ ततोऽन्तर्द्धानानन्तरम् । मुहूर्ते मुहूर्तमिते काले गते सति। पुरुषः द्वारकास्थपुरुषः ॥२१-२२॥ प्रकृतिं स्वभावम् ॥२३॥ अहो विधिर्दैवम् ॥२४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कत्थसे आत्मानं श्लाघसे तच्च युक्तमित्याह-मन्द हे निर्बुद्धे ! मन्दत्वमेवाह, नेति । आसन्नमृत्युत्वादीदृशं कथनं युक्तमेवेति भावः । शूरोऽपि न खलु भवसीत्याह-पौरुषमिति । स्मेति प्रसिद्धमेवैतदित्यर्थः ॥१९॥ स साल्वः ॥२०॥ गदायामित्यर्धकम् । सम्यक् निवृत्तायां निवृत्तः पुनः भगवत्करपङ्कजं गतायां मुहूर्ते जाते सतीत्यर्थः । मुहूर्तादिति क्वचित् पुरुषः श्रीवसुदेवस्य प्रसिद्धभृत्यविशेषाकारः वचस्तत्सन्देशं गीर्देवीमते अप्रहित इतिच्छेदः वचो यत्किञ्चिद्वचनमात्रं न तु सत्यमित्यर्थः ॥२१॥ हे कृष्ण ! एतत्संज्ञया प्रसिद्ध ! वीप्सा त्रासानुकारात् हे महाबाहो परमवीरेत्यर्थः । इति त्वत्पितुः शत्रुणा बद्ध्वाऽऽनयनं परमानुचितमिति भावः । किञ्च हे पितृवत्सलेति शोकं जनयति अपनीतः अपमान्य अपकारार्थं वा नीत इत्यर्थः । न च त्वत्पिता आत्मानं मोचयितुं शक्त इत्यादिकं दृष्टान्तेन बोधयन् शोकमधिकं जनयति । शौनिकेनेति । पशुघातिना व्याधेनेत्यर्थः । गीर्देवीमते अपितेति छेदः। पितृसदृशः कश्चिन्मायानिर्मित इत्यर्थः ॥२२॥ कृष्णः स्वयं भगवानपि प्रकृतिं स्वभावं विमनस्कः शोकाकुलः सन् घृणी पितरि कृपावान् अतः स्नेहात् प्राकृतवत् स्वयं स्वस्मिन्नेव बभाषे ॥२३॥ असम्भ्रान्तम् अप्रमत्तम् अल्पीयसा तदपेक्षयातिक्षुद्रबलेनापि अहो दुर्घटमपि विधातुरिच्छया घटतेति शोकादाह-विधिर्बलवानिति ॥२४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कत्थसे आत्मानं श्लाघसे गर्वेण बहु जल्पसि वा । तच्च युक्तमेवेत्याह-मन्द हे निर्बुद्धे ! दुष्टेति वा । मन्दत्वमेवाह-नेति । आसन्नं मृत्युत्वादीदृशं कत्थनं युक्तमेवेति भावः । शूरोऽपि त्वं न खलु भवसीत्याह-पौरुषमिति । स्मेति प्रसिद्धमेवैतदित्यर्थः ॥१९॥ भगवान् सर्वशक्तिमान् भीमो भयङ्करो वेगो निपातो यस्यास्तया संरब्धः क्रुद्धः सन् तताड एतदपि महाविरुद्धं तेन तथा तादृश-ताडनेन सद्य एव मरणसम्भवात् स शाल्वः ॥२०॥ सम्यक् निवृत्तायां निवृत्त्य पुनः श्रीभगवद्धस्ताब्जं गतायां किं वा गदायां तत्प्रहारे सन्निवृत्तायां सत्यां तु मुहूर्ते सति एकमुहूर्तमध्य एवेत्यर्थः । पञ्चम्यन्तपाठे पाठान्तरे तदनन्तरं शिरसा नत्वा वचः सगद्गदं प्रणयेनाह ॥२१॥ हे कृष्णसंज्ञ ! वीप्सा प्रासानुकारात् हे महानुबाहो इति त्वत्पितुः शत्रुणा बद्ध्वा नयनं परमानुचितमिति भावः । किञ्च हे पितृवत्सलेति शोकं सञ्जनयति । उप स्वसमीपे उपरि वा नीतः अपनीत इति पाठो वा । अपमान्य अपकारार्थं वा नीत इत्यर्थः । न च त्वत्पिता आत्मानं मोचयितुं शक्य इत्यादिकं दृष्टान्तेन बोधयन् शोकमधिकं जनयति-सौनिकेनेति । पशुघातिना व्याधेनेत्यर्थः । कृष्णः साक्षाद्भगवानपि प्रकृतिं स्वभावं विमनस्कः शोकाकुलः सन् यतो घृणी पितरि कृपावान् अतः स्नेहात् प्राकृतवत् स्वयं स्वस्मिन्नेव दूतं प्रति वा बभाषे ॥२३॥ असम्भ्रान्तमप्रमत्तम् अल्पीयसा अधमेनापि अहो दुर्घटमपि विधातुरिच्छया घटेतेति शोकादाह-विधिर्बलवानिति । एतच्चाज्ञानादिकं परमं विरुद्धमेव तच्चाग्रे स्वयमेव भगवता श्रीबादरायणिना वक्ष्यते ॥२४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१५-२७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थमुक्तः प्राह-भगवान् वृथेति । हे मन्द ! विकत्थसे प्रगल्भं भाषसे अन्तिके समनन्तरे प्राप्तं मृत्युं न पश्य नालोकयसीत्यर्थः । किञ्च शूराः केवलं पौरुषमेव दर्शयन्ति न तु बहु यथा तथा भाषन्त इति तथा ॥१९॥ इतीति । भीमो

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

वेगो यस्यास्तया गदया जत्रौ स्कन्धमूले तताड ताडयामास स च साल्वः असृग्रुधिरं वमन् उद्गिरन् चकम्पे कम्पितवान् ॥२०॥ गदायामिति। सन्निवृत्तायां श्रीकृष्णेनापनीतायां सत्यामित्यर्थः। अन्तरधीयत अन्तर्हितवान् तत अन्तर्धानानन्तरं कश्चित् साल्वप्रेषितः पुरुषः आगत्याच्युतं शिरसा नत्वा प्रणम्य रुदन् वचो वाक्यं प्राह, किमित्यत आह-देवक्या प्रहितः प्रेषितोऽस्मीति ॥२१॥ किञ्च, हे पितृवत्सल ! ते तव पिता वसुदेवः साल्वेन बद्ध्वा आनीतः यथा सौनिकेन पशुमारकेण पशुरमनीयते तद्वत् ॥२२॥ निशम्येति। मानुषीं प्रकृतिं स्वभावम् अनुगतः प्राप्तः घृणी दयावानत एव विमनस्को दुःखितमनाः स्नेहात्पितृविषयकाद्बभाषे यथा प्राकृतः पुरुषस्तद्वत् ॥२३॥ भाषणमेवाह-कथमिति। सुरासुरैरपि जेतुमशक्यं तं प्रसिद्धं रामं कथं जित्वा क्षुद्रेण साल्वेन मम पिता आनीतः विधिर्दैवं बलवानहो ॥२४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

यस्य तवातिकौतुकमिति व्याख्यातं वीर्यं नास्ति स त्वं वृथा कत्थसे पौरुषम् अस्ति चेद्दर्शय शूराणां च भाषणं फल्गु मितं वीर्यप्रकटनं बह्वित्यर्थः। यद्वा शूराणां पौरुषं दर्शय भाषणं फल्गु तुच्छं विकत्थनमित्यर्थः ॥१९-२६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-२९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-२२॥

अद्यापि (३०श-श्लो०) "एवं वदन्ति राजर्षे ! मुनयः केचनान्विताः" इति वक्ष्यति, तथापि श्रुतिकटुदोषोऽसह्य एव समाधीयते-निशम्येत्यादि। अमानुषीं प्रकृतिं गतः, विमनस्को विशिष्टमनाः स्नेहादपत्यघृणी अकातरश्चेदप्राकृतो यथा यथावद्बभाषेत्यर्थः ॥२३॥ कथं राममसम्भ्रान्तमित्यादि। नैवेदमित्यात्मनः सर्वज्ञताप्रतिपादनम्, बलवान् विधिरिति पितृविशेषणम्, स च निर्बलो न भवति, विधिर्विधानकर्ता, यथा कृमयः कार्यं विधाता (?) अतो मायैवेयम् ॥२४॥ ॥२५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

॥१८-२०॥ परमतमाह-गदायां सन्निवृत्तायामित्यारभ्य यावत् स्वाप्नं यथेति ॥२१-२२॥ घृणी दयावान् ॥२३-२५॥

गूढार्थदीपिनी

कत्थसे श्लाघसे। अन्तिके शिरसि अन्तकं मृत्युं न पश्यसि। पौरुषं पुरुषार्थं प्रदर्शयन्ति। बहुभाषिणः आत्मश्लाघिनः नैवेत्यर्थः स्म एवार्थे ॥१९॥ जत्रौ कण्ठमूले तिर्यगस्थिनि तताड संरब्धः क्रुद्धः सन् स शाल्वः असृक् रक्तं वमन् उद्गिरन् चकम्पे। न सृजति शरीरमिति असृक् इति विग्रहः। 'टुवम्' उद्गिरणे धातुः। भीमवेगया तीव्रवेगया ॥२०॥ गदायामिति सार्धम्। मुहूर्ते घटिकाद्वये व्यतीते सति। नत्वा रुदन् सन् वचः प्राह अहं देवक्या प्रहितोऽस्मीति। देवीमतेऽप्रहित इतिच्छेदः ॥२१॥ सौनिकेन पशुघातिना यथा पशुः अपनीयते तथा ॥२२॥ विप्रियं निशम्यापि अमानुषीमैश्वरीमेव प्रकृतिं स्थितः। विशिष्टं सर्वज्ञं मनो यस्य। अप्राकृतः यथा यथावत्। घृणी दयावान् ॥२३॥ मे पिता कथं नीतः नैव नीतः। विधिरपि मत्पुरतः अबलवान् अकिञ्चित्करः ॥२४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

॥१८-२२॥ घृणा दयास्यास्तीति स तथा ॥२३-२५॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

(इतः आरभ्य श्रीसत्यधर्मकृतायां श्रीभागवतटिप्पण्यां षट् श्लोका न दृश्यन्ते यथा विजयध्वजीये)

---

१. जायते-श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक.। २. यथा-वीर.। ३. पश्तोन्मादनं-विज. ; पश्य उन्मादनं-वीर.। ४. यैत्ताः-विज।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

भगवांस्तु वाक्येन शब्दातिक्रमं निवारयति–वृथा त्वं कत्थस इति। अर्थस्य बाधितत्वादत एव मन्दत्वं प्रत्युत विपरीतं तवास्तीत्यत आह–न पश्यसीति। अन्तिके मच्चाग्रे तवान्तकोऽस्तीति इदमप्ययुक्तमिति जयापजययोः अव्यवस्थेति शूराणां स्वप्रशंसाकथनमयुक्तमिति तमुपदिशति–पौरुषं दर्शयन्ति स्मेति। पौरुषं पुरुषशरीरबलम्। शूराः क्षत्रियाः। ब्राह्मणानां तु वाग्बलमेव भवतीति तद्व्युदासः ॥१९॥ एवमुक्त्वा स्ववाक्यसत्यत्वाय भगवान् स्वपौरुषं दर्शयामास–इत्युक्त्वेति। यतो भगवान् समर्थः भीमवेगयेत्यलौकिकं सामर्थ्यं निराकृतम्। जत्रौ कण्ठमालास्थिनि। संरब्धः क्रोधेन क्रियाऽऽवेशमात्रं वा। ततः स शाल्वः असृग् वमन् चकम्पे। ततस्तस्य लोहितं दृष्ट्वा कृतकार्या गदा निवृत्ता तस्यां निवृत्तायां प्रहारान्तरेण मरणं भविष्यतीति निश्चित्य असुरत्वाद्भगवद्रूप मायां प्रार्थयितुमन्तरधीयत। तुशब्देन महादेवपक्षो निवारितः ॥२०॥ ततो भगवद्रूपमायाकृत्यमाह–ततो मुहूर्त इति। मुहूर्तानन्तरं कश्चित्पुरुषः समागतः। इदं मानसनिराकरणम्, तेन मनसा प्रार्थितेनेश्वरेण क्रियत इति भगवतोऽपि मनस्येव काचित् प्रतिभा सैव स पुरुषो मायिकः तथापि भगवदीय इति भगवत्समीपागमनेऽपि न तस्य नाशः। सोऽपि व्यामोहार्थमच्युतमव्यामुग्धं देवक्या अहं प्रहित इति आत्मानं निवेद्य पश्चाद्भगवन्तं नत्वा रुदन् वचः प्राह। देवक्यन्तरङ्गत्वख्यापनाय रोदनम् ॥२१॥ तस्य वाक्यं कृष्ण कृष्णेति। दुःखे वीप्सा। महाबाहो इति क्रियाशक्तिसामर्थ्यम्। वाच्यमाह–पिता त इति। पितृवत्सलेति। अभिमानार्थं सम्बोधनम्। बद्ध्वा अपनीत इति महत्यपमानना। स्वयमेव त्यक्ष्यतीति शङ्काऽभावाय दृष्टान्तमाह–सौनिकेनेति। सूनायां प्रसिद्धः मारक एव अतो मारणार्थं नीतवानित्यर्थः ॥२२॥ निराकरणार्थं भगवति भातमित्याह–निशम्य विप्रियमिति। मानुषीं मनुष्यस्वभावमङ्गीकृतवान् ततस्तत्स्वभावात् विमनस्कः घृणी पितरि कृपावांश्च। ततः स्नेहाद्वक्ष्यमाणं बभाषे ॥२३॥ 'मनः पूर्वं वागुत्तररूपम्' इति श्रुतेः 'तस्य यजुरेव शिरः'। इति मानसपुरुषस्य शब्दप्राकृतिकत्वात् शोकशब्दाभावे मानसपीडा पूर्णा नोक्ता भवतीति शब्दोऽपि निरूप्यते–कथं राममिति। रामो रक्षार्थं नियुक्तः स चाऽसम्भ्रान्तः अतिसावधानः समयविशेषात्। अतिक्रमस्तु तस्याशक्य इत्याह–सुरासुरैरजेयमिति। अयं सर्वोत्तमो भविष्यतीत्याशङ्क्याह–शाल्वेनाल्पीयसा नीत इति। मे पितेति। भाग्यं वा तस्य कथं रक्षकं जातमित्यर्थः। सर्वातिक्रमस्य दृष्टत्वात् नित्येच्छो विधिरेव बलवान् ॥२४॥

श्रीसुबोधिनीसारः

कृष्णोक्तिः। हे मन्द ! त्वं वृथा कत्थसे आत्मानं श्लाघसे। अन्तिके समीपेऽन्तकं त्वन्मृत्युरूपं मां न पश्यसि। शूराः पौरुषं बलं दर्शयन्ति न बहुवादिनः स्म प्रसिद्धम् ॥१९॥ इत्युक्त्वा भीमो भयङ्करो वेगो यस्यास्तया गदया जत्रौ चिबुकाधः तताड जघान शाल्वं भगवान्। असृक् रुधिरं वमन् उद्गिरन् स च शाल्वः चकम्पे ॥२०॥ गदायाम् ॥ उपरतायां सत्यां शाल्वोऽन्तर्धानं गतोऽभूत्। ततोऽन्तर्धानसमयान्मुहूर्ते धटीद्वये पुरुषो मायिक आगत्य शिरसाऽच्युतं कृष्णं नत्वा प्रणम्य देवक्या प्रहितः प्रेषितोऽस्मीति रुदन् वचः प्राह ॥२१॥ हे कृष्ण कृष्ण हे महाबाहो हे पितृवत्सल शाल्वेन ते पिता वसुदेवो बद्ध्वाऽपनीतोऽन्यत्र नीतः। सौनिकेन वधकेन पशुरिव ॥२२॥ विप्रियं निशम्य्यं श्रुत्वा मानुषीं प्रकृतिं स्वभावं गतः प्राप्तः कृष्णो विमनस्कः "उदासीनस्तु निर्विण्णो विमनस्कः स उच्यते" धृणी कृपालुः स्नेहात् हेतोः बभाषे प्राकृतः पुरुष इव ॥२३॥ सुरासुरैर्देवदानवैरजेयं जेतुमशक्यम् असम्भ्रान्तं निर्भयमव्यग्रं रामं जित्वाऽल्पीसाऽतितुच्छेन शाल्वेन मे मम पिता नीतः अहो विधिर्बलवान् दैवं हि बलवत्तरम् ॥२४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अद्य इदानीं निशितैस्तीक्ष्णैर्बाणैरपराजितमानिनं तं त्वा त्वाम् अपुनरावृत्तिं मृत्युं नयामि प्रापयामि यदि ममाग्रतः तिष्ठसि ॥१८॥ इत्थमुक्तो भगवानाह–वृथेति। हे मन्द ! वृथैव मिथ्यैव त्वं विकत्थसे प्रगल्भं भाषसे, अन्तिके समीपे समनन्तरं स्वमृत्युं न पश्यसि। मन्दबुद्धित्वमेव स्पष्टयति–ये शूरास्ते बहुभाषिणः आत्मश्लाघिनो न भवन्ति, किन्तु इह युद्धे स्वपौरुषं दर्शयन्ति। त्वं त्वात्मानं बहु श्लाघसे, अतो मन्द इत्याशयः ॥१९॥ भगवानित्युक्त्वा भीमो भयङ्करः वेगो यस्यास्तया गदया कण्ठमूले शाल्वं तताड। तत्र हेतुमाह–संरब्ध इति। क्रोधाविष्ट इत्यर्थः। स च शाल्वः असृक् रुधिरं वमन् उद्गिरन् चकम्पे ॥२०॥ गदायां सन्निवृत्तायां कृष्णेनापनीतायां सत्यां शाल्वस्त्वन्तरधीयत। ततोऽन्तर्धानानन्तरं मुहूर्तमात्रानन्तरं कश्चित् शाल्वप्रेषितः आगत्य अच्युतं शिरसा नत्वा रुदन् 'अहं देवक्या प्रहितोऽस्मि' इति वचः प्राहेत्यन्वयः ॥२१॥ 'किमर्थं प्रेषितोऽसि' इत्यपेक्षायाम्

कृष्ण कृ
पशुघातिना यथा
इत्याशयेन सम्बोध
दुःखितमनाः कृष
भाषणमेवाह–कथ
तुच्छेन शाल्वेन मम

वृथेति ॥
शूरास्ते बहुभाषिणः
इत्युक्त्वा भीमो भय
वमन् उद्गिरन् चकम्
धीडो लङ्। ततोऽन्त
आगत्य अच्युतं शिरस
हे कृष्ण कृष्ण सम्भ्र
पशुघातिना पशुर्हनना
प्राकृतपुरुष इव स्नेहा
बभाषे। वस्तुतः विप्रि
यथावद्बभाषे ॥२३॥ व
अल्पीयसा तुच्छेन शाल

जत्रौ कण्ठबा

इत्थं तदुक्तो
सम्प्राप्तमिति शेषः। अन
पौरुषं पराक्रमं दर्शयन्ति
आसुरभावोपेतवाक्यमाश्र
। स च स शाल्वोऽपि असृ
सत्यां शाल्वस्तु अन्तरधीय
अस्मि इति रुदन् वचो वा
पशुः यथा तथा शाल्वेन बद्
सम्प्राप्तः। अत एव घृणी
बभाषे ॥२३॥ भाषणमेवाह
मम पिता कथम् आनीतः।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कृष्ण कृष्णेति । द्विरुक्तिः सम्भ्रमसूचिका । ते तव पिता वसुदेवः शाल्वेन बद्ध्वा नीतः । तत्र दृष्टान्तमाह–सौनिकेन पशुघातिना यथा पशुर्हननार्थं नीयते तथेति । तद्विमोचनं तवोचितम् इत्याशयेन सम्बोधयति–पितृवत्सलेति । सामर्थ्यं तु तवास्त्येव इत्याशयेन सम्बोधयति–महाबाहो इति ॥२२॥ विप्रियं तद्वाक्यं निशम्य प्राकृतपुरुष इव स्नेहात् वसुदेवविषयकात् हेतोर्विमनस्को दुःखितमनाः कृष्णः बभाषे इत्यन्वयः । दुःखे हेतुः–घृणीति । तत्रैव हेत्वन्तरमाह–मानुषीं प्रकृतिं स्वभावमनुगत इति ॥२३॥ भाषणमेवाह–कथमिति । सुरासुरैरपि अजेयं जेतुमशक्यमसम्भ्रान्तं पुरपालकतया स्थापितत्वात् सावधानं रामं जित्वा अल्पीयसा तुच्छेन शाल्वेन मम पिता कथं नीतः ? अतो विधिर्दैवं बलवान् ॥२४॥

अन्वितार्थप्रकाशिका

वृथेति ॥ हे मन्द ! वृथैव मिथ्यैव त्वं विकत्थसे प्रगल्भं भाषसे । अन्तिके समीपे समनन्तरे प्राप्तं स्वमृत्युं न पश्यसि । ये शूरास्ते बहुभाषिणः आत्मश्लाघिनो न भवन्ति । किन्तु इह युद्धे स्वपौरुषमेव दर्शयन्ति ॥१९॥ इतीति ॥ संरब्धः क्रुद्धो भगवान् इत्युक्त्वा भीमो भयङ्करः वेगो यस्यास्तया गदया जत्रौ कण्ठमूले शाल्वं तताड । णिजभाव आर्षः । स च शाल्वः असृक् रुधिरं वमन् उद्गिरन् चकम्पे ॥२०॥ गदायामिति सार्धम् ॥ गदायां सन्निवृत्तायां निवृत्य भगवद्धस्तं गतायां सत्यां शाल्वस्त्वन्तरधीयत । धीङे लङ्। ततोऽन्तर्धानानन्तरं मुहूर्ते गते सति । मुहूर्तादिति क्वचित् पाठः । कश्चित् शाल्वप्रेषितः वसुदेवभृत्यरूपधरः पुरुष आगत्य अच्युतं शिरसा नत्वा रुदन् 'अहं देवक्या प्रहितोऽस्मी'ति वचः प्राह स्म । वस्तुतस्तु अप्रहित इतिच्छेदः ॥२१॥ कृष्णेति । हे कृष्ण कृष्ण सम्भ्रमे द्विरुक्तिः । हे महाबाहो हे पितृवत्सल ! ते तव पिता वसुदेवः शाल्वेन बद्ध्वा नीतः । यथा सौनिकेन पशुघातिना पशुर्हननार्थं नीयते तथ । वस्तुतः अपिता पितृसदृशो मायानिर्मित इत्यर्थः ॥२२॥ निशम्येति ॥ विप्रियं तद्वाक्यं निशम्य प्राकृतपुरुष इव स्नेहात् वसुदेवविषयकात् हेतोः मानुषीं प्रकृतिं स्वभावमनुगतः घृणी दयावान् विमनस्को दुःखितमनाः कृष्णः बभाषे। वस्तुतः विप्रियं निशम्यापि अप्राकृतिमैश्वरीमेव प्रकृतिं गतः अप्राकृतः विशिष्टं श्रेष्ठं मनो यस्य सः महामनाः कृष्णः यथा यथावद्बभाषे ॥२३॥ कथमिति ॥ सुरासुरैरपि अजेयं जेतुमशक्यमसम्भ्रान्तं पुरपालकतया स्थापितत्वात् सावधानं रामं जित्वा अल्पीयसा तुच्छेन शाल्वेन मम पिता कथं नीतः । अतो विधिर्दैवं बलवान् ॥२४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जत्रौ कण्ठबाह्वन्तरास्थिनि । स शाल्वः ॥२०-२२॥ मानुषीं प्रकृतिं गतः मानुषभावं प्राप्तः अतोऽघृणी दयालुः ॥२३-२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थं तदुक्तो भगवान् प्राह वृथेति । हे मन्द ! त्वं वृथा कत्थसे प्रगल्भं भाषसे । अत्र हेतुमाह । अन्तिके स्वसमीपे सम्प्राप्तमिति शेषः । अन्तकं मृत्युं न पश्यसि । अन्तिकवर्तिनो मृत्योरनवेक्षणमेव विकत्थनहेतुरिति भावः । किञ्च शूराः केवलं पौरुषं पराक्रमं दर्शयन्ति एव, न तु बहुभाषिणः । त्वद्वद्वृथा बहुभाषणकर्तारो न भवन्त्येवेत्यर्थः ॥१९॥ इतीति ॥ इति उक्त्वा संरब्ध असुरभावोपेतवाक्यमाश्रुत्य कोपाविष्टः भगवान् शाल्वं भीमो भयङ्करो वेगो यस्यास्तया गदया जत्रौ कण्ठमूले तताड ताडयामास ।स च स शाल्वोऽपि असृग्रुधिरं वमन्नुद्गिरन् सन् चकम्पे कम्पितवान् ॥२०॥ गदायामिति ॥ गदायां सन्निवृत्तायां प्रहृत्य गदायामुपात्तायां सत्यां शाल्वस्तु अन्तरधीयत । ततः मुहूर्ते व्यतीते पुरुषः शाल्वप्रेषितः कश्चित् पुमान् आगत्य शिरसा अच्युतं नत्वा देवक्या प्रहितः अस्मि इति रुदन् वचो वाक्यं प्राह ॥२१॥ कृष्णेति ॥ हे कृष्ण हे कृष्ण हे महाबाहो हे पितृवत्सल ! ते तव पिता वसुदेवः शौनिकेन पशुः यथा तथा शाल्वेन बद्ध्वा अपनीत आनीतः ॥२२॥ निशम्येति ॥ तत् विप्रियं निशम्य कृष्णः मानुषीं प्रकृतिं गतः मनुष्यनाट्यनाटनं सम्प्राप्तः । अत एव घृणी दयावान् अत एव विमनस्को दुःखितमनाः सन् प्राकृतः यथा तथा स्नेहात् पितृविषयकं स्नेहमालम्ब्य बभाषे ॥२३॥ भाषणमेवाह कथमिति । सुरासुरैः अपि अजेयं जेतुमशक्यम् असम्भ्रान्तं रामं जित्वा अल्पीयसा क्षुद्रेण शाल्वेन मे मम पिता कथम् आनीतः । अत्र विधिर्दैवमेव बलवान् ॥२४॥

कृष्णप्रिया

यह सुनकर भगवान श्रीकष्णने हास्य कर कहा अरे मन्द तू व्यृथ ही बकवाद कर रहा है। तुझे पता नहीं कि तेरे मस्तक पर मृत्यु सवार है। शूरवीर पुरूष व्यर्थ के बकवाद नहीं करते, लेकिन अपनी वीरता ही दिखलाया करते है ॥१९॥ ऐसा कह कर भगवान कृष्णचन्द्रने कुद्ध होकर अपनी उग्र वेगिली और भयानक गदा से शाल्व के जत्रु पर उग्र प्रहार किया। इस प्रहारसे शाल्व रुधिर उगलता हुआ कांपने लगा ॥२०॥ जब यह कौमद की गदा भगवान श्रीकष्ण के पास लौट कर आयी तब शाल्व अन्तर्हित हो गया। तदनन्तर दो घडी गुजरते हुअे एक मनुष्यने भगवान कृष्णके समाप आकर उनको मस्तक नमाकर नमस्कार किया और रूदन करता हुआ बोला कि मुजे पूज्य मातृचरण देवकीजीने आपके समीप भेजा है ॥२१॥ श्रीमातृचरणोने कहा है कि पिताजी के ओर अत्यन्त भक्ति रखने वाले हे महाबहु श्रीकष्ण ! शाल्व आपके पिताजी को उसी तरह बांधके ले गया है जेसे कोइ सखा पशुको बांधकर ले जाय ॥२२॥ अैसे अमंगल समाचार सुनकर भगवान श्रीकृष्ण साधारण मनुष्य के समान बन गये उनके मुख पर कुछ औदासिन्य छा गया। भगवान कृष्ण सामान्य पुरुष के समान अत्यन्त करूणा से एवं प्रेमसे कहने लगे ॥२३॥ आश्चर्यकी बात है शेषावतार बलभद्रजी भैया को सुर अथवा असुर कोईभी नहि जीत सकते और श्रीदाउजी सतत सावधान रहते है जब शाल्वका पुरुषातन तो अतिशय स्वल्प है। उसने बलभद्रजी को कैसे जीत लिये और वह कैसे मेरे पितृचरणको बांधकर ले गया। सत्य बात है के विधि बहुत बलवान है ॥२४॥

इति ब्रुवाणो गोविन्दे सौभराट् प्रत्युपस्थितः। वसुदेवमिवानीय कृष्णं चेदमुवाच [1]सः ॥२५॥
एष ते जनिता [2]तातो यदर्थमिह जीवसि। वधिष्ये वीक्षतस्तेऽमुमीशश्चेत् पाहि बालिश ॥२६॥
[3]एवं निर्भर्त्य मायावी खड्गेनानकदुन्दुभेः। [4]उत्कृत्य शिर आदाय स्वस्थं सौभं समाविशत् ॥२७॥
ततो [5]मुहूर्तं प्रकृतावुपप्लुतः स्वबोध आस्ते स्वजनानुषङ्गतः।
महानुभावस्तदबुद्ध्यदासुरीं मायां स शाल्वप्रसृतां मयोदिताम् ॥२८॥

कर्दमक्षमा

गोविन्दे, इति ब्रुवाणे, सौभराट्, वसुदेवम्, इव, (पुरुषम्) आनीय, प्रत्युपस्थितः, सः, च, कृष्णम्, इदम्, उवाच ॥२५॥ यद्, अर्थम्, इह, जीवसि, एषः, ते, तातः, जनिता, हे बालिश ! ते, वीक्षतः, विधष्ये, ईशः, चेत्, पाहि ॥२६॥ एवम्, निर्भर्त्स्य, मायावी, आनकदुन्दुभेः, शिरः, खड्गेन, उत्कृत्य, खस्थम्, सौभम्, समाविशत् ॥२७॥ ततः, स्वजनानुषङ्गतः, मुहूर्तम्, प्रकृतौ, उपप्लुतः, स्वबोधे, आस्ते, महानुभावः, सः, मयोदिताम्, शाल्वप्रसूताम्, तदासुरीम्, मायाम्, अबुध्यत ॥२८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

जनिता जनयिता ईशश्चेच्छक्तश्चेत् ॥२६-२७॥ स्वबोधः स्वतस्सिद्धज्ञानवानपि स्वजनस्नेहतः प्रकृतौ मनुष्यस्वभावे उप निमग्न आस्ते अतिष्ठत् ततस्तत्सर्वमासुरीं मायामबुध्यत् मायेयमिति ज्ञातवान् ॥२८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इदं वक्ष्यमाणम् ॥२५॥ यदर्थं पितृनिमित्तम्। पितरि मृते त्वमपी मरिष्यसीति वृद्धवसुदेवकृपया त्वां न मारयामि त्वस्मिन्पुनस्त्वामप्यहं मारयिष्यामीति भावः ॥२६॥ एवमुक्तरीत्या निर्भर्त्स्य कदुक्त्वा। उत्कृत्य छित्त्वा ॥२७॥ वसुदेवशिरश्छेदोत्तरम्। स शाल्वः। तथा च श्रुतिः – "यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु ॥ मयेत्सा

---

१. मुवाच ह-वीर.। २. नीतो-च पु टी.। २. ततः शाल्वः समुत्पत्य खड्गेनानकदुन्दभेः। ४. उत्पाट्य-जीव.। ५. मुहुर्तात्प्रकृतावुपस्थतस्तत्रानुतिष्ठत्स्वजनानुसङ्गतः-विज.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से" इति श्रुतिसिद्धोऽयमर्थः । तथा हि-हे इन्द्र तन्वा वावृधानः स्वरूपेण भृशं वर्द्धमानस्त्वं बलानि वीर्याणि वक्रमलक्षणानि अचरः अकृतेति यत्स्वजनेषु प्रब्रुवाणः व्याकुर्वाणो वर्तस इति शेषः ॥ तस्मात्स्वभावरहस्यं स्वजना जानन्तीत्यर्थः । शाल्वादिशत्रुणा क्रियमाणानि यानि युद्धान्याहुः । पुराणादावेतानि त्वामुद्दिश्य सा मयोदिता माया इत् इन्द्रजाललक्षणैव त्वं पुरा प्रथमतो मुहूर्तं शत्रुसुखत्रोटनान्मायां न विवित्से न ज्ञातवानसि । अद्याधुना । विवित्से ननु पश्चात्सा सिद्धाभूदित्यर्थः ॥२८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रत्युपस्थितः पुनः परावृत्त्य समीपमागतः किं कृत्वा वसुदेवमिवानीय कञ्चित्तदाकारमुपस्थाप्य ॥२५॥ जनिता जनकः न त्वन्नदात्रादिलक्षणः पिता इति सम्बन्धविशेषेण शोकभरमुत्पादयति-यदर्थमिति । सत्पुत्रस्य तदर्थे प्राणत्यागौचित्यादिति भावः । वीणतः साक्षादीक्ष्यमाणस्यापि तव हे बालिश ! मत्प्रभावानभिज्ञत्वादिति भावः । गीर्देवी तु वाचयति यदर्थमिह मयि जीवसि बलं प्रकटयसि स एष ते तव अजनिता जनको न भवति अत एव अतातस्तातो न भवतीत्यर्थः । तस्मात् पश्यतस्ते इन्द्रजालमिव कौतुकेन पश्यति त्वयि अमुं वधिष्ये तत्र निजोद्देश्यमाह-ईशमिति । चेदित्यवधारते "धत्से पदं त्वमविता यदि विघ्नमूर्ध्नि" इतिवत् हे बालिश ! बाला मूर्खाः सन्त्येषां बालिनो मूर्खसभापतयः तान् मादृशान् स्यति तनूकरोति क्षिणोतीति हे तथाभूत ! तस्मादवश्यमीशः परमस्वतन्त्रस्त्वं तस्मात् पाहि मादृशं संसारादुद्धरेति ॥२६॥ आनकदुन्दुभेस्तदाकारस्य उत्पाट्य छित्त्वा उत्कृत्येति वा पाठः ॥२७॥ ततः शिरस उत्पाटनादादानाच्च हेतोः साल्वात्प्रसृतां तेन प्रसारितामित्यर्थः । ननु कुतस्तस्येदृशी शक्तिः तत्राह-मयेनोदितामुपदिष्टाम् ॥२८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गोविन्दे गवामिन्द्र इति परमवात्सल्यं सूचितम् । प्रति पुनः परावृत्त्योपस्थितः साक्षात् समीपमागतः । किं कृत्वा ? वसुदेवमिव मायया वसुदेवसदृशमेकमानीय कृष्णं शोकाकृष्टचित्तमिति भावः । स महामायावी उवाच च ॥२५॥ तव जनकः न त्वन्नदानादिलक्षणः पिता इति सम्बन्धविशेषेण शोकभरमुत्पादयति । यदर्थं यद्धेतोः इह संसारे जीवसि उत्पाद्य वर्तसे यद्वा, यत्पालनार्थं जीविकां सम्पादयसीत्यर्थः । वीक्षतः साक्षात्पश्यतोऽपि तव बालिश ! हे मत्प्रभावानभिज्ञ ! ॥२६॥ उत्कृत्य (उत्पाट्य, ग, घ, ङ) छित्त्वा सम्यक् सुखमाविशदारोहत् ॥२७॥ ततः शिरस उत्पाटनादादानाच्च हेतोः सोऽबुध्यत यतो महानुभावः प्रभावो यस्य सः शाल्वात् प्रसृतां तेन प्रसारितामित्यर्थः । ननु कुतस्तस्येदृशी शक्तिः ? तत्राह-मयेनोदितां प्रकटितां मयाज्जातां वा ॥२८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१५-२७॥

प्रकृतावुपप्लुतः प्रकृतिवश्याज्ञसंसारिवदित्यर्थः । अबुध्यत प्रबुद्धवानित्यर्थः । नित्यसार्वज्ञत्वात् ॥२८-२९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इति इत्थं ब्रुवाणे सति वसुदेवमिवेति इवशब्देन वस्तुतोऽवसुदेवमिति सूच्यते ॥२५॥ उक्तिमेवाह-एष इति । ते तवैष जनिता जनकः तातः पिता पालकव्यावृत्तये जनितेत्युक्तं यदर्थं किमर्थमित्यर्थः । ते तव वीक्षतः पश्यतः सतोऽमुं वसुदेवं वधिष्ये हे बालिश मूढ ! ईशः समर्थश्चेदमुं पाहि ॥२६॥ एवमिति । आनकदुन्दुभेर्वसुदेवस्य शिर उत्कृत्य छित्वा आदाय स्वस्थमाकाशं स्थितं सौभमाविशत् ॥२७॥ तत इति । प्रकृतौ मानुषस्वभावे उपप्लुतो मग्नः स्वबोधः स्वसाधारणं सावज्ञ्यं यस्य सः तत्र हेतुः स्वजनाननुषङ्गच्छतेऽनुवर्तन्त इति तथा तेष्वासक्तो वा ततो महानुभावः हेतुगर्भमिदं तत्त्वात्स भगवान् मयोदितां साल्वं प्रति मयेनैवं कुर्वित्युपदिष्टामित्यर्थः । साल्वेन प्रेषितामासुरीं मायामबुध्यत ज्ञातवान् इत्यर्थः ॥२८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

शाल्वस्य शक्तिप्रकटनाय तन्मायाप्रकारमाह-तत इति ॥२७॥ श्रीकृष्णः शाल्वसृष्टां मायाम् अवलोक्य किमकरोदत्राह-तत इति । ततो वसुदेवशिरोहरणानन्तरं मुहूर्तकालं तत्र युद्धे अनुतिष्ठत् अन्वतिष्ठत् अन्ववर्तत कीदृशः प्रकृतौ चिदानन्दघनस्वभावे

श्रीमद्विजयध्वजकृता पदरत्नावली

उपस्थितोऽपि शाल्वमायां जानन्नपि प्रकृतावुप प्रकृतिसमीपे स्थित: अजानन्निव पुन: किं चकारेति तत्राह–ततो मुहूर्तान्महानुभाव: अपरिमितप्रभाव: स हरि: स्वजनस्य स्वभक्तजनस्यानुकूलात् सङ्गत: वचनप्रसङ्गात् तद्वसुदेवशिरोहरणमबुद्ध्यत, कथम् ? तदत्राह-आसुरीमिति । शाल्वेन प्रकृतां प्रयुक्तां मूलबलमाह–मय इति । मयेनासुररक्षणोदितामुपदिष्टामित्यर्थ: तदुक्तं "जानन् शाल्वकृतां मायामजानन्निव केशव: । अन्ववर्तत किञ्चित्तु" इति बुद्ध्वा किं कृतमत्राह, प्रकृताविति । "कृतीच्छेदने" इति धातो: बुद्ध्वा माया: प्रकृतौ निर्मूलने सम्यक् स्थितोऽभूदिति शेष: । "ततस्तामाहरद्विभु:" इति वचनात् अज्ञानप्रकटनं कस्मादत्राह–प्रकृताविति। प्रकृतिनिर्मितशरीरस्थत्वादसुरजनमोहनार्थत्वाच्च– "एवमेव तु सर्वत्र परमात्मा सनातन: । विद्धश्च रुधिरस्त्रावी कथञ्चिदजयत् परम् ॥ इत्यादि दर्शयेद्विष्णुर्मोहयन् मायया जगत्" इति चिदानन्दघनस्वभाव इत्येतत् कुत इति चेन्न "चिदानन्दघनस्यास्य कुतो वेधादि सम्भवेत्" इत्यस्मात् स्वजनानुसङ्गत इति इदमपि सद्गते: इति सिद्धम् । "यदचरस्तन्वा वावृधानो बलानीन्द्रप्रब्रुवाणो जनेषु मायेत्सातेयानियुद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से ।" इत्यादि श्रुतिसिद्धोऽयमित्यर्थ: । तथा हि हे इन्द्र ! तन्वा वावृधान: स्वरूपेण भृशं वर्धमानस्त्वं बलानि वीर्याणि विक्रमलक्षणानि अचर: अकृतेति यत् स्वजनेषु प्रब्रुवाणो व्याकुर्वाणो वर्तस इति शेष: । तस्मात् स्वभावरहस्यं स्वजना जानन्तीत्यर्थ: । शाल्वादिशत्रुणा क्रियमाणानि यानि युद्धानि आहु: पुराणादौ एतानि त्वामुद्दिश्य या मयोदिता माया इत् इन्द्रजाललक्षणेन त्वं पुरा प्रथमतो मुहूर्तं शत्रुसुखत्रोटनान्मायां न विवित्से न ज्ञातवानसि अद्याधुना विवित्से ननु पश्चात् सा सिद्धाऽभूदित्यर्थ: ॥२८॥

श्रीमज्जीवगोस्वामिकृत: क्रमसन्दर्भ: ॥१-२९॥

श्रीमज्जीवगोस्वामिकृत: बृहत्क्रमसन्दर्भ: ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

एष ते तव अजनिता–तात:, अजनितायामजातायामपि तात: पितृव्यपदेशवान्, वस्तुतस्त्वमजनिरेव तथाप्येष तात:, तथाप्रसिद्धे:, यदर्थं जीवसि जीव इवाचरसि 'लुप्ता यि:' अस्य स्नेहेनैव जीववत्, अस्य पुत्रवद् वर्तसे । वीक्षतो वक्ष्यमाणस्य तव पुरतोऽमुं वधिष्ये, पाहि चेत्त्वनीश:, बलितुं शीलं येषां ते बालिनो बलवन्त इत्यर्थ:, तान् श्यति तनूकरोतीति बालिशस्तस्य सम्बोधनम् ॥२६॥ ॥२७॥ तत इत्यादि । तदनन्तरमन्वजनानां विपक्षाणामनुषङ्गतो मुहूर्तमुपप्लुत उपद्रुत: सन् महानुभावं श्रीकृष्णस्त तामासुरीं मायामवबुध्यत, यत: प्रकृतौ स्वभावे सर्वज्ञत्वादिसर्वशक्तिमत्त्वरूपे प्रबोधे स्वज्ञाने च आस्ते ॥२८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जनिता जनयिता ॥२६-२७॥ प्रकृतौ मानुषस्वभावे उपप्लुत: व्याप्त: सुष्ठु अबोध: सन्नास्ते स्म तदनन्तरं तु स महानुभावस्तत्सर्वमासुरीं मायां साल्वेन प्रसृतां प्रयुक्तां मयात् उदिताम् अबुद्ध्यत ॥२८॥

गूढार्थदीपिनी

इवेत्यनेन न वसुदेवं किन्तु मायिकम् ॥२५॥ यदर्थमिह जीवसि स एष ते अजनिता जनको न । अकार: पृथक् प सादृश्ये अतात: तातसदृश: अत: वीक्षतस्ते कौतुकार्थममुं वधिष्ये । अतोऽनेन कौतुकेन प्रसन्नश्चेत् मां 'पाहि' संसारादुद्धरेत्यर्थ: बाला: सन्ति येषां ते बालिन: मूर्खपतय: तान् श्यति क्षिणोति नाशयतीति तथा ॥२६॥ निर्भर्त्स्य आत्मानम् । आनकदुन्दु मायिकवसुदेवस्य शिर उत्कृत्य छित्त्वा खस्थमाकाशस्थं सौभं विमानं समाविशत् ॥२७॥ प्रकृतौ मनुष्यप्रकृतौ उपप्लुतो निम सुष्ठु अबोध इव लीलया आस्ते स्वजनसम्बन्धात् । वस्तुत: तदपि स्वप्रकृतौ स्वबोध एवास्ते यतो महानुभाव: अचिन्त्यप्रभा मयोदितां मयेन प्रवर्तितां शाल्वेन प्रसारिताम् आसुरीं मायामबुध्यत ॥२८॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

जनिता जनयिता ॥२६-२७॥ स्व: स्वासाधारण: "य: सर्वज्ञ: सर्ववित्" इत्यादिश्रुतिप्रसिद्धो बोधो यस्य स तथाभूतो स्वजनेषु योऽनुषङ्ग: अनुरागस्तस्मात् प्रकृतौ प्राकृतजनस्वभावे उपप्लुतो निमग्न: आस्ते अतिष्ठत् तत: मयोदितामासुरीं मा साल्वप्रहिताम् अबुध्यत् ज्ञातवान् ॥२८॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

ततो मुहूर्तात्प्रकृतावुपस्थित इति श्लोके मुहूर्तपर्यन्तं साल्वनिर्मितमाययाऽनवगमो भगवतोऽवगम्यते। न चैतज्ज्ञानमूर्तौ सम्भवतीत्यतो माननैव तदवमानयन् तत्प्रसक्तं चान्यदपि दर्शयन् विष्णुर्न तथा मन्तव्य इत्यधिकमंशमवश्यवक्तव्यं वक्ति। जानन्निति। साल्वकृतां वसुदेवशिरःकर्तनं तत्प्रदर्शनं चेत्येतद्रूपां मायामैन्द्रजालिकीं जानन् किञ्चित्सार्धघटिकाद्वयात्मकं कालम्। मुहूर्तशब्दः क्षणमात्रपरः। मुहूर्तमष्टभागे स्याद्घटिका द्वितीयेऽपि चेति बृहदारण्यकभाष्ये तथा महाभारततात्पर्यनिर्णये चेताः क्रीडया क्षणमहं समर इत्युक्तेश्च ज्ञेयः। केशवो ब्रह्मरुद्रप्रवर्तको ब्रह्मलक्ष्मीप्रवर्तको वाऽजानन्निवान्ववर्ततानुससार। तत एवं प्रदर्शनानन्तरं तां मायामहरत्। एतदसम्भावनामुन्मूलयति॥ विभुरिति। सर्वत्र। न केवलमेतद्रूप एव किन्तु मत्स्यादिसर्वरूपेषु। सनातनः पुराणपुरुषो वेदनादसहितो वा परमात्मा। एवमेवाविद्धादिरप्यज्ञवद्विद्धादिवद्दर्शयतीति दर्शयति। विद्धः। चोऽप्यर्थे। तुशब्दो रूपसर्वसाम्यरूपविशेषसूचकः। विद्धः शस्त्रादिना रुधिरं स्रावयतीति स तथा। कथञ्चिद्वञ्चनादिना परमजयज्जितवान्। इत्यादिमायया स्वेच्छया जगदसन्मोहयन्विष्णुर्दर्शयेत्। अनेन मोहनमेतत्फलं परमफलं तम इति सूचितं भवति। किन्न कथ्यते वास्तवमिदमितीत्यत आह॥ चिदानन्देति। चिदानन्दघनस्यास्य श्रीकृष्णस्य कुतो वेधादि स्यात्। अभेदविभेदन्यपतद्धस्तात्। प्राहार्दिता बाण गणैरिति विवृततात्पर्यकमिति चानुसन्धेयम्। ब्रह्माण्डपुराणं नाविश्वसनीयमिति श्रुतिमूलमालपति। यदचर इति। महेन्द्रो यानि युद्धानि रणानि एवमादियुतानि। आहुः। शत्रुं शत्रुवद्विद्यमानां मायां पुरा मुहूर्तपर्यन्तं न विवित्से त्वं न जानासि। विद ज्ञानेऽस्मात्थासः से आदेश इडागमाभावात्मनेपदत्वं च छान्दसे। यद्वा लाभार्थत्वाद्धातूनामनेकार्थताया विन्दतेर्ज्ञानार्थत्वे भाष्यमतेन क्रियादिनियमादिडभावमात्रमार्षं व्याघ्रभूयादिमतेऽप्यनिट्कारिकायामगणनात्तन्मात्रं तथेति ज्ञेयम्। अवगतोऽसि। अद्येदानीं पश्चाद्विवित्से। न तु जनेषु। जनैर्यदचरः। चर गतिभक्षणयोरिति स्मृतेर्गत्यर्थानां चावगत्यर्थत्वात्। सा तेऽज्ञात्वावगतिर्माया इत् मायैव। तन्मायात्वे हेतुमाह वेदपुरुषः। बलानीति। यतो भो हरे तेऽज्ञानाद्यनाकलने सामर्थ्यविशेषान्ब्रुवाणो विचित्रशक्तिः पुरुषः पुराण इत्यादिवेदोऽस्ति। किञ्च तन्वा स्वमूर्त्यैव वा वृधानात्यभिवृद्धः। इदमपि सर्वत्र तत्तस्य न तत्तदमत्यादिः सम्भवतीत्यज्ञानाभावनिदानम्। आदिपदेन परो मात्रया तन्वा वृधान इत्याद्या च संगृहीतेति ज्ञेयम्। नन्वष्टमाष्टकप्रथमाध्यायपञ्चदशवर्गीयां तां सूते कीर्तिमित्यारभ्यावर्गावसानं नैन्द्रत्वस्योक्तेः कथमियमाचार्यैरनुदाहार्योदाहृतेति। किञ्चाचार्यैरेव तां सूते कीर्तिं मघवन्महित्वेत्यादिसूक्तानि च तत्प्रमाणमिति महाभारततात्पर्यनिर्णये चरमेऽध्याये वायुमाहात्म्यावेदकतया च व्याकरणादत्रैवं कथं व्यामरणमिति चेन्न। किमपूर्वमप्राक्षः प्रेक्षावान्। सर्वे वेदा यत्पदमामनन्तीत्यादेरिन्द्रादिसर्वपराणां भगवत्परत्वस्य यथा विचिकित्सनीयता तथेन्द्रोत्तमस्य वायोः प्रतिपाद्यत्वस्याथवा पूर्वेन्द्रोऽसावित्यादिना वायोरिन्द्रत्वस्याप्युक्तेस्तद्विवक्षया वा तत्परत्वोक्तेः सम्भवात्काऽत्रकथन्ता। द्वितीयाष्टकद्वितीयाध्यायषष्ठवर्गस्था भूषन्नयोधिबभ्रूपुनम्नत इत्यादिका तथाष्टमवर्गगा बलित्थेत्यादिकाश्च ऋचश्चाग्निदेवताः श्रूयन्ते तासामपि श्रीमद्भिः पठितानां निर्णये गतिरियमेव ज्ञेयम्॥ तथा चायं श्लोकार्थः। वसुदेवशिरोऽवलोक्य वासुदेवः किमकृतेत्यत आह॥ तत इति। ततस्तदवलोकनतः प्रकृतौ स्वभावे उपस्थितः सदा सन्नपि प्रकृते तद्विषये उपत्वेनाधिकत्वेन स्थितोऽपीति वा। प्रकृतावुपस्थितस्तद्वद्ध इव तत्र रणाङ्गणे मुहूर्तान्मुहूर्तात्मकं कालमतति गच्छतीति आतयतीति वा। स तथा सन् अनुतिष्ठदन्वतिष्ठत् अन्ववर्तत। मुहूर्तात्तदात्मकं कालं वा। जनेषु प्रब्रुवाण इत्यंशशंसितार्थकं पदं स्वजनानुसङ्गत इति। स्वजनैरनुसङ्गतः। न केवलं स्वयमेव माययमिति व्यज्ञासीत्किन्तु तथा ज्ञातारो भक्ता अपि सन्ति तत्सङ्गत इत्यर्थः। पुत्रं नटनप्रकटनेन किं फलमित्यतो वाऽऽह। स्वजना इत्यनुयोगः सम्बन्धस्तस्मात्। लोके लोकैरेवं मोहो शक्यत्याग इति सूचयितुमिति भावः। स्वस्य कथङ्कारं संविदित्यतोऽप्याह। स्वजनः स्वस्य जनो जननं यस्मात्स वसुदेवस्तेनानुगतः स च वर्तत इति ज्ञानवान् वा तदनुगतो वा महानुभावः प्रकृतौ तन्मायाच्छेदने विषये उपस्थितस्तयेच्छावानभूद्यदा तदा मयोदितां मयोत्पादिताम्। अन्येन वचने वञ्चनं सम्भवतीत्यतोऽप्याह॥ मयोदितामिति। मयेनैवोपदिष्टां साल्वप्रकृतौ तत्प्रदर्शितामासुरीं मायां साल्वोऽपि मायावीति तदुपोद्वलिता काचित्तदीयाऽप्येतन्मिलितेत्यासुरीमिति वा मय एव कांश्चिद्देवीं कांश्चिच्चासुरीं कृतवान् मायां तन्मध्य इयमासुरीति तामिति वा सूचयितुमियमुक्तिः। स तामबुद्ध्यत ज्ञातवान्। यदाऽबुद्ध्यत तदा प्रकृतावुक्तरूप उपस्थित इति वा योजना। ततस्तामाहरत्। विभुरित्युक्तेर्महानुभाव इति विभुपदार्थप्रदर्शनमिति ज्ञेयम्। अनुतिष्ठन्स्वजनेति पाठोऽपि स्फुटार्थः। पूर्वपाठेऽनुतिष्ठत्स्वजनानुसङ्गत इति पदमेकं वा। अनुतिष्ठन्तः स्वजना मुक्ता अमुक्ता ब्रह्मादयो वा तैरनुसङ्गतः ॥३८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

न केवलं नयनमात्रं तदा मानसः क्लेशः सन्दिग्धोऽपि भवेत् किन्त्वनर्थान्तरमपीत्याह-इति ब्रुवाण इति। प्रत्युपस्थित
आभिमुख्येन समायातः। ततो वसुदेवमिव मायिकं कञ्चन पुरुषं समानीय कृष्णमिदं वक्ष्यमाणमुवाच। यतः स उपासितमायारू
स भगवान् ॥२५॥ तस्य वाक्यम् "एष ते जनिता तात" इति। भगवत्त्वादिन्द्रियप्रवृत्तिः। अजनिता अतात इति तु वस्तुस्थितिः
कृतेऽपि भूभारहरणे स्थितिः पित्रर्थेति मन्यते यद्यप्यन्येषां स्थितिर्बहुकार्यार्था तथापि पितृभक्तस्य एतदेवकार्यमिति प्रकृ
क्लेशाधिक्याय आरोपन्यायेन पितृभक्तत्वं वदन् स्वतः पीडां कर्तुमशक्तः तदभावे स्वत एव पीडितो भविष्यतीति तथोक्तवान्
अधिकक्लेशार्थमाह-वधिष्ये इति। क्रिया तु कर्तव्यैवेति। प्रतिज्ञाहान्यर्थम्-ईशश्चेत् पाहीत्युक्तवान्। स्वबुद्ध्या सम्बोध
बालिनोऽपि शं यस्मादिति। स्वयमेव द्वेषिणामप्युपकारं कोरषीति मारणेनास्मान् कृतार्थान् कुर्विति प्रार्थना। मतान्तरभाषि
पदार्थो नात्राभिप्रेत इति न पदानाम् ॥२६॥ अर्थान्तरं वर्ण्यते-निर्भर्त्सनम् अभिमानप्रच्यावनं तथाकरणे बलं मायावीति
'मायेत्यसुरा' इति श्रुतेः। 'तं यथा यथोपासते तद्धैतान् भूत्वावति' इति च भगवतेव भगवान् एवं क्रीडतीति न काऽप्यनुपपत्तिः
अतो भगवदावेशात् लीलाप्रदर्शक इव आनकदुन्दुभेः शिरः खड्गेनोत्कृत्य पुनर्योजनाभावाय खस्थम् आकाशस्थितं सौभ
मूलाश्रयं समाविशत् ॥२७॥ एन्मुहूर्तमात्रम्। तृतीयेऽपि मुहूर्ते भगवान् इममर्थं चिन्तयन् तूष्णीं स्थितः। अने
बलभद्ररक्षाभावशङ्काऽपि निवारिता। तदनन्तरं मुहूर्तमात्रं प्रकृतावेवोपप्लुतः सन् पश्चान्मानुषीं प्रकृतिं परित्यज्य अन्यप्रबोधाभावेऽपि
स्वबोध एव आस्ते। स्वज्ञानशक्तिं प्रकटीकृतवान्। अत्रापि क्रियाव्यवहितेन सम्बन्धः। स्वजनानुषङ्गतः प्रकृतावुपप्लुत इ
अस्वजनानुषङ्गतो वा तस्य स्वजनानुषङ्गो नास्तीति मोहाभावात् जिज्ञासया स्वबोधे स्थितिर्जातेत्यर्थः। ननु तथाप्युपदेशाभाव
कथं ज्ञननिष्ठा तदाह-महानुभाव इति। तदा तामासुरीं मायामबुद्ध्यत्। इदं ममैव रूपन्तरमिति। आत्मजिज्ञासायामे
आत्मबोध इति। अनेन तस्मिन्नपि कल्पे भगवतः शुद्धब्रह्मत्वमित्युक्तम्। अज्ञत्वादिलीला सर्वावतारेष्विति न काप्यनुपपत्ति
। परमुपक्रान्ते भागवते कृष्णो नैवंविध इति अत्रापि साधारण्येन योजयतां दूषणमग्रे वक्तव्यं सा माया कुत उत्पन्ना, किं निष्ठे
तद्द्वयं निर्दिशति-शाल्वप्रसृतां मयोदितामिति। शाल्वे व्याप्तां मयेन च निरूपिताम् ॥२८॥

श्रीसुबोधिनीसारः

इत्येवं ब्रुवाणे भाषमाणे सति गोविंदे सौभराट् शाल्वः प्रत्युपस्थितः प्राप्तः वसुदेवमिह युधि आनीय कृष्णं स इदमुवा
पाठांतरे इवेन कृत्रिमत्वमुच्यते ॥२५॥ यदर्थं यत्कृते इह लोके त्वं जीवसि एष ते तव जनितोत्पत्तिहेतुः तातः पितास्ति ते वीक्ष
पश्यतः सतोऽमुं वसुदेवमहं हनिष्यामि ईशः प्रभुश्चेत्तर्हि पाहि रक्ष हे बालिश ॥२६॥ एवं निर्भर्त्स्याक्षिप्य मायावी शाल्
खड्गेनानकदुन्दुभेर्वसुदेवस्य शिर उत्कृत्य छित्त्वाऽऽदाय गृहीत्वा खस्थमाकाशे वर्तमानं सौभं विमानमारुहत् ॥२७॥ ततो हे
स्वबोधः स्वतःसिद्धज्ञानवानपि स्वजनेषु अनुषङ्गतः स्नेहात् प्रकृतौमानवस्वभावे मायायां वा उपप्लुतो निमग्नो मुहूर्तमास्ते ततोऽन
महानुभावः शाल्वेन प्रसृतां प्रसारितां मयेनोदितां वर्णिताम् आसुरीं मायां स कृष्णोऽबुध्यत् ज्ञातवान् ॥२८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गोविन्दे कृष्णे एवं ब्रुवाणे सति सौभराट् शाल्वः प्रत्युपस्थितः प्रादुर्भूतः सन् वसुदेवमिवानीय प्रदर्श्य कृष्णं प्रतीदमु
। वस्तुतो वसुदेवाभावादिवशब्दप्रयोगः ॥२५॥ तदुक्तिमेवाह-एष इति। ते तवैष जनिता जनयिता तातः पिता। यदर्थमिह संसा
जीवसि, अतस्ते तव वीक्षतः पश्यत एव सतः अमुं वधिष्ये। हे बालिश अज्ञ ! चेत् यदि त्वमीशः समर्थस्तदाऽमुं पाहि
मायावी शाल्वः एवं कृष्णं निर्भर्त्स्य तिरस्कृत्य आनकदुन्दुभेः शिरः खड्गेन उत्कृत्य छित्वा तदादाय गृहीत्वा खस्थं आ
स्थितं सौभमाविशत् ॥२७॥ ततश्च कृष्णः स्वजनानां पित्रादीनामनुषङ्गतः आसक्त्या मुहूर्तमात्रं प्रकृतौ प्रकृतिकार्ये मनुष्यस्व
शोके उपप्लुतो निमग्न आस्ते स्म, ततश्च तत् वसुदेववधादिकमासुरीं मायामबुध्यत्। तामेव स्पष्टयति-मयेनोदितां शि
शाल्वेन प्रसारितामिति। तदा कृष्णः केन प्रबोधित इत्यपेक्षायामाह-स्वबोध इति। स्वत एव बोधो ज्ञानं यस्य सः। तत्र हेतु
महानुभाव इति। महाननुभावस्तेजो यस्य सः। मयाकृतावरणाभावादित्याशयः ॥२८॥

अन्वितार्थप्रकाशिका

वस्तुतः मे पिता कथं नीतः नैव नीत इत्यर्थः । विधिरपि मत्पुरतः अबलवान् अकिञ्चित्कर इत्यर्थः ॥२४॥ इतीति ॥ गोविन्दे कृष्णे एवं ब्रुवाणे सति सौभराट् शाल्वः प्रत्युपस्थितः प्रादुर्भूतः सन् वसुदेवमिवानीय प्रदर्श्य कृष्णं प्रतीदमुवाच । वस्तुतो वसुदेवाभावादिवशब्दप्रयोगः ॥२५॥ एष इति ॥ ते तवैष जनिता जनयिता । जनितामन्त्रे इति छान्दसो णिलोपः । तातः पिता यदर्थमिह संसारे त्वं जीवसि अतस्ते तव वीक्षतः पश्यत एव सतः । शता आर्षः । अमुं वधिष्ये । तङार्षः । हे बालिश अज्ञ ! चेत् यदि त्वमीशः समर्थस्तदाऽमुं पाहि । वस्तुतः यदर्थमिह त्वं जीवसि बलं प्रकटयसि एषः ते अजनिता अत एव अतास्तस्तातसदृशं मात्रम् अतस्तव वीक्षत एव कौतुकार्थममुं वधिष्ये । बलानां समूहो बालं तदस्ति येषां ते बालिनो महाबलाः तान् श्यति । हे बालिश ! त्वम् ईश एवासि अतोऽनेन कौतुकेन प्रसन्नश्चेन्मां पाहि संसारादुद्धर ॥२६॥ एवमिति । मायावी शाल्वः एवं कृष्णं निर्भर्त्स्य तिरस्कृत्य आनकदुन्दुभेः शिरः खड्गेन उत्कृत्य छित्वा तदादाय गृहीत्वा खस्थं आकाशे स्थितं सौभं समाविशत् ॥२७॥ तत इति ॥ ततश्च कृष्णः स्वजनानां पित्रादीनामनुषङ्गतः आसक्त्या मुहूर्तमात्रं प्रकृतौ प्रकृतिकार्ये मनुष्यस्वभावे उपप्लुतो निमग्न आस्ते स्म । ततश्च स्वत एव बोधो ज्ञानं यस्य सः महाननुभावः भगवान् तत् वसुदेववधादिकं मयोदितां शिक्षितां शाल्वेन प्रसृतां प्रसारितामासुरीं मायामबुद्ध्यत । तङभाव आर्षः । वस्तुतः मुहूर्तमात्रं स्वजनानुषङ्गतः स्वजनदृष्ट्या उपप्लुतः शोकव्याप्त इवास्ते स्म । वस्तुतस्तदापि प्रकृतौ स्वभावभूते स्वबोध एवास्ते स्मेति ॥२८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जनिता जनयिता पिता ईशः समर्थश्चेत् ॥२६-२७॥ ततो मायादर्शनानन्तरं स्वबोधः । अनादिः स्वतःसिद्धज्ञानोऽपि । स्वजनानुषङ्गतः मानुषभावदर्शनाय स्वजनेषु अनुरागतः मुहूर्तं प्रकृतौ मानुषचरित्रे उपप्लुतो निमग्नः आस्ते तिष्ठति स्म । तदनन्तरं तत्सर्वम् । मयोदितां मयेन शिक्षिताम् । महाभुज इत्यपि पाठः । आसुरीं मायामबुध्यत इयं माया भवतीति विदितवान् ॥२८॥

जनिता जनयिता पिता ईशः समर्थश्चेत् ॥२६-२७॥ ततो मायादर्शनानन्तरं स्वबोधः । अनादिः स्वतःसिद्धज्ञानोऽपि । स्वजनानुषङ्गतः मानुषभावदर्शनाय स्वजनेषु अनुरागतः मुहूर्तं प्रकृतौ मानुषचरित्रे उपप्लुतो निमग्नः आस्ते तिष्ठति स्म । तदनन्तरं तत्सर्वम् । मयोदितां मयेन शिक्षिताम् । महाभुज इत्यपि पाठः । आसुरीं मायामबुध्यत इयं माया भवतीति विदितवान् ॥२८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं गोविन्दे श्रीकृष्णे ब्रुवाणे भाषितवति सति सौभराट् शाल्वः वसुदेवम् इव, इवशब्देन वस्तुतोऽवसुदेवम् इति सूचितम् । आनीय प्रत्युपस्थितः सन् कृष्णं च श्रीकृष्णं प्रत्यपि ह स्फुटं यथा तथा इदम् उवाच ॥२५॥ उक्तिमेवाह । एष इति । हे कृष्ण ! एषः ते तव जनिता जनकः तातः पिता त्वं यदर्थम् इह संसारे जीवसि अमुं तवैतं पितरमित्यर्थः । ते तव वीक्षतः सतः वधिष्ये । अतः हे बालिश ! मूढ ! ईशः समर्थश्चेत् अमुं पाहि त्रायस्व ॥२६॥ एवमिति । मायावी शाल्वः एवमुक्तप्रकारेण निर्भर्त्स्य भर्त्सनां कृत्वा खड्गेन आनकदुन्दुभेः मायोद्भावितवसुदेवस्य शिरः उत्कृत्य छित्वा आदाय, शिरो गृहीत्वा खस्थमाकाशस्थं, सौभं समाविशत् ॥२७॥ तत इति ॥ ततः मुहूर्तं क्षणकालं यावत्, स्वबोधः स्वयं स्वतःसिद्धज्ञानवान् सन्नपि स्वजनानुषङ्गतः स्वजनविषयस्नेहस्वीकरणतः प्रकृतौ मानुषस्वभावे उपप्लुतः मग्नः आस्ते । स्मेति शेषः । ततः महानुभावः स श्रीकृष्णः तत्सर्वं मयोदितां शाल्वं प्रति मयेनैवं कुर्वित्युपदिष्टामित्यर्थः । शाल्वप्रहितां शाल्वेन प्रसृतां प्रसारितामित्यर्थः । आसुरीं मायाम् अबुद्ध्यत् ज्ञातवान् ॥२८॥

कृष्णप्रिया

भगवान गोविंद इस प्रकार बोल रहे थे उसी समय शाल्व मायारचित श्रीवसुदेवजी के समान अेक मनुष्य को ले कर वहां आ गया और श्रीकृष्ण भगवान को कहने लगा ॥२५॥ हे बालिश ! देखो यही तुजे पैदा करनेवाला तेरा पिता है । जिस पिताके लिये तुम जी रहे हो । अभी तुम्हारे देखते हि मैं इसका वध कर रहा हुं । यदी तुम्हारा सामर्थ्य हो तो इसका रक्षण करो ॥२६॥ मायावी शाल्वने जब इस प्रकार भगवान को तिरस्कृत कर मायारचीत शरीर वासुदेवका मस्तक तलवारसे उडा दिया और शिरको ले कर आकाशमें रहाया हुआ अपने सौभ विमानमें

कृष्णप्रिया

जा कर बैठा ॥२७॥ इसके बाद स्वतः सिद्ध ज्ञानस्वरूप महानुभाव भगवान श्रीकष्ण इस घटनाको देख कर दो क्षण के लिये अपने पूज्यचरण श्रीवसुदेवजी के प्रति अतिशय भक्ति होने के कारण सामान्य मनुष्योंके समान शोकसागरमें डुब गये। किन्तु पुनः वे क्षणमे हि जान गये कि यह सब शाल्य कि फैलायी हुई आसुरी माया ही है। शाल्व को यह हमारा भय दानवने बतलायी है ॥२८॥

न तत्र दूतं न पितुः कलेवरं प्रबुद्ध [१]आजौ समपश्यदच्युतः।
[२]स्वाप्नं यथा चाम्बरचारिणं रिपुं सौभस्थमालोक्य निहन्तुमुरुतः ॥२९॥
एवं वदन्ति राजर्षे मुनयः[३] के च नान्विताः। यत् स्ववाचो [४]विरुध्येरन्नूनं ते न स्मरन्त्युत ॥३०॥
क्व शोकमोहौ स्नेहो वा भयं[५] वा येऽज्ञसम्भवाः।
क्व चाखण्डितविज्ञान[६]ज्ञानैश्वर्यस्त्वखण्डितः ॥३१॥

कर्दमक्षमा

प्रबुद्धः, यथा, स्वाप्नम्, (न पश्यति) तथा, प्रबुद्धः, अच्युतः, तत्र, आजौ, न, दूतम्, न, पितुः, कलेवरम्, समपश्यत्, किन्तु, अम्बरचारिणम्, सौभस्थम्, रिपुम्, आलोक्य, निहन्तुम्, उद्यतः ॥२९॥ राजर्षे! मुनयः, एवम्, वदन्ति, केचन, अन्विताः, सन्ति, ते, स्ववाचः, विरुध्येरन्, नूनम्, उत, ते, न, स्मरन्ति ॥३०॥ ये, अज्ञसम्भवाः, क्व, शोकमोहौ, स्नेहः, भयम्, क्व, च, अखण्डितविज्ञानज्ञानैश्वर्यः, सुरेडितः, श्रीकृष्णः, क्व ॥३१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वाप्नं स्वप्नप्रपञ्चं यथा ॥२९॥ एवं परमतमुपन्यस्तं निराकरोति-एवमिति। केच केचन नान्विताः अनन्विताः पूर्वापरानुसन्धानरहिताः तदाह यत्स्ववाच इति तन्नानुस्मरन्तीत्यर्थः। अयमभिप्रायः न तावद्राजस्यार्थं रामेण सह गतः श्रीकृष्णः सङ्कर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात् ॥३०॥ असम्भावितञ्चेत्याह-क्व शोकमोहाविति। भयं वा दुर्निमित्तदर्शनकृतं नूनं हन्युः पुरीं ममेति यदुक्तं यच्च हस्ताच्छार्ङ्गं न्यपतदित्युक्तं तद्भयं वा क्वेति अज्ञेषु सम्भवो येषां ते अखण्डितानि विज्ञानज्ञानैश्वर्याणि यस्य सः तत्र विज्ञानं स्वरूपविषयं ज्ञानं बाह्यविषयम् ॥३१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र युद्धे। अच्युतो ज्ञानच्युतिरहितः ॥२९॥ तदाह पूर्वपरानुसन्धानराहित्यमाह। स्ववाचो यद्विरुध्येत। इत्यर्थ इति-तद्विरोधलक्षणं वचो नानुसन्दधत इति। अत्र तात्पर्यमाह-अयमभिप्रायः। न तावदित्यादिना, मम त्वित्थं प्रतिभाति-के च ऋषयः। हे राजर्षे एवं वदन्ति। किम्भूताः-"नान्विताः अनु पश्चादुक्तिं सङ्कर्षणमनुज्ञाप्येत्यादिकां न इता न ज्ञातवन्त इत्यर्थः।" यद्यतः स्वस्य मम वाचः। सङ्कर्षणमित्यादिकमेव ते न स्मरन्ति। अतस्तदुक्त्या "आह चाहमिहायात आर्यमिश्राभिसङ्गतः" इत्यादिकम् विरुध्येत। तदुक्त्येति शेषः। विरुध्येतेति भावे लिङ्। उपसर्गवशाद्रुधेरकर्मकत्वम्। तीर्थस्तु - 'खेचरान्विता विरुध्यन्ते' इति पाठमाह। स्वस्य स्वतन्त्रस्य हरेर्वाचो वेदलक्षणाः। विरुध्यन्ते यत् हरिमोहादिकं प्रति हरेर्मोहादिकं न सहन्ते। "अजस्यावक्रचेतसः" इति श्रुतेः। खेचरा भूतास्तदावेशयुतास्तथा ॥३०॥ विपरीतं तत्कथनं निषेधति-क्वेति ॥३१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रबुद्धः सन् न सम्यक् साक्षादपश्यत्। प्रबुद्धत्वे हेतुः अच्युतः अनश्वरज्ञानादित्वादिति भावः ॥२९॥ ऋषयोऽपि

---

१. आत्मा तदपश्यदच्युतः-विज.। २. स्वप्ने यथा-विज.; स्वप्नं यथा-गो. प्रे. टी.। ३. ऋषयः-श्रीधर. वंशी. वीर. विज. शुक.। ४. विरुध्येतनूनं-श्रीधर. वंशी. विश्व. शुक. ; विरुध्येरन्ननूनं ते स्मरन्त्युत-वीर. ; विरुध्यन्ते तन्नूनं ते स्मरन्ति नु-विज.। ५. तत्रः स्मा शुक.। ६. वाऽज्ञानसंमवाः-वीर.।

स्वकीयाया ए
सुरैरीडित इति

प्रबुद्धः
मन्त्रमात्रविदः
नानुसन्दधते। नू
गमनादेवं व्याख्ये
प्रतिपादितमस्ती
गुणातीता अभिज्ञे
सुरैरीडित इति शु

यत् स्वव
संसारिषु सम्भवन्तः

ततः किं
स्वप्नादु(त्थित)द्बुद्धः
॥२९॥ इतीत्थमुपन्यस
इत्थं वदन्ति तदेवाह-
रामेण सहागतः श्रीकृ
युष्मद्द्यूतं न ज्ञातमिति
क्व शोकमोहाविति।
दुर्निमित्तदर्शनजं नूनं ह
सम्भवेत् भयं वा क्वेत्य
अखण्डिते ज्ञानविज्ञाने
हेत्येवंविधस्य भगवतः

एतदेव स्पष्टय
परमात्मा निदर्शयति स्व
अम्बरचारिणमिति ॥२९॥
यत्स्ववाच इति। स्वस्य
न सहन्त इत्यर्थः। "अज
स्मरन्ति नु किं नैव स्मरन्ती
स्मरन्ति पुराणादौ नैवेति वा

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वकीयाया एव वाचो हेतोर्यद्विरुद्ध्येत विरुद्धं स्यात् तन्नानुस्मरन्ति नानुसन्दधति नूनं वितर्के निश्चये वा ॥३०॥ मोहः अज्ञानं सुरैरीडित इति शुद्धसात्त्विकदेवः तत्त्वेन तामसशोकाद्यभावोऽखण्डविज्ञानादिसद्भावश्च दृढीकृतः ॥३१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रबुद्धः सन् न सम्यक् साक्षादपश्यत् यतोऽच्युतो ज्ञानादौ सदा स्थिर इति भावः । च तु अम्बरचारिणं तु ॥२९॥ ऋषयो मन्त्रमात्रविदः ज्ञानिमात्रेण ऋषयो वा यद्वा, ऋषयोऽपि स्वकीयाया वाचः सकाशाद्यद्विरुध्येत विरुद्धं स्यात् तत् नानुस्मरन्ति नानुसन्दधते। नूनं वितर्के निश्चये वा। अन्यत्तैर्व्याख्यातम्। यद्वा, सभापर्वोक्तानुसारेण श्रीवैशम्पायनादिमते राजसूये श्रीबलदेवस्यापि गमनादेवं व्याख्येयम्। महाभारतादौ स्थाने स्थाने श्रीहरिवंशे च श्रीरुक्मिणीस्वयंवरादौ जरासन्धाद्युक्त्यापि श्रीकृष्णस्य भगवत्त्वं प्रतिपादितमस्तीति तेनैतद्विरुध्येतेत्यर्थः ॥३०॥ मोहोऽज्ञानं ममता वा। येऽज्ञसम्भवा इत्यनेन श्रीभगवद्भक्तिविशेषाज्जायमानास्तु गुणातीता अभिज्ञेष्वपि सम्भवतीति ध्वनितम्। विज्ञान-ज्ञानयोरैश्वर्यान्तर्गतत्वेऽपि पृथगुक्तिः प्रस्तावानुसारेण तयोराधिक्यापेक्षया। सुरैरीडित इति शुद्धसात्त्विकदेवस्तुत्वेन तामसशोकाद्यभावोऽखण्डविज्ञानादिसद्भावश्च दृढीकृतः ॥३१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

यत् स्ववाचा "तान्यहं वेद सर्वाणि" इति स्वसार्वज्ञविषयवाचा ते इति बहुवचनं तत्त्वाभिप्रायः ॥३०॥ अज्ञसम्भवाः संसारिषु सम्भवन्तः ज्ञानविज्ञानशब्दौ प्रकारप्रकारिज्ञानपरौ अखण्डितविज्ञानज्ञानैश्वर्यः ईश्वरः विज्ञानज्ञानैश्वर्याणाम् इति वा अर्थः ॥३१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ततः किं कृतवांस्तदाह-नेति। यदेवं प्रबुद्धोऽबुध्यत तत्र तदैव आजौ युद्धाङ्गणे दूतं नापश्यत् नापि पितुः कलेवरं यथा स्वप्नादु(त्थित)द्बुद्धः स्वाप्नमर्थं न पश्यति तद्वत् किन्तु अम्बरचारिणं सौभे स्थितं तं रिपुं साल्वमवलोक्य निहन्तुमुद्युक्तो बभूव ॥२९॥ इतीत्थमुपन्यस्तं परमतं निराकरोति-एवमिति। हे राजर्षे ! केचिदृषयः नान्विताः अनन्विताः पूर्वापरानुसन्धानरहिता इत्यर्थः। इत्थं वदन्ति तदेवाह-यत्स्ववाचो विरुध्येरन् विरोधं प्राप्नुयुरिति यत्तन्नानुस्मरन्ति नानुसन्दधते नूनं ध्रुवम् अयमभिप्रायः नतावद्राजसूयार्थं रामेण सहागतः श्रीकृष्णः सङ्कर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात् न चेन्द्रप्रस्थं गते कृष्णे साल्वागमनं साल्वसङ्ग्रामव्यासक्तेन मया युष्मद्द्यूतं न ज्ञातमिति काम्यकवनस्थान् पाण्डवान् सान्त्वयता श्रीकृष्णेन उक्तमिति व्यासोक्तेरिति ॥३०॥ असम्भावितं चैतदित्याह-क्व शोकमोहाविति। विमनस्क इत्यनेनोक्तः शोकः मानुषीं प्रकृतिं गत इत्यनेनोक्तो मोहश्च घृणी स्नेहादित्यनेनोक्तः स्नेहो भयं वा दुर्निमित्तदर्शनजं नूनं हन्युः पुरीं ममेत्यनेनोक्तं यच्च हस्ताच्छार्ङ्गं न्यपतदिति तच्चाज्ञानसम्भवं न विद्यते ज्ञानं येषां तेषु सम्भवं सम्भवेत् भयं वा क्वेत्यसम्भावना द्योत्यते तद्धेतुत्वेन भगवन्तं विशिनष्टि-अखण्डितेति। ज्ञानविज्ञानशब्दौ प्रकारप्रकारिविषयज्ञानपरौ अखण्डिते ज्ञानविज्ञाने सर्वपदार्थतद्याथात्म्यविषयके ऐश्वर्य्यं च यस्य तस्येश्वरस्तस्य सर्वान्तर्यामिणः शोकादिः क्वेति सम्बन्धः। हेत्येवंविधस्य भगवतः शोकादिकं वन्दतो विस्मयन्ते इति ॥३१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

एतदेव स्पष्टयति-नेति। अच्युतः ज्ञानच्युतिरहितः तत्पितुः कलेवरं च नापश्यत् प्रबुद्धः मायामिति शेषः। आत्मा परमात्मा निदर्शयति स्वप्न इति यथा स्वप्ने करितुरगादीन् पश्यति ततः प्रबुद्धः तान् पदार्थान् न पश्यति बुद्ध्वा किं कृतमत्राह अम्बरचारिणमिति ॥२९॥ तद्द्रष्टॄणामृष्यादीनामपि ज्ञानलोपो नास्ति किं पुनः हरेरिति भावेनाह-एवमिति। कथं वदन्तीत्यत्राह-यत्स्ववाच इति। स्वस्य स्वतन्त्रस्य हरेर्वाचो वेदलक्षणा यन्मोहादिकं हरिविषयं प्रति विरुध्यन्ते विरोधवन्त्यो भवन्ति हरेर्मोहादिकं न सहन्त इत्यर्थः। "अजस्यावक्रचेतसः" इति श्रुतेः। नूनं तार्किका उपक्रमादिवेदतात्पर्यलिङ्गकोविदास्ते वैदिकास्तन्मोहादिकं स्मरन्ति नु किं नैव स्मरन्तीत्यर्थः। येषां स्ववाचो विरुध्यन्ते हरेर्मोहादिवादिन्यः परस्परविरोधिन्यः स्युः ते शास्त्रप्रणेतारः तादृशीर्वाचः स्मरन्ति पुराणादौ नैवेति वा ॥३०॥

(मूलम्)

इति तैस्सदितां वाणीमाकर्ण्य कमलेक्षणः । स सौभं हन्तुमारेभे शाल्वं कुरुकुलोद्वह ॥ क ॥
ततो निशातमादाय चक्रं कृष्णः सुदर्शनम् । आग्नेयास्त्रेणाभिमन्त्र्य प्राहिणोत् सौभनाशनम् ॥ ख ॥
तन्नारायणहस्ताग्र्यान्मुक्तमाग्नेयमन्त्रितम् । जज्वालाब्रह्मसदनं ज्वालामालातिभीषणम् ॥ ग ॥
ततो वैमानिकाः सर्वे तद्विहाय विहायसम् । सुदर्शनोष्मणा तप्ता दुद्रुवुः सर्वतोदिशम् ॥ घ ॥
तदर्कशतसङ्काशं सौभं भित्त्वा द्विधा पुरम् । भूयो नारायणकरं प्राप भूप सुदर्शनम् ॥ ङ॥
ततस्समुद्रे न्यपतत्पुरं विच्छिन्नबन्धनम् । यदा पाणिर्दुराधर्षः शाल्वोऽपि प्रत्यदृश्यत ।
तां प्रेषयामास गदां कृष्णमुद्दिश्य दुर्मतिः ॥ च ॥
ततो रथं दैत्यबलोपनीतं संस्थाय शाल्वो बहुशस्त्रसञ्चयम् ।
अवाकिरन् कृष्णशिरस्यनन्तैर्महायुधैश्च व्यनदद्धरिर्यथा ॥ छ ॥
तां गदां प्रेषितां तेन छित्त्वा बाणैस्त्रिधा हरिः । पाञ्चजन्यमुपाध्माय सिंहनादं व्यनीनदत् ॥ ज ॥

प्रत्युत विपरीतमेव वदन्तीत्याह-क्वेति । ये शोकादयोऽज्ञानतः सम्भवो येषां ते तथा ॥३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवं वदन्तीति विरुद्धं यत्तत्स्वयमेवाह-क्व शोकेति । अत्राज्ञसम्भवा अन्ये लभ्यन्ते पूर्वे मायापारवश्यकृताः चेत् संसारिणा उत्तरे परमार्थमाधुरीपारवश्यकृताः ते तु संसारोत्तीर्णानां यथा प्रह्लादस्य संसारिणां तद्बहिर्मुखत्वमयदुःखदर्शनेन श्रीनृसिंहदेवे स्वशोकनिवेदनं यथा ब्रह्ममोहनलीलाकथनारम्भे श्रीशुकदेवस्य मोहः यथा श्रीभरतस्य श्रीभगवन्तमविदुषि रहूगणेऽनुग्रहमयः स्नेहोदयः यथा वा सनकादीनां श्रीवैकुण्ठदेवे तत्पार्षददशापजनितस्वभयनिवेदनमिति एते श्रीभागवतेऽपि वर्णिताः यथा "ता वीक्ष्य कृष्णः सकलाभयप्रदो ह्यनन्यनाथान् स्वकरादपच्युतान् । दीनांश्च मृत्योर्जठराग्निघासान् घृणार्दितो दिष्टकृतेन विस्मितः" इति तस्मादसुरैर्यदि मायया मोहयितुमिष्यते तदा तु न सर्वथासौ शोकमोहादिभाग्भवतीत्येव मन्तव्यम् । यत्तु ततो वत्सानदृष्ट्वेत्यादिकं वर्णितं तत्पुनः परमभक्तेन ब्रह्मणा सह लीलाकौतुकार्थमेव स्वातन्त्र्येणाङ्गीकृतमिति ज्ञेयम् ॥३०-३७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अतः एव न तत्रत्येत्यादि स्वाप्नं स्वप्नप्रपञ्चं यथा ॥२९॥ एवं परमतमुपन्यस्य निराकरोति-एवमिति । के च केच नान्विताः पूर्वापरानुसन्धानरहिताः तदेवाह-यत्तस्ववाचो विरुध्येत विरुध्येरन्निति तन्नानुस्मरन्तीत्यर्थः । तथा हि न तावद्राजसूया रामेण सह गतः कृष्णः सङ्कर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात् ततश्चार्य्यमिश्रादिसङ्गत इति तैर्वर्णितं कृष्णोक्तं कथं सङ्गच्छतां यदि वा कष्टेन सङ्गच्छतां नाम तदा पुनरपि "कथं राममसम्मतं जित्वाऽजेयं सुरासुरैः" इति कृष्णोक्तमुपपद्यतामिति ॥३०॥ कि साल्वमायया मोह एव तावत् कृष्णस्य न सम्भवेत् कुतस्तद्धेतुकौ वसुदेवविषयकस्नेहशोकौ सम्भवेतां तथा साल्वाद्भयं तस्य न सम्भवेत् कुतस्तद्धेतुकं शार्ङ्गपतनं चेत्याह-क्व शोकेति । शोकादयो द्विविधाः अज्ञसम्भवाः विज्ञसम्भवाश्च । तत्र अ असर्वज्ञजने सम्भवन्ति ये ते वा क्व अखण्डितानि विज्ञानादीनि यस्य स परमेश्वरः कृष्णः क्वेति तस्माद्विज्ञे मायातीतलो सम्भवन्ति ये ते चिन्मयाः शोकादयो भगवद्भक्ते भगवति च निखिलरसामृतमयस्वरूपे रसाङ्गभूतसञ्चारिनामानः सन्त्येव त दामोदरलीला गोपीपूर्वरागरासादिलीला सुव्यक्ता एव द्रष्टव्याः अत्र भयं वेति भयं पलायनहेतुभूतभयभिन्नं ज्ञेयम् अभि पलायनमित्युद्धवोक्तेः तत्तत्र वास्तवं चेत्स्यात्तद्विदां बुद्धिभ्रमस्तदा न स्यादिति भागवतामृतोक्तेश्च "इमामगृभ्णन्रशनामृतस्ये सामान्ये अश्वाभिधानीमादत्त इतिवत् ॥३१॥

गूढार्थदीपिनी

पूर्वमेव प्रबुद्धः । आजौ सङ्ग्रामे । यथा प्रबुद्धः पुरुषः स्वप्नप्रपञ्चं न पश्यति तथा । ततश्च आकाशे चरन्तं रिपुं हन्तुमुद्यतोऽभूत् ॥२९॥ के च केचित् एवं वदन्ति ते नान्विताः पूर्वपरानुसन्धानरहिताः । यत् स्वस्यैव वाचः परस्परं विरुध्येरन् तत् नानुस्मरन्ति सङ्कर्षणमनुज्ञाप्य निरूप्य पुररक्षणमित्यादिकाः आह चाहमिहायात आर्यमिश्राभिसङ्गत इत्यादिकया । यद्वा । किम्भूता वाचः । नान्विताः अनु पश्चादुक्ति सङ्कर्षणमनुज्ञाप्येति न इता न ज्ञातवन्तः । यद्वा विरुध्येतेति पाठः तत्र भावे लिङ् । उपसर्गवशात् रुधेरकर्मकत्वम् इति वंशीधरी ॥३०॥ विरोधमेव दर्शयति अज्ञसम्भवाः शोकादयः क्व । अखण्डितानि विज्ञानादीनि यस्य सः भगवांश्च क्व । तत्र शोकः प्रकृतावुपप्लुत इत्यनेन मोहः स्वजनानुषङ्गतः इत्यनेन । स्नेहः स्नेहाद्बभाषे इत्यनेन । भयं च निमित्तान्यति घोराणि इत्यनेन । स्वबोधेन ज्ञानविज्ञाने उक्ते । तत्र ज्ञानं बाह्यविषयं विज्ञानं स्वरूपविषयकम् ऐश्वर्यं तु महानुभाव इत्यनेन विरोधः स्पष्ट एव ॥३१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एतदेवं प्रबुद्धः न दूतं न पितुः कलेवरं समपश्यत् यथा प्रबुद्धः स्वाप्नमर्थं न पश्यति तद्वत् ॥२९॥ परमतं दूषयति- एवमिति । केचन ऋषयः एवं वदन्ति ये नान्विताः पूर्वापरानुसन्धानरहिताः तदाह-यत्स्ववाचो विरुध्येत विरुध्येरन् विरोधं प्रापुयुः तत्र स्मरन्ति नूनं निश्चितम् अयमाशयः न तावद्रामेण सह राजसूयार्थं गतो हरिः सङ्कर्षणमनुज्ञाप्येत्युक्तत्वात् ॥३०॥ किञ्च असम्भवाः शोकादयः तत्र विमनस्क इत्यनेन शोकः निशम्य विप्रियं कृष्णो मानुषीं प्रकृतिं गत इत्यनेन मोहः स्नेहाद्बभाषे प्राकृतो यथेत्यनेन स्नेहश्चोक्तः वेति चार्थे द्वितीयो वाशब्दः अनुक्तसङ्ग्रहार्थः कथं राममसम्भ्रान्तं जित्वाऽजेयं सुरासुरैः साल्वेनाल्पीयसा नीतः पिता मे इत्यनेनाज्ञत्वं शाल्वः शौरेस्तु दोः सव्यं सशार्ङ्गं शार्ङ्गधन्वनः बिभेद इत्यादिना अनवहितत्वादयो दोषाः क्व अखण्डितानि विज्ञानज्ञानैश्वर्याणि यस्य सः विज्ञानं विविधं स्वगुणशक्त्यादिविषयकं ज्ञानं स्वविषयकम् एवम्भूतः अखण्डितः पूर्णः श्रीकृष्णश्च क्व ॥३१॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

प्रबोधप्रदर्शनानन्तरं का कथा प्रवृत्तेत्यतस्तां वक्ति । नेति ॥ तत्र दैत्यं साल्वं नापश्यतत् पितुर्वसुदेवस्य कलेवरमात्मा सर्वान्तर्यामी प्रबुद्धस्तद्ददर्शयित्वाऽच्युतः परपरिदर्शितमायाच्युतिप्रच्युतेः । किञ्चित्साम्येन निदर्शनं दर्शयति । स्वाप्नं यथेति । समदर्शनं स्वाप्निकानां मायिकानां च । परन्तु ते यथार्था एतेऽयथार्था इति विशेषो ज्ञेयः । अम्बरचारिणमिति विशेष्ये न सरसान्वयि तत्सौभपदेन सशोभान्वयम् । अम्बरचारिसौभस्थं रिपुमालोक्य निहन्तुमुद्यतोऽभूदिति शेषः । पूर्वं तदेधनायैवायोधनेनोद्यमं चकार हरिरिति स एवं चकारेति ध्वन्यतेऽनेन । न तत्रेति परीक्षित्सम्बोधनपक्षे दैत्यं पितुः कलेवरं च नापश्यदिति युगपदन्वयेन वा नत्र आवृत्याऽन्वयेन वाऽर्थो बोध्यः । न तांस्त्रायत इति न तत्रस्तत्सम्बोधनम् ॥३९॥ श्लोकद्वयस्य तात्पर्यं स्वजनानुसङ्गत इत्युक्तस्वजनजल्पनानुवादमिषेण ग्रन्थकृदाहेत्याह ॥ एवमिति ॥ खेचरैर्देवैरन्विता युक्ता ऋषय एवं वदन्ति । तद्वचनं कुतः प्रमाणमित्यतस्त एतादृशास्तद्वचनं चैवमिति तान्विवेचयति । यदिति । यन्मोहादिकथनं प्रति स्ववाचः स्वतन्त्रवाचो वेदा अपौरुषेयत्वाद्विरुद्ध्यन्ते न वस्तुतस्तदिति बाधन्ते तन्मोहादिकं ते ऋषयः खेचराश्च नूनं स्मरन्ति नु किं तत्र स्मरन्तीति । एवं वदति मत्रिर्मोहादिकं प्रति तेऽविरुद्ध्यन्ते तत् नु नुम इति स्मरन्तीत्यावृत्त्याऽन्वयोऽपि । नुनुमो लोप इत्याद्यृग्भाष्यमुदाहृत्य प्राग्विवृतमनुसन्धेयम् ॥४०॥ द्वाभ्यां श्लोकाभ्यां पुनर्वदति । क्वेति । भयं शोकमोहौ स्नेहो वा । कीदृशा इत्यत आह । य इति । अज्ञसम्भवा अज्ञेषु सम्भवाः सम्भावयितुं योग्याः क्व । अखण्डितं ज्ञानं विज्ञानं चैश्वर्यं चेत्येतानि यस्य स चासावीश्वरो स्वारमणोऽजितः क्व । अत्यन्तविरोधादिति भावः ॥४१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो बोधेन तद्रूपे उपसंहृते तत्कार्याणां लयो जात इत्याह-न तत्र दूतमिति । अनेनापि भगवत्त्वमेव साधितम् । अन्यथा मायिकोपसंहारे हेत्वभावः, दूतः पितुः शरीरं च पूर्वं दृश्यमानमपि प्रबुद्धः सन् पश्चादाजौ युद्धस्थाने न समपश्यत् । यतोऽयमच्युतः । रूपान्तरस्थितः-तथैवेति ज्ञापयितुं गूढोऽर्थोयमिति दृष्टान्तमाह-स्वाप्नं यथेति । स्वप्नेऽपि स्वयमेव स्थितः परं रूपान्तरेणेति

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

रूपान्तरस्वीकारे तस्यादर्शनं युक्तम्। चकारेण मायामनोरथादिकमपि सङ्गृह्यते-ततः अम्बरचारिणं रिपुं सौभस्थमालोक्य मारणपापे महादेवभगवतोः उपेक्षणाद्रक्षकाभावात् निहन्तुमुद्यत इति पूर्वपक्षः ॥२९॥ सिद्धान्तमाह-एवमिति। अस्य पूर्वपक्षत्वं युक्तिबोधेन वक्तव्यमेव प्रमाणबाधेनापि निरूप्यते। एवं मुनयो वदन्तीति मननेन सञ्जातं यदार्षज्ञानं तेनोत्प्रेक्षया एव ज्ञात्वा वदन्ति मूलविरोधे आर्षज्ञानमप्रमाणमिति शास्त्रमर्यादा उपजीव्यविरोधात्। यथा प्रमाणबोधितधर्मेणैव आर्षज्ञानं वृत्तमिति प्रमाणविरोधेन निरूपितानि साङ्ख्यादिमतान्यप्रमाणानि। एवं भगवदनुभावकृपाव्यतिरेकेण प्रमेयबलं विना आर्षज्ञानं न भवतीति तेन ज्ञानेन भगवति दोषदर्शनं स्वजन्मनि मातृव्यभिचारदर्शनमिव सर्वथा बाधितविषयत्वादुपेक्ष्यम्। तथापि धृष्टा निर्लज्जा ये वदन्ति मूलभूतेऽपि भगवति दोषांस्तानुपहसति मुनयो वदन्तीति। ऋषय इत्यपि तथा। राजर्ष इति सम्बोधनं स्वपक्षपरपक्षाभिनिवेशयोः विश्वासोपहासौ बोधयति। एतेषां मध्ये केचनैवान्विताः युक्तवादिनः सर्वनिराकरणे अर्धनिराकरणं प्ररोचनार्थम्। नान्विता इति पदच्छेदे सर्वनिराकरणं वा। उपहासे युक्तिमाह-यत्स्ववाचो विरुध्येरन्निति। ते किं कल्पान्तरव्यवस्थां योगबलेन ज्ञात्वा वदन्ति आहोस्वि इदानीन्तनभगवद्व्यवस्थाम्। आद्ये नास्माकं कापि क्षतिः। द्वितीये तु 'कृष्णस्तु भगवान् स्वयम्' इति शास्त्रपर्यालोचनया तदनुगुणा एव धर्मा वक्तव्या इति विरुद्धकथनात् ते नूनं न स्मरन्ति। अपि च। तादृशार्षज्ञानेन उत अपि पूर्वमपि स्मृतमप्रमाणमेव। ननु सर्वेष्ववतारेषु अवतारधर्माः प्रवर्तन्ते अन्यथा वसुदेवसुतत्वादयोऽपि बाधितार्था इति न वक्तव्याः स्युः ॥३०॥ तस्मादवतीर्णस्य दोषवर्णनं न बाधितमिति शङ्कायामाह-क्व शोकमोहौ स्नेहो वेति। अयमवतारः नावतारान्तरवत् केनचिदंशेन अज्ञानशक्तिसहि वा किन्तु साक्षात्पुरुषोत्तमस्यैव पूर्णशक्तिमतः ततश्च तत्र पूर्णरूपे प्रथमतो हीनभाव एव बोधयितुमनुचितः भक्तोत्कर्षबोधनाभावा तत्रापि पित्रर्थं शोकः मोहश्च। मायिके पितृत्वबुद्धिस्तस्मिंश्च स्नेह इति। वेत्यनादरे। तदनुगुणं वचनं च 'पिता मे बलवान् विधि इत्यादि। एते कथं न भवन्तीत्याह-अज्ञसम्भवा इति। अज्ञानगृहीत एव चैतन्ये एतेऽन्तःकरणस्य धर्माः सम्भवन्ति प्रकृतेऽप्येवमेवास्त्विति चेत्तत्राह-क्व चाखण्डितविज्ञानज्ञानैश्वर्य इति। भगवति सर्वदा त्रयं सिद्धं सर्वलीलास्वपि अखण्डि विज्ञानमात्मानुभवः, ज्ञानं सर्ववस्तूनाम् ऐश्वर्यं पूतनासुपयःपानप्रभृति सर्वत्र त्रयाणां निरूपणात्, यत्राज्ञानं बाल्ये सर्वजनीनं यदि नास्ति तदा कथमिदानीं जीवानामपि विवेकदशायां तत्सम्भवेत्। न च लोकास्तथैव बोध्यन्त इति पक्षः लोकानामपि भगव निरतिशयैश्वर्य्य इति बुद्धिः। यतः सुरैरनुक्षणमीडितः। उपलक्षणमेतत्। पारिजातहरणगोवर्धनोद्धरणकालीयदमनादीनि पामराणाम माहात्म्यज्ञापकानि चरित्राणि सन्ति। अतः सर्वथास्मिन्नवतारे केनाप्यंशेनाज्ञानादिकथनं बाधितविषयमेव ॥३१॥

श्रीसुबोधिनीसारः

तत्र स्थाने दूतं नापश्यत् पितुः कलेवरं शरीरं नापश्यत्प्रबुद्धोऽच्युतः श्रीकृष्णः प्रबुद्ध उत्थितः स्वाप्नं स्वप्नगतं वस्तु अम्बरचारिणमाकाशे वर्तमानं सौभे स्थितं रिपुं वैरिणं शाल्वम् आलोक्य दृष्ट्वा निहन्तुमुद्यतः ॥२९॥ परमतमुपन्यस्तं खण्ड एवमिति। के च ऋषयो नान्विता अनन्विताः पूर्वापरवाक्यानभिज्ञा एवं वदन्ति यत् स्ववाचो विरोधं प्राप्नुयात् तत् ते नूनं न स्म सङ्कर्षणमनुज्ञाप्येति पूर्वोक्तेराह चाहमिहायात आर्यमिश्राभिसङ्गत इति वचो विरुद्धमिति भावः ॥३०॥ शोकमोहौ क्व स्नेहो व भयं दुःशकुनजं वा क्व अज्ञेषु मूर्खेषु सम्भवो येषां ते ये शोकादयः अखण्डितानि विज्ञानज्ञानैश्वर्याणि यस्य सोऽखण्डितो आत्मा क्व इति महदन्तरम् ॥३१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रबुद्धश्चाच्युतस्तत्राजौ रणाङ्गणे दूतं पितुः कलेवरं च न समपश्यदित्यन्वयः। तत्र दृष्टान्तमाह-स्वाप्नं यथा। सुप्त पुरुषो यथा स्वप्नमदृष्टं वस्तु न पश्यति तद्वदित्यर्थः। ततश्चाम्बरचारिणं आकाशे विचरन्तं सौभे स्थितं रिपुं शत्रुं शाल्वमालो निहन्तुमुद्यतो बभूव ॥२९॥ इत्थमुपन्यस्तं परमतं निराकरोति-एवमिति। त्वयापि विचारणीयम्, विवेकित्वात्, इत्याशयेन सम्बो राजर्ष इति। केचन केचन नान्विताः अनन्विताः पूर्वापरानुसन्धानरहिता एवं वदन्ति। तेषामनन्वितत्वमेव स्पष्टयति-यत्स्व विरुध्येरन् विरोधं प्राप्नुयुः तत्तेन नूनं निश्चितं न स्मरन्ति नानुसन्दधते। विवेकिनामेतस्यायुक्तत्वादाश्चर्यं सूचयति-उतेति विरोधमेव दर्शयति क्वेति। अज्ञेषु सम्भवो येषां ते शोकादयः क्वः ? अखण्डितानि विज्ञानज्ञानैश्वर्याणि यस्य सः अखण्डि

अ
इत्युक्तः स्नेह
बाह्यविषयम्,

नेति
न पश्यति तद्व
इत्थमुपन्यस्तं प्र
यत्स्ववाचो विरु
रामेण सह गतः
कथं राममसम्भ्रा
पूर्वमुक्तम्। आर्य
विरोधः। रामस्य
मागधपलायना
सर्वज्ञव्यासादिवर्ण
ऋषय एवं वदन्ति
विरोधमेव दर्शयति
अविद्यावरणराहित्ये
स्नेहाद्भाष इति स्ने
बाह्यविषयम्, विज्ञान

प्रबुद्धः जाग
हन्तुमुद्यतः ॥२९॥ हे
एवं शाल्वमायायां श्री
यत् स्ववचनं शाल्वमा
तमेव विरोधं खण्डयन्न
अप्रतिहतानि विज्ञानादी

ततः किं कृतव
स्वाप्नमर्थं यथा न पश्यति
सौभस्थं रिपुं शाल्वम् आ
केचित् ऋषयः नान्विताः
प्राप्नुयुर्यदित्यर्थः। तद् उ
श्रीकृष्णे शोकमोहौ क्व।
इत्यर्थः। स्नेहो वा 'घृणी स्ने
दुर्निमित्तदर्शनजा भीतिः क्व

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अविद्यावरणराहित्येन पूर्णानन्दस्वरूपो भगवांश्च क्व ? । तत्र शोकः प्रकृतावुपप्लुत इत्युक्तः । मोहश्च स्वजनानुषङ्गत इत्युक्तः स्नेहाद्बभाष इति स्नेह उक्तः । भयं च पश्यन् निमित्तानि घोराणीत्युक्तम् । तथा स्वबोध इति ज्ञानविज्ञाने उक्ते । तत्र ज्ञानं बाह्यविषयम्, विज्ञानं स्वस्वरूपविषयम् । ऐश्वर्यं तु महानुभाव इत्युक्तम् । तथा विरोधः स्पष्ट एव ॥३१॥

अन्वितार्थप्रकाशिका

नेति ॥ सदैव प्रबुद्धश्चाच्युतस्तत्राजौ रणाङ्गणे दूतं पितुः कलेवरं च न समपश्यत् । सुप्तप्रबुद्धः पुरुषो यथा स्वप्नदृष्टं वस्तु न पश्यति तद्वदित्यर्थः । ततश्चाम्बरचारिणं आकाशे विचरन्तं सौभे स्थितं रिपुं शत्रुं शाल्वमालोक्य तं निहन्तुमुद्यतो बभूव ॥२९॥ इत्थमुपन्यस्तं प्रकरणं शोधयति –एवमिति । हे राजर्षे ! केचित् नान्विताः पूर्वापरानुसन्धानरहिता ऋषयः एवं वदन्ति । तत्र – यत्स्ववाचो विरुध्येरन् विरोधं प्राप्नुयुः तत्तेन नूनं निश्चितं न स्मरन्ति नानुसन्दधते । अत्र पूर्वापरविरोधमेवं व्याचक्षते । न तावद्राजसूयार्थं रामेण सह गतः कृष्णः सङ्कर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात् ततश्चार्यमिश्राभिसङ्गत इति तैरुक्तमसङ्गतं स्यात् । कष्टेन सङ्गतीकरणे कथं राममसम्भ्रान्तमिति नोपपद्यते इति । वस्तुतः शुकस्यापि ऋषिवचनखण्डने तात्पर्यं न वर्णनीयम् । तथा हि सङ्कर्षणमनुज्ञाप्येति पूर्वमुक्तम् । आर्यमिश्राभिसङ्गत इत्यस्येन्द्रप्रस्थात् सर्वागमनोत्तरं स्वाह्वानार्थम् आगतेनार्यमिश्रेण सङ्गत इति व्याख्याने तेन सह न विरोधः । रामस्य च पुररक्षणे नियुक्तत्वात्कथं राममित्यपि सङ्गतमेव एवं क्व शोकमोहावित्यादिश्लोकद्वयोक्तविरोधोऽपि नास्ति । मागधपलायनादिबाह्यलीलावद्भक्तचिन्तादेरान्तरलीलाया दामोदरलीलादौ दृष्टत्वात् प्रयोजनं त्वीदृशान्तरलीलायाः सर्वज्ञव्यासादिवर्णनैर्भक्तवात्सल्यादिभक्तव्यक्तीभावार्थमेव एवं वदन्ति इति । श्लोकार्थस्तु हे राजर्षे ! केचन अन्विता योग्या वा ऋषय एवं वदन्ति ये तु भ्रमात् स्ववाचो विरुध्येरन् इति तान् प्रति वदन्ति । ते नूनं परस्परं विरोधपरिहारं न जानन्तीत्यर्थः ॥३०॥ विरोधमेव दर्शयति क्वेति । अज्ञेषु सम्भवो येषां ते शोकादयः क्वः ? अखण्डितानि विज्ञानज्ञानैश्वर्याणि यस्य सः अखण्डितः अविद्यावरणराहित्येन पूर्णानन्दस्वरूपो भगवांश्च क्व । तत्र शोकः प्रकृतावुपप्लुत इत्युक्तः । मोहश्च स्वजनानुषङ्गत इत्युक्तः स्नेहाद्बभाष इति स्नेह उक्तः । भयं च पश्यन् निमित्तानि घोराणीत्युक्तम् । तथा स्वबोध इति ज्ञानविज्ञाने उक्ते । तत्र ज्ञानं बाह्यविषयम्, विज्ञानं स्वरूपविषयम् । ऐश्वर्यं तु महानुभाव इत्युक्तम् । तथा विरोधः स्पष्ट एव ॥३१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रबुद्धः जागरितः सन् स्वाप्नं स्वप्नदृष्टपदार्थं यथा तथा तत्र हतं कलेवरं च नापश्यत् ततः अच्युतः आजौ संग्रामे रिपुं हन्तुमुद्यतः ॥२९॥ हे राजर्षे ! के च एके ऋषयः नान्विता अनन्विताः सर्वज्ञत्वादिभगवदसंरब्धगुणज्ञानानुसन्धानरहिताः सन्तः एवं शाल्वमायायां श्रीकृष्णो मुहूर्तं मोहं प्राप्त इति ये वदन्ति ते अनादिस्वतःसिद्धज्ञानवान् सदा अप्रतिहतज्ञानः श्रीकृष्णोऽस्तीति यत् स्ववचनं शाल्वमायायां श्रीकृष्णो मुहूर्तं मोहित इति वचनेने सह विरुध्येत विरोधं प्राप्तं तन्नस्मरन्ति न विचारयन्तीत्यर्थः ॥३०॥ तमेव विरोधं खण्डयन्नाह द्वाभ्याम्–क्वेति । अज्ञेषु विषयासक्तेषु सम्भव उत्पत्तिर्येषां ते शोकादयः क्व । अखण्डितानि सदा अप्रतिहतानि विज्ञानादीनि यस्मिन् स्वयं चाखण्डितः । अच्युतः अविनाशिविग्रह इति यावत् । एवम्भूतः श्रीकृष्णः क्व ॥३१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ततः किं कृतवांस्तत्राह नेति । ततः तत्र यदैवमबुद्ध्यत् तदैवेत्यर्थः । अच्युतः प्रबुद्धः जागरितः स्वाप्नं यथा स्वप्नादुत्थितः स्वाप्नमर्थं यथा न पश्यति तद्वदित्यर्थः । आजौ युद्धाङ्गणे दूतं न समपश्यत् । पितुः कलेवरमपि न समपश्यत् । किं तु अम्बरचारिणं सौभस्थं रिपुं शाल्वम् आलोक्य निहन्तुम् उद्युक्तः आसीच्च ॥२९॥ एवमुपन्यस्तं परमतं निराकरोति । एवमिति । हे राजर्षे ! के च केचित् ऋषयः नान्विताः अनन्विताः पूर्वापरानुसन्धानरहिता इत्यर्थः । एवमित्थं वदन्ति यत् स्ववाचः विरुध्येरन् विरोधं प्राप्नुयुर्यदित्यर्थः । तद् उत तत्त्वित्यर्थः । ते मुनयः न स्मरन्ति नूनम् ॥३०॥ असम्भावितं चैतदित्याह–क्व शोकमोहाविति । श्रीकृष्णे शोकमोहौ क्व । तत्र 'विमनस्कः' इत्यनेन उक्तः शोकः 'मानुषीं प्रकृतिं गतः' इत्यनेनोक्तो मोहश्च कदापि न युज्यत इत्यर्थः । स्नेहो वा 'घृणी स्नेहात्' इत्यनेनोक्तः स्नेहः क्व । कुलमुच्छिद्य धाम यास्यामीत्युक्तेरस्य सोऽपि न युज्यत इत्यर्थः । भयं वा दुर्निमित्तदर्शनजा भीतिः क्व । तच्च 'नूनं हन्युः पुरीं मम' 'हस्ताच्छार्ङ्गं न्यपतत्' इत्यनेन चोक्तं भयमप्यस्मिन् कालकालत्वान्न

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

घटते इत्यर्थः । कुतः ये एते भावा इति शेषः अज्ञसम्भवाः । अतः ते क्व । अखण्डितं विज्ञानं ज्ञानमैश्वर्यं च यस्य सः तत्र विज्ञानं स्वरूपविषयं ज्ञानं बाह्यप्रपञ्चविषयम् ऐश्वर्यं षाड्गुण्यपूर्णत्वं तु स्वतस्तु अखण्डितः एवं विधो भगवान् क्व च अन्योन्यविरुद्धधर्माणामेकत्र सम्भवं वदतामवबोधं विचार्य विस्मीयत इति भावः ॥३१॥

कृष्णप्रिया

द्वारिकाधीश भगवान श्रीकृष्णने उस युद्ध भूमिमे सावधान बनकर देखा की वहां न दूत है और न तो पिताजीका वह शरीर है जैसे स्वप्नमें कोइ एक दृश्य दीखकर क्षणमें लुप्त हो गया हो और उधर देखा तो सौभ विमान पर चढकर शाल्व गगनमें विचर रहा है । उसी क्षण शाल्व का वध करने के लिये भगवान तत्पर हो गये ।।२९।। राजर्षि परीक्षित जो बात उपर कही गयी उस बातका विचार न करनेवाले कोई कोई ऋषि कहते है, लेकिन इस बात को वे विसर जाते है कि भगवान श्रकृष्ण के विषयमें अैसा कहना .नही के वचनों की विपरीत है ।।३०।। अज्ञानी जनोंमे रहनेवाले शोक मोह भय एवं स्नेह और कहां परिपूर्ण भगवान पुरुषोत्तम श्रीकृष्ण जीन भगवान का ज्ञान विज्ञान और ऐश्वर्य जो अखंडित है सदा एकरस है उन भगवानमें वैसे भावो की संभावना ही कहां है ।३१।।

यत्पादसेवोर्जितयाऽऽत्मविरुया हिन्वन्त्यनारुात्मविपर्ययग्रहम् ।
लभन्त [1]आत्मानमनन्तमैश्वरं कुतो नु मोहः परमस्य सद्गतेः　　॥३२॥
तं [2]शस्त्रपूगैः प्रहरन्तमोजसा शाल्वं शरैः शौरिरमोघविक्रमः ।
[3]विद्ध्वाच्छिनद्वर्म धनुः शिरोमणिं सौभं च शत्रोर्गदया रुरोज ह　　॥३३॥
तत् कृष्णहस्तेरितया [4]विघूर्णितं पपात तोये गदया सहस्रधा ।
विसृज्य तद्भूतलमास्थितो गदामुरुम्य शाल्वोऽच्युतमभ्यगाद्द्रुतम्　　॥३४॥

कर्दमक्षमा

यत्पादसेवोर्जितया, आत्मविद्यया, अनाद्याऽऽत्मविपर्ययग्रहम्, हिन्वन्ति, आत्मानम्, अनन्तम्, ईश्वरम्, लभन्ते, अस्य सद्गतेः, परमस्य, नु, मोहः, कुतः ॥३२॥ ओजसा, शत्रपूगैः, प्रहरन्तम्, तम्, शाल्वम्, अमोघविक्रमम्, शौरिः, शरैः, वर्म, धनुः, शिरोमणिम्, विद्ध्वा, अच्छिनत्, च, शत्रोः, सौभम्, गदया, रुरोज, ह ॥३३॥ तत्, कृष्णहस्तेरितया, गदया, सहस्रधा, विघूर्णितम् तोये पपात, शाल्वः, तद्, विसृज्य, गदाम्, उद्यम्य, भूतलम्, आस्थितः, अच्युतम्, द्रुतम्, अभ्यगात् ॥३४॥

---

१. ज्ञानैश्वर्यस्य ह्यात्मनः-वीर. ; ज्ञानैश्वर्येश्वरोऽजितः-विज. । ७. आत्मीय-श्रीधर वंशी. वीर. विज. शुक. । ८. विज. त्रयस्त्रिंश (३३) श्लोकमारभ्याऽऽध्यायसमाप्ति पाठोऽन्यादृशो दृश्यते । तत्र केचन ॥क॥इत्यादिक्रमेण पूर्वश्लोकविजयध्वजीयटीकायां श्लोकाः दत्ताः । अन्ये च

तं शस्त्रपूगैः प्रहरन्तमोजसा शाल्वं शरैः शौरिरमोधविक्रमः । विद्ध्वाऽच्छिनद्धर्मं धनुः शिरोमणिं रथं च शत्रोर्गदया रुरोज ह ॥९॥
तत्कृष्णहस्तेरितया विचूर्णितः पपात तोये गदया सहस्रधा । विसृज्य तं भूतलमास्थितो गदामुधम शाल्वोऽच्युतमभ्यगाद्द्रुतम् ॥१०॥
आधावतो भीमगदस्य बाहुं भल्लेन छित्वाऽथ रथाङ्गमद्भुतम् । वधाय शाल्वस्य लयार्कसनिभं बिभ्रद्बभौ सार्क इवोदयाचलः ॥११॥
जहार तेनैव शिरः सकुण्डलं किरीटयुक्तं पुरुमायिनो हरिः । वज्रेण वृत्रस्य यथा पुरन्दरो बभूव हाहेति वचस्तदा नृणाम् ॥१२॥
तस्मिन्निपतिते पाप सौभे चाब्धौ निपातिते । देवदुन्दुभयो नेदुवृपुः पुष्पवृष्टयः ॥१३॥
स्तूयमानो मुनिगणैः सूतमागधवन्दिभिः । आजगाम वृतः सैन्यैः पुरीं द्वारवतीं हरिः ॥१४॥
स प्रविश्य पुरीं रम्यां पताकाषण्डमण्डिताम् । अलङ्कृतामलङ्कारैः सिक्तसंमृष्टचत्वराम् ॥१५॥
पूजितो यदुभिर्वृद्धैः पौरजानपदैस्तथा । रमयद्द्वयष्टसाहिषीः प्रेमविह्वलाः । उवास देवकीपुत्रः सानन्दं कुरुनन्दन ॥१६॥"

९. युद्ध्वा-वीर. । १०. विचूर्णितं-श्रीधर. वशी. वीर. विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

किञ्च यस्य पादसेवया ऊर्जिता पुष्कला या आत्मविद्या तया अनादिश्चासावात्मविपर्ययग्रहश्च अहं कृशः सुखी दुःखी इत्यादिलक्षणस्तं हिन्वन्ति नाशयन्ति सन्तः ऐश्वरं पदञ्च तस्य सतां गतेः कुतो नु मोह इति अतो नैतद्वचनं सख्यमित्यर्थः ॥३२॥ किं तर्हि सत्यं तदाह-तं शस्त्रपूगैरिति । वर्म कवचम् रुरोज बभञ्जे ॥३३-३४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कैमुत्येन तदेव द्रढयति-किञ्चेति । अतो मोहाभावात् । एतद्वचनं 'ततो मुहूर्तम्' इत्यादिरूपम् । इत्यर्थ इति-न सर्वथा सत्यम् । "यदचरस्तन्वा" इत्यादिश्रुत्या तद्व्यवहारस्य मायिकत्वागमादिति भावः ॥३२॥ सत्यमाशङ्क्य वक्ति-किमिति । तत्सत्यम् ॥३३॥ तत्सौभं तच्चूर्णितसौभम् ॥३४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आत्मविद्यया स्वतत्त्वविज्ञानेन आत्मनः स्वस्वरूपस्य विपर्ययेण वैपरीत्येन ग्रहणं ज्ञानमित्यर्थः । आत्मीयं पदं स्वरूपानुभवलक्षणं मोक्षमित्यर्थः । ऐश्वरं च वैकुण्ठलोकं कथं भूतम् ? अनन्तं लोकत्वेऽपि श्रीविग्रहवदपरिच्छिन्नं नु अहो मोहः अज्ञानं परमस्य परमेश्वरस्य इति दुर्निमित्ततादर्शनं तेन चिन्ता च न सम्भवेत् तथा सतां मुक्तानां मोक्षानपेक्षकभक्तानां वा गतेर्गम्यस्येति सच्चिदानन्दविग्रहत्वेन च दोर्भेदनादिकं न सम्भवेदेवेति भावः । अथवात्र प्रकरणे सर्वं नासमञ्जसं किन्तु किञ्चिदेव कुरुवृद्धानुज्ञापनापूर्वकप्रस्थानादीनामपेक्षितत्वात् श्रीबलदेवस्य सभापर्वादावुक्तं तत्र गमनं च न विरुद्धं पूर्वमागतस्यापि पश्चाद्यज्ञार्थमाह्वानेन तथा श्रीकृष्णेन सहैवागत्य पुररक्षार्थावस्थानेन च सम्भवात् पूर्वं द्वारकायां स्थिते तु श्रीबलदेवे श्रीप्रद्युम्नस्य युद्धादौ प्राधान्यायुक्तत्वात् प्राकृता अपि तदानीं जानीयुः किमुत श्रीवैशम्पायनादयः अतस्तेषां तत्र मोहो न सम्भवेत् दुर्निमित्तदर्शनादिकं च लीलैव ततस्तदपि न विरुद्धं यत्तु श्रीभगवदन्तर्वृत्तित्वात्तैर्दुरूहं विरुद्धं च तत्स्वयमेवाह-क्व शोकेति । अखण्डितविज्ञानादित्वेन शोकादिवशत्वेन चोक्तत्वात् स्ववाग्विरुद्धता तत्राज्ञसम्भवा इति । विशेषणाद्विज्ञसम्भवा अन्ये लभ्यन्ते पूर्वे मायापारवश्यकृताः ते च संसारिणाम् उत्तरे परमार्थवस्तुमाधुरीपारवश्यकृताः ते तु संसारोत्तीर्णानां यथा श्रीप्रह्लादस्य संसारिणां तद्बहिर्मुखत्वमयदुःखदर्शनेन श्रीनृसिंहदेवे स्वशोकनिवेदनं यथा वा ब्रह्ममोहनलीलाकथनारम्भे श्रीशुकदेवस्य मोहः यथा वा श्रीभरतस्य श्रीभगवन्तमविदुषि हूणेऽनुग्रहमयः स्नेहोदयः यथा वा सनकादीनां श्रीवैकुण्ठदेवे तत्पार्षदशापजनितस्वभयनिवेदनमिति एते श्रीभगवतोऽपि दामोदरलीलाप्रसङ्गे भक्तानुग्रहस्वभावतास्थापनया स्थापिता एव यथैव श्रीशुकदेवेनापि स्वयमन्यत्र वर्णितम्- "तान्वीक्ष्य कृष्णः सकलाभयप्रदो ह्यनन्यनाथान् स्वकरादपच्युतान् । दीनांश्चमुत्योर्जठराग्निघासान् घृणार्दितो दिष्टकृतेन विस्मितः ॥" इति । यथा तत्रैव च सर्वसात्वतगणरक्षार्थं शाल्वेन युद्ध्यतीति तस्मादसुरैर्यदि मायया मोहयितुमिष्यते तदा न सर्वथा शोकमोहादिभाक्भवतीत्येव मन्तव्यं यत्तु- "ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान् । उभावपि वने कृष्णो विचिकाय समन्ततः ॥" इति । ब्रह्मणो माययैव तत्तद्वर्णितम् । तत्पुनः परमभक्तेन ब्रह्मणा सहलीलाकौतुकार्थमेव स्वातन्त्र्येणाङ्गीकृतमिति ज्ञेयम् । एवमेवोत्तरपद्येऽपि अनाद्यात्मविपर्ययग्रहं हिन्वन्तीत्येवोक्तमिति दिक् । एवं ततो मुहूर्तमित्यादिद्वये गीर्देवीमतमेतत् मुहूर्तं व्याप्य तत्तस्मात् मिथ्याकारणाद्धेतोर्यः स्वजनस्य श्रीवसुदेवस्य अनुषङ्गोऽनुस्मरणं तृतीयायास्तसिल् तेनोपप्लुतो व्यासोऽपि प्रकृतौ स्वस्वरूपे स्वबोधे निजसार्वज्ञ एवास्ते स्वव्यवच्छेदेनासीत् यतो महानुभाव इत्यादि मुहूर्तानन्तरं तु बहिरपि नापश्यदित्याह-नेति । तत्र दृष्टान्तः प्रबुद्धः स्वप्नसमयेऽपि स्वप्नोऽयमिति निर्णीतबोधो जनो यथा क्षणात्स्वाप्नं तत्सम्बन्धि वस्तु न पश्यति तथेति ॥३२॥ एवं परमतमिश्रं पूर्वं प्रकरणं संशोध्य केवलस्वमतमुत्तरं प्रकरणमाह-वर्म्मादीनां तत्तत्क्रमेणाच्छादनं तद्दर्पस्याधिकनिरसनार्थं यतः शत्रोः ह हर्षे ॥३३॥ तत्सौभं तोये समुद्रे ॥३४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आत्मविद्यया स्वतत्त्वज्ञानेनानादिं सदा वर्तमानमात्मनः स्वस्वरूपस्य विपर्ययेण वैपरीत्येन ग्रहं ग्रहणं ज्ञानमित्यर्थः । आत्मीयं पदं स्वरूपानुभवलक्षणं मोक्षमित्यर्थः । ऐश्वरं च श्रीवैकुण्ठलोकं कथम्भूतम् ? अनन्तं लोकत्वेऽप्यपरिच्छिन्नं ब्रह्मघनत्वेन परमव्यापकत्वात् । नु अहो मोहोऽज्ञानं परमस्य परमेश्वरस्येति दुर्निमित्तदर्शनं तेन चिन्ता च । तथा सतां मुक्तानां मोक्षानपेक्षकभक्तानां

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वा गतेर्गम्यस्येति सच्चिदानन्दविग्रहत्वेन च दौर्भेदनादिकं न सम्भवेदेवेति भावः ॥३२॥ ओजसा वेगेन महाबलेन वा प्रहरन्तमित्यने लीलया विद्ध्वेति ध्वनितम् । यतः शौरिः अतोऽमोघो विक्रमः शक्तिर्येषां तैः पाठान्तरे सत्यपराक्रमः शिरसो मणिं वर्मादीन तत्तत्क्रमेणच्छेदनं वीरदर्पाधिकनिरसनार्थम्, यतः शत्रोः ह हर्षे तावदेव राजसूयस्य पश्चादिन्द्रप्रस्थाच्छ्रीद्वारकामागतमात्र इति शेष ॥३३॥ तत्सौभम् । कृष्णस्य साक्षाद्भगवतो हस्तेनेरितया प्रेरितया अतो विशेषेण चूर्णितं सत् तोये समुद्रे । अच्युतमिति । तत्रैव स्थिरतया वर्तमानमिति भावः । द्रुतमपि सुखमगात् ॥३४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

आत्मीयमनन्तमैश्वरं गुणाष्टकलक्षणं लभन्ते ॥३२-३५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

शोकाद्यभावं कैमुत्याभिप्रायेणाह-यत्पादेति । यस्य भगवतः पादयोः सेवया परिचर्यादिरूपसेवया श्रवणकीर्तनादिरूप वा ऊर्जिता पुष्कला परिनिष्पन्नेति यावत् तयाऽऽत्मविद्यया आत्मनस्तस्य परमात्मनः विद्यया उपासनया अनाद्यात्मविपर्ययग्र हिन्वन्ति अपनयन्ति अनादिश्चासावात्मनो विपर्ययः देहाद्विलक्षणस्यात्मनो देहतादात्म्यभ्रमः अस्वतन्त्रस्यात्मनः स्वातन्त्र्यभ्रमश्चेत्येवंविधो विपर्ययः स एव ग्रहः पिशाचस्तं किञ्चानन्तमसङ्कुचितमात्मीयमैश्वरम् अपहतपाप्मत्वादिगुणाष्टकलक्ष लभन्ते निरस्तनिश्शेषाज्ञानतत्कार्याः गुणाष्टकप्रादुर्भावरूपमुक्तिं लभन्त इत्यर्थः । सतां गतेः परमपुरुषस्य मोहं कुतो तत्पादसेवकानामेव न मोहः किम्पुनस्तस्य मोहाभाव इति वक्तव्यमित्यर्थः ॥३२॥ इत्थं परमते निरस्ते किं तर्हि तात्त्विकमित्याह- तमिति । शौरेरित्यस्येन्द्रप्रस्थादागत इत्यादिः यद्वा भगवतः शोकमोहादिप्रतिपादकमिव स्थितमनूदितं इत्यादिः यद्वा भगवतः शोकमोहादिप्रतिपादकमिव स्थितमनूदितं परमतमुद्धरति-एवं वदन्तीति त्रिभिः । अन्विता युक्ता इति यावत् केचनैवं वदि इत्यर्थः । ननु निरस्तनिखिलदोषस्य भगवतोऽज्ञानशोकादिदोषान् वदन्तः कथमभियुक्ता इत्यत आह-यदिति । यत् यस्मात्स्ववा इति षष्ठ्यन्तं स्ववाचः "वेदाहं समतीतानि वर्तमानानि चार्जुन । तान्यहं वेद सर्वाणि" इति सार्वज्ञ्यविषयभगवद्वचसः ये विरुध्ये अज्ञानादयो दोषास्तान् ते ऋषयः नानुस्मरन्त्येव किन्तु मनुष्यभावानुकारमात्रतात्पर्यकत्वेन तथोचुरिति भावः । त इति बहुवच सर्वाभिप्रायकम् एवञ्च मानुषीं प्रकृतिं गत इत्यस्य प्रकृतिं स्वभावं गतोऽनुगतः अनुकुर्वन्नित्यर्थः । अन्यथा प्राकृतो यथे दृष्टान्तसङ्गतिः हस्ताच्छार्ङ्गं न्यपतदित्युक्तेरपि मनुष्यभावानुकारे तात्पर्यम् अन्यथा निरस्तनिखिलदोषस्य क्वावद्यसम्भावनापीत्यभिप्रायेणाह-क्व शोकेति द्वाभ्याम् । अनयोर्यथोक्त एवार्थः । अस्मिन् पक्षे आर्यमिश्राभिसङ्गत इत्यस्यायम आर्यमिश्राः वृद्धाः भीष्मादयस्तैरभिसङ्गतः अभितस्सङ्गतस्सुखमासमिति आर्यमिश्रैश्च सङ्गत इत्यर्थः । न तु बलभद्रसहितत्वमनेनोच्य अस्मिन् पक्षे काम्यकवनस्थपाण्डवसान्त्वनमुपपन्नमेवान्यथा परमतं दूषयन् बादरायणः स्ववचसोः पूर्वपरयोर्विरोधं पर नापादयितुमर्हति ततो मुहूर्तमित्यादेस्त्वयमर्थः उपप्लुतः स्वबोध इत्यसमस्तं पदद्वयं स्वबोधः स्वः स्वाभाविकः स्वासाधार बोधः सार्वज्ञ्यरूपो यस्य तथाभूतोऽपि प्रकृतावुपप्लुतो मग्नः प्रकृतिवश्याज्ञसंसारीव आस आस्त इत्यर्थः । तत्र हेतुः स्वज यदूननुसङ्गतः अनुवर्तमानः स्वयमपि कश्चिद्यादववदनुकुर्वन्नित्यर्थः । ततोऽबुद्ध्यत प्रबुद्धवानभूत् नित्यसर्वज्ञोऽपि प्राकृतवत्क बुध्यत इति किञ्चाद्य व्याख्याने इन्द्रप्रस्थाद्भगवदागमनस्यानुक्तत्वात्तं शस्त्रपूगैरित्यादेः पूर्वग्रन्थसन्दर्भवैघट्यं शौरेरित्यस्येन्द्रप्रस्था इत्यादि पूरणत्वे स्वारस्यमित्यवगन्तव्यमित्यलं विस्तरेण । अमोघोऽप्रतिहतो विक्रमो यस्य स शोरिरोजसा बलेन शस्त्रजा(ले प्रहरन्तं साल्वं शरैर्विद्ध्वा ताडयित्वा वर्म कवचं धनुश्च शिरोमणिं चाच्छिनत् सौभं तु गदया रुरोज बभञ्ज हेत्याश्चर्ये ॥३३॥ त कृष्णहस्तेनेरितया प्रयुक्तया गदया सहस्रधा विचूर्णितं तत्सौभं तोये समुद्रजले पपात ततः साल्वः तत् सौभं त्यक्त्वा भूतलमा गदाम् उद्यम्य द्रुतं यथा तथा तं कृष्णमभ्यद्रवत् ॥३४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

तदेव दृढयति-यत्पादेति। आत्मविद्यया परमात्मज्ञानेन अनादिकालेन आत्मविपर्ययग्रहं मनसि स्थितमन्यथाज्ञानं हिन्वन्ति नाशयन्ति न तावदेव किन्तु हरितत्त्वं च जानन्तीत्याह-लभन्त इति। आत्मीयमात्मनः परमात्मनो विद्यमानमनन्तमैश्वरमीश्वरत्वं लभन्ते जानन्ति यद्वा स्वयोग्यमैश्वरमीश्वरानुगृहीतमनन्तं मोक्षं लभन्ते प्राप्नुवन्ति ॥३२॥

॥क-ख॥ आब्रह्मसदनं ब्रह्मसदनं ब्रह्मलोकपर्यन्तम् ॥ग-घ॥ सौभं नाम पुरम् ॥ङ॥ अनन्तैरनेकसङ्घ्यैः हरिः सिंहः ॥छ-ज॥ शिरोमणिं किरीटं रुरोज बिभेद ह प्रसिद्धम्- "शतं सहस्रमयुतं नियुतं प्रयुतार्बुदे। न्यर्बुदं शङ्खवृन्दे च निखर्वं खर्वमर्बुदम् ॥" इति यादवः ॥३३-३५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥३०-३७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२९-३७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

साल्वमायया मोहासम्भवे कैमुत्यमाह-यत्पादसेवया ऊर्जिता पुष्टा या आत्मविद्या तया अनादिश्चासावात्मविपर्ययग्रहश्च अहं कृशः सुखी दुःखीत्यादिलक्षणः तं हिन्वन्ति दूरीकुर्वन्ति सन्तः ऐश्वरं पदं न लभन्ते तस्य सतां गतेः परमेश्वरस्य साल्वस्य नास्य मायया कुतो मोहोऽज्ञानं तस्मान्न तद्वाक्यं सत्यमित्यर्थः ॥३२॥ तदेवं परमतं दूषयित्वा प्रकृतमनुसरति-तमिति। रुरोज बभञ्ज ॥३३॥ तत् सौभम् ॥३४-३६॥

गूढार्थदीपिनी

यस्य पादसेवया ऊर्जितया तीव्रया आत्मविद्यया अनादिं दुर्निवारमात्मनो विपरीतबोधं देहाध्यासलक्षणं हिन्वन्ति त्यजन्ति आत्मीयमक्षुण्णम् ऐश्वरं पदं च लभन्ते तस्य सतां गतेः कुतो नु मोहः मोहाभावे च कुतः शोकादयः अतस्तेषां वचोऽनन्वितमेवेति योज्यम् ॥३२॥ ओजसा बलेन शस्त्रपूगैः प्रहरन्तं तं शाल्वं शौरिः श्रीकृष्णः शरैः विद्ध्वा तस्य वर्म कवचं धनुः शिरोमणिं च अच्छिनत् गदया सौभं विमानं च रुरोज बभञ्ज भग्नमकरोत्। अमोघविक्रमः सफलपराक्रमः। पूगः समूहः ॥३३॥ कृष्णहस्तेन ईरितया प्रक्षिप्तया गदया सहस्रधा विचूर्णितं सत् तत् सौभं जले पपात। ततः शाल्वः तत् विसृज्य गदामुद्यम्य अच्युतमभ्यधावत् ॥३४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवतः शोकादिरहितत्वं कैमुतिकन्यायेन दर्शयति-यदिति। यस्य पादसेवया भक्त्या ऊर्जिता या आत्मविद्या "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" इति श्रीमुखवचनात् आत्मनो भगवतः स्वरूपगुणादिप्रत्यक्षानुभवरूपा विद्या तया अनाद्यात्मविपर्ययग्रहम् अनादेरात्मविपर्ययस्य अब्रह्मात्मकत्वस्य यो ग्रहो निर्बन्धस्तं हिन्वन्ति नाशयन्ति मुमुक्षवः ऐश्वरम् ईश्वरस्य भगवतः अपहतपाप्मत्वादिलक्षणं साम्यम् आत्मीयमात्मन एव आविर्भूतं "निरञ्जनः परमं साम्यमुपैति" "मम साधर्म्यमागताः" इति श्रुतिस्मृतिभ्याम् अनन्तं पुनरावृत्तिशून्यं "न स पुनरावर्तते" "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" इति श्रुतिस्मृतिभ्यां तस्य सतां मुमुक्षूणां गतेः गम्यते अनया इति गतिश्चेति करणव्युत्पत्तिः कर्मव्युत्पत्तिश्च श्रीपुरुषोत्तमाचार्येण वेदान्तरत्नमञ्जूषायां दर्शिताः एवम्भूतस्य मुक्तिप्रदस्य मुक्तगम्यस्य मोहः कुतः मोह इत्युपलक्षणं सर्वेषां शोकादीनामुक्तामनुक्तानां प्राकृतगुणानां सर्वेषां परमतमयुक्तमित्यर्थः ॥३२॥ किं तर्हि युक्तं तदाह-तमित्यादि। रुरोज बभञ्ज ॥३३-३७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

यस्य पादयोः सेवयोपसत्त्याऽऽर्जिता सम्पादिता तयाऽऽत्मविद्यया ययाऽऽत्मविद्भवति वाऽऽत्मस्वामीति विद्या तयाऽनादिर्य

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

आत्मनो मनसस्तत्सम्बन्धी यो विपर्ययग्रहोऽन्यथामतिस्तं हिन्वन्ति गमयन्ति नाशयन्तीति यावत्। किञ्च फलान्तरमपि प्राप्नु
इत्याह॥ लभन्त इति। आत्मीयं स्वयोग्यं लभ्यमनन्तमक्षयम्। नन्वात्मीयावाप्तौ कुत इतरापेक्षेत्यत आह॥ ऐश्वरमिति। तद
आगच्छदित्यैश्वरं सुखं मोक्षगं लभन्ते। ईश्वरत्वं स्वावरवरत्वं लभन्त इति वा। तस्य परमस्य सद्गते: सत्प्राप्यस्य समीचीन
वा मोह: कुत:। निर्हेतुक इत्यर्थ:। प्रदर्शनं कुत इत्यतोऽप्याह। कुत इति। भूनिमित्तं देवत्वे देववच्चेष्टा मानुषत्वे तु मानु
तथा नरवत्प्रवृत्तिरित्यादे:। धरिण्यामवतरणादे.वं करणमिति भाव:। ननु ग्रन्थकृतैवं निर्णयं करिष्यति कुत आचार्यैराचार्य
जानन्साल्वकृतामित्यादिना इत्यारभ्य श्रुतिरित्यन्तेन ग्रन्थेन तात्पर्यवर्णनमिति चेत्। सत्यम्। लब्धवर्णोऽसि। एवं
शुकमुखतो वदन् व्यास: परोदीरितमेवावदत्। न किञ्चित्स्वमतमूचे। तत्किंरूपं वेति कश्चिद्विपश्चिच्छङ्केतातस्तद्वचनमस्मा
चेत्तत्संशयव्यंसनं भवतीति ब्रह्माण्डपुराणोक्ति:। तस्यास्य च मूलत्वेन श्रुत्युदाहरणं च मुदावहमिति सम्भवात्। तत्राप
स्वप्रतिपादकत्वेनोदाहृतानामेव ऋचमुदाहरन्नानन्दतीर्थोऽहममुख्य: प्रतिपाद्यस्तस्या अपि अरिरिव मुख्योऽर्थ इति स्वनैष्कृष्ट्य प्रति
विश्वविश्वसनीयता स्यादिति सूचयामासेत्यवसेयम्। यदैतेषां न मोह: क्व स भगवत इति भाव:। सम्मोहो मोहो मा न
ऊहाऽपि यस्य स इत्यूहागोचर इत्यर्थोऽपि ज्ञेय: ॥४२॥ तैरागतैस्तै: स्वजनैरुदितां वाणीमाकर्ण्य श्रुत्वा कमलेक्षण: कमले
ईक्षमाणमत्रैव पातयितव्यं पुरमित्यवलोकनं यस्य स:। यद्वक्ष्यति तत: समुद्रे न्यपतत्पुरमिति। सर्वावयवानामभेदादेवमुक्ति
सौभं साल्वं हन्तुमारेभे आरब्धवान् आलुलोचेति यावत् ॥४३॥ सुदर्शनं सतां शुभदर्शनं निशातं चक्रमाग्नेयास्त्रेणा
सौभनाशनमुद्दिश्य प्राहिणोत्। सौभेत्यादि चक्रविशेषणं वा। अग्निकलिभ्यामिति ढक्। ननु तदर्कशतसङ्काश
वक्ष्यमाणत्वात्तथाऽन्यत्रापि सुदर्शनमहाज्वालकोटिसूर्यसमप्रभेत्याद्युक्ते: स्वतस्तेज:पुञ्जस्य सुदर्शनस्य किमाग्नेयास्त्राभिमन्त्रण
चेत्। सत्यम्। चक्रस्य कामोऽभिमानी स च रुद्रपूर्वद्वेषीति तद्वरदृप्तं साल्वं तद्विमानं चैकदैव नाशयेन्न तेन तद्बललक्ष्यता।
नमनमयशोविशेष: स्यादिति। किञ्च खाण्डववनदहनकालेऽर्जुनत्रातामयोऽसुरतक्षाऽस्वमुखपातं यात इति किञ्चिद्दुर्मन
तन्निर्मितविमानदाहनेन सान्त्वयन्निवाथवा मम पुत्रस्त्रिनेत्र त्वया मदुपेक्षयैव क्षयं नीतो न तु तव शक्त्येव ममाशक्येति
भजेति देवावमतो वामदेवमानभङ्गाय तद्वरवित्तद्वितरणलब्धविमानभङ्गेन वा मत्पुत्रघातकप्रसादासादितमग्नेरपि इत्याद्युक्तत्वादप
कुर्विति वा सुदर्शनस्यानावरणे विश्वक्षय: स्यात्स न भवतीति तत्तेजोऽनुतेजनाय जनार्दनमिदमपदेशेनावरणमेतन्मात्रपर्याप्त्यै त
वा तदिति ज्ञेयम्। ननु कंकशिशुपालादौ तन्मात्रपर्याप्तिस्तस्य जनजगद्भर्जनमिति चेन्न। तथैव सङ्कल्पनेन तत्त्यागसम्भवात्।
त्वाग्नेयास्त्रेत्युक्तेरेतद्गमकत्वादिति दिक्। वनपर्वणि —

आग्नेयमस्त्रं दयितं सर्वसाहं महाप्रभुम्। योजयंस्तत्र धनुषेति०

भाषणं करपातायातापप्रथाप्रमथनाय तद्द्वाराऽभिमन्त्रणं चक्रे इत्यर्थकं ज्ञेयम्। अत एवाचार्या अरीन्द्रविभिन्नबन्ध
बबन्धुस्तुच्छत्वादाग्नेयाभिमन्त्रणं नोचुरिति ज्ञेयम् ॥४४॥ आब्रह्मसदनं सत्यलोकपर्यन्तं ज्वालामालाभिरतिभीषणं भय
भीषणां ज्वालामालात्यादत्ते। अन्तरङ्गत्वेन भाष्यकृदिष्टे:। अनेन संहार्यासंहार्यविवक्षयाऽऽदानानादाने सूच्येते ॥४५॥ वै
देवा विहायसं नाकं विहाय। तत्र तन्त्रं सुदर्शनोष्मणा तप्ता इति। पराङ्मुखानां द्रवतां भीतिरिति द्योत्येत ॥४६॥ पुरं सौभं तं
तदर्कशतसङ्काशमित्यत्र शतशब्दो बहुत्ववचन: ॥४७॥ दुर्मतिर्गदाग्रजे गदा किमधायिनीति मतिरहित: ॥४८॥ दैत्यबल
स्वकीयसेनानीतम्। अनन्तैर्बहुभिरप्रतिबद्धैर्वा। हरि: सिंह: ॥४९॥ सिंहनादं साल्वकृतं प्रति स्वयं व्यनीनदत्। स्वार्थे णिच्
॥५०॥ वर्म कवचं शिरोमणिं किरीटं बभञ्ज। मुकुटत्रोटनेन किञ्चिदायुरधुनाऽपि वर्तत इत्यसूचि ॥५१॥ तन्मध्येऽ
कस्यचित्पात इति बोधयितुं सामान्ये नपुंसकमित्युक्तेस्तदित्युक्तम्। वर्मादिरथान्तचतुष्टयं तत्र गदया रथ: शरौघैर्वर्मादि
मर्म ज्ञेयम्। रथे कश्चन भागोऽप्यवशिष्ट इति वा द्योतयितुं तदुक्ति:। अथवाऽव्ययं तदिति विचूर्णितं तं विसृज्येत्यन्वयो
स चासौ कृष्णश्च तद्धस्तेरितया गदया सहस्रधा सन् य: पपात तोये तं चिच्चूर्णितं विसृज्येत्यन्वयो वा ॥५२॥

किञ्च। य
प्रयोजनम्। अन्यत्तु
इत्यपि पक्षे माहात्म्य
आत्मविद्या भवति।
गुरोर्भगवत: सकाशा
भगवन्मोहसम्भव:।
अनादिर्योऽयमात्माग्र
किन्त्वज्ञाननिवृत्यनन्त
अपरिच्छेद ऐश्वर्य्ये अ
विशिष्टात्मा सायुज्य
अनुपदमेव सायुज्यमे
शास्त्रान्तरकरणज्ञानवदु
परमस्य सद्गतेरिति। क
कुतस्तेषामपि गति:।
प्रकृते मोहहेतो: तस्याप
शस्त्रपूगै: प्रहरन्तमोजसे
प्रहरन्तं मारितवानित्याहु:
जातमेव केवलं भगवति
कल्पान्तरे सर्वमेव यथा
मारितवानिति। एक: पक्ष
ओजसा प्रहरन्तं शाल्वं श
समागतं सौभं बाणप्रहारैरा
प्रथमत: कालात्मा तत्रापि
गदया सह तोये सहस्रधा भ
भूतलमास्थित: सन् गदामु

किञ्च यस्य पा
त्यजन्ति आत्मीयमनन्तमै
कैमुतिकसिद्धोऽर्थ: ॥३२
शाल्वस्य वर्म कवचं धनु:
प्रेरितया गदया तत्सौभं वि
गदामुद्यम्य द्रुतं शीघ्रमच्यु

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

किञ्च । यद्यस्मिन्नवतारे कोऽप्यंशः अज्ञानकृतः प्रदर्शनार्थो वा तदायमवतार एव न भवेत् । मोक्षदानमेवास्यावतारस्य प्रयोजनम् । अन्यत्तु गौणमेव 'नृणां निःश्रेयसार्थाय' इति वाक्यात् । अन्यथा कामादिभिर्भजने मोक्षो न स्यात् । 'भक्तियोगविधानार्थम्' इत्यपि पक्षे माहात्म्यविघटकत्वादिदं चरित्रमसमञ्जसमित्यभिप्रेत्याह–यत्पादसेवोर्ज्जितयाऽऽत्मविद्ययेति । यस्य पादसेवया ऊर्ज्जिता आत्मविद्या भवति । ब्रह्मविच्चरणसेवया उत्पन्ना भगवच्चरणसेवया पुष्टा भवति । बीजभावदेहभावयोर्लोके महान् विशेषः । तथा गुरोर्भगवतः सकाशाच्च जायमानज्ञानविशेषः । एवं यत्र चरणसेवकानामन्येषामेवं भवति । यत्र च गुरोरपि मोहो निवार्यते तत्र कथं भगवन्मोहसम्भवः । किञ्च । न केवलं तेषां ज्ञानमेवोत्पद्यते किन्तु तेन ज्ञानेन अनाद्यात्मविपर्ययग्रहं हिन्वन्ति नाशयन्ति । अनादिर्योऽयमात्माग्रहः ततो विपर्ययः देहादिबुद्धिः तत्र योऽयमाग्रहः समूलकमज्ञानकार्यं नश्यतीत्यर्थः । न केवलं तावन्मात्रं किन्त्वज्ञाननिवृत्यनन्तरम् आत्मानं भगवन्तमपि लभन्ते । ननु स्वात्मालब्ध एव को विशेष इति चेत्तत्राह–अनन्तमीश्वरमिति । अपरिच्छेद ऐश्वर्य्ये आत्मना अत्मन्येव तत्रैश्वर्य्यं तच्चैवेति सर्वत्वादिसम्मतं परिच्छेदस्तु केषाञ्चिन्मते आविद्यकः । उभयथापि विशिष्टात्मा सायुज्य एव प्राप्तो भवति । ततश्चैकस्मिन्नेव जन्मनि चरणसेवामात्रेण निषिद्धप्रकारेणापि अविद्यानिवर्तकं ज्ञानम् अनुपदमेव सायुज्यमेव ज्ञानमार्गेऽपि जन्मकोटिभिः साध्यं कथं लभन्ते । अतस्तेषामप्यस्मिन्नवतारे अज्ञानादिवर्णनं शास्त्रान्तरकरणज्ञानवदुपेक्ष्यमेव । ननु प्रदर्शनार्थं शिवतद्भक्तमाहात्म्यकथनार्थं वा तथा लीलाप्रदर्शनं भविष्यतीति चेत् । तत्राह–परमस्य सद्गतेरिति । कालादेरपि परस्य को महादेवभक्तानुरोधः सतां गतेश्च कथं मोहप्रवर्तकत्वम् । सन्त एव न मोहं प्रदर्शयन्ति कुतस्तेषामपि गतिः । अवतारान्तरेऽपि भक्तैः सहलीलायामेव पराजयादिवर्णनं 'मद्भक्तपूजाभ्यधिका' इति प्रदर्शनार्थं तस्मात् प्रकृते मोहहेतोः तस्याप्यभावात् । नु इति निश्चये न कुतो मोहः ॥३२॥ तर्हि अत्र शाल्वयुद्धे किं जातमित्याकाङ्क्षायामाह–तं शस्त्रपूगैः प्रहरन्तमोजसेति । अत्र केचिन्मोहदर्शनप्रभृति सर्वमेव बाधितं किन्तु गृह एव विद्यमाने भगवति तस्मिन्नागते शस्त्रपूगैः प्रहरन्तं मारितवानित्याहुः अन्ये त्विन्द्रप्रस्थादेवागत्य स्वसैन्यं शस्त्रैः प्रहरन्तं दृष्ट्वा मारितवानिति, अपरे तु बहुवेधादिमोहप्रदर्शनं जातमेव केवलं भगवति मोह एव निषिद्धः न त्वन्य इति पश्चान्मोहाभाव एव । पुनरागत्य शस्त्रैः प्रहरन्तमिति तत्र मतान्तरत्वात् कल्पान्तरे सर्वमेव यथार्थं भगवति तु तस्य सर्वस्यापि सप्रकरणस्य मोहस्य निषिद्धत्वात् । अष्टाविंशे दिवसे केवलं स्वयमागत्य मारितवानिति । एकः पक्षः सभार्यो वा समागत्य वा मारितवानिति । शस्त्रपूगैः शस्त्रसमूहैः अवान्तरजातिभेदापन्नैः नानाशस्त्रोद्भवैर्वा ओजसा प्रहरन्तं शाल्वं शरैस्त्रिभिर्विद्ध्वा तैरेवाच्छिनत् । वर्म धनुः शिरोमणिं च, पुनरन्यैर्बाणैः सौभं चकारात्तं च । ततो निकटं समागतं सौभं बाणप्रहारैरानीतं गदया रुरोज । पीडां सम्पादितवान् । हेत्याश्चर्य्ये ॥३३॥ ततो यज्जातं तदाह–तत्कृष्णहस्तेरितयेति । प्रथमतः कालात्मा तत्रापि पूर्णा क्रियाशक्तिः । तया च प्रेरिता गदा अत आध्यात्मिकादि सर्वरक्षकाणां निवृत्तत्वात् विघूर्णितं सत् गदया सह तोये सहस्रधा भूत्वा पपात । गदयेत्यनुवादो वा । करणत्वं तु प्रहार एव । पुनर्हस्ते वा समागमनम् । ततः शाल्वस्तद्विसृज्य भूतलमास्थितः सन् गदामुद्यम्य भ्रान्तः सन् अच्युतमभ्यगात् । अच्युत एवायं किं गमनेन पराक्रमेण वा ॥३४॥ ।

श्रीसुबोधिनीसारः

किञ्च यस्य पादसेवया ऊर्जिता यात्मविद्या तया अनादिर्य आत्मनि विपर्ययग्रहो विपरीतभावना तं हिन्वन्ति त्यजन्ति आत्मीयमनन्तमैश्वरं पदं च ते लभन्ते । सतां गतेः परमस्य सर्वोत्तमस्य श्रीहरेर्मोहः कुतो न स्यादिति कैमुतिकसिद्धोऽर्थः ॥३२॥ शस्त्रसमूहैः प्रहरन्तं शाल्वम् ओजसा बलेन शौरिः श्रीकृष्णः सत्यपराक्रमः शरैर्बाणैः शत्रोः शाल्वस्य वर्म कवचं धनुः शिरोरत्नं मुकुटं च विद्ध्वाऽच्छिनत् । गदया च सौभं बभञ्ज । ह स्फुटम ॥३३॥ कृष्णहस्तेनेरितया प्रेरितया गदया तत्सौभं विचूर्णितं सहस्रधा तोये समुद्रजले पपात तद्विमानं विसृज्य त्यक्त्वा भूतलमास्थितः शाल्वो गदामुद्यम्य द्रुतं शीघ्रमच्युतं कृष्णमभ्यगात् ॥३४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

शोकाद्यभावे कैमुत्यन्यायमाह–यत्पादेति। यस्य पादसेवोर्जितया पुष्कलया परिनिष्पन्नया आत्मविद्यया आत्मसाक्षात्कारेण अनादिश्चासावात्मनो विपर्ययो देहेन्द्रियादावहङ्कारलक्षणः स एव दुर्निवार्यत्वात् ग्रहः पिशाचस्तं भक्तजना हिन्वन्ति परित्यजन्ति। आत्मीयमनन्तमविनाशि ऐश्वरं स्वरूपं च लभन्ते तस्य सतां गतेः फलभूतस्य परमस्य पुरुषोत्तमस्य कुतो नु मोहः स्यात् ?। मोहाभावे च शोकादयो नैव सम्भवन्ति। अतस्तेषां वचनमनन्वितमेवेत्याशयः ॥३२॥ तर्हि किं सत्यम् इत्यपेक्षायां स्वसम्मतमाह-तमिति। शौरिः कृष्णः ओजसा बलेन शस्त्रसमूहैः प्रहरन्तं तं शाल्वं शरैर्विद्ध्वा ताडयित्वा तस्य वर्म कवचं धनुः शिरोमणिं च अच्छिनत्। तथा सः कृष्णः शत्रोः शाल्वस्य सौभाख्यं विमानं च गदया रुरोज बभञ्ज। तत्र सामर्थ्यं प्रभावं च हेतुमाह–अमोघः सफलो विक्रमो यस्य स इति ॥३३॥ कृष्णहस्तेनेरितया प्रयुक्तया गदया सहस्रधा विचूर्णितं तत्सौभं समुद्रजले पपात। ततश्च शाल्वः तत्सौभं विसृज्य त्यक्त्वा भूतलमास्थितः गदामुद्यम्य द्रुतं शीघ्रं यथा भवति तथाऽच्युतं कृष्णमभ्यद्रवत् ॥३४॥

अन्वितार्थप्रकाशिका

यत्पादेति। यस्य पादसेवयोर्जितया पुष्कलया परिनिष्पन्नया आत्मविद्यया आत्मसाक्षात्कारेण अनादिश्चासावात्मनो विपर्ययो देहेन्द्रियादावहङ्कारलक्षणः स एव दुर्निवार्यत्वात् ग्रहः पिशाचस्तं भक्तजना हिन्वन्ति परित्यजन्ति। आत्मीयमनन्तमविनाशि ऐश्वरं स्वरूपं च लभन्ते तस्य सतां गतेः फलभूतस्य परमस्य पुरुषोत्तमस्य कुतो नु मोहः स्यात्। मोहाभावे च शोकादयो नैव सम्भवन्ति। अतस्तेषां वचनमनन्वितमेव प्रतीयत इत्याशयः ॥३२॥ प्रकृतमनुसरति–तमिति। अमोघः सफलः विक्रमः यस्य सः शौरिः कृष्णः ओजसा बलेन शस्त्रसमूहैः प्रहरन्तं तं शाल्वं शरैर्विद्ध्वा ताडयित्वा तस्य वर्म कवचं धनुः शिरोमणिं चाच्छिनत्। तथा सः कृष्णः शत्रोः शाल्वस्य सौभाख्यं विमानं च गदया रुरोज बभञ्ज ॥३३॥ तदिति ॥ कृष्णहस्तेनेरितया प्रयुक्तया गदया सहस्रधा विचूर्णितं तत्सौभं समुद्रजले पपात। ततश्च शाल्वः तत्सौभं विसृज्य त्यक्त्वा भूतलमास्थितः गदामुद्यम्य द्रुतं शीघ्रं यथा भवति तथाऽच्युतं कृष्णमभ्यगात् ॥३४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यदिति। यस्य श्रीकृष्णस्य पादसेवया कृत्वा ऊर्जितया पुष्कलतां प्राप्तया आत्मविद्यया आत्मज्ञानेन अनादिर्य आत्मनि जीवात्मनि विपर्ययो देहदैहिकेष्वहंममत्वरूपो ग्रहस्तं साधवः हिन्वन्ति घ्नन्ति आत्मीयं स्वकीयमैश्वरं परमैश्वर्ययुक्तमक्षरस्थानं लभन्ते सतां गतेः तस्य श्रीकृष्णस्य कुतो नु मोहः अतस्तेषां वचनं न सत्यमिति भावः ॥३२॥ प्रकृतमनुवदति–तमिति ॥ शस्त्रपूगैः तं विद्ध्वा शत्रोः वर्म कवचं च धनुश्च मस्तकस्य मणिं च चिच्छेद गदया सौभं च रुरोज बभञ्ज ॥३३॥ तत्सौभाभिधं विमानं सहस्रधा विचूर्णितं समुद्रतोये पपात तत् सौभं विसृज्य त्यक्त्वा भूतलमाश्रितः सन्नभ्यगात् ॥३४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यदिति। यस्य श्रीकृष्णस्य पादसेवया कृत्वा ऊर्जितया पुष्कलतां प्राप्तया आत्मविद्यया आत्मज्ञानेन अनादिर्य आत्मनि जीवात्मनि विपर्ययो देहदैहिकेष्वहंममत्वरूपो ग्रहस्तं साधवः हिन्वन्ति घ्नन्ति आत्मीयं स्वकीयमैश्वरं परमैश्वर्ययुक्तमक्षरस्थानं लभन्ते सतां गतेः तस्य श्रीकृष्णस्य कुतो नु मोहः अतस्तेषां वचनं न सत्यमिति भावः ॥३२॥ प्रकृतमनुवदति–तमिति ॥ शस्त्रपूगैः तं विद्ध्वा शत्रोः वर्म कवचं च धनुश्च मस्तकस्य मणिं च चिच्छेद गदया सौभं च रुरोज बभञ्ज ॥३३॥ तत्सौभाभिधं विमानं सहस्रधा विचूर्णितं समुद्रतोये पपात तत् सौभं विसृज्य त्यक्त्वा भूतलमाश्रितः सन्नभ्यगात् ॥३४॥

कृष्णप्रिया

समर्थ ऋषिमुनि भगवान श्रीकृष्णके चरणकमलोंकी सेवा करके आत्मविद्याको आत्मबुद्धिरुप अनं अविद्या को मिटा देते है और आत्मसंबंधि अनंत ऐश्वर्यको प्राप्त करते है। उन संतो के परमगति स्वरूप भगव श्रीकृष्णमें भला मोह कैसे हो सकता है ॥३२॥ श्रीद्वारिकाधीश भगवान श्रीकृष्ण पर अतीशय ओजस और

से शाल्व शस्
कर दीया एवं
विमान चूर्ण ह
गदाकी पुनः पु
और समुद्रमें f
द्वारिकानाथ की

आधावत
वधाय श
जहार तेनै
वज्रेण वृ
तस्मिन् नि
सखीनाम

॥ इति श्रीम

आधावतः,
सार्कः, उदयाचलः, इव
किरीटयुक्तम्, (शिरः) ते
राजन्! दिवि, देवगणेरि

॥ इति श्रीमद्भाग

किञ्च यस्य पाद
इत्यादिलक्षणस्तं हिन्वन्ति
तर्हि सत्यं तदाह–तं शस्त्रपूं

॥ श्रीमद्भागवते महापुर

तस्य शाल्वस्य।
अन्यदाह–किं चेति ॥३७॥

॥ इति श्रीम

११.साङ्गदमस्य बाहुं–वी
शाल्ववधः–गो. प्रे. टी. । ४. षडशी

कृष्णप्रिया

से शाल्व शस्त्रवृष्टी करने लगा तब अमोघ विक्रम भगवान श्रीकृष्ण ने भी दीव्य वाणों से शाल्व को घायल कर दीया एवं उसके कवच धनुष्य तथा शिरोमणी को छिन्न भिन्न कर दिया । पुनः गदा के प्रहार से सौभ विमान चूर्ण होकर महासागरमें गिर पडा । जर्जरित हो गया ॥३३॥ पुनः कृष्णभगवान ने गदा चलाई और गदाकी पुनः पुनः चोट से वह सौभ विमान चूर्ण बनकर महासागरमें गिर पडा सौभ के चूर्ण होने के पहले और समुद्रमें गिरने के पूर्व ही शाल्व हाथमें गदा जमीन पर कूद पडा और सावधान बन कर भगवान द्वारिकानाथ की और दौड गाय ॥३४॥

आधावतः [1]सगदं तस्य बाहुं भल्लेन छित्त्वाथ रथाङ्गमद्भुतम् ।
वधाय शाल्वस्य लयार्कसन्निभं बिभ्रद्बभौ सार्क इवोदयाचलः ॥३५॥
जहार तेनैव शिरः सकुण्डलं किरीटयुक्तं पुरुमायिनो हरिः ।
वज्रेण वृत्रस्य यथा पुरन्दरो बभूव हाहेति वचस्तदा नृणाम् ॥३६॥
तस्मिन् निपतिते पापे सौभे च गदया हते । नेदुर्दुन्दुभयो[2] राजन् दिवि देवगणेरिताः ।
सखीनामपचितिं कुर्वन् दन्तवक्त्रो रुषाभ्यगात् ॥३७॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे[3] सौभवधो नाम [4]सप्तसप्ततितमोऽध्यायः ॥७७॥

कर्दमक्षमा

आधावतः, सगदम्, तस्य, बाहुम्, भल्लेन, छित्त्वा, शाल्वस्य, वधाय, लयार्कसन्निभम्, अद्भुतम्, रथाङ्गम्, बिभ्रत्, सार्कः, उदयाचलः, इव, (श्रीकृष्णः) बभौ ॥३५॥ पुरन्दरः, यथा, वृत्रस्य, शिरः, वज्रेण, तथा, हरिः, पुरुमायिनः, सकुण्डलम्, किरीटयुक्तम्, (शिरः) तेनैव, जहार, तदा, नृणाम्, हाहा, इति वचः, बभूव ॥३६॥ तस्मिन्, पापे निपतिते, च, गदया, सौभे, हते, हे राजन्! दिवि, देवगणेरिताः, दुन्दुभयः, नेदुः, सखीनाम्, अपचितिम्, कुर्वन्, दन्तवक्त्रः, रुषा, अभ्यगात् ॥३७॥

॥ इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे सप्तसप्ततितमेऽध्याये अन्वयाः निरूपिताः ॥७७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किञ्च यस्य पादसेवया ऊर्जिता पुष्कला या आत्मविद्या तया अनादिश्चासावात्मविपर्ययग्रहश्च अहं कृशः सुखी दुःखी इत्यादिलक्षणस्तं हिन्वन्ति नाशयन्ति सन्तः ऐश्वरं पदञ्च तस्य सतां गतेः कुतो नु मोह इति अतो नैतद्वचनं सख्यमित्यर्थः ॥३२॥ किं तर्हि सत्यं तदाह-तं शस्त्रपूगैरिति । वर्म कवचम् रुरोज बभञ्जे ॥३३-३४॥

॥ श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां सप्तसप्ततितमोऽध्यायः ॥७७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य शाल्वस्य । अथ बाहुच्छेदानन्तरम् ॥३५॥ तेनैव चक्रेणैव । तदा शिरश्छेदनसमये ॥३६॥ तस्मिन् शाल्वे । अन्यदाह-किं चेति ॥३७॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे सप्तसप्ततितमोऽध्यायः ॥७७॥

११.साङ्गदमस्य बाहुं-वीर. । १. देवदुन्दुभयो नेदुस्तदा-वीर. । २. पारमहंस्यां संहितायां उत्तरार्धे-गो. प्रे. पु. । ३. दशमस्कन्धे सौभ-शाल्ववधः-गो. प्रे. टी. । ४. षडशीति (८३) तमोऽध्यायः।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अद्भुतमेवाह-लयेति । वधाय बिभ्रत् श्रीकृष्णः यत्र दुष्टवधार्थं चक्रस्य तेजोभरप्रकाशः सूचितः तथा युद्धेऽपि श्रीभगवतो मनोहरशोभाभर इति ॥३५॥ पुरुमायिनः बहुलमायायुक्तस्यापि जहार छित्त्वा स्वसैनिकाग्रे विचकर्ष सकुण्डलमिति विशेषणाभ्यां तत्र स्वकौतुकमपि बोधयति हा हेति परमाद्भुतत्वात् ॥३६॥ नितरां पतिते मृते अपुनरावृत्तिं प्राप्ते सौभे च हते नाशिते सखीनामित्यर्धकम् । अपचितिं वैरनिग्रहरूपेण प्रत्युपकारेणान्त्येष्टिमिव कुर्वन् कर्तुमभ्यगात्तदैव इति महानिर्बुद्धित्व सूचितं तत्र हेतुः रुषेति ॥३७॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां सप्तसप्ततितमोऽध्यायः ॥७७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथानन्तरं सद्य एवेत्यर्थः । अद्भुतत्वमेवाह-लयेति । वधाय बिभ्रत् श्रीहस्ते दधानः सन् बभौ अशोभत श्रीकृष्ण उदयाचलस्य श्यामतया श्रीकृष्णेनोपमा एवं दुष्टवधार्थं चक्रस्य तेजोभरप्रकाशः सूचितः तेन युद्धेऽपि मनोहरशोभाभ उक्तः ॥३५॥ पुरुमायिनो बहुलमायायुक्तस्यापि सकुण्डलमित्यादिविशेषणाभ्यां तीक्ष्णधारेण लीलया मूलतः शीघ्रहर बोधयति । अत एवोक्तं- हरिरिति । महाकायस्यापि तथा शिरोहरणे दृष्टान्तः-वज्रेणेति । हाहेति परमाद्भुतत्वात् ॥३६॥ पा महादुष्टे नितरां पतिते मृते अपुनरावृत्तिमोक्षप्राप्ते अथ च सौभे च हते नाशिते इति तस्मिन् स्थितेऽपि तत्पुत्रादीन पुनर्दुष्टताशङ्कानिरासेन देवगण-(देववर्ग-ग)प्रहर्षः सूचितः । अत एव नेदुः । हे राजन्निति प्रहर्षेण स्वयं राजमानस्तमी हर्षयति । सखीनां शिशुपालादीनामपचितिमानृण्यं कुर्वन् कर्तुमभ्ययात्तदैवेति महानिर्बुद्धित्वं सूचितम् । तत्र हेतुः-रु क्रोधेन विचारलोपादिति भावः ॥३७॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्या श्रीदशमटिप्पण्यां सप्तसप्ततितमोऽध्यायः ॥७७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पुरुमायिनः पुरुरूपमायावतः ॥३६-३७॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये सप्तसप्ततितमोऽध्यायः ॥७७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

आधावत इति । अभ्यापततोऽस्य साल्वस्याङ्गदेन सहितं बाहुं भल्लेन बाणविशेषेण छित्त्वा (अथ) साल्वस्य वधा प्रलयतुल्यं रथाङ्गं चक्रं बिभ्राणो बभौ यथा सार्कः सूर्यसहित उदयाचलस्तद्वत् ॥३५॥ जहारेति । पुरुमायिनः बहुविधमा(यावतः)वि साल्वस्य शिरः तेनैव चक्रेण जहार हृतवान् यथेन्द्रो वज्रेण वृत्रस्य शिरस्तद्वत्तदा नृणां हाहेति शब्दो बभूव ॥३६॥ अ सानुजदन्तवक्त्रवधात्मकं हरेश्चेष्टितं वक्तुं तावत्प्रस्तौति सार्धेन-तस्मिन्निति । तस्मिंश्छाल्वे निपतिते हते च सति सखी साल्वादीनामपचितिं पारोक्ष्येणोपकृतिं कुर्वन् कर्तुमित्यर्थः । वर्णाधिक्यमार्षम् ॥३७॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां सप्तसप्ततितमोऽध्यायः ॥

श्रीमद्विजयध्वजकृता पदरत्नावली

(मूलम्)

★देवदुन्दुभयो नेदुः ववर्षुः पुष्पवृष्टयः । स्तूयमानो मुनिगणैः सूतमागधवन्दिभिः । आजगाम वृतः सैन्यैः पुरीं द्वारवतीं हरि

सम्प्रविश्य पुरीं रम्यां पताकाखण्डमण्डिताम् । अलङ्कृतामलङ्कारैः सिक्तसंमृष्टचत्वराम् ॥

पूजितो यदुभिर्वृद्धैः पौरजानपदैस्तथा । रमयन् द्व्यष्टसाहस्रमहिषीप्रेमविह्वलाः ॥

उवास देवकीपुत्रः सानन्दं कुलनन्दन ॥०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

पुरुमायिनः अनेकशतमायावतः ॥३६-३७॥ सानन्दम् आनन्दसहितम् इत्यर्थे विषयानन्दः न स्वरूपानन्द इत्यर्थः । स्यात् सोऽनुपपन्नः "विज्ञानमानन्दं ब्रह्म" इति श्रुतेः ॥०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां सप्तसप्ततितमोऽध्यायः ॥७७॥
(श्रीविजयध्वजतीर्थरीत्या षडशीतितमोऽध्यायः ॥८६॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥३०-३७॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे सप्तसप्ततितमोऽध्यायः ॥७७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३७॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे सप्तसप्ततितमोऽध्यायः ॥७७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥२९-३७॥

॥ इति श्रीनाथचक्रवर्तिपादविरचितायां चैतन्यमञ्जूषायां सप्तसप्ततितमोऽध्यायः ॥७७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सखीनां शिशुपालादीनामपचितिं वैरनिर्यातनेनान्त्येष्टिं कुर्वन् कर्तुम् ॥३७॥

॥ इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । सप्तसप्ततितमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥७७॥

गूढार्थदीपिनी

आधावतः तस्य बाहुं भल्लेन छित्त्वा अथ तस्य वधाय रथाङ्गं बिभ्रत् हरिः बभौ इत्यन्वयः । यथा सार्कः उदयाचलो भाति तथा । कथम्भूतं रथाङ्गम् । लयार्कः प्रलयकालिकसूर्यः तत्सदृशम् ॥३५॥ हरिः तेनैव चक्रेण तस्य सकुण्डलं शिरो जहार चिच्छेद यथा इन्द्रो वृत्रस्य तदा नृणां विपक्षीयाणां हाहेति दुःखसूचकः शब्द आसीत् । पुरुमायी महामायावी ॥३६॥ तस्मिन्निति सार्धम् । शाल्वे पापे पापिनि निपतिते । अर्श आद्यजन्तः । सौभे विमाने च हते सति देवगणैः ईरिता वादिताः । सखीनां मृतानाम् अपचितिमानृण्यं कुर्वत् दन्तवक्त्रः योद्धुमभ्यगात् ॥३७॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यां सप्तसप्ततितमोऽध्यायः ॥७७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

॥३३-३७॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवसिद्धान्तप्रदीपे सप्तसप्ततितमाध्यायप्रकाशः ॥७७॥

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

भल्लेन छित्त्वेत्यत्र छेचेति तुगभावेन लाघवेन हस्तलाघवं सूचितवानिति ज्ञेयम् । लयार्काः प्रलयकालिकार्कास्तत्सन्निभं शोभाम् । अभूतोपमेयमतिशयाशया ज्ञेयम् । रथाङ्गं चक्रं बिभ्रद्धारैः सार्कोर्कं बिभ्रदुदयाचल इव बभौ । अनेनोदयपर्वतः स्वयं श्यामवर्ण इति ध्वन्यते । तमालद्रुमावलीसमवेतत्वादत्युच्चतया नीरदयुतत्वाद्वा नीलता चलस्येति वा ॥५३॥ तेनैव चक्रेणैव किरीटयुक्तं प्रच्छन्नादन्यत्किरीटं तद्युक्तं सकुण्डलं शिरो जहार । तदा नृणां देवानां तथाऽनृणां रक्षआदीनां हाहेति मोदे खेदेऽपि प्रायिकः शब्दः । अत एवाभाणकं हाहेति हसतीति । नृपत्नीः सभाराजामनुष्यपूर्वेत्यत्रैव नृशब्दः सुखवाची चेदनृशब्दस्यासुखवाचकत्वं विनोपपादनायासं लभ्यत इति वा । उदाहृतं च प्राङ्नृशब्दस्य ऋग्भाष्याद्युदाहरणेनानुस्मर्तव्यम् ॥५४॥ पुष्पवृष्ट्यो ववृषुः । वृषिः

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

सेचनार्थ: । पतिता इति यावत् । ववर्षुरिति पाठे वर्षस्नेहनमोचनयोरिति स्मृतस्य वर्षधातो रूपम् । एवं स्वपातेन स्नेहविशेषं चक्रुरिवेत्यर्थ: ॥५५॥ सैन्यै: सेनासमवेतै: ॥५६॥ पताकाभिरखण्डं यत्र यत्र स्थाप्यास्तत्र तत्रेति सर्वत्रमण्डितमलङ्कृतम् ॥५७॥ प्रेमविह्वला द्व्यष्टसाहस्रमहिषी रमयन् । सानन्दमानन्दसहितं यथा तथा पूजित उवास ॥५८॥

॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धेऽष्टाशीतितमोऽध्याय: ॥१०-८८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो यज्जातं तदाह-आधावत इति । भल्लेन हस्तच्छेद: क्रियाशक्ते: पृथक्करणार्थ: । ततो रथाङ्गेन मोक्षदानार्थम् अद्भुतं रथाङ्गं लयार्कसन्निभं दर्शनेनैव मृत्युभयजनकं बिभ्रद्भगवान् बभौ । तावतैव सर्वेषां प्रात:काल इव महत्सुखं जातमित्याह-सार्क इवोदयाचल इति । किञ्चित्कालं शस्त्रं धृत्वा स्थिति: महादेवादिपरीक्षार्था यद्यस्ति कश्चिदस्य रक्षक: तदा समायात्विति ॥३५॥ तत: न कस्यापि समागमने तेनैव शिरश्चिच्छेद । अन्यार्थं चक्रं धृतमिति तुच्छत्वादस्य वधोऽन्येन भविष्यतीति तेनैवेत्युक्तम् । सकुण्डलमिति । सर्वदेवाधिष्ठितमपि तत्रापि पुरमायिन: पुरलक्षणा मोहमाया यस्य, एतादृशस्यापि वधे हेतु: हरिरिति । सर्वदु:खहर्ता । एतस्यैव च मोक्षार्थम् । किञ्च यद्ययं जीवेत्तदा सर्वोपद्रवं कुर्यादिति दृष्टान्तेनाह-वज्रेण वृत्रस्य यथा पुरन्दर इति । तदा तदीयानां नृणां हा हेति वच: अभूत् ॥३६॥ तावतापि युद्धं न निवृत्तमिति वक्तुमाह-तस्मिन्निपतित इति । भगवानक्लिष्टकर्मा । तं न मारितवान् किन्तु पापेनैव पतित: पापेन सायुज्याभावो वा । सौभे च गदया हत इति । मायानिर्मितत्वात् कदाचित् स्थितिर्भवेत् । ततस्तस्मिन् प्रविश्य वाऽन्यो युद्धं कुर्यात्, अत: प्रधानानन्तरमपि सौभस्य पृथगनुवाद: । तदा दन्तवक्त्र: पूर्वमृतानां सख स्वापचितिं कुर्वन् सखीनामर्थे रुषा क्रोधेन युद्धार्थमाभिमुख्येन समागत: अन्यै: सह युद्धेन क्लिष्टदशायां स्वस्य जयो भविष्यतीति ॥३७॥

॥ इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां
दशमस्कन्धोत्तरार्धविवरणे अष्टाविंशाध्यायविवरणम् ॥२८॥ ॥७७॥

श्रीसुबोधिनीसार:

गदया सहितम् आधावत आगचछतस्तस्य भुजं भल्लेनच्छित्त्वाथ शाल्वस्य वधाय हननार्थं प्रलयार्कतुल्यम् अद्भुतं रथाङ् चक्रं बिभ्रत् धारयत् बभौ सार्क: ससूर्य उदयपर्व इव ॥३५॥ तेन चक्रेण बहुमायिनो दैत्यस्य सकुण्डलं मुकुटयुक्तं शिरो हरिर्जहा चिच्छेद पुरन्दर इन्द्रो वज्रेण वृत्रस्य शिर इव तदा नृणां हाहा इति वचो बभूव ॥३६॥ तस्मिन् पापे शाल्वे पतिते मृते सति गदया सौभे विमाने हते त्रुटिते सति दिवि स्वर्गे देवगणैरीरिता दुन्दुभयो नेदु: हे राजन् किं च सखीनां भ्रातृमित्राणामपचितिमानृण्यं कुर्वन् कर्तुं हेतौ शतृप्रत्यय: रुषा क्रोधेन हेतुना दन्ता वक्रा: कुटिला यस्येति साम्प्रदायिका: दन्तेषु वक्रं मुखं यस्येति विरूपत्वादित्यन्ये कबन्धमुदरे मुखमितिवत् प्राप्त: ॥३७॥

॥ इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायां सप्तसप्ततितमोऽध्याय: ॥७७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आधावत: अभ्यापतत: शाल्वस्याङ्गदेन सहितं बाहुं भल्लेन बाणविशेषेण छित्त्वाऽथान्तरं तस्य वधार्थं प्रलयार्कतुल् रथाङ्गं चक्रं बिभ्राण: कृष्णो यथा सार्क: सूर्यसहित: उदयाचलो भाति तथा बभौ ॥३५॥ ततश्च हरि: पुरुमायिनो बहुमायावि शाल्वस्य कुण्डलादियुक्तं शिरस्तेनैव चक्रेण जहार । तत्र दृष्टान्तमाह-पुरन्दर इन्द्रो यथा वज्रेण वृत्रस्य शिरो जहार तथेति । त तत्पश्यतां शाल्वपक्षीयाणां नृणां हाहेति वचो बभूव ॥३६॥ तस्मिन् पापाचारे शाल्वे निपातिते सति सौभाख्ये पुरे च गदया ह चूर्णिते च सति दिवि स्वर्गे हर्षाद्देवगणैर्वादिता दुन्दुभयो नेदु: । दुष्टे निहते राज्ञां हर्षो भवतीति तु तव विदितमेव इत्याशये सम्बोधयति-राजन्निति ॥३७॥ अथ सानुजदन्तवक्त्रवधात्मकं भगवच्चरितं वक्तुं प्रस्तौति-सखीनामिति । सखीनां शाल्वादि मृतानामपचितिं पारोक्ष्योपकृतिं कुर्वन् कर्तुं रुषा दन्तवक्त्रोऽभ्यगात् योद्धुमागत: ॥३८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र सात्त्विकानां निरोधने । सप्तसप्ततितमोऽगाच्छाल्ववधनिरूपकः ॥३॥ ॥७७॥

अन्वितार्थप्रकाशिका

आधावत इति ॥ आधावतः अभ्यापततः तस्य शाल्वस्याङ्गदेन सहितं बाहुं भल्लेन बाणविशेषेण छित्त्वाऽथान्तरं तस्य वधार्थमद्भुतं लयार्कसन्निभं प्रलयकालिकसूर्यतुल्यं रथाङ्गं चक्रं बिभ्राणः कृष्णो यथा सार्कः सूर्यसहितः उदयाचलो भाति तथा बभौ ॥३५॥ जहारेति ॥ ततश्च हरिः पुरुमायिनो बहुमायाविदः शाल्वस्य कुण्डलादियुक्तं शिरस्तेनैव चक्रेण जहार । तत्र दृष्टान्तमाह-पुरन्दर इन्द्रो यथा वज्रेण वृत्रस्य शिरो जहार तथेति । तदा तत्पश्यतां शाल्वपक्षीयाणां नृणां हाहेति वचो बभूव ॥३६॥ तस्मिन्निति सार्धम् । हेराजन् ! तस्मिन् पापाचारे शाल्वे निपातिते सति सौभाख्ये पुरे च गदया हते चूर्णिते च सति दिवि स्वर्गे हर्षाद्देवगणैर्वादिता दुन्दुभयो नेदुः ॥३७॥ सखीनां शाल्वादीनां मृतानामपचितिं पारोक्ष्योपकृतिं कुर्वन् कर्तुं रुषा दन्तवक्त्रोऽभ्यगात् योद्धुमागतः ॥३७॥

॥ इति श्रीमद्भागवतेऽन्वितार्थप्रकाशिकायां सप्तसप्ततितमोऽध्याः ॥७७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

लये प्रलयकाले योऽर्कस्तेन सन्निभं तुल्यं रथाङ्गं चक्रं बिभ्रत् सत् अर्कसहित उदयाचल इव बभौ ॥३५॥ पुरुमायिनो बहुमायाविनः पुरन्दर इन्द्रः ॥३६॥ देवगणैः ईरिताः शब्दिताः अपचितिं वैरग्रहणं कुर्वन् ॥३७॥

॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते
निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने ससौभशाल्ववधोनाम सप्तसप्ततितमोऽध्यायः ॥७७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आधावत इति ॥ श्रीकृष्णः आधावतः अभ्यापततः तस्य शाल्वस्य सगदं गदया सहितं साङ्गदमस्य बाहुमिति पाठे अस्य शाल्वस्य साङ्गदं केयूरसहितं बाहुं भल्लेन स्नुहिपत्रसमानबाणविशेषेण छित्त्वा अथ शाल्वस्य वधाय वधार्थं, लयार्कसन्निभं प्रलयकालीनसूर्यसदृशम्, अद्भुतं रथाङ्गं, सुदर्शनचक्रं, बिभ्रद्बिभ्राणः, सन् सार्कः ससूर्यः, उदयाचलः इव बभौ ॥३५॥ जहारेति ॥ हरिः श्रीकृष्णः पुरुमायिनो बहुमायावतः शाल्वस्य किरीटयुक्तं सकुण्डलं शिरः तेन चक्रेण एव पुरन्दर इन्द्रः वज्रेण दधीचोऽस्थिनिर्मापित पविना वृत्रस्य वृत्रासुरस्य, शिरः यथा तथा जहार । तदा नृणां तत्पक्षीयजनानां हाहा इति वचः बभूव ॥३६॥ अथ सानुजदन्तवक्त्रवधात्मकं हरेश्चरित्रं वक्तुं तावत् प्रस्तौति सार्धेन । तस्मिन्निति । पापे तस्मिन् शाल्वे निपतिते सति सौभे गदया हते भग्ने सति च हे राजन् ! दिवि देवगणेरिताः दुन्दुभयः नेदुः । ततः सखीनाम् अपचितिं कुर्वन् शाल्वादीनां पारोक्ष्येणोपकृतिं कर्तुमित्यर्थः । दन्तवक्त्रः रुषा अभ्यगात् । तृतीयपादेऽक्षराधिक्यमार्षम् ॥३७॥

॥ इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनु-
भगवत्प्रसादविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धे
सप्तसप्ततितमोऽध्यायः ॥७७॥

कृष्णप्रिया

भगवान पर आक्रमण कर आने के पूर्व में ही भगवानने भाले से गा के साथ शाल्व का हाथ को काटकर धरती पर गिराया। पुनः शाल्व के वधके लिये भगवान श्रीकष्णने प्रलयलाल के सूर्यनारायण के सभान तेजोमय एवं अत्यंत दिव्य सुदर्शन चक्र धारण कर लिया सुदर्शन धारण किये हुए भगवन श्रीकृष्ण का दर्शन मानो कि सूर्य के साथ उदयाचल शोभायमान हो रहा था ।।३५।। राजन् परीक्षित् ! इधर दुष्टात्मा शाल्व मर गया और सौभ विमान भी गदा की चोटसे चूर्ण हो गया तब सुरवृन्द आकाशमें मेरी दुन्दुभि आदि वाजित्र बजाने लगे। राजन् उसी समय भाइ और मित्र आदीका बदला लेने के लिये अत्यन्त आविष्ट हो कर आ पहुं चा

॥ इति श्रीभद्भागवते दशमस्कन्धे सप्तसप्ततितमाध्यायभाषाटीका समाप्ता ॥७७॥

श्लोकाः **अनु.**

४० ४०

शिशुपालस्य

श्रीशुकः उवाच

शिशुपालस्य, श

पदातिः, संक्रुद्धः, गदापा

ततोऽष्टसप्ततितमे

सखीनामपचितिं

ततः शाल्ववधोत्तर

शिशुपालस्येति युग

'च' अपि, परलोक

---

५. अयं अध्यायः एकाधिकशत (

श्रीशुक उवाच-

उद्यापनस्नानहेतोर्यमुनातीरमागतम् श्र

महत्या सेनया युक्तो गजानीकसमन्

सौभ्येत्य पथि गच्छन्तं वृतं यदुकुमा

राजसङ्घानुगच्छन्तं महर्षिगणसेवितम्

दन्तवक्त्रोऽरुणन्मूढो मृगेन्द्रं जंबुको

॥ श्रीहरिः ॥

★श्रीगणेशाय नमः★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ [1]अष्टसप्ततितमोऽध्यायः ॥

श्लोकाः	अनु.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
४०	४०	५	१२८०	३०	५३	१३६३	४२॥	३

श्रीशुक उवाच

[6]शिशुपालस्य शाल्वस्य पौण्ड्रकस्यापि [7]दुर्मतिः । परलोकगतानां च कुर्वन् पारोक्ष्यसौहृदम् ॥१॥

कर्दमक्षमा

श्रीशुकः उवाच ।

शिशुपालस्य, शाल्वस्य, पौण्ड्रकस्य, अपि, परलोकमतानाम्, च, पारोक्ष्यसौहृदम्, कम्पयन्, कुर्वन्, हे महाराज ! पदातिः, संकुद्धः, गदापाणिः, महासत्त्वः, दुर्मतिः, एकः, पद्भ्याम्, इलाम्, व्यदृश्यत ॥१-२॥

श्रीधरस्वामिकृतभावार्थदीपिका

ततोऽष्टसप्ततितमे दन्तवक्त्रविदूरथौ । हत्वा हरिः पुरे रेमे रामः सूतं ततोऽवधीत् ॥

सखीनामपचितिं कुर्वन्नित्युक्तं तदेवाह-शिशुपालस्येति पारोक्ष्यसौहृदं परोक्षे करणीयं सुहृत्कृत्यम् ॥१-२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः शाल्ववधोत्तरम् । ततः श्रीकृष्णोपरत्यनन्तरम् (१) । तदेवापचयनमेव ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

शिशुपालस्येति युग्मकम् इमां महीं महत् सत्त्वं बलं कायो वा यस्य सः व्यदृश्यत श्रीभगवता ॥१-२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

'च' अपि, परलोकगतानामपि, कुर्वन् कर्तुम्, यतो दुर्म्मतिर्निर्बुद्धिः ॥१॥

---

[1] अयं अध्यायः एकाधिकशत (१०१)-विज. तत्र एते अधिकाः ।

शुक उवाच-

स्नानहेतोर्यमुनातीरमागतम् श्रुत्वा तूर्णं कलिङ्गेशो दन्तवक्रः सहानुजः ॥१॥

त्या सेनया युक्तो गजानीकसमन्वितः । गच्छन्तं द्वारकां कृष्णं पथि रोद्धुं समाययौ ॥२॥

पथि गच्छन्तं वृतं यदुकुमारकैः । कान्ताषोडशसाहस्रशिबिकापरिवाहनम् ॥३॥

गच्छन्तं महर्षिगणसेवितम् ।ऋत्विक्पुरोहिताचार्यब्राह्मणैश्च समन्वितम् ॥४॥

दन्तवक्त्रोऽगमन्मूढो मृगेन्द्रं जंबुको यथा । रुक्मिणः शिशुपालस्य पौण्ड्रकस्य च दुर्मतेः ॥५॥ ६. इदमर्धं नास्ति-विज. । ७. दुर्मतेः-वीर ।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

सखीनामपचितिं कुर्वन्नित्युक्तं विस्तरेणाह-शिशुपालस्येत्यादिना । पारोक्ष्यसौहृदं परोक्षेण कर्तव्यं सुहृत्कृत्यं कुर्वन् "लक्षणहेत्वोः" इति शत्रादेशः कर्तुमित्यर्थः । व्यदृश्यतेत्युत्तरत्र सम्बन्धः कथम्भूतः एकोऽसहायः गदा पाणौ यस्य सः पद्भ्यां महीं प्रकम्पयन् महत्सत्त्वं बलं यस्य सः हे महाराज ! ॥१-२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

(मूलम्)

श्रीशुक उवाच

उद्वापनस्नानहेतोर्यमुनातीरमागतम् । श्रुत्वा तूर्णं कलिङ्गेशो दन्तवक्त्रः सहानुजः ॥

महत्या सेनया युक्तो गजानीकसमन्वितः । गच्छन्तं द्वारकां कृष्णं पथि रोद्धुं समाययौ ॥

सोऽभ्येत्य पथि गच्छन्तं वृतं यदुकुमारकैः । कान्ताषोडशसाहस्रशिबिकापरिवारितम् ॥

राजसङ्घानुगच्छन्तं महर्षिगणसेवितम् । ऋत्विक्पुरोधसाचार्यब्राह्मणैश्च समन्वितम् ॥

दन्तवक्त्रोऽरुणन्मूढो मृगेन्द्रं जम्बुको यथा ॥०॥

हरेरवशिष्टभूभारदन्तवक्त्रविदूरथवधलक्षणं यच्चरितं तत्कथयत्यस्मिन्नध्याये तत्र तद्घटनप्रकारमाह-उद्वापनेति उद्वापनस्नानहेतोः अवभृथस्नानहेतोः ॥०॥ अरुणत् रुरोध जम्बुकः शृगालः ॥०॥ पारोक्ष्यसौहृदं भृतिलक्षणाप्रत्यक्षत्वेऽपि बन्धु यत् कर्तव्यं सौहृदं प्रेम तत्र कुर्वन् कर्तुकामः ताच्छीलिक शतृप्रत्ययः ॥१-२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

अष्टयुक्सप्ततितमे दन्तवक्त्रविदूरथौ । हरिर्जघान सूतं तु बलस्तीर्थं परिभ्रमन् ॥१॥

सखीनामपचितिं कुर्वन्तिति पूर्वोक्तं विवृणोति-शिशुपालस्येति द्वाभ्याम् । शिशुपालादीनां पारोक्ष्ये सति सौ सुहृत्कृत्यम् ॥१-२॥

गूढार्थदीपिनी

अष्टसप्ततितमे युधि दन्तवक्त्रमत्र सविदूरथमीशः । तं निहत्य मुमुदे पुरि रामो नैमिषे समवधीदथ सूतम् ॥१॥

शिशुपालेति युग्मम् । पौण्ड्रको मिथ्यावासुदेवः तस्य । दुर्मतिः दन्तवक्त्रः अत एव क्रुद्धः सन् पद्भ्यामिमां पृ कम्पयन् युद्धे व्यदृश्यतेति द्वयोरन्वयः । कथम्भूतः । पारोक्ष्यसौहृदं परोक्षे सुहृत्कृत्यं कुर्वन् कर्तुकामः । ताच्छीलिकः शतृप्रत्य पारोक्ष्यं स्वार्थे ष्यञ् । महासत्त्वो महाबलः इमां पृथ्वीम् ॥१-२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अष्टसप्ततितमे कृष्णेन दन्तवक्त्रविदूरथौ हतौ श्रीबलभद्रेण च सूतो हत इति वर्णयति-शिशुपालस्येति ॥१-२॥

(अस्य टीका

बलभद्रस्य स
कीर्तिर्जातानुभावाच्च

शुकोक्तिः ।
पापबुद्धिः ॥१॥

अथाष्टसप्ततितमे

प्रस्तुतमेव विस्त
कुर्वन् कर्तुं दन्तवक्त्रो व्य

अष्टयुक्सप्ततितमे
श्लोकतुल्या (४०) अनुष्टु

शिशुपालस्येति यु
सौहृदं सुहृत्कृत्यं कुर्वन् क
दन्तवक्त्रो व्यदृश्यत ॥१-२

अथाष्टसप्ततितमे द

अपचितिमेवाह-शि

हत्वाष्टसप्ततितमे दन्

'सखीनामपचितिं कु
शाल्वस्य पौण्ड्रकस्य च एते
शत्रादेशः । व्यदृश्यतेत्युत्तरत्र स

ब्रह्मर्षि शुकमुनि ने
हा जाने के बाद उन सर्व की

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

(अस्य टीकाकृतः मतानुसारम् अत्रप्रदेयो विषयः पूर्वतनाध्यायेषु व्याख्यातः अन्यश्चाप्राप्यः अत एतस्याध्यायस्य टीकास्माभिर्नोपलभ्यत इति ज्ञेयम्)

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

बलभद्रस्य सत्कीर्तिरध्यायद्वितयेन हि । निरूप्यते ऋषिप्रोक्ता येनासौ सुस्थिरीभवेत् । तीर्थाभिषेकाद्यज्ञाच्च ज्ञानस्याप्युपदेशतः । कीर्तिर्जातानुभावाच्च मध्यस्थाच्चेति वर्ण्यते ॥१॥

सुबोधिनीसारः

शुकोक्तिः । शिशुपालशाल्वमिथ्यावासुदेवानां परलोकं गतानां मृतानामपि पारोक्ष्यं सौहृदं मित्रत्वं कुर्वन् दुर्बुद्धिः पापबुद्धिः ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथाष्टसप्ततितमे दन्तवक्त्रविदूरथौ ॥ हरिर्जघान रामस्तु सूतमिति निरूप्यते ॥१॥

प्रस्तुतमेव विस्तरेणाह–शिशुपालस्येति । परलोकगतानां मृतानामपि शिशुपालादीनां पारोक्ष्यसौहृदं परोक्षे कर्तव्यं सुहृत्कृत्यं कुर्वन् कर्तुं दन्तवक्त्रो व्यदृश्यतेत्युत्तरेणान्वयः । ननु शिशुपालादीनां निधनं दृष्ट्वापि कथमेवं निर्भयतयागतः तत्राह–दुर्मतिरिति ॥१॥

अन्वितार्थप्रकाशिका

अष्टयुक्सप्ततितमे दन्तवक्त्रविदूरथौ । अहन् हरिर्बलः सूतं तत्र श्लोकाः खवार्धयः (४०) ॥ उवाच पञ्चकं (५) चात्र श्लोकतुल्या (४०) अनुष्टुभः ॥७८॥

शिशुपालस्येति युग्मम् । हे महाराज ! परलोकगतानां मृतानामपि शिशुपालादीनां परोक्षमेव पारोक्ष्यम् । स्वार्थे ष्यञ् । तत्र सौहृदं सुहृत्कृत्यं कुर्वन् कर्तुं दुर्मतिः एकः पदातिः संक्रुद्धः गदापाणिः पद्भ्यामिमां भूमिं प्रकम्पयन् महासत्त्वो महाबलः दन्तवक्त्रो व्यदृश्यत ॥१–२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथाष्टसप्ततितमे दन्तवक्त्रं विदूरथम् । कृष्णोऽवधीत्ततः सूतं बलदेवोऽप्यथावधीत् ॥१॥

अपचितिमेवाह–शिशुपालस्येत्यादिभिः ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हत्वाष्टसप्ततितमे दन्तवक्त्रविदूरथौ । रेमे हरिः पुरे स्वीये रामः सूतं ततोऽवधीत् ॥१॥

'सखीनामपचितिं कुर्वन्' इति यदुक्तं तद्विस्तरेणाह–शिशुपालस्येत्यादिना ॥ शिशुपालस्येति । दुर्मतिर्दन्तवक्त्रः शिशुपालस्य शाल्वस्य पौण्ड्रकस्य च एतेषां परलोकगतानामपि पारोक्ष्यसौहृदं परोक्षे करणीयं सुहृत्कृत्यं कुर्वन् कर्तुं 'लक्षणहेत्वोः' इति शत्रादेशः । व्यदृश्यतेत्युत्तरत्र सम्बन्धः ॥१॥

कृष्णप्रिया

ब्रह्मर्षि शुकमुनि ने कहा - राजन् परीक्षित युद्धमें राजसूय यागमें शाल्व शिशुपाल पुन पौण्ड्रक आदि की मृत्यु हो जाने के बाद उन सर्व की मित्रता का ऋण अदा करने के लिये दुर्मति दन्तवक्त्र एकाकी पैदल आ पहुंचा ॥१॥

एकः पदातिः संक्रुद्धो गदापाणिः प्रकम्पयन् । पद्भ्यामिलां[1] महाराज महासत्त्वो व्यदृश्यत ॥२॥
तं तथायान्तमालोक्य गदामादाय सत्वरः । अवप्लुत्य रथात्कृष्णः सिन्धुं वेलेव[2] प्रत्यधात् ॥३॥
गदामुद्यम्य [3]कारूषो मुकुन्दं प्राह दुर्मदः । [4]दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः ॥४॥[5]
त्वं मातुलेयो नः कृष्ण मित्रध्रुङ्मां जिघांससि । अतस्त्वां गदया मन्द हनिष्ये वज्रकल्पया ॥५॥

कर्दमक्षमा

कृष्णः, सिन्धुम्, वेला, इव, तम्, तथा आयान्तम्, अवलोक्य, सत्वरः, गदाम्, आदाय, रथात्, अवप्लुत्य, प्रत्यधात् ॥३॥ दुर्मदः, कारूषः, गदाम्, उद्यम्य, मुकुन्दम्, प्राह, दिष्ट्या, दिष्ट्या, अद्य, भवान्, मम, दृष्टिपथम्, गतः ॥४॥ कृष्णः, नः, मातुलेयः, त्वम्, मित्रधृक्, माम्, जिघांससि, हे मन्द ! अतः, त्वाम्, वज्रकल्पया, गदाय, हनिष्ये ॥५॥

श्रीधरस्वामिकृतभावार्थदीपिका

प्रत्यधात् ॥३॥ मुकुन्दं प्राह दुर्मद इत्यादेरधिक्षेपपरता स्फुटैव परमार्थस्तु दुर्मदो गतमदः प्राह मुकुन्दं तृतीये जन्मनि मुक्तिदानार्थमागतम् अद्येति जन्मत्रयेऽन्विष्यमाणोऽद्य ब्रह्मशापावसाने भवान् मम स्वामी दृष्टिपथं गतः प्राप्तः एतद्दिष्ट्या दिष्ट्या भद्रं भद्रम् अतिहर्षे वीप्सा ॥४॥ किञ्च हे कृष्ण ! त्वमस्माकं मातुलेयो बन्धुः एवमपि मित्रध्रुक् मित्राणि घातितवान् माम् जिघांससि तस्मादस्माकं त्वत्तो मृत्युः सनकाद्यनुग्रहप्राप्तो नूनं दुर्वारः अतस्त्वामेतावन्मात्रमहं याचे, किन्तदाह–अमन्द सर्वसहनसमर्थ । क्षात्त्रधर्मेण सेवितुं गदया त्वां हनिष्ये प्रहरिष्यामि तामेकवारं सहस्व इति ननु वज्रतुल्यां त्वद्गदां को वा सहेत नैवमित्याह अवज्रकल्पया उत्पलमालावदतिकोमलयेत्यर्थः ॥५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इमां भूमिम् ॥२॥ तं दन्तवक्त्रम् । तथायान्तं सगदम् ॥३॥ कारूषः करूषदेशेशः ॥४॥ सम्बन्धं द्योतयति-किञ्चेति एवमपि बन्धुस्सन्नपि । मित्राणि शिशुपालादीनि । यस्मान्मां जिघांससि तस्मादित्यर्थः । यतो दुर्वारोऽतो हेतोः । तद्याचनं स्वयमाशङ्क्य समाधत्ते–नन्विति । इत्यर्थ इति–अद्भ्योऽज्यते प्राप्यते इत्यवज्रमुत्पलम् । अप्पूर्वादजतेरो बाहुलकाद्वीभावाभावः तत्कल्पप्प्रत्यये रूपिमिति ज्ञेयम् ॥५॥

---

१. मिमां–श्रीधर. वंशी.;पद्भ्यां महीं–वीर. विज. जीव. । २. प्रत्यगात्–विज । ३. कालिङ्गो–विज. । ४. दिष्ट्या कृष्ण–विज. । ५. विज
मातुलेय इतिपञ्चमश्लोकमारभ्य त्रयोदशश्लोकपर्यन्तं विद्यमानानां नवश्लोकानां स्थाने १५श्लोकाः किंचिद्भिन्नार्थकाःसन्ति । ते च—
"त्वामद्य द्वन्द्वयुद्धेन हनिष्याम्यविलंबितम् । त्वं मातुलेयो नः कृष्ण मित्रध्रुक्पारदारिकः । विश्वासघाती बन्धुघ्नः सततं कलहप्रियः ॥१॥
पौण्ड्रकं मातुलेयं मेद्धये सूदितवानसि । रुक्मी च शिशुपालश्च भ्रातरो मे त्वया हतौ ॥२॥
अतस्त्वां गदया मन्द हनिष्ये वज्रकल्पया । तेनानृष्यमुपैम्यज्ञ मित्राणां मित्रवत्सलः ॥३॥
बन्धुरूपमरिं हत्वा व्याधिं देहचरं यथा । इति लोकप्रवादोस्त तेन दोषोपि नास्ति मे ॥४॥
एवं रुक्षैश्च वचनैः कृष्णं तोत्रैरिव द्विपम् । गदयाऽताडयत्कृष्णं सिंहवद्व्यनदच्च सः ॥५॥
गदयाऽभिहतोप्याजौ न चचाल यदूत्तमः । गदया व्यहनद्गुर्व्या कौमोदक्यास्तनान्तरे ॥६॥
गाढनिर्भिन्नहृदय उद्वमन रुधिरं मुखात् । प्रसार्य केशबाह्वङ्घ्रि गतासुर्व्यपतद्भुवि ॥७॥
ततः सूक्ष्मतरं ज्यातिः कृष्णमाविशदद्भुतम् । पश्यतां सर्वभूतानां यथा चैधस्य सङ्गरे ॥८॥
भ्रातरं निहतं दृष्ट्वा दन्तवक्त्रं विदूरथः । मूर्च्छितो भ्रातृशोकेनाप्यसिचर्म समाददे ॥९॥
अवप्लुत्य रथात्तूर्णं विधुन्वन्खड्गमुत्तमम् । अभिदुद्राव गोविन्दं पद्भ्यामुर्वी प्रकंपयन् ॥१०॥
तस्य बाणेन चिच्छेद खड्गं यादवनन्दनः । ततो जग्राह निशितां शक्तिं घोरां विदूरथः ॥११॥
तया प्रहर्तुं गोविन्दमभिनिश्चित्य सङ्गरे । क्षणेनाभिससाराज्ञश्चापमुक्तो यथा शरः ॥१२॥
तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना । शिरो जहार राजेन्द्र सकिरीटं सकुण्डलम् ॥१३॥
एवं निहत्य समरे दन्तवक्त्रविदूरथौ । कालयामास तत्सैन्यं जगृहे वारणादिकम् ॥१४॥
भूयः पुष्परथं दिव्यमास्थ्य । सहितः सात्वतगणैरीडितः सुरमानवैः ॥१५॥"

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

रथादवप्लुतेति प्रतियोधस्य पदातित्वेन धर्मानुरोधात् उद्यम्येत्यत्रादायेति क्वचित् ।।३।। कारूषः करूषदेशभवः ।।४।। मातुलेयोऽपि दन्तवक्त्रमातुः श्रुतदेवायाः श्रीवसुदेवभगिनीत्वात् वास्तवार्थे त्वेवं वा मित्रध्रुक् चासावहं चेति तं मां जिघांससि हन्तुं गन्तुं स्वीकर्तुमिच्छसीत्यर्थः । अतो हे अमन्द ! ''विधाय सुहृदां सुखम्'' इति ''हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्वताम् । यदाह वः समागत्य कृष्णः सत्यं करोति तत् । आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ।। प्रियं विधास्यते पित्रोर्भगवान् सात्वतां पतिः'' इति च स्वमुखेन भ्कतजनमुखेन धर्मसङ्कल्पसिद्ध्येरन्यथानुपपत्तेः सत्यसङ्कल्प इति परमेश्वरनिष्ठा श्रुतिः । सत्यव्रतमिति । ईश्वराणां वचः सत्यं तथैवाचिरितमिति च स्वयं श्रीमद्भागवतमेव कथं वाऽक्रूरस्य कुब्जायाश्च सकृन्मात्रगृहागमनप्रतिज्ञा सम्पादिता कथं वा मुहुरपि तेषामपि मानः सम्पादयितव्यः । न केवलमेतावदेव तस्य व्रजागमनमपि श्रीद्वारकावासिवचनेन स्फुटमेवाह प्रथमे । ''यर्ह्यम्बुजाक्षापससार भो भवान् कुरून् मधून् वापि सुहृद्दिदृक्षया'' इत्यत्र मधून् मथुरान् चेति व्याख्याय तदानीं तन्मण्डले सुहृदो व्रजस्था एव प्रकटा इति श्रीस्वामिपादैरपि तथाभिमतं ''तत्र योगप्रभावेण नीत्वा सर्वजनं हरिः'' इत्यत्र सर्वशब्देनान्येषां तत्राविद्यमानत्वात् सुहृद्दिदृक्षुरुत्कण्ठ इति श्रीबलदेवागमनेऽपि तत्रैव तत्प्रयोगात् श्रीभगवतस्तत्र गमने समयश्चायमेव तत्स्वारस्यलब्धेः । विधाय सुहृदां सुखमित्युक्तत्वात् अधुनैव निर्जिताशेषशत्रुत्वादिना तेषां नैश्चित्यं जातमिति एतत् प्राचीनलीलत्वेन स्थापयिष्यमाणायां सूर्योपरागयात्रायाम् । वज्रकल्पया हीरकवद्विराजमानया गदया त्वदीयया कौमोदक्या हेतुना त्वां हनिष्ये प्राप्स्ये इति ।।५।।

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

इमां महीं पद्भ्यां प्रकर्षेण कम्पयन् । यतो महत् सत्त्वं बलं कायं वा यस्य सः व्यदृश्यत सः, व्यदृश्यत श्रीकृष्णेन, किंवा; स्वयमेव तत्र सर्व्वेषां प्रत्यक्षोऽभूदित्यर्थः ।।२।। तथा तेन गदापाणित्वादिनोक्तप्रकारेणायान्तं रथादवप्लुत्य वेगेन प्लुतगत्यावतीर्य्येति पदातेः पदातिना सतैव योद्धव्यमिति वीरधर्मापेक्षया, यतः कृष्णः सर्वधर्मप्रवर्तनार्थमवतीर्थः साक्षाद्भगवान्, अतः कथमपि तदतिक्रमेण तादृशस्यापि तस्य शक्तिर्नाभूदिति दृष्टान्तेन च द्योतयति-सिन्धुमिति ।।३।। कारूषः करूषदेशोद्भवस्तद्देशाधिपः, मुकुन्दमपि प्रकर्षेण स्वगर्वप्रदर्शनादिनाह, यतो दुर्मदो दुष्टाभिमानः ।।४।। वास्तव्यर्थे च च प्रणयेनाह- मातुलेयोऽपि दन्तवक्त्रमातुः श्रुतदेवायाः, श्रीवसुदेवभगिनीत्वात् । हे कृष्णेति शिशुबालादिप्राणाकर्षणाभिप्रायेण श्यामवर्णापेक्षया, वास्तवार्थे तु निजाशेषैश्वर्य्यप्रकटनार्थमवतीर्ण ! साक्षाद्भगवन्निति । आनृण्यञ्च ममावश्यकृत्यमित्याशयेनाह-मित्रेति । बन्धुरूपं बन्धुत्वेन वर्तमानमप्यान्तरमहावैरिणमित्यर्थः । स्वदेहसम्बन्ध्यपि महादुःखदः स्यादित्यादौ दृष्टान्तः-व्याधिमिति । वास्तवार्थे च यथा यथाबद्ध्वा ।।५-६।।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

व्यदृश्यत दन्तवक्त्र इत्यर्थः ।।२-१५।।

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

तदा कृष्णः किमकरोत्तदाह-तमिति । तं दन्तवक्त्रमवलोक्य त्वरया सहितः सन्धुं समुद्रं वेलेव प्रत्यधात् प्रतिरुरोधेत्यर्थः ।।३।। गदामिति । कारूषो दन्तवक्त्रः प्राह । तदेवाह-दिष्ट्येति । दिष्ट्या अयमानन्दो जातः इत्यर्थः । कोऽसौ अद्य दृष्टिपथं भवान् प्राप्त इत्येषः ।।४।। हे कृष्ण ! त्वमस्माकं मातुलस्य पुत्रः सहजमित्रमिति तात्पर्यं तथापि मित्राण्येव द्रुह्यतीति तथा मां च हन्तुम् इच्छसि यत एवम्भूतस्ततः त्वां वज्रतुल्यया बृहत्या गदया हनिष्ये ताडयिष्यामीत्यर्थः ।।५।।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

वेला जलवृद्धिः सन्धुं नदीम् ।।३।। कालिङ्गः कलिङ्गवषयनाथः ।।४।।

(मूलम्) त्वं मातुलेयो नः कृष्ण मित्रध्रुक् पारदादिकः । विश्वासघाती बन्धुघ्नः सततं कलहप्रियः ।।
पौण्ड्रकं मातुलेयं मे सङ्ख्ये सूदितवानसि । रुक्मी च शिशुपालश्च भ्रातरौ मे त्वयाहतौ ।।०।।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

मातुलो वसुदेवः तत्पुत्रः पारदारिकः परस्त्रीरतिसमुत्सुकः ॥५॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

अवप्लुत्येति प्रतियोद्धारं पदातिमालोक्येति भावः । वेलातीरं प्रत्यधात् प्रतिरुरोध ॥३॥ कारूषः करूषदेशोद्भवः मातुलेय इति दन्तवक्त्रमातुः श्रुतश्रवायाः वसुदेवभगिनीत्वात् दुर्मद इत्यादेर्भारतीपक्षे व्याख्या यथा दुर्मदो गतमदः मुकु तृतीये जन्मनि मुक्तिदानार्थमागतं प्राह । अद्य तृतीये जन्मनि ब्रह्मशापावसाने भवान् मन्मोक्षदाता प्रभुर्दृष्टिपथं गतः एत दिष्ट्या भद्रं भद्रम् अतिहर्षे द्वित्वम् ॥४॥ नः प्रभुरपि त्वं मातुलेयः सम्प्रति मातुलपुत्रोऽभूः तदपि मित्रध्रुक् चासावहश्चेति तद्रूपमातुलेयद्रोहिणं मां जिघांससि उचितमेवैतदिति भावः । अतः हेऽमन्द ! गदया त्वदीयया कौमोदक्या मद्विघातिन्या हेतु त्वां हनिष्ये प्राप्स्यामि वज्रकल्पया वज्रतुल्ययेति कृष्णगदया लोकदृष्ट्यैवोत्कर्षो विवक्षितः वस्तुतस्तु मामल्पसत्त्वं ह त्वद्गदा वज्रवदेव स्वस्य बलं प्रकाशयिष्यति नाधमत्वमित्यर्थः ॥५॥

गूढार्थदीपिनी

तथा यान्तं सगदम् ॥ त्वरया सहितः कृष्णः रथात् अवप्लुत्य तं प्रत्यधात् प्रातिकूल्येन रुरोध । वेला तीरं य समुद्रवेगं रुणद्धि तथा ॥३॥ करूषो विहारप्रदेशः तस्य राजा । जन्मत्रयेऽन्विष्यमाणो भवान् मम स्वामी अद्य शापाव दृष्टिपथं गतः एतत् दिष्ट्या (दिष्ट्येति भद्रार्थेऽव्ययम्) । भद्रं भद्रम् । हर्षाधिक्ये वीप्सा ॥४॥ नोऽस्माकं मातुलेयः दन्तवक्त्रमा श्रुतदेवाया वसुदेवभगिनीत्वात् । मित्राणि शिशुपालादीनि द्रुह्यन्तीति । त्वदीयया गदया त्वामेव हनिष्ये प्राप्स्यामि । हिंसागत्योः धातुः । वस्तुतः मित्रध्रुक् चासौ अहं च मित्रध्रुङ्मां जिघांससि हन्तुं गन्तुं स्वीकर्तुमिच्छसि । अतो हे अम सर्वसहनेश ! अवज्रकल्पया (अद्भ्योऽज्यते प्राप्यते इत्यवज्रमुत्पलम् । अपूर्वादजते रो बाहुलकात् ततः कल्पप्रत्यये रूप ज्ञेयमिति वंशीधरी ।) उत्पलवत् अतिकोमलया ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रत्यधात् प्रतिरुरोध ॥३-५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

विजयोऽयं यथा रामस्ततोऽध्याये निरूपितः । रामस्य कीर्तिरूपे च तद्धाता च तथाविधः । अतो भगवतो भृत एकत्र रूपिताः ॥२॥ तत्र प्रथमं भगवतः क्रियाशक्तिसमाप्त्यर्थं दन्तवक्त्रस्यापि भगवत्सेवकत्वात् तन्मुक्तिश्च भगवत्क अवतारप्रयोजकत्वेन निरूप्यते, पूर्वाध्यायान्ते दन्तवक्त्रः समागत इत्युक्तं तत्किमर्थम् । तेन प्रकारेणेति विस्तरेण निरूप्य पत्नी भर्तृनिमित्तं प्रवृत्ता तन्मरणे स्वयमेव म्रियते तथा शिशुपालाद्यर्थं तन्मित्रमयमपि जानन् मरणार्थमेवागतः न ह्यस्मि तेषामुपकारो भवति तथापि दुर्मतित्वात्तथा कृतवान् तत्र शिशुपालो राजसः दन्तवक्त्रस्तामसः पौण्ड्रकः सात्त्विकः । ए बहव एव अपिशब्देन सङ्गृहीताः पतिव्रता च दुर्गतिं प्राप्तानामुद्धारार्थं यतत इति चेत्तत्राह–परलोकगतानामिति । तेषां भगवद्भ परलोकः सिद्धः चकारादृतानामपि मुक्तानां वा सौहृदं हि तैर्ज्ञातं तेषां सुकृतं भगति तत्कृतौ तदभावेऽपि कृतवा पारोक्ष्यसौहृदमिति ॥१॥ मरणमेव चेद्वाञ्छितं किं सहायेन इत्येकः तत्रापि पदातिः क्रोधाभावे पलायनं च स्यादिति निकटे गदया युद्धं भवतीति शीघ्रं मरणपर्यवसायी तथापि भगवान्न मारयिष्यतीति आशङ्क्य मरणार्थमिमां पद्भ्यां प्र इत्युक्तं महाराजेति तादृशो हन्यत इति बोधितम्, महासत्त्व इति तस्य युद्धार्थं प्रकृतौ साहसम् ॥२॥ ततो भगवान् धर्मयु

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

कर्तव्यमिति स्वयमपि तथाविधो जात इत्याह-तं तथायान्तमालोक्येति । सत्वर इति आगमने तस्य क्लेशाभावार्थमुक्तम् अवप्लुत्येति दर्शनानन्तरं न कोऽपि विलम्बः कृतः इति वक्तुं रथादुत्प्लवमुक्तं यतः कृष्णः कालरूपः अतः सर्वयादवमारणार्थप्रवृत्तिं सिन्धुं वेलेव प्रत्यधात् प्रतिधावनं कृतवान् शीघ्रं भगवति समागते कदाचित् भगवान् साल्वादेः साल्वस्यायं पदातिः कश्चिदिति अवहेलया मुक्तिं न दद्यादिति ॥३॥ स्वप्रयोजनप्रवृत्तिस्वरूपाणि निर्दिशति-गदामुद्यम्य कारूष इति । स हि कारूषदेशाधिपतिः मुकुन्दं मोक्षदातारं गदामुद्यम्य अस्याधिकारं प्रदर्शयन् द्वारपालकत्वं वा ख्यापयन् उत्तमाधिकारी स्नेहेनैव सायुज्यं प्राप्तुं योग्यः विरोधेन प्राप्तुम् इच्छतीति दुर्मदः अत एव विरुद्धमाह-दिष्ट्या दिष्ट्येति । एतावानर्थः उभयत्रापि तुल्यः मम दृष्टिपथं गत इति यदेतन्मम भाग्येन यस्तु मनोरथप्रकारेणान्विष्यते स जात इति ॥४॥ आत्मानं ख्यापयन् भगवत्सम्बन्धमाह-त्वं मातुलेय इति । नोऽस्माकं शिशुपालादीनां मातुलेयः सुतरां नोऽस्माकं कृष्णेति स्नेहात् सम्बोधनम् मित्रध्रुगिति उपालम्भः वस्तुतस्तु कृष्णमित्रान् द्रोग्धीति सर्वसखाशिक्षक इत्यक्तम् अत एव मां जिघांससि अहमपि कृष्णमित्रमिति अपराधव्यतिरेकेण न मारयिष्यतीति प्रथममहमपराधं करिष्यामीत्याह-अतस्त्वां गदयेति । अमन्देति छेदः हनिष्ये प्राप्स्यामि गदया सुषुम्णया वज्रकल्पया यथा वज्रेण वृत्रस्त्वां प्राप्तवान् ॥५॥

सुबोधिनीसारः

एकः पादचारी संक्रुद्धो गदाहस्तः पद्भ्यामिमां भूमिं प्रकम्पयन् महासत्त्वो महाबलो व्यदृश्यत हे महाराज ! ॥२॥ तथा तेनोक्तप्रकारेणागच्छन्तं तं दन्तवक्त्रमालोक्य दृष्ट्वा सत्वरः कृष्णो रथादवप्लुत्योत्तीर्य गदामादाय प्रत्यधात् न्यरुणत् सिन्धुं समुद्रं वेला इव ॥३॥ गदामुद्यम्य उद्धृत्य कारूषः करूषदेशजातो दुर्मदोऽभिमानी कृष्णं प्राह । भवानद्य इदानीं मम दृष्टिपथं नेत्रमार्गं प्राप्तो दिष्ट्या भद्रं वीप्सा हर्षाधिक्ये ॥४॥ हे कृष्ण नोऽस्माकं त्वं मातुलेयो मातुलपुत्रोऽसि मित्रघाती मां हन्तुमिच्छसि अतो हे मन्द ! वज्रतुल्यया गदया त्वां हनिष्यामि ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आगमनप्रकारमाह-एकः असहायः । पद्भ्यामिमां भूमिं प्रकम्पयन् । तत्र हेतुमाह-महत् सत्त्वं बलं यस्य सः । समदृश्यत ॥२॥ तं दन्तवक्त्रं तथा क्रोधेन आयान्तमालोक्य स्वयमपि गदामादाय त्वरया सहितः कृष्णो रथादवप्लुत्य प्रत्यधात् प्रतिरुरोध । तत्र दृष्टान्तमाह-वेलां तीरं यथा समुद्रं सर्वतः प्रतिरुणद्धि, तथेति ॥३॥ कारूषो दन्तवक्त्रोऽपि गदामुद्यम्य मुकुन्दं प्राह । तत्र हेतुमाह-दुष्टो मदो यस्य सः इति । तदुक्तिमेवाह-दिष्ट्येति सार्धाभ्याम् । भवानद्य मम दृष्टिपक्षं गत इति दिष्ट्या, महानानन्दो जात इत्यर्थः ॥४॥ कथं तेन तवानन्द इत्यपेक्षायामाह-त्वमिति । हे कृष्ण ! यद्यपि त्वं नोऽस्माकं शिशुपालादीनां मातुलेयो मातुलपुत्रः, अतो हननायोग्यः, तथापि मित्राणि द्रुह्यतीति मित्रध्रुक् शिशुपालं हतवान् मां च यतो जिघांससि अतो हे मन्द ! वज्रतुल्यया गदया त्वां हनिष्ये ॥५॥

अन्वितार्थप्रकाशिका

तमिति । तं दन्तवक्त्रं तथा क्रोधेन आयान्तमालोक्य स्वयमपि गदामादाय त्वरया सहितः कृष्णः प्रतियोद्धारं पदातिमालक्ष्य रथादवप्लुत्य प्रत्यधात् प्रतिरुरोध । वेलां तीरं यथा समुद्रं सर्वतः प्रतिरुणद्धि, तथेति ॥३॥ गदामिति । दुर्मदः कारूषो दन्तवक्त्रोऽपि गदामुद्यम्य मुकुन्दं प्राह स्म । भवानद्य मम दृष्टिपक्षं गत इति दिष्ट्या दिष्ट्या महानानन्दो जातः । वस्तुतो दुर्मदः गतमदः मुकुन्दं मुक्तिदानायागतं प्राह स्म । जन्मत्रयेऽन्विष्यमाणो ब्रह्मशापावसाने स्वामी दृष्टिपथं गतः ॥४॥ त्वमिति । हे कृष्ण ! यद्यपि त्वं नोऽस्माकं शिशुपालादीनां मातुलेयो मातुलपुत्रः अतो हननायोग्यः तथापि मित्रं द्रुह्यतीति मित्रध्रुक् शिशुपालं हतवान् मां च यतो

अन्वितार्थप्रकाशिका

जिघांससि । अतो हे मन्द ! वज्रतुल्यया गदया त्वां हनिष्ये । वस्तुतः मित्रध्रुक् चासावहं च तं मित्रध्रुङ्मां जिघांससि हन्तुं गन्तुं स्वकसुमिच्छसि अतः हे अमन्द ! गदया त्वदीयया कौमोदक्या हेतुना त्वां हनिष्ये प्राप्स्यामि ॥५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इमां भूमिम् ॥२॥ वेलेव तट इव प्रत्यधात् रुरोध ॥३॥ कारूषः करूषदेशाधिपतिः दन्तवक्त्रः ॥४॥ मां जिघांससि हन्तुमिच्छसि। अतस्त्वां हनिष्ये वज्रकल्पया वज्रतुल्यया ॥५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एक इति। कथम्भूतः। एकोऽसहायः गदा पाणौ यस्य सः पदातिः संक्रुद्धः महासत्त्वः अत एव पद्भ्यां पादन्यासाभ्यां इमां महीं प्रकम्पयन् सन् हे महाराज ! व्यदृश्यत ॥२॥ तमिति। कृष्णः तं दन्तवक्त्रं तथोक्तप्रकारेण आयान्तम् आलोक्य रथा अवप्लुत्य गदाम् आदाय सत्वरं सिन्धुं समुद्रं वेला इव प्रत्यधात्। गदेति। दुर्मदः कारूषो दन्तवक्त्रः गदाम् उद्यम्य भवा अद्य मम दृष्टिपथं गतः दिष्ट्या दिष्ट्या महाभद्रम् अतिहर्षे वीप्सा इति मुकुन्दं प्राह ॥४॥ त्वमिति। हे कृष्ण ! त्व नोऽस्माकं मातुलेयः। मातुलपुत्रत्वात् सहजमित्रभूत इति तात्पर्यम्। तथापि मित्राण्येव द्रुह्यतीति मित्रध्रुक् सन् म जिघांससि। अतः हे मन्द ! त्वां वज्रकल्पया गदया हनिष्ये ॥५॥

कृष्णप्रिया

वह क्रोधसे आग बबूला हो रहा था। शस्त्र के रुपमें हाथमें केवल गदामात्र थी। परन्तु परीक्षित लोगों देखा कि पूर्ण शक्तिमान था कि उसके पैरोंकी धमक से पृथ्वी कांप रही थी ॥२॥ द्वारिकाधीश कृष्णचन्द्रने ज दन्तवक्त्र को गदा लेकर आते देखा तब वे शीघ्रातीशीघ्र आगे वढने से रोक देती है वैसे ही भगवानने दंतवक्त्र को रोक लिया ॥३॥ दुर्मद करुषनरेश दंतवक्त्रने गदा .ठाकर भगवान कृष्ण से कहा बडे सौभाग्य और आनंद की बात है कि आज कृष्ण मेरी दृष्टि में पड गये ॥४॥ अरे कृष्ण आप मेरे मामा के पुत्र हो इसलिये मैं आपको मार नहीं चाहता लेकिन एक तो आपने मेरे मित्रों को मार दिया है ओर दुसरी बात मुझे भी मारना चाहते हो इ लिये हे मन्दमति आज मै तुम्हें अपनी वज्रकठोर गदा से चूर चूर कर दूंगा ॥५॥

तर्ह्यानृण्यमुपैम्यज्ञ मित्राणां मित्रवत्सलः। बन्धुरूपमरिं हत्वा व्याधिं देहचरं यथा ॥६
एवं रूक्षैस्तुदन् वाक्यैः कृष्णं तोत्रैरिव द्विपम्। गदयाऽताडयन् मूर्ध्नि सिंहवद् व्यनदद् च सः ॥७
गदया निहतोऽप्याजौ न चचाल यदूद्वहः। कृष्णोऽपि तमहन् गुर्व्या कौमोदक्या स्तनान्तरे ॥८
[1]गदानिर्भिन्नहृदय उद्वमन् रुधिरं मुखात्। प्रसार्य केशबाह्वङ्घ्रीन् धरण्यां न्यपतत् व्यसुः ॥९

कर्दमक्षमा

हे अज्ञ ! मित्राणाम्, मित्रवत्सलः, तर्हि, आनृण्यम्, उपैमि, देहचरम्, व्याधिम्, यथा, बन्धुरूपम्, अरिम्, ह आनृण्यम्, उपैमि ॥६॥ तोत्रैः, द्विपम्, इव, कृष्णम्, रुक्षैः, वाक्यैः, एवम्, तुदन्, मूर्ध्नि, गदया, अताडयन्, च, सः, सिंह व्यनदत् ॥७॥ गदया, निहतः, अपि, यदूद्वहः, आजौ, न, चचाल, कृष्णः, अपि, गुर्व्या, कौमोदक्या, स्तनान्तरे, तम्, अहन् गाढनिर्भिन्नहृदयः, मुखात्, रुधिरम्, उद्वमन्, केशबाह्वङ्घ्रीन्, प्रसार्य, व्यसुः, धरण्याम्, न्यपतत् ॥९॥

श्रीधरस्वामिकृता भावार्थदीपिका

नन्वेवं हनने कस्तव पुरुषार्थस्तमाह–तर्हीति। अज्ञ ! न विद्यते ज्ञो यस्मात् हे सर्वज्ञेत्यर्थः। परमार्थतः स्वामिनमेतद्देहस बन्धुरूपमरिं ब्रह्मशापेन शत्रुत्वेन प्रतीतं त्वां हत्वा मित्राणामानृण्यमुपैष्यामि विशेषेणाऽऽधीयते मनसि चिन्त्यत इति

---

[1] गाढनिर्भिन्न–वीर.; गाढं निर्भिन्न–च. पु. टी.।

देहेऽन्तर्यामित
तद्वदिति ॥६॥

पुनरा
तेनाराधनज्ञानय
तद्वत्पित्राद्यानृण
साधु केशबाह्वङ

आनृण
स्वदेहसम्बन्ध्यि
व्याधिं विगतः
॥७॥ आजौ युद्ध
गामित्यत्र गदेति

तोत्रैरिवे
आजौ समभूप्रदेशे
स्वस्थानाद्विच्युतो
युद्धक्रीडार्थमेव, य
गरिष्ठया वा ॥८॥ नि

व्यदृश्यत

तर्ह्येवञ्चेन्मि
॥६॥ एवमिति। तोत्रै
दन्तवक्त्रः सिंहवद्व्यन
स्तनान्तरे स्तनमध्ये व
मुखाद्रुधिरमुद्वमन् केश

भ्रातरौ मातृ
(मू) इति लो
रुक्षैर्वचनैर्वय

श्रीधरस्वामिकृता भावार्थदीपिका

देहेऽन्तर्यामितया चरतीति तथा तम् ईश्वरं हत्वा क्षात्रधर्मेणाराध्य हन्तेर्गत्यर्थस्य ज्ञानार्थत्वाज्ज्ञात्वेति वा तेन यथा पित्रादीनामानृण्यमुपयन्ति तद्वदिति ॥६॥ रूक्षैरित्यादि प्रतीत्यभिप्रायेण तोत्रैरङ्कुशादिभिः ॥७-१५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनराशङ्कते-नन्विति। अनेकार्थत्वादर्थतात्पर्याद्वा हन्तेराराधनार्थत्वं लभ्यते। किं क्लिष्टकल्पनयेत्याह-हन्तेरित्यादि। तेनाराधनज्ञानयोरन्यतरेण। 'न किङ्करो नायमृणी च राजन्' इत्यारभ्य 'गतो मुकुन्दं परिहृत्य कर्तम्' इति वक्ष्यमाणत्वात्। तद्वत्पित्राद्यानृण्यवत् ॥६॥ स दन्तवक्त्रः ॥७॥ तं दन्तवक्त्रम् ॥८॥ "सेनातूर्यप्राण्यङ्गानां द्वन्द्व एकवद्वा" इति एकवचनान्तमपि साधु केशबाह्वङ्घ्रीति ॥९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आनृण्यं च मयाऽवश्यकृत्यमित्याशयेनाह-मित्रेति। बन्धुरिव रूप्यते दृश्यते यस्तं विचारे तु महावैरिणमित्यर्थः स्वदेहसम्बन्ध्यपि महादुःखदः स्यादित्यादौ दृष्टान्तः व्याधिमिति वास्तवार्थे च यथा यथावद्धत्वा ज्ञात्वा अन्यत्तैः यद्वा व्याधिं विगतः आधिर्येन तं देहचरमन्तर्यामित्वादिति ॥६॥ द्विपं मत्तगजं तोत्रैरिवेति दृष्टान्तोऽयमन्तर्दुःखाभावविवक्षया ॥७॥ आजौ युद्धक्रियायां न चचाल न च्युतः पतितोऽभूत् यत् यतः कृष्णोऽपीति ॥८॥ बाह्वङ्घ्रीनित्येकवत्त्वाभाव आर्षः गामित्यत्र गदेति वा पाठः ॥९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तोत्रैरिवेति दृष्टान्तेनातितुच्छतया तैस्तस्यान्तर्दुःखं नाभूदिति सूचितमेव, अत एवोक्तं कृष्णं परमानन्दघनमिति ॥७॥ आजौ समभूप्रदेशे एव स्थितो न चचाल युद्धात्, किंवा युद्धे निजधैर्यादेवास्थिरो नाभूदिति; यद्वा, आजावभिहतोऽपि न चचाल, स्वस्थानाद्विच्युतो नाभूदित्यर्थः; यतो यदूद्वहः साक्षाद्भगवान्; यद्वा, तद्वञ्चनादौ शक्तस्यापि तत्स्वीकारः स्ववीर्यातिशयप्रदर्शनेन युद्धक्रीडार्थमेव, यतो यदूद्वहो युद्धादिक्रीडार्थं यदुकुलेऽवतीर्ण इति। कृष्ण इति तत्प्राणाकर्षणाभिप्रायेण, गुर्व्या गदावर्गश्रेष्ठया गरिष्ठया वा ॥८॥ निःशेषेण भिन्नं विदीर्णं हृदयं वक्षो यस्य सः, अत उच्चैर्वमन् बाहुमङ्घ्री च प्रसार्य, अतो नितरामपतत् ॥९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

व्यदृश्यत दन्तवक्त्र इत्यर्थः ॥२-१५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तर्ह्येवञ्चेन्मित्रवत्सलोऽहं देहगतं व्याधिमिव मृत्युसम्पादकं बन्धुरूपमरिं त्वां हत्वा मित्राणामानृण्यम् ऋणानुभावं प्राप्स्यामि ॥६॥ एवमिति। तोत्रैरङ्कुशादिभिर्द्विपं गजमिवेत्थं रूक्षैः परुषैः वाक्यैः कृष्णं तुदन् व्यथयन्निव मूर्ध्नि गदया तताड ततः स दन्तवक्त्रः सिंहवद्व्यनदत् ॥७॥ गदयेति। यदूद्वहः कृष्णः आजौ युद्धे गदया ताडितोऽपि न चचाल अपि तु कृष्णस्तं दन्तवक्त्रं स्तनान्तरे स्तनमध्ये कौमोदक्याख्यया स्वगदया गाढं यथा तथा अताडयदित्यनुषङ्गः ॥८॥ एवं ताडितो निर्भिन्नं हृदयं यस्य सः मुखाद्रुधिरमुद्वमन् केशादीन् प्रसार्य व्यसुर्गतप्राणो धरण्यां न्यपतत् ॥९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

भ्रातरौ मातृसोदरीपुत्रत्वेन ॥०॥ आनृण्यम् ऋणाभावं देहचरं देहगतम् ॥६॥

(मू) इति लोकप्रवादोऽस्ति तेन दोषोऽपि नास्ति मे।)

रुक्षैर्वचनैर्वयथयित्वेति शेषः ॥७-९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

किञ्च त्वदनुभवी त्वां प्राप्तो जनः स्वबन्धूनप्युद्धरतीत्याह तर्हीति। न विद्यते ज्ञो यस्मात् हे सर्वज्ञ ! मित्रवत्सलोऽहं तर्ह्येव मित्राणामानृण्यम् उपैमि तेषामप्युद्धारणादिति भावः। अरिं लोकप्रीत्या शत्रुमपि त्वां बन्धुरूपं हत्वा ज्ञात्वा यथा यथावदेव विशेषेण आधीयते मनसि चिन्त्यत इति व्याधिस्तं परमध्येयमित्यर्थः। विगत आधिर्यस्मात्तमिति वा देहे चरतीति तमन्तर्यामिणम् ॥६॥ रूक्षैर्वाक्यैर्विशिष्टः तुदन् पीडयितुं रूक्षैरित्यादिकं प्रथमार्थानुगतमुपन्यस्तं तोत्रैरङ्कुशैः ॥७-१५॥

गूढार्थदीपिनी

न विद्यते ज्ञो यस्मात् हे अज्ञ सर्वज्ञ। शापादरिं शत्रुत्वेन प्रतीतं विगतः आधिर्यस्मात् तं देहचरमन्तर्यामिणं त्वा यथा यथावत् हत्वा (हन्तेर्गत्यर्थस्य ज्ञानार्थतापीति वामनादयः।) ज्ञात्वा आनृत्यमुपैमि। 'न किङ्करो नायमृणी च राजन्' इत्युक्तेः ॥६॥ रूक्षैः प्रातीतिकार्थेन। स दन्तवक्त्रः। तोत्रैः अङ्कुशैः यथा द्विपम् ॥७॥ यदून् उद्वहति पालयतीति तथा कृष्णः। तं दन्तवक्त्रं स्तनान्तरे वक्षसि अहन्। गुर्व्या गदया। आजौ सङ्ग्रामे ॥८॥ गदया निर्भिन्नं विदीर्णं हृदयं यस्य स अत एव व्यसु गतप्राणः सन् रुधिरम् उद्गिरन् धरण्यां न्यपतत्। केशादीन् (सेनातुर्यप्राण्यङ्गानां द्वन्द्वे एकवद्वा इति नियमात् एकवचनमपि साधु। केशबाह्वङ्घ्रीति।) प्रसार्य ॥९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

मित्रवत्सलः अहम् ॥६॥ तोत्रैरङ्कुशादिभिः ॥७-१५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

एवं सति "तत्रानृणो भूतबलिं विधाय" इतिवत् मित्राणामनृणो भवेः यतोऽहं मित्रवत्सलः त्वं वा अमित्रवत्सलः दैत्येष्वपि कृपाकरणात् मित्रवत्सलो वा सर्वेषामेव मित्रत्वात् किं कृत्वा अनृणो भविष्यसीति आकाङ्क्षायामाह-बन्धुरूपम हत्वेति। बन्धुरूपो देहः बन्धो रूपमिव प्रियं यस्य हितकर्तृत्वात् वस्तुतस्तु अरिः स्पृष्ट्वास्यबीजमिति न्यायात् नन्वात्मत स्वीकृतः कथं मारणीय इति चेत्तत्र दृष्टान्तमाह-व्याधिं देहचरं यथेति। अयं स्तुतिपक्षो व्याख्यातः निन्दापक्षस्तु स्पष्टः बन्धुरू मातुलपुत्रत्वात् मारकत्वादरिम् ॥६॥ निन्दायां रुक्षता तुदन् मर्मभेदं कुर्वन् श्रीकृष्णं तुदन्निति स्तुतौ स्वदोषं दूरीकुर्वन् तोत्र अङ्कुशपृष्ठभागं तेन यथा अग्रे गमनार्थं यथा प्रेर्यते द्विपः एवं कृष्णोऽपि शीघ्रं कर्त्तुं मारयितुं मृत्युं वा दातुं प्रेर्यत इति ॥७॥ ए वाक्यापराधं कृत्वा कायिकापराधं कृतवानित्याह-गदयेति। मूर्ध्नि समीपे सुषुम्णया ब्रह्मरन्ध्रभेदनं वा ततः सिंहवत् व्यन आत्मानं कृतार्थं मन्यमानः यतः सः पूर्वोक्तप्रकारेण भक्तः शूरो वा एतावता स्वकृतकृत्यता जातेति गदया निहतो वा आजौ क्रो भवतीति प्रहारस्य क्रूरत्वं दर्शितम्। यदूद्वह इति यादवलीला स्वीकृतेति तथा वर्ण्यत इत्यर्थः। एवमपराधं तस्योक्त्वा ततोऽपराधशान् भगवतः कृपामाह-कृष्णोऽपीति। गुर्व्येति साधनः माहात्म्यं कौमोदक्येति स्वकीयया प्रसिद्ध्या तेन मोक्षः सुप्रसिद्धः त स्तनान्तरे यथा जीवस्य निर्गमने षट्चक्रभेदनक्लेशो न भवेत् ॥८॥ ततो यज्जातं तदाह-गाढनिर्भिन्नहृदय इति। मुखतो रुधिरो वाक्पारुष्यदोषपरिहारार्थं ततो दयोत्पत्त्यर्थमिव केशान् बाह्वङ्घ्रींश्च प्रसार्य धरण्यां भगवच्चरणारविन्दे विशिष्टासुर्विगतासुर्वा न्यप आदौ नात्रैव समवनयनं द्वितीये भोगापेक्षाभावात् प्राणानां परित्यागः ॥९॥

सुबोधिनीसारः

तर्हि मित्राणाम् आनृण्यं निष्कृतिं मित्रेषु वत्सलोऽहमुपैमि प्राप्स्यामि हे अज्ञ ! बन्धुरूपिणमरिं शत्रुं हत्वा देहचरं वर्तमानं व्याधिं रोगमिव ॥६॥ एवं रूक्षैरसम्बद्धैर्वाक्यैः कृष्णं तुदन् व्यथयन् तोत्रैरंकुशादिभिर्द्वीपं गजमिव गदया मूर्ध्नि शि

अताडयत्। स
स्वगदया गुर्व्या
उद्वमन् धरण्यां

एवं ह
ऋणराहित्यमुपैमि
अज्ञेति। दृष्टान्ते
शत्रुनिराकरणे कः
व्यथयन् मूर्ध्नि ग
युद्ध एवं गदयाऽपि
हृदयं यस्य सः, अ

तर्हीति। हे
मित्राणां शिशुपाला
विगत आधिर्येन तं दे
पितॄणां न किङ्करो ना
परुषैर्वाक्यैः कृष्णं तु
कृष्णः आजौ युद्ध ए
गदया निर्भिन्नं हृदयं य

मित्रवत्सलो
देहचरं व्याधिं यथा त
॥७॥ आजौ युद्धे।
प्राणितूर्यसेनाङ्गानामिति

तर्हीति। देहच
मित्राणाम् आनृण्यम् उ
गजमिव एवमुक्तप्रकारेण
सिंहनादमकरोदित्यर्थः ॥
अपि कौमोदक्या स्वगद
निर्भिन्नं हृदयं यस्य सः मु

सुबोधिनीसारः

अताडयत्। स च दन्तवक्त्रः सिंहवदगर्जत् ॥७॥ आजौ संग्रामे गदयाऽभिहतोऽपि यदूद्वहः कृष्णो न चचाल न चकम्पे कौमोदक्या स्वगदया गुर्व्या महाभारवत्या स्तनयोरन्तरे वक्षसि कृष्णः तं दन्तवक्त्रमपि अहन् ॥८॥ गदया निर्भिन्नं हृदयं यस्य स मुखाद्रुधिरम् उद्वमन् धरण्यां भूमौ केशबाहुपादान् प्रसार्य व्यसुर्मृतो न्यपतत् ॥९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं हननेऽपि किं स्यात्तत्राह-तर्हीति। एवं चेत् मित्रवत्सलोऽहं बन्धुरूपमरिं त्वां हत्वा मित्राणां शिशुपालादीनामानृण्यम् ऋणराहित्यमुपैमि प्राप्स्यामि। ननु शत्रुत्वेऽपि बन्धोर्वधः कथं युक्त इत्याशङ्क्य त्वं चैरहस्यं न जानासि इत्याशयेन सम्बोधयति-अज्ञेति। दृष्टान्तेन हननस्य युक्तत्वं साधयति-व्याधिमिति। यदा देहगतस्य व्याधिरूपशत्रोर्निराकरणं सार्वजनीनं तदा बहिः शत्रुनिराकरणे कः सन्देह इत्याशयः ॥६॥ स दन्तवक्त्रः तोत्रैः अंकुशादिभिः द्विपं गजमिव एवं रूक्षैः परुषैर्वाक्यैः कृष्णं तुदन् व्यथयन् मूर्ध्नि गदया अताडयत्, ततः सिंहवद्व्यनदच्च ॥७॥ यदूनुद्वहति पालनपोषणादिभिर्निर्वहतीति तथाभूतः कृष्णः आजौ युद्ध एवं गदयाऽभिहतोऽपि न चचाल, किन्तु गुर्व्या कौमोदक्याख्यया स्वगदया तमपि स्तनान्तरे अहन् ॥८॥ एवं गदया निर्भिन्नं हृदयं यस्य सः, अत एव व्यसुः गतप्राणः मुखात् रुधिरमुद्वमन् केशादीन् प्रसार्य धरण्यां न्यपतदित्यन्वयः ॥९॥

अन्वितार्थप्रकाशिका

तर्हीति। हे अज्ञ! तर्हि त्वद्वधे कृते यथा देहचरं व्याधिं विनाश्य सुखमाप्नोति एवं मित्रवत्सलोऽहं बन्धुरूपमरिं त्वां हत्वा मित्राणां शिशुपालादीनामानृण्यम् ऋणराहित्यमुपैमि प्राप्स्यामि। वस्तुतः नास्ति ज्ञो यस्मात् हे सर्वज्ञ! ब्रह्मशापादरिं शत्रुत्वेन भातं विगत आधिर्येन तं देहचरमन्तर्यामिणं त्वां यथा यथावद् हत्वा ज्ञात्वा मित्राणां तदुपलक्षितपत्रादीनां चानृण्यमुपैमि। देवर्षिभूताप्तनृणां पितृणां न किङ्करो नायमृणी चेत्युक्तेः ॥६॥ एवमिति। स दन्तवक्त्रः तोत्रैः अंकुशादिभिः द्विपं गजमिव एवं रूक्षैः प्रातीतिकार्थेन परुषैर्वाक्यैः कृष्णं तुदन् व्यथयन् मूर्ध्नि गदया अताडयत्, ततः सिंहवद्व्यनदच्च ॥७॥ गदयेति। यदूनुद्वहति पालयतीति तथाभूतः कृष्णः आजौ युद्ध एवं गदयाऽभिहतोऽपि न चचाल, किन्तु गुर्व्या कौमोदक्या स्वगदया तमपि स्तनान्तरे अहन् ॥८॥ गदेति। एवं गदया निर्भिन्नं हृदयं यस्य स अत एव व्यसुः गतप्राणः मुखात् रुधिरमुद्वमन् केशादीन् प्रसार्य धरण्यां न्यपतत् ॥९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मित्रवत्सलोऽहं तर्हि तदानीमेव मित्राणामानृण्यं वैरग्रहणम् उपैमि प्रापयामि। किं कृत्वा यर्हि यदा बन्धुरूपम् अरिं त्वां देहचरं व्याधिं यथा तथा हत्वा आनृण्यमुपैमीति सम्बन्धः ॥६॥ तोत्रैः कशाभिर्द्विपं कुञ्जरमिव तुदन् व्यथयन् सन् स दन्तवक्त्रः ॥७॥ आजौ युद्धे। स्थानात् न चचाल यदून् उद्वहति न्यायपथेन। यतीति तथाभूतः ॥८॥ केशबाह्वङ्घ्रीनित्यत्र द्वन्द्वश्च प्राणितूर्यसेनाङ्गानामिति प्राप्तस्यैकत्वस्याभाव आर्षः ॥९-१०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तर्हीति। देहचरं देहे वर्तमानं व्याधिं रोगं यथा तथा बन्धुरूपमपि अरिं शत्रुं त्वां हत्वा व्यापाद्य हे अज्ञ! मित्रवत्सलः अहं मित्राणाम् आनृण्यम् उपैमि गमिष्यामि। तर्हि तदैव शान्तिमपीति शेषः। गमिष्यामि ॥६॥ एवमिति। तोत्रैरंकुशादिभिः द्विपं गजमिव एवमुक्तप्रकारेण रुक्षैः वाक्यैः कृष्णं तुदन् स दन्तवक्त्रः मूर्ध्नि गदया ताडयन् सन् सिंहवत् व्यनदच्च। गदाप्रहारं कृत्वा सिंहनादमकरोदित्यर्थः ॥७॥ गदयेति। यदूद्वहः श्रीकृष्णः आजौ युद्धे गदया अभिहतोऽपि ताडितोऽपि न चचाल। ततः कृष्णः अपि कौमोदक्या स्वगदया तं दन्तवक्त्रं गाढं यथा तथा स्तनान्तरे स्तनयोर्मध्ये अहन्नताडयत् ॥८॥ गदेति। दन्तवक्त्रः गदया निर्भिन्नं हृदयं यस्य सः मुखाद्रुधिरम् उद्वमन् धरण्यां भूमौ केशबाह्वङ्घ्रीन् प्रसार्य व्यसुर्गतप्राणः सन् न्यपतत् ॥९॥

कृष्णप्रिया

हे अज्ञ ! वैसे तो मेरे सम्बन्धी हो साथ साथ शत्रु भि हो जैसे अपने ही शरीरमें रहनेवाला कोई व्याधि हो मै अपने मित्रो से अत्यन्त स्नेह करता हूं क्योंकि उन सबका मुझ पर ऋण है । अब तुम्हारा वध कर ही मैं उन सबके ऋण से उरुण हो सकता हुं ।।६।। जैसे महावत अंकुशसे हरित को घाटल करता है वैसे हि दंतवक्त्र ने अपनी कटुवार्ता से श्रीकृष्ण को चोट लगाने की चेष्टा की और पुनः अन्तेशिरपर उग्रवेशसे गदा का प्रहार कर सिंह के समान गरज उठा ।।७।। संग्रामभूमि में गदा की चोट खाकर भी भगवान श्रीकृष्ण अल्प भी न हिले । पुनः भगवान श्रीकृष्णने अपनी प्रसिद्ध कौमोदकी गदा सावधान हो कर दंतवक्त्रके वक्षस्थल पर जोरसे लगायी ।।८।। गदा के प्रहार से दंतवक्त्रका वक्षस्थल वीदीर्ण हो गया और मुखसे रुधीर उगलने लगा । उनके केश विखर गये उनकी भुजाएं और पैर फैर गये और अन्तमें निष्प्राण हो कर वह धरती पर गीर पडा ।।९।।

ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतम् । पश्यतां सर्वभूतानां यथा चैद्यवधे नृप ॥१०॥
[1]विदूरथस्तु तद्भ्राता भ्रातृशोकपरिप्लुतः । आगच्छदसिचर्मभ्यामुच्छ्वसंस्तज्जिघांसया ॥११॥
तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना । शिरो जहार राजेन्द्र सकिरीटं सकुण्डलम् ॥१२॥
एवं सौभं च साल्वं च दन्तवक्त्रं सहानुजम् । हत्वा दुर्विषहैर[2]न्यैरीडितः सुरमानवैः ॥१३॥

कर्दमक्षमा

ततः, हे नृप ! चैद्यवधे, यथा, सर्वभूतानाम्, पश्यताम्, सूक्ष्मतरम्, ज्योतिः, कृष्णम्, आविशद्, तद्, अद्भुतम् ॥१०॥ भ्रातृशोकपरिप्लुतः, तद्, भ्राता, विदूरथः, तु, तत्, जिघांसया, असिचर्मभ्याम्, उच्छ्वसन्, आगच्छत् ॥११॥ हे राजेन्द्र ! कृष्णः, क्षुरनेमिना, चक्रेण, सकिरीटम्, सकुण्डलम्, आपततः, तस्य, शिरः, जहार ॥१२॥ एवम्, सौभम्, च, शाल्वम्, च, सहानुजम्, दन्तवक्त्रम्, दुर्विषहैः, हत्वा, अन्यैः, सुरामानवैः, ईडितः ॥१३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ॥७-१५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः पतनानन्तरम् । ज्योतिर्विजयात्मकं तेजः ॥१०॥ तद्भ्राता दन्तवक्त्रानुजः । तज्जिघांसया कृष्णहननेच्छया ॥११॥ तस्य विदूरथस्य ॥१२॥ एवमुक्तविधया । अन्यैः कृष्णेतरैः ॥१३-१४-१५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तद्देहादित्यर्थः । सूक्ष्मतरं चक्षुराद्यग्राह्यं न तु प्रमाणतोप्यल्पतरम् उल्केव भुवि खाच्च्युतेति चैद्यवधे चक्षुरग्राह्यत्वादद्भुतं लोकातीतं पश्यतामिति तथापि सर्वेषु भूतेषु साक्षात् पश्यत्स्वित्यर्थः । इति भगवदिच्छैव तत्कारणत्वेन द अत एव विस्मयात् सम्बोधयति (नृपेति) यथा चैद्यवध इति पार्षदत्वेन द्वयोरपि तुल्यत्वात्तस्यैव प्रवेशो गतिश्च सूचिता ॥ तुशब्दो भेदे तस्य दन्तवक्त्रस्य भ्रातेति यादवो विदूरथो व्यावर्तितः ॥११॥ आपततः वेगेनागच्छत एव ॥१२॥ एवमितित्रिक अन्यैः श्रीकृष्णेतरैर्दुर्विषहान् असह्यविक्रमानपीत्यर्थः । सुरैर्मानवैश्च ईडितः जयजयेत्यादिना स्तुतः मुन्यादिभिरुपगीयमा सौभादिवधेन विजयो यस्य सः तैरेव सर्वैः कुसुमैः कृत्वाऽभितो वर्षितः वृष्ट्येव व्यापित इत्यर्थः वृष्णिप्रवरैः प्राग्युद्धार्थं श्रीप्रद्युम्नादि तत्तद्वधानन्तरमभ्यागतैरेव सर्वैः श्रीवसुदेवबलदेवोग्रसेनादिभिर्वृतः अलङ्कृतां स्वभावत एव किं वा महादुष्टवर्गविजयोत्स विशेषतो भूषितामित्यर्थः । अत्र दन्तवक्त्रवधप्रसङ्गे पाद्मोत्तरखण्डे विशेषः श्रूयते तथाहि तदीयगद्यानि "अथ शिशुपालं नि श्रुत्वा दन्तवक्त्रः कृष्णेन योद्धुं मथुरामाजगाम, कृष्णस्तु तच्छ्रुत्वा रथमारुह्य मथुरामाययौ तयोर्दन्तवक्त्रवासुदेवायाहोरात्रं मथुरा

---

१. विदूरथम्-च. पु. टी. । २. दुर्विषहानन्यै-श्रीधर. वंशी. विज. ; दुर्विषहानन्यानीडितः-वीर ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सङ्ग्राम: समवर्तत, कृष्णस्तु गदया तं जघान स तु चूर्णितसर्वाङ्गो वज्रनिर्भिन्नो महीधर इतव गतारुरवनीतले पपात सोऽपि हरे: सारूप्येण योगिगम्यं नित्यानन्दसुखं शाश्वतं परमपदमवाप । इत्थं जयविजयौ सनकादिशापव्याजेन केवलं भगवतो लीलार्थं संसृतावतीर्य जन्मत्रयेऽपि तेनैव निहतौ जन्मत्रयावसाने मुक्तिमवापतु:" इति । अत्र कल्पभेदव्यवस्था न मन्तव्या सङ्गते: सद्भावात् साह्यगतेरेव गति: तस्मादत्राप्येषा सङ्गति: कर्तव्या मारितमात्रे साल्वे तन्निष्क्रयार्थमप्यागतत्वेन निर्दिष्टस्य तस्य तच्छ्रवणं गृहे न सम्भवति किन्तु सोऽयं पौण्ड्रकस्य वधं पूर्वमेव ज्ञात्वा शिशुपालवधे तु ज्ञातमात्रेऽतिरुषा निजदेशत: शक्रप्रस्थदिशमेवागत: तत्र गदामात्रमादायैकाकित्वेन चलिततया पृथ्वीप्रकम्पनकृतितया महासत्त्वतया सिन्धुतया वज्रनिर्भिन्नमहीधरतया च तत्र तत्र पठितया महादेवाराधनेनाकस्माद्धिरण्याक्षक्षताप्राप्ततया चागत: । श्रीशुकदेवनिर्दिष्टदुर्मतितया जरासन्धवधार्थं श्रीमदुद्धवमन्त्रमेवालम्ब्य श्रीकृष्णं चक्रमात्रबलं मत्वा द्वन्द्वयुद्धाय गदामादाय श्रीबलदेवभीमादीन् गदाशिक्षानिपुणान् मत्वा तमेकाकिनमेवाह्वयितुं तं च तद्देशमुपद्रावयितुं मथुरायामेवाययौ ततश्च नूनं श्रीनारदमुखात् द्वारकामागतं विनिहतशाल्वं च श्रीकृष्णं श्रुत्वा तत्रैव चलितुमुद्यतो हिरण्याक्षवदेवादतिदूरादपि दृष्ट: तावदेव च साल्ववधानन्तरं श्रीभगवता मनोजवेनैव स्वरथेन तद्वदेकाकितयैवागतवता मथुरातो निष्क्रम्यागच्छन्नसौ प्रतिकूलगमनतया दृश्यतेत्यादि तत्रैव चासौ दन्तवक्त्रो हत इत्यद्यापि मथुरायां द्वारकादिग्द्वारि दन्तवक्त्रहेति संस्कृतानुगायां लोकभाषायां दतिहानाम्ना प्रसिद्ध: श्रीवज्रेण वासितो ग्रामो वर्तते अथ विदूरथस्तु तदसम्मत्या तेन सममनागतोऽपि भ्रातृस्नेहेन पश्चादागत्य तं हतं दृष्ट्वा श्रीकृष्णचित्रभानौ पतङ्ग इव पपातेति किञ्चान्यदपि तदनन्तरमुत्तरखण्डे वर्तते यथा कृष्णोऽपि तं हत्वा यमुनामुत्तीर्य नन्दव्रजं गत्वा सोत्कण्ठौ पितरावभिवाद्याश्वास्य ताभ्यां साश्रुकण्ठमालिङ्गित: सकलगोपवृद्धान् प्रणम्याश्वास्य बहुवस्त्राभरणादिभिस्तत्रस्थान् सर्वान् सन्तर्पयामास- "कालिन्द्या: पुलिने रम्ये पुण्यवृक्षसमाचिते । गोपनारीभिरनिशं क्रीडयामास केशव: ॥" इति यमुनाजलमुत्तीर्येति । ब्राह्मणबालकाहरणे दर्शितप्रभावेण स्वेनैव रथेनेति ज्ञेयं बहुवस्त्रादीनां तत्क्षणं तत्सम्पत्तिश्च लक्ष्मीपतित्वादकस्मात्सर्वत उपस्थितेरिति च इदं पुनर्व्रजागमनं श्रीमद्भागवतस्यापि सम्मतम्- "तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तम: । सान्त्वयामास सप्रेमैरायास्य इति दौत्यकै: ॥" इति - "यात यूयं व्रजं तात वयं च स्नेहदु:खितान् । ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥ इति । हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्वताम् । यदाह व: समागत्य कृष्ण: सत्यं करोति तत् ॥ आगमिष्यत्यदीर्घेण कालेन व्रजमच्युत: । प्रियं विधास्यते पित्रोर्भगवान् सात्वतां पति: ॥" इति च स्वमुखेन भक्तजनमुखेन च बहुसङ्कल्पसिद्धेरन्यथानुपपत्ते: सत्यसङ्कल्प इति हि परमेश्वरनिष्ठाश्रुति: सत्यव्रतमिति ईश्वराणां वच: सत्यमिति च स्वयं श्रीमद्भागवतमेव कथं वाऽक्रूरस्य कुब्जायाश्च सकृन्मात्रगृहागमनप्रतिज्ञा सम्पादिता कथं वा मुहुरपि तेषामपि सा न सम्पादयितव्या न केवलमेतावदेव तस्य व्रजागमनमपि अत्र मधून् मथुरां वेति व्याख्याय तदानीं तन्मण्डले सुहृदो व्रजस्था एव प्रकट इति श्रीस्वामिपादैरपि तथाभिमतम् - "तत्र योगप्रभावेण नीत्वा सर्वजनं हरि:" इत्यत्र सर्वशब्देनान्येषां तत्राविद्यमानत्वात् सुहृद्दिदृक्षुरुत्कण्ठ इति श्रीबलदेवागमनेऽपि तत्रैव तत्प्रयोगात् श्रीभगवतस्तत्र गमने समयश्चायमेव तत्स्वारस्यलब्धे: । विधाय सुहृदां सुखमित्युक्तत्वात् अधुनैव निर्जिताशेषशत्रुत्वादिना तेषां नैश्चित्यं जातमिति एतत् प्राचीनलीलत्वेन स्थापयिष्यमाणायां सूर्योपरागयात्रायामप्येतदेव । निजझटित्यनागमने कारणमुपन्यस्तं स्वयं भगवता -

"अपि स्मरथ न: सख्य: स्वानां प्रियचिकीर्षया । गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतस: ॥"

इति । एवमपि यदिदं श्रीमद्व्रजागमनं पुराणान्तरेषु नोद्घाटितं तत्खलु परोक्षवादरीतिकत्वादृषीणाम् अत्र च परोक्षवादो बहिर्मुखान् प्रति तादृशतदीयरहस्यलीलादिगोपनाय अनुरागिण: प्रति उत्कण्ठावर्धनाय चेति ज्ञेयम् । अभ्युपगम्य त एव चानेकत्र पुराणेऽनुक्तस्याप्येकत्रोक्तस्य प्रामाणिकत्वं यथा ब्रह्ममोहनवस्त्रहरणमृद्भक्षणादिलीलानां यत्तु तत्र तत्र स्वयं सूचितस्यापि व्रजागमनस्य श्रीशुकदेवेन चात्राकथनं तत्खलु परोक्षवादसिद्धान्तमेव द्रढयति - विशेषश्चास्य "तत्स्मारितानन्तहताखिलेन्द्रिय:" इतिवन्मध्ये मध्ये प्रेममूर्च्छां प्राप्नुवत: कदाचिदारीप्सितकथासक्त्या स्यात्कदाचिन्न स्यादपि यथैव काश्चिदपि लीला: क्रमवैपरीत्येनापि वर्णिता: सन्ति यथैव दन्तवक्त्रवधात्पूर्वापि सूर्योपरागयात्रा दूरत: परत एव वक्ष्यते यतस्तीर्थयात्रात: श्रीबलदेवे कुरुयुद्धे समागते सत्येव

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सर्वकौरववधोत्तरकाल एव च दुर्योधनवधः तदुत्तरतो वक्ष्यमाणा सूर्योपरागयात्रा तु श्रीभीष्मद्रोणाद्यागमनमपीति, क्रमस्त्वयमेव प्रथमं सूर्योपरागयात्रा ततो राजसूयसभा ततो द्युतं ततः पाण्डवानां वनगमनं तदैव साल्वदन्तवक्त्रवधव्रजागमनानि वनादागतेषु पाण्डवेषु श्रीबलदेवतीर्थयात्रादिकमिति। सूर्योपरागयात्रा तु कंसवधान्नाति बहुसंवत्सरानन्तरा यतस्तत्रैव- "कंसप्रतापिताः सर्वे वयं याता दिशं दिशम्। एतर्ह्येव पुनः स्थानं दैवेनासादिता स्वसः ॥" इति कुन्तीं प्रति श्रीवसुदेववाक्यम् अतः प्रथमदर्शनादेव श्रीद्रौपद्या श्रीरुक्मिण्यादीनां मिथो विवाहप्रश्नत्तरे घटेते यत्तु "आस्तेऽनिरुद्धो रक्षायां कृतवर्मा च यूथपः" इति सूर्योपरागयात्रायाम् अनिरुद्धस्यापि प्रोढत्वप्रतीतेश्चिरकालत्वमाकल्पते तत्पुनर्नातिदीर्घेण कालेन "स कार्ष्णी रूढयौवनः" इति न्यायेनाल्पकालत एव तत्सम्पत्तेर्न तादृशत्वम् अत एव "आगमिष्यत्यतिदीर्घेण कालेन व्रजमच्युतः" इत्यपि सङ्गच्छते श्रीकृष्णनन्दनोऽप्यन्योऽनिरुद्धो वर्तते यः खलु दशमान्ते महारथमध्ये गणतो वर्णितो व्याख्यातश्चेति व्यवस्थितमेव श्रीपाद्मोत्तरखण्डे स्पष्टमुक्तं पुनः श्रीव्रजागमनं किञ्चान्यदपि रहस्यमेतदन्ते तत्र वर्तते यथा – "रम्यकेलिसुखेनैव गोपवेषधरः प्रभुः। बहुप्रेमरसेनात्र मासद्वयमुवास ह॥" अत्र तत्रस्था नन्दगोपादयः सर्वे जनाः पुत्रदारसहिता पशुपक्षिमृगादयश्च वासुदेवप्रसादेन दिव्यरूपधरा विमानमारूढाः परमं वैकुण्ठं लोकमवापुरिति ह स्फुटं प्रकटं यथा स्यात्तथा मासद्वयमुवास। अथानन्तरं दिव्यरूपधरा इति परमानन्देन पूर्वतोऽप्यलौकिकशोभायुक्ता इत्यर्थः। श्रीगोगोपगोपीपरिकरत्वेनैव नित्यलीलायाः स्थापितत्वात् परमं वैकुण्ठं लोकमिति "दर्शयामास लोकं स्वं गोपाना"मित्यादिना "नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः। कृष्णं च तत्र छन्दोभिः स्तूयमानं सुविस्मिताः॥" इत्थं तेनैव नाथेन सनाथं गोलोकमेवेत्यर्थः "वत्सैर्वत्सतरीभिश्च सरामो बालकैर्वृतः। वृन्दावनान्तरगतः सदा क्रीडति माधवः॥" इति स्कान्दोक्तानुसारेण श्रीरामरोहिण्यादियुक्तमपि तमिति भावः। तेषामुत्कण्ठां दृष्ट्वा "न वेद स्वां गतिं भ्रमन्" इति विचिन्त्य तदभिप्रायेणैव श्रीभगवता पूर्वमपि दर्शितोऽसौ एवं श्रीवृन्दावन एव तादृशप्रकाशस्य विद्यमानत्वाद्विमानारूढा इति तदानीं सूर्योपरागयात्रातः समागत दुःखात् दूरतो यमुनापार एव कृतवासत्वात् अत एवोक्तं कृष्णोऽपि तं हत्वा यमुनामुत्तीर्येति विमानमत्र द्वारकादिभिः सह वैकुण्ठादागतः स्वेच्छापरिमाणो भगवद्रथ एव तादृशतया तत्र नयनं चैश्वर्यज्ञानप्रधानभक्तेषु देवादिषु महिमदर्शनार्थमेव तस्य शीघ्रत्वमहाज्योतिर्मयत्वाभ्यामलक्ष्यगतित्वेन विस्मापनार्थमेव च व्याख्यानान्तरन्तु न युक्तम्। "अर्केचेन्मधुविन्देत किमर्थं पर्वतं व्रजेत्" इति न्यायात् अर्क इत्यव्ययं निकटार्थे यदि चेयं तस्य पुनर्व्रजागतिः नित्यप्राप्तिश्च न स्यात् तदा सर्वा गोकुलानुरागवर्णनं उद्धवादिषु स्वयं भगवता तदुत्कण्ठासूचनाश्च विफला एव स्युः न केवलं विफला विरसा एव चेति सुधिभिर्विचार्यम् एवं श्रीव्रजवासिनां पुनः साक्षात्तादृशतत्प्राप्त्यपेक्षयैव सूर्योपरागयात्रायामुक्तम् – "मयी भक्तिर्हि भूतानाममृतत्वाय कल्पते। दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः॥" इति श्रीभगवता "गोपीनां स गुरुर्गतिः" इति श्रीशुकदेवेन च तथा श्रीभागवतैकादशे "केवलेन हि भावेन" इत्यादिपदद्वये साधकचरीणां श्रीगोपीनां प्रथमं स्वप्राप्तिमुक्त्वा प्रस्तावान्नित्यप्रेयसीनामपि तन्महावियोगानन्तरप्राप्तिस्तस्य वियोगस्यातीतत्वनिर्देशात् दृढीक्रियते द्वाभ्याम् – "रामेण सार्धं मथुरां प्रणीते श्वाफल्किनामय्यनुरक्तचित्ताः।

विगाढभावेन न मे वीयोगतीव्राधयोऽन्यं ददृशुः सुखाय ॥ तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृन्दावनगोचरेण।
क्षणार्धवत्ताः पुनरङ्ग तासां हीना मया कल्पसमा बभूवुः॥" इति पूर्वन्तु तस्य व्रजाय प्रस्थापने -
"मयि ताः प्रेयसां प्रेष्टे दूरस्थे गोकुलस्त्रियः। स्मरन्त्योऽङ्ग विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः॥
धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन। प्रत्यागमनसन्देशैर्वल्लव्यो मे मदात्मिकाः॥"

इत्यत्र वर्तमानप्रयोग एव कृतः सम्प्रति त्वतीतनिर्देशः क्रियते ततश्च विगाढभावेन वियोगतीव्राधयः सत्यो मनो सख्यादिकमिति न सुखाय ददृशुः ततश्चाधुना सुखाय पश्यन्तीति वियोगो नास्तीत्यर्थः। एवं तास्ताः क्षपा मया हीनाः कल्प बभूवुः अधुना तु तादृश्यो न भवन्तीति वियोगो नास्तीत्यर्थः। हे उद्धव ! त्वद्द्वारा तासु सन्देशानु श्रीवृन्दावनस्यैवाप्रकटप्रकाशविशेषप्रवेशात्तासां नित्यं मत्प्राप्तेरिति भावः। ननु पूर्वोक्तानुसारेण गोलोकाख्ये वृन्दावनस्य प्रकाश तस्मिन्नस्ति प्रकटलीलासदृश्यैवाप्रकटलीला तर्हि कथमुभयोरेकत्र समावेशः ? उच्यते, प्रकटलीलायाः प्रकटप्रकाशस्य चा तावप्रकटलीलाप्रकाशौ प्रतिपन्नाविति च दृश्येते तदनन्तरपद्येन –

"ता नावि
यथा सम

अस्यार्थः
महामोदनाख्यभावा
प्रकटलीलानुगतत्वेन
प्रकटप्रकाशस्य त
अप्रकटप्रकाशविशे
मुनय इति । समा
पृथिवीगतामब्धितोय
लीलास्थितिं ताश्च भे
लीलाकैवल्यम्" (२

मत्कामारम

अत्र "आनन
अन्वये चार्थिक एव
चात्रानूद्यविधेयस्तयोः
प्रतीतिवशाल्लब्धत्वात्
शतसहस्रशः प्रापुः गण
केवलेन हि भावेनेत्या
लक्ष्मीः स्वरूपशक्तिरू
"ब्रह्मणो हि प्रतिष्ठाहम्"
भूतानाममृतत्वाय कल्प
प्रतिज्ञातत्वात् "दर्शयामा
वाञ्छनीयेन प्रेमविशेषेण
इति तेनैव दर्शितत्वेन
लक्षणदारसहिततत्प्राप्तेः स
गुणानामपि सर्वोत्कृष्टत्वं
तदेवं स्वरूपे निर्दिष्टे को
सम्बन्धमपि निर्दिशति "
"रूढिर्योगमपहरतीति"
नन्दनरमणशब्दयोर्भिन्नार्थत्व
रमणं स्वात्तथा रमणः प्रिय
"जारस्तूपपतिः सामै" इ
रमणशब्दो यौगिकत्वेनान्य
द्वावपि पर्य्यवसायितव्यावि
अत्र मत्पदाभावात् स्वरूपश
स्वरूपमजानन्त्यो रागातिश

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

"ता नाविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् ।
यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे ॥" इति ।

अस्यार्थः तास्तथाभूताः विरहोत्कण्ठातिशयेनाभिव्यक्तदुर्द्धरमहाभावाः सत्यः अथ कदाचित्तद्दर्शनार्थं गते मयि लब्धो योऽनुषङ्गो महामोदनाख्यभावाभिव्यक्तिकारी पुनश्च संयोगस्तेन बद्धा धीर्यासां तथाभूताः सत्यः स्वं ममतास्पदमात्मानमहङ्कारास्पदं च अदः प्रकटलीलानुगतत्वेनाभिमतं तथैव इदं प्रकटलीलानुगतत्वेनाभिमतं वा यथा स्यात्तथा नाविदन् किन्तु द्वयोरैक्येनैवाविदुरित्यर्थः । प्रकटप्रकाशस्य तल्लीलायाश्चाभेदेनैवाप्रकटं तद्द्वयमजानन्निति विवक्षितं ततश्च नाम च रूपं च तस्मिन् तन्नामरूपात्मनि अप्रकटप्रकाशविशेषे प्रविष्टा इव प्रविष्टाः वस्त्वभेदादित्यर्थः । तत्र प्रकटाप्रकटलीलागतयोर्नामरूपयोरभेदे दृष्टान्तः, यथा समाधौ मुनय इति । समाधिः शुद्धात्ममात्रस्फूर्ति तस्मिन् तयोर्लीलयोर्भेदावेदने दृष्टान्तः यथाब्धितोये नद्य इति । यथा नद्यः पृथिवीगतामब्धितोयगतां च स्वस्थितिं भेदेन न विदन्ति किन्तूभयस्यामपि स्थितौ समुद्रतोयानुगतावेवाविशन्ति तथा प्रकटां च लीलास्थितिं ताश्च भेदेन नाविदुः किन्तु मय्येवाविविशुरित्यर्थः । दृष्टान्तस्त्वयं लीलाभेदावेदनांश एव न तु सर्ववेदनांशे "लोकवत्तु लीलाकैवल्यम्" (२/१/३३) इतिवत् ततश्चाप्रकटलीलायां प्रविष्टा अपि यद्रूपमात्मनः प्रापुस्तदनन्तरमेव दर्श्यते-

मत्कामारमणं जारमस्वरूपविदोऽबलाः । ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः ॥ इति

अत्र "आनन्दो ब्रह्म" श्रुतिप्रसिद्धेरानन्दरूपं ब्रह्मैव विशेष्यं सर्वैः पदैः सर्वाविशेषाश्रयस्य तस्यैव विशेषयितव्यत्वात् अन्वये चार्थिक एव क्रमो गृह्यते तस्यैव प्राधान्यात् "पच्यन्तां विविधाः पाकाः" इत्यादौ सर्वदोहश्च गृह्यतामितिवत् न चात्रानूद्यविधेयस्तयोः पूर्वापरीभावः श्रयणीयः "यस्य पर्णमयी जुहूर्भवति न स पापं लोकं शृणोती"तिवद्वैपरीत्यस्य प्रतीतिवशाल्लब्धत्वात् ततश्चायमर्थः पूर्वोक्तरीत्या ताः ब्रह्म प्रापुः तासां मदंशभूतानां नित्यप्रियाणां सङ्गादन्या अपि साधनसिद्धाः शतसहस्रशः प्रापुः गणद्वयस्यास्य भेदो रासारम्भे दर्शित एव सङ्गस्य तत्प्रापकत्वं झटिति समानभावजनकत्वात् यथोक्तमेतत्पूर्वोक्तमेव केवलेन हि भावेनेत्यादि एवं गवादिष्वपि द्विविधत्वं ज्ञेयं तदेवं यत्प्रापुस्तच्च ब्रह्मणाद्वैतवादिना इति श्रीविष्णुपुराणात् परमा लक्ष्मीः स्वरूपशक्तिरूपा यत्रेति निरुक्तेश्च तथाभूतं श्रीभगवद्रूपमेव न च भगवद्रूपस्य विविधत्वेऽपि मत्तोन्याकारं प्रापुः किन्तु मां "ब्रह्मणो हि प्रतिष्ठाहम्" इति निर्दिष्टं मद्रूपं स्वयं भगवन्तं नराकृतिपरब्रह्माख्यमेव मत्कामा इति विशेषणात् "मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते । दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥" इति निर्विशेषब्रह्ममात्रप्राप्तिनिषेधपूर्वकसाक्षात्स्वप्राप्तेः प्रतिज्ञातत्वात् "दर्शयामासलोकं स्वं गोपानां तमसः परम्" इत्यादौ च "वाञ्छति यद्भवभियो मुनयो वयं च" इति मुमुक्षुमुक्तभक्तैरपि वाञ्छनीयेन प्रेमविशेषेण लब्धतया सर्वतो वैशिष्ट्येन तल्लाभावगमात् सर्वेषामेव व्रजवासिनां श्रीकृष्णरूपस्य स्वधामैव स्वलोक इति तेनैव दर्शितत्वेन अथ तत्रस्था नन्दादयः सर्वे जनाः पुत्रदारसहिता इत्यादौ च श्रीकृष्णादिलक्षणपुत्रश्रीयशोदादि-लक्षणदारसहिततत्प्राप्तेः सर्वव्रजजनकीयत्वेन तास्तु कैमुत्यस्य सिद्धत्वाच्च तदेवं ब्रह्मत्वेनानन्दरूपतया स्वस्वरूपस्य तथा परमत्वेन गुणानामपि सर्वोत्कृष्टत्वं दर्शयित्वा स्वस्य सर्वोत्तमनायकत्वं दर्शितं तत्रापि मां पदेन स्वयं भगवत्त्वं व्यज्य परमवैशिष्ट्यं ज्ञापितं तदेवं स्वरूपे निर्दिष्टे कीदृक् सम्बन्धं त्वां प्रापुरित्याशङ्किष्यत इत्यभिप्रेत्य तासामेव विशेषणेष्वन्तःपतितया स्वविशेषणाभ्याम् सम्बन्धमपि निर्दिशति "मत्कामा रमणं जारमस्वरूपविदः" इति च तत्र रमणः पतिः जार उपपतिः इत्येव रूढ्या लभ्यते "रूढिर्योगमपहरतीति" न्यायेन जारशब्दवद्रमणशब्दस्याप्यन्यार्थो न युज्यते तथा हि समानेऽपि यौगिकत्वेन नन्दनरमणशब्दयोर्भिन्नार्थत्वेन प्रतीतेर्मित्रापुत्रोमित्रारमणो नोच्यते न च मित्रापतिर्मित्रानन्दन इति तथा च विश्वप्रकाशे पटोलमूले रमणं स्यात्तथा रमणः प्रिय इति प्रियशब्दस्य चात्रपतिवाचित्वमेव "धवः प्रियः पतिर्भर्ता" इत्यमरकोषात् जारस्तूपपतावेव रूढः "जारस्तूपपतिः समौ" इत्यमरकोषात् पापपतिरयमुच्यते जारः पापपतिः समाविति त्रिकाण्डशेषात् तस्मात्पत्यावेव रूढोऽयं रमणशब्दो यौगिकत्वेनान्यवाचकत्वं नोररीकरोति तदेवं यो जारः स पतिर्न भवति यः पतिः स जारो न भवतीति तथात्रैकस्मिन् द्वावपि पर्य्यवसायितव्याविति स्थितः स्वयमेव तासां विशेषणाभ्यां व्यवस्थापयति मत्कामा रमणमिति जारमस्वरूपविद इति च अत्र मत्पदाभावात् स्वरूपशब्देनात्र तासामेव स्वरूपमुच्यते ततश्च प्रथमं तावल्लीलाशक्त्या जन्मादिना विस्मारितं मन्नित्यप्रेयसीत्वलक्षणं स्वरूपमजानन्त्यो रागातिशयाज्जारतया प्रतीतमेव मां प्रापुः तथापि मत्कामामपि कामेऽभिषलाषः कथमस्मिन् रमणत्वमेव

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जारवद्बुद्धिः स्याज्जारत्वन्तु स्वप्नवद्विलीयतेति लक्षणो यासां तथाभूताः सत्यो रमणत्वमेव प्रापुः परपुरुषरागिणीष्वन्यास्वपि तादृशभावाद्दुर्ल्लभतादिकं तत्खलु विप्रलम्भात्मकमेवेति विप्रलम्भ एव तत्र रत्युत्कर्षः ततश्च सह्यतां वा सहृदयेन तासु तस्य

कादाचित्कता यदि–

"न विना विप्रलम्भेन संयोगः पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान् रागो विवर्द्धते ॥"

इत्यादिन्यायेन पर्य्यवसाने कषायेण राग इव विप्रलम्भेन संयोगः पुष्टः स्यात् तेन स इव पुनरपि बाधितो न स्यात् हन्त हन्त तस्य शश्वदावृत्तिः कस्य वा कर्णयोरेकतरेणापि स्पृश्यतां भोजनरुचिवृद्धये लङ्घनाद्युग्रचिकित्सानामविश्रान्तिवत् तस्मादपि तदुपद्रवशमनाय रमणतया प्राप्तावेव तात्पर्य्यम् अन्यथा रसभङ्गश्च स्यात् तथा हि "निवारयामः समुपेत्य माधवं किन्नो करिष्यन् कुलवृद्धबान्धवाः" इति । "विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदरमाधवेति" "ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः" इति त्यक्तलौकिका इति गतह्रिय इति काचिन्मधुकरं दृष्ट्वेति "या दुर्त्यजं स्वजनमार्य्यपथं च हित्वा" इति "मातरं पितरं भ्रातृन् पतीन् पुत्रान् स्वसृरपि । यदर्थे जहिम दाशार्ह" इति च व्यक्तदुर्धरश्रीकृष्णमहनभावानां व्रजं प्रत्यागते श्रीकृष्णे परपत्नीत्वस्य मिथ्यात्वव्यक्तिम्विना तस्य व्रजे परमलज्जा प्रसज्जेत उक्तञ्च लज्जाशीलत्वं तस्य श्रीहरिवंशे–

"यत्र ह्रीः श्रीः स्थिता तत्र यत्र श्रीस्तत्र सन्नतिः । सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं कृष्णे तथाऽऽत्मनि ॥" इति ।

तस्मात्तल्लज्जानिवारणार्थमपि मायया स्वगुप्ते रमणत्वं व्यञ्जनीयमेव तच्च लोकवल्लीलाकैवल्यमये व्रजे लोकरीत्यैव न तु परीक्षित्सभायामिव गोपीनां तत्पतीनां चेत्यादिदर्शितपरमात्मत्वादिरीत्या किञ्च श्लीलत्वाद्रसविघातकृत्पारदार्य्यस्य खण्डनपूर्वकं तत्रैवात्र च रमणत्वमेव व्यञ्जयितव्यमिति दिक् । यथाह श्रीगोपालोत्तरतापिन्यां ताः प्रति दुर्वासाः "जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयं योऽसौ सौर्य्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गोपान् पालयति योऽसौ गोपेषु तिष्ठति योऽसौ सर्वेषु वेदेषु तिष्ठति योऽसौ सर्वैर्वेदैर्गीयते योऽसौ सर्वेषु भूतेष्वाविश्य भूतानि विदधाति स वो हि स्वामी भवति" इति सौर्य्य इति सौरी यमुना यददूरभवदेश इत्यर्थः । अथ तत्तद्गद्यानन्तरमपि पाद्मोत्तरखण्डे गद्यान्तरं यथा "कृष्णस्तु नन्दगोपव्रजौकसां सर्वेषां परमं निरामयं स्वपदं दत्त्वा दिवि देवगणैः संस्तूयमानो द्वारवतीं विवेश" इति निरामयं प्रापञ्चिकदोषामिश्रं पुनर्विरहदुःखरहितं चेत्यर्थः । स्वपदं स्वस्य श्रीगोपालरूपस्यैव नित्यविहारास्पदमित्यर्थः । तद्वा च सति जारत्वमेव तस्मिन्न सिद्ध्यतीति श्रीशुकदेवेन सिद्धान्तित गोपीनां तत्पतीनां चेत्यादिना श्रीदत्तात्रेयेण परमार्थविवेकश्लाघागर्भं गुरुत्वेन मतया पिङ्गलया च आत्मना रमणेनैव रंस्ये अनेन यथा रमेति जारभावेन प्राप्तेरागन्तुकत्वेन दर्शितत्वात् दर्शयिष्यमाणत्वाच्च न पर्य्यवासितपुरुषार्थत्वं तस्माज्जारत्वेन प्रतीतमपि मल्लक्षणं नराकृतिपरमब्रह्मैव रमणरूपं प्रापुरित्येवं जारतया पूर्वप्रतीतत्वमनूद्य रमणत्वं विधीयते प्रसिद्धं ह्यनूद्याप्रसिद्धं विधातव्यं विप्रोऽयं पण्डित इतिवत् जारत्वं खल्वेव प्रसिद्धमिति न वैपरीत्यं घटते किञ्च प्राप्ते हि शास्त्रमर्थवदिति न्यायेन दध्ना जुहोतीत्यादौ दधिपदवद्रमणपद एव विधेयत्वं न तु पूर्वपूर्वप्राप्ते ब्रह्मादिजारपर्य्यन्त इति इह च ब्रह्मेत्येवोक्ते श्रुतनिर्विशेषब्रह्मवादानां भगवत्त्व भ्रमविषयः स्यादिति परममित्युच्यते सिद्धे च भगवत्त्वे श्रीकृष्णरूपत्वं न व्यक्तीभवतीति मामित्युच्यते मामित्येवोक्तञ्च ब्रह्मत्वं भगवत्त्वं च प्रमाणान्तरसापेक्षं भवतीति तत्तदुच्यते यदि रमणपदं नोच्येत तर्हि जारमित्येव विधेयतया प्रतीयेत यदि च जारपदं नोच्येत तर्हि पूर्वप्रतीतत्वाद्रमणपदेनापि जारत्वमेव प्रतीयेतेति तन्निरासार्थं तव दर्शनात्

"ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति ।

मम भक्तभावानुसारित्वात् सोऽयं भावश्च श्रीराधादेव्या स्वयमेव ह्येषां व्यक्तीकृतः —

"अपि तव मधुपुर्य्यामार्य्यपुत्रोऽधुनास्ते स्मरति स पितृगेहान् सौम्यबन्धूंश्च गोपान् ।
सकृदपि स कथां नः किङ्करीणां गृणीते भुजमगुरुसुगन्धं मूर्ध्नि धास्यत् कदा नु ॥"

इत्यनेन अत्र खलु पत्यावेव कविभिः प्रयुक्तेनार्यपुत्र इत्यनेन तदीयत्वमेव स्वान्तर्भावितं व्यज्य किङ्करीणामित्यनेन तत् दैन्येनापि नादृढीकृत्य भुजमगुरुसुगन्धमित्यादिना तेनापि तादृशत्वेन स्पष्टैव स्वस्मिन् गीकृतिः प्रार्थिता मया चेदं कर्तुमि गोपीनां मद्वियोगादिमित्यारभ्य बल्लव्यो मे मदात्मिका इत्यनेन तस्मात् रमणतयैव तासामप्राप्तिः पर्यवसिता तदेवमेवाभिप्रेत

गणीष्वन्यास्वपि
तासु तस्य

न स्यात् हन्त हन्त
न्तिवत् तस्मादपि
र्वं किन्नो करिष्यन्
का मत्प्राणा मदर्थे
त्वा" इति "मातरं
प्रत्यागते श्रीकृष्णे

।" इति ।
जे लोकरीत्यैव न तु
र्यस्य खण्डनपूर्वकं
जन्मजराभ्यां भिन्नः
योऽसौ सर्वेषु वेदेषु
र्य्य इति सौरी यमुना
सर्वेषां परमं निरामयं
हितं चेत्यर्थः । स्वपदं
शुकदेवेन सिद्धान्तितं
रमणेनैव रंस्ये अनेन
ज्जारत्वेन प्रतीतमपि
नूद्याप्रसिद्धं विधातव्यं
येन दध्ना जुहोतीत्यादौ
षब्रह्मवादानां भगवत्त्वं
नामित्येवोक्तञ्च ब्रह्मत्वं
तीयेत यदि च जारपदं

किङ्करीणामित्यनेन तदेव
ता मया चेदं कर्तुमिष्टैव
ता तदेवमेवाभिप्रेत्य

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पत्युपपतिशब्दावदत्वा जाररमणशब्दाभ्यां तत्तद्योगिकार्थबलेन तथा तथा प्राप्तेर्निष्कर्षप्रकर्षौ व्यज्य रमणतया प्राप्तिरेव पूर्तये योग्येति व्यञ्जितं व्याख्यातं च स्वामिभिः जारबुद्धिवेद्यमपित्वेव ननु रमणबुद्धिमिपीति तासां क्रमेण तासां क्रमेण तथा तथा मत्प्राप्तौ मत्कृपैव हेतुरित्याह–अबला इति । ज्ञानक्रियाशक्तिहीनत्वात् मत्कृपाविषया इत्यर्थः । तदेवं स्थितेऽपि विषयप्रतिपत्तये विचार्यते रमणोऽत्र रतिजनको वक्तव्य इति चेत् न रतिजनकत्वं विना लौकिकोऽपि जारो नाश्रीयते इति जारपदेनैव तदर्थताया लब्धेः किमुत सर्वोत्तमनायकतासूचकेन परममितिमामिति च पदेन इत्यादिस्थायिभावश्च न साक्षात् वाच्यः किन्तु भङ्ग्या व्यञ्जयितव्यः एवेति तु रसशास्त्राणां स्थितिः । क्रीडार्थत्वेऽपि क्रीडा च पूर्वहेतोरेव लभ्यत इति तेनाप्यलं ननु सत्यपि केषुचित् पितिमन्यादिषु रमणपदमत्र तत्सम्बन्धिदुःखनिवारकत्वं प्रति नेयमिति चेत्कृष्टं कथं वा तासामनुभवापलापः क्रियते । कृष्णेतरपतितत्सम्बन्धिमात्राणां सम्बन्धमात्रस्य ताभिः सुदुःसहत्वात् यथोक्तं "कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मनित्यप्रिये पतिसुतादिभिरार्तिदैः किम्" इति तेष्ववस्थितेस्तु सुतरां यथोक्तं नान्यसमक्षमङ्गः स्थातुं त्वयाभिरमिता बत पारयाम इति किमुत तत्कृतिं निवारणादीना यथोक्तं "अन्तर्गृहगताः काश्चित्" इत्यादि तदेवं यौगिकी वृत्तिर्न घटते गौण्या तु तत्सदृशत्वप्राप्तेर्जार इत्येव प्रतिपद्यतेति पौनरुक्तमेवापद्येत न च जारपदं वा तद्वृत्तिद्वयं नेतव्यम् । यौगिक्याभिमतत्वात् गौण्यां तद्गुणयोगाभिधानेन रमणशब्दयोगेन च गुप्तत्वादिरिति कपतेरेव प्रतिपत्तव्यत्वेन जारताप्रतिसिद्धेर्व्याघातात् श्रीभगवता तु तत्र तत्र तत्तद्विशेषणं दत्त्वा व्यवस्थापितमेवेत्यलं स्वयं कुकल्पनायां दुराग्रहेण तस्माद्भिन्नावाचकत्वेऽपि सर्वविशेषाश्रये तस्मिन् ब्रह्मणि सामानाधिकरण्यस्यावमन्तव्यत्वादेकस्य प्रातीतकत्वमन्यस्य वास्तवमित्येव मन्तव्यं तत्र न सम्भवात् न च कल्पिताकल्पितयोर्युगपदाविर्भावो न स्यात् संज्ञाया आविर्भावेच्छायायाः स्थितिश्रवणात् न चोपपत्यापगमे निवारणाद्यभावेन रागवृद्धिर्न स्यात् यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवमिति वचनस्य तासु सर्वोर्ध्वप्रेमवतीषु कैमुत्योपपत्तेः न च यत्र मिथो दुर्लभता यत्र प्रच्छन्नकामुकत्वं यत्र च निवारणास्यादेषा तु नो रतिः परा ज्ञेयेति रसशास्त्रानुसारेणोपपत्त्य एव रतेरुत्कर्षः रत्नावती नाटिका ययातिचरितवद्दाम्पत्येऽपि तत्सम्भावात् नेष्टा यदङ्गिनि रसे कविभिः परोढेत्यादौ परोढानङ्गीकाराच्च लज्जालुत्वाद्बहुप्रेयसीत्वाच्छ्रीव्रजराजनन्दनेन तु मुहुर्दुर्लभतादिकमपि सम्भवतीति किमनिष्टप्रसङ्गेन "या दुस्त्यजं स्वजनमार्यपथं च हित्वा" इत्यादिदर्शितं तदुल्लङ्घनं तु तासामुत्कण्ठात्मकप्रेमबलस्य प्रकाशकमेव ननु तत्कृतनिवारणतया तस्य जनकं न हि महादुर्गत्रोटनं महाहस्तिनो बलजनकं किन्तु तत्प्रकाशकमेवेति किञ्च परकीयत्वे सति तदनुवादश्च कार्य इति यथोक्तं तस्माद्रमणतया प्राप्तावेव वक्तुर्मम विवक्षित पर्यवसानमिति भावः । तदेतदेवं "तमेव परमात्मानं जारबुद्ध्यापि सङ्गता" इत्यवष्टम्भेन "या मया क्रीडिता रात्र्याम्" इत्यत्र ज्ञापितम् अप्यर्थत्वेन तस्या हेयत्वव्यक्तेः "जिघांसयापि हरये स्तनं दत्त्वाऽऽप सद्गतिम्" इतिवत् अपिशब्दस्य खलु स्वभावोऽयं यन्निन्द्यवाचकसान्निध्ये निन्द्यस्य हेयत्वं स्तुत्यवाचकसान्निध्ये स्तुत्यस्योपादेयकत्वं गमयति पलाण्डुमपि सिञ्चति तुलसीमपि सिञ्चतीतिवत् न च भर्तुबुद्धिरपि तादृशी

"या सम्पर्यचरत् प्रेम्णा पादसंवाहनादिभिः । जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः ॥"

इत्यत्र स्तुतत्वात् न च चासामहो चरणेत्यादौ जारभावोऽपि स्तुतः अपि तु राग एव स एव जारतया एव तं स्वीकारितवानिति तस्यैव चमत्कारकारित्वात् न चैताः परमित्यादौ मुमुक्षुमुक्तभक्तानामुद्धवोक्तानां परदारा भूत्वा जारतया तं भजामेति तात्पर्यम् । किन्तु तादृशनिर्गलमहाप्रेम दृष्ट्वा तत्कृपामाशासानानां तच्छविमेव ते प्रार्थयन्ते ततो यद्यपि यथा भीष्ममुदारं दर्शनीयं कटं करोतीत्यादौ कृतक्रियाया विशेषणानि चान्वयन्ते तथात्र प्राप्तिक्रिययापि कटं करोति तच्च भीष्ममित्यादि ब्रह्म प्रापुस्तच्च परमित्यादिरीत्या तथापि रमणत्वेन प्राप्तिरेवात्र विधेया जारमुखरूपविद इत्युक्त्वा तन्नित्यप्रेयसीत्वात्तासां तच्च श्रीमत्साक्षतारादौ व्यक्तम् –

"अनेकजन्मसिद्धानां गोपीनां पतिरेव वा । नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्धनः ॥"

इति तन्मत्रस्य तन्नामव्याख्यातृगौतमीयात् अनेकजन्मसिद्धत्वमत्र "बहूनि मे व्यतीतानि जन्मानि तव चार्जुन" इतिवत् एवशब्दः प्रकटलीलागतजारत्वकिम्बवन्तीनिरासार्थः वाशब्दश्च पूर्वोक्तब्रह्मत्वेश्वरत्वमयव्याख्याद्वयस्यानादरापेक्षया न च ताभिः परकीयतया प्रसिद्धाभिस्तस्य रमणतया प्राप्तिर्व्रजे कथं घटतेति वाच्यं यया लीलाशक्त्याऽन्यथा प्रत्यापितं तया यथावत् प्रत्यापयितुं कथमिव न शक्येत न च तासां श्रीकृष्ण एव पर्य्यवसितत्वे तत्पतिं मन्यादीनामसूया स्यात् "नासूयन् खलु कृष्णाय" इत्याद्युक्तानुसारेण मायया स्वकल्पितानां तत्प्रतिरूपाणामर्पणेन समाधानानन्तरं च प्रकाशान्तरेण यदुभिर्मिलित्वेति शेषः ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

''वृतश्च वृष्णिप्रवरैर्विवेशालङ्कृतां पुरीम्'' इत्युक्तत्वात् श्रीकृष्णागमनं प्रतीक्ष्य तेषां बहिरेव स्थितत्वात् तच्च मासद्वयविलम्बेऽपि जाते नाशङ्काकरं विदूरवर्त्मत्वात् तस्यैव योगमायया मुहूर्तवद्भानसम्भवात् एकस्मिन्नपि यातेऽब्दे इत्यत्र क्षणार्धे मेनिरेऽर्भका इतिवत् पश्चादेव तद्विशेषज्ञानं श्रीदारुकमुखादित्यवगन्तव्यम् तस्मादिदमपि व्यस्थितम् एवं श्रीगोकुलवासिनामप्रकटलीलाप्रवेशस्य सिद्धत्वादेव श्रीरामस्य यमुनामनु तीर्थकृतौ तथा प्रथमस्कन्धवर्णिते भारतयुद्धानन्तरं श्रीभगवतो हस्तिनापुराद्द्वारकागमने रासपञ्चाध्याय्यां श्रीमदुद्धवसन्देशे च तत्तद्व्याख्यानं मेलयित्वा द्रष्टव्यम् ॥१३-१५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततस्तद्देहादित्यर्थः। सूक्ष्मतरं चक्षुराद्यग्राह्यम्, अत एवाद्भुतं लोकातीतम्, किंवा सूक्ष्मतरमपि तद्भुतं यथा स्यात्तदेवाह-पश्यतामिति। सर्वेष्वपि भूतेषुसाक्षात् पश्यत्स्विति, अत एव विस्मयात् सम्बोधयति। यथा चैद्यवध इति पार्षदत्वेन द्वयोरपि तुल्यत्वात्तस्यैव प्रवेशो गतिश्च सूचिता ॥१०॥ तु-शब्दो भिन्नोपक्रमे, स्य दन्तवक्त्रस्य भ्रातेति यादवो विदूरथो व्यावर्तितः। अतो भ्रातुस्तस्य शोकेन परिप्लुतो व्याप्तः, अत उच्चैः श्वसन्नसिचर्म्मभ्यां सहागतः ॥११॥ च तु, तस्य तु, आपततो वेगेनागच्छत एव, राजेन्द्रेति परमहर्षात् ॥१२॥ एवमुक्तप्रकारेण सौभादीन् हत्वा पुरीं विवेशेति त्रिभिरन्वयः। अन्यैः श्रीकृष्णेतरैः, दुर्विषहान् हन्तुमशक्यान् किंवा असह्यविक्रमानपीत्यर्थः। सुरैर्मानवैश्च ईडितो जयजयेत्यादिना स्तुतः ॥१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२-१५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ततो दन्तवक्त्रशरीरात् सूक्ष्ममणुस्वरूपं (परं) परित्यक्तप्रकृतिसम्बन्धं ज्योतिः स्वप्रकाशं जीवस्वरूपं श्रीकृष्णमाविश्य तावदाविश्य ततस्तत्साधर्म्ययुक्तस्तत्पार्षदतां प्राप्त इत्यर्थः। यथा सर्वभूतानां पश्यतां सतां हे नृप! चैद्यवधे कृते तद्देहादाविशत्तद्वदित्यर्थः। यद्यप्यात्मज्योतिषोऽतिसूक्ष्मत्वात्सर्वभूतैर्द्रष्टुमशक्यमतीन्द्रियं च तथापि स्वस्य परमपुरुषत्वं तयोस्तु शापान्ते स्वस्मिन् प्रवेशं सर्वभूतेभ्यः प्रख्यापयितुमचिन्त्यशक्तिर्भगवान् तथा प्रवेशयामासेति विभावयन्तु ॥१०॥ विदूरथ इति। तस्य दन्तवक्त्रस्य भ्राता विदूरथः भ्रातृविषयकशोकेन परिप्लुतो व्याप्तः उच्छ्वसन् तज्जिघांसया कृष्णं हन्तुमिच्छयाऽसिचर्मभ्यां खड्गखेटाभ्यां युक्त इति शेषः। आगच्छदभ्यपतत् ॥११॥ तस्येति। क्षूरस्येव नेमिर्द्धारा यस्य तेन चक्रेण हे राजेन्द्र! किरीटादिसहितमापततस्तस्य विदूरथस्य शिरो जहार चिच्छिदे इच्यर्थः ॥१२॥ एवमिति। अन्यानपि दुर्विषहान् सोढुमशक्तान् शत्रून् सौभादीन् हत्वा सुरादिभिरीडितः उपगीयमानः विजयो यस्य सः वृष्णिप्रवरैर्यदूत्तमैः परिवृतश्च पुरीं द्वारकां विवेश ॥१३-१५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

दन्तवक्त्रगतासुरः कृष्णं ध्वान्तापरपर्यायं तमोऽविशत् अन्यस्तु द्वारपालः कृष्णम् उत्कृष्टानन्दरूपश्रीहरिम् ॥१०॥

(मूलम्)

भ्रातरन्निहतं दृष्ट्वा दन्तवक्त्रं विदूरथः। मूर्च्छितो भ्रातृशोकेनाप्यसिचर्मसमाददे ॥★॥

सोऽवप्लुत्य रथात्तूर्णं विधुन्वन् खड्गमुत्तमम्। अभिदुद्राव गोविन्दं पद्भ्यामुर्वीं प्रकम्पयन् ॥

तस्य बाणेन चिच्छेद खड्गं यादवनन्दनः। ततो जग्राह निशितां शक्तिं घोरां विदूरथः ॥

तया प्रहर्तुं गोविन्दमभिनिश्चित्य सङ्गरे। क्षणेनाभिससाराज्ञश्चापमुक्तो यथा शरः ॥

असियुक्तं चर्म ॥★॥ ॥११-१२॥

(मूलम्)

एवं निहत्य समरे दन्तवक्त्रविदूरथौ। कालयामास तत्सैन्यं जगृहे वारणादिकम् ।।क।।

भूयः पुष्परथं दिव्यमास्थाय समलङ्कृतम्। सहितः सात्वतगणैरीडितः सुरमानवैः ।।ख।।

श्रीमद्विजयध्वजकृता पदरत्नावली

कालयामास द्रावयामास वारणादिकमित्यत्र गजाश्वरथादिकं गृह्यते ॥क॥

पुरस्थं विवाहयोग्यरथम् ॥ख॥ ॥१३-१५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सूक्ष्मतरं चक्षुराद्यग्राह्यं न तु स्वल्पतमप्रमाणम् । उल्केव भुवि खाच्च्येतेति चैद्यवधोक्तेः । तथापि पश्यतामिति श्रीभगवदिच्छाया एव कारणत्वं सूचितम् । अत्र श्रीकृष्णस्य व्रजागमनं व्रजेन सह वृन्दावन एव च तस्याप्रकटलीलाप्रवेशः श्रीकृष्णसन्दर्भे चतुःसप्तत्यधिकशततमाङ्कस्यावतारिका प्रघट्टकमारभ्यास्ति । अत एव यमुनामनुयान्येवेत्युक्त्वापि श्रीबलदेवस्य पुनर्व्रजगमनं नोक्तं भावित्वादिति ततस्तु पुरानिवृत्तिभावितवानित्यर्थः । विशुद्ध्यसे विमलकीर्तिर्भविष्यसि ॥१०-४०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ॥७-१५॥

गूढार्थदीपिनी

ज्योतिः जीवाख्यम् । चैद्यः चेदिदेशीयः शिशुपालः ॥१०॥ तद्भ्राता दन्तवक्त्रानुजः । तज्जिघांसया कृष्णहननेच्छया । चर्म (ढाल) इति ॥११॥ आपततः तस्य विदूरथस्य शिरः चक्रेण जहार चिच्छेद । कथम्भूतेन । क्षुरस्येव नेमिः धारा यस्य तेन ॥१२॥ एवमिति त्रयम् । एवं शाल्वादीन् हत्वा सुरादिभिः ईडितः मुनिभिः उपगीयमानविजयः तैरेव कुसुमैः अभिवर्षितश्च भगवान् अलङ्कृतां पुरीं विवेशेति त्रयाणामेकान्वयः ॥१३-१५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ॥७-१५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततस्तस्य सायुज्यं जातमित्याह-ततः सूक्ष्मतरं ज्योतिरिति । आत्मज्योतिः कृष्णं भगवच्चरणारविन्दम् अत्र सर्वे साक्षिण इत्याह-पश्यतामिति । यथा चैद्यवध इति चैद्यवधे तत्तेजः दशदिशो भासयन् भगवन्तं प्रविवेश एवमयमपीत्यर्थः ॥१०॥ तस्य सायुज्यं दृष्ट्वा तद्भ्राता विदूरथोऽपि तथापि तथा कर्तुं प्रवृत्त इत्याह-विदूरथस्त्विति । अक्षरच्युतकालङ्कारः । विदूरथ इति विकटो भवति । दूरादेव रथ इति तद्भ्राता दन्तवक्त्रभ्राता भ्रातृशोकेन परितः प्लुतः मग्नः सन् असिचर्मभ्यामुच्छ्वसन्नागतः अनेन सर्प इव तस्य क्रोधो निरूपितः । तज्जिघांसयेति आगमनाभिप्रायः भ्रान्तोऽपि प्रवर्तकः ॥११॥ ततःप्रभृत्यसम्बन्धीति आगत एव प्रहारात् पूर्वमेव चक्रेण शिरो जहार क्षुरनेमिनेति । स्वालौकिकसामर्थ्याभावः जहार दूरीकृतवान् सकुण्डलं सकिरीटमिति देवाधिष्ठानं तेन भक्तियोग्यता निरूपिता ॥१२॥ मारितवान् सात्त्विकराजसतामसान् उपसंहरति-एवं सौभमिति । चकारस्तत्सेनापरिग्रहार्थमिति शाल्वे चकारः तन्मायादेवतावरनाशार्थः दन्तवक्त्रो विदूरथसहितः दुर्विषहैरन्यैः शूरैः सह तेऽपि मारिता इति हत्वा स्थितः ईडित इति क्रियाध्याहारोऽपि अर्थाद्भवति । शूरैर्मानवैश्च दुर्विषहान्यैरिति यादववाचकत्वं वा ॥१३॥

श्रीसुबोधिनीसारः

ततोऽनन्तरं सूक्ष्मतरं ज्योतिस्तेजोऽद्भुतं सर्वभूतानां पश्यतां सतां कृष्णं समाविशत् । चैद्यस्य शिशुपालस्य वधे यथा हे नृप ॥१०॥ तस्य भ्राता विदूरथस्तु भ्रातुः शोकेन परिप्लुतो व्याप्तः । असिचर्मभ्यां सह उच्छ्वसन् श्वासं मुञ्चन् तस्य कृष्णस्य हन्तुमिच्छया गच्छत् ॥११॥ आपततः तस्य विदूरथस्य तीक्ष्णधारेण चक्रेण समुकुटं सकुण्डलं शिरो जहार हे राजन् ॥१२॥ पूतनामादितः कृत्वाऽवसाने च विदूरथम् । कङ्कणेनेव मार्जारी कृष्णस्तूपशमं गतः ॥क॥ एवं सौभं विमानं शाल्वं दन्तवक्त्रं सविदूरथं हत्वान्यैर्दुर्विषहान् सोढुमशक्यान् एतान् वधित्वा देवमनुष्यैः ईडितः स्तुतः ॥१३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे नृप ! सर्वभूतानां पश्यतामेव अद्भुतम् अदृष्टपूर्वत्वात् आश्चर्यकरं सूक्ष्मतरं ज्योतिः जीवाख्यं तेजः ततो दन्तवक्त्रशरीरात् निःसृत्य कृष्णमाविशत् । तत्र दृष्टान्तमाह-यथेति । यथा चैद्यवधे कृते सति तद्देहाज्ज्योतिः निःसृत्य कृष्णमाविशत्तथेत्यर्थः । अत्र यद्यप्यात्मज्योतिषोऽतिसूक्ष्मत्वेन अतीन्द्रियत्वात् सर्वजनैस्तद्द्रष्टुमशक्यम्, तथापि स्वस्य परमपुरुषत्वं तयोः स्वप्रवेशेन संसारविमुक्तिं च सर्वभूतेभ्यः प्रख्यापयितुं अचिन्त्यशक्तिर्भगवान् एवैवं दर्शयामासेति ज्ञेयम् ॥१०॥ ततश्च तस्य दन्तवक्त्रस्य भ्राता भ्रातृविषयकशोकेन परिप्लुतो व्याप्तोऽतस्तस्य कृष्णस्य जिघांसया असिचर्मभ्यां खड्गखेटाभ्यां युक्तो विदूरथ उच्छ्वसन्नागच्छदित्यन्वयः ॥११॥ हे राजेन्द्र ! आपततस्तस्य विदूरथस्य किरीटादिसहितं शिरः क्षुरस्येव नेमिर्धारा यस्य तेन चक्रेण कृष्णो जहार चिच्छेद ॥१२॥ अन्यैर्दुर्विषहान् सोढुमशक्यानपि शाल्वादीन् एवमनायासेनैव हत्वा सुरादिभिरीडितः उपगीयमानविजयः कुसुमैरभिवर्षितः आच्छादितः वृष्णिप्रवरैर्वृतश्च श्रीकृष्णः अलंकृतां पुरीं द्वारकां विवेशेति त्रयाणामन्वयः ॥१३-१४-१५॥

अन्वितार्थप्रकाशिका

तत इति । हे नृप ! सर्वभूतानां पश्यतामेव अद्भुतम् अदृष्टपूर्वत्वात् आश्चर्यकरं सूक्ष्मतरं ज्योतिः जीवाख्यं तेजः ततो दन्तवक्त्रशरीरात् निःसृत्य कृष्णमाविशत् । यथेति । यथा चैद्यवधे कृते सति तद्देहाज्ज्योतिः निःसृत्य कृष्णमाविशत्तथेत्यर्थः । यद्यप्यात्मज्योतिः अतिसूक्ष्मत्वात् द्रष्टुमशक्यं तथापि लोकविश्वासार्थं भगवानचिन्त्यशक्तिस्तथाऽदर्शयत् ॥१०॥ विदूरथ इति । ततश्च तस्य दन्तवक्त्रस्य भ्राता विदूरथः भ्रातृविषयकशोकेन परिप्लुतो व्याप्तोऽतस्तस्य कृष्णस्य जिघांसया वस्तुतः प्रासीच्छ्य असिचर्मभ्यां खड्गखेटाभ्यां युक्त उच्छ्वसन्नागच्छत् ॥११॥ तस्येति । हे राजेन्द्र ! आपततस्तस्य विदूरथस्य किरीटादिसहितं शिरः क्षुरस्येव नेमिर्धारा यस्य तेन चक्रेण कृष्णो जहार चिच्छेद ॥१२॥ एवमिति त्रयम् । अन्यैर्दुर्विषहान् सोढुमशक्यानपि शाल्वादीन् एवमनायासेनैव हत्वा सुरादिभिरीडितः उपगीयमानविजयः कुसुमैरभिवर्षितः आच्छादितः वृष्णिप्रवरैः शाल्वयुद्धार्थमागतैः प्रद्युम्नादिभिस्तद्वधोत्तरमागतैरुग्रसेनाद्यैश्च वृतः श्रीकृष्णः अलंकृतां पुरीं द्वारकां विवेश ॥१३-१५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्य दन्तवक्त्रस्य भ्राता ॥११-१२-१३-१४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति । ततः दन्तवक्त्रशरीरात् निःसृतमिति शेषः । अद्भुतमाश्चर्यरूपं सूक्ष्मतरमणुस्वरूपं ज्योतिः परित्यक्तप्रकृतिसम्ब तज्जीवरूपं महः हे नृप ! चैद्यवधे यथा तथा सर्वभूतानां पश्यतां सतां कृष्णम् आविशत् । यद्यपि ‘सूक्ष्माणामप्यहं जी इत्युक्तेरात्मज्योतिषोऽपि सूक्ष्मत्वादतीन्द्रियत्वाच्च तत् सर्वभूतैर्द्रष्टुमशक्यं तथापि स्वस्य परमपुरुषत्वं तयोस्तु शापान्ते स्वस्मि प्रवेशं च सर्वभूतेभ्यः सत्यापयितुं (सत्यं विधापयितुम्-उ-३) चाचिन्त्यशक्तिर्भगवान् तथा प्रवेशयामासेति भावयन्तु ॥ विदूरथ इति । तद्भ्राता दन्तवक्त्रस्य भ्राता विदूरथस्तु भ्रातृशोकपरिप्लुतः भ्रातृविषयकशोकेन व्याप्तः उच्छ्वसन् सन् तज्जिघां श्रीकृष्णं हन्तुमिच्छया असिचर्मभ्यां खड्गखेटाभ्यां युक्त इति शेषः । आगच्छदभ्यापतत् ॥११॥ तस्येति । कृष्णः आपततोऽभ्याग तस्य च विदूरथस्यापि हे राजेन्द्र ! सकिरीटं सकुण्डलं शिरः क्षुरस्येव नेमिर्धारा यस्य तेन चक्रेण जहार चिच्छेद । धर्मरा सम्पाद्य राजसूयक्रतूत्सवम् । हत्वा शाल्वादिकान् कृष्णो नृघातात् समुपारमत् ॥१२॥ एवमिति । एवमुक्तप्रकारेण सौभं शाल्वं सहानुजं भ्रातृसहितं दन्तवक्त्रं च इत्येतान् अन्यैः दुर्विषहान् सोढुमशक्यान् हत्वा सुरमानवैः ईडितः संस्तुतः ॥१३॥

कृष्णप्रिया

हे नृप परीक्षित ! शीशुपालकी मृत्यु के समय जैसा हुआ था कि सब प्राणीयोंके सन्मुख ही दन्त मृतदेहसे एक अतिशय सूक्ष्म तेज निकला और वह तेज अत्यन्त विलक्षण प्रकारसे भगवान श्रीकृष्णमें समा ॥१०॥ दंतवक्त्रके भाइका विदूरथ नाम था वह अपने भाइकी मौत से अत्यन्त शोकातुर हो गया । अब वह से लम्बे लम्बे श्वास लेता हुआ एक हाथमें ढाल और दुसरे हाथमें खडग लेकर द्वारिकाधीश भगवान को

कृष्णप्रिया

की इच्छा से आया ।।११।। हे राजेन्द्र ! जब भगवान श्रीकृष्णचन्द्रजे ने देखा कि विदूरथ प्रहार करना ही चाहता है तब भगवान कृष्ण ने अपने क्षुरके समान तीक्ष्ण धारवाले सुदर्शन चक्र से मुकुट और कुण्डल के साथ विदूरथ का सिरको धड से अलग कर दिया ।।१२।। इस प्रकार शाल्व और शाल्व के सौभ विमान दंतवक्त्र एवं विदूरथ को जिन्हें मारना औरों के लिये अशक्य था उनका विनाश कर भगवान कृष्णने श्रीद्वारिकानगरीमें प्रवेश किया । नगर प्रवेश के अवसर पर देवलोग और मानववृन्द भगवान की स्तुति कर रहे थे । समर्थ ऋषिमुनि सिद्ध गन्धर्व विद्याधर और वासुकी आदि महानाग अप्सरावृन्द पितृगण यक्ष किन्नर और चारण पुष्पोंकी वृष्टि करते थे ।।१३-१४।।

मुनिभिः सिद्धगन्धर्वैर्विद्याधरमहोरगैः । अप्सरोभिः पितृगणैर्यक्षैः किन्नरचारणैः ।।१४।।
[1]उपगीयमानविजयः कुसुमैरभिवर्षितः । वृतश्च वृष्णिप्रवरैर्विवेशालंकृतां पुरीम् ।।१५।।
एवं योगेश्वरः कृष्णो भगवान् जगदीश्वरः । ईयते पशुदृष्टीनां निर्जितो जयतीति सः ।।१६।।
[2]श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पाण्डवैः । तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल ।।१७।।

---

[1] उद्गीयमान-वीर. । २. इदमर्ध नास्ति-विज. ।

राजोवाच-

स भाजयित्वा बहुधा श्रुतदेवं श्रियः पतिः । आगतो द्वारकां भूयः कि चकार महामुने ।।१।।

श्रीशुक उवाच -

उपप्लाव्यं गतान्पार्थान्गोग्रहे जितकौरवान् । शुश्राव तीर्णसमयान्बलेन महाता वृतान् ।।२।।
संप्रहृष्टमनाः कृष्णो महत्या सेनया वृतः । सात्यकि कृतवर्माणमुद्धवं शठसारणौ ।।३।।
अभिमन्युं च सौभद्रं पुरस्कृत्य महामतिः। अक्षौहिण्या पृतनया सहितः सत्यसङ्गरः ।।४।।
शङ्खदुन्दुभिनिर्धोषैर्द्रष्टुं प्रायाद्यु धिष्ठिरम् । सन्धिमिच्छन्कौरवाणां कुर्वाणां दौत्यमत्युतम् ।।५।।
मूढो ग्रहीतुमारेभे विनशिष्णुः सुयोधनः। स तत्रानन्तरुपत्वं दर्शयित्वा महाभुजः ।।६।।
कृत्वा विभीषिकां धोरां पाण्डवान्पुनराययौ । विवृद्धमत्सराः सर्वे राजानो जातमन्यवः ।।७।।
युद्धायैवानुयुज्यन्ते न सन्धिमनुकाङ्क्षणः । युधिष्ठिरस्तु धर्मात्मा पुरस्कृत्य जनार्दनम् ।।८।।
कुरुक्षेत्रं ययौ राजन्युद्धाय भ्रातृभिः सह । अक्षौहिण्या विराटोपि मत्स्यराजो महामनाः ।।९।।
युधिष्ठिरमनुप्रायात्सपुत्रः कुरुसत्तमः। द्रुपदश्च शिखण्डी च धृष्टद्युम्नश्च दुर्जयः ।।१०।।
अक्षौहिणीभिस्तिसृभिरनुजग्मुर्युधिष्ठिरम् । अक्षौहिण्या परिवृतः सात्यकिर्युद्धलालस. ।।११।।
नियोगाद्वासुदेवस्य प्रायादनु युधिष्ठिम् । अक्षौहिण्या परिवृताः कैकयाः पश्च भूभृतः ।।१२।।
अनुजग्मुर्धर्मपुत्रं राजानं मातृसोदराः । धृष्टकेतुस्तदा राजा शैब्यश्च नरपुङ्गवः ।।१३।।
अन्वयातां नृपश्रेष्ठावक्षौहिण्या युधिष्ठिरम् । ते गत्वा पाण्डवाः सर्वे नारायणपुरोगमाः ।।१४।।
स्वैरमूषुः कुरुक्षेत्रे प्रतीक्षन्तः सुयोधनम् । सुयोधनोऽपि कौरव्य मानी भ्रातृशतैर्वृतः ।।१५।।
द्रोणभीष्मकृपद्रौणिकर्णबाह्लीकसौबलेः । हार्दीकसाल्वमद्रेशभगदत्तजयद्रथैः ।।१६।।
अन्यैश्च राजशार्दूलैर्नानादेशसमुद्भवैः । शङ्खदुन्दुभिनिर्धोषैर्भेरीपटहनिःस्वनैः ।।१७।।
पूरयन्ककुभो वीरः प्रययौ कंपयन्महीम् । ते समेत्य कुरुक्षेत्रे राजानः कुरुपाण्डवाः ।।१८।।
स्यमन्तश्चके चक्रुर्व्यूहमुद्यति भास्करे । अक्षौहिण्यः कौरवाणामेकादश दुरात्मनाम् ।।१९।।
सप्त पाण्डुसुतानां च कर्शितानां वने भृशम् । तथा व्यूहेष्वनीकेषु तावकेष्वितरेषु च ।।२०।।
गाण्डीवधन्वी कवची बद्धतूणतलत्रवान् । आरूढ स्यन्दनः पार्थो ददर्श रिपुवाहिनीम् ।।२१।।
उपाध्यायान्पितॄन्मातुलान्स्वस्त्रियान्सुतान् । शिष्यान्सपौत्रान्दौहित्राञ्शालान्संबंधिबान्धवान् । दृष्ट्वा निर्वेदमापन्नो हन्तुं नैवाकरोन्मनः।।२२।।
तं विपण्णमनश्चत्तं कृपालुमविधातिनम् । प्रबध्य प्रेरयामास केशवो योगमायया ।।२३।।
त्यक्तशस्त्राय शान्ताय बन्धून्प्रति कृपालवे । दर्शयामास पार्थय विश्वरूपं जनार्दनः ।।२४।।

कर्दमक्षमा

मुनिभिः, सिद्धगन्धर्वैः, विद्याधरमहोरगैः, अप्सरोभिः, पितृगणैः, यक्षैः, किन्नरचारणैः, उपगीयमानविजयः, कुसुमै अभिवर्षितः, च, वृष्णिप्रवरैः, वृतः, अलङ्कृताम्, पुरीम्, विवेश ॥१४-१५॥ एवम्, जगदीश्वरः, योगेश्वरः, भगवान्, कृष्ण पशुदृष्टीनाम्, निर्जितः, नीयते, इती, सः, जयति ॥१६॥ पाण्डवैः, सः, कुरूणाम्, युद्धोद्यमम्, श्रुत्वा, मध्यस्थः, राम तीर्थाभिषेकव्याजेन, किल, प्रययौ ॥१७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

॥७-१५॥

एवं श्रीकृष्णो महाबलानपि लीलया जयत्येवेति कृत्वा स कदाचिज्जरासन्धादिभिर्निर्जित इति पशुदृष्टीनामीयते नित्यज हेतवः योगेश्वरो भगवान् जगदीश्वर इति ॥१६॥ विदूरथान्तमामथ्य पूतनादिदनोः कुलम्। कृष्णस्तूपारमन्नाराद्रामोऽहन्सूतबल्व ॥तत्प्रसङ्गमाह-श्रुत्वेति ॥१७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

महाबलानतिबलान्। स कृष्णः। पशुदृष्टीनां तन्माहात्म्यमविदुषाम्। **योगेश्वरः** अचिन्त्यवैभवः। अत्र हेतुर्भगवानिति तत्रापि हेतुर्जगदीश्वरः सर्वेश्वर इति ॥१६॥ आमथ्य विनाश्य। पूतनादिर्यस्य तत्। दनोर्दैत्यस्य मारणं मारो दैत्यनाशनं तस्मा कथान्तरमाह-श्रुत्वेति। मध्यस्थ उदासीनः सन् ॥१७-१८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्थं सर्वविजयमुक्त्वा लोकरीत्या कदाचित् पराजयोऽपि जात इति सम्भावयतो निन्दति - एवमिति। इतीति ज सति कदाचित् पराजयोऽपि स्यादिति विचिन्त्येत्यर्थः। तच्चान्येष्वेव सम्भवेत् न तु भगवतीत्याह-पशुदृष्टीनां निर्बुद्धीना ईयते तैरेव प्रतीयते न त्वन्यैरिति पराजयस्तु कल्पनयैवेत्यर्थः। यतो योगस्य अचिन्त्यशक्तेरीश्वरः स्वामी तत्र लिङ्गं भगव सर्वैश्वर्यादिभिर्युक्त इति तत्र च लिङ्गं जगतः सर्वस्यैवेश्वर इति ॥१६॥ **मध्यस्थः** उभयपक्षाग्राही सन् श्रीकृष्णार्थ लीलाकौतुकसमीहितं खल्विदं प्रययौ श्रीद्वारकातः प्रतस्थे ॥१७॥

संबोधितः कंसभिदा तथा वासवतन्दनः। भूयो जग्राह कोदण्डं युद्धायाच्युतसारथिः ॥२५॥
प्रारब्धं भारतं युद्धं श्रुत्वा सङ्कर्षणोबली। अशक्नुवन्वारयितुं किं करोमीत्यचिन्तयत् ॥२६॥
प्रवृतं भारतं युद्धमवेक्ष्योद्वेगविह्वलः। तीर्थव्याजेन तत्याज रामः परिचितां भुवम् ॥२७॥
सेनापतिः पाण्डवानां धष्टद्युम्नो महारथः। गाङ्गेयो धार्तरष्ट्राणां वृद्धः कुरुपितामहः स कुर्वन्नाहवं धोर निहतो दशमेऽहनि ॥२८॥
भारद्वाजं ततो द्रोणं सैनापत्ये सुयोधनः। न्ययोजयत्स युयुधे दिवसान्पञ्चभूपते ॥२९॥
तस्मिन्युद्धयति दुर्धर्षे सैन्धवेन दुरात्मना। अभिमन्युस्तव पिता निहतो रणमूर्धनि ॥३०॥
पुत्रशोकाभिसंतप्तः प्रतिजज्ञे धनञ्जयः। जयद्रथं हनिष्यामि श्वोभूत इति भारत ॥३१॥
तस्यां निशायां गोविन्दस्त्वारुह्य गरुडं हरिः। सुप्तमर्जुनमादाय कैलासमभिजग्मिवान् ॥३२॥
तत्र गत्वा विरुपाक्षं दृष्ट्वा संभाष्य वाञ्छितम्। साधयित्वाऽर्जु नस्याशु स्वायोधनमुपाययौ ॥३३॥
ततोऽपरदिने युद्धमासीद्धोरं जनक्षयः। मम्रुर्महीभुजस्तत्र बहवो बाहुशालिनः ॥३४॥
हतेषु. रणदक्षेषु राजपुत्रेष्वनेकशः। जयद्रथोऽपि पार्थेन निहतो दिवसात्यये ॥३५॥
दिनानि पञ्च द्रोणोऽपि कृत्वा युद्धमतन्द्रितः। पञ्चमेऽहनि सन्ध्यायां धृष्टद्यम्नेन पातितः ॥३६॥
ततः सेनापतिः कर्णो भूखा चक्र महारणम। दिनद्वयान्ते पार्थेन स च सङ्ख्ये निपातितः ॥३७॥
शल्योऽप्यर्धदिनं कृत्वा सैनापत्यमरिन्दमः। मध्यंदिनगते सूर्ये धर्मराजेन पातितः ॥३८॥
युयुधाते ततो वीरो गदया दोर्धवैरिणौ। भीमदुर्योधनौ कोपात्परस्परवधैषिणौ ॥३९॥
अष्यदशाक्षौहिणीनां तत्पतीनां च भूभृताम्। अष्यदशैर्दिनैरासीदर्धोनैः संक्षयो महान् ॥४०॥ (इतः परं राजोवाचेत्यादि ६ श्लोकाः विज.टीकायां स

विजयध्वजीयपाठे पञ्चनवतितमोऽध्यायः ॥९५॥

मुन्यादिभि
तैरेव सर्वैः कुसुमैरभि
श्रीबलदेववसुदेवोग्रसे
१५॥ इत्थं विजयमुक्त
पराजयोऽपि सम्भवेदि

त्वन्यैरिति प
तत्रापि हेतुः-जगदीश्वर
कृष्णसंज्ञयावतीर्ण इति
इति पाद्मोत्तरखण्डोक्ता

कालिन्द्याः पु

रम्यकेलिसुखे

यच्च तत्र गद्यम
विमानमारूढाः परमं वै
अनन्तरं ज्ञेयम्। तत्र तेषां
तं तं वक्तुं तत्प्रसङ्गमारभ
तस्यां श्रीरामस्यापि गमन
रतिरक्षार्थमिति भावः। 3

निर्जितो जयती

इत्थं सर्वत्र सर्व
कृत्स्नस्येश्वरः प्रशासिता च 3
पशुदृष्टीनां मूढानाम् ईयते प्र
अनुवर्णयति-श्रुत्वेत्यादिना
बान्धवताविशेषादुभयमध्यस

पशुदृष्टीनाम् अज्ञजनबुद्धी

(मूलम्)

तस्य कर्माण्युदारा

एवमारभ्य राक्षस्य

ब्रह्माद्यन्यतमेनापि

स्कन्धमारभ्य यद्दैत

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मुन्यादिभिरुपगीयमानः, सौभादिवधेन विजयो यस्य सः, एषां यथापूर्वं श्रैष्ठ्यम् । तत्र पितृगणेभ्योऽप्यप्सरसां गानापेक्षया, तैरेव सर्वैः कुसुमैरभितो वर्षितः, वृष्ट्येव व्याप्त इत्यर्थः । वृष्णिप्रवरैः प्राग्युद्धार्थं निर्गतैः श्रीप्रद्युम्नादिभिस्तत्तद्वधानन्तरमभ्यागतैश्च । श्रीबलदेववसुदेवोग्रसेनादिभिर्वृतः, अलंकृतां स्वभावत एव, किंवा महादुष्टवर्गविजयोत्सवेन विशेषतो भूषितामित्यर्थः ॥१४-१५॥ इत्थं विजयमुक्त्वा लोकरीत्या कदाचित् कथञ्चित् पराजयमपि सम्भाव्य तं परिहरति–एवमिति । इतीति जये सति कदाचित् पराजयोऽपि सम्भवेदिति कृत्वेत्यर्थः । तच्चान्येष्वेव सम्भवेत्, न तु भगवतीत्याह–पशुदृष्टीनां निर्बुद्धीनामेव ईयते, तैरेव प्रतीयते, न

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

त्वन्यैरिति पराजयो मिथ्येवेत्यर्थः । यतो योगस्याचिन्त्यशक्तेरीश्वरः स्वामी, तत्र हेतुः-भगवान्, सर्वैश्वर्य्यादियुक्त इति । तत्रापि हेतुः-जगदीश्वर इति । एवं सर्वोत्कृष्टत्वात् सर्वचित्ताकर्षकमाहात्म्यविशेषाद्वा, कृष्णः, यद्वा, तत्रापि निजाशेषभगवत्ताप्रकटनार्थं कृष्णसंज्ञयावतीर्ण इति । एवं निर्ज्जिताशेषशत्रुर्युद्धादुपरतो गोकुले गत्वा मासद्वयं सत्यप्रतिज्ञो दीनवत्सलो रसिकशेखरोऽसौ रेम इति पाद्मोत्तरखण्डोक्तानुसारेण ज्ञेयम्; तथा च तत्र —

कालिन्द्याः पुलिने रम्ये पुण्यवृक्षसमाचिते । गोपनारीभिरनिशं क्रीडयामास केशवः ॥

रम्यकेलिसुखेनैव गोपवेषधरः प्रभुः । बहुप्रेमरसेनात्र मासद्वयमुवास ह ॥ इत्यादि ॥

यच्च तत्र गद्यम् – "अथ तत्रस्था नन्दगोपादयः सर्वे जनाः पुत्रदारसहिताः पशुपक्षिमृगादयश्च वासुदेवप्रसादेन दिव्यरूपधरा विमानमारूढाः परमं वैकुण्ठं लोकमवापुः" इति; तत्तु राजसूयात् पश्चात् श्रीयुधिष्ठिरदुर्योधनद्यूताच्च प्राग्वृत्तायाः कुरुक्षेत्रयात्रायाः अनन्तरं ज्ञेयम् । तत्र तेषां सर्वेषामेव समागमस्य वक्ष्यमाणत्वात् ॥१६॥ श्रीकृष्णस्य विक्रमं युद्धादुपरामं चोद्दिश्य श्रीबलदेवस्यापि तं तं वक्तुं तत्प्रसङ्गमारभते–श्रुत्वेत्यादिना यावन्निरन्तराध्यायसमाप्तिः । एतच्च वक्ष्यमाणायाः कुरुक्षेत्रयात्रायाः पश्चादेव बोद्धव्यम्, तस्यां श्रीरामस्यापि गमनात्, तच्च सर्वमग्रे तत्रैव व्यक्तं भावि । सर्वानेव रमयतीति राम इति कुरूणां पाण्डवानां च स्वस्मिन् तितिक्षार्थमिति भावः । अतो मध्यस्थ उभयेष्वपि पक्षपातरहितः सन्नित्यर्थः ॥१७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

निर्जितो जयतीति भ्रान्तिः अजित एव जयतीत्यर्थः ॥१६॥ ॥१७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थं सर्वत्र सर्वदा विजयिनो भगवतः क्वचित्पराजयं वदन्तो मूढा इत्याह–एवमिति । भगवान् षाड्गुण्यपूर्णः जगतः कृत्स्नस्येश्वरः प्रशासिता च अनेन पराजयसम्भावना दूरत एवापास्तेति सूचितम् निर्जितः जरासन्धादिभिरिति शेषः । क्वचिच्च जयतीत्येवं पशुदृष्टीनां मूढानाम् ईयते प्रतीयते निर्जितो जयति इति भ्रान्तिरजित एव जयतीत्यर्थः ॥१६॥ अथ पुनः कानिचिद्बलभद्रचेष्टितानि अनुवर्णयति-श्रुत्वेत्यादिना यावदेकोनाशीतितमाध्यायसमाप्ति कुरूणां पाण्डवैः सह युद्धोद्यमं युद्धाय यत्नं श्रुत्वा मध्यस्थः उभयेषामपि बन्धुताविशेषादुभयमध्यस्थस्तटस्थ इति यावत् हेतुगर्भमिदम् अतः पुण्यतीर्थस्नानयात्राव्याजेन प्रययौ ॥१७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

पशुदृष्टीनाम् अज्ञजनबुद्धीनां पक्षे जयतीति ईयते ज्ञायते ॥१६॥

(मूलम्)

तस्य कर्माण्युदाराणि पुण्यश्लोकस्य भारत । शक्यन्ते कथितुं नैव वर्षाणामयुतैरपि ॥★॥

एवमारभ्य राक्षस्याः पूतनायाः परन्तप । भूभारभूतानसुरान् जघानमधुसूदनः ॥०॥

ब्रह्माद्यन्यतमेनापि तत्कर्मसमाप्तिं कर्तुं न शक्यते किं पुनर्मयेति भावेनाह तस्येति ॥★॥

स्कन्धमारभ्य यद्वैत्यहननं तदादितः उपसंहरति एवमिति ॥०॥

(श्रीविजयध्वजरीत्या एकाधिकशततमोऽध्यायः ॥१०१॥)

श्रीमद्विजयध्वजकृता पदरत्नावली

(मूलम्)

राजोवाच ।

अष्टादशाक्षौहिणीनां तावद्भिर्माययादिनैः । व्यापादनं येन कृतं तस्मै विश्वात्मने नमः ।।क।।

श्रृण्वतो मे कथास्तस्य चरितानि च सङ्घशः । वैक्लव्यं विस्मयो भीतिर्वर्धते मे पुनः पुनः ।।ख।।

मन्ये प्रायेण पाप्मानं जीर्णं मम दुरत्ययम् । इन्द्रियाणि प्रबुद्धानि प्रसन्नं च मनो भृशम् ।।ग।।

क्षुत्तृष्णे च प्रशान्ते मे आत्मा चानन्दनिर्भरः । प्रसादात्तव धर्मज्ञ कृतार्थोऽहमिहाभवम् ।।घ।।

अपि च श्रोतुमिच्छामि किञ्चिदर्थं तपोधन । युध्यतः सुहृदो दृष्ट्वा निवारितुमशक्नुवन् ।।

तीर्थं स्नातुं गतो रामः किं चकार तपोधन ।।ङ।।

सितकेशावेशिनो बलभद्रस्य चरितं कृष्णमाहात्म्यानुस्यूतमेवातस्तदपि पुरुषार्थोपयोगि भवतीत्यनेनाध्यायद्वयेन निरूपय तत्रादौ श्रुतकृष्णवैभवो विस्मितमनाः राजा भगवन्तं नमति–अष्टादशेति । मायया महिम्नाव्यापादनं निधनं विश्वात्मने सर्वान्तर्यामि ।।क।। हरिकथाश्रवणस्य प्रत्यक्षफलमाह–श्रृण्वत इति । वैक्लव्यं पारवश्यं कथाश्रवणतात्पर्यं विस्मयः स्मयभावः भीतिः विहिताका प्रत्यवायबुद्धिः ।।ख।। प्रबुद्धानि प्रफुल्लानि स्वविषय इति शेषः ।।ग।। आत्माभोगायतनम् आनन्दनिर्भरः पूर्णानन्दः ।। कृतार्थश्चेत्तूष्णीम्भवेति तत्राह–अपि चेति । किञ्चिदित्यव्ययं शब्दतोऽल्पमर्थतो महान्तमित्यतो वा व्यत्ययः ।।ङ।। ।।१७।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।।१०-४०।।

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।।१-२२।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ।।१...४०।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पशुदृष्टयो बहिर्मुखाः दुर्योधनादयस्तु तदपि न चमत्कारं प्राप्नुवन्तीत्याह–पशुदृष्टीनां पशुदृष्टिभिस्तु जनैरयं मथुरात्याजनपू जरासन्धादिनिर्जित एव द्वित्रान् वीरान् जयतीति ईयते प्रतीयते अत्र दन्तवक्त्रवधप्रसङ्गे पाद्मोत्तरखण्डे विशेषो दृश्यते तथा तदीयगद्यानि "अथ शिशुपालं निहतं श्रुत्वा दन्तवक्त्रः कृष्णेन सह योद्धुं मथुरामाजगाम । कृष्णस्तु तच्छ्रुत्वा रथमारुह्य मथुराम तयोर्दन्तवक्त्रवासुदेवयोरहोरात्रं मथुराद्वारि सङ्ग्रामः समवर्तत । कृष्णस्तु गदया तं जघान स तु चूर्णितसर्वाङ्गो वज्रनिर्भिन्नो मह इव गतासुरवनितले निपपात सोऽपि हरेः सारूप्येण योगिगम्यं नित्यानन्दसुखदं परमं पदमवाप इत्थं जयविजयौ सनकादिशाप केवलं भगवतो लीलार्थं संसृतावववतीर्य्य जन्मत्रयेऽपि तेनैव निहतौ जन्मत्रयावसाने मुक्तिमवाप्तौ" इति कृष्णस्तु तत् श्रु मनोजवस्य नारदस्यैव मुखात् अत एव साल्ववधानन्तरं द्वारकामप्रविश्यैव मनोजवेन रथेन तत्क्षण एव मथुरान्तिके तं दृ एवाद्यापि मथुराया द्वारकादिग्द्वारि दन्तवक्त्रहेति संस्कृतानुगलोकभाषया दतिहा इति नाम्नाख्या वज्रेण वासितो ग्रामो वर्त पाद्मे तदनन्तरमपि गद्यं च यथा "कृष्णोऽपि तं हत्वा यमुनामुत्तीर्य्य नन्दव्रजं गत्वा सोत्कण्ठौ पितरावभिवाद्याश्वास्य साश्रुसेकमालिङ्गितः सकलगोपवृद्धान् प्रणम्य बहुवस्त्राभरणादिभिस्तत्रस्थान् सन्तर्पयामास–

कालिन्द्याः पुलिने रम्ये पुण्यवृक्षसमाचिते । गोपनारीभिरनिशं क्रीडयामास केशवः ।।

रम्यकेलिसुखेनैव गोपवेषधरः प्रभुः । बहुप्रेमरसेनात्र मासद्वयमुवास ह ।।

अथ तत्रस्था नन्दगोपादयः सर्वे जनाः पुत्रदारादिसहिताः वासुदेवप्रसादेन दिव्यरूपधराः विमानमारुह्य वैकुण्ठलोकमवापुः कृष्णस्तु नन्दगोपव्रजौकसां सर्वेषां निरामयं स्वपदं दत्त्वा दिवि देवगणैः संस्तूयमानो द्वारवतीं विवे अत्र भागवतामृते कारिकाभिरेव व्याख्या यथा–

यदुत्तीर्य्यै

व्रजेशादेरं

प्रेष्ठेभ्योऽपि

अत्र नन्दगो
सर्वे जना इति व्रजम
गोकुल इव नरलीलत
व्रजस्थानाम् एतच्च
वाऽथ सुहृद्दिदृक्षय
तत्रात्ममातापित्रादिगुरु
दन्तवक्त्रमायान्तं श्रुत्व
अयमवसरो व्रजस्थब
निर्वाप्य कंसवधान्ते
प्रापञ्चिकलोकचक्षुर्भ्या
गोलोकं जगाम अन्येन
जगाम शौरसेनिकलोका
गता इत्यजानन्तो महावि
यदून् कथं मौशललील
विमृश्य श्रीशुकदेवः पा
इति पदार्थस्य विवेशेति
व्रजस्थलीलोपसंहारः प्रक
प्रथमं सूर्योपरागयात्रा ततो
।।१६।। "विदूरथान्तानसतं
युधिष्ठिरोऽपि उभयोरपि नि

जयतीति इतिशब
ईयते प्रतीयते जरासन्धादि

योगेश्वरे युज्यते
स्वाभाविकषड्गुणनिधिः
शिशुपालदन्तवक्त्रादीनामन्य
भीमादिद्वारा जयत्येव जरास

तथा मुनिप्रभृतिभिर
युद्धलीलाभिनिवेशो भवत्वि
निरूपितम् ।।१५।। त्रिगुणां भग
कृष्णत्वाद्भूभारो हृतो इत्यपरं

यदुत्तीर्य्येत्युत्तरणं तदाप्लवनमुच्यते । दुष्टं हित्वा व्रजे यानं स्नानपूर्वमिहोचितम् ॥
व्रजेशादेरंशभूता ये द्रोणाद्या अवातरन् । कृष्णस्तानेव वैकुण्ठे प्राहिणोदिति साम्प्रतम् ॥
प्रेष्ठेभ्योऽपि प्रियतमैर्जनैर्गोकुलवासिभिः । वृन्दारण्ये सदैवासौ विहारं कुरुते हरिः ॥ इति ।

अत्र नन्दगोपादयः पुत्रदारसहिता इति नन्दगोपादीनां पुत्राः कृष्णश्रीदामसुबलादय एव दाराश्च यशोदा कीर्तिदादय एव सर्वे जना इति व्रजमण्डलस्थाः सर्वे एवेत्यतः परमं वैकुण्ठं गोलोकमेव ययुः दिव्यरूपधरा इति गोलोके देवलीलत्वमेव न तु गोकुल इव नरलीलत्वं तेषामिति विशेषो ज्ञेयः तस्माद्रामावतारेऽयोध्यावासिनां सशरीराणामेव यथा वैकुण्ठप्रापणं तथैवात्रावतारेऽपि व्रजस्थानाम् एतच्च द्वारकातः कृष्णस्य व्रजागमनं श्रीभागवतसम्मतमिति मन्यते "यर्ह्यम्बुजाक्षापससार भो भवान् कुरून् मधून् वाऽथ सुहृद्दिदृक्षया ।' इति प्रथमस्कन्धोक्तेः सुहृद्दिदृक्षा कृष्णस्य बलदेवव्रजागमनसमयत एवासीत् किन्तु तत्रात्ममातापित्रादिगुरुजनासम्मतिरेव तत्र प्रतिबन्धिका आसीत् सा च प्राग्विवृताकारिभ्यां इदानीं तु शाल्ववधान्ते नारदमुखादेकाकिनं दन्तवक्त्रमायान्तं श्रुत्वा द्वारकामप्रविश्य तं हन्तुमेकाकितयैव तत्र गमने न कापि कस्यचित् विप्रतिपत्तिः दन्तवक्त्रं हत्वा तु अयमवसरो व्रजस्थबन्धुवर्गमिलन इति विमृश्य गायन्ति ते विशदकर्मेत्यत्र गोप्यश्चेत्युद्धवसङ्केतं च स्मृत्वा व्रजमागत्य स्वविरहं निर्वाप्य कंसवधान्ते विवृतं व्रजस्थानां प्रकाशद्वयमैकधर्म्यादेकीकृत्य मासद्वयं पूर्ववत् प्रकटं विहृत्य व्रजस्थलीलां प्रापञ्चिकलोकचक्षुर्भ्यस्तिरोधाय्य कृष्णः पित्रादिबन्धुवर्गसहितो वैकुण्ठं गच्छतीति स्वर्गस्थादिलोकदृश्यः सन्नेकेन पूर्णकल्पप्रकाशेन गोलोकं जगाम अन्येन पूर्णतमप्रकाशेन प्रापञ्चिकलोकादृश्ये व्रज एव नित्यं विजहार अन्येन पूर्णप्रकाशेन रथारूढ एकाकी द्वारकां जगाम शौरसेनिकलोकास्तु कृष्णो दन्तवक्त्रं हत्वा व्रजस्थैः पित्रादिभिर्मिलित्वा द्वारकामसौ गच्छति व्रजस्थाः सर्वे त्वकस्मात् क्व गता इत्यजानन्तो महाविस्मयमवापुः । किञ्च व्रजस्थान् गोपान् सशरीरानेव वैकुण्ठं प्रापयामास यः स एव कृष्णो द्वारकास्थान् यदून् कथं मौशललीलया तादृशीं दुरवस्थां प्रापयामासेति विचिन्त्य परीक्षिदयं दुर्मनायिष्यते यदुष्वेवास्य स्वीयाभिमानादिति विमृश्य श्रीशुकदेवः पाद्मोत्तरखण्डामेतां लीलां न श्रावयामासेति तत्त्वं ज्ञेयम्, किन्त्वेवं योगेश्वरः कृष्णो भगवान् जगदीश्वर इत्यत्र इति पदार्थस्य विवेशेति क्रियान्विति कृतस्यान्यथानुपपत्तिं प्रमाणीकृत्य किञ्चित्तदलक्षितं द्योतयामासेत्यपि ज्ञेयं किञ्च व्रजस्थलीलोपसंहारः प्रकारान्तरेण काप्यदृष्टत्वात्तत्रायमेवंप्रकारः सर्वैरपि प्रमाणीकर्तव्य एव अत्र वैष्णवतोषिण्यां दृष्टो लीलाक्रमस्त्वयं प्रथमं सूर्योपरागयात्रा ततो राजसूयसभा ततो द्यूतं ततः पाण्डवानां वनगमनं तदैव शाल्वदन्तवक्त्रवधव्रजागमनव्रजलीलोपसंहाराः ॥१६॥ "विदूरथान्तानसतो हत्वाऽस्त्रन्यासमाचारत् । हरिर्बलस्तु पुनरप्यवधीत् सूतबल्वलौ ॥" श्रुत्वेति मम दुर्योधनस्य प्रियो युधिष्ठिरोऽपि उभयोरपि निमन्त्रणे आयास्यति कस्य पक्षे स्यामिति विमृश्य तीर्थस्नानमिषेण प्रययौ ॥१७॥

गूढार्थदीपिनी

जयतीति इतिशब्दोऽवधारणे । जयत्येव नात्रसन्देहः किन्तु पशुदृष्टीनाम् अविवेकिनां कारणाज्ञानात् कदाचित् निर्जितोऽपि ईयते प्रतीयते जरासन्धादिभिः ॥१६॥ मध्यस्थः उदासीनः उभयपक्षत्यागी ॥१७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

योगेश्वरे युज्यते इति योगः सङ्कल्पस्तदीशः सत्यसङ्कल्पः सङ्कल्पमात्रेणैव सर्वत्र कर्तुं कुशल इत्यर्थः । भगवान् स्वाभाविकषड्गुणनिधिः जगदीश्वरः विश्वनियन्ता एवम्भूतः कृष्णः एवमुक्तप्रकारेण क्वचित् साक्षादेव जयति शिशुपालदन्तवक्त्रादीनामन्यवध्यत्वाऽसम्भवात् । क्वचित्स्वयं पलायनादिमिषेण शत्रुवधमकृत्वा युधिष्ठिरादिश्रैष्ठ्यख्यापनार्थं भीमादिद्वारा जयत्येव जरासन्धादिभिर्जित इति पशुदृष्टीनामीयते प्रतीयते इत्यर्थः ॥१६-१७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तथा मुनिप्रभृतिभिरपि कुसुमैरभिवर्षित इत्यन्तं महती स्थितिः भगवतो युद्धलीला समाप्यत इति सन्तोषात् कृता श्रोतृणां युद्धलीलाभिनिवेशो भवत्विति ॥१४॥ ततो भगवतः पुरप्रवेशमाह-वृतश्च वृष्णिप्रवरैरिति । हत्वा स्तुतः विवेशेति तस्य क्रियात्रयं निरूपितम् ॥१५॥ त्रिगुणां भगवतः क्रियालीलामुपसंहरन् दोषभावमाह-एवं योगेश्वर इति । योगे भ्रष्टास्ते मोचिता इति एकप्रयोजनं कृष्णत्वाद्भूभारो हतो इत्यपरं भगवानिति सामर्थ्यं जगदीश्वर इत्यावशकत्वम् । एवं क्रियाकरणे हेतुमुक्त्वा लौकिकबुद्ध्या प्रासान्

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

हेतून्निन्दति–ईयते पशुदृष्टीनामिति । पशुदृष्टिभिः निर्जितो भगवान् जयतीति ईयते ज्ञायते कदाचिन्निर्जितः कश्चिज्जयतीति एतदुभयम पूर्वापरानुसन्धानरहितानामेव त एव पशवः यतः सः पुरुषोत्तमः न तु केनाप्यंशेन भावान्तरं प्राप्त इत्यर्थः । अत्र भगवतः शस्त्रसंन्यास पुराणान्तरेऽपि निरूपितः स एवात्र उपसंहारेणापि सूचितः ॥१६॥ एवं भगवतः क्रियाशक्तिमुपसंहृत्य बलभद्रस्यापि कीर्तिसिद्ध्य धर्मक्रियामाह–श्रुत्वा युद्धोद्यममिति । यत्रानर्थपर्यवसानं तत्परित्याग एव आदौ धर्मः तत्रापि तद्व्याजेन तीर्थाभिषेकव्याजे आचरणं सुतरामेव अतः युद्धोद्यमं श्रुत्वा भगवान् पाण्डवपक्षपातीति स्वस्य कौरवपक्षपाते अन्योन्यमेव विरोधो भवतीति तीर्थाभिषेकव्याजेन वस्तुतः तीर्थयात्रानाभिप्रेतेति निमित्ताभावात् तद्व्याजेनैव उभयोर्मध्यस्थः प्रययौ । तीर्थदेशानेव किलेति प्रमा जीववत्तस्य तीर्थाचरणं भगवत्त्वाद्विरोधीति स्वतः अनुक्त्वा किलेत्युक्तम् । हृदये व्याजेऽपि लोकप्रतीत्यर्थम् ॥१७॥

श्रीसुबोधिनीसारः

मुनिभिरिती प्रसिद्धार्थत्वान्न व्याख्यातः ॥१४॥ उप हीने । उपगीयमानो विजयो यस्य स कुसुमैः पुष्पैरभिवर्षितः वृष्णिप्रवरैः वृष्णिश्रेष्ठैः वृतो युक्तोऽलंकृतां मण्डितां पुरीं द्वारकां विवेश ॥१५॥ एवं योगानामुपायानामीश्वरः योगिनां वा आदित्वादच्प्रत्यये भगवान् जगतामीश्वरः स कृष्णो निर्जितः क्वापि जयतीति पशुदृष्टीनामज्ञानामीयते प्रतीयते ॥१६॥ पाण्डवैः स कुरूणां युद्धार्थमुद्यमं श्रुत्वा मध्यस्थ उभयोः समो रामः । तीर्थेष्वभिषेकः स्नानं तस्य व्याजेन मिषेण प्रययौ किलैव ॥१७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्रीकृष्णस्य विजयमुपसंहरति–एवमिति । स श्रीकृष्ण एवमनायासेन महाबलानपि सर्वदा जयत्येव । इति शब्दोऽवधार पशुदृष्टीनामविवेकिनां तु कदाचिज्जरासन्धादिभिः निर्जितोऽपि ईयते प्रतीयते । तस्य नित्यविजये हेतुमाह–योगेश्वर इति योगिनोऽपि यथेष्टं विजये समर्थाः, किं पुनस्तत्फलदातेत्याशयः । जगदीश्वरः यो हि सङ्कल्पमात्रेण जगज्जन्मादि करोति त विजये कः सन्देहः ? तत्र हेतुमाह–भगवानिति, ऐश्वर्यादिगुणपूर्ण इत्यर्थः ॥१६॥ एवं श्रीकृष्णचरितमुक्त्वा कानिचि द्बलभद्रचरितानि वर्णयति–श्रुत्वेत्यादिना यावदेकोनाशीतितमाध्यायपरिसमाप्तिः । कुरूणां पाण्डवैः सह युद्धोद्यमं श्रुत रामस्तीर्थस्नानव्याजेन प्रययौ द्वारकातो निर्जगाम । तत्र स्थितौ तदन्यतरपक्षपातित्वमवश्यं स्यात्, तच्च नेष्टम् । तत्र हेतुमा मध्यस्थ इति । तद्यात्राप्रसिद्धिं सूचयति–किलेति ॥१७॥

अन्वितार्थप्रकाशिका

एवमिति । योगेश्वरो भगवान् जगदीश्वरः श्रीकृष्णः एवमनायासेन महाबलानपि सर्वदा जयत्येव । इति शब्दोऽवधार पशुदृष्टीनामविवेकिनां तु सः कदाचिज्जरासन्धादिभिः निर्जितोऽपि ईयते प्रतीयते इति पूतनादिविदूरथान्तमामथ्य कृ युद्धादुपरतोऽभूत् इत्याहुः । अत्र तोषिण्यां पाद्मोत्तरखण्डोक्तो विशेषः । तथा हि तत्रत्य गद्यानि यथा । अथ शिशुपालं हतं दन्तवक्त्रः कृष्णेन योद्धुं मथुरामाजगाम । कृष्णस्तु तच्छ्रुत्वा रथमारुह्य मथुरामाययावित्यादि ततोऽत्रैवं व्याख्येयम् । पौण्ड्रकशिशु हतौ श्रुत्वा श्रीकृष्णं योद्धुं दन्तवक्त्रः शक्रप्रस्थं प्रति चलितः । मार्गे नारदेन द्वारकागतं कृष्णकृतशाल्ववधं बोधितः कृ गदायुद्धं चिकीर्षुर्मथुरामुपद्रावयितुं तत्रैव तदाह्वानेच्छया ययौ । तच्छ्रुत्वा भगवानेकाकी मथुरां रथेन गत्वा तं सानुजं हतवान् नन्दव्रजं गत्वा पितरावभिवाद्य कालिन्द्यां गोपीभिः रेमे । इदं व्रजगमनं भागवतसम्मतमेव । आयास्य इति दौत्यकीर्त प्रतिज्ञानात् । "पुरून् मधून् वाथ सुहृद्दिदृक्षया" इति प्रथमस्कन्धोक्तेः । मधून् मथुरासुहृदो व्रजस्थान् वेति स्वामिव्याख्या सूर्योपरागयात्रायां गतांश्चिरायितानित्यादिवाक्यविरोधस्तु नास्ति । तद्यात्रायाः दन्तवक्त्रवधपूर्वकालिकत्वात् । तत्रैवं क्रमः । कंसव नरकवधान्तलीलाऽल्पैरेव वत्सरैः ततः सूर्योपरागयात्रा ततो राजसूयसभा ततः पाण्डवानां द्यूतवनगमने त शाल्वदन्तवक्त्रवधव्रजगमनानि । तेषु रामतीर्थयात्रादिकम् । सूर्योपरागे भीष्माद्यागमोक्त्या रामतीर्थयात्रोत्तरत्वासम्भवात् दन्तवक्त्रादिवधोत्तरं मासद्वयं व्रजे स्थित्वा नन्दगोपादिभ्यः परमं स्वपदं दत्त्वा पश्चाद् द्वारवतीमाजगामेति तत्रोक्तम् वाक्यान्तरविरोधसमाधानं तोषिण्यां द्रष्टव्यम् ॥ १६॥ श्रुत्वेति । कुरूणां पाण्डवैः सह युद्धोद्यमं श्रुत्वा मध्यस्थः एकपरपक्षावलम्ब रामस्तीर्थस्नानव्याजेन प्रययौ द्वारकातो निर्जगाम ॥१७॥

मुन्यादि
सः श्रीकृष्णः पशु
॥१६॥ अथ बलदे

मुनिभिरि
उपगीयमानो विजये
॥१५॥ सर्वत्र सदा
विश्वस्येश्वरः शास्ता
स तु जयति एव इति
पुनर्बलभद्रचेष्टितान्य
युद्धोद्यमं श्रुत्वा मध्य

स्तुति पाठ
सजयी गयी थी । भ
भगवान श्रीकृष्णकी
। जो अज्ञानी जीव है
विजयी ही है ॥१६॥
तेयारी कर रहे है । ल
इस लिये बलभद्रजी

स्नात्वा प्रभास
'पृथूदकं बिन
यमुनामनु[3] या
तमागतमभिप्रे

प्रभासे, स्नात्वा
बिन्दुसरः, त्रितकूपम्, सु
यानि, गङ्गाम्, अनु, नैमिष
अभिनन्द्य, उत्थाय, च, प्र

प्रतिस्रोतं प्रतिलो
सर्वाणि गत्वा नैमिषमरण्यं

१.मधूदकं-च. पु. टी. । २. स्त्र
विज. । ५. अभिगम्य-च. पु. टी

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मुन्यादिभिरुपगीयमानविजयः ॥१५॥ कदाचिज्जरासन्धादिभिर्निर्जितः । कदाचिच्छिशुपालादीन् जयतीत्यमुना प्रकारेण सः श्रीकृष्णः पशुदृष्टीनां पशुदृग्भिरज्ञैः ईयते ज्ञायते । श्रीकृष्णस्तु योगेश्वरादिविशेषणविशिष्टत्वात्सततमजेय एवास्तीति भावः ॥१६॥ अथ बलदेवचरित्रमाह-श्रुत्वेत्यादिभिः । तीर्थाभिषेकव्याजेन तीर्थयात्रामिषेण ॥१७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मुनिभिरिति । मुनिभिः सिद्धगन्धर्वैः विद्याधरमहोरगैः अप्सरोभिः पितृगणैः यक्षकिन्नरचारणैः ॥१४॥ उपगीयमानेति । उपगीयमानो विजयो यस्य सः कुसुमैः अभिवर्षितः वृष्णिप्रवरैः वृतश्च कृष्णः अलंकृतां पुरीं विवेश । इति त्रयाणामेकसम्बन्धः ॥१५॥ सर्वत्र सदा विजयिनः भगवतः क्वचित्पराभवं वदन्तो मूढा इत्याह-एवमिति । भगवान् षाड्गुण्यपूर्णः जगतः कृत्स्नस्य विश्वस्येश्वरः शास्ता योगेश्वरः कृष्णः निर्जितः । जरासन्धादिभिरिति शेषः । एवं पशुदृष्टीनाम् ईयते मूढानां प्रतीयते इत्यर्थः । कुतः स तु जयति एव इति सिद्धान्तादिति शेषः । 'जयः सदैकत्र न वै परात्मनां विनैकमुत्पत्तिलयस्थितीश्वरम्' इत्यत्रैवोक्तेः ॥१६॥ अथ पुनर्बलभद्रचेष्टितान्यनुवर्णयति-श्रुत्वेत्यादिना । यावदेकोनाशीतितमाध्यायसमाप्ति । श्रुत्वेति । पुरूणां दुर्योधनादीनां पाण्डवैः सह युद्धोद्यमं श्रुत्वा मध्यस्थः रामः तीर्थाभिषेकव्याजेन प्रययौ किल ॥१७॥

कृष्णप्रिया

स्तुति पाठकगण विजयकी गाथा गा रहे थे । श्रीद्वारिकानगरी भगवान के विजय प्रवेश अवसर पर सजायी गयी थी । भगवान आगे चल रहे थे और वृष्णिकुल यादववीर भगवान के पीछे पीछे चल रहे थे ॥१५॥ भगवान श्रीकृष्णकी सदा विजयगाथा भक्त गाते रहते है । जगदीश्वर श्रीकृष्ण इसी प्रकार हरेक लीलाए कर रहे थे । जो अज्ञानी जीव है वे तो भगवान को कभी पराजित भी देखते है लेकिन यथार्थरुपमें तो भगवान कृष्ण निरन्तर विजयी ही है ॥१६॥ तटस्थ श्रीबलभद्रजी ने एकवार सुना की दुर्योधनादि कौरव पाण्डवो के साथ युद्ध करने की तैयारी कर रहे है । लेकिन बलभद्रजी तटस्थ थे । उनको किसी एकका पक्ष लेकर युद्ध करना अभीष्ट नहीं था । इस लिये बलभद्रजी तीर्थयात्रा करने के निमित्त द्वारिका से प्रस्थान कर गये ॥१७॥

स्नात्वा प्रभासे सन्तर्प्य देवर्षिपितृमानवान् । सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः ॥१८॥
[1]पृथूदकं बिन्दुसरस्त्रि[2]तकूपं सुदर्शनम् । विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीम् ॥१९॥
यमुनामनु[3] यान्येव गंगामनु च भारत । जगाम नैमिषं यत्र ऋषयः सत्रमासत[4] ॥२०॥
तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः । [5]अभिनन्द्य यथान्यायं प्रणम्योत्थाय चार्चयन् ॥२१॥

कर्दमक्षमा

प्रभासे, स्नात्वा, देवर्षिपितृमानवान्, संतर्प्य, ब्राह्मणसंवृतः, प्रतिश्लोकम्, सरस्वतीम्, ययौ ॥१८॥ पृथूदकम्, बिन्दुसरः, त्रितकूपम्, सुदर्शनम्, विशालम्, ब्रह्मतीर्थम्, चक्रम्, च, प्राचीम्, सरस्वतीम्, हे भारत ! यानि, यमुनाम्, इव, च, यानि, गङ्गाम्, अनु, नैमिषम्, यत्र, ऋषयः, सत्रम्, आसत, जगाम, दीर्घसत्रिणः, मुनयः, आगतम्, तम्, अभिप्रेत्य, यथान्यायम्, अभिनन्द्य, उत्थाय, च, प्रणम्य, आर्चयन् ॥१९-२०-२१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रतिस्रोतं प्रतिलोमम् ॥१८॥ सुदर्शनं तीर्थम् चक्रं चक्रतीर्थम् ॥१९॥ यमुनामनु यानि तीर्थानि गङ्गामनु च यानि तानि सर्वाणि गत्वा नैमिषमरण्यं जगाम ॥२०॥ अभिप्रेत्य श्रीराम इति ज्ञात्वा ॥२१॥

१.मधूदकं-च. पु. टी. । २. स्त्रकूटं च-वीर. ; स्तृणकलं-च. पु. टी. । ३. मनु यान्येवं-वीर. ; मनुयात्येष-विज. । ४. मासते-श्रीधर. वुशी. वीर. विज. ।५. अभिगम्य-च. पु. टी. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्राचीति महत्फलश्रवणात्। "नूनं प्राचीनपापानि मेरुतुल्यानि भारत। सद्यो दहति निस्नाता प्रातः प्राची सरस्वती॥" इति पुराणात् ॥१९॥ यत्र नैमिषे। आसते कुर्वन्ति। कृञर्थस्य सर्वधातुष्वनुस्यूतत्वात् ॥२०॥ तं रामम् ॥२१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ब्राह्मणसंवृतः इत्यतिनिर्वेदं बोधयति-तन्मात्रसाहित्यात् ॥१८॥ पृथ्विति युग्मकम्। पृथूदकं कुरुक्षेत्रवर्ति यत्र वैन्येनाश्वमेधानां शतं विहितं बिन्दुसरः कर्दमाश्रमं गूर्ज्जरदेशीयसिद्धपुरवर्ति त्रितकूपं त्रितो नाम एकतद्वितयो भ्राता स तु स्वं वञ्चयित्वा भ्रात्रोर्गोव्रजं नयतोऽग्रवर्ती तत्र कूपे वृकभयात् पतितः तत्रैव च सोमेन देवानिष्ट्वा तत उत्थितश्च स तु सरस्वतीतीरवर्ती कूपस्त्रितकूपः विशालामवन्तीं विशालमिति पाठे सरस्वतीवर्तिनमेव तीर्थविशेषं ब्रह्मतीर्थं कन्यातीर्थसोमतीर्थयोर्मध्यवर्ति तथा चारण्यपर्वणि कन्यातीर्थानन्तरं-

"ततो गच्छन्नरव्याघ्र ब्रह्मणस्तीर्थमुत्तमम्। तत्र वर्णावरः स्नात्वा ब्रह्मण्यं लभते नरः॥"

ततस्तु सोमतीर्थं च कथमिति चक्रं चक्रतीर्थं प्राचीं सरस्वतीं च कुरुक्षेत्रवर्तिनीमिति मार्गव्युत्क्रमोऽयं तत्क्रमतस्तीर्थक्रियाविधानं द्योतयति ॥१९-२०॥ आदावुत्थाय ततः प्रणम्य स्वागतादिनाऽभिनन्द्य च यथान्यायमर्चयन् ॥२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्यग् यथाविधि भक्त्या तर्पयित्वा देवादीनां यथापूर्वं श्रेष्ठतया तत्क्रमेणैव तर्पणात्तथैव निर्देशः। ब्राह्मणाः पुरोहितादयः, तैः सम्यग् वृतो वेष्टितः ॥१८॥ पृथूदकं कुरुक्षेत्रवर्ति, यत्र वैश्येनाश्वमेधानां शतं विहितम्, बन्दुसरः कर्दमाश्रमं गुर्जरदेशीयसिद्धपुरवर्ति त्रितकूं त्रितो नाम एकद्वितयोर्भ्राता, स तु स्वं वञ्चयित्वा भ्रात्रोर्गोव्रजं नयतोः सतोरग्रवर्ती यत्र कूपे वृकभयात् पतितस्तत्रैव च सोमेन देवानिष्ट्वा तत उत्थितश्च। स तु सरस्वतीतीरवर्ती कूपस्त्रितकूपः। विशालामवन्तीम्, सरस्वतीं तीर्थविशेषं वा, विशालमिति पाठे तत्रत्यामरतीर्थविशेषम्, ब्रह्मतीर्थं कन्यातीर्थसोमतीर्थयोर्मध्यवर्ति तथा चारण्यकपर्वणि कल्पतीर्थानन्तरम् —

'ततो गच्छेन्नरव्याघ्र ब्रह्मणस्तीर्थमुत्तमम्। तत्र वर्णावरः स्नात्वा ब्रह्मण्यं लभते नरः॥
ततस्तु सोमतीर्थं च कथितम्।' इति॥

चक्रं चक्रतीर्थम्, प्राचीं सरस्वतीं ययाविति पूर्वेणान्वयः। एवं मार्गानुसारेण कदाचिद्गमनक्रमेण कदाचिन्माहात्म्यापेक्षया वर्त्मत्यागेनोत्क्रमेण च तत्र तत्र गमनं ज्ञेयम्। किञ्च, एतानि तीर्थानि कृतानीति तात्पर्यम्, न तु क्रमोऽत्र विवक्षितः ॥१९॥ भारतेति शीघ्रसर्वतीर्थगमनेन विस्मयात्; निमिषे भाविप्रयोजनानन्तराययाताद्वा ॥२०॥ आदावुत्थाय, ततः प्रणम्य, स्वागतादिनाभिनन्द्य च, यथान्यायमार्च्चयन् पूजयामासुरित्येवमत्र क्रमो द्रष्टव्यः। महर्षेः शिष्यमिति विजयादियोग्यत्वं तथा रोमाणि श्रोतृणां भगवत्कथया हर्षयतीति तथा तमिति परमभागवतत्वं च सूचितम्। तथाप्यासीनमिति महापराधश्च ॥२१-२२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्रतिस्रोतं पश्चिमाभिमुखस्रोतसम् ॥१८-२२॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स्नात्वेति। प्रतिप्रत्यक्स्रोतः प्रवाहो यस्यास्तां सरस्वतीम् प्रत्यक्सरस्वतीं ययौ इत्यर्थः ॥१८॥ ततः पृथूदकादीनि तीर्थविशेषाणि ययाविति सम्बन्धः तत्र चक्रं चक्रतीर्थं प्राचीं सरस्वतीं त्रिवेणीमित्यर्थः ॥१९॥ ततो यमुनामनु यानि तीर्थानि गङ्गामनु च यानि तीर्थानि तानि सर्वाणि सादरं यथा तथा नारदमिति पाठे तदाख्यं तीर्थं नैमिषं च जगामेति सम्बन्धः। नैमिषं विशिनष्टि यत्रेति। यत्र नैमिषे ऋषयः शौनकादयः सत्रमासतेऽनुतिष्ठन्ति ॥२०॥ तत्र यदभूत्तदेवाह-तमित्यादिना। बलभद्रमागतमभिप्रेत्य दृष्ट्वेत्यर्थः। दीर्घं सहस्रसमं सत्रमेषामस्तीति तथा ते मनुष्याः यथान्यायमभिनन्दार्चयन्नर्चितवन्तः ॥

श्रीमद्विजयध्वजकृता पदरत्नावली

भोजनादिना मानवसन्तर्पणं प्रतिस्रोतं प्रवाहाभिमुखम् ॥१८॥ पृथूदकं नाम तीर्थं त्रितस्य मुनेः कूपं विशालम् तीर्थम् ॥१९-२०॥ अभिप्रेत्याभिगम्य ॥२१-२२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१०-४०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सरस्वतीं प्रतिस्रोतं प्रतिलोमस्रोतस्वतीम् ॥१८॥ चक्रं चक्रतीर्थं यमुनाम् अनु लक्षीकृत्य यानि तीर्थानि तानि गत्वेत्यर्थः ॥१९-२१॥

गूढार्थदीपिनी

प्रभासे क्षेत्रे। प्रतिस्रोतं प्रवाहाभिमुखं यथा भवति तथा सरस्वती तत्तीरम् ॥१८॥ पृथूदकादीन् तत्तन्नाम्ना तीर्थविशेषान् ययौ। पृथूदकं कुरुक्षेत्रवर्ति पृथोरश्वमेधस्थानम्। बिन्दुसरः कर्दमाश्रमं गुर्जरदेशस्थम्। त्रितकूपं त्रितऋषेस्तीर्थं सरस्वत्यन्तर्वर्ति। सुदर्शनतीर्थमि तत्रैव। विशालं सरस्वत्यन्तर्वर्ति। अग्रे द्वयमपि तथैव। प्राचीति (नूनं प्राचीनपापानि मेरुतुल्यानि भारत। सद्यो दहति निस्नाता प्रातः प्राची सरस्वती ॥ इति पुराणान्तरात्।) महाफलश्रवणात् ॥१९॥ यमुनामनु यमुनातीरे गङ्गायामनु गङ्गातीरे यानि तीर्थानि तानि सर्वाणि निषेव्य नैमिषारण्यं जगाम। आसते (सर्वेषामेव धातूनामन्तर्भूतकृतार्थता। सा वाच्या प्रत्ययार्थेन ह्येवं भाट्टादयो जगुः। इति।) कुर्वते कृञर्थस्य सर्वधातुष्वनुस्यूतत्वत्तत् ॥२०॥ अभिप्रेत्य बलराम इति ज्ञात्वा। दीर्घं सहस्रवर्षपर्यन्तं सत्रमिति येषां ते। यथान्यायं यथोचितम् अर्चयन् पूजितवन्तः ॥२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रतिस्रोतं प्रतिलोमम् ॥१८॥ चक्रं चक्रतीर्थम् ॥१९॥ यमुनामनु लक्षीकृत्य यानि गङ्गाञ्चानु लक्षीकृत्य यानि तीर्थानि ताः नैमिषं च जगाम ॥२०॥ अभिप्रेत्य ज्ञात्वा ॥२१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

प्रभासे गत्वा सङ्कल्पं कृत्वा ततो निर्गत इत्याह-स्नात्वा प्रभासमिति। भगवता सात्त्विकप्रकरणधर्मः कर्तव्यः स च प्रवृत्यात्मकः स धर्मो यज्ञतीर्थानि च तदुक्तम् "यज्ञास्तीर्थानि च पुनः समानि हरिणा कृताः" इति यज्ञाः कृताः तीर्थानि च पुनः तत्समानि च कृतानि तत्र वसुदेवः जीवतीति न स्वतो यागकरणं सम्भवतीति सुतरां राजसूयादिकरणं ततो भगवान् साहाय्यमेव कृतवान् बलभद्रस्तु तीर्थयात्रां यज्ञसमानां मन्यत इति तामेव कर्तुं प्रवृत्तः व्याजेन करणं धर्मो न भवतीति पश्चाद्भगवान् निमित्तं सम्पादयिष्यति अन्यथाऽनधिकारिणा कृतमकृतमिति धर्म एव न भवेत् प्रभासेऽग्निकुण्डे सङ्गमे वा स्नात्वा ततो देवर्षिपितृमानवान् ब्राह्मणभोजनादिना संतर्प्य सरस्वतीतीरे एव प्रतिस्रोतं यथा भवति तथा ययौ ब्राह्मणसंवृत इति। तत्पूर्त्यर्थः ब्राह्मणाभ्यनुज्ञाव्यतिरेकेण तीर्थपूर्त्यभावात् ॥१८॥ यद्यपि प्रतिस्रोतो गमने क्रमेण पृथूदकादीनि तीर्थानि न सन्ति तथापि तीर्थमाहात्म्यं पुरस्कृत्य तेषां गणना तस्मिन् कल्पे वा तथा सन्निवेशः पृथूदकादीनि षट् तीर्थानि सर्वत्र प्राची सरस्वती एवं प्लक्षजाता सरस्वतीति यावत् ॥१९॥ ततो यमुनां प्राप्य अनुस्रोतं न्यायेन प्रयागे समागतः। ततो गङ्गामनु हरिद्वारपर्यन्तं वा गतः ततः पुनः गोमतीतीरं नैमिषपर्यन्तं समागतः तत्र विलम्बे कारणमाह-यत्र ऋषय इति। सत्रं यत्किञ्चिदासत ॥२०॥ ततो यज्जातं तदाह-समागतमभिप्रेत्येति। मुनयः अग्रे अस्मान् ज्ञानोपदेशो भविष्यतीति एष ज्ञानयुक्तः अत एव तदर्थं दीर्घसत्रिणः तस्यागमनमभिनन्द्य यथान्यायं यथा क्षत्रियोत्तमे समागते कर्तुमुचितं तथा कृतवन्तः। ततो भगवद्बुद्ध्या प्रणम्य उत्थाय च अर्चयन् ॥२१॥

श्रीसुबोधिनीसारः

प्रभासे स्नात्वा देवर्षिपितृमानवान् सन्तर्प्य एतेन जीवितपितृकस्यापि दिव्यपितृतर्पणेऽधिकारः सूचितः ब्राह्मणैः संवृतः सरस्वतीं प्रतिस्रोतं सम्मुखं ययौ ॥१८॥ पृथूदकमिति पाठ एव व्याख्या ॥१९॥ यमुनामनु यानि तीर्थानि गङ्गामनु यानि तीर्थानि जगाम तानि सर्वाणि नैमिषारण्यं जगाम यत्र नैमिषे ऋषयः शौनकाद्याः सत्रं यज्ञमकुर्वन् ॥२०॥ आगतं तं राममभिप्रेत्य ज्ञात्वा दीर्घसत्रिणः सहस्रसमा अनुष्ठेयत्वात् मुनयो यथाशास्त्रं प्रणम्य उत्थाय चापूजयन् ॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रभासे स्नात्वा तत्र तर्पणब्राह्मणभोजनादिना देवादीन् संतर्प्य प्रतिस्रोतं प्रतिलोमं प्रवाहसम्मुखं यथा भवति तथा सरस्वतीं तत्तीरं ब्राह्मणसंवृतो ययौ ॥१८॥ तथा पृथूदकादीन् तीर्थविशेषान् ययावित्यन्वयः । चक्रं चक्रतीर्थम् ॥१९॥ तथा यमुनामनु यमुनातीरे यानि तीर्थानि तथा हे भारत ! गङ्गामनु यानि तीर्थानि तानि गत्वा ततो यत्र ऋषयः शौनकादयः सत्रमासते अनुतिष्ठन्ति तन्नैमिषारण्यमाजगामेत्यन्वयः ॥२०॥ तं बलभद्रमागतमभिप्रेत्य ज्ञात्वा दीर्घं सहस्रसंवत्सरपर्यन्तमनुष्ठेयं सत्रं येषामस्ति ते मुनयः उत्थायाभिनन्द्य सुष्ठ्वागमनं जातमिति वचसा अभिनन्दनं कृत्वा प्रणम्य च यथान्यायं यथोचितं आर्चयन् पूजितवन्तः ॥२१॥

अन्वितार्थप्रकाशिका

स्नात्वेति । प्रभासे स्नात्वा तत्र तर्पणब्राह्मणभोजनादिना देवादीन् संतर्प्य प्रतिस्रोतं प्रतिलोमं प्रवाहसम्मुखं यथा भवति तथा सरस्वतीं तत्तीरं ब्राह्मणसंवृतो ययौ ॥१८॥ पृथूदकमिति । पृथूदकादीन् तीर्थविशेषान् ययावित्यन्वयः । पृथूदकं यत्र पृथुनाश्वमेधशतेनेष्टं तत्कुरुक्षेत्रवर्ति बिन्दुसरः कर्दमाश्रमं गुर्जरदेशे त्रितकूपं सरस्वत्यन्तरवर्ति त्रितऋषेस्तीर्थं सुदर्शनतीर्थमपि तत्रैव । विशालं सरस्वत्यन्तर्वर्ति तीर्थं विशालामिति पाठे अवन्तीम्, ब्रह्मतीर्थं चक्रतीर्थे सरस्वत्यामेव प्राची सरस्वती कुरुक्षेत्रवर्तिनी इदं तीर्थसंग्रहमात्रं न तु मार्गक्रमः ॥१९॥ यमुनामिति । यमुनामनु यमुनातीरे यानि तीर्थानि तथा हे भारत ! गङ्गामनु यानि तीर्थानि तानि गत्वा ततो यत्र ऋषयः शौनकादयः सत्रमासते अनुतिष्ठन्ति तन्नैमिषारण्यमाजगाम ॥२०॥ तमिति । तं बलभद्रमागतमभिप्रेत्य ज्ञात्वा दीर्घं सहस्रसंवत्सरपर्यन्तमनुष्ठेयं सत्रं येषामस्ति ते मुनयः उत्थायाभिनन्द्य सुष्ठु आगमनं जातमिति वचसा अभिनन्द कृत्वा शिरसा प्रणम्य च यथान्यायं यथोचितं आर्चयन् पूजितवन्तः ॥२१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रतिस्रोतं प्रतिस्रोतः प्रवाहसम्मुखं सरस्वतीं प्रतीययौ ॥१८॥ बिन्दुसरः सिद्धपुरनिकटवर्तिनि कर्ममाश्रमेऽस्ति । त्रितकू त्रितऋषेस्तीर्थं सुदर्शनं नाम तीर्थम् । पृथूदकं यत्र पृथुनाश्वमेधशतेनेष्टं तत् कुरुक्षेत्रवर्ति । चक्रं चक्रतीर्थम् । इदं तीर्थसंग्रहमात्रं न तु मार्गक्रमः ॥१९॥ यमुनामनु यानि तीर्थानि गङ्गामनु यानि तीर्थानि च तानि सर्वाणि प्राप्य नैमिषारण्यम् । जगाम ॥२०॥ तं राम अभिप्रेत्य बुद्ध्वा ॥२१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्नात्वेति । रामः प्रभासे स्नात्वा समुद्रे इति शेषः । देवर्षिपितृमानवान् सन्तर्प्य प्रति प्रत्यक्स्रोतः प्रवाहो यस्याः सरस्वतीं प्रत्यग्वाहिनीं सरस्वतीमित्यर्थः । ब्राह्मणैः संवृतः सन् ययौ । प्रत्यक्स्रोतं प्रवाहसन्मुखं यथा तथेत्यन्ये । स्रोतसोऽदन्तत्वमार्षं ॥१८॥ पृथूदकमिति । ततः पृथूदकं बिन्दुसरः त्रितकूपं सुदर्शनं विशालं ब्रह्मतीर्थं चक्रं चक्रतीर्थं च प्राचीं सरस्वतीम् इ तीर्थसंग्रहमात्रं न तु मार्गगततीर्थक्रमः ॥१९॥ यमुनामिति । हे भारत ! यमुनाम् अनु यानि तीर्थानि गङ्गाम् अनु च यानि तीर्थानि ते सर्वेष्वपि स्नात्वेति शेषः । नैमिषं नैमिषाख्यं क्षेत्रं जगाम एव । यत्र नैमिषीयक्षेत्रे ऋषयः शौनकादयः सत्रं यज्ञम् आसते अनुतिष्ठ ॥२०॥ तत्र यदभूत्तदेवाह–तमिति । तं बलभद्रम् आगतम् अभिप्रेत्य दृष्ट्वा दीर्घं सहस्रसमं सत्रमेषामस्तीति तथा ते मुन यथान्यायम् उत्थाय अभिनन्द्य प्रणम्य च आर्चयन् अर्चितवन्तः ॥२१॥

कृष्णप्रिया

द्वारिका से प्रस्थान कर प्रथम प्रभास क्षेत्रमें स्नान किया और तर्पण ब्राह्मण भोजन के माध्यम से दे ऋषि पितृगण और मनुष्योंको संतृप्त कीया । इस विधिके बाद वे कतिपय विप्रों के साथ जहां से सरस्वती सो आ रही थी उधर ही पधारे ॥१८॥ श्रीबलभद्रजी क्रमसे पृथूदक, बिन्दु सरोवर, त्रितकूप, सुदर्शन तीर्थ, विशा तीर्थ, ब्रह्म तीर्थ, चक्रतीर्थ एवं प्राची सरस्वती आदि तीर्थों में पधारे ॥१९॥ हे भारत ! क्रमशः श्रीयमुना तट श्रीगंगातटके प्रधान प्रधान तीर्थोंमें स्नानादि करते हुए बलभद्रजी नैमिषारण्य क्षेत्रमें पधारे । उन दि श्रीनैमिषारण्यमें शौनकादि समर्थ ऋषिगण सहस्र वर्षका दीर्घ सत्र कर रहे थे ॥२०॥ वे ऋषिलोग सहस्रवर्ष

सत्संग सत्रका व्रत ले
सन्मान सत्कार स्वाग

सोऽर्चितः स
[2]अप्रत्युत्थायि
कस्मादसावि
ऋषेर्भगवतो

सपरिवारः, कृत
अकृतप्रह्वणाञ्जलिम्, सूत
विप्रान्, तथा, एव, अस
सेतिहासपुराणानि, बहूनि,
इव, न, गुणाय, भवन्ति,

महर्षेर्व्यासस्य ॥
॥२३-२४॥ अजानन्नध्यास

सः रामः ॥२२॥
तस्याग्निकुण्डोद्भूतत्वेन
विप्रान्माध्यास्तादध्यास्ते
भगवद्दत्ताधिकारमत्तुल्यनृप
इतिहासपुराणानां विप्रान्यो
भगवति भावित्वात्तद्वधो जात

महर्षेः शिष्यमिति वि
विप्रानध्यासीनं ततः सूतं लिङ्ग
॥२३॥ कस्मादिति युग्मकम्
कस्माच्चिदप्यन्यस्मात् केवलं

उत् उच्चासनोपविष्ट
तथा समुच्चये, एव अपि,
दुष्टबुद्धित्वादेवेत्यर्थः । अस्मा
सकाशात् ॥२३-२४॥ भगवत
सम्पूर्णत्वादिनाधीत्य च; इतिह

---

[1] शिष्यमैक्षन्महामुनेः–विज. । २.

कृष्णप्रिया

सत्संग सत्रका व्रत लेकर बैठे हुए महर्षियोंने बलभद्रजी को अपने अपने आसनो से खडे हो कर बलरामजी का सन्मान सत्कार स्वागत कीया और यथोचित प्रणाम शुभाषिर्वाद करके बलभद्रजी का अर्चन किया ॥२१॥

सोऽर्चितः सपरीवारः कृतासनपरिग्रहः । रोमहर्षणमासीनं [१]महर्षेः शिष्यमैक्षत ॥२२॥
[२]अप्रत्युत्थायिनं सूतमकृतप्रह्वणांजलिम् । अध्यासीनं च तान् विप्रांश्चुकोपोद्वीक्ष्य माधवः॥२३॥
कस्मादसाविमान् विप्रानध्यास्ते प्रतिलोमजः । धर्मपालांस्तथैवास्मान् वधमर्हति दुर्मतिः ॥२४॥
ऋषेर्भगवतो भूत्वा शिष्योऽधीत्य बहूनि च । सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः ॥२५॥

कर्दमक्षमा

सपरिवारः, कृतासनपरिग्रहः, अर्चितः, सः, महर्षेः, शिष्यम्, रोमहर्षणम्, आसीनम्, ऐक्षत ॥२२॥ माधवः, अप्रत्युत्थायिनम्, अकृतप्रह्वणाञ्जलिम्, सूतम्, अध्यासीनम्, च, तान्, विप्रान्, उद्वीक्ष्य, चुकोप ॥२३॥ असौ, प्रतिलोमजः, धर्मपालान्, इमान्, विप्रान्, तथा, एव, अस्मान्, दुर्मतिः, कस्मात्, अध्यास्ते, असौ, वधम्, अर्हति ॥२४॥ भगवतः, ऋषेः, शिष्यः, भूत्वा, सेतिहासपुराणानि, बहूनि, धर्मशास्त्राणि, सर्वशः, अधीत्य, अदान्तस्य, अविनीतस्य, वृथा, पण्डितमानिनः, अजितात्मनः, नष्टस्य, इव, न, गुणाय, भवन्ति, स्म ॥२५-२६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

महर्षेर्व्यासस्य ॥२२॥ सूतं प्रतिलोमजं न कृतं प्रह्वणमञ्जलिश्च येन तम् अध्यासीनं च तान् तेभ्योऽप्युच्चैरासीनमित्यर्थः ॥२३-२४॥ अजानन्नध्यास्त ईति चेत् नैवमित्याह-ऋषेरिति ॥२५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सः रामः ॥२२॥ प्रह्वणं नमनम् । इत्यर्थ इति- "अधिपूर्वाणां शीङ् स्थासाम्" इति कर्मत्वं तानिति ज्ञेयम् ॥२३॥ तस्याग्निकुण्डोद्भूतत्वेन जातिसूतत्वाभावेऽपि चरुनिक्षेपवैपरीत्यात्प्रतिलोमज इत्युक्तिः । अन्यः कश्चित्प्रतिलोमजो विप्रान्माध्यास्तादध्यास्ते चेत्तर्हि अस्माभिः स वध्य एव, नाधर्मिणां वधे दोष इत्युक्तेः । अस्मानिति बहुत्वं तु भवद्दत्ताधिकारमतुल्यनृपधर्मादिभिः स वध्य एवेति बोधयति । अन्यथा- "विप्रो वक्ता सुधीः कार्यो विशुद्धोभयवंशजः । इतिहासपुराणानां विप्रान्यो धर्महानिकृत् ॥" इति संहितोक्तिरसमञ्जसा स्यात् । किञ्च-नायं जातिसूत इति ज्ञात्वा निवृत्तोऽपि भवति भावित्वात्तद्वधो जातोऽत एव तस्य प्रायश्चित्ते प्रवृत्तिरिति ॥२४-२५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महर्षेः शिष्यमिति विनयादिगुणयोग्यः तथाप्यासीनमिति महापराधः ॥२२॥ प्रथममप्रत्युत्थायिनं ततोऽकृतप्रह्वणाञ्जलिं ततो विप्रानध्यासीनं ततः सूतं लिङ्गविशेषेण तज्जातिमुद्वीक्ष्येत्युत्तरोत्तरविस्मयबुद्धिः उद्वीक्ष्येति उच्चासनोपविष्टत्वादुच्चैरूर्ध्वदृष्ट्या वीक्ष्येत्यर्थः ॥२३॥ कस्मादिति युग्मकम् । इमान् यज्ञपरान् तथैवेति समुच्चये धर्मपालानप्यस्मांश्च कस्माद्धेतोर्दुर्मतिरसावध्यास्यते अपि तु न कस्माच्चिदप्यन्यस्मात् केवलं दुर्बुद्धित्वादेवेत्यर्थः ॥२४॥ भगवत इति श्रीभगवदवतारत्वात् धर्मशास्त्राणि स्मृत्यादीनि च ॥२५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उत् उच्चासनोपविष्टत्वादुच्चैरूर्ध्वदृष्ट्या वीक्ष्य साक्षाद्दृष्ट्वा, माधव इति ब्रह्मण्यत्वादिसद्धर्म्मप्रवर्तनार्थः । इमान् यज्ञपारान्, तथा समुच्चये, एव अपि, धर्मपालानप्यस्मांश्च कर्माद्धेतोर्दुर्मतिरसावध्यास्ते, अपि तु न कर्माच्चिदप्यन्यस्मात्, केवलं दुर्बुद्धित्वादेवेत्यर्थः । अस्मादिति पाठे पाठान्तरे तथा तेन दीर्घसत्रादिनोक्तप्रकारेण धर्मपालानपि विप्रान्; अस्मत् अस्मत्तः सकाशात् ॥२३-२४॥ भगवत इति श्रीभगवदवतारत्वात्, बहूनि इतिहासादिसहितानि धर्मशात्राणि स्मृत्यादीनि सर्वशः सर्वथा सम्पूर्णत्वादिनाधीत्य च; इतिहासो महाभारतम् ॥२५॥

---

१. शिष्यमैक्षन्महामुनेः-विज. । २. प्रत्यवस्थायिनं-विज. ।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्रह्वणं प्रणामः ॥२३-३०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स इति । कृतः आसनपरिग्रहो येन स रामः रोमहर्षणमैक्षतेति सम्बन्धः । कथम्भूतमासीनमुपविष्टं महर्षेर्बादरायण शिष्यम् ॥२२॥ अप्रत्युत्थायिनं प्रत्युत्थानमकृतवन्तं तं सूतं प्रतिलोमजं न कृतं प्रह्वणं प्रणामोऽञ्जलिश्च येन तान् विप्रानध्यासी विप्रेभ्योऽप्युच्चासनासीनमित्यर्थः । माधवो रामश्चुकोप सकोपं प्राह इत्यर्थः ॥२३॥ तदेवाह-कस्मादिति चतुर्भिः विप्रानध्यास्ते विप्रेषूच्चैरासनमधितिष्ठतीत्यर्थः । प्रतिलोमज इत्यनेन तदनर्हत्वाविष्कारः तथा धर्मं पालयन्तीति त तानस्मानप्यध्यास्तेऽतोऽयं दुर्मतिर्वधमर्हति ॥२४॥ अजानन्नध्यास्ते इत्यत आह-ऋषेरिति । ऋषेर्भगवतो बादरायण शिष्यो भूत्वा बहूनि इतिहासादीनि सर्वशः कार्त्स्न्येन अधीत्य च ॥२५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

प्रत्यवस्थायिनम् आभिमुख्येन स्थितं प्रह्वणं नमनं तान् विप्रानध्यासीनं तेषां मध्ये उच्चासने स्थितं माधवो मधुकुलो ॥२३॥ प्रतिलोमजः विपरीतजन्मा अस्मानिति द्वितीया पञ्चम्यर्थे ॥२४॥ सेतिहासपुराणान्यधीत्य सुदुष्टस्य प्रतिजन्मनः ॥२५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१०-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

निशम्य विप्रियमित्यादि । अमानुषीं प्रकृतिं गतः आकृतिरेव तस्य मानुषी मनुष्यसदृशी न प्रकृतिरित्यर्थः । विमन विशिष्टमनाः स्नेहादपि स्नेहेनापि अघृणी स्थिरः यतः अप्राकृतः एवं सन् यथा यथावत् बभाषे ॥२३॥ तत्किमित्या कथमित्यादि । एवंभूतं रामं जित्वा कथम् अल्पीयसा क्षुद्रेण शाल्वेन बलवान् मे पिता आनीतः कीदृशः पिता वि सर्वभावेन समर्थः तदिदं मृषैवेति सार्वज्ञ्यप्रकटनम् ॥२४-२५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

महर्षेर्व्यासस्य ॥२२॥ तान् विप्रानप्यधि तेभ्यो विप्रेभ्यः सकाशादप्यधिके उच्चे आसने आसीनं कथकत्वादिति ॥२३॥ अस्मानपि अध्यास्ते अतिक्रम्योच्चासने आस्ते उपविष्ट एव न तूत्तिष्ठति ॥२४॥ अज्ञात्वैवास्ते इति चेन्न, ऋषेरिति ॥

गूढार्थदीपिनी

सपरिवारः विप्रादिसहितः महर्षेः व्यासस्य ॥२२॥ अप्रत्युत्थापिनं प्रत्युत्थानमकुर्वन्तम् । न कृतं प्रह्वणं शिरसा न तम् । प्रह्वत्वं शिरसा नतिः । तान् विप्रान् अध्यासीनं वीक्ष्य माधवः मधोर्वंशजः बलरामः चुकोप । तानिति आधारस्य कर्म अधिशीङ्स्थासां कर्म इति नियमात् । प्रह्वशब्दादाचारक्वि बन्तात् ल्युट् ॥२३॥ धर्मपालान् विप्रान् अस्मांश्च कस्माद उच्चासनमधितिष्ठति । यतः प्रतिलोमजः विलोमसङ्करः । ब्राह्मण्यां क्षत्रियाज्जातः सूत इत्यभिधीयते इति वचनात् । व नैतादृशोऽयं जातिसूतः किन्तु अग्निकुण्डसमुद्भूतः सूतः निर्मलमानस इत्युक्तेः । पृथोर्यज्ञे क्षत्रियेन्द्रस्य हविषा ब्राह्मणबृहस्प सम्पृक्तत्वात् तत एव कुण्डादुत्पन्नत्वेन जातिसूतत्वाभावेऽपि चरुनिक्षेपवैपरीत्यात् प्रतिलोमज इत्युक्तम् ॥२४॥ न गुणाय दोषायैव भवन्ति शास्त्राध्ययनादीनीति शेषः ॥२५-२६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृतः आसनपरिग्रहो येन सः महर्षेर्व्यासस्य ॥२२॥ अप्रत्युत्थायिनम् अकृतप्रत्युत्थापनं सूतं "ब्राह्मण्यां क्षत्रिय स वै सूत उदाहृतः" इति स्मृतिप्रोक्तलक्षणं प्रतिलोमजं न कृतं प्रह्वणं प्रणामोऽञ्जलिश्च येन तं तान् विप्रानप्यधि आसीनं विप्रेभ्यो उच्चे आसने उपविष्टम् ॥२३-२५॥

स हि व्याजे
धर्मस्थानेऽधर्मं नियुक्त
सपरिवारः ब्राह्मणसहित
उच्चासने स्थितः न वा
इत्याह-अप्रत्युत्थायिनम
तस्य मात्सर्याजनकत्वात
ब्राह्मणाश्चेदभ्युत्थानादिकं
पुष्टः धर्माभासः गर्वजनव
हीनः न कृतः प्रह्वणार्थमञ्ज
ब्राह्मणान् हीनान् कृत्वा अ
इति दोषोपपत्तिरुक्ता । म
ज्ञापितम् इमान् विप्रानिति
विप्राणामेव ज्ञानतो ज्येष्ठमि
। तत्र दण्डो वध्य एवेत्या
उक्तमपि न ग्रहिष्यति ॥२
तस्य शिष्योऽप्यलौकिक
चकारादध्यापनाभ्यासे वेद
तदभावे केवलधर्मेऽप्यनर्थ
सर्व एव ज्ञाता भवन्ति सर्व

परीवारैर्ब्राह्मणैः
॥२२॥ न प्रत्युत्थातुं शीलं
माधवो बलदेवः चुकोप को
कस्मात्कारणादध्यास्ते उच्च
सभारतपुराणानि धर्मशास्त्रा

सपरिवारः सहचर
॥२२॥ उद्वीक्ष्य दृष्ट्वा च माधव
तेभ्यो विप्रेभ्योऽप्युच्चासनास
॥२३॥ कोपाविष्टश्चेदमाह-क
विप्राणामेव तदर्हत्वं सूचयंस
वधमर्हति ॥२४॥ अजानन्न
इतिहाससहितानि पुराणानि ब

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स हि व्याजेन प्रवृत्तः मुख्यस्वाम्यभिप्रायाभावात् भगवच्छास्त्रपर्यालोचनाभावाच्च स्मृतिन्यायेन धर्ममप्यधर्मं ज्ञात्वा धर्मस्थानेऽधर्मं नियुक्त इति तेषां सत्कारफलसिद्ध्यर्थम् उपकारमिव कुर्वन् सूतनिराकरणार्थं तं दृष्टवानित्याह--सोऽर्चित इति । सपरिवारः ब्राह्मणसहितः कृतः आसनपरिग्रहो येन स्थिरतायै उपदेशयोग्यत्वायाभिमानाय चोक्तम् रोमहर्षणः सूतः ब्राह्मणानामग्रे उच्चासने स्थितः न वायं बालः यतो महर्षेः (व्यासस्य) शिष्यः ॥२२॥ एवमपि स्मृतिविरुद्धं करोतीति तस्मिन् क्रोधं कृतवात् इत्याह-अप्रत्युत्थायिनमिति । वस्तुतो ब्राह्मणातिक्रम एव तस्य दण्डे हेतुः तथापि ब्राह्मणैः केनचित्प्रकारेण तस्य दोषोऽङ्गीकृतः । तस्य मात्सर्याजनकत्वात् अप्रत्युत्थानमेव हेतुं मन्यते यद्यस्य महत्त्वं केनापि प्रकारेण जातं तथापि ब्राह्मणोत्तमादधिकं भवति ब्राह्मणाश्चेदभ्युत्थानादिकं कृतवन्तः तत्रास्याभ्युत्थाने कः सन्देहः अतो नास्मिन् धर्मः मार्गाभावात् अतः पाषण्डेन केनचिल्लोभादिना पुष्टः धर्माभासः गर्वजनकत्वादपकार्येव जात इति तस्मिन् विद्यमानं धर्मं पाषण्डत्वेन आभिप्रेत्य क्रोधं कृतवान् सूत इति जात्या हीनः न कृतः प्रह्वणार्थमञ्जलिर्येन व्रतस्थेनाप्येतावत्कर्तव्यमिति द्वितीयो देशः उक्तः । तृतीयमाह-अध्यासीनं चेति । आधिक्येनोच्चासनेन ब्राह्मणान् हीनान् कृत्वा आसीनः ते च विप्राः विशेषेण पूरकाः सर्वसुहृदः अतस्तेषां तूष्णीम्भावो न दोषायेति स्वयं दण्डाधिकृत इति दोषोपपत्तिरुक्ता । माध्धवो मधुवंशोत्पन्नः ॥२३॥ तस्यालोचनामाह-कस्मादिति । असाविति नास्मिन् तेजो दृश्यत इति ज्ञापितम् इमान् विप्रानिति । तेजोदर्शनं न चायमपि महान् यतः प्रतिलोमजः अनेन ज्ञानाधिक्यादुपविष्ट इति पक्षो निराकृतः विप्राणामेव ज्ञानतो ज्येष्ठमिति भावः । किञ्च धर्मपालांस्तथैवास्मानिति ऐहिकभयमामुष्मिकभयं च नास्त्यस्मिन्निति द्वयं निरूपितम् । तत्र दण्डो वध्य एवेत्याह-वधमर्हीतति । ननु बोधनीय एवायं किमिति वधः क्रियत इत्याकङ्क्ष्याह-दुर्मतिरिति । दुष्टबुद्धिः उक्तमपि न ग्रहिष्यति ॥२४॥ नन्वयमनुपासितवृद्धः बालवत्प्रबोधनीय एवेति चेत्तत्राह-ऋषेर्भगवतो भूत्वेति । ऋषिर्मन्त्रद्रष्टा । तस्य शिष्योऽप्यलौकिककार्थज्ञो भवितुमर्हति तत्रापि भगवतः सानुभावस्य न केवलं शिष्यत्वमात्रं किन्तु बहून्यधीत्येति चकाराद्ध्यापनाभ्यासे वेदाध्ययनं शङ्कितं भविष्यतीति तन्निराकरणार्थं सेतिहासपुराणानीत्याह-इतिहासश्रवणेन नीतिज्ञानं भवति तदभावे केवलधर्मेऽप्यनर्थः स्यात् । गजेन्द्रवत्पुराणाध्ययनात्साभिप्रायधर्मज्ञानं धर्मशास्त्रैः देशकालकुलादिधर्माः आधुनिका एव सर्वं एव ज्ञाता भवन्ति सर्वश इति तत्तदभिप्रायोऽपि बहूनां मुखादवगतः ॥२५॥

श्रीसुबोधिनीसारः

परीवारैर्ब्राह्मणैः सहितः कृत आसनपरिग्रहो यस्य स रामोऽर्चितः महर्षेर्व्यासस्य शिष्यमासीनं रोमहर्षणम् ऐक्षतापश्यत् ॥२२॥ न प्रत्युत्थातुं शीलं यस्य तं न कृतं प्रह्वणं नमनमञ्जलिर्येन तं तान् विप्रान् तेभ्योऽप्यध्यासीनमुच्चैरासीनं सूतमुद्वीक्ष्य दृष्ट्वा माधवो बलदेवः चुकोप कोपं चकार ॥२३॥ प्रतिलोमजो ब्राह्मण्यां क्षत्रियाज्जातोऽसौ इमान् विप्रान् धर्मपालानस्मान् वा तथैव कस्मात्कारणादध्यास्ते उच्चासने कथं तिष्ठति दुर्मतिः कुबुद्धिरेष वधं मृत्युमर्हति ॥२४॥ भगवत ऋषेर्व्यासस्य शिष्यो भूत्वा बहूनि सभारतपुराणानि धर्मशास्त्राणि सर्वशोऽधीत्याध्यास्ते ॥२५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सपरिवारः सहचरविप्रादिसहितोऽर्चितः कृत आसनपरिग्रहो येन स रामः महर्षेर्व्यासस्य शिष्यं रोमहर्षणमासीनमैक्षत ॥२२॥ उद्वीक्ष्य दृष्ट्वा च माधवः मधुवंशजः बलः चुकोप । कोपहेतुं सूचयन् सूतं विशिनष्टि-सूतं प्रतिलोमजं तान् विप्रानध्यासीनं भ्यो विप्रेभ्योऽप्युच्चासनासीनं स्वं प्रति अप्रत्युत्थायिनमकृतवन्दनम् अकृतप्रह्वाञ्जलिं न कृतं प्रह्वणं प्रणामोऽञ्जलिश्च येन तम् ॥२३॥ कोपाविष्टश्चेदमाह-कस्मादिति । कस्मादसौ सूतः विप्रान् अस्मांश्चाध्यास्ते विप्रादिभ्यः उच्चैरासनमधितिष्ठतीत्यर्थः । विप्राणामेव तदर्हत्वं सूचयंस्तान् विशिनष्टि-धर्मपालानिति । तस्य तदनर्हत्वमाह-प्रतिलोमज इति । यतोऽयं दुर्मतिः, अत एव वधमर्हति ॥२४॥ अजानन्नध्यास्तम् इत्याशङ्क्याह-ऋषेरिति । भगवतो वेदव्यासस्य शिष्यो भूत्वा वेदेऽधिकाराभावात् इतिहाससहितानि पुराणानि बहून्यधीत्य तथा सर्वशः कात्स्न्येंन धर्मशात्राणि चाधीत्याप्येवमध्यास्ते ॥२५॥

अन्वितार्थप्रकाशिका

स इति । सपरिवारः सहचरविप्रादिसहितोऽर्चितः कृत आसनपरिग्रहो येन स रामः महर्षेर्व्यासस्य शिष् रोमहर्षणमासीनमैक्षत ॥२२॥ अप्रतीति । माधवः बलदेवः सूतं प्रतिलोमजं ब्राह्मण्यां क्षत्रियाज्जातं तान् विप्रानध्यासीनं तेभ्य विप्रेभ्योऽप्युच्चासनासीनं स्वं प्रति अप्रत्युत्थायिनं प्रत्युत्थानमकृतवन्तम् अकृतप्रह्वणाञ्जलिं न कृतं प्रह्वणं प्रह्ववदाचरं प्रणामोऽञ्जलि येन । प्रह्वशब्दादाचारक्विबन्तात्ल्युट् । तादृशमुद्वीक्ष्य चुकोप कोपपूर्वकमाह स्म ॥२३॥ कस्मादिति । प्रतिलोमजः दुर्मति असौ सूतः इमान् धर्मपालान् विप्रान् अस्मांश्च कस्मात् अध्यास्ते उच्चैरासनमधितिष्ठति अतोऽयं वधमर्हति ॥२४॥ चेदमज्ञानादित्याह-ऋषेरिति । भगवतो वेदव्यासस्य शिष्यो भूत्वा वेदेऽधिकाराभावात् इतिहाससहितानि पुराणानि बहून्यधीत सर्वशः कात्स्र्न्येन धर्मशात्राणि चाधीत्याप्येवमध्यास्ते ॥२५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

महर्षेर्व्यासस्य शिष्यं रोमहर्षणसंज्ञं सूतपौराणिकम् ॥२२॥ क्षत्रियाद्ब्राह्मण्यां जातं सूतम् । न कृतं प्र नमस्कारः । अञ्जलिश्च येन तम् अध्यासीनं तान् तेभ्य उच्चासनस्थं माधवो मधुकुलोत्पन्नः ॥२३॥ विप्रानध्यास्ते विप्रे उच्चासने तिष्ठति यतः क्षत्रियाद्ब्राह्मण्यां जातः अतः प्रतिलोमजः तथैव धर्मपालान् अस्मान् धर्मपालेभ्यः अस्मद अध्यास्ते ॥२४॥ न चेदमज्ञानादित्याह-ऋषेरिति ॥२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति । सपरीवारः अर्चितः कृत आसनपरिग्रहो येन सः स रामः महर्षेर्व्यासस्य शिष्यम् आसीनं कथावाचन व्यासासने समुपविष्टं रोमहर्षणम् ऐक्षत ॥२२॥ अप्रत्युत्थायिनमिति । अप्रत्युत्थायिनं प्रत्युत्थानमकृतवन्तं सूतं प्रतिलोम न कृतं प्रह्वणं प्रणामः अञ्जलिश्च येन तं तान् विप्रान् अध्यासीनं च विप्रेषूच्चासनासीनं चेत्यर्थः । उद्वीक्ष्य माधवो चुकोप सकोपं प्राहेत्यर्थः ॥२३॥ तदेवाह-कस्मादिति चतुर्भिः । कस्मादिति । प्रतिलोमजः असौ इमान् विप्रान् कस्मा अध्यास्ते विप्रेषूच्चैरासनमधितिष्ठतीत्यर्थः । प्रतिलोमज इत्यनेन तदनर्हत्वाविष्कारः सूचितः । तथा धर्मं पालयन्तीति अस्मान् एव अस्मानपीत्यर्थः । अध्यास्ते अस्मदासनतोऽप्युच्चैरासने तिष्ठतीत्यर्थः । अतः दुर्मतिरयं वधम् अर्हति ॥२ अजानन्नध्यास्त इत्यत आह-ऋषेरिति । भगवतः बादरायणस्य ऋषेः शिष्यः भूत्वा बहूनि सेतिहासपुराणानि भारतसहित सर्वाण्यपि पुराणानीत्यर्थः । सर्वशः धर्मशास्त्राणि च अधीत्य ॥२५॥

कृष्णप्रिया

श्रीबलभद्रजी अपने साथियोंके साथ आसन ग्रहण करके बिराजमान हो गये और उनकी अर्चा पूजा गयी तब महारजने देखा कि भगवान व्यासजी के शिष्य श्रीरोमहर्षण व्यास गद्दी पर बैठे हुए थे ॥ श्रीबलभद्रजीने देखा कि रोमहर्षण मुनिजी सूत जातिमें उत्पन्न होने पर भी उन श्रेष्ठ महर्षियोंसे उंचे आसन बैठे हुए है और श्रीबलभद्रजीके पधारने पर न तो अभ्युत्थान किया न तो स्वागत किया न अंजलिबद्ध नमस्कार किया । एसे असभ्य व्यवहारसे श्रीबलभद्रजी को क्रोध आ गया ।।२३।। और श्रीबलभद्रजी कहने कि यह लोमहर्षण प्रतिलोम जाती के होने पर भी इन उत्तम विप्रों से तथा धर्म के रक्षक हम लोगो से उप हुआ है । इस लिये यह दुर्मति रोमहर्षण मृत्युदंडका पात्र है ।।२४।। महर्षि व्यास भगवान का शिष्य होकर इतिहास पुराण धर्मशास्त्र आदि अनेक शास्त्रों का अध्ययन भी किया है । लेकिन अभी इसका अपने म संयम नहि है । यह रोमहर्षण विदेकी विनयी भी नहीं है, और उच्छ्रुखल है । इस अजितन्द्रियने व्यर्थ अप समर्थ पंडित मान लिया है । जैसे किसी नटकी समस्त क्रियाएं अभिनय मात्र होती है वैसे हि उनका सारा अ स्वांग के लिए है । उससे न इसका लाभ है और न किसी दुसरे का भी हित है ।।२५-२६।।

अदान्तस्यावि
एतदर्थो हि लो
एतावदुक्त्वा
हाहेति वादिनः

अस्मिन्, लोके,
॥२७॥ भगवान्, एतावत्,
खिन्नमानसाः, हा हा इति व

ननु, बहुज्ञः कथमे
किं तवेति चेत्तत्राह-एतदर्थ
इत्यर्थः अहनत् अहन् ॥२८॥

अत्राशङ्कते-नन्विति
श्रेयसे इति । "विद्या विवादाय
इत्याद्युक्तेः ॥२६॥ ननु शुभ
उत्तमलिङ्गधारिणो नीचा भूत्वोत्त
सर्वेश्वराज्ञारूपवेदातिक्रमकारित
इत्यादिपुराणात् ॥२७॥ तं सूतम् ।
कर्मरेखा" इत्याद्युक्तेश्चेति भावः

गुणाय उपशमादिफ
असंयतेन्द्रियस्य अत एव वृथा
महतां नाहन्तु सहे इत्यभिप्रायेण
प्रत्युत्तरेण तद्वधप्रतिषेधसम्भवात्
हस्ते तद्ग्रहणात् ननु कुशाग्रमात्रे
नहि नहि किन्तु सविनयमेवेत्या-
वासुदेवस्य द्वितीयव्यूहम् अत एव

गुणाय न भवन्ति शा
पण्डिताभिमानिनो दुष्टस्वभावस्य ज
कल्पन्ते, किन्तु केवलं दुरभिमाना
गुणाय न भवन्ति, केवलं वृत्याद्य
चाधीतान्यपि शात्राणि नटसङ्गान्नटस
अन्यत् समानम् ॥२६॥ हि एव, ए
यतः, अन्यत्तैर्व्याख्यातम् । तत्रोत्तमि

व्यासस्य शिष्यं
ानध्यासीनं तेभ्यो
रं प्रणामोऽञ्जलिश्च
तिलोमजः दुर्मतिः
मर्हति ॥२४॥ न
ाणानि बहून्यधीत्य

् । न कृतं प्रह्वणं
ानध्यास्ते विप्रेभ्य
ालेभ्यः अस्मदपि

सीनं कथावाचनार्थं
न्तं सूतं प्रतिलोमजं
द्वीक्ष्य माधवो रामः
मान् विप्रान् कस्मात्
र्मं पालयन्तीति तान्
वधम् अर्हति ॥२४॥
ाणानि भारतसहितानि

उनकी अर्चा पूजा हो
बैठे हुए थे ॥२२॥
योंसे उंचे आसन पर
न अंजलिबद्ध होकर
बलभद्रजी कहने लगे
म लोगो से उपर बैठा
का शिष्य होकर इसने
इसका अपने मन पर
न्द्रियने व्यर्थ अपने को
हे उनका सारा अध्ययन
६॥

अदान्तस्याविनीतस्य वृथा पण्डितमानिनः । न गुणाय भवन्ति स्म नटस्येवाजितात्मनः ॥२६॥
एतदर्थो हि लोकेऽस्मिन्नवतारो मया कृतः । वध्या मे धर्मध्वजिनस्ते हि पातकिनोऽधिकाः ॥२७॥
एतावदुक्त्वा भगवान् निवृत्तोऽसरूधादपि । भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः ॥२८॥
हाहेति वादिनः सर्वे मुनयः खिन्नमानसाः । ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो ॥२९॥

कर्दमक्षमा

अस्मिन्, लोके, हि, एतदर्थः, मया, अवतारः, कृतः, धर्मध्वजिनः, अपि, मे, वध्याः, ते, हि, अधिकाः, पातकिनः ॥२७॥ भगवान्, एतावत्, उक्त्वा, असद्वधात्, निवृत्तः, अपि, भावित्वात्, प्रभुः, करस्थेन, कुशाग्रेण, तम्, अहनत् ॥२८॥ खिन्नमानसाः, हा हा इति वादिनः, सर्वे, मुनयः, सङ्कर्षणम्, देवम्, हे प्रभो ! ते, अधर्मः, कृतः, इति, ऊचुः ॥२९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु, बहुज्ञः कथमेवं कुर्यात्तत्राऽऽह-अदान्तस्येति । गुणाय यथोचितानुष्ठानाय ॥२६॥ विप्रानध्यास्तामन्यद्वा किञ्चित्करोतु किं तवेति चेत्तत्राह-एतदर्थ इति । धर्मध्वजिन उत्तमलिङ्गधारिणः ॥२७॥ भावित्वादिति । न हि भवितव्यं केनापि परिहर्तुं शक्यत इत्यर्थः अहनत् अहन् ॥२८॥ ते त्वया ॥२९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्राशङ्कते-नन्विति । एवं महदवज्ञानम् । यथा नटशिक्षितप्राणायामादिर्न मोक्षाय तथाऽविनीतस्य शास्त्राभ्यासादिरपि न श्रेयसे इति । "विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय । खलस्य साधोर्विपरीतमेतज्ज्ञानाय दानाय च रक्षणाय ॥" इत्याद्युक्तेः ॥२६॥ ननु शुभाऽशुभफलभोक्तृत्वं कर्तुर्भवति किं तव शासने प्रयोजनमित्याह-विप्रानध्यास्तामित्यादिना । उत्तमलिङ्गधारिणो नीचा भूत्वोत्तमजातिचिह्नधारिणः । हि यतः । ते धर्मध्वजिनः । अधिका ब्रह्महत्यादिमहापातकिभ्योऽधिकपापिनः । सर्वेश्वराज्ञारूपवेदातिक्रमकारित्वात् । "नैतस्मादधिकं पापमहं मन्ये नराधिप । यद्वेदातिक्रमो लोके विनापदमकारयत् ॥" इत्यादिपुराणात् ॥२७॥ तं सूतम् । इत्यर्थ इति- "भवितव्यं भवत्येव प्रतिकारे कृते खलु" इत्याद्युक्तेः । "न हि चलति कदाचिद्भाविनी कर्मरेखा" इत्याद्युक्तेश्चेति भावः । करस्थकुशचालनमात्रेण मृत्युमापेत्यर्थः ॥२८-२९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गुणाय उपशमादिफलाय न भवन्ति शास्त्राणि कुतः अजितात्मनः प्राचीनापराधेनाजितचित्तस्य अतश्चादान्तस्य असंयतेन्द्रियस्य अत एव वृथा पण्डितमानिनः ॥२६॥ मयेत्येकवचनं श्रीकृष्णेनाभेदविवक्षया स वा परमकोमलस्वभावत्वेन महतां नाहन्तु सहे इत्यभिप्रायेण वा टीकायामुत्तमलिग्धारिण इत्यनधिकार्य्यपेक्षया ॥२७॥ उक्त्वेति स्वमस्येवान्यथा मुनिभिः प्रभुत्वेन तद्वधप्रतिषेधसम्भवात् तीर्थयात्रायामसतां वधान्निवृत्तोऽपि अहन् तथैव तन्मृत्योर्भावित्वात् करस्थेनेति तीर्थे ब्रह्मचारितया स्वे तद्ग्रहणात् ननु कुशाग्रमात्रेण हननं कथं घटेत तत्राह-प्रभुः सर्वं कर्तुं समर्थः ॥२८॥ खिन्नमानसाः सन्त ऊचुः किं सक्रोधं नहि नहि किन्तु सविनयमेवेत्या-हे प्रभो ! सर्वेश्वर ! ते त्वयाऽधर्मः कृत इति तथापि तथाविनये हेतुः सङ्कर्षणं स्वयं भगवतो वासुदेवस्य द्वितीयव्यूहम् अत एव देवं सर्वाराध्यमितिवास्तवार्थे तु न विद्यते धर्मो यस्मात्परमधर्म इत्यर्थः ॥२९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गुणाय न भवन्ति शास्त्राणि कुतः ? अजितात्मनोऽस्थिरचित्तस्य, अतोऽदान्तस्यासंयतेन्द्रियस्य, अत एव वृथा पण्डिताभिमानिनो दुष्टस्वभावस्य जनस्य; किंवा वेदाद्यध्ययनानन्तरं दुःसङ्गादिदोषाददान्तादेः स्वतः शास्त्राण्यधीतान्यपि न फलाय कल्पन्ते, किन्तु केवलं दुरभिमानायैव भवन्तीत्यर्थः । तत्र दृष्टान्तः नटस्येवेति । यथा नृत्यादिकौशलार्थं नटेनाधीतानि शास्त्राणि गुणाय न भवन्ति, केवलं वृत्त्याद्यर्थमेव; यद्वा, नटेन गृहीतोऽपि विप्रादिवेषो यथा तत्फलाय न कल्पते, तद्वदित्यर्थः । पक्षान्तरे अधीतान्यपि शात्राणि नटसङ्गान्नटस्य सतो यथेति, स्म प्रसिद्धौ निश्चये वा; अन्यत्तैर्व्याख्यातम्; यद्वा, गुणाय उपशमादिफलाय; अन्यत् समानम् ॥२६॥ हि एव, एतदर्थ एव, अस्मिन् मर्त्येऽवतारः श्रीवैकुण्ठादवतरणम् । एतच्छब्दार्थमेवाह-वध्या इति । हि परः, अन्यत्तैर्व्याख्यातम् । तत्रोत्तमलिङ्गधारिण इति अधमा अपि ये उत्तमानां लिङ्गानि धारयन्तीत्यर्थः । अथवा धर्मध्वजिनो

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दाम्भिकाः ॥२७॥ उक्त्वेति स्वमनस्येव, अन्यथा मुनिभिः प्रत्युत्तरेण तद्वधप्रतिषेधसम्भवः । भगवान् सर्वज्ञोऽपि तीर्थयात्र्य असतां वधान्निवृत्तोऽप्यहन् । कुतः ? भावित्वात्तथैव तन्मृत्योर्भाव्यत्वात्; करस्थेनेति तीर्थस्नानाद्यर्थं किंवा तीर्थे ब्रह्मचारितया हस्ते तद्ग्रहणात् । ननु कुशाग्रमात्रेण हननं कथं घटेत ? तत्राह–विभुः सर्वं कर्तुं समर्थ इति ॥२८॥ सङ्कर्षणं द्वितीयव्यूहं साक्षाद्भगवन्तम् अतो देव जगत्पूज्यम्; यद्वा, श्रीकृष्णेन सहाग्रजत्वादिना अपृथग्भूतम् । प्रमो ! हे अस्मत्स्वामिन् ! किञ्च, हे यदुनन्दन सद्धर्म्मपालनाद्यर्थं यदुकुलेऽवतीर्णेति त्वया अस्मत्कृतमवश्यं पाल्यमेवेति, यद्वा, यदुकुलप्रहर्षार्थं यथा ययातिशापाददेयमपि राजत्वधर्ममुग्रसेनाय भवता दत्तम्, तद्वदिति भावः ॥२९-३०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२३-३०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अदान्तस्य दमविनयादिरहितस्य वृथा पण्डितमात्मानं मन्यमानस्य गुणाय न भवन्ति इतिहासाद्यध्ययनादीनि शेषः किन्तु दोषायैवेति भावः । अदान्तस्येत्यादि विशेषणैर्नास्याज्ञानकृतमध्यासनाधिष्ठानमपि त्वहङ्कारप्रयुक्तमिति सूच्यते ॥२६ प्रियानध्यास्तान्यद्वा करोति किं तवेत्यत आह–एतदर्थ इति । कोऽसावर्थः ? धर्मध्वजिनः उत्तमवेषधारिणो मे वध्या इत्येषः, कुतः ? हि यस्मात्ते धर्मध्वजिनोऽधिकाः पातकिनो अतो दुष्कृद्विनाशार्थमवतीर्णेन मयैवंविधा अवश्यं वध्याः इत्यर्थः ॥२७॥ एतावदि असतां धर्मान्निवृत्तोऽपि भगवान् रामः भावित्वाद्भवितव्यस्य केनाऽप्यपरिहार्यत्वात्तं रोमहर्षणं कुशाग्रेण अहनत् ॥२८॥ हाहेति खिन्नं मानसं येषां ते ऊचुः उक्तिमेवाह–अधर्म इत्यादिना सपादत्रयेण । ते त्वयाऽधर्मः कृतः ॥२९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

गुणाय पुण्यफलदानलक्षणाय न भवन्ति ॥२६॥ एतदर्थः दुष्टनिग्रहार्थः ॥२७॥ असद्वधान्निवृत्तोऽपि मरणस्यावश्यम्भावित्वात् ॥२८-२९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१०-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एष ते जनितेत्यादि सरस्वती वक्ति । एष वसुदेवः ते तव अजनिता अतः अजनितायामपि अजत्वेऽपि जातः तात स्वीकृतः वस्तुतस्तव जनिरेव नास्ति कुतस्तातसम्भावना यदर्थं यस्य वसुदेवपूर्वपूर्वजन्मकृतस्य निमित्तं जीवसि जीव इवा जातवत्प्रतीयसे आचारार्थे क्विपि कृते तल्लोपात् सिद्धम् । ईक्षतो वीक्षमाणस्य तव पुरतोऽमुं वधिष्ये पाहि रक्ष चेत् यतस्त्वम् ईश बालिश ! केशिनाशन ! बालाः केशाः सन्त्यस्येति बाली केशी तं श्यतीति कः ॥२६-२७॥ ततो मुहूर्तमित्यादि ततस्तदन अस्वजनानां परेषां शत्रूणाम् अनुषङ्गतः अमुहूर्तं क्षणमात्रमेव उपप्लुत उपद्रुतः सन् महानुभावः श्रीकृष्णस्तत् ताम् आसुरीं म अबुध्यत यतः प्रकृतौ भावे सर्वज्ञत्वे स्थितः ॥२८-२९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

न गुणाय शास्त्राणि नोपशमादिफलाय ॥२६॥ ननु विप्रानध्यास्तामन्यद्वा किमपि करोतु निरभिमानस्याक्रोधनस्य पा तव किमनेनेत्यत आह–एतदर्थमिति । धर्मध्वजिनः धर्मरहितत्वेऽपि स्वस्य धर्मवत्त्वं प्रदर्शयन्तः ॥२७॥ भावित्वात्तन्मृत्यो भावित्वात् न हि भवितव्यं केनापि परिहर्तुं शक्यत इति भावः ॥२८-२९॥

गूढार्थदीपिनी

धर्मध्वजिनः (नीचाः सन्तोऽपि उत्तमजातिचिह्नधारिणः ।) दाम्भिकाः ॥२७॥ भावित्वात् भवितव्यस्य अपरि कुशाग्रेण चालनमात्रेण ॥२८॥ ते त्वया ॥२९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सेतिहासपुराणानि धर्मशास्त्राणि च गुणाय यथोचितानुष्ठानाय न भवन्ति ॥२६॥ धर्मध्वजिनः यथार्थधर्मानुष्ठानाभावेऽपि आत्मनो धार्मिकत्वख्यापकाः ॥२७॥ भावित्वात्तन्मृत्योस्तथैव भावित्वात् ॥२८-२९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु विद्यया कथमस्य गुणा नोत्पादिताः कथमयमेतादृशो जात इत्याह-अदान्तस्येति। विद्या गुणोत्पादिका आश्रयदोषाभावे भवति। तत्राऽजितेन्द्रियत्वं महानाश्रयदोषः "पराञ्चि खानि व्यतनोत्स्वयम्भूः" इति सहजबहिर्मुखानि विद्या ह्यन्तर्मुखं कर्तुमिच्छति तदिन्द्रियाणां प्रतिबन्धेन भवतीति इन्द्रियजयो मृग्यते। किञ्च विद्याग्रहणे विद्याबाधकधर्माभावो हेतुः। "विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि। असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती यथा स्यामि"ति। अविनीतस्य विद्या निर्वीर्येति न गुणजननसामर्थ्यं किञ्च वृथा पण्डितमानिन इति विद्या बुद्ध्या गृहीता सती स्वकार्यं करोति तदभिमानात् तस्या ग्रहणमेव यस्तु पाठव्यतिरेकेणापि मन्यते पण्डितोऽहमिति स प्रयोजनाभावात् स्वार्थं विद्यां न ग्रहिष्यत्येव। कथं विद्याफलं जनयेत् अतो न गुणाय भवन्ति पुराणादीनि किञ्च नटस्येवेति परप्रदर्शनार्थमेव यो विद्यां गृह्णाति तस्य न विद्यातः फलं यथा नटस्य किञ्च अजितात्मनः अन्तःकरणजयाभावे उत्पादिता अपि गुणाः तामसैर्भावैस्तिरोहिता भवन्ति। अतोऽस्य सर्वमेवं वर्तत इति दोषपञ्चकसद्भावान्नास्मिन् विद्याफलम् ॥२६॥ नन्वस्य दोषेणायमेव नष्टो भवतु किं तव यथास्या विनयो धर्मः एवं क्षमापि तदभावे तवापि दोष एवेत्याशङ्क्याह-एतदर्थ इति। इदं नाधिकारिभिः कर्तुं शक्यम् अन्यथा अधिकारस्वीकारो व्यर्थः स्यात् यथा परमहंसानां सर्वातिक्रमसहनं युक्तम् एवं राज्ञेऽपि चेत्तदा सर्वनाशः स्यात्। एतदर्थमेव ममावतारः येन धर्मो रक्षितो भवति। अतस्तदेव मम कर्तव्यम्। धर्मे च प्रतिपक्षा निराकर्तव्याः तत्राधर्मकारिभ्योऽपि धर्मध्वजिनो दुष्टाः अन्यानपि नाशयन्तीति तेषां दोषाधिक्यमाह-ते हि पातकिनोऽधिका इति। ते अधिकाः पातकिनः साक्षान्निषिद्धाचरणमधर्मः तस्योत्कर्षः महापातकं तेभ्योऽपि धर्मध्वजिनः अधिकाः विधर्मः परधर्मश्चेति वाक्ये एतन्निरूपितम्। उपधर्मास्ते तद्धर्मनिवृत्तीच्छायामपि न निवर्तन्ते नापि प्रतीकारार्थम् इच्छामपि कुर्वन्ति अतोऽस्मिन् विद्यमाने अधर्मानुवृत्तिर्भविष्यतीति वधावश्यकता निरूपिता ॥२७॥ ततो यत्कृतवांस्तदाह-एतावदुक्त्वेति। स हि सङ्कल्पमारभ्य असद्वधादपि निवृत्तः वृत्तिनोऽवध्यवधोऽपि निषिद्ध इति तथापि क्षोभाधिक्यात्तथैव भावित्वात् धर्मपरीक्षार्थं लौकिकं शस्त्रं परित्यज्य तत्रापि स्वहस्तस्थितं सूक्ष्ममेव कुशं मारणार्थं गृहीतवान्। हस्तस्थितौ तस्मिन् क्रियाशक्त्यध्यासः मारणे च हेतः प्रभुरिति ॥२८॥यद्यपि तन्मारणं धर्मः तथापि धर्मप्रवर्तकानां नाभिप्रेतः अतस्ते खिन्ना जाता इत्याह-हाहेति। सर्व एव स्वाभिलषितनाशात् हाहेति वादिनः ते हि भगवत्कथां शृण्वानाः तद्विघातो जात इति खिन्नमानसा जाताः यतो मुनयः श्रुतो हि भगवान् मन्तव्यो भवति साक्षाद्गुरोः सकाशात् अध्ययनव्यापारे मननं बाधितं भवेत् अतोऽयं प्रसङ्गाद्दूहं समागतः सर्वं श्रावयतीत्यनायासेनाभिलषितसिद्धिः तन्नाशान्मनःखेदः तथापि जात एवार्थमिति तूष्णीं स्थातव्यं किमित्युपालम्भः क्रियत इति तत्राह-सङ्कर्षणमिति। स ह्यन्यत्र धर्मोऽन्यत्र प्रयोजयितुं शक्तः दृष्टदृश्ययोर्मेलकत्वात् तत्रापि देवः अलौकिकमपि योजयेत् अतः स वक्तव्य एवेत्यूचुः ते त्वया अधर्मः कृत इति अयमधर्मः तवैव जातो नास्माकमयमभिप्रायः प्रभो इति सामर्थ्यमेव त्वया प्रकटितं न तु ज्ञानमिति सूचितम् ॥२९॥

श्रीसुबोधिनीसारः

तथाप्यदान्तस्य बहिर्मुखस्याविनीतस्याऽनम्रस्य वृथा पण्डितम्मन्यस्य गुणा गुणाय न भवन्ति। अजित आत्मा मनो यस्य तस्य नटस्येव स्म प्रसिद्धम् ॥२६॥ एषोऽर्थः। प्रयोजनं यस्य सोऽवतारोऽस्मिल्लोके मया कृतः धर्मध्वजिन उत्तमलिङ्गधारिणो मे मया वध्या हन्तव्याः। तत्र हेतुः। ते हि अधिकाः पातकिनो महापातकिनः ॥२७॥ एतावदुक्त्वा भगवान् बलोऽसतां वधात् मारणान्निवृत्तोऽपि तीर्थयायित्वात् भावित्वात् करस्थेन हस्तस्थेन कुशाग्रेण तं सूतमहन्। यतः प्रभुः समर्थः। एतेन भवितव्यं भवत्येवेति सूचितम् ॥२८॥ उद्विग्नचित्ता हा हेति भाषिणः सर्वे मुनयः सङ्कर्षणं देवमूचुः हे प्रभो ! ते त्वयाऽधर्मः पापं कृतः ॥२९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु तर्हि कथमस्य विद्यावतोऽपि वैपरीत्यम् इत्यत आह-अदान्तस्येति। अस्य तानीतिहासादीनि गुणाय तात्पर्यज्ञानाय न भवन्ति स्म। तत्र हेतुमाह-वृथा यथार्थज्ञानाभावेऽप्यात्मानं पण्डितं मन्यमानस्येति। तत्र हेतुमाह-अविनीतस्येति। तत्रापि

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हेतुमाह–अदान्तस्येति, अजितेन्द्रियस्येत्यर्थः । अजितेन्द्रियत्वे हेतुमाह–अजितात्मन इति, अवशीकृतान्तःकरणस्येत्यर्थः इन्द्रियाणां तदधनत्वादिति भावः । निष्फलत्वे दृष्टान्तमाह–नटस्येवेति । नटेन मायाविना यथा परप्ररोचनार्थं प्रदर्शिता अपि राजविभव स्वभोगसुखजनका न भवन्ति, तथाऽवशीकृतान्तःकरणेन गृहीतान्युपदिष्टान्यपि शास्त्राणि स्वफलप्रदानि नैव भवन्तीत्यर्थः ॥ विप्रानध्यास्तामन्यद्वा करोतु, तेन तव किम्, इत्यत आह–एतदर्थ इति । दुष्टवधार्थः । अतो धर्मध्वजिनः उत्तमवेषधारणे धर्मिष्ठत्वप्रकाशनपरा एव केवलम्, वस्तुतस्त्वधर्मिष्ठत्वेन धर्ममर्यादाभङ्गमर्तारो मे मया वध्याः, हि यस्मात्तेऽधिकाः पापिनः अधर्मिष्ठा हि लोकलज्जाभयाद्गुप्तं पापं कुर्वन्ति तेन स्वयमेव नरके पतन्ति, धर्मध्वजिनस्तु प्रसिद्धतया पापं कुर्वन्तोऽन्यान् कारयन्तो नरके पातयन्तीति तेषां पापाधिक्यं बोध्यम् । अतोऽस्य तादृशत्वादयमपि वध्य एवेत्याशयः ॥२७॥ असतां वधान्निवृत्तो भगवान् रामः एतावदुक्त्वा भावित्वाद्भवितव्यस्य केनाप्यपरिहार्यत्वात्तं रोमहर्षणं करस्थेन कुशाग्रेण अहनत् अहन् । कुशमात्र हनने कथं मरणम् इत्याशङ्क्य तत्प्रभावात् इत्याह–प्रभुरिति ॥२८॥ तदा हाहेति वादिनः सर्वे मुनयः सङ्कर्षणं प्रत्यूचुः । मुनयः यथार्थवत्कृत्वा ईश्वरं प्रति उपालम्भवचनेऽपि भयं नास्ति इति सूचयन्नाह–देवमिति । हाहाशब्दे हेतुमाह–तद्वधेन खिन्नं मानसं ते । तद्वचांस्याह–हे प्रभो ! वधात्मकोऽधर्मस्ते त्वया कृतः ॥२९॥

अन्वितार्थप्रकाशिका

अदान्तस्येति । अदान्तस्य अविनीतस्य वृथा पण्डितमानिनः अजितात्मनः अजितचित्तस्य अस्य तानीतिहासादीनि गुणाय तात्पर्यज्ञानाय उपशमफलाय वा न भवन्ति स्म । यथा नटेन मायाविना यथा परप्ररोचनार्थं प्रदर्शिता अपि राजविभव स्वभोगसुखजनका न भवन्ति तथाऽवशीकृतान्तःकरणेन गृहीतान्युपदिष्टान्यपि शास्त्राणि स्वफलप्रदानि नैव भवन्ति ॥ एतदिति । हि यस्मात् अस्मिन् लोके मया एतदर्थः दुष्टवधार्थ एवावतारः कृतः अतो धर्मध्वजिनः बहिर्धर्मप्रकाशकाः अन्तः पापिनः ते मम वध्याः । हि यस्मात्तेऽधिकाः पापिनः अधर्मिष्ठा हि लोकलज्जाभयाद्गुप्तं पापं कुर्वन्ति तेन स्वयमेव नरके पतन्ति । धर्मध्वजिनस्तु अन्यानपि पातयन्ति ॥२७॥ एतावदिति । तीर्थयात्राकारितया असतां वधान्निवृत्तोऽपि भगवान् रामः एतावदुक्त्वा भावित्वाद्भवितव्यस्य केनाप्यपरिहार्यत्वात्तं रोमहर्षणं करस्थेन कुशाग्रेण अहनत् अहन् । 'बहुलं छन्दसि' इति शब्लुगभावः ॥२८॥ हाहेति । तदा खिन्नमानसाः हाहेति वादिनः सर्वे मुनयः सङ्कर्षणं देवम् ऊचुः । हे प्रभो ! एतद्वधरूपः अधर्मः ते त्वया कृतः । वस्तुतो नास्ति धर्मो यस्मात् स परमधर्म इत्यर्थः ॥२९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु शास्त्रज्ञोऽपि कथं विरुद्धमाचरेत्तत्राह–अदान्तत्वादिदोषयुक्तस्य । इतिहासादीनि । गुणाय यथायोग्याचरणाय न भवन्ति ॥२६॥ धर्मध्वजिनो धर्मित्वख्यापनायोपरिष्टाद्धर्माचरणपराः ॥२७॥ अहनत् अहन् ॥२८॥ ते त्वया ॥२९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अदान्तस्येति । अदान्तस्य अवशीकृतबाह्येन्द्रियस्य अविनीतस्य विनयादिरहितस्य वृथा मिथ्यैव पण्डितम् पण्डितमात्मानं मन्यमानस्य पुंसः अध्ययनादयो गुणा इति शेषः । अजितात्मनः नटस्य इव गुणाय गुणख्यात्यै अपि न भवन्ति किं तु दोषायैव भवन्तीति भावः । अदान्तस्येत्यादिविशेषणैर्नास्याज्ञानकृतमध्यासनाधिष्ठानमपि त्वहङ्कारप्रयुक्तमेवेति ॥२६॥ विप्रानध्यास्तामन्यदपि करोतु किं तवेत्यत आह । एतदर्थमिति । अस्मिन् लोके मया अवतारः एतदर्थं कृतः कोऽसावर्थः । ये धर्मध्वजिनः अन्तरधर्मिणः सन्तोऽपि लोकप्रतारणार्थमुत्तमधर्मिवेषधारिणः ते मे मम वध्याः एषः । यस्मात् ते धर्मध्वजिनः अधिकाः पातकिनः अतो दुष्कृतविनाशार्थमवतीर्णेन मया एवंविधा अवश्यं वध्या इत्यर्थः एतावदिति । भगवान् प्रभुः समर्थो रामः एतावत् उक्त्वा सतां यो वधस्तस्मात् निवृत्तः अपि भावित्वात् भवितव्यस्य केनाप्यपरिहार्यत्वात् तं रोमहर्षणं करस्थेन कुशाग्रेण अहनत् । कुशाग्रेमात्रेण मरणस्यासम्भवेऽपि अस्त्रमन्त्राभिमन्त्रितेन तेनाहन्नित्यर्थः । ननु

'इहोपहूतो भगवान् मृत्युः शामित्रकर्मणि । न कश्चिन्मित्रयते तावद्यावदास्त इहान्तकः ॥' इत्युक्तेः ।

कथमत्र रोमहर्षणमरणमिति चेत्

'ब्राह्मणं कुलसम्पन्नं भक्तान्विष्णोश्च तं तथा । आयातान् वीक्ष्य नोत्तिष्ठेत्सदुःखैः परिभूयते ॥'

इति स्मृतेर्महानुभावागमनेऽभ्युत्थानाञ्जल्याचरणमावश्यकम् । तदनाचरणे बृहस्पतिं प्रत्यनभ्युत्थाने देवेन्द्रस्येव अगस्तिं प्रति तथानाचरणे इन्द्रद्युम्नस्येवावश्यं दुःखाप्तिदर्शनाद्भगवन्तं रामं तद्भक्तद्विजैः सहैवायान्तं दृष्ट्वा रोमहर्षणेन तन्नाचरितम् । तेन तस्मिन् धर्मध्वजित्वं च प्राप्तम् । तद् दृष्ट्वा भावित्वाच्च कर्तुमकर्तुमन्यथाकर्तुं समर्थस्य रामस्य हृदि जातस्य क्रोधोदयस्य तन्मरणहेतुकत्वात् कथञ्चनापि न तन्मरणे बाधः ॥२८॥ हाहेतीति । हाहेति वादिनः खिन्नमानसाः सर्वे मुनयः हे प्रभो ! ते त्वया अधर्मः कृतः । इति सङ्कर्षणं देवम् ऊचुः ॥२९॥

कृष्णप्रिया

जो लोग केवल तिलक वेष आदि धर्म के चिह्न धारण करते है परन्तु धर्म का पालन नही करते वे लोग अधिक पातकी है । इस लीये वे लोग मेरे लीये वध के योग्य है । क्योंकि इस भूतल पर मैने धर्म ध्वजी को शिक्षा करने के लिये अवतार लिया है ॥२७॥ यद्यपि भगवान बलभद्रजी तीर्थ यात्रा के कारण दुष्टो को दंड से भी अलग हो गये थे लेकिन इतना कह कर श्रीबलरामजी ने अपने करकमलमें रहे हुअे कुशाग्र से रोमहर्षण पर प्रहार कीया और उनका शरीर छुट गया भावी ही एसा था । श्रीरोमहर्षणजी के देह छुटते ही सर्व ऋषिमुनीवृन्द हा-हाकार करने लगे और सर्व चिन्त मानस हो गये इन लोगोनें भगवान श्रीबलभद्रजी से कहा कि महाराज ! हे प्रभो ! आपने महान् अनुचित कीया और महान अधर्म किया ॥२८-२९॥

अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनन्दन । [1]आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते ॥३०॥
अजानतैवाचरितस्त्वया ब्रह्मवधो यथा । योगेश्वरस्य भवतो नाम्ना योऽपि नियामकः ॥३१॥
यद्येतद् ब्रह्महत्यायाः पावनं लोकपावन । चरिष्यति भवाँल्लोक[2]संग्रहोऽनन्यचोदितः ॥३२॥

कर्दमक्षमा

हे यदुनन्दन ! अस्माभिः यावत्, सत्रम्, समाप्यते, तावत्, आत्मक्लमम्, आयुः, च, ब्रह्मासनम्, अस्य, दत्तम् ॥३०॥ त्वया, अजानता, एव, ब्रह्मवधः, आचरितः, योगेश्वरस्य, भवतः, आम्नायः, अपि, यथा, न, नियामकः ॥३१॥ हे लोकपावन ! यदि, एतद्, ब्रह्महत्यायाः, पावनम्, भवान्, चरिष्यति, अनन्यचोदितः, लोकसङ्ग्रहः, (भविष्यति) ॥३२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अधार्मिकप्रतिलोमजवधः कोऽयमधर्म इति चेत्तत्राहुः–अस्येति । पुराणप्रवचनायाऽऽत्मनः शरीरस्य नास्ति क्लमो यस्मिंस्तदायुश्च दत्तमिति ॥३०॥ ब्रह्मवधेऽपि किं ममेश्वरस्येति चेत्सत्यमेव तथापि प्रायश्चित्तं कर्तव्यमित्याहुः–योगेश्वरस्येति सार्धेन । आम्नायो ब्राह्मणो न हन्तव्य इत्यादिलक्षणः ॥३१॥ तथाप्येतस्याः ब्रह्महत्यायाः पावनं प्रायश्चित्तं हे लोकपावन ! अनन्यचोदितः स्वयमेव भवान्यदि करिष्यति तर्हि लोकसंग्रहो भविष्यति नान्यथेति ॥३२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अधार्मिकेत्यादि भगवदाक्षेपं समादधिरे। अस्य सूतस्य । "अग्निर्वै ब्राह्मणः" इति श्रुतेः । तदुद्भूतत्वादयं ब्राह्मण एवातः एव ब्रह्मासनं वेदेतिहासपुराणवक्तृब्राह्मणयोग्यासनं दत्तमिति । क्लमो ग्लानिः ॥३०॥ इवयथाशब्दाभ्यां जानतैव ब्रह्मवधः कृत इति प्रतीयते इत्याह–ब्रह्मवधेऽपीति । नियामक इत्थं कुर्वित्थं मा कुर्वित्येवं नियन्ता । न कुत इति चेदाह–योगेश्वरस्य ज्ञानिनामधिपतेः । "त्रैगुण्यविषया वेदाः" इत्युक्तेर्ज्ञानिनोऽतीतविधिनिषेधत्वेन कुतस्तदधिपस्य तदाशङ्केति भावः । यद्यपि न नियामकस्तथापीति । "न मे पार्थास्ति कर्तव्यं वर्त एव हि कर्मणि" इति श्रीमुखोक्तेः । अन्यथा प्रायश्चित्ताकरणे । जगदान्ध्यं प्रसज्येतेति भावः ॥३१-३२॥

---

१. आयुश्चास्याक्षयं-विज. । २. सङ्ग्रहो नान्य-वीर. ; सङ्ग्रहं-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किञ्च, हे यदुनन्दन ! सद्धर्मपालनाद्यर्थं यदुकुलेऽवतीर्णेति त्वया दस्मद्दत्तमवश्यं पाल्यमेवेति भावः ॥३०॥ यथा यथाव अजानतैव विचाररहितेनैव आचरितः (इव) ब्रह्मवध इवेति योज्यम् एवं ब्रह्मवधसदृश एवायं न तु ब्रह्मवधः किञ्च योगेश्वरस्येति ॥३१ तथापि यदीति नान्यचोदितः सर्वेश्वरत्वेनानन्यप्रेर्य्योऽपि भवान् यद्वा अनन्यप्रवर्तितो लोकसङ्ग्रहः तद्रक्षणे हेतुः लोकपावनेति ॥३२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ब्रह्मवधो यथेति ब्रह्मवधसदृशोऽस्य वधः, यद्वा, यथा यथावत्, ब्रह्मवध एव कृतः, अस्माभिर्दत्तब्रह्मासनत्वात् योगेश्वरस्य परमेश्वरस्येत्यर्थः ॥३१॥ हे लोकपावनेति यथाकथञ्चित्त्वन्नामोच्चारणादिना महापातकिनोऽपि पूयन्ते, तव तु पापप्रायश्चित्तशङ् कुत इति भावः। नान्यचोदित इति परमेश्वरत्वेनानन्यप्रेर्यत्वात्, प्रायश्चित्तायोग्यत्वाच्च ॥३२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

आम्नायोऽपि न नियामकः कीर्तनकृदित्यर्थ इति ॥३१॥ भवान् करिष्यति लोकसङ्ग्रहं लोकसङ्ग्रहः स्यादीत्यर्थः ॥३२-३४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अधार्मिकप्रातिलोमजवधः कोऽयमधर्मः ? इत्यत आहुः-अस्येति सार्धेन । हे यदुनन्दन ! अस रोमहर्षणस्यास्माभिर्ब्रह्मासनं यावान् यावता कालेन सत्रं समाप्यते तावदात्मनो देहस्य न क्लमः श्रमो यस्मिन् तदायुश्च त पुराणवक्त्रे ब्राह्मणाय देयं यस्मान्न प्रत्युत्थीयते तद्ब्रह्मासनमित्यर्थः ॥३०॥ अजानतेति। अतस्त्वया अजानतैव आचरितं कृतं य ब्रह्मवधः ब्रह्महत्या तद्वत्। ब्रह्महत्यासदृशं पापं कृतमित्यर्थः। ननु ब्रह्मवधादपि किं ममेश्वरस्येत्यत आहुः-योगेश्वरस्येति सार्धे यद्यपि योगेश्वरस्याविद्यास्पर्शोपयुक्तयोगनिर्वाहकस्याकर्मवश्यस्य तव "ब्राह्मणो न हन्तव्यः" इत्यादिलक्षण आम्नायोऽपि न नियामक यद्यपि त्वं न विधिवश्य इत्यर्थः ॥३१॥ तथापि हे लोकपावन ! ब्रह्महत्यायाः पावनं प्रायश्चित्तं चरिष्यति चरत्वनुतिष्ठत्वित्यर्थः किमर्थमित्यत आहुः-नान्यैश्चोदितः स्वयमेव यदि भवांश्चरिष्यति तर्हि लोकसङ्ग्रहः स्यादित्यर्थः। "यद्यदाचरति श्रेष्ठः" इत्युक्ते लोकाननुशिक्षितुं चरेति भावः ॥३२॥

श्रीमद्विजयध्वजकृता पदरत्नावली

ब्रह्मासनं ब्राह्मणमध्ये ब्राह्मणयोग्यासनम् ॥३०॥ अस्य निधनं त्वया अजानतैव यद्वाऽजानता ब्राह्मणवधसमानदोषोऽयमित्याशयेनाह-ब्रह्मेति। भवत आम्नायो विधिनिषेधशासि शास्त्रं नियामकम् इदं कुरु नेदमिति नि नास्ति कुत इत्यत्राह-योगेश्वरस्येति ॥३१॥ विध्यगोचरत्वात् ऋषयः स्वहार्दं विज्ञापयन्ति-यदीति। यदि भवान् त्वं ब्रह्महत्या एतत्पावनं शुद्धिलक्षणं परिहारं चरिष्यति तर्हि लोकसङ्ग्रहं करिष्यति कुतोऽत्राह - नेति ॥३२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१०-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं वदन्तीत्यादि हे राजर्षे के च न अन्विता मुनय एवं वदन्ति न तु तत्सत्यं सर्वज्ञस्य श्रीभगवतस्त सरस्वत्यैव तत्समाधीयते ॥३०-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आत्मनो देहस्य नास्ति क्लमो यस्मिन् तादृशमायुश्च दत्तम् ॥३०॥ अजानतैव जनेन यथा आचर्यते तथा सर्वै त्वयेत्यर्थः। किन्तु त्वयि न पापसम्भावनेत्याह-योगेश्वरस्येति ॥३१॥ एतस्याः ब्रह्महत्यायाः पावनं प्रायश्चित्तं भवान् यदि च तदैव लोकसङ्ग्रहो भविष्यति नान्यथा यतः स अनन्यचोदितः अनन्यप्रवर्तितः ॥३२॥

गूढार्थदीपिनी

अस्येति सार्धम् । आत्मनो देहस्य नास्ति क्लमः क्लेशो ग्लानिर्वा यत्र तथाभूतमायुः । इव यथा शब्दाभ्यां जानतैव ब्रह्मवधः कृत इति प्रतीयते ॥३०॥ योगेश्वरेति सार्धम् । आम्नायः वेदोऽपि नियामकः आदेशकर्ता न । तथापि यदि अनन्यचोदितः सन् स्वयमेव पावनं प्रायश्चित्तं करिष्यति तदा लोकसङ्ग्रहो भविष्यति । लोका अपि एवं करिष्यन्ति नान्यथेति ॥३१॥ वधस्य निर्वेशं प्रायश्चित्तम् । अनुग्रहः सङ्ग्रहः । प्रथमे कल्पे मुख्यपक्षे यावान् नियमः मुख्यं प्रायश्चित्तं स तु विधीयताम् (उपसर्गवशात् दधातेरुपदेशार्थत्वम् ।) उपदिश्यताम् ॥३२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आत्मनो देहस्य नास्ति क्लमः क्लेशो यस्मिन् तदायुश्च दत्तम् ॥३०॥ अजानतैवेति "आचार्यशास्ता या जातिः सा नित्या साऽजरामरा" इति महर्षिणोत्कृष्टायां जातौ सर्वाभिमाननिरासपूर्वकपरब्रह्मात्मकत्वलक्षणायां निवेशितस्यात एवास्माभिः ब्रह्मासने स्थापितस्य सर्वज्ञेनापि त्वया भावित्वादजानतेव यथा यथावदेव ब्रह्मवधः कृतः इत्यर्थः । यद्यपि योगेश्वरस्य भवतः "ब्राह्मणो न हन्तव्यः" इत्यादिलक्षण आम्नायोऽपि नियामकः इदं कुर्वित्येवं नियोजको नास्ति तस्य जीवविषयत्वात् ॥३१॥ तथापि हे लोकपावन ! नान्यचोदितः स्वेच्छयैव ब्रह्महत्यायाः पावनं प्रायश्चित्तं यदि चरिष्यति तर्हि लोकसङ्ग्रहो भविष्यतीत्यर्थः ॥३२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

कथमधर्ममित्याशङ्कायामाह–अस्य ब्रह्मासनं दत्तमिति । अन्यस्मात् कथाश्रवणं दोषायेति ब्रह्मासनं दत्तवन्तः यावदयमासने उपविश्य तिष्ठति तावद्ब्राह्मण एवेति अत एवानेनोत्थितं तैस्तु स्वब्राह्मणत्वमत्र स्थापितमिति तेषामुत्थानेऽप्यस्यानुत्थानं न हि ब्राह्मणः क्षत्रियं मन्यते धर्मस्तु अयुक्ते ब्रह्मत्वं स्थापितमिति वधे सानुकूलः अस्माभिरिति स्वसामर्थ्यं पापयन्ति यदुनन्दनेति ब्राह्मणहृदयानभिज्ञत्वं पितापुत्रौ विजानीयादिति वाक्यात् क्षत्रियः पुत्रो भवति ततः पितुः अभिप्रायाज्ञानं तव प्रयुक्तमिति गूढोऽभिप्रायः किञ्च अस्मद्वाक्यमपि त्वया नाशित इत्याह–आयुश्चेति । यद्यपि ब्राह्मणानां कृतिः अन्यथापि भवेत्तथापि वाक् मृषा भवितुं नार्हति अस्माभिश्च अल्पायुरयं ज्ञात्वा अस्मै आयुर्दत्तं यावत् सत्रं समाप्यते तावदस्मदायुरत्र तिष्ठति अतोऽस्माकमायुषोऽपि क्षयो जातः सूर्यो धर्मादिकरणदशायाम् आयुर्नगृह्णातीत्यवोचाम किञ्च आत्माक्लमं च आत्मनो देहस्य क्लमाभावः अतः स्वकीयदानमलौकिकदानं च स्वयं नष्टमित्याक्रोशो जातः ॥३०॥ तर्हि किं पर्यवसितं जातमित्याकाङ्क्षायामाहुः–अजानतैवाचरितमिति । यथा ब्रह्मवधः तथास्य च वध इति महापातकसमत्वम् अज्ञानात् कृतमिति प्रायश्चित्तार्हता कामतो ब्राह्मणवधे निष्कृतिर्न विवक्षितेति तर्हि किं कर्तव्यमित्याकाङ्क्षायामपि आह–योगेश्वरस्येति । यो हि जीवः तस्यैव कर्मणा गुणदोषौ भवतः भवांस्तु योगेश्वरो ब्रह्म अतो भवतो नियामक आम्नायोऽपि न भवति वेदेन हि सर्वार्थो नियम्यते अतो यद्यपि तव न वधदोषः प्रकारान्तरेण धर्माभीप्सितमप्युक्तम् ॥३१॥ तथापि प्रायश्चित्तं कर्तव्यमित्याहुः–यद्येतद्ब्रह्महत्याया इति । एतादृशब्रह्महत्यायाः पावनं प्रायश्चित्तं तदा एव तव लोकसङ्ग्रहः इति चेत् तत्राहुः–लोकपावन इति । लोकपावित्र्यार्थमेव त्वया समागतमिति यथा वधाभावे त्वया अवतारवैयर्थ्यमुक्तं तथा प्रायश्चित्ताकरणेऽपि लोकापकाराभावादवतारवैयर्थ्यमिति भावः ॥३२॥

श्रीसुबोधिनीसारः

हे यदुनन्दन ! अस्यास्मै ब्रह्मासनमस्माभिर्दत्तं पुराणवाचनार्थम् आत्मनः शरीरस्य च क्लमो ग्लानिर्यस्मिंस्तदा चास्माभिर्दत्तं यावत्सत्रं पूर्यते तावत् ॥३०॥ अजानता इव त्वया ब्रह्मणो वध इवास्य वध आचारितः कृतः तथापि प्रायश्चित्तं कार्यमित्याहुः योगेश्वरस्य भवतः तवाम्नायो वेदोऽपि न नियामकः ॥३१॥ यदि तथापि एतस्या ब्रह्महत्यायाः पावनं प्रायश्चित्तं भवान् करिष्यति हे लोकपावन लोकसंग्रहोऽयं स्वतः प्राप्तः ।

"न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन । नानावाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥"

इति भगवद्गीतोक्तेः ॥३२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु अधार्मिकप्रतिलोमजवधः कोऽयमधर्म इत्याशङ्क्याह-अस्येति । यावत्काले नैतत् सत्रं यागः समाप्यते तावत्कालमस्माभिरस्य रोमहर्षणस्य ब्रह्मासनं दत्तम्, अतोऽस्याप्रत्युत्थानं युक्तमेवेति सूचितम् । तथाऽत्मनो देहस्य न क्लमः श्रमो यस्मिस्तथाभूतमायुश्च दत्तम् । ब्राह्मणवधश्च तव क्षत्रियस्य न युक्त इति सूचयन् सम्बोधयन्ति-यदुनन्दनेति । अत एतत् सर्वमजानतेव त्वया यथाऽब्राह्मणवधः क्रियेत तथाऽस्य वध आचरितः कृतः । वस्तुतस्त्वीश्वरत्वात्तवाविदितं किमपि नास्ति इति सूचयति-इवेति ॥३०॥ ननु ब्राह्मणवधेऽपि मम परमेश्वरस्य को दोषः पुण्यपापास्पर्शित्वात् इत्याशङ्क्याह-योगेश्वरस्येति । आम्नायो ब्राह्मणो न हन्तव्य इत्यादिश्रुतिस्मृत्यात्मको भवतो यद्यपि नियामको नास्ति । तत्र हेतुमाह-योगेश्वरस्येति । योगिनोऽपि स्वेच्छाचार दोषास्पर्शिनस्तेषां नियामकस्य तव पापसम्बन्धः कुतः स्यादित्याशयः । स्वश्रवणकीर्तिनादिनापि जानन् पावयतस्तव कुतः पापसम्बन्धः स्यात् इति सूचयन्तः सम्बोधयन्ति-लोकपावनेति । तथापि यदि अनन्यचोदितः स्वयमेव एतस्या ब्रह्महत्यायाः पावनं प्रायश्चित्तं भवांश्चरिष्यति तदा लोकसंग्रहो लोकानां प्रायश्चित्ते प्रवृत्तिर्भविष्यति नान्यथा श्रेष्ठत्वात् । "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते" इति वचनात् ॥ ३१॥ लोकानुग्रहकाम्यया लोकसङ्ग्रहेच्छयाहमेतस्य वधस्य निर्वे प्रायश्चित्तं करिष्ये करिष्यामि अतः प्रथमे कल्पे मुख्ये पक्षे यावान्नियमः प्रायश्चित्तं स तु विधीयताम् ॥३२॥

अन्वितार्थप्रकाशिका

अस्येति सार्धम् । हे यदुनन्दन ! यावता कालेन एतत् सत्रं समाप्यते तावत्कालमस्माभिरस्य रोमहर्षणस्य ब्रह्मासनं दत्तम् अतोऽस्याप्रत्युत्थानं युक्तमेवेति सूचितम् । तथाऽत्मनो देहस्य न क्लमः श्रमो यस्मिस्तथाभूतमायुश्च दत्तम् । अत एतत् सर्वमजानतेव त्वया यथा ब्राह्मणवधः क्रियेत तथाऽस्य वध आचरितः कृतः । इवशब्देन अज्ञातमपि नास्तीति सूच्यते ॥३०॥ योगेश्वरस्येति सार्धम् । हे लोकपावन ! आम्नायो ब्राह्मणो न हन्तव्य इत्यादिश्रुतिस्मृत्यात्मको भवतो यद्यपि नियामको नास्ति । तथापि यदि अनन्यचोदितः स्वयमेव एतस्या ब्रह्महत्यायाः पावनं प्रायश्चित्तं भवांश्चरिष्यति तदा लोकसंग्रहो लोकानां प्रायश्चित्ते प्रवृत्तिर्भविष्यति नान्यथा । "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते" इति वचनात् ॥ ३१॥ करिष्ये इति लोकानुग्रहकाम्यया लोकसङ्ग्रहेच्छयाहमेतस्य वधस्य निर्वेशं प्रायश्चित्तं करिष्ये करिष्यामि । अतः प्रथमे कल्पे मुख्ये पक्षे यावान्नियमः प्रायश्चित्तं स तु स एव मया विधीयताम् करणीयः ॥३२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

धर्मध्वजिनो वधे को दोष इति चेत्तत्राहुः-अस्येति । पुराणकथनायास्य ब्रह्मासनम् । आत्माऽक्लमम् आत्मनो देहस्य नास्ति क्लमः खेदो यस्मिन् तदायुश्च दत्तम् । एतत् अजानता त्वया यथा यथावत् । ब्रह्मवधः ॥३०॥ नन्वीश्वरस्य मम ब्रह्मवधे को दोषस्तत्राहुः-सार्धेन आम्नायो ब्राह्मणो न हन्तव्य इत्यादिरूपो वेदः । भवतो नियामको न भवति तथापि हे लोकपावन अनन्यनोदितः ईश्वरादन्येनाप्रेरितः स्वयमेव भवान् । अन्यनोदित इति पाठेऽपि स एवार्थः । एतस्याः ब्रह्महत्यायाः पावनं प्रायश्चि यदि चिष्यति करिष्यति तर्हि लोकसंग्रहो भविष्यति नान्यथा ॥३१॥ वधस्य निर्वेशं प्रायश्चित्तम् । प्रथमे कल्पे प्रायश्चित्तानां मुख्य यावान्नियमोऽस्ति स नियमः विधीयतां कथ्यताम् ॥३२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वधार्मिकस्य प्रतिलोमजस्यास्य वधेन मया कोऽधर्मः कृत इत्यत आहुरस्येति सार्धेन । अस्येति । हे यदुनन्दन! अ रोमहर्षणस्य अस्माभिः ब्रह्मासनं ब्राह्मणपदं दत्तं भवति । कियत्कालपर्यन्तमित्यत्राह । यावद्यावताकालेन सत्रं समाप्यते ता आत्मनो देहस्य न विद्यते क्लमः श्रमो यस्मिंस्तत् आयुश्च दत्तम् । त्वया अजानता इव ब्रह्मवधः यथा तथा अस्य वधः इति शे आचरितः । ब्रह्महत्यासमं पापं कृतमित्यर्थः ॥३०॥ ननु ब्रह्मवधादपि किं परमेश्वरस्य मम इत्यत आहुः सार्धेन । योगेश्वरस्ये यद्यपि योगेश्वरस्य अवद्यास्पर्शोपयुक्तयोगनिर्वाहकस्य कर्मबाह्यस्य भवतस्तव आम्नायः 'ब्राह्मणो न हन्तव्यः' इत्यादिल वेदोऽपीत्यर्थः । न नियामकः । यद्यपि त्वं न विधिवश्य इत्यर्थः । तथापि हे लोकपावन ! भवान् यदि एतस्याः ब्रह्महत्यायाः प्रायश्चित्तं नान्यचोदितः अन्येनानियुक्तः सन् चरिष्यति तर्हि लोकसंग्रहः स्यात् । 'यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरो जनः ।'

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जन

इत्युक्तेर्लोकाननुग्रहीतुमनुतिष्ठस्वेत्यर्थः ॥३१॥ एवमुक्तो रामः प्राह चरिष्ये इति द्वाभ्याम् । चरिष्ये इति । हे मुनयः ! लोकानुग्रहकाम्यया लोकानामनुजिघृक्षया वधनिर्वेशं रोमहर्षणवधप्रायश्चित्तं चरिष्ये । अतः प्रथमे कल्पे मुख्यपक्षे यावान्नियमः स तु स एव विधीयतामुपदिश्यताम् ॥३२॥

कृष्णप्रिया

हे भगवान ! हे श्रीयदुनन्दन ! श्रीरोमहर्षणजी को हमलोगोने ही ब्रह्मासन पर बैठाये थे वे बैठना चाहते नही थे और जबतक हमारा यह सत्र पूर्ण न हो तब तक उनको शारीरिक कष्टो से रहीत दीर्घायुष्य भी समर्पित कीया था ॥३०॥ आपके ध्यानमें और जाननेमें यह बात न थी ईसलीये आपने अनजानपने में वध कीया क्योंकि हमलोगोने ब्रह्मासन दीया था । आप तो योगेश्वर है अम्नाय - भगवान वेद भी आप पर शासन नही कर पाता ॥३१॥ पुनः आपके श्रीचरणोंमें यह हमारा नम्र निवेदन है कि आपका अवतरण लोगो को पवित्र करने के लीये ही हुआ है । यह आपका अपराध नही है लेकीन आप हमारी सुचना के बिना भी स्वेच्छा से इस ब्रह्मवध का प्रायश्चित कर लेंगे तो एक विशिष्ट लोकसंग्रह बन जायेगा ॥३२॥

श्रीभगवानुवाच

[1]चरिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया । नियमः प्रथमे कल्पे यावान् स तु विधीयताम् ॥३३॥
[2]दीर्घमायुर्बतैतस्य सत्त्वमिन्द्रियमेव च । [3]आशंसितं [4]यत्तद्ब्रूत साधये योगमायया ॥३४॥

कर्दमक्षमा

श्रीभगवान्, उवाच । लोकानुग्रहकाम्मया, वधनिर्वेशम्, चरिष्ये, प्रथमे, कल्पे, यावान्, नियमः, सः, तु, विधीयताम ॥३३॥ बत, एतस्य, दीर्घम्, आयुः, सत्त्वम्, इन्द्रियम्, एव, च, यत्, आशंसितम्, तद्, ब्रूत, योगमायया, साधये ॥३४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

वधस्य निर्वेशं प्रायश्चित्तं प्रथमे कल्पे मुख्य (कल्पे) पक्षे विधीयतामुपदिश्यताम् ॥३३॥ किञ्च बत हे मुनयः ! एतस्य दीर्घमायुः सत्त्वं बलमिन्द्रियं तत्पाटवञ्च अन्यच्च यद्भवद्भिराशासितमपेक्षितं तं नो ब्रूत सर्वम् ॥३४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स तावान् । मुख्यकल्पे मुख्यविधौ "कल्पः शास्त्रे विधौ न्याये" इति मेदिनी । उपदिश्यताम् उपसर्गवशाद्धातेरुपदेशार्थत्वम् । किञ्च-

'प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते । न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम् ॥'

इति शातिपर्वण्यापद्धर्मोक्तेः । प्रभुणा श्रीबलदेवेन प्रथमकल्प एव स्वीकृतः ।

"अनुकल्पः परो धर्मो धर्मवादैस्तु केवलम् । विश्वैर्देवैश्च साध्यैश्च ब्राह्मणैश्च महर्षिभिः ॥

अय्यतुमरणाद्भीतैर्विधिः प्रतिनिधीकृतः ।" इत्यपि तत्रैव ॥३३॥

स्वसामर्थ्यं द्योतयन्नाह-किञ्चेति । एतस्य मृतसूतस्य । योगमायया निजैश्वरीसामर्थ्येन ॥३४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नियमो व्रतं कल्पे पक्षे स तु स एव न त्वनुकल्पादिरित्यर्थः ॥३३॥ योगमायया अचिन्त्यशक्त्या ॥३४॥

करिष्ये-श्रीधर. वंशी. वीर. विज. शुक. । २. मायुः किलैतस्या-वीर. ; मायुर्व्रतं तस्य-विज. । ३. आशा-श्रीधर. वंशी. वीर. विज. शुक. ।
यद्ब्रुत-विज. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नियमो व्रतम्, कल्पे पक्षे, तु एव, स तु स एव, अनुकल्पादिर्मध्यमादिरित्यर्थः। एव अपि, इन्द्रियमपि, च-शब्दात् साधुत्वादिकम्, योगमायया निजैश्वर्यविशेषेणेत्यर्थः ।।३३-३४।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अस्त्रस्य सत्यत्वम् अस्माकं वचः सत्यमिति स्वरस एवार्थः ।।३५-४०।।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमुक्तः प्राह रामः-चरिष्य इति द्वाभ्याम्। लोकानुग्रहकाम्यया लोकानुजिघृक्षया वधस्य निर्वेशं प्रायश्चित्तं चरिष्ये प्रथमे कल्पे मुख्यपक्षे यावान्नियमः स तु विधीयताम् मुख्यप्रायश्चित्तमुपदिश्यतामित्यर्थः ।।३३।। किञ्च दीर्घमिति। अस्य रोमहर्षणस्य दीर्घमायुः सत्त्वं बलम् इन्द्रियम् इन्द्रियपाटवात्मकमन्यच्च यद्भवद्भिराशासितम् अनपेक्षितं तत्सर्वं ब्रूत योगमायया आश्चर्यशक्त्याऽहं तत्सर्वं साधये ।।३४।।

श्रीमद्विजयध्वजकृता पदरत्नावली

प्रथमे कल्पे उत्तमकल्पे यावान्नियमो विधिः सत्वेव विधिर्भवद्भिर्विधीयताम् ।।३३।। तस्य व्रतं दीर्घमायुः सत्त्वमिन्द्रियं दूरश्रवणदूरदर्शनादिशक्तिमत्साधये किं बहुना यद्यदाशासितं कामितं तत्तत्साधय इत्याह-आशासितमिति ।।३४।।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।।१०-४०।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ।।३०-३७।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ।।१...४०।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निर्वेशं प्रायश्चित्तम् ।।३३।। यस्मान्ममैव हि मुखं ब्राह्मणकुलं तस्माद्भवतां वाक्यभङ्गो न मे चिकीर्षीत इत्यतो ब्रूत यथा युष्मदुक्तमेव करोमीत्याह-दीर्घमिति। सत्त्वं बलम् इन्द्रियमिन्द्रियपाटवम् ।।३४।।

गूढार्थदीपिनी

बत हर्षे। अस्य दीर्घायुरादि तथा अन्यच्च यद्भवतामाशंसितम् अपेक्षितं तत् स्पष्टं यूयं ब्रूत अहं तमापादयिष्यामि। सत्त्वं बलम्। इन्द्रियपाटवं च ।।३३।। वीर्यस्य प्रभावस्य। अस्माकं वचः यावत्सत्रं पुराणवक्ता भवतु इत्येवंविधम् ।।३४।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

लोकानुग्रहकाम्यया वधस्य निर्वेशं प्रायश्चित्तं करिष्ये तत्र प्रथमे कल्पे मुख्यपक्षे नियमो विधीयताम् ।।३३।। सत्त्वं बलम् इन्द्रियं करणपाटवम् अन्यच्च भवद्भिर्यदाशासितमपेक्षितं तत्सर्वं ब्रूत ।।३४।।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ऋषिप्रोक्तं प्रायश्चित्तं कर्तव्यमिति निश्चित्य पृच्छति-चरिष्य इति। वधनिर्वेशो वधप्रायश्चित्तं लोकपावनोपपत्तिमङ्गीकृत्याह लोकानुग्रहकाम्ययेति। ततश्चानुकल्पं परित्यज्य मुख्यकल्पमेव वदन्त्वित्याह-नियमः। प्रथमे कल्प इत्याह-मुख्यकल्पे यावद् व्रतं तावत् वेदो न वदतीति शङ्कां च परित्यज्य स विधीयताम् ।।३३।। अथान्यदप्यभिलषितं भवतां करिष्यामीत्याह दीर्घमायुरिति। यथैतस्य दीर्घमायुः सत्त्वं बलम् इन्द्रियसामर्थ्यं च चकारादन्यदपि यदेव किञ्चित् भवतानाशासि चकारात्पूर्वमाशासितं च तत्सर्वं योगमायया साधयिष्यामि ।।३४।।

रामोक्ति
नियमस्तावानुपदि
यूयं ब्रूत वदत यो

किञ्च यु
इन्द्रियपाटवम् अ
संपादयिष्यामि ।।३
अस्त्रादेः सत्यता क
सत्यत्वे युष्मद्वचः
च यथा सत्यं भवेत्

दीर्घमिति।
अपेक्षितं तत्सर्वं ब्रूत।
कुशस्य तव च वीर्य
पुराणवक्ता च भवेत्येव

किञ्च बत हे
यदाऽऽशासासितं वाञ्छि
सत्यत्वं भवेत्। यथा च

दीर्घमिति। वि
आशासितमपेक्षितं तच्च
प्राहुः। अस्त्रस्येति। अस्त्र
'यावत्सत्रं दीर्घायुष्मान् पु

शेषावतार भग
लीये और लोगो पर अनु
करके उत्तम प्रकार का ज
महर्षि ! इस रोमहर्षणजी
दीजिये मैं अपने योगबल

अस्त्रस्य तव वीर्

श्रीसुबोधिनीसारः

रामोक्तिः। वधस्य निर्वेशं प्रायश्चित्तं करिष्यामि लोकानामनुग्रहस्य काम्यये्च्छया प्रथमे मुख्ये कल्पे यावान् यत्प्रमाणको नियमस्तावानुपदिश्यताम् ॥३३॥ एतस्य सूतस्य दीर्घमायुः सत्त्वं बलमिन्द्रियपाटवं चेति यद्भवद्भिराशासितं वाञ्छितं तत्सर्वं यूयं ब्रूत वदत योगबलेनाहं साधयिष्यामि ॥३४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्च युष्माभिः खेदो न कर्तव्य इति सूचयन्नाह-बतेति। एतस्य रोमहर्षणस्य दीर्घमायुः सत्त्वं बलम् इन्द्रियम् इन्द्रियपाटवम् अन्यच्च यद्भवतामाशासितम् अपेक्षितं तत्सर्वं ब्रूत। अहं योगमायया अचिन्त्यशक्त्या तत्सर्वं साधये संपादयिष्यामि ॥३३॥ इत्युक्ता मुनयः प्राहुः। अस्त्रस्य त्वत्प्रयुक्तकुशस्य तव वीर्यस्य प्रभावस्य मृत्योः सत्यताभावे अस्त्रादेः सत्यता कथं स्यात् इत्याशङ्क्याहुः-मृत्योरिति। रोमहर्षणमरणस्य च यथासत्यता स्यात्तथा विधीयताम्। एतत्त्रितयस्य सत्यत्वे युष्मद्वचः सत्यं न स्यात् इत्याशङ्क्याहुः- अस्माकं वचः यावत्सत्रं त्वं दीर्घायुष्मान् पुराणवक्ता च भवेत्येवंविधं च यथा सत्यं भवेत्तथा हे राम। विधीयतां क्रियतामित्यर्थः ॥३४॥

अन्वितार्थप्रकाशिका

दीर्घमिति। बत,तथा एतस्य रोमहर्षणस्य दीर्घमायुः सत्त्वं बलम् इन्द्रियम् इन्द्रियपाटवम् अन्यच्च यद्भवतामाशासितम् अपेक्षितं तत्सर्वं ब्रूत। अहं योगमायया अचिन्त्यशक्त्या तत्सर्वं साधये संपादयिष्यामि ॥३३॥ अस्त्रस्येति। अस्त्रस्य त्वत्प्रयुक्तस्य कुशस्य तव च वीर्यस्य प्रभावस्य मृत्यो रोमहर्षणमरणस्य च यथा सत्यता स्यात्तथा अस्माकं वचः यावत्सत्रं त्वं दीर्घायुः पुराणवक्ता च भवेत्येवंविधं च यथा सत्यं भवेत्तथा हे राम! विधीयतां क्रियताम् ॥३४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

किञ्च बत हे मुनयः! एतस्य सूतस्य दीर्घम् आयुर्बहुकालजीवितं सत्त्वं सामर्थ्यं च इन्द्रियचातुर्यं च युष्माभिः यदाऽऽशासासितं वाञ्छितम्। तद्यूयं ब्रूत योगमायया योगैश्वर्येण तत्सर्वमहं साधये करिष्ये ॥३३॥ हे राम! अस्त्रादीनां यथा सत्यत्वं भवेत्। यथा चास्माकं वचनं सत्यं भवेत् तथा विधीयतां क्रियताम् ॥३४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दीर्घमिति। किञ्च बत हे मुनयः! एतस्य रोमहर्षणस्य दीर्घम् आयुः सत्त्वं बलम् ऐन्द्रियमिन्द्रियपाटवं यदन्यद्भवद्भिः आशासितमपेक्षितं तच्च ब्रूत सर्वं कथयत। योगमायया मदीययाऽऽश्चर्यशक्त्या अहं साधये एव ॥३३॥ इत्थं रामेणोक्ता मुनयः प्राहुः। अस्त्रस्येति। अस्त्रस्य त्वत्प्रयुक्तकुशरूपस्य तव वीर्यस्य च सत्यं सत्यत्वं यथा भवेत् मृत्योः सत्यं भवेत् अस्माकं वचः 'यावत्सत्रं दीर्घायुष्मान् पुराणवक्ता भव' इत्येवंरूपमस्मद्वचश्च यथा सत्यं भवेत् हे राम! तथा एव विधीयताम् ॥३४॥

कृष्णप्रिया

शेषावतार भगवान संकर्षणजीने कहा की हे महर्षिवृन्द! आपका सूचन मनमें रखकर लोकशिक्षा के लीये और लोगो पर अनुकम्पा करने के लिये ब्रह्मवध का प्रायश्चित निश्च रूपसे करुंगा इस लीये आप सर्व कृपा करके उत्तम प्रकार का जो प्रायश्चित हो उसीका आप लोग विधान कीजीये ॥३३॥ पुनः श्रीबलभद्रजीने कहा हे महर्षि! इस रोमहर्षणजी को दीर्घायुष्य बल, इन्द्रिय शक्ति आदि जो कुछ देना चाहते हो विना संकोच मुझे बतलो दीजिये मैं अपने योगबल से सबकुछ सम्पन्न करा दुंगा ॥३४॥

ऋषय ऊचुः

अस्त्रस्य तव वीर्यस्य मृत्योरस्माकमेव च। यथा भवेद्वचः सत्यं तथा राम विधीयताम् ॥३५॥

[1]श्रीभगवानुवाच

आत्मा वै पुत्र उत्पन्न इति वेदानुशासनम् । तस्मादस्य भवेद्वक्ता [2]आयुरिन्द्रियवीर्यवान् ॥३६॥
किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ । अजानतस्त्वपचितिं [3]यथा मे चिन्त्यतां बुधाः॥३७॥

कर्दमक्षमा

ऋषयः, ऊचुः । हे राम ! यथा, अस्त्रस्य, तव, वीर्यस्य, मृत्योः, अस्माकम्, एव, च, वचः, सत्यम्, भवेत्, तथा, विधीयताम् ॥३५॥ श्रीभगवान्, उवाच । आत्मा, वै, पुत्रः, उत्पन्नः, इति, वेदानुशासनम्, तस्मात्, वक्ता, भवेत्, अस्य, आयुः, इन्द्रियवीर्यवान् ॥३६॥ मुनिश्रेष्ठाः ! वः, किम्, कामः, अथ, ब्रूत, तु, मे, अपचितिम्, करवाणि, यथा, अहम्, अजानः, हे बुधाः ! चिन्त्यताम् ॥३७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्त्रादीनां यथा सत्यता भवेदस्माकं च वचः सत्यं यथा भवेत् तथा विधीयतामित्यर्थः ॥३५॥ तथा सम्पादयन्नाह-आत्मा वा इति । "अङ्गादङ्गात्सम्भवसि दृदयादभिजायसे आत्मा वै पुत्रनामासि सजीव शरदः शतम्" इत्यादि वेदानुशासनं वेदवचनम् तस्मादस्य रोमहर्षणस्य पुत्रः उग्रश्रवाः भवतां पुराणप्रवक्ता भवेत्स चायुरादिमांश्च भवेत् अतः साक्षादजीवनादस्त्रस्य मृत्योश्च सत्यता पुत्ररूपेण चायुरादिसिद्धेर्युष्मद्वचनस्यापि सत्यता स्यादिति भावः ॥३६॥ प्रथमं तावदपेक्षितं कथयत तदहं करिष्यामीत्याह-किं वः काम इति । किंविषयो वा वः कामो वर्तते तद्ब्रूतेति अथानन्तरं ब्रह्मदण्डं गृहीत्वाऽपचितिं निष्कृतिमजानतो मे हे बुधाः ! यथावच्चिन्त्यतामपचितिरिति ॥३७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति-अस्त्रवीर्ययोरमोघत्वं मृत्योरनावृत्तित्वमस्मद्वचसश्चावंध्यफलत्वं यथा स्यात्तथा कुर्विति भावः ॥३५॥ यथा मुनिभिरुक्तं तथा संपादयन्नित्यर्थः । अङ्गादङ्गात्पृथक्पृथगङ्गात्ततदङ्गरूपेण स त्वं जीवेत्यर्थः । स चोग्रश्रवाः । तादृशकरणात् इति भाव इति-तस्यैव जीवनादिना सर्वमेवासमञ्जसं भवोदित्याशयः ॥३६॥ यदन्यदभीप्सतं तदपि ब्रूतेत्याह-प्रथममित्यादि निष्कृतिं प्रायश्चित्तं यथाऽजानतः प्रायश्चित्तं भवद्भिः कथ्यते तथा जानतोऽपि मे कथ्यतां ब्राह्मणाज्ञां विना करणात्फलनिष्पत्तिः "श्रौतं स्मार्तं च यत्कर्म जानतापि च सर्वथा । विप्राज्ञयैव कर्तव्यमन्यथा निष्फलं हि तत् ॥" इति वारतान्तव्युक्तेः ॥३७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अस्त्रस्य वीर्यस्य च पराक्रमस्य त्वदीयत्वेन मृत्योश्च विधात्रा त्वयैव नियुक्तत्वेन अस्माकं वचसश्च त्वद्यजनादिना तावकसम्बन्धित्वेनावश्यं सत्यतापेक्ष्यत इति हे रामेति च तेनैव तव सर्वरमणतासिद्धेरिति भावः ॥३५॥ वै प्रसिद्धौ ॥३६॥ अजानत इति नरलीलावेशात् वास्तवत्त्वे तु वधदोषाभावात् ॥३७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अस्त्रस्य वीर्यस्य च पराक्रमस्य त्वदीयत्वेन मृत्योश्च विधात्रा त्वयैव नियुक्तत्वेनास्माकं वचसश्च त्वद्यजनादिना तावकत्वेनावश्यं सत्यतापेक्ष्यत इति । हे रामेति च तेनैव तव सर्वरमणतासिद्धेरिति भावः ॥३५॥ वै एव, आत्मा स्वयमेव, पिता पुत्रः सन्नुत्पन्नो भवति ॥३६॥ करवाणीत्यत्र हेतुः-हे मुनिश्रेष्ठाः ! परमभागवता इति भावः । अन्यत्तैर्व्याख्यातम्, यद्वा, किं कामो वर्तते, अपि तु नैव । तत्र हेतुः-हे मुनिश्रेष्ठाः इति माहात्मारामत्वादित्यर्थः । तथापि मयि स्नेहेन किञ्चिद्ब्रूत । अन्यत् समानम् अजानत इति विनयातिशयात्, हे बुधा इति युष्माभिरेव सा विज्ञायत इति भावः । सर्वमिदं तेषां सन्तोषणार्थम् ॥३७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अस्त्रस्य सत्यत्वम् अस्माकं वचः सत्यमिति स्वरस एवार्थः ॥३५-४०॥

---

१. रामः-च. पु. टी. । २. सत्त्व श्रीधर. वंशी. वीर. विज. । ३. यथावच्चिन्त्यतां-वीर. ; यथा मे बुद्ध्यतां-विज. ।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थमुक्ताः प्राहुर्मुनयः-(श)अस्त्रस्येति। अस्त्रस्य त्वत्प्रयुक्तकुशाग्ररूपस्य तव वीर्यस्य च मृत्योः रोमहर्षणस्य च यथा सत्यत्वं यथा चास्माकं वचः यावत्सत्रं त्वं दीर्घायुष्मान् पुराणवक्ता भवेत्येवंविधं वचः सत्यं भवेत्तथा हे राम ! विधीयतां क्रियतामित्यर्थः ॥३५॥ अस्त्रादीनां सत्यत्वं सम्पादयन् आह रामः-आत्मा वा इति। "अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे। आत्मा वै पुत्रनामासि स जीव शरदां शतम् ॥" इत्यादि वेदानुशासनं वेदवाक्यं तस्मादस्य पुत्रः उग्रश्रवाः भवतां पुराणवक्ता भवेत् आयुरादिमांश्च भवेदित्यर्थः। अतः साक्षाद्रोमहर्षणस्याजीवनादस्त्रस्य मृत्योश्च सत्यता पुत्ररूपेण च आयुरादिसिद्धेर्भवद्वचनस्यापि सत्यता स्यादिति भावः ॥३६॥ किञ्च ब्रह्मदण्डार्थं युष्मदपेक्षितं कथयत तदहं करिष्यामीत्यत आह-किं वः काम इति। हे मुनिश्रेष्ठाः ! वो युष्माकं किं कामः यद्विषयः कामः वर्तते तं ब्रूत अथानन्तरं ब्रह्मदण्डं गृहीत्वाऽपचितिं निष्कृतिमजानतो मम हे बुधाः ! यथावद्वेदशास्त्रानुसारतः अपचितिश्चिन्त्यतां विधीयतामित्यर्थः ॥३७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अस्त्रवीर्ययोरमोघत्वं मृत्योरनावृत्तित्वमस्मद्वचसश्चावन्ध्यफलत्वं यथा स्यात्तथा विधीयताम् ॥३५॥ पुराणानां वक्ता पुत्रः स्यात् ॥३६॥ हे बुधाः ! युष्माभिर्वरो दत्त इत्यजानतो मेऽपचितिं परिहारं बुद्ध्यताम् ॥३७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१०-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥३०-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अस्त्रादीनां सत्यता यथा भवेदस्माकं च वचः सत्यं यथा भवेत्तथा विधीयतामित्यर्थः ॥३५॥ तत्सम्पादयन्नाह-आत्मा वा इति। "अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥" इत्यादि वेदानुशासनं वेदवचनं तस्मादस्य रोमहर्षणस्य पुत्रः उग्रश्रवाः भवतां पुराणवक्ता भवेत् स चायुरादिमांश्च भवेत् अत साक्षादजीवनादस्त्रस्य मृत्योश्च सत्यता पुत्ररूपेण चायुरादिसिद्धेर्युष्मद्वचनस्य सत्यताऽभूदिति भावः ॥३६॥ किञ्च प्रायश्चित्तोपदेष्टृभ्यो बुधेभ्यः प्रथमं किञ्चिद्देयं भवतीत्यभिप्रेत्याह-किं व इति। तदनन्तरमेव अपचितिं निष्कृतिमजानतो मे यथावच्चिन्त्यतां निष्कृतिं व्यवस्थीयतामित्यर्थः ॥३७॥

गूढार्थदीपिनी

वै एवार्थे। अस्य पुत्रः उग्रश्रवाः। एवं सति सर्वं सम्पन्नं स्यात् ॥३५॥ किञ्च हे बुधाः ! वः युष्माकं किंविषयकः कामः सङ्कल्पो वर्तते तमपि ब्रूत अहं तत् अथ अनन्तरमेव करवाणि। हे मुनिश्रेष्ठाः ! अजानतो मे अपचितिः प्रायश्चित्तं चिन्त्यतां विचार्य कथ्यताम् ॥३६॥ पर्वणि अमायां पौर्णमास्यां च। सत्रं यागम् ॥३७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अस्त्रादीनां सत्यता यथा भवेत् यावत्सत्रं त्वं दीर्घायुष्मान् पुराणवक्ता भवेत्यस्माकं च वचः सत्यं यथा भवेत्तथा विधीयताम् ॥३५॥ अस्य मृतत्वादस्त्रादीनां सत्यता भवतु "अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे। आत्मा वै पुत्रनामासि स जीव शरदां शतम् ॥" इति वेदवचनामृतस्याप्यस्य रूपान्तरभूतः पुत्रः युष्माकं पुराणवक्ता भवत्वतः भवतां वचसः सत्यता भवतु इत्याह-आत्मेति। अस्य रोमहर्षणस्य पुत्रः उग्रश्रवाः ॥३६॥ जानताऽपि विद्वद्भ्योऽर्थं दत्त्वा धर्मः प्रष्टव्यः इति लोकशिक्षार्थं सर्वज्ञोऽपि मुग्धवत् पृच्छति-किं वो युष्माकं प्रायश्चित्तोपदेष्टृणां काम्यते इति कामः ईप्सितोऽर्थः किमस्ति तर्हि ब्रूत अहं करवाणि अथानन्तरम् अपचितिं प्रायश्चित्तमजानतो मे मम यथावदपचितिश्चिन्त्यतां शास्त्रतो व्यवस्थीयताम् ॥३७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तदा सन्तुष्टा ऋषय ऊचुः परीक्षार्थं सन्दिहानाः विरुद्धद्वयमस्माभिर्वक्तव्यम् तत्र यदि समाधानं ज्ञास्यति तदा अस्योक्तं भविष्यतीति तादृशमाहुः-अस्त्रस्येति । चत्वारोऽत्र व्यापृताः अस्त्रं तव वीर्यं मृत्युर्वयं चेति । तत्र तस्य जीवने त्रयं बाधितं भवेत् अजीवने तु वयं चकारात्तव वाक्यं च यथैतच्चतुष्टयमपि सत्यं भवेत्तथा राम ! विधीयतामिति ।।३५।। एतेनैव चतुर्णां दूषणानां निर्धारमाह-आत्मा वै पुत्र उत्पन्न इति । ''अङ्गादङ्गात् सम्भवसि हृदयादभिजायसे आत्मा वै पुत्रनामासि स जीव शरदः शतम्'' इति यद्यप्ययमनुकल्पः तथापि मुख्याभावे विधीयते यतो वेदानुशासनं तस्मादस्य आयुरिन्द्रियवीर्यवान् अयमेव भवेत् तदा स्वस्य मम वीर्यस्य मृत्योश्च न बाधा भवति सामान्यात् प्रतिनिधिस्तद्धर्मजः स्यादिति न्यायादस्यापि तथाविधा भवत्विति बोधितम् ।।३६।। किञ्च यद्यपीदं भवतां सर्वथा नाभिप्रेतं तथाप्येतत्प्रतिनिधित्वेनान्यद्वक्तव्यमित्याह-किं वः कामो मुनिश्रेष्ठा इति । अथ तदनन्तरं शीघ्रमेव तत्कर्माणि तर्हि स्वेच्छयैव किञ्चित् कर्तव्यमिति चेत्तत्राह-अजानतस्त्वपचितिमिति । विधाय यथावत् यतो भवन्तो बुधाः अतः अपचितिम् अपराधदूरीकरणोपायं चिन्त्यतां तदनूच्यतामित्यर्थः ।।३७।।

श्रीसुबोधिनीसारः

ऋषीणामुक्तिः । अस्त्रस्य तव बलस्य मृत्योर्यथा सत्यता यथा स्यादस्माकं वचः सत्यं यथा स्यात्तथा हे राम प्रीयताम् ।।३५।। रामोक्तिः । ''आत्मा वै स्वयं पुत्रत्वेन जातः'' इति वेदवचनम् । तस्मात्कारणादस्य लोमहर्षणस्य पुत्र उग्रश्रवा आयुरादिमांश्च भवतां पुराणवक्ता भवेत् एतच्च पाद्मं स्पष्टम् ।।३६।। हे मुनिश्रेष्ठाः ! वो युष्माकं किं कामो वाञ्छितं तद्यूयं ब्रूत अहं करवाणि अथापचितिं प्रायश्चित्तमजानतो मे यथावत् कर्तव्यमुपदिश्यतां हे बुधाः ! ।।३७।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अविरोधेन तत्प्रार्थितं शस्त्रादीनां साफल्यं संपादयति आत्मा वा इति । 'अङ्गादङ्गात्संभवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतम्' इत्यादिवेदानुशासनं वेदवाक्यमस्ति, तस्मादस्य रोमहर्षणस्य पुत्र उग्रश्रवा भवतां पुराणवक्ता भवेत्, आयुरादिमांश्च भवेत् । अतः साक्षाद्रोमहर्षणस्याजीवनादस्त्रादेः सत्यता, पुत्ररूपेण चायुरादेः सिद्धेर्भवद्वचनस्यापि सत्यता स्यादिति भावः ।।३५।। पूज्यत्वं सूचयन् सम्बोधयति-मुनिश्रेष्ठा इति । सूतवधेन मया युष्मदपराधः कृतः, अतो युष्मत्सन्तोषार्थं किञ्चित्कर्तव्यम् । तत्र युष्माकं किंविषयकः कामः सङ्कल्पो वर्तते तद्ब्रूत, अहं तत् अथ अनन्तरमेव करवाणि । ततस्तु अपचितिं सूतहत्याप्रायश्चित्तमजानतो मे मदर्थं हे बुधाः ! सर्वज्ञाः ! यथावत्प्रायश्चित्तं चिन्त्यता विचार्य कथ्यतामिति भावः ।।३६।। एवमुक्ता मुनय आहु-इल्वलस्येति । इल्वलो ह्यगस्त्याय वातापिं पेचे इति तन्मायाप्रभावस्य प्रसिद्धत्वात् तत्सुतोऽपि तथेति सूचयन्नाह-इल्वलस्य सुतो बल्वलो नाम दानवोऽस्ति । स पर्वणि पर्वणि पूर्णमास्यां पूर्णमास्यामेत आगत्य नोऽस्माकं सत्रसंज्ञकं यागं दूषयति । स च घोरो भयङ्करोऽस्मदसाध्यः ।।३७।।

अन्वितार्थप्रकाशिका

आत्मेति । 'आत्मा वै पुत्रनामासि सञ्जीव शरदः शतम्' इत्यादि वेदानुशासनं वेदवाक्यमस्ति तस्मादस्य रोमहर्षण पुत्र उग्रश्रवा भवतां पुराणवक्ता भवेत् आयुरादिमांश्च भवेत् । अतः साक्षाद्रोमहर्षणस्याजीवनादस्त्रस्य मृत्योश्च सत्यता पुत्ररू चायुरादेः सिद्धेर्भवद्वचनस्यापि सत्यता स्यात् ।।३५।। किमिति । हे मुनिश्रेष्ठाः ! सूतवधखेदोपशमनाय मया यूयं प्रसा प्रायश्चित्तोपदेष्टृभ्यः प्रथमं किञ्चिद्देयं वा तत्र वो युष्माकं किंविषयकः कामः सङ्कल्पो वर्तते तद्ब्रूत अहं तत् अथ अनन्तर करवाणि । ततस्तु अपचितिं सूतहत्याप्रायश्चित्तमजानतो मे मदर्थं हे बुधाः ! सर्वज्ञाः ! यथावत्प्रायश्चित्तं चिन्त्यतां विचार्य कथ्यत ।।३६।। इल्वलस्येति । इल्वलस्य सुतो बल्वलो नाम दानवोऽस्ति । स पर्वणि पर्वणि पूर्णमास्यां पूर्णमास्याम् अमायाममायां एत्य आगत्य नोऽस्माकं सत्रसंज्ञकं यागं दूषयति । स च घोरो भयङ्करोऽस्मदसाध्यः ।।३७।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तथाकुर्वन्नाह-आत्मेति । आत्मा वै पुत्रनामासीति वेदानुशासनं वेदवाक्यमस्ति तस्मादस्य रोमहर्षणस्यात्मज उग्र युष्माकं पुराणवक्ता भवेत् । स च आयुरादियुक्तो भवेत् एवं जाते सति अस्त्रादीनां सर्वेषां सत्यत्वं स्यादिति भावः ।।३५।।

हे मुनिश्रेष्ठाः ! वो
तत्रादौ स्वापेक्षितव

एतत्सम्
'अङ्गादङ्ग
तस्मात् अ
आयुरिन्द्रियसत्त्ववा
सत्यता स्यादेव ।।३
युष्माकं किं कामः
तन्निष्कृतिमजानतः
विधीयतामित्यर्थः ।।
वर्तते इति शेषः । स

बलभद्रजी
सर्वज्ञ है जिससे आ
न हो और हम ऋषि
कहा की हे ऋषिमुनि
होती है इस लीये
रोमहर्षणजी को अप
और जो कुछ भी च
अपराध हो गया है
समर्थ विद्वान है ।।३

इल्वलस्य सु
तं पापं जहि
ततश्च भारतं

।। इति श्र

---

१. घोरः पल्लवो-वीर. । २. न
५. पारमहंस्यां संहितायां दशमस्

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे मुनिश्रेष्ठाः ! वो युष्माकं यः कामोऽस्ति तं यूयं ब्रूत । अजानतो मेऽपचितिं प्रायश्चित्तं चिन्त्यतां विचार्योच्यतामित्यर्थः ॥३६॥ तत्रादौ स्वापेक्षितकृत्यमाहुः-इल्वलस्येति द्वाभ्याम् ॥३७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एतत्सम्पादयन्नाह रामः आत्मेति । हे मुनयः ! पुत्र आत्मा वै तत्पितैव उत्पन्नः पुत्ररूपेण प्रादुर्भूतः इति वेदानुशासनं **'अङ्गादङ्गात्सम्भवसि हृदयादभि जायसे । आत्मा वै पुत्रनामासि स जीव शरदां शतम् ॥'** इति वेदवाक्यम् अस्ति । तस्मात् अस्य पुत्र इति शेषः । उग्रश्रवोनामास्य पुत्र इत्यर्थः । वक्ता भवतां पुराणवक्ता इत्यर्थः । भवेत् । आयुरिन्द्रियसत्त्ववानपि भवेत् । अतः साक्षाद्रोमहर्षणस्याजीवनादस्त्रस्य मृत्योश्च सत्यता । पुत्ररूपे चायुरादिसिद्धेर्भवद्वचनस्यापि सत्यता स्यादेव ॥३५॥ प्रथमं तावद्भवतां यदपेक्षितं तत्कथयत । तदहं करिष्यामीत्याह । किं व इति । हे मुनिश्रेष्ठाः ! वो युष्माकं किं कामः ब्रूत । यद्विषयः कामो वर्तते तद्ब्रूतेत्यर्थः । तम् अहं करवाणि । अथानन्तरम् अजानतः ब्रह्मदण्डं गृहीत्वा तन्निष्कृतिमजानतः मे मम हे बुधाः ! यथा यथावदेव वेदशास्त्रानुसारत इत्यर्थः । अपचितिं तु अपचितिमेव चिन्त्यताम् । विधीयतामित्यर्थः ॥३६॥ उक्तरीत्योक्तास्ते यावदपेक्षितं कथयन्ति । इल्वलस्येति । इल्वलस्य सुतः घोरः बल्वलः नाम दानवः वर्तते इति शेषः । स बल्वलः पर्वणि पर्वणि प्रतिपर्वेत्यर्थः । एत्यागत्य नोऽस्माकं सत्रं यागं दूषयति ॥३७॥

कृष्णप्रिया

बलभद्रजी की बात सुनकर ऋषियोंने कहा - महाराज आप एसा कोई भी उपाय कीजिये क्योंकि आप सर्वज्ञ है जिससे आपका शस्त्रका सामर्थ्य एवं आपके वीर्य की महिमा और रोमहर्षणजी की मृत्यु को भी व्यर्थ न हो और हम ऋषिमुनीओं ने इन्हे जो वरदान दीया था वह भी सफल हो जाय ॥३५॥ भगवान श्रीबलभद्रजीने कहा की हे ऋषिमुनीओ ! वेदोका ऐसा वचन है की आत्मा वै पुत्र नामासि अपनी आत्मा ही पुत्र के रूपमें उत्पन्न होती है इस लीये श्रीरोमहर्षणजी के स्थान पर इनका पुत्र आप लोगो को पुराणों की कथा सुनायेगा । में रोमहर्षणजी को अपने योगबलसे दीर्घायुष्य इन्द्रिय शक्ति और बल दे रहा हुं ॥३६॥ हे मुनिवर ! आप इससे अलग और जो कुछ भी चाहते हो मुजसे कहीये । में आपलोगोकी इच्छा को पूर्ण करुंगा अज्ञात अवस्थामें मेरा जो अपराध हो गया है उसका निवारण भी आपलोग सोच विचार करके बतलाइये क्योंकि आप सर्व इस विषय के समर्थ विद्वान है ॥३७॥

ऋषय ऊचुः

इल्वलस्य सुतो घोरो [1]बल्वलो नाम दानवः । स दूषयति नः[2] सत्रमेत्य पर्वणि पर्वणि ॥३८॥
तं पापं जहि दाशार्ह तन्नः शुश्रूषणं परम् । पूयशोणितविण्मूत्रसुरामांसाभिवर्षणम् [3]॥३९॥
ततश्च भारतं वर्षं परीत्य सुसमाहितः । चरित्वा [4]द्वादशमासांस्तीर्थस्नायी विशुद्ध्यसे ॥४०॥

॥इति श्रीमद्भागवते महापुराणे[5] दशमस्कन्धे[6] बलदेवचरित्रे बल्वलवधोपक्रमो
[7]नामाष्टसप्ततितमोऽध्यायः ॥७८॥

---

[1] घोरः पल्लवो-वीर. । [2]. नः सर्वानसत्रमेत्य च पर्वणि-विज. । [3]. वर्षिणम्-श्रीधर. वंशी. वीर. विज. । [4]. द्वादशान्मासां-वीर. विज. चित्सुख. ।
[5]. परमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. पु. । [6]. दशमस्कन्धे बलदेवतीर्थयात्रायां-गो. प्रे. टी. । [7]. षण्णवतितमोऽध्यायः-विज.(९६) ।

कर्दमक्षमा

ऋषयः, ऊचुः । इल्वलस्य, बल्वलः, नाम, दानवः, घोरः, सुतः, पर्वणि, पर्वणि, एत्य, नः, सत्रम्, पूयशोणितविण्मूत्रसुरामांसाभिवर्षणम्, कृत्वा, दूषयति, हे दाशार्ह ! तम्, पापम्, जहि, तत्, नः, परम्, शुश्रूषणम्, च, ततः, सुसमाहितः, द्वादशान्, मासान्, भारतम्, वर्षम्, चरित्वा, परीत्य, तीर्थस्नायी, विशुद्ध्यसे ॥३८-३९-४०॥

॥ इति श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे अष्टसप्ततितमेऽध्याये अन्वयाः ॥७८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रथमं तावत् अपेक्षितं कर्तव्यं कथयन्ति इल्वलस्येति द्वाभ्याम् ॥३८-३९॥ प्रायश्चित्तमाहुः-ततश्चेति । तरीत्य प्रदक्षिणीकृत्य सुसमाधानादिगुणविशेषादेकाब्दमात्रमुक्तमित्यविरोधः सुसमाहितः कामक्रोधादिरहितः चरित्वा कृच्छ्राणि ॥४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीधरस्वामिविरचितायां भावार्थदीपिन्यामष्टसप्ततितमोऽध्यायः ॥७८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तावदधुना । पर्वण्यमायां पौर्णमास्यां चेत्यर्थः ॥३८॥ तं बल्वलम् । तत् हननम् ॥३९॥ ततो बल्वलहननोत्तरम् । ननु ब्रह्मघ्नो द्वादशाब्दप्रायश्चित्तस्य "द्वादशाब्दाविति चरेद् ब्रह्मघ्नस्तत्कपालभृत् । ख्यापयन्नात्मनः कर्म भिक्षां विप्रेषु सञ्चरन् ॥" इत्यादिना पाराशराद्यैर्विरुद्धं 'द्वादशान्मासान्' इति कथमुच्यते-इति चेत्तत्राह-सुसमाधानादीति । समाधानं चित्तैकाग्र्यम् । आदिना बाह्येन्द्रियनिग्रहादिग्रहः । गुणविशेषसंबन्धादेकाब्दोऽपि दक्षिणाविशेषयोगाद्युधिष्ठिरैकाश्वमेधस्याश्वमेधत्रयतुल्यत्वात् द्वादशाब्दवद्भवतीत्युक्तमविरोध इति । कृच्छ्राणीति शेषः । कृच्छ्राणि कृच्छ्रतप्तकृच्छ्रपर्णकृच्छ्रातिकृच्छ्रादीनि । 'एकभक्तैश्च नक्तैश्च तथैवायाचितैरपि । उपवासैश्चतुर्भिश्च कृच्छ्रः षोडशभिर्दिनैः ॥' इत्यादिना पराशरादिभिरुक्तलक्षणानि बहूनि सन्ति विस्तरभियेह नोक्तानीति । द्वादशान् द्वादश ॥४०॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धेऽष्टसप्ततितमोऽध्यायः ॥७८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पर्वणि अमावास्यादौ वीप्सयाऽवश्यं सर्वपर्वस्वागमनं बोधयन्ति ॥३८॥ अस्मद्विधपालनार्थं हे दशार्हवंशावतीर्ण ॥३९॥ ऋषयस्तु चातुर्यात्तद्व्यवसिततीर्थकरणादधिकं प्रायश्चित्तं नोपदिष्टवन्त इति ततश्चेति भारतं वर्षमिति तन्मध्यभागमित्यर्थः । द्वादशा द्वादशेति चित्सुखः द्वादशेति पाठः सुसङ्गत एव स्वामिपादानां च सम्मत इव तद्वद्व्याख्यानात् विशुद्ध्यसे निर्मलकीर्तिर्भविष्य वस्तुतस्तु अन्तर्भूतण्यर्थत्वं विशोधयसि निर्मलयशसा अधिकं पावयिष्यसीत्यर्थः ॥४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् अष्टसप्ततितमोऽध्यायः ॥७८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

घोरोऽन्यैर्हन्तुमशक्य इत्यर्थः । सर्वण्यभावस्यादौ, वीप्ससा अवश्यं सर्वपर्वस्वागमनं बोधयति ॥३८॥ दाशार्ह ! निजैश्वर्यप्रकटनार्थं यदुकुलेऽवतीर्णेत्युत्साहयन्तो हनने सामर्थ्यं सूचयन्ती । परं परमं शुश्रूषणं सम्माननम् । पापत्वमेव दर्शयन् सत्रदूषणप्रकारमाह-पूयेति; पूयादीन्यभितो वर्षितुं शीलं यस्य, च तु ॥३९॥ ततस्तद्वधानन्तरम्, च तु, द्वादशात् द्वादशेति चित्सु द्वादशेति पाठन्तरं सुसङ्गतमेव; तच्च श्रीस्वामिपादानां सम्मतं नो लक्ष्यते, किञ्चिदव्याख्यातत्वात् । छन्दोभङ्गस्त्वार्षत्वात् सोढव्य विशुद्ध्यस इति स्वत एव सदा शुद्धस्त्वं लोकसंग्रहार्थं तत्तदाचरणेन विशेषतः शुध्यसे, निर्म्मलकीर्तिं लब्ध्वा परमोज्ज्व भविष्यसि, यद्वा, अन्तर्भूतण्यर्थत्वम्, विशोधयसि निर्म्मलयशसा अधिकं जगत् पावयिष्यसीत्यर्थः, अन्यत्तैर्व्याख्यातम्; सुसमाहितः सुष्ठु श्रीकृष्णैकचित्तः सन् चरित्वा भारतवर्षे भ्रमित्वा, अन्यत् समानम् ॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशमटिप्पण्यामष्टासप्ततितमोऽध्यायः ॥७८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥३५-४०॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये अष्टसप्ततितमोऽध्यायः ॥७८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थमुक्तास्तावदपेक्षितं कथयन्ति-इल्वलस्येति । दानवो वर्तत इति शेषः । स बल्वलः प्रतिपर्वागत्य सत्रं दूषयति ॥३८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तं बल्वलं जहि मारय तदेव नोऽस्माकं परमम् उत्कृष्टं शुश्रूषणं तं कथम्भूतं पूयादीनभिवर्षतीति तथाभूतं तत्र पूयं हेयम् ॥३९॥ ततस्तद्वधानन्तरं भारतं वर्षं परीत्य प्रदक्षिणीकृत्य सुसमाहितो रागद्वेषादिरहितः तीर्थस्नानशीलो द्वादशमासांश्चरित्वा विशुद्ध्यसे शुद्धो भविष्यसि । चरित्वेत्यस्य कृच्छ्राणीत्यादिर्वा ॥४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् अष्टसप्ततितमोऽध्यायः ॥७८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

प्रायश्चित्तं विधातुमाहुः-इल्वलस्येति ॥३८-४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजकृतपदरत्नावल्याम् अष्टसप्ततितमोऽध्यायः ॥

(श्रीविजयध्वजतीर्थरीत्या षण्णवतितमोऽध्यायः ॥९६॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१०-४०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भेऽष्टसप्ततितमोऽध्यायः ॥७८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥३०-३७॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भेऽष्टसप्ततितमोऽध्यायः ॥७८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...४०॥

॥ इति श्रीनाथचक्रवर्तिपादविरचितायां चैतन्यमञ्जूषायाम् अष्टसप्ततितमोऽध्यायः ॥७८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पर्वणि पर्वणि प्रत्यमावास्यादिनम् ॥३८-३९॥ प्रायश्चित्तमुपदिशन्ति-ततश्चेति । परीत्य प्रदक्षिणीकृत्य सुसमाधानादि पुण्यविशेषादेकाब्दमात्रमुक्तमित्यविरोधः । चरित्वा कृच्छ्राणि ॥४०॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । अष्टयुक्सप्ततितमो दशमेऽजनि सङ्गतः ॥७८॥

गूढार्थदीपिनी

हे दाशार्ह ! दशार्हवंशोद्भव ! पापं पापिनम् । पूयादीन् अभितो वर्षतीति तथा ॥३८॥ ततो बल्वलवधः । परीत्य प्रदक्षिणीकृत्य विशुद्ध्यसे पापमुक्तो भविष्यसि । ननु 'द्वादशाब्दानिति चरेद्ब्रह्मघ्नस्तत्कपालभृत्' इति स्मृतेः कथं द्वादशमासानित्युक्तं

गूढार्थदीपिनी

सेन्द्रियमनसः सुसमाहितत्वेन गुणविशेषसम्बन्धादेकाब्दोऽपि द्वादशाब्दतुल्यो भवति अतः स्मृत्या न विरोधः । यथा युधिष्ठिरकृतैकाश्वमेधस्य दक्षिणादिगुणविशेषसम्बन्धात् त्रित्वं सम्पद्यते तथात्रापि ॥३९॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यामष्टसप्ततितमोऽध्यायः ॥७८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रथमं स्वकामं कथयन्ति-इल्वलस्येति द्वाभ्याम् । अपचितिं कथयन्ति-ततश्चेति । भारतवर्षं परीत्य प्रदक्षिणीकृत्य सुसमाहितः रागद्वेषादिरहितः तीर्थस्नायी द्वादशान्मासान् चरित्वा कृच्छ्राणि ब्रह्महत्याप्रायश्चित्तस्य बहुकालनिर्वर्त्यस्यापि द्वादशमाससाध्यत्वोक्तौ हेतुरुक्तः सुसमाहितः ॥३८-४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टसप्ततितमाध्यायार्थप्रकाशः ॥७८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तदाहुः-इल्वलस्येति । समानमेव निष्कृतिहेतुर्भवति इल्वलोऽपि ब्रह्मवेषधरो भवति ऋषिवेषेणैव क्वचित् स्थित अगस्त्यायातिथये ये च वातापिं स इल्वलः तस्य सुतो बल्वलः स स्वभावतोऽपि वध्य इति ज्ञापयितुमाह-दानव इति । किमतस्तत्राह-

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स दूषयति नः सत्रमिति । पर्वणि पर्वणि पूर्णमास्यां सुत्यादिवसे ॥३८॥ एवं तस्यापराधमुक्त्वा कर्तव्यमाह-तं पापं जहीति पापत्वादवश्यं मारणीयः दाशार्हेति स्वस्य शरणागतत्वं तस्य तत्पालकत्वं च बोधितम् । तदेव नः शुश्रूषणम् अपेक्षितत्वात् दुःखनिवारकत्वाच्च यद्यपि पादसंवाहनादिकमपि भवति शुश्रूषणं तथापि तत्परं तस्य दूषणप्रकारमाहुः-पूयशोणितेति परशुश्रूषणत्वायैतदग्रे कथितं पूयादि षण्णामभितो वर्षणं यस्मादिति ॥३९॥ एवं स्वाभिलषितमुक्त्वा तत्करणेनास्मत्सन्तो सुगममेव प्रायश्चित्तं त्वया कर्तव्यमित्याह-ततश्च भारतं वर्षमिति । भारतवर्षस्य सम्पूर्णस्य परिभ्रमणं कर्तव्यम् अयं मुख्यः कल तत्र प्रकारः सुसमाहित इति द्वादशान्मासान् व्रतं चरित्वेति शूद्रहत्याव्रतमुपदिष्टम् । ततः वर्षपर्यन्तं तीर्थस्नानेनान्तिमेन वा विशुद्ध्य शुद्धो भविष्यसि यात्रा ब्रह्महत्यायाः प्रायश्चित्तं भवति कालस्तु शूद्रहत्यायाः अस्मत्सन्तोषो बल्वलवधेन वाक्यादीनां सत्य प्रतिनिधिस्थापनेनेति सर्वं यथास्थितं जातमिति विशुद्ध्यसे ॥४०॥

॥ इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे
एकोनत्रिंशाध्यायविवरणम् ॥२९॥ ॥७८॥

श्रीसुबोधिनीसारः

ऋषयः इल्वलस्य सुतः पुत्रो घोरो दारुणः बल्वलो नाम दानवोऽस्ति स पर्वणि पर्वणि प्रतिपर्व नोऽस्माकं सत्रं य एत्य प्राप्य दूषयति विण्मूत्रादिभिः ॥३८॥ हे दाशार्ह ! तं पापं त्वं जहि स्य तदेव नोऽस्माकं परं शुश्रूषणं परा सेवा पूयादिवर्षि इति पापित्वे हेतुः ॥३९॥ ततोऽनन्तरं भारतं वर्षं खण्डं परीत्य प्रदक्षिणीकृत्य द्वादशमासान् संवत्सरं यावत् चरित्वा कृच्छ्रा परिभ्रम्य वा सुसमाहितः नियमादिमान् तीर्थस्नायी त्वं पूतो भविष्यसि ॥४०॥

॥ इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायाम् अष्टसप्ततितमोऽध्यायः ॥७८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तव च क्षत्रियस्य तद्वधे न कश्चिद्दोष इति सूचयन् सम्बोधयति-दाशार्हेति । तं पापाचारं जहि मारय, तद्धननमेव नोऽस्माकं परमुत्कृष्टं शुश्रूषणं सेवनम् । तद्दूषणप्रकारमाह-पूयेति । पूयादीनभितो वर्षतीति तथाभूतम् ॥३८॥ प्रायश्चित्तमुपदिशन्ति-ततश्चेति । बल्वलवधानन्तरं भारतं वर्षं परीत्य सर्वत्र भ्रमणं कृत्वा तीर्थस्नायी तीर्थस्नानशीलः तत्र तत्र तीर्थस्नानं कृत्वा चरित्वा यज्ञादि कृत्वा च विशुद्ध्यसे ॥३९॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥

श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥

रचिता दशमे तत्र सात्त्विकानां निरोधने अष्टसप्ततितमोऽगात्सूतघातनिरूपकः ॥३॥ ॥७८॥

अन्वितार्थप्रकाशिका

तमिति । हे दाशार्ह ! पूयादीनभितो वर्षति तं पापाचारं जहि मारय तद्धननमेव नोऽस्माकं परमुत्कृष्टं शश्रूषणं सेवनम् ॥३८॥ ततश्चेति । बल्वलवधानन्तरं सुसमाहितः सन् द्वादशमासानिति चित्सुखपाठः । भारतं वर्षं परीत्य सर्वत्र भ्रमणं कृत्वा तीर्थस्नायी तत्र तत्र तीर्थस्नानशीलः कृच्छ्राणि चरित्वा विशुद्ध्यसे शुद्धकीर्तिर्भविष्यति । वस्तुतस्तु अन्तर्भूतण्यर्थे लोकान् क्रोधयिष्यसि शुद्धयशसा पावयिष्यसि । तडार्षः । सुसमाधानादिगुणविशेषादेकाब्दमात्रमुक्तमिति स्वामिपादाः । तेन स्मृत्युक्तद्वादशाब्दिकविरोधाभावः । स विंशतिशतयोजनागतस्य भागीरथीस्नानं द्वादशवर्षकृच्छ्रसममित्यादि स्मृतिरीत्या तु बुद्धिपूर्वकब्रह्महत्याप्राप्तप्रायश्चित्ततोऽप्यधिकं कृतमिति ज्ञेयम् । नाप्यसौ सूतः साक्षाद् ब्राह्मणः ॥३९॥

॥ इति श्रीभागवते दशमस्कन्धेऽन्वितार्थप्रकाशिकायामष्टसप्ततितमोऽध्यायः ॥७८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पूयाद्यभिवर्षिणं तं जहि ॥३८॥ अपचितिमाहुः-तत इति । परीत्यप्रदक्षिणीकृत्य द्वादशमासान् चरित्वा सूतहत्याव्रतं कृत्वा ॥३९॥

॥इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने रोमहर्षणवधो नामाष्टसप्ततितमोऽध्यायः ॥७८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति । पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणं पापं पापरूपं तं दानवं जहि नाशय । हे दाशार्ह ! तद्दानवमारणमेव नोऽस्माकं परमुत्कृष्टं शुश्रूषणम् ॥३८॥ ततश्चेति । ततश्च तद्वधानन्तरमेव सुसमाहितः रागद्वेषादिरहितः सन् भारतं वर्षं परीत्य प्रदक्षिणीकृत्य तीर्थस्नायी तीर्थेषु स्नानशीलः सन् द्वादशान् मासान् चरित्वा कृच्छ्राणीति शेषः । विशुद्ध्यसे शुद्धो भविष्यसि । द्वादशवर्षापनोद्यस्याघस्य सुसमाधानादिगुणविशेषादेकाब्दमात्रापनोद्यत्वमुक्तमित्यविरोधः ॥३९॥

॥इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धे अष्टसप्ततितमोऽध्यायः ॥७८॥

कृष्णाप्रिया

महर्षिओने कहा की हे बलभद्रजी ! यल्वत्य का पुत्र बल्वल एक भयंकर दान है वह खल प्रत्येक पर्व पर वहा आ जाता है । और हमारे सत्र को दूषित कर जाता है ॥३८॥ हे दाषा है यदुनंदन ! वह खल यहां आकर पूरा-पीब रुधिर मल मुत्र मदिरा और मांस की वृष्टि करने लगता है । आप इस पापी का वध कर दीजीये जीससे हमलोगो की यह उत्तम सेवा बनेगी ॥३९॥ इस कार्य की समाप्ती के बाद आप समाहित मनसे तीर्थ स्नान करते हुऐ बारह मास पर्यन्त भारत वर्ष की परीक्रमा करते हुऐ तीर्थ स्नान करते हुऐ विधरण कीजीये इससे आपको शुद्ध हो जायेगी ॥४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे ७८ अध्यायभाषाटीका समाप्ता ॥७८॥

श्लोकाः अनु.
३४ ३४

तत: पर्वण्यु

श्रीशुक:, उवाच

ऊनाशीतितमे रा
उपावृत्ते प्राप्ते ॥१

आदिना कृच्छ्रादि

ततस्तदैव प्रचण्ड:
अनु पश्चात् अदृश्यत तत्रत्यै:

ततस्तदैव, प्रचण्डो

अथ बल्वलवधं व
भयङ्करो दुर्गन्धो वायुरभूदुदभ्

---

१. गन्धश्च-गो. प्रे. टी.

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ एकोनाशीतितमोऽध्यायः ॥

श्लोकाः	अनु.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अक्ष.
३४	३४	१	११०४	६	५०	११६०	३६।	

श्रीशुक उवाच

ततः पर्वण्युपावृत्ते प्रचण्डः पांसुवर्षणः । भीमो वायुरभूद्राजन् [1]पूयगन्धस्तु सर्वतः[2] ॥१॥

कर्दमक्षमा

श्रीशुकः, उवाच । राजन् ! ततः, पर्वणि, उपावृत्ते, पांसुवर्षणः, प्रचण्डः, पूयगन्धः, सर्वतः, भीमः, वायुः, अभूत् ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

ऊनाशीतितमे रामो बल्वलं द्विचतुष्टये । निहत्य तीर्थस्नानाद्यैः सूतहत्यामपानुदत् ॥१॥

उपावृत्ते प्राप्ते ॥१-२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आदिना कृच्छ्रादिग्रहः (१) ततः वरदानोत्तरम् ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

ततस्तदैव प्रचण्डः अतितीव्रः भीमो भयङ्करः पूयगन्धश्चाभूत् हे राजन्निति विस्मयात् । ततस्तस्मात् वायोरनन्तरं निर्मितम् अनु पश्चात् अदृश्यत तत्रत्यैः यद्वा स्वयमेव दृश्योऽभूदित्यर्थः ॥१-२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ततस्तदैव, प्रचण्डोऽतितीव्रः भीमो भयंकरः तु च पूयगन्धश्चाभूत् हे राजन्निति विस्मयात् ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-९॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथ बल्वलवधं वक्तुं तद्दुश्चेष्टितं प्रस्तौति-तत इति । पर्वण्युपावृत्ते प्राप्ते सति प्रचण्डो निष्ठुरः पांसून् वर्षतीति तथा भयङ्करो दुर्गन्धो वायुरभूदुदभूत् ॥१॥

---

[1] गन्धश्च-गो. प्रे. टी. । [2] सर्वशः-श्रीधर. वंशी. वीर. विज. ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

॥१-२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-३०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...३४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

ऊनाशीतितमे हत्वा बल्वलं बहुतीर्थगः । भीमदुर्योधनयुद्धं दृष्ट्वा रामः पुरीं ययौ ॥१॥

गूढार्थदीपिनी

ऊनाशीतितमे हत्वा बल्वलं सबलं बलः । तीर्थाभिषेकतो ब्राह्मीं सूतहत्यां न्यवारयत् ॥१॥

उपावृत्ते प्राप्ते सति पांसुं धूलिं वर्षतीति । पूयस्येव गन्धो दुर्गन्धो यस्मिन् । सर्वशः सर्वतः । पूयम् (पीव) इति ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ऊनाशीतितमे बल्वलवधरोमहर्षणहत्याशान्त्यर्थं तीर्थस्नानादिकं बलकर्म वर्णयति-तत इति । उपावृत्ते प्राप्ते पांसून् वर्षतीति तथा पूयगन्धो दुर्गन्धो वायुरभूत् ॥१-२॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

कीर्त्यभावे सुसंसिद्धे कीर्तिहेतून् बलः स्वयम् । त्रिंशत्तमे तथाऽध्याये चकारेति निरूप्यते ॥

तत्र प्रथमं बल्वलवधार्थं प्रतीक्षा कृतेति ततो बल्वलसमागमनमाह-ततः पर्वण्युपावृत्ते इति । दानवा अदृश्याः एवेति तत्कार्यमेव दृष्टं वर्णयति । ततः प्रचण्डपांसुवर्षणः पांसुवृष्टिं वर्षन् भयानको वायुराविर्भूतः एतत्तेषां प्रथमकार्यं राजन्निति सम्बोध महती सेना पश्चात्समायातीति ज्ञापनार्थम् । ततः पूयगन्धश्च सर्वतो जातः वृष्ट्यर्थं सुरामांसादीनां आनयनात् ॥१॥

सुबोधिनीसारः

शुकोक्तिः । ततोऽनन्तरं पर्वण्युपावृत्ते प्राप्ते सति प्रचण्डस्तीक्ष्णः धूलिवर्षणः सर्वतः पूयस्येव गन्धो यस्य स भीमो भयङ्करो वायुरभूत् अवात् हे राजन् ! ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ऊनाशीतितमे रामो हत्वा बल्वलदानवम् । सूतहत्यां निराचक्रे तीर्थैरिति निरूप्यते ॥१॥

एवमृषिभिरुक्तमङ्गीकृत्य रामः तदागमनं प्रतीक्षमाणस्तिष्ठति । ततस्तदनन्तरं हे राजन् ! पर्वणि उपावृत्ते प्राप्ते सति प्रचण् निष्ठुरः पांसून् वर्षतीति तथा भीमो भयङ्करः पूयगन्धः दुर्गन्धो वायुः सर्वतोऽभूत् ॥१॥

अन्वितार्थप्रकाशिका

ऊनाशीतितमे रामो न्यहन् बल्वलदानवम् । तीर्थस्नानैः सूतहत्यां श्लोकाः सार्धाश्चतुर्गुणाः (३४) ॥१॥

उवाचेत्येकमेवात्र (१) श्लोकतुल्या (३४) अनुष्टुभः ॥७९॥

तत इति । एवमृषिभिरुक्तमङ्गीकृत्य रामः तदागमनं प्रतीक्षमाणस्तिष्ठति । ततस्तदनन्तरं हे राजन् ! पर्वणि उपावृत्ते सति प्रचण्डो निष्ठुरः पांसून् वर्षतीति तथा भीमो भयङ्करः पूयगन्धः दुर्गन्धो वायुः सर्वतोऽभूत् ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नवसप्ततितमेऽध्याये रामेण कृतं बल्वलहननं सूतवधदोषनिवारणाय तीर्थयात्राकरणं च निरूप्यते तत इति । पर्वणि इष्टिदिने उपावृत्ते आगते सति ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बल्वलं द्विजतुष्ट्यर्थमूनाशीतितमे बलः । हत्वा तीर्थाप्लवाद्यैस्तु सौतीं हत्यामपानुदत् ॥१॥

अथ बल्वलवधं वक्तुं तस्य दुश्चेष्टितं प्रस्तौति । तत इति ॥ ततः पर्वणि उपावृत्ते प्राप्ते सति, प्रचण्डो निष्ठुरः, पासून् वर्षतीति पांसुवर्षणः, भीमो भयंकरः, तुश्चार्थः । पूयस्येव गन्धो यस्येति । दुर्गन्ध इति । दुर्गन्ध इत्यर्थः । वायुः, हे राजन् ! सर्वशः सर्वास्वपि दिक्ष्वित्यर्थः । अभूत् उदभूत् ॥१॥

कृष्णप्रिया

श्रीब्रह्मर्षि शुकदेवजी ने कहा - राजन् परीक्षित ! ऋषि मुनियों ने जो निर्देश निवेदन किया था उसी निवेदन के अनुसार पर्व का दिन आने पर अत्यंत भयानक जोर से वायु चलने लगी । धूध की वृष्टि होने लगी और चारों ओर से पूयदुर्गन्ध पीबकी दुर्गन्ध आने लगी ।।१।।

युधिष्ठिर उवाच

ततोऽमेध्यमयं वर्षं बल्वलेन विनिर्मितम् । अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलधृक् ॥२॥
तं विलोक्य बृहत्कायं भिन्नाञ्जनचयोपमम् । तप्तताम्रशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखम् ॥३॥
सस्मार मुशलं रामः परसैन्यविदारणम् [1] । हलं च दैत्यदमनं ते तूर्णमुपतस्थतुः ॥४॥
तमाकृष्यहलाग्रेण [2] बल्वलं गगनेचरम् । मुशलेनाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः ॥५॥

कर्दमक्षमा

ततः, यज्ञशालायाम्, बल्वलेन, विनिर्मितम्, अमेध्यमयम्, वर्षम्, अभवत्, सः, शूलधृक्, अदृश्यत ॥२॥ बृहत्कायम्, तम्, विलोक्य, रामः, परसैन्यविदारणम्, मुसलम्, च, दैत्यदमनम्, हलम्, सस्मार, ते, तूर्णम्, उपतस्थतुः, ॥३-४॥ गगनेचरम्, बल्वलम्, हलाग्रेण, आकृष्य, क्रुद्धः, बलः, ब्रह्मद्रुहम्, मूर्ध्नि, मुसलेन, अहनत् ॥५॥

श्रीधरस्वामिकृतभावार्थदीपिका

भिन्नो विदीर्णोऽञ्जनचय उपमा यस्य तमतिकृष्णमित्यर्थः । तप्तताम्रवच्छिखा श्मश्रूणि च यस्य तम् दंष्ट्राभिरुग्रभ्रुकुटीमुखं यस्य तम् ॥३-५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो दुर्गन्धप्राप्त्युत्तरम् । स बल्वलः ॥२॥ तं बल्वलम् । इत्यर्थ इति-ततोऽधिकमन्यत्र कार्ष्ण्यं नास्तीति भावः ॥३॥ ते हलमुसले ॥४॥ तं दैत्यम् ॥५॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

तमिति युग्मकम् । बृहत्कायमित्यादिविशेषणैर्यथोत्तरं घोरत्वं सूचितम् । राम इति तज्जिघांसया मुनीन् रमयन्निति भावः । तत्स्मरणे हेतुः परेति दैत्येति च, लीलया ताभ्यां तद्वधार्थमिति भावः । अहनन्त प्रहृतवान् यतो ब्रह्मद्रुहं विप्रकुलहिंसकं बल इति बलाधिक्येन हननस्य गाढता सूचिता ॥३-५॥

---

[1] विमर्द-विज. । [2] पल्वलं-वीर. ।

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

ततस्तस्माद्वायोरनन्तरम् अमेध्यानि पूयादीनि तन्मयं विशेषेण पूर्वतोऽप्याधिक्येन निर्मितम् अनु पश्चाददृश्यत
यद्वा, स्वयमेव दृश्योऽभूदित्यर्थः ॥२॥ बृहत्कायमित्यादिविशेषणैर्यथोत्तरं घोरत्वं सूचितम् ॥३॥ राम इति तज्जिघांसया
रमयन्निति भावः । तत्तत्स्मरणे हेतुः-परेति दैत्येति च । लीलया ताभ्यां तद्वधार्थमिति भावः ॥४॥ अहनत् प्रहृतवान् यतो
विप्रकुलहिंसकं बल इति बलाधिक्येन हननस्य गाढता सूचिता ॥५॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-९॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

ततः अमेध्यमिति छेदः । स बल्वलः शूलं धरतीति तथा अन्वदृश्यत ॥२॥ तमिति । तं बल्वलमवलोक्य रामः
विदारयतीति तथा तं मुसलं दैत्यान् दमयति नाशयतीति तथा तं मुसलं दैत्यान् दमयति नाशयतीति तथा तद्धलं च
सम्बन्धः । तं कथम्भूतं बृहत्कायः शरीरं यस्य भिन्नो विदीर्णोऽञ्जनचयः उपमा यस्य तमिति कृष्णमित्यर्थः । तप्ततांम्र
श्मश्रूणि च यस्य तं दंष्ट्राभिरुग्रं भ्रुकुटीयुतं मुखं यस्य तम् ॥३॥ तौ हलमुसलौ तूर्णं तदैव उपतस्थतुः सन्निहितौ बभूवतुः
तमिति । गगनेचरं तं बल्वलं हलाग्रेणाकृष्य बलो रामः क्रुद्धो मूर्ध्नि मुसलेनाहनत् ताडयामास । तत्र हेतुत्वेन बल्वलं
ब्रह्मद्रुहं ब्रह्म ब्राह्मणकुलं तस्मै द्रुह्यतीति तथा तम् ॥५॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

तप्ततांम्रवत् प्रकाशमानाभिः शिखाश्मश्रुदंष्ट्रोग्रभ्रुकुटिभिर्युक्तं मुखं यस्य स तथा तं शिखा च श्मश्रूणि च
उग्रभ्रुकुटी च शिखाश्मश्रुदंष्ट्रोग्रभ्रुकुट्यः उग्रा भ्रुकुटी उग्रभ्रुकुटी ॥३-७॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-३०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...३४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

उपावृत्ते प्राप्ते ॥१-५॥

गूढार्थदीपिनी

अमेध्यमयं विष्ठामूत्रमयम् । स बल्वलोऽपि । धृक् 'धृजे क्विप्' ॥२॥ तमिति युग्मम् । रामः तं विलोक्य मुसलं
सस्मार । ते तूर्णमुपतस्थतुः समीपमाजग्मतुः । कथम्भूतम् । भिन्नः विदीर्णः योऽञ्जनचयः कज्जलगिरिः तद्वत् उपमा
अतिकृष्णम् । पुनश्च । तप्ततांम्रवत् शिखाः श्मश्रूणि च यस्य । पुनश्च दंष्ट्राभिः उग्रं भीषणं भ्रुकुटीयुक्तं मुखं यस्य तम् ।
विदारयतीति तथा मुसलविशेषणम् ॥३-४॥ गगनेचरं सप्तम्या अलुक् । अहनत् अहन् ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

भिन्नः किञ्चित् पुरुषाकारेण विदीर्णः अञ्जनचयः उपमा यस्य तम् ॥३-५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

ततो यज्ञशालायाममेध्यमयं वर्षमभूत् तेन स एवोपद्रव इति निश्चितं ततः सोऽप्यन्वदृश्यत
महादेवाल्लब्धवरत्वं ख्यापयितुम् ॥२॥ ततो बलदर्शनेन तस्य स्वरूपं वर्णयति-तं विलोक्येति । आदौ मूर्तिस्थौल्यं
बलाधिकं च वर्णेनापि तथात्वमाह-भिन्नाञ्जनचयोपममिति । अञ्जनचयोऽञ्जनपर्वतः प्रसिद्धाञ्जनपर्वताद्भिन्नश्चेन्मूर्तिमान्

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

भवति तस्याधिदैविक: पृथक् पर्वत: स्थित: तदायं तत्तुल्यो भवति एवं तस्मिन् तामसभावमुक्त्वा तथा सति जडो भविष्यतीत्याशङ्क्य तस्य स्वरूपे वर्णे च राजसं भावमाह-तप्ततामप्रशिखाश्मश्रुमिति। अग्नितप्ततामवत् शिखा केशा: श्मश्रूणि च यस्य तं दंष्ट्राभि: उग्रभ्रुकुटया च सहितं भुखं च भ्रुकुटिसहितं मुखं दंष्ट्राभिरुग्रं वा अयं सर्वथा वध्य एवेति ॥३॥ स्वशस्त्रं मुसललाङ्गलात्मकं द्वारकायां स्थितं पाताले वैकुण्ठे वा स्थितं सस्मार यतो राम: सर्वेषां रतिजनक: पूर्ववद्विशेषणं परसैन्यविदारणमिति शत्रुसेनाविनाशकं हलं च तादृशं चकारेण तद्धर्मानुत्कर्ष: स्मरणानन्तरमेव बलभद्रमुपतस्थतु: तत्समीपमागते ॥४॥ ततो लीलाया: कर्तव्याभावात् एकेनैव प्रहारेण तं मारितवानित्याह-तमाकृष्येति। गगनेचरं दूरे वर्तमानमपि भगवत्त्वेऽपि क्रुद्धत्वान्मारणं क्रोधे हेतु: ब्रह्मद्रुहमिति बल इति सामर्थ्यम् ॥५॥

सुबोधिनीसार:

ततो बल्वलेन विनिर्मितं रचितं कृतम् अमेध्यमयं विण्मूत्रादिरूपं वर्षं वृष्टिर्यज्ञशालायामभवत्। शूलधारी स बल्वलोऽन्वदृश्यत प्रतीतोऽभूत् ॥२॥ भिन्नो विदीर्णोऽञ्जनचय: कज्जलपुञ्जपर्वतो बहुव्रीहिबलात् स उपमा यस्य तप्ततामवत् शिखा श्मश्रूणि च यस्य दंष्ट्राभिरुग्रं भयङ्करं भ्रुकुटीयुतं मुखं यस्य तं महाकायं तं बल्वलं विलोक्य राम: परसैन्यविदारणं शत्रुबलविनाशनं हलं मुसलं च शत्रुदमनं सस्मार दध्यौ। ते हलमुसले तूर्णं शीघ्रं प्रापतु: ॥३-४॥ गगनेचरमाकाशचारिणं तं बल्वलं हलाग्रेणाकृष्य ब्रह्मद्रुहं ब्राह्मणद्वेषिणं क्रुद्धो बलो मुसलेन मूर्ध्नि अहनत् ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च बल्वलेन विनिर्मितममेध्यमयं विण्मूत्रादिमयं वर्षं यज्ञशालायामभवत्। ततश्च शूलधृक् स बल्वलोऽन्वदृश्यत दृष्टो बभूव ॥२॥ तं बल्वलं विलोक्य राम: परसैन्यं दारयतीति तथा तं मुशलं तथा दैत्यान् दमयति विनाशयतीति तथाभूतं हलं च सस्मार, ते च हलमुशले तूर्णं तत्क्षणमेवोपतस्थतु:। समीपमागते इति द्वयोरन्वय:। तस्य वधयोग्यतां दर्शयंस्तं वर्णयति-बृहत्काय: शरीरं यस्य तम्। भिन्नो विदीर्ण: अञ्जनचय उपमा सदृशो यस्य तम्, अतिकृष्णमित्यर्थ:। तप्ततामवत् शिखा: श्मश्रूणि च यस्य तम्। दंष्ट्राभि: उग्राभ्यां भ्रुकुटीभ्यां च युक्तं मुखं यस्य तम् ॥३-४॥ गगनेचरम् आकाशे स्थितं तं बल्वलं हलाग्रेणाकृष्य बलरामो मुशलेन मूर्ध्नि अहनत्, यत: क्रुद्ध:। तत्र हेतुमाह-ब्रह्मद्रुहमिति। ब्राह्मणकुलद्रोहकर्तारम् ॥५॥

अन्वितार्थप्रकाशिका

तत इति। ततश्च बल्वलेन विनिर्मितममेध्यमयं विण्मूत्रादिमयं वर्षं यज्ञशालायामभवत्। ततश्च शूलधृक्। धृजे: क्विप्। स बल्वलोऽन्वदृश्यत् दृष्टो बभूव ॥२॥ तमिति युग्मम्। बृहत्काय: शरीरं यस्य तं भिन्नो विदीर्ण: अञ्जनचय उपमासदृशो यस्य तमति कृष्णमित्यर्थ:। तप्ततामवत् शिखा: श्मश्रूणि च यस्य तं दंष्ट्राभि: उग्राभ्यां भ्रुकुटीभ्यां च युक्तं मुखं यस्य तम् बल्वलं विलोक्य राम: परसैन्यं विदारयतीति तथा तत् मुसलं तथा दैत्यान् दमयति विनाशयतीति तथाभूतं हलं च सस्मार ते च हलमुसले तूर्णं तत्क्षणमेवोपतस्थतु: समीपमाजग्मतु: ॥३-४॥ तमिति। ब्रह्मद्रुहं ब्राह्मणकुलद्रोहकर्तारम् गगनेचरम् आकाशे स्थितं तं बल्वलं हलाग्रेणाकृष्य क्रुद्धो बल: मुसलेन मूर्ध्नि अहनत्। शब्लुगभाव आर्ष: ॥५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ततो वायोरनन्तरम्। अनुपूयादिवृष्टे: पश्चात् स बल्वलो जनै: अदृश्यत ॥२॥ भिन्न एवदेशस्थ: अञ्जनचय: कज्जलसमूह उपमा यस्य तम्। अति श्याममित्यर्थ:। दंष्ट्राभिरुग्रं भ्रुकुटियुक्तं मुखमस्य तम् ॥३॥ ते उभे ॥४-५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति॥ तत:, यज्ञशालायां, बल्वलेन विनिर्मितम्, अमेध्यमयं प्रचुरामेध्यं, वर्षम् अभवत्। तत:, शूलधृक्, विधृतशूल:, स बल्वल:, अन्वदृश्यत ॥२॥ तमिति॥ सस्मारेति च॥ राम:, बृहन्महान् कायो यस्य तं, भिन्नो विदीर्णश्चासावञ्जनचयश्च स उपमा

ागवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यस्य तं, तप्तताम्रवच्छिखाः श्मश्रूणि च यस्य तं, दंष्ट्राभिरुग्रं भ्रुकुटीयुतं मुखं यस्य तं, तं बल्वलं, विलोक्य, परेषां सैन्यानि विदारयतीति तथा तं मुसलं सस्मार। दैत्यान् दमयतीति तथा तं हलं च सस्मार। यदा स्मृते तदेति शेषः। ते हलमुसले तू शीघ्रमेव उपतस्थतुः ॥३-४॥ तमिति। बलः, गगनेचरमाकाशचारिणं तं बल्वलं हलाग्रेण आकृष्य क्रुद्धः सन् ब्रह्मद्रुहं मूर्ध्नि मुसलेन अहनत् ॥५॥

कृष्णप्रिया

पीब गन्ध आने बाद यज्ञभूमि में दानव बल्वलने मल मूत्र आदि अपवित्र वस्तुओंकी वृष्टि का प्रारम्भ किया। वर्षा के बाद हस्तमें त्रिशूल धारण किये हुए बल्वल दिखायी पडा ॥२॥ उस की काया बडी विशाल थी। मान लीजिये कि एक ही जगह अरजग का संचय किया हो। बल्वल की चोटी और दाढी मूंछ संतप्त ताम्र के समान लाल ही लाल दृश्यमान हो रहा था। उग्र दंष्ट्रा और एक भ्रुकुटी के कारण उसका मुंह अत्यंत भयंकर लगता था ॥३॥ ऐसे भयानक बल्वल को देखकर यदुदेव श्रीबलदेवजी ने शत्रुसेना का निकंदखान करने वालु मूसल धारण कर लिया और दैत्यो को चीर देने वाले हलका स्मरण किया। उन दोनों के आते हुए आप स्वयं वहां आ पहुंचे ॥४॥ पुनः श्रीबलदेवजी गगन विहारी विल्वल दैत्य को अपने हलाग्र भाग से खींचकर उस खल ब्रह्मद्रोही के बडे रोष से मूसल का प्रहार किया जिससे उसका ललाट फट गया ॥५॥

सोऽपतद्भुवि निर्भिन्नललाटोऽसृक्समुत्सृजन्। मुञ्चन्नार्तस्वरं शैलो यथावज्रहतोऽरुणः[1] ॥६॥
संस्तुत्य मुनयो रामं [2]प्रयुज्याऽवितथाशिषः। अभ्यषिञ्चन्महाभागा वृत्रघ्नं विबुधा यथा ॥७॥
वैजयन्तीं ददुर्मालां श्रीधामाम्लानपङ्कजाम्। रामाय वाससी दिव्ये दिव्यान्याभरणानि च ॥८॥
अथ तैरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्मणैः। स्नात्वा सरोवरमगाद्यतः सरयूरास्रवत् ॥९॥

कर्दमक्षमा

निर्भिन्नललाटः, अरुणः, असृक्, समुत्सृजन्, आर्तस्वरम्, मुञ्चन्, वज्रहतः, यथा, शैलः, सः, भुवि, अपतत् ॥ अवितथाशिषः, मुनयः, रामम्, संस्तुत्य, प्रयुज्य, महाभागः, विबुधाः, यथा, अभ्यसिञ्चन् ॥७॥ रामाय, श्रीधामाम्लानपङ्कजा वैजयन्तीम्, मालाम्, दिव्ये, वाससी, च, दिव्यानि, आभरणानि, ददुः ॥८॥ अथ, तैः, ब्राह्मणैः, अनुज्ञातः, कौशिकीम् स्नात्वा, यतः, सरयूः, आस्रवत्, सरोवरम्, अगात् ॥९॥

श्रीधरस्वामिकृता भावार्थदीपिका

अरुणो रुधिरेण दैत्यः शैलो धातुभिर्यथेति ॥६-७॥ श्रियोधामान्यम्लानानि पङ्कजानि यस्यां ताम् ॥८॥ किञ्च यत इति आस्रवदुदगात् ॥९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स बल्वलः ॥६-७॥ वैजयन्तीं विजयकरीम् ॥८॥ अथ वस्त्रमालादिसत्कारानन्तरम्। तैर्ब्राह्मणैः। मानसं सरो यतः सरोवरात् ॥९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्यक् धारादिरूपेण उत्सृजन् अत एवारुणः महाकायस्यापि तस्य सकृत् प्रहारेण पतनेन दृष्टान्तः। शैल इति आहतः प्रहतः सोऽप्यसृक्तुल्यं गौरिकं समुत्सृजन् तेनैवारुणो महाशब्दं कुर्वन् पतति वहत इति पाठे पाठान्तरेऽप्यर्थः।

---

१. ऽसुरः-विज.। २. प्रयुज्यापि तथा-विज.।

लोक्य, परेषां सैन्यानि
ष: । ते हलमुसले तूर्णं
क्रुद्ध: सन् ब्रह्मद्रुहं तं

ोंकी वृष्टि का प्रारम्भ
काया बडी विशाल थी
ढी मूंछ संतप्त ताम्र के
ह अत्यंत भयंकर लगता
व्रान करने वाले मूसल
हुए आप स्वयं वहां आ
यकर उस खल ब्रह्मद्रोही

तोऽरुण:[1] ॥६॥
बुधा यथा ॥७॥
भरणानि च ॥८॥
रास्रवत् ॥९॥

न:, स:, भुवि, अपतत् ॥६॥
माय, श्रीधामाम्लानपङ्कजाम्,
अनुज्ञात:, कौशिकीम्, एत्य,

न यस्यां ताम् ॥८॥ किन्तत्सर:

। तैर्ब्राह्मणै: । मानसं सरोवरम्।

तनेन दृष्टान्त: । शैल इति । वज्रेण
त पाठे पाठान्तरेऽप्यर्थ: । स एव

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सम्यक् ईश्वरत्वश्रीकृष्णैकप्रियत्वात् यतो मुनयो महाभिज्ञा: अवितथा: सत्या: सद्य:फला: आशिष: सुखं जगत् पाहि सुसिद्धाभीष्टो भूया इत्याद्या: प्रयुज्य दत्त्वा अभ्यषिञ्चन् तस्य मङ्गलाभिषेकं कारयामासु: । यतो महाभागा: परमभाग्यवन्त इति सर्वसम्पत्तिमत्त्वं सूचितम् । तत्रानुरूपो दृष्टान्त: वृत्रघ्नमिति ॥६-७॥ श्रीधामेति महादिव्यत्वं तथा वैजयन्त्या: पञ्चवर्णत्वेऽपि पङ्कजप्रायत्वमुक्तम् ॥८॥ अथानन्तरमेव तीर्थयात्रोद्यतत्वात् तैर्मुनिभिरभ्यनुज्ञात: ब्राह्मणै: स्वसङ्गागतै: पुरोहितादिभि: सह सरयु: सरयू: ॥९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्यग् धारादिरूपेणोत्सृजन् त्यजन् अत एवारुण: महाकायस्यापि तस्य सकृत्प्रहारेण पतने दृष्टान्त:-शैल इति । वज्रेणाहत: प्रहृत: सोऽप्यसृक्कुल्यं गैरिकादिकं समुत्सृजन् तेनैवारुणो महाशब्दं कुर्वन् पतति । वज्रहत इति पाठे पाठान्तरेऽप्यर्थ: स एव ॥६॥ सम्यक् ईश्वरत्व-श्रीकृष्णैकप्रियत्वात् यतो मुनयो महाभिज्ञा: अवितथा: सत्या: सद्य:फला आशिष:-सुखं जगत् पाहि सुसिद्धाभीष्टो भूया: । इत्याद्या: प्रयुज्य दत्त्वा अभ्यषिञ्चन् तस्य मंगलाभिषेकं कारयामासु: यतो महाभागा: परमभाग्यवन्त इति सर्वसम्पत्तिमत्त्वं सूचितम् । तत्रानुरूपो दृष्टान्त:-वृत्रघ्नमिति ॥७॥ श्रीधामेति महादिव्यत्वं तथा वैजयन्त्या: पंचवर्णत्वेऽपि पंकजप्रायत्वमुक्तम् ॥८॥ अथानन्तरमेव तीर्थयात्रोद्यमत्वात् तैर्मुनिभिर्ब्राह्मणै: स्वसंगागतै: पुरोहितादिभि: सह स्नात्वा तस्यां सरयूमनुस्रोतेन सरय्वा अनुलोमत: स्नात्वा प्रयोगे सन्तर्प्य च आदि-शब्दादृश्यादीनपि विद्यमानपितृपितामहस्यापि तस्य गयायां पितृयोग: श्रीवसुदेवाज्ञया तत्पूर्वजापेक्षयेति ज्ञेयम् ॥९-१०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१-९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स इति । निर्भिन्नं ललाटं यस्य स: बल्वल: । असृग्रुधिरं समुत्सृजन्नुद्गिरन्नार्तस्वरं मुञ्चंश्च भुवि भूमावपतत् यथारुण: गैरिकादिधातुभिरिति शेष: । उपमेये तु रुधिरेणाऽरुण: वज्रेणाहत: पर्वत: पपात तद्वदित्यर्थ: ॥६॥ संस्तुत्येति । अवितथा: सत्या: ता: आशिष: प्रयुज्याशीर्वादान् कृत्वेत्यर्थ: । हे महाभाग ! अभ्यषिञ्चन् स्नापयामासु: यथा विबुधा: देवा: वृत्रघ्नम् इन्द्रं तद्वदित्यर्थ: ॥७॥ वैजयन्तीमिति । श्रियो धामान्यम्लानानि पङ्कजानि यस्यां तां वैजयन्तीं नाम मालां दिव्ये वस्त्रे दिव्यान्याभरणानि च ददु: ॥८॥ अथेति । तैर्मुनिभिर्ब्राह्मणै: सह कौशिकीं नदीमागत्य तत्र स्नात्वा तत: सरोवरमगात् । किं तत्सरस्तत्राह-यत: सरस: सरयूरास्रवदुदगात् ॥९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

श्रियो धामानि अम्लानानि च पङ्कजानि यस्यां सा तथा ताम् ॥८॥ यत: सरोवरात् आस्रवत् अस्यन्दत् ॥९॥

श्रीमज्जीवगोस्वामिकृत: क्रमसन्दर्भ: ॥१-३०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भ: ॥१...३४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

अरुणो रुधिरेण । दैत्य: शैलो धातुभि: ॥६-७॥ श्रियो धामानि अम्लानानि पङ्कजानि यस्यां ताम् ॥८॥ किं तत् सरोवरं तत्राह-यत इति । आस्रवत् उदगात् ॥९॥

गूढार्थदीपिनी

स बल्वल: । निर्भिन्नं विदीर्णं ललाटं यस्य स: । आर्तस्वरं पीडासूचकशब्दं मुञ्चन् भुवि अपतत् । असृक् रक्तम् उद्गिरन् गैरिकादिधातुभि: अरुण: शैल: यथा पतति तथा ॥६॥ अवितथा: सत्या: आशिष: आशीर्वादान् प्रयुज्य दत्त्वा । विबुधा देवा:

गूढार्थदीपिनी

यथा वृत्रघ्नमिन्द्रम् ॥७॥ श्रियो धामानि अम्लानानि विकसितानि पङ्कजानि यस्यां ताम् । वैजयन्तीं विजयकरीम् मुनयो ददुरिति योज्यम् । वाससी वस्त्रे ॥८॥ तैः मुनिभिः अनुज्ञातो रामः ब्राह्मणैः पुरोहितादिभः सह सरोव मानसमगात् । यतः सरोवरात् सरयूर्नदी आस्रवत् निरगात् ॥९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अरुणः गैरिकादिना ॥६-७॥ श्रियः शोभायाः धामानि अम्लानानि पङ्कजानि यस्यां ताम् ॥८॥ आस्रवदुदगात् ॥९॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

न तस्य पराक्रमः कोऽपि जात इति वक्तुं शीघ्रं तस्य पतनमेवोच्यते-सोऽपतदिति । भुवीति तस्यापि मुक्तिः निर्भिन्नललाट प्रहारज्ञापकम् असृक् समुत्सृजन्निति महाप्रहारः प्रतीकाराऽकरणज्ञापकः आर्तस्वरं मुञ्चन्निति मुक्त्यर्थं स्वस्मिन् दया ख्यापि तादृशोऽपि हन्तव्य एवेति दृष्टान्तमाह-शैलो यथा वज्रहत इति । अरुणः अरुणवर्णः पर्वतः ॥६॥ ततः इष्टस्य सिद्धत्वात् मुन स्तोत्रादिकं कृतवन्त इत्याह-संस्तुत्येति । स्तोत्रं स्वसन्तोषख्यापकं ततः प्रीतानां सत्याशीर्दानं ततः स्वसर्वपुरुषार्थसिद्ध्यर्थं अभ्यषिञ्चन् कीर्त्यर्थं पापनिवृत्त्यर्थं वा परमदयालुर्व्रतस्थः कथमेवं कृतवानित्याशङ्कां वारयितुं महत्या प्रार्थनया केवलं मारितवा न तु स्वत एवेति ज्ञापयितुं दृष्टान्तमाह-वृत्रघ्नंविबुधा यथेति । वृत्रे हते यथा देवेन्द्राभिषेकं चक्रुरित्यर्थः । अनेन तस्य सर्वपापक्ष निरूपितः ॥७॥ ततः कीर्त्याद्युपचयार्थं वैजयन्तीं मालां ददुः आपदलम्बिनी वैजयन्ती श्रीधामेति स्थिरलक्ष्मीत्वम् अम्लानेति दोषाभावः पङ्कजेति गुणाः ततो रामाय सर्वरमणरूपाय दिव्ये वाससी दिव्यानि चाभरणानि लौकिकशोभातिशयार्थं ददुः ॥८॥ ए लौकिकशोभातिशयसंयुक्तः सन् तदाज्ञापालनार्थं तैरभ्यनुज्ञातः तीर्थयात्रार्थमाज्ञप्तः ब्राह्मणैः सह कौशिकी नदीं ययौ तत उत्तरभा या कोटग्रामादायाति सा कौशिकी तत्र स्नात्वा तेनैव मार्गेण मानससरोवरमगात् ॥९॥

सुबोधिनीसारः

निर्भिन्नो ललाटो यस्य स्फुटितमस्तकः स बल्वलोऽसृक् रुधिरं समुद्वमन् आर्तस्वरं हा कष्टमिति शब्दं मुञ्चन् कु अपतत् । अरुणो रुधिराक्तः ममारेत्यर्थः । वज्रेण हतः शैलः पर्वतो यथा ॥६॥ संस्तुत्य समीड्य अवितथाः सत्या आशि प्रयुज्य दत्त्वा महाभागा ऋषयो राममभ्यषिञ्चन् वृत्रघ्नम् इन्द्रं विबुधा देवा यथा ॥७॥ श्रियो लक्ष्म्या धामानि गृहाण्यम्लानानि सदा विकसन्ति पङ्कजानि यस्यां तां वैजयन्तीं मालां दिव्ये वाससी द्वे दिव्यान्याभरणानि च रामाय ददुः ॥८॥ अथ म तैर्ऋषिभिरभ्यनुज्ञातो रामो ब्राह्मणैः सह कौशिकीम् एत्य प्राप्य स्नात्वा च सरोवरमगात् यतो यस्मात् सरसः सरयूर्नदी अस 'सरः प्रवृत्ता सरयूः' इति वाल्मीकिवचनात् ॥९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

निर्भिन्नं ललाटं यस्य सः बल्वलः असृक् रुधिरं समुत्सृजन् उद्वमन् आर्तस्वरं च मुञ्चन् भुवि अपतत् । तत्र दृष्टान्तमा गैरिकादिभिररुणः इन्द्रवज्रेण हतः शैलो यथा स्वरं मुञ्चन् पतति यथेति ॥६॥ एवं तद्वधेन सन्तुष्टा मुनयो रामं संस्तुत्य अवि यथार्था आशिषः प्रयुज्य अभ्यर्षिचन् स्नापयामासुः । एवं भगवत्स्तुत्यादिकरणं महासुकृतफलम् इति सूचयन्नाह-महाभागा तत्र दृष्टान्तमाह-वृत्रघ्नम् इन्द्रं यथा तद्वधेन सन्तुष्टा द्विजाः अभिषिच्य स्तुत्यादिकं कृतवन्तस्तथेति ॥७॥ श्रियः शोभाया धा अम्लानानि पङ्कजानि यस्यां तां वैजयन्तीं बहुरूपपुष्पचितां मालां दिव्ये वाससी वस्त्रे दिव्यान्याभरणानि च रामाय ददुः ॥८॥ बल्वलनिधनं निरूप्य तेन कृतां तीर्थयात्रां निरूपयति-अथेति । बल्वलवधानन्तरं तैर्मुनिभिरभ्यनुज्ञातो रामो ब्राह्मणैः सह कौ नदीमेत्य आगत्य तत्र स्नात्वा ततः सरोवरमगात् । 'किं तत्सरोवरम्' इत्यपेक्षायामाह-यतः सरसः सरयू नाम नदी आस्रवत् उदगा

अन्वितार्थप्रकाशिका

स इति । निर्भिन्नं ललाटं यस्य सः बल्वलः असृक् रुधिरं समुत्सृजन् उद्वमन् अतो रुधिरेणारुणः आर्तस्वरं च मुञ्च अपतत् । यथा गैरिकादिभिररुणः इन्द्रवज्रेण हतः शैलो यथा स्वरं शब्दं मुञ्चन् पतति तथेति ॥६॥ संस्तुत्येति । महाभाग

रामं संस्तुत्य अ
कृतवन्तस्तथेति ॥७॥ तं
दिव्ये वाससी वस्त्रे दिव
नदीमेत्य आगत्य तत्र स्न

अरुणो रक्तः
अम्लानानि निरन्तरमशु
सह ॥ आस्रवदुत्पन्ना ब

स इति ॥ निर्
गैरिकादिधातुभिरिति शो
अवितथाः सत्याः या अ
महाभागेति सम्बोधनं वा
दिव्ये वाससी दिव्यानि अ
तैर्मुनिभिः अभ्यनुज्ञातः स
सरयूः, आस्रवत् । तत् सरे

वह पल्वल रुधि
बल्वलको देखते हुए ऐसे त
पड़ता था ॥६॥ शौनक म
यशोगान किया और समर्च
देवराज इन्द्रजी का अभिषेव
श्रीबलरामजी को वैजन्ती म
सौन्दर्य का कमल के पात्रो
ने नैमिष निवासी मुनिवरो
सरिता के तट पर पधारे । क
से भगवानी श्रीसरयूजी का

अनुस्त्रोतेन [1]सरयूं प्र
गोमतीं गण्डकीं स्नात
उपस्पृश्य महेन्द्राद्रौ र
स्कन्दं दृष्ट्वा ययौ राम

---

१. रमयन्-गो. प्रे. टी. । २.

अन्वितार्थप्रकाशिका

रामं संस्तुत्य अवितथा यथार्था आशिषः प्रयुज्य अभ्ययथा वृत्रघ्नम् इन्द्रं यथा तद्वधेन सन्तुष्टा विबुधाः अभिषिच्य स्तुत्यादिकं कृतवन्तस्तथेति ॥७॥ वैजयन्तीमिति । श्रियः शोभाया धामानि अम्लानानि पङ्कजानि यस्यां तां वैजयन्तीं बहुरूपपुष्परचितां मालां दिव्ये वाससी वस्त्रे दिव्यान्याभरणानि च रामाय ददुः ॥८॥ अथेति । बल्वलवधानन्तरं तैर्मुनिभिरभ्यनुज्ञातो रामो ब्राह्मणैः सह कौशिकीं नदीमेत्य आगत्य तत्र स्नात्वा ततः सरोवरमगात् । यतः सरसः सरयुर्नाम नदी । ह्रस्वान्तताऽऽर्षी । आस्रवत् उदगात् ॥९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अरुणो रक्तः शैलो यथा ॥६॥ अवितथाशिषः सत्याशीर्वादान् ॥७॥ श्रियाः शोभायाः धामानि स्थानानि अम्लानानि निरन्तरमशुष्कतया प्रफुल्लानि पङ्कजानि च यस्यां ताम् ॥८॥ तैः सत्रस्थमुनिभिः ब्राह्मणैः स्वेन सहागतैर्विप्रैः सह ॥ आस्रवदुत्पन्ना बभूव ॥९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति ॥ निर्भिन्नं ललाटं यस्य सः असृग्रुधिरं समुत्सृजन् स बल्वलः आर्तस्वरं मुञ्चन् सन् वज्रहतः अरुणः गैरिकादिधातुभिरिति शेषः । शैलः पर्वतः यथा तथा भुवि अपतत् ॥६॥ संस्तुत्येति ॥ महाभागाः मुनयः रामं संस्तुत्य अवितथाः सत्याः या आशिषस्ताः प्रयुज्य, विबुधा देवाः, वृत्रघ्नमिन्द्रं, यथा, तथा, अभ्यषिञ्चन् स्नापयाञ्चक्रुः । हे महाभागेति सम्बोधनं वा ॥७॥ वैजयन्तीमिति । मुनयः श्रियः धामानि अम्लानानि पंकजानि यस्यास्तां वैजयन्तीं मालां दिव्ये वाससी दिव्यानि आभरणानि च रामाय ददुः ॥८॥ अथेति अथानन्तरं, रामः तैः, ब्राह्मणैः अभ्यनुज्ञातः । यद्वा, मुनिभिः अभ्यनुज्ञातः सन्, ब्राह्मणैः सह, कौशिकीं नदीम्, एत्यागत्य, तत्र स्नात्वा, ततः, यतः यस्मात् सरोवरात्, सरयुः नद्यः, आस्रवत् । तत् सरोवरम् अगात् 'सरयूः सरयुश्च निगद्यते' इति द्विरूपः ॥९॥

कृष्णप्रिया

वह पल्वल रुधिर उगलता और आर्त स्वर से चिल्लाता हुआ धरणी पर गिर पडा । भूमि पर गिरे हुए पल्वलको देखते हुए ऐसे लगता था कि इन्द्र के वज्र की चोट खाकर गेरूधातु से रक्त वर्ण का कोई पर्वत सा दीख रहा था ॥६॥ शौनक महर्षि योजित सत्रमें समुपस्थित एवं नैमिषारण्य निवासी समर्थ मुनियों ने श्रीबलभद्रजी स्वागत किया और समर्चन किया और सदा सफल होनेवाले आशिर्वाद दिये । पुन देवाधिदेव सर्व मिलकर जैसे देवराज इन्द्रजी का अभिषेक करते है वैसे ही उनका अभिषेक किया ॥७॥ बलभद्रजी के अभिषेक बाद महर्षियोंने श्रीबलरामजी को वैजन्ती माला, दिव्य वस्त्र, दिव्य अलंकार समर्पित किये । जो कभी भी न मुरझाने वाली और सौन्दर्य का कमल के पात्रो का दलीथी आश्रम वनमाला थी ॥८॥ श्रीमहर्षिवरों के सत्कार के बाद श्रीबलभद्रजी नैमिष निवासी मुनिवरो का अनुमोदन प्राप्त करके महर्षिवरों के सूचनानुसार विप्रवर्यो के साथ श्रीकौशिकी सरिता के तट पर पधारे । कौशिकी जी में स्मान दान स्तुति आदि पुण्य कर्म करने के बाद मुनिवरों के साथ जहां भावानी श्रीसरयूजी का प्राकट्य हुआ उस सरोवर पर पहुंचे ॥९॥

अनुस्रोतेन [1]सरयूं प्रयागमुपगम्य सः । स्नात्वा सन्तर्प्य दवादीन् जगाम पुलहाश्रमम् ॥१०॥
गोमतीं गण्डकीं स्नात्वा विपाशां शोण आप्लुतः । गयां गत्वा पितॄनिष्ट्वा गङ्गासागर[2]सङ्गमे॥११॥
उपस्पृश्य महेन्द्राद्रौ रामं दृष्ट्वाऽभिवाद्य [3] च । सप्तगोदावरीं वेणां पम्पां भीमरथीं ततः ॥१२॥
स्कन्दं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशालयम् । द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वैङ्कटं प्रभुः ॥१३॥

---

[1] स्रयन्-गो. प्रे. टी. । [2] सङ्गमं-वीर. विज. । [3] ऽभिवाद्य तं -विज. ।

कर्दमक्षमा

अनुस्रोतेन, सरयूम्, प्रयागम्, उपगम्य, स्नात्वा, देवादीन्, सन्तर्प्य, सः, पुलहाश्रमम्, जगाम ॥१०॥ गोमतीम्, गण्डकीम्, विपाशाम्, स्नात्वा, शोणे, आप्लुतः, गयाम्, गत्वा, पितृन्, इष्ट्वा, गङ्गासागरसङ्गमम्, उपस्पृश्य, महेन्द्राद्रौ, रामम्, दृष्ट्वा, च, अभिवाद्य, सप्तगोदावरीम्, वेणाम्, पम्पाम्, ततः, भीमरथीम्, स्कन्दम्, दृष्ट्वा, गिरिशालयम्, द्रविडेषु, महापुण्यम्, वेङ्कटम्, अद्रिम्, दृष्ट्वा, प्रभुः, श्रीशैलम्, ययौ ॥११-१२-१३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनुस्रोतेनानुलोमतः पुलहाश्रमं हरिक्षेत्रम् ॥१०॥ गोमत्याङ्गण्डक्यां विपाशायां चस्नात्वा शोणे च आप्लुतः सम्पूज्य ॥११-१२॥ श्रीशैलं श्रीपर्वतम् ॥१३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स बलः । आदिना दिव्यपित्रादिग्रहः ॥१०॥ पितृनिति–ननु जीवत्पितृकेण रामेण कथं पितृयागः कृत इति चेदाह- 'वृद्धे तीर्थे च संन्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥' इति स्मृतेर्जीवत्पितृपितामहस्यापि श्राद्धेऽधिकारो न तु जीवत्पितृपितामहप्रपितामहस्यापीति । यच्चोक्तम् – "अमाश्राद्धं गयाश्राद्धं न कुर्यात् सपिता पुमान्।" इति । तत्तु जीवत्पितृकेण गयामुद्दिश्य न गन्तव्यमित्येवं वरम् । प्रसङ्गात्प्राप्तौ तु श्राद्धं कार्यमेवेति तत्त्वम् ॥११॥ उपस्पृश्येति पूर्वान्वयि । रामं जामदग्न्यम् । ततो रामदर्शनानन्तरम् । सप्तशाखाभेदेन समुद्रं गतागतः सप्तगोदावरीति ॥१२॥ वेङ्कटमद्रिम् ॥१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सरयूमनुस्रोतेन सरय्वा आनुलोमतः स्नात्वा प्रयागे सन्तर्प्य च ॥१०॥ गोमतीमिति सार्धद्वयकम् । विद्यमानपितृपितामहस्यापि तस्य गयायां पितृयागः श्रीवसुदेवाज्ञया तत्पूर्वजापेक्षयेति ज्ञेयम् । सागरसङ्गमे उपस्पृश्य स्नात्वेत्यर्थः । तदनन्तरं गम्येऽपि श्रीपुरुषोत्तमक्षेत्रे तस्यागमनं सर्वैः स्वावतारैस्सह सम्पूर्णतयाऽवतीर्णेन भगवता श्रीकृष्णेन सह श्रीविष्ण्वादिवच्छ्री-श्रीजगन्नाथदेवस्याप्यैक्यप्राप्त्या तदपूज्यत्वात् किं वा आत्मनस्तत्र साक्षाद्वर्तमानत्वेनात्मनोऽत्यन्ताभिन्नत्वेन प्रयोजनविशेषाभावादिति दिक् ॥११॥ उपस्पृश्य आचम्य स्नात्वा वा तदनन्तरं गम्ये तु श्रीपुरुषोत्तमक्षेत्रे तस्यागमनं श्रीकृष्णबलभद्रसुभद्राख्यत्वेन साक्षात् स्वपूजने लज्जापत्तेरिति ज्ञेयम् । रामं जामदग्न्यं ततो रामदर्शनादेः पश्चादेव सप्तगोदावरादीनि तीर्थानि उपस्पृश्य तेषु स्नात्वेत्यर्थः । एवं परशुरामे भक्तिः सूचिता तत्र सप्तगोदावरमिति नदीभिश्चेति समाहारेऽव्ययीभावः सप्तगोदावरमिति बहुत्र पाठस्त्वार्षः वेणाभीमरथ्यौ नद्यौ पम्पाख्यं सरः ॥१२॥ द्रविडेष्विति सार्धद्वयम् । महापुण्यं श्रीत्रिमल्लनाथाश्रयत्वात् श्रीवैष्णवगर्भाश्रयत्वाच्च दृष्ट्वा ॥१३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सागरसंगमे चेष्टा तदनन्तरं गम्येऽपि श्रीपुरुषोत्तमक्षेत्रे तस्य आगमनम्, सर्वैः स्वावतारैः सह सम्पूर्णयावतीर्णेन भगवता श्रीकृष्णेन सह श्रीविष्ण्वादिवच्छ्रीजगन्नाथदेवस्याप्यैक्यप्राप्त्या तत्रादृश्यत्वात् किं वा आत्मनः साक्षाद्वर्तमानत्वेनात्मनोऽत्यन्ताभिन्नत्वेन प्रयोजनविशेषाभावादिति दिक् ॥११॥ उपस्पृश्य आचम्य स्नात्वा वा रामं जामदग्न्यं रामदर्शनादेः पश्चादेव सप्तगोदावरादीनि तीर्थानि गत इति शेषः । एवं रामे भक्तिः सूचिता तत्र सप्तगोदावरमिति 'नदीभिश्च' इत्यव्ययीभावः । सप्तगोदावरीमिति पाठस्त्वार्षः । वेणाभीमरथ्यौ नद्यौ पम्पाख्यं सरः ॥१२॥ राम इति रममाणः किं वा दर्शनं स्कन्दं रमयन्निति भावः । महापुण्यं श्रीत्रिमल्लनाथाश्रयत्वेन श्रीवैष्णववर्गाश्रयत्वात् दृष्ट्वा कामकोष्ण्यादिकमगमदिति परे । प्रभुः सर्वत्र सर्वथा समर्थ इति तत्र तत्र कृत्यानां सम्पूर्णतां बोधयति ॥१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पुलहाश्रमं सालग्रामम् ॥१०-१२॥ श्रीशैलं श्रीपर्वतम् ॥१३-१४॥

सरयूमनुस्रोते
स्नातः पितृन् पितामहा
गन्तव्येति वदन्ति तथाऽ
स्नात्वा क्त्वाप्रत्ययान्तान
कावेरीं श्रीरङ्गाख्यं महापु

स्रोतेन प्रवाहेण

सरयूमनुस्रोतेन स
जीवत्पितृपितामहस्यापि
श्रीपुरुषोत्तमक्षेत्रे तस्यागम
वैष्णवतोषिणी रामं जाम

सरयूमनुलोमेन प्र
षष्ठेनान्वयः । विपाशा नदी ।
संन्यस्ते ताते च पतिते सति ।
गयाश्राद्धं न कुर्यात् सपिता पुम
सङ्गमे उपस्पृश्य आचमनपूर्वकं
कामकोष्णीं शिवकाञ्चीम् । पम

अनुस्रोतेन अनुलोमेन

तस्मात्सरोवरात् बह्यो
समागतः सरयु शब्दः सरयूशब्
स्नात्वा सन्तर्प्येति । तत उत्तरभा
पञ्चनद्यां प्रविष्टा हरिक्षेत्रनिकट
आप्लुत इत्युक्तं ततो गङ्गायां गत्व
निषिद्धमिति भावः । ततो गङ्गासाग
तदनुक्त्वा महेन्द्राद्रिं गतः तत्र परशुरा
तस्यापि सङ्गमं गतः ततो देशमध

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

सरयूमनुस्रोतेनानुलोमेन स बलभद्रः पुलहाश्रमं सालग्रामक्षेत्रं गोमत्यां गण्डक्यां विपाशायां च स्नात्वा शोणे च नदे आप्लुतः स्नातः पितृन् पितामहादीनिष्ट्वा सम्पूज्य मनसा आराध्येत्यर्थः । जीवत्पितृकत्वाच्छ्राद्धाधिकाराभावात् यद्यपि जीवत्पितृकैः गया न गन्तव्येति वदन्ति तथाऽप्यत एव वचनात् तीर्थयात्राव्याजेन गन्तव्या न तु श्राद्धार्थमित्यवगम्यते । गङ्गासागरसङ्गमं गत्वोपस्पृश्य तत्र स्नात्वा क्त्वाप्रत्ययान्तानां समुद्रसेतुमगमदित्युपरिष्टादन्वयः ॥१०-१२॥ गिरिशस्य रुद्रस्यालयं श्रीशैलं श्रीपर्वतं काञ्चीपुरीं सरिद्वरां कावेरीं श्रीरङ्गाख्यं महापुण्यं क्षेत्रं यत्र हरिः सन्निहितः परिवर्तते तथाभूतं श्रीरङ्गाख्यं महापुण्यावहं क्षेत्रम् ॥१३-१४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

स्रोतेन प्रवाहेण ॥१०॥ शोणं नदम् ॥११॥ सप्तशाखाभेदेन समुद्रं गता सप्तगोदावरी तां वेणीं कृष्णवेणीम् ॥१२-१७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-३०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...३४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सरयूमनुस्रोतेन सरय्वा अनुकूलस्रोतसेत्यर्थः ॥१०॥ गोमतीमित्यादीनां गत्वेत्यनेनान्वयः । स्नात्वेति तत्र तत्रेत्यर्थः । पितृनिष्ट्वेति-जीवत्पितृपितामहस्यापि तस्य श्रीवासुदेवाज्ञया तत्पूर्वजापेक्षयैवेति ज्ञेयम् ॥११॥ उपस्पृश्य स्नात्वा तदनन्तरगम्येऽपि श्रीपुरुषोत्तमक्षेत्रे तस्यागमनं श्रीकृष्णबलभद्रसुभद्राणां स्वेषामेव स्वकर्तृके पूजनादाववश्यकर्तव्ये लज्जापत्तेरिति ज्ञेयमिति वैष्णवतोषिणी रामं जामदग्न्यम् अभिवाद्य स्नात्वा ॥१२-१७॥

गूढार्थदीपिनी

सरयूमनुलोमेन प्रवाहानुसारेण प्रयागमुपगम्य पुलहाश्रमं गण्डकीतटं जगाम ॥१०॥ क्त्वान्तानां सामुद्रं सेतुमगमदितर्ति नान्वयः । विपाशा नदी । शोणो नदः पितृनिष्ट्वा । ननु जीवत्पितृकेण रामेण कथं पितृयागः कृतः इति चेत् तत्राह । वृद्धौ तीर्थे च न्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात् तेभ्यो दद्यात् स्वयं सुतः इति वचनात् श्राद्धेऽधिकारोऽस्ति । यच्चोक्तम् अमाश्राद्धं याश्राद्धं न कुर्तात् सपिता पुमान् । तत्तु जीवत्पितृकेण गयामुद्दिश्य न गन्तव्यमित्येवंपरम् । प्रसङ्गात्प्राप्तौ तु श्राद्धं कार्यमेवेति तत्त्वम् । सङ्गमे उपस्पृश्य आचमनपूर्वकं स्नात्वेति पूर्वान्वयि । रामं परशुरामम् । सप्तशाखाभेदेन समुद्रं गताऽतः सप्तगोदावरी तीर्थम् । वेङ्कटमद्रिम् । कामकोष्णीं शिवकाञ्चीम् । पम्पाख्यं सरः । यत्र श्रीरङ्गक्षेत्रे दक्षिणा मथुरा व्रजादन्येयम् ॥११-१५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अनुस्रोतेन अनुलोमेन पुलहाश्रमं शालग्रामक्षेत्रम् ॥१०॥ दृष्ट्वा सम्पूज्य ॥११-१२॥ गिरिशालयं श्रीशैलं श्रीपर्वतम् ॥१३-१६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तस्मात्सरोवरात् बह्व्यो नद्यः प्रसृताः ततः सरयूरपि प्रसृता अतस्तत्सङ्गे अनुस्रोतेन सरयूरयोध्यापर्यन्तमागत्य पश्चात्प्रयागे गतः सरयु शब्दः सरयूशब्दश्च सर इत्युदकनामसरो युनक्तीति तथा ततः तीर्थराजः प्रयाग इति तत्र विशेषस्नानादिकमाह-त्वा सन्तर्प्येति । तत उत्तरभागे पुलहाश्रमं हरिक्षेत्रं गतः ॥१०॥ गमनमध्य एव गोमतीं गण्डकीं स्नात्वा विपाशा काचित् क्षुद्रा न्यां प्रविष्टा हरिक्षेत्रनिकट एव अन्या तु विपाशा काश्मीरदेशे ततः शोणे समागतः गङ्गामुत्तीर्य सोऽपि महानद इति शोणे आप्लुत इत्युक्तं ततो गङ्गायां गत्वा सामान्यपितृनिष्ट्वा पितामहपित्रादीन् वा केवलगयाभिगमनं जीवत्पितृकस्य निषिद्धं यात्रायान्तु न निषिद्धमिति भावः । ततो गङ्गासागरसङ्गमः सर्वत्र स्नानतर्पणादिः ॥११॥ ततो मध्ये तदानीं पुरुषोत्तमस्थानं स्थानमात्र् न भगवानस्तीति त्वा महेन्द्राद्रिं गतः तत्र परशुरामं दृष्ट्वा अभिवाद्य च ज्येष्ठत्वात् ततः सप्तगोदावरीं गतः यत्र सप्तधा गोदावरी समुद्रं गतः ततः कृष्णवेण्यां सङ्गमं गतः ततो देशमध्ये समागत्य निवृत्तिसङ्गमे पाण्डुरङ्गे गां भीमरथीं गतः पम्पां च सरः विद्यानगरसमीपे ॥१२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्रैव स्कन्दं दृष्ट्वा ततः श्रीशैलं गतः अनेन देशमध्ये परिभ्रमणं कृत्वापि सर्वाणि तीर्थानि कृतानीत्युक्तं ततः पूर्वभा श्रीशैले किमिति गतमित्याकाङ्क्षायामाह–गिरिशालयमिति। तत्र महादेवं दृष्ट्वा द्रविडदेशेषु महापुण्यजनकं वेङ्कट्यद्रिं भगव दरर्श स हि पर्वत एव विष्णुरूपः यथा नारायणः ॥१३॥

श्रीसुबोधिनीसारः

सरयूमनुस्रोतेनानुलोमतः प्रयागमागत्य स्नात्वा देवादीन् सन्तर्प्य पुलहाश्रमं हरिक्षेत्रं जगाम ॥१०॥ गोमत्यां गण्डकीं विपाशां स्नात्वा शोणे नदे आप्लुतः स्नातः गयां गत्वा पितॄन् इष्ट्वा पिण्डादिना सम्पूज्य ब्राह्मणादि दिव्यपित्रभिप्रायेणेत्येके। गङ्गासागरयोः सङ्गमे तन्नामके तीर्थे उपस्पृश्य स्नात्वा ॥११॥ महेन्द्राद्रौ पर्वते रामं परशुरा दृष्ट्वा प्रणम्य सप्तगोदावरीं जगाम ततो वेणां पम्पां भीमरथीं जगाम ॥१२॥ स्कन्दं कार्तिकेयं दृष्ट्वा श्रीशैलं शिवस्थानं य ययौ। द्रविडेषु देशेषु महापुण्यं वेङ्कटम् अद्रिं पर्वतं दृष्ट्वा प्रभुर्बलः ॥१३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स बलभद्रः सरयूमनुस्रोतेन अनुलोमेन प्रयागमुपगम्य तत्र स्नात्वा देवादीन् सन्तर्प्य पुलहाश्रमं शालग्रामक्षेत्रं जगा ॥१०॥ गोमत्यां गण्डक्यां विपाशायां च स्नात्वा शोणाख्ये नदे आप्लुतः स्नातः ततश्च गयां गत्वा तत्र पितॄन् इष्ट्वा जीवत्पितृकत्वे श्राद्धादिकाराभावाद्ब्राह्मणभोजनदानादिना समाराध्य ततो गङ्गासागरसङ्गमे उपस्पृश्य स्नात्वा ॥११॥ क्त्वाप्रत्ययान्तानां सा सेतुमगदिति चतुर्थेनान्वयः। रामं परशुरामम्। सप्तगोदावरीं सप्तधाऽऽत्मानं यत्र गोदावरी कृत्वा समुद्रं गता तत्तीर्थम् ॥१ श्रीशैलाख्यं पर्वतम्। गिरिशस्य रुद्रस्यालयम् ॥१३॥

अन्वितार्थप्रकाशिका

अन्विति। स बलभद्रः सरयूमनुस्रोतेन अनुलोमेन प्रयागमुपगम्य तत्र स्नात्वा देवादीन् सन्तर्प्य पुलहाश्रमं शालग्राम हरिक्षेत्रं वा जगाम ॥१०॥ गोमतीमिति। क्त्वान्तानां सेतुमगमदित्यनेनान्वयः। गोमत्यां गण्डक्यां विपाशायां च स्नात्वा शोणा नदे आप्लुतः स्नातः ततश्च गयां गत्वा तत्र पितॄन् इष्ट्वा जीवत्पितृपितामहकत्वेन श्राद्धादिकाराभावाद्ब्राह्मणभोजनदानादिना समा। यद्वा। प्रपितामहादिपितृश्राद्धानि कृत्वा "वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति। येभ्य एव पिता दद्यात्तेभ्यः स्वयं सुतः" स्मृतेः। एतदपि वसुदेवाज्ञयैवेति ज्ञेयम्। ततो गङ्गासागरसङ्गमे उपस्पृश्य आचमनपूर्वं स्नात्वा रामं परशुरामं सप्तगोदावरं सप्तधाऽऽत्मा यत्र गोदावरीकृत्वा समुद्रं गता तत्तीर्थम् सप्तगोदावरमिति पाठः। ड्यन्तपाठस्त्वार्षः। वेणाभीमरथ्यौ नद्यौ पम्पाख्यं सरः श्रीशैल पर्वतम्। गिरिशस्य रुद्रस्यालयं श्रीरङ्गाख्यं क्षेत्रम्। स्पष्टं शेषम् ॥११-१२-१३-१४-१५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनुस्रोतेन अनुस्रोतसः अनुलोमेन प्रयागं च पुलहाश्रमं च डण्डकितीरे मुक्तनाथं विष्णुस्थानम् ॥१०॥ गोमत्यादौ स्नात्वा शोणे चाप्लुतः स्नातः गयां गत्वा पितॄन् इष्ट्वा प्रपूज्य ॥११॥ गंगासागरसंगमे उपस्पृश्य स्नात्वा ॥ रामं प सप्तगोदावरमिति पाठस्त्वार्षः ॥१२॥ श्रीशैलसंज्ञं पर्वतम् ॥१३-१४-१५-१६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अनुस्रोतेनेति। सः बलः, सरयूम् अनुस्रोतेन अनुलोमेन, प्रयागम् उपगम्य, तत्र प्रयागे, स्नात्वा गङ्गायमुनासङ्गमे कृत्वेत्यर्थः। देवादीन् संतर्प्य, पुलहाश्रमं शालग्रामक्षेत्रं, जगाम ॥१०॥ गोमतीमिति। गोमतीं गण्डकीं विपाशां गोमत्यादि स्नात्वा, शोणे नदविशेषे, आप्लुतः। गयां गत्वा, पितॄन् पितामहादीन्, इष्ट्वा सम्पूज्य मनसाऽऽराध्येत जीवत्पितृकत्वाच्छ्राद्धाधिकाराभावात् तेषां मनसाऽऽराधनम्। यद्यपि जीवत्पितृकैर्गया न गन्तव्येति वदन्ति, तथाप वचनात्तीर्थयात्राव्याजेन गन्तव्या, न तु श्राद्धार्थमित्यवगम्यते। गङ्गासागरसङ्गमे, गत्वा ॥११॥ उपस्पृश्येति ॥ उपस्पृ स्नात्वा, गत्वा उपस्पृश्य स्नात्वा इत्यादिक्त्वाप्रत्ययान्तानामगमदित्यनेनोपरिष्टादन्वयः। महेन्द्राद्रौ, रामं जामदग्न्यं दृष्ट्वा, अ

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

च, सप्तगोदावरीं ड्यन्तत्वमार्षम् । वेणीं, पम्पां, ततः, भीमरथीं सप्तगोदावर्यादिषु स्नात्वेत्यर्थः ॥१२॥ स्कन्दमिति ॥ रामः, स्कन्दं दृष्ट्वा, गिरिशालयं रुद्रस्यालयं, श्रीशैलं श्रीपर्वतं, ययौ । प्रभुः रामः, द्रविडेषु, महापुण्यं वेङ्कटम्, अद्रिं दृष्ट्वा ॥१३॥

कृष्णप्रिया

श्रीबलभद्रजी उस सरोवर से भगवानी सरयू के किनारे किनारे प्रयाण करते करते आगे पधारे अब श्रीसरयूजी को प्रणाम कर प्रस्थान करते आप श्रीप्रयागराज पधारे । श्रीप्रयागराजमें स्नान करके पुनः देव-ऋषि-मनुष्य-पितृ तर्पण करके श्रीपुलह मुनिवर के आश्रम पधारे ॥१०॥ अब पुलहाश्रम से गोमती गण्ड की विपाशा आदि सरिताओं मे स्नान करके श्रीशोणनद के तट पर पहुंचे । शोणनदमें स्नानादि दिव्य कर्म करने के बाद आप श्रीगयाजी पधारे वहां शास्त्र विधि के अनुसार पितृओं का यजन पूजन आदि किया पुनः गंगा सागर संगम पर पधारे ॥११॥ श्रीगंगासागर संगममें स्नानादि तीर्थ कार्यो से निव्त हो कर श्रीमहेन्द्र पर्वत पर पधारे । महाराज श्रीपरशुरामजी जहां नित्य बिराजते है । उनका दर्शन और अभिवादन किया । पुनः सप्तगोदावरी तीर्थ पर पधारे पुनः वेणा पम्पा और भीमरथी आदि दिव्य तीर्थोमें करते हुए आगे चले ॥१२॥ पुनः श्रद्धा पाथेय वाले श्रीस्कन्द भगवान के दर्शन के लिये पुनः श्रीकार्तिके स्वामी का दर्शन करके श्रीशैल पर्वत पर पधारे जहां पर श्रीमल्लिकार्जुन महादेव नित्य बिराजते है उनका दर्शन करके श्रीवैंकटाधीशजी का दर्शनार्थ पधारे ॥१३॥

[1]कामकोष्णीं पुरीं काञ्चीं कावेरीं च सरिद्वराम् । श्रीरङ्गाख्यं महापुण्यं यत्र सन्निहितो हरिः ॥१४॥
ऋषभाद्रिहरेः क्षेत्रं दक्षिणां मथुरां तथा । [2]सामुद्रं सेतुमगमन् महापातकनाशनम् ॥१५॥
तत्रायुतमदाद्धेनुर्ब्राह्मणेभ्यो हलायुधः । कृतमालां ताम्रपर्णीं मलयं च कुलाचलम् ॥१६॥
[3]तत्रागस्त्यं समासीनं नमस्कृत्याभिवाद्य च । योजितस्तेन चाशीर्भिरनुज्ञातो गतोऽर्णवम् ।
दक्षिणं तत्र कन्याख्यां दुर्गां देवीं ददर्श सः ॥१७॥

कर्दमक्षमा

कामकोष्णीम्, पुरीम्, काञ्चीम्, सरिद्वराम्, च, कावेरीम्, यत्र, हरिः, सन्निहितः, महापुण्यम्, श्रीरङ्गाख्यम्, ऋषभाद्रिम्, हरेः, क्षेत्रम्, तथा, दक्षिणाम्, मथुराम्, महापातकनाशनम्, समुद्रसेतुम्, अगमत् ॥१४-१५॥ तत्र, हलायुधः, ब्राह्मणेभ्यः, अयुतम्, धेनूः, अदात्, कृतमालाम्, च, ताम्रपर्णीम्, च, मलयम्, च, कुलाचलम्, तत्र, समासीनम्, अगस्त्यम्, नमस्कृत्य, च, अभिवाद्य, तेन, आशीर्भिः, योजितः, च, अनुज्ञातः, दक्षिणम्, अर्णवम्, गतः, तत्र, कन्याख्याम्, दुर्गाम्, देवीम्, सः, ददर्श ॥१६-१७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

काञ्चीं पुरीम् ॥१४-१६॥ दक्षिणमर्णवम् ॥१७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यत्र श्रीरङ्गक्षेत्रे ॥१४॥ दक्षिणा मथुरान्या व्रजानन्तर्गतेति । तथा दृष्ट्वा । महापातकानि ब्रह्महत्यादीनि 'केदारं रामसेतुं च दृष्ट्वा भारतसंहिताम् । श्रुत्वा कोटिश्च गायत्र्या ब्रह्महत्यां व्यपोहति ॥' इति पुराणान्तरात् ॥१५॥ तत्र रामसेतौ । कृतमालादीनां यथाविति शेषः ॥१६॥ तत्र मलये । तेनागस्त्येन । तत्र दक्षिणार्णवतटे । स बलदेवः ॥१७॥

---

१. कामकोटिं-वीर. । २. समुद्रसेतु-वीर. विज. । ३. तथाऽगस्त्यं-वीर. विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कामकोष्ट्यादिकमगमदिति परेणान्वयः प्रभुः सर्वथा समर्थः इति तत्र तत्र कृत्यानां सम्पूर्णतां बोधयति श्रीरङ्गा क्षेत्रं हरिः सर्वदुःखहरः सर्वमनोहरश्च भगवान् यत्र सन्निहितः श्रीङ्गशायिमूर्त्या स्वयं वा सन्निहितो नित्यं वर्तत इत्यर्थः। अ एव महापुण्यं तथा शब्दस्यार्थः । चेति तथा च ॥१४॥ समुद्रसेतुं च महापातकनाशनमिति तत्र गमनमात्रे ब्रह्म इत्या प्रायश्चित्तसिद्धेः ॥१५॥ तत्रेत्यर्धकम्-ब्राह्मणेभ्यस्तत्रत्येभ्यः हलायुध इति । बल्वलवधमारभ्य तद्देशीयब्राह्मणकुलपालना हलस्यापरित्यागं बोधयति सङ्कर्षणत्वं बोधयन् तस्य साक्षाद्भगवत्त्वेन सर्वसामर्थ्यं सूचयति कुलाचलं भारतवर्षदक्षिणसीमापर्य गत इति परेणान्वयः ॥१६॥ तत्र मलये सम्यगासीनं सदा तत्रैव निवासात् । तेनागस्त्येन आशीर्भिर्योजितोऽनुज्ञातश्च सन् त दक्षिणार्णवान्तिके देवीं जगत्पूज्यां स्वमहिम्ना द्योतमानां वा ॥१७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीरंगाख्यं क्षेत्रं हरिः सर्वदुःखहरः (सर्वदोषदुःखहरः, घ, ङ) सर्वमनोहरश्च भगवान् यत्र श्रीरंगशायि-मूर्त्या स्वयं व सन्निहितो नित्यं वर्तत इत्यर्थः । अत एव महापुण्यम् ॥१४॥ तथा-शब्दस्यार्थः-चेति तथा च समुद्रसेतुं च महापातकनाशनमि तत्र गमनमात्रे ब्रह्महत्यादिप्रायश्चित्तसिद्धेः ॥१५॥ हलायुध इति संकर्षणत्वं बोधयंस्तस्य साक्षाद्भगवत्त्वेन सर्वसामर्थ्यं सूचयति कुलाचलं भारतवर्षदक्षिणसीमापर्यन्तं गत इति परेणैवान्वयः ॥१६॥ तत्र मलये सम्यगासीनं सदा तत्रैव निवासात् ते अगस्त्येनाशीर्भिर्योजितोऽनुज्ञातश्च सन् तत्र दक्षिणार्णवान्तिके देवीं जगत्पूज्यां स्वमहिम्ना द्योतमानां वा ॥१७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वृषभाद्रिं वनगिरिम् ॥१५-१७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ऋषभाद्रिं वनगिरिं तद्विशेषणं हरेः क्षेत्रमिति ॥१५॥ तत्र समुद्रसेतौ हलायुधः रामः अयुतं धेनुर्ददौ कृतमालामि अगमदित्यनुषङ्गः शेषो वा ॥१६॥ तत्र मलयपर्वते तेन अगस्त्येनाशीर्भिर्योजितः चोदितश्च दक्षिणमर्णवं गतः तत्रार्णवसमी कन्याख्यां कन्याकुमार्याख्यां दुर्गां देवीं ददर्श स बलरामः ॥१७॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥१२-१७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-३०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...३४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

॥१२-१७॥

गूढार्थदीपिनी

तत्रेति युग्मम् । तत्र समुद्रसेतौ हलायुधः श्रीरामः गवामयुतं दशसहस्रमदात् । पुनः मलयं चागमदित्यनुषङ्गः। तत्र । दक्षिणमर्णवं गतः इति योज्यम् ॥१६-१७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

दक्षिणम् अर्णवं गतः ॥१७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः कामकोष्णीं कामाक्षीं शिवकाञ्चीति प्रसिद्धा ततः काञ्ची पुण्यकोटिः ततः कावेरी श्रीरङ्गस्थाने तत्र श्री महापुत्यहेतुं ददर्श सर्वायतनापेक्षया श्रीरङ्गे वीशेषमाह यत्र सन्निहितो हरिरिति ॥१४॥ ततो ऋषभाद्रिं तस्यैवापरभागे तच्छि

विष्णुक्षेत्रं वेति सन्देहे
सेतुबन्धे गतः तस्य मा
दानशङ्कां वारयितुमाह-
कृतमाला अग्रे दक्षिण
नमस्कारं कृतवानित्याह
साष्टाङ्गः अभिवादनं ना
दक्षिणसमुद्रस्थानं गतः
दुर्गापदं सा च देवी देव

कामकोष्णीं नदी
॥१४॥ ऋषभपर्वतं हरेः
ब्रह्महत्यादिनिवारणम् ॥१
ताम्रपर्णीं नदीं मलयं
तेनागस्त्येनाशीर्भिरभियुक्तो

श्रीरङ्गाख्यं क्षेत्रम् ॥

तत्रेति युग्मम् । तत्र

तेनागस्त्येनानुज्ञातो

कामेति ॥ कामको
श्रीरङ्गाख्यं क्षेत्रं दृष्ट्वा ॥१४॥ ऋ
सेतुम् अगमत् ॥१५॥ तत्रेति ॥
मलयं मलयनामानं कुलाचलं
अभिवाद्य संस्तूय च, तेन च
दक्षिणार्णवसमीपे, स रामः, क

श्रीद्रवीड देशमें पर
श्रीवेंकटनाथ नित्य विराजते
श्रीकावेरीमें अवगाहन पुण्यम
॥१४॥ श्रीरंगनाथ भगवान के

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

विष्णुक्षेत्रं वेति सन्देहे निर्णयार्थमाह–हरेः क्षेत्रमिति । ततो दक्षिणमथुरां गतः या नाम मथुरेति प्रसिद्धा ततः समुद्रसेतुमागमत सेतुबन्धे गतः तस्य माहात्म्यमाह–महापातकनाशनमिति । तदत्यन्तं पुण्यतममिति ॥१५॥ तत्र धेनूनामयुतं प्रादात् तीर्थवासिभ्यो दानशङ्कां वारयितुमाह–ब्राह्मणेभ्य इति । यद्यपि तत्स्थानं स्वकृतमेव ततश्च न ज्ञातवानिति ख्यापयितुं हलायुध इत्युक्तं ततः कृतमाला अग्रे दक्षिणसमुद्रसमीपे ततः ताम्रपर्णी तत्रैव मलयः कुलाचलः यत्रागस्त्यस्थानम् ॥१६॥ ततस्तत्रागत्यागस्त्यं नमस्कारं कृतवानित्याह–तत्रागस्त्यमिति । समासीनं तपः कुर्वाणं स्थिरासनं वा भगवच्चिन्तकं नमस्कारः माहात्म्याख्यापकः साष्टाङ्गः अभिवादनं नामोच्चारणपूर्वकं चकारात्तस्य स्तोत्रमपि कृतवानिति ज्ञेयम् अतस्तेन आशीर्भिः योजितः ततोऽप्यनुज्ञातः दक्षिणसमुद्रस्थानं गतः यत्र कन्याकुमारी तिष्ठति ततस्तामपि दृष्टवानित्याह–ततः कन्याख्यां दुर्गामिति । लक्ष्म्यंशत्वं वारयितुं दुर्गापदं सा च देवी देवतारूपा पूर्वं मानुष्यपि देवतारूपा जाता ॥१७॥

श्रीसुबोधिनीसारः

कामकोष्णीं नदीं काञ्चीं पुरीं सरिद्वरां नदीश्रेष्ठां कावेरीं ययौ । श्रीरङ्गनामकं महाक्षेत्रं ययौ । तत्र स्थाने हरिः सन्निहितोऽस्ति ॥१४॥ ऋषभपर्वतं हरेः क्षेत्रम् अगमत् । दक्षिणां मथुरां तथाऽगमत् । सामुद्रं सेतुं सेतुबन्धं रामेश्वरमगमत् । महापातकनाशनं ब्रह्महत्यादिनिवारणम् ॥१५॥ तत्र सेतुबन्धे हलायुधो रामो ब्राह्मणेभ्योऽयुतं दशसहस्रं धेनूर्गाः अदात् सङ्कल्पितवान् कृतमालां ताम्रपर्णीं नदीं मलयं च कुलपर्वतमगात् ॥१६॥ तत्र मलयाद्रौ समासीनमगस्त्यं मुनिं नमस्कृत्य प्रणम्य च तेनागस्त्येनाशीर्भिरभियुक्तोऽनुज्ञातो रामो दक्षिणमर्णवं समुद्रं गतः । तत्रार्णवे कन्यानाम्नीं दुर्गां देवीं ददर्श ॥१७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्रीरङ्गाख्यं क्षेत्रम् ॥१४-१५॥ तत्र सामुद्रे सेतौ । ततः कृतमालां ताम्रपर्णीं नदीं मलयं चागमदित्यनुषङ्गः ॥१६॥ तत्र मलये ॥१७॥

अन्वितार्थप्रकाशिका

तत्रेति युग्मम् । तत्र सामुद्रसेतौ ततः कृतमालां ताम्रपर्णीं नदीं मलयं चागमदित्यनुषङ्गः तत्र मलये ॥१६-१७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तेनागस्त्येनानुज्ञातो दक्षिणमर्णवं गतः ॥१७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कामेति ॥ कामकोष्णीं, काञ्चीं पुरीं दृष्ट्वा, सरिद्वरां कावेरीं च, तत्र स्नात्वेत्यर्थः । यत्र हरिः सन्निहितः, तथाविधं, महापुण्यं श्रीरङ्गाख्यं क्षेत्रं दृष्ट्वा ॥१४॥ ऋषभेति ॥ हरेः क्षथेत्रं ऋषभाद्रिं, तथा, दक्षिणां मथुरां दृष्ट्वा, महापातकनाशनं समुद्रसेतुं समुद्रसम्बन्धिनं सेतुम् अगमत् ॥१५॥ तत्रेति ॥ हलायुधः रामः, तत्र समुद्रसेतौ ब्राह्मणेभ्यः अयुतं धेनूः, अदाद्ददौ । ततः कृतमालां ताम्रपर्णीं, मलयं मलयनामानं कुलाचलं च, अगमदित्यनुषङ्गः शेषो वा ॥१६॥ तत्रेति ॥ तत्र मलयपर्वते,समाससीनम् अगस्त्यं नमस्कृत्य, अभिवाद्य संस्तूय च, तेन च अगस्त्येनापि आशीर्भिः योजितः, अनुज्ञातः संश्च, दक्षिणम् अर्णवं दक्षिणार्णवं गतः । तत्र दक्षिणार्णवसमीपे, स रामः, कन्याख्यां दुर्गां देवीं ददर्श ॥१७॥

कृष्णप्रिया

श्रीद्रवीड देशमें परम पुज्य पूर्ण प्रदेश पर्वत श्रीवेंकटाचल गिरिवर बिराजमान है जहांपर बालाजी श्रीवेंकटनाथ नित्य विराजते है । वहां से कामाक्षी - शिवकांची, विष्णुकांची होते हुए पुण्यतमा श्रेष्ठ सरिता श्रीकावेरीमें अवगाहन पुण्यमय श्रीरंग क्षेत्र में जहां रंगनाथ भगवान नित्य विराजमान है सन्निहितो हरिः वहां पधारे ॥१४॥ श्रीरंगनाथ भगवान के दर्शन करके श्रीहरिभगवान के क्षेत्र ऋषभाद्रि दक्षिण मथुरा एवं महापातकों का

कृष्णप्रिया

विनाश करने वाले श्रीसेतुबन्ध पधारे ॥१५॥ सेतुबन्ध पधारकर श्रीबलभद्रजी ने दस हजार गौओं का किया । अब श्रीसेतुबन्धसे कृतमाला और ताम्रपर्ती आदि नदियोमें स्नान करके मलयाद्रि पर्वत पर पधारे। पर विराजमान सात कुलाचलों में से एक है ॥१६॥ उस दिव्य कुलाद्रि गिरिवर पर बिराजमान श्रीअगस्त्य को बलरामजी ने नमस्कार एवं अभिवादन किया । श्रीमुनिवर अगस्त्यजी का आशीर्वाद प्राप्त करके और तीर्थयात्रा के प्रस्थान के लिये अनुमोदन प्राप्त करके समुद्रयात्रा के लिये प्रयाण किया । वहां पर बलभद्रजी दुर्गा देवीका कन्याकुमारी के रूपमें दर्शन किया ॥१७॥

ततः फाल्गुनमासाद्य पञ्चाप्सरसमुत्तमम् । विष्णुः सन्निहितो यत्र स्नात्वाऽस्पर्शद्गवायुतम्
[1]ततोऽभिव्रज्य भगवान् केरलां[2] स्तोकप्रगर्तकान् । गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटिः
[3]आर्यां द्वैपायनी दृष्ट्वा शूर्पारकमगाद्बलः । तापीं पयोष्णीं निर्विन्ध्यामुपस्पृश्याथ [4]दण्डकम्
प्रविश्य रेवामगमद्यत्रमाहिष्मती पुरी । मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत्

कर्दमक्षमा

ततः, फाल्गुनम्, उत्तमम्, पञ्चाप्सरसम्, आसाद्य, यत्र, विष्णुः, सन्निहितः, तत्र, स्नात्वा, गवाम्, अयुतम्, ॥१८॥ ततः, भगवान्, केरलाम्, स्तोकप्रगर्तकान्, अभिव्रज्य, गोकर्णाख्यम्, शिवक्षेत्रम्, यत्र, धूर्जटिः, सान्निध्यम्, द्वैपायनीम्, दृष्ट्वा, बलः, शूर्पारकम्, अगात्, अथ, तापीम्, पयोष्णीम्, निर्विन्ध्याम्, उपस्पृश्य, दण्डकम्, प्रविश्य, यत्र, पुरी, रेवाम्, अगमत्, मनुतीर्थम्, उपस्पृश्य, पुनः, प्रभासम्, अगमत् ॥१९-२०-२१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

फाल्गुनमनन्तपुरम् पञ्चाप्सरसं सरः अस्पर्शदस्पृशत् ॥१८॥ केरलादीन् देशान् ॥१९॥ द्वीपमयनं यस्यास्ताम् ॥२०-

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः कन्यादेवीदर्शनोत्तरम् । फाल्गुनम्- अर्जुनेन तत्र ग्राहभावमिताः पञ्चाप्सरसो मोचिता इति प्रकाशितत्वात्तत्संज्ञमिति । यत्र पञ्चाप्सरससरसि । गुण आर्षः ॥१८॥ ततो गोदानानन्तरम् । यत्र गोकर्णक्षेत्रे शिवस्य ॥१९॥ आर्यां दुर्गाम् । द्वैपायनीं द्वीपवासिनीं व्यासस्थापितां वा । शूर्पारकं क्षेत्रम् । अथ निर्विन्ध्यास्नानो दण्डकं वनम् ॥२०॥ यत्र रेवातटे ॥२१-२२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पञ्चाप्सरसं च तीर्थमासाद्य उद्यमत्वमेव दर्यशति, विष्णुर्विश्वव्यापकोऽपि भगवान् यत्र पञ्चाप्सरसे सन्निहितः अस्पर्शत् ददावित्यर्थः ॥१८॥ तत इति सार्धकम् । [तोग्मान्] केरलान् त्रिगर्तकांश्च देशान् गोकर्णाख्यं चातिव्रज्य परेणान्वयः । यतो भगवान् सर्वशक्तिमान् इति तत्र तत्र स्नानदानादिसत्कर्मसाङ्गता पूर्ववत् सूचिता ॥१९॥ बल इति । श्रमाद्यभावं च सूचयति अत वाथानन्तरमेवेति प्रवेशे शैघ्र्यं बोधयति ॥२०॥ [दण्डकं दण्डकानिति पाठः] मनुतीर्थमिति द्विजैस्तत्रत्यैः तीर्थयात्रयागतैर्वा विप्रैः हृतं श्रीकृष्णेनेति शेषः ॥२१-२२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पंचाप्सरसं च तीर्थमासाद्य उत्तमत्वमेव दर्शयति-विष्णुर्विश्वव्यापकोऽपि भगवान् यत्र पंचाप्सरसे सन्निहितः। ॥१८॥ भगवान् त्रिगर्तकांश्च गोकर्णाख्यं चातिव्रज्यागादिति परेणान्वयः । यतो भगवान् सर्वशक्तिमान् इति

---

१. "**स्थानन्दूरं हरेः स्थानं यत्र संनिहितो हरिः**"-इदमर्धमधिकं विज. । २. केरलांस्तु त्रिवर्तकान्-श्रीधर. वंशी. ; केरला वीर. ; केरलादींस्त्रिगर्तकानन्विज. । ३. तत्र द्वैपायनं-विज. । ४. दण्डकान्-इति कस्यचित् ।

जार गौओं का दान
न पर पधारे। भूमि
श्रीअगस्त्य मुनिवर
त करके और आगे
हां पर बलभद्रजी ने

र्णद्रवायुतम् ॥१८॥
यत्र धूर्जटिः ॥१९॥
दण्डकम् ॥२०॥
ुनरागमत् ॥२१॥

वाम्, अयुतम्, अस्पर्शत
ः, सान्निध्यम्, आर्याम्,
प्रविश्य, यत्र, माहिष्मती,

नं यस्यास्ताम् ॥२०-२२॥

मोचिता इति फाल्गुनेन
यत्र गोकर्णक्षेत्रे धूर्जटिः
अथ निर्विन्ध्यास्नानोत्तरम्।

प्सरसे सन्निहितः गवामयुतम
र्णाख्यं चातिव्रज्य अगादिति
१९॥ बल इति। वेगेन गमनं
पाठः] मनुतीर्थमित्यर्धकम्।

सरसे सन्निहितः। गवामयुतम
सर्वशक्तिमान् इति तत्र तत्र

धर. वंशी. ; केरलाञ्शतगर्तकान्-

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्नानदानादिसत्कर्मसांगतापूर्ववत्सूचिता। बल इति वेगेन गमनं श्रमाद्यभावं च सूचयति। अत एवाथानान्तरमेवेति प्रवेशे शैघ्र्यं बोधयति ॥१९-२१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

फाल्गुनम् अनन्तपुरम् अस्पर्शत् ददौ ॥१८-२२॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तत इति। फाल्गुनमनन्तपुरं प्राप्य उत्तमं पञ्चाप्सरसं नाम सरः समासाद्य तद्विशिनष्टि-यत्र पञ्चाप्सरसे विष्णुः सन्निहितः तत्र स्नात्वा गवामयुतमस्पृशद्ददौ ॥१८॥ भगवान् रामः केरलादीन् देशान् यत्र धूर्जटिः शिवस्य सान्निध्यं तद्गोकर्णाख्यं शिवाभिमानि क्षेत्रम् ॥१९॥ द्वीपमयनम्, यस्यास्तामार्यामम्बिकां दृष्ट्वा शूर्पारकं क्षेत्रं जगाम तापीमिति। उपस्पृश्य ताप्यादिषु स्नात्वा। अथ दण्डकं दण्डकाख्यमरण्यं प्रविश्य ततो रेवां नर्मदामगमत् यत्र रेवातीरे माहिष्मती पुरी वर्तते तां रेवामित्यर्थः ॥२०-२१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अस्पर्शत् ददौ ॥१८॥ स्थानं दूरम् अनन्तक्षेत्रम्। धूर्जटिः शिवस्य ॥१९-२०॥ मनुतीर्थं नाम तीर्थम् ॥२१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-३०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१...३४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अस्पर्शत् ददौ ॥१८-२२॥

गूढार्थदीपिनी

दक्षिणमिति सार्द्धम्। तत्र दक्षिणार्णवतटे। स बलदेवः। फाल्गुनम्। फाल्गुनेन अर्जुनेन ग्राहभावं प्राप्तानां पञ्चाप्सरसामुद्धरणात् तन्नाम्नैव प्रसिद्धमेतत्। यत्र सरसि। अस्पर्शत् अस्पृशत् ददौ। गुण आर्षः ॥१८॥ यत्र गोकर्णक्षेत्रे। धूर्जटिः (धूर्भारभूता जटिर्यस्य। यद्वा। धूर्गङ्गा जटिषु अस्य। 'जट् झट्' सङ्घाते धातुः। "सर्वधातुभ्यः" इति औणादिक इन् प्रत्ययः।) शिवस्य। केरलान् देशान् ॥१९॥ आर्यामीति युग्मम्। आर्यां दुर्गां द्वैपायनीं (द्वीपमयनं यस्याः सा द्वीपायना सैव द्वैपायनी। स्वार्थेऽण् ङीप् च।) द्वीपवासिनी। व्यासस्थापितां वा शूर्पारकं क्षेत्रम्। दण्डकमुत्तरेणान्वेति ॥२०॥ रेवां नर्मदाम्। यत्र रेवातीरे। मनुतीर्थं ब्रह्मावर्ते मनोः क्षेत्रे ॥२१-२२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्र दक्षिणार्णवसमीपे कन्याख्यां दुर्गां ददर्श ततः फाल्गुनमनन्तपुरं प्राप्य उत्तमं पञ्चाप्सरसं नाम सरः आसाद्य ॥१८॥ यत्र पञ्चाप्सरसि विष्णुः सन्निहितः तत्र स्नात्वा गवामयुतम् अस्पर्शत् अस्पृशत् ददौ। केरलादीन् देशान् ॥१९॥ द्वैपायनीं द्वीपमयनं यस्यास्तामार्यामम्बिकाम् ॥२०-२२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः फाल्गुनम् अनन्तशय्यां गतः तत्रार्जुनस्य पञ्चाप्सरसां पादगृहीतानामुद्धारणात्तन्नाम्नैव तत् प्रसिद्धं जातं तदाह पञ्चाप्सरसमिति उत्तमं स्थानमेतत् तस्य स्थानस्य माहात्म्यमाह-विष्णुः समाहितो यत्रेति। तत्रापि स्नात्वा सेवाविव गवामयुतं स्नातवान् ॥१८॥ ततोऽतिव्रज्य शीघ्रं तद्देशोल्लङ्घनार्थमतिव्रजनं यतोऽयं भगवान् तत्र देशे भेदत्रयमाह-केरलान् स्तोक्मान् गर्तकांश्चेति स एव (मल्लिवार) इति प्रसिद्धः ततोऽग्रे गोकर्णाख्यं रावणेन नीयमानो महादेवः तत्र स्थापितः नोद्धर्तुं शक्य आसीत् तत उत्पाद्यमानः गोकर्णाकृतिर्जातः तच्छिवक्षेत्रं तद्धूर्जटिः सान्निध्यं सर्वदैव ॥१९॥ ततस्तीरे गच्छन् मनुतीर्थमुपस्पृश्य

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

समुद्रसङ्गमपर्यन्तगत्या पुनः प्रभासमगमत् एवं भारतवर्षस्य परिभ्रमणमुक्तम् एतावतापि वर्षो न पूर्णः आर्या नदी द्वैपायन सम्बन्धिनी ततः शूर्पारकस्थानं कृष्णवेण्यां ततः तापीं नदीं पयोष्णीं निर्विन्ध्यां च ततस्ततो दण्डकारण्यं प्रविष्टः ॥२०॥ तत्र चे नर्मदामगमत् यत्र मण्डपा च निकटे माहिष्मती नाम पुरी पूर्वं प्रसिद्धा ततोऽप्यग्रे पुनर्भ्रमणार्थं गच्छन् कुरुक्षेत्रनिकटे गतः ॥२

श्रीसुबोधिनीसारः

ततोऽनन्तरं फाल्गुनमनन्तपुरमासाद्य उत्तमं पञ्चाप्सरसं तीर्थम् आसाद्य प्राप्य यत्र तीर्थे विष्णुः सन्निहितः स्थित स्नात्वा गवामयुतं सङ्कल्पितवान् ॥१८॥ ततः स्थानात् केरलान् त्रिगर्तकान् देशानभिव्रज्य भगवान् रामो गोकर्णनामकं शिव क्षेत्रमगात् यत्र गोकर्णक्षेत्रे धूर्जटेर्महादेवस्य सान्निध्यमस्ति ॥१९॥ द्वीपमयनं यस्यास्तामार्यां देवीं दृष्ट्वा बलः शूर्पारकमगात् पयोष्णीं तप्तजलां निर्विन्ध्यां गङ्गामुपस्पृश्य स्नात्वाऽथ दण्डकारण्यमगात् ॥२०॥ रेवां नर्मदां प्रविश्य यत्र नर्मदातीरे माहिष्मती पु वर्तते मनोः तीर्थमुपस्पृश्य पुनः प्रभासमायात् ॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दक्षिणमर्णवं गतः सः रामस्तत्रार्णवसमीपे कन्याख्यां दुर्गां देवीं ददर्श। ततः फाल्गुनमनन्तपुरमासाद्य गत्वा तत्र उ तीर्थं पञ्चाप्सरसं नाम सरः आसाद्य तत्र स्नात्वा गवामयुतमस्पर्शत् ब्राह्मणेभ्यो ददावित्यर्थः। तस्योत्तमत्वे हेतुमाह-यत्र विष्णुः सन्निहितो वर्तत इति ॥१८॥ ततो भगवान् रामः केरलादीन् देशानभिव्रज्य यत्र धूर्जटेः शिवस्य सान्निध्यमस्ति तद्गोकर्णा शिवक्षेत्रमगमदिति शेषः ॥१९॥ द्वीपमयनं यस्यास्तामार्यां देवीं दृष्ट्वा बलः शूर्पारकाख्यं क्षेत्रमगात्। ताप्यादीर्नदीः उपस्पृश्य स्नात्वा ॥२०॥ अथ दण्डकारण्यं प्रविश्य रेवां नर्मदां नदीमगमत्, यत्र रेवातीरे माहिष्मती पुरी वर्तते। मनुतीर्थं "ब्रह्मावर्ते मनोः यत्र प्राची सरस्वती" इति चतुर्थोक्तमुपस्पृश्य स्नात्वा ॥२१॥

अन्वितार्थप्रकाशिका

दक्षिणमिति सार्धम्। दक्षिणमर्णवं गतः सः रामस्तत्रार्णवसमीपे कन्याख्यां दुर्गां देवीं ददर्श। ततः फाल्गुनमनन्तपुर यत्र विष्णुः सदा सन्निहितो वर्तते तत उत्तमं तीर्थं पञ्चाप्सरसं नाम सरः आसाद्य तत्र स्नात्वा गवामयुतमस्पर्शत् ब्राह्मणेभ्यो आर्षः ॥१८॥ तत इति। ततो भगवान् रामः केरलादीन् देशानभिव्रज्य यत्र धूर्जटेः शिवस्य सान्निध्यमस्ति तद्गोक शिवक्षेत्रमगमदिति शेषः ॥१९॥ आर्यामिति युग्मम्। द्वीपमयनं यस्यास्तामार्यां देवीं दृष्ट्वा बलः सूर्पारकाख्यं क्षेत्रमगात्। ताप्या उपस्पृश्य तासु स्नात्वा अथ दण्डकारण्यं प्रविश्य रेवां नर्मदां नदीमगमत्। यत्र रेवातीरे माहिष्मती पुरी वर्तते। मनुतीर्थं "ब्र मनोः क्षेत्रे यत्र प्राची सरस्वती" ति चतुर्थोक्तमुपस्पृश्य स्नात्वा प्रभासमगमत् ॥२०-२१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पंचाप्सरसं नाम सरोवरम् ॥१८॥ केरलादीन् देशान् ॥१९॥ द्विपस्थाम् आर्यां देवीम् ॥२०-२१-२२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत इति ॥ ततः, फाल्गुनमनन्तपुरम्, आसाद्य सम्प्राप्य, यत्र विष्णुः, सन्निहितः, तत्, उत्तमं पञ्चाप्सरसमेतन्नामसरो आसाद्य च तत्र स्नात्वा, गवायुतमयुतसंख्याकाः गाः, अस्पर्शत् अस्पृशत्। ददावित्यर्थः ॥१८॥ तत इति ॥ ततः, भगवान् केरलान्, त्रिगर्तकांस्तु त्रिगर्तकाख्यदेशविशेषांश्चेत्यर्थः। अभिव्रज्य सम्प्राप्य, यत्र धूर्जटेः, नित्यं सान्निध्यम् अस्ति। तथाभूतं गो शिवक्षेत्रं, सम्प्रापत् ॥१९॥ आर्यामिति ॥ प्रविश्येति ॥ ततः द्वीपमयनं यस्याः सैव ताम्, आर्याममम्बिकां, दृष्ट्वा बलः, शूर्पा अगाज्जगाम। तापीं, पयोष्णीं, निर्विन्ध्याम् उपस्पृश्य ताप्यादिषु स्नात्वेत्यर्थः। अथ, दण्डकं दण्डकारण्यं प्रविश्य, यत्र माहिष्म तत्र रेवाम्, अगमत्। मनुतीर्थम् उपस्पृश्य तत्र स्नात्वा, पुनः प्रभासम् अगमत् इति द्वयोरेकान्वयः ॥२०॥ श्रुत्वेति ॥

श्रीकन्
क्षेत्र के अत्यंत
सान्निध्य रहता
श्रीबलदेवजी पंच
भवानीशंकर के
से आगे चलते जल
उस जल चलकर
स्नान करके श्रीब
नर्मदाजी के परम
श्रीबलभद्रजी पुनः

श्रुत्वा द्विजै
स भीमदुर्
युधिष्ठिरस्तु
गदापाणी उ

तत्र, द्विजैः, कु
गदाभ्याम्, युध्यतोः, भी
अभिवाद्य, तु, किं, विव
मण्डलानि, चरन्तौ, उभौ,

विनशनं कुरुक्षेत्रम्

विशेषेण नश्यति
संरब्धौ क्रुद्धौ। इदं वक्ष्यमाण

मृधे युद्धस्थले युद्ध
उभयोरपि भीमदुर्योधनय
भारतयुद्धे निजबन्धुवर्गादिसर्व
किं गुणादिकं वा वक्तुमि
मिथो विजयेच्छाशीलौ
भूतावपि दृष्ट्वा अत एव नम

---

१. द्विजैस्तु कथितं विज.

र्ा नदी द्वैपायनस्य
॥२०॥ तत्र च रेवां
निकटे गतः ॥२१॥

न्निहितः स्थितस्तत्र
कर्णनामकं शिवस्य
शूर्पारकमगात्। तापीं
दातीरे माहिष्मती पुरी

ासाद्य गत्वा तत्र उत्तमं
त्वे हेतुमाह-यत्र सदा
ध्यमस्ति तद्गोकर्णाख्यं
दीर्नदीः उपस्पृश्य तासु
र्थं ''ब्रह्मावर्ते मनोः क्षेत्रे

ः फाल्गुनमनन्तपुरमासाद्य
स्पर्शत् ब्राह्मणेभ्यो ददौ।
न्निध्यमस्ति तद्गोकर्णाख्यं
यं क्षेत्रमगात्। ताप्यादीर्नदीः
वर्तते। मनुतीर्थं ''ब्रह्मावर्ते

२१-२२॥

ञ्चाप्सरसमेतन्नामसरोविशेषम्,
इति ॥ ततः, भगवान्, रामः,
म् अस्ति। तथाभूतं गोकर्णाख्यं
वकां, दृष्ट्वा बलः, शूर्पारकं क्षेत्रं
यं प्रविश्य, यत्र माहिष्मती पुरी,
॥ श्रुत्वेति ॥

कृष्णप्रिया

श्रीकन्याकुमारी जी का दर्शन करने के बाद श्रीफाल्गुन तीर्थ पधारे मति अनन्त शयम क्षेत्रमें पधारे उस क्षेत्र के अत्यंत उत्तम पंचाप्सरस तीर्थमें सरोवरमें स्नान किया। उस पंचाप्सरस तीर्थमें नित्य श्रीविष्णुभगवान का सान्निध्य रहता है। वहां पधारकर श्रीबलभद्रजीने दस हजार गौओं का दान किया ॥१८॥ अब भगवान श्रीबलदेवजी पंचाप्सस तीर्थमें स्नान दान आदि पुण्यकर्म करके आगे चलते केरल ौर त्रगर्त देशोमें होकर भगवान भवानीशंकर के गोकर्ण क्षेत्रमें पधारे। श्रीगोकर्ण तीर्थमें भगवान शंकर सदा सर्वदा बिराजते है ॥१९॥ गोकर्ण क्षेत्र से आगे चलते जलसे घिरे हुए द्विपमें नित्य बिराजमान आर्याद्वैपायनी देवी का दर्शन करने के लिये पधारे। पुनः उस जल चलकर आगे शूर्पारक क्षेत्र कि यात्रा की, इस यात्रा के बाद तापी, पयोम्णी एवं निर्वघ्न्या सरिताओंमें स्नान करके श्रीबलदेवजी दण्डकारण्यमें आये ॥२०॥ वहां पधारकर आप श्रीनर्मदाजी के तट पर पधारे इस नर्मदाजी के परम पावन तटपर ख्यातनाम श्रीमहाहिष्मती नगरी आई है। वहां मनुतीर्थमें स्नान करके श्रीबलभद्रजी पुनः प्रभास क्षेत्रमें आये ॥२१॥

श्रुत्वा द्विजैः[1] कथ्यमानं कुरुपाण्डव[2]संयुगे । सर्वराजन्यनिधनं [3]भारं मेने हृतं भुवः ॥२२॥
स भीमदुर्योधनयोर्गदाभ्यां [4]युध्यतोर्मृधे । वारयिष्यन् [5]विनशनं जगाम यदुनन्दनः ॥२३॥
युधिष्ठिरस्तु तं दृष्ट्वा [6]यमौ कृष्णार्जुनावपि । अभिवाद्याभवंस्तूष्णीं किं विवक्षुरिहागतः ॥२४॥
गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ । मण्डलानि विचित्राणि चरन्ताविदमब्रवीत् ॥२५॥

कर्दमक्षमा

तत्र, द्विजैः, कुरुपाण्डवसंयुगे, सर्वराजन्यनिधनम्, श्रुत्वा, भुवः, भारम्, हतम्, मेने ॥२२॥ सः, यदुनन्दनः, मृधे, गदाभ्याम्, युध्यतोः, भीमदुर्योधनयोः, वारयिष्यन्, विनशनम्, जगाम ॥२३॥ कृष्णार्जुनौ, अपि, यमौ, युधिष्ठिरः, तम्, दृष्ट्वा, अभिवाद्य, तु, किं, विवक्षुः, इहागतः, इति, तूष्णीम्, अभवम् ॥२४॥ उभौ, विजयैषिणौ, संरब्धौ, गदापाणी, विचित्राणि, मण्डलानि, चरन्तौ, उभौ, दृष्ट्वा, इदम्, अब्रवीत् ॥२५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विनशनं कुरुक्षेत्रम् ॥२३॥ विवक्षुर्वक्तुमिच्छुः किं वदिष्यतीति भिया तूष्णीमासन्निति ॥२४-२६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विशेषेण नश्यति पापं यत्र तद्विनशनम्। स बलः ॥२३॥ तं बलम्। किं किञ्चिद्विवक्षतीति वा किं विवक्षुः ॥२४॥ संरब्धौ क्रुद्धौ। इदं वक्ष्यमाणम् ॥२५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मृधे युद्धस्थले युद्ध्यतोस्सतोः किं वा मृधे मृधा तौ वारयिष्यन् यद्वा युद्ध्यतोरिति कर्मणि षष्ठी युद्ध्यन्तौ वारयिष्यन् द्वा उभयोरपि भीमदुर्योधनयोर्यदुभिः सह तुल्यसम्बन्धात् द्वयोरपि जगामेति ॥२३॥ कृष्णार्जुनाभ्यां पश्चादभिवादनं सम्प्रति युद्धे निजबन्धुवर्गादिसर्वक्षत्रियवर्गक्षये तस्मिन् तयोर्द्वयोरेव मुख्यत्वात्सङ्कोचापत्तेः आगत इत्यन्ते इति वितर्क्येति शेषः। किं गुणादिकं वा वक्तुमिच्छन् आगत इत्यभिप्रायज्ञानेन किमपि वक्तुमशक्तेस्तूष्णीमभूवन्नित्यर्थः ॥२४॥ संरब्धो क्रुद्धौ मिथो विजयेच्छाशीलौ अतो विचित्राणि बहुप्रकारकाणि मण्डलानि गदायुद्धगतिभेदान् चरन्तौ दृष्ट्वा अयमुक्तौ हेतुः यद्वा यमावपि दृष्ट्वा अत एव नमस्कृतवन्तौ नेति भावः ॥२५॥

---

[1] द्विजैस्तु कथितं विज. । [2] संयुगं-विज. । [3] भारमेतद्धृतं-विज. । [4] युध्यतो रणं-विज. । [5] विशसनं-विज. । [6] ययौ-च.पु. टी. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

द्विजैस्तत्रत्यैः तीर्थयात्रयागतैर्वा विप्रैः ॥२२॥ मृधे युद्धस्थले युद्ध्यतोः सतोः किं वा मृधे मृधा तौ वारयिष्यन् यु युध्यतोरिति कर्मणि षष्ठी युद्ध्यन्तौ वारयिष्यन् । यदुनन्दन इति पुनः प्रभासागमनेन यदूनां प्रहर्षणात् यद्वा, उभयोर्र भीमदुर्योधनयोर्यदुभिः सह तुर्यसम्बन्धात् द्वयोरपि रक्षया तेषामानन्दार्थमिति भावः । यद्वा, चिरप्रवासादागतो द्वारकायां गत यदूनानन्दयितुमर्होऽपि जगामेति ॥२३॥ कृष्णार्जुनाभ्यां पश्चादभिवादनं भारतयुद्धे निजबन्धुवर्गादिसर्वक्षत्रियवर्गे तस्मिंस्तयोर्द्वयोः मुख्यतया लज्जादिसंकोचात् । अन्यत्तैर्व्याख्यातम् । यद्वा किं गुणादिकं दोषादिकं वा वक्तुमिच्छन्नागत इत्यभिप्रायाज्ञानेन किमपि वक्तुमशक्तेस्तूष्णीमभवन्नित्यर्थः ॥२४॥ संरब्धौ क्रुद्धौ किं च मिथो विजयेच्छाशीलौ अतो विचित्राणि बहुप्रकाराणि मण्डलानि गदायुद्धगतिभेदान् चरन्तौ दृष्ट्वा अयमुक्तौ हेतुः यद्वा, तथाभूतावपि दृष्ट्वा ॥२५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विनशनं सरस्वतीतिरोधानदेशम् ॥२३-२९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

श्रुत्वेति । तत्र द्विजैः कथ्यमानं सर्वेषां बहूनां राजन्यानां राज्ञां निधनं नाशं श्रुत्वा भुवो भारं हृतं भगवतेति शेषः मे अमन्यत ॥२२॥ स इति । स यदुनन्दनो रामः मृधे युद्धे युध्यतोः सतोः तौ वारयिष्यन् वारयितुं विनशनं कुरुक्षेत्रं जगाम ॥२ युधिष्ठिर इति । तं रामं दृष्ट्वा ययौ तत्समीपमित्यर्थः । तथा कृष्णार्जुनावपि ययतुः । ते तमभिवाद्य किं वक्तुमिच्छुरिहागत इ संशयानास्तूष्णीमभवन् ॥२४॥ उभौ भीमदुर्योधनौ दृष्ट्वेदं वक्ष्यमाणमब्रवीत् कथम्भूतौ संरब्धौ क्रुद्धौ विजयमाकाङ्क्षमाणौ विचित्राणि मण्डलानि गतिभेदांश्चरन्तौ कुर्वन्तौ ॥२५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

भुव एतत् एतं भारं हृतं श्रुत्वा एतत् एतर्हि भुवो भारं हृतं मेन इति शेषः इति वा ॥२२॥ विशसनं युद्धम् ॥२३॥ कि वक्तुकाम आगत इति मत्वा ॥२४-२५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-३०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१...३४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विनशनं कुरुक्षेत्रम् ॥२३॥ किं वदिष्यतीति शङ्कया तूष्णीं ॥२४-२५॥

गूढार्थदीपिनी

मृधे सङ्ग्रामे । वारयिष्यन् वारयितुम् । हेतौ शतृप्रत्ययः । विनशनं कुरुक्षेत्रम् । विशेषेण नश्यन्ति पापानि तत्र विनशनम् । भीमेति शेषे षष्ठी ॥२३॥ किं किञ्चित् विवक्षतीति वा आगतः ॥२४॥ संरब्धौ क्रुद्धौ । मण्ड पादविक्षेपात् (पैतरासंज्ञकान्) ॥२५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वारयिष्यन् तौ वारयितुं विनशनं कुरुक्षेत्रम् ॥२३॥ किं विवक्षुः किं वक्तुमिच्छुरिहागतः इति संशयानाः तूष्णीमासन् ॥२४-२

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्रत्यैर्द्विजैः कथ्यमानं कुरुपाण्डवानां संयुगे तत्सम्बन्धिनां सर्वेषां राज्ञां निधनं श्रुत्वा भुवो भारं हृतं मेने ॥२२॥ तत गदायुद्धमपि जायत इति श्रुत्वा भूभारस्तु हृत एव उद्देशान्तरं नास्तीति यथा पञ्च पाण्डवा जीवन्ति एवमेको दुर्योधनोऽपि जी

कि मरणेनेति निश्चि
युद्ध्यतोः सतोः युद्धं
विचारितार्थकर्ता स्नेह
विद्वेषाणां च सुखं ज
तूष्णीमभवन् तेषामात
ततः स्वयमेव स्वागत
अनिवृत्त्यर्थं कामनाम
निवृत्तौ भवतः तस्मात्

द्विजैर्ब्राह्मणैः
पृथिव्या भारं हृतं दूरी
निवर्तयितुं स यदुनन्दन
प्रम्य तूष्णीमभवन् । मौ
मण्डलानि गदायुद्धगती

प्रभासे द्विजैः व
॥२२॥ तदा स रामः मृधे
सूचयन्नाह–यदुनन्दन इति
भीतास्तूष्णीमभवन् ॥२
गदाप्रहारगतिभेदांश्चरन्तावुभ

श्रुत्वेति । तत्र प्रभ
भारं हृतं मेने ॥२२॥ स इ
भीमदुर्योधनौ वारयिष्यन् वा
॥२३॥ युधिष्ठिर इति । युधि
भीतास्तूष्णीमभवन् ॥२४॥ ग
गदाप्रहारगतिभेदांश्चरन्तावुभौ

विनशनं कुरुक्षेत्रम
गदायुद्धगमनविशेषान् ॥२५

तत्र द्विजैः, कथ्यमानं
स इति ॥ यदुनन्दनः स रामः,
कुरुक्षेत्रं, जगाम ॥२३॥ युधिष्ठि

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

किं मरणेनेति निश्चित्य विनशनं प्रदक्षिणं कुर्वन् तत्र समागत इत्याह-स भीमदुर्योधनयोरिति । स रामः भीमदुर्योधनयोः गदाभ्यां युद्ध्यतोः सतोः युद्धं वारयिष्यन् विनशनं कुरुक्षेत्रमागतः इदानीमागमने पक्षपातशङ्का नास्तीति तस्यागमनं यतो यदुनन्दनः यदुरिव विचारितार्थकर्ता स्नेहादिना पक्षपातरहितः ॥२३॥ ततः सर्वेषां शङ्का जातेत्याह-युधिष्ठिरस्त्विति । तं रामं तुशब्देन साधारणानां विद्वेषाणां च सुखं जातमिति सूचितं युधिष्ठिरप्रभृतीनां तु ततोऽन्यथेति अन्यपक्षो व्यावर्तितः यौ नकुलसहदेवौ सर्व एवाभिवाद्य तूष्णीमभवन् तेषामालोचनमाह- किं विवक्षुरिहागत इति । क्रियाप्रयोजनं तु निवृत्तं वाङ्मात्रमवशिष्यत इति तस्यैवोत्प्रेक्षा ॥२४॥ ततः स्वयमेव स्वागतं प्रकटीकृतवान् इत्याह-गदापाणी उभाविति । युद्धार्थं हस्तेन गदा उभयोरपि अतः साधनमाह-संरब्धाविति अनिवृत्त्यर्थं कामनामाह-विजयैषिणाविति तदर्थं यत्नमप्याह-मण्डलानि विचित्राणि चरन्ताविति न ह्येवं प्रवृत्तौ कदाचित् स्वतो निवृत्तौ भवतः तस्मात् ज्ञानेनैव निवृत्तिरिति ज्ञानोपदेशार्थमागतः इदं वक्ष्यमाणमब्रवीत् ॥२५॥

श्रीसुबोधिनीसारः

द्विजैर्ब्राह्मणैः कथ्यमानं कुरूणां पाण्डवानां संयुगे संग्रामे सर्वेषां राजन्यानां क्षत्रियाणां निधनं मृत्युं तत्र श्रुत्वा भुवः पृथिव्या भारं हृतं दूरीकृतं बलो मेने विजज्ञे ॥२२॥ मृधे युद्धे गदाभ्यां युध्यतो भीमदुर्योधनयोः कर्मणि षष्ठी वारयिष्यन् निवर्तयितुं स यदुनन्दनः बलो विनशनं कुरुक्षेत्रं जगाम ॥२३॥ तं रामं दृष्ट्वा युधिष्ठिरः कृष्णार्जुनयमौ नकुलसहदेवौ अभिवाद्य प्रण्य तूष्णीमभवन् । मौनिन आसन् किं वक्तुमिच्युरिहागतोऽयमिति ॥२४॥ संरब्धौ क्रुद्धौ विजयैषिणौ गदाहस्तौ विचित्राणि मण्डलानि गदायुद्धगतीः रचन्तावुभौ द्वौ दृष्ट्वा इदमब्रवीत् ॥२५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रभासे द्विजैः कथ्यमानं कुरुपाण्डवसंयुगे सर्वेषां बहूनां तत्रागतानां राज्ञां निधनं नाशं श्रुत्वा भगवता भुवो भारं हृतं मेने ॥२२॥ तदा स रामः मृधे गदाभ्यां युद्ध्यतोर्भीमदुर्योधनयोर्वारयिष्यन् वारयितुं विनशनं कुरुक्षेत्रं जगाम । वारणे सम्बन्धस्य हेतुत्वं सूचयन्नाह-यदुनन्दन इति ॥२३॥ यमौ नकुलसहदेवौ युधिष्ठिरादयस्तं रामं दृष्ट्वाभिवाद्य किंविवक्षुरिहागत इति संशयमापन्ना भीतास्तूष्णीमभवन् ॥२४॥ संरब्धौ क्रुद्धौ, अत एव विजयमाकांक्षमाणौ, अतो गदापाणी विचित्राणि मण्डलानि गदाप्रहारगतिभेदांश्चरन्तावुभौ भीमदुर्योधनौ दृष्ट्वा इदं वक्ष्यमाणमब्रवीत् ॥२५॥

अन्वितार्थप्रकाशिका

श्रुत्वेति । तत्र प्रभासे द्विजैः कथ्यमानं कुरुपाण्डवसंयुगे सर्वेषां बहूनां तत्रागतानां राज्ञां निधनं नाशं श्रुत्वा भगवता भुवो भारं हृतं मेने ॥२२॥ स इति । तदा यदुनन्दनः स रामः मृधे गदाभ्यां युद्ध्यतोः । शताऽऽर्षः । भीमदुर्योधनयोः । शेषे षष्ठी । भीमदुर्योधनौ वारयिष्यन् वारयितुं विनशनं कुरुक्षेत्रं जगाम । यद्वा भीमदुर्योधनयोः विनशनं युद्धं वारयिष्यन् तत्र जगामेत्यन्वयः ॥२३॥ युधिष्ठिर इति । युधिष्ठिरः कृष्णार्जुनौ यमौ नकुलसहदेवौ च तं रामं दृष्ट्वाभिवाद्य किंविवक्षुरिहागत इति संशयमापन्ना भीतास्तूष्णीमभवन् ॥२४॥ गदेति । संरब्धौ क्रुद्धौ अतो नमस्कारमकृतवन्तौ विजयैषिणौ अतो गदापाणी विचित्राणि मण्डलानि गदाप्रहारगतिभेदांश्चरन्तावुभौ भीमदुर्योधनौ दृष्ट्वा इदं वक्ष्यमाणमब्रवीत् ॥२५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विनशनं कुरुक्षेत्रम् ॥२३॥ किंविवक्षुः वक्तुम् इच्छुः इहागत इति विचार्य तूष्णीं बभूवुः ॥२४॥ मण्डलानि गदायुद्धगमनविशेषान् ॥२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्र द्विजैः, कथ्यमानं कुरुपाण्डवसंयुगे, सर्वराजन्यनिधनं श्रुत्वा, भुवः भारं हृतं, भगवतेति शेषः । मेने अमन्यत ॥२२॥ स इति ॥ यदुनन्दनः स रामः, मृधे गदाभ्यां, युद्ध्यतोः, भीमदुर्योधनयोः, तावित्यर्थः । वारयिष्यन् वारयितुमित्यर्थः । विनशनं कुरुक्षेत्रं जगाम ॥२३॥ युधिष्ठिर इति ॥ तं दृष्ट्वा तु, युधिष्ठिरः, यमौ सहदेवनकुलौ, कृष्णार्जुनौ, अपि किं विवक्षुः, इह आगतः

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्यात् । इति विचार्य, अभिवाद्य, तूष्णीं, अभवन् ॥२४॥ गदेति ॥ रामः, संरब्धौ कुपितौ, विजयैषिणौ, विचित्राणि मण्डला
चरन्तौ, गदापाणी, उभौ भीमदुर्योधनौ दृष्ट्वा इदम् अब्रवीत् ॥२५॥

कृष्णप्रिया

श्रीबलभद्रजी ने द्वजजनों के मुख्र से श्रवण किया कि महाभारत के युद्धमें अधिक प्रमाणमें क्षत्रियों का संहार हो गया है इस समाचार से बलभद्रजी ने माना कि अब मूमि का बहुत सा भार उतर गया है ॥२२॥ महारा बलभद्रजी जिस दिन कुरुक्षेत्र पधारे उस दिन रणभूमि में भीमसेन और दुर्योधन दोनों गदायुद्ध कर रहे थे। उ अवसर पर दोनों को रोकने का विचार कर रहे थे ॥२३॥ धर्मराज महाराज नकुल सहदेव श्रीकृष्णचन्द्र भगवान और अर्जुनजीने बलदेवजी को प्रणाम किया और मौन ले लिया कि न जाने यहां क्या कहने के लिये पधारे ॥२४॥ उधक कुराक्षेत्रमें भीमसेन और दुर्योधन दोनों चचेरे भाई हाथमें गदा लेकर एक दूसरे को जीतने के लि क्रोधाविष्ट होकर विविध प्रकार के पैतरे ले रहे थे। उन्हें देखकर बलभद्रजी ने कहा ॥२५॥

युवां तुल्यबलौ वीरौ हे राजन् हे वृकोदर । एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकम् ॥२६॥
तस्मादेकतरस्येह युवयोः समवीर्ययोः । न लक्ष्यते जयोऽन्यो वा विरमत्वफलो रणः ॥२७॥
न तद्वाक्यं जगृहतुर्बद्धवैरौ [1]नृपार्थवत् । अनुस्मरन्तावन्योन्यं दुरुक्तं दुष्कृतानि च ॥२८॥
दिष्टं तदनुमन्वानो रामो द्वारवतीं ययौ । उग्रसेनादिभिः [2]प्रीतैर्ज्ञातिभिः समुपागतः ॥२९॥

कर्दमक्षमा

हे राजन्! हे वृकोदर! युवाम्, तुल्यबलौ, वीरौ, एकम्, प्राणाधिकम्, मन्ये, उत, एकम्, शिक्षयाधिकम्, मन्ये, तस्मा समवीर्ययोः, युवयोः, इह, एकतरस्य, जयः, लक्ष्यते, वा, अन्यः, लक्ष्यते, अफलः, रणः, विरमतु ॥२६-२७॥ हे नृप! बद्धवै अर्थवत्, तद्वाक्यम्, अन्योन्यम्, दुरुक्तम्, च, दुष्कृतानि, अनुस्मरन्तम्, न, जगृहतुः ॥२८॥ तद्, दिष्टम्, अनुमन्वानः, राम द्वारवतीम्, ययौ, प्रीतैः, उग्रसेनादिभिः, ज्ञातिभिः, समुपागतः, तम्, पुनः, नैमिषम्, प्राप्तम्, निर्वृत्ताखिलविग्रहम्, सर्वैः, क्रतुभि क्रत्वङ्गम्, ऋषयः, मुदा, अयाजयन्, ॥२९-३०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अन्यः पराजयो वा रणः सङ्ग्रामः ॥२७॥ अर्थवद्वाक्यम् ॥२८॥ दिष्टं प्राचीनङ्कर्म समुपागतः सङ्गतः ॥२९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्राणाधिकं बलाधिकं भीमम् । 'प्राणो हन्मारुते बले' इति धरणिः ॥२६॥ यतः समवीर्यौ तस्माद्धेतोः । अ पराजयः ॥२७॥ तद्वाक्यं रामवाक्यम् । अर्थवद्युक्तियुक्तम् । दुरुक्तं द्रौपदीमुद्वीक्ष्य दुर्वचनम् । दुर्वचनानि जतुगृहदाहा ॥२८॥ तन्निजवाक्यानादरणं युद्धं वा ॥२९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तुल्यं बलं युद्धसामर्थ्यं ययोस्तौ किञ्च वीरौ महोत्साहौ हे राजन्निति शिष्ये दुर्य्योधने स्नेहविशेषेणादरात् अत तत्सम्बोधनं यद्वा राज्यभोगापेक्षया जीवनार्थं युद्धत्याग एव तवोचित इति भावः यद्वा निजवाक्यग्रहणार्थं दुष्टं तमनुवर्णयति भीमं प्राणेन बलेनाधिकम् दुर्योधनाच्छ्रेष्ठम् उत तु एकं दुर्योधनं तु शिक्षया गदायुद्धविद्याज्ञानवैशिष्ट्येनाधिकं स्वयं तच्छि श्लेषेण प्राणादप्यधिकं परमसुहृत्तमं शिक्षया शिष्यतया चाधिकमिति मन्ये तदानीमेव वा तयोस्तद्दृष्ट्या पूर्वत एव वा वेद्मि

---

१. नृपात्मजौ-विज. । २. स्फीतै-विज. ।

समं वीर्यं युद्ध
तद्वदपि न जगृहतुः बद्ध
जनितमित्यर्थः । अर्थवते
द्वारकानिकटे चोग्रसेन

तुल्यं बलं यु
तत्सम्बोधनम् । यद्वा, रा
। एकं भीमं प्राणेन बले
तच्छिक्षणात् मन्ये तदान
अतोऽफलो जयादिरहितो
अत एव निरन्तरं स्मरन्तौ
स्ववाक्यस्य द्वयोः केनाप

॥२३-२९॥

उक्तिमेवाह-युवा
दुर्योधनं शिक्षयाधिकं मन्ये ।
निष्फलो रणः सङ्ग्रामः विरम
हेतुत्वेन तौ विशिनष्टि-बद्धवैरौ
तयोः प्राचीनकर्मप्रयुक्तं मन्वा

प्राणाधिकं बलाधि
॥२८॥ तद्युद्धं दिष्टं दैवकृतम्

एकं भीमं बलाधिकं
॥२८॥ दिष्टं श्रीकृष्णेनैवादिष्टं तत्

एकं भीमं प्राणाधिकं ब
॥२६॥ अन्यः पराजयो वा न लक्ष्
दुष्कृतानि लाक्षाभवनदाहादीनि ॥२

त्राणि मण्डलानि,

ाणमें क्षत्रियों का
है ॥२२॥ महाराज
कर रहे थे। उस
कृष्णचन्द्र भगवान
के लिये पधारे है
को जीतने के लिये

याधिकम् ॥२६॥
फलो रणः ॥२७॥
कृतानि च ॥२८॥
समुपागतः ॥२९॥

याधिकम्, मन्ये, तस्मात
-२७॥ हे नृप! बद्धवैरौ,
ष्टम्, अनुमन्वानः, रामः,
विग्रहम्, सर्वैः, क्रतुभिः,

सङ्गतः ॥२९॥

वीर्यौ तस्माद्धेतोः। अन्यः
दुर्वचनानि जतुगृहदाहादीनि

हविशेषेणादरात् अत एवादौ
हणार्थं दुष्टं तमनुवर्णयति-एकं
ट्येनाधिकं स्वयं तच्छिक्षणात
ट्या पूर्वत एव वा वेद्मि ॥२६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

समं वीर्यं युद्धसामर्थ्यं ययोस्तयोः इह रणे न लक्ष्यते मया अतोऽफलः जयादिरहितो विरमतु ॥२७॥ अर्थः कारणं प्रयोजनं वा तद्वदपि न जगृहतुः बद्धवैरौ चिरं वृद्ध्यभूतद्वेषौ अत एव निरन्तरं स्मरन्तौ ॥२८॥ तद्युद्धं दिष्टं श्रीकृष्णेन भगवतैवादिष्टं प्रवर्तितं तदिच्छया जनितमित्यर्थः। अर्थवतोऽपि स्ववाक्यस्यैकतरेणाप्यग्रहणात् राम इति उग्रसेनादीनां रमणार्थमिति भावः। आदिशब्दात् श्रीवसुदेवप्रद्युम्नादयः द्वारकानिकटे चोग्रसेनादिभिः सम्यक् तन्मङ्गलाचारसहितं यथा स्यात्तथा उप समीपे आ सर्वतो गतो मिलितः ॥२९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तुल्यं बलं युद्धसामर्थ्यं ययोस्तौ अतो वीरौ महायोधौ हे राजन्निति शिष्ये दुर्योधने स्नेहविशेषेणादरात् अत एवादौ तत्सम्बोधनम्। यद्वा, राज्यभोगापेक्षया जीवनार्थं युद्धत्याग एव तवोचित इति भावः यद्वा, निजवाक्यग्रहणार्थं दुष्टं तमनुनयति। एकं भीमं प्राणेन बलेनाधिकं दुर्योधनात् श्रेष्ठम् उत तु एकं दुर्योधनं तु शिक्षया गदायुद्धज्ञानाभ्यासकौशलेनाधिकं स्वयं तच्छिक्षणात् मन्ये तदानीमेव तयोस्तत्तद्दृष्ट्या पूर्वत एव वा वेद्मि ॥२६॥ समं वीर्यं ययोस्तयोः इह रणे न लक्ष्यते मया अतोऽफलो जयादिरहितो विरमतु ॥२७॥ अर्थः कारणं प्रयोजनं वा तद्वदपि न जगृहतुः कुतः ? बद्धवैरौ चिरं निबिडीभूतद्वेषौ अत एव निरन्तरं स्मरन्तौ ॥२८॥ तद्युद्धं दिष्टं श्रीकृष्णेन भगवता आदिष्टं प्रवर्तितं तदिच्छया जनितमित्यर्थः। अर्थवतोऽपि स्ववाक्यस्य द्वयोः केनाप्यग्रहणात् राम इत्युग्रसेनादीनां रमणार्थमिति भावः। आदिशब्दाच्छ्रीवसुदेवप्रद्युम्नादयः ॥२९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥२३-२९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उक्तिमेवाह-युवामिति। हे राजन् दुर्योधन! हे वृकोदर! भीम! एकं भीमं प्राणाधिकं बलाधिकं मन्ये। उतैकमेकं तु दुर्योधनं शिक्षयाधिकं मन्ये ॥२६॥ तस्माद्धेतोः तुल्यवीर्ययोर्युवयोरन्यतरस्य विजयोऽन्यः पराजयो भविष्यतीति न लक्ष्यते अतो निष्फलो रणः सङ्ग्रामः विरमतु शाम्यतु ॥२७॥ नेति। नृपात्मजौ भीमदुर्योधनौ इत्थमुक्तावपि तस्य रामस्य वाक्यं न जगृहतुः। तत्र हेतुत्वेन तौ विशिनष्टि-बद्धवैरौ तत्रापि हेतुरन्योन्यं दुरुक्तं दुष्कृतानि च स्मरन्तौ इति ॥२८॥ दिष्टमिति। रामः तत्स्ववाक्याग्रहणं दिष्टं तयोः प्राचीनकर्मप्रयुक्तं मन्वानस्तूष्णीं द्वारवतीं पुरीं ययौ। तत्र च स्थितैः सर्वसम्पत्समृद्धैरुग्रसेनादिभिः सङ्गतो बभूव ॥२९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

प्राणाधिकं बलाधिकम् ॥२६॥ अन्यः पराजयो वा विरमतु शान्तो भवतु ॥२७॥ दुष्कृतानि जतुगृहदाहादीनि ॥२८॥ तद्युद्धं दिष्टं दैवकृतम् ॥२९-३३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-३०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१...३४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एकं भीमं बलाधिकं मन्ये उतैकं दुर्योधनं गदाशिक्षया अधिकम् ॥२६॥ अन्यः पराजयः ॥२७॥ अर्थवत् तद्वाक्यम् ॥२८॥ दिष्टं श्रीकृष्णेनैवादिष्टं तत् प्रवर्तितमित्यर्थः ॥२९॥

गूढार्थदीपिनी

एकं भीमं प्राणाधिकं बलाधिकम्। 'प्राणो हृन्मारुते बले' इति धरणिः। शिक्षया मद्दत्तया अधिकम्। उत अप्यर्थे ॥२६॥ अन्यः पराजयो वा न लक्ष्यते अतो रणः विरमतु ॥२७॥ हे नृप अर्थवत् युक्तियुक्तं दुरुक्तम्। दुर्वचनं द्रौपदीमालक्ष्य। दुष्कृतानि लाक्षाभवनदाहादीनि ॥२८॥ तत् वाक्याग्रहणं दिष्टं दैवकृतम्। समुपागतः ज्ञातिभिः सह सम्मिलितः ॥२९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे नृप ! तस्य रामस्य अर्थवत् वाक्यं न जगृहतुः ॥२८॥ दिष्टं तयोः प्राचीनं कर्म मन्वानः द्वारवतीं ययौ तस्यामुग्रसेनादिभिः समुपागतः सङ्गतः ॥२९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

उभयोरादौ प्रशंसामाह-युवां तुल्यबलाविति । युवयोर्भिन्नतया सम्बोधनं हे राजन् ! हे वृकोदरेति राजन्निति। सम्बोधनादेकोऽपि जीवितः राज्यमेव प्राप्स्यतीति निश्चितं ननु भीमश्च बलभद्रश्चेति वाक्यात् कथं भीमसेनो दुर्योधनः इति चेत्तत्राह-एवं प्राणाधिकं मन्य इति । एकं भीमं प्राणेन बलेन द्वितीयादधिकं मन्ये अपरं राजानं भीमापेक्षया शिक्षया मयैव कृतया अधिकं मन्ये ॥२६॥ तर्ह्येवं सति किं भविष्यतीत्याशङ्कायामाह-तस्मादेकतरस्येति बलांशः शिक्षांशेन सम भविष्यतीति अत एकतरस्यापि युवयोर्मध्ये अर्थात्समवीर्यता जातेति जयः अन्यः पराजयो वा न लक्ष्यते अतो निष्फलः अयं क्लेशरूपो रणः विरमतु निष्फलत्वात् ॥२७॥ एवमुक्तावपि न निवृत्तावित्याह-न तद्वाक्यं जगृहतुरिति । यतो बद्धवैरौ यद्यप्यर्थवत् आन्तरमनिवर्तकं बाह्यो निवर्तक इति ततो रामः तत्तेषामनिवर्तनं दिष्टं भाग्याधानमिति मन्वानः यथाभाग्य भविष्यतीति स्वयं यात्रां कुर्वन्नेव द्वारवतीं ययौ बलभद्रे बहुकाले गृहागते नष्टलब्धधना इव उग्रसेनादयः समागताः तं गृहं निन्युः ततो यात्राया अनिवृत्तत्वात् पुनर्नैमिषे समागतः एतावता वर्षः पूर्णः ॥२८-२९॥

श्रीसुबोधिनीसारः

हे राजन् ! वृकोदर युवां समबलौ वीरौ शूरौ स्थः । एकं भीमं प्राणाधिकं बलेनाधिकम् उतापि एकं दुर्योधनं शिक्षयाधिकमहं मन्ये ॥२६॥ तस्माद्धेतोः समबलयोर्युवयोर्मध्ये एकतरस्यैकस्य जयोऽन्यो वा पराजयो न लक्ष्यते न ज्ञायतेऽतस्सोऽफलो निष्फलो रणो युद्धं निवर्तताम् ॥२७॥ शुकोक्तिः । हे नृप ! अर्थवत् सार्थकं तस्य बलदेवस्य वाक्यं बद्धवै ययोस्तौ भीमसेनदुर्योधनौ अन्योन्यं परस्परं दुरुक्तं कटुवचनं दुष्कृतानि विषमोदकप्रदानजतुगृहदाहद्रौपदीवस्त्राकर्षणादीनि भीमः जयद्रथपराभवात्मकपराजयचित्ररथबन्धमोचनादीनि दुर्योधनः अनुस्मरन्तौ नोररीचक्रतुः ॥२८॥ तद्दिष्टं भागधेयं मन्वानो रामो द्वारकां जगाम । प्रीतैः ज्ञातिभिरुग्रसेनादिभिः सङ्गतो मिलितोऽभूत् ॥२९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमाह-युवामिति । एकस्यापि तव जीवतः कदाचिद्राज्याशा स्यादप्यन्यथा तु सापि न स्यात् इति सूचयन् दुर्योधनं सम्बोधयति-हे राजन्निति । एकस्मिन् दुर्योधने जीवति सत्यपि तव भयं तु नास्त्येव, अतः किं वृथा मारणेन इति सूचयन् भीमं सम्बोधयति - हे वृकोदरेति । युवां तुल्यबलौ वीरौ । वैषम्यस्य प्रसिद्धत्वात् कथं तुल्यत्वं तत्राह-एकं भीमं दुर्योधनात् प्राणेन बलेनाधिकं मन्ये, उत अथ चैकं दुर्योधनं भीमात् शिक्षया मया कृतया गदाप्रहारनैपुण्येनाधिकं मन्ये ॥२६॥ यस्मादेवं तस्मात् समवीर्ययोर्युवयोरन्यतरस्येह युद्धे जयः अन्यः पराजयो वा भविष्यतीति न लक्ष्यते, अतो निष्फलोऽयं रणः युद्धं विरमतु ॥२७॥ हे नृप ! यद्यपि तस्य रामस्य वाक्यम् अर्थवत्क्लेशनिवर्तकं तथापि तौ न जगृहतुः । तत्र हेतुमाह- बद्धवैराविति । तत्रापि हेतुमाह-अन्योन्यं दुरुक्तं दुष्कृतानि च स्मरन्ताविति ॥२८॥ तत् स्ववाक्याग्रहणं दिष्टं तयोरनिष्टहेतुप्राचीनकर्मप्रयुक्तं मन्वानो रामो द्वारवतीं ययौ तत्र चोग्रसेनाभिः समागतः सम्मीलितो बभूव ॥२९॥

अन्वितार्थप्रकाशिका

युवामिति । हे राजन् ! दुर्योधन ! हे वृकोदर ! भीम ! युवां तुल्यबलौ वीरौ च तत्र एकं भीमं दुर्योधनात् प्राणेन बलेनाधिकं मन्ये । उत अथ चैकं दुर्योधनं भीमात् शिक्षया कृतया गदाप्रहारनैपुण्येनाधिकं मन्ये ॥२६॥ तस्मादिति । यस्मादेवं तस्मात् समवीर्ययोर्युवयोरन्यतरस्येह युद्धे जयः अन्यः पराजयो वा भविष्यतीति न लक्ष्यते । अतो निष्फलो रणः युद्धं विरमतु ॥२७॥ नेति । हे नृप ! यद्यपि तस्य रामस्य वाक्यम् अर्थवत्क्लेशनिवर्तकं बद्धवैरौ अन्योन्यं दुरुक्तं दुष्कृतानि च स्मरन्तौ न जगृहतुः ॥२८॥ दिष्टमिति । यत् स्ववाक्याग्रहणं दिष्टं तयोरनिष्टहेतुप्राचीनकर्मप्रयुक्तं मन्वानो द्वारवतीं ययौ । तत्र चोग्रसेनाभिः प्रीतैर्ज्ञातिभिः समुपागतः सम्मीलितो बभूव ॥२९॥

प्राणाधिकं ब
प्राक्तनं कर्म सन्मुखागतै

युवामिति ॥ हे
मन्ये । एकमुत एकं दुर्यो
एकतरस्य जयः, अन्यो वा
अन्योन्यं दुरुक्तं दुष्कृतानि
दिष्टं तयोः प्राचीनकर्मप्रयुक्त

राजन् दुर्योधन
मेरा तो यह मानना है कि
अधिक पाया है ॥२६॥ ए
से नहीं दीख पडती । अतः
॥२७॥ हे नृप परीक्षित ! श्र
इतना गहरा और रूढमूल
कठोरवाणी और दुष्कृत्यों क
का भाग्य को बलवत्तर मान
। श्रीद्वारिकापुरी में महाराज
बलभद्रजी का स्वागत किया

तं [1]पुनर्नैमिषं प्राप्तम्
तेभ्यो विशुद्धविज्ञान
स्वपत्न्यावभृथस्नातो

तेभ्यः, विभुः, भगवान्,
ज्ञातिबन्धुसुहृद्वृतः, स्वपत्न्या, अवभृ

कत्वङ्गं यज्ञमूर्तिम् ॥३०॥
आत्मन्यधिष्ठाने विश्वगं सर्वा

---

१. ३०।३१।३२। एते त्रयः श्लोका
"इदंविधान्यसंख्यानि बलस्य बल
शृण्वन्नृणंश्चतद्भक्त्या विष्णोःस द

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्राणाधिकं बलाधिकं वृकोदरम् ॥२६॥ अन्यः पराजयो वा ॥२७॥ हे नृप ! अर्थवत् युक्तिमत् तस्य वाक्यम् ॥२८॥ दिष्टं प्राक्तनं कर्म सन्मुखागतैरुग्रसेनादिभिः सह समुपागतः मिलितः सन् मुमुदे ॥२९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

युवामिति ॥ हे राजन् ! दुर्योधन, हे वृकोदर भीम ! वीरौ युवां, तुल्यबलौ स्थः । तत्र एकं भीमं, प्राणाधिकं बलेनाधिकं, मन्ये । एकमुत एकं दुर्योधनमि, शिक्षया अधिकं, मन्ये ॥२६॥ तस्मादिति ॥ तस्मात्, समवीर्ययोः युवयोः मध्ये, इह युद्धे एकतरस्य जयः, अन्यो वा पराजयोऽपि, न लक्ष्यते । अतः अफलः, रणः सङ्ग्रामः, विरमतु ॥२७॥ नेति ॥ बद्धवैरौ, नृपात्मजौ, अन्योन्यं दुरुक्तं दुष्कृतानि च, अनुस्मरन्तौ सन्तौ, तद्वाक्यं बलभद्रवचनं, न जगृहतुः ॥२८॥ दिष्टमिति ॥ रामः, तत् स्ववाक्याग्रहणं, दिष्टं तयोः प्राचीनकर्मप्रयुक्तम् अनुमन्वानः सन्, द्वारवतीं ययौ । प्रीतैः उग्रसेनादिभिः, ज्ञातिभिः समुपागतः सङ्गतः, बभूव ॥२९॥

कृष्णप्रिया

राजन् दुर्योधन ! और वीर भीमसेन ! आप दोनों वीर हो आप दोनों में बल-पराक्रम भी समान है । मेरा तो यह मानना है कि भीमसेन में बल अधिक है और दुर्योधनमें शिक्षा कौशल्य अधिक है और शिक्षाज्ञान अधिक पाया है ॥२६॥ एसी परिस्थितिमें आप समान बलबुद्धि मानो में से किसी एक की जय पराजय नजरों में नहीं दीख पडती । अतः आप दोनों भाई निरर्थक संग्राम न करो और इस निष्फल संग्राम को बंध कर दीजिये ॥२७॥ हे नृप परीक्षित ! श्रीबलभद्रजी यह निर्णय दोनों के लिये सर्वथा हितकर था । परन्तु परस्पर का कटुभाव इतना गहरा और रूढमूल था कि दोनों ने दैव वश श्रीबलदेवजी का मार्गदर्शन नहीं माना । वे परस्पर की कठोरवाणी और दुष्कृत्यों का स्मरण करके पागल उन्मत्त हो गे थे या हो रहे थे ॥२८॥ श्रीबलभद्रजी ने इन दोनों का भाग्य को बलवत्तर माना इसलिये उनदोनों के लिये विशेष आग्रह न रखते हुए आप श्रीद्वारिकापुरीमें पधारे । श्रीद्वारिकापुरी में महाराज उग्रसेन वगैर आप्तजनों ने और स्नेही स्वजनोंने अत्यंत आदर से सन्मुख जाकर बलभद्रजी का स्वागत किया ॥२९॥

तं [1]पुनर्नैमिषं प्राप्तमृषयोऽयाजयन् मुदा । [2]क्रत्वङ्गं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहम् ॥३०॥
तेभ्यो विशुद्धविज्ञानं भगवान् व्यतरद्विभुः । यैनेवात्मन्यदोविश्वमात्मानं विश्वगं विदुः ॥३१॥
स्वपत्न्यावभृथस्नातो ज्ञातिबन्धुसुहृद्वृतः । रेजे स्वज्योत्स्नयेवेन्दुः सुवासाः सुष्ठ्वलङ्कृतः ॥३२॥

कर्दमक्षमा

तेभ्यः, विभुः, भगवान्, विशुद्धविज्ञानम्, व्यतरद्, येनैव, अदः, विश्वम्, विश्वगम्, आत्मानम्, आत्मनि, विदुः ॥३१॥ ज्ञातिबन्धुसुहृद्वृतः, स्वपत्न्या, अवभृथस्नातः, स्वज्योत्स्नया, इन्दुः, इव, सुवासाः, सुष्ठु, अलंकृतः, रेजे ॥३२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

क्रत्वङ्गं यज्ञमूर्तिम् ॥३०॥

आत्मन्यधिष्ठाने विश्वगं सर्वानुस्यूतं येनैव विदुः पश्यन्ति तद्विशुद्धं विज्ञानं व्यतरददात् ॥३१-३४॥

---

[1] ३०।३१।३२। एते त्रयः श्लोका न सन्ति । तत्स्थाने अर्धत्रयं वर्तते ।
''ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः । अनन्तस्याप्रमेयस्य कर्माण्यद्भुतकर्मणः ।
शृण्वन्गृणंश्चतद्भक्त्या विष्णोःस दयितो भवेत् ॥'' २.क्रत्वङ्गैः-वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं रामम्। सर्वैः प्रकृतिविकृतियागैः। निवृत्ताखिलविग्रहं दूरीभूतसर्वदुरितम्। 'काये तापे तथा पापे विरोधे विग्रहो इति निरुक्तिः ॥३०॥ तेभ्य ऋषिभ्यः। येनैव ज्ञानेनैव ॥३१॥ स्वपत्न्या रेवत्या ॥३२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुनरिति तीर्थयात्रादिसमाप्तौ सत्यां यज्ञेच्छया प्राप्तं सर्वयज्ञोपकरणयादवादिस्वपरिवारसाहित्यादिनोत्कृष्टप्रकारेण स्वगोष्ठ्य यज्ञोचितं सम्पत्त्या च गतं सन्तं तदा तदानीमेव अचिरादित्यर्थः। मुदेति पाठः स्पष्टः। पाठान्तरं स्पष्टं क्रतुरङ्गम् एकांशो यस्य य क्रतवोऽङ्गेषु अवयवेषु यस्य यद्वा क्रतोरङ्गानि नामोच्चारणादिना साङ्गता यस्मात्तमप्ययाजयन् तदानीं च तद्योग्यतामाह-निवृत्तः उपरतः अखिलो विग्रहो युद्धं यस्य तथाभूतं यथा स्यात्तथा "विग्रहः समरे काये विस्तारप्रविभागयोः" इति विश्वः ॥३०॥ विशु मायासम्बन्धरहितं विज्ञानमनुभवं विशब्दाभ्यां ज्ञानस्य श्रीभगवद्विषयत्वेन वैशिष्ट्यं बोध्यते अत आत्मनि स्वस्मिन्नेव वि ततस्तेन महात्मनोऽभिन्नत्वात् तथा विश्वगं विश्वव्यापकमपि आत्मानं भगवन्तमन्तर्यामितया च स्थितं येन साक्षादनुभवन्ति तद्व्यतर यतो भगवान् सर्वज्ञः परमदयालुर्वा विभुः सर्वं दातुं समर्थो भक्तेष्टपरिपूरको वा ॥३१॥ स्वपत्न्या श्रीरेवत्या सह ज्ञातयो याद बन्धवः सम्बन्धिनः कौसलदेशाधिपादयः सुहृदो मित्राणि मैथिलादयः तैर्वृतः सुशोभने वाससी यस्य सः सुष्ठु अलङ्कृतश्च स रेजे अशोभत। तत्र दृष्टान्तः स्वैर्नक्षत्रैर्ज्ञात्यादिस्थानीयैः तद्युक्तया ज्योत्स्नया श्रीरेवतीस्थानीयया यथेन्दुरिति न च मन्तव्यम् एतावन्त्येव तस्य कर्माणीति अन्यान्यपि बहूनि सन्तीत्याह ॥३२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पुनरिति तीर्थयात्रादिसमाप्तौ सत्यां यज्ञेच्छया प्राप्तं सर्वयज्ञोपकरणयादवादिस्वपरिवारसाहित्यादिनोत्कृष्टप्रकारेण गतं तदा तदानीमेवाचिरादित्यर्थः। मुदेति पाठः स्पष्टः पाठान्तरं स्पष्टम्। क्रतुरंगमेकांशो यस्य यद्वा, क्रतवोऽङ्गेषु अवयवेषु यस्य य क्रतोरंगानि नामोच्चारणादिना सांगता यस्मात्तमप्ययाजयन् तदानीं च तद्योग्यतामाह-निर्वृत्त उपरतोऽखिलविग्रहो युद्धं यस्य त यद्वा, कथमयाजयन्? नितरां वृत्तोऽखिलविग्रहो विस्तारो यस्य तथाभूतं यथास्यात्तथा 'विग्रहः समरे काये विस्तारप्रविभागयोः' इति विश्वः। विशब्दाभ्यां ज्ञानस्य श्रीभगवद्विषयत्वेन वैशिष्ट्यं बोध्यते ॥३०॥ अत आत्मनि स्वस्मिन्नेव विश्वं ततस्ते सहात्मनोऽभिन्नत्वात् तथा विश्वं विश्वव्यापकमप्यात्मानं भगवन्तमन्तर्यामितया च स्थितं येन साक्षादनुभवन्ति तद्व्यतरत् य भगवान् सर्वज्ञः परमदयालुर्वा विभुश्च सर्वं दातुं समर्थो भक्तेष्टपरिपूरको वा ॥३१॥ स्वपत्न्या श्रीरेवत्या सह ज्ञातयो याद बन्धवः सम्बन्धिनः कोशलदेशाधिपादयः सुहृदो मित्राणि मैथिलादेस्तैर्वृतः सुशोभने वाससी यस्य सः सुष्ठु अलंकृतश्च स अशोभत। तत्र दृष्टान्तः-स्वैर्नक्षत्रैर्ज्ञात्यादिस्थानीयैस्तद्युक्तया स्वज्योत्स्नया श्रीरेवतीस्थानीयया यथेन्दुरिति ॥३२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

क्रत्वङ्गं यज्ञशरीरम् ॥३०॥ ज्ञानप्रदानदक्षिणास्थानीयं येनेति धारकत्वं विश्वगमिति प्राप्यत्वम् ॥३१-३४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तमिति। तं बलभद्रं निवृत्ताखिलविरोधं क्रत्वङ्गैः सह क्रतुभिरयाजयन् क्रत्वङ्गमिति पाठे यज्ञशरीरकं कर्मा ॥३०॥ तेभ्य इति। भगवान् रामः तेभ्यः ऋषिभ्यः विशुद्धं विपर्ययसंशयादिरहितं विज्ञानं व्यतरददादुपदिदेशेत्यर्थः तत् ज्ञानं यद्व्यतरदित्याह-येनैवेति। येन ज्ञानेन आत्मनि परमात्मन्याधारभूते विश्वमात्मानं च विश्वगं विश्वं गच्छति तिष्ठतीति तथाभूतं विदुः साक्षात्कुर्युः तथाविधं ज्ञानं व्यतरदित्यर्थः। [ज्ञानप्रदानं दक्षिणास्थानीयम् इति बोध्यम्] स्वपत्न्येति। रेवत्याख्यया स्वपत्न्या सहावभृथस्नातः कृतावभृथस्नान इत्यर्थः। स्वज्योत्स्नया चन्द्र इव रेजे। ज्योत्स्ना स्वपत्नी चन्द्रस्थानीयस्तु रामः अनपायित्वाच्छुभ्रवर्णत्वाच्च ॥३२॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥२९-३३॥

येन ज्ञा

क्रत्वङ्गं यज्ञमूर्ति
विश्वाधिष्ठितं विदुः ॥३१-

क्रत्वङ्गं यज्ञमूर्तिं श्री
।) पापं यस्य तम् ॥३०॥ अ
मुनिभ्यः व्यतरत् ददौ इत्यन्व
सन् रेजे। यथा ज्योत्स्नया च

क्रतुरङ्गं शरीरं यस्य
परमात्मनि अदः कार्यभूतं विश्व

ततः ऋषयस्तं मुदा
यागाः कृता इति शङ्का व्युदस्त
तस्मिन् पक्षे याजने भगवानिति
निवृत्तः अखिलैः सह विग्रहः व
। दक्षिणाज्ञानसन्देश इति वाक्य
दक्षिणां नीत्वा स्वर्गं लोकं यात
कथमकस्मात् ज्ञानमभूत् तत्राह-
विभुत्वात् सर्वसामर्थ्यं तस्मिन
परोक्षविश्वमात्मन्यपश्यन् विश्वसि
कृतवन्त इत्याह स्वपत्न्येति। रेव
शोभायां पत्नी च हेतुभूता जातेत्याह
परमशोभां प्राप्तस्य पश्चाल्लौकिक

क्रतुर्यज्ञोऽङ्गं मूर्तिर्यस्य तं
णायजयन् ॥३०॥ तेभ्य ऋषिभ्यो
आश्रयेऽदो विश्वं विश्वगं सर्वगतमा
स्वपत्न्या स्वस्त्रिया रेवत्या रेजे स्वच

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

येन ज्ञानेन आत्मनि स्वस्य वक्तुः स्वरूपे आश्रये आत्मानं तमेव ॥३१-३४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१...३४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

क्रत्वङ्गं यज्ञमूर्तिम् ॥३०॥ येनैव ज्ञानेन आत्मनि परमात्मन्यधिष्ठाने अदो विश्वम् आत्मानं परमात्मानं च विश्वगं विश्वाधिष्ठितं विदुः ॥३१-३२॥

गूढार्थदीपिनी

क्रत्वङ्गं यज्ञमूर्तिं श्रीरामम् अयाजयन्। निवृत्तोऽखिलो विग्रहः (कामे तापे तथा पापे विरोधे विग्रहो गृहे। इति निरुक्तिः) पापं यस्य तम् ॥३०॥ आत्मनि अदो विश्वं विश्वगं च आत्मानं येन विदुः तत् विशुद्धविज्ञानं संशयविपर्ययादिरहितं तेभ्यो मुनिभ्यः व्यतरत् ददौ इत्यन्वयः। विभुः सर्वसमर्थो रामः ॥३१॥ स्वपत्न्या रेवत्या सह अवभृथेन यज्ञान्तस्नानेन स्नातः कृतस्नानः सन् रेजे। यथा ज्योत्स्नया चन्द्रिकया इन्दुः राजते ॥३२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

क्रतुरङ्गं शरीरं यस्य तम् ॥३०॥ तेभ्यः ऋषिभ्यः विशुद्धं संशयादिदोषरहितं व्यतरद्दिदेश। येन विज्ञानेन आत्मनि परमात्मनि अदः कार्यभूतं विश्वम् आत्मानं परमात्मानं च कारणभूतं विश्वगं विश्वस्मिन् विदुः पश्यन्ति ॥३१-३२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः ऋषयस्तं मुदा अयाजयन् सर्वैरेव क्रतुभिः अग्निहोत्रादिभिः क्रत्वङ्गमिति पित्रादिषु जीवत्सु कथं सर्वे यागाः कृता इति शङ्का व्युदस्ता यतोऽयं क्रत्वङ्गः क्रतवः अङ्गानि अङ्गेषु वा यस्येति तमयाजयन् क्रत्वङ्गं वा भगवन्तं तस्मिन् पक्षे याजने भगवानिति क्रतोरङ्गमिति यजमानं पुरुषस्य च कर्मार्थत्वात् इति न्यायात् अत आह निवृत्ताखिलविग्रहमिति निवृत्तः अखिलैः सह विग्रहः कलहो यस्य ॥३०॥ ततो दक्षिणात्वेन तेभ्यो ज्ञानं दत्तवानित्याह-तेभ्यो विशुद्धविज्ञानमिति दक्षिणाज्ञानसन्देश इति वाक्यात् "आत्मलाभान्न परं विद्यते" इति श्रुतेश्च आत्मदक्षिणां वै सत्रमिति च आत्मानमेव दक्षिणां नीत्वा स्वर्गं लोकं यातीति च ज्ञानदक्षिणैव दक्षिणा विशुद्धं ज्ञानमनुभवरूपं निरुपाधिकं ननु कर्मासक्तानां तेषां कथमकस्मात् ज्ञानमभूत् तत्राह-भगवान् व्यतरद्विभुरिति। भगवत्त्वात् तादृशज्ञानवत्त्वं वितरणं च वितरणेन हि दानपात्रापेक्षा विभुत्वात् सर्वसामर्थ्यं तस्मिन् ज्ञाने प्राप्ते तेषां का अवस्था जातेत्याकाङ्क्षायामाह-येनैवात्मन्यदो विश्वमिति। रोक्षविश्वमात्मन्यपश्यन् विश्वस्मिंश्चात्मानं तदाह-आत्मानं विश्वगमिति ॥३१॥ ततो दक्षिणादानानन्तरं यज्ञसमाप्तिं च कृतवन्त इत्याह स्वपत्न्येति। रेवती रामस्य पत्नी तया सह अवभृते स्नात एव ज्ञात्यादिभिर्वृतः पश्चाद्वा शोभार्थं निरूप्यते शोभायां पत्नी च हेतुभूता जातेत्याह-रेजे स्वज्योत्स्नयैवेन्दुरिति। अन्यथा दिवसे धूसरश्चन्द्रो न शोभते तस्यावभृथादुत्तीर्णस्य परमशोभां प्राप्तस्य पश्चाल्लौकिका वस्त्राभरणानि प्रतिपत्त्यर्थं निरूप्यन्ते सुवासाः सुष्ठ्वलङ्कृत इति ॥३२॥

श्रीसुबोधिनीसारः

क्रतुर्यज्ञोऽङ्गं मूर्तिर्यस्य तं रामं पुनर्नैमिषारण्यं प्राप्तं निवृत्तः सर्वेभ्यो विग्रहो विरोधो यस्य तं सर्वैः क्रतुभिर्ऋषयो मुदा सर्वेणायाजयन् ॥३०॥ तेभ्य ऋषिभ्यो यज्ञप्रवर्तकेभ्यो विशुद्धं विज्ञानं भगवान् विभुः समर्थो दक्षिणात्वेनादात् येन विज्ञानेनात्मनि आश्रयेऽदो विश्वं विश्वगं सर्वगतमात्मानं न विदुः ॥३१॥ अवभृथे यज्ञान्ते स्नातः सुवस्त्रः सुभूषितः ज्ञातिबन्धुसुहृद्भिर्वृतः स्वपत्न्या स्वस्त्रिया रेवत्या रेजे स्वचन्द्रिकया इन्दुश्चन्द्र इव ॥३२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं तीर्थस्नानादिभिर्निवृत्तोऽखिलो विग्रहः कलहः तत्प्रयुक्तो दोषो यस्य तं क्रत्वंगं यज्ञमूर्तिं पुनर्नैमिषं प्राप्तं रामं ऋषयो मुदा हर्षेण सर्वैः क्रतुभिरयाजयन् ॥३०॥ 'दक्षिणा ज्ञानसन्देश' इति वाक्यात् तेभ्य ऋषिभ्यो दक्षिणा तथा विशुद्धं संशयविपर्ययादिरहि विज्ञानं व्यतरत् ददौ । येनैव ज्ञानेन आत्मनि अदो विश्वं विदुः । तथा विश्वं गच्छति व्याप्य तिष्ठतीति तथाभूतमात्मानं च विदुः साक्षात्कुर्युः । एवंविधज्ञानसम्पादने सामर्थ्यमाह-विभुरिति । तत्र हेतुमाह-भगवानिति ॥३१॥ स्वपत्न्या रेवत्या सह अवभृथस्नातः कृतावभृथाख्यस्नानः सुवासाः सुष्ठ्वलङ्कृतः ज्ञात्यादिभिर्वृतश्च रामो रेजे । तत्र दृष्टान्तमाह-स्वज्योत्स्नया चन्द्र इवेति ॥३२॥

अन्वितार्थप्रकाशिका

तमिति । एवं तीर्थस्नानादिभिर्निवृत्तोऽखिलो विग्रहः कलहः तत्प्रयुक्तो दोषो यस्य तं क्रत्वंगं यज्ञमूर्तिं पुनर्नैमिषं प्राप्तं रा ऋषयो मुदा हर्षेण सर्वैः क्रतुभिरयाजयन् ॥३०॥ तेभ्य इति । भगवान् विभुः बलदेवः ''दक्षिणा ज्ञानसन्देश इति वाक्यात्'' तेभ्य ऋषिभ्यो दक्षिणात्वेन विशुद्धं संशयविपर्ययादिरहितं विज्ञानं व्यतरत् ददौ । येनैव ज्ञानेन आत्मनि अदो विश्वं विदुः तथा वि गच्छति व्याप्य तिष्ठतीति तथाभूतमात्मानं च विदुः साक्षात्कुर्युः ॥३१॥ स्वेति । स्वपत्न्या रेवत्या सह अवभृथस्नातः कृतावभृथाख्यस्नानः सुवासाः सुष्ठु अलंकृतः ज्ञात्यादिभिर्वृतश्च रामः स्वज्योत्स्नया चन्द्र इव रेजे ॥३२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्रतवोऽङ्गानि यस्य तं निवृत्तः । अखिलैः सहविग्रहो वैरं यस्य तं पुनर्नैमिषं प्राप्तं तं रामम् । ऋषयः सर्वैः क्रतुभिरयाज ॥३०॥ आत्मनि परमात्मनि ॥ अदो विश्वं विदुः तदाधारे स्थितमिति ज्ञातवन्त इत्यर्थः । विश्वगम् अन्तर्यामिशक्त्या विश्व आत्मानं परमात्मानं श्रीकृष्णं विदुः ॥३१॥ स्वज्योत्स्नायाश्च ॥ कान्त्या इन्दुरिव ॥३२-३३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ पुनः, नैमिषं नैमिषारण्यं, प्राप्तं तं रामं, निवृत्तोऽखिलैर्विग्रहो यस्य तं ज्ञात्वा, ऋषयः सर्वैः क्रतुभि क्रत्वङ्गं यज्ञशरीरकं परमात्मानं, मुदा अयाजयन् ॥३०॥ तेभ्य इति ॥ विभुरीश्वरावतारो भगवान् रामः, तेभ्यो मुनिभ्यः, येन विज्ञा एव, आत्मनि सर्वाधारभूते परमात्मनि, अदः विश्वं, विदुः । आत्मानं च, विश्वं गच्छति व्याप्य तिष्ठतीति विश्वगं, विदुः साक्षात्कु ॥ तथाभूतं, विशुद्धं विपर्ययसङ्क्याादिरहितं, विज्ञानं, व्यतरत् ददौ उपदिदेशेत्यर्थः । अत्र दक्षिणास्थानीयं ज्ञानप्रदानं बोध्यम् ॥ स्वपत्न्येति ॥ स्वपत्न्या रेवत्याख्यया स्वाङ्गनया सह, अवभृथस्नातः विहितावभृथस्नान इत्यर्थः । सुवासाः परिहितशोभनव सुष्ठ्वलङ्कृतः स्वाङ्गधृतशोभनाभरणः, रामः, ज्ञातिबन्धुसुहृद्वृतः सन्, स्वज्योत्स्नया सह, इन्दुः इव, रेजे ॥३२॥

कृष्णाप्रिया

श्रीद्वारिका पधार कर यात्रा को समाप्त करके कर कमलों से अत्यंत अनुराग से सब प्रकार के यज्ञ । आदि वास्तविक बात कही जाय तो जितने यज्ञ है वे श्रीबलभद्रजी के ही अंग है । यह यज्ञाराधन श्रीबल का लोकसंग्रह के लिये ही है ।।३०।। नैमिषारण्यमें निवास करने वाले उन महर्षियों को स्वयं श्रीबलभद्रजीने ब्रह्मज्ञान का उपदेश किया कि जिस तत्वज्ञान से वह ऋषिलोग इस संपूर्ण विश्व को अपने आपको और सा अपने आपको सारे सारे विश्वमें देखने लगे ।।३१।। यज्ञ समाप्ति के बाद अपनी पत्नी श्रीरेवती जी के बलभद्रजी महाराजने यज्ञान्त स्नान किया पुनः दिव्य वस्त्र और उत्तम आभूषण धारण करके अपने बन्धु एवं सुहृद वृन्द और ज्ञातिजनों के साथ शोभायमान लगने थे जैसे श्रीचन्द्रदेव नक्षत्रों और अपनी श्रीचन्द्रिका के साथ सुशोभित लगते हो ।।३२।।

ईदृग्विधान्यस

[1]श्रृण्वन् गृणंश्र

॥ इति

बलशालिनः, बल

अद्भुतकर्मणः, रामस्य, कम

॥ इति श्रीमद्भा

क्रत्वङ्गं यज्ञमूर्तिम् ।

आत्मन्यधिष्ठाने विश्वग

इति श्रीमद्भागवते महापुराणे

ईदृग्विधानि पाखण्डव

॥ इति श्रीमद्भागव

ईदृगिति । एतत्तुल्यविधा

बलशालिन इति महाविक्रमवन्ती

दुर्वितर्क्यमाहात्म्यस्येति अत्यन्ताद्भु

सर्वत्रैव हेतुः बलस्य सर्वथा सर्वा

कार्येत्यर्थः ॥३३॥ न च तत्कर्मणा

वाङ्मयम् अनु निरन्तरतया वा स्मरेत

रामान्तःप्रविष्यस्य श्रीकृष्णस्य

श्रीकृष्णप्रियपाण्डवद्वेषिदुर्योधनानुग्रहण

कृष्णां पाण्डवानां कीर्तिविस्तारणार्थ

ष्णोः सायं प्रापश्च सदा दयितो भवेत

॥ इति श्रीमद्भागव

न च मन्तव्यमेतावन्त्येव तस्

असंख्यानि अनन्तानि सन्ति कर्माणीति

---

[1] योऽनुस्मरेत-श्रीधर. वंशी. वीर. वि

ईदृग्विधान्यसङ्ख्यानि बलस्य बलशालिनः । अनन्तस्याप्रमेयस्य मायामर्त्यस्य सन्ति हि ॥३३॥
[1]शृण्वन् गृणंश्च रामस्य कर्माण्यद्भुतकर्मणः । सायं प्रातरनन्तस्य विष्णोः स दयितो भवेत् ॥३४॥

॥ इति श्रीमद्भागवते महापुराणे[2] दशमस्कन्धे बलदेवतीर्थयात्रानिरूपणं
[3]नामैकोनाशीतितमोऽध्यायः ॥७९॥

कर्दमक्षमा

बलशालिनः, बलस्य, अनन्तस्य, अप्रमेयस्य, मायामर्त्यस्य, हि, ईदृग्विधानि, असङ्ख्यानि, चरितानि, सन्ति ॥३३॥ अद्भुतकर्मणः, रामस्य, कर्माणि, शृण्वन्, च, सायम्, प्रातः, च, गृणन्, सः, विष्णोः, दयितः, भवेत् ॥३४॥

॥ इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे फलप्रकरणे अन्वयवर्णने एकोनाशीतितमोऽध्यायः ॥७९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

क्रत्वङ्गं यज्ञमूर्तिम् ॥३०॥

आत्मन्यधिष्ठाने विश्वगं सर्वानुस्यूतं येनैव विदुः पश्यन्ति तद्विशुद्धं विज्ञानं व्यतरददात् ॥३१-३४॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायाम् एकोनाशीतितमोऽध्यायः ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ईदृग्विधानि पाखण्डिदमनासुरहरणशुभाचरणलक्षणानि ॥३३॥ स स्मर्ता ॥३४॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे एकोनाशीतितमोऽध्यायः ॥७९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ईदृगिति । एतत्तुल्यविधाप्रकारो येषां तानि असङ्ख्यानि अनन्तानि सन्ति कर्माणीति शेषः । तत्र हेतुर्बलस्येत्यादिः । तत्र बलशालिन ईति महाविक्रमवन्तीति भावः । किञ्च अनन्तस्य सर्वथाऽपरिच्छिन्नस्य इत्यसङ्ख्यानीति । किञ्च अप्रमेयस्य दुर्वितर्क्यमाहात्म्यस्येति अत्यन्ताद्भुतानीति किञ्च मायया कृपया युक्तस्य मर्त्यस्य अप्राकृततदाकारलीलस्येति परममधुराणीति सर्वत्रैव हेतुः बलस्य सर्वथा सर्वाधिकबलवत इति विशेषणानामेषां यथोत्तरं श्रैष्ठ्यं हि निश्चितम् अत्र प्रमाणापेक्षा कापि न कार्येत्यर्थः ॥३३॥ न च तत्कर्मणामीदृशमाहात्म्योऽर्थवादः शङ्क्यः साक्षान्महाफलसिद्धेरित्याशयेनाह–य इति । सायं प्रापश्च तद्द्वयम् अनु निरन्तरतया वा स्मरेत मनसा चिन्तयेदपि स विष्णोः निजाशेषभगवतः प्राकट्येन विश्वव्यापकस्य किं वा स्नेहभरेण रामान्तःप्रविष्यस्य श्रीकृष्णस्य दयितो दयापात्रं भवेत् कुतः रामस्य बहुधा तं तद्भक्तांश्च रमयतीति तथा तस्य ननु कृष्णप्रियपाण्डवद्वेषिदुर्योधनानुग्रहणादिना तद्विविरुद्धमपि किञ्चिच्छ्रूयते तत्राह–अद्भुतमिति । दुर्योधनस्य वधे हेतुर्दुरभिमानवर्धनेन तद्भक्तानां पाण्डवानां कीर्तिविस्तारणार्थमेवेति भावः । यतोऽनन्तस्य महागम्भीराशयस्येत्यर्थः । यद्वा, निजाशेषभगवत्प्रकटनेनानन्तस्य विष्णोः सायं प्रापश्च सदा दयितो भवेत् ॥३४॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
एकोनाशीतितमोऽध्यायः ॥७९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न च मन्तव्यमेतावन्त्येव तस्य कर्माणीति अन्यान्यपि बहूनि सन्तीत्याह–ईदृगिति । एतत्तुल्या विधा प्रकारो येषां असंख्यानि अनन्तानि सन्ति कर्माणीति शेषः तत्र हेतुः–बलस्येत्यादि । तत्र बलशालिन इति महाविक्रमवन्तीति भावः । किञ्च

---

१. योऽनुस्मरेत-श्रीधर. वंशी. वीर. विज. । २. पारमहंस्यां संहितायां-गो. प्रे. । ३. सप्तनवतितमोऽध्यायः-विज. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अनन्तस्य सर्वथा अपरिच्छिन्नस्येत्यसंख्यानीति किञ्च अप्रमेयस्य दुर्वितर्क्य-माहात्म्यस्येत्यत्यन्ताद्भुतानीति। किञ्च मायया कृप युक्तस्य मर्त्यस्येति परममधुराणीति सर्वत्रैव हेतुः बलस्य सर्वथा सर्वाधिकबलवत इति विशेषणानामेषां यथोत्तरं श्रैष्ठ्यं निश्चितम्। अत्र प्रमाणापेक्षा कापि न कार्येत्यर्थः ॥३३॥ न च तत्कर्मणामीदृशमाहात्म्येऽर्थवादः शंक्यः साक्षान्महाफलसिद्धे-रित्याशयेनाह-य इति। सायं प्रातश्च वाद्वयं तु अन्वाचयन्यायेनापि स्मरेत् मनसा चिन्तयेदपि स विष्णोर्निजाशेष-भगवत्ताप्रकटने विश्वव्यापकस्य किंवा स्नेहभरेण श्रीरामान्तःप्रविष्टस्य श्रीकृष्णस्य दयितो भवेत्। कुतः ? रामस्य बहुधा तं तद्भक्तांश्च रमयतीति तथा तस्य। ननु श्रीकृष्ण-प्रियपाण्डवद्वेषिदुर्योधनानुग्रहणादिना तद्विरुद्धमपि किञ्चिच्छ्रूयते तत्राह-अद्भुतेति। दुर्योधनस्य वधहेतुदुरभिमानवर्धनेन तद्धन्तॄणां पाण्डवानां कीर्तिविस्तारणार्थमेवेति भावः। यतोऽनन्तस्य महागभीराशयस्येत्यर्थः। यद्वा निजाशेषभगवत्ता प्रकटनेनानन्तस्य विष्णोः सायं प्रातश्च सदा दयितो भवेत् ॥३४॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रील-सनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशम-टिप्पण्यामेशोनाशीतितमोऽध्यायः ॥७९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

ज्ञानप्रदानदक्षिणास्थानीयं येनेति धारकत्वं विश्वगमिति प्राप्यत्वम् ॥३१-३४॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकोनाशीतितमोऽध्यायः ॥७९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

रामस्य चेष्टितानि साकल्येन वक्तुं न शक्यानीत्यभिप्रयन्नाह-ईदृग्विधानीति। अनन्तस्य अनन्तावताररूपस्याप्रमेयस्य-सङ्ख्यातगुणगणस्य मायामर्त्यस्य सङ्कल्पगृहीतमनुष्यजन्मनः ॥३३॥ उपवर्णितबलभद्रचेष्टितश्रवणादिफलमाह-य इति। अद्भुतानि कर्माणि यस्य तस्यानन्तस्य तदवतारूपस्य बलदेवस्य कर्माणि यः पुमान् शृण्वन् सति वक्तरि गृणन् कथयन् सति श्रोतरि कीर्तयन्नुभयोरभावे स विष्णोर्दयितो निरतिशयप्रियो भवेत् ॥३४॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकोनाशीतितमोऽध्यायः ॥७९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

॥२९-३३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजकृतपदरत्नावल्याम् एकोनाशीतितमोऽध्यायः ॥७९॥
(श्रीविजयध्वजतीर्थरीत्या सप्तनवतितमोऽध्यायः ॥९७॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥३१-३४॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोनाशीतितमोऽध्यायः ॥७९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३४॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे एकोनाशीतितमोऽध्यायः ॥७९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१...३४॥

॥ इति श्रीनाथचक्रवर्तिपादविरचितायां चैतन्यमञ्जूषायाम् एकोनाशीतितमोऽध्यायः ॥७९॥

मायया स्वरूपे

॥ इति स

बलेन शालते
शेषावतारस्य भगवतः दयि

॥ इति श्रीमद्भागवते महा

ईदृग्विधानि कर्मा
कृपा मयि भवत्विति शेषः ॥

॥ इति श्रीमद्भागवते महापु

उपसंहरति-ईदृग्विध
बलशाली बलकार्यं बह्वेव करि
स्तुतिपरत्वं वारयति सन्तीति य
अन्यथा वैयर्थ्यापत्तेः तस्माद्ग्रन्थ
श्रवणादेः भगवद्भजनोपयोगित्वम
किमिति श्रोष्यति भावान्तरापन्न
कृष्णः एवमस्मत्पक्षे बलभद्र इ
साहाय्यं च कुर्वन् तथापि माय
कर्माङ्गत्वार्थमाह-सायम्प्रातरिति
इति प्रपौत्रवत्प्रियः एवमुपसंहृत्य फ

॥ इति श्रीमद्भागवतसु

न सङ्ख्या येषां तानि ए
॥३३॥ फलितमाह। अद्भुतानि कर्मा

॥ इति श्रीमद्भा०

'रामकर्माणि साकल्येन वक्तुम
सन्ति। हिशब्दोऽवधारणे। तत्र हेतून्

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मायया स्वरूपेण मर्त्यस्य स्वरूपभूतया नित्यशक्त्या मायाख्यया युत इति श्रुतेः ॥३३॥ विष्णोस्तदनुजस्य कृष्णस्य ॥३४॥

॥ इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । एकोनाशीतितमो दशमेऽजनि सङ्गतः ॥७९॥

गूढार्थदीपिनी

बलेन शालते शोभते तस्य । मायया कृपया मर्त्यस्य मनुष्यभावं प्राप्तस्य सन्ति कर्माणीति शेषः ॥३३॥ अनन्तस्य शेषावतारस्य भगवतः दयितः प्रियो भवेत् ॥३४॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यामेकोनाशीतितमोऽध्यायः ॥७९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ईदृग्विधानि कर्माणि सन्ति श्रीबलदेवचरितकथनान्ते तत्कृपा अपि भवत्विति प्रार्थयते-अमर्त्यस्य मर्त्यभिन्नस्य माया कृपा मयि भवत्विति शेषः ॥३३॥ श्रीबलदेवचरितस्मरणादिफलं दर्शयति-य इति ॥३४॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे एकोनाशीतितमाध्यायार्थप्रकाशः ॥७९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

उपसंहरति-ईदृग्विधानीति । यथा तीर्थयात्रात्मकमिदम् एकं चरितम् एवंविधान्यसङ्ख्यातानि तस्य चरित्राणि यतोऽयं बलशाली बलकार्यं बह्वेव करिष्यतीति न तच्चरित्रं परजयात्मकं यतोऽयमनन्तः तर्हि कथं नोच्यत इति चेत्तत्राह-मायामर्त्यस्येति । स्तुतिपरत्वं वारयति सन्तीति युक्तयश्चायमर्थः अवतारो हि किञ्चित् कार्यार्थः केषाञ्चिद्धर्मं साधयेत् अन्येषामन्यदन्येषामन्य इति अन्यथा वैयर्थ्यापत्तेः तस्माद्ग्रन्थविस्तरभिया परं न लिख्यन्ते किन्तु सन्ति बुद्धिरेकत्र स्थिरीभूता दृढा भवतीति ॥३३॥ बलभद्रचरित्रस्य श्रवणादेः भगवद्भजनोपयोगित्वमाह-शृण्वन् गृणन्निति । श्रोतरि सति गृणन्नित्यादिव्याख्येयं गृणन्नित्युच्चरन् स्वयमेव ननु भगवद्भक्तः किमिति श्रोष्यति भावान्तरापन्नस्य तत्राह अद्भुतकर्मण इति अद्भुतत्वाच्छ्रवणं दुर्योधनादय एवं मन्यन्ते यथा पाण्डवानां पक्षे कृष्णः एवमस्मत्पक्षे बलभद्र इति ततो वयं तुल्या जेष्याम इति इयं बुद्धिर्भूभारहरणार्थं बलभद्रेणैव सम्पाद्यते यथार्थं वदन् तथैव माहात्म्यं च कुर्वन् तथापि मारयत्येव कृष्णरामयोरेकभावादिति अद्भुतकर्मत्वं स्वतन्त्रतया श्रवणादौ तत्रैव भक्तिर्भविष्यतीति कर्माद्भुतत्वार्थमाह-सायम्प्रातरिति । अनन्तस्य शेषस्य विष्णोः पुरुषोत्तमस्य श्रवणादिकर्ता भगवतः प्रियो भवेत् अयमस्मत्सेवक इति प्रपौत्रवत्प्रियः एवमुपसंहृत्य फलकथनात् तच्चरित्रं समापितमिति सूचितं कीर्तिस्तस्य सर्वप्रकारेण स्थिरीकृता निरूपिता ॥३४॥

॥ इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे त्रिंशाध्यायविवरणम् ॥३०॥ ॥७९॥

श्रीसुबोधिनीसारः

न सङ्ख्या येषां तानि एवंप्रकाराणि कर्माणि बलशालिनो बलस्यानन्तस्याप्रमेयस्य मायामनुष्यस्य सन्ति हि युक्तम् ॥३३॥ फलितमाह । अद्भुतानि कर्माणियस्य तस्य रामस्य कर्माण्यनुस्मरेत यः सोऽनन्तस्य विष्णोर्दयितः प्रियो भक्तो भवेत् ॥३४॥

॥ इति श्रीमद्भा०दशमस्कन्धे उ० सुबोधिन्यां टीकायाम् एकोनाशीतितमोऽध्यायः ॥७९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

'रामकर्माणि साकल्येन वक्तुमशक्यानि' इति सूचयन्नुपसंहरति-ईदृग्विधानीति । उक्तप्रकारकाणि बलस्य कर्माण्यसङ्ख्यान्येव सन्ति । हिशब्दोऽवधारणे । तत्र हेतून् सूचयन् विशिनष्टि-बलेन शालते शोभते तस्येति । अप्रमेयस्य मनोगोचरस्येत्यर्थः । अनन्तस्य

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

देशकालवस्तुपरिच्छेदरहितस्येत्यर्थः । मायया स्वसंकल्पेन मर्त्यस्य स्वीकृतमनुष्यवेषस्येत्यर्थः ॥३३॥ उपवर्णि बलदेवचरितस्मरणादेः फलमाह-य इति । अद्भुतानि आश्चर्यकराणि कर्माणि यस्य तस्यानन्तस्य शेषावतारस्य रामस्य कर्माणि पुमान् । सायं प्रातरनुस्मरेत् स भगवतो विष्णोर्दयितो प्रियो भवेत् ॥३४॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र सात्त्विकानां निरोधने ऊनाशीतितमोरामतीर्थयात्रानिरूपकः ॥३॥ ॥७९॥

अन्वितार्थप्रकाशिका

ईदृगिति । बलेन शालते शोभते तस्य अनन्तस्य अप्रमेयस्य मायया मर्त्यरूपस्य बलस्य ईदृग्विधानि कर्माण्यस सन्ति ॥३३॥ य इति । अद्भुतानि आश्चर्यकराणि कर्माणि यस्य तस्यानन्तस्य शेषावतारस्य रामस्य कर्माणि यः पुमान् प्रातरनुस्मरेत् स भगवतो विष्णोर्दयितो प्रियो भवेत् ॥३४॥

॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । एकहीनाशीतितमे दशमे निरमादिमाम् ॥१॥
इति श्रीभागवते दशमेऽन्वितार्थप्रकाशीकायामेकोनाशीतितमोऽध्यायः ॥७९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्मरेतस्मरेत् ॥३४॥

॥ ॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने बलदेवतीर्थयात्रा नामैकोनाशीतितमोऽध्यायः ॥७९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ईदृगिति ॥ अनन्तस्य, अप्रमेयस्य, मायामर्त्यस्य, अनेन विशेषणत्रयेणास्य अनन्तावताररूपत्वमसंख कल्याणगुणगणवत्त्वं संकल्पगृहीतमर्त्यभावत्वं चोक्तम् । बलशालिनः बलस्य, ईदृग्विधानि असंख्यानि चरितानि, सन् अनेन रामस्य चेष्टितानि साकल्येन वक्तुमशक्यानीत्यभिप्रायो दर्शितः ॥३३॥ उपवर्णितबलभद्रचेष्टितश्रवणादिफलमा इति ॥ अद्भुतानि कर्माणि यस्य, तस्य अनन्तस्यानन्तावताररूपस्य, रामस्य, कर्माणि चरितानि, यः पुमान्, सायं अनुस्मरेत, सः विष्णोः दयितः, भवेत् ॥३४॥

॥ इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादविरचिताया-मन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धे एकोनाशीतितमोऽध्यायः ॥

कृष्णप्रिया

महाराज परीक्षित् ! श्रीबलशाली भगवान बलभद्रजी अनन्त स्वरूप है अधिक क्या कहे उनका मन वाणी का विषय नहीं बन सकता । श्रीबलभद्रजी ने दिव्य लीलाओं के लिये ही मनुष्य विग्रह धारण है । बलशाली श्रीबलदेवजी के लोकोत्तरचरित्रों की गणना भी कभी नहीं की जा सकती ॥३३॥ जो अद्भूत कर्मा, अनन्त, सर्वत्रव्यापक, श्रीबलभद्र भगवानकी लीलाओं का सायं प्रातः स्मरण करता है वह का अत्यन्त प्रिय हो जाता है ॥३४॥

र्थः ॥३३॥ उपवर्णित-
रस्य रामस्य कर्माणि यः

॥१॥
॥२॥
॥७९॥

धानि कर्माण्यसङ्ख्यान्येव
कर्माणि यः पुमान् सायं

ते निगूढार्थप्रकाशके
यः ॥७९॥

नन्तावताररूपत्वमसंख्यात-
ंख्यानि चरितानि, सन्ति हि।
चेष्टितश्रवणादिफलमाह ॥ य
नि, यः पुमान्, सायं, प्रातः,

भगवत्प्रसादविरचिताया-
नाशीतितमोऽध्यायः ॥७९॥

धक क्या कहे उनका स्वरूप
ो मनुष्य विग्रह धारण किया
सकती ॥३३॥ जो भक्तजन
स्मरण करता है वह भगवान

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथाशीतितमोऽध्यायः ॥

श्लोकाः	अनु.	वंश.	मि.उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
४५	४२	१	२	५	१४७९	२८	३८	१५६३	४८॥।	३

[१]राजोवाच

भगवान् यानि चान्यानि मुकुन्दस्य महात्मनः । वीर्याण्यनन्तवीर्यस्य श्रोतुमिच्छामहे प्रभो ॥१॥

कर्दमक्षमा

राजा उवाच । भगवन् ! अनन्ततीर्थस्य, महात्मनः, मुकुन्दस्य, हे प्रभो ! अन्यानि, च, यानि, वीर्याणि, श्रोतुम्, इच्छामहे ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

अथाशीतितमे कृष्णः श्रीदामानं गृहागतम् । सम्पूज्यापृच्छदर्थेप्सुं गुरुवासकथाम्मुदा ॥
सुरारिमारको हरिः पुरा चकार शं सताम् । अतः परं विनैवतन्निजोपकारमाचरत् ॥

आचरितानि श्रुत्वा पुनर्मुकुन्दवीर्याणि पृच्छति–हे भगवन् ! श्रोतुमिच्छामह इत्यन्वयः ॥१॥

---

[१] एते षोडश श्लोकाः विजयेऽधिकाः ।

श्रीशुक उवाच–

भगवानपि गोविन्दः साधयित्वा स्ववाञ्छितम् । सुयोधने महाबाहौ निहते गदया रणे ॥१॥
विसृज्यायोधनं शून्यं प्रयातुमुपचक्रमे । कृपश्च कृतवर्मा च द्रौणिश्च रथिनां वरः ॥२॥
अवशिष्टा महात्मानः सुयोधनबले त्रयः । पञ्च पाण्डुसुता वीराः सात्यकिश्च महाबलः ॥३॥
वैश्यापुत्रो युयुत्सुश्च शिष्टाः कृष्णपुरोगमाः । तान्पुरस्कृत्य गोविन्दो मुनिवृद्धसमन्वितः ॥४॥
जगाम हास्तिनपुरं धृतराष्ट्रं प्रसादितुम् । गान्धारीं धृतराष्ट्रं च विदुरं च महामतिम् ॥५॥
प्रसाद्य पाण्डवान्स्वेस्वे राज्ये संस्थाप्य यत्नतः । स्तूयमानो मुनिगणैः सूतमागधवन्दिभिः ॥६॥
अनुयातः पाण्डुपुत्रैः प्रेमबाष्पाविलेक्षणैः ।ताननुज्ञाप्य सोत्कण्ठान्थेनादित्यवर्चसा ॥७॥
शङ्खदुन्दुभिनिर्घोषैर्वेदमङ्गलनिःस्वनैः । पुण्याहमन्त्रघोषैश्च द्वारकां प्रययौ हरिः ॥८॥
विचित्रतोरणां रम्यां चलत्कदलिकाकुलाम् । अलङ्कृतां पौरजनैः सिक्तसंमृष्टभूतलाम् ॥९॥
उपस्थितः पौरजनैः पालिकाङ्कुरधारिभिः । योषिद्भिर्वारमुख्याभिर्भूषिताभिश्च भूषणैः ॥१०॥
वहद्भिर्दीपमुकुरकलशस्रक्फलाक्षतान् । उपस्थितो ब्राह्मणैश्च पुत्रैः पौत्रैः सहानुजैः ॥११॥
प्रविवेश वसुदेवं च रामं चैवाभ्यवादयत् । स प्रविश्य सभां दिव्यां सुधर्मां लोकविश्रुताम् ॥१२॥
आहुकं वसुदेवं च रामं चैवाभ्यवादयत् । प्रणम्य मातरो विश्वाः काञ्चने परमासने ॥१३॥
उपविश्य यथाजोषं पूजितो यदुपुङ्गवैः । रराज रजनीनाथो यथा ग्रहगणैर्दिवि ॥१४॥
हतावशिष्टैर्भूपालैस्तत्पुत्रैश्च महाबलैः । अभिषिक्तैर्यथास्थानं सेव्यमानो दिवानिशम् ॥१५॥
अवतीर्णमहाभारां विश्वां विश्वंभरो हरिः । धर्मराजं पुरस्कृत्य धर्मेवान्वशासत ॥१६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ बलदेवतीर्थयात्रानन्तरम् । अर्थेप्सुं धनार्थिनम् (१) । पुरा पूर्वोपाख्यानेषु । शं कल्याणम् । अतो दैत सज्जनावनात् । तं सुरारिनाशम् । निजाभक्ताः (२) । अधुना न केवलं हरिभक्तानां पारत्रिकमेव सुखं किन्त्वैहिकमप्यत तद्भवतीत्यध्यायद्वयेनाह-अन्यानि असुरसंहारादितराणि भक्तवात्सल्यबोधकानि ॥१-२॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

कथासमाप्तिमिवालक्ष्य सोत्कण्ठः पृच्छति । वस्तुतस्तु विष्णोः स दयितो भवेदित्यनेनोक्तं ततस्तज्जनितकथारुचिविशेषं च प्राप्य ताभ्यां पृच्छति-भगवन् ! हे सर्वज्ञ ! मुकुन्दस्य सर्वदुःखविमोचकस्य म सर्वोत्तमस्वभावस्य यान्यन्यानि वीर्याणि प्रभावमयचरितानि च श्रोतुमिच्छामोवयम् । प्रार्थनायां लोट् । अन्येषामपि सं सम्भावने हेतुः अनन्तवीर्यस्येति । एवं कथने योग्यता तथा तद्वीर्याणामेव तादृशत्वात् अस्माकं तन्मात्रश्रवणौचि तेषामानन्त्यं चेति सर्वाण्येव तानि कथयेति भावः । ननु द्वित्राण्येव दिनानि तव जीवतिमिति कथमेतावत्याशा सम्भवेत त प्रभोरिति । आयुंष्यपि यथेष्टं दातुं शक्तस्येत्यर्थः । अन्यतृप्तिविलसितमेवेदम् ॥१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

'च' तु मुकुन्दस्य तु पूर्वोक्त-श्रीबलदेवचरितापेक्षया यद्वा, अपि च श्रीबलेदस्याश्रृण्म एवं मुकुन्दस्यापि श्रोतुमिच्छ तच्छ्रवणेच्छाधिक्यं द्योतयति यद्वा, अन्यान्यपि यानि वीर्याणि अद्भुतचरितानि सन्ति तानि सर्वाण्येव श्रोतुमिच्छाम आशिषि पञ्चमी । त्वत्प्रसादात्त्वच्छ्रवणेच्छाऽस्माकं भवत्वित्यर्थः । इच्छामेति बहुत्वं विनयेन श्रोतृणामन्येषामपि परिग्रहात् तानि च भवान् वेत्त्येवेत्याशयेनाह-भगवन् ! हे सर्वज्ञेति । आशीःपक्षे तव कृपया तत्सम्भवेदेवेत्याह-भ महादयायुक्तेति । श्रवणेच्छायां हेतवः-मुकुन्दस्य परमानन्दप्रदस्य किञ्च महानपरिच्छिन्न आत्मा बुद्धिर्वा यस्य तस् अनन्तं वीर्यं प्रभावः सामर्थ्यं वा यस्य तस्य किञ्च प्रभोर्निजेष्टेश्वरस्य । एवं वीर्याणामपि परमानन्दप्रदत्वमपरिच्छिन्नत्वं सर्वा प्रेमसेव्यत्वं चाभिप्रेतम् । विशेषाणानामेषां यथोत्तरं श्रवणेच्छाहेतुत्वे श्रैष्ठ्यम् ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-३॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथ भगवतो भक्तानुग्रहं ब्रह्मण्यत्वाद्यात्मकं कुचेलवृत्तान्तं प्रस्तोष्यंस्तावत्तद्विषयकं राज्ञः प्रश्नमाह सूतः-भग हे भगवन् ! शुक ! अनन्तस्यापरिच्छिन्नस्वरूपस्वभावस्य महात्मनो भक्तानुकम्पिनो मुकुन्दस्य यानि वीर्याणि प्रभाव कर्माणि तानि श्रोतुम् इच्छामहे प्रभो ! वक्तुं समर्थेति भावः ॥१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

श्रीशुक उवाच

(मूलम्)

भगवानपि गोविन्दः साधयित्वा स्ववाञ्छितम् । सुयोधने महाबाहौ निहते गदया रणे ॥ क ॥
विसृज्यायोधनं शून्यं प्रयातुमुपचक्रमे । कृपश्च कृतवर्मा च द्रौणिश्च रथिनां वरः ॥ ख ॥
अवशिष्टा महात्मानः सुयोधनबले त्रयः । पञ्च पाण्डुसुता वीराः सात्यकिश्च महाबलः ॥ ग ॥
वैश्यापुत्रो युयुत्सुश्च शिष्टाः कृष्णपुरोगमाः । तान् पुरस्कृत्य गोविन्दो मुनिवृद्धसमन्वितः ॥ घ ॥
जगाम हास्तिनपुरं धृतराष्ट्रं प्रसादितुम् । गान्धारीं धृतराष्ट्रं च विदुरं च महामतिम् ॥ ङ ॥
प्रसाद्य पाण्डवान् स्वे स्वे राज्ये संस्थाप्य यत्नतः । स्तूयमानो मुनिगणैः सूतमागधवन्दिभिः ॥ च ॥

अनुयातः प
शंखदुन्दुभि
विचित्रतोरण
उपस्थितः पौ
वहद्भिर्दीपमु
प्रविवेश पुरीं
आहुकं वसुदे
उपविश्य य
हतावशिष्टैर्भूप
अवतीर्णमहा

अनेनाध्यायद्वये
स्यादितीदृशं माहात्म्यं
शून्यं शवादिनाऽपि रहित
यत्नत इति युक्त्या प्रति
अंकुरपूरितपालिकापात्र

अशीतितम आ
हे प्रभो ! तानि

गत्वाऽशीतितमे
हे प्रभो यानि अ

अशीतितम आ
भगवन्निति ॥१॥

सम्पत्तिर्भगवन्नि
एकत्रिंशे तथाध्
अङ्गत्वेन बलस्य
पूर्वाध्याये बलभ

अनुयातः पाण्डुपुत्रैः प्रेमबाष्पाविलेक्षणैः ।ताननुज्ञाप्य सोत्कण्ठान्रथेनादित्यवर्चसा ॥ छ ॥
शंखदुन्दुभिनिर्घोषैर्वेदमङ्गलनिःस्वनैः । पुण्याहमन्त्रघोषैश्च द्वारकां प्रययौ हरिः ॥ ज ॥
विचित्रतोरणां रम्यां चलत्कदलिकाकुलाम् । अलङ्कृतां पौरजनैः सिक्तसम्मृष्टभूतलाम् ॥ झ ॥
उपस्थितः पौरजनैः पालिकांकुरधारिभिः । योषिद्भिर्वारमुख्याभिर्भूषिताभिश्च भूषणैः ॥ ञ ॥
वहद्भिर्दीपमुकुरकलशस्रक्फलाक्षतान् । उपस्थितो ब्राह्मणैश्च पुत्रैः पौत्रैः सहानुजैः ॥ ट ॥
प्रविवेश पुरीं दिव्यां दिवसे पूजितो हरिः । स प्रविश्य सभां दिव्यां सुधर्मां लोकविश्रुताम् ॥ ठ ॥
आहुकं वसुदेवं च रामं चैवाभ्यवादयत् । प्रणम्य मातरो विश्वाः काञ्चने परमासने ॥ ड ॥
उपविश्य यथाजोषं पूजितो यदुपुङ्गवैः । रराजरजनीनाथो यथा ग्रहगणैर्दिवि ॥ ढ ॥
हतावशिष्टैर्भूपालैस्तत्पुत्रैश्च महाबलैः । अभिषिक्तैर्यथास्थानम् सेव्यमानो दिवानिशम् ॥ ण ॥
अवतीर्णमहाभारां विश्वां विश्वम्भरो हरिः । धर्मराजं पुरस्कृत्य धर्मेणैवान्वशासत ॥ त ॥

अनेनाध्यायद्वयेन कृपणब्राह्मणकृपातिशयकथनेन हरिभक्तस्य केवलं न पारत्रिकमेव फलम् अपि तु ऐहिकमप्यतिविस्मयकरं स्यादितीदृशं माहात्म्यं वक्ति तत्र प्रथमतो भारतयुद्धं समाप्य कृष्णस्य हस्तिनापुरप्रयाणप्रकारं प्रख्यापयति- भगवानपीति ॥ क ॥ शून्यं शवादिनाऽपि रहितं प्रयातुं गन्तुम् अष्टादशाक्षौहिणीभ्यः शिष्टानाह- कृपश्चेति ॥ ख - ङ॥ भगवत्सेवामन्तरेण राज्यानिच्छूनित्यतो भवत इति युक्त्या प्रतिपाद्येत्यर्थः ॥ च - छ ॥ वेदे ये मङ्गलनिःस्वनाः मङ्गलवचनानि तैः ॥ ज - झ ॥ उपस्थितोऽभिगतः अंकुरपूरितपालिकापात्रविशेषः ॥ ञ - ठ ॥ मातरो मातृः ॥ ड ॥ यथा जोषं यथासुखम् ॥ढ - त ॥ ॥१-२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

अशीतितम आयातः श्रीदामा हरिणार्चितः । सप्रेमपृष्ट उक्ता च कथा गुरुकुलाश्रया ॥१॥

हे प्रभो ! तानि श्रोतुम् इच्छाम इत्यन्वयः ॥१॥

गूढार्थदीपिनी

गत्वाऽशीतितमेऽर्थेप्सुः सुदामा द्वारकापुरीम् । हरिणा सत्कृतस्तत्र चक्रतुस्तौ कथां मिथः ॥१॥

हे प्रभो यानि अन्यानि वीर्याणि चरित्राणि तानि श्रोतुमिच्छामः । प्रार्थनायां लोट् ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अशीतितम आगते सुदाम्नि श्रीकृष्णकृतसत्कारादिकं वर्ण्यते बलचरितानि श्रुत्वा पुनः श्रीकृष्णचरितानि पृच्छति- भगवन्निति ॥१॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

सम्पत्तिर्भगवन्मित्रे द्वाभ्यामत्र निरूप्यते । लोकावगतहेतूनामभावात्केवले हरेः ॥१॥

एकत्रिंशे तथाध्याये कृष्णमित्रस्य सर्वथा । सम्पत्त्यभावो वाक्याच्च स्थाप्यते सविशेषतः ॥२॥

अङ्गत्वेन बलस्यात्र श्रुत्वा लीलां विचक्षणः । निर्विण्णो भगवल्लीलां विशेषेणात्र पृच्छति ॥३॥

पूर्वाध्याये बलभद्रलीलां श्रुत्वा भगवल्लीलायां जातस्पृहः पृच्छति- भगवन् यानि चान्यानीति चतुर्भिः । भगवन्निति

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

सम्बोधनंभगवच्चरित्रे श्रद्धां ज्ञानं च सूचयति यानि प्रसिद्धानि चरित्राणि चकारादप्रसिद्धानि च अन्यानि ग्रान्थान्तरेषूक्तानि तत्स चकारादनुक्तानि च न चैवं चारित्र्यबाहुल्यं नास्तीति च शङ्कनीयं यतो मुकुन्दस्य चरित्रबाहुल्याभावे सर्वेषां मुक्तिर्न सिद्ध देशकालव्यवहितानां सर्वेषामेव चरित्रश्रवणादिनैव मोक्षे सिद्धे मम त्वेतावती श्रद्धा तानि सर्वाण्येव चरित्राणि श्रोतव्यानि केवलं मोक्षार्थित्वेनैव किन्तु महत्त्वार्थिन आत्मार्थिनश्च तत्रापि वीर्याणि पराक्रमरूपाणि तत्रापि बाहुल्यमाह-अनन्तवीर्य श्रोतुमिच्छाम ह इति श्रवणेच्छा सर्वेषां निरूपिता प्रभो इति एतावता श्रवणेच्छापूर्तिर्नस्त्वयैव कर्तुं शक्या नान्येनेति ॥१॥

सुबोधिनीसारः

राजप्रश्नः । हे भगवन् ! महात्मनो मुकुन्दस्यानन्तबलस्य यानि अन्यानि वीर्याणि तानि श्रोतुं वयमिच्छामः । हे प्रभो ।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथाशीतितमेऽध्याये मिथः श्रीरामकृष्णयोः । पूर्वं गुरुकुलावाससंवादो विनिरूप्यते ॥१॥

एवं रामचरितानि श्रुत्वा पुनः श्रीकृष्णचरितानि पृच्छति 'त्वं तु वक्तुं समर्थोऽसि' इति सूचयन् सम्बोधयति-प्रभो । तत्र सर्वज्ञत्वं हेतुं सूचयन् पुनः सम्बोधयति-भगवन्निति । मुकुन्दस्य मोक्षप्रदस्य श्रीकृष्णस्य यानि चान्यानि वीर्याणि प्रभावसूचकानि कर्माणि तानि वयं सर्वे श्रोतुमिच्छामहे । आत्मनेपदमार्षम् । कर्मणां बहुत्वे हेतुमाह-अनन्तवीर्यस्येति । पूर्णकामस्य तस्य कर्मकरणे किं प्रयोजनम् इत्याशङ्क्‍याह-महात्मन इति । महान् औदार्यादिगुणपुर्ण आत्मान्तःकरणं यस्य तस्येत्यर्थः । श्रवणादिपराणां धर्मादिफलसिद्ध्यर्थं कर्मकरणमित्याशयः ॥१॥

अन्वितार्थप्रकाशिका

अथाशीतितमे कृष्णः श्रीदामानं सुसत्कृतम् । उवाच प्राक्कथां तत्र श्लोकाः सार्धाः शराब्धयः (४५) ॥१॥

पञ्चोवाचेति (५) पादोनाः सप्तवेदा (४६।।।) अनुष्टुभः ॥८०॥

भगवन्निति । हे भगवन् हे प्रभो ! अनन्तवीर्यस्य महात्मनः मुकुन्दस्य यानि चान्यानि वीर्याणि प्रभावसूचकानि कर्माणि तानि वयं सर्वे श्रोतुमिच्छामः । प्रार्थने लोट् ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथाशीतितमेऽध्याये कृष्णः स्वगृहागतश्रीदामपूजनं गुरुगृहनिवासकथाकथनं चकारोदिति वर्ण्यते भगवानिति ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कृष्णोशीतितमे विप्रमर्थेप्सुं गृहमागतम् । श्रीदामानं समभ्यर्च्यापृच्छत् पूर्वकथां मुदा ॥१॥

अथ भगवतो ब्रह्मण्यात्मत्वद्योतकं भक्तानुग्रहद्योतकं च कुचैलवृत्तान्तं प्रस्तोष्यंस्तावद्विषयकं राज्ञः प्रश्नमाह सूतश्चतुर्भि । भगवन्निति । हे भगवन् ! शुक ! मुकुन्दस्य मुक्तिप्रदायिनः महात्मनः भक्तजनानुकम्पिनश्च अनन्तानि वीर्याणियस्य तस्य भगवतः यानि अन्यानि वीर्याणि चरितानि हे प्रभो ! तान्यपि श्रोतुम् इच्छामि ॥१॥

कृष्णप्रिया

राजा परीक्षितजीने नम्रता से निवेदन किया कि भगवन् ? मैं आपके श्रीमुखकमल से अनन्तवीर्य महात्मा श्रीमुकुन्द भगवान श्रीकृष्णचन्द्र के मधुरता एवं ऐश्वर्यपूर्ण अन्य भी दिव्यलीला कथा का श्रवण करना चाहता हुं। अभी तक आपने जिन चरित्रों का निरुपण न किया हो ॥१॥

को नु श्रुत्वा स

सा ¹वाग्यया त

स्मरेद्वसन्तं स्थिर

शिरस्तु तस्योभ

अङ्गानि विष्णोर

विष्णुरातेन सम्पृ

ब्रह्मन् ! काममार्ग

यया, तस्य, गुणान्, गृणीते,

कर्णः ॥३॥ तस्य, उभयलि

नित्यम्, पादोदकम्, चाति

सूतः उवाच ।

विष्णुरातेन, सम्पृष्ट

उत्तमश्लोकस्य श्री

॥२॥ कथाश्रवणं स्तुवन् दृष्ट

स्मरेत् यस्तस्य पुण्याः कथ

जङ्गमश्च तस्यैव लिङ्गमित्येव

यया वाचा । तत्क

जानातीति मनः । कर्णयति श्र

प्रयोगाः ॥३॥ तस्यैव भगवत

इति निरुक्तिः । तज्जनानां हि

दर्शनेऽपि चक्षिरस्ति । अ

मङ्गलानन्तरारम्भकात्स्न्याधि

ननु युष्माभिर्बहूनि

कोऽपि तत्र हेतुः उत्तमाः उ

श्रीकृष्णावतारसम्बन्धित्वेन

माहात्म्यमाधुर्यरूपे वैशिष्ट्ये

विरन्तुं न युज्यत इत्यत आह

---

१. मुहुर्ब्रह्म-गो. प्रे.

वंशी. वीर. विज. जीव. ।

को नु श्रुत्वा सकृद्[1]ब्रह्मन्नुत्तमश्लोकसत्कथाः [2]। विरमेत विशेषज्ञो विषण्णः काममार्गणैः ॥२॥
सा [3]वाग्यया तस्य गुणान् गृणीते करौ च तत्कर्मकरौ मनश्च ।
स्मरेद्वसन्तं स्थिरजङ्गमेषु शृणोति तत्पुण्यकथाः स कर्णः ॥३॥
शिरस्तु तस्योभयलिङ्गमानमेत्तदेव[4] यत्पश्यति तद्धि चक्षुः ।
अङ्गानि विष्णोरथ तज्जनानां पादोदकं यानि [5]वहन्ति नित्यम् ॥४॥

सूत उवाच

विष्णुरातेन सम्पृष्टो भगवान् बादरायणिः । वासुदेवे भगवति निमग्नहृदयोऽब्रवीत् ॥५॥

कर्दमक्षमा

ब्रह्मन् ! काममार्गणैः, विषण्णः, उत्तमश्लोकसत्कथाः, सकृत्, श्रुत्वा, कः, नु, विशेषज्ञः, विरमेत ॥२॥ सा, वाक्, यया, तस्य, गुणान्, गृणीते, च, तत्कर्मरौ, करौ, स्थिरजङ्गमेषु, वसन्तम्, स्मरेत्, तत्, मनः, च, तत्पुण्यकथाः, शृणोति, सः, कर्णः ॥३॥ तस्य, उभयलिङ्गम्, आनमेत्, तत्, तु, शिरः, यत्, तत्, एव पश्यति, तत्, हि, चक्षुः, विष्णोः, अथ, तज्जनानाम्, नित्यम्, पादोदकम्, चातिवहन्ति, तानि, अङ्गानि ॥४॥

सूतः उवाच ।

विष्णुरातेन, सम्पृष्टः, बादरायणिः, भगवान्, भगवति, वासुदेवे, निमग्नहृदयः, अब्रवीत् ॥५॥

श्रीधरस्वामिकृतभावार्थदीपिका

उत्तमश्लोकस्य श्रीकृष्णस्य सत्यो मनोहराः विषयवैतृष्ण्यजनिकाः कथाः विशेषज्ञः सारवित् विषण्णो विषादं प्राप्तः ॥२॥ कथाश्रवणं स्तुवन् दृष्टान्ततयाऽन्यार्थानाह-सा वागिति । तावेव करौ यौ तत्कर्मकर्तारौ तदेव मनो यत्स्थिरजङ्गमेषु वसन्तं स्मरेत् यस्तस्य पुण्याः कथाः शृणोति स एव कर्णः ॥३॥ उभयलिङ्गमिति मत्वा आनमेत्तदेव शिरः तदेव तस्य लिङ्गं स्थिरं जङ्गमञ्च तस्यैव लिङ्गमित्येव यत्पश्यति तदेव चक्षुः तान्येवाङ्गानि यानि पादोदकं भजन्तीति ॥४-६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यया वाचा । तत्कर्मार्चनादि कुरुत इति । तथा अनेन वागादिपदानामन्वर्थतोक्ता । वक्तीति वाक् । करोतीति करः । मन्यते जानातीति मनः । कर्णयति शृणोतीति कर्णः । क्रमाद्वचिकृञ्मनिकर्णीनां परिभाषणकरणज्ञानाकर्णनार्थकानां धातूनामेतेऽन्वर्थकाः प्रयोगाः ॥३॥ तस्यैव भगवतो लिङ्गं मूर्तिम् । लिङ्गं चिह्ने तु माने च मूर्तिप्रकृतिहेतुषु । शिश्ने च शिवलिङ्गे च ज्ञानज्ञापकयोरपि ॥ इति निरुक्तिः । तज्जनानां हरिभक्तानाम् । श्रिञ् सेवायाम् । अस्य नमनलक्षणसेवायां शिर इति निपात्यते । चष्टे पश्यतीति चक्षुः । दर्शनेऽपि चक्षिरस्ति । अङ्गन्ति पानस्नानादिरूपां सेवां प्राप्नुवन्तीत्यङ्गानि । अथ कोऽर्थो मङ्गलानि शुभानि । अथेति मङ्गलानन्तरारम्भकात्स्न्याधिकारसमुच्चयेष्विति । एतेन शीर्षादीनामप्यन्वर्थतोक्ता ॥४॥ निमग्नहृदयः प्रविष्टचेताः ॥५॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

ननु युष्माभिर्बहूनि तानि श्रुतान्येव किं पुनस्तदिच्छया तत्राह-को न्विति । असकृदपि श्रुत्वा को नु पुमान् विरमेत् अपि न कोऽपि तत्र हेतुः उत्तमाः उद्गते तमसी अज्ञानदुःखे यस्मात् तादृशः उत्तमः सर्वोत्कृष्टो वा श्लोको यस्य तस्य भगवतः सतीः श्रीकृष्णावतारसम्बन्धित्वेन तदीयकथास्वपि श्रेष्ठाः कथाः ननु बहवो विरमन्तोऽपि दृश्यन्ते तत्राह-विशेषज्ञ इति । विशेषौ माहात्म्यमाधुर्यरूपे वैशिष्ट्ये जानात्यनुभवति यः सः इति अहो आस्तां तदनुभवे जाते विरामः नित्यानुभूयमानदुःखध्वंसार्थमपि विरन्तुं न युज्यत इत्यत आह-विषण्ण इति कामस्य विषयभोगस्य मार्गणैरन्वेषणैः श्लेषेण बाणैर्विषण्ण इति ॥२॥ अन्यथा

---

[1] मुहुर्ब्रह्म-गो. प्रे. टी. । [2] सत्कथां-विज. । [3] सावागनन्तस्य गुणान्-वीर. विज. । [4] नं तदेव-गो. प्रे. टी. । [5] भजन्ति-श्रीधर. वंशी. वीर. विज. जीव. ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

कर्णस्य वैयर्थ्यमेवेति दर्शयितुं तत्सहयोगेन अन्यान्यपीन्द्रियाणि तथा दृष्टान्तयति–सेति । गुणानिति बहुत्वं प्रीतौ
नानागुणानुसन्धानात् करणतया वाचःप्रवृत्तेः कर्त्रधीनत्वं निर्दिश्य पुनरपरितोषेण सर्वेन्द्रियाणां तत्र स्वतः प्रवृत्तिरेव
ज्ञापयन् करादीनि कर्तृत्वेनैव निर्दिशति, तत्कर्मकरावित्यादिना । कर्म पूजापरिचर्यादि स्थिरेत्यादि सदा सर्वत्रैव स्मरणापेक्षया
पुण्याः पुण्यकरीर्मनोज्ञा वा कथाः कर्णः श्रवणेन्द्रियम् अस्य ज्ञानेन्द्रियत्वाज्ज्ञानस्य चैकेनापि सिद्धिः
द्वित्वाद्यपेक्षत्वमित्येकत्वं निर्दिष्टम् एवं चक्षुरपि वक्ष्यते ॥३॥ उभयलिङ्गं विष्णोस्तज्जनानां चेति व्यक्तीभावित्वात्
तद्भक्तरूपं च आ सम्यक् भूमिस्पर्शादिना नमेत् एव शब्देन विचित्ररूपदर्शनशीलस्य चक्षुषोऽन्यत्र प्रवृत्तिं निरस्यति
अनेनैव पूर्वत्राप्युत्तरत्रापि निर्धारो ज्ञेयः अथानन्तरं तस्य विष्णोर्जनानामपि भजन्ति श्रद्धया धारयन्ति नित्यस्य सर्वान्ते
सर्वैः सहान्वयः । अङ्गानि नाभेरूर्ध्वानि ज्ञेयानि अधस्ताद्धारणनिषेधाद्यथाकथञ्चिन्नामोच्चारणादिभिर्वागादीनां सार्थकत्वे
तथा तत्सिद्ध्युक्तिः तत्तत्सम्यक्तयैव साफल्यसम्यक्तासिद्धेः करादीनां दृष्टान्तत्वेऽप्ययं भावः एवमेव वागादीनि सार्थकानि
मम तु तत्तदभावेन सर्वाणि तानि व्यर्थान्येव केवलं त्वत्प्रसादाच्छ्रवणेन्द्रियमेव सार्थकं भवत्विति ।
स्वस्मिंस्तादृशतदनुग्रहभावेनोद्दीप्तप्रेम्णेत्यर्थः । अत एव सम्यक् सोत्कण्ठं पृष्टः स च स्वतो भगवान् भगवल्लीला
सर्वज्ञशिरोमणिः किञ्च बादरायणस्य सर्ववेदान्तसारज्ञस्य पुत्रः तेन पुनः सम्प्रश्नेन तु श्रीवसुदेवनन्दने समग्रैश्वर्यादिसमग्र
गुणनिवासे नितरां मग्नहृदयः सन्नब्रवीत् । तस्य परमकृपामयं कथास्वेव विशेषं स्मृत्वा कथयामासेत्यर्थः ॥५॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

ननु युष्माभिर्बहूनि तानि श्रुतान्येव किम्पुनस्तदिच्छया ? तत्राह–को न्विति । असकृदपि श्रुत्वा को नु पुमान् विरमेत्
न कोऽपि । तत्र हेतुः उत्तमः सर्वोत्कृष्टः किंवा उद्गतं तमः ...सारोऽज्ञानं वा यस्मात्तथाभूतः श्लोको यशो यस्य तस्य
पावनीः कथा इति तासामपि तमोनाशकत्वं च सूचितम् । ननु तथापि मधुररसपानबाहुल्येनेव मुहुः श्रवणेन तत्र कदाचित्
शङ्कऽऽद्धते–विशेषज्ञ इति । सारग्राहित्वेन नित्यनूतनतया तत्र मुहुरिच्छावर्धक एव न तु तृप्तिः स्यादिति भावः तथा चोक्तं श्रीशौनकादिभिः
प्रथमस्कन्धे (भा.१/१/१९) 'वयं तु न वितृप्यामः' नित्यानुभूयमानदुःखध्वंसार्थमपि विरन्तुं न युज्यत इत्याह–विषण्ण
काममार्गणैः स्मरशरैः एतदुपलक्षणं क्रोधादिवेगैरपि क्रोधादीनां कामानुगतत्वात् तथा चोक्तं गीतासु (३/३७) 'काम एष
एषः' इत्यादि यद्वा, कामस्य विषयभोगस्य मार्गणैरन्वेषणैः साधनैरित्यर्थः बहुत्वं वैविध्याद्बाहुल्याच्च यद्वा अकाम
काममार्गणैरविषण्णोऽपि आत्मारामः पूर्णकामोऽपीत्यर्थः । विशेषज्ञश्चेत् को नु विरमेत् । ब्रह्मन्निति तत्त्वया ज्ञायत एवेति
॥२॥ यया कृत्वा तस्योत्तमश्लोकस्य गुणान् सौन्दर्यमाधुर्यकारुण्यादीन् गृणीते उच्चारयति जनः सैव वाक् अन्यथा भेकजिह्ववद्
वाक्त्वस्यैवासिद्धेः निन्दत्वाद्वा । एवमग्रेऽपि सर्वं करादीनां सर्वेषां कर्तृत्वेऽपि । ययेति वाचः करणत्वं तस्या जीवदुर्वशत्वबोधनार्थं
। सर्वेन्द्रियक्षोभिकाया बहुविधाया वाचो महायत्नेनैव भगवद्गुणोच्चारणे प्रवृत्तेः । यद्वा, जीवस्य भगवन्नामोच्चारणे
परमपुरुषार्थसाधने तस्या एव श्रैष्ठ्यबोधनार्थं तत्र तस्याः प्रवृत्त्या सर्वेन्द्रियाणां क्षोभिनिवृत्तेः निर्वृत्तेश्चेत् तथान्येषामपि श्रवणादि
हितसिद्धिरिति दिक् । गुणानिति बहुत्वं स्वभावतस्तेषां बाहुल्यात् किंवा वार्तान्तरनिरसनार्थं बहूनां तेषामुच्चारणापेक्षया गुणांश
वा । आत्मन इव श्रोतृणामपि हितस्यापेक्षया कर्म पूजापरिचर्यादि । स्थिरेषु जङ्गमेषु च जीवेषु वसन्तमिति सदा
स्मरणापेक्षया स्थिरतो जङ्गमानां पश्चादुक्तिस्तेषु प्रकाशबाहुल्यात् । यद्वा, वृन्दावनस्य स्थिरेषु कदम्बादिषु जङ्गमेषु च
सान्निध्येन वसन्तं स्मरेत् । तस्य पुण्याः पुण्यकरीः साक्षात्पुण्यरूपा वा मनोज्ञा वा कथाः कर्णः श्रवणेन्द्रियं यद्वा,
साहचर्यात् कर्णाविति ज्ञेयम् । तस्य नित्यद्वित्वसिद्धेरेकत्वोक्तावपि द्वित्वं गम्यत एव तच्च पूर्वं विवृत्तम् । एवमग्रे चक्षुरपि
सर्वासामपि कथानां स्वभावतः पुण्यत्वेन स्वरूपमात्रनिर्देशः मधुरलीलाकथापेक्षया वा ॥३॥ उभयलिङ्गं श्रीशालग्रामादि
मद्भगक्तरूपं च यद्वा, चलाचलमूर्तितया द्विरूपम् आ सम्यक् भूमिस्पर्शनादिना नमेत् एवशब्देन विचित्ररूपदर्शनशीलस्य चक्षुषो
प्रवृत्तिं निरस्यति । हि एव तदेव निश्चये वा । अस्य पूर्वत्र परत्राप्यनुषङ्गः । विष्णोः श्रीशालग्रामादिविविधरूपेण विश्वव्यापक
पादोदकस्य सौलभ्यं सूचितम् । अथ अपि तस्य विष्णोर्जनानामपि भजन्ति श्रद्धया धारयन्ति नित्यमित्यस्य सर्वान्ते प्रयुक्त
पूर्वैरपि सर्वैः सहान्वयः । अङ्गानि नाभेरूर्ध्वानि ज्ञेयानि । अधस्ताद्धारणनिषेधात् । यथाकथञ्चित्तन्नामोच्चारणादिभिर्वागादीनां

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

सार्थकत्वेऽपि तथा तथा तत्सिद्ध्युक्तिस्तत्तत्सम्यक्तयैव साफल्यसम्यक्त्वसिद्धेरिति दिक्। साध्यस्य श्रवणस्य प्रस्तावेऽन्येषामुदाहरणाद्दृष्टान्ततयेति तैर्व्याख्यातम्। यद्वा, एवमेव वागादीनि सार्थकानि भवन्ति। मम दुर्भगस्य तत्तदभावेन सर्वाणि तानि व्यर्थान्येव केवलं त्वत्प्रसादाच्छ्रवणेन्द्रियमेव सफलं भवत्विति भावः। अयं तु भक्त्यातिदैन्यादेव ॥४॥ विष्णुना उत्तरागर्भान्तःप्रविष्टेन भगवता रातो ब्रह्मास्त्रात् रक्षित्वा पाण्डवेभ्यो दत्त इति श्रीभगवन्महाकृपापात्रत्वं सूचितम्। अत एव सम्यक् सन्याय-सदैन्यादिना पृष्टः अतः श्रोतृरसविशेषोत्पत्त्या वक्तुरपि सदुदयात्। वासुदेवे श्रीवसुदेवनन्दने अत एव भगवति तादृशश्रीदामविप्रानुग्रहादिना निजाशेषमाहात्म्यप्रदर्शके नितरां मग्नममृताब्धौ मज्जनवत् प्रविष्टं हृदयं यस्य तथाभूतः सन् यतो भगवान् श्रीकृष्णप्रेमसम्पत्तिमान्। तत्रैव हेतुः-बादरायणिर्भगवतः श्रीव्यासस्य बदरिकाश्रमकृत-महातपःफलरूप इत्यर्थः। यद्वा, यथोक्तो हेतुः-भगवान् सर्वज्ञः श्रोतुर्भावविशेषोदये सति तदनुरूपमधुरकथा कथ्येत्यादिकं जानन्निति भावः। अन्यत् समानम्। एवं कथायां कालादिक्रमापेक्षा न कार्या प्रष्टुर्भावानुसारेण रसोत्पत्त्या वक्तुस्तदनुरूपमिति ज्ञेयम् ॥५॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

उभयलिङ्गं चरमचरं च शरीरं रामाद्यवताररूपम् अर्चारूपं चेति केचित् ॥४-१५॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

बहुधा श्रुतवतोऽपि कुतस्तव न विरक्तिरुदेतीत्यत आह-को न्विति। हे ब्रह्मन्! उत्तमश्लोकस्य सत्कथाः असकृदपि श्रुत्वा काममार्गणैर्विषयान्वेषणैरविषण्णो विषादमप्राप्तः विशेषज्ञो रसज्ञश्चेत् को वा पुमान् विरमेत भगवत्कथाश्रवणादिति शेषः। रसज्ञश्चेन्न कोऽपि विरमेतेत्यर्थः। यद्वा काममार्गणैर्विषण्णः निर्वेदं प्राप्तः ॥२॥ भगवद्गुणवर्णनादिषूपयुक्तानामेव वागादीन्द्रियाणां साफल्यमन्यथा वैयर्थ्यमेवेत्याह-सेति द्वाभ्याम्। या अनन्तस्य गुणान् गृणीते वर्णयति सैव वाक् सफलेत्यर्थः। विपर्यये 'जिह्वाऽसती र्दुरिकेव' इत्यादि द्वितीयस्कन्धोक्तोऽर्थोनुसन्धेयः। तस्य भगवतः कर्माराधनात्मकं कुरुत तथा तावेव करौ हस्तौ स्थावरेषु चरेषु चराचरात्मतया वसन्तं भगवन्तं यत्स्मरेत् तदेव मनः यस्तस्य पुण्याः कथाः शृणोति स एव कर्णः श्रोत्रम् ॥३॥ उभयं चराचरात्मकं लिङ्गं शरीरं यस्य तं विभवावताररूपमर्चावताररूपं चेति वा यदाऽऽनमेत्प्रणमेत्तदेव शिरः यत् तं पश्यति तदेव चक्षुः विष्णोस्तज्जनानां तद्भक्तानां वा (उदकं) पादोदकं नित्यं यानि भजन्ति सेवन्ते तान्येवाङ्गानि गात्राणि ॥४॥ इत्थमापृष्टः प्राह मुनिरित्याह सूतः-विष्णुरातेनेति। विष्णुरातेन परीक्षिता निमग्नमासक्तं मानसं हृदयं यस्य सः ॥५॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

राजा एतदेव इन्द्रियकृत्यमिति वक्ति - सा वागिति। या अनन्तस्य गुणान् गृणीते सैव वाक् यौ तत्कर्मकरौ तावेव करौ अनेन करोतीति करः कर्तर्यच् प्रत्ययः सफल इति सूचितम्। यत्स्थिरजङ्गमेषु वसन्तं हरिं स्मरेत्तदेव मनः 'मन ज्ञाने' इति धातोः स्मरणलक्षणं ज्ञानं यस्तस्य हरेः कथाः शृणोति स कर्णः 'कृण आकर्णने' इति धातुः ॥३॥ चराचरभेदेनोभयलिङ्गम् उभयप्रतिमामानमेद्यत्तदेव शिरः श्रयत इति शिरः 'श्रिञ् सेवायाम्' इति धातोर्नमनलक्षणसेवायां शिरः इति निपात्यते यदुभयलिङ्गं पश्यति तदेव चक्षुः 'चक्षु दर्शने' इति धातुः तस्य हरेर्जनानां यानि विष्णोः पादोदकं नित्यं भजन्ति पानस्नानलक्षणसेवां कुर्वन्ति अथ मङ्गलानि तानि एवाङ्गानि नान्यानि ॥४-६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

असकृदिति यो विशेषज्ञः यो वा काममार्गणैर्विषण्णः सोऽपि सोऽपि ॥२॥ स्थिरजङ्गमेष्विति। सदा सर्वत्रैव स्मरणापेक्षया ॥३॥ उभयलिङ्गं श्रीमदर्चादिरूपं तद्भक्तादिरूपं च। तदन्यसर्वविस्मरणांशे दृष्टान्तः ॥४-१६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

सा वागित्यादि। स्थिरजङ्गमेषु वसन्तं स्थिराः संसारवासनयाऽनुतरलो ये जङ्गमाः प्राणिनो महान्तस्तेषु वसन्तं तेषां हृद वसन्तम् ॥३॥ उभयलिङ्गं भगवन्मूर्तिर्वैष्णवं च विष्णोः पादोदकं तज्जनानां च ॥४-१५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

स्थिरजङ्गमेषु सन्तं 'व इवार्थे' तदेकभावनया सर्वत्रैव तत्स्फूर्तेः ॥३॥ उभयलिङ्गं भगवन्मूर्तीं विष्णवं च। विष्णोः पादोदकं गङ्गाजलम् शालग्रामादिन्जलं च। तज्जनानां वैष्णवानां पादोदकं च जलमात्रम् ॥४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

असकृदपि श्रुत्वा ननु विरमन्तोऽपि बहवो दृश्यन्ते तत्राह-विशेषज्ञ इति। निर्विशेषतत्त्वज्ञानिन एव विरमन्तु अप्राकृतगुणरूपलीलास्वादविशेषज्ञस्तु को विरमेत् किञ्च नित्यानुभूयमानदुःखध्वंसार्थमपि विरमितुं न युज्यते इत्याह-विषण्णः। विषण्णोऽपि अन्यथा श्रवणद्वयं व्यर्थमेव स्यादिति भावः ॥२॥ न केवलं कर्णस्यैव किन्तु कृष्णसम्बन्धं विना सर्वेषामप्यङ्गानां वैयर्थ्यमाह-सा वागित्यादि। अन्यानि वागादीनि तु 'जिह्वाऽसती दार्दुरिकेव' इत्यादि शौनकोक्तेर्निन्द्यान्येवेत्यर्थः। तत्कर्मकरावेव करौ धन्यौ स्थिरेषु जङ्गमेषु वसन्तं स्मरेत् यन्मनस्तदेव मन इति यत्र यत्र नेत्रं पतति तत्र तत्रैव कृष्णस्मरणशीलं मन एव धन्यमित्यर्थः ॥३॥ उभयलिङ्गं विष्णोस्तज्जनानां चेति व्यक्तीभावित्वात्। विष्णुप्रतिमारूपं च तत् द्वयमेव यत् पश्यति तदेव चक्षुः अङ्गानि नाभेरूर्ध्ववर्तीनि ज्ञेयानि ॥४-६॥

गूढार्थदीपिनी

हे ब्रह्मन्! सकृत् एकवारमपि यस्य सत्कथाः श्रुत्वा विशेषज्ञः विवेकी चेत् को नु विरमेत् विरक्तो भवेत् न कोऽपीत्यन्वयः। काममार्गणैः कामबाणैः विषयान्वेषणैर्वा विषण्णः खिन्नः सन् उत्तमः श्लोकः (पद्ये यशसि च श्लोकः इति कोशः।) यशो यस्य। उत्तमैर्नारदादिभिः श्लोक्यते स्तूयते वा ॥२॥ यया गुणान् गृणीते वर्णयति सा वाक्। यौ कर्मकरौ तौ करौ। यः स्थावरादिषु वसन्तं भगवन्तं स्मरेत् तन्मनः। यश्च कथाः शृणोति स कर्णः। अत्र वक्तीति वाक्। करोतीति करः। मन्यते जानातीति मनः कर्णयति शृणोतीति कर्णः क्रमात् वचिकृञ्मनिकर्णीनां धातूनामेतेऽन्वर्थकाः प्रयोगाः ज्ञेयाः ॥३॥ उभयलिङ्गं स्थावरजङ्गमात्मकं तस्यैव लिङ्गं मूर्तिरिति मत्वा यत् आनमेत् तदेव शिरः। एतदेव यत् पश्यति तद्धि तदेव चक्षुः। विष्णोरथ च तद्भक्तानां पादोदकं यानि भजन्ति धारयन्ति तान्येव अङ्गानि । अङ्गन्ति सेवां प्राप्नुवन्तीति अङ्गानि। श्रिञ् सेवायाम् इति नमनलक्षणसेवायां शिर इति निपात्यते। चष्टे पश्यतीति चक्षुः। चक्षिर्दर्शनेऽप्यस्ति। एतेषामपि अन्वर्थता ज्ञेया ॥४॥ विष्णुरातेन परीक्षिता। बादरायणिः शुकः ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

कामस्य मार्गणैर्विषण्णः विषादं प्राप्तः विषयेभ्यो जातग्लानिरित्यर्थः। विशेषज्ञः मुकुन्दवीर्यश्रवणादेः सर्वानन्देभ्यो विशेषं फलं जानातीति स तथा ॥२॥ तौ एव करौ तत्कर्मकरौ तदेव मनो वसन्तं यत् स्मरेत् ॥३॥ उभयोः विष्णुतज्जनयोर्लिङ्गं मूर्तिं तज्जनानां वैष्णवानाम् ॥४-६॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

ननु, श्रुतान्येव बहुचरित्राणि पुनः कथमाकाङ्क्षेति चेत् तत्राह-को नु श्रुत्वेति। असकृत् वारं वारमपि श्रुत्वा श्रवणादिरं ब्रह्मन्नित्यस्मिन्नर्थे सर्वज्ञत्वात् सम्मतिरुक्ता तत्राप्युत्तमश्लोकस्य सत्कथाः उत्तमैः श्लोक्यन्त इत्यतियोग्यानां कथाश्च स्वतोऽपि पुरुषार्थपर्यवसायिन्यः एवं सर्वप्रकारेण उत्तमाभ्यः को वा विरमेत ननु, सत्कथाः बह्व्य एव सन्ति बहूनां भगवतश्च त श्रुतानामेवानुवृत्तिः कर्तव्या किमपूर्वश्रवणेनेत्याशङ्कायामाह-विशेषज्ञ इति। यदेकं चरित्रं श्रुतं तदा यावान् रसः तदपेक्ष द्वितीयचरित्रश्रवणे शतगुणः ततस्तृतीयेऽपि ततः शतगुणाधिक्यम् एवमुत्तरोत्तरं श्रोतॄणां रसाधिक्यमनुभवसिद्धम् अतो विशेष को वा विरमेत् पूर्वचरित्रेणान्तःकरणमालिन्ये निवृत्ते उत्तरोत्तरमधिकचरित्रस्वरूपज्ञानात् विशेषज्ञता युक्तैव तत्र कदाचित् सं

व्यापृतः अन्यधर्मैर्बा
कामाः नानाविधाः
काममयः पुरुष: अत
विरक्तौ न केवलम् अ
वागिति द्वाभ्याम्। वा
। अन्यथा भगवतस्स
वाक्शब्दव्यवहार उक्त
"एतस्माज्जायते प्राण
तेषामुत्पत्तिः यत्र ये भ
व्यवहारः राजसतामस
परीक्षार्थमिदमारभ्यते
इत्यनुशासनात्। भगव
वाच एवेति न क्वाप्यव
भगवत्त्वेन ज्ञात्वा यज्ञकृ
सेवकसेवकानां करौ स
न तु सेवकानां स्थिरज
निरूप्यते-स्थिरजङ्गमे
आधिदैविकमन्तर्यामिरू
वा भवति तादृशस्य स्म
पुण्यजनकास्तु प्रकरणि
भक्तिजनिकां कथां शृण
इन्द्रियाणां निरूप्य अङ्ग
यस्येति अन्यत्तु भारत
फलदशायामुपयुज्यत इ
साधकक्रमोऽपि निरूपि
सेवारुच्या सेवा ततो ज्ञा
कथाश्रवणं ततः सर्वत्र भ
भगवच्चरणोदकस्य पश्चा
वहन्ति अथ भिन्नप्रक्रमे
श्रवणम् अहरहः तदेक
श्रवणेन शुकोऽपि भक्त्य
एतदर्थमेव रक्षितः शुको
सत्त्वान्तःकरणाविर्भूते नि
निमग्नहृदयत्वादिकं साध

हे ब्रह्मन्! उत्त
विशेषज्ञः सारवित् को नु

व्यापृतः अन्यधर्मैर्बाह्यगृहीतः विरमेतापि यस्तु पुनर्विरक्तः स कथं तत्र गृह्णीयात् वैराग्ये उपपत्तिमाह–विषण्णः काममार्गणैरिति । कामाः नानाविधाः मार्गणत्वादन्तःस्थिताः भित्त्वा बहिर्निर्गच्छन्ति बहिः स्थिताश्चान्तः प्रविशन्तीति तत उपायो जातः यतोऽयं काममयः पुरुषः अतः सर्वतो भिन्नः सर्वानन्दहेतोश्चरित्रात् कथं विरमेतेत्यर्थः ।।२।। एवं जीवस्य स्वतः भगवच्चरित्रादविरतिमुक्त्वा विरक्तौ न केवलम् आत्मन एव कामैः नाशः किन्तु सर्वेन्द्रियाणामपि वैफल्यमिति वदन् इन्द्रियवत्त्वं भगवच्चरित्रादेवेत्याह–सा वागिति द्वाभ्याम् । वाग्देवतारूपा अनेनान्येषां दैत्यरूपा वागिति तेषामिन्द्रियाणां वागादिपदप्रयोगो भाक्तः आभासा वा वागादयः । अन्यथा भगवतस्सकाशात् उत्पन्नाः वागादयः कथमन्यपरा भवेयुः । अथ बाहू प्राजापत्या इत्यत्र देवपक्षतेह वाचमूचुरित्यादिना वाक्शब्दव्यवहार उक्तः आसुराणां तु सर्वेन्द्रियाणामासुरत्वमेव न वागादित्वम् अथवा इन्द्रियाणां द्वेधा उत्पत्तिः श्रुतौ निरूपिता "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इति । "पराञ्चि खानि व्यतृणात् स्वयम्भूः" इत्यादि च पुराणादिष्वहङ्कारादपि तेषामुत्पत्तिः यत्र ये भगवद्योग्याः तेषां भगवदीयैव सामग्री तत्रैव वागादिव्यवहारः ब्रह्मनिर्मितेऽहङ्कारनिर्मिते वा इन्द्रियवर्गेणायं व्यवहारः राजसतामसव्यवहारात् अतः सात्त्विका निर्गुणा वा भगवदीया भवन्तीति भगवत्कृतेन्द्रियसम्बन्ध एव तेषां तत्र परीक्षार्थमिदमारभ्यते सा वागिति अभिप्रेता वाक् सैव यया तस्य गुणान् गृणीते गृणनं नोच्चारणमात्रं किन्तु नितरां "गृणि गरणे" इत्यनुशासनात् । भगवतः कथामात्रं कदाचिदन्योऽपि वदेत् उत्कर्षाधायकानां तु तेन प्रकारेण नितरां भक्तिपूर्वकमुच्चारणं भगवत्कृत वाच एवेति न क्वाप्यव्याप्त्यतिव्याप्ती इदमेव चाभिज्ञापिकम् एवमग्रेऽपि ज्ञातव्यम् । करौ च तत्कर्मकरौ कर्म लौकिकं परिचर्यात्मकं भगवत्त्वेन ज्ञात्वा यज्ञकृतौ तदपि भवति । तच्छब्देन पुरुषोत्तमो वा यज्ञस्तु पुरुषस्य कर्मेति न तत्रातिव्याप्तिः चकाराद्बहिर्मुखानामपि सेवकसेवकानां करौ सङ्गृहीतौ गुणानुवर्णनं तु न तेषामान्तरं शक्यं बाह्यं तु प्रसङ्गाद्भवेदपि । मनश्च तत्र चकारः पूर्वकर्मसङ्ग्रहार्थः न तु सेवकानां स्थिरजङ्गमेषु वसन्तं भगवन्तं स्मरेदिति अनेन द्वितीयस्कन्धे सूक्ष्मधारणायां यदुक्तं धारणया स्मरतीति तत्र विशेषो निरूप्यते-स्थिरजङ्गमेषु वसन्तमिति । तत्र स्वदेहान्तर्हृदयावकाश इति अन्यदपि रूपद्वयं सामान्यात् सङ्गृह्यते । आधिदैविकमन्तर्यामिरूपं च तत्राप्युत्तमत्वादिभेदः कल्पनीयः । उत्तमास्तु पूर्वोक्ताः सर्वत्र भगवद्दर्शनं तु भगवत एव तथानुगृहीतस्य भवति तादृशस्य स्मृतिर्निर्वर्तत एव सर्वत्रानुभव एव, कर्णयोस्तु विशेषमाह–शृणोतीति । तत्पुण्यस्य जीवितकरणस्य कथाः पुण्यजनकास्तु प्रकरणविरोधान्न ग्राह्याः । कर्ण इत्येकवचनं वामाभिप्रायम् उत्तरो देहहृत्स्मृत इति वाक्यम् अथवा यः कर्णौ भक्तिजनिकां कथां शृणोति स सर्वसम्मत इति तं परित्यज्य योऽपि पुण्यकथाः शृणोति स कर्णः स एव कर्णः पूर्वोक्तो वा ।।३।। इन्द्रियाणां निरूप्य अङ्गानि निरूपयन् उत्तमाङ्गं निरूपयति–शिरस्तु तस्योभयलिङ्गमानमेदिति । उभयं स्थावरजङ्गमात्मकं लिङ्गं यस्येति अन्यत्तु भारात्मकत्वेन पूर्वमेव निरूपितम् । तुशब्दः तद्व्यावर्तयति । एतद्येन सम्भवति तदप्यैन्द्रियकार्यं तथापि फलदशायामुपयुज्यत इति तदाह–तदेव यत्पश्यतीति । सर्वमेव जगत् तल्लिङ्गत्वेनैव यदा पश्यति तदेव चक्षुः भवति । अत्रायं साधनक्रमोऽपि निरूपितः मार्गान्तरानुसारेणैव गुणानुकीर्तनपर्यन्तमधिकारे सिद्धे पश्चात्कीर्तनं भगवदीयानां प्रथमं साधनं ततः सेवारुच्या सेवा ततो ज्ञानोदये सर्वत्र भगवदनुसन्धानं तादृशस्य बहिर्व्यापारे तत्साधकपुण्यकथाश्रवणं तस्य पुण्यैर्नारदादिभिर्वा कथाश्रवणं ततः सर्वत्र भगवत्साक्षात्कारः ततो नमनमिति एवं क्रमसिद्ध्यर्थं सर्वापेक्षया पूर्वमेव कर्तव्यम् आवश्यकफलसाधकमिति भगवच्चरणोदकस्य पश्चादपि साधकमिति सर्वाङ्गे निरूपयति–अङ्गानि विष्णोरिति । तान्येवाङ्गानि यानि विष्णोः पादोदकं गङ्गां वहन्ति अथ भिन्नप्रक्रमेण विष्णोः शालग्रामादौ तज्जनानां च नित्यं वहन्ति अङ्गात्प्रथममागमनं भिन्नः प्रक्रमः नित्यवहनं सेवनम् अहरहः तदेकपानादिना वा एवं भगवदीयत्वेनैव सर्वपुरुषार्थ इति कथं कथातो विरतिरिति ।।४।। एवं भगवदुत्कर्षे वर्णिते श्रवणेन शुकोऽपि भक्त्यानन्दे निमग्नः कथारम्भं कृतवानिति । सूतः शौनकादीन् प्रत्याह विष्णुरातेन संस्पृष्ट इति स हि भगवता एतदर्थमेव रक्षितः शुकोऽपि परमभगवच्छ्रद्धया भगवान् यतो बादरायणिः तपःपरायणाद्भगवत उत्पन्न अत एव वासुदेवे सत्त्वान्तःकरणाविर्भूते निमग्नहृदयः सन् ततो गूढं भगवच्चरित्रं गृहीत्वैवाब्रवीत् इदं सख्यचरित्रम् एकादशाध्यायैर्वक्तव्यम् अतो निमग्नहृदयत्वादिकं साधनेन निरूपितम् ।।५।।

सुबोधिनीसारः

हे ब्रह्मन् ! उत्तमश्लोकस्य श्रीकृष्णस्य सत्यो बन्धनहन्त्र्यो याः कथाः ताः श्रुत्वा कामबाणैर्विषण्णो विषादं प्राप्तो विशेषज्ञः सारवित् को नु विरज्येत, न कोऽपि । स्वादु स्वादु पदे पदे, इत्युक्तेः । सकृदेकवारमप्यसकृद्वा इति किं वक्तव्यम् ।।२।।

सुबोधिनीसारः

यया तस्य हरेर्गुणान् गायति वक्ति वा सा वाक् वाणी तस्मै कर्माणि कुरुत इति तौ करौ हस्तौ स्थिरजङ्गमेषु वसन्तं यत्स्मरेत् तन्मनः तस्य पुण्याः कथा यः श्रणोति स कर्णः ॥३॥ तस्य हरेरुभयलिङ्गं चराचरं रूपं यन्नमेत्तत् शिरः । यत् तद्रूपं पश्यति तच्चक्षुः नेत्रम् । यानि विष्णोः तस्य जनानां भक्तानां पादोदकं चरणप्रक्षालितजलं भजन्ते सेवन्ते नित्यं सदा तानि अङ्गानि ॥४॥ सूतोक्तिः । परीक्षितेन सम्पृष्टो भगवान् व्यासपुत्रो शुको भगवति वासुदेवे प्रविष्टचित्तोऽवदत् ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु बहुधा श्रुतवतोऽपि तव कुतो न ततो विरक्तिरुदेति, इत्याशङ्क्याह-को न्विति । तवाप्येतत्सम्मतम् इति सूचयन् सम्बोधयति-ब्रह्मन्निति । उत्तमश्लोकस्य अविद्यानिवर्तकयशसः कृष्णस्य अत एव सत्यो निखिलदोषनिवर्तिकाः सकलपुरुषार्थप्रापिकाश्च कथाः असकृत् वारं वारं श्रुत्वापि को नु विरमेतेत्यन्वयः । ननु बहवोऽपि ततो विरक्ता दृश्यन्ते इत्याशङ्क्याह-काममार्गणैर्विषयान्वेषणैर्विषण्णो विषादं प्राप्त इति । विषण्णा अपि विरक्ता दृश्यन्ते । तत्राह-विशेषज्ञ इति विवेकी । ये विषण्णा अपि कथातो विमुखास्तेऽत्यन्तमन्दबुद्धयो दुष्कृतिन इति भावः ॥२॥ भगवत्परत्वेनैव सर्वेषां शरीरावयवानां सफलत्वं, अन्यथा तु निष्फलत्वमेव इत्याह-द्वाभ्याम् । यया वाचा तस्य भगवतो गुणान् ऐश्वर्यादीन् गृणीते पुरुषः कथयति सैव वाक् सफलेत्यर्थः । गुणशब्दो जन्मकर्मनाम्नामुपलक्षणम् । तस्यैव भगवतः कर्म परिचर्यायज्ञानुष्ठानादिरूपं कुरुत इति तथाभूतावेव करौ सफलावित्यर्थः । स्थिरेषु जङ्गमेषु चान्तरात्मतया वसन्तं भगवन्तमेव यत्स्मरेत्तदेव मनः सफलमित्यर्थः । यः तस्य पुण्याः पुण्यजनिकाः कथाः शृणोति स एव कर्णः श्रोत्रेन्द्रियं सफलमित्यर्थः ॥३॥ उभयं चराचरात्मकं तस्यैव लिङ्गं शरीरमिति मत्वा यत् आनमेत् तदेव तु शिरः सफलमित्यर्थः । तदेव तस्य लिङ्गमेव यत्पश्यति तदेव चक्षुः सफलमित्यर्थः । कर्णद्वये श्रोत्रस्य अक्षिद्वये चक्षुषश्चैकत्वादेकवचनम् । विष्णोरथवा तज्जनानां तद्भक्तानां पादोदकं नित्यं यानि भजन्ति धारयन्ति तान्येवाङ्गानि सफलानीत्यर्थः ॥४॥ एवं विष्णुरातेन परीक्षिता सम्पृष्टो बादरायणिः शुकोऽब्रवीत् श्रीकृष्णचरितानि वर्णितवानित्यर्थः । तद्वर्णने सामर्थ्यमाह-भगवानिति । तद्वर्णने हेतुमाह-भगवति वासुदेवे श्रीकृष्णे निमग्नमासक्तं हृदयं यस्य सः, भगवद्भक्तत्वादित्यर्थः ॥५॥

अन्वितार्थप्रकाशिका

को न्विति । हे ब्रह्मन् । उत्तमः श्लोको यस्य तस्य कृष्णस्य सत्कथाः कर्माणि काममार्गणैर्विषयान्वेषणैर्विषण्णो विषादं प्राप्तः को नु विशेषज्ञो विवेकी असकृत् श्रुत्वापि विरमेत । तङ्ार्षः ॥२॥ सेति । यया वाचा तस्य भगवतो गुणान् उपलक्षतया कर्माणि नामानि च गृणीते पुरुषः कथयति । तङ्ार्षः । सैव वाक् सफला तस्यैव कर्म परिचर्यायज्ञानुष्ठानादि कुरुत इति तथाभूतावेव करौ सफलावित्यर्थः । स्थिरेषु जङ्गमेषु चान्तरात्मतया वसन्तं भगवन्तमेव यत्स्मरेत्तदेव मनः सफलमित्यर्थः । यः तस्य पुण्याः पुण्यजनिकाः कथाः शृणोति स एव कर्णः श्रोत्रेन्द्रियं सफलः ॥३॥ शिर इति । उभय चराचरात्मकं तत्प्रतिमारूपं तद्भक्तरूपं चेति तस्यैव लिङ्गं शरीरमिति मत्वा यत् आनमेत् तदेव तु शिरः सफलमित्यर्थः । तदेव तस्य उभयलिङ्गमेव यत्पश्यति तदेव चक्षुः सफलम् । विष्णोरथवा तज्जनानां तद्भक्तानां पादोदकं नित्यं यानि नाभेरूर्ध्वं अधोधारणनिषेधात् भजन्ति धारयन्ति तान्येवाङ्गानि सफलानि ॥४॥ विष्णुरातेनेति । भगवति वासुदेवे निमग्नहृदयो भगवान् विष्णुरातेन परीक्षिता सम्पृष्टो बादरायणिः शुकोऽब्रवीत् ॥५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उत्तमश्लोकस्य कृष्णस्य सतीः श्रेष्ठाः कथाः श्रुत्वा विषण्णः खिन्नः को नु विरमेत न कोऽपीत्यर्थः ॥२॥ वागादीनां हरिगुणकथनादिभिः साफल्यमाह-सेति । यया तस्य श्रीकृष्णस्य गुणान् गृणीते जनो वदति सा वाक् सफला भवति यौ च भगवतः कर्मकरौ कर्मानुष्ठातारौ तौ करौ सफलौ भवतः । स्थिरजङ्गमेषु अन्तर्यामिशक्त्या वसन्तं श्रीकृष्णं यन्मनश्च स्मरेत् तत्सफलं यस्तस्य श्रीकृष्णस्य पुण्यकथाः शृणोति सः सफलः कर्णः ततः अन्यो बिलतुल्यः बिले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्येत्युक्तेः ॥३॥ किञ्च शिर इति तस्य भगवत उभयलिङ्गं भगवत्स्वरूपं हर्येकान्तिकभक्तरूपं चेति द्विविधं यत् शिरः आनमेत्तदेव सफलं यच्चक्षुः उभयलिङ्गं पश्यति तत् सफलं यानि अङ्गानि विष्णोस्तज्जनानां च पादोदकं नित्यं भजन्ति गृणन्ति तान्येव जनस्य सकलाङ्गानि भवन्ति ॥४॥ विष्णुना श्रीकष्णेन रातौ द्रौण्यस्त्ररक्षटणेन दत्तस्तेन ॥५-६॥

बहुधा भगवत
उत्तमगीतकीर्तेर्भगवतः
विषण्णो निर्वेदं प्राप्तः पु
गादीन्द्राणां साफल्यमन
वागित्यर्थः । विपर्यये '
क्रिया तत् कुरुत इति तत्
हरेः इत्येवंविधाविति भा
मनः एवंविधं मन एव स
तत्पुण्यकथाः तस्य श्रीहरे
इत्यर्थः । विपर्यये बले ब
भगवतः उभे लिङ्गे शरीरे
। चरं संन्यासिनां रूपं स्थ
भगवत्स्वरूपं हर्येकान्तिक
सम्प्रणमेत् तत् तु एव शिरः
एव चक्षुषः सफलत्वमित्य

'भारः परं पट्टकिरी

इत्युक्तेरुक्तविधं
वा पादोदकं यानि नित्यं भ
इत्थमापृष्टो मुनिः प्राहेत्या
श्रीकृष्णे भगवति निमग्नं ह

हे ब्रह्मन् ! शुक
ऐसी परिस्थितिमें ऐसा कौ
लीलाओं का श्रवण करके
जो निरंतर भगवद् लीलों
प्राणी मात्र में निवास क
रसमयी पुण्यकथाओंका श्र
को भगवान का ही स्वरुप
है तुम्हारे शरीर के जो अंग
सच कहा जाय तो जो जी
सूतमहर्षिजी का मन भगवा
ने जब उपरोक्त प्रकार के प्र
श्री परीक्षित राजा का समा

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बहुधा भगवतः कथाः श्रुतवतोऽपि कुतस्तव न विरक्तिरुदेतीत्यत आह । को न्विति ॥ हे ब्रह्मन् ! उत्तमश्लोकसत्कथाः उत्तमगीतकीर्तेर्भगवतः सतीः कथा इत्यर्थः । असकृद्वारं वारं श्रुत्वा काममार्गणैः कामोपभोगोपकरणशब्दादिविषयान्वेषणैः विषण्णो निर्वेदं प्राप्तः पुमान्, विशेषज्ञः सारज्ञश्चेत् को नु विरमेत । भगवत्कथाश्रवणादिति शेषः ॥२॥ भगवद्वर्णनादिषूपयुक्तानामेव वागादीन्द्रियाणां साफल्यमन्यथा वैयर्थ्यमेवेत्याह सेति द्वाभ्याम् । सेति । यया तस्य हरेः गुणान् गृणीते वर्णयति सा वाक्, सैव सफला भवतीत्यर्थः । विपर्यये 'जिह्वाऽसती दार्दुरिकेव' इत्यादिद्वितीयस्कन्धोक्तोऽर्थोऽत्रानुसन्धेयः । तस्य भगवतः कर्माराधनात्मिका क्रिया तत् कुरुत इति तत्कर्मकरौ च एव करौ, भगवत्परिचर्यापरावेव करौ सफलावित्यर्थः । विपर्यये शावौ करौ नो कुरुतः सपर्यां हरेः इत्येवंविधाविति भावः । स्थिरजङ्गमेषु वसन्तं स्थावरेषु चरेषु चान्तरात्मतया वसन्तं भगवन्तमित्यर्थः । यत् स्मरेत् तदेव च मनः एवंविधं मन एव सफलमित्यर्थः । मनः स्मरेतात्मासुपतेर्गुणांस्ते, ईत्यनेन तथाविधस्य तस्य सफलत्वोक्तेरिति भावः । यः, तत्पुण्यकथाः तस्य श्रीहरेः श्रोतृजनपवित्रतापादकाः कथा इत्यर्थः । शृणोति सः एव कर्णः भगवत्कथाश्रवणकर्तेव सफलः कर्ण इत्यर्थः । विपर्यये बले बतोरुक्रमविक्रमान् ये, इत्युक्तरीत्या कृष्णाहिनिवासभूतबिलसमानावेवेति भावः ॥३॥ शिर इति । तस्य भगवतः उभे लिङ्गे शरीरे यस्येत्युभयलिङ्गम् । श्रीहरेः स्थावरजङ्गमात्मके शरीरे इत्यर्थः । "शरीरे द्विविधे विष्णोश्चरं चाचरमेव च चरं संन्यासिनां रूपं स्थावरं प्रतिमादिकम् ॥" इति स्मृतेः । संन्यासिनोऽत्र साधवः । अत्र श्रीगोपालानन्दस्वामिचरणा अपि भगवत्स्वरूपं हर्येकान्तिकभक्तरूपं चेति द्विविधशरीरमित्याहुः । अन्ये तु विभवावताररूपचर्मावताररूपं चेत्यूचुः । यत् आनमेत् प्रणमेत् तत् तु एव शिरः । सफलं शिर इत्यर्थः । यत्, पश्यति तं भगवन्तं निरीक्षेत, तत् चक्षुः हि । भगवतः श्रीमूर्तिनिरीक्षणत एव चक्षुषः सफलत्वमित्यर्थः । विपर्यये तु

'भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् । बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ॥'

इत्युक्तेरुक्तविधं शिरोभाररूपं चक्षुश्च मयूरबर्हगतचन्द्रकसमेवेति भावः । विष्णोः अथ तज्जनानां भगवद्भक्तजनानां च पादोदकं यानि नित्यं भजन्ति सेवन्ते तान्येव अङ्गानि गात्राणि । भगवत्पादोकस्पर्शनादेवाङ्गानां सफलत्वमिति भावः ॥४॥ इत्थम्पृष्टो मुनिः प्राहेत्याह–सूतः । विष्णुरातेनेति । विष्णुरातेन परीक्षिता सम्पृष्टः भगवान् बादरायणिः शुकः वासुदेवे श्रीकृष्णे भगवति निमग्नं हृदयं मानसं यस्य तथाविधः सन् अब्रवीत् ॥५॥

कृष्णाप्रिया

हे ब्रह्मन् ! शुकदेवजी काम सुख की खोजमें जो दुःख हो रहा है वे बाण की नाई चित्तमें चुभ रहा है ऐसी परिस्थितिमें ऐसा कौन रसज्ञ पुरुष होगा कि जो जीव पुनः पुनः पुण्यकीर्ति भगवान कृष्णचन्द्रजी मंगलमयी लीलाओं का श्रवण करके भगवान की कथा-लीलाओं से विमुख हो सके ॥२॥ राजन् ! वाणी तो वही कही जाय जो निरंतर भगवद् लीलों गान रहे, और भगवच्चरण कमलों की सेवामें सतत लगे रहते हो । मन उसे कहा जाय प्राणी मात्र में निवास करने वाले भगवान वासुदेव स्मरण करता है, और कान वे कहे ज़ाय जो भगवान की मंगलमयी पुण्यकथाओंका श्रवण करते है ॥३॥ राजन् ! मस्तिष्क वही कहा जाय जो मस्तिष्क स्थावर जंगम विश्व को भगवान का ही स्वरूप समझकर नमस्कार करता रहे । नेत्र भी वही है जो सर्वमें भगवद स्वरूप का दर्शन करता है तुम्हारे शरीर के जो अंग है कि भगवच्चरणकमलों का और भगवदीय जनों के चरणोदक का सेवन करते है । सच कहा जाय तो जो जीवन हरि परायण है वही जीवन है ॥४॥ परीक्षितमहाराज की जिज्ञासा से महाराज शुकमहर्षिजी का मन भगवान श्रीकृष्णमें निमग्न हो गया और कहने लगे कि हे महर्षिवृन्द ! महाराज परीक्षितजी ने जब उपरोक्त प्रकार के प्रश्न किये तब ब्रह्मर्षि शुक्राचार्यजी भगवान श्रीकृष्णचन्द्रजी में तन्मय हो गये । पुनः श्री परीक्षित राजा का समाधान का आरम्भ किया ॥५॥

श्रीशुक उवाच

कृष्णस्यासीत् सखा कश्चिद् ब्राह्मणो ब्रह्मवित्तमः । विरक्त इन्द्रियार्थेषु प्रशान्तात्मा जितेन्द्रियः ॥६

यदृच्छयोपपन्नेन वर्तमानो गृहाश्रमी । तस्य भार्या [1]कुचैलस्य क्षुत्क्षामा च तथाविधा ॥७

पतिव्रता पतिं प्राह म्लायता वदनेन सा । दरिद्रा[2] सीदमाना सा वेपमानाऽभिगम्य च ॥८

ननु ब्रह्मन् भगवतः सखा साक्षाच्छ्रियः पतिः । ब्रह्मण्यश्च शरण्यश्च भगवान् सात्वतर्षभः ॥९

कर्दमक्षमा

श्रीशुकः उवाच ।

कृष्णस्य, कश्चित्, ब्रह्मवित्तमः, ब्राह्मणः, इन्द्रियार्थेषु, कुचैलस्य, तस्य, भार्या, च, तथाविधा, पतिव्रता, सीदमा वेपमाना, च, अभिगम्य, सा, म्लायता, वदनेन, पतिम्, प्राह ॥७-८॥ ब्रह्मन् ! ननु, भगवतः, साक्षात्, श्रियः, पतिः, ब्रह्मण्यः, शरण्यः, भगवान्, सात्वतर्षभः, सखा, हे महाभाग ! साधूनाम्, परायणम्, तम्, उपैहि, ते, कुटुमबिने, च, सीदते, भूरि, द्रवि दास्यति, अधुना, भोजवृष्ण्यन्धकेश्वरः, सः, द्वारवत्याम्, आस्ते, सः, पादकमलम्, स्मरतः, आत्मानम्, अपि, यच्छति, किम् भजते, न, अत्यभीष्टान्, अर्थकामान्, अपि, यच्छति ॥९-१०॥

श्रीधरस्वामिकृता भावार्थदीपिका

तथाविधा कुचैला किञ्च क्षुत्क्षामा यत्किञ्चित्सम्पन्नमन्नं तस्मै परिविष्य स्वयं क्षुधा जीर्णा ॥७॥ पतिव्रता सती म्लाय शुष्यता वदनेन सीदमाना भर्तुर्भोगसम्पादनाशक्त्यावसीदन्ती वेपमाना भयेन कम्पमाना ॥८-१०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'श्रीदामानौ सखायौ द्वौ लाङ्गलिवासुदेवयोः । एको गोपाललीलायां द्वितीयः शास्त्रचिन्तने ॥

आद्यो गोपः परो विप्रो द्वावेव परमप्रियौ । रामकेशवयोर्ज्ञेयौ श्रीकृष्णस्य विशेषतः ॥' इति बृहत्संहितोक्तेः॥

'श्रीदामा नाम गोपालो रामकेशवयोः सखा ।' इदमेवार्धं पृथुकोपाख्यानेऽपि मण्डूकप्लुतिन्यायेनानेयम् । तत्र गोपाल श्लेषेण गा वेदलक्षणा वाणीः पालयते तदुक्तानुष्ठानेनेति गोपालो विप्र इति वक्ति । अत एव स्वामिचरणैः श्रीदामसुहृ व्याख्यातम् । किञ्च तत्रैव श्रीदामपदार्थोऽप्युक्तः-

"अमर्त्या लभ्या या सम्पत् सा श्रीरित्यभिधीयते । श्रीशेन दत्ता सा यस्मै स श्रीदामाभिधीयते ॥"

तच्चेहोक्तं स्वयं भगवता- "प्राप्तो मामस्य दास्यामि सम्पदोऽमर्त्यदुर्लभाः ।" इति एतेन श्रीदामपदं पृथुकोपाख नास्ति प्रत्युक्तं प्राप्तो मामिति वाक्येन सूचितत्वात् । ननु कश्चिदित्युक्तेः सुदामेतर एव किं न स्यात्तत्रेदं बोध्यम् । "श्रीदामनामभ भूम्यानीतेन्द्रवैभव" इत्यष्टोत्तरशतनामपाठात्स एवेति । साक्षात्तन्नाम तु श्रीकृष्णस्य ज्येष्ठगुरुभ्रातृत्वेन गुरुत्वादेव श्रीयो नोपात्तम् ।

"आत्मनाम गुरोर्नाम नामातिकृपणस्य च । श्रेयस्कामो न गृह्णीयात् ज्येष्ठापत्यकलत्रयोः ॥" इति स्मृतेः ।

यद्वा- 'ब्राह्मणो ब्रह्मवित्तमः' इत्यनेनैव सुदामश्रीदामनाम्नोर्ग्रहणमर्थैक्येन पर्यायत्वात्, तथा हि-ब्रह्मणो वेदस्य वि यस्मात् स ब्रह्मवित् । वेदनं वित् विल्लाभोऽतो भावे क्विप् । वेदाध्यापकत्वेनात्युदारोऽतिशयेऽर्थे तमपो विधानात् ।

"सर्वेभ्य एव दानेभ्यो विद्यादानं विशिष्यते । अहार्यधनमेतद्धि तद्दाता सर्वदायकः ॥" इति स्मृतेः ।

सुष्ठु ददातीति सुदामा । श्रीः ददातीति श्रीदामा । सुष्ठु श्रीशब्दवाचको वेद एव "सा हि श्रीरमृता सताम्" इति श्रुतेः तस्य विप्रस्य । तथाविधा भर्तृवन्मलिनवस्त्रा । न केवलं मलिनाम्बरैरेवेत्याह-किञ्चेति ॥७-८-९॥

---

[1] कुचैला च-गो. प्रे. टी. । [2] दारिद्र्यात्सीदमाना सा-वीर. ; दरिद्रंसाध्व्यशनया-विज. ।

कृष्णस्येति

इति बृहत्सहस्रनामपाठा

इन्द्रियार्थेषु विषयेषु वि

गृहाश्रम्यपि यदृच्छया प्र

चासीदिति पूर्वेणैवान्वय

च ततो भगवति भक्तीत

एव श्रियः पतिः ननु ता

कुत इति चेत्तत्राह-शरण्य

कृष्णस्य सर्वचि

मध्ये श्रेष्ठ इत्यर्थः-भगव

चित्तं यस्य सः तच्च कुतः

समीपे लब्धेन स्वयमुपस्थि

पूर्वेणैवान्वयः ॥७॥ 'वै' अ

स्मरणादिना किंवा प्रणयेन

सदावशा द्रवती ओत वेपम

दरिद्रम् । यतो रङ्कमिति-अ

भगवत इत्यादिना । साक्षा

गौरवात् । श्रियः पतिरिति

ब्राह्मणहितकारीति । ननु ब्र

चेत्तत्राह-भगवान् परमदया

कारुण्याद्यशेषगुणप्रकटनाथ

चेत्तत्राह-सात्वतर्षभः कंसभ

सहजकारुण्यम् अतस्तस्य

उक्तिमेवाह-कृष्णस

हेतुः प्रशान्तः आत्मा मनो

एवम्भूतः कृष्णस्य सखा आ

यदृच्छया लब्धं तस्मै परिविष्य

शुष्यता वदनेन पतिं प्राह ॥८॥

। कथम्भूतः ? साक्षाच्छ्रियो

आह-ब्रह्मण्य इति । ब्रह्मणि

आह-शरण्यः चतुर्विधपुरुषार्थ

परत्वेन न मामाद्रियेतेत्यत आह

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कृष्णस्येति युग्मकम्। सर्वचित्ताकर्षकसद्गुणनिधेः कश्चिदेकः श्रीदामनामा "श्रीदामरङ्कभक्तार्थं भूम्यानीतेन्द्रवैभवः" इति बृहत्सहस्रनामपाठात् ब्राह्मणत्वेऽपि विशेषमाह-ब्रह्मवित्तमः वेदार्थविदां श्रेष्ठ इत्यर्थः। श्रीभगवद्भक्त्येकनिष्ठत्वात् अत एव इन्द्रियार्थेषु विषयेषु विरक्तः कुतः प्रकर्षेण शान्तः कामादिशोकरहित आत्मा चित्तं यस्य सः तच्च कुतः जितेन्द्रियः ॥६॥ अतो गृहाश्रम्यपि यदृच्छया प्रयत्नं विनापि उपपन्नेन समीपलब्धेन अर्थेन वर्तमानः वृत्तिं कल्पयन् कुचेलस्य जीर्णमलिनक्षुद्रवर्णस्य भार्या चासीदिति पूर्वेणैवान्वयः। तथाविधा तादृशसद्गुणा ॥७॥ वदनम्लान्यादित्रयं प्रथमतो भर्तृभोगसम्पादनाऽशक्त्या निरन्तरबुभुक्षयैव च ततो भगवति भक्तीतरप्रार्थनानर्हत्वभावनया पतिभयेन सम्भवति ॥८॥ भगवतः पूज्यस्य भवत इत्यर्थः। साक्षात्सर्वेषां प्रकट एव श्रियः पतिः ननु तादृशेन सहाधमस्य मम सख्यं कुत इति चेत्तत्राह-ब्रह्मण्यः ब्राह्मणहितकारीति ननु तादृशं ब्राह्मण्यं च मम कुत इति चेत्तत्राह-शरण्यः शरणागतवत्सल इत्यर्थः। कोऽसौ ? तत्राह-भगवान् सात्वतर्षभः तद्रूपत्वेनावतीर्णोऽयमित्यर्थः ॥९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णस्य सर्वचित्ताकर्षकसद्गुणनिधेः कश्चिदेकः श्रीदामनामा ब्राह्मणत्वेऽपि विशेषमाह-ब्रह्मवित्तमो ब्रह्म वेदस्तदर्थविदां मध्ये श्रेष्ठ इत्यर्थः-भगवद्भक्त्येकनिष्ठत्वात्। अत इन्द्रियार्थेषु विषयेषु विरक्तः कुत ? प्रकर्षेण शान्तः कामादिक्षोभरहित आत्मा चित्तं यस्य सः तच्च कुतः ? जितानि वशीकृतानि इन्द्रियाणि सर्वाणि येन सः ॥६॥ अतो गृहाश्रम्यपि यदृच्छया प्रयत्नं विनोपपन्नेन समीपे लब्धेन स्वयमुपस्थितेन वा द्रव्येण वर्तमानो वृत्तिं कल्पयन् कुचेलस्य जीर्णमलिनक्षुद्रवर्णस्य च अपि भार्यापि आसीदिति पूर्वेणैवान्वयः ॥७॥ 'वै' अपि भयेन वेपमानापि अभिमुखे गत्वा चकारात् प्रणम्य च भयेनैव म्लायता वदनेन प्रकर्षेण श्रीभगवत्सख्यस्मरणादिना किंवा प्रणयेनाह। कुतः ? पतिव्रता किञ्च दरिद्रं दुःखितमित्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, क्षुत्क्षामत्वेनैव सीदमाना मदावशा द्रवती ओत वेपमाना किञ्च म्लायता वदनेन विशिष्टा यतः पतिव्रता इति पत्युरपि तादृशत्वं ध्वनितम्। तदेवाभिव्यञ्जयति-दरिद्रम्। यतो रङ्कमिति-अतः प्राह-वै प्रसिद्धौ ॥८॥ ननु भो ब्रह्मन्! वेदस्वरूपेति त्वया तत्सर्वं विज्ञायत एवेति भावः। तदेवाह-भगवत इत्यादिना। साक्षाच्छ्रियः पतिः स्वयमेव प्रयत्यक्षीभूतो वा लक्ष्मीकान्तः भगवतः सखा भवत इति वक्तव्ये भगवत इति गौरवात्। श्रियः पतिरिति सर्वविभूतिप्रदानसामर्थ्यमुक्तम्। ननु तादृशेन सहाधमस्य मम सख्यं कुत इति चेत्तत्राह-ब्रह्मण्यो ब्राह्मणहितकारीति। ननु ब्राह्मण्यं च मम कुत इति चेत्तत्राह-शरण्यः शरणागतवत्सल इति। ननु शरणागतलक्षणमपि नास्तीति चेत्तत्राह-भगवान् परमदयालुरित्यर्थः। कुतः ? सात्वतर्षभो यादवेन्द्रः कृपयैव यदुकुलेऽवतीर्णत्वात्। यद्वा, तत्रापी सात्वतर्षभः कारुण्याद्यशेषगुणप्रकटनार्थं यदुकुलेऽवतीर्य तत् श्रेष्ठतां प्राप्त इत्यर्थः। यद्वा, ननु तथापि केन हेतुना मयि तेन कृपा कार्येति चेत्तत्राह-सात्वतर्षभः कंसभयादिनाऽतिदुःखितानां यादवानां परिपालक इत्यर्थः। इति दीनवात्सल्यं सूचितम्। यद्वा, सात्वतर्षभत्वेन सहजकारुण्यम् अतस्तस्य कृपायां कृपालुत्वमेव हेतुः न तत्रान्योऽन्वेषणीय इति भावः ॥९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४-१५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उक्तिमेवाह-कृष्णस्येत्यादिना यावदुत्तराध्यायसमाप्ति। ब्रह्मवित्तमः ब्रह्मविदां श्रेष्ठः इन्द्रियार्थेषु शब्दादिविषयेषु विरक्तः तत्र हेतुः प्रशान्तः आत्मा मनो यस्य जितानीन्द्रियाणि बाह्यानि येन सः ॥६॥ यदृच्छयोपपन्नेन दैवाल्लब्धेनान्नादिना वर्तमानः जीवन् एवम्भूतः कृष्णस्य सखा आसीदिति सम्बन्धः। तस्य ब्राह्मणस्य कुचेलाख्यस्य कुत्सितचेलमस्येतीदमन्वर्थं नाम भार्या क्षुत्क्षामा यदृच्छया लब्धं तस्मै परिविष्य स्वयं क्षुधा जीर्णा तत्र हेतुः तथाविधा पतिवत् जितेन्द्रिया ॥७॥ अत एव पतिव्रता एवम्भूता सा म्लायता शुष्यता वदनेन पतिं प्राह ॥८॥ तदेवाह-नन्विति सार्धैस्त्रिभिः। हे ब्रह्मन्! भगवतः पूज्यस्य तव यः सखा कृष्णः तमुपैहि समीपं गच्छ। कथम्भूतः ? साक्षाच्छ्रियो लक्ष्म्याः पतिः तव दारिद्र्यापनयनं तस्य कियदिति भावः। ननु श्रियः पतिश्चेन्मां नावलोकयेदपीत्यत आह-ब्रह्मण्य इति। ब्रह्मणि ब्राह्मणकुले साधुः तस्मात्त्वाम् आदरिष्यत इति भावः। अतः श्रियः पतिश्चेन्मोक्षदो न तु वित्तद इत्यत आह-शरण्यः चतुर्विधपुरुषार्थार्थिनां शरणार्हः अथापि न मदभिप्रेतं जानीयादित्यत आह-भगवान् ज्ञानशक्त्यादिषाड्गुण्यपूर्णः अथापि यत्नेन न मामाद्रियेतेत्यत आह-सात्वतर्षभः निरतिशयसौशील्यादेव सात्वतश्रेष्ठतयावतीर्ण इति भावः ॥९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

तथाविधा भर्तृवन्मलिनवस्त्रा ॥७॥ म्लायता म्लानं गच्छता अशनया वेपमानेत्येकं पदम्। अशनाय अशनेच्छया कम्पमाना ॥८-९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥४-१६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥४-१५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥५-१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

तथाविधा तादृशगुणयुक्ता क्षुत्क्षामा चेति चकारात् क्षुत्क्षामत्वमित्येको गुणस्तु तस्मादप्यधिकस्तस्याः प्राप्तं यत्किञ्चित् तस्मै परिवेष्य स्वयं क्षुधयैव स्थितत्वादिति भावः ॥७॥ सीदमाना भर्तृभोगसम्पादनासामर्थ्यात् सीदन्ती वेपमाना भगवति भक्तीतरप्रार्थनाया अनर्हत्वात् पतिभयेन सकम्पा ॥८॥ ननु श्रीपतिना दीनस्य मम कुतः सख्यं तत्राह-ब्रह्मण्यः मम तादृ ब्राह्मण्यमपि नास्तीति चेत् शरण्यः भक्त्यभावान्मम शरणागतत्वमपि नास्तीति चेत् भगवान् सर्वज्ञतया तव दुःखं दृष्ट्वा दयिष्य एवेत्यर्थः। ननु स्वकर्मफलभोगेषु मद्विधेष्वनन्तेषु दुःखिजीवेषु मध्ये सर्वत्र समः स मह्यमेव कथं धनं दद्यादिति चेन्मैवमित्याह-सात्वतां भक्तानाम् ऋषभः पतिरिति स मा ददातु नाम किन्तु व्यजनादिभिस्तं परिचरन्तः परमकृपालवस्तद्भक्तास्तु दास्यन्त्येवेति भावः। सात्वतान् यदुवंश्यान् स पालयत्येव त्वत्पालने तस्य को भारः को वा दोषो भवितेति भावः ॥९॥

गूढार्थदीपिनी

कश्चित् सुदामेति इन्द्रियार्थेषु विषयेषु। साक्षात् तन्नाम तु श्रीकृष्णस्य ज्येष्ठगुरुभ्रातृत्वेन गुरुत्वादेव श्रीशुकेन नोपात्तम्। सुदामश्रीदाम्नोः पर्यायवाचित्वं च ज्ञेयम् ॥६॥ सुष्ठश्रीशब्दावपि पर्यायवाचिनौ। सुष्ठु श्रियं वा ददातीति सुदामा श्रीदामेति। यदृच्छया देवेच्छया प्राप्तेन अन्नेन वर्तमानो जीविकां कुर्वन् आसीत्। तथाविधा क्षुद्दुर्बला कुचैला भार्या च आसीत् ॥७॥ चकारोऽनुक्तसमुच्चयार्थः। एकदा म्लायता शुष्यता वदनेन उपलक्षिता सती सा पतिमभिगम्य प्राहेत्यन्वयः। अवीसदमान भोग्यवस्तुनोऽभावात् क्लिश्यन्ती वेपमाना कम्पमाना च ॥८॥ सात्वतेषु यादवेषु श्रेष्ठः ॥९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तथाविधा तादृशगुणयुक्ता क्षुत्क्षामा च यदृच्छयोपपन्नं संस्कृत्य बहुमानेन भर्त्रे परिवेष्य स्वयं क्षुधा जीर्णा अने गुणेन भर्तृतोऽप्यधिकेत्यर्थः ॥७॥ एकदा अधिगम्य म्लायता शुष्यता वदनेन पतिं प्राह कथम्भूता सीदमाना भर्तुर्यथार्थभोजनाच्छादनसम्पादनेन सीदन्ती यतः पतिव्रताः वेपमाना निष्कामभक्तं धनार्थं भगवति नियोजनेन भर्तृक्रोधसम्भावन कम्पमाना ॥८॥ साक्षाच्छ्रीः स्वयं श्रीः रुक्मिणी तस्याः पतिः ॥९-१०॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

कथामाह-कृष्णस्यासीदिति। स पूर्वमपि कृष्णस्यैवासीत् इदानीं तु सखा बाल्ये मित्रं कश्चिदिति विशेषतो देवांशत्वनिराकर किन्तु केवलं स जीवः तर्हि तेन सह कथं सख्यमासीत्तत्राह-ब्राह्मण इत्यादिसप्त विशेषणानि येन षड्गुणैश्वर्ययुक्तो भगवांश्च प्रतिष्ठितो भवति। ततो भगवानेव भगवतः सखा सम्भवतीत्युक्तं भवति। तत्र ब्राह्मणः श्रियो रूपं ब्रह्मानन्दत्वाल्लक्ष्म्याः अयं ब्राह्मणः सम्बन्धी ब्रह्मसम्बन्धयोग्यतामेव सम्पादयति न जीवसम्बन्धमिति प्रकरणाद्ब्राह्मण्यं निरुक्तम् अनेन एतादृश यददृष्टं भगवदिच्छा वा तेनैवास्य सख्यं जातमित्युक्तं भवति। ब्रह्मविदां मध्ये श्रेष्ठः ब्राह्मणोत्कर्षः परमोऽयं ज्ञानस्यैतद्रूपं वि इति इन्द्रियाणामर्थेषु सहजेषु रागाभावः वैराग्यस्य रूपं प्रकर्षेण शान्तः आत्मा यस्येति त्रितयानन्तरं धर्मी निरूपितः ततो जितेन्द्रि ऐश्वर्ययुक्तः ॥६॥ यदृच्छयोपपन्नेन वर्तमानः वीर्यवान् इदं त्वतिसहनं परमवीर्यकार्यं गृहाश्रमी गृहस्थः एतत्कीर्तिरूपं नन्वेतादृ गृहस्थाश्रमो न युक्त इति शङ्कां वारयितुमाह-तस्य भार्या कुचेलस्य क्षुत्क्षामा च तथाविधेति। पूर्वं परमहंसगृहस्थनिर्णये यद्येतादृ भार्या लभ्येत तदा गार्हस्थ्यमुत्तमम् एतदभावे पारमहंस्यमिति अन्यथा पुरुषोर्धयुगल इति पुरुषार्थसाधने खण्डः स्यात्। कुचेलस्य

तस्यां रागाभावो
क्षामा कृशा तदपे
तथाविधा कुचेला
यथा व्रती स्वव्रतोत
म्लायता वदनेनेति
नास्तीत्याशङ्कायाम
दरिद्रा सीदमाना से
भविष्यतीति भयात
पतनदशापन्नमिति अ
॥८॥ तस्या वाक्यानि
नन्विति कोमलसम्ब
त्वयि समर्पितम् अतो
शङ्काव्युदासार्थं सख
सर्वाः सम्पदः तदध
शरण्यश्च शरणं गच्छ
सति पदार्थक्षयः अल
आह-सात्वतर्षभ इति

शुकोक्तिः

शुद्धचित्तो जितेन्द्रिय
भार्या स्त्री तथाविधा त
म्लायता वदनेन शुष
सात्वतपुङ्गवः शरण्यो

कश्चिद् ब्राह्मण
विरक्त इति। तत्र हेतुमाह-
ब्रह्मविदां मध्ये श्रेष्ठः ॥६॥
सूचयन्नाह-गृहाश्रमीति।
क्षुधा जीर्णाऽऽसीत्। तत्र
चैकदा म्लायता शुष्यता व
सीदमानेति। भर्तृभोगसम्प
निश्चितमेतत्। ब्राह्मणत्वात्त
लक्ष्म्याः पतिः श्रीकृष्णः स
क्लिश्यमानाय। तत्र हेतुम
ब्राह्मणभक्त इत्यर्थः। शरण

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

तस्यां रागाभावो निरूपितः । रागिणां प्रथमतो वस्त्रालङ्करणमिति तस्यां रागाभावे अस्यापि हेतुमाह-क्षुत्क्षामेति । सर्वथा क्षुधा क्षामा कृशा तदपेक्षया तस्याः व्रतमधिकमिति पदार्थोत्पत्तावेक एव प्रकारः तत्रापि विशेषभोजनादाधिक्यं चकारात्तद्धर्मयुक्तापि तथाविधा कुचेला अनेन तस्मिन्नपि तस्याः रागाभावो निरूपितः ।।७।। तस्याः कामनायां प्रथमतो हेतुमाह-पतिरेव व्रतं यस्याः यथा व्रती स्वव्रतोत्कर्षं वाञ्छतीति तथा सापि भर्तुः सर्वसमृद्धिं वाञ्छतीति पतिव्रतात्वादेव अन्यतस्तत्सम्पादनम् अतः पतिं प्राह म्लायता वदनेनेति दैन्यख्यापनं ननु मनसि कामाभावे दैन्यं कपटरूपमिति पातिव्रत्यविरुद्धं विद्यमाने तु तथाविधत्वं नास्तीत्याशङ्कायामाह-सेति । सा पतिव्रता व्रतार्थं तत्साधनमिति न दोष इति भावः । स्वतः स्वव्रतोत्कर्षो नास्तीति ज्ञापयितुमाह-दरिद्रा सीदमाना सेति । दारिद्र्याद् दुर्गतेः न कोऽप्यर्थः तत्राप्यवसादं शरीरेण प्राप्नोति तत्र प्रथमत एव देहवियोगे व्रतभङ्गोऽपि भविष्यतीति भयात् तथाकरणं यतः सा पूर्ववत् तर्ह्येतावत्कालं कथं नोक्तवती तत्राह-वेपमानेति । भयादिति केनचित् शरीरं पतनदशापन्नमिति अतः परं कालो विलम्बं न सहत इति आभिमुख्येनागत्य चकारात् तन्मनःप्रीतिं कृत्वा स्तोत्रं वा वक्ष्यमाणमाह ।।८।। तस्या वाक्यानि निरूपयति-नन्विति सार्धैस्त्रिभिः । सर्वथा अवसादे ईश्वरोपसर्पणं विहितम् अतः आपद्धर्मत्वात् सा बोधयति नन्विति कोमलसम्बोधनम् । ब्रह्मन्नित्यविकृतत्वाय । सिद्धदशैषा तव विषयभोगेऽपि न स्वरूपनाशः किञ्च भगवता स्वस्य रूपं त्वयि समर्पितम् अतो भगवतस्तव सखा भगवान् साक्षात् अनेन प्रतिग्रहस्तद्दोषश्च निवारितः । तस्याप्यस्मत्तुल्यभावे व्यर्थमुपधावनमिति शङ्काव्युदासार्थं सख्यपदे नैव भगवत्त्वं प्राप्तमिति साक्षाच्छ्रियः पतिरित्याह-मूर्तिमत्याः आधिदैविक्याः लक्ष्म्याः पतिः तेन सर्वाः सम्पदः तदधीना इत्युक्तं तथाप्यस्मभ्यं कथं दास्यतीत्यत्र हेतुमाह-ब्रह्मण्य इति । चकारात् स्वतोऽप्युदारः । किञ्च शरण्यश्च शरणं गच्छति तस्मै च सर्वं प्रयच्छति शरणगतावपि गमनमात्रेणैव दास्यतीति चकारार्थः नन्वेवं सति सर्वेभ्यो दाने सति पदार्थक्षयः अल्पावशेषे स्वार्थं वा स्थापयतीति शङ्कां वारयति भगवानिति । पूर्णसर्वशक्तिः सेवकाः प्रतिबन्धं करिष्यन्तीत्यत आह-सात्वतर्षभ इति । सात्वतानां परमभक्तानाम् ऋषभः स्वामी ।।९।।

सुबोधिनीसारः

शुकोक्तिः । ब्राह्मणो वेदवित्तमः कश्चित्कृष्णस्य सखा मित्रमासीत् । इन्द्रियाणामर्थेषु विषयेषु विरक्तो निःस्पृहः शुद्धचित्तो जितेन्द्रियः ।।६।। गृहस्थो यदृच्छया स्वत उपपन्नेन प्राप्तेन वर्तमानो जीवन् कुचैलस्य जीर्णमलिनवस्त्रस्य तस्य भार्या स्त्री तथाविधा तादृशी कुचैला क्षुधा क्षामा कृशा ।।७।। पतिव्रता दरिद्रा सीदमाना दुःख्यन्ती कम्पन्ती सती अभिगम्य म्लायता वदनेन शुष्यता मुखेन पतिं प्राह ।।८।। हे ब्रह्मन् ! भगवतो भवतः साक्षात् श्रियः पतिः लक्ष्मीशो भगवान् सात्वतपुङ्गवः शरण्यो ब्रह्मण्यश्च सखा नूनमेव ।।९।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कश्चिद् ब्राह्मणः कृष्णस्य सखा आसीत् विषयासक्तस्य कथं तत्सखित्वं सम्भवति इत्याशङ्क्ऽऽह-इन्द्रियार्थेषु विषयेषु विरक्त इति । तत्र हेतुमाह-जितेन्द्रिय इति । तत्रापि हेतुमाह-प्रशान्तः रागलोभादिरहितः आत्मान्तःकरणं यस्य स इति । तत्रापि हेतुमाह-ब्रह्मविदां मध्ये श्रेष्ठः ।।६।। यदृच्छयोपपन्नेन प्रारब्धवशात् प्राप्तेनान्नादिना वर्तमानो जीवन् । तस्य प्रशान्तात्मत्वेऽपि परदृष्ट्या कष्टाधिक्यं सूचयन्नाह-गृहाश्रमीति । कुत्सितं चैलं वस्त्रं यस्य तस्य भार्या च क्षुधा क्षामा दुर्बला आसीत् यदृच्छालब्धमन्नं तस्मै परिविष्य स्वयं क्षुधा जीर्णाऽऽसीत् । तत्र हेतुमाह-पतिव्रतेति । पतिसेवापरा । तत्रापि हेतुमाह-तथाविधेति । प्रशान्त्यादिगुणविशिष्टेत्यर्थः ।।७।। सा कैवल म्लायता शुष्यता वदनेनोपलक्षिता वेपमाना दुर्बलतया कम्पमानाङ्गी दरिद्रं पतिमभिगम्य प्राहेत्यन्वयः । एवं भाषणे हेतुमाह-सीदमानेति । भर्तृभोगसम्पादनचिन्तया आकुलचित्तेत्यर्थः ।।८।। आपत्सु हरिशरणमेव तदुद्धारकम् इति सिद्धान्तमङ्गीकृत्याह-नन्विति । निश्चितमेतत् । ब्राह्मणत्वात्तव याचनेऽपि न कापि क्षतिः इति सूचयति सम्बोधनेन-ब्रह्मन्निति । भगवतः वैराग्यादिगुणवतस्तव साक्षाच्छ्रियो लक्ष्म्याः पतिः श्रीकृष्णः सखा तमुपैहि उपगच्छ । स ते तुभ्यं भूरि बहु द्रविणं दास्यतीति द्वयोरन्वयः । दाने हेतून् सूचयन्त्याह-सीदते क्लिश्यमानाय । तत्र हेतुमाह-कुटुम्बिन इति । ननु तस्य महतो दर्शनादिकमेव मम कथं स्यात् इत्याशङ्क्ऽऽह-ब्रह्मण्यश्चेति । ब्राह्मणभक्त इत्यर्थः । शरण्यः शरणार्हश्चेति । तत्र हेतुमाह-सात्वतानां भक्तानाम् ऋषभः पालक इति ।।९।।

अन्वितार्थप्रकाशिका

कृष्णस्येति युग्मम् । ब्रह्मवित्तमः ब्रह्मविदां श्रेष्ठः इन्द्रियार्थेषु विषयेषु विरक्तः प्रशान्तात्मा जितेन्द्रियः यदृच्छयोप प्रारब्धवशात् प्राप्तेनान्नादिना वर्तमानो जीवन् तस्य प्रशान्तात्मत्वेऽपि परदृष्ट्या कष्टाधिक्यं गृहाधिक्यं गृहाश्रमीकश्चिद् ब्राह्म कृष्णस्य सखा आसीत् । अस्य श्रीदामेति नाम "श्रीदामविप्रभक्तार्थं भूम्यानीतेन्द्रवैभवः" इति बृहद्विष्णुसहस्रनामस्तोत्रवच कुत्सितं चैलं वस्त्रं यस्य तस्य श्रीदाम्नः भार्या च तथाविधा तादृशगुणा यदृच्छालब्धमन्नं तस्मै परिविष्य स्वयं क्षुधा सा दु आसीत् ॥६-७॥ पतिव्रतेति । पतिव्रता सा चैकदा म्लायता शुष्यता वदनेनोपलक्षिता दरिद्रा वेपमाना दुर्बलतया कम्पमाना सीदमाना भर्तृभोगसम्पादनचिन्तया आकुलचित्ता । शानजार्षः चानश् वा । सा एकदा दरिद्रं पतिमभिगम्य चाजितेन्द्रियजितेन्द्रि ॥८॥ नन्विति । हे ब्रह्मन् ! ननु भगवतस्तव सखा सात्वतर्षभः यादवश्रेष्ठः साक्षाच्छ्रियः पतिः ब्रह्मण्यः ब्राह्मणभक्तः शर शरणार्हः भगवान् अस्ति ॥९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यदृच्छयोपपन्नेन प्रारब्धकर्मप्राप्तेनान्नादिना कुचैलस्य जीर्णवस्त्रस्य तस्य सुदाम्नः तथाविधा तादृक् गुणा क्षुत्क्षा क्षुधा पीडिता ॥७॥ म्लायता ग्लानिं प्राप्नुवता भर्तुः अन्नवस्त्रोत्पादनासमर्थत्वात् । सीदमाना स्वधर्मभङ्गभयेन वेपमाना सती ॥८॥ भगवतः पूज्यस्य भवतः ॥९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह-कृष्णस्येत्यादिना यावदुत्तराध्यायसमाप्ति । कृष्णस्येति । ब्रह्मवित्तमः ब्रह्मविदां श्रेष्ठः इन्द्रियार्थे शब्दादिविषयेषु विरक्तः कुतः ? प्रशान्त आत्मा मनो यस्य सः जितानीन्द्रियाणि येन सः यदृच्छया उपपन्नेन दैवाल्लब्धेनान्ने । अन्नादिनेति शेषः । वर्तमानो जीवन् गृहाश्रमी गृहाश्रमस्थः एवंविधः कश्चिद् ब्राह्मणः कृष्णस्य सखा आसीत् ॥६॥ तस्य । कुचैलस्य कुत्सितवसनस्य तस्य विप्रस्य तथाविधा कुचैला क्षुत्क्षामा यदृच्छालब्धं स्वामिने परिविष्य स्वं क्षुत्सहनेन क्षाम गता भार्या च आसीत् । सा पतिव्रता अत एव सीदमाना भर्तुर्भोगसम्पादनाऽशक्त्यावसीदती वेपमाना भयेन कम्पमाना स दरिद्रं पतिम् अभिगम्य च सम्प्राप्यैव म्लायता ग्लानिमुपगच्छता वदनेन उपलक्षिता सती प्राह ॥७॥ तदेवाह सार्धैस्त्रिभिः नन्विति । हे ब्रह्मन् ! साक्षात् श्रियो लक्ष्म्याः पतिः लक्ष्मीकान्तस्य कृष्णस्य तव दरिद्रापनयनं कियदिति भावः । ननु श्रि पतिश्चेन्मामपि नावलोकयेदित्यत आह । ब्रह्मण्य इति । ब्रह्मणि ब्राह्मणकुले साधुः ब्रह्मण्यश्च ब्राह्मणप्रतिपालक एवेत्यर्थ ब्रह्मण्यत्वात् त्वामादरिष्यत्येवेति भावः । शरण्यश्च चतुर्विधपुरुषार्थिनां शरणं गतानां तदभीष्टप्रदोऽपीति भावः । भगव षाड्गुण्यपूर्णः सात्वतर्षभः कृष्णः भगवतः पूज्यस्य तव सखा अस्ति ननु ॥८॥ तमिति । हे महाभाग ! साधूनां च भवा साधूनामेव परायणं परमप्राप्यं तं श्रीकृष्णम् उपैहि । श्रीकृष्णसमीपे गच्छेत्यर्थः । उपेताय मह्यं स किं दास्यतीत्यत आह कुटुम्बिने सीदते क्लिश्यमानाय ते तुभ्यं भूरि पुष्कलं द्रविणं धनं दास्यति ॥९॥

कृष्णप्रिया

अब श्रीशुक्राचार्यजी महाराज कहने लगे कि - राजन् ब्रह्मनिष्ठ ब्रह्मर्षि एक विप्रवर्य भगवान श्रीकृष्णचन्द्र के अत्यंत प्रिय सखा थे । इन्द्रिय के विषयों से सर्वथा विरक्त थे, सम्पूर्ण जितेन्द्रिय और प्रशान्त आत्मा थे ॥६॥ यद्यपि वह गृहस्थाश्रमी थे, विशाल परिवार भी था, न कभी संग्रह किया था परम निग्रही थे । केवल श्रीकृ भगवान के अनुग्रह से जो उपलब्ध होता था उसमें असाधारण सन्तोष था । लेकिन शरीर और शरीर के भो आसक्ति न थी । शरीर के पुराने एवं फटे टुटे थे परन्तु पूर्ण स्वच्छ थे । भगवत् कृपासे विप्रर्षि जी की पत्नी गुणों से पूर्ण थी । उन दोनों के अंग भी क्षुधा से दुर्बल हो रहे थे ॥७॥ इस तरह जीवन चलता रहा । लेकि एकदिन दरिद्रता की पराकाष्ठा आ गइ । अत्यंत दु:खिनी पतिव्रता पत्नी क्षधा से काम्पती हुई अपने पतिदे सन्मुख आयी और मलिन मुरझाये हुए मुख से नम्रता पूर्वक निवेदन करने लगी ॥८॥ हे ब्रह्मनिष्ठ महर्षि ! सा

श्रीपति भगवान् श्रीकृष्ण अ
और ब्राह्मणों के उत्तम भक्त

तमुपैहि महाभाग
आस्तेऽधुना द्वार
किं न्वर्थकामान् भ
स[2] एवं भार्यया
इति सञ्चिन्त्य मनस

एवम्, सः, विप्रः, भ
मनसा, गमनाय, मतिम्, दधे, व

भोजवृष्ण्यन्धकेश्वर इ
अप्यस्ति किमस्तीति प्रश्नः ॥

तं भगवन्तम् । ते तुभ्य
कुर्वन्तीति प्रसिद्धेः । परमार्थमाह
॥११॥ स विप्रः ॥१२॥ इति हरि

तमिति सार्धकम् । अत
परायणं परमाश्रयं तदेकाश्रयत्वेन
हे महाभागेति । अन्यथा तेन सह
सीदते दारिद्र्येण क्षुधादिना सदा
कदाचिदिन्द्रप्रस्थे कदाचिद्वृन्दाव
इति । तदितो नातिदूरं श्रीद्वारका
भोजादयः ईश्वराः सर्वसम्पत्तिम
नातिचिरकालगतमिदं वृत्तं ज्ञेयम्
स्मरतः तच्चिन्तनमात्रे प्रवर्तमाना
यथाविधि पूजयते वा जनाय अर्थ
तुभ्यमिति भावः । तेषां न्यूनत्वे
जगतो गुरुः सर्वधर्मोपदेष्टा ततो भ
क्रीडनकालिकं तुच्छमपि प्रार्थय
पश्चात्परमपदं चेति ॥११॥ स एव

---

१. पादयुगल-विज. । २. स

कृष्णप्रिया

श्रीपति भगवान् श्रीकृष्ण आपके सखा है। वह भक्तजनों के लिये साक्षात् इच्छा कल्पतरु है और शरणागतवत्सल और ब्राह्मणों के उत्तम भक्त है ॥९॥

तमुपैहि महाभाग साधूनां च परायणम् । दास्यति द्रविणं भूरि सीदते ते कुटुम्बिने ॥१०॥
आस्तेऽधुना द्वारवत्यां भोजवृष्ण्यन्धकेश्वरः । स्मरतः [1]पादकमलमात्मानमपि यच्छति ।
किं न्वर्थकामान् भजतो नात्यभीष्टाञ्जगद्गुरुः ॥११॥
स[2] एवं भार्यया विप्रो बहुशः प्रार्थितो [3]मुहुः । अयं हि परमो लाभ उत्तमश्लोकदर्शनम् ॥१२॥
इति सञ्चिन्त्य मनसा गमनाय मतिं दधे । [4]अप्यस्त्युपायनं किञ्चिद् गृहे कल्याणि दीयताम् ॥१३॥

कर्दमक्षमा

एवम्, सः, विप्रः, भार्यया, मुहुः, बहुशः, प्रार्थितः, अयम्, हि, परमः, लाभः, उत्तमश्लोकदर्शनम्, इति, सञ्चिन्त्य, मनसा, गमनाय, मतिम्, दधे, कल्याणि ! किञ्चित्, अपि, उपायनम्, गृहे, अस्ति, दीयताम् ॥१२-१३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भोजवृष्ण्यन्धकेश्वर इति तत्स्वीकारमात्रेण सर्वे ते दास्यन्तीति भावः। नात्यभीष्टान् परिपाकविरसत्वात् ॥११-१२॥ अप्यस्ति किमस्तीति प्रश्नः ॥१३-१४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं भगवन्तम्। ते तुभ्यम्। सीदते दरिद्राय ॥१०॥ ते भोजादयः। इति भाव इति-स्वामिनाऽऽदृतस्य भृत्याः परमादरं कुर्वन्तीति प्रसिद्धेः। परमार्थमाह-किन्त्विति। पाकविरसान् परिणामे सन्तापकरान्। जगद्गुरुः सर्वहितकर्तेति हेतुगर्भितविशेषणम् ॥११॥ स विप्रः ॥१२॥ इति हरिदर्शनलाभम् ॥१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तमिति सार्धकम्। अतस्तमुपैहि तत्समीपे गच्छ। ननु तथाऽप्यत्यन्तायोग्यत्वाल्लज्जया बिभेमि च तत्राह-साधूनां भवादृशां शरण्यं परमाश्रयं तदेकाश्रयत्वेन भयादिना तदनाश्रयणं सतामयुक्तमिति भावः। ननु साधुत्वे सति तदास्तां नाम अहं त्वसाधुरेवेत्याह-हे महाभागेति। अन्यथा तेन सह सख्यानुपपत्तेरिति भावः। अतो भवतानभ्यर्थितमपि धनं तच्च भूरि बहुलं ते तुभ्यं दास्यति किञ्च सीदते दारिद्र्येण क्षुधादिना सदा दुःखं लभमानाय किञ्च कुटुम्बिने इति दानपात्रता सूचिता ॥१०॥ नन्वसौ निजबन्धुसन्तोषार्थं कदाचिदिन्द्रप्रस्थे कदाचिद्वृन्दावने कदाचिद्युद्धार्थमन्यत्रापि गच्छेदिति दूरं गन्तुमशक्तेन मया कथं प्राप्तव्यमिति चेत्तत्राह-आस्त इति। तदितो नातिदूरां श्रीद्वारकां गच्छ। युद्धादिनिवृत्त्या यदुभिः सह विलासार्थमधुना तत्रैव निवासार्हत्वादिति भावः। यद्वा भोजादयः ईश्वराः सर्वसम्पत्तिमन्तो यस्मात् स इति गमनमात्रेणैव तव सर्वसम्पत्तिर्भवितेति भावः। यद्वा द्वारकावासतो नातिचिरकालगतमिदं वृत्तं ज्ञेयम्। ननु तथाप्ययोग्याय भूरि न दास्यत्येव तत्राह-स्मरत इति। चतुर्थ्याः षष्ठी पादकमलमेकमपि स्मरतः तच्चिन्तनमात्रे प्रवर्तमानायापि आत्मानं सर्वेश्वरमपि यच्छति तद्वश्यं करोतीत्यर्थः। भजतः भजते श्रवणाद्यशेषभक्तिं कुर्वते यथाविधि पूजयते वा जनाय अर्थकामान् किन्तु अर्थान् कामांश्च यच्छतीति किमुत वक्तव्यमित्यर्थः। किमुततरां सख्यसौभाग्ययुक्ताय तुभ्यमिति भावः। तेषां न्यूनत्वे हेतुः नात्यभीष्टान् परिणामविरसत्वेन प्रायोऽनभीष्टान् ननु तर्हि तानवज्ञया न दास्यत्येव तत्राह-जगतो गुरुः सर्वधर्मोपदेष्टा ततो भक्तस्य मनोरथं किमिति न पूरयेदिति भावः। यद्वा जगतो गुरुः पितेति अयम्भावः - यथा पिता क्रीडनकालिकं तुच्छमपि प्रार्थयमानाय बालकाय स्नेहेन तदिच्छया दत्ते पश्चाद्रत्नालङ्कारादिकमपि तथाऽसावर्थकामानपि ददाति आत्मपरमपदं चेति ॥११॥ स एवमिति सार्धकम्। भार्ययेत्यावश्यकतद्वरणार्थं तद्वचनं पाल्यमिति भावः। तत्रापि च विशेषेण

---

[1] पादयुगल-विज.। [2] स एवं-श्रीधर. वंशी. वीर. विज.। [3] मृदु-श्रीधर. वंशी.। [4] अथास्त्युपायनं-विज.।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रतिकामं पूरयतीति विप्रः तत्रापि बहुषु बहुलयुक्तिप्रदर्शनेन तत्रापि मुहुर्वारं वारं मृद्विति पाठे क्रियाविशेषणम् एवं प्रार्थितो हीत्यादि मनसा सञ्चिन्त्यैव गमनाय मतिं दधे । दीयतामित्यस्यानन्तरमुवाचेति शेषः । हे कल्याणि इति श्रीभगवद्दर्शन प्रवर्तनात् तत्प्रार्थनं च रिक्तपाणितादोषनिरासाय ॥१२-१३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतस्तमुपैहि, तत्समीपे गच्छ। ननु तथाप्यत्यन्तायोग्यत्वाल्लज्जे बिभेमि च, तत्राह-साधूनां भवादृशां परायणं परम तदेकाश्रयत्वेन सतां भयादिना तदनाश्रयणमयुक्तमिति भावः । ननु साधुत्वे सति तदास्तां नाम, अहन्त्वसाधुरेव, नेत्या महाभागेति, अन्यथा तेन सह सख्यानुपपत्तिरिति भावः। अतो भवता अप्रार्थितमपि धनं तच्च भूरि बहुलं ते तुभ्यं दास्यति ? सीदते दारिद्र्येण सदा क्षुधादिना दुःखं लभमानाय; किञ्च, कुटुम्बिने इति दानपात्रतापि सूचिता ॥१०॥ नन्वसौ निजबन्धुसन्तो कदाचिदिन्द्रप्रस्थे कदाचिन्मथुरायां कदाचित् मथुरायां कदाचिद्युद्धार्थमन्यत्रापि गच्छेदिति दूरं गन्तुमशक्न मया कथं प्राप्तव्य चेत्तत्राह-आस्त इति । तदितोऽनतिदूरे श्रीद्वारकां गच्छेति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, कुत आस्ते ? तदाह-भौ युद्धादि-निवृत्त्या यदुभिः सह विलासार्थमधुना तत्रैव निवासादिति भावः । यदूनां बहुलकुलभेदेऽप्येषामेवां प्राधान्यादिभक्तिविशेषाद्वा। यद्वा, भोजादय ईश्वराः सर्वसम्पत्तिमन्तो यस्मात् स इति गमनमात्रेणैव तव सर्वसम्पत्तिर्भवितेति । ननु तथाप्यत्ययोग्याय भूरि न दास्यत्येव तत्राह-स्मरत इति चतुर्थ्यां षष्ठी । पादकमलमेकमपि स्मरतस्तच्चिन्तन प्रवर्तमानायाऽप्यात्मानं सर्वेश्वरमपि यच्छति तद्वश्यं करोतीत्यर्थः । भजतो भजते श्रवणाद्यशेषभक्तिं कुर्वते यथाविधि पूजयं जनाय यद्वा, सख्येन भजते तुभ्यमर्थकामान् किमु अर्थान् कामांश्च नात्यभीष्टान् परिपाकविरसत्वेन प्रायोऽनभीष्टानपि यच्छ किमु वक्तव्यम् । अतो जगतो गुरुः शास्त्रादिद्वारार्थादिदोषदर्शकोऽपि तदिच्छया ददात्येवेत्यर्थः । यद्वा, ननु तर्हि न दास्य तत्राह-जगद्गुरुरिति । अयम्भावः-यथा पिता क्रीडनकादिकं तुच्छमपि प्रार्थयमानाय बालकाय स्नेहेन तदिच्छया पश्चाद्रत्नालङ्कारादिकमपि तथा असावर्थकामानादौ ददाति पश्चात् परमपदं चेति ॥११॥ भार्ययेत्यावश्यक-तद्भरणार्थं परिपाल्यमिति भावः । तत्र च विशेषेण प्राति कामं पूरयतीति विप्रः । तत्रापि बहुशश्चिरकालं बहुलन्यायादिप्रदर्शनेन वा मुहुर्वारं वारं मुहुरिति पाठे पाठान्तरे कृपाकोमलस्वभाव इत्यर्थः । प्रार्थितः सन् मनो दधे इति परेणान्वयः । यद्वा प्रार्थित इत्येतावत् वाक्यसमाप्तिः अतो गमनाय मतिं दधे प्राग्बहुशः दर्शनेनापि गमने स्थितं संशयं निरस्य निश्चयं कृतवानित्यर्थः । ननु तथाप्येकान्ति धनेच्छया यदयुक्तं तत्राह-अयमिति । यद्वा, मतिं मनस्तदनिच्छुमपि दधे युक्त्या प्रवर्तयामास । कयेत्यपेक्षायामाह-अयमिति एव अयमेव कोऽसावित्यत्राह-उत्तमेति । यस्य यशः श्रवणादिना संसारध्वंसादिकं भवति तस्य दर्शनं साक्षात्कार इत्ययं परम सर्वपुरुषार्थफलरूपाया भक्तेरपि तत्फलत्वात्। मनसा स्थीरीकृतेन सम्यक् दृढतया चिन्तयित्वा। हे कल्याणीति श्रीभगवद्दर्शन प्रवर्तनात्। तर्हि तद्दीयतां तत्प्रार्थनं च 'रिक्तपाणिर्न पश्येत राजानं देवतां गुरुम्' इत्यादिन्यायात् सख्यस्वभावाद्वा ॥१२-१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४-१५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तमेव किं विशिष्योपैहीति ब्रूषे इत्यत आह-साधूनां भवादृशां परमयनं प्राप्यम् उपेताय किं दास्यतीत्यत आह-दास्य भूरि पुष्कलं द्रविणं धनं सीदते क्लिश्यमानाय कुटुम्बिने च तुभ्यं दास्यति ॥१०॥ क्वास्त इत्यत आह-आस्ते द्वारकामेवाधुनाऽऽस्ते न तु शत्रुविजयाद्यर्थं क्वापि गत इति भावः । दास्यति वा न वेति संशयानं प्रत्याह-स्मरत इति एवात्मानमपि यच्छति ददाति किं पुनः दूरं गत्वा भजतो याचमानस्यार्थकामान् ददातीति वक्तव्यमित्यर्थः । तान् विशि नात्यभीष्टानिति । परिपाकविरसत्वादिति भावः । भर्तुर्भोगसम्पादनार्थमेवं प्रचोदितमिति न पूर्वोक्तजितेन्द्रियपातिव्रत्यादि ॥११॥ स इति । स विप्रः कुचेलस्य मृदुर्मृदुस्वभावत्वात् ओमिति वदन्निति भावः । उत्तमश्लोकस्य भगवतो दर्शनमित्यं लाभः ॥१२॥ इति मनसा सञ्चिन्त्य चिन्तापूर्वकं निश्चित्येत्यर्थः । वित्तलाभस्त्वानुषङ्गिक इत्यभिप्रेत्येति भावः । मतिं बुं चक्रे विधाय प्राहेत्यर्थः । तदेवाह-अपीति । हे कल्याणि ! उपायनं भगवते समर्पणीयं योग्यं वस्तु गृहे किमस्तीति प्रश्नः

सीदते अवसन्न
यच्छति किन्तु भजतः पु

साधूनां चेति ।
कुटुम्बिने इति दानपात्रत्वं
आस्त इति । अधुना न्यस्त
। ननु तदपि धनं प्रार्थयितु
ददाति किं पुनरकामान् प
दत्ते तेन तत्र गत्वा त्वया
द्योतितम् ॥११॥ बहुशः प्र
प्रसादयति- अयमिति ॥१

तमिति सार्द्धम् ।
आत्मानं स्वरूपमपि यच्छ
। मृदु क्रियाविशेषणम् । म

अर्थकामान् यच्छ
विजानतस्तवेति शेषः ॥११

किमतो यद्येवं त
दारिद्र्यादेवावसीयते तत्राह-
कथं सर्वपुरुषार्थनिधिः प्राप
तेषामपि परमयनं चकारो यु
भूरीति । तत्र हेतुः सीदते ते
शङ्कां व्युदस्यति-आस्तेऽधुन
निरूपिताः तथापि "दाता ज
प्रयच्छति । किम्बहुना ब्रह्मान
तदा न दद्यादित्यत आह-ना
किञ्चिदभीष्टत्वं वर्तत एव अ
वारयति-जगद्गुरुरिति । सर्वे
विषयासक्तः न ह्यन्येभ्यो वै

श्रीमद्विजयध्वजकृता पदरत्नावली

सीदते अवसन्नाय दरिद्राय ॥१०॥ अर्थकामान् यच्छतीति किन्नु वक्तव्यम्। किञ्च जगद्गुरुः अन्यमुक्तेभ्योऽन्यमिष्टं न यच्छति किन्तु भजतः पुरुषस्य यच्छत्येवेत्यर्थः। यद्वा ना परमपुरुषः अन्यमभीष्टं यच्छतीत्यतः तमुपैहीत्यन्वयः ॥११-१३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४-१६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥४-१५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥५-१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

साधूनां चेति। चकाराद्दीनानां च। यदि त्वमात्मानं साधुं न मन्यसे तदा दीनं तु भवस्येवेति भावः। अतः सीदते कुटुम्बिने इति दानपात्रत्वं द्योतितम् ॥१०॥ ननु स साम्प्रतमिन्द्रप्रस्थे द्वारकायां वा असुरमारणार्थमन्यत्र क्वाप्यास्ते वा तत्राह-आस्त इति। अधुना न्यस्तशस्त्रः स्वनगरादन्यत्र न यातीत्यर्थः। भोजवृष्ण्यन्धकेश्वर इति तत्स्वीकारमात्रेण तेऽपि दास्यन्तीति भावः। ननु तदपि धनं प्रार्थयितुमहं लज्जे तत्राह-स्मरत इति। चतुर्थ्यर्थे षष्ठी स्मरणमात्रं कुर्वते जनाय अप्रार्थकायापि स्वमात्मानमपि ददाति किं पुनरकामान् परिणामविरसत्वात्। दातुं नात्यभीष्टान् यतो जगतां गुरुर्हितकर्ता याचकानां त्विच्छया तानप्यप्रार्थितोऽपि दत्ते तेन तत्र गत्वा त्वया तूष्णीमेव स्थेयं स तु त्वदभीष्टं बहुधनं त्वद्धितकारित्वात् स्वाभीष्टं स्वचरणपद्ममाधुर्यं च दास्यतीति द्योतितम् ॥११॥ बहुशः प्रार्थित इति तस्याः भार्यात्वात् तस्य च मृदुत्वादिति भावः। तस्याः प्रार्थनया अप्रसन्नं मनः परामर्शेन प्रसादयति- अयमिति ॥१२॥ अप्यस्ति गृहे अस्ति चेद्दीयतां रिक्तपाणिः सख्युस्तस्य गृहं कथं यास्यामीति भावः ॥१३-१४॥

गूढार्थदीपिनी

तमिति सार्द्धम्। तं श्रीकृष्णमुपेहि गच्छ। सीदते दरिद्राय। भोजेति यादवानामवान्तरभेदाः ॥१०॥ स्मरतः स्मरते भजते आत्मानं स्वरूपमपि यच्छति ददाति तदा नात्यभीष्टान् अतितुच्छान् अर्थकामान् यच्छतीति किन्नु वक्तव्यम् ॥११॥ स इति सार्द्धम् मृदु क्रियाविशेषणम्। मतिं दधे चकार ॥१२॥ अपीत्यर्धम्। अपि यदि उपायनम् अस्ति तर्हि दीयताम् ॥१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अर्थकामान् यच्छतीति किन्नु वक्तव्यम्। कथम्भूतान् नात्यभीष्टान् धर्मार्थमपि नेहेत यात्रार्थं बाधा नो धनमिति सिद्धान्तं विजानतस्तवेति शेषः ॥११-१४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

किमतो यद्येवं तत्राह-तमुपैहि तन्निकटे गच्छेति प्रार्थना। ननु महाभाग्यव्यतिरेकेण कथं भगवत्समीपगमनं तदभावश्च दारिद्र्यादेवावसीयते तत्राह-महाभागेति। पातिव्रत्येन तद्भाग्यं प्रादुर्भूतं पश्यन्ती तथा सम्बोधयति अनेनाल्पद्रव्येऽपि भाग्यरहितः कथं सर्वपुरुषार्थनिधिः प्राप्स्यतीति परिहृतम् इदानीमेव प्रादुर्भावात् किञ्च साधूनां च परायणं ये स्वभावत एव दरिद्राः परमसाधवः तेषामपि परमयनं चकारो युक्त्यन्तरमिदमिति ख्यापयितुं नन्वेवमपि को वेद दास्यति न वेति। शङ्काव्युदासार्थमाह-दास्यति द्रविणं भूरीति। तत्र हेतुः सीदते ते कुटुम्बिन इति। सीदत्कुटुम्बी पात्रं तथापि भवान् सर्वगुणसम्पन्नः ॥१०॥ कदाचिद्भगवानन्यत्र गत इति शङ्कां व्युदस्यति-आस्तेऽधुनेति। तस्य कार्यान्तरवैयग्र्याभावाय ऐश्वर्यं निरूपयति-भोजवृष्ण्यन्धकानाम् ईश्वर इति त्रिगुणप्रधानास्त्रयो निरूपिताः तथापि "दाता जगति दुर्लभः" इति न्यायेन कदाचिन्न दद्यात्, तत्राह-स्मरतः पादकमलम् इति। यः स्मरति तस्मै बहु प्रयच्छति। किम्बहुना ब्रह्मानन्दं किम्बहुना आत्मानन्दमपि तत्र किं वक्तव्यं भजते अर्थकामान् ददातीति नन्वर्थकामावेव चेत्तस्याभीष्टौ तदा न दद्यादित्यत आह-नात्यभीष्टानिति। बह्वयेव दीयत इति लोके प्रसिद्धं सर्वथानभीष्टं सखा न दास्यतीत्यत आह-नातीति। किञ्चिदभीष्टत्वं वर्तत एव अतः प्रथमं दत्त्वा पश्चात् दूरीकरिष्यतीति भावः। ननु पात्रं प्राप्य कदाचित्क्रूरकरं यास्यतीति शङ्कां वारयति-जगद्गुरुरिति। सर्वेषां हितोपदेष्टा कथमन्यथा कुर्यादित्यर्थः। अनभीष्टत्वे वा हेतुः अन्यथा जगद्गुरुत्वं न स्यादिति स्वयं विषयासक्तः न ह्यन्येभ्यो वैतृष्ण्यं बोधयितुं शक्नोति ॥११॥ एवं तस्या वाक्यानुक्त्वा तेषामावृत्त्या तस्यापि मनः

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

किञ्चित्तथाजातमित्याह-एवं स इति । ननु स्वयमेव कुतो न गतः किमिति भार्यया प्रार्थितः यतो भगवद्दर्शनं सर्वेषामेवाभीष्टं तत्राह-विप्र इति । बहुशो बहुप्रकारेण उक्तसदृशेन मुहुः एकस्मिन्नपि दिवसे वारं वारं भर्त्रे रोचत इति ततस्तस्य गमनार्थमालोचनमाह-अयं हि परमो लाभ इति । उत्तमश्लोकस्य दर्शनं ब्रह्मभावादपि दुर्लभं यतो ब्रह्मणोऽपि तद्वाञ्छितम् ॥१२॥ एवमेकं कार्यमुभयं साधयिष्यतीति सञ्चिन्त्य इदं गोप्यं भार्यायै न वक्तव्यमिति मनसेत्युक्तम् अन्यथा साऽप्यागच्छेत् ततो गमनाय मतिं दधे ततो गमनसामग्रीं विचारयन् रिक्तहस्तो न पश्येतेत्युपायनं याचितवान् याचनावाक्यमाह-अप्यस्तीति । अपीति सम्भावनायां हे कल्याणि ! कदाचित् कुतश्चित् प्राप्नुयात् गृहेऽस्तीति प्रश्नः नास्तीत्युक्ते कदाचिद्गमनप्रतिबन्धकमेतदेव भवेदिति तूष्णीं स्थिता ॥१३॥

श्रीसुबोधिनीसारः

हे महाभाग ! साधूनां च परायणं परमाश्रयं तं मित्रं श्रीकृष्णम् उपैहि उपगच्छ शरणं याहि । सीदते क्लिश्यमानाय कुटुम्बिने ते तुभ्यं भूरि द्रविणं दास्यति ॥१०॥ अधुना इदानीं भोजवृष्ण्यधकानामीश्वरो द्वारकायां वर्तते । स चात्युदार इत्याह। पादकमलं स्मरतो भक्तस्यात्मानमपि यच्छति ददाति तद्वशो भवति ॥११॥ जगतां गुरुः श्रीकृष्णो नात्यभीष्टान् नातिप्रियान् अर्थकामान् भजते स्वयं किं तु का त्वद्वार्ता इति व्यङ्ग्योऽर्थः । एवं भार्यया स्त्रिया बहुशः पुनः पुनः मृदु यथा भवति तथा प्रार्थितः स सुदामा उत्तमश्लोकस्य हरेर्दर्शनमिति यत् अयं परमो लाभो हि ॥१२॥ इत्येवं मनसा विचार्य गमनाय बुद्धिं चकार। हे कल्याणि ! गृहे किञ्चिदुपायनम् अस्ति अपि चेत् तर्हि दीयताम् ॥१३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तव साधुत्वादपि दास्यति इत्याशयेनाह-साधूनां परायणम् आश्रयभूतमिति । पालने सामर्थ्यमस्त्येव इत्याशयेनाह-भगवानिति । धनलाभो भवतु मा वा, सर्वसुकृतफलभूतं तद्दर्शनं तु तव स्यादेव इति सूचयन्ती सम्बोधयति-महाभागेति ॥१०॥ कदाचित् सोऽन्यत्र गतः स्यात् इत्याशङ्क्याह-स भोजादीनां यादवानाम् ईश्वरः कृष्णोऽधुना द्वारकायामेवास्ते । भोजादीश्वरः इत्यनेन तत्सत्कारमात्रेण तेऽपि सर्वे धनं दास्यन्तीति सूचितम् । ननु तथापि दानस्य दुष्करत्वात् को वा वेद दास्यति वा न वा इत्याशङ्कामालक्ष्यामह-स्मरत इति । स्वपादकमलं स्मरतः पुरुषस्य परमानन्दरूपमात्मानमपि यच्छति ददाति बलिप्रभृतिषु तत्प्रसिद्धः ॥११॥ तर्हि भजतो जनस्यार्थकामान् ददातीति तु किं पुनर्वक्तव्यम् ? तत्र हेतुमाह-नात्यभीष्टानिति । विनाशित्वादिनाऽतितुच्छानित्यर्थः । तथा त्वं चेत्तर्हि तद्दानं कथमुचितम् इत्याशङ्क्याह-जगद्गुरुरिति । तुच्छत्वेऽपि जगत्पालकत्वात् तत्प्राण्यभिप्रायानुसारेण तद्दानं युक्तमेवेत्याशयः । स विप्रो भार्यया एवं बहुशो बहुप्रकारेण मुहुर्वारं वारं प्रार्थितः ॥१२॥ अयं हीति श्लोकः स्पष्टार्थः ॥१३॥

अन्वितार्थप्रकाशिका

तमिति सार्धम् । हे महाभाग ! साधूनां साधूनां परायणम् आश्चर्यभूतं तं कृष्णमुपैहि । स च सीदते कुटुम्बिने ते स ते तुभ्यं भूरि बहु द्रविणं दास्यति । स भोजवृष्ण्यन्धकेश्वरः कृष्णोऽधुना द्वारवत्यामेवास्ते ॥१०॥ स्मरत इति । स्वपादकमलं स्मरतः पुरुषस्य परमानन्दरूपमात्मानमपि यच्छति तर्हि जगद्गुरुः स भजतो जनस्यनत्यभीष्टान् अतितुच्छान् अर्थकामान् ददातीति किं तु वक्तव्यम् । स्मरतो भजत इति चतुर्थ्यर्थे षष्ठ्यौ ॥११॥ स इति सार्धम् । स विप्रो भार्यया एवं बहुशो बहुप्रकारेण मृदु कोमलोक्त्या प्रार्थितः सन् अयं हीत्यादि संचिन्त्य गमनाय मतिं दधे स्पष्टं शेषम् ॥१२॥ अपीति अर्धम् । हे कल्याणि ! अपि यदि गृहे किञ्चिदुपायनं भगवत्समर्पणयोग्यं वस्त्वस्ति तर्हि दीयताम् ॥१३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

परायणं परमाश्रयं सीदते अन्नवस्त्रादिराहित्येन क्लिश्यमानाय ते तुभ्यं भूरि बहुलं द्रविणम् ॥१०॥ आत्मानं स्वमूर्तिमपि यच्छति ददाति । भजतो नरस्य नात्यभीष्टान् अनतिप्रियानर्थकामान् द्रव्यभोगान् यच्छति तत्र किम् ॥११॥ विप्रविचारमाह-अयं हीति ॥१२॥ अप्यस्ति किमस्तीति प्रश्नः दीयतामित्युवाचेति शेषः ॥१३॥

स साम्प्रतं क्व
एव आस्ते । न तु शत्रुवि
पादकमलं स्मरतः स्वपा
श्रीकृष्णः भजतो याचमा
एवं भार्यया बहुशो यथा
दूरे तिष्ठतु भगवद्दर्शनं मम
। ततः हे कल्याणि ! गृहे
याचित्वेति । सा विप्रान्
चैलखण्डेन तान् बद्ध्वा

दैन्य पूर्वक
साधुजन और संतज
श्रीकृष्णचन्द्रजी को प
दयालु आपको भूरि
वृष्णि और अधकवंश
औदार्य के बारे में क्य
वे अपने आत्मा का
धन और सांसारिक प
श्रीसुदामाजी की अध
रसाल वाणी से वार व
भगवान श्रीकृष्णचन्द्र
चाहिये श्रीसुदामाजी
अयं हि परमो लाभः उ
भगवान के श्रीचरणों

याचित्वा चतुरे
स तानादाय
त्रीणि [1]गुल्मान्य
[2]गृहं द्व्यष्टसह

पृथुकतण्डुलान्,
तान्, आदाय, द्वारिकाम्,
गुल्मानि, च, तिस्रः, कक्ष
एकतमम्, गृहम्, ब्रह्मानन्

---

१. गुल्मानि त्रीण्यि

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स साम्प्रतं क्व वा स्थितः स्यादित्यत आह। आस्त इति। भोजवृष्ण्यन्धकेश्वरः स कृष्णः अधुना द्वारवत्यां द्वारकायाम् एव आस्ते। न तु शत्रुविजयार्थं क्वापि गत इति भावः। पुनरपि दास्यति वा न वेति संशयानन्तरं प्रत्याह हे स्वामिन्! कृष्णस्तु पादकमलं स्मरतः स्वपादकमलं स्मरते पुरुषायेत्यर्थः आत्मानमपि यच्छति ददाति। न केवलमेतावदेव। किन्तु जगद्गुरुः श्रीकृष्णः भजतो याचमानस्य नात्यभीष्टानत्यन्तानभीष्टान् परिपाकविरसत्वादिति भावः। अर्थकामानपि ददाति ॥१०॥ स इति। एवं भार्यया बहुशो यथा तथा प्रार्थितः मृदुर्मृदुस्वभावः सः विप्रः उत्तमश्लोकदर्शनं यत् अयं परमः लाभः हि। लाभालाभवार्ता दूरे तिष्ठतु भगवद्दर्शनं मम तत्र गतस्य स्यादयमेव परमो लाभ इति भावः ॥११॥ इतीति। इति मनसा संचिन्त्य गमनाय मतिं दधे ततः हे कल्याणि! गृहे किञ्चित् उपायनम् अस्ति अपि स्याच्चेदित्यर्थः। दीयताम्। इति प्राहेति शेषः। द्वयोरेकसम्बन्धः ॥१२॥ याचित्वेति। सा विप्रान् विप्रेभ्य इत्यर्थः। चतुरः मुष्टीन् चतुर्मुष्टिपरिमितानित्यर्थः। पृथुकतण्डुलान् व्रीहिचिपिटकान् याचित्वा चैलखण्डेन तान् बद्ध्वा भर्त्रे स्वस्वामिने उपायनं प्रादात् ॥१३॥

कृष्णप्रिया

दैन्य पूर्वक कल्याणी श्री विप्रपत्नी ने निवेदन किया कि हे महाभाग ! आर्यपुत्र ! भगवान् श्रीकृष्ण साधुजन और संतजनों के एकमात्र अवलंबन है । आप बिनासंकोच श्रीकृष्ण के पास जाइये जब श्रीकृष्णचन्द्रजी को पता लगा कि आप का परिवार विशाल है और अन्न के लिये दुःखी हो रहे है तब वह दयालु आपको भूरि प्रमाणमें द्रव्य प्रदान करेंगे ॥१०॥ नाथ ! श्रीद्वारिकानाथ श्रीकृष्ण वर्तमानमें भोज, वृष्णि और अधकवंश के यादों के नाथ के स्वरुप में श्रीद्वारिकानगरीमें विरजते है । श्रीकृष्णभगवान के औदार्य के बारे में क्या कहा जाय ! जो उनके श्रीचरणकमलों का स्मरण करते है उन अनन्य भक्तजनों को वे अपने आत्मा का भी दान कर देते है । धेसे परमोदार जगद्गुरु भगवान् श्रीकृष्ण अपने भक्तजनों को यदि धन और सांसारिक पदार्थ जो अत्यन्त वांच्छनीय नही है - दे दे तो इसमें तो इसमें कौनसा आश्चर्य है ॥११॥ श्रीसुदामाजी की अर्धांगना ने श्रीकल्याणीजीने ब्रह्मनिष्ठ श्रीसुदामाजी को दैन्य और भक्तिपूर्वक मधुर और साल वाणी से वार वार निवेदन किया तब श्रीसुदामाजी ने निर्णय किया कि धन की इच्छा से तो नही परन्तु भगवान श्रीकृष्णचन्द्रजी का दर्शन हो जायगा यह तो जीवन का सर्वोत्कृष्ट लाभ है इसलिये अवश्य जाना चाहिये श्रीसुदामाजीने मनसे खूब विचार करके भगवान के धाम श्रीद्वारिका में जाने का निर्णय किया । अयं हि परमो लाभः उत्तम श्लोक दर्शनम् ॥१२॥ प्रस्थान के निश्चय बाद अपनी गृहिणी से कहा है कल्याणी भगवान के श्रीचरणोंमे समर्पण करने योग्य कोइ वस्तु है क्या ? यदि हो तो देवि दीजिये ॥१३॥

याचित्वा चतुरो मुष्टीन् विप्रान् पृथुकतण्डुलान् । चैलखण्डेन तान् बद्ध्वा भर्त्रे प्रादादुपायनम् ॥१४॥
स तानादाय विप्राग्र्यः प्रययौ द्वारकां किल । कृष्णसन्दर्शनं मह्यं कथं स्यादिति चिन्तयन् ॥१५॥
त्रीणि [1]गुल्मान्यतीयाय तिस्रः कक्षाश्च स द्विजः । विप्रोऽगम्यान्धकवृष्णीनां [2]गृहेष्वच्युतधर्मिणाम् ॥१६॥
[3]गृहं द्व्यष्टसहस्राणां महिषीणां हरेर्द्विजः । विवेशैकतमं श्रीमद् ब्रह्मानन्दं गतो यथा ॥१७॥

कर्दमक्षमा

पृथुकतण्डुलान्, चतुरः, मुष्टीन्, विप्रान्, याचित्वा, तान्, चैलखण्डेन, बद्ध्वा, भर्त्रे, उपायनम्, प्रादात् ॥ सः द्विजाग्र्यः, तान्, आदाय, द्वारिकाम्, किल ययौ, मह्यम्, कृष्णसन्दर्शनम्, कथम्, स्यात्, इति, चिन्तयन्, ययौ ॥१४-१५॥ सः, द्विजः, त्रीणि, गुल्मानि, च, तिस्रः, कक्षाः, अतीयाय, विप्रः, अगम्याऽन्धकवृष्णीनाम्, अच्युतधर्मिणाम्, गृहेषु, द्व्यष्टसाहस्राणाम्, महिषीणाम्, एकतमम्, गृहम्, ब्रह्मानन्दम्, यथा, गतः, द्विजः, हरेः, श्रीमद्, गृहम्, विवेश ॥१६-१७॥

---

[1] गुल्मानि त्रीण्यति-गो. प्रे . टी. । [2] गम्यान्धवृष्णीनां-वीर. विज. । [3] गृहान्द्व्यष्टसहस्राणि-वीर. ; गृहाणिद्व्यष्टसाहस्र-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

मह्यं मम ॥१५॥ गुल्मानि रक्षार्थं सैन्यस्थानानि कक्षाः प्रतोलीः अतीयाय अतिक्रम्य जगाम सद्विजः द्विजैः सहितः
अगम्याः दुर्गमाः येऽन्धका वृष्णयश्च तेषां गृहेषु ॥१६॥ तथा हरेर्द्व्यष्टसहस्राणां महिषीणां च ये गृहास्तेषु मध्ये श्रीमदेकतमं
विवेश तदा च स द्विजो ब्रह्मानन्दङ्गतो यथा तथा बभूवेति शेषः ॥१७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

‘पृथुकः स्याच्चिपिटके’ इत्यमरः ॥१४॥ तान् पृथुकतण्डुलान् ॥१५॥ प्रतोलीः रथ्याः ‘रथ्या प्रतोली विशिख
इत्यमरः । ततो गुल्मादिलङ्घनानन्तरं अच्युतधर्मिणामनवच्छिन्नधर्माणां हरिभक्तानां वा ॥१६॥ तदा च गृहप्रवेशावसरे ॥१७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

याचित्वा प्रति विप्रान् प्रति चतुर इत्यधिकन्यूनतायां प्रयोजनाभावात् पृथुकतण्डुलाः नवार्धभ्रष्टधान्य-
कुट्टनाज्जाताश्चिपिटतण्डुलाः ॥१४॥ सोऽपि तानेवादाय अन्यासद्भावात् किल वार्तायाम् ॥१५॥ त्रीणीत्यर्धकम् । गुल्मलक्षणमिदमुक्

नवद्विपं नवरथं सप्तविंशतिसप्तिकम् । गुल्मं तज्ज्ञैः स्मृतं पञ्चचत्वारिंशत्पदातिकम् ॥ इति ॥

अत्र तु पुररक्षकतावत् सेनानिवेशस्थलमेव गुल्ममित्युपचारात् तादृशानि त्रीणि । विप्र इति सार्धकम् । ननु दुर्गमगृहा
गृहेषु कथं प्रवेशः तत्राह-अच्युतस्य ब्रह्मण्यदेवत्वादिनिजमाहात्म्ये सदा सुस्थिरत्वेन तन्नाम्नस्तस्यैव धर्मः तद्वतां यद्वा, भगवद्धर्म
वैष्णवत्वेन स्वत एव ब्राह्मणानां वैष्णवानां चादरादित्यर्थः ॥१६॥ श्रीमदिति । श्रीरुक्मिण्या गृहस्य श्रैष्ठ्येन शोभाभरात् तथा
पाद्मोत्तरखण्डे गद्यं -

“स तु रुक्मिण्यान्तःपुरद्वारि क्षणं तूष्णीं स्थित” इत्यादि । अतोऽग्रे शैब्यास्थाने गुर्जरादिप्रसिद्धः साक्षादिति पाठ
सङ्गतः । तथाचानन्तराध्यायेऽपि “तावच्छ्रीर्जगृहे हस्तम्” इति ‘राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि’ इति श्रीकृष्णपुराणो
तस्या एव प्राधान्येन श्रीरिति प्रसिद्धेः तदन्यसर्वविस्मारणांशे दृष्टान्तः ब्रह्मेति ॥१७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

याचित्वा प्रतिवेशिविप्रान् यतो विप्रान् चतुर इति चतुर्वर्गस्य चतुर्विधमोक्षस्य वा सिद्ध्यपेक्षया वा किंवा चतुर्दि
वर्तमानांश्चतुरः प्रतिवेशिनः प्रत्येकमेकमुष्टिप्रार्थनात् पृथुकाश्च ते तण्डुलाश्चेति तथा तानिति प्रतिवेशिब्राह्मणीनामपि तादृशतया कि
तस्या एव तादृश-क्षुत्क्षामत्वेन प्रार्थ्यानीतधान्येषु दृढकुट्टनाशक्त्या पृथुकानामपि तण्डुलरूपत्वात् । चेलस्य जीर्णवस्
खण्डमेकाल्पभागस्तेन बद्ध्वा उपायनरूपतया प्रकर्षेण भर्तृवस्त्रान्तर्दृढधारणादिनाऽदात् । एतच्च सर्वं श्रीभगवति निजाकिञ्च
विज्ञापनार्थं तस्याश्चातुर्यमिति न ज्ञेयम् । किन्तु अतिदारिद्र्येणाकिञ्चनत्वादेव ॥१४॥ सोऽपि तानेवादाय अन्यसद्भावात् प्रय
कृशत्वादिना गन्तुमशक्तोऽपि प्रयासेन ययौ यतो विप्रेष्वग्र्यः श्रीभगवद्भक्तत्वात् । किल निश्चितम् । इत्यशक्त्यादिना मार्गान्निवृत्तिर्नास
। यद्वा, वितर्के ततश्च परेणास्यान्वयः । यद्वा प्रकर्षेण ययौ तदेवाह-कृष्णस्य साक्षाद्भगवतः सन्दर्शनं साक्षाद्दर्शनं मह्यं मां प्रति
केन प्रकारेण किं वा किं स्याद्भविता किलेति चिन्तयन् सन्निति । सन्दर्शनमिति सदा चित्ते दर्शनं सूचितमेव । तथापि साक्षात्कार
परमफलत्वं बोधयति ॥१५॥ गुल्मलक्षणविशेषश्चोक्तः - “नवद्विपं नवरथं सप्तविंशति सप्तिकम् । गुल्मं तज्ज्ञैः
पञ्चतत्वारिंशत्पदातिकम् ॥” इति तावत्सैन्यस्य स्थानमेव गुल्ममित्युपचारात् तादृशानि त्रीणि । नन्वगम्यानां गृहेषु कथं प्रवे
तदाह-अच्युतः स्थिरः क्षत्रियत्वेन ब्रह्मण्यतादिलक्षणो यो धर्मस्तद्वताम् । यद्वा, अच्युतस्य ब्रह्मण्यदेवत्वादि-निजमाहात्म्ये
सुस्थिरस्य भगवत इव धर्मो ब्राह्मणभक्त्यादिस्तद्वतां वैष्णवत्वेन स्वत एव ब्राह्मणानां वैष्णवादरादित्यर्थः ॥१६॥ हरेः सर्वदुःख
सर्वमनोरहस्य चेति गृहस्य तादृशत्वं तेन विप्रस्यापि तद्दर्शनेन सर्वदुःखनिवृत्तिमानन्देन ..(प्रमोद)नप्रकाराद्यनुसन्धानं च सूच
श्रीमदिति सर्वमहिषीवर्गश्रेष्ठायाः बहुकुटुम्बिन्याः श्रीरुक्मिण्याः गृहस्य श्रैष्ठ्येन शोभाभरात् । तथा च पाद्मोत्तरखण्डे गद्यं
रुक्मिण्यन्तःपुरद्वारि तूष्णीं क्षणं तस्थौ’ इत्यादि । अतोऽग्रे शैब्यास्थाने भैष्मीति पाठ एव सङ्गतः । तथा च निरन्तराध्याये
(भा.१०-८१-१०) तावच्छ्रीर्जगृहे हस्तम् इति ‘राघवत्वेऽभवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि’ श्रीविष्णुपुराणो
तस्या एव श्रीरिति प्रसिद्धेः ॥१७॥

अन्यैर्द्विजैर्भिक्षुभिः

इत्थमापृष्टा सा पृ
बद्ध्वा भगवत उपायनं भर्त्रे
। स द्विजः कुचेलः गुल्मानि
धर्माः सम्पत्त्यादिगुणाः येषां
तत्रापि श्रीमदेकतमं गृहं वि
पौनरुक्त्यं यथा ब्रह्मानन्दं मो

चेलखण्डेन जीर्णवस्त्रखण्डेन
प्रकोष्ठके’ इति यादवः । अन्
विवेशेत्यन्वयः । द्विजत्वं क्षत्रि

ब्रह्मानन्दमिति ॥१७

त्रीणि गुल्मानीत्यादि
द्व्यष्टसहस्राणां हरेर्महिषीणां म
एकतमं प्रधानतमं श्रीरुक्मिणी

विवेशैकतममित्यादि
प्रविष्टः । अतस्तल्लोकस्थपुरा

कथं स्यादिति द्वाः
पुरन्तर्द्वारदीर्घगृहप्रकोष्ठान् स द्वि
हरेर्महिषीणां द्व्यष्टसहस्रमहि
पाद्मोत्तरखण्डगद्यम्-

“स तु रुक्मिण्यन्तःपु

नवार्धभ्रष्टधान्यकुट्टन
चैलखण्डेन चीरेण ॥१४॥ अ
सद्विजः द्विजैः सहितः । अती
हरेर्महिषीणामेकतमं गृहं विवे
द्विज इत्यस्य न पोनरुक्त्यम् ।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अन्यैर्द्विजैर्भिक्षुभिः सहित इति निर्भयप्रवेशे हेतुः ॥१६-२९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थमापृष्टा सा पृथुकतण्डुलान् तानपि चतुरो मुष्टीन् ग्रामस्थान् विप्रान् प्रति याचित्वा चेलखण्डेन छिद्रपटशकलेन बद्ध्वा भगवत उपायनं भर्त्रे ददौ तद्धस्ते ददौ इत्यर्थः ॥१४॥ स इति । स विप्राग्र्यः कुचेलः तान् पृथुकतण्डुलान् ॥१५॥ त्रीणीति । स द्विजः कुचेलः गुल्मानि रक्षार्थसैन्यस्थानानि ततः कक्ष्याः प्रतोलयस्ताश्चातीयायातिक्रान्तवानित्यर्धस्यान्वयः । अच्युतस्येव धर्माः सम्पत्त्यादिगुणाः येषां तेषामगम्यानां दुर्गमानामन्धकानां वृष्णीनां च गृहेषु मध्ये ॥१६॥ द्व्यष्टसहस्राणि हरेर्महिषीणां गृहान् तत्रापि श्रीमदेकतमं गृहं विवेशेति सम्बन्धः । द्विजशब्दस्य त्रैवर्णिकसाधारणत्वादग्रजात्यवगमाय विप्र इति चोक्तमित्यतो न पौनरुक्त्यं यथा ब्रह्मानन्दं मोक्षसुखं प्राप्तो वैकुण्ठे हरेर्मन्दिरं विशति तद्वत् ॥१७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

चेलखण्डेन जीर्णवस्त्रखण्डेन ॥१४-१५॥ गुल्मानि शिबिराणि कक्ष्याः पुरप्रकोष्ठानि 'कक्ष्याः कच्छे वरत्रायां काञ्च्यां गेहे प्रकोष्ठके' इति यादवः । अन्धकवृष्णीनां गृहेषु मध्ये यानि द्व्यष्टसाहस्रमहिषीणां गृहाणि गम्य गत्वा तेष्वेकतमं गृहं विवेशेत्यन्वयः । द्विजत्वं क्षत्रियस्याप्यस्तीति विप्र इति आनन्दं गतो मुक्तो ब्रह्म विशति यथा तथा ॥१६-१७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ब्रह्मानन्दमिति ॥१७-१८॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

त्रीणि गुल्मानीत्यादि त्रीणि गुल्मानि तिस्रः कक्षाश्च स द्विजः द्विजैरन्यैः सहितः स विप्रः अतीयायेत्येकं वाक्यं पुनरुत्तरवाक्ये द्व्यष्टसहस्राणां हरेर्महिषीणां मध्ये एकतमं मुख्यतमं गृहं द्विजो विवेशेति एक एवेति मनने पुनर्द्विजशब्दोपादानं विवेशेकतममित्यादि एकतमं प्रधानतमं श्रीरुक्मिणीभवनं यथावत् गतः सन् विवेशेत्यन्वयः । कीदृशं ब्रह्मानन्दं ब्रह्मानन्दस्वरूपम् ॥१६-२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

विवेशैकतममित्यादि । एकतमं प्रधानतमं श्रीरुक्मिणीभवनमित्यादि । ब्रह्मानन्दं ब्रह्मानन्दस्वरूपं यथा यथावद्गतः प्रविष्टः । अतस्तल्लोकस्थपुरारामादेर्ब्रह्मानन्दसदृशत्वं प्रतिपादितम् ॥१७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कथं स्यादिति द्वाःस्थैर्वारयिष्यमाणत्वादिति भावः ॥१५॥ गुल्मानि पुरबहिर्द्वाररक्षकसेनानिवेशस्थलानि कक्षाः पुनर्द्वारदीर्घगृहप्रकोष्ठान् स द्विजः तत्रत्यद्विजसहितः अगम्याः ये अन्धकवृष्णयस्तेषां गृहेषु तद्गृहनिकटे इत्यर्थः ॥१६॥ द्व्यष्टसहस्राणां हरेर्महिषीणां द्व्यष्टसहस्रमहिषीगृहाणां मध्ये एकतमं मुख्यतमं गृहं विवेशेत्यन्वयः । तच्च गृहं रुक्मिणीगृहमेव यदुक्तं पाद्मोत्तरखण्डगद्यम्-

"स तु रुक्मिण्यन्तःपुरद्वारि क्षणं तूष्णीं स्थितः" इत्यादि तदन्यसर्वविस्मरणांशे दृष्टान्तः ब्रह्मेति ॥१७॥

गूढार्थदीपिनी

नवार्धभ्रष्टधान्यकुट्टनाज्जाता पृथुकतण्डुलाः । अप्यस्ति किमस्तीति प्रश्नः । पृथुकः स्याच्चिपिटिके इत्यमरः । चेलखण्डेन चीरेण ॥१४॥ अग्र्यः श्रेष्ठः । मह्यं मम ॥१५॥ त्रीणि इत्यर्द्धम् । गुल्मानि सैन्यस्थानानि । कथा प्रतोलीः स द्विजः द्विजैः सहितः । अतीयाय अतिक्रम्य जगाम ॥१६॥ विप्र इति सार्धम् । विप्रः सुदामा दुर्गमेषु वृष्णीनां गृहेषु मध्ये हरेर्महिषीणामेकतमं गृहं विवेशेत्यन्वयः । तदा स द्विजः ब्रह्मानन्दं गतो यथा भवति तथा बभूवेति शेषः । एवमन्वयभेदात् द्विज इत्यस्य न पौनरुक्त्यम् ॥१७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मह्यं मम कृष्णदर्शनं कथं स्यादिति चिन्तयन् ॥१५॥ गुल्मानि रक्षार्थं सैन्यस्थानानि कक्षाः प्रतोलीश्च स श्रीदामा प्रतीयाय अतिक्रान्तवानित्यर्थः । ततश्च अगम्याः येऽन्धवृष्णयः अन्धकवृष्णयः तेषाम् अच्युतधर्मोऽस्ति विष्णुधर्मनिरतानां भागवतानामित्यर्थः ॥१६॥ गृहेषु हरेर्महिषीणां गृहेषु च मध्ये एकतमं श्रीमद्रुक्मिणीगृहं विवेशेत्यर्थः स द्विजः यथा ब्रह्मानन्दं गतो तथा बभूवेति शेषः ॥१७-१९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः अप्रतिषिद्धमनुमतं भवतीति ज्ञात्वा याचयति-दीयतामिति । सा च पतिव्रता भर्तृवाक्यं प्रतिपालयितुं मुष्टीन् पृथुकतण्डुलान् धान्यचिपिटान् ते मध्ये भक्षयितुमपि शङ्क्यत इति तानेव याचयित्वा चैलखण्डेन स्ववस्त्रखण्डेन बद्ध्वा स्वभर्त्रे उपायनं प्रादात् एतद्भगवते देयमिति अबद्ध्वा दाने कदाचित् अन्यस्मै प्रयच्छेत् पातयेद्वा ॥१४॥ ततो प्रति सोपायनस्य गमनमाह-स तानादायेति । किलेति प्रमाणं मध्ये यो गच्छति स स्वाभिलषितं चिन्तयति ततो चिन्तयन् गच्छति तत्किं धनं दर्शयन् चेति सन्देहे तन्निवृत्त्यर्थमाह-कृष्णसन्दर्शनमिति ॥१५॥ ननु, कथं कियद्दानं ततः दुर्गगतत्वात् रक्षकास्तत्र तत्र स्थिताः ते किमपि न प्रवेशयन्ति अज्ञातचरं तत्र कथमयं गतः इति शङ्कां निवारयति गुल्मान्यतीयायेति । गुल्मानि सेनाभेदाः कक्ष्याः प्राकारभेदाः गुल्मशब्देन गुल्मकृतं वनं दुर्गाणि वा निःशङ्कगमने हेतुः इति । द्विजैः सहितः स एव वा द्विजः द्विजत्वं साधारणमिति विशेषेण पूरणत्वं वदन् विप्रत्वमाह-अन्धकवृष्णीनाम् वैष्णवानां परितो व्याप्तानां गृहेषु मध्ये हेरः द्व्यष्टसहस्राणां महिषीणां गृहेषु च द्विजः अप्रत्याख्येयः एकतमं गृहं भगवानत्र स्थास्यतीति तत्र हेतुः श्रीमदिति शोभासम्पत्त्यतिशययुक्तं तत्र गमनमात्रेणैव तस्य याऽवस्था तामाह-ब्रह्मानन्दं यथेति । द्वारकायां वैकुण्ठावेशात्तस्य च ब्रह्मत्वात् तन्मध्ये भगवद्गृहस्य च आनन्दांशत्वात् तत्र प्रविष्टो ब्रह्मानन्दं यथेति प्रकारभेदार्थमुक्तं ततः परितो विलोकनसामर्थ्यरहितः आनन्दानुभवेन निमीलिताक्ष इव भगवता दृष्ट इत्याह-तं । प्रियापर्यङ्के लक्ष्मणापर्यङ्के विरतिवेलायां चतुर्थप्रहरे रात्रौ वा प्रियापर्यङ्के भगवानुपविष्टः सा लक्ष्मणा चिह्नेन लक्ष्मीर्भवति सहसोत्थाय अग्रे समागत्य दोर्भ्यां पर्यग्रहीत् अनेन तुल्यता निरूपिता । मुदेत्यान्तरो भावः यथा भगवत्सम्बन्धे तस्य हर्षः तत्सम्बन्धो भगवतोऽपि भक्तत्वादिति ज्ञापितम् ॥१६-१८॥

श्रीसुबोधिनीसारः

विप्रान् चतुरेमुष्टीन् पृथुकतण्डुलान् याचित्वा द्विकर्मकत्वादस्य । विप्रेति पाठे तत्स्त्री वस्त्रखण्डेन तान् बद्ध्वा भर्त्रे उपायनं प्रादात् ॥१४॥ स विप्राग्र्यो ब्राह्मणोत्तमः तानादाय द्वारकां जगाम । किल निश्चये कृष्णस्य सन्दर्शनं मह्यं भवेदिति चिन्तयन् सन् ॥१५॥ त्रीणि गुल्मानि रक्षार्थं सैन्यस्थानानि तिस्रः कक्षाः प्रतोलीरतीयाय उल्लङ्घ्य ययौ स अच्युतधर्मिणां भगवद्धर्मिणाम् अगम्या येऽन्धका वृष्णयश्च तेषां गृहेषु ॥१६॥ हरेः श्रीकृष्णस्य षोडशसहस्राणां एकतमं गृहं श्रीमत् सम्पद्युक्तं विवेश । द्विजः ब्रह्मानन्दं प्राप्त इव ॥१७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततश्च भार्यामाह-हे कल्याणि ! अपि यदि गृहे किञ्चिदुपायनं भगवत्समर्पणयोग्यं वस्त्वस्ति तर्हि इत्युक्ता सा चतुरो मुष्टीन् पृथुकतण्डुलान् धान्यचिपिटान् याचयित्वा तांश्च चैलखण्डेन बद्ध्वा भर्त्रे प्रादात् तानिति स्पष्टम् । कृष्णसन्दर्शनं मह्यं मम कथं स्यादिति चिन्तयन् त्रीणि गुल्मानि रक्षार्थसेवास्थानानि तथा तिस्रः प्रतोलीश्चातीयायातिक्रम्य स द्विजैः सहितो विप्रः अच्युतस्यैव धर्मः आराधनं येषां तेषाम् अगम्यानां दुर्गमानाम् वृष्णीनां च गृहेषु मध्ये ॥१५-१६॥ हरेर्द्व्यष्टसहस्राणां महिषीणां च गृहेषु मध्ये श्रीमदेकतमं गृहं विवेश । द्विजो ब्रह्मानन्दं गतो यथा भवति तथा बभूवेति शेषः ॥१७॥

याचित्वेति ।
। तावतैव चतुर्वर्गसिद्धे
पृथुकतण्डुलानादाय
श्रीदामा त्रीणि गुल्मानि
अतीयाय
इत्यादिसर्वं श्लोकं
अच्युतस्यैव धर्मः
च स गृहेषु
पाद्मोत्तरखण्डगद्यम्—

'स तु

तदा च स

पृथुक
ब्राह्मणी ॥१४-१५॥
प्रतोलीश्चाऽतीयाय
गृहेषु मध्ये हरेः

स इति । मह्यं
किल ॥१४॥ त्रीणीति ।
अतीयाय अतिक्रम्य
अगम्या दुर्गमा
गृहान् अपश्यदिति शेषः
उभयोरेकसम्बन्धः ॥१६॥
विलोक्य सहसा

श्रीसुदामाजी
कहा तब
व्यवस्थित बांधकर दिये
के लिये पोहें की
मुझे भगवान श्रीकृष्ण
पहुंचने पर सैनिकों की
अन्धक और वृष्णिवंश

अन्वितार्थप्रकाशिका

याचित्वेति। इत्युक्ता सा चतुरो मुष्टीन् पृथुकतण्डुलान् धान्यचिपिटान् विप्रान् प्रतिवेश्यादिविप्रेभ्यो याचित्वा। याचिर्द्विकर्मकः। तावतैव चतुर्वर्गसिद्धे न्यूनाधिकवैयर्थ्यात् तांश्च चैलखण्डेन बद्ध्वा भर्त्रे उपायनं प्रादात् ॥१४॥ स इति। स विप्राग्र्यः तान् पृथुकतण्डुलानादाय कृष्णसन्दर्शनं मह्यं मम कथं स्यादिति चिन्तयन् किल द्वारकां प्रययौ ॥१५॥ त्रीणि इत्यर्धम्। स द्विजः श्रीदामा त्रीणि गुल्मानि अन्तःपुरबहिर्द्वारि रक्षासैन्यानि तथा तिस्रः कक्षाः प्रतोलीश्च पुरान्तर्द्वारदीर्घगृहप्रकोष्ठानिति चक्रवर्ती। अतीयाय अतिक्रान्तवान्। ''नवद्विपं नवरथं सप्तविंशति सप्तिकम्। गुल्मं तज्ज्ञैः स्मृतं पञ्चतत्वारिंशत्पदातिकम् ॥'' अत्र त्रीणि इत्यादिसर्वं श्लोकं योजयतां मते तु स द्विजः तत्रत्य स द्विजैः सहितो विप्र इत्यन्वयः ॥१६॥ विप्र इति सार्धम्। विप्रः श्रीदामा अच्युतस्यैव धर्मः आराधनमच्युत इव धर्मो ब्रह्मण्यतादिर्विद्यते येषामिति वा तेषाम् अगम्यानां दुर्गमानामन्धानामन्धकानां वृष्णीनां च स गृहेषु तद्गृहनिकटे हरेर्द्व्यष्टसहस्राणां महिषीणां गृहेषु मध्ये श्रीमदेकतमं मुख्यं श्रीरुक्मिणीगृहं विवेश। तथा च पाद्मोत्तरखण्डगद्यम्—

'स तु रुक्मिण्यन्तःपुरद्वारि क्षणं तूष्णीं स्थित इत्यादि ॥

तदा च स द्विजो ब्रह्मानन्दं गतो यथा भवति तथा बभूवेति शेषः। अन्वयभेद् द्विज इत्यस्य न पुनरुक्तिदोषः ॥१७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पृथुकतण्डुलान् आदौ क्वथिताः पश्चाद्भर्जिता व्रीहयोऽवखण्डनेन निस्तुषीकृतास्तण्डुलाः पृथुकसंज्ञकास्तान्। विप्रा ब्राह्मणी ॥१४-१५॥ अत्र श्लोकद्वयस्य सहान्वयः। स श्रीदामा द्विजः गुल्मानि गुरुरक्षणार्थं स्थापिताऽनीकस्थानानि कक्षाः प्रतोलीश्चाऽतीयाय उल्लङ्घ्य विप्रस्ततोऽगम्याः प्राप्तुमशक्याः ये अन्धकाः वृष्णयश्च तेषां गृहेषु मध्ये हरेः। द्व्यष्टसहस्राणां महिषीणां गृहेषु मध्ये हरेः श्रीमदेकमतं गृहं विवेश स च द्विजः ब्रह्मानन्दं गतः प्राप्तो यथा तथा आनन्दं प्राप्तः ॥१६-१७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इति। मह्यं कृष्णसन्दर्शनं कथं स्यात् इति चिन्तयन् स कुचैलः विप्राग्र्यः तान् पृथुकतण्डुलान् आदाय द्वारकां प्रययौ किल ॥१४॥ त्रीणीति। विप्रः कुचैलः सद्विजः द्विजैः सहितः सन्नेव त्रीणि गुल्मानि रक्षार्थकसैन्यस्थानानि तिस्रः कक्षाः प्रतोलीश्च अतीयाय अतिक्रम्य अच्युतस्य श्रीकृष्णस्येव धर्माः सम्पत्त्यादिगुणाः सन्त्येषाम् अच्युतधर्मिणस्तेषाम् अन्धकाश्च वृष्णयश्च अगम्या दुर्गमा येऽन्धकवृष्णयस्तेषां गृहेषु मध्ये ॥१५॥ गृहानिति। तत्रापि हरेः द्व्यष्टसहस्राणां षोडशसहस्रसंख्याकानां महिषीणां गृहान् अपश्यदिति शेषः। तत्रापि श्रीमत् एकतमं हरेर्गृहं विवेश। तदा द्विजः ब्रह्मानन्दं गतः यथा तथा बभूवेति शेषः। उभयोरेकसम्बन्धः ॥१६॥ तमिति। तदा प्रियापर्यङ्कं रुक्मिण्याः शय्याम् आस्थितः अच्युतः श्रीकृष्णः तं कुचैलं द्विजं दूरात् विलोक्य सहसा झटित्येव उत्थाय च अभ्येत्य तत्सम्मुखमागत्य मुदा दोर्भ्यां बाहुभ्यां पर्यग्रहीदालिङ्गितवान् ॥१७॥

कृष्णप्रिया

श्रीसुदामाजी ने ठाकुरजी के श्रीचरणोंमें उपायन समर्पण के लिये जब देवीजी को कुछ भी देने के लिये कहा तब श्रीकल्याणीजी ने समीप के विप्रों के घरसे पडोस के नाते से चार मुठ्ठी पौहे मांग कर एक वस्मंचल में यथास्थित बांधकर दिये और कहा नाथ ! यह उपायन विश्वनाथ के करकमलों कें समर्पण कीजिये ।।१४।। उपायन के लिये पोहें की पुटली लेकर प्रस्थान कर दिये। मार्ग में चलते चलते विप्रर्षि सुदामाजी यह सोचते जाते थे कि मुझे भगवान श्रीकृष्ण के दर्शन कैसे प्राप्त होंगे ।।१५।। राजन् परीक्षित् ! महर्षि सुदामाजी श्रीद्वारिकापुरी में पहुंचने पर सैनिकों की तीन छावनियां और तीन ड़्योढीयां पसार करके अच्युत धर्मों का आचरण करने वाले अन्धक और वृष्णिवंश के यादवों के महलों में जहां पहुंचना सर्वथा कठिन था वहां जा पहुंचे ।।१६।। उन निवासों

कृष्णप्रिया

के मध्यमें भगवान श्रीद्वारिकानाथ श्रीकृष्णचन्द्रकी सोलह हजार रानियां के महल थे। उनमें से एक महलमें ब्रह्मर्षि श्रीसुदामाजी ने प्रवेश किया। वह भुवन सर्वथा सर्वेश्वसर्स्य से सुशोभित था। उस महलमें प्रवेश करने से ऐसा अनुभव हो रहा था कि मानो श्रीब्रह्मर्षिजी ब्रह्मानन्द के दिव्य महासमुद्रमें निमज्जन कर रहे थे ॥१७॥

तं विलोक्याच्युतो दूरात् [१]प्रियापर्यङ्कमास्थितः। सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्यग्रहीन्मुदा ॥१८॥
सख्युः प्रियस्य विप्रर्षे रङ्गसङ्गातिनिर्वृतः। प्रीतो व्यमुञ्चदब्बिन्दून् नेत्राभ्यां पुष्करेक्षणः ॥१९॥
अथोपवेश्य पर्यङ्के स्वयं सख्युः समर्हणम्। उपहृत्यावनिज्याप:[२] पादौ पादावनेजनीः ॥२०॥
अग्रहीच्छिरसा राजन् भगवाँल्लोकपावनः। व्यलिम्पद्दिव्यगन्धेन चन्दनागुरुकुङ्कुमैः ॥२१॥

कर्दमक्षमा

प्रियापर्यङ्कम्, आसीनः, अच्युतः, दूरात्, तम्, विलोक्य, सहसा, उत्थितः, च, अभ्येत्य, मुदा, दोर्भ्याम्, पर्यग्रहीत् ॥१८॥ पुष्करेक्षणः, सख्युः, प्रियस्य, विप्रर्षेः, अङ्गसङ्गातिनिर्वृतः, प्रीतः, नेत्राभ्याम्, अब्बिन्दून्, व्यमुञ्चत् ॥१९॥ अथ पर्यङ्के, उपवेश्य, अपः, उपहृत्य, सख्युः, पादौ, अवनिज्य, पादावनेजनीः, अपः, लोकपावनः, भगवान्, राजन्! शिरसा अग्रहीत्, चन्दनागुरुकुङ्कुमौ, दिव्यगन्धेन, व्यलुम्पत् ॥२०-२१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पर्यग्रहीत् पर्यरम्भत ॥१८॥ अब्बिन्दूनानन्दाश्रूणि ॥१९॥ समर्हणमुपायनमुपहृत्य समर्प्य पादावनेजनीरपः ॥२०-२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं विप्रम् ॥१८-१९॥ अथाङ्गसङ्गानन्तरम्। अस्य विप्रस्य ॥२०-२१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अच्युतदेवसर्वसद्गुणसद्व्यवहारेभ्यः यथाकथञ्चिज्जातात् सख्याच्च विच्युतिरहित इत्यर्थः। अतः प्रियायाः पर्यङ्कश्रितोऽपि पर्यङ्क आश्रित इति चित्सुखः अर्थः स एव टीकायां पर्यरम्भतेत्यस्यालिङ्गदित्यर्थः ॥१८॥ सख्युः सतीर्थत्वेन सह विहारिणः तेष्वपि बहुषु प्रियस्य प्रेमविशेषविषयस्य किञ्च विप्रश्चासौ ऋषिश्च श्रीभगवद्भक्त्यादिमाहात्म्यज्ञः तस्य निवृत्तिरानन्दः प्रीतिः स्नेह इति भेदः विशेषेणामुञ्चत् तत्र पुष्करेक्षण इति श्रीनेत्रयोः सौन्दर्याधिकता सूचिता ॥१९॥ अथ चिरपरिरम्भणानन्तरमेव उपवेश्येति भयादिनानुपविशन्तं बलादाकृष्य स्वयमुपवेश्येत्यर्थः। स्वयमित्यस्य यथायोग्यं परैरप्यन्वयः। समर्हणं पूजाद्रव्यं स्वयमेवोपहृत्य ततः स्वयमेवावनिज्येत्यादि। भगवान् साक्षात्परमेश्वरोऽप्यग्रहीत्। किमर्थं लोकपावनः तच्छिक्षणेन लोकान् पावयितुमिति यद्वा भगवानपि लोकपावनोऽप्यग्रहीत्। अहो विनयादिसौशील्यमिति भावः। व्यलिम्पदित्यर्धकम्। दिव्येन गन्धेन अगुर्वादिसाधितसुगन्धिद्रव्यविशेषेण चन्दनादिभिश्च सहैव पिष्टैः विशेषेण भक्तिच्छेदादिना अलिम्पत्तमिति शेषः ॥२०-२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अच्युतः सर्वसद्गुणसद्व्यवहारेभ्यः किंवा यथाकथंचिज्जातात् सख्याद्विच्युतिरहित इति भावः। अतः प्रियायाः पर्यङ्कमाश्रितोऽपि पर्यङ्क आस्थित इति चित्सुखः। अर्थः स एव। दूरादेव विलोक्य साक्षाद्दृष्ट्वा किंवा दूरादेव सहसा सद्यः सम्भ्रमेण वोत्थायाभ्येत्य चाग्रतो गत्वा मुदा दोर्भ्यां प्रसारिताभ्यां परितः सर्वाङ्गव्याप्त्या अग्रहीत् गाढं पर्यरम्भत ॥१८॥ सख्युः सहाध्यायित्वात् किञ्च प्रियस्य परमभक्तत्वात् यद्वा, प्रियसखस्येत्यर्थः। यतो विप्रश्चासौ ऋषिश्च श्रीभगवद्भक्त्यादि-माहात्म्यज्ञस्तस्य अतोऽङ्गसङ्गेन सर्वाङ्गगाढालिङ्गनेनात्यन्तं निवृत्तः स्वस्थचित्तः प्रीतश्च हृष्टः सन् यद्वा, अतिनिर्वृत्तः परमसुखी प्रीतश्च प्रेमसम्पत्तिपरिपूर्णः सन् विशेषेण असाधारणतयाऽमुञ्चत्। यतः पुष्करवद्विशालायतेक्षण इति बहुलानन्दाश्रुविमोके योग्यतोक्ता यद्वा, तेन श्रीनेत्रयोः सौन्दर्याधिकता सूचिता ॥१९॥ अथ चिरपरिरम्भणानन्तरमेव उपवेश्येति भयादिनानुपविशन्तं बलादाकृष्य स्वयमुपवेश्येत्यर्थः।

---

[१] माश्रितः-गो. प्रे. टी.; पर्यङ्क आस्थितः-वीर.; पर्यङ्क आश्रितः-विज.। [२] ज्यास्य-श्रीधर. वंशी. वीर. विज.; ज्यापः-विश्व. शुक.

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वयमित्यस्य यथायोग्यं परैरप्यन्वयः। अन्यत्तैर्व्याख्यातम्। तत्र किञ्चिदुपायमादौ समर्प्येत्यर्थः। यद्वा, उत्तमपूजोपकरणमुपहृत्य तत्प्रकारमेवाह-अवनिज्येत्यादिना द्वयेन। अथवा स्वयमेवानीय यतः सख्युरवनिज्य स्वर्णशृङ्गारेण श्रीरुक्मिण्या दत्तेन जलेन प्रक्षाल्य भगवान् साक्षात् परमेश्वरोऽप्यग्रहीत्। किमर्थम् ? लोकपावनस्तच्छिक्षणेन लोकान् पावयितुमिति यद्वा लोकपावनोऽप्यग्रहीत् ।कुतः ? भगवान् ब्रह्मण्यदेवत्वाद्यशेषगुणप्रकटनपर इत्यर्थः। हे राजन्निति श्रीभगवतस्तादृश-व्यवहारेण प्रेमविवशत्वात्। यद्वा, प्रीत्या राजमानः सत्। दिव्येन गन्धेनागुर्वादि-साधित-सुगन्धिद्रव्यविशेषेण चन्दनादिभिश्च सहैव पिष्टैः यद्वा दिव्यगन्धेन सहितैः पिष्टचन्दनादिभिर्विशेषेण ...क्तिच्छेदादिनाऽलिम्पत् ॥२०-२१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१६-२१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तमिति। प्रियायाः रुक्मिण्याः पर्यङ्के आस्थितो भगवांस्तं कुचेलं दूरादेव दृष्ट्वा दोर्भ्यां बाहुभ्यां पर्यग्रहीदालिङ्गितवान् ॥१८॥ सख्युरिति। अङ्गसङ्गेनालिङ्गनेनातीव निर्वृत्तः सुखितः प्रीतश्च पुष्करेक्षणः नेत्राभ्यामानन्दाश्रुबिन्दूनभ्यमुञ्चत् ॥१९॥ अथेति। अविष्टं कृत्वा तस्य सख्युः स्वयमेवोपायनमुपहृत्य समर्प्य ददाववनिज्य प्रक्षाल्य पादावनेजनीरपः शिरसा अग्रहीद्दधार। व्यलिम्पदिति। चन्दनादिभिः साधितेन दिव्यगन्धेन मित्रं सखायं व्यलिम्पत् ॥२०-२१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

पर्यग्रहीदाश्लिष्टवान् ॥१८-१९॥ पादावनेजनीरपः पादप्रक्षालनजलानि ॥२०-२२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

निर्वृतिरानन्दः प्रीतिः स्नेहः ॥१९-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१६-२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१८-४५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अभ्येत्य प्राङ्गणमागत्य पर्यग्रहीत् परिरेभे ॥१८-१९॥ पादावनेजनीरपः ॥२०-२२॥

गूढार्थदीपिनी

अच्युतः तं दूरात् विलोक्य सहसा उत्थाय अभ्येत्य तत्समीपम् आगत्य दोर्भ्यां बाहुभ्यां पर्यग्रहीत् आलिङ्गितवानित्यन्वयः ॥१८॥ सख्युः अङ्गसङ्गेन अतिनिर्वृतः आनन्दितः कमलेक्षणः भगवान् प्रीतः सन् नेत्राभ्याम् अब्बिन्दून् आनन्दाश्रूणि व्यमुञ्चत् ॥१९॥ अथेति सार्धम्। अथ भगवान् तं स्वपर्यङ्के उपवेश्य सख्युः समर्हणमुपायनम् उपहृत्य समर्प्य स्वयमस्य पादौ अवनिज्य प्रक्षाल्य पादावनेजनीः पादप्रक्षालिताः अपः शिरसा अग्रहीत् दधारेत्यन्वयः ॥२०॥ व्यलिम्पदित्यर्धम्। स्पष्टम् ॥२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उपहृत्य समर्प्य पादावनेजनीः अपः ॥२०॥ शिरसा अग्रहीत् दधार। तत्र हेतुः लोकपावनः एवंविधमज्जनचरणोदकम्। शिरसा धारणीयमित्येवं लोकशिक्षया लोकान् पावयति पवित्रीकरोतीति तथा ॥२१-२२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत आनन्दापूरित इव लीलां कृतवान् इत्याह-सख्युः प्रियस्येति। सखित्वात्तस्य यथा जातं तथैव भाव्यं भगवतोऽपि प्रियस्य स प्रीतिविषयः पूर्वत्र हेतुरपि भवति। ततो विप्रर्षिः ब्राह्मणोत्तमः अलौकिकः परमानन्दोऽप्यस्मिन् प्रादुर्भूत इति

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्सङ्गेनाति निर्वृतः अन्तःसुखं प्राप्तवान् ततः प्रीत्यात्मनस्तं द्रष्टुं बहिरागतमिव नेत्राभ्याम् अब्बिन्दून् व्यमुञ्चत् पुष्करेक्षण इ कृपालुत्वमुक्तं हेतुत्वेन ॥१९॥ ततो भार्याकृतवैलक्षण्यमावश्यकमिति तेनैव सख्यं न्यूनं भविष्यतीति शङ्कायामाह-अथोपवे पर्यङ्क इति। ततः सख्युः समर्हणं स्वयं कृतवान् अस्य पादाववनिज्य समर्हणसाधनान्युपाहृत्य पादावनेजनीरपः ॥२०॥ शिर अग्रहीत् धर्मोऽयमिति नात्र दूषणं लोकशिक्षार्थं च धर्मकरणं राजन्निति सम्मत्यर्थं विशेषतश्चरणोदकधारणे अभिप्रायान्तरमा लोकपावन इति। स हि सर्वलोकात्मकः ब्राह्मणोऽपि स्वयं स्थित इति पूर्वमुक्तम्। तेन स्वचरणारविन्दोदकेन लोक पावितवानित्युक्तम्। नैतावता त्वपकर्षः यतो भगवान् ततः पूजामाह-व्यलिम्पद्दिव्यगन्धेनेति। पूजयाऽऽप्तदेवत्वं वारयति मित्रमि प्रदीपावलिभिरारात्रिकैः अनेन तस्य सुखं तथा यद्यपि न भवति तथापि मुदा कृतवान् ततः पुष्पैः शिरसि अर्चित्वा ताम्बूलं निवे गां च विधिपरिपालनार्थं पश्चात् स्वागतमब्रवीत् अत्र वृषभो गौः ॥२१-२२॥

श्रीसुबोधिनीसारः

तमागतं विप्रं दूरात् विलोक्य दृष्ट्वा प्रियाया रुक्मिण्याः पर्यङ्कं शय्यामास्थितः श्रीकृष्णोऽच्युतः सहसा त्वरयोत्था दोर्भ्यां भुजाभ्यां पर्यग्रहीत् आलिङ्गितवान् मुदा हर्षेण ॥१८॥ प्रियस्य सख्युर्मित्रस्य विप्रर्षेः सुदाम्नोऽङ्गस्य सङ्गेनातिनिर्वृतः प्रीतः पुष्करेक्षणः पद्मनेत्रो नेत्राभ्यामपां वारां बिन्दून् अमुञ्चत् ॥१९॥ अथानन्तरं पर्यङ्कोपरि उपवेश्य सख्युः सख्ये समर्ह पूजोपकरणमुपहृत्य समर्प्य अस्य पादयोरवनेजनीः शुद्धिकर्त्रीरपः स्वयं शिरसाऽग्रहीत् अधत्त ॥२०॥ हे राजन्! लोकपाव भगवान् दिव्यगन्धेन चन्दनागुरुकुङ्कुमैर्व्यलिम्पत् ॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तं ब्राह्मणं दूरादेव विलोक्य प्रियायाः लक्ष्मणायाः पर्यङ्कमास्थितः अच्युतः सहसा झटित्युत्थायाभ्येत्य समीपं गत्वा मुदा हर्षेण दोर्भ्यां पर्यग्रहीत् आलिङ्गितवान् ॥१८॥ विप्रर्षेस्तस्याङ्गसङ्गेनालिङ्गनेनातीव निर्वृत्तः आनन्दितः प्रीतः प्रीतियु पुष्करेक्षणः दृष्ट्वैव सन्तापहारकः कृष्णः नेत्राभ्यामानन्दाश्रुबिन्दूनभ्यमुञ्चत्। परमानन्दमूर्तेरप्यानन्दाविष्कारहेतुमाह-प्रियस्येति तत्र हेतुमाह-सख्युरिति ॥१९॥ अथानन्तरं तं स्वपर्यङ्के उपवेश्य समर्हणं पूजासाधनमुपहृत्यानीय स्वयमेवास्य सख्युः पादाववनि प्रक्षाल्य पादावनेजनीरपः भगवान् शिरसा अग्रहीद्दधार। तत्र हेतुमाह-लोकपावन इति। शिक्षाद्वारा लोकपावित्र्यार्थमित्याश ॥२०॥ चन्दनादिभिः साधितेन गन्धेन तं व्यलिम्पत् ॥२१॥

अन्वितार्थप्रकाशिका

तमिति। तं ब्राह्मणं दूरादेव विलोक्य प्रियायाः पर्यङ्कमास्थितः अच्युतः सहसा झटित्युत्थायाभ्येत्य प्राङ्गणमाग च मुदा हर्षेण दोर्भ्यां पर्यग्रहीत् आलिङ्गितवान् ॥१८॥ सख्युरिति। प्रियस्य सख्युः विप्रर्षेस्तस्याङ्गसङ्गेनालिङ्गनेना निर्वृतः आनन्दितः प्रीतः प्रीतियुक्तश्च पुष्करेक्षणः कृष्णः नेत्राभ्यामानन्दाश्रुबिन्दूनानन्दाश्रुबिन्दून् अमुञ्चत् ॥१९॥ अथे सार्धम्। हे राजन्! अनन्तरं लोकपावनोऽपि भगवान् तं स्वपर्यङ्के उपवेश्य समर्हणं पूजासाधनमुपहृत्यानीय स्वयमेवा सख्युः पादाववनिज्य प्रक्षाल्य पादावनेजनीरपः पादक्षालनजलानि शिरसा अग्रहीद्दधार ॥२०॥ व्यलिम्पदित्यर्थ चन्दनादिभिः साधितेन दिव्यगन्धेन तं व्यलिम्पत् ॥२१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पर्यग्रहीत् आलिङ्गितवान् ॥१८॥ अब्बिन्दून् प्रेमाऽश्रूणि ॥१९॥ समर्हणमुपहारम्। उपहृत्य दत्त्वा। पादावने पादप्रक्षालनजलानि ॥२०-२१-२२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सख्युरिति। प्रियस्य सख्युः विप्रर्षेः अङ्गसङ्गेनालिङ्गनेनात्यतीव निर्वृतः सुखितः प्रीतश्च पुष्करेक्षणः श्रीकृष्णः नेत्रा अब्बिन्दून् हर्षाश्रुबिन्दून् व्यमुञ्चत् ॥१८॥ अथेति। अग्रहीदिति। धूपैरिति च। अथ हे राजन्! लोकपावनः भगवान् श्रीकृ

् व्यमुञ्चत् पुष्करेक्षण इति
ति शङ्कायामाह-अथोपवेश्य
वनेजनीरपः ॥२०॥ शिरसा
कधारणे अभिप्रायान्तरमाह-
चरणारविन्दोदकेन लोका
ऽसदेवत्वं वारयति मिश्रमिति
सि अर्चित्वा ताम्बूलं निवे

ऽच्युतः सहसा त्वरयोत्थाय
ऽङ्गस्य सङ्गेनातिनिर्वृतः तुष्ट
विश्य सख्युः सख्ये समर्ह
२०॥ हे राजन् ! लोकपावन

त्थायाभ्येत्य समीपं गत्वा च
आनन्दितः प्रीतः प्रीतियुक्त
विष्कारहेतुमाह-प्रियस्येति।
मेवास्य सख्युः पादावनेज
ा लोकपावित्र्यार्थमित्याशयः

युत्थायाभ्येत्य प्राङ्गणमागत्य
तस्याङ्गसङ्गेनालिङ्गनेनातीव
न्दून् अमुञ्चत् ॥१९॥ अथेति
नमुपहृत्यानीय स्वयमेवास्य
॥२०॥ व्यलिम्पदित्यर्थम्

उपहृत्य दत्त्वा । पादावने

पुष्करेक्षणः श्रीकृष्णः नेत्र
कपावनः भगवान् श्रीकृष्ण

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ङ्के उपवेश्य उपवेष्टं कृत्वा सख्युः स्वमित्रस्य तस्य समर्हणं सदुपायनं स्वय३मेव उपहृत्य समर्प्य अस्य पादौ तदङ्घ्री अवनिज्य त्य पादावनेजनीः तत्पादावनेजनसम्बन्धिनीरपः शिरसा अग्रहीत् दधार। चन्दनागुरुकुङ्कुमैः चन्दनादिभिः साधितेन दिव्यगन्धेन सखायं व्यलिम्पत्। सुरभिभिः धूपैः प्रदीपावलिभिः पाठन्तरे प्रदीपैः बलिभिरन्यैरपि पूजासाधनैः मुदा अर्चित्वा तं सम्पूज्य म्बूलं गां धेनुं च आवेद्य स्वागतम् अब्रवीत् पप्रच्छ। इति त्रयाणामेकान्वयः ॥१९-२०-२१॥

कृष्णप्रिया

जब ब्रह्मर्षि सुदामाजी ने जिस महलमें प्रवेश किया उस भगनमें भगवान् श्रीकृष्ण अपनी प्रियतमा श्रीरुक्मिणीजी के पर्थंक पर विराजे हुए थे । ब्रह्मर्षिवर्य को दूर से ही देखकर भगवान यकायक खडे हुए और श्रीविप्रर्षि के समीप पधारकर बडे उत्सीाह से एवं अत्यंत आनन्द एवं आरसे अपने मुज युगलमें मुनिवर को बांध लिये ॥१८॥ राजन् ! निजानन्द स्वरूप भगवान श्रीकृष्ण अपने प्रिय सखा विप्र महर्षिजी के पुण्यतम श्रीअंग स्पर्श से अतिशय आनन्दित हुए पुनः कमलनयन भगवान श्रीकृष्णचन्द्रजी के कोमल नेत्रों से प्रेमाश्रु वर्षा होने लगी ॥१९॥ श्रीब्रह्मण्यदेव भगवान एवं ब्रह्मर्षिवर्य के सम्मिलन एवं समालंगन के बाद भगवान श्रीकृष्णचन्द्रजीने श्रीसुदामाजी को ले जाकर अपने पर्यंक पर बैठा दिया और स्वयं मधुपर्क की सामग्री लाकर उनका समर्चन किया । अधिक क्या कहा जाय राजन् ! भगवान श्रीकृष्ण समस्त लोकों को पावन करने वाले है - फिर भी अपने करकमलों से ब्रह्मण्य देव भगवान ने विप्रवर्य श्रीसुदामाजी के चरण कमलों का प्रक्षालन करके उनका पादतीर्थ पाद भगवानने अपने सिर पर धारण किया और उनके श्रीअंगमें इत्र-चन्दन-अरगजा केसर ादि सुगन्धित द्रव्यों का विलेपन किया ॥२०-२१॥

धूपैः सुरभिभिर्मित्रं [1]प्रदीपावलिभिर्मुदा । अर्चित्वाऽऽवेद्य ताम्बूलं गां च स्वागतमब्रवीत् ॥२२॥
कुचैलं मलिनं क्षामं द्विजं धमनिसन्ततम् । देवी पर्यचरत् [2]शैब्या चामरव्यजनेन वै ॥२३॥
अन्तःपुरजनो दृष्ट्वा कृष्णेनामलकीर्तिना । विस्मितोऽ[3]भूदतिप्रीत्या अवधूतं सभाजितम् ॥२४॥

कर्दमक्षमा

प्रदीपावलिभिः, सुरभिभिः, धूपैः, मित्रम्, मुदा, अर्चित्वा, गाम्, च, ताम्बूलम्, आवेद्य, स्वागतम्, अब्रवीत् ॥२२॥ कुचैलम्, मलिनम्, क्षामम्, धमनिसन्ततम्, द्विजम्, शैब्या, चामरव्यजनेन, वै, पर्यचरत् ॥२३॥ अन्तःपुरजनः, अमलकीर्तिना, कृष्णेन, अतिप्रीत्या, अवधूतम्, सभाजितम्, दृष्ट्वा, विस्मितः, अभूत् ॥२४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

धमनिभिः सिराभिः सन्ततं व्याप्तम् ॥२३॥ अवधूतं मलिनम् ॥२४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गां चेति व्याख्यातमक्रूरोपाख्याने ॥२२॥ शिरा नाडी 'धमनी तु शिरा हट्ट विलासीन्यस्तु योषिति' इति मेदिनी । शैब्या च। अत्र 'देवी पर्यचरत् साक्षात्' इति पाठ एव श्रीधरसम्मतः । अग्रे 'पर्यङ्कस्थां श्रियं हित्वा' इत्यत्र ''तावच्छ्रीर्जगृहे हस्तं तत्परा ष्ठिनः'' इत्यत्र च श्रीपदोपादानात् स्वामिभिः शैव्यापरत्वेन व्याख्यानाच्च । अत एव चक्रवर्तिना 'गृहं द्व्यष्टसहस्राणाम्' रुक्मिणीगृहमिति व्याख्याय तत्र पाद्मोत्तरखण्डवाक्यं प्रमाणत्वेन न्यस्तम् । 'स तु रुक्मिण्यन्तःपुरद्वारि क्षणं तूष्णीं स्थितः' बालबोधिन्यां शैव्येति पाठमङ्गीकृत्य शैव्या लक्ष्मणेति व्याख्या श्रीपदं लक्ष्म्यंशभूत लक्ष्मणापरत्वेन व्याख्यातम् । तत्र च

---

[1] प्रदीपैर्बलिभिः-वीर. । [2] साक्षाच्चामर श्रीधर. वंशी. जीव. शुक. ; पर्यचरद्वैष्मी-वीर. ; पर्यचरच्छैष्या-विज. विश्व. । [3] भूत्स
मवधूतं-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

शैब्या शब्दस्य लक्ष्मणापर्यायत्वे मानमन्वेष्यम् । अशीतितमाध्याये 'शैब्ये रोहिणि लक्ष्मणे' इत्यत्र शैब्ये मित्रविन्दे पर्यायालेखनात्परस्परविरोधो विवेचनीयः सुधीभिरिति । अतः शैब्येति पाठोऽशोभनः प्रतिभाति ॥२३-२४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अर्चित्वा अर्चयित्वा परमान्नादिभोजनं च यथासमयं स्नपनपूर्वकं ज्ञेयं तच्च भुक्त्वेत्यादिनाऽग्रे वक्ष्यत्यपि ॥२२॥ कुचेलमिति । वस्त्राप्रदानं सूचयति । तच्च सकारणमग्रे व्यक्तं भावि मलिनं विवर्णमित्यादिकं शीतादिदुःखेनैव एभिस्तु विशेषणैः परिचरणीयत्वाऽयोग्यता तस्योक्ता । एवं तेषां यथोत्तरं श्रैष्ठ्यं तथापि पर्यचरत्, का ? या साक्षात् स्वयमेव देवी पट्टमहिषी श्रीरुक्मिणीत्यर्थः । इति श्रीभगवद्वृत्तस्य अपि परमब्रह्मण्यत्वं दर्शितम् ॥२३॥ अवधूतं श्रीकृष्णेन सभाजितं दृष्ट्वा ॥२४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

धूपादिभिश्च मुदाऽर्चयित्वा यतो मित्रं सखायं ताम्बूलं गां च समर्प्य भोजनं च यथासमयं स्नपनपूर्वकं ..(भा)वि, तच्च (भा.१०/८१/१२) 'भुक्त्वा' इत्यादिनाऽग्रे वक्ष्यत्येव ॥२२॥ कुचेलमिति वस्त्राप्रदानं सूचयत्येव तच्च सकारणमग्रे व्यक्तं भावि मलिनत्वादिकं च दारिद्र्येण तैलोद्वर्तनाद्यभावादेव । विशेषणैश्चैभिः श्रीरुक्मिण्याः परिचरणायोग्यता तस्योक्ता । एवं तेषां यथोत्तरं श्रैष्ठ्यं तथापि किञ्च देवी जगत्पूज्यापि किंवा रूपगुणादिभिर्विद्योतमाना पर्यचरत् यतो भैष्मी श्रीभगवदर्थं कन्यात्वेऽपि त्यक्तबन्धुवर्गादिका परमपतिव्रतेति भावः । वै प्रसिद्धौ ॥२३॥ अमलकीर्तिनेति साधुवर्गपूज्यत्वेनावधूत सभाजनानर्हतोक्ता तथापि किञ्च कृष्णेन साक्षाद्भगवताऽप्यतिप्रीत्या परमप्रेम्णा सभाजितं दृष्ट्वा जन इति वर्गापेक्षयैकत्वम् । अवधूतमिति तैर्व्याख्यातमेव यद्वा, गार्हस्थ्येऽपि तल्लिङ्गादर्शनात् ॥२४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१६-२९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

सुरभिभिर्धूपैर्दीपैर्बलिभिरन्यैश्च पूजासाधनैरर्चित्वा गां धेनुं ताम्बूलं च निवेद्य स्वागतमब्रवीत् पप्रच्छ ॥२२॥ कुचेलमिति । मलिनमभ्यङ्गोद्वर्तनाद्यभावात् धमनीभिः सिराभिः सन्ततं व्याप्तं मेदोमांसादिरहितकेवलत्वङ्नाडीमात्रावशिष्टशरीरमित्यर्थः । हेतुः क्षामं क्षुधा कर्शितं भैष्मी रुक्मिणी चामरव्यजनेन पर्यचरद्वीजयामासेत्यर्थः ॥२३॥ अन्तःपुरजन इति । अमला कीर्तिर्यस्य तेन कृष्णेन प्रीत्या सभाजितं सम्यक्पूजितं तमवधूतं मलिनं वीक्ष्य विस्मितो बभूव ॥२४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

धमनिसन्ततं सिरासहस्राचितगात्रम् ॥२३-२५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१९-२६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

देवी पर्यचरच्छैब्येत्यादि । देवी रुक्मिणी कीदृशी शैब्या शिवं कल्याणं तस्य समूहं शैवं तत्र साधुः शैब्या अन्यथा 'तावच्छ्रीर्जगृहे हस्तं' इत्यस्यासङ्गतिः । वस्तुतस्तु श्रीरुक्मिण्येव एकतमं गृहमिति च तस्या एव गृहस्य प्राधान्यम् ॥२३-

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥१८-४५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

साक्षाद्देवी रुक्मिणी शैब्येति क्वाचित्कः पाठः पाद्मोत्तरखण्डासम्मतः ॥२३॥ अमलकीर्तिनेति । तत्र श्रीदामपरिचरणरूपा कीर्तिः सुदामदारिद्र्यभञ्जनरूपं नाम चाभूत् । अवधूतं मलिनवेषम् ॥२४॥

गूढार्थदीपिनी

धूपादिभि: मित्रमर्चित्वा गां धेनुं मधुरवाणीं वा भोजनान्ते ताम्बूलं च आवेद्य स्वागतमब्रवीत् अकरोदित्यर्थ: ॥२२॥ क्षामं दुर्बलम् । धमनीभि: गलस्थशिरानाडीभि: सन्ततं व्याप्तं तं साक्षात् देवी रुक्मिणी पर्यचरत् वीजयामास व्यजनेन सेवितवती । अत्र शैब्येत्यपपाठ: स तु रुक्मिण्यन्त:पुरद्वारि क्षणं स्थित: इति पाद्मोत्तरखण्डोक्तिविरोधात् अतो न श्रीधरसम्मत: ॥२३॥ अवधूतं मलिनवेषम् । सभाजितं सत्कृतम् ॥२४॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

धमनिभि: सिराभि: साक्षाद्देवी रुक्मिणी ॥२३॥ अवधूतं मलिनवेषम् ॥२४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो भार्यापि पतिव्रतात्वान्मासर्यादिकमकृत्वा तं पूजितवतीत्याह–कुचेलमिति । मलिनभग्नस्थूलवस्त्रं शरीरं संस्काररहितं दुर्बलं धमनिभि: शिराभि: सन्ततं तथापि द्विजं ब्राह्मणस्यैषैव शोभा तादृशमपि देवीदेवतारूपा लक्ष्म्यावेशात् शैब्या लक्ष्मणा चामरव्यजनेन पर्यचरत् पूर्वं भगवति चामरव्यजनं कुर्वाणा स्थिता पश्चाद् ब्राह्मणपूजायामपि तथैव कुर्वाणा स्थितेत्यर्थ: ॥२३॥ एवमुभाभ्यां पूजितं दृष्ट्वा तत्रत्या आश्चर्ययुक्ता जाता: इत्याह–अन्त:पुरजन इति । कृष्णेन सभाजितमवधूतं दृष्ट्वा विस्मितोऽभूत् अनेन भगवत्यपि अपकर्षो भाव्यतामिति शङ्काभावायाह–अमलकीर्तिनेति । तत्राप्यतिप्रीत्या तत्रापि सोऽवधूत: मलिन एव अन्यद्वारा मलापकर्षणं कृत्वा पश्चात् पूजापक्षो निवारित: ॥२४॥

श्रीसुबोधिनीसार:

सुरभिभि: धूपै: प्रदीपानामावलिभि: पङ्क्तिभि: मित्रं सखायमर्चित्वा ताम्बूलं वीटकमावेद्य समर्प्य गां च जलं निवेद्य स्वागतमब्रवीत् ॥२२॥ कुत्सितानि चेलानि वस्त्राणि यस्य तं मलिनं क्षामं क्षीणं दुर्बलं धमनीभि: शिराभि: सन्ततं व्याप्तं द्विजं ब्राह्मणं साक्षात् देवी रुक्मिणी चामरव्यजनेन सेवामकरोत् ॥२३॥ अमला शुद्धा निर्दोषा कीर्तिर्यस्य तेन कृष्णेन सभाजितं सत्कृतमवधूतं मलिनं विप्रं दृष्ट्वाऽतिप्रीत्या परमादरेण अन्त:पुरजनो विस्मितोऽभूत् ॥२४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मुदा धूपादिभिस्तं मित्रमर्चित्वा ताम्बूलं गां धेनुं च निवेद्य स्वागतमब्रवीत् पप्रच्छ ॥२२॥ अभ्यङ्गोद्वर्तनाद्यभावात् मलिनं धमनिभि: शिराभि: सन्ततं व्याप्तम् । तत्र हेतुमाह–क्षामं दुर्बलमिति । द्विजं चामरव्यजनेन देवी दीप्यमाना शैब्या लक्ष्मणा पर्यचरत् वीजयामास । वै इति तद्भाग्यस्याश्चर्यं सूचयति ॥२३॥ अवधूतं मलिनं तम् अमला कीर्तिर्यस्य तेन कृष्णेन प्रीत्या सभाजितं सम्यक् पूजितं दृष्ट्वा अन्त:पुरजनो विस्मितोऽभूदित्यन्वय: ॥२४॥

अन्वितार्थप्रकाशिका

धूपैरिति । मुदा धूपादिभिस्तं मित्रमर्चित्वा ताम्बूलं गां धेनुं च निवेद्य स्वागतमब्रवीत् पप्रच्छ । धूपैरित्यत्र अभ्यूह्यानि मधुपर्कपूजोत्तरं स्नपनपूर्वकं परमान्नादिभोजनं ज्ञेयम् ॥२२॥ कुचैलमिति । कुचैलमिति वस्त्रप्रदानं व्यज्यते मलिनं धमनीभि: शिराभि: सन्ततं व्याप्तं तत्र हेतुमाह–क्षामं दुर्बलमिति । द्विजं चामरव्यजनेन साक्षान्मुख्या देवी रुक्मिणी पर्यचरत् वीजयामास । अत्र यदि देवी पर्यचरच्छैब्या इति पाठस्तदा शैब्या लक्ष्मणा रुक्मिणीगृहं कार्यवशादागता इति व्याख्येयम् । पाद्मोत्तरस्वारस्यात् ॥२३॥ अन्त:पुरेति । अवधूतं मलिनं तम् अमला कीर्तिर्यस्य तेन कृष्णेन अतिप्रीत्या सभाजितं सम्यक् पूजितं दृष्ट्वा अन्त:पुरजनो विस्मितोऽभूत् ॥२४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्षामं कृशदेहं धमनिभि: दृश्यमाननाडिकाभि: सन्ततं व्याप्तं देवी रुक्मिणी तद्गृहागता तदनुवर्तिनी शैब्या भद्राख्यमहिषी च चामरव्यजनेन पर्यचरत् । एकाचामरेण अपरा व्यजनेनेत्यर्थ: देवीपर्यचरत्साक्षादिति पाठे तु स्पष्टम् ॥२३॥ अङ्गतैलमर्दनादिना असंस्कृतदेहं कृष्णेन सत्कृतम् ॥२४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कुचैलमिति । कुचैलं परिधृतकुत्सितवसनं मलिनमभ्यङ्गोद्वर्तनाद्यभावात् समलगात्रं क्षामं सुधासहनसुकृशशरीरं धमनि शिराभिः सन्ततो व्याप्तस्तं मेदोमांसादिरहित केवलत्वङ्नाडीमात्रावशिष्टशरीरमित्यर्थः । द्विजं देवी भैष्मी रुक्मिणी चामरव्यज पर्यचरत् वीजयामास । क्वचिच्छैब्येति पाठः । तदा देवी रुक्मिणी शैब्या मित्रविन्देति च ज्ञेयम् । 'देवी पर्यचरत् साक्षात्' इति प तु स्पष्ट एवार्थः । वै इत्यवधारणार्थः ॥२२॥ अन्तःपुरेति । अन्तःपुरजनः अमला निर्मला कीर्तिर्यस्य तेन कृष्णेन अतिप्री सभाजितं सम्यक्पूजितम् अवधूतं मलिनं तं दृष्ट्वा विस्मितः अभूत् ॥२३॥ विस्मितान्तःपुरजनवाक्यमाह । किमिति द्वाभ्या किमिति । अवधूतेन मलिनेन श्रिया हीनेन अत एव भिक्षुणा भिक्षुकेण अस्मिन् लोके गर्हितेनानादरणीयेन अधमेन च अ कुचैलेन पूर्वजन्मनीति शेषः । किं पुण्यं सुकृतं कृतं स्यात् ॥२४॥

कृष्णप्रिया

राजन् ! पुनः श्रीकृष्णने अत्यंत आनन्द से सुवासित धूप और दीपावली अपने प्रिय मित्र की आर उतारी । राजन् इस प्रकार अर्चन करके ताम्बूल एवं गो प्रदान करके मधुर वचनोंसे कहा विप्रवर्य मित्रवर्य स्वागत सुस्वागतम् शब्दों से स्वागत किया ॥२२॥ द्विजवर्य के वस्त्र पुराने और फटे हुए थे मुखकमल तेजोमय था कि काया अत्यंत दुबली थी श्रीअंग की सारी सिराये दीख पडती थी । भगवती श्रीरुक्मिणीजी व्यजन एवं च ढुलाकर विप्रर्षि की सेवा करने लगी ॥२३॥ अन्तःपुर के नर नारियां एवं सेवकवर्ग यह अपूर्व दृश्य देखकर अत आश्चर्य मग्न हो राहा था कि पुण्यश्लोक पूर्ण पुरुषोत्तम भगवान श्रीकृष्ण अत्यंत आदर भक्तिसे इस मैले-फ वस्त्रवाले अवधूत महर्षि का समर्चन कर रहे है ॥२४॥

किमनेन कृतं पुण्यमवधूतेन भिक्षुणा । श्रिया हीनेन लोकेऽस्मिन् गर्हितेना[1]धनेन च ॥२
योऽसौ [2]त्रैलोक्यगुरुणा श्रीनिवासेन सम्भृतः [3]। पर्यङ्कस्थां श्रियं[4] हित्वा परिष्वक्तोऽग्रजो यथा ॥२
कथयाञ्चक्रतुर्गाथाः पूर्वा[5] गुरुकुले स ताः । [6]आत्मनो ललिता राजन् करौ गृह्य परस्परम् ॥२

कर्दमक्षमा

भिक्षुणा, अधनेन, च, श्रिया, हीनेन, अस्मिन्, लोके, गर्हितेन, अनेन, अवधूतेन, किम्, पुण्यम्, कृतम् ॥२५॥ श्रीनिवा त्रैलोक्यगुरुणा, पर्यङ्कर्थाम्, श्रियम्, हित्वा, यथा, अग्रजः, असौ, यः, सम्भृतः, परिष्वक्तः ॥२६॥ सतोः, आत्मनोः, र परस्परम्, करौ, गृह्य, गुरुकुले, सतोः आत्मनः, पूर्वाः, ललिताः, गाथाः, कथयाञ्चक्रतुः ॥२७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

विस्मयमाह-किमनेनेति द्वाभ्याम् ॥२५॥ सम्भृतः सम्मानितः ॥२६॥ सतोर्वसतोः गृह्य गृहीत्वा ॥२७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

किमनिर्वचनीयम् ॥२५॥ श्रियं श्र्यंशभूतां शैब्याम् ॥२६॥ आत्मनोर्निजयोः ॥२७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रिया सम्पत्त्या हीनेन भिक्षुणा याचकेन अतोऽस्मिन् लोके गर्हितेन ततश्चाधमेन निकृष्टेन इति पुण्ययोग्यत ॥२५॥ असौ अयम् अधुना साक्षादेवेत्यर्थः । त्रिलोकगुरुणा श्रीब्रह्मादिपूज्येनापीति गर्हिताधमस्य श्रियो नितरां वासो तेनापीति च श्रीहीनादेः सम्मानतानर्हतोक्ता अतः आस्तां वा विप्रत्वादिना सम्माननं परिष्वङ्गं त्वीदृशं नार्हत्येवेत्याशयेन श्रीरूपां पर्यङ्कस्थामपि हित्वा परिष्वक्तः श्रियमिति तु पाठोऽनुवृत्तः परिष्वङ्गश्च महादरेण परमस्नेहेन चेति सूचयति यथा तदिदं श्रीमदन्तःपुरजनवचनमिति युक्तमेव अन्येषां श्रीभगवतस्तथाविधाने तु नायुक्तताभानमिति तद्वचनत्वेनोक्तम् ॥२६

---

१. धमेन-श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक. । २.त्रिलोक-श्रीधर. वंशी. वीर. विज. जीव. । ३. संमतः-इति कस प्रियां इति कस्तचित् । ५. पुरा गुरुकुते सतोः-वीर. ; पूर्ब गुरुकुले सतां-विज. । ६. आत्मनोर्ललिता-वीर. ; आत्मनोल्लसितौ-विज.।

पुरजनविस्मयापनोदन
गुरोः कुले गृहे तथा च
व्यञ्जितेन सख्येन तस्य

भिक्षुणा याचके
पुण्ययोग्यता निरस्ता । एवं
वाऽन्वयः । अस्मिन् मत्य
॥२५॥ असौ अयमधुना
वासस्थानंवा तेनापीति च
नार्हत्येवेत्याशयेनाह-प्रियां
तादृशस्यादरस्य चाभावाच्
स्वीकृतः तदेवाह-पर्यङ्कस्थ
किंवा सख्यस्वभावादेव ते
आत्मनोर्गाथाः परमाद्भुतत्वेन
इत्यादि । ललिताः सर्वलोक
कथयाञ्चक्रतुरिति साम्येनोक्ति
बलाच्छ्रीभगवतैव तस्य प्रवर्त
प्रकाशितेन स्नेहभरेण तस्य वैव

॥१६-२९॥

विस्मितवाक्यमेवाह-कि
विशिनष्टि-अवधूतेन मलिनेन श्रि
एवेति सूच्यते अधमेन न ह्यधमः
श्रीनिवासेन सम्भृतः सम्मानितः
शेषः । पुरा गुरुकुले सतोर्वर्तमान
कथयाञ्चक्रतुः ॥२७॥

सम्भृतः सभाजितः सङ्ग

विस्मयमाह-किमनेनेति द्वा

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुरजनविस्मयापनोदनार्थमिव तत्त्वतो मिथः सख्यसुखोदयार्थं स्वस्नेहभरं प्रकाशयन् करग्रहणपूर्वकं पूर्वाः प्रियवार्ताः गुरोः कुले गृहे तथा च विश्वः 'कुलं जनपदे गृहे' इत्यादि ललिताः सर्वलोकमनोहराः परस्परं करौ गृहीत्वेति श्रीभगवता अङ्गीकृतेन सख्येन तस्यापि सख्योदयात् ॥२७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भिक्षुणा याचकेन श्रिया धनादिसम्पत्त्या हीनेन अतो दरिद्रेणास्मिन् लोके सर्वजनमध्ये गर्हितेनाधमेन च निकृष्टेनेति पुण्ययोग्यता निरस्ता । एवं विशेषणानामेषां यथोत्तरं श्रैष्ठ्यम् । अनेनापि किं कतरत् पुण्यं सुकृतं पूर्वजन्मनि लोकेऽस्मिन्नित्यस्यात्रैव अन्वयः । अस्मिन् मर्त्यलोके जन्मनि वा कृतं किमिति तादृशपुण्यस्यासम्भवात् । ज्ञानं च सद्वयमपि तदेवकरवामेति भावः ॥२५॥ असौ अयमधुना साक्षादेवेत्यर्थः । त्रिलोकगुरुणा श्रीब्रह्मादिपूज्यत्वेनापीति गर्हिताधमस्य श्रियो नितरां वासो यस्मिन् समस्थानंवा तेनापीति च श्रीहीनादेः सम्माननानर्हतोक्ता । अहो आस्तां वा विप्रत्वादिना सम्माननम् । परिष्वङ्गं तु ईदृशं नार्हत्येवेत्याशयेनाह-प्रियां पर्यङ्कस्थामपि हित्वा परिष्वक्तः तच्च महादरेण परमस्नेहेन चेति सूचयति यथाग्रज इति पदप्रद्युम्नादिषु सत्यादरस्य चाभावाच्छ्रीबलदेवोपमा । पाठान्तरे महिषीवर्गश्रैष्ठ्यं श्रीरुक्मिणीमपि । अन्यत्तैर्व्याख्यातम् । यद्वा, सम्मतः संमतः तदेवाह-पर्यङ्कस्थामिति । अन्यत्समानम् ॥२६॥ पुरजनविस्मयापनोदार्थमिव तत्त्वतस्तस्य सुखार्थं स्वस्नेहभरं प्रकाशयता स्व सख्यस्वभावादेव तेन सह सङ्गम्य करग्रहणपूर्वकं पूर्वाः प्रियवार्ताः श्रीभगवता कथिता इत्याह-कथयाञ्चक्रतुरिति । गाथाः परमाद्भुतत्वेन कविभिर्गीततया निबद्धा लोकप्रसिद्धा वा वार्ता गुरोः कुले गृहे तथा च विश्वः- 'कुलं जनपदे गृहे' इत्यादि । ललिताः सर्वलोकमनोहराः परस्परं करौ गृहीत्वेति । सख्येति । सख्येनात्यन्तस्नेहात्कथने श्रीभगवतः प्राधान्येऽपि कथयाञ्चक्रतुरिति साम्येनोक्तिर्विप्रस्याप्यग्रे प्रतिवचनात् । किंवा अनयैव तस्यात्मनो वा प्रीत्यर्थं मध्य मध्ये किञ्चिदनुक्त्यानुमोदने श्रीभगवतैव तस्य प्रवर्तनमूह्यम् । मिथो हस्तग्रहणं च श्रीभगवतैव तं प्रति परमाग्रहेण स्वकरग्राहणात् किं वा श्रीभगवता प्रकाशितेन स्नेहभरेण तस्य वैवश्यापादनात् इति प्रेमोद्रेकेण सम्बोधयति-राजन्निति ॥२७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१६-२९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

विस्मितवाक्यमेवाह-किमिति द्वाभ्याम् । पुरा पूर्वजन्मनि किं पुण्यमनेन कृतमित्यर्थः । अन्यथैवं पूजितो न स्यादित्यभिप्रयंस्तं कुचैलिनि-अवधूतेन मलिनेन श्रिया हीनेन दरिद्रेणात एव अस्मिँल्लोके गर्हितेनादरणीयेन अस्मिन् लोक इत्यनेन अमुष्मिंस्त्वादरणीय इति सूच्यते अधमेन न ह्यधमः पूज्यते किन्तु पूजकापेक्षयोत्तम एव पूज्यत इति ॥२५॥ योऽसाविधोऽप्ययं द्विजस्त्रिलोकगुरुणा निवासेन सम्भृतः सम्मानितः परीष्वक्तः आलिङ्गितश्च अथाग्रजो रामस्तद्वत् ॥२६॥ कथयाञ्चक्रतुरिति अस्य कृष्णकुचेलाविति ॥२६॥ पुरा गुरुकुले सतोर्वर्तमानयोरात्मनोर्याः सुन्दराः गाथाः कथाः ताः परस्परं करौ हस्तौ गृह्य गृहीत्वा । ल्यबार्षः । हे राजन् ! कथयाञ्चक्रतुः ॥२७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

सम्भृतः सभाजितः सङ्गृहीतो वा ॥२६॥ गुरुकुले सतां स्वेषां काले पूर्वस्मिन् याः गाथाः वृत्तास्ताः कथयाञ्चक्रतुः ॥२७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१९-२६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२३-४५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१८-४५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विस्मयमाह-किमनेनेति द्वाभ्याम् । अधमवेषत्वादधमेन ॥२५-२६॥ गृह्य गृहीत्वा ॥२७॥

गूढार्थदीपिनी

अधमेन इति वेषत्वेन तथा प्रतीतिर्न वस्तुतः। अनेन किमनिर्वचनीयं पुण्यं कृतम् ॥२५॥ सम्भृतः सम्मानितः परिष्वक्त आलिङ्गितश्च। यथा अग्रजो बलरामः तथा ॥२६॥ गुरुकुले सतोः वर्तमानयोः परस्परम् आत्मनोः निजयोः ललिताः पूर्वाः गाथाः परस्परं चक्रतुरित्यन्वयः। करौ गृह्य गृहीत्वा ॥२७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विस्मयमाह–किमनेनेति द्वाभ्याम्। श्रिया हीनेन निर्धने गर्हितेन धनसाध्यस्वजनादिसत्कारार्हो लोके स्तुत्यो भवति तद्विपरीते अधमेन लोके बहुधनसञ्चयेन परोपकारी उत्तमः स्वभोजनाच्छादनमात्रकर्ता मध्यमः अयं तु स्वभोजनाच्छादनेऽप्यकल्पोऽधमस्तेन ॥२५॥ सम्भृतः श्रेष्ठत्वेन धृतः परिष्वक्तश्च यथा अग्रजो बलः ॥२६॥ गुरुकुले सतोर्वसतोः ॥२७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

विस्मितानां वाक्यमाह–किमनेनेति। ते सर्वे पुण्यफलमेव शुभं मन्यन्ते अदृष्टपूर्वत्वात् किमित्याशङ्क्य किञ्चित्तथाभविष्यतीति चेत्तत्राहुः–अवधूतेनेति पञ्चविशेषणानि यद्यस्य धर्मो भवेत् तदा प्रथमं धर्मोत्पादितं शरीरं भवेत् देहे कान्त्यतिशयो भवेत् अयं तु श्रिया हीनः लौकिकी सम्पत्तिश्च अनेनैव समुज्झिता किञ्च यद्यस्य धर्मो भवेत् तदा लोके कीर्तिर्भवेत् अयं च लोके गर्हितः अस्मिन्निति वयमेवात्र प्रमाणम् इह लोकवत्परलोकोऽपि इति सूचितं किञ्च धर्मे विद्यमाने तत्कार्यमस्य धनं भवेत् अयं चाधमः दरिद्रः अधमः इति वा क्वचित् पाठः तदा संस्कारसामग्र्यभावात् संस्काराभावात् तथोक्तिः चकारादन्येऽपि लक्ष्मणादयः सङ्गृहीताः ॥२५॥ ननु किमस्य जातं येनैतावदुच्यते इति तत्राह–योऽसाविति। त्रैलोक्यगुरुणा भगवान् हि लोकशिक्षार्थं कर्माणि करोति तेन यद्येतादृशेनापि सख्यं बोधयेत् तदा नीचैरपि लोकाः सख्यं कुर्युः किञ्च भगवान् श्रीनिवासः यदि पुण्यरहितोऽपि लक्ष्म्या संयुक्तो तदा कोऽपि दरिद्रो न भवेत् एतादृशेन सम्भृत इति किञ्चित्पुण्यमस्तीति ज्ञायते काम्यश्च परमकाष्ठापन्नः किञ्च महता आदरेण परिष्वक्तः अनेनान्तरोऽपि भावोऽस्मिन् वर्णितः तं भावं निरूपयितुं दृष्टान्तमाह–अग्रजो बलभद्रो यथेति। कदाचिद्देशान्तरादागत्य समागच्छेत् तदा भगवानेव सादरं करोतीत्यर्थः पूजा त्वधिका ॥२६॥ एवं कायिकमानसिकसन्तोषजननमुक्त्वा वाचिकसन्तोषजननमाह–कथयाञ्चक्रतुरिति। गाथाः पूर्वकथानिबद्धाः श्लोकाः याः पूर्वं गुरुकुले सतोः सम्बन्धिन्यः कथयाञ्चक्रतुः कथानिमित्तं वा स्मृत्वा कथयामासतुः ता आत्मनो ललिताः स्वस्यैव प्रियजनिकाः राजन्निति सावधानार्थं करौ गृहीत्वेति तुल्यतामापाद्य ये श्लोकाः याः वा श्रुतयः ताः परस्परसन्तोषार्थं प्रथमं पठितवन्तः ततो भगवानाह–समुदायानुवादः वा तत्र प्रथमं भगवद्वाक्यानि षोडशभिराह–अपि ब्रह्मन्निति। वाक्यैस्तस्य सम्पत्त्यभावोऽपि स्थिरीक्रियते अन्यथा वर्णनार्थं तथा वर्णितः स्यात् तत्र प्रथमं वियोगावधि यज्जातं तत्पृच्छति–अपीति त्रिभिः। विद्यासमाप्तिस्तदैव जाता तदनु नैष्ठिकब्रह्मचर्यं समावर्तनेन विवाहो वा कृत इति वक्तव्यं तदर्थं पृच्छति ब्रह्मन्निति सम्बोधनात् विद्यासिद्धिः सूचिता गुरुकुलात् ब्रह्मचर्यं गुरु दृष्टार्थमपि स्थित्या भवति "गुर्वभावे तत्पत्न्यां तत्पुत्रे तद्गोत्रे वा ब्रह्मचर्यमि"ति ज्ञापयितुं कुलपदम्। "गुरवे तु वरं दत्त्वा तदनुज्ञया" इति स्नानाख्यं समावर्तनं दक्षिणादानानन्तरं भवति तदनन्तरं च–

"चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः। द्वितीयमायुषो भागं कृतदारो गृहे वसेत्॥" इति॥

तदनन्तरं विवाहः तत्राह–गुरुकुलाल्लब्धदक्षिणात् समावृत्तेन तदनन्तरं समावर्तनसंस्कारेण संस्कृतेन हे धर्मरहस्याभिज्ञ! सदृशी स्वस्य सर्वतः समा भार्या ऊढा न वा ऊढेति ॥२७-२८॥

श्रीसुबोधिनीसारः

श्रिया धनेन हीनेनास्मिल्लोके गर्हितेन निन्दितेनाधमेन नीचेनावधूतेन भिक्षुणानेन किं पुण्यं कृतम् त्रिलोकपतिना श्रीनिवासेन शय्यास्थां श्रियं रुक्मिणीं हित्वा त्यक्त्वाग्रजो बलदेव इति परिष्वक्तो मिलितः योऽसौ सम्मानितः ॥२६॥ हे राजन्! गुरोः कुले सतोर्वसतोर्विद्यमानयोरात्मनोः पूर्वाः गाथाः कथाः कथयामासतुः परस्परं हस्तौ गृह्य गृहीत्वा ल्यबार्षः समासाभावात्। ललिता मनोहराः ॥२७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

विस्मयमेव दर्शयति–किमनेनेति द्वाभ्याम् । योऽसौ त्रिलोकगुरुणा ब्रह्मेन्द्रादित्रिलोकपालपूज्येन कृष्णेन परिष्वक्तः आलिङ्गितः सम्भृतः सम्मानितश्च तेनानेन किं पुण्यं कृतमिति द्वयोरन्वयः । तत्र पूर्वजन्मन्येव किञ्चित् महत्कर्म कृतम्, अस्मिंस्तदसम्भवात् इत्याशयेन तं विशिनष्टि–अस्मिन् लोके गर्हितेन अनादरणीयेन । तत्र हेतुः–अधमेनेति । नीचवत्प्रतीयमानेन । तत्र हेतुः–अवधूतेन मलिनेन भिक्षुणा चेति । तत्र हेतुः–श्रिया हीनने दरिद्रेणेति ॥२५॥ त्रिलोकगुरुत्वे हेतुमाह–श्रीनिवासेनेति । ब्रह्मादिभिरपि समाराधितायाः श्रिया आश्रयभूतेनेत्यर्थः । तत्र तस्य स्नेहातिशयं सूचयन्नाह–पर्यङ्कस्थां श्रियं श्रियोंऽशभूतां लक्ष्मणां हित्वेति । तत्र दृष्टान्तमाह–अग्रजो यथेति । प्रियां हित्वा यथा बलभद्रः परिष्वज्य सम्पूज्यते तथेत्यर्थः ॥२६॥ ततश्च हे राजन् ! श्रीदामकृष्णौ पुरा गुरुगृहे सतोर्वर्तमानयोर्या ललिता मनोहरा गाथाः कथास्ताः परस्परं करौ प्रगृह्य कथयाञ्चक्रतुरित्यन्वयः ॥२७॥

अन्वितार्थप्रकाशिका

किमिति युग्मम् । योऽसौ त्रिलोकगुरुणा श्रीनिवासेन कृष्णेन पर्यङ्कस्थां श्रियं हित्व अग्रजो यथा परिष्वक्तः आलिङ्गितः सम्भृतः सम्मानितश्च तेन अनेन अवधूतेन मलिनेन भिक्षुणा श्रिया हीनेन दरिद्रेण अस्मिन् लोके गर्हितेन अधमेन नीचवत् प्रतीयमानेन किं पुण्यं कृतम् ॥२५-२६॥ कथयाञ्चक्रतुरिति । हे राजन् ! श्रीदामकृष्णौ पुरा गुरुकुले तद्गृहे सतोर्वर्तमानयोरात्मनोर्या ललिता मनोहरा गाथाः कथास्ताः परस्परं करौ गृह्य । ल्यबार्षः । कथयाञ्चक्रतुः । एतेन मध्य मध्ये श्रीदामवाक्यमपि ज्ञेयम् ॥२७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विस्मयमाह–द्वाभ्याम् ॥२५॥ सम्भृतः सत्कृतः परिष्वक्त आलिङ्गितः ॥२६॥ सतोर्निवसतोः गृह्य गृहीत्वा ॥२७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

य इति । योऽसौ कुचैलः उक्तविधोऽप्ययं द्विज इत्यर्थः । त्रिलोकगुरुणा श्रीनिवासेन लक्ष्मीपतिना श्रीकृष्णेन सम्भृतः सम्मानितः पर्यङ्कस्थां श्रियं भैष्मीं हित्वा परित्यज्य अग्रजः यथा रामवदित्यर्थः । परिष्वक्त आलिङ्गितश्च ॥२५॥ कथयाञ्चक्रतुरिति । तः हे राजन् ! श्रीकृष्णकुचैलाविति शेषः । परस्परं करौ गृह्य गृहीत्वेत्यर्थः । समासाभावात् क्त्वो ल्यबादेश आर्षः । गुरुकुले सतोर्वर्तमानयोः आत्मनोः याः पूर्वाः पुरावृत्ताः ललिताः सुन्दराः गाथाः कथाः ताः कथयाञ्चक्रतुः ॥२६॥ ता एवाह । अपीति । हे ब्रह्मन् ! हे धर्मज्ञ ! लब्धा दक्षिणा येन तस्मात् गुरुकुलात् समावृत्तेन कृतसमावर्तनाख्यकर्मणा भवता सदृशी भार्या ऊढा संजाता न वा । अपिशब्दः प्रश्नद्योतकः ॥२७॥

कृष्णप्रिया

श्रीहरि के अन्त:पुर निवासी जन परस्पर कहने लगे कि इस भिक्षुक दरिद्र क्षुद्र निन्दनीय और निकृष्ट अच्युत ने कौन सा सुकृत किया होगा कि जिससे त्रणलोक के पूज्य एवं वुरुवर्य श्रीनिवास श्रीकृष्ण भगवान स्वयं इसका स्वागत-समादार कर रहे है ।।२५।। अरे भैया ! जरा तो नजर कीजिये ! भगवान श्रीकृष्णने अपने पलंग पर सेवा करती हुई साक्षात लक्ष्मी स्वरूपिणी श्रीरुक्मिणीजी को छोडकर इस अवधूत महर्षिजीको अपने ज्येष्ठ बन्धु बलभद्रजी के समान अपने हृदय से आलिंगन किया ।।२६।। राजन् ! श्रीकृष्णचन्द्रजी का [illegible] सौजन्य के लिये क्या कहा जाय ? आलंगन के बाद दोनों श्रीकृष्ण एवं सुदामाजी परस्पर के करकमल ग्रहण करके अपने अभ्यासकालकी लालित्यमयी आनन्द दायिनी घटनाओंका स्मरण एवं निरुपण करने लगे जो गुरुकुलमें रहते समय घटी हुई थी ।।२७।।

श्रीभगवानुवाच

अपि ब्रह्मन् गुरुकुलाद्भवता लब्धदक्षिणात् । समावृत्तेन धर्मज्ञ भार्योढा सदृशी न वा ॥२८
प्रायो गृहेषु ते [1]चित्तमकामविहतं तथा । नैवातिप्रीयते[2] विद्वन् [3]धनेषु विदितं हि मे ॥२९
केचित्कुर्वन्ति कर्माणि कामैरहतचेतसः । त्यजन्तः [4]प्रकृतीर्दैवीर्यथाऽहं लोकसङ्ग्रहम् [5]॥३०
कच्चिद्गुरुकुले[6] वासं ब्रह्मन् स्मरसि नौ यतः । द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते ॥३१

कर्दमक्षमा

श्रीभगवान्, उवाच । ब्रह्मन् ! लब्धदक्षिणात्, गुरुकुलात्, समावृत्तेन, भवता, धर्मज्ञ ! सदृशी भार्या, ऊढा, न, वा ॥२८ हे विद्वन् ! मे, विदितम्, प्रायः, गृहेषु, ते, चित्तम्, अकामविहतम्, तथा, धनेषु, न, एव, अतिप्रीयते ॥२९॥ केचित्, का अहतचेतसः, दैवीः, प्रकृतीः, त्यजन्तः, यथा, अहम्, लोकसङ्ग्रहम्, कर्माणि, कुर्वन्ति ॥३०॥ ब्रह्मन् ! गुरुकुले, नौ, वास कच्चित्, स्मरसि, यतः, द्विजः, विज्ञेयम्, विज्ञाय, तमसः, पारम्, अश्नुते ॥३१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भार्या ऊढा परिणीता नवेति गृहस्थलिङ्गदर्शनाद्भोगादर्शनाच्च संशयादिव प्रश्नः ॥२८॥ अप्रतिषेधादुद्वाहमनुमतं मत्वाऽऽह प्राय इति । तर्हि ते चित्तं नूनमकामविहतं कामैर्विहतं न भवतीति मे विदितम् तथाहि धनेषु वस्त्रादिषु नैवातिप्रीयसे हे विद्वन्निति विदुषस्तवैतद्युक्तमिति भावः ॥२९॥ कामहतत्वाभावे किं गृहधर्मक्लेशेनेत्याशङ्क्याऽऽह–केचिदिति । दैवीरीश्वरमायारचिता प्रकृतिर्विषयवासनास्त्यजन्तः कामैरनाकृष्टचेतसामपि कर्मकरणे दृष्टान्तः यथाऽहमिति लोकसङ्ग्रहं लोकस्य सङ्ग्रह ग्रहणं य भवति तथाऽहमीश्वरोऽपि कर्माणि यथा करोमि तद्वत् ॥३०॥ नौ आवयोः यतो गुरोः विज्ञेयं परमात्मतत्त्वम् तमसः संसारस्य ॥३

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

गृहस्थलिङ्गमुष्णीशबन्धनादि । भुज्यन्ते इति भोगा वस्त्रभूषणादयः ॥२८॥ अप्रतिषेधान्मया विवाहो न कृत इत्युत्तरप्रदान । इति भाव इति–न हि संसारतत्त्वविदो विषयासक्ताभवन्तीत्याशयः ॥२९॥ स्वयमाशङ्क्य समाधत्ते–कामहतत्वेत्यादिना ।

"यदि ह्यहं न वर्तेयं जातुकर्मण्यतन्द्रितः । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥" इति श्रीमुखोक्तेः ॥३०॥

पारं परमात्मानं 'यस्तस्य पारेऽभिविराजते परः' इत्याद्युक्तेः ॥३१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र श्रीभगवानुवाचेति प्राचुर्यात् अपि किम् अनेन लब्धदक्षिणत्वादेः सर्वस्यापि प्रश्नो ज्ञेयः । हे धर्मज्ञेति यदि समाव कृतं तर्ह्यनाश्रमित्वदोषपरिहारार्थमवश्यं भार्या प्रतिग्राह्येति धर्मं भवान् वेत्त्येवेति भावः ॥२८॥ अकामविहतमिति । धनेषु नातिप्री इति चापाततस्तददाने व्याजार्थं तत्र प्राय इत्यनेन विशब्देनातिशब्देन च वासनाया मूर्च्छितत्वेन च स्थितिं सूचयित्वा काम दास्यामीति निगूढमाश्वासितं च अन्यत्तैः तत्र तर्हीति चूर्णिकार्थमनुसृत्य अध्याहृतं तथा हीति तथेत्यनेन हिशब्दस्यान्वयात् ॥२ कर्माणि गृहस्थधर्मान् केचित् कामैरहतचेतसः केचित्तु दैवीः प्रकृतीस्त्यजन्तः इत्यावृत्त्यान्वयः । ननूत्तरः पक्षः सम्भवतु पूर्वस्तु न भवेदित्याशङ्क्याऽऽह–यथाहमिति । लोकस्य सङग्रहो येन तादृशं यथा स्यात् ॥३०॥ मौनं सम्मतिलक्षणमिति तत्स्वीकारमालक्ष्य सख्यहेतुपूर्वगाथा एव कथयितुमारभमाणो वक्ष्यमाणकष्टवार्तायां दोषपरिहारार्थं सुखहेतुत्वबोधनार्थं गुरुतत्सेवादिमाहात्म्यमाह–कच्चिदिति चतुर्भिः । नौ वासं विज्ञाय अनुभूय विज्ञेयमिति विशब्देन श्रीभगवत्तत्त्वमभिप्रे तमसः सर्वाज्ञानदुःखमयतः प्रकृतेः पारं श्रीवैकुण्ठलोकं लभत इत्यर्थः ॥३१॥

---

१. कामनिरतं तदा–गो. प्रे. टी. । २. प्रीयसे–श्रीधर. वशी. वीर. विज. विश्व. शुक. । ३. तद्वद्धनेषु–विज. । ४. प्रकृतिं दैवीं विज. । ५. लोकसंग्रहः–विज. । ६. गुरुकुलावासं–विज. ।

अपि वि
पूर्वमधीता एवेति
भार्या परिग्राह्येति
तैर्व्याख्यातम् । अ
किञ्चित् कामहत
समावर्तनानन्तरमि
विवाहो युक्त इति
तत्स्वीकारमालक्ष्य
गुरुतत्सेवादिमाहात
ज्ञात्वा विज्ञेयमिति
अतोऽनायासेनावान

केचित् मुमु
यस्येति बहुवित्तवल्लो
तद्धेतुभूतज्ञानोत्पादक
यस्मिन्नाश्रमे गुरुरहमि

तदेवाह–अ
'वेदमधीत्याभिसमावृत्त
भार्योढा परिणीता न वा
तव चित्तं प्रायशः गृहेषु
तत्त्वत्रययाथात्म्यज्ञानिन् !
पुनर्निश्चित्य कामहतत्वा
केचिन्मुमुक्षवः दैवीं देव
'लक्षणहेत्वोः' इति श
नित्यनैमित्तिकादिरूपाणि
ननु कामैश्चेतसोऽविहतय
किं कर्मानुष्ठानेनेत्यत आ
कामैर्विहतचेतोभिस्तद्विहति
हे ब्रह्मन् ! नौ आवयोः गुरु
पारमज्ञानस्य पारं मुक्तिमिति

स भवान् सदृशी
भार्यास्त्वकामविहतं कामन
२९॥ केचिन्निवृत्तिमार्गस्थाः
स्मिन् गुरुकुलवासे विज्ञेयं

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अपि किम् ? अनेन लब्धदक्षिणत्वादेः सर्वस्यापि प्रश्नो ज्ञेयः । हे ब्रह्मन्निति मया सह सर्वे वेदाः साङ्गा भवता पूर्वमधीता एवेति भावः । सदृशी रूपगुणादिनाऽऽत्मतुल्या हे धर्मज्ञेति समावर्तनानन्तरमनाश्रमित्वदोषमपरिहारार्थमवश्यं भार्या परिग्राह्येति भवान् वेत्त्येवेति भावः ॥२८॥ ननु तर्हि संशयलोपात् किं प्रश्नेन ? तत्राह-प्राय इति । तदेत्येतदेव । तर्हीति तैर्व्याख्यातम् । अतोऽयमेव पाठस्तत्सम्मतः । हि एव विदितमेव । प्राय इत्यनेन तथा वि-शब्देनातिशब्देन च कदाचित् किञ्चित् कामहतत्वं किञ्चित्-प्रीतिं च सूचयति । अत एव संशयेन प्रश्नः । इति सम्यक् कामाद्यभावे सति समावर्तनानन्तरमविवाहेऽप्यनाश्रमित्वदोषो निरस्तः ॥२९॥ किन्तु सम्यक् कामहतत्वाभावेऽपि केषाञ्चिद्विषयवासनाक्षयणार्थं विवाहो युक्त इति भावः । केचिदिति विवेकिनः कर्माणि गृहस्थधर्मान् ॥३०॥ 'मौनं सम्मतिलक्षणम्' इति न्यायेन तत्स्वीकारमालक्ष्य सख्यहेतुपूर्वगाथा एव कथयितुमारभमाणो वक्ष्यमाणकष्टवार्ताया दोषपरिहारार्थं सुखहेतुबोधनार्थं चादौ गुरुतत्सेवादिमाहात्म्यमाह-कच्चिदिति चतुर्भिः । नौ वासं हे ब्रह्मन्निति स्मरणयोग्यतोक्ता । विशेषेणानुभवविश्वासादिना ज्ञात्वा विज्ञेयमिति वि-शब्देन भगवत्तत्त्वमभिप्रेतम् । अनुक्तं तैरपि (अतस्तैरपि-घ-ङ) व्याख्यातम् । परमात्मतत्त्वमिति अतोऽनायासेनावान्तरफलतया संसारं तरति किंवा तमसः सर्वदुःखपारसमाप्तिश्रीवैकुण्ठलोकं लभत इत्यर्थः ॥३१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

केचित् मुमुक्षवस्त्यजन्तः त्यक्तफलसङ्गविरहे दृष्टान्तः यथा अहमिति । लोकसङ्ग्रहमिति क्रियाविशेषणं लोकेन सङ्ग्रहो यस्येति बहुवित्तवल्लोकसङ्ग्रहानुगुणमित्यर्थः ॥३०॥ तमसः परम् अज्ञानस्य पारं स गुरुकुलवासः सत्कर्मसम्भवात् अनुष्ठानहेतुः तद्धेतुभूतज्ञानोत्पादकत्वादित्यभिप्रायः । यद्वा, सत्कर्मणां पुंसां द्वितीयजन्मनः सम्भवेन गुरुकुलवासरूपः आद्याश्रम इत्यर्थः । यस्मिन्नाश्रमे गुरुरहमिव ज्ञानप्रदः स इत्यन्वयः ॥३१-३२॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह-अपीति । हे ब्रह्मन् लब्धा दक्षिणा येन तस्माद्गुरुकुलात्समावृत्तेन कृतसमावर्तनाख्यकर्मणा भवता 'वेदमधीत्याभिसमावृत्त्य' इत्यधीतसाङ्गसशिरस्कस्वाध्यायैरनुष्ठेयं समावर्तनाख्यं कर्म विहितम् । हे धर्मज्ञ ! सदृशी अनुरूपा भार्योढा परिणीता न वा ? अपिशब्दः प्रश्नद्योतकः ॥२८॥ नोढैवेत्यहं तु सम्भावयामीत्यभिप्रयन्नाऽऽह-प्राय इति । अकामविहतं तव चित्तं प्रायशः गृहेषु गृहाश्रमेषु न रमत इत्यध्याहारः, यद्वा, तव चित्तं गृहेषु कामैरविहतं विहतं न भवति तथा हे विद्वन् ! तत्त्वत्रययाथात्म्यज्ञानिन् ! धनेष्वपि विषयभूतेषु नातीव प्रीयसे प्रीतियुक्तो भवसीति मे मया विदितम् ॥२९॥ गृहस्थलिङ्गदर्शनादूढैवेति पुनर्निश्चित्य कामहतत्वाभावे किं गृहाश्रमेणेत्याशङ्कामपनुदंस्तत्प्रयोजनमाह-केचिदिति । कामैरविहतं चेतो यस्यां तथाभूता अपि केचिन्मुमुक्षवः दैवीं देवस्य विष्णोः सम्बन्धिनीं प्रकृतिं मायां 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' इत्युक्तविधां त्यजन्तः 'लक्षणहेत्वोः' इति शत्रादेशः त्यक्तुं प्रकृतिसम्बन्धान्मोक्तुमिति यावत् कर्माणि गृहस्थाश्रमप्रयुक्तान्यनभिसंहितफलानि नित्यनैमित्तिकादिरूपाणि कुर्वन्ति ब्रह्मविद्याङ्गत्वेनानुतिष्ठन्तीत्यर्थः । ब्रह्मविद्याङ्गतया कर्मणामनुष्ठानार्थं गृहाश्रमपरिग्रह इति भावः । ननु कामैश्चेतसोऽविहतय एव हि कर्माणि कर्तव्यानि कर्मणां विद्याङ्गत्वमपि चित्तशुद्धिजननद्वारैव तथा च सति कामैरविहतचेतसां किं कर्मानुष्ठानेनेत्यत आह-यथाहं लोकमिति । लोकस्य सङ्ग्रहो यस्मिंस्तद्यथा अहं तथा करोमि तद्वत् । अयम्भावः । कामैर्विहतचेतोभिस्तद्विहतिद्वारा विद्यानिष्पत्तये कर्माणि कर्तव्यानि अविहतचेतोभिस्तु लोकसङ्ग्रहार्थमिति भावः ॥३०॥ कच्चिदिति । हे ब्रह्मन्! नौ आवयोः गुरुकुले वासं स्मरसि ? कच्चित् तं विशिनष्टि यतो गुरुकुलावासाद्विज्ञेयं स्वपरात्मयाथात्म्यं विज्ञाय तमसः परमज्ञानस्य पारं मुक्तिमिति यावत् अश्नुते प्राप्नोति ॥३१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

स भवान् सदृशी भार्या लब्धाऽपि किं न वा यथा प्राकृतस्य चित्तं गृहेषु कामविहतं भवति तथा प्रायस्ते चित्तं गृहेषु धनादिष्वकामविहतं कामनाविषयेच्छया विहतं न स्यात् तद्वत्तव चित्तं धनेष्वपि नैवातिप्रीयते कथमेतदत्राह-विदितमिति ॥२८-२९॥ केचिन्निवृत्तिमार्गस्थाः प्रकृतिं देहाभिमानलक्षणां दैवीं देवाधीनाम् ॥३०॥ तात्पर्यात्पुनरुक्तं करोति-कच्चिदिति । यतो यस्मिन् गुरुकुलवासे विज्ञेयं विज्ञाय तमसः अज्ञानस्य पारं प्रकृतेर्वा वैकुण्ठमश्नुते ॥३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

कथयाञ्चक्रतुरिति विप्रस्यापि मध्ये तत्पूरणादिति ज्ञेयम् ॥२७-२९॥ केचित् कामैरहतचेतसः केचित्तु दैवीः प्राकृतीस्त्यज
इत्यावृत्त्यान्वयः ॥३०-३१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२३-४५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१८-४५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भार्या ऊढा परिणीता न वेति गृहस्थलिङ्गदर्शनात् भोगादर्शनाच्च संशयादिव प्रश्नः हे धर्मज्ञेति यदि समावर्तनं कृ
तर्ह्यनाश्रमित्वदोषपरिहारार्थमवश्यं भार्या परिग्राह्येति धर्मं भवान् वेत्त्येवेति भावः ॥२८॥ त्वया लज्जया सम्प्रत्यवचना
सर्वज्ञामहमज्ञासिषमेवेत्याह-प्राय इति । सम्प्रति गृहस्थस्यापि ते चित्तम् अकामविहतं न कामैर्विहन्तुं शक्यं हे विद्व
भोगपरिणामविज्ञधनेषु वस्त्रेषु च नातिप्रीयसे एव इति विदितम् अत एवाधुना तानि तानि न दीयन्ते प्राय इत्यतीतिपदा
भार्यानुरोधेन धनादिषु प्रीयसे चेत्यत एव पश्चात्तानि दास्यन्ते चेति भावः । पश्यत भोः किलायं गृहस्थोऽप्यतिनिःस्पृ
परस्मात् किमपि न कामयते बलाद्दत्तमपि न गृह्णातीति द्वारकायां तत्प्रतिष्ठाख्यापनार्थमेव तस्य सकामत्वं न प्रकटीकृतं
किञ्चित् प्रकटं दत्तं चेति ज्ञेयम् ॥२९॥ त्वमपि विरक्तोऽप्यन्य इव संन्यासं नाकरोरित्यत्र तत्त्वामहं जाने इत्याह-केचित् विर
कामैरनाकृष्टचेतसोऽपि कर्माणि कुर्वन्ति केचिच्च दैवीः प्रकृतीर्दैवनिर्मितान् चित्तस्य स्वभावान् दुर्लक्ष्य सूक्ष्मविषय-
वासनात्मकमालिन्यमयान् त्यजन्तस्त्यक्तुं च कर्माणि कुर्वन्ति तत्र पूर्वेषां दृष्टान्तः यथाहं लोकसङ्ग्रहं यथा स्यात्तथा क
करोमीति ॥३०॥ मामतिनीचमपि यदेवं सम्मानयति तन्मां परिचित्यान्यस्य कस्यचिद्भ्रानेन वेति मनसि सन्दिहानस्य त
संदेहापगमार्थं गुरुकुलवासं स्मारयति-कच्चिदिति द्वादशभिः । नौ आवयोः विज्ञेयं भगवत्तत्त्वं तमसः संसारस्य ॥३

गूढार्थदीपिनी

गुरुकुलात् समावृत्तेन समाप्तब्रह्मचर्येण भवता अपि किं भार्या ऊढा परिणीता नवेति गार्हस्थ्यसूचकोष्णीषादिदर्शना
संशयादिव प्रश्नः ॥२८॥ उत्तरादानात् विवाहं मत्वाऽऽह-प्राय इति यथा अन्यस्य तथा ते चित्तं प्रायः कामैः विषयैः विहतमाकृ
न भवतीति मे विदितम् । अतो धनेष्वपि नैवातिप्रीयसे । विवेकिनस्तवैतदुचितमिति भावः ॥२९॥ केचित् कामैः अनाकृष्टचेत
लोकसङ्ग्रहार्थं) कर्माणि कुर्वन्ति दैवीः प्रकृतीः विषयवासनाः त्यजन्तः यथाऽहं करोमि । लोकसङ्ग्रहमिति क्रियाविशेषण
॥३०॥ यद्वा । गुरुकुलेवासमित्येकपदम् । नौ आवयोः । गुरुकुले वासो यस्मिन् तं ब्रहंमचर्याश्रमं तद्वृत्तं च स्मरसि । यतो गु
वासात् विज्ञेयं भगवत्तत्त्वं विज्ञाय द्विजः तमसः संसारस्य पारं मोक्षमश्नुते प्राप्नोति ॥३१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

समावृत्तेन समाप्तब्रह्मचर्येण भार्योढेत्युक्तिः समावर्तनकर्मस्मरणात् जितेन्द्रियत्वस्मरणात् नवेत्युक्तिः ॥२८॥ जितेन्द्रियत्व
गार्हस्थ्याभावसम्भावनायां सत्यामपि केषाञ्चित् जितेन्द्रियाणां लोकशिक्षा यैर्गार्हस्थ्यमाचरतां मतमाश्रित्य समावृत्तेन त
भार्योढैवेत्याशयेनाह-प्राय इति द्वाभ्याम् । ते चित्तम् अकामविहतं कामविहतं न भवति अतः गृहेषु गृहोचितेषु कर्मसु सा
धनेषु च न प्रीयसे न प्रीतियुक्तो भवसि इति मे विदितम् ॥२९॥ तथापि कामैरहतचेतसोऽनाकृष्टचेतसोऽपि केचिन्मुनयः दै
देवमायारचिताः प्रकृतीर्विषयवासनास्त्यजन्तः कर्माणि गृहोचितानि कुर्वन्ति यथाहं लोकस्य सङ्ग्रहो यथा तथा कर्माणि क
तथा जितेन्द्रियेणापि त्वया लोकशिक्षायै गृहोचितकर्मानुष्ठानार्थं भार्योढैवेति भावः ॥३०॥ एवं सर्वज्ञोऽपि लीलासौष्ठवार्थं तद्गा
सम्भाव्य गुरुकुलवासं स्मारयति-कच्चिदित्यादिना । नौ आवयोः गुरुकुले वासं स्मरसि ? क्वचित् यतः वासात् विज्ञेयं यद्वि
आत्मानात्मपरब्रह्मरूपादि विज्ञातं भवति तत् परं ब्रह्म विज्ञाय तेन सह प्रकृतेः पारं मोक्षमश्नुते प्राप्नोति ॥३१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तस्य भावं स्वीकृत्य रागविद्वेषयोर्विवाह इति निन्दायां प्राप्तायां तन्निषेधार्थमाह-प्रायो गृहेष्विति । ते चित्तं गृहेषु काम
प्रायेण न भवति अन्यथा कथं परिग्रह इति विशेषमाह-तथेति । यथा लोकानां तथा कामैर्न हतमित्यर्थः अत एव गृहेषु नैवाति

अतिप्रीतियुक्तं चित्तं न
धनाभावादपि गृहे पुरु
नानाप्रकारधनेष्वपि न
इति । युक्तश्चायमर्थः यो
प्रव्रजेत्" इति श्रुतेः ।
इति "इन्धानात्वारतबृं
परित्यागकर्मणां व्यवस्
केचित्तु कामैरहतचेतसो
किन्त्वन्तःकरणशोधक
इति चेत्तत्राह-त्यजन्तः
भूतानि निग्रहः किं करि
त्यजन्ति तदा मूलप्रकृति
प्रकारेणैव जेतव्याः तत्र
कर्मकरणं ननु कषायप
कर्मकरणमिति चेत्तत्राह-
इति न चैवं क्वचिदपि
एवं स्वतो ज्ञातमप्यर्थं प्र
कृतवानिति श्रुतेरपि दो
निवर्तते तत इच्छायामपि
बोधयति-कच्चिद्गुरुकुले
ब्रह्मन्निति सम्बोधनं तत्
यत्किञ्चिदनुभूतं गुरुकुले त
प्रमाणं च विज्ञाय ज्ञात्वा

कृष्णोक्तिः । हे
परिणीता वा न वा हे धर्मज्ञ
विदितं ज्ञातं हे विद्वन् !
दैवीरीश्वरमायारचिताः प्रकृ
भाषते कृष्ण इति लज्जित
किञ्चिद्ध्यायसे यतो गुरोर्वि

तत्र भगवद्वाक्यान्य

हे धर्मज्ञ ! लब्धा
स्वयोग्या भार्या ऊढा परिण
ज्ञानित्वेन देहाद्यध्यासाभावा

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अतिप्रीतियुक्तं चित्तं न भवति तत्र हेतुं सम्बोधनेनाह-हे विद्वन्निति । ज्ञानोदयाच्छरीराध्यासाभावात् तत्प्रीतिकरे गृहे न प्रीतिः ननु धनाभावादपि गृहे पुरुषो न प्रीयते "अन्तरं नैव पश्यामि निर्धनस्य मृतस्य च" इति वाक्यात् तत्राह-धनेष्विति । तव चित्तं नानाप्रकारधनेष्वपि न प्रीयते गोभूहिरण्यादिभेदेन धनं बहुविधं तथा गृहा अपि स्त्रीभेदेन विलासभेदेन, अत्र प्रमाणमाह-विदितं मे इति। युक्तश्चायमर्थः यो हि महापुरुषः स एतादृश एव भवेदिति ॥२९॥ ननु, विरक्तस्य संन्यास एवाधिकारः "यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति श्रुतेः । अतः कथं विवाह इति चेत्तत्राह- केचित्कुर्वन्ति कर्माणीति । "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा" इति "इन्धानात्वारातबृंहिमा" इति च श्रुतेः । यावज्जीवं कर्म कर्तव्यम् अत एवाग्निहोत्रादौ यावज्जीवाधिकारः तत्र विरक्ताविरक्तभेदेन परित्यागकर्मणां व्यवस्थां मन्यमानान् प्रति भगवान् प्रकारान्तरेण व्यवस्थामाह- एके तु यथा त्वयोक्तः तथैव व्यवस्थापयन्ति । केचित्तु कामैरहतचेतसोऽपि निष्कामा अपि कर्माण्येव कुर्वन्ति ननु कषायपक्तिः कर्माणीति कर्मणां न साक्षात् पुरुषार्थसाधकत्वं किन्त्वन्तःकरणशोधकत्वमेव यथा प्रमुच्यन्ते कामा येऽस्य हृदि स्थिता इति कामाभावे मोक्षः सन्निहितः इति कर्मणां क्वोपयोग इति चेत्तत्राह-त्यजन्तः प्रकृतीर्दैवीरिति । स्वभावविजयार्थं कर्मणां करणं स्वभावो हि दुर्जयः अत एव भगवानाह- "प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति" इति । ताश्च प्रकृतयः स्वभावरूपाः देशकालबीजयोन्यादिभेदेन नैकविधा भवन्ति ताश्चेत् पुरुषं त्यजन्ति तदा मूलप्रकृतिमपि त्यक्त्वा स्वस्थो भवति तदभावे कामोऽप्रयोजकः कामाभावेऽपि संसारस्य निरूपितत्वात् ननु ताः प्रकारेणैव जेतव्याः तत्र कर्मणां किं प्रयोजनम् ? तत्राह-दैवीरिति । ता देवतारूपाः अतो वैदिककर्मभिरेव तासां निवृत्तिरिति कर्मकरणं ननु कषायपाकार्थमेव कर्मणां विनियोगः श्रूयते स्वर्गाद्यर्थं वा न तु स्वभावजयार्थं ततश्च केवलयुक्त्या तदर्थं कर्मकरणमिति चेत्तत्राह-यथाहं लोकसङ्ग्रहमिति । अहं च कर्माणि करोमि लोकसङ्ग्रहार्थं तत्र युक्तिरेव मूलं मम वर्त्मानुवर्तन्त इति न चैवं क्वचिदपि वाक्यमस्ति लोकसङ्ग्रहार्थमीश्वरेण कर्तव्यानीति तस्मात्फलनिर्णयः युक्त्याऽपि भवतीत्यर्थः ॥३०॥ स्वतो ज्ञातमप्यर्थं प्रश्नव्याजेन विरक्ततया गृहाश्रमे तिष्ठतीति कृतमुक्त्वा तथाकरणस्य प्रयोजनं स्वभावाद्वासनया केवलं कृतवानिति श्रुतेरपि दोषेणाननुभूय न जानाति जनो विषयतीक्ष्णतामिति मनःप्रत्ययजननार्थं विवाहं कृतवान् यतः इच्छा निवर्तते तत इच्छायामपि निवृत्तायां गले पतिता भार्येति उपहसन्निव कृतमभिनन्द तेन सह सख्यं स्मारयितुं गुरुकुलवासं बोधयति-कच्चिद्गुरुकुले वासमिति चतुर्भिः । आदौ गुरुकुलवासस्य प्रशंसा निरूप्यते सफलत्वेन महत्त्वे स्मरणं भवति ब्रह्मन्निति सम्बोधनं तत्प्रसादादेव जातमिति बोधयति नौ आवयोः गुरुकुले वासं किं स्मरसि अनेन बाह्याभ्यन्तरभेदेन किञ्चिदनुभूतं गुरुकुले तत्स्मरणेन कृतार्थतया भवतीति ज्ञापितं गुरुकुलस्य प्रतिष्ठामाह-द्विजो विज्ञाय विज्ञेयमिति । विज्ञेयमात्मानं च विज्ञाय ज्ञात्वा तमसः पारं भगवन्तमश्नुते "आदित्यवर्णः तमसः परस्तात्" इति श्रुतेः ॥३१॥

श्रीसुबोधिनीसारः

कृष्णोक्तिः । हे ब्रह्मन् ! लब्धा प्राप्ता दक्षिणा यत्तस्मात् गुरुकुलात् समावृत्तेन प्रत्यागतेन भवता सदृशी भार्या स्त्री ऊढा ता वा न वा हे धर्मज्ञ ! ॥२८॥ गृहेषु धनेषु तथा ते चित्तमकामविहतं कामैर्विहतं न भवत्यतो नैवातिप्रीयसे त्वं तैरिति मे मया ज्ञातं हे विद्वन् ! हि युक्तमिदम् ॥२९॥ कामादिविक्षेपाभावे धर्मक्लेशेन किं तत्राह । कामैरहतं चेतो येषां ते केचित् मायारचिताः प्रकृतीर्विषयवासनास्त्यजन्तः कर्माणि कुर्वन्ति । लोकसङ्ग्रहमीश्वरोऽहं यथा करोमि तथा ॥३०॥ अजानन् कृष्ण इति लज्जितमानसं सूचयन् पूर्ववृत्तान्तमानन्दयति लौकिकैः हे ब्रह्मन् ! नौ आवयोर्गुरुकुलवासं कच्चित्स्मरसि ? ध्यायसे यतो गुरोर्विज्ञेयं परात्मतत्त्वं विज्ञाय द्विजस्तमसः संसारस्य पारमश्नुते मुक्तो भवति ॥३१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र भगवद्वाक्यान्याह-अपीति । 'धर्मरहस्यं भवान् जानात्येव' इति सूचयन् सम्बोधयति-हे ब्रह्मन् !

हे धर्मज्ञ ! लब्धा दक्षिणा येन तस्मात् गुरुकुलात् समावृत्तेन आगत्य कृतसमावर्तनाख्यकर्मणा भवता अपि किं सदृशी भार्या ऊढा परिणीता न वा ? ॥२८॥ विरक्तिदर्शनाद्दोषाभावाच्च संशयादयं प्रश्न इत्याशयेनाह-प्राय इति द्वयेन । देहाद्यध्यासाभावात् इति हेतुं सूचयन् सम्बोधयति-हे विद्वन् ! प्रायो गृहेषु तथा धनेषु गोभूहिरण्यादिभेदेन बहुविधेषु त्वं

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नैवातिप्रीयसे अतिशयप्रीतियुक्तो नैव भवसीति तु मया विदितमेवेत्यन्वयः । प्रीत्यभावे शान्तचित्तत्वं हेतुमाह- ते इति । तथा अन्यवत् ते चित्तं कामैर्विषयैर्विहतम् आकृष्टं न भवतीत्यर्थः ॥२९॥ एवं विरक्त्यतिशयाद्विवाहाभावः सम्भावितः । अथ लोकसङ्ग्रहाय कर्माङ्गत्वेन तदपि सम्भवति इत्याह-केचिदिति । कामैरहतचेतसोऽपि केचित् दैवीः देवस्य परमेश्वरस्य सृष्ट्यादिकर्तुः शक्तीः प्रकृतिकार्यभूता नानाविधवासनाः त्यजन्तः निराकर्तुं कर्माणि कुर्वन्तीत्यन्वयः । ननु वासनाक्षयस्तु तपआद्युपायान्तरेणापि भवति किं कर्मानुष्ठानेन इत्याशङ्क्य लोकसङ्ग्रहार्थमपि कर्मकरणं सम्भवति इति स्वदृष्टान्तेनाह-यथाहं प्रयोजनान्तररहितोऽपि लोकसङ्ग्रहार्थं कर्म करोमि तथेति ॥३०॥ किञ्च हे ब्रह्मन् ! नौ आवयोः गुरुकुले वासं कच्चित् स्मरसि ? परमोपकारित्वात्तत्स्मरणमुचितमेव इत्याशयेनाह-यतो गुरुकुलवासाद् द्विजो विज्ञेयं ज्ञातव्यं धर्मादि विज्ञाय क्रमेण तमसः संसारस्य पारं मोक्षमश्नुते प्राप्नोति ॥३१॥

अन्वितार्थप्रकाशिका

अपीति । हे ब्रह्मन् ! हे धर्मज्ञ ! लब्धा दक्षिणा येन तस्मात् गुरुकुलात् समावृत्तेन आगत्य कृतसमावर्तनाख्यकर्मणा भवता अपि किं सदृशी स्वयोग्या भार्या ऊढा परिणीता न वा । गृहस्थलिङ्गदर्शनात् भोगादर्शनाच्च संशयादिव प्रश्नः ॥२८॥ अप्रतिषेधादुद्वाहमनुमतं मत्वाऽऽह-प्राय इति । हे विद्वन् ! तथा अन्यवत् गृहेषु वर्तमानस्यापि ते चित्तं प्रायः कामैर्विषयैर्विहतम् आकृष्टं न भवति इत्यकामविहतं इति मे विदितम् । कामैर्विहन्तुमशक्यमिति वा अतः धनेषु वस्त्रादिषु त्वं नैवातिप्रीयसे अतिशयप्रीतियुक्तो नैव भवसीति विदुषस्तवैतद्युक्तमिति भावः । एतच्च गृहस्थोऽप्ययमतिनिःस्पृहो न कामयते बलाद्दत्तमपि न गृह्णातीति द्वारकायां तद्गौरवख्यापनार्थमेव तस्य सकामत्वमप्रकटीकृतवान् नापि किञ्चिद्दत्तवान् इति ज्ञेयम् ॥२९॥ केचिदिति । कामैरहतचेतसोऽपि केचित् दैवीः देवस्य परमेश्वरस्य सृष्ट्यादिकर्तुरिमाः प्रकृतीः प्रकृतिकार्यभूता नानाविधवासनाः त्यजन्तः निराकर्तुं कर्माणि कुर्वन्ति यथाहं प्रयोजनान्तररहितोऽपि लोकसङ्ग्रहार्थं कर्म करोमि तथा ॥३०॥ कच्चिदिति । हे ब्रह्मन् ! नौ आवयोः गुरुकुले वासो यस्मिंस्तं ब्रह्मचर्याश्रमव्रतवृत्तं तत्पुरुषो वा "शयवासवासिषु" इति सप्तम्यलुक् । कच्चित् स्मरसि । यतो गुरुकुलवासाद् द्विजो विज्ञेयं ज्ञातव्यं धर्मादि विज्ञाय क्रमेण तमसः संसारस्य पारं मोक्षमश्नुते प्राप्नोति ॥३१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

समावृत्तेन कृतवेदाध्ययनसमाप्तिकर्मणा भवता ऊढा परिणीता ॥२८॥ अनुत्तरदानात् कृतोद्वाहं ज्ञात्वाह-प्राय इति । हे विद्वन् कामेन विहतं न भवति तथाविधं ते चित्तमस्ति तथा च धनेष्वपि त्वं नातिप्रीयसे प्रीतियुक्तो न भवसि इति मे मया विदितम् ॥२९॥ ननु कामहीनचित्तस्य सक्लेशगृहिधर्माचरणे न किमिति चेत्तत्राह-केचिदिति कामैः । अहतचेतसो जनकप्रह्लादादयः दैवीः देवाधीनाः प्रकृतीः गुणमयवासनाः सज्जन्तः कर्माणि गृहस्थोचितानि कुर्वन्ति तत्र स्वदृष्टान्तः यथाहं परमेश्वरोऽपि लोकस्य सङ्ग्रहः प्रवर्तनं यथा भवति तथा कर्माणि करोमि तद्वत् ॥३०॥ नौ आवयोः गुरुकुले वासम् । यतो गुरोः विज्ञेयं शास्त्रं विज्ञायाथ तमसः प्राप्याप्राप्यकार्याकार्यधर्माधर्मविवेकाज्ञानस्य पारमन्तं नाशमिति यावत् अश्नुते प्राप्नोति ॥३१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नोढैवेत्यहं तु सम्भावयामीत्यभिप्रयन्नाह । प्राय इति । हे विद्वन् ! तत्त्वत्रययाथात्म्यज्ञानिन् अकामविहतं कामैरविहतं तव चित्तं प्रायः गृहेषु गृहश्रमेषु न अरमतेति शेषः । यद्वा । तव चित्तं गृहेषु भार्यादिषु अकामविहतं कामैर्विहतं न भवति । तथा धनेषु धनोपार्जनीयवस्त्रादिष्वपि न एव अतिप्रीयसे अतिशयितप्रीतियुक्तो न भवसि । इति मे मम विदितं प्रथमत एव ज्ञातमस्ति हि ॥२८॥ गृहस्थलिङ्गदर्शनादूढैवेति पुनर्निश्चित्य कामहतत्वाभावे किं गृहाश्रमगतगृहधर्मक्लेशेनेत्याशङ्कामपनुदंस्तत्प्रयोजनमाह । केचिदिति । कामैः अहतमविहतं चेतो येषां तथाभूताः सापेक्षत्वेऽपि गमकत्वात्समासः । अपि केचिन्मुमुक्षवः दैवीं देवस्य विष्णोः सम्बन्धिनी प्रकृतिं मायां 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' इत्युक्तविधामजानमित्यर्थः । त्यजन्तः 'लक्षणहेत्वोः' इति शत्रादेशः । त्यक्तुं प्रकृतिसम्बन्धादात्मनो मोक्षं विधातुमिति यावत् । कर्माणि गृहस्थाश्रमप्रयुक्तान्यनभिसंहितफलानि नित्यनैमित्तिकरूपाणि कुर्वन्ति ब्रह्मविद्याङ्गत्वेनानुतिष्ठन्तीत्यर्थः । ब्रह्मविद्याङ्गतया कर्मणामनुष्ठानार्थं गृहाश्रमपरिग्रह इति भावः । ननु कामैश्चेतसोऽविहत्यर्थमेव हि कर्माणि कर्तव्यानि कर्मणां विद्याङ्गत्वमपि चित्तशुद्धिजननद्वारैव । तथा च सति

कामैरविहतचेतसां
अयस्त्रावः । कामैर्वि
मद्वत्कर्तव्यानीति ॥३
गुरुकुलावासात् द्विजः
अश्नुते प्राप्नोति ॥३०
सम्भवो जन्ममात्रं स
सम्भवः उपनीय वेदा
यः गुरुः स तु यथा अ

भगवान श्री
दीक्षान्त अवसर पर अ
या नहीं ? ॥२८॥ भैर
अनुरक्त नहीं है । अरे
संलग्न नहीं है ॥२९॥
वासना न रहने पर मे
आपको इस समयकी
निश्चित और सत्य है
अज्ञानान्धकार से पार

स वै सत्कर्मण
ऽन्वर्थकोविदा
नाहमिज्याप्रजा
अपि नः ऽस्मर्य

द्विजातेः, इह, सम
॥३२॥ ब्रह्मन् ! इह, वर्णाश्रम
अहम्, गुरुशुश्रूषया, यथा, तु
क्वचित्, गुरुदारैः, इन्धनानय
निष्ठुरः, स्तनयित्नवः, अभवन्

तत्राऽऽत्मज्ञानप्रदस्य
पिता तावदाद्यः प्रथमो गुरुः पू

---

१. आद्यो गुरुर्ह्याश्रमिणां-

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कामैरविहतचेतसां किं कर्मानुष्ठानेनेत्यत आह। यथाहमिति। लोकस्य सङ्ग्रहो यस्मिंस्तद्यथा तथा यथा अहं करोमि तद्वदेतेऽपि। अयश्चाव:। कामैर्विहतचेतोभिः कामविहतिद्वारा विद्यानिष्पत्तये कर्माणि कर्तव्यानि। कामैरविहतचेतोभिस्तु लोकसङ्ग्रहार्थं महत्कर्तव्यानीति ॥२९॥ कच्चिदिति। हे ब्रह्मन्! नौ आवयोः गुरुकुले वासं स्मरसि कच्चित्। गुरुकुलावासं विशिनष्टि। यतो गुरुकुलावासात् द्विजः विज्ञेयं विज्ञातुं योग्यं स्वपरयाथात्म्यं विज्ञाय सम्यक् विदित्वा तमसोऽज्ञानस्य पारं पाररूपां मुक्तिमित्यर्थः। अश्नुते प्राप्नोति ॥३०॥ तत्रात्मपरमात्मज्ञानप्रदस्य गुरोरत्यन्तपूज्यत्वं वदन् पुरुषस्य त्रीन् गुरूनाह। स वै इति। इह संसारे यत्र सम्भवो जन्ममात्रं स पितेत्यर्थः। आद्यः प्रथमः गुरुः। स तु पूज्य एवेत्यर्थः। अङ्ग हे मित्र! द्विजातेः सतः पुंसः सत्कर्मणां यत्र सम्भवः उपनीय वेदाध्यापक इत्यर्थः। स तु वै साक्षात् द्वितीयः गुरुः आद्याद्गुरोः पूज्यतर इत्यर्थः। आश्रमिणां सर्वेषामपि ज्ञानदो यः गुरुः स तु यथा अहमेव यथाहं तथोभाभ्यामपि पूज्यतम इत्यर्थः ॥३१॥

कृष्णप्रिया

भगवान श्रीकृष्णचन्द्रजीने कहा भैया ! ब्रह्मर्षिधर्म के रहस्य को जानने वाले आप श्रीगुरुचरणोंमें दीक्षान्त अवसर पर गुरुदक्षिणा देकर जब आपके घर लौट आये तब आपने अनुरुप कन्यासे विवाह लग्न किया या नहीं ? ॥२८॥ भैया ! में अच्छी तरह से जानता हूं कि आप का चित्त गृहस्थाश्रममें रहने पर भी विषय सुखोमें अनुरक्त नहीं है। अरे विद्धन् यह भी मुझे अच्छी तरह से सुविदित है कि धन आदि पदार्थोमें आपका कोई मन संलग्न नहीं है ॥२९॥ हे ब्रह्मनिष्ठ ! सखा ! इस विश्वमें ऐसे विरल लोग होते है और चित्तमें विषयों की स्वल्पभी वासना न रहने पर मेरे समान मात्र लोकसंग्रह के लिये नित्यकर्म करते रहते है ॥३०॥ हे ब्रह्मनिष्ठ सखा ! क्या आपको इस समयकी बात स्मृतां पथमें है कि जब हमदोनों एकसाथ गुरुकुलमें निवास करते थे। यह बात निश्चित और सत्य है कि द्विजातियों को आपने ज्ञातव्य वस्तुका ज्ञामान होता है जिस ज्ञानके माध्यम से वे अज्ञानान्धकार से पार हो जाते है ॥३१॥

स वै सत्कर्मणां साक्षाद्द्विजातेरिह सम्भवः। [1]आद्योऽङ्ग्यत्राश्रमिणां यथाऽहं ज्ञानदो गुरुः ॥३२॥
[2]नन्वर्थकोविदा ब्रह्मन् वर्णाश्रमवतामिह। ये मया गुरुणा वाचा तरन्त्यञ्जो भवार्णवम् ॥३३॥
नाहमिज्याप्रजातिभ्यां तपसोपशमेन वा। तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥३४॥
अपि नः [3]स्मर्यते ब्रह्मन् वृत्तं निवसतां गुरौ। गुरुदारैः[4] प्रेरितानामिन्धनानयने क्वचित् ॥३५॥

कर्दमक्षमा

द्विजातेः, इह, सम्भवः, सः, वै, सत्कर्मणाम्, साक्षात्, अयम्, यथा, अहम्, यत्र, आश्रमिणाम्, ज्ञानदः, गुरुः ॥३२॥ ब्रह्मन्! इह, वर्णाश्रमवताम्, अर्थकोविदाः, ननु, मया, गुरुः, वाचा, अञ्जः, भवार्णवम्, तरन्ति ॥३३॥ सर्वभूतात्मा, अहम्, गुरुशुश्रूषया, यथा, तुष्येयम्, तथा, इज्यापूजाभ्याम्, तपसा, उपशमेन, वा, न, तुष्येयम् ॥३४॥ ब्रह्मन्! गुरौ, निवसताम्, क्वचित्, गुरुदारैः, इन्धनानयने, प्रेरितानाम्, नः, हे द्विज! महारण्यम्, प्रविष्टानाम्, अपर्तौ, सुमहत्, तीव्रम्, वातवर्षम्, अभूत्, निष्ठुराः, स्तनयित्नवः, अभवन् ॥३५-३६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तत्राऽऽत्मज्ञानप्रदस्य गुरोरत्यन्तं पूज्यत्वं वक्तुं पुरुषस्य त्रीन् गुरूनाह-स वा इति। इह संसारे यत्र सम्भवो जन्ममात्रं स पिता तावदाद्यः प्रथमो गुरुः पूज्यः। कर्मविद्याप्रदं गुरुमाह-द्विजातेः सतः पुंसः सत्कर्मणां यत्र सम्भवः उपनीय वेदाध्यापक

---

[1] आद्यो गुरुह्याश्रमिणां-विज.। [2] ते त्वर्थ-विज.। [3] स्मर्यतां-विज.। [4] श्चोदितानामि-श्रीधर. वंशी. वीर. विज. शुक.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

इत्यर्थः। स द्वितीयो गुरुः यथाऽहमीश्वरस्तथा प्रथमादपि पूज्य इत्यर्थः। ब्रह्मविद्याप्रदं गुरुमाह–आश्रमिणां सर्वेषामपि ज्ञानदो य स तु साक्षादहमेवेति ॥३२॥ अतो ज्ञानप्रदं गुरुरूपं मामाश्रित्य ये संसारं तरन्ति ते बुद्धिमन्त इत्याह–नन्विति। हे ब्रह्मन्! ते नु वर्णाश्रमवतां मध्ये अर्थकोविदाः इह मनुष्यजन्मनि तत्रापि वर्णाश्रमवत्त्वे सति ये मया गुरुणा गुररूपेण वक्त्रा वाचा उपदेशमात्रेणाऽ सुखेनैव भवार्णवं तरन्तीति ज्ञानप्रदद्गुरोरहिकः सेव्यो नास्तीत्युक्तम् ॥३३॥ अत एव तद्भजनादधिको धर्मश्च नास्तीत्याह–नाहमिति। इज्या गृहस्थधर्मः प्रजातिः प्रकृष्टं जन्म उपनयनं तेन ब्रह्मचारिधर्मः उपलक्ष्यते ताभ्यां तथा तपसा वनस्थधर्मेण उपशमेन यतिधर्मेण वा अहं परमेश्वरस्तथा न तुष्येयं यथा सर्वभूतात्माऽपि गुरुशुश्रूषयेति ॥३४॥ किञ्च अस्माकं गुरुशुश्रूषणं किमपि दैवादेव सम्पन्नं तत्किम् त्वया स्मर्य इति पृच्छति–अपि न इति। गुरौ निवसताम् अस्माकं यत्किमपि वृत्तं तत् क्वचित्कदाचित् ॥३५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र तावत्। इत्यर्थ इति–आचार्य इति भावः। इत्यर्थ इति —

'**उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता।**' इति मात्स्ये ॥

ब्रह्म गायत्री वेदो वेति ज्ञेयम्। अहमेवेति– "ददामि बुद्धियोगं तं येनमामुपयान्ति ते।" इति गीतोक्तेः ॥३२॥ यतस्त्रयाणां गुरूणां मध्ये ज्ञानद एव श्रेष्ठोऽतो हेतोः। तत्रापि मनुष्यजन्मन्यपि ॥३३॥ अत एव ज्ञानप्रदगुरोर्मद्रूपत्वादेव। मद्भजनाज्ज्ञानदगुरुसेवातः सर्वभूतात्मापि गुरुसेवातोऽहं यथा तुष्ये तथा नान्यैर्धर्मैरिति। "गुरुसेवा कृता येन तेन सर्वं कृतं शुभम्।" इत्यादिपुराणाद्गुरुसेवैव परो धर्मोऽतोन्यथा सर्वधर्मवैयर्थ्यं स्यादिति भावः ॥

"**नित्यं कार्या गुरोः सेवाऽवसरे कार्यसंकुलैः। निजोपाधिकधर्माणां साङ्गतावाप्तये नृभिः ॥**
आषाढ्यां पौर्णमास्यां सा कार्या पूजा प्रयत्नतः। आषाढ्यां पौर्णमास्यां च व्यासपूजाकृतो नराः ॥
सुविद्याधनसम्पत्तिं लभन्ते चाक्षयां सदा। आषाढ्यां च नरश्रेष्ठ व्यासार्चाविमुखो नरः ॥
याम्यैः पाशैः परिवृतः कष्टं प्राप्नोति दारुणम्। कामाल्लोभात्तथा मोहाद्व्यासार्चां न करोति यः।
तस्य सांवत्सरो धर्मो नाशमायाति पाण्डव। व्यासपूजा गुरौ कार्या ब्राह्मणेऽध्यापके शुचौ ॥
यद्वोपनेतरि गुरावलाभे पुस्तकादिषु। अध्यापके क्षत्रियादौ विप्रे त्यक्तनिजाश्रमे ॥
सा न कार्या कदाचिच्च व्यासार्चा शुभमीप्सुभिः ॥ व्यासार्चने पूर्णमासी त्रिमुहूर्ताधिका वरा ॥
त्रिमुहूर्ताधिका नो चेत्तदा पूर्वदिने भवेत् ॥" 'त्यक्तनिजाश्रमे' इत्युक्तेः कलिप्रवृत्त नानाऽशास्त्रीयमार्गप्रवृत्ते ब्राह्मणेऽपि गुरौ सा न कार्येति भावः। पुस्तकादिष्विहादिपदेन शालिग्रामाक्षतपुञ्जतन्मूर्त्यादयो ग्राह्या इति।

"**धर्मोपदेष्टा सर्वेषां व्यासः सर्वगुरुर्मतः। तदर्चितेऽर्चिताः सर्वे पितरो गुरवोऽमराः ॥**" इति सर्वं स्मृतिसारे संहिता चेह प्रसङ्गादुक्तं स्पष्टम्। अलं प्रकृतानुप्रकृतेन ॥३४॥ घुणाक्षरन्यायेन जातं गुरुशुश्रूषणमाह–किञ्चेति। दैवादेवाचिन्तितम् तद्गुरुसेवनम्। गुरुदारैरिति दारशब्दस्य बहुवचनान्तत्वात्, तत्पुरुषस्य परप्रधानत्वाद्वृत्तावपि बहुत्वमेवेति ॥३५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स वै स एव यत्र निमित्ते अस्य त्रिरावृत्त्यान्वयः निमित्ते द्विजातेः सत इति तृतीयस्याप्यपेक्षितत्वात् यतः त मत्तत्त्वोपदेशकः स्वतोऽप्युत्तमे ज्ञेयान्तरे सति गुरोस्तुल्यत्वमेवोच्येत अत एव स्वपरितोष एव फलत्वेनोपसंहरिष्यते नाहमित्या ॥३२॥ ननु निश्चये अञ्ज इति विज्ञेयविज्ञानेन भक्तेः सिद्ध्या अवान्तरफलतया भवार्णवतरणस्य सुखसिद्धेः ॥३३॥ सर्वभूता सर्वभूतानामन्तर्यामित्वेन तेषां सेवया मत्संतोषसम्भवेऽपि गुरुसेवया तुष्येयमित्यतिशयविवक्षया तां विनान्यवैयर्थ्यापत्तेः मदावेशेन साक्षान्मद्रूपत्वात् मद्भक्तवररूपत्वाच्चेति भावः। अन्यत्तैः। यद्वा, इज्या मत्पूजा प्रजातिर्मद्दीक्षा तपो मत्त उपशमो मन्निष्ठा तैरपीति किन्त्वर्थद्वयमिदं स्वधर्मभगवद्धर्मोपदेष्टृत्वेन यथायथं गुरुद्वयतारतम्ये ज्ञेयम् ॥३४॥ श्रीगुरुसेवामाहात्म्यमुक्त्वा लोकशिक्षार्थं तत्प्रकारं दर्शयन् एकत्रैव दुःखप्राप्त्यादिना सख्यस्य हेतुविशेषं प्रतिपादयन् तत्र

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

बोधयति-अपीत्यादिना । नौ इति श्रीबलदेवापेक्षया पूर्वं सतोरिति द्विवचनं तु तदपेक्षयापि स्वयोरैक्यव्यञ्जनया तं स्नेहयति स्म, गुरौ गुरुगृहे ब्रह्मन्निति मुहुः सम्बोधनेन लज्जाभयादिकं निरस्यन् सख्यमेव दृढयन् स्वसन्दर्शनाय मुखमुन्नमयंस्तं प्रहर्षयति ॥३५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वै एव । स एव प्रसिद्ध इति वा यत्र यतः ॥३२॥ ननु निश्चये हे ब्रह्मन्निति ब्रह्मानुभवेन वेदार्थतत्त्वज्ञानेन तत्तवैव सुसिद्धमिति भावः । अञ्ज इति विज्ञेय-विज्ञानेन भक्तिसुसिद्ध्यावान्तरफलतया भवार्णवतरणस्य सुखसिद्धेः ॥३३॥ सर्वभूतात्मेति-सर्वजीवानामन्तर्यामित्वेन तेषां सेवया मत्सन्तोषः-सम्भवेऽपि गुरुसेवैव तुष्येयम् । गुरोर्मद्भक्तवरत्वात् साक्षान्मद्रूपत्वाद्वेति भावः ॥३४॥ एवं श्रीगुरुसेवामाहात्म्यमुक्त्वा लोकशिक्षणार्थं तत्प्रकारं दर्शयन्नेकत्रैव दुःखप्राप्त्यादिना सख्यस्य हेतुविशेषं प्रतिपादयन् दार्ढ्यं बोधयति-अपीत्यादिना । 'नः' इति बलदेवापेक्षया गुरौ गुरुगृहे ब्रह्मन्निति पुनः पुनः सम्बोधनेन लज्जाभयादिकं निरस्यन् सख्यमेव द्रढयन् स्वसन्दर्शने मुखमुन्नमय्यंस्तं प्रहर्षयति ॥३५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वर्णाश्रमवतां मध्ये अथ कोविदाः प्रयोजनकुशलाः अञ्जः अञ्जसा ॥३३॥ प्रजातिः सन्तत्युत्पादनम् ॥३४-३५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

किञ्च स वा इति । स वै गुरुकुलवासः द्विजातेस्त्रैवर्णिकस्य सतां कर्मणां सम्भवोऽनुष्ठानहेतुः तद्धेतुभूतज्ञानोत्पादकत्वादित्यभिप्रायः । यद्वा, सत्कर्मणां पुंसां द्वितीयजन्मसम्भवेन गुरुकुलवासरूपो ह्याश्रम इत्यर्थः । यस्मिन्नाश्रमे गुरुरहमिव गुरुः स इत्यन्वयः । यद्वा ज्ञानप्रदस्य गुरोः अत्यन्तपूज्यतां वक्तुं पुरुषस्य त्रीन् गुरूनाह-स वा इति । अङ्ग हे ब्रह्मन् इह संसारे यतः सम्भवो जन्ममात्रं स पिता तावदाद्यः प्रथमः गुरुः । द्विजातेः सतः पुंसः सत्कर्मणां यत्र सम्भवः उपनीय वेदाध्यापकः स द्वितीयो गुरुः यथा अहमीश्वरस्तथा प्रथमादपि पूज्य इत्यर्थः । ब्रह्मविद्याप्रदं गुरुमाह-आश्रमिणां सर्वेषामपि ज्ञानदो यो गुरुः स तु साक्षादहमेवेति ॥३२॥ अतो ज्ञानप्रदं गुरुमाश्रित्य ये संसारं तरन्ति ते बुद्धिमन्त इत्याह-नन्विति । हे ब्रह्मन् ! इह लोके सर्वेषां वर्णानामाश्रमिणां च मध्ये त एवार्थकोविदाः पुरुषार्थकुशलाः, के ? ये मया गुरुणा गुरुरूपेण वक्त्रा वाचा उपदेशमात्रेणाञ्जः सुखेन संसाररूपं महार्णवं तरन्ति ॥३३॥ एवं महोपकर्तुर्गुरोरधिकः सेव्यो नास्तीत्युक्तम् अत एव तद्भक्तजनादधिको धर्मश्च नास्तीत्याह-नाहमिति । इज्या महायज्ञपञ्चकम् । प्रजातिः प्रकृष्टं जन्म तपोऽनशनादिरूपम् । शमः इन्द्रियनिग्रहः यथाहं गुरुशुश्रूषया तुष्येयं प्रीतः स्याम्, न तथेज्यादिभिः तुष्येयम् । आत्मानं विशिनष्टि-सर्वभूतानामन्तरात्मा ॥३४॥ किञ्चास्माकं गुरुशुश्रूषणे किमपि दैवादेव सम्पन्नं तत्किं त्वया न स्मर्यत इति पृच्छति-अपि न । गुरौ तत्सन्निधौ वसतामस्माकं वृत्तं न स्मर्यते किम् ? किं तदित्यत आह-गुरुदारैरित्यादिना । इन्धनानयने निमित्ते चोदितानामस्माकं केचित् कदाचित् ॥३५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

इतोऽपि गुरुकुलवासः कर्तव्य इत्याह-स वा इति । यस्मात् द्विजातेः साक्षात् सत्कर्मणां सम्भवो जन्म स गुरुकुले वासो वा इत्यन्वयः, अत्र हेतुमाह-आद्य इति । ज्ञानदो गुरुः । आश्रमिणाम् आद्यः हि यस्मात्तस्मात् यथाहमिति ॥३२॥ ज्ञानमपि मुक्तिसाधनं तद्वदेव गुरुरित्याह-ते त्विति । गुरुणा गुरुस्थेन मयाप्युक्तया वाचा अञ्जः शिक्षिताः ये पुरुषाः भवार्णवं तरन्ति ते इह वर्णाश्रमवतां मध्ये अर्थकोविदाः स्वप्रयोजनसम्पादनपटव इत्यन्वयः ॥३३॥ सर्वेषु साधनेष्वयमेव भगवदनुग्रहान्तरङ्गमित्याह-नैति । इज्या यजनं प्रजनं प्रजातिः सन्ततिजननं 'नापुत्रस्य लोकोऽस्ति' इति श्रुतिः ॥३४॥ अनुग्रहविशेषस्मरणार्थम् उभयोरनुभवविशेषं स्मारयति अपीति । गुरौ निवसतां नौ यत्कर्म तत् स्मर्यतामपि स्मर्यते किम् ॥३५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननूत्तरः पक्षः सम्भवतु नाम पूर्वस्तु न सम्भवेदित्याशङ्क्याऽऽह-यथाहमिति । स वै इत्यत्रापि यत्रेत्यस्य त्रिरावृत्तिः कार्या तत्र सम्भवो यत्र निमित्ते द्विजातेः सतः यत्रैव च निमित्ते सत्कर्मणां सम्भव इति ॥३२-४५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२३-४५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१८-४५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इह खलु पिता उपनेता मदीयतत्त्वोपदेष्टा चेति त्रय एव गुरवो भवन्ति तेष्वन्त्य एवातिपूजनीय इत्याह–स वा इति। संसारे यत्र सम्भवो जन्ममात्रं च आधानकर्ता पिता तावदाद्यो गुरुः। यत्र द्विजातेः सतः पुंसः सत्कर्मणां सम्भवः स उपने सावित्र्युपदेष्टा द्वितीयो गुरुः। यस्तु आश्रमिणाम् आश्रमिभ्यश्चतुर्थ्य एव ज्ञानदः मत्तत्त्वोपदेष्टा स यथाहं मत्तुल्यत्वेनातिपूजनीय इत्यर्थः ॥३२॥ तृतीयो गुरुरेव संसारात्तारयतीत्याह–ननु निश्चितमेव वर्णाश्रमवतां मध्ये ते एव अर्थकोविदाः ये मया मद्रूपेण मत्तत्त्वोपदेष्ट्रा गुरुणा वाचा मन्मन्त्रोपदेशमात्रेणैवाञ्जः सुखेनैव भवार्णवं तरन्ति ॥३३॥ तस्मान्मदुपदेष्टा गुरुरेवातिशयेन शुश्रूषणीय इत्याह–नाहमिति। इज्या होमो ब्रह्मचारिधर्मः प्रजातिः प्रजापुत्रोत्पादनं गृहस्थधर्मः ताभ्यां तपसा वनस्थधर्मेण उपशमेन यतिधर्मेण वा अहं परमेश्वरस्तथा न तुष्येयम्। यथा सर्वभूतानामात्मापि गुरुशुश्रूषया ॥३४॥ गुरौ निवसतामस्माकं यद्वृत्तं तत्कि स्मर्यते ॥३५॥

गूढार्थदीपिनी

यत्र सम्भवो जन्ममात्रं स पिता तावत् आद्यो गुरुः। द्विजातेः सतः सत्कर्मणां यत्र सम्भवः उपनीय वेदाध्यापकः स द्वितीयो गुरुः सर्वेषामाश्रमिणां साक्षात् ज्ञानदः स तु साक्षात् अहमेवेत्यन्वयः। अङ्ग हे मित्र ! ॥३२॥ वर्णाश्रमवतां मध्ये न निश्चयेन ते अर्थकोविदाः पुरुषार्थकुशलाः। के। ये मया गुरुणा प्रयोक्त्रा वाचा उपदेशमात्रेण अञ्जः सुखेन भवार्णवं तरन्ति ॥३३॥ इज्या यागादिः गृहस्थधर्मः। प्रजातिः प्रकृष्टं जन्म उपनयनं ब्रह्मचारिधर्मः ताभ्यां तपसा वानप्रस्थेन। उपशमेन यतिधर्मेण च अहं नैव तुष्येयं यथा गुरुसेवया ॥३४॥ गुरौ गुरुसमीपे निवसताम् अत एव क्वचित् कदाचित् गुरुदारैः इन्धनानयने प्रेषिता नोऽस्माकं यत् वृत्तं जातं तत् अपि किं स्मर्यते। बहुत्वं रामाद्यपेक्षया ॥३५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गुरवस्त्रयः पित्रुपनेतृमत्तत्त्वोपदेष्टृभेदात्। तत्र मत्तत्त्वोपदेष्टा मदभिन्न एवेत्याह–इह संसारे यत्र सम्भवो जन्म स जनिता तावदाद्यः प्रथमो गुरुः पूज्यः द्विजातेः सतः पुंसः सत्कर्मणां यत्र सम्भवः उपनीय वेदाध्यापकः यथाहं मत्सदृशो द्वितीयो गुरुः आश्रमिणां सर्वेषां यथाधिकारं ज्ञानदो मत्स्वरूपादिविषयकबोधप्रदो यः स तु साक्षादहमेवेति ॥३२॥ मज्ज्ञानप्रदेन गुरुणा भवार्णवं तरन्ति तस्य सर्वश्रेष्ठत्वे हेतुमाह–नन्विति। इह वर्णाश्रमवतां मध्ये ये जाता इति शेषः। ते गुरुणा मदात्मयाथात्म्योपदे वाचा मद्विषयकेण श्रोतव्येन वाक्येन मन्त्रादिरूपेण वेदान्तवाक्यकदम्बेन च अर्थेषु उपास्योपासककृपाफलभक्तिरसविरोधिसंज्ञक कोविदाः व्युत्पन्नाः सन्तः भवार्णवं नूनं निश्चितमञ्जस्तरन्तीत्यन्वयः ॥३३॥ मत्तत्त्वज्ञानप्रदगुरुशुश्रूषयाहं प्रीतः स्यामित्याह नाहमिति। इज्या गृहस्थधर्मः प्रजातिः प्रकृष्टं जन्मोपनयनं तेन ब्रह्मचारिधर्म उपलक्ष्यते ताभ्यां तपसा वनस्थधर्मेण उपशमे यतिधर्मेण च अहं तथा न तुष्येयं प्रीतः स्याम् यथा सर्वभूतात्मापि गुरुशुश्रूषया गुर्वाज्ञानुवृत्त्येत्यर्थः ॥३४॥ किञ्च नः अस्माकं वृत्तम् अनुकूलाचरणरूपं चेष्टितं त्वया स्मर्यते। क्वचिदावश्यके कार्ये इन्धनानयने निमित्ते चोदितानां प्रवर्तितानाम् ॥३५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

किञ्च गुरुकुलवासो द्विजन्मनां द्वितीयं जन्म तच्च साक्षात् कर्मणां सम्बन्धी सम्यग्भवो यत्रेति तत एव कर्माण्युत्पद्य "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते" इति श्रुतेः। किञ्च यत्राश्रमिणामाद्यो भवति गुरुकुले स्थितो ब्रह्मचारी आश्रमाः पुरुषार्थसाधकाः तेषामाद्योऽयं तदभावे कोऽप्याश्रमो न भवेदिति साध्यसाधकत्वेन गुरोरुपयोगमुक्त्वा ज्ञानसाधकत्वेन पुरुषार्थोपयोगित्वमाह–यथाहं ज्ञानदो गुरुरिति। गुरोः भक्तेरनुभवपर्यवसायित्वात् स्वतुल्यता ॥३२॥ ननु कथं करणत्वम् अननुगमादित्याशङ्क्याऽऽह–नन्वर्थकोविदा इति। अर्थे पुरुषार्थे ये पुरुषाः कोविदाः पण्डिताः पुरुषार्थसिद्धिर्भवत्विति विचारयन्ति तेन ये मया गुरुणा वाचा वाङ्मात्रेणैव अञ्जः अनायासेन भवार्णवं तरन्ति तरिष्यन्ति निश्चित्य गुरुमेव भजन्ते त एव अर्थकोविदा इत्यर्थः। ब्रह्मन्निति सम्बोधनं सम्मत्यर्थं साधनान्तरव्युदासार्थमाह–वर्णाश्रमवतां अनेन वर्णधर्मा आश्रमधर्माश्च तत्साधका इत्युक्तं भवति ॥३३॥ एवं प्रसङ्गात् ये केचन संसारतरणोपायाः गुरुसेवातिरिक्ता

निषेद्धुं गार्हस्थ्यवानप्रस्थसं
सन्ततिः उभयं गार्हस्थ्यधर्मः
सर्वभूतेषु आत्मा यस्य यागे
क्लिष्टो भवतीति तपसा शरी
सेवकस्यानन्दः गुरोश्चेति अतो
तथापि भक्त्या कृतः मत्प्री
सेवार्थं परमक्लेशं सम्पादित
सम्बन्धि वक्ष्यमाणं स्मर्यते अ
कर्तव्यमिति अत एव गुरुदारै

इह संसारे सम्भव
सत्कर्मणामुपनयनसन्ध्यादीन
पूज्यतमः यथाहमीश्वरः पूज्यत
येऽर्थे निपुणास्ते मया मद्रूपेण
तरन्ति नन्वेव ॥३३॥ सर्वभूता

अथ —

जनकश्चोपनेता च य

तेषु ज्ञानगुरोराधिक्यम
पिता तावदाद्यः प्रथमो गुरुः
यस्त्वाश्रमिणां सर्वेषामपि ज्ञान
इत्याशयेन सम्बोधयति–ब्रह्मन्नि
त एव सर्वेषां वर्णानामाश्रमिणां च
धर्मो नास्ति इत्याह–नाहमिति
ताभ्याम्। तपसा अनशनादिना
गुरुशुश्रूषया तुष्येयम्। तवैकस्
स्यात् इत्याशयेनात्मानं विशिनष्टि
इति पृच्छति – अपि इति। हे ब्रह्म
जातानि, तस्य कस्य स्मरणं पृच्छ

स इति। अङ्ग हे मित्र
सत्कर्मणां यत्र सम्भवः उपनीय
गुरुतया सम्पूज्य इत्यर्थः। यद्वा। य
पूज्यः ज्ञानदो गुरुस्तु साक्षाद् अ
पूर्वोक्तो गुरुकुले वासो ब्रह्मचर्याश्र

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

निषेद्धुं गार्हस्थ्यवानप्रस्थसंन्यासानां मुख्यधर्माणां मत्प्रीतिहेतुत्वं नास्तीत्याह–नाहमिज्याप्रजातिभ्यामिति । इज्या यागः प्रजातिः सन्ततिः उभयं गार्हस्थ्यधर्मः ऋणापकरणरूपः तपोवतस्थस्य उपशमः परमहंसस्य एवं त्रिभिरपि अहं न तुष्येयं तत्र हेतुः सर्वभूतात्मेति सर्वभूतेषु आत्मा यस्य यागेन जीवानां नाशः प्रजात्या उत्पत्तिः तेनोत्पत्तिप्रलयौ कुर्वन् मम सन्तोषं न जनयति उत्पादनेनापि जीवः क्लिष्टो भवतीति तपसा शरीरक्लेशः उपशमेन देहेन्द्रियादीनाम् अतः क्लेशकरत्वात् मम न सन्तोषः गुरुशुश्रूषायां तु स्नेहे सेवया सेवकस्यानन्दः गुरोश्चेति अतोऽहं तुष्येयं वेदाध्ययनस्यैव ऋणापकरणरूपत्वात् सेवा अधिकैव यद्यप्यङ्ग ! भावेनैव सेवाया विनियोगः तथापि भक्त्या कृतः मत्प्रीतिहेतुरपि भवति संयोगपृथक्त्वन्यायेन ॥३४॥ एवं गुरुकुलवासं स्तुत्वा तं स्मारयित्वा आवयोर्वासः सेवार्थं परमक्लेशं सम्पादितवानिति सेवाविशेषं स्मारयति–अपि नः स्मर्यते ब्रह्मन्निति नवभिः । त्रिगुणकार्यमेतदिति नोऽस्माकं सम्बन्धि वक्ष्यमाणं स्मर्यते अपीति सम्भावनायां ब्रह्मन्नित्यनसूयार्थं गुरौ निवसतां व्रतस्थानां गुरुवाक्यत्वात् गुरुपुत्रगुरुपत्नीवाक्यमपि कर्तव्यमिति अत एव गुरुदारैः प्रेरितानामिन्धनानयने अरण्यादिन्धनमानीयतामिति क्वचित् कदाचित् विषमसमये ॥३५॥

श्रीसुबोधिनीसारः

इह संसारे सम्भवो जन्म यत्र यतो भवति यद्वा सम्भवत्युत्पद्यते यस्मात् स पिताऽद्यो गुरुः द्विजातेस्त्रैवर्णिकस्य सत्कर्मणामुपनयनसन्ध्यादीनां सम्भवो यतो भवति स द्वितीयो गुरुरर्थात् पूज्यतरः आश्रमवतां चतुर्णां वर्णानां ज्ञानदः स साक्षाद्गुरुः पूज्यतमः यथाहमीश्वरः पूज्यतमः "ज्ञानी त्वात्मैव मे मतम्" इत्यात्मज्ञानिनोरभेदात् हे अङ्ग ॥३२॥ हे ब्रह्मन् ! वर्णाश्रमवतां मध्ये येऽर्थे निपुणास्ते मया मद्रूपेण गुरुणा 'गुरुरेव परं ब्रह्म' इत्युक्तेः । वाचोपदेशेनाञ्जः सुखेनैव भवार्णवं संसारसागरमिह मनुष्यजन्मनि तरन्ति नन्वेव ॥३३॥ सर्वभूतात्माऽहं यथा गुरोः सेवया तुष्यामि तथा यज्ञादिभिर्न ॥३४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ —

जनकश्चोपनेता च यश्च विद्यां प्रयच्छति । अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥ इति ॥

तेषु ज्ञानगुरोराधिक्यमाह–स वा इति । स्नेहाधिक्यं सूचयन् सम्बोधयति–अङ्गेति । इह संसारे यत्र सम्भवो जन्ममात्रं स पिता तावदाद्यः प्रथमो गुरुः पूज्यः । द्विजातेः सतः पुंसः सत्कर्मणां यत्र सम्भवः उपनीय वेदाध्यापकः स द्वितीयो गुरुः । यस्त्वाश्रमिणां सर्वेषामपि ज्ञानप्रदः स तु साक्षाद्यथाहं गुरुस्तथा गुरुतया सम्पूज्य इत्यर्थः ॥३२॥ तवाप्येतत्सम्मतमेव विज्ञेयत्वात् इत्याशयेन सम्बोधयति–ब्रह्मन्निति । इह लोके ये मया गुररूपेण वक्त्रा वाचा उपदेशमात्रेण अञ्जः सुखेन संसाररूपं महार्णवं तरन्ति त एव सर्वेषां वर्णानामाश्रमिणां च मध्येऽर्थकोविदाः स्वपुरुषार्थे कुशला इत्यन्वयः । ननु इत्यवधारणे ॥३३॥ अत एव तद्भजनादधिको धर्मो नास्ति इत्याह–नाहमिति । इज्या पञ्चमहायज्ञादिगृहस्थधर्मः प्रजातिः प्रकृष्टं जन्म उपनयनं तेन ब्रह्मचारिधर्म उपलक्ष्यते स्याम् । तपसा अनशनादिना वनस्थधर्मेण उपशमेन इन्द्रियादिनिग्रहेण यतिधर्मेण चाहं तथा न तुष्येयं प्रीतः स्याम् यथा गुरुशुश्रूषया तुष्येयम् । तवैकस्य सन्तोषमात्रेणापि किं स्यात् ? इत्याशङ्क्यसर्वात्मकत्वाद्ब्रह्मादिसर्वसंतोषेण तस्य किं दुर्लभं स्यात् इत्याशयेनात्मानं विशिनष्टि– सर्वभूतानामात्मेति ॥३४॥ अस्माकं च किञ्चिद्गुरुशुश्रूषणं भाग्यात्सम्पन्नं नन्विति त्वया स्मर्यते इति पृच्छति - अपि इति । हे ब्रह्मन् ! गुरुसमीपे निवसतां नोऽमस्माकं यद्वृत्तं जातं तत्किं त्वया स्मर्यते ? तत्र निवसतां बहूनि वृत्तानि जातानि, तस्य कस्य स्मरणं पृच्छ्यत इत्यपेक्षायामाह–गुरुदारैरित्यादिना । क्वचित्कदाचित् इन्धनानयनार्थं गुरुदारैश्चोदितानाम् ॥३५॥

अन्वितार्थप्रकाशिका

स इति । अङ्ग हे मित्र ! इह संसारे यत्र सम्भवो जन्ममात्रं स पिता तावदाद्यः प्रथमो गुरुः पूज्यः द्विजातेः सतः पुंसः सत्कर्मणां यत्र सम्भवः उपनीय वेदाध्यापकः स द्वितीयो गुरुः यस्त्वाश्रमिणां सर्वेषामपि ज्ञानप्रदः स तु साक्षाद्यथाहं गुरुस्तथा गुरुतया सम्पूज्य इत्यर्थः । यद्वा । यत्र सम्भवो जन्म सोऽपि आद्यो गुरुः यत्र सत्कर्मणां सम्भवः स वेदाध्यापको गुरुर्यथाहमीश्वरस्तथा पूज्यः ज्ञानदो गुरुस्तु साक्षाद् अहं वै अहमेवेति शेषं प्राग्वत् । इति श्रीस्वामिपादादिभिर्गुरुत्रयपरतया व्याख्यातम् । यद्वा । स पूर्वोक्तो गुरुकुले वासो ब्रह्मचर्याश्रमः द्विजातेः सत्कर्मणां च साक्षात् आद्यो मुख्यः सम्भवः । गर्भनिःसरणं तु शूद्रसाधारणम् । यत्र

अन्वितार्थप्रकाशिका

गुरुकुलवासे आश्रमिणां तत्तदुचितज्ञानप्रदगुरुः आचार्यः यथाहं तथा तत्तुल्यतया पूज्यः यद्वा सन्ति श्रेष्ठानि कर्माणि येषां तेषाम् आश्रमिणाम् इति ॥३२॥ नन्विति । हे ब्रह्मन् ! इह लोके ये मया गुरुरूपेण वक्त्रा वाचा उपदेशमात्रेण अञ्जः सुखेन संसाररू महार्णवं तरन्ति त एव सर्वेषां वर्णानामाश्रमिणां च मध्येऽर्थकोविदाः स्वपुरुषार्थे कुशलाः । ननु एतेन ज्ञानप्रदाद्गुरोरधिकः सेव्यो नास्तीत्युक्तम् ॥३३॥ नाहमिति । सर्वभूतानामात्माऽप्यहम् इज्या पञ्चमहायज्ञादिगृहस्थधर्मः प्रजातिः प्रकृष्टं जन्म उपनयनं ते ब्रह्मचारिधर्म उपलक्ष्यते ताभ्यां तपसा अनशनादिना वनस्थधर्मेण उपशमेन इन्द्रियादिनिग्रहेण यतिधर्मेण चाहं तथा न तुष्येयं प्रीतः न स्याम् यथा गुरुशुश्रूषया तुष्येयम् । अपीति । हे ब्रह्मन् ! गुरौ गुरुसमीपे निवसतां क्वचित् कदाचित् इन्धनानयनार्थं गुरुदारैश्चोदितानां नोऽस्माकं च वृत्तं किञ्चिद्गुरुशुश्रूषणं भाग्यात्सम्पन्नं नन्विति त्वया स्मर्यते । बहुत्वं रामाद्यपेक्षया ॥३४-३५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गुरुवार्ताप्रसङ्गेन मोक्षप्रदगुरुज्ञानाय त्रीन् गुरूनाह-स इति । इह लोके यत्र जनिरस्ति स जनकः आद्यो गुरुर्ज्ञेयः । द्वितीयं गुरुमाह द्विजातेः । उपनीतसंस्काररूपं द्वितीयं जन्म प्राप्नुवतस्त्रैवर्णिकनरस्य सत्कर्मणां संध्यावन्दनवेदाध्ययनादीनां यत्र यस्मिन्निमित्ते सति सम्भवः । यद्वा यत्र यतः सम्भव उपदेशः स द्वितीयो गुरुः मोक्षप्रदं तृतीयं गुरुमाह । आश्रमिणां ब्रह्मचर्यादिचतुराश्रमवतां जनानां ज्ञानदः मत्स्वरूपज्ञानप्रदाता यो गुरुः मोक्षप्रदं तृतीयं गुरुमाह । आश्रमिणां ब्रह्मचर्यादीनां ब्रह्मचर्यादिचतुराश्रमवतां जनानां ज्ञानदः मत्स्वरूपाज्ञानप्रदाता यो गुरुः स तु यथाऽहं मत्सदृशो ज्ञातव्यः ॥३२॥ मया तेन गुरुणा च जनाः संसा तरन्तीत्याह-नन्विति । हे ब्रह्मन् ! इह लोके वर्णवताम् आश्रमवतां च नृणां मध्ये ये अर्थकोविदाः मोक्षपुरुषार्थसाधननिपुणास्ते मया धृताऽवतारेण परमेश्वरेण वक्त्रा गुरुणा मदेकान्तिकभक्तेन वक्त्रा च कृतया वाचा उपदेशेन अञ्जोऽनायासेन भवार्णवं तरन्ति ॥३३॥ एवंविधगुरुसेवनादधिकं सत्कर्म नास्तीत्याह-नाहमिति । इज्या अग्निहोत्रादिगृहस्थधर्मश्च प्रजातिः द्वितीयं जन्म वर्णित्वरू च ताभ्याम् । तपसा वनस्थत्वेन उपशमेन यतित्वेन च अहं न तुष्येयम् । यथा गुरोर्मज्ज्ञानोपदेष्टुः शुश्रूषया सेवया तुष्येयं तथा नान्यसाधनैः ॥३४॥ ज्ञानप्रदान्यगुरुसेवनमिषेणस्वपूर्ववृत्तान्तं पृच्छति अपीति क्वचित् कदाचित् । वृत्तं वृत्तान्तम् ॥३५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अतः ज्ञानप्रदं गुरुमाश्रित्य ये संसारं तरन्ति ते बुद्धिमन्त इत्याह । नन्विति । हे ब्रह्मन् ! इह लोके वर्णाश्रमवतां सर्वेषां वर्णवतामाश्रमवतां च मध्ये ते एव अर्थकोविदाः पुरुषार्थसम्पादनकुशलाः ननु ते के । ये गुरुणा गुरुरूपेण वक्त्रा मया कृ वाचा उपदेशमात्रेण करणेन बोधिताः सन्तः अञ्जः सुखेनैव भवार्णवं संसाराम्बुधिं तरन्ति । ते इति सम्बन्धः । एते ज्ञानप्रदाद्गुरोरधिकः सेव्यो नास्तीत्युक्तम् ॥३२॥ अत एव तद्भजनादधिको धर्मश्च नास्तीत्यत आह । नाहमिति । सर्वभूता सर्वभूतान्तरात्मा अहम् इज्या गृहस्थधर्मश्च प्रजातिः प्रकृष्टं जन्मोपनयनं ब्रह्मचारिधर्मः ताभ्यां ब्रह्मचारिगृहिधर्माभ्यामित्यर्थः । तथा तपसा वानप्रस्थधर्मेण तथा उपशमेन यतिधर्मेण च तथा न तुष्येयम् । यथा गुरुशुश्रूषया तुष्येयम् ॥३३॥ किं चास्माकं किमपि गुरुशुश्रूषणमपि दैवादेव सम्पन्नं तत्त्वया न स्मर्यते । किमिति पृच्छति । अपीति । हे ब्रह्मन् ! गुरौ तत्सन्निधावित्यर्थः निवसतां क्वचित्कदाचित् इन्धनानयने गुरुदारैर्गुरुपत्न्या चोदितानां प्रेरितानां नोऽस्माकं वृत्तं स्मर्यते अपि । क्षुधा संदष्ट तथाविधं मां किञ्चिन्मात्रमप्यदत्त्वैव मां वञ्चयित्वैव गुरुदारदत्तचणकभक्षिता आसीर्यत्तद्वृत्तं स्मरसि किमिति भावः । प्रविष्टानां । किञ्च हे द्विज ! महारण्यं प्रविष्टानां नोऽस्माकम् अपर्तौ अकाले इत्यर्थः । सुमहत् वातश्च वर्षं च तयोः समाहारः तीव्रम् अ । निष्ठुराः स्तनयित्नवो गर्जितानि च अभूवन् । तच्च स्मर्यते अपि ॥३५॥

कृष्णप्रिया

हे अंगरहे प्रियसखा ! इस विश्वमें शरीर का कारण जन्मदाता पिता आद्यगुरु है । तदनन्तर कर्मयज्ञोपवितादि संस्कार करके यत्कर्मो की शिक्षा समर्पण करने वाले द्वितीय गुरु होते है वह मेरे ही तुल्य सम्मान्य है । उसके बाद ज्ञानोपदेश करके भगवान को प्राप्त कराने वाला गुरु तो मेरा ही स्वरुप है । इस प्र वर्णाश्रमियों के ये तीन गुरु होते है ॥३२॥ हे ब्रह्मर्षि प्रियसखा ! गुरुदेव प्रत्यक्ष मेरा ही स्वरुप है । इस वि

वर्णाश्रम धर्म के अन
लेते है वे सज्जन अ
हुं, सबके हृदयमें अ
आदि धर्म से और सन
सेवा समचीन से सन्तु
की घटना क्या आपक

प्रविष्टानां महा
सूर्यश्चास्तं गत
वयं भृशं तत्र
दिशोऽविदन्तो
एतद्विदित्वानुदि

तावत्, सूर्यः, अ
वयम्, तत्र, भृशम्, महानि
आतुराः, वने, परिबभ्रिम ॥
नः, आतुरान्, अपश्यत् ॥३

अपर्तौ अपगते ऋत
नतमुन्नतञ्च स्थानम् ॥३७॥ अ
धातोरूपम् परि परितो बभ्रिम

इत्यर्थ इति-वर्षाकाल
इत्यर्थ इति-मार्गादीनां जलाच्छ
भ्रमणस्य परिशब्दावगतत्वादिति

प्रविष्टानां प्रविष्टेष्वस्मासु
स्तनयित्नवो महागर्जितं कुर्वाणा
तटमुन्नतं किञ्चानेन प्रकर्षेणाज्ञाय
बभ्रिम बभ्रमिमेत्यर्थः । भ्रमधातो

प्रविष्टानां प्रविष्टेष्वस्मासु
॥३६॥ चकाराभ्यां द्वयोरपि प्राधान्य
नज्ञातमस्माभिः यतो जलमयं जले

---

१. संवृता-विज. २.कज्जलौधेन

कृष्णप्रिया

वर्णाश्रम धर्म के अनुयायियों में जो सज्जन अपने श्रीगुरुवर्य के उपदेशानुसार अनायास भवार्णन को पार कर लेते है वे सज्जन अपने स्वार्थ परमार्थ के वास्तविक अभिज्ञ है ।।३३।। ब्रह्मर्षि सखा ! मैं प्राणीमात्र का आत्मा हुं, सबके हृदयमें अन्यर्यामी स्वरुपसे, गृहस्थके धर्म पंचमहायज्ञादि से वानप्रस्थ के धर्म तपश्चर्या एवं उपरति आदि धर्म से और सन्यासी के उपरामवृष्टि आदि धर्मानुष्ठान से उतना प्रसन्न सन्तुष्ट नहीं जितना श्रीगुरुचरणोकी सेवा समचीन से सन्तुष्ट होता हुं ।।३४।। भैया ब्रह्मर्षि जिस समय हम आप गुरुकुलमें निवास करते थे उस काल की घटना क्या आपको स्मृति पथमें है ? भैया एकदिन श्रीगुरुपत्नीने इधन लेने के लिये जंगलमें भेजा था ।।३५।।

प्रविष्टानां महारण्यमपर्तौ सुमहद्द्विज । वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः ।।३६।।
सूर्यश्चास्तं गतस्तावत्तमसा [1]चाऽऽवृता दिशः । निम्नं कूलं [2]जलमयं न प्राज्ञायत किञ्चन ।।३७।।
वयं भृशं तत्र महानिलाम्बुभिर्निहन्यमाना मुहुरम्बुसम्प्लवे ।
दिशोऽविदन्तोऽथ परस्परं वने गृहीतहस्ताः परिबभ्रिमातुराः ।।३८।।
एतद्विदित्वानुदिते[3] रवौ सान्दीपनिर्गुरुः । अन्वेषमाणो नः शिष्यानाचार्योऽपश्यदातुरान् ।।३९।।

कर्दमक्षमा

तावत्, सूर्यः, अस्तम्, गतः, दिशः, च, तमसा, आवृताः, कूलम्, निम्नजलमयाम्, न, किञ्चन, प्राज्ञायत ।।३७।। वयम्, तत्र, भृशम्, महानिलाम्बुभिः, मुहुः, अर्द्यमानाः, अम्बुसम्प्लवे, दिशः, अविदन्तः, परस्परम्, गृहीतहस्ताः, अथ, आतुराः, वने, परिबभ्रिम ।।३८।। एतत्, विदित्वा, अनुदिते, रवौ, सान्दीपनिः, गुरुः, नः, शिष्टान्, अन्विष्यमाणः, आचार्यः, आतुरान्, अपश्यत् ।।३९।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपर्तौ अपगते ऋतौ अकाल इत्यर्थः । वातश्च वर्षञ्च तयोः समाहारः स्तनयित्नवो गर्जितानि चाभवन् ।।३६।। निम्नं कूलं मुन्नतञ्च स्थानम् ।।३७।। अम्बूनां सम्प्लवो व्यामिश्रणं यस्मिन्नेकोदके तस्मिन् वने इत्यर्थः । परिबभ्रिम "भृञ् भरणे" इति रूपम् परि परितो बभ्रिम इडागमश्छान्दसः भारान् धृतवन्त इत्यर्थः ।।३८-३९।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति-वर्षाकालमन्तरेणेति भावः ।।३६।। तावत्तदा । जलमयं प्रचुरजलम् । किञ्चन तृणकण्टकादि च ।।३७।। तत्र वने । इति-मार्गादीनां जलाच्छादितत्वेनैकोदकतयाऽप्रतीयमान इति भावः । इत्यर्थ इति-सभारा इतस्ततो अगच्छाम इति भावः । परिशब्दावगतत्वादिति ।।३८।। एतत् इन्धनार्थमस्मत्प्रेषणम् । विदित्वा भार्यातोऽवगम्य । आतुरान् क्लिष्टान् ।।३९।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रविष्टानां प्रविष्टेष्वस्मासु सत्सु अपर्तौ शीतर्तौ प्राप्ते तीव्रं दुःसहं हे द्विजेति तद्भूतवृत्तस्मरणात् तेन कौतुकाद्वा निष्ठुरास्तीव्राः यित्नवो महागर्जितं कुर्वाणा विद्युत्पाताश्चाभवन् ।।३६।। चकाराभ्यां द्वयोरपि प्राधान्यं यौगपद्यात् निम्नं नीचं स्थानं कूलं च किञ्चानेन प्रकर्षेणाज्ञायत किञ्चिदपि सम्यक् न ज्ञातमस्माभिः यतो जलमयं जलेन प्लावितमित्यर्थः ।।३७।। परितो बभ्रमिमेत्यर्थः । भ्रमधातोष्टिलोप आर्षः ।।३८।। एतदस्मद्दुःखं विदित्वा वितर्क्य गुरुर्महानपि ।।३९।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रविष्टानां प्रविष्टेष्वस्मासु सत्सु अपर्तौ अवर्षाकालेऽपि तीव्रं दुःसहं हे द्विजेति । तदद्भुत-वृत्तस्मरणात् तेन कौतुकाद्वा चकाराभ्यां द्वयोरपि प्राधान्यम् । यौगपद्यात् । निम्नं नीचस्थानं कूलं च तटमुन्नतं किञ्चन न प्रकर्षेणाज्ञायत । किञ्चित् सम्यङ् स्माभिः यतो जलमयं जलेन प्लावितमित्यर्थः ।।३७।। महद्भिरनिलैरम्बुभिश्च वृष्टिजलैर्मुहुर्नितरां सीदमानाः पीड्यमानाः

---

[1] संवृता-विज. [2] कज्जलौधेन-विज. । [3] उदिते-श्रीधर. वंशी. वीर. विज. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ अत आतुरा विवशाः सन्तो बभ्रिम बभ्रमिमेत्यर्थः ॥३८॥ एतत् महावातवृष्ट्यादिनास्माकं वने वास-दुःखादि ज्ञा अनुदितेऽप्यन्वेषमाण इतस्ततोऽन्विष्यन् यत आचार्यः सदाचारे साधुः परमसद्वृत्त इत्यर्थः ॥३९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अपर्तौ अकाले ॥३६-३९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अपर्तावपगते ऋतावकाल इत्यर्थः । महारण्यं प्रविष्टानां सतां वातो वर्षं च तयोः समाहारस्तदभूत् तथा निष्ठुराः स्तनयि स्तनयित्नुशब्दोऽत्र तद्गर्जने लाक्षणिकः गर्जितानि चाभवन् ॥३६॥ तावत्तथैव सूर्योऽस्तङ्गतश्च अत एव दिशस्तमसा व्याप्ताः निम्नो कूलमुन्नतं च स्थलं जलमयं हेतुगर्भमतो न प्राज्ञायत न ज्ञानमभूत् ॥३७॥ वयमिति । अम्बूनां सम्प्लवे प्रवाहे महानिलैरम्बुभि हन्यमानाः पीड्यमानाः दिशोऽविदन्तः अतः अजानन्तः एवातुराः परस्परं गृहीताः हस्ताः यैः ते वयं वने परिबभ्रिम परितो ब इन्धनभारान् धृतवन्त इत्यर्थः । पर्यचरामेति वा । उपसर्गवशाद्भृञश्चरत्यर्थत्वात् इडार्षः ॥३८॥ एतदिति । एतदस्माकं कृ विदित्वा सूर्ये उदिते सत्यन्वेषमाणो नोऽस्मानपश्यत् दृष्ट्वा चाब्रवीदित्यर्थः ॥३९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अपर्तौ वर्षाकालमन्तरेण वातयुतवर्षम् ॥३६॥ इदं निम्नमिदं कूलमिति किञ्चन स्थूलजलप्रवाहेण न प्राज्ञायत न ज्ञानम् ॥३७॥ अम्बुसम्प्लवे जलप्रवाहे दिशोऽविदन्तः अजानन्तः परिबभ्रिम परितो भ्रान्ता बभूविम ॥३८॥ विदित्वा उदिते दुःखातिशयं दर्शयति-कथमेतदत्राह-अरूरुददिति ॥३९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥३२-४५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२३-४५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१८-४५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अपर्तौ अपगतवर्षर्तौ शीतकाल इत्यर्थः । स्तनयित्नवो गर्जनवन्तो मेघाः ॥३६-३७॥ परिबभ्रिम परितो भ्रमणं का इन्धनभारमवहाम वा भ्रमधातोर्भ्रमणार्थः छान्दसः प्रयोगः ॥३८-३९॥

गूढार्थदीपिनी

अपगते ऋतौ अपि आस्माकं समक्षे तीव्रं वातवर्षमभूत् स्तनयित्नवो गर्जितवन्तो मेघाश्च आसन् ॥३६॥ तमसा अन्धका अत एव सर्वं जलमयं प्रचुरजलमासीत् । प्राचुर्ये मयट् । नतं नीचस्थानं कूलं तटमुन्नतस्थानं च न प्राज्ञायत ॥३७॥ वयं त तीव्रैः अनिलैः जलैश्च मुहुः निहन्यमानाः पीड्यमानाः गृहीतहस्ताः सन्तः इतस्ततः परिबभ्रिमेत्यन्वयः । कथम्भूते । अ सम्प्लवः प्रवाहो यस्मिन् तस्मिन् एकोदके । बभ्रमिम इति वक्तव्यम् । भ्रमेष्टिलोप आर्षः ॥३८॥ एतत् इन्धनानयनार्थमस्मत् । नोऽस्मान् अन्वेषमाणः आतुरान् क्लिष्टान् अपश्यत् । एष्ट गतौ धातुः ॥३९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अपर्तौ अपगते ऋतौ अकाले तीव्रम् उल्बणं वातेन सह वर्षं महदभूत् तथा स्तनयित्नवो गर्जितानि अभूवन् ॥३६॥ कूलं नतमुन्नतं च स्थानम् ॥३७॥ भृशमत्यर्थं मुहुः महानिलैरम्बुभिश्च हन्यमानाः पीड्यमानाः अम्बूनां सम्प्लवाः प्रवाहा तस्मिन् वने दिशोऽविदन्तः इन्धनभारान् धृतवन्तः 'भृञ् भरणे' इत्यस्य रूपम् । इडागमश्छान्दसः ॥३८-३९॥

तत उत्कृ
ज्ञापनार्थं सुमहद्वात
तमसा दिशश्चावृताः
कियती नदी कियती
रात्रौ स्थिता इति ॥
नितरां हन्यमानाः उप
विचार्य अथ भिन्नप्र
गृहीतहस्ताः सन्तः त
निर्दयो गुरुः कथं तत्र
एव रवौ सान्दीपनिर्गु

गुरौ गुरुसमीप
किं हे ब्रह्मन् ! ॥३५॥
सुमहत्तीव्रं दुःसहं वात
तमसान्धकारेण दिश अ
महापवनवर्षैर्भृशमत्यर्थं
ग्रथितहस्ता वयं परिबभ्रि
शिष्यान् मृगयमाणः आ

महारण्यं प्रविष्टा
तथा निष्ठुरा दुःसहाः स्तनि
। तत्र हेतुः सूर्यश्चेति । त
महद्भिरनिलैरम्बुभिश्च भृश
परस्परं गृहीतहस्ताः मुहुः
सान्दीपनिर्गुरुर्नोऽस्मान् शि
आचार्य इति ॥

"उपनीय तु यः शि

प्रविष्टानामिति । म
समाहारः तीव्रं दुःसहमभूत्
दिशश्च तमसा आवृताः सर्वं
सम्प्लवः प्रवाहो मिश्रणं वा
अत एवातुरा व्याकुलचित्ताः
इन्धनार्थमस्मद्गमनं विदित्वा
अपश्यत् । "उपनीय तु यः शि

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत उत्कृष्टे इन्धनार्थं महारण्यं प्रविष्टानाम् अपर्तौ वर्षातिरिक्तकाले शिशिरे द्विजेति सम्बोधनं जन्मभूमिः सेति ज्ञापनार्थं सुमहद्वातवर्षमभूत् निष्ठुराश्च स्तनयित्नवः गर्जितानि नैष्ठुर्यं कर्णासह्यम् ॥३६॥ एतस्मिन्नन्तरे सूर्यश्चास्तं गतः तमसा दिशश्चावृताः तथापि कथं नागतमित्याकाङ्क्षायामाह–निम्नं कूलं जलमयमिति । नद्याः कूलं सर्वमेव जलमयं कियती नदी कियती भूमिरिति ज्ञातुमशक्यं ततः क्षिप्रोत्तरणार्थं न प्राज्ञायत कमप्युपायं न ज्ञातवन्तः ततस्तत्परपार एव त्रौ स्थिता इति ॥३७॥ क्लेशस्थितिं स्मारयति–वयं भृशमिति । वयं त्रयोऽपि तत्रैवारण्यदेशे अनन्तमहानिलाम्बुभिः नितरां हन्यमानाः उपवेशनार्थमपि भूमिर्नास्तीत्याह–अम्बुसम्प्लव इति । ततो दिशोऽप्यविदन्तः एवं जाते किं कर्तव्यमिति विचार्य अथ भिन्नप्रक्रमेण अतः परं गमनार्थं प्रयत्नो न कर्तव्यः किन्तु कालक्षेप एवेति विचार्य अन्योन्यविश्लेषाभावाय गृहीतहस्ताः सन्तः तस्मिन् वने आतुरा दीनाः क्षुधिताः सन्तः परिबभ्रिम इतस्ततो भ्रमणमेव कृतवन्तः ॥३८॥ तर्हि निर्दयो गुरुः कथं तत्र वासः कृत इति चेत्तत्राह–एतद्विदित्वेति । गुरोरपि हृदये अयमस्मत्क्लेशो भात एव अत एवानुदित एव रवौ सान्दीपनिर्गुरुः गृहान्निर्गतः नः अस्मान् अन्वेषमाणः आतुरान् वेपमानानपश्यत् ॥३९॥

श्रीसुबोधिनीसारः

गुरौ गुरुसमीपे निवसतां क्वचित्कदाचिद्गुरोर्दारैः स्त्रीभिरिन्धनस्यानयनार्थं प्रयुक्तानां नोऽस्माकं वृत्तं स्मर्यते चिन्त्यतेऽपि किं हे ब्रह्मन् ! ॥३५॥ महारण्यं घोरं वनं प्रविष्टानां सताम् उपरि वा विशेषणं पूर्वान्वयीति पण्डिताः अपर्तौ अकाले पौषादौ सुमहत्तीव्रं दुःसहं वातश्च वर्षं च तयोः समाहारोऽभूत् निष्ठुरा घोरा मेघनादाश्चासन् हे द्विज ! ॥३६॥ तावत्सूर्योऽस्तं गतः तमसान्धकारेण दिश आवृत्ता आच्छादिताः निम्नं कूलम् उच्चनीचस्थानं जलरूपं किञ्च न किमपि नालक्षत ॥३७॥ तत्र वने महापवनवर्षैर्भृशमत्यर्थं हन्यमाना मुहुरसकृत् अम्बूनां वारां सम्प्लवे व्याप्तौ दिशोऽविन्दतो अजानन्तः आतुरा दुःखिता मिथो गृहीतहस्ता वयं परिबभ्रिम आर्षम् ॥३८॥ एतद् विदित्वा ज्ञात्वा रवौ सूर्ये उदिते सति सन्दीपनस्यापत्यं गुरुराचार्यो नोऽस्मान् शिष्यान् मृगयमाणः आतुरान् दुःखिनोऽपश्यत् ॥३९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

महारण्यं प्रविष्टानां सताम् अपर्तौ वर्षाकालेऽतीतेऽपि हे द्विज ! सुमहद्वातश्च वर्षा च तयोः समाहारः तीव्रं दुःसहमभूत् । तथा निष्ठुरा दुःसहाः स्तनयित्नवो गर्जितानि चाभवन् ॥३६॥ गदाप्रहारनैपुतत्र निम्नं कूलं नतमुन्नतं च किञ्चनापि स्थानं न प्राज्ञायत तत्र हेतुः सूर्यश्चेति । तत्रैव हेत्वन्तरमाह–सर्वं जलमयं जातमिति ॥३७॥ अम्बूनां सम्प्लवः प्रवाहो यस्मिन् तस्मिन् वने महद्भिरनिलैरम्बुभिश्च भृशम् अत्यन्तं निहन्यमानाः सम्पीड्यमानाः दिशोऽविदन्तः अत एवातुरा व्याकुलचित्ताः अथ अत एव परस्परं गृहीतहस्ताः मुहुः परिबभ्रिम तत्र तत्र परिभ्रमणं कृतवन्तः ॥३८॥ एतत् इन्धनार्थमस्मद्गमनं विदित्वा रवौ सूर्ये उदिते सति सान्दीपनिर्गुरुर्नोऽस्मान् शिष्यान् अन्वेषमाणोऽथातुरान् अपश्यत् । स च नोपनयनमात्रकर्ता गुरुः किन्तु ज्ञानप्रद इति सूचयन्नाह–आचार्य इति ॥

"उपनीय तु यः शिष्यान् वेदानध्यापयेद् द्विजः । सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षत ॥" इति वचनात् ॥३९॥

अन्वितार्थप्रकाशिका

प्रविष्टानामिति । महारण्यं प्रविष्टानां सताम् अपर्तौ वर्षाकालेऽतीते शीतकाले इत्यर्थः । हे द्विज ! सुमहद्वातश्च वर्षं च तयोः समाहारः तीव्रं दुःसहमभूत् तथा निष्ठुरा दुःसहाः स्तनयित्नवो गर्जितवन्तो मेघाश्चाभवन् ॥३६॥ सूर्य इति । तत्र सूर्यस्तावदस्तङ्गतः तमसा आवृताः सर्वं जलमयं जातम् अतः निम्नं कूलं नतमुन्नतं किञ्चनापि स्थानं न प्राज्ञायत ॥३७॥ वयमिति । अम्बूनां सम्प्लवः प्रवाहो मिश्रणं वा यस्मिन् तस्मिन् वने महद्भिरनिलैरम्बुभिश्च भृशम् अत्यन्तं निहन्यमानाः सम्पीड्यमानाः दिशोऽविदन्तः आतुरा व्याकुलचित्ताः अथ अत एव परस्परं गृहीतहस्ताः मुहुः परिबभ्रिम । भ्रमेष्टिलोप आर्षः ॥३८॥ एतदिति । एतत् इन्धनार्थमस्मद्गमनं विदित्वा रवौ सूर्ये उदिते सति आचार्यः सान्दीपनीर्गुरुर्नोऽस्मान् शिष्यान् अन्वेषमाणः । एष्टृ गतौ । अथातुरान् अपश्यत् । "उपनीय तु यः शिष्यान् वेदानध्यापयेद् द्विजः । सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षते ॥"॥३९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अपतौ अपगते ऋतौ वृष्टिकाले । वातेन सहितं वर्षं जलवर्षणमभूत् ॥३६॥ निम्नं नीचस्थानं कूलमुन्नतस्थानम् । न प्राज्ञायत अस्माभिर्ज्ञातम् ॥३७॥ अम्बुनां प्लवो व्याप्तिर्यस्मिस्तस्मिन् । एकतोये वने दिशोऽविदन्तः अजानन्तः अतः परस्प गृहतहस्ताः सन्तः परिबभ्रिम परितो बभ्रमिम भ्राम्यतेर्टिलोप आर्षः ॥३८॥ आतुरान् दुःखितान् ॥३९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सूर्यश्चेति । तदा सूर्यश्च अस्तं गतः । तावत् दिशश्च तमसा ध्वान्तेन आवृताः अभूवन् । तदा निम्नं नतं कूलमुन्नतं वा स्थल किञ्चन किमपि न प्राज्ञायत । किन्तु जलमयमेव सर्वं प्राज्ञायतेत्यर्थः ॥३६॥ वयमिति । किञ्च वयम् अम्बूनां सम्प्लवो व्याप्तिश्च यस्मिस्तस्मिन् एकोदके इत्यर्थः । तत्र वने महानिलाः प्रचण्डवाताश्च अम्बूनि च तैः मुहुः निहन्यमानाः सुतरां पीड्यमानाः सन्तः दिशः प्राच्याद्याशाश्च अविदन्तः अत एव आतुराः सन्तः अथानन्तरं परस्परं गृहीता हस्तायैस्तथाविधाः भूत्वा वने भृशं परिबभ्र । मूर्द्धविधृतेन्धनभारकाः सन्त एव भ्रमणमाचरितवन्तस्तत् स्मरसि किमिति भावः ॥३७॥ एतदिति । एतदस्माकं कृच्छ्रं विदित रवौ सूर्ये उदिते सति गुरुः तत्रापी आचार्यः सान्दीपनिः अन्वेषमाणः सन् शिष्यान् नोऽस्मान् आतुरान् अपश्यत् दृष्ट्वा चाब्रवीदिति शेषः ॥३८॥ तदेवाह त्रिभिः । अहो इति । हे पुत्रकाः ! प्राणिनां देहिनाम् आत्मा देहः श्रेष्ठोऽतिप्रियतमः वै । तथापि अहो तं देहम् अनादृत्य मत्परा मत्सेवारताः यूयम् अस्मदर्थे अस्माकं प्रयोजनायेत्यर्थः । अतिदुःखिताः जाता इति शेषः ॥३९॥

कृष्णप्रिया

भैयाजी - उसदिन हमलोग एक घोर जंगलमें गये हुए थे ।वर्षा काल भी न था । कऋतुमें यकायक भयंकर आंधी और पानी आ गया था । आकाशमें बादल एवं बीजली होने लगी ॥३६॥ इस आंधी तूफानमें सूर्यास्त हो गया । चारों और अंधेरा ही अंधेरा छा गया । भूमि पर सर्वत्र पानी पानी हो गया कि कहां जल है और कहां पर किनारा है और कहां पर उन्नत भूमि है इसका पता ही न चलता था ॥३७॥ प्रिय सखा वह वर्षा नथी लेकिन एक छोटा मोटा प्रलय ही था । धारा संपात वर्षा एवं आंधी के झटकोंमें हम सखा लोगो को अत्यन्त कष्ट हुआ चारों और तिमिर छा गया और दिशा का ज्ञान भी न रहा । हम सखा गण आतुर हो गये और परस्पर हाथ पकडकर घोर जंगलमें इधर उधर भटकते रहे ॥३८॥ जब गुरुदेव श्रीसान्दीपनी महर्षिजी को यह पता चला कि भयंकर आंधी छा गयी है और हम सब इन्धन लेनेके लि गये है सूर्यो होने पर भी हम गुरुगृह नहीं आये। तब श्रीगुरुदेव सूर्योदय होने पर अपने शिष्य हमलोगों को खोजते हुए जंगलमें पहुंचे और अपनी नजरों से देखा कि हम सब अत्यन्त दुःखी हो रहे है ॥३९॥

[1]अहो हे पुत्रका यूयमस्मदर्थेऽतिदुःखिताः । आत्मा वै प्राणिनां [2]प्रेष्ठस्तमनादृत्य मत्पराः ॥४०॥
[3]एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिष्कृतम्[4] । यद्वै विशुद्धभावेन सर्वार्थात्मसमर्पणम्[5] ॥४१॥
तुष्टोऽहं[6] हे द्विजश्रेष्ठाः सत्याः सन्तु मनोरथाः । छन्दांस्ययातयामानि भवन्त्विह परत्र च ॥४२॥
इत्थंविधान्यनेकानि वसतां गुरुवेश्मसु [7]। गुरोरनुग्रहेणैव पुमान् पूर्णः [8]प्रशान्तये ॥४३॥

कर्दमक्षमा

अहो ! हे पुत्रकाः ! यूयम्, अस्मदर्थे, अतिदुःखिताः, प्राणिनाम्, आत्मा, वै, प्रेष्ठः, तम्, अनादृत्य, मत्पराः ॥४०॥ सच्छिष्यैः, इयत्, एव, गुरुनिष्कृतम्, कर्तव्यम्, विशुद्धभावेन, सर्वार्थात्मसमर्पणम्, यद्, वै, कर्तव्यम् ॥४१॥ हे द्विजश्रेष्ठाः ! मनोरथाः, सत्याः, सन्तु, अहम्, तुष्टः, वः, छन्दांसि, इह, च, परत्र, अयातयामानि, भवन्तु ॥४२॥ गुरुवेश्मसु, वसताम्, इत्थं अनेकविधानि, ब्रह्मन् ! (स्मर्यन्ते ?) पुमान्, गुरोः, अनुग्रहेण, पूर्णः, प्रशान्तये, (भवति) ॥४३॥

---

१. आचार्यः-च. पु. टी. । २. श्रेष्ठ-गो. प्रे. टी. । ३. इयदेव हि-वीर. विज. । ४. निष्क्रियं-वीर. । ५. त्मार्पणं गुरौ-श्रीधर. वंशी. विज. विश्व. शुक. । ६. तुष्टोऽहं भो-श्रीधर. वंशी. ; तुष्येऽहं वो-वीर. जीव. ; संतेष्येऽहं-विज. । ७. नि-गो. प्रे. टी. । ८. प्रजायते-च. पु.

उवाच कृपया
यस्मात्स आत्मा देहस्त
गतसारं गौण्यावृत्त्या यात
ण्यनेकानि वृत्तानि किं त्व

यया श्लोकत्रय्य
॥४१॥ गौण्या वृत्त्या-शोणं
भवत्विति भावः ॥४२॥ फ

"न यत्प्रसादायुत
कर्तुं समेताः प्रभ

अहो इति य आ
निर्दिशन्नप्यस्मदिति बहुत्वं नि
इयदिति ॥४१॥ अतो वो युष्म
च परिभुक्तं च यातयाममिदं
प्रकृष्टसुखस्वरूपाय मोक्षाय श्र

अहो खेदे । हे पुत्रकाः
बभूविथ ॥४०॥ अतो गुरुसेवा य
अतो वो युष्मान् प्रति तुष्टोऽहम्
मनोरथा इहास्मीन् लोके परत्र च
इहास्मिन् जन्मनि परस्मिश्च भवन्तु
प्रशान्तये भवतीत्यर्थः । अस्माभि

आत्मा वै इति शरीरम् ।

तदेवाह-अहो इति त्रिभि
मत्प्रयोजनायातीव दुःखिता इत्यर्थ
यद्विशुद्धभावेन निष्कपटभावेन स
इत्युक्तेरिति भावः ॥४१॥ तुष्ट इति
युष्माकं मनोरथाः अपेक्षाः सत्याः
सफलानि ऐहिकामुष्मिकापेक्षितफल
एवंविधान्यनेकानि वृत्तानि किं त्वय
पूर्णः पूर्णमनोरथः स्यादिति लक्षयत्

कूलमुन्नतस्थानम् । न
जानन्तः अतः परस्परं

नतं कूलमुन्नतं वा स्थलं
बूनां सम्प्लवो व्यामिश्रणं
सुतरां पीड्यमानाः सन्तः
भूत्वा वने भृशं परिबभ्रिम
तदस्माकं कृच्छ्रं विदित्वा
अपश्यत् दृष्ट्वा चाब्रवीदिति
वै । तथापि अहो तं देहम्
शेषः ॥३९॥

था । कन्नृतुमें यकायक
॥ इस आंधी तूफानोमें
हो गया कि कहां जल है
७॥ प्रिय सखा वह वर्षा
म सखा लोगो को अत्यंत
तुर हो गये और परस्परका
हर्षिजी को यह पता चला
हम गुरुगृह नहीं आये है
और अपनी नजरों से देखा

नादृत्य मत्पराः ॥४०॥
र्थात्मसमर्पणम्' ॥४१॥
न्त्विह परत्र च ॥४२॥
प्रशान्तये ॥४३॥

तम्, अनादृत्य, मत्पराः ॥४०॥
र्तव्यम् ॥४१॥ हे द्विजश्रेष्ठाः! वः,
२॥ गुरुवेश्मसु, वसताम्, इत्थम्,
॥

। ५. त्मार्पणं गुरौ-श्रीधर. वंशी. वीर
गो. प्रे. टी. । ८. प्रजायते-च. पु. टी.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

उवाच कृपया श्लोकत्रयीम् यया वयं कृतार्था इत्याह-अहो इति आत्मा देहः ॥४०॥ गुरोर्निष्कृतं प्रत्युपकारः सर्वे अर्थाः यस्मात्स आत्मा देहस्तस्यार्पणं विनियोगः ॥४१॥ अयातयामानि यातो यामो यस्य पक्वस्यान्नस्य तद्गतसारं भवति तद्वदन्यदपि गतसारं गौण्यावृत्त्या यातयाममित्युच्यते अगतसाराणि छन्दांसि मत्तोऽधीयमानानि भवन्त्वित्यर्थः ॥४२॥ इत्थम्विधान्येवम्प्रकाराण्यनेकानि वृत्तानि किं त्वया स्मर्यन्त इति शेषः । फलितमुपसंहरति-गुरोरिति ॥४३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यया श्लोकत्रय्या । तमात्मानम् । अनादृत्यागणय्य ॥४०॥ इयदेव (एतदेव-इत्यत्र इयदेवपाठेऽयमर्थः ।) एतावन्मात्रमेव ॥४१॥ गौण्या वृत्त्या-शोणो धावतीतिवत् तत्तद्गुणसम्बन्धाद्गौणी वृत्तिर्भवतीति । इत्यर्थ इति-मत्तोऽधीतं सकलमिह परत्र च सफलं भवत्विति भावः ॥४२॥ फलितं गुरुसेवनलब्धं वस्तु । प्रशान्तये मोक्षाय । पूर्ण ऐहिकामुष्मिकसुखभोगेन विरक्तः सन् । एवकारेण-

"न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम् ।
कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥" इति सूचितम् ॥४३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो इति य आत्मा प्राणिनां प्रेष्ठस्तमप्यनादृत्य मत्पराः सन्तो यूयमस्मदर्थे दुःखिता जाता इत्यर्थः । मदित्येकत्वं निर्दिशन्नप्यस्मदिति बहुत्वं निर्दिशन् मत्सम्बन्धिष्वपि तत्परा जाता इति व्यनक्ति स्म ॥४०॥ अतो गुरुसेवा युष्माकं सुसम्पन्नेत्याह-इयदिति ॥४१॥ अतो वो युष्मभ्यं तुष्टोऽहं किञ्च छन्दांसीति अयातयामानि अजीर्णानि अप्लुतानि अविस्मर्यमाणानीत्यर्थः । 'जीर्णं च परिभुक्तं च यातयाममिदं द्वयम्' इत्यमरनानार्थात् ॥४२॥ इत्थमित्यर्धकम् । गुरोरित्यपि सर्वकामपूर्णो भवति प्रशान्तये प्रकृष्टसुखस्वरूपाय मोक्षाय श्रीभगवदनुभवाय च भवतीत्यर्थः ॥४३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो खेदे । हे पुत्रकाः ! इत्यतिस्नेहात् अस्माकमर्थे प्रयोजनार्थम् अस्मदिति भार्याद्यपेक्षया किञ्चात्मेति । वै प्रसिद्धौ । मत्परा भूविथ ॥४०॥ अतो गुरुसेवा युष्माकमधुना सुसम्पन्नेत्याह-इयदिति । हि निश्चये । वै एव । यदेव एवाद्यव्ययत्रयेण यदन्यन्निरस्तम् । वो युष्मान् प्रति तुष्टोऽहम् । हे द्विजश्रेष्ठाः ! इत्यभीष्टसिद्धेः । यद्वा, तच्च युष्माकं साद्गुण्येनैवेति भावः । यद्वा, द्विजेषु श्रेष्ठा ये नोरथा इहास्मीन् लोके परत्र च सत्याः सफलाः सन्तु । कथम् ? तदाह-छन्दांसीति । मन्त्रा वेदा वा सर्वे अन्यत्तैर्व्याख्यातम् । यद्वा, स्मिन् जन्मनि परस्मिंश्च भवन्तु स्वयं स्फुरन्त्वित्यर्थः ॥४१-४२॥ प्रशान्तये प्रकृष्टसुखाय तेन पूर्णो भवति किंवा अनुग्रहेण पूर्ण एव न्तये भवतीत्यर्थः । अस्माभिः कृत्वा किमनिर्वृत्तं किन्तु अस्माकं सर्वमेव सुसम्पन्नमित्यर्थः ॥४३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

आत्मा वै इति शरीरम् ॥४०-४१॥ अयातयामानि वीर्यवन्ति प्रदोषरहितानि ॥४२-४४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह-अहो इति त्रिभिः । हे पुत्रकाः ! देहिनामात्मा देहः प्रेष्ठः प्रियतमस्तथापि तमात्मानमनादृत्य मत्पराः मत्सेवापराः जनायातीव दुःखिता इत्यर्थः ॥४०॥ इयदेवेति । सच्छिष्यैः गुरोः कर्तव्यं निष्क्रयं प्रत्युपकारः इयदेवैतावदेव कियत् ? भावेन निष्कपटभावेन सर्वथा सर्वप्रकारेण आत्मार्पणं देहसमर्पणमित्येवत् 'शरीरमर्थं प्राणांश्च स गुरुभ्यो निवेदयेत्' ति भावः ॥४१॥ तुष्ट इति । हे द्विजश्रेष्ठाः ! द्विजशब्दस्य त्रैवर्णिकपरत्वादेवं सम्बोधनं वो युष्मभ्यमहं गुरुः सन्तुष्टः अतो नोरथाः अपेक्षाः सत्याः सफलाः सन्तु किञ्च छन्दांसि मत्तोऽधीता वेदाः इह परत्र च लोके अयातयामान्यगतसाराणि ऐहिकामुष्मिकापेक्षितफलजननसमर्थानि भवन्तु इत्यर्थः ॥४२॥ इत्थमिति । गुरुवेश्मनि स्वाचार्यगृहेषु वसतामस्माकम् न्यनेकानि वृत्तानि किं त्वया न स्मर्यन्त इति शेषः । फलितमाह-गुरोरिति । अनुग्रहेणैवेत्येवकारेण उपायान्तरव्यावृत्तिः नोरथः स्यादिति लक्षयत् इत्यर्थः ॥४३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

आत्मा देहः ॥४०॥ गुरुनिष्कृतं गुरुप्रत्युपकारः सर्वोऽर्थो यस्मात् स तथा सर्वार्थ आत्मा शरीरं तस्यार्पणं यत्तत् ॥४१-४२॥ उक्तमतिदिशति-इत्थमिति । इत्थंविधान्यनेकानि व्यसनान्यासन्निति शेषः । तानि व्यसनानि गुरोरनुग्रहेण निस्तीर्य पुमान् प्रशान्तये प्रकृष्टसुखवृत्तये पूर्णः कृतार्थः स्यात् ॥४३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥३२-४५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२३-४५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१८-४५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उवाच चेत्याह त्रिभिः-अहो इति ॥४०॥ गुरोर्निष्कृतम् ऋणशोधनं सर्वोऽर्थो ममतास्पदम् आत्मा अहंतास्पदं च तयोरर्पणम् ॥४१॥ अयातयामानि अगतसाराणि 'जीर्णं च परिभुक्तं च यातयाममिदं द्वयम्' इत्यमरः ॥४२॥ अनेकानीति वृत्तान्यभूवन्निति शेषः ॥४३॥

गूढार्थदीपिनी

अनादृत्य उपेक्ष्य अगणय्य मत्पराः मत्सेवाऽनुरक्ता जाताः । हे पुत्रकाः अनुकम्पायां कन् ॥४०॥ निष्कृतं प्रत्युपकारः ऋणशोधनमित्यर्थः । सर्वे अर्था धर्मादयः यस्मात् स चासौ आत्मा देहः तस्य अर्पणम् । यद्वा । सर्वार्थस्य वस्तुनः आत्मनश्च अर्पणम् । भावेन कापट्यराहित्येन ॥४१॥ सत्याः सफलाः सन्तु । छन्दांसि पठितानि (यातः गतः यामः प्रहरो यस्यान्नस्य तस्य गतसारं भवति तद्वदन्यदपि तद्विपरीतमयातयामम् । अयातयामः साफल्ये इति कोशः । जीर्णं च परिभुक्तं च यातयाममिदं द्वयम् । इत्यमरः ।) अयातयामानि अविस्मृतानि भवन्तु ॥४२॥ अनेकानि वृत्तानि सन्ति तानि त्वया किं स्मर्यन्ते इति शेषः । पूर्णः कृतकृत्यः प्रशान्तये मोक्षाय भवति मोक्षाधिकारी भवतीत्यर्थः ॥४३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उवाच चेत्याह-अहो इत्यादिना ॥४०॥ सच्छिष्यैः कर्तव्यं गुरोर्निष्क्रयं प्रत्युपकारः एतदेव किं यद्विशुद्धभावेन सर्वोऽर्थश्च आत्मा च तयोर्गुरौ अर्पणमिति ॥४१॥ मनोरथाः वाञ्छितार्थाः युष्माकं सत्याः सन्तु किञ्च छन्दांसि मत्तोऽधीतानि वेदाः इह लोके परत्र परलोके च अयातयामानि अगतसाराणि यथेष्टफलदानि भवन्तु ॥४२॥ इत्थंविधान्यनेकानि ईदृशानि बहूनि वृत्तानि अभूवन्निति शेषः । फलितमाह-गुरोरिति ॥४३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो दया परमा तस्योत्पन्नेत्याह-अहो इति ।एतदर्थमेव भगवतैवैवं सम्पादितं विद्या हि वेधन्यायेन गुरौ स्थित अतिमन्थनात् प्रादुर्भूता शिष्ये समायाति तत्र मथनस्थानीया परमा दया अहो इत्याश्चर्यं हे पुत्रका इति दयया जातस्नेह सम्बोधनं पुत्रकाः पुत्रप्रायाः अनेन भवतामेव गृहमिति स्वार्थमेवैतत् क्रियते इत्याश्वासनमप्युक्तं तेषां दुःखं निरा गच्छतीत्यनुवदति-अस्मदर्थेऽतिदुःखिता इति । ननु व्रतं क्रियते कथं दुःखमिति चेत्तत्राह-आत्मा वै प्राणिनां प्रेष्ठ इति "द्रव्यसंस्कारविरोधे द्रव्यं बलीयान्" इति न्यायेन शरीरव्रतयोर्विरोधे शरीरमेवादरणीयं तत्रापि स्नेहपात्रं विधिस्नेहयोः तयो बलिष्ठ इति एवं वैदिकलौकिकन्यायोल्लङ्घनमपि कृत्वा यतो मत्परा जाताः तदाह-आत्मा देहः प्राणिनामतिप्रेष्ठः तमनादृ मत्परा जाता इति ॥४०॥ तर्हि विरुद्धाचरणात् कथं भवान् प्रसन्न इत्याशङ्क्याऽऽह-इयदेव हीति । सच्छिष्यैरलौकिकैः इय तावदेव गुरुनिष्कृतं गुरोः प्रत्युपकारः तदाह-यद्विशुद्धभावेन सर्वस्यार्थस्य आत्मनश्च समर्पणं वै निश्चयेन ॥४१॥ न तु केनचिद्भ तद्भवद्भिः कृतमित्यहं तुष्टः यावच्छक्यं निष्कपटतया कृतमिति सम्बोधनेनैव तोषफलमाह-हे द्विजश्रेष्ठा इति । श्रैष्ठ्यं च व्रतस्य सर्वोत्कर्षः सम्पद्यतामित्यर्थः । यदर्थं च व्रतं कृतं तद्दानमाह, सत्याः सन्तु मनोरथा इति । पठितानां विद्या अयातयामत्वमाह-छन्दांस्ययातयामानीति ।

आम्नाया तु विनिर्मुक्ता अनध्याये तथा स्मृताः । अयाज्ये योजिताश्चैव निषिद्धा ये च पाठिताः ॥

र्णं यत्तत् ।।४१-
ा निस्तीर्य पुमान्

त्मा अहंतास्पदं च
।।४२।। अनेकानीति

निष्कृतं प्रत्युपकारः
य वस्तुनः आत्मनश्च
हरो यस्यान्नस्य तदन्नं
यातयाममिदं द्वयम्॥
न्ते इति शेषः । पूर्णः

व किं यद्विशुद्धभावेन
श्च छन्दांसि मत्तोऽधीता
विधान्यनेकानि ईदृशानि

वेधन्यायेन गुरौ स्थिता
इति दयया जातस्नेहात
युक्तं तेषां दुःखं निरुक्तं
मा वै प्राणिनां प्रेष्ठ इति ।
स्नेहपात्रं विधिस्नेहयोः स्नेहो
प्राणिनामतिप्रेष्ठः तमनादृत्य
सच्छिष्यैरलौकिकैः इयदेव
न ।।४१।। न तु केनचिद्व्याजेन
द्विजश्रेष्ठा इति । श्रैष्ठ्यं भवतु
इति । पठितानां विद्यानां च

पाठिताः ।।

फलार्थं योजिता दृष्टा यातयामा भवन्ति हि । अन्यथा ज्ञातरूपाश्च अन्यथार्थप्रबोधिताः ।।
अव्रतैः शूद्रसङ्काशे पातित्याद्याकुले स्थले । आधीताः सर्वथैवैते यातयामा भवन्त्विति ।।

तेष्वपि समयेषु मत्प्रसादाद्यातयामा मा भवन्त्विति वरः इह परत्रेति परलोकार्थमिह लोकार्थं च स्वार्थं स्थापिताः परलोकार्थं भवन्ति विनियुक्तास्त्वैहिकफलाः भवतां तूभयत्रापि फलसाधका भवन्त्वित्यर्थः । चकारात् स्वकर्मस्वपि ।।४२।। इदमेकं फलसाधनरूपं चरित्रमुक्त्वा नैतावदेवेत्याह-इत्थं विधान्यनेकानीति । गुरुवेश्मसु वसतां भवन्ति गुरुवासस्य नित्यत्वमाह-गुरोरनुग्रहेणैवेति । न केवलं वासेन पुमान् पूर्णो भवति सर्वार्थैः प्रशान्तः एव भवति स्वाभाविकाः कामादयः तदुत्पत्तैर्न शान्ता भवन्ति किन्तु गुर्वनुग्रहेणैव भगवता कृतस्मरणेन वा प्रशान्त एव पूर्णः समर्थः एवमुपाख्यानैः सर्वे पुरुषार्थास्त्वया साधिता न वेति प्रश्नः ।।४३।।

श्रीसुबोधिनीसारः

हे पुत्रकाः अस्मन्निमित्तं यूयमतिदुःखिताः स्थ अहो आश्चर्यमेतत् प्राणिनाम् आत्मा प्रेष्ठोऽतिप्रियः तमात्मानं तिरस्कृत्य मन्निष्ठा जाता इति ।।४०।। गुरोर्निष्कृतं प्रत्युपकारः सद्भिः शिष्यैरेतदेव हि कार्यं विशुद्धभावनया गुरौ सर्वस्वदेहनिवेदनमिति यत् ।।४१।। भो द्विजश्रेष्ठा अहं तुष्टः प्रसन्नोऽस्मि युष्माकं मनोरथाः सत्याः सन्तु अयातयामानि ससाराणि छन्दांसि वेदा इह परत्र च लोके भवन्तु इत्याह । अहोस्थाने आहेति पाठः साधुः ।।४२।। एवंप्रकाराणि अनेकानि गुरुगृहेषु निवसतामस्माकं कर्माणि जातानि गुरोरनुग्रहेण कृपयैव पुमान् पूर्णः कृतकृत्यः प्रशान्तये मुक्त्यर्थं भवति चेष्टते ।।४३।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दृष्ट्वा चाह-अहो इति । अहो इति अस्मद्भक्तेरतिशयत्वेनाश्चर्यं सूचयति । स्वस्नेहं सूचयन् सम्बोधयति-हे पुत्रकाः ! यूयमस्मत्प्रयोजनायातिदुःखिता जाताः । आश्चर्यहेतुभक्त्यतिशयमेव दर्शयति-वै इति निश्चये । प्राणिनामात्मा स्वदेहः सर्वतः प्रेष्ठस्तमनादृत्य यूयं मत्पराः मत्सेवारता इति ।।४०।। सच्छिष्यैर्गुरोर्निष्कृतम् उपकारः एतदेव हि कर्तव्यम् । किं तदाह-यद्विशुद्धेन भावेन भक्त्या उचितपदार्थस्यात्मनो देहस्य च गुरावर्पणं तदर्थे विनियोग इति ।।४१।। हे द्विजश्रेष्ठाः ! अहं युष्मभ्यं तुष्टः । अतः युष्माकं मनोरथाः अपेक्षाः सत्याः सफलाः सन्तु । युष्माभिरधीतानि छन्दांसि वेदा इह परत्र चायातयामानि अगतसाराणि इहामुष्मिकापेक्षितफलजननसमर्थानि भवन्त्वित्यर्थः ।।४२।। गुरुगृहेषु वसतामेवंविधानि बहूनि वृत्तानि जातानि तानि किं त्वया न स्मर्यन्त इति शेषः । किं बहुना गुरोरनुग्रहेणैव पुमानिह पूर्णः पूर्णकामः सन् प्रशान्तये संसारदुःखनिवृत्तये मुक्तये समर्थो भवतीति शेषः ।।४३।।

अन्वितार्थप्रकाशिका

दृष्ट्वा चाह-अहो इति । हे पुत्रकाः ! यूयमस्मत्प्रयोजनायातिदुःखिताः । वै इति निश्चये प्राणिना मात्मा स्वदेहः सर्वतः प्रेष्ठस्तमनादृत्य यूयं मत्पराः मत्सेवारताः ।।४०।। एतदिति । सच्छिष्यैः गुरोर्निष्कृतम् उपकारः एतदेव कर्तव्यम् किं तदाह-यद्विशुद्धेन भावेन भक्त्या यथोचितसर्वपदार्थस्यात्मनो देहस्य च गुरावर्पणं तदर्थे विनियोगः ।।४१।। तुष्ट इति । हे द्विजश्रेष्ठाः ! अहं युष्मभ्यं तुष्टः अतः युष्माकं मनोरथाः अपेक्षाः सत्याः सफलाः सन्तु । युष्माभिरधीतानि छन्दांसि वेदा इह परत्र चायातयामानि गतो यामो यस्य पक्वान्नस्य तद्गतसारं भवति । गौण्या वृत्त्या अन्यदपि गतसारं यातयाममुच्यते । "जीर्णं च परिभुक्तं च यातयाममिदं द्वयम् ।"इत्यमरः । न यातयामानि न जीर्णानि अविस्मृतानि चेति अगतसाराणि इहामुष्मिकापेक्षितफलजननसमर्थानि भवन्तु ।।४२।। इत्थमिति । गुरुगृहेषु वसतामेवंविधानि बहूनि वृत्तानि तानि किं त्वया न स्मर्यन्त इति शेषः । किं बहुना गुरोरनुग्रहेणैव पुमानिह पूर्णः पूर्णकामः सन् प्रशान्तये संसारदुःखनिवृत्तये मुक्तये समर्थो भवतीति शेषः ।।४३।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्मद्दुःखं दृष्ट्वा गुरुराह त्रिभिः । आत्मा देहःअहमेव परः प्रधानो येषां ते मत्पराः ।।४०।। निष्कृतं प्रत्युपकारः सर्वेऽर्थाः पुरुषार्थाः यस्मात्सः सर्वार्थः सश्चासौ आत्मा देहश्च सर्वार्थात्मा तस्यार्पणम् ।।४१।। भवतां मनोरथाः सत्याः सन्तु छन्दांसि

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अयातयामानि सद्यः पठितानि भवन्तु बहुकालेन विस्मृतानि न भवन्तित्यर्थः ॥४२॥ इत्थंविधानि अनेकानि वृत्तान्तानि त्वय स्मर्यन्ते इति शेषः । अनुग्रहेणैव पूर्णो नरः प्रशान्तये सुखाय भवति ॥४३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इयदेवेति । सच्छिष्यैः कर्तव्यं गुरुनिष्क्रयं प्रत्युपकारः इयत् एव एतावदेव हि । कियत्तत्राह । यत् विशुद्धभावेन निष्कपटभावेन सर्वथा सर्वप्रकारेण गुरौ आत्मार्पणं देहसमर्पणम् वै एतावत् । 'शरीरमर्थं प्राणं च यद्गुरुभ्यो निवेदयेत्' इत्यभियुक्तोक्तेरिति भावः ॥४०॥ तुष्टोऽहमिति । हे द्विजश्रेष्ठाः ! द्विजशब्दस्य त्रैवर्णिकपरत्वादेवं सम्बोधनम् । वो युष्मभ्यम् अहं भवतां गुरुः तुष्टः । अतः मनोरथा भवदीयाः सर्वे मनोरथा इत्यर्थः । सत्याः सफलाः सन्तु । किञ्च छन्दांसि मत्तोऽधीता वेदाः इह परत्र च अस्मिन् लोके परत्र लोके चापीत्यर्थः । अयातयामानि अगतसाराणि भवन्तु । ऐहिकामुष्मिकापेक्षितफलजननसमर्थानि सन्त्वित्यर्थः ॥४१॥ इत्थमिति गुरुवेश्मसु स्वाचार्यगृहे इत्यर्थः । वसतामस्माकं इत्थंविधान्येवंप्रकाराणि अनेकानि वृत्तानि त्वया न स्मर्यन्ते किमिति शेषः । फलितमाह । पुमान् गुरोः अनुग्रहेण एव एवेत्येवकारेणोपायान्तरव्यावृत्तिः । पूर्णः सम्पूर्णमनोरथः सन् प्रशान्तये भवति । शान्तिमधिगच्छतीति भावः ॥४२॥ इत्थमुक्तो विप्रः प्राह । किमिति । हे देवदेव ! हे जगद्गुरो ! येषामस्माकं सत्यकामेन भवता सह गुरौ गुरुकुले वासः अभूत् । तैः अस्माभिः अनिर्वृत्तमसम्पन्नं किम् । अस्माकं दुर्लभं न किमपीत्यर्थः । सत्यकामस्य तव गुरुकुलवासः केवलमस्मन्मनोरथपूरणार्थ एवेति भावः ॥४३॥

कृष्णप्रिया

दयानिधि श्रीगुरुदेव कहने लगे कि अत्यंत आश्चर्य है प्यारे पुत्र ! आप सबने हमारे लिये भारी कष्ट उटाया । प्राणीमात्र को अपना शरीर सबसे अधिक प्रिय होता है लेकिन आप सब उस शरीरकी परवा न करके हमारी सेवामें ही अच्छी तरह से लगे रहे ॥४०॥ अपने गुरुचरणों के ऋणसे मुक्त होने के लिये उत्तम शिष्यों का इतना ही कर्तव्य है कि शिष्यगण विशुद्धभाव से अपना सबकुछ और अपना शरीर भी अपने श्रीगुरुचरणोंकी सेवामें समर्पित करदे ॥४१॥ हे द्विजश्रेष्ठकुमार मैं आपलोगो की सेवासे अत्यन्त प्रसन्न हुं । तुम्हारे सकल मनोरथ आमैर आपलोगोकी सकल अभिलाषाऐं पूर्ण हो । पुनः आप लोगोंने हमसे जो वेदाभ्यास किया है वे वेद निरंतर आपके आयतयाम कंठस्थ रहे और इस लोक परलोक में कहीं भी कभी भी निष्फल न हो सदा सफल रहे ॥४२॥ हे ब्रह्मर्षि प्रिय सखा ! जिस अवसर काल हमलोग गुरुकुलमें निवास कर रहे थे तब हमारे जीवछनमें एसी घटनाएं घटित हुई थी वे सारी घटनाएं श्रीगुरुचरणोंकी कृपासे पार उतर गइ । भैया इसमें स्वल्प भी संदेह नहीं कि श्रीगुरुचरणोंकी कृपासे ही मनुष्य शान्ति का अधिकारी होता है और पूर्णताको प्राप्त करता है ॥४३॥

ब्राह्मण उवाच

[1]किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो । भवता सत्यकामेन येषां वासोऽ[2]भवद्गुरौ ॥४४॥
यस्यच्छन्दोमयं ब्रह्म देह आवपनं विभो । [3]श्रेयसां तस्य गुरुषु वासोऽत्यन्तविडम्बनम् ॥४५॥

॥ इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे[5] [6]श्रीदामचरितेऽशीतितमोऽध्यायः ॥८०॥

कर्दमक्षमा

ब्राह्मणः उवाच । हे देवदेव ! हे जगद्गुरो ! अस्माभिः, किम्, अनिर्वृत्तम्, येषाम्, सत्यकामेन, भवता, सह, गुरौ, वासः अभवत् ॥४४॥ हे विभो ! छन्दोमयम्, ब्रह्म, यस्य, देहः, श्रेयसाम्, आवपनम्, तस्य, गुरुषु, वासः, अत्यन्तविडम्बनम् ॥४५॥

॥ श्रीमद्भागवते दशमस्कन्धोत्तरार्धेऽशीतितमेऽध्यायेऽन्वयनिरूपणम् ॥८०॥

---

[1] किं न्वस्माभि-वीर. । [2] गुरोवभूत्-श्रीधर. वंशी. वीर. विज. शुक. । [3] योऽयं स तस्य-विज. । [4] पारमहंस्यां संहितायां गो. प्रे. पु. । [5] न्धे सप्तसप्ततितमो-गो. प्रे. टी. । [6] अष्टनवतितमोऽध्यायः-विज. ॥९८॥

अस्माभि
यस्येति । छन्दोमयं व
इति श्रीमद्भाग

किमसम्पन्नं
॥४४॥ एतत्कथनं तु
बीजरूपेण सन्तन्यते

॥ इति

सङ्क्षेपेण सर्वो
सुसम्पन्नमित्यर्थः । तत्र है
यस्येति । छन्दोमयं वेदप्रधा
अनुकरणमात्रं लीलाकौतुक
॥ इति श्रीमद्भागवते

तत्र हेतुमाह-देवदे
सद्यः सिध्यत्सर्वार्थेन किंवा स
यस्येति । अनेन तथा विभो !
अत्यन्तं विडम्बनम् । डलयोरैक
यद्वा, श्रीभगवद्गुरुत्वेन भक्त्य
विषये श्रीपुरुषावतारे श्रीब्रह्मा
॥ इति श्रीमद्भागवते म

आवपनं पुरुषार्थानाम
॥ इति श्रीमद्भागवत

इत्थमुक्तः प्राह कुचेल
किमपीत्यर्थः तत्र हेतुं वदन्नात्मनो
सत्यकामस्य तव गुरुकुलवासः वे
छन्दोमयं वेदरूपं ब्रह्म यस्य देहः

श्रीधरस्वामिविरचिता भावार्थदीपिका

अस्माभिः किमनिर्वृत्तमसम्पन्नं येषामस्माकं भवता सह वासोऽभूत् ॥४४॥ भवतस्तु सर्वमेतद्विडम्बनमात्रमित्याह-यस्येति। छन्दोमयं वेदाख्यं ब्रह्म तथा श्रेयसामावपनं तदुद्भवस्थानं देहो मूर्तिर्यस्य तस्य तव ॥४५॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायामशीतितमोऽध्यायः ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

किमसम्पन्नं किं तु सर्वमेव सम्पन्नमेव। सत्यकामेन सत्यसङ्कल्पेन। गुराविति सामीपिकाधारे सप्तमी, गुरुगृह इत्यर्थः ॥४४॥ एतत्कथनं तु सामान्यत एव न तु त्वामुद्दिश्येत्याह-भवत इति। श्रेयसां तपोयज्ञदानादिफलानाम्। आसमन्तादुप्यते बीजरूपेण सन्तन्यतेऽन्नादि यत्र तदावपनम्। यस्य तवेति अनुकरणं लोकसङ्ग्रहार्थमेवेति भावः ॥४५॥

॥इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धेऽशीतितमोऽध्यायः ॥८०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सङ्क्षेपेण सर्वोत्तरमाह-किमिति द्वाभ्याम्। अस्माभिर्हेतुभिः किमनिर्वृत्तं किन्त्वस्माकं भवतां पृष्टमपृष्टं सर्वमेव सुसम्पन्नमित्यर्थः। तत्र हेतुमाह-देवदेवेत्यादिसम्बोधनाभ्याम्। यथासत्यकामेनेति च ॥४४॥ तर्हि ममाध्ययनादिना किं तत्राह-यस्येति। छन्दोमयं वेदप्रधानं तदेकगम्यम् अत एव श्रेयसां सर्वपुरुषार्थानाम् उद्भवस्थानं च यद्वस्तु तदेव यस्य देहः अत्यन्तविडम्बनम् अनुकरणमात्रं लीलाकौतुकमेवेति यावत् ॥४५॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् अशीतितमोऽध्यायः ॥८०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्र हेतुमाह-देवदेवेत्यादि। हे देवानां श्रीब्रह्मादीनामपि देह! पूज्येति। हे जगतो गुरो! इति च तथा सत्यकामेनेच्छामात्रेण सद्यः सिध्यत्सर्वार्थेन किंवा सद्यः सफलभक्तमनोरथकेनेति गुरौ वासायोग्यतोक्ता तथाप्यभूत् ॥४४॥ तदेव प्रपञ्चयंस्तद्वासे कारणमाह-यस्येति। अनेन तथा विभो! हे सर्वैश्वर्यपूर्णेत्यनेन च वेदार्थं तत्फलश्रेयोऽर्थं च गुरुगृहवासः परिहृतः। ननु तर्हि किमर्थम्? तत्राह-अत्यन्तं विडम्बनम्। डलयोरेकत्वाद्विलम्बनं लोकशिक्षणाश्रयणमित्यर्थः। गुरुष्विति बहुत्वं श्रीरघुनाथाद्यवतारे श्रीविश्वामित्राद्यपेक्षया यद्वा, श्रीभगवद्गुरुत्वेन भक्त्या गौरवात्। अन्यत्तैर्व्याख्यातम्। यद्वा, श्रेयसामावपनमुद्भवकारणं ब्रह्मदेह एका मूर्तिः यद्वा, देहे विषये श्रीपुरुषावतारे श्रीब्रह्मावतारे च वेदस्य तन्मुखोद्भवत्वात्। अन्यत्समानम् ॥४५॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशमटिप्पण्यामशीतितमोऽध्यायः ॥८०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

आवपनं पुरुषार्थानामास्थानम् उत्पत्तिभूमिः। छन्दोमयं ब्रह्म ॥४५॥

॥इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये अशीतितमोऽध्यायः ॥८०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थमुक्तः प्राह कुचेलः-किं न्विति। हे देवदेव हे जगद्गुरो! अस्माभिरनिर्वृत्तमसम्पन्नमस्माकं दुर्लभ्यं किं न्वस्ति न किमपीत्यर्थः तत्र हेतुं वदन्नात्मनो विशिनष्टि येषामस्माकं सत्यकामेन भवता सह गुरुकुले वासो बभूव तैरस्माभिरिति सम्बन्धः सत्यकामस्य तव गुरुकुलवासः केवलमस्मन्मनोरथपूरणार्थ एवेति भावः ॥४४॥ अन्यथा न घटत इत्यभिप्रयन्नाह-यस्येति। छन्दोमयं वेदरूपं ब्रह्म यस्य देहः विग्रहः श्रेयसां पुरुषार्थानामावपनम् उत्पत्तिभूमिः तस्य तव गुरुषु गुरुगृहेषु

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

वासोऽत्यन्तविडम्बनमभिनयमात्रं विडम्बनेनास्मन्मनोरथपूरणार्थः अन्यथा सर्वविद्यार्थानतदवबोध्यपुरुषार्थचतुष्टयवर्षुकशीलशरीरस्य तव न घटत इत्यर्थः ॥४५॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् अशीतितमोऽध्यायः ॥८०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

जन्मत्रयेऽनुगुणितेन सम्वर्धितेन वैरेण शत्रुभावेन विशिष्टेनेतरेण ज्ञानेन संरब्धया समुद्रिक्तया धिया ध्यायंस्तन्मयतां द्वेषमयताम् असुरे भगवत्प्रधानतां जयो यात: तथा हि भावो भक्तिर्भवकारणं माङ्गल्यकारणं भवति ॥४६॥ भगवतेऽग्रपूजासमर्पणेन युधिष्ठिरः कृतकृत्यः किमुत ऋत्विगादिभ्योऽपि यथाविहितदक्षिणामददादिति तत्राह–ऋत्विग्भ्य इत्यादिना–एकराट् चक्रवर्ती ॥४७-४९॥

(विजयध्वजरीत्याऽष्टनवतितमोऽध्यायः ॥९८॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥३२-४५॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे अशीतितमोऽध्यायः ॥८०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२३-४५॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे अशीतितमोऽध्यायः ॥८०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१८-४५॥

॥ इति श्रीनाथचक्रवर्तिपादविरचितायां चैतन्यमञ्जूषायाम् अशीतितमोऽध्यायः ॥८०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किम् अनिर्वृत्तम् अपि तु सर्वमेव निर्वृत्तं सुसम्पन्नमित्यर्थः । सत्यकामेन सत्यसङ्कल्पेनेति भवतो गुरुकुलवासः स्वेच्छाधी समिद्वहने वातवर्षादिकृच्छ्रमपि गुरुभक्तिज्ञापकस्य तव स्वेच्छाधीनमेवान्यथा वातादीनां का खलु त्वयि शक्तिः "भीषास्माद्वा पवते" इत्यादि श्रुतेः अस्माकं तु तत्र त्वत्साहित्यं महाभाग्यफलमिति भावः ॥४४॥ छन्दोमयं ब्रह्मैव यस्य तव देहः श्रेय सर्वेषाम् आवपनं क्षेत्रम् ॥४५॥

॥ इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमेऽत्राशीतितमः सङ्गतः सङ्गतः सताम् ॥८०॥

गूढार्थदीपिनी

येषामस्माकं सत्यकामेन सत्यसङ्कल्पेन भवता सह गुरुसमीपे वासोऽभूत् तैरस्माभिः किमनिर्वृत्तं किमसम्प किमपि। अपि तु सर्वं सम्पन्नं पूर्णमेवेत्यर्थः । गुराविति । सामीपिकाधारे सप्तमी ॥४४॥ यस्य देहः श्रेयसां धर्मादिफलानामावप (टुवप् वाजसन्ताने धातुः आसमन्तादुप्यतेऽस्मिन्निति आवपनम् अधिकरणे ल्युट्।) उत्पत्तिस्थानं तस्य गुरुषु वासः अत्यन्तविडम्ब अस्मदादीनां शिक्षार्थमनुकरणमात्रमेव लोका अपि एवं कुर्युरिति । कथम्भूतो देहः छन्दोमयं वेदमयं ब्रह्मैव ॥४५॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यामशीतितमोऽध्यायः ॥८०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अस्माभिरनिर्वृत्तमसम्पन्नं किमपि तु सर्वं निर्वृत्तमेव भवता सह येषामस्माकं वासो गुरावभूत् ॥४४॥ श्रेयसां श्रेयः सा ज्ञानादीनामावपनं क्षेत्रं ज्ञापकमित्यर्थः । एवम्भूतं छन्दोमयं वेदाख्यं ब्रह्म देहः प्रकाश्यं तस्य स्वतःसिद्धज्ञानस्य गुरु अत्यन्तं विडम्बनं लोकसङ्ग्रहार्थमिति फलितार्थः ॥४५॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अशीतितमाध्यायार्थप्रकाशः ॥८०॥

तत्रोत्तरमाह
गुरौ वासो भवेदित्यर्थः
पुरुषार्थस्वरूपेण त्वय
तत्तन्मन्त्रदेवतानां तृप्तिः
सत्यकामः अस्मत्सङ्गेऽ
भवदिच्छयैवास्माकं सर्वे
भवतीत्याह–यस्य छन्दो
मम देहः जीवविशेष एव
फलदानं व्यापकाधिष्ठान
इति एतादृशदेहवतः तव

॥ इति श्रीमद्भ

सुदामोक्तिः । अ
सत्यसङ्कल्पेन भवता त्वया
देहो मूर्तिः तस्य गुरुषु वासः

॥ इति श्र

एवमुक्तो ब्राह्मण अ
गुरुसमीपे वासोऽभूत्तैरस्माभिः

"अनन्याश्चिन्तयन्तो म

भगवत्सङ्कल्पेन सर्वमे
विज्ञाय विज्ञेयं तमसः पारमश्नुते
इत्याह–यस्येति । हे विभो ! श्रेय
वासोऽत्यन्तविडम्बनम् अस्मदादि

॥ इति श्रीवल्लभ

श्रीमद्गिरिधराख्ये

रचिता दशमे तत्र

सङ्क्षेपतः सर्वोत्तरमाह–कि
किं फलमनिर्वृत्तम् अप्राप्तम् भगवता पृ
छन्दोमयं वेदात्मकं ब्रह्म यस्य देहस्तस

॥ इति श्रीमद्

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्रोत्तरमाह-किमस्माभिरनिर्वृत्तमिति । को वा पुरुषार्थोऽस्माभिर्नोत्पादितः परं विशेषोऽस्तीत्याह-भगवता सह येषां गुरौ वासो भवेदित्यर्थः । गुरुगृहवासनानन्तरं तत्प्रसादे च जाते पश्चात्सर्वे पुरुषार्थाः साधयितुं शक्यन्ते अस्माभिस्तु गुरुकुल एव पुरुषार्थस्वरूपेण त्वया सङ्गताः अतो गुरुकुलवासोऽस्माकमेव सफलो जातः न त्वन्येषामिति अस्माभिः किं न निर्वृत्तं नापि तत्तन्मन्त्रदेवतानां तृप्तिः प्रयोजिका मृग्यते यतो भवानेव देवहेतवः नापि गुरुप्रसादो मृग्यते यतो भवानेव जगद्गुरुः किञ्च भवान् सत्यकामः अस्मत्सङ्गेऽध्ययनयुक्तानामस्माकं च लोकन्यायेन सर्वे पुरुषार्थाः सिद्धाः भवन्त्विति भवतः कामः सत्य एव भवतीति भवदिच्छयैवास्माकं सर्वे पुरुषार्थाः सिद्धा इत्यर्थः । अतस्त्वया सह गुरुगृहवासं स्मरसीति तत्र स्वामिनस्तव वासः अनुकरणार्थमेव भवतीत्याह-यस्य छन्दोमयं ब्रह्मेति । वेदात्मकब्रह्मशब्दब्रह्मेति यं विदुः तत्तव देहः यदध्ययनार्थं गुरुगृहवासोऽपेक्ष्यते ननु कथं मम देहः जीवविशेष एव कश्चित्तत्राधिष्ठितो भवेदिति तत्राह-विभोरिति । भवानेव तमधिष्ठातुं शक्तः देशकालपुरुषानन्त्येष्वधिष्ठितस्य फलदानं व्यापकाधिष्ठानव्यतिरेकेण न भवतीति तस्यैव फलसाधकत्वमाह-श्रेयसामावपनमिति । श्रेयांस्यस्मिन्ना समन्तादुप्यन्त इति एतादृशदेहवतः तव गुरुषु वासोऽत्यन्तं विडम्बनमनुचितानुकरणमित्यर्थः ॥४५॥

॥इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे एकत्रिंशाध्यायविवरणम् ॥३१॥ ॥८०॥

श्रीसुबोधिनीसारः

सुदामोक्तिः । अस्माभिरनिर्वृत्तमसिद्धं किं सर्वं सुसम्पन्नं हे देवदेव ! हे जगद्गुरो ! तत्र कारणमाह । सत्यकामेन सत्यसङ्कल्पेन भवता त्वया सह येषां गुरौ वासोऽभूत् ॥४४॥ श्रेयसां सर्वमङ्गलानामावपनमुत्पत्तिस्थानं छन्दोमयं ब्रह्म वेदो यस्य मूर्तिः तस्य गुरुषु वासः पठनार्थम् अत्यन्तं विडम्बनमेव न तात्त्विकम् ॥४५॥

॥इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायाम् अशीतितमोऽध्यायः ॥८०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवमुक्तो ब्राह्मण आह-किमिति । हे जगद्गुरो ! तत्र हेतुः देवा ब्रह्मादयस्तेषामपि देवेति । येषामस्माकं भवता सह गुरुसमीपे वासोऽभूत्तैरस्माभिः किं फलमनिर्वृत्तम् अप्राप्तम् ? तत्र हेतुमाह-सत्यकामेनेति सत्यसङ्कल्पेनेत्यर्थः ।

"**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥**" इति हि भगवत्सङ्कल्पः ।

भगवत्सङ्कल्पेन सर्वमेव प्राप्तम् । किं भार्यादिप्रश्नेनेत्याशयः । सख्यन्तराभिप्रायेण बहुवचनम् ॥४४॥ त्वया तु "द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते ।" इति गुरुगृहवासस्तुतिः कृता, तत्रान्यस्य प्राकृतस्य भवतु तथा फलम्, तव तु तन्न घटत इत्याह-यस्येति । हे विभो ! श्रेयसां धर्मादिफलानामावपनम् उत्पत्तिभूमिः छन्दोमयं वेदात्मकं ब्रह्म यस्य देहस्तस्य तव गुरुषु वासोऽत्यन्तविडम्बनम् अस्मदादिशिक्षार्थमत्यन्तानुकरणमात्रमित्यर्थः ॥४५॥

॥इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र सात्त्विकानां निरोधने । गतोऽशीतितमो विप्रकृष्णसंवादबोधकः ॥३॥ ॥८०॥

अन्वितार्थप्रकाशिका

सङ्क्षेपतः सर्वोत्तरमाह-किमिति । हे देवदेव हे जगद्गुरो ! येषामस्माकं सत्यकामेन भवता सह गुरुसमीपे वासोऽभूत्तैरस्माभिः किं फलमनिर्वृत्तम् अप्राप्तम् भगवता पृष्टमपृष्टं वा सर्वं सम्पन्नम् ॥४४॥ यस्येति । हे विभो ! श्रेयसां धर्मादिफलानामावपनम् उत्पत्तिभूमिः छन्दोमयं वेदात्मकं ब्रह्म यस्य देहस्तस्य तव गुरुषु वासोऽत्यन्तविडम्बनम् । अस्मदादिशिक्षार्थमत्यन्तानुकरणम् ॥४५॥

॥ इति श्रीमद्भागवते दशमेऽन्वितार्थप्रकाशिकायामशीतितमोऽध्यायः ॥८०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्माभिः किमनिर्वृत्तं किं न प्राप्तं सर्वमेव प्राप्तम् । यतो येषामस्माकं सत्यकामेन भवता सहवासोऽभूत् ॥४४॥ नन्वेवम्भूतस्य ममाऽध्ययनादिना किं प्रयोजनमिति चेत्तत्राह-यस्येति । श्रेयसां चतुःपुरुषार्थानाम् । आवपनमुत्पत्तिस्थानं छन्दोमयं वेदसंज्ञं ब्रह्म यस्य देहस्य तव गुरुषु वासो विद्यापठनार्थं यन्निवसनं तदत्यन्तविडम्बनम् अत्यन्ताश्चर्यजनकमित्यर्थः ॥४५॥

॥ ॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने श्रीकृष्णश्रीदामसमागमो नामाशीतितमोऽध्यायः ॥८०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्यथा न घटत इत्यभिप्रयन्नाह । यस्येति । छन्दोमयं वेदरूपं यस्य तव देहः हे विभो ! स च श्रेयसां सकलपुरुषार्थानाम् आवपनमुत्पत्तिभूमिश्च तस्य तव गुरुषु गुरुगृहेषु वासः अत्यन्तविडम्बनमभिनयमात्रम् । अभिनयोऽप्यस्मन्मनोरथपूरणार्थं एव । अन्यथा सर्वविद्यास्थानतदवबोध्यपुरुषार्थचतुष्टयवर्धुकशीलशरीरस्य तव न घटत इत्यर्थः ॥४४॥

श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धे अशीतितमोऽध्यायः ॥८०॥

कृष्णप्रिया

ब्रह्मर्षिजी बोले कि हे देवाधिदेवोंके आराध्य देव ! जगद्गुरु ! भगवान श्रीकृष्ण ! भला बताईए अब हमें क्या करना अवशिष्टठ रहा कि जो विश्वमें सत्य संकल्प परमाता है एसे आपके साथ हमें रहने को मिला इससे बडा सौभाग्य क्या होगा ? ॥४४॥ हे विभो ! हे समर्थ भगवन् ! छन्दोमय वेद-धर्म-अर्थ-काम-मोक्ष-चतुर्विध पुरुषार्थ के मूल स्त्रोत है, और वे है आपके श्रीअंग । वही आप वेदाध्ययन के लिये गुरुकुलमें निवास करे यह मनुष्य लीलाका केवल का नाटन नहीं तो और क्या है ॥४५॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धेऽशीततमाध्यायभाषाटीका समाप्ता ॥८०॥

श्लोकाः अनु. इ.व.
४१ ३५ १

स इत्थं द्विजमुख
ब्रह्मण्यो ब्राह्मणं

श्रीशुकः,, उवाच ।
इत्थम्,, द्विजमुख्येन, सह
ब्रह्मण्यः, भगवान्, कृष्ण

एकाशीतितमे स

संकथयन् सुखगोष्ठीः कु
॥१॥ प्रहसन् क्ष्वेलीं कुर्वन् ॥२॥

जग्ध्वा भक्षयित्वा । तदाश्रये
दद्विजनाशनार्हमिदमन्नमहं कथं दास्यामी

स इति युग्मकम् । सः पूर्ववर्णि
मुख्येन तत्प्रियसखत्वाच्छ्रेष्ठेन तेन सह स
वैशिष्ट्यं कृष्ण इति सर्वभूतमनोऽभिज्ञ इति
क्षेप्तव्यमिति प्रेम्णा जलादौ न विक्षिप्ताः स

---

१. तम्-श्रीधर. वंशी. वीर. विज. जीव. विश्व

॥ श्रीहरिः ॥

★श्रीगणेशाय नमः★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथैकाशीतितमोऽध्यायः ॥

लोकाः	अनु.	इ.व.	मि.उ.	इ.व.	उ.	श्लो. अ.	उ.अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
॥	३५	१	४	१	१	१४०८	६	४२	१४५६	४५॥	

श्रीशुक उवाच

स इत्थं द्विजमुख्येन सह सङ्कथयन् हरिः । सभूतमनोऽभिज्ञः स्मयमान उवाच [१]ह ॥१॥
ब्रह्मण्यो ब्राह्मणं कृष्णो भगवान् प्रहसन् प्रियम् । प्रेम्णा निरीक्षणेनैव प्रेक्षन् खलु सतां गतिः ॥२॥

कर्दमक्षमा

श्रीशुकः,, उवाच ।

इत्थम्,, द्विजमुख्येन, सह, संकथयन्, सर्वमनोभिज्ञः, सः, हरिः, स्मयमानः, उवाच, ह ॥१॥

ब्रह्मण्यः, भगवान्, कृष्णः, प्रेम्णा, निरीक्षणेन, एव, प्रियम्, ब्राह्मणम्, प्रहसन्, प्रेक्षन्, सताम्, गतिः, खलु, उवाच ॥२॥

श्रीधरस्वामिकृतभावार्थदीपिका

एकाशीतितमे सख्युर्जग्ध्वा पृथुकतण्डुलान् । श्रियं निर्मितवानिन्द्रदुर्लभां तु तदाश्रमे ॥

संकथयन् सुखगोष्ठीः कुर्वन् सर्वभूतानां मनसोऽभिज्ञः मदर्थं पृथुकानानीय दातुं लज्जित इति जानन्नित्यर्थः प्रहसन् क्ष्वेलीं कुर्वन् ॥२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

जग्ध्वा भक्षयित्वा । तदाश्रये तद्गृहे (१) । स हरिः । इत्यर्थ इति । राजराजाधिपे भगवति बहुसुस्वाद्वन्नाद्यशनकर्तरि ...शनार्हमिदमन्नमहं कथं दास्यामीति व्रीडितोऽयं ज्ञातवानिति भावः ॥१॥ क्ष्वेलिं 'क्ष्वेलिस्यात्सवयोहास्ये' इति निरुक्तिः ॥२॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

स इति युग्मकम् । सः पूर्ववर्णितब्रह्मण्यत्वभ्कतसौहृद्यादिगुणः यतो हरिः सर्वमनोहरत्वात्तन्नामैवासौ अत एव द्विजेषु ...तिप्रियसखत्वाच्छ्रेष्ठेन तेन सह सङ्कथयन् सङ्कथारसेन तमानन्दयन्नित्यर्थः । तत्र हेतुः, सर्वेति । तत्र हेतुर्भगवानिति । तत्र च ...कृष्ण इति सर्वभूतमनोऽभिज्ञ इति मदर्थं दूरस्तावता प्रयासेन पृथुकतण्डुलाः समानीताः दृष्ट्वापि मद्वैभवं तदर्थमानीतं कथं ...प्रेम्णा जलादौ न विक्षिप्ताः सम्प्रत्यपि यत्नेनैव रक्षिताः तथापि दातुं लज्जत इति च सङ्कथने जानन्नित्यर्थः । अत एव

---

[१] ...वंशी. वीर. विज. जीव. विश्व. शुक. । २. अय श्लोको न दृश्यते-वीर. ।

स्मयमानः प्रेम्णा तं ब्राह्मणं प्रकर्षेण कौतुकरसप्रसादसानन्दत्वेन ईक्षन् ईक्षमाणश्च तच्च निरीक्षणेन कदाऽयं दास्यतीत्यनु-सन्धानेनेत्यर्थः। तद्ग्रन्थिनिरीक्षणेनोपलक्षित इति वा तथापि यतो ब्रह्मण्यः ब्राह्मणजातावेव तावत्सहजहितः किमुत तादृशीत्यर्थः ततोऽप्यदत्ते प्रहसन् मत्प्रजावत्या यदुपायनं दत्तं तद्भवान् कथं गोपयतीति परिहसन्नुवाच यतः प्रियं सखायमिति खलु वाक्यालङ्का तदेवं सतां गतिः स एव सतां परमाश्रय इत्यर्थः ॥१-२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स निजाशेषभगवत्ताप्रकटनेनानिर्वचनीयमाहात्म्यो हरिः सर्वेषां तस्य वा मनोहरो भगवान्। द्विजेषु विप्रेषु मुख्ये तत्प्रियसखत्वाच्छ्रेष्ठेन सह। अत एव संकथयन्, इत्यन्योन्यं प्रहर्षोदय उक्तः। स्मयमानः तावता प्रथेत्नेन सन्तोषात्तं ब्राह्मण उवाच ॥१॥ यतो ब्रह्मण्यो ब्राह्मणहितकारी किञ्च प्रहसन् यतः प्रियम्। सर्वभूतमनोऽभिज्ञत्वे हेतुः-भगवान् सर्वैश्वर्ययुक्तः; यतः कृष्णः यद्वा, प्रियत्वे हेतुः ब्राह्मणं सहैव वेदार्थतत्त्वाभिज्ञमित्यर्थः। किञ्च स्वयं ब्रह्मण्यः प्रहसने हेत्वन्तरं-कृष्णः सर्वचित्ताकर्षकलीलः। किंच भगवान् सर्वसद्गुणपूर्ण इति। अतः प्रेम्णा यन्निरीक्षणमवलोकनं तेन प्रेक्षन् प्रेक्षमाणः यतः सतां भक्तानां गतिः परमाश्रयः। एतत्पद्यार्धं न सार्वत्रिकम् ॥२॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-३३॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

ततः किं जातं तदाह-स इति। स हरिरित्थं द्विजमुख्येन कुचेलेन सह सङ्कथयन् सुखगोष्ठीं कुर्वन् सर्वभूतानां मनसोऽभिज्ञः मदर्थं पृथुकानानीय दातुं लज्जित इति जानन्नित्यर्थः। तं विप्रमुवाच ॥१-२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

सङ्कथयन् संलापं कुर्वन् ॥१-२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-२॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

एकाशीतितमे भुक्तपृथुकोऽस्मै परोक्षतः। दत्त्वाप्यतुलसम्पत्तिं स्वं मेने ऋणिनं हरिः ॥

सर्वभूतानामपि किम्पुनस्तस्य मनसोऽभिज्ञ इति मदर्थं पृथुकान् आनीयापि दातुं लज्जत इति सहसैव जानन्नित्यर्थः स्मयमान इति तवैतत् उपायनमहं व्यक्तीकरिष्याम्येवेति द्योतयामास तं ब्राह्मणं ब्रह्मण्य इति तस्य ब्राह्मणत्वे स्वयं तस्य भक्त इत्यर्थः। प्रहसन्निति मल्लोभनीयमानीतं वस्तु कियन्तं क्षणं त्वं स्वकक्षे निह्नोष्यसीति स्वप्रागल्भ्यप्रद्योतकः प्रहासः प्रेम्णा निरीक्षणं प्रेमपूर्वकं यत् कक्षस्थपृथुकग्रन्थिनिरीक्षणं तेन उपलक्षितः तं प्रेक्षमाण इति तवेदं धमनिसन्तततत्वमिदं च कुचेलत्वमत्रत्यजन विस्मयरसपोषकमतःपरमपि श्वस्तनप्रहरद्वयपर्य्यन्तं स्थास्यति न ततःपरमिति भावः। सर्वत्र हेतुः सतां गतिरिति ॥१-२॥

गूढार्थदीपिनी

एकाशीतितमे भुक्त्वा सुदाम्नः पृथुकान् हरिः। दत्त्वाऽप्यलौकिकीं लक्ष्मीं कृतार्थं स्वं न मन्यते ॥१॥

द्विजमुख्येन सुदाम्ना सह सङ्कथयन् अभिज्ञः धनार्थमागतः इति ज्ञातवान् स्मयमानः ईषद्धसन् ॥१॥ प्र स्वप्रसन्नतां द्योतयन्। प्रेम्णा प्रियं मित्रं प्रेक्षंश्च सन्तोषयंश्च तमुवाचेति पूर्वेणान्वयः। प्रहसन् क्ष्वेलि (क्ष्वेलि स्यात्सवयो इति निरुक्तिः) कुर्वन् वा ॥२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

एकाशीतितमे स्वभक्तपृथुकान् जग्ध्वा तस्मै श्रियं दत्तवान् हरिरित्याह-स इत्थमिति। स वर्णितवीर्यो हरिः इत्थं सङ्कथयन् गोष्ठिं कुर्वन् सर्वभूतमनोऽभिज्ञः मदर्थं पृथुकानानीयापि लज्जया न ददातीति जानन्नित्यर्थः। अनेनाप्रकाशितान् प्रकटीकरिष्यामीति युक्तेन स्मयमानस्तमुवाच ॥१॥ किं कुर्वन् प्रहसन् क्ष्वेलिकां कुर्वन् ॥२-४॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

द्वात्रिंशे भगवानस्य पुरुषार्थतयोदितः। स्वकर्तव्यं विदित्वैव कृतवानित्युदीर्यते ॥
मर्यादया प्रेरिता तु लक्ष्मीः स्थैर्य्यमिहोच्यते। अतोऽत्र भगवांस्तस्य पृथुकानप्यभक्षयत् ॥
दानेऽपि तेजोहानिः स्याद्भार्यादत्तमुपायनम्। तस्या एव फलं भूयादिति जग्धुं समुद्यतः ॥
मुष्टिरेको जगत्तृप्त्यै वनवासे निरूपितः। सर्वं फलं सर्वतृप्त्या परलोके तथा परः ॥
तृतीये देवतां दद्यादात्मानं च ततः परम्। एवं बुद्ध्या तया दत्तास्तेचेन्निर्विविशुर्हरिम् ॥
चतुर्थ्यंशः सिद्धिमेतु तस्या नाधिकमित्युत। लक्ष्मणायां प्रविष्टा श्रीः प्रतिबन्धं चकार ह ॥

पूर्वाध्यायान्ते मनःप्रीतिमुक्त्वा तदिष्टं पूरयित्वा तद्भार्येष्टं पूरयितुं पूर्वमुपसंहरन्नाह-स इत्थमिति। जीवेन सह सङ्कथेत्याह-मुख्येनेति। ब्रह्मभावाज्जीवोऽपि आदेशी भवतीति सङ्कथनं न दोषायेत्यर्थः। ततो भार्याहृदयं ज्ञात्वोवाचेत्याह-सर्वभूतमनभिज्ञ हेतुत्वार्थं साधारण्येन निरूपयति स्मयमानः भार्यासम्बन्धात् तेन सह परिहासं चिकीर्षुः हेत्याश्चर्ये न हि पूर्णो भगवान् अदत्तं गृह्णातीति ब्राह्मणस्तु जानन्नपि लज्जया न दत्तवान् तथापि भगवान् ब्रह्मण्यः ब्राह्मणानां हितकर्ता सोऽपि ब्राह्मणः स्वयं च तदर्थं चावतीर्णः अन्यथा भगवान् कथमागच्छेत् प्रहसन्निति गोप्यं करोतीति तं प्रति तथा वचने हेतुः प्रियमिति ॥१-२॥

सुबोधिनीसारः

शुकोक्तिः। एवं विप्रोत्तमेन सुदाम्ना सह सङ्कथयन् सम्भाषमाणः सर्वप्राणिचित्तवित् हरिः स्मयमानः ईषद्धसन् उवाच तं म्॥१॥ प्रियं ब्राह्मणम्। ब्रह्मण्यो भगवान् कृष्णः प्रहसन् प्रेमवीक्षणेनैव प्रेक्षन् प्रेक्षमाणः सतां पतिर्भक्तार्तिहरश्चेत्युक्तेः ॥२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एकाशीतितमे कृष्णो भुक्त्वा पृथुकतण्डुलान्। श्रियं निर्मितवांस्तस्याश्रमे ह्येतत् निरूप्यते ॥१॥

स हरिरित्थमुक्तप्रकारेण द्विजमुख्येन श्रीदाम्ना सह संकथयन् सुखगोष्ठीः कुर्वन् सर्वभूतानां मनसाऽभिज्ञः साक्षी णया धनार्थमागतः मदर्थं पृथुकानानीय लज्जया न ददातीति जानन् स्मयमानः प्रहसन् तं द्विजं प्रत्युवाच ॥१॥ ननु ब्राह्मणो न किञ्चिद्याचितवांस्तदा भगवानपि किं न तमुपेक्षितवान् इत्याशंक्याह-ब्रह्मण्य इति। यतः श्रीकृष्णो ब्रह्मण्यो भक्तः। स च ब्राह्मणः, अत एव प्रियः। अतः प्रहसन् स्वप्रसन्नतां सूचयन् प्रेम्णा युक्तेन निरीक्षणेन नेत्रेणैव तं प्रेक्षन् माण उवाचेत्यनुषंगः। ब्रह्मण्यतायां हेतुमाह-सतां सर्वतो विरक्तानां गतिराश्रय इति। तत्रापि हेतुमाह-भगवानिति। तेषां निर्वाह एव न स्यादिति भावः ॥२॥

अन्वितार्थप्रकाशिका

एकाशीतितमे सख्युस्तण्डुलान् भक्षयन् हरिः। ददावलौकिकीमृद्धिं श्लोकाः सार्द्धाः कुवार्थयः (४१॥)॥

द्वे (२) उवाचेत्यत्र चतुश्चत्वारिंशदनुष्टुभः (४४) ॥८१॥

इति। स हरिरित्थमुक्तप्रकारेण द्विजमुख्येन श्रीदाम्ना सह सङ्कथयन् सुखगोष्ठीः कुर्वन् सर्वभूतानां मनसोऽभिज्ञः साक्षी धनार्थमागतः मदर्थं पृथुकानानीय लज्जया न ददातीति तान् स्मयमानः प्रहसन् तं द्विजं प्रत्युवाच ॥१॥ ब्रह्मण्य इति सतां गतिः आश्रयः भगावन् कृष्णः प्रहसन् स्वप्रसन्नतां सूचयन् प्रेम्णा युक्तेन निरीक्षणेन नेत्रेणैव प्रियं ब्राह्मणं प्रेक्षन्। उवाचेत्यनुषङ्गः ॥२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एकाशीतितमेऽध्याये भुक्त्वा पृथुकतण्डुलान् । ददौ श्रीदाम्ने श्रीकृष्णः सम्पत्तिं देवदुर्लभाम् ॥१॥

स इति युग्मम् । स्मयमानो मन्दहासयुक्तः ॥१॥ प्रहसन्नुपहासं कुर्वन् । तं ब्राह्मणं प्रेम्णा सहितेन निरीक्षणेन पुनः पुनर्नेत्रप्रसाणेन प्रेक्षन्नवलोकयन् सन् उवाच ॥२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सख्युश्चिपिटकान् प्राश्य श्रियं निर्मितवान् हरिः । एकाशीतितमे शक्रदुर्लभामाश्रमेऽस्य हि ॥१॥

ततः किं जातं तत्राह-स इति । सः हरिः इत्थम् द्विजमुख्येन कुचैलेन सह संकथयन् सुखगोष्ठीं कुर्वन् सर्वभूतमनोऽभिज्ञः सर्वभूतानां मनोऽभिज्ञत्वान्मदर्थं पृथुकानानीय दातुं लज्जित इति जानन्नित्यर्थः । अत एव स्मयमानः क्ष्वेलिं कुर्वन् सन् तं विप्रम् उवाच ॥१॥ तदेवाह-किमिति सार्धाभ्याम् । किमिति । हे ब्रह्मन् ! भवता गृहात् मे मह्यम्, मदर्थमित्यर्थः । उपायनं किम् आनीतम् । इति भगवता पृष्टे लज्जया तूष्णीं स्थितस्य तामपनुदन्नाहाण्वपीति द्वाभ्याम् । भक्तैर्मम भक्तजनैः प्रेम्णा उपाहृतं समर्पितं यत् तत् अण्वल्पमपि मे भूर्येव भवेत् अभक्तोपहृतं भूर्यपि मे तोषाय मम सन्तोषाय न कल्पते ॥२॥

कृष्णप्रिया

बहुत देर तक प्रियसखाके सतीर्थ्य अवस्थाकी वार्ता करते रहे पुनः कुछ स्मित हास्य करते हुए भगवान बोले । उस अवसर भी आर्द्र दृष्टि से ब्रह्मर्षिजी देखते हते ॥१-२॥

श्रीभगवानुवाच

किमुपायनमानीतं ब्रह्मन् मे भवता गृहात् । [1]अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् ।
भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥३॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥४॥
इत्युक्तोऽपि द्विजस्तस्मै व्रीडितः पतये श्रियः । पृथुकप्रसृतिं[2] राजन् न प्रायच्छदवाङ्मुखः ॥५॥
सर्वभूतात्मदृक् [3]साक्षात् तस्यागमनकारणम् । विज्ञायाचिन्तयन्नायं[4] श्रीकामो माभजन् पुरा॥

कर्दमक्षमा

श्रीभगवान्, उवाच ।

ब्रह्मन्, भवता, गृहात्, किम्, उपायनम्, आनीतम्, भक्तैः, प्रेम्णा, अणु, अपि, मे, भूरि, एव, भवेत्, अभक्तोपाहृतम्, भू अपि, मे, तोषाय, न, कल्पते ॥३॥ यः, मे, भक्त्या, पत्रम्, पुष्पम्, फलम्, तोयम्, प्रयच्छति, भक्त्युपहृतम्, तद्, अ प्रयतात्मनः, अश्नामि ॥४॥ राजन्, इति, उक्तः, अपि, व्रीडितः, द्विजः, श्रियः, पतये, अवाङ्मुखः, पृथुकप्रसृतिम्, न, प्राय ॥५॥ सर्वभूतात्मदृक्, तस्य, आगमनकारणम्, साक्षात्, विज्ञाय, चिन्तयन्, अयम्, न, श्रीकामः, माम्, पुरा, अभजत् ॥६॥

श्रीधरस्वामिकृतभावार्थदीपिका

लज्जया त्वकथयतस्तामपनुदन्नाह-अण्वपीति द्वाभ्याम् ॥३-५॥ सर्वभूतानामात्मदृगन्तःकरणसाक्षी ॥६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तां लज्जाम् । दरिद्रस्य मम भूरिद्रव्यासत्त्वात् । भवतो महतोऽल्पं तुष्टिकरं न स्यादिति नानीतमिति चेदाह-अण्व भक्तैर्भक्तियुक्तैः प्रेम्णान्तरप्रीत्या । उपाहृतं सम्शङ्क्याह । एतेन-द्रव्यभूरित्वाभूरित्वे मत्प्रीतौ न हेतू किन्तु भक्तिरेवेत्युक्तम्॥

---

१. अल्पमप्याहृतं-विज. । २. प्रसृती राजन्न-गो. प्रे. टी. । ३. साक्षी-वीर. । ४. चिन्तयदयं श्रीकामो नाऽभजत्पुरा ।

तद्दर्शयति-पत्रमिति
तृप्तेः प्रसिद्धत्वात्तत्
सुदाम्नः । अयं सुदा

किमित्यर्धक
युज्यत इति सनर्मभावः
प्रेरितोऽपि मां याचितुं स
यथार्थमाह-अण्वपीति
तावतैव बहुकालतृप्तिः स्व
सति पत्रादीनां मध्ये यत्कि
स्वीकरोमि कुतः भक्तोप
ख्यापयति भक्त्युपहृतत्वे हे
अप्यश्नन्निवोपभुञ्जे कि
पेयत्वेऽप्यशननिर्देशस्तोया
स्वेच्छया नायच्छत् किन्तु
व्यवसितवान् इत्यपेक्षायामा
साक्षात्तुल्योऽन्यूनरूपो यस्य
इत्यमरः विज्ञाय अपरोक्षतया
इति सख्यार्थमेवाभजदिति सू

किमानीतं तत्कथय दे
। एवं प्रहसनं वोह्यम् । भक्तैस्त
अभक्तैरुपहृतं तु न कल्पते यो
अकिंचनत्वादिना अन्नाद्यसद्भावे
यच्छति अहं स्वयमेवाश्नामि स्वी
तद् अश्नामि । तत्र पत्रपुष्पयोरशना
वेति दिक् ॥४॥ पृथुकानां प्रसृतिं चत
सन् व्रीडायां हेतुः-श्रियः पतय इ
द्विजस्यागमने कारणं धनार्थमाग्रहेण
पूर्वजन्मनि मा मां नाभजत् । इति स

तदेवाह-किमिति सार्धद्वयेन
अण्वपीति द्वाभ्याम् । यद्भक्तैः प्रेम्णोपहृत

र्भाम् ॥१॥
सहितेन निरीक्षणेन पुनः

१॥
कुर्वन् सर्वभूतमनोऽभिज्ञः
क्ष्वेलिं कुर्वन् सन् तं विप्रम
र्थः । उपायनं किम् आनीतम्
ण्णा उपाहृतं समर्पितं यत् तव

स्य करते हुए भगवान बोले

भूर्येव मे भवेत् ।
॥३॥
प्रयतात्मनः ॥४॥
प्रायच्छदवाङ्मुखः ॥५॥
ीकामो माभजन् पुरा॥६॥

एव, भवेत्, अभक्तोपाहृतम्, भूरि
च्छति, भक्त्युपहृतम्, तद्, अहम्
मुखः, पृथुकप्रसृतिम्, न, प्रायच्छ
मः, माम्, पुरा, अभजत् ॥६॥

गन्तःकरणसाक्षी ॥६॥

दिति नानीतमिति चेदाह-अण्वपीति
न हेतू किन्तु भक्तिरेवेत्युक्तम् ॥३॥

ामो नाऽभजत्पुरा ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदर्शयति-पत्रमिति । विदुरस्य पत्रं गजेन्द्रस्य पुष्पं शबर्याः फलं रन्तिदेवस्य तोयमिति एतेषां प्रीत्या समर्पितपत्रादिभिरेव तृप्तेः प्रसिद्धत्वात्तत्पत्रादि ॥४॥ तस्मै कृष्णाय । प्रसृतिमर्धाञ्जलिम् । 'अर्धांजलौ तु प्रसृतिः' इति यादवः ॥५॥ तस्य सुदाम्नः । अयं सुदामा ॥६॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

किमित्यर्धकम् । किमानीतं तत्कथयेति देहि वेति शेषः । हे ब्रह्मन्निति । वेदार्थविदा त्वया मदर्थमानीतं स्वयं ग्रहीतुं न युज्यत इति सनर्मभावः तत्रापि गृहात्पत्नीतः सकाशादिति पूर्ववत् किञ्च भवान् मित्रोचितं न व्यवहरति यत्परमपतिव्रतया तन्त्या प्रीतोऽपि मां याचितुं सङ्कुचति अहं तु तदुचितस्वच्छव्यवहारपरः यतो याचित्वैव गृह्णामीति परिहासं परित्यज्य तं प्रोत्साहयन् यथार्थमाह-अण्वपीति । स्वल्पमप्यन्नादिकं भक्तैः सादरैः तत्रापि प्रेमवद्भिः प्रेम्णा यद्वा भक्तविषयकमत्प्रेम्णा भूर्येव भवेत् तावतैव बहुकालतृप्तिः स्यादित्यर्थः अभक्तैरुपहृतं मे तोषाय न कल्पते न सम्पद्यते तेषु न किञ्चिदपि रोचत इत्यर्थः ॥३॥ असद्भावे सति पत्रादीनां मध्ये यत्किञ्चिल्लभ्यते तदेकमपीत्यर्थः । अत एव क्रमानुक्तिः भक्त्या प्रेम्णा अतः प्रकर्षेण यच्छति अहं स्वयमेवाश्नामि स्वीकरोमि कुतः भक्तोपहृतं ततस्तेषामुपहरणमात्रं मदशने कारणं न तु मन्त्रादिकमपीति भावः । पुनरुक्तिर्भक्तौ स्वलालसां ज्ञापयति भक्त्युपहृतत्वे हेतुः प्रयतात्मनः विशुद्धचित्तस्य कामनान्तरशून्यस्येति यावत् । तत्र पत्रपुष्पयोरसनायोग्यत्वमप्यशननिर्देशस्ते अप्यशनमिवोपभुञ्जे किं वा भोज्याभावे ते अश्नामि फलतोये तु सुतरामश्नाम्येवेति गमयति तोयस्य पेयत्वेऽप्यशननिर्देशस्तोयारवत्तदेकतृप्त्यपेक्षया ॥४॥ पृथुकानां प्रसृति चतुर्मुष्टिभिः प्रसृतिः तत्परिमितान् चिपिटान् तस्मै प्रकर्षेण लज्जया नायच्छत् किन्तु व्रीडितः सन्नवाङ्मुखो बभूवेत्यर्थः । व्रीडायां हेतुः श्रियः पतय इति ॥५॥ तर्हि श्रीभगवांस्तु किं व्यवसितवान् इत्यपेक्षायामाह-सर्वेति सार्धैश्चतुर्भिः । साक्षादेव सर्वेषां भूतानामात्मनां च दृक् द्रष्टा तदन्तर्यामी पुरुषः सोऽपि साक्षात्तुल्योऽन्यूनरूपो यस्य सः "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति इतरगृहीताभ्यः "साक्षात्प्रत्यक्षतुल्ययोः" स्मरः विज्ञाय अपरोक्षतया ज्ञात्वा किमचिन्तयत्तदाह-नायमित्याद्यधिकेनैकेन । श्रीकामः सन् पुरा पूर्वजन्मनि मा मा नाभजन् इति सख्यार्थमेवाभजदिति सूचितम् ॥६॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

किमानीतं तत्कथय देहि वेति शेषः । हे ब्रह्मन्निति । विप्र ! स्वाभाविकवदान्यत्वेन तद्भवता निह्नितुं नोपयुज्यत इति भावः एवं प्रहसनं वोह्यम् । भक्तैस्तत्रापि प्रेम्णा किंवा भक्तत्वादेव प्रेम्णोपहृतं समर्पितम् । यद्वा, भक्तिविषयकमत्प्रेम्णा भूर्येव भवेत् अभक्तैरुपहृतं तु न कल्पते योग्यं न समर्थं वा न भवति । पाठान्तरेऽपि कथंचित् कैश्चिद्भक्तोपहृतमति अर्थः स एव ॥३॥ अकिञ्चनत्वादिना अन्नाद्यसद्भावे सति केवलं पत्रादिकमपि तोयं वेति विकल्पोऽत्रानुसन्धेयः । भक्त्या प्रेम्णा अतः प्रकर्षेण यच्छति अहं स्वयमेवाश्नामि स्वीकरोमि । कुतः ? भक्त्योपहृतं तत्कुतः ? भक्त्या विशुद्धचित्तस्य यद्वा, भक्त्यैवोपहृतं स्वीकृतं तद् अश्नामि । तत्र पत्रपुष्पयोरशनायोग्यत्वेऽप्यशनं भक्तिसुधासम्बन्धबलात् । तोयस्य पेयत्वेऽपि तत्तत् छत्रिन्यायेन तोयैकाहारापेक्षया इति दिक् ॥४॥ पृथुकानां प्रसृतिं चतुर्मुष्टिभिः प्रसृतिस्तपरिमितान् चिपिटान् तस्मै प्रयत्नेनापि तदीयेननायच्छत् । व्रीडितः अतोऽवाङ्मुखः व्रीडायां हेतुः-श्रियः पतय इति ॥५॥ साक्षादेव सर्वभूतानामात्मदृक् यद्वा, अन्तर्याम्यपि साक्षाद्भूतः प्राकट्यं प्राप्तः अतस्तस्य तस्यागमने कारणं धनार्थमाग्रहेण पत्न्याः प्रेरणं विज्ञाय सम्यग्ज्ञात्वा अचिन्तयत् । किम् ? तदाह – नेत्यादिना । श्रीकामः सन् पूर्वजन्मनि मा मां नाभजत् । इति सख्यार्थमेवाभजदिति सूचितम् ॥६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-३३॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

तदेवाह-किमिति सार्धद्वयेन । हे ब्रह्मन् ! भवता गृहात् मे मह्यम् उपायनं किमानीतं लज्जया तूष्णीं स्थितस्य तामपनुदन्नाह-अण्वपीति द्वाभ्याम् । यद्भक्तैः प्रेम्णोपहृतं समर्पितं तदणु अत्यल्पमपि मे भूर्येव भवेत् यद्भूर्यप्यभक्तोपहृतं तन्मम सन्तोषाय न कल्पते

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

इत्यर्थः ॥३॥ अतः पत्रादीनामन्यतमं यः पुमान् मह्यं प्रयच्छति ददाति समर्पयतीति यावत् प्रयतः नियतः विशुद्ध आत्मा मनो यस्य तस्य सम्बन्धि भक्त्या समर्पितमहमश्नामि ॥४॥ इतीति । व्रीडाऽस्य सञ्जात इति तथाऽत एवावाङ्मुखः हे राजन् ! तस्मै श्रिय पतये भगवते पृथुकप्रसृतिं न प्रायच्छत् न ददौ ॥५॥ सर्वभूतानामात्मानमन्तःकरणं पश्यतीति तथाऽत एव साक्षाद्द्रष्टा भगवान् सर्वभूतमनोभिप्रायसाक्षात्कर्ता वा तस्य द्विजस्यागमनकारणं विज्ञाय कार्यमात्मना कर्तव्यमित्यचिन्तयत् किमिति विज्ञायेत्यत्राह- श्रीकाम इत्यादिना मामित्यन्तेन श्रीकामो नाभजत् मामिति शेषः । किन्तु मोक्षार्थकाम इत्यर्थः ॥६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

दरिद्रत्वेन भूरिद्रव्यत्वाभावात् भवतो महतोऽल्पं मनस्तुष्टिकरं न स्यादिति नानीतमिति शङ्का मा भूदित्याह-अल्पमि । आहृतमानीतं द्रव्यभूरित्वाभूरित्वे अप्रयोजके किन्तु भक्तिरेवेत्यनेनादर्शि ॥३-५॥ सर्वभूतानामात्मदृक् स्वभावज्ञः "आत्मा धृतौ जीवे स्वभावे परमात्मनि" इति यादवः ॥६-७॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

भक्तैः सादरैः तत्रापि प्रेमभक्तैः प्रेम्णा ॥३-५॥ सर्वेषां भूतानामात्मनां च दृक् द्रष्टा तदन्तर्यामी पुरुषः सो साक्षात्तुल्योऽन्यूनरूपो यस्य सः ॥६-९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

भवता गृहादिति भवादृशेन प्रियेण मादृशस्य प्रियस्य निकटं प्रति यत्स्वगृहाच्चिरादागमनं तत् किं रिक्तहस्तं सम्भवेदित्यनुमानादेव विदितमिति भावः । ननु तदत्यल्पमेवातोऽत्र दर्शयितुमहं लज्जे इत्यत आह अण्वपीति ॥३॥ न निर्बुद्धिना यदा स्वगृहादिदं त्वदर्थं गृहीतं तदा किमपि न विचारितमधुना तु विमृशामि त्वद्भक्षणयोग्यमिदं न भवत्वं दीयत इत्यत आह-पत्रमिति । अत्र भक्त्युपहृतमिति पौनरुक्त्याद्भक्त्येति न करणे तृतीया किन्तु सहार्थे तेन भक्त्या मद्भक्तजनो यद्ददाति तच्च भक्त्यैव उपहृतं चेत्तर्ह्यश्नामि न तु कस्यचिदनुरोधेनेत्यर्थः । अयमर्थः वस्तु खलु स्वाद्वस्वादु भवतु किन्तु स्वाद्विदमिति बुद्ध्या मद्भक्तेन भक्त्यैव यत् दीयते तन्मे अति स्वाद्वेव भवेत्तत्र न मे कोऽपि विवेकसि अश्नामीति घ्रेयमप्यनशनीयमपि पुष्पमहं भक्तप्रेममोहितोऽश्नामि ननु देवतान्तरभक्तस्य भक्त्युपहृतं वस्तु किं नाश्नासि मद्भक्तजनो यद्ददातीति ब्रूषे तत्र सत्यं नाश्नाम्येवेत्याह-प्रयतात्मन इति । मद्भक्त्यैव स शुद्धान्तःकरणो भवति नान्यथ भक्तौ प्रकर्षेण यतमानमनसः अतस्तस्यैवाश्नामि नान्यस्येत्यर्थः ॥४॥ पृथुकानां प्रसृतिं मुष्टिचतुष्टयं व्रीडित इत्यत्र हेतुः श्रिय इति श्रीपतिं खलु कठोरविरसांश्चिपिटान् कथं भोजयामीति विमृश्येति भावः । अवाङ्मुख इति भोः प्रभो ! विडम्बय बहुशो याच्यमानोऽप्यहं तुभ्यमिदं न दास्यामीति मे सङ्कल्प इति विप्राभिप्रायः गृहादागमनसमये मद्भक्तस्य सङ्कल्पः स नान्यथा भवितुमर्हतीति भगवदभिप्रायः ॥५॥ आत्मदृक् अन्तःकरणसाक्षी यद्वा सर्वेषां भूतानामात्मनां द्रष्टा अचीन्तयत् सर्वज्ञोऽपि मद्भक्तस्यास्य कथमीदृशं दारिद्र्यमभूदिति तत्प्रेममुग्धश्चिन्तयामास तत्क्षण एव अधि स्वगतमाह-नायमिति । ननु निष्कामभक्तस्याप्यननुसंहितं फलं सद्विषयभोगो भवत्येव यदुक्तं "धर्मस्य नार्थोऽर्थायोपकल्पते । नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥ कामस्य नेन्द्रियप्रीतिः" इति उच्यते निष्का स्वभावभेदादननुसंहितं फलं द्विधं स्यात् दिष्टमदिष्टं च यस्य विषयभोगमात्रे एव द्वेषस्तस्य विषयभोगो नैव स्यादिति तथा दर्शनादतोऽस्य विप्रस्य प्रागेतज्जन्मनि च भोगे द्वेष एव केवलं भार्य्यानुरोधाद्भगवद्दर्शनलोभाच्चायात इति

अणु अ
अश्नामि । अत्र वि
गृहीतम् ॥४॥ प्रसृति
प्राणिमात्राणाम् अन्तः

पृथुकानां प्र
साक्षाद्द्रष्टा आगमनका

सार्धाभ्यामाह-
ते मह्यं मध्ये शास्त्रार्थत्वाय
दत्तं स्यात् अतो व्यर्थं ग्रहण
सर्वस्यामपि द्वारकायां भक्त
स्वापेक्षया अधिममानयति
हृदमणुमात्रं तण्डुलास्तु मुष्टिच
युक्तमिति मे भूर्येव भवेत् अ
कथञ्चित् सर्वसामर्थ्येनापि स
वाक्यात् प्रेम्णैव तुष्यति न त्वन
तेनैवावरुद्धमिति तण्डुलाश्रितैव
भक्ष्यं तोषाय न तु रूक्षं विधौ द्व
भक्तिरप्यभक्तिरिवेति वा ॥३॥
तुलस्यादि पुष्पं लवङ्गादि फल
अग्निसंस्काराद्यभावात् वनस्थानां
भक्षयतीति नाहं तयाद्मीति वाक्याद
चतुष्टये श्रद्धाधिक्यं भवति अत उ
सम्पाद्य स्वाधिकारानुसारेण यत्र
प्रयच्छति मम तु ततोऽपि विशेष इ
स्मरणसहितस्नेह इति केचित् किञ्च त
भवेत् तदा अवश्यमश्नामि अशनं
दुग्धेक्षुरसादिकं तोयं ताम्बूलादिकं
आत्मसत्करोतीत्यर्थः ॥४॥ एवं भार्यय
पतये तस्मै पृथुकतण्डुलप्रसृतिं मुष्टिच
समाहृतमिति अतिसाधारणानामेवैतद्भक्ष
किमस्मै सम्पदो देया न वेति ॥५॥

गूढार्थदीपिनी

अणु अपि उपाहृतं समर्पितम् ।।३।। प्रयतात्मनः शुद्धचित्तस्य भक्तस्य भक्त्या अपहृतं समर्पितं यत् पत्रादि तत् अहम् अश्नामि। अत्र विदुरस्य पत्रं गजेन्द्रस्य पुष्पं शबर्याः फलं रन्तिदेवस्य च तोयम् इत्यवगन्तव्यम् । वनवासकाले द्रौपद्या पत्रं गृहीतम् ।।४।। प्रसृतिमर्धाञ्जलिं न प्रायच्छत् न ददौ किन्तु अधोमुखोऽभूत् । अर्धाञ्जलौ तु प्रसृतिः इति यादवः ।।५।। सर्वभूतानां प्राणिमात्राणाम् अन्तःकरणसाक्षी । पुरा पूर्वजन्मनि श्रीकामः सन् मा मां न अभजदित्यन्वयः ।।६।।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पृथुकानां प्रसृतिं मुष्टिचतुष्टयम् ।।५।। सर्वेषां भूतानामचेतनानाम् आत्मानं पश्यन्तीत्यात्मदृशश्च चेत्ततस्तेषां च साक्षी साक्षाद्द्रष्टा आगमनकारणं स्वदर्शनमात्रम् "अयं हि परमो लाभः उत्तमश्लोकदर्शनम्" इत्युक्तत्वात् ।।६।।

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

सार्धाभ्यामाह- भगवद्वाक्यम्, किमुपायनमानीतमिति । ब्रह्मन्निति सम्बोधनात् धर्मज्ञानं सूचितं तेन उपायनानयनं निश्चितं ते मह्यं मध्ये शास्त्रार्थत्वाय गृहीतं तु न मे सुखायेति विशेषमाह- गृहादिति । ननु पूर्णस्य तव किमुपायनेन अस्मदर्थं तु अस्माभिरेव तं स्यात् अतो व्यर्थं ग्रहणमिति चेत्तत्राह- अण्वप्युपाहृतमिति । एतत्सर्वं प्रायेणाभक्तैरुपहृतमेतत्सर्वं पृथुकतण्डुला एव भक्तोपाहृताः सर्वस्यामपि द्वारकायां भक्ताहृतत्वे को विशेष इति चेत्तत्राह- प्रेम्णा अण्वपि भक्तोपाहृतं भूर्येव मे भवेत् प्रेमान्तःकरणधर्मः यो हि स्वापेक्षया अधिममानयति तत्तस्याधिकं भवति "ये यथा मां प्रपद्यन्ते" इति मम चायं नियमः प्रेम्णा समानीतं हृदयानीतं भवति ह्यणुमात्रं तण्डुलास्तु मुष्टिचतुष्टयात्मिकाः अहं च हृदयरूप एव तत् गृह्णामि अतः अण्वप्युपाहृतं मत्समानत्वात् भक्ष्यं न्यूनपरिमाणमेव पुष्कलमिति मे भूर्येव भवेत् अभक्तेन उपाहृतं बहिर्दृष्ट्या उपहृतं भवति ब्रह्माण्डमितं भवति तदग्रहते अहमपि तथा अतो यथा कथञ्चित् सर्वसामर्थ्येनापि समाहृतं मम तृप्तिहेतुर्न भवतीति अल्पत्वाय न मे तोषाय कल्पते अथवा "भक्त्यैव तुष्टिमभ्येति" इति वाक्यात् प्रेम्णैव तुष्यति न त्वन्येनेति प्रेम तु साधारणमेव मत्सन्निधौ समायातीति तस्या देहोऽन्यार्थमेव विनियुक्त इति लिङ्गशरीरं च तेनैवावरुद्धमिति तण्डुलाश्रितैव भक्तिरत्रागता अतो भक्तिसहभावः पदार्थानां निरूप्यते अभक्तेन रूक्षेण लोकेऽपि व्रतादिप्लुतं भक्ष्यं तोषाय न तु रूक्षं विधौ द्वयं प्रयोजकम् अधिकारविशेषणं करणं च निषेधे तु विशेषणमाह- करणन्तु सिद्धमेवेति अभक्तस्य भक्तिरप्यभक्तिरिवेति वा ।।३।। एवं पदार्थस्थितिमुक्त्वा स्वस्य बलादेव ग्रहणे हेतुमिव स्वसङ्कल्पमाह- पत्रं पुष्पमिति । पत्रं तु तुलस्यादि पुष्पं लवङ्गादि फलमाम्रादि तोयं गङ्गाजलादि एतच्चतुष्टयमविकृतमनुपहतं च अन्यत्पाकादिना उपहतं भवेत् अग्निसंस्काराद्यभावात् वनस्थानां दरिद्राणां परमहंसानाम् उपलक्षणविधया तेषामर्थे चतुष्टयमुक्तमिति केचित् ब्राह्मणद्वारा त्वन्यदपि भक्षयतीति नाहं तयाद्मीति वाक्यादपि कृतमुत्तमसंस्कारेण संस्कृतमिति विचारकाः एकेन त्वाहृतमेक एव भक्षयामि न हि कस्यचिदपि चतुष्टये श्रद्धाधिक्यं भवति अत उद्दिष्टानां विकल्प इति ख्यापयितुं तदित्याह तत्रत्यादीनामन्यतमम् अहमिति पुरुषोत्तमः मदर्थं सम्पाद्य स्वाधिकारानुसारेण यत्र क्वचिन्निवेदयतु तत्रैवाहं भक्षयामि इत्यर्थः । दानसमये भक्त्यैव दानं यथेष्टं पुत्राय कश्चित् प्रयच्छति मम तु ततोऽपि विशेष इत्याह- भक्त्युपहृतमिति । तत्स्थानादुद्धरणप्रभृतिमत्समीपानयनपर्यन्तं स्नेहस्याविच्छेदोऽपेक्ष्यते स्मरणसहितस्नेह इति केचित् किञ्च तच्चेत् द्रव्यं प्रयतात्मनो भवति प्रकर्षेण नियतान्तःकरणस्य कामादिसर्वदोषरहितस्य चेत्पत्रादिकं भवेत् तदा अवश्यमश्नामि अशनं यथाक्रियोपलक्षकं वस्तुतस्तु सर्वमेतच्चतुष्टयमध्ये निविशति अन्नवस्त्रादिकमपि फलमेव दुग्धेक्षुरसादिकं तोयं ताम्बूलादिकं पत्राणि सुवर्णरत्नादिकं पुष्पाणीति अन्तःप्रवेशनं च भोजनं यत्र क्वचित् स्थापितम् आत्मसात्करोतीत्यर्थः ।।४।। एवं भार्यया प्रहितं त्वया भक्तेन भक्त्या चाहृतं देयमित्युक्तोऽपि द्विजः सङ्कोचाविष्टोऽल्पबुद्धिः श्रियः प्रापये तस्मै पृथुकतण्डुलप्रसृतिं मुष्टिचतुष्टयात्मकं प्रसृतिं सेरमात्रं भवतीति न प्रायच्छत् लज्जया चोधोमुखो जातः किं मया समाहृतमिति अतिसाधारणानामेवैतद्भक्ष्यं ततो भगवान् विचारितवान् अयं तु न प्रयच्छति तथापि ग्राह्यं न वेति तदर्थं चैतद्विचारयति किमस्मै सम्पदो देया न वेति ।।५।।

कामितं दोषरहितं भगवांस्तु प्रयच्छति । अलौकिकत्वात्सम्पत्तेर्दोषाभावः सुनिश्चितः ॥
कामाभावस्त्वस्य सिद्धो न देयं तत्कथञ्चन । स्वत आगमनं तस्य न भवत्येव भार्यया ॥
प्रेषितस्यागतिस्त्वस्य भार्यागतिरियं मता । प्रतिबन्धकता त्वस्य दाने लज्जादिदोषतः ॥
तस्मात्तस्या गृहीत्वैतत्तस्यै दास्यामि निश्चितम् ।

एतद्वदन्नस्य दोषाभावमाह–सर्वभूतानामात्मानमन्तःकरणं पश्यतीति एतस्य तस्य नापि हृदयं जानातीत्युक्तं साक्षात् आगमनकार्यं भार्यार्थमेव प्रासङ्गिकं नु स्वार्थम् एतद्विज्ञायाचिन्तयत् अत्रार्थः सन्दिग्ध इति सन्देहमेवाह–नायं श्रीकामः मां च अगमत् ततोऽयं भक्तो निष्काम अतोऽस्मै स्वरूपमेव देयम् ॥६॥

सुबोधिनीसारः

हे ब्रह्मन् ! भवता त्वया गृहान्मे मह्यं किमुपायनमानीतं लघु महन्न च तुष्टिकरं मम भक्तिरेव च सर्वगरीयसीत्या भक्तैः प्रेम्णा प्रीत्याणु अत्यल्पमपि मे मह्यमुपाहृतं समर्पितं भूरि बहु स्यात्। विदुरनिवेदितान्नवत्। अभक्तैरुपहृतं निवेदितं बह्वपि पदार्थजातं मे मम तुष्टये न कल्पते। दुर्योधनमिष्टनानाविधान्नपाकवत् ॥३॥ एतदेव दृष्टान्तचतुष्टयेन द्रढयति। शाकपत्रं द्रौपदी इव पुष्पं गजेन्द्र इव फलं बदरादि शबरीव तोयं जलं रन्तिदेव इव भक्त्या मे मह्यं यः प्रयच्छति प्रार्पयति भक्त्योपहृतं समर्पितं तत्। प्रयतो वशीकृत आत्मा चित्तं येन तस्य पुंसोऽहमश्नामि भुञ्जे ॥४॥ एवमुक्तोऽपि द्विजः सुदा व्रीडितो लज्जितः श्रियो लक्ष्म्याः पतये तस्मै श्रीकृष्णाय पृथुकतण्डुलानां प्रसृतिं नादात् अधोमुखः ॥५॥ सर्वभूतानामात्म साक्षी तस्य विप्रस्यागमने कारणं विज्ञाय बुद्धा दारिद्र्यपीडिता पत्नी न्ययुङ्क्तैनं ममान्तिकमिति श्रीकामो धनेप्सुरयं पुरा नाभजत् अतो धनं ज्ञानं चोभयं देयमित्यर्थः ॥६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तद्वाक्यान्याह–किमिति सार्धद्वयेन। हे ब्रह्मन् ! भवता गृहात् मे मह्यमुपायनं किमानीतम् ? एवमुक्तेऽपि स्वल्पं लज्जया तूष्णीं स्थितस्य तामपनुदन्नाह–अण्विति द्वाभ्याम्। मद्भक्तैः प्रेम्णोपहृतं समर्पितमणु स्वल्पमपि मे भूर्येव भवेत्। अनादरादुपहृतं तु भूरि बह्वपि मे सन्तोषाय न कल्पते न भवति ॥३॥ अतः प्रयतो नियतो वशीकृतो विशुद्ध आत्मा मनो यस्य पत्रादीनामन्यतममपि यः पुमान् भक्त्या मे मह्यं प्रयच्छति ददाति समर्पयति तद्भक्त्या समर्पितमहमश्नामि ॥४॥ इत्युक्तो द्विजस्तस्मै पृथुकप्रसृतिं न प्रायच्छत् न ददौ, किन्तु व्रीडितः सन्नवाङ्मुखो बभूव। लज्जायां हेतुमाह–श्रियः पतये इति। सामान्य राज्ञेऽपि तद्ददतो लज्जा भवति, सा लक्ष्मीपतये तद्ददतो कथं न स्यात् इति सूचयन् सम्बोधयति–राजन्निति ॥५॥ तदा च भगवान् तस्यागमनकारणं विज्ञायात्मना यत्कर्तव्यं तदचिन्तयत्। तज्ज्ञाने हेतुमाह–साक्षीति। साक्षित्वमेव स्पष्टयति सर्वभूतानामात्मानमन्तःकरणं पश्यतीति तथा स इति। ज्ञानप्रकारमाह–अहं श्रीकामो धनार्थी सन् मा मां पुरा नाभजत्। पृथुकानानीयापि न ददाति। न च किञ्चित् याचनं करोतीति भावः ॥६॥

अन्वितार्थप्रकाशिका

किमिति। सार्धम्। हे ब्रह्मन् ! भवता गृहान्मे मह्यमुपायनं किमानीतं मद्भक्तैः प्रेम्पोपहृतं समर्पितमणु स्वल्पमपि मे भवेत्। अभक्तेनानादरादुपहृतं तु भूरि बह्वपि मे सन्तोषाय न कल्पते न भवति ॥३॥ पत्रमिति। पत्रपुष्पादीनामन्यतममपि यः भक्त्या मे मह्यं प्रयच्छति समर्पयति। प्रयतो विशुद्ध आत्मा मनो यस्य तस्य तद्भक्त्या समर्पितमहमश्नामि प्रीत्या स्वीकरोमि इतीति। हे राजन् ! इत्युक्तोऽपि द्विजः श्रियः पतये तस्मै पृथुकप्रसृतिं न प्रायच्छत् न ददौ। किन्तु व्रीडितः सन्नवाङ्मुखो बभूव सर्वेति। तदा च साक्षात् सर्वभूतात्मदृक् अन्तःकरणसाक्षी भगवान् तस्यागमनकारणं विज्ञायात्मना यत्कर्तव्यं तदचिन्तयत् श्रीकामो धनार्थी सन् मा मां पुरा नाभजत्। अतः पृथुकानानीयापि न ददाति। न च किञ्चित् याचनं करोतीति भावः ॥६॥

भक्तैः प्रे
अहम् अश्नामि गृह
। न प्रायच्छत् न द

पत्रमिति
जलमात्रमपि यो भ
मह्यं समर्पितं तत्तदी
इत्यर्थः। अत एव अ
तस्मै कृष्णायेत्यर्थः
सर्वेषां भूतानामात्मा
तस्य द्विजस्य आगम
किन्तु मोक्षकामः स
तुशब्दोऽवधारणे । स
दुष्प्रापाः सम्पदः भोग

भगवान श्री
क्या उपहार लाये हो
मेरे लिये बहुत हो ज
मैं उनसे सन्तुष्ट नहीं
समर्पित करता है तब
लेकिन उस पदार्थ का
पर भी श्रीदिनवर्य सुदा
नहीं दिये । सुदामाजी
सर्वज्ञ ह सर्वके प्रत्येक
है , भगवान श्रीहरिने उ
प्रिय सखा है और दुस

पत्न्या मे [1]प्रेषि
[2]इत्थं विचिन्त्य
[5]नन्वेतदुपनीतं
इति [6]मुष्टिं सकृ

---

[1] पत्न्याः पतिव्रतायास्तु–श्रीध
तण्डुलं–विज. ; तण्डुलाः–त.

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भक्तैः प्रेम्णा उपाहृतं दत्तम् अण्वपि भूरि बहुलम् ॥३॥ प्रयतात्मनो विषयेभ्यो नियमितमानसस्य भक्तस्य तत्पत्रादि अहम् अश्नामि गृह्णामीत्यर्थः ॥४॥ पृथुकानां प्रसृतिरञ्जलिर्यस्यां तां वस्त्रग्रन्थिम् । वस्त्रबद्धप्रसृतिपरिमितपृथुकतण्डुलग्रन्थिमित्यर्थः । न प्रायच्छत् न ददौ ॥५॥ सर्वभूतात्मदृक् सर्वजनान्तःकरणद्रष्टा हरिः । तस्य द्विजस्य ॥६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पत्रमिति । किञ्च । पत्रं जीवन्त्यादेर्भक्षणार्हं पत्रं पुष्पं वर्षाजीवन्त्यादेर्भक्षणीयकुसुमं फलं कदलीफलादिकं तोयं जलमात्रमपि यो भक्तः मे मह्यं भक्त्या प्रयच्छति प्रयतात्मनः शुद्धप्रेमयुतान्तःकरणभक्तस्य सम्बन्धि भक्त्युपहृतं भक्त्या मह्यं समर्पितं तत्तदीय पत्रमात्रादिकम् अहम् अश्नामि ॥३॥ इतीति । हे राजन् ! व्रीडास्य संजाता इति व्रीडितः । सम्प्राप्तातिलज्ज इत्यर्थः । अत एव अवाङ्मुखो न्यक्कृतास्यः स द्विजः इत्युक्तप्रकारेण उक्तो भगवताऽभिहितः अपि श्रियः पतये रुक्मिणीकान्ताय तस्मै कृष्णायेत्यर्थः । पृथुकप्रसृतिं प्रसृतिपरिमितान् स्वानीतांस्तान् पृथुकानित्यर्थः । न प्रायच्छत् न ददौ ॥४॥ सर्वभूतेति ॥ सर्वेषां भूतानामात्मानमन्तःकरणं पश्यतीति तथा अत एव साक्षी साक्षात् द्रष्टा । सर्वभूतमनोऽभिप्रायसाक्षात्कर्ता वा श्रीकृष्णः तस्य द्विजस्य आगमनकारणं विज्ञाय अचिन्तयदात्मना यत्कर्तव्यं तद्विचारयामास । अयं पुरा मा मां श्रीकामः न अभजत् । किन्तु मोक्षकामः सन्नेव मामभजदित्यर्थः ॥५॥ पत्न्या इति ॥ अधुना तु पतिव्रतायाः पत्न्याः प्रियं कर्तुमिच्छयेत्यर्थः । तुशब्दोऽवधारणे । सखा मन्मित्रभूतोऽयं द्विजः मां प्राप्तः अतः अस्य अस्मै विप्रायेत्यर्थः । अमर्त्यसुलभाः देवानामपि दुष्प्रापाः सम्पदः भोग्यभोगोपकरणभोगस्थानादिसमृद्धीः दास्यामि ॥६॥

कृष्णप्रिया

भगवान श्रीकष्ण कहने लगे ! अये ब्रह्मविद् ब्रह्मर्षिजी भैया यह तो कहो कि आप आपके घरसे मेरे लिये क्या उपहार लाये हो ? भैया ? मेरे अनन्य प्रेमी भक्त यदि प्रेमसे अल्प भी वस्तु मुझे समर्पण करते है तो वह मेरे लिये बहुत हो जयती है । लेकिन जो मेरे भक्त नहीं होते है और मुझे बहुत सी सामग्री मुझे भेंट करते है तो मैं उनसे सन्तुष्ट नहीं होता ॥३॥ यदि भक्तजन प्रेमपूर्वक भक्ति से पत्र पुष्प फल जल आदि कोई भी वतु मुझे समर्पित करता है तब वह विशुद्ध मन वाला भक्तजन का वह प्रेमोपहार पदार्थ का मात्र स्वीकार ही नहीं करता लेकिन उस पदार्थ का अविलंबसे उपभोग कर लेता हुं ॥४॥ महाराज परीक्षित् ! भगवान श्रीकृष्ण के ऐसा कहने पर भी श्रीदिनवर्य सुदामाजी ने लज्जावश एवं संकोचवश श्रीलक्ष्मीवर के लिये उपायनमें लाये हुए चार मुठ्ठी पोंहे नहीं दिये । सुदामाजी ने लज्जावश एवं संकोचवश अपना मुंह नीचे कर लिया था ॥५॥ राजन् ! भगवान तो सर्वज्ञ है सर्वके प्रत्येक संकल्प को अच्छी तरहसे जानते है । श्रीद्वारिकाजीमें ब्रह्मर्षि के पधारने का कारण भी जानते है, भगवान श्रीहरिने उनके हृदयकी बात जान ली थी पुनः पुरुषोत्तम चित्तमें चिन्तन करने लगे यह मेरा अतिशय प्रिय सखा है और दुसरी यह बात है कि इसने श्री की कामनासे मेरा भजन नहीं किया है ॥६॥

पत्न्या मे [1]प्रेषितायातः सखा प्रियचिकीर्षया । प्राप्तो मामस्य दास्यामि सम्पदोऽमर्त्यदुर्लभाः ॥७॥
[2]इत्थं विचिन्त्य वसनाच्चीर[3]बद्धान्द्विजन्मनः । स्वयं जहार किमिदमिति पृथुकतण्डुलान् [4]॥८॥
[5]नन्वेतदुपनीतं मे परमप्रीणनं सखे । तर्पयन्त्यङ्ग मां विश्वमेते पृथुकतण्डुलाः ॥९॥
इति [6]मुष्टिं सकृज्जग्ध्वा द्वितीयां जग्धुमाददे । तावच्छ्रीर्जगृहे हस्तं [7]तत्परा परमेष्ठिनः ॥१०॥

---

१. पत्न्याः पतिव्रतायास्तु–श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक. । २. इति सञ्चिन्त्य मनसा चीर–गो. प्रे. टी. । ३. बद्धं–विज. । ४. बद्धं-विज. ; तण्डुलाः–त. पु. । ५. अय श्लोको नास्ति–विज. । ६. एकमुष्टि–विज. । ७. सत्वरा–वीर. विज. ।

कर्दमक्षमा

पत्न्या, प्रेषिताय, अतः, मे, प्रियचिकीर्षया, माम्, प्राप्तः, अतः, अमर्त्यदुर्लभाः, सम्पदः, अस्मै, दास्यमि ॥७॥ इत्थम्, विचिन्त्य, किम्, इदम्, इति, द्विजन्मनः, वसनात्, चीरबद्धान्, पृथुकतण्डुलान्, स्वयम्, जहार ॥८॥ सखे, नूनम्, एतत्, उपनीतम्, मे, परमप्रीणनम्, अंग, एते, पृथुकतण्डुलाः, विश्वं, माम्, तर्पयन्ति ॥९॥ एकमुष्टिम्, सकृत्, जग्ध्वा, द्वितीयाम्, जग्धुम्, आददे तावत्, श्रीः, तत्परा, परमेष्ठिनः, हस्तम्, जगृहे ॥१०॥

श्रीधरस्वामिकृता भावार्थदीपिका

अमर्त्यानां देवानामपि दुर्लभाः ॥७॥ अतिजीर्णत्वाद्वसनस्य पुनस्तन्मध्ये चीरेण बद्धान् ॥८॥ अङ्ग हे सखे ! मां विश्वं विश्वात्मानं माम् ॥९॥ इति वदन्नेकां मुष्टिं जग्ध्वा तत्परेति अयं भावः एतावता पुंस इहामुत्र च मत्कटाक्षविलासभूतानां सर्वसम्पदां समृद्धयेऽलम् अतःपरं द्वितीयमुष्ट्यदनेन मा मामेतदधीनां कुर्विति ॥१०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अस्य सख्युः ॥७॥ तन्मत्रे वस्त्रमध्ये । चीरेण वस्त्रखण्डेन । इदं चीरबद्धं किमिति द्विजन्मनो वसनात् कक्षस्थसङ्कुचितजीर्णवस्त्रात् स्वयं जहाराददौ ॥८॥ एतत्पृथुकतण्डुलरूपमन्नम् ॥९॥ तावत् द्वितीयमुष्टिग्रहणकाले । तत्परेति भगवदेकनिष्ठा । अत्राशयमाह- अयंभाव इति । एतावता एकमुष्टितण्डुलादनेन । अलं पर्याप्तम् । कक्षान्तरमाह-त्वत्तोषेति । इत्थं इति-यादृशभक्तसमृद्ध्या तव तोषो भवेत्तादृशीं त्वेकमुष्ट्यशनेनैवाहं सम्पादयिष्यामीति भावः ॥१०-११॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, तर्हि कथमधुना धनार्थमागतः तत्राह-पत्न्या इति । तत्प्रियचिकीर्षायां हेतुः पतिव्रताया इति करुणया धर्महानिभियाचेतेति भावः । अनेन सोऽपि सुष्ठु पतिसेवनार्थमेव तमेनं मद्याचनार्थं प्रेषितवतीति भावः । ननु तर्हि वदान्यान्तरं कुतो न गतः तत्राह सखेति मत्सख्येन मय्येवाऽऽगमनं योग्यमन्यत्र गमने सङ्कोचे च सति सख्यमेव न स्यादिति किञ्च सख्येन मुख्यतया मत्सन्दर्शनमेव प्रयोजनमिति भावः । अतः अस्य अस्मै दास्यामि यद्वा अस्य स्वाधीना एवेत्यर्थः । यद्वा साक्षात्तं प्रत्यदानेन केवलं तत्पत्नीप्रीत्यर्थमेव दानेन सम्बन्धमात्रापेक्षया सम्प्रदानत्वाभावादस्येति ॥७॥ इत्थमीदृशं सम्यक् चिन्तयित्वेति अदत्त्वं नोपतिष्ठत इति न्यायेन तत्सम्पत्तिसिद्ध्यर्थं स्वयं तदीयं किञ्चित् स्वीकर्तुमिति भावः । तथा च श्रीरुक्मिणी देवी वक्ष्यति । एतावताऽलमिति । इत्थं तस्य परमभक्तत्वं सञ्चिन्त्य स्वयमेव जहार बलात् गृहीतवान् कथं किमिदमित्येव वदन् स्वयं जहार बलाद्गृहीतवान् द्विजन्मन इति ब्राह्मण्येन वसनस्य पृथुकतण्डुलानामपि पावित्र्यादिकं ध्वनितम् ॥८॥ ननु, वितर्के एतदेव उपनीतं न च मन्तव्यमेतदुपायनं योग्यं न स्यादिति मम परमप्रियत्वादित्याह मे मम परमप्रीतिकरमिति तत्र हेतुः हे सखे इति सख्या त्वयानीतत्वादिति भावः । न च मन्तव्यमेतदल्पमित्यपि विश्वात्मनो मम तर्पकत्वाद्विश्वस्यापि तृप्तिं जनयितुं समर्थमित्याह-तर्पयन्तीति । अन्यत्तैः यद्वा यतो मम अतः सुतरामपि विश्वं यथा तरोर्मूलनिषेचनेनेत्यादिन्यायात् ॥९॥ यावदाददे तावदेवेत्यतित्वरां बोधयति अन्यथा भक्षिता स्यात् परमेष्ठिनः परमेश्वरस्यापि हस्तं जगृहे यतस्तत्परा ततः परमेष्ठिनस्तस्य तादृशकदन्नभोजनं सोढुमशक्तेरिति भावः ॥१०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु तर्हि कथमधुना धनार्थमागतः ? तत्राह-पत्न्या इति । तत्प्रियचिकीर्षायां हेतुः-पतिव्रतायाः इति । ननु तर्हि वदान्यान्तरं कुतो न गतः ? तत्राह-सखेति । मत्सख्येन मय्येवागमनं योग्यमिति भावः । यद्वा, ननु तथापि स्वयं तदर्थमागन्तुं नार्हति तत्राह सखेति । सख्येन ततो मत्सन्दर्शनमेव मुख्यप्रयोजनमिति । अतोऽस्य अस्मै दास्यामि यद्वा, अस्य स्वाधीना एवेत्यर्थः । यद्वा साक्षात्तं प्रत्यदानेन केवलं तत्पत्नीप्रीत्यर्थमेव दानेन सम्बन्धमात्रापेक्षया सम्-प्रदानत्वाभावादस्येति ॥७॥ इत्थमीदृशं सम्यक् चिन्तयित्वेति 'अदत्तं नोपतिष्ठते' इति न्यायेन तत्सम्पत्तिसिद्ध्यर्थं स्वयं तदीयं किंचित् स्वीकर्तुमिति भावः । तथा च श्रीरुक्मिणी देवी वक्ष्यति (११ स श्लोकः) 'एतावताऽलम्' इति यद्वा इत्थं तस्य परमभक्तत्वं संचिन्त्य स्वयमेव जहार बलाद्गृहीतवान् कथं किमिदमित्येवं वदन्निति ...वो वा । द्विजन्मन इति ब्राह्मण्येन वसनस्य पृथुकतण्डुलानामपि पावत्र्यादिकं ध्वनितम् ॥८॥ ननु

वितर्के । एतदेवोप

। तत्र हेतुः-हे स

समर्थमित्याह-तर्प

यावदाददे तावदेवे

। यद्वा, परमेष्ठिन इ

परमेष्ठित्वेन तस्य ता

जगृह इति भावः । अ

अधुना तु पि

देवानामपि दुर्लभाः सम

मह्यमेतत्पृथुकतण्डुलरूप

तर्पयन्ति तृप्तं कुर्वन्ति ॥९

सत्वरा त्वरया युक्ता परमेष्ठि

चीरं पटच्चरम् जी

तत्परा तादृशकदन्न

अत एव पुनः स्व

परमनिःस्पृहत्वमेवेत्यतोऽमर्त्यान

कक्षादाकृष्य जहार ॥८॥ विरसमेत

जग्राह मा भुङ्क्ष्वेति द्योतयामास

स्वसपत्नीभ्यः स्वकिङ्करीभ्यः स्वस

ज्ञापयामास महासौकुमार्यवतोऽस्

पतिव्रतायास्तु । अत्र तुश

पृथुकान् स्वयं जहारेत्यन्वयः । क

उपनीतम् उपायनं मे परमप्रीणनं तृप्ति

कुत्सितान्नभोजनादि सोढुमशक्तेत्यर्थ

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वितर्के। एतदेवोपनीतमुपायनत्वेनानीतं न च मन्तव्यमेतदुपायनयोग्यं न स्यादिति मम परमप्रियत्वादित्याह-मे परमप्रीतिकरमिति। तत्र हेतुः-हे सखे ! इति सख्या त्वया आनीतत्वादिति भावः । न च मन्तव्यमेतदल्पमपीति विश्वस्यापि तृप्तिं जनयितुं समर्थमित्याह-तर्पयन्तीति । अन्यत्तैर्व्याख्यातम् । यद्वा, मदंगतुल्यपरमात्मीयेत्यर्थः । मामिति किमुच्यते विश्वमपि ॥९॥ यावदाददे तावदेवेत्यतित्वरां बोधयति। अन्यथा भक्षितः स्यात्। परमेष्ठिनः परमेश्वरस्यापि हस्तं जगृहे। अतस्तत्परा तदेकाधीना। यद्वा, परमेष्ठिन इति तावन्मात्रेणैव सर्वसम्पत्सिद्धिः सूचिता । तच्च स्वयमभीव्यंजितव्यमेव अन्यत्तैर्व्याख्यातम् । यद्वा, परमेष्ठित्वेन तस्य तादृशपृथुकभक्षणायोग्यतोक्ता । किंच तत्परा सा श्रीरुक्मिण्यपि प्रेम्णा तद्भक्षणं सोढुमशक्तेति शीघ्रं हस्तं जगृह इति भावः । अन्यत्समानम् ॥१०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अधुना तु पतिव्रतायाः पत्न्याः प्रियं कर्तुमिच्छया मां प्राप्त इति कार्यचिन्ताप्रकारमेवाह-अस्येत्यादिना । अमर्त्यानां देवानामपि दुर्लभाः सम्पदः भोग्यभोगोपकरणभोगस्थानादिसमृद्धिरस्य द्विजस्य दास्यामि ॥७॥ इत्थमिति । ननु हे सखे ! मह्यमेतत्पृथुकतण्डुलरूपमुपायनमानीतमेतदेव मत्परप्रीणनं नितरां प्रीतिकृत् अङ्ग हे सखे ! एते पृथुकतण्डुलाः विश्वशरीरकं मां तर्पयन्ति तृप्तं कुर्वन्ति ॥९॥ इतीत्यनन्तरमुक्त्वेति शेषः एकं मुष्टिं जग्ध्वा द्वितीयं मुष्टिं जग्धुमाददे तावददनात्पूर्वमेव श्रीरुक्मिणी सत्वरा त्वरया युक्ता परमेष्ठिनः श्रीकृष्णस्य हस्तं जगृहे गृहीत्वा वारयती प्राहेत्यर्थः ॥१०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

चीरं पटच्चरम् जीर्णवस्त्रमित्यर्थः । इदं चीरबद्धं किमित्युक्त्वा द्विजन्मनः पृथुकदन्दुलान् स्वयमाजहार ॥८-१२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्परा तादृशकदन्नभोजनादिसोढुमशक्तेति विवक्षितम् ॥१०-११॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

अत एव पुनः स्वगतमाह-पत्न्या इति । पतिव्रताया इत्यनेन तस्या अप्येतत् प्रेमानुरोधेनैव सकामत्वं स्वतस्तु निःस्पृहत्वमेवेत्यतोऽमर्त्यानां देवानामपि दुर्लभाः ॥७॥ अतिजीर्णत्वाद्वसनस्य पुनस्तन्मध्ये चीरेण बद्धान् स्वयं स्वपाणिना आकृष्य जहार ॥८॥ विरसमेतन्मदयोग्यमिति मा मन्येथा यथो मे परमप्रीणनं नाप्यलं यतस्तर्पयन्तीत्यादि ॥९॥ जगृहे स्वपाणिना आह मा भुङ्क्ष्वेति द्योतयामास तत्र स्वस्य सख्युर्गृहादागतमिदमद्भुतं वस्तु स्वयमेव यदि सर्वं भोक्ष्यसे तदाहं स्व(जा)यातृभ्यः सपत्नीभ्यः स्वकिङ्करीभ्यः स्वस्मै च विभज्य किं दास्यामि वण्टने खल्वेकैकोऽपि पृथुको नायास्यतीति स्वाभिप्रायं श्रीदामानं ज्ञापयामास महासौकुमार्य्यवतोऽस्योदरगताः कठोरपृथुका अपकरिष्यन्तीति वास्तवं स्वाभिप्रायं स्वसखीभिर्ज्ञापयामास ॥१०॥

गूढार्थदीपिनी

पतिव्रतायास्तु । अत्र तुशब्देनारुचिः प्रकटिता ॥७॥ तव कुक्षिस्थमिदं किमिति विचिन्त्य द्विजन्मनो जीर्णवस्त्रात् पृथुकान् स्वयं जहारेत्यन्वयः । कथम्भूताद्वसनात् । चीरेण वस्त्रखण्डेन बद्धात् इति पंचम्यन्तपाठ एव साधुः ॥८॥ एतत् पृथुकात्मकम् उपायनं मे परमप्रीणनं तृप्तिकरम् । मां तर्पयन्ति । अङ्ग हे सखे ॥९॥ सकृत् एकां मुष्टिम् । जग्धुमत्तुम् । तत्परा तादृक् कदन्नभोजनादि सोढुमशक्तेत्यर्थः ॥१०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीप:

पत्न्यास्तु प्रियचिकीर्षया प्राप्त: तत्र हेतुगर्भं विशेषणं पतिव्रताया इति । सापि पतिसेवार्थं द्रविणं वाञ्छति नान्यथ अत: अमर्त्यानां देवानामपि दुर्लभा: दास्यामि ॥७-८॥ विश्वं सर्वात्मानं माम् ॥९॥ श्रीरुक्मिणी परमेष्ठिन: परमलोकवासिन: श्रीकृष्णस्य हस्तं जगृहे उवाच च ॥१०॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

साम्प्रतं च पत्न्या सम्प्रेषित: आयात: मत्समीपं सन्धिरार्ष: तर्हि क: सन्देह: इदानीं तस्या एवार्थे देयमिति चेत्तत्राह मे सखेति तथापि मम मित्रं मम च प्रयकरणार्थमागत: अत: किमेतद्धितं कर्तव्यं तस्या हितं वा भोग: किमेतद्गामी तद्गामी वा एतद्गामी चेन्न देयं तद्गामी चेद्देयमिति आद्ये अस्य भोगात्स्वरूपात् प्रच्युति: द्वितीये प्रासङ्गिको भोग इति स न नाशक: तस्या प्रासङ्गिको मोक्षोऽपि भविष्यति अत एतदर्थं पृथुकभक्षणमावश्यकम् अस्मै चेत् दानं स्यात् तदैवमेव दद्यात् न ह्यन्येभ् ब्राह्मणेभ्य: किञ्चित् गृहीत्वा प्रयच्छति अतो द्वितीयपक्षमाह-प्राप्तो मामस्य दास्यामीति । मत्प्रीत्यर्थमेव सम्प्राप्त: अस्येति सम्बन्धमात्रं न तु सम्प्रदानम् एवं विचार्य दयोत्कर्षमाह-सम्पदोऽमर्त्यदुर्लभा इति । अमर्त्यानामपि दुर्लभा: यदा भगवान् स्वयमिन्द्रोऽभूत् तदा य सम्पत्तां दत्तवानिति वाक्यान्तरादवगम्यते "श्रीदामरङ्कभक्तार्थभूम्यानीतेन्द्रवैभव:" इति अत्र चामर्त्यदुर्लभा इति अतो देवव्यतिरिक्त भगवानेवेति ॥७॥ एवं निश्चित्य वसनादाच्छादितात् तेन प्रावृतात् तत्प्रावरणं दूरीकृत्य चीरेण वस्त्रखण्डेन बद्धान् द्विजन्मन इति यदाऽयमसावधान: कर्मकरणार्थं व्यग्रो वा तदा स्वयं जहार हरणसमयवाक्यमाह-किमिदमिति ॥८॥ पश्चान्मोचयित्वा पृथुकतण्डुलान् दृष्ट्वा भगवानाह-नन्वेतदुपनीतमिति । एतदुपायनं परमप्रीतिजनकं सखित्वात् सङ्कोचाददीयमानमपि ग्राह्यं पृथुकतण्डुलान माहात्म्यमाह-तर्पयन्त्यङ्ग मां विश्वमिति । एते उपस्थिता: भक्त्या संवलिता: ॥९॥ एवं विचार्य मुष्टिमात्रं गृहीत्वा भक्षितवानित्याह-इति मुष्टिमिति सर्वमेव जग्धुं द्वितीयं मुष्टिमाददे तदा लक्ष्म्या प्रतिबन्ध: कृत इत्याह-तावच्छ्रीर्जगृहे हस्तमिति । लक्ष्मणाभिनिविष्टाप्रतिबन्धे तस्या अभिप्रायमाह-तत्परेति । सा हि भगवत्परा सर्वं चद्भक्षयिष्यति तस्मै सर्वं दास्यति ततो म दास्यति अहमेव सर्वमिति अहं तु भगवत्परेति न तत्र गमिष्यामि इति तात्पर्यं किञ्च अर्द्धेऽपि दत्ते आमुष्मिके फलं सेत्स्यतीति तस्य मर्यादा ब्रह्माण्डमेव सर्वमिति साम्प्रतं ब्रह्माण्डविग्रहो भगवानेवेति द्वितीयमुष्टावेव विघ्नं कृतवती तदाह-परमेष्ठिन इति। भगवत: पुरुषोत्तमत्वे लक्ष्म्यपि तथा जाता ॥१०॥

सुबोधिनीसार:

पतिव्रताया: पत्न्या: स्त्रिया: प्रियकरणेच्छया सखा मित्रमयं मां प्राप्तोऽतोऽस्यास्मै अमर्त्यदुर्लभा देवदुष्प्रापा: सम्प दास्यामि ॥७॥ एवं विचार्य द्विजन्मन: सुदाम्नो वसनात् वस्त्रादिकं किमिति पृथुकतण्डुलान् जहार स्वयं श्रीकृष्ण: चीरेण बद्धा ॥८॥ हे सखे ! परमप्रीणनं महत्तोषकरमेतत् मे मह्यं त्वयोपनीतम् आनीतम् । हे अङ्ग ! मां विश्वं जगत् एते पृथुकतण्डुला: तर्पयन्ति । "अनुनयामन्त्रणे ननु" इति कोश: ॥९॥ इत्येवं मुष्टिं सकृदेकवारं जग्ध्वा भक्षित्वा द्वितीयां मुष्टिं जग्धुम् आददे जग्राह यत: तावत्तत्परा तन्निष्ठा तदाश्रया वा श्रीरुक्मिणी तदंशत्वात् परमेष्ठिन: श्रीकृष्णस्य हस्तं जगृहे ॥१०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तर्हि किमर्थमागत इत्यपेक्षायामाह-पत्न्या: प्रियं कर्तुमिच्छयैव धनार्थमयं मां प्राप्त इति । अन्यान् विहाय स्वप्राप्तौ हेतुमा सखेति । पत्न्या: प्रियचिकीर्षायां हेतुमाह-पतिव्रताया: स्वभक्ताया इति । एवं ज्ञानप्रकारम् उक्त्वा कार्यचिन्तनप्रकारमाह-अमर्त्य देवानामपि दुर्लभा: सम्पदो भोगोपकरणस्थानधनादिसमृद्धीरस्य दास्यामीति ॥७॥ इत्थं सञ्चिन्त्य वस्त्रस्यातिजीर्णत्वात्तन्मध्ये ची बद्धान् पृथुकतण्डुलान् किमिदमिति पृच्छन् तद्वसनात् स्वयमेव जहार ॥८॥ एवमादरेण तानादायाह-नन्विति । निश्चितं वदामीत्य आवयोर्भेदाभावाद्वृथैव त्वया लज्यत इति सूचयन् सम्बोधयति-अंगेति । अभेदे हेतुं सूचयन् पुन: सम्बोधयति-सखे इ उपनीतमुपायनमेतत् पृथुकतण्डुलात्मकं मे मम परमप्रीणनं परमतृप्तिकरम् । एतदेव स्पष्टयति-एते पृथुकतण्डुला मां मदाश्रितं वि तर्पयन्ति तृप्तं कुर्वन्ति ॥९॥ इत्युक्त्वा सकृदेकां मुष्टिं जग्ध्वा द्वितीयां मुष्टिं जग्धुम् अत्तुमाददे । तावत्तददनात्पूर्वमेव श्रीलक्ष्म्या लक्ष्मणा परमेष्ठिन: कृष्णस्य हस्तं जगृहे । तत्परेति तदेकनिष्ठा । तथा च द्वितीयमुष्ट्यदनेन मा मां सर्वथैतदधीनां कुर्वित्याशय: ॥

पत्न्या इति
तस्या अप्येतत् प्रस
धनादिसमृद्धीरस्य दा
किमिति पृच्छन् तद्वस
मे मम परमं प्रीणनं तृ
सकृदेकां मुष्टिं जग्ध्वा
परमेष्ठिन: कृष्णस्य ह

मम सखा पत्
। द्विजन्मनो द्विजस्य व
परमप्रीणनमतिप्रसन्नताज
तत्परत्वात्तस्य तादृशशु

इत्थमिति ॥ भ
इति पृच्छन् सन् द्विजन्मन
मह्यम् एतत्पृथुकतण्डुलरू
विश्वशरीरकं मां तर्पयन्ति
इति मेदिनी । जग्धुमत्तुं य
श्रीविशेषणम् । परमेष्ठिन:
हे विश्वात्मन् ! विश्वात्मन
एकमुष्टिपृथुकतण्डुलाशनम
। सर्वसम्पत्समृद्धये सर्वसम
परं द्वितीयमुष्ट्यदनेन किं म

मेरा प्रिया सखा
के आग्रह से द्वारिका आ
करूं गा जो देवताओंके ि
लपेट करके सुरक्षित की ह
कि भैया यह क्या लाये ह
अतिशय प्रिय सामग्री ले अ
है ॥९॥ ऐसा कहकर कृपा
भरी त्यों ही श्रीरुक्मिणीजी
लिया क्योंकि श्रीलक्ष्मीजी

द्रविणं वाञ्छति नान्यथा
ष्ठिनः परमलोकवासिनः

एवार्थे देयमिति चेत्तत्राह मे
गः किमेतद्गामी तद्गामी वा
इति स न नाशकः तस्याश्च
दद्यात् न ह्यन्येभ् ब्राह्मणेभ्यः
ः अस्येति सम्बन्धमात्रं न तु
वान् स्वयमिन्द्रोऽभूत् तदा या
र्भा इति अतो देवव्यतिरिक्तेन्द्रो
खण्डेन बद्धान् द्विजन्मन इति
श्चान्मोचयित्वा पृथुकतण्डुलान्
नमपि ग्राह्यं पृथुकतण्डुलानां
मात्रं गृहीत्वा भक्षितवानित्याह-
-तावच्छ्रीर्जगृहे हस्तमिति ।
यति तस्मै सर्वं दास्यति ततो मां
आमुष्मिके फलं सेत्स्यतीति तस्य
ी तदाह-परमेष्ठिन इति । भगवतः

अमर्त्यदुर्लभा देवदुष्प्रापाः सम्पदो
जहार स्वयं श्रीकृष्णः चीरेण बद्धान्
जगत् एते पृथुकतण्डुलाः तर्पयन्ति
यां मुष्टिं जग्धुम् आददे जग्राह यावत्
।१०॥

इति । अन्यान् विहाय स्वप्राप्तौ हेतुमाह-
क्त्वा कार्यचिन्तनप्रकारमाह-अमर्त्यानां
चिन्त्य वस्त्रस्यातिजीर्णत्वात्तन्मध्ये चीरेण
दायाह-नन्विति । निश्चितं वदामीत्यर्थः।
सूचयन् पुनः सम्बोधयति-सखे इति।
-एते पृथुकतण्डुला मां मदाश्रितं विश्वं
ददे । तावत्तददनात्पूर्वमेव श्रीर्लक्ष्म्यंशभू
मा मां सर्वथैतदधीनां कुर्वित्याशयः ॥१०॥

अन्वितार्थप्रकाशिका

पत्न्या इति । अयं सखा पतिव्रतायाः पत्न्याः प्रियचिकीर्षया एव न धनार्थमयं मां प्राप्त इति । पतिव्रताया इत्यनेन तस्या अप्येतत् प्रसादानुरोधेनैव सकामत्वम् । स्वतस्तु निःस्पृहत्वमेव । अतः अमर्त्यानां देवानामपि दुर्लभाः सम्पदो धनादिसमृद्धीरस्य दास्यामीति ॥७॥ इत्थमिति । इत्थं सञ्चिन्त्य वस्त्रस्यातिजीर्णत्वात्तन्मध्ये चीरेण बद्धान् पृथुकतण्डुलान् इदं किमिति पृच्छन् तद्वसनात् स्वयमेव जहार ॥८॥ नन्विति । अङ्ग हे सखे ! ननु निश्चितम् उपनीतमुपायनमेतत् पृथुकतण्डुलात्मकं मे मम परमं प्रीणनं तृप्तिकरम् । यतः एते पृथुकतण्डुला मां मदाश्रितं विश्वं च तर्पयन्ति तृप्तं कुर्वन्ति ॥९॥ इतीति । इत्युक्त्वा सकृदेकां मुष्टिं जग्ध्वा द्वितीयां मुष्टिं जग्धुम् अत्तुमाददे । तावत्तददनात्पूर्वमेव तत्परा भगवदेकनिष्ठा श्रीर्लक्ष्म्यंशभूता रुक्मिणी परमेष्ठिनः कृष्णस्य हस्तं जगृहे ॥१०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मम सखा पत्न्याः प्रियचिकीर्षया मां प्राप्तः अमर्त्य अमरास्तेषामपि दुर्लभाः ॥७॥ चीरेण वस्त्रखण्डेन बद्धान् पृथुकतण्डुलान् द्विजन्मनो द्विजस्य वस्त्रात् किमिदमिति वदन् सन् स्वयं जहार ॥८॥ उपनीतमानीतम् । हे सखे ! हे अंग एतदुपायनम् । मे परमप्रीणनमतिप्रसन्नताजनकम् ॥९॥ जग्ध्वा भुक्त्वा जग्धुम् अत्तुं भोक्तुम् । परमेष्ठिनः परमेश्वरस्यापि हस्तं जगृहे यतस्तत्परा तत्परत्वात्तस्य तादृशशुष्कान्नभोजनं द्रष्टुमसहमानेत्यभिप्रायः ॥१०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमिति ॥ भगवान् इत्थं विचिन्त्य चीरं पटच्चरं जीर्णवस्त्रमित्यर्थः । तेन बद्धास्तान् पृथुकतण्डुलान् हे सखे ! इदं किम् इति पृच्छन् सन् द्विजन्मनो ब्राह्मणस्य वसनात् स्वयं जहार । आदायोवाचेति शेषः ॥७॥ उक्तिमेवाह-नन्विति ॥ ननु हे सखे ! मे मह्यम् एतत्पृथुकतण्डुलरूपम् उपनीतं त्वदानीतमुपायनं परमप्रीणनं मम नितरां प्रीतिकृत् अङ्ग हे सखे ! एते पृथुकतण्डुलाः विश्वं विश्वशरीरकं मां तर्पयन्ति तृप्तं कुर्वन्तीति ॥८७॥ इतीति । इति उक्त्वेति शेषः । एकां मुष्टिं सकृज्जग्ध्वा द्वितीयां मुष्टिं 'मुष्टिर्द्वयोः' इति मेदिनी । जग्धुमत्तुं यावत् आददे तावददनात्पूर्वमेवेत्यर्थः । श्रीरुक्मिणी सत्वरा त्वरया युक्ता सती तत्परेति पाठे तत्परेति श्रीविशेषणम् । परमेष्ठिनः श्रीकृष्णस्य हस्तं तण्डुलमुष्टिसहितं पाणिं जगृहे । गृहीत्वा वाक्यं प्राहेत्यर्थः ॥९॥ तदेवाह-एतावतेति ॥ हे विश्वात्मन् ! विश्वात्मना त्वया कृतेनैकमुष्टिपृथुकतण्डुलाशनेनैव कृत्स्नं विश्वं तर्पितमिति सम्बोधनाभिप्रायः । एतावता एकमुष्टिपृथुकतण्डुलाशनमात्रणैव पुंसः अस्मिन् लोके अथवा अमुष्मिन् लोके त्वत्तोषकारणं तव तोषस्य कारणं यथा भवेत्तथेत्यर्थः सर्वसम्पत्समृद्धये सर्वसम्पदां समृद्धये अलं पर्याप्तं यो भक्तः समृद्धिं दृष्ट्वा यथा त्वं तुष्येस्तथा तु सकृन्मुष्ट्यदनेन जातम् । अतः परं द्वितीयमुष्ट्यदनेन किं मामपि द्विजाधीनां कर्तुमुद्युक्तोऽसीति भावः ॥१०॥

कृष्णप्रिया

मेरा प्रिया सखा केवल पतिव्रता अपनी अर्धांगना को संतोष देने के एवं प्रसन्न करने के लिये पुनः पत्नी के आग्रह से द्वारिका आया है वह तो हृदय से भी कुछ नहीं चाहता है मैं इस ब्रह्मर्षि को ऐसी सम्पत्ति समर्पित करूं गा जो देवताओंके लिये भी सर्वथा है ॥७॥ कृपानिधि भगवान श्रीकृष्णने ऐसा निर्णय करके उसके वस्त्रमें लपेट करके सुरक्षित की हुइ वस्त्राचलमें बांधी हुई पोंहेकी पोटली को खिंचकर छीन लेकर स्वयं छीन लेकर पूछा कि भैया यह क्या लाये हो ॥८॥ पुन अत्यंत आदर एवं हर्ष से कहने लगे प्रिय सखा ? यह तो तुम मेरे लिये अतिशय प्रिय सामग्री ले आये हो । ये पोंहे न केवल मुझे लेकिन सम्पूर्ण विश्व को संतृप्त करने के लिये परिपूर्ण है ॥९॥ ऐसा कहकर कृपालु श्रीकृष्णचन्द्र उनमेंसे एक मुठ्ठी पोंहे खा गये और खाने के लिये दूसरी मुठ्ठी ज्योंही ली त्यों ही श्रीरुक्मिणीजी के रूपमें बिराजती भगवती लक्ष्मीजीने मरुवत्सल जगन्नाथ श्रीकृष्ण का हाथ पकड लिया क्योंकि श्रीलक्ष्मीजी भगवत्परायण है ॥१०॥

एतावतालं विश्वात्मन् सर्वसम्पत्समृद्धये । अस्मिल्लोकेऽतवाऽमुष्मिन्[1] पुंसस्त्वत्तोषकारणम् ॥११॥
ब्राह्मणास्तां तु रजनीमुषित्वाच्युतमन्दिरे । भुक्त्वा पीत्वा[2] सुखं मेने आत्मानं स्वर्गतं यथा ॥१२॥
श्वोभूते विश्वभावेन[3] स्वसुखेनाभिनन्दीत:[4] । जगाम स्वालयं तात[5] पथ्यनुव्रज्य नन्दित: ॥१३॥
स चालब्ध्वा धनं[6] कृष्णान्न तु याचितवान् स्वयम् । [7]स्वगृहान् व्रीडितोऽगच्छन्महद्दर्शननिर्वृत: ॥१४॥

कर्दमक्षमा

विश्वात्मन्, अस्मिन्, लोके, वा, अमुष्मिन्, लोके, सर्वसम्पत्समृद्धये, एतावता, अलम्, पुंस:, त्वत्तोषकारणम् ॥११॥ पीत्वा, आत्मानम्, यथा, स्वर्गतम्, सुखम्, मेने ॥१२॥ तात, श्व:, भूते, विश्वभावेन, स्वसुखेन, अभिनन्दित:, अनुव्रज्य, नन्दित:, स्वालयम्, जगाम ॥१३॥ स, च, धनम्, अलब्ध्वा, कृष्णात्, न, तु, स्वयम्, याचितवान्, मद्दर्शनम्, निर्वृत:, व्रीडित:, स्वगृहान्, अगच्छन् ॥१४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्वत्तोषकारणं तव तोषस्य कारणं यथा भवेत्तथा सर्वसम्पत्समृद्धये यां भक्तस्य समृद्धिं दृष्ट्वा त्वं तुष्येरित्यर्थ: ॥११॥ स्वर्गतं स्वर्गवासिनम् ॥१२॥ श्वोभूते उदिते रवौ विश्वं भावयतीति विश्वभावस्तेनेति पुरतो भाविनमिन्द्रदुर्लभं विभवं सूचयति स्वसुखेन स्वानन्दपूर्णेनेति दानेऽदीनतां दर्शयति-नन्दितो विनयोक्तिभि: ॥१३॥ व्रीडित: स्वचित्तकार्पण्येन लज्जित: महत: श्रीकृष्णस्य दर्शनेन निर्वृत: सुखं प्राप्त: ॥१४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाश:

यस्मिन् दिने गतस्तां रात्रिं तद्दिनरात्रिमित्यर्थ: । भक्ष्यं भुक्त्वा पेयं दुग्धादि पीत्वा मेने इति शेष: ॥१२॥ न हि विश्वकर्तुर्विप्रगृहेऽलौकिकसम्पत्सम्पादनं स्वानन्दतृप्तस्य च दाने दैन्याभावश्चमत्कृतिहेतुरिति भाव: ॥१३॥ स च सुदामा। लज्जितो माम् मत्प्रिया किं वदिष्यतीति सङ्कुचित: । निर्वृतोऽवाप्तानन्द: ॥१४-१५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु भवतु तस्या वस्तुत एवमभिप्राय: किमुक्त्वा जगृहे इत्यपेक्षायामाह-एतावतेति । एतावता द्वितीयमुष्टिपर्य्यन्तेन भोजनेन अलं प्रयोजनं नास्ति किमुतान्येन तेनेत्यर्थ: । कुत: पुंसो जीवमात्रस्येहामुत्र च सर्वेषां तत्प्रेमपर्य्यन्तानां पुरुषार्थानां या सम्पत् तस्या: समृद्धये वृद्धये तत्तोषरूपमेव कारणं भवति स तु पूर्वत एव विद्यते परमभक्त्युपहृतपृथुकैकमुष्टिभोजनेन तु सुतराम् अतो मदंशाभासरूपाया व्यवहारसम्पदधिष्ठातृलक्ष्म्या दृष्टिमात्रेण या सम्पत् सिद्ध्यति तस्या: सिद्ध्यर्थं मदीयपरमाश्रयस्य भवत: प्रयासेनालं किन्त्वस्य गृहे सिद्धैव सेत्यर्थ: । अतो यदि गार्हस्थ्यसम्पत्तिं सम्प्रति प्रकटं दातुमिच्छसि तदा साप्यस्य गृहे सिद्धैव तस्मादण्वप्युपाहृतं भक्तै: प्रेम्णा भूर्य्येव मे भवेदिति भवदनुभवप्रामाण्येन भोजनप्रयोजनेन तव सन्तोषे जाते तत्प्रयोजनान्तरे चास्य समृद्धिभरे जाते किं मुष्ट्यन्तरादनेनेति व्यञ्जनाभागर्थ: हे विश्वात्मन्निति तत्परितोषे युक्तैव सर्वा सिद्धिरिति भाव: एतदनन्तरं सखीभिर्विभज्य स्तोकं स्तोकं सा स्वयमपि तद्भोजनगौरवाद्भुक्तवतीति ज्ञेयं टीकायां तु तत्परेत्ययं भाव इत्यादिनैव व्याख्यातमिदं पद्यम् अयमेतावतेति पद्यार्थ एव तत्परेत्यस्याभिप्राय इत्यर्थ: । तमेव व्यञ्जयति, एतावता पुंस इत्यादिना । एतावता प्रथममुष्टिभक्षणेन सर्वसम्पत्समृद्धिं दातुम् अलं पर्य्याप्तं तस्य पूर्तिर्जातेत्यर्थ: । तामेव समृद्धिं विशिनष्टि त्वत्तोषेत्यादिना । धात्वर्थस्यैव विशेषणं न तु क्तिन्प्रत्ययान्तस्य अत: क्लीबत्वादिकम् । अलं शब्दोऽत्र धर्मपरत्वेन व्याख्यात: न तु अलमस्त्यस्य धनमित्यादि धर्मिपरत्वेन अतो हेतुत्वविवक्षया तृतीया चेति ज्ञेयम् ॥११॥ तामिति । यस्मिन् दिने गतस्तदीयामेकामेव व्याप्येत्यर्थ: । अच्युत सर्वसुखपरिपूर्णस्य भगवतो मन्दिरमिति मन्दिरस्यापि तादृशत्वमभिप्रेतम् अत: सुखं यथा स्यात्तथा भुक्त्वा सायमप्यशित्वा च स्वर्गतमिव मेन इति लोकोक्तिमात्रम् अच्युतमन्दिर इत्युक्तत्वात् किं वा स्व:शब्देन वैकुण्ठलोकोऽप्युच्यते "स्वचूडामणि

---

[1] मुस्मिन्-ह. टी. । [2] सुखं सुप्त्वा मेन आत्मावमिन्द्रवत्-विज. । [3] स्वसखेनाभि-वीर. विज. । [4] वन्दित:-श्रीधर. वंशी. जीव. विज. शुक. । [5] परिष्वङ्गाति-गो. प्रे. टी. ; [6] सख्युर्न तु -गो. प्रे. टी. वीर. विज. । [7] स्वगृहं-विज. ।

सुभगयत्तमिवात्मधिष्ण्यम्
सहेति ज्ञेयं छन्दोभङ्ग आ
स्वेषां भक्तानां सुखं यस्मा
याञ्चार्थमहमिहागत इत्यन्त
निजान्त:पुरसीमव्रजनविन
दूरे इत्यर्थ: । दत्तं तु न किञ्चि
स्वयं याचितवान् तत्र हेतु:,

उवाच च- यद्वा
सम्पदां विभूतीनां समृद्धये
भाव: । अथवेति समुच्चये ।
यस्य कारणं त्वद्भक्त्यादिक
तथाप्येकमुष्टिभक्षणं सख्येन यु
व्याप्येत्यर्थ: । अच्युतस्य सर्व
भुक्त्वा पीत्वा च स्वर्गतमिव
स्वानां सुखं यस्मात्तेनेति अभित
किंवा तादृशभगवद्व्यवहारेण
दद्यात् स्वयमपि नाऽयाचतेत्य
महद्दर्शननिर्वृत: सन्नगच्छत् । य
महदिति यद्वा, महद्दर्शननिर्वृतोऽ

तदेवाह-एतावतेति । हे वि
एकमुष्ट्यदनमात्रेणैव पुंसोऽस्मिन्
द्विजाधीनां कर्तुमधुक्ष इति भाव: ।
अच्युतस्य मन्दिरे भुक्त्वा पीत्वा तां
श्वोभूते उदिते रवौ विश्वं भावयत्यभ्यु
तथा हे तात ! तेन पथ्यनुव्रज्यानुगम्य
स्वयं व्रीडित: कार्पण्येन लज्जित: न
भगवतो दर्शनेनैव निर्वृत: सुखित: स्

अनुव्रज्य अनुगम्य नन्दित:

स्वर्गतमिव मेन इति लोको

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सुभगयत्तमिवात्मधिष्ण्यम्" इति द्वितीयोक्तेः यथा यथावत् द्वारकायास्तन्नित्यत्वेन परमवैकुण्ठत्वात् पाठान्तरे सुप्त्वा च श्रीभगवतैव महेति ज्ञेयं छन्दोभङ्ग आनन्दादार्षः ॥१२॥ ततः किं वृत्तमित्यपेक्षायामाह-श्व इति। यतो विश्वेषां भावनः पालकः ततः सुतरां स्वेषां भक्तानां सुखं यस्मात् तथाभूतः तेन प्रातरुत्थायाभिवन्दित इति युक्तमेव ब्रह्मण्यत्वादिगुणयुक्तत्वमिति भावः। ततश्च धिक् याञ्चार्थमहमिहागत इत्यन्तःसङ्कोचेनैव श्रीबलदेवमप्यमिलित्वा शीघ्रं च स्वालयं प्रति जगाम प्रस्थितवान् ततश्च यथा यथावत् आ निजान्तःपुरसीमव्रजनविनयोक्तिपरिक्रमनमस्कारसाञ्जलितन्मुखवीक्षणादि नीतियुक्तं यथा स्यात्तथाऽनुव्रज्य नन्दितः पथीति पाठे दूर इत्यर्थः। दत्तं तु न किञ्चिदपीति कौतुकेन सम्बोधयति हे तातेति ॥१३॥ सख्युः सकाशाद्धनमलब्ध्वापि स्वगृहानेवागच्छत् न तु स्वयं याचितवान् तत्र हेतुः, व्रीडित इति। महद्दर्शननिर्वृत इति च ॥१४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उवाच च- यद्वा कथं जगृहे-तदाह। एतावतेति। एकमुष्टिभक्षणेनैव पुंसस्त्वद्भकस्य पुंमात्रस्यैव वा सर्वासामेव सम्पदां विभूतीनां समृद्धये विवृद्धये अलं पर्याप्तं तत्परिपूर्णताऽभूदित्यर्थः। कुतः ? हे विश्वस्य आत्मन् ईश्वर! त्वत्प्रभावादिति भावः। अथवेति समुच्चये। अन्यत्तैर्व्याख्यातम्। यद्वा, एतावता द्वितीयमुष्टिभक्षणेनालं प्रयोजनं नास्तीत्यर्थः। कुतः ? त्वत्तोषस्य कारणं त्वद्भक्त्यादिकमेव सर्वसम्पत्समृद्धये भवति। अतोऽस्य भक्तिरेव लोकद्वये सर्वसम्पदः सम्पादयिष्यति। तथाप्येकमुष्टिभक्षणं सख्येन युक्तमेव अन्येन तु न किंचित् प्रयोजनमिति भावः ॥११॥ तामिति। यस्मिन् दिने गतस्तदीयामेकामेव वायेत्यर्थः। अच्युतस्य सर्वसुखपरिपूर्णस्य भगवतो मन्दिरमिति मन्दिरस्यापि तादृशत्वमभिप्रेतम्। अतः सुखं यथा स्यात्तथा भुक्त्वा पीत्वा च स्वर्गतमिव मेने। किंवा यथा यथावत् पाठान्तरे सुप्त्वा च छन्दोभंग आर्षः ॥१२॥ विश्वभावेनेत्यत्र हेतुः- स्वानां सुखं यस्मात्तेनेति अभितः पादस्पर्शादिना वन्दित इति च धनाद्यदानं बोधयत्येव केवलादरमात्रात् हे तातेति महाकौतुकात् किंवा तादृशभगवद्व्यवहारेण प्रेमोद्रेकात्। सख्युः सकाशाद्धनमलब्ध्वापि स्वयमिति श्रीभगवान् वा केनापि कौतुकेन न ददात् स्वयमपि नाऽयाचतेत्यर्थः। तत्रापि हेतुः-सख्युरित्येव। श्रीभगवति धनयाचनायोग्यत्वादिति भावः। व्रीडितोऽपि महद्दर्शननिर्वृतः सन्नगच्छत्। यद्वा, अयाचने हेतुः-व्रीडित इति लज्जयेत्यर्थः। अलब्ध्वापि स्वयमेवागच्छत्। तत्र हेतुः- महदिति यद्वा, महद्दर्शननिर्वृतोऽपि व्रीडितः सन्नगच्छत्। धनार्थमागतोऽपि तदलाभात् ॥१४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह-एतावतेति। हे विश्वात्मन्! विश्वात्मना त्वयैकमुष्ट्यदनेनैव कृत्स्नं विश्वं तर्पितमिति सम्बोधनाभिप्रायः एतावता एकमुष्ट्यदनमात्रेणैव पुंसोऽस्मिन् अमुष्मिन् वा लोके सर्वसम्पदां समृद्धयेऽलं पर्याप्तम् इतःपरं द्वितीयमुष्ट्यदनेन किं मामपि देवार्थानां कर्तुमधुङ्क्ष इति भावः। तव तोषस्य कारणं यथा भवेत्तथा सर्वसम्पत्समृद्धये इति सम्बन्धः ॥११॥ ब्राह्मण इति। अच्युतस्य मन्दिरे भुक्त्वा पीत्वा तां रात्रिं सुखं यथा तथोषित्वा चात्मानं स्वर्गसङ्गतं स्वर्गवासिनम् इव अमन्यतेत्यर्थः ॥१२॥ ततः प्रभूते उदिते रवौ विश्वं भावयत्यभ्युदययुक्तं करोतीति तथा तेन स्वसुखेन श्रीकृष्णेनाभिनन्दितः अभिनन्दनपूर्वकमनुज्ञात इत्यर्थः। यथा हे तात! तेन पथ्यनुव्रज्यानुगम्य विन्दतश्च स्वालयं स्वगृहं प्रति जगाम ॥१३॥ स चेति। स ब्राह्मणः सख्युस्सकाशाद्धनमलब्ध्वा स्वयं व्रीडितः कार्पण्येन लज्जितः न याचितवान् भगवानयाचितो न ददौ स्वयं तु न याचित्वापि लब्धवानित्यर्थः। किन्तु महतो भगवतो दर्शनेनैव निर्वृतः सुखितः स्वगृहान् प्रति जगाम ॥१४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अनुव्रज्य अनुगम्य नन्दितः कृष्णेनेति शेषः ॥१३॥ महतः कृष्णस्य दर्शनेन निर्वृतः ॥१४-१५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स्वर्गतमिव मेन इति लोकोक्तिमात्रम्। वस्तुतस्तु स्वशब्देन वैकुण्ठोऽप्युच्यते यथा यथावत् ॥१२-२७॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वप्रेयांसं प्रति तु स्वाभिप्रायं ज्ञापयन्ती मनसैवाह-एतावता तु भुक्तेनैवालम् एतावतैव तृप्तो भव अतः परं न भोक्तव्यमिति भावः । हे विश्वात्मन् ! तव तृप्तौ विश्वमेव तृप्तं भवेदिति भावः । ननु स्वप्रियसखायास्मै महासम्पत्तीर्दातुम् अन्यदपि भोक्तव्यं तत्राह-अस्मिन् लोके अमुष्मिन् वा लोके पुंसः सर्वसम्पत्समृद्ध्यर्थं त्वत्तोष एव कारणं भवति विसर्जनीयलोप आर्षः । तस्मादलं विरसकठोरपृथुलपृथुकचर्वणेनेति भावः । एषा रुक्मिण्यास्स्वगतोक्तिरेव न तु स्पष्टोक्तिः तथा चेदर्थावगमे सत्यधनोऽयं धनं प्राप्येत्यग्रिमवाक्यं श्रीदाम्नो न सम्भवेदिति विवेचनीयम् ॥११॥ स्वर्गतं यथा स्वर्गतमिव ॥१२॥ श्वोभूते परदिने विश्वमेव भावयति सङ्कल्पमात्रेण सृजतीति विश्वभावस्तेन तस्मात्तादृशविचित्रमहासम्पन्मयसुदामपुरसृष्टौ तस्य कः प्रयास इति भावः । स्वसुखेन स्वानन्दपूर्णेनेति तस्य तादृशविषयानन्दमात्रदाने च कः प्रयत्न इति भावः । यथा यथोचितम् ॥१३-१४॥

गूढार्थदीपिनी

तव तोषस्य कारणं सर्वसम्पत्समृद्धये एतावतैव एकमुष्टिप्रदानेनैव अलं पर्याप्तं नातः परं किञ्चिदपेक्ष्यते । इह लोके परलोके च द्वितीयया मामपि एतदधीनां करिष्यति किम् ? ॥११॥ मन्दिरे राजभवने लक्ष्यं भुक्त्वा पेयं दुग्धादि पीत्वा स्वर्गवासिनम् इव सुखिनं मेने । इति लोकोक्तिमात्रं न हि नश्वरसुखेनास्य साम्यं विवक्षितम् ॥१२॥ श्वोभूते आगामिदिने सूर्योदये हे तात इति शुकोक्तिः भगवता विश्वभावेन सर्वप्रकारेण पथि अनुव्रज्य पृष्ठतो गत्वा नन्दितः (पुनः आगन्तव्यमिति विनयेन ।) सन्तोषितः अभिवन्दितश्च स जगामेत्यन्वयः । स्वसुखेन आनन्दरूपेण भगवता ॥१३॥ व्रीडितः कार्पण्येन महतः श्रीकृष्णस्य दर्शनेन निर्वृतः आनन्दितः ॥१४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एतावतेति । हे विश्वात्मन् ! एतावता एकमुष्ट्यदनेनैव पुंसोऽमुष्य अस्मिन् अमुष्मिन् वा लोके सर्वसम्पत्समृद्धये अलं पर्याप्तम् । ननु स्वभक्ताय ऐहिकामुष्मिकसुखसाधनभूतसम्पत्समृद्धिमात्रं दत्त्वा नाहं तुष्यामि किन्तु मोक्षं दत्त्वा तुष्यामि तदर्थं द्वितीयमुष्ट्यदनं करिष्येऽत आह-त्वत्तोषस्य कारणं त्वद्भावापत्तिरूपमोक्षसुखं तदपि एतावतैव भविष्यतीति शेषः अतोऽवशिष्टान् पृथुकतण्डुलान् मह्यं देहीति भावः । एं सत्यस्य श्रीपतिभावापत्तिर्भविष्यतीति गूढो भावः । एकमुष्ट्यदनमात्रे पतिव्रतामनोरथपूर्त्यर्थं सम्पत्समृद्धिः विप्रमनोरथपूर्त्यर्थं च मुक्तिर्भविष्यतीति भावः ॥११॥ तां रजनीमच्युतमन्दिरे सुखं यथा भवति तथोषित्वा स्वर्गवासिनमात्मानं मेने अमन्यत ॥१२॥ श्वोभूते उदिते रवौ विश्वं भावयत्युत्पादयतीति तथा तेन अनेन पुरुष भाविनः अन्यदुर्लभो विभवः सूच्यते स्वसुखेन स्वं सुखं यस्मात्तेन मोक्षप्रदेन अनेन भाविमोक्षसुखमपि सूच्यते अभिवन्दित अभिवन्दनपूर्वकमनुज्ञातः नन्दितो विनयोक्तिभिः ॥१३॥ स द्विजाग्र्यःमहतः वेदाविर्भावस्थानभूतस्य "एतस्यैव महतो भूतस्य निःश्वसितं यदृग्वेदः" इत्युक्तेः स्वेप्सितेन निर्वृतः सुखितः-दास्यति द्रविणमिति पत्नीकामितं न लब्धं धनं येन सः पत्नीं किं वक्ष्यतीति स्वगृहान् व्रीडितोऽगच्छत् जगाम ॥१४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्र ब्रह्माण्डविग्रहस्यैव सम्बन्धिनीति सुदाम्न एव तथात्वे पुनरनिष्टं स्यात्तस्याः फलमात्रप्रतिबन्धकत्वशङ्कया स्वाभिप्रायं निरूपयति । एतावताऽलमिति । एतस्यै दित्सितमल्पं मुष्टिमात्रस्यापि बहुदानसम्भवात् अत उक्तमेतावतेति अ एतावदलमित वदेत् न च वक्तव्यं सर्वमेव दास्यामीति यस्त्वं विश्वात्मा अन्येभ्यः किं दास्यसि अन्ये च तवावश्यका इ सर्वाः याः धनादिसम्पदः तासां समृद्धये ननु मुष्टिमात्रेणऐहिकी सर्वा सम्पत् सिद्ध्येत् न त्वामुष्मिकी तत्राह अस्मिन् लोके अमुष्मिन्निति लोकद्वये न तस्य भोगापेक्षा उत्तमाधिकारात् किञ्चित् क्वचित् भोगापेक्षा तदिह लोके परलोके वा भवतु तत्र मुष्टिः प्रयोजकः समुच्चयस्तु न तस्यापि सम्मत इति । ननु मुष्टिमात्रेण कथं सर्वा सम्पत्तिस्तदाह-त्वत्तोषकारणमिति । एकमु

तः परं न भोक्तव्यमिति
तुम् अन्यदपि भोक्तव्यं
लोप आर्षः। तस्मादलं
वगमे सत्यधनोऽयं धनं
रदिने विश्वमेव भावयति
इति भावः। स्वसुखेन

किञ्चिदपेक्ष्यते। इह लोके
त्वा पेयं दुग्धादि पीत्वा
२॥ श्वोभूते आगामिदिने
तः (पुनः आगन्तव्यमिति
व्रीडितः कार्पण्येन महतः

ा लोके सर्वसम्पत्समृद्धये
किन्तु मोक्षं दत्त्वा तुष्यामि
वतैव भविष्यतीति शेषः।
भावः। एकमुष्ट्यदनमात्रेण
जनीमच्युतमन्दिरे सुखं यथा
यतीति तथा तेन अनेन पुरतो
खमपि सूच्यते अभिवन्दितः
स्य "एतस्यैव महतो भूतस्य
लब्धं धनं येन सः पत्नी किं

नमात्रप्रतिबन्धकत्वशङ्कायां सा
त् अत उक्तमेतावतेति अन्यथा
अन्ये च तवावश्यका इत्यर्थः।
की तत्राह अस्मिन् लोके अथवा
परलोके वा भवतु तत्र एक एव
त्तोषकारणमिति। एकमुष्टिभक्षणे

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

प्रयत्न आरब्धः सम्पूर्णगिलनपर्यन्तमनुवर्तते तावता तद्रसेन तृप्यति मुष्ट्यन्तरे पुनः प्रयत्नः प्रारम्भणीयः तेन च प्रीतिरन्या पुनर्भविष्यति फलं च देयमेकम् अतस्तव सन्तोषो द्वितीय एवमेव तिष्ठेदिति द्वितीयो नोत्पादनीय एवेत्यर्थः ॥११॥ एवं भगवल्लक्ष्म्योः संवादमुक्त्वा एवं फलं भविष्यतीति विनिर्धार्य ब्राह्मणस्य तत्फलप्राप्त्यर्थं स्वगृहगमनं वदन् भगवत्सन्निधौ तस्य स्वाभिलषितमानन्दमाह–ब्राह्मणस्तान्तु रजनीमिति। अच्युतमन्दिरे उषित्वा तत्रैव वासं कृत्वा भुक्त्वा पीत्वा नानाविधरसानि अमृतादीन्यपि अलौकिकभोगसमर्थो भूत्वा मेने आत्मानं स्वर्गतं वर्गत एव अमृतपानादिकं प्राप्नोति भगवत्पूजार्थं किञ्चिदाभरणं वस्त्रादिकं गां च दत्तवानिति लक्ष्यते यावता सुवेषेण गृहं गच्छति ॥१२॥ ततः प्रातःकाले ततो निर्गत इत्याह–श्वोभूत इति। समक्षादाने हेतुः, विश्वभावेनेति। विश्वस्मिन्नेवानुभावो यस्य यत्रैव गमिष्यति तत्रैव सर्वाविर्भावे सम्भवति किमर्थमितो नयनं सख्यमेव पुरस्कृतमिति सखा बहु न ददाति गच्छामीत्युक्ते अभिनन्दितः गन्तव्यमिति ततः स्वालयं गतः भगवान् पुनः पथि अकान्तभागस्य नन्दितः सन्तोषं प्रापितः ॥१३॥ मध्ये तस्य भार्याभयाच्चिन्तां जातामाह–स चालब्ध्वेति स्वतो भगवता न दत्तमिति धनं चालब्ध्वा स्वयं न याचितवान् सख्युः सकाशात् तत् उभयथापि लज्जितः स्वगृहान् गच्छन् महद्दर्शनेन निर्वतः सुखित एव जातो न तु धनाभावेन दुःखितो जात इत्यर्थः ॥१४॥

श्रीसुबोधिनीसारः

आह च हे विश्वात्मन्! अस्मिन् लोकेऽमुष्मिन् परलोके वा तव तोषकारणं यथा भवति तथा पुंसः सर्वसम्पदां समृद्धये एतावतालं पर्याप्तम् ॥११॥ अच्युतस्य मन्दिरे सुखं यथा भवति तथा भुक्त्वा भोजनं कृत्वा पीत्वा पेयं ब्राह्मण आत्मानं स्वर्गतं स्वर्गवासिनमिव मेने तां रात्रिमुषित्वा ॥१२॥ श्वोभूते प्रभाते स्वसुखेन स्वानन्दपूर्णेन विश्वभावेन जगत्पालकेन श्रीकृष्णेनाभिनन्दितः सुसत्कृतः पथि मार्गेऽनुव्रज्य पृष्ठतो गमनं कृत्वा नन्दितः प्रशंसितः सुदामा स्वालयं स्वस्थानं ययौ हे राजन्! ॥१३॥ कृष्णाद्धनमलब्ध्वा न प्राप्य स्वयं स सुदामा न तु याचितवान्। व्रीडितः स्वदारिद्र्येण लज्जितः महतः श्रीकृष्णस्य दर्शनेन निर्वृतः आनन्दितः स्वगृहानायात् ॥१४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतदेव स्पष्टयन्त्याह–एतावतेति। हे विश्वात्मन्! त्वत्तोषयस्य कारणं यथा भवति तथा पुंसस्त्वद्भक्तस्यास्मिन् अथवामुष्मिन् लोके सर्वासां सम्पदां समृद्धये एतावता एकमुष्ट्यदनमात्रेणैवालमित्यन्वयः ॥११॥ ब्राह्मणस्तु अच्युतस्य मन्दिरे स्वाद्वन्नं भुक्त्वा स्वादु पेयं च पीत्वा सुखं यथा स्यात्तथा तां रात्रिमुषित्वा चात्मानं स्वर्गतं स्वर्गवासिनमिव मेने ॥१२॥ ततः श्वोभूते सूर्ये उदिते सति विश्वं भावयति अभ्युदययुक्तं करोतीति विश्वभावस्तेन। अनेन प्रत्यक्षतः किञ्चिददानेऽपि परोक्षमेव बहु दत्तवानिति सूचयति स्वसुखेन आनन्दमूर्तिना परमानन्दं तु प्रत्यक्षतः स्वरूपेणैव दर्शनस्पर्शनादिना दत्तवानिति सूचितम्। श्रीकृष्णेन पथ्यनुव्रज्य अनुगम्य गन्तव्यं पुनः कृपया शीघ्रमागन्तव्यमिति विनयोक्त्या नन्दितोऽभिवन्दितश्च स्वालयं स्वगृहं प्रति जगाम ॥१३॥ स च ब्राह्मणः कृष्णाद्धनमलब्ध्वापि स्वयं व्रीडितः कार्पण्येन लज्जितः न याचितवान्। किन्तु महतो भगवतो दर्शनेनैव निर्वृतः आनन्दितः स्वगृहान् प्रति आगच्छत् ॥१४॥

अन्वितार्थप्रकाशिका

एतावतेति। हे विश्वात्मन्! त्वत्तोषयस्य कारणं यथा भवति तथा पुंसस्त्वद्भक्तस्यास्मिन् अथवामुष्मिन् लोके सर्वासां सम्पदां समृद्धये यां भक्तसमृद्धिं दृष्ट्वा त्वं तुष्यसि तत एतावता एकमुष्ट्यदनमात्रेणैवालम्। अत्र महाकठोराः पृथुका भगवन्तं व्यथयिष्यन्तीति देव्याः स्वगताभिप्रायः। स्वयमेव सर्वं भोक्ष्यसे तदाहं तव सख्युरुपायनात् स्वसखीभ्यः पुत्रादिभ्यश्च विभज्य किं दास्यामीति श्रीदामानं ज्ञापयामास। श्रीस्वामिपादास्तु प्राहुः। एतावता पुंस इहामुत्र च मत्कटाक्षविलासभूतानां समृद्धये अलम्। अतः परं द्वितीयमुष्ट्यदनेन मामपि तदधीनां मा कुरु इति। यद्वा। सर्वसम्पत्समृद्ध्यर्थं त्वत्तोष एव कारणम्। विसर्गलोपस्त्वार्षः ॥११॥ ब्राह्मण इति। ब्राह्मणस्तु अच्युतस्य मन्दिरे स्वाद्वन्नं भुक्त्वा स्वादु पेयं च पीत्वा सुखं यथा स्यात्तथा तां रात्रिमुषित्वा आत्मानं स्वर्गतं स्वर्गवासिनमिव मेने ॥१२॥ श्व इति। हे तात! ततः श्वोभूते सूर्ये उदिते सति विश्वभावेन सर्वप्रकारेण स्वसुखेन

अन्वितार्थप्रकाशिका

परमानन्देन भगवता पथ्यनुव्रज्य अनुगम्य गन्तव्यं पुनः कृपया शीघ्रमागन्तव्यमिति विनयोक्त्या नन्दितोऽभिवन्दितश्च स्वाल स्वगृहं प्रति जगाम ॥१३॥ स इति । स च ब्राह्मणः कृष्णाद्धनमलब्ध्वापि स्वयं व्रीडितः कार्पण्येन लज्जितो न याचितवान् । कि महतो भगवतो दर्शनेनैव निर्वृतः आनन्दितः स्वगृहान् प्रति आगच्छत् ॥१४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वपतेर्हस्तं गृहीत्वा रुक्मिण्याह-एतावतेति । अस्मिन् लोके परलोके च । सर्वासां सम्पदां समृद्धये सम्पादन एतावता एकमुष्ट्यदननेनालं पूर्णत्वमस्ति यतः पुंसः सर्वार्थसिद्धेः त्वत्तोष एव कारणमस्ति ॥११॥ अन्नं भुक्त्वा जलं प स्वर्गतं स्वर्गं गतम् आत्मानं स्वं यथा तथा स द्विजः सुखं मेने ॥१२॥ श्वोभूते द्वितीये दिवसे सति विश्वभावेन विश्वोत्पाद स्वस्मिन्नेव सुखं यस्य तेन श्रीकृष्णेनाभिवन्दितः । पथि मार्गे अनुव्रज्य श्रीकृष्णप्रोक्तविनयवचनस्मरणेन नन्दित आनन्दं ॥१३॥ व्रीडितः सन् स्वयं तु न याचितवान् महतः श्रीहरेः दर्शनेन निर्वृत्तः सुखं प्राप्तः सन् । अगच्छज्जगाम ॥१४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ब्राह्मण इति । ब्राह्मणः तु अच्युतमन्दिरे श्रीकृष्णागारे भुक्त्वा पीत्वा तां रजनीं सुखं यथा तथा सुप्त्वा उषित आत्मानं स्वर्गतं स्वर्गं प्राप्तं यथा तथा मेने स्वर्गवासिनमिवामन्यतेत्यर्थः ॥११॥ श्वोभूत इति ॥ ततः स द्विजः श्वोभूते स्वकु सतीत्यर्थः । विश्वं भावयत्यभ्युदययुक्तं करोतीति विश्वभावस्तेन अनेन पुरतो भावीन्द्रदुर्लभविभवप्रदत्वं सूचितम् । स्वसु स्वानन्दपूर्णेन अनेनादीनता दर्शिता । तेन भगवता अभिनन्दितोऽभिनन्दनपूर्वकमनुज्ञात इत्यर्थः । ततः हे तात ! पथि अनुव्रज्यानु वन्दितश्च सन् स्वालयं स्वगृहं प्रति जगाम ॥१२॥ स चेति ॥ स च स ब्राह्मणोऽपि कृष्णात् स्वसख्युः श्रीकृष्णात् धनम् अल व्रीडितः स्वचित्तकार्पण्येन संजातलज्जः सन् स्वयं न तु याचितवान् । स्वयं हे भगवन् ! मह्यं दरिद्राय किञ्चिद्देहीति याचनं । तथा च भगवानपि तदयाचितः सन् प्रत्यक्षं किचिन्मात्रं न ददौ तथापि भगवद्दोषमगृहीत्वा वर्तमान इति भावः । महतो भग यद्दर्शनं तेनैव निर्वृतः सुखितः सन् स्वगृहान् प्रति अगच्छन् ॥१३॥ तन्निर्वृत्तिमेवाह चतुर्भिः । अहो इति । ब्रह्मणि स ब्रह्मण्यास्तेषु देवो देववत्पूज्यस्तस्य भगवतः ब्रह्मण्यता मया दृष्टा । अहो अत्याश्चर्यरूपा । का सा तत्राह । उरसि वक्षसि ल बिभ्रता भगवता दरिद्रतमः अपि अहम् आश्लिष्यः इति यत् इयम् ॥१४॥

कृष्णप्रिया

श्रीरुक्मिणीजी देवीने कहा है वश्वात्मन् ! अलम अलम् बस बस नाथ ! नाथ ! आपने कृपासे जो मुट्ठी पोंहे आरोगे वह मानवको इस लोकमें और परलोकमें भी समग्र सम्पत्तियोंकी समृद्धि प्राप्त करने के इतना ही परिपूर्ण है । क्योंकि आपके इतने ही पोंहे लिये प्रसन्नता का हेतु बन जाता है ॥११॥ महाराज पुण्यात्मा महर्षि उस रात्री को भगवान श्रीकृष्ण के मन्दिरमें ही रहे । ब्रह्मनिष्ठ ऋषिने अत्यंत आनन्द और वहां ही प्रसाद भोजनादि किया भगवान के परिवार के प्यारसे उनको ऐसा अनुभव हुआ कि मान लीजि वह वैकुंठमें ही पहुंच गया है ॥१२॥ विश्व भावना से जिसका प्रताप-महिमा सर्वत्र विश्वमें जागरुक है और के सारे वैभव सुख व्यापक बन चुके है वैसे भगवान से विदाय मांगी तब भगवानने स्नेह संकोचवश अनु दिया और कुछ दूर तक भगवान साथ पधारे और ब्रह्मर्षिजी को संतुष्ट करके निजमंदिर आये लेकिन श्रीकृ को कुछ न दिया ॥१३॥ सुदामाजी ने साक्षात् याचना नही करी इसी कारण-श्रीकृष्ण ते धन को नही प्रा निजगृह को चला गया ॥१४॥

अहो ब्रह्मण्य
क्वाहं दरिद्रः प
[1]निवासितः श्री
शुश्रूषया पर

अहो, बह्मण्यदेवस
दरिद्रः, पापीयान्, क्व श्रीनिवे
यथा, निवासितः, बालव्यजन
देववत्, पूजितः ॥१८॥

पापीयान्नीचः ॥१६

दरिद्रस्यातिपापफल
बन्धुर्दायादोऽयमिति स्मृत्वेत्य
भारः' इति सौभरिः । भ्रातर इ
छन्दसो वान्यथा दृष्टान्तवैषम्यं

यद्यप्यहो इत्यादिभिः स
स्पष्टार्थं पृथगेवाङ्कयित्वा व्या
जीवविशेषस्तावत्क? कृष्णस्तु स
स्वभावतस्तत्सम्पत्तिमान् तत्तच्छी

तत्र तत्र च स तु ब्रह्मब
परिरम्भे विप्रत्वमेव कारमुक्तं न तु स
॥१६॥ न केवलं परिरब्ध एव श्रि
परमादरस्नेहाभ्यामेवेति सूचयति भ्रात
जातश्रम इति करुणां च दर्शयति ॥
कीदृशेन देवानामाराध्येन विप्राणाम

मार्गे श्रीभगवन्माहात्म्यानुस्म
अहो इति षड्भिः । अहो आश्चर्ये दृ
लक्ष्मीं बिभ्रतेति च तस्य पारमे
विरोधमेवातिविस्मयेनाभिव्यंजयन् उ
कृष्णत्वपापीयस्त्वयोस्तथा दारिद्र्यश्री
परिरब्धः स्म विस्मये । एवं परिरम्भे वि

---

[1]. निवेशितः-वीर. । २. श्रिया जुष्टे-इति

नन्दितोऽभिवन्दितश्च स्वालयं
लज्जितो न याचितवान्। किन्तु

सम्पदां समृद्धये सम्पादनाय।
११॥ अन्नं भुक्त्वा जलं पीत्वा
सति विश्वभावेन विश्वोत्पादकेन
नस्मरणेन नन्दित आनन्दं प्राप्तः
च्छज्जगाम ॥१४॥

वं यथा तथा सुप्त्वा उषित्वा च
ततः स द्विजः श्वोभूते रवावुदिते
भवप्रदत्वं सूचितम्। स्वसुखेन
तः हे तात ! पथि अनुव्रज्यानुगम्य
ख्युः श्रीकृष्णात् धनम् अलब्ध्वा
रिद्राय किञ्चिद्देहीति याचनां नाकृत
र्तमान इति भावः। महतो भगवतो
ः। अहो इति। ब्रह्मणि साधवो
सा तत्राह। उरसि वक्षसि लक्ष्मी

नाथ ! आपने कृपासे जो एक
की समृद्धि प्राप्त करने के लिये
जाता है ॥११॥ महाराज ! वह
षिने अत्यंत आनन्द और आराम
भव हुआ कि मान लीजिये कि
विश्वमें जागरुक है और भगवान
ानने स्नेह संकोचवश अनुमोदन
मंदिर आये लेकिन श्रीसुदामाजी
कृष्ण ते धन को नही प्राप्त भया

अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया। यद्दरिद्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि ॥१५॥
क्वाहं दरिद्रः पापीयान् क्व कृष्णः श्रीनिकेतनः। ब्रह्मबन्धुरिति स्माहं बाहुभ्यां परिरम्भितः ॥१६॥
[1]निवासितः [2]प्रियाजुष्टे पर्यङ्के भ्रातरो यथा। महिष्या वीजितः श्रान्तो वालव्यजनहस्तया ॥१७॥
शुश्रूषया परमया पादसंवाहनादिभिः। पूजितो देवदेवेन विप्रदेवेन देववत् ॥१८॥

कर्दमक्षमा

अहो, बह्मण्यदेवस्य, मया, ब्रह्मण्यता, दृष्टा, यत्, उरसि, लक्ष्मीम्, बिभ्रता, दरिद्रतमः, आश्लिष्टः ॥१५॥ क्व अहम्, दरिद्रः, पापीयान्, क्व श्रीनिकेतनः, कृष्णः, अहम्, ब्रह्मबन्धुः, इति, स्म, बाहुभ्याम्, परिरम्भितः ॥१६॥ प्रियाजुष्टे, पर्यङ्के, भ्रातरः, यथा, निवासितः, बालव्यजनहस्तया, महिष्या, श्रान्तः, वीजितः ॥१७॥ विप्रदेवेन, देवदेवेन, पादसंवाहनादिभिः, परमया, शुश्रूषया, देववत्, पूजितः ॥१८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पापीयान्नीचः ॥१६-१७॥ पूजितश्चन्दनलेपनादिभिः ॥१८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दरिद्रस्यातिपापफलत्वात्पापीयानिति। नीचः नीचवत्परिहार्यः। 'दरिद्रोऽनादृतः क्वचित्' इत्युक्तेः। ब्रह्मबन्धुर्ब्राह्मणानां बन्धुर्दायादोऽयमिति स्मृत्वेत्यर्थः ॥१६॥ भ्रा-व्यावहारिकभारस्तीर्यतेऽनेति भ्रातरः। 'ऋदोरप्' इत्यप्। 'भ्राता भ्रा ब्रह्मा प्रकटो भ्राः' इति सौभरिः। भ्रातर इत्यदन्तोऽपि भ्रातृवाचकशब्दो व्याकरणार्णवनिष्पन्नो ज्ञेयः। 'यान्युज्जहार' इति भीमसेनोक्तेः। अदसो वान्यथा दृष्टान्तवैषम्यं स्यात्। एकत्वबहुत्वयोरसम्बन्धात् ॥१७-१८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यद्यप्यहो इत्यादिभिः सार्धैरष्टभिः कुलकं स्यात् इति तच्चिन्तयन्नित्यनेन तदनुषङ्गाद्विचित्रेत्यादिसार्धेन चान्वयात् तथापि स्पष्टार्थं पृथगेवाङ्कयित्वा व्याख्यायते अहो आश्चर्य्ये लक्ष्मीं पीतरेखारूपाम् ॥१५॥ पूर्वार्थमेव विशदयति-क्वेति। अहं जीवविशेषस्तावत्क्व? कृष्णस्तु स्वयं भगवान् क्व? तत्राप्यहं दरिद्रो धनादिहीनः पापीयांश्च तद्भाग्यहीनः क्व? स तु श्रीनिकेतनः स्वभावतस्तत्सम्पत्तिमान् तत्तच्छक्तिमांश्च क्वेत्यर्थः।

तत्र तत्र च स तु ब्रह्मबन्धुः विप्रकुले जात इति मात्राद्धेतोर्बाहुभ्यां द्वाभ्यामेव परिरम्भितः परिरब्धः स्म विस्मये एवं परिरम्भे विप्रत्वमेव कारमुक्तं न तु सख्यं तत्रात्मनोऽतीवायोग्यत्वमननात् अतो भगवतो ब्रह्मण्यतैव श्लाघिता न तु भक्तवत्सलताऽपीति ॥१६॥ न केवलं परिरब्ध एव श्रिया रुक्मिण्या जुष्टे सदा भगवता सहाधिष्ठिते पर्य्यङ्के निवासितश्च प्रियेति क्वचित्पाठः तच्च समादरस्नेहाभ्यामेवेति सूचयति भ्रातरोऽनुजाः श्रीगदादयो यथेति किञ्च महिष्येति वालव्यजनं चामरं वीजने हेतुः श्रान्तः दूरागमनादिना जातश्रम इति करुणां च दर्शयति ॥१७॥ किञ्च शुश्रूषयेति। पादसंवाहनादिभिः या शुश्रूषा सेवा तया पूजितः सत्कृतः स्वयं तु ईदृशेन देवानामाराध्येन विप्राणामप्याराध्येन क इव देववत् इष्टदेव इव ॥१८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मार्गे श्रीभगवन्माहात्म्यानुस्मरणेन च भावविशेषोत्पत्त्या परमनिर्वृत एवाभूत्। न च किंचिद्दुःखीति बोधयंस्तच्चिन्तामाह-अहो इति षड्भिः। अहो आश्चर्ये दृष्टा साक्षादनुभूता दरिद्रतम इत्यवश्यापेक्ष-परिधेययोरप्यभावेनात्मनो महादारिद्र्यम् उरसि लक्ष्मीं बिभ्रतेति च तस्य पारमैश्वर्यम्। एवं महाविरोधेनाश्लेषायोग्यत्वंच महदुक्तं तथाप्याश्लिष्टः ॥१५॥ विरोधमेवातिविस्मयेनाभिव्यंजयन् उक्तपोषण्यायेना ब्रह्मण्यतामेवाह-क्वेति। पापीयान् दुर्भगः कृष्णः साक्षाद्भगवान् एवं कृष्णत्वपापीयस्त्वयोस्तथा दारिद्र्यश्रीनिकेतनत्वयोर्विरोधः तथापि ब्रह्मबन्धुर्विप्रकुलजात इति बाहुभ्यां द्वाभ्यामेव परिरम्भितः परिरब्धः स्म विस्मये। एवं परिरम्भे विप्रत्वमेव कारणमुक्तं न तु सख्यम्। तत्रात्मनोऽतीवायोग्यत्वमननात्, अतो भगवतो

---

[1] निवेशितः-वीर.। [2]. श्रिया जुष्टे-इति पाठः।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ब्रह्मण्यतैव श्लाघिता न तु भक्तवत्सलतापीति ॥१६॥ न केवलं परिरब्ध एव श्रिया श्रीरुक्मिण्या जुष्टे सेव्ये पूर्वं श्रीभगवता सहाधिष्ठिते वा पर्यङ्के निवेशितश्च तच्च परमस्नेहेनैवेति सूचयति । भ्रातरो यथेति बहुत्वं श्रीगदाद्यपेक्षया किंवा गौरवादेव ततश्चाग्रज इति पूर्ववज्ज्ञेयम् । किंच महिष्येति बालव्यजनं चामरं वीजने हेतुः-श्रान्तो दूरगमनादिना जातश्रमः ॥१७॥ किंच शुश्रूषयेति भक्त्या आदि-शब्दात् पूर्वोक्तं पादप्रक्षालनं दिव्यगन्धाद्यनुलेपनादिकं च देवानां देवेन पूज्येनापि किंच विप्राणां देवेनापि देववत् इष्टदेवतावत् पूजितः । पूजितश्चन्दनालेपनादिभिरिति तेषां व्याख्ययाऽत्र (व्याख्यामत्र-ग) पाठान्तरमनुसन्धेयम् । किंवा, सा टीकैव केनचिन्मन्दबुद्धिना कल्पितेति ज्ञेयम्-पूजने पादसंवाहनादीनामेव करणत्ववृते: यद्वा, आदृत इति लेख्ये पूजित इति लेखकभ्रमात् ॥१८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

निर्वृतिमेवाह-अहो इति चतुर्भिः । ब्रह्मण्यदेवस्य ब्राह्मणश्रेष्ठस्य ब्रह्मण्यता ब्रह्मकुले साधुता दृष्टा काऽसौ उरसि वक्षसि लक्ष्मीं बिभ्रता भगवता अहं दरिद्रोऽप्याश्लिष्ट आलिङ्गितः इति यदेषा ॥१५॥ अयमलभ्यलाभ इत्याह-क्वाहमिति। पापीयानपि अथापि ब्रह्मबन्धुरयमित्यभिप्रेत्य बाहुभ्यामालिङ्गितः ॥१६॥ किञ्च श्रिया लक्ष्म्यवताररूपया रुक्मिण्या जुष्टे सेविते पर्यङ्के अ निवासितः यथा भ्रातरस्तद्वत् किञ्चाऽध्वनि श्रान्तोऽहं वालव्यजनं हस्ते यस्यास्तया महिष्या भार्यया वीजितश्च ॥१७॥ किञ्च शुश्रूषयेति । पादसंवाहनपादपीडनमादिर्येषाम् आदिशब्देन चन्दनलेपादिसङ्ग्रहः देवानां देवेन तथापि सौशील्यातिशयेन विप्राणां देवन कर्त्रा देववदहं पूजितः ॥१८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अहं ब्राह्मणानां विप्राणां बन्धुरिति स्मृत्वा ॥१६॥ भ्रातरो यथा भ्रातरमिति शेषः ॥१७-१८॥ दिवि आकाशे ॥१९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१२-२७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निर्वृतिमेवाह-अहो इति चतुर्भिः । यत् यतो लक्ष्मीम् उरसि बिभ्रता तेनाहमाश्लिष्टः ॥१५॥ इतिरप्यर्थे ॥१६-१९॥

गूढार्थदीपिनी

यत् यस्मात् दरिद्रतमोऽपि अहं भगवता आश्लिष्टः आलिङ्गितः । कथम्भूतेन उरसि लक्ष्मीं बिभ्रता ॥१५॥ इतिरप्यर्थे स्मत्याश्चर्ये। बन्धुधर्मोऽपि ॥१६॥ जुष्टे सेविते पर्यङ्के निवासितः उपवेशितः । यथा भ्रातरः । एकवचनान्तम् । भ्रा भारः तीयतेऽनेन भ्रातरः । रुदोरप् । इत्यप्प्रत्ययः । भ्राता भ्रा प्रकटो भार इति सौभरिः । भ्रातर इत्यदन्तोऽपि । शङ्करप्रोक्तव्याकरणार्णवग्रन्थे वंशीधरी ॥१७॥ संवाहनं पादसम्मर्दनम् ॥१८॥

श्रीपच्छुकदेवकृतः सिद्धान्तप्रदीपः

निर्वृतिं दर्शयन् भगवतो गुणान् संस्मृत्य वर्णयति-अहो इति चतुर्भिः ॥१५-१८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततस्तस्य मनोरथो यथा जातस्तमाह अहो ब्रह्मण्यदेवस्येति षड्भिः । धर्मिणा तु सिद्ध एवार्थः धर्मैः कृत्वा सन्तो ब्रह्मण्यदेवोऽपि अवसरविशेषे ब्राह्मणस्य हितं करोति अस्य तु अनवसरेऽपि तथा करणादाश्चर्यं मयैव ब्रह्मण्यता दृष्टा यद्दरिद्रतम इति । लक्ष्मीमुरसि बिभ्रता भगवता दरिद्रतमः द्रष्टुमप्ययोग्योऽहम् आश्लिष्टः ॥१५॥ एतदेव विशदयति-क्वाहं

इति । अत एव पापीया
नास्ति अतुल्यत्वात् तर्हि
भावः स्वयं विष्णुरिति तु
भवति न त्वन्यस्तत्रोपवे
अदृष्टार्थतां निवारयति श्र
परमयेति । पादसंवाहनमे
तेषामपि देवो भगवान् तेन
यस्येति देववदित्यणुमात्र

अहो ! ब्रह्मण्य
महादरिद्रोऽहमाश्लिष्ट आ

'दरिद्रभावाच्च क

अहं क्वास्मि श्री
प्रियया लक्ष्म्या रुक्मिण्या
यस्यास्तया महिष्या राज्ञ्या
यस्य तेन पूजितः देव इव

आनन्दपूर्णस्य वा
फलप्रदस्य कृष्णस्याहो आ
बिभ्रताऽपि तेनाहं दरिद्रतमोऽ
दारिद्र्यानुमित पापातिशयवा
परिरम्भितः ॥१६॥ किंच प्रि
यतोऽध्वनि श्रान्त इति । त
चन्दनलेपनादीनां तैः परमया
कथमन्यं पूजयेत् इत्याशंक्य ज

अहो इति । ब्रह्मण्यदे
दृष्टा । यत् यतः उरसि लक्ष्मीं
दारिद्र्यानुमित पापातिशयवान् अ
परिरम्भितः ॥१६॥ निवासित इ
वालव्यजनहस्तया महिष्या वीजि
देवेनापि विप्रदेवेन ब्राह्मणशुश्रूषके

सुखप्राप्तिं दर्शयति अहो इ

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

इति। अत एव पापीयान् दारिद्र्यव्याप्तदेहः दारिद्र्येण वा अनुमितपापवान् कुत्र वा भगवान् श्रीनिकेतनः अतः सखित्वसम्भावनापि नास्ति अतुल्यत्वात् तर्हि कथमालिङ्गनं कृतवानित्यत आह-ब्रह्मबन्धुरिति। स्मेति प्रसिद्धे ब्राह्मणो माननीय इति ॥१६॥ स हि ब्रह्मणो भावः स्वयं विष्णुरिति तुल्यतया आलिङ्गनं सर्वभोगदानं च कृतवानित्याह-निवासितः प्रियाजुष्टे पर्यङ्के इति। स्वस्थाने स्वयमेव योग्यो भवति न त्वन्यस्तत्रोपवेशनीयः तत्राह-भ्रातरो यथेति। अनेनानौचित्यमेव परिहृतम् उपचारास्तु कृता एवेत्याह-महिष्या वीजित इति। अदृष्टार्थतां निवारयति श्रान्त इति। वालव्यजनहस्तेति राजोपचारः ॥१७॥ ततो भगवतापि ब्राह्मण इति पूजित इत्याह-शुश्रूषया परमयेति। पादसंवाहनमेवादिर्येषामिति ते उपचाराश्चतुष्षष्टिः नृत्यगीताद्याः ननु किमाधिक्यमेतावता तत्राह-देवदेवेनेति। देवाः पूज्याः तेषामपि देवो भगवान् तेनापि पूजितश्चेत् किमवशिष्यते। ननु भगवान् हीनभावं किमित्यवलम्बते तत्राह-विप्रदेवेनेति। विप्रा एव देवा यस्येति देववदित्यणुमात्रमि स्वव्यापारः तत्र निवारितः स्नानादिकमपि भगवतैव कारितमिति ज्ञापितम् ॥१८॥

श्री सुबोधिनीसारः

अहो ! ब्रह्मण्यदेवस्य ब्रह्मण्यता मया दृष्टा यत् यस्मात् लक्ष्मीमुरसि वक्षसि बिभ्रता धारयता हरिणा दरिद्रतमो महादरिद्रोऽहमाश्लिष्ट आलिंगितः ॥१५॥ दरिद्रः ततः पापीयान् अतिपापी

'दरिद्रभावाच्च करोति पापं पुनर्दरिद्रः पुनरेव पापः।' इत्युक्तेः।

अहं क्वास्मि श्रीनिकेतनो लक्ष्मीनिवासः कृष्णः क्वास्ति। ब्रह्मबन्धुरयमिति हेतोर्बाहुभ्यामहं परिष्वक्तः ॥१६॥ प्रियया लक्ष्म्या रूपिण्या रुक्मिण्या जुष्टे सेविते पर्यङ्के शय्यायां भ्रातर इवारोपितः। बालानां चमरीकेशानां व्यजनं हस्ते यस्यास्तया महिष्या राज्या श्रान्तोऽहं वीजितोऽस्मि ॥१७॥ श्रेष्ठया सेवया पादसंवाहनमादिर्येषां तैः देवानां देवेन विप्रा देवा यस्य तेन पूजितः देव इव मनुष्येण ॥१८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आनन्दपूर्णस्य वाक्यान्याह-अहो इति चतुर्भिः। ब्रह्मण्यदेवस्य ब्रह्मकुले साधवस्तदाराधका ब्रह्मण्यास्तेषां देवस्य फलप्रदस्य कृष्णस्याहो आश्चर्यजनिका ब्रह्मण्यता ब्राह्मणकुले साधुता मया दृष्टा। कासौ तत्राह-यत् यतः उरसि लक्ष्मीं बिभ्रताऽपि तेनाहं दरिद्रतमोऽपि आश्लिष्ट आलिङ्गित इति ॥१५॥ मया अलभ्यं लब्धम् इत्याशयेनाह-क्वेति। दरिद्रः पापीयान् दारिद्र्यानुमित पापातिशयवान् अहं क्व श्रीनिकेतनः लक्ष्म्याश्रयः कृष्णश्च क्व ? तथाप्ययं ब्रह्मबन्धुरिति मत्वा तेन बाहुभ्यां परिरम्भितः ॥१६॥ किंच प्रियया जुष्टे सेविते पर्यङ्केऽहं निवासितः उपवेशितः तथा वालव्यजनहस्तया भार्यया वीजितश्च यतोऽध्वनि श्रान्त इति। तत्राप्यादरातिशयं द्योतयन् दृष्टान्तमाह-यथा भ्रातरस्तथेति ॥१७॥ किंच पादसंवाहनमादिर्येषां चन्दनलेपनादीनां तैः परमया शुश्रूषया देवा ब्रह्मादयस्तेषामपि देवेन पूज्येन कृष्णेन देववदहं पूजितः। ननु देवदेवश्चेत् कथमन्यं पूजयेत् इत्याशंक्य जनशिक्षार्थम् इत्याशयेनाह-विप्रदेवेनेति ॥१८॥

अन्वितार्थप्रकाशिका

अहो इति। ब्रह्मण्यदेवस्य ब्राह्मणभक्तानां फलप्रदस्य कृष्णस्याहो आश्चर्यजनिका ब्रह्मण्यता ब्राह्मणकुले साधुता मया दृष्टा। यत् यतः उरसि लक्ष्मीं बिभ्रताऽपि तेनाहं दरिद्रतमोऽपि आश्लिष्ट आलिङ्गित इति ॥१५॥ क्वेति। दरिद्रः पापीयान् दारिद्र्यानुमित पापातिशयवान् अहं क्व। श्रीनिकेतनः लक्ष्म्याश्रयः कृष्णश्च क्व। तथाप्ययं ब्रह्मबन्धुरिति मत्वा तेन बाहुभ्यां परिरम्भितः ॥१६॥ निवासित इति। अध्वनि श्रान्तोऽहं भ्रातरो यथा प्रियया जुष्टे सेविते पर्यङ्केऽहं निवासिति उपवेशितः तथा वालव्यजनहस्तया महिष्या वीजितश्च ॥१७॥ शुश्रूष्येति। पादसंवाहनमादिर्येषां चन्दनलेपनादीनां तैः परमया शुश्रूषया देवानां देवेनापि विप्रदेवेन ब्राह्मणशुश्रूषकेण कृष्णेन देववदहं पूजितः ॥१८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सुखप्राप्तिं दर्शयति अहो इति श्लोकचतुष्केन। यद्यतः उरसि लक्ष्मीं बिभ्रता हरिणा दरिद्रतमोऽप्यहम् आश्लिष्ट आलिङ्गितः ॥१५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ब्रह्मबन्धुर्ब्राह्मणजातीयोऽयम् इति ज्ञात्वा तेन बाहुभ्याम् अहं परिरम्भितः आलिङ्गितः । स्म विस्मये ॥१६-१७॥ पादसंवाहनादिभिः पादमर्दनादिभिः । आदिशब्देन चन्दनलेपादिभिश्च पूजितः सत्कृतः अर्चितश्च ॥१८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अयं तु ममात्यन्तलाभ इत्यर्थः । क्वाहमिति । पापीयानतिनीचः अथापि अयं ब्रह्मबन्धुः ब्राह्मणः सन् मम सखा इत्यभिप्रेत्य अहं स्म सर्वजनसमक्षं यथा स्यात्तथेत्यर्थः । बाहुभ्यां परिरम्भितः । क्रोडीकृत्यालिङ्गितः । अतः दरिद्रः अहं क्व । श्रीनिकेतनः कृष्णः क्व । अस्यैवंविधतयाचरणं परमेश्वरत्वादन्यथा न घटत इति भावः ॥१५॥ निवासित इति । किञ्च श्रिय लक्ष्म्यवताररूपया रुक्मिण्या जुष्टः सेवतस्तस्मिन् पर्यङ्के अहं भ्रातरः यथा भ्रातरमिति शेषः । तथा निवासितः । किञ्च । अध्वनि श्रान्तः अहं बालव्यजनं हस्ते यस्यास्तया महिष्या भार्यया वीजितश्च ॥१६॥ शुश्रूषयेति । किञ्च पादसंवाहनमादिर्येषां चन्दनलेपादीनां तैः करणैः परमया सर्वोत्तमया शुश्रूषया करणेन च देवानां ब्रह्मादीनां देवस्तेन विप्राणां देवस्तेन भगवता कर्त्रा देववत् अहं पूजितः ॥१७॥ इत्थं सम्पूज्यापि धनस्याप्रदाने कारणं कल्पयति स्वर्गेति द्वाभ्याम् । स्वर्गेति । यद्यपि पुंसां रसायां पाताले भुवि च वर्तमानानामिति शेषः । सर्वासां सम्पदां सिद्धीनां सर्वासामणिमानदिसिद्धीनामपि स्वर्गापवर्गयोः स्वर्गमोक्षयोश्च मूलं कारणं तस्य कृष्णस्य चरणौ तयोरर्चनं पूजनमेव ॥१८॥

कृष्णप्रिया

विदा होने के अनन्तर सुदामाजी यह चिन्तवन करने लगे कि ब्राह्मणों के भक्तन के इष्टदेव श्रीकृष्णका अत्यन्त आश्चयर्य कारी ब्राह्मण कुल में भक्तपनो मेने देखा क्योंकि जिस वक्षस्थल में लक्ष्मी जी को धारण करते हैं उसी वक्षस्थल में श्रीकृष्ण ने अत्यन्त दरिद्री मेरा आलिंगन किया ॥१५॥ कहां दरिद्री पापी में और श्रीनिवास श्रीकृष्ण कहां इस पर भी यह सुदामा अधम ब्राह्मण है ऐसा मानिकर श्रीकृष्ण ने दोनो भुजान सें मेरा आलिंगन किया ॥१६॥ जैसें भ्राताना को अपने पलिंग पर निवास कराते हैं । तैसें ही मार्ग में परिश्रम को प्राप्त मेरा प्यारी रुक्मिणी जी के सेवित पलिंग पर निवास करा और वालव्यजन से पटरानी ने मेरी हवा करी ॥१७॥ देवनके देव ब्राह्मण देव श्रीकृष्ण मे पादसं वाहनसे आदि लेकर परम पूजा करके इष्टदेव के सदृश मेरा पूजन किया ॥१८॥

स्वर्गापवर्गयोः पुंसां रसायां भुवि सम्पदाम् । सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम् ॥१९॥
[1]अधनोऽयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् । इति कारुणिको नूनं धनं मेऽभूरि नाददात् ॥२०॥
इति [2]तच्चीन्तयन्नन्तः प्राप्तो निजगृहान्तिकम् । सूर्यानलेन्दुसङ्काशैर्विमानैः सर्वतो वृतम् ॥२१॥
विचित्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः[3] । प्रोत्फुल्लकुमुदाम्भोजकह्लारोत्पलवारिभिः ॥२२॥

कर्दमक्षमा

पुंसाम्, स्वर्गापवर्गयोः, रसायां, भुवि, सम्पदाम्, सर्वासाम्, अपि, सिद्धीनाम्, मूलम्, तच्चरणार्चनम् ॥१९॥ अधनः, अयम्, मे, धनम्, प्राप्य, उच्चैः, माद्यन्, माम्, न, स्मरेत्, इति, कारुणिकः, नूनम्, भूरि, धनम्, न, अददत् ॥२०॥ इति, अन्तः, चिन्तयन्, सूर्यानलेन्दुसंकाशैः, विमानैः, सर्वतो, वृतम्, निजगृहान्तिकम्, प्राप्तः ॥२१॥ कूजद्द्विजकुलाकुलैः, विचित्रोपवनोद्यानैः, प्रोत्फुल्लकुमुदाम्भोजकह्लारोत्पलवारिभिः, स्वलङ्कृतैः, पुम्भिः, हरिणाक्षिभिः, स्त्रीभिः, किम्, इदम्, कस्य, वा, स्थानम्, कथम्, तद्, इदम्, अभूत् ॥२२-२३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं सम्पूज्यापि धनस्यादाने कारणं कल्पयति एवं सम्पूज्यापि धनस्यादाने कारणं कल्पयति-स्वर्गापवर्गयोरिति द्वा

---

१. अधनो यद्धनं-विज. । २. इति तच्चिन्तयनगात्यां-वीर. ; इति तच्चत्तगत्यान्तः-विज. सञ्चिन्तयन्विप्रः-च. पु. टी. । ३. समकुलै-

---

स्कं. १० उ. अ. ८१

स्वर्गादीनां यद्यपि तस्
चिन्तयन्निजगृहस्यान्ति
पक्षिसमूहैराकुलैर्व्याप्तैः

तच्चरणार्चनं
हये पोते प्रासादे सप्तभूमि

स्वर्गेति युग्मकम्
च मूलमिति तद्विना सुष्ठ्व
भावः । चरणार्चनमिति च
प्रसक्तत्वात् वक्ष्यते च मयो
धनप्राप्तिकरणं चान्तर्निगूढ
स्थानमपश्यदिति शेषः ॥२१
शङ्कया न तु मुखे जल्पन् वि
श्वेतम् उत्पलं नीलम् अम्भोजं
एकशेषात्पुंस्त्वं समासान्ताभ
तादृशं तद्रूपादिकं च सर्वं दि
स्वभर्तृसङ्गतः श्रीभगवत्प्रभाव

पुंसां साध्यो यः स्वर्ग
याः सम्पदः सम्पत्तयस्तासां तत्र
उच्चैरतिशयेन माद्यन् धनमदेन
इति ॥२०॥ इत्येवं तत् श्रीभ
सूर्यादितुल्यैर्विमानैस्तत्सदृशैर्दिव्य
परमदिव्यत्वमुक्तम् । तथा च बृहत्
भेदः अम्भोजं कमलं कह्लारं सौग

इत्थं सम्पूज्यापि धनस्य
सर्वासां सिद्धीनामणिमादीनां च स्वर्ग
गुणगर्भमिदम् अतो निर्धनो मादृशो
॥२०॥ इतीति, विचित्रेति । कूजतां
कुमुदादीनि येषु तानि वारीणि येषु तै

पादसंवाहनादिभिः

णः सन् मम सखा
तः दरिद्रः अहं क्व।
न इति। किञ्च श्रिया
तः। किञ्च। अध्वनि
दिर्येषां चन्दनलेपादीनां
र्ता देववत् अहं पूजितः
सायां पाताले भुवि वा
यियोश्च मूलं कारणं तस्य

के इष्टदेव श्रीकृष्णका
ती जी को धारण करते
ापी में और श्रीनिवास
ुजान से मेरा आलिंगन
म को प्राप्त मेरा प्यारी
वा करी ॥१७॥ देवनके
मेरा पूजन किया ॥१८॥

तच्चरणार्चनम् ॥१९॥
ऽभूरि नाददात् ॥२०॥
: सर्वतो वृतम् ॥२१॥
रोत्पलवारिभिः ॥२२॥

च्चरणार्चनम् ॥१९॥ अधनः,
नम्, न, अददत् ॥२०॥ इति,
॥२१॥ कूजद्द्विजकुलाकुलैः,
क्षिभिः, स्त्रीभिः, किम्, इदम्,

यति-स्वर्गापवर्गयोरिति द्वाभ्याम्।

-च. पु. टी.। ३. समकुलैः-वीर।

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वर्गादीनां यद्यपि तस्य चरणार्चनमेव कारणं तथापि कारुणिकत्वादभूर्यपि स्वल्पमपि धनं मह्यं नाददात् ॥१९-२०॥ इत्येवं चिन्तयन्निजगृहस्यान्तिकं तत्प्रशान्तं तस्य विशेषणं सूर्येति ॥२१॥ विचित्रोपवनादिभिर्वृतं कथम्भूतैः कूजद्भिर्द्विजकुलैः पक्षिसमूहैराकुलैर्व्याप्तैः तथा प्रोत्फुल्लानि कुमुदादीनि येषु तानि वारीणि येषु तानि तथा तैः ॥२२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तच्चरणार्चनं कृष्णांघ्रिपूजनम् ॥१९॥ अभूर्यपि स्वल्पमपि ॥२०॥ तस्य गृहस्य। विमानैः सप्तभूमिप्रासादैः 'विमानोऽस्त्री हये पोते प्रासादे सप्तभूमिके। व्योमयाने सार्वभौमगृहे मानविवर्जिते ॥' इति निरुक्ति ॥२१-२२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वर्गेति युग्मकम्। पुंसां साध्यो यः स्वर्गोऽपवर्गश्च संसारदुःखध्वंसः तयोः (रथा)रसायां भुवि च याः सम्पदो विभूतयस्तासां च मूलमिति तद्विना सुष्ठ्वनुष्ठितेऽपि साधनान्तरे विघ्नापातात् वस्तुविचारे निश्छिद्रत्वार्थप्रयुक्ततत्रत्यतत्स्मरणस्यैव साधकतमत्वादिति भावः। चरणार्चनमिति चरणशब्दसाहित्यं भक्तिमात्रव्यञ्जनाय कृतं यथाकथञ्चिदर्चनमात्रे तु तात्पर्य्यं किन्तु तथापि मैवं ज्ञेयं प्रसक्तत्वात् वक्ष्यते च मयोपनीतं पृथुकैकमुष्टिमिति ॥१९-२०॥ इति तच्चिन्तयन्निति सार्धद्वयम्। इति एवं तत् श्रीभगवन्माहात्म्यं धनाप्राप्तिकरणं चान्तर्निगूढतया चिन्तयन् तत्र च दिव्यरत्नमयतया तेजसा सूर्यादितुल्यैर्विमानैस्तत्सदृशैर्दिव्यगृहैस्सर्वतो वृतं स्थानमपश्यदिति शेषः ॥२१॥ अनेन प्रकारेण तत् श्रीकृष्णकारुण्यम् अन्तश्चिन्तयन् निजरहस्यमिदं कुतोऽपि कोऽपि न शृणुयादिति सूक्ष्मं न तु मुखे जल्पन् विमानैस्तत्सदृशैर्गृहभेदैः तथा बृहत्सहस्रनामस्तोत्रे "श्रीदामरङ्कभक्तार्थभूम्यानीतेन्द्रवैभवः" इति कुमुदं रक्तम् उत्पलं नीलम् अम्भोजं कमलं कह्लारं सौगन्धिकं पुम्भिर्दासादिभिः स्त्रीभिर्दास्यादिभिः हरिणाक्षिभिरित्युभयेषां युगपद्विशेषणत्वेन स्त्रीयोगात्पुंस्त्वं समासान्ताभाव आर्षत्वादनित्यवद्वा अत्रैवं ज्ञेयं तस्य विप्रस्य द्वारकावासरात्रौ स्वगृहे सुप्तायां पत्न्यां तत्स्थानं रूपं तद्रूपादिकं च सर्वं दिव्यमभूत् पश्चात्प्रातः प्रबुद्धया तया तद्दर्शनात् सुविस्मितया सत्या स्वविचारेण तत्रत्यदास्यादिद्वारा च स्वभर्तृसङ्गतः श्रीभगवत्प्रभावासिद्धं ज्ञातं ततश्च स्वपत्यागमनापेक्षया तद्वर्त्मनि स्थाने स्थाने लोका नियुक्ता इति ॥२२-२३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पुंसां साध्यो यः स्वर्गोपवर्गश्च संसारदुःखध्वंसस्तयोः तथा रसायां भुवि च याः सम्पदो विभूतयस्तासां च यद्वा, स्वर्गादिषु याः सम्पदः सम्पत्तयस्तासां तत्रापवर्गे सम्पद आत्मारामत्वादयो मूलमिति तदाश्रितस्यात्मनस्तत्प्राप्तियोग्यत्वमपि सूचितम् ॥१९॥ सर्वातिशयेन माद्यन् धनमदेन मत्तो भवन् इत्यस्माद्धेतोः नूनं वितर्के तच्च मद्धितार्थमेव तस्य सहजकारुण्यादित्याह-कारुणिक इति ॥२०॥ इत्येवं तत् श्रीभगवन्माहात्म्यं धनाप्राप्तिकारणं चान्तर्निगूढतया चिन्तयन् तत्र च दिव्यरत्नमयतया तेजसा सूर्यादितुल्यैर्विमानैस्तत्सदृशैर्दिव्यगृहैः सर्वतो वृतं स्थानमपश्यदिति शेषः। अनेन विचित्र-प्रशब्दसुशब्दैश्च हरिणाक्षिभिरित्यनेनापि सर्वदिव्यत्वमुक्तम्। तथा च बृहत्सहस्रनामस्तोत्रे 'श्रीदामरंकभक्तार्थं भूम्यानीतेन्द्रवैभव' इति ॥२१॥ कुमुदोत्पलयोश्च रक्तनीलवर्णभेदेन भेदः अम्भोजं कमलं कह्लारं सौगन्धिकम् ॥२२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थं सम्पूज्यापि धनस्यादाने कारणं कल्पयति-स्वर्गापवर्गयोरिति द्वाभ्याम्। यद्यपि रसायां पाताले भुवि च सम्पदां तासां सिद्धीनामणिमादीनां च स्वर्गापवर्गयोः स्वर्गमोक्षयोश्च कारणं तस्य भगवतश्चरणार्चनमेव ॥१९॥ तथाप्ययं भगवान् कारुणिकः धर्मिदम् अतो निर्धनो मादृशो धनं लब्ध्वा नितरां माद्यन् गर्वितो मां न स्मरेदित्यभिप्रेत्य मे मह्यं भूरि बहुधनं नाददात् न ददौ ॥२०॥ इतीति, विचित्रेति। कूजतां द्विजानां पक्षिणां कुलानि तैराकुलैर्व्याप्तैर्विचित्रैरुपवनैरुद्यानैश्च वृतं तथाप्रोत्फुल्लानि (कुमुदानि) कुमुदादीनि येषु तानि वारीणि येषु तैः सरोभिरिति विशेष्यमध्याहर्यं जुष्टं युक्तमित्यर्थः ॥२२॥

श्रीमद्विजयध्वजकृता पदरत्नावली

दिवि आकाशे ॥१९॥ माद्यन् मदं गच्छन् ॥२०॥ अन्तर्हृदय इति तस्मिन् कृष्णे स्थितचित्तगत्या स्वगृहान्तिकं प्राप्तः ॥२१-

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१२-२७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अभूर्यपि धनं नादात् यद्वा यन्मह्यं नादात्तदेव मे भूरि धनं यद्वा नु निश्चितम् ऊनम् अल्पधनं न अदात् अपि तु भू
॥२०॥ तत्तदा निजगृहस्यान्तिकं विशिनष्टि-सूर्येत्यादिभिः ॥२१-२२॥

गूढार्थदीपिनी

स्वर्गादीनां सर्वासां सिद्धीनां च मूलं कारणं तच्चरणार्चनमेव । रसायां पाताले ॥१९॥ माद्यन् उन्मत्तः सन् न स्मरे
तु ततो भ्रश्येदित्यभिप्रेत्य अभूरि स्वल्पमपि नाददात् यद्वा न अददात् तदेव भूरि नु निश्चितम् ऊनमल्पम् न अपि तु भूरि
ज्ञानादिति वा ॥२०॥ इतीति सार्धयुग्मम् । इति अन्तर्हृदि चिन्तयन् निजगृहस्य अन्तिकं प्राप्त इत्यन्वयः । कथम्भूतम् । सूर्यादिस
सदृशैः विमानैः सप्तभूमिकप्रासादैः वृतम् । तथा विचित्रोपवनादिभिश्च वृतम् । कथम्भूतैः । कूजद्भिः द्विजकुलैः पक्षिभिः आ
व्याप्तैः । तथा प्रोत्फुल्लानि कुमुदादीनि येषु तानि वारीणि येषु तैः सरोभिः इति विशेष्यमध्याहार्यम् । पुम्भिः स्त्रीभिश्च
हरिणेति (हरिणानामिव अक्षीणि यासां ताभिरित्युभयविशेषणत्वान्न समासान्त इति तोषिणी । वस्तुतस्तु 'पुमान् स्त्रिया' इत्
पुंसः शेषात् हरिणाक्षैरिति भाव्यम् ।) ॥२१-२२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वसुखमूलं भगवच्चरणार्चनमस्ति तत्र विघ्नकरं धनं मह्यं न दत्तवान् इत्याह-स्वर्गेति द्वाभ्याम् ॥१९-२०॥ निजगृह
परितः कीदृशं विमानैरावृतम् ॥२१॥ चित्रोपवनादिभिश्चावृतं कूजद्भिर्द्विजसमूहैराकुलैर्व्याप्तैः प्रोत्फुल्लानि कुमुदादीनि येषु
वारीणि येषु तैर्जलाशयैरिति विशेष्यपदाध्याहारः ॥२२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भगवन्तं स्तुत्वा धनादानात् अन्यथा वचनं प्राप्नोति तन्निराकरणार्थं हेत्वन्तरमेवात्र स्थापयति-स्वर्गापवर्गयो
पञ्चधा हि फलं जगति प्रसिद्धं लोकत्रयसुखं मोक्षः अणिमादिसिद्धयश्चेति । तेषामेव हरेः पादसेवनं कारणं पुंसां सर्वेषामेव
कस्यचिदपि देवतान्तरोपासकस्य हेत्वन्तरमस्तीति मूलं मुख्यकारणम् । नन्विदानीं चरणसेवार्थं गतः तदा कथं न दत्तवान्
चरणसेवा न कृतेति चेदानीं चरणसेवा कृतेति तस्याः कारणं तयैव न स्यात् ॥१९॥ तत्राह-अधनोऽयं धनं प्राप्येति धनेनावश्
भवेत् मदेन च विस्मृतात्मा मां सुतरामेव न स्मरेत् ततः स्मरणाभावे सर्वनाश इति कारुणिको भगवान् मे भूरि धनं नादद
तु दत्तवानिति सूचितम् ॥२०॥ उपसंहरन्नग्रिममाह-इति तच्चिन्तयन्निति । तत् प्रमेयं चिन्तयन् निजगृहस्यान्तिकं प्राप्तः
दृष्टवानित्याह-एतादृशैर्मनोऽभिलषितसुखावहैः सर्वतो व्याप्तम् ॥२१॥ ततः परितः शोभामाह-विचित्रोपवनोद्यानैरिति ।
फलप्रदानम् उद्यानं पुष्पप्रदानम् अवान्तरभेदपरिग्रहार्थं बहुवचनं कूजद्द्विजानां कूजद्विहङ्गानां कुलानि जातिविशेषास्तैरा
पुष्पसमृद्धिः निरूपिता तामसराजसभावान्निरूप्य सात्त्विकभावानाह-प्रफुल्लानि कुमुदानि येषु वारिषु तैः पुष्करिणीस्थैः स
कुमुदं रात्रिविकासि अव्यवस्थितम् अम्भोजकह्लारोत्पलानि दिनसन्ध्यारात्रिविकासयुक्तानि नियतानि ॥२२॥

श्रीसुबोधिनीसारः

स्वर्गमोक्षयोः पाताले पृथिव्यां च सर्वासामपि सिद्धीनां तस्य हरेश्चरणयोरर्चनं पुंसां मूलं कारणम् ॥१९॥ अदाने हेतु
। अधनो दरिद्रोऽयं धनं प्राप्य उच्चैर्मां न स्मरेत् इति हेतोः कारुणिको दयालुः कृष्णोऽभूरि अल्पमपि धनं मह्यं नाददात्

श्रीसुबोधिनीसारः

इत्येवमन्तन्मनसि चिन्तयन् स्वगृहसमीपं प्राप्तः तद्विशिनष्टि । सूर्याऽग्निचन्द्रप्रकाशैर्विमानैः सर्वतो युक्तम् ॥२१॥ कूजद्भिर्द्विजकुलैः पक्षिसङ्घैराकुलैर्व्याप्तैः प्रोत्फुल्लानि कुमुदादीनि येषु तैः विचित्रैरुपवनैरुद्यानैर्जुष्टम् ॥२२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सम्पूज्यापि धनस्यादाने कारणं कल्पयति-स्वर्गेति द्वयेन । यद्यपि रसायां पाताले भुवि च सम्पदां सर्वासां सिद्धीनाम् अणिमादीनां च स्वर्गापवर्गयोः स्वर्गमोक्षयोश्च कारणं तस्य भगवतश्चरणार्चनमेव ॥१९॥ तथापि कारुणिकः कारुणिकत्वात् अधनोऽयं धनं प्राप्योच्चैर्माद्यन् गर्वितः सन् मां न स्मरेत् ततो भ्रश्येतेत्यभिप्रेत्याभूरि स्वल्पमपि धनं मह्यं नाददात् ॥२०॥ स्वान्तःकरण इत्येवं सञ्चिन्तयन् निजगृहस्यान्तिकं समीपं प्राप्तः । तद्गृहान्तिकं वर्णयति-सूर्यादिसंकाशैस्तद्वद्दीप्यमानैर्विमानैः सर्वतो वृतमिति ॥२१॥ कूजतां द्विजानां पक्षिणां कुलानि तैराकुलैर्व्याप्तैर्विचित्रैरुपवनैरुद्यानैश्च वृतम् । तथोत्फुल्लानि कुमुदादीनि येषु तेर्वारिभिर्जलैश्च जुष्टं युक्तम् ॥२२॥

अन्वितार्थप्रकाशिका

स्वर्गेति । यद्यपि रसायां पाताले भुवि च सम्पदां सर्वासां सिद्धीनाम् अणिमादीनां च स्वर्गापवर्गयोः स्वर्गमोक्षयोश्च कारणं तस्य भगवतश्चरणार्चनमेव ॥१९॥ अधन इति । तथापि कारुणिकः कारुणिकत्वात् अधनोऽयं धनं प्राप्योच्चैर्माद्यन् गर्वितः सन् मां न स्मरेत् ततो भ्रश्येदित्यभिप्रेत्याभूरि स्वल्पमपि धनं मह्यं नाददात् ॥२०॥ इतीति सार्धं युग्मम् । स्वान्तःकरणे इत्येवं सञ्चिन्तयन् न तु स्फुटं वदन् सूर्यादिसङ्काशैस्तद्वद्दीप्यमानैर्विमानैः तत्सदृशगृहभेदैः सर्वतो वृतमिति कूजतां द्विजानां पक्षिणां कुलानि तैराकुलैर्व्याप्तैर्विचित्रैरुपवनैरुद्यानैश्च वृतम् । तथा प्रोत्फुल्लानि कुमुदादीनि येषु तेर्वारिभिर्जलैश्च जुष्टं युक्तं स्वलंकृतैः पुम्भिः हरिणीनामिवाक्षीणि यासां ताभिः स्त्रीभिश्च जुष्टं निजगृहस्य अन्तिकं समीपं प्राप्तः । हरिणाक्षिभिरित्युभयविशेषणत्वान्न समासान्तः इति तोषिणी । वस्तुतः ''पुमान्स्त्रिया'' वा इत्यनेन हरिणाक्षैरिति भाव्यम् । अत्रैवं ज्ञेयं श्रीदाम्नो द्वारकावासरात्रौ स्वगृहे सुप्तायां तत्पत्न्यां सर्वस्थानं तद्रूपादिकं च दिव्यमभूत् । प्रादर्दिव्यदास्यादेरुक्त्या स्वभर्तृसङ्गतः श्रीकृष्णदत्तं ज्ञात्वा विस्मितया पत्यागमनज्ञापका जनास्तन्मार्गे नियुक्ता इति ॥२१-२२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तेनाहं पूजितोऽपि मह्यं धनं कस्मान्न दत्तमित्याशङ्क्यात्र कारणमाह-स्वर्गेति श्लोकद्वयेन ॥१९॥ उच्चैरधिकं माद्यन् सन् इति कारुणिकः करुणया वर्तमानः सन् अभूरि अल्पमपि धनं मे मह्यं नाददात् ॥२०॥ अन्तःकरणे इत्यमुना प्रकारेण तत् । श्रीकृष्णकारुण्यं चिन्तयन् स्वगृहस्यान्तिकं समीपं प्राप्तः । तत्कीदृशं गृहम् । सूर्यादितुल्यैर्वृतम् ॥२१॥ कूजद्भिर्द्विजकुलैः पक्षिगणैः आकुलैर्व्याप्तैः विचित्रोपवनोद्यानैः सर्वतो वृतं च । कथम्भूतैः उद्यानादिभिः । प्रोत्फुल्लानि कुमुदादीनि येषु तानि एवम्भूतानि वारीणि येषु तैः ॥२२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अधन इति । तथापि अयं भगवान् कारुणिकः हेतुगर्भमिदं कारुणिकत्वाद्धेतोः अधनः निर्धनः अयं विप्रः धनं प्राप्य उच्चैरधिकं यथा तथा माद्यन् गर्वितः सन् मां न स्मरेत् इति अभिप्रेत्य मे मह्यं भूरि बहु अभूर्यल्पमात्रं वा धनं न अददात् नूनम् ॥१९॥ इतीति ॥ इतीत्थं तच्चिन्तया भगवद्गुणचिन्तयैव हृष्टः सन् निजगृहान्तिकं स्वगृहान्तिकं प्राप्तः । कथम्भूतं तद्गृहम् । सूर्यश्च अनलश्च इन्दुश्च तत्संकाशैः सूर्यादिवद्दीप्यमानैरित्यर्थः । विमानैः सर्वतः परितः वृतम् ॥२०॥ विचित्रेति ॥ किञ्च । कूजन्तः शब्दायन्तो ये द्विजाः पक्षिणस्तेषां कुलानि तैराकुलानि तैः विचित्राणि उपवनानि उद्यानानि च तैः वृतम् ॥ प्रफुल्लानि प्रोत्फुल्लानि अम्भोजानि कह्लाराणि उत्पलानि येषु तानि वारीणि येषु तैः सरोभिरिति विशेष्यमध्याहर्तव्यम् । जुष्टं युक्तमित्यर्थः ॥२१॥ जुष्टमिति किञ्च स्वलङ्कृतैः 'पुमान् स्त्रिया' इत्येकशेषः । पुम्भिः पुरुषैः हरिणाक्षिभिर्मृगनयनाभिः स्त्रीभिश्च जुष्टम् । तदाश्चर्यं दृष्ट्वा तर्कितवांस्तदाह किमिति । प्रथमतस्तेजःपुंजं दृष्ट्वा किमिदमिति पश्चाद्विमानानि दृष्ट्वा कस्येदं वा स्थानमिति ततः स्वीयमिति ज्ञात्वा तत् इदं मत्स्थानं कथम् इत्येवंरूपम् अभूत् ॥२२॥

कृष्णप्रिया

यद्यपि पुरुषन कों पाताल लोक की भूलोक की सम्पत्ति यों का और अणिमादि सब सिद्धियों का तथा स्वर्ग मोक्ष का कारण श्रीकृष्ण के चरणारविन्द का अर्चना हि है ॥१९॥ तथापि यह निर्धनी सुदामा धन को पाय कर अत्यन्त गर्वित होकर मेरा स्मरण नहि करैगा ऐसा विचार कर करुणावान् श्रीकृष्ण ने मो को धन नहि दिया यह निश्चित है ॥२०॥ सुदामाजी अपने मन में इस प्रकार का चिन्तवन करत अपने गृहके समीप में प्राप्त भए। अब गृह को देखते हैं तो सूर्य्य अग्नि चन्द्रमा के सदृश वारे अनेक विमानों से चारों तर्फ धिरा भया है वीच में गृह है ॥२१॥ बोल ने वारे पक्षीन के समूह से व्याप्त विचित्र नजरि वागन से तथा विना लगाये भए वृक्षन के समूहन सें धिरा भया वह गृह है ॥ और प्रफुल्लित कुमोदिनी श्वेत कमल कल्हार रक्त कमल युत सरोवरन से युक्त वह गृह है ॥२२॥

जुष्टं स्वलङ्कृतैः पुम्भिः स्त्रीभिश्च हरिणाक्षिभिः। किमिदं कस्य वा स्थानं कथं तदिदमित्यभूत् ॥२३॥
एवं मीमांसमानं तं नरा नार्योऽमरप्रभाः। प्रत्यगृह्णन् महाभागं गीतवाद्येन भूयसा ॥२४॥
पतिमागतमाकर्ण्य [1]पत्न्युद्धर्षाति[2]सम्भ्रमा। निश्चक्राम गृहात्तूर्णं रूपिणी श्रीरिवालयात् ॥२५॥
पतिव्रता पतिं दृष्ट्वा प्रेमोत्कण्ठाश्रुलोचना। मीलिताक्ष्यनमद्बुद्ध्या मनसा परिषस्वजे ॥२६॥

कर्दमक्षमा

धवम, मीमांसमानम्, अमरप्रभाः, नराः, नार्यः, तम्, महाभागम्, भूयसा, गीतवाद्येन, प्रत्यगृह्णन् ॥२४॥ पतिम्, आगतम्, आकर्ण्य, उद्धर्षातिसम्भ्रमा, पत्नी, अथवा, रूपिणी, श्रीः, इव, आलयात्, तूर्णम्, निश्चक्राम ॥२५॥ पतिव्रता, पतिम्, दृष्ट्वा, प्रेमोत्कण्ठाश्रुलोचना, मीलिताक्षी, बुद्ध्या, अनमत्, मनसा, परिषस्वजे ॥२६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

किञ्च जुष्टमिति। हरिणीनामिवाक्षीणि यासां ताभिः तदैश्वर्यं दृष्ट्वा वितर्कितवांस्तदाह किमिदमिति प्रथमं तेजःपुञ्जं दृष्ट्वा किमिदमिति पश्चाद्विमानानि दृष्ट्वा कस्यचेति स्थानं स्वीयमिति ज्ञात्वा कथं तदिदं स्थानमित्येवं रूपमभूदिति ॥२३॥ अमरप्रभास्तत्तुल्यकान्तयः प्रत्यगृह्णन्नुपायनादिभिरादृतवन्तः ॥२४॥ उद्भूतो हर्षो यस्याः सा अतिसम्भ्रमः आदरो यस्याः सा आलयात् कमलवनाद्रूपधारिणी श्रीरेव स्वर्गस्य तत्र भगवता आनीतत्वात्स्वर्गिणामिव तयोरूपञ्च बभूवेति भावः ॥२५॥ बुद्ध्या अयमेव वन्द्य इति निश्चयेन मनसा सङ्कल्पेन ॥२६-२८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वशेषसौभाग्यमाह-किञ्चेति। तत् अलौकिकम्। तत्तर्कितम्। इदं स्थानं तत् द्वारकासदृशं कथं जातमिति ॥२३॥ तं सुदामानम्। तत्तुल्या देवतुल्या कान्तिर्यासां तास्तथा ॥२४॥ तत्र सुदाम्नः स्थाने। तयोस्तत्स्त्रीसुदाम्नोः। इति भाव इति- यत्कृपाकटाक्षपातादद्भुतैश्वर्यं जातं तत एव तद्रूपमप्यद्भुतमभूदिति तात्पर्यम् ॥२५॥ अयमेव पतिरेव ॥२६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु, ते परमदिव्यरूपाः कथं दरिद्ररूपस्य तस्यानुगतावशोभन्त तत्राह-महाभागमिति। महाभागत्वमेव सर्वेषां चित्त चमत्कारयन् शोभाहेतुत्वाय सम्पद्यत इति भावः ॥२४॥ आकर्ण्य पूर्वनियुक्तलोकेभ्यः श्रुत्वा अन्यत्तैः यद्वा रूपिणी श्रीरुक्मिण्याः सौन्दर्य्यवती पत्नी अत एव श्रीरिवालयात् वैकुण्ठलोकात् ॥२५॥ प्रेमोत्कण्ठयाऽश्रुलोचना मीलिताक्षी लज्जया अतो बुद्ध्या ननाम मनसैव परिषस्वजे न तु साक्षादित्यर्थः। तत्र बुद्ध्येति "पतिरेको गुरुः स्त्रीणाम्" इति विचारांशापेक्षया मनसेति रागप्राधान्ये सङ्कल्पमात्रापेक्षया कारणभेदः ॥२६॥

---

१. भक्त्य-च. पु. टी. ; प्रीत्युर्षातिसंभ्रमम वीर. ; पत्न्युद्धर्षाच्चसंभ्रमात्-विज.। २. तिमानिता-गो. प्रे. टी.।

पुम्भिर्दास
तद्रूपादिकं च सर्वं
स्वभर्तृसंगतश्रीभगव
तादृश-विभूतिसिद्धेः
श्रुत्वा अन्यत्तैर्व्याख्य
ध्वनितम् ॥२५॥ प्रेम
अश्रुव्याप्तनेत्रत्वात् लज

पुम्भिः हरिण
किमिदमिति पश्चाद्विमा
मीमांसमानं वितर्कयन्त
अमरप्रभाः देवतुल्यका
निर्गतवती ॥२५॥ पति
अक्षिणी यया सा बुद्ध्य

स्वमन्दिरं दृष्ट्वा
नरादयः प्रत्यगृह्णन् अभ्या

प्रथमं तेजःपुञ्जं
प्रत्यगृह्णन्निति एताश्च भगव
स्वीचक्रुः ॥२३-२४॥ रू
स्वं श्रियं गृहादिकं च तादृश
दृष्ट्वेति। धमनिव्याप्तं शुष्कगा

किमिदमित्यर्धम्
उत्पन्नो हर्षोऽतिसम्भ्रमः अ
॥२५॥ परिषस्वजे आलिङ्गि

किञ्च स्वलङ्कृतैः

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पुम्भिर्दासादिभिः स्त्रीभिर्दास्यादिभिः अत्रैवं ज्ञेयम्–तद्विप्रद्वारकावासस्यैव रात्रौ स्वगृहे प्रसुप्तायां तत्पत्न्यां तत्स्थानं तादृशं तद्रूपादिकं च सर्वं दिव्यमभूत् पश्चात् प्रातः प्रबुद्धया तया तत्तद्दर्शनात् सुविस्मितया सत्या स्वविचारेण तत्रत्यदास्यादिद्वारा वा स्वभर्तृसंगतश्रीभगवत्प्रभावसद्धं ज्ञातम्। ततश्च स्वपत्यागमनापेक्षया तद्वर्मनि स्थाने स्थाने लोका नियुक्ता इति ॥२३॥ महाभागमिति तादृश-विभूतिसिद्धेः श्रीभगवत्सख्याद्वा किंवा तस्यापि तदानीं रूपविशेषोदयं द्योतयति ॥२४॥ आकर्ण्य पूर्वनियुक्तलोकेभ्यः श्रुत्वा अन्यत्तैर्व्याख्यातम्। यद्वा, रूपिणी सौन्दर्यवती पत्नी अत एव श्रीरिवालयात् वैकुण्ठलोकात् इति गृहस्यापि परमोत्कृष्टत्वं ध्वनितम् ॥२५॥ प्रेम्णा उत्कण्ठा परमोत्सुका चासावश्रुलोचनाऽश्रुयुक्तलोचना च किंवा, परमोत्कण्ठ्याश्रुलोचना मीलिताक्षी अश्रुव्याप्तनेत्रत्वात् लज्जया वा हर्षेण वा नमनाद्यशक्त्या वा तत्र बुद्ध्येति नमनाद्वक्ति मनसेति च परिष्वंगाद्भावोदयं बोधयति ॥२६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

पुम्भिः हरिणीनामिववाक्षिणी यासां ताभिः स्त्रीभिश्च जुष्टं तदाश्चर्यं दृष्ट्वा विर्कितवानित्याह–किमिति प्रथमं तेजःपुञ्जं दृष्ट्वा किमिदमिति पश्चाद्विमानानि दृष्ट्वा कस्य चेदं स्थानमिति स्वीयमिति ज्ञात्वा कथं तदिदं स्थानं इत्येवं रूपमभूत् ॥२३॥ इत्येवं मीमांसमानं वितर्कयन्तं द्विजं नराः नार्यश्च हे महाभाग ! भूयसोच्चैर्गीतवाद्येन प्रत्यह्णन् उपायनादिभिरादृतवन्त इति सम्बन्धः। अमरप्रभाः देवतुल्यकान्तयः इति नरनारीविशेषणम् ॥२४॥ पतिमिति। आलयात्कमलवनाच्छ्रीर्लक्ष्मीरिव स्वगृहात्तूर्णं निश्चक्राम निर्गतवती ॥२५॥ पतिव्रतेति उत्कण्ठया प्रेमपूर्वकानुध्यानेनाश्रुण्यानन्दजलबिन्दवो लोचनयोर्यस्याः सा प्रेम्णा पतिं दृष्ट्वा मीलिते अक्षिणी यया सा बुद्ध्याऽनमन्नमश्चक्रे मनसा परिषस्वजे आलिङ्गितवती च ॥२६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

स्वमन्दिरं दृष्ट्वा इदं किं कस्य चेदं स्थानम् इदं तदिति तत् द्वारकाविधं कथमभूत् ॥२३॥ एवं मीमांसमानं जिज्ञासमानं तं नादयः प्रत्यगृह्णन् अभ्ययाययुरित्यन्वयः ॥२४-२७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१२-२७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रथमं तेजःपुञ्जं दृष्ट्वा किमिदमिति ततो विमानानि दृष्ट्वा कस्य वेति तत्स्थलस्य स्वीयत्वं निश्चित्याह–कथं तदिदमिति। प्रत्यगृह्णन्निति एताश्च भगवतैव मह्यं दत्ता इति निश्चित्य तान् स अगृहंणात् मनसा स्वीचकार पश्चादेता अपि तं प्रत्यगृह्णन् स्वामित्वेन स्वीचक्रुः ॥२३-२४॥ रूपिणी श्रीरिति भग्नच्छदि भित्तिके गृहे सा कुचेला शुष्ककुचाद्यवयवा निशि सुप्ता आसीत् प्रातरुत्थाय स्वं श्रियं गृहादिकं च तादृशं दृष्ट्वा क्षणं चमत्कारसिन्धुमग्ना पश्चाद्भगवता दत्तं तद्वैभवं निश्चित्य ततः पतिमानेतुं निश्चक्राम ॥२५॥ पतिं दृष्ट्वेति। धमनिव्याप्तं शुष्कगात्रं कुचेलं स्वपतिं सा परिचिनोत्वेतदर्थमेव भगवता सख्युस्तस्य तादृशत्वं न दूरीकृतमिति ज्ञेयम् ॥२६॥

गूढार्थदीपिनी

किमिदमित्यर्धम्। इदं स्थानं तत् द्वारकासदृशं कथमभूत् ॥२३॥ एवं मीमांसमानं विचार्यमाणम्। भूयसा महता ॥२४॥ उत्पन्नो हर्षोऽतिसम्भ्रमः अत्यादरश्च यस्याः। उत्पन्नहर्षेण आकुलता वा यस्याः सा आलयात् कमलवनात् रूपधारिणी श्रीरिव ॥२५॥ परिषस्वजे आलिङ्गितवती प्रेमाधिक्येन अश्रूणि लोचनयोः यस्याः सा ॥२६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

किञ्च स्वलङ्कृतैः पुम्भिः हरिणाक्षिभिः मृगनयनीभिस्त्रिभिश्च जुष्टं दूरतस्तेजःपुञ्जं दृष्ट्वा किमिदमिति तदनन्तरं स्थानं दृष्ट्वा

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कस्य वा स्थानमिति तदनन्तरं स्वीयं निश्चित्य तत् तादृशम् इदम् एवंविधं कथमभूदिति तर्कितवान् ॥२३॥ एवं मीमांसमा तर्कयन्तम् अमरप्रभा देवतुल्यकान्तयः प्रत्यगृह्णन् स्वामित्वेन स्वीचक्रुः ॥२४॥ उद्धर्षेण उद्भूतेन हर्षेण अतिसम्भ्रमो वैवश्यं यस्या सा आलयात् कमलवनात् रूपिणी रूपधारिणी श्रीरिव गृहात्तूर्णं निश्चक्राम निर्गतवती ॥२५॥ प्रेम्णा स्नेहेन या उत्कण्ठा हर्षोद्रे तया अश्रूणि लोचनयोः यस्याः सा बुद्ध्या अनमत् मनसा परिषस्वजे आलिङ्गितवती ॥२६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

मध्यं वर्णयति। जुष्टं स्वलङ्कृतैः पुम्भिरिति स्त्रीभिश्च हरिणाक्षिभिः परमसौन्दर्ययुक्ताभिः एवंविधं गृहान्तिकं स्थानं दृ गन्धर्वनगरादिशङ्कया अलौकिकं किञ्चित् सम्भावयति किमिदमिति इदं परिदृश्यमानं गन्धर्वनगरमायावैभवादीनाम् अन्यतम आहोस्वित् सत्यमेवेति ततः स्थिरतां पदार्थानां दृष्ट्वा स्वस्यैव भ्रमात् स्थानान्तरगमनं सम्भावयति। कस्य वा स्थानान्तरमिदमि ततोऽपि परितो भोगात् दृष्ट्वा मदीयमेवैतत् स्थानमिति निश्चित्य तदतिहीनमस्मद्गृहमिदम् एतादृशं कथमभूदिति चिन्तितवान् ॥२३ एवम् आश्चर्याविष्ट एव तस्मिन् तत् निर्णयार्थं कौतुकान्तरमाह-एवं मीमांसमानमिति पूजितविचारवचनो मीमांसाशब्दः ए उत्कृष्टार्थविचारकं पुरुषा नार्यश्च गीतवाद्येन भूयसा प्रत्यगृह्णन्। नन्वयं पिशाचसदृशः गीतवाद्यादिकं कथं भज योग्यत्वाभावादित्याशङ्क्याऽऽह-महाभागमिति। परमभाग्ययुक्तं तस्मिन् भगवत्स्वरूपदेवेन्द्रावेशो जातः अतो योग्यरूप एव स नृत्यादिभिः पुरस्कृतो जात इत्यर्थः ततः पूर्वं तस्मिन्नेव स्थाने अमरावती प्रादुर्भूता तस्यां च इन्द्रपत्न्याविर्भावः तेन परमसौन प्राप्तवती ततो भगवता चिपिटभक्षणोत्तरक्षण एव तादृशीमवस्थां प्राप्ता कदा पतिरायास्यतीति पतिमेव चिन्तयाना इदा पतिमागतमाकर्ण्य पत्नी तदेकनिष्ठा उद्धर्षो हर्षोत्फुल्लनयना अतिसम्भ्रमात् सर्वाभरणभूषिता सर्वैश्वर्य्ययुक्ता तूर्णं गृहान्निश्चक्राम निष्क्रामन्तीं तां स्थानं च वर्णयति-रूपिणी श्रीः आलयादिवेति। क्षीरसमुद्रात् कमलालयाद्वा रूपिणी श्रीः कृतावतारा य निर्गच्छति ततः पतिव्रता पतिं दृष्ट्वा मदर्थं भर्ता क्लेशं प्राप्त इति चिरात् दूरादागत इति प्रेमोत्कण्ठा सती अश्रुलोचना जाता त लज्जावशादपशकुनभयाद्वा मीलिताक्षी जाता ततो यथोचितं पूजां कृतवतीत्याह-बुद्ध्याऽनमदिति। विवेकवत्या बुद्ध्यैव भर्तृनमस्का कृतवती मनसा चालिङ्गनम् एतावदेव कर्तव्यम् ॥२४-२६॥

श्रीसुबोधिनीसारः

स्वलंकृतैर्भूषितैः पुम्भिः मृगाक्षिभिः स्त्रीभिश्च जुष्टं तर्कमाह। तेजःपुञ्जं दृष्ट्वा इदं किमिति ततो विमानानि दृष्ट्वाऽऽह क वा स्थानमिदम्। अल्पैर्दिनैः कथं तदभूत् ॥२३॥ एवं विचारयन्तं तं महाभागं सुदामानम् अपरप्रभा देवदीप्तयो नरा नार्यः म गीतवाद्येन सत्कृतवन्तः ॥२४॥ आगतं पतिमाकर्ण्य श्रुत्वा उद्भूतो हर्षो यस्या पतिसम्भ्रम आदरो यस्याः सा पत्नी स्त्री गृह शीघ्रं निश्चक्राम। आलयात् पद्मवनात् रूपिणी श्रीरिव ॥२५॥ पतिं दृष्ट्वा प्रेम्णौत्कण्ठ्यं यस्या अश्रूणि लोचनयोर्यस्याः सा पति मीलितनेत्रा बुद्ध्यानमत् मनसा परिरेभे ॥२६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वलंकृतैः पुम्भिः हरिणीनामिवाक्षीणि यासां ताभिः स्त्रीभिश्च जुष्टम्। तदाश्चर्यं दृष्ट्वा वितर्कितवांस्तदाह-किमिदमि प्रथमं तेजःपुंजं दृष्ट्वा किमिदमिति, पश्चाद्विमानानि दृष्ट्वा कस्यैवेदं स्थानमिति, स्वीयमिति ज्ञात्वा कथं तदिदं स्थानमित्येवंरूपम ॥२३॥ एवं मीमांसमानं वितर्कयन्तं तं द्विजम् अमरप्रभाः देवतुल्यकान्तयो नरास्तथाविधा नार्यश्च भूयसा उच्चैर्गीतवाद्येन प्रत्य उपायनादिभिरादृतवन्त इत्यन्वयः। अमरप्रभा इत्यनेन तत्पुरवासिनः सर्वे एव भगवता सर्वसम्पद्भिः पूर्णाः सुरूपाश्च कृता इति सूचितम् ते सकलसम्पत्सम्पूर्णास्तं मलिनं कथमेवमादृतवन्त इत्याशंक्य यस्य भगवान् प्रसन्नस्तस्यादरं को न कुर्यात् इत्याशयेनाह-महाभा ॥२४॥ पतिमागतमाकर्ण्य श्रुत्वा उद्भूतेन हर्षेणातिसम्भ्रमो व्याकुलता यस्याः सा तत्पत्नी तूर्णं शीघ्रं गृहान्निश्चक्राम। तत्स्व भगवत्कृपया अलौकिकमभूदिति सूचयन् दृष्टान्तमाह-आलयात् कमलवनात् रूपिणी श्रीर्लक्ष्मीरिवेति ॥

पतिं दृष्ट्वा प्रेम्ण
माभूदित्याशयेन मीलि
च परिषस्वजे आलिङ्गि

किमिति सार्धव
तदिदं स्थानमित्येवंरूपमभ
उच्चैर्गीतवाद्येन प्रत्यगृह्णन्
इति सूचितम् ॥२३-२४॥
आलयात् कमलवनात् रू
रूपं च बभूवेति भावः ॥२
तथाप्यश्रुपातेनास्यापशकुनं
अनमत् मनसा च परिषस्वजे

किञ्च हरिणाक्षिभि
हरिण्यक्ष्यश्च हरिणाक्षयश्च ह
समासान्तस्याभावस्तु तदनि
स्थानविशेष उक्तः। कस्य
मीमांसमानं विचारयन्तं तं
॥२५॥ प्रेमोत्कण्ठी स्नेहरुद्ध
निश्चयवत्या धिया अनमत् ॥

एवमिति ॥ एवं मी
प्रत्यगृह्णन्। उक्तविधोपायनादि
तद्धर्षातिशयितहर्षवती अतिस
निश्चक्राम ॥२४॥ पतिव्रतेति।
प्रेम्णा पतिं सन्निरीक्ष्येत्यर्थः। मी
च ॥२५॥ पत्नीमिति। स ब्राह्मण
तासां दासीनां मध्ये भान्तीं दीप्य

भूषण धारण कियें पु
प्रकार के गृह को देख कर सु
निज गृह जान कर विचार कर
करते हि हैं इतने हि में देवता
जी को आगें आय कर लेते भ

॥ एवं मीमांसमानं
भ्रमो वैवश्यं यस्याः
उत्कण्ठा हर्षोद्रेकः

गृहान्तिकं स्थानं दृष्ट्वा
नवादीनाम् अन्यतमम
त्रा स्थानान्तरमिदमिति
ति चिन्तितवान् ॥२३॥
नो मीमांसाशब्दः एवं
द्यादिकं कथं भजते
अतो योग्यरूप एव सन्
र्भावः तेन परमसौन्दर्य
मेव चिन्तयाना इदानीं
क्ता तूर्णं गृहान्निश्चक्राम,
णी श्रीः कृतावतारा यथा
अश्रुलोचना जाता ततो
वत्या बुद्ध्यैव भर्तृनमस्कारं

विमानानि दृष्ट्वाऽऽह कस्य
देवदीप्तयो नरा नार्यः महता
स्याः सा पत्नी स्त्री गृहातूर्णं
लोचनयोर्यस्याः सा पतिव्रता

र्कितवांस्तदाह-किमिदमिति।
तदिदं स्थानमित्येवंरूपमभूदिति
यसा उच्चैर्गीतवाद्येन प्रत्यगृह्णन्
सुरूपाश्च कृता इति सूचितम्। ननु
र्यात् इत्याशयेनाह-महाभागमिति
ं गृहान्निश्चक्राम । तत्स्वरूपमपि
पणी श्रीर्लक्ष्मीरिवेति ॥२५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

पतिं दृष्ट्वा प्रेम्णा उत्कण्ठावृद्धिस्तया अश्रूणि आनन्दजलबिन्दवो लोचनयोर्यस्याः सा तथाप्यश्रुपातेनास्यापशकुनं माभूदित्याशयेन मीलिते अक्षिणी यया सा । एवं प्रेमौत्कण्ठ्ये हेतुमाह-पतिव्रतेति । सा पतिं दृष्ट्वा बुद्ध्या अनमत् मनसा च परिषस्वजे आलिङ्गितवती ॥२६॥

अन्वितार्थप्रकाशिका

किमिति सार्धकम् । प्रथमं तेजःपुञ्जं दृष्ट्वा किमिदमिति पश्चाद्विमानानि दृष्ट्वा कस्यैवेदं स्थानं स्वीयमिति ज्ञात्वा कथं तदिदं स्थानमित्येवंरूपमभूत् । एवं मीमांसमानं विचारयन्तं तं द्विजम् अमरप्रभा देवतुल्यकान्तयः नरास्तथाविधा नार्यश्च भूयसा उच्चैर्गीतवाद्येन प्रत्यगृह्णन् उपायनादिभिरादृतवन्तः । इत्यनेन तत्पुरवासिनः सर्वे एव भगवता सर्वसम्पद्भिः पूर्णाः सुरूपाश्च कृता इति सूचितम् ॥२३-२४॥ पतिमिति । पतिमागतमाकर्ण्य श्रुत्वा उद्भूतेन हर्षेणातिसम्भ्रमो व्याकुलता यस्याः सा तत्पत्नी तूर्णम् आलयात् कमलवनात् रूपिणी श्रीर्लक्ष्मीरिव तूर्णं शीघ्रं गृहान्निश्चक्राम । स्वर्गस्य तत्र भगवता आनीतत्वात् स्वर्गिणामिव वयो रूपं च बभूवेति भावः ॥२५॥ पतिव्रतेति । पतिं दृष्ट्वा प्रेम्णः उत्कण्ठावृद्धिः तया अश्रूणि आनन्दजलबिन्दवो लोचनयोर्यस्याः सा तथाप्यश्रुपातेनास्यापशकुनं माभूदित्याशयेन मीलिते अक्षिणी यया सा पतिव्रता पतिं दृष्ट्वा अयमेव वन्द्य इति बुद्ध्या निश्चयेन अनमत् मनसा च परिषस्वजे आलिङ्गितवती ॥२६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

किञ्च हरिणाक्षिभिः हरिणीनामक्षीणीव अक्षीणि यासां ताः हरिण्यक्षयः हरिणानामक्षीणीव अक्षीणि येषां ते हरिणाक्षयः हरिण्यक्षयश्च हरिणाक्षयश्च हरिणाक्षयस्तैः पुमान्स्त्रियेत्येकशेषे पुंल्लिङ्गशेषः । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षजिति प्राप्तस्य समासान्तस्याभावस्तु तदनित्यत्वाद्बोध्यः । पुम्भिः दासादिभिः स्त्रीभिः दास्यादिभिः जुष्टं सेवितं स्वगृहं विलोक्य किमिदमिति स्थानविशेष उक्तः । कस्य वा स्थानम् । कथं तदिदं स्थानम् अभूत् अत्र प्रथमं नाभूदिति चिन्तयामासेति शेषः ॥२३॥ एवं मीमांसमानं विचारयन्तं तं द्विजं प्रत्यगृह्णन् सत्कारयामासुः ॥२४॥ उद्भूतेन हर्षेण अतिसम्भ्रमो व्याकुलत्वं यस्याः सा पत्नी ॥२५॥ प्रेमोत्कण्ठी स्नेहरुद्धकण्ठी चासावश्रुलोचना च लज्जया मीलिताक्षी च तथाभूता सती बुद्ध्या पतिरेव प्रणम्य इति निश्चयवत्या धिया अनमत् ॥२६-२७-२८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ एवं मीमांसमानं वितर्कयन्तं तं द्विजम् अमरप्रभाः नराः नार्यश्च हे महाभाग ! भूयसा उच्चैः गीतवाद्येन प्रत्यगृह्णन् । उक्तविधोपायनादिभिरादृतवन्त इति भावः ॥२३॥ पतिमिति । पत्नी तदीयाङ्गना पतिम् आगतम् आकर्ण्य श्रुत्वा उद्भवातिशयितहर्षवती अतिसम्भ्रमा विलासवती सती च आलयात् कमलवनात् रूपिणी मूर्तिमती श्रीर्लक्ष्मी इव गृहात् तूर्णं निश्चक्राम ॥२४॥ पतिव्रतेति । प्रेमोत्कण्ठया प्रेमपूर्वकानुध्यानेनाश्रूण्यानन्दजलबिन्दवो लोचनयोर्यस्याः सा पतिव्रता पतिं दृष्ट्वा प्रेम्णा पतिं सन्निरीक्ष्येत्यर्थः । मीलिते अक्षिणी यया सा । एवम्भूता सती बुद्ध्या अनमन् नमश्चक्रे । मनसा परिषस्वजे आलिङ्गितवती च ॥२५॥ पत्नीमिति । स ब्राह्मणः वैमानिकीं विमानारूढां देवीं देवानां स्त्रियम् इव विस्फुरन्तीं निष्कः पदकाख्यभूषणं कण्ठे यासां तासां दासीनां मध्ये भान्तीं दीप्यमानां पत्नीं वीक्ष्य विस्मितः बभूव ॥२६॥

कृष्णप्रिया

भूषण धारण कियें पुरुषों से औरा हिरणीयों के नेत्र सदृरा चपल नेत्र वारी स्त्रीयों सें युक्त वह गृह है । इस प्रकार के गृह को देख्न कर सुदामाजी मन में विचार करने लगे. कि-यह क्या तेज है १ और यह किसका है पश्चात् निज गृह जान कर विचार करने लगे कि यह गृह इस प्रकार को कैसे हो गया ॥२३॥ सुदामा जी इस प्रकार बिचार करते हि हैं इतने हि में देवतान के सदृरा कान्ति वारे नर और नारी बहुत गाजे वाजे के साथ उस महाभाग सुदामा जी को आगें आय कर लेते भए ॥२४॥ पति को आये भए सुन कर उत्पन्न हुए हर्ष सें अति व्याकुल भई सुदामा

कृष्णाप्रिया

जी की भार्य्या जैसे कमल वन से साक्षात् लक्ष्मी निकसे तैसे ही शीघ्रही निज गृह से निक सती भई ॥२५॥ पति को देख कर प्रेम से उत्साह भया उस से नेत्रों में अशुपात वहने लगे तव तो नेत्र मीच कर पतिनता बुद्धि से पति को नमस्कार करती हुई और मन से पति को मिली ॥२६॥

पत्नीं [1]दृष्ट्वा [2]प्रस्फुरन्तीं देवीं वैमानिकीमिव । दासीनां निष्ककण्ठीनां मध्ये भान्ती[3] स विस्मितः ॥२७॥
[4]प्रीतः स्वयं तया युक्तः प्रविष्टो निजमन्दिरम् । मणिस्तम्भशतोपेतं महेन्द्रभवनं यथा ॥२८॥
पयःफेननिभाः शय्या दान्ता रुक्मपरिच्छदाः । पत्यङ्का [5]हेमदण्डानि चामरव्यजनानि च ॥२९॥
आसनानि च हैमानि [6]मृदूपस्तरणानि च । मुक्तादामविलम्बीनि वितानानि द्युमन्ति च ॥३०॥

कर्दमक्षमा

निष्ककण्ठीनाम्, दासीनाम्, मध्ये, भान्तीम्, वैमानिकीम्, दैवीम्, इव, प्रस्फुरन्तीम्, पत्नीम्, दृष्ट्वा, सः, तु, विस्मितः ॥२७॥ स्वयम्, प्रीतः, तया, युक्तः, महेन्द्रभवनम्, यथा, मणिस्तम्भशतोपेतम्, निजमन्दिरम्, प्रविष्टः ॥२८॥ पयःफेननिभाः, शय्याः, दान्ताः, पर्यङ्काः, च, हेमदण्डानि, चामरव्यजनानि, मृदूपस्तरणानि, हैमानि, आसनानि, च, मुक्तादामविलम्बीनि, च, द्युमन्ति, वितानानि, अच्छस्फटिककुड्येषु, महामारकतेषु, च, ललनारत्नसंयुताः, रत्नदीपाः, आभान्ति ॥२९-३०-३१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यत्र मन्दिरे पयःफेननिभाः शय्याः आस्तरणानीत्यादिसम्पदस्तत्र सर्वसम्पदां समृद्धीर्विलोक्य तर्कयामासेति चतुर्थेनान्वयः । यत्र च दान्ताः गजदन्तमयाः पर्यङ्काः ॥२९॥यत्राऽऽसनानि च मृदून्युपस्तरणानि तूलादिमयानि येषु तानि यत्र मुक्तादामविलम्बीनि द्युमन्ति च वितानानि ॥३०-३१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स सुदामा । विस्मितो जाताश्चर्यः ॥२७॥ तया पत्न्या ॥२८-२९॥ द्युमन्ति द्युतिमन्ति ॥३०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पत्नीमिति युग्मकम् । स विप्रः प्रथमं प्रीतः ततः स्वयमपि युक्तः सहसा जातेन रूपादिना योग्यतां प्राप्तस्सन् तया स मन्दिरं प्रविष्टः ॥२७-२८॥ तदेव वर्णयति-पय इति चतुष्केण । चामराणि व्यजनानि च तालवृन्दादीनि स्वच्छानि स्फाटिकानि कुड्यानि भित्तयो येषु तेषु तदीयेषु क्रीडागृहेषु महत् मारकतं मरकतसमूहो येषु तेषु यद्वा महामरकतमयेषु गृहेषु रत्नरूपा दीपा भ्राजमानाः सन्ति पाठान्तरे रत्नदीपैः सह रत्नसंयुता इति रत्नमयालङ्कारवत्त्वात् ॥२९-३१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रकर्षेण स्फुरन्तीं द्योतमानाम् अतो वैमानिकीं विमानेश्वरीं देवीमिव स विप्रो वीक्ष्य साक्षात् दृष्ट्वा विस्मितः ॥२७॥ प्रीत इति स्वयमेव पद्भ्यां न त्वग्रेऽभिगतेनापि यानादिना प्रविष्ट इत्यर्थः ॥२८॥ तदेव दर्शयति-पय इति त्रिभिः । पयसो दुग्धस्य फेनं परमं कोमलं धवलं च तत्तुल्या रुक्मपरिच्छदा स्वर्णखचिता इत्यर्थः । चामराण्येव व्यजनानि यद्वा चामराणि व्यजनानि च तालवृन्तादीनि च-कारादूत्नानि चासनानि ॥२९-३०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-३३॥

---

१. वीक्ष्य-श्रीधर. वंशी. वीर. विज. विश्व. । २. विस्फुरन्तीं-श्रीधर. वंशी. ; प्रस्फुरन्तीं-वीर. विज. । ३. सुविस्मितः-विज. । ४. स्वयं तया-विज. । ५. पर्यङ्का-श्रीधर. वंशी. वीर. विज. शुक. । ६. स्त्रग्वस्त्राभरणानि च-विज. ।

पत्नीमिति । स
तासां दासीनां मध्ये भा
विशिनष्टि-मणिस्तम्भेत्य
दुग्धफेनवन्मृदुलाः शु
विलोक्येत्युपरिष्टात्सम्बन्ध
सम्बन्धः । अस्मिन् पक्षे
॥२९॥ आसनानीति । मृ
तथाभूतानि तानि वितानान

स निजमन्दिरं प्र

स तु स्वपत्नीं तां न
विस्मयाब्धौ पतितः ततश्च तवै
वीक्ष्य प्रीतः महेन्द्रभवनं यथेि

वैमानिकीं विमानारू
अलौकिकीः समृद्धीः वीक्ष्य ताम
शय्यादयः सन्तीति सर्वत्र क्रिया
ताः । पर्यङ्का अपि तथा । आस
आस्तरणानि येषु तानि । मुक्तानां

भान्तीं दीप्यमानां ॥२७-
चतुर्थेनान्वयः । शय्या आस्तरणानि

ततो ब्राह्मणः पत्नीं दृष्ट्वा वि
पूजितां तस्यां तेजोविशेषं भावादिकं
दासीनां निष्ककण्ठीनां मध्ये भान्ती
विस्मितः भगवच्चरित्रम् एतादृशमलौ
तन्मन्दिरं वर्णयति-मणिस्तम्भशतोपेत
सामान्यतः परमोत्कर्षमाह-महेन

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

पत्नीमिति । स ब्राह्मणः वैमानिकीं विमानारूढां दैवीं देवतास्त्रियमिव प्रस्फुरन्तीं तां निष्कः पदकाख्यभूषणं कण्ठे यासां तासां दासीनां मध्ये भान्तीं दीप्यमानां पत्नीं वीक्ष्य विस्मितो बभूव ॥२७॥ प्रीति इति । तया पत्न्या युक्तः सहितः निजमन्दिरं विशिनष्टि-मणिस्तम्भेत्यादिना । यथा महेन्द्रभवनं तद्वत्स्थितम् ॥२८॥ पय इति । पयः फेनेत्यादेः मन्दिरः इत्यादि पयःफेननिभाः दुग्धफेनवन्मृदुलाः शुभ्राश्च दान्ताः धौताः परिच्छदाः रुक्ममयाः परिकराः यासां ताः शय्या इति द्वितीयान्तानां विलोक्येत्युपरिष्टात्सम्बन्धः । प्रथमान्तपाठे तु यत्र मन्दिरे पयःफेननिभाः शय्यादयः तत्र सर्वसम्पदां समृद्धिमवलोक्य तर्कयामासेति सम्बन्धः । अस्मिन् पक्षे दान्ताः दन्तमयाः रुक्मपरिच्छदा इति च पर्यङ्कविशेषणं हेममयो दण्डो येषां तानि चामरव्यजनानि च ॥२९॥ आसनानीति । मृदून्युपस्तरणानि तूलादिमयानि येषु तानि आसनानि मुक्तादाम्नां मुक्तासराणां विलम्बा येषु सन्तीति तथाभूतानि तानि वितानान्युल्लोचाः द्युमन्ति कान्तियुक्तानि च ॥३०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

स निजमन्दिरं प्रविष्टोऽभूत् ॥२८-२९॥ द्युमन्ति द्युतिमन्ति ॥३०-३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२८-३९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स तु स्वपत्नीं तां न परिचिकाय इत्याह-पत्नीं स्वभार्यां देवीमिव वीक्ष्य स विस्मितः केयं देवाङ्गना मामधममप्युपैतीति विस्मयाब्धौ पतितः ततश्च तवैवेयं सा भार्येति ताभिर्ज्ञापितस्तत्क्षण एव स्व(मेव)देहं च दिव्यसौन्दर्यतारुण्यवस्त्रालङ्काराद्याश्रितं वीक्ष्य प्रीतः महेन्द्रभवनं यथेति "श्रीदामरङ्कभक्तार्थभूम्यानीतेन्द्रवैभव" इति बृहत्सहस्रनामस्तोत्रम् ॥२७-३१॥

गूढार्थदीपिनी

वैमानिकीं विमानारूढां देवाङ्गनामिव । निष्कं ग्रैवेयकभूषणं कण्ठे यासां तासाम् ॥२७-२८॥ यत्र मन्दिरे शय्याद्या अलौकिकीः समृद्धीः वीक्ष्य ताम् अहैतुकीम् आकस्मिकीं समृद्धिं प्रति निर्व्यग्रः सन् तर्कयामास । कुतः आगतैषेति चतुर्थेनान्वयः । शय्यादयः सन्तीति सर्वत्र क्रियाशेषः । कथम्भूताः । दान्ताः गजदन्तनिर्मिताः । रुक्मं सुवर्णं तन्मया परिच्छदाः सामग्र्यो यासां ताः । पर्यङ्का अपि तथा । आस्यतेऽस्मिन्नासनम् । आसु उपवेशने धातुः ॥२९॥ आसनानि चौकीप्रभृतीनि मृदूनि कोमलानि आस्तरणानि येषु तानि । मुक्तानां दामानि विलम्ब्यन्ते येषु तानि । वितानं चन्द्रातपः (चांदनी) ॥३०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भान्तीं दीप्यमानां ॥२७-२८॥ यत्र मन्दिरे पयःफेननिभाः शय्यादयः तत्र ब्राह्मणः सर्वसम्पदां समृद्धीर्विलोक्य तर्कयामासेति चतुर्थेनान्वयः । शय्या आस्तरणानि दान्ताः गजदन्तमयाः पर्यङ्काः ॥२९॥ मुक्तादाम्नां विलम्बा ये येषु सन्ति तानि वितानानि ॥३०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो ब्राह्मणः पत्नीं दृष्ट्वा विस्मितो जात इत्याह-पत्नीं दृष्ट्वेति । पूर्वापेक्षया प्रकर्षेण स्फुरन्तीं देवीं देवतामिव वस्त्रालङ्करणादिभिः पूजितां तस्यां तेजोविशेषं भावादिकं दृष्ट्वा तामुत्प्रेक्षते । वैमानिकीमिवेति । यथा विमानस्था अप्सरा भवति ततोऽप्यतिशयमाह-दासीनां निष्ककण्ठीनां मध्ये भान्तीमिति । दासीनां विशेषणं रसस्त्रीत्वाय तासां मध्ये विभान्तीं शोभमानामेतादृशीं दृष्ट्वा स ब्राह्मणो विस्मितः भगवच्चरित्रम् एतादृशमलौकिकमिति । ततो भगवता कृपयैतद्दत्तमिति निश्चित्य प्रीतः सन् तया युक्तो निजमन्दिरं प्रविष्टः । स्वमन्दिरं वर्णयति-मणिस्तम्भशतोपेतमिति । एकमेव भवनं मणिस्तम्भशतेनोपेतं यत्र पत्न्या सह स्थितिः एवं लोकोत्तरं तदित्युक्त्वा सामान्यतः परमोत्कर्षमाह-महेन्द्रभवनं यथेति ॥२७-२८॥ तत्रत्यान्यपदार्थान् वर्णयति-पयःफेनेति त्रिभिः ।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

शयनोपयोगिन्यासनोपयोगीनि गृहोपयोगीनि च वस्तूनि वर्ण्यन्ते । पयःफेननिभाः शुभ्रा उत्तुङ्गाः शय्याः दन्तनिर्मिताः पर्यङ्काः रुक्मपरिच्छदाः सुवर्णेन दन्तमध्ये योजिताः हेमदण्डानि चामरव्यजनानि चकारादन्यान्यपि शयनसाधनानि आसनान्युपवेशनस्थानानि हैमानि सुवर्णमयानि मृदुपदसन्नद्धानि आस्तरणानि च मृदुपदनिर्मितानि चकारादन्यानि सिंहासनोपयोगीनि तदुपरि मुक्तादामविलम्बीनि चन्द्रातपानि द्युमन्ति च विचित्राणि कान्तियुक्तानि ॥२९-३०॥

श्रीसुबोधिनीसारः

विमानारूढां देवीमिव विस्फुरन्तीं पत्नीं स्त्रीम् निष्ककण्ठीनां दासीनां मध्ये भान्तीं वीक्ष्य दृष्ट्वा स सुदामा विस्मितः ॥२७॥ स्वयं प्रीतः तया स्त्रिया युक्तो निजगृहं प्रविष्टः मणिमयेन स्तम्भानां शतेनोपेतं युक्तम् इन्द्रमन्दिरमिव ॥२८॥ दुग्धफेनतुल्याः शय्याः दान्ता गजदन्तमयाः पर्यङ्काः सुवर्णोपकरणाः सुवर्णदण्डानि चामरव्यजनानि ॥२९॥ सुवर्णमयानि आसनानि मृदूनि कोमलानि उपस्तरणानि तूलमयानि येषु मुक्तादाम्नां विलम्बा येषु तानि द्युमन्ति प्रकाशवन्ति वितानानि ॥३०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स ब्राह्मणः वैमानिकीं विमानारूढां दैवीं देवस्त्रियमिव विस्फुरन्तीं दीप्यमानां निष्कः पदकाख्यभूषणं कण्ठे यासां तासां दासीनां मध्ये भान्तीं दीप्यमानां पत्नीं वीक्ष्य विस्मितः ॥२७॥ प्रीतश्च तया पत्न्या युक्तः सहितः स्वयं निजं मन्दिरं प्रविष्ट इति द्वयोरन्वयः । मन्दिरं विशिनष्टि–मणीनां स्तम्भशतेनोपेतं युक्तम् । किं बहुना महेन्द्रस्य भवनं यथा शोभते तथा शोभमानमिति ॥२८॥ महेन्द्रभवनसादृश्यं दर्शयंस्तत्रत्यानि वस्तूनि दर्शयति–पयःफेनेति त्रिभिः । यत्र मन्दिरे दान्ता हस्तिदन्तनिर्मिताः पयःफेननिभाः दुग्धफेनवन्मृदुलशुभ्रास्तरणयुक्ताः रुक्ममयाः परिच्छदाः पत्रकीलादयो यासां ताः शय्याः सन्तीति सर्वत्र क्रियाशेषः । रुक्ममयाः परिच्छदाः येषां ते दान्ताः पर्यङ्काश्च । हेममयो दण्डो येषां तानि चामरव्यजनानि ॥२९॥ मृदूनि तूलादिमयानि उपस्तरणानि येषु तानि हैमानि सुवर्णमयानि आसनानि च मुक्तादाम्नां विलम्बाः येषु सन्तीति तथाभूतानि अत एव द्युमन्ति, कान्तियुक्तानि च वितानानि ॥३०॥

अन्वितार्थप्रकाशिका

पत्नीमिति । स ब्राह्मणः वैमानिकीं विमानारूढां देवीं देवस्त्रियमिव विस्फुरन्तीं दीप्यमानां निष्कः पदकाख्यभूषणं कण्ठे यासां तासां दासीनां मध्ये अधिकतया भान्तीं शोभमानां पत्नीं वीक्ष्य विस्मितः ॥२७॥ प्रीत इति । प्रीतश्च तया पत्न्या युक्तः स्वयं स मणीनां स्तम्भशतेनोपेतं युक्तं किं बहुना महेन्द्रस्य भवनं यथा शोभते तथा शोभमानं निजमन्दिरं प्रविष्टः ॥२८॥ पय इति । यत्र मन्दिरे दान्ता हस्तिदन्तनिर्मिताः पयःफेननिभाः दुग्धफेनवन्मृदुलशुभ्रास्तरणयुक्ताः रुक्ममयाः परिच्छदाः पत्रकीलादयो यासां ताः शय्याः सन्तीति सर्वत्र क्रियाशेषः । रुक्ममयाः परिच्छदाः येषां ते दान्ताः पर्यङ्काश्च हेममयो दण्डो येषां तानि चामरव्यजनानि सन्ति ॥२९॥ आसनानीति । यत्र मृदूनि तूलादिमयानि उपस्तरणानि येषु तानि हैमानि सुवर्णमयानि आसनानि च मुक्तादाम्नां विलम्बा येषु सन्तीति तथाभूतानि अत एव द्युमन्ति कान्तियुक्तानि च वितानानि सन्ति ॥३०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदेव वर्णयति पय इति श्लोकचतुष्केण । सर्वसम्पदां समृद्धीर्विलोक्य तर्कयामासेत्युत्तरेण सम्बन्धः । दान्ताः इभदन्तरचिताः पर्यङ्काः ॥२९॥ मृदूनि तूलपटमयत्वात् कोमलानि उपस्करणानि आच्छादनानि येषु तानि वितानानि उल्लोचाः ॥३०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रीत इति । प्रीतः प्रसन्नतां प्राप्तः स्वयं स द्विजः तया पत्न्या युक्तः सन् निजमन्दिरं प्रविष्टः । मन्दिरं विशिनष्टि मणिस्तम्भेत्यादि । मणिमयानां स्तम्भानां शतेनोपेतम् । अत एव महेन्द्रभवनं यथा तथा शोभमानमिति शेषः ॥२७॥ पयःफेनेति । यत्र मन्दिरे पयःफेननिभाः शय्याः दुग्धफेनवन्मृदुलाः शुभ्राश्च सास्तरणतूलिकाः सन्तीत्यर्थः । यत्र पर्यङ्काः दान्ता गजदन्तनिर्मिताः रुक्माः स्वर्णमयाः परिच्छ परिकरा येषु तथाभूताश्च यत्र चामरव्यजनानि च हेमदण्डानि ॥२८॥ आसनानीति । यत्र मृदूपस्तरणानि कोमलोपस्तरणसहितानि हैमानि स्वर्णमयानि च आसनानि । मुक्तादाम्नां मुक्तासराणां विलम्बा येषु तानि द्युमन्ति कान्तियुक्तानि च वितानानि ॥२९॥ स्वच्छेति । मरकता इन्द्रनीलमणयो येषु तेषु स्वच्छस्फटिककुड्येषु स्वच्छेषु स्फटिकमयकुड्येषु च ललना रत्नसंयुताः रत्नदीपाः भ्राजमानाः ॥३०

जिन के कण्
के सदृश प्रकाशमान
स्तम्भयुक्त निज मन्दि
फेन जैसी कोमल पल
में सुवर्ण की सामग्री
बीजना जिस में शोभा
की मालाओं के गुच्छ

[1]अच्छस्फटिक
विलोक्य ब्राह्म
नूनं बतैतन्मम
महाविभूतेरवल
नन्वब्रुवाणो [6]दि
पर्जन्यवत्तत्[8] स्व

तत्र, ब्राह्मणः, सव
मम, दुर्गभस्य, शश्वद्दरिद्रस्य
उपपद्येत ॥३३॥ नूनम्, भू
अब्रुवाणः, असमक्षम्, अपि

स ब्राह्मणो निर्व्यग्रः
निश्चिनोति–नूनमिति एतन्ममेति
महदैश्वर्यं दत्तवांस्तर्हीदं तुभ्यं मय
भूरि बह्वपि दिशति ददाति अत्र
आप्तकामत्वाल्लक्ष्मीपतित्वाच्च अ
समक्षमवर्षन्रात्रौ निद्राणे कर्षके त
भजनं बहुमन्यमानः समक्षमब्रुवा

यत्र स्वच्छस्फटिककुड्ये
मन्दिरे । समृद्धिं वृद्धिम् ॥३२॥

---

१. स्वच्छ–श्रीधर. वंशी. वीर. विज.
भ्राजमाना–श्रीधर. वंशी. वीर. विज.
भूरिभोगः–वीर. ;भूरितेजाः–विज. । ८

कृष्णप्रिया

जिन के कण्ठ में पदक पडी हैं ऐसी दासियों के मध्य में अत्यन्त शोभायमान और विमान में बैठी देवांगना के सदृश प्रकाशमान भार्या को देख कर सुदामाजी चकित हो गए ॥२७॥ इन्द्र के भवन सदृश मणिनयों के सेंकडों सम्प्रयुक्त निज मन्दिर में सुदामाजीने आप प्रसन्न होकर पत्नी सहित प्रवेश किया ॥२८॥ उस मन्दिर में दूध के फेन जैसी कोमल पद बिछौना बिछे और जिन में सुवर्ण के पत्र की लगी ऐसी अनेक शय्याएं बिछी हैं और जिन में सुवर्ण की सामग्री ऐसे हाथी दांत के बडे बडे पर्यंक जहां विद्यमान हैं और सुवर्ण की दंडिका के अनेक चौर बीजना जिस में शोभायमान हैं ॥२९॥ कोमल आस्तरण युक्त सुवर्ण के अनेक आसन जिस में विद्यमान हैं मोतियों की मालाओं के गुच्छ युक्त प्रकाशमान चंद्रिका जिस में लग रही है ॥३०॥

[1]अच्छस्फटिककुट्येषु महामारकतेषु च । रत्नप्रदीपा[2] [3]आभान्ति ललनारत्नसंयुताः ॥३१॥
विलोक्य ब्राह्मणस्तत्र समृद्धीः[4] सर्वसम्पदाम् । तर्कयामास निर्व्यग्रः स्वसमृद्धिमहैतुकीम् ॥३२॥
नूनं बतैतन्मम दुर्भगस्य शश्वद्दरिद्रस्य समृद्धिहेतुः ।
महाविभूतेरवलोकतोऽन्यो[5] नैवोपपद्येत यदूत्तमस्य ॥३३॥
नन्वब्रुवाणो [6]दिशते समक्षं याचिष्णवे भूर्यपि [7]भूरिभोजः ।
पर्जन्यवत्तत्[8] स्वयमीक्षमाणो दाशार्हकाणामृषभः सखा मे ॥३४॥

कर्दमक्षमा

तत्र, ब्राह्मणः, सर्वसम्पदाम्, समृद्धीः, विलोक्य, निर्व्यग्रः, अहैतुकीम्, स्वसमृद्धिम्, तर्कयामास ॥३२॥ बत, न दुर्भगस्य, शश्वद्दरिद्रस्य, एतत्, कुतः, नूनम्, समृद्धिहेतुः, महाविभूतेः, यदूत्तमस्य, अवलोकतः, अन्यः, न, एव, उपपद्येत ॥३३॥ नूनम्, भूरिभोजः, दाशार्हकाणाम्, ऋषभः, मे, सखा, पर्जन्यवत्, स्वयम्, ईक्षमाणः, याचिष्णवे, अब्रुवाणः, असमक्षम्, अपि, भूरि, दिशते ॥३४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स ब्राह्मणो निर्व्यग्रः सन् स्थिरस्सन्नहैतुकीमाकस्मिकीं स्वस्य समृद्धिं तर्कयामास कुत एषा समृद्धिरागतेति ॥३२॥ नेति-नूनमिति एतन्ममेति एष चासावहञ्च तस्यैतन्मम महती विभूतिर्यस्य तस्यावलोकादन्यः ॥३३॥ ननु स चेदवलोकनमात्रेण परोक्षं दत्तवांस्तर्हीदं तुभ्यं मया दत्तमिति किं नावोचदत आह-नन्विति । ननु मे सखा समक्षमब्रुवाण एव याचिष्णवे याचकाय भूरि बह्वपि दिशति ददाति अत्र हेतुः भूरिभोजः स्वयं तद्देयं पर्जन्यवदीक्षमाण इति, अयमर्थः स्वयं तावद्भूरिभोजो बहुभोज आप्तकामत्वाल्लक्ष्मीपतित्वाच्च अतो यथा पारावारपरिपूरकोऽतिवदान्यः पर्जन्यः कदाचिद्बह्वपि वर्षमल्पमेव च मन्यमानो लज्जयेव असमक्षमवर्षन्रात्रौ निद्राणे कर्षके तत्क्षेत्रमाप्लावयत्येवं श्रीकृष्णोऽपि स्वभोगापेक्षया तद्देयमिन्द्रादिपदमप्यतितुच्छं मन्वानस्तस्य च परं बहुमन्यमानः समक्षमब्रुवाण एव ददातीति ॥३४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यत्र स्वच्छस्फटिककुड्येषु विमलस्फाटिकभित्तिषु । रत्नदीपाः सन्ति 'कुड्यं भित्तौ विलेपने' इति मेदिनी ॥३१॥ तत्र मन्दिरे। समृद्धि वृद्धिम् ॥३२॥ बत हर्षे । दुर्भगस्य मन्दभाग्यस्य । अवलोकः कृपाकटाक्षः ॥३३॥ अत्राशंकते-नन्विति ।

---

[1] स्वच्छ-श्रीधर. वंशी. वीर. विज. । २. रत्नदीपा-श्रीधर. वंशी. वीर. विज. जीव. ; रत्नदीपैः-इति पाठः ; रत्नप्रदीपा-शुक. । ३. [illegible]-श्रीधर. वंशी. वीर. विज. जीव. । ४. समृद्धि-विज. । ५. अवलोकतोन्यत्-इति पाठः । ६. दिशते शमक्षयं-विज. । ७. भूरिभोजः-वीर. ;भूरितेजाः-विज. । ८. पर्जन्यवन्नः स्वय- विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्राकथने । पर्जन्यो मेघः । अत्राशयमाह–अयमर्थः–आप्तकामस्य श्रीपतेश्च सर्वलोकैश्वर्यमपि तुच्छं प्रतीयत इति भाव अत आप्तकामत्वादेः । एवं पर्जन्यवत् । तस्य निजभक्तस्य । यथाऽत्युदारः समक्षमल्पवस्तु दातुं लज्जमानस्तद्गृहे प्रेष तथा श्रीकृष्णोऽपीति ॥३४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र स्वगृहे सर्वसम्पदां समृद्धीरित्यतोऽनुक्ताप्यन्यानीन्द्रभवनाधिकानि वैभवानि गृहीतानि स्वस्यसमृद्धिं विभूतिमि । तर्कयामास कुतः ? कथं जातेति विचारितवान् एवं कुत एषा समृद्धिरागतेति तेषां व्याख्याऽत्रैव युक्ता तर्कणस्य प्रकारापेक्ष ॥३२॥ नूनं निश्चये बत हर्षे यदूत्तमस्याऽवलोकतोऽन्यत् किञ्चिदपि एतस्य मम ह सा समृद्धिर्हेतुर्न । अन्य इति तु पाठः एतच्छब्दार्थमेव हेतुत्वेन विवृणोति दुर्भगस्य धनादिभाग्यहीनस्य अतः शश्वन्नित्यं दरिद्रस्येति यदूत्तमस्य तु कीदृशस्य सर्वतः पूर्णा विभूतिर्लक्ष्मीरूपा शक्तिर्यत्र तादृशस्य ॥३३॥ दाशार्हकाणामृषभो मे मम सखाऽसौ असमक्षं याचिष्णवे साक्षाद्याच किन्तु निगूढतद्वासनायुक्ताय अब्रुवाणोऽपि असमक्षमपि भूरि साष्ट्यादिकमपि दिशते नन्वसमक्षयाचनं कथं जानीयात् त तत्स्वयमेवेक्षमाणः सर्वज्ञशिरोमणित्वादिति भावः । तत्र भूरिदाने हेतुः भूरिभोज इति तादृशः स्वयमल्पं दातुं लज्जत इति भाव अनुक्त्वैवासाक्षादेव च दाने हेतुः असमक्षं याविष्णव इत्येवं तदेव सारस्याय स्यादिति भावः । स च निरुपाधिकदातुः स्वभावोऽन्य दृश्यत इति आह–पर्ज्जन्यवदिति । कदाचित् प्रकटमयाचमानेति सुप्तेति लोकगर्जनं विनापि वर्षतीति दर्शनात् दाशार्हकाणामृ इति तादृशभावनायां निजभावविशेषोद्रेकात् तत्रैव सखेति तेन परमानन्दमदोद्रेकादुक्तम् ॥३४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वच्छानि स्फाटिकानां कुड्यानि येषु तेषु यदीयेषु क्रीडागृहेषु महत्मारकतं मरकतसमूहो येषु तेषु यद्वा, महामरकत च गृहेषु रत्नरूपा दीपा भ्राजमानाः सन्ति पाठान्तरे रत्नदीपैः सह रत्नसंयुता इति रत्नमयालंकारमयत्वात् ॥३१॥ तत्र स्वगृहे सर्वसम्प समृद्धीरित्यतोऽनुक्तान्यप्यन्यानीन्द्रभवनाधिकानि वैभवानि गृहीतानि स्वस्य समृद्धिं सर्वसम्पदामेव किंवा विभूतिमित्यर्थः । तर्कया कुतः ? कथं जातेति विचारितवान् । एवं कुत एषा समृद्धिरागतेति तेषां व्याख्या अत्रैव युक्ता तर्कणस्य प्रकारापेक्ष्यत्वात् ॥३२॥ वितर्के निश्चये वा । यत हर्षे । एतच्छब्दार्थमेव विवृणोति–दुर्भगस्य धनादिभाग्यहीनस्य अतः शश्वत् नित्यं दरिद्रस्येति यदूत्तम अशेषैश्वर्यप्रकटनार्थं यदुकुलेऽवतीर्य तच्छ्रेष्टतां प्राप्तस्य भगवतः अतो महाविभूतेः यद्वा, महाविभूतेरस्याः समृद्धि अतस्तदवलोकनादन्यत् किंचिन्न घटते एतत्तदवलोकनेतरभाग्यरहितस्य मे सहसैवेदृशविभूतिसिद्ध्यसम्भवादिति भावः ॥ ननु निश्चये । भूरि लोकद्वये बहुलोपभाग्यं भोजयति भक्तानिति भूरिभोजः । तत्र सर्वत्रैव हेतुः–दाशार्हाणामृषभो निजाशेषसद्गुणप्रकट इत्यर्थः । अतो मे सखा अन्यथा परमाधनेन मया सह तस्य सख्यानुपपत्तिरिति । यद्वा, हर्षभरेणात्मानं महुमन्यमानो भ माद्यन् स्वसख्येन (स्वमुखेन–ग) श्रीभगवतोऽत्यसाधारणं निजममतास्पदताधिक्यं द्योतयति–मे सखेति । दाशार्हाणा छन्दोभंगपरिहारार्थं रेफस्यपृथुच्चारणं छान्दसम् । दाशार्हकाणामिति चित्सुखः । अन्यत्तैर्व्याख्यातम् । तत्र निद्राणे कर्षक व्याख्यानात्तथा प्रस्तुतेऽप्यसाक्षादेव दानादकारप्रश्लेषेणासमक्षं विषक इति ज्ञेयमिति । अथवा याचिष्णवे याचनशील अब्रुवाणस्तत्राप्यसमक्षमेव दिशति अयाचकाय तु मह्यं ब्रुवाणः साक्षात् कुतो दास्यतीत्यर्थः । अन्यत्समानम् ॥३४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

पर्जन्यवत् । पर्जन्यो गर्जितपूर्वकं ददाति नैवमित्यर्थः । यद्वा पार्जन्यवत् ददाति न अस्मानीक्षमाणः इत्यर्थः ॥३

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

महान्तो मरकता इन्द्रनीलमणयो येषु तेषु स्वच्छेषु स्फटिकमयकुड्येषु रत्नान्येव दीपाः स्त्रीरत्नैस्संवृताः प्र औज्ज्वल्यातिशयाद्रत्नानां दीपत्वरूपणम् ॥३१॥ विलोक्येति । निर्व्यग्रः निश्चलः स्थितः सन्नहैतुकीमाकस्मिकीं स्वस्य तर्कयामास कुतः एषा समृद्धिरागतेति तावच्चिन्तितवानित्यर्थः ॥३२॥ निश्चिनोति–नूनमिति । दुर्भगस्यास्मिन् जन्मनि नि

शश्वत् सदा जन्मान्तरेष्वपी
अवलोकनात् अन्यो नैवोप
ब्रुवन् किं न ददावित्याशङ्क
बहुभाग्यमप्यब्रुवाणो दास्य
स्वभोगापेक्षया अतितुच्छमे
कृतज्ञतामप्याह–पर्जन्यवदिति
तद्वदयं दाशार्हकाणामृषभो
पुंस्यभिलषितानर्थानसमक्षं व

निर्व्यग्रः निःसम्भ्रमः
॥३३॥ सः स्वयमब्रुवाणस्तूष्ण
अनल्पप्रभावो भवति स एताद

प्रथमं प्रीतः ततः स्वय

अहैतुकीमाकस्मिकीम् ।
ननु स चेदवलोकनमात्रेणैव मह
समक्षमब्रुवाण एव याचिष्णवे
लक्ष्मीकान्तत्वादात्यन्तिकभोगाधि
स्वगृहे ह्यवर्तमानानामपि तेषां या
क्वापि नास्ति अधिकं कुतः स्या
मन्यमानो लज्जया अब्रुवाण एव
कर्षकदत्तं बहुविधं पूजोपहारं सम्भुज
कर्षकेषु निद्राणेषु तत्क्षेत्राण्याप्लावय

कुड्येषु भित्तिषु । कथम्
सन्ति । प्रथमान्तम् ॥३१-३२॥ बत
कृपाकटाक्षादन्यो नैवोपपद्येत नैव स
समक्षमब्रुवाण एव याचिष्णवे याच
प्राणिजातं स स्वयमीक्षमाणः सन् अ
असमक्षं तत्क्षेत्रं जलैराप्लावयति एवं

शश्वत् सदा जन्मान्तरेष्वपीत्यर्थः । दरिद्रस्य मम समृद्धिहेतुः सम्पद्धेतुः महाविभूतेः विभूतिद्वयनायकस्य यदूत्तमस्य भगवतो अवलोकनात् अन्यो नैवोपपद्येत न सम्भाव्येत नूनं ध्रुवम् अहो बतैतदाश्चर्यमित्यर्थः ॥३३॥ एवं तर्हि समक्षमेव मह्यं दास्यामीति ब्रुवन् किं न ददावित्याशङ्क्याऽऽह–नन्विति । भूरि भोगः बहुभोगो भगवान् हेतुगर्भमिदम् अतः याचिष्णवे याचकाय भूर्यपि बहुभाग्यमप्यब्रुवाणो दास्यामि प्रतिगृह्णीष्वेत्येवमवदन्नसमक्षमेव दिशते यच्छति विरञ्चिभोगपर्यन्तमपि याचकाय दीयमानं स्वभोगापेक्षया अतितुच्छमेवेत्यभिप्रेत्य लज्जया तत्समक्षं न यच्छति किन्त्वसमक्षमेवेत्यर्थः । एतदेव दृष्टान्तमुखेन वदन् कृतज्ञतामप्याह–पर्जन्यवदिति । यथा पर्जन्यः कदाचिद्बह्वपि वर्षमल्पमेव मन्यमानः शयाने सति जने रात्रावगर्जन्नसमक्षमेव वर्षति तद्वदयं दाशार्हकाणामृषभो यदुपतिः तत्सेवकसमर्पितमत्यल्पमपि समीक्षमाणो बहुमन्यमानः सकामे कामनया युक्ते पुंस्यभिलषितानर्थानसमक्षं वर्षतीत्यर्थः ॥३४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

निर्व्यग्रः निःसम्भ्रमः ॥३२॥ ममैतदेव समृद्धिहेतुर्महाविभूतेर्यदूत्तमस्यावलोकतोऽन्यन्निमित्तं नैवोपपद्येत स एव हेतुरित्यन्वयः ॥३३॥ सः स्वयमब्रुवाणस्तूष्णीकः पर्जन्यवन्नः अक्षयं शं दिशते ददाति तेन यो यस्मै विष्णवे अभूर्यपि धनं ददाति भूरितेजाः अल्पप्रभावो भवति स एतादृशमहिमा दाशार्हकाणामृषभः श्रीकृष्णः मे सखा नन्वनुमतं लोकेनेति शेषः ॥३४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रथमं प्रीतः ततः स्वयमपि युक्तः रूपादिभिर्योग्यतां प्राप्तः सन् ॥२८-३९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहैतुकीमाकस्मिकीम् ॥३२॥ एष चासावहं तस्य एतन्मम महाविभूतेस्तस्यावलोकादन्यो न अन्यत्रैवेत्यपि पाठः ॥३३॥ ननु स चेदवलोकनमात्रेणैव महदैश्वर्य्यं दत्तवांस्तर्हि इदं तुभ्यं दत्तमिति तदैव किं नावोचदत आह–ननु निश्चितमेव मे सखा समक्षमब्रुवाण एव याचिष्णवे मद्विधयाचकजनाय भूर्यपि बहुतरमपि दिशते दिशति ददाति अब्रुवाणत्वे हेतुः भूरिभोजः कान्तत्वादात्यन्तिकभोगाधिक्यवान् अयं भगवत आशयः मत्प्रियसखोऽयं स्वभोग्यवस्तुतोऽप्यधिकान् पृथुकान् मह्यं ददौ गृहे ह्यवर्तमानानामपि तेषां याचित्वैवानीतत्वात् तस्मादस्मै मयापि स्वभोग्यादधिकमेव दातुं युक्तं किन्तु मद्भोग्यस्य सममेव अपि नास्ति अधिकं कुतः स्यादिति अतः स्वभोग्यादधिकं च स्वभोग्यसमं च दातुमसमर्थो देयमैन्द्रपारमेष्ठ्यादिपदमल्पमेव मन्यमानो लज्जया अब्रुवाण एव परोक्षमेव ददातीति तत्र दृष्टान्तः पर्ज्जन्यवदिति यथा पारावारपरिपूरकोऽपि वदान्यः पर्जन्यः कृतं बहुविधं पूजोपहारं सम्भुज्य कर्षकापेक्षया बह्वपि वर्षं स्वयं तदल्पमेव देयमीक्षमाणः कदाचिल्लज्जयेव समक्षमवर्षन् रात्रौ कर्षकेषु निद्राणेषु तत्क्षेत्राण्याप्लावयति तथेत्यर्थः । दाशार्हकाणामृषभ इति दाशार्हवंश्या एव वदान्यास्तेषामपि ऋषभः ॥३४॥

गूढार्थदीपिनी

कुड्येषु भित्तिषु । कथम्भूतेषु मरकता इन्द्रनीलमणयः जटिताः येषु तेषु । ललनारत्नैः संयुताः भ्राजमानाः रत्नदीपाश्च ते। प्रथमान्तम् ॥३१-३२॥ बत हर्षे नूनं निश्चितमेतत् एष चासौ अहं च तस्य एतन्मम सम्मृद्धिहेतुः यदूत्तमस्य अवलोकतः कटाक्षादन्यो नैवोपपद्येत नैव सम्भाव्येत दुर्भगस्य मन्दभाग्यस्य । शश्वत् सर्वदा ॥३३॥ ननु निश्चयेन मे सखा श्रीकृष्णः समक्षमब्रुवाण एव याचिष्णवे याचकाय भूर्यपि बह्वपि दिशते ददाति । यतो भूरिभोजः बहुभोगवान् । अतः पर्जन्यवत् तत्सर्वं तं स स्वयमीक्षमाणः सन् अभिलषितं ददाति । यथा पर्जन्यः समक्षं बह्वपि वर्षमल्पमेव मन्यमाने रात्रौ कर्षके निद्राणे सति स्वं तत्क्षेत्रं जलैराप्लावयति एवं श्रीकृष्णोऽपि तथैव करोति । दाशार्हकाणां यादवानां श्रेष्ठः ॥३४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रत्नान्येव च प्रदीपाः रत्नप्रदीपाः ॥३१॥ सर्वसम्पदां समृद्धीर्विलोक्य निर्व्यग्रः अवहितः सन् अहैतुकीमाकस्मिकीं स्वस समृद्धिं तर्कयामास कुतः इयमागतेति चिन्तितवानित्यर्थः ॥३२॥ निश्चित्याह-नूनमिति ॥३३॥ इदं तुभ्यं दत्तमित्येवमब्रुवाणेनासमक्ष बहुविभवे दत्ते बीजमाह-नन्विति । दाशार्हकाः कृतज्ञाः तदृषभोऽतिकृतज्ञः भूरिभोजोऽपि बहुसम्पत्पूर्णगृहादिभोक्तापि तत् गृ विद्यमानम् उपायतः सम्पादितं पृथुकमुष्टिचतुष्कं स्वयमीक्षमाणः स्वगृहगतविभूतिदानेनापि तत्प्रतिकर्तुमात्मानं मन्यमानः याचिष्णवे भार्याद्विद्वारेतिशेषः । अस्मद्विधाय भूर्यपि इन्द्रादिषु अविद्यमानमपि लज्जया असमक्षम् अब्रुवाण एव मे सखा दिशते ददातीत्यन्वयः । पर्जन्यवत् यथा कदाचिदतिदुःखोपार्ज्जितैर्जलादिभिः कर्षकेनार्चितः पर्जन्यः स्वाभाविकं स्वीयं जलसमूहं तत्सममन्यमानः कर्षके निद्राणे असमक्षं तत्क्षेत्रं रात्रौ लज्जयाऽऽप्लावयति तद्वत् ॥३४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

गृहभित्तीर्वर्णयति-अच्छस्फटिककुड्येष्विति । स्फटिकमयाः भित्तयः महामरकतमयाश्च तेषु सर्वत्र रत्नप्रदीपा आभान्ति ललनाः स्त्रियश्च रत्नसंयुताः चित्रमया रत्नैर्विरचिताः सत्यः स्त्रिय एव वा ॥३१॥ एवं दृष्ट्वा ब्राह्मणस्य या बुद्धिस्तामाह-विलोक्य ब्राह्मण इति । किञ्च सर्वसम्पदां समृद्धीर्दृष्ट्वा तस्य हेतुं तर्कयामास निर्व्यग्रः सावधानः ननु हेतुः प्रसिद्ध एव भवति किमिति चिन्तनं तत्राह-स्वसमृद्धिमहैतुकीमिति ॥३२॥ लोकावगतहेत्वभावात् तत्र बहून् हेतून् उत्प्रेक्ष्य निरोकरोति-नूनं बतेति । भगवदिच्छा अदृष्टं कालो ग्रहाः भगवानेव वेति तत्रान्ये बाधिकविषया इति भगवानेव दृष्टकारणमिति निर्णयमाह-एतत्परिदृश्यमानं मम दुर्भगस्य कथं बतेति हर्षे कदाचिद्भाग्योदयेन भवतीति चेत् तत्राह-शश्वद्धरिद्रस्येति-सर्वदा दरिद्रो कथमेकदैव सुसंवृद्धो जातः न ह्यकस्मादेवं भाग्यानि भवन्ति अतो महाभूतेर्भगवत एवावलोकनादृते अन्यो हेतुर्नैवोपपद्यते लोकेष्वेवं श्रूयते अस्माल्लक्ष्म्या दृष्टो महासमृद्धो जात इति भगवांश्च महाविभूति महत्यो विभूतयो लक्ष्मीसदृश्यो यस्यां अतोपपत्तिम् अपि आह-यदूत्तमस्यति । यादवाः पूर्वमन्यप्रयोजकाः स्थिताः इदानीं भगवद्दृष्ट्या अतिसमृद्धदृष्टा उपपत्तियुक्ता इति ॥३३॥ ननु भगवांश्चेत् दद्यात् तर्हि कथं न वदेत् अतः सन्देह इति चेत्तत्राह-नन्वब्रुवाण इति । नन्विति निश्चये भगवान् याचिष्णवे एतद्दिशते आदिशति प्रदर्शयति प्रयच्छतीत्यर्थः परमसमक्षम् अब्रुवाणश्च इदं प्रयच्छामीति नोक्तवान् स्वसमक्षं च दत्तवान् एतावान् परं विशेष इत्यर्थः नन्वेतादृशं दातृस्वरूपं न क्वाप्युपलक्षितमिति चेत्तत्राह-पर्जन्यवत्तत्स्वयमीक्षमाण इति यथा पर्जन्तः कृषीवलानात्मैकशरणान् निदाघपीडितान् दृष्ट्वा कदाचिच्छयानेष्वेव तेषु तत्सत्यं सर्वमेवाप्याययति एवं भगवान् मां तथाविधमेवमाप्यायितवान् तद्भक्तानां स्वरूपं स्वयमेवेक्षमाणः ननु तथापि यावदपेक्षितं तावदेव दद्यात् कथं बहु दत्त इत्याशङ्क्याह-भूर्यपीति यतः स्वयं भूरिभोजः ननु केचित् स्वयं भोक्तारोऽपि परस्मै न बहु प्रयच्छन्तीति चेत्तत्राह दाशार्हकाणामृषभ इति । दशार्हका दाशार्हाः यादवविशेषाः ते सेवकसमृद्धिवाञ्छायुक्ताः तेषामधिपः स्वसेवकान् दाशार्हान् तथा कृतवानिति ननु ते तस्य सम्बन्धिन इति चेत्तथाहमपीत्याह-सखा म इति ॥३४॥

श्रीसुबोधिनीसारः

स्वच्छस्फटिकमयेषु कुड्येषु महामारकतमयेषु च ललनारत्नैः स्त्रीश्रेष्ठैः संयुतान् भ्राजमानान् रत्नदीपान् विलोक्य ॥३१॥ सर्वसम्पदां समृद्धीः विलोक्य तत्र निर्व्यग्रः स्वस्थचित्तो ब्राह्मणोऽहैतुकीं निर्हेतुकीं स्वसमृद्धिं तर्कयामास ॥३२॥ शश्वज्ज दरिद्रस्य दुर्भगस्य मम एतत्समृद्धिहेतुः महाविभूतेः श्रीकृष्णस्यावलोकत इक्षणात् नूनमेव बत हर्षे अन्यः कारणान्तरं न सम्भ नास्ति ॥३३॥ भूरिभोजो लब्धकामत्वात् लक्ष्मीपतित्वात् दाशार्हकाणामृषभः श्रेष्ठो मे सखा श्रीकृष्णः पर्जन्यवन्मेघ इव स्वयमगु अगर्जन् समक्षं साम्प्रतमीक्षमाणो याचिष्णवे याचनशीलाय भूर्यपि बह्वपि ददाति ननु निश्चितम् ॥३४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

महान्तो मरकता इन्द्रनीलमणयो येषु स्वच्छेषु स्फटिकमयकुड्येषु रत्नान्येव दीपाश्च तथाभूतैः संयुताः, अत एव भ्रा रत्नसंयुता ललना उत्तमस्त्रियश्च सन्ति ॥३१॥ तत्र भवने एवं सर्वसम्पदां समृद्धीर्विलोक्य निर्व्यग्रः सावधानचित्तो ब्राह्मणः अहै आकस्मिकीं स्वस्य समृद्धिं तर्कयामास कुत एषा समृद्धिरागता इति चिन्तितवानित्यर्थः ॥३२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भगवत्कृतदानप्रकारस्यालौकिकत्वादाश्चर्यं सूचयति-बतेति। एष चासावहं च तस्य मम समृद्धिहेतुः यदूत्तमस्य श्रीकृष्णस्यावलोकतः कृपादृष्टेरन्यो नैवोपपद्येत नैव सम्भाव्यतेति नूनं निश्चितमेव। सर्वं तत्कृपादृष्ट्यैव जातमित्यन्वयः। ननु तव भाग्यवशादेव जातम् इत्याशंक्याह-दुर्भगस्येति भाग्यहीनस्येत्यर्थः। कथं भाग्यहीनत्वनिश्चयस्तत्राह-शश्वत् जन्मतः सर्वदा दरिद्रस्येति। दारिद्र्येण तथा निश्चयः तर्हि तदवलोकतोऽपि कथं स्यात्तत्राह-महती विभूतिर्लक्ष्मीर्यस्य यदधीना तस्येति ॥३३॥ ननु यदि भगवान् दत्तवांस्तदा तुभ्यमिदं दास्यमीति किं नोक्तवान् इत्याशंक्याह-नन्विति। निश्चितमेवैतत् मे मम सखा दाशार्हकाणामृषभः श्रेष्ठः श्रीकृष्णो भूरि बह्वपि याचिष्णवे याचकाय समक्षमब्रुवाण एव दिशते ददाति। तत्र हेतुमाह-तत् स्वयमीक्षमाण इति। स्वयं तद्देयमिन्द्रादिवैभवमतितुच्छं मन्वानस्तस्य च भजनं बहुमन्यमानो लज्जया इदं ददामीत्यब्रुवाण एव ददातीत्यर्थः। लज्जायां हेतुमाह-भूरिभोज इति। लक्ष्मीपतित्वात्स्वयं बहुभोज इति। यो हि स्वयं भूरिभोजः स सख्ये स्वल्पं प्रयच्छन् लज्जत्येवेत्याशयः परोक्षदाने दृष्टान्तमाह-पर्जन्यवदिति। पर्जन्यो यथा कर्षके रात्रौ शयान एव तत्क्षेत्रमाप्लावयति तथेत्यर्थः ॥३४॥

अन्वितार्थप्रकाशिका

स्वच्छेति। महान्तो मरकता इन्द्रनीलमणयो येषु स्वच्छेषु स्फटिकमयकुड्येषु रत्नान्येव दीपाश्च तथाभूतैः संयुक्ता अत एव भ्राजमाना ललना उत्तमस्त्रियश्च सन्ति ॥३१॥ विलोक्येति। तत्र भवने एवं सर्वसम्पदां समृद्धिं विलोक्य निर्व्यग्रः सावधानचित्तो ब्राह्मणः अहैतुकीम् आकस्मिकीं स्वस्य समृद्धिं तर्कयामास। कुत एषा समृद्धिरागतेति चिन्तितवानित्यर्थः ॥३२॥ निश्चिनोति-नूनमिति। बताश्चर्ये। नूनं दुर्भगस्य भाग्यहीनस्य शश्वत् सर्वदा दरिद्रस्य एष चासावहं च तस्य मम समृद्धिहेतुर्महाविभूतेः यदूत्तमस्य श्रीकृष्णस्यावलोकतः कृपादृष्टेरन्यो नैवोपपद्येत नैव सम्भाव्यतेति नूनं निश्चितमेव। सर्वं तत्कृपादृष्ट्यैव जातम् ॥३३॥ नन्विति। भूरिभोजः बहुभोगवान् लक्ष्मीपतित् वात्स्वयं आप्तकामत्वाच्च मे मम सखा दाशार्हकाणामृषभः श्रेष्ठः श्रीकृष्णः स्वयं तद्देयमिन्द्रादिवैभवमपि पर्जन्यवत् पर्जन्यवत् ईक्षमाणः अतितुच्छं मन्वानः श्रीकृष्णोऽपि स्वभोगापेक्षया तद्देयमिन्द्रादिपदमतितुच्छं मन्वानस्तस्य च भजनं बहुमन्यमानः समक्षमब्रुवाण एव दिशति। यद्वा। मम सखा असौ असमक्षं याचिष्णवे साक्षादयाचकाय इच्छायुक्ताय अब्रुवाणोऽपि असमक्षमपि भूर्यपि ददातीत्यन्वयः। याचिष्णवे याचकाय समक्षमब्रुवाण एव भूरि अपि बह्वपि दिशते ददाति। यथा समुद्रपूरकोऽतिवदान्यः पर्जन्यः कदाचित् बह्वपि वर्षमल्पमेव मन्यमानो लज्जयेव समक्षमवर्षन् यथा कर्षके रात्रौ शयान एव तत्क्षेत्रमाप्लावयति तथा ॥३४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

महामारकताः खचिताः येषु तेषु गृहेषु दीपाः सन्ति ॥३१॥ एवं तत्र स्वगृहे सर्वसम्पदां समृद्धीर्वृद्धीर्बाहुलानीति वत्। विलोक्य अहैतुकीं कुत इयमागतेति स्वसमृद्धिं निर्व्यग्रः सन् तर्कयामास ॥३२॥ दरिद्रस्य एतदेतस्य मम समृद्धिहेतुः विभूतेर्यद्दत्तमस्यावलोकनात् अन्यो हेतुः नैवोपपद्येत न सम्भवेत् ॥३३॥ पुनर्वितर्कयन्नाह-नन्विति। दाशार्हकाणां णाम् ऋषभः श्रेष्ठः भूरिभोजो बहुभोगः अनल्पैश्वर्यत्वात् अल्पं दातुं विलज्जमान इत्यर्थः। तद्देयं भूर्यपि मितैश्वर्यत्वादभूरि स्वयमीक्षमाणः सन् मे सखा श्रीकृष्णः याचिष्णवे याचकाय भक्ताय समक्षमब्रुवाणः सन् असमक्षं यथा तथा दिशते दिशति ददाति। अत्र दृष्टान्तः पर्जन्यवत्। यथा पर्जन्यः इन्द्रः अपरिमितजलवर्षणशीलत्वात् देयं जलमपि अल्पं मन्यमानः अगर्जमानः सन् दिनं विहाय लज्जमन इव रात्रौ वर्षति तद्वत् भक्तकृतं स्वल्पमपि बहु न्ते इत्याह-किञ्चिदिति यत् स्वदत्तम् ऐश्वर्यम् उर्वपि बहुलमपि तत् किञ्चित् करोति अल्पं मन्यते यत् सुहृदा भक्तेन कृतं क्षणं कर्म फल्गु अल्पमपि तत् भूरिकारी बहु मन्यते।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विलोक्येति। ब्राह्मणः तत्र भवने सर्वसम्पदां समृद्धीः विलोक्य निर्व्यग्रो निश्चलचित्तः सन् अहैतुकीमाकस्मिकीं स्वसमृद्धिं यामास। कुत एषा समृद्धिरागतेति तावच्चिन्तितवानित्यर्थः ॥३१॥ निश्चिनोति। नूनमिति॥ दुर्भगस्यास्मिन् जन्मनि निर्भाग्यस्य सदा जन्मान्तरेष्वपीत्यर्थः। दरिद्रस्य मम समृद्धिहेतुः सम्पद्धेतुः महाविभूतेः विभूतिद्वयनायकस्य

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दिव्यमानुषभावभेदप्रदर्शनऽप्येकताभाज इत्यर्थः । यदूत्तमस्य श्रीकृष्णभगवतः अवलोकतोऽवलोकनात् अन्यः नैव उपपद्येत के सम्भाव्येत नूनं ध्रुवम् । बत अहो एतत् आश्चर्यमिति शेषः ।।३२।। एवं तर्हि स समक्षमेव मह्यं दास्यामीति ब्रुवन् कि ददावित्याशङ्क्य स्वयमेवाह-नन्विति । भूरिभोजो बहुभोगो भगवान् हेतुगर्भमिदम् ॥ अतः याचिष्णवे याचकाय भूरि अ बहुभोग्यमपि अब्रुवाणः दास्यामि प्रतिगृह्णीष्वेत्येवमवदन् असमक्षमेव दिशते यच्छते ननु । विरिञ्चिभोगपर्यन्तमपि याचका दीयमानं स्वभोगापेक्षयातितुच्छमेवेत्यभिप्रेत्य लज्जया तत्समक्षं न यच्छति किन्त्वसमक्षमेवेत्यर्थः । एतदेव दृष्टान्तमुखेन कृ कृतज्ञतामप्याह-पर्जन्यवदिति । तत् स्वदत्तं स्वयम् ईक्षमाणः अल्पमिति शेषः । दाशार्हकाणाम् ऋषभः श्रीकृष्णः सका कामनया युक्ते पुंसि पर्जन्यवत् ददाति यथा पर्जन्यः कदाचिद्बहु वर्षन्नपि स्ववैभवापेक्षया तदल्पमेव मन्यमानः कामनायुक्ते पु तदभिलषितजलान्यसमक्षं वर्षति तथायमपि तदभिलषितार्थान् असमक्षमेव ददातीत्यर्थः । सखा मे इति पाठे दाशार्हकाणा ऋषभः भूरिभोजः मे मम सखा अयं श्रीकृष्णः तत् स्वदेयम् अल्पम् ईक्षमाणः सन् पर्जन्यवत् भूरि अपि याचिष्णवे अब्रुवाण असमक्षं दिशते ननु । अयमर्थः । स्वयं तावद्भूरिभोजः आप्तकामत्वात् लक्ष्मीपतित्वाच्चातो यथा पारावरपरिपूरकोऽतिवद पर्जन्यः कदाचिद्बह्वपि वर्षमल्पमेव मन्यमानो लज्जयेव समक्षमवर्षन् रात्रौ निद्राणे कर्षुके तत्क्षेत्रमाप्लावयति एवं श्रीकृष्णोऽ स्वभोगापेक्षया तद्देयमिन्द्रादिपदमपि अतितुच्छं मन्वानस्तस्य भजनं बहु मन्यमानः समक्षमब्रुवाण एव ददातीति ।।३३।। 'पर्जन्यव स्वयमीक्षमाणः' इत्येतदेव दृष्टान्तं स्पष्टं यथा तथा द्रढयति । किञ्चिदिति । यत् स्वदत्तमात्मना दत्तमैश्वर्यम् उरु अपि सदपीत्यर्थः । किञ्चिदत्यल्पं करोति मन्यते इत्यर्थः । यत् सुहृत्कृतं स्वभक्तेन कृतं समर्पितमिति यावत् । फल्गु अल्पमा भूरिकारी बहु मन्यते इत्यर्थः । अत एव मया उपनीतं समीपं नीतं पृथुकैकमुष्टिमेकमुष्टिपरिमितान् पृथुकानित्यर्थः । मह उभयविधविभूत्यधिपतिरपि स्वयं श्रीकृष्णः प्रीतियुतः सन् प्रत्यग्रहीत् स्वयमेव प्रतिगृहीतवान् ।।३४।।

कृष्णप्रिया

जहां बडी नीलमणि जटित निर्मल बिल्लौरी पाषाण को भित्तियों में प्रकाशमान अनेक रत्न हि दीपक हैं तथा उत्तम नारीवर्ग जहां विद्यमान है ।।३१।। उस भवन में उनको देखकर और सब समृद्धि को दे सावधान चित्त होकर सुदामा ब्राह्मण निज समृद्धि को निर्हेतुक तर्क करने लगे कि यह समृद्धि कैसे आ ।।३२।।उस के बाद यह निश्चय किया कि भाग्यहीन और सदा दरिद्र मेरी अद्‌भुत इस समृद्धि का महान् सम्पन्न यदूत्तम श्रीकृष्ण के कृपा-कटाक्ष के सिवा अन्य कोई भी हेतु नहिं हो सकता ।।३३।।यहां भोग दाशार्हक वंशियों मे श्रेष्ठ यह सखा श्रीकृष्ण मैं तुमको देता हूं ऐसा नहिं कहकर भी आप निज आश्रित को दे मेघ के सदृश असनज़ में याचना करने को बहुत भी देते हैं यह निश्चित है ।।३४।।

किञ्चित्करोत्युर्वपि यत् स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी ।
मयोपनीतां पृथुकैकमुष्टिं प्रत्यग्रहीत् प्रीतियुतो महात्मा
तस्यैव मे सौहृदसख्यमैत्री दास्यंपुनर्जन्मनि जन्मनि स्यात् ।
महानुभावेन गुणालयेन विषज्जतस्तत्पुरुषप्रसङ्गः
भक्ताय चित्रा भगवान् हि सम्पदो राज्यं विभूतीर्न[1] समर्घयत्यजः ।
अदीर्घबोधाय विचक्षणः स्वयं पश्यन् निपातं धनिनां मदोद्भवम्
इत्थं व्यवसितो बुद्ध्या [2]भक्तोऽतीव जनार्दने । विषयाञ्जायया त्यक्ष्यन्[3] बुभुजे नातिलम्पटः

---

१. समर्थ-श्रीधर. वंशी. वीर. विज. ; समद्ध-विश्व. ; समृद्ध-शुक. । २. भक्त्यातीव-विज. । ३. त्यक्त्वा-विज. ।

कर्दमक्षमा

यत्, उरु, अपि, स्वदत्तम्, किञ्चित्, करोति, सुहृत्कृतम्, फल्गु, अपि, भूरिकारी, महात्मा, मया, उपनीतम्, पृथुकैकमुष्टिम्, प्रीतियुतः, प्रत्यग्रहीत् ॥३५॥ तस्य, एव, मे, महानुभावेन, गुणालयेन, सौहृदसख्यमैत्री, दास्यम्, विषज्जतः पे, तत्पुरुषप्रसंगः, जन्मनि, जन्मनि, स्यात् ॥३६॥ धनिनाम्, मदोद्भवम्, निपातम्, पश्यन्, विचक्षणः, स्वयम्, अदीर्घबोधाय, भगवान्, सम्पदः, राज्यम्, चित्राः, विभूतीः, अजः, भक्ताय, न, समर्घयति ॥३७॥इत्थम्, बुद्ध्या, व्यवसितः, जनार्दने, अतीव, भक्तः, जायया, विषयान्, त्यक्ष्यन्, न, अतिलम्पटः, बुभुजे ॥३८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवाऽऽह-किञ्चिदिति। उरु बाह्वपि स्वदत्तं यत्किञ्चित्करोत्यल्पं मन्यते सुहृत्कृतं फल्ववतितुच्छमपि भूरिकारी बहुमन्यत इत्यर्थः॥ अत एव मयोपनीतां समीपं नीताम् प्रीतियुतः स्वयमेव प्रतिगृहीतवान् ॥३५॥ श्रीकृष्णस्य भक्तवात्सल्यं दृष्ट्वा तद्भक्तिं प्रार्थयते। तस्येति सौहृदं प्रेम सख्यं हिताशंसनं च मैत्री उपकारत्वं च दास्यं सेवकत्वम् तत्समाहारैकवचनम् तस्य तत्सम्बन्धिनो मे मम स्यान्न तु विभूतिः किञ्च महानुभावेन तेनैव विषज्जतो विशेषेण सङ्गं प्राप्नुवतस्तद्भक्तेषु प्रकृष्टः सङ्गः स्यादिति ॥३६॥ ननु भक्तेः फलं सम्पदं प्राप्य पुनर्भक्तिं किमिति प्रार्थयसेऽत आह-भक्तायेति। सम्पदः कोशादीन् राज्यमैश्वर्यं विभूतीः कलत्रपुत्रादीन्न समर्धयति न वदात्यपि तु दृढां भक्तिमेव कुतः अदीर्घबोधाय अविवेकिनो मम तु भक्त्यभावादेवं जातमतस्तद्भक्तिरेव स्यादिति भावः ॥३७॥ त्यक्ष्यन् शनैः शनैस्त्यागमभ्यस्यन् जायया सह बुभुजे ॥३८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदेव भक्तभक्त्यपेक्षया स्वदानाल्पमननमेव। इत्यर्थ इति-भक्तवात्सल्यादल्पमपि बह्वेव जानातीति भावः। अत एव प्रीतिमननादेव ॥३५॥ तदभिलषितमाह-कृष्णस्येत्यादिना। तस्यैव श्रीकृष्णस्यैव। एवकारेणान्ययोगव्यवच्छेदः। तेषां सौहृदादीनाम् समाहारद्वन्द्वे एकवचनम्। न तु विभूतिरित्यर्थावगतं तस्य अग्रिमपद्येनानर्थहेतुकथनात्। अन्यदभिलषितमाह-किञ्चेति। महान् अद्भुतोत्पादकत्वादिरूपोऽनुभावः। प्रभावो यस्य तेन। तद्भक्तेषु ब्रह्मरुद्रादिष्वपि। एतेन भगवज्जनसंगं विना भगवद्भक्तिरपि भक्तानां तोषकरी नेत्युक्तम् ॥३६॥ हरिरैहिकमैश्वर्यदो नेति मन्दानुमितस्वदोषमार्जनायेयं सम्पादितेति भावेनाशङ्क्य समाधत्ते-[illegible]। अतोऽत्र आदिना गजाश्वादिग्रहः। ऐश्वर्यं प्रयोजकत्वं न प्रेर्यत्वम्। आदिना पौत्रस्नुषादिग्रहः। सम्पदाद्यदाने हेतुमाशंकते-कुत इति। एवं जातम् ऐश्वर्यादि जातम्। यतोऽहमदीर्घबोधोऽतो हेतोः। इति भाव इति-मम संसृतिनिवर्तकदीर्घबोधाय श्रीकृष्णभक्तिरेवास्त्वित्याशयः ॥३७॥ नातिलम्पटः अनासक्तः ॥३८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न च मन्तव्यं तावद्दत्त्वापि तस्य तृप्तिः स्यादिति स्वल्पेऽपि भक्तकृते बहुमाननादित्याह-किञ्चिदिति। तत् मत्कृतमेव मुख्यं प्रमाणमित्याह-मयेति। पूर्वत्र हेतुः महात्मा महान् पूज्यः आत्मा कृपार्द्रादिस्वभावो यस्य सः अतो मत्पृथुकैकमुष्टेस्सकाशात् स्वल्पत्वमननेन नूनमसौ लज्जितश्चास्ते इति भावः ॥३५॥ यस्मादेवं तस्मात्तस्यैवेति येन मम सम्बन्धेन तत्कदन्नमपि सास्वादं स्वीकृतवान् तस्यैवेत्यर्थः। सौहृददास्ये स्वकर्तृके तद्विषयके सख्यमैत्र्यौ च तत्कर्तृके स्वविषयके तस्मिन्नेव प्रेम करवाणि तस्यैव च सेवां स एव मम हितमाशास्तां स एव मामुपकरोतु च इत्यर्थः। पुनरिति पुनरपीत्यर्थः। यद्वा त्वर्थोऽयं पुनःशब्दः जन्मादिकं यत्र कुत्रापि स्यात् सौहृदादिकं तु तस्यैवास्त्वित्यर्थः। सौहृदादिकं तु तैर्व्याख्यातम् अथवा सौहृदं दैहिकसम्बन्धः सख्यं विश्वासः मैत्री स्नेहः पुनः सदैन्योक्तिर्दास्यमिति यद्वा सौहृदं निरुपाधि मिथो हितकारित्वं सख्यं सह विहारमयः प्रणयः मैत्रस्निग्धतामात्रमपि दास्यं सेवकत्वमपीति पुनरिति वाक्यालङ्कारे अन्यत्समानं नन्वेवकारेण तदीयसुहृदादयोऽपि व्यावर्त्यन्ते नेत्याह- महाननुभावः प्रभाव ऐश्वर्यं यस्य तेन किञ्च गुणानां रूपतारुण्यकारुण्यवात्सल्यादीनामालयेन विषज्जतः विशेषेण सौहृदादिना सङ्गं प्राप्नुवतो मम तत्प्रभावेण तदीयगुणेनैव च तस्य पुरुषाणां सुहृदादीनां प्रकृष्टः सप्रेमकः सङ्गश्च स्यात् ॥३६॥ भगवान् सर्वैश्वर्य्यपरिपूर्णोऽपि अजः [illegible] स्वयमेव सिद्धः अतो दानेऽप्यनन्यापेक्षोऽपीति भावः। तासामदाने हेतुः चित्राः विविधप्रकाराः ततो नानाप्रकारं भक्तान्तःकरणं [illegible] किञ्च धनोपलक्षितत्वात् धनं सम्पादादित्रयं तन्मदोद्भवं नितरां पातं स्वनिष्ठातो भ्रंशं स्वयं स्वधर्मादिभ्यो नरकेषु पतनं वा

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

साक्षादेव पश्यन् यतो विचक्षण: सर्वज्ञ: ननु तर्हि श्रीध्रुवप्रह्लादाम्बरीषेभ्य: कुतोऽददात् तत्राह-अदीर्घेति । दीर्घबोधानां तेषां विवेकबलेन मदानुद्भावात् अदीर्घबोधाय मह्यं तु दुराग्रहदर्शनादेव दत्तवानिति भाव: ॥३७॥ बुद्ध्या विचारेण व्यवसित: अतो जनेषु निजभक्तेषु अदर्शनं किमुपायनमानीतमित्यादि प्रकारेण याचनं यस्य स: परमभक्तवत्सल: श्रीकृष्ण इत्यर्थ: । भक्त: जातप्रेमा अतो विषयान् त्यक्ष्यन् तथापि बुभुजे किमर्थं जायया हेतुना पतिव्रतायास्तस्या: प्रीत्यर्थमित्यर्थ: अन्यथा स्यादिति भाव: । तथापि नातिलम्पट: अतिशयेन नितरामलम्पट: तेष्वनासक्त एव बुभुजे ॥३८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

न च मन्तव्यं तादृशदानेनापि तस्य तृप्ति: स्यादिति भक्तानां भक्तेस्तेन बहुमननादित्याह-किंचिदिति । सुहृदां भक्तानां भजनम् अत एव तेषाम् ऋणी किल भवतीति भाव: । महात्मा परं ब्रह्म इति परमेश्वरत्वेन तादृशपृथुकैकमुष्टिग्रहणायोग्य तथापि प्रीतियुत: सन् प्रत्यग्रहीत् साक्षाद्भक्षितवानित्यर्थ: । यद्वा, प्रीत्या प्रतिग्रहेण हेतु:-महानात्मा कृपार्द्रत्वादि-स्वभावो स: अतो मत्पृथुकैकमुष्टे: सकाशात् तुच्छत्वमनननेन नूनमसौ लज्जित इवास्त इति भाव: ॥३५॥ अतो भक्त्युद्रेकेणा तस्येति । एवशब्देन देवतान्तरं तस्यावतारान्तरं च निरस्यति । इत्थमस्य यथापेक्ष्यमग्रेऽप्यन्वय: । स्यादस्तु । तत्र सौहृद-स्वकर्तृके तद्विषयके सख्यमैत्र्यौ च तत्कर्तृके स्वविषये स एव मम हितमाशास्तां स एव ममोपकरोतु चेत्यर्थ: । एवं यथोत्तरं भावतारतम्येन न्यूनत्वं पुनरित्यन्यस्मिन् जन्मनि (पुनरित्यस्मिन् जन्मनि) तत्सत्ता सूचिता यद्वा, त्वर्थे जन्मादिकं कुत्रापि स्यात् सौहृदादिकं तु तस्यैवास्त्वित्यर्थ: । जन्मनि जन्मनीति वीप्सया मोक्षो निरस्त एव अथवा सौहृदं दैहिक सख्यं विश्वास: मैत्री स्नेह: परमेशां यथोत्तरं श्रैष्ठ्यम् । तत्र मैत्र्या: सकाशाद्दास्यस्यातिदैन्यविशेषेण सेवाया: परमफलरूप तेन मननात् स्वदत्तेदृङ्महाविभूतेरपि परमफलरूपसाक्षात्सेवापेक्षयेति दिक् । ततश्च पुनरिति वाक्यालंकारे अन्यत्समानम् । महानु प्रभाव ऐश्वर्यं यस्य तेन किंच गुणानां रूपलावण्यकारुण्यवात्सल्यादीनामालयेन यद्वा, गुणानां श्रीव्रजेश्वर्योदरे बद्धानां दाम्नाम् श्रीदामोदरेणेत्यर्थ: । अतो विषज्जत: हेतौ शतृङ् विशेषेण सामीप्यादिना तत्र च गोपालबालकत्वेन संगं प्राप्तुमित्यर्थ: । पूर्वेण परेणाप्यन्वय: । यद्वा, विषज्जत: प्रेम्णा आसक्तिं प्राप्नुवत: सत: अन्यथा भक्तजनानुग्रहासम्पत्तिस्तत्संगसुखानुभव विषज्जने हेतु:-गुणालयेनेति तन्मधुररूपलीलाकारुण्याद्यनुसन्धानेनेत्यर्थ: । ननु तथापि प्रेमासक्तिर्दुर्घट तत्प्रभावाद्घटेतापीत्याशयेनाह-महानुभावेनेति ॥३६॥ ननु भक्तवत्सलश्चेदसौ भक्तेभ्यो धनादिकं किं न दत्ते ? अनर्थावह चेदधुना तुभ्यं कुतो दत्तम् ? तत्राह-भक्तायेति । चित्रा अद्भुता बहुविधा वा भगवान् सर्वैश्वर्यपूर्णोऽपि अज: सदा स्वयमेव अतो दानेऽनन्यापेक्षोऽपीति भाव: । न सम्यक् अर्थयति दत्त इत्यर्थ: । तत्र हेतु:-धनमदोद्भवं नितरां पातं स्वधर्मादिभ्यो नरकेषु पतनं वा स्वयं साक्षादेव पश्यन् यतो विचक्षण: सर्वज्ञ: । ननु तर्हि श्रीध्रुवप्रह्लादाम्बरीशादिभ्य: कुतोऽदात् ? अदीर्घेति । तेषां स्वतो विवेकबलेन मदानुद्भवादिति भाव: । यद्वा, हि यत: सम्पदोऽदीर्घबोधाय अविवेकाय भवन्तीति इत्यनेन सम्-शब्देन च भक्तेच्छया किंचिद्दत्तेऽपीति सूचयति । अतो निष्कामत्वेन मे पूर्वं किमपि दत्तम् अधुना च जातयेच्छया दत्तमिति भाव: । अन्यत्तैर्व्याख्यातम् । यद्वा, अकारे श्रीविष्णौ दीर्घोऽकुण्ठो बोधो ज्ञानम् अतो मे भगवद्विषयक दत्तमिति भाव: । एतच्च भक्तिस्वभावेन विनयादैन्याच्चेति ॥३७॥ बुद्ध्या विचारेण व्यवसित: कृतनिश्चयत: अतो जनेषु निजभक्ते (भा.१०-८१-३) 'किमुपायनमानीतम्' इत्यादिप्रकारेण याचनं यस्य स: परमभक्तवत्सल: श्रीकृष्ण इत्यर्थ: । जातप्रेमा अतो विषयान् त्यक्ष्यन् तथापि बुभुजे । किमर्थम् ? जायया हेतुना पतिव्रतायास्तस्या: प्रीत्यर्थमित्यर्थ: । नातिलम्पटस्तेष्वनासक्त एव बुभुजे ॥३८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

किञ्चिदिति । महदपि स्वदत्तम् अल्पं मन्यते सुहृदत्वम् अल्पमपि भूरि मन्यत इत्यर्थ: ॥३५॥

तत्स्वयमि
तत्किञ्चित्करोत्यल
मयोपनीतं समीप आनी
इति वार्थ: ॥३५॥ अत
हितैषित्वं प्रेम वा सख
तन्मम जन्मनि जन्मनि
भगवता विषज्जता वि
किमिति पुन: तद्भक्ति
मामभक्तमेव सम्भावय
यच्छतीत्यर्थ: । तत्र सम
धनिनां मदस्योद्भवो यस
विचक्षण: हेतुगर्भमिद
इत्थमिति । बुद्ध्या
शनैर्विषयत्यागमभ्यसन्

भक्तदत्तमेव ह
किञ्चित्करोति फलत इ
अल्पमपि भूरिकारि एतत
भावेनाह-तस्यैवेति । यो
पूर्यते अपि तु भक्तसङ्गो
तस्य हरे: पुरुषेषु ब्रह्मादि
सम्पादितेति भावेनाह-भ

प्रथमं प्रीत: तत

उरु अपि बह्वि
भूरिकारी बहुमन्यत इत्यर्थ
मैत्री बन्धुभाव: दास्यं सेव
ननु, तव भक्तिरस्त्येव तत्
कोषादीन् राज्यमैश्वर्यं विभूति
ददाति तत्रापि तेषां नापका
कुर्वन् स्थण्डिलशायी तदी
सम्यग्वर्धयति किन्तु तदभी

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तत्स्वयमीक्षमाण इत्येतदेव स्पष्टं दृष्टान्तेन दृढयति-किञ्चिदिति । यत् स्वदत्तमात्मना दत्तमैश्वर्यमुरु भूर्यपि तत्किञ्चित्करोत्यत्यल्पं मन्यत इत्यर्थः । यत्सुहृदा भक्तेन कृतं समर्पितं फल्गु अल्पम् अपि तद्भूरि बहु करोतीति तथा तथा हि मयोपनीतं समीप आनीतं पृथुकानाम् एकं मुष्टिं स्वयं महात्मोभयविभूत्यधिपतिरपि प्रीतियुक्तः प्रत्यग्रहीत् महात्मेत्यस्य सर्वभूताभिप्रायज्ञ इति वार्थः ॥३५॥ अतः कृतज्ञतमस्य भगवतः सख्यादिकमेव मम प्रतिजन्मनि स्यादिति प्रार्थयते-तस्यैवेति । भगवत एव सौहृदं हितैषित्वं प्रेम वा सख्यं प्रियत्वं हताशंसनं वा मित्रत्रायकत्वं वा मैत्री उपकारकरणेन किञ्चित्करत्वं दास्यं भृत्यत्वं तेषां द्वन्द्वैकवद्भावः तन्मम जन्मनि जन्मनि वीप्सायां द्विर्भावः स्यादस्तु न तु विभूतिरिति भावः । किञ्च गुणालयेन अनन्तकल्याणगुणाश्रयेण महानुभावेन भगवता विषज्जता विशेषेण सङ्गतिं प्राप्नुवतो मम तत्पुरुषाणां तद्भक्तानां प्रसङ्गः प्रकृष्टः सङ्गः स्यात् ॥३६॥ ननु, भक्तस्सन्नेव किमिति पुनः तद्भक्तिं प्रार्थयसे इत्यत आह-भक्तायेति । चित्रं यद्यहं भक्तस्तर्हि मह्यमैश्वर्यप्रदानमतिचित्रमित्यर्थः । इत्थमैश्वर्यदानेन मामभक्तमेव सम्भावयामीति भावः । कुतः हि यस्मादजो भगवान् भक्ताय सम्पदो राज्यं विभूतीश्च न समर्द्धयति न वर्द्धयति न यच्छतीत्यर्थः । तत्र सम्पदो भोग्यभोगस्थानादिसमृद्धयः विभूतयः पुत्रपशुवित्तादिसमृद्धयः अदाने हेतुं वदन् भगवन्तं विशिनष्टि-धनिनां मदस्योद्भवो यस्मात्तदैश्वर्य्यं निपातं निपतन्त्यनेन नरक इति तथाभूतम् अदीर्घबोधाय अविवेकाय च भवेदिति पश्यन् जानन् विचक्षणः हेतुगर्भमिदम् अतस्तावन्न समर्द्धयत्येवेति सम्बन्धः अतः किंवाऽहमभक्तस्तस्मात्तद्भक्तिं प्रार्थये इति भावः ॥३७॥ इत्थमिति । बुद्ध्या विवेकात्मिकया व्यवसितः निश्चिन्वन्नितरां भगवति भक्तियुक्तस्सन् विषयांस्त्यक्ष्यन् शनैः शनैर्विषयत्यागमभ्यसन्नातिलम्पटः तेष्वतीवादररहितः तान् जायया सह बुभुजे अनुबभूव ॥३८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

भक्तदत्तमेव हरेस्तृप्तिजनकत्वेनानन्तफलत्वेन परिणमति नाभक्तदत्तमित्याह-किञ्चिदिति । यत् सुष्ठु भक्तिपूर्वमदत्तं तदुर्वपि किञ्चित्करोति फलत इति शेषः । "त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिम्" इत्यादेः सुहृत्कृतं पूजनं फल्गु अपि अल्पमपि भूरिकारि एतत्कुतो दृष्टमत्राह-मयेति । हेतुगर्भविशेषणम् एतत् ॥३५॥ यतोऽत्र भक्तिरेव प्रधानकारणमतः सैव सम्पाद्येति भावेनाह-तस्यैवेति । योऽहमनादिकालमारभ्य तच्चरणैकशरणः तस्यैव मे सौहृदादि स्यादित्यन्वयः न केवलस्य हरेः भक्तिलक्षणसङ्गेन पूर्ते अपि तु भक्तसङ्गोऽपि स्यात् इति प्रार्थयते-महानुभावेनेति । भगवता सह विषज्जतः विशेषेण सङ्गं कुर्वतः मे तत्पुरुषप्रसङ्गः तस्य हरेः पुरुषेषु ब्रह्मादिष्वपि प्रकृष्टसङ्गश्च स्यादित्यन्वयः ॥३६॥ हरिरैहिकमैश्वर्यं न ददातीति मन्दजनानुमितस्वदोषापमार्जनायेयं सम्पादितेति भावेनाह-भक्तायेति ॥३७॥ त्यक्त्वाऽहम्ममतामिति शेषः ॥३८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रथमं प्रीतः ततः स्वयमपि युक्तः रूपादिभिर्योग्यतां प्राप्तः सन् ॥२८-३९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उरु अपि बह्वपि स्वदत्तं मह्यमीदृशैश्वर्य्यं किञ्चित्करोति अल्पं मन्यते सुहृदो मद्विधस्य फल्गु अतितुच्छमपि वस्तु भूरिकारी बहुमन्यत इत्यर्थः । यतो मयेत्यादि ॥३५॥ तस्यैवैतादृशभक्तवत्सलस्य सौहृदं स्नेहः सख्यं सहावस्थायित्वमयः प्रणयः मैत्री बन्धुभावः दास्यं सेवा तेषां द्वन्द्वैक्यं महानुभावेन तेनैव विषज्जतः विशिष्टसङ्गं प्राप्नुवतो मम तद्भक्तेषु प्रसङ्गः स्यात् ॥३६॥ ननु, तव भक्तिरस्त्येव तत्फलं सम्पत्तिश्च प्राप्ता तत्र नास्ति मे भक्तिर्नापि भक्तेर्वास्तवं फलं सम्पत्तिरित्याह-भक्तायेति । सम्पदः कोषादीन् राज्यमैश्वर्यं विभूतीः कलत्रादीन् न समर्द्धयति न ददाति अदीर्घबोधायेति दीर्घबोधेभ्यः प्रह्लादादिभक्तेभ्यो यदिह सम्पदोऽपि ददाति तत्रापि तेषां नापकारः मम त्वदीर्घबोधस्य भक्त्यभावादेव सम्पत्प्राप्तिरभूत्तदलमनयेति विमृश्य स यावदर्थमेव विषयभोगं कुर्वन् स्थण्डिलशायी तदीयव्रतनिष्ठः श्रवणकीर्तनादिषु परमाग्रहवानभूदिति ज्ञेयं भक्ताय सुखयितुं सम्पदादिकं न समर्द्धयति न सम्यग्वर्धयति किन्तु तदभीप्सितप्रेमसेवासिद्ध्यर्थमीषन्मात्रं वर्धयतीति केचिदाहुः "ऋधु वृद्धौ" ॥३७-३८॥

गूढार्थदीपिनी

भगवान् स्वदत्तम् उरु बह्वपि यत् वत् किञ्चित् करोति अल्पं मन्यते। भक्तकृतं फल्वपि भूरि करोतीति बहुमन्यते। मया उपनीतां समीपं प्रापितां प्रत्यग्रहीत् सादरं गृहीतवान् ॥३५॥ मे मम प्रतिजन्म तस्यैव सौहृदादिकं तत्पुरुषाणां भक्तानां प्रकृष्टे महत्त्वपूर्णः सर्गश्च स्यादित्यन्वयः। कथम्भूतस्य मे। तेनैव गुणालयेन भगवता विषज्जतः विशिष्टं सङ्गं प्राप्नुवतः। सौहृदं प्रेम सख्यं विश्वासः मैत्री उपकारकत्वं सेवकत्वं चेति क्रमेणार्थाः सर्वेषां समाहारद्वन्द्वैक्यम् ॥३६॥ अजो भगवान् भक्ताय सम्पदो राज्यं विभूतीश्च न समर्थयति न ददाति यतः ताः सर्वा अपि दीर्घबोधाय विवेकाय न भवन्ति किन्तु पतनाय। कुतः। धनिनां मदोद्भवं निपातं पश्यतः पश्यतीति हेतोः। अत एव भगवान् विचक्षणः परिणामदर्शी। अर्थयतेः हेतुमण्णिच्। समर्धयतीति पाठे ऋध्यतेः ऋध्वतेर्वा णिच्। उभयत्र दाने तात्पर्यम्। चित्रा विविधा ॥३७॥ बुद्ध्या एवं व्यवसितः कृतनिश्चयः यतो भक्तः अत एव विषयांस्त्यक्ष्यन् त्यक्तुमिच्छन् नातिलम्पटः अनासक्तः सन् तान् बुभुजे इत्यन्वयः ॥३८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्स्वयमीक्षमाण इत्यनेन सूचितां भगवतः कृतज्ञतां प्रपञ्चयति-किञ्चिदिति। स्वदत्तम् उरु अपि यत् करोति न बहुमन्यते इत्यर्थः। सुहृत्कृतं फल्गु अल्पमपि भूरिकारी भूरि बहुकरोतीति तथा बहुमन्यते इत्यर्थः। अतो ममोपनीतं केवलं समीपं नीतं न तु अर्पितं तथापि महात्मा सर्वात्मा स्वतः परिपूर्णकामः पृथुकैकमुष्टिं स्वयमेव प्रीतियुतः प्रत्यग्रहीत् प्रतिगृहीतवान् ॥३५॥ भगवति विविधां भक्तिं भागवतेषु च प्रसङ्गं प्रार्थयते तस्येति। सौहृदादीनां द्वन्द्वैकवद्भावः। महानुभावेन भगवता विषज्जतः विशेषण अन्येभ्यस्तत्पुरुषेषु श्रेष्ठेन भावेन सङ्गं प्राप्नुवतः तत्पुरुषेषु भागवतेषु प्रकृष्टः सङ्गश्च स्यात् ॥३६॥ स्वभक्तेभ्यो भक्तिफलं स्वपद ददाति न तु सम्पदः अतः प्राप्तासु सम्पत्सु अनासक्तस्तमेव भजामीत्याशयेनाह-भक्तायेति। न समृद्धयति न ददाति अतो मम भार्यामनोरथपूर्त्यर्थं तद्दत्तास्वपि सम्पत्सु अनासक्तः सन् तत्पदप्राप्त्यर्थमेव भजामीति भावः ॥३७॥ एवं कृतनिश्चयस्य मुनेः हरिभजनेन हरिपदप्राप्तिमाह-इत्थमिति त्रिभिः। त्यक्षन् शनैः शनैः त्यजन् जायया सह बुभुजे ॥३८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अन्यमपि भगवद्गुणं स्मृत्वा धोरोदात्तो भगवानेवैवं दातुं समर्थ इति निश्चिनोति-किञ्चित्करोतीति। यो ह्यल्पं प्रयच्छति स लज्जया अनुक्त्वा प्रच्छन्नत्वं ज्ञापयति अतः स्वदत्तमुर्वपि किञ्चित्करोति सुहृत्करोतीति सुहृत्कृतमस्मन्नीतं तु तर्पयन्त्यङ्ग मां विश्वमित्यादिवाक्यैः फल्वपि मुष्टिचतुष्टयात्मकमुपायनं भूरिकारी तत्प्रकटीकरोति मयोपनीतमिति भगवानिन्द्रादिभिरप्यानीतमेवममृ न भक्षयति यथा पृथुकानाम् एकमुष्टिं भक्षितवान् अत अमृतापेक्षयापि पृथुकानामानन्ददातृत्वाद्भूरिकारित्वं तत्रापि प्रीतियुतः परमापेक्षितपदार्थं प्राप्त इव स्वयं तु महात्मा कोटिब्रह्माण्डनायकः ॥३५॥ तस्मादेवं भक्तवत्सलः कोऽपि नास्तीति तत्सम्बन्धा मम बहवो भवन्त्विति प्रार्थयते-तस्यैव मे सौहृदसख्यमैत्रीति। प्राणिनो देहेन्द्रियं प्राणान्तःकरणानि चतुर्विधानि भवन्ति तत्र हृदयस्य सम्बन्धः सौहार्देन भवति सौहार्देनैव स्मरणं गच्छति भगवांश्चेन्मत्प्राणानां स भवेत् तदा तमेवानुगच्छेयुरिति तात्पर्यम् इन्द्रियाणां मैत्री तानि मित्रानुगुणमेव कुर्वन्ति दास्यं देहस्य एतच्चतुष्टयं मम पूर्वं स्थितमेव अन्यथा भगवत्सम्बन्धः कथं भवेत् पुनर्जन्म जन्मनि स्यादिति प्रार्थना यत्र याञ्चाभावेऽपि समृद्धिमेतावतीं दत्तवान् तत्र याञ्चायां किं न दद्यादिति गृहे प्रविष्टो याचसे नन्वेकस्मि जन्मनि एकेन सहजातं जन्मान्तरे शिवेनान्येन वा प्रार्थ्यतां कोऽयं निर्बन्ध इति चेत्तत्राह-महानुभावेन गुणालयेनेति। स महानुभावः तत्सेवकसेवकेष्वपि न संसारादिधर्मा भवन्ति इति किञ्च गुणालयेन गुणानां स एव एक आलयः आकरः ननु त सख्यार्थं जन्मादिप्रार्थनायां तत्र विषयैः सह आसङ्गः स्यात् तदा अनर्थो भवेदित्याशङ्क्याह-विषज्जतस्तत्पुरुषप्रसङ्ग इति। त भगवद्भक्तैः सह सङ्गो भवतु तेनैव सङ्गदोषो निवर्तिष्यत इत्यर्थः ॥३६॥ ननु, तस्मिन् जन्मनि धनराज्यादिसम्पत्तौ न भगवद्भ सह सङ्गः न वा निस्तार इति चेत्तत्राह-भक्ताय चित्रा इति। भगवान् विचित्रा बुद्धिव्यामोहकाः सम्पदः भक्ताय न समर्द्धयति त राज्यं विभूतीरैश्वर्याणि च तत्र हेतुः अज इति। स्वयं न जातः अनेन षड्भावविकारा निराकृताः अतः स्वार्थं सेवकानां समृद्धि

करोतीत्यर्थः। तेषामेव
वा अतो भक्तानां दीर्घ
कदाचिद्विस्मरणे का ग
॥३७॥ एवं भगवति स
निश्चीय स्वयं च जनार्दने
किञ्चिल्लम्पटो भूत्वा अ

उर्वपि बह्वपि
इत्यर्थः। मया उपनीताम्

"सौहृदं प्रेम

गुणानामाश्रये
अदीर्घबोधायाल्पज्ञानिने
मदोद्भवं धनिनां निपातं
क्षीण्वन् नातिसक्तो जायय

तत्स्वयमीक्षमाण
हृत् हृदयं यस्य तेन भक्तेन
अत्युदारचित्तस्य इत्यर्थः।
श्रीकृष्णस्य भक्तवात्सल्यं दृ
विषज्जतः विशेषेण संगं प्रा
तत्र सौहृदं प्रेम, च सख्यं विश्व
किम्पुनस्तत्प्रार्थनया इत्याशंक
अतस्तत्प्रार्थना युक्तैव इत्याश
न समर्थयति न प्रयच्छति।
सम्पदादयोपकारं न कुर्वन्ति अ
यस्य तं नरकादौ निपातं प
अविद्याकृतावरणाभावेनजन्मा
भक्तः, अत एव विषयान् त्यक्ष

किञ्चिदिति। यत् उरु
भजनं फल्गु स्वल्पमपि भूरिक
प्रत्यग्रहीत् ॥३५॥ तस्येति। गुणा
मम जन्मनि जन्मनि तस्यैव सौहृ

बहुमन्यते। मया
ां भक्तानां प्रकृष्टे
वतः। सौहृदं प्रेम
काय सम्पदो राज्यं
। धनिनां मदोद्भवं
तीति पाठे ऋध्यते:
तो भक्तः अत एव

करोति न बहुमन्यते
वलं समीपं नीतं न तु
वान् ॥३५॥ भगवति
विषज्जतः विशेषण
यो भक्तिफलं स्वपदं
न ददाति अतो मम
वं कृतनिश्चयस्य मुनेः

यो ह्यल्पं प्रयच्छति स
नीतं तु तर्पयन्त्यङ्ग मां
तादिभिरप्यानीतमेवममृतं
रित्वं तत्रापि प्रीतियुतः
ास्तीति तत्सम्बन्धा मम
नि भवन्ति तत्र हृदयस्य
रति तात्पर्यम् इन्द्रियाणां
: कथं भवेत् पुनर्जन्मनि
विष्टो याचसे नन्वेकस्मिन्
न गुणालयेनेति। स हि
आलयः आकरः ननु तत्र
स्तत्पुरुषप्रसङ्ग इति। तदा
ादिसम्पत्तौ न भगवद्भक्तेः
भक्ताय न समर्द्धयति तथा
स्वार्थं सेवकानां समृद्धिं न

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

करोतीत्यर्थः। तेषामेवार्थे करिष्यतीति पक्षं दूषयति दीर्घबोधायेति यतः सम्पदादयः अदीर्घबोधा भवन्ति दीर्घबोधाभावाय नाशाय वा अतो भक्तानां दीर्घबुद्धिर्भविष्यति नेति जाता वा नाशं यास्यतीति न समर्द्धयति नात्रान्यकथनापेक्षा यतः स्वयमेव विचक्षणः कदाचिद्विस्मरणे का गतिरिति चेत्तत्राह-पश्यन्निपातं धनिनां मदोद्भवमिति। धनिनां धनमदपातदर्शनमेव भगवत्स्मारकमित्यर्थः ॥३७॥ एवं भगवति सख्यादिकमेव निश्चित्य तत्परो भूत्वा त्यागार्थं विषयोपभोगं कृतवानित्याह-इत्थं व्यवसित इति। एवं बुद्ध्या निश्चीय स्वयं च जनार्दने भक्तो भूत्वा जायया सह तदर्थमेवैतावज्जातमिति कियत्कालानन्तरं तां विषयांश्च त्यक्ष्यामीति अनतिलम्पटः किञ्चिल्लम्पटो भूत्वा अन्यथा रसो न भवतीति बुभुजे ॥३८॥

श्रीसुबोधिनीसारः

उर्वपि बह्वपि सुष्ठु अदत्तं यत् किञ्चित्करोति अल्पं मन्यते तुच्छीकरोति सुहृद्भिः कृतं फल्गु अल्पमपि भूरिकारी बहुमन्यते इत्यर्थः। मया उपनीताम् आनीतां पृथुकतण्डुलैकैकमुष्टिं प्रीतियुक्तो महात्माऽङ्गीकृतवान् ॥३५॥ सदा तद्भक्तिं याचते तस्य हरेः

"सौहृदं प्रेम मित्रत्वं सख्यं मैत्र्युपकारतः। दास्यं सेवानुयायित्वं प्रतिजन्म ममास्तु वैः ॥१॥" इति ॥

गुणानामाश्रयेण महानुभावेन श्रीकृष्णेन विषज्जतः सङ्गं प्राप्नुवतः मे तत्पुरुषेषु प्रसङ्गः स्यात् ॥३६॥ अदीर्घबोधायाल्पज्ञानिने चित्राः सम्पदो राज्यं विभूतीरजो भगवान् ददाति भक्ताय न ददाति स्वयं विचक्षणो दानादाने निपुणः मदोद्भवं धनिनां निपातं प्रपश्यन् सन् ॥३७॥ एवं बुद्ध्या कृतनिश्चयोऽतीव कृष्णे भक्तः विषयान् भोगान् त्यक्ष्यन् भोगेन ण्वन् नातिसक्तो जायया स्त्रिया सह भुक्तवान् ॥३८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्स्वयमीक्षमाण इत्येतदेव स्पष्टयति-किञ्चिदिति। उरु बह्वपि स्वदत्तमैश्वर्यादि किञ्चित्करोति स्वल्पं मन्यते, सुष्ठु प्रेमयुक्तं हृत् हृदयं यस्य तेन भक्तेन कृतं भजनं फल्गु स्वल्पमपि भूरिकारी बहुकरोतीति तथा सः। एवं करणे हेतुमाह-महात्मेति। अत्युदारचित्तस्य इत्यर्थः। न चात्र सन्देहः, प्रत्यक्षत्वात् इत्याह-मयोपनीतं पृथुकैकमुष्टिं प्रीतियुक्तः प्रत्यग्रहीत् ॥३५॥ एवं श्रीकृष्णस्य भक्तवात्सल्यं दृष्ट्वा तद्भक्तिमेव प्रार्थयते-तस्येति। गुणालयेन ऐश्वर्यादिगुणसम्पन्नेन महानुभावेन श्रीकृष्णेनैव प्रेरितस्य विषज्जतः विशेषेण संगं प्राप्नुवतो मम जन्मनि जन्मनि तस्यैव सौहृदादिकं तस्य पुरुषाणां भक्तानां प्रकृष्टसंगश्च स्यादित्यन्वयः। तत्र सौहृदं प्रेम, च सख्यं विश्वासः मैत्री उपकाराशंसनं, दास्यं सेवकत्वं च तत्समाहारैकवचनम् ॥३६॥ ननु प्रार्थिता भक्तिस्तवास्त्येव, किम्पुनस्तत्प्रार्थनया इत्याशंक्य यदि मम भक्तिः स्यात्तदा भगवान् मह्यं सम्पदादि न दद्यात्, अतस्तद्दानादनुमीयते मम भक्तिर्नास्तीति, अतस्तत्प्रार्थना युक्तैव इत्याशयेनाह-भक्तायेति। भगवान् भक्ताय चित्राः सम्पदः कोशादीन् राज्यमैश्वर्यं विभूतीः कलत्रपुत्रपौत्रादीन् न समर्थयति न प्रयच्छति। ननु अम्बरीषप्रह्लादादिभ्यस्तद्दानप्रसिद्धिः इत्याशंक्याह-अदीर्घबोधायेति। तेषां विवेकित्वात् सम्पदाद्योपकारं न कुर्वन्ति अविवेकिनस्त्वपकारं कुर्युरेव अतो न प्रयच्छतीत्यर्थः। तत्र हेतुमाह-धनिनां धनमदेन उद्भव जन्म यस्य तं नरकादौ निपातं पश्यन्निति। तद्दर्शने हेतुमाह-स्वयं विचक्षणः-सर्वसाक्षीत्यर्थः। तत्र हेतुमाह-अज इति। अविद्याकृतावरणाभावेनजन्मादि विकाराभावादित्यर्थः ॥३७॥ बुद्ध्या इत्थं व्यवसितः कृतनिश्चयः। तत्र हेतुः-जनार्दने अतीव भक्तः अत एव विषयान् त्यक्ष्यन् विषयत्यागमभ्यसन् अत एव नातिलम्पटः तेष्वत्यासक्तिरहितो जायया सह तान् बुभुजे ॥३८॥

अन्वितार्थप्रकाशिका

किञ्चिदिति। यत् उरु बह्वपि स्वदत्तमैश्वर्यादि किञ्चित्करोति स्वल्पं मन्यते। सुष्ठु प्रेमयुक्तं हृत् हृदयं यस्य तेन भक्तेन कृतं भजनं फल्गु स्वल्पमपि भूरिकारी बहुकरोतीति तथा सः यतः सः महात्मा उदारचित्तः मयोपनीतं पृथुकैकमुष्टिं प्रीतियुक्तः प्रत्यग्रहीत् ॥३५॥ तस्येति। गुणालयेन ऐश्वर्यादिगुणसम्पन्नेन महानुभावेन श्रीकृष्णेनैव प्रेरितस्य विषज्जतः विशेषेण सङ्गं प्राप्नुवतो मम जन्मनि जन्मनि तस्यैव सौहृदादिकं तस्य पुरुषाणां भक्तानां प्रकृष्टसङ्गश्च स्यादित्यन्वयः। तत्र सौहृदं प्रेम च सख्यं विश्वासः

अन्वितार्थप्रकाशिका

मैत्री उपकाराशंसनं दास्यं सेवकत्वं च तत्समाहारैकवचनम् ॥३६॥ ननु तव भक्तिरस्त्येव तत्फलं च सम्पत्तिर्जातेत्याशङ्क्य नास्ति मे भक्तिर्नापि तत्फलं सम्पदित्याह-भक्तायेति । स्वयं विचक्षणः अजः भगवान् अधिनां धनमदेन उद्भवो जन्म यस्य तं नरकादौ निपातं पश्यन् अदीर्घबोधाय अविवेकिने मादृशाय भक्ताय चित्राः सम्पदः कोशादीन् राज्यमैश्वर्यं विभूतीः कलत्रपुत्रपौत्रादीन् न समर्थयति अपि तु दृढां भक्तिमेव । मम तु भक्त्यभावात्समृद्ध्यादि जातम् अतो भक्तिरेव भवतु । समर्थयति इत्यत्र अर्थयतेर्हेतुमण्णिच् । समर्धयतीति पाठे ऋध्यतेः ऋध्नोतेर्वा णिच् । उभयथा दानमेव पर्यवसितोऽर्थः ॥३७॥ इत्थमिति । बुद्ध्या इत्थं व्यवसितः कृतनिश्चयः तत्र हेतुः जनार्दने अतीव भक्तः अत एव विषयांस्त्यक्ष्यन् विषयत्यागमभ्यसन् अत एव नातिलम्पटः तेष्वत्यासक्तिरहितो जायया सह तान् बुभुजे ॥३८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अत एव मयोपनीतं प्रत्यग्रहीत् स्वयमेव जग्राह ॥३५॥ एवम्भूतं श्रीकृष्णं ज्ञात्वा तद्भक्तिं याचते-तस्येति । तेन सह विषज्जतः अनुरागं प्राप्नुवतो मम तत्पुरुषाणां हरिभक्तानां प्रसंगो नित्यसमागमः स्यात् ॥३६॥ भक्तौ बहुफलं मत्वा सम्पन्निन्दन्नाह-भक्तायेति । अजः न जायते कर्माधीनजनवन्नोत्पद्यते इत्यजः । स्वतन्त्रजन्मेत्यर्थः । अदीर्घबोधाय अल्पबुद्धये भक्ताय सम्पदो द्रव्याणि विभूतीः पुत्रकलत्रामात्यादिपदार्थान् न समर्धयति ददाति । यतः स्वयं विचक्षणः धनिनां मदोद्भवं निपातं स्वभक्तेः पतनं पश्यन् सन् न ददाति ॥३७॥ जनार्दने अतीव अत्यन्तभक्त्या हेतुना इत्थम्बुद्ध्या व्यवसितः कृतनिश्चयः सन् विषयान् त्यक्ष्यन् । शनैः त्यागाभ्यासं कुर्वन् सन् जायमानातिलम्पटः सन् तान् बुभुजे ॥३८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवत एवंविधगुणवत्त्वात् कृतज्ञस्यास्य सख्यादिकमेव मम जन्मनि जन्मनि स्यादिति प्रार्थयते । तस्यैवेति । तस्योक्तविधस्य भगवत एव मे मम सौहृदं हितैषित्वं प्रेम वा सख्यं प्रियत्वं हिताशंसनं वा मैत्री मित्रता उपकारस्मरणेन स्वय किञ्चित्करत्वं दास्यं भृत्यत्वम् एतेषां द्वन्द्वैकवद्भावः । जन्मनि जन्मनि वीप्सायां द्विर्भावः । स्यादस्तु । किञ्च गुणालयेन अनन्तगुणाश्रयेण महानुभावेन भगवता पुनर्भूयो भूयः विषज्जतो विशेषेण सङ्गतिं प्राप्नुवतो मम तत्पुरुषाणां तद्भक्तानां प्रसङ्गः प्रकृष्टः सङ्गः स्यात् ॥३५॥ ननु भक्तः सन्नेव किमिति पुनस्तद्भक्तिं प्रार्थयसे तत्राह-भक्तायेति ॥ यद्यहं भक्तः स्याम् तर्हि मह्यमित्थंभूतैश्वर्यप्रदानं तस्यानुचितमेव यदा दत्तं तदाहं मामभक्तं सम्भावयामि कुतः । हि यस्मात् अजः भगवान् भक्ताय चित्राः सम्पदः राज्यं विभूतीः न समर्धयति न प्रयच्छतीत्यर्थः । तत्र सम्पदो भोग्यभोगोपकरणभोगस्थानात्मकाः समृद्धयः विभूतयः पुत्रपशुवित्तादिरूपाः समृद्धयः अदाने हेतुं वदन् भगवन्तं विशिनष्टि । धनिनां मदस्योद्भवो यस्मात्तदैश्वर्यं निपतन्त्यनेन नरक इति तथाभूतं भवेत् अदीर्घबोधाय अविवेकाय च भवेत् । इति पश्यन् जानन्नित्यर्थः । अत एव स्वयं विचक्षणः हेतुगर्भमिदं तत्त्वात्तावन्न समर्धयेत्येवं सम्बन्धः । समृद्धिलब्ध्या स्वमभक्तं मन्यमानोऽहं तद्भक्तिमेव प्रार्थय इति भावः ॥३६॥ इत्थमिति । बुद्ध्या विवेकात्मिकया वि इत्थमुक्तप्रकारेण व्यवसितः निश्चिन्वन् जनार्दने भगवति अतीव नितरां भक्तः शुद्धभक्तियुक्तः विषयान् त्यक्ष्यन् शनैः शनैर्विषयत्यागमभ्यस्यन्नित्यर्थः । नातिलम्पटः तेष्वतीवादररहितः सन् तान् जायया सह बुभुजे ॥३७॥ स्वयं निःसमाभ्यधिक भगवान् कथमेवमकिञ्चनं द्विजमादृतवानिति स्मयमानं राजानं समालक्ष्याह । तस्य वा इति । हे प्रभो ! यज्ञपतेर्यज्ञनिर्वाहक देवदेवस्य ब्रह्मादीनामपि देवस्य तस्य हरेः ब्राह्मणाः एव प्रभवः दैवं च तेभ्यो ब्राह्मणेभ्यः परं दैवतं न विद्यते वै ॥३८॥

कृष्णप्रिया

आश्रितों के लिए आप के दिये हुए अत्यधिक ऐश्वर्य को भी भगवान् थोडा मानते हैं कि हमने कुछ न किया और जिन भक्तों के किये हुए थोडे भजन को भी बहुत मानते हैं कि इसने बहुत किया क्योंकी भगवा उदारचित्त है इसी लिये मेरी लाई हुई तण्डुल की एक मुट्ठी को अति प्रसन्न होकर अंगीकार किया ॥३५॥ इसी

जन्म जन्मान्तर में
प्राप्त हो । कल्या
भगवान् के भक्तों क
कोविचार कर स्वयं
सम्पत्ति राज्य स्त्रीपुत्र
प्रज्ञासे इस तरह नि
स्थितिमें सर्व सम्पत्ति
सेवामें अनुराग प्रेमल

[1]तस्य वै देव
एवं स विप्रो
तद्ध्यानवेगो
[5]एतद् ब्रह्मण्
इति श्रीमद्भाग

तस्य, वै, देवदेव
भगवान्(सुदामा), सुहृत्, त
सताम, गतिम्, लेभे ॥४०॥

॥ श्री

श्रीकृष्णस्यैवं ब्रह्
वेगस्तेनोद्ग्रथितमात्मबन्धनम
एतत्पृथुकोपाख्यानं श्रुत्वा तत्र

इति श्रीमद्भागवते महापुरा

ब्रह्मण्यता ब्राह्मणभ
प्रभवः स्वामिनः । यद्वा-प्रभव

"समासे शौचकालेऽ

---

१. तस्यैव-वीर । २. भगवत्सुहृत्तदा-
एवं ब्रह्मण्य-विज. । ६.पारमहंस्या
एकोनशततमाऽध्यायः ॥९९॥-विज.

कृष्णप्रिया

जन्म जन्मान्तर में वारंवार मुझे श्रीकृष्ण के विषय में ही मित्रता और सेवकत्व प्राप्त हों और उसी का दासभाव प्राप्त हो । कल्याणगुणसम्पन्न महानुभाव श्रीकृष्ण से प्रेरित होकर विशेष संग को प्राप्त होने वाले प्रसंगों में भगवान् के भक्तों का ही सत्संग हो यह मेरी विनति है ॥३६॥ धनी पुरुषों को मदकरके नरकपात होता है इस बात कोविचार कर स्वयं चतुर कर्म के आधी जन्म रहित श्रीकृष्ण भगवान् अविवेकी भक्त के अर्थ नाना प्रकार की सम्पत्ति राज्य स्त्रीपुत्रादिक विभूतियोंको नहीं देते हैं ॥३७॥ महाराज परीक्षित ! विप्रर्षि श्रीसुदामाजी ने विवेकमयी प्रज्ञासे इस तरह निश्चय किया पुनः ब्रह्मनिष्ठ ब्रह्मर्षि अपनी धर्मांगना के साथ त्यागमयी वृत्ति से अनासक्त स्थितिमें सर्व सम्पत्तिको भगवत्प्रसादरूप जीवनमें विनियोग करने लगे और उत्तरोत्तर ठाकुरजी के श्रीचरणोंकी सेवामें अनुराग प्रेमलक्षणा भक्ति बढने लगी ॥३८॥

[1]तस्य वै देवदेवस्य हरेर्यज्ञपतेः प्रभोः । ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परम् ॥३९॥
एवं स विप्रो [2]भगवान्सुहृत्तदा दृष्ट्वा [3]स्वभक्तैरजितं पराजितम् ।
तद्ध्यानवेगोद्ग्रथितात्मबन्धनस्तद्धाम लेभेऽचिरतः [4]सतां गतिम् ॥४०॥
[5]एतद् ब्रह्मण्यदेवस्य श्रुत्वा ब्रह्मण्यतां नरः । लब्धभावो भगवति कर्मबन्धाद्विमुच्यते ॥४१॥
इति श्रीमद्भागवते महापुराणे [6]दशमस्कन्धे[7] पृथुकोपाख्यानं [8]नामैकाशीतितमोऽध्यायः ॥८१॥

कर्दमक्षमा

तस्य, वै, देवदेवस्य, यज्ञपतेः, हरेः, प्रभोः, प्रभवः, दैवम्, ब्राह्मणाः, तेभ्यः, परम्, न, विद्यते ॥३९॥ एवम्, सः, भगवान्(सुदामा), सुहृत्, तदा, स्वभक्तैः, अजितम्, पराजितम्, दृष्ट्वा, विप्रः, तत्, ध्यानवेगोद्ग्रथिताम्बन्धनः, तद्, धाम, अचिरतः, सताम्, गतिम्, लेभे ॥४०॥ ब्रह्मण्यदेवस्य, ब्रह्मण्यताम्, श्रुत्वा, नरः, भगवति, लब्धभावः, कर्मबन्धात्, विमुच्यते ॥४१॥

॥ श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे एकाशीतितमाऽध्यायाऽन्वयनिरूपणम् ॥८१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीकृष्णस्यैवं ब्रह्मण्यता नातिचित्रमित्याह–तस्येति ॥३९॥ अन्यैरजितमपि स्वभृत्यैः पराजितं दृष्ट्वा तस्य ध्यानं तस्य ध्यानवेगेनोद्ग्रथितमात्मबन्धनमहङ्कारो यस्य सः गतिमित्याविष्टलिङ्गं धाम विशेषणम् सतां ब्रह्मविदां प्राप्यमित्यर्थः ॥४०॥ एतत्पृथुकोपाख्यानं श्रुत्वा तत्र ब्रह्मण्यतां विशेषतः श्रुत्वा ॥४१॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायामेकाशीतितमोऽध्ययः ॥८१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ब्रह्मण्यता ब्राह्मणभक्तिः । तस्य श्रीकष्णस्य । देवदेवस्य सर्वपूज्यस्य यज्ञपतेः सर्वकर्मफलदातुः प्रभोः सर्वेश्वरस्यापि प्रभवः स्वामिनः । यद्वा–प्रभवः समर्था अशुचीनामपि शोधकत्वात्तदुक्तं वशिष्ठस्मृतौ–

"समाप्ते शौचकालेऽपि न शुद्धिर्ब्राह्मणैर्विना । शोधयन्त्यसमाप्तेऽपि ततस्ते प्रभवो मताः ॥" इति ॥

---

[1] [illegible]-वीर. । २. भगवत्सुहृत्तदा–श्रीधर. वंशी. विज. ; भयवत्सुहृत्तमो–वीर. । ३. स्वभृत्यै–श्रीधर. वंशी. वीर. विज. । ४. सतां गतेः–विज. । ५. तद्ब्रह्म–विज. । ६.पारमहंस्या संहितायां दशमस्कन्धे उत्तरार्धे–गो. प्रे. पु. । ७. दशमस्कन्धे पृथुकोपाख्यानेऽष्टसप्ततिमो–गो. प्रे. टी. । ८. [illegible]तमोऽध्यायः ॥९१॥–विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दैवं पूज्याः । 'वेदाः प्रमाणम्' इतिवद्ब्राह्मणा दैवमित्युद्देश्यविधेयभावत्वाल्लिङ्गसङ्ख्यानियमाभावः । तेभ्यो ब्राह्मणेभ्यः। 'न ब्राह्मणैस्तुलये भूतमन्यत्' इति श्रीमदृषभोक्तेः ॥३९॥ अनासक्तभोगे सुदाम्नः का सिद्धिर्जातेति चेदाह–एवमित्थम्। तदानासक्तभोगपूर्वकहरिभक्तिकरणसमये । तस्य श्रीकृष्णस्य । धाम स्वरूपम् । आविष्टं व्याप्तं लिङ्गं यस्मिंस्तत्तथा । व्याप्तस्य त्यागासम्भवादजहल्लिङ्गमित्यर्थः । इत्यर्थ इति–गम्यते प्राप्यते साधनसम्पत्त्या साक्षात्क्रियत इति । गतिरिति निरुक्त्यायमर्थः ॥४०॥ एतच्चरिताकर्णनफलमाह–एतदिति । लब्धभावः प्राप्तभक्तिः ॥४१॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायामेकाशीतितमोऽध्ययः ॥८१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तस्येत्यस्यावतारिकाटीका श्रीकृष्णत्वमेव तत्र हेतुरित्यभिप्रायेण यद्वा ब्राह्मणस्य तस्य गुणातिशयं वक्ष्यन् श्रीभगवतो गुणविशेषमाह–तस्येति । देवदेवस्य श्रीब्रह्मादिपूज्यस्य किञ्च यज्ञपतेः विप्राद्यनुष्ठेययज्ञानां फलप्रदस्य किञ्च प्रभोर्जगदीश्वरस्य विशेषणानामेतेषां यथोत्तरं विप्रसेवनायोग्यत्वाधिक्यं तस्यापि प्रभवः सेव्याः वै एतत्प्रसिद्धमेवेत्यर्थः तस्मान्नाश्चर्य्यमिति भावः। तस्मात्तेभ्यः परमन्यद्दैवं देवता च नास्ति अत एव भक्त्या पूज्या इत्यर्थः । एवमन्यत्र ग्रामकतिपयेश्वरमन्यादावप्यसम्भवसम्भवेन गुणेन सर्वमनोहरणात् हरेरिति ॥३९॥ तथापि स विप्रस्त्वेवं पूर्वोक्तप्रकारेण स्वभृत्यैरेव पराजितमजितं दृष्ट्वा भक्ताय चित्रा इत्यादिना निश्चित्य तस्य भक्तवशीकृतत्वस्य भक्त्या तम् अमुकेनैव वशीकृतोऽसावमुकेनैवमिति सप्रेमचिन्तनं तस्य वेगः प्रवाहस्तेन उद्ग्रथितात्मबन्धनं ब्राह्मणत्वाद्यभिमानो यस्य सः तद्धाम श्रीद्वारकाख्यं नित्यततस्थानम् अचिरतः शीघ्रमेव लेभे तस्य च तत्त्वं नाश्चर्य्यमित्याह–भगवत्सुहृदिति । अन्यत्तैः यद्वा सतां नित्यरूपाणां यादवानां गतिमिति ॥४०॥ अहो भगवन्मित्रमसौ विप्रः शीघ्रं तद्धाम प्रापेति चित्रं न मन्तव्यं तत्कथाश्रवणेनापि तत्सिद्धेरित्याह–एतदिति । ब्रह्मण्यतामपि किं पुनः सख्येन तादृशपरिरम्भणादि नरो यः कश्चिदपि मनुष्य इति अधिकारापेक्षा निरस्ता भगवति श्रीकृष्णे लब्धो भावः प्रेमा येन तथाभूतस्सन् कर्मबन्धाद्विशेषेण मुच्यते स्वयमेव प्रारब्धभोगाधीनो न स्यात् स्वेच्छया सुखं भक्तिमनुतिष्ठंस्तत्पदं लभत इत्यर्थः । अन्यत्तैः यद्वा एष उक्तो यो ब्रह्मण्यदेवः तस्य श्रीकृष्णस्येत्यर्थः । अत एव भगवति सर्वैश्वर्य्यप्रकाशके तस्मिन्नेव लब्धभावः ॥४१॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम्
एकाशीतितमोऽध्यायः ॥८१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

देवदेवस्य श्रीब्रह्मादिपूज्यस्य किंच यज्ञपतेर्विप्राद्यनुष्ठेययज्ञानां फलप्रदस्य किंच प्रभोर्जगदीश्वरस्य विशेषणानामेषां यथो- विप्रसेवकत्वायोग्यताधिक्यम् । तस्यापि प्रभवः सेव्याः तेभ्यः परमन्यद्दैवं देवता च नास्ति त एव भक्त्या पूज्या इत्यर्थः। ब्राह्मणानां मनोहरणाद्धरेरिति ॥३९॥ एवमनेनोक्तप्रकारक–तद्व्यवहारेण यद्वा, ईदृशः शीघ्रमेव तद्धाम श्रीवैकुण्ठलोकं लेभ इत्यर्थः । यद्वा, द्वारवतीम् । भगवतः सर्वैश्वर्ययुक्तस्य श्रीकृष्णस्य सुहृत् सखेति उक्ते वक्ष्यमाणे च तत्प्रसादे मूलकारणमुक्तं स्वैस्तदेकनिष्ठै भृत्यैः पराजितं वशीकृतं दृष्ट्वेति अतो ब्राह्मणाभिमानपरित्यागेन भक्त्येकनिष्ठो भूत्वेति भावः । अत एव तद्ध्यानो- सत्तामेकान्तिकान्तिकानाम् अन्यत्तैर्व्याख्यातम् । यद्वा, सतां गतिं स्वभक्तपराजितत्वादेव सर्वेषां साधूनामाश्रयणीयत्वं च जि- अन्यत्समानम् ॥४०॥ अहो विप्रोऽसौ श्रीभगवत्सखोऽचिरात् तद्धाम प्रापेति चित्रं न मन्तव्यं तत्कथाश्रवणेनान्यस्यापि तत्सिद्धेरि- एतदिति । ब्रह्मण्यं तमपि किम्पुनः सख्येन तादृशपरिरम्भणादि नरो यः कश्चिदपि मनुष्य इत्यधिकारापेक्षा निरस्ता। भगवति

लब्धो भावः प्रेमा
भक्तिमनुतिष्ठंस्तत्पदं
भगवति सर्वैश्वर्यप्रका

॥ इति श्रीमद्भ

सौहृदसौख्यमै
दास्यम् ॥३९-४१॥

॥ इति श्रीमद्

स्वयं निस्समा
यज्ञपतेर्यज्ञनिर्वाहकस्य दे
इत्यर्थः ॥३९॥ ततो ब्राह्म
पराजितं वशीकृतं दृष्ट्वा
चरितैस्तद्ध्यानाङ्गतयाऽनुष्ठि
स्थानं वैकुण्ठाख्यं ले
अथोपवर्णितभगवच्चेष्टित
कर्मबन्धात्प्राचीनकर्मरूपाद्ध

॥ इति श्रीमद्भागवते महापु

देवदेवस्येत्यनेन स
कर्तव्येति तात्पर्यं विधीयते न
आत्मबन्धनं यस्य तथा तद्भक्तै
लब्धभक्तिः अनेनास्य विप्रस्ये

॥ इति श्रीमद्भागवते महा

भक्तायेति । अदीर्घबोध

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

लब्धो भावः प्रेमा येन तथाभूतः सन् कर्मबन्धाद्विशेषेण मुच्यते । स्वयमेव प्रारब्धभोगाधीनो न स्यात् । स्वेच्छया सुखं भक्तिमनुतिष्ठंस्तत्पदं लभत इत्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, एष उक्तो यो ब्रह्मण्यदेवस्तस्य श्रीकृष्णस्येत्यर्थः । अत एव भगवति सर्वैश्वर्यप्रकटके तस्मिन्नेव लब्धभावः ॥४१॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशमटिप्पण्यामेकाशीतितमोऽध्यायः ॥८१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सौहृदसौख्यमैत्रीदास्यमिति द्वन्द्वैकवद्भावः । सौहृदं हितैषित्वं प्रियैषित्वम् अमित्रात्त्रायकत्वं मत्री उपकारस्मरणेन किञ्चित्करत्वं दास्यम् ॥३९-४१॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकाशीतितमोऽध्यायः ॥८१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स्वयं निस्समाभ्यधिको भगवान् कथमेवमकिञ्चनं द्विजमादृतवानिति स्मयमानं राजानमालक्ष्याह-तस्यैवेति । हे प्रभो ! यज्ञपतेर्यज्ञनिर्वाहकस्य देवानां ब्रह्मादीनामपि देवस्य हरेः प्रभवो दैवं च ब्राह्मणा एव तेभ्यो ब्राह्मणेभ्यः परमन्यद्दैवं न तस्य विद्यते इत्यर्थः ॥३९॥ ततो ब्राह्मणः किमभूदित्यत आह-एवमिति । भगवत्सखः स ब्राह्मणः अन्यैरजितमपि [स्वभक्तैः] स्वभृत्यैः पराजितं वशीकृतं दृष्ट्वा तस्य भगवतो ध्यानेनोद्ग्रथितम् उन्मोचितमात्मनः स्वस्य बन्धनं संसृतिबन्धो यस्य सः कीर्तिस्तद्ध्यानाङ्गतयाऽनुष्ठितैर्वर्णाश्रमानुगुणैः पञ्चमहायज्ञाद्यनुष्ठानैर्द्ध्यानद्वारा साधनैः सतां मुक्तानां गतिं प्राप्यं तस्य भगवतो धाम स्थानं वैकुण्ठाख्यं लेभे प्राप्तवान् स्वभृत्यैः पराजितं सताङ्गतिम् उपायभूतं दृष्ट्वेति वा सम्बन्धः ॥४०॥ अथोपवर्णितभगवच्चेष्टितफलमाह-एतदिति । ब्रह्मण्यश्रेष्ठस्य भगवतो ब्रह्मण्यतां श्रुत्वा लब्धः भावो भक्तिर्येन सः कर्मबन्धात्प्राचीनकर्मरूपाद्बन्धनान्मुक्तोऽभवत् ॥४१॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् एकाशीतितमोऽध्यायः ॥८१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

देवदेवस्येत्यनेन सर्वप्रभुत्वं यज्ञपतेरित्यनेन सर्वदेवत्वं च हरेरेव मुख्यमिति सूचितम् । अनेन इतरैर्ब्राह्मणभक्तिरेवावश्यं कर्तव्येति तात्पर्यं विधीयते न तु तस्यैवेति ॥३९॥ तस्य विप्रस्य का सिद्धिरभूत्तत्राह-एवमिति । अजितं उद्ग्रथितमुन्मुक्तम् आत्मबन्धनं यस्य तथा तद्भक्तैरेव प्राप्यं तद्धाम वैकुण्ठादिलक्षणम् ॥४०॥ एतच्चरितोपासकस्य फलमाह-एवमिति । लब्धभावो लब्धभक्तिः अनेनास्य विप्रस्येतरभक्तवैलक्षण्यमुक्तं स्यादिति तात्पर्यमवगन्तव्यम् ॥४१॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् एकाशीतितमोऽध्यायः ॥८१॥

(श्रीविजयध्वजरीत्या एकोनशततमोऽध्यायः ॥९९॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

भक्तायेति । अदीर्घबोधाय मह्यं तु दुराग्रहदर्शनादेव दत्तवानिति भावः । स विप्रस्त्वेवमुक्तप्रकारेण स्वभृत्यैरेव पराजितं

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तमजितं दृष्ट्वा भक्ताय चित्रा इत्यादिना निश्चित्य तस्य भक्तवशीकृतत्वस्य यद्ध्यानम् अमुकेनैवं वशीकृतोऽसावमुकेनैवमिति चिन्तनं तस्य वेगः प्रवाहः नैतद्ग्रथितमात्मबन्धनं ब्राह्मणत्वाद्यभिमानो यस्य सः ब्रह्मण्यतामिति किमुत मुख्येन तादृशपरिरम्भणादि ॥४०-४१॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकाशीतितमोऽध्यायः ॥८१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

विषयान् जायया त्यक्ष्यन्नित्यादि । भगवत्प्रसादबुद्ध्या बुभुजे अत एव नातिलम्पटः तत्रापि त्यक्ष्यन् अद्य श्वो वा त्यक्ष्यामीति कृत्वा ॥३८-४१॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे एकाशीतितमोऽध्यायः ॥८१॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

विषयान् बुभुज इति भगवत्प्रसादबुद्ध्या बुभुजे, तत्रापि त्यक्ष्यन् अद्य श्वो वा त्यक्ष्यामीति कृत्वा ॥३९-४१॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीचक्रवर्तिपादविरचितायां
चैतन्यमञ्जूषायामेकाशीतितमोऽध्यायः ॥८१॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भक्तवत्सलस्यापि कृष्णस्यैषा ब्रह्मण्यतैव लोके प्रसिद्धा अभूदित्याह-तस्येति । सर्वेषां प्रभोरपि हरेर्ब्राह्मणा एव प्रभवः देवदेवस्यापि तस्य ब्राह्मणा एव दैवं यज्ञपतेरपि ते एव यजनीया इत्यर्थः ॥३९॥ तस्यैहिकीं सम्पदमुक्त्वा पारलौकिकीं सम्पदमाह-एवमिति । सर्वैरजितमपि स्वभृत्यैः पराजितं वशीकृतं दृष्ट्वातद्ध्यानवेगेति तस्य पूर्ववृत्तमुक्तम् ॥४०-४१॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । एकाशीतितमोऽध्यायो दशमेऽजनि सङ्गतः ॥८१॥

गूढार्थदीपिनी

प्रभोः सर्वेश्वरस्यापि भगवतः ब्राह्मणाः प्रभवः स्वामिनः दैवं देववत्पूज्यं च । तेभ्यः परमुत्कृष्टमन्यत् न विद्यते ॥३९॥ एवं स विप्रः भृत्यैः पराजितं भगवन्तं दृष्ट्वा अचिरतः शीघ्रमेव तत् धाम लेभे इत्यन्वयः । कथम्भूतः । तस्य ध्यानवेगेन उद्ग्रथितम् उन्मोचितम् आत्मबन्धनं यस्य सः । अन्यैः अपराजितमपि ॥४०॥ ब्रह्मणि साधु ब्रह्मण्यः स चासौ देवस्तस्य ब्रह्मण्यतां ब्राह्मणभक्तिम् । कर्मबन्धात् संसारात् ॥४१॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्याम् एकाशीतितमोऽध्यायः ॥८१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रभवः मान्याः भक्तप्रियत्वात् अत एव तेभ्योऽन्यं दैवतं मान्यं न विद्यते ॥३९॥ स विप्रः सतां मुक्तानां गतिं गम्यते गतिस्तं प्राप्यं भगवन्तं अजितमपि भक्तैर्जितं वशीकृतं दृष्ट्वा तस्य भगवतः ध्यानवेगेनोद्ग्रथितमात्मनो बन्धनं संसारलक्षणं यस्य सः तद्धाम भगवत्पदमचिरतः स्वल्पेनैव कालेन लेभे ॥४०॥ प्रकरणश्रवणादिफलमाह-एतदिति । एतत्पृथुकोपाख्यानं ब्रह्मण्यदेव

श्रीकृष्णस्य विशेषतो ब्र
लब्धभक्तिरित्यर्थः । क

॥ इति श्रीमद्भागव

एवं तस्य चरि

पूज्यो दु

तदाह-तस्य प्रसि
करोति पूजयति चेत्यर्थः ।

शुद्धास्त एव

एवं ब्रह्मण्यत्वगुणं
भगवतः सुहृच्च भगवत्सुहृ
करस्थिता इति तद्ध्यानवेगो
तथाविधो भूत्वा भगवच्चिन्त
प्राप्तवानित्यर्थः ॥४०॥ एवं
एतद्ब्रह्मण्यदेवस्येति- एतदि
करोतीति भगवद्भावो दृढो भव
भगवानेवेत्युक्तम् अन्यदपि फ

॥ इति श्रीमद्भाग

देवदेवस्य यज्ञपतेः प्र
भगवतः सुहृत्सखा स विप्रः सुदाम
यस्य सोऽचिरतः प्रारब्धान्ते तस्
लब्धभातः प्राप्तभक्तिर्नरः कर्मबन

॥ इति श्री

उक्तं ब्रह्मण्यत्वमुपसंहरति
तस्य हरेर्ब्राह्मणा एव प्रभवः स्वा

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णस्य विशेषतो ब्रह्मण्यतां च श्रुत्वा भगवति लब्धभाक् प्रदीपसन्निधौ स्वपात्रत्वानुसारेण लब्धप्रकाशवत् स्वाधिकारत्वानुसारेण लब्धभक्तिरित्यर्थः । कर्मरूपाद्बन्धाद्विमुच्यते ॥४१॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवसिद्धान्तप्रदीपे एकाशीतितमाध्यायार्थप्रकाशः ॥८१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं तस्य चरित्रमुक्त्वा भगवतोऽयं ब्रह्मण्यत्वगुणयुक्त इति ज्ञापयितुं स्तौति-तस्य वै देवदेवस्येति-

पूज्यो दुःखप्रहर्ता च कर्माध्यक्षः प्रभुस्तथा । चतुर्विधो महान् लोके तादृशोऽपि द्विजप्रियः ॥

तदाह-तस्य प्रसिद्धस्य देवानामपि देवस्य सर्वदुःखहर्तुः यज्ञभोक्तुर्नियन्तुः एतादृशस्यापि ब्राह्मणाः प्रभवः दैवं च आज्ञां पूजयति चेत्यर्थः । किञ्च भगवतो विचारे न तेभ्यः किञ्चिदुत्तमं वर्तते अनेन दाक्षिण्यात्तान्मानयति इति पक्षो निवारितः-

शुद्धास्त एव वक्तारो माहात्म्योक्तौ विचक्षणाः । निःस्पृहा ज्ञानसंयुक्ता मोक्षयोग्या हरिप्रियाः ॥३९॥

एवं ब्रह्मण्यत्वगुणं स्थापयित्वा ततः सुदाम्नः किं जातमित्याकाङ्क्षायामाह-एवं स विप्रो भगवानिति । भगवदावेशाद्भगवान् वा: सुहृच्च भगवत्सुहृद्वा अजितं सर्वैरपि स्वभक्तैः पराजितं सर्वावश्योऽपि भक्तवश्य इति सर्वेश्वरे वशे जाते सर्वे पुरुषार्थाः संपन्ता इति तद्ध्यानवेगोद्ग्रथितात्मबन्धन इति तस्य ध्यानवेगेनैव उद्ग्रथिताः आत्मानः सर्व एव अविद्यादिबन्धाः यस्येति बंधो भूत्वा भगवच्चिन्तनेनैव तद्धाम लेभे वैकुण्ठं प्राप्तवान् ततः अचिरतः शीघ्रमेव सतां गतिं भगवन्तमपि पश्चात्सायुज्यं वानित्यर्थः ॥४०॥ एवं सुदाम्न उद्धारमुक्त्वा तस्य पश्चादपि लोके कीर्तिर्भवत्विति एतदुपाख्यानस्य श्रवणफलमाह-ब्रह्मण्यदेवस्येति- एतदित्यव्ययम् । इमां ब्रह्मण्यतां श्रुत्वा नरो भवति लब्धभावो वति नराणामैहिके दृष्टिरिति तद्भगवान् भवति भगवद्भावो दृढो भवति ततः कर्मबन्धाद्विमुच्यते यत्रैतच्छ्रोतुरपि मोक्षः तत्र सुदाम्नो मोक्षे कः सन्देहः एवं भुक्तिमुक्तिप्रदो भवतीत्युक्तम् अन्यदपि फलं भगवान् प्रयच्छतीति च एवं निरुद्धानां फलदाता निरूपितः ॥४१॥

॥इति श्रीमद्भागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे द्वात्रिंशाध्यायविवरणम् ॥३२॥८१॥

श्रीसुबोधिनीसारः

देवदेवस्य यज्ञपतेः प्रभोर्हरिस्तस्य ब्राह्मणाः दैवं प्रभव ईश्वराः स्वामिनः तेभ्यो ब्राह्मणेभ्यः परं श्रेष्ठं तस्य नास्ति ॥३९॥ वा: सुहृत्सखा स विप्रः सुदामा जितमपि स्वभृत्यैः पराजितं सतां गतिं दृष्ट्वा तस्य ध्यानवेगेन नैरन्तर्येणोद्ग्रथितमुन्मूलितमात्मबन्धनं मोऽचिरतः प्रारब्धान्ते तस्य धाम मोक्षं वैकुण्ठं वा लेभे प्राप ॥४०॥ एतदाख्यानं ब्रह्मण्यदेवस्य ब्रह्मण्यतां श्रुत्वा भगवति भाव: प्राप्तभक्तिर्नरः कर्मबन्धान्मुक्तो भवति ॥४१॥

॥ इति श्रीमद्भा० दशमस्कन्धे उ० सुबो० टीकायामेकाशीतितमोऽध्यायः ॥८१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उक्तं ब्रह्मण्यत्वमुपसंहरति-देवा ब्रह्मादयस्तेषामपि देवस्य पूज्यस्य यज्ञपतेः यज्ञैः समाराध्यस्य प्रभोः सर्वस्वामिनः ब्राह्मणा एव प्रभवः स्वामिनः दैवं च तेभ्यः परमुत्कृष्टमन्यन्न विद्यत इति ॥३९॥ ततः सुदाम्नः किं फलं

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जातमित्यपेक्षायामाह-एवमति। भगवतः सुहृत् भक्तः स विप्रः अन्यैरपराजितमपि भगवन्तमेवं स्ववृत्तान्तेन तदा स्वभृत्यैः पराजितं वशीकृतं दृष्ट्वा तस्यैव ध्यानेनोद्ग्रथितमुन्मोचितमात्मनः स्वस्य बन्धनमविद्यादिरूपं यस्य स अचिरत एव स गतिं प्राप्य तस्य धाम वैकुण्ठाख्यं स्थानं लेभे प्राप्तवानित्यन्वयः ॥४०॥ वर्णितस्यैतस्योपाख्यानस्य श्रवणादिफलमाह-एतदिति। ब्रह्मण्यदेवस्य श्रीकृष्णस्यैतत् सुदाम्ने सम्पत्प्रतिपादनं ब्रह्मण्यतां ब्राह्मणभक्तिं च श्रुत्वा भगवति तस्मिन् लब्धो भावो भक्तिर्येन तथाभूतः सन्नरः कर्मरूपाद्बन्धाद्विमुच्यते ॥४१॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना। श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥

श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये। श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥

रचिता दशमे तत्र सात्त्विकानां निरोधने। एकाशीतितमो यातः पृथुकाख्यानवर्णकः ॥३॥ ॥८१॥

अन्वितार्थप्रकाशिका

कृष्णस्य ब्रह्मण्यता नातिचित्रम्। इत्याह-तस्येति। देवानां देवस्य यज्ञपतेः प्रभोः तस्य हरेर्ब्राह्मणाः एव प्रभव स्वामिनः दैवं च तेभ्यः परमुत्कृष्टमन्यत्र विद्यते इति ॥३९॥ एवमति। भगवतः सुहृत् भक्तः स विप्रः अन्यैरपराजितम भगवन्तमेवं स्ववृत्तान्तेन तदा स्वभृत्यैः पराजितं वशीकृतं दृष्ट्वा तस्यैव ध्यानवेगेनोद्ग्रथितमुन्मोचितमात्मनः स्वस्य बन्धनमहङ्का यस्य यस्य स अचिरत एव सतां गतिं प्राप्य तस्य धाम वैकुण्ठाख्यं स्थानं लेभे प्राप्तवान् ॥४०॥ गतिमित्यजहल्लिङ्गं धामविशेषण ॥४०॥ एतदिति। ब्रह्मण्यदेवस्य श्रीकृष्णस्यैतत् सुदाम्ने सम्पत्प्रतिपादनं ब्रह्मण्यतां ब्राह्मणभक्तिं च श्रुत्वा भगवति तस्मिन् लब्धो भावो भक्तिर्येन तथाभूतः सन्नरः कर्मरूपाद्बन्धाद्विमुच्यते ॥४१॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायामेकाशीतितमोऽध्यायः ॥८१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्य भगवतः ब्राह्मणाः प्रभवः सेव्याः अतस्तेभ्यो ब्राह्मणेभ्यः परम् अन्यत् दैवं न विद्यते। यद्वा। तेभ्यस्तेषां हरेः प अन्यत् दैवम् उपास्यो देवो न विद्यते ॥३९॥ भगवतः सुहृत् सखा स विप्रः तदा अन्यैः अजितं स्वभृत्यैः पराजितं हरिं दृष्ट्वा त

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ध्यानवेगेन उद्ग्रथितं ध्वस्तं आत्मबन्धनं देहाभिमानं यस्य सः। सतां गतिं गम्यं तद्धाम अचिरेण लेभे ॥४०॥ एतत् पृथुकोपाख ब्रह्मण्यतां च ॥४१॥

॥ ॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने पृथुकोपाख्यानं नाम एकाशीतितमोऽध्यायः ॥८१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ भगवान् सखा यस्य सः सः विप्रः अजितमन्यैरजितमपि स्वभक्तैः पराजितं वशीकृतम् एवं दृष्ट्वा त भगवतो ध्यानस्य यो वेगस्तेनोद्ग्रथितमुन्मोचितमात्मनः स्वस्य बन्धनं संसृतिबन्धो यस्य स तथाभूतः सन् अचिरे कालेन सतां गतिं मुक्तप्राप्यमित्यर्थः। तद्धाम वैकुण्ठपदं लेभे प्राप्तवान् ॥३९॥ अथोपवर्णितभगवच्चेष्टितश्रवणफलमाह। ए । ब्रह्मणि साधवो ब्रह्मण्यास्ते देवा देववत्पूज्या यस्य तस्य भगवतः सम्बन्धि एतत् पृथुकोपाख्यानं ब्रह्मण्यतां च नरः श्रु

भगवति लब्धभावः सम्

॥श्रीधर्मधुरन्धरश्रीधर्मात्म

भक्तमनोर

राजन् परीक्षित
आराध्यदेव मानते है इस
॥३९॥ इस प्रकार भगवा
अजित है किसी भी व्यि
जाते है इतने उदार है - स
तन्मय हो गये। भगवद्
का दिव्य धाम जो संतोका
मानने वाले भगवान श्रीकृष
भक्तिभाव हो जाता है। पु

॥ इति श्रीमद्भागव

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवति लब्धभावः सम्प्राप्तभगवद्भक्तिः सन् कर्मबन्धात्प्राचीनकर्मरूपाद्बन्धनाद्विमुच्यते विमुक्तो भवेत् ॥४०॥

॥श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धे एकाशीतितमोऽध्यायः ॥८१॥

कृष्णप्रिया

राजन् परीक्षित ! देवाधिदेव यज्ञपति भक्तक्लेशहारी सर्वसमर्थ भगवान श्रीकृष्ण ब्राह्मणोंको आपना इष्ट आराध्यदेव मानते है इसलिये इस विश्वमें ब्राह्मणों से बढकर कोइभी व्यक्ति विशिष्ट व्यक्ति इस विश्वमें नहीं है ॥३९॥ इस प्रकार भगवान श्रीकष्णके अत्यंत प्रिय सुत श्रीसुदामाजी विप्रवर्य ने देखा कि भगवान श्रीकृष्ण स्वयं अजित है किसी भी व्यक्तिको आधिन नहीं है फिर भी नजजनों के आधीन हो जाते है उनसे आप पराजित हो जाते है इतने उदार है - सरल है और भक्तवत्सल है । अब विप्रवर्य श्रीसुदामाजी उन्हीं श्रीकृष्णचन्द्रजी के ध्यानमें तन्मय हो गये । भगवद् ध्यानके सामर्थ्य से उनकी अविद्याकी ग्रन्थी छूट गयी और अल्प ही समयमें भगवान का दिव्य धाम जो संतोका एकमात्र आश्रय आधार है प्राप्त किया ॥४०॥ महाराज विप्रोंको अपना आराध्य देव मानने वाले भगवान श्रीकृष्ण की इस दिव्य विप्रभक्तिको जो श्रवण करता है उसे श्रीठाकुरजी के श्रीचरणकमलोमें भक्तिभाव हो जाता है । पुनः कर्मबन्धनो से शीघ्र मुक्त हो जाता है ॥४१॥

॥ इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे भाषाटीकायामेकाशीतितमोऽध्यायः ॥८१॥

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ द्व्यशीतितमोऽध्यायः ॥

श्लोकाः	अनु.	व.	इ. वं.	व.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
५९	४२	१	१	५	३	१७२०	४१	४५	१८३३	५६।	

श्रीशुक [1]उवाच

अथैकदा [2]द्वारकायां वसतो रामकृष्णयोः । सूर्योपरागः सुमहानासीत् कल्पक्षये यथा ॥१॥

कर्दमक्षमा

श्रीशुकः, उवाच ।

अथ, एकदा, रामकृष्णयोः, वसतोः, कल्पक्षये, यथा, सुमहान्, सूर्योपरागः, आसीत् ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

द्व्यशीतितम आगत्य कुरुक्षेत्रं रविग्रहे । वृष्णीन् दृष्ट्वा मुदा भूपाश्चक्रुः कृष्णकथा मिथः ॥

श्रीदामसुहृदे कृष्णः प्रकल्प्यैन्द्रं पदं भुवि । नन्दादिसुहृदानन्दी कुरुक्षेत्रं जगाम सः ॥

कल्पक्षये यथा सर्वग्रास इत्यर्थः ॥१॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

रविग्रहे सूर्यग्रहणे (१) । स कृष्णः (२) । इत्यर्थ इति–कल्प्यते तत्त्वसमूहेनेति कल्पं ब्रह्माण्डं जगदिति यावत्। प्रलयादौ इत्यर्थोऽन्यदपि सर्वग्रासग्रहे प्रलयसाम्यं लोके भवतीति भावः । महाभारतस्य तदुत्तरभावित्वात् ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

अथ कथान्तरारम्भे पृथुकोपाख्यानादनन्तरं वा एकदेति राजसूयात्पूर्वं कदाचिदित्यर्थः । द्वारकायां वसतोः त्यक्त्वा कियन्तमपि समयमुषित्वा श्रीबलदेवव्रजगमनादूर्ध्वं कदचिदित्यर्थः । द्वारकायां वसतोः श्रीमथुरां त्यक्त्वा समयमुषित्वा स्थितयोः सतोरित्यर्थः । सुशब्दार्थं व्यञ्जयति कल्पक्षये यथेति आच्छादनस्य कालस्य चातिबाहुल्यात् ॥१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ माङ्गल्ये । चिरविरहार्ततरव्रजजनानां श्रीभगवत्सन्दर्शनमङ्गलहेतूद्गमात्, एकदेत्यनेनास्योपा पृथुकोपाख्यानानन्तर्य्यं निरस्तम् । द्वारकायामिति श्रीयुधिष्ठिरस्य राजसूयं सम्पाद्य साल्वादींश्च हत्वा सुखं तस्यां निवसतो

---

१. ऋषिरुवाच गो. प्रे. टी. । २. द्वारकायां वीर. ; द्वारवत्यां–श्रीधर. वंशी. विज. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं तत्रत्यानां रमणेन रामः परमानन्दप्रदत्वाच्च कृष्णस्तयोः, यद्वा, रमत इति रामः परमसुखी, कृष्णश्च परमानन्दघन इति तयोः एतच्च तयोर्भाविव्रजजनसमागमसुखविशेषस्याभिप्रायेण, तथा सुमहानिति सर्वग्रासस्य कल्पक्षये यथेति च तत्रापी दीर्घकालस्येति ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-१८॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथ भगवतः सबान्धवस्य तीर्थयात्राव्याजेन सुहृत्सङ्गमतत्सल्लापाद्यात्मकं चेष्टितमनुवर्णयति त्रिभिरध्यायैः- अथेति । रामकृष्णयोर्द्वारकायां वसतोः सतोः सुमहान् सर्वग्रासः तत्र दृष्टान्तः कल्पक्षये यथेति । यथा कल्पावसाने सूर्यो न दृश्यते तद्वदित्यर्थः ॥१॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

(सूर्योपरागे कुरुक्षेत्रं प्रति श्रीकृष्णादीनां गमनकथा तु श्रीविजयध्वजतीर्थपाठे मुद्रिताऽभूत्)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-१३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-१२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

रविग्रहे कुरुक्षेत्रे बन्धूनां सङ्गमो मिथः । कृष्णो व्रजस्थप्रेमाब्धौ द्व्यशीतितम आप्लुतः ॥१॥

अथेति कर्मानुक्तकथान्तरारम्भे एकदेति बलदेवव्रजगमनादूर्ध्वं राजसूयात्पूर्वमेवेयं कुरुक्षेत्रयात्रा यदस्यां धृतराष्ट्रविदुरयुधिष्ठिरभीष्मद्रोणादीनां सुखमेकत्रावस्थितानां श्रीकृष्णदर्शनानन्दकथा दृश्यते अस्या यात्राया राजसूयानन्तर्य्यत्वे त्वेवं न सम्भवेत् यतो राजसूयानन्तरमेव मन्युग्रस्तेन दुर्योधनेन द्यूतप्रवर्तनं ततो वनपर्वदृष्ट्या साल्वदन्तवक्त्रवधसमकालमेव युधिष्ठिरादीनां वनगमनं तेषामागमनानन्तरमेव भीष्मद्रोणादिवधमयभारतयुद्धमिति श्रीवैष्णवतोषिणी कल्पक्षये यथा सर्वग्रास इत्यर्थः ॥१॥

गूढार्थदीपिनी

द्व्यशीतितमके गत्वा कुरुक्षेत्रं रविग्रहे । मिलितो बन्धुभिर्गोपीर्ज्ञानेनासान्त्वयद्धरिः ॥१॥

वसतोः सतोः । कल्पक्षये प्रलये यथा सुमहान् सर्वग्रासः तथा सूर्योपरागः सूर्यग्रहणमासीत् ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अथ श्रीकृष्णस्य सूर्योपरागयोगतः कुरुक्षेत्रयात्राव्याजेन सुहृत्सङ्गमादिचेष्टितं वर्णयति-अथैकदेति-द्व्यशीतितमाध्याये । तस्य पूर्वोक्तात्कौरवपाण्डवयुद्धात्पूर्वमेव भीष्मादिसमागमस्य वक्ष्यमाणत्वात् कल्पस्य क्षये कल्पावसाने यथा सर्वो ग्रासस्तथा महान् सर्वग्रासरूपः सूर्योपरागः आसीत् ॥१॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

सात्त्विकप्रक्रियायां तु षड्भिः षड्भिस्त्रयं जगौ । प्रमेयसाधनफलं धर्मास्तत्र निरूपिताः ॥

धर्मिणोऽत्र त्रयो वाच्यास्तत्राध्यायत्रयं मतम् । सात्त्विके तु प्रमेये हि धर्मी यादृग्विधो मतः

। ।

त्रयस्त्रिंशे तथाऽध्याये प्रथमं स निरूप्यते । सर्वाभीष्टः सर्वसाक्षी सर्वप्रियहितैषिणः ॥

तीर्थैकगम्यो ज्ञानात्मा गुरुर्मोक्षप्रदः परः । सात्त्विकानामेकमेव साधनं गुणवर्णनम् ॥

सरसस्य श्रुतिश्चापि तदग्रे विनिरूपितम् । ततः फलात्मा स हरिः सर्वाभीष्टप्रपूरकः ॥

देशकालौ तथा चाङ्गं ततस्तत्रैव तत्त्रयम् । तामसा राजसाः प्रोक्ताः राजसाश्चैव सात्त्विकाः ॥

ततोऽध्याये प्रमेयेऽत्र सर्वे सात्त्विकतां गताः । प्रमेयमेतदेवात्र यदा सर्वे तु सात्त्विकाः ॥

तदा प्रमेयो भगवान् नान्यथेत्युच्यते स्फुटः ॥

इदानीमध्यायत्रयेण भगवत्साक्षात्कारः भगवदीयानां साधनं तेषां फलं च क्रमेण निरूप्यते–तत्र प्रथमं सात्त्विकानामपि सर्वोत्कृष्टानां ग्रहणादिकालविशिष्टे कुरुक्षेत्रादावेव भगवद्दर्शनं नान्यत्रेति निरूप्यते, तदर्थं कुरुक्षेत्रयात्राप्रसङ्गः तीर्थमपि गृ चेत् तदा न फलतीति मथुरातो द्वारकातश्च सर्वेषां गमने तत्र कालस्य प्राधान्यात् प्रथमं सूर्यग्रहणमाह–अथैकदेति। राहुग्रस्तदिवाकरात् नान्यो मुख्यः कालः स च कालः सर्वनाशक इति भगवति विद्यमाने कदाचिन्न भवेदित्याशङ्क्याह- रामकृष्णयोर्द्वारकायामेव सतोः यथा कल्पक्षये कल्पक्षयनिमित्तं तत्सूचकः सूर्योपरागः सर्वग्रासात्मको भवति एवं भगवति विद्यमानेऽपि जातः भूभारहरणं सूचयिष्यति ॥१॥

सुबोधिनीसारः

शुकोक्तिः । अथ मङ्गले एकस्मिन् समये द्वारकायां रामकृष्णयोर्वसतोः सतोः सुमहान् सर्वग्रासात्मकः सूर्यस्योपरा ग्रहणमभूत् कल्पक्षये इव ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आगतानां कुरुक्षेत्रं नन्दादीनां परस्परम् । द्व्यशीतितम आदित्यग्रहे सङ्गम ईर्यते ॥१॥

अथ सबान्धवस्य भगवतस्तीर्थयात्रादिचरितमाहाध्यायत्रयेण । अथेति । रामकृष्णयोर्द्वारकायां वसतोस्सतोरेकदा कल्पक्ष कल्पावसाने यथा भवति तथा सुमहान् सर्वग्रासात्मकः सूर्योपरागः सूर्यग्रहणमासीत् ॥१॥

अन्वितार्थप्रकाशिका

द्व्यशीतितमके सूर्यग्रहे राज्ञामभून्मिथः । कुरुक्षेत्रे कृष्णकथा तत्र श्लोका नवाब्धयः (४९) ।

सप्तोवाचेति (७) पादोनाश्चतुर्बाणा (५३।।।) अनुष्टुभः ॥८२॥

अथेति । एकदा युधिष्ठिरराजसूयात्पूर्वं रामव्रजागमनादूर्ध्वं कदाचिन्मथुरां त्यक्त्वा रामकृष्णयोर्द्वारकायां वसतोः स कल्पक्षये कल्पावसाने यथा भवति तथा सुमहान् सर्वग्रासात्मकः सूर्योपरागः सूर्यग्रहणमासीत् ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ द्व्यशीतितमेऽध्याये सूर्यग्रहणसमयोपरि यादवैः सूतकलत्रादिभिश्च सह कुरुक्षेत्रे श्रीकृष्णस्य गमनं तत्रागत परस्परं श्रीकृष्णवार्ताकथनं च नन्दादिगोपगोपीनां श्रीकृष्णसमागमश्च हरिणा गोपीभ्यः स्वमाहात्म्यबोधनं च निरूप्यते अथैक अथ श्रीदामसत्कारादनन्तरम् । वसतोः सतोः सूर्यस्य उपरागो ग्रहणं कल्पक्षये यथा सर्वग्रास इत्यर्थः ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

द्व्यशीतितमके प्राप्य कुरुक्षेत्रं रविग्रहे । तत्र दृष्ट्वा यदून् भूपा मिथश्चक्रुः कथा हरेः ॥१॥

अथ भगवतः सबान्धवस्य तीर्थयात्राव्याजेन सुहृत्सङ्गमतत्संलापात्मकं चेष्टितमनुवर्णयति त्रिभिरध्यायैः ॥ अथेति एवकदा रामकृष्णयोः द्वारकायां वसतोः सतोः कल्पक्षये यथा, कल्पावसाने सूर्यो न दृश्यते किन्तु केवलं तम एव तद्व सर्वसूर्यमण्डलावरणपूर्वकं बहुतमो व्याप्त्यात्मकः सूर्योपरागः आसीत् ॥१॥

कृष्णप्रिया

राजन् ! भगवान श्रीकृष्ण और श्रीबलभद्रजी श्रीद्वारिकापुरीमें बिराजते थे, तब पूर्णग्रास सूर्यग्रहण लगा, जैसा प्रलय के समय लगा करता है ॥१॥

[1]तं ज्ञात्वा [2]मनुजा राजन् पुरस्तादेव [3]सर्वतः । समन्तपञ्चकं क्षेत्रं [4]ययुः श्रेयोविधित्सया ॥२॥
निःक्षत्रियां महीं कुर्वन् रामः शस्त्रभृतां वरः । नृपाणां रुधिरौघेण यत्र चक्रे महाह्रदान् ॥३॥
ईजे च भगवान् रामो यत्रास्पृष्टोऽपि कर्मणा । [5]लोकं सङ्ग्राहयन्नीशो यथान्योऽघापनुत्तये ॥४॥
महत्यां तीर्थयात्रायां [6]तत्रागन् भारतीः प्रजाः । [7]वृष्णयश्च तथाक्रूरवसुदेवाहुकादयः[8] ॥५॥

कर्दमक्षमा

राजन्, पुरस्तात्, एव, तम्, ज्ञात्वा, मनुजाः, श्रेयोविधित्सया, सर्वतः, समन्तपञ्चकम्, क्षत्रम्, ययुः ॥२॥ यत्र, निःक्षत्रियाम्, महीम्, कुर्वन्, शसत्रभृताम्, वरः, रामः, नृपाणाम्, रुधिरौघेण, महाह्रदान्, चक्रे, च, यत्र, भगवान्, रामः, कर्मणा, अस्पृष्टः, अपि, ईशः, लोकम्, सङ्ग्राहयन्, यथा, अन्यः, अघापनुत्तये, ईजे ॥३-४॥ तत्र, महत्याम्, तीर्थयात्रायाम्, भारतीः, प्रजाः, आगन्, च, वृष्णयः, तथा, अक्रूरवसुदेवाहुकादयः, सुचन्द्रशुकसारणैः, गदप्रद्युम्नसाम्बाः, स्वम्, अघम्, क्षपयिष्णवः, ते, भारतम्, क्षेत्रम्, रक्षायाम्, अनिरुद्धः, च, कृतवर्मा, आस्ते ॥५-६॥

श्रीधरस्वामिकृतभावार्थदीपिका

ज्योतिर्विद्भिः कथ्यमानमादावेव ज्ञात्वा स्यमन्तपञ्चकं क्षेत्रं कुरुक्षेत्रम् ॥२॥ अब्रह्मण्यक्षत्रियवधस्थानत्वेन युगमस्याघापनुत्तिर्थानत्वेन च क्षेत्रस्य पापनिरासकत्वमाह-निःक्षत्रियामिति द्वाभ्याम् ॥३॥ अन्यो विद्वान् यथा ॥४॥ तत्राजग्मुः भारतीर्भारत्यः ॥५-६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं सूर्योपरागं दृष्ट्वा (दृष्ट्वेत्यपि पाठे) ज्ञात्वा पञ्चकस्य जामदग्न्यकृतह्रदपञ्चकस्य सम्मते (समन्तपञ्चकमित्यपि पाठः कं) समीपे वर्तमानो देशः समन्तपञ्चकः । कुरुक्षेत्रदेशोऽष्टचत्वार्शिशत्क्रोशात्मकस्तम् । सर्वतः सर्वदेशेभ्यः श्रेयः पापहानिपूर्वकं कल्याणावाप्तिस्तस्य विधित्सा कर्तुमिच्छा तया ॥२॥ ह्रदकारणमाह-निःक्षित्रियामिति । ननु रामस्त्रिःसप्तकृत्वः क्षत्रियाणामनेकदेशहतानां रक्तेन कथं कुरुक्षेत्रे ह्रदांश्चक्रे इत्याशंक्य ब्रह्माण्डपुराणमध्यभागसस-चत्वारिंशतमाध्यायवचनैर्वारयति, तथा हि-

"ततो मूर्धावसिक्तानां राज्ञाममिततेजसाम् । षट्सहस्रद्वयं (१२०००) रामो जीवग्राहं गृहीतवान् ॥
ततो राजसहस्राणि गृहीत्वा मुनिभिः सह । स जगाम कुरुक्षेत्रं महातेजास्तपोमयः ॥
सरसां पञ्चकं तत्र खानयित्वा भृगूद्वहः । सुखावगाहतीर्थानि तानि चक्रे समन्ततः ॥
जघान तत्र वै राज्ञस्तच्छरीरभवाऽसृजा । सरांसि तानि वै पञ्च पूरयामास भार्गवः ॥
स्नात्वा तेषु यथान्यायं जामदग्न्यः प्रतापवान् । पितृन् संतर्पयामास यथाशास्त्रमतन्द्रितः ॥
पितुः प्रेतस्य श्राद्धादि मातुश्चैव यथोदितम् । कृत्वा तीर्णप्रतिज्ञः स तीर्थानि तानि चाकरोत् ॥

---

१. तं ज्ञात्वा-गी. प्रे. टी. । २. सत्तमा-वीर. । ३. सर्वशः-वीर. विज. । ४. जग्मुः-विज. । ५. लोकस्य ग्राह्यन्नार्यो-वीर. ; लोकस्य ग्राहयन्नीशो । ६. तत्राजग्मुर्भारतीः-विज. । ७. -अर्धत्रयं अधिकं विज. । **कृष्णः षोडशसाहस्त्रमहिषीशिबिकान्वितः । पुत्रपौत्रजनानीकैर्वारकान्ताकरेणुभिः।**

संयुतः ॥१॥ ८. वसुदेवगदादयः-विज. ।

सन्तुष्टपितृवरतस्ततः प्रोक्तं हि नाम तत् । समन्तपञ्चकमिति मुनिभिर्दैवतैः सह ॥'' इति ॥

यत्र समन्तपञ्चके ॥३॥ ईश्वरत्वेनाहङ्काराभावादस्पृष्टकर्मापि –

''यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते । हत्वापि स इमांल्लोकान्नायं हन्ति न हन्यते ॥''

इति श्रीमुखोक्तेः ॥ लोकसङ्ग्रहार्थमीजे । यथान्यः प्राकृतः ॥४॥ तीर्थयात्रायामुपस्थितायाम् । तत्र कुरुक्षेत्रे ॥५॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

हे राजन्निति तं पूर्वकथायामाविष्टमस्यामवधापयति अत्र पूर्वतोऽपि रसविशेषोऽस्तीति द्योतनाय श्रेयस्स्नानदानादिसुकृ ॥२॥ तत्रैव गमने हेतुः-निःक्षत्रियामिति । द्वयं श्रीपरशुरामप्रभाव एव तस्य तादृशत्वे हेतुरिति महाह्रदानित्ये स्यमन्तपञ्चकमितीत्याख्याकारणमूह्यं समन्तात्पञ्चह्रदा यस्मिन्निति ॥३॥ लोकसङ्ग्रहे हेतुः, ईशः सर्वलोकेश्वरः स धर्मप्रवर्त सर्वलोकहितार्थमिति भावः । प्रशंसा चेयं श्रीव्रजवासिनां श्रीकृष्णमिलनानन्दगर्भा ज्ञेया तत्तीर्थयात्राहेतुकत्वात्तस्य पद्यद्वये त तदा फलाधिक्यवशात्ते ययुरित्यतस्तत्प्रतिष्ठापनञ्च ग्रहणयोग एव तेन कृतमिति बोधितम् ॥४॥ महत्यामित्यर्धकम् । महत्यामि सर्वग्रासेन महापर्वत्वात् अत एव भारत्यः भारतवर्षवर्तिन्यः प्रायः सर्वा एवेत्यर्थः । वृष्णय इति युग्मकम् । प्रजास्ववतीर्णं तच्छ्रेष्ठत्वाङ्गीकारादादौ यादवानाह-वृष्णय इति सपादेन । श्रीकृष्णरामादय इत्यर्थः । यथा ते तथैवाक्रूरादय इति तेषां प्र श्रीकृष्णसाहित्यगमनादर्शनात् तथाऽक्रूरस्यादित्वं कर्मण्यत्यन्तादरात् स्वमघं क्षपयिष्णवः क्षपयितुमिच्छव इत्यर्थः । एतच्च विशे सर्वेषामेव तत्र वृष्णीनां लीलया तदन्येषां केषाञ्चित् वस्तुतोऽपि न केवलं पुण्यपरावृद्धा एव कुमाराश्च ययुरित्याह-गदेति । द्वारकारक्षणे के आसन् तत्राह-सुचन्द्रेति पादत्रयेण । सुचन्द्रः श्रीरुक्मिण्याः पुत्रश्चारुदेष्णः ॥५-६॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

मनुजा इति धर्माधिकारित्वात् हे राजन्निति नरश्रेष्ठेन त्वया तद्बुद्ध्यत एवेति भावः । यद्वा, सर्वेषां मनुजानां तत्र य व्रजजनानामपि तेषां तत्र प्रयाणं संकेतेन बोधयति, श्रेयः स्नानदानादि-सुकृतम् ॥२॥ शस्त्रभृतां वरत्वेनैव निःक्षत्रियां कुर्वन् राम: रेणुकानन्दनः महतो ह्रदान् पञ्च चक्रे इति समन्तात् पञ्च ह्रदा यस्मिन्निति स्यमन्तपञ्चकमित्याख्याकरणं चोह्यम् भगवान् ईश्वरः, श्रीभगवदवतारत्वात्, अतः कर्मणा विधिनिषेधलक्षणेनास्पृष्टोऽपि, अघस्य बहुशः सर्वक्षत्रियवधपापस्या सङ्क्षपणाय ईजे, तत्प्रयोजनमाह-लोकमिति । सम्यग्ग्राहयन् शिक्षयितुमित्यर्थः । तच्च किमर्थम् ? ईशः सर्वलोकेश्वरः सद्धर्मप्रव लोकहितार्थमिति भावः । किंवा सर्वं कर्तुं समर्थः, अतो यथान्यः कर्माधीनस्तथेजे, इति यागस्य यथाविधि सम्यगनुष्ठा सूचितम् ॥४॥ महत्यामिति सर्वग्रासेन महापर्वत्वात् अत एव भारत्यो भारतवर्षवर्तिन्यः सर्वा एवेत्यर्थः । तासामेव तत्राधिकारि प्रजा एव विशेषतो निर्दिशन्, तासु परमश्रेष्ठत्वादादौ यादवानाह-वृष्णय इति यादवाः, च-शब्दात् श्रीरामकृष्णादयोऽपि राजसूयादाविव वृद्धा गृहेषु स्थिता इत्याह-तथेति समुच्चये । आदि-शब्दात् शूरान्धकादयः, तेषां विशेषतो निर्देशो वृद्ध तेषां सत्कर्मादरविशेषात् । तत्राक्रूरस्यादित्वां तस्यात्यन्तादरविशेषात्, यद्वा तथा तेन प्रजानां महापर्वयात्राप्रकारेणैवाक्रूरादयो वृष्णे स्वमघं क्षपयिष्णवः क्षपयितुमिच्छव इत्यर्थः । एतच्च –

'यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः'(गी.३/२१) इति न्यायेन ॥

श्रीजामदग्न्यवल्लोकशिक्षणार्थमेव, अत एव श्रीरामकृष्णयोः साक्षादनुक्तिश्च तयोः श्रीनन्दादिव्रजजनसमाग तत्र प्रयाणात्, हे भारतेति-भारतवंश्यप्रधानेन त्वया मुख्यानां कर्मकारणं तद्यात्रामुख्यप्रयोजनं च बुध्यत एवेति भ केवलं पुण्यपरा वृद्धा एव, कुमाराश्च ययुरित्याह-गदेति । सुचन्द्रः श्रीरुक्मिण्याः पुत्रोऽप्यमश्चारुचन्द्रस्तदादि गदादयश्च ययुः ॥५-६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-१८॥

तमिति

पुण्यार्जनेच्छया

परशुरामस्याधापनु

यत्र क्षेत्रे महाह्रदान

मत्तोऽर्वाचीनाः शि

तत्क्षेत्रं ययुरिति पूर्व

क्षेत्रेऽगमन्नाजग्मुः त

॥१-३॥ न

स्यमन्तपञ्चकं

क्षेत्रस्यास्य श्रीपरशुराम

भारत्यः ॥५-६॥

तमुपरागं ज्ञात्व

देशः समन्तपञ्चकः कुरु

अतः समन्तपञ्चकं

(''सम

समन्त

यत्र समन्तपञ्चके

ग्राहयन् अन्येऽप्येवं कुर्यु

कृष्णरामादयस्तथेति योज्य

स्यमन्तपञ्चकं कु

आजग्मुः तत् क्षेत्रं गदादयः

ततः किमत आह-

कुरुणा निर्मितदेशानां मध्ये मु

श्रेयःसम्पादनं कुत इति चेत्तत्र

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

तमिति । हे राजन् ! तं सूर्योपरागं ज्योतिर्विद्भिः कथ्यमानम् आदावेव ज्ञात्वा सत्तमाः शिष्टाः सर्वे श्रेयोविधित्सया पुण्यार्जनेच्छया स्यमन्तकपञ्चकं नाम क्षेत्रं कुरुक्षेत्रमित्यर्थः ययुर्जग्मुः ॥२॥ अब्रह्मण्यक्षत्रियवधस्थानत्वेन परशुरामस्याघापनुत्तिस्थानत्वेन च क्षेत्रस्य पापनिरासकत्वमाह–निःक्षत्रियामिति द्वाभ्याम् । रामो भार्गवः रुधिरौघेण रुधिरधारया यत्र क्षेत्रे महाह्रदान् पञ्च चक्रे ॥३॥ ईज इति । कर्मणा नृपवधप्रयुक्तपापेनास्पृष्टोऽपि रामो भार्गवः लोकस्य ग्राहयन्नन्येऽपि मत्तोऽर्वाचीनाः शिष्ट एवं कुर्युरिति तान् ग्राहयितुमित्यर्थः । तथाऽन्येषामविदुषामघापनुत्तये पापापनोदनाय च यत्र क्षेत्रे ईजे इयाज तत्क्षेत्रं ययुरिति पूर्वेण सम्बन्धः ॥४॥ महत्यामिति । महत्याम् अतिशयितपुण्यावहायां भारतीर्भारत्यः भारतवर्षस्थाः प्रजाः तत्र क्षेत्रेऽगमन्नाजग्मुः तथाऽक्रूरादयश्च वृष्णयश्चागमन् ॥५॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

॥१-३॥ न च यज्ञभोक्तुस्तव स्वार्थमेवेदं कर्म्म यतो नहीति । न च त्वदीयानामस्माकं स्वाभिमानमयमेतत् ॥४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-२६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-१२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

स्यमन्तपञ्चकं कुरुक्षेत्रं सूर्य्योपरागे खल्वस्यैव क्षेत्रस्य सर्वतः सकाशादपि पुण्यप्रदत्वाधिक्यश्रवणादिति भावः ॥२॥ क्षेत्रस्यास्य श्रीपरशुरामपराक्रमद्योतकत्वमाह–निःक्षत्रियामिति ॥३॥ पापापनोदकत्वमाह–ईजे चेति ॥४॥ आगन् आजग्मुः भारतीः भारत्यः ॥५-६॥

गूढार्थदीपिनी

तमुपरागं ज्ञात्वा मनुजाः श्रेयः पुण्यं विधातुमिच्छया समन्तज्ञेत्रं ययुः । परशुरामकृतह्रदपञ्चकस्य समन्ते समीपे वर्तमानो देशः समन्तपञ्चकः कुरुक्षेत्रदेशः अष्टचत्वारिंशत् क्रोशात्मकस्तम् । तत्र समन्तपञ्चके । अत्र यकारघटितोऽपपाठः । समन्ततः चक्रे अतः समन्तपञ्चकं

("सरसां पञ्चकं तत्र खानयित्वा भृगूद्वहः । सुखावगाहतीर्थानि तानि चक्रे समन्ततः ॥
समन्तपञ्चकमिति ततः प्रोक्तं हि नाम तत् ॥" इति ब्रह्माण्डपुराणे ॥) नाम ॥२॥

यत्र समन्तपञ्चके ॥३॥ कर्मणा पापेन अस्पृष्टोऽपि ईशः समर्थोऽपि यत्र ईजे च तत्क्षेत्रं ययुरिति पूर्वेण सम्बन्धः । लोकं ग्राहयन् अन्येऽप्येवं कुर्युरिति शिक्षयितुम् ॥४॥ महत्यामिति सार्धम् । भारतीः भारत्यः प्रजाः अगन् अगमन् । तत्र वृष्णयः कृष्णरामादयस्तथेति योज्यम् । क्षपयितुं नाशयितुमिच्छवः ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

स्यमन्तपञ्चकं कुरुक्षेत्रम् ॥२-३॥ अन्यः कर्मणा संस्पृष्टः ॥४॥ भारतीः सूर्योपरागं श्रुत्वेति शेषः । प्रजाः आगन् आजग्मुः तत् क्षेत्रं गदादयः ययुरन्ये स्वमघं क्षपयिष्णवः अघवन्तोऽपि ययुः सुचन्द्रादिभिः सह ॥५-६॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

ततः किमत आह–तं ज्ञात्वेति । ज्योतिःशास्त्रप्रामाण्यात् पूर्वमेव माघे मासि ग्रहणं जायत इति श्रुत्वा स्यमन्तपञ्चकं क्षेत्रं कुरुणा निर्मितदेशानां मध्ये मुख्यं श्रेयोविधित्सया तत्र गत्वा श्रेयस्सम्पादयिष्याम इति निश्चित्य तस्मिन् समागताः ॥२॥ ननु, तत्रैव श्रेयःसम्पादनं कुत इति चेत्तत्राह–निःक्षत्रियां महीं कुर्वन्निति । पूर्वं रामेण क्षत्रियाणां सर्वेषामेव नाशार्थं सङ्कल्पः कृतः ततः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

क्षत्रियाः सर्वान् मारयिष्यन्तीति क्व युद्धेन मृते प्राप्स्याम इति मोक्षं विचार्य "कुरुक्षेत्रसमा गङ्गा" इति धर्मक्षेत्रमिति कुरुणा महता कष्टेन तत् स्थानं तथा कृतमिति तत्रैव मोक्षो भविष्यतीति निश्चित्य परशुराममारणसमये सर्व एव तत्र समागताः ततो रामेण ते सर्वे हताः तेषां रुधिरौघेण नव ह्रदांश्चक्रे, तान्येव तीर्थानि जातानि गङ्गातोऽप्यधिकानि अनेन तस्योत्कर्षः सम्पादितः किन्तु स्वस्यापीत्याह- ईजे च भगवान् राम इति। प्रायश्चित्तार्थं यज्ञांश्च तत्रैव कृतवान् प्रायश्चित्तं तु पापसम्बन्धे भवति तथा च तस्मिन् क्षेत्रे पापमप्युत्पद्यत इति शङ्काव्युदासार्थमाह-यत्रास्पृष्टोऽपि कर्मणेति। यद्यपि भगवत्त्वेनापि न कर्मसम्बन्धः तथापि तत्र देशमाहात्म्यादेव न कर्मसम्बन्ध इति ज्ञापयितुं यत्रेत्युक्तम् अन्यथा चकारादपि पूर्वस्थानमायाति तर्हि यागस्य किं प्रयोजनमित्याशङ्क्याह-लोकं सङ्ग्राहयन्निति। ननु, किमित्येव मन्यते तत्राह-ईज इति। ननु ईश्वरस्य यज्ञाधिकार एव नास्ति कथं कृतवानिति चेत्तत्राह-यथाऽन्य इति फलार्थतां वारयति अघापनुत्तय इति पापक्षयार्थम् ॥४॥ एवं देशकालयोर्माहात्म्यमुक्त्वा तत्र सर्वासां प्रजानां समागमनमाह-महत्यां तीर्थयात्रायामिति। एतादृशे निमित्ते तीर्थयात्रा महती भवति महत्त्वं सर्वेषां गमनात्फलाधिक्याच्च अत एव भारतीः भारतवर्षोद्भवाः प्रजाः सर्वा एव तत्रागमन् तत्र महतां नामानि सङ्क्षेपेणाह-वृष्णयश्चेति। आदौ वृष्णयः समागताः तत्रापि मुख्या एव समागता इति वक्तुम् अक्रूरवसुदेव-आहुकादय इति सात्त्विका महान्तो राजानश्चोक्ताः ॥५॥

सुबोधिनीसारः

तमुपरागं ज्योतिर्विद्भिः पुरस्तात्प्रथममेव ज्ञात्वा मनुष्याः सर्वतः कल्याकरणेच्छया स्यमन्तपञ्चकं कुरुक्षेत्रं ययुः हे राजन्! ॥२॥ निःक्षत्रियां पृथिवीं कुर्वन् शस्त्रभृतां श्रेष्ठः परशुरामः नृपाणां रुधिरपूरेण यत्र महाह्रदान् चक्रे पितॄणां वरदानतस्तीर्थानीति भारतादिपर्वणि ॥३॥ यत्र कुरुक्षेत्रे कर्मणाऽस्पृष्टो निर्लिप्त ईशो रामो लोकस्य कर्मणि षष्ठी लोकं शिक्षयन्निव ईजेऽघस्य पापस्यापनुत्तये नाशार्थमन्यः प्राकृत इव ॥४॥ महत्यां तीर्थयात्रायां तत्र भारतीर्भारत्यः प्रजा आगन् वर्णलोप आर्षः आजग्मुः। अक्रूरवसुदेवादयो वृष्णयश्च ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे राजन्! तं सूर्योपरागं ज्योतिर्विद्भिः कथ्यमानं ज्ञात्वा पुरस्तात् ततः पूर्वत एव सर्वदेशतो मनुजाः श्रेयोविधित्सया पुण्यार्जनेच्छया स्यमन्तपञ्चकं नाम कुरुक्षेत्रं ययुरित्यन्वयः ॥२॥ अब्रह्मण्यक्षत्रियवधस्थानत्वेन परशुरामस्याघापनुत्तिस्थानत्वेन च क्षेत्रस्य पापनिरारकत्वं सूचयन्नाह-निःक्षत्रियामिति द्वाभ्याम्। रामो भार्गवो महीं निःक्षत्रियां कुर्वन् यत्र नृपाणां रुधिरौघेण रुधिरधारया महाह्रदान् चक्रे। तत्र सामर्थ्यमाह-शस्त्रभृतां वर इति ॥३॥ कर्मणा नृपवधप्रयुक्तपापेनास्पृष्टोऽपि रामो लोकस्य ग्राहयन् अन्येऽप्येवं कुर्युरिति शिक्षयितुं यथान्यः प्राकृतुरुषवत् अघापनुत्तये पापविनाशाय यत्र क्षेत्रे ईजे च तत्क्षेत्रं ययुरिति पूर्वेण सम्बन्धः। पापास्पर्शे हेतुमाह-भगवानिति। लोकशिक्षायां सर्वश्रेष्ठत्वं हेतुमाह-ईश इति ॥४॥ महत्याम् अतिशयितपुण्यावहायां तीर्थयात्रायां तत्र क्षेत्रे भारतीः भारत्यः भारतवर्षस्थाः प्रजाः अगन् आजग्मुः। तथा अक्रूदयो वृष्णयः स्वं स्वकीयमघं क्षपयिष्णवः निरसितुमिच्छवस्तत् क्षेत्रं ययुः ॥५॥

अन्वितार्थप्रकाशिका

तमिति। हे राजन्! तं सूर्योपरागं ज्योतिर्विद्भिः कथ्यमानं ज्ञात्वा पुरस्तात् ततः पूर्वत एव सर्वदेशतो मनुजाः श्रेयोविधित्सया पुण्यार्जनेच्छया स्यमन्तपञ्चकं नाम कुरुक्षेत्रं ययुः ॥२॥ क्षेत्रस्य पापनाशकत्वमाह-निःक्षत्रियामिति। शस्त्रभृतां वरः रामः भार्गवः महीं निःक्षत्रियां कुर्वन् यत्र पापिनां नृपाणां रुधिरौघेण रुधिरधारया महाह्रदान् चक्रे ॥३॥ ईजे इति। कर्मणा नृपवधप्रयुक्त अस्पृष्टः अपि भगवान् ईशः क्षम लोकस्य ग्राहयन् अन्येऽप्येवं कुर्युरिति शिक्षयितुं यथान्यः प्राकृतुरुष इव अघापनुत्तये पापविनाशाय यत्र क्षेत्रे ईजे च तत्क्षेत्रं ययुरिति पूर्वेण सम्बन्धः ॥४॥ महत्यामिति सार्धम्। महत्याम् अतिशयितपुण्यावहायां तीर्थयात्रायां तत्र भारतीः भारत्यः भारतवर्षस्थाः। पूर्वसवर्णदीर्घ आर्षः। प्रजाः अगन् जग्मुः। मलोप आर्षः उपरोक्तरीत्या वा साध्यम्। अक्रूदयो वृष्णयश्च स्वं स्वकीयमघं क्षपयिष्णवः निरसितुमिच्छवस्तत् क्षेत्रं ययुः ॥५॥

पुरस्त
कर्मणा क्षत्रियव
तपोयज्ञयोगयज्ञा

तमिति।
शिष्टा जनाः मनुज
स्यमन्तपञ्चकं क्षेत्रं
पापनिरासकत्वमाह
नृपाणां सर्वेषां राज्ञां रु
अस्पृष्टः अपि रामो भ
। अन्योऽविद्वान् यथ
महत्यामिति॥ महत्या
। तथा अक्रूरवसुदेवाहु

महाराज ! ज
अपने कल्याण की
वह है जहां शस्त्रधार
क्षत्रीय रहित बनाने के
जैसे जगतमें कोइ सा
सम्पन्न भगवान परशुर
क्षेत्रमें यज्ञ किया था
भारतवर्ष के समस्त प्र
श्रीउग्रसेनजी आदि वृद्ध
और पापों का विनाश
श्रीकृष्णवर्माजी ये दो वी
रह गये थे। यदुवर याद
वस्त्र सुदृढ कवचों से सु
मार्गमें जब प्रस्थान कर
चलनेवाले अश्वों वादलों
समान मनुष्योंके द्वारा ढो
रहे थे कि स्वर्ग के देवाधि
से श्रद्धापूर्वक स्नान किया

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुरस्तात् प्रथमत एव सर्वतः सर्वदेशेभ्यः स्यमन्तपञ्चकं कुरुक्षेत्रम् । श्रेयो विधातुं कर्तुमिच्छया ॥२॥ रामो भार्गवः ॥३॥ कर्मणा क्षत्रियवधररूपेण अस्पृष्टः । अलिप्तोऽपि लोकस्य स्वकृतहिंसाप्रायश्चित्तं ग्राहयत् । अन्यो यथा इतरजनवत् ईजे तपोयज्ञयोगयज्ञादिभिर्यजनं चकार ॥४॥ भारतीर्भारत्यः आगन् आगच्छन् आययुः । आहुक उग्रसेनः ॥५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ हे राजन् ! तं सूर्योपरागं ज्योतिर्विद्भिः कथ्यमानमिति शेषः । पुरस्तादारात् एव ज्ञात्वा सर्वशः सर्वेऽपि सत्तमाः शिष्ट जनाः मनुजा इति पाठे सर्वत इति पाठे च सर्वेभ्यो देशेभ्यः सर्वे मनुष्या इत्यर्थः । श्रेयोविधित्सया पुण्यार्जनेच्छया स्यमन्तपञ्चकं क्षेत्रं कुरुक्षेत्रमित्यर्थः । ययुर्जग्मुः ॥२॥ अब्रह्मण्यक्षत्रियवधस्थानत्वेन परशुरामस्याघापनुत्तिस्थानत्वेन च क्षेत्रस्य पापनिरासकत्वमाह । निःक्षत्रियामिति द्वाभ्याम् ॥ निःक्षत्रियामिति ॥ शस्त्रभृतां वरः रामो भार्गवः महीं पृथ्वीं निःक्षत्रियां कुर्वन् सन् नृपाणां सर्वेषां राज्ञां रुधिरौघेण रुधिरधारया यत्र कुरुक्षेत्रे महाह्रदान् पञ्च महतो ह्रदान् चक्रे ॥३॥ ईज इति ॥ कर्मणा नृपवधप्रयुक्तपापेन अस्पृष्टः अपि रामो भार्गवः ईशः भगवान् सन्नपि लोकस्य ग्राहयन् मत्तोऽर्वाचीना अन्येऽपि शिष्या एवं कुर्युरिति तान् ग्राहयितुमित्यर्थः अन्योऽविद्वान् यथा तथा अघापनुत्तये पापापनोदनाय च यत्र क्षेत्रे ईजे इयाज । तत् क्षेत्रं ययुरिति पूर्वेण सम्बन्धः ॥४॥ महत्यामिति ॥ महत्याममितपुण्यावहायां तत्र तीर्थयात्रायां भारतीः भारत्यः प्रजाः भरतवर्षस्था जना इत्यर्थः । तत्र क्षेत्रे अगन्नाजग्मुः तथा अक्रूरवसुदेवाहुकादयः वृष्णयश्च हे भारत ! स्वम् अघं क्षपयिष्णवः निरसितुमिच्छवः सन्तः तत् क्षेत्रं ययुः ॥५॥

कृष्णप्रिया

महाराज ! ज्योतिर्वींदो के माध्यम से मनुष्यों को पहले से पता लग गया था इसलिये प्रजाजन अपने अपने कल्याण की कामना से पुण्य सम्पादन के लिये तीर्थमें कुरुक्षेत्रमें आ पहुंचे ॥२॥ समन्तपंचक क्षेत्र है जहां शस्त्रधारण क रने वालों में जो श्रेष्ठ माने गये है ऐसे श्रीपरशुराम भगवानने समग्र पृथ्वी को क्षत्रीय रहित बनाने के लिये क्षात्रियों का वध करके उनकी रुधिर धारासे बडे बडे पांच कुण्ड बनाये थे ॥३॥ जैसे जगतमें कोइ सामान्य मानव अपने पापोंकी निवृत्ति के लिये प्रायश्चित करता है वैसे ही सर्व सामर्थ्य सम्पन्न भगवान परशुरामजी ने अपने साथ कर्मोका कोइ सम्बन्ध न होनेपर भी लोकशिक्षा के लिये उसी क्षेत्रमें यज्ञ किया था ॥४॥ महाराज परीक्षित् ! इस सर्वोत्तम महान् पर्व पर तीर्थ करने के लिये समस्त भारतवर्ष के समस्त प्रान्तोकी जनता कुरुक्षेत्रमें आयी थी । उन महानुभावोंमें श्रीअक्रुरजी, श्रीवसुदेवजी, श्रीउग्रसेनजी आदि वृद्धगण एवं गद प्रद्युम्न, साम्ब आदि सर्व यदुवंशी गण भी अपने अपने पापोंकी शुद्धि और पापों का विनाशके लिये कुरुक्षेत्रमें आये थे । श्रीप्रद्युम्नकुमार अनिरुद्धजी और यादवसेनाधिपति श्रीकृष्णवर्माजी ये दो वीरवर सुचन्द्र-शुक-सारण आदि वीरों के साथ नगरकी रक्षा के लिये श्रीद्वारिकापुरीमें रह गये थे । यदुवर यादववीर स्वभासे ही तेजस्वी थे और कण्ठमें सुवर्ण की माला और पुष्पों के हार बहुमूल्य वस्त्र सुदृढ कवचों से सुसज्जित होने के कारण सैनिकों की शोभा और बढ रही थी । सारे यादव यात्रा के मार्गमें जब प्रस्थान कर रहे थे तब मार्गमें देवताओंके समान सौन्दर्यपूर्ण रथों समुद्रके तरङ्गो के समान चलनेवाले अश्वों वादलों के समान विशालकाय एवं गर्जना करते हुए गजराजोंका दिव्यवृन्द विद्याधरों के समान मनुष्योंके द्वारा ढोयी जाने वाली पालकियोंमें अपनी धर्मांगनाओंके साथ इस प्रकार शोभायमान हो रहे थे कि स्वर्ग के देवाधिदेव ही यात्रा कर रहे हों । बडभागी यादवोने कुरुक्षेत्रमें पहुंचकर भगवन्मय चित्त से श्रद्धापूर्वक स्नान किया और ग्रहणके उपलक्ष्यमें निश्चित काल पर्यन्त उपवास किया ॥५-९॥

[1]ययुस्ते भारतं क्षेत्रं स्वमघं क्षपयिष्णवः । [2]गदप्रद्युम्नसाम्बाश्च सचन्द्रशुकसारणैः ॥६॥
[3]आस्तेऽनिरुद्धो रक्षायां कृतवर्मा च यूथपः । ते [4]रथैर्देवधिष्ण्याभैर्हयैश्च तरलप्लवैः ॥७॥
[5]गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः । व्यरोचन्त[6] महातेजाः पथि काञ्चनमालिनः[7] ॥८॥
[8]दिव्यस्त्रग्वस्त्रसन्नाहाः कलत्रैः खेचरा इव । तत्र स्नात्वा महाभागा उपोष्य सुसमाहिताः ॥९॥

कर्दमक्षमा

देवधिष्ण्याभैः, रथैः, च, तरलप्लवैः, हयैः, नदद्भिः, गजैः, अभ्राभैः, विद्याधरद्युभिः, नृभिः, महातेजाः(ब.व.) काञ्चनमालिनः, पथि, व्यरोचन्त ॥७-८॥ दिव्यस्त्रग्वस्त्रसन्नाहाः, कलत्रैः, खेचराः, इव, व्यरोचन्त, महाभागाः, तत्र, स्नात उपोष्य, सुसमाहिताः, ब्राह्मणेभ्यः, वासःस्त्रग्रुक्ममालिनीः, धेनूः, ददुः, वृष्णयः, पुनः, रामह्रदेषु, विधिवत्, आप्लुत्य, कृष्णे, भक्तिः, अस्तु, इति, द्विजाग्रेभ्यः, स्वर्णम्, ददुः ॥९-१०-११॥

श्रीधरस्वामिकृता भावार्थदीपिका

सुचन्द्रशुकसारणैः सहानिरुद्धो द्वारकारक्षायामास्ते तथा कृतवर्मा च यूथपतिः सेनानीः देवधिष्ण्याभैर्विमानसङ्का तरलास्तरङ्गास्तद्वत् प्लवो गतिर्येषां तैः ॥७॥ विद्याधरद्युभिर्विद्याधराणामिव द्युतिर्येषां तैः महातेजाः महातेजसः ॥८॥ दिव्य अत्युत्तमाः स्त्रग्वस्त्रसन्नाहाः येषाम् ॥९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत् क्षेत्रं समन्तपञ्चकम् ॥६॥ ते वृष्णयः ।

"तरलश्चञ्चले वक्रे तरङ्गे सुरषिङ्गयोः ।" इति कोषात् ॥

'भेकोडुपगतौ प्लवः ।' इति । भेकादीनां समाहारद्वन्द्वः ॥७॥ महातेजा इति समासान्तो डप्रत्ययः ॥८॥ तत्र रामह्रदेषु ॥९

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

रक्षायां रक्षार्थम् आस्ते आसीदिति अनिरुद्धस्यात्यल्पवयस्त्वादिना लघुत्वेऽपि प्राधान्यान्महानुभाव ज्येष्ठान्वयत्वात्तादृशव्यवहारार्हत्वं च दर्शितम् । अनिरुद्धोऽयं श्रीकृष्णपुत्रो वा ते इति च युग्मकम् । ते वृष्णयो रथादि सेनायाश्चतुर्भिरङ्गैः कारणभूतैः नृभिः पदातिभिः ॥७-८॥ कलत्रैः सह खेचराणां दृष्टान्तत्वं साधारणजनचमत्काराय श्रीकृष्ण

---

१. ययुर्भारस्त तत-श्रीधर. वंशी. । २. शठप्रद्युम्नसांबाश्च सुवज्रोद्धवसारणाः-विज. ; गदप्रद्युम्नसाम्बाद्याः-श्रीधर. वंशी. वीर. । ३. आहुकं कृतव संस्थाप्य पुररक्षणे-विज. । ४. देवविख्यातै-विज. । ५. गजैर्बृहद्भि-विज. । ६. महाभागाः-वीर. विज. । ७.

वेदवादित्रनिर्धोषैः शङ्खदुन्दुभिनिःस्वनैः । गायन्तः कृष्णकृष्णोति गोविन्देति च सन्ततम् ।
ककुभः पूरयन्नादैर्जग्मुः सर्वे कुरूद्वह ॥१॥
स्यमन्तपञ्चकं प्राप्य क्षेत्रं त्रैलोक्यविश्रुतम् । तृणैः पर्णैः पर्णैस्तथा काष्ठैश्चकिरे भवनानि च ॥ २॥
कंवलाजिनवस्त्राणां शिविराणि महीभृताम । आसन्विचित्रस्पाणि शतशोथ सहस्त्रशः ॥ ३॥
तत्राजग्मुर्नृपानेके ब्राह्मणाश्च सहस्त्रशः । शूद्राश्च निःसङ्ख्या ये चान्ये वर्णानिन्दिताः ॥४॥
ऋषयश्च महात्मानो विख्याताः शंसितव्रताः । सोपाध्यायाः साग्निहोत्राः स्नातका गृहमेधिनः ॥५॥
अन्धाश्च बधिराश्चैव कुब्जा वामनपण्डकाः । व्यङ्ग जडाश्च मूकांश्च कर्मक्षयपरीप्सवः ॥६॥
गोविन्दचरणांभोजरेणुरञ्जितमस्तकाः । कटकाङ्गदकेयूरहारकुण्डलभूषणाः ॥७॥

सप्त श्लोका अधिकः -विज. । ८. स्त्रगन्धदिव्यवसनाः-विज. ।

ुकसारणौ: ॥६॥
तरलप्लवैः ॥७॥
नमालिनः[७] ॥८॥
सुसमाहिताः ॥९॥

मः, महातेजाः(ब.व.),
हाभागाः, तत्र, स्नात्वा,
त्, आप्लुत्य, कृष्णे, नः,

धिष्ण्याभैर्विमानसङ्काशैः
महातेजसः ॥८॥ दिव्याः

ः ॥८॥ तत्र रामह्रदेषु ॥९॥

प्राधान्यान्महानुभावत्वं
म् । ते वृष्णयो रथादिभिः
जनचमत्काराय श्रीकृष्णे

शी. वीर. । ३. आहुकं कृतवर्माणं

देति च सन्ततम् ।
॥१॥
र भवनानि च ॥ २॥
थ सहस्रशः ॥ ३॥
वर्णनिन्दिताः ॥४॥
का गृहमेधिनः ॥५॥
र्क्षयपरीप्सवः ॥६॥
ुण्डलभूषणाः ॥७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

चन्द्रादीनामिव तत्र तेषु ह्रदेषु उपोष्य सूर्य्यग्रहणापेक्षयैव न तु तीर्थोपवासापेक्षया "मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः । वर्जयित्वा कुरुक्षेत्रम्" इति स्मृतेः ॥९-१०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

रक्षायां रक्षार्थमास्ते आसीत्, तस्याभिनववयस्त्वेन यद्यात्रापेक्षाविशेषात्, यद्वा, मुख्यतमानां चतुर्णां तेषामेकतमस्य तत्रापेक्ष्यत्वात्तत्रापि तस्य सर्वलघुत्वादिति । ते वृष्णयो रथादिभिः सेनाचतुरङ्गैः कृत्वा, कलत्रैः सह पथि विशेषेण श्रीनन्दादिसमागमाशयाधिक्येनारोचन्त अशोभन्तेति द्वाभ्यामन्वयः । नदद्भिर्मदेन बृंहमाणैः, किञ्च, अभ्राभैः स्थौल्यादिना मेघतुल्यैः, नृभिः पदातिभिः, काञ्चनस्य माला तत्पुष्पमाल्यम्, किरीटकुण्डलादिरूपेण पङ्क्तिर्वा, तद्वन्तः ॥७-८॥ स्रक् पुष्पादिनिर्मिता, सन्नाहः कवचम् । एवं महातेजस्त्वादिना शीघ्रग-दिव्यरथारोहणादिना च खेचराः सिद्धा इव, तत्र तेषु ह्रदेषु महान् भागो भाग्यं श्रीभगवद्बन्धुत्वकारणम्, किंवा, प्रेमभक्तिलक्षणो लाभांशो येषां यादवानां ते, इति बाह्यान्तराशेषसुसम्पत्तिमत्ता सद्धर्मपरता च सूचिता । अत उपोष्य सूर्यग्रहणापेक्षयैव, न तु तीर्थोपवासापेक्षया - 'वर्जयित्वा कुरुक्षेत्रम्' इति स्मृतेः । सुसमाहिताश्च क्रीडादिपरित्यागेन तदेकचित्ताः सन्तः । स्वन्नमुत्तमान्नं द्विजाग्रेभ्यो विप्रेभ्यः श्रीभगवद्भक्तिपरत्वादिना विप्रश्रेष्ठेभ्यो च महाभागत्वमेव दर्शयन् स्वन्नदानादौ (स्नानदानादौ-घ-ङ।) सुसङ्कल्पितमाह-कृष्ण इति । श्रीदेवकीनन्दने भगवति; न ति प्रत्येकं स्वस्वपरिवारापेक्षया ॥९-१०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-१८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

किमर्थमित्यत आह-ययुरिति । हे भारत ! स्वं स्वकीयमघं पापं क्षपयिष्णवः निरसितुमिच्छव इत्यर्थः । गदेति गदादिभिः अनिरुद्धः रक्षायां निमित्तभूतायां द्वारकारक्षणार्थमित्यर्थः । तत्रैवास्ते स्थितवान् इत्यर्थः । तथा यूथपः सेनानीः कृतवर्मापि वास्ते इत्यर्थः । एतैर्विशेषणैस्सर्वे भगवदादयो जग्मुरित्यभिप्रायः । तत्र श्रीकृष्णस्तु लोकं तीर्थयात्रायां प्रवर्तयितुं गत इति ष्यम्। तेऽक्रूरादयः देवधिष्ण्याभैर्देवविमानसङ्काशैरिति रथविशेषणं तरलाः तरङ्गाः तद्वत् प्लवो गतिः येषां तैः इति हयविशेषणम् ६-७॥ नदद्भिरभ्राभैर्नीलमेघसङ्काशैरिति च गजविशेषणं विद्याधराणामिव द्युतिर्येषां तैः नृभिर्नरैश्च व्यरोचन्तेति सम्बन्धः । महाभागाः भाग्यवन्तः सर्वे काञ्चनमालायुक्ताः ॥८॥ दिव्याः स्रगादयो येषां ते सन्नाहः कवचादिपरिकरबन्धः खेचरा देवा इव कलत्रैः सह व्यरोचन्त । तत्रेति । वासस्रगादयः आसां सन्तीति तथा ताः धेनूर्ददुः रामह्रदेषु भार्गवनिर्मितेषु ह्रदेषु आप्लुत्य स्नात्वा कृष्णे भगवति नोऽस्माकंभक्तिरस्त्विति प्रार्थ्यमाना ददुः तथा स्वयं भगवानपि तत्राप्लुत्य ददौ इत्यर्थः कृष्णो देवता येषां ते ॥९-११॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-१३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-१२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

अनिरुद्धो द्वारकारक्षायामास्ते इति तस्यैव श्वेतद्वीपस्थस्य पालनकर्तृविष्णुत्वेन प्रसिद्धेः देवधिष्ण्याभैर्देवविमानतुल्यैः ॥८॥ महातेजाः महातेजसः ॥८-९॥

गूढार्थदीपिनी

सुचन्द्रादिभिः सह अनिरुद्धो द्वारकाया रक्षायामास्ते इति योज्यम् । सुचन्द्रो रुक्मिणीपुत्रः शुकसारणौ यादवौ ॥६॥ ते युग्मम्। ते वृष्णयः पथि खेचरा देवा इव व्यरोचन्त । कैः । रथादिभिः । देवधिष्ण्यम् देवविमानं तत्सदृशैः । तरलास्तरङ्गास्तद्वत्प्लवो

गूढार्थदीपिनी

गतिर्येषां तैः अभ्राभैः नीलमेघसदृशैः । द्यु: द्युतिः महातेजा इति समासान्तोऽप्रत्ययः । दिव्यस्रगादीनां सन्नाहः सुन्दरबन्धो येषां ते । णः बन्धने धातुः । सन्नाहः सन्निबन्धः । सजावट इति ॥७-८॥ रुक्मं स्वर्णम् । वासःस्रक्-रुक्मभूषणानि मलन्ते धारयन्तीति तथा । 'मल मल्ल धारणे' धातुः ॥९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अनिरुद्धः यूथपः सेनानीः कृतवर्मा च रक्षायां द्वारकारक्षार्थम् आस्ते तरलवत् तरङ्गवत् प्लवो गतिर्येषां तैः ॥७॥ विद्याधराणामिव द्युतिर्येषां तैः ॥८॥ दिव्याः स्रगादयो येषां ते खेचरा इव व्यरोचन्त महातेजाः श्रीकृष्णः खेचर इव शुशुभे इति शेषः ॥९॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

तेषामन्यत्र गमनं वारयितुमाह-ययुस्ते भारतं क्षेत्रमिति । भरतवंशोद्भवेन निर्मितं क्षेत्रं वृष्णीनां सर्वश्रेयांसि गृह एवेति भगवदवज्ञालक्षणं पापं सम्भवतीति तस्यान्यत्रानिष्कृतिमलभमानाः स्वमसाधारणमघं क्षपयिष्णवः तत्रागता इत्युक्तं त्रिविधा एव समागता इति शङ्काव्युदासार्थम् अन्यानपि गणयति गदप्रद्युम्नसाम्बाश्चेति ॥६॥ सर्वेषामेवागमने द्वारकायां कः स्थितः इत्याकाङ्क्षायामाह-आस्तेऽनिरुद्धो रक्षायामिति । अनिरुद्धो योगपतिरिति योगाभ्यासपरस्याप्यनागमनमुक्तं कृतवर्मा च यूथप इति तस्य सेनापतिरित्यर्थः । योऽपि तस्योत्तरसाधकः सोऽपि नागच्छेदिति यद्यपीयं यात्रा सर्वथा साधारणी तथापि भगवच्चरित्र प्रकरणत्वात् मुख्यतया यादवा वर्ण्यन्ते ये समागतास्ते किं यात्रानियमेन आहोस्विच्छोभयेति सन्देहे निरूपयति-ते रथैर्देवधिष्ण्याभैरिति कृत्वा कार्पटिकं वेषमिति नियमो यात्रायां देशमात्रप्राधान्ये सति नियमः कालप्राधान्ये तु न नियम इति चतुरङ्गसेनया महत्या सहितास्ते व्यरोचन्तेति रक्षाशोभाविषयश्च निरूप्यते रथादयो वाहनरूपा इति केचित् देवधिष्ण्यानि विमानानि जगन्नाथादिदेवस्थानयात्रानिमित्तदेवासनरथसदृशा वा नानालङ्करणोपेताः तैर्व्यरोचन्तेत्यग्रिमेण सम्बन्धः । ते गदादयः सर्व एव लोकाः तथा हया अपि तरलवत्तरङ्गवत् प्लवः प्लवनं गतिर्येषां हयानां गतिरेव गुणः ॥७॥ गजाश्च नदन्तः अभ्राभाः अत्युच्च नादेनान्तस्तोषो मत्तता वा निरूप्यते नृभिः पदातिभिर्दोलावाहकैर्वा तेषां कान्तिः विद्याधरसदृशी ते हि नानाविद्यया नानारूपा भवन्ति अलङ्कृताश्च प्रतिक्षणमन्यथान्यरथारूपमिति ज्ञापयितुं विद्याधरकान्तितुल्यता स्वयमपि महातेजाः महत्तेजो येषामिति समासान्तो टच् तेन टिलोपात् महातेज इत्यकारान्तो भवति अनेन सहजोत्कर्षः तेषामुक्तः आगन्तुकमाह-पथि काञ्चनमालिन इति अनेन सर्वदेशस्वास्थ्यं सर्वनिर्मलचित्तता च निरूपिता ॥८॥ अन्यथा साभरणा निर्भयाश्च सर्वे सर्वतो नागच्छेयुः दिव्यस्रग्वस्त्रसन्नाह दिव्यान्यलौकिकानि लोके आश्चर्यकराणि वस्त्रादीनि (संवाहाश्च) सन्नाहा वा कवचादयः सर्व एव सस्त्रीकाः प्रकृते स्त्रीसहितानामेवाधिकार इति महत्त्वख्यापकं वा स्त्रीणां बाहुल्यं शोभातिशयं च ज्ञापयितुं दृष्टान्तः खेचरा इवेति । सर्वेषामागमनमुक्त्वा अमावास्यायां ग्रहणदिवस एव यावतामागमनं भवति तानुक्त्वा पश्चात्तीर्थस्नानादिकं कृतवन्त इत्याह स्नात्वेति । महाभागा इत्यनेन तीर्थप्राप्तिभाग्यंदानाद्यर्थं च निरूप्यते ततो प्रस्तास्तमयः सूर्य इति तस्मिन् दिवसे सर्वेषामुपवासः तीर्थप्राप्तिनिमित्तः कुरुक्षेत्रे तन्निषेधात् सुसमाहिता इति सर्वभोगनिवृत्तिः क्रोधादिसर्वदोषनिवृत्तिश्च ततो ग्रहणसमये ब्राह्मणेभ्यो ददुर्धेनूः वासांसि स्रजश्च रुक्ममालाश्च यासु सर्वालङ्करणोपेता दत्ता इत्यर्थः । तत्र मुख्यमेकं सरः अन्ये च ह्रदा नव ते रामह्रदाः "शोणितौघान् ह्रदान्नव" इति वाक्यात् ततो रामह्रदेष्वपि विधिवत्फलसाधकत्वात् स्नानं कृतवन्तः ॥९-१०॥

सुबोधिनीसारः

हे भारत ! स्वमघं पापं क्षपयिष्णवः नाशयितुकामाः सुचन्द्राद्यैः सह गदादयश्च तत्क्षेत्रं ययुः ॥६॥ अनिरुद्धो द्वारकारक्षार्थमास्ते यूथपतिः कृतवर्मा च देवानां धिष्ण्यानि विमानानि तद्वदाभा दीप्तिर्येषां तैः रथैः तरलास्तरङ्गास्तद्वत् गतिर्येषां तैर्हयैरश्वैः ॥७॥ अभ्राभैर्नीलमेघोपमैर्गर्जद्भिर्गजैः विद्याधराणामिव द्यौर्दीप्तिर्येषां तैर्नृभिः महातेजा एकत्वमार्षं सुवर्णमालिनः ॥८॥ दिव्यः स्रग्वस्त्रसन्नाहा येषां ते पथि व्यरोचन्ताशोभन्त । कलत्रैः स्त्रीभिः खेचरा ग्रहा इव तत्र कुरुक्षेत्रे स्नात्वा तीर्थोपवासं कृत्वा सचित्ता महाभागाः ॥९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

गदादिभिः सहानिरुद्धः रक्षायां निमीत्तभूतायां द्वारकायामास्ते । साम्बाद्या इति पाठे पूर्वेणान्वयः ॥६॥ देवधिष्ण्याभैर्देवविमानसदृशैः रथैः, तरलास्तरङ्गास्तद्वत्प्लवो गतिर्येषां तैर्हयैः नदद्भिर्नादं कुर्वद्भिः अभ्राभैः नीलमेघसदृशैर्गजैः विद्याधराणामिव द्युतिर्येषां तैर्नृभिश्च ॥७॥ कलत्रैश्च सह काञ्चनमालायुक्ताः दिव्याः स्रगादयो येषां ते महातेजाः महातेजसो यादवाः पथि खेचरा देवा इव व्यरोचन्तेति द्वयोरन्वयः ॥८॥ तत्र तीर्थे स्नात्वा उपोष्य सावधानाश्च ते ब्राह्मणेभ्यो धेनूर्ददुः ॥९॥

अन्वितार्थप्रकाशिका

गदेति । गदप्रद्युम्नसाम्बाद्याः सुचन्द्राद्याश्च तत्क्षेत्रं ययुः । तथा अनिरुद्धः यूथपः सेनानीः कृतवर्मा च रक्षायां निमित्तभूतायां द्वारकायाम् आस्ते । सुचन्द्रो रुक्मिणीपुत्रश्चारुचन्द्रनामा शुकसारणौ यादवौ ॥६॥ ते इति युग्मम् । देवधिष्ण्याभैर्देवविमानसदृशैः रथैः तरलास्तरङ्गास्तद्वत्प्लवो गतिर्येषां तैर्हयैः नदद्भिर्नादं कुर्वद्भिः अभ्राभैः नीलमेघसदृशगर्जितैः विद्याधराणामिव द्युतिर्येषां तैर्नृभिः कलत्रैश्च सह काञ्चनमालायुक्ताः दिव्याः स्रगादयो येषां ते महातेजाः महातेजसः तेजशब्दोऽदन्तोऽपि । ते यादवाः पथि खेचरा देवा इव व्यरोचन्त ॥७-८॥ तत्रेति । तत्र तीर्थे स्नात्वा उपोष्य सूर्योपरागनिमित्तमेवोपोषणम् । तीर्थोपवासस्य तत्र निषिद्धत्वात् सावधानाश्च । ते ब्राह्मणेभ्यो धेनूर्ददुः । स्पष्टं शेषम् ॥९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सुचन्द्रः चारुचन्द्रनामा रुक्मिणीपुत्रः । शुकसारणौ यादवौ तैः सह अनिरुद्धः यूथपः सेनापतिः कृतवर्मा च पुररक्षायामास्ते ॥६॥ देवानां धिष्ण्याभैः विमानतुल्यैः तरलास्तरङ्गास्तद्वत् । प्लवो गमनं येषां तैः ॥७॥ महातेजाः महातेजसः दिव्याः श्रेष्ठाः स्रगादयो येषां तैः । सन्नाहः कवचम् ॥८-९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गदेति ॥ गदप्रद्युम्नासाम्बाद्यैः सुचन्द्रशुकसारणैः सह अनिरुद्धः यूथपः कृतवर्मा च रक्षायां द्वारकारक्षार्थमित्यर्थः । आस्ते तत्रैव स्थितवानित्यर्थः । एतैर्विना सर्वे भगवदादयो जग्मुस्तत्र श्रीकृष्णस्तु लोकं तीर्थयात्रायां प्रवर्तयितुं तदादिबहुकार्यसिद्धिं संसाधयितुं च गत इति बोध्यम् ॥६॥ त इति ॥ व्यरोचन्तेति च ॥ तेऽक्रूरादयः, देवधिष्ण्याभैः देवविमानसङ्काशैः रथैः तरलास्तरङ्गास्तद्वत् प्लवो यानं येषां तैः हयैरश्वैश्च नदद्भिः अभ्राभैरभ्रसदृशैः गजैः विद्याधराणामिव द्युतिर्येषां तैः नृभिर्मनुष्यैः सह महाभागाः भाग्यवन्तः काञ्चनमालिनः सुवर्णमालायुक्ताः दिव्यस्रग्वस्त्रसन्नाहाः सन्तः कलत्रैः सह दिवि खेचरा देवा इव पथि व्यरोचन्त ॥७-८॥ तत्रेति ॥ महाभागाः ते तत्र स्नात्वा सुसमाहिताः सन्तः उपोष्य ब्राह्मणेभ्यः वासांसि स्रजश्च रुक्ममालाश्च विद्यन्ते आसां तथाविधाः धेनूः ददुः ॥९॥

कृष्णप्रिया ॥५-९॥

ब्राह्मणेभ्यो ददुर्धेनूर्वासःस्रग्रुक्ममालिनीः । रामह्रदेषु विधिवत् पुनराप्लुत्य वृष्णयः ॥१०॥
[1]ददुः स्वर्णं द्विजाग्र्येभ्यः कृष्णे नो भक्तिरस्त्विति । स्वयं च तदनुज्ञाता वृष्णयः कृष्णदेवताः ॥११॥
भुक्त्वोपविविशुः कामं स्निग्धच्छायाङ्घ्रिपाङ्घ्रिषु । तत्रागतांस्ते ददृशुः सुहृत्सम्बन्धिनो[2]ऽपरान् ॥१२॥
[3]मत्स्योशीनरकौसल्यविदर्भकुरुसृञ्जयान् । काम्बोजकैकयान् मद्रान् कुन्तीना[4]रदकेरलान् ॥१३॥

कर्दमक्षमा

च, स्वयम्, कृष्णदेवाताः, वृष्णयः, तदनुज्ञाताः, भुक्त्वा, शीतलच्छायाङ्घ्रिपाङ्घ्रिषु, कामम्, उपविविशुः ॥१२॥

---

[1] ददुःस्वर्णं-वीर. विज. ; ददुःस्वन्नं-श्रीधर. वंशी. । [2] नृपान-श्रीधर. वंशी. वीर. विज. । [3] मत्स्यकेकयकौसल्य-वीर. । [4] कुन्तिगान्धारकेरलान्-विज. कुन्तिनारट्टकेरलान्-इति कस्यचित् ; कुन्तिनानर्तकेरलान्-श्रीधर. वंशी. वीर. ।

हे, नृप, ते, तत्रागतान्, सुहृत्सम्बन्धिनः, च, अपरान्, मत्स्योशीनरकौसलविदर्भकुरुसृञ्जयान्, काम्बोजकैकयान्, मद्रान्, कुन्तीन्, नारदकेरलान्, च, अन्यान्, आत्मपक्षीयान्, परान्, च, शतशः, च, नन्दादीन्, सुहृदः, गोपान्, च, चिरम्, उत्कण्ठिताः, गोपीः, ददृशुः ॥१३-१४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पुनरन्येद्युराप्लुत्य यद्वा तस्मिन्नेवाहनि मुक्तिस्नानं कृत्वा ॥१०-११॥ स्निग्धा शीतला छाया येषामङ्घ्रिपानाममङ्घ्रि मूलेषु ॥१२-१४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यथान्येद्युरन्यस्मिन् दिने द्वितीयदिवसस्नाने । पुनःपदप्रयोगास्वारस्यं मत्वाह-यद्वेति । मुक्तिस्नानं ग्रहणान्तस्नानम्।

"आदौ स्नानं तथा चान्ते मध्ये दानं प्रकीर्तितम् ।" इति स्मृतेः ॥१०॥

तदनुज्ञाता ब्राह्मणादिष्टाः 'स्निग्धः शीतलचिक्कणे' इति धरणिः । अङ्घ्रिषु अधस्तात् ॥११॥ तत्र कुरुक्षेत्रे । ते यदवः ॥१२॥ आनर्तेत्यत्र आरट्टेति पाठोऽपि क्वचित् ॥१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वन्नमुत्तमान्नं महाभागत्वमेव दर्शयन् स्नानदानादौ सुसङ्कल्पितमाह-कृष्ण इति । न इति प्रत्येकं स्वस्वपरिवारापेक्षया भक्तिः सादरप्रेमास्तु भगवतात् लालसास्वभावोऽयम् एवं ग्रहणदिने कृतमुक्त्वा तत्परदिनेऽप्याह-स्वमिति । तदनुज्ञाताः व्रतसमाप्ते तदनुज्ञां प्रार्थ्य प्राप्य चेत्यर्थः तत्र हेतुः कृष्ण इति ॥११॥ तत्रेति सार्धद्वयम् । कांश्चिन्निजागमनात्पूर्वमागतान् कांश्चित् पश्चादागतान् तत्र कांश्चिदुपरागात्पूर्वं कांश्चित्तु पश्चाद्ददृशुरित्यर्थः ॥१२॥ नृपानेवाह-मत्स्येति । उशीनरान् आवन्त्यान् काम्बोजान् आरदांश्च सिन्धुपारीणान् श्रीनन्दादींश्च तत्रागतानित्यन्वयार्थस्यायं भावः ज्ञातीन् वो द्रष्टुमेष्यामः इति भगवदभिप्रायेण मथुराद्वारकादौ पूर्वमागमनं प्रतिपाद्य ततः परमोत्कण्ठितास्ते कथमपि तन्मिषं लब्ध्वा गता इति सुहृदो मित्राणि सुहृदित्यादौ प्रागुक्तेऽपि पुनरप्येतदुक्तिः सौहृदविशेषविवक्षया गोपीश्च चिरमुत्कण्ठिताः श्रीभगवद्दर्शनोत्सुकाः इत्येवमत्रान्यत्र च तासामीदृशविशेषणं विना निर्देश एव न क्रियत इति माहात्म्यविशेषः सूचितः एवं प्रेमोद्रेकेण सम्बोधनं नृपेति ॥१३-१४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं ग्रहणदिनेऽप्याह-स्वयमिति । च तु स्वयन्त्वित्यन्यतो विशेषं बोधयति-तमेवाह-तेन कृष्णेनानुज्ञाताः स्वस्वस्थानं प्रस्थापिता अनुमोदिता वा सन्तो भूत्वा यतः कृष्ण एव देवता इष्टदेवो येषां ते । अतस्तदनुज्ञयैव स्निग्धच्छायाङ्घ्रिपाङ्घ्रिषु बन्धुवर्गसमागमापेक्षया कामं यथेष्टमुपविविशुः । बान्धवा मित्राणि सम्बन्धिनः नृपानिति पाठः स्पष्टः । पाठान्तरः स्पष्टः तानेवाह-मत्स्येति । उशीनरान् आवन्त्यान् ॥११-१२॥ काम्बोजान् अरदांश्च सिन्धुपारीणान् एव अपि अन्यानप्यात्मपक्षीयान् इति मत्स्यादीनामात्मपक्षीयत्वमुक्तम् । च-कारादुदासीनांश्च । यद्वा, एव इव । आत्मपक्षीयानिव । परांश्च विपक्षान् तीर्थे द्वेषादित्यर्थः शतश इत्यस्योभयेष्वप्यन्वयः । सुहृदो मित्राणि । सुहृदित्यादौ प्रागुक्तेऽपि पुनरप्येतदुक्तिः सौहृदविशेषविवक्षया । 'च'अपि गोपीश्च चिरमुत्कण्ठिताः श्रीभगवद्दर्शनोत्सुका अतोऽन्यासां बह्वीनां स्त्रीणां समागमेऽप्यासामेव दर्शनोक्तिः सर्वश्रैष्ठ्यात् किञ्च श्रीभगवद्दिदृक्षया व्यग्राणामतोऽग्रतोऽभिस्रुतानां तासामेवादौ दर्शनात् । किञ्च तासां परमदुर्लभदर्शनत्वेन सर्वान्ते निर्देशः । अ एव च-कारश्च एवं प्रेमोद्रेकेण सम्बोधयति-नृपेति ॥१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-१८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अत एव तेन कृष्णेनानुज्ञाताः वृष्णयः कामं यथेष्टं भुक्त्वा स्निग्धा सान्द्रा छाया येषां तेषा मङ्घ्रिपाणां वृक्षाणामङ्घ्रि मूलेषु उपविविशुः । तत्रेति ते वृष्णयस्तत्र स्यमन्तपञ्चके आगतान् सुहृदादीन् ददृशुः सुहृदश्च सम्बन्धिनश्च तान् ॥१२॥ मत्स्य

शब्दाः जनपदतद्राजसा
गोपांश्चिरमुत्कण्ठा प्रीतिपू

श्रीनाथचक्रवर्तिप

गोपीश्चोत्कण्ठिताश्चिरमित्
(१५-श.श्लोक.) "मि

पुनराप्लुत्य उपराग

पुनः आप्लुत्य मुक्ति
मध्ये दानं प्रकीर्तितम् इति श्रुते
सन्तः स्निग्धाः शीतला छाया
तत्तद्देशीयास्तान् ॥१२॥ अन्यांश्
मत्स्यादीन् राज्ञः नन्दादीन् गोपा

वासःस्रगादयः सन्ति
तेषामङ्घ्रिषु मूलेषु उपविविशुः ।

तत्रापि स्वर्णं ददुः स्नानपू
सार्वकामिकत्वात् तत्स्नानं द्वितीय
येषाम् ॥११॥ तत्र तीर्थे कृष्णं पूज
भुक्त्वा समुपविविशुः एतावत्पर्यन्त
तत्रैव समागतात् सर्वान् ददृशुरि
भगवद्दर्शनार्थमागतान् नृपानिति ॥१
प्रसिद्धाः एकादश निरूपिताः तत्तन्
इति शत्रुबाहुल्यं सूचितं द्रष्टुं समाग
विजातीयान् निरूपयन् प्रथमं नन्दादी
एतावान् भगवतो विलास इति द्रष्टुं ता

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

शब्दाः जनपदतद्राजसाधारणाः अन्यान्मत्स्यादिभ्योऽन्यानात्मपक्षीयान् स्वपक्षपातिनस्तथा परान् शत्रूंश्च सुहृदो नन्दादीन् गोपीश्चिरमुत्कण्ठा प्रीतिपूर्वकानुध्यानमासां सञ्जातेति तथा ताः गोपीश्च ददृशुरिति पूर्वेण सम्बन्धः ॥१३-१४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-१३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-१२॥ नन्दादीन् नन्दसनन्दोपनन्दादीन् सुहृदो गोपान् दामादीन् गोपीश्चोत्कण्ठिताश्चिरमित्यादिना। (१४-श.श्लोक) "अन्योन्यसन्दर्शन"-इत्यादिना नन्दादयो वसुदेवादयश्च स्त्रियश्च संवीक्ष्य (१५-श.श्लोक.) "मिथोऽतिसौहृद-"इत्यादिषु स्त्रियश्च कुन्त्यादयो देवक्यादिभिः श्रीगोप्यो रुक्मिण्यादिभिः परिष्वङ्गं चक्रुरित्यर्थः ॥१३-१५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पुनराप्लुत्य उपरागमुक्तिस्नानं कृत्वा ॥१०-११॥ स्निग्धा छाया येषां तेषामङ्घ्रिपानामङ्घ्रिषु तलेषु ॥१२-१८॥

गूढार्थदीपिनी

पुनः आप्लुत्य मुक्तिस्नानं कृत्वा स्वाद्वन्नं क्षीरान्नं ददुः। कृष्णे नोऽस्माकं भक्तिरस्तु इति सङ्कल्प्य आदौ स्नानं तथा चान्ते दानं प्रकीर्तितम् इति श्रुतेः ॥१०॥ ते वृष्णयः स्वयमपि कामं यथेच्छं भुक्त्वा वृक्षमूलेषु उपविविशुः। तैः अनुज्ञाताः दत्ताज्ञाः स्निग्धाः शीतला छाया येषां ते एवम्भूता ये वृक्षास्तेषु ॥११॥ तत्रेति सार्धद्वयम्। तत्र कुरुक्षेत्रे ते यदवः मत्स्यादयः क्षीयास्तान् ॥१२॥ अन्यांश्चैव ददृशुरिति योज्यम्। आत्मपक्षीयाः पाण्डवाद्याः। पराश्च शत्रवः दुर्योधनाद्या गान्धाराद्याः तान् त्यादीन् राज्ञः नन्दादीन् गोपान् गोपीश्च ददृशुरिति योज्यम् ॥१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वासःस्रगादयः सन्ति यासां तास्तथा पुनराप्लुत्य सूर्य्योपरागमुक्तिस्नानं कृत्वा ॥१०॥ स्निग्धा छाया येषामङ्घ्रिपाणां मङ्घ्रिषु मूलेषु उपविविशुः ॥११-१४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्रापि स्वर्णं ददुः स्नानपूर्त्यर्थं दानाभावे स्नानं विकलं स्यात्, कामानाह-कृष्णे नो भक्तिरस्त्विति-तीर्थसुवर्णदानयोरुभयोरपि कामिकत्वात् तत्स्नानं द्वितीयदिवस एवेति केचित् पुनः यदा द्वितीयदिवसेऽपि दानं च ततो ब्राह्मणानुज्ञया कृष्ण एव देवता ॥११॥ तत्र तीर्थे कृष्णं पूजयित्वा भोजनार्थमुपविष्टे भुक्ते वा भगवति भगवता वाऽनुज्ञाताः स्निग्धच्छायायुक्तेष्वङ्घ्रिपेषु समुपविविशुः एतावत्पर्यन्तं तीर्थवैयग्र्याल्लोकदर्शनार्थं नावकाशः ततो यादवाः स्वयमन्यत्रागत्वैव भगवांस्तत्र वर्तत इति समागतात् सर्वान् ददृशुरित्याह-तत्रागतांस्ते ददृशुरिति सुहृदो मित्राणि सम्बन्धिनः विवाह्यान् अपरानुदासीनान् च दर्शनार्थमागतान् नृपानिति ॥१२॥ नानादेशस्थास्त इति देशभेदान्निरूपयति-मत्स्येति। नारददेशः कोङ्कणदेशः अन्ये तु एकादश निरूपिताः तत्तन्मनोवृत्तिप्राधान्यख्यापनाय अनुक्तसमुच्चयार्थमाह-अन्यांश्चैवेति। परान् शत्रुपक्षीयान् शतश बाहुल्यं सूचितं द्रष्टुं समागता इति भगवतोऽचिन्त्यसामर्थ्यं निरूपितम् एते सर्वे क्षत्रिया एव सजातीया निरूपिताः निरूपयन् प्रथमं नन्दादीनपश्यत् गोपान् गोपीश्च उत्कण्ठिता इति भगवद्विषयिणी उत्कण्ठा भगवदीयान् वा सुसमृद्धान् भावतो विलास इति द्रष्टुं तासामुत्कण्ठा उत्कण्ठायामेव चिरमिति विशेषणम् ॥१३-१४॥

श्रीसुबोधिनीसारः

वास आदियुक्ता धेनूर्गाः ब्राह्मणेभ्यो ददुः । रामह्रदेषु विधिवत् पुनः स्नात्वा वृष्णयो यादवाः कृष्णे नोऽस्माकं भक्तिरस्त्विति हेतोर्विप्रवरेभ्यः सुष्ठु अन्नं ददुः । कृष्णो देवता येषां ते वृष्णयः तेन कृष्णेनानुज्ञाता भुक्त्वा कामं यथेच्छं स्निग्ध शीतला छाया येषामङ्घ्रिपानां तेषामङ्घ्रिषु मूलेषु स्वयं विविशुः । तत्र यात्रायामागतान् सुहृत्सम्बन्धिनो नृपान् ते यादवा ददृशुः तद्यथा । मत्स्येत्यादिदेशाः प्रसिद्धाः तदधिपान् आत्मपक्षीयान् अन्यान् परांश्च शतशो ददृशुः । हे नृप ! नन्दादीन् सुहृदो मित्राणि गोपान् चिरमुत्कण्ठिता दर्शनेच्छन्तीर्गोपीश्च ददर्श ॥१०-११-१२-१३-१४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं मुख्ये सरसि स्नात्वा वृष्णयः पुनः रामनिर्मितेषु नवस्वपि ह्रदेषु विधिवदाप्लुत्य स्नात्वा कृष्णे नोऽस्माकं भक्तिरस्त्वित्यभिप्रेत्य ब्राह्मणेभ्योऽन्नं ददुः ॥१०॥ कृष्णभक्तिप्रार्थनायां हेतुमाह–कृष्ण एव देवता येषां ते वृष्णयः तैर्ब्राह्मणैरनुज्ञाताः कामं यथेच्छं भुक्त्वा स्निग्धा सान्द्रा शीतला छाया येषाम् अङ्घ्रिपानां वृक्षाणां तेषामङ्घ्रिषु मूलेषु उपविविशुः ॥११॥ ते वृष्णयस्तत्र कुरुक्षेत्रे आगतान् सुहृदादीन् ददृशुरिति सार्धद्वयान्वयः । मत्स्यादयः शब्दास्तत्तद्देशवासिजनपराः ॥१२॥ आत्मपक्षीयान् स्वपक्षपातिनः परान् शत्रूंश्च । चिरमुत्कण्ठा प्रीतिपूर्वकानुध्यानमासां जातेति तथाभूता गोपीश्च ॥१३॥

अन्वितार्थप्रकाशिका

रामेति । एवं मुख्ये सरसि स्नात्वा वृष्णयः पुनः रामनिर्मितेषु नवस्वपि ह्रदेषु विधिवदाप्लुत्य स्नात्वा कृष्णे नोऽस्माकं भक्तिरस्त्वित्यभिप्रेत्य ब्राह्मणेभ्यो ग्रहणमुक्तिस्नाने कृतेऽन्नं ददुः ॥१०॥ स्वयमिति । कृष्ण एव देवता येषां ते वृष्णयः तैर्ब्राह्मणैरनुज्ञाताः कामं यथेच्छं भुक्त्वा स्निग्धा सान्द्रा शीतला छाया येषाम् अङ्घ्रिपानां वृक्षाणां तेषामङ्घ्रिषु मूलेषु उपविविशुः ॥११॥ तत्रेति सार्धद्वयम् । ते वृष्णयस्तत्र कुरुक्षेत्रे आगतान् सुहृदादीन् ददृशुरिति सार्धद्वयान्वयः । मत्स्यादयः शब्दास्तत्तद्देशवासिजनपराः आरदकेरलान् इति पाठे आरदाः सिन्धुपारीणाः । आनर्तकेरलानिति स्फुटः पाठः आत्मपक्षीयान् स्वपक्षपातिनः परान् शत्रूंश्च चिरमुत्कण्ठा प्रीतिपूर्वकानुध्यानमासां जातेति तथाभूता गोपीश्च ददृशुः ॥१२-१३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुनः ग्रहणमुक्त्यनन्तरम् आप्लुत्य स्नात्वा । नोऽस्माकं कृष्णे भक्तिरस्तु इति सङ्कल्प्य ॥१०॥ तैः द्विजैरनुज्ञाता आकण्ठं स्निग्धाः मनोऽभिज्ञाः छाया येषां तेषामङ्घ्रिपानामङ्घ्रिषु मूलेषु कामं यथेच्छम् उपाविविशुः ॥११॥ मत्स्यादिदेशस्थान् ॥१२॥ चिरम् उत्कण्ठिताः बहुदिनवियोगान्मेलनाभिलाषव्याकुलाः ॥१३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

रामह्रदेष्विति ॥ प्रातः पुनः रामह्रदेषु विधिवत् आप्लुत्य मुक्तिस्नानं कृत्वा वृष्णयः कृष्णे नः भक्तिः अस्तु । इति सङ्कल्प्य द्विजातिभ्यः स्वन्नं ददुः ॥१०॥ स्वयमिति ॥ कृष्ण एव देवता येषां ते वृष्णयः तदनुज्ञाताः ब्राह्मणैः कृताज्ञाः सन्तः भुक्त्वा स्निग्धा सान्द्रा छाया येषां ते येऽङ्घ्रिपा वृक्षास्तेषामङ्घ्रयो मूलानि तेषु कामम् उपविविशुः । स्वयं भगवांश्चापि तद्वदेव कृत्वोपविवेशेति बोध्यम् ॥११॥ तत्रेति ॥ ते वृष्णयः तत्र स्यमन्तपञ्चके आगतान् मत्स्योशीनरकौसल्यविदर्भकुरुसृञ्जयकाम्बोजकैकयान् मद्रान् कुन्तीन् आनर्तकेरलान् सुहृत्सम्बन्धिनः नृपान् ददृशुः । मत्स्यादयः शब्दा जनपदतद्राजसाधारणाः ॥१२॥ अन्यानिति ॥ अन्यान् मत्स्यादिभ्य इतरान् आत्मपक्षीयान् स्वपक्षपातिनः शतशः नृपांश्च तथा परान् शत्रूंश्च सुहृदः नन्दादीन् गोपान् चिरम् एव उत्कण्ठिताः गोपीश्च ते ददृशुरिति पूर्वेण सम्बन्धः ॥१३॥

पुनः समन्त
पुष्प मालाओं से सम
कीर्तन किये गये और
विप्रवर वहां पर विद्य
मनोरथ किया कि
श्रीकृष्णचन्द्रजी को अ
भोजन किया, तदनन्त
यात्रिक स्वजन के साथ
पर कुरुक्षेत्रमें पधारे हुए
विदर्भ, कुरु, सृंजय, क
और विपक्ष के सेंकडों न

अन्यांश्चैवात्मपक्ष
अन्योन्यसन्दर्शन
आश्लिष्य गाढं न
स्त्रियश्च संवीक्ष्य
स्तनैः स्तनान् कु
ततोऽभिवाद्य ते वृ
पृथा भ्रातॄन् स्वसॄ

अन्योन्यसन्दर्शनहर्षरंह
मुदम्, ययुः ॥१५॥ च, स्त्रियः,
स्तनान्, स्तनैः, निहत्य, दोर्भिः,
ते, मिथः, कृष्णकथाम्, चक्रुः
वीक्ष्य, सङ्कथया, शुचः, जहौ ॥१

प्रोत्फुल्लैर्हृद्वक्त्रसरोरुहैः श्री
परस्परं सम्वीक्ष्य दोर्भिरभिरेभिरे आ

आत्मपक्षीयाः पाण्डवाद्याः
ते यदवः ॥१७॥ तत्पुत्रान् भ्रातृस्वसृपु
पुराणादेः प्रेमगोष्ठ्यां च सङ्कथा'' इति

---

१. नृपान्-विज. । २. सौहृदाः स चामलाप

कृष्णे नोऽस्माकं
मं यथेच्छं स्निग्धा
ते यादवा ददृशुः।
दीन् सुहृदो मित्राणि

ा कृष्णे नोऽस्माकं
यः तैर्ब्राह्मणैरनुज्ञाताः
पविविशुः ॥११॥ ते
॥१२॥ आत्मपक्षीयान्

ात्वा कृष्णे नोऽस्माकं
ष्णयः तैर्ब्राह्मणैरनुज्ञाताः
विविशुः ॥११॥ तत्रेति
स्तत्तद्देशवासिजनपराः।
पक्षपातिनः परान् शत्रूंश्च

तैः द्विजैरनुज्ञाता आज्ञप्ताः
मत्स्यादिदेशस्थान् ॥१२॥

ो नः भक्तिः अस्तु। इति
ः ब्राह्मणैः कृताज्ञाः सन्तः
त्रयं भगवांश्चापि तद्वदेव सर्व
कौसल्यविदर्भकुरुसृञ्जयान्
ब्दा जनपदतद्राजसाधारणाः
परान् शत्रूंश्च सुहृदः नन्दादीन्

कृष्णप्रिया

पुनः समन्तपंचक तीर्थमें यादवोंने और यात्रिकोंने गोप्रदान किया। गैया वस्त्रोंसे सुशोभित की गयी थी पुष्प मालाओं से समर्चित की गयी थी। पुनः सुवर्ण की जंजीरे पहना दी गयी थी। ग्रहण के समय जप-ध्यान-कीर्तन किये गये और ग्रहण मुक्ति के पर्वकाल में यादवोने समन्तपंचक तीर्थ कुण्डमें स्नान किया। पुनः जो सुपात्र विप्रवर वहां पर विद्यमान थे उन सबको उत्तम पकवानों का भोजन कराया। यादवोंने अपने अपने मनमें यह मनोरथ किया कि भगवान श्रीकृष्णचन्द्रजी के श्रीचरणोंमें हमारी प्रेमलक्षणा भक्ति बनी रहे। भगवान श्रीकृष्णचन्द्रजी को अपना आदर्श महापुरुष और इष्टदेव मानने वाले यादवोंने विप्रवर्योंसे अनुमोदन पाकर भोजन किया, तदनन्तर गहरी और शीतल छायाबाले तरुवरोंके नीचे अपनी इच्छाके अनुसार डेरा डालकर सर्व यात्रिक स्वजन के साथ ठहर गये। उन महानुभावोंने विश्राम कर लिया पुनः जब स्थिर बैठे तब इस पर्व के अवसर पर कुरुक्षेत्रमें पधारे हुए आप्तजनों का दर्शन पाया ॥१०-१२॥ पधारे हुए स्वजनो में मत्स्य, उशीनर, कोसल, विदर्भ, कुरु, सृंजय, काम्बोज, कैकय, मद्र, कुन्ति, आनर्त, केरल एवं अन्यान्य अनेक देशों के अपने पक्ष के और विपक्ष के सेंकडों नरपति कुरुक्षेत्र में आये हुए थे ॥१३॥

अन्यांश्चैवात्मपक्षीयान् परांश्च शतशो[1]नृप। नन्दीदीन् सुहृदो गोपान् गोपीश्चोत्कण्ठिताश्चिरम् ॥१४॥
अन्योन्यसन्दर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः।
आश्लिष्य गाढं नयनैः स्त्रवज्जला हृष्यत्त्वचो रुद्धगिरो ययुर्मुदम् ॥१५॥
स्त्रियश्च संवीक्ष्य मिथोऽतिसौहृद[2]स्मितामलापाङ्गदृशोऽभिरेभिरे।
स्तनैः स्तनान् कुङ्कुमपङ्करूषितान् निहत्य [3]दोर्भिः प्रणयाश्रुलोचनाः ॥१६॥
ततोऽभिवाद्य ते वृद्धान् यविष्ठैरभिवादिताः। स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णकथा मिथः ॥१७॥
पृथा भ्रातॄन् स्वसॄर्वीक्ष्य तत्पुत्रान् पितरावपि। भ्रातृपत्नीर्मुकुन्दं च जहौ सङ्कथया शुचः ॥१८॥

कर्दमक्षमा

अन्योन्यसन्दर्शनहर्षरंहसा, प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः, नयनैः, स्त्रवज्जलाः, गाढम्, आश्लिष्य, हृष्यत्त्वचः, रुद्धगिरः, मुदम्, ययुः ॥१५॥ च, स्त्रियः, मिथः, संवीक्ष्य, अतिसौहृदस्मितामलापाङ्गदृशः, प्रणयाश्रुलोचनाः, कुङ्कुमपङ्करूषितान्, स्तनान्, स्तनैः, निहत्य, दोर्भिः, अभिरेभिरे ॥१६॥ ततः, यविष्ठैः, वृद्धान्, अभिवादिताः, स्वागतम्, कुशलम्, पृष्ट्वा, अभिवाद्य, मिथः, कृष्णकथाम्, चक्रुः ॥१७॥ पृथा, भ्रातॄन्, स्वसॄः, तत्पुत्रान्, पितरौ(माहिषशूरसेनौ), भ्रातृपत्नीः, च, मुकुन्दम्, [illegible], सङ्कथया, शुचः, जहौ ॥१८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रोत्फुल्लैर्हृद्वक्त्रसरोरुहैः श्रीः शोभा येषां ते ॥१५॥ अतिसौहृदेन यत् स्मितं तेनामलाः अपाङ्गैर्दृशो दृष्टयो यासां ताः मिथः [illegible] सम्वीक्ष्य दोर्भिरभिरेभिरे आलिङ्गनं कृतवत्यः ॥१६-१७॥ सङ्कथया मिथः सप्रेमगोष्ठ्या ॥१८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आत्मपक्षीयाः पाण्डवाद्याः। पराश्च दुर्योधनपक्षीया गान्धाराद्याः ॥१४-१५॥ निहत्य संयोज्य ॥१६॥ ततः स्त्रीमेलापोत्तरम्। [illegible] ॥१७॥ तत्पुत्रान् भ्रातृस्वसृपुत्रान्। शुचः शोकान् अश्रूणि वा 'शोकेऽस्त्रे शुक् तथा शुद्धौ' इति निरुक्तिः ॥ "गाथायां च [illegible] प्रेमगोष्ठ्यां च सङ्कथा" इति च ॥१८॥

---

[1] [illegible]-विज. । [2] सौहृदाः स चामलापाङ्ग-विज. । [3] दोर्भ्या-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्रादौ श्रीकृष्णभक्तानां सामान्यतः सर्वेषां पुंसां समागमसुखमाह-अन्योन्येति। अन्योन्यं यत्सन्दर्शनं साक्षाद्दर्शनं ते हर्षस्य रंहो वेगः तेन कृत्वा प्रकर्षेण उत्फुल्लानि हृदयपाणिवक्त्ररूपाणि च सरोरुहाणि तैः श्रीर्येषां तथाभूताः सन्तो गाढमाश्लिष्य मुदं ययुः। नयनैरित्यादिविशेषणैस्त्रिभिः एषां यथोत्तरमुक्तलक्षणत्वे श्रैष्ठ्यम् इत्यानन्दविशेष उक्तः ॥१५॥ तथैव तद्भक्तानां स्त्रीणामाह-स्त्रियश्चेति। मिथः इति सर्वत्रोपयोज्यं निहत्य गाढालिङ्गनादुन्मर्द्य ॥१६॥ एवं सर्वजनानां सामान्यतः समागममुक्त्वा विशेषत आह-तत इति। वृद्धान् ज्येष्ठान् यविष्ठैः कनिष्ठैः मिथः पृष्ट्वा मिथः कथाश्चक्रुः ॥१७॥ तत्रैव श्रीकुन्तीवसुदेवयोर्विशेषं रसविशेषणं विस्तार्य्याह-पृथेति पञ्चभिः। भ्रतॄन् श्रीवसुदेवादीन् स्वसॄः श्रुतदेव्याद्याः तत्पुत्रान् श्रीरामगदादीन् सन्तर्दनादींश्च पितरौ शूरं तत्पत्नीञ्च भोज्या भ्रातृपत्नीः श्रीदेवक्याद्याः शुचः चिरादर्शनशोकान् जहौ तत्याज यद्वा अश्रूण्यमुञ्चन् ॥१८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्रादौ सामान्यतः सर्वेषां पुंसां मिथः समागमसुखमाह-अन्योन्येति। अन्योन्यं यत् सन्दर्शनं साक्षाद्दर्शनं तेन हर्षस्य रंहो वेगस्तेन कृत्वा प्रकर्षेणोत्फुल्लानि हृद्रूपाणि वक्त्ररूपाणि च सरोरुहाणि तैः श्रीर्येषां तथाभूताः सन्तो गाढमाश्लिष्य मुदं ययुः। तल्लक्षणमाह-नयनैरित्यादिविशेषणैस्त्रिभिः। येषां यथोत्तरं तल्लक्षणत्वे श्रैष्ठ्यम् इत्यानन्दविशेष उक्तः ॥१४॥ तथैव स्त्रीणामप्याह-स्त्रियश्चेति। सम्यग्वीक्ष्य साक्षाद्दृष्ट्वा, सं-शब्दार्थमेव विवृणोति-अतिसौहृदेति। मिथो दोर्भिः प्रसारितैरभिरेभिरे अत एव स्तनैः स्तनान् मिथो नितरां हत्वा गाढालिंगनेन पीनोत्तुङ्गकुचानामधिकमर्दनात्। प्रणयेनाश्रुयुक्तलोचना इत्यत्र प्रणय-शब्दप्रयोगस्तासां स्नेहविशेषेणाश्रुस्त्रावाधिक्यं द्योतयति। च-शब्दबलात् हृष्यत्त्वचो रुद्धगिर इत्यप्यत्र बोद्धव्यमेव, प्रणयस्वभावात् ॥१५॥ एवं सर्वजनानां सामान्यतः समागममुक्त्वा अधुना विशेषत आह-तत इति। ते वृष्णयः सर्व एव नृपादयो वा लोकाः वृद्धान् ज्येष्ठान् यविष्ठैः कनिष्ठैर्मिथः पृष्ट्वा कृष्णस्य कथाश्चक्रुरित्येतस्य किञ्चिद्दूरस्थित्या परोक्षं किंवान्तिके साक्षादेव प्रेमवैवश्यात् एवमग्रेऽपि ज्ञेयम् ॥१६॥ तत्रैव श्रीकुन्ती-वसुदेवयोर्विशेषं रसविशेषेण विस्तार्याह-पृथेति पञ्चभिः। भ्रातॄन् श्रीवसुदेवादीन् स्वसॄः श्रुतदेव्याद्याः तत्पुत्रान् बलदेवगदादीन् सन्तर्दनादींश्च पितरौ शूरं तत्पत्नीं च भोज्यां भ्रातृपत्नीः श्रीदेवक्याद्याः शुचश्चिरादर्शनशोकान् जहौ तत्याज। यद्वा, अश्रूण्यमुञ्चत् ॥१७॥ तत्र श्रीभगवत्पितृत्वेन श्रीवसुदेवस्य सर्वतः श्रैष्ठ्यात् सम्बोध्याह-आर्येति। हे गुरो ! ज्येष्ठत्वात्, इत्यात्मनस्तत्पाल्यत्वं सूचयति। हे भ्रातरिति स्नेहं जनयति। यद्वा, एकमेवपदं बृहद्भ्रातरित्यर्थः। भावः स एव। यद्यस्मात् वै अपि आपत्स्वपि सत्तमा बन्धुवात्सल्यदीनवात्सल्यादिना महासाधुवरा अपि यूयं नानुस्मरथ अन्वाचयेनापि न स्मरथ, बहुत्वं पुत्राद्यपेक्षया ॥१८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१-१८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अन्योन्येति। अन्योन्यस्य सन्दर्शनेन यो हर्षस्तस्य रंहसा वेगेन अतिशयेनेति यावत् प्रोत्फुल्लैर्हृद्वक्त्राण्येव सरोरुहाणि तैः श्रीः शोभा येषां ते गाढं यथा तथा आलिङ्ग्य नयनैः स्त्रवन्ति जलानि येषां ते हृष्यन्त्यः उदञ्चितरोमाणः (तनवो) त्वचो येषां ते गद्गदाः गिरो येषां ते मुदं हर्षं ययुः प्रापुः ॥१५॥ स्त्रियश्चेति। अतिसौहृदेन स्मितं तेनामलाः अपाङ्गैर्नेत्रान्तैर्दृशो दृष्टयो यासां ताः कुङ्कुमपङ्केन रूषितान् लिप्तान् तादृशैः स्तनैर्निहत्य सम्पीड्य मिथोऽभिरेभिरे परिषस्वजिरे प्रणयेन प्रीत्याऽश्रूणि लोचनयोर्यासां ताः ॥१६॥ तत इति। ते यदवो मत्स्यादयश्च वृद्धान् वयसाऽधिकानभिवन्द्य यविष्ठैर्न्यूनवयस्कैरभिवन्दितांश्च स्वागतं कुशलं च पृष्ट्वा तत्र परस्परं कथाश्चक्रुः कथयामासुः ॥१७॥ तावत्पृथा कुन्ती भ्रातॄन् स्वसॄर्भगिनीश्च तत्पुत्रान् भ्रातृपुत्रान् स्वसृपुत्रांश्च वीक्ष्य मह मिथः सप्रेमगोष्ठ्या शुचः क्लेशान् जहौ तत्याज ॥१८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

नन्दादीनित्यादि । नन्दोपनन्दसन्नन्दादीन् सुहृदो गोपान् दामसुदामवसुदामादीन् गोपीश्चोत्कण्ठिता इत्यादिना अन्योन्यसन्दर्शनेनेत्यत्र नन्दादयो वसुदेवादिभिः परिष्वङ्गं चक्रुरित्यर्थः ॥१४-३९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१६-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

॥१२-१८॥

गूढार्थदीपिनी

पूर्वोक्ता मत्स्यादयः परस्परं गाढमालिङ्ग्य मुदं ययुरित्यन्वयः । तेषां चत्वारि विशेषणानि क्रमेण योज्यानि । तथा हि-अन्योन्यसन्दर्शजन्यहर्षाधिक्येन प्रोत्फुल्लैः हृद्वक्त्रसरोरुहैः श्रीः शोभा येषां ते । पुनः नयनैः स्रवन्ति जलानि येषाम् । पुनश्च हृष्यन्त्यः रोमाञ्चिता त्वचो येषाम् । पुनश्च । रुद्धा गद्गदा गिरो येषां ते तथोक्ताः ॥१४॥ स्त्रियोऽपि मिथः परस्परं समीक्ष्य स्वस्तनैः स्तनान्निहत्य संयोज्य दोर्भिः बाहुभिः अभिरेभिरे आलिङ्गितवत्यः । कुङ्कुमपंकेन रूषितान् भूषितान् । रूष भूष भूषायां धातुः । स्वरूपभूताः स्त्रियः । अतिसौहृदेन यत् स्मितं मन्दहासः तेन अमला आसर्षकाः अपाङ्गयुक्ता कटाक्षयुक्ता दृष्टयो यासां ताः । पुनश्च प्रणयेन अश्रूणि लोचनयोर्यासां ताः ॥१५॥ ततश्च स्त्रीमेलापोत्तरम् । ते यादवाः मत्स्यादश्च यविष्ठैः कनिष्ठैः अभिवादिताः सन्तः वृद्धान् अभिवाद्य कुशलं च पृष्ट्वा मिथः कथाश्चक्रुरित्यन्वयः ॥१६॥ पृथा कुन्ती । स्वभ्रातॄन् वसुदेवादीन् । स्वसृः श्रुतदेव्याद्याः । स्वपुत्रान् रामादीन् । पितरौ शूरं तत्पत्नीं भोज्यां च । भ्रातृपत्नीः देवक्याद्याः वीक्ष्य शुचः (शोकेऽस्त्रे शुक्तथा शुद्धौ इति निरुक्तिः ।) शोकान् अश्रूणि च जहौ । कया । सङ्कथया (गाथायां च पुराणादेः प्रेमगोष्ठ्यां च सङ्कथा । इति च ।) प्रेमगोष्ठ्या ॥१७॥ तामेव वसुदेवपृथयोः सङ्कथामाह-आर्येति चतुर्भिः । हे भ्रातः ! सत्तमाः श्रेष्ठा अपि यूयं यद् मम वार्तां नानुस्मरथ ततो हेतोः अहम् आत्मानमकृताशिषम् अकृतपुण्यं भाग्यहीनमित्यर्थः । मन्ये । वै अप्यर्थे । आपत्स्वपि ॥१८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अन्योन्यसन्दर्शनेन यो हर्षः तस्य रंहसा वेगेन प्रोत्फुल्लैः हृदयसरोरुहौ श्रीः शोभा येषां ते गाढं यथा तथा आश्लिष्य आलिङ्ग्य मुदं ययुः प्रापुः ॥१५॥ अतिसौहृदस्मिताभ्याममलाः अपाङ्गदृशः नयनप्रान्तदृष्टयो यासां ताः मिथः संवीक्ष्य कुङ्कुमपङ्केन रुषितान् लितान् स्तनान् तादृशैरेव स्तनैर्निहत्य दोर्भिरभिरेभिरे परिषस्वजिरे ॥१६-१७॥ सङ्कथया अन्योन्यसप्रेमगोष्ठ्या ॥१८-१९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततस्तेषामन्योन्यसम्भाषणादिकं लौकिकभाषया निरूपयति अन्योन्येति । भगवद्भक्तेः सह साक्षात् परम्परया वा सर्वेषामासक्तिरस्तीति । सर्वे भगवदीया एवेति प्रमेयत्वं तेषामन्यथा तन्निरूपणेऽधर्मः स्यात् प्रकरणं च विरुद्ध्येत अतस्तदुक्तार्थमेव अन्योन्यदर्शनेन प्रेमाधिक्यं निरूप्यते हर्ष आन्तरः तस्य तादृशो वेगः यो बहिरपि स्वानुभावं प्रकाशयति अतो हृद्वक्त्रसरोरुहयोः प्रफुल्लयोः श्रीर्येषां दूराद्दर्शनस्यैतावत् आश्लेषस्य ततोऽप्यधिकमित्याह-आश्लिष्येति । कायवाङ्मनसां सर्वेन्द्रियाणां च भाव उत्तर इति निरूपयति तत्र प्रथमं सर्वेन्द्रियोपलक्षणार्थं हृष्यत्त्वच इति कायिकः सन्तोषः रुद्धगिर इति वाचिकः मुदं ययुरिति मानसः ॥१५-१६॥ एवं पुरुषाणम् अन्योन्यं स्त्रीणामप्याह-स्त्रियश्च संवीक्ष्येति । तासां भावः प्रकटो जात इति ख्यापयितुं स्मितमालापाङ्गनिरूपणम् अतिसौहृदमान्तरं स्मितं मध्यस्थम् अमलापाङ्गा बाह्याः एतत्सहिता दृष्टयो यासाम् अभितः अन्तर्मानसव्यवधानराहित्येन रमणं वाचनिकं स्तनैः स्तनानिति कायिको गाढश्लेषः प्रणयेणाश्रुलोचना इति सर्वेन्द्रियसंश्लेषः समुभयेषामेकता निरूपिता अतः सर्व एव भगवदीयाः भगवदीयाश्च भगवानिति प्रमेयं भगवानेव निरूपितो भवतीति तेषामर्थाद्भगवदीयत्वं नीरूप्य साक्षान्निरूपयति ततोऽभिवाद्येति वृद्धाभिवादनं धर्मः कीर्तनाङ्गं यविष्ठैरभिवादिता हीनानां परिग्रहः

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवमुच्चनीचार्थं परिगृह्य सर्वोपकारार्थं कृष्णकथां मिथः चक्रुः एतदेव परमवैष्णवलक्षणं तेऽन्योऽन्यतो भागवताः प्रसह्य "सभाज मम पौरुषाणि" इति वाक्यात् ॥१७॥ एवं साधारणानां निरूप्यासाधारणानां स्वभावत एवासक्तियुक्तानामन्योन्यवैमनस्य दोषे परिहर्तुमुपालम्भपरिहारौ निरूप्येते–पृथाभ्रातृनिति । भ्रातरो वसुदेवादयः स्वसारः श्रुतदेव्याद्याः तत्पुत्राः बलशिशुपाला पितरौ मारिषाशूरौ भ्रातृपत्नीः देवक्याद्याः मुकुन्दः सर्वेषां मोक्षदानार्थमागतो भगवान् चकारात्तस्य सर्वसम्बन्धो निरूपित सङ्कथया शुचो जहौ सामान्यप्रश्नेनैव शोकलक्षणो दोषो निवृत्तः ॥१८॥

श्रीसुबोधिनीसारः

अन्योन्यं मिथः सन्दर्शनं तस्माद्धर्षस्तस्य रंहसा वेगेन प्रोत्फुल्लैर्हृद्वक्त्रसरोरुहैः हृदयमुखपद्मैः श्रीः शोभा येषां तेषु येषां ते गाढं दृढं आश्लिष्यालिङ्ग्य नयनैर्नेत्रैः स्रवन्ति जलानि येषां ते हृष्यन्ती त्वक् येषां रुद्धा गिरो वाचो येषां ते मुदं ययुर्जग्मुः ॥१५॥ मिथोऽतिसौहृदेन यत्स्मितं तेनामलापाङ्गा दृशो दृष्टयो यासां ता अभिरेभिरे परिषस्वजिरे कुङ्कुमस्य रूषितान् लिप्तान् स्तनान् स्तनैर्निहत्य प्रेमाश्रुजलाः स्त्रियः दोर्भिर्भुजैरालिङ्गनं चक्रुः ॥१६॥ ततोऽनन्तरं वृद्धानभिवाद्य यविष्ठैः कनिष्ठैरभिवादितास्ते स्वागतं कुशलं पृष्ट्वा मिथः परस्परं कृष्णकथां चक्रुः ॥१७॥ भ्रातृन् स्वसृर्भगिनीः तत्पुत्रान् भ्रातृस्त्रीः मुकुन्दं च वीक्ष्य दृष्ट्वा सम्यक् कथया वार्तया शुचः शोकान् पृथा कुन्ती जहौ तत्याजोवाच च ॥१८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अन्योन्यस्य सन्दर्शनेन यो हर्षस्तस्य रंहसा वेगेनातिशयेन प्रोत्फुल्लानि हृद्वक्त्राण्येव सरोरुहाणि तैः श्रीः शोभा तथा नयनैः स्रवन्ति जलानि येषां ते, तथा हृष्यन्त्यः उदंचितरोमाणस्त्वचो येषां ते, तथा बाष्पेण रुद्धा गद्गदा गिरो येषां ते जना यथा तथा आश्लिष्य आलिंग्य मुदं हर्षं ययुः ॥१४॥ तथा स्त्रियश्च संवीक्ष्य अतिसौहृदं प्रेमातिशयः स्मितं मन्दहासः अपाङ्गा नेत्रप्रान्ताः तैर्युक्ता दृशो दृष्टयो यासां ताः, तथा प्रणयेन प्रीत्या अश्रूणि लोचनयोर्यासां ताः कुङ्कुममेव पङ्कस्तेन स्तनान् तादृशैरेव स्वस्तनैर्निहत्य संपीड्य मिथोऽभिरेभिरे परिषस्वजिरे इत्यन्वयः ॥१५॥ ततश्च ते यादवा मत्स्याद यविष्ठैर्न्यूनवयस्कैरभिवादिता वृद्धान् अधिकवयस्कान् अभिवाद्य स्वागतं कुशलं च पृष्ट्वा मिथः कृष्णकथाश्चक्रुः ॥१६॥ तत्र कुन्ती भ्रात्रादीन् वीक्ष्य सङ्कथया मिथः सप्रेमगोष्ठ्या शुचः क्लेशान् जहौ तत्याज ॥१७॥ तामेव वसुदेवपृथयोः सङ्क आर्येति चतुर्भिः । स्नेहातिशयं सूचयन्ती सम्बोधयति–हे आर्य ! हे भ्रातः ! अहमात्मानमकृताशिषम् अकृतपुण्यं मन्ये। कुतः यस्मात् सत्तमाः श्रेष्ठा अपि यूयं आपत्स्वपि मद्वार्तां नानुस्मरथ ॥१८॥

अन्वितार्थप्रकाशिका

अन्योन्येति । अन्योन्यस्य सन्दर्शनेन यो हर्षस्तस्य रंहसा वेगेनातिशयेन प्रोत्फुल्लानि हृद्वक्त्राण्येव सरोरुहाणि श्रीः शोभा येषां ते तथा नयनैः स्रवन्ति जलानि येषां ते तथा हृष्यन्त्यः उदंचितरोमाणस्त्वचो येषां ते तथा बाष्पेण गद्गदा गिरो येषां ते जना गाढं यथा तथा आश्लिष्य आलिंग्य मुदं हर्षं ययुः ॥१४॥ स्त्रिय इति । तथा स्त्रियश्च अतिसौहृदं प्रेमातिशयः स्मितं मन्दहासः अमलाः अपाङ्गा नेत्रप्रान्ताः तैर्युक्ता दृशो दृष्टयो यासां ताः तथा प्रणयेन अश्रूणि लोचनयोर्यासां ताः कुङ्कुममेव पङ्कस्तेन रूषितान् स्तनान् तादृशैरेव स्वस्तनैर्निहत्य संपीड्य दोर्भिर्मिथो परिषस्वजिरे ॥१५॥ तत इति । ततश्च ते यादवा मत्स्यादयश्च यविष्ठैर्न्यूनवयस्कैरभिवादिताः वृद्धान् अधिकवय अभिवाद्य स्वागतं कुशलं च पृष्ट्वा मिथः कृष्णकथाश्चक्रुः ॥१६॥ पृथेति । तत्र पृथा कुन्ती भ्रात्रादीन् वीक्ष्य सङ्कथया सप्रेमगोष्ठ्या शुचः क्लेशान् जहौ तत्याज । भ्रातृन् वसुदेवादीन् स्वसृः श्रुतदेव्याद्याः तत्पुत्रान् रामादीन् भोजाख्यं मातरं च भ्रातृपत्नीर्देवक्याद्याः ॥१७॥ तत्र पृथाऽऽह–आर्येति । हे आर्य भ्रातः ! अहमात्मानमकृता अकृतपुण्यं मन्ये । कुतः यत् यस्मात् सत्तमाः श्रेष्ठा अपि यूयं आपत्स्वपि मद्वार्तां नानुस्मरथ ॥१८॥

प्रोत्फुल्लैः
दर्शनानि यासां ताः
भगिनीः शुचः शोका
अकृताशिषम् अपूर्ण

अन्योन्येति
सरोरुहाणि तैः श्रीः
येषां ते रुद्धा गद्गदा
दृशो दृष्टयो यासां ताः
निहत्य संपीड्य
दोर्भिः अभिरेभिरे
सन्तः वृद्धान् स्वतो
पृथेति ॥ तावत् पृथा
पितरौमातरपितरावपि
॥१७॥ तामेव
पृथक् सम्बोधने पठन्ति
सत्तमाः आपत्सु मद्वार्तां

राजन् ! और
श्रीकृष्णचन्द्रजी के
परस्पर के दर्शन,
हृदयकमल एवं
उन के नेत्रों से अश्रुओं
आप्तजन आनन्द के
बनी हुई थी । वे भी
स्नेहसौहार्द, मन्द मन्द
भरने लगी । वे अपनी
दबाती और अत्यन्त
अवसर तीर्थक्षेत्र में जो
महानुभावों ने जो वयः
पूजकर पुनः भगवान्
श्रीवसुदेवजी आदि अपने
को मिलकर तथा परस्पर

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रोत्फुल्लैः हृद्वक्त्रसरोरुहैः श्रीः सौन्दर्यं येषां ते ॥१४॥ अतिसौहृदेन यत्स्मितं तेन अमला अपाङ्गा यासां तास्तथाभूता दृशो र्शनानि यासां ताः मिथ इति वीक्षणादौ सर्वत्र योज्यम् । अभिरेभिरे आलिंगनं चक्रुः ॥१५॥ यविष्ठैः कनिष्ठैः ॥१६॥ स्वसृः भगिनीः शुचः शोकान् सङ्कथया सस्नेहवार्तया ॥१७॥ चतुर्भिः पृथावसुदेवयोर्गोष्ठीमाह–आर्येति । हे आर्य भ्रातः ! ज्येष्ठबन्धो ! अकृताशिषम् अपूर्णमनोरथम् । आत्मानं मां यद्यतः वै निश्चितं सत्तमाः समर्था अपि यूयं मद्वार्तां नानुस्मरथ ॥१८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अन्योन्येति ॥ अन्योन्यस्य सन्दर्शनेन यो हर्षस्तस्य रंहो वेगस्तेन हर्षवेगातिशयेनेत्यर्थः । प्रोत्फुल्लानि यानि दृद्वक्त्राण्येव सरोरुहाणि तैः श्रीः शोभा येषां ते गाढं यथा तथा आश्लिष्य आलिङ्ग्य नयनैः स्रवन्ति जलानि येषां ते हृष्यन्त्य उदञ्चितरोमाणस्त्वचो षेण ते रुद्धा गद्गदा गिरो वाचो येषां तथाभूताः सन्तः मुदं हर्षं ययुः ॥१४॥ स्त्रियश्चेति ॥ अतिसौहृदेन यत् स्मितं तेन अमलापाङ्गा दृष्ट्यो यासां ताः स्त्रियश्च संवीक्ष्य परस्परं दृष्ट्वा कुङ्कुमपङ्करूषितान् काश्मीरकर्दमलिप्तान् स्तनान् स्तनैस्तथाविधैरेव कुचैः निहत्य संपीड्य प्रणयेन प्रीत्या अश्रूण्यानन्दजलानि लोचनयोर्यासां ता इति प्रणयाश्रुलोचनाः एवम्भूताः सत्यः मिथः परस्परं दोर्भिः अभिरेभिरे परिषस्वजिरे ॥१५॥ तत इति ॥ ततः ते यादवाः मत्स्यादयश्च यविष्ठैः स्वतः कनिष्ठैः अभिवादिताः कृताभिवादनाः सन्तः वृद्धान् स्वतो वयसाधिकान् अभिवाद्य च स्वागतं कुशलं च पृष्ट्वा तत्र मिथोऽन्योन्यं कृष्णकथाः चक्रुः कथयामासुः ॥१६॥ पृथेति ॥ तावत् पृथा कुन्ती भ्रातृन् वसुदेवादीन् स्वसृः श्रुतदेव्यादिका भगिनीः वीक्ष्य तत्पुत्रान् भ्रातृपुत्रान् स्वसृपुत्रांश्च वीक्ष्य भ्रातरौमातरपितरावपि वीक्ष्य भ्रातृपत्नीः मुकुन्दं श्रीकृष्णं च वीक्ष्य सङ्कथया मिथः सप्रेमगोष्ठ्या शुचः क्लेशान् जहौ तत्याज ॥१७॥ तामेव वसुदेवपृथयोः सङ्कथामाह चतुर्भिः ॥ आर्येति ॥ हे आर्यभ्रातः ! ज्येष्ठभ्रातर्वसुदेव ! केचित्तु हे आर्य हे भ्रातः ! इति एक सम्बोधने पठन्ति । अहम् आत्मानम् अकृताशिषमप्राप्तमनोरथं मन्ये । मम मनोरथपूर्तिरजातेत्यर्थः । कुतः । यद्यस्मात् हे सत्तमाः आपत्सु मद्वार्तां न अनुस्मरथ वै । यूयमिति शेषः ॥१८॥

कृष्णप्रिया

राजन् ! और भी यादवों के परम हितैषी एवं स्नेही नन्दराय आदि गोपजन और दीर्घकाल से भगवान् श्रीकृष्णचन्द्रजी के दर्शन के लिये उत्कण्ठित गोपीयां भी वहां पधारी थीं । यादववर्ग ने इन सब को देखा ॥१४॥ परस्पर के दर्शन, सम्मिलन एवं भावमयी गोष्ठी आदि से वर्व को अपार आनन्द हुआ । प्रत्येक स्वजन का हृदयकमल एवं मुखकमल प्रफुल्लित हो उठे । परस्पर परस्पर को अपनी दो भुजाओं में भरकर हृदय से लगाते, उन के नेत्रों से अश्रुओं की धारा बहने लगी । रोमावली खिल उठी और स्नेहावेश से वाणी रुक गयी और प्रत्येक स्वजन आनन्द के महासागर में उतरने लगे ॥१५॥ पुरुषों की जैसी स्थिति बनी वैसी स्त्रियों की भी अवस्था बनी हुई थी । वे भी परस्पर को देखकर प्रेम के आवेश और आनन्द के आवेश से भर गयीं । वे अतिशय स्नेहसौहार्द, मन्द मन्द मधुर हास्य-मुसकान अत्यन्त विशुद्ध-पवित्र तिरछी चितवन से देख-देखकर भेंट अंकवार भरने लगी । वे अपनी भुजाओं में भरकर केसर चर्चित अपने वक्ष:स्थलों को दूसरी वामांगना के वक्ष:स्थलों से दबाती और अत्यन्त आनन्द का आस्वादन लेती, तब उन के नेत्रों से प्रम की अश्रुधारा बहने लगती ॥१६॥ इस अवसर तीर्थक्षेत्र में जो वय: आदि से छोटे थे उन सज्जनों ने बडे-बुझुर्ग आप्नजनों को प्रणाम कीया और इन महानुभावों ने जो वय: मे छोटों का प्रणाम स्वीकार किया । वे परस्पर का स्वागत एवं करके और कुशल मंगल पूछकर पुन: भगवान् श्रीकृष्ण की मधुर लीलाएं परस्पर कहने और सुनने लगे ॥१७॥महाराज ! श्रीकुन्तीजी वसुदेवजी आदि अपने भाईयों एवं बहिनों, पुन: उनके पुत्रों, माता-पिता भाभीयों और प्यारे भगवान श्रीकष्ण से मिलकर तथा परस्पर वार्तालाप करके अपना सम्पूण दु:ख विसर गये ॥१८॥

कुन्त्युवाच

आर्य भ्रातरहं मन्ये आत्मानमकृताशिषम् । यद् वा आपत्सु मद्वार्तां [1]नानुस्मरथ सत्तमाः ॥१९॥
सुहृदोः ज्ञातयः पुत्रा भ्रातरः [2]पितरावपि । नानुस्मरन्ति स्वजनं यस्य दैवमदक्षिणम् ॥२०॥

कर्दमक्षमा

कुन्ती, उवाच । आर्य, भ्रातः, अहम्, आत्मानम्, अकृताशिषम्, मन्ये, यद्, वै, सत्तमाः, आपत्सु, मद्वार्ताम्, अनुस्मरथ ॥१९॥ यस्य, दैवम्, अदक्षिणम्, तस्य, सुहृदः, ज्ञातयः, पुत्राः, भ्रातरः, पितरौ, अपि, स्वजनम्, न, अनुस्मरन्ति ॥२०

श्रीधरस्वामिविरचिता भावार्थदीपिका

तामेव वसुदेवपृथयोः सङ्कथामाह-आर्येत्यादिचतुर्भिः । अकृताशिषमपूर्णमनोरथम् ॥१९॥ यस्य दैवमदक्षिणमननुकू तं स्वजनमपि सन्तं सुहृदादयो नानुस्मरन्ति अतो मम दैवं प्रतिकूलं युष्माकं कोऽपराध इति भावः ॥२०-२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तामेव प्रेमगोष्ठीरूपामेव । आर्यभ्रातर्ज्येष्ठभ्रातः । यद्यपि "अग्रजातेति तां कन्यां शूरेऽनुग्रहकाम्यया । अददत्कुन्तिभोजा इति महाभारतोक्त्या पृथैव ज्येष्ठा तथापि तद्भ्रातृषु वसुदेवस्यैव ज्यैष्ठ्यमिति यत्तदोर्नित्यसम्बन्धाद्यतो नानुस्मरथ तं हेतोरकृतात्मानमिति योज्यम् ॥१९॥ यस्य तम् नानुस्मरन्तीत्यर्थः ॥

"प्रतिकूले रमाकान्ते सरले वक्रता भवेत् ।" इत्याद्युक्तेः ॥२०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र श्रैष्ठ्यात् श्रीवसुदेवं सम्बोध्याह-आर्य्येति । हे गुरो ! ज्येष्ठत्वात् इत्यात्मनस्तत्पाल्यत्वं सूचयति-हे भ्रातरिति जनयति । यद्वा, एकमेव पदं हे बृहद्भ्रातरित्यर्थः । भावः स एव यद्यस्मात् सत्तमाः सत्तमत्वेन बन्धुदीनवात्सल्ययोग्यापे ॥१९॥ सुहृदः सम्बन्धिनः सुहृदादीनां यथोत्तरं स्नेहानुस्मरणे श्रैष्ठ्यम् ॥२०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुहृदः सम्बन्धिनः सुहृदादीनां यथोत्तरं स्नेहानुस्मरणे श्रैष्ठ्यम् ॥१९॥ अम्ब हे मातरिति कनिष्ठभगिनीत्वेन स्नेहविशे देवस्य ईश्वरस्य क्रीडनं क्रीडा तेन कातरान् विवशान् देवक्रीडनकान् नराननिति पाठे पाठान्तरे क्रीडनकान् क्रीडासाधनानि ता नरान् देवाद्यपेक्षया स्वल्पशक्तिमत इत्यर्थः । रोगजरामरणादिधर्मिणो वा । अयमेव पाठः । सत्सम्प्रदायसिद्धः । आ चित्सुखपाठसम्मतः । एवमुक्तमस्वातन्त्र्यमेव दर्शयति-हि यतः । वशे तिष्ठन्नेव स्वयं किञ्चित् करोति अथवेति समुच्चये अ किञ्चित् कार्यते च यद्वा, लोको यत्कुरुते कार्यते वा तत्सर्वमीशस्य वशे तदधीनमेवेत्यर्थः ॥२०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भ्रातरिति वसुदेवः सम्बोध्यते ॥१९-२८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तावत् पृथावसुदेवयोः सङ्कथामाह-आर्येति चतुर्भिः । हे आर्य हे भ्रातः ! अहमात्मानमकृताशिषमप्राप्तमनोरथं म मनोरथपूर्तिरजातेत्यर्थः । कुतः यद्यस्मात् हे सत्तमाः ! मद्वार्तां नानुस्मरतः न स्मृतवन्तः अडभाव आर्षः ॥१९॥ युक्तं चैतदित्या इति । यस्य दैवमदक्षिणं प्रतिकूलं तं स्वजनमपि सुहृदो नानुस्मरन्त्येव अतो मम दैवं प्रतिकूलमिति भवतां कोऽपराध इति भाव

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-२६॥

---

१. त-गो. प्रे. टी. । २. पितरोपि वा-वीर. ।

अकृताशिषकम्
कोऽपराध इति भावः ॥१

अदक्षिणं प्रतिकूल
सर्वोऽपि लोकः कालस्य व

तामेव वसुदेवपृथयोः
॥१९॥ यस्य जनस्य दैवमदक्षि

विशेषनिराकरणार्थमु
स्वयमेव हेतुं कल्पयति अहमात्म
मन्ये भाग्याभावे बन्धूनां प्रश्नाह
वार्ता नानुस्मरन्तीति किमाश्चर्यं
दैवमदृष्टाभिमानिनी देवता अदक्षि

हे आर्य हे भ्रातः ! अकृत
यूयम् ॥१९॥ युक्ते चैतदित्याह । यस्

अस्मत्प्रारब्धमेवेदृशदुःखप्रद
भवति तं स्वजनमपि सुहृदादयो नानुस
मातृनाम्ना सम्बोधयति-अम्बेति । दैवस्
। हि यस्मात् लोकः सर्वोऽपि जनः ईश

सुहृद इति । यस्य दैवं प्रारब्धं
अम्ब हे परमवत्सले ! कनिष्ठभगिनीत्वे
क्रीडाप्रसाधनभूतान्नरान् अस्मान् माऽसूयेः
भवति अतस्तत्प्रेरित एव कुरुते अथवा तेनै

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१४-३९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१६-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अकृताशिषक्म् अकृतसुकृतं यद्यतो वै निश्चितमेव सत्तमा अपि नानुस्मरथेति ममैव भाग्यं नास्ति युष्माकं कोऽपराध इति भावः ॥१९-२०॥

गूढार्थदीपिनी

अदक्षिणं प्रतिकूलम् ॥१९॥ अम्ब हे स्वसः ! अस्मान् मा असूयेथाः दोषदृष्ट्या मा द्राक्षीः यतो दैवक्रीडनकान् । सर्वोऽपि लोकः कालस्य वशे वर्तते । तत्प्रेरितः सन् कुरुते तेन कार्यते च । 'स्वसरि मातरि चाम्बा स्यात्' इति व्याडिः ॥२०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तामेव वसुदेवपृथयोः सङ्कथामाह-आर्य्येत्यादि चतुर्भिः । अकृताशिषमकृतसुकृतम् । यत् यस्मात् सत्तमा अपि यूयं नानुस्मरथ ॥१९॥ यस्य जनस्य दैवमदक्षिणं प्रतिकूलं तं स्वजनं स्वीयं जनमपि सुहृदादयो नानुस्मरन्ति अतो दैवोपेक्षितास्मीत्यर्थः ॥२०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

विशेषनिराकरणार्थमुपालम्भमाह-आर्य भ्रातरिति । दुष्टस्तु न पृच्छत्येव त्वन्त्वार्यः तथापि न पृच्छसीत्याश्चर्यं तत्र स्वयमेव हेतुं कल्पयति अहमात्मानमेव अकृताशिषम् अल्पभाग्यं मन्ये न कृताः आशिषो भाग्यहेतुयुक्तानीति ननु त्वामुपेक्षकं मन्ये भाग्याभावे बन्धूनां प्रश्नाद्यभावः लोकेऽपि सिद्ध इति तं निरूपयति-सुहृद इति । अस्माकन्तु आपत्सु एकस्या अपि वार्तां नानुस्मरन्तीति किमाश्चर्यं यस्य दैवमदक्षिणं तं सुहृदादयः केऽपि न स्मरन्ति सर्वदैव यद्वेत्यापत्स्विति न वक्तव्यं दैवमदृष्टाभिमानिनी देवता अदक्षिणं प्रतिकूलम् ॥१९-२०॥

श्रीसुबोधिनीसारः

हे आर्य हे भ्रातः ! अकृताशिषमपूर्णमनोरथम् आत्मानमहं मन्ये यत् यतः हे सत्तमाः आपत्सु मम वार्तां नानुचिन्तयथ सुखम् ॥१९॥ युक्ते चैतदित्याह । यस्य दैवमदक्षिणं प्रतिकूलं तं स्वजनं सुहृदादयो नानुस्मरन्ति ॥२०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अस्मत्प्रारब्धमेवेदृशदुःखप्रदम्, युष्माकं कोऽपराधः इत्याशयेनाह-सुहृद इति । यस्य दैवं प्रारब्धं कर्म अदक्षिणं प्रतिकूलं भवति तं स्वजनमपि सुहृदादयो नानुस्मरन्तीत्यन्वयः ॥१९॥ एवमुक्तो वसुदेवः प्राह-अम्बेति । कनिष्ठभगिनीत्वेऽपि तत्सन्तोषार्थं मातृनाम्ना सम्बोधयति-अम्बेति । दैवस्य परमेश्वरस्य क्रीडनकान् क्रीडाप्रसाधनभूतान्नरान् अस्मान् माऽसूयेथाः दोषारोपेण माऽद्राक्षीः हि यस्मात् लोकः सर्वोऽपि जनः ईशस्यान्तर्यामिणो वशे भवति, अतस्तत्प्रेरित एव कुरुते अथवा तेनैव कार्यते च ॥२०॥

अन्वितार्थप्रकाशिका

सुहृद इति । यस्य दैवं प्रारब्धं कर्म अदक्षिणं प्रतिकूलं भवति तं स्वजनमपि सुहृदादयो नानुस्मरन्ति ॥१९॥ अम्बेति । अम्ब हे परमवत्सले ! कनिष्ठभिगिनीत्वेऽपि वात्सल्यसाधर्म्यात् मातृनाम्ना सम्बोधयति । दैवस्य परमेश्वरस्य क्रीडनकान् क्रीडाप्रसाधनभूतान्नरान् अस्मान् माऽसूयेथाः दोषारोपेण माऽद्राक्षीः । हि यस्मात् लोकः सर्वोऽपि जनः ईशस्यान्तर्यामिणो वशे भवति अतस्तत्प्रेरित एव कुरुते अथवा तेनैव कार्यते च ॥२०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्य दैवं प्रारब्धम् अदक्षिणं प्रतिकूलम्। तं स्वजनं स्वसम्बन्धिजनमपि सुहृदादयो नानुस्मरन्ति अतो भवतां को दोष: मम दैवमेव प्रतिकूलमस्तीत्यर्थः ॥१९॥ लोको यत्कर्म कुरुते अथ अन्येन कार्यते वा ॥२०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

युक्तं चैतदित्याह ॥ सुहृद इति ॥ यस्य दैवम् अदक्षिणं प्रतिकूलं तं स्वजनमपि सुहृद: ज्ञातय: पुत्रा: भ्रातर अनुस्मरन्ति। पितरौ मातृपितरावपि न अनुस्मरत:। अत: मम दैवस्य प्रतिकूलत्वाद्भवद्भिरिदं स्मृतिपथं नानीतं ततो को ऽपराध इति भाव: ॥१९॥ पृथयेत्थमुक्त: प्राह वसुदेव: ॥ अम्बेति ॥ हे स्वस: ! दैवक्रीडनकान् दैवस्य क्रीडाप्रसाधनभूतान् नरान् अस्मान् मा सूयेथा:। अस्मदसूयां मा कार्षीरित्यर्थः। हि यस्मात् लोको जन: ईशस्येश्वरस्य वशे स्थित: सन् कुरुते कर्माणीति शेष:। अथवा कार्यते गुणैरिति शेष:। 'कार्यते ह्यवश: कर्म गुणै: स्वाभाविकैर्बलात्' इति भगवदुक्ते:। यद्वा लोको जन: ईशस्य वशे वर्तमान: सन् कुरुते। अथवा तेनैव कार्यते ॥२०॥

कृष्णप्रिया

भक्तहृदय भगवती श्रीकुन्तीजी अपने भाई श्रीवसुदेवजी से कहने लगी, भैया भैया मैं सत्य कहती हूं की मैं बडी अभागिन हूं। मेरी एक भी आशा पूर्ण न हुई। भैया ! आप जैसे साधुस्वभाव सज्जन भा आपत्ति के दिनों कें मेरी सुधि भी न ले, भैया इससे बठकर अधिक दुःख कढया हो सकता है ॥१९॥ भैया ! क्या कहूं, भाग्य-विधि जिसके प्रतिकूल हो जाता है, उसे स्वजन-सुहृत्-पुत्र-माता-पिता आदि सर्व भू जाते हैं। इस में आप्तजनों का कोई दोष नहीं ॥२०॥

वसुदेव उवाच

अम्ब मास्मानसूयेथा [1]दैवक्रीडनकान् नरान्। ईशस्य हि वशे लोकः कुरुते [2]कार्यते हि वा ॥२१॥
कंसप्रतापिता: सर्वे वयं याता [3]दिशं दिशम्। एतर्ह्येवपुन: स्थानं दैवेनासादिता: स्वस: ॥२२॥

कर्दमक्षमा

वसुदेव:, उवाच।

अम्ब, देवक्रीडनकान्, नरान्, अस्मान्, मा, स्म, असूयेथा:, लोक:, हि, ईशस्य, वश:, कार्यम्, कुरुते, वा, कार्य ॥२१॥ हे, स्वस:, कंसप्रतापिता:, वयम्, सर्वे, दिशम्, दिशम्, याता:, एतर्हि, एव, दैवेन, पुन:, स्थानम्, आसादिता: ॥२२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ईशवशत्वमेवाह-कंसप्रतापिता इति। हे स्वस: ! एतर्ह्येव सम्प्रत्येव ॥२२-२६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाश:

'स्वसरि मातरि चाम्बा' इति व्याडि:। अम्ब हे स्वस: ! ॥२१-२२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अम्ब हे मात: ! इति कनिष्ठभगिनीत्वेन स्नेहविशेषात् देवस्य ईश्वरस्य क्रीडनं क्रीडा तेन कातरान् वि "दैवक्रीडनकान्नरान्" इति पाठे क्रीडनकान् क्रीडासाधनानि तत्रापि नरान् देवाद्यपेक्षया स्वल्पशक्तिमत इत्यर्थ:।

---

[1] ईशक्रीडनकातरान्-इति कस्यचित्। [2] यथा-वीर। [3] दिशो दश- विज.।

रोगजरामरणादिधर्मि
समुच्चये लोक: स
तदधीनमेवेत्यर्थ:। त
प्राबल्ये विशेषतश्च
कीर्तिमदादिजन्मारभ
प्रस्थापितबालकद्वये ग
द्वारकामागता अपि ज
सम्प्रत्येव दैवेनैश्वरानुकू
दशां श्रोतुमागृह्णत्या भ

कंसेन प्रकर्षेण
तत्सर्वं त्वया श्रुतमस्त्येवेति
श्रीयुधिष्ठिरस्य राज्यार्धप्रासे
। तथा तत्र जरासन्धशिशुपा
तदानीमेव समागतानां सम
आद्य-शब्दादक्रूरान्धकादय
तेषामेव सर्वश्रेष्ठत्वेन सर्वसम
परमानन्दो ब्रह्मसुखादपि सुख

॥१९-२८॥

एवमुक्त: प्राह वसुद
माऽकार्षी: कुत: हि यस्माल्लोक
॥२१॥ ईशवशत्वमेवाह-कंसप्र
सम्प्रत्येव दैवेन स्थानमासादिता

अम्ब हे परमवत्सले ! क
॥२१॥ कंसप्रतापितास्सर्वे वयं दिश
स्वस: ! ॥२२-२६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

रोगजरामरणादिधर्मिणो वा आद्यस्तु पाठश्चित्सुखसम्मतः एवमुक्तमस्वातन्त्र्यमेव दर्शयति-ईशस्येति। हि यतः अथवेति समुच्चये लोकः स्वातन्त्र्येण यत्कुरुते यच्च कार्य्यते पारतन्त्र्येण तत्र नियोजनविषयो भवति तत्सर्वमीशस्य वशे तदधीनमेवेत्यर्थः। तस्य नियोजकस्यापि नियोजकत्वात् ॥२१॥ कंसेति अयमर्थः पूर्वं तात्कौमारमारभ्य वेणस्यैव कंसस्य प्राबल्ये विशेषतश्च केश्यरिष्टतृणावर्तपूतनादिसङ्ग्रहे जाते तेन प्रतापिताः नभोवाणीमारभ्य तु ततोऽप्यतितरां कीर्तिमदादिजन्मारभ्य ततोऽप्यधिकतमं प्रतापिताः देवर्षिवचनमारभ्य तु दिशं गतास्तदुपलक्षणत्वेन बद्धाश्च प्रस्थापितबालकद्वये गोकुले तत्कृतोपद्रवतया भीताश्च तदेतदप्युपलक्षणं जरासन्धकृतमुहुरवरोधे तु दिशन्दिशं गन्तुमप्यशक्ता द्वारकामागता अपि जतुगृहे भवतां दाहप्रतीत्या निरालम्बव्यग्रचित्ता वयमेतर्ह्येव भवत्पुत्राणां कुर्वद्धराज्यप्राप्तिसमयरूपे सम्प्रत्येव दैवेनैश्वरानुकूल्येन पुनः स्थानं स्वगोष्ठीष्वव्यग्रतयाऽवस्थानमासादिता इति अत्र तु हे स्वसः इति भ्रातृणामस्माकं दशां श्रोतुमागृह्णत्या भवत्या ज्ञायत इति भावः ॥२२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कंसेन प्रकर्षेण तापिताः पीडिताः दैवेनेश्वरेणैव न तु स्वशक्त्या इत्यस्वातन्त्र्यमेव दृढीकृतम्। हे स्वसरिति भगिनीत्वेन तत्सर्वं त्वया श्रुतमस्त्येवेति भावः। यद्वा, तामाश्वासयन् प्रहर्षयति-एतर्ह्येवेत्यनेनास्या यात्राया कंसवधस्य पश्चात् श्रीद्रौपदीविवाहानन्तरं श्रीयुधिष्ठिरस्य राज्यार्धप्राप्तेरानन्तर्यसम्भवेऽपि राजसूयानन्तरत्वमेव ज्ञेयम्। (२६-श.श्लो.) 'युधिष्ठिरमनुव्रताः' इति वक्ष्यमाणत्वात् तथा तत्र जरासन्धशिशुपालाद्यभावाच्च। ततश्च चिरकालेऽतीतेऽत्यतर्ह्येवेत्याश्वासनार्थम्। यद्वा, कंसभयेन दूरं गतानां यादवानां तदानीमेव समागतानां सम्पूर्णस्थानप्राप्त्या किंवा, विदूरथान्तसर्वदुष्टवर्गवधेन तर्ह्येव सम्यक् स्वास्थ्यसिद्धेरिति दिक् ॥२१॥ आद्य-शब्दादक्रूरान्धकादयः। यद्यात्रायामागताः सर्वे गन्धपुष्पादिभिरर्चिताः सम्मानिताः मिथोऽर्चने योग्येऽपि यदुभिरेवार्चनम्। तेषामेव सर्वश्रेष्ठत्वेन सर्वसम्मानकतार्हत्वात्। ततश्चाच्युतस्य सर्वसौन्दर्यादिपरिपूर्णस्य भगवतः सन्दर्शः साक्षाद्दर्शनं तेन तदे वा परमानन्दो ब्रह्मसुखादपि सुखविशेषस्तेन निवृत्तास्तृप्ताः परिपूर्णा इत्यर्थः। किंवा, निःशेषेण वृता व्याप्ता आसन् ॥२२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१९-२८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमुक्तः प्राह वसुदवः अम्बेति। हे अम्ब ! दैवस्य क्रीडनकान् क्रीडासाधनभूतान्नरानस्मान् प्रति मासूयेथाः असूयां माऽकार्षीः कुतः हि यस्माल्लोकः जनः ईश्वरस्य वशे ईश्वरेण वशीक्रियत इत्यर्थः। यथा (ईशस्य) यथारुचि कार्यते व्यापार्यते च ॥२१॥ ईशवशत्वमेवाह-कंसप्रतापिता इति। कंसेन प्रतापिताः क्लेशिताः सर्वे वयं दिशंदिशं याताः गताः हे स्वसः ! एतर्ह्येव सम्प्रत्येव दैवेन स्थानमासादिताः प्रापिताः ॥२२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-२६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१४-३९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१६-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अम्ब हे परमवत्सले ! कनिष्ठभगिनीत्यर्थः। दैवस्य क्रीडनकान् क्रीडासाधनानि कुरुते स्वातन्त्र्येण कार्य्यते पारतन्त्र्येण ॥२१॥ कंसप्रतापितास्सर्वे वयं दिशन्दिशं याता इत्यन्यानितस्ततः कंसभयात् पलायितान् यादवान् क्रोडीकृत्योक्तं एतर्ह्येव समये हे स्वसः ! ॥२२-२६॥

गूढार्थदीपिनी

याता: पलायिता: । एतर्हि इदानीमेव स्वस्थानं पुन: आसादिता: प्रापिता: ॥२१॥ ते समागता नृपा: कुरुमत्स्यादय अर्चिता: सन्त: अच्युतस्य सन्दर्शनजन्मपरमानन्देन निर्वृता: आनन्दिता आसन् ॥२२॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

हे अम्ब देवि ! दैवक्रीडोपस्करान् अस्मान् मा असूयेथा: असूयां माकार्षी: कुरुते स्वयं करोति कार्यते पित्राद्याज्ञय प्रियते ॥२१॥ ईशवशत्वं दर्शयति-कंसप्रतापिता इति ॥२२-२६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

उपालम्भं परिहरति-वसुदेव: । अम्बेति कनिष्ठभगिनीं स्नेहात् मातृनाम्ना सम्बोधयति-अस्मान् भ्रात्रादीन् मासूयेथा: दोषारोपणे न माद्राक्षी: तत्र हेतु:, देवक्रीडनकानिति । देवोऽत्र काल: स एवावतीर्ण: अतो देवपदं तत्रापि नरान् मनुष्या: सर्वसेवक इति कथमेवमिति चेत्तत्राह-ईशस्य हि वशे लोक इति । प्रयोजककर्तृत्वे साक्षात्कर्तृत्वे च ईशस्य नियन्तु: कालस्यैव वा युक्तश्चायमर्थ: तदुदर एवोत्पन्नत्वात् यो हि यस्य गृहे उत्पद्यते स तस्य वशे भवति हीति समुच्चयार्थे वा अनादरे सर्वा: क्रिया तदधीना इत्यर्थ: ॥२१॥ एवं सामान्यत: पराधीनत्वमुक्त्वा विशेषतोऽप्याह-कंसप्रतापिता इति । प्रकर्षेण तापमुत्पादिता: सर्व एव यादवा: दिशं दिशमष्टदिक्षु याता: एतर्ह्येवेदानीमेव भोगेन कालो न स्मृत: तत: कंसवधं साम्प्रतमेव जातमिति मन्यते पुन: स्थान यथा प्रतापनात्पूर्वं दैवेन भगवता कालेनासादिता: स्वस इति सम्बोधनमप्रतारणाय ॥२२॥

श्रीसुबोधिनीसार:

वसुदेवोक्तिरुत्तरत्वेन हे अम्ब ! "मातेव भगिनी ज्येष्ठा पितृवच्च सहोदर:" इति स्मृते: । दैवस्य क्रीडनका क्रीडासाधनरूपान्नरान् अस्मान् मासूयेथा: युक्तमिदमित्याह। लोक ईश्वराधीन: कर्म कुरुतेऽथवा कार्यते इत्यनेनाभिन्ननिमित्तोपादा सूचितम्। धात्रा तु दिष्टस्य वशे किलेदं सर्वं जगच्चेष्टति न स्वतन्त्रमिति भारते सभापर्वणि ॥२१॥ हे स्वस: ! कंसेन प्रतापिता: सर्वे वयं दश दिशो याता गता: । एतर्हि इदानीं दैवेन पुन: स्थानं प्रापिता: स्म एवातो न ममापराध: ॥२२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सामान्यत उकमत्वा विशेषतोऽपीशवशत्वमाह-कंसेति । स्नेहेन सम्बोधयति-स्वस इति । कंसेन प्रतापित क्लेशिता: सर्वे वयं दिशं दिशं याता: पलायिता: । एतर्ह्येव सम्प्रत्येव दैवेन प्रारब्धफलप्रदेन पुन: स्वस्थानमासादिता: प्रापित ॥२१॥ ते समागता: कुरुमत्स्यादयो नृपा वसुदेवादिभिर्यदुभिरर्चिता: अच्युतस्य अनावृतपरमानन्दमूर्ते: श्रीकृष्णस्य सन्दर्शनजपरमानन्देन निर्वृता: सुखिता आसन् ॥२२॥

अन्वितार्थप्रकाशिका

कंसेति । हे स्वस: ! कंसेन प्रतापिता: क्लेशिता: सर्वे वयं दशदिश: दिशं दिशं याता: पलायिता: । एतर्ह्येव सम्प्र दैवेन प्रारब्धफलप्रदेन पुन: स्वस्थानमासादिता: प्रापिता: ॥२१॥ वसुदेवेति । ते समागता: कुरुमत्स्यादयो नृपा वसुदेवादिभिर्यदु अच्युतस्य श्रीकृष्णस्य सन्दर्शनजपरमानन्देन निर्वृता: सुखिता आसन् ॥२२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ईशाधीनत्वं वदति-हे स्वस: ! एतर्ह्येव अधुनैव आसादिता: प्रापिता: इदं सर्वं त्वया ज्ञायते इति भाव: ॥२१-२

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ईशवशित्वमेवाह ॥ कंसेति ॥ हे स्वस: ! कंसप्रतापिता: कंसेन क्लेशिता: वयं सर्वे दश दिश: याता: कंसान्तिकवर्ति स्वस्य सम्बन्धिजनानां दग्गतत्वमात्मन्यारोप्य वयमित्युक्ति: । यद्वा । देवकीं विनाऽन्येषां स्वकलत्राणामन्य

वर्तमानत्वेनेत्थमुक्ति:
वसुदेवोग्रसेनाद्यै: यदुभि
अच्युतसन्देशेति पाठे अ

श्रीवसुदेवजी ने
अलग मत मानो । मान
फल भोगता है ॥२१॥ बहि
कुछ ही दिन हुए, भगवा

वसुदेवोग्रसेना
भीष्मो द्रोणोऽम्बि
कुन्तिभोजो विराट
दमघोषो विशाला

श्रीशुक:, उवाच । व
भीष्म:, द्रोण:, अम्बिकापुत्र:,
एते, नव, सात्त्विका:, कुन्तिभो
एते, नव, राजसा:, दमघोष:, वि
नव, तामसा: ॥२४-२५-२६॥

ते कुरुक्षेत्रगता: ॥२३-

मिथोऽर्चने योग्येऽपि यदुभि
भगवत: सन्दर्श: साक्षाद्दर्शनं तेन तदे
नाम्ना निर्दिशन् परमानन्दनिर्वृतिहेतौ
सूचितम् । सुता: दुर्योधनादय: तथेति स
नग्नजित: श्रैष्ठ्यात् पुरुजित् शैब्य: श्री
सूचित: विशालाक्ष: कश्चित् मैथिलो ब

---

१. यदुभिस्सेविता नृपा:-विज. । २. निर्भरा:-

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वर्तमानत्वेनेत्थमुक्तिः । पुनः दैवेन एतर्ह्येव सम्प्रत्येव स्थानम् आसादिताः प्रापिताः ॥२१॥ वसुदेवेति ॥ ते मत्स्यादयः नृपाः वसुदेवोग्रसेनाद्यैः यदुभिः अर्चिताः सन्तः अच्युतस्य सन्दर्शो दर्शनं तेन यः परमानन्दस्तेन निर्वृताः निर्वृतिं प्राप्ताः आसन् । अच्युतसन्देशेति पाठे अच्युतसम्बन्धी यः सन्देशो वार्तादिसम्प्रश्नस्तेन निर्वृताः ॥२२॥

कृष्णप्रिया

श्रीवसुदेवजी ने आश्वासन देते दैन्य एवं स्नेह से कहा, बहिन ! हमें उलाहना मत दो । आप, आपको हम से अलग मत मानो । मानवमात्र दैव के खिलौने हैं । यह सारा विश्व ईश्वर के वश में रहकर कर्म करता है और उस का फल भोगता है ॥२१॥ बहिन ! हम सब कंस के त्रास से त्रस्त होकर इधर-उधर विविध देश-दिशाओं में भागे हुए थे । अभी कुछ ही दिन हुए, भगवान् की अनुकम्पा से हम सब पुनः अपना स्थान प्राप्त कर सके हैं ॥२२॥

श्रीशुक उवाच

वसुदेवोग्रसेनाद्यै[1]र्यदुभिस्तेऽर्चिता नृपाः । आसन्नच्युतसन्दर्शपरमानन्दनिर्वृताः[2] ॥२३॥
भीष्मो द्रोणोऽम्बिकापुत्रो गान्धारी ससुता तथा । सदाराः पाण्डवाः कुन्तीसृञ्जयो विदुरः कृपः ॥२४॥
कुन्तिभोजो विराटश्च भीष्मको नग्नजिन्महान् । पुरुजिद् द्रुपदः [3]शल्यो धृष्टकेतुः सकाशिराट् ॥२५॥
दमघोषो विशालाक्षो मैथिलो मद्रकेकयौ । युधामन्युः सुशर्मा च [4]ससुता बाह्लिकादयः ॥२६॥

कर्दमक्षमा

श्रीशुकः, उवाच । वसुदेवोग्रसेनाद्यैः, यदुभिः, अर्चिताः, नृपाः, अच्युतसन्दर्शपरमानन्दनिर्वृताः, आसन् ॥२३॥ भीष्मः, द्रोणः, अम्बिकापुत्रः, धृतराष्ट्रः, तथा, ससुता, गान्धारी, तथा, सदाराः, पाण्डवाः, कुन्ती, सृञ्जयः, विदुरः, कृपः, एते, नव, सात्त्विकाः, कुन्तिभोजः, च, विराटः, भीष्मकः, महान्, नग्नजित्, पुरुजित्, द्रुपदः, शल्यः, धृष्टकेतुः, सकाशिराट्, एते, नव, राजसाः, दमघोषः, विशालाक्षः, मैथिलः, मद्रः, कैकेयः, युधामन्युः, च, सुशर्मा, ससुताः, बाह्लिकादयः, एते, नव, तामसाः ॥२४-२५-२६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ॥२२-२६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ते कुरुक्षेत्रगताः ॥२३-२४-२५-२६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मिथोऽर्चने योग्येऽपि यदुभिरेवार्चनं तेषामेव सर्वश्रेष्ठत्वेन सर्वसम्मानकतार्हत्वात् ततश्चाच्युतस्य सर्वसोन्दर्य्यादिपरिपूर्णस्य भगवतः सन्दर्शः साक्षाद्दर्शनं तेन तदेव वा परमानन्दः ब्रह्मसुखादपि सुखविशेषः तेन निर्वृस्तृप्ताः परिपूर्णा इत्यर्थः ॥२३॥ नृपानेव नाम्ना निर्दिशन् परमानन्दनिर्वृतिहेतौ तस्मिन् वैशिष्ट्यमप्याह-भीष्मेति चतुर्भिः । अम्बिकायाः पुत्र इति धृतराष्ट्रस्यान्धकत्वं सूचितम् । सुताः दुर्योधनादयः तथेति समुच्चये दाराः श्रीद्रौपद्यादयः ॥२४॥ महानिति । भक्त्या निजकन्यादानेन भगवदीयेश्वरवर्गेषु नग्नजितः श्रैष्ठ्यात् पुरुजित् शैब्यः श्रीमित्रविन्दापिता काशिराट् सुदक्षिणभ्राताऽन्यो वा कश्चीत् तेन सह वर्तत इति द्वयोः स्नेहविशेषः सूचितः विशालाक्षः कश्चित् मैथिलो बहुलाश्वश्च अन्यो वा तद्देशाधिपः कश्चित् आदिशब्दात्तदनुयायिनः ॥२५-२६॥

यदुभिस्सेविता नृपाः-विज. । २. निर्भराः-विज. । ३. शैब्यो धृष्टकेतुस्सकाशिराट्-विज. । ४. यदुश्चावन्तिकादयः-गो. प्रे. टी. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नृपानेव नाम्ना निर्दिशन् परमानन्दनिर्वृतत्वमूलकारणं पुनरप्युक्तपोषन्यायेनाह–भीष्मेति चतुर्भिः । अम्बिकायाः पुत्र इ धृतराष्ट्रस्यान्धत्वं सूचितम् । सोऽपि सुता दुर्योधनादयः तथेति समुच्चये । दाराः श्रीद्रौपद्यादयः ॥२३॥ महानिति भक्त्य निजकन्यादानेन भगवदीयश्वशुरवर्गेषु नग्नजितः श्रैष्ठ्यात् पुरुजित् शैब्यः श्रीमित्रविन्दापिता काशिराट् सुदक्षिणभ्राता अन्यो वा कश्चित्तेन सह वर्तत इति द्वयोः स्नेहः सूचितः । यद्वा, स काशीनिवासेन शुष्कज्ञानपरोऽपि ॥२४॥ विशालाक्षो मैथिलो बहुलाश्वः अन्यो वा तद्देशाधिपः कश्चित् आदि-शब्दात् सहदेवादयः ॥२५॥ हे राजेन्द्रेति परमविस्मयात् किंवा तेषां सम्राट् श्रीयुधिष्ठिरानुवर्तित्वे तादृशत्वं युक्तमेवेति सम्राजा त्वया विज्ञायत एवेति भावः । यद्वा, राजेन्द्रः सम्राट् चासौ युधिष्ठिरश्च तम्, शौरेर्निजाशेषरूपगुणादिप्रकटनार्थं शूरवंशेऽवतीर्णस्य श्रीभगवतः श्रियो लक्ष्म्याः सर्वशोभायाः वा निकेतं नित्यवसतिस्थानं वीक्ष साक्षाद्दृष्ट्वा स्त्रीभिः सह वर्तमानाः सस्त्रीका इति तासां मुख्यतया विस्मयाधिक्यमुक्तम्, प्रेमार्द्रस्वभावत्वात्, यद्वा, यथा स्त्रियस्तथा तेऽपीति तुल्यो भावविशेषोऽभिप्रेतः ॥२६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१९-२८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

वसुदेवेति । ते मात्स्यादयो नृपाः वसुदेवादिभिर्यदुभिरर्चिताः अच्युतसन्दर्शनजपरमानन्देन सुखिताश्चासन् बभूवुः ॥२३॥ (हे राजेन्द्र कथम्भूतं वपुः श्रीनिकेतं सर्वशोभास्थानं सस्त्रीकं रुक्मिण्यादिस्त्रीसहस्रसहितम् । इति पाठान्तरम् ।) भीष्मादयः अन्ये च युधिष्ठिरमनुव्रताः ते सर्वे सस्त्रीकाः श्रियो लक्ष्म्याः निकेतनमाश्रयं शौरेः श्रीकृष्णस्य वपुः शरीरं वीक्ष्य विस्मिताः बभूवुरि चतुर्णामन्वयः तत्राम्बिकापुत्रो धृतराष्ट्रः ससुता दुर्योधनादिसहिता गान्धारी ॥२४-२७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-२६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१४-३९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१६-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ॥२२-२६॥

गूढार्थदीपिनी

भीष्म इति चतुष्कम् । ये च राजानः ते सर्वे शौरेः श्रीकृष्णस्य वपुः वीक्ष्य विस्मिता आसन् । अम्बिकापुत्रो धृतराष्ट्र सुतैः दुर्योधनादिभिः सहितः ॥२३-२४-२५-२६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ॥२२-२६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं दोषपरिहारमुक्त्वा गुणान् वक्तुं प्रथमतो मानसमाह–वसुदेवोग्रसेनाद्यैरिति । वसुदेवोऽलौकिको महान् उ लौकिकः तौ आदिभूतौ येषां यदूनां तैरग्रे वक्ष्यमाणाः सर्व एवार्चिताः सन्तः महत्पुरस्कारेण गतमूलदोषाः अच्युतसन्दर्शने जातः परमानन्दः तेन निर्वृताः आसन् निर्वृतिर्मानसी तान् गणयति भीष्म इति त्रिभिः । सात्त्विका राजसास्तामसाश्च क्रमान्नि अम्बिकापुत्रो धृतराष्ट्रः ससुता दुर्योधनादिसहिता तथेति तस्याः सात्त्विकसन्देहव्युदासः नव भेदाः सात्त्विकाः ॥२३-२४॥ त नवविधान् राजसान् निरूपयति–कुन्तिभोज इति । महानिति नग्नजितो विशेषणं दमघोषादयस्तामसाः मद्रदेशाधि कैकयदेशाधिपतिश्च ससुता इति भूरिश्रवादयो भिन्नतया निरूप्याः अतस्तेऽपि नवविधाः ॥२५-२६॥

शुकोक्तिः । व
॥२३॥ भीष्मादयः स्पष्टा

तत्र कांश्चिद्वि
तत्सुता दुर्योधनादयः ॥
तत्सौन्दर्यातिशयेन विस्मि

भीष्म इति चतुष्
। तदानीं तस्य राज्यार्धप्राप्तेः
विस्मिता जाताः ॥२३-२४

॥२१-२२-२३-

भीष्म इति ॥ भीष
स्वस्वपत्नीभिः सहिताः पाण्ड
भीष्मकः महान् नग्नजिच्च
विशालाक्षः मैथिलः मद्रश्च कै
युधिष्ठिर ! अनुव्रताः ये अन्ये
वीक्ष्य विस्मिताः विस्मयाविष्टा

श्रीशुकदेवजी मुनि
का श्रीवसुदेवजी, महाराज उ
हुए सर्व सुजन अच्युत भगवा
श्रीसमन्त-पंचक क्षेत्र में सूर्यग्र
श्रीभीष्मपितामह, श्रीद्रोणाचार
के साथ युधिष्ठिरादि पाण्ड
महाराज, भीष्मकजी, महारा
विशालाक्ष, मिथिलानरेश, मद्र
युधिष्ठिरजी के अनुयायी नृपति
की धर्मांगनाओं का दर्शन कर

श्रीसुबोधिनीसारः

शुकोक्तिः । वसुदेवोग्रसेनाद्यैर्यदुभिरर्चितास्तेऽच्युतस्य श्रीकृष्णस्य सन्दर्शनात् यः परमानन्दस्तेन निर्वृताः सुतृप्ता आसन् ॥२३॥ भीष्मादयः स्पष्टाः पाठ एव व्याख्या ॥२४-२५॥ शिशुपालादयः स्पष्टाः यज्ञात्पूर्वकालीनं वृत्तमिति बोध्यम् ॥२६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र कांश्चिद्विशिष्टान् दर्शयन्नुक्तमेव स्पष्टयति- भीष्मेति चतुर्भिः । अम्बिकापुत्रो धृतराष्ट्रः । गान्धारी तद्भार्या । तत्सुता दुर्योधनादयः ॥२३-२४-२५॥ श्रीनिकेतं शोभातिशयाश्रयं सस्त्रीकं स्त्रीभिः सहितं शौरेः श्रीकृष्णस्य वपुर्वीक्ष्य तत्सौन्दर्यातिशयेन विस्मिता जाताः ॥२६॥

अन्वितार्थप्रकाशिका

भीष्म इति चतुष्कम् । हे राजेन्द्र ! अम्बिकापुत्रो धृतराष्ट्रः गान्धारी तद्भार्या तत्सुता दुर्योधनादयः युधिष्ठिरमनुव्रता इति तदानीं तस्य राज्यार्धप्राप्तेः श्रीनिकेतं शोभातिशयाश्रयं सस्त्रीकं स्त्रीभिः सहितं शौरेः श्रीकृष्णस्य वपुर्वीक्ष्य तत्सौन्दर्यातिशयेन विस्मिता जाताः ॥२३-२४-२५-२६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

॥२१-२२-२३-२४-२५॥ हे राजेन्द्र ! राजसूये जितत्वात् ये युधिष्ठिरमनुव्रतास्ते ॥२६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भीष्म इति ॥ भीष्मः शान्तनवः द्रोणः आचार्यः अम्बिकापुत्रो धृतराष्ट्रः तथा ससुता सुतैः सहिता गान्धारी सदाराः स्वपत्नीभिः सहिताः पाण्डवाः पाण्डुपुत्राः कुन्ती पृथा सञ्जयः विदुरः कृपः कृपाचार्यः ॥२३॥ कुन्तीति ॥ कुन्तिभोजः विराटः भीष्मकः महान् नग्नजिच्च पुरुजित् द्रुपदः शल्यः सकाशिराट् काशिराजसहितः धृष्टकेतुः ॥२४॥ दमघोष इति ॥ दमघोषः विशालाक्षः मैथिलः मद्रश्च कैकयश्च तौ युधामन्युः सुशर्मा ससुताः पुत्रैः सहिताः बाह्लिकादयश्च ॥२५॥ राजान इति ॥ हे राजेन्द्र युधिष्ठिर ! अनुव्रताः ये अन्ये राजानः ते च सस्त्रीकं स्त्रीभिः सहितं श्रीनिकेतं लक्ष्म्या निवासभूतं शौरेः श्रीकृष्णस्य वपुः शरीरं वीक्ष्य विस्मिताः विस्मयाविष्टाः आसन्निति शेषः । इति चतुर्णामेकसम्बन्धः ॥२६॥

कृष्णप्रिया

श्रीशुकदेवजी मुनि ने कहा राजन् ! कुरुक्षेत्र में समन्तपंचक तीर्थ जितने भी नरपति आये थे उन सब का श्रीवसुदेवजी, महाराज उग्रसेन आदि यादवों ने उत्तम प्रकार से खूब सत्कार किया और सन्मान दिया । आये हुए सर्व सुजन अच्युत भगवान् श्रीकृष्ण-दर्शन प्राप्त कर परम शान्ति एवं परमानन्द का अनुभव करने लगे ॥२३॥ श्रीसमन्त-पंचक क्षेत्र में सूर्यग्रहण पर्व के अवसर और पुण्यवान जनों ने भगवान श्रीकृष्णका दर्शन पाया, उनमें श्रीभीष्मपितामह, श्रीद्रोणाचार्यजी, श्रीधृतराष्ट्र महाराज, दुर्योधनादि पुत्रों के श्रीगान्धारी जी, अपनी धर्मांगनाओं के साथ युधिष्ठिरादि पाण्डव, श्रीकुन्तीजी, सृंजय, श्रीविदूरजी, कृपाचार्य महाराज, श्रीकुन्तिभोज, विराट् महाराज, भीष्मकजी, महाराज सत्यजित्, श्रीपुरुजित्, द्रुपद राजा, शल्य, धृष्टकेतु, श्रीकाशीराज, दमघोष, विशालाक्ष, मिथिलानरेश, मद्रनरेश, केकयनरेश, युधामन्यु, सुशर्मा, अपने पुत्रों के साथ बाह्लीक और महाराज युधिष्ठिरजी के अनुयायी नृपति, भगवान् श्रीकृष्ण का अत्यन्त सुन्दर श्रीनिकेतन श्रीविग्रह एवं भगवान् श्रीकृष्ण की धर्मांगनाओं का दर्शन कर के अत्यन्त आश्चर्यचकित हो गये ॥२४-२५-२६-२७॥

[1]राजानोऽन्ये च राजेन्द्र युधिष्ठिरमनुव्रताः । श्रीनिकेतं वपुः शौरेः सस्त्रीकं[2]वीक्ष्य विस्मिताः ॥२७॥
अथ ते रामकृष्णाभ्यां सम्यक् प्राप्तसमर्हणाः । प्रशशंसुर्मुदा युक्ता [3]वृष्णीन् कृष्णपरिग्रहान् ॥२८॥
अहो भोजपते यूयं जन्मभाजो नृणामिह । यत् [4]पश्यतासकृत् कृष्णं दुर्दर्शमपि योगिनाम् ॥२९॥
[5]यद्विश्रुतिः श्रुतिनुतेदमलं पुनाति पादावनेजनपयश्च[6] वचश्च शास्त्रम् ।
भूः कालभर्जितभगापि यदङ्घ्रिपद्म[7]स्पर्शोत्थशक्तिरभिवर्षति नोऽखिलार्थान् ॥३०॥
[8]तद्दर्शनस्पर्शनानुपथप्रजल्पशय्या[9]शनासनसयौनसपिण्डबन्धः[10] ।
येषां गृहे [11]नरकवर्त्मनि वर्ततां वः[12] स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥३१॥

कर्दमक्षमा

हे, राजेन्द्र, युधिष्ठिरम्, अनुव्रताः, ये, अन्ये, च, राजानः, सस्त्रीकम्, शौरेः, श्रीनिकेतम्, वपुः, वीक्ष्य, विस्मिताः, अथ, ते, कृष्णरामाभ्याम्, सम्यक्, प्राप्तसमर्हणाः, मुदा, युक्ताः, कृष्णपरिग्रहान्, वृष्णीन्, प्रशशंसुः ॥२७-२८॥ अहो, हे भोजपते, इह, नृणाम्, जन्मभाजः, यत्, योगिनाम्, अपि, दुर्दर्शम्, कृष्णम्, असकृत्, पश्यत ॥२९॥ श्रुतिनुता, यद्विश्रुतिः, च पादावनेजनपयः, च, वचः, शास्त्रम्, इदम्, अलम्, पुनाति, कालभर्जितभगा, अपि, भूः, यदङ्घ्रिस्पर्शोत्थशक्तिः, नः अखिलार्थान्, अभिवर्षति ॥३०॥ तद्दर्शनस्पर्शनानुपथप्रजल्पशय्याशनासनसयौनसपिण्डबन्धः, विष्णुः, नरकवर्त्मनि, गृहे वर्तताम्, येषाम्, नः, स्वर्गापवर्गविरमः, स्वयम्, आस ॥३१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

युधिष्ठिरं येऽनुव्रतास्ते राजसूये जितत्वात् ॥२७-२८॥ जन्मभाजो नृणां मध्ये सफलजन्मानः ॥२९॥ किञ्च न केवलं तस्य दर्शनमेवापित्वत्यन्तदुर्लभं बहु युष्माकं स्वतः सम्पन्नमित्याहुः-यद्विश्रुतिरिति द्वाभ्याम् । यदिति पृथक् पदम् यस्येत्यर्थः विश्रुतिः कीर्तिः श्रुतिभिर्नुता वेदैः स्तुता इदं विश्वमलमत्यर्थं पुनाति यद्विश्रुतिश्रुतिरमीवमलमिति पाठे श्रुतिः श्रवणममीवं पापमिति यस्य पादावनेजनपयो गङ्गा च यस्य वचो वाक्यरूपं शास्त्रं च वेदाख्यं विश्वं पुनाति किञ्च कालेन भर्जितं दग्धं भगं माहात्म्यं यस्याः सा तथाविधाऽपि भूर्यस्याङ्घ्रिपद्मस्पर्शेन उत्था आविर्भूता शक्तिर्यस्याः सा नोऽस्माकमखिलानर्थान् अभितो वर्षति ॥३०॥ दर्शनं स्पर्शनञ्चानुपथोऽनुगतिश्च प्रजल्पो गोष्ठी च शय्या शयनं चासनञ्चाशनञ्च यौनं विवाहसम्बन्धस्तेन सह वर्तमानः सपिण्डबन्धो दैहिकसम्बन्धः तेन श्रीकृष्णेन सह दर्शनाद्युपलक्षितः स यौनः सपिण्डबन्धो येषां वोऽस्ति किञ्च येषां वो गृहे विष्णुः स्वयमा आविरभूत् निरयवर्त्मनि प्रवृत्तिमार्गे वर्तमानानां स्वर्गापवर्गाभ्यां विरमयति वितृष्णान् करोतीति तथा सः ते यूयं जन्मभाज इति यद् तदिति सामान्यनिर्देशः सः इत्यर्थः । स विष्णुः स्वयं येषां वो निरयवर्त्मनि संसारकारणे गृहे वर्तमानानामपि बध्यते सम्बध्यते इति बन्धोः दर्शनादिभिः सम्बन्धस्सन् स्वर्गापवर्गविराम आस परमसुखप्रदो बभूवेत्यर्थः ॥३१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ये राजानः ॥२७-२८॥ यद्यतः ॥२९॥ अन्यदाह-किञ्चेति । बहु श्रीकृष्णनैकट्यम् । इत्यर्थ इत्यर्थकः । न केवलं क पूता एवापि त्वभीष्टमपि प्राप्ता इत्याहुः किञ्चेति । कालेन कलिना । तथाविधापि नष्टसामर्थ्यापि ॥३०॥ तेन यौनबन्धसपिण्डबन्धेन यौनसपिण्डबन्धः । दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनैरुपलक्षितश्चासौ सयौनसपिण्डबन्धस्तथा । पुनस्तेन सह दर्शनादि सपिण्डबन्धान्तस्तथा । येषामित्यस्य पुनरन्वयमाह-किञ्चेति । पूर्वव्याख्यायामर्थदौर्लभ्यं मत्वाऽऽह-यद्वेति । सामान्यनिर्देशः शब्दमात्रनिर्देशः । इत्यर्थ इति-स च प्रकृतार्थपर इति । इत्यर्थः इति-परमसुखं भक्तिसुखमेव ।

---

१. राजानोन्ये च-वीर. विज. ; राजानो ये -श्रीधर. वंशी. । २. सस्त्रीका-वीर. विज. । ३. स्तुष्ट्याःकृष्णपरि-विज. । ४. पश्यथा-श्रीधर. वंशी. यन्निःसृतं वेदमयं पुनाति-विज. । ६. पयस्तु-विज. । ७. स्पर्शेद्धशक्ति-विज. । ८. यद्दर्शन-वीर. । ९. शय्यासनाशन-श्रीधर. वंशी. वीर. वि १०. बन्धाः-विज. । ११. निरय-श्रीधर. वंशी. वीर. विज. जीव. विश्व. शुक. । १२. वर्ततां च-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"यानिर्वृत्तिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किन्त्वन्तकासिलुलितात्पततां विमानात् ॥"

इति ध्रुवोक्तेरिति भावः ॥ तीर्थस्तु स्वर्गापवर्गयोर्विशेषेण रमणं यस्मात् स तथा। "ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गः ।" इति श्रुतेरित्याह ॥३१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जरासन्धशिशुपालयोरनुक्तिर्नूनं श्रीभगवांस्तत्रागत इति मत्सरेण तयोरनागमनात् युधिष्ठिरमनुव्रता इति तदानीं राज्यार्धप्राप्तेः स्वतः श्रीनिकेतं सर्वशोभास्पदाविर्भावाश्रयं सस्त्रीकं यथा स्यात्तथा वीक्ष्य साक्षाद्दृष्ट्वा स्त्रीभिस्सह वर्तमानाः सस्त्रीका इति तासां मुख्यतया विस्मयाधिक्यमुक्तं प्रेमार्द्रस्वभावत्वात् यद्वा यथा स्त्रियस्तथा तेऽपीति तुल्यभावविशेषोऽभिप्रेतः ॥२७॥ अथानन्तरं वयं श्रीरामकृष्णाभ्यामपि तत्रापि सम्पत् "परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः" इति विश्वः ॥२८॥ यदुराजत्वेन श्रैष्ठ्यव्यवहारात् त्वेन स्वसाम्यमननाद्वा उग्रसेनं सम्बोध्याहुः-अहो इति। सादरसम्बोधने आश्चर्य्ये वा योगिनाम् सनकादीनामपि सकृदपि दुर्दर्शं कृष्णैवान्तः साक्षात् कार्य्यम् ॥२९॥ यदिति युग्मकम्। षष्ठ्या लुक् छान्दसः विश्रुत्यादीनां यथोत्तरं पावनत्वे न्यूनत्वम् एवं प्राचीनं साधारणं माहात्म्यमुक्त्वा साम्प्रतं विशेषमाह-भूरिति। कालः कलिः तदानीं तस्य प्रवेशात् पद्मरूपकेण सुकोमलत्वादिना स्य भूस्पर्शानर्हत्वं तथापि स्पर्शप्राप्त्या परमसौभाग्यं च सूचितः अत एव उत्थसर्वार्थशक्तिः सती नोऽस्माकमखिलानर्थान् भितो वर्षति अविच्छेदेन सम्पादयति तदिति तृतीयाया लुक् सयौनः यौनसम्बन्धेन सहितः सपिण्डबन्धः पक्षान्तरे च सपिण्डं मानपिण्डता ज्ञातित्वमित्यर्थः । निरयवर्त्मनीति लोकदृष्ट्या स्वर्गापवर्गविरमः दर्शनादिपरममहासुखविशेषप्रदानेन रूपमहाविषयभोगे ब्रह्मानुभवसुखे च वैतृष्ण्यापादकः स्वयमिति युष्मदीयप्रयासं विनेत्यर्थः । यद्वा अयनमयः संसारः त्रिगतं निरयं वर्त्मापि यस्य तस्मिन् स्वयमेव विष्णुः सर्वव्यापकः साक्षाद्भगवानेवेत्यर्थः। अन्यत्तैः तत्र तदिति सामान्यनिर्देश त्पदे तत्किमपि वस्त्वित्यर्थः । विष्णुरिति तद्विशेषणमजहल्लिङ्गमिति स्थितेऽपि तात्पर्य्यवृत्त्या स इत्यवगम्यत इत्यर्थः । यद्वा दिति पुंस्यपि प्रथमाया लुक् छान्दसः ॥३०-३१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ तदनन्तरं पूर्वं यदुकुलश्रेष्ठैः श्रीवसुदेवादिभिरेवार्चनमिति तेषामेव तत्र मुख्यता, अधुना च भगवद्भ्यामेवेति तयोरेव ख्यतेति विशेषः । सर्वानन्दप्रदत्वात् कृष्णः सर्वरमणाच्च रामः, अतस्ताभ्यां सर्वश्रेष्ठतमाभ्यां सकाशात् सम्यगुत्तमप्रकारेण र्षाधिक्येनासं लब्धं सम्यगुत्तममर्हणं पूजा तदुपकरणं वा यैस्ते, अतो मुदा आ सम्यग् युक्ताः सन्तः प्रशशंसुस्तुष्टुवुः । कुतः ? ष्णस्य निजाशेषैश्वर्यप्रकटनार्थमवतीर्णस्य साक्षाद्भगवतः परिग्रहान् सेवकानित्यर्थः, यद्वा, कृष्ण एव परिग्रहो मूलं धनकुटुम्बादिकं च येषां तान्, -

'परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः' इति विश्वः ॥२७॥

यदुराजत्वेन श्रैष्ठ्यात् नरपतित्वेन स्वसाम्याद्वोग्रसेनं सम्बोध्याहुः-अहो इत् सादरसम्बोधने, हर्षे वा, यूयमिति स्वयदुकुलापेक्षया, योगिनां समाधिमतामपि सकृदपि दुर्दर्शं चित्तेऽपि द्रष्टुमशक्यम् ॥२८॥ श्रुतिनुतेति सर्वोत्कर्षमयत्वम्, अलमिति भवासनाशेषमलक्षपणमुक्तम्, च अपि, शास्त्रमपि । एवं विश्रुत्यादीनां यथोत्तरं पावनत्वे न्यूनत्वं कैमुतिकन्यायेनैव व्याख्या । वं पौर्विकं सामान्यमाहात्म्यमुक्त्वाधुनिकविशेषत्वमाह-भूरिति । कालः कलिः, तदानीं तत्प्रवेशात् पद्मरूपकेण सुकोमलत्वादिना तस्य भूस्पर्शनानर्हत्वम्, तथापि स्पर्शप्राप्त्या परमसौभाग्यं च सूचितम् । अत एवोत्थसर्वार्थशक्तिः सती नो णानामयस्माकमखिलानर्थानभितो वर्षति, अविच्छेदेन सम्पादयति ॥२९॥ सयौनो यौनसम्बन्धेन सहितः सपिण्डबन्धः, क्षान्तरे च सपिण्डं समानपिण्डता ज्ञातित्वामित्यर्थः । निरयवर्त्मनीति लोकानां गृहस्वभावाभिप्रायेण, स्वर्गापवर्गविरमो

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दर्शनादिपरममहासुखविशेषप्रदानेन स्वर्गरूपमहाविषयभोगतो ब्रह्मानुभवसुखाच्चातितुच्छताज्ञापनेन वैतृष्ण्यापादकः। स्वयमिति युष्मदीयप्रयासं विनैवेत्यर्थः, साक्षादिति वा। विष्णुर्निजाशेषैश्वर्यविस्तारणेन विश्वव्यापको भगवान्। अन्यत्तैर्व्याख्यातम्। यद्वा विष्णुर्विश्वेश्वरोऽपि येषामास यदीय आत्मीयो बभूवेत्यर्थः, गृह इत्यस्य पूर्वेणान्वयः। स्वस्वगृहमध्ये यद्दर्शनादि स्वर्गापवर्गा विरमयति अतितुच्छत्वादिना भक्तेभ्यो विच्छेदयतीति तथा सः ॥३०॥ एवं श्रीकुन्तीवसुदेवादीनां सम्भाषणादिकमल्पकतया सूचीकटाह-न्यायेन समाप्याधुना कुरुक्षेत्रयात्राया मुख्यप्रयोजनं श्रीनन्दादिभिः सह श्रीभगवत्समागमसम्भाषणादिकं विस्तरेणाह-नन्द इत्यादिना यावत्समाप्ति। तत्र कुरुक्षेत्रे प्रकर्षेण सर्वपरिवारसाहित्यादिना आप्तानागतान् चरादिद्वारा अनुमानेन वा, निजानुभवे वा ज्ञात्वा; ननु तस्य केवलैर्यदुभिः किमित्याशंक्याह-कृष्णो व्रजचित्ताकर्षकः स्वपुत्रः पुरोगमोऽग्रगो येषां तान्, यत्र ते वसन्ति तत्रैव स्वयमागमत्। गोपैः श्रीदामादिभिर्वृतः, अत्यन्तविरहखिन्नानां स्वभावोऽयं यच्चिरादासन्नं प्रेष्ठं द्रष्टुं सर्वैर्बन्धुभिर्मिलित गम्यत इति। गोपैरित्युपलक्षणम्, गोपीभिश्च, दिदृक्षयेति तदानीं तद्दर्शनस्यैव परमदुर्लभताया महालाभताया वा मननात्। किंवा चिरविच्छेदेन दर्शनमात्रस्यैवात्यन्तोपेक्षणात्; यद्वा, अनःस्थासु शकटोपरिस्थितासु श्रीगोपीष्वर्थः श्रीकृष्णार्थं प्रियद्रव्यादि येषां ते, किंवा श्रीभगवता सह द्वारकायां गत्वा वस्तुम्, अनःस्थोर्थः परिवारादि सर्वधनं येषां तैः ॥३१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भोजपते इति हे उग्रसेन! ॥२९॥ विश्रुतिश्रुतिर्यस्य विश्रवणं विश्रुतिः विश्रुतिमिति पाठे "इमं मे गङ्गे यमुने सरस्वति" इत्यादिषु विविधश्रुतिषु श्रुतमिति पयोविशेषणं स्ववचः गीताशास्त्र यस्य कीर्तिः श्रवणं गङ्गाजलं गीताशास्त्रं चेति अलं पुनातीत्यन्वयः अमीवमलमिति पाठे पापाख्यं मलमित्यर्थः। भूरिति कालभर्जितभगापि कालेन दग्धैश्वर्यापि भूमिर्यदङ्घ्रिपद्मस्पर्शोत्थशक्तिरस्माकमखिलानर्थान् वर्षतीत्यर्थः ॥३०॥ अनुपथशब्दोऽनुगमपरः सयौनं सविवाहादिसम्बन्ध सपिण्डबन्ध एकगोत्रान्वयः स्वर्गापवर्गविरमः जन्ममृत्युनिवारकः ॥३१-३६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

वसुदेवेति। ते मात्स्यादयो नृपाः वसुदेवादिभिर्यदुभिरर्चिताः अच्युतसन्दर्शनजपरमानन्देन सुखिताश्चासन् बभूवुः ॥२ (हे राजेन्द्र कथम्भूतं वपुः श्रीनिकेतं सर्वशोभास्थानं सस्त्रीकं रुक्मिण्यादिस्त्रीसहस्रसहितम्। इति पाठान्तरम्।) भीष्मादयः अ च युधिष्ठिरमनुव्रताः ते सर्वे सस्त्रीकाः श्रियो लक्ष्म्याः निकेतनमाश्रयं शौरेः श्रीकृष्णस्य वपुः शरीरं वीक्ष्य विस्मिताः बभूवुः चतुर्णामन्वयः तत्राम्बिकापुत्रो धृतराष्ट्रः ससुता दुर्योधनादिसहिता गान्धारी ॥२४-२७॥ अथेति। ते भीष्मादयः कृष्णराम कर्तृकाभ्यां सम्यग्यथा तथा प्राप्तं समर्हणं यैस्ते कृष्णेन परिगृह्यन्त इति तथा तान् वृष्णीन् प्रशशंसुः ॥२८॥ प्रशंसामेवाह-अहो त्रिभिः। भोजपतिरुग्रसेनः हे भोजपते! इह लोके नृणां मध्ये यूयमेव जन्मभाजः सफलजन्मानः कुतः यद्यस्माद्योगिनामपि दु श्रीकृष्णमसकृत् पश्यथ ॥२९॥ किञ्च, न केवलं तस्य दर्शनमेवापि त्वत्यन्तदुर्लभं बहु युष्माकं सम्पन्नमित्याहुः, यद्विश्रुति द्वाभ्याम्। यदिति पृथक् पदमव्ययं यस्येत्यर्धकं विश्रुतिपादावनेजनपयोभ्यां पृथक् सम्बध्यते यद्वा पादेत्यस्य यस्येत्यादि भगवतो विश्रुतिः कीर्तिः श्रुतिभिर्वेदैः नुता इदं कथयत्सर्वमाश्वपाकं जगत्पुनाति यस्य पादावनेजनपयः पादप्रक्षालनजलं त गङ्गा च जगत्पुनातीत्यर्थः। वाचः काव्यपुराणादिरूपं शास्त्रं शासनात्मकवेदाश्च विश्वं पुनाति किञ्च कालेन भर्जितं दग्धं भगवन्माहा यस्यास्तथाविधापि भूः पृथ्वी यस्याङ्घ्रिपद्मस्पर्शेन उत्था आविर्भूता शक्तिर्माहात्म्यमैश्वर्यम् इति यावत् सा यस्याः त नोऽस्माकमखिलानर्थान् सर्वान् अभीष्टानर्थानभिवर्षतीति श्रुतेरिति पाठे श्रुतेर्यस्य विश्रवणं विश्रुतिः विश्रुतमिति पाठे "इमं मे यमुने सरस्वति" इत्यादिषु विविधश्रुतिषु श्रुतमिति पयोविशेषणं वचः गीतात्मकं शास्त्रं यस्य कीर्तनं जगदलं सकलमिति अलं पुनातीत्यन्वयः जगदमीवमलं पुनातीति पाठे अमीवं पापं तदेव मलं यस्य तज्जगत्पुनातीत्यर्थः। गङ्गाजलं गीताशास्त्र जगत्सकलं पुनातीत्यर्थः ॥३०॥ किञ्च, यद्दर्शनमिति। यस्य दर्शनं च स्पर्शनं चानुपथः अनुगतिश्च प्रजल्पो गोष्ठीश्च शय्या आसनं चाशनं भोजनं चेतीतरेतरयोगद्वन्द्वः सयौनसपिण्डाभ्यां विवाहैकगोत्रत्वाभ्यां बन्धः सम्बन्धः दर्शनादिभिः सयौनसपिण्डबन्धः स येषां भवतामस्ति किञ्च येषां गृहे श्रीकृष्णः स्वयमास आविर्बभूव येषां वो निरयवर्त्मनि प्रवृत्तिमार्गे वर्तमानानामपि स्वर्गापवर्गविरमः भगवत्सङ्गात्स्वर्गापवर्गवैतृष्ण्यं चास अभूत् ॥३१॥

सस्त्रीकं यथा स्व

युधिष्ठिरमनुव्रता इ
इदं विश्वम् अलमत्यर्थं पुना
भर्जितं दग्धं भगं माहात्म्यं
पुरुषार्थान् अभितो वर्षति ॥
वोऽस्ति किञ्च यषां वो गृ
निष्पापानामित्यर्थः स्वर्गापव

समर्हणं सत्कारः।
जन्मभाजः सफलजन्मानः यत्
स्तुता यस्य विश्रुतिः कीर्तिः त
यदङ्घ्रिस्पर्शेन आविर्भूतशक्तिः
कृष्णेन सह दर्शनाद्युपलक्षितः स
इति योज्यम्। कथम्भूतानाम् निरय
यस्मात्सः। 'ज्ञानदेव स्वर्गो ज्ञाना
च अशनं भोजनं चेति इतरेतरद्वन्द्वः
॥२९-३०॥ तत्र कुरुक्षेत्रे। अनःसु

युधिष्ठिरमनुव्रताः राजसूये
यदिति पृथक्पदमतः पदान्तरेणापि स
यस्य वचो वाक्यरूपं शास्त्रं श्रुतिरि
यस्याः सा तथाविधापि भूः यदङ्घ्रिप
पृथक् पदं तेन श्रीकृष्णेन सह दर्शना
स्वर्गापवर्गाभ्यां विरमयति स्वसङ्गा
निरयवर्त्मनि "एते वै निरयास्तात लो
वर्ततां येषां वो गृहे आस आविर्बभूवे

निर्गुणान्परमसात्त्विकान् वा स
सम्बन्धिनस्ते त्रिगुणा जाताः अन्ये क

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

सस्त्रीकं यथा स्यात्तथा वीक्ष्य तद्दर्शनम् ॥२७-३९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१४-३९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१६-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

युधिष्ठिरमनुव्रता इति तदानीं तस्य राज्यार्धप्राप्तेः ॥२७-२९॥ यदिति पृथक् पदं यस्येत्यर्थः। विश्रुतिः कीर्तिः श्रुतिभिर्नुता इदं विश्वम् अलमत्यर्थं पुनाति यस्य पादावनेजनपयो गङ्गा च यस्य वचो वाक्यरूपं शास्त्रं वेदाख्यं च विश्वं पुनाति किञ्च कालेन भर्जितं दग्धं भगं माहात्म्यं यस्याः सापि यदङ्घ्रिपद्मयोः स्पर्शेन उत्तिष्ठति शक्तिर्यस्यास्तथाभूता सती नोऽस्माकमखिलानर्थान् पुरुषार्थान् अभितो वर्षति ॥३०॥ तदित्यपि पृथक् पदं तेन सहेत्यर्थः। दर्शनाद्युपलक्षितः सयौनः सपिण्डो बन्धुसम्बन्धो येषां वोऽस्ति किञ्च यषां वो गृहे विष्णुः स्वयमास आविर्बभूव द्योतते स्मेति वा निरयवर्त्मपापं तस्मान्निवर्ततां निवर्तमानानां निरयपापानामित्यर्थः स्वर्गापवर्गस्पृहाया विरमो विरामो यस्मात्सः ॥३१॥

गूढार्थदीपिनी

समर्हणं सत्कारः। कृष्णेन स्वीयत्वेन परिगृह्यन्ते तान् वृष्णीन् यदुवंशीयान् प्रशशंसुः ॥२७॥ भोजपते उग्रसेन ! यूयं जन्मभाजः सफलजन्मानः यत् असकृत् निरन्तरं कृष्णं पश्यथेति ॥२८॥ यदिति पृथक्पदं षष्ठ्यर्थेऽव्ययम्। श्रुतिभिः वेदैः नुता स्तुता यस्य विश्रुतिः कीर्तिः तथा पादावनेजनपयः पादप्रक्षालितजलं श्रीगङ्गावचः वेदगीतादिशास्त्रं च इदं विश्वं पुनाति किञ्च यदङ्घ्रिस्पर्शेन आविर्भूतशक्तिः भूरपि (कालेन भर्जितं दग्धं भगम् ऐश्वर्यं शक्तिर्वा यस्याः सा) नोऽखिलार्थान् अभिवर्षति तेन कृष्णेन सह दर्शनाद्युपलक्षितः सम्बन्धः येषां वो युष्माकमस्ति स च स्वयं युष्माकं गृहे आस आविरासीत् अतः यूयं जन्मभाज इति योज्यम्। कथम्भूतानाम् निरयवर्त्मनि प्रवृत्तिमार्गे वर्तनां वर्तमानानाम्। कथम्भूतो विष्णुः। स्वर्गापवर्गयोः विशेषेण रवणमनुभवो यस्मात्सः। 'ज्ञानदेव स्वर्गो ज्ञानादेवापवर्गः' इति श्रुतेः। अनुपथोऽनुगमनं च प्रजल्पो गोष्ठी च शय्या शयनं च आसनमुपवेशनं च अशनं भोजनं चेति इतरेतरद्वन्द्वः। यौनं विवाहसम्बन्धः तेन सह वर्तमानः सपिण्डबन्धो ऐहिकसम्बन्धः। यद्वा। तत् स विष्णुः ॥२९-३०॥ तत्र कुरुक्षेत्रे। अनःसु शकटेषु स्थापितैः अर्थैः नानासामग्रीभिः सह कृष्णादीन् दिदृक्षया तत्र पार्श्वे अगमत् ॥३१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

युधिष्ठिरमनुव्रताः राजसूये जितत्वात् ॥२७-२८॥ नृणां मध्ये यूयं जन्मभाजः सफलजन्मान इति फलितोऽर्थः ॥२९॥ यदिति पृथक्पदमतः पदान्तरेणापि सम्बध्यते यस्य श्रीकृष्णस्य श्रुतिभिर्नुता स्तुता विश्रुतिः कीर्तिः यस्य पादावनेजनपयः गङ्गा च यस्य वचो वाक्यरूपं शास्त्रं श्रुतिरिति रूपम् इदं विश्वमलमत्यर्थं पुनाति पवित्रीकरोति किञ्च कालेन भर्जितं दग्धं भगं माहात्म्यं यस्याः सा तथाविधापि भूः यदङ्घ्रिपद्मस्पर्शेन उत्था प्रबुद्धा शक्तिर्यस्याः सा नोऽस्माकमखिलानर्थान् अभिवर्षति ॥३०॥ तदित्यपि पृथक् पदं तेन श्रीकृष्णेन सह दर्शनाद्युपलक्षितः सयौनः सवैवाहिकः सपिण्डः सदैहिकः बन्धः सम्बन्धः येषां वोऽस्ति किञ्च स्वर्गापवर्गाभ्यां विरमयति स्वसङ्गजानन्ददानेन सुखयित्वा भोगमोक्षाभ्यां वितृष्णान् करोतीति तथा सः स्वयं विष्णुः श्रीकृष्णः निरयवर्त्मनि "एते वै निरयास्तात लोकस्य परमात्मनः" इति वैष्णववचनात् पुनः प्राकृतलोकप्रायके प्रवृत्तिमार्गे मानुषे लोके वा वर्ततां येषां वो गृहे आस आविर्बभूवेत्यर्थः। अतो यूयं जन्मभाजः ॥३१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

निर्गुणान्परमसात्त्विकान् वा सम्बन्धाभावान्निरूपयति-राजन् इति। अन्ये पूर्वोक्तव्यतिरिक्ता चकारात्तत्सम्बन्धिनश्च नन्वेते सम्बन्धिनस्ते त्रिगुणा जाताः अन्ये कथं निर्गुणाः परमसात्त्विका वा जातास्तत्राह-युधिष्ठिरमनुव्रता इति। परमवैष्णवसङ्गात्

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तच्छीलेन शिक्षिता: एवं चतुर्विधा अप्येते श्रीनिकेतं भगवतो वपुर्दृष्ट्वा विस्मिता: इदं वपुर्ध्यानगम्यं कथं दृश्यत इति ध्यानगम्यं नियामकं श्रीनिकेतमिति सस्त्रीकमिति सहजभार्यायां विद्यमानायां पुनरन्यासां परिग्रहोऽप्याश्चर्यमिति तासामैकमत्यं कान्त्यतिशयं वा दृष्ट्वा विस्मितानां निरन्तरस्मरणेन ज्ञानोत्पत्तौ मुक्ति: स्यादिति तत्साम्प्रतमनभिप्रेतमिति कृष्णरामाभ्यां तेषां पूजा समाख्या सम्यक्प्राप्तं समर्हणं यैरिति ततो भगवदिच्छया भक्ता एव भूत्वा भगवत्स्तोत्रं कृतवन्त इत्याह-प्रशशंसुरिति। मुदा युक्ता इत्यन्तरस्तोत्र केवलवाचिकत्वं व्यावर्तयति भगवांस्तु सर्वैरेव स्तूयते ते विरला: ये भगवत्परिगृहीतान् स्तुवन्ति अत: कृष्णपरिगृहीतान् वृष्णीन् प्रशशंसु: ॥२७-२८॥ प्रशंसामाह-त्रिभि: सात्त्विकादिभावेन अहो इति भगवद्दर्शनं दुर्लभं मत्वा तत्तेषामनायासेन जायत इति भोजपते राजन्! यूयमेव जन्मभाज: सुतरां नृणां मध्ये वैकुण्ठवासिनां तु कदाचिद्भवतीति योग: कदाचित्परिपक्व: सकृद्दर्शयति भवन्तस्त्वसकृद्वारंवारं पश्यत पश्यथेति पाठे तादेशाभावश्छान्दस: ॥२९॥ एवं भगवद्दर्शनं स्तुत्वा भगवतो गुणश्रवणादीन् धर्मान् स्तुवन्ति-यद्विश्रुतिरिति। विश्रुति: कीर्ति: श्रुतिभि: सर्वैरेववेदैर्नुता अनेनाधिक्यं माहात्म्यं चोक्तं श्रुतिभि: श्रोत्रेन्द्रियैर्वा नु अतिरसालत्वेनात्यादरं गृहीता इयं जगदेवात्यर्थं पुनाति भगवत्कीर्ते: विषयत्वेन भगवत्सम्बन्ध: न तु साक्षात् तादृश्यपि चेत्पुनाति तदा साक्षात्सम्बद्धो भगवान् किं वक्तव्य इति माहात्म्यं निरूपितं भवति कीर्ति: सात्त्विकी गङ्गा राजसी शास्त्रं ततोऽन्यदिति सर्वेषां तुल्यत्वायाह-पादावनेजनपय: शास्त्रं वचो गीता भागवतं च एतद्द्वयमप्यलं पुनाति एवं कीर्त्यादिद्वारापि भगवन्माहात्म्यमुक्त्वा प्रकारान्तरेण पुन: साक्षादेवाह-भूरिति। कालेनातिबलिष्ठेन भर्जितभगापि गतदृष्टादृष्टसामर्थ्यापि यदङ्घ्रिस्पर्शमात्रेणैव उत्था: उत्थिता: सर्वा एव शक्तयो यस्या: तादृशीभूत्वा नोऽस्मभ्यं सर्वानेवार्थान् वर्षति अनेन कालग्रस्तस्यापि भगवच्चरणस्पर्शे पुन: प्रत्यापत्तिर्निरूपिता पूर्वस्माच्चाधिक्यं सर्वोपजीव्यत्वं च निरूपितम् ॥३०॥ एवं दर्शनस्पर्शमाहात्म्यमुक्त्वा तादृशदर्शनादिकं सर्वं येषां मिलितं भवति तेषां भाग्यं किं वक्तव्यमित्याह-तद्दर्शनेनेति। तादृशं दर्शनं स्पर्शनम् अनुपथं सहचलनं प्रकृष्टजल्पा: इष्टकथा: शय्या शयनम् अशनं भोजनम् आसनमुपवेशनं सयौनं स्त्रीकृत: सम्बन्ध: सपिण्डो गोत्रसम्बन्ध: एवंविधैर्नवविधैर्बन्धो यस्य साक्षात्सम्बन्धो भगवता सहास्तीति सगुणस्तु सम्बन्धो दुर्लभ इति स एवोक्त: किञ्च येषां भागवतानां नरकवर्त्मनि गृहे वर्ततां नरक आवश्यक: साधारणगृहमात्रमेव नरकसाधनं सुतरां मर्यादारहितानाम् अस्माकं वो वा स्वयमेव विष्णु: सर्वसन्देहनिवारक: य एव सम्बन्धो नरकहेतुरन्येषां स एव भवतां विष्णुर्जात इति ततोऽपि किमित्याशङ्कां वारयितुं विष्णो: प्रकृतोपयोगिगुणमाह-स्वर्गापवर्गयो विगतरमणरूप: भगवति दृष्टे न कोऽपि स्वर्गे मोक्षे वा रमत इति विरामो वा तावदेव स्वर्गापवर्गौ प्राप्नोति यावद्भगवानेवं सम्बन्धो न प्राप्यते एवं तान् स्तुत्वा परमभक्त्याविष्टास्तूर्ष्णी स्थित: एवमेकविधानां भगवत्परत्वं निरूपितम् ॥३१॥

श्रीसुबोधिनीसार:

हे राजेन्द्र! युधिष्ठिरमनुव्रता ये च राजान: शौरे: श्रीनिकेतं लक्ष्मीधाम वपुरङ्गं सस्त्रीकं वीक्ष्य विस्मिता आसन् ॥२७॥ रामकृष्णाभ्यां सम्यक् प्राप्तं समर्हणं यैर्येभ्यो वा ते मुदा युक्ता हर्षव्याप्ता: कृष्ण: परिग्रहो येषां तान् वृष्णीन् प्रशशंसु: ॥२८॥ भोजपते! उग्रसेन यूयं नृणां मध्ये जन्मभाज: सफलजन्मान इह लोकेऽहो यत् यतो योगिनां दुर्दर्शमपि कृष्णमसकृन्मुहु: पश्यथ ॥२९॥ श्रुतिभिर्वेदैर्नुता स्तुता यस्य विश्रुति: कीर्तिरिदं विश्वम् अलमत्यर्थं पुनाति। पादावनेजनपय: श्रीगङ्गा वचो वेदवाक्यं च पुनाति। कालेन भर्जितं दग्धं भगम् ऐश्वर्यं यस्या: सा भू: पृथिवी यस्याङ्घ्रिपद्मयो: स्पर्शेनोत्थाविर्भूता शक्तिर्यस्या: सा नोऽस्माकमखिलार्थान्सर्वानर्थानभिवर्षति पूरयति ॥३०॥ तस्य दर्शनं स्पर्शनमनुपथोनुगति: प्रजल्पो गोष्ठी शय्याऽऽसनमशनं भोजनं स यौनो विवाहसम्बन्ध: सपिण्डबन्धो दैहिकसम्बन्धो येषामस्ति निरयवर्मनि प्रवृत्तिमार्गे वर्तमानानां वो युष्माकं गृहे स्वर्गापवर्गं विरमयति निवर्तयतीति विष्णु: स्वयमास ॥३१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथानन्तरं रामकृष्णाभ्यां सम्यक् प्राप्तं समर्हणमासनभोजनादिसन्माननं यैस्ते मुदा युक्ता वृष्णीन् प्रशशंसु:। प्रशं हेतुमाह-कृष्णेन स्वकीयत्वेन परिगृह्यन्त इति तथा तानिति ॥२७॥ प्रशंसामेवाह-अहो इति त्रिभि:। अहो भोजपते हे उग्रसेन

इहलोके नृणां मध्ये यू
निरन्तरं पश्यथ ॥२८॥ न
। यदिति पृथक्पदमव्ययं
पादप्रक्षालनजलं तदात्
पुनाति। किञ्च कालेन भ
शक्तिर्यस्या: सा नोऽस्मा
च, शय्या शयनं च, आस
च सहित: सपिण्डबन्ध:
जन्मभाज इति सम्बन्ध:।
वर्तमानानामिति। कथं
परमफलरूपत्वादित्यर्थ: ॥
वासचिकीर्षया अन:सु श

अथेति। अथ राम
तान् वृष्णीन् प्रशशंसु: ॥२७॥
। यत् यस्मात् योगिनामपि दु
। श्रुतिभिर्नुता संस्तुता यस्य वि
पुनाति। यस्य च वचो वेद
माहात्म्यं शक्तिर्यस्या: सा तथ
वर्षति ॥२९॥ तदिति। निरय
विवाहसम्बन्धेन च सहित: स
तथेति परमफलरूपत्वात् स वि
अनुगमनं च प्रजल्पो गोष्ठी च श
इत्यर्थ:। स विष्णु: येषां वो नि
स्वर्गापवर्गविरम: परमसुखप्रद:
गोपैर्वृत: तत्सन्निधौ वासचिकी

कृष्णपरिग्रहान् कृष्णस
॥२८॥ एवमुक्त्वा श्रीकृष्णमाहात
तस्य पादावनेजनेत्यादिपदै: सम्ब
पुनाति यद्विश्रुति: श्रुतिरमीवमलमि
यस्य पादयो: अवनेजनपय: प्रक्षा
भगं यस्या: एवम्भूतापि यस्याङ्
अन्नादीन् अभिवर्षति सर्वतो ददाति।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इहलोके नृणां मध्ये यूयं यादवा एव जन्मभाजः सफलजन्मानः यत् यस्मात् योगिनामपि दुर्दर्शं द्रष्टुमशक्यं श्रीकृष्णमसकृत् निरन्तरं पश्यथ ॥२८॥ न केवलं तस्य दर्शनमेव, किन्तु अत्यन्तदुर्लभं बह्वपि युष्माकं सम्पन्नम् इत्याहुः-यद्विश्रुतिरिति द्वाभ्याम् । यदिति पृथक्पदमव्ययं यस्येत्यर्थकम् । श्रुतिभिर्नुता संस्तुता यस्य विश्रुतिः कीर्तिरिदं विश्वमलं पुनाति । यस्य पादावनेजनपयः पादप्रक्षालनजलं तदात्मिका गङ्गा च जगत् पुनाति । यस्य च वचो वेदगीताद्यात्मकं शास्त्रं श्रवणकीर्तनानुष्ठानादिना विश्वं पुनाति । किञ्च कालेन भर्जितं दग्धं विनष्टं भगं माहात्म्यं शक्तिर्यस्याः सा तथाविधापि भूः यस्याङ्घ्रिपद्मस्पर्शेनोत्था पुनराविर्भूता शक्तिर्यस्याः सा नोऽस्माकमखिलानर्थानभितो वर्षति ॥२९॥ किञ्च दर्शनं च, स्पर्शनं च, अनुपथः अनुगमनं च, प्रजल्पो गोष्ठी च, शय्या शयनं च, आसनमुपवेशनं च, अशनं भोजनं च, इतीतरेतरद्वन्द्वः । तस्य दर्शनादिभिः सहितो यौनेन विवाहसम्बन्धेन च सहितः सपिण्डबन्धः गोत्रसम्बन्धो येषामस्ति येषां च वो युष्माकं गृहे विष्णुर्भगवान् स्वयमेवास आविरासीत्ते यूयं जन्मभाज इति सम्बन्धः । यद्यपि युष्मद्गृहे तत्प्राकट्यं दुर्लभं तथापि तत्कृपा दुर्ज्ञेया इति सूचयन्नाह-निरयस्य मार्गे गृहादावासक्त्या वर्तमानानामिति । कथं तत्सम्बन्धाज्जन्मसाफल्यं तत्राह-स्वर्गापवर्गाभ्यां विरमयति वितृष्णान् करोतीति तथेति । परमफलरूपत्वादित्यर्थः ॥३०॥ नन्दस्तत्र कुरुक्षेत्रे कृष्णपुरोगमान् यदून् प्राप्तान् श्रुत्वा कृष्णादिदर्शनेच्छया गोपैर्वृतः तत्सन्निधौ वासचिकीर्षया अनःसु शकटेषु स्थापितैरर्थैः सहैव तत्रागमत् ॥३१॥

अन्वितार्थप्रकाशिका

अथेति । अथ रामकृष्णाभ्यां सम्यक् प्राप्तं समर्हणमासनभोजनादिसन्माननं यैस्ते मुदा युक्ता कृष्णेन स्वीयत्वेन परिगृह्यन्ते तान् वृष्णीन् प्रशशंसुः ॥२७॥ अहो इति । अहो भोजपते हे उग्रसेन ! इहलोके नृणां मध्ये यूयं यादवा एव जन्मभाजः सफलजन्मानः यत् यस्मात् योगिनामपि दुर्दर्शं द्रष्टुमशक्यं श्रीकृष्णमसकृत् निरन्तरं पश्यथ ॥२८॥ यदिति । यदिति पृथक्पदमव्ययं यस्येत्यर्थकम् श्रुतिभिर्नुता संस्तुता यस्य विश्रुतिः कीर्तिरिदं विश्वमलं पुनाति । यस्य पादावनेजनपयः पादप्रक्षालनजलं तदात्मिका गङ्गा च जगत् पुनाति । यस्य च वचो वेदगीताद्यात्मकं शास्त्रं श्रवणकीर्तनानुष्ठानादिना विश्वं पुनाति । किञ्च कालेन भर्जितं दग्धं विनष्टं भगं माहात्म्यं शक्तिर्यस्याः सा तथाविधापि भूः यस्याङ्घ्रिपद्मस्पर्शेनोत्था पुनराविर्भूता शक्तिर्यस्याः सा नोऽस्माकमखिलानर्थानभितो वर्षति ॥२९॥ तदिति । निरयस्य वर्त्मनि मार्गे वर्ततां वर्तमानानाम् । शतार्षः । येषां वः तस्य भगवतो दर्शनादिभिः सहितो यौनेन विवाहसम्बन्धेन च सहितः सपिण्डबन्धः गोत्रसम्बन्धो येषामस्ति । येषां च वो गृहे स्वर्गापवर्गाभ्यां विरमयति वितृष्णान् करोतीति तथेति परमफलरूपत्वात् स विष्णुर्भगवान् स्वयमेवास आविरासीत्ते यूयं जन्मभाज इति सम्बन्धः । दर्शनं च स्पर्शनं च अनुपथः अनुगमनं च प्रजल्पो गोष्ठी च शय्या शयनं च आसनमुपवेशनं च अशनं भोजनं चेतीतरेतरद्वन्द्वः । यद्वा । तदिति सामान्यनिर्देशः स इत्यर्थः । स विष्णुः येषां वो निरयवर्त्मनि संसारकारणे वर्तमानानामपि बद्ध्यते सम्बद्ध्यते । बन्धः सन्दर्शनादिभिः सम्बद्धः सन् स्वर्गापवर्गविरमः परमसुखप्रदः आस ॥३०॥ नन्द इति । नन्दस्तत्र कुरुक्षेत्रे कृष्णपुरोगमान् यदून् प्राप्तान् श्रुत्वा कृष्णादिदर्शनेच्छया गोपैर्वृतः तत्सन्निधौ वासचिकीर्षया अनःसु शकटेषु स्थापितैरर्थैः सहैव तत्रागमत् ॥३१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृष्णपरिग्रहान् कृष्णसम्बन्धिनो वृष्णीन् ॥२७॥ हे भोजपते ! इहलोके नृणां मध्ये जन्मभाजः सफलजन्मानः यद्यतः ॥२८॥ एवमुक्त्वा श्रीकृष्णमाहात्म्यं निरूपयन्तो राजान ऊचुः यदिति श्लोकद्वयेन । यदिति 'सुपांसुलुगि'त्यादिना लुप्तषष्ठीकं पदं यस्य पादावनेजनेत्यादिपदैः सम्बन्धः यत् यस्य श्रीकृष्णस्य विश्रुतिः कीर्तिः श्रुतिनुता वेदैः स्तुता सती इदं ब्रह्माण्डम् अलमत्यन्तं पुनाति यद्विश्रुतिः श्रुतिरमीवमलमिती पाठे तु यस्य विश्रुतिः कीर्तिः तस्याः श्रुतिः श्रवणम् अमीवं पापम् अलं पुनाति नाशयति यत् यस्य पादयोः अवनेजनपयः प्रक्षालनजलं गङ्गा च यस्य वचः शास्त्रं वेदगीतादिग्रन्थरूपं च इदं पुनाति किञ्च कालेन भर्जितं दग्धं भगं यस्याः एवम्भूतापि यस्याङ्घ्रिपद्मस्पर्शेनोत्था प्रादुर्भूता शक्तिः सामर्थ्यं यस्याः सा भूः भूमिः नोऽस्माकमखिलानर्थान् अजस्रं अभिवर्षति सर्वतो ददाति ॥२९॥ तद्दर्शनेति । निरयवर्त्मनि प्रवृत्तिमार्गे वर्ततां वर्तमानानां वो युष्माकं गृहे स्वर्गापवर्गयोर्विरमः

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सुखं यस्मात् सः । यद्वा, स्वर्गापवर्गाभ्यां विरमयति स्वकीयानवधिकातिशयानं ददानेन वैतृष्ण्यं जनयतीति स्वर्गापवर्गविरमे विष्णुः श्रीकृष्णः स्वयम् आस निवासं चकार । कथम्भूतो विष्णुः येषां वः दर्शनं च स्पर्शनं च अनुपथः अनुगमनं च प्रजल्पे भाषणं च शय्या शयनं च आसनं च अशनं भोजनं च सयौनं विवाहादिसहितत्वं च सपिण्डः सपिण्डत्वं कुटुम्बित्वमिति याव एतैः कृत्वा बन्धः सम्बन्धो यस्य सः तत् तस्मात् यूयं धन्याः यद्वा, तत् तस्य श्रीकृष्णस्य दर्शनादिभिः । बन्धः सम्बन्धः । येषां युष्माकमस्ति अतो यूयं धन्याः ॥३०॥ अनःस्थास्थैः शकटनिःक्षिप्तपदार्थैः गोपैर्वृतस्तत्रागमत् यद्वा गोपैर्वृतः अनःसु शकटे स्थापितपदार्थैः सह निवासाय तत्र श्रीकृष्णनिवासस्थाने अगमत् ॥३१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथेति ॥ अथ ते भीष्मादयः रामकृष्णाभ्यां सकाशात् सम्यक् प्राप्तं समर्हणं यैस्तथाभूताः मुदाऽऽनन्देन युक्ताः सन्तः कृष्णेन परिगृह्यन्ते इति कृष्णपरिग्रहास्तान् वृष्णीन् प्रशशंसुः ॥२७॥ प्रशंसामेवाह ॥ अहो इति त्रिभिः । अहो इति । हे भोजप उग्रसेन ! इह लोके नृणां मध्ये यूयमेव जन्मभाजः सफलजन्मानः । कुतः । यद्यस्मात् योगिनाम् अपि दुर्दर्शं कृष्णम् असकृ पश्यथ अहो अतिचित्रम् ॥२८॥ किं च न केवलं तस्य दर्शनमेवापि त्वत्यन्तदुर्लभं बहु युष्माकं सम्पन्नमित्याहुर्यदिति द्वाभ्याम् यदिति ॥ यदिति पृथक् पदमव्ययं यस्येत्यर्थकम् । विश्रुतिपादावनेजनपय आदिभिः पृथक् सम्बध्यते । यद्यस्य भगवतः श्रुतिभिर्वेदैः संस्तुता विश्रुतिः कीर्तिः इदम् आश्वपाकान्तं जगदित्यर्थः । अलं पुनाति । यस्य पादावनेजनपयः पादप्रक्षालनजलात्मिका गङ्गा गङ्गापि जगत्पुनातीत्यर्थः । यस्य वचो गीतात्मकं शास्त्रं वेदाख्यं च जगत्पुनातीत्यर्थः । किं च कालेन भर्जितं दग्धं भग्नं माहात्म यस्याः सा तथाविधापि भूर्भूमिः यस्य भगवतो योऽङ्घ्रिपद्मस्पर्शस्तेनोत्था आविर्भूता शक्तिर्यस्यास्तथाभूता सती नोऽस्माक अखिलार्थान् अभ्यर्थितः वर्षति ॥२९॥ किं च ॥ यद्दर्शनेति ॥ बद्ध्यते इति बन्धः येषां भवतां दर्शनं च स्पर्शनं च अनुपथोऽनुगति प्रजल्पो गोष्ठी च शय्या शयनं च आसनं च अशनं भोजनं च यौनं विवाहसम्बन्धश्च सपिण्डः दैहिकः सम्बन्धश्च तैर्बन्धो यस्य युष्मदीयदर्शनादिभिः बद्धः सन्नित्यर्थः । विष्णुः निरयवर्त्मनि वर्ततां वः गृहे विष्णुः स्वर्गापवर्गविरमः सन् स्वयम् आस अतो यू सफलजन्मान इत्यर्थः ॥३०॥ नन्द इति ॥ नन्दः कृष्णपुरोगमान् श्रीकृष्णप्रभृतीन् यदून् तत्र कुरुक्षेत्रे प्राप्तानागतान् ज्ञात्वा तद्दिदृक्ष श्रीकृष्णादिदर्शनेच्छया गोपैः वृतः परिवृतः सन् अनोभिर्गमनसाधनैः शकटैः तत्र श्रीकृष्णसन्निधौ आगमदाजगाम ॥३१॥

कृष्णप्रिया

अब आगन्तुक ये सब श्रीबलरामजी और भगवान श्रीकृष्ण से अच्छी तरह सन्मान पाकर अत्यंत हर्ष श्रीकृष्णके स्वजन यादवजनोंकी प्रशंसा करने लगे ॥२८॥ आगन्तुक सब स्वजन कहने लगे कि भोजराज महा अग्रसेनजी हम सब केवल इस विश्व के मनुष्योमें आप लोगोंका परम सौभाग्य मानते है और भूतलके मनुष्य आप लोगोंका जीवन ही सफल मानते है कारणकि जिन भगवान श्रीकष्ण का दर्शन समर्थ रोगियोंके लिये दुर्भ है उन्ही नाथको आप लोग सतत देते रहते हो । आपलोग धन्य है धन्य है ॥२९॥ श्रुति भगवती अत्यंत आ जिनका यशोगान करती है जो दिव्यगान सारे ब्रह्माण्डको सर्था पावन करता है, और जिनके चरणकमल धोवनजल श्रीमङ्गलकामनोंकी हमारे मंगल मनोरथोंको पूर्ण कर रही है ॥३०॥ वही साक्षात् पूर्ण पुरु श्रीकृष्णके नित्य दर्शन साक्षात् स्पर्श सहगमन, सहवार्तालाप, सहशयन, सहभोजन, सहासन, वैवाहिक नात गोत्रसब्बन्ध आदि नवप्रकारका दुर्लभ व्यवहार प्राप्तकर रहे हो । यह परम सौभाग्य है, वैसे तो आ गृहस्थाश्रमकी झंझटोमें फंसे रहते है जो केवल प्रपञ्चका ही मार्ग है लेकिन आपलोगोंके घर जिसे स्व अपवर्गकी भालिषा पूर्ण हो जाती है ॥३१॥

नन्दस्तत्र य
तं दृष्ट्वा वृ
वसुदेवः प
कृष्णरामौ प

श्रीशुकः, उवा

कृष्णपुरोगमान
दृष्ट्वा, चिरदर्शनकातराः,
कंसकृतान्, क्लेशान्, च
पितरौ, अभिवाद्य, हे, कु
बाहुभ्याम्, परिरभ्य, शुच

अनस्स्थार्थैरिति त
बभूवेति शेषः ॥३४-३५॥

तत्र कुरुक्षेत्रे । तत्र कृ
॥३२॥ तं नन्दम् ॥३३-३४॥

एवं श्रीकुन्तीवसुदे
श्रीनन्दादिभिः पूर्वयुक्त्या दुर्घ
तत्र कुरुक्षेत्र प्रकर्षेण सर्वपरिवा
कृष्णः व्रजचित्ताप्रकर्षकः स्व
हेतुः दिदृक्षयेति । भवत्वन्येष
तद्विरहोचितदशापि सूचिता । अ
वृष्णयः श्रीकृष्णावासद्वारसभोप
सद्यो युगपदुत्थानं वृष्णीनां तदेक
विवशाः यद्वा चिरं दर्शने कातराः
श्रीवसुदेवस्य विशेषेणाह-व
कम्पपुलकादिभिराकुलोऽभूदित्यर्थ
तत्क्लेशवर्गनिस्तारहेतुतदीयमहोप
श्रीव्रजेश्वरीमपि तद्दर्शनोत्कण्ठाविस

---

१. श्रुत्वा-विज. ; ज्ञात्वा-श्रीधर. वंशी.

श्रीशुक उवाच

नन्दस्तत्र यदून् प्राप्तान् श्रुत्वा[1] कृष्णपुरोगमान् । तत्रागमद्वृतो गोपैरनः[2]स्थार्थैर्दिदृक्षया ।।३२।।
तं दृष्ट्वा वृष्णयो हृष्टान्तन्वः प्राणमिवोत्थिताः । परिषस्वजिरे गाढं चिरदर्शनकातराः ।।३३।।
वसुदेवः परिष्वज्य सम्प्रीतः[3] प्रेमविह्वलः । स्मरन् कंसकृतान् क्लेशान् पुत्रन्यासं च गोकुले ।।३४।।
कृष्णरामौ परिष्वज्य पितरावभिवाद्य च । न किञ्चनोचतुः प्रेम्णा साश्रुकण्ठौ कुरूद्वह ।।३५।।

कर्दमक्षमा

श्रीशुकः, उवाच ।

कृष्णपुरोगमान्, यदून्, प्राप्तान्, श्रुत्वा, अनस्थार्थैः, दिदृक्षया, गोपैः, वृतः, नन्दः, तत्र, आगमत् ।।३२।। तम्, दृष्ट्वा, चिरदर्शनकातराः, वृष्णयः, हृष्टाः, प्राणम्, तन्वः, इव, उत्थिताः, गाढम्, परिषस्वजिरे ।।३३।। वसुदेवः, परिष्वज्य, कंसकृतान्, क्लेशान्, च, पुत्रन्यासम्, गोकुले, स्मरन्, सम्प्रीतः, प्रेमविह्वलः(जातः) ।।३४।। कृष्णरामौ, परिष्वज्य, च, पितरौ, अभिवाद्य, हे, कुरूद्वह, साश्रुकण्ठौ, न, किञ्चन, ऊचतुः, महाभागा, यशोदा, तौ, सुतौ, आत्मासनम्, आरोप्य, च, बाहुभ्याम्, परिरभ्य, शुचः, विजहतुः ।।३५-३६।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनस्थार्थैरिति तत्रैव वासचिकीर्षया शकटेषु स्थापितैरर्थैः सहागत इत्यर्थः ।।३२-३३।। वसुदेवस्तं परिष्वज्य प्रेमविह्वलो बभूवेति शेषः ।।३४-३५।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र कुरुक्षेत्रे । तत्र कृष्णादिपार्श्वे । इत्यर्थ इति-तीर्थयात्रामुख्यफलश्रीकृष्णदर्शनमेवेति मत्वा तत्पार्श्व एवागत इति भावः ।।३२।। तं नन्दम् ।।३३-३४।। रामकृष्णयोर्जनमोहनविडम्बनमाह-कृष्णरामाविति । पूर्वमभिवाद्य ततः परिष्वज्य ।।३५।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं श्रीकुन्तीवसुदेवादीनां सम्भाषणादिकमल्पकतयादौ समाप्य कुरुक्षेत्रयात्रा मुख्यप्रयोजनमुषरागात्प्रागेवागतैः श्रीनन्दादिभिः पूर्वयुक्त्या दुर्घटमिलनैः सह तदानीन्तनमेव श्रीभगवतः समागमं विस्तरेणाह-नन्द इत्यादिना यावदध्यायसमाप्ति । तत्र कुरुक्षेत्र प्रकर्षेण सर्वपरिवारसाहित्यादिना प्राप्तानागतान् चारादिद्वारा ज्ञात्वा ननु तस्य तादृशस्य केवलैर्यदुभिः किमित्याशङ्क्याह-कृष्णः व्रजचित्ताप्रकर्षकः स्वपुत्रः पुरोगमोऽग्रो येषां तान् गोपैः श्रीमदुपनन्दादिभिर्वृतः एकशेषेण गोपीभिश्च तत्पत्न्यादिभिः तत्र हेतुः दिदृक्षयेति । भवत्वन्येषामन्यत्पारलौकिकमैहिकं च तेषां तु श्रीकृष्णदिदृक्षैव तत्रागमनं निमित्तमित्यर्थः । इति तेषां तद्विरहोचितदशापि सूचिता । अन्यत्तैः यद्वा अनस्स्थासु शकटोपरिस्थासु श्रीगोपीषु अर्थः श्रीकृष्णार्थप्रियद्रव्यादिर्येषां तैः ।।३२।। वृष्णयः श्रीकृष्णावासद्वारसभोपविष्टाः तन्वः करचरणाद्यङ्गानि मूर्च्छितानां यथा मुख्यं प्राणमागतं प्राप्योत्तिष्ठन्ति तथोत्थिताः इति सद्यो युगपदुत्थानं वृष्णीनां तदेकालम्बनजीवनत्वं च सूचितम् इति तस्य परमगुणो व्यक्तः अत एव चिरेण यद्दर्शनं तेन कातराः विवशाः यद्वा चिरं दर्शने कातराः अत्युत्सुकाः अत एव गाढं परिषस्वजिरे ।।३३।। एवं सामान्येन सर्वेषां समागममुक्त्वा तत्रैव श्रीवसुदेवस्य विशेषेणाह-वसुदेव इति । अन्योन्यतो विशेषात् सम्यक् प्रीतो हृष्टः पश्चाच्च प्रेम्णा विह्वलः कम्पपुलकादिभिराकुलोऽभूदित्यर्थः । किञ्च स्मरन्निति क्लेशान् स्वबन्धनपुत्रवधादीन् पुत्रयोः पुत्रस्य वा न्यासं तद्दर्शनतः पूर्ववृत्तस्मृत्या तत्क्लेशवर्गनिस्तारहेतुतदीयमहोपकारानुसन्धानादित्यर्थः ।।३४।। एवं तेन सहागतैः श्रीमदुपनन्दादिभिरपि समागमो ज्ञेयः तावदेव श्रीव्रजेश्वरीमपि तद्दर्शनोत्कण्ठाविस्फुटहृदयां वर्त्मन्यपि कृतोपवासप्रायां कृशातिकृशामश्र्वाविलमुखीं स्वसखीगृहीतबाहुमध्यां

---

१. श्रुत्वा-विज. ; ज्ञात्वा-श्रीधर. वंशी. वीर. जीव. । २. गोपैरनोभिस्तद्दिदृक्षया-वीर. ; गोपैस्तरसा तद्दिदृक्षया-विज. । ३. प्रतीतः-गो. प्रे. टी. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पट्यवृतशकटीयानेन तददूरत एवागतां निशम्य सहसैव श्रीमदानकदुन्दुभिना तां च तं च तदन्तरीणपरिजनैः समं निजान्तरावासं प्रापय्य तत्रैव श्रीकृष्णरामयोराहूतयोः सतोर्यद्वृत्तं तदाह-कृष्णेति । अत्र यद्यपि व्रजादागताः पित्रादयः श्रीवसुदेवादिभिः समुपविष्टा बहिः कक्षायां मिलिताः मात्रादयस्तु श्रीदेवक्यादिभिरुपविष्टा अन्तःकक्षायामिति महाजनव्यवहाराद्गम्यते तथापि युगपदेव तत्तन्मिलनवर्णनं द्वयोरपि समानप्रेमपरिपाटीबोधनार्थं सङ्क्षेपार्थमेव च कृतं तदेवमेव वक्ष्यमाणं श्रीदेवकीयशोदादीनां मिथः परिष्वङ्गसम्भाषादिकमपि सम्भवतीति विवेक्तव्यं पित्रोः स्नेहभराकृष्टचित्तः कृष्णः तयोः स्नेहरमितो रामश्चेति द्वावपि युगपदेव पितरौ श्रीयशोदानन्दौ परिष्वज्य परिष्वङ्गानन्तरं चिरतः स्वास्थ्ये जात एवाभिवाद्य तच्च दर्शनमात्रादभिसृत्य पितृभ्यामालिङ्गितयोस्ताभ्यां स्वाभ्यां च मोचनाशक्तेः ततः कथञ्चित्कृतेऽप्युपवेशे किञ्चन नोचतुः कुशलप्रश्नादिकं चिरं वक्तुं शक्तौ कुतः साश्रुकण्ठौ बाष्परुद्धकण्ठत्वादित्यर्थः । तत्र हेतुः प्रेम्णेति । पित्रोः स्वविषयकेण स्वयोश्च तद्विषयकेण स्नेहभरेणेत्यर्थः । एवमस्य पूर्वत्रापि सर्वत्रान्वयः तेन कम्पपुलकादिविकारादयोऽपि ज्ञेयाः श्रीकृष्णस्यादौ निर्देशः स्नेहभराकृष्टतयाऽग्रेऽभिगमनात् किं वा सुस्निग्धेन श्रीरामेणैव तस्याग्रे करणात् पितराविति सदा तयोस्तौ प्रत्येव मातापितृत्वबुद्धेः इति प्रेमोद्रेकेण सम्बोधयति कुरूद्वहेति महाकुलप्रभावाणां महत्तमानां भवादृशामपीदृशः स्वभावः आचारयुक्त एवेति भावः ॥३५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तन्वः करचरणाद्यङ्गानि यथा मुख्यप्राणमागतं प्राप्योत्तिष्ठन्ति, तथोत्थिता इति सद्यो युगपदुत्थानं वृष्णीनां तदेकालम्बनजीवनत्वं च सूचितम् । गाढं परितः सर्वाङ्गव्याप्त्या सस्वजिरे आलिंगितवन्तः, कुतः ? चिरेण यद्दर्शनं तेन कातरा विवशाः; यद्वा, चिरं दर्शने कातरा अत्युत्सुकाः ॥३२॥ एवं सामान्येन सर्वेषांसमागममुक्त्वाधुना विशेषेणाह-वसुदेव इत्यादिना । सम्यक् प्रीतो हृष्टः, संशब्देनान्येभ्यो विशेषो द्योतित एव । अत एव प्रेम्णा विह्वलो विवशः; किंवा कम्पपुलकादिविकारैराकुलोऽभूदित्यर्थः । तत्रैव हेतुः-स्मरन्निति । क्लेशान् स्वबन्धनपुत्रवधादीन्, पुत्रयोः पुत्रस्य च न्यासम्, तद्दर्शनेन पूर्ववृत्तं स्मृत्वा तत्क्लेशवर्गनिस्तारहेतु-तदीयमहोपकारानुसन्धानादित्यादित्यर्थः ॥३३॥ पितुर्गौरवेण चिराश्लेषसुखार्थं वा, पश्चात् कृतं श्रीकृष्णरामयोः समागमोत्सवं सप्रेमाह-कृष्णेति । पित्रोः स्नेहभराकृष्टचित्तः कृष्णः, तयोः स्नेहरमितो रामश्च तौ द्वावपि क्रमेण, किंवा सम्भ्रमेण युगमदेव गृहीत्वा परिष्वज्य, एवमग्रेऽपि । कृष्णस्यादौ निर्देशः, स्नेहभाराकृष्टतयाग्रेऽभिगमनात्, किंवा सुस्निग्धेन श्रीरामेण तस्याग्रे करणात् । पितराविति सदा तयोस्तौ प्रत्येव मातापितृत्वबुद्धेः । नोचतुर्वक्तुं न शक्तौ । कुतः ? साश्रुकण्ठौ, बाष्परुद्धकण्ठत्वादित्यर्थः । तत्र हेतुः-प्रेम्णेति । पित्रोः स्वविषयकेण स्वयोश्च तद्विषयकेण स्नेहभरेणेत्यर्थः । एवमस्य पूर्वत्रापि सर्वत्रान्वयः । तेन कम्पपुलकादिविकारादयोऽपि ज्ञेयाः, इति प्रेमोद्रेकेण सम्बोधयति-कुरूद्वहेति । महाकुलरभावानां भवादृशामीदृशः स्वभाव आचारश्च युक्त एवेति भावः ॥३४॥ आसनं श्रीवसुदेवेनातिथ्यरीत्या किंवा स्नेहोद्रेकविह्वलत्वेन तेषां पतनशङ्कया सद्योऽर्पितमारोप्य उपवेश्य यशोदेति श्रीदामोदरलीलायां दामबन्धनादिना मुनिजनगेयश्रीकृष्णभक्तवश्यतादिमहायशोविस्तारणात्, अतो महायशाः परमधन्या,अत एव स्नेहविशेषापेक्षया तस्या व्यक्तो निर्देशः । ननु प्रकटितैश्वर्य्यविशेषयोस्तयोः कथं ताभ्यां निजप्रौढयोर्वा स्वयमात्मासनारोपणादि ? तत्राह-सुताविति । स्नेहभरेण सदैव तौ प्रति बालकबुद्ध्येति भावः । विशेषेण जहतुरिति वि-शब्देनाश्रुमोचने श्रीकुन्त्यादिभ्यो विशेष उक्तः ॥३५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥३१-३६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

नन्द इति । कृष्णपुरोगमान् कृष्णप्रभृतीन् ज्ञात्वा आकर्ण्य तद्दिदृक्षया कृष्णादिदर्शनेच्छया गोपैः परिवृतः अनः शकटैर्गमनसाधनैः तत्र कृष्णसन्निधौ आजगाम ॥३२॥ तमिति । तं नन्दं प्राणं मुख्यप्राणं प्रति तन्वः शरीराणीव तावदेव पुनरागते सति मुख्यप्राणे यथा शरीराण्युत्तिष्ठन्ते तद्वदित्यर्थः । उत्थिताः सन्तः चिरं दर्शने निमित्ते कातराः लम्पटाः अतो गाढं

तथा परिषस्वजिरे आलि
पुत्रयोः रामकृष्णयोर्न्यास
"पितामात्रा" (१-२-७
नोचतुस्तूष्णीमेवासतुरित्य

अनःस्थाः ये अ
प्रथममतिद्रौत्येन पितृकर्तृका
पुत्रयोरभिवादनेऽवकाश इत्यत

वृष्णयः तं नन्दं दृष्ट
क्लेशान् पुत्रन्यासं च स्मरन् प्रेम
अभिवाद्य किञ्चन किमपि नो
आत्मासनं स्वाङ्कमारोप्य शुचः

श्रीकृष्णपुरोगमयदुनिव
॥३३॥ वसुदेवः कंसकृतान् क्लेश

प्रमेयत्वाय द्वितीयानाम
सहितः तत्र गतः तत्र कुरुक्षेत्रे यदून
सर्वसामग्र्या वृतः भगवन्तं द्रष्टुं त
सर्ववृष्णयो दृष्टाः तेषां मनःप्रीतिज
प्राणेषु समागतेषु करचरणाद्यवयव
परिषस्वजिरे क्रमेण यथालाभं कि
॥३३॥ एवं साधारणानामुक्त्वा पूर्व
जातः इति तस्यैतावत्येवावस्था नि
कृष्णबलभद्रयोः स्थापनं च ॥३४॥
पितरावित्यभिवाद्य आविर्भूतप्रेम्णा स
प्रदर्शितौ न तु वाचनिक इति कुरूद्वहे

जनैः समं निजान्तरावासं
वसुदेवादिभिः समुपविष्टः
द्रम्यते तथापि युगपदिव
देवकीयशोदादीनां मिथः
रामश्चेति द्वावपि युगपदेव
च्च दर्शनमात्रादभिसृत्य
शलप्रश्नादिकं चिरं वक्तुं न
तद्विषयकेण स्नेहभरेणेत्यर्थः
भराकृष्टतयाऽग्रेऽभिगमनात
इति प्रेमोद्रेकेण सम्बोधयति
५॥

द्यो युगपदुत्थानं वृष्णीनां
कुतः ? चिरेण यद्दर्शनं तेन
ममुक्त्वाधुना विशेषेणाह-
णा विह्वलो विवशः; किंवा
धादीन्, पुत्रयोः पुत्रस्य वा
दित्यर्थः ॥३३॥ पितुर्गौरवेण
: स्नेहभराकृष्टचित्तः कृष्णः,
एवमग्रेऽपि । कृष्णस्यादौ
राविति सदा तयोस्तौ प्रत्येव
। तत्र हेतुः-प्रेम्णेति । पित्रोः
कम्पपुलकादिविकारादयोऽपि
वभाव आचारश्च युक्त एवेति
ा सद्योऽर्पितमारोप्य उपवेश्य
विस्तारणात्, अतो महाभागा
स्तयोः कथं ताभ्यां निःशंकं
कबुद्ध्येति भावः । विशेषेण

॥३१-३६॥

निच्छया गोपैः परिवृतः अनोभिः
ति तन्वः शरीराणीव तावद्विनिर्गते
ते कातराः लम्पटाः अतो गाढं यथा

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तथा परिषस्वजिरे आलिङ्गितवन्तः ॥३३॥ वसुदेव इति । परिष्वज्य नन्दमिति शेषः । प्रणयेन स्नेहातिशयेन विह्वलः परवशः गोकुले पुत्रयोः रामकृष्णयोर्न्यासम् अवस्थापनं च स्मरन्नास्ते इत्यध्याहारः ॥३४॥ कृष्णरामाविति प्रथमान्तं पिता च माता च पितरौ "पितामात्रा" (१-२-७०) इत्येकशेषः तौ यशोदानन्दावभिवाद्यालिङ्ग्य च हे कुरूद्वह ! प्रेम्णा साश्रुः कण्ठो ययोस्तौ किञ्चिदपि नोचतुस्तूष्णीमेवासतुरित्यर्थः ॥३५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२७-३९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१४-३९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१६-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अनःस्थाः ये अर्थाः स्वपुत्रं कृष्णं भोजयितुं तन्निकटे वासं कर्तुं च आनीतास्तैश्च वृतः ॥३२-३३॥ परिष्वज्येति । प्रथममतिद्रौत्येन पितृकर्तृकपरिष्वङ्ग एव पुत्रकर्तृकपरिष्वङ्गहेतुर्बभूवेति भावः । ततश्च पितृभ्यां चिरपरिष्वङ्गतः परित्यक्तयोरेव पुत्रयोरभिवादनेऽवकाश इत्यतः परिष्वङ्गानन्तरमभिवादनमुक्तं नोचतुरित्यत्र हेतुः साश्रुकण्ठौ अश्रुरुद्धकण्ठत्वादित्यर्थः ॥३४-३५॥

गूढार्थदीपिनी

वृष्णयः तं नन्दं दृष्ट्वा कातरा व्याकुलाः सन्तः गाढं यथा स्यात्तथा आलिङ्गितवन्तः ॥३२॥ वसुदेवः नन्दं परिष्वज्य क्लेशान् पुत्रन्यासं च स्मरन् प्रेमविह्वलो बभूवेत्यन्वयः ॥३३॥ हे कुरूद्वह परीक्षित् । कृष्णरामौ कर्तृभूतौ पितरौ कर्मभूतौ यशोदानन्दनौ अभिवाद्य किञ्चन किमपि नोचतुः । कुतः । साश्रुकण्ठौ साश्रुः अर्थपूर्णः कण्ठो ययोस्तौ ॥३४॥ यशोदा चात् नन्दश्च । तौ आत्मासनं स्वाङ्कमारोप्य शुचः शोकान् अश्रूणि वा मुमुचतुः ॥३५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

श्रीकृष्णपुरोगमयदुनिकटे श्रीनन्दवाससूचनार्थमनःस्थार्थैरित्युक्तम् ॥३२॥ तन्वः शरीराणि अङ्गानीत्यर्थः । प्राणं पञ्चवृत्तिम् ॥३३॥ वसुदेवः कंसकृतान् क्लेशान् पुत्रन्यासं च स्मरन् प्रेमविह्वलः सन् सम्परिष्वज्य प्रीतो बभूवेति ॥३४-३५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

प्रमेयत्वाय द्वितीयानामाह-नन्दस्तत्रेति । स दूरे स्थितः पूर्वभागे ते तु पश्चिमभागे स्थिताः अतः पश्चात् श्रुत्वा सर्वैः सहितः तत्र गतः तत्र कुरुक्षेत्रे यदून् प्राप्तान् कृष्णपुरोगमान् भगवानेव पुरोगमो येषामिति भगवदैश्वर्यं तत्र द्रष्टव्यमिति गोपैरनोभिश्च सर्वसामग्र्या वृतः भगवन्तं द्रष्टुं तत्रागतः ॥३२॥ तस्मिन् यादवानां पूर्वापेक्षया विशेषानुवृत्तिमाह-तं दृष्ट्वेति । दर्शनमात्रेणैव सर्ववृष्णयो दृष्टाः तेषां मनःप्रीतिर्जाता तत देहेनापि मनःप्रेरणरहितेनापि उत्थिता इत्याह-तन्वः प्राणमिवोत्थिता इति । यथा प्राणेषु समागतेषु करचरणाद्यवयवाः स्वयमेवोत्थिता भवन्ति अनेनैतावत्कालं यादवा मूर्च्छिता इव स्थिता इत्युक्तम् अतः परिषस्वजिरे क्रमेण यथालाभं किञ्च चिरदर्शनेन बहुकालजातदर्शनेन कातराश्च जाताः कदाचिदस्मान् त्यक्त्वा गमिष्यतीति ॥३३॥ एवं साधारणानामुक्त्वा पूर्ववद्वसुदेवस्य विशेषमाह-वसुदेवः परिष्वज्येति । सम्यक् प्रीतः अन्तःप्रेम्णा च बहिर्विह्वलो जातः इति तस्यैतावत्येवावस्था निरूपिता विह्वलतायां हेतूनाह-स्मरन् कंसकृतान् क्लेशान् इति पुत्रमारणादीन् गोकुले कृष्णबलभद्रयोः स्थापनं च ॥३४॥ ततो नन्दस्य साक्षाद्भगवद्दर्शनमाह-कृष्णरामौ परिष्वज्येति । उभौ प्रथमं परिष्वज्य पितराविल्यभिवाद्य आविर्भूतप्रेम्णा साश्रुकण्ठौ भूत्वा किञ्चनोचतुः तूर्ष्णी स्थितौ नन्दे कायिकमानसिकावेव व्यापारौ भगवता प्रदर्शितौ न तु वाचनिक इति कुरूद्वहेति विश्वासार्थं सम्बोधनम् ॥३५॥

श्रीसुबोधिनीसारः

शुकोक्तिः । कृष्णः पुरोगमोऽग्रेचरो येषां तान् प्राप्तान् यदून् ज्ञात्वा तत्र तीर्थे गोपैर्वृतो नन्दस्तत्रायात् द्रष्टुमिच्छया अनस्सु शकटेषु स्थैर्वर्तमानैरर्थैः सह ॥३२॥ तं नन्दं दृष्ट्वा वृष्णयो यादवाः हृष्टाः तन्व इन्द्रियाणीवोत्थिताः चिराद्बहुकालाद्दर्शनं तेन कातरा गाढं परिरेभिरे ॥३३॥ वसुदेवः परिष्वज्यालिङ्ग्य सम्यक् प्रीतोऽतिहृष्टः प्रेमविह्वलो बभूवेति शेषः । कंसकृतान् क्लेशान् स्मरन् गोकुले पुत्रन्यासं च स्मरन् ॥३४॥ कृष्णरामौ पितरौ प्रणम्यालिङ्ग्य प्रेम्णा साश्रुकण्ठौ रुद्धकण्ठौ न किञ्चनोचतुः । हे कुरूद्वह ! ॥३५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तं नन्दं दृष्ट्वा वृष्णयो हृष्टा उत्थिताः चिरात् बहुकालानन्तरं यज्जातं दर्शनं तेन कातरा व्याकुला गाढं यथा भवति तथा परिषस्वजिरे । उत्थाने दृष्टान्तमाह–प्रथमं मूर्च्छितास्तन्वः करचरणादयो यथा पञ्चवृत्तिकं मुख्यप्राणमागतं दृष्ट्वा उत्थिताश्चेष्टावन्तो भवन्ति तथेत्यर्थः ॥३२॥ वसुदेवस्तु नन्दं परिष्वज्य सम्प्रीतः सन् प्रम्णातिशयितेन विह्वलः व्याकुलो बभूव । तत्र हेतुमाह-कंसकृतान् बन्धनपुत्रमारणादीन् क्लेशान् तथा पुत्रयो रामकृष्णयोर्गोकुले न्यासं स्थापनं नन्दकृतां पुत्रपालनादिमैत्रीं च स्मरन्निति ॥३३॥ कृष्णरामौ तु पितरौ यशोदानन्दौ अभिवाद्य प्रणम्य परिष्वज्य च हे कुरूद्वह ! प्रेम्णा साश्रुः कण्ठो ययोस्तौ किञ्चिदपि नोचतुस्तूष्णीमेवासतुरित्यर्थः ॥३४॥ यशोदा चेति । चकारान्नन्दश्च तौ द्वौ सुतौ आत्मासनं स्वाङ्कमारोप्य उपवेश्य बाहुभ्यां परिरभ्य च शुचः पुत्रविश्लेषजशोकान् विजहतुः तत्यजतुः । तत्रापि यशोदायाः स्नेहाधिक्यात्तां विशिनष्टि–महाभागेति ॥३५॥

अन्वितार्थप्रकाशिका

तमिति । तं नन्दं दृष्ट्वा वृष्णयो हृष्टा उत्थिताः चिरात् बहुकालानन्तरं यज्जातं दर्शनं तेन कातरा व्याकुला गाढं यथा भवति तथा परिषस्वजिरे । उत्थाने दृष्टान्तमाह–प्रथमं मूर्च्छितास्तन्वः करचरणादयो यथा पञ्चवृत्तिकं मुख्यप्राणमागतं दृष्ट्वा उत्थिताश्चेष्टावन्तो भवन्ति तथेत्यर्थः ॥३२॥ वसुदेव इति । वसुदेवस्तु कंसकृतान् बन्धनपुत्रमारणादीन् क्लेशान् तथा पुत्रयो रामकृष्णयोर्गोकुले न्यासं स्थापनं नन्दकृतां पुत्रपालनादिमैत्रीं च स्मरन् नन्दं परिष्वज्य सम्प्रीतः सन् प्रेम्णातिशयितेन विह्वलः व्याकुलो बभूव ॥३३॥ कृष्णेति । कृष्णरामौ तु पितरौ यशोदानन्दौ अभिवाद्य प्रणम्य परिष्वज्य च हे कुरूद्व ! प्रेम्णा साश्रुः कण्ठो ययोस्तौ अतः किञ्चिदपि नोचतुस्तूष्णीमेवासाते । प्रथममतिद्रुतं पित्रा परिष्वक्तौ ततः पितृत्यागेऽपि सत्वरौ परिष्वज्य प्रणेमतुरिति ॥३४॥ ततः श्रीवसुदेवेन स्वान्तःपटगृहे प्रवेशितौ सपरिजनौ गृहीतरामकृष्णहस्तौ यशोदानन्दौ गत्वा तत्र किं चक्रतुरित्यपेक्षायामाह–ताविति । महाभागा यशोदा चकारान्नन्दश्च तौ द्वौ सुतौ आत्मासनं स्वाङ्कमारोप्य उपवेश्य बाहुभ्यां परिरभ्य च शुचः पुत्रविश्लेषजशोकान् विजहतुः तत्यजतुः । यद्वा । शुचः अश्रूणि मुमुचतुः । अत्र कृष्णः मातुरंके उपविष्टो गोपवेष एवाभूत् ॥३५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

चिरदर्शनेन कातराः विह्वलाः ॥३२॥ प्रेमविह्वलोऽभूदिति शेषः ॥३३॥ परिष्वज्यालिंग्य ॥३४॥ तौ पुत्रौ आत्म स्वासनमारोप्य यशोदानन्दश्च शुचो वियोगशोकान् विजहतुः तत्यजतुः । यद्वा शुचः प्रेमाश्रूणि विजहतुः मुमुचतुः ॥३५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ चिरं दर्शने निमित्ते कातरा लम्पटा वृष्णयः तं नन्दं दृष्ट्वा हृष्टाः सन्तः प्राणं मुख्यप्राणं प्रति तन्वः शरीराणि उत्थिताः सन्तः मुख्यप्राणे आदौ विनिर्गते पुनरागते सति यथा शरीराणि तं प्रत्युत्तिष्ठन्ते तद्वदुत्थिताः सन्तः इत्यर्थः । परिषस्वजिरे आलिङ्गितवन्तः ॥३२॥ वसुदेव इति ॥ वसुदेवः प्रेमविह्वलः सम्प्रीतः सन् परिष्वज्य कंसकृतान् क्लेशान् पुत्रन्यासं च स्मरन् आस्ते स्मेति शेषः ॥३३॥ कृष्णरामाविति ॥ कृष्णरामाविति प्रथमान्तम् । माता च पिता च पितरौ 'पिता इत्येकशेषः । एतत् द्वितीयान्तम् । यशोदानन्दावित्यर्थः । अभिवाद्य नमस्कृत्य परिष्वज्यालिंग्य च । हे कुरूद्वह ! प्रेम्णा साश्रु सन्तौ किञ्चन किञ्चिदपि न ऊचतुः ॥३४॥ ताविति ॥ महाभागा महाभाग्यवती यशोदा चकारान्नन्दः । सुतौ तौ रामकृष्णौ

आत्मासनमा
पुत्रविश्लेषजशोकान्

श्रीशुकाचार्यजी
कुरुक्षेत्रमें पधारे है औ
अपने गोप परिवारके
लाडिले पुत्र श्रीकृष्ण-ब
पधारे हुए यादव आदि
यादव इस प्रकार हठ रा
परस्पर मिलनेके लिये ब
रहे ॥३३॥ महाराज श्री
आलिंगन दिया । श्रीवसु
था और सतायाथा और
॥३४॥ प्यारे भगवान श्री
चरणकमलोंमें प्रणाम कि
वे कुछ न बोल सके ॥३५

¹तावात्मासनमारो
रोहिणी देवकी² च
³को विस्मरेत वां
एतावद्दृष्टपितरौ यु
प्राप्योषतुर्भवति

च, रोहिणी, देवकी, व्र
ऐन्द्रम्, ऐश्वर्यम्, अवाप्य, अपि,
पित्रोः, सम्प्रीणनाभ्युदयपोषणल
सताम्, नः, परः, स्वः ॥३९॥

तौ सुतौ परिरभ्य नन्दो
व्रजेश्वरी यशोदाम् ॥३७॥ अनिवृत्त

---

१. तावात्मोत्सङ्गमारोप्य–वीर. ; तावुत्स
वी. ।५. लालनानि–जीव. ; पालनानि–

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आत्मासनमात्मनोरासनम् आरोप्य तस्मिन्नुपवेश्येत्यर्थः । बाहुभ्यां परिरभ्य च शुचः विजहतुः । चक्षुषः पुत्रविश्लेषजशोकान् विजहतुः ॥३५॥

कृष्णप्रिया

श्रीशुक्राचार्यजी महाराज आगे कहने लगे - राजन् परीक्षित् भगवान श्रीकृष्ण एवं बलभद्रमहाराज कुरुक्षेत्रमें पधारे है और साथमें यादव स्वजनभी आये है ऐसा मंगल समाचार मिलते हि गोपराज श्रीनन्दरायजी अपने गोप परिवारके साथ अपनी सम्पूर्ण सामग्री वाहनोमें भरकर और परिवारको रथोंमें बैठाकर अपने प्यारे लाडिले पुत्र श्रीकृष्ण-बलराम आद्यी को देखने के लिये समान पञ्चक तीर्थ पधारे ॥३२॥ कुरुक्षेत्रमें प्रथमसे पधारे हुए यादव आदि आप्तजन, नन्दराय आदि प्रिय गोपजनोंको पधारते देखकर आनन्दसे छलकने लगे । वे यादव इस प्रकार हठ रखते हुए, मानो कि गतप्राण देहोमें यकायक प्राणोंका संचार हो गया हो । ये सब आप्तजन परस्पर मिलनेके लिये बहुत दिनों से आतुरहो रहे थे ईसलिये परस्पर बहुत देरतक अनन्य भावसे आलिंगन करने रहे ॥३३॥ महाराज श्रीवसुदेवजीने अतिशय स्नेहसे एवं आनन्दसे विह्वल होकर श्रीनन्दरायजीको हृदयसे आलिंगन दिया । श्रीवसुदेवजीका क्रमशः सारी बातें स्मृतिपथ होने लगी कैसे किस प्रकार सुदेवजी को त्रास देता था और सतायाथा और वसुदेवजीने अपने बालक कृष्णको गोकुलमें ले जाकर श्रीनन्दराजीके घर रख दिया था ॥३४॥ प्यारे भगवान श्रीकृष्ण और बलरामजीने माता यशोदा और पितृचरण नन्दराजीके हृदयसे लगकर उनके चरणकमलोंमें प्रणाम किया । भैया राजन् उस अवसर अनुराग के उद्रेक से दोनों भाईयोंका कण्ठ रूध गया और वे कुछ न बोल सके ॥३५॥

[1]तावात्मासनमारोप्य बाहुभ्यां परिरभ्य च । यशोदा च महाभागा सुतौ विजहतुः शुचः ॥३६॥
रोहिणी देवकी[2] चाथ परिष्वज्य व्रजेश्वरीम् । स्मरन्त्यौ तत्कृतां मैत्रीं बाष्पकण्ठ्यौ समूचतुः ॥३७॥
[3]को विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरि । [4]अवाप्याप्यैन्द्रमैश्वर्यं यस्या नेह प्रतिक्रिया ॥३८॥
एतावदृष्टपितरौ युवयोः स्म पित्रोः सम्प्रीणनाभ्युदयपोषणलालनानि[5] ।
प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्र च भयौ न सतां परः स्वः[6] ॥३९॥

कर्दमक्षमा

च, रोहिणी, देवकी, व्रजेश्वरीम्, परिष्वज्य, अथ, तत्कृताम्, मैत्रीम्, स्मरन्त्यौ, बाष्पकण्ठ्यौ, समूचतुः ॥३७॥ व्रजेश्वरि, ऐन्द्रम्, ऐश्वर्यम्, अवाप्य, अपि, यस्य, नेह, प्रतिक्रिया, अनिवृत्ताम्, वाम्, मैत्रीम्, विस्मरेत ॥३८॥ अदृष्टपितरौ, एतौ, युवयोः, पित्रोः, सम्प्रीणनाभ्युदयपोषणलालनानि, प्राप्य, ऊषतुः, स्म, हे, भवति, अक्ष्णोः, यद्वत्, ह, पक्ष्म, अकुत्रचभयौ, न्यस्तौ, हि, सताम्, नः, परः, स्वः ॥३९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तौ सुतौ परिरभ्य नन्दो यशोदा च विरहशोकान् विजहतुस्तत्यजतुः यद्वा शुचोऽश्रूणि विजहतुर्मुमुचुरित्यर्थः ॥३६॥ व्रजेश्वरी यशोदाम् ॥३७॥ अनिवृत्तां निवृत्तिकारणे सत्यप्यनुवर्तमानाम् ऐन्द्रमैश्वर्यं प्राप्यापि यस्याः प्रतिक्रिया कर्तुं न शक्यत

---

[1] तावात्मोत्सङ्गमारोप्य-वीर. ; तावृत्सङ्गं समारोप्य-विज. । [2] चैव-विज. । [3] को विस्मरेत वां मैत्रीमनेवृत्तां-विज. । [4] अपि प्राप्यैन्द्रः-गो. प्रे. टी. । [5] लालनानि-जीव. ; पालनानि-श्रीधर. वंशी. वीर. विज. । [6] परोस्ति-वीर. ; परस्तात्-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

इत्यर्थः ॥३८॥ तत्कृतां मैत्रीमाहतुः-एताविति । न दृष्टौ पितरौ याभ्यां तौ वस्तुतस्त्वजन्मत्वादेवादृष्टपितरौ हे भवति ! युवयोः पित्रोर्न्यस्तावेतौ सम्प्रीणनादीनि प्राप्याकुत्र च भयौ क्वचिदपि भयरहितौ भूत्वोषतुर्वासं चक्रतुः कम्भूतयोः अक्ष्णोर्नेत्रयोः रक्ष पक्ष्म यद्वत्तथा रक्षकयोः युक्तं युवयोरेतद्यतः सतां परः स्वः इति नास्ति वैषम्यम् ॥३९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

चान्नन्दः । शुक्पदस्योभयार्थत्वादाह-यद्वेति । इत्यर्थ इति-मोक्षणत्यागावेकार्थकावेवेति ॥३६॥ तत्कृतां यशोदाकृताम् मैत्रीं पुत्ररक्षणरूपाम् ॥३७॥ वां युवयोर्नन्दयशोदयोः । यस्या मैत्र्याः । इत्यर्थ इति-राजभयत्यक्तास्मत्सुतपालनं भवद्भ्यां वि कोऽपि तदा कर्तुं न समर्थः । क्रूरकंसभयात् तच्चाप्रतीकार्यमेवेन्द्रादिपददानेनापीति भावः ॥३८॥ तत्कृतां तयोः कृताम् । ए रामकृष्णौ । पितरौ पितृशब्दास्पदावावामेव । परमार्थमाह-वस्तुतस्त्विति । अजन्मत्वात्परमेश्वरत्वेन जन्मरहितत्वादेव । जन्मव जीवानामेव पितृदर्शनं भवतीति भावः । भातीति भवती दीप्तियुता तत्सम्बुद्धौ । तथा कुत्र चेत्यव्ययम् । 'किमः सामान्ये' इ चान्तं पुत्रार्थे । ततो नञा समासः । तथा च न कुत्र च भयं ययोस्तावकुत्रचभयौ । वस्तुतस्तु ईषत्त्वादेताभ्यामेव सर्वे बिभ्यति "भीषास्माद्वातः पवते" इत्यादिश्रुतेः । कथम्भूतयोर्वां तथा तद्वत् रक्षकयोरिति शेषः । अर्थान्तरं सूचयतः युक्तमित्यादिना सतामुदाराणाम् । तदुक्तं –

"अयं स्वीयः परो वेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बिनी ॥" इति ॥३९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च ताविति आसनं श्रीवसुदेवेनातिथ्यरीत्या तत्रापि स्नेहोद्रेकविह्वलत्वेन तेषां पतनशङ्कया सद्योऽर्पितमारोप्य तत्रोपवेश यशोदेति तादृशप्रेमवर्णनेनास्मभ्यमपि यशःसौभाग्यदानत यग्यतन्नाम्नी सेत्यर्थः अतो महाभागा परमधन्या चकारान् श्रीनन्द महाभागस्तत्रोपवेश्य अत्र श्रीयशोदाया एव साक्षादुक्तिस्तत्रापि तस्या वात्सल्यातिशयव्यञ्जनार्थं ननु प्रौढयोः प्रकटितैश्वर्य्यविशेषयोस्तयोः कथं ताभ्यां निःशङ्कं स्वयमात्मासनारोपणादि तत्राह सुताविति स्वाभाविकवात्सल्येन सदैव तौ प्री तयोस्तद्बुद्धेरित्यर्थः । अतः सर्वतो विशेषेण जहतुः ॥३६॥ अथ श्रीकृष्णरामसमागमाद्यनन्तरं किञ्चित्स्वास्थ्ये जा नानान्यव्रजवासिलक्षमिलनार्थं श्रीनन्दवसुदेवाभ्यां सह तयोर्बहिर्निर्गतयोश्च सतोरित्यर्थः । देवक्या अपि पूर्वं रोहिण्या निर्देशस्तस्याः पुत्रमिलनानन्दवैह्वल्येनेतः किञ्चिद्विलम्बात् अस्याः श्रीमति व्रजे चिरं सहवासादिस्नेहविशेषाच्च व्रजेश्वरीमिति श्रीबादरायणेर्भावविशेषे ते अप्यतिक्रम्य तां प्रति महागौरवात् मैत्रीं हिताचरणम् ॥३७॥ तत्र श्रीरोहिण्याह-केति । स्वोद्देशेन वां युवयोः दम्पत्योः विस्म सदा नानुचिन्तयेदित्यर्थः । कुतः अनिवृत्ताम् अस्माभिर्निकटादागमनेन परित्यक्तयोरपि सदानुवर्तमानां विदूरेऽपि स स्वयमुपहृतदिव्यघृतक्षीरसारादिद्रव्याणां तथा अस्माकं कुशलवार्ताया हरणार्थं निजजनानां च मुहुः प्रेषणात् अधुना यात्रामि वयमागमनाच्च एवं प्रेम व्यज्य आदरं व्यञ्जयति व्रजेश्वरीति । ऐन्द्रैश्वर्यात् द्वारकैश्वर्य्यस्याधिक्येऽप्यप्राप्येत्याद्युक्तिरैन्द्रैश्वर्यां महामहोदयेन विस्मृत्याधिक्यात् भवेदप्यन्यदीयाया मैत्र्याः प्रत्युपकृतायाः सत्याः विस्मृतिर्न तु भवदीयायाः तादृशप्रत्युपकारसम्भव इत्याह-यस्या इति ॥३८॥ अथ श्रीदेवक्याह-एताविति । न दृष्टावपि किम्पुनर्लालनादिप्राप्त्यानुभूतौ पितरौ याभ्यां तौ जातमात्रावित्य । अतः पित्रोः साक्षात् पितृत्वं प्राप्तयोः स्म प्रसिद्धौ स्वेति क्वचित् तत्र कारणमाह-सम्प्रीणनेत्यादिना । सम्यक् प्रीण प्रियद्रव्यप्रदानादिना तोषणम् अभ्युदयं जातकर्मादिवृद्धिं वा पोषणं स्तन्यादिना लालनं च विश्रमणादि पालनानीति पाठेऽपि एवार्थः तानि प्रकर्षेण सर्वोत्कृष्टतया प्राप्य लब्ध्वा ननु भवतु स्वपुत्रत्वेनावगते श्रीकृष्णे तत्तत् श्रीरामे वा कथं तत्राह-न सतां । अन्यत्तैः एष चार्थः श्रीदेवक्या यद्यपीत्थमेवाभिप्रेत्य प्रयुक्तः यथा सुप्रसिद्धमेव जातं श्रीकृष्णे अस्मत्पुत्रत्वं ततोऽन्य ज्ञायेतैवेत्यतस्तदनुरूपमेव सान्त्वनं युक्तमिति । तथापि श्रीव्रजेश्वर्य्यास्तद्दृढतरसंस्कारसत्त्वेनान्यथाप्रतीत्यभावात् तथा "ज्ञातं द्रष्टुमेष्यामो विधाय सुहृदां सुखम्" इत्यैकान्तिकश्रीकृष्णमन्त्रानुस्मरणादयमेवार्थः स्फुरति स्म तथाहि एतौ युवयोः पित्रोर्युव

पितृभ्यामेव न्यस्तौ अस्म
यद्वज्जन्मस्थानं रक्षकं च त
यद्यप्यत्रतादृग्वैशिष्ट्यं ना
पित्रादिभ्यो भिन्नः स्वः पि

अथ कृष्णरामयं
श्रीबादरायणेर्भावविशेषेण
सम्यक् स्नेहभरेण बाष्परुद्ध
अनिवृत्तामसमाभिर्व्रजादागम
तथा कुशलवार्ताहरणार्थं नि
व्रजेश्वरीति । सहजस्नेहविशेषा
यद्वा, ननुतर्हि महादीनां मां पु
तद्व्रजप्रलयापत्तिरिति भावः ।
। ननु तर्हि पुत्रयोः पुनः प्रत्य
प्रत्युपकारासिद्धेः । अत ऋणत्र
पितरौयाभ्यां तौ जातमात्रावित्य
। सम्यक् प्रीणनं प्रियद्रव्यप्रदान
वा, पोषणं नवनीतादिना लालन
सम्प्रीणनादीनि प्राप्य, एतौ अ
परमादरात्, ह हर्षे, स्फुटमिति
सत्यम्, साधुषु स्वपरभेदाभावादि
कुरुतमित्याह–एताविति । न दृष्टौ
कुतश्चनाभयावूषतुः । कथम्भूतौ
क्षणमपि दूरे त्यक्तुमशक्यमाना
पुत्रावेवास्मत्पुत्रावित्यर्थः ॥३८॥
विश्वास एव कार्य इति भावः । एव
कृष्णं निजचित्तादिसर्वाकर्षकं श्री
निजप्राणकोटितोऽप्यधिकप्रियं चि
बाहुल्यात्, यद्वा, प्रेमतृष्णास्वभावेन
वर्गशो बहुधा भिन्ना अप्यविशेषेणैवेत्
तदेकपरिस्फूर्तेः अन्यत्तैर्व्याख्यातम्
कृष्णत्वं परमानन्दघनतां चिरविरहदु
तेन सह रहः क्रीडाजायमानचित्तवृत्ति
दुरापम् अन्यत् समानम् ॥३९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पितृभ्यामेव न्यस्तौ अस्मास्वर्पितौ यौ यथा स्वं सम्प्रीणनः सर्वप्राणिसुखकरो योऽभ्युदयो जन्म ये च पोषणलालने तानि अक्ष्णोः पक्ष्म दृग्जन्मस्थानं रक्षकं च तद्वद्यथा स्यात्तथा युवयोरेव प्राप्यापि अदृष्टपितरौ पित्रोर्युवयोरकृतदृष्टी एव सन्तौ ऊषतुरस्मासु वासं स्वीकृतवन्तौ यद्यप्यतादृग्वैशिष्ट्यं नास्ति यथापीति भावः। तर्हि कथं तत्राह न सतामिति परः आत्मनो भिन्नोऽयं स्वः आत्मा वा तथा परः पित्रादिभ्यो भिन्नः स्वः पित्रादिरूपो वेति सतां नास्तीत्यर्थः। अत्र श्रीरामस्यापि तद्गृहे जातत्वात्तयोरेव जन्मोक्तमिति प्रतीतम् ॥३९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ कृष्णरामयोः परिष्वङ्गाद्यनन्तरं रोहिण्याः प्रागुक्तिः, ज्येष्ठत्वात्, चिरं सहवासादिना स्नेहविशेषाच्च। व्रजेश्वरीमिति श्रीबादरायणेर्भावविशेषेण तां प्रति गौरवात्, तथा तयोरीश्वरीत्यभिमानत्यागेन तां प्रत्येश्वरीबुद्ध्या परमादराच्च, मैत्रीं हिताचरणं सम्यक् स्नेहभरेण बाष्परुद्धकण्ठतया गद्गदत्वादिना चोचतुः ॥३६॥ केत्यात्मोद्देशेन विस्मरेत, सदा नानुचिन्तयेदित्यर्थः। कुतः ? अनिवृत्तामसमाभिर्व्रजादागमनेन परित्यक्तयोरपि सदानुवर्तमानाम्, विदूरेऽपि सदा भ्रातृद्वयप्रियस्वयमुपस्कृतदिव्यघृतक्षीरसारादिद्रव्याणां था कुशलवार्ताहरणार्थं निजजनानां च मुहुः प्रस्थापनात्, अधुनापि तदावासे स्वयमेव सहवासार्थमागमनात्, तत्रैव हेतुः-हे व्रजेश्वरीति। सहजस्नेहविशेषार्द्रहृदयत्वादिति भावः। यद्वा, हे व्रजेश्वरीति मैत्र्या वैचित्री, किंवा आत्मन इन्द्रस्य वैश्वर्यादधिकताभिप्रेता; यद्वा, ननु तर्हि महादीनां मां पुत्रपार्श्वे किं नानयथः ? तत्राहतुः-व्रजेश्वरीति। हे व्रजपरिपालिके इति, अन्यत्र तव गमनेन सद्योऽशेष-व्रजप्रलयापत्तिरिति भावः। ननु तथापीश्वरीभिर्दीनानां स्मरणं कुतो घटेत ? तत्राह-अपीति। ऐन्द्रैश्वर्यमहामहोदयेन विस्मृत्याधिक्यात् ननु तर्हि पुत्रयोः पुनः प्रत्यर्पणेन प्रत्युपकुरुतम् ? तत्राह-यस्या इति। इहास्मिन् लोके जन्मनि वा युष्मत्पुत्रयोर्युवयोरेवार्पणेन त्युपकारासिद्धेः। अत ऋणशोधनाशक्त्या युवयोर्मैत्रीं सदानुस्मराम एवेत्यर्थः ॥३७॥ न दृष्टावपि, किं पुनर्लालनादीप्राप्त्यनुभूतौ याभ्यां तौ जातमात्रावित्यर्थः। अतः पित्रोः साक्षात् पितृत्वं प्राप्तयोः, स्म प्रसिद्धौ यद्वा विस्मये तत्र कारणमाहतुः-सम्प्रीणनेत्यादि सम्यक् प्रीणनं प्रियद्रव्यप्रदानादिना तोषणम्, अभ्युदयं जातकर्मादिवृद्धिं वा किंवा, व्रजयुवराजत्वादि-वैभवं महादुष्टवर्गवधोत्कर्षं पोषणं नवनीतादिना लालनं च विश्रमणादिना तानि प्रकर्षेण सर्वोत्कृष्टतया आप्त्वा लब्ध्वा अन्यत्तैर्व्याख्यातम् यद्वा, युवयोः सम्प्रीणनादीनि प्राप्य, एतौ अदृष्टपितरौ अदृष्टानामपूर्वाणां बाल्यलीलाचमत्काराणां पितरौ स्रष्टारौ सन्तौ तत्रोषतुः। हे भगतीति सादरात्, ह हर्षे, स्फुटमिति वा। ननु एतावावयोरेव पुत्रौ न तु युष्माकम्। यद्वा, कथमेतौ पित्रोर्विच्छेदेन सुखं लक्ष्येते ? त्वम्, साधुषु स्वपरभेदाभावादित्याह-नेति। यद्वा, भो व्रजेश्वरि! एतौ तादृशलालनाद्यभावात् नूनं क्लिश्यत इति युवां मा चिन्तां कुरुतमित्याह-एताविति। न दृष्टौ पितरौ युवां याभ्यां तावेतौ युवयोरिव युष्मत्कर्तृकानीव अस्मत्कर्तृकानि सम्प्रीणनादीनि प्राप्यात्र कृष्णनाभयावूषतुः। कथम्भूतौ ? पक्ष्म यद्वदक्ष्णोर्भवति, अतिनिकटं स्यात्तद्वदाभ्यामक्ष्णोर्न्यस्तौ स्नेहभरेण सदा निरीक्ष्यमाणौ क्षणमपि दूरे त्यकुमशक्यमानावित्यर्थः। हि यतः सतां युवयोः सत्सखीजनानामस्माकं परः स्व इति नास्ति युवयोरेवास्मत्पुत्रावित्यर्थः ॥३८॥ श्रीयुक्त ऋषिः सर्वज्ञ उवाचेति श्रीकृष्णस्य च मिथो भावतत्त्वादिकं सम्यग्वेत्तीति तदुक्तौ दृढं विश्वास एव कार्य इति भावः। एवमग्रेऽपि ज्ञेयम्। त्वर्थे च-कारः, सर्वतो विशेषात्तमेवाह। गोप्यः सदा श्रीकृष्णैकप्रेमविशेषार्ततराः, कृष्णं निजचित्तादिसर्वाकर्षकं श्रीगोपेन्द्रनन्दनं चिरात् अभित इष्टम्, सर्वतो भावेनेष्टं वाञ्छितम्, उप समीपे लब्ध्वा, यद्वा, अभीष्टं निजप्राणकोटितोऽप्यधिकप्रियं चिरादुपलभ्य, यस्य प्रकर्षेण नैतन्तर्यादिना ईक्षणे अवलोकने निमित्ते दृशिष्विति बहुत्वं तासां बहुत्वात्, यद्वा, प्रेमतृष्णास्वभावेन तत्प्रेक्षकाणां सर्वेषामेवापेक्षया अलमत्यर्थं परिरभ्य, अन्तःपरिरम्भणे स्वातन्त्र्यात्। सर्वा इति सर्वा बहुधा भिन्ना अप्यविशेषेणैवेत्यर्थः, चिरविरहार्तिभरेण प्रायः सर्वासामेवैक्यापादनात्। तद्भावं तन्मयताम्, आत्माद्यशेषविस्मृत्या तत्कर्मपरिस्फूर्तेः अन्यत्तैर्व्याख्यातम्। यद्वा, हृदीकृतं सदा चित्ते धृतमेवाधुना दृग्भिः परिरभ्य परमासक्त्या सर्वतो निरीक्ष्य तद्भावं कृष्णत्वं परमानन्दघनतां चिरविरहदुःखोपशान्तिपूर्वकपरमकाष्ठाप्राप्तमधुरानन्दविशेषमित्यर्थः। यद्वा, सोऽनिर्वचनीयश्चासौ भावश्च सह रहः क्रीडाजायमानचित्तवृत्तिविशेषप्रेम्णः परमकाष्ठाविशेषं वा आपुः, नित्ययुजां नित्यसंयोगवतीनां श्रीरुक्मिण्यादीनामपि दुर्लभम् अन्यत् समानम् ॥३९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मैत्रीति पक्ष उपलक्ष्यते ॥३७-३९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ताविति यशोदा चेति चशब्दान्नन्दः तौ सुतौ रामकृष्णावात्मनः उत्सङ्गमारोप्य तस्मिन्नुपवेश्येत्यर्थः । बाहुभ्यां परिष्व
शुचः पुत्रविश्लेषजशोकान् विजहतुः ॥३६॥ देवकीति । व्रजेश्वरीं यशोदां परिष्वज्य तत्कृतां व्रजेश्वरीकृतां मैत्रीं स्मरन्त्यौ बाष्पमान
कण्ठे ययोस्ते समूचतुः ॥३७॥ उक्तिमेवाह-केति । हे व्रजेश्वरि ! वां युवयोर्मैत्रीमनिवृत्तां यावद्देहमनुवृत्तामित्यर्थः । का वा
विस्मरेत न कापीत्यर्थः । अत्र हेतुत्वेन तां विशिनष्टि-ऐन्द्रमैश्वर्यं दत्त्वापि यस्या मैत्र्याः प्रतिक्रिया प्रत्युपकृतिरिह लोके
॥३८॥ मैत्री प्रपञ्चयतः-एताविति । न दृष्टौ पितरौ याभ्यां तौ हे भवति युवयोः पित्रोर्न्यस्तावेतौ सम्प्रीणनादीनि प्राप्य अकुत्रच
क्वचिदपि भयरहितौ भूत्वा ऊषतुः वासं चक्रतुः कथम्भूतयोः अक्ष्णोर्नेत्रयोः पक्षकं पक्ष्म यद्वत्तथा रक्षकयोर्युवयोरिति सम्बन्धः
रक्षकयोरित्यस्याध्याहारः सुप्रीणनमपेक्षितप्रदानेन तर्पणम् अभ्युदयो महोत्सवः युक्तं च तदित्यूचतुः न सतां परोऽस्तीति
इति पाठे परः स्वकः इति न वैषम्यमस्तीत्यर्थः ॥३९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२७-३९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१४-३९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

गोपाश्चेति नित्ययुजां रुक्मिणीप्रभृतीनामपि दुरापं तस्मिन् श्रीकृष्णे भावं सत्तां स्थितिमित्यर्थः । यत्र श्रीकृष्ण
तस्थुरिति आपुः प्रासवत्यः दृग्भिर्हृदि कृत्वा परिरभ्य दर्शनानन्तरं दृशां निमीलनेन हृदये तमावेश्य परिरभ्येत्यर्थः ॥३९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च श्रीवसुदेवेनैव स्वान्तःपटगृहं प्रवेशितौ सपरिजनौ गृहीतकृष्णरामहस्तौ गत्वा तत्र किं चक्रतुरित्यपेक्षायामाह-
ताविति । प्रथमं नन्दस्ततोऽत्युत्कण्ठास्फुटहृदया यशोदेति क्रमः ननु, प्रौडयोः प्रकटितैश्वर्यविशेषयोस्तयोः कथं
स्वात्मासनारोपणादिकं सम्भवेदत आह-सुतौ स्वाभाविकवात्सल्यवतोस्तयोर्दृष्टश्रुततदैश्वर्ययोरपि तत्र सदैवाष्टवार्षिकस्वसुतबुद्धि
भावः । शुचः विरहशोकान् अत्र कृष्णो यदा नन्दयशोदाभ्यां परिष्वक्तस्तदूरुपीठकृतासनो बभूव तदैव पूर्णतमो गोपजातिरेवा
सहोपविष्टाद्गोपस्त्रीणामालिङ्गनादिकं वक्ष्यते ॥३६॥ ततश्च श्रीवसुदेवाहूते नन्दे बहिरुग्रसेनादिमिलनार्थं निर्गते
रोहिणीदेवक्योर्व्रजेश्वरीसम्मिलनमाह-रोहिणीति । उपविष्टाभ्यामेव रोहिणीदेवकीभ्यां सात्मजायाः व्रजेश्वर्य्याः परिरम्भः
पुनरपि रामकृष्णावुत्सङ्गगतौ परिष्वज्यैवोपविष्टयामश्रुस्तन्यपयःप्रवर्तितयमुनागङ्गायामानन्दस्तम्भमोहमहावर्तविभ्रान्तचि
व्रजेश्वर्य्यामग्रतः उपविष्टयोस्तयोर्मध्ये प्रथमं रोहिण्याह-केति । ऐन्द्रमैश्वर्य्यमपि प्राप्य किम्पुनर्द्वारकैश्वर्य्यमिति नरलोकरीत्यै
॥३८॥ हन्तहन्तास्मत्पुत्राविमौ चिरात् स्वमातरमिव प्राप्य परमानन्दवारिधौ स्नातौ पुरोवर्तिन्यावप्यावान्नैवेक्षेते इयमपि चिरात् प्राप्त
प्रेमान्धा मत्तोऽपि कोटिगुणितमातृभाववती स्नेहसमुद्रनिमज्जिता सख्यावावां चिरात् प्रेक्ष्यापि न परिचिनोति
स्निग्धसम्भाषणभङ्ग्यैव रहस्यतत्त्वमिमां ज्ञापयामीति मनसि विमृश्य श्रीदेवकी किञ्चिदुच्चैराह एताविति । न दृष्टौ पितरौ या
युवयोः पित्रोः सम्प्रीणनादीनि प्राप्य हे भवति ! युवयोर्न्यस्तौ न्यासरीत्या स्थापितौ अकुत्रचभयौ न कुतोऽपि बिभ्यतौ
ऊषतुर्युवयोर्गृहे वासं चक्रतुः कथम्भूतयोः अक्ष्णोर्नेत्रयोः रक्षकं पक्ष्म यद्वत् तथा रक्षकयोः युक्तं च युवयोरेतत् यतः सतां
इति नास्ति वैषम्यं ततश्च चिरादपि प्रतिसम्भाषणमप्राप्य हे सखि देवकि ! सम्प्रत्यस्या आनन्दनिद्रा नोपशाम्यति तदलम
पुत्रावप्यस्याः प्रेमपाशबद्धौ वर्तेते तदावां तावद्बहिरत्युत्कण्ठितानां पृथाद्रौपद्यादिबन्धुजनतानां सम्मिलनार्थं प्रयावः नावयोर
। महासम्मर्दः खल्वेकत्रैवावस्थिताववकाशो योग्य इति श्रीरोहिण्युक्त्या देवकी तया सह निष्क्रान्तेति ज्ञेयम् ॥३९॥

व्रजेश्वरीं यशोद
कापीत्यन्वयः । अनिवृत्तां
न्यस्तौ च अत एव युवाभ्य
यतः सतां (उदारचिरतानां
युवयोः । अक्ष्णोः नेत्रयोः
नञ्समासः । तथा च न कु
पक्ष्मकृतं विधातारं शपन्ति
तत्स्वरूपतामापुरित्यन्वयः ।

तौ सुतौ परिरभ्य
अनिवृत्ताम् अबलाम् । प्रति
देहोत्पादकौ ययोः नित्यशरीरि
ततः पुत्रीभूते जनार्दने भर्त्ति
नामकरणजन्मर्क्षक्रियादिना पो
चक्रतुः कथम्भूतयोर्युवयोः अक्ष
युष्माकं पुत्रौ मुख्यौ इत्यत्राहतुः

ततो नन्दकृत्यमाह-त
कुरुत इति तयोर्बालत्वेनैवोपस्थित
कृत्वा शुचः शोकाश्रूणि विजहतु
पूर्वाभ्यो भिन्नप्रक्रमेण चकारात्
प्रभ्वी अतो देवतारूपत्वात्समेत्य
उक्तः ॥३७॥ तयोर्वाक्यं श्लोकद्वये
व्रजेश्वरीति माहात्म्यार्थं सम्बोधनं
प्रत्युपकारं न कृतवन्त इति यशोदा
को वा विस्मरेतेति यशोदानन्दाभ्
प्रत्युपकारः कर्तव्य इति तस्मिन्नपि
अनेन सर्वयादवाः भवद्भ्यां मैत्र
दर्शनमदर्शनमित्यदृष्टपितृत्वं युवयोरेव
अभ्युदयः शान्तिकादिभिः पोषणं
भवति इति सम्बोधनं हे भवति ! त्वम
अत एव पूतनादीनां भयं निवृत्तमि
शङ्कायामूचतुः न सतां परः स्व इति

गूढार्थदीपिनी

व्रजेश्वरीं यशोदां मैत्री पुत्रपालनादिरूपाम् । बाष्पमानन्दाश्रुकण्ठे ययोस्ते ॥३६॥ वां युवयोः मैत्रीं का विस्मरेत् न कापीत्यन्वयः । अनिवृत्तां प्रत्युपकारेणापि ॥३७॥ हे भवति ! यशोदे ! एतौ रामकृष्णौ जन्मत एव अदृष्टपितरौ युवयोरेव पार्श्वे न्यस्तौ च अत एव युवाभ्यामेव सम्प्रीणनादीनि प्राप्य कुत्रचिदपि भयरहितौ सन्तौ ऊषतुः निवासं चक्रतुरित्यन्वयः । उचितं चैतत् यतः सतां (उदारचिरतानां तु वसुधैव कुटुम्बकम् इति न्यायात्) उदाराणां स्वकीयः परकीय इति भेदो नास्ति । कथम्भूतयोः युवयोः । अक्ष्णोः नेत्रयोः पक्ष्म यद्वत् रक्षकं तथा रक्षकयोः । अत्र कुत्र चेत्यव्ययम् । 'किमः सामान्ये' इति चान्तं कुत्रार्थे । ततो नञ्समासः । तथा च न कुत्र च भयं ययोस्तौ इति अकुत्रचभयौ । हेति हर्षे ॥३८॥ यत् यस्य श्रीकृष्णस्य प्रेक्षणे दृष्टिषु व्यवधायकं पक्ष्मकृतं विधातारं शपन्ति आक्रोशन्ति ता गोप्योऽपि चिरात् कृष्णमुपलभ्य हृदीकृतं तम् अलं परिरभ्य गाढमालिङ्ग्य च तद्भावं तत्स्वरूपतामापुरित्यन्वयः । नित्ययुजाम् आरूढयोगिनामपि दुरापम् । अभीष्टं प्रेमास्पदम् । प्रेक्षणे प्रेक्षणार्थं तादर्थ्ये सप्तमी ॥३९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तौ सुतौ परिरभ्य नन्दः यशोदा च शुचः अश्रूणि विजहतुर्मुमुचतुः ॥३६॥ व्रजेश्वरीं श्रीयशोदाम् ॥३७॥ वां युवयोः अनिवृत्ताम् अबलाम् । प्रतिक्रिया प्रत्युपकृतिः ॥३८॥ मैत्रीमेव सङ्क्षेपतः आहतुः-हे भवति ! एतौ रामकृष्णौ न दृष्टौ पितरौ उत्पादकौ ययोः नित्यशरीरित्वात् अजावित्यर्थः हिशब्दस्यायमर्थः हि यतः भक्तमनोरथपूर्त्यर्थं पुत्ररूपेण प्रथममस्माभिः सङ्गतौ ततः पुत्रीभूते जनार्दने भक्तिं कर्तुमवतीर्णयोः युवयोः पित्रोः न्यस्तौ ततः सम्प्रीणनं चुम्बनादिना अभ्युदयं महोत्सवं नामकरणजन्मर्क्षक्रियादिना पोषणं दुग्धादिना पालनं शृङ्ग्यादिभ्यः प्राप्य अकुत्रचभयौ क्वचिदपि भयरहितौ भूत्वा ऊषतुः वासं चक्रतुः कथम्भूतयोर्युवयोः अक्ष्णोर्नेत्रयोः रक्षकं पक्ष्म यद्वत्तथा रक्षकयोः ननु शरीरतस्तु युष्माकमावयोः पुत्रौ न भवतः प्रथमसङ्गत्या अस्माकं पुत्रौ मुख्यौ इत्यत्राहतुः न सतां परः स्व इति सर्वेषामस्माकं पुत्रौ इति फलितार्थः ॥३९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो नन्दकृत्यमाह-तावात्मासनमिति । "ये यथा मां प्रपद्यन्ते" इति न्यायेन यशोदानन्दौ बालभावेनैव भगवद्भावनां कृतवन्त इति तयोर्बालत्वेनैवोपस्थितौ अतः सूक्ष्मत्वात् स्वक्रोडे उपवेश्य आत्मैवासनमिति ततो बाहुभ्यां परिरभ्य चकारादाघ्राणादिकमपि कृत्वा शुचः शोकाश्रूणि विजहतुः शोकं वा त्यक्तवन्तौ ॥३६॥ एवं पुरुषाणामन्योन्यसम्बन्धमुक्त्वा स्त्रीणामाह-रोहिणीति । अथ पूर्वाभ्यां भिन्नप्रक्रमेण चकारात् तत्सम्बन्धिन्योऽपि नन्वसमा कथं परिष्वक्तेत्याशङ्क्याह-व्रजेश्वरीमिति । व्रजस्य सर्वगोधनस्य स्वामिन्यौ अतो देवतारूपत्वात्समेत्यर्थः । ततस्तत्कृतां मैत्रीं स्मरन्त्यो बाष्पकण्ठ्यौ भूत्वा समूचतुः । अनयोः कायिकादित्रयव्यापार ऊचतुः ॥३७॥ तयोर्वाक्यं श्लोकद्वयेनाह-को विस्मरेतेति । वां युवयोर्नन्दयशोदयोरनिवृत्तां निवृत्तिरहितां प्रत्युपकाररहितामिति यावत् व्रजेश्वरीति माहात्म्यार्थं सम्बोधनं नन्दोऽपि निकट एव तिष्ठति क्षत्रियाणामेव दूरे व्यवहारः कदाचित्प्रत्युपकारसमर्था अपि यादवाः प्रत्युपकारं न कृतवन्त इति यशोदाया हृदये कृतघ्नता भासेत तन्निवृत्त्यर्थमूचतुः, अवाप्याप्यैन्द्रवमैश्वर्यमिति । ऐन्द्रमप्यैश्वर्यं प्राप्य को वा विस्मरेतेति यशोदानन्दाभ्यां यावानर्थो दत्तः सः स्वर्गादौ नास्त्येव स एव विस्मारको भवेत् यो महान् भवेत् अथ प्रत्युपकारः कर्तव्य इति तस्मिन्नपि पक्षे ऐन्द्रेऽपि पदे दत्ते न प्रत्युपकार इति न्द्रपदकीर्तनं यस्याः मैत्र्याः इह जगति प्रतिक्रियैव नास्ति अनेन सर्वयादवाः भवद्भ्यां मैत्र्या क्रीता इति निरुक्तं भवति ॥३८॥ तां मैत्रीं स्मारयति-एतावदृष्टपितराविति । बाल्ये जन्मादर्शनमित्यदृष्टपितृत्वं युवयोरेव पित्रोः पितृभ्यां सम्प्रीणनादिकं प्राप्य युवयोरेवोषतुः सम्यक् प्रीणनमलौकिकदानहिताचरणादिभिः अभ्युदयः शान्तिकादिभिः पोषणं नवनीतादिभिः लालनं स्तुतिचुम्बनादिभिः एतच्चतुष्टयं प्राप्य अक्ष्णोः पक्ष्म तथा त्वमिति भवतीति सम्बोधनं हे भवति ! त्वमनयोरक्ष्णोः पक्ष्मेव रक्षिकेति यशोदायाः अधिका स्तुतिः अत एव युवयोर्न्यस्तावेतावकुत्रचभयौ अत एव पूतनादीनां भयं निवृत्तमिति भावः नन्वेवं रक्षा स्वकीयस्यैव क्रियते इति कृष्णोऽस्माकमेव अस्माभिश्च नंतव्य इति इत्यमूचतुः न सतां परः स्व इति परस्वेत्यसद्बुद्धिः सतां कदापि न भवति ॥३९॥

श्रीसुबोधिनीसारः

आत्मा नन्दो महाभागा यशो दा च तौ सुतौ आसनमङ्कमारोप्य बाहुभ्यामालिंग्य शुचो विरहशोकान् तत्यजतुः ॥३६॥ रोहिणी देवकी च व्रजेश्वरीं यशोदां परिष्वज्य तया कृतां मैत्रीं स्मरन्त्यो साश्रुकण्ठ्यौ समूचतुः ॥३७॥ हे व्रजेश्वरि ! ऐन्द्र इन्द्रसम्बन्धि ऐश्वर्यमवाप्य प्राप्य वां युवयोर्दम्पत्योरनिवृत्तां कारणविरहेऽपि अनुवर्तमानां सन्ततां वा मैत्रीं का विस्मरेत् न कापि यस्या मैत्र्याः प्रतिविधिर्नास्ति ॥३८॥ न दृष्टौ पितरौ याभ्यां तौ एतौ रामकृष्णौ युवयोः पित्रोः न्यस्तौ निक्षिप्तौ अकुत्र च क्वापि भयं सम्प्रीणनमङ्गलोत्साहपोषणपालनानि प्राप्य ऊषतुः वसतः स्म । हे भवति ! अक्ष्णोर्नेत्रयोः पक्ष्म यद्वत् यथा ह युक्तमेतत् सतां सत्पुरुषाणां स्वः परो नास्ति ॥३९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्कृतां यशोदाकृतां पुत्रपालनादिरूपां मैत्रीं स्मरन्त्यौ बाष्पमानन्दाश्रुकण्ठे ययोस्ते रोहिणी देवकी चाथानन्तरं व्रजेश्वरीं यशोदां परिष्वज्य समूचयतुः ॥३६॥ तदुक्तिमेवाह–केति द्वाभ्याम् । हे व्रजेश्वरि ! वां युवयोर्मैत्रीं का विस्मरेत् ? तत्र हेतुत्वेन तस्य महत्त्वमाह–अनिवृत्तामिति । प्रत्युपकारेणापि निवृत्तिरहिता । तत्र हेतुमाह–ऐन्द्रमैश्वर्यमवाप्यापि इहलोके यस्याः मैत्र्याः प्रतिक्रिया कर्तुं न शक्यत इत्यर्थः ॥३७॥ मैत्रीमेवाहतुः–एताविति । हे भवति ! अदृष्टौ पितरौ याभ्यां तावेतौ रामकृष्णौ युवयोः पित्रोर्न्यस्तौ युवाभ्यामेव सम्प्रीणनादीनि प्राप्य अकुत्रचभयौ क्वचिदपि भयरहितौ भूत्वा ऊषतुर्वासं चक्रतुरित्यन्वयः । तत्र दृष्टान्तमाह–अक्ष्णोर्नेत्रयो रक्षकं पक्ष्म यद्वत् यथा तथा रक्षकयोर्युवयोरिति सम्बन्धः । उक्तार्थस्य प्रसिद्धि सूचयति–सतामिति । युक्तं चैतत् यस्मात् सतां परः स्व इति वैषम्यं नास्ति । सम्प्रीणनमपेक्षितप्रदानेन सन्तर्पणम् । अभ्युदयः पर्वसु गोप्रदानादिमहोत्सवः । पोषणं नवनीतादिभिः । लालनं स्तुतिचुम्बनादिभिः ॥३८॥ गोप्यश्च सर्वाः चिरात् बहुकालानन्तरमभीष्टं प्रियतमं कृष्णमुपलभ्य दृग् दृग्भिर्नैत्रद्वारैर्हृदि कृतं हृदये प्रवेशितम् अलं गाढमाश्लिष्य नित्ययुजां नित्यं मनो युञ्जानानां योगिनामपि दुरापं दुर्लभं तद्भावं भगवदात्मतामापुरित्यन्वयः । प्रियतमत्वे लिङ्गमाह–यस्य कृष्णस्य प्रेक्षणे प्रवृत्तासु दृशिषु नेत्रेषु व्यवधायकं पक्ष्मकृतं विधातारं शपन्ति स्मेति ॥३९॥

अन्वितार्थप्रकाशिका

ततो वसुदेवाहूते नन्दे उग्रसेनादिमेलार्थं बहिर्निर्गते रोहिणीदेवकीभ्यां यशोदामेलमाह–रोहिणीति । तत्कृतां यशोदाकृतां पुत्रपालनादिरूपां मैत्रीं स्मरन्त्यौ बाष्पमानन्दाश्रुकण्ठे ययोस्ते रोहिणी देवकी चाथानन्तरं व्रजेश्वरीं यशोदां परिष्वज्य समूचतुः रामकृष्णौ तु तत्रैव स्थितौ शृणुतः ॥३६॥ केति । हे व्रजेश्वरि ! ऐन्द्रमैश्वर्यमवाप्यापि इहलोके यस्याः मैत्र्याः प्रतिक्रिया कर्तुं शक्यत ताम् अनिवृत्तां प्रत्युपकारेण निवृत्तिरहितां निवृत्तिकारणे सत्यप्यनुवर्तमानां वा वां युवयोः मैत्रीं का विस्मरेत । तदाह ॥३७॥ तत्कृतां मैत्रीमेवाहतुः–एताविति । हे भवति ! न दृष्टौ पितरौ याभ्यां वस्तुतः अजन्मत्वादेवादृष्टपितरौ । कबभाव आर्ये तावेतौ रामकृष्णौ अक्ष्णोर्नेत्रयोः रक्षकं पक्ष्म यद्वत् यथा तथा रक्षकयोर्युवयोः पित्रोर्न्यस्तौ युवाभ्यामेव सम्प्रीणनमपेक्षितप्रदानेन सन्तर्पणम् अभ्युदयः पर्वसु गोप्रदानादिमहोत्सवः पोषणं नवनीतादिभिः लालनं स्तुतिचुम्बनादिभिः एतानि सम्प्रीणनादीनि प्राप्य अकुत्र च भयौ क्वचिदपि भयरहितौ भूत्वा ऊषतुर्वासं चक्रतुः । युक्तं चैतत् युवयोर्हि यस्मात् सतां परः स्व इति वैषम्यं नास्ति अत्र देवक्यभिप्रेतोऽर्थः स्फुट एव । यशोदायास्तु स्ववासनानुसार्येवार्थः । स्फुरति स्म स चेत्थम् । एतौ युवयोर्युवाभ्यां पितृभ्यां न्यस्तावस्मास्वर्पितौ । यौ पूर्वं युवयोरेव सम्प्रीणनादीनि प्राप्यापि अधुना अदृष्टपितरौ अधुना युवयोः पित्रोरकृतदृष्टी सन्तौ ऊषतुस्तत्र वासं स्वीकृतवन्तौ । अत्र तादृक् सौख्याभावेऽपीति भावः । हेतुमाह–नेति । सतां परः पित्रादिभिन्नः स्वः पित्रादिः इत्य रीतिरस्तीति इत्युक्त्वा रामकृष्णौ तल्लालनार्थं तत्रैव त्यक्त्वा रोहिणीदेवक्यौ निष्क्रान्ते इति ज्ञेयम् ॥३८॥ ततः समीप एव व्यवहितस्थां विरहखिन्ना गोपीः वीक्ष्य रामे निष्क्रान्ते गोपीनां दशामाह–गोप्य इति । यस्य श्रीकृष्णस्य प्रेक्षणे प्रवृत्तासु दृशिषु नेत्रेषु व्यवधायकपक्ष्मकृतं विधातारं शपन्ति स्म ॥३९॥

व्रजेश्वरीं यशोदाम्
विस्मरेत् । ऐन्द्रमैश्वर्यम् अव
तदैश्वर्यदानेनापि कृतमित्रत्वा
भवति यशोदे ! अदृष्टौ पितरौ
भूत्वा ऊषतुः निवासं चक्रतुः
स्वः स्वकीयोऽयं परः परकीय
दर्शने जाते सति दृशिषु नेत्रेषु
सर्वास्ताः तद्भावं देहविस्मृत्या

देवकीति ॥ देवकी
बाष्पमानन्दाश्रु कण्ठे ययोस्तथाभू
प्राप्तामित्यर्थः । मैत्रीं का वा स्त्री
लोके यस्या मैत्र्याः प्रतिक्रिया प्र
यद्वत् रक्षकमिति शेषः । तद्वत्
सम्प्रीणनं च अभ्युदयश्च पोषणं
प्रसिद्धौ । हि यस्मात् सतां भवादृश
तर्पणम् । अभ्युदयो महोत्सवः ।
दर्शनविधाने दृशिषु स्वनेत्रेषु प्रवृ
गोप्योऽपि चिरात् अभीष्टमतिप्रेमा
लब्ध्वेत्यर्थः । दृग्भिर्नेत्रद्वारैः हृदि
युञ्जानानां योगिनामपि दुरापं दुर्लभं

बडभागीनी श्रीयशोदाज
भुजाओंसे दृढ आलंगन किया
और देवकीजीने ब्रजरानी श्रीयश
सौहार्द का व्यवहार किया था
लगे ॥३७॥ स्नेह सौहार्द का व्य
एश्वर्य समर्पण करके किसी भी प्र
उपकारको भूल सके ॥३८॥ भग
हे ब्रजरानी ! वासुदेवजीने धरोहर
सहृदय दम्पतीने हम दोनोंकी इस
ब्रजनेश्वरी यशोदाजी क्या कहुं ?

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

व्रजेश्वरीं यशोदाम् ॥३६॥ हे व्रजेश्वरि ! अनिवृत्तां निवृत्तिहेतौ सत्यपि सदानुवर्तमानां वां युवयोः मैत्रीं हितारचरणं का विस्मरेत्। ऐन्द्रमैश्वर्यम् अवाप्य प्राप्यापि यस्याः मैत्र्याः प्रतिक्रिया प्रत्युपकारः इहलोके नास्ति ततः अधिकं समग्रैश्वर्यमज्ञात्वा श्वर्यदानेनापि कृतमित्रत्वायाः तव प्रत्युपकारं कर्तुं वयं न शक्नुम इत्यर्थः ॥३७॥ नन्दयशोदाकृतां मैत्रीमूचतुः- एताविति । हे भवति यशोदे ! अदृष्टौ पितरौ याभ्यां तौ युवयोः पित्रोर्न्यस्तावेतौ रामकृष्णौ सम्प्रीणनादीनि प्राप्य । अकुत्रचभयौ कुत्रापि भयहीनौ ऊषतुः निवासं चक्रतुः । अक्ष्णोर्नयनयोः रक्षकं पक्ष्म यद्वद्यथा तथा रामकृष्णौ रक्षकयोः युवयोः एतद्योग्यम् । यतः सतां स्वकीयोऽयं परः परकीयोऽयमिति विषमः स्वभावो नास्ति ॥३८॥ गोप्य इति । अभीष्टं कृष्णं उपलभ्य यस्य कृष्णस्य प्रेक्षणे जाते सति दृशिषु नेत्रेषु पक्ष्मकृतं विधिं शपन्ति दृग्भिः लोचनद्वारैः हृदि हृदये कृतं प्रवेशितम् अलं परिरभ्य आलिंग्य तद्भावं देहविस्मृत्या तत्स्वरूपसमाधिमापुः तम् । कथम्भूतं नित्ययुजां सदा तं ध्यायतामपि दुरापं दुष्प्रापम् ॥३९॥

भगवत्प्रसादाचार्यविरचिंता भक्तमनोरञ्जनी

देवकीति ॥ देवकी रोहिणी चापि व्रजेश्वरीं यशोदां परिष्वज्य तत्कृतां व्रजेश्वर्या कृतां मैत्रीम् अथ कात्स्न्र्येन स्मरन्त्यौ नन्दाश्रु कण्ठे ययोस्तथाभूते सत्यौ समूचतुः ॥३६॥ उक्तिमेवाह ॥ केति ॥ हे व्रजेश्वरि ! वां युवयोः अनिवृत्तां यावद्देहपातमनुवृत्तिं त्यर्थः । मैत्रीं का वा स्त्री विस्मरेत । न कापीत्यर्थः । तत्र हेतुत्वेन तां विशिनष्टि । ऐन्द्रमिन्द्रसम्बन्धि ऐश्वर्यं दत्त्वा अपि इह यस्या मैत्र्याः प्रतिक्रिया प्रत्युपकृतिः न अस्ति ॥३७॥ मैत्रीं प्रपञ्चयते एताविति । हे भवति हे यशोदे ! अक्ष्णोर्नेत्रयोः पक्ष्म रक्षकमिति शेषः । तद्वत् रक्षकयोः युवयोः पित्रोः न्यस्तौ न दृष्टौ पितरौ याभ्यां तौ एतौ रामकृष्णौ भवद्भ्यां सकाशात् नं च अभ्युदयश्च पोषणं च पालनं च तानि प्राप्य अकुत्र च भयौ क्वचिदपि भयरहितौ भूत्वा ऊषतुः वासं चक्रतुः । स्म । हि यस्मात् सतां भवादृशसाधूनां परः स्वः न । परकीयात्मीयतात्मकं वैषम्यमेव नास्ति । अत्र सम्प्रीणनमपेक्षितपदार्थार्पणेन म्। अभ्युदयो महोत्सवः । पुष्टिकृद्रसार्पणेन पुष्टीकरणं पोषणम् ॥३८॥ गोप्य इति ॥ यत्प्रेक्षणे यस्य श्रीकृष्णस्य प्रकर्षेण विधाने दृशिषु स्वनेत्रेषु प्रवृत्तास्विति शेषः । पक्ष्मकृतं दर्शनान्तरायकृत्पक्ष्मविधातारं ब्रह्माणं शपन्ति । तथाभूताः गोप्यश्च पि चिरात् अभीष्टमतिप्रेमास्पदं कृष्णम् उपलभ्य तीव्रदारिद्र्यः पुरुषः दैवोपलब्धचिरनष्टचिन्तामणिं सम्प्राप्येव श्रीकृष्णं त्यर्थः । दृग्भिर्नेत्रद्वारैः हृदि कृतं हृदये प्रवेशितं तं श्रीकृष्णमित्यर्थः । अलमतिशयेन परिरभ्याश्लिष्य नित्ययुजां नित्यं मनो नां योगिनामपि दुरापं दुर्लभं तद्भावं कात्स्न्र्येन तद्विग्रहावगाहनात्मकमभिप्रायं सर्वाः आपुः सम्प्रापुः ॥३९॥

कृष्णप्रिया

बडभागीनी श्रीयशोदाजी और महात्मा श्रीनन्दबावाने दोनों पुत्रोंको अपने उत्सगमें बैठा लिया और से दृढ आलंगन किया और दृढकालसे न मिनेकी जो व्यथा दुःख था वह सब दूर हो गाय ॥३६॥ रोहिणी देवकीजीने ब्रजरानी श्रीयशोदाजी को अपने वक्षःस्थलोंमें भर लिया । यशोदारानीजीने उन लोगोंके साथ जो र्द का व्यवहार किया था उसका स्मरण करके दोनोंका गला भर आया और वे दोनों श्रीयशोदाजीसे कहने ॥३७॥ स्नेह सौहार्द का व्यवहार किया है वह कभी मिटनेवाला नहीं है । उसका बदला स्वर्गपति इन्द्र का समर्पण करके किसी भी प्रकार चुका नहीं सकती । व्रजरानीजी कहिये ऐसा कौन कृतघ्न है जो आपके उस को भूल सके ॥३८॥ भगवती श्रीदेवकीजी दैन्यपूर्ण और दिव्यभावसे व्रजरानीजीको निवेदन कर रही है - रानी ! वासुदेवजीने धरोहरके रूपमें इन्हें आप वात्सल्यपूर्ण दम्पत्ती के पास रख छोडा था, उस समय आप दम्पतीने हम दोनोंकी इस प्रकार वात्सल्यसे रक्षा की, जैसे पलकें पुतलियोकी रक्षा करती है । नन्दराजी यशोदाजी क्या कहुं ? आप पुण्यशील आप्तजनोंने ईसी प्रकार पालन किया - रक्षण किया पोषण

कृष्णप्रिया

किया खिलाया पिलाया लालन किया दुलार किया रिझाया मनाया और इनके मंगलके विविध प्रकारके उत्स मानाये । सच काहा जाय तो इनके मातापिता आप दम्पति ही है । आप दोनों निगराहमें किसीकी आंच तक न लगी और दोनों सर्वथा निर्भय रहे; एसा करना आप लोगोंके अनुरूप ही था । क्योंकि सज्जनोंकी मतिमें य अपना यह पराया ऐसा भेद भाव कभी नहीं रहता । नन्दरानीजी सत्य बात है कि आप लोग परम संत है ॥३

[1]श्रीशुक उवाच

गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपन्ति[2] ।
दृग्भिर्हृदीकृतमलं परिरभ्य सर्वा[3]स्तद्भावमापुरपि नित्ययुजां दुरापम् ॥४०॥
भगवांस्तास्तथाभूता विविक्त उपसङ्गतः[4] । आश्लिष्यानामयं पृष्ट्वा प्रहसन्निदमब्रवीत् ॥४१॥
अपि[5] स्मरत नः सख्यः स्वानामर्थचिकीर्षया[6] । गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतसः ॥४२॥
[7]अप्यवध्यायथास्मान् स्विदकृत[8]ज्ञाविशङ्कया । नूनं भूतानि भगवान् युनक्ति वियुनक्ति च ॥४३॥

कर्दमक्षमा

श्रीशुकः, उवाच ।

च, गोप्यः, यत्प्रेक्षणे, दृशिषु, पक्ष्मकृतम्, शपन्ति, चिराद्, अभीष्टम्, तम्, कृष्णम्, उपलभ्य, सर्वाः, दृग्भिः, हृदीकृत अलम्, परिरभ्य, नित्ययुजाम्, अपि, दुरापम्, तद्भावम्, आपुः ॥४०॥ तथाभूताः, ताः, विविक्त, उपसङ्गताः, आश्लिष्य, अनाम पृष्ट्वा, प्रहसन्, भगवान्, इदम्, अब्रवीत् ॥४१॥ सख्यः, स्वानाम्, अर्थचिकीर्षया, शत्रुक्षपणचेतसः, नः, चिरायितान्, गतान्, अ स्मरत ॥४२॥ अकृतज्ञा, इति, विशङ्कया, अपिस्वित्, अस्मान्, अवध्यायथ, नूनम्, भगवान्, भूतानि, युनक्ति, च, वियुनक्ति ॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अभीष्टत्वे लिङ्गं यद्यस्य श्रीकृष्णस्य प्रेक्षणे दृशिषु नेत्रेषु व्यवधायकं पक्ष्मकृतं विधातारं शपन्ति दृग्भिर्नेत्रद्वारैर्हृदि हृदये प्रवेशितं परिरभ्य तद्भावं तदात्मतां प्रापुः अपि नित्ययुजामारूढयोगिनामपि ॥४०-४१॥ चिरायितान् विलम्बितान् अ शत्रूणां पक्षस्य क्षपणे चेतो येषां तान् ॥४२॥ अपिस्वित् अस्मानवध्या यथावजानीथ अकृतज्ञा एत इत्याविशङ्कया ईषच्छङ्क शङ्कामात्रं निश्चितमेवैतत्परित्यज्य गतत्वादित्यत आह-नूनमिति ॥४३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

लिङ्गं हेतुः । व्यवधायकं व्यवधानकर्तारम् । प्रेक्षणे तादर्थ्ये सप्तमी प्रेक्षणार्थम् । तदात्मतां तद्रूपताम् । आरूढयोगिनामि भक्त्यतिशयो दर्शितः ॥४०॥ ता गोप्यः । तथाभूताः प्रेमरताः । इदं वक्ष्यमाणम् ॥४१॥ अत्र चिरायितत्वे ॥४२॥ एतेऽस्म बहुत्वं स्वस्यानेकरूपत्वबोधनाय रासक्रीडायां ताभिर्दृष्टचरत्वात् । एतदकृतज्ञत्वम् । भगवान् कालः ॥४३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत्रोभयथापि श्रीव्रजेश्वर्य्याः प्रत्युत्तरं न युक्तमिति । किंवा तदानीं तया चिरात्पुत्रदर्शनपरमाविष्टया किञ्चिदपि न न किञ्चिदप्युक्तमित्येवं तदनुक्त्वा श्रीऋषिः श्रीयुक्त ऋषिः सर्वज्ञ उवाचेति श्रीगोपीनां श्रीकृष्णस्य च मिथो भाव सम्यग्वेत्तीति तदुक्तौ दृढविश्वास एव कार्य्य इति भावः । एवमग्रेऽपि ज्ञेयं ततश्चातिविरहतापक्षीणतमानां प्रतिक्षणमाश्वासन

---

१. ऋषिरुवाच-गो. प्रे. टी. । २.शपन्त्यः-वीर. । ३. सद्यः-विज. । ४. सङ्गताः-विज. । ५. स्मरथ-श्रीधर. वंशी. विज. जीव. । ६. विज. । ७. अवबुद्ध्य यथास्मासु इदमेव विशङ्क्ये-विज. । ८. दकृतज्ञविशङ्कया-वीर. ।

सन्धुक्षितप्राणानां चिरादाग
तेऽन्ये गोप्यश्चेति स्वानन्दपू
लब्ध्वा यद्वा अभीष्टं निजप्रा
नैरन्तर्य्यादिना ईक्षणे निमि
दूरीकृतमित्यभिप्रायेण यद्वा
दीर्घश्छान्दसः अलमित्यर्थं
चिरविरहार्तिभरेण सर्वासामेव
धृतमेवाधुना दृग्भिः तं प
चिरमानन्दमूर्च्छामवापुरित्यर्थः
वासविशेषं नीतानां तासां श्री
विविक्ते नक्तं निर्जनतां गते प्र
युगपदालिङ्ग्य ततश्च मुहू रुदत
विरहस्य हरणोपायः समुपदिष्ट
पृष्ट्वा ततश्च मृदुसंलापादिपरिपाटी
॥४१॥ अपि किं न इति बहुवच
सख्य इति ताभिरात्मनः स्मरणय
भवाम इत्याह-स्वानामिति । भव
कर्तुमिच्छया गतानपि किञ्च तत
श्रीवसुदेवपुत्रत्वं विखाप्य विवाह
न सम्भवेदेव किन्तु दोषेणैव स्मरथे
सर्वतः विशिष्टा या शङ्का तया
लोकवल्लीलाकैवल्यरीतिमनुसरन् त

भगवान् सर्वज्ञः, भक्तवश्य
प्राप्ताः विविक्ते दिनान्तरे तद्दिन एव
सुव्यक्तस्य महामनोदुःखस्यापृच्छ
शोकादिलाघवार्थम्, यद्वा, अकारप्र
इदमत्यद्भुतम् ॥४०॥ अपि किम्, नः
ताभिरात्मनः स्मरणयोग्यत्वं बोधयति
स्वानामिति । गतानपि, किञ्च, चिराय
किन्तु दोषेणैव स्मरथेत्याशयेन, किंवा
आ-शब्दो वि-शब्दश्चात्मनोऽकृतज्ञत्वा
तया, किंवा, अविशङ्क्यानिशचयेनेत्य
युष्माकं प्रेमोपकारादिविस्मरणात् एतच्

विविध प्रकारके उत्सव
किसीकी आंच तक न
सज्जनोंकी मतिमें यह
ोग परम संत है ॥३९॥

॥४०॥
सन्निदमब्रवीत् ॥४१॥
क्षक्षपणचेतसः ॥४२॥
क्ति वियुनक्ति च ॥४३॥

भ्य, सर्वाः, दृग्भिः, हृदीकृतम्,
सङ्गताः, आश्लिष्य, अनामयम्,
नः, चिरायितान्, गतान्, अपि,
न, युनक्ति, च, वियुनक्ति ॥४३॥

ारं शपन्ति दृग्भिर्नेत्रद्वारैर्हृदि कृतं
चरायितान् विलम्बितान् अत्र हेतुः
एत इत्याविशङ्क्या ईषच्छङ्क्या न

तद्रूपताम्। आरूढयोगिनामित्यनेन
चिरायितत्वे ॥४२॥ एतेऽस्मानिति
कालः ॥४३॥

नपरमाविष्टया किञ्चिदपि न श्रुतमिति
श्रीकृष्णस्य च मिथो भावतत्त्वादि
ातमानां प्रतिक्षणमाश्वासनसन्तर्पण

धर. वंशी. विज. जीव. । ६. चिकी

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न्युक्षितप्राणानां चिरादागतानां नूनं श्रीभगवतैवोद्धवद्वारा निजान्तर्वासं नीतानां श्रीगोपीनां समागममाह-गोप्यश्चेति । न केवलं ऽन्ये गोप्यश्चेति स्वानन्दपूर्तिव्यञ्जनं त्वर्थे वा चशब्दः सर्वतो विशेषात् चिरात् अभित इष्टं सर्वतो भावेन द्रष्टुं वाञ्छितम् उप समीपे लब्ध्वा यद्वा अभीष्टं निजप्राणकोटितोऽप्यधिकं प्रियं चिरादुपलभ्य तासां सर्वतोऽपि प्रेमाधिक्यं दर्शयति-यदिति । यस्य प्रकर्षेण सेन्तर्य्यादिना ईक्षणे निमित्ते दृशिष्विति बहुत्वं तासां बाहुल्यात् तच्चास्माकमेकस्या अप्येकस्यां दृशौ कथं पक्ष्म न रीकृतमित्यभिप्रायेण यद्वा अतिप्रेमतृष्णास्वभावेन तत्प्रेक्षकाणां सर्वेषामेवापेक्षया दृष्टिमात्रे कथं पक्ष्माणि कृानीति हृदी कृतमिति दीर्घश्छान्दसः अलमित्यर्थं परिरभ्य अन्तः परिरम्भणस्वातन्त्र्यात् सर्वा इति वर्गशो बहुधा भिन्ना अपि अविशेषेणैवेत्यर्थः । चिरविरहार्तिभरेण सर्वासामेक्यापादनात् तद्भावं तन्मयताम् आत्मादिविस्मृत्या तदेकपरिस्फूर्तेः अन्यत्तैः यद्वा हृदि कृतं सदा चित्ते धृतमेवाधुना दृग्भिः तं परिरभ्य परमासक्त्या सर्वतो निरीक्ष्य तद्भावं तं भावं प्रेम्णः परमं काष्ठाविशेषं प्राप्तः तेन चिरमानन्दमूर्च्छामवापुरित्यर्थः । नित्ययुजां नित्यसंयोगवतीनां रुक्मिण्यादीनामपि दुरापम् अन्यत् समानम् ॥४०॥ ततश्च सान्त्वनाय वासविशेषं नीतानां तासां श्रीभगवता स्वयमेव यत्सान्त्वनं तदाह-भगवान् सर्वज्ञः तथाभूताः स्वविरहेणात्यन्तदुरवस्थां प्राप्ताः विविक्ते नक्तं निर्जनतां गते प्रदेशविशेषे उप सामीप्ये सङ्गतस्सन् आश्लिष्य प्रेमवैयग्र्येण मूर्च्छाभङ्गार्थं प्रत्येकं वैभवविशेषेण युगपदालिङ्ग्य ततश्च मुहू रुदतीर्मूर्च्छन्तीः सान्त्वयित्वाऽचिरेण स्वस्थायमानाश्च दृष्ट्वेति ज्ञेयम् अनामयं पृष्ट्वेति पूर्वं मयोद्धवद्वारा विरहस्य हरणोपायः समुपदिष्ट एव तत एतत्कार्श्यादिहेतुः स न भवतीति व्यञ्जना निजापराधसङ्गोपनाय साधारणामयराहित्यमेव पृष्ट्वा ततश्च मृदुसंलापादिपरिपाटीभिः क्षणकतिपये गमिते सति प्रहसन् प्रेति प्रारम्भे तासां शोकादिलाघवार्थं स्मयमानः इदमत्यद्भुतम् ॥४१॥ अपि किं न इति बहुवचनं बहुसङ्गित्वेन स्वस्यैव बहुत्वमङ्गीकृत्य केवलस्वेच्छया झटित्यागमनं न समभवदिति सूचितं हे सख्य इति ताभिरात्मनः स्मरणयोग्यतां बोधयति आश्वासयति चापराधं क्षमापयति च किन्तु महापराधेन स्मरणयोग्या न खलु भवाम इत्याह-स्वानामिति । भवतीरनादृत्य स्वानां श्रीव्रजेश्वरभ्रातृत्वेन श्रीवसुदेवादिलक्षणज्ञातीनां महाशत्रुकंसवधरूपस्यार्थस्य कर्तुमिच्छया गतानपि किञ्च तत्प्रसङ्गेन चिरायितानपि चिरायितत्वे हेतुः शत्रुपक्षेति तच्चेतस्त्वेनैव यादवानन्यांश्च सहायीकर्तुं श्रीवसुदेवपुत्रत्वं विखाप्य विवाहाभासादिकञ्चात्र कृतवन्तः स्म इति भावः ॥४२॥ अहो कृतज्ञतादिसद्गुणहीनस्य मम गुणैः स्मरणं न सम्भवेदेव किन्तु दोषेणैव स्मरथेत्याशयेन सकातर्य्यं निजापराधक्षमापनार्थमाह-अपीति । अपिस्वित् वितर्के अकृतज्ञ इति आ सर्वतः विशिष्टा या शङ्का तया किंवा अविशङ्कया निश्चयेनेत्यर्थः । तत्र च प्रेमवशः सन् सम्भ्रमान्निजैश्वर्य्यमननुसन्दधानो लोकवल्लीलाकैवल्यरीतिमनुसरन् तत्राप्युत्तरोत्तरमपश्यंस्तत्त्वज्ञानरीत्यैव सान्त्वयति-नूनमिति निश्चये भगवानीश्वरः ॥४३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवान् सर्वज्ञः, भक्तवश्यतादि (नित्ययुजां भक्तानां प्रेमवश्यतादि-(ग) ।) गुणनिधिर्वा, तथाभूतः स्वविरहेणात्यन्तदुरवस्थां प्राप्ताः विविक्ते दिनान्तरे तद्दिन एव वा निर्जनस्थाने उप दाक्षिण्येन सङ्गतः सन् अनामयं देहनैरुज्यमेव, न त्वन्यत्, सुखादिकम्; मुख्यकस्य महामनोदुःखस्यापृच्छात्वात्, किंवा, अत्यन्तकार्श्यादिना देहे महाव्याधिमननात् प्रहसन् स्मयमानः तासां शोकादिलाघवार्थम्, यद्वा, अकारप्रश्लेषेणाप्रहसन् सदा सुप्रसन्नमुजोऽपि तासां दुरवस्थावलोकनेन विषण्णमुखः सन्नित्यर्थः । इदमत्यद्भुतम् ॥४०॥ अपि किम्, नः- इति बहुत्वं श्रीबलदेवाद्यपेक्षया, यद्वा, ताभिः स्मर्तव्यस्यात्मनो बहुमानात्। हे सख्य इति ताभिरात्मनः स्मरणयोग्यत्वं बोधयति आश्वासयति वा, अपराधं क्षमयति वा। महापराधेन तु स्मरणयोग्या न खलु भवाम इत्याह-स्वानामिति। गतानपि, किञ्च, चिरायितानपि, किञ्च शत्विति ॥४१॥ अहो कृतज्ञतादिसद्गुणहीनस्य मे गुणैः स्मरणं न सम्भवेदेव, किन्तु दोषेणैव स्मरथेत्याशयेन, किंवा सख्येन स्मरणं सम्भाव्य सकातर्यं निजापराधक्षपणार्थमाह-अपीति। अपिस्वित् वितर्के, आ-शब्दो वि-शब्दश्चात्मनोऽकृतज्ञत्वातिशयपरिहाराय, न च तासामनुनयार्थम्; यद्वा, अकृतज्ञा इति आ सर्वतः विशिष्टा या शङ्का तया, किंवा, अविशङ्क्यानिशचयेनेत्यर्थः । यद्वा, अकृतज्ञा अतिमूढा येऽवयो मेषास्त एव किलैत इति शङ्क्या मत्येत्यर्थः । युष्माकं प्रेमोपकारादिविस्मरणात् एतच्चानुनयचातुर्येण आर्तिभरेण वा तत्र चात्मनो दोषपरिहाराय सर्वेषामस्वातन्त्र्यम्। किंवा,

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रियजनप्रेमपरवशः परमार्त्या निजैश्वर्यादिकं विस्मृत्याह–नूनमिति निश्चये, भगवान् ईश्वरः कालो वा, वियुनक्तीत्यस्य पश्चादुक्तिः संयोगे सत्येव वियोगसम्भवात्, तथा वियोगस्यैव प्रस्तुतत्वात् एवमग्रेऽपि ॥४२॥ एतदेवोक्तपोषानुवादन्यायेन सदृष्टान्तमाह-वायुरिति। घनानीकं मेघसमूहम्, भूतकृत् ईश्वरः सृष्टिहेतुत्वेन काल एव वा ॥४३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अक्ष्णोः पक्ष्म यथा रक्षकं तद्वद्युवामित्यर्थः । पक्ष्मकृतं पक्ष्मकर्तारं ब्रह्माणं हृदि नित्ययुजां नित्ययुञ्जानानां योगिनाम् ॥४०-४२॥ अवध्यायथ अवध्यानं प्रीत्या चिन्तनम् ॥४३-४५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

गोप्यश्चेति। अभीष्टं प्रियतमं कृष्णम् उपलभ्य दृष्ट्वा यस्य कृष्णस्य प्रेक्षणे प्रवृत्तासु दृशिषु स्वनेत्रेषु व्यवधायकपक्ष्मकृ विधातारं शपन्त्यः दृग्भिर्नेत्रद्वारैर्हृदि कृतं हृदये प्रवेशितमाश्लिष्य नित्ययुजां नित्यं मनोयुञ्जानानां योगिनामपि दुरापं दुर्लभं तद्भावं कात्स्न्र्येन तद्विग्रहावगाहनात्मकमभिप्रायं प्रापुः ॥४०॥ भगवानिति । तथाभूताः आत्मभावमापन्नाः ताः गोपीर्विविक्ते एकान्ते उपसङ्गतः अनामयमारोग्यं पृष्ट्वा इदं वक्ष्यमाणमब्रवीत् ॥४१॥ तदेवाह–अपीति षड्भिः । हे सख्यः ! नोऽस्मानपि स्मरथ किमित्यर्थः । क्षणसौहृदान् युष्मान्नानुस्मरामेत्यत आत्मनो विशिनष्टि–सतां साधूनां स्वानामर्थं प्रयोजनं कर्तुमिच्छ चिरायितान् विलम्बितान् तत्र हेतुः शत्रुपक्षक्षपणे चेतो येषां तानस्मान् ॥४२॥ अकृतज्ञविशङ्कयाऽकृतज्ञः कृतज्ञानन्यस्तद्विशङ्कया कृतघ्ना एवैते इति बुद्ध्येत्यर्थः । अवध्यायथापिस्विदवजानीथ किम् इत्यर्थः । अवपूर्वाद्ध्यायतेर्लोण्मध्यमबहुवचनं न शङ्क्यमानं निश्चितमेतत्परित्यज्य गतत्वादित्यत आह–नूनमिति । भूतानीति द्वितीयान्तम् ॥४३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नित्ययुजां नित्यसंयुक्तताद्यभिमानिनीनां पट्टमहिषीणामपि ॥४०॥ प्रहसन् स्वापराधस्य तुच्छताकरणाय कृत्रिमं हसन् ॥४१-४४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

गोप्यश्चेत्यादि । गोप्यः कृष्णम् उपलभ्य तद्भावम् आपुः तं प्रसिद्धं भावं तद्भावं कीदृशम् ? नित्ययुजां रुक्मिणीप्रमुखानामपि दुरापं दुर्लभं पुनः कीदृशम् ? अभीष्टं वाञ्छितं चिरात् चिरकालेन किं कृत्वा दृग्भिर्हृदि कृत्वा परिरभ्य ॥४०॥ भगवानित्यादि । भगवान् अचिन्त्यपरमैश्वर्य्यः तास्तु दृग्भिरेव परिरेभिरे अतो युगपत् घटते अयमेकस्तासु बहीकर यदा शिश्लेष तेन भगवच्छब्दोपादानं तत्रापि तदानीं विविक्तस्थलाभावात् भारतप्रजानामेव तत्र सङ्गतेः सर्वेषां द्वारकावासि च तथापि तत्रैव विविक्तस्थलमभूत् अनामयं पृष्ट्वा प्रहसन्नित्यर्थः । मद्विरहे कथमासामनामयं तदि तत्पृच्छामीति स्वावेदना प्रहासः ॥४१॥ अपीत्यादि । हे सख्यः ! यद्यपि कठिनत्वात् स्मृतियोग्योऽहं न भवामि तथापि निजसौजन्यात् किं स्म स्मरणयोग्यत्वे हेतुमाह–स्वानामित्यादि । स्वानां ज्ञातीनां प्रयोजनचिकीर्षया आगतान्, तत्रापि चिरायितान् तत्र हेतुः शत्रुपक्षे अतो ज्ञातिप्रयोजनशत्रुवधादिबहिरङ्गकार्यहेतोर्भवतीनामासङ्गस्त्यक्त इति प्रेमनिरपेक्षोऽहं स्मर्तुमयोग्य एवेति वाक्यार्थः ॥ प्रेम्णा स्मरणं तु दूरादास्ताम् अवज्ञापूर्वकमपि किं स्मरतेत्याह–अप्यवध्यायतेत्यादि । अकृतज्ञया विशङ्कया अकृतज्ञोऽयं या आ सम्यक् विशेषणशङ्कात्रासः तथापि किंस्वित् अवध्यायत अवजानीत अवज्ञा च न योग्या नाहमकृत दैवयोगेनैवैतदुपपन्नमित्याह–भूतानीत्यादि ॥४३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

तमेवार्थं प्रकटयति–भगवानचिन्त्यपरमैश्वर्यः । एतेनैतदुक्तं भवति–ताः सर्वा युगपदेव हृदि परिरेभिरे अयमपि चेत

सर्वा युगपत् परिष्वजते
निर्जने वस्तुतस्तदानीं
प्रत्येकं युगपदनामयं पृ
यद्यपि स्मृतियोग्यो न भ
हेतुः–शत्रुपक्षक्षपणे चेतो
अवज्ञापूर्वकमपि स्मरणं
आ सम्यक् विशेषेण शङ्क
द्रढयति–वायुरित्यादि ॥४

ततश्चारादेव तत्रैव
विदग्धचूडामणौ श्रीबलदे
निर्देशस्तद्वाक्य एव परमत
इत्यतस्तासामसाधारणं लक्ष
तेन दर्शने तावन्मात्रसमय
विधातर्य्यपि अभिशापो भ
दृग्भिरेव द्वारैर्हृदीकृतं हृदय
नित्ययुजामात्मारामशिखाम
इति तस्मिन् पुनरपीर्ष्या ध्वनि
क्वचन विविक्तप्रदेशे
पूर्वश्लोकोक्तलक्षणामानन्द
प्रबोध्येत्यर्थः । अनामयं मद्वि
मत्पितुर्ज्ञातीनां वसुदेवादीना
चेतो येषां तान् अत
रात्रिन्दिवमस्मत्स्मरणविदीर्ण
वयं तु त्वां न स्मरामः त्वां वि
अपिस्वित् अस्मान् अवध्याय
शृणुतेत्याह–नूनमिति ॥४३॥

तथाभूताः प्रेमरताः इ
स्मरथ। कथम्भूतान् अर्थचिकीर्ष
चेतो येषां तान् ॥४१॥ अकृतज्ञ
नास्माकं दोषः यतो भगवानेव प्रा
मेलयित्वा भूयः आक्षिपते वियोज

नक्तीत्यस्य पश्चादुक्तिः
न्यायेन सदृष्टान्तमाह-

नत्ययुञ्जानानां योगिनाम्

त्रेषु व्यवधायकपक्ष्मकृतं
योगिनामपि दुरापं दुर्लभं
ापन्नाः ताः गोपीर्विविक्ते
हे सख्यः ! नोऽस्मानपि
मर्थं प्रयोजनं कर्तुमिच्छा
ज्ञः कृतज्ञानन्यस्तद्विशङ्क्या
ध्यमबहुवचनं न शङ्कामात्रं

पराधस्य तुच्छताकरणाय

ावं कीदृशम् ? नित्यजुषां
त्वा दृग्भिर्हृदि कृत्वा परिरभ्य
टते अयमेकस्तास्तु बह्वीरेकदा
सङ्गतेः सर्वेषां द्वारकावासिनां
दि तत्पृच्छामीति स्वावैदग्ध्यात्
ापि निजसौजन्यात् किं स्मरथ
रायितान् तत्र हेतुः शत्रुपक्षेत्यादि
मियोग्य एवेति वाक्यार्थः ॥४२॥
ज्ञया विशङ्क्या अकृतज्ञोऽयं इति
ज्ञा च न योग्या नाहमकृतज्ञः

हृदि परिरेभिरे अयमपि चेत्तथा

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

सर्वां युगपत् परिष्वजते तदेव कौशलम्। तेन भगवत्त्या युगपदाश्लेषसूचनम्। तथाभूताः परिष्वजमाना विविक्त उपसङ्गतः विविक्ते निर्जने वस्तुतस्तदानीं निर्जनस्थानमेव नास्ति, महोपरागे विश्वेषामेव समागमात्, तथापि भगवन्महिम्ना तथाभूत्। आश्लिष्य प्रत्येकं युगपदनामयं पृष्ट्वा तत्पृच्छायामेव प्रहसन् मद्विरहे क्वानामयः तदपि तं पृच्छामि इति हासः ॥४०॥ अपि स्मरथेत्यादि। यद्यपि स्मृतियोग्यो न भवामि तथापि किं स्मरथ ? स्मृत्ययोग्यत्वं दर्शयति-स्वानामर्थचिकीर्षया गतान्, तत्रापि चिरायितान्। तत्र हेतुः-शत्रुपक्षक्षपणे चेतो येषाम्, न तु युष्मासु अतः स्मरण-सामग्री कोऽपि नास्तीति भावः ॥४१॥ प्रेम्णा स्मरणं तावदास्ताम्, अवज्ञापूर्वकमपि स्मरणं भवति, तत् किमवजानीथ वेत्याह-अप्यवध्यायथेत्यादि। अवज्ञानं कुतः ? तत्राह-अकृतज्ञाविशङ्कयेति, आ सम्यक् विशेषेण शङ्कया अवज्ञापि न कार्या न ह्यहमकृतज्ञः दैवदोषोऽयमित्याह-नूनं भूतानीत्यादि ॥४२॥ तमेवार्थमध्यात्ममुद्रया द्रढयति-वायुरित्यादि ॥४३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्चारादेव तत्रैव किञ्चिद्व्यवहितस्थले महोत्कण्ठास्फुटद्धृदयाः कृष्णसम्मिलनमप्राप्य प्राणान् जहतीरिव गोपीर्वीक्ष्य विदग्धचूडामणौ श्रीबलदेवेऽप्युत्थाय ततो निष्क्रान्ते तासामसाधारणदशाप्राप्तिमाह-गोप्यश्चेति। तत्र श्रीशुकदेवस्य ऋषिशब्देन निर्देशस्तद्वाक्य एव परमतत्त्वप्रकाशके दृढविश्वासं जनयितुं गोप्यश्चेति त्वर्थे चकारः तासां सर्वतो विशेषात्। ननु का गोप्य इत्यतस्तासामसाधारणं लक्षणमाह-यस्य श्रीकृष्णस्य प्रेक्षणे दृशिषु नेत्रेषु व्यवधायकपक्ष्मकृतं विधातारं शपन्ति यास्ता इति न दर्शने तावन्मात्रसमयविरहेऽपि यासां तथा असहिष्णुता यथा देवमात्रपरमसम्मानकर्तृणामपि स्त्रीणां तासां सर्वदेवमुख्ये विधातर्य्यपि अभिशापो भवेत्ताभ्यो गोपीभ्यः एतावान् विरहः कृष्णेन दत्त इति तस्मिन्नीर्ष्या ध्वनिता दृग्भिरवलोकनैराकृष्य गोपीभिरेव द्वारैर्हृदीकृतं हृदयप्रविष्टीकृतं परिरभ्य तस्य भावं महाभागं कृष्णोऽहं पश्यत गतिमितिवद्रसतादात्म्यं वा आपुः नित्ययुजामात्मारामशिखामणीनां महायोगेश्वरश्रीरुद्रादीनामपि दुर्लभमापुस्ता अपि गोपीरध्यात्म्यं शिक्षयिष्यत्यधुनैव कृष्ण इति तस्मिन् पुनरपीर्ष्या ध्वनिता किं वा नित्यसंयोगिनीनां श्रीरुक्मिण्यादीनामपि दुर्लभम् ॥४०॥ ततश्च कृष्णो मातुरुत्सङ्गादुत्थाय स्वजन विविक्तप्रदेशे गत्वा ताभिः सह सम्मिलनसम्भाषणादिकं चकारेत्याह-भगवानिति। तथाभूतः पूर्वश्लोकोक्तलक्षणामानन्दमूर्च्छां प्राप्ताः आश्लिष्य स्वीयविभूत्या शक्त्यैव सर्वा दृढमालिङ्ग्य आलिङ्गनदार्ढ्येनैव ताः मोहात् प्रबोध्येत्यर्थः। अनामयं मद्विरहमहारोगपीडा सम्प्रत्युपशान्ता न वेति पृष्ट्वा प्रहसन्निति तासां हास्यमुत्पादयितुम् ॥४१॥ स्वानां भवित्सुर्ज्ञातीनां वसुदेवादीनाम् अर्थः कंसवधादिस्तच्चिकीर्षया गतान् चिरायितान् विलम्बितान् तत्र हेतुः शत्रुपक्षस्य क्षपणे चेतो येषां तान् अत एव व्रजमागन्तुमप्राप्तावसरान् अस्मान् अपि किं स्मरथ ॥४२॥ यथा त्वं गोविन्दवमस्मत्स्मरणविदीर्णहृदयोऽस्मद्विरहरोगनिवर्तितसकलविषयभोगो महाप्रेमी भवसि तथा किं वयं भवितुं शक्नुमः। वयं तु त्वां न स्मरामः त्वां विनापि सुखिन्य एवास्म इति वक्रोक्तिद्योतकभ्रूभङ्गिभिरेव ससंरम्भं कृतप्रत्युत्तराः स्ता आलक्ष्याह-किंस्वित् अस्मान् अवध्यायथ अवजानीथ एवेति अकृतज्ञा इति आ सर्वतो या विशङ्का तया तत्र किं कर्तव्यमस्माभिस्तत्त्वं मनुतेत्याह-नूनमिति ॥४३॥

गूढार्थदीपिनी

तथाभूताः प्रेमरताः इदं वक्ष्यमाणम्। अनामयम् आरोग्यम्। विविक्ते एकान्ते ॥४०॥ हे सख्यः ! अपि किं नोऽस्मान् स्मरथ। कथम्भूतान् अर्थचिकीर्षया कार्यं कर्तुमिच्छया व्रजात् गतान् चिरायितान् जातविलम्बांश्च कुतः शत्रुपक्षस्य क्षपणे विनाशने चेतो येषां तान् ॥४१॥ अकृतज्ञाः कृतघ्ना एते इति आदिशङ्क्या ईषच्छङ्क्या अस्मान् अवध्यायथ अवजानीत अपि किम्। अस्माकं दोषः यतो भगवानेव प्राणिनः संयोजयति वियोजयति च ॥४२॥ यथा वायुः घनानीकं मेघमण्डलं तृणादीनि च संयोज्य संयोज्य भूयः आक्षिपते वियोजयति तथा भूतकृत् कालः भूतानि ॥४३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यस्य श्रीकृष्णस्य प्रेक्षणे दृशिषु नेत्रेषु व्यवधायकपक्ष्मकृतं पक्ष्मस्रष्टारं शपन्ति तमभीष्टं पतिं प्रियं कृष्णमुपलभ्य प्राप्य दृष्ट्वेत्यर्थः। दृग्भिर्नेत्रद्वारैः हृदि कृतं हृत्प्रविष्टीकृतं परिरभ्य नित्ययुजामारूढयोगिनामपि दुरापं यद्भावं तस्मिन् चित्तैकाग्र्यलक्षणां भक्तिमापुरित्यर्थः ॥४०-४२॥ अकृतज्ञा एते इत्याशङ्कया ईषच्छङ्कया अपिस्वित् अस्मान् अवध्यायथ अवजानीत किम् ॥४३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं द्वितीयानामुक्त्वा तृतीयानामाह-गोप्यश्चेति। गोपीनां कृष्ण एव सम्भाष्यः न तु देवक्याद्या तादृश्यः कृष्णमुपलभ्य सम्यक् दृष्ट्वा दृशि स्थितं भगवन्तं दृग्भिरेव हृदीकृत्य अन्तःकरणे समागतमात्मैव देहादिव्यवधानराहित्येनालमत्यर्थं परिरभ्य सर्व एव तद्भावं कृष्णभावं प्राप्ताः। अन्तर्गते भगवति आलिङ्गनार्थं प्रवृत्ताः स्वजीवात्मानं तत्र संयोज्य भगवता सह ऐक्यं प्राप्ताः लिङ्गशरीरमपि तिष्ठतीति जीवधर्मापेक्षया भगवद्धर्मा बलिष्ठा इति जीवभावं परित्यज्य भगवद्भावं प्राप्ता इत्यर्थः। चिरादभीष्टमिति सर्वभावेन प्राणानां तत्समीपगमने हेतुरुक्तः अभीष्टतायाः परमसीमामाह-यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपन्तीति। "जड उदीक्षतां पक्ष्मकृद्दृशाम्" इति अक्षिरक्षार्थं पक्ष्मकरणम्। भगवद्दर्शनदशायाम् अक्ष्युपघातकशङ्काभावात् पक्ष्म व्यर्थं प्रत्युत व्यवधानं करोतीति बाधकम् अतो ब्रह्मा भगवद्दर्शनयुक्तानां पक्ष्म कुर्वन् दर्शनरसानभिज्ञो जड एवेति वदन्त्यः भगवत्प्रेक्षणे दृशिषु य पक्ष्मकर्ता तं शपन्ति एवं दर्शनरसाभिज्ञाः ततो दृग्भिर्हृदीकृतं भगवन्तं बहिः शङ्कया आलिङ्गनबाधात् अन्तरेव परिरभ्य तद्रूपा जाताः अयं भावस्तासां कामेन जातः तत्राप्यनायासेन साधनसहस्रस्यापि एतदशक्यमित्याह-नित्ययुजामपि दुरापमिति। निरन्तरयोगरतानामप्यप्राप्यम् असूयादिसर्वदोषपरिहारार्थं भगवान् उपायान्तरमलभमानः स्वभावं दत्तवान् न तु तासां स्वभावे काचित् प्रतीतिरस्ति अत एव श्रूयते —

"गोमतिमतिमति किमिदं हरिहरिहरिणा कथं सङ्गः। जातं पीतं वसनं मेचकमङ्गं गतोऽङ्गनाभावम्" ॥इति॥

अतः पूर्वविस्मरणार्थं भगवानेवं कृतवानिति तृतीयकक्षाख्यानामप्युत्कर्ष उक्तः ॥४०॥ ततो भगवान् तद्भाववदा किञ्चिदुपदेष्टुं तत उत्थाय एकान्ते गत्वा यथोचितं कृतवान् इत्याह-भगवानिति। स्वयमेवान्तर्वर्तत इति यदेव करिष्यतीति विविक्ते एकान्ते उपसङ्गताः समीपमागताः गोपीः बहिः स्वयमेवाश्लिष्य बहिर्वर्तमानान् स्वकीयांस्तु बहिः स्थापयित्वा पश्चादनामयं पृ स्ववचनं स्मृत्वा प्रहसन्निदं वक्ष्यमाणमब्रवीत् ॥४१॥ स्वलीलां तासु स्थापयन्निवाह-अपि स्मरतेति। हे सख्यः! अपीति सम्भावनायां नोऽस्मान् किं स्मरत अस्मरणं तु भवतीनामेव दोष इति परिहासोक्तिः स्वस्यापराधं परिहरति स्वानामर्थचिकीर्षया गतानिति कर्तव्यार्थं गतं मथुरायां तत्र बन्धूनां हितकरणार्थं प्रवृत्तौ भूयान् कालो जातः तेनैवानागमनं चित्तं तु भवतीष्वेवेत्यर्थः। चिरकालस्य हेतुमाह-शत्रुपक्षक्षपणचेतस इति। शत्रूणां पक्षाः सर्व एव नाशनीया इति अन्यथा समूला न नश्यन्तीति स्त्रीभिः सह परिहासमात्र एतद्भगवतोक्तं यस्तु मर्मानभिज्ञः स एतदङ्गीकरोति न त्वभिज्ञ इति अभिज्ञा गोपिकाः भगवान् वञ्चयतीति भगवति अवध्यानबुद्ध्य भवन्ति ॥४२॥ अतस्तद्दोषपरिहारार्थं भगवानाह-अप्यवध्यायथ इति। "ध्यै चिन्तायाम्" इत्यस्य अवोपसर्गसहितस्य लो तादेशरहितस्य मध्यमपुरुषबहुवचनम् अवध्यायथेति अवध्यानं विरुद्धध्यानम् अपीति सम्भावनायाम् अस्मा बलभद्रोद्धवादिसाहित्येनावध्यान् प्राप्तिं सूचयति-अपिस्विदिति। अकृतज्ञा एते इति या विशिष्टशङ्का वा स्वाधीनत्वे दोषोऽयं न पराधीनत्वे नेत्याह-नूनं भूतानि भगवानिति। युनक्ति कच्चिद्वियुनक्ति वियोजयति वा यस्मिन् पक्षे भगवति जारबुद्धिः ॥४३॥

श्रीसुबोधिनीसारः

शुकोक्तिः। अभीष्टं स्वेप्सितं कृष्णं चिराद्बहुकालादुपलभ्य प्राप्य यस्य हरेर्दर्शने दृशिषु नेत्रेषु पक्ष्मकृतं विधातारं शपन्ति। दृग्भिर्नेत्रैर्हृदि कृतं मनसि स्थापितम् अलमतिशयेन नित्ययुजां सदा समाधिभाजामपि दुरापं दुर्लभं श्रीकृष्णं परिरभ्य तद्भावं तद्रूपतामापुः ययुः ॥४०॥ तथाभूताः परा भक्तास्ता गोपीर्विविक्ते एकान्ते उपसङ्गतः प्राप्तो भगवानाश्लिष्यालिङ्ग्य प्रहस इदमब्रवीत् ॥४१॥ स्वानामात्मीयानामर्थचिकीर्षया वाञ्छितार्थसम्पादनेच्छया गतान् चिरायितान् विलम्बितान् शत्रूणां पक्ष

क्षपणे नाशने चेतो येषां ते
अस्मान् अवध्यायथ चिन्त
कालो दैवं चेत्यन्ये। प्राणि

भगवांस्तास्तथा
प्रहसन्निदमब्रवीत् ॥४०॥
चिरायितान् विलम्बितान्, त
इति आ ईषत् विशङ्कया अपि
आह-नूनमिति। भूतानि प्रा
एतत्सदृष्टान्तमाह-वायुरिति।
विश्वस्रष्टा भगवानपि क्वचिद्

ताः सर्वाः गोप्यश्च चि
आर्षः। अलं गाढमाश्लिष्य नि
दुरापं दुर्लभं तद्भावं भगवदात्
भगवांस्तास्तथाभूता आत्मभा
प्रहसन्निदमब्रवीत् ॥४०॥ अपी
शत्रुपक्षस्य क्षपणे विनाशे चेतो
वाऽविशङ्कया अपि किं स्विदस्मा
संयोजयति वियुनक्ति वियोजयति
आक्षिपते वियोजयति च तथा भू

तथाभूतास्ताः गोपीः वि
अतश्चिरायितान् विलम्बितान् नोऽ
अवज्ञया स्मरथ अपि स्वित् किं न
आक्षिप्यते। वियुनक्ति च तथा भू

भगवानिति ॥ भगवान्
उपसङ्गतः सम्मीलितः सन् प्रथमतः
अपीति ॥ हे सख्यः! स्वानां यदूनाम्
अतः चिरायितान् विलम्बितान् नोऽस्मा
विशङ्का विशेषतश्चाशङ्का तया कृतघ्ना

श्रीसुबोधिनीसारः

क्षपणे नाशने चेतो येषां ते तान् नोऽस्मान्स्मरथापि कि हे सख्यः ! ॥४२॥ अकृतज्ञाः कृतघ्ना एते इत्याविशङ्कया ईषच्छङ्कयापि अस्मान् अवध्यायथ चिन्तयथ स्वित्किम् । साम्प्रतं परित्यज्य गतत्वान्निश्चितंमन्याः प्रत्याह । भगवन्नूनं भूतानि युनक्ति वियुनक्ति च काले दैवं चेत्यन्ये । प्राणिकर्मानुसारतोऽहमेवेति स्वाशयः ॥४३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भगवांस्तास्तथाभूता आत्मभावमापन्ना गोपीर्विवक्त एकान्त उपसङ्गतः आश्लिष्य अनामयमारोग्यं पृष्ट्वा प्रहसन्निदमब्रवीत् ॥४०॥ स्नेहं सूचयन् सम्बोधयति-सख्य इति । स्वानां पित्रादीनामर्थं प्रयोजनं कर्तुमिच्छया व्रजाद्गतान् चिरायितान् विलम्बितान्, तत्र हेतुमाह-शत्रुपक्षक्षपणे विनाशे चेतो येषां तान्नोऽस्मान् अपि किं स्मरथ ? ॥४१॥ अकृतज्ञा एते इति आ ईषत् विशङ्कया अपि किं स्विदस्मानवध्यायथ अवजानीथ ? न तु शङ्कामात्रं निश्चितमेवैतत्, परित्यज्य गतत्वात् इत्यत आह-नूनमिति । भूतानि प्राणिनो भगवानन्तर्याम्येव युनक्ति-संयोजयति वियुनक्ति वियोजयति चेति नूनं निश्चितम् ॥४२॥ तत्र दृष्टान्तमाह-वायुरिति । घनानीकं मेघसमुदायं तृणादीनि च वायुर्यथा संयोज्य आक्षिपते वियोजयति च तथा भूतकृत् विश्वस्रष्टा भगवानपि क्वचिद्भूतानि संयोज्य भूयस्तानि वियोजयति ॥४३॥

अन्वितार्थप्रकाशिका

ताः सर्वाः गोप्यश्च चिरात् बहुकालानन्तरमभीष्टं प्रियतमं कृष्णमुपलभ्य दृष्ट्वा दृग्भिर्नेत्रद्वारैर्हृदीकृतं हृदये प्रवेशितम् । दीर्घं अर्थः । अलं गाढमाश्लिष्य नित्ययुजामारूढयोगिनां समाधिनिष्ठानामपि यद्वा नित्ययुजां नित्यं संयोगवतीनां रुक्मिण्यादीनामपि दुरापं दुर्लभं तद्भावं भगवदात्मतामापुः ॥३९॥ ततश्च कृष्णो मातुरुत्सङ्गादुत्थाय विविक्ते ताभिरमिलदित्याह-भगवानिति । भगवांस्तास्तथाभूता आत्मभावमापन्ना गोपीर्विवक्त एकान्त उपसङ्गतः आश्लिष्यानामयमारोग्यं तासां हासमुत्पादयितुं प्रहसन्निदमब्रवीत् ॥४०॥ अपीति । हे सख्यः स्वानां पित्रादीनामर्थं प्रयोजनं कर्तुमिच्छया व्रजाद्गतान् चिरायितान् विलम्बितान् शत्रुपक्षस्य क्षपणे विनाशे चेतो येषां तान्नोऽस्मान् अपि किं स्मरथ ॥४१॥ अपीति । अकृतज्ञा एते इति आ ईषत् सर्वतो आविशङ्कया अपि किं स्विदस्मानवध्यायथ अवजानीथ । नोऽस्माकं तत्र दोष इत्याह । भूतानि प्राणिनो भगवानन्तर्याम्येव युनक्ति संयोजयति वियुनक्ति वियोजयति चेति नूनं निश्चितम् ॥४२॥ वायुरिति । घनानीकं मेघसमुदायं तृणादीनि च वायुर्यथा संयोज्य आक्षिपते वियोजयति च तथा भूतकृत् विश्वस्रष्टा भगवानपि क्वचिद्भूतानि संयोज्य भूयस्तानि वियोजयति ॥४३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तथाभूतास्ताः गोपीः विविक्ते आलिंग्य ॥४०॥ शत्रूणां पक्षस्य पक्षस्थराजन्यवृन्दस्य क्षपणे नाशने चेतो येषां तान् चिरायितान् विलम्बितान् नोऽस्मान् यूयं स्मरथ ॥४१॥ अकृतज्ञानाम् आविशङ्कया ईषत् शङ्कया अस्मानपि यूयम् अवध्यायथ अवज्ञया स्मरथ अपि स्वित् किं न वा । अत्रास्माकं दोषो नास्तीत्याह-नूनमिति ॥४२॥ पुनरेतद् दृष्टान्तेन स्पष्टयति-वायुरिति । भूय आक्षिप्यते । वियुनक्ति च तथा भूतानि स्थावरजङ्गमानि ॥४३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवानिति ॥ भगवान् स्वयं कृष्णः तथाभूता उक्तविधाः आत्मभावमापन्ना इत्यर्थः । ताः गोपीः विविक्ते एकान्ते उपसङ्गतः सम्मीलितः सन् प्रथमतः आश्लिष्य अनामयमारोग्यं पृष्ट्वा प्रहसन् इदं वक्ष्यमाणम् अब्रवीत् ॥४०॥ तदेवाह षड्भिः ॥ अपीति ॥ हे सख्यः ! स्वानां यदूनाम् अर्थचिकीर्षया प्रयोजनं कर्तुमिच्छया गतान् तत्र शत्रुपक्षक्षपणे शत्रुपक्षनाशने चेतो येषां तान् अतः चिरायितान् विलम्बितान् नोऽस्मान् स्मरत अपि । स्मरत किमित्यर्थः ॥४१॥ अपीति ॥ हे सख्यः ! यूयं कृतज्ञादन्योऽकृतज्ञस्तस्य आशङ्का विशेषतश्चाशङ्का तया कृतघ्ना एवैत इति बुद्ध्येत्यर्थः । अस्मान् अवध्यायथ अपि स्वित् । अवजानीथ किमित्यर्थः ।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अवपूर्वात् ध्यायतेर्लण्मध्यमवचनम् । न शङ्कामात्रं निश्चितमेव परित्यज्यगतत्वादित्यत आह । नूनमिति । भगवान् भूतः द्वितीयान्तमेतत् । युनक्ति संयोजयति वियुनक्ति वियोजयति च नूनम् ॥४२॥ एतत् सदृष्टान्तमाह ॥ वायुरिति ॥ यथा वायु घनानीकं मेघसमुदायं तृणं तूलं रजांसि च यथा संयोज्य आक्षिपते योजयति पुनर्वियोजयति च । तथा तद्वत् भूतकृत् भूतक भगवान् भूतानि संयोज्य भूयः पुनः वियोजयति च ॥४३॥

कृष्णप्रिया

राजन् ! व्रजवनिता गोपीजनों भगवान श्रीकृष्ण प्रतम है, जब उनके दर्शनके अवसर नेत्रोकी पलकें उ पडती तब वे पलकोंको बनाने वाला विधातो को ही उलाहना देती । वैसी दिव्य मूर्ति गोपीयोको आज बहुत दिन के बाद भगवान श्रीकृष्ण का दर्शन हुआ । उनके उस पूरमें इसके लिये कितनी लालसा भी इनका नाप नहीं निकाला जाता । उन गोपियोंने नयन मार्गसे अपने प्यारे श्रीकृष्ण को हृदयमें पधराकर गाढ आलिंगन किया और हृदयसे आलगन करते करते तन्मय हो गयी । राजन् ! अधिक क्या कहुं गोपियों उस अवस्था को प्राप्त हो गयी जो अविरत अभ्यास करनेवाले योगीजनो के लिये भी सुलभ नहीं ॥४०॥ भगवान श्रीकृष्णने देखा कि गोपियें मुझसे तादतम्य को प्राप्त कर रही है तब ब्कृष्ण एकान्तमें उनके पास गये, उनको हृदयसे लगाया, कुशल वार्ता प्रश्न करने मन्द स्मित करते हुए बोले ॥४१॥ सखियों हमारी बात कृपाकर सूने ? हमलोग अपने स्वजन सम्बन्धजनोंके कार्य करनेके लिये व्रजप्रदेशसे बाहर चले आये इस अवस्थामें आपके जैसी प्रियतमाओंको छोड़कर हम अब शत्रुओंके कण्टकोंको उखाडनेमें लग गये । इ प्रकार बहुत दिन बीत गये, क्या अभी आपलोग हमारा स्मरणभी करती हो ? ॥४२॥ हे प्रियतमा गोपीजन ! आपके हृदयमें मेरे लिये एसा तो विचार नहीं आता है कि मे अकृतज्ञ हुं और ऐसा मनसे निश्चय करके आपलोग हमारे लिये ओदासीन्य तो मनमें छा नहीं गया है न यह बात तो सुनिश्चित है कि भगवान हि भाग्यानुसार प्राणियोंका संयोग वियोग कराते है ॥४३॥

वायुर्यथा घनानीकं तृणं [1]तूलं रजांसि च । संयोज्या[2]क्षिपते भूयस्तथा भूतानि भूतकृत् ॥४४॥
मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते । दिष्ट्या[3] यदासीन्मत्स्नेहो भवतीनां मदापनः ॥४५॥
अहं हि सर्वभूतानामादिरन्तोऽन्तरं बहिः । भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरङ्गनाः ॥४६॥
एवं ह्येतानि भूतानि भूतेष्वात्मतया [4]ततः । उभयं मय्यथ परे [5]पश्यताभातमक्षरे ॥४७॥

कर्दमक्षमा

यथा, वायुः, घनानीकम्, तृणम्, तूलम्, च, रजांसि, संयोज्य, भूः, आक्षिपते, भूतकृत्, तथा, भूतानि, संयोज्य, आक्षि ॥४४॥ हि, मयि, भक्तिः, प्राणिनाम्, अमृतत्वाय, कल्पते, भवतीनाम्, मदापनः, मत्स्नेहः, यत्, आसीत्, तत्, दिष्ट्या ॥४५॥ अङ्गनाः, यथा, खम्, वाः, भूः, वायुः, ज्योतिः, सर्वभूतानाम्, अदिः, अन्तः, अन्तरम्, बहिः, तथा, अहम्, भौतिकानाम्(प्राणिनाम्), आदिः, अन्तः, अन्तरम्, बहिः(अस्मि) ॥४६॥ एवम्, हि, एतानि, भूतानि, भूतेषु, आत्मतया(सर्व ततः, उभयम्, मयि(वर्तते), अथ, परे, अक्षरे, आभातम्, पश्यत ॥४७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतत्सदृष्टान्तमाह-वायुरिति । आक्षिपते पृथक्करोतीत्यर्थः ॥४४॥ अपि च अतिभद्रमिदं यदुत भवतीनां मद्वियोगेन मत्प्रेमा

---

१. तृणतूलरजांसि-वीर. । २. संयोज्य क्षिपते-विज. । ३. दिष्ट्यासीन्मयि सुस्नेहो भवतीनां मुदावहः-विज. । ४. त्माऽऽत्मना-श्रीधर. वंशी. विज. जीव. विश्व. शुक. । ५. पश्यथा तत-विज. ।

जात इत्याह-मयीति । मि
मदापनो मत्प्रापण इति ॥४५
शरावसैन्धवादीनां यथाऽऽक
प्राप्ता एवेति ॥४६॥ ननु च
कुतस्त्वत्प्राप्तिरस्माकमित्यत
चतुर्विधानि भूतान्यपि भौतिक
ततो व्याप्तो न कारणत्वेन अथै

एतत्संयोगवियोगकर
मत्प्रापणो मत्सान्निध्यानन्ददः अ
तदाह-कीदृश इत्यादिना । अह
अत्राशयमाह-अयमर्थ इति । प
तिरेकत्वाभावादित्यर्थः ॥४७॥

नन्वेवं तस्य नैर्घृण्यवैषम
तदर्थविशेन तथेति भावः ॥४४॥ अ
सान्त्वयति-अहमेवेश्वरश्चेत्तथापि
स्नेहपारवश्यादित्यभिप्रायेणाह-मयी
मोक्षाय कल्पते ततो भवतीनां स
प्रेमपरिपाकविशेषः स यदासीत् संय
ननु कथं भवत्प्राप्तौ स्नेह एव कारण
द्वाभ्याम्। शब्दार्थस्तु टीकासम एव तत्र
स्पष्टीभावादिति तदेवं शीघ्रमेव भवत
सङ्गमयति-अहमिति द्वाभ्यामेव । हि
आदिः कारणम् अन्तो लयस्थानम् अन्त
नास्तीत्यर्थः । अङ्गना इति तासां सौन्दर्य
एतानि महान्ति भूतानि आकाशादीनि भू
। उभयं देह आत्मा च मयि वर्तते कुतः
सर्वत्र वर्तमाने मयि आभान्तं विराजमानं प
योजयति-यथाहम् । अहङ्कारो भूतादिः
प्रकटलीलायामनुभूयमानानि युष्माकं ममत
भूतेष्वप्रकटलीलागतेषु परमार्थस
अप्रकटलीलाभिमान्यहन्तास्पदेनात्मना व्य
विहरमाणे तत्राप्यक्षरे नित्यमेव युष्मत्सङ्गि

श्रीधरस्वामिविरचिता भावार्थदीपिका

जात इत्याह-मयीति । मयि भक्तिमात्रमेव तावदमृतत्वाय कल्पत इति यदुत भवतीनां मत्स्नेह आसीत्तद्दिष्ट्यातिभद्रम् कुतः मदापनो मत्प्रापण इति ॥४५॥ कीदृशस्त्वं यं वयं स्नेहेन प्राप्स्याम इत्यपेक्षयामात्मस्वरूपमाह-अहं हीति । हे अङ्गनाः ! भौतिकानां शरावसैन्धवादीनां यथाऽऽकाशादीनि पञ्चमहाभूतान्याद्यन्तादिरूपाण्येवं सर्वभूतानां जरायुजादीनामहम् अतो व्यापकं मां भवत्यः प्राप्ता एवेति ॥४६॥ ननु चतुर्विधभूतग्रामाणां तद्वोक्ता आत्मैवाऽऽद्यन्तादिरूपस्तस्मिंश्च सर्वव्यापकं सर्वभूतानि वर्तन्त इति कुतस्त्वत्प्राप्तिरस्माकमित्यत आह-एवं हीति । अयमर्थः शरावादीनां यथा भौतिकानां महाभूतान्याद्यन्तादिरूपाण्येवमेवैतानि चतुर्विधानि भूतान्यपि भौतिकत्वाविशेषात्स्वकारणेषु भूतेष्वेव वर्तन्ते ननु भोक्तर्यात्मनि आत्मा तु तेषु भूतेष्वात्मना भोक्तृरूपेण ततो व्याप्तो न कारणत्वेन अथैतदुभयं भूतभौतिकरूपं भोग्यं चो भोक्तारञ्चाऽऽत्मानं मय्यक्षरे परिपूर्णे आभातं पश्यतेति ॥४७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतत्संयोगवियोगकरणम् । भूतकृत्कालः ॥४४॥ गोपीभाग्यं श्लाघते-अपि चेति । अतिभद्रत्वे हेतुमाशङ्क्ते-कुत इति । मत्प्रापणो मत्सान्निध्यानन्ददः अमृतत्वे एतन्नसम्भवत्यत एव भक्तैस्तन्नाद्रियते इति रहस्यम् ॥४५॥ प्राप्य स्वरूपं पृच्छन्तीनां तत्राह-कीदृश इत्यादिना । अहमाद्यन्तरूपः यतोऽतो हेतोर्व्यापकं माम् ॥४६॥ अत्राशङ्क्ते-तद्वोक्ता चतुर्विधभूतग्रामान्तर्यामी । अत्राशयमाह-अयमर्थ इति । परिपूर्णे परमात्मनि । आभान्तं रज्जौ भुजङ्गादिकमिव प्रतीतं यूयं पश्यत अधिष्ठेयस्याधिष्ठानातिरिक्तत्वाभावादित्यर्थः ॥४७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वेवं तस्य नैर्घृण्यवैषम्ये प्रसज्ज्येयातां तत्राह-वायुरिति । भूतकृदीश्वरः वायोर्यथा स्वाभाविकलीलयैव ते चलन्ति न तु स्वार्थावेशेन तथेति भावः ॥४४॥ अथ प्रसिद्धं ममैश्वर्य्यं नूनमेताभिरपि ज्ञातमस्तीति क्षणादनुसन्धाय तदेवालम्ब्य याथार्थ्येनापि सान्त्वयति-अहमेवेश्वरश्चेत्तथापि शत्रुपक्षक्षपणलीलावेशेन कृतेऽपि भवतीनां वियोजने मम शक्तिर्न भविष्यत्येव स्नेहपारवश्यादित्यभिप्रायेणाह-मयीति । हि प्रसिद्धौ भक्तिर्नवविधानां भक्तीनामेकापि प्रीतिमात्रं वा भूतानां सर्वेषामपि अमृतत्वाय मोक्षाय कल्पते ततो भवतीनां सर्वतः पूज्यानां मदापनः मामेव साक्षात्प्रापयति बलादाकर्षति यः स्नेहः उभयार्द्रीभावहेतुः प्रेमपरिपाकविशेषः स यदासीत् संयोगवियोगलीलाभ्यामाविर्बभूव तत्तु दिष्ट्या अतिभद्रं पुनर्वियोगासम्भवादिति भावः ॥४५॥ ननु कथं भवत्प्राप्तौ स्नेह एव कारणम् इत्याशंक्य सर्वाश्रयत्वात्तस्याहमेव योग्यो मम च स एव योग्य इत्याशयेनाह-अहं हीति द्वाभ्याम् । शब्दार्थस्तु टीकासम एव तत्रोत्तरपद्ये भूतभौतिकरूपमित्येव लिखनं शुद्धं भूतभौतिकरूपं भोग्यं भोक्तृरूपस्त्वात्मेत्युभयता सद्योभावादिति तदेवं शीघ्रमेव भवतीनां नित्यमल्लाभो भविष्यतीति भावः । ननु तर्हि कथमीदृशश्चिरविरह इत्याशंक्यार्थान्तरं च सङ्गमयति-अहमिति द्वाभ्यामेव । हि निश्चये "न चान्तर्न बहिर्यस्य" इति श्रीदामोदरलीलादर्शित न्यायाच्छ्रीविग्रहरूपोऽहमेव आदिः कारणम् अन्तो लयस्थानम् अन्तरं मध्यम् एवं सर्वव्यापकोऽहं सामान्यतो युष्मानपि व्याप्य तिष्ठाम्येवेति वस्तुतो विरह एव नास्तीत्यर्थः । अङ्गना इति तासां सौन्दर्यगुणोल्लेखेन स्वप्रेमापि ज्ञापयति ॥४६॥ एवमिति । हि निश्चये अनेन आदित्वादिनैव प्रकारेण एतानि महान्ति भूतानि आकाशादीनि भूतेषु देहेषु वर्तन्ते आत्मा चात्मना स्वयमेव तेष्वेव ततः स्वशक्त्या तानि व्याप्यास्तीत्यर्थः उभयं देह आत्मा च मयि वर्तते कुतः परे परमेश्वरे जगतस्तदेकाधारत्वात् अथ अतः निजदेह आत्मा चेत्युभयमेव अक्षरे सदा सर्वत्र वर्तमाने मयि आभान्तं विराजमानं पश्यत अनुभवतेति एतच्चासां भावतोऽतिबहिरङ्गमित्याशंक्य श्रीमदुद्धवद्वारा सन्देशवदर्थान्तरं योजयति-यथाहम् । अहङ्कारो भूतादिः सर्वेषां भूतानां खादीनाद्यन्तादिरूपः अहङ्कारान्तर्गतान्येव खादीनीत्यर्थः । एवमेतानि प्रकटलीलायामनुभूयमानानि युष्माकं ममतास्पदानि भूतानि "एको विष्णुर्महद्भूतम्" इतिवत् परमार्थसत्यवस्तूनि श्रीवृन्दावनादीनि पूर्वोक्तप्रकटलीलागतेषु परमार्थसत्यवस्तुषु वर्तन्ते तथा युष्माकं प्रटलीलाभिमान्यहन्तास्पदमात्मा च अप्रकटलीलाभिमान्यहन्तास्पदेनात्मना व्याप्तः एवमिदन्ताहन्तास्पदं यदुभयं तच्च परे प्रकटमत्र दृश्यमानेऽपि तस्यां वृन्दाटव्यां दृश्यमाने तत्राप्यक्षरे नित्यमेव युष्मत्सङ्गिनि मयि आश्रयरूपे आभान्तं विराजमानं पश्यतेति तस्मात्प्रकाशभेदादेव

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तद्वस्त्वादिभेदव्यपदेशो विरहसंयोगव्यवस्था चेति पूर्वमप्युद्धवद्वारा सन्दिष्टमिति भावः । तदेवमुभयथाऽपि स्फूर्त्यस्फूर्त्योरेव संयोगविरहत्वं भवतीनां च परमस्नेहेन स्फूर्तिः सदैव वर्तत इति वस्तुतो नास्त्येव विरह इति व्यञ्जितम् ।४७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु कालस्त्वांशस्त्वदधीन एव । ईश्वरपक्षेऽपि त्वमेवेश्वरस्तत् कथमस्मानस्यगतीर्वञ्चयस इत्याशंक्य यद्वा, आदौ निजाकृतज्ञतापरिहारार्थं सदृष्टान्तं सत्सिद्धान्तमुक्त्वाधुना कृपयात्मनो माहात्म्यं प्रकटयन् समाश्वासयति-मयीति । हि अपि भक्तिर्नवविधानामेकापि भूतानां सर्वेषामपि प्राणिनामित्यधिकारापेक्षा निरस्ता । अमृता नीत्यपार्षदास्तेषां भावोऽमृतत्वं तस्मै कल्पते समर्थो योग्यो वा भवति । भवतीनां नित्यविशुद्धकोमलस्वभावानान्तु, इति स्नेहस्यान्यतो वैशिष्ट्यं सूचितम्, अतोऽनुनयात्यादरेण भवतीनामिति । अत एव मदापनो मां यत्र कुत्रापि स्थितं प्रापयति बलादाकर्षयतीति तथा सः । अतो भवतीभिः सह मम कदाचिदपि विच्छेदो नास्तीत्यर्थः ॥४४॥ ननु तर्हि कथमीदृशश्चिरविरहः ? तत्राह-अहमिति द्वाभ्याम् । हि एव अहमेव न तु मायादि, आदिः कारणम् । अन्तो लयस्थानम् । अन्तरं मध्यम् । एवं सर्वव्यापकोऽहम् । सामान्यतो युष्मानभिव्याप्य तिष्ठाम्येवेत्यर्थः । विशेषतश्च युष्माकं सौन्दर्येण कदापि युष्मांस्त्यक्तुं न शक्नोमीत्याशयेनाह-अङ्गनाः हे परमसुन्दर्य इति ॥४५॥ किञ्च, युष्माकं देह आत्मा च मय्येव विराजत इत्याह-एवमिति । हि एव । अनेन आदित्वादिनैव प्रकारेण एतानि महान्ति भूतानि आकाशादीनि भूतेषु देहेषु वर्तन्ते । आत्मा चात्मना स्वयमेव तेष्वेव ततस्तानि व्याप्यास्तीत्यर्थः । उभयं देह आत्मा च मयिवर्तते । कुतः ? परे परमेश्वरे जगतस्तदेकाधारत्वात् । अथ अतो निजदेहमात्मानं चेत्युभयमेव अक्षरे सदा श्रीवृन्दावने गोपालनादिक्रीडातो न क्षरति न चलतीति तथाभूते मय्याभातं निर्धारापेक्षयाऽतीतनिर्देशः । सदा रासक्रीडादिना शोभमानं पश्यत जानीत यद्वा, इतः परं पश्यतो साक्षादनुभवत । अतः प्रभृति पुनः कदापि विच्छेदो न भावीत्यर्थः । एवं तट्टीकायां भूतभौतिकरूपमित्येव लिखनं युक्तम् । भोग्यभोक्त्रोरर्थापेक्षया भोग्यस्य भूतभौतिकरूपमिति भोक्तुश्चात्मानमिति व्याख्यानात् । अत एव चित्सुखोऽपि तदुभयं भोग्यभोक्तृरूपमिति ॥४६॥ एवमनेनोक्तप्रकारेण आत्मा श्रीकृष्णस्तमधिकृत्य प्रवर्तते या शिक्षा तया शिक्षिताः सत्यः अतस्तस्य शिक्षणस्य अनुस्मरणमनुसन्धानं तेन ध्वस्तो जीवानामन्येषां कोशो लिङ्गं याभिः किंवा, ध्वस्तो नष्टप्रायो जीवस्यात्मनः कोशः कायो विरहकैवल्यातिशयेन यासां तथाभूताः तं सदा श्रीवृन्दावने रामविलासादिना स्वैः सह विहरिष्यन्तम् अध्यगन् ज्ञातवत्यः ॥४७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उत्पत्तिकारणत्वे अन्तर्बहिः सद्भावे च दृष्टान्तमाह-यथा खमित्यादिना । यद्वा एवं पृथिव्यादिभूतानि देवादिशरीरारम्भ कार्याणि एवंविधहेतुमन्तीत्यर्थः ॥४६॥ भूतेष्वात्मा जीवात्मा आत्मना मया कृतशरीरसंसृष्टाकृतिरित्यर्थः ॥४७-४८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एतत्सदृष्टान्तमाह-वायुरिति । घनानीकं मेघसमुदायं तृणादीनि च वायुर्यथा युनक्ति वियुनक्ति वियोजयति च तद्वत् भूतकृद्भूतस्रष्टा भगवान् क्वचिद्भूतानि संयोज्य पुनराक्षिपते वियोजयति च ॥४४॥ किञ्चातिभद्रभिदं यद्भवतीनां मद्वियोगेन मत्प्रेमातिशयोऽभूदित्याह-मयीति । मयि भक्तिमात्रमेतावदमृतत्वाय मुक्तये कल्पते यत्तु भवतीनां मयि स्नेहः आसीत् तद्दिष्ट्यातिभद्रम् कुतः ? मदापनः मत्प्रापणः ॥४५॥ कीदृशस्त्वं यं वयं स्नेहेन प्राप्स्यामहे इत्यपेक्षायामात्मनो याथात्म्यमाह-अहमिति । आदिः सृष्टिकारणमन्तर्लयकारणम् अन्तरमन्तरात्मा बहिश्च व्याप्य स्थितः इत्यर्थः । अन्तर्बहिश्च सद्भावे दृष्टान्तार्थमाह-भौतिकानामिति हे अङ्गनाः खमाकाशः वाः जलं भूः खादीनि यथा भौतिकानां भूतपरिणामात्मकानां देवमनुष्यादिशरीराणामन्तर्बहिश्च वर्तन्ते ॥४६॥ एवं दृष्टान्तमुखेन शिक्षितमर्थं दार्ष्टान्तिके सङ्गमयति-एवमिति । एतान्याकाशादीनि तत्कार्यरूपाणि देवादिशरीरात्मकानि च भूतानि भूतेषु आत्मा तेषु भूतेषु स्थित आत्मा जीवात्मा च आत्मना मया अन्तर्बहिश्च व्याप्यन्त इति शेषः । ततस्तस्मादुभयं चेतनमचेतनं च वस्तुजातमक्षरेऽन्तर्बहिश्च व्याप्य वर्तमानेऽपि व्याप्यगतविकाररहिते मय्याभातं प्रमितं पश्यत । मयीत्यनेन धारकत्वमुक्तम् आत्मनेत्यनेनान्तः प्रविश्य प्रशासितृत्वं च अन्तः प्रविश्य नियमनं ह्यात्मशब्दप्रवृत्तिनिमित्तम् ॥४७॥

ननु केचित् त्व

तमेवार्थमध्यात
नापि वयं भूतात्मान इत्य
कल्पते मोक्षाकाङ्क्षिणां भ
मदापनः मां प्रियत्वेन प्र
मत्प्राप्तिर्वः शाश्वती ॥४५
हृदये च बहिश्च भौतिकानां
भवतीभिः सह मे विरहमेव
तथा आत्मा जीवः आत्मन
दृश्यमानरूपत्वेन आभान्तं

किन्तु मयि भक्ति
किम्पुनर्भवतीनां प्रेमानुबन्ध
अध्यात्मशिक्षयेत्यादि । आत्मा
यथा न भवति तथा स्थिता इ
तदनुस्मरणेन ध्वस्तो जीवकोष
स्थिताः के अपि यथा न जान

एतत् सदृष्टान्तमाह-
दोषमारोपयसि स भगवांस्त्वमेव
भवतीनां मत्स्नेहाधीन एवास्मीत
मद्भाग्येनातिभद्रमेव यतो मदापनः
भावः ॥४५॥ किञ्च मामेव भगव
तस्मादविवेकध्वंसनं मत्तः शिक्ष
यत् यूयं ब्रूध्वे तदिदमवधत्त उद्धवो
गोपीज्ञानमाह-अहमिति । सर्वभूत
पञ्चमहाभूतान्याद्यन्तादिवर्तीनीत्यर्थ
तदेवमित्यर्थः । एतानि महाभूतान्या
सन् वर्तते इत्यर्थः । उभयं देहं जीवं
यूयं देहा आत्मानश्च मय्येव सदा व

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु केचित् त्वामेव परमेश्वरं वदन्तीत्याशंक्याह-मयीति ॥४५॥ अहं हीत्यादि ॥४६-४९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तमेवार्थमध्यात्ममुद्रया दृढयति-वायुर्यथेत्यादि ॥४४॥ ननु भूतानामेव खल्वियं व्यास्था न तु भवदुपरि दैवाधिकारं नापि वयं भूतात्मान इत्याशंक्याह-मयि भक्तिर्हीत्यादि । मयि श्रीकृष्णे भगवति भूतानां प्राणिनां भक्तिः अमृतत्वाय मोक्षाय कल्पते मोक्षाकाङ्क्षिणां भक्तेर्मोक्षदत्वाङ्गीकृतेः भवतीनां भूतमित्राणां पुनर्मयि यत्स्नेह आसीत् तद्दिष्ट्या भाग्येनैव कीदृशः मदापनः मां प्रियत्वेन प्रापयतीति तथा भक्तिस्नेहयोरयं विशेषः भक्तिः कदाचिन्मोक्षमपि प्रापयतीति स्नेहस्तु मामेव अतो मत्प्राप्तिर्वः शाश्वती ॥४५॥ ननु तथापि नैतादृशकाठिन्यमुचितमित्याशंक्याह-अहं सर्वभूतानाम् आदिरन्तश्च यथा तथा अन्तरं हृदये च बहिश्च भौतिकानां यथा खमादीनि अन्तर्बहिश्च अतो भौतिकविग्रहाणां भवतीनां यदन्तर्बहिरपि भवेयं तत्किं चित्रं तेन भवतीभिः सह मे विरहमेव नास्ति ॥४६॥ एतदेव पुनर्द्रढयति-एवमित्यादि । एवम्भूतेषु भौतिकेषु यथा भूतानि महाभूतानि तथा आत्मा जीवः आत्मना परमात्मना सह भूतेषु ततः आततः उभयम् आत्मपरमात्मरूपं द्वयं परे परात्परे मयि अक्षरे दृश्यमानरूपत्वेन आभान्तं पश्यत ॥४७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

किन्तु मयि भक्तिरेव श्रेयसीत्याह-मयि भक्तिर्हीत्यादि । मयि भक्तिरेव अमृतत्वाय अमृतवत् स्वाद्यत्वाय कल्पते । किम्पुनर्भवतीनां प्रेमानुबन्धः यद्यतो मयि भवतीनां स्नेहो मदापन आसीत् । आस्ते इति वर्तमाना ॥४४॥ ॥४५-४६॥ अध्यात्मशिक्षयेत्यादि । आत्मानमपि अध्यात्मं या शिक्षा तया कृष्णेन शिक्षिता गोप्यस्तं श्रीकृष्णमध्यगन् प्राप्तवत्यः । पुनस्तद्विश्लेषो यथा न भवति तथा स्थिता इत्यर्थः । (भा.१०-४७-३६) "अचिरान्मामवाप्स्यथ" इत्युद्धवयाने यत्संदिष्टं तदेवेदमित्यर्थः । तदनुस्मरणेन ध्वस्तो जीवकोषो जीवभावो यासां (४०-श.श्लो.) "विविक्त उपसङ्गतः" इति यदुक्तं तद्वत् विविक्त एव ताः स्थिताः के अपि यथा न जानन्ति स्वस्वरूपेणैव स्थिता इत्यर्थः । यद्वा, जीवकोषो लिङ्गशरीरम् ॥४७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एतत् सदृष्टान्तमाह-वायुरिति । आक्षिपते आक्षिपति पृथक्करोतीत्यर्थः ॥४४॥ ननु भोः वाग्मिशिरोमणे ! यस्मिन् येमारोपयसि स भगवांस्त्वमेव सर्वलोकविख्यातो भवसीत्यस्माभिर्ज्ञायत एव, भोः सख्यः ! एवं चेत् सत्यमहं भगवानेव तदपि भवतीनां मत्स्नेहाधीन एवास्मीत्याह, मयि भक्तिमात्रमेव तावदमृतत्वाय मोक्षाय कल्पते । यत्तु भवतीनां मत्स्नेह दासीत्तद्दिष्ट्या सौभाग्येनातिभद्रमेव यतो मदापनः माम् आपयति बलादाकृष्य युष्मत्समीपमानयत्यानीयाचिरेणैव युष्मदन्तिक एव स्थापयिष्यतीति भावः ॥४५॥ किञ्च मामेव भगवन्तं यदि यूयं जानीध्वे एव तदा मद्विरहदुःखं नास्त्येव युष्माकं केवलमविवेकेनैव दुःखं लभध्वे तस्मादविवेकध्वंसनं मत्तः शिक्षध्वमित्याशयेनाह-अहमिति । वस्तुतस्तु भोस्त्रिजगतीवर्तिनो महायोगेश्वराः ! ज्ञानं दुःखमात्रध्वंसनं यद्यूयं बूध्वे तदिदमवधत्त उद्धवोपदिष्टमिव साक्षामदुपदिष्टमपि ज्ञानं प्रेमवत्सु जनेषु दुःखानिवर्तनाद्वैयर्थ्यमेव प्राप्नोतीति ज्ञापयन्नेव गोपीर्ज्ञानमाह-अहमिति । सर्वभूतानां देवमनुष्यतिर्यगादीनाम् आद्यन्तमध्यबहिर्वर्तीत्यर्थः । भौतिकानां देहादीनां यथा खादीनि खमहाभूतान्याद्यन्तादिवर्तीनीत्यर्थः । हे अङ्गनाः रमण्यः ! एवं तत्त्वं मे यूयं स्त्रीजनाः नैव जानीथेति भावः ॥४६॥ एवं हि सर्वमित्यर्थः । एतानि महाभूतान्याकाशादीनि भूतेषु देहेषु वर्तन्ते । आत्मा जीवश्च आत्मना स्वरूपेण ततः विस्तृतः देहव्यापकः सन् वर्तते इत्यर्थः । उभयं देहं जीवं च मयि परे परमात्मनि अक्षरे नित्ये । सर्वव्यापकेऽधिष्ठानतत्त्वे आभान्तं प्रकाशितं पश्यत तेन सदेहा आत्मानश्च मय्येव सदा वर्तन्त एवेति कुतो मद्विरहखेदोऽविवेकविजृम्भित इति भावः ॥४७॥

गूढार्थदीपिनी

मयि भक्तिः अमृतत्वाय मोक्षाय कल्पते। यदुत यदपि मयि भवतीनां पूर्णस्नेहः आसीत् तत् दिष्ट्या अतिभद्रम्। य मत्प्रापणः। माम् अपयति प्रापयति तथा ॥४४॥ हे अङ्गनाः! तथा भौतिकानां घटशरावादीनाम् आकाशादीनि पञ्चभूतानि आद्यन्तादिरूपाणि सन्ति एवं सर्वभूतानां जरायुजादीनामहमपि अतो व्यापकं मां भवत्यः प्राप्ता एवेति ॥४५॥ एवम्भूतानि आकाशादीनि भूतेषु देहेषु। आत्मा जीवश्च आत्मना स्वरूपेण चिदात्मकेन ततो विस्तृतः देहव्यापकः सन् वर्तते इत्यर्थः। उभ देहं जीवं च मयि आभातं पश्यत अतः कुतो वियोगः ॥४६॥ एवं शिक्षिता गोप्यः तं श्रीकृष्णम् अध्यगन् प्रापुः। कथम्भूताः तस्य आत्मतत्त्वस्य अनुस्मरणेन ध्वस्तो जीवकोशो लिङ्गशरीरं यासां ताः ॥४७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आक्षिपते वियोजयति ॥४४॥ संयोगवियोगयोरीश्वरकृतत्वेन तयोश्चिन्तां त्यक्त्वा मुक्त्यर्थं मद्भजनं कर्तव्यमित्युक्तं सार्धद्वाभ्याम्। अथ मया तु स्वेच्छया भक्तकार्यसिद्धौ संयोगवियोगौ भजमानेनापि कदाचिदपि कस्यचिदपि वियोगो नास्तीत्याह-अहमिति। सर्वभूतानां चिदचिद्रूपाणां भौतिकानां पञ्चभूतविकाराणाम् ॥४५-४६॥ उक्तार्थं स्पष्टीकरोति-एवमिति। एवमेतानि भूतानि आकाशादीनि उपलक्षणमेतदचेतनवर्गस्य सर्वोऽप्यचेतनवर्ग इत्यर्थः। भूतेषु आत्मा शुभाशुभकर्मकर्त्रा स्वेनैव प्रतिशरीरं पृथक् यस्ततः आत जीवः जातावेकवचनं सः एवमुभयं चिदचित्तत्त्वद्वयम् अक्षरे निर्विकारस्वरूपे मयि आभान्तं समन्ततः प्रकाश्यमानं पश्यत ॥४७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तदैवं वचनं प्राणिन एव जारा भवन्तीति कथं कालेन संयोगवियोगौ क्रियेतेति चेत्तत्राह-वायुर्यथा घनानीकमिति। यथ वायुः मेघसमूहं योजयति वियोजयति च यथा तृणसमूहं वात्यारूपः तूलञ्च कार्पासपिण्डं रजो भूरेणुः तृणादीनि राजससात्त्विकतामसानि निर्गुणा मेघाः चतुर्विधा अपि वायुना स्वेच्छया नीयन्ते स्थाप्यन्ते वा तथा भूतानि चतुर्विधान्यपि भूतानि भूतकृत्कालः योजयति वियोजयति च अतः कालाधीनत्वात् योगवियोगार्थं कोऽपि नोपालभ्यः ॥४४॥ परमार्थबुद्धियुक्ताश्चेत्तत्राह-मयि भक्तिर्हि भूतानामिति। भक्तिर्हि शास्त्रीया आन्तरप्रेमसहिता सेवादिः इन्द्रियाणामहमहमिकया स्वाभाविकी वृत्तिर्वा अमृतत्वाय मोक्षाय भूतानामिति नात्रान्तराधिकारभेदो वक्तव्यः। यथा मर्यादायां ब्राह्मण एव मुच्यत इति न तथा भक्तिमार्गे कल्पत इति। असहायैव भक्तिर्मोक्षं दातुं समर्था न तु ज्ञानमिव कर्मापेक्षते अन्तःकरणशुद्धिं वा अतो भक्तानां मोक्षो नात्यन्तं दुष्प्राप्यः भवतीनां तु ततोऽपि विशे इत्याह-दिष्ट्या यदासीन्मत्स्नेह इति। स्नेहो लौकिकः स तु कामकृतो भवति काममयः पुरुषः इति स्नेहजोऽपि कृत्रिमो वे सहजो भगवद्विषयको न भवतीति असंव्यवहार्यत्वाद्भगवतः प्रकृते तु दैवगत्या मद्विषयो जातः तस्य च फलं मदापनमिति मामेवापयति। प्रापयतीति मद्भावं मत्सायुज्यं वा करोतीत्यर्थः। अमृतत्वं ब्रह्मभावः। पुरुषोत्तमभावो मद्भावः तद्बलक्षण पूर्वमेवावोचाम ॥४५॥ कीदृशो भगवान् यादृशं स्नेहः प्रापयतीति आकाङ्क्षायामाह-अहं हीति। स्नेहस्य मत्प्रापणे आवरणनिराकरणं साध्यं न तु प्रयासान्तरमस्तीति वक्तुं भूतानां पूर्वापरबाह्याभ्यन्तरभेदेन प्रादेशचतुष्टये स्वस्यावस्थानं निरूप्यते युक्तश्चायमर्थः व्यापको हि परिच्छिन्नस्य एवमेव भवति। आदिरन्त इति उत्पत्तेः पूर्वं नाशानन्तरं च अहमेवेति। कालपरिच्छेदे उभयतः स्थितिम अन्तरं बहिरिति। देशपरिच्छेदे सङ्घाताभिप्रायमेतत् अणुजीवाभिप्रायेऽपि तत्र पञ्चमहाभूतानि दृष्टान्तीकरोति भौतिकानामिति खमव वार्जलं तामसराजसभावनिरूपणार्थम् आकाशजलयोः क्रमो निरूपितः। तथैव भूवाद्योः सृष्टिप्रलयभेदेन क्रमद्वयं निरू भवति मध्ये सात्त्विकं तेजः आद्यं तयोस्तामसौ तत्संलग्नौ राजसौ मध्ये सात्त्विकमिति यथा सर्वतो व्याप्तं शरीरं तत्सं इन्द्रियप्राणाः मध्ये चैतन्यमिति ज्ञापनार्थम् अङ्गना इति सम्बोधनम्। उत्तमाङ्गवत्त्वेन विश्वासार्थम् एवं परितो वेष्टनमात्रतया स जीवानां जगतो वा भेदो निरूपितः ॥४६॥ तन्निराकुर्वन् केवलात्मप्रतिपत्तिमाह-एवमति। अनेन प्रमेयं भगवानिति स भविष्यति। पूर्वश्लोके भूतानि परितो निरूपितानि भौतकानां कालपरिच्छेदे देशपरिच्छेदे च मध्यभावस्तु न निरूपितः मध्य किमात्मक इत्याकाङ्क्षायामाह-मध्येऽपि भूतान्येव भौतिकेषु वर्तन्ते। नदीनिमग्नघट इव स्थिता भविष्यन्तीति पिण्डकारणा

स्थिता भविष्यन्तीति न ज
आत्मतया स्वरूपत्वेन मह
कार्यकारणभावापन्नस्य भू
आनन्तर्यार्थो निरूपितः। ए
कालसहितस्य सर्वस्यापि क
पश्यतेति। किं द्रष्टव्यमित्या
भवति। जीवानामप्यतिरिक्त

यथा मेघसेनां तृण
भूतानि ॥४४॥ मद्वियोगेन भ
मदापनो मत्प्राप्तिकरो मत्स्नेहो
चाहमस्मि हि युक्तम्। भौतिक
व्याप्तः आत्मना स्वरूपेणान्तय
पश्यत एकत्वात् न संयोगवियो

तर्हि कोऽसौ भूतकृत्
भक्तिर्भूतानाममृतत्वाय अमृतं मो
भवतीनां यदासीत् तदेतत् दिष्ट्या अ
यं च वयं स्नेहेन प्राप्स्याम इ
जरायुजादिचतुर्विधशरीराणां तत्का
स्थितः। एतदेव दृष्टान्तेन स्पष्टयति
पञ्चमहाभूतकार्याणां घटशरावादीन
चतुर्विधशरीराणि च भूतेषु स्वकार
उभयमपि जडचेतनात्मकं जगत् परे
इत्याशंक्याह-अक्षरे इति। जन्मा
आत्मतत्त्वोपदेशेन एवं कृष्णेन शिक्षि
तास्तं सर्वात्मकं भगवन्तमध्यगन्। प्र

मयीति। हि यस्मात् मयि
भवति। अतो मदापनः मत्प्रापकः मत्
प्राप्स्याम इत्यपेक्षायामाह-अहमिति न
सर्वभूतानां जरायुजादिशरीराणां तत्का
व्यवस्थितः। यथा भौतिकानां पञ्चमहाभू

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स्थिता भविष्यन्तीति न जलात्मता घटस्य भविष्यतीति विशेषमाह–आत्मात्मतयेति। आत्मनां भूतशब्दवाच्यानां घटपटादीनाम् आत्मतया स्वरूपत्वेन महाभूतानि भौतिकेषु भवन्तीत्यर्थः। अनेन पञ्चमहाभूतात्मकत्वं जगतो निरूपितम्। अतः परमुभयविधस्य कार्यकारणभावापन्नस्य भूतजातस्य भगवानाद्यन्तयोरन्तर्बहिः तद्रूपश्चेति निरूपयति। तत उभयं मयीति बोधनार्थं तत इति क्रमः आन्तर्यार्थौ निरूपितः। एतन्मयीति वचनं ब्रह्माण्डान्तर्वर्तिभूतभौतिकपक्षे पुरुषवचनं ब्रह्माण्डपक्षे तु कालपरम् अथ तदनन्तरं कालसहितस्य सर्वस्यापि कार्यजातस्य पूर्ववन्मयि परे अहं तेषामाद्यन्तान्तरवर्तीत्यादि एतावद्दूरे स्वरूपं निरूप्य तस्यानुभवं कारयति–दर्शयतीति। किं द्रष्टव्यमित्याकाङ्क्षायां क्रमनिरूपणं परित्यज्य फलमाह–अक्षरे आभातमिति। आननब्रह्मात्मभावोऽपि निरूपितो भवति। जीवानामप्यतिरिक्तभावस्य निराकृतत्वात् स्नेहस्य मदापनजनने अधिकार इव निरूपितः ॥४७॥

श्रीसुबोधिनीसारः

यथा मेघसेनां तृणं तूलं रजांसि संयोज्य सम्मेल्य पुनर्वायुर्यथा क्षिपते वियोजयति तथा भूतकृत् ब्रह्मा कालो वा भूतानि ॥४४॥ मद्वियोगेन भवतीनां मत्प्रेमातिशयो जातो दिष्ट्येत्याह। भूतानां मयि भक्तिरमृतत्वाय मोक्षाय कल्पते। मदापनो मत्प्राप्तिकरो मत्स्नेहो भवतीनां यदासीत् तद्दिष्ट्या भद्रम् ॥४५॥ हे अङ्गनाः! सर्वभूतानामादिरन्तो बाह्यमाभ्यन्तरं अहमस्मि हि युक्तम्। भौतिकानां शरावादीनाम् आकाशादिभूतानि यथा ॥४६॥ एवमेव भूतानि प्राणिनः भूतेषु आत्मा ततो भातः आत्मना स्वरूपेणान्तर्यामिणा भोक्तृरूपेण च उभयं भूतभौतिकं भोग्यं भोक्तारं च परेऽक्षरे मयि आभातं कल्पीतं यूयं पश्यत एकत्वात् न संयोगवियोगादि वस्तुतः ॥४७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तर्हि कोऽसौ भूतकृत्, किञ्च तदाराधनम्, येन वयं त्वां प्राप्नुम इत्यपेक्षायामाह–मयीति। हि यस्मात् मद्विषयिका भक्तिर्भूतानाममृतत्वाय अमृतं मोक्षः स च मदात्मकस्तदर्थं तत्प्रापयितुं कल्पते समर्था भवति, अतो मदापनः मत्प्रापकः मत्स्नेहो भवतीनां यदासीत् तदेतत् दिष्ट्या अतिभद्रमेव जातम्। नातोऽधिकं मत्प्राप्तसाधनं भवतीनामनुष्ठेयमस्तीत्याशयः ॥४४॥ कीदृशस्त्वम्, यं च वयं स्नेहेन प्राप्स्याम इत्यपेक्षायामात्मनो याथात्म्यमाह–अहमिति। हिशब्दोऽवधारणे। अहमेव सर्वभूतानां जरायुजादिचतुर्विधशरीराणां तत्कारणाकाशादीनां च आदिः करणम्, अन्तो लयाधारश्च अन्तरम् अन्तर्यामी च, बहिश्च व्याप्य स्थितः। एतदेव दृष्टान्तेन स्पष्टयति–भौतिकानामिति। अप्रतारणं सूचयन् स्नेहेन सम्बोधयति–अङ्गना इति। यथा भौतिकानां पञ्चमहाभूतकार्याणां घटशरावादीनां तान्याकाशादीनि पञ्चमहाभूतान्येवाद्यन्तरूपाणि भवन्ति ॥४५॥ यथैतानि घटशरावादीनि चतुर्विधशरीराणि च भूतेषु स्वकारणेष्वाकाशादिषु वर्तन्ते, आत्मा जीवात्मा चात्मना स्वरूपेण ततः व्याप्तो वर्तते, एवमेव उभयमपि जडचेतनात्मकं जगत् परे सर्वकारणभूते मयि आभान्तं पश्यतेति द्वयोरन्वयः। तर्हि तवापि स्वकारणे स्थितिः स्यात् इत्याशंक्याह–अक्षरे इति। जन्मादिविकाररहिते इत्यर्थः। अतो न मत्कारणान्तरमस्तीत्याशयः ॥४६॥ अध्यात्मशिक्षया अध्यात्मतत्त्वोपदेशेन एवं कृष्णेन शिक्षिता गोप्यस्तस्यात्मतत्त्वस्यानुस्मरणेनानुध्यानेन ध्वस्तो जीवकोशः कोशवदावरकमज्ञानं यासां तासां सर्वात्मकं भगवन्तमध्यगन्। प्रापुर्ज्ञातवत्यः ॥४७॥

अन्वितार्थप्रकाशिका

मयीति। हि यस्मात् मयि भक्तिर्भूतानाममृतत्वाय अमृतत्वं मोक्षं स च मदात्मकस्तदर्थं तत्प्रापयितुं कल्पते समर्थो भवति। अतो मदापनः मत्प्रापकः मत्स्नेहो भवतीनां यदासीत् तदेतत् दिष्ट्या अतिभद्रमेव जातम् ॥४४॥ कीदृशस्त्वम् यं स्नेहेन प्राप्स्याम इत्यपेक्षायामाह–अहमिति नातोऽधिकं मत्प्राप्तसाधनं भवतीनामनुष्ठेयमस्तीत्याशयः ॥४४॥। हे अङ्गनाः! अहमेव सर्वभूतानां जरायुजादिशरीराणां तत्कारणानामाकाशादीनां च आदिः कारणम् अन्तो लयाधारश्च अन्तरम् अन्तर्यामी च बहिश्च व्याप्य स्थितः। यथा भौतिकानां पञ्चमहाभूतान्येवाद्यन्तरूपाणि भवन्ति अतो व्यापकं मां भवत्यः प्राप्ता एवेति ॥४५॥ ननु जरायुजादीनां

अन्वितार्थप्रकाशिका

भोक्ता आत्मैवाच्छन्नरूप: तत्रैव सर्वभूतानि वर्तन्त इति कुतोऽस्माकं त्वत्प्राप्तिरित्यत आह-एवमिति । यथैतानि यथैतानि घटशरावादीनि चतुर्विधशरीराणि च भूतेषु स्वकारणेष्वाकाशादिषु एव वर्तन्ते न तु भोक्तर्यात्मनि । आत्मा जीवात्मा तु तेषु भूतेषु आत्मा भोक्तृस्वरूपेण तत: व्याप्तो वर्तते न तु कारणत्वेन उभयमपि भोग्यं भोक्तारं च जडचेतनात्मकं जगत् परे सर्वकारणभूते मयि आभान्तं पश्यत ॥४६॥ अधीति । अध्यात्मशिक्षया आत्मशिक्षया आत्मतत्त्वोपदेशेन एवं कृष्णेन शिक्षिता गोप्यस्तस्यात्मतत्त्वस्यानुस्मरणेनानुध्यानेन ध्वस्तो जीवकोश: कोशवदावरकमज्ञानं यासां तास्तं सर्वात्मकं भगवन्तमध्यगन् प्रापुर्ज्ञातवत्य: । मलोप आर्ष: उपोद्घातोक्तरीत्या वा ॥४७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अयं युष्माकं स्नेहातिशय: परमभद्ररूपोऽस्तीत्याह-मयीति । मदापन: मत्प्रापक: भवतीनां यत् य: मयि स्नेह आसीत् तद्दिष्ट्या परमं भद्रं जातम् ॥४४॥ त्वयि कृतस्य स्नेहस्यैतावन्माहात्म्यं कुत इत्याशंक्य स्वमाहात्म्यमाह-अहं हीति । हे अङ्गना: सर्वभूतानामादि: सृष्टे: पूर्वम् अहमेवासम् । अन्त: प्रलये अहम् अवशेष: भविष्यामि । अन्तरं चराचराणां स्थितिकाले विकसितांन्तर्यामिशक्त्याहमेव व्याप्तोऽस्मि बहि: सर्वकालेषु सृष्टेर्बहि: दिव्यमूर्त्या ब्रह्मपुराख्ये धामनि अपरिमितमुक्तकोटिभि: सह वर्तमानोऽस्मि । तत्र दृष्टान्त: यथा भौतिकानां पञ्चभौतिकदेहानाम् आदि: उत्पत्ते: प्राक् अन्ते नाशे च खादीनि पञ्च महाभूतानि अविनष्टतया वर्तन्ते अन्तरं तेषां स्थितिकाले तेषु स्वांशेनाचितानि सन्ति बहि: तदुत्पत्त्यादित्रिषु कालेषु बहि:स्थितेषु स्वस्वलोकेषु मूर्ता: पञ्चभूताभिमानिनो वरुणवह्न्यादयो देवा: सपार्षादा वर्तन्ते तथाऽहं स्थितोस्मि ॥४५॥ एवमनेन प्रकारेण एतानि आकाशादीनि महाभूतानि ॥ भौतिकेषु देहादिषु परस्परं व्याप्यव्यापकभावेन स्थितानि सन्ति अथ च भूतेषु महाभूतरचितदेहेषु पृथिव्यादिमहाभूतेषु च आत्मा भोक्तृचेतनवर्ग: । आत्मना स्वकीयज्ञानशक्त्या तत: व्याप्त: अथ अक्षरे ब्रह्मपुरे आभातम् । दिव्यविग्रहेण प्रकाशमानं परं सर्वेभ्य: श्रेष्ठं मां पुरुषोत्तमम् उभयोश्चेतनाचेतननिकरयोर्विषये आत्मनाऽन्तर्यामिरूपेण ततो व्याप्तं यूयं पश्यत मन्माहात्म्याधिक्यात् मयि कृतस्नेहस्याप्याधिक्यमस्ति । अत उक्तप्रकारेण मां सदा समीपे ज्ञात्वा भजतेति भाव: ॥४६॥ कृष्णेनैवमध्यात्मशिक्षया स्वस्वरूपान्वयव्यतिरेकत्वोपदेशेन शिक्षिता बोधिता: गोप्य: तस्य श्रीकृष्णस्यैव अनुस्मरणेन ध्वस्ता: नष्टा: जीवानां कोशा: लिङ्गशरीराणि यासाम् एवम्भूता: सत्य: तमेव अध्यगन् अध्यगच्छन् प्रापु: ॥४७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अपि चातिभद्रमिदं यदुत भवतीनां मद्वियोगेन मयि प्रेमातिशयो जात इत्याह । मयीति । हे सख्य: ! मयि भक्ति भक्तिमात्रमपि भूतानाम् अमृतत्वाय मोक्षाय कल्पते सर्वथा मोक्षं दातुं समर्था भवतीत्यर्थ: । भवतीनां तु मत्स्नेह: मयि निरवधि प्रेमा आसीत् यत् तत् दिष्ट्या अतिभद्रं यत: स: मदापनो मत्प्रापण: ॥४४॥ कीदृशस्त्वं यं वयं स्नेहेन प्राप्स्याम: इत्यपेक्षायां स्वात्मनो याथात्म्यमाह । अहं हीति ॥ हे अङ्गना: ! प्रशस्ताङ्गवत्य: यथा भौतिकानां पञ्चीकृतजभौतिकदेहानाम् आदि: अ अनन्तरम् आदावन्ते मध्ये चेत्यर्थ: ॥ भू: पृथ्वी वार्जलं ज्योतिस्तेज: वायु: खमाकाशम् अपञ्चीकृतानि खादीनि भूतानि वर्तन्ते स्वस्वलोके पृथक्तयापि स्थितानि सन्तीत्यर्थ: । तथा अहं हि अहमपि सर्वभूतानां सर्वेषां प्राणिनाम् आदि: सृष्टे: पूर्वम् अन्त: सर्गलयेऽपि अन्तरं स्थितिकालेऽपि तेषु स्थित एवास्मि बहिश्च दिव्यमूर्त्या वर्तमानो दिव्यमुक्तकोट्युपासितचरण: स्वधाम्न्यपि स्थितोऽस्मि । अनेन —

'यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु । प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥' इति ॥

स्वोक्त एवार्थ: प्रकाशित: ॥४५॥ ननु भगवंस्त्वया दृष्टान्ते अचिन्तितानि भूतानि समभिहितानि तत्र तद्भोक्तात्मवद रूपस्तस्मिंश्च सर्वव्यापकत्वे सति तत्परस्य तवास्माकं प्राप्ति: कथमित्याशङ्कापनोदायोक्तार्थानुवादेन तदुत्तरयति । एवमिति अङ्गना: ! एवमुक्तप्रकारेण एतानि कार्यकारणात्मकानि भूतानि सन्ति । तेषु कार्यकारणात्मकेषु भूतेषु आत्मा जीव: सर्वां

क्षेत्रज्ञ इत्यर्थ: । आत्मना
पश्यत । चेतनाचेतनात्मकं
॥४६॥ अध्यात्मशिक्षयेति
शिक्षा तया आत्मपरम
भगवदुपदिष्टात्मयाथात्म्यस्य
सत्य: तं भगवन्तम् अध्यग

जैसे वायु बादल
रूपसे उन्हें अलग अलग
ईच्छानुसार करते रहते है
करनेवाला स्नेह-भक्ति है
अमृतत्त्व परमपद प्रदान
पदार्थ है उनके आद्य मध्य
अग्नि-आकाश ओतप्रोत
केवल मैं ही हुं ॥४६॥ इस
है और आत्मा भोक्ताके स्व
दोनों मेरे ही अंदर प्रतित

श्रीशुक[1] उवाच

अध्यात्मशिक्षया
[2]आहुश्च ते नलिन
संसारकूपपतितो
॥ इति

श्रीशुक:, उवाच ।

एवम्, कृष्णेन, अध्यात
नलिननाभ, अगाधबोधै:, योगेश्व
मनसि, सदा, उदियात् ॥४९॥

॥ इति श्री

अध्यात्मशिक्षया स्वरूप

---

१. ऋषिरुवाच-गो. प्रे. टी. । २. मध्य

नि यथैतानि घटशरावादीनि
मा तु तेषु भूतेषु आत्मना
त् परे सर्वकारणभूते मयि
एवं कृष्णेन शिक्षिता
सर्वात्मकं भगवन्तमध्यगन्

ां यत् यः मयि स्नेह आसीत
ाह–अहं हीति । हे अङ्गनाः !
न्तरं चराचराणां स्थितिकाले
मनि अपरिमितमुक्तकोटिभिः
शे च खादीनि पञ्च महाभूतानि
ेषु बहिःस्थितेषु स्वस्वलोकेषु
प्रकारेण एतानि आकाशादीनि
रचितदेहेषु पृथिव्यादिमहाभूतेषु
तम् । दिव्यविग्रहेण प्रकाशमानं
ततो व्याप्तं यूयं पश्यत एवं
ज्ञात्वा भजतेति भावः ॥४६॥
कृष्णस्यैव अनुस्मरणेन ध्वस्ताः
ुः ॥४७॥

ीति । हे सख्यः ! मयि भक्तिर्हि
वतीनां तु मत्स्नेहः मयि निरुपाधिः
वयं स्नेहेन प्राप्स्यामः इत्यपेक्षायां
तजभौतिकदेहानाम् आदिः अन्तः
पञ्चीकृतानि खादीनि भूतानि बहिः
र्षां प्राणिनाम् आदिः सृष्टेः पूर्वमपि
ो दिव्यमुक्तकोट्युपासितचरणाब्जः

तेष्वहम् ॥' इति ॥
समभिहितानि तत्र तद्भोक्तात्मैवाद्यन्त-
र्थानुवादेन तदुत्तरयति । एवमिति ॥
केषु भूतेषु आत्मा जीवः सर्वेषां तेषां

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

क्षेत्रज्ञ इत्यर्थः । आत्मना तदात्मभावेन ततो व्याप्तः उभयमुक्तविधचिदचिद्द्वन्द्वद्वयमपि परे अक्षरे मयि अथ कात्स्न्र्येन आभान्तं पश्यत । चेतनाचेतनात्मकं वस्तुजातमन्तर्बहिश्च व्याप्य वर्तमाने व्याप्यगतविकाररहिते चाक्षरे मयि धारकतया भातं पश्यतेत्यर्थः ॥४६॥ अध्यात्मशिक्षयेति ॥ आत्मनीत्यध्यात्मं विभक्त्यर्थेऽव्ययीभावः । स्वात्मपरमात्मयाथात्म्यविषयकं ज्ञानमित्यर्थः । तस्य शिक्षा तया आत्मपरमात्मस्वरूपसम्यगुपदेशसाधनेनेत्यर्थः । एवमित्थं कृष्णेन कर्त्रा शिक्षिताः गोप्यः तस्य भगवदुपदिष्टात्मयाथात्म्यस्यानुस्मरणेन मननपूर्वकनिदिध्यासनेन ध्वस्तो जीवकोशः कोशवदावरकं कर्ममूलमज्ञानं यासां तथाविधाः सत्यः तं भगवन्तम् अध्यगन् अध्यगमन् प्रापुरित्यर्थः । मुक्ता बभूवुरिति भावः ॥४७॥

कृष्णप्रिया

जैसे वायु बादलो, तीनको, रुई और पृथ्वीके मृत्तिकाके कणोंको परस्पर को मिला देती है और स्वच्छंद रूपसे उन्हें अलग अलग कर देती है, वैसे ही समस्त पदार्थोंका विधाता भगवान भी सबका संयोग-वियोग अपने इच्छानुसार करते रहते है ॥४४॥ प्यारे गोपीजन ! यह परम सौभाग्यकी गाथा है आप सर्व गोपीजनोंको मेरी प्राप्ति करनेवाला स्नेह-भक्ति है वह स्नेह भक्ति प्राप्त हो चुकी है । एक बात सुनिश्चित है मेरे प्रति की गयी प्राणियोंको अमृतत्त्व परमपद प्रदान करनेमें समर्थ है ॥४५॥ प्यारे गोपीजन ! जैसे विश्वमें घट पट आदि जितने भी भौतिक पदार्थ है उनके आद्य मध्य और अन्में एवं बाहर और भीतर उनके मूल कारण पञ्चमहाभूत याथे पृथ्वी-जल-वायु-अग्नि-आकाश ओतप्रोत हो रहे है वैसे ही जितने भी पदार्थ है उनके पहले पीछे और मध्यमें बाहर और भीतर केवल मैं ही हुं ॥४६॥ इसी प्रकार सभी प्राणियोंमे - प्राणियोंके शरीरमें यही पञ्च महाभूत कारणरुपसे विद्यमान है और आत्मा भोक्ताके रूपसे या तो जीवके रूपसे स्थित है । लेकिन मैं इन दोनोंसे पर अविनाशी सत्य हुं । ये दोनों मेरे ही अंदर प्रतित हो रहे है, आपलोका ऐसा अनुभव करो ॥४७॥

श्रीशुक[1] उवाच

अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः । तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन्[2] ॥४८॥
[3]आहुश्च ते नलिननाभ पदारविन्दं [4]योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः ।
संसारकूपपतितोत्तरणावलम्बं गेहञ्जुषामपि मनस्युदियात् सदा नः ॥४९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे वृष्णिगोपीसङ्गमो नाम
द्व्यशीतितमोऽध्यायः ॥८२॥

कर्दमक्षमा

श्रीशुकः, उवाच ।

एवम्, कृष्णेन, अध्यात्मशिक्षया, शिक्षिताः, गोप्यः, तदनुस्मरणध्वस्तजीवकोषाः, तम्, अध्यगन् ॥४८॥ च, आहुः, हे, नलिननाभ, अगाधबोधैः, योगेश्वरैः, हृदि, विचिन्त्यम्, संसारकूपपतितोत्तरणावलम्बम्, ते, पदारविन्दम्, गेहञ्जुषाम्, अपि, नः, मनसि, सदा, उदियात् ॥४९॥

॥ इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे अन्वयवर्णने द्व्यशीतितमोऽध्यायः ॥८२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अध्यात्मशिक्षया स्वरूपोपदेशेन शिक्षिताः बोधितास्तस्यानुस्मरणेन ध्वस्तो जीवकोशो लिङ्गं यासां तास्तमेवाध्यगन्

---

१. ऋषिरुवाच-गो. प्रे. टी. । २. मध्यगुः-विज. । ३. नताःस्म ते नाथ-विज. । ४. योगीश्वरै-वीर. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रापुः ॥४८॥ एवं प्राप्तोऽपि कृष्णः पुनर्गृहव्यासङ्गेन माऽपयात्विति तच्चरणस्मरणं प्रार्थयामासुरित्याह–आहुश्चेति । हे नलिननाभ ते पदारविन्दं गेहञ्जुषां गृहसेविनीनामपि नो मनसि सदा उदियात् आविर्भवेत् ॥४९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां द्व्यशीतितमोऽध्ययः ॥८२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तमेव श्रीकृष्णमेव ॥४८॥ अपयातु विस्मृतिं गच्छतु । तच्चरणस्मरणं कृष्णपादस्मृतिम् । अगाधबोधैरनन्तबोधाढ्यैर्योगीश्वरैः सनकाद्यैः संसारकूपपतितानामुत्तरणायोर्ध्वगमनायावलम्बं हस्ताधारम् । अनेन प्राप्तात्मतत्त्वैरप्यभीप्समानतया भक्तेराधिक्यं ध्वनितम् ॥४९॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे द्व्यशीतितमोऽध्यायः ॥८२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदुपदेशफलमाह–कृष्णेनैवमात्मानं श्रीकृष्णमेवाधिकृत्य या शिक्षा तया शिक्षिताः गृहीतार्थाः सत्यस्तदनुस्मरणेन तस्य शिक्षितार्थस्य सदा चिन्तनेन ध्वस्तो नष्टः जीवस्य जीवनस्य कोषमाच्छादनं न जीविष्याम इति भावना यासां ताः तं श्रीकृष्णमध्यगन् प्राप्स्याम इति दृढसम्भावनाविषयत्वेनाजानन् इति प्रथमे द्वितीये तु तस्य सर्वव्यापकमूर्तेरनुस्मरणेन स प्रेमातिशयादेव तथानुभवेन ध्वस्तो जीवस्य आत्मनः कोषः परिच्छेदः अप्राप्तिरूपभावना याभ्यस्तथाभूताः सत्यः तमध्यगन् प्राप्तत्वेनैवामन्यतेत्यर्थः । तृतीये तस्याप्रकटप्रकाशस्यानुस्मरणेन ध्वस्तो जीवानां कोषो प्रकटलीलारूपो विच्छेदहेतुर्यासां ता इति सर्वत्र चार्थे श्लेषेण दृष्टान्तद्योतनाच्च अन्ये यथा अध्यात्मशिक्षया आत्मानमधिगच्छन्ति तद्वदिति ॥४८॥ यद्यपि परोक्षवादाय दृष्टान्ताय वा आध्यात्मभङ्ग्योक्तमपि तादृगर्थमनादृत्य तद्वचनेनैव तं प्राप्तव्यं ज्ञात्वा परमसन्तुष्टाः बभूवुस्तथापि परमौत्सुक्येन प्रार्थयामासुरित्याह–आहुश्चेति । हे नलिननाभेति पद्माकारनाभित्वात् परमसौन्दर्यमुद्दिष्टम् । अतः अरविन्दरूपकेण श्रीपदस्य परममधुररसत्वं तापहरत्वादिकं च ध्वनितम् अत एव योगो भक्तियोगः तदीश्वरैर्वशीकृतभक्तियोगैरित्यर्थः । हृद्येव विशेषेण सर्वोत्कृष्टतया भाव्यं चिन्त्यम् अगाधबोधैर्ज्ञानिभिर्मुक्तैरपि परमपुरुषार्थतया भाव्यं किञ्च संसारेति । एवं भुक्तमुक्तविषयिणां त्रयाणां सेव्यत्वेन साध्यत्वं साधनत्वं चोक्तम् । सदा मनसि जुषां सेवमानानामपि नोऽस्माकं गेहं प्रति सकृदप्युदियात् तत्र प्रकटं भवतु यद्वा, प्रथमतो नलिननाभेति सम्बोध्य सपरिचयविशेषं ज्ञापयित्वा तावता विरहस्यानौचित्यं दुःसहत्वं च ज्ञापितम् । वाक्यार्थश्चायम्–आस्तां तावद्दुर्विहितानामस्माकं त्वद्दर्शनगन्धवार्तापि हे नलिननाभ ! तव पदारविन्दं त्वदुपदेशानुसारेणास्माकं मनस्यप्युदियात् । ननु, किमिवात्रासम्भाव्यं तत्राहुः–योगेश्वरैरेव हृदि चिन्त्यं न त्वस्माभिस्त्वत्स्मरणारम्भ एव मूर्च्छागामिनीभिः तदेवोपपादयन्ति अगाधबोधैः साक्षाददर्शनेऽप्यक्षुभितबुद्धिभिः न त्वस्माभिरिव तद्दर्शनेच्छया मुहुर्मोहेन क्षुभितबुद्धिभिः तदुक्तमुद्धवं प्रति स्वयं भगवता —

"मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः । स्मरन्त्योऽङ्ग विमुह्यन्ति विरहौत्कण्ठविह्वलाः ॥" इति ।

चरणास्यारविन्दरूपकं तत्स्पर्शेनैव दाहशान्तिर्भवति न तु स्मरणेनैवेति ज्ञापनाय ननु तथा निदिध्यासनमेव योगेश्वराणां संसारदुःखमिव भवतीनां विरहदुःखं दूरीकृत्य तदुदयं करिष्यतीत्याशंक्याहुः–संसारकूपपतितानामेवोत्तराणामवलम्बं न त्वस्माकं विरहसिन्धुनिमग्नानां तच्चिन्तने दुःखवृद्धेरेवानुभूयमानत्वादिति भावः । नन्वत्रैवागत्य मुहुर्मां साक्षादनुभवत तत्राहुः–गेहजुषां परगृहिणीनामस्वाधीनानामित्यर्थः । यद्वा, गेहञ्जुषामिति सङ्गतिश्च त्वत्पूर्वसङ्गमविलासधाम्नि तत्तदस्मत्कामपूरणे स्वाभाविकास्मत्प्रतीतिनिलये निजगृहे गोकुल एव भवतु न तु द्वारकादाविति स्वमनोरथविशेषेण तस्मिन्नेव प्रीतिमतीनामित्यर्थः यः कौमारहरः स एव हि वर इत्यादिवत् तस्मात् अस्माकं मनसि भवच्चरणचिन्तनसामर्थ्याभावात् स्वयमागमनस्यासामर्थ्यादनभिरुचेर्वा —

"धारयन्त्येव कृच्छ्रेण प्रायः प्राणान् कथञ्चन । प्रत्यागमनसन्देशैः" इति ।

भवज्ज्ञातास्मन्मर्मा
श्रीमदुद्धवयानदर्शितसिद्धान्त
ज्ञेयम् ॥४९॥

॥ इति श्रीमद्भागवते म

एवं तद्वचनेनैव तत्र प्र
परमसौन्दर्यमुक्तम् । अतोऽ
भक्तियोगस्तदीश्वरैर्वशीकृतभ
परमपुरुषार्थतया भाव्यम् । कि
मनसि जुषां त्वत्कृपया त्वां स
सख्येन तत्तुल्यानां श्रीदामादि
श्रीबादरायणिनैव नोक्तमिति ज्ञे

॥ इति श्रीमद्भागवते मह

गेहजुषां गृहस्थानामैश्वर्य

॥ इति श्रीमद्भागवतव्

अध्यात्मशिक्षयेति आत्म
शिक्षया सम्यगुपदेशेन साधनेन
मननपूर्वकनिदिध्यासनेन ध्वस्तः ज
मुक्ता बभूवुरित्यर्थः ॥४८॥ तदा तदुप
आहुश्चेति । उक्तिमेवाह–त इत्यादि
चिन्त्यमेव न तु दृश्यं संसारकूपे प
सदा उदियात् । आविर्भवेत् यथावद्वि

॥ इति श्रीमद्भागवते महापुराणे

श्री

॥ इति श्रीमद्भागवते महापुराणे

अध्यात्मशिक्षयेत्यादि । आत
गोप्यस्तं श्रीकृष्णम् अध्यगन् प्राप्तवत्यः ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भवज्ज्ञातास्मन्मर्मानुरूपं भवान् साक्षादेव श्रीवृन्दावन एव यद्यागच्छेत् तदैव निस्तार इति भावः। अत्र श्रीदामादिगोपानां श्रीमदुद्धवयानदर्शितसिद्धान्तरीत्या विरह एव न जातोऽस्तीत्यनागमनात् किन्तु गोरक्षायामेव स्थितत्वान्मिलनादिकानां वर्णनं ज्ञेयम् ॥४९॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां द्व्यशीतितमोऽध्यायः ॥८२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं तद्वचनेनैव तत्र प्रासव्यं ज्ञात्वापि परमौत्सुक्येन प्रार्थयामासुरित्याह–आहुश्चेति। हे नलिननाभेति। पद्माकारनाभित्वात् परमसौन्दर्यमुक्तम्। अतोऽरविन्दरूपकेण श्रीपदस्य परममधुरत्वं पापहरत्वादिकं च ध्वनितम्। अत एव योगो भक्तियोगस्तदीश्वरैर्वशीकृतभक्तियोगैरित्यर्थः। हृद्येव विशेषेण परमोत्कृष्टतया चिन्तां भाव्यम् अगाधबोधैर्ज्ञानिभिर्मुक्तैरपि परमपुरुषार्थतया भाव्यम्। किञ्च ससारेति। एवं भक्तमुक्तविषयिणां त्रयाणां सेव्यत्वेन साध्यत्वं साधनत्वं चोक्तम्। सदा मनसि जुषां त्वत्कृपया त्वां सेवमानानामपि नोऽस्माकं गेहं प्रति सकृदप्युदियात् प्रकटं भवतु। इत्थं तासां भाषणादिना साम्येन तत्तुल्यानां श्रीदामादिगोपानां तज्जातमेवेति पृथङ्न कृतम्। किंवा, कृतमपि साम्येन विशेषाभावादूह्यत्वाच्च श्रीबादरायणिनैव नोक्तमिति ज्ञेयम् ॥४८॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशमटिप्पण्यां द्व्यशीतितमोऽध्यायः ॥८२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

गेहञ्जुषां गृहस्थानामैश्वर्यपराणामित्यर्थः ॥४९॥

॥इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये द्व्यशीतितमोऽध्यायः ॥८२॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अध्यात्मशिक्षयेति आत्मनि आध्यात्मं विभक्त्यर्थेऽव्ययीभावः स्वात्मपरमात्मयाथात्म्यविषयज्ञानमित्यर्थः। तस्य शिक्षया सम्यगुपदेशेन साधनेनेत्थं कृष्णेन कर्त्रा शिक्षिताः गोप्यस्तस्य भगवदुपदिष्टात्मयाथात्म्यस्यानुस्मरणेन अनुस्मरणपूर्वकनिदिध्यासनेन ध्वस्तः जीवकोषः कोषवदावरकं कर्ममूलमज्ञानं यासां ताः तं भगवन्तम् अध्यगन् प्रापुः क्रमेण प्राप्ता बभूवुरित्यर्थः ॥४८॥ तदा तदुपदिष्टाध्यात्मानुस्मरणविरोधिमोहोपशमनाय मनसस्तदङ्घ्रिप्रावण्यं प्रार्थयमानाः प्राहुश्चेत्याह–आहुश्चेति। उक्तिमेवाह–त इत्यादिना। हे नलिननाभ! अगाधोऽपारो बोधः ज्ञानं येषां तैर्योगेश्वरैर्हृदि विचिन्त्यं केवलं चिन्त्यमेव न तु दृश्यं संसारकूपे पतितानाम् उत्तारणायावलम्बमालम्बनभूतं ते तव पदाम्बुजं देहधारिणां नोऽस्माकं मनसि सदा उदियात्। आविर्भवेत् यथावद्विषयीभवेदित्यर्थः ॥४९॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवकृतभागवतचन्द्रचन्द्रिकायां द्व्यशीतितमोऽध्यायः॥८२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४६-४९॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे द्व्यशीतितमोऽध्यायः ॥८२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अध्यात्मशिक्षयेत्यादि। आत्मानम् अधि अध्यात्मं स्वमुद्दिश्येत्यर्थः। अध्यात्मं या या शिक्षा तया कृष्णेन शिक्षिता गोप्यस्तं श्रीकृष्णम् अध्यगन् प्राप्तवत्यः। पुनस्तद्विश्लेषो यथा न भवति तथा स्थिता इत्यर्थः। "अचिरान्मामवाप्स्यथे"त्युद्धवद्वारा

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

यदादिष्टं तस्यैवायं प्रपञ्चः कीदृश्यः तदनुस्मरणेन ध्वस्तो जीवभावो यासां एतास्तु मुनिरूपा इति बोद्धव्यम् ।।४८।। आहुश्चेत्यादि हे नलिननाभ ! ते तव चरणारविन्दं सदा जुषां नोऽस्माकं मनसि उदियात् अर्थात् तव मनसि तव मन एव नो गृहं स्यादित्यर्थः तत्रैव यथा सदा वसाम इति प्रसादः क्रियतामिति विनयोक्तिः । कीदृशं पदारविन्दं योगेश्वरैर्हृदि विचिन्त्यं न तु साक्षात् संसारकूपपतितानां जनानाम् उत्तारणायावलम्बं तव मनसि चेदस्माकं गृहं जातं तदा नः किं नाभूदिति वाक्यार्थः ।।४९।।

।। इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे द्व्यशीतितमोऽध्यायः ।।८२।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

नित्यभागवतशरीरेण तेनैव गोपीदेहेन तं प्राप्य मौनेनैव स्थिता इति न किञ्चिदुक्तवत्यश्चेत्याह-आहुश्चेत्यादि । हे नलिनना ! मनसि जुषामपि तत् एव पदारविन्दं नोऽस्माकं गेहमुदियात् । गेहं प्रति उदियात् । अतोऽन्तरं यथा वयं न तत्र गच्छामः । अथ व तव पदारविन्दं नोऽस्माकं गेहमुदियात् गेहत्वेनोदियात् तदेव गेहं भवत्वित्यर्थः । अथवा तव पदारविन्दं सदाजुषां नोऽस्माकं मनसि उदियात् अर्थात् तवैव । अयमर्थः-अतः परं यथा विच्छेदो न भवति तथा तव चरणसेवा अस्माकं निरन्तरं यथा सम तथा गेहं मनसि क्रियतामिति सङ्क्षेपेण निवेदनम् ।।४८।।

।। इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीनाथचक्रवर्तिकृतचैतन्यमञ्जूषायां द्व्यशीतितमोऽध्यायः ।।८२।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अस्याः पञ्चश्लोक्या आभ्यन्तरहेत्वर्थस्तु वैष्णवतोषिण्यां द्रष्टव्यः अध्यात्मशिक्षया एवं ज्ञानोपदेशेन शिक्षिताः प्रबोधिताः तदनुस्मरणेन तद्विरहोत्थतीव्रनिरन्तरध्यानसूर्येण ध्वस्तो जीवनकुमुदस्य कोशोऽन्तर्भागो यासां ताः तत्प्रत्याशामात्ररक्षितकिञ्चिन्मात्रजीवन इत्यर्थः । तम् अध्यगन् अधिगतवत्यः यः खल्वस्माकमजिज्ञासूनामपि रासारम्भे धर्मोपदेष्टा उद्धवद्वारा च ज्ञानोपदेष्टा साम्प्रतमपि ज्ञानमुपदिशति सोऽयं स्वभावोऽप्यस्य दुस्त्यज एवेति प्रत्यभिज्ञातवत्य इत्यर्थः । जीवकोशो लिङ्गदेह इति व्याख्यानं न सङ्ग नित्यसिद्धानां सतां लिङ्गदेहाभावात् साधनसिद्धानामपि तासां कृष्णसम्भुक्तानामेतावत्कालपर्यन्तं प्राकृतलिङ्गदेहसत्तानभ्युपगम ।।४८।। आहुश्च वक्रोक्त्या सेर्ष्यमूचुश्चेत्यर्थः । भोस्तत्त्वज्ञानाध्यापकशिरोमणे ! परमेश्वर साक्षान्मूर्तपरमात्मन् अस्माकं गृहवित्तकुटुम्बाद्यासक्तिमधिकामवधार्यैव पूर्वमुद्धवद्वारा साम्प्रतं स्वयमपि यदज्ञाननिवर्तकज्ञानोपदेशेन चित्रं निर्मलयसि तदेवं निरुपाधिक एव स्नेहोऽस्मासु मोक्षार्थकोऽवगतः किन्तु गोपस्त्रीजनानां दुर्मेधानामस्माकं हृदि कथमेतज्ज्ञानं तिष्ठेत् ब्रह्मादि त्वच्चरणचिन्तनमपि नायाति तस्मात्तदेव यथा शक्यं स्यात्तथा कृपयेत्याहुः-ते इति । योगेश्वरैरेव हृदि विचिन्त्यं वयं स्व सन्तापिताः कथं चिन्तयितुं शक्नुमः अगाधबोधैर्वयं तु मन्दधियः संसारकूपे त्वस्माकं संसारदुःखं निवर्तयितुं त्वं कृपया यत भावः । गेहञ्जुषां गृहासक्तानामपि नः सदा मनसि उदयतामित्यन्तः कोप एव व्यंजितः इह खलु —

"न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति यत्पादरजःप्रपन्नाः ।।" इति ।
"न किञ्चित्साधवो धीरा भक्ता ह्येकान्तिनो मम । वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् ।। इति ।"

"स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शनाः" इत्यादि परःशतवचनैरवगततत्त्वा भक्ताः केऽपि ज्ञानफलं मोक्षं भगवता द नैवाददते । सर्वभक्तचूडामणिभिराभिर्गोपीभिर्मोक्षसाधनस्य ज्ञानस्य ग्रहणं कथमुपपद्यतामतः प्राणप्रेष्ठमुखात्तदसह्यमध्यात्म श्लोकेनानेन कोप एव व्यञ्जयितुमर्ह इत्यत एवमेव व्याख्या समुचिता । यथाश्रुतोपस्थितार्थव्याख्यानमपि मोहिनीसधर्मणः शा सम्भवेदेव तत्तु स्पष्टमेव । यद्वा, भोः साक्षादज्ञानध्वान्तभास्कर ! तव एतैस्तत्त्वज्ञानातपैर्वयं ज्वलाम एव व चकोर्यस्त्वन्मुखचन्द्रज्योत्स्नयैव जीवामस्तस्मात् श्रीवृन्दावनमागत्य श्रीरासादिविलासैरस्मान् जीवयेत्याहुः-ते इति । योगे

विचिन्त्यम् अस्माभिस्तु ह
तरलबुद्धिभिरस्माभिस्तु तचि
संसारकूपादेवोद्धारकं न तु त्व
त्यक्तगृहपत्यादिसंसारसुखत्वा
मनस्यपि गेहं गेहरूपमा
पिच्छमौलित्वमुरलीमनोहरत्वा
त्वद्दर्शनेनैवास्माकं सन्तापोपश

।। इति सारार्थद

ता आहुश्च । किम् ।
आविर्भवेदित्यन्वयः । कथम्भूत
हस्ताधारम् । नलिनं कमलम् ।।४

।। इति श्रीमद्भागवते महापुरा

तदनुस्मरणेन ध्वस्तः
श्रीकृष्णमध्यगन् प्रापुः तत्तन्मुक्तिक
आविर्भवेत् ।।४९।।

।। इति श्रीमद्भागवते महापुराणे

तेन को वाऽधिकारः स
युक्तिपूर्वकनिरूपणं तेन गोप्य एवं भ
सन्तः व्यवधायकं स्वकीयमुपाधिरूप
भगवानेव जातः कोशस्थानीयो भगव
भगवन्तं विज्ञापयामासुः आहुश्चेति भ
अतः आधिदैविके मनसि तवावतीर्ण
एतदभावे ब्रह्मभावापन्नस्यापि सर्वे दे
तदनुवृत्त्यैव जीवानां स्थितिर्वा ब्रह्मभावे
चेत्तत्राहुः-योगेश्वरैर्हृदि विचिन्त्यमिति ।
किं प्रयोजनमिति चेत्तत्राह-संसारकूपपति
नीचत्वं प्राप्नोति तस्य वैकुण्ठपदारोहणे अ
मृग्यते । स्वस्य बाधान्तरसम्भावनामाहुः-
प्राकृतत्वं भविष्यति अयमेव च कूपे पातः

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विचिन्त्यम् अस्माभिस्तु हृदुपरि कुचद्वये तत् धृत्वैव जीवितुमुत्सामहे नान्यथेति भावः । अगाधबोधैर्गम्भीरबुद्धिभिः बुद्धिभिरस्माभिस्तु तच्चिन्तनारम्भ एव मूर्च्छासिन्धौ निमज्यते कुतस्तच्चिन्तनमिति भावः । किञ्च तच्चिन्तितं सत् कूपादेवोद्धारकं न तु त्वद्विरहसमुद्रपतितजनानुद्धर्तुं समर्थमिति भावः । वयं हि गोप्यो न संसारकूपे पतिताः आबाल्यादेव गृहपत्यादिसंसारसुखत्वात् किन्तु त्वद्विरहाम्बुधावेव ननु तर्ह्यागच्छत द्वारकामेव तत्रैव युष्माभिः सह विलसामस्तत्राहुः– स्यपि गेहं गेहरूपमास्पदं श्रीवृन्दावनं जुषां जुषमाणानां त्यक्तुमशक्नवतीनामित्यर्थः । तत्रैव तव मौलित्वमुरलीमनोहरत्वादिमाधुर्याणामस्मद्रोचकत्वादिति भावः । तस्मादस्माकं तत्रैव चरणारविन्दम् उदियात् उदयतां व्रजभूमौ नेनैवास्माकं सन्तापोपशमो न तु त्वत्स्मरणेन कुतः पुनरात्मज्ञानेनेति भावः ॥४९॥

॥ इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । द्व्यशीतितम एषोऽपि दशमेऽजनि सङ्गतः ॥८२॥

गूढार्थदीपिनी

ता आहुश्च । किम् । हे नलिननाभ ! ते पदारविन्दं देहञ्जुषामपि गृहसेविनामपि नोऽस्माकं मनसि सदा उदियात् आविर्भवेदित्यन्वयः । कथम्भूतम् । योगेश्वरैः सनकाद्यैः हृदि विचिन्त्यम् । पुनश्च । संसारकूपपतितानां निस्सारणाय अवलम्बं धारम् । नलिनं कमलम् ॥४८॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यां द्व्यशीतितमोऽध्यायः ॥८२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदनुस्मरणेन ध्वस्तः जीवकोशः जीवस्वरूपावरकाज्ञानमूलः जन्ममरणप्रवाहलक्षणः संसारो यासां ताः तं कृष्णमध्यगन् प्रापुः तत्तन्मुक्तिकाले प्राप्ते इति शेषः ॥४८॥ यावत्प्रारब्धं कर्म तावत् गेहञ्जुषां गृहसेविनीनां सदा प्रतिक्षणमुदियात् आविर्भवेत् ॥४९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे द्व्यशीतितमाध्यायार्थप्रकाशः ॥८२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तेन को वाऽधिकारः सम्पन्न इत्याकाङ्क्षायामाह–अध्यात्मशिक्षयेति । अध्यात्मशिक्षा आत्मनो ब्रह्मत्वज्ञानबोधाय पूर्वकनिरूपणं तेन गोप्य एवं भगवता शिक्षिताः ब्रह्मभावापन्ना अपि बोधकस्य भगवतः अनुस्मरणेन वा ध्वस्तजीवकोशाः व्यवधायकं स्वकीयमुपाधिरूपं लिङ्गशरीरं परित्यज्य तमेवाध्यगन् । भगवद्रूपा एव जाताः ॥४८॥ यथा भगवान् तेनान्तःपूर्णो नेव जातः कोशस्थानीयो भगवानाधिदैविकः सहजशक्तिर्वा देहस्त्ववशिष्यते व्याप्तभगवदंशः तस्य प्रतिबन्धकत्वाभावाय वन्तं विज्ञापयामासुः आहुश्चेति भक्तानामेवं स्थितिः उत्तमा एवं भावश्च ब्रह्मात्मभावोऽस्माकं जात एव च इन्द्रियवर्गश्चातीतः आधिदैविके मनसि तवावतीर्णस्य पुरुषोत्तमस्य पादयुगलं मनसि सर्वदा स्फुरति तावता इयमवस्था स्थिरा भविष्यति । भावे ब्रह्मभावापन्नस्यापि सर्वे दोषाः सम्भविष्यन्तीत्याशयेनाहुः–हे नलिननाभेति । पद्मनाभत्वादयं ब्रह्मादीनामुत्पादकः त्यैव जीवानां स्थितिर्वा ब्रह्मभावेन तद्वृत्तायां कृतघ्नता भवतीति तदभावार्थं प्रार्थित इत्यर्थः । उपायेनाविर्भावं सम्पादयन्त्विति हुः-योगेश्वरैर्हृदि विचिन्त्यमिति । अगाधबोधैर्ज्ञानपूर्णैः बहिर्योगरूपसाधनयुक्तैरपि हृदि विचिन्त्यमेव । नन्वेतादृशस्याविर्भावे प्रयोजनमिति चेत्तत्राह–संसारकूपपतितोत्तरणावलम्बमिति । संसारकूपे निर्गमोपायरहिते यः पतति दूरादुच्चैः स्थितः याचककर्मणा प्राप्नोति तस्य वैकुण्ठपदारोहणे अवलम्बनं भवति कर्मज्ञानादिकम् ऊर्ध्वगमने तन्निरालम्बनेन साधकमिति सर्वथा आलम्बनं । स्वस्य बाधान्तरसम्भावनामाहुः–गेहञ्जुषामपीति । देहो वर्तत इति देहभागिनः गृहे योजयिष्यन्ति ततो गृहासक्त्या पूर्ववदेव भविष्यति अयमेव च कूपे पातः अस्तीति कदाचित् त्वत्कृपया देहसम्बन्धो न भवेत्तदा न काचिच्चिन्ता इत्यपि सूचितम् ।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

मनसि स्वयमेवोदियात् नोऽस्माकं सर्वासामेवं निष्कामतया गोप्यो मुख्याः भक्ता जाताः कामनिवारणार्थं च ज्ञानोपदे इति निरूपितम् ॥४९॥

॥ इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीमद्वल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे त्रयस्त्रिंशाध्यायविवरणम् ॥३३॥ ॥८२॥

श्रीसुबोधिनीसारः

शुकोक्तिः । एवमध्यात्मशिक्षया स्वरूपोपदेशेन कृष्णेन कर्त्रा शिक्षिता गोप्यः तस्य कृष्णस्यानुस्मरणेन ध्वस्तो न जीवकोशो लिङ्गशरीरं यासां ताः तं श्रीकृष्णमध्यगन् आर्षो वर्णलोपः । प्राप्ताः ॥४८॥ हे नलिननाभ ! अगाधबोधैर्योगेश्वरै विचिन्त्यं संसारकूपे पतितानामुत्तरणायोद्धारार्थमवलम्बं दामभूतं ते तव पदारविन्दमाहुर्बुधाः नोऽस्माकं मनसि चि सदोदियादाविर्भवतु ॥४९॥

॥ इति श्रीमद्भा० दशमस्कन्ध उ० सुबोधिन्यां टीकायां द्व्यशीतितमोऽध्यायः ॥८२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आहुश्च । तदुक्तिमेवाह । नलिनं ब्रह्माण्डात्मकं कमलं नाभौ यस्येति तस्य सर्वकारणत्वं सूचयन्त्यः सम्बोधयन्ति नलिननाभेति । ते तव पदारविन्दं नोऽस्माकं मनसि सदा उदियात् आविर्भवेत् । त्वदनुग्रहं विना तु गृहासक्त्या तद्विस्मृतं स्यात् इत्याशयेनाहुः-गेहञ्जुषामपीति । संसारोद्धाररूपं तत्स्मरणप्रयोजनमाहुः-संसार एव दुस्तरत्वादज्ञानान्धकारव्याप्तत्वाच्च कूपस्तत्र पतितानामुत्तरणायावलम्बमवलम्बनभूतमित्यर्थः । अत्र ज्ञापकमाहुः-अगाधः अपारो बोधो ज्ञानं येषां तैर्योगेश्वरैर्योगारूढैरपि हृदि विचिन्त्यमिति ॥४८॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥

श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥

रचिता दशमे तत्र सात्त्विकानां निरूपणे । विवृतो द्व्यशीतितमो बन्धुसङ्गनिरूपकः ॥३॥८२॥

अन्वितार्थप्रकाशिका

आहुरिति । आहुश्च । हे नलिननाभ ! अगाधः अपारो बोधो ज्ञानं येषां तैर्योगेश्वरैर्योगारूढैरपि हृदि विचिन्त्यं संसार दुस्तरत्वादज्ञानान्धकारव्याप्तत्वाच्च कूपस्तत्र पतितानामुत्तराणायवलम्बनभूतं ते तव पदारविन्दं गेहञ्जुषाम् । द्वितीया आर्ष तदर्हमिति ज्ञापकाद्वा । नोऽस्माकं मनसि सदा उदियात् आविर्भवेत् । अत्र श्रीदामादयो गोपा व्रज एव गोरक्षणार्थं स्थिता अतस्तन्मेलनं न वर्णितमिति ज्ञेयम् ॥४८॥

॥ इति श्रीभागवते महापुराणे दशमेऽन्वितार्थप्रकाशिकायां द्व्यशीतितमोऽध्यायः ॥८२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एवं भगवत्कृतोपदेशं श्रुत्वा हृष्टा गोप्यः प्रार्थयन्ति आहुश्चेति । नलिनं पद्मं तत्तुल्यो नाभिर्यस्य तत्सम्बुद्धिः ते पदारविं गेहञ्जुषां सेवमानानामपि नोऽस्माकं मनसि सदा उदियात् प्रादुर्भवेत् तत् कथम्भूतम् अगाधबोधो ज्ञानं येषां तैः हृदि विचि संसारकूपे पतितानां तत उत्तरणाय उद्धरणायावलम्बमस्ति चेति गोप्यः आहुः ॥४८॥

॥ ॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने वृष्णिगोपसमागमो नाम द्व्यशीतितमोऽध्यायः ॥८२॥

तदा तदुपरिष्टाद्ध्या
नलिननाभ ! कमलनाभ ! अ
संसारकूपपतितानामुत्तरणायाव
नोऽस्माकं मनसि सदा उदिया

**॥श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्य
भक्तमनोरञ्जन्य**

राजन् कृपानाथ भग
उसी अध्यात्म विद्याका बार
एक हो गयी भगवान श्रीकृष्ण
हे कमलनाभ अगाध बोधमय
निरन्तर चिन्तन करते है करते
लिये आपके चरणकमल ही ए
घर-गृहस्थके काम करते स्नेह
भूले विस्मरण नही ॥४९॥

॥ इति श्रीम

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदा तदुपरिष्टाद्ध्यात्मानुस्मरणविरोधिमोहोपशमनाय मनसस्तदङ्घ्रिप्रावण्यं प्रार्थयमानाः प्राहुश्चेत्याह ॥ आहुश्चेति ॥ हे नलिननाभ ! कमलनाभ ! अगाधोऽपारो बोधो ज्ञानं येषां तैः योगेश्वरैः हृदि विचिन्त्यं केवलं विचिन्त्यमेव न तु दृश्यम् । संसारकूपपतितानामुत्तरणायावलम्बमालम्बनभूतं ते तव पदारविन्दं पदाम्बुजं देहञ्जुषां देहधारिणां गेहञ्जुषामिति पाठे गृहमेधिनामपि नोऽस्माकं मनसि सदा उदियात् । यथावद्विषयीभवेदित्यर्थः । इति आहुश्च ॥४८॥

श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धे द्व्यशीतितमोऽध्यायः ॥८२॥

कृष्णप्रिया

राजन् कृपानाथ भगवान श्रीकृष्णने इस प्रकार गोपीजनोंको अध्यात्म ज्ञान की विदिासे उपदेश दिया । उसी अध्यात्म विद्याका बारबार स्मरणसे गोपीजनोंका लिंग शरीर नष्ट हो गया और वे गोपी भगवान श्रीकष्ण एक हो गयी भगवान श्रीकृष्णको सदा सर्वदा के लिये प्राप्त हो गयी ॥४८॥ श्रीगोपीजनने निवेदन किया हे नाथ हे कमलनाम अगाध बोधमय अगाध बोध सम्पन्न समर्थ योगेश्वर अपने हृदय कमलमें आपके चरण कमलोंका निरंतर चिन्तन करते है करते रहते है । जो लोग संसार के कूपमें गिरे हुए है उनलोगोंको उस संसार कूपसे निकलने लिये आपके चरणकमल ही एकमात्र अवलम्बन है । तो हे नाथ ! आप ऐसी कृपा कीजिये कि आपका वह कमल घर-गृहस्थके काम करते स्नेह परभी नित्य निरंतर हमारे हृदयमें बिराजमान रहे हम एक क्षणके लिये भी उसे न भूले विस्मरण नही ॥४९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे द्व्यशीतितमाध्यायस्य

भाषाटीका समाप्ता ॥८२॥

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

[1]॥ अथ त्र्यशीतितमोऽध्यायः ॥

श्लोकाः	अनु.	मि. उ.	व.	रु.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.
४३	३०	३	९	१	१६५९	६२	३५	१७५६	५४॥

श्रीशुक उवाच

[2]तथानुगृह्य भगवान् गोपीनां स गुरुर्गतिः । युधिष्ठिरमथापृच्छत् सर्वांश्च सुहृदोऽव्ययम् ॥१॥

कर्दमक्षमा

श्रीशुकः, उवाच । गोपीनाम्, सः, गुरुः, च, गतिः, भगवान्, तथानुगृह्य, अथ, युधिष्ठिरम्, च, सर्वान्, सुहृ अव्ययम्(कुशलम्), अपृच्छत् ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

त्र्यशीतितम एवञ्च स्त्रीणां कृष्णकथोत्सवे । द्रौपद्यै कृष्णभार्याभिरुक्ताः स्वस्वकरग्रहाः ॥

अव्ययं कुशलम् ॥१॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

एवं गोपीवत् (१) । तथा प्रार्थनानुसारेण । अथ गोप्यनुग्रहोत्तरम् । स कृष्णः ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

एवं श्रीगोपीनां प्रथमदिनमुपगतं सम्भाषणमुपसंहरन् तेन अन्यदिनगतमपि प्रकारान्तरं लक्षयन् तासां यथाऽसौ स्व गुरुस्तथा स्वयमेव फलमिति बोधयित्वा पूर्वोपदेशतात्पर्यं व्यंजयन् ततो गौणत्वेनैव श्रीयुधिष्ठिरादिसम्भाषणमपि प्रस्तौति-त । तथा तेन तासां प्रार्थनाप्रकारेण गोपीरनुगृह्य यतः स एव तासां गुरुरुपदेश्यो गतिश्च गम्यो नित्यप्राप्तः अथ तदनन्तर तावत्कालं तद्विधानामप्यस्फूर्तेः अपृच्छत् एतत्पूर्वं तेषां प्रश्नमपि न कृतवान् किमुतान्यदित्यर्थः । एवं तासां प्रेष्ठत्वबोधना तदनुवादः क्रियत इति भावः । अव्ययं व्ययाभावं हानिराहित्यं कुशलमिति यावत् ॥१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तथा तेनोक्तेनानिर्वचनीयेन वा प्रकारेण गोपीनां गोपीरनुगृह्य । यतः स एव तासां गुरुरुपदेष्टा, गतिश्च गम्यः, साध सर्वसाध्यश्चेत्यर्थः । अथ तदनन्तरमेवेति तदेकप्रेमविशेषेण सर्वश्रेष्ठानां तासामेव प्रागनुग्राह्यत्वात्, अत एव तदनुवादश्च श्रीयुधि पृथगादावुक्तिः साम्राज्येन प्रियतमत्वेन च सुहृत्सु श्रैष्ठ्यात् ॥१॥

---

[1] एकसप्ततितमः-विजयः । [2] अथानु-वीर. ।

अथेति । गुरुस्तत्त

अव्ययमारोग्यमपृच्छत् ॥१

तथाऽनुगृह्य तथैव

सुहृद्भिः संस्तुतः

मनःप्रसादोऽभूत्तथेत्यर्थः । स

प्राक्त्र्यशी

तथा प्रार्थनानुसारेण

फलप्रदश्च ॥१॥

कृष्णयुधिष्ठिरादिसम्भ

इति गतिः प्राप्यश्च भगवान् य

चतुस्त्रिंशे

सर्वसाधन

अनुग्रहस्य

सर्वशक्तियु

पूर्वाध्याये गोपीनामुप

तथा तैर्यथा प्रार्थितं तथैव तद्

गोपीनां स एव गुरुर्गतिः फल

गोपिका उत्तमाधिकारिण्यः प

सुहृदः अव्ययमपृच्छत् । अव्य

प्रश्नस्थीरीकरणार्थम् अनेन उत्त

शुकोक्तिः । तथोक्तप्रक

सुहृदश्चाव्ययं कुशलमपृच्छत् ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथेति। गुरुस्तत्त्वोपदेष्टा भगवान् गोपीनां सङ्गतिं स्वपादारविन्दासक्तिं तथास्त्वित्यनुगृह्याथ युधिष्ठिरं सर्वान् सुहृदश्च प्रति अव्ययमारोग्यमपृच्छत् ॥१॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

तथाऽनुगृह्य तथैवानुग्रहं कृत्वा स श्रीकृष्णो गोपीनां गुरुः गतिः शरणं च ॥१॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

सुहृद्भिः संस्तुतः कृष्णस्तद्भार्या द्रौपदीं प्रति । स्वस्वोद्वाहकथामूचुस्त्र्यशीतितम ईलिताम् ॥१॥ यथा तासां मनःप्रसादोऽभूत्तथेत्यर्थः । सर्वेषामेव साधूनां स गतिर्भवेदेव । गोपीनां तु गुरुर्गतिर्महती गतिरित्यर्थः । अव्ययं कुशलम् ॥१-२॥

गूढार्थदीपिनी

प्राक्त्र्यशीतितमे कृष्णं संस्तुवत्सु निरूपिता । द्रौपद्यै कृष्णभार्याभिः स्वस्ववैवाहिकी कथा ॥१॥

तथा प्रार्थनानुसारेण ताः गोपीः अनुगृह्य स कृष्णः सर्वांश्च अव्ययं कुशलमपृच्छनित्यन्वयः । गुरुः उपदेष्टा गतिः फलप्रदश्च ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

कृष्णयुधिष्ठिरादिसम्भाषणं द्रौपदीरुक्मिण्यादिसम्भाषणं च वर्णयति त्र्यशीतितमे-गोपीनां गुरुः स्वप्राप्त्युपायोपदेष्टा गम्यते इति गतिः प्राप्यश्च भगवान् यथा कृतार्थता स्यात् तथानुगृह्य अथ युधिष्ठिरं सर्वान् सुहृदश्च अव्ययं कुशलमपृच्छत् ॥१॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

चतुस्त्रिंशे साधनानां मुख्यं साधनमीर्यते । कीर्तनं सरसत्वाय स्त्रीभिः स्त्रीणां निरूप्यते ॥१॥
सर्वसाधनसम्पत्तिः कृष्णानुग्रहपूर्विका । तदभावेनैव सिद्ध्येदित्यनुग्रहवर्णनम् ॥२॥
अनुग्रहस्य स्थिरता सबुद्ध्यैव हरौ भवेत् । माहात्म्यज्ञानतः तुष्टा स्तुत्या कार्यक्षमा भवेत् ॥३॥
सर्वशक्तियुतः कृष्णः श्रोतव्य इति सिद्ध्यति । शक्तीनामप्यभीष्टश्च सज्ञानस्तुतिभावतः ॥४॥

पूर्वाध्याये गोपीनामुपदेश उक्तः प्रार्थना च । अनुग्रहस्त्ववशिष्यते । तदत्र तासामनुग्रहं कृतवानित्याह-तथानुगृह्येति । तथा तैर्यथा प्रार्थितं तथैव तद्धृदये स्वचरणारविन्दं स्थापयित्वा युधिष्ठिरमथापृच्छदिति सम्बन्धः भगवतः तथानुग्रहे हेतुमाह-गोपीनां स एव गुरुर्गतिः फलं च फलसाधनरूपत्वात् । तासामन्य उपायो नास्तीति स्वचरणारविन्दं स्थापितवानित्यर्थः । गोपिका उत्तमाधिकारिण्यः परं पुष्टिस्थाः तदनु मर्यादायां युधिष्ठिरः श्रेष्ठः । अतस्तदनन्तरं युधिष्ठिरोऽनुगृहीतः ततः सर्वांश्च सुहृदः अव्ययमपृच्छत् । अव्ययशब्देन कुशलं ज्ञानमप्युच्यते तेन पूर्वं मनसा तेभ्योऽपि ज्ञानमुपदिष्टमिति लक्ष्यते । तस्य पुनः ज्ञानस्थिरीकरणार्थम् अनेन उत्तमादयः सर्व एवानुगृहीता इत्युक्तम् ॥१॥

सुबोधिनीसारः

शुकोक्तिः । तथोक्तप्रकारेणानुग्रहं कृत्वा गोपीनां गुरुर्हितोपदेष्टा गतिः स भगवान् कृष्णो युधिष्ठिरमथानन्तरं सर्वान् सुहृदश्चाव्ययं कुशलमपृच्छत् ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

योषितां त्र्यधिकाशीतितमेऽध्याये समागमे। स्वविवाहप्रकारो वै कृष्णस्त्रीभिर्निरूप्यते ॥१॥

यतो गोपीनां गुरुरात्मतत्त्वोपदेष्टा गतिः फलरूपश्च भगवानेव, अतः यथा ताभिः प्रार्थितं तथास्त्वित्यनुगृह्य अथान युधिष्ठिरं सर्वान् सुहृदश्च प्रति अव्ययं कुशलमपृच्छत् ॥१॥

अन्वितार्थप्रकाशिका

त्र्यशीतितमके कृष्णभार्याभिः स्वकरग्रहाः। द्रौपद्यै कथितास्तत्र श्लोका दहनवार्धयः (४३)॥
द्वादशोवाचेति (१२) पादयुक्पंचाशदनुष्टुभः (५०।) ॥८३॥

तथेति ॥ तथा गोपीनां गुरुरात्मतत्त्वोपदेष्टा गतिः फलरूपश्च भगवानेवातः यथा ताभिः प्रार्थितं तथास्त्वित्यनुगृह्याथान युधिष्ठिरं सर्वान् सुहृदश्च प्रति अव्ययम् अहानि कुशलमिति यावत्। अपृच्छत् ॥१॥ -

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ त्र्यशीतितमेऽध्याये यादवकौरवस्त्रीषु परस्परं कथाः क्रियमाणासु सतीषु द्रौपदीकृतप्रश्ना रुक्मिण्यादिकृष्णपत्नीभिः स्वस्वपाणिग्रहणप्रकारः कथ्यते-तथेति ॥ तथा तेन प्रार्थनाप्रकारेण गोपीः अनुगृह्य ॥ गतिः प्राप सुहृदः अव्ययं कुशलमपृच्छत्। पृच्छेर्द्विकर्मकत्वम् ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त्र्यशीतितम अध्याये स्त्रीणां हरिकथामहे। कृष्णाङ्गनाभिर्द्रौपद्यै उक्ता आत्मकरग्रहाः ॥१॥

तथेति ॥ गुरुस्तत्त्वोपदेष्टा भगवान् श्रीकृष्णः गोपीनां तथा तथास्त्विति सङ्गतिं स्वपादारविन्दासक्तिम् अनुगृह्य अथान युधिष्ठिरं सर्वान् सुहृदश्च अव्ययं कुशलम् अपृच्छत् ॥१॥

कृष्णप्रिया

महाराज परिक्षित् ! आपने पूर्वाध्यायमें देखा कि भगवान श्रीकष्ण ही व्रजदेवियोंको शिक्षा-उप देनेवाले है और वही श्रीकृष्ण उस उपदेश के द्वारा प्राप्त होनेवाली वस्तु भी है। भगवान श्रीकृष्णने इस प्र गोपीजन पर अनुग्रह करने बाद धर्मराज युधिष्ठिरजी को और सर्व सुहृदजनका कुशल मंगल पूछने लगे॥

त एवं लोकनाथेन [1]परिपृष्टाः सुसत्कृताः। प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः ॥
कुतोऽशिवं त्वच्चरणाम्बुजासवं [2]महन्मनस्तो मुखनिःसृतं क्वचित्।
पिबन्ति ये कर्णपुटैरलं प्रभो [3]देहम्भृतां देहकृदस्मृतिच्छिदम्
[4]हत्वाऽऽत्मधामविधुतात्मकृतत्र्यवस्थमानन्दसप्लवमखण्डम[5]कुण्ठबोधम्।
कालोपसृष्टनिगमावन [6]आत्तयोगमायाकृतिं परमहंसगतिं नताः स्म

कर्दमक्षमा

लोकनाथेन, एवम्, परिपृष्टाः, सुसत्कृताः, तत्पादेक्षाहतांहसः, प्रहृष्टमनसः, प्रत्यूचुः ॥२॥ हे, प्रभो, महन्मनस्तः, मुखनिःसृतम्, देहम्भृताम्, देहकृदस्मृतिच्छिदम्, त्वच्चरणाम्बुजासवम्, कर्णपुटैः, अलम्, ये, पिबन्ति, अशिवम्, कुतः

---

१. परिपृच्छय-विज.। २. महात्मनां संमुखनिर्वृत्तं क्वचित्-वीर.। ३. देहंभृतस्तत्कृतमुच्छ्वसन्ति हि-विज.। ४. तं त्वात्मधात्मगतिं विज.। ५. विकुण्ठ-विज.। ६. आत्मयोग-गो. प्रे. टी.।

आत्मधाम, हि, त्वा,
आत्मयोगमायाकृतिम्, प

तत्पादेक्षया हत
देहकृच्चासावस्मृतिश्चावि
एव त्वामेव नताः स्मे
बुद्धिनिमित्तास्तिस्रोऽवस्थ
कुण्ठितो बोधश्चिच्छक्तिर्य
कालेनोपसृष्टा विप्लुताश्च
गतिं त्वाम् अतस्तवैवंरूप
आत्मा शरीरं धाम गृहं तच

ते सुहृदः। तत्पा
मत्वाऽर्थान्तरमाह-अर्थकृदीश्व
तेषां त्वत् त्वत्तो दुर्जनशास्तुः
"आयुर्हरति
कथम्भूतं महात्मनां
दुःखं भवतीत्यर्थः। ईश्वरस्य म
। "को ह्येवान्यात्कः प्राण्यात्
पिबन्ति तेषां महात्मनां कुतोऽ
इति पाठोऽस्ति ॥३॥ इत्यर्थ
स्वप्नस्सुषुप्तिरिति वृत्तय" इ
सर्वानन्दाखण्डाकुण्ठबोधरूपत
प्रकरणलभ्यस्याऽप्यभ्यर्हितत्वेन
इति-गृहत्यागस्य शक्यत्वेऽपि

एवं क्रमरीत्या लोकनाथे
सन्तस्तत्पादेक्षयैव तु हतांहसो गतव
सर्वत्र मङ्गलमेवेत्यर्थः। केषां ये त
। कर्णपुटैः पिबन्ति प्रीत्या शृण्वन्ती
मनसो मुखेन निःसृतं मनः परिपूर्त्या
च ध्वनितम्। अमङ्गलनाशं कैमुत्ये

ईश्वरस्य तव या अस्मृति

कर्दमक्षमा

आत्मधाम, हि, त्वा, विधुतात्मकृत्यवस्थम्, आनन्दसम्प्लवम्, अखण्डम्, अकुण्ठबोधम्, कालोपसृष्टनिगमावने, आत्मयोगमायाकृतिम्, परमहंसगतिम्, नताः, स्मः ॥४॥

श्रीधरस्वामिकृतभावार्थदीपिका

तत्पादेक्षया हतमंहो येषां ते ॥२॥ महतां मनस्तः सकाशान्मुखद्वारतो निस्सृतं क्वचित्कदाचिद्देहभृतां देहधारिणां देहकृच्चासावस्मृतिश्चाविद्या तां छिनत्तीति तथा तं देहकृदीश्वरस्तद्विषयाज्ञानच्छिदं वा ॥३॥ हे त्वेति पदद्वयम् । त्वा त्वां हि एव त्वामेव नताः स्मेत्यर्थः । कथम्भूतम् ? आत्मधाम्ना स्वरूपप्रकाशेन विधुताः निरस्ताः आत्मकृताः बुद्धिनिमित्तास्तिस्रोऽवस्थाः यस्मिंस्तम् अत एवाऽऽनन्दसम्प्लवं सर्वानन्दकदम्बरूपम् अखण्डञ्चापरिच्छिन्नं यतो न कुण्ठः कुण्ठितो बोधश्चिच्छक्तिर्यस्य तम् । ननु एवंरूपता श्रीकृष्णस्य कुतः ? अस्मदादिवत्प्रतीतेरत आहुः कालोपसृष्टेति । कालेनोपसृष्टा विप्लुताश्च ते निगमाश्च तेषाम् अवने रक्षार्थमात्ता उपात्ता योगमायया आकृतिर्नराकारमूर्तिर्येन तं परमहंसानां गतिं त्वाम् अतस्तवैवंरूपत्वादस्माकञ्च त्वन्माययैतत्सर्ववैपरीत्यात्त्वामेव नताः स्म किं कृत्वा हित्वा किम् आत्मधाम आत्मा शरीरं धाम गृहं तच्च तच्च देहदैहिकसङ्गं परित्यज्येत्यर्थः । समानमन्यत् ॥४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ते सुहृदः । तत्पादेक्षया कृष्णाङ्घ्रिदर्शनेन । अंहो दुरितम् ॥२॥ न स्मृतिर्यया सा तथा । जडाया देहकरणासामर्थ्यं मत्वाऽर्थान्तरमाह–अर्थकृदीश्वर इति । अन्ये तु हे प्रभो ! त्वच्चरणाम्बुजासवं त्वदङ्घ्रिमाहात्म्यबोधिकथामृतं कर्णपुटैर्ये पिबन्ति तेषां त्वत् त्वत्तो दुर्जनशास्तुः कालरूपात् कुतोऽशिवं भयं भवतीत्यन्वयः ।

"आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ । तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया ॥" इत्युक्तेः ।

कथम्भूतं महात्मनां व्यासादीनां मुखेभ्यो निःसृतं गलितं क्वचित्कदाचिदपि व्यासादिवाक्यैस्त्वामात्मत्वेन जानतां न दुःखं भवतीत्यर्थः । ईश्वरस्य ममात्मत्वमेव कथं तत्राह–देहम्भृत इति । देहम्भृतो जीवाः त्वत्कृते त्वद्धेतुत्वेन उच्छ्वसन्ति जीवन्ति "को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्" इति श्रुतेः । अथवा त्वन्मुखनिःसृतं त्वच्चरणाम्बुजासवं ये पिबन्ति तेषां महात्मनां कुतोऽशिवमित्यन्वयः । त्वत्कृते भगवन्नमस्कारकारणाय । अत्र पक्षे "देहम्भृतस्त्वत्कृत उच्छ्वसन्ति हि" इति पाठोऽस्ति ॥३॥ इत्यर्थ इति व्याख्या । "देहे बुद्धौ चितिश्चात्मा" इति धरणिः । अवस्था जागराद्याः । "बुद्धेर्जागरणं स्वप्नस्सुषुप्तिरिति वृत्तय" इति नारदोक्तेः । अत एव अवस्थात्रयातीतत्वादेव यतः यस्मात् । अत्राशङ्कन्ते–एवंरूपता सर्वानन्दाखण्डाकुण्ठबोधरूपता । "आकारो देह आकृतिः" इति यादवः । यतस्त्वं परमहंसगम्योऽसि अतो हेतोः । प्रकरणलभ्यस्याऽप्यभ्यर्हितत्वेन "पदादौ न प्रयोक्तव्याः प्रायशश्चादयो बुधैः ।" इत्यालङ्कारिकसमयत्वाच्चाह–यद्वेति । इत्यर्थ इति-गृहत्यागस्य शक्यत्वेऽपि शरीरत्यागस्याशक्यत्वात् तयोरासक्तित्यागोऽर्थोऽत्र विवक्षित इति भावः ॥४॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

एवं क्रमरीत्या लोकनाथेन सर्वलोकेश्वरेणापि परि सर्वतः पृष्टाः सुष्ठु नानोपहारादिना सत्कृताश्च अतस्तत्प्रसाददर्शनेन हृष्टमनसः मनस्तत्पादेक्षयैव तु हतांहसो गतक्लेशास्ते श्रीयुधिष्ठिरादयःप्रत्यूचुः ॥२॥ अशिवममङ्गलम् । तेषां कुतः कुत्र कस्माद्धेतोर्वा तेषां तु सदा सर्वं मङ्गलमेवेत्यर्थः । केषां ये तव चरणाम्बुजयोरासवं माधुर्यं चरणाम्बुजेति भक्त्या तव रूपगुणलीलासौष्ठवमित्यर्थः । अलमत्यर्थम् कर्णपुटैः पिबन्ति प्रीत्या शृण्वन्तीत्यर्थः–ननु परमदुर्लभं तत्कुतो लभ्येत तत्राहुः– क्वचित्कदाचित् प्रेमोल्लाससमये महतां त्वद्भक्तानां मनसो मुखेन निःसृतं मनः परिपूर्त्यात्युद्रेकेण मुखद्वारा प्रकाशमानम् आसवशब्देन तस्य स्वतो मधुरत्वं मादकतया सर्वदुःखविस्माकरत्वं च ध्वनितम् । अमङ्गलनाशं कैमुत्येन पुष्णाति–देहम्भृतामिति । अनेन देहस्य प्रत्यक्षतया तत्कर्तुः स्मृतियोग्यतोक्ता तथापि देहकृतः ईश्वरस्य तव या अस्मृतिर्विस्मृतिः तच्छिदं यद्वा, देहम्भृतां सदा विविधदुःखमयं देहं दधतां

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

देहकृत् देहोत्पादिकाचासावस्मृतिश्च त्वद्विस्मृतिः तच्छिदं सदा तत्स्मरणमङ्गलकरमित्यर्थः । तच्च त्वत्प्रभावात्सम्भवत्येवेत्याशयेनाहु-
प्रभो हे सर्वसामर्थ्ययुक्तेति । यद्येवमन्यदपि तत्कदाचिदपि शृण्वताम् अमङ्गलं नास्ति तदा सम्प्रति कृपया त्वया स्वयं विस्तार्यमाणस्य
तस्य श्रवणादप्यस्माकं किञ्चिदप्यमङ्गलं सुतरां नास्त्येवेति येषां च साक्षात्त्वद्दर्शनं येषु चेदृशस्तत्कृपाप्रश्नः । तेषां
प्रागेवाशेषामङ्गलक्षयात् पुनस्तत् कुतो वर्तताम् अतः सदा मङ्गलमेवेति भावः ॥३॥ अतः सर्वोपेक्षया त्वामेव प्रपद्यामह इत्याहु-
हित्वेति । कालेत्यादि आत्तत्वं प्रकटितत्वं यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम् इत्यादि श्रीमदुद्धववाक्ये
सर्वोत्तमं नराकृतिसामान्यदर्शनेनान्यदुर्बोधमित्यर्थः । अत एव परमहंसानामेव गतिं गम्यं ज्ञेयमित्यर्थः । अन्यत्तैः यद्वा, आत्मधाम
शुद्धस्वरूपं तदेव विशिनष्टि विधत्तेत्यादिचतुर्भिर्विशेषणैः । तादृशमपि तद्धित्वा तद्विज्ञानमनादृत्येत्यर्थः । त्वामेव नताः प्रपन्नाः
स्म प्रसिद्धौ स्म इति विसर्गान्तपाठो वा नित्यमेव दृढं भजाम इत्यर्थः । कुतः परमहंसानामपि भजनीयं तत्रैव हेतुः कालेत्यादि
तदवने निमित्ते तन्निमित्तीकृत्य आत्ताः सङ्गृहीताः योगमायाः सर्वे स्वरूपशक्तिविलासा यत्र तादृश्याकृतिर्यस्य तं व्याख्याने
योगमायात्ता प्रकृतिरित्येव स्यात् । यद्वा, आत्मधाम निजनित्यलीलास्पदं श्रीगोलोकादिकं हित्वा आत्ता प्रकटिता
योगमायाख्यचिच्छक्तिप्रधाना मूर्तिर्येन तम् आत्मधाम्नो विशेषणानि विधुतेत्यादीनि । समानमन्यत् ॥४॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

ते युधिष्ठिरादयः एवं श्रीगोप्यनुग्रहतः पश्चादेव परितः पृष्टाः । अथ तेषां हृष्टमनस्त्वे मुख्यो हेतुः–सर्वश्रेष्ठतमानां परमार्तानां
तासामादौ समाश्वासनात्; सुष्ठु सत्कृताश्च कृपया गन्धपुष्पादिना पुनरर्च्चिताः । किंवा तादृशप्रश्नेनैव सम्मानिताः । तत्र हेतु-
लोकनाथेन सर्वलोकपरिपालकेनेत्यर्थः । किंवा जगदीश्वरेणापि अतो हृष्टमनसः सन्तः । सर्वत्रैव हेतुः–तस्य लोकनाथस्य पादयो
पूर्वपूर्वतरदर्शनम्, तयैवादौ हतमंहः प्रारब्धाद्यशेषपापं दुःखं वा येषां ते ॥२॥ अशिवममङ्गलं तेषां कुतः ? कुत्र कस्माद्धेतोर्वा,
अपि तु सदा सर्वत्र मङ्गलमेवेत्यर्थः । केषाम् ? ये तव चरणाम्बुजयोरासवं दीनवात्सल्यादिमहायशोलक्षणं मधु अलमत्यर्थं
कर्णपुटैः पिबन्ति सदा प्रीत्यानुशृण्वन्तीत्यर्थः । तत्रैव हेतुः–क्वचित् कदाचित् प्रेमोल्लाससमये महतां त्वद्भक्तानां मनस्तो मुखे
निःसृतं मनः परिपूर्य्यात्युद्रेकेण मुखद्वारा निर्गलितं तैः परमाभिनिवेशेन मनोहरतया वर्णितमित्यर्थः । आसवशब्देन तस्य स्वा-
मधुरत्वम्, मादकतया सर्वदुःखविस्मारकत्वं च ध्वनितम् । तद्धेतुत्वेन मङ्गलमेवाभिव्यंजयन्ति–देहं भृतामिति । अनेन देहस्य
प्रत्यक्षतया तत्कर्तुः स्मृतियोग्यतोक्ता, तथापि देहकृत ईश्वरस्य तव या अस्मृतीस्तच्छिदम् । यद्वा, देहंभृतां सदा विविधदुःखमयं देहं
दधतां देहकृत् देहोत्पादिका चासावस्मृतिश्च त्वद्विस्मृतिस्तच्छिदं सदा त्वत्स्मरणमङ्गलकरमित्यर्थः । तच्च त्वत्प्रभावात्
सम्भवत्येवेत्याशयेनाह–प्रभो हे सर्वसामर्थ्ययुक्तेति । यथाकथंचित् सकृत् तत्पानेन सर्वामङ्गलक्षयेऽपि सिद्धे
तादृशपानोक्तिस्तन्माधुर्यस्वभावेनैव तत्राभिनिवेशात् न तु तात्पर्यापेक्षयेति दिक् । अथवा, क्व चित् कदाचिदपि कर्णपुटैः
कर्णस्याकाशमयत्वात् स्वयमेव प्रविष्टं पिबन्ति, केवलं श्रोत्रद्वारा शृण्वन्त्यपि तच्च न स्वप्रयत्नादिनेत्याह-मद्वर्णितं
संवरणाशक्त्येतस्ततस्तैः सदा वर्ण्यमानमित्यर्थः । अलमित्यस्य अन्त्यपदेनान्वयः, अन्यत् समानम् । अतः कृपया त्वया स्व-
विस्तार्यमाणस्य स्वयशसः श्रवणादप्यस्माकं किमप्यमङ्गलं नास्त्येव । येषां च साक्षात् त्वद्दर्शनम्, येषु चेदृशस्त्वत्कृपाप्रश्नः
प्रागेवाशेषामङ्गलक्षयात् पुनस्तं कुतो वर्तताम् ? अतः सदा मङ्गलमेवेति भावः ॥३॥ अतः सर्वोपेक्षया त्वामेव प्रपद्यामह इत्याहु-
हित्वेति । परमहंसानां मुक्तानामेव गतिं प्राप्यमित्यर्थः । इति परमदौर्लभ्यमुक्तम् । तत्रैव हेतुः–कालेत्यादि । अन्यत्तैर्व्याख्यातम्
यद्वा, आत्मधाम शुद्धं स्वस्वरूपम्, तदेव विशिनष्टि–विधुतेत्यादिचतुर्भिर्विशेषणैः । तादृशमपि तद्धित्वा तद्विज्ञानमनादृत्येत्यर्थः
त्वामेव नताः प्रपन्नाः; स्म प्रसिद्धौ, स्म इति विसर्गान्तपाठो वा, नित्यमेव दृढं भजाम इत्यर्थः । कुतः ? परमहंसानामपि
भजनीयम् । तत्रैव हेतुः–कालेत्यादि । आत्ताः प्रकटिता योगमायया चिद्विलासशक्त्या आकृतयो मस्त्यादिमूर्तयो येन
मधुरमधुरविचित्रावतारैकबीजत्वेन परममधुरानन्दघनत्वादिति भावः । यद्वा, आत्ता योग ऐश्वर्य्यं माया च विचित्रलीला कृप
ताभ्यां युक्ता, आकृतिर्मनुष्यमूर्तिर्येन । यद्वा, कालोपसृष्टा निगमा वेदोक्ताचारा येषां ते वयम् । योगश्च माया च कृति
क्रीडेत्यर्थः । वने श्रीवृन्दावनादौ आत्ता विस्तारितास्ता येन तम् । अन्यत् समानम् ॥४॥

तत्पादे क्षा
उत्पत्तिस्थितिलयस्व
कालोपदिष्टनिगमावना

त इति । ते यु
येषां ते प्रत्यूचुः ॥२॥
विषयविस्मापनं च ये क
। आसवत्वरूपणात् पिब
निर्गलितं देहधारिणां देह
भावः ॥३॥ तमिति । य
मुक्त्युपायभूतं च तदुप
वैदिकधर्ममर्यादापालन
योगमायेत्यनेनाकृतेर
निगमविरोधिदुष्कृ द्वि
आश्रितकार्यापादकज्ञानगुण
प्राप्यत्वोपयुक्तं गुणमाहुः । अ
स्वतेजसा विद्युता निर्धूताः अ

हित्वेति । आत्मधाम
। त्वामेव नताः प्रपन्नाः स्म प्रां
तत्र हेतुः कालेत्यादितदवने नि
तम् । व्याख्यान्तरे योगमायया

त्वच्चरणाम्बुजासवं
सकाशात् मुखद्वारतो निःसृतं
। आत्मधाम्ना स्वविग्रहप्रकाशे
येन तम् अतः कथमकुशलम
दृष्ट्वा वयम् आनन्द एव निमज
तमित्यस्मच्चित्तवृत्तीस्त्वच्चरण
वेदोक्तमर्यादानाम् अवने पालने
सर्वसुखप्रदमिति भावः ॥४॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-४॥

तत्पादेक्षाहतांहसः तत्पादसंदर्शनहतपापाः ॥२-३॥ आत्मधाम विधुतात्मकृतत्र्यवस्थम् अवस्था । उत्पत्तिस्थितिलयस्वतेजसा निर्धूतस्वकृतजन्मादि अवस्थम् अन्येषां सृष्ट्यादिकृत्स्वयं सृष्ट्याद्यविषय इत्यर्थः । कालोपदिष्टनिगमावनायात्तयोगमायाकृतिं कालोप्लुतवेदाख्यक्षेत्रावसाने तद्रक्षणाय स्वाश्चर्ययोगशक्तिकल्पितदिव्यविग्रहम् ॥४-७॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

त इति। ते युधिष्ठिरादयः तस्य भगवतः पादयोरीक्षया दर्शनेन हतं निरस्तमंहः पापममङ्गलं च येषां ते अत एव हृष्टं मनो येषां ते प्रत्यूचुः ॥२॥ उक्तिमेवाह-कुत इति द्वाभ्याम् । त्वच्चरणाम्बुजासवं त्वत्पादाब्जकथामृतमित्यर्थः । आसववन्मधुरं विषयविस्मापनं च ये कर्णपुटैः श्रोत्रचषकैः पिबन्ति त्वच्चरणाम्बुजं ये ध्यायन्तीत्यर्थः। तेषामशिवममङ्गलं कुतः नास्त्येवेत्यर्थः। आसवत्वरूपणात् पिबन्तीत्युक्तम्। प्रसिद्धासवादौत्कृष्ट्यं वक्तुं विशंसन्ति-महात्मनां सतः परिशुद्धान्मुखमेव पद्मं तस्मान्निःसृतं निर्गलितं देहधारिणां देहकृच्चासावस्मृतिः देहकृदस्मृतिः देहसम्पादकमनाद्यज्ञानं छिनत्तीति तथा तं प्रसिद्धामृतं तु नैवंविधमिति भावः ॥३॥ तमिति । यस्य चरणाम्बुजामृतमेवंविधं तं त्वां नताः स्मः प्रणमामः । कथम्भूतम् ? परमहंसानां गतिं प्राप्यं मुक्त्युपायभूतं च तदुपयुक्तं सौशील्यं वात्सल्यं चाहुः-कालेनोपसृष्टो विप्लुतो निगमो वेदः तस्यावने निमित्ते रक्षणार्थं वैदिकधर्ममर्यादापालनार्थमित्यर्थः । आत्ता परिगृहीता योगमायया स्वाश्चर्यशक्ति...गेनाकृतिर्विग्रहो यस्य तं योगमायेत्यनेनाकृतेरकर्मायत्तत्वमुक्तम् आत्मेत्यनेन स्वेच्छयैवोपात्तत्वं यद्यपि सङ्कल्पमात्रेण निगमविरोधिदुष्कृद्विनाशसम्भवस्तथाप्याश्रितवात्सल्यात् सौशील्याच्चात्तयोगमायाकृतिरिति भावः । आश्रितकार्यापादकज्ञानगुणयोगमाहुः-अखण्डः अविच्छिन्नः अप्रतिहतः बोधः अनिष्टपरिहारेष्टप्रापणाद्युपयुक्तज्ञानं यस्य तं प्राप्यत्वोपयुक्तं गुणमाहुः। आनन्दसम्प्लवमानन्दप्रवाहरूपं प्राप्य वैलक्षण्यमाहुः-तिस्र अवस्थाः उत्पत्तिस्थितिसंहृतयः आत्मधाम्ना स्वतेजसा विद्युता निर्धूताः आत्मकृताः स्वकृताः तिस्र अवस्थाः यस्य तम् अन्येषां सृष्ट्यादिकृत् स्वयं सृष्ट्याद्यविषयश्चेत्यर्थः ॥४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

हित्वेति। आत्मधाम शुद्धस्वरूपं तदेव विशिनष्टि-विधुतेत्यादिचतुर्भिर्विशेषणैः। तादृशमपि तद्धित्वा तद्विज्ञानमात्रेत्यर्थः। त्वामेव नताः प्रपन्नाः स्म प्रसिद्धौ स्म इति विसर्गान्तपाठो वा नित्यमेव दृढं भजाम इत्यर्थः। कुतः परमहंसानामपि गतिं भजनीयं तत्र हेतुः कालेत्यादितदवने निमित्ते तन्निमित्तीकृत्य आत्ताः सङ्गृहीता योगमायाः सर्वाः स्वरूपशक्तिविलासा यत्र तादृश्याकृतिर्यस्य तम्। व्याख्यान्तरे योगमाययात्ताकृतिरेव स्यात् ॥४-८॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२-५॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

त्वच्चरणाम्बुजासवं ये कर्णपुटैः पिबन्ति तेषां देहम्भृतां देहधारिणां कुतोऽशिवमित्यन्वयः । महतां मनस्तः सकाशात् मुखद्वारतो निःसृतं देहकृच्चासावस्मृतिश्चाविद्या तां छिनत्तीति तथा तम् ॥३॥ हि निश्चितमेव त्वा त्वां नताः स्मः आत्मधाम्ना स्वविग्रहप्रकाशेन विधुताः खण्डिताः आत्मकृताः अविद्यानिर्मिताः अवस्थाः जीवानां त्रिगुणमय्योऽवस्था येन तम् अतः कथमकुशलमस्माकं सम्भवेदिति भावः । आनन्द एव सम्प्लवो निमज्जनं यस्य यस्माद्वा तं प्रत्युत त्वां दृष्ट्वा वयम् आनन्द एव निमज्जाम इति भावः । अखण्डः परिपूर्णः विकुण्ठः कालादिभिरकुण्ठितो बोधो ज्ञानं यस्य तमित्यस्मच्चित्तवृत्तीस्त्वच्चरणानुवर्तिनीस्त्वं जानास्येवेति भावः । कालेन उपसृष्टानां नष्टानां निगमानां वेदानां वेदोक्तमर्यादानाम् अवने पालने निमित्ते एव आत्ता गृहीता योगमायया कृतिर्दुष्टनिग्रहशिष्टपालनलक्षणा लीला येन तमिति सर्वसुखप्रदमिति भावः ॥४॥

गूढार्थदीपिनी

एवं कृष्णेन परिपृष्टाः युधिष्ठिरादयः तं प्रति ऊचुः कथम्भूताः ? तस्य पादेक्षया हतमंहः पापं येषां ते । महतां व्यासादीनं मनस्तः मुखद्वारा निःसृतं चरणाम्बुजासवं तन्महत्त्वबोधकं कथामृतं ये कर्णपुटैः अलमतिशयेन पिबन्ति तेषां कुतः अशिवमित्यन्वयः । कथम्भूतम् । देहकृत् या अस्मृतिः अविद्या तां छिनत्तीति तम् । देहकृत् ईश्वरः तद्विषयकमज्ञानं वा । देहंभृतां देहधारिणाम् तदर्हमिति ज्ञापकात् द्वितीया ॥३॥ हि एवार्थे । परमहंसानां गतिः त्वामेव वयं नताः स्म इत्यन्वयः । कथम्भूतं त्वाम् । आत्मधाम स्वपावस्थानेन विधुता निराकृता आत्मकृता बुद्धिनिमित्ता तिस्रोऽवस्था(जाग्रत्स्वप्नसुषुप्तिलक्षणाः ।) येन तम् । पुनश्च । क्रमेण चत्वारि विशेषणानि योज्यानि । तथा हि आनन्दसम्प्लवम् आनन्दघनम् । कालेन उपसृष्टा विलुप्ता ये निगमाः तेषामवने रक्षणार्थम् आत्ता गृहीता योगमायया आकृतिः श्रीविग्रहो येन तम् । यद्वा । हित्वेति(पदादौ न प्रयोक्तव्या प्रायशश्चादयो बुधैः । इत्यालङ्कारिकाः ।) क्त्वान्तम् । हित्वा । किम् । आत्मधाम शरीरं गृहं च देहदैहिकसम्बन्धं परित्यज्येत्यर्थः । अहंताममते वा । त्वामिति प्रकरणात् लभ्यम् । परमहंसानां ज्ञानिनां गतिं प्राप्यम् ॥४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ते युधिष्ठिरादयः तत्पादेक्षया लोकनाथचरणदर्शनेन हतमंहो येषां ते ॥२॥ हे प्रभो ! देहकृद्देहावलिङ्कृच्चासौ अस्मृतिः आत्मापरमात्मात्मस्वरूपाद्यज्ञानं छिनत्तीति तथा तं महतां मनस्तः सकाशाद् मुखाद्द्वारतो निस्सृतं त्वच्चरणाम्बुजयोरासवमासववन्मधुरं त्वदितररागविस्मारणं कथामृतमित्यर्थः । ये क्वचित्कदाचित् कर्णपुटैरलमत्यर्थं पिबन्ति तेषां देहभृतां प्राणिनां कुतोऽशिवमकुशलं न कुतोऽपीत्यर्थः ॥३॥ हि हेतौ त्वत्कथाश्रवणस्यैवं फलमतः त्वा त्वां नतास्स्म कीदृशं परमहंसानाम् सारासारविवेकवतां गम्यते अनया इति गतिः उपायः गम्यते इति गतिः उपेयः तमुपायोपेयं कालेनोपसृष्टस्य विष्णुतत्त्व निगमस्य अवने रक्षणे नमित्ते आत्ता उपात्ता आविष्कृता योगमायया युज्यते इति योगः सङ्कल्पस्तत्सहितया मायया दया आकृतिः स्वाभाविकी मूर्तिर्येन तम् अकुण्ठबोधं परिपूर्णज्ञानम् अखण्डमपरिच्छिन्नमानन्दसप्लवमानन्दसागरं स्वधाम्ना स्वतेजसा विधुताः आत्मकृता जीवोपकाराय स्वेनैव कृताः तिस्रः सृष्ट्यादिरूपा जाग्रदादिरूपा वा अवस्थाः यस्मिन् तम् ॥४-५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

ततस्ते स्वाधिकारं प्रकटयन्तः प्रत्युत्तरमुक्तवन्त इत्याह-त एवमिति । प्रश्नेनापि महान् सन्तोषो जात इति ज्ञापयन् लोकनाथेन परिपृष्टा इति । महतः प्रश्नामात्रमपि सन्तोषजनकम् । प्रकृते त्वधिकमप्यस्तीत्याह-सुसत्कृता इति । आसनादिकृतः सत्कारः अनेन कायिकपूजा निरूपिता ततः प्रत्यूचुः पूजितपार्णि निरूपितवन्तः । कायवाङ्मनसां गुणमुक्त्वा दोषाभावमाह-तत्पादेक्षाहतांहस इति । भगवच्चरणारविन्ददर्शनेन हतपापाः ॥२॥ यद्भगवता पृष्टं कुशलमस्तीति तत्रोत्तरमाहुः-कुतोऽशिवमिति अशिवसम्भावनायां कुशलप्रश्नः सङ्गच्छते अन्यथा निःसन्दिग्धे प्रश्नो व्यर्थः स्यात् । यद्यपि संसारित्वेनाकुशलं सम्भवति तथापि सर्वाकुशलनिवर्तकसाधनस्य निरन्तरमनुष्ठानात् कथमशिवमित्यभिप्रायेणाहुः-कुतः अशिवमिति । तत्किं साधनमित्याकाङ्क्षायाम् त्वच्चरणाम्बुजासवं महन्मनस्तो मुखनिःसृतमिति । परमानन्दस्य तव चरणो भक्तिमार्गप्रवर्तकः अम्बुजमिति सुखसेव्यः तत्र मकरन्दरसः रसात्मको भगवान् सर्वत्रैव वर्तत इति ब्रह्मानन्द एव मार्गान्तरेण समानीतः । देहाद्यभिमानवतां देहादिविस्मारकः आसवशब्दवाच्यो भवति स स्वभावत एव परमानन्दरूपो दोषान्तरनिवर्तकश्च तत्रापि यदि ततोऽप्युत्कृष्टरसेन सम्मिलितो भवति तदा किं वक्तव्यम् ? रसान्तरेण पृष्टः सन् परमानन्दं प्रयच्छतीति वक्तुमाह-महन्मनस्त इति । अत्र भक्तिमार्गस्यायं सिद्ध ब्रह्मानन्दः स्वेच्छया वस्त्रमिव संकुचितात्मा शतगुणित इव घनीभूतः परिणतदधिवदन्यूनः आनन्दघनो भवति तदात्मको भगवान् स यदा भक्तिमार्गेण गृहीतो भवति तदा भगवद्भक्तानां कायवाङ्मनोभिः दृढं गृहीतः रसात्मकत्वाद्भक्तानामानन्दरूपं करोति भक्तिरस इत्युच्यते । सोऽपि शब्दब्रह्मणि भगवतादावुद्धृतः घटोद्धृतजलमिव महतां श्रवणस्मरणकीर्तनादिभिः इन्द्रिय तच्छिद्रद्वारा मनसो हृदि विनिविशति । स तु भक्तिरसापेक्षयापि पुनः भक्तेन्द्रियैः पावितत्वात् निर्गलितः ततोऽप्यधिकरसः एव यदा यदा वारं वारं भगवद्गुणान् कीर्तयति चरणारविन्दमकरन्दरूपान् भक्तिमार्गानुसारेण गूढार्थरूपान् तदा महन्मनस्कः महत्

स्थित्वा मुखनिःसृत
अलङ्कर्णपुटैरुत्तभितकर्णै
तादृशा भक्ताः कोटिशो
निवर्तते ततो ज्ञानं ततः स
। तत्र भक्त्या भक्तिरसः
पेपीयमानानामशुभसम्भाव
छिनत्तीति मूले गते देहकृ
आत्मधाम स्वगृहादिकं हित्
तद्दातारं नमस्ति हि त्वेति
नन्ववस्थात्रये विद्यमाने किं
तत्राहङ्कारमेव दूरीकरोति तत्र
तदवस्थाभाव इति भगवतः
चेत्परिच्छिन्नः स दोषस्तदव
तथोपलम्भात् अपुरुषार्थो भ
एवेत्यर्थः । नन्वेतादृशः श्रुत्
चेत्तत्राह-कालोपसृष्टनिगमाव
अवने रक्षार्थमात्ता योगमायया
इति चेत्तत्राह-परमहंसगतिमि
भगवद्गतिं च विवेचितुं जानन्ति
तथाभूताः भगवद्भावार्थं त्वां न

एवं लोकानां नाथेन स
हतमंहः पापं येषां ते प्रत्यूचुः
चरणाम्बुजयोः पादपद्मयोरासवं
देहम्भृतां प्राणिनां देहकृच्चासाव
निरस्ता आत्मना बुद्ध्या कृताः
स्वतः सिद्धज्ञानं कालेनोपसृष्टा नष्ट
गतिं त्वां त्वा नताः स्म हि युक्तम्

ते युधिष्ठिरादयो लोकनाथे
येषां ते, अत एव हृष्टं मनो येषां ते तं प्र
देहकृदस्मृतिः देहसम्पादकमनाद्यज्ञा
त्वच्चरणाम्बुजासवम् आसववन्मादक

षां ते। महतां व्यासादीनां
ां कुतः अशिवमित्यन्वयः
। देहंभृतां देहधारिणाम्।
म्भूतं त्वाम्। आत्मधाम्ना
येन तम्। पुनश्च। क्रमेण
गमाः तेषामवने रक्षणार्थम
यो बुधैः। इत्यालङ्कारिकाः
ते वा। त्वामिति प्रकरणात

हावलिङ्कृच्चासौ अस्मृतिः
मुखाद्द्वारतो निस्सृतं
त् कर्णपुटैरलमत्यर्थं पिबन्ति
मतः त्वा त्वां नतास्स्म कीदृशं
कालेनोपसृष्टस्य विष्णुतत्त्वस्य
पस्तत्सहितया मायया दयया
नन्दसागरं स्वधाम्ना स्वतेजसा
: यस्मिन् तम् ॥४-५॥

् सन्तोषो जात इति ज्ञापयति-
सुसत्कृता इति। आसनादिकृतः
नसां गुणमुक्त्वा दोषाभावमाह-
तत्रोत्तरमाहुः-कुतोऽशिवमिति।
ारित्वेनाकुशलं सम्भवति तथापि
तत्किं साधनमित्याकाङ्क्षायामाह-
: अम्बुजमिति सुखसेव्यः तत्रत्यो
भिमानवतां देहादिविस्मारकत्वेन
तोऽप्युत्कृष्टरसेन सम्मिलितो भवेत्
। अत्र भक्तिमार्गस्यायं सिद्धान्तः
घनो भवति तदात्मको भगवच्चरणः
कत्वाद्भक्तानामानन्दरूपं स्रवति स
णस्मरणकीर्तनादिभिः इन्द्रियाघातैः
र्गलितः ततोऽप्यधिकरसः एवं सति
रूपान् तदा महन्मनस्कः महन्मनसि

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

स्थित्वा मुखनिःसृतो भवति क्वचिदिति। अनन्तभक्तसङ्गे रसाविर्भावे च कदाचिदेव वदतीति तथा अलङ्कर्णपुटैरुत्तभितकर्णैरलमत्यर्थं पिबन्ति। ननु दुर्लभोऽयं रसः कथं बहुपानसमर्थो भवेत् तत्राह-प्रभो इति। स हि सर्वसमर्थः तादृशा भक्ताः कोटिशो भवन्ति अतो भगवदाश्रये भूयानेव तादृशो रसः पीयत इति अशुभसम्भावनाऽपि का अशुभं धर्मादेव निवर्तते ततो ज्ञानं ततः स वासनाऽविद्यानिवृत्तिः ततः केवलात्मा भगवन्निष्ठो भवति। तदा आनन्दघनो भगवान् प्रकटो भवति। तत्र भक्त्या भक्तिरसः सर्वदोषनिवर्तकः नित्यं संसारविस्मरणहेतुः प्रादुर्भवति। सोऽपि पूर्वप्रणालिकया एवं नित्यं पेपीयमानानामशुभसम्भावनाऽपि बाधिता। किंच देहाभिमाने विद्यमानेऽपि प्रयत्नमात्रेण गृहीते देहकर्त्री या स्मृतिः तामपि छिनत्तीति मूले गते देहकृत्सम्भावनाऽपि निरस्ता ॥३॥ एवं प्रश्नोत्तरमुक्त्वा भगवति स्वचिकीर्षितं विज्ञापयन्ति-हित्वेति। आत्मधाम स्वगृहादिकं हित्वा देहं वा परमहंसगतिं त्वां नताः स्म इति सम्बन्धः। यथा कश्चित् पूर्वभावं परित्यज्य उत्तरभावग्रहणार्थं तद्दातारं नमस्ति हि त्वेति पदद्वयं वा आत्मनोऽपि धाम तेजोरूपं त्वां तस्मिन् पक्षे दोषाभावः पूर्वोक्त एवानुसन्धेयः। न्ववस्थात्रये विद्यमाने किं भगवन्नमनेनेत्यत आह-आत्मकृताः अन्तःकरणकृताः तिस्रोऽवस्थाः विधुताः दूरीकृताः येन तत्राहङ्कारमेव दूरीकरोति तत्र तत्कृतावस्थानात् दूरीकर्तुं कः प्रयासः ? न केवलमवस्थानिवर्तकमात्रम्। तथा सति बीजभावेऽपि तदवस्थाभाव इति भगवतः को विशेषः स्यात्तत्राह-आनन्दसम्प्लवमिति। आनन्दस्य सम्प्लवः समा पूरो यस्य सोऽपि चेत्परिच्छिन्नः स दोषस्तदवस्थ इति चेत् तत्राह-अखण्डमिति। तथापि लोके अज्ञातः परमानन्दो न पुरुषार्थ इति सुषुप्तौ तथोपलम्भात् अपुरुषार्थो भवेदित्याशंक्याह-अकुण्ठबोधमिति। न कुण्ठितः कुण्ठो बोधो यस्येति अनुभूयमानानन्दरूप इत्यर्थः। नन्वेतादृशः श्रुत्यैकमात्रसमधिगम्यः स्वानुभवः प्रकटः ब्रह्मानन्द एव भवति न तु परिदृश्यमानो भगवानिति चेत्तत्राह-कालोपसृष्टनिगमावन आत्तयोगमायाकृतमिति। कालेन वेदानां नाशे तत्प्रतिपाद्यधर्माणां तत्सम्बन्धिनां सर्वेषामपि अवने रक्षार्थमात्ता योगमायया आकृतिर्येन स एव धर्मरक्षार्थमेवमाविर्भूतः। न त्वन्य इत्यर्थः। तर्हि कथं न सर्वैस्तथा ज्ञायत इति चेत्तत्राह-परमहंसगतिमिति। ये संसारादात्मनः पृथग्भावं जानन्ति कर्तुं च शक्नुवन्ति ते हंसा ततोऽपि ये जीवानां गतिं भगवद्गतिं च विवेचितुं जानन्ति ते परमहंसाः तेषामेव गतिर्गम्य इत्यर्थः। अतः स्वभजनानुकूलतया कियन्तो धर्मा ज्ञाता इति तथाभूताः भगवद्भावार्थं त्वां नता इत्यर्थः ॥४॥

सुबोधिनीसारः

एवं लोकानां नाथेन स्वामिना श्रीकृष्णेन परिपृष्टाः सुष्ठु सत्कृता हृष्टमनसः प्रसन्नचित्ताः तस्य पादयोरीक्षया दर्शनेन हतमंहः पापं येषां ते प्रत्यूचुः प्रत्युत्तरं ददुः ॥२॥ महतां भगवतां मनस्तो मनसः सकाशान्मुखद्वारतो निःसृतम् उद्गतं तव चरणाम्बुजयोः पादपद्मयोरासवं सारांशं कर्णपुटैः श्रोत्रांजलिभिः क्वचिदपि समये ये पिबन्ति तेषामशिवं दुःखादि कुतः देहभृतां प्राणिनां देहकृच्चासावस्मृतिरविद्या व्यवधानकर्त्रीत्वात् तां छिनत्तीति तत् ॥३॥ आत्मधाम्ना स्वतेजसा विधुता निरस्ता आत्मना बुद्ध्या कृताः तिस्रोऽवस्था यस्मिंस्तम् आनन्दसम्प्लवमानन्दघनम् अखण्डमेकरसम् अकुण्ठबोधं नित्यं स्वतः सिद्धज्ञानं कालेनोपसृष्टा नष्टा ये निगमा वेदास्तेषामवने रक्षणार्थम् आत्ता गृहीता योगमाययाऽकृतिर्मूर्तिर्येन तं परमहंसानां गतिं त्वां त्वा नताः स्म हि युक्तम् ॥४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ते युधिष्ठिरादयो लोकनाथेन श्रीकृष्णेनैवं कुशलं परिपृष्टाः सुसत्कृताश्च तस्य पादयोरीक्षया दर्शनेन हतं निरस्तमंहः पापं येषां ते, अत एव हृष्टं मनो येषां ते तं प्रत्यूचुः ॥२॥ उक्तिमेवाह-कुत इति द्वाभ्याम्। हे प्रभो देहम्भृतां देहधारिणां देहकृच्चासावस्मृतिश्च देहकृदस्मृतिः देहसम्पादकमनाद्यज्ञानं तच्छिनत्तीति तथाभूतं महतां व्यासादीनां मनसः सकाशात् मुखपङ्कजद्वारा निःसृतं त्वच्चरणाम्बुजासवम् आसववन्मादकत्वान्मधुरत्वाच्च कथामृतं क्वचिदपि ये कर्णपुटैः श्रोत्रचषकैरलं पिबन्ति तेषामशिवममङ्गलं

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कुतः स्यादित्यन्वयः ॥३॥ हि-शब्दोऽवधारणे । वयं परमहंसानां परमविवेकिनां गतिं प्राप्यं फलभूतं त्वा त्वामेव नताः म प्रणमामः । एवं परमफलत्वे हेतुगर्भाणि विशेषणान्याह-आत्मधाम्ना स्वतेजसा विधुता निरस्ता आत्मकृता बुद्धिकृतास्ति जाग्रत्स्वप्नसुषुप्तिलक्षणा अवस्था येन तम् । आनन्दसम्प्लवम् आनन्दप्रवाहरूपं पूर्णानन्दम् । अखण्डम् अपरिच्छिन्नम् । अकुण्ठ अप्रतिहतः बोधो ज्ञानं यस्य तम् । एवम्भूतस्याविर्भावप्रयोजनमाह-कालेनोपसृष्टा विप्लुता निगमा वेदास्तेषामवने निमित्ते रक्षार्थं आत्ता परिगृहीता योगमायया निजाश्चर्यशक्त्या आकृतिर्विग्रहो येन तमिति ॥४॥

अन्वितार्थप्रकाशिका

त इति । ते युधिष्ठिरादयो लोकनाथेन श्रीकृष्णेनैवं कुशलं परिपृष्टाः सुसत्कृताश्च तस्य पादयोरीक्षया दर्शनेन ह निरस्तमंहः पापं येषां ते अत एव हृष्टं मनो येषां ते तं प्रत्यूचुः ॥२॥ कुत इति । हे प्रभो ! देहम्भृतां देहधारिणाम् । द्वितीया आर्ष । तदर्हमिति ज्ञापकाद्वा । देहकृच्चासावस्मृतिश्च देहकृदस्मृतिः देहसम्पादकमनाद्यज्ञानं तच्छिनत्तीति तथाभूतं देहकृदीश्वरस्तद्विषयाज्ञानं छिनत्तीति वा महतां व्यासादीनां मनसः सकाशात् मुखपङ्कजद्वारा निःसृतं त्वच्चरणाम्बुजासवम् आसववन्मादकत्वान्मधुरत्वाच्च कथामृतं क्वचिदपि ये कर्णपुटैः कर्णचषकैरलं पिबन्ति तेषामशिवममङ्गलं कुतः स्यात् ॥३॥ हीति । हिशब्दोऽवधारणे । आत्मधाम्ना स्वरूपप्रकाशेन विधुता निरस्ता आत्मकृता बुद्धिनिमित्तास्ति जाग्रत्स्वप्नसुषुप्तिलक्षणा अवस्था येन तम् आनन्दसम्प्लवम् आनन्दप्रवाहरूपं पूर्णानन्दम् अखण्डम् अपरिच्छिन्नम् अकुण्ठ अप्रतिहतः बोधः चिच्छक्तिर्यस्य कालेनोपसृष्टा विप्लुता निगमा वेदास्तेषामवने निमित्ते रक्षार्थम् आत्ता परिगृहीता योगमायया निजाश्चर्यशक्त्या आकृतिर्विग्रहो येन तं परमहंसानां परमविवेकिनां गतिं प्राप्यं फलभूतं त्वा त्वामेव नताः स्मः प्रणमामः । यद्वा आत्मधाम आत्मानं शरीरं धाम गृहं च हित्वा नताः स्मः । त्वामिति प्रकरणाल्लभ्यम् ॥४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्य कृबणस्य पादेक्षया हतमंहः पावृन्दं येषां ते तथाभूताः प्रत्यूचुः ॥२॥ कुत इति ॥ हे प्रभो महतां मनस्तः मनसः सकाशात् मुखनिःसृतं मुखेन कृत्वा निःसृतं बहिर्निर्गतक्कचित्कदाचित् देहभृतां जीवानां देहकृत् याऽस्मृतिः अहंममत्वरूपमज्ञानं तां छिनत्तीति तथाभूतं यद्वा देहकृतः परमेश्वरस्य तव अस्मृतिच्छिदम् अज्ञाननिवर्तकं त्वच्चरणाम्बुजयोरासवं महात्म्यकथनरूप मकरन्दरसं कर्णपुटैः ये नरा अलं पिबन्ति तेषामशिवं कुतो भवेन्न भवेत् यद्वा केभ्य इति कुतः कालादिविघ्नकृद्भ्योऽपि अशिवम् अमङ्गलं स्यात्किं न स्यादित्यर्थः ॥३॥ हित्वा इति द्वे पदे ॥ त्वा त्वाम् ॥ हि एव वयं नताः स्मेति प्रसिद्धौ ॥ स्म इति सविसर्ग पाठोऽप्यस्ति युष्मच्छब्देनोक्तं कृष्णं विशिनष्टि आत्मधाम्ना स्वरूपज्ञानेन विधुताः नाशिताः आत्मकृताः आत्मसुभक्तजीव कृताः तिस्रोऽवस्था येन तम् ॥ आनन्दसम्प्लवम् आनन्दघनमूर्तिम् ॥ अखण्डम् अच्युतम् ॥ अकुण्ठबोधं सदाऽप्रतिहतज्ञानं कालेनोपसृष्टानां नष्टानां निगमानां वेदानामवने रक्षानिमीत्तम् आत्ता गृहीता योगमायया योगैश्वर्येण आकृतयो मत्स्याद्यवतारा ये तम् ॥ परमहंसानां गतिं प्राप्यं त्वां नताः स्मेति सम्बन्धः ॥४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त इति ॥ लोकनाथेन श्रीकृष्णेन एवमुक्तप्रकारेण परिपृष्टाः कुशलमिति शेषः । सुसत्कृताः तस्य श्रीकृष्णस्य पादयोरीक्षा दर्शनं तया हतं निरस्तमंहः पापममङ्गलं च येषां ते अत धव हृष्टं मनो येषां ते, ते युधिष्ठिरादयः प्रत्यूचुः ॥२॥ उक्तिमेव कुत इति द्वाभ्याम् ॥ कुत इति ॥ हे प्रभो ! महन्मनस्तः महतां व्यासादीनां मनसः सकाशादित्यर्थः । मुखनिःसृतं मुखपद्म निर्गलितमित्यर्थः । क्वचित्, देहभृतां देहधारिणां देहकृच्चासावस्मृतिश्च देहकृदस्मृतिः देहसम्पादकमनाद्यज्ञानमित्यर्थः । तच्छिनत्ति तथाभूतं, त्वच्चरणाम्बुजासवं त्वत्पादाम्बुजादिवर्णनप्रधानासववन्मादकामृतवत्स्वादुकथामित्यर्थः । ये कर्णपुटैः श्रोत्रचषकैः अलमतीव पिबन्ति त्वच्चरणाम्बुजं ये ध्यायन्तीत्यर्थः । तेषाम् अशिवममङ्गलम्, कुतः । नास्त्येवेत्यर्थः । अत्र कथा

आसवशब्देनोक्तिर्माधुर्यातिश
निमित्ते वैदिकधर्ममर्यादाप
योगमाययेत्यनेनाकृतेरकर्माय
बोधोऽनिष्टपरिहारेष्टप्रापणाद्युप
धाम स्य तम्, अकुण्ठबोधमि
निर्धूता आत्मकृतास्तिस्रोऽव
केचित्त्वात्मधामेति पृथक् पठि

भगवान श्रीकृष्ण वे
नष्ट हो चुके थे अब यह ज
होकर भगवान से कहने लगे
मित्र बना दिये है ऐसे महत्
और कभी कभी उनके मुख
हे कृपानाथ वह कथारस इत
वह रस जन्म मरणकी परम्प
भक्तजन अपने कानोंमे भरभ
॥३॥ आत्मधाम हित्वा अप
आपको हम प्रणाम करते है ।
तक पहुं ही नही पाती, दूरसे ह
ह्रास देखकर उनकी रक्षा के लि
चरणोंमें बारबार नमस्कार कर

ऋषिरुवाच

इत्युत्तमश्लोकशिखा
समेत्य गोविन्दकथा

द्रौपद्युवाच

हे वैदर्भ्यच्युतो[३] भद्रे
हे कृष्णपत्न्य एतन्नो

रुक्मिण्युवाच

चैद्याय मार्पयितुमुद्यत
निन्ये मृगेन्द्र इव भा

---

१. प्लुवत्सवच्युत-विज. । २. कथां मिथो
च. पु. टी. । ६. चरणाब्जसमर्चनाय-विज.

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आसवशब्देनोक्तिर्माधुर्यातिशयद्योतनार्था ॥३॥ तमिति ॥ परमहंसानां गतिं प्राप्त्युपायभूतं कालेनोपसृष्टो विप्लुष्टो निगमो देवस्तस्यावने निमित्ते वैदिकधर्ममर्यादापालनार्थमित्यर्थः । आत्ता गृहीता योगमायया स्वाश्चर्यशक्तियोगेन आकृतिर्विग्रहो येन तम्, योगमाययेत्यनेनाकृतेरकर्मायत्तत्वमुक्तम् । आत्तेत्यनेन स्वेच्छयैवोपात्तत्वं दर्शितम् । अखण्डो निरन्तरः विकुण्ठोऽप्रतिहतो बोधोऽनिष्टपरिहारेष्टप्रापणाद्युपयुक्तज्ञानं यस्य तम्, अखण्डमकुण्ठधिष्ण्यमिति पाठे, अखण्डमपरिच्छिन्नम् अकुण्ठमविनाशि धिष्ण्यं धाम यस्य तम्, अकुण्ठबोधमिति पाठे न कुण्ठः बोधो यस्य तम् आनन्दसम्प्लवमानन्दप्रवाहरूपम् आत्मधाम्ना स्वतेजसा विधूता निर्धूता आत्मकृतास्तिस्रोऽवस्था उत्पत्तिस्थितिसंहृतिरूपा यस्य तम् अन्येषां सृष्ट्यादिकृत् स्वयं सृष्ट्याद्यविषयश्चेत्यर्थः । केचित्त्वात्मधामेति पृथक् पठन्ति आत्मैव धामाश्रयो यस्य क्लीबत्वमार्षमिति व्याख्यायन्ते । तं त्वा त्वां नताः स्मः प्रणमामः ॥४॥

कृष्णप्रिया

भगवान श्रीकृष्ण के श्रीचरणोंका दर्शन करने से ही पाण्डोंके और सर्व सुहृजनों के सारे अमंगल अशुभ नष्ट हो चुके थे अब यह जब भगवान श्रीकृष्णने उनका सत्कार किया कुशल मंगल पूछा तब वे अत्यन्त आनन्दित होकर भगवान से कहने लगे ॥२॥ ज्ञान कर्म भक्ति सेवा आदि दिव्य समृद्धियोंसे जिन महापुरुषोंने षट् शत्रुओंने मित्र बना दिये है ऐसे महत्पुरुषोंके मुखकमलसे छलकते आपके चरणारविन्द का मकरन्द रस पान करते रहते है और कभी कभी उनके मुखकमलसे भगलल्ली भगवत्कथा भगवच्चरितामृत रूपमें वह रस छलक पडता है हे नाथ हे कृपानाथ वह कथारस इतना अद्भूत-मधुर एवं दिव्य है कि कोई प्राणी उस रसका एकबार भी पान करले तो वह रस जन्म मरणकी परम्परा डालनेवाली अविद्या को निर्मूल कर देता है । किन्तु उसी कथामृत को जो श्रद्धपाल सज्जन अपने कानोंमे भरभरकर मनस्तुप्ति पर्यन् पान करते है उनके अमंगलकी संभावना ही कैसे हो सकती है ॥३॥ आत्मधाम हित्वा अपने धाम-निवास अथवा अपने धर्म-देहको छोडकर परमहंसो को प्राप्त करने योग्य आपको हम प्रणाम करते है । अन्त:करणसे होने वाली जाग्रतस्वप्न-सुप्ति पीन वअस्थाएं आपके स्वयंप्रकाशस्वरूप तक पहुं ही नही पाती, दूरसे ही नष्ट हो जाती है । आप परमहंसोकी एकमात्र गति है । समयके परिवर्तनसे वेदोंका ह्रास देखकर उनकी रक्षा के लिये अपनी अचित्य योगमाया के द्वारा मनुष्यका विग्रह किया है ! हे नाथ हम आपके चरणोंमें बारबार नमस्कार करते है ॥४॥

ऋषिरुवाच

इत्युत्तमश्लोकशिखामणिं जनेष्वभिष्टु[1]वत्स्वन्धककौरवस्त्रियः ।
समेत्य गोविन्दकथा [2]मिथोऽगृणंस्त्रिलोकगीताः शृणु वर्णयामि ते ॥५॥

द्रौपद्युवाच

हे वैदर्भ्यच्युतो[3] भद्रे हे जाम्बवति कौसले । हे सत्यभामे कालिन्दि शैब्ये रोहिणि लक्ष्मणे ॥६॥
हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवानयम्[4] । उपयेमे यथा लोकमनुकुर्वन् स्वमयया ॥७॥

रुक्मिण्युवाच

चैद्याय मार्पयितुमुद्यतकार्मुकेषु राजस्वजेयभटशेखरिताङ्घ्रिरेणुः ।
निन्ये मृगेन्द्र इव भागम[5]जावियूथात् तच्छ्रीनिकेत[6]चरणोऽस्तु ममार्चनाय ॥८॥

---

[1] स्तवच्युत-विज. । [2] कथां मिथोऽगृणन्त्रृलोकगीतां-विज. । [3] च्युते-वीर. । [4] स्वयम्-श्रीधर. वंशी. वीर. विज. । [5] भजोऽपि युद्धा-[illegible] । [6] चरणाब्जसमर्चनाय-विज. ।

कर्दमक्षमा

ऋषिः, उवाच ।, जनेषु, इति, उत्तमश्लोकशिखामणिम्, अभिष्टुवत्सु, अन्धककौरवस्त्रियः, समेत्य, त्रिलोकगीता गोविन्दकथाः, मिथः, अगृणनन्ताः), शृणु, ते, वर्णयामि ॥५॥

द्रौपदी, उवाच ।

हे, वैदर्भि, हे, भद्रे, हे, जाम्बवति, हे, कौशले, हे, सत्यभामे, हे, कालिन्दि, हे, शैब्ये, हे, रोहिणि, हे, लक्ष्मणे कृष्णपत्न्यः, एतत्, नः, ब्रूत, स्वमायया, लोकम्, अनुकुर्वन्, अयम्, अच्युतः, भगवान्, यथा, उपयेमे ॥६-७॥

रुक्मिणी, उवाच ।

राजसु, मा, चैद्याय, अर्पयितुम्, उद्यतकार्मुकेषु, अजेयभटशेखरिताङ्घ्रिरेणुः, मृगेन्द्र, इव, अजावियूथात्, भागम् निन्ये, तच्छ्रीनिकेतचरणः, मम, अर्चनाय, अस्तु ॥८॥

श्रीधरस्वामिकृता भावार्थदीपिका

त्रिषु लोकेषु गीताः ॥५॥ कौसले हे सत्ये ! शैब्ये हे मित्रविन्दे रोहिणीनाम काचित्पट्टमहिषीतुल्या ॥६॥ हे अ श्रीकृष्णस्य पत्न्यः ॥७॥ मा मामर्पयुतुं सम्पादयितुं राजसु जरासन्धादिषु उद्यतकार्मुकेषु सत्सु अजेया ये भटास्तेषां शेखरी मुकुटवत्कृताः अङ्घ्रिरेणवो येन तेषां मूर्ध्नि पदं दधदित्यर्थः तस्य श्रीनिकेतस्य चरणौ ममार्चनायास्तु ॥८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्युक्तरीत्या । उत्तमश्लोका युधिष्ठिराद्यास्तेषां शिखा शेखरीभूतो रुद्रस्तस्य मणिं मणिवद्धार्यं श्रीकृष्णम् ॥५-६॥ य येन विधिना । एतं विधिम् ॥७॥ इत्यर्थ इति-"जह्ने पदं मूर्ध्नि दधत्सुपर्णः" इत्युक्तेरिति भावः । अजानामवीनां च यूथात् ॥८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यथा श्रीयुधिष्ठिरादयोऽभिष्टुतवन्त इति एतत्प्रकारेण जनेष्वपि राजादिष्वभिष्टुवत्स्वित्यर्थः । याः अन्धकानां याद कौरवाणां च श्रीयुधिष्ठिरादीनां स्त्रियः पत्न्यः ताः समेत्य मिलित्वा याः कथा अगृणन् ताश्च त्रिलोकगीतास्ते तुभ्यं वर्णयामि महानुग्रहवचनम् अतः परमश्रद्धया शृण्वित्यर्थः । एवं नानास्त्रीणां नानाकथास्वपि वृत्तासु श्रीरुक्मिण्यादीनां द्रौपद्या तद्विवाहप्रसङ्गस्यैव कथनं श्रीमन्मुनीन्द्रस्य भावविशेषेण तस्यामेवादरात् तस्या एव महामाधुर्येण मुख्यत्वाच्चेति ज्ञेयम् ॥ श्रीद्रौपदी तु सख्यविशेषात् परमकौतुकेन विवाहमेव पृच्छति-हे वैदर्भीति युग्मकेन । अच्युत इति प्रत्येकं सर्वासां तासां विच्युतिराहित्याभिप्रायेण यद्यपि रमारूपत्वात् नित्यमेव श्रीभगवतो महिष्यो यूयमिति जानीमस्तथापि प्रकटलीलायां स्वेषु या माया कृपा तया लोकमनुकुर्वन् यथोपयेमे तथेति स्वादरविशेष' व्यंजितः स्वकौतुकविशेषश्च नोऽस्मान् प्रत्येतद्ब्रूत विवाहक्रमादिना ज्येष्ठत्वकनिष्ठत्वसम्भवेऽपि तत्तत्क्रमेण सम्बोधनं तत्रोपशेषक्रमापेक्षया तासु तिसृणां मुख्यत्वादादरेण हे । रोहिण्याश्च तासां मध्ये निर्देशः । शताधिकषोडशसहस्रमहिषीमुख्यत्वेन ताभिस्तुल्यत्वात् प्रत्युत्तरन्तु विवाहक्रमादेव जाम्बवत्याः प्राक् श्रीसत्यभामाया उत्तरं तस्याः श्रीभगवत्प्रेमविशेषेण भद्रामित्रविन्दयोश्च मिथो नामलिपिविपर्ययो लेखक ज्ञेयः पूर्वोक्ततत्तद्विवाहप्रकारस्य बहुविरोधापत्तेः अतोऽग्रे श्रीलक्ष्मणोक्तावाद्यपद्यटीकायामपि यथा मित्रविन्दाया इत्य इति द्रष्टव्यम् ॥६-७॥

वेददुर्वेदभावाद्या वन्दे श्रीकृष्णवल्लभाः । यासां वागर्थविवृतौ यत्कृपयैव गतिर्मम ॥

ते राजान एवोजेयभटाः तेषां मूद्धाक्रमिणश्चरणरेणवोऽपि यस्य स इति यद्वा अजेया ये भटाः योद्धारस्तैरपि निवा शेखरितार्थं शेखरिता अङ्घ्रिरेणवोऽपि यस्य स इती सर्वोपरि प्रतिभटजेतेत्यर्थः । भागं स्वीयं मां यो निन्ये स्वीकृतवान् ।तच्चानायासेनेति बोधयन् अजेयेत्यादिना सूचितं महावीरत्वमेव दृष्टान्तत्वेनाह-अजाश्च अवयश्च मेषाः तासां यूथान्

मृगेन्द्र इवेत्यर्थः । एवं परिपाटी
ननु त्वमेव पूर्णा श्रीः पूर्णेनाने
तत्प्रसादादेव मम तादृशत्वमित
केवलं दासीत्वेन तत्पादाब्जसे
कर्ता तच्च यदगादरण्यमित्या

श्रीयुधिष्ठिरस्य श्रीभ
उत्तमश्लोकानां पुण्ययशसां श्र
स्तुवत्सु सत्सु, इति स्त्रीणामुत्स
एकत्र मिलित्वा अन्यासां सद्भावे
। गोविन्दस्याशेषैश्वर्यप्रकटनार्थम
सूचिता, - तासु विवाहकथामुख
अतः परमश्रद्धया अवहितः शृ
मधुरमधुरविचित्रलीलासु विराज
विवाहमेव बहुमन्यमाना तमेव पृ
नोऽस्मान् प्रत्येतत् ब्रूत । एवं प
लोकमनुकुर्वन् लौकिकलीलामाचर
सूचितः । यद्वा, अच्युतः सर्वैश्वर्य
स्वमायया लोकमनुकुर्वन् । अ
उपवेशनकमाद्यपेक्षया तासु
शताधिकषोडशसहस्रमहिषीमुख्यत
ज्ञेयम् । तस्यां श्रीभगवत्प्रेमविशे
पूर्वोक्ततत्तद्विवाहप्रकारस्य बहुविरोध
इति द्रष्टव्यमिति दिक् । सर्वमिदमग्रे

वेददुर्वेदभावास

राजान एवाजेयभटाः । भाग
अजेयेत्यादि सूचितं महावीरत्वमेव
सूचित एव, साक्षात्तदनुक्तिश्च
तत्कारुण्यभरबोधनार्थम् । ननु स
श्रीनिकेतः कोमलत्वादिसम्पत्तेर्विचित्र
मित्यमिति मम मत्कर्तृकाय आस्त
दासीत्वेन सदा तत्पदाब्जसेवै
आतम् । यद्वा, स चासौ श्रीनि
विशेषात् । अन्यत् समानम्

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न्द्र इवेत्यर्थः। एवं परिपाटीविशेषेण तत्तद्वृत्तकथनमसादृश्येन नेतुमयोग्यस्याप्यात्मनस्तत्तत्प्रकारेण नयनात् तत्कारुण्यभरबोधनार्थम्-त्वमेव पूर्णा श्रीः पूर्णेनानेन भगवता कथं नानेन भगवता कथं नानेतव्येति चेत् तत्राह-तदिति। तस्य चरण एव श्रीनिकेत इति प्रसादादेव मम तादृशत्वमित्यर्थः। मम मत्कर्तृकायार्चनाया अस्त्विति प्रार्थनया यद्वास्ययोग्यापि न स्याम्, कुतस्तत्पत्नीत्वमर्हामीति केवलं दासीत्वेन तत्पादाब्जसेवैव काचिप्रार्थ्यत इति भावः। अन्यत्तैः। यद्वा, स चासौ श्रीनिकेतश्चेति तथा अयमेव नित्य इत्यस्य कर्ता तच्च यदगादरण्यमित्यादिवद्भक्तिविशेषात्। अन्यत्समानम् ॥८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीयुधिष्ठिरस्य श्रीभगवत्प्रियत्वादिना सर्वतो वैशिष्ट्येऽपि सामान्येन तादृशसहोक्तिः परमभक्त्या विनयविशेषात्। मश्लोकानां पुण्ययशसां श्रीयुधिष्ठिरादीनां शिखामणिं परमश्रेष्ठत्वेन शिरोधार्यमित्यर्थः। अत ईत्येवमभितः सर्वतो भावेन नृपेषु सत्सु, इति स्त्रीणामुत्साहवृद्धिः सूचिता अतोऽन्धकानां यादवानां कौरवाणां च श्रीयुधिष्ठिरादीनां स्त्रियः पत्न्यः समेत्य च मिलित्वा अन्यासां सद्भावेऽपि तासामेवोक्तिः प्राधान्यात्। तास्वपि प्राधान्यात् श्रीद्रौपदी-भगवन्महिषीवर्गाणामेव प्रश्नत्तरोक्तिः गोविन्दस्याशेषैश्वर्यप्रकटनार्थमवतीर्य्य गां पृथ्वीं विन्दतीति तथा तस्य गोकुलेन्द्रस्य वा कथा इति कथानामपि परममाधुरी ता, - तासु विवाहकथामुख्यत्वात्। अत एव त्रिलोकगीताः ताश्च ते तुभ्यं श्रीगोविन्दप्रियाय वर्णयामि विस्तार्य्य कथयामि। च परमश्रद्धया अवहितः शृण्वित्यर्थः। एतच्च कथ्यश्रीभगवद्विवाहकथभिर्भावविशेषेण श्रीबादरायणेः प्रहर्षोदयात् ॥५॥ तत्र मधुरविचित्रलीलासु विराजमानास्वप्यात्मनः सख्यभावविशेषेण किंवा श्रीगोपीनां प्रेमभरातृप्त्या अनुतापमालक्ष्य श्रीकृष्णेन मेव बहुमन्यमाना तमेव पृच्छति-हे वैदर्भीति द्वाभ्याम्। अच्युत इति प्रत्येकं सर्वासां तासां गृहतो विच्युतिराहित्याभिप्रायेण अस्मान् प्रत्येतत् ब्रूत। एवं परमगोप्यतया आदै सामान्येन प्रार्थ्य पश्चादत्यौत्सुक्येनाभिव्यंजयति-भगवान् सर्वैश्वर्ययुक्तोऽपि अनुकुर्वन् लौकिकलीलामाचरन्नित्यर्थः। स्वकीयया असाधारयणया मायया कृपया यथोपयेमे। इत्युपयमप्रकारस्य माधुर्यविशेषः कृतः। यद्वा, अच्युतः सर्वैश्वर्यपरिपूर्णः यतो भगवान् साक्षाच्छ्रीनारायणः तत्राप्ययमशेषभगवत्ताप्रकटनपरः श्रीकृष्णः अतः मायया लोकमनुकुर्वन्। अन्यत् समानम्। तासां विवाहक्रमादिना ज्येष्ठकनिष्ठत्वसम्भवेऽपि तत्तत्क्रमेण सम्बोधनं तत्प्रवेशनक्रमाद्यपेक्षया तासु च तिसृणां मुख्यत्वादादरेण प्रत्येकं हे-शब्दप्रयोगः, रोहिण्याश्च तासां मध्ये निर्देशः अधिकषोडशसहस्रमहिषीमुख्यत्वेन ताभिस्तुल्यत्वात्। प्रत्युत्तरं तु विवाहक्रमादेव केवलं श्रीजाम्बवत्याः प्राक् श्रीसत्यभामाया तम्। तस्यां श्रीभगवत्प्रेमविशेषेण प्रागल्भ्यात् श्रीभद्रा-मित्रविन्दयोश्च मिथो विपर्ययो लेखकभ्रमादेव ज्ञेयः। अन्यथा तत्तद्विवाहप्रकारस्य बहुविरोधापत्तिः। अतोऽग्रे श्रीलक्ष्मणोक्तावाद्यपद्यटीकायामपि 'यथा मित्रविन्दायाः' इत्यत्र भद्राया द्रष्टव्यमिति दिक्। सर्वमिदमग्रे व्यक्तं भावि ॥६-७॥

वेददुर्वेदभावास्ता वन्दे श्रीकृष्णवल्लभाः। यासां वागर्थविवृतौ यत्-कृपैव गतिर्मम ॥

राजान एवाजेयभटाः। भागं स्वकीयम्। मां यो निन्ये श्रीद्वारकां किंवा आनीतवानित्यर्थः। तच्चाप्रयासेनैवेति बोधयन्ती इत्यादि सूचितं महावीरत्वमेव दृष्टान्तेनाह-अजाश्च अवयश्च मेषाश्च, तासां तेषां यूथात् स्वभागं मृगेन्द्र इवेति, निन्य इति भावः सूचित एव, साक्षात्तदनुक्तिश्च प्रहर्षोद्रेकेण संवरणाशक्तेरिति तत्तद्वृत्तकथनमसादृश्येन नेतुमयोग्यस्याप्यात्मनस्तत्ततत्प्रकारेण तत्कारुण्यभरबोधनार्थम्। ननु सर्वसम्पदीश्वरी सदा वक्षःस्था नित्यप्रिया लक्ष्मीरेव त्वम्, कथमेवं नानेतव्येति चेत्तत्राह-तस्य श्रीनिकेतः कोमलत्वादिसम्पत्तेर्विचित्रशोभया वा आश्रयश्चरण एकोऽपि श्लेषेण सर्वसम्पत्तिमांस्तस्य चरण एव तत्प्रसादादेव मम स्वमिति मम मत्कर्तृकाय आस्तत्र तत्र ममाभिमानो नैवास्ति। यद्वा तथापि तद्वास्ययोग्यापि न स्याम्, कुतस्तत्पत्नीत्वमर्हामीति केवलं दासीत्वेन सदा तत्पदाब्जसेवैव काचित् प्राथ्र्यत इति भावः। सर्वमेतच्च भक्तिभरस्वभावादेव। एवमग्रेऽपि ज्ञेयम्। आतम्। यद्वा, स चासौ श्रीनिकेतचरणश्चेति तथा सः, अयमेव निन्य इत्यस्य कर्ता तच्च (भा०११/५/३४) 'यदगादरण्यम्' भक्तिविशेषात्। अन्यत् समानम् ॥८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वर्णयति शुकवाक्यम् अजेयबलशेखराङ्घ्रितरेणुः अजेयबलवत्त्वादेव शिरोद्धृतपादरेणुः श्रीनिकेतचरणो म श्रीमत्पादारविन्दपरिचर्यार्थम् ॥८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इतीति। उत्तमश्लोकानां पुण्यकीर्तीनाम् उत्तमं श्रीकृष्णमित्थं जनेष्वभिष्टुवत्सु सत्सु परितः स्तोत्रं कुर्वत्सु सत्सु अन्धक कौरवाणां च स्त्रियः समेत्य सङ्घीभूय मिथो गोविन्दस्य कथा अगृणन् कथयामासुः। तास्त्रिषु लोकेषु गीताः कथाः वयं वर्णयाम त्वं शृण्विति शुकोक्तिः ॥५॥ इत्थं प्रतिज्ञाय तावत्ताः प्रस्तोतुं तं श्रीकृष्णपत्नीः प्रति द्रौपदीप्रश्नमाह-वैदर्भीति द्वाभ्याम्। अच्यु इति वैदर्भीविशेषणं नित्यानपायिनीत्यर्थः। हे कौसल्ये सत्ये हे शैब्ये मित्रविन्दे रोहिणीनाम काचित्पट्टमहिषीतुल्या ॥६॥ अन्य कृष्णपत्नीर्युगपत्सम्बोधयति-हे कृष्णपत्न्य इति। एतत् नोऽस्मभ्यं ब्रूत किं यदयं भगवान् श्रीकृष्णः स्वमायया स्वसङ्कल्पे लोकमनुकुर्वन् यथा भवतीरुयेमे उदूढवानित्येतत् ॥७॥ एवमापृष्टासु तावद्रुक्मिणी प्राह-चैद्यायेति। मां चैद्याय शिशुपालायार्पयितुं दापयितुं राजसु चैद्यपक्षीयेषु उद्यतकार्मुकेषु उद्धृतचापेषु सत्सु अजेया भटास्तेषां शेखरिताः मुकुटवत्कृताः अङ्घ्रिरेणवो येन ते तेषां मूर्ध्नि पदं निदधदित्यर्थः। स भगवान् मृगेन्द्रः सिंहः अजानामवीनां च यूथात् स्वभागमिव मां नित्ये आनीतवान् अत्रोद्यतकार्मुकराजन्ययूथस्याजावियूथतुल्यताऽभिप्रेता। तस्य भगवतः श्रीनिकेतचरणः श्रीमत्पादारविन्दं ममार्चनाय परिचर्यायै अस्तु तच्छ्रीनिकेतचरणं सदाहं परिचरेयमिति प्रार्थना ॥८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥४-८॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

हे वैदर्भीत्यादि। यद्यपि श्रीकृष्णस्य श्रीरुक्मिण्यादिविवाहकथातिसुप्रसिद्धैव शतशः श्रुता च तथापि श्रीकृष्णे कस्याः कीदृशी श्रद्धा प्रीतिश्चेति सर्वासां हृदयं ज्ञातुं द्रौपद्या अयं प्रश्नप्रक्रमः हे वैदर्भीत्यादौ व्यतिक्रमो द्रौपद्या हर्षावेशवैवश्यसूच प्रत्युत्तरे तु क्रमः ॥६॥ अनुकुर्वन् स्वमाययेति। स्वमायया स्वलीलया लोकम् अनुकुर्वन् लोकानुकरणमेव लीला ॥७॥ चैद्यायेत्या । तच्छ्रीनिकेतचरणोऽस्तुममार्चनाय। श्रीनिकेतः पद्मं तद्वत् चरणः श्रीनिकेतचरणः तदिति षष्ठ्यर्थेऽव्ययं तस्येत्यर्थः। म श्रीत्वात् तस्य चरण एव मे निकेतः तदर्चनमेव काम्यमिति भावः ॥८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

यद्यपि रुक्मिण्याद्युद्वाहकथा प्रसिद्धैव शतशः श्रुतत्वात् तथापि श्रीकृष्णविषये कस्याः कीदृशो भावः इति ज्ञातुं म कृष्णपत्नीराह-हे वैदर्भीत्यादि। व्यतिक्रमनिर्देशश्छन्दोऽनुरोधात् प्रत्युत्तरे तु क्रमनिर्देशः। अथवा श्रीकृष्णप्रेममोहि चेतसोऽनवस्थिततत्वात् पौर्वापर्यविरहः। स्वमायया लोकमनुकुर्वन् लौकिकत्वं प्रकटयन् ॥६-७॥ चैद्यायेत्यादि। तच्छ्रीनिकेतचरणो ममार्चनाय श्रीनिकेतः पद्मं तदिव चरणो यस्य चरण एव निकेतः तेन तच्चरणौ अवर्णनीयौ ममेति तात्पर्यम्, नाहं प्रियत्व अपि तु ईश्वरत्वेनैवेति दैन्यमिति भावः ॥८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

याः कथाः अगृणन् तास्त्रिलोकगीतास्तुभ्यं वर्णयामि ॥५॥ कौसले हे नाग्नजिति अच्युतो भगवान् वो यथा एतद्ब्रूत सुष्ठु अमायया सत्यं ब्रूतेत्यर्थः। यद्वा अमायया निष्कैतवेन यथोपयेमे ॥६-७॥ चैद्याय चैद्यार्थं मा माम् अर्पयि प्रक्षिप्सुम् उद्यतकार्मुकेषु सत्सु अजेया ये भटा योद्धारस्तेषां शेखरिताः मुकुटवत्कृताः अङ्घ्रिरेणवोऽपि येन तेषां मूर्ध्नि दधदित्यर्थः। अजाः छागा अवयो मेषास्तेषां यूथात् निन्ये तस्य श्रीनिकेतस्य चरणो ममार्चनार्थमस्तु ॥८॥

इति शिखामणि

शृणु इत्यन्वयः। गीताः
विवाहितवान् तदेतत् नोऽ
॥६॥ चैद्याय (चैद्यः चे
अजावियूथात् मृगेन्द्र इव
कथम्भूतो भगवान्। अजे
दधदित्यर्थः। अजानामवी

रोहिणी पट्टमहिषीर
प्रबलैः सुरासुरादिभिश्च शेखरि

(अग्रिमश्लोकटिप्प
तादृशी प्रपत्तिर्भगवत्स्त्रीषु दृश्
सर्वाः स्त्रियः पुरुषवदेवेति यदु
ततोऽप्युत्तमत्वमेव कर्तव्यमिति
तज्ज्ञानार्थम् अन्धकानां यादवाना
तावता किं स्यादित्याशंक्याह
सात्त्विकसाधनमिति नियोगः ॥५
सर्वभावेन भगवद्गुणज्ञानार्थं मूला
सर्वासु भगवतो याः लीलाः यथ
रमणे न च्युतो भवतीति जीववैल
। षोडशसहस्रस्त्रीषु मुख्या रोहिणी
इति साधारणीनां सम्बोधनम्। ए
आन्तरं भावमुत्पाद्य विवाहं कृतवा
कथं बाह्यप्रकारं करिष्यतीति चेत्त
स्वविवाहप्रकारमाह-चैद्याय माऽर्पयि
राजानो जाताः ततश्चैद्याय मामर्पयिष
अजेयभटाः। भटः पदातिः। कीर्तित
लेप्स्यन्तीति। दूरापास्तम् अत ए
अन्येषामप्रयोजकत्वमाह-अजाविय
एवं पुरुषोत्तमत्वं प्रकटितमिति मम
श्रीनिकेतेति। स्वभागत्वात् शरीरं स्व

गूढार्थदीपिनी

इति शिखामणिं श्रीकृष्णं स्तुवत्सु सत्सु स्त्रियः मिथः समेत्य कथा अगृणन् अवर्णयन् तास्ते तुभ्यं वर्णयामि त्वं णु इत्यन्वयः । गीताः प्रसिद्धाः अन्धको यादवः ॥५॥ हे वैदर्भि ! हे रुक्मिणि ! अच्युतो वः युष्मान् यथा उपयेमे विवाहितवान् तदेतत् नोऽस्मान् ब्रूहि । कोसले ! कोसलदेशीया सत्या शैब्ये मित्रविन्दे । रोहिणी भौमाहृतानां मध्ये मुख्या ॥ चैद्याय (चैद्यः चेदिदेशीयः) शिशुपालाय मा माम् अर्पयितुम् उद्यतकार्मुकेषु राजसु जरासन्धादिषु सत्सु यः जावियूथात् मृगेन्द्र इव स्वभागं मा निन्ये आनीतवान् तस्य श्रीनिकेतस्य चरणः मम अर्चनाय अस्तु इत्यन्वयः । यम्भूतो भगवान् । अजेया मे भटाः तेषां शेखरिता मस्तकोपरि कृताः स्वीयाः चरणरेणवो येन सः । तेषां मूर्ध्नि पदं दित्यर्थः । अजानामवीनां च यूथात् । अजः छागः । अविः मेषः ॥८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

रोहिणी पट्टमहिषीसमा ॥६॥ अवशिष्टाः सर्वाः पृच्छति-हे कृष्णपत्न्य इति ॥७॥ मा माम् अजेयैर्ब्रह्मशिवादिभिर्भटैरन्यैः भटैः सुरासुरादिभिश्च शेखरिताः मुकुटवत्कृताः अङ्घ्रिरेणवो यस्य सः ॥८॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

(अग्रिमश्लोकटिप्पणम् ।) एवं पुरुषाणां सर्वभावप्रतिपत्तिमुक्त्वा स्त्रीणामपि साक्षाद्भगवत्प्रपत्त्यर्थं पुरुषद्वारा जातायामपि ती प्रपत्तिर्भगवत्स्त्रीषु दृश्यत इति । तस्या मूलकारणं द्रष्टुं सर्वाः स्त्रियो मिलिताः ततस्ताभ्यः श्रुत्वा स्वयं च तथा जाता इति तां स्त्रियः पुरुषवदेवेति यदुपाख्यानं वृत्तं तदुपक्षिपति-इत्युत्तमश्लोकेति । उत्तमैः श्लोक्यत इति उत्तमानां तदेव प्रयोजनमिति । प्युत्तमत्वमेव कर्तव्यमिति उत्तमश्लोकशिखामणिं भगवन्तमेव स्तुवन्ति । सर्वे जनाः स्त्रीणां पुनः तदभिज्ञत्वाभावात् । नार्थम् अन्धकानां यादवानां कौरवाणां च स्त्रियः समेत्य मिथः गोविन्दकथाः अगृणन् तास्ते वर्णयिष्यामीति प्रतिजानीते-ननु ता किं स्यादित्याशंक्याह-त्रिलोकगीता इति । ताः कथाः लोकत्रयेऽपि गीताः । अतः सावधानतयापि शृण्विति किकसाधनमिति नियोगः ॥५॥ तत्र प्रथमं द्रौपद्याः प्रश्नमाह-हे वैदर्भीति । अष्टस्त्रीणां प्रत्येकमन्यासां समुदायेन च सम्बोधनं भावेन भगवद्गुणज्ञानार्थं मूला प्रकृतिः लक्ष्मीः ततोऽष्टप्रकृतयो रुक्मिण्याद्याः ततः षोडशविकाराणां सहस्रशः कार्यप्रकृतयः तासु भगवतो याः लीलाः यथा वा तासां परिग्रहः तदनुसन्धानेन कृतार्थता भविष्यतीति तथा प्रश्नः । अच्युत इति सर्वास्वपि न च्युतो भवतीति जीववैलक्षण्यं निरूपितम् । हे भद्रे ! हे जाम्बवति ! हे कौसले ! हे सत्यभामे ! हे कालिन्दीति हे मित्रविन्दे षोडशसहस्रस्त्रीषु मुख्या रोहिणी सैवाष्टमहिषीष्वपि कल्पान्तरम् । अत एव क्रमदीपिकायां सैव गृहीता ॥६॥ हे कृष्णपत्न्यः ! त्री साधारणीनां सम्बोधनम् । एतदनुपदमेव प्रष्टत्वं नोऽस्मभ्यं ब्रूत । तत्किमित्याकाङ्क्षायामाह-भगवानयं यथा उपयेमे इति रं भावमुत्पाद्य विवाहं कृतवानिति चेत् तत्राह-यथाश्लोकमनुकुर्वन्निति । लोकानुकरणं बाह्यप्रकारेण ननु सर्वान्तरो भगवान् वं बाह्यप्रकारं करिष्यतीति चेत्तत्राह-स्वमाययेति । असाधारणमायया बहिरपि स्वभावं प्रकटयतीत्यर्थः ॥७॥ तत्र प्रथमं वैदर्भी विवाहप्रकारमाह-चैद्याय माऽर्पयितुमिति । राजा मत्पिता भ्राता वा यावद्दास्यति ततः पूर्वमेव नेष्यतीति तन्निराकरणार्थमुद्यतकार्मुका तं जाताः ततश्चैद्याय मामर्पयिष्यन्ति राजद्वारा एवं स्थिते अजेयभटशेखरिताङ्घ्रिरेणुः भगवान् निन्ये न जेयो भटोऽपि येषां ते जयभटः । भटः पदातिः । कीर्तिवक्ता दूतरूपो वैतालिको वा । तेषां शेखरितः मुकुटेष्वधिरूढः अङ्घ्रिरेणुर्यस्य तादृशं भगवन्तं नयतीति । दूरापास्तम् अत एव मां निन्ये । निःशङ्कार्थमाह-मृगेन्द्र इवेति । एवमावश्यकनयने हेतुः भागमिति । भयमप्रयोजकत्वमाह-अजावियूथादिति । अजानामवीनां च समूहात् येऽपि सात्त्विकाः येऽपि राजसाः ते उभयेऽप्यप्रयोजकाः पुरुषोत्तमत्वं प्रकटितमिति मम सर्वपुरुषार्थसिद्ध्यर्थं तच्चरणो ममार्चनायास्तु प्रत्यक्षमेव तत्र सर्वपुरुषार्थसत्त्वमित्याह-क्ष्यतीति । स्वभागत्वात् शरीरं स्वयमेव भोक्ष्यति । तत्र प्रसङ्गात् आगतो जीवः भगवद्भक्तिमेव वाञ्छतीति निरूपितम् ॥८॥

सुबोधिनीसारः

शुकोक्तिः। एवम् उत्तमश्लोकशिखामणिं श्रीकृष्णं जनेष्वभिष्टुवत्सु सत्सु अन्धकानां कौरवाणां स्त्रियः समेत्य मिलित्वा त्रिलोके गीता गोविन्दस्य कथा मिथोऽगृणन् परस्परम् अवर्णयन् ताः त्वं शृणु ते तुभ्यं वर्णयामि ॥५॥ द्रौपदीप्रश्नः। हे वैदर्भि शेषं स्पष्टं सम्बोधनत्वात् हे कृष्णपत्न्यः ! अच्युतो भगवान् लोकमनुकुर्वन् स्वमायया यथा येन प्रकारेण वो युष्मानुपये परिणीतवान् स्वयम् एतत् नोऽस्मभ्यमस्मानिति वा यूयं ब्रूत कथयत ॥६-७॥ रुक्मिण्युक्तिः। चैद्याय शिशुपालाय मामर्पयि साधयितुम् उद्यतधनुःसु राजसु जरासन्धादिषु मध्ये अजेया ये भटाः शूरास्तेषां शेखरिता मुकुटवत्कृता अङ्घ्रिरेणवः पादपांसवो येन स मा मां निन्ये आनीतवान्। अजावियूथाद्भागं बलिं मृगेन्द्रः सिंह इव तस्य श्रीनिकेतस्य चरणो मम पूजनायास्तु ॥८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उत्तमश्लोकाः पुण्यकीर्तयोऽम्बरीषबलिप्रह्लादप्रभृतयस्तेषामपि शिखामणिं श्रेष्ठं श्रीकृष्णमेवं जनेष्वभिष्टुवत्सु सत्सु अन्धकादिस्त्रियः समेत्य सन्धीभूय मिथो गोविन्दस्य कथा अगृणन् कथयामासुः। ताश्चेदानीं त्रिषु लोकेषु गीताः प्रसिद्धाः अहं ते तुभ्यं वर्णयामि, त्वं शृणु ॥५॥ एवं कथाकथनं प्रतिज्ञाय प्रथमं द्रौपदीप्रश्नमाह-हे वैदर्भीति द्वाभ्याम्। हे वैदर्भि ! रुक्मिणि ! कौसले हे सत्ये ! शैब्ये हे मित्रविन्दे रोहिणी नाम काचित् पट्टमहिषीतुल्या ॥६॥ अन्याः कृष्णपत्नीर्युगपत्सम्बोधयति हे कृष्णपत्न्य इति। अच्युतः स्वरूपानन्दादप्रच्युतो यः स्वयं भगवान् वैराग्यादिगुणपूर्णोऽपि श्रीकृष्णः स्वमायया स्वसङ्कल्पे लोकमनुकुर्वन् यथा वो युष्मानुपयेमे उदूढवांस्तदेतन्नोऽस्मभ्यं ब्रूतेति द्वयोरन्वयः ॥७॥ एवमापृष्टासु तासु रुक्मिणी प्राह चैद्यायेति। मा मां चैद्यायार्पयितुं राजसु शिशुपालपक्षीयेषु जरासन्धादिषु उद्यतकार्मुकेषु धृतचापेषु सत्सु अजेया ये भटास्तेषां शेखरिता मुकुटवत्कृता अङ्घ्रिरेणवो येन सः तेषां मूर्ध्नि पदं निदधदित्यर्थः। यो मां निन्ये आनीतवान्, तस्य श्रीनिकेतस्य लक्ष्म्याश्रयस्य चरणो ममार्चनायास्तु। आनयने दृष्टान्तमाह-अजावियूथात् सिंहो यथा स्वभागं नयति तद्वदिति। लक्ष्म्यवतारत्वाद्रुक्मिण्याः स्वभागत्वं बोध्यम् ॥८॥

अन्वितार्थप्रकाशिका

इतीति। उत्तमश्लोकाः पुण्यकीर्तयोऽम्बरीषबलिप्रह्लादप्रभृतयस्तेषामपि शिखामणिं श्रेष्ठं श्रीकृष्णमेवं जनेष्वभिष्टुवत्सु सत्सु अन्धकादिस्त्रियः समेत्य सङ्घीभूय मिथो गोविन्दस्य कथा अगृणन् कथयामासुः। ताश्चेदानीं त्रिषु लोकेषु गीताः प्रसिद्धाः अहं ते तुभ्यं वर्णयामि त्वं शृणु ॥५॥ हे वैदर्भीति युग्मम्। हे वैदर्भि हे रुक्मिणि ! कौसले हे सत्ये ! शैब्ये ! मित्रविन्दे रोहिणी नाम भौमाहृतासु मुख्या काचित् पट्टमहिषीतुल्या ॥६॥ हे अन्याः कृष्णपत्न्यः अच्युतो भगवान् स्वमायया लोकमनुकुर्वन् यथा वो युष्मानुपयेमे उदूढवांस्तदेतन्नोऽस्मभ्यं ब्रूत ॥६-७॥ चैद्यायेति। मा मां चैद्यायार्पयितुं राजसु शिशुपालपक्षीयेषु जरासन्धादिषु उद्यतकार्मुकेषु धृतचापेषु सत्सु अजेया ये भटास्तेषां शेखरिता मुकुटवत्कृता अङ्घ्रिरेणवो येन सः तेषां मूर्ध्नि पदं निदधदित्यर्थः। यः अजाश्छागा अवयो वा तेषां यूथात् सिंहो यथा स्वभागं नयति तद्वत् यो मां नि आनीतवान्। तस्य श्रीनिकेतस्य लक्ष्म्याश्रयस्य चरणो ममार्चनायास्तु ॥८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अभिष्टुवत्सु सत्सु त्रिषु लोकेषु गीताः ॥५॥ द्रौपदी रुक्मिण्यादिभगवत्पत्नीः पृच्छति द्वाभ्याम् अच्युतो भगवान् युष्मान् स्वयं यथा उपयेमे तन्नो ब्रूत। कौसले हे सत्ये शैब्ये हे मित्रविन्दे रोहिण्यभिधा षोडशसहस्रकृष्णपत्नीषु काचिन्मुख्या तत्सम्बुद्धिः ॥६-७॥ चैद्यायय मा माम् अर्पयितुम् उद्वाहयितुम् अजेयाश्च ते भटाश्च तैः शेखरिता शिरोमणिभूषणीकृता अङ्घ्रि यस्य सः अजानां छागानाम् अवीनां च यूथात् कलापात् तस्य श्रीनिकेतः श्रीनिवासभूतश्चासौ चरणः ॥८॥

इतीति ॥ उत्तमश्
अभिष्टुवत्सु सत्सु परितः
श्रीकृष्णकथाः अगृणन् क
शृणु। इति शुकोक्तिः ॥५
कृष्णपत्न्य इति ॥ अच्युते इ
हे शैब्ये हे मित्रविन्दे ! हे
साकं पृथग्गणिताऽस्ति। एवं
लोकम् अनुकुर्वन् भगवान्
द्रौपद्या पृष्टासु तासु मध्ये ताव
उद्यतकार्मुकेषु उद्धतचापेषु स
मूर्ध्नि पदं निदधद्भगवान् श्री
आनीतवान्। अत्रोद्यतकार्मुकरा
परिचर्यार्थम् अस्तु। तच्छ्रीनिके

महाराज ! रस सम
चन्द्रजीका महद्यशोमान कर
पुरुषोत्तम की विश्व विख्यात
॥५॥ भगवानकी पटरानीओं
हे सत्ये हे सत्यभामे हे कालिन्
सर्व कृपया हमें यह तो बता
लोगोंका किस प्रकार पाणिग्र
चाहतेथे कि मेरा विवाह शिशु
संग्राम के लिये सुसज्ज थे लेकि
युद्धमेंसे अपना भाग छीन ले ज
मुकुटोंपर इन्हीं की पादरज बिर
के सौन्दर्यके और सर्व समृद्धिके
उनके श्रीचरणोकी सेवामें नित्य

यो मे सनाभिवधतप्तहृद
जित्वर्क्षराजमथ रत्नमदा

---

१. नीतच्छिदादिशत-विज. ।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ उत्तमश्लोकानां पुण्यकीर्तीनां शिखामणिं मुकुटमणिरूपं श्रीकृष्णम् इतीत्थमुक्तप्रकारेणेत्यर्थः । जनेषु लोकेषु अभिष्टुवत्सु सत्सु परितः स्तोत्रं कुर्वन्तु सत्स्वित्यर्थः । अन्धकाश्च कौरवाश्च तेषां स्त्रियः समेत्य सन्धीभूय मिथः गोविन्दकथाः श्रीकृष्णकथाः अगृणन् कथयामासुः । त्रिलोकगीताः त्रिषु लोकेषु कथाविषयं प्राप्ताः ताः कथाः ते तव पुरः वर्णयामि । ताः त्वं शृणु । इति शुकोक्तिः ॥५॥ इत्थं प्रतिज्ञाय तावत्ताः प्रस्तोतुं श्रीकृष्णपत्नीः प्रति द्रौपदीप्रश्नमाह द्वाभ्याम् ॥ हे वैदर्भीति ॥ हे कृष्णपत्न्य इति ॥ अच्युते इति वैदर्भीविशेषणम् । हे नित्यानपायिनि हे दैदर्भि ! हे भद्रे ! हे कोसले ! हे सत्यभामे ! हे कालिन्दि ! हे शैब्ये हे मित्रविन्दे ! हे लक्ष्मणे हे रोहिणि ! रोहिणि नाम शताधिकषोडशसहस्राङ्गनासु मुख्याऽतो रुक्मिण्याद्यष्टपट्टाङ्गनाभिः साकं पृथग्गणिताऽस्ति । एवं पट्टराज्ञीः सम्बोध्य अन्याः श्रीकृष्णपत्नीर्युगपत्सम्बोधयति । हे कृष्णपत्न्यः ! स्वमायया स्वसङ्कल्पेन लोकम् अनुकुर्वन् भगवान् षाड्गुण्यपूर्णः अयं श्रीकृष्णः यथा वः युष्मान् उपयेमे उदूढवान् एतत् नोऽस्मभ्यं ब्रूत ॥६-७॥ एवं द्रौपद्या पृष्टासु तासु मध्ये तावद्रुक्मिणी प्राह ॥ चैद्यायेति ॥ हे द्रौपदि ! मा मां चैद्याय शिशुपालाय अर्पयितुं राजसु चैद्यपक्षीयनृपेषु उद्यतकार्मुकेषु उद्धृतचापेषु सत्सु अजेया जेतुमशक्या ये भटा योधास्तेषां शेखरिता मुकुटवत् कृताः अङ्घ्रिरेणवो येन सः, तेषां मूर्ध्नि पदं निदधद्भगवान् श्रीकृष्णः मृगेन्द्रः सिंहः अजानामवीनां च यूथं समूहस्तस्मात् भागं स्वकीय भावम् इव मां निन्ये आनीतवान् । अत्रोद्यतकार्मुकराजयूथस्याजावियूथतुल्यताऽभिप्रेता । तस्य श्रीकृष्णस्य श्रीनिकेतचरणः श्रीमत्पदारविन्दं मम अर्चनाय परिचर्यार्थम् अस्तु । तच्छ्रीनिकेतचरणं सदाऽहं परिचरेयमिति प्रार्थय इत्यर्थः ॥८॥

कृष्णप्रिया

महाराज ! रस समन्त पञ्चक महातीर्थ क्षेत्रमे हमज्ज सम्मेलनमें जब सम महामहिम भगवान श्रीकष्ण चन्द्रजीका महद्यशोमान कर रहे थे उसी अवसर यादव एवं कुकी कुलांगना स्त्रियां एकत्र मिलकर परस्पर पूर्ण पुरुषोत्तम की विश्व विख्यात लीलाओंका वर्णन कर रही थी । राजन् अब मैं तुम्हें उन्हींकी कथा सुधा पिलाता हुं ॥५॥ भगवानकी पटरानीओंसे देवी द्रौपदी, भक्तिभावसे प्रश्न कर रही है कि हे रुक्मिणी ! हेभद्रे हेजाम्बवती, हे सत्ये हे सत्यभामे हे कालिन्दी है शैक्ये हे लक्ष्मणे हे रोहिणी और अन्य सर्व भगवान श्रीकृष्ण की गृहिणीयां आप सर्व कृपया हमें यह तो बताओं कि भगवान श्रीकृष्णमें अपनी मायासे लोकलीलाका नाटक करते हुए आप लोगोंका किस प्रकार पाणिग्रहण किया ॥६-७॥ भगवती भी रुक्मिणीजी कहने लगी द्रौपदीजी प्रायः सर्व चाहते थे कि मेरा विवाह शिशुपालके साथ हो, इसलिये प्रायः सब सब नरेश शस्त्र एवं अस्त्रसे सुसज्जित होकर संग्राम के लिये सुसज्ज थे लेकिन मेरे नाथ भगवान श्रीकृष्ण मुझे इस तरह हरलाये कि जैसे केसरी बकरी भेडोंको झुंडमेंसे अपना भाग छीन ले जाय । ऐसा होनेमें आश्चर्य क्या ? विश्वमें जितने भी अजेय वीर है, उनके मस्तकके मुकुटोंपर इन्हीं की पादरज बिराजमान होती है । द्रौपदीजी अधिक क्या कहुं मेरी तो यही कामना है कि भगवान के सौन्दर्यके और सर्व समृद्धिके अधिष्ठान चरणसरोज जन्म जन्म मुझे सेवा करनेके लिये प्राप्त होते रहे और में उनके श्रीचरणोंकी सेवामें नित्य लगी रहुं ॥८॥

सत्यभामोवाच

यो मे सनाभिवधतप्तहृदा ततेन लिप्ताभिशापमपमार्ष्टुमुपाजहार ।
**जित्वर्क्षराजमथ रत्नमदात् स तेन [१]भीतः पितादिशत मां प्रभवेऽपि दत्ताम्	॥९॥**

---

[१] भीतश्चिदादिशत-विज. ।

जाम्बवत्युवाच

प्राज्ञाय [२]देहकृदमुं निजनाथदेवं सीतापतिं त्रणवहान्यमुनाभ्य[३]युध्यत् ।
ज्ञात्वा[४] परीक्षित उपाहरदर्हणं मां पादौ प्रगृह्य मणिनाहममुष्य दासी ॥१०॥

कालिन्द्युवाच

तपश्चरन्तीमाज्ञाय स्वपाद[५]स्पर्शनाशया । सख्योपेत्याग्रहीत् पाणिं [६]योऽहं तद्गृहमार्जनी ॥११॥

मित्रविन्दोवाच

यो मां स्वयंवर उपेत्य विजित्य भूपान् निन्ये [७]श्वयूथगमिवात्मबलिं द्विपारिः ।
भ्रातृंश्च मेऽपकुरुतः स्वपुरं श्रियौक[८]स्तस्यास्तु मेऽनुभवमङ्घ्र्यवने[९]जनत्वम् ॥१२॥

कर्दमक्षमा

सत्यभामा, उवाच ।

सनाभिवधपतहृदा, मे, ततेन, लिप्ताभिशापम्, अपमार्ष्टुम्, ऋक्षराजम्, जित्वा, अथ, रत्नम्, उपाजहार, तेन, भीतः, पिता, दत्ताम्(वचसा), अपि, माम्, प्रभवे, अदिशत ॥९॥

जाम्बवती, उवाच ।

देहकृत्, अमुम्, निजनाथदेवम्, सीतापतिम्, प्राज्ञाय, त्रिनवहानि, अमुना, अयुध्यत्, परीक्षिते, ज्ञात्वा, पादौ, मणिना, सह, माम्, अर्हणम्, उपाहरत्, अहम्, अमुष्य, दासी ॥१०॥

कालिन्दी, उवाच ।

स्वपादस्पर्शकाम्यया, तपश्चरन्तीम्, आज्ञाय, सख्या, उपेत्य, पाणिम्, अग्रहीत्, या, अहम्, तद्गृहमार्जनी ॥११॥

मित्रविन्दा, उवाच ।

यः, स्वयंवरे, उपेत्य, भूपान्, विजित्य, मे, अपकुरुतः, भ्रातृन्, विजित्य, द्विपारिः, श्वयैथगम्, आत्मबलिम्, इव, स्वपुरम्, निन्ये, तस्य, एव, मे, अङ्घ्र्यवनेजनत्वम्, अनुभवम्, अस्तु ॥१२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सेनानेर्भ्रातुर्वधेन सिंहकृतेन तप्तं हृद्यस्य तेन मे ततेन तातेन लिप्तमभिशापं दुर्यशोऽपमार्ष्टुं परिहर्तुमृक्षराजं रत्नं स्यमन्तकमुपाजहारानीतवान् अथानन्तरं मत्पित्रे रत्नमदात् तेन स्वापराधेन भीतः स मे पिता प्रभवे श्रीकृष्णाय ददौ दत्तमक्रूरादिभ्यः प्रतिश्रुतामपीत्यर्थः ॥९॥ देहकृत् पिता अमुं श्रीकृष्णं निजनाथं स्वामिनं देवमीश्वरं प्राज्ञायाविज्ञाय त्रिनवहानि त्रिनवाहानि ह्रस्वश्छन्दोनुरोधेन सप्तविंशतिदिनान्यमुनाऽभ्ययुध्यत् । परीक्षितः सञ्जात यस्य स परीक्षितस्तम् साक्षात्सीतापतिरेवासाविति ज्ञात्वा पादौ प्रगृह्य मणिना सह मामर्हणमुपाहरदर्हणतया अहो ! तर्हि त्वमति श्रेष्ठासि नेत्याह अमुष्याहं दासीति ॥१०॥ सख्या अर्जुनेन तस्य गृहमार्जनी गृहसम्मार्जनकर्त्री शुनां यूथगतं स्वबलिं द्विपारिः सिंहः इवेति मे भ्रातुश्च अपकुरुतोपकारं कुर्वतो विजित्य श्रियौको तस्याङ्घ्र्यवनेजनत्वं चरणक्षालनकर्तृत्वमनुभवं प्रतिजन्म मेऽस्तु ॥१२॥

---

२. देहकृदयं-वीर. ; देहविकृति-विज. । ३. भियुद्ध्य-विज. । ४. ज्ञात्वावधीरण-विज. । ५. स्पर्शकाम्यया-वीर. विज. । ६. याऽहं श्वयूथमिव चात्म-विज. । ८. श्रियौका-वीर. ; श्रियोगात्तस्या-विज. । ९. वने जनांभः-विज. ।

भ्रातुः प्रसेनस्य । अ
"सकृत्प्रदीयते कन्या" इति
छन्दोभङ्गं न कारयेत्" इति शि
सीतापतिरेवायं रामायणयुद्धाऽ
गृहमार्जनीति-निजभक्त्यतिशय

ननु दत्ताया भयादपि दा
तु अन्याय्यमेवेति भावः । यद्वा,
पितुरपराधोऽपि परिहृतः तदर्थमेवो
भावः । अत्र य उपाजहार अदाच्च
उपाजहार सोऽदात्तस्मै प्रभवे चादि
सख्यप्रधानाद्युक्तमेव ॥९॥ प्रकर्षे
तदसम्भावनानिरासार्थं देवपुत्रत्वेन क
भक्तवात्सल्याभिप्रायाद्वा आसीत् त
कृपया सर्वांगेषु श्रीहस्तस्पर्शनादिनो

"अ

मा मां सख्या अर्जुनेन स
दृश्यते ततश्च विन्दानुविन्दाविति भ्रा
तत्तु स्वपुरविशेषणं वा ॥१२॥

तस्मै प्रभवे तत्तत् सर्वं कर्तुं स
भावः सूचितः । यद्वा, ननु दत्ताया दा
पितुरपराधोऽपि परिहृतः । तदर्थमेव
श्रीरुक्मिण्यादिवदप्रार्थनं च तस्याः प्रेम
ऋक्षयुद्धासम्भवः । देहकृत् साक्षात् पितैव
तस्य सेवाविशेषलब्ध्या तस्यां सीतायां
प्रागुकेऽप्यत्र 'त्रिनवहानि' इति एकदिन

'द्वन्द्वयुद्धं सु

उपाहरदस्मै प्राकं तैर्व्याख्यातम्
प्रागुक्तम् (भा०१०/५६/३०) 'अभिमृश्य
अकारप्रश्लेषेणापरीक्षितः सन्नभ्ययुध्यत्
अन्यत् समानम् ॥१०॥ सख्या सहोपेत्य । न
मार्जनीत्वयोग्येत्यर्थः ॥११॥ भद्रास्थाने मित्रवि

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भ्रातुः प्रसेनस्य । अथर्क्षराजजयानन्तरम् । तेन मिथ्याभिशापरूपेण । इत्यर्थ इति । वाग्दत्ताया अन्यस्मै दानं न दोषाय "सकृत्प्रदीयते कन्या" इति स्मृतिर्जलदत्तापरेति ध्येयमिति भावः ॥९॥ छन्दोऽनुरोधेन छन्दोलोभेन- "अपि माषं मषं कुर्यात् श्लोकभङ्गं न कारयेत्" इति शिष्टाचारात् । आर्षो गुणरूप एकादेशो वा । ज्ञात्वेति न हि प्राकृतो मया योद्धुं कल्पोऽतो मत्प्रियार्थं सीतापतिरेवायं रामायणयुद्धाऽतृप्तं निजयुद्धेन मां तोषयितुमागत इति विज्ञायेत्यर्थः । अमुष्य कृष्णस्य ॥१०॥ यः कृष्णः । गृहमार्जनीति-निजभक्त्यतिशयमाह ॥११॥ भ्रातृन् विन्दानुविन्दादीन् । तस्य श्रीनिवासस्य ॥१२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु दत्ताया भयादपि दानमयुक्तं तत्राह-प्रभवे परमेश्वरायेति । वस्तुतस्तस्यैव सर्वमिति यथाकथंचित्तदर्पणमेव न्याय्यमन्यार्पणं तु अन्याय्यमेवेति भावः । यद्वा, श्रीकृष्णाद्भीत्या स्वरक्षणार्थं दत्तां प्रतिश्रुतां न तु दत्तां पदलाभात् श्रीकृष्णायैवादिशत् । एवं पूर्वापराधोऽपि परिहृतः तदर्थमेवोक्तं सनाभीति । भ्रातृशोकतप्ततयाऽतिव्याकुलत्वेनोन्मादादेवाभिशापो दत्तः । न तु ज्ञानपूर्वकमिति भावः । अत्र य उपाजहार अदाच्च यस्मै प्रभवे चादिशत तस्य तच्छ्रीनिकेतेत्यादिरुक्मिणीवाक्येनैव अन्वयो ज्ञापितः । यद्वा, य उपाजहार सोऽदात्तस्मै प्रभवे चादिशतेत्यन्वयः । अत्र श्रीरुक्मिणीवत् साक्षाद्दास्याद्यप्रार्थनं च तासां दास्यप्रधानात् कान्तभावादस्यास्तु दास्यप्रधानाद्युक्तमेव ॥९॥ प्रकर्षेणाज्ञात्वेति । अज्ञानस्यातिरेक उक्तः । तादृशयुद्धप्रवृत्तेः देहकृत्साक्षात्पितैवेति ऋक्षत्वेन तदसम्भावनानिरासार्थं देवपुत्रत्वेन कामरूपित्वादिति भावः । सीतापतिं तस्या उद्धारार्थमेव तस्य सेवाविशेषलब्ध्या तस्यां भक्तिविशेषात् भक्तवात्सल्याभिप्रायाद्वा आसीत् तदष्टाविंशाहमिति प्रागुक्तेऽप्यत्र त्रिनवाहानि इति समाप्तिदिनाग्रहाणात् अन्यत्तैः । यद्वा, परितः कृपया सर्वांगेषु श्रीहस्तस्पर्शनादिनेक्षितः निरीक्षितः तथा च प्रागुक्तम् —

"अभिमृश्यारविन्दाक्षः पाणिना शंकरेण तम् ॥" इति ॥१०॥

मा मां सख्या अर्जुनेन सहोपेत्य ॥११॥ भद्रास्थानेऽत्र मित्रविन्दा निर्णीतैव तत्त्ववादिसम्प्रदायपुस्तकेऽपि तथा [illegible] ततश्च विन्दानुविन्दाविति भ्रातृद्वयेऽपि प्रागुक्ते भ्रातृनित्यत्र बहुत्वं तदुपलक्षणत्वप्राप्तेः श्रियौक इति द्वे पदे सन्धिरार्षः तु स्वपुरविशेषणं वा ॥१२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तस्मै प्रभवे तत्तत् सर्वं कर्तुं समर्थाय किंवा यादवेन्द्रत्वेन आत्मेश्वराय, यद्वा मत्प्राणनाथाय इति प्रथमत एवात्मनस्तस्मिन्नेव [illegible] सूचितः । यद्वा, ननु दत्ताया दानमयुक्तम्, तत्राह-प्रभवे परमेश्वरायेति तदर्पणेन सर्वदोषनिवृत्त्या युक्तमेवेति भावः । एवं पूर्वापराधोऽपि परिहृतः । तदर्थमेवोक्तमसनाभीति । भ्रातृशोकतप्तचित्ततयातिव्याकुलत्वेनाभिशापेऽधिकदोषानुदयात् श्रीरुक्मिण्यादिवदप्रार्थनं च तस्याः प्रेमविशेषेण गाम्भीर्याल्लज्जाभराद्वा ॥९॥ प्रकर्षेणाज्ञात्वेति अज्ञानस्यातिरेक उक्तः । अन्यथा युद्धासम्भवः । देहकृत् साक्षात् पितैवेति ऋक्षत्वेन तदसम्भावना निरस्ता, देवपुत्रत्वेन कामरूपत्वात् । सीतापतिमिति तदुद्धारार्थमेव तस्य सेवाविशेषलब्ध्या तस्यां सीतायां भक्तिविशेषाद्भक्तवात्सल्याभिप्रायेण वा, (भा०१०/५६/२४) 'आसीत्तदष्टविंशाहम्' इति प्रागुक्तेऽप्यत्र 'त्रिनवहानि' इति एकदिनस्याल्पत्वेनोपेक्षणात् अभितः सर्वतोभावेनायुध्यत् । तच्चोक्तं प्रागेव (भा० १०/५६/२३)

'द्वन्द्वयुद्धं सुतुमुलमुभयोर्विजिगीषतोः । आयुधाश्मद्रुमैर्दोर्भिः' इत्यादि ।

उपाहरदस्मै प्राकं तैर्व्याख्यातम् । यद्वा, परितः कृपया सर्वांगेषु श्रीहस्तस्पर्शादिनेक्षितो निरीक्षितोऽवेक्षितो वा तथा च प्रागुक्तम् (भा०१०/५६/३०) 'अभिमृश्यारविन्दाक्षः पाणिना शङ्करेण तम्' इति । यद्वा, परीक्षा, परिचयो जातपरीक्षः परीक्षितः [illegible]णापरीक्षितः सन्नभ्ययुध्यत् पश्चात् प्राज्ञाय प्रकर्षेण आ सम्यक् ज्ञात्वा अर्हणं च ज्ञात्वा (दत्त्वा [ग]) अपधार्य । अर्हणं सम्मानम् ॥१०॥ सख्या सहोपेत्य । ननु तपश्चरणादिना त्वमेव तस्य योग्या भार्या, नेत्याह-तस्य गृहमार्ज्जनी नीचदासी, न च [illegible]त्यर्थः ॥११॥ भद्रास्थाने मित्रविन्दा ज्ञेयैव । ततश्च विन्दानुविन्दाविति भ्रातृद्वये प्रागुक्तेऽपि भ्रातृनित्यत्र बहुत्वं

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीभगवद्विवाहनिषेधे मुख्यतया तौ प्रागुक्तौ अन्ये च वर्तमाना अपि बहवोऽप्राधान्यान्नोक्ता इति ज्ञेयम्। श्रियौक सन्धिरार्षः। श्रीरेव तस्या भार्या योग्या, न त्वहमिति भावः। अतोऽङ्घ्र्यवनेजनत्वमेव प्रतिजन्म ममास्तु। यद्वा, श्रियौक स्वपुरविशेषणम्। श्रियो निवासस्थानमपि मामयोग्यामपि यः कृपया निन्य इत्यर्थः ॥१२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सनाभीति। भ्रातृवधतप्तहृदयेन ततेन तातेन रत्नेन सह ॥९॥ देहकृत् पिता त्रिनवहानि सप्तविंशत्यहानि ॥१०॥ स अर्जुनेन ॥११॥ द्विपारिः सिंह इव अपकुरुतः भ्रातॄंश्च विजित्येत्यन्वयः ॥१२-१८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अथ सत्यभामोक्तिमाह-य इति। सनाभेर्भ्रातुः प्रसेनस्य वधेन सिंहकर्तृकेण तप्तं हृदयं यस्य तेन ततेनास्मत् लिप्तमापादितमभिशापं दुर्यशोऽपमार्ष्टुमपनेतुमृक्षराजं जाम्बवन्तं जित्वा रत्नं स्यमन्तकाख्यमुपाजहार आनीतवान्। अथ मत्पित्रे रत्नमदाद्ददौ। तेन स्वापराधेन भीतः स मे पिता प्रभवेऽस्मत्स्वामिने श्रीकृष्णाय दत्तामक्रूरादिभ्यः प्रतिश्रुतामपि अपिशब्दाद्रत्नमपि अदिशत् ददौ इत्यर्थः ॥९॥ अथ जाम्बवती जगौ-अज्ञायेति। देहकृन्मम पिता जाम्बवान् अमुं श्रीकृ निजनाथं स्वस्वामिनं स्वकुलदैवतं च सीतापतिमज्ञाय अज्ञात्वेत्यर्थः। ल्यबार्षः। अमुना श्रीकृष्णेन सह त्रिनवहानि सप्तविंशत्य । अत्यन्तसंयोगे द्वितीया। छन्दोभङ्गाभावायह्रस्व आर्षः। शकन्ध्वादित्वात्पररूपं वा। अयुध्यत् युयोध। ततः परीक्षाऽस्यसंजातेति तथा स मम पिता ज्ञात्वा सीतापतिरेवासावधुना यदुष्ववतीर्ण इति ज्ञात्वेत्यर्थः। पादौ प्रगृह्य पादग्रहण प्रसाद्य मणिना सह मामर्हणमुपायनमुपाहरत् समर्पितवान्। अहममुष्य भगवतो दासी यावदात्मभावि दास्यं कुर्यामिति ज्ञेया ॥१०॥ अथ कालिन्दी जगौ तपश्चरन्तीमिति। स्वस्य भगवतः पादस्पर्शनाशया पादसंवाहनादिपरिचर्याचिकीर्षया कुर्वन्तीं मां ज्ञात्वा सख्या अर्जुनेन सहागत्य मम पाणिमग्रहीत्। इत्थं गृहीताऽहं तस्य भगवतो गृहमार्जनी गृहमार्जनी तथाभूता भवेयम् ॥११॥ अथ भद्रा गीतिमाह-य इति। शुनां यूथगतं स्वबलिं द्विपारिः सिंह इव नृपानपकुर्वतः मे भ्रा विजित्य यः श्रियौकः श्रीनिवासः मां पुरं द्वारकां प्रति निन्ये आनीतवान् तस्य श्रियौकसः अङ्घ्र्यवनेजनीत्वं चरणक्षालन ममानुभवं प्रतिजन्म अस्तु स्यात् ॥१२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु दत्ताया भयादपि दानमयुक्तं तत्राह-प्रभवे परमेश्वरायेति। वस्तुतस्तस्यैव सर्वमिति यथाकथंचित् तदर्पणमेव न्याय्यम् त्वन्याय्यं भवेदिति भावः ॥९-११॥ भद्रास्थानेऽत्र मित्रविन्दा ज्ञेया अग्रे च मित्रविन्दास्थाने भद्रा लेखक प्रागुक्तविवाहप्रस्तावविरोधात् तत्त्ववादसम्प्रदायपुस्तके यथायुक्तमेव नामद्वयमस्ति ॥१२॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

सत्यभामा वदति-यो मे इति। अस्याः केवलं मानोन्नत्यादिगर्व एव भावः तद्यथा अपि दत्तां वाग्दत्तां पिता माम् अदिशत दत्तवान् भीतत्वे हेतुः प्रभवे समर्थाय उपासनप्रकटनमकृत्वा केवलं प्रकृतकथाकथनाद् ॥९॥ प्राज्ञायेत्यादि। अमुं सीतापतिं प्रथमतश्च प्रकर्षेण अज्ञाय न ज्ञात्वा त्रिनवहानि सप्तविंशतिदिनान्यमुना अयुध्य देहकृत् पिता निजनाथदैवं निजानां भक्तानां नाथं च दैवं च तं ज्ञात्वा माम् अर्हणम् उपाहरत् अमुष्य श्रीकृष्णस्याहं प्रेयसीत्यभिमानं वहामीति भावः ॥१०॥ तपश्चरन्तीत्यादि। तद्गृहमार्जनी सेवान्तरसम्भावनायोग्यताऽपि मे नास्ती दैन्यातिशयः ॥११॥ यो माम् इत्यादि। तस्य अङ्घ्र्यवनेजनत्व अङ्घ्र्यवनेजनीभावः अनुभवम् अन्ववतारम् ॥

सत्यभामा वदति-

मामदिशत् दत्तवान्। भीतत्वे

पूर्वोक्तेन कस्मैचित् प्रतिश्रुति

कुर्वः ॥९॥ प्राज्ञायेति। अमु

मामुपाहरत् अमुष्याहं दासीति

चरणस्फालिनकारिवारित्वमस

सनाभेर्भ्रातुः प्रसेनस्

ऋक्षराजं जित्वा रत्नं स्यमन्तक

यस्मै श्रीकृष्णाय मामादिशत द

तम् प्राज्ञाय अविज्ञाय त्रिनवा

संजाता यस्य स सीतापतिरेवास

श्रुतचरी रामावतारोत्पन्ना श्रीराम

स्वीकृता तस्मात्त्वमतिश्रेष्ठाऽसी

द्विपारिः सिंह इव मे भ्रातृंश्चापकुर

चरणक्षालनकर्तृत्वम् अनुभवं प्रति

मे तातेन पित्रा सत्राजिते

अथ अनन्तरं मत्पित्रे च तत् अद

सनाभिः(समानो नाभिः कुक्षिर्यस्

दत्तामक्रूरादिभ्यः प्रतिश्रुतामपि।

जाम्बवान् अमुं श्रीकृष्णं सीतापति

समाप्तिदिनमादायेति ज्ञेयम्) सप्तविंश

अर्हणम् उपाहरत् अर्घ्यतया समर्पि

आशया तपः कुर्वती मामाज्ञाय सख

॥११॥ यो मम स्वयंवरे उपेत्य भूपान्

पादप्रक्षालनकर्तृत्वं मे अनुभवं मे प्र

आत्मबलिं स्वभागं नयति तथा। पुरं

सनाभेर्भ्रातुः प्रसेनस्य वधेन सिं

कृष्णेन मण्यर्थं हत इत्येवं दुर्यशः अपमा

यः रत्नमदात् मत्पित्रे तस्मै प्रभवे श्रीकृष

ददावित्यन्वयः ॥९॥ देहकृत् मम देहकृत्

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

सत्यभामा वदति-तस्याः केवलं मानौघत्वाद् गर्व एव भावः। तथा हि यो मे इत्यादि अपिदत्तां वाग्दत्तामपि भीतः पिता मामादिशत् दत्तवान्। भीतत्वे हेतुः-प्रभवे कर्तुमकर्तमन्यथाकर्तुं समर्थाय दत्तामिति (भा१०/५६/४४) ''बहुभिः प्रार्थिताम्'' इति पूर्वोक्तेन कस्मैचित् प्रतिश्रुतिदत्तामपि तथा च 'दत्तामपि हरेः कान्तां प्रेयांश्चेदवर आव्रजेत्' इति श्रेयस्तु ममैवोपासना प्रकटभावा कुर्वः॥९॥ प्राज्ञायेति। अमुं सीतापतिं प्राज्ञाय रामोऽयमित्यजानन् पश्चान्निजनाथदेवं ज्ञात्वा निजनाथो रघुनाथस्तस्यापीश्वरम्; ममुपाहरत् अमुष्याहं दासीति सेवार्हत्वम्॥१०॥ अहं तद्गृहमार्जनी-गृहशुश्रूषणपरा चेटीव॥११॥ तस्यास्तु मेऽनुभवमङ्घ्र्यवनेजनत्वं चरणस्फालिनकारिवारित्वमस्तु॥१२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सनाभेर्भ्रातुः प्रसेनस्य वधेन तप्तं हृत् यस्य तेन ततेन तातेन हेतुना लिप्तम् अभिशापं कलङ्कम् अपमार्ष्टुं परिहर्तुम् ऋक्षराजं जित्वा रत्नं स्यमन्तकमुपाजहार आनीतवान्। अथानन्तरं मत्पित्रे रत्नमदात्। तेन स्वापराधेन भीतः स मे पिता प्रभवे तस्मै श्रीकृष्णाय मामादिशत ददौ दत्ताम् अन्यस्मै दातुं प्रतिश्रुतामित्यर्थः॥९॥ देहकृत् मत्पिता अमुं निजनाथश्चासौ दैवमीश्वरश्च तम् प्राज्ञाय अविज्ञाय त्रिनवाहानि ह्रस्वश्छन्दानुरोधेन सप्तविंशतिदिनान्यमुना सह अभ्ययुद्ध्यत्। ततश्च परीक्षितः परीक्षा संजाता यस्य स सीतापतिरेवासाविति ज्ञात्वा पादौ प्रगृह्य मणिना सह मामर्हणमुपाहरत् अहो तर्हि त्वं पुरावृत्तकथास्वस्माभिः श्रुतचरी रामावतारोत्पन्ना श्रीरामाय दातुं प्रतिश्रुता तेनैकपत्नीव्रतधरेण तदानीं न स्वीकृता इदानीं तु बहुपत्नीव्रतधरेण तेनैवानेन स्वीकृता तस्मात्त्वमतिश्रेष्ठाऽसीत्यतः सलज्जमाह-अमुष्य दासीति॥१०॥ सख्या अर्जुनेन॥११॥ शुनां यूथगतं स्वबलिं द्विपारिः सिंह इव मे भ्रातृंश्चापकुरुतः अपकुर्वतो विजित्य श्रियौकः लक्ष्मीनिवासो यः स्वपुरं मां निन्ये तस्य अङ्घ्र्यवनेजनत्वं चरणक्षालनकर्तृत्वम् अनुभवं प्रतिजन्म मेऽस्तु॥१२॥

गूढार्थदीपिनी

मे तातेन पित्रा सत्राजितेन लिप्तमभिशापमपकीर्तिमपमार्ष्टुं दूरीकर्तुं यः ऋक्षराजं जित्वा रत्नमुपाजहार आनीतवान् अथ अनन्तरं मत्पित्रे च तत् अदात् तेन भीतः मे पिता प्रभवे श्रीकृष्णाय माम् अदिशत् दत्तवान्। कथम्भूतेन तातेन। सनाभिः(समानो नाभिः कुक्षिर्यस्य। समानस्य सादेशः।) सहोदरभ्राता प्रसेनः तस्य वधेन सिंहकृतेन तप्तं हृत् यस्य तेन। तामक्रूरादिभ्यः प्रतिश्रुतामपि। 'सकृत्प्रदीयते कन्या' इति स्मृतिस्तु जलदत्तापरेति अतो न दोषः॥९॥ देहकृत् मम पिता जाम्बवान् अमुं श्रीकृष्णं सीतापतिम् अविज्ञाय अमुना सह अभ्ययुद्ध्यत्। त्रिणवाहानि ('आसीत्तदष्टाविंशाहम्' इत्युक्तिस्तु सप्ततिदिनमादायेति ज्ञेयम्) सप्तविंशति दिनानि। पुनः परीक्षितः कृतपरीक्षः सन् तं ज्ञात्वा पादौ गृहीत्वा च मणिना सह माम् अर्हणम् उपाहरत् अर्घ्यतया समर्पितवान्। अतोऽहममुष्य दासी॥१०॥ स्वस्य भगवतः पादस्पर्शनं चरणसंवाहनं तस्या आशया तपः कुर्वती मामाज्ञाय सख्या अर्जुनेन सह समागत्य यः पाणिमग्रहीत् तस्य गृहमार्जनीव अहमस्मि। लुप्तोपमा॥११॥ यो मम स्वयंवरे उपेत्य भूपान् अपकुर्वतः विन्दानुविन्दादीन् भ्रातृंश्च विजित्य स्वपुरं द्वारकां निन्ये तस्य अङ्घ्र्यवनेजनत्वं चरणक्षालनकर्तृत्वं मे अनुभवं मे प्रतिजन्म अस्तु इत्यन्वयः। कः कमिव निन्ये। यथा द्विपारिः सिंहः शुनां यूथगम् आत्मबलिं स्वभागं नयति तथा। पुरं कीदृशं श्रिया पूर्णम् ओकः स्थानम्॥१२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सनाभेर्भ्रातुः प्रसेनस्य वधेन सिंहकृतेन तप्तं हृद्यस्य तेन मे ततेन तातेन लिप्तमभिशापं मणिग्रीवो वनं गतो मे भ्राता प्रायः प्रसेनो मण्यर्थं हत इत्येवं दुर्यशः अपमार्ष्टुमपनेतुम् ऋक्षराजं मणिग्राहिणं जित्वा रत्नं स्यमन्तकमुपाजहार आनीतवान् अथानन्तरं रत्नमदात् मत्पित्रे तस्मै प्रभवे श्रीकृष्णाय अक्रूरादिभ्यो दत्तां प्रतिश्रुतामपि मां तेन स्वापराधेन भीतः स मे पिता आदिशत इत्यन्वयः॥९॥ देहकृत् मम देहकृत् जाम्बवान् अमुं श्रकृष्णं निजनाथः स्वीययाच्यश्चाऽसौ देव ईश्वरश्च तं सीतापतिं प्राज्ञाय

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अविज्ञाय त्रिनवहानि अमुनाऽभ्ययुद्ध्यत् 'कालाध्वनोरत्यन्तसंयोगे' (२/३/५) इति द्वितीया शकन्ध्वादित्वात् पररूपम्। परीक्षि परीक्षा संजाता अस्येति सः तारकादित्वादितच् सीतापतिरयमित्यमुं ज्ञात्वा पादौ प्रगृह्य मणिना सह मामर्हणमुपाहरत् समर्पितवा ॥१०॥ सख्या अर्जुनेन सहोपेत्य समीपं गत्वा स्वपादस्पर्शकाम्यया तपश्चरन्तीमाज्ञाय यः पाणिमग्रहीत् तस्याहं गृहमार्ज गृहमार्जनकर्त्रीत्यन्वयः ॥११॥ श्वयूथगं ग्रामसिंहसमूहमध्यगतम्। स्वबलिं केसरिकन्यारूपं स्वीयं भागमित्यर्थः। द्विपारि सिं इव नृपान् मे भ्रातृंश्च अपकुर्वतः अपकारं कुर्वाणां विजित्य श्रियौकः सम्पन्निकेतनम् स्वपुरं मां यो निन्ये तस्य अङ्घ्र्यवनेजन चरणक्षालनकर्तृत्वम् अनुभवं प्रतिजन्म मे ममास्तु ॥१२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

यद्यपि द्रौपदी परिगणनां व्यत्यासेन कृतवती तथापि क्रमेणैव ताः स्त्रियः स्ववृत्तान्तं निरूपयन्ति। अतस्तदनन्तरभावि सत्यभामा स्ववृत्तान्तमाह-यो मे सनाभीति। सनाभिः सोदरो भ्राता तस्य वधो यद्यप्यन्यत्र जातः तथापि तद्वधेन तत्सहृदयः म पिता अविचार्यैव भगवति लिप्तोऽभिशापः तमपमार्ष्टुम् ऋक्षराजं जित्वा अथ भिन्नप्रकारेण स्वयं प्रतिगृह्य पारिबर्हतया दत्तं त तस्मै मत्पित्रे उपाजहार ततो भीतो मत्पिता तेन रत्नेन सह मामादिशद्दत्तवान्। यद्यपि तस्य भार्याः सिद्धाः तथापि प्रभुरिति अन्यस्मै दत्तामपि वाग्दत्तां

''दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेत्।'' इति ॥ क्षत्रियविषयमेतत् ॥

''नैतत्पूर्वर्षयश्चक्रुर्न करिष्यन्ति चापरे। यदन्यस्याभ्यनुज्ञाय पुनरन्यस्य दीयते ॥'' इति। मनुवाक्यम् ॥

ब्राह्मणविषयकम् ऋषिपदप्रयोगात्। किंच विवाहे बन्धूनामैकमत्यं मृग्यते तदैवाधिकारः ततोऽधिकारसम्पादनार्थमेव मां दत्तवान् अतः प्रायश्चित्तार्थं दत्ताहं दोषनिर्घातार्थं जातेति स्वार्थं नावशिष्टेति न किञ्चित् कामये इत्यर्थः। अत एव भगवतः स प्रिया पित्रर्थमेव च व्यापृता अत एव तस्याः स्वर्गो नास्तीति पारिजातापहरणं स्वर्गे च नयनम् ॥९॥ जाम्बवतीत्याह-प्राज्ञायेति अज्ञाय अज्ञात्वा प्रकर्षेण ज्ञात्वा प्राज्ञाय कश्चित् मनुष्य इति भगवन्तं ज्ञात्वा मम देहकृत् कन्यापिता महता पापेनैव कन्यापितृत्व भवतीति अत एव दुःखायैवेति शास्त्रम् अतो भगवन्तं न ज्ञातवान्। अमुमित्यग्रे प्रदर्श्याह-वस्तुतस्त्वयं निजः आत्मा नाथः स्वामी दैवं पूज्यश्च। ननु तादृशो राम इति चेत्तत्राह-सीतापतिमिति। पूर्वं सीतायै महद्दुःखं दत्त्वा ततस्तां बहुधा अवतार्य तस्य स्वयमप्यागत इत्यर्थः। अज्ञानं तावदेव यावद्भगवतः सान्निध्यं भवति। तत्र त्रिगुणानां भेदाः सप्तविंशतितत्त्वानीति तत्तद्व्यवधानाद्भगवदज्ञानमिति तन्निराकरणार्थममुनाऽभ्ययुद्ध्यत्। ततो व्यवधानेषु गतेषु परीक्षिते परीक्षायां जातायां भगवानेवायमिति ज्ञात्वा अर्हणं पूजायोग्यां मां पादौ प्रगृह्य मणिना सह उपाहरत्। एवं विवाहमुक्त्वा कामनामाह-अहममुष्य दासी। यो हि स्वतन्त्रं भवेत् स कामयेत। अहं तु दासी। दास्यव्यतिरेकेणान्यदस्याकामितं भवति ॥१०॥ ततः प्राप्ता कालिन्दी स्ववृत्तान्तमाह-तपश्चरन्तीं मामिति। अर्जुनादिप्रेषणं व्याजार्थम्। वस्तुतस्तु स्वयमेवाज्ञाय सख्या सह उपेत्य पाणिमग्रहीत्। एवं विवाहमुक्त्वा कामनामाह- योऽहं तद्गृहमार्जनीति। मम तु कामना नास्ति। स्वभावत एवाह-कालिन्दी तद्गृहस्य मथुरायाः मार्जनी शोधिका तद्गृहं व सूर्यमण्डलं ततः शोधयित्वा वा निर्गता वा अथवा गृहदासीत्वं स्वस्याः कामितमेव जातमिति निरूपयति ॥११॥ ततोऽनन्त मित्रविन्दा स्ववृत्तान्तमाह-यो मामिति। स्वयंवरे उपेत्येति पूर्वं स्वत एवासक्ताऽपि भ्रात्रा निवार्य स्वयंवरे योजिता। ततः स्वयं स्वयमुपेत्य सर्वानेव विजित्य पैतृष्वस्रेयोवाहमिति। स्वभागत्वादन्यभागमन्यो गृह्णन् श्वा भवतीति श्वयूथगमिव द्विपारिः सिं धर्मभूरक्षकानपि राज्ञो जयतीति एवं भ्रातॄनपकुरुतः। विजित्य यद्यपि विन्दानुविन्दौ द्वावेव प्रतिकूलौ तथापि तत्पक्षपातिनोऽन्येऽ गोत्रजा इति भ्रातॄनिति बहुवचनम्। चकारादन्येऽपि प्रतिकूलाः सूचिताः। ततः स्वपुरं निन्ये द्वारकां नीतवान्। अनेन मध्ये वि निवारिति। श्रियौक इति पुरस्य सर्वसमृद्धिरुक्ता। ततः कामितमाह-तस्य अङ्घ्र्यजनेजनीनत्वम् अनुभवं जन्मनि जन्मनि म अङ्घ्र्यवनेजनी पादप्रक्षालनकर्त्री एतत् कामितम् ॥१२॥

सत्यभामोक्तिः।

य उपाजहार ऋक्षराजं जाम

प्रभवे श्रीकृष्णायादिशताद

श्रीकृष्णं निजनाथं स्वस्वा

परीक्षा संजाता यस्य स ज्ञात

॥१०॥ कालिन्द्युक्तिः। त

गृहमार्जनी दास्यस्मि अहम्

विजित्य यो मां निन्ये श्वयूथ

। तस्याङ्घ्र्यवनेजनत्वं पादप्र

अथ सत्यभामोक्ति

लिप्तम् आपादितमभिशापं दुर्य

तत् मत्पित्रेऽदात्। स च मम

पूर्णानन्दाय कृष्णाय आदिशत

निजनाथं स्वस्वामिनं स्वकुलदै

त्रिणवहानि सप्तविंशत्यहानि अ

ज्ञात्वा तस्य पादौ प्रगृह्य पादग्रह

भगवतो दासीति ॥१०॥ अथ क

कुर्वन्ती मामाज्ञाय सख्या अर्जुने

॥११॥ मित्रविन्दा स्ववृत्तमाह-यो

कुर्वतो मे भ्रातृंश्च विजित्य यो मां

प्रतिजन्म अस्तु। एवं प्रार्थनायां हे

य इति। सनाभेर्भ्रातुः प्रसे

दुर्यशोऽपमार्ष्टुम् अपनेतुं यः ऋक्षरा

मम पिता तेन मिथ्याभिशापापराधे

प्राज्ञायेति। देहकृत् मम पिता जाम्बव

श्रीकृष्णेन सह त्रिणवहानि त्रिणवहा

''आसीत्तदाष्टाविंशाहम्'' इति प्रागुक्ति

स्वाम्येवासाविति ज्ञात्वा तस्य पादौ प्र

अतोऽहममुष्य भगवतो दासीति। इयं

दत्तेति प्रागुक्तम् ॥१०॥ तप इति।

मामाज्ञाय सख्या अर्जुनेन सह उपेत्य स

मामिति। मम स्वयंवर उपेत्य आगत्य

परस्रूपम्। परीक्षितः
मुपाहरत् समर्पितवान्
तस्याहं गृहमार्जनी
त्यर्थः। द्विपारिः सिंह
स्य अङ्घ्र्यवनेजनत्वं

। अतस्तदनन्तरभाविनी
तद्वधेन तप्तहृदयः मम
ह्य पारिबर्हतया दत्तं रत्नं
थापि प्रभुरिति अन्यस्मै

नुवाक्यम् ॥
तोऽधिकारसम्पादनार्थमेव
ः। अत एव भगवतः सा
ाम्बवतीत्याह-प्राज्ञायेति।
हता पापेनैव कन्यापितृत्वं
स्वयं निजः आत्मा नाथः
स्तां बहुधा अवतार्य तदर्थं
दाः सप्तविंशतितत्त्वानीति
यां जातायां भगवानेवायमिति
मुष्य दासी। यो हि स्वतन्त्रो
दी स्ववृत्तान्तमाह-तपश्चरन्ती
विवाहमुक्त्वा कामनामाह-
मार्जनी शोधिका तद्गृहं वा
नरूपयति ॥११॥ ततोऽनन्तरं
वयंवरे योजिता। ततः स्वयंवरे
त श्वयूथगमिव द्विपारिः सिंहः
तथापि तत्पक्षपातिनोऽन्येऽपि
नीतवान्। अनेन मध्ये विघ्नो
अनुभवं जन्मनि जन्मनि भवतु

श्रीसुबोधिनीसारः

सत्यभामोक्तिः। सनाभेर्भ्रातुः वधेन तप्तं हृत् हृदयं यस्य तेन मे मम ततेन तातेन लिप्तमभिशापं दुर्यशोऽपमार्ष्टुं परिहर्तुं रत्नं **मुपाजहार** ऋक्षराजं जाम्बवन्तं जित्वाऽथ स्यमन्तकमणिं मत्पित्रेऽदात् तेनापराधेन भीतो मे पिता स दत्तां वाचा प्रतिश्रुतामपि मां **प्रभवे श्रीकृष्णायादिशतादात्।** गुणवद्वरलाभेन प्राग्दत्तदोषो नेति भावः ॥९॥ **जाम्बवत्युक्तिः।** देहकृन्मे पिता जाम्बवान् अमुं **श्रीकृष्णं निजनाथं** स्वस्वामिनं देवमीश्वरं सीतापतिं प्राज्ञायाऽज्ञात्वा त्रिणवाहानि सप्तविंशतिदिनान्यमुनानेनाभ्ययुध्यत् परीक्षितः **परीक्षा संजाता** यस्य स ज्ञात्वा सीतापतिरयमिति बुद्ध्वाऽमुष्य पादौ प्रगृह्य मामर्हणं समर्पितवान् मणिना सह अस्य दास्यहमस्मि ॥१०॥ **कालिन्द्युक्तिः।** तपः कुर्वतीं मा मामाज्ञाय स्वचरणस्पर्शेच्छया सख्याऽर्जुनेन सहोपेत्य प्राप्य यो मे पाणिमग्रहीत्तस्य **गृहमार्जनी** दास्यस्मि अहम् ॥११॥ **मित्रविन्दोक्तिः।** स्वयंवरे उपेत्य गत्वा भूपान् विजित्यापकुरुस्तिरस्कारं कुर्वतो मे भ्रातॄंश्च **विजित्य** यो मां निन्ये श्वयूथगं कुक्कुरयूथगतम् आत्मनो बलिं द्विपारिः सिंह इव स्वपुरीं द्वारकां श्रियौको लक्ष्मीनिवासः सन्धिरार्षः **तस्याङ्घ्र्यवनेजनत्वं** पादप्रक्षालनकर्तृत्वं मे ममास्तु अनुभवं प्रतिजन्म ॥१२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ सत्यभामोक्तिमाह-य इति। सनाभेर्भ्रातुः प्रसेनस्य सिंहकृतेन वधेन सन्तप्तं हृदयं यस्य तेन ततेन तातेन मत्पित्रा **लिप्तम्** आपादितमभिशापं दुर्यशोऽपमार्ष्टुम् अपनेतुं यः ऋक्षराजं जाम्बवन्तं जित्वा रत्नं स्यमन्तकमुपाजहार आनीतवान्, अथानन्तरं **मत्पित्रेऽदात्।** स च मम पिता तेन मिथ्याभिशापापादनस्वापराधेन भीतः सन् दत्तामक्रूरादिभ्यः प्रतिश्रुतामपि मां प्रभवे **पूर्णानन्दाय कृष्णाय आदिशत** दत्तवानित्यर्थः ॥९॥ जाम्बवती प्राह-प्राज्ञायेति। देहकृत् मम पिता जाम्बवान् अमुं श्रीकृष्णं **निजनाथं** स्वस्वामिनं स्वकुलदैवतं च सीतापतिं प्रकर्षेण अविज्ञाय अमुना श्रीकृष्णेन सह त्रिणवहानीति ह्रस्वं छन्दोऽनुरोधेन। **त्रिणवहानि** सप्तविंशत्यहानि अभ्ययुध्यत्। ततः परीक्षितः परीक्षास्य संजातेति तथा स मम पिता सीतापतिर्मम स्वाम्येवासाविति **ज्ञात्वा तस्य पादौ प्रगृह्य** पादग्रहणपूर्वकं प्रसाद्य मणिना सह मामर्हणमुपाहरत् सेवासाधनतया समर्पितवानित्यर्थः। अतोऽहममुष्य **भगवतो दासीति** ॥१०॥ अथ कालिन्दी प्राह-तप इति। स्वस्य भगवतः पादस्पर्शनाशया पादसंवाहनादिपरिचर्याचिकीर्षया तपः **कुर्वन्तीं मामाज्ञाय** सख्या अर्जुनेन सह उपेत्य समागत्य रथेन नीत्वा यो मम पाणिमग्रहीत्तस्य गृहस्य मार्जनी मार्जनकर्त्र्येवाहम् **॥११॥ मित्रविन्दा** स्ववृत्तमाह-यो मामिति। मम स्वयंवर उपेत्य आगत्य शुनां यूथगतं स्वभागं द्विपारिः सिंह इव नृपान् अपकारं **कुर्वतो मे भ्रातॄंश्च** विजित्य यो मां स्वपुरं द्वारकां प्रति निन्ये आनीतवान्। तस्याङ्घ्र्यवनेजनीत्वं चरणक्षालनकर्तृत्वं ममानुभवं **प्रतिजन्म** अस्तु। एवं प्रार्थनायां हेतुं तन्माहात्म्यमाह-श्रियौक इति। लक्ष्मीपतिरित्यर्थः ॥१२॥

अन्वितार्थप्रकाशिका

य इति। सनाभेर्भ्रातुः प्रसेनस्य सिंहकृतेन वधेन सन्तप्तं हृदयं यस्य तेन ततेन तातेन मत्पित्रा लिप्तम् आपादितमभिशापं **दुर्यशोऽपमार्ष्टुम्** अपनेतुं यः ऋक्षराजं जाम्बवन्तं जित्वा रत्नं स्यमन्तकमुपाजहार आनीतवान्। अथानन्तरं तत् मत्पित्रेऽदात् स च **मम पिता तेन** मिथ्याभिशापापराधेन भीतः सन् दत्तामक्रूरादिभ्यः प्रतिश्रुतामपि मां प्रभवे कृष्णाय आदिशत् दत्तवान् ॥९॥ **प्राज्ञायेति।** देहकृत् मम पिता जाम्बवान् अमुं श्रीकृष्णं निजनाथं स्वस्वामिनं स्वकुलदैवतं च सीतापतिं प्रकर्षेण अविज्ञाय अमुना **श्रीकृष्णेन सह** त्रिणवहानि त्रिणवहानि सप्तविंशत्यहानि अभ्ययुध्यत्। अह्नः अलोप आर्षः। छन्दोनुरोधेन अभ्ययुध्यत्। तडार्षः। "**आसीत्तदाष्टाविंशाहम्**" इति प्रागुक्तिस्तु समाप्तिदिनेन सहेति। ततः परीक्षितः परीक्षास्य संजातेति तथा स मम पिता सीतापतिर्मम **स्वाम्येवासाविति** ज्ञात्वा तस्य पादौ प्रगृह्य पादग्रहणपूर्वकं प्रसाद्य मणिना सह मामर्हणमुपाहरत् सेवासाधनतया समर्पितवानित्यर्थः। **अतोऽहममुष्य** भगवतो दासीति। इयं च श्रीरामसमय एवोत्पन्ना श्रीरामाय दित्सितापि एकपत्नीव्रतेन तेन नाङ्गीकृता इदानीं कृष्णाय **इति प्रागुक्तम्** ॥१०॥ तप इति। स्वस्य भगवतः पादस्पर्शनाशया पादसंवाहनादिपरिचर्याचिकीर्षया तपः चरन्तीं कुर्वन्तीं **मामाज्ञाय सख्या** अर्जुनेन सह उपेत्य समागत्य रथेन नीत्वा यो मम पाणिमग्रहीत्तस्य गृहस्य मार्जनी मार्जनकर्त्र्येवास्मि ॥११॥ यो **मामिति।** मम स्वयंवर उपेत्य आगत्य शुनां यूथगतमात्मबलिं स्वभागं द्विपारिः सिंह इव नृपान् विजित्य तथा अपकुरुतः अपकारं

अन्वितार्थप्रकाशिका

कुर्वत: । शतुरलोप आर्ष: । मे भ्रातृंश्च विजित्य श्रियौक: लक्ष्मीपति: । इयडार्ष: । यो मां स्वपुरं द्वारकां प्रति निन्ये आनीतवान् श्रियौक इति पुरविशेषणं वा । तस्याङ्घ्र्यवनेजनत्वं पादक्षालनकर्तृत्वं ममानुभवं प्रतिजन्म अस्तु ॥१२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सनाभे: भ्रातु: प्रसेनस्य वधेन सिंहकृद्धननेन तप्तं हृत् यस्य तेन मे ततेन तातेन पित्रा । लिप्तं मण्यर्थं श्रीकृष्णेन प्रसेनो ह इत्यारोपितं अभिशापदुष्कीर्तिम् अपमार्ष्टुं निवर्तयितुम् ऋक्षराजं जित्वा रत्नं मणिम् उपाजहार आनिन्ये । अथ मज्जनकाय त अदात् तेन स्वदोषेण भीत: स मे पिता स्वरक्षणार्थम् अक्रूरादिभ्य: प्रतिश्रुतामपि प्रभवे यदुकुलतिलकाय मा माम् अदिशत अद ॥९॥ देहकृत् मे जनक: अमुं श्रीकृष्णं निजनाथं सीतापतिम् । प्राज्ञाय अविदित्वा त्रिनवहानि त्रिनवाहानि अत्र ह्रस्वत्वमार्ष सप्तविंशत्यहान्यमुना कृष्णेन अभ्ययुध्यत युयुधे । परीक्षित: जातपरीक्ष: तं सीतापतिं ज्ञात्वा पाणिद्वयेन पादौ गृह्य मणिना सह मा । अर्हणम् अर्हणसम्पादनाय । उपाहरत् ददौ । एतदारभ्य अहममुष्य हरे: दासी अस्मि ॥१०॥ सख्या विजयेन तस्य हरे: गृहमार्ज गृहमार्जनकर्त्री दासी ॥११॥ शुनां यूथगम् आत्मबलिं स्वकीयबलिं द्विपारि: सिंहो यथा तथा श्रिय: ओक: अत्र सन्धिरार्ष: । श्रि निवासभूतो हरि: अपकुरुत: अपकारं कुर्वतो मे भ्रातृन् भूपांश्च मां स्वपुरं निन्ये तस्य श्रीकृष्णस्य अङ्घ्र्यवनेजनत्वं पादप्रक्षालनकर्तृत्व अनुभवं जन्मनि जन्मनि मे अस्तु ॥१२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ सत्यभामोक्तिमाह ॥ य इति ॥ य: सनाभे: प्रसेनाख्यस्वभ्रातुर्यो वध: सिंहकृतो निपातस्तेन तप्तं हृत् हृदयं यस्य ते ततेन अस्मत्पित्रा लिप्त आपादित आरोपित इत्यर्थ: । योऽभिशापो दुर्यशस्तम् अपामार्ष्टुमपनेतुं परिहर्तुमित्यर्थ: । ऋक्षराजं जाम्बव जित्वा रत्नं स्यमन्ताख्यम् उपाजहारानीतवान् । अथानन्तरम् अदात् मत्पित्रे रत्नं ददौ । तेन स्वापराधेन भीत: स: मे मम पि दत्तामक्रूरादिभ्य: प्रतिश्रुतां माम् अपिशब्दाद्रत्नं च प्रभवे अस्मत्स्वामिने श्रीकृष्णाय आदिशत् ददौ ॥९॥ अथ जाम्बवत्युक्ति ॥ आज्ञायेति ॥ देहकृन्मम पिता जाम्बवान् अमुं श्रीकृष्णं निजनाथदैवं स्वस्वामिनं स्वकुलदैवतं चेत्यर्थ: । सीतापतिम् आज्ञा आदौ तत्प्रतापानालोकनेनाज्ञात्वेत्यर्थ: । अमुना श्रीकृष्णेन सह त्रीणवहानि सप्तविंशतिदिनानि अत्यन्तसंयोगे द्वितीया । छन्दोभङ्गभया ह्रस्व आर्ष: । शकन्ध्वादित्वात्पररूपं वा । अभ्ययुद्धयद्युयोध । तत: परीक्षित: संजातपरीक्ष: मम पिता ज्ञात्वा सीतापतिरेवास्मद्यु यदुष्ववतीर्ण इति विदित्वेत्यर्थ: । पादौ प्रगृह्य पादग्रहणपूर्वकं प्रसाद्य मणिना सह अर्हणमुपायनरूपां माम् उपाहरत् समर्पितवा अहम् अमुष्य भगवत: दासी । यथावदात्मभावेन दास्यं कुर्यामिति प्रार्थना ज्ञेया ॥१०॥ अथ कालिन्दी यथा जगौ तथा तपश्चरन्तीमिति ॥ यो भगवान् स्वस्य भगवतो या पादस्पर्शनाशा तया पादसंवाहनादिपरिचर्याचिकीर्षया तप: चरन्तीं कुर्वन्तीं मा आज्ञाय ज्ञात्वा सख्या अर्जुनेन सह उपेत्यागत्य मम पाणिम् अग्रहीत् । या इत्थं भगवता गृहीतपाणि: सा अहं तस्य भगव गृहमार्जनी गृहान्मार्जयतीति तथाभूता भवेयम् ॥११॥ अथ मित्रविन्दागीतिमाह ॥ य इति ॥ श्वयूथगं शुनां यूथगतम् आत्मबलिं स्वस्य बलिं द्विपारिर्हस्तिनां शत्रु: सिंह: इव यो भगवान् स्वयंवरे उपेत्य भूपान् विजित्य अपकुरुत: अपकारं कुर्वत: मे मम भ्रा विजित्य श्रियौको लक्ष्म्या निवासभूतं स्वपुरं यद्वा य: श्रियौक: श्रीनिवास: कृष्ण: स: मां स्वपुरं द्वारकां निन्ये नीतवान् । श्रीनिवासस्य भगवत: अङ्घ्र्यवनेजनत्वं चरणक्षालनकत्वं मे मम अनुभवं प्रतिजन्म अस्तु स्यात् ॥१२॥

कृष्णप्रिया

श्रीसत्भामाजी निवेदन कर रही है मेरे पितृचरण अपने भाई श्रीपुरुषोत्तमजीकी मृत्यु से सतत दुःखी रहे थे अत: उनके वधका दोषारोपण भगवान श्रीकष्ण पर ही लगाया । उस कलंकका अपमार्जन और नि करने के लिये भगवानने ऋषिराज जाम्बवान् पर विजय प्राप्त की और स्ममन्तक मणि लाकर मेरे पि

समर्पित किया । त
अपराध के निवारणके लिये
भगवान के चरणोंमें ही सम
जाम्बवानजीको इस विषयक
वे अनजानेपनमें इनसे सत्ता
पदपंज पकडकर स्यमन्तक म
हुं कि जन्म जन्म पर्यन्त उन्हीं
निवेदन करुं घगवान श्रीकृष्ण
कर रही हूं, तब भगवान श्रीकृ
किया में उनके घरकी बुहारि
स्वयंवरमें आकर भगवानने स
भाग ले जाय, वैसे ही मुझे अ
छुडाकर मेरा अपकार करना च
अभिलाषा है कि जन्म-जन्म प

ससोक्षणोऽतिबलवीर्य
तान् वीरदुर्मदहनस्तरस
य इत्थं वीर्यशुल्कां मं द

पिता मे मातुलेयाय [२]कृष्
अस्य मे पादसंस्पर्शो भ

सत्या, उवाच ।

अतिवीर्यसुतीक्ष्णशृङ्गान्, सप्त,
शिशव:, अजतोकान्, यथा, क्रीडन्, ह,
माम्, दासीभि:, निन्ये, तद्दास्यम्, मे, अ

भद्रा, उवाच । हे, कृष्णे, तच्चिताम्
दत्तवान्, भ्राम्यमाणाया, मे, जन्मनि, जन्म

सप्तोक्ष्णो वृषभान् बलञ्च वीर्यञ्च सु

---

[१] मित्रविन्दोवाच-श्रीधरादय: । [२] स्वयमाहूय-
वंशी. ।

कृष्णप्रिया

समर्पित किया । तब मेरे पिताजी भगवान कृष्ण पर मिथ्या कलंक लगानेके कारण डर गये । अतः उस अपराध के निवारणके लिये मेरा वाग्दान दूसरेको कर चुके थे, फिरभी मेरे पिताजीने मुझे स्यमन्तक मणिके साथ भगवान के चरणोंमें ही समर्पित कर दिया ॥९॥ श्रीजम्बवानजीने कहा - हे द्रौपदीजी ? मेरे पिताजी ऋक्षराज जाम्बवानजीको इस विषयका पता न था यहीं श्रीकृष्ण भगवान ही मेरे नाथ अवधनाथ श्रीसीतापति है । इसलिये वे अनजानेपनमें इनसे सत्ताइस दिन पर्यन्त लडते रहे । जब यह जाना कि ये तो भगवान श्रीराम है तब इनके चरणपंकज पकडकर स्यमन्तक मणिके साथ उपहार स्वरूपमें मुझे समर्पित कर दिया । देवी ! में यही कामना करती हूं कि जन्म जन्म पर्यन्त उन्हीं की दासी बनी रहुं ॥१०॥ श्रीकालिन्दीजी निवेदन कर रही है - द्रौपदीजी में क्या निवेदन करुं घगवान श्रीकृष्णने यह जाना कि में उनके चरणकमलोंका स्पर्श सेवा करनेकी कामना से तपश्चर्या कर रही हूं, तब भगवान श्रीकृष्ण अपने सखा अर्जुनजीके साथ स्वयं यमुनाजीके तट पर पधारे और मेरा अंगिकार किया में उनके घरकी बुहारिनी हुं ॥११॥ श्रीमित्रविद्धाजीने कहा - हे द्रौपदीजी ! मेरा स्वयंवर हो रहा था । स्वयंवारमें आकर भगवानने समस्त नरपतियोंको जीत लिया और जैसे वीर केसरी सिंह कुत्तोंके समूहमेंसे अपना भाग ले जाय, वैसे ही मुझे अपनी सौन्दर्यपूर्ण श्रीद्धारिकानगरीमें ले आये । मेरे भाईयोंने भी मुझे भगवानसे होकर मेरा अपकार करना चाहा, लेकिन श्रीकृष्णने मेरे भाईयोंको नीचा दिखा दिया । अब तो मेरी यही अभिलाषा है कि जन्म-जन्म पर्यन्त उनके श्रीचरण प्रक्षालनका सौभाग्य प्राप्त हो ॥१२॥

सत्योवाच

सप्तोक्षणोऽतिबलवीर्यसुतीक्ष्णशृङ्गान् पित्रा कृतान् क्षितिपवीर्यपरीक्षणाय ।
तान् वीरदुर्मदहनस्तरसा निगृह्य क्रीडन् बबन्ध ह यथा शिशवोऽजतोकान् ॥१३॥
य इत्थं वीर्यशुल्कां मं दासीभिश्चतुरङ्गिणीम् । पथि निर्जित्य राजन्यान् निन्ये तद्दास्यमस्तु मे ॥१४॥

[1]भद्रोवाच

पिता मे मातुलेयाय [2]कृष्णे कृष्णाय दत्तवान् । [3]तच्चित्तां भ्रातृभिर्दत्तामक्षौहिण्या सखीजनैः ॥१५॥
अस्य मे पादसंस्पर्शो भवेज्जन्मनि जन्मनि । कर्मभिर्भ्राम्यमाणाया तेन तच्छ्रेय आत्मनः ॥१६॥

कर्दमक्षमा

सत्या, उवाच ।

अतिवीर्यसुतीक्ष्णशृङ्गान्, सप्त, ऊक्षणः, क्षितिपवीर्यपरीक्षणाय, मम, पित्रा, कृतान्, तान्, वीरदुर्मदहनः, तरसा, निगृह्य, शिशवः, अजतोकान्, यथा, क्रीडन्, ह, बबन्ध ॥१३॥ यः, इत्थम्, पथि, राजन्यान्, च, चतुरंगिणीम्, निर्जित्य, वीर्यशुल्काम्, माम्, दासीभिः, निन्ये, तद्दास्यम्, मे, अस्तु ॥१४॥

भद्रा, उवाच । हे, कृष्णे, तच्चिताम्, मे, पिता, कृष्णाय, मातुलेयाय, कृष्णाय, भ्रातृभिः, दत्ताम्, सखीजनैः, अक्षौहिण्या(सह), [illegible] भ्राम्यमाणाया, मे, जन्मनि, जन्मनि, अस्य, पादसंस्पर्शः, भवेत्, येन, आत्मनः, तत्, श्रेयः, स्यात् ॥१५-१६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सप्तोक्ष्णो वृषभान् बलञ्च वीर्यञ्च सुतीक्ष्णशृङ्गणि चातिशयितानि येषां तान् मे पित्रा कृतान् सम्पादितान् बलीयसे मां दातुं

---

[1] भद्रोवाच-श्रीधरादयः । २. स्वयमाहूय-श्रीधर. वंशी. वीर. विज. जीव. । ३. प्रेम्णा कृष्णाय तच्चित्ताम्-गो. प्रे. टी. ;कृष्णे कृष्णाय-[illegible] श्री. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

क्षितिपानां वीर्यस्य बलस्य परीक्षणायताननतिप्रसिद्धान् वीराणां दुर्मदं घ्नन्ति ये तांस्तरसा शीघ्रमेव निगृह्य दमयित्वा क्रीडन्ननायासेनैव बबन्ध अजतोकानजापत्यानि ॥१३॥ वीर्यमेव शुल्कं देयं यस्यास्तां दासीभिः सह चतुरङ्गिणीं गजाश्वादिसेनायुक्तां पुरं निन्ये ॥१४॥ हे कृष्णे ! हे द्रौपदि ! तस्मिन्नेव चित्तं यस्यास्ताम् मां अक्षोहिण्या सेनया सह सखीजनैश्च सह ॥१५॥ येन पादसंस्पर्शेनाऽऽत्मनो मे तत्कैवल्याख्यं श्रेयो भवेत् सः यद्वा येन कारणेनाऽऽत्मनो जीवस्य तच्छ्रेयः स एव पुरुषार्थ इति ॥१६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तान् उक्ष्णः ॥१३॥ यः कृष्णः ॥१४॥ पिता धृष्टकेतुः । मातुलस्य वसुदेवस्य पुत्राय । तस्मिन् कृष्णे ॥१५॥ तीर्थं तस्येति पपाठ । तत् प्रसिद्धम् । स पादस्पर्शः । न हि सर्वकल्याणहेतुरेकस्य सम्भवतीत्यरुच्याऽऽह-यद्वेति । स एव पादस्पर्श एव । "अद्यापि यत्पदरजः स्मृतिमृग्यमेव" इत्युक्तेः ॥१६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उक्षणः उक्ष्णः क्षितिपवीर्यपरीक्षणायेति श्रीभगवत्प्राप्त्यर्थमेव तदिति पूर्वमेवोक्तम् । ह स्फुटम् । सर्वेषां साक्षादेवेत्यर्थः । क्रीडया बन्धने दृष्टान्तः यथेति । शिशव इति बहुत्वम् आत्मानं सप्तधा कृत्वेति पूर्वोक्तानुसारेण अजतोकान् छागापत्यानि ॥१३॥ वीर्यशुल्कामिति । श्रीभगवता तथा तत्पितृकृतनिबन्धपरिपालनात् ॥१४॥ मित्रविन्दास्थानेऽत्र भद्रापि निर्णीतैव ततश्च कैकेयीं भ्रातृभिर्दत्तां प्रागुक्तेऽप्यत्र पिता दत्तवानिति भ्रातृभिः प्रतिश्रुतां सर्वसम्मत्या पिताऽऽहूयाददित्यभिप्रायेण स्वयमाहूय दाने हेतुः तच्चितामिति तत्रैव हेतुः कृष्णायेति सर्वचित्ताकर्षकत्वेन तत्संज्ञायेत्यभिप्रायव्यंजनाय । तथापि तत्साक्षात्पत्युर्नामग्रहणं तत्र स्वाति स्वभागधेयेन तासां परमोन्मादप्रायत्वं बोधयति । येनेदमसङ्कोचाद्वदन्तीति अथवा गुर्वादिनामग्रहणं लोकेष्वेव दोषाय केवलनाम्नस्तुच्छत्वादनादरापत्तेः । श्रीभगवति तु गुणायैव महामहिमसूचकत्वात् । परमादरापत्तेः "यस्य नाम महद्यशः" इति श्रुतेः ॥१५॥ अतोऽस्यैव पादयोः सम्यक् संवाहनादिना स्पर्शः कर्मभिर्भ्राम्यमाणायाः सत्या मे मम जन्मनि जन्मनि भवेत् भवतु इति नरलीलया सर्वमन्यपुरुषार्थवर्गमनादृत्य तत्र हेतुः तदिति ॥१६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बलादीनां यथोत्तरमनिग्राह्यताहेतुत्वे श्रैष्ठ्यम्, क्षितिपवीर्यपरीक्षणायेति श्रीभगवत्प्राप्त्यर्थमेव तदिति पूर्वमुक्तमेव ह स्फुटं सर्वेषां साक्षादेवेत्यर्थः । क्रीडया बन्धने दृष्टान्तः-यथेति । शिशव इति बहुत्वम् (भा०१०/५८/४५) 'आत्मानं सप्तधा कृत्वा' इति पूर्वोक्तानुसारेण तद्दृष्टश्रीभगवद्रूपसप्तकाभिप्रायेण किंवा सर्वेषामेव शिशूनां तादृशस्वभावविवक्षया । श्रीरुक्मिण्याः श्रीमित्रविन्दायाश्च स्वयंवरे राजवर्गजयेन हरणाद्वीर्यशुल्कत्वेऽप्यत्र विशेषेण तदुक्तिः श्रीभगवता तथा तत्पितृकृतनिर्बन्धपरिपालनात् अ दास्यादियुक्ततयाऽपि नाहं गृहेश्वरी किन्तु दास्येव नित्यं पादसेवामेवेच्छामीत्याह-तदिति ॥१३-१४॥ मित्रविन्दास्थानेऽत्र भद्रा ज्ञेयैव । ततश्च (भा० १०/५८/५६) 'कैकेयीं भ्रातृभिर्दत्ताम्' इति प्रागुक्तेऽप्यत्र पिता दत्तवानिति ज्येष्ठभ्रातृभिः सह पितुरैक्य किंवा आदौभ्रातृभिः प्रतिश्रुतां पश्चात् सर्वसम्मत्या पिताऽप्यदात् । स्वयमाहूय दाने हेतुः-तच्चित्तेति कृष्णचित्ता । तत्रैव हेतुः कृष्णाय सर्वचित्ताकर्षकायेति । हे कृष्णे इत् कन्येच्छया पित्रा स्वयं दानेनान्याभ्यः सर्वाभ्यो विशेषबोधनार्थम् ॥१५॥ अतोऽस्य पादयोः सम्यक् संवाहनादिना स्पर्शः कर्मभिर्भ्राम्यमाणाया इतस्ततो जन्यमानाया अपि यद्वा, भ्राम्यमाणायाः सत्या मे जन्मनि जन्मनि भवेद् भवतु । श्रीवैकुण्ठलोकोऽपि नापेक्षितः । तत्र हेतुमाह-येन यत इत्यर्थः । तदिति श्रेयसो विशेषणत्वान्नपुंसकं स पादस्पर्श एवात्मनो मे श्रेय इति ॥१६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१२-१८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अथ नाग्नजिती गायति-सप्तेति । क्षितिपानां राज्ञां वीर्यस्य परीक्षणाय परीक्षार्थं मम पित्रा नग्नजिता कृतान् सप्त

बलं वीर्यं प्रभावश्च सुतीक्ष्
वृषभान् यथा शिशवो बा
भगवान् युद्धे राजन्यान्निर्जि
भगवतो दास्यं ममास्तु इति
मम पिता स्वयमाहूय मम
॥१५॥ अस्य श्रीकृष्णस्य प
विशिनष्टि-येन तत्पादसंस्पर्शे

क्षितिपानामन्येषां श्र
तात्पर्यमिदं गुर्वादिनामग्रहणे लो
परमादरापत्तेः "यस्य नाम महद्

सप्तोक्ष्णेत्यादि । क्रीडि
दृष्टान्तेन शिशूनां स्वभावो दर्शितः
अद्य पादसंस्पर्शः पादसंवाहनम् ॥

इयं तावदेवं करोति, तान्
कृत्वा; शिशव इति बहुवचनान्तेन
द्रौपदि ! कृष्णाय भवन्मित्राय, अस्य

सप्त उक्ष्णः वृषभान् मे पित्र
दमयित्वा क्रीडन्ननायासेनैव अजतोका
स्वपुरं निन्ये ॥१४॥ मातुलपुत्राय कृष्णाय

क्षितिपवीर्यपरीक्षणाय पित्रा न
तस्य दास्यं मे अस्तु इत्युत्तरेणान्वयः । क
घ्नन्तीति तथाभूतान् । ह हर्षे । यथा तोका
तद्दास्यमित्यन्वयः । चतुरंगिणीसेनायुक्तां
तच्चित्तां कृष्णचित्ताम् । हे कृष्णे द्रौपदि ॥

उक्ष्णः वृषान् शिशव इत्यनेन भग

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

बलं वीर्यं प्रभावश्च सुतीक्ष्णशृङ्गाणि च तान्यतिशयितानि येषां तान् वीराणां दुष्टं मदं घ्नन्तीति तथा तान् प्रसिद्धान् सप्त उक्षणः वृषभान् यथा शिशवो बालाः अजतोकानजापत्यानि तथा तरसा आशु निगृह्य दमयित्वा क्रीडन्नायासेनैव बबन्ध ॥१३॥ यो भगवान् युद्धे राजन्यान्निर्जित्य वीर्यमेव शुल्कं देयं द्रव्यं यस्यास्तां दासीभिस्सह चतुरंगिणीं गजाश्वादिसेनायुक्तां मां निन्ये तस्य भगवतो दास्यं ममास्तु इति प्रार्थना ॥१४॥ अथ मित्रविन्दागायनमाह-पितेति द्वाभ्याम्। हे कृष्णे द्रौपदि ! मे इति पूर्वोत्तरान्वयि पदं मम पिता स्वयमाहूय मम मातुलसुताय श्रीकृष्णाय तस्मिन् श्रीकृष्णे एव चित्तं यस्यास्तां मामक्षौहिण्या सखीजनैश्च सह दत्तवान् ॥१५॥ अस्य श्रीकृष्णस्य पादसंस्पर्शः पादसंवाहनादिपरिचर्या मम प्रतिजन्म भवेत् अस्तु इत्थं प्रार्थनायां हेतुत्वेन पादसंस्पर्शं विशिनष्टि-येन तत्पादसंस्पर्शेनात्मनो मम कर्मभिः पुण्यपापात्मकैः भ्राम्यमाणायाः संसरन्त्याः श्रेयो निःश्रेयसं भवेत् ॥१६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

क्षितिपानामन्येषां श्रीकृष्णस्य च वीर्यस्य परीक्षणाय तारतम्यज्ञापनाय ॥१३-१४॥ कृष्णायेति साक्षात्पत्युर्नामग्रहणे तात्पर्यमिदं गुर्वादिनामग्रहणे लोकेष्वेव दोषाय केवलनाम्नस्तुच्छत्वादनादरापत्तेः। श्रीभगवति तु गुणायैव महामहिमसूचकत्वात् समादरापत्तेः "यस्य नाम महद्यशः" इति श्रुतेः ॥१५॥ कर्मभिर्भ्राम्यमाणायेति नरलीलावशेन ॥१६-२८॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

सप्तोक्षणेत्यादि। क्रीडन्नित्येवकवचनोपादानेनैक एव बबन्धेत्यर्थः। बद्ध्वात्मानं सप्तधा कृत्त्वा शिशव इति बहुवचनान्तेन दृष्टान्तेन शिशूनां स्वभावो दर्शितः ॥१३॥ य इत्थमित्यादिना परेणान्वयः। तद्दास्यं दासीभावः ॥१४॥ पिता मे इत्यादिद्वाभ्याम्। अत्र पादसंस्पर्शः पादसंवाहनम् ॥१५-१६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

इयं तावदेवं करोति, तान् वीरदुर्मदहनस्तरसा निगृह्याजतोकानितयादिना क्रीडन्नित्येकवचनादेकत्र बबन्ध आत्मानं सप्तधा कृत्वा; शिशव इति बहुवचनान्तेन दृष्टास्तेन शिशूनां स्वभावप्रदर्शनमेव। तद्दास्यमस्तु मे दास्यं दासीकर्म ॥१३-१४॥ कृष्णे द्रौपदि ! कृष्णाय भवन्मित्राय, अस्य मे पादसंस्पर्शः पादसंवाहनम् ॥१५-१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सप्त उक्षणः वृषभान् मे पित्रा कृतान् बलीयसे वराय मां दातुं सम्पादितानित्यर्थः। वीराणां दुर्मदं घ्नन्तीति तान् निगृह्य दमयित्वा क्रीडन्नायासेनैव अजतोकान् छागबालकान् ॥१३॥ वीर्यमेव शुल्कं यस्यां तां मां दासीभिः सहितां चतुरङ्गसेनासहितां सपुरं निन्ये ॥१४॥ मातुलपुत्राय कृष्णाय कृष्णे हे द्रौपदि ! ॥१५॥ कर्मभिरिति। नरलीलतया स्वदैन्योक्तिस्तत् प्रसिद्धं श्रेयः ॥१६॥

गूढार्थदीपिनी

क्षितिपवीर्यपरीक्षणाय पित्रा नग्नजिता कृतान् नियोजितान् सप्त उक्षणः वृषभान् यो निगृह्य क्रीडन्निव तरसा वेगेन बबन्ध तस्य दास्यं मे अस्तु इत्युत्तरेणान्वयः। कथम्भूतान्। अत्यधिकं बलं वीर्यं तीक्ष्णशृङ्गाणि च येषां तान्। पुनश्च। वीराणां दुर्मदं घ्नन्तीति तथाभूतान्। ह हर्षे। यथा तोकान् अपत्यानि बध्नन्ति ॥१३॥ इत्थं पथि राजन्यान् निर्जित्य यो दासीभिः सह मां निन्ये तद्दास्यमित्यन्वयः। चतुरंगिणीसेनायुक्तां माम् ॥१४॥ मे पिता धृष्टकेतुः मातुलेयाय वसुदेवपुत्राय मां सेनया सह दत्तवान्। तच्चित्तां कृष्णचित्ताम्। हे कृष्णे द्रौपदि ॥१५॥ येन पादस्पर्शेन आत्मनो मे मम तत् कैवल्याख्यं श्रेयः स्यात् ॥१६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उक्षणः वृषान् शिशव इत्यनेन भगवतोऽपि बहुमूर्तित्वं सूच्यते ॥१३॥ वीर्यमेव शुल्कं देयं द्रव्यं यस्यास्तां मां दासीभिः

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सह चतुरंगिणीं मत्पित्रा दत्तां सेनां वेति शेषः यः पुरं निन्ये ॥१४॥ हे कृष्णे ! द्रौपदि ! सेनया सखीजनैश्च सह ॥१५॥ येन श्रीकृष्णे हेतुभूतेन पादस्पर्शेन वा तत्प्रसिद्धं श्रेयः श्रीकृष्णभावापत्तिः आत्मनो जीवस्य ॥१६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

नाग्नजिती त्वाह–सप्तोक्षण इति । अतिबलं वीर्यः पराक्रमः सुतीक्ष्णे शृङ्गे च येषां तान् सप्तव्यसनात्मकान् अत एव क्षितिपवीर्यपरीक्षार्थं पित्रा कृतान् यो हि व्यसनग्रस्तो भवति स कुतो भोक्ता भविष्यतीति । स्वकन्याया भोगः सिध्यत्विति पित्रा कृताः । व्यसनानि च त्रिगुणात्मकानि अतो बलीवर्दास्तथा निरूपिताः । वीर्यं सात्त्विकं बलं तामसं शृङ्गे राजसे । किंच व्यसनानि धर्मादिभिर्निराकर्तुमशक्यानीति ज्ञापयितुं तेषां विशेषणं वीरदुर्मदहन इति वीराः शूराः राजानः वीर्यं धर्मस्थानीयमुक्तम् । तथापि दुरभिमानजनकत्वात् न व्यसननाशने समर्थमित्यभिप्रायेणाह–दुर्मदेति । वीराणां दुष्टं मदं घ्नन्तीति दुर्मदहनः । अतस्तरसा शीघ्रमेव निगृह्य यतः व्यसनानामेव व्यसनं भवति ततः क्रीडन्निव लौकिकव्यापारेणैव तन्निग्रहणं कृत्वा । हेत्याश्चर्ये । वैदिकैरपि दुर्निवार्यं कथं लौकिकेन निवारितवानिति । लौकिकेऽपि प्रयासाभावायाह–यथा शिशवोऽजतोकानिति । स्थूलाः अजबालकान् बिभ्रतीति बालका एव बन्धार्थं बिभ्रतीति तथाऽप्येकेन न भवतीति बहुवचनं व्यसनशान्त्यर्थम् । सप्ततन्तुं यज्ञं बालकाः कुर्वन्तीति ध्वनितम् ॥१३॥ ततः स्वाभिलषिते सिद्धे पित्रैव दत्तां मां वीर्यमेव शुल्कं यस्याः । दासीभिः सहितां राजन्यांस्तेषां चतुरंगिणीं सेनां च पथि जित्वा मां स्वगृहं निन्ये । कामनामाह–तद्दस्यमस्त्विति ॥१४॥ ततो भद्रा निरूपयति–पिता म इति । मम मातुलेयो भगवान् श्रुतकीर्तिकन्येयम् । हे कृष्णे द्रौपदि ! कृष्णार्थं वा विशेषतो दाने हेतुः । तच्चित्तामिति भ्रातृभिर्दत्तामिति वाग्दानार्थं भ्रातर एव द्वारकां गता इति ज्ञेयम् । इदं तु दानं सङ्कल्पपूर्वकम् अक्षौहिणीसख्यश्च । दाने सहभावमापन्नाः ॥१५॥ कामनामाह–अस्य मे पादसंस्पर्श इति । जन्मनि जन्मनि भवेदिति यदा यदा भगवानवतीर्णो भविष्यति तदा तदा लक्ष्मीवदहमप्यागमिष्यामीति । स्व स्वयमेव तच्छक्तित्वाद्भविष्यति किमिति प्रार्थ्यत इति चेत्तत्राह–कर्मभिर्भ्राम्यमाणाया इति । जीवभावात् कर्मसम्बन्धः । अन्यथा अन्यसम्बन्धिनी कथं भवेयम् । किमतो यद्येवं तत्राह–येन पादस्पर्शेन तत्प्रसिद्धं ब्रह्मानन्दात्मकं श्रेयो भवति आत्मनः स्वस्यात्मनो वा सप्तैता भक्तिभेदाः–

> **"अर्चनात्मा रुक्मिणी स्यात् श्रवणं तदनन्तरा । सर्वपापक्षयः पूर्वं यस्मादत्र निरूप्यते ॥**
>
> **एकान्ते च प्रदत्तेति तृतीया स्मृतिरुच्यते । चतुर्थ्येव चतुर्थी स्यात् द्वितीया पंचमी मता ॥**
>
> **सर्वान् बलवतो दुष्टान् विनिवर्यैव कीर्तयेत् । षष्ठी तु सप्तमी प्रोक्ता सप्तमी तद्विपर्यया ॥**
>
> **नमने पादसंस्पर्शः प्रतिवारं भवेदिति । सख्यरूपा त्वष्टमीयं महता विनिरूप्यते ॥"॥१६॥**

श्रीसुबोधिनीसारः

सत्या नाग्नजित्याह । अति अतिशयानि बलं वीर्यं सुतीक्ष्णानि शृङ्गाणि च येषां तान् सप्त उक्ष्णो वृषभान् क्षितिप वीर्यस्य परीक्षार्थं पित्रा नग्नजिता कृतान् वीराणां दुर्मदं घ्नन्तीति तान् तरसा वेगेन निगृह्य क्रीडन् बबन्ध मेषबालकान् इव ह स्फुटम् ॥१३॥ एवं वीर्यशुल्कां बलमूल्यां मां दासीभिः सह चतुरंगिणीं सेनां च यो निन्ये पथि मार्गे राजन्यान् निर्जि तस्य दास्यं ममास्तु ॥१४॥ भद्रोक्तिः । हे कृष्णे ! मातुलेयाय मातुलपुत्राय कृष्णाय मे पिता स्वयमाहूय तच्चित्तां कृष्णमनस्कां माम् अक्षौहिण्या सह सखीजनैः सह दत्तवान् ॥१५॥ प्रतिजन्मास्य पादस्पर्शो मे मम कर्मभिर्भ्राम्यमाणायाः स्यात् येन आत्मना तत् श्रेयः पुरुषार्थः ॥१६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ नाग्नजिती स्ववृत्तमाह–सप्तेति । क्षितिपानां राज्ञां वीर्यस्य परीक्षणाय मम पित्रा नग्नजिता कृतान् सम्पादितान्

अतिशयितं बलं वीर्यं प्र
उक्ष्णः वृषभान् तरसा झ
बध्नन्ति तथेति । शिशव
भगवान् इत्थं वृषभदमने
चतुरङ्गणीं गजाश्वादिसेनां
स्वविवाहप्रकारमाह–पिते
अक्षौहिण्या सखीजनैश्च स
अस्येति । कर्मभिर्भ्राम्यमा
हेतुना जीवात्मानः तत् तस्

सप्तेति । कृष्णाय म
वीर्यं प्रभावश्च तीक्ष्णानि शृङ्ग
अश्लेषाभाव आर्षः । यथा शि
निगृह्य दमयित्वा क्रीडन् अन
द्रव्यं यस्यास्तां स्वप्रतिज्ञासि
विशेषणं वा । पथि निरोधं कु
मे मम पिता मम मातुलेया
कृष्णमनस्कां मां दत्तवान् । कै
ममास्य पादसंस्पर्शः पादसंवा
येन हेतुना जीवात्मानः तत् तस्

क्षितिपवीर्यपरीक्षणाय
च अत्युत्कृष्टानि परमाणि एता
क्रीडन् सन् बबन्ध । अजतोका
अजादिपृतनायुक्तां मां स्वपुरीं
अक्षौहिण्या सेनया सह सखीज
ब्रह्मपुरप्राप्तिरूपं श्रेयो भवेत् स

अथ नाग्नजित्यपरनाम्नी
पित्रा नग्नजिता कृतान् सम्पादितान
प्रभावः वीराणां दुर्दुष्टं मदं घ्नन्ति
मेषापत्यानि यथा तथा तरसा आशु
भगवान् पथि युद्धे राजन्यान् निर्जि

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अतिशयितं बलं वीर्यं प्रभावश्च सुतीक्ष्णानि शृङ्गाणि च येषां तान्, वीराणां दुष्टं मदं घ्नन्तीति तथाभूतान्, तथा लोकप्रसिद्धान् सप्त उक्ष्णः वृषभान् तरसा झटिति निगृह्य क्रीडन् अनायासेनैव बबन्ध। तत्र दृष्टान्तमाह- यथा शिशवो बाला अजतोकान् अजापत्यानि बध्नन्ति तथेति। शिशव इत्यनेन भगवतोऽपि बहुरूपधारणं सूचयति। भगवत्प्रभावस्याश्चर्यं सूचयति-हेति ॥१३॥ ततश्च यो भगवान् इत्थं वृषभदमनेन वीर्यं स्वप्रभावप्रदर्शनमेव शुल्कं देयं द्रव्यं यस्यास्तां स्वप्रतिज्ञासिद्धौ पित्रा दत्तां मां दासीभिः सह चतुरङ्गिणीं गजाश्वादिसेनां चादाय पथि निरोधं कुर्वतो राजन्यान् निर्जित्य निन्ये द्वारकामानीतवान्, तस्य दास्यं ममास्तु ॥१४॥ भद्रा स्वविवाहप्रकारमाह-पितेति। हे कृष्णे द्रौपदि! मे मम पिता मम मातुलेयाय मातुः श्रुतकीर्तेर्भ्रातृपुत्राय कृष्णाय स्वयमेव तमाहूय अक्षौहिण्या सखीजनैश्च सह मां दत्तवानित्यन्वयः। एवं दाने हेतुमाह-तच्चितामिति ॥१५॥ विवाहप्रकारमुक्त्वा स्वमनोरथमाह-अस्येति। कर्मभिर्भ्राम्यमाणाया मे ममास्य पादसंस्पर्शः पादसंवाहनादिपरिचर्या प्रतिजन्म भवेत्। एवं प्रार्थनायां हेतुमाह-येन हेतुना जीवात्मानः तत् तस्य पादस्पर्शनमेव श्रेयः परमं फलमिति ॥१६॥

अन्वितार्थप्रकाशिका

सप्तेति। कृष्णाय मां दातुं क्षितिपानां राज्ञां वीर्यस्य परीक्षणाय मम पित्रा नग्नजिता कृतान् सम्पादितान्, अतिशयितं बलं वीर्यं प्रभावश्च तीक्ष्णानि शृङ्गाणि च येषां तान् वीराणां दुष्टं मदं घ्नन्तीति तथाभूतान् लोकप्रसिद्धान् सप्त उक्ष्णः वृषभान्। उभयत्र अल्लोपाभाव आर्षः। यथा शिशवो बाला बहुत्वं दार्ष्टान्तिके सप्तधा भवनात् अजतोकान् अजापत्यानि बध्नन्ति तथा तरसा झटिति निगृह्य दमयित्वा क्रीडन् अनायासेनैव बबन्ध ॥१३॥ य इति। यो भगवान् इत्थं वृषभदमनेन वीर्यं स्वप्रभावदर्शनमेव शुल्कं देयं द्रव्यं यस्यास्तां स्वप्रतिज्ञासिद्धौ पित्रा दत्तां मां दासीभिः सह चतुरङ्गिणीं गजादिसेनां चादाय चतुरङ्गसेनायुक्तामिति मामित्यस्य विशेषणं वा। पथि निरोधं कुर्वतो राजन्यान् निर्जित्य निन्ये द्वारकामानीतवान् तस्य दास्यं ममास्तु ॥१४॥ पितेति। हे कृष्णे द्रौपदि मे मम पिता मम मातुलेयाय मातुः श्रुतकीर्तेर्भ्रातृपुत्राय कृष्णाय स्वयमेव तमाहूय अक्षौहिण्या सखीजनैश्च सह मां तच्चित्तां कृष्णमनस्कां मां दत्तवान्। कैकेयीं भ्रातृभिर्दत्तामिति पूर्वोक्तौ प्रतिश्रुतामिति व्याख्येयम् ॥१५॥ अस्येति। कर्मभिर्भ्राम्यमाणाया मे ममास्य पादसंस्पर्शः पादसंवाहनादिपरिचर्या प्रतिजन्म भवेत्। येन पादस्पर्शेन आत्मनो मे तत् कैवल्याख्यं श्रेयो भवेत्। यद्वा। येन हेतुना जीवात्मानः तत् तस्य पादस्पर्शनमेव श्रेयः परमं फलम् ॥१६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्षितिपवीर्यपरीक्षणाय मे पित्रा कृतान् समूहीकृतान् वीराणां दुर्मदं घ्नन्तीति तान् बलं च वीर्यं प्रभावश्च सुतीक्ष्णशृङ्गाणि च अत्युत्कृष्टानि परमाणि एतानि येषां तान्। सप्त उक्षणः उक्ष्णः वृषभान् एतैर्लक्षणैः तान् प्रसिद्धान् तरसा तूर्णमेव निगृह्य क्रीडन् सन् बबन्ध। अजतोकान् शिशवो यथा तथा ॥१३॥ वीर्यमेव शुल्कं देयमूल्यं यस्यास्ताम्। दासीभिः सह चतुरंगिणीम् गजादिपृतनायुक्तां मां स्वपुरीं निन्ये तद्दिनमारभ्य तद्दास्यं मे अस्तु ॥१४॥ हे कृष्णे द्रौपदि! तच्चित्तां कृष्णासक्तचित्तां माम् अक्षौहिण्या सेनया सह सखीजनैः दासीभिश्च सह मे पिता दत्तवान् ॥१५॥ येन चरणसंस्पर्शेन। आत्मनो जीवस्य तत् स्वरूपप्राप्तिरूपं श्रेयो भवेत् स पादस्पर्शः मे भवेत् ॥१६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ नाग्नजित्यपरनाम्नी सत्या गायति ॥ सप्तेति ॥ क्षितिपा राजानस्तेषां वीर्यपरीक्षणाय वीर्यपरीक्षां कर्तुमित्यर्थः ॥ मम पित्रा नग्नजिता कृतान् सम्पादितान् बलं च वीर्यं च सुतीष्णशृङ्गाणि च अत्यतिशयितानि बलादीनि येषां तान् तत्र बलं शारीरं वीर्यं प्रभावः वीराणां दुर्दुष्टं मदं घ्नन्तीति तथाभूतान् तान् प्रसिद्धान् सप्त सप्तसंख्याकान् उक्षणो वृषभान् शिशवो बालाः अजतोकान् अजापत्यानि यथा तथा तरसा आशु निगृह्य दमयित्वा क्रीडन् अनायासेनैवेत्यर्थः। बबन्ध ह प्रसिद्धमेतत् ॥१३॥ य इति ॥ इत्थं यो भगवान् पथि युद्धे राजन्यान् निर्जित्य वीर्यमेव शुल्कं देयद्रव्यं यस्यास्तां दासीभिः सह चतुरंगिणीं गजाश्वादिचतुरङ्गसेनायुक्तां मां

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निन्ये । मे मम तद्दास्यं तस्य भगवतो दास्यम् अस्तु । इति प्रार्थना ॥१४॥ भद्रागायनमाह पितेति द्वाभ्याम् ॥ पितेति ॥ हे कृ द्रौपदि ! मे इति पूर्वोत्तरान्वयि पवम् । मे मम पिता स्वयम् आहूय मे मम मातुलेयाय मातुलसुताय श्रीकृष्णाय तस्मिन् श्रीकृ एव चित्तं यस्यास्तां माम् अक्षौहिण्या सखीजनैश्च सह दत्तवान् ॥१५॥ अस्येति ॥ अस्य श्रीकृष्णस्य पादसंस्पर्शः पादसंवाहनादिपरि मे मम जन्मनि जन्मनि प्रतिजन्म भवेत् । इत्थम्भूतप्रार्थनायां हेतुत्वेन पादसंस्पर्शं विशिनष्टि । येन तत्पादसंस्पर्शेन कर्मभिः पुण्यपापात्मकैः भ्राम्यमाणायाः संसरन्त्याः आत्मनः मम तत् ब्रह्मभावेन तत्सेवाप्तिरूपं श्रेयः भवेत् ॥१६॥

कृष्णप्रिया

श्रीसत्याजीने कहा - द्रौपदीजी ! मेरे पितृचरणोंने मेरे स्वयंवरमे उपस्थित नरपतियोंके बल वीर्यके परीक्षाके लिये अत्यंत बलिष्ठ और पराक्रमी, तीक्ष्ण श्रृंगोवाले सात बैल रख छोडेथे । उन बैलोंने सम बलवान वीरोंका घमंड चूर्ण कर दिया था । उन बैलोंको भगवानने आसानीसे खेल-खेलमें ही झपटकर पक लिया आरे नाथ लिया पुनः बांध लिया - जैसे छोटे छोटे बालक बकरीके बच्चोंको पकडले और बांध ले है ॥१३॥ इस प्रकार वीर्य शुल्का पराक्रम शुल्का मुझे प्राप्त कर चतुरंगीणी सेना और दासियोंके साथ द्वारिक ले आये । मार्गमें जिन नरपतियोंने विघ्न किया उन्हेंभी भगवानने जीत लिया । अब तो मेरी यही मनोवांछ है कि मुझे उनके श्रीचरणोंकी सेवाका सुअवसर नित्य निरंतर उपलब्ध हो ॥१४॥ श्रीभद्राजीने निवेदन कि - हे द्रौपदीजी ! भगवान मेरे मातुलेय होते है । मेरा मन इनके श्रीचरण कमलोंमें अनुरक्त हो गया था । मे पितृचरणोने जब यह वार्ता जानी, तब उन्होंने भगवान श्रीकृष्णको आदर मानके साथ निमंत्रित कर अक्षौहिणी सेना और बहुत दासियों के साथ मुझे इनके चरणकमलोंमे समर्पित किया ॥१५॥ मैं मेरा प कल्याण इसीमें मानती हुं कि प्रारब्धके अनुसार मुझे जहां जहां जन्म मिले सर्वत्र भगवान श्रीकृष्ण के च कमलोंका स्पर्श एवं सेवा समुपलब्ध हो ॥१६॥

लक्ष्मणोवाच

ममापि राज्ञ्यच्युतजन्मकर्म श्रुत्वा मुहुर्नारदगीतमास ह ।
चित्तं मुकुन्दे किल पद्महस्तया वृतः [1]सुसंमृश्य विहाय लोकपान् ॥१
ज्ञात्वा मम मतं साध्वि पिता दुहितृवत्सलः । बृहत्सेन इति ख्यातस्तथो[2]पायमचीकरत् ॥१
यथा स्वयंवरे राज्ञि मत्स्यः पार्थेप्सया कृतः । अयं तु बहिराच्छन्नो दृश्यते स जले परम् ॥१
श्रुत्वैतत् सर्वतो भूपा आययुर्मत्पितुः पुरम् । सर्वास्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाः सहस्रशः ॥१

कर्दमक्षमा

लक्ष्मणा, उवाच ।

हे, राज्ञि, मुहुः, नारदगीतम्, अच्युतजन्मकर्म, श्रुत्वा, मम, अपि, चित्तम्, किल, मुकुन्दे, आस, ह, पद्महस्तया, सु लोकपान्, विहाय, वृतः ॥१७॥ हे, साध्वि, मम, मतम्, ज्ञात्वा, दुहितृवत्सलः, बुहत्सेनः, इति, ख्यातः, तथा, उपायम्, अचीक राज्ञि, पार्थेप्सया, यथा, मत्स्यः, स्वयंवरे, कृतः, तथा, मम, अपि, स्वयंवरे, कृतः, अयं, तु, बहिः, सम्पूर्णः, आच्छन्नः, सः, स दश्यते, एतत्, श्रुत्वा, सर्वास्त्रशस्त्रतत्त्वज्ञाः, सहस्त्रशः, सोपाध्यायाः, नृपाः, मत्पितुः, पुरम्, आययुः ॥१८-२०॥

---

१. वृतःस्वयं यस्तु-विज. । २. तत्रो-श्रीधर. वंशी. वीर. विज. शुक. जीव. ।

राज्ञि हे द्रौपदि
किलातोऽपि मम चित्तं
पार्थस्येप्सया आप्तुमिच्छ
अयान्त्विति । स मत्स्यो
केवलं दृश्यतेऽतो दृष्टिरध

अतः लक्ष्मीवरण
“पार्थो यतोऽसृजद्बाणं ना
दीर्घस्थूणशिखरेऽवलम्बित
अलक्ष्यलक्ष्यभेदने तु पार्थो
भगवानेव समर्थ इति तात्प

इति सर्वोपरि परमा
प्रकृष्टमिव मन्वानां तर्कयन्ती
निजविवाहवृत्तं विस्तार्याह–म
बकारद्रूपादिकं च ननु, मातुल
नारदेति । मुहुरित्यस्योभयतोऽ
तत्रात्मनो विचारमाह–किलेति
श्रीब्रह्मरुद्रादीन् विशेषेण दृक्पा
तस्मिन्नेव चित्तमभूदिति भावः
लोकपान् महाभूपतीन् विहाय
भविष्यति । मतं निश्चयम् ॥१७–
इति पाठे यथा पार्थेषुणा तथा कृ
एवावरणं भित्त्वा तन्मात्रमेव छे
मत्पितृकृतस्ततोऽपि दुर्वेध इत्या
साक्षाददर्शनात् बिम्बदर्शनमात्रेण

एवं ज्येष्ठानां सप्तानामुत्तर
जन्म तथा रीदेवक्यामाविर्भावम्,
इति रूपदिकमपि सूचितमेव । न
श्रुतमित्यपेक्षायामाह–नारदेति । मुहु
सुध्यत एवेति भावः । ननु बहुवल्ल
किलेति । पद्महस्तयेति दैदग्ध्यादिकं

।। पितेति ।। हे कृष्णे
णाय तस्मिन् श्रीकृष्णे
पादसंवाहनादिपरिचर्या
ादसंस्पर्शेन कर्मभिः
।।

तियोंके बल वीर्यकी
। उन बैलोने समर्थ
नें ही झपटकर पकड
कडले और बांध लेते
सियोंके साथ द्वारिका
मेरी यही मनोवांछा
द्राजीने निवेदन किया
क्त हो गया था। मेरे
साथ निमंत्रित करके
।।१५।। मैं मेरा परम
ान श्रीकृष्ण के चरण

।।१७।।
पायमचीकरत् ।।१८।।
स जले परम् ।।१९।।
ाया: सहस्रशः ।।२०।।

स, ह, पद्महस्तया, सुसंमृश्य,
तथा, उपायम्, अचीकरत्,
:, आच्छन्नः, सः, परम्,
८-२०।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

राज्ञि हे द्रौपदि ! यथा मित्रविन्दायास्तथैव ममापि चित्तं मुकुन्दविषयमासीत् सुसम्मृष्य सुविचार्य पद्महस्तया श्रिया वृतः कलातोऽपि मम चित्तं श्रीमुकुन्दे आसेति ।।१७।। तत्र श्रीकृष्णप्राप्तावुपायमचीकरत्कारयामास ।।१८।। यथा राज्ञि ! तव स्वयंवरे पार्थेप्सया आप्तुमिच्छया कृतस्तथा मत्स्यं कारितवान् पाठान्तरे पार्थस्येषुणाऽपाकृतः तर्हीमामप्यर्जुन एव किं नाविध्यत्तत्राऽऽह-आन्त्विति । स मत्स्यो बहिरेवाच्छन्नो नान्तरतः स्तम्भलग्नयोर्ध्वदृष्ट्या संलक्ष्यतेऽयं तु न तथा किन्तु स्तम्भमूले निहितकलशजले केवलं दृश्यतेऽतो दृष्टिरधस्तादुपरि च लक्ष्यमिति श्रीकृष्णव्यतिरेकेण न कस्यापि भेद्य इति भावः ।।१९-२०।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अतः लक्ष्मीवरणादेव ।।१७।। कृष्णं विना नान्यं वृणोमीति मम मतम् ।।१८।। पाठान्तरे पार्थेष्वपाकृत इति पाठेऽपाकृतश्चालितः "पार्थो यतोऽसृजद्बाणं नाच्छिनत् पस्पृशे परम्" इति वक्ष्यमाणत्वात् । स मत्स्यस्तव स्वयंवरमत्स्यः । अयं यो मत्स्वयंवरे कृतो स्तम्भस्थूणाशिखरेऽवलम्बितः बहिराच्छन्नः काचकरण्डिकादिनाऽऽच्छादितः । यतो जल एव दृश्यतेऽतो हेतोः । इति भाव इति-तादृशलक्ष्यभेदने तु पार्थोऽपि शक्त एव तथापि लक्ष्मणाया लक्ष्म्यंशत्वेन कृष्णं विनाऽन्यस्य प्राप्तुमयोग्यत्वात्ततो न बिभिदेऽतो भगवानेव समर्थ इति तात्पर्यम् ।।१९।। एतन्मत्स्यस्वयंवरम् ।।२०।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति सर्वोपरि परमानन्दमयमपि निजभागधेयविशेषकथनं ताभिर्लज्जया सङ्क्षिप्तं मन्वाना तत्र च श्रीद्रौपदीं निजविवाहोद्यमं श्रोतुमिव मन्वानां तर्कयन्ती तद्द्वयमपि परमतन्मदेन सहमाना तासां ज्येष्ठानां सप्तानाम् उत्तरसमाप्ताववकाशं प्राप्य सङ्कोचेन निजविवाहवृत्तं विस्तार्याह-ममेति । अच्युतस्य सर्वैश्वर्यपरिपूर्णस्य जन्म श्रीदेवक्यां तादृशमाविर्भावं कर्म च श्रीगोकुलक्रीडादिकं च रूपादिकं च ननु, मातुलेयत्वेन निकटत्वात्तस्य जामादिज्ञानेन भद्रायास्तच्चित्तता घटेतैव त्वया तु कथं श्रुतमित्यपेक्षायामाह-नारदेति । मुहुरित्यस्योभयतोऽप्यन्वयः । ह हर्षे । ननु बहुवल्लभेऽस्मिंश्चित्तमयुक्तं सत्यं विचारेण तन्मात्रैकगतित्वादित्याशयेन तत्रात्मनो विचारमाह-किलेति । पद्महस्तयेति वैदग्ध्यादिकं ध्वनितं तच्च सुशब्देन संशब्देन च समर्थितमपि अत एव लोकपान् ब्रह्मरुद्रादीन् विशेषेण दृक्पाताद्यकरणेनापि किंवा विदूर एव हित्वा वृतो मुकुन्द एव क्षीरोदमथने अतो ममापि तादृशविचारेण तत्रैव चित्तमभूदिति भावः । यद्वा, मम चित्तं मुकुन्दे आस अतः सुसम्मृश्य चित्तावतरणेन तमेव निश्चित्य विलासेन पद्महस्तया लोकपान् महाभूपतीन् विहाय मयाऽसौ वृतः एवमपि श्लेषेण तद्दृष्टान्तत्वं ध्वनितम् इति प्रथमं संक्षेपेणोक्तिः पश्चाद्विस्तरेण वक्ष्यति । मतं निश्चयम् ।।१७-१८।। उपायमेवाह-यथेति । यादृशः कृतस्त्वत्पित्रा तादृशः कृतो मत्पित्रापीत्यर्थः । पार्थेषुणापाकृत इति पाठे यथा पार्थेषुणा तथा कृतः तथा श्रीभगवदिषुणेत्यर्थः । यद्यपि स्तम्भमूलत एवोर्ध्वदृष्ट्या दृश्योऽसौ ततो दृष्ट्वापि दूरत एव लक्ष्यं भित्त्वा तन्मात्रमेव छेत्तव्यमिति समयेन पश्चाद्भ्राम्यत्तदनुसन्धानस्य दुष्करत्वात्त्वत्पितृकृतोऽपि दुर्वेध एव तथाप्ययं मत्पितृकृतस्ततोऽपि दुर्वेध इत्याह-अयं त्विति । सजले जलपरिपूर्णपरिखामण्डले जलगर्तमध्यस्थस्य स्तम्भमूलस्यागम्यत्वेन तत्र दर्शनात् बिम्बदर्शनमात्रेण पूर्वमपि तदवस्थितिप्रदेशानिश्चयादिति भावः ।।१९।। एतदाश्चर्यं लोभनं च ।।२०।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं ज्येष्ठानां सप्तानामुत्तरसमाप्ताववकाशं प्राप्यासङ्कोचेन निजविवाहवृत्तं विस्तार्याह-ममेति । अच्युतस्य सर्वैश्वर्यपरिपूर्णस्य जन्म तथा श्रीदेवक्यामाविर्भावम्, कर्म च गोकुलक्रीडादिकम्, च-काराद्रूपादिकं च । यद्वा, मुकुन्दे रूपगुणादिना परमानन्दप्रद इत्यर्थात् रूपादिकमपि सूचितमेव । ननु मातुलेयत्वेन निकटत्वात्तस्य जन्मादिज्ञाने श्रीभद्रायास्तच्चित्तता घटेतैव, त्वया तु कथं श्रुतमित्यपेक्षायामाह-नारदेति । मुहुरित्यस्योभयतोऽप्यन्वयः । ह हर्षे, हे राज्ञीति-एतच्च घटेतैवेति । त्वया महाराजमहिषीत्वेन श्रुतमेवेति भावः । ननु बहुवल्लभेऽस्मिंश्चित्तमयुक्तम्, सत्यम् । विचोण तन्मात्रैकगतित्वादित्याशयेन; तत्रात्मनो विचारमाह-किलेति । पद्महस्तयेति दैदग्ध्यादिकं ध्वनितम् । तच्च सु-शब्देन च समर्पितमेव, अत एव लोकपान् श्रीब्रह्मरुद्रादीन्, विशेषेण

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दृक्पाताद्यकरणेनापि, किंवा विदूरत एव हित्वा वृतो मुकुन्द एव, अतो ममापि तादृशविचारेण तस्मिन्नेव चित्तमभूदिति भावः। यद्वा, मम चित्तं मुकुन्द आस, अतः सुसंमृश्य चित्तावतरणेन तमेव निश्चित्य विलासेन पद्महस्तया लोकपान् महाभूपतीन् विहा मयासौ वृत इति प्रथमं सङ्क्षेपेणोक्तिः, पश्चाद्विस्तरेण भविष्यति ॥१७॥ मतमिच्छामित्यर्थः । हे साध्वीति त्वादृशीनां साध्वीनामीदृशीच्छ स्यादेवेति; यद्वा, साध्वीत्वेन त्वयि त्वत्पिता यथा वत्सलस्तथा ममापीति भावः । अतोऽचीकरत् ॥१८॥ उपायमेवाह-यथेति यादृशः कृतस्तत्पित्रा, तादृशः कृतो मत्पित्रापीत्यर्थः । पाठान्तरेऽपि स एवार्थः । किन्तु अयं ततोऽपि महाविषम इत्याह अयस्त्विति। धनुश्च सशरं गुरुतरं तद्वेधार्थं निर्माय नयस्तमस्तीति ज्ञेयम्। अन्यत्तैर्व्याख्यातम्। यद्वा, अयं त्वत्पित्रा कृतः, आच्छ दुर्ज्ञेयोऽपि जलाद्बहिः स्तम्भोपरि दृश्यते; स मत्पित्रा कृतः, जलान्तरेव दृश्यते, न बहिरिति । अन्यत् समानम् ॥१९॥ सर्वतः सर्वदेशेभ्यः, सोपाध्याया धनुर्विद्यागुरुभिः सहिताः-तदुपायस्य दुर्वितर्क्यत्वात् ॥२०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

बहिश्चान्तःप्रतिबिम्बस्य बिम्बभूतो मत्स्यस्तिरोहितः मत्स्यप्रतिबिम्बत्वेन जलं दृश्यते प्रतिबिम्बेन बिम्बभूतं मत्स्यावस्थानं निरूप्य तत्र वधो दुष्करः मत्स्यप्रतिबिम्बम् ॥१९-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अथ लक्ष्मणागीर्तिं प्रपञ्चयति-ममापीत्यादिना । हे राज्ञि ! नारदेन गीतमच्युतस्य जन्मादिकं श्रुत्वा ममापि यथा मित्रविन्दायास्तथा ममापि चित्तं मुकुन्दे आसीदित्यर्थः । पद्महस्तया श्रिया तदवताररूपया रुक्मिण्येत्यर्थः । वृतः किल अतोऽ सुष्ठु विचार्य मम चित्तं मुकुन्दे आसेति सम्बन्धः ॥१७॥ ज्ञात्वेति । हे साध्वि ! मम तमभिप्रायं ज्ञात्वा मम पिता बृहत्सेनो न दुहितृवत्सलः अतस्तत्र श्रीकृष्णप्राप्तावुपायमचीकरत् कारयामास ॥१८॥ कोऽसावित्यतस्त्वं प्रपञ्चयति-यथेति । हे राज्ञि ! यथा तव स्वयंवरे पार्थेप्सया अर्जुनप्राप्तीच्छया त्वत्पित्रा मत्स्यः कृतः तथा अस्मत्पित्राऽपि कृत इत्यर्थः । तर्ह्यर्जुन एव किं नाविध्यत्तत्राह- अयं त्विति । स मत्स्यो बहिरेवाच्छन्नो नान्तः स्तम्भसंलग्नोर्ध्वदृष्ट्या दृश्यते अयं तु न तथा किन्तु स्तम्भमूलनिहितकलशजले केवलं दृश्यते अतो दृष्टिरधस्तात् उपरि च लक्ष्यमिति कृष्णमन्तरेण न कस्यापि भेद्य इति भावः । बहिराच्छन्नप्रतिबिम्बस्य बिम्बभूतः मत्स्यस्तिरोहितः स मत्स्यप्रतिबिम्बजले दृश्यते प्रतिबिम्बेन बिम्बभूतमत्स्यावस्थानं निरूप्य तत्र वेधो दुष्कर इति व्याख्यानान्तरम् ॥१९॥ श्रुत्वेति । एतन्मत्स्ययन्त्रनिर्माणं श्रुत्वा सर्वतो दिग्भ्यः मत्पितुः पुरमाजग्मुः कथम्भूताः ? सर्वे शस्त्राणामस्त्राणां च तत्त्वं याथात्म्यं प्रयोगोपसंहारौ जानन्त इति तथा उपाध्यायैः सहिताश्च ॥२०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१६-२८॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

लक्ष्मणा परिपाट्यानुपूर्व्येण कथयति-ममापीत्यादि । अपिशब्दः सविशेषकथनार्थं मया तु स्वयमेवासौ वृतः हे द्रौपदि ! तत्प्रकारमानुपूर्व्येण शृण्विति भावः ॥१७-१८॥ यथा स्वयंवरे राज्ञीति पुना राज्ञीति सम्बोधनान्तरं हर्षोत्कर्षद्योतकं तव स्वयंवरे तव पित्रा पार्थेच्छया मत्स्यः कृतः तथा मत्पित्रापि मम कृष्णे किन्त्वियान् विशेषः स तु बहिर्दृश्यते अयं तु आ परं केवलं जले दृश्यत इति भावः ॥१९-२७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ममापीति । अपि-शब्दकरणं सर्वासां सामान्यकथने विशेषकथनार्थम् ॥१७॥ ॥१८॥ हे राज्ञि ! यथा तव स पार्थेप्सया मत्स्यः कृतः, तथा ममापि कृतेप्सया पित्रा कृत इत्यर्थः । किन्त्वियान् विशेषः-स तु बहिर्दृश्यते, अयं तु आच्छ जले परं केवलं दृश्यते इति भावः ॥१९॥

हे राज्ञि ! मुकुन्दे
अर्जुनप्राप्तीच्छया कृतः पार्थे
अयं तु परमचञ्चलो मत्स्यः
लक्ष्यमिति कृष्णव्यतिरेके
ऊर्ध्वदृष्ट्या संलक्ष्यत एवे

हे राज्ञि ! यथा मि
च श्रुत्वा । ततः पद्महस्तया
मत्स्यः बहिरेव आच्छन्नः
निहितकलशजले एव परं के
॥१९॥ अस्त्रं मन्त्राभिमन्त्रित

आस आसीत् ॥१
कृतः तव स्वयंवरे तथा मम
बहिराच्छन्नः अयं मम स्व
साक्षाद्द्रष्टुमनर्हः अतस्तच्छेदे

लक्ष्मणा स्ववृत्तान्तं द्रौ
ततोऽप्यधिकश्चेत् भगवत्कृतोऽ
प्राप्नोति यस्य जन्मप्रभृति जन्म
भजनीयत्वे मुख्यो हेतुः जन्म भ
प्रमाणानुवृत्तिरुक्ता । मुकुन्दे चित्त
योगिगम्यः कथं स्त्रीमात्रस्य वरण
विचार्य ग्रहणं निरूपितम् । ननु ता
सुदुष्टा इति ज्ञापितम् ॥१७॥ यत्प
पणबन्धो महान् कर्तव्य इति मम पि
तमुपायमाह-यथा स्वयंवर इति । प
बहिर्दृश्यते । परं जले तस्य प्रतिच्छ
पार्थस्याप्यगम्यं भविष्यतीति पितुरि
सर्वास्त्रशस्त्रतत्त्वज्ञा इति । अस्त्रशस्त्रय
अस्मिन् वा शस्त्रे योजिते लक्ष्यवेध इ
स्वतस्तेभ्यो आदानेऽपि प्रतिष्ठा न भव
वयश्च मिलितम् अन्यथा तदुपाध्याय
आदाने हेतुः वेद्धं पर्षदि सभायां यतो

चित्तमभूदिति भावः ।
यान् महाभूपतीन् विहाय
शीनां साध्वीनामीदृशीच्छा
८॥ उपायमेवाह-यथेति
ऽपि महाविषम इत्याह-
त्वत्पित्रा कृतः, आच्छन्नो
् समानम् ॥१९॥ सर्वतः

बेन बिम्बभूतं मत्स्यावस्थानं

मादिकं श्रुत्वा ममापि यथा
त्यर्थः । वृतः किल अतोऽपि
त्वा मम पिता बृहत्सेनो नाम
ति-यथेति । हे राज्ञि ! यथा तव
र्ह्यर्जुन एव किं नाविध्यत्तत्राह-
तु स्तम्भमूलनिहितकलशजले
वः । बहिराच्छन्नप्रतिबिम्बस्य
निरूप्य तत्र वेधो दुष्कर इति।
नाजग्मुः कथम्भूताः ? सर्वेषां

८॥

नया तु स्वयमेवासौ वृतः हे राज्ञि
म्बोधनान्तरं हर्षोत्कर्षद्योतकं यथा
स तु बहिर्दृश्यते अयं तु आच्छन्नं

१८॥ हे राज्ञि ! यथा तव स्वयंवरे
तु बहिर्दृश्यते, अयं तु आच्छन्नः स

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हे राज्ञि ! मुकुन्दे चित्तम् आसीत् अतः पद्महस्तया मया लोकपालानपि विहाय मुकुन्द एव वृतः ॥१७-१८॥ पार्थेप्सया अर्जुनप्राप्तीच्छया कृतः पार्थेष्वपाकृतः इति पाठे पार्थस्य इषुणा अपाकृतः विद्धः तर्हीममप्यर्जुन एव किं नाविध्यदित्यतो विशेषमाह-अयं तु परमचञ्चलो मत्स्यः सजले स्तम्भमूलगतजलसहितकलशे परं केवलं दृश्यते न तूर्ध्वमित्यन्वयः । अतो दृष्टिरधस्तादुपरि च लक्ष्यमिति कृष्णव्यतिरेकेण न कस्यापि भेद्य इति भावः । तेन त्वत्पितृकृतो मत्स्यः खलु बहिराच्छन्नोऽपि स्तम्भसंलग्नया ऊर्ध्वदृष्ट्या संलक्ष्यत एवेति तदनुसन्धानचतुरेणार्जुनेन स विद्ध एवेति भावः ॥१९-२०॥

गूढार्थदीपिनी

हे राज्ञि ! यथा मित्रविन्दायास्तथा ममापि चित्तं मुकुन्दे आसेत्यन्वयः । किं कृत्वा । नारदगीतं अच्युतस्य जन्म कर्म च श्रुत्वा । ततः पद्महस्तया लक्ष्म्या इव मयापि स वृतः । हेति हर्षे ॥१७॥ तत्र श्रीकृष्णप्राप्तौ ॥१८॥ अयं तु पार्थेप्सया कृतो मत्स्यः बहिरेव आच्छन्नः नान्तः अतः स्तम्भलग्नया ऊर्ध्वदृष्ट्या संलक्ष्यते । मत्पित्रा कृतस्तु न तथा किन्तु स्तम्भमूले निहितकलशजले एव परं केवलं दृश्यते अतो दृष्टिरधस्तात् उपरि च लक्ष्यमिति श्रीकृष्णव्यतिरेकेण न कस्यापि भेद्यो भवेत् ॥१९॥ अस्त्रं मन्त्राभिमन्त्रितम् । शस्त्रं तद्रहितम् ॥२०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

आस आसीत् ॥१७॥ तत्र मुकुन्दप्राप्तौ अचीकरत् कारयामास ॥१८॥ पार्थेप्सया अर्जुनप्राप्तीच्छया यथा मत्स्यः तः तव स्वयंवरे तथा मम स्वयंवरेऽपीति तर्ह्यर्जुन एव किं नाविद्ध्यदित्यत्राह-तुशब्दो विशेषं दर्शयति तव स्वयंवरे बहिराच्छन्नः अयं मम स्वयंवरे प्रकृत(सु)सजले स्तम्भमूलपात्रे प्रतिबिम्बरूपेण परं केवलं दृश्यते बहिराच्छन्नः साक्षाद्द्रष्टुमनर्हः अतस्तच्छेदे श्रीकृष्ण एव समर्थ इति भावः ॥१९-२०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

लक्ष्मणा स्ववृत्तान्तं द्रौपद्यभिमाननाशायाह-ममापीति । सा हि स्वविवाहमुत्कृष्टं मन्यते । राधावेधो हि दुर्लक्ष्यो भवति । लोऽप्यधिकश्चेत् भगवत्कृतोऽपि भवेत् । ततो भर्तृसख्यं विहाय भगवत्सखी भवेदिति सा प्रथमं स्वमनःप्रीतिमाह-स एव सख्यं प्नोति यस्य जन्मप्रभृति जन्मान्तरेषु वा भगवत्येव चित्तं भवति । हे राज्ञीति सावधानतया श्रवणार्थं सम्बोधनम् । अच्युतत्वं भजनीयत्वे मुख्यो हेतुः जन्म भक्तोद्धारार्थमेव । कर्म तु भक्तकार्यार्थमेवेति श्रुत्वा कुलशीलौ वा मुहुर्नारदगीतमिति निर्धारार्थं प्रमाणानुवृत्तिरुक्ता । मुकुन्दे चित्तमासेति तदेकप्रवणं जातम् । अच्युतत्वादैहिकसुखदातृत्वं मुकुन्दत्वान्मोक्षदातृत्वमिति तथापि योगिगम्यः कथं स्त्रीमात्रस्य वरणीयो भवेत्तत्राह-पद्महस्तया किल वृत इति । पद्मं हस्ते यस्या इति दीपमिव गृहीत्वा सर्वं दृष्ट्वा विचार्य ग्रहणं निरूपितम् । ननु तावता किं त्वयाऽन्यो ग्राह्य इति चेत्तत्राह-विहाय लोकपानिति । अन्ये लोकपालाः अप्रयोजकाः मुख्य इति ज्ञापितम् ॥१७॥ यत्परं मनस्तस्मै देयमिति स्वयं दाने लज्जा भवतीति साधारणस्वयंवरे च यः कश्चिद्ग्रहीष्यतीति यत्नो महान् कर्तव्य इति मम पिता मन्मतं ज्ञात्वा दुहितृवत्सलः यथा भगवानेव सिद्धो भवति तथोपायं कृतवानित्यर्थः ॥१८॥ तमुपायमाह-यथा स्वयंवर इति । पार्थेप्सया अर्जुन एव गृह्णात्विति ततोऽपि मदीयो विशिष्ट इत्याह-अयं तु बहिराच्छन्न इति । स तु बहिर्दृश्यते । परं जले तस्य प्रतिच्छाया उपलभ्यत इत्यर्थः । मदीयस्य तु जलेऽप्युपलम्भो नास्ति । सर्वथा बहिराच्छन्न एव अतः सर्वेषामप्यगम्यं भविष्यतीति पितुरभिप्रायः ॥१९॥ ततः सर्वे बलोन्नद्धाः समागता इत्याह-श्रुत्वैतदिति । आगमने तेषां बलमाह-कुशलतत्त्वज्ञा इति । अस्त्रशस्त्रयोर्वैदिकलौकिकयोः क्षेपाक्षेपरहितयोर्वा तत्त्वं स्वरूपम् अत्र स्थित्वा प्रक्षेपे एवं लक्ष्यं भवतीति अस्मिन् वा शस्त्रे योजिते लक्ष्यवेध इति अकस्माद्विस्मरणे सभाकम्पे वा सोपाध्यायाः सहस्रश इति एकस्य भङ्गे अपरो ग्रहीष्यतीति सकलेभ्यो आदानेऽपि प्रतिष्ठा न भवतीति समागताः सर्व एव पित्रा पूजिताः । परं तारतम्यानुसारेण तत्र तरतमभावे नियामकं वीर्यं मिलितम् अन्यथा तदुपाध्यायानामेव पूजनं स्यात् । तत्रैव भगवन्मन्त्राभिमन्त्रितं धनुः शरश्च तत्रैव स्थापितं ते समाददुः । हेतुः वेद्धं पर्षदि सभायां यतो मद्धियः मत्कामाः ततस्तेषां भङ्गप्रकारमाह-धनुरेवादाय केचिद्व्यसृजन् । तत्र हेतुः

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सज्जीकर्तुमनीश्वरा इति । केचित्पुनः वेधमात्रमेव पणीकृतमिति सज्जकरणमप्रयोजकमिति । अन्यैर्बहुभिर्वा सज्जीकृत धनुः आदाय कोष्ठपर्यन्तं ज्यामाकृष्य अमुना धनुषा हताः सन्तः पतिताः कर्णान्तं ज्याकर्षणं कर्तव्यं कोष्ठप्रदेशे तु ज्या तिष्ठ तस्यैवान्ते समीपे कथञ्चिदानीतवन्तः तावतैव बलक्षयो जातः । तथैव इति पतिताः तदनन्तरं स्वोपरि पतितेन हता इत्यर्थः ॥२०-२

श्रीसुबोधिनीसारः

लक्ष्मणोक्तिः । हे राज्ञि ! नारदेन गीतम् अच्युतस्य जन्म कर्म श्रुत्वा मुहुरसकृत् मे मम चित्तं मुकुन्दे श्रीकृष्णे आस सुसंमृश्य सुविचार्य लोकपालकान् त्यक्त्वा पद्महस्तया लक्ष्म्या वृतः किलैव ॥१७॥ हे साध्वि ! मम मतं ज्ञात्वा पुत्रीदयालुर्बृहत्से इति ख्यातः प्रसिद्धः पिता तत्र श्रीकृष्णप्राप्तौ उपायं व्यरीरचत् ॥१८॥ हे राज्ञि ! तव स्वयंवरे मत्स्योऽर्जुनेच्छया कृतो यथा त मत्स्यः कृतः किञ्चिद्विशेषमाह । अयं तु मत्स्यो बाह्यतोऽप्यावृतः परं केवलं जले दृश्यते ॥१९॥ एतत् श्रुत्वा सर्वतो दिग्विदि भूपा मम पितुः पुरं मद्रम् आययुः । सर्वेषामस्त्राणां शस्त्राणां तत्त्वं जानन्तीति तथा सोपाध्यायाः सगुरवः सहस्रशोऽनन्ताः ॥२

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

लक्ष्मणा स्ववृत्तमाह–ममेति । हे राज्ञि ! नारदेनगीतमच्युतस्य जन्म कर्म च श्रुत्वा तथा पद्महस्तया लक्ष्म्या च वृ इति कृत्वा सुसंमृश्य सम्यग् विचार्य लोकान् अन्यजनान् विहाय ममापि चित्तं मुकुन्दविषयमासेत्यन्वयः । हेति हर्षं सूच । किलेति लक्ष्मीवर्णप्रसिद्धिं सूचयति ॥१७॥ हे साध्वि ! मम मतम् अभिप्रायं ज्ञात्वा बृहत्सेन इति ख्यातः प्रथितो मम पि तत्र श्रीकृष्णप्राप्तावुपायमचीकरत् कारयामास । तत्र हेतुमाह–दुहितृवत्सल इति ॥१८॥ कोऽसावुपायस्तत्राह–यथेति । हे रा यथा तव स्वयंवरे पार्थेप्सया अर्जुनप्राप्तीच्छया त्वत्पित्रा मत्स्यः कृतस्तथा मत्पित्राऽपि कृत इत्यर्थः । तर्हि ममाप्यर्जुन एव नाविध्यत्तत्राह–अयं त्विति । स मत्स्यो बहिरेवाच्छन्नो नान्तः, अतः स्तम्भसंलग्नयोर्ध्वदृष्ट्या संलक्ष्यते । अयं तु न त किन्तु स्तम्भमूले निहितकलशजले केवलं दृश्यते । अतो दृष्टिरधस्तादुपरि च लक्ष्यमिति । श्रीकृष्णव्यतिरेकेण न कस्यापि इति भावः ॥१९॥ एतत् मत्स्ययन्त्रनिर्माणं श्रुत्वा भूपाः सर्वो दिग्भ्यो मत्पितुः पुरमाययुः । तेषां प्राबल्यं बहुत्वं च सर्वेषाम् अस्त्राणां समन्त्राणां शस्त्राणां केवलानां च तत्त्वप्रयोगोपसंहारादिकं जानन्तीति तथा उपाध्यायैः शस्त्रप्रयोगादिशिक्ष सहिताः सहस्रशः । अनेन तेषां बलादपि जिघृक्षा सूचिता ॥२०॥

अन्वितार्थप्रकाशिका

ताभिः । स्वस्वोद्वाहवृत्तं लज्जया संक्षेपेणोक्तं मन्वाना तत्र च द्रौपदी स्वविवाहोद्यमं प्रकृष्टं मत्वा तं कथयन्ती तमस सप्तानामुक्तिसमाप्त्यवकाशं प्राप्य असङ्कोचेन स्वोद्वाहवृत्तमाह–ममेति । हे राज्ञि ! नारदेनगीतमच्युतस्य जन्म कर्म च श्रुत्वा पद्महस्तया लक्ष्म्या लोकपान् इन्द्रादीन् विहाय वृत इति कृत्वा सुसंमृश्य सम्यग् विचार्य यथा मित्रविन्दायास्तथा ममापि मुकुन्दविषयमास । यद्वा । ममापि चित्तं मुकुन्दे आस । ततः लोकपान् राज्ञो विहाय पद्महस्तया मया भगवान् वृतः ॥१७॥ । हे साध्वि ! मम मतम् अभिप्रायं ज्ञात्वा दुहितृवत्सलः बृहत्सेन इति ख्यातः प्रथितो मम पिता तत्र श्रीकृष्णप्राप्तावुपायम कारयामास ॥१८॥ यथेति । हे राज्ञि ! यथा तव स्वयंवरे पार्थेप्सया अर्जुनप्राप्तीच्छया त्वत्पित्रा मत्स्यः कृतस्तथा मत्पित्राऽपि । पार्थेष्वपाकृत इति पाठे पार्थेषुणा अपाकृतः अयं तु पार्थेप्सया कृतो मत्स्यो बहिरेवाच्छन्नो नान्तः अतः स्तम्भसंलग्नयो संलक्ष्यते मत्पित्राकृतस्तु न तथा किन्तु स्तम्भमूले निहितकलशजले केवलं दृश्यते । अतो दृष्टिरधस्तादुपरि च श्रीकृष्णव्यतिरेकेण न कस्यापि भेद्यः । यद्वा । अयं मत्पित्राकृतस्तु बहिः सर्वतः आच्छन्नः केवलं स जले स्तम्भस स्थितपरिखामण्डले दृश्यते जलगर्तस्थितस्तम्भमूलस्यागम्यत्वेन साक्षाददर्शनात् । स तु स्तम्भमूलादूर्ध्वदृष्ट्याऽदृश्य एवावरणभेदोत्तरं तन्मात्रभेदसंकेतादेव न दुर्भेदः । अयं तु सर्वज्ञं कृष्णं विना सर्वस्यापि सर्वथा दुर्भेद इति भावः ॥१९॥ एतन्मत्स्ययन्त्रनिर्माणं श्रुत्वा सर्वेषाम् अस्त्राणां समन्त्राणां शस्त्राणां केवलानां च तत्त्वप्रयोगोपसंहारादिकं जानन्तीति तथा

शस्त्रप्रयोगादिशिक्षकैः सहि

हे राज्ञि द्रौपदि !
विचार्य पद्महस्तया लक्ष्म्या
पिता तत्र श्रीकृष्णोद्वहने उ
मत्स्यः कृतस्तथा मत्स्यं च
शेषः । एवं चेत्तर्हि अर्जुन
आवृतः अतः स एव मत्स्यः
श्रीकृष्णेनैव भेद्यः द्रुपदकृतम

अथ लक्ष्मणागीतिं
नारदेन कथितम् अच्युतजन्म
चित्तं हेति हर्षे । मुकुन्दे श्रीकृ
लोकपान् लोकपालान् विहाय
विहाय मुकुन्दः वृतः । मनसेति
ख्यातः मम पिता मम मतं ज्ञात
तव स्वयंवरे पार्थेप्सया अर्जुनप्र
नाविध्यत्तत्राहाऽयं त्विति । सः
ततः स्तम्भलग्नयोर्ध्वदृष्ट्या दृश्य
लक्ष्यमिति श्रीकृष्णमन्तरेण न क
शस्त्राणि च अस्त्राणि च सर्वाणि
उपाध्यायैः सहिताफ सहस्रशः भू

श्रीलक्ष्मणाजी ने कहा
निरूपण करते रहते थे । उसे सुन
श्रीकृष्ण भगवानके श्रीचरणोंका
देवी द्रौपदीजी ! मेरे पितृचरण
जाना, तब उन्होंने मेरी इच्छाकी
अर्जुनकी प्राप्ति के लिये आपके
पुत्री वत्सल पिताजीने भी मत्स्यवे
यह विशेषताथी कि मत्स्य बाहरसे
अब इस प्रकारका मत्स्यवेध वृत्तान्त
गुरुओंके साथ मेरे पिताजीकी राज

अन्वितार्थप्रकाशिका

स्त्रप्रयोगादिशिक्षकैः सहिताः सहस्रशः भूपाः सर्वतो दिग्भ्यो मत्पितुः पुरमाययुः । सर्वास्त्रेत्यनेन तेषां बलादपि जिघृक्षा सूचिता ॥२०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे राज्ञि द्रौपदि ! नारदगीतम् अच्युतस्य जन्म कर्म च मुहुः श्रुत्वा ममापि मुकुन्दे चित्तम् आस आसीत् । सुसंमृश्य सुतरां विचार्य पद्महस्तया लक्ष्म्या लोकान् अन्यजनान् विहाय वृतः किल अतो ममापि चित्तं तत्रासेति सम्बन्धः ॥१७॥ हे साध्वि ! मे पिता तत्र श्रीकृष्णोद्वहने उपायम् अचीकरत् कारयामास ॥१८॥ हे राज्ञि ! यथा तव स्वयंवरे पार्थस्यार्जुनस्येप्सया । आप्तुमिच्छया मत्स्यः कृतस्तथा मत्स्यं चकार पार्थेष्वपाकृत इति पाठे तु पार्थस्येषुणापाकृतो निहतः । मत्स्यो यथा तथा भगवदिष्वपाकृत इति [illegible] । एवं चेत्तर्हि अर्जुन एनमपि कस्मान्नाविध्यदिति चेत्तत्राह–अयमिति । अयं तु मत्पितृकृतमत्स्यस्तु बहिराच्छन्नः सर्वत आवृतः अतः स एव मत्स्यः जले स्तम्भमूले स्थापितपात्रस्थेवारिण्येव परं केवलं दृश्यते अन्यथा तु न दृश्यते अतः सर्वान्तर्यामिणा श्रीकृष्णेनैव भेद्यः द्रुपदकृतमत्स्यस्तु बहिः न दृश्यते स्तम्भसमीपस्थजनोर्ध्वदृष्ट्या दृश्यतेऽतोऽर्जुनेनापि भेद्यः ॥१९-२०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ लक्ष्मणागीर्तिं प्रपञ्चयति । ममापीत्यादिना तपसा च बभूविमेत्यन्तेन ॥ ममापीति ॥ हे राज्ञि द्रौपदि ! नारदगीतं नारदेन कथितम् अच्युतजन्मकर्म अच्युतस्य जन्म कर्म चेत्यर्थः । श्रुत्वा ममापि यथा मित्रविन्दायाः तथा ममापीत्यर्थः । हेति हर्षे । मुकुन्दे श्रीकृष्णे आस सक्तम् आसीदित्यर्थः । तत पद्महस्तया लक्ष्म्या लक्ष्म्यवताररूपया रुक्मिण्येत्यर्थः । लोकपान् लोकपालान् विहाय यथा श्रीकृष्णो वृतः तथा मयापि सुसंमृश्य रुक्मिणीतोऽपि सुतरां सम्यक् विचार्य लोकपान् विहाय मुकुन्दः वृतः । मनसेति शेषः । किल ॥१७॥ तदेव सविशेषमाह ॥ ज्ञात्वेति ॥ हे साध्वि, दुहितृवत्सलः बृहत्सेनः इती अतः मम पिता मम मतं ज्ञात्वा तत्र श्रीकृष्णप्राप्तौ उपायम् अचीकरत् ॥१८॥ तदेव सविशेषमाह ॥ यथेति ॥ हे राज्ञि यथा तव स्वयंवरे पार्थेप्सया अर्जुनप्राप्तीच्छया त्वत्पित्रा मत्स्यः कृतः । तथा मत्पित्रापि कृत इत्यर्थः । तर्हि तमप्यर्जुन एव किं विध्यत्तत्राहाऽयं त्विति । सः बहिः आच्छन्नः अयं तु परं जले दृश्यते । अयम्भावः । त्वन्मत्स्यो बहिरेव आच्छन्नः नान्तः स्तम्भलग्नयोर्ध्वदृष्ट्या दृश्यते । अयं तु न तथा किं तु स्तम्भमूलनिहितकलशजले केवलं दृश्यतेऽतो दृष्टिरधस्तादुपरि च स्यमिति श्रीकृष्णमन्तरेण न कस्यापि भेद्य इति ॥१९॥ श्रुत्वेति ॥ एतन्मत्स्ययन्त्रनिर्माणं श्रुत्वा सर्वतः सर्वाभ्यो दिग्भ्यः शस्त्राणि च अस्त्राणि च सर्वाणि यानि शस्त्रास्त्राणि तेषां तत्त्वं याथात्म्यं प्रयोगोपसंहारौ जानन्तीति तथाभूताः सोपाध्याया उपाध्यायैः सहिताफ सहस्रशः भूपाः मत्पितुः पुरम् आययुः ॥२०॥

कृष्णप्रिया

श्रीलक्ष्मणाजी ने कहा - हे द्रौपदी महारानीजी महर्षि श्रीनारदजी भगवान के अवतार लीला कथाओंका [illegible] करते रहते थे । उसे सुनकर और यह विचार करकि भगवती लक्ष्मीजीने समस्त लोकपालोंका त्याग करके श्रीकृष्ण भगवानके श्रीचरणोंका वरण किया, यह सुनकर मेरा मन भगवानके चरणोंमे आसक्त हो गया ॥१७॥ द्रौपदीजी ! मेरे पितृचरण श्रीबृहत्नेमजी पुत्री वत्स थे मुझपर बहुत स्नेह रखते थे जब उन्हें मेरा अभिप्राय जाना, तब उन्होंने मेरी इच्छाकी पूर्तिके लिये यह उपाय किया ॥१८॥ देवी द्रौपदीजी पाण्डुकुमार पार्थिव अर्जुनकी प्राप्ति के लिये आपके पितृचरणोंने मत्स्यवेध नामका स्वयंवरका आयोजन कियाथा, उसी प्रकार मेरे पुत्री वत्सल पिताजीने भी मत्स्यवेध स्वयंवरका आयोजन किया; लेकिन आपके स्वयंवरकी अपेक्षा हमारे यहां यह विशेषताथी कि मत्स्य बाहरसे ठका हुआ था, लेकिन जलमें ही उनकी परछायी दिख रही थी ॥१९॥ रानीजी जब इस प्रकारका मत्स्यवेध वृत्तान्त जाना सब चारों ओरसे समस्त अस्त्र शस्त्रोंके तत्त्वज्ञ हजारो राजा अपने अपने ओंके साथ मेरे पिताजीकी राजधानीमें आने लगे ॥२०॥

पित्रा सम्पूजिताः सर्वे यथावीर्यं यथावयः । आददुः सशरं चापं वेद्धुं पर्षदि [1]मद्धियः ॥२१
आदाय व्यसृजन् केचित् [2]सज्जीकर्तुमनीश्वराः । [3]आकोटि ज्यां समुत्कृष्य पेतुरेकेऽमुना हताः ॥२२
सज्यं कृत्वा परे वीरा [4]मागधाम्बष्ठचेदिपाः । भीमो दुर्योधनः कर्णो नावि[5]दुस्तदवस्थितिम् ॥२३
मत्स्याभासं जले वीक्ष्य ज्ञात्वा च तदवस्थितिम् । पार्थो यत्तोऽसृजद्बाणं नाच्छिनत् पस्पृशे परम् ॥२४

कर्दमक्षमा

यथावीर्यम्, यथावयः, पित्रा, सम्पूजिताः, सर्वे, पर्षदि, मद्धियः, सशरम्, चापम्, वेद्धुम्, आददुः ॥२१॥ केचि आदाय, सज्जीकर्तुम्, अनीश्वराः, व्यसृजन्, एके, ज्याम्, आकोष्ठम्, समुत्कृष्य, अमुना, हताः, पेतुः ॥२२॥ अपरे, वीर मागधाम्बष्ठचेदिपाः, भीमः, दुर्योधनः, कर्णः, तदवस्थितिम्, न, अविदुः ॥२३॥ पार्थः, जले, मत्स्याभासम्, च, तदवस्थिति ज्ञात्वा, यत्तः, बाणम्, असृजत्, परम्, पस्पृशे, न, अच्छिनत् ॥२४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

मत्स्यं वेद्धुं पर्षदि संसदि मद्धियो मय्येव धीर्येषमिति अन्यचित्ता न वेद्धुं शक्ता इति भाावः ॥२१॥

तेदेवाऽऽह–आदायेति । अमुना चापेन ॥२२॥ नाविन्दंस्तदवस्थितिमिति मागधादीनां क्रियाशक्तिरेव न तु लक्ष्याभिज्ञत्वं ॥२३॥ यतो यत्नवान् असृजत् मुमोच स बाणो मत्स्यं नाच्छिनत् परं केवलं पस्पर्श ज्ञानवानप्यर्जुनो बलेनापूर्ण इत्यर्थः ॥२४-२

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मत्स्यमिति शेषः । "सदसि सत्पर्षदौ च" इति कोशात् । इति भाव इति–मत्स्यवेधने चित्ताभावात्तद्वेद्धुं नाशक्नुवन्निति तात्पर्यम् ॥२१॥ तदेवान्यचित्तत्वमेव ॥२२॥ सज्यं सगुणम् । तदवस्थितिं मत्स्यावस्थितम् । इत्यर्थं इति क्रियाशक्तिशशस्त्रचालनादिसामर्थ्यं दैहिकबलवत्त्वेन भवेदपि तु लक्ष्याभिज्ञत्वं गुरुप्रसादाभ्यासलभ्यमेवेति भावः ॥२३॥ मत्स्याभासं प्रतिबिम्बं पस्पृश इत्यार्षत्वात् तम् । इत्यर्थ इति–छेदनस्य पूर्णबलसाध्यत्वेन छेदनज्ञाने सत्यपि तन्नास्तीति भावः ॥२४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

चापं तद्विशेषं मत्पित्रैव तत्र स्थापितमिति भावः । पर्षदि वेद्धुमिति प्रगल्भता । मद्धिय इति वेधे प्रयत्नपरतोक्ता तथा ॥२१॥ एके बलिनः आकोटि चापस्यैकस्याङ्कोटौ ज्यामादौ निधाय पश्चादन्यस्यां योजयितुं तत्पर्यन्तं समाकृष्य स्थिता अमुना हताः ज्यायोजनाशक्त्योच्चलितेन चापेनैव हता इत्यर्थः ॥२२॥ अम्बष्ठः अम्बष्ठदेशाधिपः ॥२३॥ मत्स्यस्याभासं छायां विलोक्य महाभिनिवेशेन मुहुरीक्षित्वा केवलं पस्पर्शेति । बाणैकदेशेनैव संयोगात् न तु तन्मध्यभागेन स्पर्शज्ञानं तु बाणे तत्सङ्घर्षचिह्न तत्रार्जुनस्य प्रवृत्तिः श्रीभगवन्माहात्म्यविस्तरणाय ज्ञेया ॥२४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्यक् पूजिताः, संशब्दादर्थमेवाह–यथेति । वीर्यवयोऽनुसारेणैवेत्यर्थः । इति सर्वेषामेव सन्तोषः सूचितः पर्षदि वेद्धुं प्रगल्भता मद्धिय इति वेधे प्रयत्नपरतोक्ता । यद्वा पर्षदि मद्धिय इति अतो धृष्टा न ते मद्योग्या इति भावः ॥२१॥ केचिदल्प आदायैव सद्यो व्यसृजन्, चापं तत्यजुः । यतोऽनीश्वराः सामर्थ्यरहिताः । एके बलिनः, आकोटि चामस्य एकस्यां कोट्यां निधाय पश्चादन्यस्यां योजयितुं तत्पर्यन्तं समाकृष्य स्थिता अमुना हताः । ज्यायोजनाशक्त्योच्चलितेन चापेनैव प्रहता ॥२२॥ वीराः सामर्थ्यविशेषवन्त इत्यर्थः । अम्बष्ठोऽम्बष्ठदेशाधिपः, चेदिपः शिशुपालः ॥२३॥ मत्स्यस्याभासं छायां महाभिनिवेशेन मुहुरीक्षित्वा तत्रात्मनोऽशक्तिं जानतोऽप्यस्यार्जुनस्य प्रवृत्तिः श्रीभगवन्माहात्म्यविस्तारणाय ॥२४॥

---

१. पार्षदि–विज. । २. सज्यं श्रीधर. वंशी. ; सज्ज–वीर. विज. । ३. आकोष्ठं–श्रीधर. वंशी. च. पु. त. पु. विज. ; आकोटि ज्यां–वीर. जीव
४. प्राग्ज्योतिमगधेश्वरौ–विज. । ५. नाविन्दं–श्रीधर. वंशी. वीर. विज. विश्व. ।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१९-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

पित्रेति । मम पित्रा वीर्यवयःस्थानाद्यनुरूपं सर्वे सम्पूजिताः मय्येव धीर्येषां ते मत्स्यं वेद्धुं पर्षदि सभायां सशरं चापमाददुः (जहुः) मद्धिय इत्यस्यान्यचित्तत्वाच्च वेद्धुं नाशक्नुवन्निति भावः ॥२१॥ तदेवाह-आदायेति । केचिद्व्यसृजन् लक्ष्यादन्यत्र प्रयुक्तवन्त इत्यर्थः । केचित्तु आकोटिधनुषः कोटिपर्यन्तं ज्यां समुत्कृष्य सज्जीकर्तुं ज्यासहितं कर्तुमारोपितज्याकं कर्तुमित्यर्थः । अनीश्वराः असमर्थाः अमुना चापेन हतास्ताडिताः निपेतुः ॥२२॥ सज्यमिति । अपरे जरासन्धादयस्तु वीराः सज्यं कृत्वाऽपि लक्ष्यावस्थितिं नाविन्दन् । मागधादीनां क्रियाशक्तिरेव न तु लक्ष्याभिज्ञते(तिभावः)त्यर्थः ॥२३॥ मत्स्येति । पार्थोऽर्जुनस्तु जले मत्स्याभासं मत्स्यप्रतिबिम्बं वीक्ष्य तदवस्थितिं मत्स्ययन्त्रावस्थानदेशं ज्ञात्वा यत्तो यत्नवान् बाणं व्यसृजन्मुमोच । स बाणो मत्स्यं नाच्छिनत् परं केवलं पस्पर्श ज्ञानवानप्यर्जुनो न वेद्धुं प्रबभूवेत्यर्थः ॥२४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१६-२८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१९-२७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२०-२७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पर्षदि सभायां मद्धियः मयि धीः प्राप्त्याशा येषां ते ॥२१॥ आकोटि चापस्याग्रपर्यन्तं ज्यां समुत्कृष्यापि तत्र निधातुमशक्ताः अमुना चापेनैव हताः ॥२२॥ अम्बष्ठोऽम्बष्ठदेशाधिपतिः । तदवस्थितिं नाविन्दन्निति मागधादीनां क्रियाशक्तिरेव न तु लक्ष्याभिज्ञतेति भावः ॥२३॥ मत्स्याभासं मत्स्यस्याभासं छायां वीक्ष्य विशेषेण महाभिनिवेशेन मुहुरीक्षित्वा यत्तः यत्नपरः सन् केवलं पस्पर्शेति तदेकदेश एव न तु तन्मध्यदेशे बाणसंयोगादिति भावः । स्पर्शज्ञानं तु ज्ञानस्य तत्सङ्घर्षणचिह्नात् लक्ष्याभिज्ञानवत्त्वेऽपि तद्दृबलाभावादेव न तच्छेद इति केचिदाहुः ॥२४-२५॥

गूढार्थदीपिनी

पर्षदि सभायां मत्स्यं वेद्धुं चापमाददुः । मद्धिय इत्यनेन अन्यनिष्ठचित्तत्वात् लक्ष्याभेद्यत्वं सूचितम् ॥२१॥ सज्यं कर्तुमनीश्वरा असमर्थाः केचित् धनुरादायैव व्यसृजन् तत्यजुः । आकोष्ठम् आकोटिं वा पाठः अर्थः सम एव । धनुरग्रभागः कोटिः तत्पर्यन्तं द्वितीयकोटौ योजयितुं ज्यां समुत्कृष्य स्थिता अपि एके अमुना धनुषा हताः भुवि पेतुः ॥२२॥ मागधो जरासन्धः तदादयः कर्णान्ता वीराः तदवस्थितिं मत्स्यस्थितिं नाविन्दन् ॥२३॥ पार्थोऽर्जुनः । यत्तः प्रयत्नवान् सन् । यती प्रयत्ने धातुः ॥२४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पर्षदि संसदि ॥२१॥ अमुना चापेन ॥२२-२५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवमप्रसिद्धानां स्वरूपमुक्त्वा प्रसिद्धानामाह-सज्यं कृत्वेति । अपरे पूर्वोक्तेभ्यः अन्ये मागधो जरासन्धः अम्बष्ठो भगदत्तः हस्तिपकत्वात् चेदिपः शिशुपालः तथैव भीमो दुर्योधनः कर्णश्च तथापि तस्य मत्स्यस्य अवस्थितिं न विदुः । क्व तिष्ठतीति । ततोऽर्जुनः आच्छादनसहितस्य जले प्रतिबिम्बं दृष्ट्वा मत्स्याभासं तत्र ज्ञात्वा अदकः स्थाने तिष्ठतीति निश्चित्य यत्तः सन् पार्थः बाणमसृजत् तावतापि लक्ष्यं नाच्छिनत् परं पस्पर्श स्पर्शमेव सम्पादितवान् । नरनारायणयोरेतावदन्तरं शक्तिद्वयमेकस्य पूर्णम् अपरस्यैका कथञ्चिदिति ॥२३-२४॥

श्रीसुबोधिनीसारः

यथाबलं यथावस्थं सर्वे मयि धीर्येषां ते पित्रा पूजिताः पर्षदि संसदि मत्स्यं वेद्धुं सबाणं चापं धनुराददुः जगृहुः ॥२१॥ केचिद्धनुरादाय सज्यं कर्तुम् असमर्था व्यसृजन् तत्यजुः । एके आकोष्ठं ज्यां गुणं समुत्कृष्यामुना चापेन हताः पेतुः ॥२२॥ अप जरासन्धादयो वीरा भीमादयः सज्यं कृत्वा तस्य मत्स्यस्यावस्थितिं नाविदुः ॥२३॥ जले मत्स्याभासं वीक्ष्य तस्यावस्थितिं ज्ञात्वा पार्थोऽर्जुनो यतः सावधानो विशिखं बाणं प्राक्षिपत् परं केवलं मत्स्यं पस्पर्श नावेधयत् ॥२४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ते च सर्वे मम पत्रा वीर्याद्यनुरूपं सम्पूजिताः सन्तः पर्षदि सभायां मत्स्यं वेद्धुं सशरं चापमाददुः । तत्र हेतुमाह-मद्धिय इति । मय्येव धीर्येषां ते । अनेन व्यग्रचित्तत्वान्मत्स्यं वेद्धुं नाशक्नुवन्नित्यपि सूचितम् ॥२१॥ तत्र केचित् धनुरादायैव व्यसृजन् तत्यजुः । तत्र हेतुमाह-सज्यीकर्तुम् आरोपितज्याकं कर्तुमनीश्वरा असमर्थाः । एके तु धनुः सज्यीकृत्यापि कोष्ठपर्यन्तं ज्यामाकृष्यापि सामर्थ्याभावाद्धस्ताद्विमुक्तेनामुना धनुषा हताः पेतुः ॥२२॥ अपरे जरासन्धादयस्तु वीराः समर्थाः, अतो धनुः सज्यं कृत्वापि तस्य लक्ष्यस्यावस्थितिं नाविन्दन् ॥२३॥ पार्थोऽर्जुनस्तु जले मत्स्याभासं मत्स्यप्रतिबिम्बं वीक्ष्य तस्य मत्स्यस्यावस्थितिम् अवस्थानदेशं ज्ञात्वा यत्तो यत्नवान् बाणमसृजत् मुमोच । बाणस्तु मत्स्यं नाच्छिनत्, परं केवलं पस्पर्श । अनेन ज्ञानशक्तिपूर्णोऽप्यर्जुनो बलेनापूर्ण इति सूचितम् ॥२४॥

अन्वितार्थप्रकाशिका

पित्रेति । मद्धियः ममदेकचित्ताः ते च सर्वे मम पित्रा यथावीर्यं यथावयः वीर्यवयोऽनुरूपं सम्पूजिताः सन्तः पर्षदि सभायां मत्स्यं वेद्धुं सशरं चापं यत्पित्रा स्थापितं चापविशेषमाददुः । तङभाव आर्षः । मद्धिय इत्यनेन व्यग्रचित्तत्वाल्लक्ष्यवेधाऽयोग्यता व्यङ्ग्या ॥२१॥ आदायेति । सज्यं कर्तुम् आरोपितज्याकं कर्तुमनीश्वरा असमर्थाः केचित् धनुरादायैव व्यसृजन् तत्यजुः । एके तु आकोटिं द्वितीयकोटौ योजयितुं ज्यां समुत्कृष्य स्थिताः अपि धनुषः योजनसामर्थ्याभावाद्धस्ताद्विमुक्तेनामुना धनुषा हताः पेतुः । आकोष्ठमिति पाठेऽपि स एवार्थः ॥२२॥ सज्यमिति । अपरे मागधादयः कर्णान्तास्तु वीराः समर्थाः अतो धनुः सज्यं कृत्वापि तस्य लक्ष्यावस्थितिं नाविन्दन् तेषां क्रियाशक्तिरेव न लक्ष्याभिज्ञतेत्यर्थः ॥२३॥ मत्स्येति । पार्थोऽर्जुनस्तु जले मत्स्याभासं मत्स्यप्रतिबिम्बं वीक्ष्य तस्य मत्स्यस्यावस्थितिम् अवस्थानदेशं ज्ञात्वा यत्तो यत्नवान् बाणमसृजत् मुमोच । बाणस्तु मत्स्यं नाच्छिनत् परं केवलं पस्पृशे पस्पर्श । तङार्षः । अनेन ज्ञानशक्तिपूर्णोऽप्यर्जुनो बलेनापूर्ण इति सूचितम् ॥२४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मयि एव धीर्येषां ते मत्स्यं वेद्धुं पर्षदि सभायां चापमाददुः ॥२१॥ आदाय चापं गृहीत्वा सज्यं कर्तुमनीश्वराः केचित् व्यसृजन् तत्यजुः आकोष्ठं बाहुपर्यन्तम् । ज्यां मौर्वीम् अमुना चापेन ॥२२॥ एते तस्य मत्स्यस्यावस्थितिं नाविन्दन् । मत्स्यः कु निहित इति न ज्ञातवन्तः अतस्तेषां क्रियाशक्तिरेवास्ति न तु मत्स्यवेधज्ञानमित्यर्थः ॥२३॥ यत्तो यत्नवान् पार्थो बाणमसृजन्मुमोच । स इषुः मत्स्यं नाच्छिनत् किन्तु परं केवलं पस्पृशे पस्पर्श । तं मत्स्यं स्पृष्टवानित्यर्थः । अतः अर्जुनस्य लक्ष्यवेधज्ञानमस्ति न तद्वेधे पूर्णं सामर्थ्यमस्तीत्यर्थः ॥२४-२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पित्रेति ॥ मम पित्रा यथावीर्यं यथावयः वीर्यवयःस्थानाद्यनुरूपमित्यर्थः । सम्पूजिताः सर्वे नृपाः मय्येव धीर्येषां तथाभूताः सन्तः वेद्धुं मत्स्यवेधं कर्तुं पर्षदि सभायां सशरं बाणसहितं चापं धनुः आददुः संजगृहुः । अन्यचित् न वेद्धुं शक्ता मद्धिय इत्यनेन सूचतम् ॥२१॥ एतदेवाह ॥ आदायेति ॥ केचित् चापं सज्यं कर्तुम् अनीश्वराः सन्तः आदाय व्यसृजन् । एके के आकोष्ठमामणिबन्धं ज्यां समुत्कृष्य अमुना चापेन हताः सन्तः पेतुः ॥२२॥ सज्यमिति ॥ अपरे वीराः मागधाम्बष्ठचे

मागधादीनां क्रियाशक्ति
स्वरूपावस्थितिं न आ
मत्स्ययन्त्रावस्थानदेशं ज्ञा
केवलं पस्पृशे पस्पर्श ।

देवीजी ! मेरे पि
हुए उन राजाओंने मुझे
नरपतियोंमेंसे कितने राज
वीरों धनुषकी प्रत्यंचा को
लगनेसे गिर पडे ॥२२॥
शिशुपाल भीमसेन दुर्योध
वीरोंको मत्स्य का पता न
का पता चला और परछा
अर्जुनजीने बाण छोडा लेकि

राजन्येषु निवृत्तेषु
तस्मिन् सन्धाय वि
दिवि दुन्दुभयो ने
तद्रङ्गमाविशमहं क
"नूत्ने निवीय परि

राजन्येषु, निवृत्तेषु, म
विशिखम्, सन्धाय, मत्स्यम्, स
दिवि, दुन्दुभयः, नेदुः, भुवि, ज
कनकोज्ज्वलरत्नमालाम्, प्रगृह्य,
कलनूपुराभ्याम्, पद्भ्याम्, अहम्,

अभिजिति सर्वार्थसाधके मु
तत्तदा कलौ कलस्वनौ नूपुरौ ययोस्ता
कौशिकाग्र्ये उत्तमकौशेयवस्त्रे सव्रीडं

---

१. सज्यं-श्रीधर. वंशी. वीर. विज. । २. ज
विज. । ५. वृत्ते पिधाय-विज. ।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मागधादीनां क्रियाशक्तिरेव न तु लक्ष्याभिज्ञतेति भावः । भीमः दुर्योधनः कर्णः सज्यं कृत्वापि तदवस्थितिं मत्स्यस्य स्वरूपावस्थितिं न अविन्दन् ॥२३॥ मत्स्येति ॥ पार्थोऽर्जुनस्तु जले मत्स्याभासं मत्स्यप्रतिबिम्बं वीक्ष्य तदवस्थितिं मत्स्ययन्त्रावस्थानदेशं ज्ञात्वा च यत्तो यत्नवान् सन् बाणम् असृजत् मुमोच । सोऽर्जुनमुक्तो बाणः मत्स्यं न अच्छिनत् । परं केवलं पस्पृशे पस्पर्श । ज्ञानवानप्यर्जुनो न वेद्धुं प्रबभूवेत्यर्थः ॥२४॥

कृष्णप्रिया

देवीजी ! मेरे पितृपादोने समस्त नरपतियोंका बल पुरुषार्थ अनुसार अच्छी तरहसे स्वागत किया । पधारे हुए उन राजाओंने मुझे प्राप्त करनेके इच्छासे स्वयंवर सभामें रखे हुए धनुष बाण उठाए ॥२१॥ देवी ! उन नरपतियोंमेंसे कितने राजा तो धनुष प्रत्यंचा पर न चढा सके । उन्होंने धनुषको ज्यों का त्यों रख दिया । कइ एक वीरों धनुषकी प्रत्यंचा को एक सिसे प्रान्त से दूसरे प्रान्त तक ले आये लेकिन बांध न सके परन्तु उसका झटका लगनेसे गिर पडे ॥२२॥ द्रौपदीजी रानी स्वयंवरमें समुपस्थित समर्थवीर जैसे जरासन्ध अम्बष्ठ नरपति चदिनरेश शिशुपाल भीमसेन दुर्योधन और कर्ण महाराज आदि वीर पुरुषोने धनुष पर प्रत्यंचा तो बांधली लेकिन उन वीरोंको मत्स्य का पता न लगा ॥२३॥ रानीजी ! उस स्वयंवरमें वीरवर श्रीअर्जुनजीने जलमें उस मचलीकी स्थिति का पता चला और परछायी देखली और और यह भी जान लिया कि मछली कहां है । बडी सावधानी से अर्जुनजीने बाण छोडा लेकिन लक्ष्यवेध न होने पाया । उनके बाणने केवल स्पर्श मात्र किया ॥२४॥

राजन्येषु निवृत्तेषु भग्नमानेषु मानिषु । भगवान् धनुरादाय [1]सज्जं कृत्वाथ लीलया ॥२५॥
तस्मिन् सन्धाय विशिखं मत्स्यं वीक्ष्य सकृज्जले । छित्त्वेषुणाऽपातयत्तं सूर्ये चाभिजिति स्थिते ॥२६॥
दिवि दुन्दुभयो नेदुर्जय[2]शब्दयुता भुवि । देवाश्च कुसुमासारान् मुमुचुर्हर्ष[3]विह्वलाः ॥२७॥
तद्रङ्गमाविशमहं कलनूपुराभ्यां [4]पद्भ्यां प्रगृह्य कनकोज्ज्वलरत्नमालाम् ।
[5]नूत्ने निवीय परिधाय च कौशिकाग्र्ये सव्रीडहासवदना कबरीधृतस्रक् ॥२८॥

कर्दमक्षमा

राजन्येषु, निवृत्तेषु, मानिषु, भग्नमानेषु, भगवान्, धनुः, आदाय, अथ, लीलया, सज्जम्, कृत्वा, तस्मिन्, विशिखम्, सन्धाय, मत्स्यम्, सकृत्, जले, वीक्ष्य, सूर्ये, अभिजिते, स्थिते, तम्, इषुणा, छित्त्वा, अपातयत् ॥२५-२६॥ दिवि, दुन्दुभयः, नेदुः, भुवि, जयशब्दयुताः, दुन्दुभयः, नेदुः, हर्षविह्वलाः, च, देवाः, कुसुमासारान्, मुमुचुः ॥२७॥ कनकोज्ज्वलरत्नमालाम्, प्रगृह्य, च, नूत्ने, कौशिकाग्र्ये, वाससी, परिधाय, च, निवीय, सव्रीडहासवदना, कबरीधृतस्रक्, कलनूपुराभ्याम्, पद्भ्याम्, अहम्, तद्रङ्गम्, अविशम् ॥२८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अभिजिति सर्वार्थसाधके मुहूर्ते ॥२६-२७॥ भगवत्प्राप्तिहर्षनिर्भरेणाऽऽत्मानमेवानुवर्णयन्त्याह द्वाभ्याम्-तद्रङ्गमिति । तदा कलौ कलस्वनौ नूपुरौ ययोस्ताभ्यां पद्भ्यां रङ्गं प्राविशन् कनकेनोज्ज्वलां रत्नमालां निवीय प्रावृत्य परिधाय च नीवीबन्धेन च कौशिकाग्र्ये उत्तमकौशेयवस्त्रे सव्रीडो हासो यस्मिंस्तद्वदनं यस्याः सा कबर्यां धृताः स्रजो यया सा ॥२८॥

---

[1] सज्यं-श्रीधर. वंशी. वीर. विज. । [2] जयशब्दोऽपतद्भुवि-विज.: । [3] विक्लवा:-गो. प्रे. टी. । [4] पद्भ्यां दिशो भ्रमयती चलपेशलाभ्यां-विज. । [5] वृते पिधाय-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ सर्पराजाभिमाननिवृत्तेरनन्तरम् ॥२५॥ तस्मिन् धनुषि । तं मत्स्यम् । अभिजिति, तच्चोक्तम् -

"मध्याह्ने तु यदा शंकोर्मूले छाया प्रजायते । सर्वार्थसाधनीवैकाऽभिजिदाख्या घटी स्मृता ॥"

इति ज्योतिश्शास्त्रात् । मध्याह्नात्परतो घटिकैका यावत्तावदभिजिदित्यर्थः । विस्तरेण तृतीयस्कन्धे चैतदस्तीति ॥२६-२७॥ निर्भरोऽतिशयः । कलस्वनौ मधुरास्फुटशब्दौ । रङ्गं स्वयंवरस्थलम् । कबर्यां केशपाशरचनायाम् ॥२८-२९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

राजन्येष्विति युग्मकम् । वीक्ष्य विलासेन दृष्ट्वा अभिजितीत्यनेन मध्याह्नो ज्ञेयः । अतस्तदुपरि रविस्थित्याधिकदुर्लक्ष्यत्वं च सूचितम् ॥२५-२६॥ भुवि ये जयशब्दाः तैर्युतास्तत्समकाला दुन्दुभयो दिविनेदुरित्यर्थः ॥२७॥ प्रकर्षेण परमादरादिना हस्ताभ्यां गृहीत्वा नूत्ने इत्यादिकं विवाहे तदपेक्षत्वात् व्रीडा सभादिना अत एव हासः अन्तरानन्देन प्रसादमात्रं तद्युक्तं वदनं यस्याः श्री वदनस्यैव तद्धर्मत्वं न तु मम कृत्रिममित्यर्थः ॥२८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मानिषु अभिमानवत्स्वपि तेषु भग्नमानेषु सत्सु भगवान् सर्वशक्तिमान् श्रीकृष्णोऽपातयदिति द्वाभ्यामन्वयः । अथानन्तरं सद्य एवेत्यर्थः ॥२५॥ वीक्ष्य विलासेन दृष्ट्वा; अभिजितीत्यनेन मध्याह्नो ज्ञेयः । अतस्तदुपरि रविस्थित्या अधिकदुर्लक्ष्यत्वं सूचितम् ॥२६॥ जयशब्दयुता देवा भुवि मुमुचुरित्यन्वयः । यद्वा, भुवि च नेदुः । जयशब्दैर्युता ते चोत्थिता इत्यर्थः ॥२७॥ प्रकर्षेण परमादरादिना कराभ्यां गृहीत्वा । नूत्ने इत्यादिकम् उद्वाहेतदपेक्षत्वात् । सव्रीडेति स्वमनोरथसिद्ध्या प्रहर्षात् श्रीभगवद्भावविशेषोदयाद्वा । अत एव शोभाविशेषार्थं कबरीति ॥२८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१९-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

भगवांस्तु विव्याधेत्याह-राजन्येष्विति । मानिषु साहङ्कारेषु राजन्येषु भग्नमानेष्वत एव निवृत्तेषु च सत्सु सूर्ये अभिजिति स्थिते (सति) सर्वार्थसाधके मध्याह्ने इत्यर्थः । लीलया अनायासेनैव तस्मिन् धनुषि विशिखं बाणं सन्धाय सकृदेव जले वीक्ष्य इषुणा मत्स्यं छित्त्वा न्यपातयत् ॥२५-२६॥ भुवि जयशब्देन युताः (दुन्दुभयो) देवदुन्दुभयो नेदुः । यदा दिवि दुन्दुभयो नेदुस्तदा भुवि जयशब्दा बभूवुरित्यर्थः ॥२७॥ भगवत्प्राप्तिजहर्षनिभरेणात्मानमेवानुवर्णयन्त्याह-तदिति द्वाभ्याम् । तत् तदा नूत्ने नवे कौशिकाग्र्ये उत्तमकौशिकेये (कौशेये) वस्त्रे परिधाय सव्रीडो हासो यस्मिंस्तद्वदनम् । यस्याः कबर्यां धृता स्रजो यया सा अहम् । कनकेनोज्ज्वलां रत्नमालां निवीय प्रगृह्य कलौ कलस्वनौ नूपुरौ ययोस्ताभ्यां पद्भ्यां रङ्गं प्राविशम् प्रविष्टवत्यस्मि ॥२८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१६-२८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तद्रङ्गमाविशदित्यादि । अहमिति हर्षोत्कर्षे गर्वपरम् औत्सुक्यादात्मानं विशिनष्टि-कलनूपुराभ्यामित्यादि ॥२८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

तद्रङ्गमाविशमहमित्यादि । अहमिति हर्षोत्कर्षेण गर्वम् परमैत्सुक्यादात्मानं विशिनष्टि-कलनूपुराभ्यामित्यादि ॥२८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अभिजिति मध्याह्ने इति तदा च मत्स्योपरि सूर्य इति अतिदुर्लक्ष्यत्वेऽपीति भावः ॥२६-२७॥ तत्कालभवं स्वा

स्मरन्ती तादात्विकं स्व
उत्तमकौशेयवस्त्रे निवी

राजेति द्वयम्
मध्याह्नात् परतो घटिकैक
स्मृता ॥ इति ज्योति:शा
कौशिकाग्र्ये उत्तमकौशेय
कथम्भूताभ्यां पद्भ्याम् ।
हासो यस्मिन् तादृशं वदन

अभिजिति स
तत्कटाक्षविमोहिता स्वय
परिधाय च सव्रीडो हासो
कनकेनोज्ज्वलां रत्नमालां

एवं साधारणप्रसि
शङ्कां वारयितुं भगवानित्याह
ज्ञापितम् । लीलया मत्सन्तो
सकृन्मत्स्यं जले वीक्ष्य इषुण
प्रकार उक्त: । ततो भगवता स
भूमावपि नरदुन्दुभयो जयश
देवाश्चकारादन्येऽपि सिद्धादय:
तद्रङ्गमाविशमहमिति द्वाभ्याम्
पञ्चविशेषणानि तादृशी अहं
एतादृशपद्भ्यामुपलक्षिता । कन
स्वस्यैव रूपातिशयं निरूपयति
। अनेन स्पर्शोत्कर्शो निरूपित:
ययेति गन्ध: । एवं सर्वगुणपूर्णा
हेतु: उरुकुन्तलकुण्डलत्विड्ग
कुण्डलत्विड्युक्तगण्डस्थलमिति
कृता । किंच यथा तेषां प्रतिघात
उत्पन्न एव सर्वाह्लादकर: तत्सहि
निरीक्ष्य परित: शनकैर्दृष्टिं प्रसारय
रत्नमालाम् अंसे निदधे ॥२८-२९

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मत्ती तादात्विकं स्वयंवरणं स्वस्य वर्णयन्त्याह-तद्रङ्गमिति द्वाभ्याम्। तत्तदा कलौ कलस्वनौ नूपुरौ ययोस्ताभ्यां कौशिकाग्र्ये उत्तमकौशेयवस्त्रे निवीय प्रावृत्त्य परिधाय ॥२८॥

गूढार्थदीपिनी

राजेति द्वयम्। तस्मिन् धनुषि विशिखं बाणम्। इषुणा छित्त्वा मत्स्यमपातयत्। अभिजिति सर्वार्थसाधके मुहूर्ते। मध्याह्नात् परतो घटिकैका यावत् तावदभिजित् (मध्याह्ने तु यदा शङ्कोर्मूले छाया प्रजायते। सर्वार्थसाधनी चैकाभिजिदाख्या घटी मृता॥ इति ज्योतिःशास्त्रम्।) ॥२५-२६॥ देवाः कुसुमासारान् धारासम्पातवत् पुष्पवृष्टीः मुमुचुः ॥२७॥ तत् तदा अहं नूत्ने कौशिकाग्र्ये उत्तमकौशेयवस्त्रे निवीय उपरि प्रावृत्य अधश्च परिधाय मालां च प्रगृह्य पद्भ्यां रङ्गं सभामण्डपमहं प्राविशमित्यन्वयः। कथम्भूताभ्यां पद्भ्याम्। कलौ मधुरस्वनौ नूपुरौ ययोस्ताभ्याम्। कनकेन उज्ज्वलां रत्नमालाम्। कथम्भूता सा लक्ष्मणा। सव्रीडो हासो यस्मिन् तादृशं वदनं यस्याः सा। पुनश्च कबर्यां केशपाशे धृताः स्रजो यया सा ॥२८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अभिजिति सर्वार्थसाधके मुहूर्ते मध्याह्नसमये ॥२६-२७॥ स्वशोभया श्रीकृष्णं वशीकर्तुं प्रवृत्ताऽपि कटाक्षविमोहिता स्वयमहमासमित्याशयेनाह द्वाभ्यां तदिति। तत्तदा कौशिकाग्र्ये उत्तमकौशेये वस्त्रे निवीय प्रावृत्त्य परिधाय च सव्रीडो हासो यस्मिन् तद्वदनं यस्याः सा कबर्यां धृताः स्रजो यया साऽहं कलौ मधुरस्वनौ नूपरौ ययोस्ताभ्यां कनकेनोज्ज्वलां रत्नमालां प्रगृह्य रङ्गमाविशं प्रविष्टवती ॥२८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं साधारणप्रसिद्धातिप्रसिद्धनिराकरणे जाते सर्व एव निवृत्ता इत्याह-राजन्येषु निवृत्तेष्विति। ततः कृष्णः किंकरिष्यतीति शङ्कां वारयितुं भगवानित्याह-लीलया च सज्यं कृतवान् अनेनादित आरभ्य स्वयमेव सर्वं कृतवान् न त्वन्यकृतशेषः स्थापित इति ज्ञापितम्। लीलया मत्सन्तोषार्थं तस्मिन् सन्धाय विशिखमिति लौकिकन्यायेनैव मारितवानिति ज्ञापितम्। ततोऽर्जुनसन्तोषार्थं कृत्रिममत्स्यं जले वीक्ष्य इषुणा छित्त्वा जलेऽपातयत्। तस्मिन्नेव समये अभिजिल्लग्नं तेनैव सर्वे दोषाः परिहृता इति लौकिक एव जयकार उक्तः। ततो भगवता सर्वजीवाशक्यं कृतमिति इदमेकं चरित्रं लोके समुत्पन्नमिति सन्तोषाद्दिवि दुन्दुभयो नेदुः। जयशब्दाश्च भूमावपि नरदुन्दुभयो जयशब्दाश्च। ततो देवानां भगवान् स्वोत्कर्षं प्रकटीकृतवान् अतः परं दैत्यवधं करिष्यतीति सन्तोषात् चकारादन्येऽपि सिद्धादयः कुसुमासारान् मुमुचुः हर्षेण विकलाश्च जाताः ॥२५-२७॥ ततः पणः सिद्ध इति मया वृत इत्याह-तद्रङ्गमाविशमहमिति द्वाभ्याम्। आत्मानं वर्णयत्येकेन द्वितीयेन स्वक्रियाम्। विषयाः पञ्चविधाः शब्दादयः पञ्चापि मयि सन्तीति सर्वविशेषणानि तादृशी अहं तद्रङ्गस्थानं प्रविष्टा यत्र विवाहोत्सवः कलनूपुराभ्यामिति। सशब्दान्याभरणानि निरूपितानि। तादृशपद्भ्यामुपलक्षिता। कनकोज्ज्वलरत्नमालामिति रूपसम्पत्तिर्निरूपिता। सा माला भगवतः कण्ठे देयेति स्वतुल्यतां निरूपयन्ती स्वस्यैव रूपातिशयं निरूपयति-ततः कौशिकाग्र्ये पट्टवस्त्रद्वयम् एकं निवीयोपरि धृत्वा अपरं परिधाय चकारात्कंचुकवदपि कृत्वा। अनेन स्पर्शोत्कर्षो निरूपितः। सव्रीडहासवदनेति। रसः आन्तरभावसूचिका। हासो बहिर्मोहजनकरूपः। कबर्यां धृताः स्रजो धृतेति गन्धः। एवं सर्वगुणपूर्णा मुरारेरंसे स्वमालां निदध अग्रे रसशङ्काव्यावृत्त्यर्थं राज्ञो निरीक्षणं कृतवती। वक्त्रमुन्नीय वक्त्रस्योन्नयने हेतुः उरुकुन्तलकुण्डलत्विड्गण्डस्थलमिति उरुकुन्तलानि यस्मिन् मुखे तेन कुन्तलानां प्रतिबन्धव्यावृत्त्यर्थमुन्नयनम्। कुण्डलत्विड्युक्तगण्डस्थलमिति समदर्शने विद्युताहते इव नेत्रे कुण्डलकान्त्याघातात् विषयदर्शनेन समर्थे अनेन प्रदर्शनार्थं मुखवर्णनापि कृता। किंच यथा तेषां प्रतिघातकत्वं न भवति तथा दृष्टवती तदर्थमाह-शिशिरहासकटाक्षमोक्षैरिति। शिशिरः सर्वतापहारी हासः हास एव सर्वाह्लादकरः तत्सहिता ये कटाक्षमोक्षाः। एकेन वशीकरणमपरेण हननमिति आदौ दर्शनं न दोषाय। सर्वानेव राज्ञोऽस्य परितः शनकैर्दृष्टिं प्रसारयन् तत्र भगवन्तं दृष्ट्वा तस्य मुरारेरंसे अनुरक्तहृदया सती मनोमालां दत्त्वा स्वमालां स्वप्रतिकृतिरूपां स्वमालाम् अंसे निदधे ॥२८-२९॥

श्रीसुबोधिनीसारः

भग्नं मानं येषां तेषु मानिषु राजन्येषु निवृत्तेषु सत्सु भगवान् श्रीकृष्णो धनुर्गृहीत्वाऽथ लीलया सज्यं कृत्वा ॥२५॥ तस्मिन् धनुषि विशिखं बाणं सन्धायारोप्य जले सकृदेकवारं मत्स्यं दृष्ट्वा तम् इषुणा बाणेन छित्त्वा विद्ध्वाऽपातयत् सूर्येऽभिजिति मुहूर्ते स्थिते वर्तमाने सति ॥२६॥ दिवि स्वर्गे दुन्दुभयो नेदुः । देवाश्च हर्षविह्वला भुवि पृथिव्युपरि जयशब्देन युताः कुसुमासारान् पुष्पवृष्टीर्मुमुचुः ॥२७॥ तत्तदा कनकेनोज्ज्वलां रत्नानां मालां प्रगृह्य नूत्ने नवीने कौशिकाग्र्ये उत्तमपट्टवाससी निवीय परिधाय सव्रीडो हासो यस्मिन् तद्वदनं मुखं यस्याः कबर्यां केशबन्धने धृताः स्रजो माला यया साऽहं कलौ मधुरशब्दौ नूपुरौ ययोस्ताभ्यां पद्भ्यां रङ्गमाविशम् ॥२८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मानिषु साहङ्कारेषु राजन्येषु मत्स्यवेधसामर्थ्याभावाद्भग्नमानेषु अत एव तद्वेधनप्रयत्नान्निवृत्तेषु च सत्सु सूर्ये च सर्वार्थसाधकेऽभिजिति मुहूर्ते स्थिते मध्याह्नसमये भगवान् कृष्णो धनुरादाय अथ लीलया अनायासेनैव सज्यं कृत्वा ॥२५॥ तस्मिन् धनुषि विशिखं बाणं सन्धाय सकृदेव जले मत्स्यं वीक्ष्य इषुणा तं छित्त्वा अपातयत् ॥२६॥ जयशब्देन युता दिवि स्वर्गे देवानां दुन्दुभयो नेदुः, हर्षेण विह्वला देवाश्च भुवि कुसुमानामासारान् वृष्टीर्मुमुचुः ॥२७॥ तत्तदा नूत्ने नवीने कौशिकाग्र्ये उत्तमकौशेये वस्त्रे निवीय प्रावृत्य परिधाय च सव्रीडो हासो यस्मिंस्तद्वदनं यस्याः सा तथा कबर्यां धृताः स्रजो यया साऽहं कनकेनोज्ज्वलां रत्नमालां प्रगृह्य कलौ मधुरस्वनौ नूपुरौ ययोस्ताभ्यां पद्भ्यां रङ्गं सभास्थानं प्राविशं प्रविष्टवत्यस्मि ॥२८॥

अन्वितार्थप्रकाशिका

राजन्येष्विति युग्मम् । मानिषु साहङ्कारेषु राजन्येषु मत्स्यभेदसामर्थ्याभावाद्भग्नमानेषु अत एव तद्वेधनप्रयत्नान्निवृत्तेषु च सत्सु सूर्ये च सर्वार्थसाधकेऽभिजिति मुहूर्ते स्थिते मध्याह्नसमये तदा च मत्स्योपरि सूर्य इत्यपि लक्ष्येऽवेध्येति भावः। भगवान् कृष्णो धनुरादाय अथ लीलया अनायासेनैव सज्यं कृत्वा तस्मिन् धनुषि विशिखं बाणं सन्धाय सकृदेव जले मत्स्यं वीक्ष्य इषुणा तं छित्त्वा अपातयत् ॥२५-२६॥ दिवीति । जयशब्देन युता दिवि स्वर्गे देवानां दुन्दुभयो नेदुः हर्षेण विह्वला देवाश्च भुवि कुसुमानामासारान् वृष्टीर्मुमुचुः ॥२७॥ तत्कालभवं स्वहर्षं स्मरन्ती तदा तात्त्विकं स्वयंवरणं वर्णयन्त्याह-तदिति । तत्तदा विवाहोचिते नूत्ने नवीने कौशिकाग्र्ये उत्तमकौशेये वस्त्रे निवीय प्रावृत्य परिधाय च सव्रीडो सभादिव्रीडासहित आनन्दहेतुको हासो यस्मिंस्तद्वदनं यस्याः सा तथा कबर्यां धृताः स्रजो यया साऽहं कनकेनोज्ज्वलां रत्नमालां प्रगृह्य कलौ मधुरस्वनौ नूपुरौ ययोस्ताभ्यां पद्भ्यां रङ्गं सभास्थानं प्राविशं प्रविष्टवत्यस्मि ॥२८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

विशिखं बाणं सूर्ये अभिजिति स्थिते मध्यगते सति । तं मत्स्यमपातयत् ॥२६॥ कुसुमासारान् पुष्पधाराः ॥२७॥ भगवत्प्राप्त्यातिहृष्टा सती स्ववर्णनं कुर्वत्याह श्लोकद्वयेन तदिति । तत् तदा नूत्ने नवीने कौशिकाग्र्ये श्रेष्ठकौशेयवाससी निवीय परिधाय चकारादेकं निवीय कट्यां बद्ध्वा द्वितीयं सर्वाङ्गे परिधाय कनकेन खचितामुज्ज्वलां रत्नमालां हस्ते प्रगृह्य कलौ मनोहरशब्दौ नूपुरौ ययोस्ताभ्यां रङ्गं राजसभामहं प्राविशं प्राविवेश ॥२८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

भगवांस्तु विव्याधेत्याह ॥ राजन्येष्विति ॥ तस्मिन्निति च ॥ मानिषु साहङ्कारेषु राजन्येषु भग्नमानेषु अत एव निवृत्तेषु सत्सु सूर्ये च अभिजिति स्थिते सति सर्वार्थसाधके मध्याह्ने इत्यर्थः । भगवान् धनुः आदाय अथ लीलया अनायासेनैव सज्यं कृत्वा तस्मिन् शार्ङ्गनाम्ना प्रसिद्धे धनुषि विशिखं बाणं सन्धाय सकृदेव जले मत्स्यं वीक्ष्य इषुणा तं मत्स्यं छित्त्वा अपातयत् ॥२५-२६॥ दिवीति ॥ भुवि पृथिव्यां जयशब्दयुताः जयशब्देन सहिताः दुन्दुभयो मानुषा दुन्दुभयः दिवि देवदुन्दुभयश्च नेदुः । तदैव भुवि च जयशब्दसहिता नराणां देवानां च दुन्दुभिनादाः बभूवुरित्यर्थः । तत्र प्रहर्षकृतं देवानां सम्बन्धिनं विशेषमाह । देवाश्च

हर्षविह्वलाः सन्तः कुसु

द्वाभ्याम् ॥ तदिति ॥ तत्त

सव्रीडो हासो यस्मिंस्तत्

रत्नमाला तां प्रगृह्य पाणिनो

देवी द्रौपदीजी

प्राप्त करनेकि इच्छा के

धनुष पर प्रत्यंचा चढा दी

दिया । उस समय मध्या

मत्स्यवेध किया तब पृथ्

आनन्द मग्न होकर पुष्प

मैने चरणोंमे पायल धार

चोटियोंमो पुष्प मालाएं ग

थी, उन मालमओंके मध्य

शाटिकायें और वस्त्र धारण

उन्नीय वक्त्रमुरुकु

राज्ञो निरीक्ष्य प

¹तावन्मृदङ्गपटहा

एवं वृते भगवति

कुरुकुन्तलकुण्डलत्विड

अंसे, अनुरक्तहृदया, स्वमालाम्,

जगुः ॥३०॥ हे, याज्ञसेनि, एवम्,

उरवः कुन्तलाः यस्मिन्

कटाक्षमोक्षैरपाङ्गमोक्षणविलासैः

स्पर्धन्तः स्पर्धमानाः नन्वेवं परमैश्

कामविजृम्भिता स्पर्धेति भावः ॥३

---

१. कटाक्षमोक्ष-विज. । २. निदधे स्म-वी

; स्पधिनो-विज. । ६. तुराः-श्रीधर. वंशी

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

र्षविह्वलाः सन्तः कुसुमासारान् दैवकुसुमप्रवर्षणानि मुमुचुश्चक्रु ॥२७॥ भगवत्प्राप्तिहर्षनिर्भरेणात्मानमेवानुवर्णयन्त्याह-तदिति ुग्मम् ॥ तदिति ॥ तत्तदा नूत्ने नवीने कौशिकाग्र्ये उत्तमकौशेये वस्त्रे निवीय परिधाय च नीवीबन्धनपूर्वं तत्परिधानं कृत्वेत्यर्थः । व्रीडो हासो यस्मिस्तत् वदनं यस्याः सा कबर्यां केशपाशे धृताः स्रजो रुचिरपुष्पमाला यया सा अहं कनकेन उज्ज्वला या त्नमाला तां प्रगृह्य पाणिनोपादाय कलौ कलस्वनौ नूपुरौ ययोस्तौ ताभ्यां पद्भ्यां रङ्गं स्वयंवरस्थलम् आविशं प्रविष्टवत्यस्मि ॥२८॥

कृष्णप्रिया

देवी द्रौपदीजी ! इस स्वयंवरमें ख्यातनाम नरपतियोंका मानमर्दन हो गया । प्रायः अधिक प्रमाणमें मुझे प्त करनेकि इच्छा के साथे लक्ष्यवेधकी चेष्टा का भी त्याग किया । तब भगवानने धनुष उठाकर अनायास ही नुष पर प्रत्यंचा चढा दी, बाण साधा और जलमें मत्स्य की परछाई देखकर बाण मारा तथा मत्स्य को नीचे गिरा दिया । उस समय मध्याह्न काल था सर्वार्थसाधक अभिजित मुहुर्त था बीत रहा था ॥२५-२६॥ जब भगवानने मत्स्यवेध किया तब पृथ्वीमें जयजयकार होने लगा और आकाशमें दुन्दुभियां बजने लगी और देवाधिदेव वृन्द आनन्द मग्न होकर पुष्पवर्षा करने लगा ॥२७॥ श्रीद्रौपदीजी, उस मंगल अवसर मैने अंगशालामें प्रवेश किया, मैने चरणोंमे पायल धारण किये थे, उन पायलोंकी किंकीणीयोकीं रुनझुन ध्वनि हो रही थी । मेरी अलकोंकी चोटियोंमो पुष्प मालाएं गुथी हुईथी और मुख पर लज्जा मिश्रित मुस्कुराहट थी । मेरे हाथोंमे रत्नोंकी मालमयें थीं, उन मालमओंके मध्यमें लगे हुए सुवर्ण के और भी दमक रही थी । मैने नूतन उत्तम रमणीय कोमल दुकूल ाटिकायें और वस्त्र धारण किये थे ॥२८॥

उन्नीय वक्त्रमुरुकुन्तलकुण्डलत्विड्गण्डस्थलं शिशिरहासकटाक्षमोक्षैः[१] ।
राज्ञो निरीक्ष्य परितः शनकैर्मुरारेरंसेऽनुरक्तहृदया निदधे[२] स्वमालाम् ॥२९॥
[३]तावन्मृदङ्गपटहाः शंखभेर्यानकादयः । निनेदुर्नटनर्तक्यो ननृतुर्गायका जगुः ॥३०॥
एवं वृते भगवति [४]मयेशे नृपयूथपाः । न सेहिरे याज्ञसेनि [५]स्पर्धिनो हृच्छयार्दिताः[६] ॥३१॥

कर्दमक्षमा

कुरुकुन्तलकुण्डलत्विड्गण्डस्थलम्, वक्त्रम्, उन्नीय, शिशिरहासकटाक्षमोक्षैः, परीतः, राज्ञः, निरीक्ष्य, शनकैः, मुरारेः, ंसे, अनुरक्तहृदया, स्वमालाम्, निदधे ॥२९॥ तावत्, मृदङ्गपटहाः, शङ्खभेर्यानकादयः, निनेदुः, नटनर्तक्यः, ननृतुः, गायकाः, जगुः ॥३०॥ हे, याज्ञसेनि, एवम्, भगवति, ईशे, मया, वृते, स्पर्धिनः, नृपयूथपाः, हृच्छयार्दिताः, न, सेहिरे ॥३१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उरवः कुन्तलाः यस्मिन् कुण्डलयोस्त्विषो ययोस्ते गण्डस्थले यस्मिस्तच्च तच्च शिशिरः सन्तापः हासो येषु तैः कटाक्षमोक्षैरपाङ्गमोक्षणविलासैः अनुरक्तं हृदयं यस्याः सा अहं ॥२९-३०॥ याज्ञसेनि हे द्रौपदि ! ईशे श्रीकृष्णे मया वृते सति र्धिनः स्पर्धमानाः नन्वेवं परमैश्वर्यं दृष्टवतां कुतः स्पर्धावसरस्तत्राऽऽह-हृच्छयातुरा इति हृच्छयेन कामेनाऽऽतुरा विवशाः कामविजृम्भिता स्पर्धेति भावः ॥३१॥

---

[१] कटाक्षमोक्षं-विज. । [२] निदधे स्म-वीर. । [३] ततो मृदङ्ग-विज. । [४] मयेमे-गो. प्रे. टी. ; मायेशे विज. । [५] स्पर्धन्तो-श्रीधर. वंशी. वीर. विश्व. र्धिनो-विज. । [६] तुराः-श्रीधर. वंशी. वीर. विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तावन्मालानिक्षेपसमये ॥३०॥ ईशपदेनात्र न शम्भुरग्रिमपद्ये चतुर्भुज इत्युक्तेः । अत्राऽऽशङ्कते-नन्विति । इति भाव इति-कामाकुलितचित्तत्वाद्भगवतदैश्वर्यविस्मृतिर्जाता । "कामातुराणां न भयं न लज्जा" इत्युक्तेः ॥३१-३२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

कुन्तलानां गण्डान्तःपतनं कर्णसमीपस्थचूर्णकुन्तलानां बन्धनविशेषेण तत्समीपप्रासेः स्थितान् राज्ञो वीक्ष्य अवज्ञयैव दृष्ट्वा शिशिरेत्यादिलक्षणश्रीकृष्णकटाक्षमोक्षैः अनुरक्तहृदया स्वीयां तदर्थं हस्तरचितां गृहीतां मालां मुरारेरिति महावीरत्वादिन मालानिधानयोग्यतोक्ता । अन्यत्तैः । यद्वा, उरवः कुन्तलानां कुण्डलयोश्च त्विषो ययोस्ते गण्डमण्डले यस्मिन् तत् शिशिरः शीतलो मन्द इत्यर्थः । मुरारेरेवानुरक्तं हृत् अयते यातीति तथा सेति मिथः प्रेमोक्तम् अन्यत्समानम् ॥२९॥ तावदिति तत्क्षणत एवेत्यर्थः ॥३०॥ एवमनेनोक्तप्रकारेणापि वृत्ते तावदपि दुराशाग्रस्तत्वादिति भावः । भगवति सर्वशक्तिमति यतः ईशे साक्षात्परमेश्वरे नृपयूथपा राजवर्गश्रेष्ठाः जरासन्धादयः हे याज्ञसेनीति विस्मयात् अहो यायजूकद्रुपदकन्यात्वेन सद्बुद्धिमती त्वं तेषां धार्ष्ट्यं भरं पश्येति भावः ॥३१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

शिशिरहासकटाक्षमोक्षैर्विशिष्टं वक्त्रम्, परितः उपस्थितान् राज्ञो निरीक्ष्यावज्ञयैषद् दृष्ट्वा शनकैर्निदधे । तत्र हेतुः-अनुरक्तेति, - प्रेमोद्रेकाविष्टचित्तत्वादित्यर्थः । स्वकीयां तदर्थहस्तगृहीतां मालाम्, मुरारेरिति मुरनामामहादैत्यवधेन महावीरत्वादिन मालानिधानयोग्यतोक्ता । अन्यत्तैर्व्याख्यातम् । यद्वा, उरवः कुन्तलानां कुण्डलयोश्च त्विषो ययोस्ते गण्डस्थले यस्मिंस्तत् शिशिरः शीतलो मन्द इत्यर्थः । मुरारेरेवानुरक्तं हृत् अयते यातीति तथा सेति मिथः प्रेमोक्तम् । अन्यत् समानम् ॥२९॥ तावदिति तत्क्षण इत्यर्थः । मृदङ्गः, पटहाश्च प्रसिद्धाः, भेर्यश्च शुषिरभेदाः, आनका दुन्दुभयः, आदि-शब्दात् पणवादयः, मृदङ्गादीनांयथोत्तरमुच्चशब्दत्वे श्रैष्ठ्यम् । विशेषेण दिव्यवाद्यतोऽप्याधिक्येन नेदुः स्वयमेव ॥३०॥ एवमनेनोक्तप्रकारेणापि वृते भगवति सर्वशक्तिमति यत ईशे साक्षात्परमेश्वरे नृपयूथपा राजवर्गश्रेष्ठा जरासन्धादयः, हे याज्ञसेनीति विस्मयात् । अहो यायजूक-द्रुपदकन्यात्वेन सद्बुद्धिमती त्वं तेषां धार्ष्ट्यभरं पश्येति भावः ॥३१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१९-३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उन्नीयेति । उरवः कुन्तलाः यस्मिन् कुण्डलयोस्त्विषो ययोस्ते गण्डस्थले यस्मिंस्तच्च वक्त्रम् उन्नीय परितः शनैः राज्ञो राजन्यान् निरीक्ष्य मुरारेः श्रीकृष्णस्य शिशिरः सन्तापहरः हासो येषु तैः कटाक्षमोक्षैरपाङ्गवीक्षणविलासैरनुरक्तं हृदयं चित्तं यस्याः साऽहं तस्य अंसे स्कन्धे मालां निदधे स्म निहितवत्यस्मि ॥२९॥ तावदिति । तदैव नट्य नर्तक्यश्च ननृतुः ॥३०॥ एवमिति इत्थमीश्वरे भगवति मया वृते सति हे याज्ञसेनि ! द्रौपदि ! नृपयूथपाः हृच्छयेन कामेनातुराः स्पर्धमाना न सेहिरे ॥३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

शिशिरहासकटाक्षैरुपलक्षितं वक्त्रम् । राज्ञो निरीक्ष्य अवज्ञयैव दृष्ट्वा ॥२९-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

उन्नीयेत्यादि । राज्ञोऽनिरीक्ष्येति । राज्ञः अनिरीक्ष्य जुगुप्सया तान् न दृष्ट्वेत्यर्थः । निरीक्ष्येति वा ॥२९-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

उन्नीयेत्यादि । राज्ञोऽनिरीक्ष्य-जुगुप्सया राजानो न दृष्ट्वेत्यर्थः ॥२९॥

तात्कालिकमतिह
त्विषो ययोस्तथाभूते गण्डस

ततः अनुरक्तहृदय
शिशिरः सन्तापहरो हासो ये
कुण्डलयोः त्विषः ययोस्ते
तावत् तदा मृदङ्गादयः नितरां
द्रौपदि ! । हृच्छयः कामः तेन

उरुकुन्तलानां कुण्ड
शिशिरः सन्तापहरः हासो येषु
स्वमालां निदधे न तु कण्ठे इति

तन्मम वरणं सर्वसम
नित्यानि गीतवाद्यनृत्यानि वक्ता
ततो यज्जातं तदाह-एवं वृते भ
शूकरत्वं निरूपितम् । एकचरो
निरूपितः । याज्ञसेनीति विश्वासा
स्पर्धिनः भगवता सह स्पर्धायुक्ता

उरवो बहवः कुन्तला यि
परितः सर्वतो राज्ञो भूपान् शनैर्निरी
मुरारेः श्रीकृष्णस्यांसे स्कन्धे स्वमा
ईशे भगवति मया वृते सति स्पर्धन्त

अनुरक्तं कृष्णे हृदयं यस्
तत्स्ववक्त्रमुन्नीय शिशिरः सन्तापहरो
स्वमालां निदधे निहितवत्यस्मि ॥२
एवं मया वृते सति नृपयूथपास्तत्र से
तत्राह-हृच्छयातुरा इति । हृच्छयेन म

-नन्विति । इति भाव
२॥

राज्ञो वीक्ष्य अवज्ञयैव
रिति महावीरत्वादिना
यस्मिन् तत् शिशिरः
नम् ॥२९॥ तावदिति
ति सर्वशक्तिमति यतः
दकन्यात्वेन सद्बुद्धिमती

नकैर्निदधे । तत्र हेतुः-
त्यवधेन महावीरत्वादिना
गण्डस्थले यस्मिंस्तत् ।
अन्यत् समानम् ॥२९॥
दि-शब्दात् पणवादयः,
। एवमनेनोक्तप्रकारेणापि
सेनीति विस्मयात् । अहो

त्रम् उन्नीय परितः शनैः राज्ञो
सैरनुरक्तं हृदयं चित्तं यस्याः
श्च ननृतुः ॥३०॥ एवमिति ।
ा न सेहिरे ॥३१॥

वा ॥२९-३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तात्कालिकमतिहर्षोत्थं मत्सन्दर्शनमन्यदेवासीदित्याह-उन्नीयेति । उरुकुन्तलानां कर्णसमीपस्थचूर्णकुन्तलानां कुण्डलयोश्च त्विषो ययोस्तथाभूते गण्डस्थले यत्र तत् ॥२९-३०॥

गूढार्थदीपिनी

ततः अनुरक्तहृदया अहं स्ववक्त्रमुन्नीय उपरि उत्थाप्य शनकैः मुरारेः अंसे स्वमालां निदधे इत्यन्वयः । किं कृत्वा । शिशिरः सन्तापहरो हासो येषु तैः एवम्भूतैः कटाक्षपातैः राज्ञो निरीक्ष्य । कथम्भूतं वक्त्रम् । उरवः कुन्तलाः वक्रकेशा यस्मिन् । कुण्डलयोः त्विषः ययोस्ते एवम्भूते गण्डस्थले च यस्मिन् तच्च तच्च । लज्जातिरेकात् स्कन्धे एव निहिता न तु कण्ठे ॥२९॥ तावत् तदा मृदङ्गादयः नितरां नेदुः ॥३०॥ मया ईशे कृष्णे वृते सति नृपयूथपाः सेनापतयः स्पर्धमानाः सन्तः तत्र सेहिरे हे याज्ञसेनि द्रौपदि!। हृच्छयः कामः तेन पीडिताः ॥३१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उरुकुन्तलानां कुण्डलयोश्च त्विषो ययोस्ते गण्डस्थले यस्मिन् तत् वक्त्रमुन्नीय परितः राज्ञो राजन्यान् निरीक्ष्य मुरारेः शिशिरः सन्तापहरः हासो येषु तैः कटाक्षमोक्षैरपाङ्गवीक्षणविलासैः अनुरक्तं हृदयं यस्याः साऽहम् अंसे मुरारेः स्कन्धे शनकैः स्वमालां निदधे न तु कण्ठे इति मोह उक्तः ॥२९-३१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तन्मम वरणं सर्वसम्मतं जातमिति ज्ञापयितुं तदानीमुत्सवाद्यानाह-तावन्मृदङ्गपटहा इति । पञ्चैतानि मङ्गलवाद्यानि द्यानि गीतवाद्यनृत्यानि वक्ताव्यानीति वाद्यानि उक्त्वा नृत्यमाह-नटनर्तक्यो ननृतुरिति । गानं चाह-गायकाश्च जगुरिति ॥३०॥ यज्जातं तदाह-एवं वृते भगवतीति । भगवत्त्वात् सर्वसम्पतिः ईशत्वादावश्यकः अन्ये नृपयूथपा इति नृपाणां यूथपत्वं त्वं निरूपितम् । एकचरो हि सिंहः यूथचरास्त इति तेषां वध्यत्वं निरूपितम् । ततो न सेहिरे अनेन तेषामन्तःकरणदोषो पितः । याज्ञसेनीति विश्वासार्थं सम्बोधनम् । यज्ञरूपा सेना यस्य स यज्ञसेनः तस्य कन्या याज्ञसेनी । यज्ञादेवोत्पन्नेति । यतः र्धन्तः भगवता सह स्पर्धायुक्ताः मदर्थं हृच्छयेन कामेनार्दिताः । एवमन्यकृतो दोषः स्वभावकृतश्च निरुक्तः ॥३१॥

श्रीसुबोधिनीसारः

उरवो बहवः कुन्तला यस्मिन् कुण्डलयोस्त्विषो ययोस्ते गण्डस्थले यस्मिंस्तच्च तच्च वक्त्रं मुखम् उन्नीय ऊर्ध्वं कृत्वा तः सर्वतो राज्ञो भूपान् शनैर्निरीक्ष्य दृष्ट्वा शिशिरः सन्तापहरो हासो येषु तैः कटाक्षाणां मोक्षैर्विलासैरनुरक्तं हृदयं यस्याः साऽहं रेः श्रीकृष्णस्यांसे स्कन्धे स्वमालां चिक्षिपे ॥२९॥ तावन्मृदङ्गादयो विनेदुः नटा नर्तक्यो नृत्यं चक्रुः गायका जगुः ॥३०॥ एवं भगवति मया वृते सति स्पर्धन्तः स्पर्धमानाः राजवृन्दाः हृच्छयेन कामेनातुरा एतन्न सेहिरे हे याज्ञसेनि ! ॥३१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अनुरक्तं कृष्णे हृदयं यस्याः साऽहम् । उरवः कुन्तलाः यस्मिन् कुण्डलयोस्त्विषो ययोस्ते गण्डस्थले यस्मिंस्तच्च तत्स्ववक्त्रमुन्नीय शिशिरः सन्तापहरो हासो येषु तैः कटाक्षमोक्षैरपाङ्गवीक्षणविलासैः शनकैः राज्ञो राजन्यान्निरीक्ष्य मुरारेरंसे स्कन्धे स्वमालां निदधे निहितवत्यस्मि ॥२९॥ तावत् तदा मृदङ्गादयो विनेदुः ॥३०॥ हे याज्ञसेनि द्रौपदि ! भगवति पूर्णैश्वर्यादिगुणे ईश्वरे स्वं मया वृते सति नृपयूथपास्तत्र सेहिरे । तत्र हेतुमाह-स्पर्धन्तः स्पर्धमानाः । ननु एवं परमैश्वर्यं दृष्टवतां कुतः स्पर्धा सम्भवति ह-हृच्छयातुरा इति । हृच्छयेन मन्निमित्तकामेनातुरा विवशाः ॥३१॥

अन्वितार्थप्रकाशिका

उन्नीयेति । अनुरक्तं कृष्णे आसक्तं हृदयं यस्याः साऽहम् उरवः कुन्तलाः यस्मिन् कुण्डलयोस्त्विषो ययोस्ते गण्डस्थ यस्मिंस्तच्च तत्स्ववक्त्रमुन्नीय शिशिरः सन्तापहरो हासो येषु तैः कटाक्षमोक्षैरपाङ्गमोक्षणविलासैः शनकैः परितः स्थित राज्ञो राजन्यान् अवज्ञया निरीक्ष्य मुरारेरंसे स्कन्धे स्वमालां निदधे निहितवत्यस्मि ॥२९॥ तावदिति । तावत् तदा मृदङ्गा नेदुः ॥३०॥ एवमिति । हे याज्ञसेनि द्रौपदि ! भगवति ईशे एवं मया वृते सति स्पर्धन्तः स्पर्धमानाः । आर्षः शता । हृच्छयातु कामपीडिताः नृपयूथपास्तन्न सेहिरे ॥३१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कथम्भूता सव्रीडो हासो यस्मिंस्तथाभूतं वदनं यस्याः सा कबर्यां केशपाशे धृताः स्रजो यया सा उरवः कुन्तलाः के यस्मिन् कुण्डलयुगस्य त्विषः कान्तयो ययोस्ते गण्डस्थले यस्मिन् तच्च तच्च वक्त्रम् उन्नीय उद्घाट्य । शिशिरः शीतलो हासो ये तैः कटाक्षमोक्षैः परितः स्थितान् राज्ञो नृपान् । निरीक्ष्यानुरक्तहृदयाऽहम् । मुरारेरंसे स्वमालां शनकैर्निदधे ॥२९-३०॥ हे याज्ञसे द्रौपदि ! ईशे मया वृते सति स्पर्धन्तः दृष्टैश्वर्ये हरौ कथं स्पर्धन्ते तत्राह-यतः हृच्छयेन कामेनातुराः परतन्त्राः ॥३१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उन्नीयेति ॥ उरवः कुन्तला यस्मिंस्तत् कुण्डलयोस्त्विषो ययोस्ते गण्डस्थले यस्मिंस्तत् तच्च तच्च वक्त्रं मुखम् परितः शनकैः राज्ञो राजन्यान् निरीक्ष्य शिशिरः सन्तापहरो हासो येषु ते ये कटाक्षमोक्षास्तैः कार्ष्णैरपाङ्गवीक्षणविलासैरित्य अनुरक्तं हृदयं यस्याः सा एवम्भूता सती मुरारेः श्रीकृष्णस्य अंसे स्वमालां निदधे निहितवत्यस्मि ॥२९॥ तावदिति ॥ ताव मृदङ्गपटहाः शङ्खभेर्यानकादयः निनेदुः । नटनर्तक्यः ननृतुः । गायकाः जगुः ॥३०॥ एवमिति ॥ एवमित्थम् ईशे ईश्वरे भाव मया वृते हे याज्ञसेनि नृपयूथपाः हृच्छयार्दिताः कामेनातुराः स्पर्धन्तः स्पर्धमानाः सन्तः न सेहिरे ॥३१॥

कृष्णप्रिया

देवीजी ! मेरा मुखमण्डल सघन घुंघराली अलकावलियों सुशोभित हो रहा था और कपोलों अलौकिक कुण्डलोंकी आभा पडने से, और अधिक तर दमक उठा था । देवीजी मैने उस अवसर एक बार अप मुख्र उठाकर चन्द्रमाकी किरणावली समान सुशीत हास्यरेख्रा और तिरछी चितवनसे चारो और सभामें बैठे नरपतियों की और अवलोकन किया । और धीरेसे अपनी वरमाला भगवानके श्रीचरणोंमे अनुरक्त था ॥२९॥ मैनें भगवानके श्रीकंठमें वरमाला पधरायी त्यों ही मृदंग, पख्रावज, शंख्र, ढोल, नगारे आदि वाजे वाजित ध्वनि होने लगी, नट और नर्तकियां नृत्य करने लगी और गवैये गाने लगे ॥३०॥ भगवती द्रौपदी ! जब पुरुषोत्तम और मेरे प्रियतम भगवान श्रीकृष्णको वरमाला पहनायी और उनका वरण किया कामातुर राजाओं उख्रडा हुआ वे अत्यंत चिढ गये ॥३१॥

मां [1]तावद्रथमारोप्य हयरत्नचतुष्टयम् । शार्ङ्गमुद्यम्य संनद्धस्तस्था[2]वाजौ चतुर्भुजः ॥३
दारु कश्चोदयामास काञ्चनोपस्करं रथम् । मिषतां [3]भूभुजां राज्ञि मृगाणां मृगराडिव ॥३
तेऽन्वसज्जन्त राजन्या [4]निषेद्धुं पथि केचन । संयत्ता उद्धृतेष्वासा ग्रामसिंहा यथा हरिम् ॥३

कर्दमक्षमा

तावत्, हयरत्नचतुष्टयम्, रथम्, माम्, आरोप्य, शार्ङ्गम्, उद्यम्य, सन्नद्धः, चतुर्भुजः, आजौ, तस्थौ ॥३२॥ राज्ञि, मृग मिषताम्, मृगराट्, इव, भूभुजाम्, मिषताम्, काञ्चनोपस्कररथम्, दारुकः, चोदयामास ॥३३॥ ते, केचन, संयत्ताः, रा निषेद्धुम्, पथि, उद्धृतेष्वासाः, ग्रामसिंहाः, यथा, हरिम्, अन्वसज्जन्त ॥३४॥

---

१. मां रथं स समारोप्य लसद्धयचतुष्टयं-विज. । २. स्तस्थावीशश्चतु-विज. । ३. द्विषतां राज्ञि वृकाणां-विज. । ४. नियोदधुं-गो. प्र.

हयरत्नानां चतुष्टयं यरि
मृगराडिव तदा हरिर्जगामेति शेषे
कर्तुं केचन पुरतो गत्वा पथि संय

तदा रथे स्त्र्यारोपणकाले
भावः ॥३४॥

हयरत्नचतुष्टयमिति रथस्
आसीत् ॥३२॥ काञ्चनोपस्करं सौ
मृगाणामिति दृष्टान्तेन श्रीदारुकस्य
अन्यतैः । यद्वा, केचिद्रथवेगतोऽप्यनु
निषेद्धुं रोद्धुमित्यर्थः । अतः संयत्ता

हयरत्नचतुष्टयमिति रथस्य म
॥३२॥ काञ्चनोपस्करं सौवर्णपरिच्छद
दृष्टान्तेन श्रीदारुकस्य निर्भयत्वमुक्तम्
। यद्वा, केचिद् रथवेगतोऽनुसज्जितुम
निषेद्धुं रोद्धुमित्यर्थः । अतः संयत्ता यु

ग्रामसिंहाः श्वानः हरिं नरसिंह

मामिति । हयरत्नानामश्वश्रेष्ठा
द्वाभ्यां धनुर्बाणान् गृहीत्वा चतुर्भुजो
! मृगाणां शूद्राणां पश्यतां (सतां) मृ
केचन ते राजन्याः सन्नद्धा आयत्ता उद्
ग्रामसिंहाः श्वानो हरिं सिंहं तद्वत् ॥३४

याज्ञसेनि द्रौपदि ! । स्पर्धन्तः
चतुर्भुजस्तस्थौ ॥३२॥ मिषतां मृगाणां मृग
बभूवुः निषेद्धुं रोद्धुमित्यर्थः । उद्धृतेष्वासा

श्रीधरस्वामिविरचिता भावार्थदीपिका

हयरत्नानां चतुष्टयं यस्मिस्तं रथं द्वाभ्यां मामालिङ्ग्य द्वाभ्यां धनुर्बाणौ गृहीत्वा चतुर्भुजस्तस्थौ ॥३२॥ मृगाणां मिषतां मृगराडिव तदा हरिर्जगामेति शेषो ज्ञातव्यः दारुकस्यैव मृगराजोपमा ॥३३॥ अन्वसज्जन्त पृष्ठतः सक्ता बभूवुः निषुद्धं प्रतिबन्धं र्गं केचन पुरतो गत्वा पथि संयत्ता बभूवुरित्यर्थः । उद्धृतेष्वासाः ऊर्ध्वकृतचापाः ग्रामसिंहाः श्वानो हरिं सिंहं यथेति ॥३४-३५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदा रथे स्त्र्यारोपणकाले । अध्याहारे गौरवं मत्वाह-दारुकस्येति ॥३३॥ ये तत्रागतास्ते । इत्यर्थ इति-मार्गं रुरुधुरिति भावः ॥३४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हयरत्नचतुष्टयमिति रथस्य महावेगादिकं सूचितम् । आजौ युद्धार्थं सन्नद्धः उद्यतः सन् रथस्थो रथोपर्येवोर्ध्वावस्थानेन आसीत् ॥३२॥ काञ्चनोपस्करं सौवर्णपरिच्छदमिति दूरदृश्यत्वादिकं ध्वनितम् अतो मिषतां पश्यतामपि अनादरे षष्ठी । अतो मृगाणामिति दृष्टान्तेन श्रीदारुकस्य निर्भयत्वमुक्तम् । हे राज्ञीति परमोत्साहात् ॥३३॥ श्वानोऽप्युद्धृतेष्वासवदुद्धृतपुच्छा भवन्ति भवन्ति । यद्वा, केचिद्रथवेगतोऽप्युत्सज्जितुमशक्ता दूर एवावस्थिताः आशुगरथास्तु केचन ते कुबुद्धयोऽन्वसज्जन्त किमर्थं पथि निषेद्धुं रोद्धुमित्यर्थः । अतः संयत्ता युद्धोद्यताः अत एवोद्धृतेष्वासाः सन्तः ॥३४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हयरत्नचतुष्टयमिति रथस्य महावेगादिकं सूचितम् । आजौ युद्धार्थं सन्नद्ध उद्यतः सन् तस्थौ, रथोपर्येवोर्ध्वावस्थानेनासीत् ॥३२॥ काञ्चनोपस्करं सौवर्णपरिच्छदमिति दूरदृश्यत्वादिकं ध्वनितम् । अतो मिषतां पश्यतामपि, अनादरे षष्ठी, अतो मृगाणामिति दृष्टान्तेन श्रीदारुकस्य निर्भयत्वमुक्तम् । हे राज्ञीति परमोत्साहात् ॥३३॥ श्वानोऽप्युद्धृतेष्वासवदुद्धृतपुच्छा भवन्ति । अन्यतैर्व्याख्यातम् यद्वा, केचिद् रथवेगतोऽनुसज्जितुमशक्ता दूरत एवावस्थिताः । आशुगरथास्तु केचन ते कुबुद्धयोऽन्वसज्जन्त । किमर्थम् ? पथि निषेद्धुं रोद्धुमित्यर्थः । अतः संयत्ता युद्धोद्यताः अत एवोद्धृतेष्वासाः सन्तः ॥३४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

ग्रामसिंहाः श्वानः हरिं नरसिंहम् ॥३४-४३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

मामिति । हयरत्नानामश्वश्रेष्ठानां चतुष्टयं यस्मिस्तं रथम् आरोप्य तस्मिन्निधाप्येत्यर्थः । द्वाभ्यां भुजाभ्यामालिङ्ग्य द्वाभ्यां धनुर्बाणान् गृहीत्वा चतुर्भुजो युद्धे तस्थावित्यर्थः ॥३२॥ दारुक इति । काञ्चनेनोपस्कृतं रथं गमयामास । हे राज्ञि मृगाणां शूद्राणां पश्यतां (सतां) मृगः सिंह इव भूभुजां मिषतां सतां हरिर्जगामेति शेषोऽवगन्तव्यः ॥३३॥ त इति । केचन ते राजन्याः सन्नद्धा आयत्ता उद्यत्ताः इश्वासाश्चापा यैस्ते पथि निषेद्धुं वारयितुम् अन्वसज्जन्त पृष्ठतोऽन्वधावन् यथा ग्रामसिंहाः श्वानो हरिं सिंहं तद्वत् ॥३४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२९-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२९-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥३०-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

याज्ञसेनि द्रौपदि ! । स्पर्धन्तः स्पर्धमानाः । भीरुस्वभावां मां द्वाभ्यां भुजाभ्यामालिङ्ग्य द्वाभ्यां धनुर्बाणौ गृहीत्वेति चतुर्भुजस्तस्थौ ॥३२॥ मिषतां मृगाणां मृगराडिव हरिर्जगामेति शेषः । मिषतामित्यनादरे षष्ठी ॥३३॥ अन्वसज्जन्त पृष्ठतः सक्ता बभूवुः निषेद्धुं रोद्धुमित्यर्थः । उद्धृतेष्वासा ग्रामसिंहा अप्युद्धृतपुच्छा भवन्ति ॥३४॥

गूढार्थदीपिनी

तावत् तदा भगवान् मां रथमारोप्य शार्ङ्गं धनुः उत्थाप्य चतुर्भुजः सन् आजौ सङ्ग्रामे तस्थौ । हयरत्नानां चतुष्टयं यस्मि
। सन्नद्धः धृतकवचः । भीताया मम द्वाभ्यामालिंगनं द्वाभ्यां च धनुर्धारणम् एवं चतुर्भुजत्वमिति ॥३२॥ हे राज्ञि ! राज्ञां मिष
पश्यतां सताम् । अनादरे षष्ठी । दारुकः सारथिः रथं चालयामास । काञ्चनोपस्करं सुवर्णालङ्कृतम् ॥३३॥ ये तत्रागता
अन्वसज्जन्त पृष्ठतः संलग्ना बभूवुः । केचन पथि अग्रे गत्वा निषेद्धुं निरोद्धुं संयत्ताः प्रयत्नशीला बभूवुः । मार्गं रुरुधुरित्यर्थः
यथा ग्रामसिंहाः श्वानः हरिं सिंहम् । उद्धृता उत्थापिता इष्वासो धनूंषि यैस्ते ॥३४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हया एव रत्नानि तेषां चतुष्टयं यस्मिन् तम् ॥३२॥ मृगाणां मिषतां मृगराट् यथा शरीराख्यं रथमथवा चरणांश्चोदय
तद्वत् दारुको रथं चोदयामासेत्यन्वयः ॥३३॥ अन्वसज्जन्त पृष्ठतः सक्ता बभूवुः ॥३४-३५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो भगवता यत्कृतं तदाह-मां तावद्रथमारोप्येति । तावता कथं निस्तार इति शङ्कां वारयितुमाह-हयरत्नचतुष्टयमिति

"स्यमन्तकः कौस्तुभश्च स्पर्शश्चिन्तामणिस्तथा । चत्वारो मणयः प्रोक्तास्तत्तुल्याः कृष्णवाजिनः ॥"

ततः शार्ङ्गमुद्यम्य कवचेन सन्नद्धः आजौ संग्रामे चतुर्भुजः सन् तस्थौ ॥३२॥

"साधनस्य च रक्षायाः क्रियायाः सर्वरूपतः । कालस्यापि स्वचेष्टायाः परिग्रह इहोदितः ॥"

बिभीषिकार्थमेतत् परिगृहीतवान्, न तु तेषां मारणार्थं तथा सति भूम्यर्थं मारणं न स्यादत एव दारुकेण भगवत्प्रेरितेन
द्वारकायामेव नीतो इत्याह-दारुकश्चोदयामासेति । काञ्चनोपस्करत्वेन लघुता शीघ्रगमने बन्धनाभावश्च सूचितः । मिषतां भूभुजां
तेषामपि क्रियाशक्तिः भगवतैव चतुर्भुजत्वेन स्वीकृतेति ज्ञानशक्तिरेवावशिष्टेति । राज्ञीति परिज्ञानार्थम् । किंच ते रूपाद्याश्चर्येण
विमोहिता इति ज्ञापयितुं दृष्टान्तमाह-मृगाणां मिषतामेव सतां यथा मृगराट् हरतीति ॥३३॥ ये तु दूरे स्थिताः दर्शनानन्तरं प्राप्त
ते केचित्समागता इत्याह-अन्वसज्जन्तेति । केचन मूर्खाः दूरे स्थिताः अन्वसज्जन्त भगवन्तमन्वसज्जन्त । पथि नयननिषेधं
पथि भ्रान्ताः संयत्ताः सावधानाः उद्धृतेष्वासाः धनूंषि विस्फूर्ज्य । अनेन भगवत्तुल्यता सामग्र्या निरूपिता । तथापि शब्दमात्र
तेषु अर्थस्तु भगवत्येवेति ज्ञापयितुं दृष्टान्तमाह-ग्रामसिंहा इति । सिंहशब्दतुल्यत्वेऽपि यथा ग्रामसिंहसिंहयोरन्तरम् ॥३४॥

श्रीसुबोधिनीसारः

हयरत्नानामुत्तमाश्वानां चतुष्टयं यस्मिन् तं रथं मामारोप्य तावत् शार्ङ्गं धनुरुद्यम्याजौ सङ्ग्रामे चतुर्भुजः श्रीकृष्णः
कवचितः तस्थौ ॥३२॥ सुवर्णालङ्कृतं रथं दारुकः प्रेरयामास भूभुजां राज्ञां मिषतां पश्यतां सतां मृगाणां मिषतां सिंह इव
पथि मार्गे निषेद्धुं केचन ते राजन्या भूपा अनुगता आसन् सावधाना गृहीतचापाः ग्रामसिंहाः श्वानो हरिं सिंहमिव ॥३४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हयरत्नानाम् अश्वश्रेष्ठानां चतुष्टयं यस्मिंस्तं रथं मामारोप्य तस्मिन्निधाय सन्नद्धो बद्धकवचो द्वाभ्यां भुजाभ्यां
द्वाभ्यां च धनुर्बाणौ गृहीत्वा चतुर्भुजः आजौ युद्धे तस्थौ ॥३२॥ काञ्चना उपस्करा यस्मिंस्तं रथं दारुको नाम सारथिः
। तदा च हे राज्ञि ! यथा क्षुद्राणां मृगाणां पश्यतामेव मृगराट् सिंहस्तान् तिरस्कृत्य स्वयं निर्भयस्तन्मध्यात् स्वभागं गृहीत
तथा भूभुजां राज्ञां पश्यतामेव भगवान् मामादाय निर्जगामेति शेषः ॥३३॥ यथा ग्रामसिंहाः श्वानो हरिं सिंहं निषेद्धुं
संयत्ताः प्रयत्नवन्तः उद्धृतेष्वासा उद्धृतकार्मुकास्ते केचन राजन्या हरिं निषेद्धुं पथि मार्गे अन्वसज्जन्त पृष्ठतोऽन्वधावन्

मामिति । हयरत्ना
आजौ युद्धे तस्थौ । द्वाभ्यां भी
यस्मिंस्तं रथं दारुको नाम सार
निर्भयस्तन्मध्यात् स्वभागं गृही
इवताननादृत्य रथं यापयामास
प्रयत्नवन्तः उद्धृतेष्वासा उद्धृतक

हया एव रत्नानि तेषां
! मृगाणां मिषतां पश्यतां मृगरा
बोध्यः ॥३३॥ संयत्ताः युद्धोद्यत
पथि गत्वा उद्धृतेष्वासा उद्धृतका

मामिति ॥ हयरत्नानां
भगवान् शार्ङ्गम् उद्यम्य आजौ तस
इत्याहुः ॥३२॥ दारुक इति ॥ ततः
क्षुद्राणां पशूनां मिषतां पश्यतां सत
केचन ते राजन्याः संयत्ताः सन्नद्ध
कथमिव । ग्रामसिंहाः श्वानः हरिं य

चतुरभुज भगवान श्रीकृ
चढा लिया और हाथमें शार्ग ध
॥३२॥ देवी द्रौपदीजी ! विच
राजाओंके सामने ही द्वारिकाके
जाय ॥३३॥ देवी द्रौपदीजी ! उ
रास्तेमें पीछा किया कि हम सब
थी कि जैसे कुत्ते मिलकर सिंहको

ते शार्ङ्गच्युतबाणौघैः कृ
ततः पुरीं [1]यदुपतिरत्यलङ्
कुशस्थलीं दिवि भुवि
पिता मे पूजयामास सुहृ

---

१. पतिजयभूत्यलं-विज. । २. चानिशं स्तुतां-

अन्वितार्थप्रकाशिका

मामिति । हयरत्नानाम् अश्वश्रेष्ठानां चतुष्टयं यस्मिंस्तं रथं मामारोप्य तस्मिन्निधाय सन्नद्धो बद्धकवचश्चतुर्भुजः शार्ङ्गमुद्यम्य आजौ युद्धे तस्थौ । द्वाभ्यां भीरुस्वभावाया ममालिङ्गनं द्वाभ्यां धनुर्बाणधारणमिति चतुर्भुजत्वम् ॥३२॥ दारुक इति । काञ्चना उपस्करा यस्मिंस्तं रथं दारुको नाम सारथिः चोदयामास । तदा च हे राज्ञि ! यथा क्षुद्राणां मृगाणां पश्यतामेव मृगराट् सिंहस्तान् तिरस्कृत्य स्वयं निर्भयस्तन्मध्यात् स्वभागं गृहीत्वा गच्छति तथा भूभुजां राज्ञां पश्यतामेव भगवान् मामादाय निर्जगामेति शेषः । दारुक एव वा सिंह एव ताननादृत्य रथं यापयामास ॥३३॥ त इति । यथा ग्रामसिंहाः श्वानो हरिं सिंहं निषेद्धुं चापवद्वक्रोद्धतपुच्छाः प्रवर्तेरंस्तथा संयत्ताः प्रासवन्तः उद्धृतेष्वासा उद्धृतकार्मुकास्ते केचन राजन्या हरिं निषेद्धुं पथि मार्गे अन्वसज्जन्त पृष्ठतोऽन्वधावन् ॥३४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हया एव रत्नानि तेषां चतुष्टयं यस्मिन् तं रथं प्रति तावत् मामारोप्य सन्नद्धो धृतकवचः आजौ युद्धे तस्थौ ॥३२॥ हे राज्ञि मृगाणां मिषतां पश्यतां मृगराडिव दारुकः रथं चोदयामास । यद्वा । तेषां मिषतां सताम् । मृगराडिव तदा हरिः ययौ इति शेषो बोध्यः ॥३३॥ संयत्ताः युद्धोद्यताः ते राजन्याः अन्वसज्जन्त पृष्ठतः संलग्ना अभूवन् । तेषां मध्ये केचन तं निषेद्धुं रोद्धुं प्रथमतः पथि गत्वा उद्धृतेष्वासा उद्धृतकार्मुकास्तस्थुरित्यर्थः । ग्रामसिंहाः श्वानः हरिं सिंहं रोद्धुं यथा तथा ॥३४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मामिति ॥ हयरत्नानां चतुष्टयं यस्मिंस्तं रथं मां तावत्प्रथमम् आरोप्य तस्मिन्निधाप्येत्यर्थः । सन्नद्धः वर्मी चतुर्भुजः भगवान् शार्ङ्गम् उद्यम्य आजौ तस्थौ । केचित्तु द्वाभ्यां भुजाभ्यामालिङ्ग्य द्वाभ्यां धनुर्बाणौ गृहीत्वा चतुर्भुजो युद्धे तस्थावित्यर्थः इत्याहुः ॥३२॥ दारुक इति ॥ ततः काञ्चनोपस्कृतं सुवर्णोपस्कारसहितं रथं दारुकः चोदयामास गमयामास । हे राज्ञि ! मृगाणामारण्यानां ग्राम्याणां पशूनां मिषतां पश्यतां सतां मृगराट् सिंहः इव भूभुजां राज्ञां मिषतां सतां हरिर्जगामेति शेषोऽवगन्तव्यः ॥३३॥ त इति ॥ केचन ते राजन्याः संयत्ताः सन्नद्धाः उद्यता इष्वासाश्चापा यैस्तथाभूताः सन्तः पथि निषेद्धुं अन्वसज्जन्त पृष्ठतोऽन्वधावन् । हरिमिव । ग्रामसिंहाः श्वानः हरिं यथा सिंहमिवेत्यर्थः ॥३४॥

कृष्णप्रिया

चतुरभुज भगवान श्रीकृष्णने अपने सैन्य सुनीव मेघपुष्प बलाहक नामके चार अश्वों वाले रथपर मुझे चढ़ा लिया और हाथमें शार्ग धनुष्य लेकर कवच धारण कर लिया । पुनः संग्रामके लिये रथपर खडे हो गये ॥३२॥ देवी द्रौपदीजी ! विचक्षण सारथि दारुकने सुवर्ण साज सामानसे सज्ज किये हुए रथको सर्व राजाओंके सामने ही द्वारिकाके लिये हांक दिया, मानो कि जैसे कोई सिंह हरिनोंके बीचसे अपना भाग ले जाय ॥३३॥ देवी द्रौपदीजी ! उनमेंसे कुछ राजाओंने धनुष्य लेकर युद्ध करनेके सज्ज होकर इस आशयसे हमारा पीछा किया कि हम सब मिलकर भगवान कृष्णको रोक लें परन्तु महारानीजी उन सबकी क्रिया वैसी ही थी कि जैसे कुत्ते मिलकर सिंहको रोकना चाहे ॥३४॥

ते शार्ङ्गच्युतबाणौघैः कृतबाह्वङ्घ्रिकन्धराः । निपेतुः प्रधने केचिदेके सन्त्यज्य दुद्रुवुः ॥३५॥
ततः पुरीं [1]यदुपतिरत्यलङ्कृतां रविच्छदध्वजपटचित्रतोरणाम् ।
कुशस्थलीं दिवि भुवि [2]चाभिसंस्तुतां समाविशत्तरणिरिव स्वकेतनम् ॥३६॥
पिता मे पूजयामास सुहृत्सम्बन्धिबान्धवान् । महार्हवासोऽलङ्कारैः शय्यासनपरिच्छदैः ॥३७॥

---

[1] [illegible]भूतलं-विज. । २. चानिशं स्तुतां-वीर. ; चाभि सम्मता-गो. प्रे. टी. ।

कर्दमक्षमा

शार्ङ्गच्युतबाणौघैः, कृत्तबाह्वङ्घ्रिकन्धराः, केचित्, एके, प्रधने, निपेतुः, एके, सन्त्यज्य, दुद्रुवुः ॥३५॥ ततः, तां स्वकेतनम्, इव, यदुपतिः, अत्यलङ्कृताम्, रविच्छदध्वजपटचित्रतोरणाम्, च, दिवि, भुवि, अतिसंस्तुताम्, कुशस्थलीम्, पुरीं समाविशत् ॥३६॥ मे, पिता, महार्हवासोलङ्कारैः, शय्यासनपरिच्छदैः, सुहृत्सम्बन्धिबान्धवान्, पूजयामास ॥३७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

रविं छादयन्ति ते रविच्छदा ध्वजेषु पटा यस्यां चित्राणि तोरणानि यस्यां सा च सा च तां कुशस्थलीं पुरीं यदुपतिः समाविशत् स्वकेतनं मण्डलमस्ताचलं वा ॥३६॥ महार्हवासःप्रभृतिभिः सुहृदादीन् पूजयामास ॥३७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रधने युद्धे ॥३५॥ ततो मार्गस्थराजन्यजयोत्तरम् । तरणिः सूर्यः । मण्डलमत्र सूर्यलोकः । स्वलोकं गतस्य प्रतिदिनम् यद्यपीशत्वाद्भगवतो रवेर्न सम्भवेत्तथाप्यज्ञजनबुद्ध्यारोहार्थमाह-अस्ताचलं वेति ॥३६॥ पिता बृहत्सेनः ॥३७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

शार्ङ्गाच्च्युतैः स्वयमिव निःसृतैः बाणौघैः केचित्कृत्तबाहवः केचित्कृत्ताङ्घ्रयः केचित्कृत्तकन्धराः इति विवेचनीयम् यद्वा, युगपदेव कृत्तौ युद्धार्थं गृहीतास्त्रत्याजनार्थमादौ बाहू ततो निपातनार्थमङ्घ्री । ततश्च सद्यो मारणार्थं कन्धरं येषाम् बाणानामतिशीघ्रत्वमपि सूचितम् अतः प्रधने युद्धभूमौ नितरां पेतुः मृता इत्यर्थः । प्रधनं सम्यक् दूरतस्त्यक्त्वा दुद्रुवुः पलायन्त ॥३५॥ ततस्तत्पश्चादेव न तु ताननिर्जित्येत्यर्थः । यतो यदुपतिः महावीरवर्गश्रेष्ठ इत्यर्थः । यद्वा, यदुपतिरिति पत्नीप्राप्त्या पुरीप्रवेशतो यदूनां प्रहर्षोदयाभिप्रायेण अतीतितदानीं वैशिष्ट्यात्तदेवाह-रवीति । दिवि भुवि चाभितः सर्वतो भावेन सम्यक् परमोत्तमत्वेन स्तुतामिति तत्र तत्र तादृशत्वाभावेनासाधारण्यमुक्तं तत्रापि स्वकेतनं निजावासं तरणिरिव स्वयं जाज्वल्यमानः तत्रत्यांश्च विद्योतयन् सम्यग्गीतवाद्यादिमहोत्सवेन आ सम्यक् आनन्देनाविशत् प्रविवेश । तरणिपक्षे स्वकेतनं स्वमण्डलम् तरणिश्चात्र विष्णुनामा ज्ञेयः ॥३६॥ भगवतः सुहृदादीन् तत्र सुहृदो मित्राणि सम्बन्धिनो वैवाहिकाः बान्धवाः ज्ञातयः पाणिग्रहण द्वारकायां स्वयमेवागतः सन्निति ज्ञेयम् ॥३७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

शार्ङ्गात् च्युतैः स्वयमेव निःसृतैर्बाणौघैः । केचित् कृत्तबाहवः, केचित् कृत्ताङ्घ्रयः, केचित् कृत्तकन्धरा इति विवेचनीयम् । यद्वा, युगपदेव कृत्तौ युद्धार्थं गृहीतास्त्रत्यजनार्थमादौ बाहू ततो निपातनार्थमङ्घ्री, ततश्च सद्यो मरणार्थं कन्धरं येषां ते बाणानामतिशीघ्रत्वमपि सूचितम् । अतः प्रधने युद्धभूमौ नितरां पेतुः, मृता इत्यर्थः । प्रधनं सम्यग् दूरतस्त्यक्त्वा दुद्रुवुः पलायन्त ॥३५॥ ततस्तत्पश्चादेव । न तु तान् निर्जित्येत्यर्थः । यतो यदुपतिर्महावीरवर्गश्रेष्ठ इत्यर्थः । यद्वा, यदुपतिरिति पत्नीप्राप्त्या पुरीप्रवेशतो यदूनांप्रहर्षोदयाभिप्रायेण । अतीति सदालङ्कृतामेव । अधुना च महोत्सवेऽतिशयेनालङ्कृतामित्यर्थः । तदेवाह- । दिवि भुवि चाभितः सर्वतोभावेन सम्यक् परमोत्तमत्वेन स्तुतामिति तत्र तत्र तादृशत्वाभावेनासाधारण्यमुक्तम् । तत्रापि स्वकेतनं निजवासं तरणिरिव स्वयं जाज्वल्यमानस्तत्रत्यांश्च विद्योतयन् सम्यग् गीतवाद्यादिमहोत्सवेन आ सम्यगानन्देनाविशत् प्रविवेश ॥३६॥ सुहृदादीन् स्वकीयान् महोत्सवत्वात् तत्र सुहृदो मित्राणि (ज्ञातयः [ग]) सम्बन्धिनो विवाहादिसम्बन्धवन्तः ज्ञातयः (मित्राणि [ग]) यद्वा, श्रीभगवत एव सुहृदादीन्, ततश्च प्रत्येकं तानुद्दिश्य प्रस्थापितैर्महार्हवासःप्रभृतिभिः, किंवा द्वारकायां पश्चादागतः सन्निति ज्ञेयम् (प्रविज्ञेयम् [घ,ङ ।])॥३७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥३४-४३॥

ते नृपाः कृत्ताश्छिन्नाः
श्रीकृष्णः पुरीं तत्रापि स्वगृहं
परितोऽलङ्कृतां रविं छादयन्ती
पितेति । अनर्घ्यवस्त्रादिभिः सुहृ

संत्यज्य प्रधनं विहाय ॥
॥३६-३७॥

शार्ङ्गधनुषः च्युतैः बाण
॥३५॥ ततः जयोत्तरं यदुपतिः श्रीकृ
सा ।) द्वारकां समाविशदित्यन्वयः
रविच्छदाः ध्वजेषु पटा यस्यां चित्र
ल्युट् । रुचिरावृत्तम् ॥३६॥ मे पित

रविं छादयन्ति पुर्यां तदातपं

ततो यज्जातं तदाह-ते शाङ्
कृत्तबाह्वङ्घ्रिकन्धराः षोढा छिन्ना भव
सभार्यस्य द्वारकाप्रवेशमाह-ततः पुरीमि
अत्यलङ्कृता रविच्छदध्वजपटचित्रतो
लवः लेपादिना कुशस्थलीमिति स्थान
गुप्ततया प्रवेशं वारयति-तरणिरिवेति ॥
पूजयामासेति । सुहृदादयो भगवदीया
पारिबर्हदानमाह-दासीभिरिति । सर्वाः
सेनाङ्गानि अमूल्यान्यायुधानि च दत्तवा

शार्ङ्गाच्च्युतैर्मुक्तैर्बाणौघैः कृत्त
॥३५॥ ततोऽनन्तरम् अत्यलङ्कृतां रविं
भूतले च समीड्यां श्लाघनीयां कुशस्थ
वा ॥३६॥ मे पिता बृहत्सेनवर्मा अमूल

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ते नृपाः कृत्ताश्छिन्नाः बाह्वादयो येषां ते केचित्प्रधने युद्धदेशे निपेतुः । केचित्तु संत्यज्य दुद्रुवुः ॥३५॥ तत इति । यदुपतिः श्रीकृष्णः पुरीं तत्रापि स्वगृहं समाविशदिति सम्बन्धः । यथा सूर्यः स्वकेतनं मण्डलमस्ताचलं वा तद्वत् । कथम्भूताम् ? तोऽलङ्कृतां रविं छादयन्तीति तथा तेषु ध्वजेषु पटाः यस्यां (पटानि) चित्राणि तोरणानि यस्यां सा चासौ सा च ताम् ॥३६॥ पितेति। अनर्घ्यवस्त्रादिभिः सुहृत्प्रभृतीन् पूजयामास ॥३७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२९-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२९-३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥३०-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

संत्यज्य प्रधनं विहाय ॥३५॥ रविं छादयन्तीति रविच्छदा ध्वजेषु पटाः यस्यां चित्राणि तोरणानि यस्यां सा च सा च ताम् ॥३६-३७॥

गूढार्थदीपिनी

शार्ङ्गधनुषः च्युतैः बाणसमूहैः कृत्ताः छिन्नाः बाह्वादयो येषां ते । कृती छेदने धातुः । कन्धरा ग्रीवा । प्रधने सङ्ग्रामे ॥३५॥ ततः जयोत्तरं यदुपतिः श्रीकृष्णः दिवि भुवि च संस्तुतां कुशस्थलीं (कौ पृथिव्यां शेते इति कुशं जलम्, तदेव स्थलं यस्यां) द्वारकां समाविशदित्यन्वयः । यथा तरणिः सूर्यः स्वनिकेतमस्ताचलं प्रविशति तथा । कीदृशीम् । रविं छादयन्तीति विच्छदाः ध्वजेषु पटा यस्यां चित्रविचित्राणि तोरणानि वन्दनमालिका यस्यां सा च सा च ताम् । केतनम् । कित् निवासे धातुः लुट्। रुचिरावृत्तम् ॥३६॥ मे पिता बृहत्सेनः । महार्हैः बहुमूल्यैः परिच्छदाः सामग्र्यः ॥३७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

रविं छादयन्ति पुर्यां तदातपं वारयन्तीति रविच्छदाः ध्वजेषु पटाः यस्यां विचित्राणि तोरणानि यस्यां सा च सा च ताम् ॥३६-३७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो यज्जातं तदाह-ते शार्ङ्गच्युतबाणौघैरिति । एकोऽपि शार्ङ्गयोजितः तस्मात् च्युतश्चेद्बाणौघतामापद्यते अत एकेनैव बाणेन कृत्तबाह्वङ्घ्रिकन्धराः षोढा छिन्ना भवन्ति ततः प्रधने निपेतुः । एके तु सन्त्यज्य दुद्रुवुरिति प्राणमानयोः छेदो निरूपितः ॥३५॥ ततः मायस्य द्वारकाप्रवेशमाह-ततः पुरीमिति । अयं विवाहः सर्वसम्मत इति ज्ञापयितुम् । ततः यदुपुर्यामुत्सवो निरूप्यते । आदौ सर्वैव पुरी अत्यलङ्कृता रविच्छदध्वजपटचित्रतोरणा रविमपि छादयन्तीति ध्वजपटाश्चित्रतोरणानि च । उपरि मध्ये च शोभा निरूपिता । अलङ्करणं वधः लेपादिना कुशस्थलीमिति स्थानस्य सर्वाभेद्यत्वं निरूपितम् । दैत्यसम्बन्धेन निन्दितत्वमाशंक्याह-दिवि भुवि चाभिसंस्तुतामिति कृतया प्रवेशं वारयति-तरणिरिवेति ॥३६॥ एवं स्वस्यान्तर्निर्वाहमुक्त्वा तत्र गत्वा पिता सर्वमेव विवाहयोग्यं कृतवानित्याह-पिता मे पूजयामासेति । सुहृदादयो भगवदीयाः महार्हाः अमूल्याः वासःप्रभृतयः शय्याः आसनानि परिच्छदाश्च गृहोपकरणानि । ततः परिबर्हदानमाह-दासीभिरिति । सर्वाः सम्पदो यासु वस्त्राभरणरूपाद्याः भगवदर्थमेव वा अन्याः सम्पदः तथा भटेभरथवाजिनश्च सेनाङ्गानि अमूल्यान्यायुधानि च दत्तवान् । तत्र प्रयोजनमाह-भक्तित इति । हेत्वन्तरं वारयति-पूर्णस्येति ॥३७-३८॥

श्रीसुबोधिनीसारः

शार्ङ्गाच्च्युतैर्मुक्तैर्बाणौघैः कृत्ताः छिन्ना बाह्वङ्घ्रिकन्धरा येषां ते प्रधने युधि निपेतुः केचित् एके रणं सन्त्यज्य पलायिताः ॥३५॥ ततोऽनन्तरम् अत्यलङ्कृतां रविं छादयन्ति ते रविच्छदा ध्वजेषु पटा यस्यां चित्राणि तोरणानि यस्यां सा च सा च तां स्वर्गे भूतले च समीड्यां श्लाघनीयां कुशस्थलीं पुरीं द्वारकां यदुपतिः श्रीकृष्णः समाविशत् स्वनिकेतनमस्ताचलं तरणिः सूर्य इव जलं च ॥३६॥ मे पिता बृहत्सेनवर्मा अमूल्यवस्त्राभरणादिभिः सुहृत्सम्बन्धिबान्धवान् पूजयामास ॥३७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

शार्ङ्गधनुषश्च्युतैर्बाणसमूहैः कृत्ताः छिन्नाः बाह्वादयो येषां ते केचित् प्रधने युद्धदेशे निपेतुः । एके तु सङ्ग्रामं सन्त्यज्य दुद्रुवुः ॥३५॥ ततश्च यदुपतिः श्रीकृष्णः कुशस्थलीं द्वारकां पुरीं तत्रापि स्वकेतनं गृहं च समाविशदित्यन्वयः । तत्र दृष्टान्तमाह यथा तरणिः सूर्यः स्वकेतनम् अस्ताचलं प्रविशति तद्वदिति । तां पुरीं वर्णयति–अलङ्कृतामिति । रविं छादयन्तीति रविच्छदा ध्वजे पटा यस्यां चित्राणि तोरणानि यस्यां सैव सा च तामिति । भगवन्निवासेन दिवि भुवि चाभिसंस्तुताम् ॥३६॥ ततश्च मे पिता महार्हैः अनर्घ्यैर्वस्त्रादिभिः सुहृदादीन् पूजयामास ॥३७॥

अन्वितार्थप्रकाशिका

त इति । शार्ङ्गधनुषश्च्युतैर्बाणसमूहैः कृत्ताः छिन्नाः बाह्वादयो येषां ते केचित् प्रधने युद्धदेशे निपेतुः एके सङ्ग्रामं संत्यज्य दुद्रुवुः ॥३५॥ तत इति । ततः यदुपतिः अत्यलङ्कृतां रविं छादयन्तीति रविच्छदा ध्वजेषु पटा यस्यां चित्राणि तोरणानि यस्यां सैव सा च तामिति भगवन्निवासेन दिवि भुवि चाभिसंस्तुताम् कुशस्थलीं द्वारकां पुरीं तत्रापि स्वकेतनं गृहं च समाविशत् यथा तरणिः सूर्यः स्वकेतनं अस्ताचलं प्रविशति तद्वत् । यद्वा । तरणिर्विष्णुनामा सूर्य इव स्वकेतनं स्वमण्डलं स्व जाज्वल्यमानस्तत्रत्यांश्च विद्योतयन् प्रविशति तद्वत् ॥३६॥ पितेति । मे पिता महार्हैः अनर्घ्यैर्वस्त्रादिभिः सुहृदादीन् पूजयामास ॥३७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृत्ता छिन्नाः बाह्वादयो येषां ते केचित् प्रधने रणभूमौ निपेतुः ॥३५॥ रविं सूर्यं छादयन्ति ते रविच्छदास्ते ध्वजेषु ध्वजादण्डेषु पटाः पताकाः यस्यां सा चासौ चित्रतोरणा च तां कुशस्थलीं द्वारकां पुरीं यदुपतिः स्वकेतनं स्वमण्डलं तरणिः सूर्य इव समाविशत् ॥३६॥ ननु तर्हि त्वद्विवाहे तव पित्रा किं पारिबर्हं दत्तं तत्राह द्वाभ्यां पितेति ॥३७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त इति ॥ केचित् ते नृपाः शार्ङ्गच्युतबाणौघैः कृत्ताश्छिन्ना बाह्वङ्घ्रिकन्धरा येषां तथाभूताः सन्तः प्रधने सङ्ग्रामे निपेतुः । एके केचित्तु संत्यज्य प्रधनमिति शेषः । दुद्रुवुः पलायाञ्चक्रुः ॥३५॥ तत इति ॥ ततः यदुपतिः श्रीकृष्णः अत्यलङ्कृतां परितोऽतिशयेनालङ्कृतां रविं छादयन्तीति रविच्छदाः ध्वजेषु पटा यस्यां चित्राणि तोरणानि यस्यां सा चासौ सा च तां दिवि भुवि च अभिसंस्तुतां कुशस्थलीं पुरीं तत्रापि स्वकेतनं स्वगृहं तरणिः इव यथा सूर्यः स्वकेतनं स्वमण्डलमस्ताचलं वा गच्छति तद्वत् समाविशत् ॥३६॥ पितेति ॥ मे मम पिता सुहृत्सम्बन्धिबान्धवान् महार्हवासोऽलङ्कारैर्महामूल्यवद्वस्त्रालङ्कारैः शय्यासनपरिच्छे पूजयामास ॥३७॥

कृष्णप्रिया

भगवान श्रीकष्ण के शार्ग धनुष्य के छुटे हुए तीक्ष्ण तीरोंसे किसीकी बांह कट गयी तो किसी के पैर और गर्दन ही उतरगटी । कितने वीरलोग तो उस संग्राम भूमिसें सदा के लिये सो गये और बहुतसे युद्ध भूमि छोडकर भाग गये ॥३५॥ राजन् ! युकुलनाथ भगवान श्रीकष्णने विजयश्री प्राप्त कर और भगवती श्रीलक्ष्मणाजी लक्ष्माणाजी को प्राप्त कर श्रीद्वारिकापुरीमें प्रवेश किया जैसे भगवान सूर्य नारायण आपने निवासस्थानमें प्र करे वैसे प्रवेश किया । श्रीद्वारिकापुरीकी स्वर्गलोक और पृथ्वीलोकमें सर्वत्र प्रर्संशित थी । आज भगवान लक्ष्मणा के साथ प्रवेश के अवसर पर विशेष रूपसे सजायी गयी थी । असंख्य झंडीया पताकाएं और लगाये गयेथे कि उनके भगवान दिनमणी सूर्यका धरती तक नहीं आ पाता था ॥३६॥ देवीजी ! मेरा मनोरथ

हो जाने से मेरे पित
भाई-बन्धुओंको ब
सम्मानित किया ॥३

दासीभिः स
आत्मारामस्य
महिष्य ऊचुः
भौमं निहत्य स
'निर्मुच्य संसृ

दासीभिः, सर्वसम
तपसा, अद्धा, इमाः, वयम्
महिष्यः, ऊचुः ।
भौमम्, युधि, सगण
पादाम्बुजम्, अनुस्मरन्तीः, य

दास्यादिभिः सहाऽ
गृहदासिका बभूविम ॥३९॥
यस्मात्तत्पादाम्बुजमनुस्मरतीर्नः

पूर्णायापि पूजायां स्व
आदिनास्माभिर्लब्धमिति भावः
आप्तकामपदेनोक्तः परमात्मा सोऽ

सर्वाः सम्पदः नवयौवना
धनादिभिः सह भटाः महावीराः पदा
अत्र च रवेर्दीपमिवेत्युपमा द्रष्टव्या ॥
आत्मारामस्येति । स्वयमेव पूर्णत्वादा
भावः । एवं दैन्याभावविशेषाव्यंजनेन
त्रिकम् । योऽस्मान् परिणिनाय एत
निशब्दार्थमेवाभिव्यंजयन्ति–सगणमि
गौणमेवेति भावः । तत्र हेतुः–अथ भौ
दर्शयन्त्यो निर्मोकहेतुमाहुः–पादाम्बुजं

हो जाने से मेरे पिताजीको अतिशय प्रसन्नता हुइ । मेरे पितृ चरणोंने अपने हितवाञ्छु-सुहृदो, सगे सम्बन्धियों और भाई-बन्धुओंको बहुमूल्य वस्त्र अलंकार आभूषण, शय्या, आसन और विविध प्रकारकी सामग्रियां देकर सम्मानित किया ॥३७॥

दासीभिः सर्वसम्पद्भिर्भटे[1]भरथवाजिभिः । आयुधानि महार्हाणि ददौ पूर्णस्य [2]भक्तितः ॥३८॥
आत्मारामस्य तस्येमा वयं[3] च गृहदासिकाः । सर्वसङ्गनिवृत्त्याद्धा तपसा च बभूविम ॥३९॥

महिष्य ऊचुः

भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाथ नः क्षितिजये[4] जितराजकन्याः ।
[5]निर्मुच्य संसृतिविमोक्ष[6]मनुस्मरन्तीः पादाम्बुजं परिणिनाय [7]य आप्तकामः ॥४०॥

कर्दमक्षमा

दासीभिः, सर्वसम्पद्भिः, भटेभरथवाजिभिः, आयुधानि, महार्हाणि, पूर्णस्य, भक्तितः, ददौ ॥३८॥ सर्वसङ्गनिवृत्त्या, च, तपसा, अद्धा, इमाः, वयम्, आत्मारामस्य, तस्य, गृहदासिकाः, बभूविम ॥३९॥

महिष्यः, ऊचुः ।

भौमम्, युधि, सगणम्, निहत्य, तेन, क्षितिजये, जितराजकन्याः, रुद्धाः, ज्ञात्वा, अथ, आप्तकामः, संसृतिविमोक्षणम्, पादाम्बुजम्, अनुस्मरन्तीः, यः, नः, परिणिनाय ॥४०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दास्यादिभिः सहाऽऽयुधानि पूर्णायापि ददौ ॥३८॥ इमाः अष्टौ वयं सर्वसङ्गनिवृत्त्या तपसा स्वधर्मेणाद्धा साक्षात्तस्य गृहदासिका बभूविम ॥३९॥ क्षितिजये दिग्विजये जितानां राज्ञां कन्याः नोऽस्मांस्तेन रुद्धाः ज्ञात्वा ततो निर्मुच्य संसृतेर्विमोक्षो यस्मात्तत्पादाम्बुजमनुस्मरतीर्नः परिणिनायोदवहत् आप्तकामोऽपि यः ॥४०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पूर्णायापि पूजायां रवये दीपदानवत्तत्कर्माङ्गत्वाद्ददाविति भावः ॥३८॥ तस्य श्रीकृष्णस्य दासीत्वं च तपआदिनास्माभिर्लब्धमिति भावः ॥३९॥ महिष्यः शतोत्तरषोडशसहस्रसंख्याकाः । अथ भौममरणानन्तरम् । यः श्रुत्या आप्तकामपदेनोक्तः परमात्मा सोऽप्यस्मत्पूर्वपुण्यसफलीकरणार्थं परिणीतवान् न कामुकत्वेनेति भावः ॥४०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सर्वाः सम्पदः नवयौवनालङ्कारादयो यासां ताभिर्दासीभिः तादृशैर्भटादिभिश्च सेनायाश्चतुर्भिरङ्गैः यद्वा, सर्वाभिः सम्पद्भिः अश्वादिभिः सह भटाः महावीराः पदातयः पूर्णायापि दाने हेतुः-भक्तित इति । भक्त्या पत्रादीनामपि तेन ग्राह्यत्वात् तच्च प्रागुक्तमेव अत्र च रवेर्दीपमिवेत्युपमा द्रष्टव्या ॥३८॥ एवमावेशेनात्मानं बहु वर्णयित्वा सलज्जा इव सर्वाः स्वज्येष्ठाः सन्तोषयन्त्युपसंहरति-आत्मारामस्येति । स्वयमेव पूर्णत्वादात्ममात्रक्रीडायोग्यस्यापि तस्य वयं गृहदासिका बभूविमेति तस्य कारुण्यमात्रमत्र कारणमिति भावः । एवं दैन्याभावविशेषाव्यंजनेन किन्तु भक्तिमात्रव्यंजनेन तत्तद्वर्णने स्वयं तत्तत्कथनप्रागल्भ्यमप्याच्छन्नम् ॥३९॥ भौममिति क्रमम् । योऽस्मान् परिणिनाय एतस्येति तृतीयेनान्वयः । भौमं भूमेः पुत्रमित्यवध्यता सूचिता तमपि युधि नितरां हत्वा स्वार्थमेवाभिव्यंजयन्ति-सगणमिति । ननु भूमेः पुत्रं कुतो हतवान् ? तत्राहुर्नोऽस्मान् तेन रुद्धाः ज्ञात्वेति कारणान्तरं तु सम्भवेति भावः । तत्र हेतुः-अथ भौमवधानन्तरमेव निर्मुच्य रोधान्निःशेषेण मुक्त्वा द्वारकायां प्रस्थानात् ज्ञानान्तरेभ्यो वैशिष्ट्यं अनन्यो निर्मोकहेतुमाहुः-पादाम्बुजं तस्यानु निरन्तरं स्मरन्तीः संसृतिविमोक्षमिति संसारमहादुःखतोऽपि विशेषेण मोचयति

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किम्पुनस्तद्रोधादित्यर्थः । आप्तकामोऽपि परिणिनायेति तत्रापि परमकारुण्यादिकमुक्तम् । अन्यत्तैः । यद्वा, आप्तकामोऽपि य परिणिनाय कुतः संसृतिविमोक्षमपि निर्मोक्षमपि निर्मुच्य किमुतान्यमामुष्मिकमैहिकं वा स्वार्थं निर्मुच्य पादाम्बुजमेव स्मरन्तीः अत एव न कामपि सम्पदमिच्छामः ॥४०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सर्वाः सम्पदो नवयौवनालङ्कारादयो यासां ताभिर्दासीभिस्तादृशैर्घटादिभिश्च, सेनायाश्चतुर्भिरङ्गैः । यद्वा, सर्वाभिः सम्पद्भिर्धनादिभिश्च सह, भटा महावीराः पदातयः । पूर्णायापि दाने हेतुः-भक्तित इति । भक्त्या पत्रादीनामपि तेन ग्राह्यत्वात्, तच्च प्रागुक्तमेव । अत्र च खेर्दीपमिवेत्युपमा द्रष्टव्या ॥३८॥ सर्वाः स्वज्येष्ठाः सन्तोषयन्नुपसंहरति-आत्मारामस्येति । अस्मान् प्रति निरपेक्षस्यापीत्यर्थः । एतदपि भक्तिविशेषेण विनयादेव । गृहस्य तत्सम्मार्जनादिकार्यो दासिकाः । अल्पार्थे कः । नीचदास्य एव, न च पत्न्य इत्यर्थः । एतदपि पूर्ववत् सर्वेषु धनपुत्रादिषु सङ्ग आसक्तिस्तस्य निवृत्त्या उपेक्षयेत्यर्थः । तपसा च स्वधर्मेण दासीकर्मणेत्यर्थः । वयमिति स्वज्येष्ठानां सङ्ग्रहात्, इत्यन्योन्यस्नेहश्च सूचितः । यद्वा, गृहदासिकात्वेनाप्यात्मनो बहुमानात् ॥३९॥ भौमं भूमेः पुत्रमित्यवध्यता सूचिता । तमपि युधि नितरां हत्वा । नि-शब्दार्थमेवाभिव्यंजयति-सगणमिति । यद्वा, नि-शब्देन पुनरावृत्तिमोक्षोऽभिप्रेतः । पुनर्जन्माभावेन मरणसमाप्तः । तद्वधस्त्वस्माकमुद्धारार्थमेवेत्याहुः-तेनेति । अथ अस्मादेव कारणान्निहत्यअथानन्तरं सद्य एव निर्मुच्येत्यन्वयः । निःशेषेण मुक्त्वा द्वारकायां प्रस्थापनात् । ज्ञाने निर्मोके वा हेतुः-पादाम्बुजं तस्यानु निरन्तरं स्मरन्तीः । संसृतिविमोक्षमिति संसारमहादुःखतोऽपि विशेषेण मोक्षयति, किं पुनस्तद्रोधादिति भावः । आप्तकामोऽपि परिणिनायेति परमकारुण्यादिकमुक्तम् । अन्यत्तैर्व्याख्यातम् । यद्वा, आप्तकामोऽपि यः परिणिनाय, तं निर्मुच्य अत एव न कामपि सम्पदमिच्छामः ॥४०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥३४-४३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

दासीभिरिति । सर्वसम्पद्भिः सर्वाभरणभूषिताभिरित्यर्थः । हे राज्ञि ! दास्यादिभिस्सह पारिबर्हम् उपाय पूर्णस्यावाप्तसमस्तकामस्यापि भगवतो भक्तितो ददौ । पूर्णायेति पाठान्तरम् ॥३८॥ आत्मारामस्येति । इमाः अष्टौ वयं सर्वसङ्गनिवृत्त्या वैराग्येण तपसा च हेतुना तस्य भगवतः आत्मारामस्य निरवधिकस्वानन्दानुभवशीलस्याद्धा साक्षाद्गृहदासिका बभूविम ॥३९॥ अथ षोडशसहस्रपत्नीनां गीतिमाह चतुर्भिः-भौममिति । सगणं ससैन्यं भौमं नरकं निहत्य क्षितित दिग्विजये जितानां राज्ञां कन्याः अस्मांस्तेन नरकेन रुद्धाः ज्ञात्वा ततो मोचयित्वा संसृतेर्विमोक्षो यस्मात्तत्पादाम्बुजमनुस्मरन्तीरस्मानाप्तकामोऽपि परिणिनाय उपयेमे ॥४०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२९-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

आत्मारामस्य तस्येमा वयं वै गृहदासिका इति वयमित्यात्मनः श्लाघापरत्वे बहुवचनं सर्वाभिप्रायेण वा ॥३९-४०

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥३०-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दास्यादिभिः सह आयुधानि पूर्णायापि ददावित्यत्र हेतुर्भक्तित इति । भक्त्या पत्रादीनामपि तेन ग्राह्यत्वात् ॥ एवमावेशेनात्मानं बहु वर्णयित्वा सलज्जा इव सर्वाः स्वज्येष्ठा रुक्मिण्याद्याः सन्तोषयन्त्युपसंहरति-आत्मारामस्येति । अस्म

भार्या इवामुं वयमष्टावेत
प्रेम्णा तं वशीचक्रुरपीति
मोचयित्वा आप्तकामोऽपि
पादाम्बुजम् अनुस्मरन्तीः

दास्यादिभिः स
साक्षात्तस्यैव दासिकाः ।
अथ भौमासुरमरणानन्तरम्
मोचयित्वा च यः परिणिना
निहत्य । कथम्भूताः नः । स

पूर्णस्यावाप्तसमस्त
सोऽपि भक्तवत्सलतया भौम
नोऽस्मान् रुद्धाः ज्ञात्वा ततो

कामनामाह-आत्मा
च स्वयं त्वात्मन्येव रमते
चकारादन्याश्च सर्वा एव गृहदा
सर्वसङ्गनिवृत्तिं कृत्वा तपश्च कृ
भौमं निहत्येति । सगणं सेवक
ज्ञात्वा निर्मुच्य पादाम्बुजं स्मर
निरूपितम् । तासां निरोधे हेतुम
पादाम्बुजं संसृतिविमोक्षं संसृते
अत एव परिणिनाय स्वार्थतां वा

दासीभिः सर्वसम्पदाभि
वयं सर्वसङ्गस्य निवृत्त्या तपसा
सगणं भौमं निहत्य युधि सङ्ग्रामे
मोचयित्वा संसृते संसाराद्विमोक्षमनु
पादाम्बुजमनुस्मरन्तीः परिणीतवानि

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भार्या इवामुं वयमष्टावेताः वशीकर्तुं न प्रभवाम इति भावो विनयभरेण दैन्यादेव वस्तुतस्तु ताः अपि ह्लादिनीशक्तित्वादात्मभूताः प्रेम्णा तं वशीचक्रुरपीति भावः ॥३९॥ क्षितिजये दिग्विजये जितानां राज्ञां कन्याः नः अस्मान् रुद्धाः ज्ञात्वा रोधान्निर्मुच्य मोचयित्वा आप्तकामोऽपि यः परिणिनाय परिणीय स्वभार्याश्चकार एतस्य पादरजः कामयामहे इति तृतीयेनान्वयः । परिणये हेतुः पादाम्बुजम् अनुस्मरन्तीः संसृतेरपि विमोक्षो यस्मात्तदिति रोधान्निर्मोचने हेतुः ॥४०॥

गूढार्थदीपिनी

दास्यादिभिः सह आयुधानि पूर्णस्यापि आप्तकामस्यापि भक्तितः ददौ । इभो गजः ॥३८॥ इमा अष्टौ वयम् अद्धा साक्षात्तस्यैव दासिकाः । वै एवार्थे । सर्वसङ्गनिवृत्त्या अनन्यनिष्ठया बभूविम ॥३९॥ महिष्यः शतोत्तरषोडशसहस्रसङ्ख्याकाः । अथ भौमासुरमरणानन्तरम् । क्षितिजये दिग्विजये भुवि जितानां राज्ञां कन्याः तेन भौमेन रुद्धा नः अस्मान् ज्ञात्वा ततो निर्मुच्य मोचयित्वा च यः परिणिनाय उपयेमे आप्तकामोऽपि तस्यैव वयं गृहदासिका इति पूर्वेणान्वयः । किं कृत्वा । सगणं ससैन्यं भौमं निहत्य । कथम्भूताः नः । संसृतिर्मोक्षो यस्मात् तत् पादाम्बुजमनुस्मरतीः ॥४०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पूर्णस्यावाप्तसमस्तकामस्यापि दास्यादिभिः सह आयुधानि ददौ तत्र हेतुः भक्तित इति ॥३८-३९॥ यः आप्तकामोऽपि सोऽपि भक्तवत्सलतया भौमं नरकं सगणं मुरपीठादिगणसहितं निहत्य तेन भौमेन क्षितिजये दिग्विजये जितानां राज्ञां कन्याः नोऽस्मान् रुद्धाः ज्ञात्वा ततो विमुच्य संसृतेर्विमोक्षो यस्मात् तत्पादाम्बुजमनुस्मरन्तीः नः परिणिनाय उपयेमे ॥४०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

कामनामाह-आत्मारामस्येति । सर्वाभिः दास्यमुक्तं नोपपत्तिरिति स्वयमुपपत्तिं चाह-आनीताः परं सर्वाः रमयति न स्वयं त्वात्मन्येव रमते अस्मिन्नर्थे प्रमाणसिद्धिस्तस्येति । इमाः रुक्मिण्याद्याः वयमिति मुख्यतया निरूपिताः । चकारादन्याश्च सर्वा एव गृहदासिकाः भगवदर्थे नोपयुज्यन्त इति इदमप्यत्यन्तं दुर्लभमित्याह-सर्वसङ्गनिवृत्त्येति । पूर्वजन्मनि सर्वसङ्गनिवृत्तिं कृत्वा तपश्च कृत्वा इमामवस्थां प्राप्ता इत्यर्थः ॥३९॥ महिष्य एव भावापन्नाः रोहिणीप्रमुखाः स्ववृत्तान्तमाहुः-भौमं निहत्येति । सगणं सेवकसहितं तद्रक्षकदेवसहितं वा । युधीति न चौर्यादिना तद्वधः ततः तेन रुद्धाः नः अस्मान् ज्ञात्वा निर्मुच्य पादाम्बुजं स्मरन्तीः परिणिनायेति सम्बन्धः । अथ भिन्नप्रक्रमेण निर्मुच्येति संसाराद्देहाच्चिन्तातश्च मोचनं निरूपितम् । तासां निरोधे हेतुमाह-क्षितिजये ये जिताः राजानः तेषां कन्या इति भगवतो देहेन निर्मोचनं किमाश्चर्यं यस्य पादाम्बुजं संसृतिविमोक्षं संसृतेरपि मोक्षो यस्मादिति तादृशं चेद्वयं स्मरामः तदास्माकं का चिन्तेति साधनं निरूपितम् अत एव परिणिनाय स्वार्थतां वारयन्ति-आप्तकाम इति ॥४०॥

श्रीसुबोधिनीसारः

दासीभिः सर्वसम्पदाभिः चतुरङ्गसेनाभिः सह महार्हाणि आयुधानि पूर्णस्य पर्णाय भक्तितो ददौ ॥३८॥ इमा अष्टौ वयं सर्वसङ्गस्य निवृत्त्या तपसा स्वधर्मेणाद्धा साक्षादात्मारामस्य तस्य गृहदासिका बभूविम भवामः ॥३९॥ सङ्क्षोक्तिः । सगणं भौमं निहत्य युधि सङ्ग्रामे तेन भौमेन क्षितेर्भूमेर्विजये जितानां राज्ञां कन्याः नोऽस्मान् रुद्धा ज्ञात्वा निर्मुच्य बन्धात् मोचयित्वा संसृते संसाराद्विमोक्षमनुस्मरन्तीः नो यः प्राप्तमनोरथः पादाम्बुजं चरणकमलं प्रापितवान् संसृतेर्विमोक्षो यस्मात्तत् पादाम्बुजमनुस्मरन्तीः परिणीतवानिति वा ॥४०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दास्यादिभिः सह महार्हाणि श्रेष्ठानि आयुधानि उपायनतया पूर्णस्यावाप्तसमस्तकामस्यापि भगवतो भक्तितो द ॥३८॥ इमा रुक्मिण्याद्या अष्टौ वयं जन्मान्तरेषु सर्वसङ्गनिवृत्त्या वैराग्येण तपसा च हेतुना तस्यात्माराम निरवधिकस्वानन्दानुभवस्य भगवतः अद्धा साक्षात् गृहदासिका बभूविम ॥३९॥ अथ षोडशसहस्रपत्नीनां वाक्यमाह-भौममिति । सगणं ससैन्यं भौमं नरकं निहत्य क्षितिजये युधि जितानां राज्ञां कन्याः तेन भौमेन रुद्धाः नोऽस्मान् ज्ञात्वा ततो निर्मुच मोचयित्वा यः स्वयमाप्तकामोऽप्यस्मान् परिणिनाय उपयेमे तस्यैतस्येति तृतीयेनान्वयः । परिणयने हेतुं सूचयन्त्य आहुः संसृतेर्विमोक्षो यस्मात् तत्पादाम्बुजमनुस्मरन्तीरिति ॥४०॥

अन्वितार्थप्रकाशिका

दासीभिरिति । दास्यादिभिः सह महार्हाणि श्रेष्ठानि आयुधानि उपायनतया पूर्णस्यावाप्तसमस्तकामस्यापि भगवतो भक्ति ददौ । एवं द्रौपदी गर्वभङ्गादेशेनात्मविवाहं वर्णयित्वा सलज्जा सती स्वज्येष्ठा रुक्मिण्याद्याः सन्तोषयन्त्युपसंहरति-आत्मेति इमा वयं जन्मान्तरेषु सर्वसङ्गनिवृत्त्या वैराग्येण तपसा च हेतुना तस्यात्मारामस्य निरवधिकस्वानन्दानुभवशीलस्य भगवतः अद्धा साक्षात् गृहदासिका बभूविम ॥३९॥ भौममिति । सगणं ससैन्यं भौमं नरकं निहत्य क्षितिविजये युधि जितानां राज्ञां कन्याः ते भौमेन रुद्धाः नोऽस्मान् ज्ञात्वा ततो निर्मुच्य मोचयित्वा यः स्वयमाप्तकामोऽपि संसृतेर्विमोक्षो यस्मात् तत्पादाम्बुजमनुस्मरन्तीः नः परिणिनाय उपयेमे । हे साध्वि ! वयं साम्राज्यं सार्वभौमपदं स्वाराज्यम् ऐन्द्रं पदं भौज्यं तदुभयभोगभाक्त्वम् उत अपि विवि राजत इति विराट् तस्य भावो वैराज्यम् अणिमादिसिद्धिभाक्त्वं पारमेष्ठ्यं ब्रह्मपदम् आनन्त्यं कैवल्यं मोक्षं हरेः पदं स्वरू सायुज्यं न कामयामहे किन्त्वेतस्य गदाभृतः श्रियः कुचकुंकुमस्य गन्धेनाढ्यं युक्तं श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामहे। यद्वा बह्वृच्ब्राह्मणोक्तक्रमेण प्रागादिदिक्चतुष्टयाधिपत्यानि साम्राज्यभौज्यस्वाराज्यवैराज्यानि व्याख्येयानि ॥४०-४२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पूर्णस्य पूर्णाय दास्यादिभिः सह आयुधानि ददौ ॥३८॥ रुक्मिण्यादिभगवत्पत्नीस्तोषयती सती सा प्राह-आत्मेति। इमा अष्ट वयं सर्वसङ्गानां निवृत्तिर्नाशो येन तेन तपसा तस्य गृहदासिकाः बभूविम ॥३९॥ क्षितिजये दिग्विजये जिता ये राजानस्तेषां कन्याः नोऽस्मान् तेन रुद्धाः ज्ञात्वा युधि सगणं भौमं निहत्य अथ निरोधनात् । निर्मुच्य निष्कास्य संसृतेः दुःखवृन्दस्य विमोक्षो यस्मात् तत् पादाम्बुजम् अनुस्मरन्तीर्नः आप्तकामोऽपि यः परिणिनाय उद्वहति स्म ॥४०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दासीभिरिति ॥ दासीभिः सर्वसम्पद्भिः भटेभरथवाजिभिश्च सह महार्हाणि आयुधानि पूर्णस्यावाप्तसमस्तकामस्य भगवतः भक्तितः ददौ ॥३८॥ आत्मारामस्येति ॥ इमाः अष्टौ वयं सर्वसङ्गनिवृत्त्या वैराग्येण तपसा च आत्मारामस्य श्रीकृष्णस्य अद्धा साक्षात् गृहदासिकाः बभूविम वै ॥३९॥ अथ षोडशसहस्रपत्नीनां गीतिमाह चतुर्भिः भैममिति ॥ यः श्रीकृ सगणं ससैन्यं भौमं नरकं युधि निहत्य क्षितिजये दिगिजये जिताश्च ते राजानश्च तेषां कन्याः नोऽस्मान् तेन नरकेण रुद्धाः अथ तत इत्यर्थः । निर्मुच्य मोचयित्वा संसृतेर्विमोक्षो यस्मात्तत् पादाम्बुजं तस्य चरणकमलम् अनुस्मरन्तीरस्मान् आप्त पूर्णकामः सन्नपि परिणिनाय उपयेमे ॥४०॥

कृष्णप्रिया

द्रौपदीजी ! यद्यपि भगवान तो पूर्ण परिपूर्ण है लेकिन वात्सल्य को भक्ति को और स्नेह को संतो ही होगा जब कुछ भी समर्पण किया जाय, इस प्रकार मेरे पिताजी वात्सल्यवश बहुत दासियां विविध प्र सम्पत्तियां, सैनिक , हाथी, रथ, अश्व आदि अतिमूल्य अस्त्र शस्त्र समर्पित किये ॥३८॥ द्रौपदीजी ! हम

जन्ममें सबकी आस
आत्मारा-पूर्णकाम
श्रीरोहिणीने निवेदन
कन्या हमलोगोंको अ
सेना का संहार कर
पाणिग्रहण करके अप
करती रहती थीं । जन

न वयं साध्वि
कामयामह ए
व्रजस्त्रियो यद

॥ इति श्र

हे, साध्वि, वयम्,
न, कामयामहे, किन्तु, एतस
यत्, महात्मनः, व्रजस्त्रियः,

॥ श्री

न वयमिति । साम्राज
सर्वसम्पद्भ्राजः किमेवं कामय
राजत इति विराट् तस्य भावो वै
न तु कामयामह इति यद्वा बह्वृ
तर्कि तत्पादरज एव काम्यतेऽत
ननु, तर्ह्यतिदुर्लभत्वार्त्कि तद्वा
यथा वाञ्छन्ति तद्वत्तत्पराणां सुल

इति श्रीमद्भागवते महापुराणे

वयमपि तत्पादरजोभजन
नन्विति । तदुभयभोगभाक्त्वं सार्वभ
तत्सालोक्यादि । तत्समानलोकवा
कुतः । इति भाव इति-या सर्वसे
समाधत्ते-नन्विति । इति भाव इति-अ

भगवतो भक्तितो ददौ
ना तस्यात्मारामस्य
वाक्यमाह-भौममिति
न् ज्ञात्वा ततो निर्मुच्य
हेतुं सूचयन्त्य आहुः-

मस्यापि भगवतो भक्तितो
न्त्युपसंहरति-आत्मेति।
व्रशीलस्य भगवतः अद्धा
जितानां राज्ञां कन्याः तेन
तत्पादाम्बुजमनुस्मरन्तीः
भाक्त्वम् उत अपि विविधं
न्त्यं मोक्षं हरेः पदं स्वरूपं
र्ध्ना वोढुं कामयामहे। यद्वा
०-४२॥

ी सा प्राह-आत्मेति। इमाः
वजये जिता ये राजानस्तेषां
सृतेः दुःखवृन्दस्य विमोक्षो

र्णस्यावाप्तसमस्तकामस्यापि
पसा च आत्मारामस्य तस्य
र्भः भैममिति॥ यः श्रीकृष्णः
ान् तेन नरकेण रुद्धाः ज्ञात्वा
अनुस्मरन्तीरस्मान् आप्तकामः

और स्नेह को संतोष तब
त दासियां विविध प्रकारकी
३८॥ द्रौपदीजी ! हमने पूर्व

कृष्णप्रिया

न्ममें सबकी आसक्ति छोडकर किसी भी प्रकारकी विशीष्ट तपश्चर्या की होगी । तभी तो हम सब इस जन्ममें आत्मारा-पूर्णकाम भगवान श्रीकष्ण की गृह दासियां बनी है ।।३९।। भगवानकी सोलह पत्नियोकी ओरसे श्रीरोहिणीने निवेदन किया - राणीजी भूतल पर भौमासुरने दिग्विजय किया तब बहुतसे नरेशोंको जीतकर उनकी कन्या हमलोगोंको अपने महलमें बन्दी बनाकर रख्रा था । भगवानने यह जानकर युद्धमें भौमासुर और उसकी सेना का संहार कर दिया और स्वयं श्रीकष्ण पूर्णकाम होनेपर भी हमलोगोंकी भौमासुरके बन्धनसे छुडाया तथा पाणिग्रहण करके अपनी दासी बना लिया महारानीजी ! हम सदा सर्वदा उनके सुमंगल चरणकमलोंका चिन्तन करती रहती थीं । जन्म मृत्यु के स्वरूप संसारसे मुक्ति देनेवाले है ।।४०।।

न वयं साध्वि साम्राज्यं स्वाराज्यं भौज्यमप्युत । वैराज्यं पारमेष्ठ्यं च आनन्त्यं वा हरेः पदम् ॥४१॥
कामयामह एतस्य श्रीमत्पादरजः श्रियः । कुचकुङ्कुमगन्धाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥४२॥
व्रजस्त्रियो यद् वाञ्छन्ति पुलिन्द्यस्तृणवीरुः । गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥४३॥

॥ इति श्रीमद्भागवते महापुराणे[1] दशमस्कन्धे[2] [3] त्र्यशीतितमोऽध्यायः ॥८३॥

कर्दमक्षमा

हे, साध्वि, वयम्, साम्राज्यम्, स्वाराज्यम्, भौज्यम्, अपि, उत, वैराज्यम्, पारमेष्ठ्यम्, च, आनन्त्यम्, वा, हरेः, पदम्, कामयामहे, किन्तु, एतस्य, गदाभृतः, श्रियः, कुचकुङ्कुमगन्धाढ्यम्, श्रीमत्पादरजः, मूर्ध्ना, वोढुम्, कामयामहे ॥४१-४२॥ महात्मनः, व्रजस्त्रियः, पुलिन्द्यः, तृणवीरुधः, गोपाः, गाः, चारयतः, पादस्पर्शम्, कामयन्ते, तद्, वयम्, कामयामहे ॥४३॥

॥ श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे त्र्यशीतितमेऽध्यायेऽन्वयाः समाप्ताः ॥८३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

न वयमिति। साम्राज्यादि न कामयामहे किन्तु एतस्य श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामह इति ननु तस्य गृहिण्यो यूयं सम्मद्राजः किमेवं कामयध्वमत आहुः हे साध्वि ! साम्राज्यं सार्वभौमपदं स्वाराज्यमैद्रं पदं भौज्यं तदुभयभोगं भाक्त्वं विविधं राजत इति विराट् तस्य भावो वैराज्य-अणिमादिसिद्धिभाक्त्वमित्यर्थः । पारमेष्ठ्यं ब्रह्मपदम् आनन्त्यं मोक्षं हरेः पदं तत्सालोक्यादि न तु कामयामह इति यद्वा बह्वृचब्राह्मणक्रमेण प्रागादिदिक्चतुष्टयाधिपत्यानि साम्राज्यभौज्यस्वाराज्यवैराज्यानि व्याख्येयानि ॥४१॥ किं तत्पादरज एव काम्यतेऽत आहुः-श्रियः कुचकुङ्कुमगन्धाढ्यमिति ब्रह्मादिसेव्यया लक्ष्म्यापि सेवितत्वादिति भावः ॥४२॥ ननु तर्ह्यतिदुर्लभत्वात्किं तद्वाञ्छयाऽत आहुः-व्रजस्त्रिय इति। यद्यथा गावो गाः महात्मनोऽपि गाश्चारयतः पादस्पर्शनं च गोपा वाञ्छन्ति तद्वत्तत्पराणां सुलभ इति भावः ॥४३॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां त्र्यशीतितमोऽध्ययः ॥८३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वयमपि तत्पादरजोभजनमन्तरेण नान्यत्पदमाशास्मह इत्याहुः-न वयमिति। द्वयोरन्वयः। एतस्य श्रीकृष्णस्य। अत्राशङ्कते-ष्वमिति। तदुभयभोगभाक्त्वं सार्वभौमेन्द्रभोगसेवित्वरूपम्। इत्यर्थ इति-अणिमादिसिद्धिमत एव विविधं राजमानत्वादिति भावः। तत्सालोक्यादि। तत्समानलोकवासादि। आदिना सामीप्यादिग्रहः। लोकाद्वेदो गरीयानिति न्यायमाश्रित्याह-यद्वेति ॥४१॥ किं तु। इति भाव इति-या सर्वसेव्या रमा तया तत् सेव्यतेऽतोऽस्माकमपि तत्रैव रतिरित्याहुः-श्रिय इति ॥४२॥ अत्राशंक्य ननु-नन्विति। इति भाव इति-अन्यैः प्रबलैरपि यन्नाप्यते तत्तद्भक्तैर्दुर्बलैरपि प्राप्यते, भक्तवात्सल्येन हरिर्निजजनानामसुलभमपि

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सुलभं करोतीति तात्पर्यम्। पादैः स्पृश्यते इति पादस्पर्शं पादरज एवेत्यर्थः ॥४३॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे त्र्यशीतितमोऽध्यायः ॥८३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

किन्तु केवलं तद्दास्यमेवेत्याहुः-नेति द्वाभ्याम्। हे साध्वीति पातिव्रत्यनिष्ठयैतत्त्वया साधु बुद्ध्यत एवेति भावः। भौज्यमिति चतुर्थसन्ध्यक्षरमध्य एव पाठो गम्यते भुनक्तीति भुक् तस्य भावो भौज्यमित्यर्थात् तथैव बह्वृच्ब्राह्मणपाठाच्च अपि वैराग्यमपि साम्राज्यादीनां यथोत्तरं श्रैष्ठ्यम् एतस्य गदाभृत इति नरकवधार्थं गदया निर्बिभेदाद्रीन् इति

"प्राकारगदया गुर्व्या निर्बिभेद गदाधरः।" इत्यनेन चोक्तगदाधरत्वाभिप्रायेण श्रीः सर्वा सम्पत्तिस्तद्वृतः पादस्यैकस्य एकमपि श्रीमदिति रजसोऽपि विशेषणं वा तस्य सर्वोत्तमत्वं प्रमाणयन्ति श्रिय इति ॥४१-४२॥ ... श्रीः सर्वस्त्रीजातितः तत्प्राप्यं कथं प्राप्स्यथ ? उच्यते प्रेममाहात्म्येनैव तत्प्राप्तिः न तु जात्यादिमाहात्म्येनेत्याहुः-पुलिन्द्यतृणवीरुधश्च श्रीवृन्दावनवर्तिन्यः तत्र पुलिन्दीनां तद्वाञ्छा पूर्णाः पुलिन्द्य इति प्रागुक्तेः तृणवीरुधां च वनलतास्तरव इत्याद्युक्तेः व्रजस्त्र्यादीनां यथापूर्वं प्रेम तद्वाञ्छायाः श्रैष्ठ्यमिति वक्तव्यम्। व्रजस्त्रियो वाञ्छन्तीति पुलिन्द्योऽपि वाञ्छन्तीत्येवं कैमुतिकन्यायेन व्याख्येयं तत्र वीरुद्भ्यो हि तृणानां श्रैष्ठ्यं तेषां तत्त्वस्य लीलाभाधिक्यात् अहो किं वक्तव्यं तास्तास्तद्वाञ्छन्तीति गोपाः संवाहनाद्यर्थं पादस्पर्शं वाञ्छन्तीत्याहुः गाव इति। महात्मन ऐश्वर्येण सर्वव्यापकस्यापि गाश्चारयत इति तत्कारुण्यमेव तत्र हेतुरित्यर्थः। अन्यत्तैः। तत्र च ननु तस्य गृहिण्यः यूयं सर्वसम्पद्भ्राजः किमेव कामयध्व इत्यत्र तदन्यत्रेच्छाराहित्यादिति परिहारो द्रष्टव्यः। तर्त्कि तत्पादरज एव काम्यत इति यद्यं किमपि न काम्यते तर्हि तद्रजोऽपि किमिति काम्यत इत्यर्थः। अथवा आनन्त्यम् "ते ये शतम्" इत्यादिश्रुतिरीत्या मनुष्यानन्दमारभ्य शतशतगुणितत्वेन प्राजापत्यानन्दस्य गणनायाः परां काष्ठां दर्शयित्वा परब्रह्मणि तु "यतो वाचो निवर्तन्ते" इत्यनेन यदानन्दस्यानन्त्यं दर्शितं तदपीत्यर्थः। किं बहुना हरेः श्रीपतेः पदं सामीप्यादिकमपि यत्तदेतत्सर्वमधीनमपि न कामयामहे नाधीनं कर्तुमिच्छामः इत्यर्थः। किमधिकं लब्धुं कामयध्वे तत्राहुः-एतस्यास्मत्पतित्वेन सर्वत्र तस्य गदाभृतः श्रीमत्पादरज एव तावन्मूर्ध्ना कामयामहे। तत्रापि यत् श्रियः कुचकुङ्कुमगन्धेनाढ्यं तद्गन्धेन प्राप्तसम्पद्विशेषं तत्पुनरधिकं कामयामह इत्यर्थः। ननु श्रीपतेः पदं श्रीकुचकुंकुमगन्धाढ्यं तत्तु भवत्यस्त्यक्तवत्य एव यदि श्रीरत्र रुक्मिण्यभिप्रेयते तर्हि तत्तु भवतीनां प्राप्तमेव तस्मात्तावद्विलक्षण एव श्रियः कुचकुंकुमगन्धाढ्यं तस्मादिति गम्यते। ततस्तदवबोधनाय पुनर्विशिष्यतां तत्राहुः-व्रजस्त्रिय इति —

"पुण्याः पुलिन्द्य उरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमण्डितेन ।
तद्दर्शनस्मररुजस्तृणरूषितेन लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥"

इति स्ववाक्याद्यनुसारेण व्रजस्त्रियो यद्वाञ्छन्ति तद्वाञ्छुरित्यर्थः। वर्तमानप्रयोगेण तत्तदविच्छेद उत्प्रेक्ष्यते। पुलिन्द्यादिनिर्देशस्तु स्वेषामपि तत्प्राप्तियोग्यताविवक्षया तृणवीरुधो दुर्वाद्याः आसां वाञ्छा "केवलेन हि भागेन गोप्यो गावो मृगाः।" इतिदृष्टेः गावो गाश्चरयतश्चारयन्तो गोपा इत्यन्ते निर्देशस्तु तेषां केषांचित् प्रियसखादीनां तदनुमोदनकारि पुरुषत्वात्तत्रायोग्यत्वविवक्षया। अयम्भावः - श्रीत्वेन प्रसिद्धायाः श्रियस्तत्र कामनैव श्रूयते न तु सङ्गतिः —

"कस्यानु भावोऽस्य न देव विद्महे तवाङ्घ्रिरेणुस्पर्शाधिकारः ।
यद्वाञ्छया श्रीललना चरत्तपो विहाय कामान् सुचिरं धृतव्रता ॥"

नागपत्नीनामुक्तेः न च रुक्मिणीत्वेन प्रसिद्धायाः श्रियस्तत्र सङ्गतिः। कालदेशयोरन्यतमत्वात् न च व्रज श्रीसम्बन्धलालसा युक्ता —

"नाऽयं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः।" इत्यादिना।

ततोऽपि परमाधि

"रुक्मिणी द्वारव

मात्स्यस्कान्दादि

"देवी कृ

बृहद्गौतमीयदृष्ट्या

"अनयाऽ

अग्र्येणेत्युपगतः
तादृशप्रेमस्फूर्तिमयतद्गन्धाढ्य
तादृशं पादस्पर्शं च वाञ्छ
तदव्यभिचारिफलत्वात्तदभिन्नम
स्वभावो यस्य तादृशस्य "तत्रा

॥ इतिश्रीमद्भागवते महा

किन्तु केवलं तद्दास्यमे
अपि, वैराज्यमपि हरेः सर्वमनो
एतस्य गदाभृत इति नरकवधार्थं
निर्बिभेद गदाधरः' इत्यनेन चोक्त
बन्धुवात्सल्यादिकमभिप्रेतम्। श्रीः
स्वत एव सर्वसम्पत्प्राप्तिः स्यादिति
किंच, अनेन रजसो रसविशेषसम्ब
दासीत्वाभिप्रायेणैव। पुलिन्दास्तृणा
इति प्रागुक्तेः। तृणवीरुधश्च (भा० १
किं वक्तव्यम्। व्रजस्त्रियो वाञ्छन्ती
श्रैष्ठ्यम्। गोचारणे तेषां तल्लाभाधि
वाञ्छन्तीत्याहुः-गाव इति। प्रेम्णा त
सर्वव्यापकस्यापि गाश्चारयत इति। य
महिष्यो यूयम्, सर्वसम्पद्भ्राजः किमेव
द्रष्टव्यः। तत् क/ पादरज एव काम्य
रुक्मिण्या लक्ष्म्या एव वा, कुचकुङ्कु
व्रजेति। सदा प्राप्तुमिच्छन्ति (भा०१०/४
वाञ्छया तन्माहात्म्यविशेषादिति भावः।
तत्राहुः-पुलिन्द्य इत्यादि। पुलिन्द्यादयो गो
आत्मा कारुण्यादिस्वभावो यस्य तस्य, अत
सुचितमेव। श्रीद्रौपदी चान्ते सन्तोषिता

ततोऽपि परमाधिक्यश्रवणात् तस्मात् —

"रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने ।" इति ।

मात्स्यस्कान्दादि निर्णीत्य —

"देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परा ॥" इति ।

बृहद्गौतमीयदृष्ट्या च या तासु राधात्वे प्रसिद्धा सर्वतो विलक्षणा श्रीर्विराजते तामुद्दिश्यैव तासां तदिदं वाक्यं यथा -

"अनयाऽऽराधितो नूनं भगवान् हरिरीश्वरः । यन्नो विहाय गोविन्दः प्रीतो यामनयद्रहः ॥" इति ।

अग्रयेणेत्युपगतः प्रिययेहेत्यादि द्वयं च ततश्च तासां यथा तत्र स्पृहास्पदता तथास्माकं चेति तदेवं तादृशप्रेमस्फूर्तिमयतद्गन्धाढ्यतायाः सम्प्रत्यस्मासु प्रकाशः स्यादिति दर्शितम् । न केवलं तादृशं तद्रज एव वाञ्छन्ति अपि तु तादृशं पादस्पर्शं च वाञ्छन्ति ततो वयमपि तं च कामयामह इत्यर्थः । यद्वा तद्रजस एव विशेषणं पादस्पर्शमिति तदव्यभिचारिफलत्वात्तदभिन्नमेवेत्यर्थः । एतस्य तस्य कीदृशस्य महान् सर्वत्र स्यादपि स्वभावादुत्तम आत्मा सौन्दर्यादिप्रकाशमयः स्वभावो यस्य तादृशस्य "तत्रापि शुशुभे ताभिर्भगवान् देवकीसुतः ।" इति शुकोक्तेः ॥४३॥

॥इतिश्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां त्र्याशीतितमोऽध्यायः ॥८३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

किन्तु केवलं तद्दास्यमेवेत्याहुः-नेति द्वाभ्याम् । हे साध्विति पातिव्रत्य-निष्ठयैव तत्त्वया साधु बुध्यत एवेति भावः । उत अपि, वैराज्यमपि हरेः सर्वमनोहरस्येति तत्पदस्यापि सर्वथा सर्वमनोहरत्वमभिप्रेतम् साम्राज्यादीनां यथोत्तरं श्रैष्ठ्यम् ॥४१॥ तस्य गदाभृत इति नरकवधार्थं (भा०१०/५९/४) 'गदया निर्बिभेदाद्रीन्' इति, (भा० १०/५९/५) 'प्राकारं गदया गुर्व्या निर्बिभेद गदाधरः' इत्यनेन चोक्तगदाधरत्वाभिप्रायेण । यद्वा, गदं निजानुजम् आ सम्यग् बिभर्ति परिपालयतीति तथा तस्येति वात्सल्यादिकमभिप्रेतम् । श्रीः सर्वाः सम्पत्तिस्तद्वतः पादस्यैकस्य रज एकमपि, श्रीमदिति रजसो विशेषणं वा । अतस्तत्प्राप्त्या त एव सर्वसम्पत्प्राप्तिः स्यादिति । ततोऽन्यद्ग्राह्यं किं काम्यमिति भावः । तदेव प्रमाणयन्ति-श्रिय इति । भावस्तैर्व्यञ्जित एव । किंच, अनेन रजसो रसविशेषसम्बन्धेन माहात्म्यविशेषस्तेन च भक्तवर्गप्राप्याद्विशेषोऽप्यभिप्रेतः । मूर्ध्ना वोढुमिति च परमभक्त्या त्वाभिप्रायेणैव । पुलिन्दास्तृणानि वीरुधश्च श्रीवृन्दावनवर्तिन्यः तत्र पुलिन्दीना तद्वाञ्छा (भा० १०/२१/१७) 'पूर्णाः पुलिन्द्यः' इति प्रागुक्तेः । तृणवीरुधश्च (भा० १०/३५/९) 'वनलतास्तरवः' इत्याद्युक्तेरनुसाराद्व्रजस्त्रदीनां यथापूर्वं प्रेम्णा तद्वाञ्छायां श्रैष्ठ्यं किं वक्तव्यम् । व्रजस्त्रियो वाञ्छन्तीति पुलिन्द्योऽपि वाञ्छन्तीत्येवं कैमुतिक-न्यायेन व्याख्येयम् । तत्र वीरुद्भ्योऽपि तृणानां श्रैष्ठ्यम् । गोचारणे तेषां तल्लाभाधिक्यात् । अहो किं वक्तव्यम्, तास्तास्तद्वाञ्छन्तीति, गोपाः सम्वाहनाद्यर्थं पादस्पर्शमपि वाञ्छन्तीत्याहुः-गाव इति । प्रेम्णा तासां तेषां च तत् सिध्येदेवेत्याशयेन तद्धेतुतया तस्य मधुरलीलामाहुः-महात्मन ऐश्वर्येण सर्वव्यापकस्यापि गाश्चारयत इति । यद्वा, गोचारणे हेतुः-महात्मनो महाभगवत इति । अन्यत्तैर्व्याख्यातम् । तत्र च ननु तस्य गृहिण्यो यूयम्, सर्वसम्पद्भ्राजः किमेवं कामयध्व इत्यत्र तदन्यत्रेच्छाराहित्यादिति, किंवा सम्पदं कामपि नेच्छाम इति परिहारो द्रष्टव्यः । तत् क/ पादरज एव काम्यत इति च तदेककामनाहेतुव्याख्यार्थमित्येवं पौनरुक्त्यं समाधेयमिति । अथवा श्रियः रुक्मिण्या लक्ष्म्या एव वा, कुचकुङ्कुमानां गन्धेनाढ्यमपि तथा सह सापत्न्याङ्गीकारेणापि कामयामह इत्यर्थः । तत्र हेतुमाह-सदा प्राप्तुमिच्छन्ति (भा०१०/४७/६०) 'नायं श्रियोऽङ्ग' इत्युद्धव-गीतानुसारेण लक्ष्मीतोऽप्यधिकप्रसादभाजां श्रीगोपीनां वाञ्छया तन्माहात्म्यविशेषादिति भावः । ननु गाढप्रेममाधुरीविशेषशालिन्यस्ता एव तद्योग्याः, यूयं तु तदभावात् कथं तद्वाञ्छथ ? आहुः-पुलिन्द्य इत्यादि । पुलिन्द्यादयो गोपाश्चेति दृष्टान्ततयैव तत्कारुण्येन तद्घटेतापीति भावः । कारुण्यमेवाहुः-महान् अपरिच्छिन्नः आत्मा कारुण्यादिस्वभावो यस्य तस्य, अत एव गावो गाश्चारयत इति । यद्वा, वो युष्माकं यो महात्मा तस्येति भगवत्तासारसर्वस्वप्रकटनं कृतमेव । श्रीद्रौपदी चान्ते सन्तोषिता । अन्यत् समानम् । अथवा साम्राज्यादिकं न कामयामहे यद् यस्माद् व्रजस्त्रियो

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

लक्ष्मीतोऽधिकसौभाग्यवत्योऽप्येतस्य पादरज एव वाञ्छन्तीत्यन्वयः। अतो वृन्दावने गाचारयतः सत एतस्य ता इव पादस्पर्शमे कामयामह इत्यर्थः। ननु परमदुर्लभेऽर्थे कामो नोचितः, सत्यम्, दुर्लभमपि पुलिन्द्यादय इव कामयामह इत्याहुः-पुलिन्द्य इ यथाधुना श्रीवृन्दावनस्थितानामपि तासां गोपानां चैषां सुदुर्लभेऽपि वाञ्छा भवति तद्वदित्यर्थः। विचारे सत्यपि तत्कामोऽ सुदुर्निवार इति भावः। यद्वा, यद् यस्मादेतस्य गाश्चारयतः सतः पादस्पर्शमेव व्रजस्त्रियो वाञ्छन्ति, अतः स्वाराज्यादिकं न कामयामहे। किन्तु गावश्चारयतः सतः पादरज एव कामयामहे। अन्यत् समानम्। विवाहमहासौभाग्यभाजामपि तासा भक्तिविशेष विनयविभूत्या पत्न्याभिमानत्यागेन नित्यदासीत्वमात्रापेक्षया तत्तदुक्ति र्ज्ञेयेति दिक् ॥४२-४३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशमटिप्पण्यां त्र्यशीतितमोऽध्यायः ॥८३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥३४-४३॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये त्र्यशीतितमोऽध्यायः ॥८३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

नेति। हे साध्वि ! वयं साम्राज्यादीनि न कामयामहे। तत्र साम्राज्यं सार्वभौमपदं स्वाराज्यम् ऐन्द्रं पदम्। कैवल्यं व भोज्यं, तदुभयभोगभाक्त्वं विविधराजत इति विराट् तस्य भावो वैराज्यम्। अणिमादिसिद्धिभाक्त्वमित्यर्थः। पारमेष्ठ्यं ब्रह्मपदम् आनन्त्यमिति स्वार्थे ष्यञ् अनन्तं हरेः पदम् इत्यर्थः ॥४१॥ तर्हि किं कामयध्वम् ? तत्राहुः-एतस्य गदाभृतः श्रियै लक्ष्म्याः कुचकुङ्कुमस्य गन्धेनाढ्यं श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामह इति सम्बन्धः। श्रियः कुचकुङ्कुमगन्धाढ्यमित्यने ब्रह्मादिसेवितया श्रियाऽपि सेव्यमानत्वात्पादरज एव कामयामह इति सूचितम् ॥४२॥ नन्विति। दुर्लभत्वात् किं तद्वाञ्छयेत्य आहुः-व्रजस्त्रिय इति। महात्मनः निरवधिकसौशील्ययुक्तात्मनः अत एव गावः गाश्चारयतो भगवतः यद्यथा व्रजस्त्रि पुलिन्द्यः आरण्यकस्त्रियः तृणानि वीरुधश्च पादस्पर्शं वाञ्छन्ति तद्वद्द्वयमपि कामयामह इत्यर्थः। सौशील्यसौलभ्याद्यनन्तकल्याणगुणाकरस्य भगवतः पादरजः तद्दासानां सुलभमेवेति भावः। तृणवीरुधो वाञ्छन्तीत्यने तृणादीनामपि भगवत्सान्निध्यातिशयाहितचैतन्यानां तदिच्छावत्त्वं सूचितम् ॥४३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां त्र्यशीतितमोऽध्यायः ॥८३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

न वयमिति द्वयम् ॥४१-४३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे त्र्यशीतितमोऽध्यायः ॥८३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

न वयमित्यादि। हे साध्वि ! वयं षोडशसहस्राणि साम्राज्यं साम्राज्यलक्ष्मीभारम् एवं स्वाराज्यमपि भोज्यादि बहुना आनन्त्यं हरेः पदं वा तर्हि किं वाञ्छतेत्याहुः-कामयामह इत्यादि। एतस्य पादरजः कामयामहे। कीदृशं कुचकुंकुमगन्धाढ्यं किं कर्तुं ? मूर्ध्ना वोढुम् ॥४१-४२॥ ननु कथं नोह्यते तत्तु सुलभमेव भवतीनां तत्किं कामयामह इत्यु

तत्राहुः-व्रजस्त्रियः इत्यादि।
तासां सौभाग्यमन्यदेव तत्क
इत्याहुः-तृणवीरुत्सामान्येना

कीदृश्यः अगोपाः गोपनं न गो
मन्तव्यम् ॥४३॥

॥ इति श्रीमद्भागवते म

न वयं साध्वीत्यादि
ततु ऊह्यत एव तत्किमिदमुच्य
निर्वचनीयं वा एतास्तु तत्राधिका
यद्यद्वाञ्छन्ति तथाभूता वयमपि व
चारयतः अर्थात् गावः गावो ध
श्रीवृन्दावनविहरणमेव। व्रजस्त्री
द्वारकाविलासाद्वृन्दावनविलास ए

॥ इति श्रीमद्भागवते म

यद्येवं तर्हि स्वपादाम्बुज
सार्वभौमं पदं स्वः स्वर्गे राजत
यथेष्टसर्वविषयभोगभाक्त्वं विविधं
मोक्षं हरेः पदं सालोक्यादिकं न
कुचकुङ्कुमगन्धेनाढ्यम् अत्र श्रीपदे
इति नागपत्न्यादिवाक्यात् कृष्णे का
श्रीपदेन रुक्मिण्युच्यत इति तत्राहुः-व्र
इति व्रजस्त्रीणामुक्तेस्तस्यां तासां सपत्
"देवी कृष्णमयी प्रो
बृहद्गौतमीयदृष्ट्या श्रीपदेन श्री
तृणवीरुधः सकाशात् पुलिन्द्यश्च वाञ्
एतस्य गोपाः प्रियनर्मसखाः केचित् सु
मधुरं पादस्पर्शं च वाञ्छन्ति। ततो वय

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

हुः-व्रजस्त्रियः इत्यादि। व्रजस्त्रियो यद्वाञ्छन्ति तथा व्रजस्त्रियो महात्मनोऽस्य पादस्पर्शं वाञ्छन्ति तथा वाञ्छाम इत्यर्थः। ननु सौभाग्यमन्यदेव तत्कथमन्यासां भवेदित्याशंक्याहुः-पुलिन्द्य इत्यादि। ननु वृन्दावनसम्बन्धात् ता अपि सौभाग्यवत्य हुः-तृणवीरुत्सामान्येनापि तत्रापि भूत्वा यद्वाञ्छाम इत्यर्थः। महात्मनः कीदृशस्य गावश्चारयतः गाः पालयतः सर्वाः

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

दृश्यः अगोपाः गोपनं न गोपः न विद्यते गोपो यासां सुप्रसिद्धा इत्यर्थः। तेनासां द्वारकाविलासाद्वृन्दावनविलसितमेवातिप्रेय इति न्तव्यम् ॥४३॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे त्र्यशीतितमोऽध्यायः ॥८३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

न वयं साध्वीत्यादि। अथ किं कामयध्वे ? तमाह-कामयामह इत्यादि। एतस्य श्रीमत्पादरजो वोढुम् ॥४१-४२॥ अद्यत एव तत्किमिदमुच्यते ? तत्राह-व्रजस्त्रयो यद्वाञ्छन्तीत्यादि। एताः पुरोवर्तिन्यः श्रीव्रजस्त्रियो यद्यथा वाञ्छन्ति यद् नीयं वा एतास्तु तत्राधिकारिण्यः एवं चेत् पुलिन्द्यो यद्वाञ्छन्ति ताश्च तत्रानुरागिण्यः सौभाग्यवत्य एव। एवं चेत् तृणवीरुधो च्छन्ति तथाभूता वयमपि वाञ्छामः। महात्मनः कीदृशस्य ? गावश्चारयत इत्यर्थः। यद्वा गावो वृन्दावनभूमयः; किम्भूतस्य ? तः अर्थात् गावः गावो धेनव इति वा। व्रजस्त्री-पुलिन्दी-तृणवीरुधो यद्वाञ्छन्ति तदेव वाञ्छाम इत्यर्थः। एतत्तु वनविहरणमेव। व्रजस्त्रीप्रभृतयः कीदृश्यः ? अगोपाः-न विद्यते गोपो गोपनं यासां सर्वत्र प्रसिद्धाः। (एतेनासां) विलासाद्वृन्दावनविलास एवाभिमत इति तात्पर्यम् ॥४३॥

॥इति श्रीमद्भागवते महापुराणे श्रीनाथचक्रवर्तिविरचितायां चैतन्यमंजूषायां त्र्यशीतितमोऽध्यायः ॥८३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यद्येवं तर्हि स्वपादाम्बुजभक्ताभ्यो भवतीभ्यः सर्वानेव कामान् कृष्णो दास्यतीति तत्राहुः-न वयमिति। साम्राज्यं ज्यं पदं स्वः स्वर्गे राजत इति स्वराट् तस्य भावः स्वाराज्यमैन्द्रं पदं भौज्यं भुङ्क्ते इति भुक् तस्य भावो भौज्यं सर्वविषयभोगभाक्त्वं विविधं राजत इति विराट् भावो वैराज्यमणिमादिसिद्धिभाक्त्वमित्यर्थः। पारमेष्ठ्यं ब्रह्मपदम् आनन्त्यं हरेः पदं सालोक्यादिकं न कामयामहे। तर्हि किं कामयध्वे एतस्य कृष्णस्य श्रीमत्पादरज एव तत्रापि श्रियः कुङ्कुमगन्धेनाढ्यम् अत्र श्रीपदेन प्रसिद्धा नारायणकान्ता लक्ष्मीर्न वाचनीया तस्याः खलु "यद्वाञ्छया श्रीर्ललनाऽचरत्तपः" नपत्न्यादिवाक्यात् कृष्णे कामेनैव श्रूयते 'नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः' इत्युद्धवोक्तेर्न तु प्राप्तिः ॥४१-४२॥ न तं रुक्मिण्युच्यत इति तत्राहुः-व्रजस्त्रियो यद्वाञ्छन्तीति। "कस्मात्कृष्ण इहायाति प्राप्तराज्यो हिताहितः। नरेन्द्रकन्या उद्वाह्या" व्रजस्त्रीणामुक्तेस्तस्यां तासां सपत्नीभावादसूयैव न तु तत्सम्बन्धवति तस्मिन् वाञ्छेति तस्मात् -

"देवी कृष्णमयी प्रोक्ता राधिका परदेवता। सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परा॥" इति।

बृहद्गौतमीयदृष्ट्या श्रीपदेन श्रीराधैवोच्यते तस्याः कुचकुङ्कुमगन्धाढ्यं तत्पादरजो व्रजस्त्रियस्तत्सख्यः सुहृदश्च वाञ्छन्त्येव सकाशात् पुलिन्द्यश्च वाञ्छन्ति यदुक्तम् - "पूर्णाः पुलिन्द्यः" इत्यत्र तृणरूषितेनेति गावः गाश्चारयतो महात्मनः गोपाः प्रियनर्मसखाः केचित् सुबलादयश्च तत्सखीभावभावितमतयश्च वाञ्छन्ति न केवलं तादृशं तदेव वाञ्छन्ति अपि तु स्पर्शं च वाञ्छन्ति। ततो वयमपि तं च कामयामहे इत्यर्थः। यद्वा रजस एव विशेषणे पादस्पर्शमिति अत्र आसामीदृशी

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

कामना तद्दिनमारभ्य अभवत् यस्मिन् दिने प्रेमरसप्रसङ्गत: उद्धव एव कृष्णसन्निधौ रहसि स्त्रीजनमहासदसि श्रीराधाया रूपगुणप्रेमसौभाग्यमाधुर्यपरमोत्कर्षं श्रीकृष्णवशीकारकमवर्णयत् तत्राष्टानां रुक्मिण्यादीनां स्वेषां सौभाग्योत्कर्षं मानयन्तीनां त सा कामनाऽभूत् षोडशसहस्रस्त्रीणां तु ताभ्यो न्यूनसौभाग्यानामभूदित्यतो मौशलान्ते षोडशसहस्रगोपवेषधरेण कृष्णेन भगवत्यर्जुनाच्छिद्य गोकुलमानेष्यन्ते इति केचिदाहु: ॥४३॥

॥ इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । त्र्यशीतितम एषोऽत्र दशमेऽजनि सङ्गत: ॥८३॥

गूढार्थदीपिनी

हे साध्वि ! वयं साम्राज्यादि न कामयामहे किन्तु एतस्य गदाभृत: भगवत: श्रीमत्पादरज: मूर्ध्ना वोढुं धर्तुं कामयाम इति द्वयोरन्वय: । साम्राज्यं चक्रवर्तिपदम् । स्वाराज्यमैन्द्रपदम् । भोज्यं तदुभयभोगसेवित्वम् । वैराज्यमणिमादि (विविधं राज इति विराट् तस्य भावो वैराज्यम्) । पारमेष्ठ्यं परमेष्ठिन: इदं ब्रह्मपदम् । किं बहुना आनन्त्यं मोक्षं वा न ॥४१-४२॥ यत् व गाश्चारयत: भगवत: पादस्पर्शं (पादै: स्पृश्यते इति पादस्पर्शं पादरज एवेत्यर्थ:) गोप्यादय: वाञ्छन्ति तद्वत् वयमपीत्यन्वय पुलिन्द्य: शबराङ्गना ग्राम्या: । तृणादयो जडा अपि । या गावस्ता इति योज्यम् ॥४३॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यां त्र्यशीतितमोऽध्याय: ॥८३॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

ननु श्रीकृष्णभार्याभावमतिदुर्लभं गतानामपि भवतीनां कुत्रचिद्वासनास्ति नवेत्यत आहु:-नेति । साम्राज्यं सार्वभौम स्वाराज्यमैन्द्रं पदं भोज्यं तदुभयभोगभाक्त्वं विविधं राजते इति विराट् तस्य भावो वैराज्यमणिमादिसिद्धिभाक्त्वं पारमेष्ठ चतुर्मुखपदम् अनन्तो नित्यस्वरूपो जीवस्तस्य भाव: आनन्त्यं कैवल्यम् अक्षरस्वरूपोपासनासाध्यम् । क्षेत्रज्ञस्वरूपप्राप्ति मोक्षमित्यर्थ: । भगवद्भावापत्तिलक्षणान्मोक्षादस्य मोक्षस्य भिन्नत्वं च श्रीभगवद्गीताव्याख्यानादिषु प्राचां ग्रन्थेषु द्रष्टव्यम् पदं भगवत्प्राप्तिलक्षणं मोक्षं वयं न कामयामहेत्युत्तरेणान्वय: ॥४१॥ किन्तु श्रीमत्पादरज: मूर्ध्ना वोढुं कामयाम: । ननु भग प्रिया भूत्वा तस्य पादरज: किमिति काम्यते इत्यत आहु:-श्रिय: कुचकुङ्कुमगन्धाढ्यमिति । श्रिया मूर्ध्ना धृतं तत: कुचकुङ्कुमगन्धाढ्यं भवति । उपलक्षणमेतद्ब्रह्मादीनामपि-

"धन्या अहो अमी आल्य: गोविन्दाङ्घ्र्यब्जरेणव: । या ब्रह्मेशौ रमा देवी दधुर्मूर्ध्न्यघनुत्तये ॥" इत्युक्ते: ।

नित्ययुक्तया श्रिया पारमेष्ठ्याद्यधिपतिभिर्ब्रह्मादिभिश्च सेवितत्वात् मोक्षं पारमेष्ठ्यादिकं च न कामयाम: । श्रीमत् एव कामयाम इति फलितोऽर्थ: ॥४२॥ ननु दुर्लभ्यलाभ: कथं भविष्यतीत्यत्र भक्तानां तत्सुलभमेवेत्याहु:-व्रजस्त्रिय इति यस्य महात्मन: परमात्मन: सर्वस्वामिन: चारयत: गा इति शेष: व्रजस्त्रिय: पुलिन्द्यश्च तृणवीरुध: गावश्च गोपाश्च पा वाञ्छन्ति तस्य पादरजो वयं कामयामेति पूर्वेणान्वय: ॥४३॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्र्यशीतितमाध्यायार्थप्रकाश: ॥८

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स्वस्य कामनामाहुस्त्रिभि: । न वयमिति । हे साध्वीति सम्बोधनं मात्सर्यकटाक्षाभावाय । साम्राज्यं सार्व स्वाराज्यमात्मारामता । अनेन सर्वदु:खाभावो निरूपित: । अपीति सर्वविद्यादयोऽपि सङ्गृहीता: उत पुन: भोज्यम् इत्

भगवता सह भोज्यं कामयाम
सायुज्यादि । एवं लोकसिद्धा
तत्किमित्याकाङ्क्षायामाह-एतस
स्ववक्षसि चरणस्थापनं कामय
तिष्ठति तदा तद्रजो निरन्तरं ति
गदामवलम्ब्य स्थास्यति । इतरथ
स्थित: ॥४१-४२॥ ननु कामना
। तदेव सर्वोत्तममिति ज्ञातव्यम्
परित्यज्य यद्यन्यद्वाञ्छेत् तद्भोजन
व्रजस्त्रियो हि लोकोत्कृष्टं न दृष्टवन
ततो नीचा: तथा तृणवीरुधोऽपि -

तथा गावोऽपि वाञ्छन्ति । त
चेत्त्राह-महात्मन इति । महानेवात्मा
परिसमाससर्वार्था इति च ॥४३॥

॥इति श्रीमद्भागवतसुबो

हे साध्वि ! साम्राज्यं चक्रवर्तित
आनन्त्यं मोक्षं हरे: पदं सालोक्यादि वा
गदाभृत: श्रीमतो पादयो: रजो रेणुं मूध
वाञ्छन्ति पुलिन्द्य: शबरस्त्रिय: तृणवीरु
वाञ्छन्ति रेणुविशेषणं साधु न पृथक् स्वार

॥ इति श्रीमद्भ

गोस

एवं विवाहप्रकारमुक्त्वा स्वमनोर
श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामह इति
तदुभयभोगभाक्त्वम् । उत अपि विविधं राजत
आनन्त्यं कैवल्यं मोक्षम् । हरे: पदं स्वरूपं सायु
पि सेव्यमानत्वात् इति हेतुं सूचयन्त्य आहु:
नित्यप्राप्तत्वात् किं पुनस्तत्कामनया इत

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

भवता सह भोज्यं कामयामह एव वैराज्यं ब्रह्माण्डरूपत्वं पारमेष्ठ्यं ब्रह्माण्डाधिपत्यं वेत्यनादरे। आनन्त्यं मोक्षः। हरेः पदं युज्यादि। एवं लोकसिद्धानि फलान्यनूद्य निषेधन्ति-कामयामह इति। पूर्वोक्तान् न कामयामहे अग्रिमं तु कामयामहे। किमित्याकाङ्क्षायामाह-एतस्य भगवतः श्रीयुक्तचरणरजः तद्रजो वर्णयन्ति। श्रियः कुचकुङ्कुमगन्धाढ्यमिति। तर्हि यथा श्रीः वक्षसि चरणस्थापनं कामयते एवं किं भवतीभिरपीति चेत्तत्राह-मूर्ध्ना वोढुमिति। नन्वेतदसङ्गतं प्रतिभाति। चरणश्चेन्मूर्ध्नि ष्ठति तदा तद्रजो निरन्तरं तिष्ठति। सविषमे कथं तिष्ठेदित्याशंक्याह-गदाभृत इति। अस्मासु चेत् किञ्चिन्न कर्तव्यं तदा मवलम्ब्य स्थास्यति। इतरथा गदया समं करिष्यतीति वा भावः। स हि कठिनेऽपि तिष्ठतीति ज्ञापनार्थं वा यथा ब्रह्मशिलायां स्थितः॥४१-४२॥ ननु कामनाश्चेत्त्यक्तव्याः सर्वा एव त्यक्तव्याः। किं रजः कामनया इत्याशंक्याह-व्रजस्त्रियो यद्वाञ्छन्तीति देव सर्वोत्तममिति ज्ञातव्यम्। यं नीचोऽपि लोकः प्रसिद्धं परित्यज्य चेद्वाञ्छति। यथात्यन्तं क्षुधितः प्राप्तमपि भोजनं रित्यज्य यद्यन्यद्वाञ्छेत् तद्भोजनादुत्तममित्यध्यवसेयम्। तृप्तश्चेद्वाञ्छति तदा नैवम्। अतो नीचान्नीचमेव दृष्टान्तीकुर्वन्ति। स्त्रियो हि लोकोत्कृष्टं न दृष्टवन्त्य इति कदाचिदैन्द्रपदं वाञ्छेयुः। ता अपि चेत्परित्यज्य रज एव वाञ्छन्ति ताः पुलिन्द्योऽपि नीचाः तथा तृणवीरुधोऽपि —

"आसामहो चरणरेणुजुषाम्" इति वाक्ये निरूपितम्।

तथा गावोऽपि वाञ्छन्ति। ता एव चारयतो भगवतः स्वयं तुल्या अपि गोपाः पादस्पर्शमेव वाञ्छन्ति। काऽत्रोपपत्तिरिति याह-महात्मन इति। महानेवात्मा इत्थम्भूतानुभावमित्यर्थः। युक्तिस्तु पूर्वमेवोक्ता। भगवदीयशरीरं तेनैव भवतीति भगवदीयत्वेन मासस्सर्वार्था इति च॥४३॥

॥इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे
चतुस्त्रिंशाध्यायविवरणम्॥३४॥ ॥८३॥

श्रीसुबोधिनीसारः

हे साध्वि! साम्राज्यं चक्रवर्तित्वं स्वाराज्यमैन्द्रपदं भौज्यं तदुभयभोगभाक्त्वं वैराज्यमणिमादिभाक्त्वं पारमेष्ठ्यं ब्रह्मलोकम् नन्त्यं मोक्षं हरेः पदं सालोक्यादि वा वयं न कामयामहे नेच्छामः॥४१॥ श्रियो लक्ष्म्याः कुचकुंकुमगन्धेनाढ्यं युक्तमेतस्य भृतः श्रीमतो पादयोः रजो रेणुं मूर्ध्ना शिरसा वोढुं धर्तुमिच्छामः॥४२॥ तद्दुरापतां दृष्टान्तावष्टम्भेनाह। व्रजस्त्रियो गोप्यो ञ्छन्ति पुलिन्द्यः शबरस्त्रियः तृणवीरुधः स्थावरा अपि यद्वाञ्छन्ति गावो गाश्चारयतो महात्मनः श्रीकृष्णस्य पादस्पर्शं गोपा ञ्छन्ति रेणुविशेषणं साधु न पृथक् स्वारस्याभावादिति गुरवः॥४३॥

॥ इति श्रीमद्भा० दश० उ० सुबो० टी० त्र्यशीतितमोऽध्यायः॥८३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं विवाहप्रकारमुक्त्वा स्वमनोरथमाहुः-नेति। हे साध्वि! वयं साम्राज्यादीनि न कामयामहे किन्त्वेतस्य गदाभृतः त्पादरजो मूर्ध्ना वोढुं कामयामह इति सम्बन्धः। तत्र साम्राज्यं सार्वभौमपदम्। स्वाराज्यम् ऐन्द्रं पदम्। भौज्यं भयभोगभाक्त्वम्। उत अपि विविधं राजत इति विराट् तस्य भावो वैराज्यम्, अणिमादिसिद्धिभाक्त्वम्। पारमेष्ठ्यं ब्रह्मपदम् नन्त्यं कैवल्यं मोक्षम्। हरेः पदं स्वरूपं सायुज्यम्। साम्राज्यादि विहाय किमिति तत्पादरजः कामयथ इत्यपेक्षायां ब्रह्मादिसेवितया सेव्यमानत्वात् इति हेतुं सूचयन्त्य आहुः-श्रियो लक्ष्म्याः कुचकुंकुमस्य गन्धेनाढ्यं युक्तमिति॥४१-४२॥ ननु एतत्पादरजसः नित्यप्राप्तत्वात् किं पुनस्तत्कामनया इत्याशंक्य नित्यनूतनानन्दजनकत्वात् सर्वदैव तदस्त्विति वाञ्छा घटत एव इत्याशयेन

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र दृष्टान्तमाहु:-व्रजस्त्रिय इति । महात्मन: अत्युदारचित्तस्य, अत एव भक्तवात्सल्यतया गावो गाश्चारयत: पादस्पर्शं गोप्याद यत् यथा वाञ्छन्ति तथा वयमपि कामयामहे ॥४३॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥

श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥

रचिता दशमे तत्र सात्त्विकानां निरोधने । त्रियुक्ताशीतितमोऽगात् कृष्णोद्वाहनिरूपक: ॥३॥ ८३॥

अन्वितार्थप्रकाशिका

व्रजस्त्रिय इति । महात्मन: अत्युदारचित्तस्यात एव भक्तवात्सल्येन गावो गाश्चारयत: पादस्पर्शं गोप्यादयो ग्राम्या व्रज यत् यथा वाञ्छन्ति तथा वयमपि कामयामहे । अतोऽस्माकमपि तल्लाभ: ॥४३॥

॥ इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां त्र्यशीतितमोऽध्याय: ॥८३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नेति । हे साध्वि द्रौपदि ! साम्राज्यं चक्रवर्तिपदं स्वाराज्यम् इन्द्रस्थानं भोज्यं नानाविधप्राकृतभोगसुखम् । वैरा वैराजपुरुषस्थानम् आनन्त्यं कैवल्यमोक्षसुखं हरे: पदं वैकुण्ठलोकं वयं न कामयामहे इत्युत्तरेणान्वय: ॥४१॥ ननु तर्हि किमिच्छथ चेत्तत्राहु:- कामयामहे इति । श्रियो रुक्मिण्या: कुचकुंकुमगन्धाढ्यम् । एतस्य गदाभृत: श्रीकृष्णस्य श्रीमत्पादरज: मूर्ध्ना शिर वोढुं कामयामहे ॥४२॥ वयमिव गोप्यादयोऽपि तद्वाञ्छन्तीत्याहु:-व्रजेति । गाव: गा: चारयतो महात्मन: पुरुषोत्तमस्य पादस्प यस्य एवम्भूतं यद्रज: व्रजस्त्र्यादयो वाञ्छन्ति तथा वयमिति भाव: ॥४३॥

॥ ॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने द्रौपदीरुक्मिण्यादिसंवादो नाम त्र्यशीतितमोऽध्याय: ॥८३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नेति ॥ कामयामह इति च ॥ हे साध्वि ! वयं साम्राज्यं सार्वभौमपदं स्वाराज्यमैन्द्रं पदं कैवल्यं वा भौज्यं तदुभयभोगभाक्त्व अपि वैराज्यमणिमादिसिद्धिभाक्त्वं पारमेष्ठ्यमुत ब्रह्मण: पदमपि आनन्त्यमिति स्वार्थे ष्यञ् । अन्तवर्जितमित्यर्थ: । हरे: पद वाऽवधारणे । न कामयामहे । तर्हि किं कामयध्वं तत्राहु: । गदाभृत: एतस्य श्रीकृष्णस्य श्रियो लक्ष्म्या: कुचकुङ्कुम गन्धेनाढ्यं श्रीमत्पादरज: मूर्ध्ना वोढुं कामयामहे । श्रिय: कुचकुंकुमगन्धाढ्यमित्यनेन ब्रह्मादिसेवितया श्रिया सेव्यमानत्वात् एव कामयामह इति सूचितम् ॥४१-४२॥ नन्वतिदुर्लभत्वात्किं तद्वाञ्छयेत्यत आहु: ॥ व्रजस्त्रिय इति ॥ महात्मन: निरवधिकसौशील्ययुतात्मन: अत एव गावो गा: चारयत: भगवत: पादस्पर्शं गोपा:, व्रजस्त्रिय: गोप्य: पुलिन्द्य: आरण्यकां तृणवीरुधस्तृणानि च वीरुधश्चेत्यर्थ: । यद्यथा वाञ्छन्ति तथा वयमपि कामयामह इति शेष: । सौशील्यसौलभ्याद्य कल्याणगुणाकरस्य भगवत: पादरजस्तद्दासानां सुलभमेवेति भाव: । तृणवीरुधो वाञ्छन्तीत्यनेन तृणादीनां भगवत्सान्निध्यातिशयाहितचैतन्यानां तदिच्छावत्त्वं सूचितम् ॥४३॥

॥ इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुत-
श्रीरघुवीराचार्यसूनुभगवत्प्रसादविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां
दशमस्कन्धोत्तरार्धे त्र्यशीतितमोऽध्याय: ॥८३॥

श्रीसाध्वी द्रौपदी
आदि सिद्धियां ब्रह्माका प
केवल चाहती है कि अप
जो भगवती लक्ष्मीजी के
चरणकमलोंका स्पर्श उनक
थी उन्हीकी हमें भी चाह

॥ इति श्रीमद्भागव

कृष्णप्रिया

श्रीसाध्वी द्रौपदी देवी ! हृदयकी बात सुनिये हम साम्राज्य, इन्द्रपद, अथवा इन दोनोंके भोग आराम आदि सिद्धियां ब्रह्माका पद मोक्ष अथवा सालाक्य सारूप्य आदि मुश्किलें इत्यादि मे से कुछ भी नहीं चाहती हम केवल चाहती है कि अपने प्रियतम प्रभुके अति कोमल चरणकमलोंकी वह रज अपने मस्तक पर वहन किया करे जो भगवती लक्ष्मीजी के वक्ष:स्थल पर लगी हुइ शेकरकी सुगन्ध युक्त है ।।४१-४२।। महान उदार भगवानके जिन चरणकमलोंका स्पर्श उनके गोचारण के अवसर गोप गोपियां भीलनें तिनके और घासलताएं तक करना चाहती थी उन्हीकी हमें भी चाह है ।।४३।।

।। इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे त्र्यशीतितमाध्यायस्य भाषाटीका समाप्ता ।।८३।

॥ श्रीहरिः ॥

★श्रीगणेशाय नमः★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ चतुरशीतितमोऽध्यायः ॥

श्लोकाः	अनु.	व.	मि.उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ
७१	६३	३	५	१०	२४५६	६१	४८	२५६५	८०	५

श्रीशुक उवाच

श्रुत्वा पृथा सबलपुत्र्यथ याज्ञसेनी [1]माधव्यथ क्षितिपपत्न्य उत स्वगोप्यः ।
कृष्णेऽखिलात्मनि हरौ प्रणयानुबन्धं सर्वा विसिस्म्युरलमश्रुकलाकुलाक्ष्यः ॥१
[2]इत्थं सम्भाषमाणासु [3]स्त्रीभिः स्त्रीषु नृभिर्नृप । [4]आययुर्मुनयस्तत्र कृष्णरामदिदृक्षया ॥२
द्वैपायनो नारदश्च च्यवनो देवलोऽसितः । विश्वामित्रः शतानन्दो भरद्वाजोऽथ गौतमः ॥३
रामः सशिष्यो भगवान् वसिष्ठो गालवो भृगुः । [5]पुलस्त्यः कश्यपोऽत्रिश्च मार्कण्डेयो बृहस्पतिः ॥४

कर्दमक्षमा

श्रीशुकः, उवाच । अखिलात्मनि, कृष्णे, हरौ, प्रणयानुबन्धाः, पृथा, सुबलपुत्री, अथ, याज्ञसेनी, माधवी(सुभद्रा), क्षितिपपत्न्यः, अथ, स्वगोप्यः, सर्वाः, श्रुत्वा, अश्रुकलाकुलाक्ष्यः, अलम्, विसिस्म्युः ॥१॥ द्वैपायनः, च, नारदः, देवलः, असितः, विश्वामित्रः, शतानन्दः, भरद्वाजः, गौतमः(एते-सात्त्विकाः), सशिष्यः, भगवान्, रामः, वसिष्ठः, गालवः, पुलस्त्यः, कश्यपः, अत्रिः, मार्कण्डेयः, बृहस्पतिः(एते-राजसाः), द्वितः, त्रितः, च, एकतः, सनकः, सनन्दनः, सनत्कुमारः, अङ्गिराः, अगस्त्यः, च, याज्ञवल्क्यः, वामदेवः, आदयः, अपरे, आगताः ॥३-४-५॥

श्रीधरस्वामिकृतभावार्थदीपिका

चतुर्भिरधिकाशीतितमे मुनिसमागमे । वसुदेवमखोत्साहबन्धुप्रस्थापनादिकम् ॥

सुबलपुत्री गान्धारी माधवी सुभद्रा क्षितिपानां राज्ञां पत्न्यः स्वगोप्यः कृष्णभक्ता गोप्यः विसिस्म्युर्विस्मयं चक्रुः ॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

वसुदेवमखोत्साहोत्तरं बन्धूनां नन्दादीनां प्रस्थापनादिकम् । आदिना स्वप्रस्थानादिग्रहः (१) । हरेर्ज्ञानिप्रियत्वं तदेकविषयत्वं तत्प्रीतेर्मुक्तिसाधनत्वं पुत्रादिस्नेहस्य संसारमूलत्वं चात्राध्याये कथयति । तत्र व्यासादिमुनीनामागमनं वक्तुं सन्तोषोद्रेकमाह-श्रुत्वेति । स्वशब्देन गोपीषु हरेः स्नेहोद्रेकं वक्ति मुनिः । प्रणयानुबन्धं कृष्णभार्याणामिति शेषः ॥१॥ तत्र रामकृष्णसमीपे ॥२॥ अथ चार्थे ॥३-४॥

१.माधव्य इत्थमनुयाः परमप्रतीताः-विज. । २. इति-श्रीधर. वंशी. वीर. विज. जीव. । ३. भिः-गो. प्रे. टी. । ४. आजग्मु-इति
५. पुलस्त्यःपुलहोऽत्रिश्च-इति ।

पूर्वप्रसङ्गं संश
प्रश्नकर्त्रीत्वाच्च सुबलपु
स्वातन्त्र्यस्य तादृशविनोद
याज्ञसेनीमाधवीत्यनयोरुभ
उपादानं यथासम्भवं तन्नि
परम्परयैव श्रुत्वेति ज्ञेयम् । त
प्रस्ताव्यत्वात् अथवा स्वगो
। पातिव्रत्यांशे याज्ञसेन्यास्त
पक्षान्तरे यथा स्वाश्रयं यतः
कासांचित् सजातीयतद्विशेष
याः कला धारा वाहिनोऽशा
सर्वाकर्षकस्वभावे यतः अ
चात्र कौतुकान्तरमापतितमि
तत्र द्वैपायनस्य प्राङ् निर्देशः
विशेषणं दशावतारमध्यपाठा
। ब्रह्मपुत्र इति पाठः क्वचित्

अथ-शब्दद्वयं विस्म
अपि विसिस्म्युः, किं नः पृथाद्य
ख्याख्येयम् । तत्र च स
सर्वचित्ताकर्षकाशेषभगवत्ता
तस्मिन् सामान्येन प्रणयः सम्भा
सर्वासां श्रुत्वा सर्वा एव ताः
सत्यः अद्भुतरसोदयस्वभावात्
चेति परममहोत्सवः सूचितः
सर्वलोकरमणस्तयोर्दिदृक्षया सा
श्रीशुकदेवस्य पितृत्वादिना तस्
विशेषणं प्राक् श्रीब्रह्मपुत्रोत्प
पराशरमैत्रेलपैलवैशम्पायनादयः
नृपामात्यादयः केचिदनुपविष्टा ए
प्रकर्षेण भक्तिविशेषेण दण्डवन्नि

सं. श्लो. अक्ष.
८० ५

: ।
कुलाक्ष्यः ॥१॥
कृष्णरामदिदृक्षया ॥२॥
द्वाजोऽथ गौतमः ॥३॥
मार्कण्डेयो बृहस्पतिः ॥४॥

याज्ञसेनी, माधवी(सुभद्रा), अथ,
द्वैपायनः, च, नारदः, च्यवनः,
न्, रामः, वसिष्ठः, गालवः, भृगुः,
:, सनकः, सनन्दनः, सनातनः,
-५॥

ादिकम् ॥
विसिस्म्युर्विस्मयं चक्रुः ॥१-६॥

ग्रहः (१) । हरेर्ज्ञानिप्रियत्वं यद्यस
सादिमुनीनामागमनं वक्तुं पृथादिस्त्री
र्याणामिति शेषः ॥१॥ इत्युक्तरीत्या

टी. । ४. आजग्मु-इति कस्यचित्।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

पूर्वप्रसङ्गं संश्लाघ्यमुपसंहरति-श्रुत्वेति । श्रुत्वेत्यनेन याज्ञसेनीत्यस्यैव मुख्योऽन्वयः पूर्वप्रकरणे तस्या एव प्रस्तावात् प्रकर्त्रीत्वाच्च सुबलपुत्र्यादीनां तु गौणः तासां नाममात्रग्रहणात् ततस्तासां श्रवणं परम्परयैव ज्ञेयम्, न तु साक्षात्तासामाग्रे तस्याः वक्तव्यस्य तादृशविनोदप्रस्तावस्य पट्टमहिषीभिः स्वयं तादृशकथनस्य चायोग्यत्वात् एवमपि प्रथमं पृथादीनामेवोपादानं गुरुत्वादेव याज्ञसेनीमाधवीत्यनयोरुभयतोऽप्यथशब्दनिर्देशस्तयोस्तदानीं सहावस्थानं सूचयति पूर्वपरिच्छेदसूचकत्वात् तदनन्तरं क्षितिपपत्नीनाम् उपादानं यथासम्भवं तन्निकटानिकटत्वबोधनाय उत स्वगोप्य इति सर्वतः पृथगुपादानात्तासां तु दूरत्वमेव व्यज्यते । अतस्ताश्च परम्परयैव श्रुत्वेति ज्ञेयम् । तासु स्वशब्दव्यञ्जितपूर्वपूर्वशतकृत्वः सङ्घुषितमहाप्रेमवतीषु विद्यमानासु तासां कथाया एव परमाश्चर्यत्वेन श्लाघ्यत्वात् अथवा स्वगोपीशब्देन तत्तत्पालयित्र्यस्तत्सख्यादय उच्यन्ते । अत एव स्वेति पृथगुक्तिः तत्र पृथासुबलपुत्र्योर्विस्मयः पातिव्रत्यांशे याज्ञसेन्यास्तदंशे भावांशे च माधव्याः स्नेहांशे क्षितिपपत्नीनां यथायोग्यं स्वगोपीनां तु स्वीयभावमर्मस्पर्शिभावत्वे अन्तरे यथा स्वाश्रयं यतःप्रणयानुबन्धशब्दस्य तत्र तत्र तत्तदंशप्राधान्यविवक्षा न केवलं विस्मयः कासांचित् प्रेमसामान्यांशस्पर्शेन कासांचित् सजातीयतद्विशेषांशस्पर्शेन च श्रीभगवद्विषयकप्रीत्युल्लासश्च जात इत्याह-अलमश्रुकलाविति । अलमत्यर्थाः अश्रूणां कला धारा वाहिनोंऽशाः ताभिराकुलाक्ष्यः ननु भवतु कासांचित् प्रीतिमतीनां तादृशत्वं कथमन्यासामपीत्याशङ्क्याहुः-कृष्णे सर्वाकर्षकस्वभावे यतः अखिलानां प्राकृताप्राकृतानाम् आत्मनि मूलस्वरूपे हरौ रूपगुणादिभिश्च सर्वमनोहरेति ॥१॥ नानाकौतुके स कौतुकान्तरमापतितमित्याह-इतीति । एतद्विचित्रप्रकारेण आजग्मुरित्यत्रायुरिति क्वचित्पाठः ॥२॥ मुनीनेव गणयति-त्रिकेण-द्वैपायनस्य प्राङ् निर्देशः पितृत्वादिना गौरवाधिक्यात् मुन्यन्तराणां क्रमस्त्वागमनक्रमादेवेति गम्यते । भगवानिति रामस्य विशेषणं दशावतारमध्यपाठादादराधिक्येन द्वितादीनां ब्रह्मपुत्रा इति विशेषणं ब्रह्मपुत्रोत्पत्तावनुक्तत्वात् । यद्वा । ब्रह्मपुत्राः सनकादयः ब्रह्मपुत्र इति पाठः क्वचित् । आदिशब्दात् पराशरमैत्रेयवैशम्पायनादयः ॥३-५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ-शब्दद्वयं विस्मये अत्याश्चार्या । किंवा । चार्थे, उक्तसमुच्चये । उत अपि श्रीगोप्योऽपि अनिर्वचनीयप्रेमवत्यस्ता श्रीविसिस्म्युः, किं नः पृथाद्या इत्यासां यथोत्तरं विस्मयनिवारके श्रीभगवत्तत्त्वज्ञाने न्यूनतया विस्मये यथोत्तरमाधिक्यं कैमुतिकन्यायेन आख्येयम् । तत्र च सर्वाभ्यः श्रीगोपीनां तत्त्वज्ञाने न्यूनता प्रेमभरेण तदाच्छादनादिति स्पष्टमेव । कृष्णे सर्वचित्ताकर्षकाशेषभगवत्तासारप्रकटनार्थमवतीर्णे साक्षाद्भगवति, अतोऽखिलानामात्मनि प्रियतमे हरौ सर्वमनोहरे चेति सर्वेषामपि अस्मिन् सामान्येन प्रणयः सम्भावितः । किंवा तासामेव सर्वासामसौ सूचितः तथापि प्रणयस्यानुबन्धं प्रवृत्तिं दार्ढ्यं वा श्रीमहिषीणां तासां श्रुत्वा सर्वा एव ताः किंवा अन्याश्च सर्वाः स्त्रियोऽलमत्यर्थं विसिस्म्युः । अश्रूणां कला बुद्धिर्धारा वा तयाऽऽकुलाक्ष्यः अद्भुतरसोदयस्वभावात् प्रेमोद्रेकाद्वा ॥१॥ इत्येवं गवत्प्रेमोदयेन सम्भाष्यमाणास्विति तथा नृभिः पुम्भिर्नृषु सम्भाष्यमाणेषु परममहोत्सवः सूचितः । अतस्तत्राजग्मुः । तत्रैव प्रयोजनविशेषं चाह-कृष्णः सर्वथा सर्वचित्ताकर्षकः रामश्च सर्वलोकरमणस्तयोर्दिदृक्षया साक्षाद्दर्शनार्थम् ॥२॥ श्रीभगवत्प्रियत्वादिनादौ निर्देश्यस्यापि श्रीनारदस्य श्रीद्वैपायनात् पश्चान्निर्देशः श्रीशुकदेवस्य पितृत्वादिना तस्मिन् गौरवाधिक्यादिति दिक् ॥३॥ भगवानिति रामस्य भगवदवतारत्वात् द्वितादीनां ब्रह्मपुत्रा इति विशेषणं प्राक् श्रीब्रह्मपुत्रोत्पत्तावनुक्तत्वात् । यद्वा । ब्रह्मपुत्राः सनकादयः तथेत्यस्य परतोऽन्वयः । आदि-शब्दात् व्यासमैत्रेयपैलवैशम्पायनादयः सर्व एव मुनयः सहसा सद्यः सम्भ्रमेण वा । प्रागासीना इति सहसोत्थाने योग्यतोक्ता । अतो नृपमत्यादयः केचिदनुपविष्टा एव स्थिता इति ज्ञेयम् । आदि-शब्दात् राजपुरोहितादयश्च । अपि साक्षाज्जगदीश्वरौ कृष्णरामावपि भक्तिविशेषेण दण्डवन्निपातादिना नेमुः । यतो विश्वेन वन्दितान् ॥४-६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-९॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

श्रुत्वेति । सुबलपुत्री गान्धारी याज्ञसेनी द्रौपदी माधवी सुभद्रा अथ तथा क्षितिपानां राज्ञां पत्न्यश्च उतापि च गोप्य कृष्णभक्ता गोप्यश्च रुक्मिण्यादीनामखिलान्तरात्मनि भगवति कृष्णे हरौ अमलं निष्कपटं प्रणयानुबन्धं प्रेमपारतन्त्र्ययुक्तं वच

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

यावत् । श्रुत्वा सर्वाः पृथादयः अश्रुकलाभिरानन्दाश्रुबिन्दुभिराकुले व्याप्तेऽक्षिणी यासां ताः विसिस्म्युर्विस्मयं चक्रुः ॥१॥ इतीति । इत्थं स्त्रीषु स्त्रीभिः सह सम्भाषमाणासु सतीषु तथा नृषु पुरुषेषु तैः सह सम्भाषमाणेषु सत्सु ॥२॥ आगतान् मुनीन् निर्दिशति–द्वैपायन इति त्रिभिः ॥३॥ तत्र रामः परशुरामः ॥४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

श्रुत्वेत्यनेन याज्ञसेनीत्यस्यैव मुख्योऽन्वयः । पूर्वपूर्वप्रकरणे तस्या एव प्रस्तावात् सुबलपुत्रीनां गौणः तासां नाममात्रग्रहण ततस्तासां श्रवणं परम्परयैव ज्ञेयम् । न तु साक्षात् तासामपि तस्याः स्वातन्त्र्यस्य तादृशविनोदप्रदस्य प्रस्तावस्य पट्टमहिषीभिः तादृशकथनस्य योग्यत्वात् स्वगोप्यः तासां स्वस्वरूप गोप्य इत्यर्थः ॥१-११॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

श्रुत्वेत्यादि । उत स्वगोप्य इति स्वशब्दो बलरामपरिगृहीता गोप्यस्तदा तत्र नासन्निति मन्तव्यम् ॥१-१०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

उत स्वगोप्यो यथार्थं ज्ञात्वा । श्रीशुको वदति–स्वाः स्वकीया गोप्यस्तत्तत्कथाश्रवणेनातिविस्मिता बभूवुः ॥१॥ ॥२-१

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

चतुर्युक्ताशीतितमे मुनिकृष्णमिथः स्तुतिः । शौरेः प्रश्नो मखश्चातो नन्दप्रस्थापनादिकम् ॥१॥

सुबलपुत्री गान्धारी याज्ञसेनी द्रौपदी माधवी सुभद्रा श्रुत्वेति । पृथागान्धार्यादीनां परम्परयैव श्रवणं न साक्षात् । तास द्रौपद्याः पट्टमहिषीणां च स्वातन्त्र्येण तादृशविनोदवार्ताप्रश्नोत्तरकौतुकस्यानौचित्यात् तस्मात् द्रौपदीसुभद्रयोरेव ताभिः सहवयस्य तत्तदौचित्यात् साक्षात् श्रवणं गोपीनां तु ताभिः साजात्याभावादेव सहावस्थानाभावादतिपरम्परयैव अत एव तत्रोत्त विप्रकर्षार्थज्ञापनाय प्रयुक्तः । स्वशब्दप्रयोगात्तास्वेव कृष्णस्य स्वान्तरङ्गबुद्ध्या प्रतिनिशमन्यालक्षितं परिष्वङ्गादिविलासोऽ तु कुरुक्षेत्रे तस्मिन् महातीर्थे ब्रह्मचर्यस्थितिप्रथैवेति ज्ञेयम् । विसिस्म्युरिति अश्रुकलाकुलाक्ष्य इति गोपीनां विस्मयोऽश्रुक तासां किञ्चित् स्वसजातीयभावदर्शनात् कृष्णस्य तत्तच्चरित्रश्रवणाच्च न तु पट्टमहिषीषु गोपीनां कश्चिदनुराग इति ज्ञेयम् ॥ सम्भाष्यमाणेषु च ॥२-७॥

गूढार्थदीपिनी

चतुरशीतितमे तु परस्परं मुनिहरिस्तुतिरत्र विधानतः । पुनरहो वसुदेवमखोत्सवः स्वजनयाजनयापनमुच्यते ॥१॥

पृथाद्या उत अपि स्वगोप्यः कृष्णभक्ता हरौ दुःखहरे कृष्णे तद्भार्याणां प्रणयानुबन्धं प्रेमोद्रेकं श्रुत्वा सर्वाः विसिस्म्युः विस्मिता (विसिष्मियरम् ईयङ्तऽवेरभाव आर्षः ।) बभूवुरित्यन्वयः । पृथा कुन्ती । सुबलपुत्री गान्धारी । सुभद्रा । याज्ञसेनी द्रौपदी । कथम्भूताः । अश्रुकलाभिः प्रेमाश्रुबिन्दुभिः आकुले पूर्णे अक्षिणी नेत्रे यासां ताः ॥ रामकृष्णसमीपे ॥२॥ त्रिकम् । रामः परशुरामः । द्वितादयः त्रयः सहोदराः । अपरे धौम्यकृपादयश्च आययुरिति पूर्वे ब्रह्मपुत्रः अङ्गिरा इत्यत्रान्वेति ॥३-४-५-६॥

मुनिकृष्णसंवादो
सुभद्रा स्वगोप्यः श्रीकृष्ण

पञ्चत्रिंशे
निरुद्धानां
आत्मीया
अद्भुता भ

पूर्वाध्याये भगवतः
उभयोः सम्पत्तौ भगवदीयत्वं
श्रुत्वेति । द्रौपदीप्रसङ्गं परं
याज्ञसेनी द्रौपदी माधवी सुभद्रा
सात्त्विक्यो राजस्यो तामस्यो
अनुबन्धो यासां भगवत्पत्नीनां
कथं भगवदीयाः भविष्याम इ
बाह्योऽपि भवतीति क्रियान्तर
शोकं वारयति आकुलत्वं ज्ञात
फलमिति ज्ञापयितुं साधनानामे
सर्वेषामेव भगवत्सम्बन्धिनां भग
आययुः यत्रैव यस्याभीष्टं फलं त
परित्यज्य समागता इत्यर्थः । इ
सात्त्विकादिभेदाः गौतमान्ताः नव
राजसाः रामः परशुरामः स भगवा
ब्रह्मपुत्रः पुलहः अंगिरसो वा विशे

शुकोक्तिः । सर्वात्मनि कृ
सुभद्रा क्षितिपानां राज्ञां पत्न्यः उत
विस्मयं चक्रुः ॥१॥ एवं स्त्रीभिः
आजग्मुः ॥२॥ द्वैपायनो व्यासः शे

चतुर्भिरधिकाश

एवं श्रीकृष्णविवाहप्रकारादिश्र
प्रेमपारतन्त्र्ययुक्तं वचनं श्रुत्वा अश्रुकल

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

मुनिकृष्णसंवादो वसुदेवमखोत्सवादिकं च वर्ण्यते-श्रुत्वेति चतुरशीतितमेन। सुबलपुत्री गान्धारी याज्ञसेनी कृष्णा माधवी सुभद्रा स्वगोप्यः श्रीकृष्णभक्ता गोप्यः ॥१-६॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

पञ्चत्रिंशे सात्त्विकानां फलोत्कर्षो निरूप्यते । सन्मानसङ्ग्रहौ चैव ऋणापाकर्षणं तथा ॥१॥

निरुद्धानां हि लोकेऽस्मिन् दुर्लभं चेति रूप्यते । तदीयत्वं फलं नान्यदिति चोक्तं समासतः ॥२॥

आत्मीयानां निरोधं हि हरिरत्र करोति हि । अतः फलं पूर्वमेव सिद्धं रीत्या तु बोध्यते ॥३॥

अद्भुता भगवल्लीला निरोधः फलसूचकः । फलं त्वफलतासिद्ध्यै किमाश्चर्यमतः परम् ॥४॥

पूर्वाध्याये भगवतः स्वीयकरणलीला सर्वापि निरूपिता दृष्टा अदृष्टा च दृष्टा भगवत्कृतिः अदृष्टं चरणरज इति । उभयोः सम्पत्तौ भगवदीयत्वं सेत्स्यति अतस्तासां स्त्रीणामत्याश्चर्यं भगवच्चरित्रं श्रुत्वा भगवति स्नेहानुबन्ध आश्चर्यं च जातमित्याह श्रुत्वेति । द्रौपदीप्रसङ्गं परं कृतवती उपविष्टास्तु श्रवणार्थं सर्वा एव अतो मुख्याः नामत उच्चार्यन्ते सुबलपुत्री गान्धारी याज्ञसेनी द्रौपदी माधवी सुभद्रा अथ क्षितिपपत्न्यः इतरराजस्त्रियः उत स्वगोप्यश्च अथ द्वयमुतेति च स्त्रीणां चतुर्विधत्वमुपपादयति सात्त्विक्यो राजस्यो तामस्यो निर्गुणाश्चेति एताः सर्वा एव कृष्णे परमानन्दे सर्वेषामात्मभूते सर्वदोषनिवर्तके प्रणयः स्नेह एव अनुबन्धो यासां भगवत्पत्नीनां तु विवाहादिरूपो बाह्योऽपि सम्बन्धोऽस्ति । अस्माकं तु साक्षात्सम्बन्धः प्रणयः एव अतः कथं भगवदीयाः भविष्याम इति कथं चेयमवस्था च भविष्यतीति सर्वा एव विस्मयं प्राप्ताः स्मेति प्रसिद्धे कदाचिद्विस्मयो बाह्योऽपि भवतीति क्रियान्तरमप्याह-अश्रुकलाकुलाक्ष्य इति । अश्रूणां कलाभिः आकुलानि अक्षीणि यासां कलाशब्दः शोकं वारयति आकुलत्वं ज्ञातक्रियायाः व्यापृतत्वं बोधयति ॥१॥ एवं पूर्वोक्तसाधनस्य फलाकांक्षां निरूप्य भगवानेव फलमिति ज्ञापयितुं साधनानामेतच्छेषत्वं प्रतिपादयन् मुनीनामागमनमाह-इत्थं सम्भाषमाणास्विति । स्त्रीभिः स्त्रीषु नृभिर्नृषु सर्वेषामेव भगवत्सम्बन्धिनां भगवत्परता निरूपिता भवति येन सम्मर्देऽपि मुनीनामागमनं न विरुध्येत । अत एव तत्र मुनयः आययुः यत्रैव यस्याभीष्टं फलं तत्रैव तस्यागमनम् अतो रामकृष्णावत्र वर्तेत इति तद्दिदृक्षया मननेन ज्ञात्वा मननं साधनमपि परित्यज्य समागता इत्यर्थः । इदानीं बाह्यक्रिययैव प्राप्यत इति भावः ॥२॥ तान् गणयति-द्वैपायन इति त्रिभिः । तत्रापि सात्त्विकादिभेदाः गौतमान्ताः नव सात्त्विकाः तत्रापि भेदत्रयम् उत्तमौ द्वौ मध्यमाः षट् एकश्चापर इति । रामादयोऽपि नव राजसाः रामः परशुरामः स भगवानेव तथापि तच्छिष्यास्तत्स्थानीयाः यां लीलां प्रकाशयन्ति सा निरूप्यते द्वितादयो बहव एव ब्रह्मपुत्रः पुलहः अंगिरसो वा विशेषणम् । एते प्रकारनिरूपकाः ॥३-५॥

सुबोधिनीसारः

शुकोक्तिः । सर्वात्मनि कृष्णे हरौ प्रेमाधिक्यं श्रुत्वा पृथा कुन्ती सुबलस्य पुत्री गान्धारी याज्ञसेनी द्रौपदी माधवी सुभद्रा क्षितिपानां राज्ञां पत्न्यः उतापि स्वगोप्यः सर्वा अश्रूणां कलाभिराकुलान्यक्षीणि यासां ताः अलमत्यर्थं विसिस्म्युः विस्मयं चक्रुः ॥१॥ एवं स्त्रीभिः स्त्रीषु संभाषमाणासु सतीषु नृभिर्नृषु संभाषमाणेषु सत्सु तत्र रामकृष्णदर्शनेच्छया मुनय आजग्मुः ॥२॥ द्वैपायनो व्यासः शेषं स्पष्टम् ॥३॥४॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

चतुर्भिरधिकाशीतितमे मुनिसमागमः । वसुदेवमखस्तस्माद्गमनं च निरूप्यते ॥१॥

एवं श्रीकृष्णविवाहप्रकारादिश्रवणानन्तरं किं जातम् इत्यपेक्षायामाह-श्रुत्वेति । एवं रुक्मिण्यादीनां कृष्णे प्रणयानुबन्धं प्रेमपारतन्त्र्ययुक्तं वचनं श्रुत्वा अश्रुकलाभिरानन्दाश्रुबिन्दुभिराकुले व्याप्ते अक्षिणी यासां ताः सर्वा पृथादयो विसिस्म्युर्विस्मयं

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

चक्रुरित्यन्वयः। तासां प्रेमानुबन्धो युक्त एव। तत्र हेतुमाह-अखिलात्मनीति। हरौ भक्तदुःखहरणशीले च। तत्र पृथा कुन्ती सुबलपुत्री गान्धारी। अथ तथा याज्ञसेनी द्रौपदी। माधवी सुभद्रा। अथ तथा अन्याश्च क्षितिपानां राज्ञां पत्न्यश्च। उत च स्वगोप्यः कृष्णभक्ता गोप्यश्च ॥१॥ इत्येवं स्त्रीभिः सह स्त्रीषु सम्भाषमाणासु नृभिः सह नृषु च सम्भाषमाणेषु सत्सु कृष्णरामदिदृक्षया त मुनय आययुः ॥२॥ आगतान् मुनीन् निर्दिशति-द्वैपायन इति त्रिभिः ॥३॥ रामः परशुरामः ॥४॥

अन्वितार्थप्रकाशिका

चतुर्युताशीतितमे वसुदेवमखोत्सवः। बन्धुप्रस्थापनाद्यं च तत्र श्लोका द्विपर्वताः (७२) ॥

दशोवाचेति (१०) पादोना सप्तशैला (७६॥।) अनुष्टुभः ॥८४॥

श्रुत्वेति। एवं रुक्मिण्यादीनां अखिलात्मनि हरौ दुःखहरे श्रीकृष्णे प्रणयानुबन्धं प्रेमपारतन्त्र्ययुक्तं वचनं श्रुत्वा अश्रुकलाभिरानन्दाश्रुबिन्दुभिराकुले व्याप्ते अक्षिणी यासां ताः सर्वा पृथादयो विसिस्म्युः विसिस्म्यिरे। इयङ्तडोरभाव आर्षः। तत्र पृथा कुन्ती। सुबलपुत्री गान्धारी। अथ तथा याज्ञसेनी द्रौपदी। माधवी सुभद्रा। अथ तथा अन्याश्च क्षितिपानां राज्ञां पत्न्यश्च उत स्वगोप्यः कृष्णभक्ता गोप्यश्च। अत्र पृथागान्धार्यादीनां वृद्धानां तु परम्परयैव श्रवणं न साक्षात् तासामग्रे द्रौपद्याः कृष्णमहिषीणां च स्वातन्त्र्येण तादृशविनोदवार्ताया अनौचित्यात् ॥१॥ इतीति। इत्येवं स्त्रीभिः सह स्त्रीषु सम्भाषमाणासु नृभिः सह नृषु च सम्भाषमाणेषु सत्सु कृष्णरामदिदृक्षया तत्र मुनय आययुः ॥२॥ तान् निर्दिशति-द्वैपायन इति त्रयेण। रामः परशुरामः। ब्रह्मपुत्राः सनकादयः। अपरे निर्दिष्टेभ्योऽन्ये। स्पष्टं शेषम् ॥३-५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ चतुरशीतितमेऽध्याये कृष्णरामदर्शनार्थं मुनीनामागमनं वसुदेवयज्ञोत्सवं च तत्रागतानं स्वस्वदेशगमनं च निरूपयति। सुबलपुत्री गान्धारी याज्ञसेनी द्रौपदी माधवी सुभद्रा स्वगोप्यो हरिभक्ता गोप्यः। एताः सर्वाः रुक्मिण्यादीनां कृष्णे प्रणयानुबन्धं प्रेमबन्धनं वचः श्रुत्वा अलं विसिस्म्युः विसिस्मिरे विस्मयं प्रापुः ॥१॥ इति विचित्रप्रकारेण ॥२॥ मुनीनेवाह-द्वैपायन इति श्लोकत्रयेण ॥३-४-५-६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मुन्यागमेऽशीतितमे चतुर्भिरधिके त्विह। शौरेर्यज्ञमहोत्साहे सुहृत्प्रस्थापनादिकम् ॥१॥

श्रुत्वेति॥ पृथा कुन्ती, सुबलपुत्री गान्धारी अथ याज्ञसेनी द्रौपदी माधवी सुभद्रा अथ तथा, क्षितिपपत्न्यो राज्ञां पत्न्यः, उतापि च स्वगोप्यः श्रीकृष्णभक्ता गोप्यश्च सर्वाः पृथादयः श्रीकृष्णाङ्गनानां हरौ श्रितापद्धर्तरि, अखिलात्मनि कृष्णे प्रणयानुबन्धं निष्कपटं प्रेमपारतन्त्र्ययुक्तं वचनमित्यर्थः। श्रुत्वा अलमतिशयेन अश्रुकलाभिरानन्दाश्रुबिन्दुभिराकुले व्याप्ते अक्षिणी यासां तथाभूताः सत्यः विसिस्म्युर्विस्मयं चक्रुः ॥१॥ इतीति॥ इतीत्थं स्त्रीभिः सह स्त्रीषु सम्भाष्यमाणासु सत्सु तदा नृषु पुरुषेषु नृभिः सह सम्भाष्यमाणेषु सत्सु, तत्र कृष्णरामदिदृक्षया रामकृष्णयोर्दर्शनं कर्तुमिच्छया मुनयः आययुः ॥२॥ दर्शनार्थागतमुनीन्नाम्ना निर्दिशति॥ द्वैपायन इति॥ द्वैपायनो व्यासः, नारदः, च्छ्यवनः, देवलः, असितश्च, विश्वामित्रः, शतानन्दः, भरद्वाजः, अथ गौतमः ॥३॥ राम इति॥ सशिष्यः शिष्यैः सहितः, रामः परशुरामः, भगवान् वसिष्ठः, गालवः, भृगुः, पुलस्त्यः, कश्यपः, अत्रिः, मार्कण्डेयः, बृहस्पतिश्च ॥४॥

कृष्णप्रिया

ऋषिवर्य श्रीशुकदेवजीने कहा - राजन् सर्वके आत्मा श्रीहरि भगवान श्रीकृष्ण के प्रति उनकी अर्धाङ्गिनियोंका कितना अनन्य अनुराग है यह कथा श्रीकुन्ती माता, गान्धारीदेवी, द्रौपदीजी, सुभद्राजी एवं भगवानकी

कृष्णप्रिया

प्रियतमा गोपीजनोंने भी सुनी । सबके सब उन अर्धांगनाओंका यह अलौकिक और लोकोत्तर अनुरागको देखकर अत्यन्त मुग्ध एवं अत्यन्त आनन्द और आश्चर्यमग्न हो गयी । इन सबके नयन स्नेहाश्रुसे छलक आये ॥१॥ जिस समय इस दिव्य क्षेत्रमें स्त्रियोंसे स्त्रीयां और पुरुषों से पुरुष हृदयंगम वार्तालाप कर रहे थे उस सुमंगल अवसर समर्थ महर्षिवृन्द श्रीवृन्दावन विहारी भगवान श्रीकृष्णरामजीका दर्शन के लिये वहां आये ॥२॥ कुरु क्षेत्रमें श्रीराम कृष्णके दर्शन के मनोरथसे पधारे हुए ऋषियोंमे पधान मुनिवरोंमें श्रीकृष्ण द्वैपायन व्यास महर्षि-देवर्षि नारद-च्यवनमुनि-देवलऋषि-असित-विश्वामित्र-शतानन्द-भरद्वाज-गौतम अपनी शिष्योंके साथ मगवान परशुराम-वसिष्ठ-गालव-भृगु-पुलस्त्य-कश्यप-अत्रि-मार्कण्डेय-ब्रृस्पति-द्वित-त्रत-एकत-सनक-सनातन-सानत्कुमार-अंगिरा-अगस्त्य-याज्ञवल्कप-वामदेव आदि महामुनियों पधारते देखकर इस क्षेत्रमें प्रथम पधारकर बैठे हुए नरपतिवृन्द महाराज युधिष्ठिर आदि महामुनियों पधारते देखकर इस सहसा उठकर खडे हो गये और सबने उन विश्व वन्द्य ऋषियोंको प्रणाम किया ॥३-६॥

द्वितस्त्रितश्चैकतश्च ब्रह्मपुत्रास्तथाङ्गिराः । अगस्त्यो याज्ञवल्क्यश्च वामदेववा[1]दयोऽपरे ॥५॥
तान् दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः । पाण्डवाः कृष्णरामौ च प्रणेमु[2]र्विश्ववन्दितान् ॥६॥
तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत् । स्वागतासपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥७॥
उवाच सुखमासीनान् भगवान् धर्मगुब्विभुः[3] । सदसस्तस्य महतो यतवाचोऽनुशृण्वतः ॥८॥

कर्दमक्षमा

प्राक्, आसीनाः, नृपादयः, पाण्डवाः, च, कृष्णरामौ, च, तान्, दृष्ट्वा, सहसा, उत्थाय, विश्ववन्दितान्, प्रणेमुः ॥६॥ ततः, स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः, सहरामः, अच्युतः, तान्, दृष्ट्वा, उत्थाय, अर्चयत्, यथा, सर्वे, आनर्चुः ॥७॥ धर्मगुप्, भगवान्, विभुः, सुखम्, आसीनान्, यतवाचः, महतः, तस्य, सदसः, अनुशृण्वतः, उवाच ॥८॥

श्रीधरस्वामिकृतभावार्थदीपिका

आनर्चुरर्चितवन्तः ॥७॥ धर्मगोप्त्री तनुर्यस्य स धर्मगुप्तनुः यथा नियता वाक् यस्य तस्य सदसः ॥८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

द्वितत्रितैकताः सहोदराः । "त्रितः कूपेऽवहितो देवान्हवत ऊतये" इति श्रुतेः । तथा चार्थे । अपरे उक्तान्ये धौम्यकृपादयः ॥५॥ तान् मुनीन् । प्रागुत्थाय ॥६॥ यथाविधि अर्चयत् । अडागमाभाव आर्षः ॥७॥ तस्य सदसः विप्रनृपसभायाः ॥८॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

सहसा अतर्कितं शीघ्रमेवेत्यर्थः । प्रागासीना इति यदि ते एते तेषाम् आगमनमश्रोष्यन् तदा नाशिष्यन्तैव प्रत्युताग्रे गत्वा स्वयमानयिष्यन्त चेति भावः । आदिशब्दात् श्रीनन्दादयः पुरोहितादयश्च यतो विश्वेन वन्दितान् श्रीभगवतापि मानितत्वात् ॥६॥ तान् रामसहितोऽच्युतः सर्वैश्वर्यपरिपूर्णोऽपि श्रीकृष्णः स्वागतादिभिरार्चयत् यथा येनार्चनप्रकारेणैव सर्वेऽपि तानानर्चुः तस्य मूलरूपत्वात्तदर्चनेनैव तदर्चनं सिद्धमित्यर्थः । अर्चयन्निति पाठे युग्मकम् । स्वागतादीनां स्वागमानुसारेणार्थिकक्रम एवात्र ज्ञेयः । यद्वा । अर्चेयं व्यवहारक्रमः । तत्र प्रथमतः स्वागतम् उपद्रवे जाते तेषां लोकपालानां प्रथमतस्तस्मै प्रति कार्यत्वात् स्वागते तत एवासनदानार्हत्वात् आसनानन्तरमेव पाद्यं प्रत्येकगण्डूषप्रत्येकप्रक्षालनपात्राभ्यां ज्ञेयम् । एतदुपलक्षणत्वेनाचमनीयं च ततः

---

१. वेनृप-गो. प्रे. टी. । २. लोकवन्दितान्-वीर. विज. । ३. गुप्तनुः-श्रीधर. वंशी. वीर. विज. जीव. शुक. ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

स्वास्थ्ये सत्यर्घ्यादि सम्यगवैयग्र्य एव चानुलेपनं युक्तम् ॥७॥ यतो धर्मगुप्तनुः धर्मरक्षार्थमवतीर्ण इत्यर्थः । महतोऽपि यतवाचः कुतः अनुशृण्वतः तदुक्तिश्रवणार्थमित्यर्थः ॥८॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

यथान्ये सर्वे तथैव रामसहितोऽच्युतः सर्वैश्वर्यपरिपूर्णोऽपि श्रीकृष्णः स्वागतादिभिरेवार्चयन् सन् उवाचेति परेणान्वयः ।यतो भगवान् ब्रह्मण्यताद्यशेषगुणप्रकटनपर इत्यर्थः । यतो धर्मगुप्तनुः धर्मरक्षार्थमवतीर्ण इत्यर्थः । महतोऽपि यतवाचः । कुतः अनुशृण्वतस्तत्तदुक्तिश्रवणार्थमित्यर्थः । स्वागतादीनां भक्त्या सम्भ्रमकृतत्वात् क्रमोल्लङ्घनं दीपादीनामकरणं च ज्ञेयम् । यद्वा भोजनापेक्ष्यधूपदीपादीनां भोजनाभावेन तदनुक्तिः । धूपस्त्वयं स्थानादिसौरभ्यापेक्षयैव । एवं सर्वं सङ्गतमेव ॥७-८॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-९॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

ब्रह्मपुत्र इत्यङ्गिरसो विशेषणम् अपरे निर्दिष्टेऽभ्योऽन्ये च ॥५॥ विश्ववन्दितान् कृत्स्नजगद्वन्द्यानित्यर्थः ॥६॥ तानिति । यदा सर्वे आनर्चुरर्चितवन्तः तदा सरामोऽच्युतः कृष्णोऽपि तान् स्वागतप्रश्नादिभिरर्चितवान् ॥७॥ उवाचेति । धर्मगोप्त्री तनुर्यस्य भगवतः यतवाचो मौनीभूतस्य महतो विपुलस्य तस्य सदसि सभायाम् अनुशृण्वतः सतः सुखमासीनान् तान् द्वैपायनादीनुवाच ॥८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-११॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-१०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२-१०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

सदस इति सप्तम्यर्थे षष्ठी ॥८॥

गूढार्थदीपिनी

यथा सर्वे तान् आनर्चुः तथा स्वागतादिभिः अच्युतोऽपि अर्चयत् । मालासु भवानि माल्यानि पुष्पाणि ॥७॥ तस्य महतः सदसः शृण्वतः सतः भगवान् आसीनान् तान् मुनीन् उवाचेत्यन्वयः । कथम्भूतो भगवान् धर्मगोप्त्री तनुर्यस्य । गुप् रक्षणे धातुः । यतवाचो मौनीभूतस्य ॥८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

यथा यथावत् आनर्चुः अर्चितवन्तः ॥७॥ धर्मगोप्त्री तनुर्यस्य सः यतवाचः मौनीभूतस्य सदसः सभायाः शृण्वतः अ वयं जन्मभृत इत्याद्युवाच स भागवतेषु जनेषु धर्मं संस्थापयितुमित्यर्थः ॥८॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

ततो यज्जातं तदाह–तान् दृष्ट्वेति । लोके तद्गुणाः प्रसिद्धाः इति तेषां बुद्धिमनुसृत्य व्यवहारं वा समाश्रित्य सम्मानं कुर्वन्ति सर्व एव सहसोत्थायेति । अत्रापि भेदत्रयम् । साधारणाः भक्ताः भगवांश्चेति । तत्र सर्वे प्रणेमुः । तत्र हेतुः विश्ववन्दितान् ॥६॥ ततस्तानानर्चुः यथा यथावत् सर्व एव यथा वा लोकस्थाः सर्वे भगवन्मार्गानभिज्ञाः तथा अभिज्ञा अप्यानर्चुरित्यर्थः । भगवान् न पूजयेत् तदा द्वैविध्यमापद्येतेति सहरामः अच्युतोऽप्यर्चयत् । आर्चयदिति सन्धिरार्षः अडागमाभावो वा । अर्चनाप्रकारमाह स्वागतासनेति ॥७॥ स्तोत्राभावे कायिकं सर्वं नटवद्भवतीति स्तुतिमाह–उवाच सुखमासीनानिति । यतो भगवान् कर्तव्यं

भगवतोऽपि
तनुर्यस्येति मुनिस्तोत्रा
ज्ञापयितुमाह–सदसस्त

पूर्वमुपविष्टा
॥६॥ तान्सर्वे आनर्चुः य
यतवाचः । तूष्णीं भूतस्य

ब्रह्मपुत्राः सनक
हेतुमाह–विश्ववन्दितानिति
आर्षः ॥७॥ यतवाचो मौ
भगवानुवाच । एवं स्तुतौ

तानिति । प्राक् प्र
स्वागप्रश्नासनादिभिः सर्वे
मौनीभूतस्य महतो विपुलस
तनुर्यस्य सः भगवानुवाच ॥

यथा यथायोग्यं सर्व
सदसः सभाया अनुशृण्वतः अ

द्वित इति ॥ द्वितः, त्रि
सम्बन्धः ॥५॥ तानिति ॥ ता
कृत्स्नजगद्वन्द्यान् तान् प्रणेमुः ।
॥ तान् मुनीन् यथा सर्वे अ
स्वागतासनपाद्यार्घ्यमाल्यधूपानुले
महतः विपुलस्य तस्य सदसः स

ऋषिवरोंने आसन ग्रह
जब भगवान श्रीकृष्ण कुछ नि
सुन रही थी ॥७॥ भगवान श्री

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

भगवतोऽपि तादृशकथने हेतुः धर्मगुबिति । तावतापि न काचित्क्षतिरिति विभुरिति धर्मगुप्तनुरिति पाठे धर्मरक्षार्थमेव तुर्यस्येति मुनिस्तोत्रादिकमपि अवतारकार्यमेवेति सूचितम् । यस्मिन् स्थाने स्तोत्रे कृते लोकप्रसिद्धिर्भवति तादृशमिदं स्थानमिति ज्ञापयितुमाह-सदसस्तस्य शृण्वत इति । महत इति महात्म्यं प्रकृतोपयोगि यतवाच इति सावधानता च तथा ॥८॥

सुबोधिनीसारः

पूर्वमुपविष्टा नृपादयः पाण्डवा कृष्णरामौ च विश्ववन्दितान् जगत्पूजितान् तान् मुनीन् दृष्ट्वा सहसा त्वरयोत्थाय प्रणेमुः ॥६॥ तान्सर्वे आनर्चुः यथा यथावत्सहरामोऽच्युतः श्रीकृष्णोऽपूजयत् स्वागतादिभिः ॥७॥ सुखमासीनान् धर्मरक्षकमूर्तिर्भगवानुवाच यतवाचः । तूर्ष्णीं भूतस्य महतः सदसोऽनुशृण्वतः सतः ॥८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ब्रह्मपुत्राः सनकादयः । अपरे निर्दिष्टेभ्योऽन्ये ॥५॥ प्राक् प्रथमं तत्रासीना नृपादयस्तान् दृष्ट्वा सहसोत्थाय प्रणेमुः । तत्र हेतुमाह-विश्ववन्दितानिति ॥६॥ तान् यथा स्वागप्रश्नादिभिः सर्वे आनर्चुस्तथा रामेण सहितोऽच्युतः श्रीकृष्णोऽप्यर्चयत् । अडभाव आर्षः ॥७॥ यतवाचो मौनीभूतस्य महतो विपुलस्य तस्य सदसः सभायाः अनुशृण्वतः सतः सुखमासीनान् द्वैपायनादीन् भगवानुवाच । एवं स्तुतौ प्रयोजनमाह–धर्मगुप्तनुरिति । धर्मगोप्त्री तनुर्यस्य सः । धर्मरक्षार्थमन्यान् शिक्षयितुमित्याशयः ॥८॥

अन्वितार्थप्रकाशिका

तानिति । प्राक् प्रथमं तत्रासीनाः नृपादयः पाण्डवादयश्च विश्ववन्दितान् तान् दृष्ट्वा प्रणेमुः ॥६॥ तानिति । तान् यथा स्वागप्रश्नासनादिभिः सर्वे आनर्चुस्तथा रामेण सहितोऽच्युतः श्रीकृष्णोऽप्यर्चयत् । अडभाव आर्षः ॥७॥ उवाचेति । यतवाचो मौनीभूतस्य महतो विपुलस्य तस्य सदसः सभायाः अनुशृण्वतः सतः सुखमासीनान् द्वैपायनादीन् धर्मगुप्तनुरिति । धर्मगोप्त्री तनुर्यस्य सः भगवानुवाच ॥८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यथा यथायोग्यं सर्वे आनर्चुः ॥७॥ धर्मस्य गुप् गोप्त्री तनुर्देहो यस्य सः हरिः यता नियमिता वाक् वाणी येन तस्य सदसः सभाया अनुशृण्वतः अनुशृण्वत्याः उवाच ॥८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

द्वित इति ॥ द्वितः, त्रितश्च, एकतश्च, तथा ब्रह्मपुत्रः, अङ्गिराः, अगस्त्यः, याज्ञवल्क्यः, अपरे वामदेवादयश्च, समाययुरित्यन्वयः ॥५॥ तानिति ॥ तान् द्वैपायनादिमुनीन् दृष्ट्वा प्राक् आसीनाः नृपादयः सहसा अकस्मादेव उत्तथाय विश्ववन्दिनान् जगद्वन्द्यान् तान् प्रणेमुः । पाण्डवाः कृष्णरामौ चापि प्रणेमुः । पाण्डवाः प्रणेमुः कृष्णरामावपि प्रणेमतुश्चेत्यर्थः ॥६॥ तानिति । तान् मुनीन् यथा सर्वे आनर्चुः स्वागतादिभिरर्चितवन्तः तथैव सहरामो रामेण सहितः अच्युतः श्रीकृष्णोऽपि स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः अर्चयत् ॥७॥ उवाचेति ॥ धर्मगुप् धर्मगोप्त्री तनुर्यस्य सः भगवान् यतवाचो मौनीभूतस्य महतः विपुलस्य तस्य सदसः सभायाः अनुशृण्वतः सतः सुखम् आसीनान् तान् द्वैपायनादिमुनीन् प्रति उवाच ॥८॥

कृष्णप्रिया

ऋषिवरोंने आसन ग्रहण किया पुनः धर्म रक्षा के लिये अवतार्ण भगवान श्रीकृष्णने मुनिवरों से कहा । जब भगवान श्रीकृष्ण कुछ निवेदन कर रहे थे तब वह विशाल सीमा मौनावलम्बन करके भगवानका संभाषण सुन रही थी ॥७॥ भगवान श्रीकृष्णने कहा - बहुत आनन्द की बात है । आज हमारा जीवन सफल हो गया ।

कृष्णप्रिया

जन्म लेने का हमें सम्पूर्ण मिला क्योंकि जिन योगेश्वरोंका दर्शन उत्त्म देवताओंके लिये दुर्लभ है आज हमें उन्हींक दर्शन हो रहा है ॥८-९॥

श्रीभगवानुवाच

अहो वयं जन्मभृतो लब्धं कात्स्न्येंन तत्फलम् । देवानामपि दुष्प्रापं यद्योगेश्वरदर्शनम् ॥९॥
किं[1] स्वल्पतपसां नृणामर्चायां देवचक्षुषाम् । दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकम् ॥१०॥
न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः । ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥११॥
नाग्निर्न सूर्यो न च [2]चन्द्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्मनः ।
उपासिता भेदकृतो हरन्त्यघं विपश्चितो घ्नन्ति मुहूर्तसेवया ॥१२॥
यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोचरः ॥१३॥

कर्दमक्षमा

श्रीभगवान्, उवाच ।

अहो, वयम्, जन्मभृतः, तत्, फलम्, यत्, योगेश्वरदर्शनम्, यद्, देवानाम्, अपि, दुष्प्रापम्, तत्, कार्त्स्न्येंन, लब्धम् ॥९॥ स्वल्पतपसाम्, अर्चायाम्, देवचक्षुषाम्, नृणाम्, किम्, दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकम्, जायते ॥१०॥ हि, तीर्थानि, अम्मयानि, हि, देवाः, मृच्छिलामयाः, किन्तु, ते, उरुकालेन(पुनन्ति), साधवः, दर्शनात्, एव, पुनन्ति ॥११॥ अग्निः, न, सूर्यः, न, चन्द्रतारकाः, न, भूः, न, जलम्, न, खम्, न, अथ, श्वसनः, न, अथ, वाक्, अथ, मनः, न, उपासिताः, भेदकृतः, घ्नन्ति, (किन्तु)विपश्चितः, मुहूर्तसेवया(पूर्णतयाऽघं), हरन्ति ॥१२॥ यस्य, त्रिधातुके, कुणपे, आत्मबुद्धिः, कलत्रादिषु, स्वधीः, भौमे, इज्यधीः, सलिले, यत्, तीर्थबुद्धिः, सः, अभिज्ञेषु, जनेषु, कर्हिचित्, न, मान्यः(किन्तु), गोखरः, एव ॥१३॥

श्रीधरस्वामिकृता भावार्थदीपिका

जन्मभृतः सफलजन्मानः तत्फलं जन्मफलं किं तत् यद्योगेश्वरदर्शनम् ॥९॥ किञ्च युष्माकं दर्शनमेव तावद्देवानामपि दुष्प्रापमस्माकन्तु स्पर्शनादिकमपि कथं नु घटितमिति विस्मयेनाऽऽह-किमिति । स्वल्पतपसां तीर्थस्नानादिमात्रे तपोबुद्धिर्येषां तथार्चायां प्रतिमायां देव इति चक्षुर्दृष्टिर्येषां तेषां योगेश्वरदर्शनादिकमिदं किमसम्भावितमित्यर्थः ॥१०॥

एतत्प्रपञ्चयति-न ह्यम्मयानीति त्रिभिः ॥११॥ वाङ्मनसयोरप्युपासनाविषयत्वं "यो वाचं ब्रह्मेत्युपास्ते मनो ब्रह्मेत्युपास्ते" इति श्रुतेः । अघं तन्मूलमज्ञानं न हरन्ति अत्र हेतुः भेदकृतो भेदकर्तारः यद्वा भेदबुद्धिं कुर्वतः पुंसः विपश्चितो निरस्तभेदाः ते तु मुहूर्तमात्रसेवयैवाघं घ्नन्तीति ॥१२॥ अतः साधुन्विहायान्त्राऽऽत्मादिबुद्ध्या सज्जमानोऽतिमन्द इत्याह-यस्येति । आत्मबुद्धिरहमिति बुद्धिः त्रयो धातवो वातपित्तश्लेष्माणः प्रकृतयो यस्य तस्मिन् कुणपे शरीरे स्वधीः स्वीया इति बुद्धिः भौमे भूविकारे इज्यधीर्देवताबुद्धिः यद्यस्य तीर्थबुद्धिस्तीर्थमिति बुद्धिः अभिज्ञेषु तत्त्ववित्सु यस्य एताः बुद्धयो न सन्ति स एव गोष्वपि खरो दारुणोऽत्यविवेकी यः गवां तृणादिभारवाहः खरो गर्दभ इति ॥१३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

योगेश्वराणां भक्तिज्ञानयोगाद्युपदेष्टृणां विप्राणां दर्शनम् ॥९॥ अतिदुर्लभलाभमाह-किञ्चेति । इत्यर्थ इति-किमत्रासम्भाव

---

[1] किन्वल्प-वीर. । [2] चन्द्रतारकं-विज. ।

व्याख्येयम् ।
तीर्थादिना जन्मसाफल्यं
न तु तदानीमेव । तत्र किं
गत्यर्थकानां ज्ञानार्थतापी
समासस्तेन गुरूपदिष्टज्ञाने
पावित्र्यमतो गुरूपदेशः व
यावत्, स्वदर्शनान्यथाज्ञान
भेदकर्तृत्वं भेदज्ञानवत्त्वेना

ब्रह्मादीनां शुद्धसात्
हरन्तीति चेदाह-भेदबुद्धिं कु
इत्याद्युक्तेः ॥१२॥ यतः साध
शववदचेतने "पूतिगन्धौ शवे
खरः 'खरस्तीक्ष्णे च दारुणे' इ
यद्वेति । पशूनां पशुरित्यर्थः । य

अहो प्रहर्षे । वयं मनुष्
दर्शनं परमभागवतानामेव वा सवे
ततोऽपि क्षुद्रतपसां तथार्चायां तेष
स्पर्शनादिकं च किं सम्भवति ?
तीर्थानां देवप्रतिमानां च सेवया नरा
काक्वा अम्मयानि जलावयवरूपा
देवास्तदधिष्ठानत्वेन तत्तदात्म्यापन्नतया
तत्तन्निर्मिततीर्थसेवा वा साक्षात्तत्तदुप
नाग्निरिति । तारकास्तदाकारविमानाः
ज्ञापयितारः । यद्वा । तादृशपरमेश्वरादर्शि
ज्ञापयन्ति तस्मात्तदज्ञानमूलमघमपराध
जीवद्वयोपदेशेऽपि त्रिधातुके तन्मू
सर्वपरमात्मश्रीभगवद्विज्ञेषु तु योग्यता ते
तादृशदेहपरिकरेषु कलत्रादिषु तादृशेष्व
स्नातः पवित्रोऽहमिति न तु तीर्थपादाह्वय
सूचितः । सर्वदा सर्वराहित्येन त्वतिनीच

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

व्याख्येयम् । 'अर्चा पूजाप्रतिमयोः' इति हलायुधः ॥१०॥ एतदर्चादिषु देवादिबुद्धित्वम् । न हि बहिर्मुखानां तीर्थादिना जन्मसाफल्यं किन्तु सज्जनदर्शनादेवेत्याह–न हीति । तत्र तत्र सन्निहितास्तीर्थदेवादयः उरुकालेन कालपक्षं कृत्वैव न तु तदानीमेव । तत्र किं कारणमित्यस्य देहलीदीपकन्यायेनोरुकालेनेत्येवोत्तरम् । तथा हि–कलनं कालः ज्ञानम्, 'कल गतौ' गत्यर्थकानां ज्ञानार्थतापीति वामनादयः । उरुगुरुशब्दौ पर्यायौ । उरुणा गुरुणा दत्तः कालः उरुकालः । मध्यमपदलोपी समासस्तेन गुरूपदिष्टज्ञानेन तत्तत्स्वरूपं तत्तन्मन्त्रं तत्तदङ्गाचरणादिकं ज्ञात्वा समुपास्य तत्तद्दर्शनं प्राप्य तत्तद्देवादिप्रसादेनाघक्षये वैचित्र्यमतो गुरूपदेशः कारणमित्यर्थः । प्रकृते किमागतमिति चेदाह–दर्शनादेवेति । साधवः शास्त्रानुयायिनः शिष्टा इति भवत्, स्वदर्शनान्यथाज्ञानमपगमयन्ति । एव-शब्दः गुरूपदेशं व्यवच्छिनत्ति ॥११॥ तन्मूलमवमूलम् । अत्राज्ञानाहरणे देवानां भेदकर्तृत्वं भेदज्ञानवत्त्वेनात्मस्वरूपज्ञानाभावात् । तदुक्तं –

"नैते स्वरूपं विदुरात्मनस्ते ह्यजादयो नात्मतया गृहीताः ।" इत्युक्तेः ।

'ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः ।' इत्याद्युक्तेश्च ।

ब्रह्मादीनां शुद्धसात्त्विकत्वेन ज्ञानदाने समर्थत्वेन तेषामज्ञानित्वकल्पनमनुचितं मत्वाऽऽह–यद्वेति । ते कस्य पापं न घ्नन्तीति चेदाह–भेदबुद्धिं कुर्वत इति । ते ज्ञानिनस्तु ज्ञानिसङ्गस्य सर्वपुण्यावाप्तिहेतुत्वात् । 'स्नातं तेन समस्ततीर्थसलिले' इत्याद्युक्तेः ॥१२॥ यतः साधव एव सर्वोत्तमा अतो हेतोः । अन्यत्र देहादिषु । प्रकृतयो मूलकारणं स्वभावा वा । कुणपे शववदचेतने "पूतिगन्धौ शवे चैव पुद्गले कुणपः स्मृतः" इति मेदिन्यादयः । ता बुद्धय आत्मादिबुद्धयः । गोषु बलीवर्देषु खरः 'खरस्तीक्ष्णे च दारुणे' इति धरणिः । बलीवर्दास्तु स्वभावत एव दारुणाः सन्तीति खरपदकृतविशेषस्य तत्राभावादाह–इति । पशूनां पशुरित्यर्थः । यद्वा–गवि भूमौ खरो रासभवद्भारवाडेवेत्यर्थः ॥१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अहो प्रहर्षे । वयं मनुष्याः योगेषु स्वस्वानुष्ठितेषु कर्मज्ञानभक्तिलक्षणेषु ईश्वराणां सिद्धानां दातुं दूरीकर्तुं च समर्थानां वा सेवनं परमभागवतानामेव वा सर्वेष्वेव तदुक्तिश्छत्रिन्यायेन सा च सर्वादरार्था ॥९॥ एवं महातपसां देवानामपि दुष्प्रापं चेत्तर्हि सोऽपि क्षुद्रतपसां तथार्चायां तेषां प्रतिमायामेव देवचक्षुषां तद्दर्शनेऽपि तत्स्वरूपज्ञानेऽपि वा भाग्यहीनानाम् अस्माकं दर्शनं स्पर्शनादिकं च किं सम्भवति ? नैवेत्यर्थः । अतो युष्मत्कृपाविलसितमेवैतदिति भावः ॥१०॥ यच्च तत्तच्छास्त्रप्रमितमहिम्नां तीर्थानां देवप्रतिमानां च सेवया नराणामपि दोषहान्या ज्ञानं जायेतेति तत्सत्यमेव किन्तु तत्राप्यस्ति भवतामतिशय इत्याह–नहीति । सत्यं अम्मयानि जलावयवरूपाणि नद्यादीनि तीर्थानि पावनानि न भवन्ति किं तथा मृच्छिलामयाः तद्विकाराः प्रतिमादयोऽपि तत्तदधिष्ठानत्वेन तत्तदात्म्यापन्नतया पावना न भवन्ति किम् ? किन्तु ते पुनन्तीत्यादि ॥११॥ अस्तु तावत् तत्प्रतिमायां ततदृष्ट्योपासनं शास्त्रमिततीर्थसेवा वा साक्षात्तत्तदुपासनमपि न्यूनं ततो भूप्रभृति जडोपासनं तु सुतरामिति भवद्विधोपासनमेव सर्वोत्तममित्याह–नाग्निरिति । तारकास्तदाकारविमानाः बृहस्पत्यादयः भेदकर्तारः अहमिन्द्रोऽयं वरुण इति ज्ञापयितारः न तु सर्वत्राभिन्नं परमेश्वरं ज्ञापयितारः । यद्वा । तादृशपरमेश्वरादर्शितेन सर्वत्र तत्तद्भेदबुद्धिं कुर्वतः पुंस इति विपश्चितस्तु परमेश्वरैकदर्शिनः तादृशं परमेश्वरमेव ज्ञापयन्ति तस्मात्तदज्ञानमूलमघमपराधं मुहूर्तसेवया घ्नन्तीति ॥१२॥ कुणपः शवः स्वतस्तत्तुल्यत्वाद्देह एव कुणपः तस्मिन् वैद्योपदेशेऽपि त्रिधातुके तन्मूलकसर्वरोगाकुले अनेनात्मवैपरीत्येन तस्मिन्नात्मबुद्धेरयोग्यतोक्ता । अभिज्ञेषु सर्वमात्मश्रीभगवद्विज्ञेषु तु योग्यता तेषां तादृशश्रीभगवत्मयत्वात् तथापि तस्मिन्नेवात्मबुद्धिः न त्वभिज्ञेषु एवमग्रेऽपि तथा हि तादृशदेहपरिकरेषु कलत्रादिषु तादृशेष्वपि स्वधीः न तु तादृशभगवत्परिकरेषु तेषु तादृशेषु तथा जले सामान्येऽपि तीर्थबुद्धिः कः पवित्रोऽहमिति न तु तीर्थपादाह्वयश्रीभगवन्मयेषु तेषु कर्हिचिदिति कदाचिदपि तासां बुद्धीनामेकतरास्तित्वेऽपि नास्ति दोषः पुंसः । सर्वदा सर्वराहित्येन त्वतिनीचत्वमेवेत्याह–स एव गोखर इति । गोऽत्यन्तनिर्बुद्धिश्चासौ स्वरोऽत्यन्ताधमश्चेत्यर्थः ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सिन्धुनदतीरारण्ये गोखराख्यो गर्दभाकारो निष्प्रयोजनपशुविशेषोऽप्यस्ति। म्लेच्छपतिविशेषोऽपि। बृहस्पतिसंहितायां त्ववैष्णवोऽपि तथा निन्दितः

"अज्ञातभगवद्धर्ममन्त्रविज्ञानसंविदः। नरास्ते गोखरा ज्ञेया अपि भूपालवन्दिताः॥" इति।

अतो भगवदर्चादिसम्बन्धे तु तादृशस्यापि कनिष्ठभागवतत्वमेव न तु गोखरशब्दव्यपदेशत्वं यथैकादशे "अर्चायामेव हरये" इत्यादि। अतः पूर्वपूर्वमपि साधारणादेव तत्प्रतिमातत्तीर्थान्येव दर्शितानि॥१३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो प्रहर्षे। वयं मनुष्याः। योगः समाधिः सायुज्यं वा। तदीश्वराणां दर्शनम्॥९॥ अर्चायां प्रतिमायामेव न च वैष्णवादिषु किंवा योगेश्वरेषु देवः पूज्यत इति चक्षुर्येषां तेषाम्। प्रह्वः प्रणामः। पादयोरर्चनं प्रक्षालनादिकम्। आदिशब्दादासनार्पणादिः। अन्यत्तैर्व्याख्यातम्। यद्वा। वैकुण्ठ्यायामर्चायां देवः साक्षाद्भगवानेवायमिति चक्षुर्येषामिति चक्षुर्येषां तेषाम्, दर्शनस्पर्शनादिकं स्वल्पतपसां किं स्यात्? अपि तु नैव। अतस्तथाभूतानां सुदुर्लभानां युष्माकं दर्शनादिकं युष्मत्कृपयैवास्माकमनधिकारिणामपि सिद्धमिति भावः॥१०॥ अतोऽशेषतीर्थस्नानात् सर्वदेवचार्चनाच्चाधिकफलमस्माकं सम्पन्नमित्याशयेनाह-न हीति॥११॥ तदेव विवृणोति-नेति। भेदकृतो भगवदधिष्ठानत्वेनाभिन्नेष्वप्येषु प्रत्येकमीश्वरबुद्ध्या भेदं कुर्वत इत्यर्थः॥१२॥ कुणपः शवः। तत्तुल्यादेह (तत्तुल्यदेह [घ]।) एव कुणपस्तस्मिन् घृणास्पदत्वेन कुणपसादृश्यमेव दर्शयति-त्रिधातुक इति। अनेनात्मवैपरीत्येन तस्मिन्नात्मवैपरीत्येन तस्मिन्नात्मबुद्धेरयोग्यतोक्ता। तथापि तस्मिन्नेवात्मबुद्धिः। एवमग्रेऽपि बोद्धव्यम्। तथा हि कलत्रादिषु वैराग्यादिना त्याज्येष्वपि आदि-शब्दात् पुत्रवित्तादयः भौमे मृद्दारुशिलादिभूमिद्रव्यमयाधिष्ठाने इति साक्षाद्भगवद्बुद्ध्या पूज्यमानं तद्व्यावर्तितम्। अभिज्ञेषु वेदार्थतत्त्वश्रीभगवत्तद्भक्तादिमाहात्म्यवेदिषु। कर्हिचिदिति कदाचिदपि तेषु तत्तद्बुद्ध्या सद्बुद्धिरेवेत्यर्थः। आत्मबुद्ध्यादीनां यथोत्तरं न्यूनत्वम्। मास्त्वात्मबुद्धिः स्वधीरपि नास्तीत्येवं व्याख्येयम्। इति तासां कयाचिदपि बुद्ध्या साधुबुद्धिरेव सर्वबुद्धिराहित्येन त्वत्यन्ताबुद्धिर्नीच एवेत्युक्तम्। गोखर इति। गोर्वृषोऽन्यन्तनिर्बुद्धिः। असौ खरो गर्दभो महाधमश्चेत्यर्थः। यद्वा। यथा बृहस्पतिसंहितायाम्—

"अज्ञातभगवद्धर्ममन्त्रविज्ञानसंविदः। नरास्ते गोखरा ज्ञेया अपि भूपालवन्दिताः॥" इति॥१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अर्चायां देवचक्षुषां प्रतिमामेव देवतां मन्वानानां किं न किञ्चित् प्रतिमादर्शनादिकं नोद्देश्यमित्यर्थः॥१०-११॥ उपासितास्तत्कालसेविताः भूजलादिशब्दाः देवतापराः भेदकृतः आत्मनि देहिनि देहगतभेदं कुर्वाणस्य मन्यमानस्य ते मुहूर्तसेवया विपश्चितस्तु हरन्तीत्यर्थः॥१२॥ कुणपे शरीरे त्रिधातुके वातपित्तश्लेष्ममये स्वधीः मदीयत्वबुद्धिः भौमे पार्थिवप्रतिमादाविज्यबुद्धिः गोखरः गोखरप्राय अत्त अभिज्ञेषु जनेषु सत्स्वपिताननादृत्य देवतादिषु पूज्यबुद्धिं कुर्वन् इत्यर्थः। एते श्लोकाः साधुजनप्रशंसापराः॥१३-१५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह-अहो इति पञ्चभिः। हे मुनयः! वयं जन्मभृतः सफलजन्मानो बभूविम तत्फलं जन्मफलं कार्त्स्न्येनास्माभिर्लब्धं च। किं तत् यद्देवानामपि दुर्लभं योगिनां वो दर्शनमिति॥९॥ कथं न्वेनद्घटितम् इति विस्मयेनाह-किं न्विति। अल्पं तपः पु येषामर्चायां प्रतिमायामेव देवचक्षुर्देवताबुद्धिर्येषां तेषामस्माकं वो दर्शनादिकं किन्नु कथं बभूवेत्यर्थः। प्रह्वशब्दः प्रणामः प्रश्नः स्वागतप्रश्नः॥१०॥ नन्वर्चायां देवचक्षुः पवित्रावहमपि किमिति तुच्छीकरोषीत्यत्राह-न हीति। अम्मयानि तीर्थानि मृण्म

शिलामयाश्च देवाश्च दर्शनादेव
उरुकालेनैव पुनन्तीत्येतत्प्रपञ्च
आत्मनि देहगतभेदं कुर्वाणस्या
तन्मूलमज्ञानं च विवक्षितम्॥१
कुणपे शवप्राये शरीरे आत्मबुद्धि
इज्यधीर्देवताबुद्धिः जले गङ्गादि
तीर्थबुद्धिश्च स पुमान् गोखर एव
न हि निन्दान्यायेनेयं साधुजनप्रश

"रुक्मिणी द्वारवत्यां तु
नञः शिश्चालने भगवत्प्रतिमापूज
अयमिन्द्रोऽयं वरुण इति ज्ञापयित

न ह्यम्मयानि तीर्थानीत्या
तानि ताश्च उरुकालेनैव पुनन्ति साध
देवताश्च यथाविधि निरपराधनादेव पु
स्यात्मबुद्धिः। कलत्रादिषु स्वधीः
तु अभिज्ञेषु जनेषु वैष्णवेषु आत्मबु

न ह्यम्मयानि तीर्थानीत्यादि
तु देवा एव, किन्तु ते उरुकालेन पुनन्ति
नाभिज्ञेषु वैष्णवेषु कलत्रादिषु स्वधीः
ऋषिजुष्टे जले तीर्थबुद्धिर्नाभिज्ञेषु, स

जन्मभृतः सफलजन्मानो भवा
भावः केवलं धर्मगोपनार्था इति ज्ञापयन्ति
भावः॥१०-११॥ वाङ्मनसयोरप्युपास
दप्राप्त्यादिभिश्चात्मपरयोः साम्येऽपि
साधून् विहायान्यत्रात्मादिबुद्ध्या सज्जमा
आत्मा बुद्धिः आत्मा प्रेमास्पदं तद्बुद्धिः
सलिले नद्यादिजले तीर्थमिदमिति
गोखरः गौश्चासौ खरश्चेत्युभयसाधम

हितायां त्ववैष्णवोऽपि

' इति ।

कादशे "अर्चायामेव

यां प्रतिमायामेव न च

नं प्रक्षालनादिकम् ।

ायमिति चक्षुर्येषामिति

नां युष्माकं दर्शनादिकं

ाच्चाधिकफलमस्माकं

येषु प्रत्येकमीश्वरबुद्ध्या

दत्वेन कुणपसादृश्यमेव

ापि तस्मिन्नेवात्मबुद्धिः ।

् पुत्रवित्तादयः भौमे

र्तितम् । अभिज्ञेषु

यर्थः । आत्मबुद्ध्यादीनां

प बुद्ध्या साधुबुद्धिरेव ।

। गर्दभो महाधमश्चेत्यर्थः ।

" इति ॥१३॥

द्देश्यमित्यर्थः ॥१०-११॥

कुर्वाणस्य मन्यमानस्य ते

वधीः मदीयत्वबुद्धिः भौमे

वतादिषु पूज्यबुद्धिं कुर्वन्त

न्मफलं कार्त्स्न्येनास्माभिर्लब्धं

-किं न्विति । अल्पं तपः पुण्यं

त्यर्थः । प्रह्वशब्दः प्रणामपर

त। अम्मयानि तीर्थानि मृण्मयाः

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

देवाश्च दर्शनादेव न पुनन्ति किन्तु उरुकालेन साधवस्तु दर्शनादेव पुनन्तीत्यर्थः । तीर्थानीति दृष्टान्तार्थम् ॥११॥ देवा कालेनैव पुनन्तीत्येतत्प्रपञ्चयति–नाग्निरिति । भूजलादिशब्दैस्तदभिमानिदेवताः लक्ष्यन्ते ता अग्न्यादयश्चोपासिताः भेदकृतः देहगतभेदं कुर्वाणस्याघं हरन्ति उरुकालसेवया हरन्तीत्यर्थः । विपश्चितः साधवस्तु मुहूर्तसेवयैव हरन्ति इति अघशब्देन ज्ञानं च विवक्षितम् ॥१२॥ यत एवमतोऽर्चादिवचक्षुषं क्षिपन्नर्थान्तरमप्याह–यस्येति । यस्य पुंसः त्रिधातुके वातपित्तश्लेष्ममये शवप्राये शरीरे आत्मबुद्धिरात्माभिमानः कलत्रेषु दारेषु स्वधीः स्वकीयत्वबुद्धिः एवमहंममाभिमानौ उक्तौ पार्थिवप्रतिमादौ दैवताबुद्धिः जले गङ्गादिजले एव तीर्थबुद्धिः कर्हिचिदप्यभिज्ञेषु स्वात्मपरमात्मयाथात्म्याभिज्ञेषु भवादृशेषु नेज्यधीः न बुद्धिश्च स पुमान् गोखर एव गोप्रायः खरप्रायश्च । यद्वा । गवां सम्बन्धी खरः तदर्थतृणभारार्थखरसदृशः अतीव अज्ञ इत्यर्थः । निन्दान्यायेनेयं साधुजनप्रशंसा ॥१३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

"रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने ।" इत्युपलक्षणादेवावक्ष्यमाणा अग्न्यादयः एवं भौम इज्यधीः इत्यत्रापि क्षालने भगवत्प्रतिमापूजकस्तु तादृशश्चेत् कनिष्ठभागवत एव । "अर्चायामेव हरये" इत्येकादशात् भेदकृतो भेदकर्तार न्द्रोऽयं वरुण इति ज्ञापयितारो ननु सर्वत्राभिन्नं परमेश्वरं ज्ञापयितारः ॥१२-२०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

न ह्यम्मयानि तीर्थानीत्यादि । अम्मयानि तीर्थानि न भवन्ति अपि तु भवन्त्येव । एवं मृच्छिलामयाः देवा अपि किन्तु उरुकालेनैव पुनन्ति साधवस्तु दर्शनादेव । अयम्भावः । "तीर्थानि यस्य हस्तौ च पादौ च" इत्यादि यथाविधि सेवया यथाविधि निरपराधनादेव पुनन्ति एते तु यादृच्छिकसङ्गेनापि ॥११-१२॥ यस्यात्मबुद्धिः कुणपेत्यादि । कुणपे मृतप्रायशरीर बुद्धिः । कलत्रादिषु स्वधीः आत्मीयबुद्धिः भौमे मृण्मये शिवलिङ्गदुर्गाप्रतिमादौ इज्यधीः सलिले जल एव तीर्थबुद्धिः न जनेषु वैष्णवेषु आत्मबुद्ध्यादयो यस्य स एव गोखरः पशुसेवी पशुः ॥१३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

न ह्यम्मयानि तीर्थानीत्यादि । अम्मयानि तीर्थानि न भवन्ति ? अपि तु तीर्थान्येव । मृच्छिलामया देवा न देवाः ? अपि एव, किन्तु ते उरुकालेन पुनन्ति साधवस्तु दर्शनादेव ॥११॥ ॥१२॥ यस्यात्मबुद्धिरित्यादि । कुणपे शरीरे एव यस्यात्मबुद्धिः, वैष्णवेषु कलत्रादिषु स्वधीः स्वकीयबुद्धिर्नाभिज्ञेषु, भौमे मृण्मये शिवलिङ्ग–दुर्गाप्रतिमादौ इज्यधीर्नाभिज्ञेषु, सलिले जले तीर्थबुद्धिर्नाभिज्ञेषु, स एव गोखरोऽतिमूर्खः ॥१३॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

जन्मभृतः सफलजन्मानो भवामः देवानामपि दृष्प्रापं किम्पुनर्नृणामत्रत्यानाम् ॥९॥ धर्मगुप्तनुरित्यनेन अहो वयमित्याद्यास्तस्य केवलं धर्मगोपनार्था इति ज्ञापयन्ति । अर्चायां प्रतिमायामेव देवबुद्धीनां न तु युष्मासु तदपि युष्माकमिदं युष्मत्कृपाविलसितमेवेति ॥१०-११॥ वाङ्मनसयोरप्युपासनाविषयत्वं "यो वाचं ब्रह्मेत्युपास्ते यो मनो ब्रह्मेत्युपास्ते" इति श्रुतेः । क्षुत्पिपासादिभिः दिभिश्चात्मपरयोः साम्येऽपि भेदं करोतीति भेदकृत् तस्य अघं भेदोत्थमवज्ञोपेक्षामात्सर्यादिकं घ्नन्ति ॥१२॥ अतः विषयान्यत्रात्मादिबुद्ध्या सज्जमानोऽतिमन्द इत्याह–यस्येति । कुणपः शवस्तत्तुल्ये देहे त्रिधातुके वातपित्तकफमये यस्या बुद्धिः आत्मा प्रेमास्पदं तद्बुद्धिः स्वधीः स्वीया इमे इति धीः भौमे पार्थिवप्रतीमादौ इज्यधीः पूज्योऽयमिति बुद्धिः यत् सलिले नद्यादिजले तीर्थमिदमिति बुद्धिः कर्हिचित् कदाचिदपि अभिज्ञेषु भगवत्तत्त्वज्ञेषु यस्य ता बुद्धयो न भवन्ति स एव गौश्चासौ खरश्चेत्युभयसाधर्म्यादुभयशब्दवाच्य इत्यर्थः । यद्वा । गवामपि तृणादिभारवाहको गर्दभः

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

बृहस्पतिसंहितायां तु —

"अज्ञातभगवद्धर्ममन्त्रविज्ञानसंविदः । नरास्ते गोखरा ज्ञेया अपि भूपालवन्दिताः ॥" इत्युक्तम्।

अत्र यस्यात्मबुद्धिः कुणप एव न त्वभिज्ञेष्वित्युक्त्या उभयत्रात्मबुद्धयो न गोखरा इत्यायातम्। अभिज्ञेष्वेवात्मादिबु स्त्वतिश्रेष्ठा एवेति भावः। अत्र भौमे भगवत्प्रतिमाभिन्ने इति व्याख्येयम् -

"अर्चायामेव हरये पूजां यः श्रद्धयेहते । न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥"

इत्येव दशोक्तेरभिज्ञेष्विज्यबुद्ध्यभावेऽपि तत्प्रतिमासेविनः कनिष्ठभक्तत्वोक्तेः। एवं सलिल इत्यत्रापि गङ्गायमुना इति व्याख्येयम्। तादृशवचनपरःसहस्रेभ्य इति ॥१३॥

गूढार्थदीपिनी

जन्मभृतः सफलजन्मानः। कार्त्स्न्येन साकल्येन तत्फलं जन्मफलम् लब्धम्। किं तत्। यत् यस्मात् योगेश्वराणां दर्शनं लब्धम् ॥९॥ अर्च्यते देवोऽस्यामिति अर्चा (अर्चा पूजाप्रतिमयोः इति हलायुधः।) प्रतिमा तस्यामेव देवः देवता चक्षुर्ज्ञानं येषां तेषामस्माकं भवतां दर्शनादिकं किम् असम्भावितमित्यर्थः। प्रह्वः प्रणामः ॥१०॥ जलमयानि तीर्थानि शिल देवाश्च न सन्ति सन्त्येव किन्तु ते उरुकालेन दीर्घकालेन सेविताः सन्तः पुनन्ति। साधवस्तु दर्शनादेवेति ततो वैशिष्ट्यं दर्श वस्तुतस्तु उरुगुरुशब्दौ पर्यायौ। कलनं कालः ज्ञानम्। कल गतौ धातुः। गत्यर्थानां ज्ञानार्थतापीति वामनादयः। तथा हि गुरुणा दत्तः कालः उरुकालः मध्यमपदलोपी समासः तेन गुरूपदिष्टज्ञानेनेत्यर्थः इति वंशीधरी ॥११॥ चिरकालमु अग्न्यादयः भेदकृतः भेदबुद्धिं कुर्वतः पुंसः अघं पापमूलमज्ञानं न घ्नन्ति न हरन्ति। विपश्चितः विवेकिनस्तु मुहूर्तेनैव। मनश्चेति द्वयमुपासनाविषयकम्। यो वाचं ब्रह्म मनो ब्रह्म उपास्ते इति श्रुतेः श्वसनो वायुः ॥१२॥ यस्य कुणपे शवतुल्ये आत्मबुद्धिः अहमिति बुद्धिः। कलत्रादिषु स्वधीः स्वीया इति बुद्धिः। भौमे प्रतिमायाम् इज्यबुद्धिः पूज्यदेवताबुद्धिः। यत् यस्य तीर्थबुद्धिः। किन्तु अभिज्ञेषु तत्त्वज्ञेषु एताः पूर्वोक्ता बुद्धयः न सन्ति सा गोष्वपि पशुषु खर एव। कथम्भूते कु त्रिधातुके। त्रयो धातवः वातपित्तश्लेष्माणः यस्य तस्मिन् ॥१३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

जन्मभृतः सफलजन्मानः तत्तस्य जन्मनः फलं कार्त्स्न्येन साकल्येन लब्धम्। किं तत्? यत् योगेश्वरदर्शनम् इति येषां दर्शनमात्रमपि देवानां दुष्प्रापं तेषां दर्शनस्पर्शनादिकं कथं घटितमिति विस्मयेनाह-किमिति। अल्पं तीर्थस्नानादि तपो अर्चायां प्रतिमायामेव देव इति चक्षुर्दृष्टिर्येषां तेषामस्माकं योगेश्वरदर्शनादिकं किं कथं बभूवेत्यर्थः ॥१०॥ साधवो दर्श पुनन्ति अम्मयानि तीर्थानि दर्शनात् न पुनन्ति मृच्छिलामया देवाश्च दर्शनान्न पुनन्ति किन्तु उरुकालेन पुनन्ति ॥११॥ भेदं भेदकृत् तस्य "ऐतदात्ममिदं सर्वम्" इत्यादि श्रुतेः। जगत्कारणात् अग्न्याद्येकतमं स्वोपास्यं पृथक् मन्यमानस्येत्यर्थः। तन्मूलमज्ञानं न हरन्ति अनेन जगत्कारणस्य पुरुषोत्तमस्य सम्बन्धीनि तीर्थानि तत्प्रतिमा तदात्मकतया सेव्यमाना अन्य न गृह्यन्ते इति भगवतोऽभिप्रायः। अत्रैव - "यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्।" ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये।" अग्नौ गुरावात्मनि च सूर्येषु इत्यादौ तेषां परमादरणीयत्वोक्तेश्च वि मुहूर्तमात्रसेवया घ्नन्ति सर्वात्मोपदेशादिनेति भावः ॥१२॥ उक्तगुणान् विहाय देहादावात्मबुद्ध्या सज्जमानो निन्द्य यस्येति। यस्य जनस्य कुणपे शवप्राये त्रिधातुके त्रयो वातपित्तश्लेष्माणः धातवः प्रकृतयो यस्य तस्मिन् आत्मा अना वस्तु तद्बुद्धिः कलत्रादिषु भार्यापत्यादिषु स्वधीः स्वीया इति बुद्धिः भौमे भूमिविकारे इज्यधीः सलिले तीर्थबुद्धिः आत्मानात्मयाथात्म्यवित्सु ता बुद्धयः कर्हिचिदपि न भवन्ति। स गोखरः गावः इन्द्रियाणि खराणि दारुणानि यस्य स इत्यर्थः। यद्वा गवि दिवि अपि च खरः देवलोकगतोऽपि गर्दभनिभः किं पुनर्नरलोकस्थ इत्यर्थः ॥१३॥

"पञ्चभि

आदौ भगवान् ते
कथमित्याकांक्षायां जन्मफ
कार्त्स्न्येन फलं तस्य दुर्लभ
कष्टेन बृहस्पतेर्दर्शनं न प्राप्त
तर्कमाह-किं स्वल्पतपसामि
हेतुः अर्चायां देवचक्षुषामिति
आकृतिरस्तीति चेत् तर्हि नटे
चैतन्यं गुणाः देवता आहोस्वि
सर्वेष्वेव वर्तते इति तत्परित्य
प्रश्नः ततो विनयः ततः पादा
चेत्तत्राह-नह्यम्मयानि तीर्थानी
किं तीर्थानि न भवन्ति ? भवन
अपि मृण्मयाः शिलामयाश्च के
भवति न त्वन्यत्र अतो मृण्मया
एव भवन्तीति वा तर्हि लोकप्र
प्रवर्तते अपि तु विधेयं स्तोतव्य
इति न तु लोकसिद्धिं नन्द्यते इत्य
इति। अग्निरग्निहोत्रादिषु प्रसिद्ध
वा भूमिश्च विश्वम्भरा उपासनाद
सरस्वती मनश्च योगादौ "मनोव
त्वधिकम्। तत्र हेतुः-भेदकृदिति
दूरीकुर्वन्ति तदाह-विपश्चितो घ्नन्
ज्ञानकलया कृता।" इति वाक्य
कुणपे देहे चैतन्यरहितो देहः कुण
वातपित्तश्लेष्मप्रकृतिकोऽयं देहः
वाऽयं भवति। एवमात्मबुद्धिर्भ्रान्ति
स्वस्योपकुर्वन्ति ते सन्त एव कलत्र
भूमिजत्वात् तीर्थबुद्धिश्च सलिलम्
किं बहुना स एव बलीवर्दः खरो व
लोकप्रसिद्धाः पदार्थाः निन्दिताः ॥

अहो वयं सफलजन्मानः
योगेश्वराणां दर्शनमिति यत् ॥९॥ अच

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

"पञ्चभिर्भगवानाह स्तोत्रं तेषां महात्मनाम् । तन्मुखान्निर्णयं वक्तुं पूर्वपक्षोक्तिरूपतः ॥"

आदौ भगवान् तेषां दर्शनं स्तौति-अहो इत्याश्चर्ये । वयमिति श्लाघायाम् । जन्मभृतो वयमेव सफलजन्मान इत्यर्थः । कथमित्याकांक्षायां जन्मफलं जातमिति निरूपयति-लब्धं कार्त्स्न्येन तत्फलमिति जन्मफलं ज्ञानादिकमपि भवति धर्मश्च परं कार्त्स्न्येन फलं तस्य दुर्लभत्वमाह-देवानामपि दुष्प्रापमिति । यस्माद्योगेश्वराणां दर्शनं देवानामपि दुर्लभं यत इन्द्रोऽपि महताऽपि कष्टेन बृहस्पतेर्दर्शनं न प्राप्तवान् तदुक्तं षष्ठे ॥९॥ केवलं दर्शनस्य निरूप्य तत्सम्बन्धिनां सर्वेषामेव निरूपयन् अस्य फलत्वे तत्कमाह-किं स्वल्पतपसामिति । देवादीनां महत्तपो भवत्येव । मनुष्याणामेव न भवतीति ज्ञापयितुं नृणामित्युक्तम् । अल्पतपस्त्वे हेतुः अर्चायां देवचक्षुषामिति अर्चा प्रतिमादौ जडाजडप्रकृतिः तत्रापि पामरैः कृता तादृशी स्वस्य चेतनस्य कथं देवता भवेत् । आकृतिरस्तीति चेत् तर्हि नटेन किमपराद्धम् । स्थैर्यं नास्तीति चेत् तर्हि जडा आकृतिः चैतन्यं गुणाश्च राशिद्वयं कृत्वा विचार्यतां किं चैतन्यं गुणाः देवता आहोस्विदाकृतिमात्रमिति विशिष्टेन सन्देहः । आकृतिरप्रयोजिका भगवत्त्वात् अन्यथा तद्गृहाकृतिः तद्देहाकृतिश्च सर्वेष्वेव वर्तते इति तत्परित्यज्य कुशकाशावलम्बनेन बुद्धिस्थैर्यं कुर्वाणा अल्पतपसो भवन्ति मुनिषु तु दर्शनं स्पर्शनं पादयोस्ततः प्रश्नः ततो विनयः ततः पादार्चनम् एतदादि सर्वं किं भवति चेतनधर्माश्चैते ॥१०॥ नन्वेवं सति कथं सर्वोऽपि लोकः प्रवर्तत इति चेत्तत्राह-नह्यम्मयानि तीर्थानीति । तीर्थशब्देन यच्छोधकं स्वच्छं तदुच्यते तज्जलमपि भवति । महान्तोऽपि भवति अतो जलमयानि किं तीर्थानि न भवन्ति ? भवन्त्येव । अपां शोधकत्वस्य दृष्टत्वात् परं या शुद्धिः ज्ञानरूपा महद्भिर्भवति सा न भवत्येव तथैव देवा अपि मृण्मयाः शिलामयाश्च केषांचिन्मते स्थानमेव देवः प्रतिमात्वप्रयोजिका तस्मिन् स्थाने या काचित्प्रतिमा स्थापिता सैव देवो भवति न त्वन्यत्र अतो मृण्मया एव देवाः शिलामया वा यत्र स्थानं न प्रसिद्धं शिलारूपलक्षणम् अष्टविधानां स्थिराः शिलामया न भवन्तीति वा तर्हि लोकप्रसिद्धं किं निन्दते नेत्याह-ते पुनन्त्युरुकालेनेति । साधवस्तु दर्शनमात्रेणैव न हि निन्दा निन्दयितुं वर्तते अपि तु विधेयं स्तोतव्यमिति पूजायां प्राप्तायां मृण्मयाद्यपेक्षया साधवः पूज्याः तीर्थगमनापेक्षया साधव एवाभिगन्तव्या इति न तु लोकसिद्धिं नन्द्यते इत्यर्थः । नन्वेतदपेक्षया सूर्यादयः प्रत्यक्षदेवाः सन्ति तदेव कथं न पूज्यन्त इति चेत्तत्राह-नाग्निर्न सूर्य इति । अग्निरग्निहोत्रादिषु प्रसिद्धः सूर्योऽप्युपासनायां चन्द्रोऽपि प्रतापादौ तारका अपि ग्रहादिपूजायां बुद्धादिरूपा अश्विन्यादिरूपा भूमिश्च विश्वम्भरा उपासनादौ तथा जलं तथैव हृदयाकाशः तथैव प्राणायामरूपो वायुः श्वसनः अथ भिन्नप्रक्रमेण वाक् सरस्वती मनश्च योगादौ "मनोवशे ते ह्यभवंश्च देवाः" इति एते सर्वे भगवद्बुद्ध्या पूजिताः अघं हरन्ति पापक्षयमेव कुर्वन्ति न लौकिकम् । तत्र हेतुः-भेदकृदिति भेदमङ्गीकृत्य हि सः प्रवर्तते । यो ह्यखण्डं भिनत्ति स कथं कृतार्थो भवेत् विपश्चितस्तु भेदं न कुर्वन्ति तदाह-विपश्चितो घ्नन्ति मुहूर्तसेवयेति । तावतैव ज्ञानोदयः सर्वपापक्षयः अनायासेन भवति "नालंकुर्वन्ति तां शुद्धिं या ज्ञानकलया कृता ।" इति वाक्यात् ॥१२॥ एवं परमार्थमुक्त्वा एतद्व्यतिरिक्तान् सर्वान् एकीकृत्य निन्दति यस्यात्मबुद्धिरिति । कुणपे देहे चैतन्यरहितो देहः कुणपमित्युच्यते न हि चेतनस्य जडः आत्मा भवति तत्र मूलविचारेणापि दोषमाह-त्रिधातुक इति । वातपित्तश्लेष्मप्रकृतिकोऽयं देहः आत्मा चेतनप्रकृतिकः अतोऽन्यदेहस्य धातव एव आत्मानो भवितुमर्हन्ति नन्वात्मा आत्मनो ज्ञेयं भवति । एवमात्मबुद्धिर्भ्रान्तेति निरूप्य आत्मीयबुद्धिरपि भ्रान्तेत्याह-स्वधीः कलत्रादिष्विति आत्मीयास्त एव भवन्ति ये स्वस्यापकुर्वन्ति ते सन्त एव कलत्रादयस्त्वपकुर्वन्ति तथा भगवानेव आत्मनामात्मा सद्रूपः भौमे भूमिविकारे इज्यधीः स्वदेहस्यापि पूज्यत्वात् तीर्थबुद्धिश्च सलिलम् एवं बुद्धिचतुष्टयं यस्य सः न कर्हिचित् अभिज्ञेषु जनेषु मन्तव्यः । किं नु मूर्खेष्वेव मन्तव्यः । किं बहुना स एव बलीवर्दः खरो वा बलीवर्दानां तृणानयनार्थं खरो वा पशुप्रायाः गृहस्थाः तेषां निर्वाहक इति एवं मुनिस्तोत्रार्थं लोकप्रसिद्धाः पदार्थाः निन्दिताः ॥१३॥

सुबोधिनीसारः

अहो वयं सफलजन्मानः स्म कार्त्स्न्येन सामस्त्येन तस्य जन्मनः फलं लब्धं प्राप्तं किं तत्तत्राह । देवानामपि दुर्लभं योगेश्वराणां दर्शनमिति यत् ॥९॥ अर्चायां प्रतिमायां देव इति चक्षुर्दृष्टिर्येषां तेषामल्पतपसां नृणां दर्शनादिकं किं कथम् ॥१०॥

सुबोधिनीसारः

तीर्थानि जलरूपाणि न देवा मृच्छिलारूपा न इति न अपि तु भवन्त्येव किं तु उरुकालेन बहुकालसेवया पुनन्तीति तत्प्रभावः। अत्रेयान् विशेषः साधवो दर्शनादेव पुनन्ति ॥११॥ उपासिता विपश्चितो ज्ञानिनो भेदकृतः पुंसोऽघं पापं मूलाज्ञानं मुहूर्तसेवया घ्नन्ति नाग्निर्हरति शेषं सुगमं सर्वे न हरन्ति ॥१२॥ यस्य त्रिधातुके वातपित्तश्लेष्मप्रकृतिके शरीरे आत्मेति बुद्धिर्न कर्हिचित् कदापि कलत्रादिषु स्त्रीपुत्रादिषु स्वधीः स्वकीया इमे इति बुद्धिर्न भौमे मृत्पाषाणमात्रे इज्यधीः देवबुद्धिर्न किन्त्वर्चायामेव सलिले जलमात्रे तीर्थबुद्धिर्न अभिज्ञेषु ज्ञानिषु जनेषु स एवं गच्छतीति एवगः उक्तार्थवित् अखरः शान्तः गौर्बुद्धिः खरा तीक्ष्णा यस्य स इति वा गोखरः इति वाक्ये विपरीतान्वयो युक्त्यावसेयः ॥१३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तद्वाक्यान्याह-अहो इति आश्चर्ये । वयं जन्मभृतः सफलजन्मानः । तत्र हेतुमाह-तस्य जन्मनः फलं कार्त्स्न्येनास्माभिर्लब्धमिति । किं तत् ? इत्यपेक्षायामाह-देवानामपि यद्दुर्लभं योगेश्वराणां युष्माकं दर्शनं तदस्माभिर्लब्धमिति ॥९॥ विस्मयेनाह-किमिति । स्वल्पं तपः पुण्यं येषां तेषाम् । अल्पपुण्यत्वे हेतुमाह-अर्चायां प्रतिमायामेव देवचक्षुर्देवताबुद्धिर्येषां तेषां नृणामस्माकं वो दर्शनादिकं किं कथं बभूवेत्यर्थः । प्रश्नः स्वागतप्रश्नः । प्रह्वः प्रणामः ॥१०॥ साधून् विहाय अम्मयानि तीर्थानि सेवायोग्यानि न भवन्ति तथा मृण्मयाः शिलामयाश्च देवा अपि न सेवायोग्याः । हि यस्मात् तीर्थादय उरुकालेन सेविताः पुनन्ति साधवस्तु दर्शनादेव भक्त्याद्युपदेशेन पुनन्ति ॥११॥ एतदेव प्रपञ्चयति-नेति । बहुकालमुपासिता अपि अग्न्याद्यभिमानिनो भेदकृतः त्वं तव ममाहमिति भेदबुद्धिं कुर्वतः पुंसः अघं पापमूलमज्ञानं न हरन्ति, विपश्चितो निरस्तभेदा विवेकिनस्तु मुहूर्तमात्रसेवयैव भक्तिज्ञानाद्युपदेशेनाघं घ्नन्तीति ॥१२॥ ननु तर्हि कथं साधून् विहायान्यसन्मानं कुर्वन्ति इत्यपेक्षायां मूर्खत्वात् इत्याशयेनाह-यस्येति । यस्य प्राणिनः त्रिधातुके वातपित्तश्लेष्माणः त्रयो धातवः प्रकृतयो यस्य तस्मिन् अत एव कुणपे शवतुल्ये जडे शरीरे आत्मबुद्धिः अहमिति बुद्धिः परमप्रेमास्पदतया सन्माननम्, कलत्रपुत्रादिषु स्वधीः स्वकीया इति बुद्धिः उपकार्योपकारितया सन्माननम्, भौमे भूविकारे प्रतिमायां इज्यधीः देवताबुद्धिः धर्मादिफलप्रदतया सन्माननम्, तथा यत् यस्य सलिले तीर्थबुद्धिः पापनिवर्तकतया सन्माननम्, अभिज्ञेषु जनेषु ता बुद्धयः कर्हिचिदपि न भवन्ति तथा तथा बुद्ध्या तत्सन्माननं न करोति स गोखर एव गवां तृणादिभारवाहकगर्दभतुल्य एव । पशुतुल्यजननिर्वाहकत्वादित्याशयः ॥१३॥

अन्वितार्थप्रकाशिका

अहो इति । आश्चर्ये । वयं जन्मभृतः सफलजन्मानः । तस्य जन्मनः फलं कार्त्स्न्येनास्माभिर्लब्धम् । यद्यस्मात् देवानामपि दुष्प्रापं योगेश्वराणां दर्शनमस्माभिर्लब्धम् ॥९॥ किमिति । स्वल्पं तपः पुण्यं येषां तेषाम् अर्चायां प्रतिमायामेव देवचक्षुर्देवताबुद्धिर्येषां तेषां नृणामस्माकं वो दर्शनादिकं किं कथं बभूव । प्रह्वः प्रणामः ॥१०॥ नहीति । साधून् विहाय अम्मयानि तीर्थानि सेवायोग्यानि न भवन्ति तथा मृण्मयाः शिलामयाश्च देवा अपि न सेवायोग्याः । हि यस्मात् तीर्थादयः उरुकालेन सेविताः पुनन्ति । साधवस्तु दर्शनादेव भक्त्याद्युपदेशेन पुनन्ति ॥११॥ नाग्निरिति । बहुकालमुपासिता अग्न्याद्यभिमानिनो भेदकृतः त्वं त ममाहमिति भेदबुद्धिं कुर्वतः पुंसः अघं पापमूलमज्ञानं शीघ्रं न हरन्ति । विपश्चितो निरस्तभेदा विवेकिनस्तु मुहूर्तमात्रसेवया भक्तिज्ञानाद्युपदेशेनाघं घ्नन्तीति । तारका ग्रहादिरूपाः "यो वाचं ब्रह्मेत्युपास्ते मनो ब्रह्मेत्युपास्ते" इति श्रुतेर्वाङ्मनसोरप्युपासनाविषयत्वम् ॥१२॥ यस्येति । यस्य प्राणिनः त्रिधातुके वातपित्तश्लेष्माणः त्रयो धातवः प्रकृतयो य तस्मिन् अत एव कुणपे शवतुल्ये जडे शरीरे आत्मबुद्धिः अहमिति बुद्धिः कलत्रपुत्रादिषु स्वधीः स्वकीया इति बुद्धिः भूविकारे प्रतिमायाम् इज्यधीः देवताबुद्धिः तथा यत् यस्य सलिले तीर्थबुद्धिः अभिज्ञेषु जनेषु ता बुद्धयः कर्हिचिदपि न भ तथा तथा बुद्ध्या तत्सन्माननं न करोति स गोष्वपि खरः दारुणः । यद्वा । गौश्चासौ खरश्च एक एव पशुद्वयतुल्यः सिन्धु गोखराकारो निरर्थः पशुरप्यस्ति । क्वचित् म्लेच्छविशेषोऽपि । यद्वा । गवां तृणादिभारवाहकगर्दभतुल्य एव भक्तास्तु प्राकृ

भौमे भगवत्प्रतिमाभिन्ने
कनिष्ठभक्तत्वोक्तेः । गङ्गा

अहो वयं जन्म
॥९॥ यर्हि भवतां दर्शनं दे
स्वल्पतपसां तीर्थस्नाद्यल्प
योगेश्वरदर्शनादिकं यत्तत्
साधुमाहात्म्यमाह-नहीति
उरुकालेन बहुकालेन कृत
पुनन्ति ॥११॥ अग्निरुपासि
सन्तः भेदकृतः परमेश्वरलो
भगवदेकान्तिकभक्तास्तु अ
भगवदन्यवस्तुप्रीतिरूपं पापं
यस्येति । त्रिधातुके वातपित्त
मदीया इति यावत् ॥ इमे इति
बुद्धिः अभिज्ञेषु भवादृशेषु ज
समाहारः गोखरः नपुंसकत्वाभ

तदेवाह अहो इति पञ्च
जन्मफलं कार्त्स्न्येन अद्यैव अस्म
तावद्देवानामपि दुष्प्रापमस्माकं तु
अर्चायां प्रतिमायामेव देवाः देवत
बभूवेत्यर्थः । प्रह्वशब्दः प्रणामप
तुच्छीकरोषीत्यत आह न हीति त्रि
मृच्छिलामयाः देवाः नेति न, पवि
भवादृशाः साधुताभाजो मुनयस्तु
भोजिताः पूजिता वा सद्यः पुंसामघौ
प्रपञ्चयति ॥ नाग्निरिति ॥ अग्निः सू
वाक् मनः उपासिताः सन्तः अघं न
सेवया घ्नन्तीत्यर्थः । भूजलादिशब्दै
इति श्रुतेः । विपश्चितः साधवस्तु मुहू
दुस्तर्कमूलोऽपहतो विवेकः' इति । अ

'उपासिता अग्न्यादयः भेदकृ

ीति तत्प्रभावः।
ुहूर्तसेवया घ्नन्ति
कर्हिचित् कदापि
र्चायामेव सलिले
रा तीक्ष्णा यस्य स

्य जन्मनः फलं
तदस्माभिर्लब्धमिति
वचक्षुर्देवताबुद्धिर्येषां
न् विहाय अम्मयानि
ा उरुकालेन सेविताः
प अग्न्याद्यभिमानिनो
जनस्तु मुहूर्तमात्रसेवयैव
र्वत्वात् इत्याशयेनाह-
पि शवतुल्ये जडे शरीरे
ः उपकार्योपकारितया
स्य सलिले तीर्थबुद्धिः
ननं न करोति स गोखर

ाभिर्लब्धम्। यद्यस्मात
् अर्चायां प्रतिमायामेव
साधून् विहाय अम्मयानि
ादयः उरुकालेन सेविताः
भमानिनो भेदकृतः त्वं तव
किनस्तु मुहूर्तमात्रसेवयैव
तो ब्रह्मेत्युपास्ते" इति
वयो धातवः प्रकृतयो यस्य
स्वकीया इति बुद्धिः भौमे
द्धयः कर्हिचिदपि न भवन्ति
एव पशुद्वयतुल्यः सिन्धुरे
ल्य एव भक्तास्तु प्राहुः अत्र

अन्वितार्थप्रकाशिका

भौमे भगवत्प्रतिमाभिन्ने जले च गङ्गायमुनादिभिन्ने इति व्याख्येयम्। अर्चायामेव हरये इत्यादौ अभिज्ञेष्विज्यबुद्ध्यभावेऽपि कनिष्ठभक्तत्वोक्तेः। गङ्गादिजलेष्वपि तादृशवचनसहस्रात् ॥१३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अहो वयं जन्मभृतः सफलजन्मानः यत् कार्त्स्न्येन समग्रतया तत्फलं लब्धं किं तत् तत्राह ॥ यद्योगेश्वरदर्शनं जातम् ॥९॥ यर्हि भवतां दर्शनं देवैरपि दुःप्राप्यं तर्ह्यस्माकं भवत्स्पर्शादीनां दुःप्रापत्वं यत्तत्र किमु वक्तव्यमित्याश्चर्येणाह-किमिति ॥ स्वल्पतपसां तीर्थस्नाद्यल्पधर्मवताम्। अर्चायां प्रतिमायामेव देव इति चक्षुः ज्ञानदृष्टिर्येषां न तु भवादृशेषु तेषां नृणां योगेश्वरदर्शनादिकं यत्तत् किम् उचितं नोचितमस्ति तथापि तदस्माकं जातं भवतां कृपयैवेति भावः। प्रह्वो नमस्कारः ॥१०॥ साधुमाहात्म्यमाह-नहीति त्रिभिः ॥ अम्मयानि जलप्रधानानि तीर्थानि न पुनन्ति ननु तर्हि किं तानि न पुनीयुरिति चेत्तत्राह-उरुकालेन बहुकालेन कृत्वा तानि तीर्थादीन्यपि पुनन्त्येव ॥ साधवः सच्छास्त्रलक्षणसम्पन्नाः प्रत्यक्षहरेर्भक्तास्तु दर्शनादेव पुनन्ति ॥११॥ अग्निरुपासितः सन् अघं जन्ममरणकारकमज्ञानरूपं पापं हरति एवं सूर्यादिपदेषु योज्यम् ॥ एते उपासिताः सन्तः भेदकृतः परमेश्वरलोकप्राप्तेरन्यप्राकृतफलविशेषकर्तारो भवन्ति न तु अघं हरन्ति। जनानामिति शेषः। विपश्चितो भगवदेकान्तिकभक्तास्तु अघं घ्नन्ति ॥ यद्वा भेदकृतः भेदे परमेश्वरादन्यप्राकृतवस्तुनि बुद्धिं कुर्वतो नरस्य अघं भगवदन्यवस्तुप्रीतिरूपं पापं विपश्चितो हरेर्ज्ञानिभक्तास्तु मुहूर्तमात्रसेवयैव घ्नन्ति ॥१२॥ अतो हरिभक्तासेवमानं जनं निन्दन्नाह-स्येति। त्रिधातुके वातपित्तकफात्मके ॥ कुणपे देहे यस्य जनस्यआत्मबुद्धिर्देहोऽहमिति बुद्धिरस्ति ॥ स्वधीः स्वकीया स्वीया इति यावत् ॥ इमे इति बुद्धिः भौमे भूमिविकारे इज्यधीः देहबुद्धिः ॥ यद्यस्य सलिले तीर्थमिदमेव पवित्रकरणमिति बुद्धिः अभिज्ञेषु भवादृशेषु जनेषु एताः बुद्धयः कर्हिचित्काले यस्य न भवन्ति स एव गोखरः गौर्बलीवर्दश्च खरश्च एतयोः समाहारः गोखरः नपुंसकत्वाभाव आर्षः। तद्वत्कुटुम्बभारवाहकः ॥१३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह अहो इति पञ्चभिः ॥ अहो इति ॥ हे मुनयः! वयम् अद्य जन्मभृतः सफलजन्मानः बभूविमेति शेषः। तत्फलं जन्मफलं कार्त्स्न्येन अद्यैव अस्माभिः लब्धम्। किं तत्। देवानामपि दुष्प्रापं योगेश्वरदर्शनं यत् तत् ॥९॥ किं च युष्माकं दर्शनमेव भवद्देवानामपि दुष्प्रापमस्माकं तु दर्शनादिकमपि कथं नु घटितमिति विस्मयेनाह ॥ किमिति ॥ स्वल्पं तपः पुण्यं येषां तेषाम् अर्चायां प्रतिमायामेव देवाः देवता इति चक्षुर्बुद्धिर्येषां तेषां नृणामस्माकं वो युष्माकं दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकं किं कथं घटेतेत्यर्थः। प्रह्वशब्दः प्रणामपरः। प्रश्नः स्वागतप्रश्नः ॥१०॥ नन्वर्चायां देवचक्षुष्ट्वं पवित्रतापादकमस्त्येव, तत् किमिति [illegible]पीत्यत आह न हीति त्रिभिः ॥ न हीति ॥ अम्मयानि जलमयानि तीर्थानि न हीति न, पावनत्वसमर्थानीति शेषः। तथा मृच्छिलामयाः देवाः नेति न, पवित्रतापादका इति शेषः। किं तु तानि ते च उरुकालेन बहुकालसेवनतः पुनन्ति। साधवो भवादृशाः साधुताभाजो मुनयस्तु दर्शनादेव पुनन्ति। तथा चाह सत्सङ्गिजीवने स्वयमेव 'दृष्टाः स्पृष्टा नता वा कृतपरिचरणा वन्दिताः पूजिता वा सद्यः पुंसामघौघं बहुजनिजनितं घ्नन्ति ये वै समूलम्' इति ॥११॥ दृष्टान्तार्थे देवा उरुकालेन पुनन्तीत्युक्तं तत् तद्दर्शयति ॥ नाग्निरिति ॥ अग्निः सूर्यः चन्द्रतारकाश्च उपासिताः सन्तः उपासकस्य अघं न घ्नन्तीति न, भूः जलं खं श्वसनः अथ वाक् मनः उपासिताः सन्तः अघं न घ्नन्तीति न। किन्तु यतः ते भेदकृतः आत्मनि स्वमहत्तारूपभेदबुद्धिमन्तः अतः उरुकालेन सेवया घ्नन्तीत्यर्थः। भूजलादिशब्दैस्तदभिमानिन्यो देवता लक्ष्यन्ते। वाङ्मनसयोरप्युपासनाविषयत्वं 'यो वाचं ब्रह्मेत्युपास्ते' इति श्रुतेः। विपश्चितः साधवस्तु मुहूर्तसेवया अघं हरन्ति। तथा चात्रैव पञ्चमस्कन्धे रहूगणवाक्यं 'मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतो विवेकः' इति। अघशब्देन तन्मूलमज्ञानं च विवक्षितम्। केचित्तु —

'उपासिता अग्न्यादयः भेदकृतः स्वयं भेदबुद्धिं कुर्वतः पुंसो वा अघं हरन्ति। तन्मूलमज्ञानं न हरन्ति, विपश्चितस्तु यतो

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निरस्तभेदास्ततस्ते मुहूर्तमात्रसेवयैवाघं तन्मूलमज्ञानं च हरन्ति' इत्याहुः ॥१२॥

अतः साधून् विहायान्यत्रात्मादिबुद्ध्या सज्जमानोऽतिमन्द इत्याह ॥ यस्येति ॥ तस्य पुंसः त्रिधातुके वातपित्तश्लेष्ममये कुणपे शवप्रायशरीरे आत्मबुद्धिरात्मत्वाभिमानः अहमिति बुद्धिरित्यर्थः । कलत्रादिषु दारादिषु स्वधीरात्मीयताबुद्धिः एवमहंताममते अभिहिते । भौमे भूविकारभूतप्रतिमायाम् इज्यधीर्देवताबुद्धिय् यद्यस्य सलिले गङ्गादिजले एव तीर्थबुद्धिः कर्हिचिदपि अभिज्ञेषु स्वात्मपरमात्मयाथात्म्याभिज्ञेषु जनेषु भवादृशेषु तत्त्ववित्सु जनेषु ता आत्मादिबुद्धयः न सः पुमान् गोखरः एव । गोप्रायः खरप्रायश्चेत्यर्थः । यद्वा गवां सम्बन्धी खरः तदर्थकतृणादिवाहको रासभः । अतीवाज्ञ इत्यर्थः । यद्वा गवि पृथिव्यां खरो नापर इत्यर्थः । एतौ श्लोकौ व्याख्यातारो बहुधा व्याख्यायन्ते तत्र क्लिष्टार्थदर्शनात् प्राकृतार्थानुरोधेन व्याख्यातौ स्तः । न हि निन्दा निन्द्यं निन्दितुं प्रवर्ततेऽपि तु विधेयं स्तोतुमिति न्यायोऽत्र बोद्धव्योऽन्यथा पूर्ववर्णितगङ्गामहत्त्व 'अर्चा विष्णौ शिलाधीः' इति गोपालतापनीयश्रुतिविरोधापत्तिः स्यात् ॥१३॥

कृष्णप्रिया

जिन लोगोंने अल्पतपश्चर्या की है, और जो लोग अपने इष्ट देवको प्राणी मात्रके हृदयमें न देखकर केवल किसी मूर्ति विशेषमें ही उनका दर्शान करते है, उन्हें आप लोगोंके दर्शन, स्पर्श, कुशलप्रश्न, प्रणाम और चरणार्चन आदि का मंगल अवसर भला कब मिल सकता है ॥१०॥ केवल जलमय तीर्थ ही तीर्थ नहीं कहलाते किन्तु तीर्थका अधिष्ठात्री देवता है । और मृत्तिका या पाषाणमयी प्रतिमाएं ही देवता नहीं होती परंतु तीर्थ नामके देवता है और प्रतिमा देवता ही है लेकिन तीर्थ और प्रतिमा देवता दीर्घ कालकी दृढ सेवासे प्रसन्न होते हैं और फल देते है आरे पवित्र करते है तब संतपुरुष का दर्शन मात्र भी हो जाय तब वे विना विलम्ब पवित्र कर देते है - दर्शनमात्र से कृतार्थ कर देते है ॥११॥ अग्नि-सूर्य-चन्द्रमा-तारे-पृथ्वी-जल-आकाश-वायु-वाणी और मनके अधिष्ठाता देव इन सर्वको भगवान के स्वरुप है ऐसा न जानकर केवल अधिष्ठाता देव स्वरुप भेदसे उपासना की जाय तब ये सब भेदमति का नाश नहीं करते क्योंकि उपासना मेदमति गयी है लेकिन घडी दो घडी भी ज्ञानी महापुरुषोंकी मुहुर्तमात्र सेवा की जाय तो वे सारे पाप-ताप संतोष को मिटा देते है क्योंकि वे ज्ञानी संत महापुरुष मेदबुद्धि के विनाशक है ॥१२॥ भगवान श्रीकृष्ण अब महर्ष् क्यों बने हुए सब तुल्य शरीर को ही अपनी आत्मा मानता है, एवं स्त्री पुत्र आदिमें सर्वार्थमति है; मृत्तिका-काष्ठ एवं पार्थिव विकारोंको ही अपनी इष्ट देवता मानता है । पुनः जल को ही तीर्थ समझता है ज्ञानी पुरुषोंको नहीं समझता है उसके लिये क्या कहाजाय वह यद्यपि मनुष्य होते हुए भी पशुओंमें भी अति तुच्छ माना गया है ॥१३॥

श्रीशुक उवाच

निशम्येत्थं भगवतः कृष्णस्याकुण्ठमेधसः । वचो दुरन्वयं विप्रास्तूष्णीमासन् भ्रमद्धियः ॥१४॥
चिरं विमृश्य मुनय ईश्वरस्येशितव्यताम् । [1]जनसंग्रह इत्यूचुः [2]स्मयन्तस्तं जगद्गुरुम् ॥१५॥

कर्दमक्षमा

श्रीशुकः, उवाच । एवम्, अकुण्ठमेधसः, भगवतः, कृष्णस्य, इत्थम्, दुरन्वयम्, वचः, श्रुत्वा, भ्रमद्धियः, विप्राः, तूष्णीम्, आसन् ॥१४॥ मुनयः, चिरम्, विमृश्य, ईश्वरस्य, ईशितव्यताम्, जनसङ्ग्रहः, इति, स्मयन्तः, जगद्गुरुम्, तम्, ऊचुः ॥१५॥

---

१. सङ्ग्रहमित्यूचुः-वीर. । २. स्मरन्त-गो. प्रे. टी. ।

धातुके वातपित्तश्लेष्ममये
षु स्वधीरात्मीयताबुद्धिः
ङ्गादिजले एव तीर्थबुद्धिः
म्मादिबुद्धयः न सः पुमान
अतीवाज्ञ इत्यर्थः । यद्वा ।
दर्शनात् प्राकृतार्थानुरोधेन
न्यथा पूर्ववर्णितगङ्गामहत्त्वे

ात्रके हृदयमें न देखकर
कुशलप्रश्न, प्रणाम और
र्थ ही तीर्थ नहीं कहलाते
ं होती परंतु तीर्थ नामकी
सेवासे प्रसन्न होते हैं और
ा विलम्ब पवित्र कर देते
श-वायु-वाणी और मनके
देव स्वरूप भेदसे उपासना
न घडी दो घडी भी ज्ञानी
कि वे ज्ञानी संत महापुरुष
ारीर को ही अपनी आत्मा
अपनी इष्ट देवता मानता
कहाजाय वह यद्यपि मनुष्य

मासन् भ्रमद्धियः ॥१४॥
न्तस्तं जगद्गुरुम् ॥१५॥

न्, वचः, श्रुत्वा, भ्रमद्धियः,
हः, इति, स्मयन्तः, जगद्गुरुम्,

श्रीधरस्वामिविरचिता भावार्थदीपिका

दुरन्वयमननुरूपम् भ्रमन्त्यनवस्थिता बुद्धिर्येषां ते ॥१४॥ ईशितव्यतामनीश्वरतां कर्माधिकारितां जनसङ्गहमात्रमेतदित्यूचुः स्मयन्तो हसन्तः ॥१५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अकुण्ठमेधसोऽप्रतिहतज्ञानस्य । अननुरूपं दुर्ज्ञेयाभिप्रायम् ॥१४॥ तं श्रीकृष्णम् । "ईशितव्यस्त्वनीशत्वे दास्ये च कीर्तितः" इति । जगद्गुरुं जगच्छास्तारम् ॥१५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भगवतस्तत्रापि कृष्णस्येति स्वयं भगवत इत्यर्थः । अतो अकुण्ठमेधसः अपरिच्छिन्नज्ञानस्यापि इत्थम् ईदृशं दुरन्वयमसम्बद्धं जीवसदृशोक्तेः । स्वयं च विप्रास्तन्महिमविद्वांसः अतस्तात्पर्यावधारणाशक्त्या भ्रमद्धियः संशयाकुलचित्ताः ॥१४॥ ईशितव्यतां विमृश्य नैश्वर्याभावान्न प्रतिष्ठालोभान्नाज्ञानाद्वा खल्विदं किन्तु परमसाद्गुण्येन नरलीलोचितविनय एवेति विचार्य स्मयन्तः सलज्जं सानन्दं परस्परं वीक्ष्य स्मयमाना एव जनसङ्ग्रहो लोकशिक्षणमिति जनानां भक्तानां सङ्ग्रह आकर्षणमिति वा जनसङ्ग्रहे हेतुः जगतां गुरुं सर्वसाद्गुण्यप्रवर्तकमिति ॥१५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवतः साक्षात्परमेश्वरस्य तत्रापि कृष्णस्याशेषैश्वर्यप्रकटनपरस्य अतोऽकुण्ठमेधसोऽपरिच्छिन्नबुद्धेरपि । इत्थमीदृशं जीवस्येव वचो निशम्य विशेषेण प्रान्ति सर्ववेदार्थतत्त्वोपदेशेन सर्वेषां ज्ञानं पूरयन्तीति विप्रा अपि भ्रमद्धियः सन्तः । र्व्याख्यातम् । यद्वा । दुरन्वयमसम्बद्धम् । परमेश्वरस्य कर्मपरजीवसाम्योक्तेरसंलग्नत्वात् । अतस्तात्पर्यावधारणाशक्त्या संशयाकुलचित्ताः । अन्यत् समानम् ॥१४॥ ईशितव्यतां चिरं विमृश्य विचार्य स्मयन्तः पश्चाद्विज्ञाय तद्वचनभङ्ग्या मानाः सन्तः । जनसङ्ग्रहो लोकशिक्षणमिर्मि तमूचुः । जनसङ्ग्रहे हेतुः-जगतां गुरुमिति । अन्यत्तैर्व्याख्यातम् । यद्वा । व्यतां जीवव्यवहारादिकमिदं जनसङ्ग्रह इति विमृश्य अतस्तद्वचस्तात्पर्यज्ञानेन किंवा सर्वसद्गुणनिधेर्विनयस्वभावादेवेति भक्त्येषद्धसन्तः-ईश्वरे साक्षादुच्चहासस्यायोग्यत्वात् । तमूचुर्वक्ष्यमाणम् ॥१५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१३-१५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

निशम्येति । अकुण्ठा प्रतिहतरहिता मेधा यस्य तस्य भगवतः कृष्णस्य दुरन्वयमननुरूपं वचो निशम्य भ्रमन्ती अनवस्थिता तथाभूताः तूष्णीमासन्नहो स्वभजनाहितमाहात्म्यानस्मानयं स्वस्मादुत्कृष्टतमान् वदत्यतो विपरीतेमेतद्वच इत्येवं तावद्भ्रमद्धियः ॥१४॥ चिरमिति । जनसङ्ग्रहम् अकृत्स्नविदो जनाः इत्थं साधून् भजेयुरित्येवंविधजनानुग्रहरूपाम् ईश्वरस्य भगवतः तव्यतां (कर्माधिकारिताम्) चिरमालोच्य स्मयन्तः ईषद्धसन्तः जगद्गुरुं कृष्णं प्रतीत्थं वक्ष्यमाणप्रकारेणोचुरित्यन्वयः ॥१५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥१२-२०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

वचो दुरन्वयमित्यादि । दुरन्वयं दुर्बोधं किमस्मान् स्तौति किमुह सतीति सर्वेषां धीविभ्रमो जात इत्यर्थः । एवं च सन्तस्तूष्णीमासन्निति शेषः ॥१४-१७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

वचो दुरन्वयं दुर्ज्ञेयम्। किं स्तौति किं निन्दतीति भ्रमन्ती धीर्येषां ते भ्रमद्धियः सन्तस्तूष्णीमासन्। यदि वचसोऽर्थान्तरम् तदा प्रत्युत्तरमदास्यन् ॥१४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वचः अहो वयं जन्मभृत इत्यादिकं दुरन्वयं तदननुरूपत्वाद्दुर्गमम् ॥१४॥ ईश्वरस्य मुनिषु ईशितव्यत्वं चिरं विमृश्य तत्रोपपत्तिमपश्य जनसङ्ग्रहो धर्मस्थापकस्य भगवतो लोकशिक्षणार्थमेवेदं वचनावरणादिकमित्यूचुः । तत्र हेतुः-जगद्गुरुमिति ॥

गूढार्थदीपिनी

इत्थं कृष्णस्य दुरन्वयम् अननुरूपं (दुर्ज्ञेयाभिप्रायम्।) वचः निशम्य विप्राः तूष्णीमासन्नित्यन्वयः। भ्रमन्ती अ धीर्येषां ते। अकुण्ठमेधसः अप्रतिहतज्ञानस्य भगवतः ॥१४॥ ईशितव्यतां (ईशितव्यस्त्वनीशत्वे दास्ये च परिकीर्तितः।) दास्य मुनिसेवकतां विमृश्य जनसङ्ग्रहे जनसङ्ग्रहार्थमेतत् इत्यूचुः। स्मयन्तः हसन्तः सन्तः ॥१५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अहो वयं जन्मभृतः इत्यादिकं वचो दुरन्वयं दुर्दुर्घटः अन्वयः परे तत्त्वे श्रीकृष्णे समन्वयो यस्य तत् निशम्य भ्रमन्ति दोलायमाना धीर्येषां ते तूष्णीमासन् ॥१४॥ ईश्वरस्य सर्वनियन्तुः ईशितव्यताम् अस्मदाद्यर्थप्रत्युत्थानार्चनस्तुत्यादि परनियम्यतां चिरं विमृश्य किमर्थेयमिति सुविचार्य तदनन्तरं ज्ञाताभिप्रायाः स्मयन्तः ईषद्धसन्तः जनसङ्ग्र लोकशिक्षार्थोऽयमीशितव्यभावः इति जगद्गुरुं श्रीकृष्णम् ऊचुः ॥१५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तेषां पूर्वं भगवानेव स्तोत्रं कृतवान् वेदादिद्वारा अतो विरुद्धमुभयमपि तन्निर्णयार्थं मुनीनां सन्देहो जात इत्य निशम्येत्थं भगवत इति। एवं भगवतो वचो निशम्य भ्रमद्धियो भूत्वा तूष्णीमासन्निति सम्बन्धः। ननु सन्देहः भगवद्वाक्यप्रामाण्ये निश्चय एव अन्यथा पूर्वसिद्ध एवार्थः तत्राह-अकुण्ठमेधस इति। अकुण्ठा मेधा यस्येति को वैदिकेनाभि एवं वदतीति सन्देह इत्यर्थः। ननु निश्चय एव कुतो नोत्पद्यते तत्राह-दुरन्वयमिति। अन्वयो लोकसिद्धार्थसम तद्विरुद्धत्वाद्दुरन्वयः। अत एव भ्रमद्धियः ॥१४॥ ततस्तेषां निर्णयो जात इत्याह-चिरं विमृश्येति। मुनय इति मननं साधकं विचारितमर्थमाह-ईश्वरस्येशितव्यतामिति। ईश्वरस्य सर्वसमर्थस्य ईशितव्यता सेवकता या सा जनसङ्ग्रहः एवम्बुद्ध्या सङ्ग्गृहीता भवन्तीति यथा स्वयं चेदेवं ब्रूयात् अन्योऽप्येवं वदेदिति ततो भगवद्वाक्याभिप्रायं ज्ञात्वा स्म हसन्तः जगद्गुरुं सर्वहितोपदेष्टारं प्रति किञ्चिदूचुः ॥१५॥

श्रीसुबोधिनीसारः

शुकोक्तिः। अकुण्ठा निरर्गला मेधा बुद्धिर्यस्य तस्य भगवतः कृष्णस्येत्थमेव दुरन्वयं दुर्घटं वचो निशम्य श्रुत धीर्येषां ते विप्राः तूष्णीमासन् ॥१४॥ ईश्वरस्येशितव्यतां प्राकृतवत्कर्माधिकारितां विमृश्य मुहूर्तं विचार्य जनसङ्ग्रहे लोक स्मयन्तो हसन्तः तं जगद्गुरुं श्रीकृष्णम् एवममूचुः ॥१५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवम्भूतं कृष्णस्य वचो निशम्य श्रुत्वा ते विप्रास्तूष्णीमासन्। तत्र हेतुमाह-भ्रमद्धिय इति। भ्रमहेतुमाह-दुरन्व सर्वोत्कृष्टस्यापि स्वस्यापकर्षपरत्वादननुरूपमित्यर्थः। तर्हि कृष्णेनैव भ्रान्त्योक्तं स्यात् इत्याशङ्क्याह-अकुण्ठ अप्रति यस्य तस्येति। तत्र हेतुमाह-भगवत इति ॥१४॥ ततश्च ते मुनयश्चिरं विमृश्य विचार्य ईश्वरस्यापीशितव्यतां मुनिसेवकतां कुर्युरिति जनसङ्ग्रहायेति निश्चित्य विस्मयं कुर्वन्तस्तं जगद्गुरुं श्रीकृष्णं प्रत्यूचुः ॥१५॥

अन्वितार्थप्रकाशिका

निशम्येति। एवम्भूतं भगवतः अकुण्ठमेधसः अप्रतिहतबुद्धेः कृष्णस्य दुरन्वयं सर्वोत्कृष्यस्यापि स्वस्यापकर्षपरत्वादननुरूपं वचनं निशम्य भ्रमद्धियस्ते विप्रास्तूष्णीमासन् ॥१४॥ चिरमिति । ततश्च ते मुनयश्चिरं विमृश्य विचार्य ईश्वरस्यापीशितव्यतां मुनिसेवकतामन्येऽप्येवं कुर्युरिति जनसङ्ग्रहायेति निश्चित्य स्मयन्तः विस्मयं कुर्वन्तः। शताऽऽर्षः। तं जगदुरुं श्रीकृष्णं प्रत्यूचुः ॥१५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अकुण्ठा देशकालगुणादिभिरप्रतिहता मेधा कर्तव्यानुसन्धानं यस्य तस्य दुरन्वयं दूरानुसन्धानं वचः ॥ श्रुत्वा भ्रमन्ती तात्पर्यनिश्चयाशक्त्या सन्देहव्यग्रा धीर्येषां ते ॥१४॥ ईश्वरस्येशितव्यतां साधुजनपुरतोऽनीश्वरतां चिरम् ॥ विमृश्य ॥ एष वाग्विलासः जनसङ्ग्रहः ॥ लोकशिक्षामात्रोऽस्तीति निश्चित्य स्मयन्त ईषद्धसन्तः ॥ तं कृष्णमूचुः ॥१५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

निशम्येति ॥ अकुण्ठाप्रतिहतिरहिता मेधा बुद्धिर्यस्य तस्य, भगवतः कृष्णस्य इत्थं दुरत्ययमननुरूपं दुरन्वयमिति पाठे अनन्वयमन्वेतुमशक्यं दुर्ज्ञेयमित्यर्थः । वचः निशम्य विप्राः भ्रमन्त्यनवस्थिता धीर्येषां तथाभूताः सन्तः तुष्णीम् आसन् । अहो अस्य भजनाहितमाहात्म्यानस्मानयं स्वस्मादुत्कृष्टतमान् वदत्यतो विपरीतमेतद्वच इत्येवं तावद्भ्रमद्धियः सन्तो जोषमासन्नित्यर्थः ॥१४॥ चिरमिति ॥ जनसङ्ग्रह इति इतिनाऽभिहितत्वाप्रथमा । अकृत्स्नविदो जना इत्थं मयि ब्राह्मणेषु वर्तमाने सति तान् भजेयुरित्येवंविधजनानुग्रहरूपामित्यर्थः ॥ ईश्वरस्य भगवतः ईशितव्यतां कर्माधिकारितां चिरं विमृश्यालोच्य मुनयः स्मयन्तः ईषद्धसन्तः सन्तः जगद्गुरुं श्रीकृष्णं प्रति ऊचुः ॥१५॥

कृष्णप्रिया

भगवान श्रीशुक्राचार्यजीने कहा - महाराज परीक्षित् ! भगवान श्रीकृष्णचन्द्रजी तो अकुण्डबुद्धि अखण्ड मेधा-ज्ञान वाले है । उनके यह वाक्य सुनकर यह सर्व ऋषि-मुनि ज्ञानी जन क्षणभर मौन हो गये । उन सबकी मति चक्करमें आ गयी आरैर निश्चय निर्णय न कर पाये कि नाथ क्या कह रहे है ॥१४॥ उन महर्षियों बहुत समय विचार करने के चश्चात् यह निर्णय किया कि भगवान सर्वज्ञ एवं सर्वेश्वर होने पर भी जो इस प्रकार सामान्य जीव कर्मपस्तंच जीव की तरह वाग्व्यवहार कर रहे है यह तो केवल लोक संग्रह के लिये ही है । एसा मर्म समझकर मन्द हास्य के साथ भगवान पूर्ण पुरुषोत्तम श्रीकृष्ण जगदगुरुको निवेदन करने लगे ॥१५॥

मुनय ऊचुः

यन्मायया तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः[१] ।
यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितम् ॥१६॥
अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न [२]बध्यते यथा ।
भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडम्बनम् ॥१७॥
अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्त्वं खलनिग्रहाय च ।
स्वलीलया वेदपथं पुरातनं[३] वर्णाश्रमात्मा पुरुषः परो भवान् ॥१८॥
ब्रह्म ते हृदयं [४]शुक्लं तपःस्वाध्यायसंयमैः । यत्रोपलब्धं सद्[५] व्यक्तमव्यक्तं च ततः परम् ॥१९॥

---

[१] मधीश्वरा-वीर. ; मधीश्वरं-वीर. । [२] नसज्जते वीर. ; न तत्र बध्यते-इति कस्यचित् । [३] सनातनं-श्रीधर. वंशी. जीव. वीर. विज. शुक. । [४] शुद्धं-वीर. । [५] सुव्यक्त-विज. ।

कर्दमक्षमा

मुनयः, ऊचुः । अहो, यन्मायया, तत्त्वविदुत्तमाः, च, विश्वसृजाम्, अधीश्वराः, वयम्, विमोहिताः, यत्, ईहया, गूढः, ईशितव्यायति, तत्, भगवद्विचेष्टितम्, विचित्रम् ॥१६॥ अनीहः, एकः, यथा, न, बध्यते, बहुधा, एतत्, आत्मना, सृजति, अवति, अत्ति, हि, भूमिः, भौमैः, बहुनामरूपिणी(भवति), तथा, विभूम्नः, चरितम्, विडम्बनम् ॥१७॥ अथ, अपि, काले, स्वजनाभिगुप्तये, च, खलनिग्रहाय, भवान्, परः, पुरुषः, स्वलीलया, सत्त्वम्वर्णाश्रमात्मा, पुरातनम्, वेदपथम्, बिभर्षि ॥१८॥ तपः, स्वाध्यायसंयमैः, ब्रह्म, ते, शुक्लम्, हृदयम्, यत्र, व्यक्तम्, च, अव्यक्तम्, सत्, च, परम्, उपलब्धम् ॥१९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनन्वयं विवृण्वन्त आहुर्द्वाभ्यां यन्माययेति । तत्त्ववित्सूत्तमा अपि वयं काऽसौ माया यया विमोहिता इति तामाहुः यदिति । यद्यस्मादीहया नरचेष्टितेन गूढः सन् ईशितव्यायत्यनीश्वरवदाचरति भवान् नन्वहमीश्वरश्चेत्किम् इत्येवमाचरेयम्? तत्राऽऽहुः, अहो इति । भगवतस्तव विचेष्टितं विचित्रमतर्क्यम् ॥१६॥ भगवत्त्वमेवाऽऽहुः–अनीह इति । अनीहोऽक्रिय एव आत्मना स्वरूपमात्रेण बहुधेत्यत्र दृष्टान्तः, यथा भौमैरिति भौमैर्घटादिविकारैरुपलक्षिता "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येवसत्यम्" इति श्रुतेः । ननु कथमहं जगत्सृष्ट्यादिकर्ता वसुदेवपुत्रत्वादिति तत्राऽऽहुः अहो इति विभूम्नः परिपूर्णस्य तवेदं जन्मादिचरितं विडम्बनमनुकरणमात्रं न तु तत्त्वमिति ॥१७॥ जनसङ्ग्रहमाहुः–अथापीति त्रिभः । सत्त्वं शुद्धसत्त्वात्मकं रूपं बिभर्षि स्वलीलया आचारेण वेदपथञ्च बिभर्षि ॥१८॥ अत एव ब्रह्मणेषु बहुमानमपि करोषीति सहेतुकमाहुः, ब्रह्मेति। ब्रह्म वेदाख्यं शुक्लं शुद्धं ते हृदयमन्तरङ्गं रूपम् कुतः इत्यत आहुः, यत्रेति । यत्र ब्रह्मणि व्यक्तं कार्यमव्यक्तं कारणं ततः परं सत् सन्मात्रं ब्रह्म च तप आदिभिरुपलब्धं तद्ब्रह्म ॥१९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तां मायाम् । अत्राशङ्कते–नन्विति । तत्राक्षेपे । विचेष्टितं लीला ॥१६॥ सृष्ट्यादिकर्तृत्वमाक्षिपति–नन्विति ॥१७॥ काले सज्जनोपप्लवसमये । वर्णाश्रमाणामात्मा नियन्ता तत्तद्धर्मप्रवर्तकः ॥१८॥ अन्तरङ्गरूपं 'वेदो नारायणः साक्षात्' इति स्मृतेः । अन्तरङ्गरूपत्वे हेतुमाशङ्कते–कुत इति । ब्रह्मणि वेदे । ततः कार्यकारणात् । ब्रह्म परमात्मा । ब्राह्मणैरिति शेषः । उपलब्धं साक्षाद्दृष्टम् ॥१९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुनश्चोचुरित्याह–श्रीमुनय ऊचुरिति । कथमूचुस्तत्राह–यन्माययेति पञ्चभिः । तत्र दुरन्वयत्वं विवृण्वते द्वाभ्याम् । यस्य मायया अतर्क्यशक्त्या वयं मोहिताः तस्य भगवतो विचेष्टितमित्यर्थः । तत्त्वेति विश्वेति । तत्तद्रूपत्वेन सर्वैर्ज्ञाता अपीत्यर्थः । अन्यत्तैः । यद्वा । गूढः वेददुर्वेदोऽपि भगवान् ईहया विविधलीलया ईशितव्यायति जीववदाचरति । परस्मैपदमार्षम् ॥१६॥ नैवमधुनैव किन्तु सर्वदैवेत्याहुः–स्वयमेकः कर्त्रन्तरसहायरहितः । तत्राप्यात्मना करणान्तरसहायरहितेन स्वरूपेणैव तत्राप्यनीहः क्रियापरिणामाभ्यां विकाररहितो भवान् एतद्विश्वमपि सृजतीत्यादि तत्रापि बहुधेति तत्तद्ब्रह्माण्डभेदेन कालभेदेन च विचित्रतयेत्यर्थः । तच्च स्वस्याज्ञानविषयाश्रयत्वासम्भवात् परिणामेनैवेत्याहुः–यथा भौमैरिति । अथ च न बध्यते तत्तद्दोषेण लिप्तो न भवति तस्मादहो विभूम्नः परमपूर्णस्य तव चरितं विडम्बनमस्मादृशबुद्धितिरस्कारकमित्यर्थः ।

"**श्रुतेस्तु शब्दमूलत्वात् (२/१/२७)**" इति न्यायेनाचिन्त्यशक्तित्वादिति भावः ॥१७॥ यद्यप्येवं दुस्तर्कशक्तिकं तथापि काले स्वजनोद्भवसमये स्वजनाभिगुप्तये यः खलनिग्रहस्तस्मै सत्त्वं स्वयमपि प्राकट्यं बिभर्षि तत्र च स्वलीलया वर्णाश्रमस्यात्मा प्रवर्तकः सन् सनातनं वेदपथं बिभर्षि पुष्णासि । तदेतदपि दुरन्वयमिति भावः । तच्च किं विचार्यं यतः परः सर्वबुद्धिपद्धतिमतीतः पुरुषो भवान् ॥१८॥ ननु गोपयान्येव तान् स्वजनान् वेदपथपोषणेन किं तत्राहुः–ब्रह्म वेदाख्यं शास्त्रं शुद्धं केवलानुग्रहमयं यद्धृदयं तद्रूपमेव यत्र वेदाख्यब्रह्मणि तपः सर्वनुष्ठानं स्वाध्यायस्तदर्था सर्वा शिक्षा संयमः अन्यतो मनोनि

तैः सह सत् परं ब्रह्म
स्वजनपोषणमित्यर्थः ।

कथमूचुस्तदाह–
मध्ये अधीश्वराः परमश्रेष्ठा
विश्वसृजामधीश्वरा महाप्रज
विविधलीलया ईशितव्याय
भृत्यस्तद्वदाचरति च जनः
घटादिनिर्माणे कुम्भकारादि
तथापि न वध्यत तत्तत्कर्म
तत्राह–विडम्बनं चरितम् । च
यतः भौमैर्बहुनामरूपिणी भू
अहो इति । चरितं सृष्ट्यादि
यद्यपि सृष्ट्याद्यर्थं रज आदि
स्वजनाः साधवस्तेषामभितः
षष्ठस्कन्धे यमदूतैः (भा०६/१
यद्वा । 'षणु दाने' सनः सर्वश्रे
परमेश्वरः अन्तर्यामितया स
स्वसर्वजीवहितार्थमित्येतत्पक्षे
किंवा सत्त्वं सतां विद्यमानतां
॥१८॥ सनातनत्वमेव दर्शयन्तो
व्रतादिः । तैः कृत्वा उपलब्धं
अन्यत्तैर्व्याख्यातम् । यद्वा । व्यक्तं
यस्मिन् विषये उपलब्धं प्राप्तम्,

यदीशितव्यः यस्येशि
॥१६॥ सृजतीति निमित्तत्वमुक्तम्
ब्राह्मणकुलं यस्य सः व्यक्तं कार्य

तमेवाह–यदिति । हे वि
जनसङ्ग्रहात्मकमवगन्तुमसमर्था
भगवानीहया गूढः मनुष्यचेष्टयाच्छ
चेष्टितमहो विचित्रमतिचित्रमित्यर्थः

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सह सत् परं ब्रह्म व्यक्तं जगत् अव्यक्तं प्रकृतिः तेभ्यः परं श्रीभगवदाख्यतत्त्वं चोपलब्धमिति तत्पोषणेनैव स्वजनपोषणमित्यर्थः ॥१९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कथमूचुस्तदाह-यन्माययेति पञ्चभिः । यस्य मायया तस्य भगवतो विचेष्टितमित्यन्वयः । विश्वसृजां मरीयादिप्रजापतीनां मध्ये अधीश्वराः परमश्रेष्ठा अपि विशेषेण मूर्खप्रजभ्योऽप्याधिक्येन मोहिताः । तत्तिदुत्तमत्वादिमहाभिमानात् । यद्वा । विमोहितत्वादेव विश्वसृजामधीश्वरा महाप्रजापत्यभिमानिन इत्यर्थः । अहो आश्चर्ये । अन्यत्तैर्व्याख्यातम् । यद्वा । गूढो वेददुर्वेदोऽपि भगवान् ईहया विविधलीलया ईशितव्यायति जीववदाचरति । अन्यथा ईहया बहुव्यापारेण गूढ आच्छन्नज्ञानः सन् यस्य मायया ईशितव्यो नृपस्तद्वदाचरति च जनः सर्वोऽयम् । ननु किमर्थं मायां प्राप्नुयाम् ? तत्राह-अहो इति खेदे । अन्यत् समानम् ॥१६॥ अनीहो घटादिनिर्माणे कुम्भकारादिवद्बाह्यचेष्टायुतः सन्-इच्छामात्रेणैव तत्तत्सिद्धेः । यद्वा । तच्चात्मना स्वयमेव अन्यनैरपेक्ष्येणेत्यर्थः । तथापि न बध्यत तत्तत्कर्मभिः । हि निश्चितम् । अहो हर्षे । विभूम्नः परिपूर्णस्य । ननु पूर्णश्चेत् तर्हि कथं जरासन्धादितः पलाये: ? तत्राह-विडम्बनं चरितम् । चरितेन तान् विडम्बयसीत्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा । यथा यथावत् इत्यबन्धने सम्यक्तोक्ता । हि यतः भौमैर्बहुनामरूपिणी भूरपि तैर्न बध्यते, विक्रियां नापाद्यते । ननु सृष्ट्यादिना मे किं नाम प्रयोजनम् ? सर्वजीवहितार्थमित्याहुः-अहो इति । चरितं सृष्ट्यादिकम्, डलयोरेकत्वात् विलम्बनं सर्वजीवानामवलम्बनमित्यर्थः । अन्यत्समानम् ॥१७॥ अथापीति । अपि सृष्ट्याद्यर्थं रज आदिगुणत्रयं बिभर्षि । तथापि काले पालनसमये सत्त्वमेव गुणं बिभर्षि पालयसीत्यर्थः । किमर्थम् ? स्वजनाः साधवस्तेषामभितः सद्धर्मप्रवर्तनादिना गुप्तये रक्षायै अत एव खलानां वधादिना निग्रहाय । सनातनं त्वद्रूपम् । तथा चोक्तं स्कन्धे यमदूतैः (भा०६/१/४०) 'वेदो नारायणः साक्षात्' इति । यद्वा । सनातनं सदा वर्तमानम् । इत्यवश्यपरिपाल्यतोक्ता । 'षणु दाने' सनः सर्वश्रेयोदानम् । तमातनोतीति तथा तम् । अतो वर्णाश्रमाणामात्मा प्रवर्तको भवानेव । यतः परः पुरुषः परमेश्वरः अन्तर्यामितया सर्वेन्द्रियप्रवर्तनेन विचित्रावतारैश्च पाषण्डादि-विघ्ननिरसनेनान्तर्बहिश्च पालकत्वमुक्तम् । सर्वजीवहितार्थमित्येतत्पक्षे । पक्षे च — अथ अतः । अपि एव । अत एव । काले यथाकालम् । सत्त्वं चित्तं बिभर्षि धत्से । किञ्च सत्त्वं सतां विद्यमानतां बिभर्षि । प्रत्यक्षो भवसीत्यर्थः । स्वजना भक्ताः । खलाः अभक्ताः । अत एव वेदपथं च बिभर्षीति ॥१८॥ सनातनत्वमेव दर्शयन्तो विप्र-कुलसम्मानने हेतुमाहुः-ब्रह्मेति द्वाभ्याम् । तपः स्वधर्मः स्वाध्यायो वेदाभ्यासः । संयमो आदिः । तैः कृत्वा उपलब्धं ज्ञातं साधुभिः स्वाध्यायस्य तपोऽन्तर्गतत्वेऽपि पृथगुक्तिः प्रस्तावानुसारेण तदाधिक्यापेक्षया । अन्यत्तैर्व्याख्यातम् । यद्वा । व्यक्तं स्वर्गादि । अव्यक्तं निर्वाणम् । ततः परमुत्कृष्टं श्रीभगवद्भक्त्यादि । तत्तत् साधनमित्यर्थः । यत्र अस्मिन् विषये उपलब्धं प्राप्तम्, 'आयुर्घृतम्' इतिवत् अथवा तप आदिभिर्विशिष्टं ब्रह्म विप्रकुलम् । अन्यत् समानम् ॥१९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

यदीशितव्यः यस्येशितव्यः सः ईश्वरः ईहया गूढः मनुष्यचेष्टया हेत्वभिप्रायो निर्देशः तस्माद्भगवद्विचेष्टितं चित्रमित्यर्थः ॥१६॥ सृजतीति निमित्तत्वमुक्तम् । भौमैरित्युपादानत्वमुक्तम् । भूम्नः भगवतः विडम्बनं मनुष्यचेष्टानुकारः ॥१७-१८॥ ब्रह्म ब्राह्मणकुलं यस्य सः व्यक्तं कार्यम् । अव्यक्तं कारणं यद्वा व्यक्तं शरीरम् अव्यक्तमात्मस्वरूपम् ॥१९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तमेवाह-यदिति । हे विश्वसृजां ब्रह्मादीनामधीश्वर ! तत्त्वविच्छ्रेष्ठा अपि वयं त्वन्मायया विमोहितास्तावत्त्वदभिप्रायं तदाशयात्मकमवगन्तुमसमर्था बभूविमेत्यर्थः । कोऽसावभिप्राय इत्यतस्तं निर्दिशन्ति-यदिति । गूढ ईहयेति सर्वेश्वरोऽपि ईहया गूढः मनुष्यचेष्टयाच्छन्नः ईशितव्यायति ईशितव्यवत् कर्मवश्यवदाचरतीत्यर्थः । यत एवं तस्मादहो भगवतस्तव विचेष्टितं विचित्रमतिचित्रमित्यर्थः । यद्वा । तत्त्वविदुत्तमा अपि तावत्त्वन्मायया विमोहिता इति चित्रम् । ईश्वरोऽपीहया गूढः

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

सन्नीशितव्यायत इति यत् तद्भगवतस्तव चेष्टितमहो विचित्रमित्यर्थः। यदीशितव्याः स तु गूढ ईहयेति पाठे तु यस्येशितव्या वयं ईश्वरो मनुष्यचेष्टयाऽऽच्छन्न इत्यर्थः ॥१६॥ विश्वसृजामधीश्वरेति सम्बोधनाभिप्रेतं कृत्स्नजगत्स्रष्टृत्वं व्यंजयन्तो विस्मयन्ते-अनी इति । अनीहः कर्मायत्तचेष्टारहितः भवानेकः कारणावस्थायामेक एव सन्नात्मनैतज्जगद्बहुधा सृजति बहुधेत्यनेन नामरूपविभागनिबन्धनं बहुत्वविवक्षितम् एक इत्यनेन तु तत्प्रतिसम्बन्ध्येकत्वम् । तदयमर्थः व्याकरिष्यमाणकार्यावस्थचिदचिद्गतनामरूपविभागनिबन्धनं बहुत्वं प्रतिसम्बन्धि तदविभागनिबन्धनैकत्वापन्नचिदचिच्छरीरक एत्वव्यपदेशार्होपादानकारणतया तावदवस्थितो बहुधैतज्जगत्सृजतीति एवञ्चेक इत्यनेनोपादानत्वं फलितं सृजतीति कर्तृत्वनिर्देशान्निमित्तत्वम् आत्मनेत्यनेन स्वस्यैवोपकरणत्वं वदतोऽपकरणान्तरनिरपेक्षत्वम् अवति रक्षति अत्ति संहरते च तथापि सज्ज्यते सृज्यचिदचिद्गतैर्दोषैर्न स्पृश्यत इत्यर्थः। अनेनैवोपादानत्वप्रयुक्तविकाराश्रयत्वप्रसङ्गः परिहृतः। विकाराणां चिदचिद्द्वारक स्तुतो न सृज्यत इति भावः। एकस्यैव सतोऽनेकधापत्तौ दृष्टान्तः यथा भौमैर्भूमिः बहुनामरूपिणीति यथा एक मृद्धौमैर्तद्विकारैर्घटशरावमणिकादिभिर्बहूनि रूपाण्यस्याः सन्तीति तथाभूता तथैकोऽपि भगवान् बहुरूपो बभूवेत्यर्थः। विभू भगवतस्तवेदं चरितं विडम्बनमनुकरणमहो अतिविचित्रमित्यर्थः ॥१७॥ ननु नाहं विश्वसृजामधीश्वरोऽपि तु वसुदेवसुतोऽन्य सर्वैश्वर्यस्यैवं मनुष्यतापत्तिर्न घटत इत्यत आहुः-अथापीति । यद्यपि सर्वेश्वरस्तथापि स्वजनानां स्वभक्तानां साधूनामभिगु परित्राणाय खलानां दुष्कृतां निग्रहाय च सत्त्वं शुद्धसत्त्वमयं रूपं बिभर्षि स्वलीलारूपेणाचारेण सनातनं वेदपथं च विभ पुष्णासि कथम्भूतः परः प्रकृतिपुरुषविलक्षणः पुरुषोऽपि वर्णाश्रमात्मा वर्णाश्रमोपलक्षितजीवात्मेव सन्नित्यर्थः। यद्वैवं वर्णाश्रमात् वर्णाश्रमयुक्तजीवात्मा इव प्रतीयमानोऽपि भवान् परः परमपुरुष एवेत्यर्थः ॥१८॥ यतो वेद-(मयं)पथं बिभर्ष्यत एव ब्रह्म बहु मन्यसे इत्याहुः-ब्रह्मेति द्वाभ्याम्। शुद्धं भ्रमविप्रलिप्सादिपुरुषदोषासंस्पृष्टं ब्रह्म वेदस्ते तव हृदयम् अन्तरङ्गं तद्ब्रह्म विश्वसृ तप इत्यादिना, यत्र यतो वेदात्तप आदिभिः सह सत् परमार्थं व्यक्तं कार्यम् अव्यक्तं कारणं यद्वा व्यक्तं शरीरम् अव्यक्तं आत्मस्वरूपं ततस्ताभ्यां परं विलक्षणं परमात्मस्वरूपं च उपलब्धं यथावदवगतं यत्तत्त्वत्रयात्तप आदि याथात्म्यावेदकं ब्रह्म तत् हृदयमित्यर्थः। तत्र तपोऽनशनादिरूपं स्वाध्यायोऽध्ययनं संयमः वर्णाश्रमानुरूपो धर्मः ॥१९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१२-२०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

अथापीत्यादि। सत्यमिति स परापरत्वेन प्रसिद्धस्त्वं स्वया लीलया स्वजनाभिगुप्तये वेदपथं बिभर्षि वर्णाश्रमात्मा वर्णः क्षत्रियः आश्रमो गृहस्थः तत्र तत्रात्मा यत्नो यस्य 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मविग्रहे।' इत्यादि अ स्वजनानां यादवानां भक्तानां च अभिगुप्तिर्न स्यात्। वस्तुतस्तु भवान् परः पुरुषः ॥१८॥ ब्रह्म ते हृदयमित्यादि। ब्रह्म वेदः हृदयं हृत् अयतीति तथा तव हृद्येव ब्रह्मास्ति त्वमेव वेदवक्ता यत्र त्वयि व्यक्तं कार्यम् अव्यक्तं कारणं सत् वर्तमानं तपःस्वाध्यायसं सह उपलब्धम् कीदृशम् अव्यक्तं शुक्लं शुद्धं ततः परं व्यक्ताव्यक्तयोः परं ब्रह्म त्वय्येवोपलब्धं त्वद्भिन्नम् एतदित्यर्थः ॥१९-

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

अथापीत्यादि। सत्त्वं सपरात्परत्वं स्वलीलया स्वजनाभिगुप्तये वेदपथं बिभर्षि वर्णाश्रमात्मा सन्, अतो भवान् परः पुरुषोत्तम एव ॥१८॥ ब्रह्मणोऽपि परस्त्वमेवेत्याह-ब्रह्म ते हृदयमन्तःकरणरूपम्, हृत् अयते इति हृदयम्। ब्रह्म कीदृशम्? शुद्धं यत्र ब्रह्मणि कार्यमव्यक्तं कारणं च तपआदिभिरुपलब्धं सत् सन्मात्रं ततस्तस्मात् परं परमं पदमेवतदित्यर्थः। यद्वा कार्यमव्यक्तं कारणं ततः परं च यत् सत् ब्रह्म तपः-स्वाध्यायसंयमैर्यत्र त्वयि उपलब्धमतस्त्वय्येव ब्रह्म त्वत्तः परं न भवति

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वयं परमेश्वरोऽपि भगवान् ईशितव्यायते ईहया नरचेष्टया हेतुना गूढः दुर्लक्ष्यः सन् एतदेव विचेष्टितं

यस्येशितव्या वयं स
तो विस्मयन्ते-अनीह
सृजति बहुधेत्यनेन
। तदयमर्थः ।
त्रचिदचिच्छरीरकतया
वं फलितं सृजतीति
त्ति संहरते च तथापि न
राणां चिदचिद्वारकत्वेन
पिणीति यथा एकैव
बभूवेत्यर्थः । विभूम्नो
न तु वसुदेवसुतोऽन्यथा
क्तानां साधूनामभिगुप्तये
तनं वेदपथं च बिभर्षि
र्थः । यद्वैवं वर्णाश्रमात्मा
बिभर्ष्यत एव ब्राह्मणान्
न्तरङ्गं तद्ब्रह्म विशंसन्ति,
व्यक्तं शरीरम् अव्यक्तम्
याथात्म्यावेदकं ब्रह्म तत्तव

ं बिभर्षि वर्णाश्रमात्मा सन्
विग्रहे ।' इत्यादि अन्यथा
त्यमित्यादि । ब्रह्म वेदः तव
वर्तमानं तपःस्वाध्यायसंयमैः
त्रम् एतदित्यर्थः ॥१९-२०॥

सन्, अतो भवान् परः पुरु
। ब्रह्म कीदृशम् ? शुक्लं शु
दमेवतदित्यर्थः । यद्वा
ह्म त्वत्तः परं न भवति ॥१९

व विचेष्टितं

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भवत्परमयशस्करमित्यर्थः । ''भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु'' इत्यमरः ॥१६॥ तवैश्वर्यमनैश्वर्यं च दुर्गमत्वादपारमित्याहुः– अनीह इति । एतत् जगत् बहुविधमात्मना स्वेनैव सृजति भगवानेक एव बहुनामरूपं जगद्भवतीत्यत्र दृष्टान्तः । यथा भूमिरेकापि भौमैः घटपटादिभिः अहो अद्भुतं विभूम्नः पूर्णपरमेश्वरस्यापि तव चरित्रं विप्राराधनादिलक्षणमीशितव्यत्वगमकं विडम्बनम् ईशितव्यस्यानुकरणमेव ॥१७॥ तदनुकरणं च शिष्टपालनदुष्टनिग्रहधर्मस्थापनाद्यर्थमित्याहुः–त्रिभिः । अथापि पूर्णपरमेश्वरत्वेऽपि सत्त्वं शुद्धसत्त्वात्मकं रूपं बिभर्षि स्वलीलया स्वाचरणेन वेदपथं च बिभर्षि । यतो वर्णाश्रमाणामात्मा प्रवर्तकः भवांस्तु परः पुरुषः तादृशत्वत्स्वरूपेषु मध्ये मुख्यः ॥१८॥ यतो वेदस्तव प्रियः इत्याहुः–ब्रह्म वेदाख्यं शुक्लं शुद्धं ते हृदयं यत्र ब्रह्मणि व्यक्तं कार्यमव्यक्तं कारणं ततः परं सन्मात्रं ब्रह्म च तपआदिभिरुपलब्धम् ॥१९॥

गूढार्थदीपिनी

विश्वसृजां दक्षादीनामधीश्वराः तत्त्ववित्सु उत्तमा उपदेष्टारः अपि वयं यन्मायया मोहिताः सन्तः तदभिप्रायं न जानीमः । माया । यत् यस्मात् ईहया नरचेष्टया गूढः सन् भगवान् । ईशितव्यायति दासवत् आचरति सैव । आचारे क्यङ् । निष्कर्षश्चायं च्चेष्टितं विचित्रमतर्क्यमित्यर्थः ॥१६॥ अनीहो निष्क्रियः एकोऽपि यः एतत् जगत् बहुधा आत्मना उपादानभूतेन यथावत् रक्षति संहरते च तथापि न वध्यते । यथा भूमिः भौमैः भूविकारैः घटादिभिः बहुरूपिणी भवति । अतो विभूम्नः परिपूर्णस्य वतः चरित्रं विडम्बनमनुकरणमात्रं न तु तात्त्विकम् लोकशिक्षार्थमेवेत्यर्थः ॥१७॥ जनसङ्ग्रहमेवाहुः अथापीति त्रिभिः । तव जन्मानदि न सम्भवति अथापि त्वं सत्त्वं शुद्धसत्त्वात्मकं वपुः बिभर्षि स्वलीलया स्वाचारेण वेदपथं च बिभर्षि र्माणि च अनुतिष्ठसीति योज्यम् । काले यथावसरम् । यतो भवान् वर्णाश्रमप्रवर्तकः ॥१८॥ ब्रह्म वेदाख्यं ते हृदयमन्तरङ्गम् । कुतः । यत्र ब्रह्मणि व्यक्तं कार्यम् अव्यक्तं कारणं ततः परं सद्रूपं ब्रह्म तप आदिभिः उपलब्धं साक्षात् दृष्टं भवति । तस्मात् वर्तकं ब्रह्मकुलं त्वं सभाजयसि सत्करोषि तत एव च भवान् ब्रह्मण्यानां अग्रणीरुच्यते । कथम्भूतं कुलम् । शास्त्रयोनेः मूलभूतस्य तव सद्धाम श्रेष्ठम् उपलब्धिस्थानम् ॥१९-२०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यदित्यादिपञ्चभिः । विश्वसृजामधीश्वराः ब्रह्मादयश्च विमोहिताः यन्माया नियम्या इत्यर्थः । स मायेशो भवान् ईहया र्घ्यप्रत्युत्थानार्चनस्तुत्यादिरूपया नरचेष्टया गूढः दुर्लक्ष्यः ईशितव्यायति परनियम्यवदाचरति इति यत् तदेव भगवद्विचेष्टितम् विचित्रम् अत्याश्चर्यभूतम् ॥१६॥ यथैकैव कारणभूमिः भौमैः औषध्यादिकार्यरूपै बहुनामरूपिणी भवति तथा एक एव विश्वहेतुः आत्मनोपकरणभूतेन एतत् विश्वं बहुधा नानारूपं सृजत्यवत्यत्ति । कथम्भूतः ? अनीहः मानपदार्थभोगादिचेष्टाशून्यः पूर्णकामत्वात् न बध्यते सर्वात्मत्वात् एवम्भूतस्य विभूम्नः चरित्रम् र्घ्यप्रत्युत्थानार्चनस्तुत्यादिचेष्टितं विडम्बनमनुकरणमात्रम् । लोकशिक्षार्थमित्यर्थः ॥१७॥ एवं यद्यपि स्तकामत्वान्निरीहस्तथापि जनशिक्षार्थं वर्णाश्रमाणामाश्रयः प्रवर्तकः परः पुरुषो भवान् काले तत्तत्समये स्वजनानां जनानामपि गुप्तये रक्षणाय खलानां निग्रहाय च सत्त्वमप्राकृतं शुद्धसत्त्वमयं रूपं बिभर्षि लीलया लोकानुरूपाचाररूपया वेदपथं वेदमार्गं च बिभर्षि ॥१८॥ वेदमार्गस्य सनातनत्वमुपपादयति–ब्रह्मेति । यत्र व्यक्तं कार्यं ततः कार्यात्परं कारणम् अव्यक्तं व्यक्तविलक्षणं च तपआदिभिरुपलब्धं तत् ब्रह्म शब्दब्रह्म ते परब्रह्मणः हृदयं हृद्गतं सृष्टिसंहरवर्जितं र्थः । अनेन सृष्टिपूर्ववर्तिभगवद्गतस्य वेदस्य तन्मार्गस्य च सनातनत्वमुक्तम् । मायावादिव्याख्या यत्र ब्रह्मणि व्यक्तं व्यक्तं कारणं ततः परं सत्सन्मात्रं ब्रह्म चेति । सा निर्मूला ''अथातो ब्रह्मजिज्ञासा'' इत्युक्त्वा तल्लक्षणाकाङ्क्षायां ''जन्माद्यस्य इति सूत्रकारेणोक्तत्वात् जगत्कारणात् परत्वेन चतुर्ष्वप्यध्यायेषु वस्त्वन्तरप्रतिपादनाभावाच्च ॥१९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्र मुनयः द्वेधा निर्णीय वदन्ति-किमयं भगवान् अस्मान् व्यामोहयितुं वदति आहोस्विदन्येषामुपकाराय प्रति वदति तदोत्तरमुच्यत इत्याहुः-यन्माययेति। तत्त्वविदां मध्ये उत्तमाः साक्षात्कारतद्बोधनसमर्थाः अनेन ज्ञानशक्तिर्नि । विश्वसृजामधीश्वरा इति विश्वसृजः कश्यपादयः ये सर्वदा विश्वं सृजन्ति तेषामपि वयमधीश्वराः उपदेष्टारो नियन्तारो वा वयं विमोहिताः विमोहनमाहुः यद्यस्मात् भगवान् गूढः सन् स ईशितव्यायति ईशितवदाचरति सेवकभावं सम्पादयति चेष्टया तथा चेष्टां प्रकटयति यथा लोकः ईशितव्यं जीवमेव मन्यते न त्वीशम् एतादृशं भगवच्चरित्रं श्रुत्वा आश्चर्या आहुः अहो विचित्रं भगवद्विचेष्टितमिति। भगवद्विचेष्टितत्वं तथा करणे अकरणे च हेतुरिति विचित्रता भगवांश्चेत् करोति कुतो वा न करोतीत्युभयत्रापि भगवत्त्वस्य हेतुत्वात् अनीशितृवत् अल्पेशितव्यमपि भगवति नास्ति नापि भगवता कर्तव्यमेवं न कर्तव्यमिति क्वचिन्निर्धारोऽस्ति तस्मादलौकिकत्वात्सर्वमेव भगवच्चरित्रं विचित्रम् ॥१६॥ सर्वस्यालौकिक सहजमपि भगवच्चरित्रं परस्परविरुद्धमित्याह-अनीह इति। लोके ईहासहित एव घटादिकं सृजति। मन्त्रयोगादिनापि मानसीक्रियामनुसन्धत्ते। भगवांस्तु अनीह एव तत्राप्येकः एतच्चान्येन मनसाप्याकलयितुमशक्यम्। तच्च बहुधा ब्रह्माण्ड विसदृशानेव सृजतीति तत्राप्यात्मनैवाविक्रियमाणेन एवमपि कुर्वन् तेन कर्मणा न बाध्यते करोति च यथा विकृतम् सा सृष्टिस्तादृशीत्येवेति नाश्चर्यं स्यात्। तदर्थमाह-यथा भौमैर्हि भूमिः भौमैरेव विकारैर्भूमिर्बहुनामरूपिणी भवति भगवान् स्वयमेव नानाविधत्वमापद्यते अविकृतत्वादयस्त्वधिकाः। अत एव भगवतः अनुकरणमपि विचित्रं सर्वमेवानु वा ॥१७॥ एवमघमानत्वमुपपाद्य श्रोतॄन् प्रत्युपदेशक्षे वक्तुमुचितमिति समर्थयन्ते-अथापीति। काले तत्तदवसरे भक्तजनाः तेषामभिगुप्तये रक्षार्थं सत्त्वं बिभर्षि। यद्यपि सर्वजनपालनार्थं सत्त्वं धृतमेव तथापीदं तस्मादतिरिक्तं जायन्ते पूर्वमेव गुणानां भेदा निरूपिता सच्चिदानन्तस्य प्रकृतेः अहङ्कारस्य बुद्धेः कालस्य चेति। तत्रेदं सत्त्वं सद्रूपस्य च भक्ता रक्षिता भवन्ति। किञ्च खलनिग्रहाय च दैत्यानां नाशाय च सर्वपालकं तु तेषां न नाशकं किन्तु चकारादन्यान्यपि भक्तिप्रवर्तनादीनि सङ्गृह्यन्ते। तस्य सत्त्वस्य स्वरूपे स्थितस्य स्वरूपधर्मस्य कथं ग्रहणमित्याकांक्षा स्वलीलयेति। किञ्च तेन सत्त्वेन वर्णाश्रमात्मा भूत्वा पुरातनं वेदपथं पालयसि बिभर्षि वा रक्षार्थं हेतुः पुरातनमिति बहून्यथा कर्तव्यं स्यात् न तु वर्णाश्रमात्मा पुरुषः "ब्राह्मणोस्यमुखमासीत्" इति श्रुतेः। तत्राह-भगवानेव पुरुषः अनेन ब्राह्मणानां त्वद्रूपत्वात् स्वस्य स्वयं सर्वं सम्भवतीति वचनं समर्थितम् ॥१८॥ एवं साधारण्येन वर्णाश्रमा ब्राह्मणे विशेषमाहुः-ब्रह्म ते हृदयमिति। ब्रह्म ब्राह्मणजातिः ते हृदयमन्तरङ्गा शक्तिः ताश्च शक्तयः त्रिविधा विशेषमाह-शुक्लमिति। तस्य माहात्म्यमाह-तपःस्वाध्यायसंयमैः तदङ्गैः कृत्वा यत्र शुक्ले हृदये सदभिव्यक्तं अभिव्यक्तं भवति अव्यक्तं च जगत्कारणभूतम् अक्षरात्मकं चकारादात्मस्वरूपं च ततः परं पुरुषोत्तममानन्दरूपं वानप्रस्थे स्वाध्यायो ब्रह्मचर्ये संयमः पारमहंस्ये आश्रमत्रय एव सदाद्यभिव्यक्तिरिति नियमः सूचितः ॥१९॥

श्रीसुबोधिनीसारः

यस्य मायया तत्त्ववित्सूत्तमा वयं विश्वसृजां लोकपालानामधीश्वरा ब्रह्माद्या विमोहिताः यत् यत ईहया गूढो भवान् ईशितव्यायति अनीश्वरवत्कर्माचरति अहो भगवतो विचेष्टितं विचित्रमतर्क्यम् ॥१६॥ स्वरूपैणेकोऽनीहोऽक्रियो बहुधा एतद्विश्वं सृजति अत्ति संहरति न वध्यते तद्धर्मैर्नाज्यते भौमैर्घटादिभिर्बहु भूमिर्यथा बहुधा अहो विभूमनस्तव चरितमनुकरणमात्रम् ॥१७॥ अथापि वस्तुत एवं सत्यपि काले समये भक्तानाम् अभिगुप्तये रक्षार्थं सत्त्वं सनातनं वेदपथं पुराणं वेदमार्गं बिभर्षि स्वलीलया स्वेच्छयैव खलानां च वर्णाश्रमरूपः परः पुरुषो भवान् ॥१८॥ ब्रह्म वेदाख्यं शुक्लं शुद्धसत्वात्मकं ते तव हृदयं भवति। यत्र कार्यमव्यक्तं कारणं ततः परं सत् उपलब्धं तपः स्वाध्यायसंयमैः ॥१९॥

तदाह-य
मध्ये उत्तमा अपि व
। किं तच्चरितं तत्राह
उक्तमेव स्पष्टयन्ति-
चैतत् जगद्बहुधा सृज
जीववद्बन्धनं न प्राप्न
तस्य विभूम्नो महत्तम
ननु एवम्भूतस्यासका
कर्मबन्धनरहितस्यास
खलानां दुष्कृतां निग्र
स्वलीलया स्वाचारेण
अव्यक्तं कारणं सत् स
तस्मादेव हे ब्रह्मन् ! त
शास्त्रद्वारैव इत्याशयेना
इति श्रुतेः 'तपआदिभि
संयम इन्द्रियादिनिग्रहः,

यदिति। विश्वस
मायया मोहितास्तदभिप्रा
तद्भाव आर्षः। तस्य
तद्रहितोऽपि निरासक्तिर्नि
रक्षति अत्ति संहरते च त
स्वकार्यैर्घटादिभिर्भूमिर्यथा
चरितमहो विडम्बनम् अ
कर्मबन्धनरहितस्यासकाम
दुष्कृतां निग्रहाय च का
स्वाचारेण सनातनं वेदपथं
अव्यक्तं कारणं सत् सत्ता
ब्राह्मणकुलं यस्मात् शास्त्रं
धाम उपलब्धिस्थानं ब्रह्मकु

तदेव दर्शयन्ति-य
वयमपि यस्य तव मायया वि

न्येषामुपकाराय यद्यस्मान्
अनेन ज्ञानशक्तिर्निरूपिता
देष्टारो नियन्तारो वा तेऽपि
वकभावं सम्पादयति ईहया
च्चरित्रं श्रुत्वा आश्चर्यान्विष्ट
वत्रता भगवांश्चेत् किमित्येवं
ति नास्ति नापि भगवता एवं
॥१६॥ सर्वस्वालौकिकत्वाय
ति । मन्त्रयोगादिनापि सृजन्
। तच्च बहुधा ब्रह्माण्डकोटिषु
ति च यथा विकृतम् अन्यथा
र्बहुनामरूपिणी भवति तथा
ामपि विचित्रं सर्वमेवानुकरणं
त । काले तत्तदवसरे स्वजना
पीदं तस्मादतिरिक्तं येनावतार
ति । तत्रेदं सत्त्वं सद्रूपस्य तेनैव
ं न नाशकं किन्तु पालकमेव
य कथं ग्रहणमित्याकांक्षायामाह-
र्थं हेतुः पुरातनमिति नूतननिर्माणे
तत्राह-भगवानेव पुरुषः परः ।
साधारण्येन वर्णाश्रमाणामुक्त्वा
ताश्च शक्तयः त्रिविधा भवन्तीति
क्ले हृदये सदभिव्यक्तं सद्रूपं ब्रह्म
परं पुरुषोत्तममानन्दरूपं वा तपो
मः सूचितः ॥१९॥

मोहिताः यत् यत ईहया नरचेष्टितेन
त्रचित्रमतर्क्यम् ॥१६॥ आत्मना
ज्यते भौमैर्घटादिभिर्बहुनामरूपिणी
ुवं सत्यपि काले समये स्वजनानां
स्वेच्छयैव खलानां पापिनां विग्रहाय
ाव हृदयं भवति । यत्र ब्रह्मणि व्यक्तं

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदाह-यदिति । विश्वसृजां दक्षकश्यपादिप्रजापतीनामप्यधीश्वराः तत्त्वोपदेशेन नियन्तारः । तत्र हेतुमाह-तत्त्वविदां मध्ये उत्तमा अपि वयं यस्य मायया मोहितास्तदभिप्रायं न जानीमस्तस्य भगवतो विचेष्टितमहो विचीत्रम् अतिदुर्ज्ञेयमित्यन्वयः । किं तच्चरितं तत्राह-ईहया मनुष्यचेष्टया गूढः सन् यत् ईशितव्यायति भवान् सेवकवदाचरति तदिति ॥१६॥ ईश्वरत्वं दर्शयन्त उक्तमेव स्पष्टयन्ति-अनीह इति । ईहा इच्छा भोगासक्तिस्तद्रहितोऽपि स्वयमेकोऽपि यः आत्मना उपादानभूतेन साधनभूतेन चैतत् जगद्बहुधा सृजति अवति रक्षति अत्ति संहरते च । तथापि न बध्यते मया कृतं ममेदमित्यहङ्काराभावात्तत्तत्कर्मणा जीववद्बन्धनं न प्राप्नोतीत्यर्थः । एकस्य बहुरूपत्वे दृष्टान्तमाहुः-भौमैः स्वकार्यघटादिभिर्भूमिर्यथा बहुनामरूपिणी तथेति । तस्य विभूम्नो महत्तमस्येदं मनुष्यभावस्वीकारेण ब्राह्मणसन्माननादि चरितमहो विडम्बनम् अत्यनुकरणमात्रमित्यर्थः ॥१७॥ ननु एवम्भूतस्याप्तकामस्य व्यर्थानुकरणेनापि किम् इत्याशङ्क्याहुः-अथापीति । यद्यपि भवान् परः पुरुषः पुरुषोत्तमोऽतस्तव कर्मबन्धनरहितस्याप्तकामस्य स्वप्रयोजनाभावाज्जन्मादि न सम्भवति, तथापि स्वजनानां स्वभक्तानामभिगुप्तये परित्राणाय खलानां दुष्कृतां निग्रहाय च काले तत्तदवसरे सत्त्वं शुद्धसत्त्वमयं वपुर्बिभर्षि । तथा वर्णाश्रमाभिमानी सन् लोकशिक्षार्थं स्वलीलया स्वाचारेण सनातनं वेदपथं च बिभर्षि वेदोक्तानि कर्माणि चानुतिष्ठसि ॥१८॥ किञ्च यत्र ब्राह्मणकुले व्यक्तं कार्यम् अव्यक्तं कारणं सत् सत्तामात्रं ततः कार्यकारणतः परं ब्रह्म चोपलब्धं भवति तद्ब्रह्म ब्राह्मणकुलं यस्मात्ते तव हृदयम् अन्तरङ्गं तस्मादेव हे ब्रह्मन् ! तदात्मनः सद्धाम उपलब्धिस्थानं ब्रह्मकुलं त्वं सभाजयसि सम्पूजयसीति द्वयोरन्वयः । तदुपलब्धिश्च शास्त्रद्वारैव इत्याशयेनाहुः-शास्त्रयोनेरिति । शास्त्रं वेद एव योनिः प्रमितिकरणं यस्मिंस्तस्येति । 'तपसा ब्रह्म विजिज्ञासस्व' इति श्रुतेः 'तपआदिभिः शुद्धस्यैव यथार्थज्ञानं भवति, नान्यस्य' इत्याशयेनाहुः-तपः अनशनादि, स्वाध्यायो वेदाध्ययनम्, संयम इन्द्रियादिनिग्रहः, तैः शुक्लं शुद्धमिति । तत्तस्माद्ब्राह्मणसन्माननात् ब्रह्मण्यानामग्रणीर्मुख्यः ॥१९-२०॥

अन्वितार्थप्रकाशिका

यदिति । विश्वसृजां दक्षकश्यपादिप्रजापतीनामप्यधीश्वराः तत्त्वोपदेशेन नियन्तारः तत्त्वविदां मध्ये उत्तमा अपि वयं यस्य मायया मोहितास्तदभिप्रायं न जानीमः । ईहया मनुष्यचेष्टया गूढः सन् यत् ईशितव्यायति भवान् सेवकवदाचरति । आचारे क्यङ् तङभाव आर्षः । तस्य भगवतो विचेष्टितमहो विचित्रम् अतिदुर्ज्ञेयम् ॥१६॥ अनीह इति । ईहा इच्छा भोगासक्तिः चेष्टा वा तद्रहितोऽपि निरासक्तिर्निष्क्रियो वाऽपि स्वयमेकोऽपि यः आत्मना उपादानभूतेन साधनभूतेन चैतत् जगद्बहुधा सृजति अवति रक्षति अत्ति संहरते च तथापि न बध्यते । मया कृतं ममेदमित्यहङ्काराभावात्तत्तत्कर्मणा जीववद्बन्धनं न प्राप्नोतीत्यर्थः । भौमैः स्वकार्यैर्घटादिभिर्भूमिर्यथा बहुनामरूपिणी भवति तथेति तस्य विभूम्नो महत्तमस्येदं मनुष्यभावस्वीकारेण ब्राह्मणसम्माननादि चरितमहो विडम्बनम् अत्यनुकरणमात्रं न तु तत्त्वमित्यर्थः ॥१७॥ अथापीति । यद्यपि भवान् परः पुरुषः पुरुषोत्तमोऽतस्तव कर्मबन्धनरहितस्याप्तकामस्य स्वप्रयोजनाभावाज्जन्मादि न सम्भवति तथापि स्वजनानां स्वभक्तानामभिगुप्तये परित्राणाय खलानां दुष्कृतां निग्रहाय च काले तत्तदवसरे सत्त्वं शुद्धसत्त्वमयं वपुर्बिभर्षि तथा वर्णाश्रमाभिमानी सन् लोकशिक्षार्थं स्वलीलया स्वाचारेण सनातनं वेदपथं च बिभर्षि वेदोक्तानि कर्माणि चानुतिष्ठसि ॥१८॥ ब्रह्मेति युग्मम् । यत्र ब्राह्मणकुले व्यक्तं कार्यम् अव्यक्तं कारणं सत् सत्तामात्रं ततः कार्यकारणतः परं ब्रह्म चोपलब्धं भवति । तत् तपःस्वाध्यायसंयमैः शुक्लं शुद्धं तद्ब्रह्म ब्राह्मणकुलं यस्मात् शास्त्रं वेद एव योनिः प्रमितिकारणं यस्मिंस्तस्य ते तव हृदयम् अन्तरङ्गं तस्मादेव हे ब्रह्मन् ! तदात्मनः सत् धाम उपलब्धिस्थानं ब्रह्मकुलं त्वं सभाजयसि सम्पूजयसि तत्तस्माद्ब्राह्मणसम्मानात् भवान् ब्रह्मण्यानामग्रणीर्मुख्यः ॥१९-२०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदेव दर्शयन्ति-यन्माययेति ॥ विश्वसृजाम् अधीश्वरा पूज्याः तत्त्ववित्सु चेतनाचेतननियामकपरमात्मयाथार्थ्यज्ञेषु उत्तमा अप्यपि यस्य तव मायया विमोहिताः तां मायामाहुः-यदिति यत् यस्मात् ॥ ईहया मनुष्यवदाचरणेन गूढो गुप्तः सन् ईशितव्यायति

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भवानसमर्थजनवदाचरति परस्मैपदमार्षम्। समर्थस्यैवं कथं तत्राहुः-अहो इति विचित्रं महतामपि तर्कागोतरम् ॥१६॥ अतस्तस्य परमेश्वरत्वमाहुः-अनीह इति ॥ अनीहः सृष्टेः पूर्वमक्रियः एकः चेतनाचेतनानामेक एव नियामकः भवान् ॥ आत्मना विकसितान्तर्यामिशक्त्या बहुधा सृष्ट्यादिकर्तृब्रह्मादिक्षेत्रज्ञेषु तत्तत्कर्माणि प्रकाशयितुं बहुप्रकारः सन् ॥ एतद् देवमनुष्यादिरूपेणनानाविधं विश्वं प्रकृतेः सकाशात् क्षेत्रज्ञानां यथाकर्म सृजति ॥ तेन कर्मणा भवान्न बध्यते ॥ प्रकृतितो नानाविधसृष्टे दृष्टान्तः-भौमैः कुलालकृतैर्घटादिविकारैः घटादिबहुनामरूपिणी यथा भूमिर्भवति तथा ईश्वरकृतैर्देवमनुष्यतिर्यगादिविकारैः देवादिबहुनामरूपिणी प्रकृतिर्भवति तदुक्तं श्रुतौ "अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपामिति" एवम्भूतस्य विभूम्नः परमेश्वरस्य तव चरितम् इदं नरचेष्टितम्। अहो इति आश्चर्यं विडम्बनम् अनुकरणमात्रम् ॥१७॥ अहो मनुष्यादिसमानानुकरणे मम किं प्रयोजनमिति चेत्तत्राहुः-अथेति। लोकत्रयेण काले "यदा यदा हि धर्मस्य ग्लानिर्भवति भारते"त्युक्ते समये स्वजनानामभिगुप्तये तेषाम् आसमन्ताद्भावेन एकान्तिकधर्मरक्षणाय सतः परब्रह्मणो भाव आविर्भावः सत्त्वं सच्चिदानन्दमयं वपुस्तं बिभर्षि सर्वजनदृश्यं करोषि वर्णाश्रमात्मा तद्धर्मस्थापको भवान् स्वलीलया स्वाचरणेन वेदपथं च बिभर्ति ॥१८॥ वेदपथरक्षणाय ब्राह्मणसन्मानं त्वं करोषीत्याहुर्ब्रह्मेति। शुक्लं शुद्धं ब्रह्म वेदपुराणसंज्ञं ते तव हृदयं हृदयाभिप्रायरूपमस्ति यत्र ब्रह्मणि व्यक्तं कार्यरूपं ब्रह्माण्डम् अव्यक्तं कालप्रकृतिपुरुषाख्यं कारणं च ततः परं सर्वोत्कृष्टं सत् परं ब्रह्म चैतत्त्रिकं वर्णितमस्ति तत् तपःस्वाध्यायसंयमैः कृत्वा ब्राह्मणैः उपलब्धं ज्ञातम् ॥१९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यदूचुस्तदेवाह ॥ यदिति ॥ हे विश्वसृजां ब्रह्मादीनामधीश्वर! तत्त्वविदुत्तमास्तत्त्वविच्छ्रेष्ठाः अपि वयं यन्मायया यस्य तव मायया विमोहिताः त्वदभिप्रायमवगन्तुमसमर्था बभूविमेत्यर्थः। कोऽसावभिप्राय इत्यतस्तं निर्दिशन्ति यदिति। सर्वेश्वरोऽपि भगवान् भवानिति शेषः। ईहया मनुष्यचेष्टया गूढश्छन्नः सन् ईशितव्यायति ईशितव्यवत् कर्मपरवश्यवदाचरतीत्यर्थः। यद्यतः एवं तस्मात् अहो भगवद्विचेष्टितं भगवतस्तव विचेष्टितं विचित्रमत्याश्चर्यकारकम्। भातीति शेषः। यद्वा। तत्त्वविदुत्तमा अपि वयं तावत्त्वन्मायया मोहिता इति चित्रमीश्वरस्त्वमपि ईहया गूढः सन्नीशितव्यायतीति यद्भगवतस्तव चेष्टितमहो विचित्रमित्यर्थः। 'यदीशितव्याः स तु गूढ ईहया' इति पाठे यस्येशितव्या वयं स ईश्वरस्त्वं मनुष्यचेष्टयाच्छन्न इत्यर्थः ॥१६॥ विश्वसृजामधीश्वरेति सम्बोधनाभिप्रेतं कृत्स्नजगत्स्रष्टृत्वं व्यंजयन्तो विस्मयन्तो ह्यूचुः ॥ अनीह इति ॥ अनीहः कर्मायत्तचेष्टारहितः एकः भवान् कारणावस्थायामेक एव विद्यमानः संस्त्वमित्यर्थः। आत्मना एव एतज्जगत् बहुधा सृजति। बहुधेत्यनेन नामरूपविभागनिबन्धनं बहुत्वं विवक्षितम्। एक इत्यनेन तु तत्प्रतिसम्बन्ध्येकत्वं तदयमर्थः। व्याकरिष्यमाणकार्यावस्थाचिदचिद्गत-नामरूपविभागनिबन्धनबहत्वप्रतिबन्धितदविभागनिबन्धनैकत्वापन्नचिदचिच्छरीरकतया एवत्वव्यपदेशार्ह उपादानकारणतया तावदवस्थितो भवान् बहुधैतज्जगत्सृजतीति। एवं च एक इत्यनेनोपादानत्वं फलितम्। सृजतीति कर्तृत्वनिर्देशान्निमित्तत्वं च। आत्मनेत्यनेन स्वस्यैवोपकरणत्वं वदता उपकरणान्तरनिरपेक्षत्वं च सूचितम्। अवति रक्षति अत्ति संहरते च। अथापि न बध्यते सज्जते। सृज्यचिदचिद्गतैर्दोषैर्न स्पृश्यते इत्यर्थः। अनेन अनेकोपादानत्वविकाराश्रयत्वयोः प्रसङ्गः परिहृतः विकाराणां चिदचिद्द्वारकत्वेन स्वतो न सज्जत इति भावः। एकस्यैव सतोऽनेकधापत्तौ दृष्टान्तः। यथा भौमैः पदार्थैः भूमिः बहुनामरूपिणी यथा एका एव मृत् भौमैस्तद्विकारैर्घटशरावमणिकादिभिर्बहूनि नामानि रूपाणि चास्याः सन्तीति तथाभूता तथा एकोऽपि भवान् बहुरूपो बभूवेत्यर्थः। एवं विभूम्नो भगवतस्तवेदं चरितं विडम्बनमनुकरणम् हि। अहो विचित्रमित्यर्थः ॥१७॥ ननु त्वं विश्वसृजामधीश्वरोऽपि तु वसुदेवसुतोऽन्यथा सर्वेश्वरस्यैवं मनुष्यत्वापत्तिर्न घटत इत्यत आहुः ॥ अथापीति ॥ अद्यपि त्वं सर्वेश्वरः भवस्यथापि काले स्वजनानां स्वभक्तानां साधूनामभिगुप्तिः परित्राणं तस्यै खलानां दुष्कृतीनां निग्रहः सम्पीडनं तस्मै च सत् शुद्धसत्त्वमयरूपं बिभर्षि। परः प्रकृतिपुरुषविलक्षणः पुरुषः भवन् वर्णाश्रमात्मा वर्णाश्रमोपलक्षितजीवात्मा इव सन्निवेशं

स्वलीलया स्वलीलारूपेण
भवान् परः पुरुष एवेत्यथ
ब्रह्मेति ॥ शुक्लं शुद्धं पुरु
यत्र वेदे वेदद्वा स्वाध्यायसं
उपलब्धं यथावदवगतं जाय
उपलब्धुमुपलभ्यते इत्यर्थः
स्वाध्यायोऽध्ययनं संयमो व

मुनिवर मधुर वचन
मायमसे तत्त्वज्ञानियोंमें श्रेष्
सर्वज्ञ इश्वर होते हुए मनुष्य
आपकी लीला अत्यन्त विचि
पाषाण घट-पट आदि द्वारा
रूपमें वह पृथ्वी ही है, वैसे
ही ईस जगत का विश्व का नि
कर्मयों से लिप्त नहीं होते अ
यह चरित्र लीला नहीं तो औ
से पर हो स्वयं परब्रह्म हो एवं
दुष्टोंका विनाश के लिये विश्
सनातन वैदिक मार्गकी रक्षा व
॥१८॥ ब्राह्मण मेरा हृदय है अ
हृहदयमें मेरा साकार निराकार

तस्माद् ब्रह्मकुलं [१]'ब्रह्मन्
अद्य नो जन्मसाफल्यं
नमस्तस्मै भगवते कृ
न यं विदन्त्यमी भूपा

तस्मात्, ब्रह्मन्, शास्त्रयोनेः,
जन्मसाफल्यम्, विद्यायाः, तपसः, दृशः
भगवते, परमात्मने, कृष्णाय, तस्मै, न
कालम्, च, ईश्वरम्, यम्, न, विदन्ति।

---

१. स्थानं शास्त्रयोने-वीर. । २. यः सर्वास
निःश्रेयसां-च. पु. टी. ;यदेतच्छ्रे यसां-वीर.

तामपि तर्कागोतरम् ॥१६॥
यामकः भवान् ॥ आत्मना
हुप्रकारः सन् ॥ एतत
ति ॥ प्रकृतितो नानाविधसृष्टै
र्दैवमनुष्यतिर्यगादिविकारैः
सरूपामिति" एवम्भूतस्य
हो मनुष्यादिसमानानुकरणे
वति भारते"त्युक्ते समये
वः सत्त्वं सच्चिदानन्दमयं
वेदपथं च बिभर्ति ॥१८॥
हृदयाभिप्रायरूपमस्ति यत्र
ब्रह्म चैतत्त्रिकं वर्णितमस्ति

पि वयं यन्मायया यस्य तव
न्ति यदिति । सर्वेश्वरोऽपि
दाचरतीत्यर्थः । यद्वतः एवं
। तत्त्वविदुत्तमा अपि वयं
ष्टितमहो विचित्रमित्यर्थः ।
।१६॥ विश्वसृजामधीश्वरेति
त्तचेष्टारहितः एकः भवान्
न नामरूपविभागनिबन्धनं
कार्यावस्थाचिदचिद्गत-
प्रदेशार्ह उपादानकारणतया
कर्तृत्वनिर्देशान्निमित्तत्वं च ।
हरते च । अथापि न बद्ध्यते
सङ्गः परिहृतः विकाराणां
दार्थैः भूमिः बहुनामरूपिणी
भूता तथा एकोऽपि भगवान्
मित्यर्थः ॥१७॥ ननु नाहं
ति ॥ अद्यपि त्वं सर्वेश्वर एव
ः सम्पीडनं तस्मै च सत्त्वं
जीवात्मा इव सन्नित्यर्थः ।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वलीलया स्वलीलारूपेणाचारेण सनातनं वेदपथं च बिभर्षि पुष्णासि । यद्वा । वर्णाश्रमात्मा जीव इति प्रतीयमानोऽपि भवान् परः पुरुष एवेत्यर्थः ॥१८॥ यतो वेदमयं पथं बिभर्ष्यत एव ब्राह्मणान् बहु मन्यस इत्याहुः ब्रह्मेति द्वाभ्याम् ॥ [illegible] ॥ शुक्लं शुद्धं पुरुषदोषासंस्पृष्टमेवेत्यर्थः । ब्रह्म वेदः ते तव हृदयमन्तरङ्गम् । तद्ब्रह्म विशिंषन्ति तप इत्यादिना । त वेदे वेदद्वा स्वाध्यायसंयमैः सह तपस्तपःस्वरूपं सत्परमार्थं व्यक्तं कार्यम् अव्यक्तं कारणं ततः परं परमात्मस्वरूपं च उपलब्धं यथावदवगतं जायते । यद्वा । व्यक्तं शरीरम् अव्यक्तमात्मस्वरूपं ततस्ताभ्यां परं विलक्षणं सत्परमात्मस्वरूपं च उपलब्धुमुपलभ्यते इत्यर्थः । एवं तपआदैर्याथात्म्यावेदकं यत् ब्रह्म वेदात्मकं तत्तव हृदयमित्यर्थः । तत्र तपोऽनशनादिकं स्वाध्यायोऽध्ययनं संयमो वर्णाश्रमानुरूपो धर्मः ॥१९॥

कृष्णप्रिया

मुनिवर मधुर वचनामृत करने लगे ! हे भगवन् हे नाथ ! आपकी माया अत्यंत विलक्षण है । आपकी मायासे तत्त्वज्ञानियोंमें श्रेष्ठ प्रजापतियोंके अधिश्वर मारीचि आदि पितामह हमलोग मुग्ध हो रहे है । आप स्वयं सर्वज्ञ इश्वर होते हुए मनुष्य जैसी कृतियोंसे अपने को छिपाये रखकर जीव के समान व्यवहार करते है । नाथ आपकी लीला अत्यन्त विचित्र है और आश्चर्यपूर्ण है ॥१६॥ भगवन् ! जैसे यह पृथ्वी अपने विकारों - वृक्ष पाषाण घट-पट आदि द्वारा अनेक नाम-रूप ग्रहण कर लेती है लेकिन भिन्न नाम रुप होने पर भी वास्तविक में वह पृथ्वी ही है, वैसे ही आप एच चेष्टाहीन होने पर भी आप विविध रुप धारण कर लेते है और स्वयं इस जगत का विश्व का निर्माण रक्षण और संहार करत है । यद्यपि आप यह सब करते हुए भी इन रचन आदि कार्यों से लिप्त नहीं होते आप नो सजातीय-विजातीय-स्वगत मेदरहित एकरस और अनन्त है । उसका-आपका चरित्र लीला नहीं तो और क्या है ? महाराज ! धन्य है आपकी यह लीला ॥१७॥ हे नाथ ! आपतो प्रकृति से पर हो स्वयं परब्रह्म हो एवं परमात्मा हो फिर भी मौका आने पर निज अनन्य भक्त जनकी रक्षा के लिये और दुष्टोंका विनाश के लिये विशुद्ध सत्वमय श्रीविग्रहको प्रकट करते हो । और अपनी लोकोत्तर लीला के द्वारा सनातन वैदिक मार्गकी रक्षा करते है, कारणकि सभी वर्ण और सभी आश्रमोंके रुपमें आप स्वयं ही प्रकट है ॥१८॥ ब्राह्मण मेरा हृदय है अथवा वेद मेरा हृदय है तपः स्वाध्याय और संयम अंगोसे वेदोमें अथवा तो विशुद्ध हृदयमें मेरा साकार निराकार रुप और दोनोंके अधिष्ठान स्वरूप परब्रह्म परमात्माका साक्षत्कार होता है ॥१९॥

तस्माद् ब्रह्मकुलं [1]ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः । सभाजयसि [2]सद्धाम तद् ब्रह्मण्याग्रणीर्भवान् ॥२०॥
अद्य नो जन्मसाफल्यं विद्यायास्तपसो [3]दृशः । त्वया संगम्य सद्गत्या [4]यदन्तः श्रेयसां परः ॥२१॥
नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे । स्वयोगमाययाच्छन्नमहिम्ने परमात्मने ॥२२॥
न यं विदन्त्यमी भूपा एकारामाश्च वृष्णयः । मायाजवनिकाच्छन्नमात्मानं कालमीश्वरम् ॥२३॥

कर्दमक्षमा

तस्मात्, ब्रह्मन्, शास्त्रयोनेः, त्वम्, आत्मनः, सद्धाम, सभाजयसि, भवान्, तत्, ब्रह्मण्याग्रणीः ॥२०॥ अद्य, नः, जन्मसाफल्यम्, विद्यायाः, तपसः, दृशः, त्वया, सङ्गम्य, सद्गत्या, यदन्तः, श्रेयसां, परः ॥२१॥ स्वयोगमायाच्छन्नमहिम्ने, अकुण्ठमेधसे, भगवते, परमात्मने, कृष्णाय, तस्मै, नमः ॥२२॥ छएकारामाः, अमी, भूपाफ, च, वृष्णयः, मायाजवनिकाच्छन्नम्, आत्मानम्, कालम्, च, ईश्वरम्, यम्, न, विदन्ति ॥२३॥

---

[1] स्वामं शास्त्रयोने-वीर. । २. यः सर्वास्तस्माद्ब्रह्माग्र-गो. प्रे. टी. ; सद्धाम तद्ब्रह्मण्यगुणो भवान्-विज. । ३. दृशोः-वीर. । ४. यस्त्वं श्रेयसां-च. पु. टी. ;यदेतच्छ्रे यसां-वीर. ; संगत्या यत्त्वं नः श्रेयसां परः-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्माद्वेदहृदयत्वाद्वेदप्रवर्तकं ब्राह्मणकुलं शास्त्रयोनेर्वेदप्रमाणकस्य तव सद्धाम श्रेष्ठमुपलब्धिस्थानं सभाजयसि सम्पूजयसि तत्तस्मादेव कारणात्त्वं ब्रह्मण्यानामग्रणीर्मुख्यस्तत्प्रवर्तकः सन् कर्माचरसीत्यर्थः ॥२०॥ तस्मादीश्वरस्य तवेदं जनसङ्ग्रहमात्रं वयं तु तव सङ्गत्या कृतार्था इत्याहुः-अद्येति षड्भिः । सतां गत्या त्वया सङ्गम्य सङ्गं प्राप्य यद्यस्मात्त्वं श्रेयसां परोऽवधिः ॥२१-२२॥ एकस्मिन्नेव स्थाने आरामो येषां तेऽपि कालं सृष्ट्यादिकारणम् ईश्वरं नियन्तारम् ॥२३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

उपलब्धिस्थानं ब्राह्मणकुलम् । ब्राह्मणकुले एव त्वं लभ्यसेऽन्येषामपि तवोपलब्धिर्ब्राह्मणद्वारैव तस्यैवोपदेशाधिकारात् । "ब्राह्मणस्यैवाधिकारो धर्ममात्रोपदेशने" इति संहितोक्तेः । तत्तस्माद्ब्राह्मणकुलसभाजनादेव तत्प्रवर्तको वेदमार्गप्रवर्तकः । इत्यर्थ इति-

"यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥"

इति श्रीमुखोक्तेरिति भावः ॥२०॥ यतस्त्वं वेदप्रवर्तकस्तस्मादित्यर्थः । गत्या प्राप्येन । न केवलं जन्मन एव साफल्यं किन्तु विद्यादेरपीत्याह-विद्याया इति ।

"सा विद्या तन्मतिर्यया । तत्तपो यद्धरेः प्रियम् । तदेव यत्पश्यति तद्धि चक्षुः ।" इत्याद्युक्तेः ।

साफल्यमिति समासान्तर्गतमप्यन्यत्रान्वेति "भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्" इतिवत् । श्रेयसां कल्याणानां 'श्रेयो मुक्तौ शुभे धर्मेऽतिप्रशस्ते च वाच्यवत्' इति मेदिनी । परोऽवधिः । "**श्रेयसामिह सर्वेषामात्मा ह्यवधिरर्थतः ।**" इत्युक्तेः ॥२१॥ महिमा स्वरूपम् ॥२२॥ आराम आवासः "आरामो वासनिलये क्रीडायाश्च वने तथा ।" इति कोशात् । यं कृष्णम् ॥२३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु भवत्वेवमपि युष्मान् कथं पूजयामि तत्राहुः-तस्मादिति । तदेवं लोकसङ्ग्रह इति यथोपक्रान्तं तथैवोपसंहृतमिति भावः ॥२०॥ भवत्वेवं नाम किमस्माकमचिन्त्यचिन्तनेन सम्प्रति स्वहृदयानन्दमेव निवेदयामेत्याशयेनाहुः-अद्येति । अद्येत्यजहल्लक्षणया एतादृशे स्वयं भगवतो भवतः प्रकाशसमये अवतीर्णौ किलाद्य मे इति वक्ष्यमाणश्रीदेवकीवचनात् एवमद्य नोऽस्माकं जन्मसाफल्यं वृत्तं तथास्माकं विद्यायाः वेदाद्यभ्यासस्य तपसस्ततो जातस्य परोक्षज्ञानस्य दृशश्चापरोक्षज्ञानस्य जन्मसाफल्यं जातं किं कृत्वा त्वया सतां विदुषां गत्या परमाश्रयेण सह सङ्गत्य मिलित्वा ननु भवन्तो ब्रह्मानुभविनः विचित्रमदाविर्भाव द्रष्टारश्च कथं ममैवाविर्भावसमये जन्मादिसाफल्यं वर्णयथ तत्राहुः-यत् य एव श्रेयसां सर्वपुरुषार्थानां परोऽतः परमावधिरिति च श्रीमदुद्धववचनं यन्मर्त्यलीलौपयिकमित्यादि ॥२१॥ एवं तन्माहात्म्यभरचमत्कारेण भक्त्युद्रेकात्प्रणमन्ति ननु इति । तुभ्यमिति शेषः । साक्षात्तदनुक्तिभक्तिभरोदयादेव तस्मै सर्वागोचराय यतो भगवते कृष्णाय सर्वतोऽपरायेत्यर्थः । स्वयं त्वकुण्ठमेधसे सर्वत्रानवच्छिन्नज्ञानाय एवं चेत्तर्हि कथमत्र नित्यमेव न तिष्ठथ तत्राहुः-स्वयोगेति ।

"नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥" इति न्यायेन **"यन्मायया तत्त्वविदुत्तमा वयं विमोहिताः"** इत्युक्तरीत्या च नैतादृशं ज्ञानं सदा तिष्ठतीति भावः । तर्ह्यधुना कथं जातं तत्राहुः-परमात्मने इति । तवैवानुग्रहमय्या प्रेरणयेति ॥२२॥ अहो दूरस्थाः के वयं यं श्रीकृष्णाख्यं स्वयं भगवन्तममी निकटस्थाः भूपा अपि तथा एकारामाः वृष्णयोऽपि न विदन्ति यावन्महिमा तावत्त्वेनानुभवितुं न शक्नुवन्ति ननु सततं सर्वमहिमाश्रयस्य प्रकटस्थाननुभवे किं कारणं तत्राहुः-मायेति । तादृशमहिमाश्रयत्वे किंप्रमाणं तत्राहुः-यवनिकेति । तद्वत्त्वदिच्छयान्तरङ्गीकृतानाम् अनुभवोऽपि भवत्येवेति भावः । महिमानमेवाहुः । आत्मानं ब्रह्मरूपं कलयतीति कालमन्तर्यामिरूपम् ईश्वरं स्वयं भगवत्स्वरूपमिति ॥२३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आत्मनस्तव सत् उत्कृष्टम् धाम अधिष्ठानम् । तत्र हेतुः-शास्त्रयोनेर्वेदप्रवर्तकस्य वेदप्रतिपाद्यस्य वा । किञ्च । हे ब्रह्मन्निति र: साक्षात्त्वमेवेति भावः । ईदृशवेदस्य धारणात् प्रवर्तनात् च सद्धाम । अतः सभाजनं युक्तमेवेति तात्पर्यम् ॥२०॥ जन्मनः फल्यं विद्यादीनां च साफल्यं वृत्तम् । यद्वा । अद्यैव जन्माभूत्; जन्मफलोदयात् । अन्यथा जन्मनो वैयर्थ्येनाभावे पर्यवसानमिति वः । जन्मादीनां यथोत्तरं फलं च तत्र तपसो दृक्फलकत्वम् । दृक्फलभगवत्साक्षात्कारसिद्ध्यैव सम्यक् तत्फलसिद्धेः । सतां नामेव गत्या प्राप्येण परः परमोऽन्तोऽवधिः । अन्यत्तैर्व्याख्यातम् । यद्वा । श्रेयसां फलानां मध्ये पर उत्कृष्टस्त्वत्पादाब्जप्रेमा न्तो यन्निष्ठः यत्प्रसादाल्लभ्यत इत्यर्थः । अन्यत् समानम् ॥२१॥ एवमात्ममहाधन्यतामननेन भक्त्युद्रेकात् प्रणमन्ति-नम इति । ध्यामिति शेषः । साक्षात्तदनुक्तिर्भक्तिभरोदयादेव । स्वकीयया असाधारणया योगमाययापि न छन्नो नावृतो महिमा यस्य तस्मै । श्वैश्वर्यप्रकटनात् । स्वयोगमाययाच्छन्नो महिमा येनेति वा । यद्वा । स्वेन तया योगो भक्तानां संयोगो यया मायया कृपया कृत्वा क्तमहिम्ने । अत एव परमात्मने सर्वेषां परमप्रियतमाय ॥२२॥ एवमत्रत्या एवतेऽस्मत्तोऽपि महाधन्या इत्याशयेनाहुः-नेति । स्मिन् त्वय्येवारमन्तीति तथाभूताः सन्तो यं त्वामात्मानं सर्वव्यापकं ब्रह्मेति कालं सर्वसंहारकत्वेन भयङ्करमिति ईश्वरमिति च दन्ति किन्तु श्रीदेवकीनन्दनं सर्वप्रतिपालकं परमप्रियमिति जानन्तीत्यर्थः । कुतः ? एषु मायायवनिकया अच्छन्नमनावृतम् । भगवत्ताप्रकटनादिति भावः ॥२३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

ब्रह्मकुलं ब्राह्मणकुलं शास्त्रप्रमाणकस्य तव शेषभूतं तस्माद्वेदधारकं ब्रह्मकुलं सभाजयसीत्यर्थः । विद्यायाः त्यादित्यन्वयः ॥२०॥ श्रेयसां परः पुरुषार्थः प्रकृष्टः अतस्त्वया सङ्गम्य अद्य नो जन्मसाफल्यम् ॥२१-२३॥ यथा शयान स्वप्ने देहेन्द्रियादियुक्तमात्मानं पश्यति न देहात्परम् ॥२४॥ एवं जाग्रत्पुरुषोऽपि न देहातिरिक्तं पश्यति अतः सुप्तप्रायपुरुषः त्मानं न वेद । आत्मनः परं परमात्मानं च न वेदेति कैमुत्यसिद्धमित्यर्थः । स्मृत्युपप्लवात् 'ध्रुवा स्मृतिः' इति सिद्धोपासनान्वयाभावात् ॥२३-२८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तस्मादिति । यस्मादुक्तविधं ब्रह्म तव हृदयं तस्मादित्यर्थः । शास्त्रं वेदः योनिः स्वप्रमितिकारणं यस्य तस्य सर्वान्तरात्मनस्तव कुलं स्थानम् उपलब्धिस्थानं त्वद्याथात्म्यावबोधकवेदाधारभूतमित्यर्थः । एवं हेतुनिर्देशः । तस्मात्तद्धाम ब्राह्मणकुलरूपं सभाजयसि बहुमन्यसे । किञ्च ब्रह्मण्यानां ब्राह्मणान् बहुमन्यमानानाम् अग्रणीः श्रेष्ठश्च भवानतोऽपि सभाजयसीति भावः आत्मनां कृतार्थतामाविष्कुर्वन्ति-अद्येति । सतां साधूनां गत्या प्राप्यप्रापकभूतेन त्वया सङ्गम्य नोऽस्माकमद्य जन्मसाफल्यं । तथा विद्याया तपसो दृशोर्नेत्रयोश्च साफल्यमित्यन्वयः । कुतः ? यद्यतः एतत्त्वत्सङ्गमनं श्रेयसामपि परमोत्कृष्टं श्रेयः किञ्च यथावद्विज्ञातुं न शक्नुम इत्यभिप्रायेण प्रणेमुः तस्मा इति । स्वयोगमायया स्वासाधारणाश्चर्यशक्त्या छन्नो गूढो ऐश्वर्यं यस्य तस्मै परमात्मनेऽन्तःप्रविश्य प्रशासनेन भर्त्रे ॥२२॥ केवलं वयमेव न शक्नुमोऽपि तु शश्वत्सहचरा वाऽपीत्यभिप्रेयाहुः-नेति । एकस्मिन् स्वात्मन्येवारमन्त इति तथा ते केवलप्रत्यगात्मानुभवपराश्च यं त्वां न विदन्ति यथावन्न नं कथम्भूतम् ? सर्वजीवमोहिनी मायैव यवनिका तिरस्करिणी तया छन्नं भूपादिज्ञानाविषयम् आत्मानमीशमन्तरात्मतया कालं बहिः कालरूपेण परिच्छिन्दन्तम् ॥२३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अद्य ॥२१-२२॥ अहो दूरस्था के वयं यं कृष्णाख्यं भगवन्तममी निकटस्था भूपा अपि तथा एकारामा वृष्णयोऽपि न । यन्महिमा तावत्तेनानुभवितुं न शक्नुवन्ति । ननु सततं सर्वमहिमाश्रयस्य प्रकटस्य अननुभवे किं कारणं तत्राहुः-मायेति तादृशमहिमाश्रयत्वे किं प्रमाणं तत्राहुः-यवनिकेति । तद्वत्त्वदिच्छयान्तरङ्गीकृतानामनुभवोऽपि भवत्येवेति भावः । मेवाहुः । आत्मानं ब्रह्मस्वरूपम् । कलयतीति कालमन्तर्यामिरूपम् ईश्वरं स्वयं भगवत्स्वरूपमिति ॥२३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

यदन्तःश्रेयसां पर इति श्रेयसां परः परो भाग्यो यदन्तः यः स्वयमेव त्वत्सङ्गो वा अन्तोऽवधिरित्यर्थः ॥२१-२

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

यदन्तःश्रेयसां परः परो भागः यतस्त्वमेव अन्तोऽवधिभूत इत्यर्थः ॥२१॥ ॥२२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

शास्त्रयोनेर्वेदप्रमाणस्य आत्मनः स्वस्य सद्धाम श्रेष्ठमुपलब्धिस्थानं ब्रह्मकुलं सभाजयसि पूजयसि ॥२०॥ त्वया सद्ग सद्गतिस्वरूपेण सह सङ्गम्य सङ्गं प्राप्य वर्तमानानां नोऽस्माकं विद्यादिसाफल्यं यत् यस्मात् त्वं श्रेयसां परः अन्तोऽवधिः ॥२१॥ तस्मात् त्वं लोकसङ्ग्रहार्थमस्मान् स्तुहि प्रणम वा वयं तु त्वामिष्टदेवं नमस्कुर्म एवेति प्रणमन्ति-नम इति ॥२२॥ एतस्मि शय्यासनादावारमन्तीति ते वृष्णयः आत्मानं परमप्रेमास्पदं यं त्वाम् ईश्वरं न विदन्ति अमी असाधवो भूपाः कालं स्वसंहर्तारं त्वाम् ईश्वरं न विदन्ति कुतः मायैव यवनिका तेषां ज्ञानस्यावरणकारिका तया आच्छन्नं तत्र भूपेषु माया अविद्या वृष्णि योगमायेति विवेचनीयम् ॥२३॥

गूढार्थदीपिनी

अद्य सतां गत्या उपदेशेन त्वया सह सङ्गम्य सङ्गं प्राप्य जन्मनः साफल्यं जातम् । तथा विद्यादेश्च साफल्यं (साफल्य समासान्तर्गतमपि आकृष्णमात्रान्वेति । 'भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्' इतिवत् ।) जातम् । यत् यस्मात् त्वत्सङ्ग श्रेयसां फलानां परोऽन्तः परमावधिः मुख्यं फलमित्यर्थः ॥२१॥ अकुण्ठा अप्रतिहता मेधा ज्ञानशक्तिर्यस्य तस्मै । स्वरूपम् ॥२२॥ अमी भूपाः वृष्णयश्च एकारामा अपि यं श्रीकृष्णं न विदन्ति । कुतः । मायैव जवनिका तिरस्करिणी तया आच्छ मायासमावृतम् । कालं कर्मप्रवर्तकम् । आरामः (आरामो वासनिलये क्रीडायां च वने तथा इति कोशात् । एकस्मिन्नेव आरामे निवासो येषां ते ।) सहवासः । जवनिका (पर्दा) ॥२३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यस्माद्वेदमार्गं त्वं बिभर्षि तस्मात्तन्निष्ठब्रह्मकुलं सभाजयसीत्याहुः-तस्मादिति । हे ब्रह्मन् ! परमात्मन् ! शास्त्रं शब्द योनिः ज्ञापकं प्रमाणं यस्मिन् तस्य आत्मनः परमात्मनस्तव तत्तस्य शास्त्रस्य च धाम उभयब्रह्मस्थानं ब्रह्मकुलं सभाज बहुमन्यसे अतः ब्रह्मण्येषु भवानग्रणीः श्रेष्ठः ॥२०॥ अथ भगवत्सङ्गत्या स्वकृतार्थतामाहुः-अद्येति । सद्गत्या सतामुपदे त्वया सङ्गम्य सङ्गं प्राप्य विद्यादीनां साफल्यं जातम् । यद्यस्मात्त्वं श्रेयसां कल्याणानां परोऽवधिः ॥२१॥ स्वयोगमायया इति योगः सङ्कल्पस्तद्रूपया मायया वयुनेन छन्नमहिम्ने गूढप्रभावाय "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" भगवद्वचनमत्राप्यनुसन्धेयम् । एवम्भूताय दुर्ज्ञेयाय केवलं नमः ॥२२॥ न केवलं वयमेव त्वद्याथात्म्यानभिज्ञाः एकस्मिन्नेव आगमो येषां ते वृष्णयोऽपि यं त्वां न विदन्ति यथावन्न जानन्ति तस्मै नम इति पूर्वेण सम्बन्धः । कथम्भूतम् ? माया भगवद् सैव यवनिका जीवावरणहेतुभूता तिरस्करिणी तया अच्छन्नमनावृतमपि साक्षाद्रूपेण सन्तमपि स्वयं तया मोहिता न विदन्ति अनावृतत्वाद्बहिरन्तरं न ते इत्युक्तत्वाच्च कालं सर्वसंहरहेतुमीश्वरं नियन्तारम् ॥२३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

किमतो यद्येवं तत्राह-तस्माद् ब्रह्मकुलमिति । त्वं ब्रह्मकुलं सभाजयसि । तत्रैको हेतुः सद्धामेति सदादीनां धाम युदुक्तं "यत्रोपलब्धं सद्व्यक्तम्" इति धामस्फूर्तिराश्रयो वा ब्रह्मन्निति सम्बोधनं तद्रूपतया हेत्वनन्तरमात्मानमेव पुनरन्यं हेतुमाह-शास्त्रयोनेरिति । शास्त्रस्य वेदस्य योनिः कारणं वेदा उत्पादिताः तेषामाधारो ब्राह्मण एवेति तद्रक्षा शास्त्रयोनेरात्मन इति वा तथा सति साधनफले निरूपिते शास्त्रं साधनमात्माफलमिति । किञ्च तस्मात् ब्रह्मण्य यद्यप्येतत्सर्वमन्यथा भवति त्वं ब्राह्मणानां हितकार्येव ॥२०॥ एवं ब्राह्मणानां भगवतो हितकारित्वं ज्ञात्वा संतुष्टाः सन्तः

प्राप्त इति स्वकृतकृत्यतामाहुः
सर्वाः तासां फलं सर्वज्ञता
ज्योतिर्भगवन्तमधोक्षजं साक्षा
सर्वपापनिवारकेति फलान्तरम
जन्मसाफल्यादिकं जातम् ।
स्त्रीलिङ्गपदप्रयोगः साफल्यं
यस्मादन्यच्छ्रेयोऽस्तीति ॥२१॥
स एव कृष्ण इति कृष्णाय ननु
यस्येति । अन्यत्र रूपान्तरभावे
अकुण्ठत्वं नैतज्जीवेषु भवतीति
इति । स्वस्य साधनत्वेन स्वीकृत

"विषयाच्छाद

ननु सर्वात्मकत्वाद्
गङ्गातदधिष्ठातृदेवतयोरन्तरम् एव
तद्वदित्यर्थः ॥२२॥ अत एव न के
कुर्युरिति तेषां सङ्गो नास्तीति न
तथात्वेन प्रसिद्धाः तथापि न वि
बुद्धिहेतुभूतया मायया नाट्ये आ
किमाच्छादनेनेति चेत्तत्राह-आत्मा
यथात्मानं ज्ञापयेत् तदा ते मारिता न

तस्माद्धेतोर्ब्रह्मकुलं त्वं स
ब्रह्मन् ब्रह्मण्यानामग्रणीर्मुख्यो भवान्
सतां गत्या सङ्गम्य प्राप्य यत् श्रेयसां
परमात्मने भगवते कृष्णाय नमः ॥२२
एकारामाः सहक्रीडा यादवाश्च न जान

स्वकृतार्थतामाहुः-अथेति ।
श्रोत्रनेत्रयोश्च साफल्यमित्यन्वयः । यत्
एवं परमफलप्राप्त्या भक्त्युद्रेकेण प्रणम
ऐश्वर्यादिगुणपूर्णाय । अकुण्ठा अप्रतिह
यथाप्रतीतेः इत्याशङ्क्याहुः-स्वयोगम
सृष्ट्यादिनिमित्तम् ईश्वरं सर्वनियन्त
न विन्दन्तीत्यन्वयः । तत्रोक्तमेव

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

आह इति स्वकृतकृत्यतामाहुः-अद्य नो जन्मसाफल्यमिति । सज्जन्म ऋषिवंशे तस्य च फलं ब्रह्मप्राप्तिः साऽद्य सम्पन्नेति विद्याः सर्वाः तासां फलं सर्वज्ञता तदितराभिज्ञत्वं पूर्वमपि सिद्धम् । भगवल्लीलापरिज्ञानं तु जातमिति विद्यायाः फलं तपसा हि परं ज्योतिर्भगवन्तमधोक्षजं साक्षात्करोति तच्चाद्यैव जातमिति सर्वथा कृतार्थता अनघेति सम्बोधनपाठे न विद्यते अघं यस्मादिति हे सर्वपापनिवारकेति फलान्तरमपि सूचितम् अपहतपाप्मत्वेन वा अस्मत्सम्बन्धेन वा न काचित् क्षतिरिति अत एव त्वया सङ्गम्य जन्मसाफल्यादिकं जातम् । कथम्भूतेन त्वया सद्गत्या सतां गतिः प्राप्यं फलं स्वरूपस्यैव फलत्वमविकृतत्वं च ज्ञापयितुं पौलिङ्गपदप्रयोगः साफल्यं साधयन्ति यदन्तःश्रेयसां पर इति यद्यस्मात् कारणात् श्रेयसामन्तः परिसमाप्तिः परः एतदेव न तस्मादन्यच्छ्रेयोऽस्तीति ॥२१॥ एवं साक्षान्निर्दोषपूर्णगुणत्वं भगवतो निरूप्य श्रद्धातिशयात्तं नमस्यन्ति-नमस्तस्मै भगवत इति । न एव कृष्ण इति कृष्णाय ननु ब्रह्मवादे सर्व एव साक्षाद्भगवान् को विशेष इति चेत्तत्राह-अकुण्ठमेधस इति । न कुण्ठा मेधा यस्येति । अन्यत्र रूपान्तरभावे मेधाया अपगमोऽस्ति पश्चात् प्रत्यापत्तौ योजितपटवत् वैलक्षण्यं भवति भगवति तन्नास्तीति अकुण्ठत्वं नैतज्जीवेषु भवतीति साक्षादविकृतब्रह्मत्वमित्यर्थः । नन्वेवं चेत् कथं सर्वे न विदुः । तत्र हेतुमाहुः-स्वयोगमाययाच्छन्नमहिम्न इति स्वस्य साधनत्वेन स्वीकृतया मायया आच्छन्नो महिमा यस्येति । मायापिहितदृष्टयो भगवन्माहात्म्यं न पश्यन्तीत्यर्थः ।

"विषयाच्छादनं स्वार्थं चेतने नोपपद्यते । अन्यार्थमेव तद्युक्तमात्मस्थे विषयेऽपि च ॥"

ननु सर्वात्मकत्वाद्भगवतः आत्मानमेव प्रति कथं तिरोधानमिति चेत्तत्राह-परमात्मन इति । यथा जलतदधिष्ठातृदेवतयोरन्तरम् एवमात्मपरमात्मनोर्वैलक्षण्यं यथा जले दृष्टेऽपि गङ्गादेवता न दृष्टा भवति जलाच्च तिरोधत्ते इत्यर्थः ॥२२॥ अत एव न केऽपि जानन्तीत्याह-न यं विदन्तीति । अमी विद्यमानाः भूपाः यदि जानीयुः तदा नैवं व्यवहारं कुर्युरिति तेषां सङ्गो नास्तीति न वक्तव्यम्, यतः एकारामाः चकाराज्जन्मप्रभृति सर्वाः क्रियाः एकत्रेति निरूपितं वृष्णयश्च सम्बन्धित्वेन प्रसिद्धाः तथापि न विदन्तीति तत्र हेतुं स्मारयन्ति माया(ज)यवनिकाच्छन्नमिति । पुत्रोऽयं भ्राता पिता इत्यादि बुद्धिहेतुभूतया मायया नाट्ये आवश्यकरूपया यवनिकया आच्छन्नं न तु ते हीनाः स्वभावत एव भगवन्तं न ज्ञास्यन्ति किमाच्छादनेनेति चेत्तत्राह-आत्मानमिति । अनेन तेषां संसारोऽपि न भवेदिति लीलाबाधोऽपि निरूपितः । किञ्च कालोऽयं यद्यात्मानं ज्ञापयेत् तदा ते मारिता न भवेयुरिति किञ्च ईश्वरोऽयम् ईश्वरास्तु गुप्ता एव तिष्ठन्तीति ॥२३॥

श्रीसुबोधिनीसारः

तस्माद्धेतोर्ब्रह्मकुलं त्वं सभाजयसि प्रशंससि शास्त्रयोनेर्वेदप्रमाणकस्यात्मनस्तव सद्धाम उपलब्धिस्थानं तस्मात् हे भगवन् ब्रह्मण्यानामग्रणीर्मुख्यो भवान् ॥२०॥ अद्य इदानीं नोऽस्माकं जन्मनः साफल्यं विद्यायाः तपसो दृशो नेत्रस्य वा साफल्यं सतां गत्या सङ्गम्य प्राप्य यत् श्रेयसां मङ्गलानां परोऽन्तः परा काष्ठा ॥२१॥ स्वयोगमाययाच्छन्नो महिमा यस्य तस्मै अकुण्ठमेधसे परमात्मने भगवते कृष्णाय नमः ॥२२॥ मायैव जवनिका तिरस्करिणी तयाच्छन्नमावृतमात्मानमीश्वरं कालं यम् अमी भूपा राजान एकारामाः सहक्रीडा यादवाश्च न जानन्ति ॥२३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वकृतार्थतामाहुः-अथेति । त्वया सङ्गम्य सङ्गं प्राप्य नोऽस्माकमद्य जन्मनः साफल्यं जातम् । तथा विद्यायास्तपसो दृशो नेत्रयोश्च साफल्यमित्यन्वयः । यत् यस्मात् त्वत्सङ्ग एव श्रेयसां परोऽन्तः परमावधिः, अत उत्तमं फलान्तरं नास्तीत्यर्थः ॥२१॥ एवं परमफलप्राप्त्या भक्त्युद्रेकेण प्रणमन्ति-तस्मा इति । तस्मै परमफलरूपाय कृष्णाय नमः । परमफलत्वमुपपादयन्ति-भगवते सर्वादिगुणपूर्णाय । अकुण्ठा अप्रतिहता मेधा चिच्छक्तिर्यस्य तस्मै । परमात्मने सर्वान्तर्यामीणे । कृष्णस्य कथमेवम्भूतत्वम् अप्रतीतेः इत्याशङ्क्याहुः-स्वयोगमायया अचिन्त्यशक्त्या छन्नो गूढो महिमा ऐश्वर्यं यस्य तस्मै ॥२२॥ अत एव सर्वात्मानं कालं सृष्ट्यादिनिमित्तम् ईश्वरं सर्वनियन्तारं यं त्वाम् अमी भूपाः एकस्मिन्नेव स्थाने आरामः भोजनशयनादिभिः सहवासो येषां ते यादवाश्च न विदन्तीत्यन्वयः । तत्रोक्तमेव हेतुं स्मारयन्ति-मायैव जवनिका तिरस्करणी तया छन्नमिति ॥२३॥

अन्वितार्थप्रकाशिका

अद्येति। सतां गत्या त्वया सङ्गम्य सङ्गं प्राप्य नोऽस्माकमद्य जन्मनः साफल्यं जातम् तथा विद्यायास्तपसो दृशो अपरोक्षज्ञानस्य वा साफल्यं जातम्। यत् यस्मात् त्वत्सङ्ग एव श्रेयसां परोऽन्तः परमावधिः अत उत्तमं फलान्तरं ॥२१॥ नम इति। तस्मै भगवते अकुण्ठमेधसे अप्रतिहतचिच्छक्तये स्वयोगमायया अचिन्त्यशक्त्या छन्नो गूढो महिमा ऐश्वर्यं तस्मै परमात्मने अन्तर्यामिणे कृष्णाय नमः ॥२२॥ नेति। मायैव जवनिका तिरस्करणी तयाच्छन्नं सर्वात्मानं कालं ईश्वरं सर्वनियन्तारं यं त्वाम् अमी भूपाः एकस्मिन्नेव स्थाने भगवता सह आरामः भोजनशयनादिभिः सहवासो येषां ते विदन्ति। यथेति। यथा गुणं गुणकार्यं देहं तत्त्वमात्मतत्त्वतया पश्यतीति गुणतत्त्वदृक् पुरुषः शयानः स्वप्नान् पश्यन् मिथ्याभूतमेवेन्द्रियेण मनसा आभातं सिंहव्याघ्रादिरूपमेवात्मानं वेद तदाकाररहितं परं ततो भिन्नं देवदत्तादिरूपं न वेद। । विषयेष्विन्द्रियैर्या ईहा प्रवृत्तिः सैव माया तया विभ्रमच्चित्तं यस्य स अत एव स्मृतेर्विवेकस्योपप्लवो नाशस्तस्मात् स्वप्नादितुल्येष्वपि देहादिषु सन्तमपि त्वां स्वात्मानं न वेद किं त्वेवं स्वप्नवद्देहादिकमेवात्मानं मन्यते ॥२३-२५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्माद्धेतोः शास्त्रयोनेः शास्त्रकारणस्यात्मनः। परमात्मनः तव ब्राह्मणकुलं सत्यं धाम निवासस्थानमस्ति ब्रह्मकुलं सभाजयसि अर्चसि यतो भवान्। ब्रह्मण्यानाम् अग्रणीरस्ति ॥२०॥ अस्माकं त्वत्कृतसन्मानस्तु लोकसङ्ग्रहायैव । वयं तु त्वत्समागमादिनैव कृतकृत्या इत्यूचुः-श्लोकषट्केन। अद्येति ॥ सद्गत्या सत्पुरुषप्राप्येन त्वया सह सङ्गम्य। प्राप्य नोऽस्माकं जन्मादीनां साफल्यं जातं यद्यतः श्रेयसां सर्वपुरुषार्थानां परः श्रेष्ठः अन्तोऽवधिस्त्वमेवासि। अतस्त्वं प्राप्तमिति भावः ॥२१॥ अकुण्ठा कालकर्मादिभिरप्रतिहता मेधा कृत्यानुसन्धानज्ञानं यस्य तस्मै स्वयोगमायया छन्नो मनुष्यभावप्रदर्शनेनावृत्तो महिमा येन तस्मै नमः ॥२२॥ एकस्मिन् स्थले आरामो निवासो येषां ते वृष्णयो कपटमेव जवनिका आच्छादनवस्त्रं तयाच्छन्नम् आवृतम् आत्मानं परमात्मानं कालम् उत्पत्त्यादिहेतुम्। त्वां न विदन्ति

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्मादिति ॥ यस्मादुक्तविधं ब्रह्म तव हृदयं तस्मात् शास्त्रं वेदो योनिः स्वप्रमितिकारणं यस्य तस्य आत्मनः तव ब्रह्मकुलं सद्धामोपलब्धिस्थानं त्वद्याथात्म्यावेदकवेदाधारभूतमित्यर्थः। अस्ति। हे ब्रह्मन्! त्वं सभाजयसि ब्राह्मणकुलमिति शेषः। तत्तस्मात् भवान् ब्रह्मण्याग्रणीः ब्राह्मणसन्मार्गप्रवर्तकः सन् कर्माचरसीत्यर्थः ॥२०॥ भगवद्दर्शनादिसङ्गत्या कृतार्थतामाविष्कुर्वन्ति ॥ अद्येति ॥ सतां साधूनां गत्या प्राप्यप्रापकभूतेन त्वया सङ्गम्य अद्य जन्म साफल्यं जातम्। तथा विद्यायाः तपसः दृशोर्नेत्रयोश्च साफल्यं जातम्। कुतः। यद्यतः एतत्त्वत्सङ्गमनं श्रेयसाम् श्रेय इति शेषः। पाठान्तरे यद्यस्मात् त्वं श्रेयसां परः अतोऽवधिः ॥२१॥ किं च यथावत्त्वत्स्वरूपं विज्ञातुं न एव वर इत्यभिप्रायेण प्रणेमुः ॥ नमस्तस्मा इति ॥ स्वयोगमायया स्वासाधारणाश्चर्यशक्त्या छन्नो गूढो महिम ऐश्वर्यं परमात्मने अन्तः प्रविश्य प्रशासनेन भर्त्रे अकुण्ठमेधसे भगवते कृष्णाय तस्मै तुभ्यं नमो नमस्कुर्मः ॥२२॥ वयमेव केवलं त्वत्स्वरूपं ज्ञातुं न शक्नुम इति न किन्तु शश्वत्सहचरा वृष्णयो न शक्नुवन्तीत्यभिप्रेत्याहुः ॥ नेति ॥ हे कृष्ण अमी भूपा राजानः एकस्मिन् स्थाने आरामो येषां ते वृष्णयश्च माया सर्वजीवमोहिनी मायैव जवनिका तया छन्नम् सन्तं कालं बहिः कालरूपेण सर्वायूंषि परिच्छिन्दन्तम् ईश्वरं यं त्वां न विदन्ति ॥२३॥

कृष्णप्रिया

हे नाथ ब्राह्मण ही वेदोंके आधार आपके स्वरूपकी उपलब्धि के स्थान है। इसलिये तो ब्रह्मणोंका बहुमान करते है और ब्रह्मणों के सम्मान करते हो इससे आप ब्रह्मणोंमें ब्राह्मण भक्तो हो ॥२०॥ कृपानाथ ! आज हमारी विद्या तप ज्ञान आदि सर्व सफल हो गये, क्योंकि आप सर्व प्रकार साधनोंको अन्तिम सीमा है और यम्ह भी निश्चय है कि संतजनोंकी एकमात्र गति है। सर्व प्रकारके

कृष्णप्रिया

तपश्चर्या आदि उपासनाओंका चरमफल अपनी प्राप्ति है ॥२१॥ आप भगवान के श्रीचरणोंमे हमारे प्रणाम हो आपकी मति किसी भी विषयमें और तत्त्वमें कुण्ठित नहीं होती । आपने आपकी अचिन्त्य शक्ति भी योगमाया के माध्यम से अपनी महिमा छिपा कर रखी है केवल हमारे नमःस्कार ही पुरस्कार ॥२२॥ महाराज रस सभामें विराजमान नृपतिलोग आपकी महिमा को जानते नहीं, जो नरेश और जो सज्जन आपके नित्य सहवासमें रहते है और आपके साथ आहार विहार करनेवाले यादव लोग भी आपकी वास्तव महिमा जानते । कारण यही है कि आपने अपने स्वरूपको माया के परदेसे आवृत्त कर रखा है जो आपका स्वरूप आप सर्वकी आत्मा है - विश्वका आदिकारण है और सर्वके नियन्ता है ॥२३॥

[1]यथा शयानः पुरुष आत्मानं गुणतत्त्वदृक् । नाममात्रेन्द्रियाभातं न वेद रहितं परम् ॥२४॥
[2]एवं त्वाज्यो जनो ब्रह्मन्नाममात्रेन्द्रियेहया । मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात् ॥२५॥
तस्याद्य ते ददृशिमाङ्घ्रिमघौघमर्षतीर्थास्पदं हृदि [3]कृतं सुविपक्वयोगैः ।
उत्सिक्तभक्त्युप[4]हताशयजीवकोशा आपुर्भवद्गतिमथोऽनुगृहाण भक्तान् ॥२६॥

कर्दमक्षमा

यथा, शयानः, पुरुषः, नाममात्रेन्द्रियाभासम्, आत्मानम्, गुणतत्त्वदृक्, रहितम्, परम्, न, वेद ॥२४॥ एवम्, ब्रह्मन्, नाममात्रेन्द्रियेहया, मायया, भ्रमच्चित्तः, त्याज्यः, अयम्, जनः, स्मृत्युपप्लवात्, त्वा, न, , वेद ॥२५॥ अघौघमर्षम्, तीर्थास्पदम्, सुविपक्वयोगैः, हृदि, कृतम्, तस्य, ते, अङ्घ्रिम्, अद्य, ददृशिम, उत्सिक्तभक्त्युपहताशयजीवकोशाः, भवद्गतिम्, आपुः, अथ, भक्तान्, अनुगृहाण ॥२६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतत्सदृष्टान्तमाहुः-येथेति । शयानः स्वप्नान् पश्यन् गुणतत्त्वदृक् स्वप्नविषयेषु तत्त्वदृष्टिः नाममात्रमिन्द्रियेण मनसा भातं सिंहव्याघ्रादिरूपमात्मानं वेद तद्रहितं देवदत्तादिरूपमात्मानं न वेद यथा ॥२४॥ एवं त्वा त्वाम् नाममात्रेषु स्वप्नादितुल्येषु विषयेष्विन्द्रियैर्या ईहा प्रवृत्तिः सैव माया तया विभ्रमच्चित्तो न वेद स्मृतेर्विवेकस्योपप्लवान्नाशात् ॥२५॥ अघौघस्य मर्षं नाशं करोति यद्गङ्गाख्यं तीर्थं तस्यास्पदमाश्रयं तेऽङ्घ्रिम् सुविपक्वयोगैरपि हृदिकृतं केवलं न तु दृष्टं तस्य तेऽङ्घ्रिम् ददृशिम दृष्टवन्तो वयं भूरिभिः पुण्यैरतोऽस्मान् भक्ताननुगृहाण भक्तान् कृत्वाऽनुग्रहं कुर्वित्यर्थः । ननु किं भक्त्या यथापूर्वं तप एव तप्यतामिति नेत्याहुः उत्सिक्ता उद्रिक्ता या भक्तिस्तयोपहत आशयलक्षणो जीवकोशो येषां त एव पूर्वे भवद्गतिमापुर्नान्य इति ॥२६॥ ॥२७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतत् भगवत्स्वरूपाज्ञानम् । तद्रहितं सिंहव्याघ्रादिभ्योऽन्यम् ॥२४-२५॥ यं मायया न वेद तस्येत्यर्थः । यतो वयं त्वच्चरणदर्शनाद्धतपापा अथो अतोऽर्थे अतो हेतोः । इत्यर्थ इति-

"यदा यस्यानुगृह्णाति भगवानात्मनां गतिः । भक्तियोगं स लभतेऽनेकजन्मार्जितैः शुभैः ॥"

इत्यादिपुराणात् भक्तिदानमेव भगवतः परमानुग्रह इति भावः । अत्राशङ्कते-नन्विति । आशयलक्षणो जीवकोशोऽहङ्कारः "जरयत्याशु या कोशं निगीर्णमनलो यथा ।" इति कपिलोक्तेः ॥ "विबुद्ध्य भक्त्यैव कथोपनीतया प्रपेदिरेऽञ्जोऽच्युत ते गतिं पराम् ।" इति ब्रह्मोक्तेश्च ॥२६॥

---

[1] इत्यादिश्लोकद्वयं नास्ति-विज. । [2] एवं त्वामाश्रितं ब्रह्मन्नाममात्रेन्द्रियेहया-वीर. ; एवं त्वा नाममात्रेषु विषयेष्विन्द्रियेहया-श्रीधर. वंशी. विज. ; एवं त्वा यं जनो ब्रह्मन्नाममात्रे न्द्रियेहया-इति पाठः । [3] धृतं-विज. । [4] पहताः-श्रीधर. वंशी. ; भक्त्युपहता-वीर. विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अन्यस्त्वन्यथैव वेदेत्याहुः-यथेति युग्मकेन । तत्तु तैर्व्याख्यातम् । अथवाऽयं व्याख्याक्रमः तादृशत्वे हेतुः स्वीय असाधारणया योगमायया आवरणशक्त्यापि न छन्नो नावृतो महिमा यस्य तस्मै अशेषैश्वर्यप्रकटनात् यद्वा स्वेन भगवता यो भक्तानां संयोगो यया तया मायया कृपया हेतुना अच्छन्नमहिम्ने अत एव परमात्मने सर्वेषां परमप्रियतमाय एवमत्रत्या ए अस्मत्तोऽपि महाधन्या इत्याहुः-यम् अमी सन्ततसमागमिनो भूयास्तथैकारामा वृष्णयश्च मायायवनिकाच्छन्नं न विदन्ति पश्यन्ति किन्तु प्रकटस्वस्वरूपत्वादनाच्छन्नमेव पश्यन्ति तदनाच्छन्नत्वमनुभूयापि आत्मानं निर्विशेषब्रह्मस्वरूपमात्रं न पश्यन्ति किन्तु तदतिक्रम्य सविशेषतत्स्वरूपमपि तादृशत्वमनुभूयापि कालम् अन्तर्यामिस्वरूपमात्रं न पश्यन्ति किन्तु तदतिक्रम्य तदंशिश्रीभगवतः स्वरूपमपि तादृशत्वमनुभूयापि ईश्वरं परमेश्वरस्वरूपमात्रं न पश्यन्ति किन्तु सर्वं तत्तदनुभवानन्दातिक्र तदप्यतिक्रम्य परमस्निग्धबान्धवकुलेश्वरस्वरूपमिति "इत्थं सतां ब्रह्मसुखानुभूत्या" इत्यादिन्यायेन "राजन् पतिर्गुरुरलं भव यदूनाम्" इत्यादिन्यायेन च तत्र दृष्टान्तः यथा गुणतत्त्वदृक् विषयानुभविता जाग्रत्स्वप्नावस्थः पुरुषः क्रमशस्तत्तदनुभूयातिक्र च शयानः सुषुप्तः सन् आत्मानं नाम्ना देवदत्तादिनाममात्राभिर्विषयानुभवैरिन्द्रियैश्चाभातं न वेद किन्तु तत्तद्रहितं परं शुद्धसुखस्व वेदेति । यस्तु मायया विभ्रमचित्तः स त्वेवं न वेद मायाविभ्रममेवाहुः-नाममात्रेन्द्रियेहया । स्मृत्युपप्लवादिति अथवा शयानोऽ पुरुषः वृष्णीनां मध्ये कश्चित्पुमान् आत्मानं त्वां यथा यथावद्वेद न तु रहितं तद्व्यतिरिक्तं परमन्यत् कुतः गुणानां कारुण्यादीनां त सत्यत्वनित्यत्वादिकं पश्यति साक्षादनुभवतीति तथा सः यथावत्त्वमेवाहुः-नामसु सर्वसंज्ञासु मात्रासु विषयेषु च आभातं स्वयं परिस्फुरितमिति एषां भगवत्समाधिरेव सुषुप्तमिति भावः । वक्ष्यते च 'शय्याशनाटनालाप' इत्यादि यद्वा नाम श्रीकृष्णादि सं मीयते दृश्यत इति मात्रारूपम् इन्द्रियाणि च तैराभातमेव श्यामसुन्दरं वेद न तु तैः रहितं ब्रह्मस्वरूपमित्यर्थः ॥२४॥ उपसंह एवमिति । त्वा त्वां प्रति अयं सर्वोऽपि जनः वेदानां स्मृतीनां धर्मशास्त्राणां चोपप्लवादपि नाममात्रेषु येषु केषुचित् विषयेषु इन्द्रियाणामीहा प्रवृत्तिस्तयापि मायाया मायारूपया विभ्रमच्चित्तो न भवति किन्तु वेद सदा त्वामनुभवतीत्यर्थः । अत्र 'एवं त नाममात्रेषु विषयेष्विन्द्रियेहया' इति पाठो न स्वामिसम्मतः स्वप्नादितुल्यविषयेष्विति समस्तेन व्याख्यानात् किन्तु 'एवं त जनो ब्रह्मन्नाममात्रेन्द्रियेहया' इत्येव तत्सम्मत इति ज्ञेयम् ॥२५॥ उपसंहरन्ति-तस्यैव मतिविरलानुभवस्य ते तवाङ्घ्रियुग्मं ददृशिम तस्मादेवाद्य नो जन्मसाफल्यमित्युपक्रान्तमित्यर्थः । यतः परमसाधनसाध्यरूपमिदमिति क्रमात् विशेषणद्वयेन अघौघेति । त्वद्भक्तिविमुखवृत्तिलक्षणापराधकुलक्षमापकगङ्गादिमहातीर्थानाम् उत्पत्तिस्थानं सुपक्वयोगैरात्मारामैश्च हृदि कृतं नन्वात्मरामत्वादिकमनादृत्य किं भक्तिमेव श्लाघध्वे तत्राहुः-उत्सिक्तेति । अपहतेत्यत्र अपहृतेति पाठेऽपि स एवार्थः । तस्मात् कृत्वा अनुगृहाण यथैवं दर्शनभाग्यं नित्यमेव जायेतेति भावः ॥२६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अन्यस्तु त्वां न वेदैवेत्याहुः-यथेति द्वाभ्याम् । नाममात्रेति विशेषेण मिथ्यात्वमुक्तम् । यत इन्द्रियाभातम् । हे सर्वं सर्वव्यापकमपीत्यर्थः । अन्यत्तैर्व्याख्यातम् । अथवा यतः शयानोऽपि पुरुष एषां वृष्णीनां कश्चित् पुमान् आत्मानं त्वां यथावत् वेद न तु रहितं तद्व्यतिरिक्तं परमन्यत् । कुतः ? गुणानां त्वत्कारुण्यादीनां तत्त्वं सत्यत्वनित्यत्वादिकं पश्यति साक्षादनुभ तथा सः । यथावत्त्वमेवाहुः-नामसु सर्वसंज्ञासु मात्रासु विषयेषु इन्द्रियेषु चाभ्यतं स्वयमेव परिस्फुरितमिति । यद्वा श्रीकृष्णादिसंज्ञा मीयते दृश्यत इति मात्रा रूपम् । इन्द्रियाणि च तैराभातमेव श्यामसुन्दरं वेद न तु तै रहितं ब्रह्मरूपमित्यर्थः । उपसंहरति-एवमिति । त्वा त्वां प्रति अयं सर्वोऽपि जनो वेदानां स्मृतीनां च धर्मशास्त्राणामुपप्लवादपि नाम प्राकाश्ये विषयेषु या इन्द्रियाणामीहा प्रवृत्तिस्तयापि मायया मायारूपया विभ्रमच्चित्तो न भवति, सदा त्वामनुभवतीत्यर्थः अतोऽधुनास्मान् प्रत्यपीदृशीं कृपां कुर्वित्याहुः-तस्येति । इत्थं निजाशेषमाहात्म्यप्रकटनपरस्य आद्य ! हे पुरुषोत्तम ! यद् व्रजजनसमागममहोत्सवदिने ददृशिम । अथ अस्माद्धेतोरनुगृहाण । तवाङ्घ्रिस्तु परमदुर्दर्श एवेत्याहुः-तीर्थानां सर्वेषाम्

सर्वतीर्थमय्या गङ्गाया
। किञ्च, हृदीत्यादि सु
ननु निरीश्वरसाङ्ख्यमीम
सर्वोपराधक्षमाकरोति ॥

एतत्सदृष्टान्तमा
गुणतत्त्वं गुणपरिणामरूपं
विवक्षितम् । स्वाप्ननाम
देहाद्विलक्षणमात्मानं वेद ॥
यः स्मृत्युपप्लवः स्वात्मप
गृहच्चित्तं यस्य सः त्वाम
कैमुत्यसिद्धमित्यर्थः ॥२५॥
यद्गङ्गातीर्थं तस्याश्रयमास्पदं
सुविपक्वयोगैर्हृदि कृतम्
उत्सिक्तयोद्रिक्तया भक्त्या अ
भवद्गतिं प्रापुः अनेन मुक्तप्रा

अन्यस्त्वन्यथैव वेदेत

किञ्चानेकनामरूपात्मक
। यथा पुरुषो जीवः शयानः स्वप्ना
तैराभातं व्याघ्रसर्पराजादिकमनेकना
एवमेव त्वा त्वाम् अयमज्ञानी जनो
मायया भ्रमच्चित्तः सन् न वेद त्वां ज
॥२४-२५॥ एतादृशज्ञानं व्याचक्षाणा
मर्षो नाशो यस्मात् तस्य तीर्थस्य गङ्
तदपि लिङ्गदेहध्वंसनार्थं ज्ञानमवश्याप
ते एव पूर्वे भगवद्गतिमापुः नान्ये अथो

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सर्वतीर्थमय्या गङ्गाया: प्रभवत्वात् स्वभावेन परमपावनत्वाद्वा । गङ्गाप्यस्माकं दुर्लभा, तदास्पदन्तु सुतरां दुर्लभमेवेति भाव: । किञ्च, हृदीत्यादि सुविपक्कयोगै: श्रीसनकादिभिरपि हृद्येव कृतम् । आशय: विद्याद्यभिमान: भगवद्गतिं श्रीवैकुण्ठलोकम् । ननु निरीश्वरसाङ्ख्यमीमांसामायावादादिप्रवर्तनेन युष्मद्विधा अपराधिन: कथं तथानुग्राह्या इति चेत्तत्राहु:-अघौघमर्ष ! हे सर्वापराधक्षमाकरोति ॥२६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२३-२८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एतत्सदृष्टान्तमाहु:-यथेति । गुणतत्त्वदृग्गुणेषु सत्त्वादिगुणकार्येषु शब्दादिविषयेषु तत्त्वदृक् पुरुषार्थदर्शी । यद्वा । गुणतत्त्वं गुणपरिणामरूपं तत्त्वं देहमात्मतया पश्यतीति तथा स: शयान: पुरुषो यथा नाममात्रेन्द्रियाभातं मात्राशब्देन रूपं विवक्षितम् । स्वाप्ननामरूपमात्रेन्द्रियैरवभातमुपलक्षितम् । युक्तमित्यर्थ: । तमात्मानं वेद न तु स्वतो नामादिरहितं परं देहादिविलक्षणमात्मानं वेद ॥२४॥ एवं जाग्रत्पुरुषोऽपि हे ब्रह्मन् मायया त्वन्मायामूलया नाममात्रेन्द्रियेहया नाममात्रानुगुणचेष्टया य: स्मृत्युपप्लव: स्वात्मपरमात्मयाथात्म्यविषय: स्मृते: प्रमेष: तस्माद्विभ्रमत् अनात्मानं देहमात्मया परतन्त्रं स्वतन्त्रया च गूढचित्तं यस्य स: त्वामाश्रितम् । कर्तरि क्त: । तं प्रत्यगात्मानमेव न वेद । प्रत्यगात्मन: परमात्मानं त्वां न वेदैवेति कैमुत्यसिद्धमित्यर्थ: ॥२५॥ तर्हि कैरप्यविज्ञेयोऽहमनुपास्योऽमोक्षदश्चेत्यत आहु:-तस्येति । अघौघस्य मर्षं शुद्धिं करोति यद्गङ्गातीर्थं तस्याश्रयमास्पदं ते तवाङ् घ्रि सुविपक्वो योगो भक्तियोगो येषां तैर्हृदिकृतं साक्षात्कृतं वयमधुना ददृशिम । सुविपक्वयोगैर्हृदि कृतम् इत्यनेन योगपरिशुद्धमनोदृश्यत्वमुक्तम् अत: कैश्चिदप्यविज्ञेयत्वमनुपास्यत्वं च निरस्तम् उत्सिक्तयोद्रिक्तया भक्त्या अपहृत: आशयो वासना जीवकोश: अज्ञानरूप: कोशश्च येषां ते कोशवदावारकत्वात् कोशत्वरूपणं भवद्गतिं प्रापु: अनेन मुक्तप्राप्यत्वमुक्तमतो भक्तानस्माननुगृहाण ॥२६॥

श्रीमज्जीवगोस्वामिकृत: क्रमसन्दर्भ:

अन्यस्त्वन्यथैव वेदेत्याह-यथेति युग्मकेन ॥२४-२६॥

श्रीमज्जीवगोस्वामिकृत: बृहत्क्रमसन्दर्भ: ॥२१-२९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्चानेकनामरूपात्मकमिदं जगत् त्वमेक एव तत: परोऽपि भवसीति लोकोऽयं न वेदेति सदृष्टान्तमाहुर्यथेति द्वाभ्याम् । यथा पुरुषो जीव: शयान: स्वप्नान् पश्यन् गुणतत्त्वदृक् स्वप्नविषयेषु तत्त्वदृष्टि: नाम व्याघ्रादि मात्रा तद्रूपादि इन्द्रियं तच्छ्रोत्रादि तैराभातं व्याघ्रसर्पराजादिकमनेकनामरूपं वेद न तु तत्तद्रूपी भगवन्तमप्यात्मानं स्वरूपेण तद्रहितं ततो भिन्नं परं केवलमेकं वेद एवमेव त्वा त्वाम् अयमज्ञानी जनो नामानि देवमनुष्यादीनि मात्रास्तद्रूपादय: इन्द्रियाणि तच्छ्रोत्रादीनि ईहास्तच्चेष्टाश्च यतस्तया मायया भ्रमच्चित्त: सन् न वेद त्वां जगद्रूपेण बहुनामरूपमपि स्वरूपेण ततो भिन्नं न जानातीत्यर्थ: । स्मृत्युपप्लवात् विवेकध्वंसात् ॥२४-२५॥ एतादृशज्ञानं व्याचक्षाणा अपि वयं तु त्वद्भक्ता एव भक्तिं विना एतादृशत्वद्दर्शनानुपपत्तेरित्याहु:-तस्येति । अघौघस्य मर्षो नाशो यस्मात् तस्य तीर्थस्य गङ्गाख्यस्य आस्पदमाश्रयं सुविपक्वयोगैरपि हृदि कृतं न तु दृष्टं वयं तु तवाङ्घ्रिं ददृशिम । ननु सर्वे लिङ्गदेहध्वंसनार्थं ज्ञानमवश्यापेक्ष्यमिति तत्राहु:-उत्सिक्ता उद्रिक्ता या भक्तिस्तयैव उपहत: आशयलक्षणो जीवकोशो येषां ते एव पूर्वे भगवद्गतिमापु: नान्ये अथो अत एव भक्तानेवास्मान् ज्ञात्वा अनुगृहाण ॥२६-२७॥

गूढार्थदीपिनी

यथा शयानः पुरुषः स्वप्नान् पश्यन् नाममात्रं मिथ्याभूतमेव इन्द्रियेण मनसा आभातं सिंहादिरूपमात्मानं वेद तद्रहि च न वेद। कुतः। गुणेषु स्वप्नविषयेषु तत्त्वदृक् सत्यत्वबुद्धिः। यद्वा। गुणं गुणकार्यं देहं तत्त्वरूपेण पश्यतीति तथा ॥२४॥ एवं स्मृतेः विवेकस्य उपप्लवात् नाशात् हेतोः त्वामपि न वेद। कुतः। नममात्रेषु मिथ्याभूतेषु विषयेषु इन्द्रियैः या ईहा प्रवृत्तिः सैव माया तथा भ्रमच्चित्तं यस्य सः तथाभूतः ॥२। तस्य ते अङ्घ्रिम् अद्य ददृशिम दृष्टवन्तो वयम् अथो अतः अस्मान् अनुगृहाणेत्यन्वयः। यतो बहवोऽपि योगिनः भगवद्गतिं मुक्तिम् अवापुः। कथम्भूताः। उत्सिक्ता वृद्धिं गता य भक्तिः प्रेमलक्षणा तया उपहतः नष्टः आशयः अन्तःकरणरूपो जीवकोशो लिङ्गशरीरं येषां ते तथोक्ताः। कथम्भूम् अङ्घ्रिम्। अघौघस्य मर्षो नाशो यस्मात् तत् तीर्थं गङ्गा तस्य आस्पदम्। पुनश्च। योगिभिः हृदि कृं चिन्तितम् ॥२६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्वस्वरूपान्तावज्जीवो न जानाति परमात्मानं न जानातीति कैमुत्यन्यायं द्योतयन्तः एतत्सदृष्टान्तमाहुः-शयानः अयं वा पुरुषः परं केवलं गुणतत्त्वदृक् गुणे गुणकार्ये देहे एवेदं तत्त्वमिति दृक् दृष्टिर्यस्य सः देहात्ममानी नामानि च मात्राशब्दवाच्यानि रूपाणि चेन्द्रियरूपाणि च तेषां समाहारः नाममात्रेन्द्रियम् आभातं यतः तं देहेन्द्रियादिप्रकाशरहितं देहेन्द्रियादिभिन्नं परं श्रेष्ठ आत्मानं स्वस्वरूपं यथा न वेद ॥२४॥ एवं त्वा त्वां पुरुषः स्मृतेः आत्मपरमात्मविवेकस्य उपप्लवात् न वेदेति किमुत वक्तव्यम्। नाममात्रेषु नामरूपेषु देहगेहादिषु विषयेषु शब्दादिषु च इन्द्रियेहया इन्द्रियचेष्टया मायया मायाकार्यान्तःकरणवृत्त्या भ्रमच्चित्त इति स्मृत्युपप्लवे हेतुर्दर्शितः ॥२५॥ एवं सामान्यतो भगवतो दुर्ज्ञेयत्वमुक्तमथ शिष्टैर्भक्त्या त्वच्चरणं हृदि साक्षाद्दृष्टमतो वयमपि पूर्वं त्वद्भक्ता एव प्रत्यक्षचरणानुभवोपपत्तेः अतो भक्तान् भक्तचरणानुभवज्ञानवतोऽस्मान् स्वप्राप्तिलक्षणं मोक्षं देहीति प्रार्थयन्ते-तस्येति। हे आद्य! विश्वहेतोः अघौघस्य मर्षं नाशं करोतीति तत् तीर्थं गङ्गादि तस्य आस्पदमाश्रयं सुविपक्वयोगैः सुष्ठु विपक्व भक्तिलक्षणो योगो येषां तैः हृदि कृतं साक्षाद्दृष्टं तस्य तेऽङ्घ्रिं ददृशिम दृष्टवन्तो वयमतो ज्ञायते वयं भक्ता एव अतोऽस्मान् भक्तान् अनुगृहाण कार्यकारणप्रकृतिवयोगपूर्वकं स्वप्राप्तिलक्षणं मोक्षं देहीत्यर्थः। यतः उत्सिक्तया उद्रिक्तया भक्त्या उपहतः विनष्ट आशयो वासना जीवकोशः लिङ्गदेहश्च येषां भवद्गतिं प्रापुः अतः ॥२६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

नन्वात्मत्वे व्यवधानाभावात् कथमेते न ज्ञातवन्तस्तत्राह-यथा शयान इति। यथा निद्रा आत्मज्ञाने व्यवधायिका तथा अविद्या माया वा भगवदीया तेषामात्मज्ञाने हेतुरिति वक्तुं मायायवनिकाच्छन्नत्वेन निरूपितमपि प्रकारभेदेन निरूपयितुमिदमुक्तं शयानः पुरुषः आतमानं नाममात्रेन्द्रियेष्वेव आभातं वेद न तु ततः परं तत्र हेतुः गुणतत्त्वदृगिति। गुणेषु स्वप्नप्रतिभातविषयेषु तत्त्वदृक् परमार्थबुद्धिः यदि जानीयादेते अपरमार्थाः इदानीमनुभूयमानदेहक्रियासहिताः तदा जाग्रदवस्थमात्मानं जानीयादे नन्वात्मानुभवस्तत्राप्यस्तीति चेत् सत्यं तथापि नाम तदानीन्तनं देवदत्तादिरूपं मात्राविषयाः इन्द्रियाणि च तेष्वेवाभातः त अहन्तया गृहीता इति आत्माभासप्रतीतिरेव नन्वात्मप्रतीतिः इत्यर्थः। उभयं निषेधयन्ति, न वेद रहितं परमिति। पूर्वोक्तनामादिरहितं तदवस्थातोऽपि च परं न वेद ॥२४॥ एवं दृष्टान्तमुपपाद्य दार्ष्टान्तिके योजयति-एवं त्वामिति। यथा स्वप्नसङ्घातस्यायं महान् आत्मा तथास्य भगवान् अत एव भगवतः अज्ञानं न च व्यक्तं स्वप्ने अयं देहो न स्थितः ततो वैलक्षण्यमिति तर्हि क तत्रैवाधारे तस्य प्रपञ्चस्योत्पन्नत्वात् अन्यथा तच्चालने तदपगमो न स्यात् तथापि न स पृथग्भासत इति चेत् तस्य परिच्छिन्न तत्स्थानीयमन्यच्च स्वीकृतवानिति असमर्थत्वात्तस्याभानं भगवतस्तु व्यापकत्वात् सर्वसमर्थत्वात् पृथगप्याभानमेतावान् वि अज्ञानं तु तुल्यमेव तदाह-नाममात्रेन्द्रियेहया। नाममात्रेन्द्रियेषु चलनादन्यथाबुद्धिकारिण्या आत्मबुद्धिमुत्पादयन्त्या वि भ्रमच्चित्तः त्वां परमार्थत आत्मानं न वेद अनेनात्मपरमात्मभावभेदाऽनङ्गीकारेऽपि भगवज्ज्ञानं न समर्थितं नन्वनादिसिद्धत्वात् गुरुशास्त्रतपोभिः कदाचिद्भगवदनुभवः सम्भवति आत्मानुभवो वा ततः इदानीं भगवन्तं दृष्ट्वा सोऽयमिति कथं न प्रतीति

स्मृत्युपप्लवादिति
कदाचिदपि नोपल
तस्याङ्घ्रिं ददृशिमेत

अघौघस्य
हृदि फलत्वे कृतम् ए
भवन्तो मुक्ता भविष्य
भगवते समर्पिताः आ
आशय एव वा जीवक
इति लृटि प्रयोक्तव्ये ति

एतत्सदृष्टान्त
स्फुरितं सिंहसर्पराजादि
मायया भ्रमच्चितो न वे
कृतं तस्य ते तवाङ्घ्रिं च
नष्टः आशयो वासनारूप

तत्र दृष्टान्तमाहु
पश्यन् नाममात्रं मिथ्याभू
वेद ॥२४॥ एवं दृष्टान्ते उ
यस्य सः। अत एव स्मृते
वेद, किं त्वेवं स्वप्नवद्देह
परमपुरुषार्थरूपस्य पुरुषो
कथं कृतार्थत्वं तत्राह-अ
सुपक्वयोगैरपि योगिभिर्हृ
पाठे समर्पितः आशयोऽन्तः
कृत्वा अनुगृहाण अनुग्रहपू

तस्येति। अघौघस्य
भिन्नपदपाठो वा। तथा सुप
ददृशिम दृष्टवन्तः अतो वयं
समर्पितः। आशयोऽन्तःकरण
भक्तान् कृत्वा अनुगृहाण अनु

पमात्मानं वेद तद्रहितं
तीति तथा ॥२४॥ एवं
: या ईहा प्रवृत्तिः सैव
मान् अनुगृहाणेत्यन्वयः
क्षणा तया उपहतः नष्टः
नाशो यस्मात् तत् तीर्थं

माहुः-शयानः अयानो
न च मात्राशब्दवाच्यानि
न्द्रियादिभिन्नं परं श्रेष्ठम्
विदेति किमुत वक्तव्यम्
:करणवृत्त्या भ्रमच्चित्त
साक्षाद्दृष्टमतो वयमपि
मोक्षं देहीति प्रार्थयन्ते -
क्वयोगैः सुष्ठु विपक्वः
एव अतोऽस्मान् भक्तान्
भक्त्या उपहतः विनष्टः

ज्ञाने व्यवधायिकी तथा
न निरूपयितुमिदमुच्यते
षु स्वप्नप्रतिभातविषयेषु
स्थमात्मानं जानीयादेव
च तेष्वेवाभातः त एव
ति । पूर्वोक्तनामादिरहितं
वप्नसङ्घातस्यायं सङ्घातः
क्षण्यमिति तर्हि क्व गतः
चेत् तस्य परिच्छिन्नत्वात्
प्याभानमेतावान् विशेषः
द्धमुत्पादयन्त्या विशेषेण
न्वनादिसिद्धत्वात्संसारस्य
त कथं न प्रतीतिस्तत्राह-

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

मृत्युपप्लवादिति ॥२५॥ जन्ममरणादिना स्मृतिनाशात् तादृशोऽयमद्य दृष्ट इति स्वकृतार्थतामनूद्य कृपां प्रार्थयन्ते तस्याद्येति । यः कदाचिदपि नोपलब्धः यः फलं सर्वं च स दृष्ट एव तत्रापि यथा सर्वदा दर्शनं भवति तेनोपायेन सहितो न दृष्ट इति ज्ञापनार्थं तस्याङ्घ्रिं ददृशिमेत्युक्तं चरणस्य सर्वदा साक्षात्कारहेतुत्वे प्रकारमाह-अघौघमर्षमित्यादित्रिभिर्विशेषणैः ।

"मलापकर्षणं पूर्वं शुद्धादिगुणयोजनम् । ततश्च फलरूपं च योगसाधनभावितम् ॥"

अघौघस्य पापसमूहस्य मर्षं मृषात्वं यस्मात् मर्षणं शोधनं वा किञ्च तीर्थास्पदं गङ्गादीनामुत्पत्तिस्थानं ततो योगसिद्धैः हृदि फलत्वे कृतम् एतादृशं चेत् प्राप्ताः तदा क्रमेण हृदि स्थितो भविष्यतीति तेनाग्रे सर्वं सेत्स्यतीति स्वभाग्याभिनन्दनं ननु कथमग्रे भवन्तो मुक्ता भविष्यन्तीति चेत्तं प्रकारमाहुः-उत्सिक्तेति । उत्सिक्ता या भक्तिः मर्यादामुल्लङ्घ्य अधिका जाता तया कृत्वा उपहृता भगवते समर्पिताः आशयजीवकोशाः अन्तःकरणात्मसङ्घाताः यैः सङ्घातादात्मा तदुपाधिश्च पृथक्कृत्य निरूपितौ आन्तरत्वज्ञापनाय आशय एव वा जीवकोश एवमुपाधिसमर्पणे केवला वयं भगवद्गतिमापुः "आशंसायां भूतवच्च" (३/३/१३२) इति प्राप्स्याम इति लृटि प्रयोक्तव्ये लिट्प्रयोगः । अथ अस्मात् त्वदीया एवेति भक्तानस्माननुगृहाण आत्मसात्कुर्विति प्रार्थना ॥२६॥

श्रीसुबोधिनीसारः

एतत्सदृष्टान्तमाहुः यथा शयानः सुप्तः पुरुषो गुणेषु तत्त्वदृक् सत्यबुद्धिर्यस्य स नाममात्रमिन्द्रियेण मनसा भातं प्रतीतं स्फुरितं सिंहसर्पराजादिरूपं वेदपरं तद्रहितम् आत्मानं न वेद ॥२४॥ एवं त्वा त्वां नाममात्रेषु विषयेषु इन्द्रियैरीहया प्रवृत्तिरूपया मायया भ्रमच्चितो न वेद स्मृतेर्ज्ञानस्योपप्लवान्नाशान् ॥२५॥ अघौघमर्षं पापपूरनाशनं तीर्थास्पदं श्रीगङ्गादेरुत्पत्तिधाम योगिभिर्हृदि कृतं तस्य ते तवाङ्घ्रिं चरणमद्य वयं ददृशिम अथोऽतो भक्तान् अस्मान् त्वमनुगृहाण कृपां कुरु उत्सिक्तयोद्रिक्तया भक्त्या उपहतो नष्टः आशयो वासनारूपो जीवकोशो येषां ते भवतो गतिं स्वरूपं प्रापुः ॥२६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र दृष्टान्तमाहुः-यथेति । यथा गुणं कार्यं देहं तत्त्वमात्मतत्त्वतया पश्यतीति गुणतत्त्वदृक् पुरुषः शयानः स्वप्नान् पश्यन् नाममात्रं मिथ्याभूतमेवेन्द्रियेण आभातं सिंहव्याघ्रादिरूपमेवात्मानं वेद, तदाकाररहितं परं ततो भिन्नं देवदत्तादिरूपं न वेद ॥२४॥ एवं दृष्टान्ते उक्तमर्थं दार्ष्टान्तिके योजयति-एवमिति । विषयेष्विन्द्रियैर्या ईहा प्रवृत्तिः सैव माया तया विभ्रमच्चित्तं यस्य सः । अत एव स्मृतेर्विवेकस्योपप्लवो नाशस्तस्मात् हेतोर्नाममात्रेषु वस्तुमात्रेष्वपि देहादिषु सन्तमपि त्वां स्वात्मानं न वेद, किं त्वेवं स्वप्नवद्देहादिकमेवात्मानं मन्यत इत्यर्थः ॥२५॥ उक्तामेवात्मकृतार्थतामनूद्य गमनं प्रार्थयन्ते-तस्येति । तस्य परमपुरुषार्थरूपस्य पुरुषोत्तमस्य ते तवाङ्घ्रिमद्य वयं ददृशिम दृष्टवन्तः, अतो वयं कृतार्थाः इति शेषः । ननु अङ्घ्रिदर्शनमात्रेण कथं कृतार्थत्वं तत्राह-अघौघस्य पापसमूहस्य मर्षो नाशो यस्मात्तत्तीर्थं यद्गङ्गारूपं तस्यास्पदं तीर्थत्वकारणमित्यर्थः । तथा सुपक्वयोगैरपि योगिभिर्हृदि कृतं चिन्तितमित्यर्थः । यस्य चरणस्योत्सिक्तया वृद्धया भक्त्या उपहतः निवृत्तः 'उपहृत' इति पाठे समर्पितः आशयोऽन्तःकरणरूपो जीवकोशो येषां ते एव भवद्गतिं फलभूतं भवन्तमापुः । अथो तस्मात् अस्मान् भक्तान् कृत्वा अनुगृहाण अनुग्रहपूर्वकं गमनाज्ञां देहि ॥२६॥

अन्वितार्थप्रकाशिका

तस्येति । अघौघस्य पापसमूहस्य मर्षो नाशो यस्मात्तत्तीर्थं यद्गङ्गारूपं तस्यास्पदं तीर्थत्वकारणमित्यर्थः । तीर्थास्पदमिति भिन्नपदपाठो वा । तथा सुपक्वयोगैरपि योगिभिर्हृदि कृतं चिन्तितं तस्य परमपुरुषार्थरूपस्य पुरुषोत्तमस्य ते तवाङ्घ्रिमद्य वयं ददृशिम दृष्टवन्तः अतो वयं कृतार्थाः इति शेषः । यस्य चरणस्योत्सिक्तया वृद्धया भक्त्या उपहतः निवृत्तः । 'उपहृत' इति पाठे समर्पितः । आशयोऽन्तःकरणरूपो जीवकोशो जीवावरकरूपो येषां ते एव भवद्गतिं फलभूतं भवन्तमापुः । अथो तस्मात् अस्मान् भक्तान् कृत्वा अनुगृहाण अनुग्रहपूर्वकं गमनाज्ञां देहि ॥२६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तत्र दृष्टान्तः-यथेति श्लोकयुगलम् । शयानः पुरुषः गुणेषु स्वप्नविषयेषु तत्त्वदृक् तत्त्वं याथार्थ्यम् इदमेवेति दृष्टिर्यस्य एवम्भूतः सन् नाममात्रैः इन्द्रियैः समानसैः आभातं व्यघ्रसर्पदिदृष्टम् आत्मानं स्वं वेदरहितं व्याघ्रादिभिन्नं परं जाग्रद स्थितं विष्णुदत्तादिरूपम् आत्मानं न वेद यथा ॥२४॥ एवम् अनित्येषु विषयेषु भोग्यपदार्थेषु इन्द्रियेहया इन्द्रियैः । कृत्वा या चेष्टा तया एव मायया भ्रमच्चित्तः । व्यग्रान्तःकरणः सन् त्वा त्वां परमेश्वरं न वेद यतः व्यग्रचित्तेन स्मृतिः सत्पुरुषप्राप्तपरमात्मज्ञान उपप्लवात् नाशात् ॥२५॥ अनुग्रहं प्रार्थयन्त आहुः-तस्येति । अघौघस्य मर्षं नाशकं यत्तीर्थं गङ्गादि तस्यास्पदम् उद्भवस्था सुविपक्वः योग आत्मावलोकनं येषां तैः योगिभिः हृदि कृतं ते तव अङ्घ्रिं वयं ददृशिम अतोऽस्मान् भक्ताननुगृहाण अस्मा त्वमनुग्रहं कुर्वित्यर्थः । ननु भवादृशां महतां ममानुग्रहेण किं स्यादिति चेत्तत्राहुः-उत्सिक्ता उत्कृष्टा चासौ भक्तिश्च तया उपह आशयः अन्तःकरणवासनारूपः । जीवस्य स्वस्वक्षेत्रस्य कोश आवरकं लिङ्गशरीरं येषां तथाभूताः भवदनुगृहीताः नव योगेश्वराः भवद्गतिं पार्षदत्वमापुः नान्ये अतोऽस्माकं त्वत्पार्षदत्वं देहीति भावः । अथो नु इति सन्धिरार्षः ॥२६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एतत् सदृष्टान्तमाहुः ॥ यथेति ॥ गुणेषु सत्त्वादिगुणकार्येषु शब्दादिविषयेषु तत्त्वदृक् पुरुषार्थदर्शी । यद्वा । गुणतत्त्व गुणपरिणामरूपं तत्त्वं देहमात्मतया पश्यतीति तथाभूतः शयानः पुरुषः यथा नाम च मात्रा च इन्द्रियाणि च तदात्मना भातम् अ मात्राशब्देन रूपं विवक्षितम् । स्वाप्ननामरूपेन्द्रियैर्युक्ततयोपलक्षितमित्यर्थः । आत्मानं वेद । रहितं स्वाप्ननामादिवर्जितम् अत एव परं स्वाप्नदेहाद्विलक्षणम् आत्मानं न वेद ॥२४॥ एवमिति ॥ जाग्रत्पुरुषोऽपीति शेषः । एवं स्वाप्नपुरुषवदेव हे ब्रह्मन् ! माया त्वन्मायामूलया नाममात्रेन्द्रियेहया नामरूपेन्द्रियानुगुणया चेष्टया स्मृत्युप्लवात् स्वात्मपरमात्मयाथात्म्यविषयस्मृतिप्रमोषा विभ्रमदनात्मानं देहमात्मतया परतन्त्रं सन्तमपि स्वतन्त्रतया च गृह्णच्चित्तं यस्य तथाभूतः सन् त्वाम् आश्रितम् । कर्तरि क्तः । प्रत्यगात्मानमेव न वेद । तदा प्रत्यगात्मनः परमात्मानं त्वां न वेदैवेति कैमुत्यसिद्धमित्यर्थः ॥२५॥ तर्हि कैश्चिदप्यविज्ञेयोऽमनुपार्योऽमोक्षदश्चेत्यत आहुः ॥ तस्येति ॥ अघौघमर्षं पापनिवारणपूर्वकं शुद्धिकारकं यत्तीर्थं गङ्गादिकं तस्यास्पदमाश्रयं सुतरां विपक्वो योगो भक्तियोगो येषां तैः हृदि कृतं साक्षात् कृतं तस्योक्तविधस्य ते तव अङ्घ्रिं चरणं वयम् अ अधुना ददृशिम । सुविपक्व-योगैर्हृदि कृतमित्यनेन योगपरिशुद्धमनोदृश्यत्वमुक्तम् । तेन कैश्चिदप्यविज्ञेयत्वमनुपास्यत्वं च निरस्त । उत्सिक्तोद्रिक्ता भक्तिस्तया उपहत आशयो वासना जीवकोशः अज्ञानरूपः कोशश्च येषां ते वयं भवद्गतिम् आपुः । मुक्तप्राप्यत्वमुक्तम् । अथो यत एवमत इत्यर्थः । भक्तानस्मान् अनुगृहाण । अत्राज्ञानस्य कोशवदावरकत्वात्तत्त्वेन ग्रहणम् ॥२६॥

कृष्णप्रिया

मनुष्य जब निद्रामें स्वप्न देखने लगता उस अवसर स्वप्नके मिथ्या पदार्थोंको ही वास्तविक मान और नाम मात्रकी इन्द्रियोंसे प्रतीयमान अपने स्वप्न शरीरको ही वास्तविक शरीर मान बैठता है, उतनी देरके इस बातका अल्प भी पता नहीं रहता कि स्वप्न शरीरके भिन्न एक जाग्रत अवस्था में एक भिन्न देह है एसा प्रकार जाग्रत अवस्थामें भी इन्द्रियोंकी प्रवृत्तिरूप माया से चित्त मोहित हो कर नाममात्र के विषयोंमें लगता है उस मस.मय भी चित्त के चक्करसे विवेक शक्ति आच्छादित हो जाती है और जीव यह नहीं जान कि स्वयं इस जाग्रत संसारसे परे है ॥२५॥ म्हाराज ! समर्थ ऋषि और मुनिवर अत्यन्त परिपक्व योगोपासना माध्यमसे आपके दिव्य उन चरणकमलोंको हृदयमें धारण करते है, जो पाप पुञ्ज को नष्ट करने वाले गंगा के भी उत्तम वो स्थान है । यह खडे सौभाग्यकी बात है कि आज हमें ऐसे सदामंगलकर चरणोंके दर्शन हो रहे हे नाथ ! हम आपके भक्त है, आप हम पर कृपा कीजिये; कारण कि आपके परम पदकी प्राप्ति उन्हीं जनोंको है, जिनका लींगदेह- सूक्ष्मदेह काररण शरीर आपके श्रीचरणोंकी अनन्य भक्ति के माध्यमसे नष्ट होता जाये ॥२६॥

'इत्यनुज्ञाप्य
तद्वीक्ष्य तानु

नमो वः सर्व

श्रीशुकः, उवाच
॥२७॥ तत्, वीक्ष्य, महाय
। ऋषयः, सर्वदेवेभ्यः, व

उपसङ्गृह्य चरणौ
वेदविदि ब्राह्मणे वसन्ति''

इतीत्थम् ॥२७॥ त
तप्तमुद्राधारणाऽभावं द्योतयति
वर्तत एव एतदभिप्रेत्यैव भ

''ब्राह्मण
शङ्खचक्रा

किञ्च — ''शङ्खचक्र
इत्याश्वला

श्रुतौ ब्राह्मणपदं द्वि
वैष्णवाभासैर्विप्रपरत्वबोधक
वेदभाष्यकर्तृभिरन्यपरतया व्य
निषेध इति न्यायमाश्रित्य ब्रा
सर्वत्रैवैवमत्राप्यप्राप्तनिषेधोऽ
स्वीकृतास्तद्विषयमेव वैतद्विधा

''विष्णवागम

किञ्च — ''श्रुतिपथगा

श्रुतिपथनिरतानामस्ति
देशे काले शास्त्रे इतिहासे पुरा
मूलच्छेदः । तत्तथा ॥२९॥

---

१. इतीदमुक्त्वा-वीर. । २. राज
गम्य-जीव. ।

श्रीशुक उवाच

[1]इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरम् । [2]राजर्षे स्वाश्रमान् गन्तुं मुनयो दधिरे मनः ॥२७॥
तद्वीक्ष्य तानुपव्रज्य वसुदेवो महायशाः[3] । प्रणम्य चोपसंगम्य[4] बभाषेदं सुयन्त्रितः ॥२८॥

वसुदेव उवाच

नमो वः सर्वदेवेभ्य ऋषयः श्रोतुमर्हथ । कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यताम् ॥२९॥

कर्दमक्षमा

श्रीशुकः, उवाच । राजर्षे, इति, दाशार्हम्, धृतराष्ट्रम्, युधिष्ठिरम्, अनुज्ञाप्य, मुनयः, स्वाश्रमान्, गन्तुम्, मनः, दधिरे ॥२७॥ तत्, वीक्ष्य, महायशाः, वसुदेवः, तान्, उपव्रज्य, प्रणम्य, च, उपसङ्गम्य, सुयन्त्रितः, इदम्, बभाषे ॥२८॥ वसुदेवः, उवाच ऋषयः, सर्वदेवेभ्यः, वः, नमः, श्रोतुम्, अर्हथ, यथा, कर्मणा, कर्मनिर्हारः, स्यात्, तत्, उच्यताम् ॥२९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उपसङ्गृह्य चरणौ पाणिभ्यां धृत्वा प्रभाषे इदमिति सन्धिरार्षः ॥२८॥ सर्वे देवा येषु तेभ्यः "यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति" इति श्रुतेः । येन कर्मणा यथा कृतेन वा कर्मणां निर्हारो निरासो भवति तदुच्यताम् ॥२९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतीत्थम् ॥२७॥ तत्तेषां गमनम् । तान् मुनीन् ॥२८॥ यावतीर्यावत्यः, तास्तावत्यः । इति श्रुतिपदार्थः । इयमेव श्रुतिर्विप्राणां मुद्राधारणाऽभावं द्योतयति । "श्रुतौ या वेदवित्त्वोक्तिः सा गायत्री वै सर्वमिदम्" इति श्रुतेर्गायत्र्याः सर्ववेदमूलत्वेन तन्मात्रविद्यपि अत एव एतदभिप्रेत्यैव भगीरथं प्रति बृहन्नारदीये धर्मराजेनोक्तं —

> "ब्राह्मणस्य तनूर्ज्ञेया सर्वदेवसमन्विता । सा चेत्सन्तापिता राजन् किं वक्ष्यामि तदेनसः ॥
> शङ्खचक्राद्यङ्कनं च गीतनृत्यादिकं तथा । एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ॥"

किञ्च — "शङ्खचक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा । स शूद्रवद्बहिःकार्यः सर्वस्माद्द्विजकर्मणः ॥"
इत्याश्वलायनेनाप्युक्तम् ।

श्रुतौ ब्राह्मणपदं द्विजातिपरमेव । बृहन्नारदीयादिवाक्यस्य तदुपबृंहणत्वात्, तद्धृतिविधायकवाक्यानि द्विजेतरपराण्येव । वैष्णवाभासैर्विप्रपरत्वबोधकानि वाक्यानि कल्पयित्वा पुराणेष्वाधुनिकैर्निक्षिप्तानि । याः श्रुतयस्तत्र प्रमाणत्वेन न्यस्तास्ता वेदभाष्यकर्तृभिरन्यपरतया व्याख्याताः । स्मृतयश्च हारीताद्यास्तेषां प्रसिद्धस्मृतिभ्यो विरुद्धत्वात्कल्पिता एव । यदि प्राप्तौ सत्यां निषेध इति न्यायमाश्रित्य ब्राह्मणं प्रति प्राप्तमेवेति निषिध्यते तत्रोत्तरं न हि ब्राह्मणं प्रकृत्य कुत्रापि सुरापानं विधिर्निषेधस्तु सर्वत्रैवमत्राप्यप्राप्तनिषेधोऽयम् । किञ्च-तान्त्रिकैः प्रसिद्धवर्णाश्रमेभ्यः इतरेऽपि ब्राह्मणादिवर्णा ब्रह्मचर्याद्याश्रमाश्च स्वीकृतास्तद्विषयमेव वैतद्विधानम्, स्पष्टं चैतत्सूतसंहितायाम् । वस्तुतस्तु तान्त्रिकोऽयं विधिस्तत्र वैदिकानां नाधिकारस्तदुक्तं-

> "विष्ण्वागमादितन्त्रेषु दीक्षितानां विधीयते । शङ्खचक्रगदापद्मैरङ्कनं नान्यदेहिनाम् ॥"

किञ्च — "श्रुतिपथगलितानां मानुषाणां तु तन्त्रं गुरुगुरुरखिलेशः सर्ववित्प्राह शम्भुः ।
श्रुतिपथनिरतानामस्ति नैवात्र किञ्चिद्धितकरमिह सर्वं पुष्कलं सत्यमुक्तम् ॥" इत्यलं प्रसक्तानुप्रसक्तेन । यद्वा-सर्वस्मिन् लोके काले शास्त्रे इतिहासे पुराणे वेदे आगमे च देवो देवनं प्रकाशनं येषां ते तेभ्यस्तथा । सर्वलोकपूज्येभ्य इत्यर्थः । निरासो उच्छेदः । तत्तथा ॥२९॥

---

१. तांसमुक्त्वा-वीर. । २. राजषिवर्यास्तान्गन्तुं-विज. । ३. मनाः-गो. प्रे. टी. । ४. गृह्य-श्रीधर. वंशी. वीर. विज. विश्व. शुक. ; म्य-जीव. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति विज्ञप्तिप्रकारविशेषेणानुज्ञाप्य प्रस्थानार्थमनुज्ञां प्रार्थ्य दाशार्हं तत्कुलेऽवतीर्णं स्वयं भगवन्तं धृतराष्ट्रं चेति तन्मध्ये उपविष्टत्वादन्धत्वात् श्रीव्यासात्मजत्वाच्छ्रीयुधिष्ठिरानुबोधाच्च स्वस्वाश्रमजिगमिषां च तेषां श्रीभगवदिच्छामभिप्रेत्य तत्रस्थशिष्यपरिचारकेषु भक्त्युपदेशायेति ज्ञेयम्। अतो राजर्षे इति तत्तदभिप्रायं जानास्येवेति भावः ॥२७॥ तत्तेषां मनो वीक्ष्य अभिप्रायं विज्ञायेत्यर्थः। तानुपव्रज्य तेषां समीपे गत्वा श्रीभगवत्पितृत्वेन महायशाः अतः श्रीभगवद्वदेव लौकिकलीलामनुसृत्य तदुचितस्वयशसा तं च लोकांश्चानन्दयितुमिति भावः। सुयन्त्रितः परमविनीतः सन् ॥२८॥ किं तदाह-कर्मणेति। स्वयं ज्ञायमानस्यापि तान् प्रति प्रश्नस्तेषां तदुपदेशाधिकारिणां प्रमाणनेन मर्यादाप्रतिपालनाय ॥२९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्येवमनुज्ञाप्य प्रस्थानार्थमनुज्ञां प्रार्थ्य। यद्वा। इत्येतदनुज्ञाप्य विज्ञाप्य दाशार्हमशेषैश्वर्यप्रकटनार्थं यदुकुलेऽवतीर्णं साक्षाद्भगवन्तम्, सम्राट्त्वात्। स्वस्वाश्रमजिगमिषा च तेषां तत्रस्थशिष्यादिपरिवारेषु भक्त्युपदेशायेति ज्ञेयम्। हे राजर्षे इति ऋषीणां स्वभावोऽयं भवता ज्ञायत एवेति भावः ॥२७। तत्तेषां मनो वीक्ष्य अभिप्रायं विज्ञायेत्यर्थः। उपव्रज्य समीपे गत्वा श्रीभगवत्पितृत्वेन महायशा अपि। यद्व। भावियशोविशेषाभिप्रायेण सुयन्त्रितः परमविनीतः सन् ॥२८॥ नमो वो युष्मभ्यमिति प्रागेव नतिर्विज्ञापनार्थं भक्तिविशेषात्। हे ऋषयः! इति सर्वज्ञत्वं द्योतयति। अतः श्रोतुमर्हथ योग्या भवथ मन्निवेद्यमिति शेषः। किं तदाह-कर्मणेति। स्वयं तेन ज्ञायमानस्यापि तस्य तान् प्रति प्रश्नः। सत्तीर्थे तस्मिन् नृपमुनिबन्धुगणसमाजे यज्ञमहोत्सवेच्छया तेषामेव मुनीनामुक्त्या तैस्तत्प्रवर्तनार्थम् ॥।२९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कर्मनिर्हारः कर्मबन्धक्षापणम् ॥२९-३१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इतीति। दाशार्हं श्रीकृष्णम् इदमुक्त्वा अनुज्ञां पृष्ट्वेत्यर्थः। हे राजर्षे! मनोदधिरे मनश्चक्रुः ॥२७॥ तदिति। तन्मनोधानं वीक्ष्य तान्मुनीनुपव्रज्य समीपमेत्य प्रणम्योपसङ्गम्य चरणौ पाणिभ्यां धृत्वा सुयन्त्रितोऽवहितचित्तः इदं वक्ष्यमाणं बभाषे ॥२८॥ सर्वे देवा येषु तेभ्यः युष्मभ्यं नमः। हे ऋषयः! श्रोतुं मद्वच इति शेषः। "यावतीर्वै देवतास्तास्ताः सर्वाः वेदविदि ब्राह्मणे वसन्ति" इति श्रुतिप्रसिद्ध्यभिप्रायेण सर्वदेवेभ्य इत्युक्तं किं तद्वच इत्यत आह-कर्मणेति। यथा यथानुष्ठितेन कर्मणा वर्णाश्रमानुगुणं कर्मणां भगवद्भक्तियोगोत्पत्तिप्रतिबन्धकानां प्राचीनपुण्यापुण्यात्मकानां निर्हारः स्यादिति तदुच्यतां तत्रोत्तरमुच्यतामित्यर्थः ॥२९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

धृतराष्ट्रं चेति तन्मध्ये उपविष्टत्वेन श्रीयुधिष्ठिरानुरोधात्। श्रीभगवत्पितृत्वेन महायशाः। अतः श्रीभगवद्वदेव लौकिकलीलामनुसृत्य तदुचितस्वयशसा तं लोकांश्चानन्दयितुमिति भावः ॥२८॥ नन्वहो अस्मन्मनोरथदुष्प्रापभागधेयं श्रीकृष्णपिताऽसौ कथमन्यच्छ्रेयः पृच्छति चेत् तं त्यक्त्वा कथमन्यं पृच्छतीति विस्मित्य मुनयस्तूष्णीमासन्। श्रीनारदः पूर्वोक्तं तदभिप्रायं बुद्ध्वाऽप्यसहमान एवमचिन्तयत् यथाऽयं खलु सर्वश्रेयःपथप्रवीणः श्रीकृष्णमहिमनिष्णातश्च। श्रीनन्दवत्तदीयकेवलमाधुरीमग्नः तथापि यदिदं पृच्छति तत्किल लौकिकलीलायां स्वद्वारा स्वपुत्र सात्त्विकयशोविस्तारयणायैव तच्चातितुच्छमेव। परमकाष्ठावरिष्ठस्य ततः स्वयं भगवान् वा कथञ्चित् आत्ममहिमानं तत्तल्लीलां प्रकाशयतु कथन्तरामयमपि तदनुवर्तते यदि च वयमप्येतदनुवर्तामहे तदा मुह्येदेव लोकः तस्मादेतदुपालम्भ श्रीभगवन्महिमैवास्माभिर्व्यञ्जयितुं योग्य इति ॥२९॥

॥२१-२९॥

॥२२-४०॥

उपसङ्गृह्य प

मम हत्संशयोऽपि दुश्छेद

वेदविदि ब्राह्मणे वसनि

ज्ञानभक्त्योरनधिकारादिति

दाशार्हः यदुवंशीय

तान् मुनीन् उपसङ्गृह्य पा

कर्मनाशः बन्धनिवृत्तिः स्या

देवतास्ताः सर्वाः वेदविदि ब्र

भगीरथं प्रति धर्मराजेनोक्तम्।

ब्राह्मणस्य

शङ्खचक्राद्य

किञ्च - शङ्ख

इत्याश्वलायनेनाप्युक्तम्

इत्येवं दाशार्हं श्रीकृष्

उपसङ्गृह्य चरणग्रहणं हस्ताभ्

उपास्यो येषां तेभ्यः "विप्राणां दे

देवतास्ताः सर्वा वेदविदि ब्रा

भगवद्भावापत्तिलक्षटणमोक्षप्रतिब

एवं प्रार्थयित्वा तूष्णीमेव

अप्यनुज्ञाता इत्याह- धृतराष्ट्रं युधिष्ठि

प्रवृत्तिपराणां फलसिद्धिमुक्त्वा प्रवृ

अतः स्वकृतार्थत्वाय तान् प्रष्टुं यतते

कथनार्थं दृष्टमप्युपायं कृतवानित्याह-

बभाषे सन्धिरार्षः ॥२८॥ ज्ञापनामाह-

इत्यादिश्रुतेः। सर्वदेवत्वम् अनेन दे

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

॥२१-२९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥२२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उपसङ्गृह्य पादौ धृत्वा बभाषे इदमिति सन्धिरार्षः । एतावन्तो मुनयो हि निमन्त्र्याप्यानेतुमशक्याः एतैर्विना मम हृत्संशयोऽपि दुश्छेद एव तदधुनैवाहं प्रष्टव्यं पृच्छामीति भावः ॥२८॥ सर्वदेवेभ्य इति । "यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति" इति श्रुतेः । कर्मणैव कर्मणां निर्हारो नाशो यथेति मम गृहपुत्रकलत्रादिमहासक्तस्य ज्ञानभक्त्योरनधिकारादिति भावः ॥२९॥

गूढार्थदीपिनी

दाशार्हः यदुवंशीयो राजा तद्वंशजं श्रीकृष्णम् अनुज्ञाप्य पृष्ट्वा गन्तुं मनो दधिरे मनः चक्रुः ॥२७॥ तत् तेषां गमनं वीक्ष्य तान् मुनीन् उपसङ्गृह्य पादै गृहीत्वा सुयन्त्रितः स्थिरचित्तः सन् इदं बभाषे ॥२८॥ हे ऋषयः येन कर्मणा अनुष्ठितेन निर्हारो कर्मनाशः बन्धनिवृत्तिः स्यात् तत् नोऽस्मान् प्रति उच्यताम् । सर्वे देवा येषु तेभ्यः ऋषिभ्यो वः युष्मभ्यं नमः । यावतीर्वै देवतास्ताः सर्वाः वेदविदि ब्राह्मणे निवसन्ति (इयमेव श्रुतिः विप्राणां तप्तमुद्राधारणाभावं द्योतयति । एतदभिप्रेत्यैव बृहन्नारदीये [illegible] प्रति धर्मराजेनोक्तम् ।

ब्राह्मणस्य तनूर्ज्ञेया सर्वदेवसमन्विता । सा चेत्सन्तापिता राजन् किं वक्ष्यामि तदेनसः ॥१॥

शङ्खचक्राद्यङ्कनं च गीतनृत्यादिकं तथा । एकाजातेरयं धर्मो न जातु स्याद् द्विजन्मनः ॥२॥

किञ्च - शङ्खचक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा । स शूद्रवद्बहिष्कार्यः सर्वस्मात् द्विजकर्मणः ॥३॥

इत्याश्वलायनेनाप्युक्तम् । इति वंशीधरी ॥) इति श्रुतेः ॥२९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इत्येवं दाशार्हं श्रीकृष्णमुक्त्वेति शेषः । अनुज्ञाप्य आज्ञां च पृष्ट्वा ॥२७॥ तद्गमनोद्योगं वीक्ष्य उपव्रज्य समीपं प्राप्य उपसङ्गृह्य चरणग्रहणं हस्ताभ्यां कृत्वा बभाषेदमिति सन्धिरार्षः ॥२८॥ हे ऋषयः ! नमो वः युष्मभ्यम् । सर्वो विष्णुर्देव [illegible] येषां तेभ्यः "विप्राणां देवदेवोऽसौ पूजनीयो जनार्दनः" इत्यादिध्रुववाक्यात् सर्वे देवा येषु तेभ्यः इति वा "यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति" इति श्रुतेः । हे ऋषयः ! श्रोतुमर्हथ मद्वाक्यमिति शेषः । कर्मणां भवद्भावापत्तिलक्षटणमोक्षप्रतिबन्धकानां निर्हारो निरासः यथा कर्मणा यथानुष्ठितेन क्रियायोगेन स्यात्तदुच्यताम् ॥२९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं प्रार्थयित्वा तूष्णीमेवाङ्गीकारे कृतार्थत्वं ज्ञात्वा गन्तुमारेभिर इत्याह-इत्यनुज्ञाप्येति । दाशार्हं सेवकप्रियं ततो भक्ता अनुज्ञाता इत्याह-धृतराष्ट्रं युधिष्ठिरमिति वृद्धभक्तौ निरूपितौ । विश्वासार्थं सम्बोधनं ततः स्वाश्रमान् गन्तुं मनो दधिरे ॥२७॥ एवं निवृत्तिपराणां फलसिद्धिमुक्त्वा प्रवृत्तिपराणामपि फलसिद्ध्यर्थं प्रक्रियान्तरमारभते-तद्वीक्ष्येति । वसुदेवो हि तानुत्कृष्टान् जानाति अतः स्वकृतार्थत्वाय तान् प्रष्टुं यतते अतस्तानुपव्रज्य तस्यैवं स्वनिस्तारार्थं यज्ञे पूर्वसिद्धं हेतुमाह-महायशा इति । महद्यशो यस्येति [illegible] दृष्टमप्युपायं कृतवानित्याह-प्रणम्येति । चकारात्स्तोत्रमपि कृत्वा उपसङ्गम्य निकटे समागत्य सुयन्त्रितः सन् वक्ष्यमाणमिदं [illegible] सन्धिरार्षः ॥२८॥ ज्ञापनामाह-नमो वः सर्वदेवेभ्यः इति । यद्यप्येते ऋषयः तथापि सर्वे देवा येष्विति "तावतीर्वै देवताः" इति श्रुतेः । सर्वदेवत्वम् अनेन देवा भवदधीना इति स्मृतिरप्युक्ता । हे ऋषयः ! लौकिकद्रष्टारः अतो मत्स्वरूपं जानन्तीति

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

विज्ञापितं श्रोतुमर्हथ तदेवाहुः-कर्मणा कर्मनिर्हार इति । अयमाशयः । ज्ञानेन कर्मनाशः सुप्रसिद्धः "ज्ञानाग्निः सर्वकर्माणि" इति वाक्यात् कर्म तु सजातीयं न व्यातर्तयति यद्यपि प्रायश्चित्ते कर्मनाशकत्वं निरूपितं तथापि न तत्कर्म अकर्म कर्म नाशयति विपरीतं वा निषिद्धं विधिबलाद्विहितं नाशयति यथा प्रायश्चित्तं यथा वा नखाम्बु पूर्वपुण्यं नाशयति तथापि सजातीयस्य न सजातीयनाशकत्वं नखादिषु नखाम्बुप्रभृतिषु कर्मनाशः अधर्मजननद्वारा तेन स नाशः दुःखमेव सम्पादयति न संसारनिवृत्तिः । अन्यथा महान्तो ज्ञानतस्तत्रापि यतेरन् अतस्तादृशी कर्मनिवृत्तिरपेक्ष्यते यस्यां जातायां संसार एव निवर्तते यदि संसारनिवृत्तिमेव प्रार्थयेत् तदा ज्ञानादिकमेवोपदिदिशुः ज्ञानं तु न गृहस्थस्येति मन्यते "कर्मण्येवाधिकारस्ते" इति वाक्यात् अतः कर्मणैव केनचित्प्रकारेण कृतेन यथा संसारहेतुभूतकर्मनाशः तथा वक्तव्यमित्याह-नस्तदुच्यतामिति । अत्र पुनः ऋषीणां पूर्ववत्सन्देह उत्पन्नः । यथा भगवान् ईश्वरः सन् विपरीतवाक्यमुक्तवान् तस्य च भावो यथाकथञ्चिद्वर्णितः । एवं वसुदेवोऽपि मुक्त एव सिद्धसमस्तपुरुषार्थ एवं विपरीतवत् पूर्वनिर्हारं पृच्छति केनाभिप्रायेणेति किमस्मज्ज्ञानं प्रतीक्षते आहोस्विदन्यथेति ॥२९॥

श्रीसुबोधिनीसारः

शुकोक्तिः । एवं दाशार्हं श्रीकृष्णं धृतराष्टं युधिष्ठिरम् अनुज्ञाप्य मुनवय् स्वाश्रमान् मनोदधिरे हे राजर्षे ॥२७॥ ततेषां यत् वीक्ष्य दृष्ट्वा तानुपव्रज्य सङ्गम्य प्रणम्य उपसङ्ग्गृह्य हस्ताभ्यं चरणौ गृहीत्वा महायशा वसुदेवः सुयन्त्रितः यत्त इदमुवाच ॥२८॥ हे ऋषयः सर्वदेवेभ्यो वो युष्मभ्यं नमः मद्वचः श्रोतुमर्हथ यूयं कर्मणा कर्मनिर्हारः कर्मनिवृत्तिर्यथा येन प्रकारेण स्यात्तत् नोऽस्मभ्यमुच्यताम् ॥२९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्येवं दाशार्हं श्रीकृष्णं धृतराष्ट्रं युधिष्ठिरं चानुज्ञाप्य गमनानुज्ञां पृष्ट्वा हे राजर्षे ! मुनयः स्वाश्रमान् गन्तुं मनो दधिरे ॥२७॥ तत् मुनीनां गमनोद्योगं वीक्ष्य वसुदेवस्तानुपव्रज्य समीपं गत्वा प्रणम्य उपसङ्ग्गृह्य पाणिभ्यां चरणौ गृहीत्वा सुयन्त्रितः एकाग्रचित्त इदं वक्ष्यमाणं बभाषे । सन्धिरार्षः । एवं महतां सन्मानप्रश्नादिकं पुण्यकीर्तेरेव सम्भवति इति सूचयन्नाह-महायशा इति ॥२८॥ तद्भाषणमाह-नम इति । 'यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति' इति श्रुतेः सर्वे देवा येषु तेभ्यः ऋषिभ्यो वो युष्मभ्यं नमः । हे ऋषयः ! मद्वचनं श्रोतुमर्हथ योग्याः स्थ । एवं सावधानान् कृत्वाऽऽह-कर्मणेति । येन कर्मणा यथानुष्ठितेन कर्मणां भक्त्यादिप्रतिबन्धकानां निर्हारो निरासः स्यात्तन्नोऽस्माकमुच्यताम् ॥२९॥

अन्वितार्थप्रकाशिका

इतीति । इत्येवं दाशार्हं श्रीकृष्णं धृतराष्ट्रं युधिष्ठिरं चानुज्ञाप्य गमनानुज्ञां पृष्ट्वा हे राजर्षे ! मुनयः स्वाश्रमान् गन्तुं मनो दधिरे ॥२७॥ तदिति । तन्मुनीनां गमनोद्योगं वीक्ष्य महायशा वसुदेवस्तानुपव्रज्य समीपं गत्वा प्रणम्य उपसङ्ग्गृह्य पाणिभ्यां चरणौ गृहीत्वा सुयन्त्रितः एकाग्रचित्त इदं वक्ष्यमाणं बभाषे । सन्धिरार्षः । बभाष इति तडभाव आर्षो वा ॥२८॥ नम इति । 'यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति' इति श्रुतेः । सर्वे देवा येषु तेभ्यः ऋषिभ्यो वो युष्मभ्यं नमः । हे ऋषयः ! मद्वचनं श्रोतुमर्हथ योग्याः स्थ । येन कर्मणा यथानुष्ठितेन वा कर्मणा कर्मणां निर्हारो निरासः स्यात्तन्नोऽस्मान् प्रति उच्यताम् ॥२९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे राजर्षे ! दाशार्हं श्रीकृष्णम् ॥२७॥ तज्जिगमिषूणां मुनीनां गमनं वीक्ष्य उपसङ्ग्गृह्य पादौ हस्ताभ्यां गृहीत्वा बभाष बभाषे । अत्रात्मनेपदाभावस्तदनित्यत्वादार्षत्वाद्वा बोध्यः ॥२८॥ हे ऋषयः ! सर्वेषां देवमनुष्यादीनां समग्रजनानां देव । पूज्येभ्यो वो युष्मभ्यं नमः कृतेन येन कर्मणा कर्मणां शुभाशुभानां निर्हारो नाशो भवेत् तत्कर्मोच्यते ॥२९॥

इतीति ॥ दाशार्हं
मुनयः स्वाश्रमान् प्रति ग
ज्ञात्वेत्यर्थः । महायशाः व
पाणिभ्यां धृत्वा चेत्यर्थः । सु
येषु तेभ्यः वो युष्मभ्यं नमः
वसन्ति' इति श्रुतिप्रसिद्ध्यभि
कर्मणा कर्मणां भगवद्भक्तियो
उच्यतां तत्रोत्तरं कथ्यतामित्य

श्रीशुकाचार्यजी कह
धृतराष्ट्र महाराज एवं धर्मरा
निर्णय किया ॥२७॥ महा
प्रणाम करके विनम्रता पूर्व
महामुनि प्रत्यक्ष सर्वदेव स्व
मेरी एक प्रार्थना सुन लीजि
वासनाओंका मूलतः आत्यन्ति

[1]नापि चित्रमिदं वि
सन्निकर्षोऽत्र [2]मर्त्या
यस्यानुभूतिः कालेन
तं क्लेशकर्मपरिपाक
प्राणादिभिः [4]स्वविभ

नारदः, उवाच । विप्राः, वृ
चित्रम् ॥३०॥ यथा, गाङ्गम्, अम्भ
॥३१॥ यस्य, अनुभूतिः, कालेन,
क्लेशकर्मपरिपाकगृहप्रवाहैः, अव्या
सूर्यम्, इव, अन्यः, मन्येत ॥३२-३

श्रीकृष्णं हित्वाऽस्मान् पृच्

---

१. नाति चि-श्रीधर. वंशी. वीर. विज. शु
शुक. । ४.स्वविषयै-विज. । ५. मज्ञो मेने

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ दाशार्हं श्रीकृष्णम् इति अनुज्ञाप्य इदमुक्त्वा अनुज्ञां पृष्ट्वा वा धृतराष्ट्रं युधिष्ठिरं च अनुज्ञाप्य हे राजर्षे ! मुनयः स्वाश्रमान् प्रति गन्तुं मनः दधिरे । मनश्चक्रुः ॥२७॥ तदिति ॥ तत्तेषामाश्रमगमनमनः वीक्ष्य नेत्रादिचेष्टादर्शनेन ज्ञात्वेत्यर्थः । महायशाः वसुदेवः तान्मुनीन् उपव्रज्य तेषां समीपप्रदेशमेत्येत्यर्थः । प्रणम्य उपसङ्ग्गृह्य च तेषां चरणौ पाणिभ्यां धृत्वा चेत्यर्थः । सुयन्त्रितः अवहितचित्तः सन् इदं वक्ष्यमाणं बभाषे । सन्धिरार्षः ॥२८॥ नमो व इति ॥ सर्वे देढवा एषु तेभ्यः वो युष्मभ्यं नमः । हे ऋषयः ! श्रोतुं मद्वच इति शेषः । अर्हथ । 'यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे सन्ति' इति श्रुतिप्रसिद्ध्यभिप्रायेण सर्वदेवेभ्य इत्युक्तम् । किं तद्वच इत्यत आह ॥ यथा यथानुष्ठितेन कर्मणा वर्णाश्रमानुगुणेन येषां कर्मणां भगवद्भक्तियोगोत्पत्तिप्रतिबन्धकानां प्राचीनपुण्यापुण्यात्मकानां कर्मणां निर्हारो निरासः स्यात् तत् नः अस्मभ्यम् भवतां तत्रोत्तरं कथ्यतामित्यर्थः ॥२९॥

कृष्णप्रिया

श्रीशुक्राचार्यजी कहते है - महाराज ! भगवान श्रीकृष्ण की इस तरह स्तुति करनेके बाद भगवानसे एवं धृतराष्ट्र महाराज एवं धर्मराज श्रीयुधिष्ठिरजी से अनुमति प्राप्त कर मुनवरोंने अपने अपने माध्यम पर जानेका निश्चय किया ॥२७॥ महादशा श्रीवसुदेवजीने उनका विचार जानकर उन महर्षियोंके समीप और मुनिवरोंको प्रणाम करके विनम्रता पूर्वक निवेदन करने लगी ॥२८॥ श्रीशुकदेवजी कहते है - हे महर्षिवृन्द ! आप सर्व ऋषिमुनि प्रत्यक्ष सर्वेदेव स्वरूप है आप महर्षियोंके श्रीचरणोंमें नमस्कार करता हुं । आप महानुभाव कृपाकरके मेरी एक प्रार्थना सुन लीजिये । निवेदन यह है कि जिन सत्कर्मो के अनुष्ठान से कर्मोका और कर्मों की वासनाओंका मूलतः आत्यन्तिक क्षय नाश हो जाय उनका आप कृपा करके मुझे उपदेश कीजिये ॥२९॥

नारद उवाच

[1]नापि चित्रमिदं विप्रा वसुदेवो बुभुत्सया । कृष्णं मत्वार्भकं यन्नः पृच्छति श्रेय आत्मनः ॥३०॥
सन्निकर्षोऽत्र [2]मर्त्यानामनादरणकारणम् । गांगं हित्वा यथान्याम्भस्तत्रत्यो याति शुद्धये ॥३१॥
यस्यानुभूतिः कालेन लयोत्पत्त्यादिनास्य वै । स्वतोऽन्यस्माच्च गुणयो न कुतश्चन रिष्यति ॥३२॥
तं क्लेशकर्मपरिपाकगुणप्रवाहैरव्या[3]कृतानुभवमीश्वरमद्वितीयम् ।
प्राणादिभिः [4]स्वविभवैरुपगूढमन्यो[5] मन्येत सूर्यमिव मेघहिमोपरागैः ॥३३॥

कर्दमक्षमा

नारदः, उवाच । विप्राः, कृष्णम्, अर्भकम्, मत्वा, वसुदेवः, आत्मनः, बुभुत्सया, श्रेयः, यत्, नः, पृच्यति, अपि, इदम्, चित्रम् ॥३०॥ यथा, गाङ्गम्, अम्भः, हित्वा, तत्रत्यः, शुद्धये, अन्याम्भः, याति, अत्र, मर्त्यानाम्, सन्निकर्षः, अनादरकारणम् ॥३१॥ यस्य, अनुभूतिः, कालेन, अस्य, लयोत्पत्त्यादिना, स्वतः, च, अन्यस्मात्, च, गुणतः, कुतश्चन, न, रिष्यति, तम्, क्लेशकर्मपरिपाकगृहप्रवाहैः, अव्याकृतानुभवम्, ईश्वरम्, अद्वितीयम्, प्राणादिभिः, स्वविभवैः, उपगूढम्, ईश्वरम्, मेघहिमोपरागैः, सूर्यम्, इव, अन्यः, मन्येत ॥३२-३३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्रीकृष्णं हित्वाऽस्मान् पृच्छतीति विस्मितान्प्रत्याह-नातीति । बुभुत्सया बोद्धुमिच्छया ॥३०॥ तत्रत्यो गङ्गातीरवासी

---

[1] नापि चि-श्रीधर. वंशी. वीर. विज. शुक. । २. हि-श्रीधर. वंशी. जीव. ; ऽत्र-वीर. विज. विश्व. । ३. हतानु-श्रीधर. वंशी. वीर. विज. विश्व. ४. स्वविषयै-विज. । ५. मज्ञो मेने ससूर्यमिव-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

॥३१॥ श्रीकृष्णेऽर्भकत्वं मन्यमानोऽविद्याविजृम्भित इत्याह–यस्येति द्वाभ्याम् । अनुभूतिर्ज्ञानं कुतश्चिदपि न रिष्यति न नश्यति तदेवाह–कालेन कर्कटिकाफलवत् अस्य विश्वस्य लयोत्पत्त्यादिनाऽपि स्वतश्च विद्युदादिवत् अन्यस्माच्च मुद्गरादेर्घटादिवत् गुणतो रूपाद्यन्तरोत्पत्तेः पूर्वरूपादिना देहादिवत् ॥३२॥ तमेव कुतश्चिदप्यव्याहतानुभवम् अत एवे किञ्च अद्वितीयं कृष्णमन्यः प्राकृतः उपगूढमाच्छन्नं मनुष्यं मन्येत कैः क्लेशकर्मादिभिः तत्र क्लेशाः रागादयश्च तत्पूर्वकाणि कर्माणि च तत्परिपाके सुखदुःखे च सत्त्वादीनां गुणानां पुनः प्रवाहश्च तैः प्राणादिभिः स्वैर्विभवैः स्वकार्यैः अत्र दृष्टान्तः मेघहिमोपरागैरभ्रतुषारराहुभिः स्वविभवैः सूर्यमिवेति ॥३३-३५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यद्वसुदेवो नः पृच्छति तन्नाति चित्रम् ॥३०॥ अन्याम्भस्तडागादि जलम् ॥३१॥ अर्भकत्वमानो बालत्वाभिमानः तदेवज्ञानानशनमेव । रिष्यति 'रिष हिंसायाम्' दिवादिर्लट् ॥३२॥ तं कृष्णम् । अत एवाहतज्ञानत्वादेव । सर्वं विद्यमानैश्वर्योऽप्यज्ञानामनीश एव प्रतीयते इत्याह–किञ्चेति । तत्र तेषु क्लेशादिषु । तत्पूर्वकाणि रागादिपूर्वकाणि । तत्परिपाके कर्मफले । पुनः पुनः प्रवाहो मुहुर्मुहुः सृष्ट्यादिरूपो वा शान्तघोरविमूढत्वादिस्वभाववशाच्छुक्लादिकर्मकरणाविच्छेदः । अ कार्येण कारणावृत्तौ अभ्रतुषारराहवो हि रविप्रकाश्यत्वेन रविकार्याण्येव "तद्धेतुत्वात्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः" इत्याद्युक्तेः प्रकाश्यप्रकाशकयोरपि कार्यकारणभावोऽज्ञानप्रपञ्चादिषु दृश्यत एवेति ॥३३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र नन्वहो अस्मन्मनोरथदुष्प्रापभागधेयः श्रीकृष्णपिताऽसौ कथमन्यच्छ्रेयः पृच्छति । पृच्छति चेत् तं त्यक्त्वा कथमन्यं पृच्छति । विस्मित्य मुनयस्तूष्णीमासन् । श्रीनारदस्तु पूर्वोक्तं तदभिप्रायं बुद्ध्वाऽप्यसहमान एवमचिन्तयत् । यथाऽयं सर्वश्रेयःपथप्रवीणः श्रीकृष्णमहिमनिष्णातश्च न तु श्रीनन्दवत्तदीयकेवलमाधुरीमग्नः तथापि यदिदं पृच्छति तत्किल लौकिकलीला स्वद्वारा स्वपुत्रस्य तस्य सात्त्विकयशोविस्तारणायैव तच्चातितुच्छमेव परममहिमकाष्ठावरिष्ठस्य तस्य ततः स्वयं श्रीभगवान् कथञ्चिदात्ममहिमगोपनीं तत्तल्लीलां प्रकाशयति कथमन्तरायमपि तदनुवर्तते । यदि वयमप्येतदनुवर्तामहे तदा मुह्येदेव लोकः तस्मादेतदुपालम्भव्याजेन श्रीभगवन्महिमैवास्माभिर्व्यञ्जयितुं योग्य इति तथैवाह–नापीति चतुर्भिः । तत्र तदुपालम्भः प्रथम लोकमोहदोषः उत्तराभ्याम् अपीति शकटाख्यम् अतीति चित्सुखः कृष्णं स्वयं भगवत्त्वेन सर्वपुरुषार्थशिरोमणि सर्वज्ञशिरोमणिमपीत्यर्थः । अर्भकं लौकिकापत्यतुल्यं मत्वा आत्मनः श्रेयः पुरुषार्थान्तरसाधनं पृच्छति तत्रापि तं समीपस्थं परित्यज्यास्मान् पृच्छतीत्यर्थः ॥३०॥ पूर्वत्र हेतुः– सन्निकर्षो हीति । सन्निकर्षोऽत्रेति पाठः क्वचित्पूर्वत्रैव दृष्टान्तः । गाङ्गं मर्त्यानामिति मर्त्यलीलाङ्गीकारादस्यापि तादृशो भावो जात इति भावः । गाङ्गमम्भ इति गम्यम् अन्याम्भस्तीर्थान्तरीयं ॥३१॥ यस्येति युग्मकम् । यस्य कर्तुः कर्मणश्चानुभूतिर्ज्ञानलक्षणा प्रकाशलक्षणा च न नश्यति अपि तु नित्यं विराजत एवेत्य अन्यत्तैः । तत्रास्येत्यादौ विश्वस्य लयोत्पत्त्यादिहेतुनाऽपि कालेनेति योजनिकार्थः तथा घटादेर्नाशसम्बन्धी यो मुद्गरादिस्तेनैव । तथाक गुणतो रूपाद्यन्तरोत्पत्तेर्हेतोः पूर्वरूपादिनाशद्वारा यथा देहादिर्नश्यतीत्यर्थः । दृष्टान्ताश्चैते व्यतिरेकेण एव तथा अ श्रीकृष्णमिति तस्यैव स्वयं भगवत्त्वाभिप्रायात् विशेषणानामेतेषां यथोत्तरं मनुष्यमननायोग्यत्वे श्रैष्ठ्यम् । तथापि क्लेशादि प्राणादिभिश्चोपगूढम् अन्यः साधारणो जनः निजपरिकरैः क्लेशादिभिः प्राणादिभिश्च हेतुभिर्मन्यते स्वयं क्लेशादि आत्मानुमानानुसारेण तमपि स्वसदृशं मन्येतेत्यर्थः । राहोरपि सूर्यविभवत्वं सूर्यस्य ग्रहराजत्वात् यद्वा तं क्लेशा तत्रात्यन्ताभाववत्त्वात्तैरव्याहतानुभवम् अत एवेश्वरं पराधीनज्ञानत्वात् परमस्वतन्त्रं तथा सर्वस्य तदेकप्रकाश्यत्वाददद्वितीयं श्रीकृ अन्यः पृथग्जन एव स्वविभवैः स्वरूपविभवरूपैरपि प्राणेन्द्रियैरादिग्रहणात्तत्तदवयवैश्चोपगूढं परिच्छिन्नज्ञानादिकं मन्ये इति सम्भाव्यते तैः कमिव मन्यते मेघादिभिः सूर्यमिवेत्यन्वयः । अर्थश्चायम् – सूर्यस्तावन्मेघादिभिर्यत् परिच्छिन्नप्रका

भवति तद्युक्तमेव मेघस्
उपरागहेतु राहोस्त–त्प्रति
तस्मात्तैराच्छन्नज्ञानादिर्न भव
तैः प्रकाशत एव तस्मात्स्व
स्यात् नीच एव तु जनोऽन्यथ
येनादृतो नरकभाग्भिरसत्प्रस

श्रीभगवति साक्षाद्वि
भगवद्भक्तिमाहात्म्याभिज्ञः श्री
साक्षाद्भगवन्तमि स्नेहभरेणार्भ
सदातिसान्निध्यम् । यद्वा । सम्यक
गाङ्गमित्यनेनाप्यन्वयः ॥३१॥
यस्येति द्वाभ्याम् । आदि–शब्द
अद्वितीयमसदृशम् । विशेषणान
।आदि–शब्दादीन्द्रियादयः । अ
क्लेशादियुक्त आत्मानुमानेन तम
मन्येत (मन्यते [घ, ङ]।) श्रीव
।सा च श्रीभगवत्कृपयैवेति पञ्च
च व्यक्तं भावीति दिक् ॥३३॥

यस्यानुभूतिरिति । कालेन
॥३२॥ अन्यैरलक्ष्यत्वे दृष्टान्तमाह–सू

इत्थं पृष्टेषु मुनिषु किं सर्वज्ञ
अतिचित्रमिति चतुर्भिः । हे विप्राः !
हेतुः–कृष्णमर्भकं मत्वेति । मत्वा न
रान्तरसान्निध्यमनादरणकारणं ततः
तीरस्थो गाङ्गमम्भो हित्वा अनादृत
सन्निकर्षस्यानादरणकारणत्वमुक्त
कृष्णस्यानुभूतिर्ज्ञानङ्कालादिभिर्न
स्तथा नेश्वरस्येतिभावः । अस्य जग
दयो ह्यन्येषां ज्ञानलोपहेतवः तैरस्
पुण्यात्मकानि च तेषां परिपाकः सु

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तद्युक्तमेव मेघस्य तदंशाकृष्टजलमयधूमादिपरिणामरूपत्वात् हिमस्य तदाकृष्टजलपरमाणुसङ्घरूपत्वात् हेतुराहोस्त-त्प्रतियोगितमोरूपत्वात् तस्यास्य चक्षुरादयस्तु न तद्विधाः किन्तु स्वरूपविभवरूपाः च्छन्नज्ञानादिर्न भवति न हि सूर्यो मेघादिभिरिव स्वरूपविभवैः प्रकाशौष्ण्यादिभिराच्छन्नप्रकाशादिर्भवति प्रत्युत शत एव तस्मात्स्वरूपस्य कालदेशाद्यपरिच्छिन्नत्वेन तद्विभवानां चक्षुरादीनां तादृशत्वादपरिच्छिन्नज्ञानादिरेवायं नीच एव तु जनोऽन्यथा मन्यत इति तदुक्तं - "**न चान्तर्न बहिर्यस्य**" इति नातः परं परमयद्भवतः स्वरूपमिहाद्यन्ते तो नरकभाग्भिरसत्प्रसङ्गैरिति ये तु त्वदीयेत्यादि ॥३२-३३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीभगवति साक्षाद्विराजमानेऽपि तस्य स्नेहभरेण तदैश्वर्यविस्मृत्या मुनीन् प्रति प्रश्नेन कांश्चिद्विस्मितांस्तान् किमाहात्म्याभिज्ञः श्रीनारदः स्नेहभरस्वभावमाह-नेति। अपि एव नैव। चत्रमद्भुतम्। अतीति चित्सुखः। कृष्णं वन्तमि स्नेहभरेणार्भकं शिशुं मत्वा ॥३०॥ स्नेहभरं चादरं ह्रासयन्तीति सदृष्टान्तमाह-सन्निकर्ष इति। स्नेहभरेण सान्निध्यम्। यद्वा। सम्यक् सर्वतो नितरां च कर्षति आकर्षतीति सन्निकर्षः स्नेहभरः। हि यतः समासान्तर्गतस्याप्यम्भसो त्यनेनाप्यन्वयः ॥३१॥ न च मन्तव्यम् श्रीवसुदेवोऽयमस्य माहात्म्यं न वेत्तीति। यतः प्राकृत एव न जानातीत्याह- द्वाभ्याम्। आदि-शब्दात् स्थितिः। वै अपि। तत्तन्महाव्यापारादपीत्यर्थः ॥३२॥ अव्याहतानुभवमकुण्ठज्ञानम् यमसदृशम्। विशेषणानामेषां यथोत्तरं मनुष्यमननायोग्यत्वे श्रैष्ठ्यम्। तथापि क्लेशादिभिः प्राणादिभिश्चोपगूढम् -शब्दादीन्द्रियादयः। अन्यः श्रीवसुदेवेतरः। प्राकृतः स्वविभवैर्निजपरिकरैः क्लेशादिभिश्च हेतुभिर्मन्येत। स्वयं दियुक्त आत्मानुमानेन तमपि स्वसदृशं मन्येतेत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा। क्लेशादिभिर्विशिष्टोऽन्वय उपगूढं (मन्यते [घ, ङ]।) श्रीवसुदेवस्तु सर्वथा परमप्रकटमेव वेत्तीत्यर्थः। तथापि स्नेहभरस्वभावेन तद्विस्मृतिरित्युक्तमेव श्रीभगवत्कृपयैवेति पञ्चचत्वारिंशाध्यायारम्भे (भा०१०/४५/१) 'पितरावुपलब्धार्थौ' इत्यत्र तैर्व्यञ्जितमेव। अग्रे भावीति दिक् ॥३३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

यस्यानुभूतिरिति। कालेन जन्मस्थितिप्रलयात्मकेन गुणत्रयावस्था अन्येषां ज्ञानलोपाहेतवः तैरसङ्कुचितज्ञान इत्यर्थः अन्यैरलक्ष्यत्वे दृष्टान्तमाह-सूर्यमिवेति ॥३३-३७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थं पृष्टेषु मुनिषु किं सर्वज्ञं कृष्णं हित्वा अस्मान् पृच्छतीत्येवं संशयितवत्सु तान् प्रति प्रश्नकरणमुत्थापयन्नाह नारदः- मिति चतुर्भिः। हे विप्राः ! वसुदेवः आत्मनः स्वस्य श्रेयस्साधनं बोद्धुमिच्छया नोऽस्मान् पृच्छतीत्येतन्नातिचित्रं तत्र कृष्णमर्भकं मत्वेति। मत्वा नः पृच्छतीति सम्बन्धः ॥३०॥ तत्कुत इत्यत आह-सन्निकर्ष इति। हि यस्मात्सन्निकर्षः सान्निध्यमनादरणकारणं ततः कृष्णमर्भकं मत्वेत्यर्थः। सन्निकर्षस्यानादरणकारणत्वे दृष्टान्तः-गाङ्गमिति। यथा तत्रत्यो गाङ्गमम्भो हित्वा अनादृत्य आत्मनो विशुद्धये विशुद्ध्यर्थम् अन्याम्भः प्रति याति पुण्यजलान्तरं याति तद्वत् ॥३१॥ कर्षस्यानादरणकारणत्वमुक्त्वा सर्वज्ञत्वानभिज्ञानमपि तत्कारणमिति वक्तुं तावत्कृष्णस्य नित्यसर्वज्ञतामाह-यस्येति। कृष्णस्यानुभूतिर्ज्ञानङ्कालादिभिर्न रिष्यति न नंक्ष्यति तं श्रीकृष्णमिति उत्तरेण सम्बन्धः। यथा अस्मदादीनामनुभूतेः कालादिभिः नेश्वरस्येतिभावः। अस्य जगत उत्पत्त्यादिनेत्यादिशब्देन प्रलयः गुणाः सत्त्वादयस्त्रयः कुतश्चत उक्तातिरिक्तादन्यस्मादपि ह्यन्येषां ज्ञानलोपहेतवः तैरसङ्कुचितज्ञान इत्यर्थः ॥३२॥ तदेव सदृष्टान्तपुपपादयति-तमिति। क्लेशाः कर्माणि च कानि च तेषां परिपाकः सुखदुःखे च गुणानां सत्त्वादीनां पुनः प्रवाहश्च तैरव्याहतोऽनुभवो महिमा यस्य तमद्वितीयं

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स्वतुल्यरहितमीश्वरं श्रीकृष्णं स्वविभवैः स्वकार्यैः प्राणादिभरिन्द्रियादिभिरुपगूढमावृत्तं प्राकृतेन्द्रियतद्व्यापारैस्तिरोहितानुभ मन्येत मन्यते अज्ञेति हेतुगर्भं स्वयमज्ञत्वादेवम्भूतमपीश्वरं स्वतुल्यं मन्यते इत्यर्थः । अत्र दृष्टान्तः मेघहिमोपरागैः अभ्रतुषारराहुभिः स्वविभवैः सूर्यमिवेति ॥३३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तथैवाह-नापीति चतुर्भिः । मर्त्यानामिति । मर्त्यलीलाङ्गीकारादस्यापि तादृशो भावो जात इति भावः ॥३०-३३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु साक्षाद्विराजमाने श्रीकृष्णे वसुदेवः कथमस्मान् पृच्छतीति मुनीनामाशङ्कामुद्भाव्य नारदो वदति-नापि चित्रमित्यादि । वसुदेवस्य वात्सल्यरसभक्तत्वात् कृष्णे नित्यमर्भकबुद्धिरेव नोपदेष्टृबुद्धिरिति तम् अर्भकं मत्वा नः पृच्छतीति नापि चित्र ॥३०॥ ननु सन्निकर्षज एवास्मिन्नयमनादरः अनु वात्सल्येनेति पुनः शङ्कान्तरं निरस्यन्नाह-सन्निकर्ष इत्यादि । तत्तु मर्त्यानामेव न मद्विधानां तत्र दृष्टान्तः गाङ्गमित्यादि ॥३१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥२२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहो अयं भगवतः पिताऽप्यात्मानं संसारिणं मन्यते यदि वा परार्थं पृच्छति तदपि कृष्णं हित्वा कथमस्मान् पृच्छतीत्यतिविस्मितांस्तान् प्रत्याह-नापीति । अर्भकं स्वपुत्रमेव न त्वीश्वरम् अतः आत्मनः स्वस्यैव ॥३०॥ ननु कृष्णस्य जन्मक्षणमारभ्यैव तमीश्वरत्वेनायं जानात्येव सत्यं तदपि सन्निकर्ष एवानादरहेतुरित्याह-सन्निकर्ष इति । अत्र श्रीवसुदेवस्य प्रेमप तदैश्वर्याननुसन्धाने हेतुं नारदो जानात्येव तदपि तस्मिन् महासंसदि प्रेमसिद्धान्तमतिरहस्यमविवृण्वन् लोकरीत्यैव समादधौ त श्रावयित्वा वसुदेवस्य तस्य तदैश्वर्यज्ञानं च प्रोद्दीपयामासेति तत्त्वं ज्ञेयम् अनादरोऽत्र गौरवमनानाभावः ॥३१॥ भो ब्रह्मज्ञपूज्यपादाः ! केवलमत्रायं वसुदेव एवोपालभ्यः किं त्वत्रत्यः प्रायः सर्व एव लोकः कृष्णमीश्वरं न जानातीत्याह-यस्येति द्वाभ्याम् । यस्य अनुभूतिर्ज्ञानं कुतश्चिदपि न रिष्यति न नश्यति तं श्रीकृष्णं प्राणादिभिरुपगूढम् आच्छन्नम् अन्यः प्राकृतोऽयं लोकः स्वमिवमन्य इत्यन्वयः । तदेवाह-कालेन कर्कटिकाफलवत् कीदृशेन अस्य विश्वस्य लयोत्पत्तिकारणेन स्वतश्च विद्युदादिवत् अन्यस्मात् मुद्गरादेर्घटादिवत् गुणतस्तमोगुणेन ब्रह्माण्डवत् न रिष्यति ॥३२॥ उक्तपोषन्यायेनेममर्थं पुनराह-तमिति । क्लेशा रागादयश्च कर्मा क्लेशहेतवश्च परिपाकाः तत्कार्यसुखदुःखानि च गुणानां सत्त्वादीनां तैर्न व्याहतोऽनुभवो ज्ञानं यस्य तं प्राणादिभिः प्राणमनोबुद्ध्यादिभिर्लिङ्गशरीरघटकैः स्वविभवैः स्वकार्यैरेवाच्छन्नम् अत्र दृष्टान्तः मेघश्च हिमः कुहेडिका च उपरागो राहु स्वविभवैः सूर्यमिव मेघस्य सौरज्योतिर्जलात्मकत्वात् जलस्य ज्योतिःकार्यत्वात् हिमस्य च जलविशेषत्वात् रा दुष्टजीवाविष्टध्वान्तखण्डात्मकत्वात् ध्वान्तस्य च चक्षुर्ग्राह्यत्वेन पौराणिकमते तैजसत्वात् मेघादीनां सूर्यकार्यत्वम् ॥३३॥

गूढार्थदीपिनी

हे विप्राः इदम् अतिचित्रम् अत्याश्चर्यं नास्ति । किं तत् । वसुदेवो बोद्धुमिच्छया आत्मनः श्रेयःसाधनं यत् अस्म पृच्छति ॥३०॥ सन्निकर्षः निरन्तरं सान्निध्यम् । तत्रत्यो गङ्गातीरवासी यथा गाङ्गं जलं हित्वा अनादृत्य आत्मशुद्धये अन्यतीर्थं प्रति याति ॥३१॥ यस्येति द्वयम् । यस्य अनुभूतिः ज्ञानं कालादिना कुतश्चिदपि न रिष्यति न नश्यति तम् अद्वितीयम् ईश्वरं श्रीकृ अयं प्राकृतो जनः क्लेशादिभिः उपगुढमाच्छन्नं मनुष्यं मन्यते इति द्वयोरन्वयः । अत्र दृष्टान्तः । यथा मेघुषारराहुभिः आच्छ मन्यते तथा । तत्र क्लेशा अविद्यादयः पञ्च । पुण्यपापात्मकानि कर्माणि तत्परिपाके फले सुखदुःखे च गुणानां सत्त्वादीनां प्र तैः । तथा प्राणादिभिः प्राणमनोबुद्धिभिः लिङ्गशरीरघटकैः स्वविभवैः कार्यैश्च उपगूढम् । कालादिनां जीवानामिव यस्य

नश्यति तदेवाह-कालेन कर्कटिक
गुणतो रूपान्तरोत्पत्तेः देहादिवत्

यत् यतः कृष्णमर्भकं
पृच्छति अतः नातिचित्रं श्रीकृष्णं
किञ्च प्रासादप्राप्तेऽधिकी प्रीतिर्भवत
परमभागवतस्य कथा अनावृतप
श्रीकृष्णस्यानुभूतिर्ज्ञानं कुतश्चन कु
अन्यस्मात् शत्रवादितः गुण एकस्मि
येनास्यौपचारिकोऽपि नाशः स्यादि
इति श्रुतेः ॥३२॥ नित्यानुभूतिं तत्रापि
अद्वितीयं निस्समानातिशयं श्रीकृष्णम
तेभ्यः तैः स्वरूपावरकैः क्लेशादि
पुनः पुनः प्रवाहश्च तैः प्राणादिभिः प्रा
दृष्टान्तः मेघहिमोपरागसूर्यमिव अभ्रतु

एवम् ऋषीणां सन्देहं ज्ञात्वा
गम्भीरार्थमपि न विप्रा इति । भवन्तः
न पृष्ट इति चेत्तत्राह-कृष्णं मत्वाऽर्भकं
वसुदेवदृष्टौ बालक एव प्रतिभाति अत
इति तत्राह-सन्निकर्षोऽत्र मर्त्यानामिति
विशेष इति आत्मवत् सर्वदर्शनादनाद
गङ्गातीरे सम्मर्दे स्नातः अशुद्धोऽहं जात
जलत्वेनैव मन्यते न तु तन्माहात्म्यं वेद
तथापि छिन्नयोजितपटवत् न तज्ज्ञानमुत्कृ
न रिष्यति न नश्यति प्रलयमध्येऽपि नाश
नश्यति यदाप्युत्पद्यते तदापि लोकान्तरा
सम्भवति । कदाचित्स्वतोऽप्यनुभवो न
द्रव्यान्तरशापादिना चकारात्कालविलम्बे
॥३२॥ एवं भगवन्माहात्म्यमुक्त्वा तत्र जा
जीवं मन्यते स हि अध्यासं कारणत्वेन न
सर्वांस्तुल्यानेव मन्यते भगवतः देह
अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेश

तद्व्यापारैस्तिरोहितानुभवं
दृष्टान्तः मेघहिमोपरागैः

ति भावः ॥३०-३३॥

वदति-नापि चित्रमित्यादि
नः पृच्छतीति नापि चित्रम
यादि। तत्तु मर्त्यानामेव न तु

कृष्णं हित्वा कथमस्मान्
वस्यैव ॥३०॥ ननु कृष्णस्य
अत्र श्रीवसुदेवस्य प्रेमाणमेव
न् लोकरीत्यैव समादधौ तथा
॥३१॥ भो ब्रह्मज्ञपूज्यपादाः ! न
याह-यस्येति द्वाभ्याम्। यस्य
कृतोऽयं लोकः स्वमिवमन्यत
श्च विद्युदादिवत् अन्यस्माच्च
ति। क्लेशा रागादयश्च कर्माणि
ज्ञानं यस्य तं प्राणादिभिः
कुहेडिका च उपरागो राहुश्च तैः
य च जलविशेषत्वात् राहोश्च
नां सूर्यकार्यत्वम् ॥३३॥

त्मनः श्रेयःसाधनं यत् अस्मान
दृत्य आत्मशुद्धये अन्यतीर्थान्यः
त तम् अद्वितीयम् ईश्वरं श्रीकृष्णम्
यथा मेघुषारराहुभिः आच्छन्नं सूर्य
खे च गुणानां सत्त्वादीनां प्रवाह
ादिनां जीवानामिव यस्य ज्ञानं न

गूढार्थदीपिनी

श्यति तदेवाह-कालेन कर्कटिकाफलवत्। अस्य विश्वस्य लयोत्पत्त्यादिना। स्वतः विद्विदादिवत्। अन्यस्मात् मुद्गरादेर्घट्यादिवत् गुणतो रूपान्तरोत्पत्तेः देहादिवत् ॥३२-३३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यत् यतः कृष्णमर्भकं मत्वा बुभुत्सया बोद्धुमिच्छया नः अस्मान् पृच्छति तत्रापि आत्मनः स्वस्य अधुनापि श्रेयः पृच्छति अतः नातिचित्रं श्रीकृष्णं सर्वोपदेष्टृतया परमश्रेयोरूपतया च पुत्रवात्सल्यसुखसागरनिमग्नचित्तो न जानातीत्यर्थः ॥३०॥ किञ्च प्रासादप्रासेऽधिकी प्रीतिर्भवतीति लोकरीत्यैवं चेष्ट इत्याह-सन्निकर्ष इति। तत्रत्यो गङ्गातटस्थः ॥३१॥ किञ्चास्तां वसुदेवस्य स्य भागवतस्य कथा अनावृतपरमेश्वरपरमश्रेयोरूपं श्रीकृष्णं लोकस्तु स्वतुल्यं मन्यते इत्याह-यस्येति द्वाभ्याम्। यस्य श्रीकृष्णस्यानुभूतिर्ज्ञानं कुतश्चन कुतश्चिदपि न रिष्यति न नङ्क्ष्यति तदेवाह अस्य विश्वस्य लयोत्पत्त्यादिना स्वतः स्वभावतः अन्यस्मात् शस्त्रादितः गुण एकस्मिन् गुणे नष्टे पुरुषो जीवन्मृतो यथा भवति एवमेकस्यापि गुणस्य यदीयस्य नाशो न भवति स्यौपचारिकोऽपि नाशः स्यादित्यर्थः। किम्बहुना अनन्तकोटिब्रह्माण्डसृष्टिसंहारनिमित्तभूतेन कालेनापि "ज्ञः कालकालः" श्रुतेः ॥३२॥ नित्यानुभूतिं तत्रापि अव्याहतः निरावरणः अनुभवोऽनुभूतिर्यस्य सः नित्यानावृतज्ञानमित्यर्थः। ईश्वरं सर्वनियन्तारम् अद्वितीयं निस्समानातिशयं श्रीकृष्णम् अन्यः प्राकृतो जीवः स्वविभवैः स्वीयाः स्वकृतफलभूताः विविधाः भवाः पुनः पुनर्जन्मनि यः तैः स्वरूपावरकैः क्लेशादिभिः तत्र क्लेशरागादयश्च तद्धेतुकानि कर्माणि च तत्परिपाकानि सुखदुःखे च सत्त्वदिगुणानां पुनः प्रवाहश्च तैः प्राणादिभिः प्राकृतप्राणदेहेन्द्रियमनोबुद्ध्यादिभिश्चेत्यर्थः। उपगूढमावृतं मन्यते स्वतुल्यं मन्यते इत्यर्थः। तत्र तः मेघहिमोपरागसूर्यमिव अभ्रतुषारराहुभिः स्वचक्षुरावरकैः भास्करम् उपगूढं मन्यते यथा तद्वत् ॥३३-३५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवम् ऋषीणां सन्देहं ज्ञात्वा नारदः स्वयमाह-नापि चित्रमिदं विप्रा इति। इदं वसुदेववाक्यं नापि चित्रम् अपिशब्दात् र्थमपि न विप्रा इति। भवन्तः पूरका इति स्वपूर्त्यर्थमेव तदाह-बुभुत्सयेति। ननु बुभुत्सामात्रं चेत्प्रयोजनं तदा कृष्णः किं गृ इति चेत्तत्राह-कृष्णं मत्वाऽर्भकं यन्न इति। स्वोत्पन्नः स्वाज्ञातं कथं ज्ञास्यतीति किञ्च "ये यथा मां प्रपद्यन्ते" इति न्यायेन स्वदृष्टौ बालक एव प्रतिभाति अत एव नोऽस्मान् स्थूलान् पण्डितानिति ज्ञात्वा पृच्छति ॥३०॥ ननु जानाति भगवान् सर्वेश्वर तत्राह-सन्निकर्षोऽत्र मर्त्यानामिति। अनादरे सन्निकर्ष एव कारणं मर्त्यानामिति मरणधर्माणः ते जानन्ति सर्व एव मर्त्याः को इति आत्मवत् सर्वदर्शनादनादरः सम्भावितं दृष्ट्वा दृष्टान्तमाह-गाङ्गं हित्वेति। तत्रत्यो जनः गङ्गातीरस्थः शुद्धये इति तीरे सम्मर्दे स्नातः अशुद्धोऽहं जातः गृहे स्नास्यामीति मत्वा यथा पुनः गृहे स्नाति तदुक्तं शुद्धय इति। स हि गङ्गाजलमपि लवेनैव मन्यते न तु तन्माहात्म्यं वेद ॥३१॥ स्वयं भगवन्माहात्म्यमाह-यस्यानुभूतिरिति। ऋषयस्तु शास्त्रादिना संजातज्ञानाः पि छिन्नयोजितपटवत् न तज्ज्ञानमुत्कृष्टं भगवतस्तु ज्ञानस्य न कदाचिदपि छेदः। तमेवाह-कालेन प्रलयेन यस्यानुभूतिरनुभवः रिष्यति न नश्यति प्रलयमध्येऽपि नाशसम्भवात् तानपि हेतून् निषेधति लयोत्पत्त्यादिनेति। यदा प्राणी म्रियते तदा पूर्वानुभवो ति यदाप्युत्पद्यते तदापि लोकान्तरानुभवो नश्यति। एवं महाव्याध्यपस्मारादिनापि पूर्वानुभवनाशः तदेकमपि भगवति न भवति। कदाचित्स्वतोऽप्यनुभवो नश्यति यदा संस्कारं नोत्पादयति। कार्यकारणयोरभावात् एवं वचनम् अन्यस्मात् न्तशापादिना चकारात्कालविलम्बेन निरोधज्ञानाविर्भावेन च गुणतो रजस्तमःप्रादुर्भावात् अनुक्तपरिग्रहार्थं न कुतश्चनेति ॥३२॥ एवं भगवन्माहात्म्यमुक्त्वा तन्न जानातीति वसुदेवदोषमाह-तं क्लेशेति। तं प्राणादिभिः स्वविभवैरुपगूढं प्राणादिभिर्वशीकृतं मन्यते स हि अध्यासं कारणत्वेन न जानाति पदार्थसम्बन्धमात्रं यथा कारागारे बद्धो बन्धकोऽपि ईश्वरोऽपि तिष्ठति भ्रान्तः स्वतुल्यनेव मन्यते भगवतः देहाद्यध्यासहेतुर्नास्तीति वक्तुं दोषाभावगुणानाह-क्लेशेति। शास्त्रान्तरसिद्धाः अविद्यास्मितरागद्वेषाभिनिवेशाः पञ्च क्लेशाः इति अत्र तु संसारदुःखानुभव एव क्लेशः तत्साधकं कर्म मतान्तरं तु तत्साध्यं तस्य

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

परिपाकः जात्यायुर्भोगाः देहसम्बन्धो वा तत्र यो गुणप्रवाहः उत्पत्तिस्थितिप्रलयपरम्पराः अज्ञानमारभ्य संसारप्रवाहपर्यन्तं निरू एतैः सर्वैरपि अव्याकृतः अनुभवो यस्य विशेषेण आ सर्वतः करणं व्याकरणं स्वाधीनकरणं स्वरूपनाशनमिति यावत् अनुभवो स्वरूपं ज्ञाननाशाभावः पूर्वमेव निरूपित इति तस्यैव वा अनुवादः अनाशे हेतुः, ईश्वरमिति । न हीश्वरानुभवं कश्चिन्नाश शक्नोति तादृशोऽन्यस्ततोऽप्यधिकः नाशयेदिति चेत्तत्राह–अद्वितीयमिति । असमोऽर्धमित्यर्थः । एतादृशमपि प्राणेन्द्रियान्तःकरणै स्वविभूतिभिः आधिदैविकैः आनन्दमयैः स्वयमेव वा तथाभूत इति स्वरूपभूतैर्वा तैरुपगूढं लीलार्थमावेष्टितम् अ भ्रान्तोऽस्मदादिजीवः स्वतुल्यं मन्येत कीदृशं मन्यते इति शङ्कायामाह–सूर्यमिवेति । यथा सूर्यं मन्यन्ते मेघैराच्छन्नं हिमेन निष्प्र उपरागेण ग्रस्तमिति तथा अविद्यया ग्रस्तं तृष्णादिना निष्प्रभं शरीरेण छन्नमिति वस्तुतस्तु मेघादिभिः सम्बन्ध एव सूर्यस्य ना बहुव्यवधानात् तथाप्यन्योऽपि वस्तुतो विद्यादिभिर्ग्रस्तादिः कुतो वा भगवान् भविष्यति भगवतस्तु प्रकार उक्त एव ॥३३॥

श्रीसुबोधिनीसारः

तत्र नारदोक्तिः । हे विप्रा इदमाश्चर्यं न मन्तव्यं कृष्णमर्भकं बालं मत्वा वसुदेवो बोद्धुमिच्छयात्मनः श्रेयो नोऽस्मा पृच्छतीति यत् ॥३०॥ तत्र हेतुमाह । अत्र संसारे सन्निकर्षः चिरं सहसंवासो मनुष्याणामनादरणस्य कारणं भवति तत्र दृष्टान्त तत्रत्यो गङ्गातीरवासी जनो गाङ्गं गङ्गासम्बन्धि जलं हित्वा त्यक्त्वा शुद्धये पापप्रक्षालनार्थमन्याम्भः तीर्थान्तरं गच्छति यथा "अत्र श्रेयो न पश्यामि नयध्वं मां पृथूदकम्" इत्युक्तेः ॥३१॥ अस्य जगतो लयोत्पत्त्यादिना कालेन स्वतोऽन्यतो वा गुण यस्यानुभूतिः ज्ञानं कुतश्चन हेतोरपि न पश्यति "नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति श्रुतेः ॥३२॥ क्लेशैरविद्यादिभिः कर्म पाकैः तत्परिणामैः गुणानां प्रवाहैः स्वविभवैः स्वकार्यैः प्राणादिभिरव्याहतो न तिरस्कृतोऽनुभवो यस्य सदैकरसत्वात् तमद्वितीयमी अन्यः प्राकृतः पामरो जन उपगूढम् आवृतं मन्यते मेघहिमोपरागैरभ्रतुषारराहुभिः सूर्यमिव ॥३३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं पृष्टेषु मुनिषु किं सर्वज्ञं श्रीकृष्णं विहायास्मान् पृच्छति इति संशयितवत्सु तान् प्रति प्रश्नकारणमुद्भावयन् आह–नातिचित्रमिति चतुर्भिः । हे विप्राः ! कृष्णम् अर्भकं स्वपुत्रम् अज्ञं मत्वा तं विहाय वसुदेव आत्मनः स्वस्य श्रेयःसा बोद्धुमिच्छया यन्नोऽस्मान् पृच्छति तदेतदतिचित्रं न भवति ॥३०॥ तत्र हेतुमाह–सन्निकर्ष इति । हि यस्मात् सन्निकर्षो नि सान्निध्यमनादरस्य अविश्वासस्य कारणं भवति । अतो नित्यकृष्णसन्निधानात्तमनादृत्यास्मान् पृच्छतीत्याश सन्निकर्षस्यानादरकारणत्वे दृष्टान्तमाह–गाङ्गमिति । यथा तत्रत्यो गङ्गातीरस्थो जनो गाङ्गम् अम्भो हित्वा अनादृत्यात्मनो विशुद्ध अन्यतीर्थाम्भः प्रति याति तथेति ।

'तिस्रः कोट्यर्धकोटी च तीर्थानां वायुरब्रवीत् । तान्येव जाह्नवीजल' इति वचनात् ।

गङ्गायाः सर्वतीर्थश्रेष्ठत्वात्तामनादृत्य तीर्थान्तरगमनं नोचितमित्याशयः ॥३१॥ न वसुदेवादेरज्ञत्वभ्रान्त्या तस्याज्ञत्वं सर्वज्ञत्वात् इत्याह–यस्येति द्वाभ्याम् । यस्य कृष्णस्यानुभूतिर्ज्ञानं कुतश्चनापि हेतोर्न रिष्यति न नश्यति क्लेशादिभिरव्याहतानुभवमप्यन्योऽज्ञो जनः स्वदृष्टान्तेन स्वविभवैः प्राणादिभिर्गूढमाच्छन्नं मन्येत मन्यते इति द्वयोरन्वयः । स्वप्र प्राणादिभिः स्वस्य छादनं कथं सम्भवति इत्याशङ्क्य तत्र दृष्टान्तमाह–मेघहिमोपरागैः अभ्रतुषारराहुभिर्गूढं सूर्यमिवेति । कुतश्चन रिष्यति' इत्युक्तं तदेव स्पष्टयति–कालेनेत्यादिभिः । यथा जीवानां ज्ञानं चिरकालेन नश्यति अस्य देहस्य लयोत्प जन्ममरणादिनापि नश्यति, दृढसंस्कारं विना स्वत एव शीघ्रं नश्यति तथाऽन्यस्माच्च क्रोधनिद्रादिविरोधिगुणोदयात्तथा भगवतो ज्ञानं न नश्यतीत्यर्थः ॥३२॥ एवं क्लेशादिभिरपि जीवानां ज्ञानं प्रतिहतं भवति तथा भगवतो ज्ञानं प्रतिहतं न क्लेशाद्यभावात् । तत्र अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः, तन्निमित्तकानि कर्माणि पुण्यपापात्मकानि तत्परिणा च सुखदुःखात्मकम्, गुणानां सत्त्वादीनां प्रवाहः पर्यायेण पुनः प्रादुर्भावः । प्राणादिभिरित्यादिपदेन देहेन्द्रियान्तःकरणा अप्रतिहतज्ञानत्वे हेतुमाह–अद्वितीयमिति । सर्वात्मकमित्यर्थः ॥३३॥

नेति । हे वि
बोद्धुमिच्छया यन्नोऽस्मा
सान्निध्यमनादरस्य गौरव
गङ्गातीरस्थो जनो गाङ्गम्
यस्येश्वरस्य अनुभूतिः प्र
अन्यस्माच्च मुद्गरादेर्घटादि
कारणेनेति कालविशेषणं
तन्निमित्तकानि कर्माणि पु
प्रादुर्भावः तैः क्लेशादिभि
शरीरघटकैः स्वकार्यैः प्रा
मेघस्य सौरज्योतिर्जलात्मव
चक्षुर्ग्राह्यत्वेन पौराणिकमते

ननु परमात्मनि श्र
बुभुत्सया ज्ञातुमिच्छया ॥३
वसुदेवार्भकत्वं निषेधयन्नाह
रिष्यति इतरजनज्ञानवन्न नश
मलिनसत्त्वादित्रिगुणैर्न नश्य
सर्वनियन्तारम् अद्वितीयं ना
स्वकीयपुत्रकलत्रादिसमृद्धि
प्रतिहतप्रकाशं सूर्यमिव मन्ये

इत्थं पृष्टेषु मुनिषु वि
नारदो नातिचित्रमिति चतुर्भिः ।
श्रेयः श्रेयसः साधनं बुभुत्सया
सन्निकर्ष इति ॥ हि यस्मात् अ
प्राचुर्येण भगवतो मनुष्यचेष्टावीक्ष
गाङ्गमिति । यथा तत्रत्यः गङ्गाती
सन्निकर्षस्यानादरणकारणत्वमुक्त
यस्येति ॥ यस्य श्रीकृष्णस्य अ
विद्युदादिवत् अन्यस्माच्च मुद्गरादे
महत्कृपाजातशुद्धसत्त्वादिगुणैरि
ज्ञानलोपहेतवस्तैरयं कदापि न स

रप्रवाहपर्यन्तं निरूपितम्
मिति यावत् अनुभवोऽत्र
श्वरानुभवं कश्चिन्नाशयितुं
प प्राणेन्द्रियान्तःकरणदेहैः
नीलार्थमावेष्टितम् अन्यो
घैराच्छन्नं हिमेन निष्प्रभम्
म्बन्ध एव सूर्यस्य नास्ति
कार उक्त एव ॥३३॥

च्छयात्मनः श्रेयो नोऽस्मान्
कारणं भवति तत्र दृष्टान्तः।
ः तीर्थान्तरं गच्छति यथा।
न स्वतोऽन्यतो वा गुणतश्च
क्लेशैरविद्यादिभिः कर्मभिः
कसत्वात् तमद्वितीयमीश्वरम्

त प्रश्नकारणमुद्भावयन् नारद
आत्मनः स्वस्य श्रेयःसाधनं
हि यस्मात् सन्निकर्षो निरन्तरं
यास्मान् पृच्छतीत्याशयः।
वा अनादृत्यात्मनो विशुद्ध्यर्थम्

इति वचनात्।
ादेरज्ञत्वभ्रान्त्या तस्याज्ञत्वमेव
तोर्न रिष्यति न नश्यति
ते इति द्वयोरन्वयः। स्वप्रकाशै
ुषारराहुभिर्गूढं सूर्यमिवेति।
ति अस्य देहस्य लयोत्पत्त्यादि
द्रादिविरोधिगुणोदयान्नश्यति
भगवतो ज्ञानं प्रतिहतं न भवति
ण्यपापात्मकानि तत्परिपाक
पदेन देहेन्द्रियान्तःकरणादि

अन्वितार्थप्रकाशिका

नेति। हे विप्राः ! कृष्णम् अर्भकं स्वपुत्रम् अज्ञं मत्वा तं विहाय वसुदेव आत्मनः स्वस्य श्रेयःसाधनं बुभुत्सया बोद्धुमिच्छया यन्नोऽस्मान् पृच्छति तदेतदतिचित्रं न भवति ॥३०॥ सन्निकर्ष इति । हि यस्मात् मर्त्यानां सन्निकर्षो निरन्तरं सान्निध्यमनादरस्य गौरवमननाभावस्य कारणं भवति अतो नित्यकृष्णसन्निधानात्तमनादृत्यास्मान् पृच्छतीत्याशयः । यथा तत्रत्यो गङ्गातीरस्थो जनो गाङ्गम् अम्भो हित्वा अनादृत्यात्मनो विशुद्ध्यर्थम् अन्यतीर्थाम्भः प्रति याति तथेति ॥३१॥ यस्येति युग्मम् । यस्येश्वरस्य अनुभूतिः प्रकाशस्वरूपलक्षणा कालेन कर्कटिकाफलवत् तथा अस्य विश्वस्य लयोत्पत्त्यादिना स्वतश्च विद्युदादिवत् अन्यस्माच्च मुद्गरादेर्घटादिवत् गुणतो रूपाद्यन्तरोत्पत्तेः पूर्वरूपादिना देहादिवत् कुतश्चिदपि न रिष्यति न नश्यति। लयोत्पत्त्योरादिना कारणेनेति कालविशेषणं वा । एवं यथा जीवानां ज्ञानं कालादिना नश्यति तथा अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः तन्निमित्तकानि कर्माणि पुण्यपापात्मकानि तत्परिपाकः फलं च सुखदुःखात्मकम् गुणानां सत्त्वादीनां प्रवाहः पर्यायेण पुनः पुनर्भावः तैः क्लेशादिभिरव्याहतानुभवमद्वितीयमीश्वरमपि अन्यः अन्यो जनः स्वदृष्टान्तेन स्वविभवैः प्राणमनोबुद्धिभिर्लिङ्ग-शरीरघटकैः स्वकार्यैः प्राणादिभिर्गूढमाच्छन्नं मन्येत मन्यते । यथा मेघहिमोपरागैः अभ्रतुषारराहुभिः स्वविभवैर्गूढं सूर्यमिवेति मेघस्य सौरज्योतिर्जलात्मकत्वात् जलस्य ज्योतिः कार्यत्वात् हिमस्य च जलविशेषत्वात् राहोर्ध्वान्तखण्डरूपत्वात् ध्वान्तस्य च सूर्यग्राहकत्वेन पौराणिकमते तैजसत्वात् मेघादीनां सूर्यकार्यत्वम् ॥३२-३३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु परमात्मनि श्रीकृष्णे सति अस्मानयं कुतः पृच्छतीति सन्दिग्धान् मुनीन् प्रति नारद उवाच–नातिचित्रमिति । बुभुत्सया ज्ञातुमिच्छया ॥३०॥ सन्निकर्षः समीपत्वं गाङ्गम् अम्भ इति शेषः । तत्रत्यो गङ्गाकूलस्थः ॥३१॥ श्रीकृष्णस्य पुत्रत्वार्भकत्वं निषेधयन्नाह–यस्येति । यस्य श्रीकृष्णस्यानुभूतिर्विज्ञानम् अस्य विश्वस्य लयोत्पत्त्योरादिना हेतुभूतेन कालेन न नश्यति इतरजनज्ञानवन्न नश्यति । स्वतः स्वेनापि न नश्यति अन्यस्मात् अन्येन बद्धमुक्तजनवृन्देनापि न नश्यति गुणतो मलिनसत्त्वादित्रिगुणैर्न नश्यति कुतश्च केनापि वस्तुना न नश्यति ॥३२॥ क्लेशादिभिः अव्याहतः अनुभवो ज्ञानं यस्य तम् ईश्वरं सर्वनियन्तारम् अद्वितीयं नास्ति स्वरूपस्वभावादिभिर्द्वितीयः स्वतुल्यो यस्य तं सच्चिदानन्दघनमूर्तिं श्रीकृष्णं स्वविभवैः स्वकीयपुत्रकलत्रादिसमृद्धिभिः प्राणादिभिश्च प्राकृतकरणकलेवरैः उपगूढम् आवृतैश्वर्यम् अन्यः अज्ञाजनः मेघादिभिः उपगूढं तिरोहितप्रकाशं सूर्यमिव मन्येत हिमस्तुषारः उपरागो ग्रासः ॥३३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थं पृष्टेषु मुनिषु किं सर्वज्ञं श्रीकृष्णं हित्वाऽस्मान् पृच्छतीत्येवं संशयितवत्सु तान् प्रति प्रश्नकारणमुद्भावयन्नाह ॥ अथ नातिचित्रमिति चतुर्भिः ॥ नातिचित्रमिति ॥ हे विप्राः वसुदेवः कृष्णम् अर्भकं मत्वा स्वपुत्रं मन्वानः सन् आत्मनः स्वस्य श्रेयसः साधनं बुभुत्सया बोद्धुमिच्छया नोऽस्मान् पृच्छति यत् इदमित्येतत् न अतिचित्रम् ॥३०॥ तत् कुत इत्यत आह ॥ सन्निकर्ष इति ॥ हि यस्मात् अत्रेति पाठेऽस्मिन् लोके मर्त्यानां सन्निकर्षः निरन्तरसान्निध्यम् अनादरकारणम् । अतिसान्निध्यात् कृष्णे भगवतो मनुष्यचेष्टावीक्षणतः स्वपुत्राभावं तत्र स्वीकृत्यास्मानेवं पृच्छतीति भावः । सन्निकर्षस्यानादरणकारणत्वे दृष्टान्तमाह– यथेति। यथा तत्रत्यः गङ्गातीरस्थः गाङ्गम् अम्भः हित्वा अनादृत्य शुद्धये आत्मशुद्ध्यर्थम् अन्याम्भः याति तद्वत् ॥३१॥ एवं सन्निकर्षस्यानादरणकारणत्वमुक्त्वा कृष्णस्य सर्वज्ञत्वानभिज्ञानमपि तत्कारणमिति वक्तुं तावच्छ्रीकृष्णस्य नित्यसर्वज्ञतामाह ॥ यस्येति ॥ यस्य श्रीकृष्णस्य अनुभूतिर्ज्ञानं कालेन कर्कटिकाफलवत् अस्य विश्वस्य लयोत्पत्त्यादिनापि वै अप्यर्थः । स्वतः विद्युदादिवत् अन्यस्माच्च मुद्गरादेर्घटादिवत् गुणतः रूपाद्यन्तरोत्पत्तेः पूर्वरूपादिना देहादिवत्। यद्वा। गुणतो मलिनसत्त्वादिगुणानां प्रकृतिजातशुद्धसत्त्वादिगुणैरिवेत्यर्थः । न कुतश्चित् कस्माच्चिदपि न रिष्यति सर्वथा न नश्यति । कालादयो ह्यन्येषां सङ्कोचहेतवस्तैरयं कदापि न सङ्कुचितज्ञानमिति भावः ॥३२॥ एतदेव सदृष्टान्तमुपपादयति ॥ तमिति ॥ क्लेशा

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अविद्यास्मितारागद्वेषाभिनिवेशाश्च कर्माणि तत्पूर्वकाणि पुण्यापुण्यात्मकानि च परिपाके तत्परिपाकभूते सुखदुःखे च गुणप्रवाह सत्त्वादीनां गुणानां पुनः प्रवाहश्च तैः अव्याहतोऽनुभवो महिमा यस्य तम् अद्वितीयं स्वतुल्यरहितम् ईश्वरं तं श्रीकृष्णम् अ हेतुगर्भम् । तत्त्वात् स्वविभवैः स्वकार्यैः प्राणादिभिरिन्द्रियादिभिः उपगूढमावृतं प्राकृतेन्द्रियतद्व्यापारैस्तिरोहितानुभवं मन्य मन्यते । कथमिव । अज्ञः स्वविभवैः मेघश्च हिमं च उपरागश्च तैरभ्रतुषारराहुभिरित्यर्थः । सूर्यमिव स्वयमज्ञत्वादेवमभूतमि स्वतुल्यं मन्यते इत्यर्थः ॥३३॥

कृष्णप्रिया

नारद उवाच - हे महर्षियो - यह कोई आश्चर्य की गाथा नहीं है, कारणकि महाराज श्रीवसुदेवजी भगव श्रीकृष्णको अपना बालक समझकर शुद्ध निर्दोष जीज्ञासाके भाव से अपने कल्या का साधन हमलोगों को पू रहे है ॥३०॥ इस संसारमें बहुत समीप रहना यह भी एक मनुष्योंके अनादर का कारण बन जाता है। देखा ज है कि श्रीगंगाजी के तट पर रहनेवाला पुरुष गंगाजल छोड कर अपनी शुद्धि के दूसरे तीर्थमें जाता है ॥३१॥ भगवान श्रीकृष्ण की अनुभूति समयके परिवर्तन से अथवा समय काल के कारण नष्ट नहीं होता है; इस विश्व उत्पत्तिमें या लयमें भी नष्ट नहीं होता है; स्वतः अनुभूति का नाश नहीं अथवा अन्य किसी से नष्ट नहीं हो है गुणों से भी नाश नहीं होता है या अन्य किसी कारणसे नाश जो नित्य ज्ञान स्वरूप है ॥३२॥ भगवान् श्रीकृ का जो ज्ञान मय स्वरूप है अविद्या-राम-द्वेष आदि पंचक्लेष, पुण्य पापमय कर्म सुख दुःख आदि कर्म फल सत्वादि गुणों के प्रवाह से खण्डित नहीं हो सकता । क्योंकि भगवान स्वयं अद्वितीय परमात्मा है। जब भगवान अपने को अपनी ही शक्तियों प्राण आदिसे ढक लेते है तब अज्ञजन ऐसा समझते है कि ये ढक ग जैसे बादल कुहरा अथवा ग्रहण के द्वारा अपने नेत्रोंके ढक जाने सूर्य को आच्छन्न मानते है मान लेते है ॥३

[1]अथोचुर्मुनयो राजन्नाभाष्यानकदुन्दुभिम् । सर्वेषां शृण्वतां राज्ञां तथैवाच्युतरामयोः ॥३४
कर्मणा कर्मनिर्हार एष साधु निरूपितः । यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः ॥३५
[2]वित्तस्योपशमोऽयं वै कविभिः शास्त्रचक्षुषा । दर्शितः सुगमो योगो धर्मश्चात्म[3]सुखावहः ॥३६
अयं स्वस्त्ययनः पन्था द्विजातेर्गृहमेधिनः । यच्छ्रद्धयाऽऽप्तवित्तेन [4]शुक्लेनेज्येत पूरुषः ॥३७

कर्दमक्षमा

राजन्, अथ, मुनयः, सर्वेषाम्, राज्ञाम्, शृण्वताम्, च, तथा, एव, अच्युतरामयोः, शृण्वतोः, आनकदुन्दुभिम्, आभा ऊचुः ॥३४॥ कर्मणा, कर्मनिर्हारः, एषः, साधु, निरूपितः, यत्, सर्वयज्ञेश्वरम्, विष्णुम्, मखैः, श्रद्धया, यजेत् ॥३५॥ कवि शास्त्रचक्षुषा, अयम्, वै, वित्तस्य, सुगमः, उपशमः, च, आत्मसुखावहः, योगः, दर्शितः ॥३६॥ द्विजातेः, गृहमेधिनः, स्वस्त्य अयम्, पन्थाः, यत्, श्रद्धया, आप्तवित्तेन, शुक्लेन, पुरुषः, इज्येत ॥३७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

चित्तस्योपशमः उपशमहेतुः योगो मोक्षोपायश्च शनैरात्ममुदमावहतीति तथा सुगमः प्रवृत्त्याश्रयत्वात् धर्मश्च आव अन्यथा विहिताकरणेन मालिन्यप्रसङ्गात् ॥३६॥ ननु, "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" इत्यादिना त्या विहितत्वात्कथं कर्ममोक्षोपाय इत्याशङ्क्याऽऽदावेव त्यागस्याशक्यत्वादित्याशयेनाऽऽहुः-अयमिति सार्धचतुर्भिः । स्व स्वस्ति क्षेममीयतेऽनेनेति तथा श्रद्धया निष्कामतया शुक्लेन शुद्धेनाऽऽप्तेन वित्तेन पुरुष ईश्वर इज्येतेति यदेष पन्थाः ॥३

---

१. श्रीशुकः-च. पु. टी. । २. चित-श्रीधर. वंशी. वीर. विज. । ३. धर्मश्चात्र सुखावहः-वीर. ; धर्मश्चात्मुदाहः-श्रीधर. वंशी. वि विश्व. । ४. चितो-गो. प्रे. टी. ।

अथ नारदवाक्य
। श्रद्धया विष्णुयजनलक्ष

अथानन्तरं श्रीव
उत्तरपद्येन ज्ञेयम् । आभाष
तान् प्रत्युपदेशार्थम् अच्यु
निर्हारः साधु यथा स्यात्तथा
सर्वैर्यजेदिति यत् स इत्य
नैष्कर्म्यस्यापि हेयत्वमुक्त
प्रकारान्तरेणाराधनीय इति भ
शमः शमो मन्निष्ठताबुद्धेरिति
सङ्कल्पविशेषमात्रेण तादृश
तत्रापि सन्ततश्रीभगवत्स्फूर्ति
शास्त्रचक्षुषा शास्त्ररूपं यच्चक्
वित्तस्य भगवत्समर्पणरूपया
। अत एव शुक्लेन यथोक्तं श्र

"प्रतिग्रहेण
युद्धोपलब्ध
कृषिवाणि
क्रमागतं
शुक्लेन वि

ननु पुरुषेज्यैव चेत्क
यज्ञादिना तत्राहुः-गृहमेधिनः

अथ श्रीवसुदेवमाहात्म
प्रहर्षोदयात् । किंवा तच्छ्रवणेन
अच्युतरामयोश्च शृण्वतोरिति वक्ष
श्रद्धया श्रीविष्णुयजने विश्वासे
व्यक्तहेत्वन्तरं सर्वेषां यज्ञानामीश
अयमेवशास्त्रमेव चक्षुस्तेन शा
भक्तिलक्षणः । अर्चनैकप्रकारत्वा
तर्हि मुख्यश्रवणादिभक्तिरेव साक्षा

द्दुःखे च गुणप्रवाहः
र्त तं श्रीकृष्णम् अज्ञाः
तरोहितानुभवं मन्येत
मज्ञत्वादेवम्भूतमीश्वरं

श्रीवसुदेवजी भगवान
न हमलोगों को पूछ
जाता है। देखा जाता
में जाता है ॥३१॥ जे
होता है; इस विश्वकी
सी से नष्ट नहीं होता
३२॥ भगवान् श्रीकृष्ण
द्य आदि कर्म फल एवं
रमात्मा है। जब वह
प्तते है कि ये ढक गये,
है मान लेते है ॥३३॥

च्युतरामयोः ॥३४॥
यज्ञेश्वरं मखैः ॥३५॥
ात्म[३]सुखावहः ॥३६॥
नेज्येत पूरुषः ॥३७॥

, आनकदुन्दुभिम्, आभाष्य,
द्रया, यजेत् ॥३५॥ कविभिः,
तेः, गृहमेधिनः, स्वस्त्ययनम्,

याश्रयत्वात् धर्मश्च आवश्यकः
वमानशुः'' इत्यादिना त्यागस्यैव
मति सार्धचतुर्भिः । स्वस्त्ययनं
येतेति यदेष पन्थाः ॥३७॥

त्मुदाहः-श्रीधर. वंशी. विज. जीव.

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ नारदवाक्यानन्तरम् ॥३४॥ यद्यजेदेष इत्यन्वयः ॥३५॥ अयम् आत्मन ईशस्य मुदावहः प्रीतिकरः चित्तशोधको वा श्रद्धया विष्णुयजनलक्षणः । अन्यथा एतदनाचरणे ॥३६॥ अत्राशङ्कते-नन्विति । शुद्धेन न्यायार्जितेन ॥३७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथानन्तरं श्रीवसुदेवनारदयोरभिप्रायं बुद्ध्वोभयसमाधानार्थमित्यर्थः । तत्र श्रीनारदसमाधानं तु वसुदेव भवान्नूनमिति उत्तरपद्येन ज्ञेयम् । आभाष्य भोः परमकृतार्थशिरोमणे हे जगत्पूज्येत्यादिसम्बोध्य सप्तम्यर्थे षष्ठ्यः । सर्वेषु राजसु शृण्वत्सु इति तान् प्रत्युपदेशार्थम् अच्युतरामयोश्च शृण्वतोरिति वक्ष्यमाणार्थः प्रामाण्यार्थः ॥३४॥ एष एव कर्मणा क्रिमाणेन कर्मणां कृतानां निर्हारः साधु यथा स्यात्तथा निरूपितः शास्त्रज्ञैः । कः श्रद्धया विश्वासेन विष्णुं स्वमहिम्ना विश्वव्यापकं स्वयं भगवन्तमेव मखैः सर्वैर्यजेदिति यत् स इत्यर्थः । तस्यैव यजने व्यक्तं हेत्वन्तरं सर्वेषां यज्ञादीनामीश्वरं फलदातारं सर्वदेवेश्वरत्वात् तद्यजनं विना नैष्कर्म्यस्यापि हेयत्वमुक्तम् - ''नैष्कर्म्यमप्यच्युतभाववर्जितम्'' इत्यादिना । एवं चेद्भवदभीष्टं तथापि भवत्पुत्र एवायं प्रकारान्तरेणाराधनीय इति भावः ॥३५॥ साधुत्वमेवाहुः-चित्तस्येति । अयं वै पूर्वोक्तप्रकारककर्मनिर्हार एव चित्तस्य उप आधिक्येन शमः शमो मन्निष्ठताबुद्धेरिति श्रीस्वयम्भगवत्सम्मतः शमः प्रापकत्वात् तत्रापि सुगमः सुकरो योग उपायः स्वतःसिद्धानां मखानां सङ्कल्पविशेषमात्रेण तादृशत्वसिद्धेः न त्वष्टाङ्गादिवत् कष्टसाध्यः तथा अयमेव मुख्यो धर्मः भागवतधर्मप्रवेशेन सर्वधर्माश्रयत्वात् तत्रापि सन्ततश्रीभगवत्स्फूर्तिमयत्वेनात्ममुदावहश्च न तु तत्कामस्फूर्तिमयधर्मवन्मात्सर्यादिदुःखावहः तस्मादयमेव कविभिः शास्त्रज्ञैः शास्त्रचक्षुषा शास्त्ररूपं यच्चक्षुरर्थप्रकाशकं तद्दानेन दर्शितः प्रकाशित इत्यर्थः ॥३६॥ अत्राप्ययमित्यादि-स्वस्त्ययनः गार्हस्थ्याश्रमस्य वित्तस्य भगवत्समर्पणरूपया प्रपत्त्या मत्प्रसादात् द्विजातेस्त्रैवर्णिकस्य अन्यस्यानधिकारात् आप्तेन स्वप्रवृत्त्या लब्धेन न्यायार्जितेनेत्यर्थः । अत एव शुक्लेन यथोक्तं श्रीविष्णुधर्मोत्तरे —

''प्रतिग्रहेण यल्लब्धं याज्यतः शिष्यतस्तथा । गुणान्वितेभ्यो विप्रस्य शुक्लं तत्त्रिविधं स्मृतम् ॥
युद्धोपलब्धं कारं च दण्डाच्च व्यवहारतः । क्षत्रियस्य धनं शुक्लं त्रिविधं परिकीर्तितम् ॥
कृषिवाणिज्यगोरक्षाः कृत्वा शुक्लं तथा विशः । द्विजशुश्रूषया लब्धं शुक्लं शूद्रस्य कीर्तितम् ॥
क्रमागतं प्रीतिदायं प्राप्तं च सहभार्यया । अविशेषेण सर्वेषां धनं शुक्लं प्रकीर्तितम् ॥
शुक्लेन वित्तेन कृतं पुण्यं बहुफलं भवेत् ॥'' इति ॥

ननु पुरुषेज्यैव चेत्कर्तव्या तर्हि मुख्यनवविधभक्त्यङ्गेन परिचर्यामार्गेणार्चनमार्गेणैव वा स इज्येत किं गौणभक्त्यङ्गेन यादिना तत्राहुः-गृहमेधिनः गार्हस्थ्यधर्माग्रहवतः इत्यर्थः । तच्च सम्यक् श्रद्धत्वाभावात् लोकसङ्ग्रहाग्रहाद्वेति ज्ञेयम् ॥३७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अथ श्रीवसुदेवमाहात्म्यश्रवणानन्तरमाभाष्य भो महाधन्य ! हे जगत्पूज्येत्यादि सम्बोध्य हे राजन्निति श्रीवसुदेवमाहात्म्येन स्यात् । किंवा तच्छ्रवणेन राज्ञः प्रेमविकारोऽप्यशोभादर्शनात् । सप्तमार्थे षष्ठ्यः । सर्वेषु राजसु शृण्वत्स्विति तान् प्रत्युपदेशार्थम् अच्युतरामयोश्च शृण्वतोरिति वक्ष्यमाणार्थस्य प्रामाण्यार्थम् ॥३४॥ साधु यथा स्यात्तथा निरूपितः शास्त्रज्ञैः । यद्वा । साधुभिर्निरूपितः श्रद्धया श्रीविष्णुयजने विश्वासेन भक्त्या वा विष्णुं स्वमहिम्ना विश्वव्यापकं भगवन्तमेवमन्यैः सर्वैर्यजेदिति यत्तस्यैव यजने व्यक्तहेत्वन्तरं सर्वेषां यज्ञानामीश्वरं फलदातारम् । किंवा स्वामिनं सर्वदेवेश्वरत्वात् ॥३५॥ तत्फलं चाप्याहुः-चित्तस्येति । वै एव । अथवा शास्त्रमेव चक्षुस्तेन शास्त्रार्थतत्त्वविचारेणेत्यर्थः । दर्शितः प्रकटितः प्रवर्तित इत्यर्थः । योगो भगवद्भक्त्युपायः धर्मश्च भक्तिलक्षणः । अर्चनैकप्रकारत्वात् । अत एवात्मनः कर्तुः आत्मनां वा सर्वजीवानामेव मुदावहः । बहुधा तत्सम्बन्धात् ॥३६॥ ननु मुख्यश्रवणादिभक्तिरेव साक्षात्कार्या, किं बहुव्यापारगौणाङ्गयज्ञैः ? तत्राहुः-अयमिति द्वाभ्याम् । स्वस्त्ययनो निर्विघ्नभक्तिप्रापक

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्यर्थ: । द्विजोत:-त्रैवर्णिकस्य आप्तेन स्ववृत्त्या लब्धेन न्यायार्जितेनेत्यर्थ: । अत एव शुक्लेन अविरक्तानां वित्तवताम यज्ञैर्धनार्पणमेवोचितमिति भाव: ॥३७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥३३-३७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमुक्त्वा सर्वे मुनय: सम्भूयोचुरित्याह-अथेति । आभाष्य सम्बोध्य सर्वेषां राज्ञां शृण्वतां सतां तथैवाच्युतरामयो शृण्वतो: सतो: (मुनय ऊचु: आभाष्य सम्बोध्य हे राजन् परीक्षित !) ॥३४॥ उक्तिमेवाह-कर्मणेति । साधु यथा तथा एषु एवं निरूपित: । कोऽसौ ? यत्सर्वेषां यज्ञानामीश्वरं निर्वाहकं विष्णुं श्रद्धया मखैर्यज्ञैर्यजेदाराधयेदित्येष: ॥३५॥ चित्तस्येति । अ विष्ण्वाराधनरूपो धर्म: अत्र लोके चित्तस्योपशम: शान्त्यावह: सुखावह: निरतिशयमोक्षसुखावहश्चातोऽयमेव सुगमोपाय इ मुनिभि: शास्त्रमेव चक्षुस्तेन दर्शित: । ण्यन्तादुद्दृशेर्निवृत्ते प्रेरणात् कर्मणि क्त: । दृष्ट इत्यर्थ: ॥३६॥ अयमिति । द्विजातेस्त्रैवर्णिकस्य गृहाश्रमिण: श्रेय:प्रापकोऽयमेव पन्था: कोऽसौ शुक्लेन शुद्धेन आप्तवित्तेन परपीडादिकमन्तरेण लब्धेन धनेन पुरुष: परमपुरु श्रद्धया इज्येतेत्ययं भक्तियोगोत्पत्तिप्रतिबन्धनिरसनद्वारा मोक्षसुखावह: पन्था: केवलमीश्वराराधनात्मकयज्ञ एवेत्यर्थ: ॥३७॥

श्रीमज्जीवगोस्वामिकृत: क्रमसन्दर्भ:

अथ अनन्तरं श्रीवसुदेवनारदयोरभिप्रायं बुद्ध्वोभयसमाधानार्थमित्यर्थ: । श्रीनारदसमाधानं त्वत्र "वसुदेव भवान्नूनं" इत्यन्तिमपद्येन ज्ञेयम् ॥३४-३६॥ गृहमेधिन: गार्हस्थ्यधर्माग्रहवत इत्यर्थ: । भगवदर्चादि श्रद्धावतां तु तदेव परमश्रेय इति भाव: ॥३७॥

श्रीमज्जीवगोस्वामिकृत: बृहत्क्रमसन्दर्भ: ॥३१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सर्वेषामित्यादिषु सप्तम्यर्थे षष्ठ्य: ॥३४॥ कर्मनिर्हारो यथा स्यादिति प्रकारप्रश्नोत्तरमाहु:-यच्छ्रद्धयेति । मखान विष्ण्वाराधकज्ञानं विना कर्मनिर्हारो न भवेदिति भाव: ॥३५॥ उपशम: उपशमहेतु: सुगम: प्रवृत्त्याश्रयत्वात् योग: मोक्षप्रा उपाय: आत्ममुदावह: मन:सुखप्रदश्च ॥३६॥ द्विजातेस्त्रैवर्णिकस्य आप्तवित्तेन न्यायप्राप्तधनेन शुद्धेन ॥३७॥

गूढार्थदीपिनी

अथ नारदवाक्यानन्तरं मुनय: आनकदुन्दुभिं वसुदेवमाभाष्य सम्बोध्य ऊचुरित्यन्वय: । सर्वेषां शृण्वतां सतां त रामकृष्णयोरपि शृण्वतो: सतो: ॥३४॥ कर्मणां निर्हार: कर्मजन्यबन्धनिवृत्त्युपाय: एष निरूपित: यत् मखै: विष्णुं यजेदि ॥३५॥ चित्तस्य उपशम: उपरामहेतु:आत्मन ईश्वरस्य मुदावह: प्रीतिकर: सुगमो योग: मोक्षोपाय: धर्मश्च अयमेव कवि दर्शित: अयमेव च गृहस्थस्य पन्था दर्शित: । क: । शुद्धेन वित्तेन न्यायार्जितेन श्रद्धया पूरुष: भगवान् इज्येत इति यत् अय इति द्वयोरन्वय: । स्वस्ति क्षेमम् ऐहिकामुष्मिकमीयते प्राप्यतेऽनेनेति स्वस्त्ययन: । केन दर्शित: । शास्त्ररूपचक्षुषा ॥३६-३

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

अयं विष्णुयजनात्मको धर्म: चित्तस्य उपशम: शान्तिकर: योगो विष्णुप्राप्त्युपायश्च शास्त्रमेव चक्षुस्तेन ॥३ द्विजातेस्त्रैवर्णिकस्य गृहमेधिनो गृहस्थस्य अयं पन्था: स्वस्त्ययन: वैराग्यजननद्वारा मोक्षपापक: कोऽसौ यद्यदा आप्तेन न्याया अत एव शुक्लेन शुद्धेन वित्तेन श्रद्धया पुरुषो विष्णु: इज्येत इत्ययम् ॥३७॥

एवं तस्य भ्रान्त
इत्याह-अथोचुरिति । मु
यतोऽयमानकदुन्दुभिर्मह
सर्वसिद्धान्ताविरुद्धं भगव
प्रकारमाहु:-कर्मणा कर्म
इत्याकांक्षायामाह-यच्छ्र
गुरब्राह्मणादिचरणपूजयाऽ
यतो यज्ञवराहेणाविर्भूत: '
भवतीत्याह-मखैरिति । ई
परिचर्यादिरपि पञ्चरात्राद्या
चित्तस्येति । अयं प्रकारो
यागादिरूप: स तु चित्तस्यै
। कर्तु: साधनस्य चोत्कर्ष
निरूपित: न तु भक्ति: "
स्यादित्याशङ्कायामाह-
आत्मसुखजनकत्वमधिकमि
स्वस्त्ययन: पन्था इति । गृह
निरूपिता: अतोऽयमेव
द्विजसंस्कारादिकमधिकारि
अनाशकेन हितकर्त्रा शुक्लेन

हे राजन् अथो सर्वे
कर्मणा कर्मनिवृत्तिरेष उक्त: स
शास्त्रदृष्ट्या पण्डितै: चित्तस्ये
कर्मणा न प्रजया धनेन त्य
प्रथमतस्त्यागस्याशक्यत्वादित्य
श्रद्धयाऽऽप्तेन लब्धेन वित्तेन ध

अथ नारदोक्त्यनन्तरं
सम्बोध्य मुनय ऊचुरित्यन्वय: ॥
कर्मनिवृत्त्युपाय: साधु यथा तथ
'अशान्तस्य कुत: सुखम्' इत्य
इत्यर्थ: । तत्र प्रमाणमाहु:-शास्त्र

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं तस्य भ्रान्तत्वमुक्त्वा तादृशं स्वनिस्तारार्थं सत्यमेव प्रार्थयत इति समर्थिते निःशङ्काः सन्तः उत्तरं दातुं प्रवृत्ता इत्याह-अथोचुरिति । मुनित्वात् ज्ञानं राजन्निति सावधानार्थं सम्बोधनम् आभाष्येति । हे वसुदेव ! सावधानं शृण्वित्युक्त्वा यतोऽयमानकदुन्दुभिर्महान् सर्वेषां शृण्वतामिति अनेन तेषां कथने उत्साहः सूचितः तथैव अच्युतरामयोरिति युक्तिपूर्वकं सर्वसिद्धान्ताविरुद्धं भगवान् शृणोतीति निरूपयिष्यन्तीति ज्ञापितम् ॥३४॥ कर्मनिर्हारप्रकारमाहुः-कर्मणेति सप्तभिः । आदौ प्रकारमाहुः-कर्मणा कर्मनिर्हारः एषः अग्रे वक्ष्यमाणः सर्वैरेव सिद्धान्तिभिः साधु निरूपित इति प्रमाणं स कः प्रकारः इत्याकांक्षायामाह-यच्छ्रद्धयेति । श्रद्धा सर्वाङ्गं विष्णुं यजेदिति कर्मनिर्हारकं कर्म तत्र विष्णुशब्दः इन्द्रियाधिष्ठातृपरोऽपीति गुरुब्राह्मणादिचरणपूजयाऽपि परम्परया विष्णुयागो भवतीति तन्निवृत्त्यर्थमाह-सर्वयज्ञेश्वरमिति । सर्वयज्ञानामीश्वरो विष्णुरत्राभिप्रेतः यतो यज्ञवराहेणाविर्भूतः "यज्ञो वै विष्णुः" इति श्रुतेः "यज्ञेन यज्ञमयजन्त" द्वितीयान्तवाच्यो यज्ञोऽत्राभिप्रेतः स तु यज्ञैरेवेष्टो भवतीत्याह-मखैरिति । ईश्वरपदेन यज्ञेष्वेव भगवतो नियोग इति भगवदाज्ञापरिपालनमिति प्रमाणमपि सूचितम् ॥३५॥ ननु परिचर्यादिरपि पञ्चरात्राद्यागमे निरूपितः उत्सवाश्च ततो वैष्णवमार्गं परित्यज्य श्रौत एव मार्गो निरूपित इति चेत्तत्राह-चित्तस्येति । अयं प्रकारो विद्यमाने वित्ते कविभिर्निरूपितः वैष्णवमार्गस्तु प्रायेण किञ्च नाधिकृत एव योऽस्माभिर्निरूपितो यागादिरूपः स तु चित्तस्यैवोपशमजनकः शरीरं तु तद्द्वारा उपयुज्यते एषा युक्तिरप्रमाणमिति चेत्तत्राह-कविभिः शास्त्रचक्षुषेति कर्तुः साधनस्य चोत्कर्षो निरूपितः किञ्च अयं सुगमो योगः शरीरक्लेशापेक्षया बहिरङ्गत्वात् किञ्च अयमस्माभिर्धर्मो निरूपितः न तु भक्तिः "तानि धर्माणि प्रथमानि आसन्" इति श्रुतेः । एतस्य कर्मनाशकत्वमग्रे वक्तव्यं धर्मत्वे किं स्यादित्याशङ्कायामाह-आत्मसुखावहमिति । आत्मसुखमावहतीति एतस्य कर्मनाशकत्वं प्रतिज्ञातमिति आत्मसुखजनकत्वमधिकमित्यधिकं ज्ञातव्यम् ॥३६॥ नन्वन्येष्वपि मार्गेषु विद्यमानेषु कथमयं निरुक्त इति चेत्तत्राह-अयं स्वस्त्ययनः पन्था इति । गृहस्थस्यायमेव मार्गः स्वस्त्ययनः । अन्ये तु स एव मार्गाः गार्हस्थ्यभंजकाः यदनुचरितलीलेत्यादिषु निरूपिताः अतोऽयमेव मार्गः गृहस्थं गृहे स्थापयति । किञ्च द्विजातिमात्रस्यात्राधिकारः अन्यदन्यदपि द्विजसंस्कारादिकमधिकारिविशेषणं मृग्यते । एवं साधयित्वा निश्चितं विशिष्टमनुवदति-यच्छ्रद्धयेति । प्राप्तेन स्वयं प्राप्तेन वित्तेन अनाशकेन हितकर्त्रा शुक्लेन सन्मार्गप्राप्तेन पूरुषं यज्ञपूरुषं श्रद्धया यजेतेति यत् अयमेव पन्था इति सम्बन्धः ॥३७॥

श्रीसुबोधिनीसारः

हे राजन् अथो सर्वेषां राज्ञां शृण्वतां सतां तथा रामकृष्णयोः शृण्वतोः सतोः वसुदेवं सम्बोध्य मुनयः ऊचुः ॥३४॥ कर्मणा कर्मनिवृत्तिरेष उक्तः साधु यथा स्यात्तथा साधुभिर्निरूपित इत्येके सर्वयज्ञपतिं विष्णुं यज्ञैः श्रद्धया यजेदिति यत् यः ॥३५॥ शास्त्रदृष्ट्या पण्डितैः चित्तस्योपशमो निवृत्तिकरः सुगमोऽयं योग उपायो दर्शितः । आत्महर्षकरो धर्मश्च दर्शितः ॥३६॥ "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" इति श्रुत्या त्यागस्य विहितत्वात्कर्मणा सिद्धिरिति न शङ्क्यं यमतस्त्यागस्याशक्यत्वादित्याहुः । गृहमेधिनो गृहस्थस्य द्विजातेस्त्रैवर्णिकस्यायं कल्याणकृत् पन्था मार्गः कोऽसौ तत्राह । श्रद्धयाऽऽप्तेन लब्धेन वित्तेन धनेन शुक्लेन न्यायार्जितेन पुरुषो हरिरिज्येतेति यत् यः ॥३७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ नारदोक्त्यनन्तरं हे राजन् ! सर्वेषां राज्ञां शृण्वतां सतां तथा रामकृष्णयोरपि शृण्वतोः सतोः आनकदुन्दुभिमाभाष्य सम्बोध्य मुनय ऊचुरित्यन्वयः ॥३४॥ यत् श्रद्धया मखैर्यज्ञेश्वरं यज्ञफलदातारं विष्णुं यजेत् आराधयेदित्येष एव कर्मणा कर्मनिर्हारः कर्मनिवृत्त्युपायः साधु यथा तथा निरूपितः ॥३५॥ साधुत्वमेव स्पष्टयति-आत्मनोऽन्तःकरणस्य मुदं हर्षमावहतीति तथा सः । 'अशान्तस्य कुतः सुखम्' इत्याशङ्क्याहुः-चित्तस्योपशमः शान्तिकरः । तत्र हेतुमाहुः-धर्मश्चेति । क्षत्रियाणामावश्यको धर्म एव । तत्र प्रमाणमाहुः-शास्त्रमेव चक्षुस्तेन कविभिर्विवेकिभिः सुगमः प्रवृत्त्यात्मकत्वात् सुकरो योग उपायोऽयमेव दर्शितः

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

॥३६॥ यद्यपि सन्ति तपआदयोऽन्येऽप्युपायास्तथापि द्विजातेस्त्रैवर्णिकस्य गृहश्रमिण: स्वस्त्ययन: श्रेय:प्रापकोऽयमेव पन्था। अयंशब्दार्थमाह-आप्तेन वित्तेन पूरुष: पुरुषोत्तम इज्येत । अश्रद्धया कृतं निष्फलं भवति, अत आहु:-श्रद्धयेति । तथापि परपीडामन्तरेण स्ववर्णवृत्त्या लब्धेन शुद्धधनेनैव पूजनं सफलं भवति, नान्यथा इत्याहु:-शुक्लेनेति ॥३७॥

अन्वितार्थप्रकाशिका

अथेति । हे राजन् ! सर्वेषां राज्ञां शृण्वतां सतां तथा रामकृष्णयोरपि शृण्वतो: सतो: आनकदुन्दुभिमाभाष्य सम्बोध्य मुनय ऊचु: ॥३४॥ कर्मणेति । यच्छ्रद्धया मखैर्यज्ञेश्वरं यज्ञफलदातारं विष्णुं यजेत् आराधयेदित्येष एव कर्मणा कर्मनिर्हार: कर्मनिवृत्त्युपाय: साधु यथा तथा निरूपित: ॥३५॥ चित्तस्येति । आत्मनोऽन्त:करणस्य मुदमावहति तथा स: चित्तस्योपशम: शान्तिकर: क्षत्रियाणां धर्मश्च शास्त्रमेव चक्षुस्तेन कविभिर्विवेकिभि: सुगम: प्रवृत्त्यात्मकत्वात् सुकरो योग उपायोऽयमेव दर्शित: ॥३६॥ अयमिति । यद्यपि सन्ति तपआदयोऽन्येऽप्युपायास्तथापि द्विजातेस्त्रैवर्णिकस्य गृहश्रमिण: स्वस्त्ययन: श्रेय:प्रापकोऽयमेव यत् श्रद्धया शुक्लेन शुद्धेन आप्तेन वित्तेन पूरुष: भगवान् इज्येत ॥३७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आभाष्य सम्बोध्य सर्वेषां राज्ञां शृण्वतां सताम् ॥३४-३५॥ कविभि: शास्त्रदृष्ट्या अयं सुगम: । चित्तस्योपशम: शान्तिहेतुर्दर्शित: योगो मुक्त्युपायश्च आत्ममुदावह: । मनोहर्षप्रापक: धर्मश्चायं दर्शित: ॥३६॥ संन्यासिनां त्यागेन यथा तथा गृहस्थानामनेनैव मङ्गलं स्यादित्याशयेनाहु:-अयमिति सार्धचतुष्टयेन । द्विजाते: त्रैवर्णिकस्य गृहस्थस्य स्वस्त्ययन: स्वस्ति मङ्गलमीयते अनेनेति तथाभूत: पन्था अस्ति तथा हि यद्यस्मात् श्रद्धाया: परमादरतया शुक्लेन शुद्धेन आप्तेन न्यायप्राप्तेन वित्तेन जनै: पुरुषो यज्ञपुरुष इज्येत अयमेव पन्था: ॥३७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं नारदोक्ता: सर्वे मुनय: सम्भूयोचुरित्याह शुक: ॥ अथेति ॥ अथानन्तरं हे राजन् ! मुनय: आनकदुन्दुभिं वसुदेवम् आभाष्य सम्बोध्य सर्वेषां राज्ञां शृण्वतां सतां तथैव अच्युतरामयोरपि शृण्वतो: सतो: ऊचु: ॥३४॥ उक्तिमेवाह ॥ कर्मणेति ॥ सर्वेषां यज्ञानामीश्वरो निर्वाहकस्तं विष्णुं श्रद्धया मखैर्यज्ञै: यजेदाराधयेत् यत् एष: एव कर्मणा कर्मनिर्हार: साधु यथा तथा निरूपित: ॥३५॥ चित्तस्येति ॥ अयं विष्णवाराधनरूप: धर्म: अत्र लोके चित्तस्य उपशम: शान्त्यावह: आत्मसुखावह: निरतिशयमोक्षसुखावहश्च अत: अयमेव वै निश्चयेन सुगम: योग उपाय: कविभिर्मुनिभि: शास्त्रचक्षुषा शास्त्ररूपनेत्रेण दर्शित: दृष्ट: । ण्यन्तात् दृशेर्निवृत्तप्रेरणात् कर्मणि क्त: । चकार आत्मसुखप्राचुर्यावहत्वद्योतक: ॥३६॥ अयमिति ॥ द्विजातेस्त्रैवर्णिकस्य गृहमेधिन: गृहाश्रमिण: स्वस्त्ययन: श्रेय:प्रापक: अयम् एव पन्था: । कोऽसौ शुक्लेन शुद्धेन आप्तवित्तेन परपीडादिमन्तरेण लब्धेन धनेन पूरुष: परमपुरुष: श्रद्धया इज्येत पूज्येत । यत् अयमेव भक्तियोगोत्पत्तिप्रतिबन्धनिरसनद्वारा मोक्षसुखावह: पन्था: केवलमीश्वराराधनात्मकयज्ञ एवेत्यर्थ: ॥३७॥

कृष्णप्रिया

राजन् परीक्षित ! पुन: महर्षि वृन्द भगवान श्रीकृष्ण श्रीबलभद्रजी और अन्य राजा महाराजाओंके सम्मु श्रीवसुदेवजी जिज्ञासा समाप्ति के निमित्त उद्‌बोधन करते कहने लगे ॥३४॥ राजन् वसुदेवजी सत्कर्मों के मा अनुष्ठानसे कर्मों का एवं कर्मवासनाओंको सर्वथा क्षय विनाश करने का एक अच्छा और सच्चा उपाय यह है यज्ञादि धर्मो के अनुष्ठान से समस्त यज्ञोंके स्वामी अधिपति भगवान श्रीविष्णु की श्रदधापूर्वक आराधना ॥३५॥ त्रिकालदर्शी महर्षियोंने शाख्रचक्षुसे यही मन: शक्तिका सुगम उपाय, मोक्षसाधन एवं हृदयमें आनन्द

उल्लास करने वाला
पूर्ण पुरुषोत्तमजीकी
परमकल्याण का मार्ग

[1]वित्तेषणां य
ग्रामे त्यक्तेषण
ऋणैस्त्रिभिर्द्वि
तं त्वद्य[4] मुक्तो
वसुदेव भवान्

बुध:, यज्ञदानै:,
धीरा:, तपोवनम्, ययु: ॥३
त्यजन्, पतेत् ॥३९॥ महामते,
भव ॥४०॥ वसुदेव, नूनम्,

स्वस्त्ययनमाहु:-वि
तदनुभवेनैव तदौत्सुक्यनिवृत्ते
देवकालेन देवानामपि मृत्युन
"जायमानं वै ब्राह्मणस्त्रिभिऋ
ऋणान्यनपाकृत्य तथा च मनु:

"ऋणानि त्रीण्यपाकृ

निर्ऋणो निर्मुक्तऋण:
वासुदेवेति । भवान् नूनं निश्चितं

बुध: संसारासारज्ञ: ।
वसुदेवग्रहणमेकदेशिन्यायापेक्षम
ग्रामस्थित्यधिकारात् 'तत्स्थ्याता
स्मृतिरप्यत्र प्रमाणं तथा चेति । अ
॥३९॥ 'शरणं गृहरक्षित्रो:' इत्यम

---

[1] वित्तैषणां -श्रीधर. वंशी. वीर. वि
कालेन-विज. । ४. पुत्रै-श्रीधर.
द्विसप्ततितमाध्यायसमाप्ति:-विज. ।

कृष्णप्रिया

उल्लास करने वाला धर्मवत् लाया है ॥३६॥ न्यायोपार्जित एवं पुण्यकर्मसे समर्जित द्रव्य से श्रद्धापूर्वक भगवान पूर्ण पुरुषोत्तमजीकी अर्चना सेवा की जाय वही द्विजाति-ब्राह्मण क्षत्रिय और वैश्य गृहस्थ के लिये परम मंगल परमकल्याण का मार्ग है ॥३७॥

[1]वित्तेषणां यज्ञदानैर्गृहैर्दार[2]सुतेषणाम् । आत्मलोकैषणां देव[3]कालेन विसृजेद्बुधः ।
ग्रामे त्यक्तेषणाः सर्वे ययुर्धीरास्तपोवनम् ॥३८॥
ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितॄणां प्रभो । यज्ञाध्ययन[4]दानैस्तान्यनिस्तीर्य [5]त्यजन् पतेत् ॥३९॥
तं त्वद्य[6] मुक्तो द्वाभ्यां वै ऋषिपित्रोर्महामते । यज्ञैर्देवर्णमुन्मुच्य निर्ऋणोऽशरणो भव ॥४०॥
वसुदेव भवान् नूनं भक्त्या परमया हरिम् । जगतामीश्वरं प्रार्चः स यद्वां पुत्रतां [7]गतः ॥४१॥

कर्दमक्षमा

बुधः, यज्ञदानैः, वित्तेषणाम्, गृहैः, गृहदारसुतेषणाम्, आत्मलोकेषणाम्, देवकालेन, विसृजेत्, ग्रामे, त्यक्तेषणाः, सर्वे, धीराः, तपोवनम्, ययुः ॥३८॥ प्रभो, देवर्षिपितॄणाम्, त्रिभिः, ऋणैः, जातः, द्विजः, यज्ञाध्ययनदानैः, तानि, अनिस्तीर्य(संसारम्), त्यजन्, पतेत् ॥३९॥ महामते, त्वम्, तु, अद्य, ऋषिभिः, पित्रोः, द्वाभ्याम्, मुक्तः, यज्ञैः, देवर्णम्, उन्मुच्य, निर्ऋणः, अशरणः(योगी), भव ॥४०॥ वसुदेव, नूनम्, भवान्, परमया, भक्त्या, जगताम्, ईश्वरम्, हरिम्, प्रार्चः, यत्, सः, वाम्, पुत्रताम्, गतः ॥४१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वस्त्ययनमाहुः-वित्तैषणामिति । वित्तफलभूतैर्यज्ञैर्दानैश्च वित्तैषणां वित्तेच्छां विसृजेत् गृहैर्गृहोचितैर्भोगैर्दारसुतैषणां विसृजेत् तदनुभवेनैव तदौत्सुक्यनिवृत्तेः देहे मृते आत्मनः स्वर्गादिलोकेषणां कालेन क्षयानुसन्धानेन विसृजेत् देव हे वासुदेव ! यद्वा देवकालेन देवानामपि मृत्युना मृत्युहेतुभूतेनेत्यर्थः । अत्राचारं प्रमाणयति-ग्राम इति ॥३८॥ किञ्च, ऋणैरिति । तथा च श्रुतिः "जायमानं वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः" इत्यादि तान्यनिस्तीर्य तेषां ऋणान्यनपाकृत्य तथा च मनुः —

"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥" इति ॥३९॥

निर्ऋणो निर्मुक्तऋणः अशरणो भव गृहात् प्रव्रज ॥४०॥ किञ्च अविशुद्धचित्तानामयं क्रमस्त्वं तु कृतार्थ एवेत्याहुः-वसुदेवेति । भवान् नूनं निश्चितं परमया प्रेमलक्षणया भक्त्या हरिं प्रार्चोऽर्चितवान् यद्यस्मात् वां युवयोः ॥४१-४४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

बुधः संसारासारज्ञः । वित्तैषणां धनेच्छाम् । तदनुभवेन दारसुताद्यनुभवेन । तेष्वौत्सुक्यस्योत्कण्ठायाः । देवशब्देन सम्बोधनग्रहणमेकदेशिन्यायापेक्षमत आह-यद्वेति । अत्रैषणात्रयत्यागे । धीरास्त्यागशक्तिमन्तः । ग्रामे गृहस्थाश्रमे । गृहस्थस्यैव गृहस्थत्याधिकारात् 'तत्स्थ्याताच्छब्द्यम्' इति न्यायेन ॥३८॥ अत्र सङ्गतार्थमाह-किञ्चेति । 'अनृणः' इति श्रुतिशेषपदं ज्ञेयम् । स्मृतिरप्यत्र प्रमाणं तथा चेति । अपाकृत्य दूरीकृत्य । मोक्षे मोक्षमार्गे संन्यासादौ । अधो व्रजति देवादीनां कोपान्नरकं गच्छतीत्यर्थः ॥३९॥ 'शरणं गृहरक्षित्रोः' इत्यमरः । न विद्यते शरणं यस्य सः । एतेनर्णापाकरणं विना गृहस्थत्वत्यागोऽनुचित इत्युक्तम् ॥४०॥

---

[1] वित्तैषणां-श्रीधर. वंशी. वीर. विज. विश्व. शुक. । [2] सुतैषणां-श्रीधर. वंशी. वंशी. वीर. विज. विश्व. ; सुतेषणां-शुक. । [3] षणामेवं ...-विज. । [4] पुत्रै-श्रीधर. वंशी. वंशी. वीर. विज. । [5] चरन्पतेत्-वीर. । [6] ब्रह्मचर्यसुताभ्यां वै-विज. । [7] अत्र ...ध्यायसमाप्तिः-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

न त्वामुद्दिश्यैतदुक्तमित्याह-किञ्चेति । प्रार्चः अर्चितवानसि । स हरिः । यद्यतः । किम्भूतस्त्वम्-भं कलत्रं तदस्यास्तीति भवान् सकलत्र इत्यर्थः । "कलत्रोडुतेजसि स्याद्भं भो भ्रातरि भास्करे" इति निरुक्तिः । वामित्युक्तिरप्येवं सङ्गच्छते । प्रार्च इत्यनद्यतनातीतवाचिना लङा बहूनि जन्मानि सूचितानि । "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते" इति गीतोक्तेः ॥४१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तस्मिंस्तत्तद्दर्पणात्तत्प्रसादेन तत्तदेषणापि क्षीयत इत्याहुः- वित्तेति । यज्ञदानैः वित्तव्ययमयतत्तत्कर्मभिः पूर्वोक्तरीत्या भवदिज्यार्थैः तथा गृहैस्तत्रत्यदारसुतादिभिः तदिज्यार्थैः ततो या चात्मैषणा आत्मपक्षपातरूपा या च लोकैषणा लोकद्वयवशीकरणेच्छारूपावशिष्टा तां च हे देव ! कालेन सर्वेणैवावसरेण (पथि) तदिज्यैकानुसन्धानतया तदर्थीकृतेन देवस्य भगवतः कालेन तदिज्यैकानुसन्धानमयसमयगमनेन वा विसृजेत् त्यक्तुमर्हः स्यात् बुधो विवेकी एवं वित्तवतो गृहस्थस्य ततः पूर्वविक्षिप्तमनस्त्वेन श्रवणादिकमपि सुष्ठु न सिद्ध्येदिति भावः । अत एव (ग्राम इत्यर्धकम्) ग्रामे गृहाश्रमे एषणाक्षयाभावेनाविरक्तस्य हठात्यागेऽपि श्रवणमननादिनिष्ठत्वासिद्धेस्तदनन्तरमेव त्याज्यमिति भावः ॥३८॥ प्रभो ! हे सर्वर्णमोचनसमर्थ ! इत्यशक्तस्य न दोषावहमिति सूचितम् । पितृणामिति ह्रस्वत्वमार्षम् । तान् देवादीन् अनिस्तीर्य तानिति पाठे स एवार्थः । देवादिपदानामपि तत्तदृणे तात्पर्यात् पतेत् उभयतो भ्रश्येत् विघ्नाकुलो भवेदित्यर्थः । अत एव व्रजत्यध इति मनुः । अत्र भगवदाश्रयत्वं तु नोद्दिष्टम् इति तत्र न दोष इति भावः । "देवर्षिभूतात्मनृणां पितृणाम्" इत्यादेः ॥३९॥ तु-शब्दो विशेषे तमेवाहुः-वै एव द्वाभ्याम् ऋणाभ्यां मुक्त एव । अद्योन्मुच्य उच्चैर्मुक्त्वा निरस्य निर्ऋणः सन् अशरणो भव त्वं तु त्यागमपि विष्ण्वर्थं कुर्वित्यर्थः ॥४०॥ इदं त्वजातभक्तिश्रद्धानां साधकानां रीतिरुक्ता । भवांस्तु प्रथमत एव परमकृतार्थः इत्याहुः-वसुदेवेति । वसु-भगवद्भक्तिलक्षणं धनं तेन दीव्यतीति तथा तत्सम्बोधनं तदेव दर्शयति भवानिति । नूनं निश्चये हरिं सर्वदोषदुःखहरं यतो जगतां देवादीनामीश्वरं प्रकर्षेण पुत्रत्वेन स्ववश्यतापेक्षया आर्चः अतो भवान् अपास्तसमस्तर्णो मुक्तभक्तवर्गार्च्य एव । ततोऽभिप्रायान्तरेणैवायं तवोद्यम इति भावः । इदमपि लौकिकलीलानुकरणानुसारेणैवोक्तम् । न तु नित्यत्वानुसारेण । तत्तु वसुदेवशब्देन व्यञ्जितमेव । शुद्धसत्त्वाख्यश्रीभगवदन्तरङ्गशक्त्याविर्भावरूपत्वेन तन्नामत्वात् । तदुक्तं चतुर्थे - 'सत्त्वं विशुद्धं वसुदेवशब्दितम्' इति । नवमे- 'वसुदेवं हरेः स्थानं वदन्त्यानकदुन्दुभिम्' इति ॥४१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तस्मादेव वित्तैषणापि क्षीयते नान्यथेति । सदृष्टान्तमाह-वित्तेति । गृहैरित्यादिक-दृष्टान्ततया एवमग्रेऽपि बुधो विवेकी अन्यथा वित्तवतो गृहस्थस्य मनःशुद्ध्यभावेन श्रवणादिभक्तेरेवासिद्धेरिति भावः । ननु तर्हि केवलश्रवणादिपरतासिद्धये धनादिसहितं गृहमेव त्याज्यम्, तत्राहुः-ग्राम इति । गृहाश्रमे धीरा बुद्धिमन्तः एषणाक्षयाभावेनाविरक्तस्य त्यागो नोपयुक्त इति भावः ॥३८ किञ्च । ऋषिपितृणामध्ययनपुत्राभ्यामिव यज्ञेन देवानामृणशोधनमवश्यकृत्यमेवेत्याहुः-ऋणैरिति । प्रभो ! हे वर्वर्णादिमोचनसमर्थ ! इत्यशक्तस्य न तद्दोषावहमिति सूचितम् । पितृणामिति ह्रस्वत्वमार्षम् । तान् देवादीननिस्तीर्य पतेदयः, किंवा पुनर्गृहभोगे प्रविशेदित्यर्थः । पाठान्तरेऽपि स एवार्थः । इदं तेषामसम्मतं लक्ष्यते तेषामिति व्याख्यानात् ॥३९॥ तु-शब्दो विशेषे तमेवाहुः- एव द्वाभ्यामृणाभ्यां मुक्त एव अद्योन्मुच्य उच्चैर्मुक्त्वा निरस्य निर्ऋणः सन् अशरणः अकारो विष्णुः श्रवणादिना तदेकाश्रयो भ ॥४०॥ इयन्तु साधकानां रीतिरुक्ता । भवांस्तु प्रथमत एव परमकृतार्थ इत्याहुः-वसुदेवेति । (भा०४/३/२३) 'सत्त्वं विशु वसुदेवशब्दितम्' इत्यादि-श्रीमहादेवोक्तानुसारेण शुद्धसत्त्वस्वरूपतया विशुद्धचित्तत्वादिकमभिप्रेतम् । यद्वा, वसु भगवद्भक्तिल धनम्, तेन दीव्यतीति तथा, तत्सम्बोधनम् । तदेव दर्शयति-भवानिति । नूनं निश्चये । हरीं सर्वदोषदुःखहरम् । यतो ज देवादीनामीश्वरं प्रकर्षेण पुत्रत्वेन स्ववश्यतापेक्षया आर्च्चः अतो भवानपास्तसमस्तर्णो मुक्तवर्गार्च्च्य एवेति भावः ॥४१॥

वित्तैषणामिति
दारपुत्रलाभे सति एताव
॥३८-३९॥ अशरणः गृ

आप्तवित्तेनेज्येतेत्
वित्तेच्छां विसृजेत् । अथ
सत्येवैतावतालमिति तदौत्
त्यजेदित्यर्थः । तथा हि धी
इत्याहुः-ऋणैरिति । हे विभो
क्रमेण यज्ञाध्ययनपुत्रैरनिस्ती
'जायमानो वै ब्राह्मणो
"ऋणानि त्री
इति श्रुतिस्स्मृतिश्चानु
श्रुतौ ब्रह्मचर्यशब्दस्त
एवेत्याहुः-त्वं त्विति । हे मह
भवान् नूनं हरिमाराधितवान् कु

वित्तैषणामित्यादिकं त

श्र

निष्कामत्वं विना कर्मी
वित्तफलभूतैस्त्यजेत् । सम्पादितेषु
पुत्रवासनां च त्यजेत् । तदनुभवेनैव
। देव हे वसुदेव ! अत्राचारं प्रमाणय
जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन
ऋणाभ्याम् अशरणो भव गृहात् प्र
वस्तुतस्तु त्वयि भगवत्पितरि नित्
शास्त्रोक्तधर्माणामधिकारिणमेव मन्
वसुदेव ! भक्त्या तत्रापि परमया प्रकर्ष
न चेदस्मदुक्तप्रमाणमेवेत्याहुः-स य
भगवानिव लोकसङ्ग्रहार्थं कर्म कुर्वि

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वित्तैषणामिति । अर्थैषणानिमित्तं तद्रक्षणानिमित्तं दुःखम् अर्थस्य सम्यग्व्ययेन परिहरेदित्यर्थः । गृहैः गार्हस्थ्यवासेन सत्पुत्रलाभे सति एतावतालमिति बुद्धिः स्यादित्यर्थः । कालेन कालपरिच्छिन्नत्वादनित्यत्वबुद्ध्या लोकैषणां जयेदित्यर्थः ॥३८-३९॥ अशरणः गृहसङ्गरहितः ॥४०-५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

आप्तवित्तेनेज्येतेत्युक्तं सम्यग्व्यय एव वित्तस्य प्रयोजनमिति वदन्तः प्रसङ्गादन्यदप्याहुः- वित्तैषणामिति । यज्ञैर्दानैश्च वित्तेच्छां विसृजेत् । अर्थस्य सम्यग्व्ययेन तद्रक्षणदुःखं परिहरेदित्यर्थः । गृहैर्गृहोचितैर्भोगैर्दारसुतैषणां विसृजेत् । तदनुभवे सत्येवैतावतालमिति तदौत्सुक्यनिवृत्तेः मृते देहे आत्मनः स्वर्गादिलोकेषणां कालेन स्वर्गादीनामपि कालवशात् क्षयिष्णुत्वनिरूपणेन त्यजेदित्यर्थः । तथा हि धीराः तावद्ग्रामे त्यक्ताः ईषणाः पूर्वोक्तास्तिस्रः यैस्ते ततः तपोवनं ययुः ॥३८॥ इतोऽपि विष्णुर्यष्टव्य इत्याहुः-ऋणैरिति । हे विभो ! देवानाम् ऋषीणां पितृणां च ऋणैस्त्रिभिर्द्विजः त्रैवर्णिको जातः जायते । अतस्तानि देवर्षिपितृऋणानि क्रमेण यज्ञाध्ययनपुत्रैरनिस्तीर्य अनपाकृत्य चरन् पतेत् नरक इति शेषः । अत्र

'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः ॥' इति श्रुतिः ।

"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥"

इति श्रुतिस्स्मृतिश्चानुसन्धेया ।

श्रुतौ ब्रह्मचर्यशब्दस्तत्पूर्वकाध्ययनपरः ॥३९॥ अतस्त्वयाऽधुना देवऋणमेवापाकर्तव्यम् । ऋषिपितृऋणाभ्यां तु मुक्त इत्याहुः-त्वं त्विति । हे महामते ! उन्मुच्योपाकृत्य निर्ऋणः ऋणत्रयरहितः अशरणः गृहसङ्गरहितो भव ॥४०॥ हे वसुदेव वान् नूनं हरिमाराधितवान् कुतः ? यद्यस्माद्भगवान् स्वयं वां युवयोः पुत्रतां गतः ॥४१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वित्तैषणामित्यादिकं तादृशभगवज्जनाधिकारिसम्पादनायोक्तम् ॥३८-६५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥३१-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

निष्कामत्वं विना कर्मनिर्हारो न स्यात् निष्कामत्वं चानेन प्रकारेण भवेदित्याहुः-वित्तैषणां वित्ताकाङ्क्षां यज्ञैर्दानैश्च तत्फलभूतैस्त्यजेत् । सम्पादितेषु यज्ञेषु दानेषु किमतः परं वित्तेन इति भावयेत् । गृहैर्गृहोचितैर्भोगैर्दारसुतैषणां स्त्रीसम्भोगवासनां पुत्रवासनां च त्यजेत् । तदनुभवेनैव तदौत्सुक्यनिवृत्तेः देहे मृते सत्यात्मनः स्वर्गादिलोकैषणां कालेन क्षयानुसन्धानेन विसृजेत् हे वसुदेव ! अत्राचारं प्रमाणयति-ग्राम इति ॥३८॥ किञ्च ऋणैरिति । तथा च श्रुतिः "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः" इत्यादिः । तान्यनिस्तीर्य तेषामृणान्यनपाकृत्य ॥३९॥ द्वाभ्याम् ऋणाभ्याम् अशरणो भव गृहात् प्रव्रज ॥४०॥ लोकरीत्यैव त्वया कृतस्य प्रश्नस्यास्माभिरपि लोकशास्त्ररीत्यैवोत्तरं दत्तम् । वस्तुतस्तु त्वयि भगवत्पितरि नित्यसिद्धे भगवतीव नैव लोकशास्त्रे अधिकर्तुं प्रभूष्णू स्याताम् तदपि यदि त्वमात्मानं लोकधर्माणामधिकारिणमेव मन्यसे तत्राप्युत्तरं शृण्वित्याहुः-वसु धनं श्रेष्ठं भक्तियोग एव । तत्र दीव्यसि इत्यत एव हे वसुदेव ! भक्त्या तत्रापि परमया प्रकर्षेणैव आर्चः सर्वमेव तत् कथमधुना ततोऽतिनिकृष्टकर्माधिकारेऽपि पतिष्यसीति भावः । अस्मदुक्तप्रमाणमेवेत्याहुः-स यद्वामिति । तदपि त्वमतिदैन्येनात्मनि सांसारिकत्वमारोप्य यदि कर्म चिकीर्षसि तदा [illegible] लोकसङ्ग्रहार्थं कर्म कुर्विति भावः ॥४१-४४॥

गूढार्थदीपिनी

वित्तफलभूतैः यज्ञैः दानैश्च वित्तेच्छां विसृजेत् त्यजेत् । गृहैः गृहोचितभोगैः दारादितृष्णां त्यजेत् तदनुभवे औत्सुक्यनिवृत्तेः । आत्मनः स्वस्य स्वर्गादितृष्णां च कालेन क्षयानुसन्धानेन । देवशब्देन हे वसुदेव ग्रहणम् एकदेशिन्यायेन। बुधः सारासारवित् । यद्वा देवकालेनेत्येकपदम् । देवानामपि कालेन मृत्युहेतुभूतेन ॥३८॥ ग्रामे इति सार्धम् । यज्ञेन देवानाम् अध्ययनेन ब्रह्मचर्येण ऋषीणां पुत्रैः पितृणाम् ऋणैर्मुक्तो भवति । तानि ऋणानि अनिस्तीर्य अदूरीकृत्य गृहं त्यजन् पतेत् नरकं यातीत्यर्थः ॥३९॥ निर्ऋणः निर्मुक्तऋणः । अशरणो भव गृहात् प्रव्रज । नास्ति शरणं (शरणं गृहरक्षित्रोः-इत्यमरः) गृहं यस्य तथाभूतः ॥४०॥ हे वसुदेव ! त्वं भक्त्या हरिं प्रार्चः अर्चितवानसि । यत् यस्मात् स कृष्णः वां युवयोः पुत्रतां गतः। कथम्भूतस्त्वं भवान् सकलत्रः (कलत्रोडुतेजसि स्याद्भं भो भ्रातरि भास्करे-इति निरुक्तिः ।) इति वसुदेवविशेषणम्। य कलत्रं तदस्यास्तीति भवान् । इत्थमेव व्याख्येयमन्यथा प्रार्च इति मध्यमपुरुषक्रियाया असङ्गतिः स्यादिति । किञ्च प्रार्च इत्यनद्यतनातीतवाचिना लङा बहूनि जन्मानि सूचितानि । इति वंशीधरी ॥४१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यज्ञादेर्वैराग्यहेतुत्वमाहुः-वित्तैषणामिति । विष्णूद्देशेन कृतैर्यज्ञैर्दानैश्च वित्तैषणां धनेच्छां गृहे गृहोचितैर्भोगैर्दारसुतैषणां च आत्मनः स्वर्गादिलोकेषणां च कालेन स्वर्गादिक्षयहेतुभूतकालानुसन्धानेन विसृजेत् अत्र सदाचारं प्रमाणयन्ति ग्रामे इति ॥३८॥ ऋणैरिति । तथा च श्रुतिः "जायमानो वै ब्राह्मणस्त्रिभिः ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यो प्रजया पितृभ्यः" इति तानि अनिस्तीर्य अनपाकृत्य व्रजन् पतेत् पुरुष इति शेषः । तथा च मनुः —

"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥" इति ।

इदम् ऋणित्वं मुकुन्दशरणजनाभिन्नविषयम् —

"देवर्षिभूतात्मनृणां न किङ्करो नायमृणीत्वं राजन् ।
सर्वात्मना यः शरणं शरण्यो गतो मुकुन्दं परिहृत्य कर्तुम् ॥"

इति वक्ष्यमाणत्वात् ॥३९॥ त्वं त्विति । तु-शब्दः श्रीवसुदेवस्य सर्वथा कृतार्थतां दर्शयति ऋणिवत्कर्मप्रवृत्तिस्तु तस्य लोकसङ्ग्रहार्था अशरणः त्यक्तगृहस्थत्वाभिमानो भव ॥४०॥ तस्य कृतार्थतामाहुः-वसुदेव इति । प्रार्चः अर्चितवान् व युवयोः ॥४१-४४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

नन्वेतस्य कर्मनिर्हारकत्वं कथं तत्राह-वित्तैषणामिति । ईषणात्रयपरित्यागः कर्मबन्धाभावज्ञापकः कर्माणि हि ईषणाद्वारे बध्नन्ति । ईषणाभावे तु कर्माभावः सिद्ध एव लोके ईषणात्रयम् । वित्तैषणा दारेषणा लोकेषणेति । त्रयाणां परित्यागप्रका उच्यते-वित्तैषणा यज्ञदानैरिति यस्य वित्ते महतीच्छा भवति तेन वित्तोपार्जनं कृत्वा यज्ञादानानि कर्तव्यानि ततो वित्तस्य बहु व्यवहृतत्वात् तदिच्छा निवर्तते अदृष्टद्वारापि तद्यज्ञदानादिकमन्तःकरणशुद्धिमुत्पाद्य निवर्तयतीत्यवगन्तव्यम् । ततो दारसुतैष गृहस्थाश्रमैर्दूरीकर्तव्या । गार्हस्थ्ये तासां संव्यवहारो बहुधा भवतीति दारसुतानां व्यवहृतत्वात् तदिच्छापि निवर्तते आत्मनां लोक स्वर्गादिलोकानाम् ईषणात् देवकालेन देवैः सह क्रीडया बुधः पण्डितः एवं विसृजेत् । अत्र वैराग्यस्य ज्ञानैकसाध्यत्वात् अत ए वेदे स्वर्गार्थमेव यज्ञाः निरुक्ताः अन्यत्तु द्वयं प्रसङ्गादेव सेत्स्यति स्त्रीवित्तव्यतिरेकेण यज्ञाभावात् अत एव स्त्रीणामधिकारो प्रवेश उक्तः धनस्य च क्रियायाम् अन्यथा मानसा एव यज्ञाः वेदे उक्ताः स्युः अन्यथा श्रेयान् द्रव्यमयाद्यज्ञादिति वाक्य द्रव्ययज्ञानामधमत्वे तत्प्रतिपाद्यवेदो विरुध्येत इदमेव वेदस्य तात्पर्यं मन्यन्ते मुनयः । अत एव आत्मसुखावहो धर्म हि स्वर्गात्मकयज्ञार्थमेव यागाः कर्तव्या इति यथाश्रुतैव श्रुतिः समर्थिता अत एवाश्रमधर्माणामपि विधिरिति वक्तुं गार्हस्थ्यविधे प्रयोजनमित्याह-ग्रामे त्यक्तैषणाः सर्वे इति । ग्राम एव स्थित्वा ईषणाविनिर्मोकः कर्तव्यः अनेनैतत् ज्ञापितं पूर्वे यागे कृते व

जाते ततो लोकविरागं प्राप्य
कृत्वा तत ईषणात्रयं परित्य
परित्यज्य तपोवनमेव विवि
वसुदेवसम्बोधनकालेनेत्यनु
तन्निवृत्तिः अन्यत्रापि तुल्या
ऋणापाकरणार्थमेव यज्ञाः क
ब्राह्मणो जायमानः उपनीयम
पितृभ्यः" इति श्रुतेः । अत्र
तत्पुत्राणां कर्तव्यमिति फलते
गार्हस्थ्यानन्तरमेव संन्यासमिति

"ऋणानि त्रीण्य

इति मनुवाक्यात् ननु "
एकमधिकारिविशेषणम् ।
भगवद्भजनोत्तम्भकसद्भावेऽपि क
केवलेन पूर्वं बहुधा ऋणापकर
भ्रातृपुत्रेण पितृऋणविमुक्तिसम्भव
तेन ऋणापकरणमीषणानिवृत्तिश्च
ऋणद्वयमतीतम् ऋणमात्रमवशिष
भवान् मुक्तः महामत इति यज्ञाधि
युक्तो भवेत्यर्थः । भिक्षुर्हि अनगि
ऋणापाकरणार्थं चेति । भगवान् भव
नास्ति त्वं यतो जगतामीश्वरं प्रार्चः
त्वं कृतार्थः तव कर्मनिर्हारादिकं न
स्वयमपि जात इति स पुत्रतां गत इ

तद्यथा यज्ञदानैर्धनेच्छां गृ
वसुदेव देवानामपि कालेन मृत्युहेतुन
त्रिभिर्ऋणैर्ऋणवान् हे प्रभो यज्ञाध्ययनपु
"यदहरेव विरज्येत तदहरेव
मुक्तोऽसि अद्य इदानीं यज्ञैर्देवानामृण
जगतामीश्वरं हरिं भवान् प्रार्चः पूजितव

एवं भगवदाराधनेन कदाचित्

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो लोकविरागं प्राप्य पुनरागत्य गार्हस्थ्य एवाङ्गत्वेन पूर्वं व्यवहृतसुवर्णस्त्रीणां लोकानामाकांक्षाभावात् प्राधान्येत व्यवहारं ईषणात्रयं परित्यज्य तथा चित्तशुद्ध्यभावे विक्षिप्तमपि मनः धैर्यं प्रापयित्वा सम्यक् चित्तशुद्ध्यर्थं पुनर्गमनक्लेशं तपोवनमेव विविशुः । तपसा सम्यक् चित्तशुद्धिर्भविष्यतीति ये त्वेकजन्मपरतयैव सर्वं व्याचक्षते ते चिन्त्याः देवेति सम्बोधनकालेनेत्यनुपायं चाहुः-तेषां लोकेषणाया अनिवृत्तत्वात् कथं सर्वेषाणापरित्याग इति । बुध इत्यनेन ज्ञानेनैव अन्यत्रापि तुल्या पूर्वं यागानां कर्तव्यता ईषणापरित्यागार्थमुक्त्वा तद्द्वारा कर्मनिर्हरणार्था भवति ॥३८॥ इदानीं तु करणार्थमेव यज्ञाः कर्तव्या इत्याह-ऋणैस्त्रिभिर्द्विजो जात इति "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते" इति श्रुतेः । जायमानः उपनीयमानः तानि ऋणानि गणयति देवऋषिपितृणामिति "ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया " इति श्रुतेः । अत्र तु पितृऋणपरित्यागो दानेनाह-यज्ञाध्ययनदानैरिति । दानमत्र सन्तति-दानमेव पिण्डदानमित्येके । कर्तव्यमिति फलतो निरूपितं येषां पुनः ईषणाविनिर्मोको जात एव तेषामपि ऋणविमोको न जात इति मुख्यपक्षे नन्तरमेव संन्यासमिति मतमाश्रित्याह-अनिस्तीर्य त्यजन् पतेदिति-

"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य तांस्त्रींस्तु मोक्षमिच्छन् व्रजत्यधः ॥"

इति मनुवाक्यात् ननु 'ब्रह्मचर्यादेव प्रव्रजेत्' इत्यादि श्रुतेः । का गतिः ? उच्यते ईषणाभावो ऋणाभावश्च मोक्षात्पूर्वभावो धिकारिविशेषणम् । द्वितीयः प्रतिबन्धकाभावः । अधिकारिविशेषणं तु मृग्यमेव । प्रतिबन्धकभावे तु तम्भकसद्भावेऽपि कार्यं भवति यथा तदवदानैरेवावदयत इति त्र्यङ्गावदनिनाऽपि ऋणत्रयमुपागच्छति । एवं स्वाध्यायेनापि पूर्वं बहुधा ऋणापकरणं कृतं यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीति "भ्रातॄणामेकजातानाम्" इति वाक्यन्यायेन पितृऋणविमुक्तिसम्भवे अन्यैर्वा दत्तादिभिर्ब्रह्मचर्यादेव प्रव्रजेदिति वाक्यं सिद्धं भवति । तस्माद्यो मुख्यः प्रथमाधिकारी ऋणापकरणमीषणानिवृत्तिश्च कर्तव्येति ऋषिभिः साधूक्तम् ॥३९॥ एवम् ऋणापकरणकर्तव्यतामुक्त्वा ऋणत्रयमध्ये तीतम् ऋणमात्रमवशिष्यत इत्याहुः-त्वं त्वद्य मुक्तो द्वाभ्याम् । वेदाः पठिताः पुत्राश्चोत्पादिता इति ऋषिपित्रोः ऋणाभ्यां मुक्तः महामत इति यज्ञाधिकारो निरूप्यते । अजडत्वाय अतो यज्ञैर्देवर्णमुन्मुच्य निर्ऋणः सन् पश्चादशरणः सर्वपरित्यागे भवेत्यर्थः । भिक्षुर्हि अनग्निरनिकेतो भवति । एवं प्रकारत्रयेण यज्ञकारणमुपदिष्टम् । कर्मनिर्हारार्थमीषणापरित्यागार्थम् करणार्थं चेति । भगवान् भवदीयो जात इति भगवत्पूजा च कर्तव्यमित्यग्रिमश्लोकेनोच्यत इत्येके । अन्ये तु तव देवादिऋणमेव यतो जगतामीश्वरं प्राचः अतस्तव यागस्यान्यत्र विनियोगाभावात् कर्मनिर्हारार्थमेव तव यज्ञो भविष्यतीत्याहुः-वस्तुतस्तु तव कर्मनिर्हारादिकं नापेक्ष्यत इति मूलप्रश्ने उत्तरमुक्तं भवति । परमया भक्त्या पूजितश्चेद्भगवान् परमप्रीत्याश्रयः जात इति स पुत्रतां गत इत्यर्थः । एवं यज्ञाः कर्तव्या इत्युक्तं भवति ॥४०-४१॥

श्रीसुबोधिनीसारः

तद्यथा यज्ञदानैर्धनेच्छां गृहैस्तदुचितैर्भोगैः स्त्रीपुत्रेच्छाम् आत्मनः स्वर्गादिलोकेच्छां बुधः कालेन त्यजेत् । हे देव देवानामपि कालेन मृत्युहेतुना वा ॥३८॥ ग्रामे त्यक्तैषणा धीराः सर्वे तपोवनं जग्मुः । जातो जायमानो द्विजो देवर्षिपितृणां ऋणवान् हे प्रभो यज्ञाध्ययनपुत्रैः तानि ऋणानि अनिस्तीर्यानपाकृत्य कर्माणि त्यजन् पतितो भवेत् तदुक्तं मनुना —

"यदहरेव विरज्येत तदहरेव प्रव्रजेत्" इति तु श्रुतिः तीव्रवैराग्यपरा ॥३९॥ हे महामते ! ऋषिपित्रोर्द्वाभ्यामृणाभ्यां त्वं अद्य इदानीं यज्ञैर्देवानामृणमुन्मुच्य निवर्त्य निर्ऋणोऽशरणो विरक्तो भव ॥४०॥ हे वसुदेव ! परमया भक्त्या नूनं हरिं भवान् प्राचः पूजितवान् यद्यस्मात् वां युवयोः स हरिः पुत्रतां गतः ॥४१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं भगवदाराधनेन कदाचित्कर्मनिवृत्तावपि तन्मूलकामनाया विद्यमानत्वात् पुनस्तत्प्रयुक्तप्रवृत्त्या कर्मोत्पत्तिः स्यात्

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अतः सर्वथा कर्मनिर्हारमिच्छतां सर्वकामना त्यक्तव्या इत्याशयेन सोपायं कामनात्यागमाहुः-वित्तैषणामिति। वित्तफलभूतैर्यज्ञैर्दानै वित्तेच्छां विसृजेत्। गृहैर्गृहोचितैर्भोगैर्दारसुतैषणां विसृजेत्, तद्वैरस्यानुभवेनैव तदौत्सुक्यनिवृत्तेः। आत्मनः स्वर्गादिलोकैषणां च देवकालेन देवानामपि मृत्युहेतुभूतकालानुसन्धानेन बुधो विवेकी विसृजेत् परित्यजेदित्यर्थः। अत्र सदाचारं प्रमाणयन्ति-धी विवेकिनः सर्वे ग्रामे त्यक्तैषणाः सन्तस्तपोवनं ययुरिति ॥३८॥ एवं सर्वकामनारहित एव मोक्षाधिकारीत्युक्तम्। अथ ऋणत्र मोक्षप्रतिबन्धकम्, तन्निरासार्थमपि यज्ञानुष्ठानं त्वया कर्तव्यम्, इत्याशयेनाहुः-ऋणैरिति। हे प्रभो! यज्ञानुष्ठाने समर्थ! द्विजस्त्रैवर्णिक देवादीनां त्रिभिर्ऋणैः सह जातो जायते। अतः क्रमेण यज्ञाध्ययनपुत्रैस्तानि देवर्षिपितृणामृणान्यनिस्तीर्य अनपाकृत्य गृहकर्मा त्यजन् नरके पतेत्॥ तथा चाह मनुः —

"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः" इति ॥३९॥

'बुद्धिवैमत्येनैवैतत्प्रश्ने प्रवृत्तिः' इत्याशयेन सम्बोधयन्ति-महामते इति। द्वाभ्यामृषिपित्रोः ऋणाभ्यां तु त्वम मुक्तः, वेदाध्ययनपुत्रोत्पादनयोः कृतत्वात्। अतो यज्ञैर्देवर्णमुन्मुच्यापाकृत्य निर्ऋणः सन्नशरणो भव गृहादिकं परित्यज ॥४०॥ अयं क्रमस्तु मर्यादादृष्ट्या सर्वसाधारणः त्वं तु भगवद्भक्त्यैव कृतार्थ इत्याह-वसुदेवेति। प्रार्चः अर्चितवान्। यत् यस्मा युवयोः पुत्रतां गतः ॥४१॥

अन्वितार्थप्रकाशिका

निष्कामत्वं विना कर्मनिर्हारो न स्यात् निष्कामत्वं चानेन प्रकारेण-वित्तेति। वित्तफलभूतैर्यज्ञैर्दानैश्च वित्तैषणां वित्तेच्छां विसृजेत् सम्पादितयज्ञेषु दानेषु किमतः परं वित्तेनेति भावयेत्। गृहैर्गृहोचितैर्भोगैर्दारसुतैषणां स्त्रीभोगवासनां पुत्रवासनां च विसृजेत् तद्वैरस्यानुभवेनैव तदौत्सुक्यनिवृत्तेः। आत्मनः स्वर्गादिलोकैषणां च देवकालेन देवानामपि मृत्युहेतुभूतकालानुसन्धानेन देव हे वसुदेव कालेन क्षयाद्यनुसन्धानेन वा बुधो विवेकी विसृजेत् परित्यजेदित्यर्थः ॥३८॥ ग्रामे इत्यर्धम्। धीरा विवेकिनः स ग्रामे त्यक्तैषणाः सन्तस्तपोवनं ययुरिति। ऋणैरिति। हे प्रभो! यज्ञानुष्ठाने समर्थः द्विजस्त्रैवर्णिको देवादीनां त्रिभिर्ऋणैः सह जा जायते। अतः क्रमेण यज्ञाध्ययनपुत्रैस्तानि देवर्षिपितृणामृणान्यनिस्तीर्यानपाकृत्य गृहकर्मादि त्यजन् नरके पतेत् ॥३९॥ त्वमिति हे महामते द्वाभ्यामृषिपित्रोः ऋणाभ्यां तु त्वमद्य मुक्तः वेदाध्ययनपुत्रोत्पादनयोः कृतत्वात्। अतो यज्ञैर्देवर्णमुन्मुच्यापाकृ निर्ऋणः सन्नशरणो भव गृहादिकं परित्यज ॥४०॥ लोकरीत्या प्रश्नस्य लोकरीत्यैवोत्तरमस्माभिर्दत्तं वस्तुतः अविशुद्धचित्तानामेव क्रमः त्वं तु कृतार्थ एवेत्याहुः-वसुदेवेति। हे वसुदेव! भगवान् नूनं परमया प्रेमलक्षणया भक्त्या जगतामीश्वरं हरिं प्र अर्चितवान्। यत् यस्मात् स हरिः वां युवयोः पुत्रतां गतः ॥४१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कल्याणमार्गमाहुः-वित्तैषणामिति। वत्तोत्पन्नैः यज्ञैः दानैश्च कृत्वा वित्तैषणां धनेच्छां विसृजेत् त्यजेत्। न्यायेन सम्पाद्य तेन च यज्ञादीन् कृत्वा वित्तैषणात्यागो गृहस्थोचित इत्यर्थः। गृहैः गृहस्थधर्मोचितविषयभोगैः दारसुतैषणां च त्यजे दारसुतसमागमप्राप्तक्लेशेन तदिच्छानिवृत्तेः। देहे नष्टे सति आत्मनः स्वस्वस्वर्गादिलोकैषणां स्वर्गादिलोकनाशजनकेन का कालानुसन्धानेन विसृजेत् हे देव! हरिपितृत्वाद्देवत्तुल्यः यद्वा देवकालेनेत्येकं पदं देवानामपि कालेन मृत्युना मृत्युदर्शनेनैव तां बुधः त्यजेत् ततो ग्रामे गृहाश्रमे त्यक्तैषणाः ॥३८॥ देवादीनां त्रयाणाम् ऋणैः सः द्विजः त्रैवर्णिको नरसमूहः जातः यज्ञाध्यय यज्ञैः देवर्णम् अध्ययनेन ऋष्यर्णं पुत्रेण पितृणं च तानि एतानि अनिस्तीर्य अमुक्त्वा गृहस्थाश्रमं त्यजन् पतेत् गृहस्थध शेषः। इदं च वचनमविरक्तपरं तथा च श्रुतिः 'यदहरेव विरजेत्तदहरेव प्रव्रजेदि'ति ॥३९॥ निर्ऋणः ऋणरहितः सन् अग अगृही भव गृहं त्यजेति भावः ॥४०॥ ततोऽप्यतिसुगमोपायमाहुः-वसुदेव इति। हे वसुदेव प्रार्चः अर्चितवान्। यद्यस्मा युवयोः सः पुत्रतां गतः ॥४१॥

प्राप्तवित्तेनेज्येतेत्यनेन
वित्तैषणामिति ॥ बुधः हे देव
तद्रक्षणदुःखं परिहरेतेत्यर्थः।
सत्येवैतावतालमिति तदौत्सुक्यत
क्षयिष्णुत्वनिरूपणेन विसृजेत्।
वर्तमाना अपि ये धीराः ते त्यक्तैष
! देवर्षिपितृणां देवानामृषीणां पि
इत्यर्थः। अतः तानि देवर्षिपितृण
तथा च श्रुतिः 'जायमानो वै ब्राह्म
तथा च मनुरपि 'ऋणानि त्रीण्यप
ब्रह्मचर्यशब्दस्तत्पूर्वकाध्ययनपरः।
त्वमिति ॥ हे महामते वसुदेव! त्वं त
उन्मुच्य अपाकृत्य निर्ऋणः ऋणत्रय
क्रमः त्वं तु कृतार्थ एवासीत्याहुः
प्रकर्षेणाराधितवानसीत्यर्थः। यद्यतः

महाराज ! राजनको चाहि
भोगो द्वारा स्त्री पुत्रादि की इच्छा
को त्याग दे। इस प्रकार मनुष्य वी
प्रस्थान करता है ॥३८॥ हे महानुभ
सब देख ऋण मनुष्य और पितृऋण
करना अत्यावश्यक माना गया है।
तो इस मनुष्य का पतन होता है ॥
पितृओंके ऋणसे अवश्य मुक्त हो चुके
दीजिये, और इस प्रकार सबसे उ
भगवच्छरण हो जाइये ॥४०॥ हे बद्ध
पूर्ण पुरुषोत्तम भगवानकी सेवा की

इति तद्वचनं श्रुत्वावसुदेवो
त [२]एनमृषयो राजन् वृता ध

---

[१] बादरायणिरुवाच-गो. प्रे. टी.। [२]. नम्योपसप

वित्तफलभूतैर्यज्ञैर्दानैश्च
स्वर्गादिलोकैषणां च
चारं प्रमाणयन्ति-धीरा
युक्तम्। अथ ऋणत्रयं
समर्थ! द्विजस्त्रैवर्णिको
अनपाकृत्य गृहकर्मादि

॥३९॥
ौ: ऋणाभ्यां तु त्वमद्य
गृहादिकं परित्यज ॥४०॥
र्चितवान्। यत् यस्माद्वां

ज्ञैर्दानैश्च वित्तैषणां वित्तेच्छां
भोगवासनां पुत्रवासनां च
मृत्युहेतुभूतकालानुसन्धानेन
र्धर्म्। धीरा विवेकिनः सर्वे
ादीनां त्रिभिर्ऋणैः सह जातो
नरके पतेत् ॥३९॥ त्वमिति।
तो यज्ञैर्देवर्णमुन्मुच्यापाकृत्य
स्तुतः अविशुद्धचित्तानामेवायं
क्त्या जगतामीश्वरं हरिं प्रार्चः

विसृजेत् त्यजेत्। न्यायेन वित्तं
भोगैः दारसुतैषणां च त्यजेत्।
वर्गादिलोकनाशजनकेन कालेन
ालेन मृत्युना मृत्युदर्शनेनेत्यर्थः।
ो नरसमूहः जातः यज्ञाध्ययनपुत्रैः
मं त्यजन् पतेत् गृहस्थधर्मादिति
र्ऋणः ऋणरहितः सन् अशरणः।
प्रार्चः अर्चितवान्। यद्यस्मात् वां

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्राप्तवित्तेनेज्येतेत्यनेन न्यायलब्धधनस्य भगवत्प्रीत्यर्थं व्यय एव परं प्रयोजनमिति वदन्तः प्रसङ्गादन्यदप्याहुः ॥ वित्तैषणामिति ॥ बुधः हे देव वसुदेव ! यज्ञदानैः यज्ञैर्दानैश्चेत्यर्थः । वित्तैषणां वित्तेच्छां विसृजेत् अर्थस्य सम्यग्व्ययेन रक्षणदुःखं परिहरेतेत्यर्थः । गृहैर्गृहोचितैर्भोगैः दारसुतैषणां क्वचिद्दारसुखैषणामित्यपि पाठः । विसृजेत् । तदनुभवे मत्वैतावतालमिति तदौत्सुक्यतो निवर्तेत । आत्मलोकैषणामात्मनः स्वर्गादिलोकैषणां कालेन स्वर्गादीनामपि कालवशात् ध्रुवमृत्युत्वनिरूपणेन विसृजेत् । यद्वा । देवकालेन देवानामपि मृत्युना मृत्युहेतुभूतेनेत्यर्थः । अत्र सदाचारं प्रमाणयति । ग्रामे वसमाना अपि ये धीराः ते त्यक्तैषणाः सन्तः सर्वेऽपि तपोवनं ययुः ॥३८॥ इतोऽपि विष्णुर्यष्टव्य इत्याहुः ॥ ऋणैरिति ॥ हे प्रभो देवर्षिपितृणां देवानामृषीणां पितृणामेवं त्रयाणामित्यर्थः । ह्रस्वत्वमार्षम् । त्रिभिः ऋणैः द्विजस्त्रैवर्णिकः जातः जायते इत्यर्थः । अतः तानि देवर्षिपितृणाम् ऋणानां क्रमेण यज्ञाध्ययनपुत्रैः अनिस्तीर्य अनपाकृत्य त्यजन् पतेत् । नर इति शेषः । तथा च श्रुतिः 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इत्यादिः । तथा च मनुरपि 'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः' इति । श्रुतौ ब्रह्मचर्यशब्दस्तत्पूर्वकाध्ययनपरः ॥३९॥ अतस्त्वयाऽधुना देवर्णमेवापाकर्तव्यमृषिपितृऋणाभ्यां तु त्वं मुक्त एवासीत्याहुः ॥ त्वमिति ॥ हे महामते वसुदेव ! त्वं तु ऋषिपित्रोः सम्बन्धिभ्यां द्वाभ्यामृणाभ्यां अद्य मुक्तः वै । अतः यज्ञैः देवर्णं देवतानामृणम् उन्मुच्य अपाकृत्य निर्ऋणः ऋणत्रयरहितः सन् अशरणः असङ्गः गृहसङ्गरहितः इति यावत् । भव ॥४०॥ अविशुद्धचित्तानामयं मार्गः त्वं तु कृतार्थ एवासीत्याहुः ॥ वसुवेदेति ॥ हे वसुदेव ! भवान् नूनं परमया भक्त्या जगताम् ईश्वरं हरिं प्रार्चः आराधितवानसीत्यर्थः । यद्यतः स उक्तविधः हरिः वां युवयोर्दम्पत्योः पुत्रतां गतः ॥४१॥

कृष्णप्रिया

महाराज ! राजनको चाहिये कि यज्ञ दान यात्रा आदि द्वारा द्रव्य की इच्छा को गृहस्थाश्रम के समुचित भोगों द्वारा स्त्री पुत्रादि की इच्छा को और काल क्रमसे स्वर्गादि भोग भी नष्ट हो जाते है । इस विचारसे लोकेषणा का त्याग दे। इस प्रकार मनुष्य वीरतापूर्वक घरमें रहते हुए पकमकी एषणाओंका परित्याग करके तपोवन की और प्रस्थान करता है ॥३८॥ हे महानुभाव श्रीवसुदेवजी ! द्विज ब्राह्मण क्षत्रिय और वैशय ये तीन द्विज मनाते है ये जब देव ऋण मनुष्य और पितृऋण लेकर ही जन्म लेते है इन ऋणोंसे मुक्त होनेके यज्ञ अध्ययन एवं प्रजोत्पत्ति करना अत्यावश्यक माना गया है । यदि मनुष्य ने इन तीन गुणोंसे मुक्ति न पायी और संसार का त्याग किया तब तो इस मनुष्य का पतन होता है ॥३९॥ महान्मेघावी श्रीवासुदेवजी ! भगवत्कृपासे आप देव मनुष्य ऋषि एवं पितृओंके ऋणसे अवश्य मुक्त हो चुके हो अब पुनः यज्ञोंके अनुष्टान से देवताओंका भी कुछ अवशिष्ठ ऋषण को दीजिये, और इस प्रकार सबसे उन्ऋण होकर गृहस्थाश्रमका एवं गृह परिवार आदि का परित्याग करके अनासक्त उऋण हो जाइये ॥४०॥ हे बढभागी वसुदेवजी ! सचमुच इस विश्वमें आपने अवश्य ही अनन्य भक्ति से श्रीपुरुषोत्तम भगवानकी सेवा की है उस सेवा-स्नेह-वात्सल्य वश ही वे आप दोनों के पुत्र हुए है ॥४१॥

श्रीशुक [1]उवाच

इति तद्वचनं श्रुत्वावसुदेवो महामनाः । तानृषीनृत्विजो वव्रे मूर्ध्नाऽऽ[2]नम्य प्रसाद्य च ॥४२॥
त [3]एनमृषयो राजन् वृता धर्मेण धार्मिकाः[4] । तस्मिन्नयाजयन् क्षेत्रे मखैरुत्तमकल्पकैः ॥४३॥

---

[1] बादरायणिरुवाच-गो. प्रे. टी. । २. नम्योपसर्प्य च -गो. प्रे. टी. । ३. त एव-विज. । ४. धार्मिकम्-श्रीधर. वंशी. वीर. विज. ।

तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः । स्नाताः सुवाससो राजन् राजानः सुष्ठ्वलङ्कृताः ॥४४॥

[5]तन्महिष्यश्च मुदिता निष्ककण्ठ्यः सुवाससः । दीक्षाशालामुपाजग्मुरालिप्ता वास्तुपाणयः ॥४५॥

कर्दमक्षमा

श्रीशुकः, उवाच ।

इति, तत्, वचनं, श्रुत्वा, महामनाः, वसुदेवः, तान्, ऋषीन्, मूर्ध्ना, आनम्य, च, प्रसाद्य, ऋत्विजः, वव्रे ॥४२॥ राज वृताः, ते, ऋषयः, धर्मेण, धार्मिकम्, तस्मिन्, क्षेत्रे, उत्तमकल्पकैः, मखैः, अयाजयन् ॥४३॥ राजन्, तद्दीक्षायां, प्रवृत्ताय पुष्करस्रजः, वृष्णयः, स्नाताः, च, सुवाससः, राजानः, सुष्ठ्वलंकृताः ॥४४॥ च, मुदिताः, महिष्यः, निष्ककण्ठ्यः, सुवास आलिप्ताः, वस्तुपाणयः, दीक्षाशालाम्, उपाजग्मुः ॥४५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

निर्ऋणो निर्मुक्तऋणः अशरणो भव गृहात् प्रव्रज ॥४०॥ किञ्च अविशुद्धचित्तानामयं क्रमस्त्वं तु कृतार्थ एवेत्या वासुदेवेति । भवान् नूनं निश्चितं परमया प्रेमलक्षणया भक्त्या हरिं प्रार्चोऽर्चितवान् यद्यस्मात् वां युवयोः ॥४१-४४॥ आलि कुङ्कुमादिभिः वस्तुपाणयो गृहीतार्हणहस्ताः ॥४५-४६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतीत्थम् । तद्वचनं मुनिकथनम् । तान् मुनीन् ॥४२॥ तस्मिन् विनशने । मखैरिति बहुत्वमङ्गेष्ट्यपेक्षम् । कल्प आभिरिति कल्पकाः सामग्र्यः, उत्तमा राजसूयादयस्तेष्विव कल्पका येषु तैः । प्रकृतिविकृतियागैरित्यर्थः । धर्मेण कल्पोक्तवि । 'अहिंसाविधिपुण्येषु धर्मः' इति कोशात् ॥४३॥ तद्दीक्षायां यज्ञारम्भसङ्कल्परूपायां 'दीक्षा स्याद्व्रतसङ्ग्रहः' इति याद पुष्करस्रजः कमलबीजमालावलम्बिकण्ठाः ॥४४॥ तन्महिष्यो राजपत्न्यः, वसुदेवभार्या वा । गृहीतमर्हणं यैस्ते । गृहीता हस्ता यासां तास्तथा ।

"हिरण्यं रजतं चापि गृहीत्वा क्रमुकं फलम् । शालां विशेद्यज्ञपत्नी शपेयुस्त्वन्यथा सुराः ॥" इत्युक्तेः ।

यज्ञोऽस्यास्तीति यज्ञो यज्ञकर्ता तस्य पत्नीत्यर्थः ॥४५-४६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इति स्वस्यैवातिगूढाभिप्रायं तेषां वचः श्रुत्वा महामनास्तथैवावबुद्ध्य चेत्यर्थः ॥४२॥ धर्मेण न्यायेन विप्रैः याज्यत्वात् किंवा धर्मेण हेतुना धर्मार्थं वृता इत्यर्थः । धर्मेण धर्मशास्त्रोक्तविधिनेत्यर्थः । धार्मिकं भगवद्धर्मपरम् उत्तमक मुख्यकल्पैः सर्वसामर्थ्यसद्भावात् ॥४३॥ तदिति युग्मकम् । वृष्णयो राजानश्च हे राजन्! इत्यहोभाग्यं राज्ञामिति भावः । पुन सम्बोधनमत्यन्तहर्षादेव । तस्य श्रीवसुदेवस्य महिष्यः मुदिता इति च-शब्दबलाद्वृष्ण्यादीना च विशेषणं द्रष्टव्यम् उप आजग्मुः ॥४४-४५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्येतत् (३५श.श्लो.) 'कर्मणा कर्मनिर्हारः' ईत्यादिकं तेषां वचनं श्रुत्वा वव्रे वृतवान् । महाम यज्ञदानश्रीभगवत्सन्दर्शनादिना सर्वलोकहितेच्छयेत्यर्थः । यद्वा । वासुदेवोत्पाद्यात्मभाग्यमहिमप्रतिपादकं तद्वचः श्रुत्वा महामना इत्ययं भावः — इमे मुनयो भक्तिं याचन्ते सा च मादृशत एव सिध्येदिति यज्ञव्याजेनैतान् प्रति श्री प्रापयेयमिति विचिन्त्येति । अत एव वक्ष्यते (४९श.श्लो.) 'पीतकौशेयवाससः' इति । मूर्ध्ना भूमिस्पृशा अत एव आ

---

[5] तस्मिन् महिष्यो-गो. प्रे. टी. ।

प्रसाद्य स्तुत्यादिभिः
भगवद्धर्मपरम् उत्तमक
दीक्षाशालामुपाजग्मुरिति
भावः । पुनः पुनस्तथैव
विशेषणं द्रष्टव्यम् । उप

॥४०-५०॥

इतीति । तद्वचनं
धर्मेण यथाविधि वृतास्ते ऋ
॥४३॥ एतदेव प्रपञ्चयति-त
पत्न्यः आलिप्ताः कुंकुमादि

वसुदेवभवानित्यादि

वसुदेवभवान्नूनमित्य
॥४१॥ ॥४२-६८॥

वस्तुपाणयः हस्तगृही

वव्रे वरणीकृतवान् ॥४२
ज्ञेयम् । कल्प्यन्ते सम्पाद्यन्ते वि
यज्ञारम्भसङ्कल्परूपायाम् । वृष्णयः
क्रमुकं फलम् । यज्ञशालां विशेत्प
माङ्गलिकद्रव्याणि पाणौ यासां ताः
अशरफी) 'वक्षोऽलङ्करणे तथा' इति

तन्महिष्यः राज्ञां महिष्यः अ

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

प्रसाद्य स्तुत्यादिभि: धर्मेण न्यायेन विप्रै: क्षत्रियाणां याज्यत्वात् किंवा-धर्मेण हेतुना धर्मार्थं वृता इत्यर्थ: ॥४२॥ धार्मिकं भगवद्धर्मपरम् उत्तमकल्पकैर्मुख्यकल्पै: सर्वसामर्थ्यसद्भावात् हे राजन्निति प्रागुक्ताभिप्रायमेव ॥४३॥ वृष्णयो राजानश्च दीक्षाशालामुपाजग्मुरिति परेणान्वय: । यद्वा । वृष्णयो राजानश्च सुष्ठ्वलंकृता बभूवुरिति शेष: । हे राजन्नित्यहो भाग्यं राज्ञामिति भाव: । पुन: पुनस्तथैव सम्बोधनमत्यन्तहर्षादेव ॥४४॥ तस्य श्रीवसुदेवस्य महिष्यो मुदिता इति च-शब्दबलाद्वृष्ण्यादीनमपि विशेषणं द्रष्टव्यम् । उप समीपे आजग्मुर्दीक्षाशालामित्यनेन यज्ञेऽपेक्ष्यमण्डपादीनि सद्य एव निर्मितानीति बोध्यते ॥४५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥४०-५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इतीति । तद्वचनं तेषां वच: श्रुत्वा आनम्य प्रणम्य प्रसाद्य प्रसन्नान् कृत्वा ऋत्विजो वव्रे वृतवान् ॥४२॥ त इति । एवं धर्मेण यथाविधि वृतास्ते ऋषयस्तस्मिन् स्यमन्तपञ्चके क्षेत्रे उत्तमकल्पकै: मन्त्रतन्त्रद्रव्यादिलोपरहितै: मखैर्यज्ञैस्तं वसुदेवमयाजयन् ॥४३॥ एतदेव प्रपञ्चयति-तद्दीक्षायामित्यादिना । तद्दीक्षायां यज्ञदीक्षायां पुष्कराणां स्रजो येषां ते ॥४४॥ तस्य वसुदेवस्य महिष्य: महिष्य: आलिप्ता: कुंकुमादिभि: वस्तून्यर्हणानि पाण्योर्यासां ता: ॥४५॥

श्रीमज्जीवगोस्वामिकृत: क्रमसन्दर्भ: ॥३८-६५॥

श्रीमज्जीवगोस्वामिकृत: बृहत्क्रमसन्दर्भ:

वसुदेवभवानित्यादि । यत् यो वां पुत्रतां गत: तं जगताम् ईश्वरं परमया भक्त्या प्रार्च: प्रकर्षेणार्चितवान् ॥४१-६८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

वसुदेवभवान्नूनमित्यादि । यत् यो वां युवयो: पुत्रतां गत: तं जगताम् ईश्वरं परमया भक्त्या प्रार्च: प्रकर्षेणार्चितवान् ॥४१॥ ॥४२-६८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

वस्तुपाणय: हस्तगृहीतार्हणद्रव्या: ॥४५-४६॥

गूढार्थदीपिनी

वव्रे वरणीकृतवान् ॥४२॥ धर्मेण यथाविधि वृता: ते मुनय: एनं वसुदेवमयाजयन् । मखैरिति बहुवचनमिष्ट्यपेक्षया क्षम् । कल्प्यन्ते सम्पाद्यन्ते विधय आभिरिति कल्पका: सामग्र्य: उत्तमा: कल्पका: येषु तै: मखै: ॥४३॥ तद्दीक्षायां प्रारम्भसङ्कल्परूपायाम् । वृष्णय: राजान: तन्महिष्य: तथा तस्य वसुदेवस्य महिष्यश्च वस्तुपाणय: (हिरण्यं रजतं चापि गृहीत्वा अमुकं फलम् । यज्ञशालां विशेत्पत्नी शपेयुस्त्वन्यथा सुरा: ॥ इत्युक्ते: ॥) सत्य: दीक्षाशालामुपाजग्मुरित्यन्वय: । वस्तूनि मङ्गलिकद्रव्याणि पाणौ यासां ता: । निष्कं दीनारहार: कण्ठे यासां ता: । 'दीनारेऽपि च निष्कोऽस्त्री' इत्यमर: । (दीनार: अशर्फी) 'वक्षोऽलङ्कारणे तथा' इति मेदिनी च ॥४४-४५॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

तन्महिष्य: राज्ञां महिष्य: आलिप्ता: कुंकुमादिभि: वस्तूनि अर्हणानि पाणिषु यासां ता: ॥४५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो "ब्राह्मणानामेवार्त्विज्यम्" इति कुरुक्षेत्रमेव वेदिरिति भाग्यत ऋषयः समागता इति तेषां वचनं कृतवानित्या इति तद्वचनं श्रुत्वेति। महामनाः यज्ञकरणे प्रोत्साहयुक्तः तानेव पूर्वोक्तानृषीन् ऋत्विक्त्वेन वव्रे ओदनं पचतीतिवत् वरण ऋत्विजः कृतवानित्यर्थः। मूर्ध्नानम्येति नमनेनैव वशीकृताः अस्माभिरुक्तं कर्तव्यमिति कथमस्माभिरेव यागः कर्तव्य तेषां सङ्कोचाभावः कारित इत्याह-प्रसाद्येति। चकारात् स्तोत्रादिकमपि कृत्वा ॥४२॥ ततः सोमः प्रवाक्कृतवरणे जाते द्वैपायना तं याजयामासुरित्याह-त एनमिति। धर्मेण न तूत्कोचनादिकं कृत्वा यतो धार्मिकः सः यादवाः वैदिकधर्मे न प्रशस्ता वसुदेवे विशेष उक्तः तस्मिन्नेव क्षेत्रे अयाजयन् मखैः सर्वैरेव उत्तमः कल्पो येषां न क्वाप्यनुकल्पः कृत इत्यर्थः ॥४३॥ वैदिकसमृद्धिमुक्त्वा लौकिकसमृद्धिमाह-तद्दीक्षायां प्रवृत्तायामिति। सर्व एव वृष्णयः कमलमालायुक्ताः जाताः अनुवा वा अनेन भगवत्सारूप्यं निरूपितम्। ततः स्नाताः अभ्यङ्गेन सुवाससो जाताः अलंकृताश्च तथैव तन्महिष्यः अन्तस्तोषमा मुदिता इति। पुरुषाद्विशेषमाह-निष्ककण्ठ्यः सुवासस इति इदं वस्त्रमुपरिधेयम्। ततश्चन्दनादिलिप्ताः उपायनहस्ताः सत्य यस्यां शालायां दीक्षा कृता तामुपाजग्मुः पत्नीनां दर्शनार्थम् ॥४४-४५॥

श्रीसुबोधिनीसारः

शुकोक्तिः। इति तेषां वचनं श्रुत्वा महामना अत्युदारो वसुदेवः तान् ऋषीन् ऋत्विजो वव्रे। शिरसा प्रणम्य प्रसाद्य ॥४२॥ धर्मेण वृतास्ते ऋषयो धार्मिकमेनं वसुदेवं तस्मिन् क्षेत्रे उत्तमोपस्करैर्मखैरयाजयन् ॥४३॥ हे राजन्! तस्य दीक्षायां प्रवृत्तायां सत्यां स्नाताः सुवस्त्रा कमलमालिनो यदवः राजानः सुमण्डिताः ॥४४॥ तस्य वसुदेवस्य महिष्यो राज्यः मुदिता हर्षिता पदकमणिकण्ठ्यः सुवाससः चन्दनादिनाऽऽलिप्ता मङ्गलवसुहस्ता दीक्षाशालामुपाजग्मुः ॥४५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इत्येवम्भूतं तेषां वचनं श्रुत्वा महामनाः हृष्टचित्तो वसुदेवस्तानेव ऋषीन् मूर्ध्ना आनम्य प्रसाद्य च प्रसन्नान् कृत्वा ऋत्विजो वव्रे वृतवान् ॥४२॥ हे राजन्! ते ऋषय एवं धर्मेण यथाविधि वृतास्तस्मिन् स्यमन्तपञ्चके क्षेत्रे उत्तमकल्पकैर्मन्त्रतन्त्रद्रव्यादिसम्पन्नैर्मखैस्तं धार्मिकं वसुदेवमयाजयन् ॥४३॥ एतदेव प्रपञ्चयति-तद्दीक्षायामित्यादिना सुष्ठ्वलंकृता वृष्ण्यादयो दीक्षाशालां यज्ञशालामुपाजग्मुरिति द्वयोरन्वयः ॥४४॥ तस्य वसुदेवस्य महिष्यः पत्न्यः चन्दनादिभिरालिप्ताः। वस्तूनि अर्हणानि पाण्योर्यासां ताः ॥४५॥

अन्वितार्थप्रकाशिका

इतीति। इत्येवम्भूतं तेषां वचनं श्रुत्वा महामनाः हृष्टचित्तो वसुदेवस्तानेव ऋषीन् मूर्ध्ना आनम्य प्रसाद्य च प्रसन्नान् कृत्वा ऋत्विजो वव्रे वृतवान् ॥४२॥ त इति। हे राजन्! ते ऋषय एवं धर्मेण यथाविधि वृतास्तस्मिन् स्यमन्तपञ्चके क्षेत्रे उत्तमकल्पकैर्मन्त्रतन्त्रद्रव्यादिसम्पन्नैर्मखैस्तं धार्मिकं वसुदेवमयाजयन् ॥४३॥ तदिति युग्मम्। हे राजन्! तस्य यज्ञस्य दीक्षायामित्यां सम्प्रवृत्तायां सत्यां पुष्करस्रजः स्नाताः सुवाससः सुष्ठ्वलंकृता वृष्णयः राजानः तथा मुदिता निष्ककण्ठ्यः सुवाससः चन्दनादिभिरालिप्ताः वस्तूनि अर्हणानि पाण्योर्यासां ताः तस्य वसुदेवस्य महिष्यः पत्न्यश्च दीक्षा यज्ञशालामुपाजग्मुः ॥४४-४५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मूर्ध्ना मस्तकेन आनम्य प्रणम्य ॥४२॥ तस्मिन् क्षेत्रे कुरुक्षेत्रे उत्तमाः। मुख्याः कल्पाः कर्तव्यप्रकारा येषां तैः ॥ ४४॥ आप्ताः कुंकुमादिचर्चिताः वस्तुपाणयः गृहीतपूजासामग्रीकराः ॥४५-४६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इत्येवंविधं तद्वचनं तेषां मुनीनां वचनं श्रुत्वा महामनाः वसुदेवः मूर्ध्ना आनम्यादौ प्रणामं कृत्वा प्रसाद्य प्रसन्नांश्च कृत्वा तानृषीन् ऋत्विजः वव्रे ॥४२॥ त इति ॥ हे राजन् एवं धर्मेण यथाविधि वृताः ते ऋषयः तस्मिन् स्यमन्तपञ्चके क्षेत्रे धार्मिकं तं वसुदेवम् उत्तमकल्पकैः मन्त्रतन्त्रद्रव्यादिलोपरहितैः मखैर्यज्ञैः अयाजयन् ॥४३॥ एतदेव प्रपञ्चयति ॥ तद्दीक्षायामिति ॥ हे राजन्! तद्दीक्षायां तेषां मखानां दीक्षायां प्रवृत्तायां सत्यां वृष्णयः स्नाताः सुवाससः पुष्करस्रजः कण्ठधृतकमलमालाः आसन्। राजानोऽन्ये नृपतयश्च सुष्ठ्वलंकृताः शोभनालङ्कारधारिणः आसन् ॥४४॥ तन्महिष्य इति ॥ तन्महिष्यो वसुदेवपत्न्यश्च मुदिताः निष्कण्ठ्यः सुवाससः आलिप्ताः कुंकुमादिभिरभिलिप्ताङ्गाः वस्तुपाणयः गृहीतार्हणहस्ताः सत्यः दीक्षाशालाम् उपाजग्मुः ॥४५॥

कृष्णप्रिया

महाराज शुक्राचार्यजीने कहा - महाराज परीक्षित महामनस्वी श्रीवसुदेवजीने मुनिवरोंका यह उत्तम मार्ग दर्शन पाकर उनसे श्रीचरणोंमें सिर रखकर प्रणाम किया और सर्व मुनिवरोंको प्रसन्न करके यज्ञ कार्य के लिये ऋत्विजो के स्वरूपमें उनका वरण किया ॥४२॥ राजन् परीक्षित ! धर्म विधि के अनुसार जब श्रीवसुदेवजीने मुनिवरोंका वरण किया, तब उन महामुनियोंनें परम पवित्र पुण्यक्षेत्र कुरुक्षेत्रमें श्रद्धा सम्पन्न् धर्मनिष्ठ हमहाराज श्रीवसुदेवजीके करकमलोंसे सर्वोत्तम सामग्रीसे युक्त यज्ञ करवाये ॥४३॥ राजन् परीक्षित् महाराज श्रीवसुदेवजीने जब यज्ञाय दीक्षा ग्रहण कर ली तब यदुवंशके महापुरुषों स्नान करके उत्तम पथ और कमलोंकी मालाएं धारण करली और राजा महाराजा लोग वस्त्रोलंकारो से खूब सुसज्जित हो गये ॥४४॥ महाराज श्रीवसुदेवजीकी पत्नियोंने उत्तम वस्त्र अलंकार एवं सुवर्ण के आभूषणोंमें अपने को सुशोभित कर लिया और वे सर्व अत्यंत आनन्दसे अपने अपने करकमलोंमें मंगल एवं यज्ञीय कार्योचित सर्व मांगलिक सामग्री लेकर यज्ञशालामें प्रवेश करने लगी ॥४५॥

नेदुर्मृदंग[1]पटहशंखभेर्यानकादयः । ननृतुर्नटनर्तक्यस्तुष्टुवुः सूतमागधाः ।
जगुः सुकण्ठ्यो गन्धर्व्यः [2]सङ्गीतं सहभर्तृकाः ॥४६॥
तमभ्यषिञ्चन् विधिवदक्तमभ्यक्तमृत्विजः । पत्नीभिरष्टादशभिः सोमराजमिवोडुभिः ॥४७॥
ताभिर्दुकूलवलयैर्हारनूपुरकुण्डलैः[3] । स्वलङ्कृताभिर्विबभौ दीक्षितोऽजिनसंवृतः ॥४८॥
तस्यर्त्विजो महाराज [4]रत्नकौशेयवाससः । [5]ससदस्या विरेजुस्ते यथा वृत्रहणऽध्वरे ॥४९॥

कर्दमक्षमा

मृदङ्गपटहशङ्खभेर्यानकादयः, नेदुः, नटनर्तक्यः, ननृतुः, सूतमागधाः, तुष्टुवुः, सुकण्ठ्यः, गन्धर्व्यः, सहभर्तृकाः, सङ्गीतम्, जगुः ॥४६॥ उडुभिः, सोमराजम्, इव, अष्टादशभिः, पत्नीभिः, अक्तम्, अभ्यक्तम्, तम्, ऋत्विजः, विधिवत्, अभ्यषिञ्चन् ॥४७॥ दीक्षितः, अजिनसंवृतः, दुकूलवलयैः, हारनूपुरकुण्डलैः, स्वलङ्कृताभिः, ताभिः, विबभौ ॥४८॥ महाराज, यथा, वृत्रहणः, अध्वरे, तथा, रत्नकौशेयवाससः, तस्य, ते, ऋत्विजः, ससदस्याः, विरेजुः ॥४९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अक्तं नेत्रयोरञ्जनेन अभ्यक्तं सर्वाङ्गेषु नवनीतेन ॥४७॥ ताभिः पत्नीभिः सहितो दीक्षितो विरेजे ॥४८-४९॥

---

[1] [illegible]शङ्ख-गो. प्रे. टी. । [2] सुगीतं-विज. । [3] कुण्डलनूपुरैः-गो. प्रे. टी. । [4] नूत्र च. पु. टी. वीर. विज. । [5] सप्तदश-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं वसुदेवम् । यज्ञारम्भे यज्ञकर्तुरंजनं नेत्रयोर्दत्त्वा गोनवनीतेन तद्वपुः सर्वतो मर्दयित्वा च तं स्नापयेदिति श्रुत्या विहि ॥४७॥ विभवैर्भूषणाद्यैः स्वलंकृताभिः । अजिनमत्र मृगचर्म ॥४८॥ तस्य वसुदेवस्य । होत्राद्याः षोडश । ते पूर्वं वृता ये इत्यर्थ वृत्रहण इन्द्रस्य । कुत्वाभावालोपाभावावार्षौ ॥४९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नेदुरिति सार्धम् । सूताश्च मागधाश्च गन्धर्व्यः गायकानां गन्धर्वजातीनां स्त्रियः ॥४६॥ सोमराजमिवेति । राजशब्देन कृतराजसूयावस्थत्वं स्मारयति । यज्ञस्य तादृशत्वं गमयति । यद्वा । यदि बहवः सोमा भवन्ति तन्मध्ये च कोऽपि भवति तदेव उपमीयेत इत्यर्थः । अत एवोडुभी राज्ञीभिरित्यपि ज्ञापितम् अष्टादशभिरिति । तादृशसप्तविंशतेरत्यन्तासम्भवादिति भावः । श्रीहरिवंशे तु तज्जन्मप्रसङ्गे यदिदं तस्य वर्णनम् –

"मनुष्यलोके कृत्स्नेऽस्मिन् रूपेणाप्रतिमो भुवि । यस्यासीत्पुरुषाग्र्यस्य कान्तिश्चन्द्रमसो यथा ॥" इति ।

अत्र तु तदपि न सोढम् ॥४७॥ विबभौ विशेषेण रेजे ॥४८॥ पीतकौशेयवासस इति श्रीभगवत्परिधानीयनव्यदिव्यवस्त्रप्रा पाठान्तरे रत्नश्रेणिविलम्बयुक्तप्रान्तभागकौशेयवासस इति यथेत्यापातमात्रचमत्काराय ॥४९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सुताश्च मागधाश्च गन्धर्व्यो गायकानां साक्षाद्गन्धर्वजातीनां वा स्त्रियः ॥४६॥ पत्नीभिरिति । श्रीदेवक्यादयो देवक सप्त रोहिण्यादयश्चान्या एकादशेत्येवमष्टादशभिः सहितम् । बहुपत्नीसाहित्ये सुदृश्यत्वादौ च दृष्टान्तः–सोमेति सोमश्चासौ राजा द्विजन्मादीनामिति तथा तम् । राजशब्दप्रयोगस्तद्यज्ञमाहात्म्यबोधनार्थम् । तेनैतद्यज्ञस्यापि दिव्यत्वं सूचयति । श्रीवसुदेव सुदृश्यता चोक्ता श्रीहरिवंशे – (हरि.–प.३४/२०) तज्जन्मप्रसङ्गे –

'मनुष्यलोके कृत्स्नेऽस्मिन् रूपेणाप्रतिमो भुवि । यस्यासीत्पुरुषाग्र्यस्य कान्तिश्चन्द्रमसो यथा' इति ॥४७॥

विबभौ विशेषेण पूर्वतोऽप्याधिक्येन बभौ अशोभत । यतो दीक्षितः तल्लक्षणम् – अजिनेन संवृतो वेष्टित इति ॥४ 'पीतकौशेयवाससः' इति श्रीभगवन्महाप्रसादवस्त्रप्राप्तेः इति श्रीवसुदेवदयया तेषां प्रार्थितभक्तिसिद्धिश्च सूचिता । अत एव विरे रेजुः । इति महाहर्षोदयात् सम्बोधयति–महाराजेति ॥४९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥४०–५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

सूता पुराणपाठकाः मागधाः वंशावलिपाठकाः सहभर्तृकाः ॥४६॥ तमिति । अक्तं नेत्रयोरंजनेनाभ्यक्तं सर्वाङ्गेषु नवनीते तं वसुदेवम् उडुभिर्नक्षत्रैः सहितं सोमराजं चन्द्रमिवाष्टादशभिः पत्नीभिः सहितमभ्यषिञ्चन् ॥४७॥ ताभिरिति । दुकूलादिभि विविधैर्विपुलालङ्कारैः सुष्ठु अलंकृताभिः पत्नीभिः सह दीक्षितः अजिनेन संवृतः विरेजे ॥४८॥ तस्य वसुदेवस्य सर्वे ऋत्विजः नूत्नानि नवानि कौशेयानि वासांसि येषां ते सदस्यैः सभ्यैः सहिता विरेजुः । यथा वृत्रहणः इन्द्रस्याध्वरे तद्वत् ॥४

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥३८–६५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

॥४१–६८॥

॥४२–६८॥

अक्तं नेत्रयोरंज

नेदुरिति सार्ध
सहितमभ्यषिञ्चन् । उडु
इत्यन्वयः । अजितं मृगच

सहभर्तृकाः सभ
दीक्षितो विबभौ विरेजे इ

एवं मनुष्यसम्भ्रम
अत्र रसाधिक्यार्थं मुख्यतय
यागप्रकारमाह–तमभ्यषिञ्चन्
तस्याष्टादशपत्न्यः न क्वापि
कृतवन्त इति वक्तुं दृष्टान्तमाह
संवृतः विभवैः सर्वैरेव कट
कर्मकारा इति कदाचिदनलङ्कृ
कृतवान् । तत्र ऋत्विजोऽपि स

मृदङ्गाद्या वाद्यविशे
सधवाः सङ्गीतं जगुः ॥४६॥
विधवदभ्यषिञ्चन् । उडुभिरश्वि
त्नीभिर्दीक्षितोऽजिनेन मृगचर्मण
वसुदेवस्य ऋत्विजो ब्राह्मणास्ते

मृदङ्गादयो नेदुः । नटन
लितम् अष्टादशभिः पत्नीभिः सहि
सहितं सोमराजं चन्द्रमभ्यषिञ्चंस्त
अजिनेन मृगचर्मणा संवृतश्च विरेजे
ऋत्विजो विरेजुः । तत्र दृष्टान्तमाह–

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥४२-६८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अक्तं नेत्रयोरंजनेन अभ्यक्तं सर्वाङ्गेषु नवनीतेन सोमराजं बहूनां सोमानां यदि वा कश्चिदेको राजा भवति तमिवेत्यर्थः ॥४७-४९॥

गूढार्थदीपिनी

नेदुरिति सार्धम् । सङ्गीतं मधुरगीतम् ॥४६॥ अक्तं नेत्रयोरंजनेन अभ्यक्तं सर्वाङ्गेषु नवनीतेन लिप्तं तं वसुदेवं पत्नीभिः सहितमभ्यषिञ्चन् । उडुभिः नक्षत्रैः सह यथा सोमराजं चन्द्रम् ॥४७॥ दुकूलादिभिः अलङ्कृताभिः ताभिः पत्नीभिः सह स बभौ इत्यन्वयः । अजितं मृगचर्म ॥४८॥ तस्य वसुदेवस्य ऋत्विजः होत्राद्याः षोडश ते ये पूर्वं वृताः ते ॥ वृत्रहणः इन्द्रस्य ॥४९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सहभर्तृकाः सभर्तृकाः ॥४६॥ अक्तमंजनेन नेत्रयोः अभ्यक्तं नवनीतेन सर्वाङ्गेषु उडुभिः सोमराज इव पत्नीभिः सहितो दीक्षितो विबभौ विरेजे इत्युत्तरेणान्वयः ॥४७-४९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं मनुष्यसम्भ्रममुक्त्वा वाद्यादिसम्भ्रममाह-नेदुरिति । वाद्यनृत्यगानानि निरूपितानि मध्ये सूतमागधवन्दिनां स्तोत्रं च अत्र रसाधिक्यार्थं मुख्यतया स्त्रीणां गानमुक्तं ताश्च केवला निषिद्धा इति सहभर्तृका उक्ताः ॥४६॥ एवं लौकिकसम्भ्रममुक्त्वा यागप्रकारमाह-तमभ्यषिञ्चन् विधिवदिति । दशदिक्षु अंजनमभ्यंजनं च ततस्तमभ्यषिञ्चन् पावनानन्तरं विधिवत् कल्पोत्तरप्रकारेण तस्याष्टादशपत्न्यः न क्वापि तस्य भोगस्त्री तदर्थमाह-पत्नीभिरष्टादशभिरिति । यथा चन्द्रस्य राजसूये बहुपत्नीकः प्रयोगः तथात्रापि कृतवन्त इति वक्तुं दृष्टान्तमाह-सोमराजमिवेति । तास्त्वलङ्कारसहिताः स्वयन्त्वलंकृत इति यतो दीक्षितः अजिनेन कृष्णाजिनेन च संवृतः विभवैः सर्वैरेव कटकवलयादिभिः स्वलंकृताः स्त्रियः ॥४७-४८॥ ततः तस्य ऋत्विजां शोभामाह-तस्यर्त्विज इति । कर्मकाल इति कदाचिदनलङ्करणं ततोऽलङ्कारो निरूप्यते सदस्यसहिताः सर्व एव ऋत्विजो विरेजुः वृत्रवधानन्तरमिन्द्रो बहुदक्षिणाश्वमेधं कृतवान् । तत्र ऋत्विजोऽपि समृद्धा जाताः तद्वदत्रापीत्यर्थः ॥४९॥

श्रीसुबोधिनीसारः

मृदङ्गाद्या वाद्यविशेषा नेदुः । नट्य नर्तक्यो ननृतुः । सूतमागधाः तुष्टुवुः । सुष्ठु कण्ठा यासां ता गन्धर्व्यः सहभर्तृकाः सधवाः सङ्गीतं जगुः ॥४६॥ अक्तं कृतांजनम् अभ्यक्तं नवनीतादिना कृतोद्वर्तनं तं वसुदेवमष्टादशभिः पत्नीभिः स्त्रीभिः सह विधिवदभ्यषिञ्चन् । उडुभिरश्विन्यादिभिः सोमराजं चन्द्रमिव ॥४७॥ दुकूलवलयैः वस्त्रकंकणैर्हारादिभिः स्वलंकृताभिः ताभिः ताभिर्दीक्षितोऽजिनेन मृगचर्मणा संवृतो वसुदेवो रराज ॥४८॥ हे महाराज ! ससदस्याः सदस्यैः सहिताः रत्नचिह्नितपट्टवस्त्राः तस्य वसुदेवस्य ऋत्विजो ब्राह्मणास्ते विरेजुः वृत्रहण इन्द्रस्याध्वरे यज्ञे यथा ॥४९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मृदङ्गादयो नेदुः । नटनर्तक्यो ननृतुः । सहभर्तृकाः सभर्तृकाः ॥४६॥ अक्तं नेत्रयोरंजनेन अभ्यक्तं सर्वाङ्गेषु नवनीतेन लिप्तम् अष्टादशभिः पत्नीभिः सहितं तं वसुदेवं ऋत्विजो विधिवदभ्यषिञ्चन् । पत्नीसाहित्ये दृष्टान्तमाह-यथा पुरा उडुभिर्नक्षत्रैः सहितं सोमराजं चन्द्रमभ्यषिञ्चंस्तथेति ॥४७॥ स च दुकूलादिभिरन्यैश्च विभवैरलङ्कारैः सुष्ठ्वलंकृताभिः पत्नीभिः सह दीक्षितः अजिनेन मृगचर्मणा संवृतश्च विरेजे इति शेषः ॥४८॥ हे महाराज ! सदस्यैः सभ्यैः सहिताः रत्नकौशेयवस्त्रैरलंकृतास्तस्य वसुदेवस्य ऋत्विजो विरेजुः । तत्र दृष्टान्तमाह-यथेति । वृत्रासुरहननानन्तरम् इन्द्रस्य यज्ञे यथा तस्य ऋत्विजो विरेजुस्तथेत्यर्थः ॥४९॥

अन्वितार्थप्रकाशिका

नेदुरिति सार्धम् । मृदङ्गादयो नेदुः नटनर्तक्यो ननृतुः सूतमागधास्तुष्टुवुः सहभर्तृकाः सुकण्ठ्यो गन्धर्व्यः सङ्गीतं जगुः ॥४६॥ तमिति । अक्तं नेत्रयोरंजनेन अभ्यक्तं सर्वाङ्गेषु नवनीतेन लिप्तम् अष्टादशभिः पत्नीभिः सहितं तं वसुदेवं ऋत्विजो विधिवदभ्यषिञ्चन् । यथा पुरा उडुभिर्नक्षत्रैः सहितं सोमराजं चन्द्रमभ्यषिञ्चंस्तथा बहूनां सोमानां यदि कोऽप्यधिकतेजा राज भवति तमिवेत्यर्थः । ताभिरिति । स च दुकूलादिभिरन्यैश्च विभवैरलङ्कारैः सह सुष्ठ्वलंकृताभिः पत्नीभिः दीक्षितः अजिनेन मृगचर्मणा संवृतश्च विरेजे । बभौ इत्यपि पाठः ॥४७-४८॥ तस्येति । हे महाराज ! सदस्याः सभ्यैः सहिताः रत्नकौशेयवाससस्तस्य वसुदेवस्य ऋत्विजो विरेजुः । तत्र दृष्टान्तमाह-यथेति । वृत्रासुरहननानन्तरम् इन्द्रस्य यज्ञे यथा तस्य ऋत्विजो विरेजुस्तथा ॥४९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अक्तं लोचनयोः कृतांजनम् अभ्यक्तं सर्वाङ्गेषु कृतनवनीतलेपम् ॥४७॥ ताभिः पत्नीभिः सहितो दीक्षितः सन् विशेषेण बभौ ॥४८॥ वृत्रहणः इन्द्रस्य ॥४९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नेदुरिति ॥ मृदङ्गशङ्खभेर्यानकादयः नेदुः । नटनर्तक्यः नटाश्च नर्तक्यश्चेत्यर्थः । ननृतुः । सूतमागधाः तुष्टुवुः । तत्र सूताः पौराणिकाः मागधा वंशावलीपाठकाः सहभर्तृकाः स्वभर्तृभिः सहिताः सुकण्ठ्यः गन्धर्व्यः सङ्गीतं जगुः ॥४६॥ तमिति ॥ अक्तं नेत्रयोरंजनेन अभ्यक्तं सर्वाङ्गेषु नवनीतेन एवंविधं तं वसुदेवम् उडुभिः रोहिण्याद्यङ्गनाभिः सह सोमराजं चन्द्रमिव अष्टादशभिः पत्नीभिः सह विधिवद्यथाविधि ऋत्विजः अभ्यषिञ्चन् ॥४७॥ ताभिरिति ॥ दुकूलवलयैः हारनूपुरकुण्डलैः स्वलंकृताभिः ताभिः पत्नीभिः सह दीक्षितः अजिनसंवृतोऽजिनेन संवृतः वसुदेवः विबभौ विशेषेण रेजे ॥४८॥ तस्येति ॥ तस्य वसुदेवस्य सम्बन्धिनः ते ऋत्विजः हे महाराज ! नूत्नानि नवीनानि कौशेयवासांसि येषां ते ससदस्याः सदस्यैः सहिताः सन्तः वृत्रहणः इन्द्रस्य अध्वरे यज्ञे यथा तथा विरेजुः । रत्नकौशेयवासस इति पाठे 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते' इति वाक्यादुत्कृष्टकौशेयवसनधरा इत्यर्थः ॥४९॥

कृष्णप्रिया

यज्ञ का प्रारम्भ हो जा रहा था तब शंख मृदंग पखावज ढोल और नगारे आदि विविध वाजिंत्र ध्वनि होने लगा । नट और नर्तकियां नाट्य करने लगी, सूत मागध बंदिजन स्तुतिगान करने लगे । गन्धर्वोंके साथ किन्नर गन्धर्वोंकी नारियां गान करने लगी ॥४६॥ परमोदारचरित श्रीवसुदेवजीने जब यज्ञदीक्षा का स्वीकार किया तब दीक्षाविधिके पूर्वमें अंजन एवं तैलाचल विधि की गयी पुनः श्रीदेवकीजी जिनमें मुख्य है एसी अपनी अष्टादश अर्धांगनाओंके महर्षिवर्योंने महाभिषेक की विधि करायी जैसे प्राचीन कालमें नक्षत्रों से काथ चन्द्रमा का अभिषेक किया गया था ॥४७॥ उस अवसर यज्ञमें दीक्षित श्रीवसुदेवजीने मृगचर्म धारण कियाथा परन्तु महाराजकी अर्धांगनाओंको उत्तमोत्तम दुकूल शाटिका कंगन हार पायल कर्णफूल आदि अलंकारोंसे अच्छी तरह से समलंकृत बनी थी ॥४८॥ राजन् परीक्षित् ! श्रीवसुदेवजीके यज्ञमें दीक्षित ऋत्विज एवं सदस्यगण रत्ननिर्मित अंकारोंसे और दुकूल वस्त्रोंसे समलंकृत किये गये थे जैसे पूर्वकालमें स्वर्गराज इन्द्र महाराजके यज्ञमें किया गये थे ॥४९॥

तदा रामश्च कृष्णश्च स्वैः स्वैर्बन्धुभिरन्वितौ । रेजतुः स्वसुतैर्दारैर्जीवेशौ[1] स्वविभूतिभिः ॥५०
ईजेऽनुयज्ञं विधिना अग्निहोत्रादिलक्षणैः । प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरम् ॥५
अथर्त्विग्भ्योऽददात् काले [2]यथाम्नायं स दक्षिणाः । स्वलङ्कृतेभ्योऽलङ्कृत्य गोभूकन्या महाधनाः ॥५
पत्नीसंयाजावभृथ्यैश्चरित्वा ते महर्षयः । सस्नू रामह्रदे विप्रा यजमानपुरःसराः ॥५

---

१. देवेशौ-वीर. । २. म्नातं-श्रीधर. वंशी. वीर. विज. ।

तदा, रामः, च
अग्निहोत्रादिलक्षणैः, प्र
ऋत्विग्भ्यः, अलङ्कृत्य
चरित्वा, यजमानपुरःसरा

जीवेशौ सर्वज
तेभ्यश्चोदनालिङ्गादिभिरिति
॥५१-५२॥ सस्नुः स्नानञ्च

तदा यज्ञसमये
स्वैर्विभूतिभिरहङ्कारादियोगम
'प्रकृतिवद्विकृतिः कर्तव्या'
सर्वाण्यङ्गान्यारादुपकारकादी
। स वसुदेवः ॥५२॥ पत्नी
उभयत्रेष्टिविशेषाश्च भवन्ति ।

जीवानामीशौ प्र
स्वैर्बन्धुभिर्मातुलेयसम्बन्धिमि
स्वतायाः स्पष्टज्ञानात् । यद्वा ।
इति ईशश्च ततः परः स्वयं भग
भगवन्तमिति । तस्येवेज्यत्वादि
महान्ति स्वर्णरत्नादीनि यासु ताः

स्वैः स्वैर्बन्धुभिर्निजनि
च-शब्दाभ्यां द्वयोरपि प्राधान्यं द्यो
स्वविभूतिभिर्निजवैभवैः । यद्वा । स
अनुयज्ञं यो विधिस्तेन । विधिमेवाह
यथाम्नातं शास्त्रोक्तानुसारेणेत्यर्थः ।
महाधना महान्ति स्वर्णरत्नादीनि धन
स्नानानन्तरमलंकृतः सन् अदात् तथा

कर्दमक्षमा

तदा, रामः, च, कृष्णः, च, स्वैः, स्वैः, बन्धुभिः, अन्वितौ, स्वविभूतिभिः, जीवेशौ, स्वसुतैः, दारैः, रेजतुः ॥५०॥ अग्निहोत्रादिलक्षणैः, प्राकृतैः, वैकृतैः, अनुयज्ञम्, विधिना, द्रव्यज्ञानक्रियेश्वरम्, ईजे ॥५१॥ अथ, सः, काले, स्वलङ्कृतेभ्यः, ऋत्विग्भ्यः, अलङ्कृत्य, यथाम्नायम्, महाधनाः, गोभूकन्याः, दक्षिणाः, अददात् ॥५२॥ ते, महर्षयः, विप्राः, पत्नीसंयाजावभृथ्यैः, चरित्वा, यजमानपुरःसराः, रामह्रदेषु, सस्नुः ॥५३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

जीवेशौ सर्वजीवानामीशौ ॥५०॥ अनुयज्ञं प्रतियज्ञं आम्नातसर्वाङ्गाः प्राकृताः ज्योतिष्टोमदर्शपूर्णमासादयः तेभ्यश्चोदनालिङ्गादिभिरिति देशप्राप्ताङ्गा वैकृताः सौरसत्रादयस्तैः सर्वैः द्रव्यं पुरोडाशादि ज्ञानं मन्त्रः क्रिया कर्म तेषामीश्वरम् ॥५१-५२॥ सस्नुः स्नानञ्चक्रुः ॥५३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदा यज्ञसमये । स्वस्य विभूतिभिर्मूर्तिमद्भिरणिमाभिः । यद्वा–लुप्तोपमा बोध्या । जीवेशौ जीवात्मपरमात्मानौ । स्वैर्विभूतिभिरहङ्कारादियोगमायादिभिः ॥५०॥ तेभ्यः प्राकृतेभ्यो यागेभ्यश्चोदनालिङ्गादिभिर्विधिलिङ्गप्रकरणसमाख्यादिभिः अतिदेशेन 'प्रकृतिवद्विकृतिः कर्तव्या' इति वाक्येन प्राप्तान्यङ्गानि येषु ते वैकृताः । ईश्वरं स्वामिनम् ॥५१॥ आम्नातानि कथितानि सर्वाण्यङ्गान्यारादुपकारकादीनि येषु ते आम्नातसर्वाङ्गाः । अथ प्राकृतवैकृतयागोत्तरम् । काले यथोदितसमये । यथाम्नातं यथोदितम् । स वसुदेवः ॥५२॥ पत्नीसंयाजः पत्नीभिः क्रियमाणः, काश्चन देवता उद्दिश्य यजनम् । अभवृथः समाप्तिकर्मस्थानम् । अवभृथेष्टिविशेषाश्च भवन्ति । तैश्चरित्वा तांश्च कृत्वेत्यर्थः ॥५३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जीवानामीशौ प्रजानां राजयुवराजाविव नियन्तारौ स्वविभूतिभिरन्तरङ्गवैभवैरेजतुः । ता एवाह–स्वैः स्वैर्बन्धुभिर्मातुलेयसम्बन्धिमित्रादिभिः । स्वैः स्वैर्दारैश्चेत्यन्वयः । तथापि सुतेषु पुनः स्वशब्दप्रयोगः आकारादिभिरभेदप्रतीतेः स्वतायाः स्पष्टज्ञानात् । यद्वा । जीवः स्वांशेन सर्वसमष्टिजीवान्तर्यामी स्वयं सङ्कर्षणः यथोक्तमेकादशे 'कालो मायामये जीवः' इति ईशश्च ततः परः स्वयं भगवान् तौ सममन्यत् ॥५०॥ अनुयज्ञं यो विधस्तेन विधिमेवाह–अग्नीत्यादिना । द्रव्यादीनामीश्वरं भगवन्तमिति । तस्यैवेज्यत्वादिति भावः ॥५१॥ अथ यागानन्तरं गवाद्या एव दक्षिणाः अलंकृत्यादात् । कथम्भूताः ? महाधनाः महान्ति स्वर्णरत्नादीनि यासु ताः ॥५२॥ सस्नुः अवभृथस्नानं चक्रुः । विप्राश्चान्ये ॥५३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वैः स्वैर्बन्धुभिर्निजनिजप्रियैः श्रीगोपादिभिः । यद्वा । स्वैर्ज्ञातिभिर्यादवैः स्वैर्बन्धुभिश्च श्रीनन्दादिभिर्द्वाववेवान्वितौ । तत्र स्व-शब्दाभ्यां द्वयोरपि प्राधान्यं द्योत्यते । दारेषु स्वशब्दाप्रयोगः स्वत एव तेषां स्वीयत्वात् जीवेशावपि कथम्भूतैः ? स्वादिभिः स्वविभूतिभिर्निजवैभवैः । यद्वा । स्वविभूतिभिश्च कौस्तुभमकरकुण्डलादिनिजपरिच्छदैः स्वादीनां यथोत्तरं नैकट्ये श्रैष्ठ्यम् ॥५०॥ अनुयज्ञं यो विधिस्तेन । विधिमेवाह–अग्नीत्यादिना । द्रव्यादीनामीश्वरं भगवन्तमिति तस्यैवेज्यत्वादिति भावः ॥५१॥ अथ यागानन्तरं यथाम्नातं शास्त्रोक्तानुसारेणेत्यर्थः । स श्रीवसुदेवः प्राक् तेनैव सुष्ठ्वलंकृतेभ्योऽप्यलंकृत्य गवाद्या एव दक्षिणाः । कथम्भूताः ? महाधनाः महान्ति स्वर्णरत्नादीनि धनानि यासु ताः । यद्वा । महाधना महामूल्याः ॥५२॥ सस्नुरवभृथस्नानं चक्रुः । विप्राश्चान्ये । ततः स्वयमलंकृतः सन् अदात् तथा स्त्रियः स्त्रीश्च । यद्वा । स्त्रियस्तस्य महिष्योऽप्यदुः । वर्णान् सर्वांश्चतुरः ॥५३-५४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्राकृतैः वैकृतैः प्रकृतिभिः विकृतिभिश्च द्रव्यज्ञानक्रियेश्वरं पञ्चभूतज्ञानेन्द्रियकर्मेन्द्रियनिर्वाहकं यद्वा पुरोडाशादिद्रव्य अङ्गकर्मविषयज्ञानतदनुष्ठानानां प्रभुम् ॥५१-६१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेति । देवानां ब्रह्मादीनामपीशौ इति रामकृष्णयोर्विशेषणम् । जीवेशौ इति पाठान्तरं तदा जीवानामीश्वरावित्यर्थः देवेशैः स्वविभूतिभिरिति च पाठः तदास्याः विभूतयो येषां तैर्देवेशैर्देवश्रेष्ठांशसम्भूतैरिति स्वसुतविशेषणम् ॥५०॥ ईजे इति अनुयज्ञं प्रतियज्ञमीजे इष्टवान् तदेवाह–विधिनेति । आम्नातसर्वाङ्गाः प्राकृताः ज्योतिष्टोमदर्शपूर्णमासादय तेभ्यश्चोदनालिङ्गादिभिरतिदेशप्राप्ताङ्गाः वैकृताः सौर्यसत्रादयः सर्वैरग्निहोत्रादिनामकैस्तैः भौमैश्च द्रव्यज्ञानक्रियेश भूतपञ्चकज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकनिर्वाहकं भगवन्तम् ईजे । यद्वा । पुरोडाशादिद्रव्यसाङ्गकर्मविषयज्ञानतदनुष्ठानानां प्रभु ॥५१॥ अथेति । वसुदेवः काले विहितकाले यथाम्नातं यथोक्तदक्षिणाः ऋत्विग्भ्यः स्वयमप्यलंकृत्य तावत् ततो महाधन अनर्घाः गोभूकन्याश्च ददौ ॥५२॥ पत्नीसंयाजा आवभृथ्याश्च यागविशेषाः तैश्चरित्वा इष्ट्वा रामह्रदे परशुरामनिर्मिते ह्रदे सस्नुः चक्रुः ॥५३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥३८-६५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥४१-६८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥४२-६८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जीवेशौ सर्वजीवानामीशौ ॥५०॥ अनुयज्ञं प्रतियज्ञम् आम्नातसर्वाङ्गाः प्राकृताः ज्योतिष्टोमदर्शपूर्णमासादय तेभ्यश्चोदनालिङ्गादिभिरिति देशप्राप्ताः वैकृताः सौर्यसत्रादयः तैः सर्वैरेव द्रव्यं पुरोडाशादि ज्ञानं मन्त्रः क्रिया कर्म तेषामीश्वर ॥५१॥ स वसुदेवः दक्षिणाः कीदृशीः महान्ति स्वर्णरत्नादीनि धनानि यासु ताः ॥५२॥ पत्नीसंयाजो यागविशे अवभृथसम्बन्धिकृत्यानि च तैः चरित्वा तान्यनुष्ठायेत्यर्थः ॥५३॥

गूढार्थदीपिनी

तदा यज्ञसमये । स्वस्य विभूतिः मूर्तिमद्भिः अणिमादिभिः । अत्र यथेति लुप्तोपमा बोध्या ॥५०॥ अनुयज्ञं प्रतिय अग्निहोत्रादिनामकैः सर्वैरेव प्राकृतादिभिः भगवन्तम् ईजे च । कथम्भूतम् । द्रव्यादीनामपीश्वरं स्वामिनं सञ्चालकम् । तत्र पुरोडाशः (तण्डुलपिष्टनिर्मितकूर्माकारो बलिः पुरोडाशः । इति वंशीधरी ।) ज्ञानं मन्त्रः । क्रिया कर्म । प्राकृता ज्योतिष्टोमाद वैकृताः सौरसत्रादयः ॥५१॥ स वसुदेवः । यथाम्नातं यथोदितं दक्षिणाः अददात् । तथा महान्ति धनानि यासु ताः स्व गोभूकन्याश्च अददात् । स्वलंकृतेभ्यः आचारसम्पन्नेभ्यः विप्रेभ्यः ॥५२॥ पत्नीसंयाजः पत्नीभिः क्रियमाणः काञ्चनदेवता यजनम् अवभृथः समाप्तिकर्मस्नानम् । उभयत्र इष्टिविशेषाश्च भवन्ति । तैश्च कृत्वा ताश्च कृत्वेत्यर्थः । कर्मणि तृतीया । सस्नु चक्रुः । ष्णा शौचे धातुः ॥५३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

जीवानामीशौ ॥५०॥ सर्वाङ्गाः ज्योतिष्टोमदर्शपूर्णमासादयः प्राकृतास्तैस्तेभ्यश्चोदनादिभिरतिदेशप्राप्ताङ्गाः सौर वैकृतास्तैश्च अनुयज्ञं विधिना द्रव्यज्ञानक्रियेश्वरं द्रव्यं कर्मफलं ज्ञानं कर्ता क्रिया कर्म तेषामीश्वरं भगवन्तम् ईजे ॥५१-५२॥ स्नातं चक्रुः ॥५३-५४॥

एवम् इन्द्रवरुणादिस
बहव इति चकारद्वयं स्वैः स्वै
नियन्तारौ पूर्वोक्ताः दारादयो वि
बहवो यज्ञाः कृता इत्याह–ईजेऽ
वैकृतं तु कुण्डपायनामयनस्थं प
सोमेष्वपि सर्वत्र प्रकृतिविकृति
आध्यात्मिकी । एतत्त्रितयस्यापी
तु प्रसिद्धा राजसूयादय इति निरू
पृथगुच्यते । काले तत्तदवसरे यथ
क्वचिद्भूमिर्दक्षिणात्वेनोक्ता । उर्वर
ततः पूर्ववत् पृथक् पत्नीसंयाजावभृ
सिद्धार्थत्वात् यजमानः पुरःसरो ये

तस्मिन् समये स्वैः स्वैर्ब
अनुयज्ञं प्रतियज्ञं विधिना वेदोक्तमार्गेण
ज्ञानं मन्त्रः क्रिया कर्म तेषामीश्वरम् ॥५
यासु ता दक्षिणा अददात् स वसुदेवः ॥
कारयित्वा ते महर्षयो विप्रा यजमानो

तदा स्वैः स्वैर्बन्धुभिः तथा स
॥५०॥ आम्नाताः सर्वाङ्गाः प्राकृताः ज्यो
सर्वैरेवाग्निहोत्रादिनामकैश्च द्रव्यज्ञानक्रियेश
इष्टवानित्यन्वयः ॥५१॥ अथानन्तरं स व
दक्षिणाः तथा महान्ति धनानि यासु ताः स्व
ताननुष्ठाय ते महर्षयः ऋत्विजो यजमानः

तदेति । तदा स्वैः स्वैर्बन्धुभिः त
॥५०॥ ईजे इति । आम्नातसर्वाङ्गाः प्राकृत
अतिदेशप्राप्ताङ्गाः वैकृताः सौरसत्रादयस्तै
भगवन्तं विधिना अनुयज्ञं प्रतियज्ञमीजे इष्ट
स्वयमप्यलंकृत्य यथाम्नातं यथोक्तं दक्षिण
पत्नीसंयाजो यागविशेषश्च आवभृथ्यान्यवभृ
विप्रा रामह्रदे परशुरामनिर्मिते ह्रदे सस्नुः ॥

यद्वा पुरोडाशादि द्रव्यम्

जीवानामीश्वरावित्यर्थः।
षणम् ॥५०॥ ईज इति।
ष्टोमदर्शपूर्णमासादयः
तौमैश्च द्रव्यज्ञानक्रियेश्वरं
षयज्ञानतदनुष्ठानानां प्रभुम
त्य तावत् ततो महाधनाः
रामनिर्मिते ह्रदे सस्नुः स्नानं

ज्योतिष्टोमदर्शपूर्णमासादयः
न्त्रः क्रिया कर्म तेषामीश्वरम
। पत्नीसंयाजो यागविशेषः

ध्या ॥५०॥ अनुयज्ञं प्रतियज्ञम
वामिनं सञ्चालकम्। तत्र द्रव्यं
कर्म। प्राकृता ज्योतिष्टोमादयः
न्ति धनानि यासु ताः रत्नरूपा
क्रियमाणः काश्चनदेवता उद्दिश्य
:। कर्मणि तृतीया। सस्नुः स्नानं

भिरतिदेशप्रासाङ्गाः सौर्यसत्रादयो
भगवन्तम् ईजे ॥५१-५२॥ सस्नुः

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवम् इन्द्रवरुणादिसाधारण्योऽस्य यज्ञ इति साधारण्यं निरूप्य सर्वतो विशेषमाह–तदा रामश्च कृष्णश्चेति। तत्तत्सम्बन्धिनो बव इति चकारद्वयं स्वैः स्वैर्बन्धुभिः अन्विताः सुताः दाराश्च तैः सहितौ रामकृष्णौ एको जीवः अपरः ईशः उभौ जीवानां नियन्तारौ पूर्वोक्ताः दारादयो विभूतिरूपाः अथवा भिन्नाः विभूतयः तामस्यः सात्त्विक्यश्चेति ॥५०॥ एवं सम्भ्रममुक्त्वा एवम्प्रकारेण बहवो यज्ञाः कृता इत्याह–ईजेऽनुयज्ञमिति। अनुयज्ञं विधिना ईजे। अग्निहोत्रादिनामान्येव लक्षणानि येषां प्राकृतमग्निहोत्रं प्रसिद्धं वैकृतं तु कुण्डपायनामयनस्थं पयसाऽग्निहोत्रं द्रव्यान्तराग्निहोत्रं वा तथैव सर्वा इष्टयः दर्शपूर्णमासव्यतिरिक्ताः पशवो वैकृताः एवं सोमेष्वपि सर्वत्र प्रकृतिविकृतिभावोऽस्ति। सर्वैरपि यज्ञैः भगवन्तमीजे। तत्र हेतुः–द्रव्यमाधिभौतिकं ज्ञानमाधिदैविकं क्रिया आध्यात्मिकी। एतत्त्रितयस्यापीश्वरो भगवान् अत एव तत्त्रितये भगवानेव पूज्यतेति युक्तम्। अनेन सामान्ययज्ञा एव तेन कृताः न तु प्रसिद्धा राजसूयादय इति निरूपितम् ॥५१॥ ततो दक्षिणामाह–अथर्त्विग्भ्य इति। दक्षिणादानमुत्कर्षहेतुरिति लोकप्रसिद्धत्वात् पुनरुच्यते। काले तत्तदवसरे यथाऽऽम्नातं यथोदितं स्वलंकृतेभ्य इति पूर्वं यज्ञार्थमलंकृता अपि पुनर्दक्षिणाङ्गत्वेन अलंकृताः ऋत्विग्भूमिर्दक्षिणात्वेनोक्ता। उर्वरा प्रतिष्ठिताय देयेति तथा दैवविवाहे ऋत्विजे कर्मकुर्वत इति महाधनाः अन्याः काश्चन दक्षिणाः ततः पूर्ववत् पृथक् पत्नीसंयाजावभृथ्यकर्मणां करणं महर्षयः कारयन्तीति न क्वाप्यनुशयः ततोऽवभृथस्नानं रामह्रदेष्वेव कृतवन्तः सिद्धार्थत्वात् यजमानः पुरःसरो येषाम् ॥५२-५३॥

श्रीसुबोधिनीसारः

तस्मिन् समये स्वैः स्वैर्बन्धुभिर्युक्तो रामः कृष्णश्च द्वौ स्वपुत्रैः स्त्रीभिः शुशुभाते स्वविभूतिभिः जीवेश्वराविव ॥५०॥ अनुयज्ञं प्रतियज्ञं विधिना वेदोक्तमार्गेण ईजे अग्निहोत्रादिलक्षणैः प्राकृतैर्ज्योतिष्टोमादिभिः वैकृतैः सौरसत्रादिभिर्यज्ञैः द्रव्यं पुरोडाशादि ज्ञानं मन्त्रः क्रिया कर्म तेषामीश्वरम् ॥५१॥ अथानन्तरं काले समये यथाशास्त्रं स्वलंकृतेभ्य ऋत्विग्भ्यो विप्रेभ्यो गोभूकन्यामहाधनानि यासु ता दक्षिणा अददात् स वसुदेवः ॥५२॥ पत्नीसंयाजोऽवभृथ्यश्च यागविशेषौ अवान्तरकर्माभिप्रायेण बहुवचनं तैः चरित्वाऽनुष्ठानं चरित्वा ते महर्षयो विप्रा यजमानो वसुदेवः पुरःसरोऽग्रेचरो येषां ते रामह्रदे स्नानं चक्रुः ॥५३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदा स्वैः स्वैर्बन्धुभिः तथा स्वविभूतिभिः स्वांशभूतैः सुतादिभिश्च अन्वितौ जीवानामीशौ रामकृष्णौ च रेजतुरित्यन्वयः ॥५०॥ आम्नाताः सर्वाङ्गाः प्राकृताः ज्योतिष्टोमदर्शपूर्णमासादयः तेभ्यश्चोदनालिङ्गादिभिरतिदेशप्रासाङ्गाः, वैकृताः सौरसत्रादयस्तैः सर्वैर्वाग्निहोत्रादिनामकैश्च द्रव्यज्ञानक्रियेश्वरं भूतपञ्चकज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकनिर्वाहकं भगवन्तं विधिना अनुयज्ञं प्रतियज्ञमीजे इज्यानित्यन्वयः ॥५१॥ अथानन्तरं स वसुदेवः काले तदवसरे स्वलंकृतेभ्योऽपि ऋत्विग्भ्यः स्वयमप्यलंकृत्य यथाम्नातं यथोक्तं दक्षिणाः तथा महान्ति धनानि यासु ताः स्वलंकृता गोभूकन्याश्चाददादित्यन्वयः ॥५२॥ पत्नीसंयाजा आवभृथ्याश्च यागविशेषास्तैश्चरित्वा अनुष्ठाय ते महर्षयः ऋत्विजो यजमानः पुरःसरो येषां ते विप्रा रामह्रदे परशुरामनिर्मिते ह्रदे सस्नुः ॥५३॥

अन्वितार्थप्रकाशिका

तदेति। तदा स्वैः स्वैर्बन्धुभिः तथा स्वविभूतिभिः स्वांशभूतैः सुतैर्दारैश्च अन्वितौ जीवानामीशौ रामकृष्णौ च रेजतुः ॥५०॥ ईजे इति। आम्नातसर्वाङ्गाः प्राकृताः ज्योतिष्टोमदर्शपूर्णमासादयस्तेभ्यश्चोदनालिङ्गादिभिः प्रकृतिवद्विकृतिः कर्तव्येति अतिदेशप्रासाङ्गाः वैकृताः सौरसत्रादयस्तैः सर्वैरेवाग्निहोत्रादिनामकैश्च द्रव्यं पुरोडाशादि ज्ञानं मन्त्रः क्रिया कर्म तेषामीश्वरं भगवन्तं विधिना अनुयज्ञं प्रतियज्ञमीजे इष्टवान् ॥५१॥ अथेति। अथ स वसुदेवः काले तदवसरे स्वलंकृतेभ्योऽपि ऋत्विग्भ्यः स्वयमप्यलंकृत्य यथाम्नातं यथोक्तं दक्षिणाः तथा महान्ति धनानि यासु ताः स्वलंकृता गोभूकन्याश्चाददात् ॥५२॥ पत्नीति। पत्नीसंयाजो यागविशेषश्च आवभृथ्यान्यवभृथकृत्यानि तैश्चरित्वा तान्यनुष्ठाय ते महर्षयः ऋत्विजो यजमानः पुरःसरो येषां ते विप्रा रामह्रदे परशुरामनिर्मिते ह्रदे सस्नुः ॥५३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जीवेशौ जीवानां ब्रह्मादिक्षेत्रज्ञानाम् ईशौ नियामकौ ॥५०॥ विधिना कृतैः अग्निहोत्रादिलक्षणैः ज्योतिष्टोमदर्शपूर्णमासादिभिः प्राकृतैः आम्नातसमग्राङ्गैर्यज्ञैः तेभ्योऽन्यैः वैकृतैः सौर्यसत्रादिभिः एवं नानाविधयज्ञभेदैः द्रव्यं हविश्च ज्ञानं मन्त्रजपविधिवेदनं च क्रिया कर्तव्यं कर्म च तेषामीश्वरं पतिं नारायणम् अनुयज्ञं यज्ञं प्रति ईजे ॥५१॥ यथाम्नातं यथा शास्त्रप्रोक्तम् ॥५२॥ महर्षयः पत्नीसंयाजावभृथ्यैः पत्नीसंयाजो यागविशेषश्च आवभृथ्यानि अवभृथसम्बन्धीष्टयश्च तैः वसुदेवं चरित्वा तानि कारयित्वेत्यर्थः सस्नुः अवभृथसंज्ञं स्नानं चक्रुः ॥५३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेति ॥ तदा देवेशौ ब्रह्मादिदेवानामपीश्वरौ रामः कृष्णश्च स्वैः दारैः स्वविभूतिभिः स्वविभूतिरूपैः स्वैः बन्धुभिः स्वसुतैश्च अन्वितौ सहितौ सन्तौ रेजतुः । जीवेशाविति पाठे जीवानामीशावीश्वरावित्यर्थः । देवेशैः स्वविभूतिभिरिति पाठे स्वविभूतिभूतैः देवेशैः देवश्रेष्ठांशसम्भूतैरिति सुतविशेषणम् ॥५०॥ ईज इति ॥ वसुदेवः अनुयज्ञं प्रतियज्ञं विधिना द्रव्यज्ञानक्रियेशं भूतपञ्चकज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकनिर्वाहकम् । यद्वा । द्रव्यं पुरोडाशादि । ज्ञानं मन्त्रः । क्रिया कर्म, तेषामीश्वरं प्राकृतैः आम्नातसर्वाङ्गाः इष्टिदर्शपूर्णमासादयस्तैः वैकृतास्तेभ्यश्चोदनालिङ्गादिभिरतिदेशं प्राप्ताङ्गा ज्योतिष्टोमसौरसत्रादयस्तैः अग्निहोत्रादिलक्षणैः सर्वैरग्निहोत्रादिनामभाग्भिश्च यज्ञैः ईजे सम्यगिष्टवान् ॥५१॥ अथेति ॥ अथ महामनाः स वसुदेवः काले यथाम्नातं यथोक्तं स्वलंकृतेभ्यः ऋत्विग्भ्यः दक्षिणाः अदात् । अलंकृत्य गोभूकन्याश्च अददात् ॥५२॥ पत्नीति ॥ पत्नीसंयाजः पत्नीभिः क्रियमाणं देवता उद्दिश्य यजनं च अवभृथः कर्मसमाप्तिश्च तयोर्भवा इष्टिविशेषाः पत्नीसंयाजावभृथ्यास्तैः चरित्वा तान्कृत्वेत्यर्थः । ते महर्षयः विप्राः यजमानपुरःसराः सन्तः रामह्रदे परशुरामनिर्मिते ह्रदे सस्नुः स्नानं चक्रुः ॥५३॥

कृष्णप्रिया

उस मंगल उत्सव समय पर भगवान द्वारिकाधीश एवं श्रीबलभद्रजी अपने अपने भाई बन्धुजन सभी पु परिवार के साथ इस प्रकार सुशोभित बने से अपनी दिव्य शक्योंसे भगवान और संकर्ण अपने दिव्य स्वरूपमें शोभित होते है ॥५०॥ विवेकशील श्रीवसुदेवजीने समस्त यज्ञोमें ज्योतिष्टोम दर्शपूर्णमास आदि अग्निहोत्रमें प्राकृत यज्ञ सौरसत्रादि वैकृत यज्ञ एवं अन्यान्य यज्ञोंके द्वारा द्रव्य क्रिया एव क्रिया ज्ञानके मन्त्रोके अधिष्ठाता भगवान् विष्णु का आराधन किया ॥५१॥ परमोदार श्रीवसुदेवजीने यज्ञोमें योग्य समयपर ऋत्विवोंको वस्त्राभूषणादि से सम्मानित किया और शास्त्रानुसार बहुतसी दक्षी एवं प्रचुर द्रव्य के साथ समलंकृत गौए भूमि एवं दिव्य कन्याऐं समर्पित की ॥५२॥ इन सब कार्य समाप्त होने के पश्चात पत्नी संयाज नामे यज्ञांग एवं अवभृथ नामक यज्ञान्त स्नान विषयक अविशिष्ट कर्म कराकर महात्मा वसुदेवजी को अग्रसर करके महाराज श्रीपरशुरामजीने निर्मित किये हृदयसे रामहृदमें महर्षियोंने स्नान किया ॥५३॥

[1]नानाऽलङ्कारवासांसि वन्दिभ्योऽदात्तथा स्त्रियः । ततः स्वलङ्कृतो वर्णानाश्वभ्योऽन्नेन पूजयत् ॥५
बन्धून् सदारान् ससुतान् पारिबर्हेण भूयसा । विदर्भकोसलकुरून् काशिकेकयसृंजयान् ॥५
सदस्यर्त्विक्सुरगणान्[2] नृभूतपितृचारणान् । श्रीनिकेतमनुज्ञाप्य शंसन्तः प्रययुः क्रतुम् ॥५
धृतराष्ट्रोऽनुजः[3] पार्था भोष्मो द्रोणः पृथा यमौ । नारदो भगवान् व्यासः सुहृत्सम्बन्धिबान्धवाः ॥५

---

१. स्नानालङ्कर वीर. ; स्नातोऽलङ्कार-श्रीधर. वंशी. विज. ।

२. गणा नृभुतपितृचारणाः-वीर. विज. ।

३. नुजो द्रोणि भीष्मो द्रोणिः कृपस्तथा-विज. ।

कर्दमक्षमा

स्नातः, स्वलडकृतः, वसुदेवः, तथा, स्त्रियः, बन्दिभ्यः, वर्णान्, आश्वभ्यः, नाना, अलङ्कारवासांसि, अदात्, तथा, अन्नेन, अपूजयत् ॥५४॥ विदर्भकोसलान्, कुरून्, काशिकेकयसृंजयान्, बन्धून्, सदारान्, ससुतान्, सदस्यर्त्विक्सुरगणान्, नृभूतपितृचारणान्, नृपसा, पारिबर्हेण, अपूजयत्, ते, श्रीनिकेतम्, अनुज्ञाप्य, क्रतुम्, शंसन्तः, प्रययुः ॥५५-५६॥ धृतराष्ट्रः, अनुजः(विदुरः), पार्थाः, भीष्मः, द्रोणः, पृथा, यमौ(नकुलसहदेवौ), नारदः, भगवान्, व्यासः, सुहृत्सम्बन्धिबान्धवाः, बन्धून्, यदून्, परिष्वज्य, सौहृदाक्लिन्नचेतसः, विरहकृच्छ्रेण, स्वदेशान्, ययुः, अपरे, जनाः, अपि, ययुः ॥५७-५८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आश्वभ्यः शुनोऽभिव्याप्य अन्नेन पूजयदपूजयत् ॥५४॥ बन्ध्वादिचारणान्तान् पारिबर्हेण प्रीतिदानेन चापूजयत् ते च सर्वे प्रययुः ॥५५-५६॥ प्रयाणे केषाञ्चिद्विशेषमाह-धृतराष्ट इति द्वाभ्याम् । अनुजो विदुरः पार्था युधिष्ठिरभीमार्जुनाः यमौ नकुलसहदेवौ ॥५७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यथा स ददौ तथा स्त्रियोऽपि ददुरित्यर्थः । ततः स्नानोत्तरम् ॥५४॥ पारिबर्हेण पूजाद्रव्येण बन्ध्वादींश्चाऽपूजयदिति शेषः ॥५५॥ ते च बन्ध्वादयः ॥५६-५७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नानेत्यर्धकम् । स्नात इति क्वचित्तथा स्त्रियस्तस्य महिष्योऽप्यदुः । ततः इति युग्मकम् । वर्णानपूजयत् । अन्यांश्च अन्त्यपर्यन्तानित्यर्थः ॥५४॥ बन्धून् यादवादीन् विदर्भादींश्च तत्तद्देशनृपादीन् ॥५५॥ नरोऽन्ये सर्वे मनुष्याः भूतादयश्च तान् तत्र भूताः प्रमथाः सुरगणानिति भूतादीनित्यनेन साक्षात्ते तत्रागता इति ज्ञेयम् । श्रीत्यर्धकम् । श्रीनिकेतमिति । तद्यज्ञेनानायासेन सर्वाङ्गपूर्णतादिना केवलतत्सौन्दर्यादिना च सर्वेषां सन्तोषोत्पत्तिः सूचिता ॥५६॥ धृतेति युग्मकम् । सुहृदादयोऽन्ये च । विरहात् कृच्छ्रं दुःखं तेनैवोपलक्षिता ययुः । अपरेऽप्युदासीनाः ॥५७-५८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बन्धूनेवाह-विदर्भेति । यद्वा । बन्धून् यादवान् विदर्भादींश्च तत्तद्देशनृपादीन् नरा अन्येऽपि सर्वे मनुष्या भूतादयश्च तान् । तत्र भूताः प्रमथाः सुरगणानिति भूतादीनित्यनेन साक्षात्ते तत्रागता इति ज्ञेयम् । श्रीनिकेतं श्रीकृष्णमिति तद्यज्ञेऽनायासेन सर्वाङ्गपूर्णतादिना सर्वेषां सन्तोषत्पत्तिः सूचिता ॥५५-५६॥ भगवानिति । भगवदवतारत्वात् तच्च परमगुरुत्वपितृत्वाभ्यां अत्रापि विशेषणम् । सुहृदादयोऽन्ये च । सौहृदाक्लिन्नचेतस्त्वे हेतुः-बन्धूनिति । तत्रापि यदून् विरहाद्यत् कृच्छ्रं दुःखं तेनैव ययुः अपरे चोदासीनाः ॥५७-५८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥५१-६१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स्नानेति । स्नानादीनि ददौ स्नापयामास । तेभ्योऽलङ्कारवासांसि च ददौ इत्यर्थः । तत्र स्त्रियश्च सस्नुः सुष्ठ्वलंकृताश्चेति सस्नुः । आश्वभ्यः शुनोऽभिव्याप्य सर्वान् वर्णान् अन्नेन पूजयत् अपूजयत् । अडभाव आर्षः । आगमशास्त्रस्यानित्यत्वाद्वा बन्ध्वादीन् पारिबर्हेण बहुमानार्थदेयद्रव्येण पूजयदिति सम्बन्धः ॥५५॥ सदस्येति । सदस्यादयः श्रीनिकेतं कृष्णमनुज्ञाप्यानुज्ञां प्रशंसन्तो ययुः ॥५६॥ धृतराष्ट्र इति । अनुजो विदुरः पृथा कुन्ती यमौ नकुलसहदेवौ सुहृदश्च सम्बन्धिनश्च बान्धवाश्च ते सौहृदेन क्लिन्नमार्द्रं चेतो येषां ते विरहकृच्छ्रेण विश्लेषयुक्तक्लेशेन उपलक्षिताः ययुः तथा अपरे जनाश्च ययुः ॥५७-५८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥३८-६५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

॥४१-६८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥४२-६८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्नातो वसुदेवः तस्य स्त्रियश्चादुः आश्वभ्यः शुनोऽभिव्याप्य अन्नेन पूजयत् अपूजयत् ॥५४॥ पारिबर्हेण प्रीतिदानेन च ॥५५॥ ते च सर्वे प्रययुः ॥५६॥ अनुजो विदुरः ॥५७-५८॥

गूढार्थदीपिनी

स्नात इत्यर्धम् । स्नातो वसुदेवः अदात् तथा तस्य स्त्रियोऽपि अदुरिति योज्यम् ॥५४॥ तत इति सार्धयुग्मम् । ततः स्नानोत्तरम् । आश्वभ्यः शुनः अभिव्याप्य सर्वानेव वर्णान् पूजयत् अपूजयत् । भूयसा पारिबर्हेण पूजाद्रव्येण च बन्ध्वादीं चारणान्तान् अपूजयदिति शेषः । ते च सर्वे श्रीकृष्णमनुज्ञाप्य पृष्ट्वा क्रतुं प्रशंसन्तः स्वाश्रमान् प्रययुरित्यन्वयः ॥५५-५६॥ धृतराष्ट्रादयः तथा अपरे जनाः अपि बन्धून् परिष्वज्य स्वदेशान् प्रययुरिति योज्यम् । अनुजो विदुरः । यमौ नकुलसहदेवौ । सौहार्देन क्लिन्नमार्द्रं चेतो येषां तान् ॥५७-५८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

बन्ध्वादीन् चारणान्तान् पारिबर्हेण प्रीतिदानेन अपूजयत् ॥५५-५६॥ विदुरः यमौ माद्रेयौ ॥५७-५८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स्नानोत्सवमाह–नानलङ्कारवासांसीति । अदाद्यजमानः तत्स्त्रियोऽपि तत अवभृथादुत्तीर्य स्वयं स्वलंकृतः सन् सर्वानेवापूजयत् आश्वभ्यः अन्नेन पूजयन् । बन्धूंश्च पारिबर्हेण बन्धून् गणयति विदर्भेति तथा सदस्यर्त्विक्सुरगणानित्यपूजयदिति पूर्वेणैव सम्बन्धः । अन्नैरपूजयदिति पाठः अग्रिमटीका ततस्ते श्रीनिकेतं भगवन्तम् अनुज्ञाप्य क्रतुं शंसन्तः प्रययुरिति प्रत्यापत्तिर्निरूपिता ॥५५-५६॥ साधारणानां गमनमुक्त्वा प्रसिद्धानामाह–धृतराष्ट्रेति । अनुजो विदुरः पार्थाः पाण्डवाः यमौ नकुलसहदेवौ एते क्षत्रियाः सम्बन्धिनः ततो देवऋष्यादीन् सम्बन्धिनः आह–नारदो भगवान् व्यास इति । सर्वे एव यदून् परिपूज्य स्नेहेन क्लिन्नहृदयाः स्वस्वदेशान् ययुः विरहक्लेशेन सहिता एव ॥५७-५८॥

श्रीसुबोधिनीसारः

स्नातो वसुदेवो बन्दिभ्यो भूषणानि वस्त्राणि अदात् । तथा स्त्रियः स्त्रीः स्वलंकृतो वर्णान् आश्वप चाण्डालमारभ्यान्नेनापूजयत् । आर्षोऽट्लोपः ॥५४॥ सस्त्रीकान् सपुत्रान् बन्धून् भूयसा पारिबर्हेण बहुनोपस्करादिनाऽपूजयत् विदर्भादीन् सदस्यर्त्विक्सुरगणैः सहितान् नृभूतादीन् अपूजयत् । श्रीनिकेतं कृष्णमनुज्ञाप्य क्रतुं यज्ञं संशन्तः प्रययुः स्वगृ ॥५५-५६॥ धृतराष्ट्रोऽनुजो विदुरः पार्था भीष्मादयो नारदव्यासादयश्च बन्धून् यदून् आलिङ्ग्य सौहृदेनाऽऽक्लिन्नानि चेतांसि ये ते वियोगकष्टेन ययुः । अपरे जनाश्च स्वदेशान् जग्मुः ॥५७-५८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्नातो वसुदेवो बन्दिभ्योऽलङ्कारवासांस्यदात् । तथा तस्य स्त्रियोऽपि स्नाता वस्त्रादिकं तेभ्यो ददुः । ततः स्वलंकृ

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कृतः आ श्वभ्यः शुनोऽभिव्याप्य सर्वानेव वर्णानन्नेनापूजयत्, अडभाव आर्षः ॥५४॥ बन्ध्वादीन् भूयसा पारिबर्हेण सन्मानार्थं बहुद्रव्येण अपूजयत् ॥५५॥ ततश्च सदस्यादयः श्रीनिकेतं लक्ष्मीपतिं श्रीकृष्णमनुज्ञाप्य तदनुज्ञां पृष्ट्वा क्रतुं भगवन्तं प्रशंसन्तो शीघ्रं स्वाश्रमान् ययुः ॥५६॥ प्रयाणे केषाञ्चिद्विशेषमाह-धृतराष्ट्र इति । अनुजो विदुरः । पार्था युधिष्ठिरभीमार्जुनाः । पृथा न्ती । यमौ नकुलसहदेवौ । सुहृदो मित्राणि । सम्बन्धिनो मातुलश्वशुरादयो विवाहादिना सम्बद्धाः । बान्धवाः गोत्रिणः ॥५७॥

अन्वितार्थप्रकाशिका

स्नात इति अर्धम् । स्नातो वसुदेवो बन्दिभ्योऽलङ्कारवासांस्यदात् तथा तस्य स्त्रियोऽपि स्नाता वस्त्रादिकं तेभ्यो ददुः ५४॥ तत इति सार्धयुग्मम् । ततः स्वलंकृतो वसुदेवः शुनोऽभिव्याप्य सर्वानेव वर्णानन्नेन पूजयत् अपूजयत् । अडभाव आर्षः । सदारान् ससुतान् बन्धून् विदर्भादीन् चारणान्तान् भूयसा पारिबर्हेण सम्मानार्थं देयबहुद्रव्येण अपूजयत् । ते च सर्वे श्रीनिकेतं मीपतिं श्रीकृष्णमनुज्ञाप्य तदनुज्ञां पृष्ट्वा क्रतुं भगवन्तं च प्रशंसन्तो द्रुतं शीघ्रं स्वाश्रमान् ययुः ॥५५-५६॥ धृतराष्ट्र इति । अनुजो विदुरः पार्था युधिष्ठिरभीमार्जुनाः पृथा कुन्ती यमौ नकुलसहदेवौ सुहृदो मित्राणि सम्बन्धिनो मातुलश्वशुरादयो विवाहादिना सम्बद्धाः बान्धवाः गोत्रिणः एतेऽपि ययुः । स्पष्टाः शेषाः ॥५७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आश्वभ्यो ग्रामसिंहान् अभिव्याप्य अन्नेन पूजयत् अपूजयत् । अडागमानाभाव आर्षः ॥५४॥ बन्धुप्रभृतीन् चारणान्तान् सा पारिबर्हेण चापूजयत् ततस्ते च श्रीनिकेतमनुज्ञाप्य श्रीकृष्णाज्ञां गृहीत्वेत्यर्थः प्रययुः ॥५५-५६॥ अनुजो विदुरः पार्था ष्ठिरादयस्त्रयः यमौ माद्रीसुतौ नकुलसहदेवौ ॥५७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्नात इति ॥ एवं स्नातः स वसुदेवः बन्दिभ्यः अलङ्कारवासांसि स्नानीयालङ्कारवसनानि अदात् । तदा स्त्रियश्च ददुः । ततः लंकृतः सन् ताश्च स्वलंकृताः सत्यः आश्वभ्यः शुनोऽभिव्याप्य वर्णान् सर्ववर्णान् अन्नेन पूजयत् अपूजयत् । अडभाव आर्षः । लस्यानित्यत्वाद्वा ॥५४॥ बन्धूनिति ॥ ततः सदारान् ससुतान् विदर्भकोसलकुरून् काशिकैकयसृंजयान् बन्धून् भूयसा पारिबर्हेण अपूजयत् ॥५५॥ सदस्येति ॥ सदस्याश्च ऋत्विजश्च सुरगणाश्च तान् नृभूतपितृचारणान् अपि अपूजयत् । ते च सर्वे निकेतं श्रीकृष्णम् अनुज्ञाप्याज्ञां पृष्ट्वा क्रतुं शंसन्तः सन्तः प्रययुः ॥५६॥ धृतराष्ट्र इति ॥ धृतराष्ट्रः अनुजो विदुरः पार्था ष्ठिरादयः भीष्मः द्रोणः पृथा यमौ सहदेवनकुलौ नारदः भगवान् व्यासः सुहृदश्च सम्बन्धिनश्च बान्धवाश्च ते ॥५७॥

कृष्णप्रिया

यज्ञान्त स्नान विधि सम्पूर्ण करके महात्मा श्रीवसुदेवजी एवं उनकी अर्धांगनाओंने बन्दीजनोंको अपने धारण किये हुए समग्र वस्त्रालंकर समर्पित किये, और स्वयंनूतन वस्त्रालंकारादिसे समलंकृत होकर विप्रोंसे लेकर न चाण्डाल पर्यन्त समग्र समाजको भोजन कराया ॥५४॥ समस्त समाजके भोजनादिसे सत्कार करनेके बाद अपने बन्धुजन उनकी अर्धांगना संतान तथा विदर्भ कौशल कुरु वाराणसी केलय एवं सृंजय आदि देशो कें प्रकृतियाँ सदस्यो ऋत्विजों देवताओ मनुष्यों पितृओं भूतो चारणोंको उपहार के रूपमें विविध प्रकारकी भेंट देकर स्नेह से बहुत सन्मान किया । आगन्तुक एवं आमन्त्रित वे लोक द्वारिकाधीभ भगवान श्रीकृष्णकी अनुज्ञा प्राप्त उनकी यशोगाथा गाते अपने अपने घर चले गए ॥५५-५६॥ राजन् ! उस अवसर महाराज धृतराष्ट्र विदुरजी भीमसेन अर्जुन श्रीभीष्म पितामह द्रोणाचार्य श्रीकुन्तिजी नकुल सहदेवजी नारदजी महामुनि व्यासजी

कृष्णप्रिया

और अन्य आप्तजन स्वजन स्नेही सम्बधीजन बन्धुजन आप्तजन हितैषी सज्जन यादवों को छोडकर जानें अतिशय विरह व्था का अनुभव करने लगे। विदाय वेला उन पुण्य जनोंने अतिशय स्नेहार्द चित्तसे याद स्वजनोंका आलिंगन किया । पुनः मनको मनकर अति कठीनाइसे वियोग वेदना का अनुभव करते अपने अपने देश पधारे ॥५७-५९॥

बन्धून् परिष्वज्य यदून् सौहृदा [1]क्लिन्नचेतसः । ययुर्विरहकृच्छ्रेण [2]स्वदेशांश्चापरे जनाः ॥५८॥
[3]नन्दस्तु सह गोपालैर्बृहत्या[4] पूजयार्चितः । कृष्णरामोग्रसेनाद्यैर्न्यवात्सीद्बन्धुवत्सलः ॥५९॥
वसुदेवोऽञ्जसोत्तीर्य मनोरथमहार्णवम् । सुहृद्वृतः प्रीतमना नन्दमाह करे स्पृशन् ॥६०॥

कर्दमक्षमा

बन्धुवत्सलः, नन्दः, तु, गोपालैः, बृहत्या, पूजया, अर्चितः, कृष्णरामोग्रसेनाद्यैः, सह, न्यवात्सीत् ॥५९॥ मनोरथमहार्णवम्, अंजसा, उत्तीर्य, सुहृद्वृतः, प्रीतमनाः, वसुदेवः, करे, स्पृशन्, नन्दम्, आह ॥६०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सौहृदेनाऽऽक्लिन्नानि चेतांसि येषां ते ॥५८-५९॥ मनोरथो यज्ञविषयस्तमेव महार्णवम् ॥६०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आक्लिन्नान्यार्द्राणि ॥५८॥ न्यवात्सीत् उवास ॥५९-६०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवं तेषां सर्वेषां श्रीभगवता प्रस्थापनं व्रजजनैः सहासङ्कोचेन चिरं तत्र निवासाभिप्रायमिति सूचयन्नाह-नन्द इति। तु-शब्दः सर्वतो विशेषात्। अत एव महत्या पूजया अर्चितश्च न्यवात्सीच्च। बृहत्येति क्वचित् यतः बन्धुभ्यः श्रीवसुदेवादिभ्यः श्रीकृष्णरामयोर्वत्सलः आद्यशब्दाद्वसुदेवादयः तत्र श्रीवसुदेवस्य साक्षादनुक्तिर्यज्ञाङ्गत्वेन पूर्वमेव कृतपूजाविशेषत्वात् ॥५९॥ कंसवधमारभ्य श्रीवसुदेवस्य मनोरथश्चायं श्रीकृष्णरामसाहित्येन श्रीनन्दादिभिर्व्रजजनैः सङ्गत्य क्वचित्स्थाने सर्वेषां बन्धूनां मुनीनां नृपादीनां च साक्षान्महोत्सवः क्रियेतेति स एव महार्णवः दुर्घटत्वात् तमंजसा अनायासेनोत्तीर्य प्रीतमनाः सन् दिनान्तरे सुहृद्भिः सर्वैर्भ्रातृपुत्रादिभिः सहितो भूत्वा तन्निवासं गतः सन्निति करे स्पृशन् आभिमुख्येनैकासन उपविश्य स्नेहेन तत्करं गृहीत्वेत्यर्थः। एषा च परिपाटी प्रायस्तस्य श्रीकृष्णवियोगदुःखसान्त्वनायेति ज्ञेयम् ॥६०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं तेषां सर्वेषां प्रस्थापनं व्रजजनैः सहासङ्कोचेन चिरं तत्र स्थातुमिति भगवदतिप्रायं सूचयन्नाह-नन्द इति। तु-शब्दः सर्वतो विशेषात्। तमेवाह-महत्येत्यादिना ('बृहतीत्यादिना' इति पाठान्तरम्) कृष्णादिभिरर्चितः तत्र चिरं सहनिवासार्थं सम्मानितः सन्। यद्वा। प्रस्थापनौचित्येनार्चितोऽपि नितरां दार्ढ्येनावात्सीत्। यतो बन्धुषु श्रीकृष्णरामादिषु । यद्वा। बन्धुभ्यः श्रीवसुदेवादिभ्यः श्रीकृष्णरामयोर्वत्सलः कृष्णादीनां यथापूर्वमर्चने श्रैष्ठ्यम् आद्यशब्दात् वसुदेवाक्रूरोद्धवादयः सर्वे यादवाः। तत्र श्रीनन्दप्रियसखस्य श्रीवसुदेवस्य साक्षादनुक्तिर्वक्ष्यमाणतत्प्रणयोक्त्याऽग्रे तेन तत्समानानस्याभिव्यक्तेर्भावित्वात्। यद्वा। सख्यविशेषेण तस्य तात्पर्याभावादिति ॥५९॥ मनोरथः श्रीकृष्णरामसाहित्येन श्रीनन्दादिभिर्व्रजजनैः सङ्गत्य क्वचित्संस्थाने सर्वेषां बन्धूनां मुनीनां

---

१. दात्-च पु. ; गो. प्रे. मुल । २. शानपरे-गो. प्रे. टी. । ३. नन्दश्च-गो. प्रे. टी. । ४. महत्या-इति पाठः।

व्यासादीनां नृपादीनां च स
प्रीतमनाः सन् सुहृद्भिर्वृत इति
स्नेहेन श्रीनन्दकरं शनैर्गृहीत्वे

नन्दस्त्विति । बृहत्या
॥५९॥ वसुदेव इति मनोरथः य

तु-शब्देन सर्वतोऽपि वि
मनोरथो यज्ञविषयकस्तं महार्णवम्

कृष्णादिभिः अर्चितः नन

नन्दस्त्विति । तुशब्दो नन्द
अंजसा सुखेन उत्तीर्य निस्तीर्य ॥६०॥

एवं सर्वेषां गमनमुक्त्वा न
कृत्वा नन्दं प्रेषयित्वा भगवन्तं स्थापि
यज्ञानन्तरं गोपालैः सहितः बृहत्या पूज
बन्धुवत्सलान्न वैषम्यम् ॥५९॥ ततः स
महानेवार्णवः विघ्ननक्रसम्भवात् । त
अभिलषितं स करिष्यतीति सूचितम् ।

गोपालैः सह बृहत्या पूजय
॥५९॥ मनोरथो यज्ञरूप एव महार्णवः
स्पृशन् सन् नन्दमाह ॥६०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

[illegible] नृपादीनां च साक्षान्महोत्सव एकः क्रियेतेति तद्विषयकः स एव महार्णवो दुर्घटत्वात् । तमंजसाऽनायासेनोत्तीर्य [illegible] सन् सुहृद्भिर्वृत इति सर्वेषां यादवानां सम्मत्येत्यर्थः । यद्वा । सुहृद्वृतोऽपि श्रीनन्दापेक्षाया सुहृत्त्वेनताननपेक्ष्येति करे स्पृशन् [illegible] श्रीनन्दकरं शनैर्गृहीत्वेत्यर्थः ॥६०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥५१-६१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

नन्दस्त्विति । बृहत्या महत्या पूजया समर्चितः गोपैः सह न्यवात्सीदुषितवान् तत्र हेतुत्वेन विशिनष्टि-बन्धुवत्सल इति [illegible] वसुदेव इति मनोरथः यज्ञविषयः स एव महार्णवः तमंजसा सुखेन उत्तीर्य निस्तीर्य ॥६०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥३८-६५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥४१-६८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥४२-६८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तु-शब्देन सर्वतोऽपि विशेषतः पार्थादिपूजातोऽपि बृहत्या पूजया तान् सर्वान् प्रस्थाप्यापि तस्य चिरमप्रस्थापनात् ॥५९॥ [illegible] यज्ञविषयकस्तं महार्णवम् उत्तीर्य तत्सर्वसम्पूर्णतालाभेनेति भावः ॥६०॥

गूढार्थदीपिनी

कृष्णादिभिः अर्चितः नन्दस्तु तत्रैव न्यवात्सीत् यतो बन्धुषु वत्सलः स्नेहवान् ॥५९॥ अजसा अनायासेन ॥६०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नन्दस्त्विति । तुशब्दो नन्दस्यादरणीयत्वे विशेषं दर्शयति बृहत्येत्यादिना ॥५९॥ मनोरथो यज्ञविषयकः स एव महार्णवस्तम् [illegible] सुखेन उत्तीर्य निस्तीर्य ॥६०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं सर्वेषां गमनमुक्त्वा नन्दस्य भगवद्विरहात् आगमनं भगवता सह गमनं भविष्यतीति शङ्कायां वसुदेवो मनोमार्जनं [illegible] नन्दं प्रेषयित्वा भगवन्तं स्थापितवानिति वक्तुं तत्संवादो निरूप्यते, आदौ नन्दस्य स्वतो गमनाभावमाह-नन्दस्त्विति । [illegible] गोपालैः सहितः बृहत्या पूजया अर्चितः प्रथमत एव वा ततः कृष्णरामोग्रसेनाद्यैः सहावात्सीत् यादववत् । सोऽप्येकः [illegible] वैषम्यम् ॥५९॥ ततः संवादार्थं प्रसङ्गमाह-वसुदेवोऽञ्जसोत्तीर्येति । मनोरथ एव यज्ञः कथं भविष्यतीति यज्ञरूपः [illegible] विघ्ननक्रसम्भवात् । ततः सुहृद्भिर्वृतः प्रीतमनाः सन् करे स्पृशन्नन्दमाह-हस्तस्पर्शेन स्वधर्मः तत्रारोपितः तेन [illegible] स करिष्यतीति सूचितम् ॥६०॥

श्रीसुबोधिनीसारः

गोपालैः सह बृहत्या पूजया पूजितो नन्दस्तु बन्धुषु वत्सलः कृपालुः कृष्णरामोग्रसेनाद्यैः सह तत्रावात्सीत् [illegible] मनोरथो यज्ञरूप एव महार्णवः समुद्रस्तमंजसा सुखेनोत्तीर्य सुहृद्भिर्वृतो युक्तो वसुदेवः प्रीतमनाः प्रसन्नचित्तः करे [illegible] सन् नन्दमाह ॥६०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सौहृदेन स्नेहेन आक्लिन्नं चेतो येषां ते बन्धून् यदून् परिष्वज्य विरहकृच्छ्रेण स्वदेशं ययुः । तथापरे च जनाः ययुः कृष्णादिभिः बृहत्या महत्या पूजया अन्नवस्त्राद्यपेक्षितया समृद्ध्या अर्चितः सत्कृतः नन्दः गोपालैः सह तत्र न्यवात्सीत् रामकृष्णवसुदेवादिप्रीत्यर्थमेव तत्र न्यवात्सीत् इति सूचयन्नाह-बन्धुवत्सल इति ॥५९॥ वसुदेवस्तु यज्ञविषयकमनोरथ महार्णवस्तमंजसा अनायासेनैवोत्तीर्य अतः प्रीतं मनो यस्य स करे स्पृशन् करं गृहीत्वा नन्दमाह ॥६०॥

अन्वितार्थप्रकाशिका

बन्धूनिति । सौहृदेन स्नेहेन आक्लिन्नं चेतो येषां तान् बन्धून् यदून् परिष्वज्य विरहकृच्छ्रेण स्वदेशं ययुः । तथापरे जनाः ययुः ॥५८॥ नन्द इति । कृष्णादिभिः गोपालैः सह बृहत्या महत्या पूजया अन्नवस्त्राद्यपेक्षितया समृद्ध्या अर्चितः बन्धुवत्सलः नन्दः गोपालैः सह नन्दः तत्र न्यवात्सीत् ॥५९॥ वसुदेव इति । सुहृद्वृतो वसुदेवस्तु यज्ञविषयकमनोरथ महार्णवस्तमंजसा अनायासेनैवोत्तीर्य अतः प्रीतं मनो यस्य सः करे स्पृशन् करं गृहीत्वा नन्दमाह ॥६०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सौहृदेन आक्लिन्नानि आर्द्राणि चेतांसि ते धृतराष्ट्रादयः यदून् परिष्वज्य स्वदेशान् ययुः ॥५८॥ नन्दः कृष्णादिभिः अर्चितः सन् गोपालैः सहितः तत्र न्यवात्सीत् निवासं चकार ॥५९-६०॥ मनोरथो यज्ञकरणाभिलाषः स एव महार्णवस्तम् ॥६०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

बन्धूनिति ॥ बन्धून् यदून् परिष्वज्य सौहृदेनाक्लिन्नमार्द्रं चेतो येषां ते तथाभूताः विरहकृच्छ्रेण विरहप्रयुक्तक्लेशेन उपलक्षिताः सन्तश्च ययुः । अपरे जनाश्च स्वदेशान् प्रति ययुः इति द्वयोरेकसम्बन्धः ॥५८॥ नन्द इति ॥ कृष्णरामोग्रसेनादिभिः बन्धुवत्सलः नन्दस्तु गोपालैः सह बृहत्याऽतिमहत्या पूजया अर्चितः सन् न्यवात्सीत्तत्रोषितवान् ॥५९॥ वसुदेव इति ॥ वसुदेव मनोरथो यज्ञविषयः स एव महार्णवस्तम् अंजसा सुखेन उत्तीर्य निस्तीर्य सुहृद्वृतः प्रीतमनाः नन्दं करे स्पृशन् संश्च आह ॥६०॥

कृष्णप्रिया

महामना श्रीवसुदेव विना परिश्रम अपना महान् मनोरथ का महासागर पारकर गये थे इसलिए उनके आनन्दकी सीमा न रही । सभी आत्मीयजन उनके साथ थे । आप्नजनोंने श्रीव्रजराम नन्दरायजीका हस्तग्रहण करते कहा ॥६०॥

वसुदेव उवाच

भ्रातरीशकृतः पाशो नृणां यः स्नेहसंज्ञितः । तं दुस्त्यजमहं मन्ये [1]देवानामपि योगिनाम् ॥६१॥
अस्मास्वप्रतिकल्पेयं[2] यत् कृताज्ञेषु सत्तमैः । मैत्र्यर्पिताफला वापि न निवर्तेत कर्हिचित् ॥६२॥
[3]प्रागकल्पस्तु कुशलं भ्रातर्वो [4]नाचराम हि । अधुना श्रीमदान्धाक्षा न पश्यामः [5]पुरः सतः ॥६३॥
मा राज्यश्रीरभूत् पुंसः श्रेयस्कामस्य मानद । स्वजनानुत[6] [7]बन्धूंश्च न पश्यति [8]ययान्धदृक् ॥६४॥

---

१. शूराणामपि-श्रीधर. वंशी. विश्व. शुक. ; सूराणामपि-विज. । २. प्रतिकल्पोयं-विज. । ३. प्रागकल्पाच्च-श्रीधर. वंशी. विश्व. प्रागकल्पाश्च-वीर. ; प्रागकल्पास्तु-विज. । ४. नाचरेम हि-विज. । ५. पूरा कृतं-वीर. । ६. सुजनानुत-वीर. । ७. बन्धून्वा-श्रीधर. विज. । ८. मदान्धदृक्-वीर.।

वसुदेवः, उवाच । भ्र
मन्ये ॥६१॥ सत्तमैः, अस्मासु,
॥६२॥ भ्रातः, प्राक्, अकल्पा
श्रेयस्कामस्य, पुंसः, राज्यश्रीः,

शूराणां बलेन योगि
सत्तमैर्भवद्भिरप्रतिकल्पा अनुप
पाशोऽयं भवतामिति गम्यत इ
ह्याचराम न कृतवन्तो वयं श्रीम

तं स्नेहपाशम् । इत्यर्थ
प्रकारमाक्षिपति-तत्कुत इति । त
'सर्वः स्वार्थं समीहते' इति न्या
अकल्पत्वं च कंसोपद्रुतत्वात् । पुर
किं पुनरन्यान् । यया राज्यश्रियाऽ

अत एव सर्वे वयं त्वद
नास्तीति भावः । ईशकृतत्वादेव
मत्सम्बन्धेनान्येष्वपीत्यर्थः । कर्हिचि
पारस्परिकत्वे सत्येव गवोर्युगलतय
तत्संयोगाभावेऽपि तव तु तेन मयि
कृतज्ञैर्भवद्भिर्या मैत्री स्नेहलक्षणाऽ
न स्यादिति ॥६२॥ पुरःसतः अग्रेव
मानदातृणां युष्माकमेव सोचितेति

हे भ्रातरिति स्नेहेन भ्रातृसख
भवतां निरुपाधिमहास्नेहानिवृत्तिमित्
सत्तमैरिति विनयाद्दैन्याद्वाऽऽत्मनोऽ
प्राक् श्रीप्राप्तेः कंसवधाद्वा पूर्वं कुशलं
। तत्र हेतुः-श्रीमदेति । बहुकुटुम्बा
साधूनपि युष्मान् पुरः सर्वादौ न पश्या

ापरे च जनाः ययुः ॥५८॥
ैः सह तत्र न्यवात्सीत् ।
ु यज्ञविषयकमनोरथ एव
।

स्वदेशं ययुः । तथापरे च
समृद्ध्या अर्चितः सत्कृतः
तु यज्ञविषयकमनोरथ एव
०॥

॥५८॥ नन्दः कृष्णादिभिः
स एव महार्णवस्तम् ॥६०॥

कृच्छ्रेण विरहप्रयुक्तक्लेशेन
इति ॥ कृष्णरामोग्रसेनाद्यैः
९॥ वसुदेव इति ॥ वसुदेवः
स्पृशन् संश्च आह ॥६०॥

पारकर गये थे इसलिये
ीव्रजराम नन्दरायजीका

मपि योगिनाम् ॥६१॥
वर्तेत कर्हिचित् ॥६२॥
याम: ⁵पुरः सतः ॥६३॥
प्रति ⁶यथान्धदृक् ॥६४॥

न्व-श्रीधर. वंशी. विश्व. शुक. ;
। ७. बन्धून्वा-श्रीधर. वंशी. वीर.

कर्दमक्षमा

वसुदेवः, उवाच । भ्रातः, नृणाम्, स्नेहसंज्ञितः, ईशकृतः, पाशः(वर्तते), योगिनाम्, अपि, देवानाम्, दुस्त्यजम्, अहम्, न्ये ॥६१॥ सत्तमैः, अस्मासु, अज्ञेषु, अप्रतिकल्पा, इयम्, यत्, कृता, मैत्री, अर्पिता, अपि, अफला, वा, कर्हिचित्, न, निवर्तेत २॥ भ्रातः, प्राक्, अकल्पाफ, वाम्, कुशलम्, न, अचरामहि, अधुना, श्रीमदान्धाक्षाः, पुरः, सतः, न, पश्यामः ॥६३॥ मानद, स्कामस्य, पुंसः, राज्यश्रीः, मा, अभूत्, यया, अन्धदृक्, स्वजनान्, उत, च, बन्धून्, न, पश्यति ॥६४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

शूराणां बलेन योगिनां ज्ञानेनापीत्यर्थः ॥६१॥ तत्कुतस्तत्राऽऽह-अस्मास्विति । कृताज्ञेषु कृतमुपकारमजानत्सु र्भवद्भिरप्रतिकल्पा अनुपमा मैत्री इयमर्पिता अफला अपि प्रत्युपकारशून्याऽपि कर्हिचिद्यद्यस्मान्न निवर्तेत तस्मादीश्वरकृतः सोऽयं भवतामिति गम्यत इत्यर्थः ॥६२॥ अफलत्वमेवाऽऽह-प्रागिति । हे भ्रातः ! अकल्पादसामर्थ्याद्वः कुशलं प्रियं न णाम न कृतवन्तो वयं श्रीमदेन अन्धान्यक्षीणि येषां ते ॥६३॥ राज्यश्रीर्माभूत् छान्दसोऽडागमः ॥६४-६५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं स्नेहपाशम् । इत्यर्थ इति-न हि बलेन ज्ञानेन च स्नेहपाशश्छिद्यते, रामचन्द्रादिषु तथा दर्शनादिति भावः ॥६१॥ अत्र माक्षिपति-तत्कुत इति । तत्स्नेहपाशाकृन्तनम् । कुतः कथमवगतम् । तत्रात्रेत्यर्थः । यद्यतः कृता तस्माद्धेतोः । इत्यर्थ इति- स्वार्थं समीहते' इति न्यायेन तं विना यज्ञेषु प्रतीकारासमर्थेषु जानतां मैत्रीकरणमीशप्रेरणयैव सम्भवतीति भावः ॥६२॥ लत्वं च कंसोपद्रुतत्वात् । पुरः सतः अग्रे स्थितान् ॥६३॥ अदर्शने हेतुमाह-मेति । सुजनान् गुरुजनान् । तपस्विबहुश्रुताचार्यादीनपि पुनरन्यान् । यया राज्यश्रियाऽन्धदृक् आवृतचक्षुः ॥६४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत एव सर्वे वयं त्वदधीना इति सूचयन्नाह-चतुर्भिः अत एव प्रथमतो भ्रातरिति सम्बोधनम् आवयोरपत्यादिषु भेद एव तीति भावः । ईशकृतत्वादेव दुस्त्यजम् ॥६१॥ ईशकृतपाशत्वमेव कुतः तत्र तमेव दृष्टान्तयन् विवक्षितमाह-अस्मास्विति । बन्धेनान्येष्वपीत्यर्थः । कर्हिचित् कदाचिदपीति दूरदेशस्थित्यादावप्यपराचादौ सत्यपीत्यर्थः । अन्यत्तैः यद्वा तदेवमीशकृतस्नेहस्य कत्वे सत्येव गवोर्युगलतया बन्धनवत् पाशता युक्ता एतस्य तदसंयोगेन्यतरस्य तत्सङ्गे हि परस्परसम्बन्धाभावदर्शनात् मम योगाभावेऽपि तव तु तेन मयि बन्धः परम एवापूर्व इत्याह-अस्मास्विति कृताज्ञत्वात् स्नेहेन बन्धुमशक्येष्वप्यस्मासु सत्तमैः र्भवद्भिर्या मैत्री स्नेहलक्षणाऽर्पिता सा त्वमुपमाप्यफला बन्धुसमर्थापि कर्हिचित्कदाचिदपि न निवर्तेत निवर्तितुं सम्भाव्यापि यादिति ॥६२॥ पुरःसतः अग्रेवर्तमानानपि युष्मान् न पश्यामः किं पुनर्दूरस्थान् ॥६३॥ मानदेति श्रियां सत्यामपि अन्येभ्यो णां युष्माकमेव सोचितेति भावः ॥६४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे भ्रातरिति स्नेहेन भ्रातृसख्योरभेदात् ईशकृतत्वादेव दुस्त्यजम् ॥६१॥ ननु कुतो मन्यसेऽकृतज्ञेष्वधमेष्वप्यस्मासु सत्तमानां निरुपाधिमहास्नेहानिवृत्तिमित्याह-अस्मास्विति । बहुत्वं श्रीकृष्णरामाद्यपेक्षया । किंवा । तादृशतत्स्नेहपात्रत्वेनात्मनो बहुमानात् विनयाद्दैन्याद्वाऽऽत्मनोऽधमता सूचितैव । कर्हिचित् कदाचिदपीति दूरदेशस्थित्यादावप्यपराधादौ सत्यपील्यर्थः ॥६२॥ कंसवधाद्वा पूर्वं कुशलं प्रणयसङ्गतिमहोत्सवं हि एव पुरः सतोऽग्रे वर्तमानानपि युष्मान् न पश्यामः सदा नावलोकयामः -श्रीमदेति । बहुकुटुम्बादि (बहुकनकादि-घ, ङ) समृद्ध्या युष्मत्त्यागेनान्यत्रापीदृक्प्रवृत्तिरिति भावः । यद्वा सतः युष्मान् पुरः सर्वादौ न पश्यामः । प्रियाचरणादिना नावेक्षामहे यतः श्रीमदेनान्धाक्षा भ्रष्टज्ञाना इत्यर्थः ॥६३॥ श्रेयस्कामस्येति-

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रिया लोकद्वयमङ्गलनाशादिति भावः । उत अपि स्वजनान् ज्ञात्यादीनपि वा अपि बन्धून् मित्राण्यपि वा-शब्दः स्वजने बन्धूनामुत्कर्षापेक्षया हे मानदेति श्रियां सत्यामन्येभ्यो मानदानेन युष्माकमेव सोचितेति भावः ॥६४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अज्ञेषु सौहृदानभिज्ञेषु सत्तमैः युष्माभिः अर्पिता मैत्री अप्रतिकल्पा अप्रतिकार्या प्रमिति कुशलं नाचरामः नाचरितवन्त इति पुरःसतः पुरोवर्तिनो युष्मान् न पश्याम इत्यर्थः ॥६२-७१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उक्तिमेवाह-भ्रातरिति । हे भ्रातः य ईशेन भगवता कृष्णेन कृतः निर्णीतः स्नेहलक्षणपाशस्तं सुराणां बलेन योगि ज्ञानेनापि दुस्त्यजं मन्ये इत्यर्थः ॥६१॥ कुत इत्यत आह-अस्मास्विति । यद्यस्मत्कृतमुपकारं न जानन्तीति तथा तेष्वस्म सत्तमैर्भवद्भिरियमप्रतिकल्पाऽनुपमा मैत्री अर्पिता निहिता अफला प्रत्युपकारशून्याऽप्यधुनापि न निवर्तते ॥६२॥ अफलत्वमेवाह प्रागिति । हे भ्रातः ! प्राक् कंसकृतनिर्बन्धदशायाम् अकल्पाः असमर्थाः हेतुगर्भमिदम् अतो वो युष्माकं कुशलं प्रियं नाचरेमा कृतवन्तः । अधुना तु श्रीमदेन ऐश्वर्यमदेनान्धे अक्षिणी येषां ते वयं पुरा कृतमुपकारं न पश्यामः ॥६३॥ अतो हे मान श्रेयस्कामस्य पुंसो राज्यश्रीर्मा भूदिति प्रार्थना कुतः ? यतो मदान्धदृक् पुमान् सुजनान् साधूनुतापि च बन्धून् न पश्यति ॥६

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥३८-६५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥४१-६८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥४२-६८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बलेन शूराणामपि दुर्भिदं ज्ञानेन योगिनामपि दुस्त्यजमित्यर्थान्तरन्यासेन मत्पुत्रयोः स्नेहपाशेन युवां दृढं बद्धावेव भवथ इति भावः ॥६१॥ कृष्णरामविषयकदृढस्नेहरूपमहाधनवितरणेन सत्तमैर्भवद्भिरस्मासु यत् य अर्पिता इयम् अप्रतिकल्पा निरुपमा अफला प्रत्युपकारलिप्साशून्या कदापि न निवर्तिष्यते च एवार्थे अपि निश्च अस्मासु कीदृशेषु कृताज्ञेषु कृतमुपकारमजानत्सु तेन वयमसत्तमाः सत्तमान् युष्मान् प्रतीदं वक्तुमपि न त्रपामहे भावः ॥६२॥ स्वेषामकृतज्ञत्वमेवाह-प्राक् अकल्पात् कंसपारतन्त्र्येणासामर्थ्यात् युष्माकं प्रत्युपकारं नाचराम न कृत । कंसवधानन्तरमधुना स्वातन्त्र्येऽपि श्रीमदेत्यादि ॥६३॥ मा अभूत् मा भूयात् । अडागम आर्षः । एवं महादैन्यविनयां मज्जयन् स्वयमेव निर्ममज्ज वसुदेव इति भावः ॥६४-६५॥

गूढार्थदीपिनी

हे भ्रातः ! यः पाशस्तं शूराणां बलेन योगिनां ज्ञानेनापि दुस्त्यजमित्यन्वयः ॥६१॥ सत्तमैः भवद्भिः अस्मासु कृता इयं मैत्री अफलापि प्रत्युपकारशून्याऽपि यस्मात् न निवर्तते तस्मादीशकृतः इत्यन्वयः । लडर्थे लिङ् । कथम् कृतमुपकारं न जानन्तीति तेषु अप्रतिमा अनुपमा ॥६२॥ प्राक् बन्धनदशायाम् अकल्पात् असामर्थ्यात् वो युष्माकं कुश वयं नाचराम न कृतवन्तो वयम् । अधुना पुरः सतः वर्तमानानपि न पश्यामः यतः श्रीमदेन अन्धाक्षाः ॥६३॥ सुजनान् इत्ये । गुरुजनान् आचार्यादीन् किं पुनः साधारणान् । यथा श्रिया अन्धदृक् आवृतचक्षुः ॥६४॥

शूराणां बलेन यो
अफलापि प्रत्युपकारशून्याऽ
द्योतयन् मैत्र्याः अफलत्वं द
नाकरवाम अधुना स्वातन्त्र्य
पश्यामः त्वत्कृतमुपकारं न
अडागमश्छान्दसः ॥६४-६५॥

आदौ तत्स्तोत्रं वक्तुं
भोगाविनिवेशिनो ज्ञानिनो दे
तेषामपि सुदुस्त्यजमिति अतस्
निरूपयति-अस्मास्वप्रतिकल्पे
प्रतिकल्पः प्रत्युपकारः अतः अ
मैत्री च स्थापयित्वाऽऽह-प्राग
तस्याप्यकरणे हेतुरुच्यते-पूर्वं य
नाचरामहे । सम्बोधनात् कुशल
सतोऽपि विद्यमानां न पश्यामः ध
मा राज्यश्रीरभूदिति । यद्यप्युभ
ज्ञानशक्तिसहितस्यैव सद्भावत्वात्
इति पुंसः श्रेयस्कामस्य राज्यश्री
राज्यस्येति चेत् सुजनानुत बन्धूंश्चे

हे भ्रातः ! यः स्नेहसंज्ञितः
दुस्त्यजमपरिहार्यं मन्ये ॥६१॥ कृत
प्रत्युपकारशून्या कदापि न निवर्तेत ॥
। इदानीं धनमदान्धाः पुरोऽग्रे सतो व
अडलोप आर्षः । मा-शब्द इत्यन्ये य

तत्र स्नेहं सूचयन् सम्बोधयति
तमहं दुस्त्यजं मन्ये इति ॥६१॥ कु
सत्तमैर्भवद्भिरप्रतिकल्पा अनुपमा इयं पुत्र
भूतापि कर्हिचित् न निवर्तेत अधु
अफलत्वमेवाह-प्रागिति । हे भ्रातः ! प्र
नाचराम न कृतवन्तः । अधुना तु श्रीमदे

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

शूराणां बलेन योगिनां ज्ञानेनापि उपकारेष्वित्यर्थः । अस्मासु सत्तमैर्भवद्भिः अप्रतिकल्पा अनुपमा इयं मैत्री अर्पिता फलापि प्रत्युपकारशून्याऽपि कर्हिचिन्न निवर्तेत यतः अत ईशकृतः स्नेहपाश इति गम्यते ॥६१-६२॥ अस्मृतोपकारत्वमात्मनः मैत्र्याः अफलत्वं दर्शयति-प्रागिति । प्राक् अकल्पात् कंसजरासन्धादिपारतन्त्र्येण असमर्थत्वात् कुशलं प्रियं नाचराम अधुना स्वातन्त्र्यकाले श्रीमदेन अन्धान्यक्षीणि येषां ते पुरस्सतोऽपि न पश्यामः द्वितीयार्थे षष्ठी अग्रे सन्तमपि त्वां न त्वत्कृतमुपकारं न स्मराम इति किमु वक्तव्यमित्यर्थः ॥६३॥ श्रेयस्कामस्य मुक्तिकामस्य राज्यश्रीः माभूत् माभूयात् श्छान्दसः ॥६४-६५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

आदौ तत्स्तोत्रं वक्तुं स्वस्मिन् नन्दकृतसौहृदं स्थापयति-भ्रातरीशकृतः पाश इति । अत एव स्नेहः सुदुस्त्यजः विनिवेशिनो ज्ञानिनो देवाः मोक्षसाधनाभिनिविष्टाः योगिनः तेषां स्नेहाभावः सम्भवति । इदानीं स्वानुभवादेवं ज्ञायते मपि सुदुस्त्यजमिति अतस्त्वया बन्धुत्वात्स्नेहः क्रियते न त्वस्य प्रतीकारः कर्तव्य इति भावः ॥६१॥ मैत्रीमपि अप्रतीकार्यां पयति-अस्मास्वप्रतिकल्पेयमिति । सत्तमैर्भवद्भिरस्मासु मैत्री या अर्पिता सा अज्ञेषु अप्रतिकल्पा प्रतिकल्परहिता । कल्पः प्रत्युपकारः अतः अफलाः वा शब्दः अनादरे । अफला सफला वा भवतु परं न निवर्तते ॥६२॥ एवं प्रत्युपकाराभावं च स्थापयित्वाऽऽह-प्रागकल्पात्तु कुशलमिति । क्रिया प्रतिकल्पाभावेऽपि स्वशक्त्यनुसारेण प्रत्युपकारः कर्तव्यः । पकरणे हेतुरुच्यते-पूर्वं यदा कंसो न हतः द्वारकायां वा न गतं तदा वयमेवाकल्पाः तत एव हे भ्रातरः ! वः कुशलं महे । सम्बोधनात् कुशलावश्यकत्वं बोधितम् । अधुना पुनः प्राप्तराज्याः कल्पा अपि श्रीमदेनैवान्धाः सन्तः पुरः पि विद्यमानां न पश्यामः धर्मिदर्शनानन्तरं हि तत्र प्रतिकर्तव्यसम्भावना ॥६३॥ तर्हि किं युक्तमित्याकांक्षायां निर्णयमाह-राज्यश्रीरभूदिति । यद्यप्युभयत्रापि प्रतिकर्तव्याता नास्ति तथाप्यकल्पावस्थैव समीचीना ज्ञानशक्तिक्रियाशक्त्योः क्तिसहितस्यैव सद्भावत्वात् । क्रियाशक्तिस्तु सम्पत्तौ विद्यमानापि ज्ञानशक्त्यभावादप्रयोजिका । अत एवमन्तरं वर्तत पुंसः श्रेयस्कामस्य राज्यश्रीर्माभूत् मानं ददातीति मानदः अनेन त्वं सर्वथा अस्माकं मानमेव प्रयच्छसि को दोषो स्येति चेत् सुजनानुत बन्धूंश्चेति यथा श्रिया कृता अन्धा दृष्टिर्यस्य गतदृष्टिरित्यर्थः । सत्पुरुषान् बन्धूंश्च न पश्यति ॥६४॥

श्रीसुबोधिनीसारः

हे भ्रातः ! यः स्नेहसंज्ञितः प्रेमाख्यः स नृणामीशेन दैवेन कृतः पाशोऽस्ति शूराणां बलिनां योगिनां चापि तं मोहपाशं मपरिहार्यं मन्ये ॥६१॥ कृतमुपकारमजानन्तीति तेषु अस्मासु अप्रतिकल्पाऽनुपमा इयं मैत्री सत्तमैर्भवद्भिरर्पिताऽफला कारशून्या कदापि न निवर्तेत ॥६२॥ अफलत्वमाह । प्राक् पूर्वमकल्पादसमर्थत्वात् वो युष्माकं कुशलं वयं नाकुर्म हे भ्रातः धनमदान्धाः पुरोऽग्रे सतो वर्तमानान् न पश्यामः । हि एव ॥६३॥ हे मानद ! श्रेयस्कामस्य पुंसः राज्यलक्ष्मीर्माऽभूत् । आर्षः । मा-शब्द इत्यन्ये यया लक्ष्म्यान्धदृक् नरः स्वगतान् स्वशरणान् बन्धून् वा नेक्षते ॥६४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र स्नेहं सूचयन् सम्बोधयति-भ्रातरिति । स्नेहसंज्ञितो यो नृणां पाशः स ईशकृतः अतः शूराणां बलेन योगिनां ज्ञानादिना दुस्त्यजं मन्ये इति ॥६१॥ कुत इत्यत आह-अस्मास्विति । यत् यस्मात् कृतमुपकारं न जानन्तीति कृताज्ञास्तेष्वस्मासु प्रतिकल्पा अनुपमा इयं पुत्रपालनादिस्नेहरूपा मैत्र्यर्पिता कृता । अनुपमत्वे हेतुमाह-अफलेति । प्रत्युपकाररहितेत्यर्थः । कर्हिचित् न निवर्तेत अधुनापि न निवर्तते, तस्मादीश्वरकृत एवायं भवतां स्नेहरूपः पाश इति निश्चयः ॥६२॥ माह-प्रागिति । हे भ्रातः ! प्राक् कंसकृतनिबन्धनदशायाम् अकल्पात् सामर्थ्याभावादेव वो युष्माकं कुशलं प्रियं हि कृतवन्तः । अधुना तु श्रीमदेनान्धे अक्षिणी येषां ते वयं पुरः सतः अग्रे विद्यमानानपि युष्मान् न पश्यामः ॥६३॥ तव

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तु सौशील्यं निरुपममेव इत्याशयेन सम्बोधयति-मानदेति। श्रेयस्कामस्य परमपुरुषार्थमिच्छतः पुंसः राज्यश्रीर्माऽभूदिति प्रार्थ अडागमश्छान्दसः। कुतः यया श्रिया अन्धदृक् लुप्तविवेकः पुमान् कृतोपकारान् स्वजनादीन् न पश्यति तत्प्रत्युपकारं न करोति ततः कृतघ्नतादोषेण नरके पततीत्याशयः ॥६४॥

अन्वितार्थप्रकाशिका

भ्रातरिति। स्नेहसंज्ञितो यो नृणां पाशः स ईशकृतः। अतः शूराणां बलेन योगिनां ज्ञानादिना च तमहं दुस्त्यजं मन्ये ॥६१॥ अस्मास्विति। यत् यस्मात् कृतमुपकारं न जानन्तीति अकृतज्ञास्तेष्वस्मासु सत्तमैर्भवद्भिरसिकल्पा अनुपमा पुत्रपालनादिस्नेहरूपा मैत्र्यर्पिता कृता। अफलापि प्रत्युपकाररहितापि सा कर्हिचित् न निवर्तेत अधुनापि न निवर्तते। तस्मादीश एवायं भवतां स्नेहरूपः पाश इति निश्चयः ॥६२॥ अफलत्वमाह-प्रागिति। हे भ्रातः! प्राक् कंसकृतबन्धनदशायाम् अकल्प सामर्थ्याभावादेव वो युष्माकं कुशलं प्रियं हि नाचरामहि न कृतवन्तः। तङार्षः। अधुना तु श्रीमदेनान्धे अक्षिणी येषां ते वयं पु सतः अग्रे विद्यमानानपि युष्मान् न पश्याम किं पुनर्दूरस्थान् ॥६३॥ मा इति। हे मानद! श्रेयस्कामस्य परमपुरुषार्थमिच्छतः पुं राज्यश्रीर्माऽभूदिति प्रार्थना। अडागमश्छान्दसः। कुतः यया श्रिया अन्धदृक् लुप्तविवेकः पुमान् कृतोपकारान् स्वजनादीन् पश्यति तत्प्रत्युपकारं न करोति। ततः कृतघ्नतादोषेण नरके पततीत्याशयः ॥६४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शूराणां देहसामर्थ्येन योगिनां ज्ञानसामर्थ्येन ॥६१॥ स्नेहपाशस्य दुस्त्यजत्वमाह। अस्मास्विति सत्तमैः युष्माभिः कृत कृतमुपकारमविदत्सु अस्मासु अप्रतिकल्पा निरुपमा इयं पुत्रद्वयपालनरूपा या मैत्री अर्पिता कृता सा अफलाऽपि प्रत्युपकाररहिता यद्यस्मात् कर्हिचित् न निवर्तेत तस्मादीशकृतं स्नेहबन्धनं भवतां दुस्त्यजमिति भावः ॥६२॥ अफलत्वं दर्शयति-प्रागिति। हे भ्रा! प्राक् अकल्पात् पूर्वमसमर्थत्वात् वो युष्माकं कुशलं हितं वयं नाचराम न करवाम। श्रीमदेन अन्धाक्षा आवृतनेत्राः वयं पुर सतः अग्रे वर्तमानान् युष्मान् ॥६३॥ हे मानद! श्रेयस्कामस्य राज्यश्रीः मा भूत् मा अभूदित्यडागमश्छान्दसः ॥६४-६५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह ॥ भ्रातरिति ॥ हे भ्रातः! यः ईशकृतः ईशेन भगवता कृतः स्नेहसंज्ञितः स्नेहलक्षण इत्यर्थः। नृणां पा अस्ति तं शूराणां बलेन योगिनां ज्ञानेनापि दुस्त्यजम् अहं मन्ये ॥६१॥ कुत इत्यत आह ॥ अस्मास्विति ॥ यद्यस्मात् कृतमुप न जानन्तीति कृताज्ञास्तेषु अकृतज्ञेष्वित्यर्थः। अस्मासु सत्तमैरतिसाधुभिर्भवद्भिः इयम् अप्रतिकल्पा अनुत्तमा मैत्री अ निहिता। सा च अफला प्रतिकारशून्यापि अधुनापि कर्हिचित् न निवर्तेत। भवन्मैत्र्या अस्मत्कृतप्रत्युपकारशून्य यदनिवर्तनमसावेवेश्वरकृतः स्नेशपाशो भवतामपीति गम्यते इति भावः ॥६२॥ अफलत्वमेवाह ॥ प्रागिति ॥ हे भ्रातः! कंसकृतनिर्बन्धदशायाम् अकल्पा असमर्थाः हेतुगर्भमिदम्। तत्त्वात् वो युष्माकं कुशलं प्रियं न आचरामहि न कृतवन्तः। अ तु श्रीमदेनैश्वर्यमदेनान्धे अक्षिणी येषां ते वयं पुरः अग्रे सतो विद्यमानान् अपि युष्मान् न पश्यामः। उपकारस्तु दूर एव ॥६३ ॥ अतः हे मानद! श्रेयःकामस्य पुंसः राज्यश्रीः मा अभूत्। अडागमश्छान्दसः। कुतः। यतः मदान्धदृक् पुमान् स्वजनान् च बन्धून् वा न पश्यति। सुजनानिति क्वचित्पाठः ॥६४॥

कृष्णप्रिया

श्रीवसुदेवजी ने कहा! भैयाजी भगवानने मनुष्योंके लिये एक महान् बन्धन बना रखा है जिस बन्ध नाम है स्नेहपाश मेरा तो मन्वव्य है कि बडे सार्थ वीर विरक्त योगी यति भी उस बन्धन तोडनेमें असमर्थ है हम सरीखे अकृतज्ञोंके प्रति निरुपम मैत्री का कियक है आर इसमें आश्चर्य क्या? आप समान सज्जन

महापुरुषोंका तो सहज
चुका सकते। आपके
आपका यह मैत्री का न
प्रथम तो हम कारागार
स्थिति होने जा रही है
देख पाते ॥६३॥ मानद
राज्य लक्ष्मी न प्राप्त हो
स्वजनको नहीं देख पात

एवं सौहृदशैथि
नन्दस्तु सख्युः प्रि
ततः कामैः पू
वसुदेवोग्रसेनाभ्य

श्रीशुकः, उवाच।

एवम्, सौहृदशैथिल्य
नन्दः, तु, गोविन्दरामयोः, प्रेम
सव्रजः, सहबान्धवः, वसुदेवोग्र
यदुभिः, यापितः, ययौ ॥६७-६

अद्य श्व इति। प्रातर्नि
यापितो महासैन्येन प्रस्थापितः

एवमुक्तरीत्या। तत्कृत
सख्युर्वसुदेवस्य। निर्गमे गन्तुमुद्य

स्वभावत एव सौहृदेन
युक्तमेव तस्य तद्भावज्ञानात् श्रीकृष
इत्यनुसारेण अन्तरीणाहार्द्रात् यथैव

१.वारितो-वीर.। २. कृष्णार्जुन-विज.।

कृष्णप्रिया

महापुरुषोंका तो सहज स्वभाव ही होता है कि नैसर्गिक स्नेह करना । हम आपके अहैतुक मैत्री का बदला नहीं चुका सकते । आपके यह अकारण स्नेह का फल भी नहीं दे सकते यह निश्चित बात है कि आपका और हमारा आपका यह मैत्री का नाता टूटने वाला नहीं है । नम्र निवेदन कि आप इसको निरंतर निभाते रहेंगे ॥६२॥ भैयाजू ! प्रथम तो हम कारागारमें कैद थे इसलिये हमलोग आपका कुछ भी प्रिय एवं हित न कर सके अब हमारी एसी स्थिति होने जा रही है कि हम धन मदसे अंध हो रहे है धि आप हमारे सन्मुख है तो भी हम आपकी और नहीं देख पाते ॥६३॥ मानद् सबको सन्मान देनेवाले भैयाझ नन्नदराजी ? जो व्यक्ति कल्याणकी कामनावाला है उसे राज्य लक्ष्मी न प्राप्त हो उसीमें उसका कल्याण है क्योंकि मानव सम्पत्तिसे अंध बन जाता है और माता बन्धु एवं स्वजनको नहीं देख पाता ॥६४॥

श्रीशुक उवाच

एवं सौहृदशैथिल्यचित्त आनकदुन्दुभिः । रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ॥६५॥
नन्दस्तु सख्युः प्रियकृत् प्रेम्णा गोविन्दरामयोः । अद्य श्व इति मासांस्त्रीन् यदुभिर्मानितो[1]ऽवसत् ॥६६॥
ततः कामैः पूर्यमाणः सव्रजः सहबान्धवः । परार्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः ॥६७॥
वसुदेवोग्रसेनाभ्यां [2]कृष्णोद्धवबलादिभिः । [3]दत्तमादाय पारिबर्हं यापितो यदुभिर्ययौ ॥६८॥

कर्दमक्षमा

श्रीशुकः, उवाच ।

एवम्, सौहृदशैथिल्यचित्तः, आनकदुन्दुभिः, तत्कृताम्, मैत्रीम्, स्मरन्, अश्रुविलोचनः, रुरोद ॥६५॥ सख्युः, प्रियकृत्, नन्दः, तु, गोविन्दरामयोः, प्रेम्णा, यादवै, मानितः, अद्य, श्वः, त्रीन्, मासान्, अवसत् ॥६६॥ ततः, कामैः, पूर्यमाणः(नन्दः), सव्रजः, सहबान्धवः, वसुदेवोग्रसेनाभ्याम्, कृष्णोद्धवबलादिभिः, दत्तम्, पारिबर्हम्, आदाय, परार्घ्याभरणक्षौमनानार्घ्यपरिच्छदैः, यदुभिः, यापितः, ययौ ॥६७-६८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अद्य श्व इति । प्रातर्निर्गमेऽद्यैवापराह्णे गम्यताम् अपराह्णे निर्गमे श्वो गम्यतामिति पुनः पुनरेवं मानितः ॥६६-६७॥ यापितो महासैन्येन प्रस्थापितः ॥६८-७०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमुक्तरीत्या । तत्कृतां नन्दकृताम् । मैत्रीं विपदि स्त्रीपुत्ररक्षणलक्षणाम् । प्रतिकर्तुमसमर्थः केवलं रुरोदेति ॥६५॥ सख्युर्वसुदेवस्य । निर्गमे गन्तुमुद्यते ॥६६॥ ततो मासत्रयसहवासोत्तरम् । कामैर्नानाद्रव्यैः । तदाह-परार्ध्येति ॥६७-६८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वभावत एव सौहृदेन शैथिल्यं यत्र तादृशचित्तः पुनश्चैवं तत्कृतां मैत्रीं स्मरन् ॥६५॥ अत्र श्रीनन्दस्याप्यप्रतिवचनं पुनरेव तस्य तद्भावज्ञानात् श्रीकृष्णस्य स्यजातत्वे सन्देहाभावात् श्रीकृष्णस्य च "ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम्" इत्यनुसारेण अन्तरीणाहार्द्रात् यथैव दर्शितं श्रीभक्तिरसामृतसिन्धौ —

---

[1] मानितो-वीर. । [2] कृष्णार्जुन-विज. । [3] आदाय पारिबर्हं तं यापितो-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

"देवक्या विवृतप्रसूचरितयाऽप्युन्मृज्यमानानने भूयोभिर्वसुदेवनन्दनतयाप्युद्घुष्यमाणे जनैः ।
गोविन्दं मिहिरग्रहोत्सुकतया क्षेत्रे कुरोरागते प्रेमावल्लवनाथयोरतितरामुल्लासमेवाययौ ॥"

अथ श्रीनन्दोऽपि कथञ्चन चलितुमनुज्ञात इत्याशङ्क्याह-नन्दस्तु यदुभिः श्रीवसुदेवादिभिर्मानितः प्रत्यहं वर्द्धितमा सन् मासांस्त्रीनवसत् कथमिव अद्य श्व इति मासत्रये जातेऽपि तथा रामे तद्वदेव स्वसुखहेतुत्वेन धृतनाम्नि भ्रातृपुत्रे च यः प्रेमा तं तुशब्दश्च श्रीवसुदेवस्य तादृशसद्व्यवहारादपि तस्य व्यवहारस्योत्कर्षं दर्शयति, तदेवाह-सख्युस्तस्य प्रियकृदेव सन्नवसत्। तत एव श्रीकृष्णे स्वात्मजत्वमव्यंजयन् स्वसङ्गे नेतुं साक्षादनागृह्णंश्चेत्यर्थः ॥६६॥ तत इति युग्मकम् । ततः मासत्रयानन्तरं ययौ चलितवा माथुरदेशं प्रति श्रीनन्द इति शेषः । तैः सह श्रीकृष्णलीलायाः तत्रैव तेषाञ्चाभीष्टत्वात् तस्य ततश्चलनं चावशिष्टशत्रुपक्षक्षपणस्य श्रीकृष्णेनावश्यापेक्षितव्यत्वादिति गम्यते । ननु कथम्भूतः सन् ययौ, श्रीवसुदेवोग्रसेनाभ्यां कृष्णोद्धवबलादिभिरन्यैश्च यदुभिः प्रथमतस्तावत्कामैरभिलाषैः पूर्यमाणः व्यक्तमनुक्तानामप्यभिलाषाणां स्वयं सङ्कल्पेन दृढमाश्वास्यमान इत्यर्थः । तत्र सामान्यतः सर्वैः सर्वेषां श्रीकृष्णस्य श्रीगोकुले सम्प्रत्यागमनरूपस्य कामस्य पूरणं विशेषतस्तु केनचित् कस्मिंश्चित्तत्तद्विशेषसहितस्यापि अत एव कामैरिति बहुत्वम् "यद्धामार्थे"त्यादिना "कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः" इत्यनेन च तेषां तदेककामत्वस्यान्यकामनात्यागस्य च श्रवणात् । किञ्च वसुदेवोग्रसेनाभ्यामिति प्रथमोपादानं कुलश्रेष्ठत्वराजत्वाभ्यां वैशिष्ट्यात् ताभ्यां कामपूरणं चैव एतावन्तं कालं युद्धाद्युपद्रवेणागमनयोर्न वृत्तं सम्प्रति भविष्यत्येवेति श्रीबलदेवसहितेन श्रीकृष्णेनैवं 'ज्ञातीन् वो द्रष्टुमेष्यामः' इति कंसवधानन्तरं यन्निवेदितं तस्य समयोऽयमागतः ततः शीघ्रमेव केनापि मिषेणागत्य सदा तत्रैव निवत्स्याम इति श्रीमदुद्धवेन चैतदनुमोदनं ज्ञेयम् । अतस्तेन सह मन्त्रयित्वैव ताभ्यां तदङ्गीकृतमिति च अत एव मध्ये तस्य पाठः किन्तु तत्राप्येतौ सदा विहरिष्यतो द्वारकायामपीति पारमैश्वर्यज्ञानात्तन्मनःसमाधानम् एवं यदुभिश्च यथायथं ज्ञेयम् । अत्र श्रीगोपेन्द्र श्रीकृष्णस्य तद्वैशिष्ट्यमप्यनुसन्धेयम् । अत्र च मर्यादा स्वयमुक्ता - 'अपि स्मरथ नः सख्य' इत्यादौ 'शत्रुपक्षक्षपणचेतसः' इत्यनेन दन्तवक्त्रवधपर्यन्तैव ज्ञेया सा च दर्शिता । किञ्च श्रीवसुदेवादीनामधुना श्रीकृष्णस्यात्रत्य दृढगार्हस्थ्यविस्तारातिशयममतादर्शनेन जातविश्वासत्वात्तथाङ्गीकारो ज्ञेयः । तथापरार्ध्याभरणादिभिश्च पूर्यमाणः आद्रियमाण इव पारिबर्हं परार्ध्याभरणादिकम् आदरेण तत्स्नेहेन स्वीकृत्य यापितः श्रीवसुदेवादिभिरनुव्रजित इति ॥६७-६८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमीदृशं वदन्निति शेषः । यद्वा । अनेनोक्तप्रकारेण मैत्रीं स्मरन् अतः सौहृदेन प्रेम्णा यच्छैथिल्यमार्द्रता तद्युक्तचित्तः सन् अत एवाश्रुयुक्ते विशिष्टे विशालायते लोचने यस्य तथाभूतश्च सन् रुरोद । वि-शब्देनाश्रूणामाधिक्यं ध्वनितम् । यद्वा । स्वभावत एव सौहृदशैथिल्यचित्तः पुनश्चैवं स्मरन् समानमन्यत् । आनकदुन्दुभिरिति तज्जन्मोत्सवे देवकृतस्यानकदुन्दुभीनां घोषस्य सूचनेन तन्महाभाग्यस्मरणात्तद्योग्यतां सूचयति ॥६५॥ तु-शब्देन श्रीवसुदेवस्य व्यवहारादपि तस्य विशेषं बोधयति-तमेवाह-सख्युरित्यादि । श्रीवसुदेवस्य प्रियकृत् प्रियं कुर्वन् सन् । किञ्च । गोविन्दे गोकुलेन्द्रे श्रीकृष्णे रामे च गोकुलरमणे प्रेम्णा स्नेहविशेषेण हेतुना च त्रीन् मासांस्तत्रावसत् । कथम् ? अद्य श्व इति यदुभिः श्रीवसुदेवादिभिर्मानितः सन् नित्यं तत्प्रकारेणेत्यर्थः । यद्वा, किञ्च यदुभिरुग्रसेनादिभिर्निवासार्थं मानितश्च । अन्यत्तैर्व्याख्यातम् । तत्र श्रीगोपेन्द्रस्य श्रीकृष्णत्यागेन व्रजागमनानिच्छाविभावितां तादृशव्याख्यानं स्वपुत्रस्य तत्रागत्या व्रजेश्वरस्य प्रणयकोपेनैव व्रजे गमनानुबन्धादिति ज्ञेयम् । अथ वा अद्य श्वो वा मत्पुत्रोऽयमस्माभिः सह व्रजे तस्मिंश्चलिष्यतीत्येवं त्रीन् मासान् । अन्यत्समानम् ॥६६॥ ततो मासत्रयानन्तरं कामैर्विचित्रोपभोगैः तानेवाह-परार्ध्यैः यद्वा । कामैः परार्ध्याभरणादिभिश्च कृत्वा यदुभिः । किंवा, वक्ष्यमाणवसुदेवादिभिरेव पूर्यमाणः आभरणानि किरीटकुण्डलादीनि क्षौमानि पट्टवस्त्राणि परिच्छदाः दोहनभाजनाद्यर्थकांस्यादिपात्रयानादयः सव्रजो व्रजस्थदासदासीपशुवर्गादिभिः सहितः तान् प्रति प्रत्येकं पृथक्तत्प्रेरणेनेत्यर्थः । सबान्धवः सङ्गागताखिलश्रीगोपगोप्यादिसहितश्च । यद्वा । कामैः श्रीव्रजेन्द्रमनोरथैः श्रीभगवद्व्रजगमनविषयकैः पूर्यमाणः श्रीद्वारकायां ज्ञातीन् सर्वानिमान्नीत्वाचिरादेव साग्रजः कृष्णोऽयं व्रजे यास्यतीति

बहुशपथपूर्वकतत्कामसि
किञ्च । बन्धुव्यवहारेण
शब्दादक्रूरप्रद्युम्नादयः । य
दूरतोऽनुव्रजनेन । किंवा,

एवमिति शुकोक्ति
विलोचनयोर्यस्य सः रुरोद
प्रियं कर्तुरित्यर्थः ।) अद्य श्व
इति पाठान्तरं त्रीन् मासान्
परार्ध्यैः श्रेष्ठैराभरणैः क्षौमैर्दु
यदुभिर्यापितो महता सैन्येन

नन्दस्तु । कामैः
गमनागमनमयीति भेदो ज्ञेयः

नन्दस्त्विति । तुर्भिन्नो
विध्वंसयन् अहमिदानीं खलु
सख्युर्वसुदेवस्य प्रीयकृत् अन्यथ
यास्यामीति प्रतिरात्रि विचारयन्नपि
भोः प्राणपदार्द्धनिर्मन्थितश्रीसुख
कृष्णं व्रजे प्रस्थापय भो राजन्नुग्र
यूयं स्वचक्षुभिः पश्यत वयं हि
सर्वेषामेव दृढो निश्चय इत्युक्तवति
। तत्र वसुदेवेन देशकालपात्राभिज्ञे
बन्धूनां जिघांसैव किं मे सम्मता
लीजनान् द्वारकां प्रवेशयतु ततः
खलु कृष्णेन सहैवागताः विनाकृ
ममैतद्विज्ञापनापराधेन मामाज्ञापयेति
व्रजे प्रस्थापयिष्यामीति रामोद्धवस

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बहुशपथपूर्वकतत्कामसिद्धिप्रतिज्ञया पूर्णकामीक्रियमाण इत्यर्थः। ततश्च सव्रजस्थांश्च प्रति तथैवान्यांश्च प्रति तथैवाश्वासनेनेत्यर्थः। किञ्च। बन्धुव्यवहारेण परार्ध्याभरणादिभिश्च पूर्यमाणः कृष्णादिभिश्च यदुभिर्दत्तमादाय केवलं तेषां प्रीत्यर्थं स्वीकृत्य। आदि-शब्दादक्रूरप्रद्युम्नादयः। यापित इति स्नेहेनानुव्रजनार्थं सम्माननार्थं वा। अन्यत्तैर्व्याख्यातम्। यद्वा, यदुभिस्तैरेव वसुदेवादिभिर्यापितो कृतोऽनुव्रजनेन। किंवा, विविधशपथैः श्रीभगवद्व्रजयानं प्रस्थाप्य प्रयत्नेन प्रस्थापितश्च सन् ॥६७-६८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥६२-७१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमिति शुकोक्तिः। सौहृदेन शैथिल्यम्। स्वार्थे ष्यञ्। शिथिलं चित्तं यस्य सः तत्कृतां नन्दकृतां मैत्रीं स्मरन्नश्रूणि विलोचनयोर्यस्य सः रुरोद ॥६५॥ नन्दस्त्विति। सख्युः वसुदेवस्य रामकृष्णयोश्च प्रियकृत् अत एव (लक्षणहेत्वोरिति शत्रा प्रियं कर्तुरित्यर्थः।) अद्य श्वः इति प्रातः निर्गमे अपराह्णे गम्यताम् इत्यपराह्णे निर्गमे श्वो गम्यताम् इत्येवं यदुभिर्वारितश्च मानित इति पाठान्तरं त्रीन् मासान् अवसत्। मासानित्यत्यन्तसंयोगे द्वितीया ॥६६॥ तत इति। सव्रजः गोपैः सहितः सबान्धवश्च पराध्यैः श्रेष्ठैराभरणैः क्षौमैर्दुकूलैर्नानाविधैरनर्घैः परिच्छदैः भोगोपकरणैरित्येवंविधैः कामैः पूर्यमाणः दत्तान् पारिबर्हानादाय यदुभिर्यापितो महता सैन्येन प्रस्थापितो ययौ ॥६७-६८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नन्दस्तु। कामैः श्रीकृष्णस्य गोकुलागमनमयैः तत्र श्रीकृष्णेन स्वागमप्रतिज्ञा तत्रैव नित्यस्थितिमयी अन्यैस्तु गमनागमनमयीति भेदो ज्ञेयः ॥६६-७१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥४१-६८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥४२-६८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नन्दस्त्विति। तुर्भिन्नोपक्रमे। वसुदेवस्य य उपक्रमोऽभूत् स नन्दस्य नाभूदित्यर्थः। मत्पुत्रे श्रीकृष्णे तव स्वपुत्रत्वाभिमानं विध्वंसयन् अहमिदानीं खलु स्वपुत्रं गृहीत्वैव व्रजं यास्यामीत्यतिगाम्भीर्यादेव यन्न प्रत्यवोचत् किन्तु तूष्णीमेवातिष्ठत् तेनैव सख्युर्वसुदेवस्य प्रीयकृत् अन्यथा त्वप्रियकृदेव सोऽभविष्यदिति भावः। अद्य श्व इति अद्य खल्वत्रासमेव श्वः स्वपुत्रं गृहीत्वा व्रजं यास्यामीति प्रतिरात्रि विचारयन्नपि गोविन्दरामयोः प्रेम्णा तदाश्रयविषयकप्रेमानन्देन त्रीनपि मासान् अवसत् ॥६६॥ ततो मासत्रयानन्तरं भोः प्राणपदार्द्धनिर्मन्थितश्रीसुखघर्मबिन्दो! कृष्ण! साम्प्रतं चल व्रजमतः परं समयं गमयितुं न शक्नोमि। भो सखे वसुदेव! कृष्णं व्रजे प्रस्थापय भो राजन्नुग्रसेन! त्वमप्येवमेव मत्प्रियसखमिममाज्ञापय नो चेदत्र पुण्यक्षेत्रे रामह्रदे वयमधुनैव म्रियामहे। यूयं स्वचक्षुभिः पश्यत वयं हि सूर्योपरागे पुण्यजिघृक्षया नायाताः कृष्णमप्राप्य मर्तुं कृष्णं प्राप्य जीवितुमिति व्रजस्थानामस्माकं सर्वेषामेव दृढो निश्चय इत्युक्तवति श्रीव्रजराजे वसुदेवादिभिः कामैस्तस्य वाञ्छितैरर्थैः परार्ध्याभरणादिभिश्च स पूर्यमाणो ययावित्यन्वयः तत्र वसुदेवेन देशकालपात्राभिज्ञेन स्वाप्तबन्धुभिर्विचार्य श्रीनन्दस्य कामपूरणं यथा भोः सखे! व्रजराज! सत्यं ब्रूषे भवादृशानां बन्धूनां जिघांसैव किं मे सम्मता तस्मात् सर्वथैव कृष्णं व्रजं प्रस्थापयिष्यामि किन्तु साम्प्रतमयमस्मान् बन्धुज्ञातिसुहृदश्च बहूंश्च स्वजनान् द्वारकां प्रवेशयतु ततः परदिन एव शुभक्षणे निर्विरोधमेव व्रजं प्रति यात्रां करोत्वित्यत्र परःसहस्रान् शपथान् करोमि वयं तु कृष्णेन सहैवागताः विनाकृष्णं कथं गृहं गन्तुं प्रभवामः। लोकाः किं वदिष्यन्ति। त्वं सकलार्थपण्डितोऽसि। क्षमस्व ममाज्ञापनापराधेन मामाज्ञापयेति उग्रसेनेन यथा भोः व्रजेश्वर! अत्रार्थे अहमेव प्रतिभूरभूवम् सशपथं ब्रवीमि बलादेव कृष्णमहं व्रजं प्रस्थापयिष्यामीति रामोद्धवसहितेन रहःप्रदेशे कृष्णेन यथा भोस्तात! यद्यहमद्य सन्त्यज्यैव खल्वेतान् व्रजं यामि तर्ह्येतेऽपि

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मद्विरहेण मर्तुमुद्यता भविष्यन्ति । केश्यरिष्टादिभ्योऽपि महाबलिनः परःसहस्राः शत्रवः एवैतान् पार्थिवान् निहन्युः अवश्यं भावि स्ववृत्तमपि सर्वज्ञत्वादहं जानामि तदपि शृणु ब्रवीमि । इतो द्वारकां गत्वैव लब्धनिमन्त्रणो युधिष्ठिरराजसूयार्थं यास्यामि तत्र चैद्यं हत्वा पुनरागत्य शाल्वं निहत्य दन्तवक्त्रवधार्थं मथुरादक्षिणद्वारप्रदेशमासाद्य तत्रैव तं व्यापाद्य व्रजं प्रविश्य बन्धून् सदृश हृष्टमनाः युष्मदुत्सङ्ग एव रङ्गेण खेलयन्नेव जन्मेदं गमयिष्यामि । एतन्मम ललाटपत्रे विधात्रा लिखितमेवावद्दिनपर्यन्तं युष्मल्ललाटेष्वपि मद्विरहदुःखं लिखितमेतद्द्वयं नैवान्यथा भवितुमर्हत्यत एव हठं त्यक्त्वा साम्प्रतं व्रजं प्रति प्रतिष्ठस्व । एतन्मध्ये च भवन्तौ पितरौ मम प्रियसुहृदश्च मद्विरहदुःखलिखितमेतद्द्वयं नैवान्यथा भवितुमर्हत्येवार्ता यदा यदा मां द्रष्टुं किमपि क्रीडयितुं भोजयितुमीहिष्यते तदा भवद्भिश्चक्षूंषि मुद्रयितव्यानि यथाऽहमाविर्भूय सर्वानेव दवथून् खपुष्पीकृत्य सर्वानेव मनोरथान् सम्पादयिष्यामीति प्रतिजाने। किलाहमत्रार्थे मत्प्रियसखा इषीकाटवीदावसन्तप्तचरगात्राः प्रमाणीकर्तव्या इति ततश्च व्रजराजः स्वपुत्रसुखतात्पर्यपर्यालोचकचेताः भद्रं भद्रमिति सर्वान् वसुदेवादीनुक्त्वा प्रबोधिता विरतरुदद्बन्धुकातस्तैर्दत्तं पारिबर्हमादाय यदुभिस्तत्सङ्गप्रस्थापितया महासैन्य यापितो ययौ । अत्र कामैरिति पूर्यमाण इति पदद्वयान्यथानुपपत्तेरेव खल्वेतावद्व्याख्यानं प्रपञ्चितम् । कृष्णो वसुदेवदेवक्योरेव पुत्र इति ब्रह्मणापि सपुत्रपौत्रेणापि सशपथमुक्तेऽपि प्रतीतिलेशमप्यकुर्वतोः व्रजेश्वरयोः स्वाङ्गुलिस्पृष्टमात्रकृष्णचिबुकलब्धमहासुखसम्पत्तिस्मृतिमात्रन्यक्कृतप्राकृताप्राकृतसर्वसम्पदोस्तयोः किं वसुदेवादिदत्तैः पराध्याभरणक्षौमनानानर्घ्यपरिच्छदैः कामपूरणं सम्भवेत् यदि वा कामपूरणं भवेदेवेति प्रौढिस्तत्र सव्रजः सहबान्धवः इति विशेषणद्वयोपन्यासान्न केवलं सस्त्रीकस्य नन्दस्यैव अपि तु गोपीनां गोपानां सर्वेषां कृष्णप्रियसखानां च ततश्च कृष्णस्य पिता नन्दः प्रेयस्यो गोप्यश्च सखायो गोपाश्च प्राप्तैर्बहुमूल्याभरणवस्त्ररत्नादिभिः पूर्णमनोरथीभूय व्रजं ययुरित्येवं व्याख्येयं तदा व्रजस्थानां सर्वेषां प्रेमवत्त्वमपगतमेव भक्तिरसामृतसिन्धुधृतप्रेमलक्षणे अनन्यममतेत्युक्तेरित्यवधेयम् ॥६७-७१॥

गूढार्थदीपिनी

सौहृदेन प्रेमोद्रेकेण शैथिल्यमधीरं चित्तं यस्य सः । अश्रूणि लोचनयोर्यस्य सः ॥६५॥ अद्य सायं गन्तव्यं तद्व्यतीते सति श्वो गन्तव्यमित्येवं मानितः ॥६६॥ तत इति युग्मम् । कामैः नानाद्रव्यैः तदेवाह-पराध्येति । व्रजं गोष्ठसमूहः । पराध्याभरणानि श्रेष्ठभूषणानि क्षौमानि रेशमवस्त्राणि नानाबहुमूल्यपरिच्छदाः सामग्र्यश्च तैः सह पारिबर्हं मान्यम् देवद्रव्यमादाय यदुभिः यापितः प्रस्थापितः सन् ययौ ॥६७-६८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सख्युर्वसुदेवस्य रामकृष्णयोश्च प्रियकृत् अद्य श्व इति प्रातर्निर्गमे अद्यैव पराह्णे गम्यताम् पराह्णे निर्गमे श्वो गम्यतामिति यदुभिः प्रेम्णा यदुभिर्मानितः त्रीन् मासान् अवसदित्यन्वयः ॥६६-६७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं स्वदोषख्यापनं नन्दगुणप्रकटीकरणं च कृत्वा स्नेहेन रोदनं कृतवानित्याह-एवमिति । रोदनमुक्तार्थस्य स्थापकम् अन्यथा मुखत एव वदतीत्यपि शङ्का स्यात् । सौहृदेन शैथिल्यं यस्य चित्तस्य तादृशं चित्तं यस्य यतोऽयमानकदुन्दुभिः अतिसुबुद्धः कंसाद्भगवन्तं रक्षितवान् नन्दं स्वगृहनयने कः प्रयास इति भावः । तत्कृतां मैत्रीं भगवत्परिपालनरूपाम् अश्रूणि विलोचनयोर्यस्य दुःखस्य सहजत्वं निरूपितम् ॥६५॥ एवं स्नेहानुबन्धं प्राप्य नन्दः सख्युः प्रियकर्ता गोविन्दरामयोः प्रेम्णा अद्य गमिष्यामि श्वः गमिष्यामीत्येव वदन् त्रीन् मासान् न्यवात्सीत् प्रत्यहमेव यदुभिर्मानितः मासत्रयं स्वभावत एव स्थितः । ततोऽद्य श्व इति क मासत्रयम् ॥६६॥ एवं मघाद्याषाढपर्यन्तं स्थित्वा ततः कामैर्नानाभिलषितैर्भगवता पूर्यमाणः सव्रजः गोपालसहितो बान्धवसहि

काम्यपदार्थान् गणयति-
प्रत्येकं बहुभिर्दीयन्त इति
उद्धवोऽपि बहुकालं तद्गृहे
यापितः सन् ययौ । ततो नि
कोटिः गोप्यस्त्वपराः उभ
मनोनिमित्तं हि सर्वं दीयते

शुकोक्तिः । एवं
सख्युर्मित्रस्य प्रियकृत् रामकृ
कामैर्वाञ्छितैः पराध्यैरमूल्यै
उपस्करम् आदाय गृहीत्वा य

एवं सौहृदेन प्रेमा
पुत्रपालनादिमैत्रीं स्मरन् रुरोद
अद्यैवापराह्णे गम्यतामिति, अप
पराध्यैः श्रेष्ठैराभरणादिभिः का
सहितो नन्दो यदुभिर्यापितो दूर

एवमिति । एवं सौ
आनकदुन्दुभिस्तत्कृतां पुत्रपालन
नन्दो न किञ्चित् प्रत्युवाच न च
॥६५॥ नन्द इति । नन्दस्तु सख्यु
अपराह्णे निर्गमे श्वो गम्यतामिति पु
महासैन्येन प्रस्थापितो ययौ । स्प

अद्य श्व इति कुर्वत् ॥६
तैर्महत्या चम्वा प्रस्थापितः ॥६८

एवमिति शुकोक्तिः ॥
आनकदुन्दुभिर्वसुदेवः तत्कृतां नन्द

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अन्यपदार्थान् गणयति-परार्ध्येति । अमूल्यान्याभरणादीनि क्षौमाणि पट्टवस्त्राणि अनर्घ्यपरिच्छदाः दिव्यगृहोपकरणानि एतानि [illegible] बहुभिर्दीयन्त इति तान् गणयति वसुदेवेति पञ्च मुख्यतया गणिताः उग्रसेनो राजा वसुदेववत् सोऽपि भगवता मोचित इति उद्धवोऽपि बहुकालं तद्गृहे स्थित इति बलो बलभद्रः आदिशब्देन देवक्यादयोऽपि गृह्यन्ते । एतैः दत्तं पारिबर्हमादाय दूरे समागत्य यापितः सन् ययौ । ततो निर्गतः नन्वयं सर्वं गृहीत्वैव गच्छति न किञ्चित् स्वयं दत्तवान् इत्याशङ्क्याह-नन्दगोपाश्चेति । नन्दगोपाश्चैका [illegible] गोप्यस्त्वपराः उभयेऽपि गोविन्दचरणाम्बुजे समृद्ध्यर्थं क्षिप्तं मनः अतिपुष्टत्वात् पुनर्हर्तुमशक्ताः माथुरानेव देशान् ययुः मनोनिमित्तं हि सर्वं दीयते नन्दादीनां तु मनो भगवत्येव अतो नन्दादीनामेव बहुद्रव्यमत्रस्थितमित्यर्थः ॥६७-६९॥

श्रीसुबोधिनीसारः

शुकोक्तिः । एवं सौहृदेन शैथिल्यम् । स्वार्थे ष्यञ् । चित्तं यस्य स वसुदेवः तेन नन्देन कृतां मैत्रीं स्मरन् रुरोद ॥६५॥ सख्युर्मित्रस्य प्रियकृत् रामकृष्णयोश्च प्रेम्णाऽद्य श्वः प्रभात इति यदुभिर्मानितः सत्कृतो नन्दः त्रीन् मासान् अवसत् ॥६६॥ ततः मनोवाञ्छितैः परार्ध्यैरमूल्यैराभरणादिभिः पूर्यमाणः तृप्तो नन्दो बान्धवैः सह सव्रजः ॥६७॥ वसुदेवोग्रसेनाद्यैर्दत्तं पारिबर्हम् [illegible] आदाय गृहीत्वा यदुभिर्यापितः प्रस्थापितो ययौ ॥६८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सौहृदेन प्रेमातिशयेन शैथिल्यं चित्ते यस्य सः, अत एवाश्रूणिविलोचनयोर्यस्य स आनकदुन्दुभिस्तत्कृतां पुत्रपालनादिमैत्रीं स्मरन् रुरोद ॥६५॥ नन्दस्तु सख्युर्वसुदेवस्य रामकृष्णयोश्च प्रेम्णा तेषां प्रियं कर्तुम् अद्य श्व इति प्रातर्निर्गमे अद्यैवापराह्णे गम्यतामिति, अपराह्णे निर्गमे श्वो गम्यतामिति पुनः पुनर्यदुभिर्मानितः त्रीन् मासान् अवसत् ॥६६॥ ततो वसुदेवादिभिः परार्ध्यैः श्रेष्ठैराभरणादिभिः कामैः पूर्यमाणः तद्दत्तं पारिबर्हं पारितोषिकं सर्वमादाय सव्रजः शकटैः सहितः सहबान्धवः गोपैश्च सहितो नन्दो यदुभिर्यापितो दूरमागत्य प्रस्थापितो ययाविति द्वयोरन्वयः ॥६७-६८॥

अन्वितार्थप्रकाशिका

एवमिति । एवं सौहृदेन प्रेमातिशयेन शैथिल्यं यस्य तच्चित्तं यस्य सः अत एवाश्रूणिविलोचनयोर्यस्य स आनकदुन्दुभिस्तत्कृतां पुत्रपालनादिमैत्रीं स्मरन् रुरोद । अत्र प्रेमभक्ताः । श्रीकृष्णे स्वपुत्रत्वं व्यंजयन्तं वसुदेवं स्वपुत्राभावसन्देहोऽपि नन्दो न किञ्चित् प्रत्युवाच न च तस्य श्रीकृष्णे स्वपुत्रस्य दारसुदादिवैभवैश्चान्तः परमसन्तुष्टो बहिर्वसुदेवोक्तानुसारमेव व्यवजह्रे ॥६५॥ नन्द इति । नन्दस्तु सख्युर्वसुदेवस्य रामकृष्णयोश्च प्रेम्णा तेषां प्रियं कर्तुम् अद्य श्व इति अद्य निर्गमे अद्यैवापराह्णे गम्यतामिति अपराह्णे निर्गमे श्वो गम्यतामिति पुनः पुनर्यदुभिर्मानितः त्रीन् मासान् अवसत् ॥६६॥ तत इति युग्मम् । ततो वसुदेवादिभिर्यापितः उग्रसेनेन प्रस्थापितो ययौ । स्पष्टं शेषम् ॥६७-६८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अद्य श्व इति कुर्वत् ॥६६॥ कामैर्मनोवाञ्छितपदार्थैः ॥६७॥ वसुदेवादिभिर्यदुभिः । दत्तं पारिबर्हम् आदाय यापितः [illegible] चम्वा प्रस्थापितः ॥६८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति शुकोक्तिः ॥ एवमिति ॥ एवं सौहृदेन शैथिल्यं शिथिलं चित्तं यस्य सः शैथिल्यमित्यत्र स्वार्थे ष्यञ् । आनकदुन्दुभिर्वसुदेवः तत्कृतां नन्दकृतां मैत्रीं स्मरन् अत एव अश्रूणि विलोचनयोर्यस्य सः एवम्भूतः सन् रुरोद ॥६५॥ नन्दस्त्विति

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

॥ सख्युर्वसुदेवस्य गोविन्दरामयोः कृष्णबलभद्रयोश्च प्रियकृत् प्रियं कर्तुमित्यर्थः । नन्दस्तु अद्य श्वः इति यदुभिः प्रेम्णा वारितः स त्रीन् मासान् मासत्रयपर्यन्तमित्यर्थः । अवसत् । मानित इत्यपि पाठः ॥६६॥ तत इति ॥ वसुदेवेति च ॥ ततः सव्रजः गोपैः सहितः सहबान्धवः बान्धवैश्च सहितः नन्दः परार्ध्यैः श्रेष्ठैराभरणैः क्षौमैर्दूकूलैः नानाविधैरन्यर्घ्यैं परिच्छदैः भोगोपकरणैः इत्येवं बहुविधैः कामैः पूर्यमाणः सन्, वसुदेवोग्रसेनाभ्यां कृष्णोद्धवबलादिभिश्च दत्तं पारिबर्हम् आदाय यदुभिः यापितः महता सैन्येन प्रस्थापितः सन् ययौ ॥६७-६८॥

कृष्णप्रिया

श्री शुकाचार्यजी महाराज कहते है कि महामना श्रीवसुदेवजी इस प्रकार उपकार भी मायावी निरूपण करते उनका हृदय प्रेमसे भर गया और गद्‌गद् हो गया। उन्हें नन्दरायका सौहार्द और उनके उपकार स्मरण हो आये, उनके नयन युगलमें प्रेमाश्रु छलक आये भरगये औ वे रोने लगे ॥६५॥ श्रीनन्दमहाराज अपने सुहृद वसुदेवजीको प्रसन्न करने के लिये और भगवान श्रीकृष्ण एवं बलभद्रजीने स्नेह बंधकर आनजाइये कलआइये करते करते तीन मास पर्यन्त वहां रह गये। यादवोने मनभर उनका स्वागत किया ॥६६॥ पुनः अत्यंत अमूल्य अलंकार दुकूल वस्त्र विविध प्रकारके उत्तमोत्तम पदार्थ और भोगों से परम मान्य व्रजराय को उनके व्रजनिवासी स्वजनोंको बध्न्धुजन एवं अग्रगण्य व्रजजनों का अत्यंत उत्तम सत्कार किया ॥६७॥ श्रीवसुदेव उग्रसेनश्रीकृष्ण बलराम उदधन प्रभृति यदुवरों को पृथक् पृथक् विविध प्रकारकी भेंट दी विदायमान होने पर सर्व प्रकार के सत्कार पदार्थ को लेकर नन्दरायजीने प्रस्थान किया ॥६८॥

[1]नन्दो गोपाश्च गोप्यश्च गोविन्दचरणाम्बुजे । मनः क्षिप्तं पुनर्हर्तुमशक्ता [2]मथुरां ययुः ॥६९॥
[3]बन्धुषु प्रतियातेषु वृष्णयः कृष्णदेवताः । वीक्ष्य प्रावृषमासन्नां ययुर्द्वारवतीं पुनः ॥७०॥
जनेभ्यः [4]कथयांचक्रुर्वसुदेवमहोत्सवम् । यदासीत्तीर्थयात्रायां सुहृत्सन्दर्शनादिकम् ॥७१॥

॥ इति श्रीमद्भागवते महापुराणे [5]दशमस्कन्धे तीर्थयात्रानुवर्णनं नाम [6]चतुरशीतितमोऽध्यायः ॥८४॥

कर्दमक्षमा

नन्दः, गोपः, च, गोपाः, गोविन्दचरणाम्बुजे, क्षिप्तम्, मनः, पुनः, हर्तुम्, अशक्ताः, मथुराम्, ययुः ॥६९॥, बन्धुषु प्रतियातेषु, कृष्णदेवताः, वृष्णयः, आसन्नाम्, प्रावृषम्, वीक्ष्य, पुनः, द्वारवतीम्, ययुः ॥७०॥ वसुदेवमहोत्सवम्, तीर्थयात्रायाम्, सुहृत्सन्दर्शनादिकम्, यत्, आसीत्, जनेभ्यः, कथयाञ्चक्रुः ॥७१॥

॥ श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे अन्वये चतुरशीतितमोऽध्यायः ॥८४॥

---

[1] तदा गोपाश्च-विज. । [2] मनीशा मथुरां ययुः-श्रीधर. वंशी. वीर. विज. ; मशक्ताः स्वाश्रमान्:-गो. प्रे. टी. ; मनीशा माथुरान् ययुः-इति पाठ कर्त

भीष्मो द्रोणोऽङ्गराजश्च बाह्लीं कविसुरावदयः । सपुत्रो धृतराष्ट्रश्च जग्मुः स्वं स्वं निकेतनम् ॥१॥
अन्ये च सर्वराजानो देवयात्रार्थमागताः । गते मासत्रये भूयः स्वानेव विषयान् ययुः ॥२॥
पाण्डवाश्च महात्मानः पृथा च नृपसत्तम । अनुज्ञाताः केशवेन बाष्पगद्‌गदभाषिणः ॥ शक्रप्रस्थं ययुः सर्वे स्वजनैः परिवारिताः ॥३॥

— श्लोकत्रयमधिकम् - विज. ।[3] अयं श्लोको नास्ति-विज. । [4] र्यदुः-श्रीधर. वंशी. वीर. विज. ; वसुदेव-शुक. ।[5] पाद्म संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. मूलम । [6] त्रिसप्ततितमोऽध्यायः-विज. ।

यदुदेवस्य वसुदे

इति श्रीमद्भागवते महापु

क्षिप्तं लग्नम् ॥६९

॥ इति श्रीम

क्षिप्तं न्यस्तं हर्तु
निजागमनप्रतिज्ञायुक्तश्रीभगव
पुनः प्राप्तिपर्यन्तं तथैवातिष्ठन्नि
पुनर्निवृत्य दृढं यातेषु सत्स्वि
अन्यथा तत्रैवास्थास्यन्निति च त
पूर्वेणान्वयः सुहृदः श्रीव्रजवास
श्रीगोकुलागमनादिकं स्मर्तव्यं
कथयाञ्चक्रुः अकथयन् । आदि
श्रीनन्दादिषु तस्य स्नेहविशेषं तेष

यो गोष्ठं विरहय्य क
आगत्य स्वयमेव यः कु

॥ इति श्रीमद्भागवते महापुरा

क्षिप्तं न्यस्तं हर्तुमाकर्ष्टुमन
गमयति-पुनरिति । पूर्वं श्रीमधुपुरीतः
मधुपुरीप्रयाणे यथा हर्तुमनीशा मोह
हर्तुमनीशा इत्यर्थः । च-काराभ्यां च
पाठान्तरेऽपि स एवार्थः ॥६९॥ बन्धुषु
स्यातुमशक्तेरिति । किंवा, प्रतियातेष्व
इष्टदेवो येषां ते । तद्व्यवहारैकानुसारादि

श्रीधरस्वामिविरचिता भावार्थदीपिका

यदुदेवस्य वसुदेवस्य महोत्सवं यज्ञादिलक्षणं सुहृत्सन्दर्शनादिकञ्चेति ॥७१॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां चतुरशीतितमोऽध्ययः ॥८४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

क्षिप्तं लग्नम् ॥६९॥ प्रावृषं वर्षर्तुम् ॥७०-७१॥ एतदाख्यानश्रुतिफलमाह-य इति ॥७२॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे चतुरशीतितमोऽध्यायः ॥८४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

क्षिप्तं न्यस्तं हर्तुमाक्रष्टुमनीशा इति मनस्तस्मिन्नेवातिष्ठत् केवलं ते देहेन ययुरित्यर्थः । इति केवलं झटिति निजागमनप्रतिज्ञायुक्तश्रीभगवदाग्रहेणैवेति बोधितम् अतः माथुरान् देशान् ययुः मथुरामिति पाठेऽपि स एवार्थः पुनरिति तदनन्तरं पुनः प्राप्तिपर्यन्तं तथैवातिष्ठन्नित्यर्थः । चकाराभ्यां सर्वेषामेव तादृशभावे प्राधान्यं बोधयति ॥६९॥ बन्धुषु श्रीनन्दादिषु प्रति पुनः पुनर्निवृत्य दृढं यातेषु सत्स्विति तेषां स्मारके तत्स्थाने विरहोद्रेकेण क्षणमपि स्थातुमशक्तैरिति भावः । तथा प्रतियातेष्वेवेति अन्यथा तत्रैवास्थास्यन्निति च तत्रे हेतुः-कृष्णो देवता येषां ते तद्व्यवहारानुसारादित्यर्थः । ययुर्द्वारवतीं पुनरित्येव पाठः वृष्णय इति वृष्ण्यन्वयः सुहृदः श्रीव्रजवास्याद्याः ॥७०॥ इतः परं पूर्वोक्तानुसारेण साल्ववधानन्तरदन्तवक्त्रवधप्रसङ्गे श्रीभगवतः स्वयमेव गोकुलागमनादिकं स्मर्तव्यं जनेभ्यः श्रीद्वारकास्थितेभ्यः अन्येभ्योऽपि सर्वेभ्यः वृष्णय एव किंवा सर्वजनेभ्यः सर्वे जनाः व्याचक्रुः अकथयन् । आदिशब्दात् नृपमुनिगणवर्णितं यदूनां श्रीभगवतश्च माहात्म्यं श्रीमहिषीणां तस्मिन्नद्भुतभक्तिभरं तथा श्रीनन्दादिषु तस्य स्नेहविशेषं तेषां तेन तत्समानताश्वासनादिकं च - तथा च —

यो गोष्ठं विरहय्य कार्यवशतः पुर्यां चिराय स्थितो व्यग्रस्तूद्धवरौहिणेयमुखतः शश्वत्पुराऽऽश्वासयत् ।
आगत्य स्वयमेव यः कुरुभुवि प्रत्याप्य भूयो झटित्यागच्छत्कस्रगः स एव शरणं श्रीकृष्णदेवो मम ॥७१॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां चतुरशीतितमोऽध्यायः ॥८४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

क्षिप्तं न्यस्तं हर्तुमाकर्ष्टुमनीशा इति मनस्तस्मिन्नेवाऽतिष्ठत् । केवलं देहेनैव ययुरित्यर्थः । इति विचिन्तया मोहे पर्यवसानं दर्शयति-पुनरिति । पूर्वं श्रीमधुपुरीतः श्रीनन्दादीनां व्रजयाने । किंवा, श्रीकृष्णस्य मधुपुरीतः श्रीनन्दादीनां व्रजयाने, किंवा श्रीकृष्णस्य मधुपुरीप्रयाणे यथा हर्तुमनीशा मोहमलभन्त तथेत्यर्थः । यद्वा, इदानीं कथञ्चित् प्रबोध्याह स्म । अधुना तु मिथः स्नेहविवृद्ध्या हर्तुमनीशा इत्यर्थः । च-काराभ्यां च सर्वेषामेव प्रत्येकं तादृशयाने प्राधान्यं बोध्यते । माथुरानिति श्रीभगवताशेषमाथुरदेशाधिपत्यात् मथुरामिति पाठेऽपि स एवार्थः ॥६९॥ बन्धुषु श्रीनन्दादिषु प्रति पुनः पुनर्निवृत्त्य दृढं यातेषु सत्स्विति तेषां स्मारके तत्स्थाने विरहदुःखोद्रेकेण स्थातुमशक्तैरिति । किंवा, प्रतियातेष्वेवेति अन्यथा तत्रैवास्थास्यन्निति भावः । यतः कृष्णः सर्वचित्ताकर्षको भगवान् देवता येषां ते । तद्व्यवहारैकानुसारादिति भावः ॥७०॥ जनेभ्यः श्रीद्वारकास्थितेभ्यः पौरेभ्यः अन्येभ्योऽपि सर्वेभ्यः वृष्णय एव ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

किंवा सर्वजनेभ्यः । सर्वे जनाः कथयाञ्चक्रुः अकथयन् । आदिशब्दान्नृपमुनिगणवर्णितं यदूनां श्रीभगवतश्च माहात्म्यं श्रीमहिषीणां तस्मिन्नद्भुतभक्तिभरं तथा श्रीनन्दादिषु तस्य स्नेहविशेषं तेषां तेन तत्सम्माननाश्वासनादिकं च ॥७१॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रील-सनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशमटिप्पण्यां चतुरशीतितमोऽध्यायः ॥८४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥६२-७१॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये चतुरशीतितमोऽध्यायः ॥८४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

नन्दो गोप्यश्चेति । गोविन्दस्य चरणाम्बुजे क्षिप्तं निहितं चित्तं पुनर्हर्तुमसमर्थाः सन्तः ययुः ॥६९॥ बन्धुष्विति । बन्धु नन्दादिषु प्रतियातेषु प्रस्थितवत्सु कृष्ण एव देवता येषां ते वृष्णयः प्रावृषं वर्षर्तुमासन्नां सन्निहितां वीक्ष्य ज्ञात्वा ॥७०॥ जनेभ्य इति । यदुदेवस्य महोत्सवं यज्ञादिलक्षणं यच्च सुहृत्सन्दर्शनादिकं तत्सर्वं जनेभ्यो द्वारकास्थेभ्यः कथयामासुः ॥७१॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां चतुरशीतितमोऽध्यायः ॥८४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥६६-७१॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे चतुरशीतितमोऽध्यायः ॥८४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

नन्दो गोप्यश्चेत्यादि । नन्दो गोपाश्च तत्र गोविन्दचरणाम्बुजं क्षिप्तं मनः पुनर्हर्तुमनीशाः सन्तो माथुरान् ययुः नन्दः कथं त न स्थित इत्याह-अगोप्यः न गोपयितुमर्हः स्वतःसिद्धत्वात् व्रजराजत्वाच्च । गोपीजनस्तु तमेव प्राप तमध्यगन्निति पूर्वोक्तः मु गोपीजनो मुनिरूप इति पूर्ववत् ॥६९-७१॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे चतुरशीतितमोऽध्यायः ॥८४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

नन्दो गोपाश्चेत्यादि । गोविन्दचरणाम्बुजे क्षिप्तं मनः पुनर्हर्तुमनीशाः सन्तो माथुरान् ययुः । नन्दस्तत्र कथं तत्र स्थितः ? तत्राह-अगोप्योऽरक्षणीयः, स्वतः स्वातन्त्र्याद्व्रजरूपनित्यस्थानाधिकारित्वं हि तस्य नित्यम् । गोपीजन तमेव प्रापेति पूर्वमेवोक्तम् ॥६९॥ ॥७०-७१॥

॥ इति श्रीमद्भागवते महापुराणे श्रीनाथचक्रवर्तिविरचितायां चैतन्यमंजूषायां चतुरशीतितमोऽध्यायः ॥८४॥

॥६७-७१॥

॥ इति सा

क्षिप्तं लग्नं मनः पु

यदुदेवस्य वसुदेवस्य महोत्स

॥ इति श्रीमद्भागवते मह

यापितः प्रस्थापितः

॥ इति श्रीमद्भागवते मह

ततो यज्जातं तदाह-ब

निःशङ्कस्थितौ हेतुः कृष्णदेवताः

प्रावृषमासन्नामिति दिनचतुष्टयच

वृत्तान्तकथनमाह-जनेभ्यः कथय

परमोत्सवलक्षणं फलं दत्तवानि

॥ इति श्रीमद्भागवतसुबो

गोपा गोप्यश्च गोविन्दस्य

एतेन मथुराराज्यं नन्दायदत्तमित्यवग

प्रावृषं वर्षर्तुं वीक्ष्य दृष्ट्वा पुनर्द्वारक

तीर्थयात्रायां सुहृदां सन्दर्शनादिकं य

॥ इति श्रीमद्भ

नन्दादीनां स्नेहातिशयमाह-न

असमर्थाः सन्तो मथुरां मथुरामण्डलस्थं

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

॥६७-७१॥

॥ इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । चतुर्युक्ताशीतितमो दशमेऽजनि सङ्गतः ॥८४॥

गूढार्थदीपिनी

क्षिप्तं लग्नं मनः पुनः हर्तुमाक्रष्टुमनीशा असमर्थाः सन्तः मथुरां ययुः ॥६९॥ प्रावृषं वर्षर्तुम् आसन्नां सन्निहिताम् ॥७०॥ सुदेवस्य वसुदेवस्य महोत्सवं यज्ञादिलक्षणं यत् सुहृत्संदर्शनादिकं च आसीत् तत् सर्वं कथयाञ्चक्रुरित्यन्वयः ॥७१॥

॥इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यां चतुरशीतितमोऽध्यायः ॥८४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यापितः प्रस्थापितः ॥६८-७०॥ यदेव महोत्सवं वसुदेवयज्ञोत्सवम् ॥७१॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवसिद्धान्तप्रदीपे चतुरशीतितमाध्यायार्थप्रकाशः ॥८४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो यज्जातं तदाह-बन्धुषु प्रतियातेष्विति । सर्वेष्वेव स्वस्वदेशं गतेषु स्वयमेकाकिनोऽपि बहुकालं स्थिताः । तत्र स्थितौ हेतुः कृष्णदेवताः इति । कृष्ण एव अलौकिकप्रकारेण रक्षको येषाम् । तर्हि कथं गता इत्याकांक्षायामाह-वीक्ष्य सन्नामिति दिनचतुष्टचदशकव्यवहिताम् ॥७०॥ ततो ये नागतास्तेषामयं महोत्सवो न जात इति शङ्कां वारयितुं कथनमाह-जनेभ्यः कथयाञ्चक्रुरिति । वसुदेवस्य यज्ञमहोत्सवं यच्च सुहृत्संदर्शनादिकं तदप्येकं सात्त्विकानां निरुद्धानां त्सवलक्षणं फलं दत्तवानिति ॥७१॥

॥इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धविवरणे पञ्चत्रिंशाध्यायविवरणम् ॥३५॥ ॥८४॥

श्रीसुबोधिनीसारः

गोपा गोप्यश्च गोविन्दस्य चरणाम्बुजे पादपद्मे क्षिप्तं लग्नं मनः पुनर्हर्तुं प्रत्याक्रष्टुमनीशा असमर्था मथुरां ययुः । मथुराराज्यं नन्दायदत्तमित्यवगम्यते ॥६९॥ बन्धुषु प्रतिगतेषु सत्सु कृष्णो देवता येषां ते वृष्णय आसन्नां समीपवर्तिनीं वर्षर्तुं वीक्ष्य दृष्ट्वा पुनर्द्वारकां ययुः ॥७०॥ यदुदेवस्य वसुदेवस्य महोत्सवं यज्ञलीलां जनेभ्यः कथयाञ्चक्रुः । सुहृदां सन्दर्शनादिकं यदासीत्तच्च ॥७१॥

॥ इति श्रीमद्भा० दशमस्कन्धे उत्त० सुबो० टी० चतुरशीतितमोऽध्यायः ॥८४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

न्दादीनां स्नेहातिशयमाह-नन्द इति । नन्दादयो गोविन्दचरणाम्बुजे क्षिप्तं निहितं मनः पुनर्हर्तुं ततोवियोजयितुमनीशा सन्तो मथुरां मथुरामण्डलस्थं व्रजं ययुः ॥६९॥ एवं बन्धुषु सर्वेषु प्रतियातेषु प्रस्थितवत्सु कृष्ण एव देवता येषां ते

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वृष्णयः प्रावृषं वर्षर्तुमासन्नां सन्निहितां वीक्ष्य ज्ञात्वा कृष्णाज्ञया पुनर्द्वारवतीं ययुः ॥७०॥ तीर्थयात्रायां यदुदेवस्य वसुदेव महोत्सवं यज्ञमहोत्सवं तथा यच्च सुहृत्सन्दर्शनादिकमासीत्तत्सर्वं द्वारकावासिभ्यो जनेभ्यः कथयाञ्चक्रुः ॥७१॥ एतत्कीर्तनादिफलमाह-य इदमिति । स्पष्टम् ॥७२॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥

श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥

रचिता दशमे तत्र सात्त्विकानां निरोधने । चतुरशीतितमोऽगाच्छौरेर्यज्ञनिरूपकः ॥३॥ ॥८४॥

अन्वितार्थप्रकाशिका

नन्द इति । नन्दादयो गोपाः गोविन्दचरणाम्बुजे क्षिप्तं निहितं मनः पुनर्हर्तुं ततोवियोजयितुमनीशा असमर्थाः सन्तो मधु मथुरामण्डलस्थं व्रजं ययुः । अत्र शत्रुपक्षक्षपणकार्यस्यावशिष्टत्वमपदिश्य कृष्णो न ययाविति दन्तवक्त्रवधानन्तरं तु कृष्णो

अन्वितार्थप्रकाशिका

गमिष्यति इति प्रागुक्तम् ॥६९॥ बन्धुष्विति । सर्वेषु प्रतियातेषु प्रस्थितवत्सु कृष्ण एव देवता येषां ते वृष्णयः प्रावृषं वर्षर्तुमासन्नां सन्निहितां वीक्ष्य ज्ञात्वा कृष्णाज्ञया पुनर्द्वारवतीं ययुः ॥७०॥ जनेभ्य इति । तीर्थयात्रायां यदुदेवस्य वसुदेव महोत्सवं यज्ञमहोत्सवं तथा यच्च सुहृत्सन्दर्शनादिकमासीत्तत्सर्वं द्वारकावासिभ्यो जनेभ्यः कथयाञ्चक्रुः ॥७१॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमे चतुरशीतितमे व्यधात् ॥

॥ इति श्रीभागवते दशमेऽन्वितार्थप्रकाशिकायां चतुरशीतितमोऽध्यायः ॥८४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्षिप्तम् आरोपितं मनः ॥६९॥ प्रावृषं वर्षाकालम् ॥७०॥ यदुदेवस्य वसुदेवस्य महोत्सवं यज्ञम् ॥७१॥

॥ ॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने तीर्थयात्रायां वसुदेवयज्ञोत्सववर्णनं नाम चतुरशीतितमोऽध्यायः ॥८४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्द इति ॥ नन्दः गोपाः गोप्यः चकारावत्राप्यर्थे । गोविन्दचरणाम्बुजे श्रीकृष्णचरणकमणे क्षिप्तं निहितं मनः हर्तुमाक्रष्टुम् अनीशा असमर्थाः सन्तः मथुरां प्रति ययुः ॥६९॥ बन्धुष्विति ॥ बन्धुषु नन्दादिषु प्रतियातेषु प्रस्थितवत्सु कृष्ण देवता येषां ते वृष्णयः प्रावृषं वर्षर्तुम् आसन्नां सन्निहितां वीक्ष्य पुनः द्वारवतीं द्वारकां प्रति ययुः ॥७०॥ जनेभ्य इति ॥ जनेभ्यः तत्रत्यजनेभ्यः यदुदेवमहोत्सवं वसुदेवस्य यज्ञादिलक्षणमहोत्सवं तीर्थयात्रायां यत् सुहृत्संदर्शनादिकं जातम् तत्सर्वं यादवाः कथयाञ्चक्रुः ॥७१॥

॥ इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुत-
श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां
दशमस्कन्धे उत्तरार्धे चतुरशीतितमोऽध्यायः ॥८४॥

श्रीव्रजराय गोपजन
कि वे फिर भरसक प्रयत्
मन मथुराजी से प्रस्थान वि
ही अपने सर्वस्व मानने व
प्रस्थान किया ॥७०॥ व
सम्बन्धिजन समागम परस्प

॥ इति श्रीमद्भागवते

कृष्णप्रिया

श्रीव्रजराय गोपजन गोपीजन आदि व्रजजनका मन भगवान श्रीकृष्ण के चरण कमलोमें एसा लग गया कि वे फिर भरसक प्रयत्न करने पर भी अपने मनको उन चरणोंमें सढे न लौटा सके । क्या कहा वे बिना हि मथुराजी से प्रस्थान किया ।।६९।। जब सब बन्धुजन बान्धवजन वहांसे विदा हो गये, तब भगवान श्रीकृष्णको अपने सर्वस्व मानने वाले यादवोंने यह देखा कि अब वर्षा ऋतु गयी है तब अपने स्थान द्वारिका के लिये स्थान किया ।।७०।। वहां जाकर उन्होंने सब लोगोंसे महाराज श्रीवसुदेवजी के यज्ञमहोत्सव स्वजनमिलन न्धिजन समागम परस्परका दर्शन सहवास इत्यादि तीर्थयात्राके रसमय प्रसंगोको कह सुनाया ।।७१।।

।। इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे चतुरशीतितमाध्यायस्य भाषाटीका समाप्ता ।। ८४।

॥ श्रीहरिः ॥

★श्रीगणेशाय नमः★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ पञ्चाशीतितमोऽध्यायः ॥

श्लोकाः	अनु.	मि.उ.	व.	इ.वं.	वंश.	मा.	उ.	श्लो.अ.	उ.अ.	अ.अ.	सं.श्लो.अ.	सं.श्लो.
५९	५१	२	३	१	१	१	९	२०५२	५५	४५	२१५२	६७

श्रीबादरायणिरुवाच

अथैकदाऽऽत्मजौ प्राप्तौ कृतपादाभिवन्दनौ । वसुदेवोऽभिनन्द्याह प्रीत्या संकर्षणाच्युतौ ॥१॥

कर्दमक्षमा

श्रीबादरायणिः, उवाच ।

अथ, एकदा, सङ्कर्षणाच्युतौ, कृतपादाभिवन्दनौ, आत्मजौ, प्राप्तौ, वसुदेवः, प्रीत्या, अभिनन्द, आह ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

पञ्चाशीतितमे रामकृष्णौ सम्प्रार्थितौ सुतौ । पित्रे ज्ञानमथो मात्रे मृतान् पुत्रानयच्छताम् ॥

नन्दयित्वा कुरुक्षेत्रयात्रायां सुहृदो बहून् । तत्त्वज्ञानं ततः पित्रोरादिशन् मृतसूनुभिः ॥१॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

अथो पितृज्ञानदानानन्तरम् । अयच्छतां ददतुः (१) । ततः सुहृदानन्ददानोत्तरम् । पित्रोर्मातापितृभ्याम् (२)। तीर्थयात्रानन्तरम् अभिनन्द्य संश्लाघ्य ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

एवमैश्वर्यज्ञानपितृभावमिश्रप्रेम्णा श्रीवसुदेवेन मुनिवाक्योद्दीपितैश्वर्यज्ञानेन ताः सह श्रीभगवतस्तज्ज्ञानगोष्ठीमये कादाचित्को लीलाविशेषस्तमथ प्रस्तौति-अथेति । लब्धमन्युपदेशविशेषकुरुक्षेत्रयात्रान्तरम् एकदा क्वचित्प्रातर्नित्यवन्दन यत आत्मजौ ताभ्यां तेन च तथाप्यपरित्याज्यतद्भावो अतः कृतेति च अत एवाभिनन्द्य आशीर्भिः प्रीणयित्वाऽऽह तत्र प्रं साक्षात्परमेश्वरयोरप्यनयोर्मत्पुत्रत्वेनोदय इत्यन्तःसन्तोषेणेत्यर्थः । अत एवाग्रे तत्खण्डनभङ्गिरपि तत्सन्तोषगर्भैव ज्ञेया सङ्कर्षणाच्यु तादृशैश्वर्ये तादृशप्रीतिविधायित्वे चाविश्लिष्टौ ॥१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीनन्दादीन् प्रति श्रीभगवतः प्रीतिविशेषमुक्त्वा प्रसङ्गाच्छ्रीवसुदेवदीन् प्रत्यपि तं वक्तुमारभते-अथेति । कुरुक्षेत्र पश्चात् माङ्गल्ये वा, पितरि स्नेहभरविस्तारात् प्राप्तौ नित्यकृत्यत्वेन भक्त्या प्रातरागतौ यत आत्मजौ एकदा कस्मिंश्चिद्दिवसे यद्वा । शुभकालविशेषे प्रसादविशेषार्थमेव प्राप्तौ प्रीत्या अभिनन्द्य आशीर्भिः स्तुतिभिर्वा प्रशस्याभितो हर्षयित्वा वाऽऽह

सङ्कर्षणः स्वमाहात्म्यविस्त

अथ कदाचिद्वसुदेव
कृतं पादाभिवन्दनं याभ्यां तौ

पञ्चाशीतितमे पित्रोर्हरि

पञ्चाशीतितमे
अथ तीर्थयात्रानन्तरम् ।

श्रीवसुदेवकृतं भगवत्स्त

एवं निरोधः स
अन्यथा चेत्कृतो
अतोऽग्रे भगवा
तत्रादौ भगवद्
षट्त्रिंशे
अलौकिको लौ
अनुभावात्पुरैश्वर्य
तीर्थयज्ञसदुक्त्या
तथैव देवकी दे

एवमेतावद्भिरध्यायैस्त्रिविधा
लोकवेदातिशायि स ईश्वरः यः अलौ
ज्ञानोपदेशं यत्करोति यच्चाप्यखण्डं
सुतसमानयनं ततोऽपि स्वपदप्रापणमपि
पित्रोरभिमतं च करोति अध्यायसङ्ग
समेवात्मजौ प्राप्तौ लालनसमये ततः कृ
सङ्कर्षणमच्युतं च सर्वमेतत् ज्ञाने पूर्वाङ्ग

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

र्षणः स्वमाहात्म्यविस्तारणेन सर्वचित्ताकर्षकः अच्युतः प्रकटाशेषैश्वर्यपरिपूर्णस्तौ ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-२॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथ कदाचिद्वसुदेवदेवक्यावेदितथात्म्यस्य भगवतः प्रेताग्रजादानात्मकं चोष्टितमनुवर्णयति-अथेत्यादि पञ्चाशीतितमेन। कृतं पादाभिवन्दनं याभ्यां तौ रामकृष्णावभिनन्द्य प्राह ॥१॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-११॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

पञ्चाशीतितमे पित्रोर्हरेश्च ज्ञानगीस्स्तुतिः। मातुः पुत्रानानयन् स बलिना सबलः स्तुतः ॥ ॥१-२॥

गूढार्थदीपिनी

पञ्चाशीतितमे भक्त्या पितृभ्यां संस्तुतौ सुतौ। पित्रे सुनिर्मलं ज्ञानं मात्रेऽदातां मृतात्मजान् ॥१॥

अथ तीर्थयात्रानन्तरम्। वसुदेवः आत्मजौ अभिनन्द्य संश्लाघ्य प्रीत्या आहेत्यन्वयः। कृतं पादयोरभिवन्दनं याभ्यां तौ ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

श्रीवसुदेवकृतं भगवत्स्तवं श्रीदेवकीवचनात्तन्मृतबालानयनादिकं भगवच्चेष्टितं च वर्णयति-अथेति पञ्चाशीतितमेन ॥१॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

एवं निरोधः सर्वेषां भगवत्कृत ईरितः। स किं साक्षात्सर्वयुक्त्या भगवानन्यथापि वा ॥१॥
अन्यथा चेत्कृतोऽप्येष निरोधो निष्फलो भवेत्। तस्मात् कृष्णस्य सर्वोक्त्या भगवत्त्वं तु साध्यते ॥२॥
अतोऽग्रे भगवान व्यासः षडध्यायीं चकार ह। ऐश्वर्यादिप्रसिद्ध्यर्थं सङ्गतिस्त्रियमेव हि ॥३॥
तत्रादौ भगवद्भावसिद्ध्यर्थं युक्तिपूर्वकम्। ऐश्वर्यादीन् षडर्थान् हि षडध्याय्यां निरूप्यते।
षट्त्रिंशे तु तथाऽध्याये कृष्णस्यैश्वर्यलक्षणः ॥४॥
अलौकिको लौकिकश्च क्रियाज्ञानविभेदतः। निरूप्यते यतः पित्रोरैश्वर्यं हृद्गतं भवेत् ॥५॥
अनुभावात्पुरैश्वर्यं तयोर्हृदयसंहितम्। येन स्तुतिः कृता ताभ्यां कृष्णवाक्यात्तु निर्णयः ॥६॥
तीर्थयज्ञसदुक्त्या हि शुद्धान्तःकरणो भवेत्। ततः कृष्णगुणज्ञाने तस्येच्छाऽभूदितीर्यते ॥७॥
तथैव देवकी देवी ज्ञात्वा माहात्म्यमुत्तमम्। ऐश्वर्यस्य परीक्षार्थं पुत्राहृतिमुवाच ह ॥८॥

एवमेतावद्भिरध्यायैस्त्रिविधानां निरोधो निरूपितः। अथ भगवतः षड्गुणाः षड्भिरध्यायैर्निरूप्यन्ते। क्रमेणैव ऐश्वर्यं तिशायि स ईश्वरः यः अलौकिकं करोति यो वा वेदस्याप्यशक्यं करोति सोऽत्र निरूप्यते। पित्रे पुत्रत्वं स्थापयित्वैव यत्करोति यच्चाप्यखण्डं तथा बाल्ये मृतानां कालेन परमाणुसात्कृतानां पुनः कालमुल्लङ्घ्य यथास्थानं प्रापयित्वा ततोऽपि स्वपदप्रापणमपि एवं वेदकालोल्लङ्घनं न पुरुषोत्तमादन्यस्य शक्यं फलप्रकरणस्य सन्निधान एव गतत्वात् च करोति अध्यायसङ्गतिः कथायाः पौर्वापर्यं नाभिलषितमिति भिन्नप्रक्रमेणारभते अथेति एकदा प्रसन्नसमये प्राप्तौ लालनसमये ततः कृतपादाभिवन्दनौ जातौ ततो वसुदेवोऽपि तत्कृतमभिनन्द्य लौकिकप्रीतियुक्त एव ज्ञानार्थमुवाच च सर्वमेतत् ज्ञाने पूर्वाङ्गं श्रुतिविरुद्धं स्वयं गुरोर्गृहे गत्वा नमस्कारानन्तरं गुरुणाभिनन्दितः ॥१॥

सुबोधिनीसारः

शुकोक्तिः । अथ मङ्गले एकदा प्राप्तौ कृतप्रणामौ रामकृष्णौ प्रीत्याभिनन्द्य प्रशस्याह वसुदेवः ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सात्त्विकभक्तानां निरोधो विनिरूपितः । निरूप्यन्ते गुणास्तस्य षड्भिश्च यथाक्रमम् ॥१॥

पञ्चाशीतितमे तत्र पित्रे मात्रे यथाक्रमम् । ज्ञानपुत्रप्रदानाभ्यामैश्वर्यं विनिरूप्यते ॥२॥

अथेति प्रकरणान्तरद्योतकम् । एकदा प्राप्तौ स्वसमीपमागतौ आत्मजौ अत एव कृतं पादाभिवन्दनं याभ्यां तौ सङ्कर्षणाच्यु प्रीत्या आशीर्भिरभिनन्द्य वसुदेव आह ॥१॥

अन्वितार्थप्रकाशिका

पञ्चाशीतितमे दाता ज्ञानं पित्रे बलाच्युतौ । मात्रे पूर्वं मृतान् पुत्रान् अत्र श्लोका नवेषवः (५९) ॥

नवोवाचेति (९) वाक्यानि चतुःषष्टिरनुष्टुभः (६४) ॥८५॥

अथेति । अथ कुरुक्षेत्रयात्रानन्तरम् एकदा क्वचित् प्रातर्नित्यवन्दनसमये प्राप्तौ स्वसमीपगतौ आत्मजौ अत एव कृ पादाभिवन्दनं याभ्यां तौ सङ्कर्षणाच्युतौ रामकृष्णौ प्रीत्या आशीर्भिरभिनन्द्य वसुदेव आह स्म ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ पञ्चाशीतितमेऽध्याये मातृपितृकृतप्रार्थनया रामकृष्णौ मृतभ्रातॄनानीतवन्तावित्युच्यते अथेति । यत आत्म अतः कृताभिवन्दनौ ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पञ्चाशीतितमे पुत्रौ प्रार्थितौ रामकेशवौ ॥ पित्रे मात्रे क्रमात् ज्ञानं पुत्रान् प्रेतानयच्छताम् ॥१॥

अथ कदाचिद्वसुदेवदेवक्यावेदितयाथात्म्यस्य भगवतः प्रेताग्रजाऽऽदानात्मकं चेष्टितमनुवर्णयति ॥ अथेति अथानन्तरम् एकदा वसुदेवः प्राप्तौ स्वसमीपमागतावित्यर्थः । कृतं पादयोरभिवन्दनं याभ्यां तौ सङ्कर्षणाच्युतौ रामकृ आत्मजौ अभिनन्द्य प्रीत्या आह ॥१॥

कृष्णप्रिया

श्रीबादरायणिजी शुकदेवजी कहने लगे - महाराज श्रीवसुदेवदि सब द्वारिका पधारे; पुनः दिन भगवान श्रीकृष्ण और श्रीबलभद्रजी प्रातः वंदना करने के लिये माता पिताजी के समीप पधा प्रणाम विधि समाप्त होने के बाद पितृचरणों श्रीवसुदेवजी अत्यंत वात्सल्य से दोनों भाईयोंका अभिनन्दन करके कहने लगे ॥१॥

[1]मुनीनां [2]तद्वचः श्रुत्वा पुत्रयोर्धामसूचकम् । [3]तद्वीर्यैर्जातविश्रम्भः परिभाष्याभ्यभाषत
[4]कृष्ण कृष्ण महायोगिन् संकर्षण सनातन । जाने वामस्य [5]यत् साक्षात् प्रधानपुरुषौ प
यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा । स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः
एतन्नानाविधं विश्वमात्मसृष्टमधोक्षज । [6]आत्मनानुप्रविश्यात्मा प्राणो जीवो बिभर्ष्यजः

१.मुनीनां वदतां-विज. । २. स वचः-श्रीधर. वंशी. वीर. विज. । ३. तद्भावयैजति-गो. प्रे. टी. ; तद्वीर्यजातविश्रंभः परिभ्य
४. वसुदेवः-च. पु. टी. । ५. जगतः प्रधान-गो. प्रे. टी. । ६. प्रविश्यात्मन्-श्रीधर. वंशी. वीर. विज. विश्व. शुक. ।

तद्, वीर्यैः, जातवि
कृष्ण, महायोगिन्, सङ्कर्षण,
यदा, यथा, यत्, इदम्, स्या
विश्वम्, आत्मना, अनुप्रविश्य

धाम प्रभावस्तत्सूचक
प्रधानपुरुषौ नाम परौ तयोरपि
प्रधानपुरुषात्मकं कुतस्तरामाव
यस्य सम्बन्धेन षष्ठ्यर्थस्याका
भेदः यथोक्तम्-

"करोति क्रियमा

"करोत्यर्थस्य यः

सत्यम् तथाप्यवस्थाभे
सप्तविभक्त्यर्था दर्शिताः यथेति
एव सर्वं प्रपञ्चमनूद्य तत्कारण
साक्षादिति तयोरैक्यमभिप्रेत्यैव
क्रियाशक्तिः जीवो ज्ञानशक्तिश्च

तद्वीर्यैः श्रीकृष्णपराक्रमैः
"तन्मायाफलरूपेण द्विधा सम
कारकत्वं नास्ति क्रियायोगाभावा
निमित्तमस्त्येवेति । पुनराशङ्कते-न
कश्चिन्न करोतीत्यन्वयः । भवत्यर्थ
कर्ता घटः, स करोतेः कर्म जायते
सत्तार्थकस्य कर्तुः भविता सत्तार्थ
करोत्यर्थकर्तुः कुलालस्य भवितुर्घ
भवति कुलालः प्रेरयति कुलालो घ

"प्रेरणाविषयो य

मुख्यकर्तारमाचष्टे प्रत्यय

इति च सत्यं यद्यप्येतत्सत्यम्

पाकक्रियया भिन्नाऽस्ति । यथा च

कर्दमक्षमा

तद्, वीर्यैः, जातविश्रम्भः, पुत्रयोः, धामसूचकम्, मुनीनाम्, तत्, वचः, श्रुत्वा, परिभाष्य, अभ्यभाषत ॥२॥ कृष्ण, कृष्ण, महायोगिन्, सङ्कर्षण, सनातन, वाम्, अस्य, यत्, साक्षात्, परौ, प्रधानपुरुषौ, जाने ॥३॥ यत्र, येन, यतः, यस्य, यस्मै, यत्, यत्, यथा, यत्, इदम्, स्यात्, साक्षात्, प्रधानपुरुषेश्वरः, भगवान्, स्यात् ॥४॥ हे, अधोक्षज, आत्मसृष्टम्, एतत्, नानाविधम्, विश्वम्, आत्मना, अनुप्रविश्य, आत्मा, प्राणः, जीवः, अजः, बिभर्षि ॥५॥

श्रीधरस्वामिकृतभावार्थदीपिका

धाम प्रभावस्तत्सूचकं जातविश्रम्भः उत्पन्नविश्वासः परिभाष्य सम्बोध्य ॥२॥ अस्य विश्वस्य यत्साक्षात्स्वरूपभूतं कारणं प्रधानपुरुषौ नाम परौ तयोरपि कारणत्वेनेश्वरौ च साक्षाद्वां युवामिति जाने ॥३॥ नन्विदं विश्वमनेकैः कारकैर्जायमानं कुतः प्रधानपुरुषात्मकं कुतस्तरामावयोस्तत्कारणत्वेनेश्वरत्वम् तत्राऽऽह-यत्रेति । यत्राधिकरणे येन कर्त्रा करणेन च यतः अपादानात् यस्य सम्बन्धेन षष्ठ्यर्थस्याकारकत्वेऽपि निमित्ततोक्ता यस्मै सम्प्रदानाय यद्यदिति प्रयोज्यकर्तृकर्मकारके दर्शिते ननु तयोर्नास्ति कारकत्वं यथोक्तम्-

> **"करोति क्रियमाणेन न कश्चित्कर्मणा विना । भवत्यर्थस्य कर्ता च करोतेः कर्म जायते ॥" तथा-**
>
> **"करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः । भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते ॥" इति च ।**

सत्यम् तथाप्यवस्थाभेदेन भेदो विवक्षितः दृश्यते चावस्थाभेदः तण्डुलानोदनं पचति मृदं घटं करोतीति तदेवं सर्वविभक्त्यर्था दर्शिताः यथेति यदेति च क्रियाविशेषणभूतानामन्येषां चाव्ययानामर्थाः स्यादिति क्रियापदार्थोपलक्षणम् एवं सर्वं प्रपञ्चमनूद्य तत्कारणस्य भगवद्रूपतां विधत्ते इदं साक्षादिति प्रधानं भोग्यं पुरुषो भोक्ता तयोरीश्वरो भगवांस्त्वमेव स्यादिति तयोरैक्यमभिप्रेत्यैकवचनम् ॥४॥ किञ्च धारणपोषणकर्तापि त्वमेवेत्याह-एतदिति । हे आत्मन् ! प्राणः क्रियाशक्तिः जीवो ज्ञानशक्तिश्च सन् त्वमेव बिभर्षि ॥५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तद्वीर्यैः श्रीकृष्णपराक्रमैः । उत्पन्नविश्वासोऽङ्कुरितनिश्चयः ॥२॥ परौ विलक्षणत्वेनोत्तमौ । तयोरपि प्रकृतिपूरुषयोरपि । **तन्मायाफलरूपेण द्विधा समभवत् बृहत् ।"** इत्याद्युक्तेः ॥३॥ तत्राक्षिपति-नन्विति । अकारकत्वेऽपि यद्यपि सम्बन्धस्य कारकत्वं नास्ति क्रियायोगाभावात्तथापि साक्षात्क्रियागोगाभावेऽपि साधोर्धनं तिष्ठतीत्यादिषु धनादिद्वारा तत्सम्बन्धात्कारकनिमित्तमस्त्येवेति । पुनराशङ्कते-नन्विति । तयोः प्रयोज्यकर्तृकर्मणोः । प्रमाणमाह-यथोक्तमिति । क्रियमाणेन कर्मणा विना कश्चित् करोतीत्यन्वयः । भवत्यर्थस्य सत्तार्थकस्य धातोः भवतीत्यत्र धातुनिर्देशे श्तिप् । तथा हि-घटो भवतीह भत्यर्थस्य कर्ता घटः, स करोतेः कर्म जायते कुलालो घटं करोतीतिवत् ॥ क ॥ अन्यदाह-तथेति । करोत्यर्थस्य करणार्थस्य भवितुः सत्तार्थकस्य कर्तुः भविता सत्तार्थकधातुकर्ता तं प्रयोजकमपेक्ष्य प्रयोज्यत्वं प्रवर्तते । यथा घटो भवति कुलालः प्रेरयतीत्यत्र करोत्यर्थकर्तुः कुलालस्य भवितुर्घटस्य प्रयोजकत्वम्, भवत्यर्थकर्ता घटस्तु तं कुलालमपेक्ष्य प्रयोज्यत्वं प्राप्तः । यथा घटो भवति कुलालः प्रेरयति कुलालो घटं भावयतीति (१)

> **"प्रेरणाविषयो यस्तु प्रयोज्यः स विधीयते । प्रयोजकः स विज्ञेयः प्रयुक्तो नापरैर्यदि ॥**
>
> **मुख्यकर्तारमाचष्टे प्रत्ययोऽनेककर्तृकः । मुख्यप्रयोजकस्स स्याद्योऽप्रयुक्तः परैण हि ॥"** इत्यलम् ।

इति च सत्यं यद्यप्येतत्सत्यम् । तथापि दृश्यते चेति । यथा वस्तुतस्तण्डुलौदनयोरभेदेऽपि तण्डुलावस्थात ओदनावस्था पाकक्रियया भिन्नाऽस्ति । यथा च मृद्घटयोः करणलक्षणया क्रियया मृदवस्थातो घटावस्था भिन्ना । एवं प्रेरणक्रियया

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

प्रयोज्यकर्त्रवस्थातः प्रयोज्यकर्त्रावस्थापि भिन्नैवेति ज्ञेयम् । तदेवमित्थं क्रियाविशेषणता चेत्थं यदा भवतीति यत्का भवनं यथा भवतीति यत्प्रकारकं भवनमिति च भवनक्रिया विशेष्या । यदेत्यादिविशेषणं च अन्येषां क्रियाविशेषणताहा चादीनां च । एवं च इत्थं च । सर्वप्रपञ्चं षट्कारकादिसाध्यं तस्य प्रपञ्चस्य कारणमभिन्ननिमित्तोपादानं भगवांस्तद्रू भगवद्रूपताम् । तयोर्भोक्तृभोग्ययोः । तीर्थस्तु-यत्र यस्मिंस्तिष्ठति । "यस्मिन्निदं" इति श्रुतेः । "येन जातानि जीवन्ति" इ श्रुतेः । "यतो वा इमानि भूतानि" इति च । "यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनम् । मृत्युर्यस्योपसेचनम्" काठकश्रुतेः । "यस्मा इदं क्रियते" इति । "सच्च त्यच्चाभवत्" इति । "यथास्थितं यदा काले इदं स्यात्तथा तदा ब्रह्मैवेदं सर्वम् ।" इति श्रुतेः । इदं जगत् साक्षात्स्पष्टं निर्विचारं प्रधानपुरुषेश्वरशब्दवाच्यो भगवानेव स्यात्तत्सत्ताया तदधीनत्वादित्याह ॥४॥ अन्यदाह-किञ्चेति । आत्मना जीवेन रूपेण "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः ॥५॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

तदानीं त्वैश्वर्यज्ञानप्राबल्ये सूचितमेव कारणं व्यंजयन् पुनरुक्तपोषन्यायेनाह-मुनीनामिति । स्व इति 'विदितोऽपि भव साक्षात्' इत्यादौ पूर्वत एव तादृशज्ञानः मुहुश्च तदीयैर्जातविश्रम्भः सम्प्रति च मुनीनां वचस्तादृशं श्रुत्वा परिभाष्य कृष्णेत्यादि सम्बोध्य ॥२॥ तथैवाह-कृष्ण हे स्वयं भगवन् ! वीप्सा तद्दार्ढ्याय अतो हे महायोगिन् ! सर्वव्यापक ! योगमायाप्रभावनित्या ! तथा हे सङ्कर्षण ! द्वितीयनिजव्यूहत्वाच्छ्रीकृष्णेन सङ्कृष्यते छायेवाप्रकटायां प्रकटायामपि लीलायां निजसहचरः क्रियते यः तथाभूत ! अत एव हे सनातन ! तथैव नित्यसिद्ध ! वां युवां जाने निश्चित्य जानामि कीदृशं यथा स्यात्तथा जानीषे तत्राह-यु युवामस्य विश्वस्य यथाक्रमं प्रधानपुरुषौ स्थः तत्र प्रधानं सर्वतः श्रेष्ठं प्रकृत्युपाध्यतीतं श्रीभगवद्रूपं पुरुषश्च प्रकृतीक्षणकर्ता तद यथोक्तं तृतीये "भगवानेक आसेदमग्र आत्मनां विभुः" इत्युपक्रम्य —

"कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः । पुरुषेणात्मभूतेन वीर्य्यमाधत्त वीर्य्यवान् "॥

तथा तत्रापि साक्षात्परौ सर्वमूलस्वरूपश्रीकृष्णादिरूपत्वेन स्वयं भगवदादिरूपौ अन्यत्तैः तत्र साक्षादित्यस्या योजनमर्थवशात् ॥३॥ सर्वमूलस्वरूपत्वमेव दर्शयन् सङ्कर्षणस्यापि श्रीकृष्णेऽन्तर्भावमभ्युपगच्छंस्तमेव स्तौति त्रिभिः-यत्रे इदं स्वरूपाख्यतटस्थाख्यबहिरङ्गाख्यशक्तिमयं वैकुण्ठजीवजगदाख्यं वैभवं यत्र स्याद्येन स्यादित्यादि योजयित्वा स भग श्रीकृष्णलक्षणस्तमेव साक्षात् स्वयमनन्याश्रयितया पूर्वोक्तप्रधानपुरुषयोरपि ईश्वरो मूलस्वरूपत्वादाश्रय इति योज्यं यत्रेत्यादि स्वरूपसिद्धाधारशक्त्याद्यशेषशक्तिपरमाश्रयत्वव्यक्तेरिति भावः । तत्र यस्येति इदन्तानिर्दिष्टवस्तुनैव सम्बन्धो विवक्षितः तत्सम्ब विना तस्य खपुष्पादितुल्यत्वं स्यादिति निमित्तत्वं च क्रियानिमित्तत्वाविवक्षया कारकत्वाभावश्च यस्मा इति तल्लीलोपयोगित्व यद्यदित्युपादानोपादेयशक्त्योस्तदात्मकत्वात्तदभेदेन निर्देशः यथा यदेति प्रकारकाशक्त्योरपि येनैव प्रकाररूपेण यस्मिन्नेव काल इति अन्यत्तैः । तत्र कारिकार्थः कर्मैव किं तत्राह-भवतीति भवतेरर्थस्य कर्ता यो मृद्घटादिः स एव करोतेः कर्म जायते मृदेव घ जायते मृदेव घटो भवति तं भावयतीति णिजन्तभवतेरेकपर्य्यायेण करोत्यर्थेन तद्व्यासः एवं यस्य कर्मत्वं साधितं तस्यैव प्रयो साधयति तथेति भवितुर्मृद्घटादेः तथापीति पूर्वावस्थाया मृदादेः प्रयोज्यत्वमुत्तरावस्थायाः घटादेः कर्मत्वमित्यर्थः ॥४॥ पूर्वा प्रतिपादयति-एतदिति । तत्रात्मन् आत्मनीत्यनेन यत्रेति आत्मेत्यनेन येनेति आत्मसृष्टमित्यनेन यत इति यस्येति यदीदं सृष्ट्यादिलीलत्वेन यस्मा इति प्राणो जीव इत्यनेन क्रियाज्ञनशक्त्याश्रयतासूचकेन यथेति तत्रैव क्रियाशक्तिविशेषकालशक्तित्वसू यदेतदिति च अधोक्षजेत्यनेन तत्रापि परमाश्रयत्वम् अज इत्यनेन स्वयं भगवत्त्वमिति ज्ञेयम् ॥५॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

तदानीं तादृशोक्तौ हेतुविशेषमुक्तपोषण्यायेनाह-मुनीनामिति । कुरुक्षेत्रयात्रागतानां किंवा सदैव मुहुः श्रीद्वारका सर्वज्ञानां धाम्नः सूचकमीषत्प्रतिपादकम् आनन्त्येनाशेषोक्त्यशक्तेः सङ्क्षेपोक्तेर्वा । ननु मुनयो भक्त्यापि कदाचित्स्तु तयोर्वीर्यः पराक्रमैरद्भुतचरितैर्वा जातविश्रम्भ इति स्वानुभवेन तेषां वचःसत्यतासिद्धेः परिभाव्य कृष्णेत्यादिवक्ष्यमाणेन परमेश्वरौ ! हे भगवन्तावित्यादिना प्रकारेण सम्बोध्य ॥२॥ श्रीनन्दयशोदयोः स्वपुत्रयोश्चान्योन्यस्नेहभरं साक्षाद्दृष्ट्वा स्वयमपि

किञ्चित्प्रार्थयिष्यन्नादौ त
सर्वचित्ताकर्षक ! अत ए
अतो महायोगिन् ! अचिन्
! यद्वा । सनः श्रीकृष्णा
तथातत्सम्बोधनम् । एवं प
सम्बोधनं साक्षाद्भगवत्त्वेन
तयोरभेदापेक्षया ईश्वरस्यैक
एवमग्रेऽपि । किंवा, पर इ
सर्वोत्कृष्टौ श्रीकृष्णस्यैव त
प्रधानपुरुषयोरीश्वरश्च भगवा
श्रीनारायणः साक्षात् स्वयं
एतदिति । नानाविधं जरायु
बिभर्षीति तत्र तत्रान्यनैरपेक्ष्य
केनापि ज्ञातुं शक्यस इत्याह
अन्यत्तैर्व्याख्यातम् । यद्वा अ
सर्वेषामन्तश्च प्रकाशस इत्याह
विश्वस्य देहधारकस्त्वमेव प्रा
। अत एव प्रयत्नं विनापि स्व

अस्य प्रधानपुरुषौ
प्राणशरीरकः जीवः जीवशरी

किञ्च, मुनीनामिति ।
स्मृत्वा तथा तयोः रामकृष्णयो
कृष्णेति । प्राकृतावावां किमित्
इति (८-१-२०) इति वामादे
च वां युवां जाने कार्यावस्थचि
तद्विलक्षणौ पुरुषौ जाने इत्यर्थः
केनचित्प्रकारेण युक्तं कालसहच
त्वदात्मकत्वात् कृत्स्नं जगत्त्व
यत्प्रयोजकं कर्तृ यदा यस्मिन् क
साक्षात्प्रधानपुरुषयोः प्रकृतिपुरु
वक्ष्यमाणकान्त्यादिसमानाधिकर

भवतीति यत्कालिकं
क्रियाविशेषणताहीनानां
पादानं भगवांस्तद्रूपतां
जातानि जीवन्ति" इति
र्यस्योपसेचनम्" इति
इदं स्यात्तथा तदास्मात्
नेव स्यात्तत्सत्ताया अपि
ति श्रुतेः ॥५॥

व इति 'विदितोऽपि भवान्
वा परिभाष्य कृष्णेत्यादिना
! योगमायाप्रभावनित्याश्रय
निजसहचरः क्रियते यः हे
स्यात्तथा जानीषे तत्राह-यत्
रुषश्च प्रकृतीक्षणकर्ता तदंशः

त वीर्य्यवान् " ॥
तैः तत्र साक्षादित्यस्योभयत्र
स्तमेव स्तौति त्रिभिः-यत्रेति।
त्यादि योजयित्वा स भगवान्
दाश्रय इति योज्यं यत्रेत्यादिभिः
सम्बन्धो विवक्षितः तत्सम्बन्धं
यस्मा इति तल्लीलोपयोगित्वात्
प्रकाररूपेण यस्मिन्नेव कालरूप
त्र करोतेः कर्म जायते मृदेव घटे
कर्मत्वं साधितं तस्यैव प्रयोज्यत्वं
कर्मत्वमित्यर्थः ॥४॥ पूर्वार्थमेव
न यत इति यस्येति यद्यदिति च
याशक्तिविशेषकालशक्तित्वसूचने
॥

कवा सदैव मुहुः श्रीद्वारकामागतान्
यो भक्त्यापि कदाचित्स्तुतिं कु
व्य कृष्णेत्यादिवक्ष्यमाणेन किंवा
यस्नेहभरं साक्षाद्दृष्ट्वा स्वयमपि

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

किञ्चित्प्रार्थयिष्यन्नादौ तद्विषयकमात्मज्ञानं परिहरन् स्तौति-कृष्णेति। हे परब्रह्मन्! तत्रापि कृष्ण! हे निजाशेषैश्वर्यप्रकटनेन सर्वचित्ताकर्षक! अत एव महायोगिन्! हे परमशक्तियुक्त! यद्वा। कृष्ण! हे साक्षाद्भगवन्! वीप्सा तन्नाम्नो जिह्वाग्रहणस्वभावात् अतो महायोगिन्! अचिन्त्यप्रभाव! सङ्कर्षणस्नेहादिना कृष्णादपृथग्भूत! अत एव सनातन! हे द्वितीयव्यूहत्वादिना सदा वर्तमान यद्वा। सनः श्रीकृष्णविरहतो बहुधा व्रजजनाभयदानं किंवा श्रीयमुनाकर्षणादिक्रीडया व्रजजनाद्यानन्ददानं तमातनोतीति तथा तत्सम्बोधनम्। एवं पृथक्सम्बोधनं श्रीकृष्णात्सङ्कर्षणस्य न्यूनताभिप्रायेण । यद्वा। तौ प्रत्येव एतत्सर्वं तथापि कृष्णस्यादौ सम्बोधनं साक्षाद्भगवत्त्वेन प्राधान्यादिति। जाने अधुना ज्ञातवानस्मि। किंवा सदैव जानन्नस्मीत्यर्थः। प्रधानपुरुषावित्यंशत्वेन तयोरभेदापेक्षया ईश्वरस्यैकत्वेऽपि पराविति द्वित्वं तयोर्वैक्यादेव अन्यत्तैर्व्याख्यातम्। तत्र साक्षादित्यस्योभयत्र योजनमर्थबलात् एवमग्रेऽपि। किंवा, पर इत्यत्र लेखकभ्रमादिति अथवा प्रधानपुरुषौ पुरुषश्रेष्ठौ परमेश्वरावित्यर्थः। तत्रापि परौ अशेषैश्वर्यप्रकटनेन सर्वोत्कृष्टौ श्रीकृष्णस्यैव तादृशत्वेऽपि श्रीबलदेवस्य तादृशी चोक्तिरुक्तन्यायात् ॥३॥ इदमिति प्रपञ्चस्य प्रत्यक्षत्वादिदं विश्वं प्रधानपुरुषयोरीश्वरश्च भगवानेव त्वमिति वक्तव्ये भगवानिति परमादरात्। स्वचक्षे च परत्वमेव प्रतिपादयति-यत्रेति। इदं श्रीभगवान् श्रीनारायणः साक्षात् स्वयं त्वं च प्रधानपुरुषात् पुरुषोत्तमादपि तस्मादीश्वरः अशेषैश्वर्यविस्तारणात् ॥४॥ तच्च प्रत्यक्षमेवेत्याह-एतदिति। नानाविधं जरायुजादिभेदेन महदल्पभेदेन वा सात्त्विकादिभेदेन वा आत्मना स्वयमेव अनु सृष्टेरनन्तरं प्रविश्यात्मनेव बिभर्षीति तत्र तत्रान्यनैरपेक्ष्यमुक्तम्। तच्च युक्तमेवेत्याह-आत्मना त्वयैव सृष्टमिति। अन्तर्यामितयेत्यर्थः। तथापि न त्वं कथञ्चित् केनापि ज्ञातुं शक्यस इत्याह-अधोक्षज! हे इन्द्रियाज्ञानोगोचरेति। यतोऽजो नान्यवज्जायसे किन्तु स्वयमेव प्रकाशयस इत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा आत्मन्! आत्मन्येव बिभर्षि विश्वस्याश्रयश्च त्वमेवासीत्यर्थः। स्वपक्षे एवं बहिर्विराजमानोऽपि त्वं सर्वोपमन्तश्च प्रकाशस इत्याह-एतदिति। हे अधोक्षजेति बाल्यलीलया शकटाधोवर्तमानोऽपि विश्वमनुप्रविश्य बिभर्षि यतः प्राणो विश्वस्य देहधारकस्त्वमेव प्राणदश्च त्वमेवेत्याह-जीवयतीति जीव इति। अतो विश्वस्य प्रियतम इत्याह-आत्मन्! हे परमप्रियेत्यर्थः अत एव प्रयत्नं विनापि स्वयमेव त्वं प्रकाशस इत्याह-अज इति। अन्यत् समानम् ॥५॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अस्य प्रधानपुरुषौ अध्यक्षपुरुषौ ॥३॥ यत्र इति सप्तविभक्त्यर्थाः यथा यदा प्रकारः कालश्च त्वमित्यर्थः ॥४॥ प्राणः प्राणशरीरकः जीवः जीवशरीरकः मनोमयः प्राणशरीरः "यस्यामा शरीरम्" इति श्रुतेः ॥५॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

किञ्च, मुनीनामिति। स वसुदेव पुत्रयोः प्रभावसूचकं मुनीनां वचः 'वसुदेव भवान्नूनं भक्त्या परमया' इत्याद्युक्तं वचः भक्त्या तथा तयोः रामकृष्णयोर्वीर्यैर्जातो विस्रम्भो जगदीश्वरत्वविषयविश्वासो यस्य सः परिभाष्य सम्बोध्य अभाषत ॥२॥ तदेवाह-कृष्णेति। प्राकृतावावां किमित्येवं सम्बोधयसि इत्यत आह-जान इति। वामिति "युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वां नौ" सू.(८-१-२०) इति वामादेशे सति रूपं यद्यस्मादस्य जगतः साक्षात्प्रधानपुरुषौ कारणभूतौ प्रकृतिपुरुषौ परौ ताभ्यां विलक्षणौ एवं युवां जाने कार्यावस्थचिदचिदात्मकस्यास्य जगतः कारणावस्थौ प्रधानपुरुषौ प्रकृतिपुरुषशरीरकौ अत एव तदात्मभूतौ विलक्षणौ पुरुषौ जाने इत्यर्थः ॥३॥ एवं जगतस्तत्कार्यत्वं प्रतिज्ञातम्। ननु जगत्कार्यं चेत्कारकषट्कसाध्यं कस्यचित्सम्बन्धि कस्यचित्प्रकारेण युक्तं कालसहचरितं चेति। कथं मदेककार्यमित्यत आह-यत्रेति। कारकषट्कसम्बन्धिप्रकारकालानां त्वच्छरीरत्वेन तदात्मकत्वात् कृत्स्नं जगत्त्वत्कार्यमेवेत्यभिप्रायः। यत्राधिकरणे येन कर्त्रा यतः उपादानात् यस्य सम्बन्धिनः यस्मै सम्प्रदानाय प्रयोजकं कर्तृ यदा यस्मिन् काले यथा यः प्रकारः एवं कारकषट्कादीनां निर्देशः यथा स्यादित्येतदिदं विश्वमधिकरणादिकं सर्वं प्रधानपुरुषयोः प्रकृतिपुरुषयोरीश्वरो भगवांस्त्वमेवेति सम्बन्धः। स्यादित्यस्य यत्र स्यात् येन स्यादित्येवं प्रत्येकं सम्बन्धः। [illegible]कान्त्यादिसमानाधिकरण्योपयुक्तत्वेनैतत्प्रपञ्चयति-हे अधोक्षज! आत्मन्! आत्मनि आत्मना सृष्टम्

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अनेनाधिकरणान्तरकर्त्रन्तरव्युदासः । नानाभिधं देवनारपशुपादपभिन्नमेतज्जगदात्मना स्वशरीरभूतेन जीवेनानुप्रविश्य रक्षणोपयुक्तमनुप्रवेशं कृत्वा प्राणः प्राणशरीरको जीवस्तच्छरीरकश्चैवमप्यजः । प्राणजीवगतदोषास्पृष्टो जीवसि प्राणशरीरकत्वं जीवशरीरकत्वं च श्रूयते "मनोमयः प्राणशरीरनेता" "यस्यात्मा शरीरम्" इति ॥४-५॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-११॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

अस्य विश्वस्य कारणीभूतौ यत् यो प्रधानपुरुषेश्वरौ परौ तयोरपि श्रेष्ठौ परमेश्वरौ वाम् अहं जाने । यद्वा । प्रधानीभूतौ परमेश्वरौ पुरुषौ वासुदेवसङ्कर्षणौ ॥३॥ कार्यभूतमिदं विश्वमपि त्वमेव भवसीति द्वयोरैक्यादेकवचनप्रयोगेणाह-यत् घटपटादिकं वस्तु यत्र देशे स्यात् येन कारणेन यतोऽपादानात् यस्य सम्बन्धे यस्मै देयं यत् देयं यथा येन प्रकारेण यदा यस्मिन् काले स्यात् तदिदं सर्वं भगवानेव भगवत्कार्यमित्यर्थः । कीदृशः साक्षात् प्रधानपुरुषयोरपीश्वरः ॥४॥ किञ्चास्य पोषणकर्तापि त्वमेवेत्याह-एतदिति । आत्मना अन्तर्यामिस्वरूपेणानुप्रविश्य हे आत्मन् ! प्राणः क्रियाशक्तिमयसूत्रतत्त्वरूपः जीवो ज्ञानशक्तिमयबुद्धितत्त्वरूपश्च सन् त्वमेव बिभर्षि प्राणबुद्धिकर्मज्ञानेन्द्रियरूपेण पुष्णासि ॥५॥

गूढार्थदीपिनी

स वसुदेवः धामसूचकम् धाम प्रभावः । तद्वीर्यैः कृष्णपराक्रमैः जातविश्वासः । परिभाष्य सम्बोध्य ॥२॥ अस्य विश्वस्य यत् साक्षात् परं कारणं प्रधानपुरुषौ तयोरपि परौ कारणरूपौ वं युवामित्यहं जाने ॥३॥ यत्र यस्मिन् आधारे येन कर्त्रा करणे च यतः उपादानकारणात् यस्य सम्बन्धेन यस्मै सम्प्रदानाय यद्विहारार्थं यत् यत् घटपटादिकं वस्तु जायते तदिदं सर्वं प्रपञ्चं षट्कारकादिसाध्यं भगवान् भगवत्कार्यमित्यर्थः ॥४॥ धारणपोषणकर्ताऽपि त्वमेवेत्याह । हे अधोक्षज ! एतत् नानाविधं देवतिर्यगादिरूपं विश्वं आत्मन् आत्मनि त्वय्येव आत्मना त्वया सृष्टम् अजस्त्वमेव बिभर्षि धारयसि पोषयसि च । कथम् । आत्मना अन्तर्यामिरूपेण अनुप्रविश्य । किंरूपः सन् । प्राणः क्रियाशक्तिः जीवो ज्ञानशक्तिश्च सन् । यद्वा । हे आत्मन् ! ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

धामसूचकं स्वरूपज्ञापकम् ॥२॥ विश्वकारणं परं धाम ततः परं न किमपि वस्तु तद्द्योतकं मुनीनां वाक्यमवधार्य विश्वकारणं ससङ्कर्षणं श्रीकृष्णं कृष्णकृष्णेत्यादिना संस्तूय युवां न नः सुताः किन्तु भूभारहरणाय साक्षात्परमेश्वराववतीर्णाविति विज्ञाप्य "तत्ते गतोऽस्म्यरणमद्य पदारविन्दम्" इति श्रीकृष्णचरणं शरणं व्रजति । यत् यो अस्य विश्वस्य परौ कारणभूतौ तौ वां युवां जाने प्रधानौ च तौ पुरुषौ प्रधानपुरुषौ ॥३॥ अथ बलं तदवतारभूतं तस्मिन्नन्तर्भाव्य तमेव जगद्धेतुं श्रीकृष्णं सर्वात्मतया वर्णयति-यत्रेति । यदा यत्र यथा येन प्रकारेण यत् प्रयोक्तृत्वं यत्र यस्मिन् अधिकरणे येन कर्त्रा करणेन च यतोऽपादानात् यस्य सम्बन्धेन यस्मै सम्प्रदानाय तत्तत्साक्षात् भगवान् श्रीकृष्णः स्यात् । ननु सर्वस्य जडाजडस्य कथमैक्यमत आह प्रधानपुरुषेश्वरौ इति । प्रधानं प्रकृतिः भगवच्छक्तिः तस्याजडत्वविकारित्वादयो धर्माः पुरुषो जीवः भगवदंशः स्व सुखदुःखभोक्तृत्वादयो धर्माः तयोरीश्वरः सर्वेश्वरत्वसर्वथादोषास्पृष्टस्वरूपत्वसर्वकारणत्वसर्वज्ञत्वसर्वात्मत्वसच्चिदानन्दाद्यनन्तकल्याणगुणाश्रयः स्वरूपेण सर्वजडाजडविलक्षण इत्यर्थः ॥४॥ आत्मना अन्तर्यामिरूपेणानुप्रविश्य प्राणः करणरूपः जीवः स्वांशभूतः कर्ता च तद्रूपस्त्वम् एतद्विश्वं बिभर्षि अन्तर्यामिस्वरूपेण प्रेरकतया प्राणादिजडरूपेण करणतया जीवांश अंशरूपेण कर्तृभोक्तृत्वादिना विश्वं पुष्णासीत्यर्थः ॥५॥

एकं स्तौतीति
तद्वचः स्मृत्वेति । तस्य
केवलवाक्यं स्मृतं वा
तद्वीर्यैर्जातविश्रम्भ इति
अभ्यभाषत स्तुतिं कृतव

आदौ जगत्कारण
नाममात्रेण सम्बोधनमुक्त्वा
सम्यक् कर्षणात्मकत्वं
कार्यकारणादभेदोपचारेण
मूलभूतावित्यर्थः ॥३॥ जगत
स सर्वोऽपि भगवानेव तत्क
उभयोरेकत्वेन मूलमेव सर्वं
निरूपयति-एतन्नानाविधमिति
सर्वकर्तृत्वं तस्याज्ञातं बहिर्मुख
पश्चात्तत्रानैकरूपो जात इत्याह
सङ्गृहीतानि ताः सच्च त्यच्च
योजितवान् अन्तर्यामीवातदर्थ
रूपमाह-प्राणादीनामिति प्राणा
याः शक्तयः परस्यैव आधिदैवि
नन्वेतेषां सहजाः शक्तयः कुतो
आध्यात्मिकाः परतन्त्राः कथं स्व
कुर्वन्ति नान्यदेति सर्ववस्तूनां व
भगवानेवेत्यर्थः न तु जीवोऽङ्गीक
वैसादृश्यादिति । सर्ववस्तूनामात्मा
चक्षुःशक्तिः कुतो नादध्यात् अतः
यदेतदुक्तमाध्यात्मिकमाधिभौतिकं
कर्तृत्वं वा सम्भवति कुत एतत्
क्रियावतां चेष्टैव धर्मो भवितुमर्हति

कर्ता सर्वप्रतिष्ठ

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

एकं स्तौतीति मर्यादा तत्रापि पूर्वं तत्कामनया तदर्थं न प्रवृत्तः किन्तु प्रासङ्गिकस्मरणेन तथा कृतवानित्याह-मुनीनां वचः स्मृत्वेति । तस्यानुभूतिः कालेनेत्यादि मुनिवाक्यं तस्य चाकस्मात् स्मरणं तच्च पुत्रयोर्धाम तेजः स्वरूपं वा सूचयति केवलवाक्यं स्मृतं वा चेत् ज्ञानं वा न जनयेत् तदापि न काचिच्चिन्ता किञ्च संवादात्तस्य प्रामाण्यमवधृतमित्याह-वीर्यैर्जातविश्रम्भ इति । गोवर्धनोद्धरणादीनि वीर्याणि तैर्जातो विश्वासः ऋषिवाक्ये यस्य ततः हे कृष्ण ! हे रामेत्युक्त्वा अभ्यभाषत स्तुतिं कृतवानित्यर्थः ॥२॥

स्तोत्रं चक्रेऽष्टादशभिः सर्वविद्यानिरूपकः । शरणागतिपर्यन्तमुभयोरात्मजस्तथा ।
स्वरूपमाह सर्वासां विद्यानामभिवाञ्छितम् ॥

आदौ जगत्कारणत्वमाह-कृष्णकृष्णेति । आदरे वीप्सा महायोगिन्निति महानपि ज्ञातुमशक्य इत्यत्र हेतुरुक्तः सङ्कर्षणस्य नाममात्रेण सम्बोधनमुक्त्वा तदर्थापरिज्ञानात् तत्स्वरूपमाह-सनातनेति । अनेन नित्यार्थवाचकत्वमेव तस्यापि वक्तव्यमिति निरूपितं सम्यक् कर्षणात्मकत्वं प्रकृतेरिति तं प्रकृतिदेवतां मन्यते अत आह जानेवामिति अस्य जगतः साक्षात् सम्पूर्णस्य कार्यकारणादभेदोपचारेण तथात्वं वारयती उभयोः प्रधानपुरुषत्वम् उपचारादङ्गीकारत्वं वारयति परावििति अक्षरादुत्पन्नौ मूलभूतावित्यर्थः ॥३॥ जगत्कारणमुक्त्वा जगद्रूपतामाह-यत्रेति । लोके षट्कारणानां प्रकारसहितसर्वविभक्तीनां यावान् वाच्योऽर्थः स सर्वोऽपि भगवानेव तत्कारणं प्रधानपुरुषौ च तस्यापि कारणमीश्वरः कालः तयोरपि नियन्ता पुरुषोत्तम एवेति कृष्ण ऐवोक्तः उभयोरेकत्वेन मूलमेव सर्वं भवतीति च एतादृशो भगवांस्त्वमेवेत्यर्थः ॥४॥ एवं स्वरूपकारणत्वे निरूप्य उत्पत्तिं निरूप्य स्थितिं निरूपयति-एतन्नानाविधमिति । भिन्नाभिन्नब्रह्ममायाद्यनेकप्रकारम् आत्मनैव सृष्टं सर्वेष्वेव प्रकारेषु भगवानेव कर्ता अधोक्षजेति सर्वकर्तृत्वं तस्याज्ञातं बहिर्मुखैरिति निरूपितं ततः 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति वदन्तः प्रविश्य प्रवेशे केवलमात्मनैव प्रविश्य तत्रानैकरूपो जात इत्याह-आदौ आत्मा तत्सर्वं व्याप्स स्थितः पश्चाज्जीवरूपेण प्राणरूपेण च जातः प्राणशब्देनेन्द्रियाण्यपि सङ्गृहीतानि ताः सच्च त्यच्च भवदिति श्रुत्यर्थो निरूपितः ततः सर्वमेव जगच्छरीरादिकमपि बिभर्षि धारकशक्तिमपि तत्रैव योजितवान् अन्तर्यामीवातदर्थमधिकः प्रविष्टः सर्वे श्रुत्युक्ताः प्रकाराः अत्र सङ्गृह्यन्ते एवं स्थितिमुक्त्वा तस्याधिदैविकमपि रूपमाह-प्राणादीनामिति प्राणादयः सर्वे स्वक्रियाशक्त्या विश्वमेव सृजन्ति कर्मेन्द्रियैरेव सर्वं सृज्येत इति विश्वसृक् प्रयोगः एतेषां वा शक्तयः परस्यैव आधिदैविकस्यैव नत्वाध्यात्मिकस्य आधिभौतिकस्य वा यथा आत्मप्रयत्न एव इन्द्रियाणां शरीरस्य च भवति स्वेतेषां सहजाः शक्तयः कुतो नाङ्गीक्रियन्ते किमित्याधिदैविकमधिकं विकल्प्यत इति शङ्कां परिहरति-पारतन्त्र्यादिति । एते आध्यात्मिकाः परतन्त्राः कथं स्वतन्त्रतया कार्यं करिष्यन्ति अन्यथा सर्वदैव कथं कार्यं न कुर्युः तस्माद्यदैवं शक्त्याधानं तदैव कार्यं कुर्वन्ति नान्यदेति सर्ववस्तूनां वस्तुस्वरूपः आधिदैविकापरपर्यायः 'चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं मनसो मनः' इत्यादि श्रुतिवाच्यो भगवानेवेत्यर्थः न तु जीवोऽङ्गीकर्तव्यः वश्यमिति अन्तर्यामी जीवो वा स्वशक्त्याधानं करोतु किमन्तर्गडुनारूपान्तरेणेति चेत्तत्राह-वैसादृश्यादिति । सर्ववस्तूनामात्मा विसदृशः चेतनत्वादन्येषां जडत्वात् यदि विसदृशोऽपि स्वशक्तिमादध्यात् अन्धादिषु श्रोत्रादिष्वपि चक्षुःशक्तिः कुतो नादध्यात् अतः प्रतिनियतपदार्थसिद्ध्यर्थं तत्तत्स्वभावापन्नम् अतिरिक्तमेव स्वरूपमङ्गीकर्तव्यमित्यर्थः । किञ्च तद्वदुक्तमाध्यात्मिकमाधिभौतिकं च ताभ्यामेव कार्यं सिद्ध्यत्विति तत्रोच्यते द्वयोरपि तयोश्चेष्टैव तृणादीनामेव न तु प्रेरकत्वं प्रेरकत्वं वा सम्भवति कुत एतत् इत्याकाङ्क्षायां देहलीप्रदीपन्यायेन अग्रे अग्रे योजयित्वा निरूपयति चेष्टैव चेष्टितमिति चेष्टतां चेष्टावतां चेष्टैव धर्मो भवितुमर्हति न तु प्रेरकत्वं कदाचिद्वा चेष्टाभावः तस्मादाधिदैविकरूपमवश्यमङ्गीकर्तव्यमिति भावः —

कर्ता सर्वप्रतिष्ठात्मा नानारूपस्तथापरः । चतुर्धा वेदरक्षार्थं चतूरूपो निरूपितः ॥५-६॥

सुबोधिनीसारः

पुत्रयोर्महिमप्रकाशकं मुनीनां वचः श्रुत्वा तयोर्वीर्यैर्वत्सप्रामम्बादिहननैर्जातविश्रम्भ आगतविश्वासः स परिभाष्य सम्बोध्याब्रवीत् ॥२॥ हे कृष्णकृष्ण महायोगिन् हे सङ्कर्षण हे सनातन अस्य विश्वस्य साक्षात् वां युवां प्रधानपुरुषोश्वरौ परौ अहं जाने वेद्मि ॥३॥ सप्तविभक्त्यर्थान् दर्शयति। यत्राधिकरणे येन कर्त्रा यत् उपादानात् यस्य सम्बन्धेनाकारकत्वेऽपि षष्ठ्या निमित्ततो यस्मै सम्प्रदानाय यत् यत् इति प्रयोज्यकर्तृकर्मकारके दर्शिते अवस्थाभेदेन तयोर्भेदात् तण्डुलानोदनं पचति मृदं घटं करोतीति यथा यदेति क्रियाविशेषणभूतानामन्येषामव्ययानामर्था बोध्याः इदं जगत् प्रकृतिपुरुषनियन्ता साक्षाद्भगवानेव स्यात् ॥४॥ एतत् बहुप्रकारम् आत्मसृष्टं विश्वम् आत्मनानुप्रविश्याधोक्षजः श्रीहरिः प्राणरूपो जीवरूपोऽजो बिभर्षि। आत्मन् स्वस्मिन्नधिष्ठाने ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

किञ्चिद्विशेषं वदन्नुक्तमेव स्पष्टयति-यस्यानुभूतिः कालेन, इत्यादि मुनीनां पुत्रयोर्धामसूचकं परमेश्वरत्वज्ञापकं वचः स्मृत्वा तथा तयोर्वीर्यैर्गोवर्धनोद्धरणादिभिर्जातो विश्रम्भः जगदीश्वरत्वविश्वासो यस्य स वसुदेवः परिभाष्य तौ सम्बोध्य अभ्यभाषत ॥२॥ तद्वाक्यान्याह-कृष्ण कृष्णेत्यष्टादशभिः। सम्बोधनबहुत्वमादरार्थम्। महान् योगो मायाख्यशक्तिरूप उपायोऽस्यास्तीति महायोगी तत्सम्बोधनं महायोगिन्निति। हे सङ्कर्षण! इति सम्बोध्य तस्यापि जन्मादिविकारं वारयन् पुनः सम्बोधयति-सनातनेति। अस्य विश्वस्य यत् यौ कारणभूतौ प्रधानपुरुषौ तौ वां युवामेवेति जाने, यतस्तयोरपि परौ कारणरूपौ साक्षात्परमेश्वराविति ॥३॥ सर्वात्मकत्वं दर्शयन्नेतदेव स्पष्टयति-यत्रेति। यत्र यस्मिन्नधिकरणे इदं विश्वं स्यात्, येन कर्त्रा करणेन चेदं स्यात्, यतो वा अपादानसंज्ञिकादुपादानकारणादिदं स्यात्, यस्य सम्बन्धि यत्स्वामिकमिदं स्यात्, तस्मै सम्प्रदानाय यद्विहारार्थमिदं स्यात्, यत् यः प्रयोज्यकर्ता, यच्च कर्म, यथा स्यादिति तत्प्रकारात्मकः, यदा स्यादिति तत्तत्कलात्मकः, एवमधिकरणादिसर्वात्मको भगवान् त्वमेव। तत्र हेतुमाह-साक्षादिति। प्रधानं भोग्यम्, पुरुषो भोक्ता, तयोरपीश्वरस्त्वमेव साक्षादित्यर्थः। रामकृष्णयोरैक्यमभिप्रेत्यैकवचनम् ॥४॥ किञ्च धारणपोषणकर्तापि त्वमेव इत्याह-एतदिति। आत्मन्निति लुप्तसप्तम्यन्तं पदम्। स्वस्मिन्नेवाधारभूते आत्मना स्वेनैव सृष्टमेतन्नानाविधं देवतिर्यगादिदेहादिरूपं विश्वमात्मना अन्तर्यामिरूपेणानुप्रविश्य स्वयं त्वजः जन्मादिविकाररहितोऽपि क्रियाशक्तिः प्राणः ज्ञानशक्तिर्जीवश्च संस्त्वमेव बिभर्षि धारयसि पोषयसि च। तथाप्यतीन्द्रियत्वात्कोपि न ज्ञायसे इत्याशयेन सम्बोधयति-अधोक्षजेति ॥५॥

अन्वितार्थप्रकाशिका

मुनीनामिति। पुत्रयोर्धामसूचकं परमेश्वरत्वज्ञापकं मुनीनां वचः स्मृत्वा तथा तयोर्वीर्यैर्गोवर्धनोद्धरणादिभिर्जातो विश्रम्भः जगदीश्वरत्वविश्वासो यस्य स वसुदेवः परिभाष्य तौ सम्बोध्य अभ्यभाषत ॥२॥ कृष्णेति। हे कृष्ण! कृष्! महायोगिन्! हे सङ्कर्षण! हे सनातन! अस्य विश्वस्य यत् यौ साक्षात् स्वरूपेण कारणभूतौ प्रधानपुरुषौ यतस्तयोरपि परौ कारणरूपौ साक्षात्परमेश्वरौ वां युवामिति जाने ॥३॥ यत्रेति। यत्र यस्मिन्नधिकरणे इदं विश्वं स्यात् येन कर्त्रा करणेन चेदं स्यात् यतो वा अपादानसंज्ञिकादुपादानकारणादिदं स्यात् यस्य सम्बन्धि यत्स्वामिकमिदं स्यात् तस्मै सम्प्रदानाय यद्विहारार्थमिदं स्यात् यत् यः प्रयोज्यकर्ता यच्च कर्म यद्यदिति देवानामृतमाशयतीत्यादिकयोः प्रयोज्यकर्मशुद्धकर्मणोः सङ्ग्रहः। ननु प्रयोज्यभिन्नं शुद्धं कर्म नास्त्येव। तण्डुलं पचति इत्यादौ तण्डुलः पक्वो भवति तं पक्वं करोतीत्याद्यर्थात्तदुक्तम्। करोति क्रियमाणेन न कश्चित् कर्म विना भवत्यर्थस्य कर्ता च करोतेः कर्म जायते इति करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः भविता तमपेक्ष्याथ प्रयोज्यः प्रपद्यत इति सत्यम्। अवस्थाभेदेन भेदसद्भावात् तण्डुलः पक्वो भवतीत्यादौ हि तण्डुल ओदनो भवति तं तण्डुलम् ओदनं करोति इत्यर्थे न पूर्वावस्थतण्डुलादेः प्रयज्यकर्मत्वात् उत्तरावस्थौदनादेः शुद्धकर्मत्वात् दृश्यते चावस्थया भेदः। तण्डुलानोदनं पचति घटं करोतीति तदेवं सप्त विभक्त्यर्था दर्शिताः। यथा येन प्रकारेणेति क्रियाविशेषणानां यद्वा स्यादिति तत्तत्कालशक्तिः सन् स्यादिति सर्वक्रियोपलक्षणम्। एवमधिकरणादिसर्वात्मको भगवान् त्वमेव प्रधानं भोग्यं पुरुषो भोक्ता तयोरपि परमे

श्वासः स परिभाष्य
नपुरुषोश्वरौ परौ अहं
षष्ठ्या निमित्ततोक्ता
दं घटं करोतीति यथा
॥४॥ एतत् बहुप्रकारम्
धिष्ठाने ॥५॥

रमेश्वरत्वज्ञापकं वचः
ौ सम्बोध्य अभ्यभाषत
रूप उपायोऽस्यास्तीति
न् पुनः सम्बोधयति-
ोरपि परौ कारणरूपौ
त्यात्, येन कर्त्रा करणेन
यात्, तस्मै सम्प्रदानाय
ादिति तत्तत्कलात्मकः,
क्ता, तयोरपीश्वरस्त्वमेव
-एतदिति । आत्मन्निति
देहादिरूपं विश्वमात्मना
र्जीवश्च संस्त्वमेव बिभर्षि
॥

द्धरणादिभिर्जातो विश्रम्भः
। कृष्ण ! महायोगिन् ! हे
ौ कारणरूपौ साक्षात्परमेश्वरौ
णेन चेदं स्यात् यतो वा
यद्विहारार्थमिदं स्यात् यत् यः
। ननु प्रयोज्यभिन्नं शुद्धं कर्म
क्रियमाणेन न कश्चित् कर्मणा
भविता तमपेक्ष्याथ प्रयोज्यत्व
वति तं तण्डुलम् ओदनं करोति
मिदः । तण्डुलानोदनं पचति मूढ
दिति तत्तत्कालशक्तेः सङ्ग्रह
षो भोक्ता तयोरपि परस्त्वमेव

अन्वितार्थप्रकाशिका

साक्षादित्यर्थः । रामकृष्णयोरैक्यमभिप्रेत्यैकवचनम् ॥४॥ एतदिति । हे अधोक्षज ! आत्मन्निति । डिलुक् छान्दसः । स्वस्मिन्नेवाधारभूते आत्मसृष्टमित्यत्रात्मना आत्मने आत्मनः सम्बन्धि आत्मैव सृष्टमिति समासभेदात्सर्वकारकसङ्ग्रहः । एतन्नानाविधं देवतिर्यगादिदेहरूपं विश्वम् अन्तर्यामिरूपेणानुप्रविश्य स्वयं ततः जन्मादिविकाररहितोऽपि क्रियाशक्तिः प्राणः ज्ञानशक्तिर्जीवश्च संस्त्वमेव बिभर्षि धारयसि पोषयसि च । ननु प्राणादीनामपि कारणत्वात् कथं परमेश्वरस्यैव कारणत्वमित्याशंक्य प्राणादिशक्तयोऽपि तस्यैवेत्याह-प्राणेति । प्राणः समष्टिप्राणात्मकं सूत्रम् आदिपदेन कालप्रकृतिमहत्तत्त्वाहङ्कारमहाभूतपञ्चकैकादशेन्द्रियसङ्ग्रहः । प्राणादीनां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः परस्य कारणस्येश्वरस्यैव न तेषाम् तत्र हेतुः महाप्राणादीनां पारतन्त्र्यात् । यथा बाणादीनां पारतन्त्र्यान्न तेषां वेधशक्तिः किन्तु पुरुषस्यैव तद्वदित्यर्थः ।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

धाम प्रभावस्तस्य सूचकं वचः श्रुत्वा तद्वीर्ये तयोः रामकृष्णयोः वीर्ये सामर्थ्ये जात उत्पन्नो विश्रम्भो विश्वासो यस्य सः तद्वीर्यैरिती पाठे तु तयोः वीर्यैः कृत्वा जातविश्वासः परिभाष्य सम्बोधनीकृत्य ॥२॥ अस्य ब्रह्माण्डस्य यत् कारणं कारणभूतौ प्रधानपुरुषौ प्रकृतिपुरुषौ ताभ्यां परौ श्रेष्ठौ साक्षात् वां युवाम् अहं जाने ॥३॥ इदानीं विश्वकारणत्वेन श्रीकृष्णं स्तुवन्नाह-यत्रेति । इदं विश्वं यत्र यस्मिन् यदाधारे स्थितं स्यात् । येन परमात्मना यतः प्रकृतेः सकाशात् यथा येन प्रकारेण यद्यत् देवमनुष्यादिरूपम् इदं यर्हि उत्पाद्यते यस्य परमात्मनः इदमस्ति यस्मै परमेश्वराय परमेश्वरसेवार्थम् उत्पन्नं विश्वसृष्टौ प्राप्तकरणकलेवारा जीवाः उत्पन्नैर्नानाविधयोग्यवस्तुभिः परमेश्वरसेवां कुर्वन्त्वित्येतदर्थमुत्पादितमित्यर्थः । सः प्रधानपुरुषयोरीश्वरो नियामकः साक्षात् प्रत्यक्षस्त्वमसि ॥४॥ विश्वपोषकोऽपि त्वमेवेत्याह-एतदिति । हे आत्मन् ! परमात्मन् ! आत्मना स्वेन सृष्टं नानाविधं देवमनुष्यादिनानाप्रकारम् आत्मना सर्वक्षेत्रज्ञकर्मफलप्रकाशकेन विकसितान्तर्यामिरूपेणानुप्रविश्य प्राणः जीवनं यथाकर्म क्रियाशक्तिप्रकाशकः जीवश्च तेषां यथाकर्म ज्ञानशक्तिप्रकाशकश्च अजः प्राकृतजन्महीनत्वम् इदं बिभर्षि ॥५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मुनीनामिति ॥ स वसुदेवः पुत्रयोः रामकृष्णयोः धामसूचकं प्रभावसूचकं मुनीनां वचः 'वसुदेव भवान्नूनं भक्त्या परमया' इत्युक्तं वचनं श्रुत्वा क्वचित् स्मृत्वेत्यपि पाठः । तयो रामकृष्णयोर्वीर्यं सामर्थ्यं तस्मिन् जातविश्रम्भ उत्पन्नविश्वासः सन् परिभाष्य सम्बोध्य अभ्यभाषत ॥२॥ तदेवाह ॥ कृष्णेति ॥ हे कृष्ण कृष्ण ! आदरे वीप्सा । हे महायोगिन् ! हे सनातन ! हे सङ्कर्षण ! युवाम् अस्य जगतः यत्कारणं कारणभूतौ साक्षात् प्रधानपुरुषौ प्रकृतिपुरुषौ जाने । किमावां प्रधानपुरुषावेव त्वया बुद्धौ नहि । परौ ताभ्यामपि विलक्षणौ जाने । कार्यावस्थचिदचिदात्मकस्यास्य जगतः कारणावस्थौ प्रधानपुरुषौ युवां तु तच्छरीरकौ 'यस्य प्रकृतिः शरीरम्' इति 'यस्यात्मा शरीरम्' इति च श्रुतेः शरीरस्य शरीरिणः सकाशात् पृथग्भूतलक्षणत्वात् तदात्मभूतौ सन्तौ एवेति भावः । 'परः पराणाम्' इति श्रुतेः ॥३॥ एवं जगतस्तत्कार्यत्वं प्रतिज्ञातम् । कार्यं कारणसापेक्षं कारकषट्कसाध्यं च । अतोऽनेककारकैर्जायमानत्वात् । एवमनेकैः कारकैर्जायमानं विश्वं कुतः प्रधानपुरुषात्मकं कुतस्तरामावयोस्तत्कारणत्वेनेश्वरत्व-मित्याशंक्योत्तरं कुर्वन् षट्कारकप्रदर्शनपूर्वकं जगत्कारणतया प्रसिद्धयोः प्रकृतिपुरुषयोः कारकमालायाश्च त्वच्छरीरत्वेन तदात्मकत्वात् कृत्स्नं जगत्त्वत्कार्यं त्वं तत्कारणमित्यभिप्रयन्नाह ॥ यत्रेति ॥ यस्य भगवत्सम्बन्धिनि यत्र प्रधाने यस्मै लोकहितार्थं भगवता स्वसङ्कल्पेन करणेन च यतो हेतोः यदा यस्मिन् काले यथा येन प्रकारेण यत् यत् स्वरूपं यद्यत्प्रकारम् इदं विश्वं सम्पूर्णं भवेत् तत् सर्वं साक्षात् प्रधानपुरुषेश्वरः प्रकृतिपुरुषयोरपीश्वरः भगवान् त्वमेव । कृष्णरामयोरंशांशिनोरैक्यमभिप्रेत्यैकवचनम् । यत्र 'यस्मिन्निदमधितिष्ठति' 'यस्मिन्निद ँ सर्वम्' इति श्रुतिः 'येन जातानि जीवन्ति' इति श्रुतिः 'यतो वा इमानि भूतानि' इति श्रुतिः 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनम्' इति च श्रुतिः 'यस्मा इदं क्रियते' इति 'यद्यत् सच्च त्यच्चाभवत्' इति । यथा स्थितं यदा काले इदं स्यात्, तथा तदा स्यात् ब्रह्मैवेदं विश्वमिति एवमिदं जगत् साक्षान्निर्विचारं

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रधानपुरुषेश्वरो भवानेव कारणं तत्सत्तायास्त्वदेकाधीनत्वादिति व्याचख्यु: ॥४॥ किञ्च सर्वधारणपोषणकर्तापि त्वमेवेत एतदिति ॥ हे आत्मन् ! परमात्मन् ! आत्मना स्वेन सृष्टं नानाविधं देवमनुष्यादिभेदेन नानाप्रकारं विश्वम् सर्वक्षेत्रज्ञकर्मफलप्रकाशकेन विकसितान्तर्यामित्वरूपेण अनुप्रविश्य । यद्वा । आत्मना स्वशरीरभूतेन जीवेन तद्रक्षणोपयुक्तमनुप्रवेशं कृत्वेत्यर्थ: । प्राण: प्राणशरीरक: जीवो जीवशरीरकश्च एवं प्राणादिशरीरकत्वेऽपि प्राणजीवगतदोषासंस्पृष्ट: सन् हे अधोक्षज त्वं बिभर्षि धारयसि । 'मनोमय: प्राणशरीर:' इति 'यस्यात्मा शरीरम्' श्रुत्योर्भगवत: प्राणशरीरकत्वं जीवशरीरकत्वं च श्रूयते ॥५॥

कृष्णप्रिया

महामना श्रीवसुदेवजीने समर्थ-सर्वज्ञ महर्षियो के मुखकमलोंसे भगवान श्रीकृष्ण की महिमा सुनी और श्रीकृष्ण के महैदश्वर्यपूर्ण चरित्र भी अपने नयनों से देखे थे । इसलिये श्रीवसुदेवजीको इस विषयका हो गया था कि कृष्णबलभद्रजी सामान्य पुरुष नहीं किन्तु स्वयं भगवान है । इसलिये उन्होंने अपने दो पुत्रों सस्नेह यों कहा ॥२॥ हे कृष्ण हे श्रीकृष्ण ! हे सच्चिदानन्द स्वरुप हे महायोगी बलभद्र आप दोनों भाई ब्रह्म हो मैं जानता हुं कि आप दोनों इस विश्वके साक्षात् कारण स्वरूप प्रधान पुरुष के भी नियन्ता परमेश्वर ॥३॥ हे श्रीकृष्ण इस विश्व का ब्रह्माण्ड का अधिष्ठान-आधार-निर्माता एवं निर्माण सामग्री भी आप ही हो अखिल ब्रह्माण्ड के स्वामि हो और आपने आपकी क्रिडा के लिये क्रीडा भाण्डका निर्माण किया है व्यवहारमें छह प्रकार के जो कारक है अथवा कहे जाते इनका समुदित वाच्यार्थ है श्रीकृष्ण आप ही है जो होता है, जिससे होता है जिसके लिये होता है, जिस हेतु से होता है, जिस सम्बन्ध से होता है, है वह सर्व आप ही है जो प्रधान और पुरुष नामके जो कारण है वे दोनों आप ही है आप इन्सानोंके है । इस जगतमें प्रकृति स्वरुपसे भोग्य और पुरुष से भोक्ता और इन दोनों से परे एक इन दोनों के साक्षात् भगवान भी आप ही हो ॥४॥ हे अधोक्षज ! आपने बनाया हुआ, अनेक प्रकारका इस जगत् में प्रवेश करके आत्मस्वरुप प्राणस्वरुप, जीवस्वरुप और अजन्मा होकर विश्व को धारण करते हो ॥५॥

प्राणादीनां विश्वसृजांशक्तयो या: परस्य ता: । पारतन्त्र्याद् वै सादृश्याद् द्वयोश्चेष्टैव [1]चेष्टताम्
कान्तिस्तेज: प्रभा सत्ता चन्द्राग्न्य[2]र्कर्क्षविद्युताम् । यत् स्थैर्यं भूभृतां भूमेर्वृत्तिर्गन्धोऽर्थतो भवान्
तर्पणं [3]प्राणनमपां देवत्वं ताश्च तद्रस: । ओज: सहो बलं चेष्टा गतिर्वायोस्त[4]वेश्वर
दिशां त्वमवकाशोऽसि दिश:[5] खं स्फोट आश्रय: । नादो वर्णस्त्वमोंकार आकृतीनां पृथक्कृति:

कर्दमक्षमा

विश्वसृजाम्, प्राणादीनाम्, चेष्टताम्, या:, शक्तय:, ता:, परस्य, वै, सादृश्यात्, पारतन्त्र्यात्, द्वयो:, चेष्टा, चन्द्राग्न्यर्कर्क्षविद्युताम्, कान्ति:, तेज:, प्रभा, सत्ता, भूभृताम्, यत्, स्थैर्यम्, भूमे:, गन्ध:, वृत्ति:, अर्थत:, भवान् ईश्वर, अपाम्, तर्पणम्, प्राणनम्, ता:, च, तद्रस:, ओज:, ओज:, वायो:, गति:, चेष्टा, सह:, बलम्, तव(अस्ति) ॥८॥ अवकाश:, स्फोट:, आश्रय:, दिश:, नाद:, ओङ्कार:, वर्ण:, आकृतीनाम्, पृथक्कृति:, त्वम्, असि ॥९॥

---

१. चेष्टितं-विज. । २. चन्द्राग्न्यर्कसविद्यु तां-विज. । ३. तर्पणं जीवनं चापां क्लेदनं ताश्च तद्रस:-वीर. ; तर्पणं प्राणनं ताश्च तद्रत:-विज. । ४. स्त्वमीश्वर:-वीर. ; स्तथेश्वर-गो. प्रे. टी. । ५.शब्दस्त्वं-विज. ।

कर्तापि त्वमेवेत्याह॥
कारं विश्वम् आत्मना
न जीवेन अनुप्रविश्य
दशरीरकत्वेऽपि अजः
यस्यात्मा शरीरम्' इति

की महिमा सुनी थी
इस विषयका निश्चय
ंने अपने दो पुत्रों को
प दोनों भाई सनातन
ो नियन्ता परमेश्वर हो
भी आप ही हो आप
र्माण किया है लोक
ण आप ही है इसलिये
होता है, जिसमें होता
ाप इन्सानोंके नियन्ता
न दोनों के नियामक,
का इस जगत् में स्वयं
रते हो ॥५॥

श्चेष्टैव [१]चेष्टाम् ॥६॥
ध्योऽर्थतो भवान् ॥७॥
र्वायोस्त्[२]वेश्वर ॥८॥
कृतीनां पृथक्कृतिः ॥९॥

त्, द्वयोः, चेष्टा, एव ॥६॥
र्थतः, भवान्(अस्ति) ॥७॥
तव(अस्ति) ॥८॥ दिशाम्
२॥

र. ; तर्पणं प्राणनं चापां द्रवत्वं

श्रीधरस्वामिकृता भावार्थदीपिका

ननु, प्राणादीनां विचित्रशक्तीनां कारणत्वावगमात्कथं परमेश्वरस्यैव कारणत्वेन सर्वात्मकत्वमुच्यत इत्याशङ्क्य प्राणादिशक्तयोऽपि तस्यैवेत्याह-प्राणादीनामिति । प्राणः सूत्रं तदादीनां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः परस्य सर्वकारणस्येश्वरस्यैव कुतः पारतन्त्र्यात् यथा वेधशक्तिर्न बाणस्थापयितुः पुरुषस्य तद्वदित्यर्थः । ननु भगवतः प्राणादिवर्गस्य स्वातन्त्र्यमेव किं न स्यादत आह-वैसादृश्यात् द्वयोरिति । चेतनाचेतनत्वेन विशदृशत्वाद्द्वयोः अचेतनप्राणादिवर्गस्य चेतनपारतन्त्र्यमेव युक्तमित्यर्थः । यद्वा प्राणादिषु द्वयोर्द्वयोरेव तावद्विसदृशत्वं विरुद्धक्रियाकारित्वात्किं पुनर्बहूनां तस्मादेकेन सर्वज्ञेन सर्वशक्तिनाधिष्ठितानामेव विशिष्टकार्यारम्भकत्वं युक्तं न स्वतन्त्राणामिति तथा चोक्तम्-"यदैते संहता भावा भूतेन्द्रियमनोगुणाः । यदायतननिर्वाणे न शेकुर्ब्रह्मवित्तम ॥ तथा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः । सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः ॥" इति । तथा "नानात्वात्स्वक्रियाऽनीशाः प्रोचुः प्राञ्जलयो विभुम्" इत्यादि । ननु प्राणादीनां क्रियाकारित्वं शक्त्यभावे कुतः स्यादत आह-चेष्टैव चेष्टतामिति । चेष्टमानानामेषां चेष्टैव न तु शक्तिः यथा वायोः शक्त्या तृणादीनां चलनं यथा वा पुरुषस्य शक्त्या शराणां वेग इति ॥६॥ पारतन्त्र्यमेव प्रपञ्चयति । कान्तिरिति पञ्चभिः । चन्द्रस्य कान्तिः अग्नेस्तेजः अर्कस्य प्रभा ऋक्षविद्युतां सत्ता स्फुरणमात्रेण सत्त्वम् अर्थतो वस्तुतो भवान् तथा च श्रुतिः "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति स्मृतिश्च । "यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥" इति भूमेर्वृत्तिः प्राणिनामाधारत्वेन वर्तनं [illegible] भवान् तवैव शक्तिरित्यर्थः ॥७॥ किञ्च, हे देव ! अपां तर्पणं तृप्तिजनकत्वं प्राणनं जीवनं हेतुत्वं ता आपश्च तासां रसश्च त्वमेव किञ्च वायोरोजः सः आदि तवैव शक्तिः ॥८॥ दिशामुपाधिकृताऽऽकाशप्रदेशानामवकाशो दिशश्च त्वम् खं सामान्याकाशस्तदाश्रयः स्फोटश्चशब्दतन्मात्रं परावस्था वागित्यर्थः । नादः पश्यन्ती ओङ्कारो मध्यमा वर्णश्चाकृतीनां पदार्थानां पृथक्कृतिः पृथक्करणमभिधानं यस्मात्तत्पदम् वर्णपदाद्यात्मिका वैखरी च त्वमित्यर्थः ॥९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कारणत्वे पुनराशङ्कते-नन्विति । कारणत्वावगमात्कारणत्वनिश्चयात् । तस्यैव परमेशस्यैव । "प्राणो वै सूत्रम्" इति श्रुतेः । तदादीनां सूत्रमहत्तत्त्वाहङ्कारादीनाम् । प्राणादिवर्गस्य पारतन्त्र्यात्स्वातन्त्र्याभावात् । इत्यर्थ इति-तद्वद्बाणे वेधनशक्तिवदीशस्य तत्त्वमेव तेषामिति भावः । पुनराशङ्कते-नन्विति । इत्यर्थ इति-अचेतनस्य चेतनाधीनतैव युक्तेति भावः । प्राणादीनां स्वातन्त्र्यावगमे सृष्ट्यादिनिरोध एव स्यादित्याह-यद्वेति । प्राणादिषु द्वयोरेव प्राणापानयोरेव । विरुद्धक्रिया प्राणस्योपरि गमनरूपाऽपानस्याधोगमनरूपा । यद्वा-प्राणस्य सूत्रात्मनः क्रियाशक्तिरूपाहङ्कारस्याभिमतिरूपा । एवमन्यत्राप्यूह्यम् । एकमत्याभावात् । अत्र च पूर्वोक्तं स्मारयति-तथा चोक्तमिति । पुनराशङ्कते-नन्विति । एषां प्राणादीनाम् ॥६॥ कान्तिः कमनीयता । पारतन्त्र्ये श्रुतिमाह-तथा चेति । तत्रात्मनि । तमेवात्मानमेव ॥७॥ अन्यदाह-किञ्चेति । इमं न्यायमन्यत्राप्यतिदिशति-किञ्चेति ॥८॥ तदाश्रयः सामान्याकाशाश्रयः । इत्यर्थ इति-अतीवसूक्ष्मा पराख्या वागेव शब्दतन्मात्रमिति भावः । आकृतीनां घटाद्याकाराणाम् । इत्यर्थ इति-परापश्यन्तीमध्यमावैखरीरूपस्त्वमेव । प्रपञ्चयिष्यते चैतदेकादशस्कन्धे । यद्वा-वैयाकरणाभिमताष्टविधस्फोटरूपोऽपि त्वमेव । ते चाष्टौ स्फोटाः-वर्णस्फोटपदस्फोटवाक्यस्फोटा इति त्रयो व्यक्तिस्फोटाः । त्वजातिर्वाचिकेति पक्षे वर्णपदवाक्यभेदेन त्रयो जातिस्फोटाः । वर्णपदस्फोटवाक्यपदस्फोटौ चेत्यष्टौ सन्ति । यथा-राम इत्यत्र रकाराकारमकाराकारवर्णा वाचका इति वर्णस्फोटः १, राम इति पदमेव वाचकमिति पदस्फोटः २, राम मां पाहीति वाक्यमेव वाचकमिति वाक्यस्फोटः ३, तत्र व्यक्तिस्फोटवाचकानां मते [*]वर्ण[*]पदवाक्यव्यक्तिरेव वाचिका । जातिस्फोटवाचकानां मते तु वर्णत्वपदत्ववाक्यत्वजातिरेव वाचिका ६, केषांचिन्मते वर्णानां पदस्यापि राम इत्यत्र वाचकत्वं तत्र वर्णपदस्फोटः ७, राम मां पाहीति वाक्ये पदवाक्ययोरुभयोर्वाचकत्वमिति पदवाक्यस्फोटः ८, स्फुटति प्रकटीभवत्यर्थोऽनेनेति स्फोटः । विशेषावच्छिन्नं ब्रह्मैव स्फोटपदवाच्यमिति सिद्धान्तः ॥९-१०-११॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विश्वसृजामिति। आदिशब्दात् वक्ष्यमाणा महाभूतादयः। पारतन्त्र्ये हेतुः-द्वेषो वैसादृश्यादिति। अन्यत्तैर्व्याख्या ।अत्र पारतन्त्र्यमित्यधीकं लेखकभ्रमादिति स्वपक्षे अतस्तद्भक्तिः तत्कृपाप्रभावादेव सिद्ध्येन्न त्वन्यथा। त्वच्छक्त्यै सर्वेषां सर्वशक्तेरित्याह-प्राणेति। विश्वसृजां ब्रह्मादीनामपि ये प्राणादयस्तेषाम्। अन्यत् समानम् ॥६॥ शक्तीराह-कान्ति पञ्चभिः। यदिति लिङ्गव्यत्ययेन सर्वैरपि योज्यं याश्चन्दादीनां कान्त्यादयः ताः सर्वाभावेनैवेत्यन्वयः। तत्र भवानित्या अग्रे तु त्वमिति भक्त्युद्रेकात् पुनश्च भवानिति तथैवेत्येतच्च भक्तिभङ्ग्यैवेति ज्ञेयम्। एवं तेजस्विनां त्वच्छक्तिहेतुत्वेना तेजसः शक्तिरुक्ता तृतीयस्कन्धे कपिलदेवोक्तायाः पचनादितच्छक्तेरप्यत्रैव वीतभावो ज्ञेयः। एवमन्यत्रापि। अधुना भूमे शक्तिं चरन्नादौ भौमत्वेनाद्रीणामाह-स्थैर्यं धारणशक्तिरित्यर्थः। एवमन्यत्रापि अर्थलोभवानिति शक्तिमतो कार्यकारणयोरभेदाभिप्रायेण तेषां तत्तच्छक्तिस्त्वच्छक्त्यैवेत्यर्थः। एवमग्रेऽपि ॥७॥ नन्वेक एवाहं कथं तत्तद्बहुरू तत्राह-देवेति। हे अनन्तधाभासमान! एवमीश्वरे त्वयि तत्रैव विभूतयस्ता इति भावः। चेष्टा प्रयत्नः गतिचलनमात्रम् अ तथेश्वरेति केवलगौडीयः पाठः ॥८॥ आश्रयश्च त्वमित्यन्वयः। अयमेव हेतुः सर्वत्र ॥९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

विश्वसृजामिति। आदि-शब्दाद्वक्ष्यमाणा महाभूतादयः। पारतन्त्र्ये हेतुः-द्वयोर्वैसादृश्यादिति। अन्यत्तैर्व्याख्यातम्। तत्र पारतन्त्र्यमित्यधिकं लेखकभ्रमादिति। स्वपक्षे-अतदस्त्वद्भक्तिस्त्वत्कृपाप्रभावादेव सिध्येन्न त्वन्यथा। त्वच्छक्त्यैव सर्वे सर्वशक्तिरित्याह-प्राणेति। विश्वसृजां श्रीब्रह्मादीनामपि ये प्राणादयस्तेषाम्। अन्यत् समानम् ॥६॥ शक्तीराह-कान्ति पञ्चभिः। यदिति लिङ्गव्यत्ययेन सर्वैरपि योज्यम्। याश्चन्द्रादीनां कान्त्यादयस्ताः सर्वा भवानेवेत्यन्वयः। तत्र भवानित्या अग्रे तु त्वमिति भक्त्युद्रेकात्, पुनश्च भावानिति तथैवेत्येतच्च भक्तिभङ्ग्यैवेति ज्ञेयम्। एवं तेजस्विनां तच्छक्तिहेतुत्वेना तेजसः शक्तिरुक्ता, तृतीयस्कन्धे किलदेवोक्तायाः पचनादि-तच्छक्तेरप्यत्रैवान्तर्भावो ज्ञेयः। एवमन्यत्रापि, अधुना भूमे शक्तिं वदन्नादौ भौमत्वेनाद्रीणामाह-स्थैर्य्यं धारणाशक्तिरित्यर्थः। अर्थतो भवानिति शक्तिमतो कार्यकारणयोश्चाभेदाभिप्राये तेषां तत्तच्छक्तिस्त्वच्छक्त्यैवेत्यर्थः। एवमग्रेऽपि ॥७॥ नन्वेक एवाहं कथं तत्तद्बहुलरूपः? तत्राह- हे देवेति। बहुधा त्वमे क्रीडसीत्यर्थः। एवमीश्वरेत्यापि ईश्वरशक्तेर्दुर्वितर्क्यत्वादिति भावः। ओजआदित्रयं क्रमेण मन-इन्द्रिय-देहानां शक्तिः। यद्वा, ओजः-पराक्रमः, सर्वविजयशक्तिः (सर्वेन्द्रियशक्तिः [ग]), सहः-बहिरन्तर्व्यापकशक्तिः, बलम्-उत्पाटनादिशक्तिः, चेष्टा-नयनादिशक्तिः। गतिः-शीघ्रादिरिति विवेचनीयम्। तथेत्युक्तसमुच्चये। अयमेव पाठः सुसङ्गतः, प्राक् पश्चाच्च सर्वत्रैवाभेदनिर्देशात् ॥८॥ आश्रय इति शब्दस्याकाशशक्तिकत्वमेव दृढयति। तत्र शब्दस्यैवावस्थाभेदेन भेदानाह-नाद इत्यर्धेन ॥९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विश्वसृष्टिहेतुभूतानां विश्वसृजां देवतानां याः शक्तस्ताः परस्य परमात्मनः शक्तयः तद्दत्ता इत्यर्थः। कुतः पारतन्त्र्यात् तेषां देवानां परमात्मपारतन्त्र्यात् वैसादृश्यात् अनन्यप्रतिनियतशक्तित्वेन वैधर्म्यात् अतस्तेषां तास्ताः शक्त परमात्माधीना इत्यर्थः। द्वयोचेष्टैव चेष्टतां चेष्टमानानां देहिनां चेष्टा द्वयोश्चेष्टा जीवपरयोश्चेष्टैव न केवलं जीव एव स्वत प्रवर्तते किन्तु परमात्मानुमान्यः प्रवर्तत इत्यर्थः ॥६॥ सत्ताशब्दः ऋक्षाणां विद्युतां च प्रकाशसत्तामाह-प्रवृत्तिः प्रवर्तनशक्ति भूमिवर्ती गन्ध एव एतत्सर्वं भवान् त्वदर्थमित्यर्थः ॥७॥ अपां तर्पणं लोकतृप्तिहेतुत्वं जीवनहेतुत्वं देवताधिष्ठितत्वं आपः रसः माधुर्यं सर्वं भवान् त्वदधीनमित्यर्थः। वायोः ओजः प्रवृत्तिसामर्थ्यं सहो वेगः बलं धारणसामर्थ्यम् ईश्वर तवैतत् सत्यमित्यर्थः ॥८॥ स्फोटः शब्दः तदाश्रयभूतं खमित्यर्थः। नादः शब्दाभिव्यंजकः आकृतीनां शब्दवाच्य पृथक्कृतिः वैविध्यं विविधाकृतय इत्यर्थः ॥९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवं भगवतश्चिदचित्समानाधिकरण्यं शरीरात्मभावनिबन्धनमिति शिक्षा कृता अथ चिदचिदसाधारणधर्म-करण्यं तन्निर्वाहकत्वनिबन्धनमिति शिक्षयति-प्राणादीनामिति । विश्वसृजां विश्वशरीरसृष्टिहेतुभूतानां प्राणादीनाम् न भूतपञ्चकैकादशेन्द्रियमहदहङ्कारसङ्ग्रहः । एतैर्हि विश्वसृष्टिः एतेषां याः शक्तयः कार्योपयोग्यपृथक्सिद्धधर्माः ताः त्मनः तवैव शक्तयः त्वन्निर्वाह्या एतेत्यर्थः । कुतः । पारतन्त्र्याच्छक्त्याश्रयाणां प्राणादीनां पारतन्त्र्यस्याभावात् । एवं च पारतन्त्र्यं किं पुनर्न्यायसिद्धमिति भावः । ननु प्राणादीनां शक्तयः मिथः प्राणादिभिर्वाह्याः कुतो न स्युरित्यत आह-दीति । अन्योन्यप्रतिनियतशक्तित्वेन वैधर्म्यान्न मिथो निर्वाह्यतेत्यर्थः । किमुताचेतनानां पारतन्त्र्यस्वभावतेति । तत्स्वभावत्वादित्यभिप्रेत्याह-द्वयोः श्रेष्ठैव चेष्टतामिति । चेष्टतां चेष्टमानानां देवानां चेष्टा द्वयोश्चैव जीवपरयोश्चेष्टैव जीव एव स्वतन्त्रः प्रवर्तते अपि तु परमात्मानुमान्यः प्रवर्तत इत्यर्थः ॥६॥ सर्ववस्तुशक्तीनां तन्निर्वाह्यत्वनिबन्धनम् । करण्यमाह-कान्तिरित्यादिना । चन्द्रस्य कान्तिरग्नेस्तेजः । अर्कस्य प्रभा ऋक्षाणां नक्षत्राणां विद्युतां च सत्ता । भूभृतां पर्वतानां यत्स्थैर्यं भूमिवृत्तिर्गन्धः यद्वा वृत्तिः प्राणिनामाधारत्वेन वर्तनं गन्धश्चेत्येतत्सर्वम् अर्थतः भवान् त्वन्निर्वाह्यमित्यर्थः ॥७॥ तर्पणमिति । अपां तर्पणं लोकवृत्तिहेतुत्वम् । जीवनं जीवनहेतुत्वम् । प्राणनमिति र्थः । क्लेदनमार्द्रीकरणम् । देवत्वमिति पाठे देवताधिष्ठितत्वम् । ता आपः तासां रसो माधुर्यं च सर्वं भवान् मित्यर्थः । याः वायोः शक्तयः ओजःप्रभृतयः ताः ईश्वरस्त्वमेवेति पूर्ववत् । तत्र ओजः प्रवृत्तिसामर्थ्यम् । सहो वेगः णसामर्थ्यम् । चेष्टा व्यापारः । गतिर्गमनम् ॥८॥ दिशामिति । दिशां सम्बन्धी अवकाशः दिशश्च त्वमेव स्फोटः श्रयः तदाश्रयभूतं खं त्वमेवेत्यन्वयः । नादः शब्दाभिव्यंजकः वर्णः आकाशादिः । अहङ्कारः आकृतीनां नामाकृतीनां पृथक्कृतिः द्वैविध्यं च त्वमेव । स्फोटनादोङ्कारशब्दैः परा पश्यन्ती मध्यमाख्या वाग्भेदा उच्यन्ते । पदार्थानां पृथक्करणमभिधानं यस्मात् तत्पदं वर्णपदाद्यात्मिका वैखरी त्वमित्यर्थः इति केचित् ॥९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-११॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

ननु प्राणजीवावेत तत्तद्रूपौ विश्वोपदेष्टारौ प्रसिद्धौ न त्वहं तत्पोष्टा तत्राह-प्राणादीनामिति न केवलं तयोर्विश्वपोष्टृत्वमेवापि त्वमपि प्रसिद्धमित्यर्थः । तेषां याः शक्तयस्ताः परस्य परमेश्वरस्यैव कुतः पारतन्त्र्यात् यथा वेधशक्तिर्न बाणस्य अपि तु दित्यर्थः । ननु तयोः स्वाधिष्ठातृदैवतपारतन्त्र्यमस्तु परमेश्वरपारतन्त्र्यं कुतोऽवसितं तत्राह-वै निश्चितं सादृश्यात् देवतानामपि तत्तुल्यत्वात् यथैव प्राणजीवशब्दवाच्यानि कर्मज्ञानेन्द्रियाणि जडानि तथैव तदधिष्ठातृदैवतान्यपि जडानीत्यर्थः वेत्यन्वयः । ननु प्राणादीनां शक्त्यभावे कुतः क्रियाकारित्वं स्यादत आह-द्वयोः प्राणजीवयोः तयोश्चेष्टैव चेष्टतां वत् चेष्टमानानां प्राणबुद्धिकर्मेन्द्रियाणां चेष्टैव केवलं न तु शक्तिर्यथा पुरुषस्य शक्त्या शरादीनां वेग इत्यर्थः ॥६॥ नक्षत्राणां या याः शक्तयस्तवैवेति प्रदर्शयति-कान्तिरिति । तत्र कान्तिः कमनीयता चन्द्रर्क्षविद्युतां प्रसिद्धैव अग्न्यर्कयोश्च अर्कस्योदयास्तसमयेऽपि तेजः स्पर्शाशक्यत्वलक्षणं सर्वेषामेव प्रभा अतिदूरस्थः प्रकाशः सत्ता च चन्द्रादीनाम् अर्थतो तथा च श्रुतिः —

'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विदुतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभान्ति सर्वे तस्य भासा सर्वमिदं विभाति' ॥ इति ॥

[illegible] —

दित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥" ॥ इति ॥

यदिति लिङ्गविपरिणामेन सर्वत्र योज्यं भूमेर्वृत्तिः प्राणानामाधारत्वेन वर्तनं गन्धश्च भवान् तथैव शक्तिरित्यर्थः बहुना, वस्तुधर्मा वस्तूनि च त्वमेवेत्याह-तर्पणमिति चतुर्भिः । हे देव ! अपां तर्पणं तृप्तिजनकत्वं प्राणनं जीवनहेतुत्वं तद्रसश्च त्वमेव वायोरोजस्सहआदिकं तवैव शक्तिः ॥८॥ दिशामुपाधिकृताकाशप्रदेशानामवकाशः दिशश्च त्वं खं च साम तदाश्रयः स्फोटश्च शब्दतन्मात्रं वाकं परावस्थेत्यर्थः । नादः पश्यन्ती मध्यमा च त्वं वर्णः ओङ्कारश्च त्वम् आकृतीनां पृथक् कृतिः पृथक्करणम् अभिधानं यस्मात् स इति वैखरी च त्वमित्यर्थः । तथा च श्रुतिः

"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥
गुहायां त्रीणि निहितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति" ॥ इति ॥९॥

गूढार्थदीपिनी

प्राणः सूत्रं तदादीनां महदादीनां विश्वसृजां विश्वकारणानां याः शक्तयः ताः परस्य परमेश्वरस्यैव । कुतः । चेतनयो द्वयोः विसदृशत्वात् एषां चेतनपारतन्त्र्यं घटते तस्मात् चेष्टतां चेष्टमानानामेषां चेष्टैव न तु शक्तिः यथा वेधशक्तिर्न बाणस्य पुरुषस्य तद्वदित्यर्थः ॥६॥ चन्द्रस्य कान्तिः अग्नेः तेजः अर्कस्य प्रभा । ऋक्षाणां नक्षत्राणां विद्युतां च सता स्फुरणमात्रम् पर्वतानां यत् स्थैर्यं भूमेः वृत्तिः आधारशक्तिः गन्धश्च इत्येतत् सर्वम् अर्थतः वस्तुतो भवानेव तवैव शक्तिरित्यर्थः भान्तमनुभाति सर्वम् इति श्रुतेः ॥७॥ हे देव ! अपां तर्पणं तृप्तिजनकत्वं प्राणनं जीवनहेतुत्वं ता आपः तासां रसश्च त्वमेव ओजः सहो बलं क्रमेण इन्द्रियमनोदेहशक्तयः । चेष्टा व्यापारः गतिः गमनं च तवैव शक्तिः ॥८॥ दिशां मध्ये अवकाशः सामान्याकाशश्च त्वम् । तदाश्रयः आकाशाश्रयः स्फोटः परा वाणी शब्दतन्मात्रं त्वमेव । स्फुटति प्रकटीभवति अर्थो स्फोटः ध्वनिविशेषावच्छिन्नं ब्रह्मैव स्फोटपदवाच्यमिति सिद्धान्तः । नादः पश्यन्ती । ओङ्कारो वर्णश्च मध्यमा आकृतीनां घट पृथक्करणरूपा वर्णपदात्मिका वैखरी वाणी च त्वमेव ॥९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अत्र निरीश्वरा आहुः-पुरुषः कर्ता भोक्ता करणकलापेन कर्माणि कुरुते नेश्वरः प्रेरको कश्चिदिति तान् निरीश्वरा

'अन्तःप्रविष्टः शास्ता जनानाम् । स कारयति पुण्यमथापि पापं यदासीत्तदधीनमेवासीत्' —

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥"

इत्यादिशास्त्रबलेन निराकरोति प्राणादीनामिति प्राणादीनां प्राणाः इन्द्रियाणि तदादीनां विश्वसृजां ब्रह्मादिजीवानां शक्तयः ताः परस्य परमात्मनः । तत्र हेतुमाह-द्वयोः करणकर्त्रोः पारतन्त्र्यात् परमेश्वराय तत्त्वात् पारतन्त्र्येऽपि हेतुः वैसादृ यदा क्वचित् कर्तर्यवहितेऽपि करणमनवहितं भवति क्वचित्करणेऽवहिते कर्ताऽनवहितो एवंद्वयोर्वैसादृश्यात्पारतन्त्र्यासिद्धिरित्यर्थः । अतः चेष्टतां स्वासाधारणचेष्टां कुर्वतां करणानां कर्तॄणां च चेष्टापरस्यैवेत्यर्थः एवं चन्द्रादीनां कान्त्यादयो धर्मास्तवैव शक्तय इत्याह-कान्तिरिति पञ्चभिः । चन्द्रस्य कान्तिः अग्नेस्तेजः अर्कस्य प्रभा सत्तास्फुरणमात्रेण सत्त्वम्, भूभृतां भूधराणां स्थैर्यं भूमेर्वृत्तिः गिरिसमुद्राद्याधारत्वेन वर्तनम् अर्थतस्तदुपादानत्वेन उपपादनकारणात्कार्यं सर्वथा भिन्नं भवतीत्यर्थः । अनेन न्यायेन चन्द्रादिरूपोऽपि भवानेव अर्थात् इत्यग्रेऽपि योज्यम् हे देव ! अपां तर्पणं प्राणितृप्तिहेतुत्वं प्राणनं प्राणिजीवनहेतुत्वं ता आपश्च तासां रसश्च त्वमेव एवं वायोः ओजआदि ॥८॥ दिशामवकाशः दिशश्च त्वम् आश्रयः शब्दानामाश्रयः खमाकाशः स्फोटनादोङ्कारशब्दैः परा पश्यन्ती मध्यमा उच्छन्ते वर्णश्च आकृतीनां पृथक्कृतिः पृथक्करणमभिधानं यस्मात्तत्पदं वर्णपदाद्यात्मिका वैखरीवाक्त्वमेव अत्रानुकरण ज्ञेयः न त्वनादिसिद्धः वैदिकः तस्याकाशगुणत्वाभावात् सर्वस्य वेदस्य प्राकृतसृष्टेः पूर्ववर्तित्वात् ॥९॥

विभूतिरूपं निरू
सत्ता वस्तुस्थितिः यद्यप्येत
प्रभा अग्नौ ऋक्षाणां च वि
नान्यथेत्यर्थः धामरूपोऽयं
तदुभयमपि त्वमेव तत्र सर्व
स्यात् कारणगुणा हि कार्य
दृश्यते तेन ज्ञायन्ते ते धर्मा
तेजोभूम्योः धर्माः भगवद्रूपा
तर्पणमिति । यदकस्मात् पी
तिष्ठति तेन प्राणाः एवं सति
गङ्गादिषु 'आपो वै सर्वा दे
दृष्टादृष्टादिफलभेदा दृश्यन्ते
तत एव रस इति तत्रापीदं दु
सति वायुव्याप्तस्यैतदाधिक्यं
जङ्गमानां गतिः सापि पूव
सूत्रात्मकत्वभावोऽपि भगव
दिग्भेदश्च तदाह दिशस्त्वमि
भवतीति दिशोऽपि त्वमेव त
श्रूयते दिशां च पूर्वभागे सः
इति अनुरणनात्मकः आन्तरो
पञ्चाशद्वर्णाः तेषामाकृतयः
अनेकस्थानप्रकारभिन्ना भवे

प्राणादीनां विश्वस्रष्
चेष्टतां स्वस्वव्यापारं कुर्वतां
वेदान्तिनः ॥६॥ चन्द्रस्य क
पर्वतानां यत्स्थैर्यं स्थिरत्वं भ
जीवनं त्वम् । ताश्चापः तासां
खं सामान्याकाशः तदाश्रयः
पृथक्कृतिः पृथक्करणमभिधानं

ननु प्राणादीनां विचि
इत्याह-प्राणादीनामिति । प्राण
प्राणादीनां विश्वसृजां विश्वकारण

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

विभूतिरूपं निरूपयति–कान्तिस्तेज इति। सर्ववस्तुषु या कान्तिः सौन्दर्यं तेजः दीप्तिः मण्यादिष्विव प्रभा परप्रकाशिका ता वस्तुस्थितिः यद्यप्येतच्चतुष्टयं सर्ववस्तुषु विद्यमानं भवानेव तथापि तद्धर्मा येषु प्रसिद्धास्तान् गणयति कान्तिश्चन्द्रे तेजः सूर्ये भा अग्नौ ऋक्षाणां च विद्युतां सत्ता यथा भगवद्व्यतिरेकेण विद्युतां न क्वापि स्थितिः एवमेतेषामपि भगवतैव कान्त्यादिकं न्यथेत्यर्थः धामरूपोऽयं निरूपितः सोऽपि भगवानिति ज्ञापयितुं षड्वर्गपूर्त्यर्थम्पुनर्धर्मानाह–यद्भूभृतां स्थैर्यं यच्च भूमेर्गन्धः भयमपि त्वमेव तत्र सर्वत्र हेतुः अर्थत इति कार्यतः सुखादिकार्याणि जनयन्ति यदि सुखजनकत्वं धर्मिणि स्यात् तदा धर्माणामपि यात् कारणगुणा हि कार्यगुणानारभन्त इति यत्सामर्थ्यं धर्मिणो नास्ति तद्धर्माणां युक्तिबाधितमपि अथापि धर्मेषु कार्यातिशयो श्यते तेन ज्ञायन्ते ते धर्मा भगवद्रूपा इति एवं कार्येष्वपि कारणातिरिक्तसामर्थ्यं यत्र दृश्यते तद्भगवानिति ज्ञातव्यम् अनेन भूम्योः धर्माः भगवद्रूपा निरूपिताः ॥७॥ प्रसङ्गादन्येषामपि महाभूतानां धर्मा भगवद्रूपा इति निरूपयति तत्र प्रथमं जलस्याह–र्पणमिति। यदकस्मात् पीते जले काचित्तृप्तिर्जायते सा तृप्तिर्न जलस्य अन्यथा जलस्य शोषो न भवेत् प्राणानामप्याप्यायनं जायते ति तेन प्राणाः एवं सति जले मग्नः पुरुषो न म्रियेत तस्मान्न जलस्य धर्मः प्राणनं किन्तु भगवानेव किञ्च जलस्य देवत्वं श्रूयते दिषु 'आपो वै सर्वा देवताः' इति श्रुतिश्च अन्यथा पापक्षयादिकजनकत्वं न स्यात् किं च ताश्चापः कूपादिभेदभिन्नाः तासां दिफलभेदा दृश्यन्ते तद्भगवत्येवोत्पद्यन्ते किञ्च तद्रसोऽपि नानाविधः कथमेकविधाज्जलादनेकविधो रसो भवति भूमावपि स एव रस इति तत्रापीदं दूषणं वायोराह ओज इति ओज इन्द्रियाणां सामर्थ्यं सहोऽन्तःकरणस्य एतद्वायुकार्यमिति लोकः तथा वायुव्याप्तस्यैतदाधिक्यं भवेत् तस्माद्वायुधर्मत्वेन प्रसिद्धावपि भगवानेवेत्यर्थः। किञ्च या काचिच्चेष्टा तृणादिषु या वा मानां गतिः सापि पूर्वोक्तन्यायेन भगवानेव वायोस्तवेति वायुरपि त्वमेवेत्युक्तं वायुभेदाश्च शतशः ईश्वरेति वायोः त्मकत्वभावोऽपि भगवानेवेति निरूपितम् ॥८॥ आकाशस्याह–दिशामिति। प्राग्भागेन तस्य तत्रापि महानवकाशो दृश्यते भेदश्च तदाह दिशस्त्वमिति ब्रह्मवादे दिग्धर्मः आकाशः तत्तु उक्तं दिशश्च सर्वत्र नानाविधा भवन्तीति सर्वत्र सर्वं भगवत एव न्तीति दिशोऽपि त्वमेव तत्र यः स्फोटः सोऽपि अन्यथा शब्दे अर्थस्फुरणं न स्यात् स्फुटत्यर्थोऽस्मादिति आकाशस्य श्रुतावाश्रयः यते दिशां च पूर्वभागे सः दक्षिणभागे स इति अत आश्रयोऽपि भगवानेवेत्यर्थः। बाह्यमुक्त्वा आन्तरमाह–नादो वर्णस्त्वमोङ्कार अनुरणनात्मकः आन्तरो नादः स एव साकारत्वमापन्नो वर्णः स एवान्तःकरणे आवेष्टित ओङ्कारः ततो वैखरीप्रकारेण निर्गताः वर्णाः तेषामाकृतयः आकारा भिन्नाः तेषां कारणान्यपि भिन्नानि कण्ठादीनि कथमेकस्मात्कारणादनेकप्रकारवर्णाः कस्थानप्रकारभिन्ना भवेयुः अतः आकृतीनां वर्णानां पृथक्कृतिः पृथक्क्रिया भवानेवेत्यर्थः ॥९॥

सुबोधिनीसारः

प्राणादीनां विश्वस्रष्टृणां याः शक्तयः ताः परस्य परमात्मन एव वै सादृश्याच्चेतनाचेतनत्वे विलक्षणत्वात्परतन्त्रत्वाच्च तां स्वस्वव्यापारं कुर्वतां मध्ये द्वयोः प्रकृतिपुरुषयोरेव चेष्टा इति सांख्याः ईश्वरजीवयोरिति नैयायिकाः। विशिष्टोपहितयोरिति तनः ॥६॥ चन्द्रस्य कान्तिः अग्नेस्तेजः अर्कस्य प्रभा ऋक्षविद्युतां नक्षत्रचञ्चलानां सत्ता स्फुरणमात्रेण सत्त्वं भूभृतां नां यत्स्थैर्यं स्थिरत्वं भूमेर्वृत्तिराधारता गन्धश्च गुणोऽर्थतो भवान् त्वमेव ॥७॥ हे देव ! अपां जलानां तर्पणं तृप्तिहेतुत्वं त्वम्। ताश्चापः तासां रसो गुणः वायोरोजः सहो बलं गतिस्तव चेष्टा हे ईश्वर ! ॥८॥ दिशामवकाशः त्वमसि दिशश्च त्वं मान्याकाशः तदाश्रयः स्फोटश्च शब्दतन्मात्रं परावस्था त्वं नादः पश्यन्ती ओङ्कारो वर्णश्च मध्यमा आकृतीनां पदार्थानां तिः पृथक्करणमभिधानं यस्मात्तत्पदं वैखरी त्वमेव ॥९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु प्राणादीनां विचित्रशक्तीनां कारणत्वावगमात् कथं परमेश्वरस्यैव सर्वकारणत्वम् इत्याशंक्य प्राणादिशक्तयोऽपि तस्यैव प्राणादीनामिति। प्राणः समष्टिप्राणात्मकं सूत्रम् आदिपदेन कालप्रकृतिमहत्तत्त्वाहङ्कारमहाभूतपञ्चैकादशेन्द्रियसङ्ग्रहः। नां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः परस्य कारणस्येश्वरस्यैव, न तेषाम्। तत्र हेतुमाह–पारतन्त्र्यात् प्राणादीनामिति।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यथा बाणादीनां पारतन्त्र्यान्न तेषां वेधशक्तिः किन्तु पुरुषस्यैव, तद्वदित्यर्थः। ननु भगवतः प्राणादिवर्गस्य च स्वातन्त्र्यमेव किं स्यात् इत्याशंक्याह–वैसादृश्याद्द्वयोरिति। द्वयोश्चेतनाचेतनत्वेन विसदृशत्वात् अचेतनस्य प्राणादिवर्गस्य चेतनपारतन्त्र्यमेव युक्तमित्यर्थः। यद्वा द्वयोर्द्वयोरेव तावद्विसदृशत्वेन विरुद्धक्रियाकारित्वात् किं पुनर्बहूनां तथात्वम् ? तस्मादेकेन सर्वज्ञेन सर्वशक्तिनाऽधिष्ठितानामेव विशिष्टकार्यारम्भकत्वं युक्तम्, न स्वातन्त्र्येणेत्यर्थः। तथा चोक्तम्–

"यदैते संहता भावा भूतेन्द्रियमनोगुणाः। यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम॥
तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः। सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः॥" इति॥

तथा– **"नानात्वात् स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुम्॥"** इत्यादि।

ननु प्राणादीनां क्रियाकारित्वं शक्त्यभावे कथं स्यात् अत आह–चेष्टैव चेष्टतामिति। चेष्टमानानामेषां चेष्टैव न शक्तिः। यथा वायोः शक्त्या तृणादीनां चलनम्, यथा च पुरुषस्य शक्त्या शराणां वेगस्तथेत्यर्थः ॥६॥ तत्पारतन्त्र्यमेव प्रपञ्चयति-कान्तिरित्यादिना। चन्द्रस्य कान्तिः, अग्नेस्तेजः, अर्कस्य प्रभा, ऋक्षाणां नक्षत्राणां विद्युतां च सत्ता स्फुरणमात्रेण सत्त्वम्, भूभृतां पर्वतानां यत्स्थैर्यम्, भूमेर्वृत्तिः सर्वाधारतया वर्तनं गन्धश्च, इत्येतत्सर्वमर्थतः परमार्थतो भवान् तवैव शक्तिरित्यर्थः।

तथा च श्रुतिः –

"यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥" तथा हि-

"यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्व् मम तेजोंऽशसम्भवम्॥" इति॥

यद्यप्यन्यत्राप्युक्तानां कान्त्यादीनामनुक्तानामपि ज्ञानैश्वर्यबलादीनां गुणानां भगवच्छक्तित्वमेव, तथापि चन्द्रादिषु प्रसङ्गत्वात् एव दृष्टान्तीकृता इति ज्ञेयम् ॥७॥ अपां तर्पणं तृप्तिजनकत्वम्, प्राणनं जीवनहेतुत्वम्, देवत्वं शोधकत्वम्, ता आपश्च, तासां रसः, तथा हे ईश्वर! वायोश्च ओजः इन्द्रियसामर्थ्यम्, सहोऽन्तःकरणसामर्थ्यम्, बलं शरीरसामर्थ्यम्, चेष्टा शरीरव्यापारः, गतिः चेतनाचेतनसाधारणं गमनं च, तवैव शक्तिः ॥८॥ दिशामुपाधिकृताकाशप्रदेशानामवकाशो दिशश्च त्वम्। खं च सामान्याकाशः तदाश्रयः स्फोटश्च शब्दतन्मात्रं परावस्था वागित्यर्थः, नादः पश्यन्ती, ओङ्कारो वर्णश्च मध्यमा, अकृतीनां पदार्थानां पृथक्कृतिः पृथक्करणमभिधानं यस्मात्तत्पदं वर्णपदाद्यात्मिका वैखरी च त्वमित्यर्थः ॥९॥

अन्वितार्थप्रकाशिका

तथा वैसादृश्याद्द्वयोः विसदृशत्वात् अचेतनस्य प्राणादिवर्गस्य चेतनपारतन्त्र्यमेव युक्तमित्यर्थः। तथा चोक्तम्-

"यदैते सङ्गता भावा' इत्यारभ्य **'चोभयं ससृजुर्ह्यद"** इति॥

अन्यच्च **"नानात्वात् स्वक्रियानीशा"** इत्यादि।

ननु प्राणादीनां क्रियाकारित्वं शक्त्यभावे कथं स्यात् अत आह–चेष्टैव चेष्टतामिति। शतार्षः। चेष्टमानानामेषां चेष्टैव न शक्तिः। यथा वायोः शक्त्या तृणादीनां चलनम् यथा च पुरुषस्य शक्त्या शराणां वेगस्तथेत्यर्थः ॥६॥ सर्वत्रान्यत्र पारत प्रपञ्चयति–कान्तिरिति। चन्द्रस्य कान्तिः अग्नेस्तेजः अर्कस्य प्रभा ऋक्षाणां नक्षत्राणां विद्युतां च सत्ता स्फुरणमात्रेण सत्त्वं भूभृतां पर्वतानां यत्स्थैर्यम् भूमेर्वृत्तिः सर्वाधारतया वर्तनं गन्धश्चेत्येतत्सर्वमर्थतः परमार्थतो भवान् तवैव शक्तिरित्यर्थः। 'तमेव भान्तमनुभाति सर्वम्' इत्यादिश्रुतेः ॥७॥ तर्पणमिति। अपां तर्पणं तृप्तिजनकत्वम् प्राणनं जीवनहेतुत्वम् देवत्वं शोधकत्वं ता आपश्च तासां रस तथा हे ईश्वर! वायोश्च ओजः इन्द्रियसामर्थ्यं सहोऽन्तःकरणसामर्थ्यं बलं शरीरसामर्थ्यं चेष्टा शरीरव्यापारः गतिश्चेतनाचेतनसाधा गमनं च तवैव शक्तिः। तथेश्वर इति च पाठः ॥८॥ दिशामिति। दिशामुपाधिकृताकाशप्रदेशानामवकाशो दिशश्च त्वं खं सामान्याकाशः तदाश्रयः स्फोटश्च शब्दतन्मात्रं परावस्था वागित्यर्थः। नादः पश्यन्ती ओङ्कारो वर्णश्च मध्यमा अकृतीनां पदा

पृथक्कृतिः पृथक्करणमभि

गु

ननु तस्य क्रिया
महत्तत्त्वरूपं सूत्रम्। तदा
परमेश्वरस्यैव सन्ति। कु
प्राणादीनां परस्परं च सम
कान्तिरिति पञ्चभिः। चन्
भूमेर्वृत्तिः प्राणिधारकत्वेन
सामर्थ्यमेवेत्यर्थः। तदुक्तं

कु

"यदादित्यगतं
किञ्च। हे देव! अ
किञ्च। वायोः ओजआदयः
स्फोटः शब्दतन्मात्रं नादः व
पृथक्कृतिः पृथक् पृथक् नाना

एवं भगवतश्चिदचित
तन्निर्वाहकत्वनिबन्धनमिति
भूतपञ्चकैकादशेन्द्रियमहदहङ्
परमात्मनः तवैव शक्तयः।
प्राणादीनां शक्तयो मिथः प्राणा
चापि वैसादृश्यान्न मिथो निर्वा
इति श्रुतेः। अतः चेष्टतां चेष्ट
अतश्चिज्जडयोश्चेष्टाप्रवर्तकत्वा
सर्वशक्तिमताधिष्ठितानां प्राणादि

'यदैतेऽ
तदा संहत्य चान

अन्वितार्थप्रकाशिका

पृथक्कृतिः पृथक्करणमभिधानं यस्मात्तत्पदं वर्णपदाद्यात्मिका वैखरी च त्वमित्यर्थः । तथाच श्रुतिः –

''चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहायां त्रीणि निहितानि तानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥'' इति ॥९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु तस्य क्रियाशक्तिप्रकाशकत्वं ज्ञानशक्तिप्रकाशकत्वं च कथमिति चेत्तत्राह–प्राणादीनामिति । प्राणः क्रियाशक्तिप्रधानं महत्तत्त्वरूपं सूत्रम् । तदादीनां चतुर्विंशतितत्त्वानां विश्वसृजां पुरुषप्रकृतिकालब्रह्मादीनां च याः शक्तयः सामर्थ्यानि ताः परस्य परमेश्वरस्यैव सन्ति । कुतः । यतः द्वयोः शक्तिमतोः पारतन्त्र्यात् परमेश्वराधीनत्वात् वैसादृश्यात् द्वयोः शक्तिशक्तिमतोः प्राणादीनां परस्परं च समानधर्माभावाद्धेतोः चेष्टतां चेष्टमानानां तेषां प्राणादीनां चेष्टाम् ईहापरस्यैवास्ति ॥६॥ तदेव विवृणोति–कान्तिरिति पञ्चभिः । चन्द्रस्य नक्षत्राणां च कान्तिः अग्नेस्तेजः अर्कस्य प्रभा विद्युतां सत्ता सत्यत्वं भूभृतां पर्वतानां यत् स्थैर्यं भूमेर्वृत्तिः प्राणिधारकत्वेन वर्तनं गन्धश्च अर्थतः विश्वधारणपोषणरक्षणादिप्रयोजनाद्धेतोः भवान् इदं सर्वं भवदीयं विभूतिरूपं सामर्थ्यमेवेत्यर्थः । तदुक्तं श्रुतिस्मृत्योः —

''न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति ॥
कुतोऽयमग्निस्तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति ।''

''यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धिमामकमि''ति ॥७॥

किञ्च । हे देव ! अपां तर्पणं तृप्तिकरत्वम् । प्राणानां जीवनकारणत्वं च ता आपश्च तासां रसश्च त्वमेव तव शक्तिरित्यर्थः । किञ्च । वायोः ओजआदयः स्वयं वायुः तवैव शक्तयः ॥८॥ दिशां पूर्वादीनाम् अवकाशः दिशश्च त्वद्विभूतिः । खं स्वाश्रयसमग्राकाशः स्फोटः शब्दतन्मात्रं नादः वर्णविभागरहितः शब्दः वर्णः अकारादिवर्णसमूहश्च ओङ्कारः प्रणवश्च आकृतीनां देवमनुष्याद्याकाराणां पृथक्कृतिः पृथक् पृथक् नानाविधाकृतित्वं च त्वम् । एतत्सर्वं तव विभूतिरस्तीति सर्वत्र योज्यम् ॥९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं भगवतश्चिदचित्सामानाधिकरण्यं स्वशरीरात्माभावनिबन्धकमिति सूचितम् । अथ चिदचित्साधारणधर्मसामानाधिकरण्यं तन्निर्वाहकत्वनिबन्धनमिति सूचयति ॥ प्राणादीनामिति ॥ विश्वसृजां विश्वशरीरसृष्टिहेतुभूतानां प्राणादीनाम् आदिशब्देन भूतपञ्चकैकादशेन्द्रियमहदहङ्कारसङ्ग्रहः । यत एतैर्विश्वसृष्टिः प्रवर्तते तेषां याः शक्तयः कार्योपयोग्यपृथक्सिद्धा धर्माः ताः परस्य परमात्मनः तवैव शक्तयः । त्वन्निर्वाह्या एवेत्यर्थः । कुतः । पारतन्त्र्यात् शक्त्याश्रयाणां प्राणादीनां पारतन्त्र्यस्वभावत्वात् । ननु प्राणादीनां शक्तयो मिथः प्राणादिनिर्वाह्याः कुतो न स्युरत आह । वैसादृश्यात् अन्योन्यप्रतिनियतशक्तित्वेन वैधर्म्याच्चेतनाचेतनवत्त्वेन तत्र वैसादृश्यान्न मिथो निर्वाह्यतेत्यर्थः । अचेतनानां चेतनपारतन्त्र्यं चेतनानामपि चेतनत्वस्य भगवत्पारतन्त्र्यं 'चेतनश्चेतनानाम्' इति श्रुतेः । अतः चेष्टतां चेष्टमानानां चेष्टा, द्वयोः जीवपरयोः एव । न केवलं जीवोऽपि स्वतन्त्रः, तस्य भगवत्पारतन्त्र्यात् । चेतनजडयोश्चेष्टाप्रवर्तकत्वात्प्राणादिशक्तयश्चिज्जडाभ्यां पृथग्भूतस्य तवैव शक्तय इति भावः । तस्मादेकेन स्वतन्त्रेण सर्वज्ञेन सर्वशक्तिमताधिष्ठितानां प्राणादीनां विशिष्टकार्यारम्भकत्वं युक्तम् । तथा चोक्तम् ।

'यदैतेऽसंहता भावा भूतेन्द्रियमनोगुणाः । यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥
तदा संहत्य चान्योऽन्यं भगवच्छक्तिनोदिताः । सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः ॥' इति ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तथा —

'नानात्वात् स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुम् ।' इत्यादि ॥६॥

सर्ववस्तुशक्तीनां तन्निर्वाहकत्वनिबन्धनं सामानाधिकरण्यमाह कान्तिरित्यादिपञ्चभिः ॥ कान्तिरिति ॥ चन्द्रश्च अर्कश्च ऋक्षाणि च विद्युतश्च तासां, कान्तिः, तेजः, प्रभा, सत्ता, स्फुरणमात्रेण सत्त्वं, तत्रायं विवेकः । चन्द्रस्य कान्तिरग्नेस्तेजोऽर्क प्रभा ऋक्षाणां विद्युतां च सत्तेति । श्रीगोपालानन्दस्वामिचरणास्तु चन्द्रस्य नक्षत्राणां च कान्तिरित्याहुः । भूभृतां पर्वतानां यत् भूमेः वृत्तिः प्राणिनामाधारत्वेन वर्तनं गन्धश्च इत्येतत् सर्वम् अर्थतः वस्तुतः भवान् । त्वन्निर्वाह्यमित्यर्थः । तवैव शक्तिरिति भावः । च श्रुतिः । 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभान्ति सर्वं तस्य भासा सर्वमिदं विभाति' इति । स्मृतिश्च । 'यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥' इति ॥७॥ किञ्च ॥ तर्पणमिति ॥ अपां तर्पणं लोकतृप्तिहेतुत्वं प्राणनं जीवनहेतुत्वं पाठान्तरेऽपि स एवार्थः । क्लेदनमिति आर्द्रीकरणं देवत्वं देवताधिष्ठितत्त्वं, यद्वा । हे देवेति सम्बोधनम् । ता आपः तद्रसस्तासां माधुर्यं च त्वं वर्वं भवानित्यर्थः त्वदधीनमिति भावः । याः वायोः ओजः सहः बलं चेष्टा गतिश्च वायोर्या ओजः प्रभृतयः शक्तय इत्यर्थः । हे ईश्वर । एव । त्वमीश्वर इति पाठे ताः ईश्वरः त्वमेव । तत्र ओजः प्रवृत्तिसामर्थ्यम्, सहो वेगः, बलं धारणसामर्थ्यम्, चेष्टा व्यापारः गतिर्गमनम् ॥८॥ दिशामिति ॥ दिशां दिक्सम्बन्धी अवकाशः दिशश्च त्वमेव । खं सामान्याकाशः आश्रयः स्वाश्रयः स्फोटः शब्दतन्मात्ररूपापरावस्था वागित्यर्थः । त्वमेव । नादः शब्दाभिव्यंजकः वर्ण अकाशादिः ओङ्कारः आकृतीनां शब्दवाच्यानामाकृतीनां पृथक्कृतिर्वैविध्यं च त्वमेव । यद्वा । नादः पश्यन्ती ओङ्कारो मध्यमा आकृतीनां पदार्थानां पृथक्कृति पृथक्कृत्याभिधानं यस्मात्तथाभूतः वर्णो वैखरी च त्वमेव असि ॥९॥

कृष्णप्रिया

विश्व का सृजन करने वाले प्राण एवं इन्द्रिया जो है, उसकी शक्ति परमतत्त्व इश्वर की ही है, प्राणादि चेष्टायें उन सबका क्रियाशीलत्व भगवान की शक्ति का ही स्वरुप है ॥६॥ चन्द्र, अग्नि, सूर्य, नक्षत्र और बीजली की कांति, तेज, प्रभा और सत्ता ये सब आप ही है । पर्वतो की स्थिरता पृथ्वि के गुणगंध जो कुछ भी है, वे सब आप ही है ॥७॥ हे ईश्वर ! तृषाशांति, प्राणिमात्र का जीवन तीर्थ-जलमें गंगादि नदीओं का उन सबमें देव विद्यमान है । जलमें विविध प्रकार के रसास्वाद जो है, वे सब आप ही है ॥८॥ दिशाओंमें अवकाश, आकाश स्फोट, आश्रय, शब्द, ओंकार इत्यादि वर्णकी आकृति भिन्न भिन्न क्रियाऐं भी भगवान ही है ॥९॥

[1]इन्द्रियं त्विन्द्रियाणां त्वं देवाश्च तदनुग्रहः । अवबोधो भवान् बुद्धेर्जीवस्यानुस्मृतिः सती ॥१०॥
भूतानामपि भूतादिरिन्द्रियाणां च तैजसः[2] । वैकारिको विकल्पानां [3]प्रधानमनुशायिनाम् ॥११॥
नश्वरेष्विह भावेषु तदसि त्वमनश्वरः[4] । यथा द्रव्यविकारेषु [5]ह्यन्यदो व्यावहारिकः ॥१२॥
सत्त्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः । त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया ॥१३॥

कर्दमक्षमा

इन्द्रियाणाम्, इन्द्रियम्, देवाः, तदनुग्रहः, त्वम्, बुद्धेः, अवबोधः, जीवस्य, सती, अनुस्मृतिः, भवान्, एवं ॥१०॥ भूतानाम्, भूतादिः, इन्द्रियाणाम्, च, तेजसः, विकल्पानाम्, अनुशायिनाम्, वैकारिकः, प्रधानम्, त्वम्(असि) ॥११॥

---

१. इन्द्रियत्वानीन्द्रियाणां देवाश्च तदनेग्रहाः-वीर. ; इन्द्रियाणीन्द्रियाणां च देवाश्च त्वदनुग्रहः गो. प्रे. टीं. । २. तैजसं-वीर. वि प्रदान-वीर. । ४. मनश्वरम्-श्रीधर. वंशी. वीर. विज. विश्व. शुक. । ५. द्रव्यमात्रं निरू पितम्-श्रीधर. वंशी. विज. शुक. ; द्रव्यमात्रमना

कर्दमक्षमा

भावेषु, तत्, त्वम्, अनश्वरः, यथा, द्रव्यविकारेषु, हि, व्यावहारिकः, अन्यदः, असि ॥१२॥ सत्त्वम्, रजः, तमः, इति, तद्वृत्तयः, त्वयि, परे, ब्रह्मणि, योगमायया, अद्धा, कल्पिताः ॥१३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इन्द्रियाणामिन्द्रियं विषयप्रकाशनशक्तिर्देवाश्चेन्द्रियाधिष्ठातारः तदनुग्रहस्तेषामधिष्ठानशक्तिश्च त्वम् अवबोधोऽध्यवसायशक्तिः मृतिः प्रतिसन्धानशक्तिः ॥१०॥ भूतानां कारणं भूतादिस्तामसोऽहङ्कारस्त्वं विविधमधिदैवाध्यात्माधिभूतभेदेन विकल्प्यनन्तत कल्पा देवास्तेषां कारणं वैकारिकः सात्त्विकोऽहङ्कारश्च त्वम् अनुशायिनां जीवानां संसारकारणं प्रधानं त्वम् ॥११॥ अपि च नाशशीलेष्विहैतेषु भावेषु यदनश्वरमवशिष्यमाणं रूपं भत्त्वमसि द्रव्यविकारेषु मृत्सुवर्णादिकार्येषु घटकुण्डलादिषु नश्वरेषु मात्रं मृत्सुवर्णादिमात्रमनश्वरं यथा तद्वत् ॥१२॥ ननु, त्रिगुणात्मककार्यरूपोऽपि त्वमित्युक्तत्वात्कथमनश्वरत्वं तत्राऽऽह- ति। तद्वृत्तयस्तत्परिणामश्च महदादयः अद्धा साक्षात्त्वयि परे ब्रह्मणि कल्पिताः ॥१३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अन्यदाह-अपि चेति। भावेषु देहादिषु ॥१२॥ त्रिगुणात्मकत्वे शङ्कते-नन्विति ॥१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जीवस्य जीवाधिष्ठानस्य चित्तस्य याऽनुस्मृतिः साधारणी या च सती भगवन्निष्ठा सापि ॥१०॥ अनुशायिनां प्रकृतौ लयं स्थितानामिति मुक्तव्यवच्छिन्नाः ॥११॥ तदिति तत्तदुपादानमिति तच्छक्तिकं ब्रह्मेत्यर्थः ॥१२॥ ननु, तत्तच्छक्तिशाबल्ये हमपि दुर्ध्येयं तत्राह-सत्त्वमिति। योगमायया स्वरूपभूताचिन्त्यशक्त्या कल्पिताः त्वयि तेषां सत्त्वेऽपि स्पर्शो नास्तीत्येवमेव इत्यर्थः तदुक्तं श्रीगीतासु —

"मया ततमिदं विश्वं जगदव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥" इति ॥१३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं पञ्चमहाभूतानां शक्तिरुक्ता। अधुनेन्द्रियादीनामाह-इन्द्रियमिति। तु विशेषे। इन्द्रियादीनां प्रायश्चेतनत्वात् ष्टाकारित्वाद्वा मनस इन्द्रियेष्वन्तर्भावः। तस्य च सङ्कल्पादिशक्तिर्ज्ञेया। सती सत्या निःसंशयेत्यर्थः। स्मृतिशक्तिसम्भवेऽपि जीवस्येति सर्वानुस्यूतस्य सदा वर्तमानस्य चैतन्यस्यैव स्वतस्तत्सुसिद्धेः। यद्वा, जीवस्य जीवाधिष्ठानस्य श्रीभगवदनुस्मृतिः ॥१०॥ अधुना त्रिविधाहङ्कारस्य शक्तीराह-भूतानामिति पादत्रयेण। सर्वेषामेषां मूलं प्रधानमपि तव त्याह-प्रधानमिति। अनुशायिनां प्रकृतौ लयं प्राप्य स्थितानामिति मुक्ता व्यवच्छिन्नाः, तेषामेव भोगार्थं तत्तत्सृष्टेः ॥११॥ सुखानुभवशक्तिरपि त्वत्त एवेत्याशयेनाह-नश्वरेति। भावेषु उक्तेषु जगत्कारणेषु तेषु तत् चैतन्यं निरूपितं निश्चयेनोक्तं द्धेः ॥१२॥ ननु तत्तच्छक्तीनामपि कान्त्यादीनां मच्छक्तित्वे सति कथं नश्वरत्वम्? नश्वरत्वे च सति कथं वा ममानश्वरत्वम् सत्त्वमिति द्वाभ्याम्। यतः परब्रह्मरूपे कल्पनातीतेऽपि योगमायया तवाचिन्त्यशक्त्या अद्धा साक्षादेव कल्पिताः। यद्वा, ऽपि त्वयि कल्पिताः, तत्र च तवैवैकस्मिन् ब्रह्मरूपे, न तु साक्षादीश्वररूपे त्वयीत्यर्थः। ईश्वरस्यैवैश्वर्येण तत्सम्बन्धीनामपि तः, ब्रह्मणश्च केवलत्वेन तदीयानामन्येषां मिथ्यात्वस्यैवोपपत्तेरिति भावः ॥१३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

इन्द्रियाणामिन्द्रियत्वं प्रकाशकत्वं देवा इन्द्रियाणि तदनुग्रहाः अनुग्रहशब्दवाच्याः देवाः इन्द्रियाद्यभिमानिदेवताः तत्सर्वं त्यर्थः। त्वदनुग्रहप्रभवा देवा इति वार्थः। "यस्य प्रसादजं ब्रह्म" इतिवत् बुद्धेः अवबोधः अध्यवसायः अनुस्मृतिः

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

संस्कारजन्यं ज्ञानं कारणभूतः ॥१०॥ भूतादिः तामसाहङ्कारः इन्द्रियाणामनुग्राहकः । तैजसः राजसाहङ्कारः विकल्पाना वैकारिकः सात्त्विकाहङ्कारः विविधकल्पनं जातमनेनेति विकल्पः । इन्द्रियं तत्करणमिति वार्थः । अनुशायिनाम् कर्मिणां प्रधानं फलप्रदम् ॥११॥ कर्मणां नश्वरभावावस्थाः तासु आगमापायिनीषु अनवरतस्थितम् अनवस्थानम् आधार तदेव विवृणोति-यथा द्रव्यविकारेष्विति । एते सर्वे पदार्थाः परे ब्रह्मणि त्वयि योगमायया माया वयुनं ज्ञानमिति सङ्कल्प कल्पिताः त्वयि कल्पिता धृता इत्यर्थः ॥१२-१३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इन्द्रियत्वानीति । इन्द्रियाणाम् इन्द्रियत्वानि विषयप्रकाशने सामर्थ्यानि तदनुग्रहास्तेषाम् इन्द्रियाणामनुग्रहा विषयप्रकाशनरूपसामर्थ्यापादका इति यावत् । ते देवाः दिग्वातार्कादयः इन्द्रियाभिमानिदेवाश्च त्वं "इन्द्रियाणामिन्द्रियत्वं त्वदनुग्रहाः" इति पाठेऽनुग्रहाः अनुग्रशब्दवाच्याः इन्द्रियाद्यभिमानिदेवाश्चेत्येतत्सर्वं त्वत्त्वत्तः जातम् । त्वदनुग्रह इत्यर्थः । अनुग्रह इत्येकवचनान्तपाठे तदनुग्रहः तेषामधिष्ठानशक्तिश्च त्वमेवेत्यर्थः । बुद्धेरवबोधोऽध्यवसायः जीवस्यानुस्मृतिः संस्कारजन्यज्ञानं च भवान् ॥१०॥ भूतानामिति । भूतानामाकाशादीनां कारणं भूतादिस्तामस इन्द्रियाणामनुग्राहकस्तैजसः राजसाहङ्कारः विकल्पानामनुग्राहको वैकारिकः सात्त्विकाहङ्कारः विविधं कल्पनं ज्ञानमनेनेति इन्द्रियं तत्कारणम् इति वार्थः । अनुशायिनामनुशयवतां कर्मिणां (कर्मणाम्) भुक्तावशिष्टं कर्मानुशयशब्दार्थः प्रधानं फलं च त्वमेवेत्यर्थः ॥११॥ एवं सर्वकारणत्वनिर्वाहकत्वप्रयुक्तसार्वात्म्यमभिधायाथ सार्वात्म्यप्रयुक्तानित्यत्वादिदोषपरिजिहीर्षया नश्वरेष्विति । भावेष्ववस्थासु नश्वरेषु आगमापायिषु सत्सु यद्भावाश्रयमनश्वरं स्थिरमवस्थारहितमाधारभूतं च तत्त्वमसि । दृष्टान्तमुखे विवृणोति । यथेति । द्रव्यस्य मृत्सुवर्णादेर्विकारेषु पिण्डत्वघटत्वकुण्डलत्वकटकत्वादिविकारेषु नश्वरेष्वपि मृत्सुवर्णादिरूपमनश्वरं सर्वावस्थानुवृत्तं तद्वत् वस्तुतो यद्यपि मृत्सुवर्णादिद्रव्यमपि नश्वरमेव यावत्स्वविकारमनश्वरत्वमात्राभिप्रायेण दृष्टान्तः ॥१२॥ एवमप्यविकारिणो मम विकारित्वं दुर्वारमित्यत आह-सत्त्वमिति । सत्त्वादयः प्रकृतिगुणास्तेषां वृत्तयः परिणामरूपा महदादयश्च परे ब्रह्मणि त्वय्यद्धा त्वय्येव योगमायया सङ्कल्परूपज्ञानेन कल्पितास्त्वयिकृता इत्यर्थः । ब्रह्मणि परे इत्यस्य प्रधानपुरुषेश्वर इत्यादिः प्रधानपुरुषौ परौ प्रधानपुरुषेश्वर इत्युपक्रमात् सूक्ष्मचिदचिद्विशिष्टे त्वयि कल्पिता इत्यर्थः ॥१३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥१२॥ ननु तत्तच्छक्तिशाबल्ये तत्तद्दोषेणाहमपि दुष्येयं तत्राह-सत्त्वमिति । योगमायया स्वरूपभूताचिन्त्यशक्त्या तेषां सत्त्वेऽपि स्पर्शो नास्त्येवमेव योजिता इत्यर्थः । तस्माद्यर्हि यदा प्रलयसमये कार्यरूपा विकल्पिता अमी भावाः त्वत्तो वियोजितास्तदा न सन्ति न भवन्ति नश्यन्तीत्यर्थः । त्वं चामीषु विकारेषु कार्यरूपेषु न भवसि नात्मसत्तां ददासि अन्यदा तु सृष्टिस्थित्योस्तेषु व्यावहारिकः । योगमाययैवास्पृष्टोऽपि व्यवहारसत्तासाधकतया वर्तस त्यर्थः ॥१३-१४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इन्द्रियामिन्द्रियं विषयप्रकाशनशक्तिः देवाश्च तदधिष्ठातारः तदनुग्रहः तेषां विषयग्रहणानुकूल्यं च अवबोधो जीवस्थानस्मृतिः जीवसम्बन्धिनी अनुस्मृतिः प्रतिसन्धानशक्तिश्च ॥१०॥ भूतानां कारणं भूतादिस्तामसोऽहङ्कारस्त्वमसि कारणं तैजसराजसाहङ्कारश्च विविधं कल्प्यन्त इति विकल्पा देवास्तेषां कारणं वैकारिकः सात्त्विकाहङ्कारश्च त्वम् जीवानां संसारकारणं प्रधानं च त्वम् ॥११॥ नशवरेषु भावेषु तत् अनश्वरं प्रधानं त्वमसि यथा द्रव्यविकारेषु मृत्सु

घटकुण्डलादिषु नश्वरे
विकारित्वे ममैव विक
ते सर्वे योगमायया
वर्तितास्तद्वदृष्टिपथे यो

इन्द्रियं विषय
शक्तिः सती अनुस्मृति
। इन्द्रियाणां कारणं तैज
कारणं वैकारिकः सात्ति
भावेषु देहादिषु यत् अ
नश्वरेष्वपि द्रव्यमात्रं मृत
त्वयि कल्पिताः अद्धा

इन्द्रियाणामिन्द्रि
जीवस्य अनुस्मृतिः अनु
तैजसो राजसोऽहङ्कारश्च वि
जीवानां स्वरूपावरणहेतुभू
द्रव्यविकारेषु घटकुण्डला
स्वरूपत एव विकारित्यादि
च तद्वृत्तयश्च ये तेषु वृत्तिः
चकाराज्जीवा बोध्याः सर्वे
परप्रकृतिसंज्ञो जीवः तेन स
त्वयैव स्वस्मिन् स्वकीयाभ्य

एवं महाभूतान्युक्त
तत्सम्बन्धादेव शरीरावयववि
ओषधिवीरुधत्वं च सङ्गच्छ
अवबोधो भवान् बुद्धेरति बुद्
पूर्वापरानुसन्धानं स भवानेव
आत्मार्थं संस्कारमेव जनयति
प्रकारान्तरेणापि स्फुरति यथा शु
निरूपयति-भूतानामसि भूता
सङ्कल्पविकल्परूपमनसः का

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

घटकुण्डलादिषु नश्वरेषु द्रव्यमात्रंमृत्सुवर्णादिमात्रम् अनश्वरं तद्वत् ॥१२॥ ननु यदि प्रधानमहमेवास्मि तर्हि जगत्कारणस्य तस्य विकारित्वे ममैव विकारित्वं प्रसक्तमत आह–सत्त्वामिति द्वाभ्याम् । गुणास्त्रयो ये प्रधानसंज्ञा याश्च तद्वृत्तयस्तत्परिणामा महदादयश्च ते सर्वे योगमायया त्वत्स्वरूपभूताचिन्त्यशक्त्या त्वयि तेभ्यः परे गुणातीतेऽपि कल्पिताः समर्थिताः अवर्तमाना अपि ते वर्तितास्तद्वद्दृष्टिपथे योजिता इत्यर्थः ॥१३॥

गूढार्थदीपिनी

इन्द्रियं विषयप्रकाशनशक्तिः देवाश्च इन्द्रियाधिष्ठातारः तदनुग्रहः अधिष्ठानशक्तिश्च त्वमेव । अवबोधः निश्चयात्मिका शक्तिः सती अनुस्मृतिः यथार्थज्ञानरूपा शक्तिः भवानेव ॥१०॥ भूतानामाकाशादीनां कारणं भूतादिः तामसोऽहङ्कारस्त्वमसि इन्द्रियाणां कारणं तैजसः राजोऽहङ्कारस्त्वम् । विकल्पानां (विविधं कल्पनं ज्ञानमेभिस्ते विकल्पाः देवाः ।) देवानां मनसश्च कारणं वैकारिकः सात्त्विकोऽहङ्कारस्त्वमसि । अनुशायिनां जीवानां संसारकार् प्रधानं प्रकृतिस्त्वमेव ॥११॥ इह प्रपञ्चे नश्वरेषु भावेषु देहादिषु यत् अनश्वरम् अवशिष्यमाणरूपं तत् त्वमसि । यथा द्रव्यस्य मृत्सुवर्णादेः विकारेषु कार्येषु घटकुण्डलादिषु नश्वरेष्वपि द्रव्यमात्रं मृत्सुवर्णादि सत्यम् । 'मृत्तिकेत्येव सत्यम्' इति श्रुतेः ॥१२॥ तद्वृत्तयःक तत्परिमा महदादयः यास्ताः त्वयि कल्पिताः अद्धा साक्षात् रज्जौ सर्पवत् ॥१३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इन्द्रियाणामिन्द्रियं विषयप्रकाशनशक्तिः देवाश्चेन्द्रियाधिष्ठातारः तदनुग्रहस्तेषामधिष्ठानशक्तिश्च बुद्धेरवबोधोऽध्यवसायशक्तिः जीवस्य अनुस्मृतिः अनुस्मरणात्मकज्ञानं च त्वमेव ॥१०॥ भूतानामाकाशादीनां कारणं भूतादिस्तामसाहङ्कारः इन्द्रियाणां कारणं तैजसो राजसोऽहङ्कारश्च विविधमधिदैवाध्यात्मभेदेन कल्पते इति विकल्पा देवास्तेषां कारणं वैकारिकः सात्त्विकोऽहङ्काश्च अनुशायिनां जीवानां स्वरूपावरणहेतुभूतं प्रधानं न त्वमेव ॥११॥ अपि च नश्वरेषु आगमापायिषु भावेषु कार्येषु यदनश्वरं रूपं तत्त्वमसि यथा द्रव्यविकारेषु घटकुण्डलादिषु द्रव्यमात्रं मृत्सुवर्णादिमात्रम् अनश्वरं निरूपितं तद्वत् ॥१२॥ ननु तर्हि मृत्सुवर्णादिवत् अहमपि स्वरूपत एव विकारित्यादिदोषभागस्मि किमित्यत आह–सत्त्वमिति द्वाभ्याम् । सत्त्वं रजस्तम इति गुणाः विश्वाकारेण स्थिताः ये च तद्वृत्तयश्च ये तेषु वृत्तिः स्थितिर्येषां देवमनुष्यपश्वादिभावमापन्नानां जीवानां ते तथा तद्वृत्तयश्च याः इति पाठे या गुणवृत्तयः चकाराज्जीवा बोध्याः सर्वे अचेतनाः तद्गताः सर्वे उत्तममध्यमनिकृष्टाः जीवाश्च युज्यते संयुज्यते मायया इति योगोऽनुशयी परप्रकृतिसंज्ञो जीवः तेन सहिता माया अपरा प्रकृतितया ब्रह्मणि परे सर्वविकारिपदार्थविलक्षणं निर्विकारस्वरूपे त्वयि कल्पिताः त्वयैव स्वस्मिन् स्वकीयाभ्यां परापराभ्यां प्रकृतिभ्यां रचिता इत्यर्थः ॥१३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं महाभूतान्युक्त्वा इन्द्रियाण्याह–इन्द्रियमिति । सर्वेषामिन्द्रियाणां यदिन्द्रियं तदेकं सर्वानुस्यूतं वर्तत इति वक्तव्यं तत्सम्बन्धादेव शरीरावयवविशेषाणामिन्द्रियत्वम् इन्द्रियं वीर्यं पृथिवीमनुव्याच्छेदिति श्रुतिरपि सङ्गच्छते तद्वानेव अत एतस्य ओषधिवीरुधत्वं च सङ्गच्छते इन्द्रियाधिष्ठातृदेवता अपि त्वमेव चकारात्तत्सम्बन्धः तेषामनुग्रहोऽपीन्द्रियेषु अन्तःकरणस्याह अवबोधो भवान् बुद्धेरति बुद्धेर्जडाया अपि योऽवबोधः विषयप्रकाशरूपः स भवानेव जीवस्यापि जीवात्मनः या अनुस्मृतिः पूर्वापरानुसन्धानं स भवानेव अनुभव एव ब्रह्मणः स्मृतिर्जीवस्य इन्द्रियद्वारा अनुभवस्तु कृत्रिमः अत एवेन्द्रियैरपि जनितोऽनुभवः अत्यर्थं संस्कारमेव जनयति यथा स्मृत्युद्गमयोग्यो भवत्यात्मा साऽपि जीवस्य भगवानेवेत्यर्थः । सा दोषवशात् कदाचित् ज्ञानान्तरेणापि स्फुरति यथा शुक्तिका रजतत्वेन तां वारयति सतीति ॥१०॥ एवं सर्वकार्यधर्माः भगवानिति निरूप्य कारणताभगवानेवेति निरूपयति-भूतानामसि भूतादिरिति । पञ्चमहाभूतानां कारणं भूतादिरहङ्कारः इन्द्रियाणामपि तैजसो राजसः विकल्पानां सङ्कल्पविकलपरूपमनसः कारणं वैकारिकः सात्त्विकोऽहङ्कारः अनुशयानां महत्तत्वादिजीवानां कारणं प्रकृतिर्भवान् ॥११॥ एवं

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

कारणस्य कारणतामुक्त्वा कार्यस्यापि कार्यता भवानेवेत्याह-नश्वरेष्विह भावेष्विति । नाशप्रतियोगिकार्यं ततश्च कार्यस्य ना कार्यता नोपपद्येत कार्यस्य नष्टत्वात् अतः कश्चन पदार्थो वक्तव्यः यः कार्येषु स्थिरो भवति यस्य नष्टत्वं धर्मः कार्यस्यैव सम्बन्धश्च स अनश्वरः सर्वदा स्थिरः स एकः सर्वकार्यानुस्यूतो वक्तव्यः तमेवाश्रित्य कश्चिदाह-न ह्यसन् घटादिर्न घटादिरिति ननु नश्वरेषु भावेषु कोऽप्यनश्वरो न दृश्यते को वा भगवान् भविष्यतीति चेत् तत्र दृष्टान्तमुपपादयति यथा द्रव्यविकारेष्विति द्रव्यविकारेषु घटपटादिषु सोऽन्यो घटपटादिरूपो वर्तते तत्सर्वेष्वपीत्यर्थः । ननु स एव नास्तिको दृष्टान्तेन साध्यत इति चेत्तत्राह-अन्यदाव्यावहारिक इति घटाभावसमये यस्तु घटव्यवहारं साधयति अन्यथा स व्यवहारः बाधितार्थविषयकं क स्यात् स घटो भग्नः भूतले घटो नास्ति पञ्चघटा भग्ना इति एवं धर्मधर्मिव्यवहारः सद्विषयक एवेति सोऽवश्यमङ्गीकर्तव्यः इति हिशब्दार्थः ॥१२॥ एवं कार्यकारणरूपत्वं निरूप्य सर्वाधारत्वं निरूपयन् तत्कृतगुणदोषाभावार्थमाह-सत्त्वमिति । सत्त्वादयो गुणाः सद्वृत्तयः अहिंसाद्याः एकादशस्कन्धोक्ताः ते सर्वे त्वय्येव ब्रह्मणि परे शब्दब्रह्मवाच्ये तवैव योगमायया तत्र कल्पिताः अतस्तदाधारत्वेऽपि न तद्दोषसम्बन्ध इत्यर्थः । ब्रह्मणीत्यपहतपाप्मत्वमुपपत्तिरुक्ता उपपत्त्यन्तरं परमिति नियामकत्वाच्च त्वदाज्ञयेव तत्र स्पृशन्तीत्यर्थः । योगमाया च तादृश्येव यथा योगेन नाधारं स्पृशेयुः ॥१३॥

श्रीसुबोधिनीसारः

इन्द्रियाणाम् इन्द्रियं त्वम् । विषयप्रकाशनशक्तिः देवाश्चेन्द्रियाधिष्ठातारः तदनुग्रहः तेषामधिष्ठानशक्तिः त्वं बुद्धेरवबोधो ज्ञानं जीवस्य सती अनुस्मृतिः भवान् ॥१०॥ भूतानां भूतादिः तामसाहङ्कारस्त्वमसि । इन्द्रियाणां कारणं तैजसो राजसाहङ्कारः विकल्पानामध्यात्मादिभेदानां वैकारिकः सात्त्विकाहङ्कारः अनुशायिनां जीवानां कारणं प्रधानं त्वम् ॥११॥ नश्वरेषु भावेषु विनाशिदेहादिपदार्थेषु अनश्वरमविनाशि त्वमसि । इह द्रव्यविकारेषु मृत्सुवर्णादिकार्येषु घटकुण्डलादिषु द्रव्यमात्रं मृत्सुवर्णमेव यथा निरूपितम् ॥१२॥ सत्त्वादयो गुणा याश्च तेषां वृत्तयः परिणामा महदाद्याः साक्षात् परे ब्रह्मणि त्वयि योगमायया कल्पिताः ॥१३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

इन्द्रियाणामपीन्द्रियं विषयप्रकाशनशक्तिः, देवाश्चेन्द्रियाधिष्ठातारः, तदनुग्रहस्तेषामधिष्ठानशक्तिश्च त्वम् । बुद्धेरवबोधः व्यवसायात्मिका शक्तिर्भवान् । जीवस्य सत्यनुस्मृतिः यथार्थात्मानुसन्धानं च भवान् ॥१०॥ भूतानामाकाशादीनां कारणं भूतादिस्तामसोऽहङ्कारस्त्वमसि । इन्द्रियाणां कारणं तैजसः राजसोऽहङ्कारस्त्वमसि । विविधं कल्पनं ज्ञानमेभिस्ते विकल्पा देवा मनश्च तेषां कारणं वैकारिकः सात्त्विकोऽहङ्कारस्त्वमसि । अनुशायिनाम् अनुशयपदवाच्यकर्मवासनावतां जीवानां संसारकारणं प्रधानं प्रकृतिश्च त्वमसि ॥११॥ एवं सर्वात्मत्वे विनाशित्वमाशंक्याह-नश्वरेष्विति । इह प्रपञ्चे नश्वरेषु भावेषु पदार्थेषु यत्तत् परमार्थभूतमनश्वरं तत्त्वमसि । तत्र दृष्टान्तमाह-यथेति । यथा द्रव्यस्य मृत्सुवर्णादेर्विकारेषु कार्येषु घटकुण्डलादिषु नश्वरेष्वपि द्रव्यमात्रं मृत्सुवर्णादिरूपमनश्वरं निरूपितं भवति तथेत्यर्थः ॥१२॥ ननु सुखदुःखाद्यनेकविकारस्य प्रसिद्धत्वात् कथं निर्विकारित्वम् इत्याशंक्याह-सत्त्वमिति । सत्त्वादयः प्रकृतिगुणाः गुणकार्यभूता देहेन्द्रियान्तःकरणादयः, याश्च तेषां वृत्तयः सुखदुःखरागलोभादयस्ते योगमायया आत्मज्ञानेन अद्धा साक्षात् परे ब्रह्मणि त्वयि कल्पिताः अहं मनुष्यः दुःख्यहं सुख्यहं शृणोम्यहम् इति त्वदंशभूते जीवे आरोपिताः ॥१३॥

अन्वितार्थप्रकाशिका

इन्द्रियमिति । इन्द्रियाणामपीन्द्रियं विषयप्रकाशेन शक्तिः देवाश्चेन्द्रियाधिष्ठातारः तदनुग्रहस्तेषामधिष्ठानशक्तिश्च त्वं बुद्धेरवबोधः व्यवसायात्मिका शक्तिर्भवान् जीवस्य सती अनुस्मृतिः यथार्थात्मानुसन्धानं च भवान् ॥१०॥ भूतानामिति भूतानामाकाशादीनां कारणं भूतादिस्तामसोऽहङ्कारस्त्वमसि इन्द्रियाणां कारणं तैजसः रजसोऽहङ्कारस्त्वमसि विविधं कल्प

ज्ञानमेभिस्ते विकल्पा देवा म
जीवानां प्रधानं प्रकृतिश्च त्वमि
। यथा द्रव्यस्य मृत्सुवर्णादेर्विव
॥१२॥ ननु कार्यरूपोऽप्यहमुत्त
याश्च तेषां वृत्तयः सुखदुःखरा
दुःख्यहं सुख्यहं शृणोम्यहमिति

इन्द्रियविषयग्राहकश
वस्तुयाथार्थ्यज्ञानं जीवस्य क्षेत्रज्ञ
हेतुः भूतादिः तामसाहङ्कारः तै
तेषाम् इन्द्रियदेवानां हेतुः वैका
प्रवेशस्थानं प्रधानं तत्संज्ञा प्रकृ
स्थावरजङ्गमदेहेषु अनश्वरं ज्ञानादि
। द्रव्याणां मृत्तिकासुवर्णादीनां वि
अनश्वरं बोध्यम् ॥१२॥ सत्त्वमि
इत्याद्याः रजोवृत्तयः क्रोधो लोभं
हेतुना । अज्ञजीवैः परे ब्रह्मणि त्व
तथा च श्रुतिः —

'ननु भवन्ति ते निर्गुणास्ततो व
इति विष

इन्द्रियात्वमिति ॥ इ
विषयप्रकाशनरूपसामर्थ्यापादका इ
तेषामधिष्ठानशक्तिश्च त्वमेवेति । बुद्धे
भवान् ॥१०॥ भूतानामिति ॥ भूताना
त्वं विविधं कल्पन्तेऽधिदैवाध्यात्मा
अनुशायिनां जीवानां प्रधानं संसा
सार्वात्म्यप्रयुक्तानित्यत्वादिदोषपरिजि
स्थिरमवस्थानामाधारभूतं तत्त्वमसि
पिण्डत्वघटत्वकुण्डलत्वादयस्तेषु न
वस्तुतो यद्यपि मृत्सुवर्णादिद्रव्यमपि
तस्य विकारित्वमत आह–सत्त्वमिति ।

अन्वितार्थप्रकाशिका

भिस्ते विकल्पा देवा मनश्च तेषां कारणं वैकारिकः सात्त्विकोऽहङ्कारस्त्वमसि अनुशायिनाम् अनुशयपदवाच्यकर्मवासनावतां नां प्रधानं प्रकृतिश्च त्वमित्यर्थः ॥११॥ नश्वरेष्विति । इह प्रपञ्चे नश्वरेषु भावेषु पदार्थेषु यत्तस्य परमार्थभूतमनश्वरं रूपं तत्त्वमसि द्रव्यस्य मृत्सुवर्णादेर्विकारेषु कार्येषु घटकुण्डलादिषु नश्वरेष्वपि द्रव्यमात्रं मृत्सुवर्णादिरूपमनश्वरं निरूपितं भवति तथेत्यर्थः नु कार्यरूपोऽप्यहमुक्तस्तत्कथमनश्वरत्वं तमाह-सत्त्वमिति । सत्त्वादयः प्रकृतिगुणाः गुणकार्यभूता देहेन्द्रियान्तःकरणादयो तेषां वृत्तयः सुखदुःखरागलोभादयस्ते योगमायया आत्मज्ञानेन अद्धा साक्षात् परे ब्रह्मणि त्वयि कल्पिताः । अहं मनुष्यो अहं सुख्यहं शृणोम्यहमिति त्वदंशभूते जीवे आरोपिताः ॥१३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इन्द्रियविषयग्राहकशक्तिः देवाः इन्द्रियाधिपाश्च तदनुग्रहः तेषां देवानाम् इन्द्रियाणां च अनुग्रहो रक्षणं बुद्धेः अवबोधो यथार्थ्यज्ञानं जीवस्य क्षेत्रज्ञवृन्दस्य सती सतः परमेश्वरस्य तवेयमनुस्मृतिः भवान् तव सामर्थ्यमित्यर्थः ॥१०॥ भूतानामाकाशादीनां भूतादिः तामसाहङ्कारः तैजस इन्द्रियहेतुः राजसाहङ्कारश्च विकल्पानाम् इन्द्रियदेवत्वेन विविधाः कल्पाः सामर्थ्यानि येषां इन्द्रियदेवानां हेतुः वैकारिकः सत्त्वाहङ्कारश्च अनुशायिनां प्रकृतेराविर्भूतानां देवमनुष्यादिभावैः स्थितानां क्षेत्रज्ञानां प्रलये स्थानं प्रधानं तत्संज्ञा प्रकृतिश्च त्वमसि । एतत्सर्वं तव विभूतिरस्तीत्यर्थः ॥११॥ किञ्च । इह ब्रह्माण्डे नश्वरेषु भावेषु जङ्गमदेहेषु अनश्वरं ज्ञानादिसाधनाभावात् नश्वरस्वभावहीनं क्षेत्रज्ञानां कारणशरीरवृन्दं यदस्ति तत्त्वमसि । तव विभूतिरस्तीत्यर्थः णां मृत्तिकासुवर्णादीनां विकारेषु घटकुण्डलादिषु नश्वरेषु मृत्तिकादि अनश्वरं यथा निरूपितं तथा क्षेत्रज्ञकारणशरीरवृन्दम् बोध्यम् ॥१२॥ सत्त्वमिति । सत्त्वाद्या गुणाः यास्तेषां वृत्तयश्च शमो दमस्तितिक्षेत्याद्याः सत्त्ववृत्तयः काम ईहा मद रजोवृत्तयः क्रोधो लोभोऽनृतं हिंसेत्याद्यास्तमोवृत्तयः ता योगेन योगैश्वर्येण या माया मनुष्यसमानवर्तनरूपं कपटं तया अज्ञजीवैः परे ब्रह्मणि त्वयि अद्धा प्रत्यक्षे कल्पिता रज्जौ सर्पवदारोपिताः गुणातीतमूर्तौ त्वयि तु ता न सन्तीत्यर्थः ।

तथा च श्रुतिः —

'साक्षी चेत्ता केवलो निर्गुणश्चे'ति ।

भवन्ति ते **निर्गुणास्ततो वयमुपास्महे त्वां हि निर्गुण**'मिति स्कान्दं च ॥ **'सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः'**
इति विष्णुपुराणं च ॥ '**अव्ययस्याप्रमेयस्य निर्गुणस्ये**'ति शुकोऽप्याह ॥१३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इन्द्रियात्वमिति ॥ इन्द्रियाणाम् इन्द्रियत्व् विषयप्रकाशनसामर्थ्यं तेषामिन्द्रियाणामनुग्रहा अनुग्राहकाः काशनरूपसामर्थ्यापादका इति यावत् । देवा दिग्वातार्कादय इन्द्रियाभिमानिन्यो देवताश्च त्वमेव । तदनुग्रह इत्येकवचनपाठे नशक्तिश्च त्वमेवेति । बुद्धेः अवबोधोऽध्यवसायशक्तिः जीवस्य सती अनुस्मृतिः संस्कारजन्यं ज्ञानं प्रतिसन्धानशक्तिश्च ॥१०॥ भूतानामिति ॥ भूतानामाकाशादीनां कारणं भूतादिस्तामसाहङ्कारः त्वमसि । इन्द्रियाणां कारणं तैजसो राजसाहङ्कारः कल्पन्तेऽधिदैवाध्यात्माधिभूतभेदेन विकल्पन्ते इति विकल्पा देवास्तेषां कारणं वैकारिकः सात्त्विकोऽहङ्कारश्च त्वम् । जीवानां प्रधानं संसारकारणं प्रधानं त्वम् ॥११॥ एवं सर्वकारणत्वनिर्वाहकत्वप्रयुक्तसर्वात्म्यमभिधायाथ युक्तानित्यत्वादिदोषपरिजिहीर्षामाह ॥ नश्वरेति ॥ इह लोके भावेष्ववस्थासु नश्वरेष्वागमापायिषु सत्सु यत् अनश्वरं नामाधारभूतं तत्त्वमसि । तदेव दृष्टान्तमुखेन विवृणोति-यथेति । यथा द्रव्यस्य मृत्सुवर्णादेः विकाराः कुण्डलत्वादयस्तेषु नश्वरेषु सत्स्वपि द्रव्यमात्रं मृत्सुवर्णादिरूपम् अनश्वरं सर्वावस्थास्वनुवृत्तं निरूपितम् । तद्वत मृत्सुवर्णादिद्रव्यमपि नश्वरमेव तथापि यावत्स्वविकारमनश्वरत्वमात्राभिप्रायेण दृष्टान्तः ॥१२॥ एवमप्यविकारिणो त्वमत आह-सत्त्वमिति द्वाभ्याम् ॥ सत्त्वमिति ॥ सत्त्वं, रजः, तमः इत्येते गुणाः प्रकृतिगुणाः । याः तद्वृत्तयस्तेषां

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

परिणामरूपा महदादयश्च परे ब्रह्मणि त्वयि अद्धा त्वय्येवेत्यर्थः। योगमायया सङ्कल्परूपज्ञानयोगेन कल्पिताः। त्वयि कृता 'प्रधानपुरुषौ परौ' 'प्रधानपुरुषेश्वरः' इत्युपक्रमात् प्रकृतिपुरुषशरीरके सूक्ष्मचिदचिद्विशिष्टे त्वयि कल्पिता इत्यर्थः ॥१३॥

कृष्णप्रिया

इन्द्रियों की ईन्द्रियशक्ति, इन्द्रियोंका देव और हे दोनों का अनुग्रह आप ही है। बुद्धिमें शान जीव की सत्ती स्मृति आप ही है ॥१०॥ पंचमहाभहाभूतो का कारण तामस अहंकार इन्द्रियों का संकल्पात्मक मन का और देवों का सात्वक अहंकार महतत्त्वादि का कारण प्रकृणि वे आप ही है इस विश्वमें नश्वर वस्तुओंमें अविनाशी भगवान् है, जैसे मीट्टी नामक द्रव्य से नष्टहुवाघट नहीं देता, वे सब भगवान् के आधार से ही होता है ॥१२॥ सत्त्व, रजस् और तमस् ये तीन गुणों की राजस्, तामस्, वृत्त्यां आप परब्रह्ममें आपकी माया से आपमें कल्पित है जो यह सब पदार्थ आपसे गिनने में आये तो सब पदार्थ जगतमें है ही नही। पदार्थो का अन्य समयमें व्यवहार हो रहा है, पदार्थोमें आप नहीं है ऐसा मानना पडेगा ॥१३-१४॥

तस्मान्न सन्त्यमी भावा[१] यर्हि [२]त्वयि विकल्पिताः। त्वं चामीषु विकारेषु [३]येन्यदाव्यावहारिकाः
गुणप्रवाह एतस्मिन्न[४]म्बुधास्त्वखिलात्मनः। गतिं सूक्ष्मां तु जानन्ति [५]संसरन्तीह कर्मभिः
यदृच्छया नृतां प्राप्य [६]सुकल्पामिह दुर्लभाम्। स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वर
असावहं ममैवैते देहे [७]चास्यान्वयादिषु। स्नेहपाशैर्निबध्नाति भवान् सर्वमिदं जगत्

कर्दमक्षमा

अमी, भावाः, त्वयि, विकल्पिताः, यर्हि, तस्मात्, अमीषु, विकारेषु, त्वम्, न, ये, अन्यदाः, व्यावहारिकाः ॥१४॥ एतस्मिन्, गुणप्रवाहः, तु, अबुधाः, ये, अखिलात्मनः, सूक्ष्मां, गतिम्, जानन्ति, ते, इह, कर्मभिः, संसरन्ति ॥१५॥ इह, सुकल्पाम्, दुर्लभाम्, नृताम्, यदृच्छया, प्राप्य, त्वन्मायया, प्रमत्तस्य, स्वार्थे, वयः, गतम् ॥१६॥ असौ, अहम्, मम, एते, देहे, च, अस्य, अन्वयादिषु, स्नेहपाशैः, भवान्, सर्वम्, इदं, जगत्, बध्नाति ॥१७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्मान्न सन्तीति नन्वसतां कथं प्रतीतिरत आह यर्हीति। यदा विकल्पितास्तदैव प्रतीतिमात्रेण त्वयि सन्ति त्वं तदैव कारणतयाऽनुगतः अन्यदा त्वव्यावहारिको विकल्पकस्त्वमेवावशिष्यस इत्यर्थः ॥१४॥ एवं रूपत्वादज्ञाननिबन्धन इत्याह-इति सूक्ष्मां निष्प्रपञ्चां गतिमबुधाः अविद्वांसः अबुद्ध्वेति वा पाठः अतोऽबोधेन देहाभिमानेन कृतैः कर्मभिः संस ॥१५॥ एवं तयोस्तत्त्वं निरूप्य तदप्राप्त्या शोचति-यदृच्छयेति। नृतां मनुष्यतां सुकल्पां पटुतरेन्द्रियाम् ॥१६॥ अहो किं प्रमत्तोऽसि त्वया बहुभिः पाशैर्निबद्धत्वादित्याह-असावहमिति। देहे अस्य देहस्यान्वयादिषु पुत्रादिषु च ममैवैत इति

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतः कल्पितास्तस्मादित्यर्थः। तदैव विकल्पसमय एव। अमीषु भावेषु। अन्यदा ज्ञानावस्थायाम्। अव्यव सर्वव्यवहारातीतोऽविकल्पो जीवेश्वरादिविकल्परहितः। इत्यर्थ इति- "योऽवशिष्येत सोऽस्म्यहम्" इत्युक्तेस्तत्वज्ञा कल्पितप्रपञ्चबाधे रज्जुज्ञानेन भुजङ्गबाधे रज्जुवत्त्वमेवावशिष्यस इति भावः ॥१४॥ एवंरूपत्वाज्ञानं सर्वबाधावधित्वाज्ञानं

---

१. चेहि-गो. प्रे. टी.। २. त्वय्येव कल्पिताः-वीर.; त्वय्यविकल्पिताः-विज.। ३.ह्यन्यदा-श्रीधर. वंशी.; सन्सदा-वीर. वि अबुध्य-इति कस्यचित्। ५. सूक्ष्मामबोधेन-श्रीधर. वंशी. वीर. विज. विश्व. शुक. । ६. सुकल्पमिह दुर्लभं-विज.। ७. वास्या-वि

कारणं यस्य स तथा। एत
विदन्त्यतो हेतोः ॥१५॥ इ
प्रारब्धकर्मणा। ममेति शेषः
इन्द्रियकलत्रादिषु। न केवल

तर्माद्यर्हि यदा प्रलय
सन्ति न भवन्ति त्वं चामीषु वि
व्यवहारसत्तासाधकतया वर्तस
"भयं द्वितीयाभिनिवेशितः स्य
त्वत्कारुण्यादीनां प्रवाहे परम्प
इत्यर्थः। सूक्ष्मामिति स्वशक
पूर्वकर्मणैवाधुनोपसादितत्वात्
प्रमत्तस्यानवहितस्य हे ईश्वरेति

तस्मान्न सन्ति विनश्वर
न सन्ति मिथ्यैवेत्यर्थः। ननु म
तदैवासि अन्यदा कल्पनाभावे त
सत्यत्वेनानश्वर एवेति भावः
विविधसंसारदुःखानुभवः ? आ
शब्देन बुधा न संसरन्तीति बोधय
सम्पूर्णैश्वर्येत्यर्थः। अतस्त्वद्भक्ता
सूचिता। एतस्मिन् कथञ्चिदाश्र
अखिलस्य सर्वस्यात्मनो जीवस्य
यद्वा, अखिलानामात्मनोऽन्तर्यामि
त्वदीयस्य बुधस्यापि मम त्वन्मा
अधुनोपसादितत्वात्। सुकल्पां सु
नीरोग-दक्षयोः' इति। एवमुभय
प्रमत्तस्यानवहितस्य मे। हे ईश्वरेति
प्रभवेत्तत्राह-असाविति। नितरां ब

तस्मादिति। एते भावाः
अन्तःप्रविश्य स्थितोऽपि सदा सन्नि
अनृतं शरीरं सुकल्पं वर्णाश्रमाद्युत्क

पता: । त्वयि कृता इत्यर्थः ।
ा इत्यर्थः ॥१३॥

है । बुद्धिमें ज्ञान और
कार इन्द्रियों का राजस्
ा वे आप ही है ॥१३॥
ष्टहुवाघट नहीं दीखाइ
तीन गुणों की सात्विक,
सब पदार्थ आपसे भिन्न
व्यवहार हो रहा है, उस

पदाव्यावहारिका: ॥१४॥
रन्तीह कर्मभिः ॥१५॥
तं त्वन्माययेश्वर ॥१६॥
सर्वमिदं जगत् ॥१७॥

न्यदा:, व्यावहारिका:(सन्ति)
र्मभि:, संसरन्ति ॥१५॥ ईश्वर,
१६॥ असौ, अहम्, मम, एव,

मात्रेण त्वयि सन्ति त्वं चामीषु
रूपत्वादज्ञाननिबन्धनश्च संसार
ानेन कृतैः कर्मभिः संसरन्तीति
रन्द्रियाम् ॥१६॥ अहो किमिति
ादिषु च ममैवेत इति ॥१७॥

ज्ञानावस्थायाम् । अन्यावहारिकः
्यहम्" इत्युक्तेस्तत्त्वज्ञानेनात्म-
ानं सर्वबाधावधित्वाज्ञाननिबन्धनं

र. वंशी. ; सन्सदा-वीर. विज. ।
-विज. । ७. वास्या-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाश:

यस्य स तथा । एतस्मिन् प्रत्यक्षसिद्धे । पूर्वपाठापेक्षयाऽबुद्ध्वेति पाठस्य झटित्यर्थप्रत्यायकत्वात्सम्यक्त्वम् । यतो न ...तो हेतोः ॥१५॥ इत्थं तयो रामकृष्णयोः । तदप्राप्त्या तत्त्वाप्राप्त्या । इह संसारे । स्वार्थे तत्त्वावाप्तिरूपे । यदृच्छया ...कर्मणा । ममेति शेषः ॥१६॥ भगवदाक्षेपे स्वासामर्थ्यं द्योतयन् भगवतः सर्वसामर्थ्यमाह-अहो किमित्यादिना । अन्वयादिषु ...कलत्रादिषु । न केवलं मामेव किन्तु सर्वमिति ॥१७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तर्मार्द्यर्हि यदा प्रलयसमये कार्यरूपा अमी भावा: विकल्पिता: तदिच्छामय्या योगमायया त्वद्दृष्टितो वियोजितास्तदा न ...न भवन्ति त्वं चामीषु विकारेषु कार्यरूपेषु न भवसि हि निश्चये । अन्यदा सृष्टिस्थित्योस्तु तेषु व्यावहारिकः योगमाययैवास्पृष्टोऽपि ...सत्तासाधकतया वर्तस इत्यर्थः ॥१४॥ ईदृशत्वदज्ञाननिबन्धनश्चायं जीवानां संसार इति तान् शोचति-गुणेति । तथाचैकादशे ...द्वितीयाभिनिवेशितः स्यात्" इत्यादि । अन्यत्तैः । यद्वा । एतस्मिन् कथञ्चिदाश्रयणमात्रेण साक्षात्सर्वैरनुभूयमानेऽपि गुणानां ...कारुण्यादीनां प्रवाहे परम्परायां सत्यामपि अखिलस्य सर्वस्यात्मनो जीवस्य गतिं शरणं त्वांप्रत्यबुधा अज्ञाः सन्तः त्वामजानन्त ...र्थः । सूक्ष्मामिति स्वशक्त्या दुर्ज्ञेयत्वात् ॥१५॥ अथ सांसारिकेषु विशेषतो नरं शोचति यदृच्छयेति । अयत्नेनैव प्राप्य ...कर्मणैवाधुनोपसादितत्वात् सुकल्यां स्वार्थसाधने योग्यां सुकल्पामिति पाठेऽपि तथैवार्थः । स्वस्यार्थे पुरुषार्थे त्वयि ...नवहितस्य हे ईश्वरेति ! ईश्वरमायया दुर्ल्लङ्घ्यत्वादिति भावः ॥१६॥ तत्र सप्रणयरोषमेवाह-असाविति ॥१७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तस्मान्न सन्ति विनश्वरा एवेत्यर्थः । असत्यादेश्चेत्याह-यर्हि विशेषेण प्रत्यक्षत्वादिना कल्पितास्तदैवामी भावा: अन्यदा ...सन्ति मिथ्यैवेत्यर्थः । ननु मत्सम्बन्धेन सत्याः सन्तु तत्राह-त्वमिति । च अपि, त्वमपि विकारेषु मायिकत्वेन विकाररूपेष्वपि ...सि अन्यदा कल्पनाभावे त्वय्यावव्यवहारिकस्तत्सम्बन्धातीतः । अतः सदा त्वत्सम्बन्धाभावेन ते किलासत्या एव, त्वं च सदा ...नानश्वर एवेति भावः ॥१४॥ नन्वेवं संसारकारणानामेषां तत्त्वतो मिथ्यात्वेन संसारस्यापि मिथ्यात्वात् कथं ...संसारदुःखानुभवः ? आत्मतत्त्वाज्ञानादित्याह-गुणप्रवाह इति । प्रपञ्च इत्यर्थः । अयमेव हेतुः- प्रपञ्चस्याविच्छेदात् । तु ...बुधा न संसरन्तीति बोधयति अखिलस्य सर्वव्यापकत्वेनाखण्डचैतन्यरूपस्याप्यात्मनः । यद्वा, अखिलेति पृथक् पदम्, हे ...र्थः । अतस्त्वद्भक्तास्त्वत्प्रभावेणाबुधा अपि न कथञ्चित् संसरन्तीति भावः । इह प्रपञ्चे इहेति संसरस्यानिवृत्तिः ...। एतस्मिन् कथञ्चिदाश्रयणमात्रेण साक्षात् सर्वैरनुभूयमानेऽपि गुणानां त्वत्कारुण्यादीनां प्रवाहे परम्परायां सत्यामपि ...स्य सर्वस्यात्मनो जीवस्य गतिं शरणं त्वां प्रत्यबुधा अज्ञाः सन्तः त्वामजानन्त इत्यर्थः । सूक्ष्मामिति स्वशक्त्या दुर्ज्ञेयत्वात् । ..., अखिलानामात्मनोऽन्तर्यामिणस्तव सूक्ष्मां भिन्नाभिन्नत्वादिना दुर्वितर्कां गतिं तत्त्वम् । अन्यत् समानम् ॥१५॥ अहो ...बुधस्यापि मम त्वन्मायया त्वद्भक्त्यभावेनायुर्व्यर्थं गतमिति शोचति-यदृच्छयेति । अयत्नेनैव प्राप्य पूर्वकर्मणैव ...पसादितत्वात् । सुकल्पां सुसमर्थाम् । पाठान्तरे-अतिनीरोगामतिदक्षां वेत्यर्थः । तथा च- 'कल्पं सज्जे प्रभाते च कल्पो ...दक्षयोः' इति । एवमुभयथापि तेषां व्याख्या सङ्गतैव । पटुतरेन्द्रियामिति । स्वस्यार्थे पुरुषारार्थे त्वद्भक्तिलक्षणे, ...नवहितस्य मे । हे ईश्वरेति त्वदीयस्यापीति । यद्वा, ईश्वरमायया दुर्लङ्घ्यत्वादिति भावः ॥१६॥ ननु मदीयेषु माया न ...ह-असाविति । नितरां बध्नाति भवानेव, अतो मादृशामि स्नेहपाशमयी सा दुस्तरैवेति भावः ॥१७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तस्मादिति । एते भावा: त्वया सृष्टाः त्वया सृष्टत्वात् न सर्वदा सन्ति । किन्तु संहार्यत्वादनित्या इत्यर्थः । विकारेषु ...स्थितोऽपि सदा सन्निति व्यावहारिकः शास्त्रैर्व्यवह्रियते इत्यर्थः ॥१४॥ अखिलात्मन इति जीवस्येत्यर्थः ॥१५॥ ...सुकल्पं वर्णाश्रमाद्युत्कर्षवत् ॥१६॥ अन्वयादिषु देहान्वयः आदिर्येषां तेषु देहानुबन्धिषु इत्यर्थः ॥१७-१९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

यत एवं तस्मात्कल्पिताः सृष्टाः अमी भावाः महदादयस्त्वयि चिदचिद्भ्यां निकृष्टे त्वयि न सन्त्येव सूक्ष्मात्र सत्त्वे महादादिभावानां प्रकृत्यादिष्वेव साक्षात्सम्भवः । त्वयि तु प्रकृत्यादिद्वारेति न विकारित्वमिति भावः । यर्हि यदा त्वयि न सत्त्वं तदा विकारेष्वन्तःप्रविश्य सदा सन्निति व्यावहारिकः शास्त्रैर्व्यवह्रियत इत्यर्थः । अस्मदुक्तेष्वर्थेषु शास्त्रमेव प्रमाणमिति तात्पर्यं ॥१४॥ सर्वेऽपीत्थं किं न विदुरित्यत आह-गुणप्रवाह इति । सत्त्वादिगुणप्रवाहरूपम् एतस्मिन् संसारे पतिता इति शेषः सर्वान्तरात्मनस्तव सूक्ष्मां दुर्ज्ञेयां गतिं याथात्म्यमबुधाः अजानन्तः अबोधेन तेनैवाज्ञानेन तन्मूलैः कर्मभिः पुण्यापुण्यात्मकैर्हेतुभिः संसरन्ति ॥१५॥ इत्थं भगवद्याथात्म्यमजानन्तमनुशोचति-यदृच्छयेति । इह लोके दुर्लभां सुकल्यां पटुतरेन्द्रियां मृतां नरत्वं प्राप्य हे ईश्वर ! त्वन्मायया स्वार्थे स्वश्रेयःसाधने त्वद्याथात्म्याज्ञाने प्रमत्तस्यानवहितस्य पुंसो वयः आयुर्गतमहो वृथा गतमित्यर्थः ॥१६॥ किञ्च असाविति । देहेऽस्य देहस्यान्वयादिष्वनुबन्ध्यादिषु पुत्रदारादिष्वसौ देहोऽहम् इमे पुत्रादयो ममेत्येवंरूपैः स्नेहपाशैः सर्वमिदमाब्रह्मपश्वादिपर्यन्तं जगत् भवान् बध्नाति बद्धं करोति ॥१७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ईदृशत्वदज्ञाननिबन्धनश्चायं जीवानां संसार इति तान् शोचति गुणेति ॥१५-१८॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्मात् यर्हि महाप्रलये अमी भावा विकल्पिताः त्वदिच्छामय्या योगमायया त्वद्दृष्टितो वियोजितास्तदा त्वयि न सन्ति भवन्ति त्वं च अमीषु विकारेषु कार्यरूपेषु तदा न वर्तस अन्यदा सृष्टिस्थित्योस्तु त्वं तेषु व्यावहारिकः व्यवहारनिर्वाहकः वर्तसे तेष्ववर्तमानोऽपि व्यवहारसिद्ध्यर्थम् अन्तर्यामित्वाद्यंशमाविष्कृत्य वर्तस इत्यर्थः । यदुक्तं गीतासु -

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥

न च मत्स्थानि भूतानि सर्वाणीत्युपधारय ॥ इति ॥

तस्मात्त्वं स्वरूपेण गुणमयप्रधानरूपो न भवसीति नास्ति ते विकार इति भावः ॥१४॥ अत एव एतस्मिन् गुणप्रवाहे संसारे अखिलात्मनस्तव सूक्ष्मां गतिमुक्तलक्षणाम् अबुधा अजानन्तः अबोधेन तेनैव कर्मभिः संसरन्ति ॥१५॥ एवम्भूतं त्वद्भक्त्या नृजन्मनि सम्भवेत् तत् यस्य नाभूत् तं शोचति-यदृच्छयेति । सुकल्पां पटुतरेन्द्रियाम् ॥१६॥ किं कर्तव्यं यतस्तस्यां भवेत्तस्यां त्वद्भक्ताववकाशमेव जनो न प्राप्नोतीत्याह-असाविति ॥१७॥

गूढार्थदीपिनी

यस्मात् कल्पितास्तस्मादिति योज्यम् । तथा हि यदि विकल्पितास्तर्हि तेषु त्वमपि कारणत्वेनानुगतः । स्वरूपावस्थायां तु व्यावहारिकः सर्वव्यवहारातीतोऽविकल्पकजीवेश्वरादिविकल्परहितः । तस्मान्न सन्त्येवेत्युच्यते एतस्मिन् गुणप्रवाहे संसारे अखिलात्मनस्तव सूक्ष्मां गतिं दुर्ज्ञेयं शुद्धरूपम् अबुद्धा अजानन्तः अबोधेन (अयमेव समीचीनः) देहाभिमानेन कृतैः कर्मभिः इहैव संसरति भ्रमन्ति न च मुच्यन्ते इत्यर्थः ॥१५॥ यदृच्छया दैवेन मनुष्ययोनिं प्राप्य स्वार्थे परमार्थे प्रमत्तस्य मे वयः आयुः वृथैव गतम् । सुकल्पां साधनसमर्थाम् ॥१६॥ अस्य अन्वयादिषु पुत्रादिषु ममैव एते इति स्नेहपाशैः इदं जगत् बध्नाति ॥१७॥

यर्हि यदा एवं
त्वादिव्यवहारशून्यः अ
भावाः विकारित्वक
अस्मदीयशक्तिभूता एव
स्वशक्तिभूतानामात्मनां
॥१५-१६॥ अस्य देहस्

ननु विद्यमानाः ब
निरूपिताः तदा तेषां पृथक्
विकल्पो योगमायारब्धत्वं च
ननु तेषामभावे भगवान् कथ
कथमसद्भिर्व्यवहार इति चे
व्यावहारिकाः भविष्यन्तीति
यतोऽस्य ज्ञानस्य साधकत्वं
तत्रत्यबुद्ध्या ये वर्तन्ते ते अबु
न भवेत् तदा स आत्मार्थं गृह्ये
भगवान् सर्वात्मा स च पूर्णानन
सूक्ष्मा गतिरिति भक्तिमार्गानुसा
गतिं सूक्ष्मां वा अबुध्वेति विप
एतदुभयज्ञाने दोषमाह-यदृच्छ्य
कदाचिद्देवगत्या नृतामपि प्राप्
पुरुषार्थसाधनीभूतं दुर्लभशरीरं
स्वल्पपुरुषार्थसाधनीभूतं देहं व
ईश्वरेति समर्थत्वाज्ज्ञापना ॥१६॥
अहमित्यस्मिन् या बुद्धिः एते च
द्वितीयमाह-देहे चास्यान्वयादिष्वि
चकारात्तत्सम्बन्धिषु पित्रादिष्वपि
किं विषयत्वेन त्वां बध्नामि । अथ

तर्हि यतोऽमी भावाः पदा
निर्विकल्पक एव ॥१४॥ अखिलात
प्राप्नुवन्ति इह ॥१५॥ यदृच्छया स्व
स्वरूपमविदुषः पुंसो वयोऽवस्थागत
देहस्यान्वयादिषु पुत्रादिषु मम एवैते

त्येव सूक्ष्मान्न सन्त्येव।
र्हि यदा त्वयि न सन्त्येव
व प्रमाणमिति तात्पर्यम्
ारे पतिता इति शेषः।
: पुण्यापुण्यात्मकैर्हेतुभिः
न्द्रियां मृतां नरत्वं प्राप्यापि
ातमहो वृथा गतमित्यर्थः
ो ममेत्येवंरूपैः स्नेहपाशैः

ोजितास्तदा त्वयि न सन्ति न
ारिकः व्यवहारनिर्वाहकः सन्
तासु -
स्थितः ॥

। अत एव एतस्मिन् गुणप्रवाहे
संसरन्ति ॥१५॥ एवम्भूतं ज्ञानं
॥१६॥ किं कर्तव्यं यतस्त्वज्ज्ञा

पि कारणत्वेनानुगतः। अन्य
तस्मान्न सन्त्येवेत्युच्यते ॥१४॥
ानन्तः अबोधेन (अयमेव पा
॥१५॥ यदृच्छया दैवेच्छया नृ
धनसमर्थाम् ॥१६॥ अस्य देह

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यर्हि यदा एवं त्वयि त्वयेव स्वप्रकृतीभ्यां विविधतया कल्पिताः रचिताः तदा त्वममीषु विकारेषु परिणामित्वादिव्यवहारशून्यः अन्यत् चिदचिद्विलक्षण एव अव्यावहारिकः ईषनियमादिव्यवहारसाधक एवासि तस्मात् अमी भावाः विकारित्वकर्मवश्यत्वसंसारित्वादयः त्वयि नैव सन्तीत्यर्थः ॥१४॥ ननु, यदि गुणवृत्तयोऽपि जीवाः अस्मदीयशक्तिभूता एव तर्हि कुतः संसरन्तीत्यत्र समाधानमाह-गुणप्रवाहे इति त्रिभिः। अखिलानां चेतनाचेतनपदार्थानां स्वशक्तिभूतानामात्मनां आश्रयस्य सूक्ष्मां गतिं सर्वात्मताम् अबुध्वा तेनैवाबोधेन तन्मूलकैः कर्मभिश्च संसरन्ति ॥१५-१६॥ अस्य देहस्य अन्वयादिषु अपत्यादिषु ॥१७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु विद्यमानाः कथं न स्पृशन्तीत्याशङ्कायामाह-तस्मान्न सन्त्यमी भावा इति। यर्हि त्वयि विकल्पिताः त्वत्तो भिन्नतया निरूपिताः तदा तेषां पृथक् सत्त्वाभावात् न सन्त्येव अविकल्पितास्तु सन्ति न तु विकल्पिता इति स्थितिः अतो दोषाभावार्थं तेषां विकल्पो योगमायारब्धत्वं च निरूप्यते न हि मायया छिद्यमानः पटः छिन्नो भवति मायिकपटधर्मा वा कदचित् सम्बन्धिषु भवन्ति ननु तेषामभावे भगवान् कथं सर्वाश्रय इति चेत्तत्राह-त्वं चामीषु विकारेषु न वर्तस इत्यर्थः। विकारित्वमेव हेतुः नन्वेवं सति कथमसद्भिर्व्यवहार इति चेत्तत्राह-येऽन्यदा व्यावहारिका इति। यथा अन्यदा एते व्यावहारिकाः तथा विद्यमानदशायामपि व्यावहारिकाः भविष्यन्तीति को दोष इत्यर्थः ॥१४॥ एवं भगवतो दिर्दोषपूर्णगुणत्वं निरूप्य एतत्सिद्धान्तं ये न जानन्ति तान्निन्दति यतोऽस्य ज्ञानस्य साधकत्वं भविष्यतीत्याशयेनाह-गुणप्रवाह एतस्मिन्निति। गुणानामयं प्रवाह अनेन मायाकल्पितपक्षो निरुक्तः तत्त्वबुद्ध्या ये वर्तन्ते ते अबुधाः तुशब्दः तेषां बुधत्वपक्षं सिद्धान्तान्तरसिद्धं वारयति। ननु विषयाणामसत्यत्वे यद्यन्यः समीचीनो न भवेत् तदा स आत्मार्थं गृह्येत तदभावादगत्यागत्याविषयेष्वेव स्थातव्यमिति चेत्तत्राह-अखिलात्मनः गतिं सूक्ष्मां न जानन्तीति भगवान् सर्वात्मा स च पूर्णानन्तगुण इति पूर्वमेवोक्तम् अत आत्मनो भगवत्त्वसिद्धौ तेनैव कृतार्थतेति किं विषयैः किं च तस्य च सूक्ष्मा गतिरिति भक्तिमार्गानुसारिणी सा वा ज्ञातव्या उभयाबोधे इह कर्मभिः संसरन्ति अखिलात्मनः अबोधे न संसरन्तीति योजना गतिं सूक्ष्मां वा अबुध्वेति विपरिणामः कर्तव्यः तस्मात् स्वार्थद्वयं निरूपितं भगवानात्मत्वेन ज्ञातव्यो भक्तिर्वा कर्तव्येति ॥१५॥ एतदुभयज्ञाने दोषमाह-यदृच्छया नृतां प्राप्येति। अज्ञानाविष्टाः बहून्येव कर्माणि कुर्वन्ति तेन नानाविधेऽपि संसारे प्रवाहन्यायेन कदाचिद्दैवगत्या नृतामपि प्राप्नुवन्ति तत्रापि सुकल्पां भगवद्भजनादिषु सामर्थ्यम् इहास्मिन् विचारे संसारे दुर्लभाम् एवं पुरुषार्थसाधनीभूतं दुर्लभशरीरं प्राप्य स्वार्थे ज्ञाने भक्तौ यः प्रमत्तः विघ्नैराक्रान्तः उभयविरोधिवशङ्गत इत्यर्थः। तादृशः स्वल्पपुरुषार्थसाधनीभूतं देहं वय एव प्रयोजकं तस्मिन् गते जरठः किं साधयिष्यति एतादृशं वयस्त्वन्मायया गतं भोगेच्छया एवेति समर्थत्वाज्ञापना ॥१६॥ न केवलं भोगेच्छा किन्त्वन्ये दोषा जाता इत्याह-असावहमिति। असौ देहः वसुदेववाच्यः अहमित्यस्मिन् या बुद्धिः एते च पुत्रवित्तादयः ममैव नन्वहमेतेषामपीति। एवमहंममताभ्यां व्याप्तः नाशं गच्छामीत्येको दोषः द्वितीयमाह-देहे चास्यान्वयादिष्विति। अस्य देहस्यान्वयः वंशपुत्रादिः आदिशब्देन स्त्रीश्वशुराद्याः न केवलं तेष्वेव किन्तु देहे च। चकारात्तत्सम्बन्धिषु पित्रादिष्वपि स्नेहपाशैरिति बध्नातीति। न केवलं मामेव किन्तु सर्वमेव जगत्। अत्रैकोऽर्थः सन्दिग्धः। अहं किं विषयत्वेन त्वां बध्नामि। अथ चेश्वरत्वेन ॥१७॥

श्रीसुबोधिनीसारः

तर्हि यतोऽमी भावाः पदार्थाः त्वयि कल्पिताः तस्मान्न वस्तुतः सन्ति। अमीषु विकारेषु त्वं च अन्यदा हि अव्यवहारिको निर्विकल्पक एव ॥१४॥ अखिलात्मनो हरेः सूक्ष्मां गतिमबुद्ध्वाऽज्ञात्वा गुणप्रवाहे संसारे एतस्मिन् अबुधा मूढाः कर्मभिः संसारं प्राप्नुवन्ति इह ॥१५॥ यदृच्छया स्वतो नृतां मनुष्यतां सुकल्पां रोगादिरहितां दुर्लभां पुनः प्राप्तुमशक्यां प्राप्य स्वार्थे प्रमत्तस्य स्वरूपाविदुषः पुंसो वयोऽवस्थागतं तव मायया वृथा जीवनमिति भावः हे ईश्वर! ॥१६॥ असावहं विप्रादिरमुकशर्मादिदेहेऽस्य देहस्यान्वयादिषु पुत्रादिषु मम एवैते इति मोहपाशैः सर्वं जगत् इदं भवान् निबध्नाति ॥१७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यर्हि यस्मात् त्वयि कल्पिता एव तस्मादमी भावा दुःखसुखादिविकारास्त्वयि न सन्त्येव। उक्तेऽर्थे अन्वयव्यतिरेकमाह- यदा च त्वममीषु विकारेषु स्थितस्तदैव त्वयि प्रतीयन्ते। अन्यदा यदा सुषुप्त्यादौ देहेन्द्रियादयो लीना भवन्ति तदा तु त्वमव्यावहारिकः शुद्ध एव प्रतीयसे। हि-शब्दः प्रसिद्धिद्योतकः। यद्वा व्यतिरेकप्रदर्शनेन कल्पितत्वं दृढयति-त्वमिति। त्वं चामीषु विकारेषु स्थितोऽप्यन्यदा कल्पनारहितावस्थायां सुषुप्त्यादौ अव्यावहारिक एव प्रतीयसे। अतस्ते विकारा आरोपिता एव त्वयि प्रतीयन्ते, वस्तुतो न सन्त्येवेत्यर्थः ॥१४॥ जीवानां संसारोऽप्यात्मतत्त्वाज्ञाननिबन्धन इत्याह-गुणप्रवाह इति। गुणप्रवाहे सत्त्वादिगुणकार्यभूते एतस्मिन् देहादौ अखिलात्मनस्तव सूक्ष्मां गतिं दुर्ज्ञेयं सच्चिदानन्दात्मकं स्वरूपम् अबुधा अजानन्तः। अबुद्ध्वा इति पाठान्तरम्। अत एव अवबोधेन स्वरूपाज्ञाननिबन्धनदेहाद्यभिमानेन कृतैः कर्मभिः पुण्यपापात्मकैरिह संसारे संसरन्ति देवमनुष्यतिर्यगादियोनिं प्राप्नुवन्तीत्यर्थः ॥१५॥ एवं रामकृष्णयोस्तत्त्वं निरूप्य तत्र निष्ठाभावेन शोचति-यदृच्छयेति। इहलोके दुर्लभां सुकल्पां पटुतरेन्द्रियादिमत्तया पुरुषार्थसाधनसमर्थां नृतां मनुष्यतनुं प्राप्यापि हे ईश्वर ! त्वन्मायया स्वार्थे स्वपुरुषार्थसाधने त्वत्तत्त्वानुसन्धानभक्त्यादौ प्रमत्तस्य अनवहितस्य मम वयः आयुर्वृथैव गतमित्यन्वयः ॥१६॥ मायाया मोहप्रकारं दर्शयति-देहे असावहम् अस्यान्वयादिषु पुत्रकलत्रादिषु च ममैवैते इत्यभिमानपूर्वकं स्नेहरूपैः पाशैर्भवान् सर्वमेवेदं जगद्बध्नाति ॥१७॥

अन्वितार्थप्रकाशिका

तस्मादिति। यर्हि यस्मात् त्वयि कल्पिता एव तस्मादमी भावा दुःखसुखादिविकारास्त्वयि न सन्त्येव। यदा च त्वममीषु विकारेषु स्थितस्तदैव त्वयि प्रतीयन्ते अन्यदा यदा सुषुप्त्यादौ देहेन्द्रियादयो लीना भवन्ति तदा तु त्वमव्यावहारिकः शुद्ध एव प्रतीयसे। अतस्ते विकारा आरोपिता एव त्वयि प्रतीयन्ते वस्तुतो न सन्त्येवेत्यर्थः ॥१४॥ गुणप्रवाह इति। गुणप्रवाहे सत्त्वादिगुणकार्यभूते एतस्मिन् देहादौ अखिलात्मनस्तव सूक्ष्मां गतिं दुर्ज्ञेयं सच्चिदानन्दात्मकं स्वरूपम् अबुधा अजानन्तः। अबुद्ध्वेति पाठान्तरम्। अत एव अवबोधेन स्वरूपाज्ञाननिबन्धनदेहाद्यभिमानेन कृतैः कर्मभिः पुण्यपापात्मकैरिह संसारे संसरन्ति देवमनुष्यतिर्यगादियोनिं प्राप्नुवन्ति ॥१५॥ यदृच्छयेति। इहलोके दुर्लभां सुकल्पां पटुतरेन्द्रियादिमत्तया पुरुषार्थसाधनसमर्थां नृतां मनुष्यतनुं प्राप्यापि हे ईश्वर ! त्वन्मायया स्वार्थे स्वपुरुषार्थसाधने त्वत्तत्त्वानुसन्धानभक्त्यादौ प्रमत्तस्य अनवहितस्य मम वयः आयुर्वृथैव गतम् ॥१६॥ असाविति। देहे असावहम् अस्यान्वयादिषु पुत्रकलत्रादिषु च ममैवैते इत्यभिमानपूर्वकं स्नेहरूपैः पाशैर्भवान् सर्वमेवेदं जगद्बध्नाति ॥१७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तस्मादिति। तस्मात्तव निर्गुणमूर्तित्वात् यर्हि यद्यपि अज्ञानिभिस्त्वयि परमेश्वरे कल्पिता आरोपितास्तथापि अमी प्राकृतगुणमया भावाः न सन्ति इमे दिव्याऽप्राकृता अपहतपाप्मादयः सत्यशौचादयश्च गुणास्तु सन्त्येवेति भावः। किञ्च। अन्यदा विश्वोत्पत्तिस्थितिकालयोः अमीषु प्राकृतेषु विकारेषु विकसितान्तर्यामिशक्त्या वर्तमानोऽपि अव्यवहारिकः व्यवहारातीतोऽसि। यद्वा। अमीषु देवमनुष्यादिविकारेषु प्राकृतभावेषु त्वं कृष्णवामननारायणमुनिप्रभृतिरूपैः वर्तमानोऽपि अव्यवहारिकः प्राकृतव्यवहारशून्यः अप्राकृतदिव्यमनोहरलीलावानित्यर्थः ॥१४॥ एवमजानतां संसरणमाह-गुणेति। एवमबुधाः अजानन्तो जनाः अखिलात्मनः चेतनाचेतनान्तर्यामिणस्तव सूक्ष्मां गतिं सूक्ष्माया गतेः मनुष्यभावेन विचरणस्यावबोधेन अज्ञानेन इहलोके कृतैः कर्मभिः शुभाशुभैः एतस्मिन् गुणप्रवाहे राजसतामससात्त्विकभावोत्पन्नमनुष्यदेवतीर्यगादिरूपे जगति संसरति ॥१५॥ मोक्षसाधनहीनजननिन्दामाह-यदृच्छयेति। सुकल्पां समीचीनेन्द्रियां नृतां मनुष्यजातिं स्वार्थे स्वमोक्षसाधने ॥१६॥ सर्वकर्मफलप्रदः त्वयैवेदं सर्वं बद्धमित्याह-असाविति। देहेऽसावहम् अस्य देहस्य अन्वयादिषु पुत्रादिषु एते मम मदीया इति स्नेहपाशैः सर्वं चेतनं वृन्दं जगत् स्थावरजङ्गमात्मकं कर्म भवान् कर्ता निबध्नाति ॥१७॥

तस्मादिति ॥ यत
सूक्ष्मत्वान्न भवन्त्येव। महद
यदा, त्वयि न स्न्त्येव तदा
अस्मदुक्तेष्वर्थेषु शास्त्रमेव
सत्त्वादिगुणप्रवाहरूपे एतस्
अबुधाः अजानन्तः तु अबोधे
॥१५॥ इत्थं भगवद्याथात्म्यम
नृतां नरत्वं प्राप्यापि हे ईश्वर !
गतमहो वृथा गतमित्यर्थः ॥१
अहम् एते पुत्रादयः मम एव !

यह तीन गुणों का
आत्मारूप भगवान की सूक्ष्म
को प्राप्त करते है ॥१५॥ हे
प्राप्त कर जो मनुष्य भक्ति
है, उसको जो संपादन नही
ऊपर पकड है आपने समग्र
इस देह मैं में हुं यह पुत्र प

युवां न नः सुतौ स
तत्ते गतोऽस्म्यरणमह
एतावतालमलमिनि
सूतीगृहे ननु जगाद
नानातनूर्गगनवद्विद

'आकर्ण्येत्थं पितुर्वा

युवां, नः, सुतौ, न, साक्ष
अद्य, तत्, आपन्नसंसृतिभयापहम्,
परे, त्वयि, मर्त्यात्मदृक्, यत्, अ
अनुयुगम्, संजज्ञे, गगनवत्, नाना
उवाच। सात्वतर्षभः, भगवान्, इत

---

१. क्षपणार्था-गो. प्रे. टी. ; भूभा
टी. ; गतोऽस्म्यशरणोद्य-वीर. । ३. यद्य

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्मादिति ॥ यत एवं तस्मात् कल्पिताः सृष्टाः अमी भावा महदादयः त्वयि चिदचिद्भ्यां व्यतिरिक्ते त्वयि न सन्त्येव। भवन्त्येव। महदादिभावानां प्रकृत्यादिष्वेव साक्षात् सम्भवः त्वयि तु प्रकृतिद्वारेति तव न विकारित्वमिति भावः। यर्हि त्वयि न स्न्त्येव तदा त्वं च अमीषु विकारेषु अन्तः प्रविश्य सदा सन्निति व्यावहारिकः। शास्त्रैर्व्यवह्रियत इत्यर्थः। केष्वर्थेषु शास्त्रमेव प्रमाणमिति तात्पर्यम् ॥१४॥ ननु सर्वेऽपीत्थं किं न विदुरित्याह ॥ गुणप्रवाह इति ॥ गुणप्रवाहे गुणप्रवाहरूपे एतस्मिन् संसारे पतिता इति शेषः। अखिलात्मनः सर्वान्तरात्मनः तव सूक्ष्मां दुर्ज्ञेयां गतिं याथात्म्यम् अजानन्तः तु अबोधेन तेनैवाज्ञानेन तन्मूलैः कर्मभिः पुण्यपापात्मकैर्हेतुभिः इह जगति संसरन्ति जन्ममरणभाजो भवन्ति इत्थं भगवद्याथात्म्यमजानन्तं शोचति ॥ यदृच्छयेति ॥ यदृच्छया इह लोके दुर्लभां सुकल्पां सुतरां पटुतरेन्द्रियमित्यर्थः। त्वं प्राप्यापि हे ईश्वर ! त्वन्मायया स्वार्थे स्वश्रेयसोऽर्थे त्वद्याथात्म्यज्ञाने इत्यर्थः। प्रमत्तस्यानवहितस्य पुंसः वयः आयुः वृथा गतमित्यर्थः ॥१६॥ किञ्च ॥ असाविति ॥ देहे अस्य देहस्य अन्वयादिष्वनुबन्ध्यादिषु पुत्रदारादिषु च असौ देहः एते पुत्रादयः मम एव। इत्येवंरूपैः स्नेहपाशैः सर्वम् इदमाब्रह्म पश्वादिपर्यन्तं जगत् भवान् निबध्नाति बद्धं करोति ॥१७॥

कृष्णप्रिया

यह तीन गुणों का जो प्रवाह है उसको परमार्थ सत्य मानते है, वह सत्यरुप से अबुध ही है, जो सब के भगवान की सूक्ष्म गति को नही जानता, वह स्व कर्मवश होकर इस संसारमें गिरकर जन्ममृत्यु के क्लेश करते है ॥१५॥ हे नाथ ! स्वच्छ कार्यक्षम, शक्ति संपन्न और अत्यंत दुर्लभ मानव शरीर देह दैवी गतीसे कर जो मनुष्य भक्ति भगवत् सेवा, भगवत् लीला, स्वरुपज्ञान, वे ही अपना सच्चा स्वार्थ है वही ही लक्ष्य उसको जो संपादन नही करता, उसने व्यर्थ अपना जीवन गवाया है ॥१६॥ हे प्रभो ! आपकी जीव मात्र के पकड है आपने समग्र जगत् को स्नेहपाश से मजबूत रीत से जकड के रखा है कि मानवमात्र सोचते है कि देह मैं में हुं यह पुत्र परिवार मेरे है। इस प्रकार के ममत्व से बांध रखा है ॥१७॥

युवां न नः सुतौ साक्षात् प्रधानपुरुषेश्वरौ । भूभारक्षत्र[1]क्षपण अवतीर्णौ तथाऽऽत्थ ह ॥१८॥
तत्ते गतोऽस्म्यरणमद्य[2] पदारविन्दमापन्नसंसृतिभयापहमार्तबन्धो ।
एतावतालमलमिन्द्रियलालसेन मर्त्यात्मदृक् त्वयि परे यदपत्यबुद्धिः ॥१९॥
सूतीगृहे ननु जगाद भवानजो नौ [3]संजज्ञ इत्यनुयुगं निजधर्मगुप्त्यै ।
नानातनूर्गगनवद्विदधज्जहासि को वेद भूम्न उरुगाय विभूतिमायाम् ॥२०॥

श्रीशुक [4]उवाच

आकर्ण्येत्थं पितुर्वाक्यं भगवान् सात्वतर्षभः । प्रत्याह प्रश्रयानम्रः प्रहसञ्श्लक्ष्णया गिरा ॥२१॥

कर्दमक्षमा

युवां, नः, सुतौ, न, साक्षात्, प्रधानपुरुषेश्वरौ, भूभारक्षत्रक्षपणे, अवतीर्णौ, तथा, ह, आत्थ ॥१८॥ आर्तबन्धो, ते, आपन्नसंसृतिभयापहम्, पादारविन्दम्, गतम्, अरणम्, गतः, अस्मि, एतावता, इन्द्रियलालसेन, अलम्, अलम्, मर्त्यात्मदृक्, यत्, अपत्यबुद्धिः ॥१९॥ भवान्, सूतीगृहे, नौ, ननु, जगाद, अजः, इति, निजधर्मगुप्त्यै, संजज्ञे, गगनवत्, नानातनूः, विदधत्, जहासि, उरुगाय, भूम्नः, विभूतिमायाम्, कः, वेद ॥२०॥ श्रीशुकः, सात्वतर्षभः, भगवान्, इत्थम्, पितुः, वाक्यम्, आकर्ण्य, प्रश्रयानम्रः, प्रहसन्, श्लक्ष्णया, गिरा, प्रत्याह ॥२१॥

---

[1] क्षपणार्था-गो. प्रे. टी. ; भूभारक्षत्रक्षपणायावतीर्णौ-वीर. ; भूभारदैत्यक्षपणे अवतीर्णे तथा त्विह-विज.। [2] गतोऽस्मि शरणमद्य-गो. गतोऽस्म्यशरणोद्य-वीर.। [3] यद्यत इत्यनु-विज.। [4] बादरायणिरुवाच-गो. प्रे. टी.। [5] निशम्येत्थं-वीर.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अहो त्वत्पुत्रयोरावयोः किमिदमारोप्यते अत आह-युवामिति। भूभारक्षत्रक्षपणार्थमवतीर्णौ तथा ह निश्चितमा
कथयसि ॥१८॥ ततस्मादरणं शरणमापन्नानां संसृतिभयमपहन्तीति तथा तत् न तु त्वमति सुखी वृथा किं निर्विद्यसेऽत आह-
एतावतेति। इन्द्रियलालसेनेन्द्रियार्थतृष्णया यद्येनेन्द्रियलालसेन मर्त्ये शरीरे आत्मदृगात्मबुद्धिरहं त्वयि च परमेश्वरे अपत्यबुद्धि
तेनालमलं पर्याप्तमिति ॥१९॥ ननु, कुत एतदहं परमेश्वर इति तत्राह-सूतीगृह इति। नौ आवयोः अनुयुगं प्रतियुग्मम्
सुतपाः पृश्निरिति युग्मम् यदा कश्यपो दितिश्चेति युग्मम् अधुना वसुदेवो देवकीति युग्मम् एवं हि प्रतियुग्ममज एवाहं स
अवतीर्ण इति भवान्नुनं जगाद नन्वन्योऽसौ चतुर्भुजो देव इति तत्राह-नानातनूरिति गगनवदसङ्ग एव त्वं भूम्नः सर्वगत
विभूतिरूपां मायां को वेदेति ॥२०॥॥२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुनराक्षिपति-अहो इत्यादि। भूभारक्षत्रक्षपण इति निमित्ते सप्तमी। "एङः पदान्तादति" इति पूर्वरूपरूपसन्धिबाधस्त्वा
कथयसि **"संरक्षणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय भविष्यामि युगे युगे ॥"**

इति गीतोक्तिरूपेण वदसीत्यर्थः ॥१८॥ यतस्त्वमीशस्तत्तस्मात्। आर्तबन्धो इति संसृतिभीतानां त्वमेव रक्षक इत्या
आक्षिप्य समाधत्ते-नन्वित्यादि। एतावता इयत्प्रमाणकेनाद्यपर्यन्तेनेति यावत्। मर्त्ये मृत्युशिरस्के। अहमिति बुद्धिरहं परा
तेनेन्द्रियलालसेन ॥१९॥ पुनराक्षिपति-नन्विति। एतत् इदं कुतोऽवगतमित्यर्थः। तत्राक्षेपे। अजः शुक्रशोणितसम्पर्कजन्यशरीर
। ननु निश्चयेन। पुनराशङ्कते-नन्विति। असौ सूतीगृहगः। उरुगायेति नानारूपतामाह। न कोऽपीत्यर्थः ॥२०॥ ब्रह्माद्यन्यतमस्त
भगवता साक्षात्संलापो वसुदेवं विनान्यस्य दुर्लभ इति भावेन कृष्णस्य प्रतिवचनप्रकारमाह-आकर्ण्येत्यादि। प्रश्रयेण प्रणयेन
। "प्रकृष्टसेव्ये विनये प्रश्रयः प्रणयेऽपि च।" इति निरुक्तिः ॥२१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नोऽस्माकमिति 'अस्मदो द्वयोश्च' (१/२/५९) इति बहुवचनम् आत्थ जन्मसमये कथितवानसीत्यर्थः ॥१८॥
यस्माद्भवानेव मायामयैः स्नेहपाशैर्जीवानां बन्धकस्तत्तस्मात्तेषां तन्निवृत्त्यर्थमद्य त्वत्कृपया विवेकोदये सति ते तव पदास
शरणागतोऽस्मि ननु यो बन्धको भवति स कथं मोक्षे प्रवर्तेत तत्राह-आपन्नेति। आपन्नाः शरणागताः ननु न ते शरणाग
त्वमेव तदर्थं प्रार्थयसे तत्राह हे आर्तबन्धो ! सहजकरुणस्य न तदपेक्षेति तथा तेषां सर्वत आर्तिविना
पुरुषार्थशिरोमणिस्वसम्मुखीकरणायेति च भावः। एवं संसारिकाणां निवेदनं कृत्वा दैन्येन मर्त्यलीलमप्यात्मानं मर्त्यं
मत्वा निजवेदनमाह-एतावतेति। इन्द्रियलालसेन परमेश्वरे पुत्रे सति मम सम्पत्तिविशेषः स्यादिति तृप्तयैव न तु श्रीव्रजे
त्वत्प्रेममात्रेणेति भावः। अन्यत्तैः ॥१९॥ ननु मयि तवापत्यबुद्धिः कल्पिता न किन्तु वास्तवी यतः स्वप्रतिश्रुतसत्य
साक्षाद्युवाभ्यां जातस्सन् युवाभ्यामेव पूर्वपूर्वमपि जन्म स्वयमेवाहमुक्तवान् तदङ्गीकृत्य परिहरति-सूतीति। किं ज
तत्राह-अज इति। अजोऽपि जन्मरहितोऽपि नौ आवयोः सम्यक् साक्षादेव जज्ञे आविर्भावमात्रत्वेऽपि जन्मप्रकारं स्वीकृ
तत्राप्यनुयुगं तत्र कैमुत्येन कारणमपि दर्शयति-निजानां भक्तानां धर्मो भवनलक्षणस्तस्य गुप्त्यै पालनाय
वक्तव्यमावयोस्तत्पालनायेति यद्वा निजस्त्वदीयो यो धर्मः स्वभावः भक्तमनोरथपरिपूरणरूपस्तस्य पालनायेति स्वीं
मत्कृपामयी तर्हि वास्वती च तर्हि कथं मय्यपत्यबुद्धिराक्षिप्यते तत्राह-गगनवत्तत्तद्दोषास्पृष्ट एव त्वं नाना
प्राकृतनरादिजीवजातिरूपाः विधिवत् तादृशप्राकृतस्वतन्वाविर्भावद्वारा विशेषेण दधत् स्वीकुर्वन्
तत्तन्निजाविर्भावास्पदनित्यधामगमनेन त्यजसि तस्मात्तन्मध्यपातिनावावामपि तादृशाविति नात्यन्तीनत्वादपत्यबुद्धिर्
भावः। ननु नित्यावेव युवां प्राप्स्येथे मद्गतिं परामित्युक्तमेव तर्हि कथमेतावद्दैन्यं कुरुषे तत्राह- हे उरुगाय! वेदगानमात्र
भूम्नः अनन्तवैभवपरिपूर्णस्य तव परमगत्याख्यां विभूतिरू पां मायां स्वरूपशक्तिं को वेद जानात्यपि तस्मात् तत्परमां

दीनानां किमिति भावः
त्वय्यपत्यत्वंतथापि त्वद्
स्यां श्रुतौ मम व्यष्टिसमि
एव त्वं जीवानां नानातनू
तवावयोः प्रवेशो विद्वद्भिर
भावः ॥२०॥ श्रीकृष्णस्तु
कृतजन्मलीलः अत एव
मोहनेन प्रवसितेन पूर्वसि
ब्रह्मादिमनोरथागोचरेण पितृ
कंसवधान्ते शुद्धपितृभावम

नोऽस्माकं सुतौ न
तत्राह-भूभारेति। तत्र च त्वह
सुतावित्यादिद्वित्वं व्यवहारापे
क्षेहो नितरामपेक्ष्य एव। सत्य
। यद्वा, भो भगवन्! पुत्रत्वेन
भवथः किम्? - काक्वा, अ
समानम् ॥१८॥ ततस्मात् साक्ष
सूचयति-आपन्नानां शरणाग
नन्वस्मपितुर्भक्तिवर्गपूज्यस्य कु
? किन्तु केवलमिति दीनोऽस्मी
न पतति निरयेऽस्मादित्यपत्यमि

'युवां मां पुत्र

पूर्वजन्मसमये भगवता
लालसेन विषयभोगसुखपरतयेत्य
प्राप्तोऽस्मि। कथम्भूतम्? अर
दीनवात्सल्यादिति भावः। यद्वा, प
। अन्यत् समानम्। ततो विविधाप
। न च मोक्षाद्यर्थं त्वामिच्छामीत्य
अलमलं किञ्चित् प्रयोजनं मे नास्त
परमेश्वर इत्यबुद्धिः पत्यबुद्धिः, न
! निश्चितमिति वा, अजोऽपि सम्
जहासि, प्रकटयस्यन्तर्धापयसि
विभूतिमायां शक्तिविशेषमित्यर्थः

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तानां किमिति भावः । अथवा ननु यद्येवमपत्यबुद्धिमाक्षिपसि तर्हि कथं तां कुरुषे तत्राह–सुतीत्यर्धेन । यद्यप्येवमघटमानं व्यपत्यत्वंतथापि त्वद्वाक्यप्राण्येनैवाहं तत्र प्रवर्त इति भावः । नन्वहं युष्मद्देहप्रवेशमामात्रापेक्षया तथोपदिष्टवान् न तु तेनाहमपत्यं श्रुतौ मम व्यष्टिसमष्टिजीवदेहमात्रप्रवेशश्रवणेनातिव्याप्तिप्रसङ्गात् "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यादौ तत्राह–गगनवदसङ्ग त्वं जीवानां नानातनूरन्तर्यामिरूपेण प्रविश्याङ्गीकुर्वन् जहासि यत् तां तव क्षुद्रैश्वर्यरूपां को वेद बहुमन्यत इत्यर्थः । अयन्तु वयोः प्रवेशो विद्वद्भिरपि स्तूयते तस्माद्विद्वदादयोऽपि ममास्ति प्रमाणं किन्त्वात्मा योग्यतया मम तत्राप्यसम्भावना ज्ञायत इति वः ॥२०॥ श्रीकृष्णस्तु तत्र निजमहिमव्यक्तौ सौशील्येन सङ्कुचित इत्याह–आकर्ण्येति । सात्वतानामृषभः तद्रूपत्वेन तस्मिन् जन्मलीलः अत एव पितुरिति तादृशव्यवहारे हेतुः–प्रहसन्निति । तथा तद्वचनानौचित्याभिप्रायेण प्रहासं व्यक्तीकृत्य तेनैव हेन प्रवसितेन पूर्वसिद्धं तस्य निजैश्वर्यज्ञानं तत्प्रतिपादकवचनं च तेनाननुसंहितं कुर्वन्नित्यर्थः । अस्यायं भावः मयाऽयं दिमनोरथागोचरेण पितृत्वेन सदाङ्गीकृतः साधारणमुन्यादिसुलभमैश्वर्यज्ञानमात्रं नार्हति मां सङ्कोचयति च तत् एतदर्थमेव मया वधान्ते शुद्धपितृभावमयप्रेमैवानयोर्वर्द्धितः तथाप्यहो मुनिवाक्येन तज्ज्ञानांशः पुनरुदित इति ॥२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

नोऽस्माकं सुतौ न भवथः बहुत्वं स्वपत्नीवर्गाद्यपेक्षया, किन्तु साक्षात् प्रधानपुरुषेश्वरावेव । ननु तर्हि किमर्थमत्रागतौ ? ह–भूभारेति । तत्र च त्वद्वच एव प्रमाणमित्याह–तथेति । तादृशं त्वमेवात्थ, जन्मसमये साक्षाच्छ्रीमुखेन श्रीनारदादिद्वारा वा, वित्यादिद्वित्वं व्यवहारापेक्षया तत्त्वतस्त्वैक्येन पुनरप्यग्रे तथैव निर्देशः । अन्यत्तैर्व्याख्यातम् । यद्वा, अहो पितर्मयि मदीयेषु च नितरामपेक्ष्य एव । सत्यम्, किन्त्वीश्वरे पुत्रत्वदृष्टेरयोग्यत्वेन महाधार्ष्ट्यं स्यादित्याशयेनेश्वरत्वमाह–युवामिति । अर्थः स एव द्वा, भो भगवन् ! पुत्रत्वेन तवास्मासु स्नेह एवोचित इति पुत्रत्वं द्रढयति–युवामिति । प्रधानपुरुषेश्वरावपि साक्षान्नः सुतौ न थः किम् ? - काक्का, अपि तु भवथ एवेत्यर्थः । कुतः ? भूभाररूपक्षत्रियक्षपणार्थं मद्गृहे पुत्रतया साक्षादवतीर्णौ । अन्यत् नम् ॥१८॥ तत्तस्मात् साक्षादीश्वरत्वात् त्वन्मायामोहितत्वाद्वा । अद्येति त्वत्कृपया विवेकोदये सतीत्यर्थः । शरणयानप्रयोजनं यति-आपन्नानां शरणागतानां संसृतिभयापहमिति । निर्विघ्न–त्वद्भक्तिसम्पत्तये संसारदुःखनिवृत्त्यर्थमित्यर्थः । स्मपितुर्भक्तिवर्गपूज्यस्य कुतस्ते संसारभयमिति चेत, अहो बत, शरणागतियोग्यतापि मम नास्ति, कुतस्त्वत्पितृत्वादियोग्यता किन्तु केवलमिति दीनोऽस्मीति शरणं यामीत्यभिप्रायेण महार्त्याह–हे आर्तबन्धो इति । अलमलमिति वीप्सात्यन्त–तदुपेक्षया । पतति निरयेऽस्मादित्यपत्यमितीदृश्येव, न तु परमपुरुषार्थोऽयमिति बुद्धिरित्यर्थः । (भा.१०/३/४५) —

'युवां मां पुत्रभावेन ब्रह्मभावेन वासकृत् । चिन्तयन्तौ कृतस्नेहौ यास्येथे मद्गतिं पराम् ।।' इति ।।

पूर्वजन्मसमये भगवता साक्षादुक्तेऽपीदृश्युक्तिः स्नेहविशेषसम्पत्तय इति दिक् । अन्यत्तैर्व्याख्यातम् । यद्वा, इन्द्रियाणां लसेन विषयभोगसुखपरतयेत्यर्थः । पुत्रतादृढीकरणस्वपक्षे – तत्तस्मात् मद्गृहेऽवतीर्णत्वात्, अद्य एतज्जन्मन्यपि ते तव पदारविन्दं गतोऽस्मि । कथम्भूतम् ? अरणं सर्वलोकैकशरणं विशेषतश्चापन्नामापद्गतानां संसृतिभयापहम् । कुतः ? हे आर्तबन्धो ! वात्सल्यादिति भावः । यद्वा, पदं श्रीमथुराख्यं स्थानं तदेवारविन्दम्, मण्डलाकारत्वात् सन्तापहरत्वाच्च, अरणमाश्रयं लब्धोऽस्मि त् समानम् । ततो विविधापद्गणं प्राप्तस्य माहार्तस्य मे सर्वं भक्तिविघ्नादिभयं निरस्य निरन्तरं त्वयि स्नेहभरं विवर्धयेति भावः न मोक्षाद्यर्थं त्वामिच्छामीत्यभिप्रायेणाह–एतावतेति । ईदृशेन इन्द्रियस्य मनसो लालसेन मोक्षादितृष्णया औत्सुक्येन वा, मलं किञ्चित् प्रयोजनं मे नास्तीत्यर्थः । यद्यस्मात् परे पुत्रश्रेष्ठेऽपि त्वयि मर्त्यानां देहानामात्मेति दृक् दृष्टिस्तथापत्यबुद्धिः– इत्यबुद्धिः पत्यबुद्धिः, न पत्यबुद्धिरपत्यबुद्धिः, द्वौ नञौ प्रकृत्यर्थं गमयतः, – पतिबुद्धिश्च स्यादित्यर्थः ॥१९॥ ननु भो निश्चितमिति वा, अजोऽपि सम्यक् सर्वैश्वर्यपूर्णतादिना उत्तमुत्रत्वेन वा जज्ञे । निजधर्मस्तस्य गुप्त्यै गगनवच्छ्यामसुन्दरीर्विशेषेन जहासि, प्रकटयस्यन्तर्धापयसि चेत्यर्थः । तच्च केन प्रकारेणेति न केनापि ज्ञातुं शक्यत इत्याह–क इति । भूम्नः सर्वैश्वर्यपूर्णस्य विभूतिमायां शक्तिविशेषमित्यर्थः । तेन च तव महिमैव वर्धत इत्याशयेनाह–उरुगाय ! हे महाकीर्ते ! इति । अन्यत्तैर्व्याख्यातम् ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वपक्षे न त्वस्मिन्नेव तन्मन्यस्मत्पुत्रस्त्वं किन्तु बहून्येवेत्यत्र त्वद्वच एव प्रमाणमित्याह-सूतीति । निजानां मादृशानां धर्मस्त्वद्भक्तिलक्षणस्तस्य गुप्त्यै । ननु तर्हि कुतो वलपसि ? तत्राह-नानेति । गगनवद्व्यापिकाः क्वाप्यनासङ्गाश्च तनूर्विदधत् स्वार्थाय प्रकटयन् जहासि, समन्तादन्तर्धापयसि । ममान्तर्द्धानादेते दुःखं प्राप्स्यन्तीति तव काप्यपेक्षा नास्तीत्यर्थः । ननु भक्तो कदाचिदपि स्नेहं न त्यजामीति चेत्तत्राह-को वेदेति । महामायाविनि त्वयि न खलु विश्वसितुं शक्नुम इत्यर्थः । श्रीभगवद्वचः-प्रामाण्यादिना सर्वथा कृतार्थत्वेऽपीदृशी दैन्योक्तिर्भक्त्युद्रेकस्य स्वभावेन स्नेहविशेषवृद्ध्यर्थमेवेति ॥२०॥ इत्थमीदृशम्, प्रश्रयेण विनयेन, आनम्रः सम्यङ्नतशिराः सन्, श्लक्ष्णया मधुरया गिरा, प्रत्याह उत्तरं ददौ । यतो भगवान् परमदयालुरित्यर्थः । विशेषतः सात्वतानां भक्तानामृषभः परिपालक इत्यर्थः । यद्वा, तत्रापि सात्वतानां यादवानामृषभो निजाशेषैश्वर्यप्रकटनार्थं यदुकुलेऽवतीर्य तत्परिपालकत्वेन श्रैष्ठ्यं गत इत्यर्थः । अतः प्रहसन् कृतार्थस्यापि पितुर्दैन्योक्त्या उच्चैर्हसन्, तच्च तस्य शोकलाघवार्थमिति ज्ञेयम् । किंवा पितुरेव श्लक्ष्णया गिरा हर्षेण प्रहसन् स्मयमानः ॥२१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सूतीगृहे सूतिकागृहे गगनवदिति दोषास्पर्श उक्तः । वैषम्यादिदोषरहित इत्यर्थः ॥२०-२१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

यदुपक्रान्तं "जाने वामस्य यत्साक्षात्प्रधानपुरुषौ परौ" इति तमुपसंस्मारयति-युवामिति । भूमेर्भारभूतक्षत्रियनिरसनार्थमवतीर्णोऽहमित्येतदात्थ सूतिकागृहे कथितवानसि हीत्यर्थः ॥१८॥ तत्तस्मादशरणः उपायान्तरशून्योऽहं हे आर्तबन्धो ! आपन्नानां संसृतिभयमपहन्तीति तथा तत्तव पदारविन्दं शरणं गतोऽस्मि । ननु त्वमतिसुखी वृथा किमिति निर्विण्ण इत्यत आह-एतावतेति । यद्यस्मात् मर्त्ये शरीरे आत्मदृगात्मबुद्धिरहं त्वयि च प्रधानपुरुषेश्वरेऽपत्यबुद्धिरस्मि अत इन्द्रियार्थतृष्णयाऽलमलम्, पर्याप्तमित्यर्थः ॥१९॥ ननु कुत एतदहं परमेश्वर इति तत्राह-सूतीगृह इति । ननु हे भगवन् ! सूतीगृहे जगाद । किं तद्यदजः कर्मायत्तोत्पत्तिरहितोऽप्यहं निजधर्माणां स्वकृतधर्ममर्यादानां गुप्त्यै रक्षणायानुयुगं प्रतियुगं जज्ञेऽवतरामीत्येतत् नन्वन्योऽसौ चतुर्भुजो देव इत्यत आह-नानेति । नानातनुर्विदधत्तावद्विभ्राणः जहासि गगनवद्यथा गगनं सर्वत्र व्याप्नुवदप्यजहत्स्वभावम् । तथा भवानपि । नानातनुष्ववस्थितोऽप्यजहत्स्वभाव इति दृष्टान्तार्थः । इत्थमहं सम्भावयामि । ततस्तव माहात्म्यं को वेदेत्याह-हे उरुगाय ! भूम्नः सर्वगतस्य तव विभूतीर्मायाः आश्चर्यशक्तीश्च को वेद न कोऽपि वेदेत्यर्थः ॥२०॥ निशम्येति । प्रश्रयेण विनयेनानम्रः श्लक्ष्णया मृद्व्या गिरा प्रत्याह ॥२१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथात्मानमपि दैन्येन मर्त्यधर्माणं मत्वा निजनिवेदनमाह-एतेति । इन्द्रियलालसेन परमेश्वरे पुत्रे सति मम सम्पत्तिविशेषः स्यादिति कृष्णयैव न तु श्रीव्रजेश्वरवत् त्वत्प्रेममात्रेणेति भावः ॥१९॥ सूतीगृहे अस्यानन्तरप्रघट्टके दृश्यं श्रीकृष्णस्तु तत्र निजमहिमव्यञ्जने सौशील्येन सङ्कुचित इत्यर्थः ॥२०॥ आकर्ण्येति । प्रहसन्नित्यत्र प्रेति प्रारम्भे स्मयन्नित्यर्थः । अस्यायं भावः । मयाऽऽ ब्रह्मादिमनोरथागोचरेण पितृत्वेन सदाङ्गीकृत्य इत्यैश्वर्यज्ञानं नार्हति मां सङ्कोचयति च तत् एतदर्थमेव मया कंसवधानन्तरं शुद्धपितृभावमयप्रेमैवानयोः वर्धितः ॥२१॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तत्रावामेव प्रमाणं यदावयोर्देहपुत्रादिष्वहन्ताममते वर्तेते एवेत्याह-युवामिति । नः आवयोर्न सुतौ तदपि सुतबुद्धि युवयोर्ममता वर्तत एवेति भावः । क्षत्रक्षपणे भूभाररूपक्षत्रियक्षयाय तथैव आत्थ स्वजन्मसमये कथितवानसि ॥१८॥ अरण्यं

ननु भोगांस्तावद्भुङ्क्ष्व कुतस
त्वयि च परे परमेश्वरे अपत्य
पुत्रोऽभूवं यस्य तव कथं सं
सुतपाः पृश्निनरिति युग्मं यदा
संजज्ञे अवतीर्ण इति जगाद अ
पुत्रो भवन्नप्यनासक्त एव जह
वेद ॥२०॥ प्रश्रयेण आनम्रः
तात्पर्यमन्यथा प्रतिपादयामीति

युवां नोऽस्माकं सुतौ
स्वयमात्थ कथितवानसि जन्म
कथम्भूतम् । आपन्नानां शरणाग
यत् येन लालसेन मर्त्ये शरीरे अ
उरुगायः ।) अजो भवान् सूतीगृ
वसुदेवो देवकीति ।) धर्मगुप्त्यै स
ते महिमानं को वेद न कोऽपीत्य

युदक्तं 'जाने वामस्य य
ह स्फुटम् आत्थ सूतीगृहे कथितवा
गतोऽस्मि तापत्रयपीडितं मां संसा
आह-एतावतेति । यत् येन व्यामो
परमेश्वरे त्वयि अपत्यबुद्धिश्चास्मि
भूभारक्षत्रक्षपण अवतीर्णौ तथाऽऽ
भवान् अनुजगाद तदाह-अजः स
निजधर्मस्य भक्तिलक्षणस्य गुप्त्यै र
जहासि त्याजयसि तथापि स्वयन्तु
विभूतिमायां विभूतिभूतां स्वरनरा

एवं जगदपि तत्राह-युव
नास्ति यतो युवां न नः सुतौ एवं
प्रधानपुरुषयोरीश्वरौ कालपुरुषोत्तमौ
चेत्तत्राह-तथात्थ हेति । यथा ततश्च
भूभाररूपक्षत्रियहननार्थमवतीर्ण इति
तर्हि किमद्योच्यत इत्याशङ्कायामाह-

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भोगांस्तावद्भुङ्क्ष्व कुतस्ते संसार इत्यत आह-एतावतैव इन्द्रियलालसेनालं यत् येन मर्त्ये देहे आत्मदृक् आत्मबुद्धिरहं च परे परमेश्वरे अपत्यबुद्धिरस्मीत्यतोऽज्ञानमूलः संसारो मम नास्त्येवेति भावः ॥१९॥ नन्वहं परमेश्वर एव तस्य भूवं यस्य तव कथं संसार इति तत्राह-सूतीगृहे सूतिकागारे ननु भोः भवानेव नौ आवयोरनुयुगं प्रतियुगं (ग्मं) यदा पृश्निरिति युग्मं यदा च कश्यपो दितिश्चेति युग्मम् अधुना वसुदेवो देवकी तस्मात् सर्वस्मादेव आवयोर्युग्मात् अवतीर्ण इति जगाद अत एव आवयोर्नानातनूः सुतपःपृश्न्यादिनाम्नीर्विदधत् सृजन् गगनवदलिप्त एवावयोः प्रतिजन्मापि भवन्नप्यनासक्त एव जहास आवां त्यजसि संसारं च न निवर्तयसि अतस्तव भूम्नः परमेश्वरस्य विभूतिरूपां मायां को ॥२०॥ प्रश्रयेण आनम्रः प्रहसन्निति वन्दमानावावां पुत्रावपि प्रत्येवं त्वद्वाक्यस्य रसाभासाभावार्थं प्रतिभयाहमस्य मन्यथा प्रतिपादयामीति द्योतकः प्रहासः ॥२१॥

गूढार्थदीपिनी

युवां नोऽस्माकं सुतौ न भवतः किन्तु साक्षादीश्वरौ भुवो भारभूतस्य क्षत्रस्य क्षपणार्थं विनाशार्थमवतीर्णौ इति ह स्फुटं कथितवानसि जन्मकाले ॥१८॥ हे दीनबन्धो ! तत् तस्मात् अद्य ते पदारविन्दम् अरणं शरणं गतोऽस्मीत्यन्वयः । भूतम् । आपन्नानां शरणागतानां संसृतिभयमपहन्तीति तथाभूतम् । एतावता इन्द्रियलालसेन अलमलं न किञ्चित्प्रयोजनम् । येन लालसेन मर्त्ये शरीरे अहंबुद्धिः त्वयि परे परमेश्वरे च अपत्यबुद्धिरस्ति ॥१९॥ हे उरुगाय ! (उरु बहुधा गीयते इति गायः ।) अजो भवान् सूतीगृहे नौ आवाम् जगाद । किं तत् । अनुयुगं प्रतियुग्मं (सुतया पृश्निरिति । कश्यपोऽत्रिरिति । अधुना देवो देवकीति ।) धर्मगुप्त्यै संजज्ञे । एवमेव गगनवत् असङ्ग एव त्वं नानातनूः विदधत् धारयन् जहासि अतो भूम्नः परिपूर्णस्य महिमानं को वेद न कोऽपीत्यन्वयः ॥२०॥ सात्वतर्षभः यादवश्रेष्ठः श्लक्ष्णया मधुरया गिरा तं पितरं प्रति आह ॥२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

युदक्तं 'जाने वामस्य यत्साक्षात्प्रधानपुरुषेश्वरौ' इति तदुपसंहरति-युवामिति । भूभारस्य क्षत्रस्य क्षपणे अवतीर्णौ तथैव आत्थ सूतीगृहे कथितवानसि ॥१८ज्ञ। तस्मात् आर्तबन्धो ! तापत्रयपीडितस्वभक्तरक्षक ! संसृतिभयभंजनं ते पदारविन्दमरणं तापत्रयपीडितं मां संसाराद्विमोचय इति भावः । ननु भवद्विधानां संसारोऽकिञ्चित्करः स्वधर्मार्जितान् भोगान् भुङ्क्ष्वेत्यत एतावतेति । यत् येन व्यामोहकेनेन्द्रियलालसेन हेतुभूतेन मर्त्ये शरीरे आत्मदृक् आत्मदृष्टिः परे प्रधानक्षेत्रज्ञाभ्यां विलक्षणे त्वयि अपत्यबुद्धिश्चास्मि तेनेन्द्रियलालसेन अलमलं पर्याप्तमित्यर्थः ॥१९॥ युवां न नः सूतौ साक्षात्प्रधानपुरुषेश्वरौ क्षपण अवतीर्णौ तथाऽऽत्थ हेति श्लोकार्थं विवृणोति-सूतीति । ननु भो अनुयुगं युगम्प्रति नौ आवयोः पृश्निगर्भादिरूपः अनुजगाद तदाह-अजः संजज्ञे इति । अजहच्छ्रीमूर्तिरेवाहं संजज्ञे स्वरूपतस्तु जीवोऽपि अज एवेत्यर्थः । तत्र तत्र च भक्तिलक्षणस्य गुप्त्यै रक्षणाय नानातनूः निजधर्माधिकारिशरीराणि दधत् रक्षणीयतया बिभ्राणः निजधर्मविरोधिशरीराणि त्याजयसि तथापि स्वयन्तु गगनवत् निर्मल एवेत्यर्थः । एतत्त्वदुक्त्यैव वयं जानीमःक स्वतस्तु हे उरुगाय ! भूम्नः तव मायां विभूतिभूतां स्वरनरादिरूपामपि मायां त्वच्छक्तिलेशरूपामपि को वेद न कोऽपीत्यर्थः ॥२०-२१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं जगदपि तत्राह-युवां न नः सुताविति । विषयत्वेन चेद्बध्नासि तदोपकारोऽपि भवेत् वस्तुस्वभावात्परं विषयतैव यतो युवां न नः सुतौ एवं विषयत्वेन बन्धनं दूरीकृत्य प्रकारान्तरेण बन्धने सामर्थ्यमाह-साक्षात्प्रधानपुरुषेश्वराविति । रीश्वरौ कालपुरुषोत्तमौ तादृशयोः कथमागमनमिति चेत्तत्राह-भूभारक्षत्रक्षपणे अवतीर्णाविति । किमत्र प्रमाणमिति -तथात्थ हेति । यथा ततश्च शौरिः भगवत्प्रचोदित इति ग्रन्थे अनुक्तमपि प्रेरणम् अस्मादेव वाक्यादवगम्यते एवमत्रापि क्षत्रियहननार्थमवतीर्ण इति भगवतैव क्वचिदुक्तमिति ज्ञातव्यम् । हेत्याश्चर्यजनकम् अनेन अत्र कल्पना निवर्तिता ॥१८॥ च्यत इत्याशङ्कायामाह-तत्ते गतोऽस्म्यरणमद्येति । ते पदारविन्दम् अहं शरणं गतोऽस्मि । अनेन पूर्वं भवान् बध्नातीति

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अनिष्टमुक्तं तन्निवृत्तिरर्थात् सूच्यते चरणारविन्दशरणागतैः को विशेष इत्याशङ्कायामाह-आपन्नसंसृतिभयापहमिति । आपन्ना ये शरणागतास्तेषां भयमपहन्तीति तथा अतस्त्वयि विलम्बमानेऽपि चरण एव मां कृतार्थं करिष्यतीति चरणानुसृतिः भवतोऽपि यत्र स्नेहो भवति तदाह-आर्तबन्धोरिति । एतावता स्वस्यार्तत्वं पूर्वमेवोक्तमित्यध्यवसीयते ननु विषया भुज्यन्तां किं वैराग्येणेत्यत आह-एतावतालमिति । इन्द्रियलालसेन एतावता अलम् । इन्द्रियमिन्द्रियलालसा सा पूर्यतामित्यर्थः । इन्द्रियलालसेन वा मम एतावता एवमवस्थां प्रापितेन अलमिति अतः परमियमवस्था मा भवत्वित्यर्थः । किञ्च मर्त्यात्मदृगिति द्वितीयो दोषः त्वयि मे यदपत्यपुद्धिरिति तृतीयः भोगेच्छादेहाभिमानिनः भगवति चान्यथाबुद्धिरिति अचिकित्स्यस्त्रिदोषः एतं दूरीकुर्वित्यर्थादुक्तं भवति ॥१९॥ नन्वेतत्सर्वं त्वया कुतोऽवगतमिति चेत्तत्राह-अस्मिन्नर्थे त्वमेव गुरुरिति सूतीगृहे ननु जगादभवानिति । किं जगादेत्यत आह-नौ आवयोरज एव संजात इति देवकीवसुदेवयोः पूर्वदृष्ट एवाहं जात इति तत्र मम सन्देहः किमस्मदर्थमेव भगवान् जात आहोस्विदनुयुगं निजधर्मगुप्त्यै जायमान इति ननु धर्मरक्षार्थं जनने त्वद्गृहे कथं जायेत । अतस्त्वदर्थमेव जात इति चेत्तत्राह-गगनवद्वदधज्जहासीति । आकाशो हि सर्ववस्तुभिः स्वाकारं करोति घटवत्पटवत्पुरुषवच्चेति तस्मात् स्थानात् तस्मिन् चापगते फलान्तरे रूपाणि गृह्णन्नेव पूर्वरूपाणि जहाति । एवं भगवानप्यविकृतः देवकीगृहे प्रादुर्भूतः तत्रत्यमायां दूरीकृत्य जातो निश्चल एव ततः प्रदेशान्तरगमने पूर्वस्थाने माया संवृता स्थलान्तरस्यापगतेति प्रतिक्षणं रूपान्तराणि भवन्तीतोऽपि देगग्रहणापरित्यागौ इत्यत्र विशेषः उपाधिवशात्तस्य देहग्रहणं भगवतस्तु मायायवनिकाऽपगमादिति । अत एव किमस्मदर्थमागतः अन्यर्थं वा समागत इति प्रतिक्षणं गृहीतरूपाणां प्रयोजनवत्त्वमेव दुर्निरूपं प्रयोजनविशेषस्य का वार्तेति भावः । तर्ह्यस्मिन्नर्थे सिद्धान्तो ज्ञातव्य इति चेत्तत्राह-हे उरुगायेति । सर्वैरेवं च गीयत इति गानार्थमेवं करोषीत्यर्थः । विशेषतो वक्तव्यत्वेन ज्ञायत इत्याह-विभूतिरूपां मायां को वेदेति ॥२०॥ एवं स्तुतिप्रपत्ती निरूप्य अचिन्त्यरूपत्वे निरूपिते भगवान् प्रसन्नः अखण्डज्ञानं तस्य जातमिति अखण्डबोधार्थं प्रवृत्त इत्याह-आकर्ण्येत्थमिति । पितृवाक्यत्वात् स्वामिवत् लीलाप्रदर्शनमयुक्तम् । अतः प्रश्रया नम्रः सन् अग्रेऽपि मोहार्थं प्रहसन् चित्तसन्तोषार्थं श्लक्ष्णया गिरा सात्वतर्षभो वैष्णवपतिरिति एवं प्रपत्तिकथनेऽपि तूष्णीं स्थितौ वैष्णवानां दुःखं भविष्यतीति युवां मां पुत्रभावेनेति वाक्यनिर्णयस्योक्तत्वात्प्रयोजनाभावाद्वाक्येन बोधं हास्येन मोहं च कुर्वन् आहेत्यर्थः ॥२१॥

श्रीसुबोधिनीसारः

ज्ञात्वाऽऽह । युवां नोऽस्माकं सुतौ पुत्रौ न किन्तु साक्षात् प्रकृतिपुरुषौ भुवः पृथिव्या भाररूपाः ये क्षत्राः क्षत्रियास्तेषां क्षपणे नाशार्थम् अवतीर्णौ स्थः । तथा त्वम् आत्थ ह स्फुटम् ॥१८॥ हे आर्तबन्धो ! आपन्नानामापद्ग्रस्तानां संसृतेर्भयमपहन्तीति तत् अरणं शरणं प्राप्तानां वा ते चरणारविन्दं गतोऽस्मि प्राप्तोऽस्मि तत्तस्मात् हेतोः इन्द्रियलालसेन एतावताऽलं पर्याप्तं मर्त्ये शरीरे आत्मबुद्धिः परे त्वयि यत् यतोऽपत्यबुद्धिरस्मि ॥१९॥ अनुयुगं स्वधर्मरक्षणार्थम् अजोऽहं संजज्ञे इति नौ आवां सूतिगृहे भवान् जगाद ननु एव सूतेर्गृह इति पाठः । नाना तनूर्मूर्तिर्विदधत् सङ्गृह्णन् त्वं जहासि त्यजसि गगनवदाकाशवदसङ्गः हे उरुगाय ! भूमन् सर्वगतस्य तव विभूतिमायां मायावैभवं को वेद न कोऽपि ॥२०॥ शुकोक्तिः । इत्थम् एवं पितुर्वसुदेवस्य वाक्यम् आकर्ण्य श्रुत्वा सात्वतर्षभो यदुश्रेष्ठो भगवान् प्रश्रयेणानम्रः नतः प्रहसन् मनोहरया वाण्या प्रत्याह प्रत्युत्तरमुवाच ॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यदुपक्रान्तं जाने त्वामिति तदुपसंहरति-युवां नोऽस्माकं सुतौ न भवतः, किन्तु साक्षात्प्रधानपुरुषेश्वरौ भूभारभूतक्षत्रियविनाशार्थमवतीर्णौ तथा स्वयमेव ह स्फुटमात्थ कथितवानसि ॥१८॥ तत्तस्मात् त्वद्भजनं विना गतस्यायुषो व्यर्थत्वात् अद्य आपन्नानां शरमागतानां संसृतिभयमपहन्तीति तथाभूतं तव पदारविन्दमरणं शरणं गतोऽस्मि । अस्मदुद्धार एव युक्त इत्याशयेन सम्बोधयति-आर्तबन्धो इति । ननु त्वमति सुखी, किं वृथा निर्विद्यसे इत्याशंक्याह-एतावतेति । यत् येनेन्द्रियार्थलालसेन हेतुना मर्त्ये शरीरे आत्मदृक् आत्मबुद्धिः त्वयि परमेश्वरे चापत्यबुद्धिर्जातोऽस्मि तेनेन्द्रियार्थलालसेनैतावतैवालमलं पर्याप्तं ॥१९॥ तथात्थ ह इत्युक्तं तदाह-सूतीगृहेति । नन्विति सम्बोधने, हे भगवन् ! अजः कर्माधीनजन्मरहितोऽप्यहं निजधर्माणां

स्वप्रवर्तितधर्ममर्यादानां गुप्त्यै
विदधद्भिप्राणस्त्वं ता जहासि
मायां को वेद ? न कोऽपि ज्ञ
उपाधिनाशाच्च ताः परित्यजच
न सच्चिदानन्दादिस्वभावत्याग
प्रहसन् श्लक्ष्णया मधुरया गिर

युवामिति । युवां
विनाशार्थमवतीर्णौ तथा स्वय
विना गतस्यायुषो व्यर्थत्वात् अ
। एतावतैव इन्द्रियलालसेन हेतु
अपत्यबुद्धिः सत्यैव त्वत्तो ज
स्वप्रवर्तितधर्ममर्यादानां गुप्त्यै
एष नानातननूः वराहनरादिय
यद्युपाधिकृतनानातनूः विदधत
नानास्वरूपाणि दधतः परित्यज
न कोऽपि ज्ञातुं शक्तः । अतस्त्व
वसुदेवो देवकी चेति युगम् ए
पूर्वानुवादस्य किञ्चिदन्यथाऽपि
इत्थं पितुर्वाक्यमाकर्ण्य प्रश्रयेण

नन्वावां तु त्वत्पुत्रौ स
अवतीर्णावित्यहं जाने तथा त्वं म
पदारविन्दम् अरणं शरणं गतो
इन्द्रियलालसेनेन्द्रियभोगेच्छयाल
सन् परे परमात्मनि त्वयि अपत्य
नन्वहं परमेश्वरोऽस्मीति मया कदे
कश्यपोऽदितिश्चेति युगलम् अद्य
जगाद । स गगनवदसङ्गो निर्लेपः
परमेश्वरस्य विभूतिरूपां मायामैश्वर्य

यदुपक्रान्तं ‘जाने त्वामस्
किन्तु प्रधानपुरुषयोरीश्वरौ भूभारक्षत्र
त्वमपि साक्षात् तथा ह स्फुटम् आत्

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वर्तितधर्ममर्यादानां गुप्त्यै रक्षणायानुयुगं प्रतियुगं संजज्ञे अवतरामीति भवान् सूतिकागृहे नौ आवां प्रति जगाद। अतो नानातनूः विभ्राणस्त्वं ता जहासि। अत एव बहुधा गीयसे इत्याशयेन सम्बोधयति–उरुगायेति। भूम्नो व्यापकस्य तव विभूतिरूपां मायां को वेद ? न कोऽपि ज्ञातुं शक्त इत्यर्थः। तनुधारणे दृष्टान्तमाह–गगनवदिति। गगनं यथा घटाद्युपाधिकृतनानातनूः विदधत् धिनाशाच्च ताः परित्यजच्च निर्लेपव्यापकत्वादिनिजस्वभावं न परित्यजति, तथा भगवतो नानास्वरूपाणि दधतः परित्यजतश्च च्चिदानन्दादिस्वभावत्याग इत्यर्थः ।।२०।। सात्वतर्षभः भक्तपालको भगवान् कृष्ण इत्थं पितुर्वाक्यमाकर्ण्य प्रश्रयेण विनयेनानम्रः सन् श्लक्ष्णया मधुरया गिरा तं प्रत्याह ।।२१।।

अन्वितार्थप्रकाशिका

युवामिति। युवां नोऽस्माकं सुतौ न भवतः। किन्तु साक्षात्प्रधानपुरुषेश्वरावेव भूभारभूतस्य क्षत्रस्य क्षपणे णार्थमवतीर्णौ तथा स्वयमेव ह स्फुटमात्मजन्मकाले कथितवानसि ।।१८।। तदिति। हे आर्तबन्धो ! तत्तस्मात् त्वद्भजनं गतस्यायुषो व्यर्थत्वात् अद्य आपन्नानां शरमागतानां संसृतिभयमपहन्तीति तथाभूतं तव पदारविन्दमरणं शरणं गतोऽस्मि तावतैव इन्द्रियलालसेन हेतुना मर्त्ये शरीरे आत्मदृक् आत्मबुद्धिः त्वयि परमेश्वरे चापत्यबुद्धिर्जातोऽस्मि ।।१९।। ननु मयि त्यबुद्धिः सत्यैव त्वत्तो जन्माङ्गीकारादित्याशंक्याह–सूतीति। हे उरुगाय ! ननु अजः जन्मरहितोऽप्यहं निजधर्माणां वर्तितधर्ममर्यादानां गुप्त्यै रक्षणायानुयुगं जज्ञे अवतरामीति भवान् सूतीगृहे नौ आवां प्रति जगाद। अतो गगनवत् असङ्गः नानातनूः वराहनरादियाजातीयाः विदधद्भिभ्राणस्त्वं क्रीडान्ते ताः तनूः जहासि तिरोभावयसि। यथा गगनं द्युपाधिकृतनानातनूः विदधत् उपाधिनाशाच्च ताः परित्यजच्च निर्लेपव्यापकत्वादिनिजस्वभावं न परित्यजति तथा भगवतो स्वरूपाणि दधतः परित्यजतश्च न सच्चिदानन्दादिस्वभावत्यागः। अतः भूम्नो व्यापकस्य तव विभूतिरूपां मायां को वेद ोऽपि ज्ञातुं शक्तः। अतस्त्वय्यपत्यबुद्धिर्न युक्ता। यत्तु अनुयुगं प्रतियुगं सुतपाः पृश्निरिति युगं कश्यपोऽदितिश्चेति युगं देवो देवकी चेति युगम् एवं प्रतियुगमहं जज्ञ इति स्वामिपादाः। तत्तु भगवते एवमेवोक्तत्वात्तदभिप्रायेण पुराणेषु नुवादस्य किञ्चिदन्यथाऽपि बहुस्थले दृष्टत्वादत्र तोषिण्यादिरीत्या व्याख्यातम् ।।२०।। आकर्ण्येति। सात्वतर्षभः भगवान् पितुर्वाक्यमाकर्ण्य प्रश्रयेण विनयेनानम्रः प्रहसन् श्लक्ष्णया मधुरया गिरा तं प्रत्याह स्म ।।२१।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नन्वावां तु त्वत्पुत्रौ स्वो न तु भवदुक्तमहत्वार्हावित्युच्यन्ते तत्तत्राह–युवामिति भूभारक्षत्रक्षपणेति। तन्निमित्तम् णावित्यहं जाने तथा त्वं माम् आत्थ जन्मकाले कथितवान् ।।१८।। तत्तस्मात् आपन्नानां शरणागतानां संसृतिभयापहं ते विन्दम् अरणं शरणं गतोऽस्मि। ननु त्वं परमसुखी कुतो वैराग्यं प्राप्त इत्यत्राह–हे आर्तबन्धो ! एतावता लालसेनेन्द्रियभोगेच्छयालमलम्। एवं कुतस्तत्राह ।। यद्येनेन्द्रियलालसेन मर्त्यात्मदृक् मर्त्ये देहे आत्मदृक् अहंबुद्धिः परमात्मनि त्वयि अपत्यबुद्धिः ममेदमपत्यमिति बुद्धिर्यस्यैवम्भूतोऽहमस्मि। अतस्तेनालमलं परिपूर्णत्वम् ।।१९।। परमेश्वरोऽस्मीति मया कदोक्तमिति चेत्तत्राह–सूतीति। निजधर्मगुप्त्यै नौ आवयोः अनुयुगं सुतपाः पृश्निरिति युगलं दितिश्चेति युगलम् अद्य वसुदेवो देवकीति युगलम् इत्थं युगलं प्रति अहं संजज्ञे अवतीर्ण इति भवान् मां सूतीगेहे। स गगनवदसङ्गो निर्लेपश्च त्वं नानातनूः मत्स्यादिविविधदेहान् विदधत् सन् तान् जहासि। हे उरुगाय ! भूम्नः विभूतिरूपां मायामैश्वर्यशक्तिं को वेद ।।२०-२१।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दुपक्रान्तं 'जाने त्वामस्य यत् साक्षात् प्रधानपुरुषौ परौ' इति तदुपसंहरति ।। युवामिति ।। युवां नोऽस्माकं सुतौ न प्रधानपुरुषयोरीश्वरौ भूभारक्षत्रक्षपणे भूभारभूतक्षत्रियनिरसनार्थमित्यर्थः। अवतीर्णौ स्तः। अहमिति जाने इति शेषः। साक्षात् तथा ह स्फुटम् आत्थ कथितवानसि ।।१८।। तत्त इति ।। तत्तस्मात् उपायान्तरशून्योऽहमिति शेषः। हे आर्तबन्धो

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आपन्नानां संसृतिभयमपहन्तीति तथाभूतं ते तव तदारविन्दम् अद्य अरणं शरणं गतः अस्मि । यद्वा अस्मीत्येवाहमर्थगमकमव्य तदा क्रियाऽध्याहार्या । ननु त्वमतिसुखी वृथा किमिति निर्विद्यस इत्यत आह एतावतेति । हे कृष्ण ! यद्यस्मात् मर्त्ये मरणशील शरीरे आत्मदृगात्मबुद्धिः परे प्रकृतिपुरुषशरीरकत्वेऽपि वस्तुतः ततः परस्मिन् त्वयि अपत्यबुद्धिः अहम् अस्मि । अतः एता एतावत्कालपर्यन्तं कृतेन इन्द्रियलालसेन इन्द्रियार्थतृष्णया अलमलं पर्याप्तमित्यर्थः ॥१९॥ नन्वहं परमेश्वर इत्येतत्कदा अवोचमित्यत ॥ सूतीगृह इति ॥ अजः कर्मात्तोत्पत्तिरहितः अपि अहं निजधर्माणां स्वकृतधर्ममर्यादानां गुप्तिः संरक्षणं तस्यै अनुयुगं प्रति संजज्ञे अवतरामि इत्येतत् नौ आवांप्रति भवान् सूतीगृहे जगाद ननु । नन्वन्योऽसौ चतुर्भुजो देव इत्यत आह । हे कृष्ण तव नानातनूः विदधत् बिभ्रत् कार्यार्थमिति शेषः । जहासि च । कार्यसिद्ध्यन्ते इति शेषः । तथापि गगनवदेव यथा गगनं सर्व व्याप्नुवदपि अजगत्स्वस्वभावं तथा भवानपि नानातनुष्ववस्थितोऽपि अजहत्स्वस्वभाव इति दृष्टान्तार्थः । इत्थमहं सम्भाव तत्त्वतस्तव माहात्म्यं को वेदेत्याह । हे उरुगाय ! भूम्नः सर्वगतस्य तव विभूतिमायामाश्चर्यशक्ति को वेद । न कोऽपीत्यर्थः । त चतुर्भुजत्वादिभाक्त्वात्त्वमेव जगादेति भावः ॥२०॥ आकर्ण्येति ॥ सात्वतर्षभः भगवान् श्रीकृष्णः इत्थं पूर्वोक्तप्रकारं पि वाक्यम् आकर्ण्य निशम्य प्रहसन्मन्दहासमाचरन् प्रश्रयानम्रः सन् श्लक्ष्णया मृद्व्या गिरा प्रत्याह ॥२१॥

कृष्णप्रिया

हे नाथ ! आप लोनों मेरे पुत्र नहीं हो परंतु आप दोनों साक्षात् प्रकृति और पुरुष के स्वामी हो नाथ हो । पृथ्वि के उपर बीजरुप हुए क्षत्रियों का क्षय के लिए ही आपने अवतार का अंगीकार कीया है और आश्चर्य है कि आपने स्वयं ऐसा कहा है ॥१८॥ हे शरणागतवत्सल ! हे दीनबन्धु ! आप स्वयं शरणाग जीवों का संसारमय निवारण करने वाले है । में आपश्री के चरणकमलों के शरणमें आया हुं । नाथ ! आ मेरी इन्द्रिय और विषयसुखों की लालसा विरक्ति हो, भोग भुगतने के कारण मुझे त्रिदोषरोग लग गया है प्रथम दोष भोगलालसा, द्वितीय दोष यह मरणशील देहमें आत्मबुद्धि, और तृतीय दोष आप पूर्ण पुरुषोत्त भगवानमें पुत्रबुद्धि इस त्रिदोष से घिरा हुआ मुझे आप छुडायें ॥१९॥ हे प्रभो ! आपने प्रसग्रहमें ही हम दम्पत्ती समक्ष कहा था कि हे माता देवकीजी में प्रत्येक युगमें धर्म की और भक्तों की रक्षा के लिए प्र होता हुं । हे नाथ ! आप आकाश के समान अनेक स्वरुपों स्वीकृत करते हो, और पुनः वह सब स्वरुपों अपनेमें समाविष्ट कर देते हो, हे उरुगाय ! आपका ब्रहढमाजी और शुकदेवजी है, ऐसे आप व्यापक भूम भगवानकी विभूतिरूप मायम को कौन जान सकते है ॥२०॥श्रीशुकदेवजीने भगवान की शरणागति ली औ स्तुति की तब पिताजी को पूर्ण ज्ञान होना चाहिये, ऐसा निर्णय करके वैष्णवों के स्वामि भगवान श्रीकृ विनयपूर्वक निवेदन करते हुऐ स्मित हास्य से मोह उत्पन्न करते हुऐ उत्तर देने लगे ॥२१॥

श्रीभगवानुवाच

वचो वः समवेतार्थं तातैतदुपमन्महे । यन्नः पुत्रान् समुद्दिश्य तत्त्वग्राम उदाहृतः ॥२
अहं [1]यूयमसावार्य [2]इमे च द्वारकौकसः । सर्वेऽप्येवं यदुश्रेष्ठ [3]विमृश्याः सचराचरम् ॥२
आत्मा ह्येकः स्वयञ्ज्योतिर्नित्योऽन्यो निर्गुणो गुणैः । आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते ॥२
खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथाशयम् । आविस्तिरोऽल्प[4]भूर्येको नानात्वं यात्यसावपि ॥२

---

[1] प्रियो ममाचार्य-गो. प्रे. टी. । [2] च दमे-वीर । [3] विश्वं च -विज. ; विभृग्या इति पाठः क्वचित् । [4] भूर्येकनानात्व-वीर

श्रीभगवान्, उवा
॥२२॥ यदुश्रेष्ठ, यूयम्, अ
एकः, स्वयंज्योतिः, नित्य
आपः, भूः, तत्कृतेषु, यथा

उपमन्महे उपमन्य
विमृश्याब्रह्मत्वेनैवान्वेषणीया
प्रतीतेरिति सदृष्टान्तमाह
यथोपाध्याविर्भावतिरोभावा
निर्गुणः सगुणत्वेनेत्यादि बहु

एतत्त्वदुक्तम् । सम
किञ्चेति । अन्वेषणीया द्रष्ट
आदिनाऽल्पादिग्रहः । आत्मसृ
इति । सर्वमिदमौपाधिकमिति

तस्मादात्मनि पुत्र
सहजविनयादिगुणत्वात् स्तुति
एवंपरमेश्वरदेव सर्वस्य भासमान
'सर्वं खल्विदं ब्रह्म' इतिवत् ज्ञ
त्वद्विधानां प्राकट्यं चैतादृशज्ञान
यत्सर्वे जीवा विभावितास्तच्च
पाठेऽपि स एवार्थः । ततः संसा
आत्मा परमात्मा अयं चान्वयः
आत्मसृष्टैः आत्मशक्तेर्माया तदु
दर्शयति-खमिति । अपिशब्देन स
घटन्तेषु यथाशयं कार्याविभा
ततश्चिच्छक्त्यैकविलासेषु द्वारकावै
दर्शितं तत्र सति तव तदुश्रेष्ठस्य कृ

वो युष्माकमिति बहुत्वं
ईश्वरबुद्धिं निरस्य पुत्रबुद्धमेव द्रढय
तदुक्त्वाभिनन्दनेन तं सन्तोष्य सर्व

कर्दमक्षमा

श्रीभगवान्, उवाच। तात, एतत्, वः, वचः, समवेतार्थम्, उपमन्महे, यत्, नः, पुत्रान्, समुद्यदिश्य, तत्त्वग्रामः, उदाहृतः ॥२२॥ यदुश्रेष्ठ, यूयम्, अहम्, असौ, अयम्, इमे, द्वारकौकसः, च, सर्वे, अपि, एवम्, सचराचरम्, विमृश्याः ॥२३॥ हि, आत्मा, एकः, स्वयंज्योतिः, नित्यः, अन्यः, आत्मसृष्टैः, गुणैः, निर्गुणः, तत्कृतेषु, भूतेषु, बहुधा, ईयते ॥२४॥ खम्, वायुः, ज्योतिः, आपः, भूः, तत्कृतेषु, यथाशयम्, आविः, तिरः, अल्प, भूरि, एकः, अपि, असौ, नानात्वम्, याति ॥२५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उपमन्महे उपमन्यामहे समुद्दिश्य विषयीकृत्य तत्त्वग्रामस्तत्त्वसमूहः उदाहृतः सर्वत्र विधस्वेत्याह-अहमिति। एवं विमृश्या ब्रह्मत्वेनैवान्वेषणीयाः किञ्च सचराचरं जगदपि ॥२३॥ ननु, नानाविकारवतां कुतो ब्रह्मत्वमिति चेन्न ब्रह्मण एवोपाधिधर्मैर्बहुधा प्रतीतेरिति सदृष्टान्तमाह द्वाभ्याम्-आत्मा हीति। यथा खादिभूतानि तत्कृतेषु देहेषु बहुधा ईयते पुनश्च यथाशयं यथोपाध्याविर्भावतिरोभावादिरूपेण प्रतीयते न वस्तुतः कुतः एको बहुधा स्वयञ्ज्योतिर्दृश्यत्वेन नित्योऽनित्यत्वेनानन्योऽन्यत्वेन निर्गुणः सगुणत्वेनेत्यादि बहुधात्वं प्रपञ्चीनयम् ॥२४-२६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतत्त्वदुक्तम्। समवेतार्थं श्रुतिस्मृत्युपपन्नार्थं प्रसिद्धार्थं वा। यद्वचः ॥२२॥ न केवलमिम एवापि। तु सर्वमेवेत्याह-किञ्चेति। अन्वेषणीया द्रष्टव्याः "सर्वं खल्विदं ब्रह्म" इति श्रुतेः ॥२३॥ अत्राशङ्कते-नन्विति। तत्कृतेषु पञ्चीकृतभूतेषु। आदिनाऽल्पादिग्रहः। आत्मसृष्टैः प्रकृतिं द्वारीकृत्य। तत्कृतेषु गुणकृतेषु। पुनश्च बहुधात्वेऽपि कुतः कथं बहुधात्वं तदाह-एक इति। सर्वमिदमौपाधिकमिति भावः ॥२४-२५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तस्मादात्मनि पुत्रभावमेव दृढीकर्तुमैश्वर्यमपलपन्नाह-वच इति। नोऽस्मान् अवाङ्गदार्दीश्च पुत्रान् समुद्दिश्य सहजविनयादिगुणत्वात् स्तुतिव्याजेन 'तत्त्वमसि श्वेतकेतो' इत्यादिवदुपदेशास्पदीकृत्य तत्त्वग्रामः परमेश्वरवैभवरूपः ॥२२॥ त्वत्परमेश्वरादेव सर्वस्य भासमानत्वेन तदन्यतया यथावां विभावितौ भवता तथा सर्वैरेव तज्ज्ञानिभिः सर्वे विभाव्या इति भवदुपदेशेनैव 'सर्वं खल्विदं ब्रह्म' इतिवत् ज्ञातमित्याह-अहमिति। सचराचरमिति साकल्ये व्ययीभावः यदुश्रेष्ठेति तव तु तद्युक्तमेवेति तथा तद्विधानां प्राकट्यं चैतादृशज्ञानप्रकाशेन संसारनिस्तारणार्थमेवेति च भावः। अथवा यथा वयं पुत्राः कृपया विभाव्यन्ते तथा सर्वे जीवा विभावितास्तच्च युक्तमेवेत्याह-अहमिति। एवं कृपाविषयत्वेन कृपालुभिर्विमृग्याः अनुसन्धेयाः विमृश्या इति पाठेऽपि स एवार्थः। ततः संसारिणोऽपि निस्तरिष्यन्तीति भावः ॥२३॥ तथा विमृग्यतायां हेतुत्वे युग्मकम् आत्मेति तैर्व्याख्यातम् आत्मा परमात्मा अयं चान्वयः हि यस्मात् आत्मा परमात्मा एव इत्यादिरूपो जीवभेदरूपैस्तटस्थांशैर्बहुधा प्रतीयते तत्रापि आत्मसृष्टैः आत्मशक्तेर्मायाया तदुद्भूतैः सत्त्वादिभिर्गुणैरेव कृतेषु देहेषु बहुधा देवमनुष्यादिरूपैः प्रतीयते ॥२४॥ तदेव सदृष्टान्तं दर्शयति-खमिति। अपिशब्देन समक्रियत्वद्योतनया यथोपमां द्योतयति यथा खादिकं याति तथा असावात्मा स्वकार्येषु वाय्वादिषु घटादिषु यथाशयं कार्याविर्भावाद्यनुरूपमाविर्भावादिकं याति तथा असावात्मा स्वकार्येषु तदनुरूपङ्क तत्तद्यातीति तद्विचक्षणत्वैकविलासेषु द्वारकावैभवेषु किमुतेति तथा दृष्टिस्त्वत्र सुतरामेव कर्तव्या यत एव अहं यूयमसावार्य इति मया साम्यमेव दर्शितं तत्र सति तव तदुश्रेष्ठस्य कृपयापि तेषां संसारिणामपि दैन्यं न सम्भवति तव तुदैन्यमयुक्तमेवेति वास्तवो भावः ॥२५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वो युष्माकमिति बहुत्वं गैरवात्, समवेतार्थं सुसङ्गतार्थम्। हे तातेति परमपूज्यस्य तवैतद्युक्तमेवेति भावः। यद्वा, स्वबुद्धिं निरस्य पुत्रबुद्धमेव द्रढयति-पुत्रानिति, बहुत्वं विनयभरेणात्मनः साधारण्यापादनार्थं श्रीबलदेवाद्यपेक्षया ॥२२॥ एवं तद्वाक्याभिनन्दनेन तं सन्तोष्य सर्वसद्गुणनिधिर्विनयभरेणैवाह-अहमिति। यूयमिति गैरवादेव, श्रीदेवक्याद्यपेक्षया वा। असौ

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ईश्वरत्वेन स्तूयमानोऽयमार्योऽग्रजश्च इमे सर्वेऽपि जीवतया बन्धुत्वादिना वा ज्ञायमानाः । हे यदुश्रेष्ठेति महत्तमस्य ते लघुष्वपि विनयादीदृशी दृष्टिर्युक्तैवेति भावः ॥२३॥ ननु ईश्वरे जीवेषु समदृष्टिः कथं युक्ता ? सत्यम्, जीवानामीश्वरांशत्वेन तदभेदादिति चेत्तर्हि कथं बहुविधास्ते नाम दृश्यन्ते ? इत्यपेक्षायामाह-आत्मेति द्वाभ्याम् । हि अपि एकोऽपि । एवं हि-शब्दस्य यथापेक्षमन्यैरप्यन्वयः । अन्यो देहाद्भिन्नोऽसङ्ग इत्यर्थः । एक इत्यादिविशेषणानां यथापूर्वं बहुधा प्रतीत्यसम्भवे श्रैष्ठ्यम् । आत्मना सृष्टैरिति गुणानामात्माधीनत्वं मायिकत्वं चोक्तम् । तैर्गुणैः कृतेषु खमित्यादिकं दृष्टान्ततयोक्तमिति येत्यायात्येव । अतस्तैरपि व्याख्यातम् - यथा खादिभूतानीति । यथाशयमिति चान्यत्रैव योजितम्, तत्र च खमित्यादेरेकत्वेन सङ्गतेऽपि यातीत्येकवचनपाठे यान्तीति बहुत्वेन व्याख्या तेषां समुच्चयापेक्षया, किंवा यान्तीति बहुवचनपाठ एव । असावित्यनेन यान्तीत्यस्यायोजनादिति आविरित्यादीनां द्वन्द्वेन (द्वन्द्वकरणे [ग]) निरुद्धत्वं स्पष्टमेव । तत्र च यथोत्तरं तेषां श्रैष्ठ्यम् । यथाशयमित्यस्य दृष्टान्तेनापि सम्बन्धः, - घटाद्याश्रयमृदादिभेदेनैव तेषामपि तादृशत्वात् । अन्यत्तैर्व्याख्यातम् । अथवा समवेतार्थमुपमन्महे किम् ? - काक्वा, अपि तु नैव । तत्र हेतुः-यदिति । पुत्रेषु स्नेह एव कार्यः, न तु तत्त्वदृष्टिः, तस्यां सत्यां स्नेहमाहात्म्योक्तेस्तदेवात्राभिप्रेतम् । अतो निजाभीष्टस्नेहविशेषसिद्धये मयीव मदीयेषु सर्वेषु जीवेषु त्वया स्नेह एव कार्य इत्याशयेनाह-अहमिति । यूयं युष्मद्विधाः स्वभ्रात्रादयः सर्वेऽन्येऽपि मत्सम्बन्धिनः । एवं स्नेहविषयत्वेन । ननु इमे आर्यादयस्त्वदीया एव, अन्ये चोच्चावचाः सर्वे कथं त्वयदीया ? जीवानां मदंशत्वेन सर्वेषामेव तत्त्वतो मदीयत्वादिति चेत्तर्हि कथं तेषां नानाविधत्वमित्यत आह-आत्मेति । आत्मना ईश्वरेण सृष्टैर्गुणैर्हेतुभिर्बहुधा सात्त्विकादिभेदेनेयते । किञ्च, खादीनि च यथाशयमाविस्तिरोभावादिकं च प्राप्नोति । अन्यत् समानम् ॥२४-२५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उपमन्महे अभ्युपगच्छामः ॥२२॥ सर्वेऽप्येवं त्वदुक्तप्रकारेणेत्यर्थः ॥२३॥ ईयते भूतेषु व्याप्त इति प्रमाणतो ज्ञायते ॥२४॥ आविस्तृतः आ समन्तात् विस्तृतः व्याप्तः अल्पत्वं विपुलत्वम् एकत्वं कार्यतया नानात्वं तत्तदन्तरात्मत्वादित्यर्थः ॥२५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह-वच इति चतुर्भिः । आत्मनः परमात्मतत्त्वं गोपयन्नाह । हे तात ! वो युष्माकमेतद्वचो वाक्यं समवेतार्थमुपपन्नार्थम् उपमन्महे उपमन्यामहे अभ्युपगच्छाम इति यावत् । यद्वा । समवेतार्थं समवेतः अस्मच्छिक्षागर्भितः अर्थो यस्य तथाभूतम् उपलभामह इत्यर्थः । कुतः किञ्च तद्वच इत्यत आह-यदिति । यद्यतः पुत्रानस्मान् समुद्दिश्य विषयीकृत्य लक्ष्यीकृत्येति यावत् तत्त्वग्रामः तत्त्वसमुदायः उदाहृतः सम्यक् निरूपितो येनेत्येतद्वचः सर्वं ब्रह्मात्मकम् इत्येवमस्मान् ग्राहयितुमस्मानेव विषयीकृत्योक्तमिति भावः ॥२२॥ तदेवाह-अहमिति । असावार्योऽग्रजः सर्वे द्वारकौकसः किं बहुना हे यदुश्रेष्ठ ! सचराचरं विश्वं कृत्स्नं जगच्चैवं परमात्मात्मकम् । तत्कारणं तन्निर्वाह्यं चेत्यर्थः ॥२३॥ कुत इत्यत आह-आत्मेति । हि यस्मादात्मा परमात्मा तावदात्म स्वेनैव सृष्टैः प्राकृतैर्गुणैर्गुणपरिणामात्मकैर्महदादिभिः तत्कृतेषु महदादिभिः सृष्टेषु भूतेषु देवमनुष्यादिषु बहुधा ईयते व्याप्त प्रमाणतो ज्ञायते कथम्भूतः स्वयंज्योतिः स्वयंप्रकाशस्वरूपः अन्यः देवादिशरीरतदभिमानिजीवभ्योऽन्यः ॥२४॥ तत्र दृष्टान्तमा खमिति । यथा खादयः तत्कृतेषु आकाशादिभिः कृतेषु यथाशयं व्याप्यानुरूपम् आविष्कृताल्पभूर्येकनानात्वं यान्ति तद्वत् परमात्मापि क्वचिदाविष्कृतत्वं क्वचिदल्पत्वं क्वचिद्भूरित्वं विपुलत्वं स्वतस्त्वैकत्वं व्याप्य बहुत्वप्रयुक्तं नानात्वं च यातीत्यर्थः । एकस्यानेकेषु व्याप्तौ तत्प्रयुक्तनानात्ववस्तुश्चैकत्वे चायं दृष्टान्तः न वस्तुतो व्याप्यव्यापकयोरेके द्रव्यत्वेऽपीति ज्ञेयम् ॥२५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तथाप्यहो मुनिवाक्येन तज्ज्ञानांशः पुनरुदित इति तथैवाह-वच इति । समुद्दिश्य सहजविनयादिगुणत्वात् श्रुतिव्याजेनोपदेशासं तत्त्वग्रामः परमेश्वरस्य वैभवरूपः । यथा वयं पुत्राः कृपया विभाव्यन्ते यथा यत्सर्वे जीवा विभाविताः ॥२२॥ तच्च युक्तमेवेत्याह-

---

अहमिति । एवं कृपाविषयत्वेन
हेतुत्वे युग्मकम्-आत्मेति ।

समवेतार्थं युक्तार्थम्
॥२२॥ न केवलं पुत्रा एवा
परमात्मत्वेनैवान्वेषणीयाः विमृ
कर्तव्येति भावः ॥२३॥ ननु ना
परमात्मा तथा तथा प्रतीतो भव
प्रतीयते कुत्र तत्कृतेषु भूतेषु देहे
खादिभूतानि तत्कृतेषु घटादिषु
सर्वदैकरसोऽपि आविर्भावं तिरो

हे तात ! वः युष्माकम्
तत्त्वसङ्ग्रह एवं उदाहृतः सम्यक्
सचराचरं जगदपि तथैव द्रष्टव्यम्
यथोपाधि आविर्भावादिरूपेण बहु
वृक्षादौ तिरोभावः । मशकादौ अल

समवेतार्थं सम्पन्नार्थम्
मदंशाः जीवाः तत्सरूपगुणादिकः
॥२३॥ तत्र स्वं परमेश्वरमात्मानं
समानातिशयशून्यः स्वयंज्योतिः स्व
जातावेकवचनम् । नित्यः अविना
जगत्कारणत्वादीन् गुणान् सूचयन् ब
देवोऽहं मनुष्योऽहमित्याद्यनेकधा ई
शरीरेषु यथाशयम् आशयं वासनाम
देवादिदेहे आविर्भावं वृक्षादौ तिरोभा
यातीत्यर्थः । अपि-शब्दान्मद्भजनेन

आदौ तदुक्तमभिनन्दति-वचं

महत्तमस्य ते लघुष्वपि
श्वरांशत्वेन तदभेदादिति
पि । एवं हि-शब्दस्य
तीत्यसम्भवे श्रैष्ठ्यम्।
क्तमिति येत्यायात्येव।
त्यादेरेकत्वेन सङ्गतेऽपि
ाठ एव । असावित्यनेन
यथोत्तरं तेषां श्रैष्ठ्यम्।
यत्तैर्व्याख्यातम् । अथवा
तु तत्त्वदृष्टिः, तस्यां सत्यां
षु त्वया स्नेह एव कार्य
स्नेहविषयत्वेन । ननु इमे
त्वतो मदीयत्वादिति चेत्तर्हि
देनेयते। किञ्च, खादीनि च

स इति प्रमाणतो ज्ञायते ॥२४॥
त्मत्वादित्यर्थः ॥२५॥

चो वाक्यं समवेतार्थमुपपन्नार्थम्
गर्भितः अर्थो यस्य तथाभूतम्
षयीकृत्य लक्ष्यीकृत्येति यावत्
् ग्राहयितुमस्मानेव विषयीकृत्य
यदुश्रेष्ठ ! सचराचरं विश्वं कृत्स्नं
यस्मादात्मा परमात्मा तावदात्मना
नुष्यादिषु बहुधा ईयते व्याप्त इति
भ्योऽन्यः ॥२४॥ तत्र दृष्टान्तमाह-
ाल्पभूर्येकनानात्वं यान्ति तद्वदसौ
हुत्वप्रयुक्तं नानात्वं च यातीत्यर्थः।
द्रव्यत्वेऽपीति ज्ञेयम् ॥२५॥

गुणत्वात् श्रुतिव्याजेनोपदेशास्पदीकृत्य
ता: ॥२२॥ तच्च युक्तमेवेत्याह-

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अहमिति। एवं कृपाविषयत्वेन कृपालुभिर्विमृग्या अनुसन्धेयाः । ततः संसारिणोऽपि निस्तरिष्यन्तीति भावः ॥२३॥ तथा विमृग्यतायां युग्मकम्-आत्मेति । आत्मा परमात्मा अस्यार्थान्तरम् ॥२४-२५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

समवेतार्थं युक्तार्थम् उपमन्महे आधिक्येन मन्यामहे समुद्दिश्य शिक्षणार्थं 'तत्त्वमसि श्वेतकेतो' इत्यादिवदुपदेशास्पदीकृत्य ॥२२॥ न केवलं पुत्रा एवास्मदादयः एवं परमात्मत्वेन द्रष्टव्याः अपि तु सर्वे एवेत्याह-अहमिति । एवं विमृग्याः मत्वेनैवान्वेषणीयाः विमृश्या इति पाठे द्रष्टव्याः एवं च प्राप्तयुष्मच्छिक्षितैरस्मदाद्यैरपि प्रद्युम्नादिष्वपि सर्वत्रात्मदृष्टिरेव कर्तव्येति भावः ॥२३॥ ननु नानाविकारवन्तो बहव एते कुतः परमात्मरूपाः मन्तुं शक्याः सत्यं परमात्मसृष्टानामुपाधीनां धर्मैरेव परमात्मा तथा तथा प्रतीतो भवतीति सदृष्टान्तमाह-आत्मा हीति द्वाभ्याम् । आत्मा परमात्मा आत्मसृष्टैः स्वसृष्टैर्गुणैर्बहुधा ईयते ईयते कुत्र तत्कृतेषु भूतेषु देहेषु स्वयंज्योतिरपि दृश्यत्वेन नित्योऽप्यनित्यत्वेन अन्योऽप्यनन्यत्वेन निर्गुणोऽपि सगुणत्वेन यथा खादिभूतानि तत्कृतेषु घटादिषु आविस्तिरोभावादिकं यथाशयम् आशयमनतिक्रम्य याति तथैवासावेकः परमात्मापि याति एकरसोऽपि आविर्भावं तिरोभावं च व्यापकोऽपि अल्पत्वं भूरित्वं च एकोऽपि नानात्वम् ॥२४-२५॥

गूढार्थदीपिनी

हे तात ! वः युष्माकम् एतत् वचः समवेतार्थं श्रुतिस्मृतिसम्मतार्थं यथार्थं वा उपमन्यामहे । नोऽस्मान् उद्दिश्य तत्त्वग्रामः सङ्ग्रह एवं उदाहृतः सम्यक् निरूपितः ॥२२॥ असौ आर्यः श्रीरामः सर्वेऽप्येवं विमृश्या ब्रह्मत्वेनैव द्रष्टव्याः किं बहुना सचराचरं जगदपि तथैव द्रष्टव्यम् ॥२३॥ यथा खादिभूतानि तत्कृतेषु घटादिषु देवमनुष्यादिषु बहुधा ईयते पुनश्च यथाशयं उपाधि आविर्भावादिरूपेण बहुधा प्रतीयते न वस्तुतः । कुः एकः अन्यः देहादिभ्योऽन्यः । निर्गुणश्च । तत्र मनुष्यादौ आविर्भावः [illegible] तिरोभावः । मशकादौ अल्पत्वम् । गजादौ भूरित्वं महत्त्वम् । स्वतः एकत्वम् उपाधितो नानात्वम् ॥२४-२५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

समवेतार्थं सम्पन्नार्थम् उपमन्महे सूपपन्नं मन्यामहे ॥२२॥ एवमेव अहं परमेश्वरः आर्यो मदवतारः द्वारकौकसः जीवाः तत्सरूपगुणादिकः पृथक्पृथग्विमृश्याः शास्त्राचाराश्रयणेनान्वेषणीयाः । किं बहुना सचराचरं विश्वं च विमृश्यम् ॥२३॥ तत्र स्वं परमेश्वरमात्मानं चेतनमचेतनं च सङ्क्षेपतः स्वयमाह-आत्मेति द्वाभ्याम् । आत्मा परमेश्वरोऽहम् एकः समानातिशयशून्यः स्वयंज्योतिः स्वप्रकाशः हि-शब्दात्सर्वकारणत्वसर्वात्मत्वसर्वशक्तित्वादिगुणयोगो ज्ञेयः । अन्यो जीवः जात्येकवचनम् । नित्यः अविनाशी एव तद्भेदान् सूचयति-निर्गुणः प्राकृतगुणशून्यो मुक्तः कश्चिज्जीवः परमेश्वरस्य सर्वकारणत्वादीन् गुणान् सूचयन् बद्धजीवमाह-तत्कृतेषु परमात्मकृतेषु भूतेषु आत्मसृष्टैः परमात्मकृतैः गुणैः सत्त्वादिभिर्बहुधा देवोऽहं मनुष्योऽहमित्याद्यनेकधा ईयते ॥२४॥ एतदेव प्रपञ्चयति-खमिति । यानि खादीनि भूतानि तत्कृतेषु खादिकृतेषु देहेषु यथाशयम् आशयं वासनामनतिक्रम्य आविस्तिरोऽल्पभूरेको नानात्वमसौ याति एक एव अणुपरिमाणकः जीवः क्वचिद्देहे आविर्भावं वृक्षादौ तिरोभावं मत्कुणादौ अल्पभावं क्वचित्पुत्रपौत्रादिमत्त्वेन भूरिभावम् अन्यदा एकत्वमेवं नानात्वं यातीत्यर्थः । अपि-शब्दान्मद्भजनेन मद्भावं यातीति ज्ञेयम् ॥२५-२९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

आदौ तदुक्तमभिनन्दति-वचो वः समवेतार्थमिति । अस्मिन् वाक्ये अर्थः समवेतोऽस्ति । एतद्वाक्यं तया उपमन्महे स

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

कोऽर्थ इति चेत्तत्राह-यन्नः पुत्रान् समुद्दिश्येति । इदं स्तुतिर्न भवति किन्तूपदेशः यथा तत्त्वमस्यादिवाक्यमेवमिदमपि ब्रह्मात्मभावमित्यर्थः । अङ्गीकारे दोषः स्यात् अनङ्गीकारे च ततोऽन्यथा वर्णनम् ॥२२॥ एवमुक्तस्य प्रकारमुक्त्वा तत् सर्वदुःखनिवृत्त्यर्थं पूर्णं बोधितुम् उपदिशति-अहं यूयमिति । यथा मां जानासि तथा सर्वानेव जानीहि । अखण्डं कृष्णवत्त्वं यथा तत्तु निरूपितमितिवत् सर्वस्य शुद्धभगवत्त्वे ज्ञाते न किञ्चिदवशिष्यत इति । भगवांस्तदेवोपदिशति समुदायपर्यवसानव्यावृत्त्यर्थं प्रत्येकमनुवदति अहमिति दृष्टान्तानुवादः यूयमिति पितुरेव बहुवचनम् असावार्यो बलभद्रः इमे च द्वारकावासिनः अन्ये च ब्रह्माण्डस्थाः सर्व एव एवमेव विमृश्याः साक्षाद्भगवानेवेति सचराचरमिति स्थावरजङ्गमेषु यथा मयि तथा बुद्धिः कर्तव्येत्यर्थः ॥२३॥

यथेच्छां भगवान् विष्णुः पुरस्कृत्याऽभवत्स्वयम् । एवं सर्वत्र तत्तत्स्यामिति जातः स्वयं हरिः ॥

नन्वेवं सति ब्रह्मानन्त्यं स्यात् । ब्रह्मबुद्धिपरत्वे तु आरोपितज्ञानविषयत्वेन अनित्यफलसाधकता स्यादिति शङ्कां दूरीकुर्वन् आधाराधेयभावं च दूरीकुर्वन् सर्वत्रात्मप्रतीतिसिद्ध्यर्थं च अखण्डात्मत्वं बोधयति-आत्मा ह्येकः स्वयंज्योतिरिति । अतति व्याप्नोतीत्यात्मा । परिच्छेदे आत्वमेव भज्येत एकेनैव कार्यसिद्धौ द्वितीयकल्पना व्यर्था भोगस्य तु न व्यवस्थापकत्वम् ईश्वरेच्छयैव व्यवस्थासम्भवात् । या क्रिया यदीयव्यधिकरणगुणजन्या सा संयागासमवायकारणिकेऽतिव्याप्तिधितेव ईश्वरेच्छया: सर्वत्र कारणत्वं तत्संयोगः जीवावात्मसु न सङ्गच्छते अजसङ्गस्यानङ्गीकारात् तस्माद्भोगस्यान्यथाप्युपपत्तेरेक एवात्मा युक्तश्चायमर्थः **'एकमेवाद्वितीयम्' 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः । नित्यः सर्वगतः'** इत्यादिवाक्यसहस्रैः आत्मन एकत्वं निर्णीतं नानात्मानो व्यास्थात इति सूत्रमकारप्रश्लेषेणापि योजनीयम् । अव्यवस्था अविचार इति ननु जवस्य नानात्वे परिहृतेऽपि जीवब्रह्मणोर्भेदोऽङ्गीकर्तव्यः । अन्यथा ज्ञानोपदेष्टृभावात् मोक्षो न स्यात् अत आह-स्वयंज्योतिरिति । स हि स्वप्रकाशः नास्यात्मप्रकाशार्थं कश्चिदपेक्ष्यते मोक्षार्थं वा अन्यथाऽऽत्मवैलक्षण्यं नास्तीत्युक्तमेव पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपीति तत् नानात्वाज्ञाने अग्रे निरूपयिष्यते । वास्तवस्त्वयमर्थः । कालेन स्वप्रकाशनिवृत्तिमाशंक्याह-नित्य इति । सदैकरूप इत्यर्थः । तर्हि काल एवायं स्यात् तत्राह-अन्य इति । कालादन्यः यस्य चेष्टा काल इति चेष्टामाहुरिति वाक्यात् ननु तादृशः परमात्मा पुरुषोत्तमः ननु जीव इति चेत्तत्राह-निर्गुण इति । अयमेव जीवो गुणातीतः न तु ततोऽन्योस्तीति कश्चित् नन्वेवं सति नानात्वमुच्चावचत्वं च घटत इति चेत्तत्राह-आत्मसृष्टैर्गुणैः तैरेव गुणैः कृतेषु देवतिर्यङ्मनुष्यादिदेहेषु भूतशब्दवाच्येषु आधारवशात् अग्निरिव बहुधा ॥२४॥ एवमेकस्यानेकधा भानप्रकारमुक्त्वा नानात्वमपि व्यवस्थया आह-खं वायुरिति । पञ्चमहाभूतानि तत्कृतेषु भौतिकेषु आशयमनुल्लङ्घ्य आविस्तिरोऽल्पभूर्येक इति तान्येव भूतानि क्वचिद्विस्तारं प्राप्नुवन्ति हस्त्यादिशरीरे क्वचिदल्पत्वं मशकादौ क्वचिद्बहुरूपत्वं विचित्रपदमयूरादौ क्वचिदेकत्वं कोकिलादौ धात्वादौ वा एवं परिमाणरूपादिवैलक्षण्यात् पृथिव्यादीनां नानात्वं एवमात्मनोऽपि तत्तदुपादानोपलम्भकतया नानात्वमित्यर्थः । उच्चनीचत्वं देहकृतं नानात्वं परिमाणधर्मकृतमिति वस्तु स्वरूपमेकमेवेत्यर्थः । यथा सर्वत्र भौतिकेषु पृथिव्यादिरेक एव । ननु कार्यवैलक्षण्येन कारणभूतायाः पृथिव्याः नानात्वं वैलक्षण्यं वा कल्प्यते पृथिवीगुणत्वेनैव तत्सिद्धेः एवं सच्चिदानन्दधर्मतारतम्येन ऐश्वर्यादितारतम्येन श्रियादितारतम्येन वा नानात्वम् उपपद्यत इति न स्वरूपभेदस्तदनुरोधेन कल्पनीयः उपाधिकृतवैलक्षण्यमिति सर्वं सुस्थम् असावप्यात्माऽपि अपिशब्देन सङ्गृहीतानि अतः स्वेच्छया स एव सर्वरूपेण तिष्ठतीति विचारप्रवणं चित्तं कृत्वा यथा मां जानासि तथैव सर्वं वा इत्युपदेशः एष एवाऽखण्डाद्वैतवादः ॥२५॥

श्रीसुबोधिनीसारः

हे तात ! वो युष्माकं वचः समवेतार्थं निष्कृष्टार्थत्वेन सिद्धान्तरूपमेतद्द्वयं मन्यामहे । पुत्रान् नोऽस्मान् विषयीकृत्य तत्त्वानां ग्रामः समूहः उक्त इति यत् ॥२२॥ इमामेव दृष्टिं ब्रह्मविद्याख्यां सर्वतः कुरु इत्याह । अहं कृष्णः यूयं असावार्यो बलदेवः इमे च द्वारकावासिनः सचराचरं जगदपि सर्वे एवं ब्रह्मत्वेन विमृश्याः विचारणीयाः हे यदुश्रेष्ठ !

उपाधिधर्मैर्नानात्वमाह ।
प्रतीयते ॥२४॥ आकाशादय
नानात्वं याति ॥२५॥

स्नेहं सूचयन् सम्बो
तत्त्वग्रामः तत्त्वसमूह उदाहृत
॥२२॥ यदुश्रेष्ठत्वात्तवेदमेवो
यूयमसावार्यः बलभद्रः इमे च
निश्चेतव्या इत्यर्थः ॥२३॥ ननु
। यथा खादीनि महाभूतानि त
आत्मसृष्टैर्गुणैः प्राकृतगुणपरि
यथोपाधि आविर्भावतिरोभावा
भूरित्वं महत्त्वम् । स्वत
शरीरादिभ्योऽन्योऽप्यनन्यत्वेन,

वच इति । हे तात ! यत्
तत्त्वग्रामः तत्त्वसमूह ईश्वरवैभव
॥२२॥ अहमिति । हे यदुश्रेष्ठ !
परमात्मात्मकतयैव विमृश्याः वि
आत्मेति । आत्मा हि एकः स्वयंज
देवमनुष्यादिषु यथाशयं यथोपा
शरीरादिभ्योऽन्योऽप्यनन्यत्वेन निगु
एतानि भूतानि तत्कृतेषु घटादि
आविस्तिरोऽल्पभूरित्वं याति एको
भूरित्वं महत्त्वं स्वत एकत्वम् उपा

श्री
समवेतार्थं युक्तार्थमुपमन्महे
उदाहृतः कथितः ॥२२॥ सर्वदेव
कालप्रकृतिपुरुषादीनामीश्वरो नियाम

तदेवाह वच इति चतुर्भिः ॥
समवेतार्थं युक्तार्थम् उपमन्महे अभ्यु
लभामह इत्यर्थः । किञ्च तद्वच इत्य

श्रीसुबोधिनीसारः

धिधर्मैर्नानात्वमाह । आत्मा एकः स्वयंप्रकाशः नित्योऽन्योऽभिन्नः आत्मसृष्टैर्गुणैः तत्कृतेषु भूतेषु देहेषु बहुधा ईयते ॥२४॥ आकाशादयो यथा तत्कृतेषु पाञ्चभौतिकेषु तथा यथाशयं प्रत्युपाधि प्रकटान्तर्हिताल्पभूरिनानात्वमसावेकोऽपि नात्वं याति ॥२५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्नेहं सूचयन् सम्बोधयति-तातेति । बहुवचनं महत्त्वसूचकम् । यत् येन वचनेन नः अस्मान् पुत्रानुद्दिश्य विषयीकृत्य ग्रामः तत्त्वसमूह उदाहृतः सम्यङ्निरूपितः, तदेतत् वो युष्माकं वचः समवेतार्थं यथार्थमुपमन्महे उपमन्यामहे इत्यन्वयः ॥२२॥ यदुश्रेष्ठत्वात्तवेदमेवोचितम् इत्याशयेन सम्बोधयति-यदुश्रेष्ठ इति । न केवलमावयोरेवेयं दृष्टिः कर्तव्या, किन्तु अहं यूयमसावार्यः बलभद्रः इमे च सर्वे द्वारकावासिजनाः किं बहुना सचराचरं सर्वेऽप्येवं परमात्मात्मकतयैव विमृश्याः विचार्य श्चेतव्या इत्यर्थः ॥२३॥ ननु सचराचरस्य कथं परमात्मकत्वम् इत्यपेक्षायां सर्वात्मत्वात् इति सदृष्टान्तमाह-आत्मा ह्येक इति यथा खादीनि महाभूतानि तत्कृतेषु स्वकार्येषु घटादिषु यथाशयं यथाकार्यमेवाविर्भावतिरोभावादि यान्ति, एवमसावात्मापि आत्मसृष्टैर्गुणैः प्राकृतगुणपरिणामात्मकैर्महदादिभिर्हेतुभिः तत्कृतेषु महदादिसृष्टेषु भूतेषु देवमनुष्यादिषु बहुधा ईयते यथाशयं यथोपाधि आविर्भावतिरोभावादिरूपेण प्रतीयते । तत्र मनुष्यादावाविर्भावः, वृक्षादौ तिरोभावः, मशकादावल्पत्वम्, हस्त्यादौ त्वं महत्त्वम् । स्वत एकः उपाधिभेदाच्च नाना । तत्रापि स्वयंज्योतिर्दृश्यत्वेन, नित्योऽप्यनित्यत्वेन, दिभ्योऽन्योऽप्यनन्यत्वेन, निर्गणोऽपि सगुणत्वेन, इत्यादि बहुधात्वं बोध्यम् ॥२४-२५॥

अन्वितार्थप्रकाशिका

वच इति । हे तात ! यत् येन वचनेन नः अस्मान् पुत्रानुद्दिश्य शिक्षणार्थं "तत्त्वमसि श्वेतकेतो" इति वदुपदेशविषयीकृत्य ग्रामः तत्त्वसमूह ईश्वरवैवभरूपः उदाहृतः सम्यङ्निरूपितः तदेतत् वो युष्माकं वचः समवेतार्थं यथार्थमुपमन्महे उपमन्यामहे ॥ अहमिति । हे यदुश्रेष्ठ ! अहं यूयमसावार्यः बलभद्रः इमे च सर्वे द्वारकावासिजनाः किं बहुना सचराचरं सर्वेऽप्येवं मात्मकतयैव विमृश्याः विचार्य निश्चेतव्या इत्यर्थः । विमृग्या इत्यपि पाठः । यद्वा । सचराचरमिति क्रियाविशेषणम् ॥२३॥ त्मेति । आत्मा हि एकः स्वयंज्योतिर्नित्यः अन्यो देहादिभ्यो भिन्नः निर्गुणश्चापि सन् आत्मसृष्टैर्गुणैर्हेतुभिः तैर्गुणैः कृतेषु भूतेषु मनुष्यादिषु यथाशयं यथोपाधि बहुधा ईयते प्रतीयते न वस्तुतः । कुतः एको ज्योतिर्दृश्यत्वेन नित्योऽप्यनित्यत्वेन दिभ्योऽन्योऽप्यनन्यत्वेन निर्गुणोऽपि सगुणत्वेनेत्यादि ॥२४॥ एतदेव सदृष्टान्तं दर्शयति-खमिति । यथा खं ज्योतिरापो भूः भूतानि तत्कृतेषु घटादिषु आविस्तिरोभावादिकं यान्ति तथा असावात्मापि आविस्तिरोऽल्पभूरिभावप्राधान्येन आविस्तिरोऽल्पभूरित्वं याति एकोऽपि नानात्वं च याति । तत्र मनुष्यादावाविर्भावः वृक्षादौ तिरोभावः मशकादावल्पत्वम् गजादौ त्वं महत्वं स्वत एकत्वम् उपाधितो नाना ॥२५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

समवेतार्थं युक्तार्थमुपमन्महे मन्यामहे यद्यस्मात् नोऽस्मान् पुत्रान् समुद्दिश्य तत्त्वग्रामः ममत्वरूपविभूतियथार्थज्ञानसमुदाय यः कथितः ॥२२॥ सर्वदेवता सर्वदेवमाता अदितिः ॥२३॥ समाश्राव्य सम्बोधनं कृत्वा प्राह ॥२४॥ विश्वसृजां कृतिपुरुषादीनामीश्वरौ नियामकौ आदिपुरुषौ सर्वेषामादिभूतौ अनादिसिद्धदिव्यपुरुषाकारविग्रहौ ॥२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह वच इति चतुर्भिः ॥ वच इति ॥ तत्राप्यात्मनः परमात्मतां गोपायन्नाह । हे तात ! वो युष्माकम् एतत् वचो वाक्यं र्थं युक्तार्थम् उपमन्महे अभ्युपगच्छाम इति यावत् । यद्वा । समवेतोऽस्मच्छिक्षागर्भितोऽर्थो यस्य तथाभूतम् उपमन्महे इत्यर्थः । किञ्च तद्वच इत्यत आह ॥ यद्यस्मात् पुत्रान् नोऽस्मान् समुद्दिश्य विषयीकृत्येति यावत् । तत्त्वग्रामस्तत्त्वसमुदायः

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उदाहृत: येन सम्यक् निरूपित: इत्येतद्वच: हे पुत्रौ ! सर्वमिदं ब्रह्मात्मकमेव नाब्रह्मात्मकमित्येवमस्मान् ग्राहयितुमस्मानेव विषयीकृत्योक्तमिति भाव: ॥२२॥ तदेवाह ॥ अहमिति ॥ अहं यूयम् असौ आर्य: अग्रज: सर्वे इमे द्वारकौकस: च एवं विमृश्या: परमात्मनिर्वाह्यत्वात्परमात्मशरीरका एव विचार्या इत्यर्थ: । किं बहुना । हे यदुश्रेष्ठ ! सचराचरं चराचरात्मकमिदं कृत्स्नं जगच्चापि एवं विमृश्यम् । परमात्मनिर्वाह्यत्वात्परमात्मशरीरकमेव विमृश्यमित्यर्थ: ॥२३॥ कुत इत्यत आह ॥ आत्मेति ॥ आत्मा परमात्मा तावत् एक: स्वसमाभ्यधिकरहित: स्वयंज्योति: स्वयंप्रकाश: नित्य: 'नित्यो नित्यानाम्' इति श्रुते: । निर्गुण: प्राकृतगुणवर्जित: सन् अन्य: देवादिशरीरतदभिमानिजीवेभ्य: स्वरूपत: पृथग्भूत: सन्नपि आत्मसृष्टैरात्मना स्वेनैव सृष्टै: गुणै: प्राकृतैर्गुणपरिणामात्मकैर्महदादिभि: कृत्वा तत्कृतेषु महदादिभि: सृष्टेषु भूतेषु देवमनुष्यादिषु बहुधा ईयते व्याप्त इति प्रमाणतो ज्ञायते हि ॥२४॥ तत्र दृष्टान्तमाह ॥ खमिति ॥ यथा खमाकाशं वायु: ज्योतिस्तेज: आप: भू: खादीनि पञ्च भूतानीत्यर्थ: । तत्कृतेष्वाकाशादिकृतेषु यथाशयं व्याप्यानुरूपम् आविराविष्कृतत्वं तिरस्तिरोभावम् अल्पमल्पत्वं भूरि भूरित्वम् एक एकत्वं नानात्वं नानाभावं च याति । यद्वत् असौ अपि परमात्मापि क्वचिदाविष्कृतं क्वचित्तिरोहितत्वं क्वचिदल्पत्वं क्वचिद्भूरित्वं विपुलत्वं स्वतस्त्वेकत्वं नानात्वं व्याप्य बहुत्वप्रयुक्तं नानाभावं च यातीत्यर्थ: । एकस्यानेकेषु व्याप्तौ तत्प्रयुक्तनानात्वे वस्तुतश्चैकत्वे चायं दृष्टान्त: न वस्तुतो व्याप्यव्यापकयोरेकद्रव्यत्वेऽपीति ज्ञेयम् । क्षेपका अप्येते पाठकवाचकत्रपारक्षणाय व्याख्याता: ॥२५॥

कृष्णप्रिया

पिताजी ! आपके वाक्य सत्यार्थ से परीपूर्ण है, ऐसा हम मानते है, आपने तो पुत्र को लक्ष्य करके ब्रह्मज्ञान का समूह का सुव्यवस्थित वर्णन निरूपण किया है ॥२२॥ हे यदुकुलश्रेष्ठ पिताजी ! मैं, आप, श्रीबलभद्रजी और सर्व द्वारकावासीलोग इतना ही नहीं परंतु स्थावर जंगम सहित संपूर्ण विश्व भी साक्षात् भगवद्रूप है, ऐसा आपने मेरे लिये कहा उसी तरह आप सबमें आत्मबुद्धि कीजिये ॥२२॥ पिताजी आत्मा अ है, नित्य है, स्वयं प्रकाशी है, आत्मा काल स्वरूप से भिन्न है, काल स्वयं आत्मा की पेष्टारुप है, वह जीवसे भी भिन्न है, क्योंकि जीव तो गुणवाला है, आत्मा निर्गुण है, खुदने उत्पन्न किये गुणों से देव-मनुष्य-पशु आदि स्वरूप से अनेक प्रकार का दिखाइ पडता है ॥२४॥ आकाश, वायु, तेज, जल, पृथ्वी आपसे प्रगट हुए यह पंचमहाभूत है, वह घट, पट आदि वस्तुओं में अनेक प्रकार प्रतीत होता है, और उपाधि धर्मो से आविर्भाव तिरोभावादि द्वारा अल्प और अधिक दीखाइ देता है, इसी तरह आत्मा भी अनेक दीखाई देता है ॥२५॥

श्रीशुक उवाच

एवं भगवता राजन् वसुदेव उदाहृतम् । श्रुत्वा विनष्टनानाधीस्तूष्णीं प्रीतमना अभूत् ॥२६॥
अथ तत्र कुरुश्रेष्ठ देवकी सर्वदेवता । श्रुत्वाऽऽनीतं गुरो: पुत्रमात्मजाभ्यां सुविस्मित: ॥२७॥
कृष्णरामौ समाश्राव्य पुत्रान् कंसविहिंसितान् । स्मरन्ती कृपणं प्राह वैक्लव्यादश्रुलोचना ॥२८॥

कर्दमक्षमा

श्रीशुक:, उवाच ।

राजन्, एवं, भगवता, उदाहृतम्, श्रुत्वा, विनष्टनानाधी:, प्रीतमना:, वसुदेव:, तूष्णीम्, अभूत् ॥२६॥ कुरुश्रेष्ठ, अथ, सर्वदेवता, देवकी, आत्मजाभ्याम्, गुरो:, आनीतम्, पुत्रम्, श्रुत्वा, सुविस्मिता ॥२७॥ कंसविहिंसितान्, पुत्रान्, स्मरन्ती, अश्रुलोचना, कृष्णरामौ, समाश्राव्य, वैक्लव्यात्, कृपणम्, प्राह ॥२८॥

सुविस्मिता सती

एवमित्थम् ॥२

एवमात्मैश्वर्यगो
नानाधीर्मुन्याद्युपदिष्टैश्वस्यादि
विरोधकमैश्वर्यज्ञानं शमयित्व
श्रीकृष्णरामाभ्यामानीत
श्रीवसुदेवसहिततादृशप्रेमसंव
देवतेति श्रीभगवन्मातृत्वलील
लीलशक्त्या सम्पादितेति ज्ञेय

भगवता अद्भुता
शत्रुमित्रादिबुद्धिस्तामसादिबुद्धि
पुत्रया सहजस्नेहसद्भावना-ज
श्रीभगवदादिष्टप्रकारेण तस्मिन् सं
हे राजन्निति । यद्वा, प्रीतमनस्त्वे
श्रीवसुदेवस्य तथा तूष्णीम्भावा
प्रागेव जातातिविस्मया । आत्मज
तदात्मजता श्रीवसुदेवपुत्रत्वात्
यद्वा, कंसेन विहिंसितानिति पुत्रा
अतो वैक्लव्यात् पुत्रस्नेहवैवश्याद
निर्देशस्तस्मिन् स्नेहाधिक्येन समा
यद्वा, श्रीबादरायण: श्रीकृष्ण एव

विनष्टनानाधी: अब्रह्मात्म

एवमिति । उदाहृत: उक्त
अत एव प्रीतमनास्तूष्णीं बभूव
आत्मजाभ्यां रामकृष्णाभ्यां गुरो
वैक्लव्यादश्रूणि लोचनयोर्यस्या:

श्रीधरस्वामिविरचिता भावार्थदीपिका

सुविस्मिता सती ॥२७॥ समाश्राव्य सम्बोध्य ॥२८-२९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमित्थम् ॥२६॥ अथ मङ्गलारम्भे । तत्र तदा ॥२७॥ कृपणं दीनम् ॥२८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमात्मैश्वर्यगोपनपूर्वकस्वविषयकपुत्रभावनारक्षणाभिसन्धिप्रकारेण भगवतोदाहृतं श्रुत्वा विनष्टा नाधीर्मुन्याद्युपदिष्टैश्वस्यादिज्ञानं यस्मात्तथाभूतः प्रीतमनास्तस्मिन् सप्रेमचित्तस्तूष्णीमेवाभूदिति ॥२६॥ एवं पितुः स्वस्मिन् पुत्रभावस्य विरोधकमैश्वर्यज्ञानं शमयित्वा मातुरप्यन्यत्र पुत्रभावमशमयदिति तत्प्रसङ्गमारभते अथेत्यादिना । तत्राथेति युग्मकं गुरोः पुत्रमात्मजाभ्यां श्रीकृष्णरामाभ्यामानीतं श्रुत्वा पूर्ववत् एव सुष्ठु विस्मितत्वेन स्थितापि तद्वत् स्वाभीष्टलाभार्थं श्रीवसुदेवसहिततादृशप्रेमसंवादमयविशेषलाभानन्तरमेव प्राहेत्यादि रामस्यात्मजत्वनिर्देशो गर्भसङ्कर्षणस्यापि तया श्रवणात् सर्वेषां वतीति श्रीभगवन्मातृत्वलीलशुद्धसत्त्वलीलशुद्धसत्त्वसम्पत्तिरूपत्वात्-अत एवास्या इयं बहिरङ्गा चेष्टा भगवतो लीलाकौतुकार्थमेव लशक्त्या सम्पादितेति ज्ञेयं वक्ष्यते च 'मोहिता मायया विष्णोः' इति ॥२७-२८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भगवता अद्भुतानन्तशक्तिना परमदयालुना श्रीकृष्णेनोदाहृतम्, विनष्टा जीवविषयिका नानाधीः मित्रादिबुद्धिस्तामसादिबुद्धिर्वा यस्य तथाभूतः सन् सर्वेषामेव भगवदीयत्वज्ञानात्, अतः प्रीतमनाः सन् तूष्णीमभूत् - श्रीभगवति या सहजस्नेहसद्भावना-जातप्रीत्युद्रेकेण बाष्परुद्धकण्ठत्वात् । यद्वा, विनष्टा नानाविधेषु जीवेषु धीर्मतिर्यस्य सः, भगवदादिष्टप्रकारेण तस्मिन् स्नेहोद्रेकेणान्याशेषविस्तारणात्, अतः प्रीतमनाः प्रहर्षपूरितस्तूष्णीमभूत् । एवं प्रहर्षोदयात् सम्बोधयति-राजतेति । यद्वा, प्रीतमनस्त्वेन राजमानः ॥२६॥ एवं पितुर्मनोरथं परिपूर्य्य मातुरप्यपूरयदिति तत् प्रसङ्गमारभते-अथेत्यादिना । वसुदेवस्य तथा तूष्णीम्भावानन्तरं तत्रैव स्थिता सर्वेषां देवता पूज्या श्रीभगवन्मातृत्वात्, यमालयादनीतं श्रुत्वा सुविस्मिता जातातिविस्मया । आत्मजाभ्यामिति स्वपुत्रतया तयोर्ज्ञानेनेश्वरज्ञानहान्या महाविस्मयोपपत्तेरिति भावः । तत्र श्रीबलदेवस्य त्मजता श्रीवसुदेवपुत्रत्वात् प्राक् तया गर्भे धारणाद्वा ॥२७॥ सम्यगाश्राव्य सम्बोध्य, तत्प्रकाराश्च रामेत्यादिना वक्ष्यमाणः । कंसेन विहिंसितानिति पुत्रान् तौ सम्यगार्त्या श्रावयित्वा तानेव स्मरन्ती दुष्टेन हतानां तेषां का गतिरभूदिति चिन्तयन्तीत्यर्थः । वैक्लव्यात् पुत्रस्नेहवैवश्यादश्रुयुक्तलोचना सती कृपणं सदैन्यं यथा स्यात्तथा प्रकर्षेण स्तुत्यादिना प्रणयेन वाह । कृष्णस्यादौ तस्मिन् स्नेहाधिक्येन समाश्रावणे तस्यैव प्राधान्यात्, अग्रे च व्यवहारापेक्षया स्नेहभरभङ्ग्यैव वा यथाक्रमं सम्बोधनम् । श्रीबादरायणः श्रीकृष्ण एव भक्तिविशेषादिति दिक् ॥२८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विनष्टनानाधीः अब्रह्मात्मकभेदबुद्धिरहितः ॥२६॥ गुरोः पुत्रं सान्दीपनिपुत्रम् ॥२७-२९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमिति । उदाहृतः उक्तः उदाहृतमिति पाठे तूक्तं वचः श्रुत्वेत्यर्थः । विनष्टनानाधीः अब्रह्मात्मकभेदबुद्धिरहितः एव प्रीतमनास्तूष्णीं बभूव ॥२६॥ अथेति । हे कुरुश्रेष्ठ ! सर्वदेवतात्मकभगवदवतारस्थानत्वात्तथाभूता देवकी जाभ्यां रामकृष्णाभ्यां गुरोः सान्दीपनेः पुत्रमानीतं श्रुत्वा अतिविस्मिता सती ॥२७॥ समाश्राव्य सम्बोध्य श्रूणि लोचनयोर्यस्याः सा प्राह ॥२८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवमात्मैश्वर्यगोपनपूर्वकस्वविषयकपुत्रभावनारक्षणाभिसन्धिप्रकारेण भगवतोदाहृतं श्रुत्वा विनष्टा नानाधीर्मुन्याद्युपदिष्टैश्वर्यादिज्ञानं यस्मात्तथाभूतः प्रकृरीतमनास्तस्मिन् सप्रेमचित्तस्तूष्णीमेवाभूदिति ॥२६॥ एवं पितुः तस्मिन् पुत्रभावस्य विरोधकमैश्वर्यज्ञानं शमयित्वा मातुरप्यन्यत्र पुत्रभावमशमयदिति तत्प्रसङ्गमारभते । तथेत्यादिना सर्वेषां देवतेति। श्रीभगवन्मातृललितत्वशुद्धसत्त्वसम्पत्तिरूपत्वात् । अत एवास्या इयं बहिरङ्गा चेष्टा भगवतो लीलाकौतुकार्थमेव। लीलाशक्तिसम्पादितेति ज्ञेयम्। वक्ष्यते च "मोहिता मायया विष्णोः" इति ॥२७-४१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विनष्टनानाधीः सत्यमेव सर्वं जगदेवैकं ब्रह्मैव किं पुनरेतौ मत्पुत्रावित्येतत्प्रकारकज्ञानवान् बभूवेत्यर्थः ॥२६-२९॥

गूढार्थदीपिनी

श्रुत्वा आत्मैकत्वम् ॥२६॥ अथ मङ्गलारम्भे । तत्र तदा । गुरोः सान्दीपनेः पुत्रमानीतं श्रुत्वा सुविस्मिता सती रामकृष्णौ समाश्राव्य सम्बोध्य वैक्लव्यात् पुत्रान् स्मरन्ती कृपणं दीनं वचः प्राहेति द्वयोरन्वयः भगवतः श्रीकृष्णस्य आधारत्वात् सर्वदेवतेत्युक्तम् ॥२७-२८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ॥२५-२९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भगवता उपदिष्टः ऐश्वर्यभावप्राकट्यात् बोधितार्थं भावान्तरमापन्नोऽपि गृहीतवानित्याह-एवं भगवतेति। उदाहृतं सिद्धमेव विनष्टा नानाबुद्धिः पञ्चविधा अपि यस्य ततो वक्तव्याभावात् स्वस्मिन्नपि तथा तथा स्फुरणात् तूष्णीम्भूत इत्यर्थः एवमेकस्य ज्ञानोपदेशो निरूपितः ॥२६॥ स्वज्ञानशक्तिप्राकट्येन क्रियाशक्तिप्राकट्यार्थमुपाख्यानान्तरमारभते-अथ तत्रेति। कुरुश्रेष्ठेति क्रियाधिक्यं तस्य हृदये समायास्यतीति सम्बोधनं वसुदेवः कृतार्थो जात इति स्वस्यापि हृदये भगवता कृतार्थत्वं प्रार्थितं पूर्वसंजातदुःखवासनायाः अनिवृत्तत्वात् तन्निवृत्त्यर्थं भगवन्तं प्रार्थयते-वाक्येन तु तन्निवर्तते नाद्येन निवर्तनेऽपि तेषां जीवानाम् अमुक्तत्वात् ज्ञानोत्तरं सर्वज्ञेऽपि सिद्धे भगवता वञ्चितमिति प्रतिभायात् पुनस्तदुद्धारार्थं चिन्तापि स्यादिति तेष्वेव समागतेषु तद्दुःखं गच्छति नान्यथेति निश्चित्य तदर्थं भगवतः सामर्थ्यं पुत्राणां स्वरूपप्तिपत्तिश्च सम्भावितेति दृष्टान्तेनावगता तामाह-श्रुत्वेति गुरोः पुत्रमिति स्वस्यैवात्मजाभ्यां रामकृष्णाभ्यां स्वरूपं प्रापयित्वा आनीतं श्रुत्वा सुष्ठु विस्मिता जाता ॥२७॥ ततो वस्तुनिश्चयं ज्ञात्वा भगवन्तं याचितवतीत्याह-कृष्णरामाविति। सम्यगाश्राव्य सावधानं शृण्वित्युक्त्वा कंसविहिंसितान् पुत्रान् स्मरन्ती कृपणं यथा भवति तथा प्राह। तेनैव स्मरणेन वैक्लव्यादश्रुलोचना च जाता ॥२८॥

श्रीसुबोधिनीसारः

शुकोक्तिः। हे राजन्! एवं भगवतोक्तो वसुदेवः तद्वचः श्रुत्वा विनष्टा नानाधीर्यस्य सः प्रीतमनाः तूष्णीम्बभूव ॥२६॥ अथानन्तरं हे कुरुश्रेष्ठ! सर्वदेवतारूपिणी देवकी आत्मजाभ्यां पुत्राभ्यामानीतं गुरोः पुत्रं श्रुत्वातिविस्मिता स्थाने ॥२७॥ कृष्णरामौ समाश्राव्य सम्बोध्य कंसेन विहिंसितान् पुत्रान् स्मरन्ती चिन्तयन्ती वैक्लव्यात् कातरा अश्रुविलोचना रुदन्ती कृपणं वचः प्राह क्रियाविशेषणं वा ॥२८॥

हे राजन्! एवं भगव
अथानन्तरं हे कुरुश्रेष्ठ ! सर्वदे
पुत्रमानीतं श्रुत्वा सुविस्मिता स
कृष्णरामौ समाश्राव्य सम्बोध्य

एवमिति। हे राजन्! ए
॥२६॥ अथेति युग्मम् । हे कुरु
सान्दीपनेः पुत्रमानीतं श्रुत्वा सुवि
सा कृष्णरामौ समाश्राव्य सम्बोध

कालेन विध्वस्तं नष्टं स
भूमेर्भारायमाणानां राज्ञां नाशायि
रूपोऽक्षरपुरुषस्तस्यांशः ऐश्वर्य
ह्माण्डस्योत्पत्त्यादयो भवन्ति हे
स्थानाद्यमपुरादानिन्यथुः आनीत

एवमिति ॥ हे राजन् !
नष्टनानाधीरब्रह्मात्मकभेदबुद्धिरहितः
त्र स्थाने हे कुरुश्रेष्ठ! सर्वदेवता सर्वदे
सान्दीपनेः पुत्रम् आनीतं श्रुत्वा सुवि
त्रान् स्मरन्ती अत एव वैक्लव्याद्धेतोः

श्रीशुकाचार्यजीने कहा राज
श्रीवसुदेवजी भेदबुद्धिरहित श
श्रीदेवकीजीने वह यशोगाथा सुनी थ
या था, इस बातसे देवकीजी को वि
मेरी बात सुनो, ऐसा कहकर रा
और दीनतापूर्वक कहने लगी ॥२८॥

विनष्टा नानाधीर्मुन्या-
: तस्मिन् पुत्रभावस्य
ा सर्वेषां देवतेति ।
लीलाकौतुकार्थमेव ।

ूवेत्यर्थः ॥२६-२९॥

श्रुत्वा सुविस्मिता सती
ः भगवतः श्रीकृष्णस्य

॥

ह-एवं भगवतेति । उदाहृतं
फुरणात् तूष्णीम्भूत इत्यर्थः
भते-अथ तत्रेति । कुरुश्रेष्ठेति
भगवता कृतार्थत्वं प्राप्तापि
निवर्तनेऽपि तेषां जीवानाम
स्यादिति तेष्वेव समागतेषु
न्तेनावगता तामाह-श्रुत्वानीतं
जाता ॥२७॥ ततो वस्तुनिर्धा
हंसितान् पुत्रान् स्मरन्ती कृपणं

्य सः प्रीतमनाः तूष्णीमभूत्
ीः पुत्रं श्रुत्वातिविस्मिता तत्र
तयन्ती वैक्लव्यात् कातर्यात्

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे राजन् ! एवं भगवता उदाहृतं निरूपितमात्मैकत्वं श्रुत्वा विनष्टा नाना धीर्यस्य स वसुदेवः प्रीतमनास्तूष्णीमभूत् ॥२६॥ अनन्तरं हे कुरुश्रेष्ठ ! सर्वदेवतात्मकभगवदाधारत्वात् सर्वदेवतारूपा देवकी आत्मजाभ्यां रामकृष्णाभ्यां गुरोः सान्दीपनेः आनीतं श्रुत्वा सुविस्मिता सती ॥२७॥ कंसविहिंसितान् पुत्रान् स्मरन्ती, अत एव वैक्लव्यात् शोकादश्रूणि लोचनयोर्यस्याः सा रामौ समाश्राव्य सम्बोध्य कृपणं दैन्यं यथा स्यात्तथा प्राह ॥२८॥

अन्वितार्थप्रकाशिका

एवमिति । हे राजन् ! एवं भगवता उदाहृतं निरूपितमात्मैकत्वं श्रुत्वा विनष्टा नाना धीर्यस्य स वसुदेवः प्रीतमनास्तूष्णीमभूत् ॥ अथेति युग्मम् । हे कुरुश्रेष्ठ ! सर्वदेवतात्मकभगवदाधारत्वात् सर्वदेवतारूपा देवकी आत्मजाभ्यां रामकृष्णाभ्यां गुरोः सान्दीपनेः पुत्रमानीतं श्रुत्वा सुविस्मिता सती स्वपुत्रान् कंसविहिंसितान् स्मरन्ती अत एव वैक्लव्यात् शोकादश्रूणि लोचनयोर्यस्याः कृष्णरामौ समाश्राव्य सम्बोध्य कृपणं दैन्ययुक्तं यथा स्यात्तथा प्राह स्म ॥२७-२८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कालेन विध्वस्तं नष्टं सत्त्वं सत्त्वगुणसम्पत्तिर्येषां तेषाम् अत एव उच्छास्त्रवर्तिनां सच्छास्त्रविरुद्धाचाराणाम् अत एव भारायमाणानां राज्ञां नाशायेति शेषः । मे मयि अवतीर्णौ ॥२६॥ यस्य पुरुषोत्तमस्य तव अंशः ऐश्वर्यांशं प्राप्तो योऽक्षरपुरुषस्तस्यांशः ऐश्वर्यांशं प्राप्तो मूलप्रकृत्यधिष्ठाता पुरुषस्तस्यांशभागः तदैश्वर्यलेशं प्राप्तो यः प्रधानपुरुषः तेन विश्वस्य विश्वस्योत्पत्त्यादयो भवन्ति हे आद्य ! तं गतिं सर्वैर्गम्यं त्वा त्वामहं गता प्राप्ता ॥२७॥ मृतसुतस्यादाने आनयनार्थं यमपुरादानिन्यथुः आनीतवन्तौ ॥२८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ हे राजन् ! भगवता एवम् उदाहृतःवसुदेवः श्रुत्वा उदाहृतमिति पाठे वचः श्रुत्वेत्यर्थः । नानाधीरब्रह्मात्मकभेदबुद्धिरहितः अत एव प्रीतमनाः सन् तूष्णीम् अभूद्बभूव ॥२६॥ अथेति ॥ कृष्णरामाविति च ॥ अथानन्तरं स्थाने हे कुरुश्रेष्ठ ! सर्वदेवता सर्वदेवतात्मकभगवदवतारस्थानभूतत्वात्तथाभूता देवकी आत्मजाभ्यां स्वपुत्राभ्यां रामकृष्णाभ्यां सान्दीपनेः पुत्रम् आनीतं श्रुत्वा सुविस्मिता अतिविस्मिता सती कृष्णरामौ समाश्राव्य हे कृष्ण हे रामेति सम्बोध्य कंसविहिंसितान् स्मरन्ती अत एव वैक्लव्याद्धेतोः अश्रूणि लोचनयोर्यस्यास्तथाभूता सती कृपणं यथा तथा प्राह ॥२७-२८॥

कृष्णाप्रिया

श्रीशुकाचार्यजीने कहा राजन् ! इस तरह भगवान ने कहा जो उपदेश, उसका श्रीवसुदेवजीने श्रवण किया, श्रीवसुदेवजी भेदबुद्धिरहित शांत हुवे और चित्त भी प्रसन्न हुआ ॥२६॥ हे कुरुश्रेष्ठ परीक्षित् राजन् ! देवकीजीने वह यशोगाथा सुनी थी, मेरे पुत्र श्रीकृष्णने गुरु सांदिपनि महाराज के मृत पुत्र को वापस ला कर दिया, इस बातसे देवकीजी को विस्मय हुआ था ॥२७॥ उसने श्रीकृष्ण और बलभद्रजी को कहा कि तुम दोनों मेरी बात सुनो, ऐसा कहकर राजा कंस द्वारा वध कीये हुअे अपने पुत्रों के स्मरणसे नेत्र अश्रुसे परिपूर्ण हुवे, दीनतापूर्वक कहने लगी ॥२८॥

देवक्युवाच

राम रामाप्रमेयात्मन् कृष्ण योगेश्वरेश्वर । वेदाहं वां विश्वसृजामीश्वरावादिपूरुषौ ॥२९॥
कालविध्वस्तसत्त्वानां[1] राज्ञामुच्छास्त्रवर्तिनाम् । भूमेर्भारायमाणानामवतीर्णौ [2]किलाद्य मे ॥३०॥
यस्यांशांशांशभागेन [3]विश्वोत्पत्तिलयोदयाः । भवन्ति किल विश्वात्मंस्तं त्वाद्याहं गतिं गता ॥३१॥
चिरान्मृतसुतादाने गुरुणा किल [4]नोदितौ । आनिन्यथुः पितृस्थानाद् गुरवे गुरुदक्षिणाम् ॥३२॥
तथा मे कुरुतं कामं युवां योगेश्वरेश्वरौ । भोजराजहतान् पुत्रान् कामये द्रष्टु[5]मागतान् ॥३३॥

कर्दमक्षमा

देवकी, उवाच ।

राम, राम, अप्रमेयात्मन्, योगेश्वरेश्वर, कृष्ण, विश्वसृजाम्, ईश्वरौ, आदिपूरुषौ, कालविध्वस्तसत्त्वाना उच्छास्त्रवर्तिनाम्, भूमेः, भारायमाणानाम्, राज्ञाम्, अद्य, मे, अवतीर्णौ, किल, वाम्, अहम्, वेद ॥२९-३०॥ यस अंशांशांशभागेन, विश्वोत्पत्तिलयोदयाः, किल, भवन्ति, विश्वात्मन्, तम्, त्वा, अद्य, गतिम्, गता ॥३१॥ गुरुणा, कालचोदितौ पितृस्थानात्, चिरात्, मृतसुतादाने, गुरवे, गुरुदक्षिणाम्, आनिन्यथुः, युवाम्, योगेश्वरेश्वरौ, तथा, मे, कामं, कुरु भोजराजहतान्, आहृतान्, पुत्रान्, द्रष्टुम्, कामये ॥३२-३३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भूमेर्भारायमाणानां राज्ञामर्थे तेषां निधनार्थं मे मयि किलावतीर्णौ ॥३०॥ हे आद्य ! यस्यांशः पुरुषस्तस्यांशो म तस्या अंशाः गुणास्तेषां भागेन परमाणुमात्रलेशेन विश्वोत्पत्त्यादयो भवन्ति तं त्वा त्वां गतिं शरणं गतास्मि ॥३१॥ आनिन्यथुरानीतव पितृस्थानाद्यमसदनात् ॥३२-३४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वां युवाम् ॥२९॥ मे मयि, सप्तम्येकवचनेऽपि "मे" आदेशो विपरीतग्रहात्सूत्रे अर्थे इति शेषः ॥३०॥ "शरणेऽपि ग स्मृता" इति कोषात् ॥३१॥ यमसदनात् यमलोकात् ॥३२॥ यथा गुरुकामं कृतवन्तौ तथा मेऽपीत्यर्थः योगेश्वरेश्वरावित्यक्लिष्टकारित्वमाह । आहृतान् आनीतान् ॥३३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

रामेति युग्मकम् । रामस्यादौ सम्बोधनं ज्येष्ठत्वेन सपत्नीपुत्रत्वांशेन चादरात् अत एव वीप्सा अप्रमेया प्रमाणागोचरस्वभाव ! योगेश्वरेश्वर योगेश्वराणां सनकादीनामप्यचिन्त्यमहाप्रभाव ! यतो विश्वसृजां ब्रह्मादीनामीश्वरौ अत आदिपु ॥२९॥ कालेन कलिप्रभृतिना (द्वापरादिना) विशेषतो ध्वस्तं सत्त्वं सत्त्वगुणः साधुत्वं वा येषां तेषाम् अत एव उच्छ शास्त्रातिक्रमः तेन वर्तितुं शीलं येषाम् अत एव भूमेरिति अद्याधुना द्वापरान्त इत्यर्थः ॥३०॥ एवं तौ पृथक् पु पुनरैकमत्यार्थमेकत्वेनैव शरणं याति-यस्येति । किलेति प्रसिद्धमेवेदमित्यर्थः । विश्वात्मन् सर्वमूलस्वरूप ! एतावन्तं नैवं त्वां प्रार्थितवत्यस्मि अधुना च किञ्चित्प्रार्थयितुं शरणं यामीत्याशयेनाह-अद्येति ॥३१॥ अतो गुरोरिव ममाप परिपूरयतमित्याह-चिरादिति युग्मकेन । चिरकालं मृतस्यापि सुतस्यादाने यमालयाद्ग्रहणे आनयन इत्यर्थः गुरवे गुर्वर्थं गुरुदक्षि तत्सुतंयथा [आनिन्युथुः] तदाकृतिवय आदिसद्भावप्रकारेण आनिन्यथुः तथा कुरुतम् ॥३२॥ एवं स्वकामस्य गौरवं मत्वा स्पष्टमनिर्दिश्य पुनरुत्कण्ठया स्पष्टमेव निर्दिशति-भोजराजेति । आहृतान् युवाभ्यां यमालयात् आनीतान् सतः ॥३३॥

---

१. सेतूनां-विज. । २. क्षयाय मे -वीर. विज. । ३. विश्वस्थित्युदयौलयः-विज. । ४. किल चोदितौ-वीर. विज. पु कालचोदितौ-श्रीधर. वंशी. । ५. माहृतान्-श्रीधर. वंशी. विज. ; मागतान्-वीर. ।

अप्रमेयात्मन् ! हे
किंवा निजप्रार्थ्यपरिपूरण
पुरुषादीनां वा ईश्वरौ, यत
अत उच्छास्त्रवर्तिनां शास्त्रो
निश्चये वा, आद्य हे सर्वेश्वरे
सूचयन्ती तदर्थमार्त्या शरण
महाशक्तिमत्त्वमुक्तम्, अतो
यद्वा, एतावन्तं कालं न क
अतो गुरोरिव ममाप्यभीष्टं
आनयन इत्यर्थः । गुरवे गु
तत्सम्पादनं च युवयः सुकर
शक्याः, आवाभ्यां वा ज्ञेयाः
प्रकृतमनभिव्यज्य सामान्यतः
युवाभ्यां यमालयादानीतान् स

मे अस्मत्तः ॥३०-३

तदेवाह-रामेति पञ्च
विश्वसृजां ब्रह्मादीनामीश्वरावादिपु
कालेति । कालवशेन विध्वस्तं स
क्षयाय मे मयि अस्मत्तो वावतीर्णौ
किलेति शास्त्रप्रसिद्धिः । तं पूर्णब्र
मृतसुतादाने निमित्ते गुरुणा सा
विपुलदक्षिणारूपान् पुत्रान् आनि
कृतवन्तौ तथा ममापि कामम् इष्टं कु
। कोऽसौ काम इत्यत आह-भोजे

विध्वस्तं सत्त्वं सत्त्वगुणः
महापुरुषस्तस्यांशः प्रकृतिस्तस्या
आनिन्यथुः ॥३२-३४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अप्रमेयात्मन्! हे अपरिच्छिन्नबुद्धे! योगेश्वरेश्वर! हे अचिन्त्यमहाप्रभाव! ईदृशसम्बोधनं गुरुपुत्रानयनसामर्थ्याभिप्रायेण, निजप्रार्थ्यपरिपूरणयोग्यतापेक्षया। तत्र च रामं प्रति द्विःसम्बोधनं ज्येष्ठत्वादिनाधिकादरात्, यतो विश्वसृजां श्रीब्रह्मादीनां प्रादीनां वा ईश्वरौ, यत आदिपुरुषौ ॥२९॥ कालेन कलिप्रभृतिना विशेषतो ध्वस्तं सत्त्वं सत्त्वगुणः साधुत्वं वा येषां तेषाम्, उच्छास्त्रवर्तिनां शास्त्रोक्तवर्त्मातिक्रम्य सदा वर्तमानानाम्, अत एव भूमेर्भारायमाणानां दुष्टानां तदधार्यत्वात्, किल वितर्के वा, आद्य हे सर्वेश्वरेति। तव तद्युक्तमेवेति भावः। यद्वा, अद्याधुना द्वापरान्त इत्यर्थः ॥३०॥ एवं स्तुत्वा स्वप्रार्थ्यपूरणसामर्थ्यं ती तदर्थमार्त्या शरणं याति-यस्येति। किलेति प्रसिद्धमेवेदमित्यर्थः। विश्वात्मन्! हे सर्वान्तर्यामिन्! एवमुभयथा किमत्त्वमुक्तम्, अतो गतिं गतास्मि। ननु त्वमस्मन्माता किमिदं वदसि? तत्राह-हे आद्येति। महापुरुषत्वादिति भावः। एतावन्तं कालं न कथञ्चित् त्वामेवं प्रपन्नास्मि, अधुना च किञ्चित् प्रार्थयितुं शरणं यामीत्याशयेनाह-आद्येति ॥३१॥ गुरोरिव ममाप्यभीष्टं परिपूरयतमित्याह-चिरादिति द्वाभ्याम्। चिराकालं मृतस्यापि पुत्रस्य आदाने यमालयाद्ग्रहणे इत्यर्थः। गुरवे गुर्वर्थं गुरुदक्षिणारूपं तत्सुतं यथानिन्यथुस्तथा कुरुतम्। यद्वा, तथा अपि मेऽपि कामं कुरुतम्। सम्पादनं च युवयः सुकरमेवेत्या-योगेति। यद्वा भो मातः! जातमात्रा हतास्तेऽधुनानीता अपि कथं त्वया चिरेण परिचेतुं आवाभ्यां वा ज्ञेयाः? तत्राह-योगेति। अचिन्त्यानन्तयुष्मन्महाप्रभावादिति भावः। एवं स्वकामस्य गौरवं मत्वा मनभिव्यज्य सामान्यतः प्रार्थ्याधुनार्त्या निर्दिशति-भोजराजेति। अनेन तेषां हननेन तस्य शक्तिरपि सूचिता। आहृतान् यमालयादानीतान् सतः। कीदृशीमवस्थां प्राप्ताः सन्तीति द्रष्टुं कामये ॥३२-३३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मे अस्मत्तः ॥३०-३४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह-रामेति पञ्चभिः। हे अप्रमेयात्मन्! अपरिच्छेद्यस्वरूप! योगीश्वराणामाचार्य! शक्तिमतामपीश्वरौ वां युवां सृजां ब्रह्मादीनामीश्वरावादिपुरुषौ जगत्कारणपुरुषावहं वेद वेद्मि ॥२९॥ तर्ह्येवम्भूतयोरावयोः किमर्थं यदुषु जन्मेत्यत आह-ति। कालवशेन विध्वस्तं सत्त्वं सत्त्वगुणो येषाम् उच्छास्त्रवर्तिनां शास्त्रीयमर्यादातिलङ्घिनामत एव भूमेर्भारायमाणानां राज्ञां मे मयि अस्मत्तो वावतीर्णौ ॥३०॥ यस्य तव अंशांशांशभागेन अयुतायुतशतैककलांशकांशेन विश्वस्योत्पत्त्यादयो भवन्ति। ति शास्त्रप्रसिद्धिः। तं पूर्णब्रह्मरूपम्। त्वामधुनाहं गतिं शरणं गतास्मि ॥३१॥ स्वाभिप्रायमावेदयति-चिरादिति द्वाभ्याम्। सुतादाने निमित्ते गुरुणा सान्दीपनिना चोदितौ भवन्तौ पितृस्थानाद्यमसदनादानिन्यतुरानीतवन्तौ। किल गुरुदक्षिणाः दक्षिणारूपान् पुत्रान् आनिन्यतुरिति सम्बन्धः। दक्षिणामिति पाठे अर्पयितुमिति शेषः ॥३२॥ तथेति। यथा गुरोः कामं न्तौ तथा ममापि कामम् इष्टं कुरुत नावां शक्तौ इति मावोचतमित्यभिप्रायेण विशिनष्टि-योगीश्वरेश्वरौ। निरतिशयाश्चर्यशक्तिमन्तौ कोऽसौ काम इत्यत आह-भोजेति। भोजराजः कंसस्तेन हतान् ॥३३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२७-४१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विध्वस्तं सत्त्वं सत्त्वगुणः साधुत्वं वा येषां तेषां संहाराय मे मय्यवतीर्णौ ॥३०॥ यस्यांशो महावैकुण्ठनाथस्तस्यांशो पुरुषस्तस्यांशः प्रकृतिस्तस्या भागेन रजआदिना ॥३१॥ पितृस्थानात् यमसदनात् पितृदक्षिणां गुरुदक्षिणारूपं गुरुपुत्रम् आनिन्यथुः ॥३२-३४॥

गूढार्थदीपिनी

अप्रमेयः अचिन्त्यः आत्मा स्वरूपं यस्य तत्सम्बुद्धौ । विश्वसृजां ब्रह्मादीनामपि ईश्वरौ वां युवामहं वेद्मि ॥२९॥ भू भारवदाचरणां राज्ञां क्षयाय मे मयि अवतीर्णौ इत्यन्वयः । कथम्भूतानाम् । कालेन विध्वस्तं सत्त्वगुणकार्यं विवेकसाधुत्वं येषाम् । अत एव शास्त्रमुल्लङ्घ्य वर्तमानानाम् ॥३०॥ हे आद्य यस्य अंशांशेन विश्वोत्पत्त्यादयो भवन्ति तं त्वां गतिं शरणं ('शरणेऽपि गतिः स्मृता' इति कोशात् ।) गतास्मीत्यन्वयः । यस्य अंशः पुरुषः तस्यांशो माया तस्या अंशा गुणास्तेषां भागे लेशेन ॥३१॥ चिरात् मृतसुतस्य आदाने आनीय दाने गुरुणा प्रेरितौ युवां पितृस्थानात् यमलोकात् दक्षिणारूपं पुत्रमानीतवन्तौ ॥३२॥ यथा गुरुकामं कृतवन्तौ तथा मेऽपीत्यन्वयः । आहृतान् आनीतान् पुत्रान् ॥३३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे आद्य ! मे मयि अवतीर्णौ ॥३०॥ यस्य अंशाः जीवप्रकृतिकालाख्याः तेषामंशाः एकैकदेशास्तेषां भागे स्वल्पप्रदेशेनेत्यर्थः ॥३१॥ पुत्रानयने तत्कल्याणार्थं भगवन्तं नियोजयति-चिरादिति द्वाभ्याम् । आनिन्यथुः आनीतवन्तौ पितृस्थानात् यमलोकान् ॥३२-३४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं कायवाङ्मनोवैक्लव्यमुक्तं तन्निराकरणार्थमादौ भगवन्तं स्तौति-राम रामेति त्रिभिः । भगवान् शरणागतानामेव दुःखं दूरीकरोतीति प्रथमतः शरणागतिः कर्तव्या । तत्र यदि फलं न कीर्तयेत तदा मोक्षार्थं सा भवेत् भगवतो वा तन्निवारणे सामर्थ्यं न भवेत् स्वयं वा न जानीयात् तया सर्वं विशकलितं भवेदिति प्रथमतो भगवतः सामर्थ्यं स्वस्य ज्ञानं चाह-देवस्य कृष्णरामयोरवान्तरपरिज्ञानं नास्तीति ज्येष्ठानुक्रमेण स्तौति-वीप्सा आदरे । अप्रमेयात्मन्निति त्वं सर्वसमर्थः तथापि लोको न जानातीति साधनान्तरे यतते न हि कश्चिच्चिन्तामणिं प्राप्य पुनरन्यत्साधनमङ्गीकरोति भगवतस्तथात्वाज्ञाने हेतुर्भगवत्स्वरूपम एव यथा परमा एव प्रत्यक्षतायाम् एवं प्रमातुमयोग्यमेव भगवत्स्वरूपमित्यर्थः । कृष्णस्यापि सम्बोधनमाह-निकटे पृ सावधान इति । सकृदेव सम्बोधनं योगेश्वरेश्वरेति सर्वसाधनसम्पत्तिः एवमुभयोः माहात्म्यमुक्त्वा अध्यारोपवादनिराकरणार्थं स्वस्य याथार्थ्यज्ञानमनुवदति-वेदाहं वां विश्वसृजाविति । युवामहं जाने । केन प्रकारेण जानासीत्याकांक्षायामाह-विश्वसृजामीश्वराविति ब्रह्मादीनामपि नियन्तृत्वेन कालव्युदासार्थं पुरुषोत्तमत्वेनापि जानामीत्यर्थः । तादृशस्य कथमागमनमिति शङ्काव्युदासाय-कालविध्वस्तसत्त्वानामिति । भूभाररूपराज्ञां वधार्थं भगवानवतीर्ण इत्यर्थः ॥२९॥ ननु राजानः सात्त्विकाः कथं भाररूपा जा इत्याह-कालविध्वस्तसत्त्वानामिति । कालो हि पदार्थान् दूरीकरोति कदाचिदसत्यार्थान् यथा पुरुषः शिष्टागमनमालक्ष्य दुष्टानां वा तथा कालोऽपि सर्वेषां सत्त्वगुणं विवेकादिकं च हृतवान् अत एव उच्छास्त्रवर्तिनो जाताः राजत्वेन सामर्थ्यं सत्त्वाभावे सा सर्वेषां दुःखदमिति भूमेर्भारायमाणा जाताः । मशकार्थं धूमवत् तेषामर्थे भगवानवतीर्णः किलेति प्रमाणं मे मतः ॥३०॥ न भूभारहरणार्थमेव जातः न त्वन्यार्थमिति तत्रैव मम सामर्थ्यमिति चेत्तत्राह-यस्यांशांशभागेनेति । यस्य पुरुषोत्तमस्य अंशः पु तस्याप्यंशः प्रकृतिः तस्यांशा गुणाः तेषां भागेन विभागेन विश्वस्योत्पत्तिलयोदया भवन्ति । किलेति प्रसिद्धे । अनेन सामर्थ्यमुक्त्वा कारणावश्यकत्वायाह-विश्वात्मन्निति । सर्वस्यापि स्वकृत्यमावश्यकमिति अतस्तादृशं त्वां स्वकार्यसिद्ध्यर्थं शरणं गता ॥३१॥ तत्कार्यं साधकपूर्वकमाह-चिरादिति द्वाभ्याम् । यथा गुरुवाक्यं कर्तव्यम् एवं ममापि यथा गुरोः पुत्रः निरन्वयं गतः तथा प्रकृते यथा दक्षिणा अवश्यं देया एवं सत्कामनाऽपि पूरणीया । अतो दृष्टान्तः चिरान्मृतस्य सुतस्यादाने दानार्थं दक्षिणात्वेन गुरुणा प्रे किलेति प्रमाणं तदा पितृस्थानं गत्वा यत्र पुरुषाणां जीवतां गमनागमने न स्तः तादृशस्थानादपि गुरवे दक्षिणां धर्मार्थम् आनिन्यथुः पदव्यत्ययश्छान्दसः । आनीतवन्तौ तथा मे ममापि कामं कुरुतम् । अपमृत्युमृतत्वात् । प्रायेण तत्रैव गताः सामर्थ्यं सूचयति योगेश्वरेश्वराविति । योग एव कामनां पूरयति तत्रापि तस्येश्वरः किंवक्तव्यः । भगवांस्तु ततोऽप्यग्रे योगश्चेत् कदाचिद्वदेत्

नाज्ञापयतीति सोऽपि
आगतान् द्रष्टुं कामये

हे रामराम !
युवामहं वेद वेद्मि ॥२९
किलैव ॥३०॥ हे आद्य
तं त्वां गतिं शरणं गता
यमलोकात् गुरवे गुरुदि
कामम् इच्छाम् मनोरथं

युवयोरशक्यं
योगेश्वराणामपीश्वर ! वां
तर्ह्येवम्भूतयोरावयोः कि
उच्छास्त्रवर्तिनां शास्त्रीयम
क्षयायेति शेषः ॥३०॥ य
शास्त्रप्रसिद्धिं सूचयति ।
चिरादिति द्वाभ्याम् । चि
यमसदनादानिन्यथुः, आन
कामं मनोरथं युवां कुरुत
कंसस्तेन हतान् स्वपुत्रान्

रामेति । हे राम
ब्रह्मादीनाम् ईश्वरौ आदिपुरु
साधुत्वं वा येषाम् अत एव
किलाद्य मे इति पाठान्तरे क्ष
गुणास्तेषां भागेन परमाणुम
॥३१॥ चिरादिति । चिरात्
यमसदनात् गुरुदक्षिणारूपं
मनोरथं युवां कुरुतम् । भोज

कामये इच्छामि ॥

ामहं वेद्मि ॥२९॥ भूमेः
कार्यं विवेकसाधुत्वादि
ान्ति तं त्वां गतिं शरणं
अंशा गुणास्तेषां भागेन
क्षणारूपं पुत्रमानीतवन्तौ

एकैकदेशास्तेषां भागेन
आनिन्यथुः आनीतवन्तौ

। भगवान् शरणागतानामेव
ावतो वा तन्निवारणे सामर्थ्य
स्वस्य ज्ञानं चाह-देवक्या
र्वसमर्थः तथापि लोको न
ाज्ञाने हेतुर्भगवत्स्वरूपमधर्म
म्बोधनमाह-निकटे शृणोति
यारोपवादनिराकरणार्थं स्वस्य
ामाह-विश्वसृजामीश्वराविति।
ामनमिति शङ्काव्युदासायाह-
त्त्विकाः कथं भाररूपा जाता
: शिष्टागमनमालक्ष्य दुष्टागमनं
ेन सामर्थ्यं सत्त्वाभावे सामर्थ्य
त प्रमाणं मे मत्तः ॥३०॥ नु
यस्य पुरुषोत्तमस्य अंशः अक्षरं
प्रसिद्धे। अनेन सामर्थ्यमुक्तम्।
ार्यसिद्ध्यर्थं शरणं गता ॥३१॥
त्रः निरन्वयं गतः तथा प्रकृतेऽपि
दानार्थं दक्षिणात्वेन गुरुणा प्रेरितौ
ावे दक्षिणां धर्मार्थम् आनिन्यथुः।
त्रैव गताः सामर्थ्यं सूचयति-युवां
योगश्चेत् कदाचिद्वदेत् मत्प्रवर्तको

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ज्ञापयतीति सोऽपि चेद्वदेत् ममान्तर्यामी न प्रेरयेदिति तन्निरासार्थमेतावदुक्तम्। स्वकामनामाह-भोजराजहतान् पुत्रानिति। आनीतान् द्रष्टुं कामये यस्यामवस्थायां स्थिता मत्तो गताः तादृगवस्थायुक्ता एव द्रष्टव्या इति भावः ॥३२-३३॥

श्रीसुबोधिनीसारः

हे रामराम ! हे अप्रमेयात्मन् ! हे कृष्ण ! हे योगेश्वरेश्वर ! विश्वसृजां ब्रह्मादीनामपि ईश्वरौ नियन्तारौ आदिपुरुषौ त्वां युवामहं वेद वेद्मि ॥२९॥ कालेन विध्वस्तं नष्टं सत्त्वं येषां तेषाम् उत्पथगानां राज्ञां भूमेर्भाररूपाणां नाशार्थम् मे मयि अद्यावतीर्णौ किलैव ॥३०॥ हे आद्य ! यस्यांशः पुरुषस्तस्यांशो माया तस्या अंशा गुणास्तेषां भागेन विश्वस्य जन्मनाशस्थितयो भवन्ति किलैव तं त्वां गतिं शरणं गता वयं हे विश्वात्मन् ! ॥३१॥ स्तुत्वा प्रार्थयते। मृतपुत्रस्यादाने आनयनार्थं गुरुणा नियुक्तौ युवां पितृस्थानात् यमलोकात् गुरवे गुरुदक्षिणामानिन्यथुः चिरात् बहुकालात् किलाश्चर्ये ॥३२॥ तथा तेनैव प्रकारेण योगेश्वराणामपीश्वरौ युवां मे मम कामम् इच्छाम् मनोरथं कुरुतम्। कः कामः इत्यत आह। भोजराजेन कंसेन हतान् पुत्रान् आनीतान् द्रष्टुमहमिच्छामि ॥३३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

युवयोरशक्यं किञ्चिन्नास्ति इति सूचयन्ती सम्बोधयति-हे राम ! हे अप्रमेयात्मन् अचिन्त्यरूप ! हे कृष्ण ! हे योगेश्वराणामपीश्वर ! वां युवां विश्वसृजां ब्रह्मादीनाम् ईश्वरौ। तत्र हेतुमाह-आदिपुरुषौ जगत्कारणभूतौ अहं वेद वेद्मि ॥२९॥ एवम्भूतयोरावयोः किमर्थं जन्म तत्राह-कालेति। कालेन विध्वस्तं सत्त्वं सत्त्वगुणकार्यं विवेकधैर्यादि येषाम्, अत एव उच्छास्त्रवर्तिनां शास्त्रीयमर्यादातिलङ्घिनाम्, अत एव भूमेर्भारायमाणानां राज्ञां क्षयाय मे मयि अवतीर्णौ। किलाद्य मे इति पाठान्तरे क्षयायेति शेषः ॥३०॥ यस्यांशः पुरुषस्तस्यांशः प्रकृतिस्तस्या अंशा गुणास्तेषां विभागेन विश्वोत्पत्त्यादयो भवन्ति। किलेति शास्त्रप्रसिद्धिं सूचयति। हे विश्वात्मन् ! तं त्वा त्वामहमद्य शरणं गतास्मि ॥३१॥ एवं स्तुत्वा शरणमागत्य स्वाभिप्रायमावेदयति-चिरादिति द्वाभ्याम्। चिरकालमृतस्य सुतस्यादाने आनीय दाने निमित्ते गुरुणा सान्दीपनिना चोदितौ युवां पितृस्थानात् यमसदनादानिन्यथुः, आनीय च तं गुरवे दक्षिणां दत्तवन्तौ। किलेति प्रसिद्धमेतत् ॥३२॥ यथा गुरोः कामं कृतवन्तौ तथा मे ममापि कामं मनोरथं युवां कुरुतम्। सामर्थ्यं तु युवयोरस्त्येव इत्याशयेनाह-योगेश्वराविति। कोऽसौ काम इत्यपेक्षायामाह-भोजराजः कंसस्तेन हतान् स्वपुत्रान् युवाभ्यामानीतान् द्रष्टुं कामये इति ॥३३॥

अन्वितार्थप्रकाशिका

रामेति। हे राम ! हे राम ! हे अप्रमेयात्मन् अचिन्त्यरूप ! हे कृष्ण ! हे योगेश्वराणामपीश्वर ! वां युवां विश्वसृजां ब्रह्मादीनाम् ईश्वरौ आदिपूरुषौ जगत्कारणभूतौ अहं वेद वेद्मि ॥२९॥ कालेति। कालेन विध्वस्तं सत्त्वं सत्त्वगुणकार्यं विवेकधैर्यादि साधुत्वं वा येषाम् अत एव उच्छास्त्रवर्तिनां शास्त्रीयमर्यादातिलङ्घिनाम् अत एव भूमेर्भारायमाणानां राज्ञां क्षयाय मे मयि अवतीर्णौ। किलाद्य मे इति पाठान्तरे क्षयायेति शेषः ॥३०॥ यस्येति। हे विश्वात्मन् ! हे आद्य ! यस्यांशः पुरुषस्तस्यांशः प्रकृतिस्तस्या अंशा गुणास्तेषां भागेन परमाणुमात्रलेशेनापि विश्वोत्पत्त्यादयो भवन्ति। किलेति शास्त्रप्रसिद्धम्। तं त्वा त्वामहं गतिं शरणं गतास्मि ॥३१॥ चिरादिति। चिरात् चिरकालमृतस्य सुतस्यादाने आनीय दाने निमित्ते गुरुणा सान्दीपनिना चोदितौ युवां पितृस्थानात् यमसदनात् गुरुदक्षिणारूपं तं गुरुपुत्रमानिन्यथुः ॥३२॥ तथेति। हे योगेश्वरेश्वरौ ! यथा गुरोः कामं कृतवन्तौ तथा मे ममापि कामं मनोरथं युवां कुरुतम्। भोजराजः कंसस्तेन हतान् स्वपुत्रान् युवाभ्यामानीतान् द्रष्टुं कामये इति ॥३३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कामये इच्छामि ॥२९-३०॥ दैत्यराट् बलिः विश्वात्मनः अक्षरपुरुषस्यापि दैवं दैववत्पूज्यौ। अत्रैकत्वमार्षम्। तथा

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आत्मनः स्वस्यापि दैवं सान्वयः पुत्रादिसहितः ननाम ॥३१॥ तयोर्वरासनं श्रेष्ठासनं मुदा समानीय तत्र निविष्टयोरासीनयोस्तयोर्द्वयोः पादाववनिज्य प्रक्षाल्य तज्जलं सवृन्दः सपरिवारः दधार सर्वाङ्गेषु धृतवान् यदम्बु ययोरेव पादप्रक्षालनजलम् आब्रह्म पुन ब्रह्मभावं प्राप्तान् मुक्तान् पुरुषानभिव्याप्य सर्वं पुनत् पवित्रयदिति ज्ञात्वा दधारेति सम्बन्धः ॥३२॥ गोत्रं कुलम् ॥३३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह पञ्चभिः ॥ रामेति ॥ हे राम हे राम ! हे अप्रमेयात्मन् ! सर्वथा अपरिच्छेद्यस्वरूप हे कृष्ण ! हे योगीश्वरेश्वर योगीश्वराणामाश्चर्यशक्तिमतामपीश्वर ! अहं वां युवां विश्वसृजां ब्रह्मादीनामपि ईश्वरौ आदिपूरुषौ जगत्कारणभूतपुरुषौ वेद वेद्मि ॥२९॥ तर्ह्येवम्भूतयोरावयोः किमर्थं यदुषु जन्मेत्यत आह ॥ कालेति ॥ कालेन कालवशेन विध्वस्तं सत्त्वं सत्त्वगुणो येषां

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तेषाम् उच्छास्त्रवर्तिनां शास्त्रीयमर्यादातिलङ्घिनाम् अत एव भूमेः भारायमाणानां राज्ञां क्षयाय मे मयि मत्तो वा अवतीर्णौ भवतः ॥३०॥ यस्येति ॥ यस्य पुरुषोत्तमस्य तव अंशस्त्वल्लब्धैश्वर्यांशो धामरूपोऽक्षरपुरुषः तस्यांशस्तल्लब्धैश्वर्यांशो मूलप्रकृत्यधिष्ठाता पुरुषः तस्यांशभागस्तदैश्वर्यांशभागयुक्तः प्रधानपुरुषस्तेन विश्वोत्पत्तिलयोदयाः भवन्ति जायन्त इत्यर्थः किल इति शास्त्रप्रसिद्धिः । तं पूर्णब्रह्मरूपं त्वा त्वाम् उपक्रमे द्वयोरुपादानादत्र एकवचनमंशांशिनोरपृथग्भावेक्षया । विश्वात्मन् ! अद्याधुना अहं गतिं शरणं गता अस्मि ॥३१॥ स्वाभिप्रायमावेदयति चिरादिति द्वाभ्याम् ॥ चिरादिति ॥ चिराद्बहुकालतः मृतो यः सुतस्तस्यादानमर्पणं तस्मिन् निमित्ते गुरुणा सान्दीपनिना नोदितौ सम्प्रेरितौ भवन्तौ पितृस्थानाद्यमसदनात् गुरुसुतमिति शेषः । आनिन्यतुरानीतवन्तौ किल । युवामिति कर्तृपदोपादाने आनिन्यथुरिति पाठः । गुरवे गुरुदक्षिणां ददतुः । गुरुणा गुरुदक्षिणास्थाने याचितं तत्पुत्रं यमगृहादानीय तमेव दक्षिणात्वेन दत्त्वा पश्चाद्बहु धनं प्रददतुरित्यर्थः ॥३२॥ तथेति ॥ योगेश्वरेश्वरौ युवां यथा गुरोः कामं कृतवन्तौ तथा मे ममापि काममिष्टं कुरुताम् । किमभीष्टं तत्राह । भोजराजहतान् कंसेन विहिंसितान् पुत्रान् आगतान् भवद्भ्यामत्रानीतान् सतः द्रष्टुं कामये इच्छामि ॥३३॥

कृष्णप्रिया

माता देवकीजी ने कहा हे अप्रेम स्वरूप राम ! हे राम ! हे योगेश्वर ! हे कृष्ण ! मैं आप दोनों को जानती हुं, आप दोनों विश्व के निर्माता देवोंके भी देव हो । और आदि पुरुष भी हो ॥२९॥ भगवन् ! काल के प्रभाव से सत्वगुण हीन हुए नाममात्र सब राजा शास्त्र विरुद्ध आचरण करने लगे है, अतः सब राजा पृथ्वी के उपर बोज बन बैठे है । ऐसे राजाओं के विनाश हेतु मेरे उदरसे आप प्रगट हुए ॥३०॥ विश्वात्मन् ! आप पुरुषोत्तम के अंश अक्षर है, और आपके अंशरुप अक्षरअंश प्रकृति है । प्रकृति के अंश, गुणों और गुणों के विभागो से यह विश्व की उत्पत्ति, पालन और नाश होता है, सब आप पुरुषोत्तम से ही होता है, ऐसा जानकर हे विश्वात्मा ! आपके शरण आयी हुं ॥३१॥ हे कृष्ण ! समय से देहत्याग कर चले गये अपने पुत्र को गुरुदक्षिणामें लाने के लिए आप दोनों को श्रीसांदीपनि गुरुने विनंति कि तब आप यमराज के पितृलोकमें पधारकर वहांसे पुत्रों को लाकर गुरुदेव को दक्षिणा प्रदान किया था ॥३२॥ हे बलदाउ ! हे श्रीकृष्ण ! आप दोनो तो योगेश्वरों के इश्वर हो, आपके लिये भी अशक्य नही है, जीस तरह आपने गुरुचरणों में दक्षिणा के रुपमें पुत्र को लाकर दीया, उसी मेरी भी मन लालसा पूर्ण कीजिए । हे कृष्ण ! मैं भी कंस द्वारा घात किये हुवे मेरे पुत्रों को देखना चाहती हुं ॥३३॥

एवं संचोदित
तस्मिन् प्रविष्टा
तद्दर्शनाह्लादप
तयोः समानीय
दधार पादाव
समर्हयामास स
स्रग्धूपदीपामृ
स इन्द्रसेनो भगव
उवाच हानन्द

ऋषिः, उवाच ।

भारत, एवं, मात्रा, स
तथा, प्रविष्टौ, विश्वात्मदैवम्,
॥३५॥ निविष्टयोः, तयोः, मह
सवृन्दः, दधार ॥३६॥ सः, महा
च, तौ, समर्हयामास ॥३७॥ नृप
मुहुः, बिभ्रत्, ह, गद्गदाक्षरम्,

दैत्यराट् बलिः कथम्भ
पादाववनिज्य यदम्बु ययोरवनेज
बलिः प्रेमविभिन्नया प्रेमार्द्रया धि

एवमुक्तरीत्या । सुतलं तृत
आशयोऽन्तःकरणं यस्य स तथा ॥३
जन्मनी इत्युक्तेर्वस्तुतो बलदेवोऽपि
बलिः । तौ रामकृष्णौ । अमृतभक्षणं
हिमि गोरसे ॥ क्लीबे ना त्वमरे स्त्री
कुलम्, वित्तं धनम्, आत्मा देहस्तेषां
शुभमिति स्मरन् 'हा विषादशुभाति

---

१. श्रीशुकः-च.पु.टी. । २. संचो
टी. । ६. पुनात्यदो ब्रूही-वीर. ; पुनद्यदंबु
च-वीर. ; बभाष हा -विज. । १०.

[१]ऋषिरुवाच

एवं [२]संचोदितौ मात्रा रामः कृष्णश्च [३]भारत । [४]सुतलं संविविशतुर्योगमायामुपाश्रितौ ॥३४॥
तस्मिन् प्रविष्टावुपलभ्य दैत्यराड् विश्वात्मदैवं सुतरां तथाऽऽत्मनः ।
तद्दर्शनाह्लादपरिप्लुताशयः सद्यः[५] समुत्थाय ननाम सान्वयः ॥३५॥
तयोः समानीय वरासनं मुदा निविष्टयोस्तत्र महात्मनस्तयोः ।
दधार पादाववनिज्य तज्जलं सवृन्द आब्रह्म [६]पुनद् यदम्बु ह ॥३६॥
समर्हयामास स तौ[७] विभूतिभिर्महार्हवस्त्राभरणानुलेपनैः ।
[८]स्रग्धूपदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन च ॥३७॥
स इन्द्रसेनो भगवत्पदाम्बुजं बिभ्रन्मुहुः प्रेमविभिन्नया धिया ।
उवाच [९]हानन्द[१०]कलाकुलेक्षणः प्रहृष्टरोमा नृप गद्गदाक्षरम्[११] ॥३८॥

कर्दमक्षमा

ऋषिः, उवाच ।

भारत, एवं, मात्रा, सञ्चोदितौ, रामः, कृष्णः, च, योगमायाम्, उपाश्रितौ, सुतलम्, संविविशतुः ॥३४॥ तस्मिन्, प्रविष्टौ, विश्वात्मदैवम्, उपलभ्य, सुतराम्, तद्दर्शनाह्लादपरिप्लुताशयः, दैत्यराट्, सद्यः, समुत्थाय, सान्वयः, ननाम ॥ निविष्टयोः, तयोः, महात्मनोः, मुदा, वरासनम्, समानीय, पादौ, अवनिज्य, ह, आब्रह्मपुनत्, यदम्बु, तज्जलम्, दधार ॥३६॥ सः, महार्हवस्त्राभरणानुलेपनैः, ताम्बूलदीपामृतभक्षणादिभिः, विभूतिभिः, स्वगोत्रवित्तात्मसपर्पणेन, तौ, समर्हयामास ॥३७॥ नृप, सः, आनन्दजलाकुलेक्षणः, प्रहृष्टरोमा, इन्द्रसेनः, प्रेमविभिन्नया, धिया, भगवत्पदाम्बुजे, बिभ्रत्, ह, गद्गदाक्षरम्, उवाच ॥३८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

दैत्यराट् बलिः कथम्भूतौ विश्वस्याऽत्मभूतं दैवं सान्वयः सपरिवारः ॥३५॥ सवृन्दः सपरिजनः कथम्भूतौ अवनिज्य यदम्बु ययोरवनेजनोदकमाब्रह्म ब्राह्मणमभिव्याप्य जगत् पुनत् पवित्रयत् वर्तते तौ ॥३६-३७॥ इन्द्रसेनो प्रेमविभिन्नया प्रेमार्द्रया धिया बिभ्रद्धारयन् ॥३८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवमुक्तरीत्या । सुतलं तृतीयं विवरम् ॥३४॥ तस्मिन् सुतले । तयो रामकृष्णयोर्दर्शनेन य आह्लादस्तेन परिप्लुतो व्याप्तोऽन्तःकरणं यस्य स तथा ॥३५॥ तयो रामकृष्णयोः । तत्र वरासने । तज्जलं पादोदकम् । ययो रामकृष्णयोः । वृष्णिषु प्राप्य इत्युक्तेर्वस्तुतो बलदेवोऽपि विष्णुरेवेति । ततश्च यदम्ब्विति समंजसम् । पुनत्पुनातेः शत्रन्तः । तौ रामकृष्णौ ॥३६॥ स तौ रामकृष्णौ । अमृतभक्षणं रसायनभोजनम् । "अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जले जग्धौ मोक्षणे गोरसे ॥ क्लीबे ना त्वमरे स्त्री तु गुडूच्यां मद्यभिक्षयोः ।" इति यादवः । तच्च बलपुष्ट्यादिसम्पादकौषधीविशेषः । गोत्रं वित्तं धनम्, आत्मा देहस्तेषां समर्पणेन 'गोत्रं नाम्नि कुले बले' 'आत्मा देहे धृतौ जीवे' इति यादवः ॥३७॥ स प्रकृतः । स्मरन् 'हा विषादशुभार्तिषु' इति । यद्वा-ह स्फुटम् ॥३८॥

---

१. श्रीशुकः-च.पु.टी. । २. संचोदितः - इति कस्यचित् । ३. रामकृष्णौ कुरूद्वह - वीर. विज. । ४. रसातलं-वीर. । ५. स उत्थाय-गो. ६. पुनात्यदों ब्रूही-वीर. ; पुनद्यदंबुभिः । ७. महाविभूतिभिः-इति कस्यचित् । ८. ताम्बूलदीपा-श्रीधर. वंशी. ; स्त्रग्धुपा-वीर. विज. । ९. -वीर. ; बभाष हा -विज. । १०. जला-श्रीधर. वंशी. वीर. विज. । ११. क्षरः-गो. प्रे. टी. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सञ्चोदित इति । सञ्चोदिताविति च क्वचित् हे भारत भरतकुलश्रेष्ठेत्याश्चर्यान्तरस्मरणोल्लासेन तं श्लाघते ॥३४॥ उत्थ
चिरमभीप्सितौ समीप एव लब्ध्वा तस्य चालभ्यलाभोऽभूदित्यभिप्रायेण तौ विशिनष्टि-विश्वस्यात्मा च दैवमाराध्यश्च एक
द्वयोरैक्यापेक्षया त्वर्थे तथाशब्दः आत्मनस्तु सुतरामतिशयेनात्मदैवं वामनरूपे तस्मिन् स्वयं सर्वार्पणात्कुलदेवत्वाच्च तस्य
सम्यक् सांजलित्वादिना उत्थाय दैत्यराडिति परमादरात् यद्वा दैत्यानामन्येषामपि तादृशभावं सूचयति अत एव सान्वयः ॥३
तयोस्ताभ्यां मुदा सम्यक् स्वशिरोनिधानादिना द्वयोस्तत्त्वैक्येन स्नेहेन चाभेददृष्ट्या वरासनमेकमेवानीय अतस्तस्मिन् मु
निविष्टयोरासीनयोः सतोः तयोरिति पुनरुक्तिर्भक्तिभरेण तदेति पाठः क्वचित् बभार शिरसि दधारेति क्वचित् ॥३६॥ सम्यगर्हयामा
सम्यक्तासाधनान्याह-महाविभूतिरित्यादिना । सतौ विभूतिरिति क्वचित् । ता एवाह-महार्हेत्यादिना । अमृतवत् भक्ष्यत इति त
तत् महामिष्टान्नपानादिकमिति यद्वा अमृतं सुधां भक्षणञ्च फलादिकं ताम्बूलादिकं वा आदिशब्दाद्रत्नपर्यङ्कादयः पुनरात्मपर्यन्तसम
च सर्वं सागरस्थानीयाय वामनरूपाय सम्प्रति तु समुद्रस्थानीयाय स्वयं भगवते श्रीकृष्णायेत्यविशेष एव विशेषात्र दोषाय
व्यवहारात्तदानीं तद्द्वारदेशविराजमानवासस्य श्रीवामनस्य च तदवतारसमये तत्रैव प्रवेशो गम्यते ॥३७॥ इन्द्रस्य सेनेव सेना य
सः प्रायः समानचतुरङ्गत्वात् भगवतो युगपत् द्वयोरपि पदाम्बुजम् अभेदेन भवनादेकत्वं मुहुर्बिभ्रत् अतृप्त्या पुनः पुनः शिर
वक्षसि च धारयन् यद्वा उत्तरोत्तरोद्भूतत्वान्मुहुर्यत्प्रेम तेन विभिन्न्या ह हर्षे इत्थमेव सम्बोधयति नृपेति प्रेमलक्षणमाह-आनन्देत्य
। तत्रानन्देति तृतीयायाश्छान्दसो लुक् तस्मात्प्रहृष्टेत्यत्र गद्गदेत्यत्र योज्यं गद्गदाक्षरं यथा स्यात् पाठान्तरे तु गद्गदेत्यक्षरं वर्णो
यस्य सः ॥३८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्यक् स्तुत्यादिना दृढं चोदितः सन्, सम्यक् सद्य एव सुखमन्तर्विविशतुः प्रविष्टौ । तत्र हेतुः-योगे
अचिन्त्यानन्तमहाशक्तिकत्वादित्यर्थः । हे भारतेति महावंशजेन त्वया भगवन्माहात्म्यं प्रतीयत एवेति भावः ॥३४॥ उत्
भृत्यादिद्वारा स्वज्ञानशक्त्या वा ज्ञात्वैव । यद्वा, चिरमभीप्सितौ समीप एव लब्ध्वा । तस्य चालभ्यलाभोऽभूदित्यभिप्राये
विशिनष्टि-विश्वस्य आत्मदैवम्, इष्टदेवताम्, एकत्वं तयोरैक्यापेक्षया, त्वर्थे तथा । आत्मनस्तु सुतरामतिशयेनात्मदैवम्, -कुलदे
स्वयं तस्मिन् सर्वार्पणाच्च । अतस्तद्दर्शनेन य आह्लाद आनन्दमहोदधिस्तस्मिन् परितः प्लुतो मग्न आशयोऽन्तःकरणं यस्य
अनेन पुरा श्रीवामनदेवस्य सदा द्वारवर्ति-श्रीभगवतोऽपि दर्शनादेतयोर्दर्शनमाहात्म्यं सूचितम्, अधुनाशेषभगवत्ताप्रकटनात्
एव सर्वांशैः परिपूर्णतयात्रावतीर्णत्वात्तदानीं तद्द्वारेऽपि भगवतः स्थितिर्ज्ञेया । अतः सम्यक् सांजलित्वादिनोत्थाय, दैत्य
परमादरात् । यद्वा, दैत्यानामन्येषामपि तादृशभावं सूचयति, अत एव सान्वयः ॥३५॥ मुदा सम्यक् स्वशिरोनिधानादि
अतस्तस्मिन्मुदा निविष्टयोरासीनयोः सतोः, एवं मुदेत्यस्योभयतोऽप्यन्वयः । तथा तयोरित्यस्यापि स्थानद्वयेऽन्वयेनापौनरु
पाठान्तरं स्पष्टम् । तत्पादावनेजनसम्बन्धि जलं सर्वं सवृन्दो बभार, शिरसि ऊर्ध्वं सर्वाङ्गेषु वा धृतवान्, यतो महात्मनः
परमेश्वरयोः । हे स्फुटम् ॥३६॥ सम्यगर्हयामास, सम्यक्तासाधनान्याह-महाविभूतिभिरित्यादिना । महाविभूतीरेवाह-महार्ह
यद्वा, महाविभूतिभिश्छत्रचामरादिनिजमहावैभवैः । अमृतवद्भक्षणं भक्ष्यत इति तथा तत्, महामिष्टान्नपानादिकमित्यर्थः ।
अमृतं भक्षणं च फलादिकं ताम्बूलादिकं वा, आदिशब्दाद्रत्नपर्यङ्कादयः, स्वस्य गोत्रं कुलं पुत्रकलत्रादिवित्तं च, तथा
देहस्य देहिनो वा सम्यक् तदेकाधीनतादिनार्पणेन, तदीयतया निवेदनेन ॥३७॥ इन्द्रस्य सेनेव सेना यस्य सः, दैत्यानामपि
वैष्णवत्वेन देवरूपाद्भगवतः श्रीकृष्णस्य, भगवतोर्वा द्वयोः पादाम्बुजम्, एकत्वेऽपि द्वित्वं बहुत्वं च सिध्येदिति मु
मुहुर्बिभ्रत्, अतृप्त्या पुनः पुनः शिरसि वक्षसि च धारयन् । यद्वा, मुहुर्यत् प्रेम तेन विभिन्नया, यत्नेन संव्रियमाणस्यापि (संव्रिय
[घ, ङ]।) प्रेम्णः पुनः पुनराविर्भावात् । ह हर्षे, हा खेदे वा, तत्स्मरणेनात्मनस्तादृशत्वाभावेन वा, श्रीबादरायणेस्तृप्त्यभा
(प्रेमार्णवोदयात् [ग]।), इत्थमेव सम्बोधयति-नृपेति । प्रेमलक्षणमाह-आनन्देत्यादिविशेषणैस्त्रिभिः । एषां यथोत्तरं
तत्रानन्देति पदं समस्तमपि तृतीयान्ततयाग्रे द्वयोरपि योज्यम् ॥३८॥

विश्वात्मदैवं विश्वात

एवमिति । योगमाय
दैत्यराट् बलिः विश्वेषामात्मनो
आह्लादस्तेन परिप्लुतः व्यासः
रामकृष्णयोः श्रेष्ठमासनमानीया
अम्बु जलम् आब्रह्म ब्रह्माणमभि
। स बलिः तौ समर्हयामास वि
च समर्हयामासेति सम्बन्धः ॥३७
व्याप्ते अक्षिणी यस्य प्रहृष्टान्युद

दैत्यराट् बलिः विश्वस्या
ब्रह्माणमभिव्याप्य पुनत् पवित्रयद्

हे भारत परीक्षित् ! सुत
समुत्थाय तौ ननामेत्यन्वयः । स
आत्मनस्तु सुतरामिष्टदेवौ । कथम्
॥३५॥ तयोः वरासनं समानीय त
शिरसा दधारेत्यन्वयः । यत् अम्
सपरिवारः । ह प्रसिद्धमेतम् । पु
वस्त्रादिभिः ताम्बूलादिभिः स्वगो
अमृतभक्षणं (अमृतं व्योम्नि देवा
इन्द्रसेनो बलिः धिया भगवत्पदाम्बु
आनन्दजलैः प्रेमाश्रुभिः आकुले व

दैत्यराट् बलिः विश्वात्मनो
यदम्बु जलम् आब्रह्म ब्रह्माणमभि
॥३६-३७॥ इन्द्रसेनो बलिः बिभ्रत्

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विश्वात्मदैवं विश्वात्मनां दैवमीशम् ॥३५-३७॥ इन्द्रसेनो बलिः ॥३८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमिति । योगमायामाश्चर्यशक्तिम् उपाश्रितौ रसातलं (सुतलम्) बलिचक्रवर्तिनो लोकं विविशुः ॥३४॥ तस्मिन्निति । दैत्यराट् बलिः विश्वेषामात्मनां दैवं दैवभूतं तथा नितरामात्मनो दैवतभूतौ तस्मिन् सुतले प्रविष्टौ उपलभ्य दृष्ट्वा तयोर्दर्शनेन य आह्लादस्तेन परिप्लुतः व्याप्तः आशयो मनो यस्य सः सान्वयः सपरिवारः सद्यस्तदैवोत्थाय ननाम ॥३५॥ तयोरिति । तयोः रामकृष्णयोः श्रेष्ठमासनमानीयादाय समर्प्य तत्र वरासने पादाववनिज्य प्रक्षाल्य तज्जलं सपरिवारः शिरसा जहार कुतः हि यस्माददः अम्बु जलम् आब्रह्म ब्रह्माणमभिव्याप्य कृत्स्नं जगत् पुनाति पुनद्यदिति पाठे यदम्बु पवित्रयत् वर्तत इत्यर्थः ॥३६॥ समर्हयामासेति । स बलिः तौ समर्हयामास विभूतिभिः पुष्कलैः अमृतभक्षणममृततुल्यभक्ष्यद्रव्यं स्वगोत्रं स्वकुलं वित्तमात्मा च तेषां समर्पणेन च समर्हयामासेति सम्बन्धः ॥३७॥ स इति । इन्द्रसेनो बलिः प्रेमविभिन्नया प्रेमार्द्रया धिया भगवत्पादाम्बुजं धारयन् आनन्दजलैराकुले व्याप्ते अक्षिणी यस्य प्रहृष्टान्युदञ्चितानि रोमाणि यस्य गद्गदानि कुण्ठितानि अक्षराणि यस्य सः हे नृप ! उवाच ॥३८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१-५९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

दैत्यराट् बलिः विश्वस्यात्मा च दैवमाराध्यश्च एकत्वमीश्वरत्वेन द्वयोरैक्यात् ॥३५॥ सवृन्दः सपरिवारः यदम्बु आब्रह्म ब्रह्माणमभिव्याप्य पुनत् पवित्रयद्भवति ॥३६-३७॥ इन्द्रसेनो बलिः ॥३८॥

गूढार्थदीपिनी

हे भारत परीक्षित् ! सुतलं तृतीयं विवरम् ॥३४॥ तस्मिन् सुतले प्रविष्टौ तौ उपलभ्य दृष्ट्वा दैत्यराट् बलिः सद्यः समुत्थाय तौ ननामेत्यन्वयः । सान्वयः सपरिवारः । कथम्भूतौ । विश्वेषामात्मनां जीवानां दैवं देवतावदादरणीयौ । आत्मनस्तु सुतरामिष्टदेवौ । कथम्भूतो बलिः । तयोर्दर्शनेन य आह्लादः तेन परिप्लुतो व्याप्तः आशयोऽन्तःकरणं यस्य सः ॥३५॥ तयोः वरासनं समानीय तत्र निविष्टयोस्तयोः रामकृष्णयोः पादौ अवनिज्य प्रक्षाल्य तज्जलं मुदा हर्षेण बलिः शिरसा दधारेत्यन्वयः । यत् अम्बु आब्रह्म ब्रह्मलोकमभिव्याप्य सर्वं जगत् पुनत् पवित्रीकुर्वत् वर्तते तत् । सवृन्दः सपरिवारः । ह प्रसिद्धमेतम् । पुनत् पुनातेः शत्रन्तः ॥३६॥ स बलिः । विभूतिभिः ऐश्वर्यबोधकैः महार्हैः बहुमूल्यैः वस्त्रादिभिः ताम्बूलादिभिः स्वगोत्रादिसमर्पणेन च तौ समर्हयामास पूजयामासेत्यन्वयः । गोत्रं कुलम् आत्मा देहः । अमृतभक्षणं (अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । इति यादवः ।) रसायनभोजनम् । अनुलेपनं चन्दनम् ॥३७॥ स इन्द्रसेनो बलिः धिया भगवत्पदाम्बुजं बिभ्रद् धारयन् गद्गदाक्षरं यथा स्यात्तथा ह स्फुटम् तौ उवाचेत्यन्वयः । कथम्भूतः । आनन्दजलैः प्रेमाश्रुभिः आकुले व्याप्ते ईक्षणे नेत्रे यस्य सः । प्रहृष्टरोमा रोमाञ्चनयुक्तः विभिन्नया आर्द्रया ॥३८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

दैत्यराट् बलिः विश्वात्मनां सर्वेषां जीवानां दैवतम् एकवचनं द्वयोरैक्यात् सान्वयः सपरिवारः ननाम ॥३५॥ अम्बु जलम् आब्रह्म ब्रह्माणमभिव्याप्य जगत् पुनत् पवित्रयद्वर्तते तज्जलं सवृन्दः सपरिवारः दधार शिरसेति शेषः ॥३६-३७॥ इन्द्रसेनो बलिः बिभ्रत् धारयत् ॥३८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो भगवत्कृतमाह-एवं सञ्चोदिताविति। गुर्वर्थेनान्वेषणार्थं गताविति पूर्वमप्युक्तं तथाऽत्रापि सिद्धवत्कारेण जानीत इति सुतलमेव गतौ गमनमार्गमाह-योगमायामुपस्थिताविति। अष्टाविंशतितत्त्वेभ्यः अधस्ताद्योगमाया तस्यां प्रविष्टः स्वगृहेऽस्य मध्ये व्यवधायकाभावात् सुतल एव प्रादुर्भूतौ ॥३४॥ ततो दैत्यः कदाचिदाज्ञां न करिष्यतीत्याशङ्कानिवृत्त्यर्थं बलिकृतां पूजामाह-तस्मिन् प्रविष्टाविति चतुर्भिः। तस्मिन् स्थले प्रवेशमात्र एव दैत्यानां स्वामी शीघ्रनिवेदकैः दैत्यैर्भगवदागमनमुपलभ्य सद्यः समुत्थाय ननामेति सम्बन्धः। पूर्वं भगवता बद्ध इति कदाचिदद्वेषाद्भयाद्वा सम्मुखो न भवेदित्याशंक्याह-विश्वात्मदैवमिति। विश्वस्यात्मा दैवं च भगवान् तेनात्मत्वान्न भयम् आराध्यत्वान्न द्वेष इत्यर्थः। यत्र भगवान् जगत एव एवंविधः साधारणस्यापि भवदुद्वेषसम्भावनारहितः तत्र स्वस्य महतः कथमेवं भविष्यतीत्यर्थः। न च वक्तव्यं विश्वस्य भगवान्नापकारं करोतीति यतः सर्वस्योत्पत्तिप्रलयकर्ता स एव तथा ज्ञानं नास्तीति चेत्तर्हि ज्ञानं गुणो जात इति ज्ञानवतामधिक एव पूज्य इत्याह-सुतरां तथात्मन इति। किञ्च पूर्वं संसारव्यावृत्त्या अनिर्वृतः स्थितः इदानीं सुतले स्वर्गाधिकेन सुखेन तद्भावनया तिष्ठतीति स्मृतिसंजातया भक्त्या पूर्वान्तःकरण एव तद्दर्शनाह्लादेन अधिकेन परिप्लुताशयो जातः। अत आलस्यादिधर्मेषु लीनेषु सद्यः समुत्थाय ननाम। तत्पुत्रस्य बाणस्य बाहुच्छेदो भगवता कृत इति कदाचिदनमनं स्यात्तत आह-सान्वय इति। पुत्रपौत्रादिसहितः ॥३५॥ ततः पूजामाह-तयोः समानीयेति मुदेत्युभयत्र सम्बन्धः। आसनस्याग्रहणे पुनर्भयं सम्भावितं स्यात् अत आह-निविष्टयोस्तत्रेति तत्रासने उपविष्टयोः सतोः महात्मत्वात् निःशङ्कतया तत्रोपवेशनम् अन्यथा बद्धस्य गृहे प्रभुः सशङ्को भवति तदा तत्पादाववनिज्य चरणोदकं सकुटुम्बः दधार तस्य माहात्म्यमाह-यदम्बु गङ्गारूपमाब्रह्म। ब्रह्मलोकमारभ्य पातालपर्यन्तं पुनातीति आब्रह्मपुनत्। हेत्याश्चर्ये। कथमन्यस्य शेषभावं प्राप्तम् अन्यस्य शोधकमिति ततः पुष्पादिभिः समर्हयामास। महार्हाणि वस्त्राण्याभरणानि च अनुलेपनानि च चतुःस्रगादीनि तथा स्रग्धूपदीपाः अमृतममृतमयानि वा भक्ष्याणि आदिशब्देन ताम्बूलाद्युपचारा गृह्यन्ते। नैतावता साधारणधर्मेण भगवांस्तुष्यतीति स्वगोत्रवित्तात्मसमर्पणं च कृतवान् आत्मीयाः धनं देहश्चेति त्रितय एव सर्वानुप्रवेशः ॥३६-३७॥ ननु दैत्योऽयं कथमेवं भगवद्भक्त इति चेत्तत्राह-स इन्द्रसेन इति। इन्द्रस्येव सेना यस्येति उत्तमसत्त्वांशः तस्येन्द्रियादिसामग्री अत्यन्तं भगवत्परा तथास्यापीत्यर्थः। बाह्यसेनापि तथैवेति ज्ञातव्यं महत्त्वमपि सूच्यते तादृशोऽपि भगवत्पदाम्बुजं बिभ्रत् हस्तद्वयेन पश्चान्मुहुः प्रेमविभिन्नया धिया च बिभ्रदुवाच वचनस्यान्यानीन्द्रियाणि महाभूतान्याह-आनन्दकलाकुलेक्षणः प्रहृष्टरोमा गद्गदाक्षरः इन्द्रियाणां देहस्य वाचश्च वैकल्यं निरूपितम् ॥३८॥

श्रीसुबोधिनीसारः

शुकोक्तिः। हे भारत! एवं रामः कृष्णश्च मात्रा सञ्चोदितौ प्रेरितौ योगमायामुपाश्रितौ सुतलं पातालं ययतुः ॥३४॥ तस्मिन् पाताले प्रविष्टौ विश्वस्यात्मभूतं दैवं तथात्मनः स्वस्य सुतरामतिशयेन दैवम् उपलभ्य ज्ञात्वा दैत्यराट् बलिः तयोर्दर्शनाह्लादे हर्षस्तेन परिप्लुतो व्याप्त आशयोऽन्तःकरणं यस्य स सान्वयः सकुटुम्बः सद्यः समुत्थाय ननाम ॥३५॥ तयोः ताभ्यां वरं श्रेष्ठमासनं समानीय तत्र मुदा हर्षेणोपविष्टयोर्महात्मनोस्तयोः पादाववनिज्य प्रक्षाल्य आब्रह्म ब्रह्माणमभिव्याप्य जगत् पुनत् यदम्बु वर्ति तज्जलं सवृन्दः सपरिवारः दधार। शिरसीति शेषः। ह स्फुटम् ॥३६॥ स बलिः तौ रामकृष्णौ विभूतिभिः सम्पद्भिः महार्हैर्वस्त्रादिभिः ताम्बूलादिभिः स्वगोत्रस्य वित्तस्यात्मनो देहस्य समर्पणेन पूजयामास ॥३७॥ प्रेमविभिन्नया स्नेहार्द्रया धिया बुद्ध्या भगवत्पदाम्बुजं बिभ्रत् धारयन् स इन्द्रसेनो बलिः प्रेमाश्रुपूर्णनेत्रः प्रहृष्टरोमा सरोमांचितो गद्गदाक्षरमुवाच हे नृप! ॥३८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे भारत! मात्रैवं सञ्चोदितौ रामकृष्णौ सुतलं विविशतुः। कथं सुतलप्रवेशः शक्यः इत्याशंक्याह-योगमायामचिन्त्यशक्तिमुपाश्रिताविति ॥३४॥ तस्मिन् सुतले प्रविष्टौ विश्वेषामात्मनां दैवतभूतौ तथाऽऽत्मनः स्वस्य सुतरां दैवतभूतौ रामकृष्णावुपलभ्य दृष्ट्वा तयोर्दर्शनेन य आह्लादस्तेन परिप्लुतो व्याप्तः आशयोऽन्तःकरणं यस्य स दैत्यराट् बलिः सान्वयः सपरिवारः सद्यस्तदैवोत्थाय ननाम ॥३५॥ तयोर्महात्मनोः रामकृष्णयोः श्रेष्ठमासनं समानीय समर्प्य तत्रासने निविष्टयोः पादाववनिज्य प्रक्षाल्य

तज्जलं सवृन्दः सपरिवा
जगत् पुनत् पवित्रं यद्वर्त
अनुलेपनं चन्दनम्। अमृ
ततश्च स इन्द्रसेनो बलिः प्रे
अक्षिणी यस्य सः, प्रहृष्टा

एवमिति। हे भ
तस्मिन् सुतले प्रविष्टौ विश्वेष
दृष्ट्वा तयोर्दर्शनेन य आह्लादस्
ननाम ॥३५॥ तयोरिति। तय
तज्जलं सवृन्दः सपरिवारो मु
जगत् पुनत् पवित्रयद्वर्तते ॥
समर्हयामास। तत्र अनुलेपनं
देहः ॥३७॥ स इति। हे नृ
आनन्दजैर्जलैरश्रुभिराकुले व्य
यस्य तादृशः सन् उवाच। गद्

इन्द्रसेनो बलिः प्रेम
बृहत्त्वाद्यसंख्यगुणविशिष्टाय वे
ब्रह्मादीनामपि दुःप्रापमपि रजस्
अतोऽदुर्लभमिति सम्बन्धः ॥३
॥३७॥ विशुद्धसत्त्वस्य धाम्नि प्रक
वयं विरोचनपुत्राश्च तादृशा अन्ये

एवमिति॥ हे भारत! रा
सुतलं बलिचक्रवर्तिनो लोकं संवि
स्वस्य तु सुतरां दैवतभूतौ रामकृष्णौ
मनो यस्य तथाभूतः सान्वयः सन् सद्य
समानीय आदाय समर्प्येत्यर्थः। तत्र
यदम्बु आब्रह्म ब्रह्माणमभिव्याप्य जग
मुदात्यानन्देन सवृन्दः सपरिवारः सन् द
महामूल्यवासोऽलङ्कारोत्तमगन्धानुलेप
विभूतिभिः स्वगोत्रं स्वकुलं च वित्तं

द्धवत्कारेण जानीत
ां प्रविष्टः स्वगृहदेशे
निवृत्त्यर्थं बलिकृतां
गिवदागमनमुपलभ्य
ह-विश्वात्मदैवमिति
विधः साधारणस्यापि
मकारं करोतीति यतः
पूज्य इत्याह-सुतरां
ष्ठतीति स्मृतिसंजातया
सद्यः समुत्थाय ननाम
दिसहितः ॥३५॥ ततः
आह-निविष्टयोस्तत्रेति
त तदा तत्पादाववनिज्य
पुनातीति आब्रह्मपुनत्
र्हाणि वस्त्राण्याभरणानि
म्बूलाद्युपचारा गृह्यन्ते।
त्रितय एव सर्वानुप्रवेशः
यस्येति उत्तमसत्त्वांशः
मपि सूच्यते तादृशोऽपि
न्द्रियाणि महाभूतान्याह-

तातं ययतुः ॥३४॥ तस्मिन्
राट् बलिः तयोर्दर्शनाह्लादो
तयोः ताभ्यां वरं श्रेष्ठमासनं
जगत् पुनत् यदम्बु वर्तते
सम्पद्भिः महार्हैर्वस्त्रादिभिः
र्द्रया धिया बुद्ध्या भगवतः
नृप ! ॥३८॥

शः शक्यः इत्याशंक्याह-
त्मनः स्वस्य सुतरां दैवतभूतौ
राट् बलिः सान्वयः सपरिवारः
ष्टयोः पादाववनिज्य प्रक्षाल्य

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सवृन्दः सपरिवारः मुदा युक्तो बलिः शिरसा दधार। ह हेतौ, यस्मात् यदम्बु युवयोः पादोदकं आब्रह्म ब्रह्माणमभिव्याप्य पुनत् पवित्रं यद्वर्तते ॥३६॥ महार्हैः श्रेष्ठैर्वस्त्रादिभिर्विभूतिभिः ताम्बूलादिभिश्च स्वगोत्रादिसमर्पणेन स तौ समर्हयामास। नुलेपनं चन्दनम्। अमृतभक्षणम् अमृततुल्यं भक्ष्यम्। स्वगोत्रं स्वकुलं पुत्रपौत्रकलत्रादि। वित्तं धनम्। आत्मा देहः ॥३७॥ स इन्द्रसेनो बलिः प्रेमविभिन्नया प्रेमार्द्रया धिया भगवत्पदाम्बुजं मुहुर्बिभ्रत् धारयन् आनन्दजैर्जलैरश्रुभिराकुले व्याप्ते ईक्षणे यस्य सः, प्रहृष्टानि उदंचितानि रोमाणि यस्य सः, गद्गदानि कुण्ठितान्यक्षराणि यस्य सः, हे नृप! उवाच ॥३८॥

अन्वितार्थप्रकाशिका

एवमिति। हे भारत ! मात्रैवं सञ्चोदितौ योगमायामुपाश्रितौ रामकृष्णौ सुतलं संविविशतुः ॥३४॥ तस्मिन्निति। सुतले प्रविष्टौ विश्वेषामात्मनां दैवं दैवतभूतौ एकत्वमीश्वरेत्वेनैक्यात् तथात्मनः स्वस्य सुतरां दैवतभूतौ रामकृष्णावुपलभ्य तयोर्दर्शनेन य आह्लादस्तेन परिप्लुतो व्याप्तः आशयोऽन्तःकरणं यस्य स दैत्यराट् बलिः सान्वयः सपरिवारः सद्यस्तदैवोत्थाय ॥३५॥ तयोरिति। तयोर्महात्मनोः रामकृष्णयोः श्रेष्ठमासनं समानीय समर्प्य तत्रासने निविष्टयोः पादाववनिज्य प्रक्षाल्य सवृन्दः सपरिवारो मुदा युक्तो बलिः शिरसा दधार। ह हेतौ यस्मात् यदम्बु ययोरवनेजनोदकं आब्रह्म ब्रह्माणमभिव्याप्य पुनत् पवित्रयद्वर्तते ॥३६॥ समिति। महार्हैः श्रेष्ठैर्वस्त्रादिभिर्विभूतिभिः ताम्बूलादिभिश्च स्वगोत्रादिसमर्पणेन स तौ र्हयामास। तत्र अनुलेपनं चन्दनम् अमृतभक्षणम् अमृततुल्यं भक्ष्यं स्वगोत्रं स्वकुलं पुत्रपौत्रकलत्रादि वित्तं धनम् आत्मा ॥३७॥ स इति। हे नृप ! स इन्द्रसेनो बलिः प्रेमविभिन्नया प्रेमार्द्रया धिया भगवत्पदाम्बुजं मुहुर्बिभ्रत् धारयन् जैर्जलैरश्रुभिराकुले व्याप्ते ईक्षणे अक्षिणी यस्य सः प्रहृष्टानि उदंचितानि रोमाणि यस्य सः गद्गदानि कुण्ठितान्यक्षराणि तादृशः सन् उवाच। गद्गदाक्षरमिति पाठे क्रियाविशेषणम् ॥३८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

इन्द्रसेनो बलिः प्रेमविभिन्नया प्रेमार्द्रया बुद्ध्या मुहुः बिभ्रत् धारयन् ॥३४॥ अनन्ताय अवधिरहिताय बृहते संख्यगुणविशिष्टाय वेधसे विश्वकर्त्रे सांख्ययोगयोः वितानयोर्विस्तारकर्त्रे ॥३५॥ त्वां युवयोः यद्दर्शनं भूतानां नामपि दुःप्रापमपि रजस्तमःस्वभावानां नोऽस्माकं तत् अदुर्लभं जातम्। यद्यतः यदृच्छया स्वेच्छया भवन्तौ इह प्राप्तौ दुर्लभमिति सम्बन्धः ॥३६॥ राजसतामसस्वभावा दैत्यादयोऽपि त्वत्सम्बन्धेन देवेभ्यः श्रेष्ठा इत्याह त्रिभिः दैत्येति विशुद्धसत्त्वस्य धाम्नि प्रकाशके शास्त्रशरीरिणि सच्छास्त्ररूपे त्वयि तदनुसारेण वर्तमानाभावात् ते दैत्यादयो नित्यनिबद्धवैराः विरोचनपुत्राश्च तादृशा अन्ये च ये बद्धवैराः सन्ति ॥३८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ हे भारत ! रामः कृष्णश्च मात्रा एवमुक्तप्रकारेण सन्नोदितौ अत एव योगमायामाश्चर्यशक्तिम् उपाश्रितौ सन्तौ बलिचक्रवर्तिनो लोकं संविविशतुः ॥३४॥ तस्मिन्निति ॥ दैत्यराट् बली: विश्वेषामात्मनां दैवं दैवतभूतौ तथा आत्मनः तु सुतरां दैवतभूतौ रामकृष्णौ तस्मिन् सुतले प्रविष्टौ उपलभ्य दृष्ट्वा तयोः दर्शनेन य आह्लादस्तेन परिप्लुतो व्याप्त आशयो तथाभूतः सान्वयः सन् सद्यः समुत्थाय ननाम नमस्कारं चकार ॥३५॥ तयोरिति ॥ तयोः रामकृष्णयोः वरासनमुत्तममासनं आदाय समर्प्येत्यर्थः। तत्र वरासने निविष्टयोरुपविष्टयोः महात्मनोः तयो रामकृष्णयोः पादावङ्घ्री अवनिज्य प्रक्षाल्य आब्रह्म ब्रह्माणमभिव्याप्य जगदिति शेषः। पुनत् पुनाति, छान्दसोऽयं प्रयोगः। ह सर्वशास्त्रप्रसिद्धं तज्जलं पादावनेजनोदकं सवृन्दः सपरिवारः सन् दधार शिरसेति शेषः ॥३६॥ समर्हयामासेति ॥ सः बलिः तौ रामकृष्णौ महार्हवस्त्राभरणानुलेपनैः वासोऽलङ्कारोत्तमगन्धानुलेपनैः ताम्बूलदीपामृतभक्षणादिभिः ताम्बूलार्पणदीपविधानामृतसमानभक्षणद्रव्यार्पणप्रभृतिभिः स्वगोत्रं स्वकुलं च वित्तं धनं च आत्मा सजीवो देहश्च तेषां समर्पणे तेन च समर्हयामास ॥३७॥ स इति ॥ हे नृप !

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इन्द्रसेनः स बलिः प्रेमविभिन्नया प्रेमार्द्रया धिया बुद्ध्या भगवत्पदाम्बुजं मुहुः बिभ्रत् वक्षसि धारयन् आनन्दजलैः आकुले अक्षिणी यस्य सः प्रहृष्टान्युदंचितानि रोमाणि यस्य सः गद्गदानि कुण्ठितान्यक्षराणि यस्य स तथाभूतः सन् ह स्फुटम् उवाच ॥३८॥

कृष्णप्रिया

श्रीशुकदेवजी कहते है - हे भारत ! माता देवकीजी की प्रेरणा से राम और श्रीकृष्ण श्रीयोगमाया को साथ लेकर बिनाविघ्न सुतलमें जाकर उपस्थित हुवे ॥३४॥ ़राजन् ! जब भगवान सुतलमें जा पहुंचे तब दैत्यराज ताकतवर श्रीबलिजी बिराजमान थे, गत् के आत्मा और इष्टदेव तथा मेरे परम स्वीमी भगवान श्रीकृण और बलरामजी मेरे आंगन पधारे है मेरा परम सौभाग्य है ऐसा कहकर उठ खडे हो गये, भगवान के दर्शन (झंखी) से हृदय गद् गद् हो गया, और प्रभुचरणमें अपने परिवार सहित प्रणाम किया ॥३५॥ महाराजा बलिने भगवान श्रीकृष्ण को और बलरामजी को उत्तम आसन समर्पित किया, दोनों महात्मा आसनपर बिराजमान हुवें, पुनः प्रियतम भावान के चरणकमलों का प्रक्षालन किया, प्रभु का चरणतीर्थ ब्रह्म पर्यंत प्रत्येक को पवित्र करता है । वह प्रभु के पादतीर्थ को राजा बलिने और स्व परिवार के प्रत्येक सदस्यने अपने मस्तक पर धारण किया ॥३६॥ पुनः बलिराजने बहुमूल्य वस्त्र, आभूषण, चंदन ताम्बूल, दीपक अमृत समान भोजन एवं अन्य विविध सामग्रियों से उनकी पूजा कि और अपने समस्त परिवार धन तथा शरीर आदि को उनके चरणोंमें समर्पित कर दीया ॥३७॥ परीक्षित ! राजन् ! दैत्यराज बलि इस अवसर पर भगवत् परायण होकर उसका हृदय द्रवीभूत हो गया, भगवत् चरणोंमे प्रेमसे बुद्धि विह्वल हो गई, और काया पुलकित हो गई कंठ गद् गद् हो गया नेत्रों से आनंद के आंसू बहने लगे और कृपण जीव हृदयमें धनको धारण करता है, वैसे बलिराजने हृदयमें भगवान के चरणों को धारण किया ॥३८॥

बलिरुवाच

नमोऽनन्ताय [1]बृहते नमः कृष्णाय वेधसे । सांख्ययोगवितानाय[2] ब्रह्मणे परमात्मने ॥३९॥
दर्शनं वां हि भूतानां [3]दुष्प्रापं [4]चातिदुर्लभम् । रजस्तमःस्वभावानां यन्नः [5]प्राप्तौ यदृच्छया ॥४०॥
दैत्यदानवगन्धर्वाः सिद्ध[6]विद्याध्रचारणाः । यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः ॥४१॥
विशुद्धसत्त्वधाम्यद्धा त्वयि शास्त्रशरीरिणी । नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः ॥४२॥

कर्दमक्षमा

बृहते, अनन्ताय, नमः, वेधसे, कृष्णाय, सांख्ययोगवितानाय, ब्रह्मणे, परमात्मने, नमः ॥३९॥ हि, वाम्, रजस्तमःस्वभावानाम्, भूतानाम्, दुष्प्रापम्, च, अपि, यत्, यदृच्छया, प्राप्तौ, नः, अदुर्लभम् ॥४०॥ दैत्यदानवगन्धर्वाः, सिद्धविद्याध्रचारणाः, च, यक्षरक्षःपिशाचाः, भूतप्रमथनायकाः, च ॥४१॥ वयम्, अन्ये, च, तादृशाः, शास्त्रशरीरिणि, विशुद्धसत्त्वधाम्नि, त्वयि, अद्धा, नित्यम्, निबद्धवैराः ॥४२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनन्ताय शेषाय बृहते फणैकदेशे विश्वधारणाद्बृहत्तस्मै कृष्णाय सदानन्दरूपाय वेधसे जगद्विधात्रे साङ्ख्ययोगवितानाय पदत्रयमैक्यविवक्षया ॥३९॥ योगेश्वराणामपि दुर्दर्शौ युवामस्माभिर्दृष्टावित्येतन्नातिचित्रमित्याह-दर्शनमिति । दुष्प्रापमपि युव

---

१. महते-गो. प्रे. टी. । २. विधानाय-वीर. । ३. दुष्प्रापमतिदुर्लभं-विज. । ४. चाप्य-श्रीधर. वंशी. वीर. विज. । ५. प्राप्तौ-
। ६. विद्याधरा अरा-वीर. ; विद्याधरादयः-विज. ।

केषाञ्चिददुर्लभं सुलभम
सभाग्या इत्याह-दैत्येन्

सांख्ययोगयोः
कथमनेन व्यावृत्तिरत्राह-
इत्येतत् भवद्दर्शनम् । तत
निजभाग्यं श्लाघयन्नाह-अ
अत एव श्रीभगवतं प्रकृत्य
इति च । ते वयं चान्ये राक्ष

अनन्ताय श्रीकृष्ण
बृहत इति । कृष्णाय च स्
परमात्मा तयोः का गतिस्
तत्तदाख्यतदेकदेशाविर्भावनि

"ज्ञानयो
यथेन्द्रियैः

अत एव ब्रह्मणे पर
अदुर्लभमपि यदृच्छया तवैव स
॥४०॥ दैत्येति त्रिकम् । दैत्याद
आश्रयो यस्य तस्मिन् तदद
रजस्तमःस्वभावत्वेनोन्मार्गप्रवृ
तत्र गन्धर्वादीनां चतुर्णां वैरप्रसि
दैत्यानुगा एव ते दुष्टत्वेन प्रसिद्ध
केचिन्मनुष्यास्तादृशा दैत्यादिस
पौण्ड्रकादयः उच्चैर्बद्धेन वैरेण
यशआदिवाञ्छया या भक्तिस्त्रैलो

कृष्णाय साक्षाद्भगवत
तत्तत्प्रवर्तकायेत्यर्थः । यद्वा, यसि
तस्माद्भिन्नत्वेनापि वर्तमानायेत्याह-
। विशेषणानामेषां यथोत्तरं श्रैष्ठ्यम
निश्चितम् । च अपि, दुष्प्रापमपि

म् आनन्दजलैः आकुले
ह स्फुटम् उवाच ॥३८॥

कृष्ण श्रीयोगमाया को
मुतलमें जा पहुंचे तब
परम स्वीमी भगवान
खडे हो गये, भगवान
प्रणाम किया ॥३५॥
किया, दोनों महात्मा
प्रभु का चरणतीर्थ ब्रह्म
वार के प्रत्येक सदस्यने
ताम्बूल, दीपक अमृत
परिवार धन तथा शरीर
इस अवसर पर भगवत्
ल हो गई, और काया
पण जीव हृदयमें धनको
॥

ह्मणे परमात्मने ॥३९॥
प्राप्तौ यदृच्छया ॥४०॥
तप्रमथनायकाः ॥४१॥
चान्ये च तादृशाः ॥४२॥

मः ॥३९॥ हि, वाम्, दर्शनम्,
भम् ॥४०॥ दैत्यदानवगन्धर्वाः,
च, तादृशाः, शास्त्रशरीरिणि,

गद्विधात्रे साङ्ख्ययोगवितानायेत्यादि
र्शनमिति। दुष्प्रापमपि युष्मत्कृपया

शी. वीर. विज. । ५. प्राप्तं-वीर. विज.

श्रीधरस्वामिविरचिता भावार्थदीपिका

श्चिद्दुर्लभं सुलभमपि भवति तदाह-रजस्तमस्स्वभावानामिति। नो दर्शनं प्राप्तौ ॥४०॥ अहो विद्विषो वयं सात्त्विकभक्तेभ्योऽपि माया इत्याह-दैत्येन्यादित्रिभिः ॥४१॥४२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सांख्ययोगयोर्ज्ञानकर्मणोर्वितानो विस्तारो येन तस्मै सांख्यशास्त्रकारिणे वा। अनीश्वरकपिलव्यावृत्तये ब्रह्मण इति। यमनेन व्यावृत्तिरत्राह-परमात्मने इति। ऐक्यविवक्षया समाहारद्वन्द्वविवक्षया। तथा च ज्ञानभक्तिकर्मयोगस्वरूपायेत्यर्थः ॥३९॥ त् भवद्दर्शनम्। तत् दुर्लभसौलभ्यम्। यदृच्छयेति देवयोर्युवयोरिच्छया 'देवेच्छापि यदृच्छा स्यात्' इति हलधरः ॥४०॥ पायं श्लाघयन्नाह-अहो इत्यादि। शास्त्रं वेदादिग्रन्थ एव शरीरं प्रतिमा यस्य तस्मिन् 'शास्त्रं ग्रन्थनिदेशयोः' इति यादवः। त एव श्रीभगवतं प्रकृत्य स्कान्दम् उक्तम्- "तेनेयं वाङ्मयी मूर्तिः कृष्णस्य जगदीशितुः।" इति। "वेदो नारायणः साक्षात्" ति च। ते वयं चान्ये राक्षसादयश्च तादृशा निबद्धवैराः। एतेनास्मासु न कापि भगवद्दर्शनयोग्यतेति ॥४१-४२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अनन्ताय श्रीकृष्णद्वितीयव्यूहरूपाय व्रजगमनन्तसख इति गोपिकाविलापे तन्नामत्वेन तत्प्रसिद्धेः तत्र शेषाद्यन्तर्भावार्थमाह-ख इति। कृष्णाय च स्वयं भगवत्त्वेन प्रसिद्धाय यतो वेधसे सर्वकर्त्रे ननु ज्ञानशास्त्रे मुख्यतया ब्रह्म प्रतिपाद्यते योगशास्त्रे त्मा तयोः का गतिस्तत्राह-सांख्येति। सांख्ययोगयोः ज्ञानाष्टाङ्गशास्त्रयोर्वितानो यस्मिन् तदेकनिष्ठो विस्तर इत्यर्थः। ख्यतदेकदेशाविर्भावनिरूपणद्वारा स एव ताभ्यामुद्दिश्य इति विवक्षितं यथोक्तं श्रीकपिलदेवेन —

"ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः। द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः॥

यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः। एको नानेयते तद्भगवान् शास्त्रवर्त्मभिः॥" इति॥

अत एव ब्रह्मणे परमात्मने च तुभ्यमेव ॥३९॥ हि निश्चितं च अपि दुष्प्रापमपि अपिशब्दस्य अदुर्लभमित्यनेनान्यः र्लभमपि यदृच्छया तवैव स्वैरितयेत्यर्थः। अन्यत्तैः। तत्र नो दर्शनं प्राप्ताविति अस्मत्कर्तृकं दर्शनं युवां प्राप्तावङ्गीकृतवन्तावित्यर्थः। दैत्येति त्रिकम्। दैत्यादयस्त्वयि नितरां बद्धवैरा अपि वैरं कुतः तत्राह-विशेषतः शुद्धं रज आद्यमिश्रितं यत् सत्त्वं तत् धाम यस्य तस्मिन् तदधिष्ठातरीत्यर्थः। अतः शास्त्रस्य शरीरिणि आत्मनि वेदमार्गप्रवर्तक इत्यर्थः। दैत्यादीनां तमःस्वभावत्वेनोन्मार्गप्रवृत्त्या स्वप्रतिकूलत्वेन मतैः साधुभिः सह द्वेषेणतत्परिपालके त्वयि स्वत एव द्वेषोत्तपत्तेरिति भावः। गन्धर्वादीनां चतुर्णां वैरप्रसिद्ध्यभावेऽपि तदुक्तिः दैत्यानुगानां केषांचिद्रजस्तमस्स्वभावापेक्षया यक्षादयश्च वयं तामसाः सर्वे नुगा एव ते दुष्टत्वेन प्रसिद्धाः। दैत्यादयो वयमस्मदादय इत्यर्थः। ममापि तत्पक्षपातित्वान्निबद्धवैरत्वमेवेति भावः। अन्ये च मनुष्यास्तादृशा दैत्यादिसदृशाः यथा कंसादयः चकारद्वयस्तूभयेषामपि प्राधान्यात् तेष्वेव केचित् केवलतमःस्वभावाः कादयः उच्चैर्बद्धेन वैरेण तत्कृतमनोभिनिवेशेनेत्यर्थः। सन्निकृष्टा मुक्तिपदं प्राप्ताः केचित्तु मद्विधा रजोमिश्राः कामतो दिवाञ्छया या भक्तिस्त्रैलोक्यदानं तया सन्निकृष्टाः सुरादयस्तु न तथा सन्निकृष्टा इति ॥४१-४३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

कृष्णाय साक्षाद्भगवते, सांख्यं ज्ञानम्, योगः समाधिस्तयोस्तच्छास्त्रद्वयस्य वा वितानो विस्तारो यस्मात्तस्मै, कायेत्यर्थः। यद्वा, यस्मिन् तस्मै तस्मिन्नेव तयोस्तात्पर्यात्, यतो ब्रह्मणे सर्वजीवैकतत्त्वाय। न केवलं तद्रूपायैव, त्वेनापि वर्तमानायेत्याह-परमात्मन इति। यद्वा, ब्रह्मणे सर्वव्यापकाय। कथमित्यपेक्षायामाह-परमेति। अन्तर्यामितयेत्यर्थः णानामेषां यथोत्तरं श्रैष्ठ्यम्। अन्यत्तैर्व्याख्यातम्। यद्वा। कृष्णत्वमेव दर्शयन् तमेव विशिनष्टि-वेधस इत्यादिना ॥३९॥ हि म् च अपि, दुष्प्रापमपि। अपि-शब्दस्यादुर्लभमित्यनेन परेण वान्वयः। यदृच्छया स्वयमेवेत्यर्थः। अन्यत्तैर्व्याख्यातम्।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यद्वा, प्राग्दुष्प्रापमप्यधुना सुलभं निजाशेषैश्वर्यप्रकटनेन पूर्वतोऽप्यधिककारुण्यविस्तारणात् ॥४०॥ दैत्यादयस्त्वपि नितरां बद्धवैरा अपि । कुतः ? विशेषतः शुद्धं रजआद्यमिश्रं यत् सत्त्वं तत् धामाश्रयो यस्य तस्मिन् तदधिष्ठातरीत्यर्थः । शास्त्रस्य शरीरिणि आत्मनि वेदमार्गप्रवर्तक इत्यर्थः । दैत्यादीनां रजस्तमःस्वभावत्वेनोन्मार्गे प्रवृत्त्या स्वप्रतिकूलैः साधुभिः सह द्वेषेण तत्परिपालके त्वयि स्वत एव द्वेषोत्पत्तेरिति भावः । तत्र गन्धर्वादीनां चतुर्जातीनां वैरप्रसिद्ध्यभावेऽपि तदुक्तिर्दैत्यानुगानां केषांचित्तेषां रजस्तमःस्वभावापेक्षया यक्षादयश्च त्रयस्तामसाः सर्वे दैत्यानुवर्तिन एव भूतादयस्तु शैवाभिमानिनः एवम्भूता दैत्यादयो ये ते वयमित्यन्वयः । यद्वा, ते दुष्टत्वेन प्रसिद्धा दैत्यादयो वयम् अन्ये च केचिन्मनुष्यास्तादृशा दैत्यादिसदृशाः यथा कंसादयः चकारद्वयमुभयेषामपि तुल्यत्वेन प्राधान्यात् ॥४१-४२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सांख्ययोगविधानाय सांख्ययोगप्रवर्तकाय ॥३९-४४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह-नम इत्यादिना विमुच्यत इत्यन्तेन ग्रन्थेन । अनन्ताय शेषाय बृहते फणैकदेशेन विश्वधारकाय वेधसे जगद्विधात्रे सांख्ययोगविधानाय सांख्ययोगप्रवर्तकाय वितानायेति पाठे मत्वर्थीयोऽच् द्रष्टव्यः वितानो यज्ञः स च कर्मयोगोपलक्षकः योगो भक्तियोगः साख्यं नामयोगः ते अस्याराधनरूपतया सन्तीति तथा तस्मै कर्मज्ञानयोगानुगृहीतभक्तियोगाराध्यायेत्यर्थः । ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते परमात्मनेऽन्तःप्रवेशनियमनाभ्यां लोकत्रयस्य भर्त्रे व्याप्यगतदोषास्पृष्टाय च ॥३९॥ युवामस्माभिर्दृष्टावित्यतन्नातिचित्रमित्यभिप्रेत्याह-दर्शनमिति । वां युवयोर्दर्शनं केषांचिद्भूतानां दुष्प्रापं दुर्लभं चापि केषांचित् युष्मत्कृपया तु सुलभमेव तदुपपादयति-रजस्तमःस्वभावानामिति । यद्यस्माद्रजस्तमःप्रचुरस्वभावानामपि नोऽस्माकं युष्मद्दर्शनं प्राप्तम् अतो भवत्कृपैव तत्र निदानमिति भावः ॥४०॥ अहो विद्विषोऽपि वयं सात्त्विकभक्तेभ्योऽपि सभाग्या इत्याह-दैत्येति त्रिभिः । दैत्यादयस्त्वयि नित्यं बद्धं वैरं येषां तथाभूताः कथम्भूते त्वयि विशुद्धस्य रजस्तमोभ्यामनुविद्धस्य सत्त्वस्य धाम्नि आश्रये अन्तः कामक्रोधादिप्राकृतदोषप्रतीभटत्वमभिप्रेतम् । अद्धा साक्षात् शास्त्रशरीरिणि शास्त्रवेद्यं शरीरं स्वरूपमस्यास्तीति तथा तस्मिन् ते वयमित्थम्भूता वयमित्यर्थः । तथा चान्ये कंसादयश्च तादृशाः नित्यं निबद्धवैरा इत्यर्थः ॥४१-४२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥२७-४१॥ शास्त्रस्य शरीरिणि आत्मानं प्रतिप्रवर्तक इत्यर्थः । गन्धर्वादीनां चतुर्णां केषाञ्चिद्दैत्यानुगत्वाद्वैरं यक्षादीनां तामसत्वात् सुतरां वयमिति । ममापि तत्पक्षपातित्वान्निबद्धवैरमेवेति भावः ॥४१-४२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बृहतेऽनन्ताय अनन्तस्याप्यन्तर्विशतेंऽशिने श्रीबलेदेवाय नमः । वेधसे विधात्रे सर्वकारणस्वरूपाय कृष्णाय नमः सांख्यवितानाय ज्ञानशास्त्रविस्तारकाय ब्रह्मणे नमः । योगवितानाय योगशास्त्रविस्तारकाय परमात्मने नमः ॥३९॥ भूतानां दुष्प्रापं अतिदुर्लभं सुप्रापं केषां रजस्तमस्स्वभावानामप्यसुराणामित्यर्थः । यत् यतः यदृच्छयैव प्राप्तौ ॥४०॥ सात्त्विकेभ्यो भक्तेभ्योऽपि रजस्तमस्स्वभावा वयं भाग्यवन्त इत्याह-दैत्येत्यादित्रिभिः ॥४१॥ विशुद्धसत्त्वमप्राकृतसत्त्वं तदात्मकं धाम मूर्तिर्यस्य तस्मिन् शास्त्रं वेदः शरीरं स्वरूपगुणादिधारकं प्रतिपादकं यस्य तस्मिन् ॥४२॥

गूढार्थदीपिनी

सांख्ययोगयोर्ज्ञानकर्मणोर्वितानो विस्तारो येन तस्मै ॥ सांख्यशास्त्रकारिणे वा ॥३९॥ भूतानां प्राणिनां युवयोः दर्शनं दुर्लभमपि केषाञ्चित् अदुर्लभं सुलभं भवति । यत् यतः नोऽस्माकं तामसानामपि दैवेच्छया (दैवेच्छापि यदृच्छा स्यात्-इति हलायुधः ।) प्राप्तौ ॥४०॥ दैत्येति त्रयम् । दैत्यादयः नायकान्ताः ये वयम् अन्ये च ते सर्वे निबद्धवैराः त्वयि यथा सन्निकृष्टाः सान्निध्यं प्राप्ताः तथा सत्त्वाविष्टाः सुरादयः न सन्निकृष्टा इत्यन्वयः । उद्धवबद्धवैरेण दृढवैरेण या भक्तिस्तया । केचन शिशुपालादयः । कामतो भक्त्या गोप्यादयः । कथम्भूते त्वयि । शास्त्रं वेदादिग्रन्थ एव शरीरं प्रतिमा यस्य तस्मिन् । 'शास्त्रं ग्रन्थनिदेशयोः' इति यादवः । अत एव श्रीभागवतं लक्ष्यीकृत्य स्कान्देऽप्युक्तम् —

"तेनेदं वाङ्मयी मूर्तिः प्रत्यक्षा वर्तते हरेः ।" इति ॥४१-४२-४३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

बृहतेऽनन्ताय शेषस्याप्यंशिने बलाय वेधसे विश्वविधात्रे सांख्ययोगवितानाय सांख्ययोगप्रवर्तकाय । सांख्ययोगे ज्ञानयोगे तत्प्रतिपादके वेदान्ते वितानः स्वरूपगुणादिनिर्णयविस्तारो यस्य तस्मै इति वा ॥३९॥ सामान्यतो भूतानां युवयोर्दर्शनं दुर्लभम् । तत्र केषांचित् दुर्लभं भवति अतो नोऽस्माकं रजस्तमःस्वभावानां दर्शनं प्राप्तौ ॥४०॥ अहो किमाश्चर्यम् । रजस्तमःस्वभावा अपि वयं सात्त्विकेभ्यो देवेभ्योऽपि सभाग्या अभूमेत्याह-दैत्येति त्रिभिः । शास्त्रशरीरिणि 'सात्वतशास्त्रविग्रहम्' इति सप्तमोक्तेर्भक्तिशास्त्रोक्तसच्चिदानन्दमयशरीरे त्वयि यथा वयं सन्निकृष्टाः सन्निकर्षं प्राप्ताः न तथा सत्त्वसंरब्धाः सत्त्वगुणाविष्टाः सुरादयः इत्यन्वयः ॥ ननु यूयं मत्परमभक्ता एव तत्र न हीत्याह-ते प्रसिद्धाः हिरण्यकशिपुवंशा वयं बाणादिपुत्रसहितास्त्वद्विद्वेषिदैत्यपक्षपातिनो नित्यं निबद्धवैरा एवेति स्वस्मिन् दोषारोपः परमभक्त्यनुभाव एवायं ज्ञेयः । अन्ये च दानवराक्षसाद्याः ॥४१-४२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं परमभक्तियुक्तः भगवतः षड्गुणप्रतिपादकैः भगवत्प्रतिपादकेन च स्तुत्वा प्रार्थयते नमोऽनन्तायेत्यष्टभिः श्लोकैः । अतो भगवतः ऐश्वर्यं स्मृत्वा नमस्यति-नमोऽनन्तायेति । ईश्वरः स एव यो न केनापि परिच्छिन्दते अयं च देशकालापरिच्छिन्नः किञ्च स एव समर्थो यो महान् भवति तदाह बृहत इति बलभद्रनमस्कारो वा अयम् अनन्त इति शेषः प्रादुर्भूतः स एव बृहद्ब्रह्मेति सर्वेश्वरो यो नित्यानन्दः स कृष्णः यश्च जगत्कर्ता तदाह-वेधस इति जगत्कर्तृमुख्यं ब्रह्मेति भगवत एव विशेषणं शास्त्रयोनित्वमपि ब्रह्मलक्षणमिति विशेषसिद्धान्तप्रतिपादकत्वेन माहात्म्यमाह-सांख्ययोगयोर्वितानाय विस्तारहेतवे तत्र हेतुमिव वदन् सिद्धान्तान्तरकर्तृकत्वमाह-ब्रह्मणे परमात्मन इति । ब्रह्मत्वाद्वेदतदर्थरूपत्वं परमात्मन इति वैष्णवसिद्धान्तप्रवर्तकत्वं तदर्थप्रतिपादकत्वं ते सांख्या ज्ञानप्रधाना इति ब्रह्मपराः योगिनस्तु परमात्मध्यानपराः इति तद्वितानकर्तृत्वं सिध्यति अनेन शास्त्रदृष्ट्या ज्ञानं ध्यानेन च ज्ञानं भगवतः ॥३९॥ ननु, भगवत्साक्षात्कारः कस्यचिद्भवति स मम जात इति केवलं भगवद्वीर्येणैव तद्भवतीति भगवद्वीर्यं स्वपक्षमाह-दर्शनं वां हि भूतानामिति । ये उत्पद्यन्ते प्रवाहे तेषाम् उत्पत्तिविराधात् भगवद्दर्शनं दुर्लभं वां ब्रह्मपरब्रह्मणोः स्वक्रियाप्राप्यं दुःखेनापि यत्र भवति तद्दुष्प्रापं देवादिवरेणापि यत्र लभ्यं तद्दुर्लभं चकारात्सर्वसाधनैरप्यलभ्यता निरूपिता तत्र हेतुः रजस्तमःस्वभावानामिति राजसानां दुष्प्रापं तामसानां दुर्लभं राजसानामपि केषांचित् दुर्लभमिति चकारः एतादृशावपि नोऽस्माकं रजस्तमःस्वभावानां यद्यस्मात्प्राप्तौ तत्र हेतुर्यदृच्छैव ॥४०॥ कथं राजसतामसानां दुर्लभमित्यत्र हेतुमाह-श्लोकद्वयेन । दैत्यदानवगन्धर्वाः सत्त्वगुणभेदाः सिद्धविद्याध्रचारणाश्च द्वितीयाः तामसराजसाः यक्षरक्षःपिशाचास्तामसाः भूतप्रमथनायकास्तामसतामसाः प्रथमा रक्षोगणाः तयोर्वा नायकास्तृतीयाः ॥४१॥ एवं सर्वान् गणयित्वा तेषां स्वरूपमाह-विशुद्धसत्त्वधाम्नीति । भगवत आत्मत्वेऽपि

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

उपाधिगुणेनैव विरोधः किञ्च भगवान् वेदादिशास्त्रं च कृतवान् ते च लोकप्रधानाः अतः उभयेषां विरोधो युक्त इत्याह-शास्त्रशरीरिणीति । शास्त्रैकसमधिगम्यशरीरयुक्ते अत एव नित्यं निबद्धवैराः ते पूर्वोक्ताः वयं च यद्यप्यस्माकमिन्द्रियादिवर्गः सात्त्विकः तथापि देहो राजस एवेति भिन्नतया गणयति । अन्ये च तथा ब्राह्मणाः चकारात्तच्छत्सम्बन्धिनश्च ॥४२॥

श्रीसुबोधिनीसारः

अनन्ताय बृहते फणैकदेशविश्वधारिणे नमः कृष्णाय वेधसे जगद्विधात्रे सांख्ययोगयोर्वितानाय विस्तारकाय ब्रह्मणे परमात्मने नमः ॥३९॥ वां युवयोर्दर्शनं भूतानां दुष्प्रापं भक्तानामदुर्लभं सुप्रापं तथा हि रजस्तमःस्वभावानां नोऽस्माकं यदृच्छया प्राप्ताः इति यत् ॥४०॥ दैत्येति पाठो व्याख्या ॥४१॥ विशुद्धसत्त्वं धामाश्रयो यस्य विशुद्धसत्त्वस्य धाम्नि आश्रये शास्त्रयोनौ त्वयि नित्यं निबद्धं वैरं यैस्ते वयं चान्ये तादृशाः तथाभूताः ॥४२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह-नम इत्याद्यष्टभिः । अनन्ताय शेषाय । बृहते फणैकदेशेन विश्वधारकाय । कृष्णाय सदानन्दरूपाय । वेधसे जगद्विधात्रे नमः । द्वयोरैक्यविवक्षयाऽऽह-सांख्यं ज्ञानशास्त्रम्, योगः कर्मयोगः भक्तियोगः अष्टाङ्गयोगश्च, तयोर्वितानाय प्रवर्तकाय । ब्रह्मणे वेदान्तप्रतिपाद्याय । परमात्मने स्मृतिप्रतिपाद्याय च नमः ॥३९॥ तद्दर्शनमभिनन्दति-दर्शनमिति । यत् वां युवां नोऽस्माकं रजस्तमःस्वभावानां त्वद्दर्शनाद्ययोग्यानामपि यदृच्छया प्रयत्नं विनैव दर्शनं प्राप्तौ तयोर्वां युवयोर्दर्शनं हि भूतानां स्वप्रयत्नेन दुष्प्रापम्, देवादिवरदानेनाप्यतिदुर्लभम् । अतोऽस्माभिस्तु त्वत्कृपयैव लब्धमित्याशयः ॥४०॥ किञ्च वयं विद्विषोऽपि सात्त्विकेभ्यस्त्वत्कृपातिरेकभाज इत्याह-दैत्येति त्रिभिः । ये वयं दैत्यादयस्ते त्वयि नित्यं निबद्धं वैरं यैस्तैस्तथाऽन्ये च तादृशा राजसाः कामतस्त्वयि निबद्धमनस इति शेषः । तत्र यथा केचनोद्बुद्धवैरेण त्वां सन्निकृष्टास्त्वदात्मतां प्राप्ताः यथा च केचन गोप्यादिजनास्त्वां सन्निकृष्टाः, तथा सत्त्वसंरब्धाः सत्त्वगुणवन्तः सुरादयोऽपि त्वां न सन्निकृष्टा इति त्रयाणामन्वयः । भगवत्स्वरूपध्यानमेव तत्प्राप्तिकारणम्, न सत्त्वादिः इत्याशयेन तत्स्वरूपमाह-विशुद्धं रजस्तमोभ्यां रहितं सत्त्वमेव धाम मूर्तिर्यस्य तस्मिन्निति तत्र प्रमाणमाह-शास्त्रोक्तं शरीरमस्यास्तीति तस्मिन्निति ॥४१-४२-४३॥

अन्वितार्थप्रकाशिका

नम इति । अनन्ताय शेषाय विश्वधारणाद्बृहते नमः । कृष्णाय वेधसे जगद्विधात्रे नमः । सांख्यं ज्ञानशास्त्रं योगः कर्मयोगः भक्तियोगः अष्टाङ्गयोगश्च तयोर्वितानाय प्रवर्तकाय ब्रह्मणे परमात्मने नमः ॥३९॥ दर्शनमिति । यत् वां युवां नोऽस्माकं रजस्तमःस्वभावानां त्वद्दर्शनाद्ययोग्यानामपि यदृच्छया प्रयत्नं विनैव दर्शनं प्राप्तौ तयोर्वां युवयोर्दर्शनं हि भूतानां स्वप्रयत्नेन दुष्प्रापमपि केषांचित् त्वत्कृपया अदुर्लभम् सुप्रापं भवति ॥४०॥ अहो राजतास्तामसाश्च वयं सात्त्विकेभ्योऽपि देवेभ्यः सभाग्या इत्याह-दैत्येति त्रयम् । दैत्यादानवादयः प्रमथनायकान्ता विशुद्धं रजस्तमोभ्यां रहितं सत्त्वमेव धाम मूर्तिर्यस्य तस्मिन्निति शास्त्रोक्तं शरीरमस्यास्तीति तस्मिन्निति त्वयि नित्यं निबद्धं वैरं यैस्तव वयं तथाऽन्ये च बौद्धकाद्या मनुष्या अपि तादृशा एव गन्धर्वादीनां बद्धवैरत्वाप्रसिद्धावपि राजसत्वादिना तत्तुल्यत्वमुक्तम् । तेषु च केचन चैद्यादयः उद्बुद्धवैरेण च भक्तिस्तया तव सन्निकृष्टाः सन्निकर्षं प्राप्ताः केचन कामतो भक्त्या गोप्यादयः सन्निकृष्टाः तथा सत्त्वसंरब्धाः सत्त्वाविष्टा अपि सुरादयोऽपि न सन्निकृष्टाः ॥४१-४२-४३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तेषां मध्ये केचन हिरण्यकशिपुरावणकुम्भकर्णदन्तवक्त्रकंसपौण्ड्रकशिशुपालादयः प्रत्यक्षे त्वयि उद्बुद्धवैरेण अतिशयवैरेण सन्निकृष्टाः त्वत्सामीप्यं प्राप्ताः केचन प्रह्लादवृत्रासुरादयः भक्त्या एकान्तभावेन सन्निकृष्टाः केचन बलिविभीषणगयासुरादयः

कामतः सकामभक्त्या स

दुर्ज्ञेयमित्याह-इदमिति ।

॥४०॥ अतस्त्वं प्रसन्नो भ

युष्मत्पादारविन्दं तदेव

एकाकी विश्वशरणस्य सव

एव शान्तः परमसुखं प्राप्त

राज्यासक्तानामेवं कथं स्व

नियम्यानां बद्धमुक्तानां ई

परमादरेण तिष्ठन् वर्तमानः

तदेवाह नम इत्या

नमः । वेधसे जगद्विधात्रे सां

च कर्मयोगोपलक्षकः योग

कर्मज्ञानयोगानुगृहीतभक्तियोग

व्याप्यगतदोषास्पृष्टाय च कृष

दर्शनं हि भूतानां दुष्प्रापम् अ

नोऽस्माकं यदृच्छया दर्शनं प्रा

वयं सात्त्विकभक्तेभ्योऽपि सभ

सत्त्वस्य धाम्न्याश्रयभूते अ

स्वरूपमस्यास्तीति तस्मिन् त्व

भूतप्रमथनायकाश्च ते च एते दै

सालोक्यं सामीप्यं चेत्यर्थः । स

चित्तवृत्तिविशेषः भवकारणं ल

भगवता सह समानलोकावस्थानि

यावत् । गुणाष्टकाविर्भावसाम्यं

बलिराजा स्तुति करते

अनंत शेषरूप भगवान आपक

श्रीकृष्ण स्वरूप परब्रह्म आपक

आप जिसके उपर कृपा करते

स्वभाव वाले हमको आप दो

भूतों प्रमथो और उनके नायक

ां विरोधो युक्त इत्याह-
प्यस्माकमिन्द्रियादिवर्गः
न्धिनश्च ॥४२॥

तानाय विस्तारकाय ब्रह्मणे
ावानां नोऽस्माकं यदृच्छया
म्नि आश्रये शास्त्रयोनौ त्वयि

। कृष्णाय सदानन्दरूपाय।
अष्टाङ्गयोगश्च, तयोर्वितानाय
नन्दति-दर्शनमिति। यत् वां
ासौ तयोर्वां युवयोर्दर्शनं हि
मित्याशयः ॥४०॥ किञ्च वयं
त्यं निबद्धं वैरं यैस्तैस्तथाऽन्ये
ष्टास्त्वदात्मतां प्राप्ताः यथा च
न्निकृष्टा इति त्रयाणामन्वयः।
तमोभ्यां रहितं सत्त्वमेव धाम
।

नमः। सांख्यं ज्ञानशास्त्रं योगः
॥ दर्शनमिति । यत् वां युवां
तयोर्वां युवयोर्दर्शनं हि भूतानां
तामसाश्च वयं सात्त्विकेभ्योऽपि
यां रहितं सत्त्वमेव धाम मूर्तिर्यस्य
ऽन्ये च बौद्धकाद्या मनुष्या अप
केचन चैद्यादयः उद्बद्धवैरेण या
था सत्त्वसंरब्धाः सत्त्वाविष्टा अपि

म्
त्यक्षे त्वयि उद्बद्धवैरेण अतिशयवैरे
कचन बलिविभीषणगयासुरादयः

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सकामभक्त्या सन्निकृष्टाः सत्त्वसंरब्धाः मिश्रसत्त्वयुक्ताः सरादयस्तथा सन्निकृष्टाः न भवन्ति ॥३९॥ एवं सत्यपि सर्वैस्तवैश्वर्यं मित्याह-इदमिति। इदम् ऐश्वर्यम् इत्थम् अनेन प्रकारेणैवास्तीति तव योगमायां योगैश्वर्यं योगेशाः महायोगिनोऽपि न विन्दन्ति अतस्त्वं प्रसन्नो भूत्वा मां निष्कामभक्तं कुर्वित्याह- तत्र इति। हे हरे! निरपेक्षैः आत्मारामैरपि विमृग्यं न तु सहसा लभ्यं यत् पादारविन्दं तदेव धिषणं स्थानं तस्मात् अन्यो यो गृहान्धकूपस्तस्मात् निष्क्रम्य निर्गत्य एकः त्यक्तसम्बन्धिजनत्वात् विश्वशरणस्य सर्वरक्षकस्य तव अङ्घ्रिः चरणारविन्दयुगलं तस्य उपलब्धा समीपे प्राप्ता वृत्तिर्दासोचितवर्तनं येन सः अत शान्तः परमसुखं प्राप्तः सन् सर्वसखैः तवैकान्तिकभक्तैः साधुजनैः सह यथा अहं चरामि तत्तथा नोऽस्मान् प्रसीद ॥४१॥ ननु सक्तानामेवं कथं स्यादित्युच्यते चेत्तर्हि यथैव स्यात्तथा शिक्षां कुर्वित्याशयेनाह-शाधीति । हे ईशितव्येश ! ईशितव्यानां यानां बद्धमुक्तानां ईश नियामक ! अस्मानुक्तरीत्या शाधि शिक्षय । तदेव दृढयन्नाह-यत्तवानुशासनम् आज्ञां प्रति श्रद्धया दरेण तिष्ठन् वर्तमानः पुमान् नोदनायाः वेदोदितगृहस्थधर्मात् विमुच्यते त्यागिधर्मं प्राप्नोतीत्यर्थः ॥४२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह नम इत्यादिना वेदनाया विमुच्यते इत्यन्तेन ॥ नम इति ॥ अनन्ताय शेषाय बृहते फणैकदेशेन विश्वधारकाय ते वेधसे जगद्विधात्रे सांख्ययोगविधानाय सांख्ययोगयोः प्रवर्तकाय वितानायेति पाठे मत्वर्थीयोऽच् द्रष्टव्यः। वितानो यज्ञः स कर्मयोगोपलक्षकः योगो भक्तियोगः सांख्यं ज्ञानयोगः एवं सांख्ययोगविताना: अस्याराधनरूपतया सन्तीति तस्मै ज्ञानयोगानुगृहीतभक्तियोगाराध्यायेत्यर्थः। ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयबृहते परमात्मने अन्तःप्रवेशनियमनाभ्यां लोकत्रयभर्त्रे गतदोषास्पृष्टाय च कृष्णाय नमः ॥३९॥ युवामस्माभिर्दृष्टावित्येतन्नातिचित्रमित्यभिप्रेत्य आह ॥ दर्शनमिति ॥ वां युवयोः नं हि भूतानां दुष्प्रापम् अपि युष्मत्कृपया केषांचिदिति शेषः। अदुर्लभं सुलभमपि भवति। यद्यतः रजस्तमःस्वभावानां चापि स्माकं यदृच्छया दर्शनं प्राप्तौ दर्शनविषयतां गतावित्यर्थः। अतः भवत्कृपैव तत्र निदानमिति भावः ॥४०॥ अहो विद्विषोऽपि सात्त्विकभक्तेभ्योऽपि सभाग्या इत्याह त्रिभिः ॥ दैत्येति ॥ विशुद्धेति ॥ प्राप्ता इति च ॥ विशुद्धसत्त्वस्य रजस्तमोभ्यामननुविद्धस्य धाम्न्याश्रयभूते अनेन कामक्रोधादिप्राकृतदोषप्रतिभटत्वमभिप्रेतम्। अद्धा साक्षात् शास्त्र शास्त्रैकवेद्यं शरीरं रूपमस्यास्तीति तस्मिन् त्वयि नित्यं निबद्धं वैरं यैस्तथाभूताः दैत्यदानवगन्धर्वाः सिद्धविद्याध्रचारणाफ यक्षरक्षःपिशाचाः थनायकाश्च ते च एते दैत्यादयो वयं तथा तादृशाः नित्यं त्वयि बद्धवैरा इत्यर्थः। अन्ये कंसादयश्च हे भगवन्! ते सर्वे सामीप्यं चेत्यर्थः। सारूप्यं सात्मतामथ सात्मतां चेत्यर्थः। मुक्तिं प्राप्ताः। कुत इत्यत आह भाव इति। हि यस्मात् भावः वृत्तिविशेषः भवकारणं लोकोदयकारणं त्वयि केऽपि निरन्तरचित्तवृत्तिविशेषो मुक्तिकारणमित्यर्थः। तत्र सालोक्यं नाम भवता सह समानलोकावस्थायित्वं सामीप्यं नाम सान्निध्यं सारूप्यं नाम समानवेषता सात्मता नाम समानात्मगुणत्वं सायुज्यमिति गुणाष्टकाविर्भावसाम्यं हि सायुज्यं सार्ष्टित्वमथ सात्मतामिति पाठे सार्ष्टित्वं समानसमृद्धित्वम् ॥४१-४२-४३॥

कृष्णप्रिया

बलिराजा स्तुति करते कहने लगे - आपकी अनन्त फणाके एकभागमें अखिल विश्वको धारण कर महान् शेषरूप भगवान आपको नमस्कार कर रहा हुं, जगत के विधाता संख्य और योग के विस्तारक परमात्मा स्वरूप परब्रह्म आपको में प्रणाम कर रहा हुं ॥३९॥ आपका दर्शन प्राणिमात्र के लिये दुर्लभ है, किन्तु जिसके उपर कृपा करते हो, उसके स्वयं हो जाते हो, अन्यथा भगवन् ! मेरे जैसे रजोगुण और तमोगुण वाले हमको आप दोनों का दर्शन कैसा ॥४०॥ दैत्यों दानवो गंधर्वो सिद्धो विद्याधरो राक्षसो पिशाचो और उनके नायक आदि आपका प्रेमसे भजन करना तो दूर रहा, आपसे सर्वदा दृढ वैरभाव रखते है,

कृष्णप्रिया

परंतु आपका श्रीविग्रह साक्षात् वेदमय और विशुद्ध सत्वस्वरूप है इसलिये हमलोगोमें से बहुतोने दृढ वैरभावसे, कुछने भक्ति से आूर कुछने कामना से आपका स्मरण करके उस पद को प्राप्त किया है, जब आपके समी रहनेवाले सत्व प्रधान देवता भी नहीं प्राप्त कर सकते ॥४१-४३॥

[1]केचनोद्बद्धवैरेण भक्त्या केचन कामतः । न तथा सत्त्वसंरब्धाः सन्निकृष्टाः सुरादयः ॥४३॥
इदमित्थमिति प्रायस्तव योगेश्वरेश्वर । न विदन्त्यपि योगेशा योगमायां कुतो वयम् ॥४४॥
तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्[2]पादारविन्दधिषणान्यगृहान्धकूपात् ।
निष्क्रम्य विश्वशरणाङ्घ्र्युपलब्धवृत्तिः शान्तो यथैक उत [3]सर्वसखश्चरामि ॥४५॥
शाध्यस्मानीशितव्येश [4]निष्पापान् कुरु नः प्रभो । पुमान् [5]यच्छ्रद्धयाऽऽतिष्ठंश्चोदनाया विमुच्यते ॥४६॥

कर्दमक्षमा

केचन, उद्बद्धवैरेण, केचन, भक्त्या, कामतः, सत्त्वसंरब्धाः, सुरादयः, तथा, सन्निकृष्टाः, न ॥४३॥ योगेश्वरेश्वर, प्रायः, इदम्, इत्थम्, इति, तव, योगमायाम्, योगेशाः, अपि, न, विदन्ति, वयम्, कुतः ॥४४॥ गृहान्धकूपात्, निष्क्रम्य, निरपेक्षविमृग्ययुष्मत्पदारविन्दधिषणानि, विश्वशरणाङ्घ्र्युपलब्धवृत्तिः, शान्तः, यथा, एकः, उत, सर्वसखः, चरामि, तत्, नः, प्रसीद ॥४५॥ प्रभो, ईशितव्येश, अस्मान्, शाधि, नः, निष्पापान्, कुरु, यच्छ्रद्धया, चोदनायाः, आतिष्ठन्, पुमान्, विमुच्यते ॥४६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उद्बद्धवैरेण या भक्तिस्तया केचनेति चैद्यादयः कामतो भक्त्या गोप्यादयो यथा सन्निकृष्टास्त्वदात्मतां प्राप्ताः तथा न सत्त्वसंरब्धा सत्त्वाविष्टा अपि सुरादयो न सन्निकृष्टा इति ॥४३॥ ननु, सात्त्विकेभ्योऽपि राजसादयः सन्निकृष्टा इति चित्रं तदाह- इदमित्थमिति इदमिति स्वरूपतः इत्थमिति विशेषतश्च ॥४४॥ तदेवं यद्यपि वैरभावेन त्वत्प्राप्तिर्भवेत्तथाऽपि मां सात्त्विकं कुर्वि प्रार्थयते-तदिति । तत्तथा नः प्रसीद यथा निरपेक्षैराप्तकामैरपि विमृग्यं युष्मत्पादारविन्दं तदेव धिषणमाश्रयस्तस्मादन्यद्गृ तदेवान्धकूपस्तस्मान्निष्क्रम्य निर्गत्य विश्वस्य शरणं रक्षितारो वृक्षास्तेषामङ्घ्रिमूलेषु स्वत एव गलितैः फलादिभिरुपलब्धा प्रा वृत्तिर्जीविका येन सोऽहं शान्तः सन्नेक एव यथा चरामीति ॥४५॥ कथमल्पपुण्यानामेवम्भावः सम्भवतीति चेत्त यथैतद्भवेत्तथास्माननुशिक्षयेत्याह-शाधीति । हे प्रभो ! ईशितव्याः सर्वे जीवास्तेषामीश ! यत्तवानुशासनमातिष्ठन्नाश्रयँश्चोदनायाः विधिनिषेधलक्षणायाः सकाशाद्विमुच्यते न खलु त्वद्भक्तो विधिकिङ्करः स्यादिति भावः ॥४६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ननु नित्यानुसन्धानलक्षणान्तःकरणगुणेनाविर्भूतज्ञानगुणोऽस्तीति माशङ्कीरिति चेदयं सुरादीनामपि ना कुतोऽस्माकमित्यभिप्रेत्याह-केचनेति ॥४३॥ पुनराशङ्कते-नन्विति । तत्राक्षेपे । योगेशा ज्ञानिश्रेष्ठा नारदादयः । योगमा जगत्सृष्ट्याद्यनुसंहितस्वरूपमाहात्म्यम् ॥४४॥ स्वाशयमाह-तदित्यादिना । तदेवमित्थम् । तस्मात् पादारविन्दधिषणात् 'सर्वः शर्वः शिवः स्थाणुः' इति सहस्रनामसु सर्वशब्दो विष्णुवाचकोऽपि । सर्वो विष्णुः सखा येषां ते सर्वसखायो हरिजनास्तैः वा ॥४५॥ भगवदाक्षेपं समादधानो वक्ति-कथमित्यादिना । एवंभावः एवंविधत्यागः । एतत् त्यागादि । इति भाव **"देवर्षिभूताप्तनृणां पितृणां न किङ्करो नायम्"** इत्याद्युक्तेः ॥४६॥

---

[1] **प्राप्ताः सालोक्यसामीप्यं सारूप्यमथ सात्मताम् । ते सर्वे पुण्डरीकाक्ष भावो हि भवकारणम् ॥** अयं श्लोकोऽधिकः-वी

[2] धिषणोऽधगृहान्ध-वीर. ; धिषणः स्वगृहान्ध-विज. [3] सर्वसखैश्चरामि-श्रीधर. वंशी. विज. ; सर्वसखश्चरामि-वीर. । [4] निष्क विज. । [5] यः श्रद्धया-वीर. ।

तव योगमायाम्
अचिन्त्यानन्तमहैश्वर्यादित्य
वयमित्याह-दैत्येति त्रिभि
स्वार्थसाधनायैव भक्त्या
अतस्तव सन्निकृष्टाः साक्षा
साग्रजस्य प्राप्तं तद्धेतुः केन
कृपामेव स्तौति-इदमिति ।
योगेशा अपि न विदन्ति अप
तत्तस्मादेव हेतोः नोऽस्मभ्यं
यद्युवयोः पदं तदेव सर्वताप
तस्मादन्यद्यद्धिष्ण्याभासो गृहं
विश्वशरणभूतो योऽयमङ्घ्रिः
सन् न तु सपरिकरोऽपि सन् स
तादृशभाग्यहीनानस्मान् प्रति
भवेयमित्याशयेनाह-शाधीति ।
ब्रह्मरुद्रादयोऽपि यस्य हे तादृ
अनुशासनरूपेण तवाङ्गीकारे
साधारणमप्यनुशासनं किमुत सा

तेष्वेव केचन पौण्ड्राद
गयासुरादयः कामतः स्वर्गादिवा
त्वत्स्मरणासिद्धेः । आदिशब्दादृष्य
न विदन्ति न ज्ञातुं शक्नुवन्ति । तत्र
अन्यतैर्व्याख्यातम् । यद्वा । भक्त्ये
। ततश्च सन्निकृष्टाः सात्त्विकत्वेन
त्रिभिः । यतो दैत्यादयो वयं निबद्ध
न तादृशाः सुरादयो यतः सत्त्वसंर
तव तत्र चावतारिणः तत्राप्यशेषैश्वर्यप्र
तव कृपाविशेषविस्तारणादेवेत्यभिप्र
ईदृशी अनेन प्रकारेण हेतुना च स्यादि
। अन्यत् समानम् ॥४३-४४॥ तत्तस्
मोक्षाद्युपेक्षया प्रयत्नेन मृग्यमेव न
सर्वसन्तापहरणामृतरसस्रावादिना अत

बहुतोने दृढ वैरभावसे,
आपके समी रहनेवाले

ष्टाः सुरादयः ॥४३॥
कुतो वयम् ॥४४॥

मि ॥४५॥
नाया विमुच्यते ॥४६॥

॥४३॥ योगेश्वरेश्वर, प्रायः,
गृहान्धकूपात्, निष्क्रम्य,
र्वसखः, चरामि, तत्, नः,
, पुमान्, विमुच्यते ॥४६॥

स्त्वदात्मतां प्राप्ताः तथा च
सन्निकृष्टा इति चित्रं तदाह-
ाऽपि मां सात्त्विकं कुर्विति
धिषणमाश्रयस्तस्मादन्यद्गृहं
ः फलादिभिरुपलब्धा प्राप्ता
भावः सम्भवतीति चेत्तर्हि
ासनमातिष्ठन्नाश्रयँश्चोदनायाः

दयं सुरादीनामपि नास्ति
श्रेष्ठा नारदादयः । योगमायां
् पादारविन्दधिषणात् 'सर्वः
सर्वसखायो हरिजनास्तैरिति
त्यागादि । इति भाव इति-

॥ अयं श्लोकोऽधिकः-वीर ।
श्चरामि-वीर. । ४. निष्कामान्-

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तव योगमायाम् ऐश्वर्यविशेषमित्यर्थः । योगेशाः श्रीसनकादयोऽपि न विदन्ति ज्ञातुं न शक्नुवन्ति तत्र हेतुः–हे योगेश्वरेति अचिन्त्यानन्तमहैश्वर्यादित्यर्थः । प्राय इति भक्तानां केषांचिद्द्वेधत्वात् । अन्यत्तैः । अथवा देवादय एव त्वद्दर्शनमर्हन्ति न तु वयमित्याह–दैत्येति त्रिभिः । यतो दैत्यादयो वयं निबद्धवैराः तादृशत्वे हेतुः केचनेति उद्बद्धवैरेण विशिष्टाः केचन कामतः र्थसाधनायैव भक्त्या विशिष्टाः जात्या तु निबद्धवैरा एवेत्यर्थः । सुरादयो न तथा न तादृशाः तत्र हेतुः यतः सत्त्वसंरब्धाः अतएव सन्निकृष्टाः साक्षाद्दर्शनादिना त्वत्सन्निकर्षयोग्या इत्यर्थः । तथाप्यस्माभिर्यद्दर्शनं तव तत्र च स्वयं भगवद्रूपेणैवाविर्भूतस्य साग्रजस्य प्राप्तं तद्धेतुः केन ज्ञेय इत्याह–इदमिति । अर्थः स एव । यद्वा । निजैश्वर्यप्रकटनेन तव कृपाविशेषविस्तारणादेवेत्यभिप्रायेण कृपामेव स्तौति–इदमिति । योगः ऐश्वर्यविशेषः तद्रूपा या माया कृपा तां इदमित्थमिति ईदृशी अनेन प्रकारेण हेतुना च स्यादिति योगेशा अपि न विदन्ति अपरिच्छिन्नत्वहेतुकाद्यनन्तमाहात्म्यात् तत्रैव च हेतुर्योगेति अन्यत् समानम् ॥४४॥ यस्मादेवं कृपालुत्वं तस्मादेव हेतोः नोऽस्मभ्यं प्रसीद प्रसादमेवाह–निरपेक्षेति । मुक्तैरपि विशेषेण शुद्धभक्तजनभावेन मृग्यं न तु सहसा लभ्यं युवयोः पदं तदेव सर्वतापहरत्वेन परमदृश्यत्वादिगुणत्वेन परमामोददातृत्वेन चारविन्! तदेव च परमाश्रयत्वाद्धिषणं धिष्ण्यं तदन्यद्धिष्ण्याभासो गृहं तद्वस्तुतोऽन्धकूपः स इव महावरकबन्धहेतुत्वाद्विशेषतश्च सुतलरूपत्वात्तत्सदृशमेवेति तस्मान्निष्क्रम्य शरणभूतो योऽयमङ्घ्रिः पादारवीन्दं तस्य उप समीपे लब्धा वृत्तिर्दासजनोचितवर्तनं येन तथाभूतस्सन् उत एकः एकाक्येव च न तु सपरिकरोऽपि सन् सर्वसखैस्त्वदीयजनैः सह चरामि सर्वसखत्वात्तेऽपि न मयि जुगुप्सां करिष्यन्तीति भावः ॥४५॥ अहो भाग्यहीनानस्मान् प्रति तादृशप्रसादो यदि वाधुना न सम्पाद्यते तदा निजागमनप्रयोजनमप्यादिश्यतां तेनैव कृतार्थो वयमित्याशयेनाह–शाधीति । किञ्चिदादिशेत्यर्थः । तत्र श्रीभगवतो योग्यतामाह–हे ईशितव्येश ! ईशितव्याः शासनीयाः ईशा ब्रह्मादयोऽपि यस्य हे तादृशेति ! न तु तव तु तदनुष्ठाने योग्यता नास्ति तत्राह–निष्पापान् त्वद्भक्तिविघ्नेभ्यो निर्गतान् कुरु अनुशासनरूपेण तवाङ्गीकारेणैव तदपगमात्सम्पत्स्यते सेति भावः । तदेव प्रमाणयति यदिति । यद्वेदरूपं पारम्परिकं श्रवणमप्यनुशासनं किमुत साक्षात् आत्मविषयकमित्यर्थः ॥४६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तेष्वेव केचन पौण्ड्रादयः उच्चैर्बद्धेन वैरेण भक्त्या स्मरणलक्षणया एवं तमःस्वभावानुक्त्वा रजस्स्वभावानाह–केचन सुरादयः कामतः स्वर्गादिवाञ्छया, किंवा, श्रीमोहिन्यवतारे तद्रूपदर्शनेन स्मरतः । सुरादयो न तथेति तेषां बहुलभोगाद्यासक्त्या स्मरणासिद्धेः । आदिशब्दादृष्यादयः तेषां च कर्माद्यासक्तेरिति तव योगमायामैश्वर्यविशेषमित्यर्थः । योगेशाः श्रीसनकादयोऽपि विदन्ति न ज्ञातुं शक्नुवन्ति । तत्र हेतुः–हे योगेश्वरेश्वरेति । अचिन्त्यानन्तमहैश्वर्यादित्यर्थः । प्राय इति भक्तानां केषांचिद्द्वेद्यत्वात् । अन्यैर्व्याख्यातम् । यद्वा । भक्त्येति दृष्टान्ततया यथा भक्त्या सन्निकृष्टा नैकट्यं लब्धाः किंवा दर्शनं प्राप्ता इति प्रसङ्गादध्याहार्यम् तथा सन्निकृष्टाः सात्त्विकत्वेन त्वन्नैकट्ययोग्या अपीत्यर्थः । अथवा देवादय एव त्वद्दर्शनमर्हन्ति न तु वयमित्याह–दैत्येति त्रिभिः । यतो दैत्यादयो वयं निबद्धवैराः । तादृशत्वे हेतुः–केचनेति । उद्बद्धवैरेण विशिष्टाः केचन कामतो भक्त्या विशिष्टाः न तथा तादृशाः सुरादयो यतः सत्त्वसंरब्धाः अत एव सन्निकृष्टाः साक्षाद्दर्शनादिना त्वत्सन्निकर्षयोग्या इत्यर्थः । तथाप्यस्माभिर्यद्दर्शनं तव तत्र चावतारिणः तत्राप्यशेषैश्वर्यप्रकटनपरस्य साग्रजस्य प्राप्तं तद्धेतुः केन ज्ञेय इत्याह–इदमिति । अर्थः स एव । निजैश्वर्यप्रकटनेन तव कृपाविशेषविस्तारणादेवेत्यभिप्रायेण कृपामेव स्तौति–इदमिति । योग ऐश्वर्यविशेषस्तद्रूपा या माया कृपा ताम् इदमित्थमिति ईदृशीं अनेन प्रकारेण हेतुना च स्यादिति योगेशा अपि न विदन्ति । अपरिच्छिन्नत्वाहेतुकत्वादनन्तमाहात्म्यात् । तत्रैव हेतुः–योगेति अन्यत् समानम् ॥४३-४४॥ तत्तस्मात् स्वदर्शनदानाद्धेतोः नोऽस्मान् प्रति बहुत्वं निजपरिवारापेक्षया निरपेक्षैर्मुक्तैरपि विशेषेण बन्धुपेक्षया प्रयत्नेन मृग्यमेव न तु लभ्यम्, यद्युवयोर्युष्माकं वा भक्तजनापेक्षया गौरवेण वा बहुत्वम् । पाद एवारविन्द तापहरणामृतरसस्रावादिना अतस्तदेव धिषणं तदन्यगृहं चान्धकूप एव विविधदुःखावहत्वादबुद्धिभिरलक्ष्यत्वाच्च

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तस्मान्निष्क्रम्य विश्वशरणत्वेन तवरूणां निरुपाधिपरोपकारशीलतादिकमुक्तम्। अत एव तदङ्घ्रिषु तत्रापि उप स्वसमीप एव लब्धवृत्तिः इति तत्र स्वप्रयासो निरस्तः। सुपक्व-फलादीनां स्वयमेव सर्वत्र पतनात् कदाचित् क्वचित्तत्र भावेऽपि। किंवा, शीतोष्णादावपि शान्तोऽनुद्विग्नचित्तः यद्वा, रागद्वेषादिरहितः सन्नेको निरन्तरस्मरणकीर्तनविशेषसम्पत्तये एकाकी उतापवा त्वद्भक्तिरसास्वादनार्थं सर्वसखैश्चरामि, सुखमितस्ततो भ्रमामि। सर्वसखैरिति महतां परमदयालुत्वेनात्मनस्तत्सङ्गयोग्यता सूचिता। अन्यत्तैर्व्याख्यातम्। यद्वा, निरपेक्षविमृग्यं युष्मत्पदारविन्दयोर्धिषणं श्रीनन्दव्रजलक्षणं तदन्यत् सर्वं ब्रह्मलोकादिगृहमेवान्धकूपः तत्र पतितैस्त्वद्धिषणस्यालभ्यत्वात्। तस्मान्निष्क्रम्य तमनपेक्ष्येत्यर्थः। विश्वशरणं श्रीवृन्दावनतरवः तथा चोक्तं श्रीभगवता (भा.१०/२२/३२) **'पश्यतैतान् महाभागान्'** इत्यादि। तेषामङ्घ्रिषु, यद्वा, विश्वशरणस्य तवाङ्घ्र्योः। किंवा, विश्वशरणौ यौ त्वदङ्घ्री तयोरुप सामीप्येन लब्धा वृत्तिः स्थितिर्येन सः, उत अपि स्वपरिवारादित्यागेनैकोऽपि शान्तः। यद्वा, त्वत्सङ्गत्या शान्तः सुखी सन् कदाचित्त्वया सहैकाक्यपि कदाचिच्च सर्वसखैर्व्रजजनैरपि सह; यद्वा, एकः श्रेष्ठो गोपत्वेन सर्वोत्तमः, किंवा गोपानामेकतमः सन् सर्वस्य विश्वात्मकस्यापि तव सखिभिर्गोपैरपि सहचरामि। श्रीवृन्दावनादौ तत्र परिभ्रमामि। दुर्घटतरपदप्रार्थने लज्जादिना व्यक्तया तदनुक्तिः। 'नः' इति प्रागुक्तेऽपि पश्चादेकत्वेनोक्तिः, दुर्लभस्य वस्तुनो बहुषु दानायोग्यत्वस्य किंवा, मदीदृशता सिद्धा। तदीयेषु च स्वतः प्रसादसिद्धेरित्यभिप्रायेणेति ॥४५॥ ननु **'बलिरिन्द्रो भविष्यति'** इति वचनप्रामाण्येन त्रिलोक्या वैष्णवत्वसम्पत्तये त्वमीन्द्रो भवितासीत्यधुना कथमेवं घटताम्? तत्राह-शाधीति। नन्वन्यस्माच्छिक्षस्वेति चेत्तत्राह-हे ईशितव्येशेति। परमेश्वरत्वेन तत्रैवानुशासनयोग्यत्वादिति भावः। तत्र चादावनुशासनमात्रेण निष्पापान् दैत्यत्वनिदान-रजस्तमोमूलपापरहितान् कुरु ततश्च त्वदनुशासनानुष्ठानसिद्ध्या तद्योग्यो भवेयमित्याशयेनाह-पुमानिति। अधिकारापेक्षा नित्या, श्रद्धयेत्यन्यथा नास्तिकताप्रसक्त्या कलासिद्धेः। किंवा, शीघ्रसुसिद्ध्यपेक्षया विशेषेण मुच्यते प्रेमसम्पत्तेः तव त्वत्प्रभावादित्याह-हे प्रभो इति। स्वपक्षे-हे दैत्यराज! तादृशानामिदमतीव दुर्घटम्। तत्राह-शाधीति। ईशितव्यानां भृत्यानां मादृशामीश! परिपालकेति। त्वद्भक्तवात्सल्येन सुघटमिति भावः। नन्वधुना तद्योग्योऽसीति चेत्तत्राह-आदौ निष्पापान् कुरु ततश्च पापराहित्येन त्वदाज्ञानुष्ठानयोग्यतया तदातिष्ठन् परमभक्तो भूत्वा तद्योग्यतामपि प्राप्स्यामीत्यर्थः। अथवा अहं तादृशभाग्यहीनानस्मान् प्रति तत्प्रसादो यदि वा अधुना न सम्पाद्येत तदा निजागमनप्रयोजनमप्यादिश्यताम्। तेनैव कृतार्थं भवेयमित्याह-शाधीति। किञ्चिदादिशेत्यर्थः। अन्यत् समानम् ॥४६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

दुष्प्रापत्वेऽपि सुलभत्वमुपपादयति-यद्यतः न अस्माभिः सार्ष्टिः समानर्द्धितां साम्यतां समानगुणत्वं सायुज्यं गुणाष्टकाविर्भावं साम्यं हि सायुज्यं भावश्चित्तवृत्तिः तदेव कारणं लयोदयकरणं निरपेक्षैः विमृग्य युष्मत्पदारविन्दे धिषणा बुद्धिर्यस्य सः निरपेक्षविमृग्यपादारविन्दधिषणः। तस्मात् अन्यतायुक्तं गृहं गृहमेवान्धकूपं तस्मात् निष्क्रम्य ॥४५॥ चोदनायाः कर्मबन्धात् ॥४६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

प्राप्त इति त एते सर्वे सालोक्यादिरूपां मुक्तिं प्राप्ताः तत्र सालोक्यं नाम भगवता सह समानलोकावस्थायित्वम्, सामीप्यं सान्निध्यम्। सारूप्यं समानवेषता सात्मता समानात्मगुणत्वम्। सायुज्यमिति यावत्। गुणाष्टकाविर्भावसाम्यं सायुज्यम्। सार्ष्टित्वमथ सात्मतामिति पाठे सार्ष्टित्वं समानसमृद्धित्वं सालोक्यादीनि त्रीणि सायुज्यप्रयुक्तानीति मुक्तितारतम्यशङ्कावकाशः। निबद्धवैराणामपि सालोक्यादिप्राप्तिः कुत इत्यत आह-भाव इति। हि यस्माद्भावः चित्तवृत्तिः भवकारणं फलोदयकारणं त्वयि कोऽपि वा निरन्तरचित्तवृत्तिविशेषो मुक्तिकारणमित्यर्थः ॥०॥ निदर्शयति-केचनेति। कंसादयः उद्बुद्धवैरेण त्वयि निबद्धवैरेण प्राप्ता इत्यनुषज्जते केचन भक्त्या केचन गोपीजनाः कामतः कामात्प्राप्ताः कि

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

कृष्टास्त्वत्सात्मतां प्राप्ताः तथा सत्त्वसंरब्धाः सत्त्वाविष्टा अपि सुरादयो न प्राप्ताः । यद्वा । यथोद्बद्धवैरादिना प्राप्तास्तथा कृष्टा अपि सत्त्वप्रधना अपि नानुप्राप्ता इत्यर्थः ॥४३॥ त्वत्कृपासनाथो भाव एव भवकारणमन्यथा त्वन्मायायाथात्म्यावेदिनां तो निस्तार इत्यभिप्रयन्नात्मनः कैमुत्यनयेन तस्या दुर्ज्ञेयतामाह-इदमिति । हे योगीश्वरेश्वर ! योगीश्वरा अपि प्रायशस्तव मायामिदमित्थमिति स्वरूपतः स्वभावतश्च न विदन्ति कुतो वयं विद्मः ॥४४॥ तत्र इति । तत्तस्मात्त्वन्माया-स्वरूपस्वभाववेदनतरणयोर्दुष्करत्वात् केवलं प्रसीद प्रसन्नो भव अस्माननुगृहाणेत्यर्थः । कथं यथा निरपेक्षैर्निष्कामैर्विमृग्ये पादारविन्दे धिषणा बुद्धिर्यस्य अघयुक्तं गृहमेवान्धकूपः तस्मान्निष्क्रम्य विश्वस्य शरणं रक्षितारो वृक्षास्तेषामङ्घ्रिषु मूलेषु लब्धैः स्वत एव गलितैः फलादिभिः वृत्तिः जीवनं यस्य सोऽहं शान्तः सन्नेक एव उताथवा सर्वेषां सखायो ये महान्तः तैः चरामि तथानुगृहाणेत्यर्थः । सर्वसह इति पाठे शीतोष्णादिद्वन्द्वसहः ॥४५॥ प्रकृतागमनप्रयोजनबुभुत्सया स्वविषयकं शासनं यते-शाधीति । हे ईशितव्येश ! ईशितव्या नियम्यास्तेषामीश ! नोऽस्मान् शाधि । कैङ्कर्यज्ञापनेन शिक्षयेत्यर्थः । किं तदित्यत आह-निष्पापानिति । हे प्रभो ! ततोऽपि किमत आह-पुमानिति । तिष्ठन् त्वच्छासनमाश्रयन् चोदनायाः कर्मबन्धाद्विमुच्यते ॥४६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

केचित्केवलतमस्स्वभावाः पौण्ड्रादयः उच्चैर्बद्धेन वैरेण तत्कृतमनोभिनिवेशेनेत्यर्थः । सन्निकृष्टाः मुक्तिपदं प्राप्ताः चित् मद्विधा रजोमिश्राः कामतो यश आदिवाञ्छया या भक्तिः त्रैलोक्यादिदानं तया सन्निकृष्टाः शुद्धभक्तपदं प्राप्ताः सत्त्वाविष्टाः यस्तु स तथा सन्निकृष्टाः ॥४३-४४॥ विश्वशरणभूतोऽयमङ्घ्रिः पादारविन्दं तस्य उप समीपं लब्ध्वा वृत्तिर्दासजनोचितवर्तनं तथाभूतः स्वसमानवासनपरिकरसहितः सन् उत एकः एकाक्येव सन् विश्वसखैस्त्वदीयजनैः सह चरामि ॥४५॥ अहो सामर्थ्यहीनानस्मान् प्रति तादृशप्रसादो यदि वाऽधुना न सम्पाद्यते तदाङ्गने आगमनप्रयोजनमप्यादिश्यताम् तेनैव कृतार्थो मित्याशयेनाह-शाधीति ॥४६-५३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

केचन तमस्स्वभावाः चैद्यादयः उद्बद्धवैरेण या भक्तिस्तया केचन रजस्स्वभावा अस्मदादयः कामतः कीर्त्यादिख्यापनसङ्कल्पेन या भक्तिस्तया यथा सन्निकृष्टाः श्रीभगवता सङ्गताः तथा सत्त्वसंरब्धाः सत्त्वगुणे भगवति संरब्धाः सुरादयो न सन्निकृष्टा इत्यन्वयः ॥४३॥ स्वदैन्यं द्योतयितुं कैमुतिकन्यायेन स्वस्य ज्ञानभक्तिहीनत्वं वदन् यद्यपि प्रकृतयोऽपि स्वस्वविशेषेण त्वां प्राप्नुवन्ति तथा हि सात्त्विकमार्गे ज्ञानभक्तिसाधनभूते संस्थापयेति प्रार्थयते-इदमिति म् । इदमिति स्वरूपतः इत्थमित्यसाधारणधर्मतः तव योगमायाख्यां शक्तिं योगेशा न विदन्ति त्वां न विदन्तीति किमु म् । एवं सति वयं रजस्तमःस्वभावास्तव योगमायां त्वां च न जानीम इति कुतस्तरां वक्तव्यम् एवं ज्ञानाभावे भक्त्यभावोऽपि ॥४४॥ ननु भो वरं वृण्वित्यत आह-निरपेक्षैरात्मारामैरपि विमृग्यं युष्मत्पादारविन्दं तदेव धिषणमाश्रयस्तस्मादन्यो यो पस्तस्मान्निष्क्रम्य विश्वस्य शरणमुपकारका वृक्षास्तेषामङ्घ्रिमूलेषु स्वत एव गलितैः फलादिभिरुपलब्धा वृत्तिर्जीविका सोऽहं शान्तः सन्नेक एव चरामि । उत अत्यधिकं कृपयसि चेत् सर्वेषां सखायस्त्वद्भक्तास्तैः सह चरामि ॥४५॥ किञ्च साम्प्रतं दृशं दर्शनं तदाज्ञापयेत्याह-शाधि आदिश ईशितव्यानामस्मदादीनामीश हे प्रभो ! ननु मदाज्ञां निष्पादयितुं तव कारस्तत्राह-निष्पापान् कुरु तदसामर्थ्येऽपि तच्छ्रवणेनापि निष्कल्मषा भवेमेति भावः । यत् त्वदादिष्टम् अनुतिष्ठन् कुर्वंस्तु विधिनिषेधलक्षणायाः सकाशात् विमुच्यते विधिकिङ्करो न स्यादित्यर्थः ॥४६॥

गूढार्थदीपिनी

इदमिति निर्गुणरूपत: इत्थमिति सगुणरू पतश्च मायां न विदन्ति योगेशा नारदादयोऽपि कुतो वयं जानीम: ॥४४॥ तत् तथा न: प्रसीद यथा अहं गृहान्धकूपात् निष्क्रम्य शान्त: सन् एक एव चरामि उत अपि सर्वसखै: भक्तै: सह विचरामीत्यन्वय: । निरपेक्षै: विमृग्यं यत् युष्मत्पादारविन्दं तदेव धिषणमाश्रय: तस्मादन्यत् यत् गृहं तदेव अन्धकूपस्तस्मात् विनिष्क्रम्य। कथम्भूत: सन् । विश्वस्य शरं रक्षितारो ये वृक्षासतेषामङ्घ्रिमूलेषु पतितै: फलादिभि: प्राप्ता जीविका येन स तथाभूत: स ॥४५॥ ईशितव्य: सेवका अस्मदादयस्तेषामीश । नोऽस्मान् शाधि आज्ञापय । यत् त्वदादिष्टमनुतिष्ठन् चोदनाया विधिनिषेधरूपाया: सकाशात् विमुच्यते ॥४६॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

केचनोद्बद्धवैरेण सहिता: केचन गन्धर्वादय: कामतो या भक्तिस्तया सहिता: सकामभक्ता इत्यर्थ: । सन्निकृष्टा इति कृपया द्वारि स्थित्वैवास्मभ्यं दर्शनं ददासि अन्येभ्यो हत्वा मुक्तिं ददासि अन्येभ्यो गन्धर्वादिभ्य: स्वयशोगानादिगुणं स्व स्वभक्तांश्च श्रावयितुं ददासि सुरादिभ्यस्तु स्वविस्मारकं विषयभोगमेव ददासीति न ते सन्निकृष्टा इति भाव: ॥४३॥ ननु तर्ह्येवमहं कथं करोमीति तत्र कस्ते तत्त्वं जानातीत्याह–इदमिति स्वरूपत: इत्थमिति प्रकारतश्च ॥४४॥ यस्मात्त्वद्विषयकज्ञानभक्तिहीनत्वेन अतिदीना वयं तस्मात् न: अस्मान् प्रति प्रसीद प्रसन्नो भव । दीनान् त्वां शरणं गतान् अनुगृहाणेत्यर्थ: । यथा निरपेक्षै: गृहाद्यपेक्षारहितै: विमृग्यं युष्मत्पादारविन्दं तदेव धिषणमाश्रय: तस्मादन्यं तत्प्राप्तौ अन्तरायकारि गृहं तदेवान्धकूपस्तस्मान्निष्क्रम्य गृहासक्तिं हित्वेत्यर्थ: । विश्वशरणं भवान् तस्य अङ्घ्र्योर्लब्धा श्रवणमननध्यानरूपा वृत्तिर्येन स: उत अथवा सर्वो विष्णुस्त्वं सखा येषां तै: सह शान्त: सन् चरामि तथा प्रसीदेत्यन्वय: ॥४५॥ भगवदागमनप्रयोजनं श्रोतुं स्वविषयकं तच्छासनं प्रार्थयते–शाधीति । हे ईशितव्येश ईशितव्यानां प्रकृतिपुरुषादीनां नियम्यानां नियन्त: ! नोऽस्मान् शाधि इदं कर्तव्यमित्येवं शिक्षय यदर्थमागतोऽसि तदाज्ञापयेत्यर्थ: । हे प्रभो ! यत् येन शासनेन नोऽस्मान् निष्पापान् कुरु यत्तवानुशासनम् आतिष्ठन् आश्रयन् चोदनाया: कर्मबन्धाद्विमुच्यते मुक्तो भवति ॥४६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु ते चेद्द्वेषिण: तदा तेषां नरकपात इति आसुरी योनिमापन्ना इति वाक्यानुसारेण कदाचिदप्यमुक्तौ कथं भगवान् सर्वात्मेति चेत् तत्र मुख्यं सिद्धान्तमाह–केचनोद्बद्धवैरेणेति । त्रिविधा लोका: लौकिका: तत्र तामसा: उद्बद्धवैरेण त्वां जानन्ति प्राप्नुवन्ति वा सात्त्विका: भक्त्या राजसा: कामत: तथा वैदिका: सात्त्विका: सत्त्वेन संरब्धा: सत्त्वगुणेन साहङ्कारेण कर्मस्वाविष्टचित्ता: सुरादयोऽपि ॥४३॥ इदमित्थमिति प्रायेण ते योगमायां न विदन्ति कुतो वयं न लौकिका न वैदिका: निषिद्धभावनयाऽध:पतिता: योगेश्वरेश्वर इति सम्बोधनात् भोगाभिनिविष्टा: देवा: मा जानन्तु योगेश्वरा: ज्ञास्यन्तीति तान्निषेधति योगेशा अपि ॥४४॥ एवं भगवतो माहात्म्यं स्वस्यानधिकारं च निरूप्य अनधिकारिणा भगवदाज्ञाव्यतिरेकेण परित्याग: कर्तुमशक्य इत्याज्ञां प्रार्थयते–तत् प्रसीदेति । ननु किमिति परित्याग: प्रार्थ्यते तत्राह–हे निरपेक्षविमृग्येति । निरपेक्षा ये सर्वत: तेषामेव विमृग्य इती अनेन गृहे स्थितस्य शूद्रस्येव वेदोच्चारणमिव भगवदन्वेषणं निषिद्धमिति ज्ञापितं साक्षादपि भगवदन्वेषणं नास्तीत्याह– युष्मत्पादारविन्दधिषणान्यगृहान्धकूपादिति । युष्मत्पादारविन्दे धिषणा येषां तेभ्यो ये अन्ये तेषामेव गृहं तदन्धकूपप्रायमेव भवति भगवच्चरणारविन्दस्मृतिप्रकाशाभावात् अत एव तस्माद्विनिष्क्रम्य तादृशमस्मद्गृहं दैत्याक्रान्तमिति । चरामीति प्रार्थना नन्वन्नाद्यभावे कथं चरणं सेत्स्यतीति चेत् तत्राह–विश्वशरणाङ्घ्र्युपलब्धवृत्तिरिति । विश्वस्यापि शरणभूते अङ्घ्री येषां येषां परिभ्रमणेन सर्वे संसारिण: गृहं त्यक्त्वा क्षणमप्यन्यत्र गन्तुमशक्ता: तेऽपि कृतार्था भवन्तीति सन्तो विश्वशरणाङ्घ्रयो भवन्ति तै: कृता तद् उपजीविका वृत्तिर्भवति ता ये पिबन्त्यवितृपो नृप गाढकर्णैरिति प्रकारेण सद्भिर्बाधायां निवृत्तायामान्तरदोषोऽपि निवृत्तो भविष्यतीत्य शान्त इति । यथावत् एक: परमहंसो यथेति वा तथा भविष्यामीति बाह्याभ्यन्तरदोषस्य निवृत्तत्वात् ॥४५॥ एवं कियत्कालपरि उत सर्वसखोऽपि भविष्यामि यथा सन् एतत्सर्वं परित्यागव्यतिरेकेण न भवतीति गृहे उद्विग्नो भगवन्तं प्रार्थयते एतत्कालानन्

साम्प्रतं किं कर्तव्यमिति
चेत्तत्राह–हे ईशितव्येशेति
प्रार्थ्यते तत्र बीजमाह–पुमा

उद्बद्धेन दृढेन वैर
सत्वसंरब्धा: सत्त्वाविष्टा: सु
जानीम: । हे योगेश्वरेश्वर ! ॥४
धिषणमाश्रयस्तस्मादन्यद्गृहं त
स्वत: प्राप्तै: पतितफलादिभि
तथाऽस्मान् शाधि शिक्षय हे ई
विधिनिषेधलक्षणाया: सकाश

ननु कथं सात्त्विकेभ्य
स्वरूपत: इत्थमिति प्रकारतश्च त
मां सात्त्विकं कुर्विति प्रार्थयते–
तदेवान्धकूपस्तस्मान्निष्क्रम्य नि
वृत्तिर्जीविका येन सोऽहं शान्त:
नोऽस्मान् प्रसीद अनुगृहाण ॥४
समर्थ ! तत्र हेतुं सूचयन् सम्बो
मदाज्ञानुसरणे किं फलम् इत्य
त्वदादिष्टमनुतिष्ठन् पुमान् विमुक्तपु

इदमिति । हे योगेश्वरेश्वर
कुतो विद्म: ॥४४॥ तत्र इति ।
तदेवान्धकूपस्तस्मान्निष्क्रम्य निर्गत
वृत्तिर्जीविका येन । यद्वा । विश्वस्य
यथा चरामि उत अथवा सर्वेषां सख
ईशितव्यानां नियम्यानामस्माकमीश
पुमान् विमुक्तपुण्यपापादिबन्धन: सं

श्री

तदुक्तं श्रुत्वा गमनप्रयोज
मन्वन्तरे ये आसन् ते देवा: सुतां सरस

पि कुतो वयं जानीमः ॥४४॥
: भक्तैः सह विचरामीत्यन्वयः
धकूपस्तस्मात् विनिष्क्रम्य।
ीविका येन स तथाभूतः सन्
त्वदादिष्टमनुतिष्ठन् चोदनाया

भक्ता इत्यर्थः । सन्निकृष्टा इति
दिभ्यः स्वयशोगानादिगुणं स्वं
कृष्टा इति भावः ॥४३॥ ननु
त्थमिति प्रकारतश्च ॥४४॥
भव । दीनान् त्वां शरणं गतान्
स्मादन्यं तत्प्राप्तौ अन्तरायकारणं
श्रवणमननध्यानरूपा वृत्तिर्येन
५॥ भगवदागमनप्रयोजनं श्रोतुं
यानां नियन्तः ! नोऽस्मान् शाधि
् निष्पापान् कुरु यत्तवानुशासनम्

कदाचिदप्यमुक्तौ कथं भगवान्
तामसाः उद्बुद्धवैरेण त्वां जानन्ति
ुणेन साहङ्कारेण कर्मस्वाविष्टचित्ताः
दकाः निषिद्धभावनयाऽधःपतिताः
षेधति योगेशा अपि ॥४४॥ एवं
कर्तुमशक्य इत्याज्ञां प्रार्थयते-तत्र
व विमृग्य इती अनेन गृहे स्थितस्य
भगवदन्वेषणं नास्तीत्याह-
ामेव गृहं तदन्धकूपप्रायमेव भवति
त। चरामीति प्रार्थना नन्वत्राद्यभावात्
ङ्घ्री येषां येषां परिभ्रमणेन सर्व एव
णाङ्घ्रयो भवन्ति तैः कृत्वा लब्ध
न्तरदोषोऽपि निवृत्तो भविष्यतीत्याह-
त् ॥४५॥ एवं कियत्कालपरिभ्रमणे
भगवन्तं प्रार्थयते एतत्कालान्त

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

साम्प्रतं किं कर्तव्यमिति विज्ञापयति-शाध्यस्मानिति । ननु यथाशास्त्रमेव कर्तव्यम् अभ्यागता वयं कथमाज्ञापयिष्याम इति चेत्तत्राह-हे ईशितव्येशेति । ईशितव्या एव वयं सर्वे जीवाः तेषां त्वमेवेशः अतस्त्वया आज्ञापनीयाः ननु विशेषतः किमिति प्रार्थ्यते तत्र बीजमाह-पुमान् यच्छ्रद्धया तिष्ठन्निति । चोदनायाः विधिनियोगान्निवर्तते इत्यर्थः ॥४६॥

श्रीसुबोधिनीसारः

उद्बुद्धेन दृढेन वैरेण केचन केचित् भक्त्या केचन कामतश्च केचन ते तव यथा सन्निकृष्टाः प्रेष्ठाः निकटवर्तिनः तथा सत्त्वसंरब्धाः सत्त्वाविष्टाः सुरादयो न ॥४३॥ इदमित्थमिति प्रायो बाहुल्येन तव योगमायां योगेशा अपि न विदन्ति । वयं कुतो जानीमः । हे योगेश्वरेश्वर ! ॥४४॥ तत्तस्मान्नोऽस्माकमुपरि त्वं प्रसन्नो भव । निरपेक्षैर्निष्कामैर्विमृग्यमन्वेष्यं युष्माकं पादारविन्दमेव धिषणमाश्रयस्तस्मादन्यद्गृहं तदेवान्धकूतस्तस्मानिष्कम्य निर्गत्य विश्वस्य शरणं परार्थैकान्तजीविनो वृक्षास्तेषामङ्घ्रिमूलेषु उपलब्धैः स्वतः प्राप्तैः पतितफलादिभिर्वृत्तिर्जीवनं यस्य सोऽहं शान्तः एक एवोतापि सर्वेषां सखायो महान्तस्तैः सह यथा चरामि ॥४५॥ तथाऽस्मान् शाधि शिक्षय हे ईशितव्येश ! हे प्रभो ! निष्पापान् नोऽस्मान् त्वं कुरु । यत्तवानुशासनं श्रद्धयाऽऽतिष्ठन् कुर्वन् चोदनाया विधिनिषेधलक्षणायाः सकाशाद्विमुच्यते पुमान् न किङ्करो नायमृणी च राजन्नित्युक्तेर्वक्ष्यमाणत्वात् ॥४६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु कथं सात्त्विकेभ्योऽपि राजसास्तामसाः सन्निकृष्टाः इत्यपेक्षायामाह-इदमिति । हे योगेश्वरेश्वर ! योगेशा अपि इदमिति स्वरूपतः इत्थमिति प्रकारतश्च तव योगमायां न विदन्ति, वयं दैत्याः कुतो विद्मः ? ॥४४॥ तदेवं यद्यपि वैरभावेनापि त्वत्प्राप्तिर्भवेत्तथापि सात्त्विकं कुर्विति प्रार्थयते-तत्र इति । निरपेक्षैराप्तकामैरपि विमृग्यं यत् युष्मत्पदारविन्दं तदेव धिषणमाश्रयस्तस्मादन्यत् यद्गृहं तदेवान्धकूपस्तस्मान्निष्क्रम्य निर्गत्य विश्वस्य शरणं रक्षितारो वृक्षास्तेषामङ्घ्रिषु स्वत एव गलितैः फलादिभिरुपलब्धा प्राप्ता वृत्तिर्जीविका येन सोऽहं शान्तः सन् एक एव यथा चरामि, उत अथवा सर्वेषां सखायो ये त्वद्भक्तास्तैः सह यथा चरामि तत्तथा नोऽस्मान् प्रसीद अनुगृहाण ॥४५॥ एवमनुग्रहं प्रार्थ्य साम्प्रतं यदर्थमागतोऽसि तदाज्ञापय इत्याह-शाधीति । हे प्रभो ! आज्ञापने समर्थ ! तत्र हेतुं सूचयन् सम्बोधयति-हे ईशितव्यानां नियम्यानामस्माकमीश नियन्त इति । अस्मान् शाधि कैङ्कर्यमादिश । त्वदाज्ञानुसरणे किं फलम् इत्यपेक्षायां सर्वपापनिवृत्तिः इत्याह-नोऽस्मान्निष्पापान् कुर्विति । पापनिवृत्तेरपि फलमाह-यत् त्वदादिष्टमनुतिष्ठन् पुमान् विमुक्तपुण्यपापादिबन्धनः संश्चोदनायाः विधिनिषेधलक्षणाया विमुच्यते जीवन्मुक्तो भवतीत्यर्थः ॥४६॥

अन्वितार्थप्रकाशिका

इदमिति । हे योगेश्वरेश्वर ! योगेशा अपि इदमिति स्वरूपतः इत्थमिति प्रकारतश्च तव योगमायां न विदन्ति वयं दैत्याः कुतो विद्मः ॥४४॥ तत्र इति । निरपेक्षैराप्तकामैरपि विमृग्यं यत् युष्मत्पदारविन्दं तदेव धिषणमाश्रयस्तस्मादन्यत् यद्गृहं तदेवान्धकूपस्तस्मान्निष्क्रम्य निर्गत्य विश्वस्य शरणं रक्षितारो वृक्षास्तेषामङ्घ्रिषु स्वत एव गलितैः फलादिभिरुपलब्धा प्राप्ता वृत्तिर्जीविका येन । यद्वा । विश्वस्य शरणभूतो यस्तवाङ्घ्रिस्तयोपसमीपे लब्धा वृत्तिर्दासोचितवर्तनं येन सोऽहं शान्तः सन् एक एव यथा चरामि उत अथवा सर्वेषां सखायो ये त्वद्भक्तास्तैः सह यथा चरामि तत्तथा नोऽस्मान् प्रसीद अनुगृहाण ॥४५॥ शाधीति । हे ईशितव्यानां नियम्यानामस्माकमीश नियन्तः अस्मान् शाधि कैङ्कर्यमादिश । नोऽस्मान्निष्पापान् कुरु । यत् त्वदादिष्टमनुतिष्ठन् पुमान् विमुक्तपुण्यपापादिबन्धनः संश्चोदनायाः विधिनिषेधलक्षणायाः विमुच्यते न हि त्वद्भक्तो विधिकिङ्करः स्यात् ॥४६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदुक्तं श्रुत्वा गमनप्रयोजनमाह-श्लोकपञ्चकेन आसन्निति । ऊर्णायां तदभिधायां जायायां प्रथमेऽन्तरे स्वायम्भुवे मन्वन्तरे ये आसन् ते देवाः सुतां सरस्वतीं यभितुं मैथुनेन रमयितुम् उद्युक्तं कं विधिम् ॥४३॥ तेन स्वसकामभावयुक्तहास्यरूपेण

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अवद्यकर्मणां पापेन आसुरीं योनिं जातिम् अगन् अगमन्। तदेवाह। अधुना शीघ्रमेव हिरण्यकशिपोर्जाताः ते च योगमायया नीताः सन्ति देवक्या उदरे जाताः ततः ते च कंसेन विहिंसिताः सा तान् स्वानात्मजान् शोचति। ते च इमे अन्तिके तव समीपे अधुना अध्यासते ॥४४-४५॥ लोकं मरीचेः स्थानम् ॥४६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तप्रकारेण मुक्तिं गतान्निदर्शयन् सात्त्विकानामतथात्वं वदति ॥ केचनेति ॥ केचन कंसादयः उद्बद्धवैरेण त्वयि निबद्धवैरेण मुक्तिं प्राप्ता इत्यनुषज्यते। केचन नारदादयः भक्त्या केचन गोपीजनाः कामतः मुक्तिं प्राप्ताः। यथैते तव सन्निकृष्टाः सत्त्वसंरब्धाः सत्त्वाविष्टाः अपि सुरादयः न प्राप्ताः ॥४४॥ त्वत्कृपासनाथो भाव एव भवकारणमन्यथा त्वन्मायायाथात्म्यावेदिनां कुतस्ततो निस्तार इत्यभिप्रयन्नात्मनः कैमुत्यनयेन तस्या दुर्ज्ञेयतामाह ॥ इदमिति ॥ हे योगेश्वरा योगेशा योगेश्वरा अपि प्रायः प्रायशः तव योगमायाम् इदम् इत्थम् इति स्वरूपतः स्वभावतश्चेति शेषः। न विदन्ति। तदा वयं कुतः विद्मः ॥४५॥ तदिति ॥ तत्तस्मात् त्वन्मायास्वरूपस्वभाववे.दनतरणयोर्दुष्करत्वादित्यर्थः। नः प्रसीद प्रसन्नो भव। अस्मान् अनुगृहाणेत्यर्थः। कथं, यथा निरपेक्षैर्निष्कामैर्विमृग्यं यद्युष्मत्पदारविन्दं तस्मिन् धिषणा बुद्धिर्यस्य सोऽहम् अपवृक्तं यद्गृहं तदेवान्धकूपस्तस्मात् निष्क्रम्य निर्गत्य विश्वस्य शरणं रक्षितारो वृक्षास्तेषामङ्घ्रिषु मूलेषु स्वत एव गलितैः फलादिभिः उपलब्धा प्राप्ता वृत्तिर्जीवनं यस्य तथाविधः शान्तश्च सन् एकः एव उताथ वा सर्वेषां सखायो ये महान्तस्तैः सहितः सन् चरामि। तथाऽनुगृहाणेत्यर्थः। सर्वसह इति पाठे शीतोष्णादिद्विन्द्वसहः ॥४६॥

कृष्णप्रिया

हे योगेश्वर भगवन् ! आपकी योगमाया कि दिशा ऐसी है, या यह है, ऐसा योगेश्वरादि भी नही जान सके तो फिर हम कहां से जान सकें ॥४४॥ नाथ ! हम दीन के उपर अनुग्रह करें, निरपेक्ष भावसे वह सभी सत्पुरुष आपको निरंतर खोज रहे है। नाथ ! गृहसंसार उनके लिये अंधकूप समान है, कि जो भक्तजन आपके चरणकमल में मति नही है। परंतु आपके चरणों को चित्तमें धारण करने वाले भक्तों के लिये आत्मप्राप्तिरूप आश्रम है, अतः संसारासक्ति से परिपूर्ण अंधकूप सदृश ग्रहप्रपंच से बहार निकलकर जगत् का रक्षण करते हुवे, आपके चरणकमलमें रहनेवाले मेरी आजीविका का भार सोंपकर, में शांत होकर, सब का मित्र बनकर सोचुं ऐसी कृपा मेरे उपर करें ॥४५॥ हे नाथ ! हम आपके सेवक है तो अब आपश्री वर्तमान में हमको आपका आदेश सुनाइये, जिसका हम पालन करें, आप हमको पापो से मुक्त करें, यदि कोई भी पुरुष आपके स्वरूपमें श्रद्धा धारणकर विचरण करता है, वह शास्त्रों के विधि निषेधमेंसे मुक्त होता है ॥४६॥

श्रीभगवानुवाच

आसन् मरीचेः षट् पुत्रा ऊर्णायां प्रथमेऽन्तरे। [1]देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतम् ॥४७॥
तेनासुरीमगन् योनि[2]मधुनावद्यकर्मणा। हिरण्य[3]कशिपोर्जाता [4]नीतास्ते योगमायया ॥४८॥
देवक्या उदरे जाता राजन् कंसविहिंसिताः। सा ताञ्छोचत्यात्मजान् स्वांस्त इमेऽन्या[5]सतेऽन्तिके ॥४९॥
इत एतान् प्रणेष्यामो मातृशोकापनुत्तये। ततः [6]शापविनिर्मुक्ता लोकं यास्यन्ति विज्वराः ॥५०॥

---

१. देवलं जहसुर्वीक्ष्य सुताञ्छपितुमुद्यतं-विज.। २. ममुना-विज.। ३. कशिपोः शापाज्जतास्ते-विज.। ४. पुत्रास्ते-च. पु. टी.। ५. ध्यासे लि. टी.। ६. शापाद्-श्रीधर. वंशी. वीर. विज. विश्व.।

श्रीभगवान्, उवाच
प्रथमे, अन्तरे, मरीचे
अवद्यकर्मणा, योगमायया, न
जाताः, कंसविहिंसिताः, सा, त
प्रणेष्यामः, ततः, शापात्, वि

कथमल्पपुण्यानामेव
सर्वे जीवास्तेषामीश ! यत्तव
विधिकिङ्कराः स्यादिति भावः
भार्यायां प्रथमेऽन्तरे स्वायम्भु
जहसुरुपहसितवन्तः ॥४७॥ ते
॥४८॥ ते च योगमायया ततो नी
मत्वा शोचति ते चेमे तवान्तिके

तदुक्तं बल्युक्तम्।
भीमादिवदक्षरमुष्टिन्यायेन वाऽऽभा
नेदानीमर्थकं किन्तु तत्क्षणार्थकमिति
स्थित्वा पुनरधुना देवक्या उदरे जात
"हिरण्यकशिपुपुत्रकालने
ददौ। तच्छ्रुत्वा तेषां पितामहो हिरण
भविष्यतेत्युक्त्वा तांस्तत्याज। त
शयनं चक्रुस्तेषां जीवात्मनो योग
अनिलोकदृष्ट्या साक्षाज्जनिरिति।
अध्यासते तिष्ठन्ति ॥४९॥ इतस्त
पापाकोशदिव्यप्राप्तकल्याणकेषु च' इ

तत्रोत्तरं प्रार्थनमेव सम्प्रति स्
सार्थकम्। आसुरयोनिगमनप्रकारमेवाह-
सार्धद्वयेन। तत्रैव सकरुणमाह सेत्यर्धके
सर्वज्ञेन बलिना श्रीभगवद्दर्शनार्थं ते सदा
आवश्यकतया प्रणयेन वा नेष्यामः 'अ
शापादिति वा पाठः विशेषेण आसुरभावर
प्रथमतस्तावदेव लोकं यास्यन्ति भोगेच्छा

: ते च **योगमायया नीताः**
न्तिके तव **समीपे अधुना**

सादयः **उद्धवैरेण त्वयि**
र्क्ति **प्राप्ताः । यथैते तथा**
त्र **एव भवकारणमन्यथा**
इदमिति ॥ हे योगेश्वरेश्वर
षः । **न विदन्ति । तदा वयं**
। **नः प्रसीद प्रसन्नो भव ।**
बुद्धिर्यस्य **सोऽहम् अद्ययुक्तं**
त **एव गलितैः फलादिभिः**
ह्रान्तस्तैः **सहितः सन् चरामि**

वरादि भी **नही जान सकते**
भावसे वह **सभी सत्पुरुष**
भक्तजन आपके **चरणकमल**
नप्राप्तिरूप **आश्रम है, अतः**
रक्षण करते हुवे, **आपके**
नत्र बनकर सोचुं **ऐसी कृपा**
को आपका **आदेश सुनाइये,**
के स्वरुपमें **श्रद्धा धारणकर**

सुतां यभितुमुद्यतम् ॥४७॥
नास्ते योगमायया ॥४८॥
इमेऽन्या'सतेऽन्तिके ॥४९॥
यास्यन्ति विज्वराः ॥५०॥

---

४. पुत्रास्ते-च. पु. टी. । ५. ध्यासे-इ.

कर्दमक्षमा

श्रीभगवान्, उवाच ।

प्रथमे, अन्तरे, मरीचेः, ऊर्णायाम्, षट्, पुत्राः, आसन्, देवाः, सुताम्, यभितुम्, उद्यतम्, कम्, वीक्ष्य, जहसुः ॥४७॥ तेन, अवद्यकर्मणा, योगमायया, नीताः, ते, आसुरीम्, योनिम्, अगन्, अधुना, हिरण्यकशिपोः, जाताः ॥४८॥ राजन्, देवक्याः, उदरे, जाताः, कंसविहिंसिताः, सा, तान्, स्वान्, आत्मजान्, शोचति, ते, इमे, अन्तिके, अध्यासते ॥४९॥ मातृशोकापनुत्तये, इतः, एतान्, नेष्यामः, ततः, शापात्, विनिर्मुक्ताः, विज्वराः, लोकम्, यास्यन्ति ॥५०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कथमल्पपुण्यानामेवम्भावः सम्भवतीति चेत्तर्हि यथैतद्भवेत्तथास्माननुशिक्षयेत्याह-शाधीति । हे प्रभो ! ईशितव्याः सर्वे जीवास्तेषामीश ! यत्तवानुशासनमातिष्ठन्नाश्रयँश्चोदनायाः विधिनिषेधलक्षणायाः सकाशाद्विमुच्यते न खलु त्वद्भक्तो विधिकिङ्करः स्यादिति भावः ॥४६॥ तदुक्तं सर्वमनुमोद्य स्वागमनकारणं सप्रपञ्चं कथयति आसन्निति पञ्चभिः । ऊर्णायां पत्न्यां प्रथमेऽन्तरे स्वायम्भुवमन्वन्तरे ते देवाः सुता वाचं यभितुं यब्धुं मैथुनेन रमयितुमुद्यतमुद्युक्तं कं प्रजापतिं वीक्ष्य उपहसितवन्तः ॥४७॥ तेनावद्यकर्मणा पापेनाऽसुरीं योनिमगन्नगमन् अधुना तत्क्षणमेव हिरण्यकशिपोर्जाता इत्यर्थः ॥४८॥ ते च योगमायया ततो नीताः सन्तो देवक्या उदरे जाताः हे राजन् बले ! ते च कंसेन विहिंसिताः सा च तानात्मजान् स्मृत्वा शोचति ते चेमे तवान्तिकेऽध्यासते ॥४९॥ लोकं देवलोकम् ॥५०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदुक्तं बल्युक्तम् । विगीतव्यावृत्त्यर्थमर्थान्तरमाह-सुखं तनोतीति सुता भार्या ताम् । नामैकदेशन्यायेन भीमादिवदक्षरमुष्टिन्यायेन वाऽऽभाकादिवदत्र सुना सुखग्रह इति ॥४७॥ तेन महदुपहासलक्षणेन । इत्यर्थ इति-अधुनेति पदमत्र कालानर्थकं किन्तु तत्क्षणार्थकमिति भावः । ते च हिरण्यकशिपुजाताः । ततो हिरण्यकशिपुगृहात् । योगमायापार्श्वमेतावत्कालपर्यन्तं स्थित्वा पुनरधुना देवक्या उदरे जाता इत्युत्तरेणान्वयः । अत्र च हरिवंशीया कथाऽनुसन्धेया । सा च —

"हिरण्यकशिपुपुत्रकालनेमिनः षट् पुत्रा ब्रह्मप्रसादावाप्तये तपश्चक्रुस्तत्तपसा तुष्टो ब्रह्मा तदभीप्सितममरत्वं ददौ । तच्छ्रुत्वा तेषां पितामहो हिरण्यकशिपुस्ताञ्छशाप-यतो मां सर्वेश्वरं त्यक्त्वा ब्रह्माणमाराधितवन्तोऽतः स्वपितृवध्या भविष्यतेत्युक्त्वा तांस्तत्याज । ततो विष्णुर्ब्रह्मवरं सत्यीकर्तुं तेषामात्मन आकृष्य योगनिद्रायै ददौ । ते च जलगर्भे शयनं चक्रुस्तेषां जीवात्मनो योगमाया भगवदाज्ञप्ता देवकीगर्भे निवेशितवतीति तेषां स्वप्नवत् स्वदृष्ट्या देवक्यां जनिर्लोकदृष्ट्या साक्षाज्जनिरिति ।" ॥४८॥ सा च देवकी । तान् कंसविहिंसितान् । ते च कंसहिंसिताः । इमे सम्मुखस्थाः । अध्यासते तिष्ठन्ति ॥४९॥ इतस्तव पार्श्वतः । ततो मातृशोकापनुत्त्यनन्तरम् । शापान्महदुपहासलक्षणपापात् 'शापः आक्रोशोदिव्यप्राप्तकल्याणकेषु च' इति निरुक्तिः ॥५०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्रोत्तरं प्रार्थनमेव सम्प्रति स्वाभीष्टविशेषेणानुमोदितुमुपोद्घातं प्रस्तौति-आसन्निति । देवा अपि जहसुः ॥४७॥ तेनेति युग्मकम् । आसुरयोनिगमनप्रकारमेवाह-अधुनेति । हिरण्यकशिपोर्जात इति द्वितीयाध्यायारम्भे व्याख्यातम् ॥४८॥ तत्र प्रस्ताव्यमाह-राजन्निति सार्धकेन । तत्रैव सकरुणमाह सेत्यर्धकेन । यतः स्वान् स्वीयानात्मजान् ते च न गोपनीया इति सनर्माह त इम इति एवं परमभक्तेन भवता बलिना श्रीभगवद्दर्शनार्थं ते सदा स्वसमीप एव च स्थापिता इति ज्ञेयम् ॥४९॥ स्वाभीष्टमाह-इत इति द्वाभ्याम् । प्रकर्षेण आवश्यकतया प्रणयेन वा नेष्यामः 'अस्मदो द्वयोश्च' इति बहुवचनम् एषामपि कुशलं भविष्यतीत्याह-तत इति । शापेति विनिर्मुक्ता इति वा पाठः विशेषेण आसुरभावराहीत्येन निःशेषेण तच्छरीरराहीत्येन मुक्ताः अत एव विज्वराः सर्वसन्तापरहिताः सन्तः अधिकारावदेव लोकं यास्यन्ति भोगेच्छावशेषात् ॥५०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तत्प्रार्थितस्याधुना महादुर्घटत्वेन तत्रोत्तरमदत्त्वा स्वागमनप्रयोजनकथनेनैव तं सन्तोषयंस्तदाह-आसन्निति त्रिभिः देवा अपि जहसुः ॥४७॥ हिरण्यकशिपोरिति तत्पुत्रात् कालनेमिनो जाता इति श्रीहरिवंशोक्तानुसारेण ज्ञेयम्। तच्च पु द्वितीयाध्यायारम्भे सूचितमेव। तद्विशेषः श्रीहरिवंशे सुव्यक्त एव। अत्र बाहुल्यभयान्न लिख्यते ॥४८॥ हे राजन्निति ते तत्तत्सर्ववृत्तं त्वया ज्ञायत एवेति भावः। कीदृशीं गतिं प्राप्ता इति शोचति, यतः स्वान् स्वकीयानात्मजान् अत एतानर्पयेत्यादि तेषां तदधीनतामाह-त इति। एवं परमभक्तेन सर्वज्ञेन श्रीबलिना श्रीभगवद्दर्शनार्थं ते सदा स्वसमीपेऽवस्थाप्यन्त इति ज्ञेय ॥४९॥ प्रकर्षेणावश्यकतया प्रणयेन वा नेष्यामः बहुत्वं नयनदार्ढ्याय निजप्रौढिसूचनात्। पाठान्तरं स्पष्टम् मातृशोकापनुत्तिहेतुमाह-तत इति। तदनन्तरमेव शापादुपहासेन श्रीब्रह्मदत्तात्, पापेति वा पाठः। विशेषेण निःशेषेण च सर्वथा मुक्ताः, अत एव विज्वराः सर्वसन्तापरहिताः सन्तः लोकमात्मीयं तत्रत्यानां स्वपरिवाराणां सन्तोषार्थं निश्चयार्थं च तानेव निर्दिशन् भोगान्ते परमपदं प्राप्स्यन्तीत्याह-स्मरेति। पुनः पश्चात् सद्गतिं श्रीवैकुण्ठलोकम् अथवा लोकं मर्त्यं तदेवोक्तपोषण्यायेन द्रढयन्नाह-स्मरेति। पुनस्त्वर्थे वाक्यालङ्कारे। अन्यत्समानम् ॥५०-५१॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मरीचिः प्रजापतिः। कं प्रजापतिं देवा एत एव षट् पुत्राः ॥४७॥ उत्तराः अवद्यकर्मणा पापकर्मणा ॥४८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थं प्रार्थितः प्राह भगवान्-आसन्निति। प्रथमान्तरे स्वायम्भुवमन्वन्तरे मरीचेः प्रजापतेरूर्णायां भार्यायां षट् सुताः आसन्। ते देवाः सुतां सरस्वतीं यभितुं मैथुनं कर्तुमुद्युक्तं तं ब्रह्माणं वीक्ष्य जहसुर्हसितवन्त इत्यर्थः ॥४७॥ तेन परिहासात्मकेन दुष्टेन कर्मणा आसुरीं योनिं प्रापुः। तथैव हिरण्यकशिपोर्जाताः ते च योगमायया शक्त्या ततो नीताः सन्तः देवाक्या उदरे जाताः हे राजन्! तेन कंसेन विहिंसिताः देवकीसुतानात्मजान् मत्वा शोचती ते चेमे तवान्तिकमन्तिके अध्यासते। "अधिशीङ्स्थासां कर्म" (१/४/४६) इत्याधारस्य कर्मत्वम् ॥४८-४९॥ इत इति। मातुर्देवक्याः शोकापहरणाय इत एतान् प्रणेष्यामः त शोकापनोदनानन्तरं पापात् प्रजापत्यपहासात्मकाद्विनिर्मुक्ताः अत एव विज्वराः निर्दुःखाः लोकं तावत्पुण्यलोकं यास्यन्ति त मत्प्रसादेन मदनुग्रहेण हेतुना इमे स्मरादयः षट् सद्गतिं मुक्तिं यास्यन्ति ॥५०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४६-५३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वागमनकारणमाह-आसन्निति पञ्चभिः। ऊर्णायां भार्यायाम् अन्तरे मन्वन्तरे स्वायम्भुवे ते देवाः षट् सुतान् सा यभितुं सम्भोक्तुम् उद्यतम्। कं प्रजापतिम् ॥४७॥ तेनावद्यकर्मणा पापेन अधुना तत्क्षण एव आसुरीं योनिमगमन् हिरण्यकशि सकाशात् कालनेमिक्षेत्रे जाताः ते च योगमायया देवक्याः उदरे कंसहस्तेन घातनार्थं नीताः ॥४८॥ सा देवकी इमे ते इति त तान् दर्शयतीति ते परमभागवतेन बलिना भगवद्दर्शनार्थमानीय स्वदृष्टिपथ एव स्थापिता इति भावः ॥४९॥ शापात् पित वधिष्यतीति हिरण्यकशिपोः शापाद्विमुक्ता एवैते ततः मन्नयनानन्तरं लोकं देवलोकम् ॥५०॥

गूढार्थदीपिनी

प्रथमेऽन्तरे स्वायम्भुवमन्वन्तरे ऊर्णायां कलायां पत्न्यामासन् अस्या एव नामान्तरम्। ते देवाः सुतां यभितुं मैथुनं क कं ब्रह्माणं वीक्ष्य जहसुः ॥४७॥ तेनेति युग्मम्। तेन अवद्यकर्मणा निन्दितकर्मणा आसुरीं योनिमगमन्। ते योगमायया

सन्तः देवक्या उदरे जाताः
तिष्ठन्ति ॥४८-४९॥ इतः
(शापात् उपहासलक्षणपापा

अक्षिसङ्कोचेन तदु
ऊर्णायां पत्न्यां षट् पुत्राः अ
ब्रह्माणं वीक्ष्य जहसुः उपह
ततो योगमाययानीताः ॥४८
॥४९॥ लोकं देवलोकम् ॥

प्रथमवाक्ये अनङ्गी
अतीतब्रह्मकल्पे मरीचेरूर्णानाम
त एवैत इति वक्तुं तेषामपराधम
सम्भोक्तुमुद्यतं कं ब्रह्माणं जहसु
ते तत्रोपहासं कुर्वन्तः भक्तोपहा
इति अधुना आसुरयोनौ उपह
कस्यांचिज्जाताः ॥४७-४८॥ तत
देवक्या उदरं नीताः राजन्निति रा
जातः त्रिसत्यो भगवानिति इदा
शोचति ते पुनरत्रैव हिरण्यकशिपु
प्रणेष्याम इति। प्रयोजनं मातृशोक
तेषां शापापनोदः ततो विज्वरास्स

कृष्णोक्तिः। प्रथमेऽन्तरे
यभितुं रन्तुमुद्यतं कं ब्रह्माणं वीक्ष्
वर्णलोपः। हिरण्यकशिपोर्जातास्ते
शोचति। तेऽन्तिके समीपे इमे वर्त
एते विज्वरा सुखिनो लोकं स्वर्गं ग

एवं सम्प्रार्थितो भगवान् तत्रा
मरीचेः प्रजापतेः ऊर्णायां 'मरीचये क
सुतां सरस्वतीं यभितुं मैथुनेन रमि

तदाह-आसन्निति त्रिभिः ।
सारेण ज्ञेयम् । तच्च पुरा
।।४८।। हे राजन्निति तेषां
ान् अत एतानर्पयेत्यादिशन्
ीपेऽवस्थाप्यन्त इति ज्ञेयम्
ात् । पाठान्तरं स्पष्टम् ।
ः । विशेषेण निःशेषेण च
णां सन्तोषार्थं निश्चयार्थं च
ोकम् अथवा लोकं मदीयं

ापकर्मणा ।।४८।।

तेरूर्णायां भार्यायां षट् सुताः
र्थः ।।४७।। तेन परिहासात्मकेन
ः सन्तः देवाक्या उदरे जाताः हे
अध्यासते । "अधिशीङ्स्थासां
ाय इत एतान् प्रणेष्यामः ततः
तावत्पुण्यलोकं यास्यन्ति ततो

म्भुवे ते देवाः षट् सुतान् सरस्वतीं
ासुरीं योनिमगमन् हिरण्यकशिपोः
८।। सा देवकी इमे ते इति तर्जन्या
भावः ।।४९।। शापात् पिता पुत्रान्

ते देवाः सुतां यभितुं मैथुनीकर्तुमुद्यतं
योनिमगमन् । ते योगमायया नीताः

गूढार्थदीपिनी

ताः देवक्या उदरे जाताः ते च कंसेन विहिंसिताः तान् आत्मजान् सा देवकी शोचति । इमे संमुखस्थाः ते अन्तिके अध्यासते ष्ठन्ति ।।४८-४९।। इतः स्थानात् । लोकं देवलोकम् । विज्वराः सन्तापरहिताः । ज्वर संतापे धातुः । शापात् उपहासलक्षणपापात् । 'शापः पापाक्रोशे' इति निरुक्तिः ।) ।।५०।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अक्षिसङ्कोचेन तदुक्तं सर्वमनुमोद्य आगमनप्रयोजनं कथयति-आसन्निति पञ्चभिः । प्रथमेऽन्तरे स्वायम्भुवमन्वन्तरे ऊर्णायां पत्न्यां षट् पुत्राः आसन् ते षट् देवाः सुतां सर्वनिर्गमनस्थानात् ब्रह्मशरीरान्निर्गतामित्यर्थः । यभितुं भोक्तुमुद्यतं कं ब्रह्माणं वीक्ष्य जहसुः उपहसितवन्तः ।।४७।। अधुना सद्य एव आसुरीं योनिमगमन् प्रापुः । तानाह-हिरण्यकशिपोर्जाताः ते योगमाययानीताः ।।४८।। देवक्या उदरे जाताः कंसेन विहिंसिताः सा देवकी तान् शोचति ते चेमे तवान्तिके अध्यासते ।।४९।। लोकं देवलोकम् ।।५०।।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

प्रथमवाक्ये अनङ्गीकारमिव ज्ञापयन् द्वितीयस्योत्तरं वक्तुं प्रसङ्गमाह-आसन् मरीचेः षट्पुत्रा इति । प्रथमकल्पे तीतब्रह्मकल्पे मरीचेरूर्णानामपत्नी अभूत् अथेदानीं कला तस्याः षडिन्द्रियदेवा इव पुत्रा जाताः प्रथमकल्पे यदन्तरं मन्वन्तरं वैत इति वक्तुं तेषामपराधमाह-देवाः कं जहसुर्वीक्ष्येति । वाचं दुहितरं तन्वीमिति यन्निरूपितं तेन प्रकारेण सुतां यभितुं भोक्तुमुद्यतं कं ब्रह्माणं जहसुः कामो भगवान् तेन प्रेरितः तत्सेवार्थं वा प्रवृत्तो निष्कपटः शुद्ध एव परं ये तत्सिद्धान्तानभिज्ञाः तत्रोपहासं कुर्वन्तः भक्तोपहासका इवासुरीं योनिं प्राप्नुवन्ति । तेनेमामासुरीं योनिं प्राप्ताः तावतापि भगवदपराधो न शान्त अधुना आसुरयोनौ उपहासफलत्वेन प्राप्तायामवद्यं कर्म कृतवन्तः तेनावद्यकर्मणा हिरण्यकशिपोर्भगवद्विमुखात् चिज्जातः ।।४७-४८।। ततस्ते योगमायया देवक्या उदरे विद्यमानमरिषड्वर्गं दूरीकर्तुं दोषेणैव दोषो हन्तव्य इति योगमायया देवक्या उदरं नीताः राजन्निति राजसत्वात्तवाज्ञानं न दोषाय ततः कंसेन विहिंसिताः विशेषेण मारिताः एवं तेषां वारत्रयं दण्डो ततः त्रिसत्यो भगवानिति इदानीं मन्माता तान् च दोषहारकारकान् अत एव स्वान् आत्मजानिति पुत्रा एते ममेति तान् शोचति ते पुनरत्रैव हिरण्यकशिपुवंशत्वात् ते अन्तिके आसते ।।४९।। एषां तेषां वृत्तान्तमुक्त्वा तत्र कर्तव्यमाह-इत एतान् प्रणेष्याम इति । प्रयोजनं मातृशोकापनुत्तिः प्रसङ्गात्तेऽप्युद्धर्तव्या इत्याह-ततः शापविनिर्मुक्ता इति । अस्मन्मातुः शोकापहरणात् तेषां शापापनोदः ततो विज्वरास्सन्तः ऋषिलोकं यास्यन्ति ।।५०।।

श्रीसुबोधिनीसारः

कृष्णोक्तिः । प्रथमेऽन्तरे स्वायम्भुवमन्वन्तरे मरीचेरूर्णायां भार्यायां षट् पुत्रा आसन् । ते देवाः सुतां पुत्रीं रोहिणीं यभितुं तुमुद्यतं कं ब्रह्माणं वीक्ष्य दृष्ट्वा जहसुः ।।४७।। तेनावद्येन कर्मणा पापेनासुरीं योनिम् अधुना अगन् अगुः । आर्षो लोपः । हिरण्यकशिपोर्जातास्ते योगमायया देवक्या उदरे जाताः कंसेन हताः । हे राजन् ! सा देवकी स्वान् पुत्रान् तान् शोचति । तेऽन्तिके समीपे इमे वर्तन्ते ।।४८-४९।। इतः स्थानात् एतान् प्रणेष्यामः मातुः शोकनिरासार्थं ततः शापाद्विमुक्ता विज्वरा सुखिनो लोकं स्वर्गं गमिष्यन्ति ।।५०।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सम्प्रार्थितो भगवान् तत्प्रार्थनां कटाक्षेणैवाभिनन्द्यागमनप्रयोजनमाह-आसन्नित्यादिना । प्रथमेऽन्तरे स्वायम्भुवे मन्वन्तरे प्रजापतेः ऊर्णायां 'मरीचये कलां प्रादात्' इत्युक्तत्वात्तस्या एवोर्णेति नामान्तरम्, तस्यां भार्यायां षट्पुत्रा देवा आसन् । ते सुतां सरस्वतीं यभितुं मैथुनेन रमितुम् उद्यतं ब्रह्माणं वीक्ष्य जहसुः ।।४७।। ते च तेन परिहासात्मकेन दुष्टेन कर्मणा अधुना

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्क्षणम् आसुरीं योनिमगन् प्रापु: । अत एव हिरण्यकश्यपो: सकाशाज्जाता: । यद्यपि प्रह्लादादयस्तत्पुत्रा उक्तास्तथाप्यनयैवोक्त्या एतेऽपि ततो जाता इति ज्ञेयम् । ते च योगमायया ततो नीता: सन्त: ॥४८॥ देवक्या उदरे जातां हे राजन् ! कंसेन विहिंसिता: । सा च देवकी तान् स्वान् स्वकीयानात्मजान् मत्वा शोचती, ते चेमेऽधुना तवान्तिकेऽध्यासते ॥४९॥ मातु: शोकस्यापनुत्तये निरासार्थम् इत: स्थानादेतान् प्रणेष्याम: । तत: शोकापनोदनानन्तरं शापात् प्रजापत्युपहासनिमित्तात्तत्कृतादासुरभावाद्विनिर्मुक्ता अत एव विज्वरा निर्दु:खा: सन्तो देवलोकं यास्यन्ति ॥५०॥

अन्वितार्थप्रकाशिका

आसन्निति । प्रथमेऽन्तरे स्वायम्भुवे मन्वन्तरे मरीचे: प्रजापते: ऊर्णायां मरीचये कलां प्रादादित्युक्तत्वात्तस्या एवोर्णेति नामान्तरं तस्यां भार्यायां षट्पुत्रा देवा आसन् । ते च सुतां सरस्वतीं यभितुं मैथुनेन रन्तुम् । इडाऽऽर्ष: । उद्यतं कं ब्रह्माणं वीक्ष्य जहसु: ॥४७॥ तेनेति युग्मम् । ते च तेन परिहासात्मकेन दुष्टेन कर्मणा अधुना तत्क्षणम् आसुरीं योनिमगन् अगमन् । मतो आर्ष: । अत एव हिरण्यकश्यपो: सकाशाज्जाता: । यद्यपि प्रह्लादादयस्तत्पुत्रा उक्तास्तथाप्यनयैवोक्त्या एतेऽपि ततो जाता इति ज्ञेयम् । केचित् हिरण्यकशिपोर्वीर्यात् कालनेमिक्षेत्रे जाता इत्याहु: । ते च योगमायया ततो नीता: सन्त: देवक्या उदरे जातां हे राजन् बले ! ते च कंसेन विहिंसिता: सा च देवकी तान् स्वान् स्वकीयानात्मजान् मत्वा शोचति । ते चेमेऽधुना तवान्तिकेऽध्यासते इमे । इति तत्रैवोपविष्टान् बलिना शापमोचकभगवद्दर्शनार्थं तत्रानीतानङ्गुल्या निर्दिशति ॥४८-४९॥ तत इति । मातु: शोकस्यापनुत्तये निरासार्थम् इत: स्थानादेतान् प्रणेष्याम: । तत: शोकापनोदनानन्तरं शापात् प्रजापत्युपहासनिमित्तात्तत्कृतादासुरभावाद्विनिर्मुक्ता अत एव विज्वरा निर्दु:खा: सन्तो लोकं प्रथमं कर्मशेषात् देवलोकं यास्यन्ति ॥५०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सद्गतिं मोक्षम् ॥४७॥ मातु: मात्रे अयच्छतां ददतु: ॥४८-४९॥ सतुस्पर्शेन परिप्लुता पूर्णमनोरथा । परिप्लुतमिति पाठे तु पय:पूर्णं स्तनम् ॥५०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रकृतागमनप्रयोजनबुभुत्सया स्वविषयकं शासनं प्रार्थयते ॥ शाधीति ॥ ईशितव्या नियाम्यास्तेषामीशस्तत्सम्बुद्धि: अस्मान् शाधि । कैङ्कर्याज्ञापनेन शिक्षयेत्यर्थ: । हे प्रभो ! नोऽस्मान् निष्पापान् कुरु । यत्तव अनुशासनं श्रद्धया आतिष्ठन् त्वच्छासनं श्रद्धया समाश्रयन् इत्यर्थ: । पुमान् वेदनाया: कर्मबन्धात् विमुच्यते । चोदनाया इति पाठे काम्यकर्मप्रवृत्तेरित्यर्थ: । केचित् विधिनिषेधलक्षणायाश्चोदनाया इत्याहुस्तन्न युक्तम्, यतो मुक्तानामपि लोकसङ्ग्रहार्थं यावज्जीवं विधिनिषेधाचरणविधानस्मरणाद्दर्शनाच्च 'मयोदितेष्ववहित: स्वधर्मेषु मदाश्रय: । वर्णाश्रमकुलाचारमकामात्मा समाचरेत्' इति भगवदुक्ते: ॥४७॥ इत्थं बलिना सम्प्रार्थितो भगवानाह ॥ आसन्निति ॥ प्रथमेऽन्तरे स्वायम्भुवमन्वन्तरे मरीचे: प्रजापते: ऊर्णायां भार्यायां षट् पुत्रा: सुता: आसन् । देवा: ते सुतां सरस्वतीं यभितुं मैथुनं कर्तुम् उद्यतमुद्युक्तं कं ब्रह्माणं वीक्ष्य जहसुर्हसितवन्त: ॥४८॥ तेनेति ॥ देवक्या इति च ॥ तेन परिहासात्मकेन अवद्यकर्मणा दुष्टेन कर्मणा ते आसुरीं योनिम् अगन् । ते अधुना तत्क्षणमेवेत्यर्थ: । हिरण्यकशिपो: सकाशाज्जाता: तत: ते योगमायया योगात्मकभगवच्छक्त्या नीता: सन्त: देवक्या उदरे जाता: । हे राजन् बले ! ते च कंसविहिंसिता: सा देवकी तान् स्वान् आत्मजान् मत्वा शोचति । ते च इमे अन्तिके तव अध्यासते । अन्तिकमिति पाठे 'अधिशीङ्स्थासाम्' इत्याधारस्य कर्मत्वम् ॥४९-५०॥

कृष्णप्रिया

भगवान् ने कहा राजन् बलि ! यह कल्प से पूर्व ब्रह्म कल्प था, तब मारिचि नाम ऋषि के उर्णा नाम पत्नी थी, उसे छे पुत्र हुवे थे, एकबार ब्रह्माजी स्व स्वरूप भूलकर अपनी पुत्री के साथ रमह हेतु सोचने लगे

वह छे पुत्रोने ब्रह्माजी व
हुआ, जिससे उसकी अ
योगमाया ले गइ और दे
मार डाला, यह सब पुत्र
परिष्वंग, पत्तंग, क्षुद्रभृत अ

स्मरोद्गीथ: परिष्व
इत्युक्त्वा तान् स
तान् दृष्ट्वा बालका
अपाययत् स्तनं प्री

स्मर:, **उद्गीथ:**, परिष्वङ्ग
इन्द्रसेनेन, **पूजितौ**, तान्, समादा
बालकान्, **दृष्ट्वा**, परिष्वज्य, अङ्कम
मोहिता, **सुतस्पर्शपरिप्लुता**, प्रीता,

स्मरोद्गीथ: स्मरसहित उद्गीथ
।अर्पयामास" इत्युक्तम् ॥५१॥ अ

अभिज्ञानार्थं तन्नामानि नि
मायया ॥५४॥

निश्चयार्थं तानेव नाम्ना नि
गतिं ममाप्रकटलीलास्पदम् ॥५१॥
सन्तौ मातु: मात्रे ॥५२॥ बालकानिति
॥५३॥ सुतानां श्रीकृष्णादीनां स्पर्श
मायया स्वलीलाहेतुना योगमायाख्य
सिद्धार्थद्वारा झटिति साधारणलोकबो

श्र

सम्यक् सपरिच्छदत्वादिना करग्र
सन्तोषार्थं श्रीभगवदिच्छया पूर्ववद्बालक

परिप्लुता-श्रीधर. वंशी. ; परिस्नुतं-विज. ।

ा उक्तास्तथाप्यनयैवोक्त्या
! कंसेन विहिंसिताः । सा
शोकस्यापनुत्तये निरासार्थम्
रभावाद्विनिर्मुक्ता अत एव

ादित्युक्तत्वात्तस्या एवोर्णेति
ः । उद्यतं कं ब्रह्माणं वीक्ष्य
योनिमगन् अगमन् । मलोप
क्त्या एतेऽपि ततो जाता इति
सन्तः देवक्या उदरे जातां है
वेमेऽधुना तवान्तिकेऽध्यासते
८-४९॥ तत इति । मातुः
पात् प्रजापत्युपहासनिमि-
ोकं यास्यन्ति ॥५०॥

र्मनोरथा । परिप्लुतमिति पाठे

याम्यास्तेषामीशस्तत्सम्बुद्धिः ।
सनं श्रद्धया आतिष्ठन् त्वच्छसनं
ाम्यकर्मप्रवृत्तेरित्यर्थः । केचित्तु
ोकसङ्ग्रहार्थं यावज्जीवं
लाचारमकामात्मा समाचरेत् ॥'
यम्भुवमन्वन्तरे मरीचेः प्रजापतेः
कं ब्रह्माणं वीक्ष्य जहसुर्हसितवन्तः
ासुरीं योनिम् अगन् । ते अधुना
त्या नीताः सन्तः देवक्याः उदरे
त । ते च इमे अन्तिके तव समीपे

चि नाम ऋषि के उर्णा नामक
साथ रमह हेतु सोचने लगे, तब

कृष्णप्रिया

ह छे पुत्रोने ब्रह्माजी को उद्देश कर हास्य किया ॥४७॥ मारिचिमुनि के पुत्रोंसे ब्रह्माजीका उपहाररूप अपराध आ, जिससे उसकी असुर योनिमें उत्पत्ति हुई और वह हिरण्यकशिपु के यहां जन्मधारण किया और उसको गमाया ले गइ और देवकीजी के गर्भमें उसका स्थापन किया, देवकी में से उसका जन्म हुआ और कंसने उसे र डाला, यह सब पुत्र आपके यहां है यह पुत्रों का माता देवकी शोक करती है ॥४८-४९॥ स्मर, उद्‌गीथ, रिष्वंग, पत्तंग, क्षद्रभृत और धृणि यह छे पुत्र मेरी कृपा से फिर सद्‌गति प्राप्त करेंगे ॥५०॥

स्मरोद्गीथः परिष्वंगः पतंगः क्षुद्रभृद्घृणी । षडिमे मत्प्रसादेन पुनर्यास्यन्ति सद्गतिम् ॥५१॥
इत्युक्त्वा तान् समादाय इन्द्रसेनेन पूजितौ । पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छताम् ॥५२॥
तान् दृष्ट्वा बालकान् देवी पुत्रस्नेहस्नुतस्तनी । परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ॥५३॥
अपाययत् स्तनं प्रीता सुतस्पर्शपरिस्नुतम्[1] । मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्तते ॥५४॥

कर्दमक्षमा

स्मरः, उद्गीथः, परिष्वङ्गः, पतङ्गः, क्षुद्रभृत्, घृणी, इमे, षट्, पुनः, मत्प्रसादेन, सद्गतिम्, यास्यन्ति ॥५१॥ इति, उक्त्वा, सेनेन, पूजितौ, तान्, समादाय, पुनः, द्वारवतीम्, एत्य, मातुः, पुत्रान्, अयच्छताम् ॥५२॥ पुत्रस्नेहस्नुतस्तनी, देवी, तान्, कान्, दृष्ट्वा, परिष्वज्य, अङ्कम्, आरोप्य, अभीक्ष्णशः, मूर्ध्नि, अजिघ्रत् ॥५३॥ यया, सृष्टिः, प्रवर्तते(तया), विष्णोः, मायया, ता, सुतस्पर्शपरिप्लुता, प्रीता, स्तनम्, अपाययत् ॥५४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्मरोद्गीथः स्मरसहित उद्गीथः सद्गतिं मोक्षम् स्मरस्यैव पूर्वं कीर्तिमानिति नाम अतः "कीर्तिमन्तं प्रथमजं कंसायानकदुन्दुभिः र्पयामास" इत्युक्तम् ॥५१॥ अयच्छातामर्पयामासतुः ॥५२-५४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अभिज्ञानार्थं तन्नामानि निर्दिशति-स्मर इत्यादि । अतस्तन्नामत्वात् ॥५१॥ तान् स्मरादीन् । मातुर्मात्रे ॥५२-५३॥ यया ॥५४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निश्चयार्थं तानेव नाम्ना निर्दिशन् भोगान्ते नित्यमद्धामापि प्राप्स्यन्तीत्याह-स्मरेति । पुनः पश्चात् सतां यादवानां ममाप्रकटलीलास्पदम् ॥५१॥ सम्यक् सपरिच्छदत्वादिना करग्रहणादिना चादाय पूजितौ तदर्पणादिना सम्मानितौ मातुः मात्रे ॥५२॥ बालकानिति मातृसन्तोषार्थं श्रीकृष्णेच्छया बालकरूपेणैवाविर्भूतान् कीर्तिमदादीन् श्रीकृष्णरामौ ॥५३॥ सुतानां श्रीकृष्णादीनां स्पर्शेनैव परितः स्नुतं प्रस्नुतक्षीरमित्यर्थः । परिप्लुतेति पाठे सुतस्नेहेन व्याप्ता सती तत्र हेतुः स्वलीलाहेतुना योगमायाख्यशक्त्या मोहिता सृष्टिर्लीलानिर्माणं प्रस्तुतत्वात् तथापि साधारणतत्तच्छब्देनोक्तिः र्थद्वारा झटिति साधारणलोकबोधनाय ॥५४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

सम्यक् सपरिच्छदत्वादिना करग्रहणादिना चादाय पूजितौ तदर्पणादिना सम्मानितौ सन्तौ मातुर्मात्रे ॥५२॥ बालकानिति । र्थं श्रीभगवदिच्छया पूर्ववद्बालकरूपप्राप्तेः किंवा तस्याः स्नेहभरेण बालकतयैव परिस्फूर्तेः देवी ईश्वरी श्रीभगवन्मातृतया

---

[1] -श्रीधर. वंशी. ; परिस्नुतं-विज. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गौरवात् परिष्वज्येति क्रमशः स्नेहाकुलतयातिशैघ्र्येण युगपदिव वा । एवमग्रेऽपि ॥५३॥ सुतानां सुतस्य वा कृष्णस्य स्पर्शेन परितः प्लुतं प्रस्नुतक्षीरमित्यर्थः । स्नुतमिति पाठेऽपि स एवार्थः । तत्र हेतुः–मायया पुत्रस्नेहलक्षणया मोहिता आकृष्टचित्तेत्यर्थः । न च सा माया तयाऽपि हर्तुं शक्यत इत्याशयेनाह–विष्णोर्विश्वव्यापकस्य भगवतः । ननु श्रीभगवता स्वमातरि सा किं विस्तार्यते ? तत्राह–ययेति । यया मायया तत्स्वीकारेण विना तस्याः सङ्कोचेन विश्वसृष्ट्यप्रवृत्तेरित्यर्थः । यद्वा, मायया कृपया सृष्टिः प्रवर्तते तस्यास्तन्मातृतया पुनः पुनर्जन्म स्यादित्यर्थः ॥५४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४९-५६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स्मरोद्गीथ इति सन्धिरार्षः । स्मरसहितोद्गीथ इति मध्यमपदलोपिसमासो वा ॥५१॥ इतीति । अयच्छतामर्पयामासतुः ॥५२॥ तानिति । पुत्रस्नेहेन स्नुतौ स्नवन्तौ स्तनौ यस्याः साऽभीक्ष्णशः पुनः पुनः मूर्ध्नि अजिघ्रत् ॥५३॥ सुतानां संस्पर्शेन स्नुतं क्षरत् स्तनमपाययत् । तत्र हेतुः विष्णोर्मायया मोहिता । मायां विशिनष्टि–यया सृष्टिः प्रवर्तते । सृष्टिरित्यस्य विश्वेत्यादिः ॥५४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४६-५३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्मरसहित उद्गीथ इत्यादीनि नामानि मरीचिपुत्रत्वदशायाम् ॥५१-५३॥ मायया योगमायया यया विष्णोः सृष्टिप्राकृती तल्लीलापरिकरप्रादुर्भावमयी प्रवर्तते न तु ब्रह्मणः सृष्टिः प्राकृतीत्यर्थः ॥५४॥

गूढार्थदीपिनी

स्मरेण सहितः उद्गीथः इति मध्यमपदलोपी समासः । स्मरस्यैव पूर्वं कीर्तिमानिति नाम ॥५१॥ इन्दुसेनेन बलिना मातुः मात्रे । अयच्छतां ददतुः ॥५२॥ पुत्रस्नेहेन स्नुतौ प्रस्नवन्तौ स्तनौ यस्याः सा । देवी देवकी अभीक्ष्णशः मुहुर्मुहुः ॥५३॥ परिप्लुता जाताह्लादा ॥५४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

स्मरोद्गीथः स्मरसहितोद्गीथ इति मध्यमपदलोपिसमासः । ततो मत्प्रसादेन सद्गतिं मुक्तिं यास्यन्ति ॥५१॥ अयच्छतार्पयामासतुः ॥५२-५३॥ मायया वयुनात्मिकया सङ्कल्पेनेत्यर्थः ॥५४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तेषां नामान्याह–स्मरश्च उद्गीथश्चेति एकभावापन्नौ द्वौ स्मरो मानसः उद्गीथो घ्राणः परिष्वङ्गः श्रोत्रं पतङ्गो नेत्रं क्षुद्र जिह्वा घृणिः स्पर्शः ततो घृणा संजायत इति चक्षुषा वा व्यत्यासः । षडिमे स्वकर्मणा नष्टा अपि मत्प्रसादेन पुनर्यास्यन्ति सद्गतिं ॥५१॥ अत एतान् देहीत्यनुक्त्वैव सेवकत्वं तस्य स्थिरीकृत्य तान् गृहीत्वा स्वयमेव निर्गत इत्याह–इत्युक्त्वेति । इन्द्रसेनत्वात् पूजां कृतवान् येन मार्गेण गतौ तेनैव द्वारवतीमेत्य मातुः पुत्रान् तान् मात्रे अयच्छतां ते च गुरुपुत्रन्यायेन पूर्वावस्थां प्रापयित्वा समर्पितं इति तान् बालकान् दृष्ट्वा मातुः स्नेहेन स्तुनस्तनी जाता । ततः परिष्वज्याङ्कमारोप्य मूर्ध्न्यजिघ्रत् । अत्यन्तं स्नेहोऽभिव्यक्तः अभीक्ष्णश इति स्नेहविह्वलितत्वं सूचितं ततस्तनमपाययत् बालभावं दृढं कुर्वती प्रीता गतदुःखा न केवलं दुःखनिवृत्तिरेव कि

सुखमपि जातमिति ज्ञापय
स्नेहः तत्राह–मोहिता माय
स्नेहाधिक्यम् ॥५२-५४॥

तेषां नामानि स्मरो
पूजितौ रामकृष्णौ तान् समा
स्नुतौ स्तनौ यस्या सा देवी
परिप्लुता हर्षव्याप्ता प्रीता वि

मरीचिपुत्रत्वसमयभ
समासः । इमे स्मरादयः षट् म
बलिना पूजितौ रामकृष्णौ पु
स्तनौ यस्याः सा देवकी तान्
सुतानां स्पर्शेन परिप्लुतं क्षरदु
विना विषयासक्त्यभावेन सृष्टि

स्मर इति । स्वर्गभोगा
गतिं प्राप्य मम लोकं यास्यन्ति ।
इत्युक्त्वा तान् पुत्रान् समादाय
॥५२॥ तानिति । बालकान् मा
प्रस्नवन्तौ स्तनौ यस्याः सा देवकी
प्रवर्तते तया विष्णोर्मायया मोहित

गदाभृतः पीतशेषम् अ
स्वज्ञानं यैस्ते ॥५१॥ धाम स्वग
मायां योगकलां मेने ॥५३-५४॥

गदाभृतः पीतशेषम् अ
इति स्वज्ञानं यैस्ते ॥५१॥ धाम
र्पितां मायां योगकलां मेने ॥५

इस प्रकार निवेदन करके

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

पि जातमिति ज्ञापयति सुतस्पर्शपरिसृतमिति सुतानां स्पर्शेन परितः सर्वाङ्गेभ्यः सृतं ननु भगवत्पुत्रायाः कथमेवमन्यत्र तत्राह-मोहिता मायया विष्णोरिति। कथमन्यथा सृष्टिः प्रवर्तते केचिदियमेव पूर्वपूर्णेत्याहुः-ततः पूर्ववासनया तेषु वक्यम् ॥५२-५४॥

श्रीसुबोधिनीसारः

तेषां नामानि स्मरोद्गीथ इति स्पष्टसन्धिरार्षः। इमे षट् मत्कृपया पुनः सद्गतिं मोक्षं यास्यन्ति ॥५१॥ एवमुक्त्वा इन्द्रसेनेन रामकृष्णौ तान् समादाय गृहीत्वा पुनर्द्वारकामागत्य मातुः मात्रे पुत्रान् अदत्ताम् ॥५२॥ तान् बालकान् दृष्ट्वा पुत्राणां स्नेहेन स्तनौ यस्या सा देवी परिष्वज्य मिलित्वाङ्कमारोप्याभीक्ष्णशः पुनः पुनर्मूर्ध्नि अजिघ्रत् आघ्रातवती ॥५३॥ सुतानां स्पर्शेन स्नुता हर्षव्याप्ता प्रीता विष्णोर्मायया मोहिता स्तनमपाययत्। नेदमाश्चर्यमित्याह। यया मायया सृष्टिः प्रवर्तते ॥५४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मरीचिपुत्रत्वसमयभवानि नामानि वदन् देवलोकगमने स्वप्रसादं हेतुमाह-इति। स्मरसहित उद्गीथ इति मध्यमपदलोपी समासः। इमे स्मरादयः षट् मत्प्रसादेन पुनः सतां गतिं प्राप्य देवलोकं यास्यन्ति ॥५१॥ इत्युक्त्वा तान् पुत्रान् समादाय इन्द्रसेनेन पूजितौ रामकृष्णौ पुनर्द्वारकामागत्य मातुः पुत्रान् अयच्छताम् अर्पयामासतुः ॥५२॥ तान् दृष्ट्वा तेषां पुत्राणां स्नेहेन स्नुतौ यस्याः सा देवकी तान् परिष्वज्याङ्कमारोप्य अभीक्ष्णशो मूर्ध्नि अजिघ्रत् ॥५३॥ ततश्च विष्णोर्मायया मोहिता, अत एव प्रीता स्पर्शेन परिप्लुतं क्षरद्दुग्धं स्तनम् अपाययत्। भगवतो मायया मोहनप्रयोजनमाह-यया मायया सृष्टिः प्रवर्तते इति। मोहं विषयासक्त्यभावेन सृष्टिरेव न स्यात्, स्नेहाभावे पालनं च न स्यादित्याशयः ॥५४॥

अन्वितार्थप्रकाशिका

स्मर इति। स्वर्गभोगानन्तरं च स्मरसहित उद्गीथ इति मध्यमपदलोपी समासः। इमे स्मरादयः षट् मत्प्रसादेन पुनः सतां प्राप्य मम लोकं यास्यन्ति। स्मरस्यैव पूर्वं कीर्तिमदिति नाम वस्तुतः स्मरादीनि मरीचिपुत्रत्वदशायां नामानि ॥५१॥ इतीति। तान् पुत्रान् समादाय इन्द्रसेनेन बलिनां पूजितौ रामकृष्णौ पुनर्द्वारकामागत्य मात्रे पुत्रान् अयच्छताम् अर्पयामासतुः तानिति। बालकान् मातृतोषार्थं कृष्णेच्छया बालरूपेणाविर्भूतान् तान् कीर्तिमदादीन् दृष्ट्वा तेषां पुत्राणां स्नेहेन स्नुतौ स्तनौ यस्याः सा देवकी तान् परिष्वज्याङ्कमारोप्य अभीक्ष्णशो मूर्ध्नि अजिघ्रत् ॥५३॥ अपाययदिति। यया मायया सृष्टिः तया विष्णोर्मायया मोहिता अत एव प्रीता सुतानां स्पर्शेन परिप्लुतं क्षरद्दुग्धं स्तनम् अपाययत् ॥५४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गदाभृतः पीतशेषम् अत एवामृतं पयः नारायणस्य श्रीकृष्णस्याङ्गसंस्पर्शेन प्रतिलब्धम् आत्मदर्शनं मया इति यैस्ते ॥५१॥ धाम स्वर्गम् ॥५२॥ मृतानामागमनं ततो निर्गमं च। अत्र द्वन्द्वैक्यं कृष्णस्य। श्रीकृष्णेन रचितां योगकलां मेने ॥५३-५४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

गदाभृतः पीतशेषम् अत एवामृतं पयः नारायणस्य श्रीकृष्णस्याङ्गसंस्पर्शेन प्रतिलब्धम् आत्मदर्शनं मया यैस्ते ॥५१॥ धाम स्वर्गम् ॥५२॥ मृतानामागमनं ततो निर्गमं च। अत्र द्वन्द्वैक्यं कृष्णस्य। श्रीकृष्णेन योगकलां मेने ॥५३-५४॥

कृष्णप्रिया

इस प्रकार निवेदन करके भगवानने छे पुत्रों को साथ में लिया, तब इन्द्रसेन राजा बलिने भगवान का

कृष्णप्रिया

और बलभद्रजी का अर्चन किया, दोनों ने अर्चन स्वीकार कर, द्वारिका पधारकर अपनी माता देवकीजी को छ पुत्र दीये ॥५१॥ पुत्र वत्सल माता देवकीजीने प्यारे पुत्र को देखकर स्व वक्षस्थलमें से दूधधारा बहने लगी, अपने लाडले लालको आलिंगन देकर गोदमें बिठाकर बारबार मस्तक सुंघने लगी ॥५३॥ श्रीगदाधर भगवानने माता देवकीजी का प्रसादस्वरूप शेष पयपपान छे पुत्रोनें किया तब, और भगवान नारायण के श्रीअंग स्पर्श से स्व स्वरूप का दर्शन हुआ, और उनको मिली असुर योनि का ज्ञान हुआ ॥५४॥

[1]पीत्वामृतमयं तस्याः पीतशेषं गदाभृतः । नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ॥५५॥
ते नमस्कृत्य गोविन्दं देवकीं पितरं बलम् । मिषतां सर्वभूतानां ययुर्धाम [2]विहायसा ॥५६॥
[3]तं दृष्ट्वा देवकी देवी मृतागमननिर्गमम् । मेने सुविस्मिता मायां [4]कृष्णस्य रचितां नृप ॥५७॥
एवंविधान्यद्भुतानि कृष्णस्य परमात्मनः । वीर्याण्यनन्तवीर्यस्य सन्त्यनन्तानि भारत ॥५८॥

कर्दमक्षमा

नारायणाङ्गसंस्पर्शप्रतिलब्धात्मदर्शनाः, गदाभृतः, पीतशेषम्, तस्याः, अमृतम्, पयः, पीत्वा, ते, गोविन्दम्, देवकीम्, पितरम्, बलम्, नमस्कृत्य, सर्वभूतानाम्, मिषताम्, दिवौकसाम्, धाम, ययुः ॥५५-५६॥ नृप, देवी, देवकी, मृतागमननिर्गमम्, तम्, दृष्ट्वा, सुविस्मिता, कृष्णस्य, रचिताम्, मायाम्, मेने ॥५७॥ भारत, अनन्तवीर्यस्य, परमात्मनः, श्रीकृष्णस्य, एवंविधानि, अद्भुतानि, अनन्तानि, वीर्याणि, सन्ति ॥५८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अमृतत्वे हेतुः गदाभृतः पीतशेषमिति नारायणाङ्गसंस्पर्शेन प्रतिलब्धं देवा वयमित्यात्मदर्शनं यैस्ते ॥५५॥ धाम देवलोकं ॥५६॥ मृतानामागमनं निर्गमनञ्च श्रीकृष्णस्य मायां मेने तनैवापत्यादिरूपेण रचिताम् ॥५७-५८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्या देवक्याः । 'अमृतपय' इति पाठे तु अमृतममृतत्वापादकं पयोऽमृतपयः । यद्वा-नन्दगेहगमनानन्तरं स्वाविर्भावसम एव जाताह्लादा देवकी तन्मुखे स्तनं ददौ । स्वयमेव मुखे स्तनं गृहीत्वा पुनर्वसुदेवाय मां नन्दगृहं नयेत्युक्तवानिति पूर्वजन्मापेक्षयैतज्जन्मनोऽन्यत्वादिति ॥५५॥ ते स्मरादयः ॥५६॥ तत्तदा ॥५७॥ कृष्णलीलानन्त्यमतिदिशति-एवमिति ॥५८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पीत्वेति युग्मकम् । स्वत एवामृतं परमानन्दात्मकं तत्रापि गदाभृतः पीतशेषं तत्र गदाभृत इती गदाभृत पातालगमनागमनादिकं बोधयति । पीतशेषमिति मातुः स्वस्य चेच्छया प्रथमं तेन पानात् नारायणः सर्वाश्रयः स्वयं भग तस्याङ्ग श्रीहस्तादि तस्य साक्षात् सम्यक् स्पर्शः तेन प्रतिपुनर्लब्धनिजदेवत्वदर्शनाः तद्वासनानुसारेण सम्प्रति तन्मात्र भगवतेष्टत्वात् अत एव मात्रादावपि स्नेहरहिता देवलोकमेव ययुः मिषतां पश्यतां सर्वभूतानामिति कौतकविशेषः विहायसेति पाठः स्वामिसम्मतः दिवौकसामिति पाठस्तु सर्वत्र ॥५५-५६॥ तदेवं स्वस्मिन्नेव श्रीभगवता तस्याः स्नेहे

---

[1] मृतं पयस्तस्या-श्रीधर. वंशी. वीर. विज. । [2] दिवौकसाम्-श्रीधर. वंशी. ; विहायसा-वीर. विज. । [3] तान्दृष्ट्वा-
[4] कृष्णसंसूचितां-विज. ।

इत्याह-तमिति ।
तेषां जन्मादिकमागमनादि
भावः । एवं प्राचीनदेहैरेव
प्रकरणादवगतम् ॥५७॥ अ
अनन्तानि प्रतिक्षणं युगपदे
तत्रैव हेतुः परमात्मनः सर्वम

गदाभृतो गदाधरस्य
निजानुजम् आ सम्यक् बिभ
पीतशेषमिति पूर्वजन्मसमये प्रा
तस्याङ्ग श्रीहस्तस्तस्य सम्यक्
मैस्तथाभूताः सन्तः ॥५५॥ गोवि
प्राग्देवकीं मातरं मिषतां पश्य
सास्त्वित्यर्थः । इति तत्रासम्भाव
र्शितां मायां स्वशक्तिविशेषं,
श्रीभगवतोऽनुग्रहविशेषो विचार्यत
किंवा, आश्चर्याण्यनन्तानि वीर्याणि
परमात्मनोऽन्तर्यामितया सर्वत्र
परमेश्वरत्वमुक्तमेव । ततश्च कृष्णस
प्रतीयन्त एवेति । तथा तान्यशेषतः

मायामाश्चर्यशक्तिम् ॥५७

पीत्वेत्यादि । तस्या दे
नारायणस्य श्रीकृष्णस्य अङ्गसंस्पर्
सर्वभूतानां पश्यतां सतां विहायस
विस्मिता सती कृष्णस्य माय
अनन्तवीर्यस्य अनन्तकल्याणवीर्य
साकल्येन वक्तुं श्रोतुं वा शक्यान

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्याह-तमिति। आगमनपूर्वकं निर्गमं यद्वा द्वन्द्वैक्येऽपि पुंस्त्वमज्झस्वदीर्घप्लुत इतिवत् कृष्णस्य रचितां मायां जन्मादिकमागमनादिकं च श्रीकृष्णेनैव कंसवञ्चनादिकार्याय मायया रचितमिति मेन इत्यर्थः। स्नेहाद्यदर्शनादिति ः। एवं प्राचीनदेहैरेव भ्रूणतया देवक्यां प्रवेशो न तु ततो देहोत्पत्तिस्तेषां मारणानन्तरं च पुनस्तेनैव देहेन गतिरिति णादवगतम् ॥५७॥ अथ राज्ञो मुक्तिकालासत्तिमाशंक्य ग्रन्थमाशु समापयितुं श्रीकृष्णकथामुपसंहरन्नाह-एवमिति। न्तानि प्रतिक्षणं युगपदेवापरिमितलीलाविष्कारात् श्रीनारदेन तथा दर्शनात् तत्र हेतुः अनन्तं वीर्यं शक्तिर्यस्य तस्येति हेतुः परमात्मनः सर्वमूलस्वरूपस्येति ॥५८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

गदाभृतो गदाधरस्य गदामादाय तत्रागमनात् किंवा, साक्षात् श्रीनारायणस्येत्यर्थः-जन्मसमयदृष्टरूपदर्शनात्। यद्वा, गदं नुजम् आ सम्यक् बिभर्ति पालयतीति तथा तस्य निजाशेषैश्वर्यप्रकटनार्थं श्रीवसुदेवपुत्रतयाऽवतीर्णस्य भगवत इत्यर्थः। मिति पूर्वजन्मसमये प्राकृतरूपदर्शनेन स्नेहभरोदयेन तदानीं प्रस्नुतस्तनपानादिति ज्ञेयम्। नारायणः साक्षाद्भगवान् स एव श्रीहस्तस्तस्य सम्यक् स्पर्शः समादानं तेन प्रत्ययतो लब्धमात्मनो दर्शनं स्वरूपज्ञानं, किंवा श्रीभगवतो माहात्म्यज्ञानं भूताः सन्तः ॥५५॥ गोविन्दमशेषैश्वर्यप्रकटनार्थं पृथ्व्यामवतीर्णं साक्षाद्भगवन्तमित्यर्थः। ततश्च स्नेहाधिक्येनात्मकृतार्थतापादनेन देवकीं मातरं मिषतां पश्यतां सर्वभूतानामिति श्रीभगवद्भगवदीयापेक्षयान्येष्वनादरात्। यद्वा, आश्चर्येण सर्वभूतेषु पश्यत्सु त्यर्थः। इति तत्रासम्भावनादिकं निरस्तम्। धाम श्रीवैकुण्ठलोकं विहायसा आकाशमार्गेण ॥५६॥ रचितां श्रीकृष्णेनैव मायां स्वशक्तिविशेषं, किंवा तेनैव कृतां कृपां मेने। हे नृपेति। एवं मातरि भ्रातृषु च तत्सम्बन्धेन श्रीबलौ च वतोऽनुग्रहविशेषो विचार्यतयावगम्यतामिति भावः ॥५७॥ एवंविधानीदृशानि अद्भुतानि साक्षादैश्वर्यविशेषप्रकटनेन लोकातीतानि आश्चर्याण्यनन्तानि वीर्याणि मङ्गलचरितानि प्रभावा वा सन्ति। तत्र हेतुः-अनन्तं वीर्यं शक्तिर्यस्य तस्येति। तत्रैव हेतुः त्मनोऽन्तर्यामितया सर्वत्र सर्वथा सर्वप्रवर्तकस्येति। तत्रापि हेतुः-कृष्णस्य साक्षात्परमेश्वरस्येति। अनन्तवीर्यत्वेन त्वमुक्तमेव। ततश्च कृष्णस्येति तत्राप्यशेषैश्वर्यप्रकटनार्थमवतीर्णस्य भगवत इत्यर्थः। हे भारतेति। महावंशजेन त्वया तानि न्त एवेति। तथा तान्यशेषतः केनापि वर्णयितुं न शक्यन्त इति त्वया बुद्ध्यत एवेति भावः ॥५८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मायामाश्चर्यशक्तिम् ॥५७॥ वीर्याणि पुत्रदानादीनि ॥५८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

पीत्वेत्यादि। तस्या देवक्याः अमृततुल्यं पयः स्तन्यं तत्र हेतुः-गदाभृतः श्रीकृष्णस्य पीतशेषम्। पीत्वा श्रीकृष्णस्य अङ्गसंस्पर्शात् प्रतिलब्धमात्मदर्शनं स्वात्मपरमात्मयाथात्म्यज्ञानं यैस्ते बलं बलभद्रं च नमस्कृत्य नां पश्यतां सतां विहायसा धाम देवलोकं ययुः ॥५५-५६॥ तमिति। तं मृतानामागमनपूर्वकं निर्गममवलोक्य विस्मिता सती कृष्णस्य मायां मेने। सर्वं तन्मायया कृतममन्यत। माया आश्चर्यशक्तिः ॥५७॥ एवमिति। हे भारत! वीर्यस्य अनन्तकल्याणवीर्यसूचकगुणाकरस्य भगवतः इत्थम्भूतानि वीर्याणि प्रभावसूचकचेष्टितान्यनन्तानि सन्ति त्वेन वक्तुं श्रोतुं वा शक्यानीति भावः ॥५८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

मायया लीलाहेतुना योगमायया मोहिता सृष्टिलीलानिर्माणं प्रस्तुतत्वात् प्रतिलब्धात्मदर्शनाः पुनर्लब्धा निजदेवत्वानुभवाः । तेषां भोगवासनावशेषाद्भगवतस्तदानीं तावन्मात्रदानस्येष्टत्वात् ।।५४-५६।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ।।१-५९।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ।।१-५९।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गदाभृतः कृष्णस्य पीतशेषमिति 'पित्रोः सम्पश्यतोः सद्यो बभूव प्राकृतः शिशुः' इत्युक्तेर्देवक्यां प्रादुर्भूय नन्द गमनसमये यदा शिशुरभूत्तदा दूरगमननिबन्धनोऽस्य कण्ठशोषो माभूदिति स्नेहेन श्रीदेवकी तं स्तनं पाययामासैवं तत्रानुक्तमप्यत्रोक्तेरवगम्यते । नारायणस्य अङ्गसंस्पर्शेन प्रतिलब्धं देवा वयमित्यात्मदर्शनं यैस्ते धाम देवलोकम् ।।५५-५८।।

गूढार्थदीपिनी

अमृतं मोक्षत्वापादकम् । नारायणस्य अङ्गस्पर्शेन प्रतिलब्धं पुनः प्राप्तम् आत्मज्ञानं स्वदेवत्वलक्षणं यैस्ते ।।५५।। ते स्मरादयः पुत्राः मिषतां पश्यतां सताम् । धाम देवलोकम् ।।५६।। मृतानामागमनं निर्गमनं च । मायां लीलाम् ।।५७।। वीर्याणि चरित्राणि ।।५८।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

नारायणाङ्गसंस्पर्शेन प्रतिलब्धमात्मदर्शनं यैस्ते ।।५५-५६।। मृतानामागमनपूर्वकं निर्गमं मायां वयुनात्मकं सङ्कल्पम् ।।५७-५८।।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स्तनपानानन्तरं तेषां विवेकाद्युत्पत्त्या स्वलोकगतिमाह-पीत्वाऽमृतमयमिति द्वाभ्याम् । अमृतमयत्वं भगवदर्थं दे तत्रामृतं स्थापितमिति पीतशेषं गदाभृत इति पानं तु पूर्वं स्थापितं यदैव भगवन्तं स्मरति तदाऽमृतं भगवानेव पिबतीति एत वा यदा प्रथमं समागताः एतेषां स्वपदप्राप्तौ ज्ञानं हेतुः तस्य हेतुत्रयं भगवदुच्छिष्टपानम् अमृतपानं नारायणाङ्गसंस्पर्शश्च नारायणपदं धर्मावतारनारायणांशानिरुद्धचरित्रं ख्यापयति तेन प्रतिलब्धमात्मदर्शनं येषाम् ।।५५।। ततो ज्ञानशक्तिवत् क्रियाशक्ति तेषामाविर्भूतेत्याह-ते नमस्कृत्य गोविन्दमिति । आदौ स्वामिनं पश्चान्मातापितरौ तदनु बलभद्रं भगवत्साधनभूतम् चतुर्मूर्तिमिव भगवन्तं नमस्कृत्य सर्वसाक्षिकं विहायसा स्वधाम ययुः एवं स्वतो गमनं जातमित्यर्थः ।।५६।। देवकीकामनापूर्त्यर्थं भगवता ते समानीताः सा च कामना न क्षणमात्रेण पर्यवस्यति अत एवं शीघ्रं तेषां गमने को हेतु चेत्तत्राह-तं दृष्ट्वेति । तेषां पुत्राणां पूर्वं मृतानाम् आगमनं तदनन्तरमेव च निर्गमं दृष्ट्वा विस्मिता सती सर्वमेव कृष्णचरित्रं एतत् ज्ञानसिद्ध्यर्थमेव समानीताः । न तु पुत्रतया स्थापयितुम् अन्यथा कंसद्वारा भगवत्कृतवधो व्यर्थः स्यात् भगवच्चरित्रेण कामनापूर्तिमोहान्तरानुत्पत्त्यर्थं विशेषणं देवीति तत्रापि मायां मेने तेनासत्यतापि पदार्थानामभिज्ञता नृपेति सम्बोधनं मनोभिनिवेशार्थम् ।।५७।। एवं चरित्रद्वयमुक्त्वा ऐश्वर्ये एतदेव द्वयमिति कदाचिच्छङ्काभावात् तदर्थमन्यान्यपि सूचय एवंविधानीति । भगवच्चरित्रत्वे ज्ञापकम् अद्भुतानीति यान्येवाद्भुतानि भगवच्चरित्राणीति तानि भगवानपि किमर्थं करोतीत्याशंक्याह-कृष्णस्येति । अवतीर्णत्वात्करोतीत्यर्थः । प्रयोजनान्तरमप्याह-परमात्मन इति । सर्वेषामात्मनामात्मा

तत्सङ्ग्रहार्थं करोतीत्यर्थः ।
सर्वसङ्ग्रह इति चेत्तत्राह-स

गदाभृतः श्रीकृष्ण
लोकाचारतोऽवसेयः विवाहश्म
देवा वयमिति ज्ञानं यैस्ते ।।५५
मृतानामागमनं निर्गमनं च दृष्ट्वा
परमात्मनः कृष्णस्याद्भुतान्यनन

ते च अमृतमयं तस
गोविन्दादीन्नमस्कृत्य सर्वभूतानां
गदाभृतो भगवतः पीतशेषमिति
।।५५-५६।। ननु एवं तेषां झटिति
दृष्ट्वा सुविस्मिता सती हे नृप ! अ
सम्बोधयति-हे भारतेति । एवंविधा
हेतुमाह-अनन्तं वीर्यं प्रभावो यस्

पीत्वेति युग्मम् । गदाभृत
कण्ठशोषो मा भूदिति देवकी स्तन
श्रीकृष्णस्याङ्गसंस्पर्शात् प्रतिलब्धम्
धाम स्वर्गं ययुः ।।५५-५६।। तमि
अहंताममतात्मिकाम् अपत्यादिरूप
कृष्णस्य एवंविधान्यद्भुतानि अनन्ता

श्री

जगताम् अघभित् पापनिव
वर्णितम् अमृतं सुधा तद्वत् अनवधि
निश्चलीकृतं चित्तं येन एवम्भूतः सन्

इत इति ।। हे राजन् ! मातृश

नर्लब्धा निजदेवत्वानुभवाः

क्तेर्देवक्यां प्रादुर्भूय नन्दगृहे
तं स्तनं पाययामासैवेति
देवलोकम् ॥५५-५८॥

वदेवत्वलक्षणं यैस्ते ॥५५॥
च । मायां लीलाम् ॥५७॥

निर्गमं मायां वयुनात्मिकां

। अमृतमयत्वं भगवदर्थं देवैः
तं भगवानेव पिबतीति एत एव
पानं नारायणाङ्गसंस्पर्शश्च अत्र
तो ज्ञानशक्तिवत् क्रियाशक्तिरपि
लभद्रं भगवत्साधनभूतम् एवं
मनं जातमित्यर्थः ॥५६॥ ननु
शीघ्रं तेषां गमने को हेतुरिति
सती सर्वमेव कृष्णचरितं मेने
व्यर्थः स्यात् भगवच्चरित्रज्ञानेनैव
भिज्ञता नृपेति सम्बोधनमाश्चर्यं
वात् तदर्थमन्यान्यपि सूचयति-
त तानि भगवानपि किमर्थमेवं
इति । सर्वेषामात्मनामात्मेति

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ग्रहार्थं करोतीत्यर्थः । अत एव वीर्याण्यनन्तानि सन्ति तथा करणं सामर्थ्यमनन्तवीर्यस्येति ननु वीर्याणामनन्तत्वात् कथं सङ्ग्रह इति चेत्तत्राह–सन्तीति सदा सन्तीति नित्यानीत्यर्थः । भारतेति विश्वासार्थं सम्बोधनम् ॥५८॥

श्रीसुबोधिनीसारः

गदाभृतः श्रीकृष्णस्य पीतात् पानाच्छेषं श्रीकृष्णेन तत्पानं तु रुक्मिणीं हृत्वा पुरमानीय विधिवदुपयेमे इत्यत्र लोकाचारतोऽवसेयः विवाहश्मशानयोर्लोकवदिति सूत्रात् । अत एवामृतं पयः पीत्वा कृष्णाङ्गस्य संस्पर्शात् प्रतिलब्धं प्राप्तमात्मदर्शनं स्वयमिति ज्ञानं यैस्ते ॥५५॥ मातरं पितरं रामं कृष्णं नमस्कृत्य सर्वप्राणिनां मिषतां पश्यतां सतां देवानां स्वर्गं जग्मुः ॥५६॥ तत् पुत्राणामागमनं निर्गमनं च दृष्ट्वा देवी देवकी सुविस्मिता कृष्णेन रचितां मायां मेने विजज्ञे हे नृप ! ॥५७॥ एवंप्रकाराणि अनन्तवीर्यस्य परमात्मनः कृष्णस्याद्भुतान्यनन्तानि वीर्याणि सन्ति हे भारत ! ॥५८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ते च अमृतमयं तस्याः पयः पीत्वा नारायणस्य श्रीकृष्णस्याङ्गसंस्पर्शात् प्रतिलब्धम् आत्मदर्शनं स्वज्ञानं यैस्ते गोविन्दादीन्नमस्कृत्य सर्वभूतानां मिषतां पश्यतामेव सतां दिवौकसां धाम स्वर्गं ययुरिति द्वयोरन्वयः । पयसोऽमृतमयत्वे हेतुमाह–गदाभृतो भगवतः पीतशेषमिति । 'बभूव प्राकृतः शिशुः' इत्युक्तेस्तत्समये भगवता दुग्धं पीतमिति तत्रानुक्तमप्यनयैवोक्त्या ज्ञेयम् ॥५५-५६॥ ननु एवं तेषां झटिति गदनाद्देवक्याः कथं सन्तोषो जात इत्यत आह–तमिति । तं मृतानां पुत्राणामागमनपूर्वकं निर्गमं दृष्ट्वा सुविस्मिता सती हे नृप ! अहंताममतात्मिकां कृष्णस्य मायां मेने । एवं विवेके तस्या योग्यतामाह–देवीति ॥५७॥ विश्वासार्थं सम्बोधयति–हे भारतेति । एवंविधान्यद्भुतानि आश्चर्यजनकानि अनन्तानि कृष्णस्य वीर्याणि पराक्रमाः सन्तीत्यन्वयः । पराक्रमानन्तत्वे हेतुमाह–अनन्तं वीर्यं प्रभावो यस्य तस्येति । तत्र हेतुमाह–परमात्मन इति ॥५८॥

अन्वितार्थप्रकाशिका

पीत्वेति युग्मम् । गदाभृतो भगवतः पीतशेषमिति बभूव प्राकृतः शिशुरित्युक्तेः शिशुभवनसमये दूरगमनेन निबन्धनोऽस्य शोषो मा भूदिति देवकी स्तन्यं पाययामासेति । तत्रानुक्तमप्यनयैवोक्त्या ज्ञेयम् । अमृतमयं तस्याः पयः पीत्वा नारायणस्य कृष्णस्याङ्गसंस्पर्शात् प्रतिलब्धम् आत्मदर्शनं स्वज्ञानं यैस्ते गोविन्दादीन् नमस्कृत्य सर्वभूतानां मिषतां पश्यतामेव सतां दिवौकसां धाम स्वर्गं ययुः ॥५५-५६॥ तमिति । देवी देवकी तं मृतानां पुत्राणामागमनपूर्वकं निर्गमं दृष्ट्वा सुविस्मिता सती हे नृप ! अहंताममतात्मिकाम् अपत्यादिरूपां वा कृष्णस्य रचितां मायां मेने ॥५७॥ एवमिति । हे भारत ! अनन्तवीर्यस्य परमात्मनः कृष्णस्य एवंविधान्यद्भुतानि अनन्तानि वीर्याणि पराक्रमाः सन्ति ॥५८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जगताम् अघभित् पापनिवर्तकं तस्य श्रीकृष्णस्य भक्तानां सत्कर्णपूरं रमणीयकर्णाभरणरूपं व्यासपुत्रैः श्रीशुकाचार्यैः कीर्तितम् अमृतं सुधा तद्वत् अनवधिकातिशयानन्दप्रदा कीर्तिर्यस्य तस्येदं चरितमलं निःशेषं यथा भवति तथा सः भगवति कृतं चित्तं येन एवम्भूतः सन् तस्य कृष्णस्य क्षेमं निर्भयं धाम ब्रह्मपुरं याति ॥५५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत इति ॥ हे राजन् ! मातृशोकापनुत्तये मन्मातुर्देवक्याः शोकापहरणाय इतः सकाशात् एतान् प्रणेष्यामः मात्रन्तिकं

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नेष्यामः । ततः मातृशोकापनोदनानन्तरं पापात्प्रजापत्युपहासात्मकादघात् विनिर्मुक्ताः अत एव विज्वराः निर्दुःखाः सन्तः लोकं पुण्यलोकं यास्यन्ति । क्वचित्तु शापादिति पाठः । परं तत्र शापाश्रवणादुक्तः पाठ एव साधुः ॥५१॥ स्मरेति ॥ स्मरेण सहित उद्गीथ इति मध्यमपदलोपी समासः । सन्धिरार्षो वा । स्मरः उद्गीथश्चेत्यर्थः । स्मरस्यैव पूर्वं कीर्तिमानिति नाम अतः 'कीर्तिमन्तं प्रथमजं कंसायानकदुन्दुभिः । समर्पयामास' इत्युक्तं तदविरुद्धम् । परिष्वङ्गः पतङ्गः क्षुद्रभुक् घृणी इमे षट् मत्प्रसादेन मदनुग्रहेण हेतुना पुनः सद्गतिं ब्रह्मसदनं मोक्षं वा यास्यन्ति ॥५२॥ इतीति ॥ इति उक्त्वा बलिमिति शेषः । तान् बलिसमर्पितानिति शेषः । समादाय इन्द्रसेनेन बलिना पूजितौ रामकृष्णौ पुनः द्वारवतीम् एत्य मातुः पुत्रान् अयच्छतार्पयामासतुः ॥५३॥ तानिति ॥ देवी देवकी तान् बालकान् दृष्ट्वा पुत्रस्नेहेन स्नुतौ प्रस्रवन्तौ स्तनौ यस्याः सा एवम्भूता सती परिष्वज्य अङ्कम् उत्सङ्गम् आरोप्य अभीक्ष्णशः पुनः पुनः मूर्ध्नि अजिघ्रत् ॥५४॥ अपाययदिति ॥ यया विष्णोः मायया सृष्टिः प्रवर्तते तया सा देवकी मोहिता सती सुतस्पर्शपरिप्लुता सुतानां संस्पर्शेन स्तनक्षरद्दुग्धा प्रीता च सती स्तनम् अपाययत् ॥५५॥ पीत्वेति ॥ त इति । तस्याः देवक्याः अमृतममृतवत् स्वादु स्तन्यं पीत्वा गदाभृतः श्रीकृष्णस्य पीतशेषं पीतावशिष्टं पयो जलं च पीत्वा तदानीं भगवते पानाय मात्रा दत्तं जलं पात्रे शेषितं दुग्ध महिमातिशयतस्तदपि तैर्निपीतमिति बोध्यम् । अन्यथा भगवत्कृतदेवकीस्तनपानानुक्तेर्गदाभृतपीतत्वमसङ्गतं स्यात् । केचित्तु भगवत जन्मान्तरविहिततत्पानावशिष्टमिति वदन्ति । ततः नारायणस्य श्रीकृष्णस्याङ्गस्पर्शात् प्रतिलब्धमात्मदर्शनं स्वात्मपरमात्मयाथात्म्यज्ञानं

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यैस्तथाभूताः सन्तः ते स्मरादयः षडपि गोविन्दं श्रीकृष्णं देवकीं मातरं पितरं वसुदेवं बलं रामं नमस्कृत्य सर्वभूतानां मिषतां पश्यतां सतां विहायसेति शेषः । दिवौकसां देवानां धाम लोकं ययुः ॥५६-५७॥ तमिति ॥ देवी देवकी तं मृतानामागमनपूर्वकं निर्गमं दृष्ट्वा हे नृप ! सुविस्मिता सती कृष्णस्य रचितां श्रीकृष्णेन स्वयोगशक्त्या विरचितामित्यर्थः । मायां मेने ॥५८॥

कृष्णप्रिया

इस अवसर पर भगवान श्रीकृष्ण और बलभद्रजी दोनंने पिता वसुदेवजी एवं माता देवकीजी को नमस्कार करके सब लोगोंके बीच आकाशमार्ग से स्वधाम पधारें ॥५६॥ राजन् ! यह अवसर पर मृत पुत्र का आगमन और पुनः गमन देखकर माता देवकीजी विस्मित हुअे, और यह सब भगवान श्रीकृष्ण की लीला है, ऐसा मानने लगे ॥५७॥ हे राजन ! अनन्त पराक्रमी परमात्मा श्रीकृष्ण की अनेक विध नाना प्रकारकी लीलाए, और अनन्त पराक्रम है ॥५८॥

सूत उवाच

य इदमनुशृणोति श्रावयेद्वा मुरारेश्चरित[1]ममृतकीर्तेर्वर्णितं व्यासपुत्रैः ।
जगदघभिदलं तद्भक्तसत्कारपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे [2]दशमस्कन्धे मृताग्रजानयनं नाम [3]पञ्चाशीतितमोऽध्यायः ॥८५॥

★ ★ ★

---

१. ममलकौर्ते-वीर. । २. पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. पु. । ३. चतुस्सप्ततितमोऽध्यायः-विज. ।

सूतः, उवाच । यः,

श्रावयेत्, वा, भगवति, कृत

॥ श्रीम

अमृतं कीर्तिर्यस्य तस

दिनकृच्छ्रादिवदिति तदेवं मोक्ष

कृतमावेशितं चित्तं येन सः तथ

इति श्रीमद्भागवते महापुराणे

अमृतं कीर्तिरिव यस्येति

तदेवं निःशेषाघहरत्वादुभयहेतुत्व

वैकुण्ठम् । "न कर्हिचिन्मत्पराः

॥ इति श्रीमद्भाग

अथ सर्वमहन्महनीयश्री

श्रोतॄनाशीर्वादप्रायेण तच्चरितमाह

बोधयंश्च गायन्नेवाह–य इति । अधि

रुच्युत्पादकस्वभावत्वादनुवाद

वाशब्दादनुशब्दस्योत्तरत्राप्यन्वयः

कीर्तिर्यस्य अमृतकीर्तित्वादेव व्यास

इत्यादेः अत एव जगतः सर्वस्यैव

कृतचित्त इत्यस्मिँल्लोकेऽपि महासुख

इति प्रसिद्धं नित्यं द्वारकाख्यमेव

फलतामाह–भक्तसत्कर्णपूरमिति ॥५

॥ इति श्रीमद्भागवते महापुराणे

एवं सद्य एव तेषां श्रीवैकु

प्राप्ता इति किं वक्तव्यम् । तद्वार्ताश्रवण

कर्दमक्षमा

सूत:, उवाच। य:, इदम्, व्यासपुत्रै:, वर्णितम्, जगदघभित्, भक्तसत्कर्णपूरम्, अमृतकीर्ते:, मुरारे:, चरितम्, अनुशृणोति, वयेत्, वा, भगवति, कृतचित्त:, तत्, क्षेमधाम, याति ॥५९॥

॥ श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे पञ्चाशीतितमाध्यायान्वया: ॥८५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अमृतं कीर्तिर्यस्य तस्य व्यासपुत्रैरिति बहुवचनं पूजार्थम् जगतामघं भिनत्तीति तथा तत् अलं निश्शेषं यथा भवति तथा कृच्छ्रादिवदिति तदेवं मोक्षहेतुत्वं चोक्तं तद्भक्तानान्तु सत्कर्णपूरं परमसुखावहं कर्णाभरणमिति सुखरूपतामाह किञ्च भगवति वेशितं चित्तं येन स: तथाभूत्वा तस्य क्षेम धाम कालादिभयरहितं लोकं यातीति ॥५९॥

ति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां पञ्चाशीतितमोऽध्यय: ॥८५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाश:

अमृतं कीर्तिरिव यस्येति कीर्तेरमृताधिक्यं मोक्षहेतुत्वात्। न कृच्छ्रादिवत्प्रयोगोक्तमात्रपापहरम्। आदिना चान्द्रायणादिग्रह:। ं नि:शेषाघहरत्वादुभयहेतुत्वं युक्तम्। तद्भक्तानां मुरारिभक्तानाम्। स्वयं सुखरूपतां परमानन्दरूपतां व्यनक्तीत्यर्थ:। लोकं ण्ठम्। **"न कर्हिचिन्मत्परा: शान्तरूपे नङ्क्ष्यन्ति नोऽनिमिषो लेढि हेति:"** इत्युक्ते: ॥५९॥

॥इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे पञ्चाशीतितमोऽध्याय: ॥८५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ सर्वमहन्महनीयश्रीमन्निजगुरुचरणैर्वर्णितेनैवम्भूतश्रीकृष्णचरितवृन्देनोल्लसितस्सन् श्रीसूतोऽप्युपसंहारानुरूपं शीर्वादप्रायेण तच्चरितमाहात्म्यानुवादेन तोषयन् तल्लीलापरिकराणां तत्तत्प्राप्तिर्नाश्चर्या यतस्तच्छ्रोतृणामप्येवं स्यादिति गायन्नेवाह-य इति। अधिकारापेक्षा निरस्ता इदं पूर्वपूर्वोक्तं किञ्चिदपि तच्चरितम् अनु निरन्तरमिति सकृच्छ्रवणस्यैव नुवादकस्वभावत्वादनुवाद एव स च भाविफलस्य शीघ्रत्वज्ञापनाय सापराधत्व एव तु न तत्तत्सम्पद्यत इति नुशब्दस्योत्तरत्राप्यन्वय:। योग्यता चेत् स्वपरकृतार्थतार्थम् अनु श्रावयेद्वा तत्र सामर्थ्यम् अमृतं परानन्दरस: तद्रूपा स्य अमृतकीर्तित्वादेव व्यासपुत्रैर्वर्णितं तद्वर्णितत्वेन च विशेषो बोधित:। "पिबन्तं त्वन्मुखाम्बोजच्युतं हरिकथामृतम्" अत एव जगत: सर्वस्यैव यदघं तद्भक्तिविघ्नपर्यन्तं तद्भिनत्तीति यथा तत् अत एव भगवति तत्तच्चरिताश्रये श्रीकृष्णे इत्यस्मिँल्लोकेऽपि महासुखमुक्त्वा पारलौकिकमप्याह-तस्य श्रीकृष्णस्यैव क्षेमं "स्मृत्याशेषाशुभहरं सर्वमङ्गलमङ्गलम्" प्रसिद्धं नित्यं द्वारकाख्यमेव धाम एवं तच्चरितश्रवणेन साधकानां फलक्रमो दर्शित: सिद्धानान्तु तस्यैव सद्य: स्वयं आह-भक्तसत्कर्णपूरमिति ॥५९॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां पञ्चाशीतितमोऽध्याय: ॥८५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं सद्य एव तेषां श्रीवैकुण्ठलोकलाभं श्रुत्वा विस्मितान् ब्राह्मणान् दृष्ट्वाऽनुगृह्णन् अहो श्रीभगवत्सोदरास्ते तत्पदं ति किं वक्तव्यम्। तद्वार्ताश्रवणादिनान्येऽपि तत् प्राप्नोतीति वदन् तादृशश्रीशुकदेवस्योक्त्या सुप्रीत: सन्

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीलोमहर्षणिस्तन्माहात्म्यपूर्वकं श्रीभगवच्चरितमाहात्म्यमाह-य इति। अधिकारापेक्षा निरस्ता। अनु निरन्तरं शृणोति। वा-शब्दादनु-शब्दस्यात्रान्वयः, अनु श्रावयेद्वा । तत्र हेतुः-अमृतं परमानन्दरसस्तद्रूपा परममधुरा कीर्तिर्यस्य तस्येति। तच्चरितस्यामृतत्वं ध्वनितम्। अतोऽत्याज्यत्वादिति भावः। यद्वा, अन्वाचयन्यायेनापि शृणोति मुरारेरिति साक्षाद्भगवत्त्वं सूच्यते । श्रीकृष्णेनैव स्वयं नरकसेनानीमुरासुरवधादमृतकीर्तित्वादेव श्रीव्यासपुत्रैर्वर्णितम् । यद्वा, तद्वर्णितत्वं विशेषतोऽधिकरसमयत्वं (रसवत्त्वं-[घ, ङ]।) बोधयति-प्रियजनमुखेनैव त्वत्कथाया रसविशेषोदयात्, तच्च (भा.१०।१३) 'पिबन्तं त्वन्मुखाम्भोजच्युतम्' इत्यादावुक्तमेव। जगतोऽविशेषेण सर्वस्यैवाघं प्रारब्धाद्यशेषदुष्कर्मलक्षणं संसारदुःखं वा भिनत्तीति तथा तत् भगवति श्रीकृष्णे कृतचित्त इत्यस्मिन् लोकेऽपि महासुखमुक्तम् ॥५९॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रील-सनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशमटिप्पण्यां पञ्चाशीतितमोऽध्यायः ॥८५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

व्यासपुत्रैरिति बहुवचनं गुरुत्वाभिप्रायं भक्तानां सतां कर्णान् पूरयतीति ॥५९॥

॥इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये पञ्चाशीतितमोऽध्यायः ॥८५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उपवर्णिताख्यानश्रवणादिफलमाह सूतः-य इति। व्यासपुत्रैरिति बहुवचनं गुरुत्वाभिप्रायम् अमला कीर्तिर्यस्य मुरारेश्चरितस्य निःशेषं यथा तथा जगतोऽघं भिनत्तीति तथा न कृच्छ्रादिवद्यत्किञ्चिदघभिदिति भावः। तदेवं पापक्षयहेतुत्वमत एव मोक्षहेतुत्वं चोक्तम्। किञ्च तद्भक्तानां सत्कर्णपूरं परमसुखावहकर्णाभरणरूपम् इत्थम्भूतम् इदं चरितं यः पुमाननुशृणोति श्रावयेद्वा स भगवति कृतं निहितं चित्तं येन तथाभूतः तद्भगवत्सम्बन्धि क्षेमं कालादिभयरहितं धाम स्थानं याति प्राप्नोति ॥५९॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां पञ्चाशीतितमोऽध्यायः ॥८५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवं स्वस्मिन्नेव श्रीभगवता तस्याः स्नेहो रक्षित इत्याह-तमिति ॥५७-५९॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे पञ्चाशीतितमोऽध्यायः ॥८५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

॥१-५९॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे पञ्चाशीतितमोऽध्यायः ॥८५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥१-५९॥

॥ इति श्रीमद्भागवते महापुराणे श्रीनाथचक्रवर्तिविरचितायां चैतन्यमंजूषायां पञ्चाशीतितमोऽध्यायः ॥८५॥

अमृतमेव कीर्तिर्यश

कर्णपूरं कर्णाभरणम् ॥५९॥

॥ इति सारार्थद

व्यासपुत्रैः वर्णितं मुर

मङ्गलमयं धाम वैकुण्ठं याती

जगतामघं भिनत्तीति तथा । त

मृत्युभयनिवर्तिका कीर्तिर्यस्येति

॥इति श्रीमद्भागवते महापुरा

व्यासपुत्रैरिति बहुवचन

कर्णाभरणरूपम् ॥५९॥

॥इति श्रीमद्भागवते महापुराणे

एवं भगवच्चरित्रस्य नि

शृणोति श्रावयेद्वा ननु किमर्थं शृणो

अमृतरूपा कीर्तिर्यस्येति चरित्रं श्रव

अतो बहुवचनं सर्वैरेव व्यासशिष्यैः पु

।सर्वपापनाशकं किञ्च अलमत्यर्थं

स्थापयति स एव सन्नित्यपि सूचितं

पारलौकिकमाह-याति तत्क्षेमधामेति

भगवद्वीर्यश्रवणफलान्युक्तानि भगवत

॥इति श्रीमद्भागवतसुबोधि

सूतोक्तिः । अमृता शुद्धा

जगतामघं पापं भिनत्ति धुनोतीति तत् त

येन स तस्य हरेः क्षेमधाम परं पदं याति

॥ इति श्रीमद्भा

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अमृतमेव कीर्तिर्यशो यस्य तस्य अमृतत्वमाह-जगतामेव अघं संसाररोगं भिनत्तीति तत् तद्भक्तानां संसारोत्तीर्णानां तु पूरं कर्णाभरणम् ॥५९॥

॥ इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । पञ्चाशीतितमोऽध्यायो दशमेऽजनि सङ्गतः ॥८५॥

गूढार्थदीपिनी

व्यासपुत्रैः वर्णितं मुरारेः चरितं यः पुमान् शृणुयात् अथवा श्रावयेत् वर्णयेत् स भगवति स्थिरचित्तः सन् तस्य क्षेमं मयं धाम वैकुण्ठं यातीत्यन्वयः । अमृतं मोक्षसुखं कीर्तिर्यस्य । कथम्भूतं चरितम् । अलं निःशेषं यथा स्यात्तथा मघं भिनत्तीति तथा । तद्भक्तानां तु सत्कर्णपूरं श्रेष्ठं कणभिरणं परमसुखावहम् । पुत्रैरिति बहुवचनमादरार्थे । अमृतं भयनिवर्तिका कीर्तिर्यस्येति वा ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यां पञ्चाशीतितमोऽध्यायः ॥८५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

व्यासपुत्रैरिति बहुवचनमादरार्थम् । अलमत्यर्थं यथा तथा जगदघभित् तद्भक्तसत्कर्णपूरं मुरारिभक्तानां समीचीनं भरणरूपम् ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे पञ्चाशीतितमाध्यायार्थप्रकाशः ॥८५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भगवच्चरित्रस्य नित्यतां स्थापयितुं तच्छ्रवणादेः फलमाह-य इदमनुशृणोतीति । श्रद्धया अनुगुरूच्चारणमनु यः श्रावयेद्वा ननु किमर्थं शृणोति श्रावयति तदर्थमाह-मुरारेति । मुरो हि विघ्नात्मकः दोषात्मकश्च । किञ्च अमृतकीर्तिरिति रूपा कीर्तिर्यस्येति चरित्रं श्रवणेऽपि सुखजनकम् अत एव व्यासपुत्रैर्वर्णितम् इदं चरित्रमनन्तरूपो भूत्वा शुको वर्णितवान् बहुवचनं सर्वैरेव व्यासशिष्यैः पुत्रैश्चेति वा शिष्याणामपि पुत्रत्वात् सर्वैरेव श्रोतव्यमित्येतदर्थं बहून्येव फलान्याह-जगदघभिदिति पनाशकं किञ्च अलमत्यर्थं सतां कर्णपूरं कर्णाभरणम् अनेन सतां निरन्तरं सेव्यता निरूपिता । अतो य एव नित्यं कर्णे यति स एव सन्नित्यपि सूचितं प्रयोजनान्तरमप्याह-भगवति कृतचित्त इति । भगवति तस्य चित्तं स्थितं भवति ऐहिकमुक्त्वा लौकिकमाह-याति तत्क्षेमधामेति । धाम यातीत्येव फलं धामप्रशंसार्थं क्षेमेति एवं विघ्ननिवृत्तिमाद्यारभ्य भगवत्स्वरूपप्राप्तिपर्यन्तं श्रवणफलान्युक्तानि भगवत ऐश्वर्यं स्थायपन्ति अतो भगवान् कृष्णः सर्वेश्वर इति स्थितम् ॥५९॥

॥ इति श्रीमद्भागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धविवरणे षट्त्रिंशाध्यायविवरणम् ॥३६॥ ॥८५॥

श्रीसुबोधिनीसारः

सूतोक्तिः । अमृता शुद्धा मोक्षकर्त्री वा कीर्तिर्यस्य तस्य मुरारेः श्रीकृष्णस्य व्यासपुत्रैः पूजार्थं बहुवचनं वर्णितम् । पापं भिनत्ति धुनोतीति तत् तस्य भक्तानां सत्कर्णपूरं परमसुखकरं चरितम् इदं योऽनुशृणोति श्रावयेद्वा भगवति कृतं चित्तं तस्य हरेः क्षेमधाम परं पदं याति ॥५९॥

॥ इति श्रीमद्भा० दशमस्कन्धे उत्त० सुबो० टी० पञ्चाशीतितमोऽध्यायः ॥८५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतच्छ्रवणफलमाह-य इति । अमृतं जन्ममरणादिभवनिवर्तका श्रवणानन्दजनका च कीर्तिर्यशो यस्य तस्य मुरारे चरितं यः पुमान् शृणोति श्रावयेद्वा स भगवति स्थिरीकृतं चित्तं येन तथाभूतः संस्तस्य क्षेमं धाम कालादिभयरहितं लोकं यातीत्यन्वयः । अमृतकीर्तित्वमेव स्पष्टयति-जगतः श्रवणकीर्तनपरस्य जनस्य अघं पापं भिनत्तीति तथा तत्, तत्रापि अलं निःशे भवति तथा । तद्भक्तानां सतां तु कर्णपूरं कर्णयोः परमानन्दजनकम्, अत एव व्यासपुत्रैर्वर्णितम् । बहुवचनं पूजार्थम् ॥५९॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥

श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥

रचिता दशमे तत्र भगवद्गुणवर्णने । पञ्चाशीतितमो यात ऐश्वर्यस्य निरूपकः ॥३॥ ॥८५॥

अन्वितार्थप्रकाशिका

य इति । जगतः श्रवणकीर्तनपरस्य जनस्य अघं पापं भिनत्तीति तथा तत् तत्रापि अलं निःशेषं यथा भवति त तद्भक्तानां सतां तु कर्णपूरं कर्णयोः परमानन्दजनकम् अत एव व्यासपुत्रैर्वर्णितं बहुवचनं पूजार्थम् । अमृतं जन्ममरणादिभवनिवर्तक श्रवणानन्दजनका च कीर्तिर्यशो यस्य तस्य मुरारेरिदं चरितं यः पुमान् शृणोति श्रावयेद्वा स भगवति स्थिरीकृतं चित्तं येन तथाभूः संस्तस्य क्षेमं धाम कालादिभयरहितं लोकं याति ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धेऽन्वितार्थप्रकाशिकायां पञ्चाशीतितमोऽध्यायः ॥८५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

जगताम् अघभित् पापनिवर्तकं तस्य श्रीकृष्णस्य भक्तानां सत्कर्णपूरं रमणीयकर्णाभरणरूपं व्यासपुत्रैः श्रीशुकाचार्यै वर्णितम् अमृतं सुधा तद्वत् अनवधिकातिशयानन्दप्रदा कीर्तिर्यस्य तस्येदं चरितमलं निःशेषं यथा भवति तथा सः भगवति श्री निश्चलीकृतं चित्तं येन एवम्भूतः सन् तस्य कृष्णस्य क्षेमं निर्भयं धाम ब्रह्मपुरं याति ॥५५॥

॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्य
गोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रमद्भागवतस्थदशमस्कन्धव्याख्याने
मृताग्रजानयनं नाम पञ्चाशीतितमोऽध्यायः ॥८५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमिति ॥ हे भारत परीक्षित् राजन् ! अनन्तवीर्यस्य परमात्मनः कृष्णस्य एवंविधान्युक्तप्रका अद्भुतान्याश्चर्यरूपाणि वीर्याणि प्रभावसूचकचेष्टितानि अनन्तानि सन्ति न साकल्येन वक्तुं श्रोतुं वा शक्यानीति ॥५९॥ उपवर्णिताख्यानश्रवणादिफलमाह सूतः ॥ य इति ॥ अमृतममृतवदमला कीर्तिर्यस्य तस्य मुरारेः श्रीकृ व्यासपुत्रैः वर्णितं बहुवचनं गुरुत्वाभिप्रायम् । अलं निःशेषं यथा तथा जगतोऽघं भिनत्तीति तथा तत् न कृ किञ्चिदघभिदिति भावः । तदेवं पापक्षयहेतुत्वं मोक्षहेतुत्वं चोक्तम् । तस्य भगवतो ये भक्तास्तेषां तु सत्क परमसुखावहकर्णाभरणरूपम् इदं चरितं यः अनुशृणोति श्रावयेद्वा सः भगवति श्रीकृष्णे कृतं निहितं चित्तं येन तथा सन् तद्भगवत्सम्बन्धि क्षेमं कालादिरहितं यद्धाम स्थानं लोकं वा याति सम्प्राप्नोति ॥६०॥

श्रीरघुवीराचार्यसूनुभ

महर्षि सूतजीने व
हुए अनन्त स्वरूपों को ले
कृष्णमें प्रस्थापित होता है,
के सभी पापों का नाश व

॥ इति श्रीमद्भागवते

र्शो यस्य तस्य मुरारेरिदं
कालादिभयरहितं लोकं
तत्, तत्रापि अलं निःशेषं
चनं पूजार्थम् ॥५९॥

॥१॥

॥२॥

॥८५॥

निःशेषं यथा भवति तथा
जन्ममरणादिभवनिवर्तका
थरीकृतं चित्तं येन तथाभूतः

ध्याय: ॥८५॥

पं व्यासपुत्रैः श्रीशुकाचार्यैः
वति तथा सः भगवति कृतं

ख्याने

य एवंविधान्युक्तप्रकाराणि
श्रोतुं वा शक्यानीति भावः
स्य तस्य मुरारेः श्रीकृष्णस्य
ति तथा तत् न कृच्छ्रादिवत्
ये भक्तास्तेषां तु सत्कर्णपूरं
तं निहितं चित्तं येन तथाभूतः

॥इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुत
श्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां
दशमस्कन्धे उत्तरार्धे पञ्चाशीतितमोऽध्यायः ॥८५॥

कृष्णप्रिया

महर्षि सूतजीने कहा राजन् ! मुररिपु भगवानकी कीर्ति ही अमृत है, व्यास महर्षि के पुत्र श्रीशुक्राचार्यजीने गाये हुए अनन्त स्वरूपों को लेकर अमृत का नित्य श्रवण करते है, और रसपान के श्रवण कराते है, उनका मन मनमोहन कृष्णमें प्रस्थापित होता है, ओर अंतमें वह जीव कल्याणकारी भगवान के धाममें जाता है, यह श्रीहरि का चित्र जगत् के सभी पापों का नाश करता है, इतना ही नहीं परंतु भगवदीय जनों के कर्णरूप सप्त आभूषणें है ॥५९॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे पञ्चाशीतितमाध्यायस्य भाषाटीका समाप्ता ॥८५॥

★★★★★

॥ श्रीहरिः ॥

★श्रीगणेशाय नमः★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

[1]॥ अथ षडशीतितमोऽध्यायः ॥

श्लोकाः	अनु.	मि. उ.	व.	वं.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
५९	५४	२	२	१	८	१७६८	४६	४५	२०७५	६४॥	१

[1]राजोवाच

ब्रह्मन् वेदितुमिच्छामः [2]स्वसारं रामकृष्णयोः । यथोपयेमे विजयो या ममासीत् पितामही ॥१॥

कर्दमक्षमा

राजा, उवाच ।

ब्रह्मन्, विजयः, रामकृष्णयोः, स्वसारं, यथा, उपयेमे, या, मम, पितामही, आसीत्, तत्, वेदितुम्, इच्छामः ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

षडशीतितमे दम्भात्सुभद्रामर्जुनोऽहरत् । गत्वा च मिथिलां कृष्णो नृपविप्रावनन्दयत् ॥

पित्रोः स्वज्ञानमादिश्य सुभद्रां फाल्गुनाय च । जगाम मिथिलां कृष्णः स्वभक्तप्रियकृत्ततः ॥

देवक्या मृतपुत्रलाभवदर्जुनस्य सुभद्रालाभोऽपि रामप्रातिकूल्याद्दुर्घट इति मन्यमानः प्रसङ्गात्पृच्छति-ब्रह्मन्निति ॥१-२॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

लोकवचनविहितमिथ्यानुष्ठानं दम्भः । अनन्दयत् साह्लादौ चक्रे (१) । स्वसारं सुभद्राम् । विजयोऽर्जुनः ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

अथोपसंहारमुद्रामालक्ष्य श्रीपरिक्षित्तु भीत एव पुनस्तामवतारयितुं पृच्छति-तत्रापि श्रीभगवता निजदेहसम्ब मुख्यकारणरूपायाः स्वपितामह्या मूलकथारूपं विवाहं चिरं प्रष्टुमिष्टं पृच्छति-ब्रह्मन्निति । यथा येन प्रकारेणोपयेमे त प्रकारेण तदुपयमनं वेदितुमिच्छामः तत्र रामकृष्णयोरिति दुर्लभत्वमभिप्रेतम् । विजय इति तत्रैव तस्य सान्वयसंज्ञत्वं पर्यवसितमि भावः । निजोत्कण्ठातिशयेन कारणं येति ॥१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीभगवतः पित्रोर्भ्रातृषु चानुग्रहं श्रुत्वा भगिन्यामपि तमधिकं सम्भाव्य तत्प्रकारं सादरं पृच्छति-ब्रह्मन्निति । हे वेदस्व अतस्त्वं तत् सर्वं समूलं वेत्सीति भावः । अत एव तत्प्रकारं वेदितुमिच्छामः । बहुत्वं सर्वश्रोतृणामपेक्षया, सा च विनया

---

१. आद्या द्वादशश्लोकाः न दृश्यन्ते-विज. । ८. मि-गो. प्रे. टी. । ९. स तत्र-वीर. ; तत्रासौ-गो. प्रे. टी. । १०. रामेण च महात्मना-वी

सं. श्लो. अ.
६४॥ १

सीत् पितामही ॥१॥

दितुम्, इच्छामः ॥१॥

॥

त्पृच्छति–ब्रह्मन्निति ॥१-२॥

विजयोऽर्जुनः ॥१॥

श्रीभगवता निजदेहसम्बन्धे
था येन प्रकारेणोपयेमे तेन
सान्वयसंज्ञत्वं पर्यवसितमिति

ति–ब्रह्मन्निति । हे वेदस्वरूप।
मपेक्षया, सा च विनयादेव।

। १०. रामेण च महात्मना-वीर।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ष्णयोरिति 'रमन्ते योगिनोऽनन्ते' इत्यत्रेति तथा 'कृषिर्भूवाचकः शब्दः' इति वचनतः साक्षाद्भगवतोरित्यर्थः । अनेन तथा मिति द्वयोरपि तस्यां स्नेहसूचनेन च, द्वयोस्तयोः सम्मत्यैवोपयमस्य सिद्ध्या तस्य दुष्करत्वमभिप्रेतम् । विजय इति रक्षितयादवसैन्यजनपूर्वक–श्रीसुभद्राहरणस्य किंवा तद्विवाहेन तदुत्कर्षलाभस्याभिप्रायेण । ननु किं तव तद्विविदिषया ? –येति । यस्याः सम्बन्धेन मम भगवदीयत्वविशेषः सम्पन्नः इति भावः ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-१३॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

वीर्याण्यनन्तवीर्यस्य सन्तीत्युक्तं तत्रार्जुनाय सुभद्राप्रदानात्मकं भगवतश्चेष्टितं श्रोतुकामः पृच्छति राजा–ब्रह्मन्निति । विजयः रामकृष्णयोः स्वसारं भगिनीं यथा येन प्रकारेण उपयेमे तं प्रकारं वेदितुम् इच्छामि । तां विशिनष्टि–या तयोः स्वसा मम तामही बभूव ॥१॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥१-१२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

यतिवेषेऽर्जुनोऽहार्षीत् सुभद्रां मिथिलामगात् । धिन्वन् विप्रनृपौ भक्तौ षडशीतितमे हरिः ॥१॥

अथ कथोपसंहारमुद्रामालक्ष्य ननु भोः प्रभो बलदेवादीनामनिरुद्धपर्यन्ताना विवाहाः श्रुता एव किन्तु सुभद्राविवाहो न इत्याह–ब्रह्मन्निति । विजयोऽर्जुनः तद्विवाहो मम त्ववश्यपृष्टव्य इत्याह येति ॥१॥

गूढार्थदीपिनी

षडशीतितमे जिष्णुः सुभद्रामहरद्बलात् । चक्रे चानुग्रहं कृष्णो मैथिलश्रुतदेवयोः ॥१॥

विजयोऽर्जुनः । उपयेमे विवाहितवान् ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

षडशीतितमेऽर्जुनबहुलाश्वश्रुतदेवान् स्वभक्तान् वाञ्छितार्थदानेन प्रीणयामासेत्युच्यते रामकृष्णादिविवाहा महर्षिणोक्ताः पितामहीविवाहो नोक्त इत्यतः पृच्छति ब्रह्मन्निति ॥१-४॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

सप्तत्रिंशे हरेर्वीर्यं त्रेधा प्राह सुनिश्चितम् । सर्वेषां सर्वकार्याणि कृतवानित्युदीर्यते ॥१॥
तदेव भगवद्वीर्यं यत्र शक्यं हि लौकिकैः । न ह्यन्यो भगिनीं दातुमेवं शक्तो हरिं विना ॥२।
नापि स्वयं यस्य कस्य गृहे स्थातुं विभूतये । नापि धर्मं स्वहीनार्थमन्यः कथयितुं प्रभुः ॥३॥
अनाहूतः स्वयं क्वापि गच्छतीत्यपि नो मतम् । यथा ग्रन्थानुसारेण प्रसङ्गोऽत्र विचारितः ॥४॥
क्रमपाठादिभेदेषु तथा व्याख्यानमिष्यते । उदासीनो हरिर्व्यासः फलसिद्धेरशक्यतः ॥५॥

ग्रन्थारम्भे तथैवास्मिन् बोधयामास माधवः ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

राजा परीक्षित् पूर्वाध्यायान्ते भगवद्वीर्याणामुपसंहृतत्वात् स्वसन्दिग्धार्थानर्थान् पृच्छति तत्प्रसङ्गाच्छुकोऽन्य वक्ष्यति । व्यवहारो भगवद्वीर्यान्यथाभावो यत्र प्रतीयते स प्रष्टव्यः । वैदिकविरोधः सोऽपि भजनाय विरो एतत्क्रमेणाध्यायत्रयेण द्रष्टव्यः । यादृशश्च प्रसङ्गः शुकोक्तौ हेतुः स एतत्तत्र वक्ष्यते कथापक्षे त्वियं सङ्गतिः विवा पूर्वोक्त इति क्षत्रियो हि बलादेव विवाहं करोति गान्धर्वो राक्षसश्चेति वाक्यात् भगवांश्च सर्वाजेयः अतो विरुद्धत सुभद्राया विवाहं पृच्छति-ब्रह्मन् वेदितुमिच्छाम इति । रामकृष्णयोः स्वसारमिति अजेयत्वे हेतुः यथा यथाव शास्त्रोक्तप्रकारेणोपयेमे दैन्येन विवाहं वारयति विजय इति । या ममासीत् पितामहीति सैव वंशजननी जाता तादृ विवाहः नान्यथा भवितुमर्हतीति भावः ॥१॥

सुबोधिनीसारः

राजप्रश्नः । ब्रह्मन् ! रामकृष्णयोः स्वसारं भगिनीं सुभद्रां विजयोऽर्जुनो यथोपयेमे परिणिन्ये एतद्वेदितुं व वयमिच्छामः । या सुभद्रा मम पितामही पितु पितु स्त्री अभूत् ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

षडशीतितमे कृष्णः सुभद्रामर्जुनाय वै । मैथिलश्रुतदेवाभ्यां ज्ञानं चाददितीर्यते ॥१॥

भगवच्चरितान्तरं पृच्छति-ब्रह्मन्निति । ब्रह्मन्निति सम्बोधनेन सर्वज्ञत्वं सूचयति । विजयोऽर्जुनो रामकृष्णयोः स्वसारं भगिनीं यथा येन प्रकारेण उपयेमे तं विवाहप्रकारं वयं वेदितुमिच्छामः । तदिच्छायां हेतुं सूचयति-या तयोः स्व मम पितामही आसीत् ॥१॥

अन्वितार्थप्रकाशिका

षडशीतितमेऽहारि सुभद्राऽथाऽत्र मैथिलौ । हरिर्भक्तावन्वगृह्णात् तत्र श्लोका नवेषवः (५९) ॥१॥

अष्टोवाचेति (८) वाक्यानि स्याद्द्वाषष्टिरनुष्टुभाम् (६२) ॥८६॥

अन्येषां विवाहाः श्रुताः सुभद्राविवाहो मज्जन्महेतुः सोऽपि कथ्यतामित्याह-ब्रह्मन्निति । विजयोऽर्जुनो रामकृष्णयोः स्वसारं भगिनीं यथा येन प्रकारेणोपयेमे तं विवाहप्रकारं वयं वेदितुम् इच्छामः । या तयोः स्वसा मम पितामही आसीत् ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

षडशीतितमे पार्थः सुभद्रामहरच्छलात् । मिथिलायां गतः कृष्णो द्विजभूपावमोदयत् ॥१॥

ब्रह्मन्निति । यथोपयेमे तथा तदुपयमनं वेदितुमिच्छामः ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सुभद्रामर्जुनो दम्भात् षडशीतितमेऽहरत् । कृष्णश्च मिथिलां गत्वा भूपविप्रावनन्दयत् ॥१॥

वीर्याण्यनन्तवीर्यस्य सन्तीत्युक्तं तत्रार्जुनाय सुभद्राप्रदानात्मकं भगवतश्चेष्टितं श्रोतुकामः पृच्छति राजा । ब्रह्मन्निति । ब्रह्मन् ! रामकृष्णयोः स्वसारं भगिनीं या मम पितामही आसीत् बभूव तां सुभद्रां विजयोऽर्जुनः यथा येन प्रकारेण उपयेमे तत्त वेदितुमिच्छामि ॥१॥

कृष्णप्रिया

राजा परीक्षितजीने कहा कि सर्वज्ञ ! निर्विकार शुक्राचार्यजी श्रीबलभद्रजी और श्रीकृष्ण बहन और मेरी दादी श्रीसुभद्राजी का श्रीअर्जुनजी के साथ जो लग्न हुआ, वह प्रसंग आपके श्रीमु मैं श्रवण करना चाहता हुं ॥१॥

श्रीशुक उवाच

अर्जुनस्तीर्थयात्रायां पर्यटन्नटवीं प्रभुः । गतः प्रभासमशृणोन्मातुलेयीं स आत्मनः ॥२॥
दुर्योधनाय रामस्तां दास्यतीति न चापरे । तल्लिप्सुः स यतिर्भूत्वा त्रिदण्डी द्वारकामगात् ॥३॥
तत्र वै वार्षिकान् मासानवात्सीत् स्वार्थसाधकः । पौरैः सभाजितोऽभीक्ष्णं रामेणाजानता च सः ॥४॥

कर्दमक्षमा

प्रभुः, अर्जुनः, तीर्थयात्रायाम्, अवनीम्, पर्यटन्, प्रभासं, गतः, सः, आत्मनः, मातुलेयीम्, अशृणोत् ॥२॥ रामः, ताम्, दुर्योधनाय, दास्यति, इति, च, अपरे, न, तल्लिप्सुः, च, त्रिदण्डी, यतिः, भूत्वा, द्वारकाम्, अगात् ॥३॥ तत्र, स्वार्थसाधकः, वै, वार्षिकान्, मासान्, अवात्सीत्, पौरैः, अजानता, रामेण, च, अभीक्ष्णम्, सः, सभाजितः ॥४॥

श्रीधरस्वामिकृतभावार्थदीपिका

कथमशृणोत् दुर्योधनायेति अपरे वसुदेवादयो न दास्यन्तीति तल्लिप्सुस्तस्या मातुलेय्या लिप्सुः रामं वञ्चयितुं पूज्यतमं त्रिदण्डिवेषं विधाय गत इत्याह स यतिरिति ॥३॥ स्वार्थसाधकः कन्यां प्रेप्सुः ॥४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तीर्थयात्रायां ब्राह्मणधनरिरक्षया स युधिष्ठिरद्रौपदीगृहान्तर्गतधनुर्ग्रहणार्थतद्गतप्रतिज्ञातद्वादशवार्षिकतीर्थयात्रायामिति महाभारते। सोऽर्जुनः ॥२॥ लिप्सुरिच्छावान्। त्रिदण्डीति एकदण्डधारणं तु परमहंसस्यैव न तु हंसादेस्तेषां त्रिदण्डविधानं प्रतिपादितम्। अत्र भारतविरोधः त्रिषु लोकेषु दण्डो यस्य स त्रिदण्डो जिष्णुर्विष्णुर्वा पुत्रत्वेन पालकत्वेन च विद्यते स त्रिदण्डी यतिः। कन्याहरणे यत्नवान्भैक्ष्यं प्रार्थनया दत्तं बुभुजे 'भिक्ष-याञ्चायाम्' इत्येव परिहार्यः ॥३॥ द्वारकायाम्। सोऽर्जुनः ॥४॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

अर्जुन इति सार्धकम् । दुर्योधनाय राम एव तां दास्यति दातुमिच्छति न चापर इत्यनेन प्रकारेण मातुलेयीमशृणोदित्यन्वयात् प्रभुरिति। श्रीकृष्णसख्येन विशेषतश्च श्रीसुभद्रापतित्वेन परमादरात् आत्मनो मातुलेयीत्वेन तत्परिणयने योग्यता सूचिता। दक्षिणदेशवत् तदानीमन्यत्रापि तद्वद्व्यवहारवृत्तेः ॥२॥ राम इति । श्रीकृष्णक्रीडाकौतुकार्थमेव तस्य प्रवेशोऽपि भवतीति पूर्ववदभिप्रायः। तदित्यर्धकम्। तल्लिप्सुरिति सम्बन्धविवक्षया षष्ठीसमासः तां लिप्सुरित्यर्थः। भूत्वेति भिक्षाव्याजेनान्तःपुरप्रवेशाय। अन्यत्तैः। तत्र पूज्यतममिति त्रिदण्डित्वमेव स्वमतत्वेन स्थापितम् ॥३॥ अजानतेति। श्रीकृष्णलीलासक्तिमोहितत्वेनैवेतिभावः ॥४॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

प्रभुरिति। श्रीकृष्णसख्येन विशेषतश्च श्रीसुभद्रापतित्वेन परमादरात् । यद्वा, पर्यटनादौ समर्थ इति । तत्रैव धर्मकारित्वादर्जुन इति। आत्मनो मातुलेयीमिति तत्परिणयनयोग्यता सूचिता-तदानीं लोके तद्व्यवहारवृत्तेः ॥२॥ राम इति गदायुद्धशिक्षणादिना दुर्योधनरमणाभिप्रायेण । स विजयो यतिर्भूत्वेति श्रीसुभद्रां द्रष्टुं तेन च तस्या भावं स्वस्मिन् तदावासे श्रीरामस्य गेहे तदलक्ष्यत्वेन प्रवेशार्थम् ॥३॥ वै च, तत्र तस्यामेवावात्सीत्,- यतीनां चातुर्मास्यमेकत्रैव अजानतेति श्रीकृष्णेच्छयैवेति ज्ञेयम्, अन्यथा सर्वज्ञस्य तदसम्भवात् ॥४॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

॥१-१३॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

तं प्रस्तौति मुनिः अर्जुन इत्यादिना। अथान्यदपि कृष्णस्येत्यतः प्राक्तनेन। अवनीं पृथ्वीं पर्यटन् प्रभासं नाम तीर्थं प्रति
गतस्तत्र सोऽर्जुनः आत्मनः स्वस्य मातुलेयां मातुलस्य सुता तां सुभद्रां रामो दुर्योधनाय दास्यति अपरे वसुदेवादयस्तु न च
दास्यन्तीत्यशृणोत्। वसुदेवाद्यनुमतिमन्तरेणापि रामो दातुमुद्युक्तवानित्यशृणोदित्यर्थः ॥२॥ तल्लिप्सुरिति। तां मातुलेयां लिप्सुः तां
जिहीर्षुरित्यर्थः। सोऽर्जुनः त्रिदण्डी यतिर्भूत्वा रामं वञ्चयितुं त्रिदण्डियतिवेषं धृत्वा ॥३॥ स तत्रेति। वार्षिकानाषाढाद्याश्विनान्तांश्चतु
मासानुषितवान् तत्र हेतुः स्वार्थसाधनः स्वार्थं स्वप्रयोजनं साधयतीति तथा नन्द्यादित्वात्कर्तुरिल्युः पौरैर्महात्मना रामेण चाभी
पुनः पुनः सम्मानितोऽवात्सीदिति सम्बन्धः ॥४॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥१-१२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

अजानता इति। श्रीकृष्णलीलामोहितत्वेनैवेति भावः ॥४-१९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

तां प्रसिद्धां मातुलेयीं रामो दुर्योधनाय दास्यतीत्यशृणोदित्यन्वयः। न चापरे वसुदेवकृष्णादयस्तु न दित्सन्तीत्यर्थः
तां लिप्सुः स स्वप्रियसखकृष्णसाहाय्यसाहसेन रामं वञ्चयितुं पूज्यतमं त्रिदण्डिवेषम् अकरोदित्याह-यतिरिति ॥३-४॥

गूढार्थदीपिनी

तीर्थयात्रायाम् (ब्राह्मणधनं रक्षितुमिच्छया युधिष्ठिरद्रौपदीगृहान्तर्गतधनुर्ग्रहणार्थं गतस्यार्जुनस्य पूर्वप्रतिज्ञाततद्वादशवार्षिक-
तीर्थयात्रा प्राप्तेति स्फुटं महाभारते तदनुसारेणेदं बोध्यम्)। पृथ्वीं पर्यटन् प्रभासक्षेत्रं गतः। तत्र मातुलकन्यां सुभद्रां रामो दुर्योधना
वसुदेवादयस्तु तस्मै दातुं नेच्छन्तीति जनश्रुतिमशृणोत्। तल्लिप्सुः तां लब्धुमिच्छुः ॥२-३॥ तत्र द्वारकायाम्। वै एवार्थे। स्वा
स्वविवाहं साधयितुमिच्छतीति गर्भितसन्ननन्तः सभाजितः सत्कृतः। अप्यर्थे चकारः। अजानता रामेणापि ॥४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ॥१-४॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

उभयसमर्थनार्थं शुकः प्रकारमाह-अर्जुनः तीर्थयात्रायामिति। वस्तुतस्त्वयं नरः जीवकालात्मकः सा च मायाशक्ति
या पूर्वं यशोदायां जाता सा देवक्या स्नेहात्परिगृहीतेति देवकीस्नेहवशात् कंसहस्ताद्विनिर्मुक्ता स्थानाष्टकमिव देवकीमपि प्र
सुभद्रेति व्याख्याता स्त्रीभावेनैव मोहस्सम्भवतीति अर्जुनस्यैव स्त्री भवितुमर्हति अत एव तया व्यामोहितः कलौ तस्या एव क
स्थास्यतीति प्रव्राजं स्वीकृत्य वञ्चयीत्वा कन्यां हृतवान् चौर्याधर्मवेषौ क्षत्रियस्य निषिद्धौ तथापि हृतेति पितृभ्यां च दत्तेति तीर्थया
कृत्रिमवेषौ न निषिद्ध इति उभयात्मकत्वात् द्वयं समर्थितं भवति। अत्र तीर्थयात्राप्रसङ्गो भारते निरूपितः द्रौपदीविवाह
पञ्चानामेको वैषम्यहेतुर्भवतीति प्रचेतसामिवैक्यभावाभावात् कामो दुर्ल्लङ्घ्यः उद्यतः क्षणमात्रमपि प्रतिबद्धश्चेत् प्रतिबन्ध
हन्तीति नारदः सुन्दोपसुन्दकथामुक्त्वा प्रत्येकं वर्षमात्रभोगाय कालव्यवस्थां निरूपितवान् तन्मध्ये यद्येन भुज्मानामन्यः पर
स वर्षमात्रं तीर्थयात्रां कुर्यादिति। ततः कदाचित् कश्चिद् ब्राह्मणः चौरैरपहृतगोधनः अर्जुनं प्रोवाच मदीया गावः संरक्ष्या इति
शस्त्रागारे युधिष्ठिरो द्रौपद्या स्थितः। ततः कार्यस्यावश्यकत्वात् विलम्बासहिष्णुत्वाच्च व्यस्थां जानन्नपि शस्त्रगृहे प्र
रममाणौ दृष्ट्वापि शस्त्राणि गृहीत्वा चौरान् हत्वा ब्राह्मणाय गाः दत्तवान्। ततो युधिष्ठिरेण निवारितोऽपि कामादेव दर्शने

सत्यवाक्यत्वात् भगव
एकाकी पर्यटने वा प्र
स्वभागमन्यो नेष्यतीति
भविष्यतीति प्रसह्य कन्य
भवति पर्वणि क्षौरं विधा
निषिद्धमिति वार्षिकान्
सम्भवति ततः अज्ञैरेव
भगवदिच्छया च अजानत
। बलभद्रोऽपि परमहंसं
नोत्पन्ना। सादृश्यं प्रतिभात

शुकोक्तिः। अर्जु
स्वस्य मातुलेयीं मातुलकन्
द्वारकामायात् ॥२-३॥ तत्र
रामेण च सोऽभीक्ष्णं मुहुर्मुहु

प्रभुः विजये सम
तत्र स आत्मनो मातुलेयी
दास्यन्तीत्यशृणोदित्यन्वयः
द्वारकामगात् ॥३। पौरैः अ
आषाढाद्याश्विनान्तांश्चतुरो मा

अर्जुन इति युग्मम्। प्र
आत्मनो मातुलेयीं मातुलकन्यां
शेषषष्ठ्या समासः। तां जिहीर्षु
विधाय द्वारकामाजगाम ॥२-३॥
सोऽर्जुनो वार्षिकान् आषाढाद्याश्वि

अर्जुन इति युग्मम्। आ
दास्यन्तीति सोऽर्जुनः अशृणोत् ॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

त्यवाक्यत्वात् भगवदिच्छया तीर्थयात्रार्थं प्रवृत्तः । तदाह अर्जुनस्तीर्थयात्रायामिति । ततः अवनीं पर्यटन् प्रभुः समर्थः हरणे काकी पर्यटने वा प्रभासं गतः किञ्चिदशृणोत्तदाह-मातुलेयीमिति । मातुलस्यैव योषा भागस्ते पैतृष्वसायामिवेति श्रुतेः । भागमन्यो नेष्यतीति आत्मनो मातुलेयीं रामो दुर्योधनाय दास्यतीति सोऽपि कलित्वात् अधर्महेतुरिति तस्यापि लौकिक एव भविष्यतीति प्रसह्य कन्याहरणत्वे शुद्धधर्मत्वं च भविष्यतीति भोगार्थमेव तां लिप्सुः यतिर्भूत्वा यत्र कस्यापि कामसम्भावनैव न भवति पर्वणि क्षौरं विधाय पीठादिद्वात्रिंशत्पदार्थपरिग्रहं कृत्वा त्रिदण्डी सन् द्वारकामगात् ॥२-३॥ ततो वर्षाकाले यतेः पर्यटनं निषिद्धमिति वार्षिकान् मासान् अवात्सीत् । ननु कृत्रिमवेषे किं धर्मकरेनेत्यत आह-स्वार्थसाधक इति । यथैव तस्या हरणं सम्भवति ततः अज्ञैरेव सर्वैः पौरैः सभाजितः अभीक्ष्णम् एक एव बहुवारं भिक्षार्थं कथयति रामेण च नरमायया मोहितेन भगवदिच्छया च अजानता सभाजितः लौकिके चक्षुःप्रीतिः कथमिति तदर्थं परिचयार्थं पश्चाद्वरणसिद्ध्यर्थं च तस्याज्ञानं निरूप्यते बलभद्रोऽपि परमहंसं तं ज्ञात्वा तत्र हेतुभिः विचारो न कर्तव्य इति शास्त्रमेवावलम्ब्य तूष्णीं स्थितः अतस्तत्राधर्मजिज्ञासा नेत्यत्र । सादृश्यं प्रतिभातमपि धर्मज्ञानस्य बलिष्ठत्वात् न प्रत्यभिज्ञासाधकं जातम् ॥४॥

सुबोधिनीसारः

शुकोक्तिः । अर्जुन एकः तीर्थयात्रायां परिभ्रमन् भूमिं प्रभासं गतः सोऽशृणोज्जनेभ्यः । किमित्यत आह । आत्मनः अस्य मातुलेयीं मातुलकन्यां तां रामो दुर्योधनाय दास्यति अपरे परस्मै नेति । तल्लिप्सुः तत्कामुकोऽर्जुनः स यतिर्भूत्वा त्रिदण्डी द्वारकामायात् ॥२-३॥ तत्र पुरि वार्षिकान् मासान् चतुरोऽवात्सीत् स्वार्थसाधकः कन्यां प्रेप्सुः पुरजनैरजानता कपटवेषमविदुषा रामेण च सोऽभीक्ष्णं मुहुर्मुहुः प्रशंसितः ॥४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रभुः विजये समर्थः अर्जुनः तीर्थयात्रायां निमित्तभूतायामवनीं पृथ्वीं पर्यटन् प्रभासं नाम तीर्थं प्रति गतः । तत्र स आत्मनो मातुलेयीं मातुलकन्यां सुभद्रां रामो दुर्योधनाय दास्यति, अपरे वसुदेवादयस्तु तां तस्मै न दास्यन्तीत्यशृणोदित्यन्वयः ॥२॥ तल्लिप्सुः तां जिहीर्षुरर्जुनः यतिर्भूत्वा रामं वञ्चयितुं पूज्यतमं त्रिदण्डिवेषं विधाय द्वारकामगात् ॥३। पौरैः अजानता रामेण चाभीक्ष्णं सत्कृतः स्वार्थं कन्यां साधयतीति तथाभूतः सोऽर्जुनो वार्षिकान् आषाढाद्याश्विनान्तांश्चतुरो मासांस्तत्र द्वारकायां न्यवात्सीदित्यन्वयः ॥४॥

अन्वितार्थप्रकाशिका

अर्जुन इति युग्मम् । प्रभुः अर्जुनः तीर्थयात्रायां निमित्तभूतायामवनीं पृथ्वीं पर्यटन् प्रभासं नाम तीर्थं प्रति गतः । तत्र सः आत्मनो मातुलेयीं मातुलकन्यां सुभद्रां रामो दुर्योधनाय दास्यति अपरे वसुदेवादयस्तु तां तस्मै न दास्यन्तीत्यशृणोत् तल्लिप्सुः । षष्ठ्या समासः । तां जिहीर्षुरित्यर्थः । अर्जुनः यतिर्भूत्वा रामं वञ्चयितुं भिक्षाव्याजेनान्तःपुरं प्रवेष्टुं च पूज्यतमं त्रिदण्डिवेषं विधाय द्वारकामाजगाम ॥२-३॥ तत्रेति । पौरैः अजानता रामेण चाभीक्ष्णं सत्कृतः स्वार्थं सुभद्राविवाहं साधयतीति तथाभूतः सोऽर्जुनो वार्षिकान् आषाढाद्याश्विनान्तांश्चतुरो मासांस्तत्र द्वारकायां न्यवात्सीत् ॥४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अर्जुन इति युग्मम् । आत्मनः स्वस्य मातुलेयीं सुभद्रां दुर्योधनाय रामो दास्यति । अपरे वसुदेवश्रीकृष्णादयः तस्मै तां न दास्यन्तीति सोऽर्जुनः अशृणोत् ॥२-३॥ अजानता रामेण च सभाजितः सत्कृतः ॥४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एतत्प्रस्तौति मुनिरर्जुन इत्यादिनाऽथान्यदपीत्यतः प्राक्तनेन ग्रन्थेन ।। अर्जुन इति ।। दुर्योधनायेति च ।। तीर्थयात्रायां तीर्थयात्रानिमित्तमित्यर्थः । अवनीं पृथ्वीं पर्यटन् प्रभुः समर्थः सः अर्जुनः प्रभासं प्रभासनामतीर्थं गतः सन् आत्मनः स्वस्य मातुलेयीं मातुलसुतां तां सुभद्रां रामः दुर्योधनाय दास्यति दातुमुद्युक्तो जातोऽस्तीत्यर्थः । अपरे वसुदेवादयस्तु न इति अश्रणोत् । वसुदेवाद्यनुमतिमन्तरेणापि रामो दुर्योधनाय दातुमुद्युक्तवानित्यश्रणोदित्यर्थः । तल्लिप्सुः तां जिहीर्षुरित्यर्थः । सोऽर्जुनः त्रिदण्डी यतिः भूत्वा त्रिदण्डिवद्यतिवेषं कृत्वेत्यर्थः । द्वारकामगादगमत् ।।२-३।। तत्रेति । तत्र द्वारकायां स्वार्थसाधकः सः अर्जुनः वार्षिकानाषाढाद्यानाश्विनान्तांश्चतुरो मासानवात्सीत् वै । मासचतुष्टयपर्यन्तमुषितवानेवेत्यर्थः । कथम्भूतः सन् पौरैः पुरवासिभिः महात्मना रामेण च अभीक्ष्णं वारं वारं सभाजितः सम्मानितोऽवात्सीत् ।।४।।

कृष्णप्रिया

श्रीशुक्राचार्यजीने कहा कि समर्थ अर्जुनजी एक साल के लिये तीर्थयात्रा करने निकले थे, उनके जीवनमें एकबार ऐसा हुआ कि धर्मराज युधिष्ठिर के आन्तःपुरमें द्रौपदीजी थी, फिरभी परवश प्रवेश करना पडा। पांच भाईयोंमें परस्पर प्रेम बना रहे ऐसा सोचकर देवर्षि नारदजीने नियम बनाया कि द्रौपदी एक एक साल क्रमानुसार पांच भाईयों के साथ निवास करे और उस समय अन्तःपुरमे कोई भाई प्रवेश न करें, उसी प्रकार व्यवस्था चल रही थी तब अर्जुनजीने एक ब्राह्मण की गौ रक्षा हेतु गांडव धनुष्य लेने के लिये धर्मराज के अन्तःपुरमें प्रवेश करना पडा, उस समय द्रौपदी धर्मराजा के अन्तःपुरमें थी, नियम भंग हुआ अतः अर्जुनजी तीर्थयात्रा करने चले, धर्मराजा ने मना किया यह सो आपद्धर्म था, अतः तीर्थयात्रा का प्रयोजन नही है, किन्तु अर्जुनजी तीर्थयात्रामें निकल पडे, समर्थ होने से अकेले ही विचरण करते थे, रास्तेमें प्रभासक्षेत्रमें समाचार मिला कि श्रीसुभद्राजी को केवल बलभद्रजी दुर्योधन को देत्ना चाहते है, उसमें कोई सुभद्रा स्वयं संमत नहीं है, अतः सुभद्राजी के साथ विवाह करने हेतु सोचने लगे अतः यह कार्य सिद्धि हेतु त्रिदंडी संन्यासी बनकर द्वारिकामें आकर बस गये ।।२-३।। एकदिन ऐसा हुआ कि बलभद्रजी को बहन सुभद्राजी के व्रतपूर्ति के लिये कोई अतिथि न मिला, अतः यह दंडी सन्यासी श्रेष्ठ अतिथि है, ऐसा समजकर अर्जुनजी को भीषा ग्रहण करने ले आये, और बलभद्रजीने अतिशय श्रद्धापूर्वक भिक्षा कराई ।।४।।

एकदा [1]गृहमानीय आतिथ्येन निमन्त्र्य तम् । श्रद्धयोपहृतं भैक्ष्यं बलेन बुभुजे किल ।।५।।
सोऽपश्यत्तत्र महतीं कन्यां [2]वीरमनोहराम् । प्रीत्युत्फुल्लेक्षणस्तस्यां [3]भावक्षुब्धं मनो दधे ।।६।।
सापि तं चकमे वीक्ष्य नारीणां हृदयंगमम् । हसन्ती व्रीडितापांगी तन्न्यस्तहृदयेक्षणा ।।७।।
तां परं समनुध्यायन्नन्तरं प्रेप्सुरर्जुनः । न लेभे शं भ्रमच्चित्तः कामेनातिबलीयसा ।।८।।

कर्दमक्षमा

एकदा, आतिथ्येन, तम्, निमन्त्र्य, गृहम्, आनीय, बलेन, श्रद्धया, भैक्ष्यम्, उपहृतम्, किल, बुभुजे ।।५।। तत्र, सः, वीरमनोहराम्, महतीम्, कन्याम्, अपश्यत्, प्रीत्युत्फुल्लेक्षणः, तस्यां, भावक्षुब्धम्, मनः, दधे ।।६।। सा, अपि, हसन्ती, व्रीडितापाङ्गी, तन्न्यस्तहृदयेक्षणा, नारीणम्, हृदयङ्गमम्, तम्, वीक्ष्य, चकमे ।।७।। परम्, अन्तरम्, प्रेप्सुः, अर्जुनः, ताम्, समनुध्यायन्, अतिबलीयसा कामेन, भ्रमच्चित्तः, शम्, न, लेभे ।।८।।

---

[1] मानिन्यं-गो. प्रे. टी. । [2] धीरमनोहरा-इति कस्यचित् ; मनोरमां-वीर. । [3] स्मरक्षु-गो. प्रे. टी. ।

तमातिथ्येन निमन्त्र
क्षुभितं मनो दधे ।।६।। व्री
प्राप्तुमिच्छुः कामेन भ्रमच्चित्

सन्ध्यभाव आर्षः
साऽपि कन्याऽपि । तं त्रिदण्

एकदा चतुर्मास्यान
कामादिजयसमर्थस्यार्जुनस्या
दृष्ट्वा नायं यतिः किन्तु कोऽपि
भावेन हर्षेण नर्मणा च हसन्ती
तैर्व्याख्याम् । तत्र रामादिपौरजनै
अथवा शं शान्तिलक्षणं सुखं त

एकदा चातुर्मास्यान्ते
गौरीति पाठे कामादिजयसमर्थान
जातकामाभूत्, पतित्वेनैच्छदिति
भावक्षुब्धं मनः संलक्ष्य कपटवे
सम्यगन्याशेषत्यागेन अनु निरन्त
वान्वयः । अर्जुनो विशुद्धकर्मापी
तथाभूतमपि । सुखमिति अन्यथा

एकदेति । बलेन रामेणैकदा
स इति । सोऽर्जुनः महतीमद्भुतां वीर
स्त्यभिप्रायेण क्षुभितं मनो दधे निहि
व्रीडयुक्तौ अपाङ्गौ नेत्रान्तौ यस्यास्सा
कन्यामेव ध्यायन्नन्तरं हर्तुमवसरं प्राप्तु

श्री
श्रीम

नायेति च ॥ तीर्थयात्रायां
तः सन् आत्मनः स्वस्य
दयस्तु न इति अशृणोत्।
यर्थः । सोऽर्जुनः त्रिदण्डी
वार्थसाधकः सः अर्जुनः
तः सन् पौरैः पुरवासिभिः

कले थे, उनके जीवनमें
वेश करना पडा । पांच
क एक साल क्रमानुसार
उसी प्रकार व्यवस्था चल
क अन्तःपुरमें प्रवेश करना
ी तीर्थयात्रा करने चले,
न्तु अर्जुनजी तीर्थयात्रामें
मिला कि श्रीसुभद्राजी को
, अतः सुभद्राजी के साथ
ामें आकर बस गये ॥२-
तिथि न मिला, अतः यह
और बलभद्रजीने अतिशय

लेन बुभुजे किल ॥५॥
वक्षुब्धं मनो दधे ॥६॥
न्यस्तहृदयेक्षणा ॥७॥
नातिबलीयसा ॥८॥

, किल, बुभुजे ॥५॥ तत्र, सः,
सा, अपि, हसन्ती, व्रीडितापाङ्गी,
ाम्, समनुध्यायन्, अतिबलीयसा,

ा. ।

श्रीधरस्वामिकृता भावार्थदीपिका

तमातिथ्येन निमन्त्र्य गृहमानीय बलेन यच्छ्रद्धयोपहृतं परिविष्टं तद्भैक्ष्यं किलार्जुनो बुभुजे इत्यन्वयः ॥५॥ भावेन रत्यभिप्रायेण
मनो दधे ॥६॥ व्रीडितापाङ्गी सव्रीडकटाक्षा तस्मिन्नेव न्यस्तं हृदयमीक्षणञ्च यया सा ॥७॥ अन्तरं हर्तुमवसरं प्रेप्सुः
कामेन भ्रमच्चित्तं यस्य सः शं रामादिसन्माननिमित्तं सुखम् ॥८-९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सन्ध्यभाव आर्षः । बलेन रामेण ॥५॥ स त्रिदण्डवेष्यर्जुनः । तत्र गृहे । तस्यां कन्यायाम् । क्षुभितं सञ्चलितम् ॥६॥
कन्याऽपि । तं त्रिदण्डिनम् । चकमे कामयामास ॥७॥ तां कन्याम् ॥८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एकदा चतुर्मास्यान्ते तन्निर्गमशङ्कया निमन्त्र्यानीय किल प्रसिद्धौ ॥५॥ महतीं प्रौढां धीरेति वीरेति च पाठे
जयसमर्थस्यार्जुनस्यापि । मनोहरां दधे निदधे ॥६॥ अन्यासामपि नारीणां मनोहरं किं पुनः स्वस्य तं वीक्ष्य विशेषेण
यतिः किन्तु कोऽपि मम पतित्वार्ह इति वैदग्ध्या प्राचीनसंस्कारेण चानुभूय तन्न्यस्ताहृदयेक्षणा सती चकमे । तत्र
नर्मणा च हसन्ती स्मितविकसितनेत्रगण्डा जाता कुलवती स्वभावेन व्रीडितापाङ्गा च जातेत्यर्थः ॥७॥ तामिति ।
। तत्र रामादिपौरजनैर्यः सम्मानः स एव निमित्तं कारणं यस्य तथाभूतमपि सुखं न लेभे सुखत्वेन न मेन इत्यर्थः ।
शं शान्तिलक्षणं सुखं तत्र हेतुर्भ्रमादिति ॥८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एकदा चातुर्मास्यान्ते । अतस्तन्निर्गमशङ्कया निमन्त्र्यानीय । किल प्रसिद्धौ ॥४॥ महतीं प्रौढाम् । धीराणामपि,
पाठे कामादिजयसमर्थानामपि मनोहराम्, दधे निदधे ॥६॥ वीक्ष्य परोक्षे लोकद्वारा श्रुतं साक्षात् दृष्ट्वा, चकमे तं प्रति
कामाभूत्, पतित्वेनैच्छदिति वा । कामस्य लक्षणान्याह-हसन्तीत्यादिविशेषणत्रयेण । यद्वा, यतिनोऽपि स्वस्मिन्
मनः संलक्ष्य कपटवेशं बुद्ध्वा तं चार्जुनमभिज्ञाय प्रहर्षेण कामेनैव वा हसन्ती ॥७॥ परं केवलं तामेव
शेषत्यागेन अनु निरन्तरं ध्यायन् कथं कदा लभेयेति, किंवा, तत्सौन्दर्यादिकं भावयन् । परमुत्तममन्तरमिति
। अर्जुनो विशुद्धकर्मापीति भावः । अन्यत्तैर्व्याख्यातम् । तत्र रामपौरजनैर्यः सम्मानः, स एव निमित्तं कारणं यस्य
। सुखमिति अन्यथा शं शान्तिलक्षणसुखम् । तत्र हेतुः-भ्रमादिति ॥८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-१३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एकदेति। बलेन रामेणैकदा आतिथ्येन हेत्वर्थे तृतीया आतिथ्यार्थं निमन्त्रितः श्रद्धयोपहृतं परिविष्टं भैक्षमन्नं बुभुजे ॥५॥
सोऽर्जुनः महतीमद्भुतां वीराणां मनो हरतीति तथा तां प्रीत्या उत्फुल्ले विकसिते ईक्षणे यस्य सः तस्यां कन्यायां भावेन
क्षुभितं मनो दधे निहितवान् स्मरक्षुब्धमिति पाठान्तरम् ॥६॥ सापीति । सापि कन्यापि तमर्जुनं वीक्ष्य व्रीडितो
अपाङ्गौ नेत्रान्तौ यस्यास्सा तस्मिन्नेव न्यस्तं हृदयमीक्षणे च यया सा चकमे अकामयत ॥७॥ तामिति । परं केवलं तां
ध्यायन्नन्तरं हर्तुमवसरं प्राप्तुमिच्छुरतिबलीयसा कामेन भ्रमच्चित्तं यस्य सः शं रामादिसम्मानजं सुखं न लेभे ॥८॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥१-१२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४-१९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

एकदा चातुर्मास्यान्ते तं निमन्त्र्यानीय बलदेवेनोपाहृतं भैक्ष्यं स बुभुजे इत्यन्वयः ॥५॥ वीरेति धीरेति च
तादृशस्याप्यर्जुनस्य मनोहरन्ती ॥६॥ तं नारीणां हृदयङ्गमं वीक्ष्य तादृशलक्षणैर्निश्चित्य नायं यतिः किन्तु मम प्रेयानेवेति स्वमन
प्रमाणीकृत्य चकमे ॥७॥ अन्तरं हर्तुमवसरं शं सुखम् ॥८॥

गूढार्थदीपिनी

तमर्जुनम्। बलेन श्रद्धया उपानीतं भैक्ष्यं भिक्षान्नं बुभुजे ॥५॥ सोऽर्जुनः। तत्र गृहे। महतीं प्राप्तकिशोरावस्थाम्।
मनो हरतीति ताम्। प्रीत्या उत्फुल्ले विकसिते लोचने यस्य सः। भावेन रत्यभिप्रायेण क्षुब्धं चञ्चलं मनो दधे मनश्चकार ॥६॥ सा
कन्यापि तं चकमे कामयामास। व्रीडितौ लज्जायुक्तौ अपाङ्गौ कटाक्षौ यस्याः सा। तस्मिन्नेव न्यस्तं हृदयमीक्षणे च यया सा ॥
परं केवलं तां कन्यामेव ध्यायन् अन्तरं हर्तुमवसरं प्रेप्सुः शं न लेभे इत्यन्वयः। कुतः कामेन भ्रमत् अस्थिरं चित्तं यस्य सः ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तमर्जुनमातिथ्येन निमन्त्र्य गृहमानीय बलेनोपहृतं परिवेष्टितं भैक्षमन्नमर्जुनो बुभुजे ॥५॥ भावेन इयं मम प
भवत्वित्यभिप्रायेण क्षुभितमाकुलम् ॥६॥ सा सुभद्रा व्रीडितौ सञ्जातलज्जौ अपाङ्गौ नेत्रप्रान्तौ यस्याः सा तस्मिन्नर्जुने न्यस्तं
हृदयमीक्षणं च यस्याः तमर्जुनं चकमे अकामयत ॥७॥ अन्तरे प्रेप्सुः हर्तुमवसरं प्राप्तुमिच्छुः ॥८-११॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

अत एव तस्या भक्त्या सभाजनमाह-एकदा गृहमानीयेति। निकटे गच्छन्तं सङ्गाद्गृहे समानीय पश्चात् आतिथ्ये
निमन्त्रणं कृत्वा पाकसिद्धिपर्यन्तं बहुकालं स्थापयित्वा यथा निलीय दर्शनं भवति कन्यायाः स्थित इत्यर्थात् तमातिथ्ये
निमन्त्र्य स्थित इति ततस्तेनैव बलभद्रेण श्रद्धयोपहृतं भैक्ष्यं बुभुजे। अयमर्थो महतः वक्तुमनुचित इति किलेत्युक्तम् ॥५॥
एतस्यापि दर्शनमाह-सोपश्यदिति। महतीं स्थूलाम् अर्जुनाद्वर्षमात्रन्यूनां यस्याः रूपेण वीराः प्राणानपि त्यजन्ति सा वीरमनोह
ततस्तस्याः दर्शनेन तद्दर्शनसहितेन प्रीत्या कृत्वा उत्फुल्लेक्षणो जातः तावता कामवशङ्गतः भावक्षुब्धमनो दधे ॥६॥ अकामय
ग्रहणं न सम्भवतीति तस्या अपि भावो निरूप्यते-सा पि तं चकम इति। सौन्दर्येणैव तस्याः मनोहरणं प्रथमतो हसन्ती
व्रीडितापाङ्गी तस्मिन्नेव न्यस्तं हृदयमीक्षणं च यथा एवं तया वृतः ॥७॥ ततो भिक्षां विस्मृत्य तामेव धयायन् हरणार्थम
प्रेप्सुर्जातः। तादृश्योऽप्यन्तरं न लेभे। अप्रमत्तैः संरक्ष्यमाणत्वात् अत्र भारतोक्तमधिकमपि ज्ञातव्यं भगवतानीतो देवकीवसुदेव
ततस्ताभ्यां सा कन्या दत्ता ततः अतिबलीयसा कामेन सम्भ्रमच्चित्तो जातः ततो भगवान् दयालुः यात्रां कल्पयीत्वा पुराद्बहि
निस्सारितवान्। ततो महत्यां सर्वेषामुत्सववैयग्र्ये पूर्वोक्तिन्यायेन पित्रोरनुमतः कृष्णस्य च ततो महारथः अज्ञानि
समर्थः दुर्गनिर्गतां रथस्थां तामहरत् ॥८-९॥

सुबोधिनीसारः

एकस्मिन् दिने आतिथ्येन तं यतिवेषमामन्त्र्य गृहमानीय बलेन रामेण श्रद्धयोपाहृतं दत्तं भैक्ष्यमोदनादि बुभुजे कि
॥५॥ तत्र गृहे महतीं तरुणीं वीराणां मनोहारिणीं कन्यां सोऽर्जुनोऽपश्यत्। प्रीत्युत्फुल्ले ईक्षणे यस्य स तस्यां कन्यायां
रत्यभिप्रायेण क्षुब्धं विकृतं मनो दधे ॥६॥ नारीणां स्त्रीणां हृदयङ्गमं प्रियं तमर्जुनं वीक्ष्य दृष्ट्वा हसन्ती, व्रीडितौ लज्जितौ अ
यस्याः, तस्मिन् यतौ न्यस्तमर्पितं हृदयमीक्षणे यया सा चकमे उवास ॥७॥ तां सुभद्रां परं केवलं समनुचिन्तयन् अन्तरं हर्तुं
प्रेप्सुरिच्छुरर्जुनो भ्रमच्चित्तो बलीयसा कामेन शं सुखं स्त्रीसम्भोगजं न प्राप ॥८॥

एकदा तमातिथ्ये
कामप्राबल्याश्चर्यं सूचयति, येन
तथा तां कन्यामपश्यत्, दृष्ट्वा प्री
दधे ॥६॥ व्रीडितौ व्रीडाप्रयुक्तौ
मनोहरं वीक्ष्य चकमे पतित्वेन
अतिबलीयसा कामेन भ्रमच्चित्त

एकदेति। एकदा तमा
इति। सोऽर्जुनस्तत्र गृहे महतीं क
ईक्षणे यस्य सः तस्यां कन्यायां
नेत्रान्तौ यस्याः सा तस्मिन्नेव न्यस्त
॥७॥ तामिति। परं केवलं तां कन
यस्य सः शं रामादिसन्मानजनितं

श्री

आतिथ्येन तमर्जुनं निमन्त्र
क्षुब्धं क्षुभितं मनः। तस्यां सुभद्राय
प्रतिरूपेऽर्जुने न्यस्तं हृदयम् ईक्षणं
कामेन भ्रमच्चित्तः सन् शं सुखं न

एकदेति ॥ बलेन बलभद्रेण
किल। निमन्त्रित इति पाठे निमन्त्रितो
महतीमद्भुताम्, वीराणां मनो हरतीति त
कन्यायां भावेन रत्यभिप्रायेण क्षुब्धं क्षु
हृदयङ्गमं, तं वीक्ष्य व्रीडायुक्तावपाङ्गौ
तामेव अकामयत ॥७॥ तामिति ॥ परं के
कामेन भ्रमच्चित्तं यस्य सः एवंभूतः स

भिक्षाग्रहण हेतु अर्जुनजी क
होगा ऐसा जानकर वहांपर ही रुक
श्रीसुभद्राजी को देखा जब वह समी
हो गया, और स्वाप्य चला गया ॥
भी आकर्षित हुई और मधुर हास्य व

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एकदा तमातिथ्ये निमन्त्र्य गृहमानीय बलेन यच्छ्रद्धयोपहृतं परिविष्टमन्नं तदर्जुनः बुभुजे इत्यन्वयः । किलेति वल्याश्चर्यं सूचयति, येन महाशूरोऽपि भिक्षुकीकृतः ॥५॥ सोऽर्जुनस्तत्र गृहे महतीं वयोऽधिकां वीराणां मनो हरतीति तां कन्यामपश्यत्, दृष्ट्वा प्रीत्योत्फुल्ले विकसिते ईक्षणे यस्य सः तस्यां कन्यायां भावेन रत्यभिप्रायेण क्षुब्धं क्षुभितं मनो ॥६॥ व्रीडितौ व्रीडाप्रयुक्तौ अपाङ्गौ नेत्रान्तौ यस्याः सा तस्मिन्नेव न्यस्तं हृदयमीक्षणे च यस्याः सा तं नारीणां हृदयङ्गमं वीक्ष्य चकमे पतित्वेन कामितवती ॥७॥ परं केवलं तां कन्यामेव ध्यायन् अन्तरं हर्तुमवसरं प्रेप्सुः प्राप्तुमिच्छुः बलीयसा कामेन भ्रमच्चित्तं यस्य सः शं सन्मानजनितं सुखं न लेभे ॥८॥

अन्वितार्थप्रकाशिका

एकदेति । एकदा तमातिथ्येन निमन्त्र्य गृहमानीय बलेन यच्छ्रद्धयोपहृतं परिविष्टं भैक्षमन्नं तदर्जुनः बुभुजे ॥५॥ स सोऽर्जुनस्तत्र गृहे महतीं कौमारमतिक्रान्तां वीराणां मनो हरतीति तथा तां कन्यामपश्यत् । दृष्ट्वा प्रीत्योत्फुल्ले विकसिते यस्य सः तस्यां कन्यायां भावेन रत्यभिप्रायेण क्षुब्धं क्षुभितं मनो दधे ॥६॥ सापीति । व्रीडितौ व्रीडाप्रयुक्तौ अपाङ्गौ यस्याः सा तस्मिन्नेव न्यस्तं हृदयमीक्षणे च यस्याः सा तं नारीणां हृदयङ्गमं मनोहरं वीक्ष्य चकमे पतित्वेन कामितवती तामिति । परं केवलं तां कन्यामेव समनुध्यायन् अन्तरं हर्तुमवसरं प्रेप्सुः प्राप्तुमिच्छुः अतिबलीयसा कामेन भ्रमच्चित्तं सः शं रामादिसन्मानजनितं सुखं न लेभे ॥८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आतिथ्येन तमर्जुनं निमन्त्र्य बलेन श्रद्धयोपाहृतं दत्तं भैक्षं पक्वभिक्षान्नं सः बुभुजे ॥५॥ भावक्षुब्धः भावेनरतिभावेन क्षुभितं मनः । तस्यां सुभद्रायां दधे ॥६॥ हृदयङ्गमं मनोहरं व्रीडिता कुलीनत्वात् सलज्जाकटाक्षा यस्याः सा तस्मिन् ऽर्जुने न्यस्तं हृदयम् ईक्षणं च यया सा ॥७॥ तामेव परं केवलं समनुध्यायन् सन् ॥ अन्तरं हरणावकाशं प्रेप्सुः भ्रमच्चित्तः सन् शं सुखं न लेभे ॥८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एकदेति ॥ बलेन बलभद्रेण एकदा आतिथ्येन निमन्त्र्य तं गृहमानीय श्रद्धया उपहृतं परिविष्टं भैक्ष्यं सोऽर्जुनः बुभुजे निमन्त्रित इति पाठे निमन्त्रितो यतिः बलेन श्रद्धया उपहृतं बुभुजे इत्यन्वयः ॥५॥ स इति ॥ स यतिवेषधरोऽर्जुनः, तत्र गृहे, तां, वीराणां मनो हरतीति तथाविधां, कन्याम् अपश्यत् । प्रीत्या उत्फुल्ले विकसिते ईक्षणे यस्य तथाविधः सन्, तस्यां भावेन रत्यभिप्रायेण क्षुब्धं क्षुभितं मनः दधे निहितवान् । स्मरक्षुब्धमिति वा पाठः ॥६॥ सेति ॥ सा कन्या अपि, नारीणां तं वीक्ष्य व्रीडायुक्तावपाङ्गौ नेत्रप्रान्तौ यास्याः सा तस्मिन्नर्जुन एव न्यस्तं हृदयमीक्षणं च यया हसन्ती सती च चकमे अकामयत ॥७॥ तामिति ॥ परं केवलं तां कन्यां समनुध्यायन् अनन्तरं हर्तुमवसरं प्रेप्सुः प्राप्तुमिच्छुः अर्जुनः अतिबलीयसा भ्रमच्चित्तं यस्य सः एवंभूतः सन् शं रामादिकृतसम्मानजं सुखं न लेभे ॥८॥

कृष्णप्रिया

भिक्षाग्रहण हेतु अर्जुनजी को आदर के साथ बलभद्रजी लाये थे, पाक सामग्री सिद्ध हो रही थी विलंब ऐसा जानकर वहांपर ही रुक गये, तब वीर पुरुष के मन का हरण करने वाली लग्नयोग्य उम्र वाली जी को देखा जब वह समीप आयी तब अर्जुनजी के नयनकमल प्रफुल्लित हो गये और सुभद्राजीमें मन और स्वाप्य चला गया ॥६॥ नारीजन का मनहरण करने वाले वीर अर्जुनजी को देखकर श्रीसुभद्राजी हुई और मधुर हास्य करने लगी मन ही मन मुस्कुराकर अर्जुनजी में मन नयन लगाकर लज्जामय

कृष्णप्रिया

कटाक्ष से तीर्यक द्रष्टि से निरखने लगी ॥७॥ अब अर्जुनजी का मन भीक्षामें न रहा किन्तु सुभद्रामें संलग्न हो गया, येनकेन प्रकार सुभद्रा का हरण विषयक् सोचने लगा, बलवान कामदेवने भी अर्जुनजी विह्वल कर दीया, अर्जुनजी की उत्कंठा बढने लगी, भगवानने स्वयं इस अवसर पर बहन सुभद्रा की प्रसन्ना हेतु बडी देवयात्रा की योजना की, बडी यात्रामें सुभद्राजी जाने के लिये रथमें बिराजमान होकर दर्ग के बहार निकल रहे थे, तब माता-पिता श्रीवसुदेव-देवकीजी की और भगवान कृष्ण की संमति ग्रहण कर अर्जुनजी सुभद्राजी का अपहरण कर चल पडे ॥८-९॥

महत्यां देवयात्रायां रथस्थां दुर्गनिर्गताम् । जहारानुमतः पित्रोः कृष्णस्य च महारथः ॥९॥
रथस्थो धनुरादाय शूरांश्चारुन्धतो भटान् । विद्राव्य क्रोशतां स्वानां [1]स्वभागं मृगराडिव ॥१०॥
तच्छ्रुत्वा क्षुभितो रामः पर्वणीव महार्णवः । गृहीतपादः कृष्णेन सुहृद्भिश्चान्व[2]शाम्यत ॥११॥
प्राहिणोत् पारिबर्हानि वरवध्वोर्मुदा बलः । महाधनोपस्करेभरथाश्वनरयोषितः ॥१२॥

कर्दमक्षमा

पित्रोः, कृष्णस्य, च, अनुमतः, महारथः, महत्याम्, देवयात्रायाम्, दुर्गनिर्गताम्, रथस्थाम्, रथस्थः, धनुः, आदाय, भटान्, शूरान्, च, आरुन्धतः, विद्राव्य, क्रोशताम्, स्वानाम्, मृगराट्, स्वभागम्, इव, जहार ॥९-१०॥ तत्, श्रुत्वा, पर्वणि, महार्णवः, इव, क्षुभितः, रामः, सुहृद्भिः, कृष्णेन, च, गृहीतपादः, अन्वशाम्यत ॥११॥ बलः, मुदा, वरवध्वोः, पारिबर्हाणि, महाधनोपस्करेभरथाश्वनरयोषितः, प्राहिणोत् ॥१२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आ समन्ताद्रुन्धतः आवरणं कुर्वतः ॥१०-११॥ पारिबर्हाणि वरवध्वोः प्रीतिदेयानि ॥१२-१३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पित्रोर्देवकीवसुदेवयोः । अनुमतोऽङ्गीकृतः । श्रीकृष्णेनैकान्ते सुभद्रामिच्छसि चेत्तर्हि देवयात्रागतां गृहीत्वा गच्छानुम चैतन्मम पित्रोश्च विना राममिति स्पष्टं भारते ॥९-१०। तत्सुभद्राहरणम् । पर्वणि पूर्णिमायाम् ॥११-१२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

महत्यामिति युग्मकम् । देवयात्रायां देवोत्थानलक्षणायां पित्रोः पितृभ्यां श्रीवसुदेवदेवकीभ्यां चातुर्याच्छ्रीकृष्णेना-नुमिताभ्यामिति ज्ञेयम् । पश्चात् कृष्णस्य श्रीकृष्णेन चानुमतः अत एव रथस्थां तस्मै स्वरथसामग्रीं दातुं श्रीभगवता स्वरथमारोपितामित्यर्थः । तच्चादिपर्वणि ज्ञेयम् । ननु तथापि यदुकुलमध्यतस्तत् दुष्करम् । महारथो वीरश्रेष्ठः श्रीभगवत्प्रियसखत्व ॥९-१०॥ अनुसान्त्वितः प्रियोक्त्यानुनीय प्रोबधितः । अन्वशाम्यतेति पाठोऽपि स एवार्थः ॥११॥ अत एव बले बलेनाधिक्यात्तन्नामापि मुदा पारिबर्हाणि प्राहिणोदिति सुहृदां श्रीकृष्णस्य चनुमत्यैव तेन सा हृतेति बुद्ध्वेति भावः । पारिबर्हाण्येव महेति । महाधना महामहामूलाः याः उपस्कारादयस्ताः तत्रोपस्कारा विचित्रालङ्कारपर्यङ्कादयः ॥१२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

महत्यामिति देवोत्थानमहोत्सवाद्दुर्गतो निर्गताहमिति सुखहार्यत्वमुक्तम् । ननु तथापि तादृशं साहसं कथमुपपद्यते (उप [ग] ।) ? तत्राह-अनुमत इति । तद्यात्रायां तेन प्रकारेण हरणाद्यर्थं निभृतमनुज्ञातोऽनुमोदितो वा, श्रीवसुदेव-देवकीभ्यां श्रीकृष्णेन

---

१. स्वबर्लिं-वीर. । २. श्चानुसान्त्वितः-गो. प्रे. टी. । ३. एतदारभ्याऽऽध्यायसमाप्ति एकनवतितमोऽध्यायः ॥९१॥-विज.।

ननु तथापि यदुकुलमध्यतः
रथस्थो धनुरादायेति तदनुमत्या
प्रापय्य स्वानां बन्धूनां क्रोशत
सूचितम् । तत्रैव दृष्टान्तः-स्वभ
सर्वलोकरमणोऽपि भगवान् क्षु
क्षोभस्याधिक्यमपि ध्वनितम् ।
पाठान्तरे सुहृद्भिः श्रीगदादिभिश्च
इति, सुहृदां श्रीकृष्णस्य चानुमत
महामूल्या या उपस्कारादयस्ताः ।
स्वर्णरत्नादय उपस्कारादयश्च ताः,

एवं स्थिते कदाचिन्मह
प्राकाराद्बहिर्निर्गतां रथस्थां कन्यां
कृत्वा स्वानां यदूनां क्रोशतामाक्र
तदिति । तद्धरणं श्रुत्वा तावत्पर्वी
शान्तो बभूव ॥११॥ किञ्च प्राहि
उपस्कराः अलङ्काराः येषां तानि

देवयात्रायां देवोत्थानोत्सव
षष्ठी ॥१०-११॥ पारिबर्हाणि प्रीति

महत्यामिति युग्मम् । मह
आ सर्वतो रुन्धतः शूरान् विद्राव्य प
प्रेषयामास तथा महाधनोपस्कराः अ

तमर्जुनमातिथ्येन निमन्त्र
भवत्वित्यभिप्रायेण क्षुभितमाकुलम्

किन्तु सुभद्रामें संलग्न
अर्जुनजी विह्वल कर
ा की प्रसन्नता हेतु बडी
र दर्ग के बहार निकल
कर अर्जुनजी सुभद्राजी

स्य च महारथः ॥९॥
भागं मृगराडिव ॥१०॥
द्भिश्चान्वशाम्यत ॥११॥
श्वनरयोषितः ॥१२॥

म्, रथस्थः, धनुः, आदाय,
-१०॥ तत्, श्रुत्वा, पर्वणि,
मुदा, वरवध्वोः, पारिबर्हाणि,

-१३॥

त्रयात्रागतां गृहीत्वा गच्छानुमतं
-१२॥

कीभ्यां चातुर्याञ्छ्रीकृष्णेनैवा-
वरथसामग्रीं दातुं श्रीभगवतैव
वीरश्रेष्ठः श्रीभगवत्प्रियसखत्वात्
ार्थः ॥११॥ अत एव बलो
द्ध्वेति भावः । पारिबर्हाण्येवाह-
१२॥

शं साहसं कथमुपपद्यते (उपपद्येत
सुदेव-देवकीभ्यां श्रीकृष्णेन च।

ऽध्यायः ॥९१॥-विज.।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तथापि यदुकुलमध्यतः कथं सम्भवेत् ? तत्राह-महारथः,- भगवच्छ्रीनरावतारत्वात्, तत्रापि भगवत्पैतृष्वसेयत्वात् ॥९॥ धनुरादायेति तदनुमत्या प्रभासे निह्नुतस्य स्वरथादेरेवानयनात्। शूरान् रथाद्यारूढान् यदुवीरान् भटांश्च पदातीन् विद्राव्य भङ्ग स्वानां बन्धूनां क्रोशतामुच्चैरार्तनादं कुर्वताम्, अनादरे षष्ठी । यद्वा, क्रोशत्स्वपि सत्स्वित्यर्थः । इति तस्य निर्भयत्वं तत्रैव दृष्टान्तः-स्वभागमिति, मृगाणां मध्याद्यथा सिंहः स्वभोग्यं हरति, तद्वदित्यर्थः ॥१०॥ तत् क्रोशनं हरणं वा, रामः रमणोऽपि भगवान् क्षुभितः क्रोधोद्रेकेण त्यक्तधैर्यः सन् । अक्षोभस्यापि कदाचित् क्षोभे दृष्टान्तः-पर्वतीवेति । अनेन याधिक्यमपि ध्वनितम् । सुहृद्भिः श्रीवसुदेवादिभिरनुसान्त्वितः प्रियोक्त्यानुनीय प्रबोधितश्च सन्, प्राहिणोदिति परेणान्वयः । सुहृद्भिः श्रीगदादिभिश्च गृहीतपादः सन्ननुक्रमेणाशाम्यत्। बल इति तत्तत्प्रस्थापने महासमर्थ इति, किंवा बुद्धिबलेनाधीक सुहृदां श्रीकृष्णस्य चानुमत्यैव तेन सा हृतेत्यबुद्ध्यतेति भावः । अत एव मुदा प्राहिणोत्। पारिबर्हाण्येवाह-महेति। महाधना या उपस्करादयस्ताः । तत्रोपस्करा विचित्रवस्त्रालङ्कारपर्यङ्कादयः, नराः पदात्यादयः, योषितो दास्यादयः, यद्वा, महाधनानि उपस्करादयश्च ताः, महाधनादीनां यथोत्तरं निकृष्टत्वं बाहुल्यं वा ज्ञेयम् ॥११-१२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-१३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवं स्थिते कदाचिन्महारथोऽर्जुनः पित्रोः कृष्णस्येवेति च कर्तरि षष्ठी देवकीवसुदेवाभ्यां कृष्णेन चानुमतः दुर्गात् र्हिर्निर्गतां रथस्थां कन्यां जहार ॥९॥ ततो रथस्थः धनुर्गाण्डीवमादाय समन्ताद्रुन्धतः शूरान् भटान् विद्राव्य पलायितान् स्वानां यदूनां क्रोशतामाक्रोशतां सतां जहारेति पूर्वेण सम्बन्धः । यथा मृगराट् सिंहः स्वबलिं स्वभागं हरति तद्वत् ॥१०॥ तद्धरणं श्रुत्वा तावत्पर्वणि महार्णव इव क्षुभितः क्रुद्ध इत्यर्थः । ततः कृष्णेन सुहृद्भिश्च गृहीतौ पादौ यस्य सः अशाम्यत बभूव ॥११॥ किञ्च प्राहिणोदिति । बलो रामः पारिबर्हाणि प्रीत्या देयानि श्रेष्ठवस्तूनि प्राहिणोत् प्रददौ महाधना अनर्घाः अलङ्काराः येषां तानि इभान् गजान् रथानश्वान् पराः श्रेष्ठा योषितो दासीश्च प्राहिणोदिति सम्बन्धः ॥१२॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥१-१२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४-१९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

देवयात्रायां देवोत्थानोत्सवविहितरथयात्रायां जहारेत्यत्र हेतुः पित्रोः कृष्णस्य च अनुमतः प्राप्तानुमतिः ॥९॥ क्रोशतामित्यनादरे ॥१०-११॥ पारिबर्हाणि प्रीतिदेयानि ॥१२॥

गूढार्थदीपिनी

महत्यामिति युग्मम् । महारथोऽर्जुनः धनुरादाय रथस्थः किं कुर्वतां स्वानां यदूनां क्रोशतां शपतां सताम् । किं कृत्वा । रुन्धतः शूरान् विद्राव्य पलायितान् कृत्वा ॥९-१०॥ तत् हरणम् ॥११॥ बलः पारिबर्हाणि कन्यादेयद्रव्याणि प्राहिणोत् तथा महाधनोपस्कराः अनर्घ्यसामग्र्यः इभादयश्च तान् । नराः दासाः तान् योषितः दासीश्च प्राहिणोत् प्रेषयामास ॥१२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तमर्जुनमातिथ्येन निमन्त्र्य गृहमानीय बलेनोपहृतं परिवेष्टितं भैक्षमन्नमर्जुनो बुभुजे ॥५॥ भावेन इयं मम पत्नी भिप्रायेण क्षुभितमाकुलम् ॥६॥ सा सुभद्रा व्रीडितौ सञ्जातलज्जौ अपाङ्गौ नेत्रप्रान्तौ यस्याः सा तस्मिन्नर्जुने न्यस्तं

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हृदयमीक्षणं च यस्याः तमर्जुनं चकमे अकामयत ॥७॥ अन्तरे प्रेप्सुः हर्तुमवसरं प्राप्तुमिच्छुः ॥८-११॥ पारिबर्हाणि प्रीत्या दे वस्तूनि महाधनाः बहुधनशुल्काः उपस्कराः अलङ्काराः येषां तान् इभान् रथान् अश्वान् योषितो दासीश्च प्राहिणोत् ॥१२-१३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो हरणार्थं तस्य पराक्रममाह-रथस्थ इति । आ समन्तात् रुन्धतः रक्षकभटान् विद्राव्य सह समागतानां बन्धू आक्रोशतां सतामेव अज्ञानादाक्रोशं कुर्वतामिति स्वभागत्वादुपेक्षा निषिद्धेति मृगराडिव समर्थः जहारेति पूर्वेणैव सम्बन्धः ॥ ततो हृतायां तस्यां बलभद्रेण श्रुतो वृत्तान्तः पारिबर्हप्रेषणार्थमयमुद्यमो निरूप्यते । ततो रामः तद्धञ्चनादिकं श्रुत्वा क्षुभि तद्वधार्थमेव प्रवृत्तः । दृष्टान्तेन तस्य महत्त्वं समयश्च तादृश इति सूचयति-ततो भगवता परिसान्त्वितः वाक्यैरनेकविधैः—

"अस्माकं सर्वथा देया हृता नन्यैश्च गृह्यते । वधे भर्तृविहीना स्यात् योग्यश्चायं विशेषतः ॥
कार्यार्थं वञ्चनं तस्य न दोषायेति मे मतिः । अज्ञानं स्वस्य दोषोऽपि कृत्रिमो न हि बाधकः ।
ततो गृहीतपादश्च तनैवाभूद्बलः स्वयम् ॥"

तथा सुहृद्भिरपि गृहीतपादः अन्वशाम्यत । ततो भगिन्यां स्नेहातिशयात् पारिबर्हाणि प्राहिणोत् । तान्याह-महाधनी गृहोपकरणानि चतुरङ्गिणी सेना दास्यश्च प्रस्थापितवान्—

"भक्ताय भगवान् कृष्णो भगिनीं दत्तवानिति । किमाश्चर्यं यतः कर्मज्ञाननिष्ठामवाप्तयोः ॥
स्वयं गत्वाऽतिमहता समाजेन समावृतः । विप्रक्षत्रिययोः प्रीत्या स्वात्मानं दत्तवान् स्वयम् ।
यथाभिलषितं ताभ्यां सुखं प्राप्तं हरेर्महत् । कृतार्थावपि सञ्जातौ पुनरागमनं ततः ॥"

॥११-१२॥

श्रीसुबोधिनीसारः

काकतालीयेन तत्प्राप्तिमाह । महत्यां देवस्य शिवस्य यात्रायां दुर्गान्निर्गतां रथे वर्तमानां कन्यां तत्पित्रोः प्रौढत्वात्क अनुमतकृष्णस्यानुमतो मान्यो महारथोऽर्जुनो जहार ॥९॥ रथे स्थितः धनुर्गृहीत्वाऽऽसमंततो रुन्धतो भटान् शूरान् विद्राव्य तिरस्कृ स्वानां क्रोशतां सतां मृगराट् सिंह इव ॥१०॥ तत् श्रुत्वा रामः क्षोभं प्राप्तः पर्वणि समुद्र इव कृष्णेन सुहृद्भिर्मित्रैर्गृहीतचरणो न्यव ॥११॥ वरवध्वोः पारिबर्हाणि विवेहे देयान्युपस्करणानि चतुरङ्गं बलं दासीश्च मुदा हर्षेण प्राहिणोत् ॥१२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कर्तरि षष्ठी । पित्रोः देवकीवसुदेवाभ्यां कृष्णेन चानुमतोऽर्जुनः कदाचिद्देवयात्रायां निमित्तभूतायां दुर्गात् प्राकाराद्बहिर्नि रथस्थां कन्यां जाहार । तत्र सामर्थ्यमाह-महारथ इति ॥९॥ रथस्थो धनुरादाय आ सर्वतो रुन्धतः शूरान् भटान् विद्राव्य पला कृत्वा स्वानां यदूनां क्रोशतां जहारेति पूर्वेणान्वयः । यथा मृगराट् सिंहः स्वभागं हरति तद्वदिति ॥१०॥ तत् हरणं श्रुत्वा क्षुभितः क्रुद्धः, ततः सान्त्वयता कृष्णेन सुहृद्भिरन्यैश्च गृहीतौ पादौ यस्य सोऽन्वशाम्यत शान्तो जातः ॥११॥ शान्तश्च मुस बलः पारिबर्हाणि प्रीत्या देयानि श्रेष्ठवस्तूनि तथा महाधना अनर्घ्या उपस्करा अलङ्कारा येषां तान् इभान् गजान् रथान् अश्वान् योषितो दासीश्च वरवध्वोः प्राहिणोदिति सम्बन्धः । तदा च यादवाः पाण्डवाश्च सर्वे प्रीत्या संहृष्टा बभूवुः ॥१२॥

अन्वितार्थप्रकाशिका

महत्यामिति युग्मम् । कदाचिन्महत्यां देवयात्रायां निमित्तभूतायां पित्रोः देवकीवसुदेवाभ्यां कृष्णेन च । शेषं स्प अनुमतः महारथो रथस्थोऽर्जुनः धनुराम्नायार्जुनः आ सर्वतो रुन्धतः शूरान् भटान् विद्राव्य पलायितान् कृत्वा स्वानां यदूनां

अन्वितार्थप्रकाशिका

दुर्गात् प्राकाराद्बहिर्निर्गतां रथस्थां तस्मै रथसामग्रीं दातुं भगवतैव रथमारोपितां कन्यां जहार। यथा मृगराट् सिंहः स्वभागं हरति ।।९-१०।। तदिति। तत् हरणं श्रुत्वा रामः क्षुभितः क्रुद्धः ततः सान्त्वयता कृष्णेन सुहृद्भिरन्यैश्च गृहीतौ पादौ यस्य सोऽन्वशाम्यत जातः। तडार्षः ।।११।। प्राहिणोदिति सार्धम्। कृष्णानुमत्यैव तेन हृतेति न तस्य दोष इति हेतोः मुदा युक्तो बलः पारिबर्हाणि देयानि श्रेष्ठवस्तूनि तथा महाधना अनर्घ्या उपस्करा अलङ्कारा येषां तान् इभान् गजान् रथान् अश्वान् नरान् योषितो दासीश्च प्राहिणत्। तदा च यादवाः पाण्डवाश्च सर्वे प्रीत्या संहृष्टा बभूवुः। इदमर्धमसार्वत्रिकम् ।।१२।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनुमतः हरणाय गुप्तं प्रेरितः ।।९।। अरुन्धतः ।। आसमन्तात् रोधनं कुर्वतः ।।१०।। शान्तोऽभूत्। अनुसान्त्वितः ।। पारिबर्हाणि वरवध्वोर्देयानि ।।१२।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

महत्यामिति ।। एवं स्थिते कदाचिदिति शेषः। महारथः अर्जुनः पित्रोर्देवकीवसुदेवयोः कृष्णस्य च कर्तरि षष्ठी। वसुदेवश्रीकृष्णैरित्यर्थः। अनुमतः सन् महत्यां देवयात्रायां दुर्गनिर्गतां रथस्थां तां जहार ।।९।। किं कृत्वा क इवेत्यत्राह ।। इति ।। रथस्थोऽर्जुनः धनुः आदाय स्वभागं मृगराट् सिंहः इव आरुन्धतः भटान् शूरांश्च विद्राव्य स्वानां क्रोशतां नादृत्येत्यर्थः। जहार ।।१०।। तदिति ।। तत् सुभद्राहरणं श्रुत्वा पर्वणि पूर्णिमायां महार्णवः इव रामः क्षुभितः। ततः सुहृद्भिश्च गृहीतौ पादौ यस्य तथाभूतः संश्च अन्वशाम्यत शान्तो बभूव ।।११।। प्राहिणोदिति ।। ततः बलः रामः मुदा पारिबर्हाणि प्राहिणोत्। पारिबर्हाणि दर्शयति। महाधना अनर्घ्या उपस्करा अलङ्कारा येषां ते ये इभा गजाश्च अश्वाश्च नराश्च दास्यश्च ताः प्राहिणोदिति सम्बन्धः। तदा यदवः पाण्डवाश्च प्रीत्याऽऽनन्देन संहृष्टा विकसितमुखाः बभूवुः ।।१२।।

कृष्णप्रिया

रथपर सवार होकर वीर अर्जुनजीने धनुष उठा लिया और जो सैनिक उन्हें रोकने के लिये आये, उन्हें मार भगा दिया। सुभद्राजी के निज जन रोते चिल्लाते रह गये और जीस प्रकार सह अपना भाग लेकर चल वैसे ही सुभद्राजी को लेकर चल पडे ।।१०।। यह समाचार सुनकर बलरामजी बहुत बिगडे वे वैसे ही क्षुब्ध जैसे पूर्णिमा के दिन समुद्र। परंतु भगवान श्रीकृष्ण तथा अन्य सद्ध संबंन्धीयोने उनके पैर पकडकर उन्हे कुछ समझया-बुझया तब वे शांत हुए ।।११।। इसके बाद बलरामजीने प्रसन्न होकर वर वधु के लिये बहुत धन, सामग्री, हाथी, रथ, घोडे और दासी-दास दहेज में भेजे ।।१२।।

श्रीशुक उवाच[1]

कृष्णस्यासीद् द्विजश्रेष्ठः श्रुतदेव इति श्रुतः। कृष्णैकभक्त्या पूर्णार्थः शान्तः कविरलम्पटः ।।१३।।
स उवास विदेहेषु मिथिलायां गृहाश्रमी । अनीहयाऽऽगता[3]हार्यनिर्वर्तितनिजक्रियः ।।१४।।
[4]यात्रामात्रं त्वहरहर्दैवादुपनमत्युत[5] । नाधिकं [6]तावता तुष्टः क्रियाश्चक्रे यथोचिताः ।।१५।।
तथा तद्राष्ट्रपालोऽङ्ग [7]बहुलाश्व इति श्रुतः । मैथिलो निरहम्मान उभावप्यच्युतप्रियौ ।।१६।।

---

[1] अभवन्प्रीतिसंहृष्य बान्धवा यदुपाण्डवाः। अथान्यदपि कृष्णस्य वात्सल्यं भक्तयोः शृणु ।।१।। अयं श्लोकोऽधिको दृश्यते-वीर. । प्रीतिसंहृष्टा यदवः पाण्डवास्तदाक''-इत्यर्धमेवाधिकं बाल. । २. वृष्णिष्वासीद्यदुश्रेष्ठः-विज. । निर्वर्तितजपक्रियः-विज. । ४. यावन्मात्रं-विज. । ५. नमत्ययम् -विज. । ६. तपसा-विज. । ७. पालोऽभूद्बहु-विज. ।

कर्दमक्षमा

श्रीशुकः, उवाच । कृष्णैकभक्त्या, पूर्णार्थः, शान्तः, कविः, अलम्पटः, श्रुतदेवः, इति, श्रुतः, कृष्णस्य, द्विजश्रे आसीत् ॥१३॥ सः, अनीहया, आगताहार्यनिर्वर्तितनिजक्रियः, गृहाश्रमी, विदेहेषु, मिथिलायाम्, उवास ॥१४॥ दैवात्, उ यात्रामात्रम्, अहरहः, उपनमति, तु, न, अधिकम्, तावता, तुष्टः, यथोचिताः, क्रियाः, चक्रे ॥१५॥ अङ्ग, तद्राष्ट्रपालः, निरहम्मा मैथिलः, बहुलाश्वः, इति, श्रुतः, अपि, तथा, उभौ, अच्युतप्रियौ ॥१६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अनीहयाऽनुद्यमेनैवाऽगतं यदाहार्यं भोज्यं तेन निर्वर्तिताः निजाः क्रियाः येन सः ॥१४॥ यात्रामात्रं शरीरादिनिर्वाहमा भोज्यमुपनमति तं प्रत्यागच्छति ॥१५॥ मिथिलस्य जनकस्य वंश्यो मैथिलः ॥१६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'यमेवैष वृणुते तेन लभ्यः' इति श्रुत्यर्थं व्यक्तीकुर्वन्नितिहासमाह-पूर्णार्थः भक्तिमन्तरेणान्यमर्थमनाकाङ्क्षमाण कृष्णलीलाप्रबन्धकर्तृत्वात्कविः । शब्दादिविषयेच्छारहितत्वादलम्पटः ॥१३॥ मिथिलायां नगर्याम् । आहर्यमित्युपलक्षणं वस्त्रे निर्वर्तिताः सम्पादिताः क्रिया भोजनाच्छादनादिरूपा नित्यनैमित्तिका वा ॥१४॥ तावता देवागतमात्रेण । उचिता अतिथिसत्कारादिरू ॥१५॥ यथा श्रुतदेवस्तत्परायणस्तथा तद्राष्ट्रपालो मिथिलाप्रान्तदेशापतिः । उभौ श्रुतदेवबहुलाश्वौ ॥१६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ स्वयमेव स्मृतिपथमागतं साक्षाद्भक्तानुग्रहमयत्वेन स्वसहयोगेन चातिचित्ताकर्षकं चत्तरितविशेषमपृष्टमप्याहत्य श्रीशुक उवाचेति । पुनरुक्तिः प्रसङ्गान्तरापेक्षया कृष्णस्येति कृष्णस्वामिको द्विजश्रेष्ठ इत्यर्थः । कृष्ण एवैकस्मिन् किंवा ए विशुद्धा या भक्तिस्तया परिपूर्णा अनादृता अपि सर्वतः सर्वांशेन वर्तमाना अर्था धर्मादयो यस्य सः स्वयं तु शान्तः श्रीभगवन्निष्ठचि यतः कविः सर्वतत्त्वज्ञः अलम्पटश्च विषयानासक्तः ॥१३॥ विदेहेषु देशेषु मिथिलायां पुर्यां श्रीभगवत्पूजालक्षणा यद्यपि लभ्यते तदपि स्वनाम्नैव यादवार्थमेव च प्रतिगृह्णाति न तु भगवन्नाम्ना नाप्यधिकमित्युत्तरार्धार्थः ॥१४॥ श्रीभगवदानुकूल्यमप्यस्तीत्याह-यात्रेति । तु एव यात्रामात्रमेव दैवादीश्वराद्धेतोः योगक्षेमं वहाम्यहमिति तद्गीतातः उत उपनमत्येव न तु कदाचिन्नोपतिष्ठतीत्यर्थः । तावतैव तुष्टः सन् यथोचिता भगवद्भक्त्यनुरूपा इत्यर्थः ॥१५॥ तथेति । तद्राष्ट्र पालो राजापि तादृश एव श्रीकृष्णभक्त्यादिना श्रुतदेवसदृश इत्यर्थः । अतो निरहम्मानः राजा त्वद्भक्तत्वाभिमानशून्यः एवोभावपि अविशेषेण अच्युतस्य भक्तानुग्रहादिगुणेभ्यश्च्युतिरहितत्वेन तन्नाम्नस्तस्य प्रियौ ॥१६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं सख्यावर्जुने श्रीभगवतोऽनुग्रहमुक्त्वा प्रसङ्गाद्भक्तवरयोरन्ययोरपि तमाह-कृष्णस्येति । श्रीशुकदेवस्योक्तौ प्रकृताप श्रीशुक उवाचेति पुनरुक्तिः प्रसङ्गान्तरापेक्षया । एवमन्यत्रापि ज्ञेयम् । श्रुतेन शास्त्रेण दीव्यति द्योतत इति श्रुतदेवाख्य विख्यातः द्विजेषु विप्रेषु श्रेष्ठः, यतः कृष्णस्य एवैकस्मिन् किंवा एका विशुद्धा या भक्तिस्तया पूर्णाः समाप्ता अर्थाः सर्वे धर्मा यस्य सः, शान्तः श्रीभगवदेकनिष्ठचित्तः (भा.११/१९/३६) 'शमो मन्निष्ठता बुद्धेः' इति भगवदुक्तेः । कविः सर्वज्ञः, अलम्प विषयानासक्तः । विशेषणानामेषां यथोत्तरं हेतुहेतुमद्भावः ॥१३॥ विदेहेषु देशेषु मिथिलायां पुर्याम्, क्रिया देवपूजादि ॥१४॥ तत्प्रकारमेवोक्तपोषण्यायेन विशदयति-यात्रेति । तु एव, यात्रामात्रमेव, दैवात् प्रारब्धवशात्, अनायासेनैवेत्यर्थः । उप उपनमत्येव, न तु कदाचिन्नोपतिष्ठतीत्यर्थः । अन्यथा श्रीभगवद्भोगाद्यसिद्ध्या दुःखोदयात् । तावतैव तुष्टः सन् यथो भगवद्भक्त्यनुरूपा इत्यर्थः ॥१५॥ तद्राष्ट्रस्य पालो राजापि, तथा तादृश एव, श्रीकृष्णभक्त्यादिना श्रुतदेवसदृश इत्यर्थः । निरहम्ममानो राजत्वाभिमानशून्यः । यद्वा, पाल-शब्देन प्रजापालनादिस्वधर्मपरत्वमपी सूचितम् । तथापि निरहम्ममानोऽयं

अतः सहर्षं सम्बोधयति
अच्युतः स्वचित्ततो विच
श्रीभगवद्दर्शने निजायोग

अनीहया गता

तदा यदवः पा
भगवतः चेष्टितं प्रस्तोतुं
तयोर्वात्सल्यमित्यतः प्रस
कृष्णे भगवत्येकया भक्त
विदेहेषु देशेषु तत्रापि मि
निजाः क्रियाः अतिथिपू
शरीरनिर्वाहकमात्रोपयुक्तम
यात्रामात्रेणैव तुष्टः उचिताः
यथाऽयं श्रुतदेवः तथा तद्राष्ट्र
उभौ श्रुतदेवबहुलाश्वौ अच्यु

''यमेवैष वृणुते तेन
शुको वदति-वृष्णिष्विति ।
शब्दादिविषयेच्छारहितः ॥१३
प्राप्तभोज्यो वा । नितरां वर्तिता
कथं शरीरयात्रास्येत्यत्राह-यावदि
तपसेति ॥१५॥ यथा श्रुतदेवः ।

अथ स्वयमेव स्मृतिपथ
विदेहेषु देशेषु ममिथिलायां पुर्याम्
सः ॥१४॥ तदप्याहार्यं दैवाद्भगव
न त्वधिकम् ॥१५॥ मिथलस्य ज

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतः सहर्षं सम्बोधयति-अङ्ग ! हे राजन्निति । अत एवोभावपि तावविशेषेणाच्युतस्य सर्वैश्वर्यपरिपूर्णस्य श्रीकृष्णस्य प्रियौ । यद्वा, अच्युतः स्वचित्ततो विच्युतिरहितो भगवानेव प्रियो ययोस्तौ, अयं तु तयोस्तथाभूतत्वे हेतुर्ज्ञेयः । अतो भक्तिविशेषविजृम्भितदैन्यभरेण श्रीभगवद्दर्शने निजायोग्यतां मन्यमानौ तदर्थमपि श्रीद्वारकां किल न प्रयाताविति ज्ञेयम् ॥१६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अनीहया गताहार्यः अनीहया स्वयं मुन्यन्नाहारः ॥१४-२०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदा यदवः पाण्डवाश्च बान्धवाः प्रीतिसंहृष्टाः प्रीतिरानन्दस्तेन संहृष्टाः विकसितमुखा बभूवुः । अथ भक्तवात्सल्यप्रयुक्तं भगवतः चेष्टितं प्रस्तोतुं प्रतिजानीते-अथेति । भक्तयोर्विषयभूतयोर्यद्वात्सल्यं तच्छृणु ॥०॥ कारणं भक्तौ कीदृशं वा तयोर्वात्सल्यमित्यतः प्रस्तौति-कृष्णस्येत्यादिना । यावदध्यायसमाप्ति ॥ श्रुतदेव इति । श्रुतः कृष्णस्य भक्त आसीत् स च कृष्णे भगवत्येकया भक्त्या पूर्णार्थः पूर्णमनोरथः अत एव शान्तः कविर्विद्वानलम्पटः चित्तविक्षेपरहितः ॥१३॥ स श्रुतदेवः विदेहेषु देशेषु तत्रापि मिथिलायां पुरि गृहाश्रमी सन्नुषितवान् । अनीहया अनुद्यमेनैवागतं यदाहार्यं भोज्यं तेन निर्वतिताः निजाः क्रियाः अतिथिपूजनादिकाः येन सः ॥१४॥ एतदेव प्रपञ्चयति-यात्रामात्रमिति । अथ श्रुतदेवः यात्रामात्रं शरीरनिर्वाहकमात्रोपयुक्तमाहार्यमहरहः दैवादुपनयति उपनयन्तं प्रतीक्षत इत्यर्थः । अधिकं यात्रामात्रादधिकं नोपनयति तावता यात्रामात्रेणैव तुष्टः उचिताः वर्णाश्रमोचिताः क्रियाः पञ्चमहायज्ञादिरूपक्रियाः यथावच्चक्रे ॥१५॥ तथेति । अङ्ग हे राजन् ! यथाऽयं श्रुतदेवः तथा तद्राष्ट्रपालः विदेहदेशाधिपः बहुलाश्व इति विश्रुतः स मैथिलो जनकवंश्यः निरहम्मानः देहात्माभिमानरहितः उभौ श्रुतदेवबहुलाश्वौ अच्युतस्य प्रियौ भक्तौ ॥१६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

"यमेवैष वृणुते तेन लभ्यः" इत्यादिश्रुत्यर्थदृढीकरणाय हरेर्भक्तिप्रियत्वमाहात्म्यं वक्ति, तत्र श्रुतदेवबहुलाश्वविषयमितिहासं शुको वदति-वृष्णिष्विति । भक्तिमन्तरेणान्यमर्थमनाकाङ्क्षमाणः पूर्णार्थ इत्युच्यते कृष्णविषयगाथारचनात् कविरलम्पटः शब्दादिविषयेच्छारहितः ॥१३॥ मिथिलायां नगर्यां गृहाश्रमे स्थितः सभार्य इत्यर्थः । अनीहया अप्रयत्नेनागताहार्यः प्राप्तप्राप्तव्यः प्राप्तभोज्यो वा । नितरां वर्तिता सहस्रनामादिजपक्रिया येन स तथा 'नित्यं कामनिकामयोः' इति यादवः ॥१४॥ ननु प्रयत्नाभावे कथं शरीरयात्रास्येत्यत्राह-यावदिति । अनुदिनं यावन्मात्रमुपनमति दैवात्प्राप्तं भवति अयं ततोऽधिकं नाकाङ्क्षते तर्हि केनालम्बुद्धिरत्राह-तपसेति ॥१५॥ यथा श्रुतदेवः ॥१६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४-१९॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अथ स्वयमेव स्मृतिपथमागतं तच्चरितविशेषं स्वसाक्षात् दृष्टमपृष्टमप्याह-कृष्यस्येति । कृष्णस्वामिक इत्यर्थः ॥१३॥ विदेहेषु देशेषु ममिथिलायां पुर्याम् अनीहया अनुद्यमेनैव आगतं यदाहार्यं भोज्यं तेनैव निर्वतिता निजा क्रिया भगवत्परिचर्यापि येन ॥१४॥ तदप्याहार्यं दैवाद्भगवदिच्छावशात् यात्रामात्रं सपरिकरस्वशरीरनिर्वाहो यावता भवति तावन्मात्रमेवाहरहरुपनमति मिलति नाधिकम् ॥१५॥ मिथलस्य जनकस्य वंश्यो मैथिलः मिथिलायाम् ईश्वर इति वा निरहम्मानः राजत्वाभिमानशून्यः ॥१६॥

गूढार्थदीपिनी

अत्र शुक उवाचेति पुनरुक्ति: कथान्तरेपेक्षया। कृष्णस्य कश्चित् श्रुतदेवो नाम भक्त: आसीत्। श्रुतो विख्यात:। अलम्पट: अनासक्त: ॥१३॥ विदेहो देश: तत्रापि मिथिलायां नगर्याम्। कथम्भूत:। अनीहया अनुद्योगेनैव आगतं यत् आहार्यं भोज्यं तेन निर्वतिता सम्पादिता निजा क्रिया भोजनाच्छादनादिरूपा नित्यनैमित्तिकी वा येन स: ॥१४॥ अहरह: प्रतिदिनं यात्रामात्रं देहनिर्वाहमात्र उपनमत्येव मिलत्येव। उत एवार्थे। अधिकं नोपनमति न च इच्छति ॥१५॥ अङ्ग हे राजन्! श्रुत: विख्यात: मिथिलस्य जनकस्य वंशे भव: मैथिल: ॥१६॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

अनीहया यदृच्छया आगतेन आहार्येणान्नादिना निर्वतिता: निजा: स्वाश्रमोचिता: क्रिया: येन स: ॥१४॥ यात्रामात्रं निर्वाहमात्रं दैवादुपनमति तं प्रत्यागच्छति अन्नादिकमिति शेष: ॥१५॥ मिथिलस्य जनकस्य वंश्यो मैथिल: ॥१६-१७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अतोपमाननप्रस्तावे भगवान् भक्तार्थमेवागत: ज्ञात्वैव अमानीमानद इति तत्सर्वं करोतीति कैमुत्यन्यायेन मार्गान्तरभक्तयोरपि स्वापमानेनापि हितं करोतीति निरूपयति-कृष्णस्यासीद्द्विज: श्रेष्ठ इति। ब्राह्मणत्वादयं प्रकरणी क्षत्रियस्तु प्रासङ्गिक:। अत एव मध्ये निरूपित:। अतो नोपक्रान्तक्रमविरोध:। कृष्णस्य सम्बन्धी आसीत् भगवदीय: आसीदित्यर्थ:। तथा भवने तस्य साधनमाह-द्विजश्रेष्ठ इति। श्रेतेर्देव: श्रवणे देववत् प्रज्ञावान् तत्त्वेन च विख्यात:। तत: कृष्ण एव या भक्ति: तयैव पूर्णार्थ: एतत् तस्य दारिद्र्यदोषाभावाय निरूप्यते। विद्यमानायामिच्छायां भक्त्या विषयाभाव: न युक्त अत आह-शान्त इति। आन्तरोऽयं गुण: कविर्विचारकश्च स्वभावतोऽपि तस्येन्द्रियाणि न बहिर्मुखानि इत्याह-अलम्पट इति। भगवत्सम्बन्धे तस्य षड्गुणा: निरूपिता:। तत्र द्विजश्रेष्ठत्वमैश्वर्यं नाम कीर्ति: भक्ति: श्री: शान्तिर्ज्ञानं कविर्बलम् अलम्पटो वैराग्यमिति तदीयस्तत्तुल्यो भवतीति निरूपितम् ॥१३॥ ततस्तादृशस्य सात्त्विकदेशे स्थितिर्युक्तेति मिथिलायां स्थितिमाह-स उवास विदेहेष्विति। विदेहा देशा: यत्र स्थितानां देवाभिमानो न भवति तत्रापि मिथिलायां गतदेहाभिमानकृतायाम् अभिमानाभावे इतराश्रमेभ्योऽपि गृहस्थाश्रम एव मुख्य: तत्र दोषाणां निरभिमानस्यासम्भवात्। अत: गृहाश्रमी। तत्र वृत्त्यभावे धर्मो न फलतीति तस्य मुख्यां वृत्तिमाह-अनीहयाऽऽगताहार्यम् इति। स्वप्रयत्नव्यतिरेकेण आगतमाहार्यं भैक्ष्यागतं यस्य तेनैव निर्वतित: क्रिया: येन ताश्च क्रिया: निजा: न परधर्मा: अत एवायं काममार्गानुसारी भक्त: ॥१४॥ अनीहया कदाचित् अन्नाभावात् क्रियाविच्छेद: स्यादित्याशंक्याह-यात्रामात्रमिति। यात्रा शरीरनिर्वाह: सकुटुम्बस्य तच्चाहरह: तच्चापि दैवादुपनमति ईश्वरेच्छया कदाचिच्छरीरबले विद्यमाने एकादशी उपवासादौ वा नोपनमतीत्यपि सूचयति-उतेति। अधिकं तु नोपनमति कदाचिदपि तावतैव सन्तुष्ट: अन्यथा दोष: स्यात्। अत एव यथोचिता: क्रियाश्चक्रे ॥१५॥ एवं ब्राह्मणं निरूप्य क्षत्रियं निरूपयति-तथा तद्राष्ट्रपालोऽङ्गेति। भगवद्भक्तवासात् सोऽपि भक्त्यङ्गे प्रविष्ट इति तथेत्युक्तं यतस्तस्य विदेहराष्ट्रस्य पाल: अङ्गेत्यप्रतारणार्थं सम्बोधनम्। बहुला: अश्वा: यस्येति क्रियाशक्तिर्निरूपिता। स तु मिथिलवंशोद्भवत्वान्मैथिल:। अस्य तु षड्गुणा: राज्ञस्त्वभिमानाभाव एव यथा कर्मनिष्ठ: प्रिय: तथा ज्ञाननिष्ठोऽपि भगवत्प्रिय: अत आह-उभावप्यच्युतप्रियाविति। यथा धर्मनिष्ठ: प्रिय: एवं ज्ञाननिष्ठोऽपि। एतावद्वर्णनं भगवत् तथाभूतौ स्मृताविति भगवन्मानसक्रियाविषयत्वात् भगवच्चरित्रत्वेन निरूपितौ ॥१६॥

श्रीसुबोधिनीसार:

शुकोक्ति:। भक्तवैभवमाह। विप्रश्रेष्ठ: कृष्णैकभक्त्या पूर्णार्थ: तुष्ट: शान्त: कामादनाकुल: कवि: पण्डितोऽलम्पटो जितेन्द्रिय: श्रुतदेव इति प्रसिद्ध: कृष्णसय भक्त आसीत् ॥१३॥ गृहाश्रमी गृहस्थोऽनीहयाऽनुद्यमेनागतं यदाहार्यं भोज्यं तेन निर्वतिता निष्पादिता निजा: क्रिया येन स विदेहेषु उवास ॥१४॥ कथं तस्य निर्वाह इत्यत आह। यात्रामात्रं शरीरादिनिर्वाहक भोजनं तु अहरह: प्रतिदिनं दैवात् कर्मयोगात् उपनमति तं प्राप्नोति उतापि अधिकं नागच्छति तावता तावन्मात्रेण तुष्ट: उचित:

क्रिया नित्ययज्ञान् यथाव
निरहम्मानो बहुलाश्व इति

अथ भक्तवात्सल
द्विजश्रेष्ठ: कृष्णस्य भक्त
रागलोभादिरहित:, अत एव
यदाहार्यं भोज्यं तेनैव निर्व
'उद्यमं विना तु कथमाहार्य
प्रत्यागच्छत्येव, अधिकं तु
सूचयन्सम्बोधयति-अङ्गेति
निरहंमान: देहादावहङ्काररहि

अथ स्वयं प्रत्यक्ष
कृष्णस्येति। कृष्णे या
विषयासक्तिरहित:। श्रुतदेव
अनीहया अनुद्यमेनैवागतं यदा
पुर्यामुवास ॥१४॥ यात्रेति। य
नागच्छति तावता अप्रयत्नप्रासे
बहुलाश्व इति श्रुतो नाम्ना
राजत्वभक्तत्वाहङ्काररहित: ज्ञा

अलम्पटो विषयेष्वना
अन्नादिभोग्यं तेन निर्वर्तिता स
कर्मफलदातुरीश्वरात्। यात्रामात्रं
देशस्या पालो राजाऽपि तथा भक

अथ भक्तवात्सल्यप्रयुक्तं
पूर्ण: अर्थो मनोरथो यस्य स: अत
विख्यात: कृष्णस्य भक्त इति शेष
अनीहयाऽनुद्यमेनैव आगतं यदाहा
॥१४॥ यात्रामात्रमिति ॥ किञ्च। अ
उपनतं प्रतीक्षते। अधिकं यात्रामात्रा

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

क्रिया नित्ययज्ञान् यथावच्चकार ॥१५॥ तथा तेनैव प्रकारेण तस्य राष्ट्रस्य देशस्य पालो राजा मैथिलो मिथिलस्य जनकस्य वंश्यो निरहम्मानो बहुलाश्व इति प्रख्यातोऽभूत्। हे अङ्ग! उभौ द्वावपि अच्युतस्य हरेः प्रियौ भक्तौ ॥१६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ भक्तवात्सल्यप्रयुक्तं भगवतश्चेष्टितं प्रस्तौति–कृष्णस्येत्यादिना यावदध्यायसमाप्ति। श्रुतदेव इति श्रुतो नाम्ना प्रसिद्धः द्विजश्रेष्ठः कृष्णस्य भक्त आसीत्। कृष्णे या एका अनन्यप्रयोजना भक्तिस्तयैव पूर्णार्थः पूर्णमनोरथः, अत एव शान्तः लोभादिरहितः, अत एव अलम्पटः विषयासक्तिरहितः। यतः कविः विवेकी ॥१३॥ स च गृहाश्रमी, अतः अनीहया अनुद्यमेनैवागतं यदाहार्यं भोज्यं तेनैव निर्वर्तिता निजाः क्रियाः येन सः विदेहेषु विदेहवंशावासदेशेषु तत्रापि मिथिलायां पुर्यामुवास ॥१४॥ ननु 'उद्यमं विना तु कथमाहार्यमागच्छेत्' इत्याशंक्याह–यात्रेति। यात्रामात्रं शरीरादिनिर्वाहमात्रं तु दैवात् प्रारब्धात् उपनमत्युत सर्वान् प्रत्यागच्छत्येव, अधिकं तु प्रयत्नेनापि नागच्छति। स च तावता अप्रयत्नप्राप्तेनैव सन्तुष्टो यथोचिताः क्रियाश्चक्रे ॥१५॥ अप्रतारकत्वं सूचयन्सम्बोधयति–अङ्गेति। तद्राष्ट्रपालः तद्देशाधिपतिः बहुलाश्व इति श्रुतो नाम्ना प्रसिद्धः, मैथिलो मिथिलस्य जनकस्य वंश्यः, निरहंमानः देहादावहङ्काररहितः ज्ञानी, तथा श्रुतदेववद्भगवद्भक्तश्च। अत उभावप्यच्युतस्य प्रियौ ॥१६॥

अन्वितार्थप्रकाशिका

अथ स्वयं प्रत्यक्षतोऽनुभूतं तच्चरितविशेषमपृष्टमपि स्वयमाह। शुक उवाचेति। मध्ये पुनरुक्तिः कथान्तरापेक्षया कृष्णस्येति। कृष्णे या एका अनन्यप्रयोजना भक्तिस्तयैव पूर्णार्थः पूर्णमनोरथः शान्तः कविः विवेकी अलम्पटः विषयासक्तिरहितः। श्रुतदेव इति श्रुतो नाम्ना प्रसिद्धः द्विजश्रेष्ठः कृष्णस्य भक्त आसीत् ॥१३॥ स इति। स च गृहाश्रमी अपि अनीहया अनुद्यमेनैवागतं यदाहार्यं भोज्यं तेनैव निर्वर्तिता निजाः क्रिया येन सः विदेहेषु विदेहवंशावासदेशेषु तत्रापि मिथिलायां पुर्यामुवास ॥१४॥ यात्रेति। यात्रामात्रं शरीरादिनिर्वाहमात्रं तु दैवात् प्रारब्धात् उपनमत्युत प्रत्यागच्छत्येव अधिकं तु प्रयत्नेनापि नागच्छति तावता अप्रयत्नप्राप्तेनैव सन्तुष्टो यथोचिताः क्रियाश्चक्रे ॥१५॥ तथेति। अङ्ग हे राजन्! तद्राष्ट्रपालः तद्देशाधिपतिः बहुलाश्व इति श्रुतो नाम्ना प्रसिद्धः। मैथिलो मिथिलस्य जनकस्य वंश्यः मिथिलाया ईश्वरो वा निरहंमानः भगवभक्तत्वाहङ्काररहितः ज्ञानी तथा श्रुतदेववद्भगवद्भक्तश्चात उभावप्यच्युतस्य प्रियौ ॥१६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अलम्पटो विषयेष्वनासक्तः ॥१३॥ विदेहेषु देशेषु॥ मिथिलासंज्ञायां पुर्याम् अनीहया अयाचितवृत्त्या आगतं यदाहर्यम् अन्नादिभोग्यं तेन निर्वर्तिता सम्पादिता निजा स्वकीया भगवत्सेवालक्षणा क्रिया येन सः ॥१४॥ अहरहः प्रतिदिनं दैवात् कर्मफलदातुरीश्वरात्। यात्रामात्रं देहादिनिर्वाहमात्रान्नादिवस्तुम् उपनमति तं श्रुतदेवः प्राप्नोति अधिकं न ॥१५॥ तस्य राष्ट्रस्य देशस्य पालो राजाऽपि तथा भक्त्या श्रुतदेवसदृशः मैथिलो जनकपुरि निवासी ॥१६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ भक्तवात्सल्यप्रयुक्तं भगवतश्चेष्टितं प्रस्तोतुं प्रतिजानीते॥ कृष्णस्येति॥ श्रीकृष्णे भगवत्येवैका एकान्ता या भक्तिस्तया पूर्णः अर्थो मनोरथो यस्य सः अतः शान्तः कविर्विद्वान् अलम्पटः चित्तविक्षेपरहितः द्विजश्रेष्ठः ब्राह्मणोत्तमः श्रुतदेवः इति श्रुतो विख्यातः कृष्णस्य भक्त इति शेषः। आसीत् ॥१३॥ स इति॥ स श्रुतदेवः विदेहेषु तत्रापि मिथिलायां पुरि गृहाश्रमी सन्नपि अनीहयाऽनुद्यमेनैव आगतं यदाहार्यं भोज्यं तेन निर्वर्तिताः निजक्रिया अतिथिपूजनादिका येन तथाभूतः सन् उवास ऊषितवान् ॥१४॥ यात्रामात्रमिति॥ किञ्च। अयं श्रुतदेवः अहः अहः प्रतिदिनं यात्रामात्रं शरीरनिर्वाहकमात्रोपयुक्तमाहार्यं दैवात् उपनमति उपगतं प्रतीक्षते। अधिकं यात्रामात्रादधिकं तु न उपनमपि। तावता यात्रामात्रोपलब्धेनाहार्येणैवेत्यर्थः। तुष्टः सन् यथोचिताः

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वर्णाश्रमोचिताः क्रियाः पञ्चमहयज्ञादिरूपाः चक्रे ॥१५॥ तथेति ॥ अङ्ग ! हे राजन् ! यथायं श्रुतदेवस्तथैव तद्राष्ट्रपालः विदेहदेशाधिप: निरहंमानो देहात्माभिमानरहितः मैथिलो जनकवंश्यः बहुलाश्वः इति श्रुतो विख्यातः बहुलाश्वनाम्ना विख्यातो नृपतिरित्यर्थः। उभौ श्रुतदेवबहुलाश्वौ अपि अच्युतः श्रीकृष्णः प्रियो ययोस्तौ अच्युतस्य प्रियौ वा आस्ताम् ॥१६॥

कृष्णप्रिया

श्रीशुकदेवजी कहते है परीक्षित् ! विदेहकी राजधानी मिथिला में एक गृहस्था ब्राह्मण थे। उनका नाम था श्रुतदेव। वे भगवान श्रीकृष्ण के परम भक्त थे, परम शांत, ज्ञानी और विरक्त थे ॥१३॥ वे गृहस्थाश्रममें रह हुए भी किसी प्रकारका उद्योग नहीं करते थे, जो कुछ मिल जाता, उसीसे अपना निर्वजााह कर लेते थे ॥१४॥ प्रारब्धवश प्रतिदिन उन्हें जीवन निर्वाह भरके लिये सामग्री मिल जाया करती थी, अधिक नहीं। वे उतने से ही संतुष्ट थे, और अपने वर्णाश्रमके अनुसार धर्मपालनमें तत्पर रहते थे ॥१५॥ प्रिय परीक्षित् ! उस देशके राजा भी ब्राह्मण के समान ही भक्तिमान थे। मैथिल वंशके उन प्रतिष्ठित नगरपतिका नाम था बहुलाश्व। उनमें अहंकार का लेश भी न थी। श्रुतदेव और बहुलाश्व दोनो ही भगवान श्रीकृष्ण के प्यारे भक्त थे ॥१६॥

तयोः प्रसन्नो भगवान् दारुकेणाहृतं रथम्। आरुह्य [1]साकं मुनिभिर्विदेहान् प्रययौ प्रभुः ॥१७॥
नारदो वामदेवोऽत्रिः कृष्णो रामोऽसितोऽरुणिः। अहं बृहस्पतिः कण्वो [2]मैत्रेयश्च्यवनादयः ॥१८॥
तत्र तत्र तमायान्तं पौरा जानपदा [3]नृप। उपतस्थुः[4] सार्घहस्ता ग्रहैः सूर्यमिवोदितम् ॥१९॥
आनर्तधन्वकुरुजांगलकंकमत्स्य[5]पांचालकुन्तिमधुकेकयकोसलार्णाः।
अन्ये च तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृप पपुर्दृशिभिर्नृनार्यः ॥२०॥

कर्दमक्षमा

तयोः, प्रसन्नः, भगवान्, दारुकेण, आहृतम्, रथम्, आरुह्य, मुनिभिः, साकम्, प्रभुः, विदेहान्, प्रययौ ॥१७॥ नारद: वामदेवः, अत्रिः, कृष्णः, रामः, असितः, अहम्, बृहस्पतिः, कण्वः, मैत्रेयः, च्यवनादयः ॥१८॥ नृप, तत्र, तत्र, तम्, आयान्तम्, पौराः, जानपदाः, ग्रहैः, सूर्यम्, इव, उदितम्, सार्घ्यहस्ताः, उपतस्थुः ॥१९॥ नृप आनर्तधन्वकुरुजाङ्गलकंकमत्स्यपाञ्चालकुन्तिमधुकेकयकोसलार्णाः, अन्ये, च, नृनार्यः, दृशिभिः, उदारहासस्निग्धेक्षणम् तन्मुखसरोजम्, पपुः ॥२०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रभुरेव स्वयं विदेहान् देशान् प्रययौ ॥१७॥ कृष्णो व्यासः रामो भार्गवः अहं शुकः एवमादिभिः सह ॥१८-१९॥ आनर्ताद्यर्णान्तास्तद्देशवर्तिनो नृनार्यः उदारहासं स्निग्धमीक्षणं यस्मिस्तत् दृशिभिर्नेत्रैः ॥२०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तयोश्श्रुतदेवबहुलाश्वयोः। भक्त्येति शेषः ॥१७॥ मुनीन्नामतो निर्दिशति नारद इत्यादि। कृष्णो व्यासः। जामदग्न्यः। अहं शुकः। आदिना भृग्वादयः ॥१८॥ तत्र तत्र पुरादौ। तं श्रीकृष्णम्। सूर्योदयसमये ग्रहाणामपि किञ्चित्प्रतीति तेन प्रभुसमीपेऽपि ते पूज्या एवेत्युक्तम् ॥१९॥ तद्देशवर्तिनृनार्यः तेष्वानर्ताद्यर्णान्तेषु देशेषु वर्तिन्यो नृनार्यो नरसहिता 'तात्स्थ्यात्ताच्छब्द्यम्' इति न्यायेन वाऽऽनर्ताद्या विद्यन्ते यासां निवासत्वेन तास्तथा। अन्ये उक्तदेशेभ्योऽन्यदेशस्थाश्च ॥२०॥

---

१. सहितो विप्रैर्नियतैर्ब्रह्मवादिभिः-विज.। २. मैत्रेयश्च पराशरः-विज.। ३. नृपाः-इति कस्यचित्। ४. साध्यं-श्रीधर. वंशी. वीर. विज.। ५. वीर.; टङ्क-विज.।

अत एव तयोः
निर्दिशति-नारद इति ॥१
आनर्तादिदेशीयाः अन्ये
आनर्तादयः श्रीद्वारकातो
क्रमेण यथा भ्रमणात् तदा
पूर्ववत्तेषामप्रकटलीलाप्रवेशे

अत एव प्रसन्नः
प्रायो द्वारकायां निवसद्भिः,
प्रकर्षेण ययौ, दारुकेण श्रीभ
साहित्येन प्रभोरपि तादृशगम
॥१७॥ मुनीनेव नामभिर्निर्दिश
मुनिभिरिति प्राक् तृतीयान्ततया
सद्योऽग्रेभिगमनादिकं बोधयति
तथापि महातेजस्विनां मुनीनां
क्रमेण देशाः, अन्ये च कौशल
ध्वनितम्। परमासक्त्या (परमय
नृपति श्रीबादरायणेर्भावविशेषेण
देशाः, नृनार्यश्च तत्तद्देशवर्तिन्य
नारीणां विशेषणात्तथा स्निग्धं चेति
। उदारहासं च तत्स्निग्धेक्षणं चेति

तयोरिति। प्रसन्नः प्रसन्नो
नारद इति। कृष्णो द्वैपायनः रामो
हस्ताः येषां ते ग्रहैर्गुरुशुक्रादिभिः
आनर्तादिदेशवर्तिनो जनाः तथा अ
मुखसरोजलावण्यरूपं मकरन्दं नेत्रच

ततः किमायातमत्राह-तयोरिति।
निषेवयाञ्चक्रुः ॥१९-२०॥

थैव तद्राष्ट्रपालः विदेहदेशाधिपः
ा विख्यातो नृपतिरित्यर्थः। उभौ

या ब्राह्मण थे। उनका नाम
॥१३॥ वे गृहस्थाश्रममें रहते
निर्वजााह कर लेते थे ॥१४॥
अधिक नहीं। वे उतने से हे
ीक्षित्! उस देशके राजा भी
था बहुलाश्व। उनमें अहंकार
क थे ॥१६॥

देहान् प्रययौ प्रभुः ॥१७॥
मैत्रेयश्च्यवनादयः ॥१८॥
सूर्यमिवोदितम् ॥१९॥

॥२०॥

, विदेहान्, प्रययौ ॥१७॥ नारदः,
॥ नृप, तत्र, तत्र, तम्, आयान्तम्,
उपतस्थुः ॥१९॥ नृप,
दृशिभिः, उदारहासस्निग्धेक्षणम्,

कः एवमादिभिः सह ॥१८-१९॥

इत्यादि। कृष्णो व्यासः। रामो
ये ग्रहाणामपि किञ्चित्प्रतीतिरस्तीति
वर्तिन्यो नृनार्यो नरसहिता नार्यः।
क्तदेशेभ्योऽन्यदेशस्थाश्च ॥२०॥

र्य-श्रीधर. वंशी. वीर. विज.। ५. म-

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत एव तयोः प्रसन्न इति युग्मकम्। मुनिभिः सहारुह्य तैरेव सह गमनं तयोस्तादृशरुचित्वात् ॥१७॥ मुनीनेव नामभिः र्दिशति-नारद इति ॥१८॥ हे नृपेति। प्रहर्षात् तथापि महातेजस्विनां मुनीनां भगवत्सान्निध्यात्तेजोहानिः सूच्यत एव ॥१९॥ र्तादिदेशीयाः अन्ये अन्यदेशीयाश्च जनाः पपुः परमासक्त्या ददृशुरित्यर्थः। ते के तत्राह-नृनार्य इति। सर्व एवेत्यर्थः। र्तादयः श्रीद्वारकातो विदेहप्रयाणे क्रमेण देशाः केचित्पार्श्वस्थाश्च अत्युत्कण्ठया दूरतोऽपि मिलनात् केषांचिच्च कृपार्थमेव मेण यथा भ्रमणात् तदानन्दनार्थमेव हि अगाच्छनकैर्विदेहानिति वक्ष्यते। अत्रापि मधुदेशस्थानां श्रीव्रजवासिनां मिलनावर्णनं त्तेषामप्रकटलीलाप्रवेशेनेति ज्ञेयम् ॥२०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत एव प्रसन्नः सन्, यतो भगवान् तयोर्भावाद्यशेषज्ञः परमभक्तवात्सल्यादिगुणनिधिर्वा, रथं स्वयमारुह्य, मुनिभिः यो द्वारकायां निवसद्भिः, किंवा स्वभक्तयोस्तयोः सन्तोषविशेषार्थं श्रीभगवत्स्मृतिमात्रेण सद्यः समागतैः सहितः, अत एव र्षेण ययौ, दारुकेण श्रीभगवद्भावाभिज्ञेनाहृतमिति तदेकभृत्यत्वं शीघ्रगमनादिकं च सूचयति। यद्वा, व्योममार्गगामिभिर्मुनिभिः हित्येन प्रभोरपि तादृशगमनमाशंक्य स्वसेवासौभाग्यस्य प्रभुशोभाविशेषस्य च सम्पत्तये समानीतवम्। मुनिभिः सहारुह्य ७॥ मुनीनेव नामभिर्निर्दिशति-नारद इति। आदिशब्दाद्भरद्वाज-गौतमादयः। अन्यत्तैर्व्याख्यातम्। तत्र चैवमादिभिः सहेति निभिरिति प्राक् तृतीयान्ततया निर्दिष्टैः सह योजनार्थं किंवा केनचित् कल्पितमिति ॥१८॥ तं श्रीभगवन्तमायान्तमिति वर्तमानतया ग्रेऽभिगमनादिकं बोधयति। हे नृपेति प्रहर्षात्। पाठान्तरे तत्तद्देशनृपतयश्च। ग्रहैः सहितमित्यभूतोपमा, सूर्योदये ग्रहाणामदृश्यत्वात्, पि महातेजस्विनां मुनीनां श्रीभगवत्सान्निध्यात्तेजोहानिः सूचत एव ॥१९॥ आनर्तादयः श्रीद्वारकातो विदेहदेशप्रयाणे पथि मेण देशाः, अन्ये च कौशलाद्यग्रे पथि वर्तमाना आनर्ताद्यन्तर्गताश्च देशाः। पपुरिति दृशां तद्दर्शनरस-लाम्पट्येन मधुपत्वं नितम्। परमासक्त्या (परमया भक्त्या [घ, ङ]।) ददृशुरित्यर्थः। तत्तद्देशैर्बोधितांस्तत्रत्यानेव जनान् निर्दिशति-नृनार्य इति। हे ति श्रीबादरायणेर्भावविशेषेण तद्दर्शनामृतपानौत्सुक्यात्, किंवा तदसिद्ध्यानुतापात्। अन्यत्तैर्व्याख्यातम्। तत्रानर्ताद्यर्णान्ता न्ताः, नृनार्यश्च तत्तद्देशवर्तिन्य इति लेख्ये सङ्क्षेपार्थमानर्ताद्यर्णान्ता इत्यस्यैव व्याख्या तत्तद्देशवर्तिन्य इति, स्त्रीत्वं चान्ते निर्दिष्टम्। र्णां विशेषणात्तथा स्निग्धं चेति लेख्ये च-कारपातो लेखकभ्रमादिति, अथवा आनर्ताद्या नृनार्यः, अन्ये तद्देशीयाः पश्चादयोऽपि उदारहासं च तत्स्निग्धेक्षणं चेति तथा तत् ॥२०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१४-२०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तयोरिति। प्रसन्नः प्रसन्नो भवितुमित्यर्थः। आहृतमानीतं मुनिभिः साकं मुनिभिस्सह ॥१७॥ केऽमी मुनय इत्यत आह-रद इति। कृष्णो द्वैपायनः रामो भार्गवः अहं शुकः ॥१८॥ तत्र तत्रेति। पुरेषु भवाः पौराः जनपदेषु भवाः जानपदाः सार्घ्याः ः येषां ते ग्रहैर्गुरुशुक्रादिभिः सहोदितं सूर्यमिव समायान्तं तं भगवन्तमुपतस्थुः अभूतोपमेयम् ॥१९॥ आनर्तेति। हे नृप! र्तादिदेशवर्तिनो जनाः तथा अन्ये च नराः नार्यश्च उदारो हासः स्निग्धे ईक्षणे च यस्मिस्तस्य भगवतो मुखसरोजं पपुः। रोजलावण्यरूपं मकरन्दं नेत्रचषकैः पपुरित्यर्थः ॥२०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

किमायातमत्राह-तयोरिति। नियतैरेकान्तभक्तैः ॥१७॥ मुनीनां नामानि निर्दिशति नारद इत्यादिना ॥१८॥ त उपतस्थुः ङ्कुः ॥१९-२०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥४-१९॥ ननु कथं परब्रह्मविग्रहं भगवन्तमज्ञानमयैश्चक्षुभिरपश्यन् कथं वा वायुवेगरथं तमनुवर्तन्ते तत्राह-तेभ्य इति। स्ववीक्षणं स्वकर्तृका कृपादृष्टिः 'पुमान् स्त्रिया' (१/२/६७) इत्येकशेषत्वान्नृभ्यो नारीभ्यश्चेत्यर्थः ॥२०॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तयोःप्रसन्न इति । तौ स्वेष्टदेवश्रीविग्रहपरिचर्यानुरोधवशादेवागन्तुमसमर्थौ वा लक्ष्यातिदिदृक्षुभ्यां ताभ्यां स्वयमेव दर्शनं दातुं प्रययौ । मुनिभिः सहैवारुह्येत्यन्यथा तेषां श्रममालक्ष्य बलादेव मुनयः स्वरथमारोहिता इति भावः । कृष्णो व्यासः रामो भार्गवः अहं शुकः ॥१७-१९॥ आनर्तादिदेशीयाः मार्गसन्निकृष्टा एव अन्ये मार्गविप्रकृष्टा अपि जनास्तत्र तत्रागत्य दृशिभिर्नेत्रैर्मुखसरोजं पपुस्तन्माधुर्यमास्वादयामासुः ॥२०॥

गूढार्थदीपिनी

तयोः प्रसन्नः सन् भगवान् मुनिभिः सह विदेहान् प्रययौ इत्यन्वयः । किं कृत्वा । दारुकेण सारथिना आहृतमानीतं रथमारुह्य ॥१७॥ कृष्णो व्यासः । रामः परशुरामः । अहं शुकः । आदिना भृग्वादयः एतेऽपि प्रययुरिति व्यत्ययेनान्वयः ॥१८॥ तत्र मार्गे आयान्तं तं श्रीकृष्णं सर्वे उपतस्थुः पूजयामासुः ॥१८॥ अर्घ्यसहिता हस्ता येषां ते । अत्र यकारघटितः पाठः । पौरा नागरिकाः । जानपदा अन्यदेशीयाः । ग्रहैः गुरुशुक्रादिभिः सह उदितं सूर्यं यथा जनाः पूजयन्ति तद्वत् ॥१९॥ आनर्तादि (तात्स्थ्यात्ताच्छब्द्यम् इति न्यायेन ।) देशवासिन्यः नरो नार्यश्च अन्यदेशीयाश्च तस्य भगवतः मुखसरोजं दृशिभिः पपुः ददृशुरित्यन्वयः । कथम्भूतम् । उदारः आकर्षकः हासो यस्मिन् स्निग्धमीक्षणं च यस्मिन् तच्च तच्च । अर्णोऽपि कश्चन देशः । हे नृप ! ॥२०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कृष्णः श्रीव्यासः ॥१८-१९॥ आनर्तादिशब्दैस्तत्तद्देशवासिनो जनाः ग्राह्याः दृशिभिर्नेत्रैः ॥२०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अत एव तद्गुणान् स्मृत्वा भगवान् तयोरिष्टिसिद्ध्यर्थं तद्गृहं गत इत्याह-तयोः प्रसन्नो भगवान् इति । पूर्वं गमनबोधनाभावात् लौकिकाभावेनोत्सवाभावाच्च कदाचित्सभागमनार्थं दारुकेण समानीतं रथमारुह्य विदेहानेव प्रययौ । न त्वेकाकी सर्वानुरक्त च कथं प्रस्थित इति चेत् तत्राह-प्रभुरिति । मुनिभिः साकमारुह्य विदेहान् ययौ । तौ हि भगवन्तं मुनिसहितं भावयतः तत्र राजा मुनीनपि भगवद्रूपानेव जानाति । ब्राह्मणस्तु मुनिरूपान्अत एव स्वयं मुनिरूपधारी राजगृहे गमिष्यति मुनिभिः सहितः ब्राह्मणगृहे । उभावपि कालात् परभूतं भगवन्तं ज्ञात्वा कालावयवभूतान् मुनीन् जानीतः अतो द्वादशमुनीन् नाम्ना परिगणयति-प्रकारपरत्वाय च आदिपदप्रयोगः । कृष्णो वेदव्यासः रामः परशुरामः अहं शुकः आदिशब्देन गौतमादयः ॥१७-१८॥ गुप्ततया अलौकिकन्यायेन गमनं व्यावर्तयितुं सर्वानुभवार्थं मध्ये पूजामाह-तत्र तत्रेति । सार्घ्यहस्ताः उपतर्थुः प्रत्येकं पूजायां कालविलम्बो भवेत् अग्रहणे तु दोषः स्यादित्युभयथापि व्यावर्तयितुं दृष्टान्तमाह-सूर्यमिवोदितमिति । ग्रहस्थानीया ऋषयः हि सूर्यः सर्वेषामर्घ्यं गृह्णाति निरीक्षणेन च गृह्णात्यपि एवं भगवानपीत्यर्थः ॥१९॥ मध्यस्थान् देशान् द्वादश नाम्ना निरूपयति आनर्तेति । अन्ये च अप्रसिद्धाः प्रसिद्धाश्च भगवतो मुखसरोजं पपुरिति तेषामुपासनाफलं निरूपितम् । सरोजत्वेनामृत दृष्टमेव प्रयोजनं स्यादिति मुखं विशिनष्टि-उदारहासस्निग्धेक्षणमिति । उदारः सर्वपुरुषार्थदायी हासः स्निग्धं वी मायाबहिर्मुखत्वेऽपि सम्पादिते सर्वपुरुषार्थान् साधयति । ज्ञानन्तु भगवत्सम्बन्धिनं करोति अतः अदृष्टमपि फलं प्रयच्छति निरूपितम् । एतादृशं नरा नार्यश्च सर्वेऽधिकारिणो ह्यत्रेति न्यायेन पपुः ॥२०॥

तयोरुपरि प्रस

। नारद इति पाठो व्याख

सहोदितं सूर्यमिव ॥१९

तच्च तच्च तस्य मुखपङ्क

तयोः प्रसन्नः स

देशान् प्रययौ ॥१७॥ तान्

प्रसिद्ध एव इति सूचयन्

येषां ते तत्र तत्र मार्गे अ

भक्तोपेक्षादोषः स्यात्, अतः

॥१९॥ हे नृप ! आनर्तादि

मुखसरोजं दृशिभिः पपुः मु

तयोरिति । तयोः

साकं सहारुह्य विदेहान् देश

॥१८॥ तत्रेति । हे नृप !

भगवन्तमुपतस्थुः पूजितवन्

तथान्ये च अन्यदेशीया नृना

। मुखगतलावण्यरूपं मकरन्

वक्रेणापि पथा गमनात् अत

आहृतमानीतम् ॥१७

महैश्वर्यैर्नारदादीनामैश्वर्याच्छादनं

स्निग्धेक्षणं च यस्मिन् तत् दृशि

तयोरिति ॥ तयोः प्र

साकं विदेहान् प्रययौ ॥१७॥

भार्गवः असितः आरुणिः अहं

॥ येन पथा व्रजति तत्र तत्र पौरा

आयान्तं समायान्तं भगवन्तं स

आनर्तश्च धन्वा च कुरुश्च जा

आनर्ताद्यर्णान्तदेशवर्तिनो जना इ

तन्मुखसरोजं मुखसरोजगतलाव

श्रीसुबोधिनीसारः

तयोरुपरि प्रसन्नो भगवान् दारुकेणाहृतं रथम् आरुह्य मुनिभिः साकं सह प्रभुर्विदेहान् प्रययौ ॥१७॥ के ते मुनयस्तत्राह नारद इति पाठो व्याख्या ॥ अहं शुकः ॥१८॥ तत्र तत्र पुरे देशे तत्तद्वासिनो जनाः सार्घहस्ता आयान्तं तमुपतस्थुः । ग्रहैः सहोदितं सूर्यमिव ॥१९॥ आनर्ताद्यर्णान्ता देशास्तत्स्थाः प्रजा लक्षणयाऽन्ये च उदारो हासो यस्मिन् स्निग्धे ईक्षणे यस्मिन् तच्च तस्य मुखपङ्कजं दृशिभिर्नेत्रैः पपुः । हे नृप ! ॥२०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तयोः प्रसन्नः सन् भगवान् कृष्णः स्वयंप्रभुरेव दारुकेण सारथिना आहृतमानीतं रथमारुह्य मुनिभिः साकं विदेहान् प्रययौ ॥१७॥ तान् मुनीनाह–नारद इति । कृष्णो द्वैपायनः । रामो भार्गवः । अहं शुकः ॥१८॥ नृपाणामप्येवं सत्कारः सिद्ध एव इति सूचयन् सम्बोधयति–नृपेति । नृपा इति पाठन्तरम् । पौराः पुरवासिनः जानपदाः देशवासिनश्च सार्घाः हस्ता ते तत्र तत्र मार्गे आयान्तं तं भगवन्तमुपतस्थुः पूजितवन्तः । प्रत्येकं पूजाग्रहणे कालविलम्बो भवेत्, अग्रहणे तु न्योपेक्षादोषः स्यात्, अतः सूर्यवन्निरीक्षणमात्रेणैव तदङ्गीकृतवानिति सूचयन् दृष्टान्तमाह–ग्रहैर्गुरुशुक्रादिभिः सहोदितं सूर्यमिवेति ॥ हे नृप ! आनर्तादिदेशवर्तिनो जनास्तथान्ये च नरा नार्यश्च उदारो हासः स्निग्धे ईक्षणे च यस्मिंस्तत्तस्य भगवतो मुखसरोजं दृशिभिः पपुः मुखगतलावण्यरूपं मकरन्दं नेत्रचषकैः पपुरित्यर्थः ॥२०॥

अन्वितार्थप्रकाशिका

तयोरिति । तयोः प्रसन्नः सन् भगवान् कृष्णः स्वयंप्रभुरेव दारुकेण सारथिना आहृतमानीतं रथमारुह्य मुनिभिः सहारुह्य विदेहान् देशान् प्रययौ ॥१७॥ मुनीनां नामान्याह–नारद इति । कृष्णो द्वैपायनः । रामो भार्गवः । अहं शुकः ॥१८॥ तत्रेति । हे नृप ! पौराः पुरवासिनः जानपदाः देशवासिनश्च सार्घाः हस्ता येषां ते तत्र तत्र मार्गे आयान्तं तं भगवन्तमुपतस्थुः पूजितवन्तः । ग्रहैर्गुरुशुक्रादिभिः सहोदितं सूर्यमिव ॥१९॥ आनर्तेति । आनर्ताद्यर्णान्तदेशवर्तिनो जनाः अन्ये च अन्यदेशीया नृनार्यः नरो नार्यश्च उदारो हासः स्निग्धे ईक्षणे च यस्मिंस्तत्तस्य भगवतो मुखसरोजं दृशिभिः पपुः मुखगतलावण्यरूपं मकरन्दं नेत्रचषकैः पपुरित्यर्थः । आनर्तादयः केचन मार्गस्थाः केचित्पार्श्वस्था अपि तेषां कृपया पि पथा गमनात् अत एवागाच्छनकैर्विदेहान् इति वक्ष्यते ॥२०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आहृतमानीतम् ॥१७॥ कृष्णो व्यासः रामो जामदग्न्यः अहं शुकः ॥१८॥ ग्रहैः सह सूर्यमिवेत्यनेन श्रीकृष्णस्य र्नारदादीनामैश्वर्याच्छादनं सूचितमिति भावः ॥१९॥ आनर्ताद्यर्णान्तदेशाः तत्रत्याः नृनार्यः अन्य अन्यदेशीयाश्च जनाः उदारहासं ग्धेक्षणं च यस्मिन् तत् दृशिभिर्लोचनैः पपुः अनासक्त्या ददृशुः ॥२०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तयोरिति ॥ तयोः प्रसन्नः भवितुमिति शेषः । प्रभुः भगवान् श्रीकृष्णः दारुकेण आहृतं रथम् आरुह्य मुनिभिः साकं विदेहान् प्रययौ ॥१७॥ केऽमी मुनय इत्यत आह ॥ नारद इति ॥ नारदः वामदेवः अत्रिः कृष्णो द्वैपायनः रामो असितः आरुणिः अहं शुकः बृहस्पतिः कण्वः मैत्रेयः च्यवनादयः तैः साकं प्रययाविति सम्बन्धः ॥१८॥ तत्रेति पथा व्रजति तत्र तत्र पौराः पुरवासिनो जनाः जानपदा जनपदस्थाः नृपाः ग्रहैः गुरुशुक्रादिभिः सह उदितं सूर्यम् इव समायान्तं भगवन्तं सार्घ्यहर्ता येषां तथाभूताः सन्तः उपतस्थुः । अभूतोपमेयम् ॥१९॥ आनर्तेति ॥ हे नृप धन्वा च कुरुश्च जाङ्गलश्च कंकश्च मत्स्यश्च पाञ्चालश्च कुन्तिश्च मधुश्च कैकयश्च कोसलश्च अर्णश्च ते, र्णान्तदेशवर्तिनो जना इत्यर्थः । अन्ये च नृनार्यः नरा नार्यश्चेत्यर्थः । उदारो हासः स्निग्धे ईक्षणे च यस्मिंस्तत् सरोजं मुखसरोजगतलावण्यरूपमकरन्दमित्यर्थः । दृशिभिर्नेत्रचषकैः पपुः ॥२०॥

कृष्णप्रिया

एक बार भगवान श्रीकृष्ण ने उन दोनों पर प्रसन्न होकर दारुकसे रथ मंगवाया और उसपर सवार होकर द्वारकासे विदेह देशकी और प्रस्थान किया ॥१७॥ भगवान के साथ नारद, वामदेव, अत्रि वेदव्यास, परशुराम, असितं, आरूणि, मैं (शुकदेव), बृहस्पति, कण्व, मैत्रेय, च्यवन आदि ऋषि भी थे ॥१८॥ परीक्षित् ! वे जहां जहां पहुंचते वहां वहां की नागरिक और ग्रामवासी प्रजा पूजा की सामग्री लेकर उपस्थित होती । पूजा करने वालोंके भगवान ऐसे जान पडते, मानों ग्रहों के साथ साक्षात् सूर्यनारायण उदय हो रहे हो ॥१९॥ परीक्षित् उस यात्रामें अनंत धन्व मत्स्य पांचाल कुन्ति मधु केकय कोसल आदि अनेक देशोंके नर नारियोंने अपने नेत्ररूपी दोनों से भगवान श्रीकृष्ण के उन्मुक्त हास्य और प्रेमभरी चितवनसे युक्त मुखराविन्द के मकरन्द रसका पान किया ॥२०॥

तेभ्यः स्ववीक्षणविनष्टतमिस्त्रदृग्भ्यः क्षेमं [1]त्रिलोकगुरुरर्थदृशं च यच्छन् ।
शृण्वन् दिगन्तधवलं स्वयशोऽनुभघ्नं गीतं सुरैर्नृभिरगाच्छनकैर्विदेहान् ॥२१॥
तेऽच्युतं प्राप्तमाकर्ण्य पौरा जानपदा [2]नृप । [3]अभीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः ॥२२॥
दृष्ट्वा [4]तमुत्तमश्लोकं प्रीत्युत्फुल्लाननाशयाः । [5]कैर्धृतांजलिभिर्नेमुः श्रुतपूर्वांस्तथा मुनीन् ॥२३॥
स्वानुग्रहाय सम्प्राप्तं [6]मन्वानौ तं जगद्गुरुम् । मैथिलः श्रुतदेवश्च पादयोः पेततुः प्रभो ॥२४॥

कर्दमक्षमा

त्रिलोकगुरुः, स्ववीक्षणविनष्टतमिस्त्रदृग्भ्यः, तेभ्यः, अर्थदृशम्, क्षेमम्, च, यच्छन्, दिगन्तधवलम्, अशुभघ्नम्, सुरैः, नृभिः, गीतम्, स्वयशः, श्रण्वन्, शनकैः, विदेहान्, अगात् ॥२१॥ नृप, प्राप्तम्, अच्युतम्, आकर्ण्य, गृहीतार्हणपाणयः, मुदिताः, ते, जानपदाः, पौराः, तस्मै, अभीयुः ॥२२॥ उत्तमश्लोकम्, दृष्ट्वा, प्रीत्युत्फुल्लाननाशयाः, ते, कैः, धृताञ्जलिभिः, तथा, श्रुतपूर्वान्, मुनीन्, नेमुः ॥२३॥ स्वानुग्रहाय, तम्, जगद्गुरुम्, सम्प्राप्तम्, मन्वानौ, मैथिलः, श्रुतदेवः, च, प्रभोः, पादयोः, पेततुः ॥२४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वीक्षणेनैव विनष्टतमिस्रा दृग्येषां तेभ्यः क्षेममभयमर्थदृशे तत्त्वज्ञानं च ॥२१॥ अभीयुः प्रत्युज्जग्मुः ॥२२॥ प्रीत्योत्फुल्लान्याननान्याशयाः अन्तःकरणानि च येषां ते कैः शिरोभिः ॥२३-२५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विनष्टतमिस्रा निरस्ताज्ञाना दृग्बुद्धिर्येषां तेभ्यः । अभयं सांसारिकभयाभावं तद्धेतुभूतं तत्त्वज्ञानमपरोक्षज्ञानं च । तेभ्य आनर्तादिवासिभ्यः । दिगन्तान् धवलयति शोधयतीति तथा । सर्वत्र व्याप्तम् । अशुभघ्नं महापातकनाशकम् । विदेहान् मिथिलादेशान् ॥२१॥ ते मैथिलाः । तस्मै तं पूजयितुम् ॥२२॥ ते उक्तार्थाः । यथा तं तथा मुनीन् पूर्वं श्रुताः श्रुतपूर्वास्तान्नेमुः ॥२३॥ तं श्रीकृष्णम् । किम्भूतम्-जगद्भिः सर्वलोकैर्गम्यते स्वस्वाभिलषितावाप्तये प्राप्यते इति जगद्गु औणादिकोऽत्र डुः ब्राह्मणकुलं तद्राति स्वीकरोति स्वीयत्वेनेति जगद्गुरुरत्रापि रातेर्डुः ब्राह्मणकुलसहितमित्यर्थः ॥२४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ननु कथं परब्रह्मविग्रहं श्रीभगवन्तमज्ञानमयैश्चक्षुर्भिरपश्यन् कथं वायुवेगरथं तमन्ववर्तन्त तत्राह-तेभ्य इति । स्ववीक्ष स्वविषयककृपादृष्टिः 'पुमान् स्त्रिया' इत्येकशेषत्वात् नृभ्यः नारीभ्यश्चेत्यर्थः । तमिस्त्रमज्ञानं क्षेमं पुनस्तदापातशङ्कानिरासम् अथ

---

[1] र्थदृशं-वीर. । [2] नृपाः-गो. प्रे. टी. । [3] प्रतीयु-गो. प्रे. टी. । [4] त उत्तम-श्रीधर. वंशी. वीर. विज. । [5] निबद्धाञ्जलिभिः-वी. उद्धृताञ्जलिभिः-विज. । [6] सत्यभूतं जगद्गुरुं-विज. ।

तत्स्वरूपभूतपरमार्थप्रकाशव
तयैवापश्यन्नित्यर्थः । अत एव
तत् सुरैराकाशगामिभिः नृभिश्
जनाः तस्मै तदर्थं गृहीतमर्हणम
दिदृक्षाऽऽसीत् किंवा तेनापि
श्रुतपूर्वानिति तेषां माहात्म्यज्ञा
सम्यक्स्वाभीष्टमुनिगणसाहित्या
पेततुः द्विजश्रेष्ठस्यापि श्रुतदेवस्

तेभ्य इति । 'पुमान् ि
वैयर्थ्यादान्ध्यम्, क्षेमं संसारभय
[घ, ङ] ।) दीक्षाविशेषः सू
एवाकाशे सुरैः, भूमौ च नृभिर्गी
स्ववीक्षणेनैव विशेषतो नष्टं तमि
तदर्थमर्थदृशं परमपुरुषार्थभक्तिज्ञा
भगवन्तमाकर्ण्यैव मुदिता जानप
पौरादीनामीदृशभाग्योदयेन प्रहर्षा
कृतार्थता स्यात्तं साक्षाद्दृष्ट्वेत्यर्थः। कै
तेन दर्शने चौत्सुक्यं सूचितम् ॥२३
प्राप्तमागतं मन्यमानौ अतो भक्त्युद्रे
पश्चान्निर्देशो विनयलज्जादिविशेषेण

अर्थदृशं तत्त्वार्थज्ञानम् ॥

तेभ्य इति । त्रिलोकगुरुर्भ
श्रेयो यथा भवति तथाऽऽर्थदृशं प्रयच
सुरैर्नृभिश्च गीतं श्रण्वन् शनैर्विदेहान् दे
भगवतेऽभीयुः प्रत्युज्जग्मुः तमभिय
पावन्तरम् ॥२२॥ दृष्ट्वेति । प्रीत्योत्फुल्ल
निबद्धाञ्जलिभिर्नेमुः कैर्धृताञ्जलिभिरि
भगवन्तं स्वानुग्रहार्थमागतं मन्वानौ प्र

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

भूतपरमार्थप्रकाशकचिच्छक्ति सा चात्र भक्तिरूपा ज्ञेया "भक्त्याहमेकया ग्राह्यः" इत्यादिभ्यः ततश्चक्षुरुदितया यन्नित्यर्थः। अत एवाह-त्रिलोकगुरुरिति। वेधदीक्षयैवेति भावः। दिगन्तान् दिशस्तत्रत्यान् धवलयति निर्मलयतीति तथा सुरैराकाशगामिभिः नृभिश्च क्रमशो मिलितैः ॥२१॥ अच्युतं सर्वरूपगुणादिसम्पूर्णं भगवन्तमाकर्ण्यैव मुदिताः जानपदाश्च तस्मै तदर्थं गृहीतमर्हणमर्घ्यादिपूजोपकरणं यैस्ते पाणयो येषां ते ॥२२॥ उत्तमश्लोकमिति। यस्य दूरतः सद्यशःश्रवणेन चिर आसीत् किंवा तेनापि कृतार्थता स्यात् तं साक्षाद्दृष्ट्वेत्यर्थः। कैरिति। श्रीमुखदर्शनार्थं तथा तेनैव प्रकारेण मुनींश्च यतः र्वानिति तेषां माहात्म्यज्ञानं तेन दर्शने चौत्सुक्यं सूचितम् ॥२३॥ जगतो गुरुं श्रीब्रह्मादीनामपि परमपूज्यं स्वयोरनुग्रहायैव स्वाभीष्टमुनिगणसाहित्यादिना प्राप्तमागतं मन्यमानौ अतो भक्त्युद्रेकेण प्रभोर्निजेश्वरस्य सर्वाभीष्टप्रदानसमर्थस्य वा पादयोः द्विजश्रेष्ठस्यापि श्रुतदेवस्य पश्चान्निर्देश आदरयोग्यतया सङ्कोचेन पश्चाद्वर्तित्वात् ॥२४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तेभ्य इति। 'पुमान् स्त्रिया' इत्येकशेषत्वात् नृभ्यो नारीभ्यश्चेत्यर्थः। तमस्त्रं नेत्ररोगविशेषः। किंवा, श्रीकृष्णदर्शनेन न्ध्यम्, क्षेमं संसारभयाभावं तदर्थमेवार्थदृशं यच्छन् वीक्षणमात्रेणैव, यतस्त्रिलोकस्य गुरुवरत्वेन वैधाख्यो (वेधाख्यो [ङ] ।) दीक्षाविशेषः सूचितः। दिगन्ताः सर्वदिशो धवला निर्मला यस्मात्तत्, यतोऽशुभघ्नं सर्वामङ्गलनाशकम्, अत काशे सुरैः, भूमौ च नृभिर्गीतं सदा गीयमानमित्यर्थः। शनकैरिति तत्तद्दानादिना लोकप्रीत्यर्थम्। अन्यत्तैर्व्याख्यातम्। यद्वा, क्षणेनैव विशेषतो नष्टं तमिस्त्रं मोहलक्षणमावरणरूपं वा तमो यस्याः सा दृक् ज्ञानं येषां तेभ्यः। क्षेमं लोकद्वयमङ्गलं र्थदृशं परमपुरुषार्थभक्तिज्ञानम्। अन्यत् समानम् ॥२१॥ अच्युतं सर्वरूपगुणादि (सर्वस्वरूप-गुणादि- [ग] ।) परिपूर्णं न्तमाकर्ण्यैव मुदिता जानपदाश्च जनास्तस्मै तदर्थं गृहीतमर्हणमर्घ्यादिपूजोपकरणं यैस्ते पाणयो येषां ते। हे नृपेती नामीदृशभाग्योदयेन प्रहर्षात् ॥२२॥ उत्तमश्लोकमिति-यस्य दूरतः सद्यशःश्रवणेन चिरं दिदृक्षा आसीत्, किंवा तेनापि ता स्यात्तं साक्षाद्दृष्ट्वेत्यर्थः। कैरिति श्रीमुखदर्शनार्थं तथा तेनैव प्रकारेण मुनींश्च यतः श्रुतपूर्वान्। इति तेषां माहात्म्यादिज्ञानम्, र्शने चौत्सुक्यं सूचितम् ॥२३॥ जगतो गुरुं श्रीब्रह्मादिपरमपूज्यमपि स्वयोरनुग्रहायैव सम्यक् स्वप्रियमुनिगणसाहित्यादिना। गतं मन्यमानौ अतो भक्त्युद्रेकेण प्रभोर्जिजेश्वरस्य सर्वाभीष्टप्रदानसमर्थस्य वा, पादयोः पेततुः, द्विजश्रेष्ठस्यापि श्रुतदेवस्य र्देशो विनयलज्जादिविशेषेण राज्ञः पश्चाद्वर्तित्वात्। एवमग्रेऽपि ॥२४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अर्थदृशं तत्त्वार्थज्ञानम् ॥२१-२२॥ कैः शिरोभिः ॥२३-३४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तेभ्य इति। त्रिलोकगुरुर्भगवान् स्वदर्शनेन विनष्टा तमिस्त्रा दृक् येषां तेभ्यः स्ववीक्षणमात्रनिरस्ताज्ञानेभ्य इत्यर्थः। क्षेमं यथा भवति तथाऽऽर्थदृशं प्रयच्छन्नपाङ्गदृष्ट्या तानवलोकयन्नित्यर्थः। अतिशुभ्रं निर्मलं दिगन्तधवलं दिगन्तव्याप्तं स्वयशः गीतं शृण्वन् शनैर्विदेहान् देशानगाद्ययौ ॥२१॥ त इती। ते वैदेहाः पौरा जानपदाश्च गृहीतमर्हणं यैस्ते पाणयो येषां ते तस्मै भीयुः प्रत्युज्जग्मुः तमभिययुरित्यर्थः। यद्वा तस्मै इत्यनेन सापेक्षस्यापि गृहीतार्हणेत्यस्यार्षत्वात्समासः तं वा इति ॥२२॥ दृष्ट्वेति। प्रीत्योत्फुल्लमाननमाशयश्च येषां ते विदेहदेशवासिनो जनास्तं कृष्णं यथा श्रुतपूर्वान् मुनींश्च न तु दृष्टपूर्वान् लिभिर्नेमुः कैर्धृताञ्जलिभिरिति पाठे न्यस्ताञ्जलिभिः शिरोभिरित्यर्थः ॥२३॥ स्वानुग्रहायेति। मैथिलः श्रुतदेवश्च जगद्गु स्वानुग्रहार्थमागतं मन्वानौ प्रभोः श्रीकृष्णस्य पादयोः निष्पेततुः ॥२४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

सेवाफलमाह-तेभ्य इति । स्ववीक्षणेन दर्शनेन विनष्टं तमिस्रं यस्याः सा तथा विनष्टतमिस्रा निरस्ताज्ञाना दृक् ज्ञानं ये ते तथा तेभ्यः तेभ्यः पौरेभ्यः क्षेमं यच्छन् अर्थदृशमपरोक्षज्ञानं च ददन् एकस्मिन् दिगन्तेऽप्यनन्यथा गीयमानत्वाद्दिगन्तधवलम् ॥२१-२२॥ स्वधृताञ्जलिरिति पाठे के मूर्ध्नि धृताञ्जलिपुटैरित्यर्थः ॥२३॥ सत्यभूतं निर्दोषानन्दज्ञानघनम् ॥२४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तमिस्रमज्ञानं क्षेमं पुनस्तदापातशङ्कानिरासम् अर्थदृशं तत्स्वरूपभूतपरमार्थप्रकाशचिच्छक्तिं सा चात्र भक्तिरूपा ज्ञे "भक्त्याऽहमेकया ग्राह्यः" इत्यादिभ्यः ततश्च तया चक्षुरुदितयैवापश्यन्नित्यर्थः । एत एवाह-त्रिलोकगुरुरिति । वैधदीक्षयैवे भावः । दिगन्तान् दिशस्तत्रत्यान् धवलयति निर्मलयतीति तथा तत् ॥२१-३०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु परब्रह्मविग्रहस्य तस्य माधुर्यास्वादनं कथम् ? तेषां प्रति स्वनेत्रैस्तत्राह-तेभ्यः 'पुमान् स्त्रिया' इत्येकशेषात् नृभ्यो नारीभ्यश्चेत्यर्थः । स्ववीक्षणं स्वकृपावलोकस्तेन विनष्टं तमिस्रमज्ञानं यासु तथाभूता दृशो नेत्राणि येषां तेभ्यः अर्थदृ परमार्थवस्त्वनुभवं क्षेमं स्वभक्तियोगं च स्वमाधुर्यविशेषग्राहकं यच्छन् 'भक्त्याहमेकया ग्राह्यः' इति तदुक्तेः ॥२१॥ अभीयुः प्रत्युज्जग्मुः ॥२२॥ कैः शिरोभिः धृता अञ्जलयो येषु तैः ॥२३-२४॥

गूढार्थदीपिनी

त्रिलोकगुरुः भगवान् तेभ्यो नृभ्य (पुमान् स्त्रिया इत्येकशेषात् नृभ्यः नारीभ्यश्चेत्यर्थः ।) अर्थदृशं तत्त्वज्ञानं तत्फलं क्षे भाविनं मोक्षं च यच्छन् सुरैः गीतं स्वयशः शृण्वन् विदेहान् अगादित्यन्वयः । कथम्भूतं यशः दिगन्तान् दिग्भागान् धवलयं प्रकाशयतीति तथा । पुनश्च । अशुभघ्नं महापातकनाशनम् । कथम्भूतेभ्यः नृभ्यः । स्ववीक्षणेन कृपादृष्ट्यैव विनष्टतमि विनष्टाज्ञाना दृक् बुद्धिः येषां तेभ्यः ॥२१॥ ते मैथिलाः अच्युतं प्राप्तमाकर्ण्य मुदिताः सन्तः तस्मै तं पूजयितुमभीयुः समु जग्मुरित्यन्वयः । कथम्भूताः । अर्ह्यतेऽनेनेति अर्हणं पूजनद्रव्यं फलपुष्पादि गृहीतमर्हणं पाणौ यैस्ते ॥२२॥ ते तं कृष्णं त श्रुतपूर्वान् मुनींश्च दृष्ट्वा कैः शिरोभिः नेमुरित्यन्वयः । धृतो बद्धोऽञ्जलिः येषु तैः । कथम्भूतास्ते । प्रीत्या प्रफुल्लानि विकसितानि आननानि आशयाः अन्तःकरणानि च येषां ते ॥२३॥ तं सम्प्राप्तं मन्वानौ तौ मैथिलः श्रुतदेवश्च पादयोः पेततुः ॥२४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तेभ्यः आनर्तादिवासिभ्यः स्ववीक्षणेनैव विनष्टतमिस्रा दृशो येषां तेभ्यः अर्थदृशं यावज्जीवनं तावत् भोगसाधन योऽर्थस्तत्सम्पादनज्ञानं क्षेमं मोक्षोपायं स्वविषयकं ज्ञानं भक्तियोगं च दिगन्ताः धवलाः शुद्धाः पवित्रीकृताः येन तत् ॥२१-२ ते वैदेहाः अभीयुः प्रत्युज्जग्मुः धृता अञ्जलयो येषु तैः कैः शिरोभिः ॥२३-२५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो भगवान् फलरूपेणापि भजने फलान्तरं प्रयच्छन् ततोऽप्यग्रे फलपरम्परारिद्ध्यर्थम् उपायं कृतवानित्याह-ते इति । भगवद्वीक्षणेन नष्टं तमः अज्ञानं यस्य तादृशयुक्तदृष्टिभ्यः वस्तुसामर्थ्यादेव दोषे निवृत्ते स्वयमधिकं क्षेमं दत्त लब्धस्य परिपालनं क्षेमः यथेयं मूर्तिः सर्वदा दृष्टौ सन्निहिता भवति तथा वरं दत्तवानित्यर्थः । तदैवेदानीं प्राप्तस्य परि भवति । ननु मध्ये विषयान्तरदर्शनस्यावश्यकत्वात् कथमेतस्यैव दर्शं निरन्तरं भवेदित्याशंक्याह-त्रीलोकगुरुरिति । त्रिलो

स एव गुरुः यत्रान्तर्यामिप्रेरणया
तदैव तन्निषेधार्थमुपदेशं करोतीत
वस्तुरूपम् अतो यत्किञ्चिदपि ते
भगवन्तं द्रष्टुं सामर्थ्यं दत्तवानित्य
स्थास्यतीत्यपि ज्ञापयति । श्रण
तत्कीर्तिविस्मरणे साधनाभावमाशंव
निरूपितम् एव मध्यस्थेऽप्येतावत
शनकैरिति मध्ये तेषु स्नेहो निरूपितः
नृपा इति पाठे भगवांस्तत्र गच्छतीति
तेषां कायिकादिभावमाह-आभिमुख
भजनमुक्तम् ॥२२॥ तत ऐन्द्रियकमा
। प्रविष्टोऽतिप्रीतिमुत्पाद्य उत्फुल्लान्य
भगवन्तं नेमुः मुनींश्च विशेषाभिज्ञत्वात्
स्वानुग्रहाय सम्प्राप्तमिति । ननु सर्वदा
। किमस्माभिर्यत् क्रियते तदेव कर्तव
एव पादयोः पेततुः अनेन ब्राह्मणस्य
स्वाहितं करिष्यति नाधिकं स्वार्थमपेक्ष

स्वस्य वीक्षणेन दर्शनेन विना
यावद्धवलं शुद्धं स्वयशो अशुभघ्नं पाप
श्रुत्वा पौरा जानपदा गृहीतार्हणपाणयो मु
मुखानि आशया अन्तःकरणानि च येषां ते
प्राप्तं जगतां गुरुं तं श्रीकृष्णं मन्वानौ मैथि

गो

त्रिलोकगुरुः त्रिलोकस्य ब्रह्मादि
जनेभ्यः अर्थदृशं तत्त्वज्ञानं तत्फलं क्षेमं
सुरैर्नृभिश्च गीतम् । गाने हेतुमाह-अशुभघ्नं
॥२१॥ हे नृप ! ते वैदेहाः पौरा जानपदाश्च
अभीयुः तं प्रत्युज्जग्मुरित्यर्थः ॥२२॥ उत्त
अन्तःकरणानि येषां ते विदेहवासिनो जना
समागतं मन्वानौ मैथिलश्रुतदेवौ प्रभोस्तस्य

तेभ्य इति । त्रिलोकगुरुः भगवान्

मिस्रा निरस्ताज्ञाना दृक् ज्ञानं येषां
न्यथा गीयमानत्वाद्दिगन्तधवलम
ानघनम् ॥२४॥

च्छक्ति सा चात्र भक्तिरूपा ज्ञेया
-त्रिलोकगुरुरिति । वैधदीक्षयैवेति

॥

॥

भ्यः 'पुमान् स्त्रिया' इत्येकशेषात्
दृशो नेत्राणि येषां तेभ्यः अर्थदृशं
ग्राह्यः' इति तदुक्तेः ॥२१॥ अभीयुः

र्थः ।) अर्थदृशं तत्त्वज्ञानं तत्फलं क्षेमं
यशः दिगन्तान् दिग्भागान् धवलयति
स्ववीक्षणेन कृपादृष्ट्यैव विनष्टतमिस्रा
न्तः तस्मै तं पूजयितुमभीयुः सम्मुखं
पाणौ यैस्ते ॥२२॥ ते तं कृष्णं तथा
तास्ते । प्रीत्या प्रफुल्लानि विकसितानि
देवश्च पादयोः पेततुः ॥२४॥

दृशं यावज्जीवनं तावत् भोगसाधनभूतो
शुद्धाः पवित्रीकृताः येन तत् ॥२१-२२॥

रारिद्ध्यर्थम् उपायं कृतवानित्याह-तेभ्य
दोषे निवृत्ते स्वयमधिकं क्षेमं दत्तवान्
नित्यर्थः । तदैवेदानीं प्राप्तस्य परिपालनं
याशंक्याह-त्रीलोकगुरुरिति । त्रिलोकस्य

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

गुरुः यत्रान्तर्यामिप्रेरणया सर्वेषां सद्बुद्धिरुत्पद्यते । बहिर्वाक्यं स्वप्रयोजनं व्यभिचारात् । अतो यदैवान्यदर्शनं प्राप्नोति तन्निषेधार्थमुपदेशं करोतीत्यर्थः । किञ्च अर्थदृशं च यच्छन् सर्वत्र ते यथा अर्थरूपं भगवन्तमेव पश्यन्ति । सर्ववस्तुषु रूपम् अतो यत्किञ्चिदपि ते पश्यन्तः भगवन्तमेव पश्यन्तीति पूर्वदत्तक्षेमस्य न कापि प्रच्युतिः । चकारात्तत्र स्थितमपि वन्तं द्रष्टुं सामर्थ्यं दत्तवानित्यर्थः । नन्वकस्मात् कथमेतावत्फलं प्रयच्छतीति शङ्कां व्यावर्तयन् तेन दत्तं फलं सर्वदैव च्छतीत्यपि ज्ञापयति । शृण्वन् मध्ये कालादिवशात् जातधर्मेण प्रतिबन्धमाशंक्याह-अशुभघ्नमिति । कदाचित् कीर्तिविस्मरणे साधनाभावमाशंक्याह-गीतं मुनिभिरिति । ये देवरूपाः मनुष्याः तैर्गीतं सुरैर्नृभिश्च गीतमिति वा तेन कीर्तेरक्षयत्वं पितम् एव मध्यस्थेऽप्येतावत्प्रयच्छति । यदर्थं तु गच्छति तेभ्यः किं दास्यतीति शङ्कामुत्पादयन्नेव उद्देश्यदेशान् गतः रिति मध्ये तेषु स्नेहो निरूपितः ॥२१॥ उद्देश्यदेशस्थानां भगवति स्नेहादिकमाह-तेऽच्युतं प्राप्तमिति । पुरवासिनो देशवासिनश्च इति पाठे भगवांस्तत्र गच्छतीति दर्शनार्थं प्रथमत एव सर्वे गताः तेऽपि भगवति पुरवासिवज्जाता इति त्रिविधा निरूपिताः कायिकादिभावमाह-आभिमुख्येन ईयुरिति । कायिकं मुदिता इति । मानसं गृहीतार्हणपाणय इति । धनद्वारा ममतास्पदेनापि मुकम् ॥२२॥ तत ऐन्द्रियकमाह-दृष्ट्वा तमिति । प्रीत्युत्फुल्लमुखाम्बुजाः इति भगवद्दर्शनं तादृशे येन भगवानन्तः प्रविशति तेऽतिप्रीतिमुत्पाद्य उत्फुल्लान्याननानि बहिः आशयान्तश्च करोति । ततः कैर्मस्तकैर्धृताञ्जलिभिः सर्वापराधक्षमापकैः नेमुः मुनींश्च विशेषाभिज्ञत्वात् तथा नमनमिति शङ्कां वारयति श्रुतपूर्वानिति ॥२३॥ साधारणानां प्रपत्तिमुक्त्वा मुख्ययोराह-ग्रहाय सम्प्राप्तमिति । ननु सर्वदा भगवान् दृश्यते एव सेव्यते च । तथा सति को विशेष इति शङ्कां वारयति-जगद्गुरुमिति स्माभिर्यत् क्रियते तदेव कर्तव्यमाहोस्विदन्यद्वा एतन्निर्णयं भगवानेव करिष्यतीति विशेषतः समागमनमित्यर्थः । अत पादयोः पेततुः अनेन ब्राह्मणस्यापि नमस्कारः अनिषिद्ध इति निरूपितं प्रभोः समर्थस्य चरणनमनमात्रेणैव सर्वमेव हितं करिष्यति नाधिकं स्वार्थमपेक्षते फलदानार्थं वेति सूचितम् ॥२४॥

श्रीसुबोधिनीसारः

स्वस्य वीक्षणेन दर्शनेन विनष्टा तमिस्रा दृग् येषां तेभ्यः क्षेमं मङ्गलम् अर्थदृशं तत्त्वज्ञानं यच्छन् ददत् दिशामन्तं धवलं शुद्धं स्वयशो अशुभघ्नं पापहन्तृ देवैर्नृभिर्गीतं शृण्वन् शनैर्विदेहान् देशानगात् ॥२१॥ हे नृप ! प्राप्तमच्युतं श्रीकृष्णं पौरा जानपदा गृहीतार्हणपाणयो मुदिता हर्षिताः तस्मै अभीयुः ॥२२॥ उत्तमश्लोकं तं हरिं दृष्ट्वा प्रीत्या उत्फुल्लानि आननानि आशया अन्तःकरणानि च येषां ते धृतोऽञ्जलियैस्तैः कैः शिरोभिर्नेमुः । श्रुतपूर्वान् मुनीन् तथा नेमुः ॥२३॥ स्वयोरनुग्रहार्थं गतं गुरुं तं श्रीकृष्णं मन्वानौ मैथिलो राजा श्रुतदेवो ब्राह्मणो द्वौ प्रभोः पादयोः पेततुः ॥२४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

त्रिलोकगुरुः त्रिलोकस्य ब्रह्मादिपूज्यत्वाद्भगवान् स्वदर्शनेन विनष्टं तमिस्रमज्ञानं यासां तादृश्यो दृशो बुद्धयो येषां तेभ्यो अर्थदृशं तत्त्वज्ञानं तत्फलं क्षेमं भाविनं मोक्षं च स्वकृपादृष्ट्यैव यच्छन् तथा दिग्गतधवलं दशदिक्षु व्याप्तं विशुद्धं गीतम् । गाने हेतुमाह-अशुभघ्नं गानकर्तॄणां श्रोतॄणां च सर्वपापनिवर्तकं स्वयशः शृण्वन् शनकैर्विदेहान् देशान् अगात् ॥२१॥ हे नृप ! ते वैदेहाः पौरा जानपदाश्च अच्युतं प्राप्तमाकर्ण्य श्रुत्वा मुदिताः गृहीतमर्हणं यैस्ते पाणयो येषां ते तस्मै भगवते तं प्रत्युज्जग्मुरित्यर्थः ॥२२॥ उत्तमश्लोकं पुण्ययशसं कृष्णं श्रुतपूर्वान् मुनींश्च दृष्ट्वा प्रीत्योत्फुल्लानि आननानि आशया करणानि येषां ते विदेहवासिनो जना धृतो बद्धोञ्जलिर्येषु तैः कैः शिरोभिस्तान्नेमुः ॥२३॥ जगद्गुरुं तं श्रीकृष्णं स्वानुग्रहार्थं मन्वानौ मैथिलश्रुतदेवौ प्रभोस्तस्य पादयोः पेततुः ॥२४॥

अन्वितार्थप्रकाशिका

तेभ्य इति । त्रिलोकगुरुः भगवान् स्वदर्शनेन विनष्टं तमिस्रमज्ञानं यासां तादृशो बुद्धयो येषां तेभ्यः । "पुमान् स्त्रिया"

अन्वितार्थप्रकाशिका

इत्येकशेषात् नृभ्यो नारीभ्यश्चेत्यर्थः । अर्थदृशं तत्त्वज्ञानं तत्फलं क्षेमं भाविनं मोक्षं च स्वकृपादृष्ट्यैव यच्छन् तथा दिगन्तधवलं दशदिक्षु व्याप्तं विशुद्धं सुरैर्नृभिश्च गीतम् अशुभघ्नं गानकर्तृणां श्रोतृणां च सर्वपापनिवर्तकं स्वयशः शृण्वन् शनकैर्विदेहान् देशान् अगात् ॥२१॥ ते इति । हे नृप ! ते वैदेहाः पौरा जानपदाश्च अच्युतं प्राप्तमाकर्ण्य मुदिताः गृहीतमर्हणं यैस्ते पाणयो येषां ते तस्मै भगवते अभीयुः तं प्रत्युज्जग्मुः ॥२२॥ दृष्ट्वेति । उत्तमश्लोकं कृष्णं श्रुतपूर्वान् मुनींश्च दृष्ट्वा प्रीत्योत्फुल्लानि आननानि आशय अन्तःकरणानि येषां ते विदेहवासिनो जना धृतो बद्धोऽञ्जलिर्येषु तैः कैः शिरोभिस्तान्नेमुः ॥२३॥ स्वेति । जगद्गुरुं तं श्रीकृष्णं स्वानुग्रहार्थं सम्प्राप्तं मन्वानौ मैथिलः श्रुतदेवश्चेत्येतौ प्रभोस्तस्य पादयोः पेततुः ॥२४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्ववीक्षणेन श्रीकृष्णकृपाकटाक्षेण विनष्टं तमिस्रं पापं यस्याः सा दृक् येषां तेभ्यो जनेभ्यः क्षेमं कल्याणम् अर्थदृशं विवेकं च यच्छन् ददत् दिगन्तधवलं दिगन्तविस्तीर्णं शृण्वत् ॥२१॥ अभीयुः संमुखं जग्मुः ॥२२॥ प्रीत्योत्फुल्लानि आननानि मुखानि आशयाः अन्तःकरणानि च येषां ते ॥ धृता अञ्जलयो येषु तैः कैर्मस्तकैः नेमुः ॥२३-२४-२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तेभ्य इति ॥ त्रिलोकगुरुर्भगवान् स्ववीक्षणेन स्वदर्शनेनैव विनष्टतमस्रा दृग्येषां तेभ्यः स्ववीक्षणमात्रनिरस्ताज्ञानेभ्य इत्यर्थः । तेभ्यो जनेभ्यः क्षेमं श्रेयः अर्द्धदृशं च यच्छन् क्षेमविधानपूर्वमपाङ्गदृष्ट्या अवलोकयन्नित्यर्थः । अर्थदृशमिति तत्त्वज्ञानमित्यर्थः । यच्छन् अशुभघ्नम् अति शुभ्रमित्यपि पाठः । दिगन्तधवलं दिगन्तव्याप्तमित्यर्थः । सुरैर्देवैः नृभिर्मनुष्यैश्च गीतं स्वयशः शृण्वन् शनकैः विदेहान् देशान् अगाद्ययौ ॥२१॥ त इति ॥ हे नृप पौराः जानपदाश्च ते लोकाः अच्युतं श्रीकृष्णं प्राप्तम् आकर्ण्य गृहीतमर्हणं यैस्ते पाणयो येषां ते मुदिताः सन्तश्च तस्मै भगवते अभीयुः प्रत्युज्जग्मुः । तमभिययुरित्यर्थः । यद्वा इत्यनेन सापेक्षस्यापि गृहीतार्हणेत्यस्यार्षत्वात् समासः । तं वेति पाठान्तरम् ॥२२॥ दृष्ट्वेति ॥ प्रीत्या उत्फुल्लमाननमाशयश्च येषां ते विदेहवासिनः जनाः उत्तमश्लोकं श्रीकृष्णं तथा श्रुतपूर्वान् मुनींश्च दृष्ट्वा धृताञ्जलिभिः कैर्मस्तकैः न्यस्ताञ्जलिभिः शिरोभिरित्यर्थः बद्धाञ्जलिभिरित्यपि पाठः । नेमुर्मनश्चक्रुः ॥२३॥ स्वानुग्रहायेति ॥ मैथिलः श्रुतदेवश्च जगद्गुरुं तं श्रीकृष्णं स्वानुग्रहाय स्वानुग्रहार्थं सम्प्राप्तम् आगतं मन्वानौ सन्तौ प्रभोः श्रीकृष्णस्य पादयोः पेततुः ॥२४॥

कृष्णप्रिया

त्रिलोकगुरु भगवान श्रीकृष्ण के दर्शन से उन लोगोंकी अज्ञात दृष्टि नष्ट हो गयी । प्रभु दर्शन करते नर नारियों को अपनी दृष्टि से परम कल्याण और तत्त्वज्ञान का दान करते चल रहे थे । स्थान स्थान पर मनुष्य और देवता भगवानकी उस कीर्ति का गान करके सुनाते, जो समस्त दिशाओंको उज्ढवल बनाने वाली एवं समस्त अशुभों का विनाश करनेवाली है । इस प्रकार भगवान श्रीकृष्ण धीरे धीरे विदेह देशमें पहुंचते ॥२१॥ परीक्षित् भगवान श्रीकृष्ण के शुभागमन का समाचार सुनकर नागरिक और ग्रामवासियों के आनंद की सीमा न रही अपने हाथोमें पूजा की विविध सामग्रीयां लेकर उनकी सपर्या पूजा करने आये ॥२२। भगवान श्रीकृष्ण का दर्शन करके उनके हृदय और मुखकमल प्रेम और आनंद से खिल उठे । उन्होंने भगवान को तथा उन मुनियों को जिनका नाम केवल सुन रखा था देखा न था उन्हें हाथ जोड मस्तक झुका कर प्रणाम किया ॥२३॥ मिथिलानरेश बहुलाश्व और श्रुतदेवने यह समझकर कि जगद्गुरु भगवान श्रीकृष्ण हमलोगों पर अनुग्रह करने के लिये ही प,धारे है, उनके चरणों पर गिरकर प्रणाम किया ॥२४॥

न्यमन्त्रयेतां दाशा
भगवांस्तदभिप्रेत्य
श्रोतुमप्यसतां[२] दूरा

मैथिलः, श्रुतदेवः, च,
अभिप्रेत्य, द्वयोः, प्रियचिकीर्षया,
श्रोतुम्, अपि, स्वगृहागतान्, आनी

तदभिप्रेत्याङ्गीकृत्य तत्त
तदलक्षितस्ताभ्यामलक्षित इति ॥२

आतिथ्येनाऽतिथियोग्येन
तथा ॥२५॥ तन्निमन्त्रणम् । ताभ्यां
'ईश्वरान्पूजयाञ्चक्रे' इति तृतीयेनान्व

द्विजैर्मुनिभिः सह सहितम्
स्वातन्त्र्यं नासीदिति भावः ॥२६॥
महत् सर्वोत्कृष्टं मनो यस्य सः अ
गन्धेतिसार्धकम् । गोवृषा बलीवर्दाः

दाशार्हमशेषैश्वर्यप्रकटनार्थं
बद्धाञ्जली सन्तौ ॥२५॥ भगवान् भ
प्रविवेश ॥२६॥ ततः श्रीश्रुतदेवस्य भ
जनक इति । जनकवंश्यत्वेन सर्वज्ञा
पूजयाञ्चक्र इति त्रिभिरन्वयः । उद्धरयें
इति पृथक्पदं चित्सुखसम्मतम् ॥२७-

॥२३-३४॥

न्यमन्त्रयेतामिति । सन्नतौ नमस्कु
न्यमन्त्रयेतां निमन्त्रितवन्तौ ॥२५

---

१. रूपाभ्यां-विज. । २. प्यथ तान्-गो.

वैव यच्छन् तथा दिगन्तधवलं
श्रण्वन् शनकैर्विदेहान् देशान्
र्णं यैस्ते पाणयो येषां ते तस्मै
योत्फुल्लानि आननानि आशया
। स्वेति । जगद्गुरुं तं श्रीकृष्णं

नेभ्यः क्षेमं कल्याणम् अर्थदृशं
॥२२॥ प्रीत्योत्फुल्लानि आननानि
२४-२५॥

भ्यः स्ववीक्षणमात्रनिरस्ताज्ञानेभ्य
कयन्नित्यर्थः । अर्थदृशमिति पाठे
त्यर्थः । सुरैर्देवैः नृभिर्मनुष्यैश्च गीतं
ते लोकाः अच्युतं श्रीकृष्णं प्राप्तम
: । तमभिययुरित्यर्थः । यद्वा । तस्मै
ीत्या उत्फुल्लमाननमाशयश्च येषां ते
कैः न्यस्ताञ्जलिभिः शिरोभिरित्यर्थः ।
तं श्रीकृष्णं स्वानुग्रहाय स्वानुग्रहार्थं

हो गयी । प्रभु दर्शन करने वाले
न रहे थे । स्थान स्थान पर मनु
उज्ढवल बनाने वाली एवं सम
ह देशमें पहुंचते ॥२१॥ परीक्षित् !
तों के आनंद की सीमा न रही ।
॥२२। भगवान श्रीकृष्ण का दर्शन
ान को तथा उन मुनियों को जिन
किया ॥२३॥ मिथिलानरेश बहुला
ह करने के लिये ही प,धारे है, उन

न्यमन्त्रयेतां दाशार्हमातिथ्येन सह द्विजैः । मैथिलः श्रुतदेवश्च युगपत् संहतांजली ॥२५॥
भगवांस्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया । उभयोराविशद् [1]गेहमुभाभ्यां तदलक्षितः ॥२६॥
श्रोतुमप्यसतां[2] दूरान् जनकः स्वगृहागतान् । आनीतेष्वासनाग्र्येषु सुखासीनान् महामनाः ॥२७॥

कर्दमक्षमा

मैथिलः, श्रुतदेवः, च, युगपत्, संहताञ्जली, द्विजैः, सह, आतिथ्येन, दाशार्हम्, न्यमन्त्रयेताम् ॥२५॥ भगवान्, तत्, प्रेत्य, द्वयोः, प्रियचिकीर्षया, उभाभ्याम्, तदलक्षितः, उभयोः, गेहम्, आविशत् ॥२६॥ महामनाः, जनकः, असताम्, दूरान्, अपि, स्वगृहागतान्, आनीतेषु, आसनाग्र्येषु, सुखासीनान् ॥२७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदभिप्रेत्याङ्गीकृत्य तत्तदोभाभ्यामपि ताभ्यां तद्गृहादन्यस्य गेहं यातीत्यलक्षितोऽविदितः यद्वा उभाभ्यां रूपाभ्यां लक्षितस्ताभ्यामलक्षित इति ॥२६-२७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आतिथ्येनाऽतिथियोग्येन कर्मणा न्यमन्त्रयेतां भोजनार्थं प्रार्थयताम् । संहतः कृतोऽञ्जलिः प्रसृतकरद्वयसंयोगो याभ्यां तौ ॥२५॥ तन्निमन्त्रणम् । ताभ्यां श्रुतदेवबहुलाश्वाभ्याम् । तत्पदस्य तदार्थत्वे क्लिष्टकल्पनामपेक्ष्याह–यद्वेति ॥२६॥ जनकः नूजयाञ्चक्रे' इति तृतीयेनान्वयः । श्रोतुमपि दूरान् कर्णाविषयान् । असतां तच्छ्रवणमपि दुर्लभमिति भावः ॥२७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

द्विजैर्मुनिभिः सह सहितम् ॥२५॥ आ सम्यक् मुनिसाहित्यादिनाऽविशत् प्रविवेश अतोऽत्र निजद्वैधीभावे मुनीनामपि न्यं नासीदिति भावः ॥२६॥ तत्क्रमेणैवादौ राज्ञो वृत्तमाह–तत्र श्रोतुमिति सार्धद्वयकम् । महामनाः श्रीकृष्णनिष्ठत्वेन सर्वोत्कृष्टं मनो यस्य सः अत एव प्रवृद्धया भक्त्या प्रवृद्धभक्त्या उद्धर्ष इत्यसंहितात्वादसन्धिः । वहन् धारयन् । सार्धकम् । गोवृषा बलीवर्दाः गन्धादीनामार्थिक एव क्रमो ज्ञेयः ॥२७-२९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दाशार्हमशेषैश्वर्यप्रकटनार्थं यदुकुलेऽवतीर्णं भगवन्तम्, द्विजैर्मुनिभिः सहितं युगपत् न्यमन्त्रयेताम्, संहताञ्जली ञ्जली सन्तौ ॥२५॥ भगवान् भक्तवात्सल्याद्यशेषगुणप्रकटनार्थं परः श्रीकृष्णः, आ सम्यक् मुनिसाहित्यादिनाविशत ॥२६॥ ततः श्रीश्रुतदेवस्य भगवदादेशादिविशेषं वक्ष्यन्नादौ सूचीकटाहन्यायेन राज्ञो वृत्तमाह–श्रोतुमित्यादिभिर्नवभिः । इति । जनकवंश्यत्वेन सर्वज्ञानसम्पत्तिः सूचिता, अतो महामना गभीराशयः, अत एव प्रवृद्धया भक्त्या ईश्वरान् इति त्रिभिरन्वयः । उद्धरयेति रषकारयोः पृथक्पाठश्छन्दोऽनुरोधात् । पाठान्तरे त्वविवक्षिततत्वादसन्धिः । उद्धर्षहृदय पदं चित्सुखसम्मतम् ॥२७-२८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥२३-३४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

न्यमन्त्रयेतामिति । सन्नतौ नमस्कुर्वन्तावञ्जली ययोस्तौ द्विजैर्मुनिभिः सह सहितमित्यर्थः । दाशार्हं भगवन्तमातिथ्येनातिथ्यार्थं न्यमन्त्रयेतां निमन्त्रितवन्तौ ॥२५॥ भगवांस्त्विति । तन्निमन्त्रणमभिप्रेत्याङ्गीकृत्य द्वयोरपि प्रियं कर्तुमिच्छया तत्तदा

भ्यां-विज. । २. प्यथ तान्-गो. प्रे. टी. ।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उभभ्यामपि ताभ्यां मद्गृहादन्यस्य गेहं समायातीत्यलक्षितः अविदितः उभयोरपि गृहान् अविशत् ॥२६॥ श्रोतुमिति । अस श्रोतुमपि दूरान् स्वगृहागतान् आनीय समर्पितेषु श्रेष्ठेष्वासनेषु सुखासीनान् नत्वेत्युपरिष्टात्सम्बन्धः । कथम्भूतः ? प्रवृद्धभक्त उद्धर्षमुद्गतहर्षं हृदयं यस्य अस्त्रैरानन्दाश्रुभिः आविले व्याप्ते ईक्षणे यस्य स चासौ स च तेषामङ्घ्री पादौ प्रक्षाल्य ताः लोकपावनी मूर्ध्ना वहन् गन्धादिभिरीश्वरान् पूजयामास । आकल्पोऽलङ्कारः तत्रेश्वरशब्दः ईश्वरात्मकपरः ॥२७-२९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

निमन्त्रयेतां भोजनार्थं क्षणं कृतवन्तौ आतिथ्येन अतिथियोग्येन कर्मणा ॥२५॥ तदलक्षितः ताभ्यां रूपाभ्या अलक्षितः अज्ञातरूपद्वय इत्यर्थः ॥२६॥ अथ बहुलाश्वः ईश्वरं पूजयाञ्चक्र इत्यन्वयः । तान् नत्वा कीदृशान् श्रोतुमपि दूरा कर्णाविषयान् ॥२७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२१-३०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

न्यमन्त्रयेतामित्यार्षम् ॥२५॥ तदभिप्रेत्य मद्गृहमेवायात्विति द्वयोरेव वाञ्छितं ज्ञात्वा उभयोराविशदिति स्वस्य मुनीनां प्रकाशद्वयीकरणात् तत्तदा उभाभ्याम् अलक्षित इति ममैव निमन्त्रणमङ्गीकृत्य मद्गृहमेव कृपालुः प्रभुरायाति । श्रुतदेवस्तु प्रभुर्मद्गृह एवायमेकाकी स्वगृहं यातीति राजा तथा विचारयति स्म तथा श्रुतदेवोऽपि ततस्तयोरपि द्वौ द्वौ प्रकाशाविवाभूताम् एकः कृष्णसंयुक्तो हृष्टः अन्यः कृष्णवियुक्तो विषण्ण इति कृष्णसंयुक्तराजप्रतिवेशिजनैः श्रुतदेवगृहं गतैः श्रुतदेवः कृष्णवियुक्तो विषण्णो दृश्यते । तथैव कृष्णसंयुक्तश्रुतदेवप्रतिवेशिजनैः राजापि कृष्णवियुक्तो विषण्ण इति ॥२६-२७॥

गूढार्थदीपिनी

दशार्हवंशजत्वात् दाशार्हं श्रीकृष्णं युगपत् सहैव आतिथ्येन न्यमन्त्रयेतां भोजनार्थं प्रार्थयताम् । संहताञ्जली बद्धाञ्जली सन्तौ ॥२५॥ तत् निमन्त्रणम् अभिप्रेत्य स्वीकृत्य उभाभ्यां रूपाभ्यां गेहमविशत् । ताभ्यामलक्षितः सन् ॥२६॥ श्रोतुमिति त्रय महामना जनकः आसनेषु आसीनान् नत्वा तदङ्घ्रीन् प्रक्षाल्य तदपो मूर्ध्ना वहन् धारयन् ईश्वरान् समर्थान् तान् गन्धमाल्यादिभिः पूजयाञ्चक्रे इति त्रयाणामेकान्वयः । कथम्भूतान् । असतामभक्तानां श्रोतुमपि दूरात् दूरे वर्तमानान् । जनकः कथम्भूतः । उद्ध उत्पन्नहर्षं हृदयं यस्य अस्त्रैः आविले आर्द्रे ईक्षणे नेत्रे यस्य स चासौ स च तथा बहुव्रीहिगर्भितकर्मधारयः । ईश्वरश्च ईश्वराश्च त मुनयश्च इत्येकशेषः । यद्वा । ईश्वरो विद्यते येषु ते ईश्वराः । मत्वर्थीयोऽच् प्रत्ययः । ईश्वरसहितानित्यर्थः । आकल्पो भूषण गोवृषैरिति मधुपर्काङ्गत्वेनोक्तम् । दर्शनमात्रं विहितम् । गोषु वाक्षु वृषैः श्रेष्ठैः वेदमन्त्रैरिति वा ॥२७-२८-२९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवान् तदभिप्रेत्य मम गृहमायातु इति तयोराशयमङ्गीकृत्य द्वयोः प्रियचिकीर्षया तदलक्षितः श्रुतदेवबहुलाश्वाभ्यां रूपान्तरेण स्वेतरगृहे प्रवेष्टुमुद्यतोऽविदितः उभयोर्गेहं द्वाभ्यां रूपाभ्यामाविशदित्यन्वयः । एकेन विप्रगृहमेकेन राजगृहं युगपत् प्रविष्टोऽभूदित्यर्थः ॥२६॥ असतां श्रोतुमपि दूरान् दुर्लभान् अत्र हरिवत् हरिदासेष्वपि सूचयितुं बहुवचनेन हरिसहिताः हरिदासाः गृह्यन्ते ॥२७॥

ततः उभावपि स्वस्व
दाशार्हमिति । सहद्विजैरिति भा
लौकिकास्तथा कुर्वन्ति भगवांस्
श्रुतदेवस्य युगपत्संहताञ्जली इति
किमपि नास्तीति तत्तथैव सम्पा
समूहद्वयं जातः तत उभयोर्गृहे
ताभ्यामलक्षित एव गतः । मुनीना
यथा मां प्रपद्यन्ते" इति वाक्याच्
२६॥ ततस्तस्मिन् देशे राज मुख
मुनिभावापन्नाः भगवतः तादृशाः
दृष्ट्वा स्वस्य सिंहासनसदृशानि आ
करिष्यामीति चिन्तां परित्यज्य मह
यस्य तादृशो जातः अनेन देहे पूजा
पूजासमाप्तिः आन्तरे सूचिता । बाह
मूर्ध्ना अवहत् ततः पूजायोग्यो भूत
स्वार्थसिद्धये स हि मर्यादया प्रवृ
क्ष्यमाणमाह–अन्नतर्पितानिति ।भोज
न भवेत् । तत्ताम्बूलविश्रामशयनस
विष्णुबुद्धिरैक्यबुद्धिश्चेति विशेषाभाव

द्विजैः सह दाशार्हं कृष्णमाति
द्वयोः प्रियकरणेच्छया तत्तदा उभाभ्या
श्रोतुमपि दूरात् परे वर्तमानान् स्वगृह
यस्मिंस्तद्धृदयं यस्य अस्त्रैरश्रुभिराविले
वहन् ईश्वरान् पूजयामास । उत्तमैर्गन्धा

संहतौ संयोजितावञ्जली
न्यमन्त्रयेताम् ॥२५॥ तत्तयोर्निमन्त्रणम
यातीत्यज्ञात एव भगवान् उभाभ्यां रू
हृदयं यस्य अस्त्रैरानन्दाश्रुभिः आविले
दुराचाराणां श्रोतुमपि दूरान् कृपया स्वगृ
प्रक्षाल्य ता लोकपावनीरपो जलानि ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः उभावपि स्वस्वगृहे समानयनार्थं निमन्त्रणं कृतवन्तावित्याह-न्यमन्त्रयेतामिति। स्वगृहे समायास्यतीत्यतो हेतुः ...मिति। सहद्विजैरिति भागशो निमन्त्रणं वारयति। उभयोस्तु कर्तव्यमेव तत् लोके त्वशक्त्या कालभेदेन भागभेदेन वा ...स्तथा कुर्वन्ति भगवांस्तु प्रभुरिति सर्वं सम्पादयिष्यतीति राजत्वान्मैथिलः प्रथमं निर्दिष्टः। चकारः राजसमत्वं बोधयति। ...स्य युगपत्संहताञ्जली इति कालभेदव्यावृत्त्यर्थमुक्तं ततो भगवान् तयोरभिप्रायं ज्ञात्वा भगवतो वैभवं च ज्ञातुं भगवता शक्यं ...नास्तीति तत्तथैव सम्पादनीयमिति। भगवानुभयोरपि गृहे गतः। तत्र प्रकारमाह-उभाभ्यां तदलक्षित इति। भगवान् ...जातः तत उभयोर्गृहे गतः यस्मिन् देशे मार्गभेदोऽस्ति। ततो भगवन्माहात्म्ये तथावगते तथा रसो न भविष्यतीति ...लक्षित एव गतः। मुनीनामपि तथात्वं जातमिति। केचित् राजनि मुनीनां विशेषाभावात् सर्वत्र भगवद्बुद्धेस्तुल्यत्वात् "ये ...मां प्रपद्यन्ते" इति वाक्याच्च श्रुतदेवगृह एव मुनिभिः सहितो गतः राजगृहे तु स्वयमेव गतस्तादृग्रूप इति विमर्शः ॥२५-... ततस्तस्मिन् देशे राज मुख्य इति प्रासङ्गिकत्वाच्च राजवृत्तान्त-श्रोतुमप्यसतामिति। ये असतस्तेषां श्रोतुमपि दूरे एते ...पन्नाः भगवतः तादृशाः स्वगृहे समागता इति महदन्तरम् असत्त्वं तु देहाभिमानात् सर्वेषामवशिष्टम् अतः स्वगृहागतान् ...स्य सिंहासनसदृशानि आसनानि स्वमीत्रेभ्यः समानीतवान्। ततस्तेष्वासनाग्र्येषु सुखासीनान् कृत्वा कथमेतावतीं पूजां ...मीति चिन्तां परित्यज्य महामना भूत्वा तेषु या प्रवृद्धा भक्तिः तया उद्धर्षम् ऊर्ध्वहर्षयुक्तं यत् हृदयं तेनास्त्रयुक्ते अक्षिणी ...तादृशो जातः अनेन देहे पूजा निरूपिता। ततो बाह्येद्रव्यैः पूजामाह-नत्वा तदङ्घ्रीन् प्रक्षाल्येति नन्वेति पूर्वेण सम्बध्यते तेन ...सिः आन्तरे सूचिता। बाह्यार्थमनुज्ञां च प्रार्थयते। आदै तदङ्घ्रीन् प्रक्षाल्य तदपो लोकपावनीर्गङ्गारूपत्वात् सकुटुम्बो ...अवहत् ततः पूजायोग्यो भूत्वा पूजां चक्रे। सर्वानेव ईश्वरान् न तु जीवेश्वरान् पूजासाधनानि गन्धमाल्यादीनि गोवृषैरिति ...सिद्ध्ये स हि मर्यादया प्रवृत्तो न तु भक्त्या अतो यथावाक्यमेव करोति। गोनिवेदनं च मुख्यं ततो मधुरया वाचा इदमग्रे ...माह-अन्नतर्पितानिति।भोजनताम्बूलविश्रमशयनान्तं कृत्वा पश्चात् स्तोत्रं कृतवान् अन्नेन तृप्तिस्तदैव भवति यद्यन्नमुद्वेजकं ...त्। तत्ताम्बूलविश्रामशयनसहितमेव। तत्रापि विशेषमाह-पादावङ्कगताविति। विष्णोर्मुख्यत्वेन समागतस्य सर्वत्र ...द्वैक्यबुद्धिश्चेति विशेषाभावात् वा शनकैः संस्पर्शः अभ्यनुज्ञार्थः। जाते स्पर्शे सन्तोषाविर्भावः ॥२७-३०॥

श्रीसुबोधिनीसारः

द्विजैः सह दाशार्हं कृष्णमातिथ्येन बहुलाश्वश्रुतदेवौ कृताञ्जली युगपत् समकालं न्यमन्त्रयेताम् ॥२५॥ तदभिप्रेत्य स्वीकृत्य ...प्रियकरणेच्छया तत्तदा उभाभ्यामलक्षितोऽनुज्ञातः उभयोर्गेहं भगवान् आविशत् प्रविष्टवान् द्विमूर्त्या ॥२६॥ असतां दुष्टानां ...पि दूरात् परे वर्तमानान् स्वगृहमागतान् मुनीन् दत्तेष्वासनोत्तमेषु सुखमुपविष्टान् महामना उदारचित्तो जनक उदुद्गतं हर्षं ...हृदयं यस्य अस्रैरश्रुभिराविले व्याप्ते ईक्षणे यस्य स नत्वा तेषामङ्घ्रीन् चरणान् प्रक्षाल्य लोकपावनीः तदपो मूर्ध्ना शिरसा ...श्वरान् पूजयामास। उत्तमैर्गन्धादिभिः वृषशब्दस्य श्रेष्ठवाचित्वात् ॥२७-२८-२९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

संहतौ संयोजितावञ्जली ययोस्तौ मैथिलश्रुतदेवौ द्विजैः सहितं दाशार्हं कृष्णम् आतिथ्येन पूजार्थं युगपदेव ...येताम् ॥२५॥ तत्तयोर्निमन्त्रणमभिप्रेत्य अङ्गीकृत्य द्वयोः प्रियं कर्तुमिच्छया ताभ्यामलक्षितः मद्गृहादन्यस्य गृहमपि ...गत एव भगवान् उभाभ्यां रूपाभ्यामुभयोरपि गेहमाविशदित्यन्वयः ॥२६॥ प्रवृद्धया भक्त्या उद्धर्षम् उद्गतहर्षं ...स्य अस्रैरानन्दाश्रुभिः आविले व्याप्ते ईक्षणे यस्य स चासौ स च, अत एव महामना उदारचित्तः जनकः असतां ...श्रोतुमपि दूरान् कृपया स्वगृहागतान् आनीतेषु निवेदितेष्वासनश्रेष्ठेषु सुखं यथा तथा आसीनान् नत्वा तेषामङ्घ्रीन् ...लोकपावनीरपो जलानि ॥२७-२८॥

अन्वितार्थप्रकाशिका

न्यमन्त्रयेतामिति । संहतौ संयोजितावञ्जली ययोस्तौ मैथिलः श्रुतदेवश्चेत्येतौ द्विजैः सहितं दाशार्हं कृष्णम् आतिथ्येन पूजार्थं युगपदेव न्यमन्त्रयेताम् ॥२५॥ भगवानिति । तत्तयोर्निमन्त्रणमभिप्रेत्य अङ्गीकृत्य द्वयोः प्रियं कर्तुमिच्छया ताभ्यामलक्षितः मद्गृहादन्यस्य गृहमपि यातीत्यज्ञात एव भगवान् उभाभ्यां रूपाभ्यामुभयोरपि गेहं मुनिसाहित्यादिनाऽविशत् ॥२६॥ श्रोतुमिति त्रयम् । प्रवृद्धया भक्त्या उद्धर्षम् उद्गतहर्षं हृदयं यस्य अस्त्रैरानन्दाश्रुभिः आविले प्राप्ते ईक्षणे यस्य स चासौ स च अत एव महामना उदारचित्तः जनकः असतां दुराचाराणां श्रोतुमपि दूरान् कृपया स्वगृहागतान् आनीतेषु निवेदितेष्वासनश्रेष्ठेषु सुखं यथा तथा आसीनान् नत्वा तेषामङ्घ्रीन् प्रक्षाल्य लोकपावनीस्तेषामङ्घ्रीणामपो जलानि। समासान्तभाव आर्षः । सकुटुम्बो मूर्ध्ना वहन् मूर्ध्नि धारयन् ईश्वरं कृष्णं तत्तुल्यान् मुनींश्चेति ईश्वरान् गन्धादिभिः पूजयामास। आकल्पोऽलङ्कारः गोवृषैरिति गवादिनिवेदनमपि कृतवानित्यर्थः । ईश्वरान् इति बहुवचनेन मुनिसमूहस्यापि रूपद्वयं जातम् भगवानेव वा सर्वस्वरूपो बभूवेति ज्ञेयम् ॥२७-२८-२९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तदभिप्रेत्य तन्निमन्त्रणं स्वीकृत्य उभाभ्यां रूपाभ्यां द्वयोः गेहमाविशत् । कथम्भूतः ताभ्यां श्रुतदेवनृपाभ्याम्॥ अलक्षितः परस्परमज्ञातः सन् श्रुतदेवगृहगमनराज्ञा न ज्ञातं राजगेहगमनं श्रुतदेवेन न ज्ञातमित्यर्थः ॥२६-२७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न्यमन्त्रयेतामिति ॥ मैथिलः श्रुतदेवश्च संहतौ निबद्धावञ्जली याभ्यां तथाभूतौ सन्तौ दाशार्हं श्रीकृष्णं द्विजैः स युगपत् आतिथ्येनातिथ्यार्थं न्यमन्त्रयेताम् ॥२५॥ भगवानिति ॥ भगवान् श्रीकृष्णः तत् सहनिमन्त्रणम् अभिप्रेत्याङ्गीकृत्य द्वयोः अपि प्रियचिकीर्षया प्रियं कर्तुमिच्छया तत्तदा उभाभ्याम् अलक्षितः मद्गेहादन्यस्य गेहं यातीति ताभ्यामविदितः सन् उभयोः गेहम् अविशत् ॥२६॥ श्रोतुमिति ॥ प्रवृद्धभक्त्येति ॥ सकुटुम्ब इति च ॥ असतां तु श्रोतुम् अपि दूरान् स्वगृहागतान् स्वत एव स्वगृहं समायातान् तान् मुनीन् महामना उदारचित्तः जनकः आनीतेषु आनीय समर्पितेषु आसनाग्र्येषु श्रेष्ठासनेषु सुखासीनान् सुखेनोपविष्टान् मत्वा प्रवृद्धभक्त्या उद्धर्षमुद्गतहर्षं हृदयं यस्य सः अस्त्रैराविले क्लिन्ने ईक्षणे यस्य स चासौ स च तथाभूतः सन् नत्वा तदङ्घ्रीन् तेषां पादान् प्रक्षाल्य लोकपावनीः तदपस्तदङ्घ्रिक्षालनजलानि सकुटुम्बः मूर्ध्ना अवहत् गन्धश्चन्दनं च माल्यानि पुष्पाणि च अम्बराणि वस्त्राणि च आकल्पा अलङ्काराश्च धूपाश्च दीपाश्च अर्घश्च गावः शुभा वत्सा वृषा वृषभाश्च तैः ईश्वरान् अत्र ईश्वरशब्द ईश्वरात्मकपरः । पूजयाञ्चक्रे ॥२७-२८-२९॥

कृष्णप्रिया

बहुलाश्व और श्रुतदेव दोनोंने ही एक साथ हाथ जोडकर मुनि मण्डलकेसहित भगवान श्रीकृष्ण को आतिथ्य ग्रहण करने के लिये निमन्त्रित किया ॥२५॥ भगवान श्रीकृष्ण दोनो की प्रार्थना स्वीका करके दोनो को ही प्रसन्न करने के लिये एक ही समय पृथक पृथक रूपसे दोनोके घर पधारें और यह बात एएक दूसरे को मालूम न हुई कि भगवान श्रीकृष्ण मेरे घरके अतिरिक्त और कहीं भी जा रहे है ॥२६॥ विदेहराज बहुलाश्व बडे मनस्वी थे उन्होंने यह देखकर कि दुष्ट दुराचारी पुरुष जिसका नाम भी नही सुन सकते, वे ही भगवान श्रीकृष्ण और ऋषि मुनि मेरे घर पधारे है सु सुन्दर आसन मंगाये और भगवान श्रीकृष्ण तथा ऋषि मुनि आरामसे उनपर बैठ गये । उस समय बहुलाश्व की विचित्र दशा थी । प्रेम भक्ति के उद्वेग से उनका हृदय भर आया था । नेत्रोमें आंसू उमड रहे थे । उन्होंने अपने पूज्य अतिथियों के चरणोंमें नमस्कार करके पांव पखारे और अपने कुटुम्ब के साथ उनके चरणों का लोकपावन सिरपर धारण किया और भगवान एव् भगवत्स्वरूप ऋषियों को गन्ध माला, वस्त्र अलंकार धूप दिप अर्घ्य बैल आदि समर्पित करके उनकी पूजी कि ॥२७-२९॥

प्रवृद्धभक्त्या[1] उ
सकुटुम्बो वहन्
वाचा मधुरया प्री

उद्धर्षहृदयास्त्राविलेक्ष
वहन्, गन्धमाल्याम्बराकल्पधू
मुदा, मधुरया, वाचा, प्रीणन्, श्

उद्धर्षमुद्गतहर्षं हृदयं
॥२९॥ प्रीणन् प्रीणयन् संस्पृशन्

तदङ्घ्रीन् कृष्णसहितम्
पूज्यत्वेनेश्वरतुल्यानिति भावः । यद्वा-
- 'मा गामनागामदितिं वधिष्ट'
श्रुतिवाक्यैरिति वा ॥२२॥ मधुरया

अन्नेन तर्पितान् सन्तोषितान्
अग्रे भवानित्याद्युक्तेः । विष्णोः विश्व
चातुर्यविशेषेण स्पृशन् शनकैरिति सु

वहन् धारयन्, गोवृषा बली
विस्मृतस्य तस्य पश्चादर्पणात्, किंवा
दिक् ॥२९॥ अन्नेन तर्पितान् सन्तोषिता
श्रीभगवन्तम्, अग्रे भवानित्याद्युक्तेः ।
सर्वप्राधान्यात् । विष्णोरस्त्रिविक्रम
भक्तवात्सल्याद्यशेषगुणप्रकटनेन विश्वव्
सुकोमलत्वात् । अत एव संस्पृशन्निति

वाचेति । ततोऽन्नेन तर्पितान्
संस्पृशन्नित्यर्थः । मुदा हर्षेणेदं वक्ष्यमाण

---

१. भक्त्युत्कर्ष-विज. । २. ईश्वरं-विज. । ३.

प्रवृद्धभक्त्या[1] उद्धर्षहृदयास्राविलेक्षणः । नत्वा तदङ्घ्रीन् प्रक्षाल्य तदपो लोकपावनीः ॥२८॥
सकुटुम्बो वहन् मूर्ध्ना पूजयांचक्र ईश्वरान्[2] । गन्धमाल्याम्बराकल्पधूपदीपार्घ[3]गोवृषैः ॥२९॥
वाचा मधुरया प्रीणन्निदमाहान्नतर्पितान् । पादावंकगतौ [4]विष्णोः संस्पृशञ्छनकैर्मुदा ॥३०॥

कर्दमक्षमा

उद्धर्षहृदयास्राविलेक्षणः, प्रवृद्धभक्त्या, तदङ्घ्रीन्, प्रक्षाल्य, लोकपावनीः, तदपः, नत्वा ॥२८॥ सकुटुम्बः, मूर्ध्ना, वहन्, गन्धमाल्याम्बराकल्पधूपदीपार्घ्यगोवृषैः, ईश्वरान्, पूजयाञ्चक्रे ॥२९॥ अन्नतर्पितान्, विष्णोः, अङ्कगतौ, पादौ, संस्पृशन्, मुदा, मधुरया, वाचा, प्रीणन्, शनकैः, इदम्, आह ॥३०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

उद्धर्षमुद्गतहर्षं हृदयं यस्य अस्रैराविले क्लिन्ने ईक्षणे यस्य सः स च स च ॥२८॥ ईश्वरान् ईश्वरं तत्तुल्याँश्चेत्यर्थः ॥२९॥ प्रीणन् प्रीणयन् संस्पृशन् सम्मर्दयन् ॥३०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तदङ्घ्रीन् कृष्णसहितमुनिचरणान् । तदपस्तच्चरणजलानि ॥२८॥ ईश्वरश्चेश्वराश्चेत्येकशेषः । इत्यर्थ इति-ईश्वरवज्जगत्सु त्वेनेश्वरतुल्यानिति भावः । यद्वा-ईश्वरो विद्यते येषु त ईश्वरा इति मत्त्वर्थीयोऽच् । ईश्वरसहितानित्यर्थः । गोवृषैरिति मधुपर्काङ्गत्वेनोक्तम् 'मा गामनागामदितिं वधिष्ट' इति श्रुत्या दर्शनमात्रं विहितं वधस्य निषिद्धत्वादित्युक्तं पुरस्तात् । गोषु वाक्षु वृषैः श्रेष्ठैः श्रुतिवाक्यैरिति वा ॥२२॥ मधुरया लौकिकश्लाघायुक्तया । इदं वक्ष्यमाणम् ॥३०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अन्नेन तर्पितान् सन्तोषितान् सतः सर्वानिव धन्योऽस्मि कृतकृत्योऽस्मीत्यादिवाचा प्रीणयन् इदं वक्ष्यमाणमाह । श्रीभगवन्तम् अग्रे भवानित्याद्युक्तेः । विष्णोः विश्वव्यापकस्यापि भगवतः कृपया अंकं स्वक्रोडं गतौ तत्रापि पर्याप्तावित्यर्थः । अतो मुदा सम्यक् चातुर्यविशेषेण स्पृशन् शनकैरिति सुकोमलत्वात् अत एव संस्पृशन्निति संस्पर्शनमात्रमुक्तम् ॥३०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वहन् धारयन्, गोवृषा बलीवर्दाः, किंवा गावो वृषाश्च तैः, गन्धादीनां क्रमसद्भावेऽप्यर्घ्यस्य पश्चादुक्तिः प्रागतिसम्भ्रमेण विस्मृतस्य तस्य पश्चादर्पणात्, किंवा भोजनमङ्गलार्थदीपानन्तरमपि तस्यापेक्ष्यत्वात्, गोवृषाश्च प्राक् पश्चाद्वातिथ्येन देया एवेति दिक् ॥२९॥ अन्नेन तर्पितान् सन्तोषितान् सतः सर्वानिव 'धन्योऽस्मि कृतकृत्योऽस्मि' इत्यादिना वा प्रीणयन् । इदं वक्ष्यमाणमाह-श्रीभगवन्तम्, अग्रे भवानित्याद्युक्तेः । यद्वा, सर्वानिवाह । ततश्च भवानित्यादि तं प्रत्युक्त्यैव तान् सर्वान् प्रत्यपि सङ्गच्छेत् । तस्यैव प्राधान्यात् । विष्णोरस्त्रिविक्रमरूपेण पद्भ्यां विश्वव्यापकस्यापि भगवतः कृपया अंकं स्वक्रोडं गतौ, किंवा वात्सल्याद्यशेषगुणप्रकटनेन विश्वव्यापकस्य, अतः स्वयमङ्कगतौ सन्तौ, अतो मुदा सम्यक् चातुर्यविशेषेण स्पृशन् । शनकैरिति सुकोमलत्वात् । अत एव संस्पृशन्निति संस्पर्शनमात्रमुक्तम् ॥३०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२३-३४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

वाचेति । ततोऽन्नेन तर्पितान् मधुरया वाचा प्रीणयन् अङ्कगतौ विष्णोः कृष्णस्य पादौ संस्पृशन् पादावंके निधाप्य न्यस्तावित्यर्थः । मुदा हर्षेणेदं वक्ष्यमाणमाह ॥३०॥

---

१. मुत्कर्ष-विज. । २. ईश्वरं-विज. । ३. पार्घ्य-गो. पु. ; पार्घ-श्रीधर. वंशी. वीर. विज.। ४. विष्णोरामृजञ्छनकै-विज. ।

श्रीमद्विजयध्वजकृता पदरत्नावली

अतिवृद्धभक्त्युत्कर्षहृदयश्चास्राविलेक्षणश्च स तथा अस्रं नेत्रजलम् ॥२८॥ तैः साधनैरत्राह-गन्धेति ॥२९॥ आमृज संवाहनं कुर्वन् ॥३०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२१-३०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अस्राविलेक्षणः अश्रुक्लिन्ननयनः ॥२८॥ ईश्वरः कृष्णश्च ईश्वरतुल्या मुनयश्च तान् ईश्वरान् ॥२९-३०॥

गूढार्थदीपिनी

प्रीणन्तिति गर्भितण्यन्तः । वाचा प्रीणयन् प्रसादयन् अङ्कगतौ पादौ संस्पृशन् संमर्दयन् तानाहेत्यन्वयः ॥३०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

उद्धर्षमुद्गतं हर्षं हृदयं यस्य अस्राविले अश्रुक्लिन्ने ईक्षणे नेत्र यस्य सः ॥२८॥ ईश्वरान् उपास्यान् हरिं हरिदासांश्चेत्यर्थः ॥२९॥ हरेः प्राधान्यमाह-पादावित्यादिना ॥३०-३३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी ॥२७-३०॥

श्रीसुबोधिनीसारः

अन्नेन तर्पितान् मधुरया वाचा प्रीणन् अङ्कगतौ विष्णोः पादौ संस्पृशन् सन् शनैर्हर्षेणेदमाह ॥३०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सकुटुम्बो मूर्ध्ना वहन् मूर्ध्नि धारयन् ईश्वरं कृष्णं तत्तुल्यान् मुनींश्च गन्धादिभिः पूजयामास । आकल्पोऽलङ्का गोवृषैरिति गवादिनिवेदनमपि कृतवानित्यर्थः । ईश्वरान् इति बहुवचनेन मुनिसमूहस्यापि रूपद्वयं जातम्, भगवानेव वा सर्वस्वरू बभूवेति ज्ञेयम् ॥२९॥ ततोऽन्नेन तर्पितान् मधुरया गिरा प्रीणयन् अङ्कगतो अङ्कीकृतो विष्णोः कृष्णस्य पादौ शनकैः संस्पृश संमर्दयन् मुदा हर्षेणेदं वक्ष्यमाणमाहेत्यन्वयः ॥३०॥

अन्वितार्थप्रकाशिका

वाचेति । ततोऽन्नेन तर्पितान् मधुरया गिरा प्रीणयन् अङ्कगतौ अङ्कीकृतौ विष्णोः कृष्णस्य पादौ शनकैः संस्पृश संमर्दयन् मुदा हर्षेणेदं वक्ष्यमाणमाह स्म ॥३०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उद्धर्षम् अतिहर्षयुक्तं हृदयं यस्य अस्रैः प्रेमाश्रुभिः आविले आर्द्रे ईक्षणे नेत्रे यस्य स चासौ स च ॥२८॥ आकल आभरणानि गोवृषाः गोदानानि बलीवर्ददानानि च तैः गन्धादिभिः पूजयाञ्चक्रे ॥२९॥ प्रीणन् प्रीणयन् संस्पृशन् संवाहयन् ॥३

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वाचेति ॥ ततः अन्नतर्पितानन्नाशनविधापनेन तृप्तीकृतान् तान् मधुरया वाचा प्रीणन् अङ्कगतौ विष्णोः श्रीकृष्णस्य मुदा शनकैः संस्पृशन् पादावंके निधाय संस्पृशन् सन्नित्यर्थः । इदं वक्ष्यमाणम् आह ॥ मैथिल उवाचेत्यर्थः ॥३०॥

जब सब लो
लेकर बैठ गये ॥३०।

भवान् हि स
स्ववचस्तद्धृतं
को [6]नु त्वच्चर
योऽवतीर्य य

राजा, उवाच ।

विभो, हि, भवान्
तत्, स्ववचः, ऋतम्, कर्तु
एवंवित्, त्वच्चरणाम्भोजम्
यदोः, वंशे, अवतीर्य, इह, स

आत्मा चेतयिता स
पुत्रोऽपि ॥३२-३३॥ तच्छान्

तो भवान् स्वेषु प्रका
। एकस्मिन्नन्तोऽध्यवसायो य
ज्ञानिनोऽत्यर्थमहं स च मम
स्वरूपसाक्षात्कारप्रदः ॥३३-३

अयोग्यस्यात्मनो गृहे
अन्यापेक्ष्यप्रसादोऽपि स्वभावत
ततस्तदुपाधीनामपि चेतनवत्कत
जीवेभ्यस्त्वमपि । अथ अस्मादेव
कृपया स्वप्रकाशताशक्तिप्रकाशने
वा प्रयासं कुर्वतामित्यर्थः । अम्भोज
भूतानामिति वा पाठः ॥३१॥ अथ

---

१. जीवानां-गो. प्रे. टी. । २. अद्य-वी
प्रे. टी. । ६. यदाऽचिनोत्स्वं-वीर. ।

कृष्णप्रिया

जब सब लोग भोजन करके तृप्त हो गये, तब राजा बहुलाश्व भगवान श्रीकृष्ण के चरणों को अपनी गोदमें लेकर बैठ गये ॥३०॥

राजोवाच

भवान् हि सर्व[1]भूतानामात्मा साक्षी स्वदृग् विभो । [2]अथ नस्त्वत्पदाम्भोजं स्मरतां दर्शनं गतः ॥३१॥
स्ववचस्तदृतं कर्तुमस्मद्दृग्गोचरो भवान् । [3]यदात्थैकान्तभक्तान् मे नानन्तः श्रीरजः प्रियः ॥३२॥
को [4]नु त्वच्चरणाम्भोज[5]मेवंविद्विसृजेत् पुमान् । निष्किञ्चनानां शान्तानां मुनीनां यस्त्वमात्मदः ॥३३॥
योऽवतीर्य यदोर्वंशे नृणां संसरतामिह । [6]यशो वितेने तच्छान्त्यै त्रैलोक्यवृजिनापहम् ॥३४॥

कर्दमक्षमा

राजा, उवाच ।

विभो, हि, भवान्, सर्वभूतानाम्, आत्मा, साक्षी, स्वदृक्, अथ, त्वत्पदाम्भोजम्, स्मरताम्, नः, दर्शनम्, गतः ॥३१॥ तत्, स्ववचः, ऋतम्, कर्तुम्, भवान्, अस्मद्दृग्गोचरः, एकान्तभक्तान्, आत्थ, यत्, मे, अनन्तः, श्रीः, अजः, प्रियः, न ॥३२॥ एवंवित्, त्वच्चरणाम्भोजम्, कः, पुमान्, नु, विसृजेत्, यः, त्वं, निष्किञ्चनानाम्, शान्तानाम्, मुनीनाम्, आत्मदः ॥३३॥ यः, यदोः, वंशे, अवतीर्य, इह, संसरताम्, नृणाम्, तच्छान्त्यै, त्रैलोक्यवृजिनापहम्, यशः, वितेने ॥३४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

आत्मा चेतयिता साक्षी प्रकाशकः स्वदृक् स्वप्रकाशः अथातः कारणात् ॥३१॥ अन्ततो बन्धुरपि श्रीर्भार्याऽपि अजः पुत्रोऽपि ॥३२-३३॥ तच्छान्त्यै संसारोपशमाय ॥३४-३५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तो भवान् स्वेषु प्रकाशते इति स्वप्रकाशः अतः कारणादित्यर्थः ॥३१॥ अनन्तो बलदेवः । तत्स्ववचः तर्त्कि यदित्यात्थ एकस्मिन्नन्तोऽध्यवसायो यस्यास्सैकान्ता सा चासौ भक्तिरेकान्तभक्तिरभेदोपासना तद्वानेकान्तभक्तो ज्ञानीत्यर्थः । "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इत्युक्तेः ॥३२॥ एवंवित् उक्तार्थज्ञः । एकान्तभक्तेभ्यः किं ददातीति चेदाह-आत्मदः स्वरूपसाक्षात्कारप्रदः ॥३३-३४-३५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अयोग्यस्यात्मनो गृहे स्वयमेव भगवतः साक्षात्समागमनेन निरुपाधिकृपां वर्णयंस्स्तौति-भवानिति । हि यतः स्वयंप्रकाशो अनपेक्ष्यप्रसादोऽपि स्वभावत एव विभिन्नांशरूपजीवानां चेतयिता चित्स्वरूपाश्रयः यथा सूर्यमण्डलो निजांशूनां ज्योतीरूपताश्रयः तदुपाधीनामपि चेतनवत्कर्ता त्वमेवेत्यर्थः । अत एव लौकिकः साक्षी यथा स्वयमनासक्तोऽन्येभ्यो विषयं प्रकाशयति तथा तेभ्यस्त्वमपि । अथ अस्मादेव जीवानां त्वद्दर्शनशक्यत्वात् तव कृपालुस्वभावत्वाच्च हेतोर्नोऽस्मत्कर्तृकं दृशनं गतः स्वयमेव कृपया स्वप्रकाशताशक्तिप्रकाशनेनेति भावः । कीदृशामपि स्मरतामपि यथाकथञ्चित्स्मरणमात्रं कुर्वतामपि न तु तत्र प्रेमसंयुक्तानन्दार्थं प्रयासं कुर्वतामित्यर्थः । अम्भोजरूपेणाज्ञातमहिमत्वेनापि प्राप्तसङ्गस्य तस्य तापहारित्वं स्वाभाविकमेवेति व्यञ्जितम् । जीवानामिति भूतानामिति वा पाठः ॥३१॥ अथवा स्ववच इति अयमर्थः । एकान्तभक्तान्मे मम अनन्तो भ्रातृत्वेनापि श्रीर्जायात्वेनापि अजः

---

१. जीवानां-गो. प्रे. टी. । २. अद्य-वीर. । ३. यदा ह्येकान्तभक्तनामात्माऽनन्तोडरजाः प्रियः-विज. । ४. किं नु-विज. । ५. जं वन्दित्वा विसृ-गो. । ६. यदाऽचिनोत्स्वं-वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पुत्रत्वेनापि न प्रियः किन्तु तेऽप्येकान्तभक्तत्वेनैव मम प्रेष्ठा इत्यर्थः । तदेतद्यदात्थ तत्स्ववचः ऋतं सत्यं कर्तुं दर्शयितुं भवानस्मद्दृग्गोचरोऽभूत् तदनुगामितांशेनैवास्मान् प्रत्यपि कृपां कृतवानित्यर्थः । यद्वा । यतस्ते सङ्गे समानीता न सन्ति किन्त्वेत एवानीता इति भावः । अत्र शान्तरसमयभक्तत्वादस्य युक्तमेवैतत् यत एव तथैव श्रीभगवदाविर्भाव इति ॥३२॥ नन्वेकान्तभक्तानुगामित्वमपि भवतां दुर्लभं ततस्तत्प्रशस्त्या भवतां किं सत्यं तथापि तव तादृशगुण एव मादृशमस्म जयतीत्याह-क इति युग्मकेन । एवं वक्ष्यमाणप्रकारं कं गुणं वेत्ति यः स को विसृजेत् मुक्तावमुक्तावपि त्यजेत् तत्रैकान्तभक्तविषयं कृपागुणमनुवदन्नत्यागे हेतुमाह-निष्किञ्चनानां त्वदर्थं त्यक्ताशेषपरिग्रहाणां यतः शान्तानां त्वदेकनिष्ठभक्तानां तत्रैव हेतुः-मुनीनां शास्त्रतत्त्वाभ्यासवताम् आत्मदः वश्यो भवतीत्यर्थः । अहो यत्सम्बन्धेनैव समति प्रकटीभूय सर्वत्रैव कृपागुणान्निरर्गलमेव विस्तारयन्नसीति तत्राप्यतिशयमाह-य इति । य एकान्तभक्तकृपालुर्भवान् इह जगति विशेषेण पूर्वतोऽप्याधिक्येन तेने विस्तारयामास ॥३३-३४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अयोग्यस्याप्यात्मनो गृहे स्वयमेव श्रीभगवतः साक्षात् समागमेन निरुपाधिकृपा वर्णयंस्तं स्तौति-भवानिति । हि यतः सर्वेषां ब्रह्मादीनां तृणान्तानां जीवानां साक्षी सर्वेन्द्रियप्रकाशकः । आत्मत्वादौ हेतुः-हे विभो ! हे सर्वव्यापकेति परमेश्वरेति वा । अथ अस्मादेव जीवानां त्वद्दर्शने शक्त्यभावात् कृपया स्वयमेव नोऽस्माकं दर्शनं गतः, दृष्टोऽभूः । बहुत्वं निजपरिवाराद्यपेक्षया, किंवा तद्दर्शनेनात्मनो बहुभानत्वात्; एवमग्रेऽपि । ननु ह्यन्येषामपि सर्वेषां दृश्यो न किं भवेयम् ? तत्राह-त्वदिति । भक्त्यभावादिति भावः । इति दर्शनस्य स्मरणहेतुकत्वेऽपि स्वदृक्त्वं सङ्गच्छेतैव, - तत्कारुण्येनैव तस्य दृश्यत्वात्, तथा स्मरणस्यापि कृपया तेनैव प्रवर्तितत्वाच्च । एवं निरूप्याधिकृपत्वं सिद्धमेव, अथवा अथास्मादात्मत्वात् साक्षित्वाच्च हेतोः स्मरताम्, अत एव दर्शनं गतः । अस्माभिस्त्वं दृष्टः, तथाप्यस्माकं स्मरणशक्त्या त्वद्दर्शनं न सिध्येत्, किन्तु केवलं त्वत्कृपालुत्वादेवेत्याह । यतः स्वदृक् आत्मनं स्वमेव दर्शयतीत्यर्थः । यद्वा, स्वेषु भक्तेषु दृक् कृपादृष्टिर्यस्य सः । सहजनिजभक्तवात्सल्यगुणस्य, न त्वस्माकं गुणस्यापेक्षयेति भावः । तच्च युक्तमेवेत्याह-विभो ! हे सर्वसद्गुणपरिपूर्णेति ॥३१॥ तदेवोक्तपोषण्यायेन विशदयति-स्वेति । एकस्मिन् भगवत्येवानं निष्ठा यस्य भक्तस्य तस्मात् । मे मम न प्रिय इति यदात्थ वदसि, तदनन्तः श्रीबलदेवः शेषो वा, स्वस्य च बन्धुत्वं श्रीलक्ष्मणादिरूपेण सहावतीर्णत्वात्, परमपार्षदत्वाद्वा । बन्धुत्वादिना न प्रियः, वस्तुतो भक्तिविशेषादेव ॥३२॥ अहो त्वत्कृपया भक्त्यैव त्वद्दर्शनं लभ्येतेति किं वक्तव्यम् ? मुमुक्षवोऽपि त्वत्कृपयैव मोक्षं लभन्त इत्याह-क इति । नु वितर्के, पुमांश्चेत्, एवमित्यस्यैवार्थमाह-निष्किञ्चनानां निरहङ्काराणाम्, अतः शान्तानां रोगादिरहितानाम्, यतो मुनीनां ज्ञानपराणामित्यर्थः । आत्मदः, आत्मतत्त्वप्रकाशने मोक्षदातेत्यर्थः । अथवा एवं भक्तैकप्रियत्वमस्तीति तथा सः । भक्तप्रीयत्वमेव प्रदर्शयति-निष्किञ्चनानां त्वदर्थं त्यक्ताशेषपरिग्रहाणाम्, यतः शान्तानां त्वदेकनिष्ठचित्तानाम् । तत्रैव हेतुः-मुनीनां शास्त्रार्थतत्त्वाभ्यासवताम्, आत्मदो वश्यो भवसीत्यर्थः ॥३३॥ अनु चाशेषैश्वर्यप्रकटनेन सर्व एव समुद्धृता इत्याह-य इति । तस्मै तुभ्यमिति परेण पूर्वेणैवान्वयः । इह भूतले, विशेषेण पूर्वतोऽप्याधिक्येन तेने विस्तारयामास, अस्मिन् प्रपञ्चे संसरतामिति वा । एवं संसारस्यानिवृत्तिरुक्ता । तच्छान्त्यै इत्यत्र हेतुः-त्रैलोक्यस्य त्रिलोकीस्थिताशेषजीवानां वृजिनं संसारदुःखम्, अप दूरतो हन्तीति तथा तत् । अन्यत्तैर्व्याख्यातम् । यद्वा, तस्यै अनिर्वचनीयायै शान्त्यै प्रेमसुखाय, किंवा भक्तिरसेन त्वदेकनिष्ठचित्तायै । संसारदुःखध्वंसश्चावान्तरफलन्यायेन स्वत एव सिध्यतीत्याह-त्रैलोक्येति द्वितीयपक्षोक्तभक्तिसिद्धान्ते चेदं सङ्गतमेव ॥३४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥२३-३४॥

ऋतं सत्यं कर्तुं दर्शयितुं
सङ्गे समानीता न सन्ति
वदाविर्भाव इति ॥३२॥
दृशगुण एव मादृशमासं
मुक्तावमुक्तावपि त्यजेत
ग्रहाणां यतः शान्तानां
हो यत्सम्बन्धेनैव सम्प्रति
न्तभक्तकृपालुर्भवान् इह

स्तौति-भवानिति। हि यतः
र्वव्यापकेति परमेश्वरेति वा।
बहुत्वं निजपरिवाराद्यपेक्षया,
ह-त्वदिति। भक्त्यभावादिति
था स्मरणस्यापि कृपया तेनैव
मरताम्, अत एव दर्शनं गतः।
वेत्याह। यतः स्वदृक् आत्मानं
, न त्वस्माकं गुणस्यापेक्षयेति
वेति। एकस्मिन् भगवत्येवान्तो
य च बन्धुत्वं श्रीलक्ष्मणादिरूपेण
हो त्वत्कृपया भक्त्यैव त्वद्दर्शनं
पुमांश्चेत्, एवमित्यस्यैवार्थमाह-
। आत्मदः, आत्मतत्त्वप्रकाशनेन
नानां त्वदर्थं त्यक्ताशेषपरिग्रहाणाम्,
श्यो भवसीत्यर्थः ॥३३॥ अधुना
तले, विशेषेण पूर्वतोऽप्याधिक्येन
च्छान्त्यै इत्यत्र हेतुः-त्रैलोक्यस्य
तम्। यद्वा, तस्यै अनिर्वचनीयायै
वत एव सिध्यतीत्याह-त्रैलोक्येति।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह-भवानिति षड्भिः। हे विभो ! हि यस्माद्भवानात्मा अन्तरात्मा साक्षाद्द्रष्टा स्वदृक् अनन्याधीनप्रकाशश्च अथातो मदभिप्रायं जानन् त्वत्पदाम्भोजं स्मरतां नोऽस्माकं दर्शनं प्राप्तः ॥३१॥ किञ्च स्ववच इति। यस्मात् एकान्तभक्तादनन्यप्रयोजनभक्तियुक्तात् ममानन्तः शेषः सखापि श्रीर्लक्ष्मीर्भार्यापि अजो ब्रह्मा पुत्रोऽपि न प्रिय इति यत् आत्थ उक्तवानसि तत् स्ववचो दृढीकर्तुं भवानस्माकं दृग्गोचरो दृग्विषयो बभूव ॥३२॥ तस्मादेवंविधं त्वच्चरणाम्भोजं पुमान् विसृजेत् किन्तु न त्यजेदेवेत्यर्थः। किञ्च यत् यस्मात् निष्किञ्चनानां नास्ति किञ्चन प्रार्थनीयं येषां तेषां शान्तानां जितान्तःकरणानां मुनीनां त्वमात्मदः निरतिशयपुरुषार्थभूतमात्मानं ददाति स्ववशीकरोतीति तथा तस्माच्च विसृजेत् किन्त्विति सम्बन्धः ॥३३॥ सर्वमित्थम्भूतस्तु ईश्वरो न त्वहमित्यत आह-य इति। इह प्रकृतिमण्डले संसरतां जीवानां तच्छान्त्यै संसारिकतापत्रयोपशमनाय यदोर्वंशे अवतीर्य यस्त्रिलोकवृजिनापहं त्रैलोक्यपापहरं स्वं स्वाधारणं यशोऽचिनोत् सम्पादितवान् तस्मै भगवते तुभ्यं नमः इत्यन्वयः। सर्वेश्वर एव त्वं लोकोज्जिजीविषया अवतीर्ण इति भावः ॥३४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

सुहृदिति यदथ तस्मात् ॥३१॥ दर्शनहेतुमाह-स्ववच इति। भवान् —

"प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः।" इति।

यस्त्ववचस्तदृतं कर्तुम् अस्मद्दृग्गोचरोऽभूदित्यर्थः। भक्तेनापि कृतज्ञेन भाव्यमिति भावेनाह-यदेति। आत्मा स्वामी अनन्तः अन्तत्रयहीनः अरजाः सात्त्विकः त्वमेकान्तभक्तानां प्रिय इति यदा यस्मात्तस्मात् ॥३२॥ एवंवित् उक्तार्थज्ञः को नु पुरुषः त्वच्चरणाम्भोजं विसृजेत्। कृतज्ञश्चेन्न मुञ्चतीत्यर्थः। एकान्तभक्तप्रियोऽयं किं ददातीति तत्राह-निष्किञ्चनानामिति ॥३३॥ लोकोपकारायावतारो न स्वार्थायेत्याह-य इति। तच्छान्त्यै संसारोन्मूलनाय त्रैलोक्यस्य विकृतात् विरोधिनोऽपहन्तीति त्रैलोक्यविकृतापहः। विकृतं दुष्कृतम् ॥३४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ अथापि दर्शनं गतः ॥३१॥ स्ववचः अत एव तुभ्यं नम इति तस्मादास्तां तव साक्षाद्रूपेण सा वार्ता ॥३२-३४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आत्मा चेतयिता अतो जडं मां चेतनीकृत्य कृपया स्वभक्तौ प्रवर्तयसीति भावः। साक्षी भद्राभद्रकर्मद्रष्टा अतो मदनुष्ठितां [illegible] स्वयमेव नित्यं पश्यसीति भावः। स्वदृगिति त्वयि न कापि विज्ञापनापेक्षेति भावः। अथ अत एव स्मरतामिति यदि [illegible] स्वयमेवागत्य दर्शनं ददाति तदैव दर्शनप्राप्तिरस्माकमन्यथा तु स्वगृहे तदीयश्रीविग्रहप्रात्यहिकपरिचर्यां क्षणमात्रमपि त्यक्त्वा क्वापि गन्तुमशक्नुवतामस्माकं न तद्भाग्यसम्भव इति सततं चिन्तयतामित्यर्थः ॥३१॥ अनन्तो भ्राताऽपी श्रीः भार्यापि अजः पुत्रोऽपि द्वारकातोऽतिदूरेऽत्रान्यप्रयोजनासद्भावेऽपि यदागत्य स्वदर्शनमदाः अतो मम स्वस्य त्वदेकान्तभक्तत्वे यः संशयः आसीत् स छिन्न इति भावः ॥ यद्वा यस्मादेवं तस्मादस्मानपि दृग्गोचरीभूय एकान्तभक्तान् कर्तुमिच्छसीति भावः। [illegible]तत्प्रकारकज्ञानवान् ॥३२-३३॥ तच्छान्त्यै संसारोपशमाय ॥३४॥

गूढार्थदीपिनी

आत्मा अन्तर्यामी। स्वदृक् स्वप्रकाशस्वरूपः। स्वेषु भक्तेषु दृक् कृपादृष्टिर्यस्येति वा। अथ अतः स्मरतां नोऽस्माकं [illegible] दृष्टिविषयं गतः ॥३१॥ यत् आत्थ ब्रवीषि तत् स्ववचः ऋतं सत्यं कर्तुमस्मद्दृग्गोचरो जातः। किं तत्। एकान्तभक्तान्

गूढार्थदीपिनी

ज्ञानिनः अन्यः प्रियो न अनन्तः बलरामः बन्धुरपि श्रीः भार्याऽपि अजो ब्रह्मा पुत्रोऽपि न । एकस्मिन्नन्तोऽध्यवसायो यस्याः स एकान्ता सा चासौ भक्तिः तद्वान् एकान्तभक्तः (प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । इति गीतोक्तेः ।) ज्ञानीत्यर्थः ॥३२॥ एवंवित् उक्तार्थवित् को नु विसृजेत् परित्यजेत् न कोऽपीत्यन्वयः । यतस्त्वं तेषामात्मानमपि ददासि वशीभूतो भवसि ॥३३॥ योऽवतीर्य संसरतां नृणां तच्छान्त्यै संसारनिवृत्तये यशो वितेने । तस्मै तुभ्यं नमः इत्युत्तरेणान्वयः । त्रैलोक्यस्य त्रिलोकस्य वृजिनं पापं दुःखं वा अपहन्तीति तथा । स्वार्थे ष्यञ् ॥३४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्य संसरणस्य शान्त्यै निराकरणाय ॥३४-३७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स हि यादृशं भावयति तादृशं वदन् भगवत्त्वज्ञापनाय षड्भिः स्तौति-भवानिति । स हि सर्वदा सर्वं भगवत्कार्यमेवेति मन्यते सर्वं च भगवद्रूपमिति तादृशस्य कथमिदानीं विशेषतो वाक्यं सम्भवति विरुद्धं च न वक्तव्यम् । अतः पूर्वावस्थामनु विशेषं बोधयति । यद्यपि भगवान् सर्वरूपेणात्मरूपेण च दृष्टः तथापि भक्तिमार्गानुसारेण यादृशो भाव्यते तादृशोऽद्यैव दृष्ट इति युक्तश्चायमर्थः । सर्वभूतानामात्मत्वात् सर्वं भगवानेव साक्षित्वात् स्वात्मासाक्षिचैतन्यं वा तत्रापि स्वदृक् स्वप्रकाशः । अनेन तत्प्रकाशार्थमपि नान्यापेक्षेति निरूपितम् । विभो इति सम्बोधनं सर्वसामर्थ्यं सूचयति । तेनास्माकं हृदये तथा प्रतीतिजनकं नान्येषामिति सर्वं सम्पद्यते तथापि त्वत्पदाम्भोजं भक्तिमार्गेण स्मरतामद्यैव दर्शनं गतः नन्वस्य दर्शनस्य क्वोपयोगः । न हि दर्शनार्थं चिन्तनं करोति किन्तु स्वतः पुरुषार्थत्वेनैव ॥३१॥ तत्राह-स्ववचस्तदृतं कर्तुमिति । तद्भगवतः प्रसिद्धं वचः ऋतं सत्यं कर्तुं भवानस्मद्दृग्गोचरः । ननु किं तद्वच इति चेत्तत्राह-यदात्थेति ।

"न तथा मे प्रियतमः आत्मयोनिर्न शङ्करः । न च सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥"

इति एतद्भगवद्वाक्यम् अत्र यथा एकान्तभक्तो मम प्रिय इति वक्तव्यं दृष्टान्तार्थं यथा भवानित्युक्तत्वात् अत्राजशब्देन शङ्करोऽपि गृहीतः गुणावतारत्वेन तस्याप्यजत्वात् आत्मनि तत एव अत एतत्सङ्गच्छते । एकान्तभक्तादिति प्रियत्वं तदैव भवति यदि गत्वा दृश्यते अतः प्रियत्वान्यथानुपपत्त्या भगवान् स्वयमागत्य दृष्टवानित्यर्थः । एवं भगवद्गुणं ज्ञात्वा आत्मत्वसाक्षित्वयोरसिद्धत्वादधिकमेवं करोतीति सुगमत्वादुत्तमत्वाच्च एवंवित् को वा त्वां विसृजेत् । ननु प्राप्तात्मभावस्य भक्त्या सर्वं सिध्यति यस्य त्वात्मभावो न जातः तस्य तदर्थं परित्याग इति चेत्तत्राह-निष्किञ्चनानां शान्तानामिति । ब्रह्मात्मभावे साधनत्रयम् आदौ निष्किञ्चनत्वं सर्वपरित्यागः तदनन्तरं शमः एवमन्तर्बहिर्विक्षेपरहितः मननं कुर्यात् ततो ब्रह्मभावः तदुक्तं निष्किञ्चनानां शान्तानां मुनीनां च त्वमात्मद इति ॥३२-३३॥ नन्वेतादृशो भगवान् नाहमित्याशंक्याह-योऽवतीर्य इति । स एव भगवान् सर्वेषां मोक्षार्थमेव यदोर्वंशे अवतीर्य संसरतां नृणां संसारदुःखदर्शनेन जातकरुणः तन्निवृत्त्यर्थं यशो वितेने । तस्य कथं संसारनिवर्तकत्वमित्याशंक्य स्पृष्टमेव द्वारमाह-त्रैलोक्यवृजिनापहमिति । पापवशाद्बहिर्मुखतादिसर्वे दोषाः संसर्गिदोषाद्वा यशस्तु सर्वेषामेव दोषनिवर्तकम् अतः स्पृष्टमेव तस्य संसारनिवर्तकत्वमित्यर्थः ॥३४॥

श्रीसुबोधिनीसारः

राजोक्तिः । हे विभो ! सर्वभूतानाम् आत्मा साक्षी स्वदृक् स्वप्रकाशो हि भवान् तव पदाम्भोजं पादपद्मं स्मर नोऽस्माकं दर्शनं गतः । अथेति मङ्गले ॥३१॥ एकान्तभक्तान्मे ममानन्तो बलदेवः प्रियो न श्रीः प्रिया न अजो ब्रह्मा प्रियो न यत्त्वमात्थ उक्तवानसि तत्स्ववच ऋतं सत्यं कर्तुम् अस्माकं दृग्गोचरो नेत्रविषयो भवान् ॥३२॥ एवं वित् ज्ञाता को नु पुमान् त्वच्चरणाम्भोजं त्यजेत न कोऽपि । निष्किञ्चनानां विरक्तानां शान्तानां मुनीनां यस्त्वमात्मदोऽसि ॥३३॥ यदोर्वंशेऽवतीर्य इह लोके संसरतां जन्तूनां तच्छान्त्यै संसारनिवृत्त्यर्थं त्रैलोक्यदुःखहन्तृ यशो विस्तारितवान् यः ॥३४॥

तवाक्यान्याह-

यद्यप्यदृश्यः अथापि नोऽ

हेतुमाह-साक्षीति । सर्वे

इत्याह-स्ववच इति । एक

पुत्रोऽपि मम प्रियो न भव

अत्र श्रीमूर्तिशङ्कयोरपि ग्रह

"न तथा

इति भगवद्वचनात्

हेतुः-मुनीनां मननशीलाना

विसृजेत् परित्यजेदित्यन्वयः

तच्छान्त्यै तस्य सांसारिकस्य

विसृजेदिति पूर्वेणान्वयः ।

तापकारणसकलपापनिरासक

भवानिति । हे प्रभो !

त्वमदृश्यः अथापि त्वत्पदाम्भो

अनन्तः सङ्कर्षणो बन्धुरपि श्री

सत्यं कर्तुं भवान् अस्माकं दृ

मुनीनाम् आत्मदः आत्मानमपि

परित्यजेत् ॥३३॥ य इति । इह

यदोर्वंशेऽवतीर्य त्रैलोक्यवृजिना

आत्मा अन्तर्यामी साक्षी

गतः । अस्माकं दृष्टिगोचरतां प्राप्तः

यत्त्वमात्थ तदृतं कर्तुम् ॥३२-३३॥

तदेवाह भवानिति षड्भिः ।

स्वदृगनन्याधीनप्रकाशश्च अथातः म

प्राप्त इत्यर्थः ॥३१॥ स्ववच इति ॥ कि

भार्यापि अजो ब्रह्मा पुत्रोऽपि न प्रियः

अस्मद्दृग्गोचरः अस्माकं दृशोर्विषयः जा

तोऽध्यवसायो यस्याः सा
क्तेः ।) ज्ञानीत्यर्थः ॥३२॥
वशीभूतो भवसि ॥३३॥
क्यस्य त्रिलोकस्य वृजिनं

र्वदा सर्वं भगवत्कार्यमेवेति
यम् । अतः पूर्वावस्थामनूद्य
व्यते तादृशोऽद्यैव दृष्ट इति ।
स्वदृक् स्वप्रकाशः । अनेन
कं हृदये तथा प्रतीतिजनकं
दर्शनस्य क्वोपयोगः । न हि
वतः प्रसिद्धं वचः ऋतं सत्यं

च यथा भवान् ॥"
ानित्युक्तत्वात् अत्राजशब्देनैव
दिति प्रियत्वं तदैव भवति यदि
। एवं भगवद्गुणं ज्ञात्वा
विसृजेत् । ननु प्रासात्मभावस्य
नां शान्तानामिति । ब्रह्मात्मभावे
कुर्यात् ततो ब्रह्मभावः तदुक्तं
क्याह-योऽवतीर्य इति । स एव
वृत्त्यर्थं यशो वितेने । तस्य कथं
सर्वे दोषाः संसर्गिदोषाद्वा यशस्तु

तव पदाम्भोजं पादपद्मं स्मरतां
ः प्रिया न अजो ब्रह्मा प्रियो नेति
२॥ एवं वित् ज्ञाता को नु पुमान्
॥३३॥ यदोर्वंशेऽवतीर्य इह लोके

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तवाक्यान्याह–भवानिति षड्भिः । हे प्रभो ! भवान् हि स्वदृक् स्वप्रकाशः सर्वभूतानामात्मा चेतयिता, अतो यदृश्यः अथापि नोऽस्माकं दर्शनं गत इति सम्बन्धः । दर्शनदाने हेतुमाह–त्वत्पदाम्भोजं स्मरतां भक्तानामिति । भजनज्ञाने तुमाह-साक्षीति । सर्वेषामन्तः स्थितः साक्षात्सर्वं पश्यति ॥३१॥ एवं मम दर्शनदानेन स्ववाक्यस्य प्रामाण्यं दर्शितम् त्याह-स्ववच इति । एकान्तभक्तान् अनन्यप्रयोजनभक्तियुक्तान् अनन्तः सङ्कर्षणो बन्धुरपि, श्रीर्लक्ष्मीर्भार्यापि, अजो ब्रह्मा त्रोऽपि मम प्रियो न भवतीति यदात्थ कथितवांस्तत्स्ववचनम् ऋतं सत्यं कर्तुं भवान् अस्माकं दृग्गोचरो नेत्रविषयो जातः । त्र श्रीमूर्तिशङ्कयोरपि ग्रहणं कर्तव्यम्,

"न तथा मे प्रियतम आत्मयोनिर्न शङ्करः । न च सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥"

इति भगवद्वचनात् ॥३२॥ अतो यस्त्वं निष्किञ्चनानां सर्वतोविरक्तानाम्, तत्र हेतुः–शान्तानां रागादिरहितानाम्, तत्र तुः-मुनीनां मननशीलानाम् आत्मानमपि ददासि । अन्यद्दानस्य का वार्ता ? एवंवित्पुमान् तस्य तव चरणाम्भोजं को नु विसृजेत् परित्यजेदित्यन्वयः ॥३३॥ किञ्च इह संसारे संसरतां देवतिर्यङ्मनुष्यादियोनिषु तापत्रयमनुभवतां नृणां प्राणिनां च्छान्त्यै तस्य सांसारिकस्य तापत्रयस्योपशमनाय यस्त्वं यदोर्वंशेऽवतीर्य यशो वितेने तस्य तव चरणाम्भोजं को नु पुमान् विसृजेदिति पूर्वेणान्वयः । ननु यशोविस्तारेण कथं तापत्रयोपशान्तिः इत्याशंक्य तच्छ्रवणादिपराणां त्रिलोकस्थजनानां कारणसकलपापनिरासकत्वात् इत्याशयेनाह–त्रैलोक्यवृजिनापहमिति ॥३४॥

अन्वितार्थप्रकाशिका

भवानिति । हे प्रभो ! भवान् हि स्वदृक् स्वप्रकाशः सर्वभूतानामात्मा चेतयिता साक्षी च अथ अतः कारणात् यद्वा यदृश्यः अथापि त्वत्पदाम्भोजं स्मरतां नोऽस्माकं दर्शनं गतः ॥३१॥ स्ववच इति । एकान्तभक्तात् अनन्यप्रयोजनभक्तियुक्तात् अनन्तः सङ्कर्षणो बन्धुरपि श्रीर्लक्ष्मीर्भार्यापि अजो ब्रह्मा पुत्रोऽपि मम प्रियो न भवतीति यदात्थ कथयसि तत्स्ववचः ऋतं सत्यं कर्तुं भवान् अस्माकं दृग्गोचरो नेत्रविषयो जातः ॥३२॥ क इति । यस्त्वं निष्किञ्चनानां सर्वतोविरक्तानां शान्तानां मुनीनाम् आत्मदः आत्मानमपि ददासि । अन्यदानस्य का वार्ता । एवंवित्पुमान् तस्य तव चरणाम्भोजं को नु विसृजेत् परित्यजेत् ॥३३॥ य इति । इह संसारे संसरतां जन्ममरणाद्यनुभवतां नृणां प्राणिनां तच्छान्त्यै तस्य संसारस्योपशमनाय यस्त्वं यदोर्वंशेऽवतीर्य त्रैलोक्यवृजिनापहं यशो वितेने ॥३४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आत्मा अन्तर्यामी साक्षी साक्षाद्द्रष्टाऽतः स्वदृक् स्वकीयेषु भक्तेषु दृक् कृपाकटाक्षो यस्य सः अत एव स्मरतां दर्शनं तः । अस्माकं दृष्टिगोचरतां प्राप्तः ॥३१॥ अनन्तो भ्राताऽपि श्रीः पत्न्यपि अजो विधिरपि ॥ एकान्तभक्तात् मे न प्रियः इति यदात्थ तदृतं कर्तुम् ॥३२-३३॥ तच्छान्त्यै तस्य संसरणस्य शान्त्यै शमनाय ॥३४-३५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह भवानिति षड्भिः ॥ भवानिति ॥ हे विभो हि यस्मात् भवान् सर्वभूतानाम् आत्मा अन्तरात्मा साक्षी साक्षात् द्रष्टा स्वाधीनप्रकाशश्च अथातः मदभिप्रायं जानन्निति शेषः । त्वत्पदाम्भोजं स्मरतां नोऽस्माकं दर्शनं गतः । अस्माकं नयनविषयतां तत्यर्थः ॥३१॥ स्ववच इति ॥ किञ्च एकान्तभक्तादनन्यप्रयोजनभक्तियुक्तात् सकाशात् मे मम अनन्तः शेषः सखापि श्रीर्लक्ष्मीः पत्नी अजो ब्रह्मा पुत्रोऽपि न प्रियः । इति यत् आत्थ । तत् स्ववचः ऋतं सत्यं कर्तुं स्ववचस्तद्दृढीकर्तुमित्यपि पाठः । भवान् दृग्गोचरः अस्माकं दृशोर्विषयः जात इति शेषः ॥३२॥ को न्विति ॥ तस्मात् एवंवित् को नु पुमान् त्वच्चरणाम्भोजं विसृजेत् ।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त्यजेदेवेत्यर्थः । यः परमेश्वरः त्वं निषकिञ्चनानां शान्तानाम् आत्मजः असि ॥३३॥ य इति ॥ यस्त्वम् इह लोके संसृतं जन्ममरणात्मकसंसारमुपगच्छतां नृणां तच्छान्त्यै सांसारिकतापत्रयोपशमनाय यदोः वंशे अवतीर्य त्रैलोक्यवृजिनापहं त्रिलोकस्थजनपापघ्नं यशः वितेने सम्पादितवान् ॥३४॥

कृष्णप्रिया

राजा बहुलाश्वने कहा प्रभो ! आप समस्त प्राणियों के आत्मा साक्षी एवं स्वयं प्रकाश है । हम सदा सर्वदा आपके चरणकमलोंका स्मरण करते रहते है । ईसी से आपने हमलोगोंको दर्शन दे कर कृतार्थ किया है ॥३१॥ भगवन् ! आपके वचन है कि मेरा अनन्य प्रेमी भक्त मुझे अपने स्वरूप बलरामजी अर्धांगिणि लक्ष्मी और पुत्र ब्रह्मासे भी बढकर प्रिय है । अपने उन वचनों को सत्य करने के लिये ही आपने हमलोगोंको दर्शन दिया है ॥३२॥ भला एसा कौन सा पुरुष है जो आपकी इस परम दयालुता और प्रेम परवशता को जानकर भी आपके चरणकमलों का परित्यग कर सके ? प्रभो ! जिन्होंने जगत् की समस्त वस्तुओंका एवं शरीर आदि का भी मनसे परित्यग कर दिया है, उन परम शान्त मुनियो को आप अपने तक को भी दे डालते है ॥३३॥ आपने यदुवंशमें अवतार लेकर जन्म मृत्यु के चक्कर में पडे हुए मनुष्योंको उससे मुक्त करने के लिये जगतमें ऐसे विशुद्ध यश का विस्तार किया है, जो त्रिलोकी के पाप तापको शान्त करने वाला है ॥३४॥

नमस्तुभ्यं भगवते कृष्णायाकुण्ठमेधसे । नारायणाय ऋषये [1]संशान्ततप ईयुषे ॥३५॥
दिनानि कतिचिद्भूमन् गृहान् नो निवस[2] द्विजैः । समेतः पादरजसा पुनीहीदं निमेः कुलम् ॥३६॥
इत्युपामन्त्रितो राज्ञा भगवाँल्लोकभावनः । उवास कुर्वन् कल्याणं मिथिलानरयोषिताम् ॥३७॥
श्रुतदेवोऽच्युतं प्राप्तं स्वगृहान् जनको यथा । [3]नत्वा मुनीन्[4] सुसंहृष्टो धुन्वन् वासो ननर्त ह ॥३८॥

कर्दमक्षमा

अकुण्ठमेधसे, सुशान्तम्, तप, ईयुषे, कृष्णाय, नारायणाय, ऋषये, भगवते, तुभ्यम्, नमः ॥३५॥ भूमन्, कतिचित्, दिनानि, द्विजैः, समेतः, नः, गृहान्, निवस, पादरजसा, इदम्, निमेः, कुलम्, पुनीहि ॥३६॥ इति, राज्ञा, उपामन्त्रितः, लोकभावनः, भगवान्, मिथिलानरयोषिताम्, कल्याणम्, कुर्वन्, उवास ॥३७॥ यथा, जनकः, श्रुतदेवः, स्वगृहान्, प्राप्तम्, अच्युतम्, मुनीन्, नत्वा, सुसंहृष्टः, ह, वासः, धुन्वन्, ननर्त ॥३८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

गृहान् गृहेष्वित्यर्थः ॥३६-३७॥ धुन्वन् परिभ्रमयन् ॥३८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

य इत्यर्थ इति-सप्तम्यर्थे द्वितीया छान्दसीति भावः ॥३६-३७॥ अथ श्रुतदेवोत्सवमाह-श्रुतेति । धुन्वन्निति अन्तर्भावितणिजर्थः ॥३८॥

---

[1] सुशान्तं-श्रीधर. वंशी. ; शान्ताय तप -इति कस्यचित् ; संशान्तं तप-वीर. ; स्वशान्ततप-विज. ।
[2] निवसन्द्वजैः-वीर. ; निवसन्निजैः-विज. । [3] मत्वा-विज. । [4] मुनींश्च-इति कस्यचित् ।

अथ किञ्चिदग्रे प्रार्थ
किञ्च सर्वलोकहितर्थमद्यापि
कर्तुमर्हस्येवेति भावः । यद्वा, ि
वा तथापि लोकशिक्षार्थं तपःक्ष
स्तुत्वा सदैन्यं प्रार्थयते-दिनानि
तथैवाह-गृहानिति । निवसेत्यत्र
॥३७॥ जनको यथेति । प्रवृद्धभ

किञ्चिदग्रे प्रार्थयितुं प्रा
सर्वलोकहितार्थमद्यापि बदरिकाश्र
शान्ताय कामाद्यनुपहतचित्ताय
यद्वा, किञ्च, नारायणाय सर्वजीव
तपः क्षात्रगृहिधर्ममीयुषे आचरत
साक्षादवध्यनुक्त्या अनन्तानीति
स्वशक्त्यात्राप्यन्यत्रापि स्वयं स्था
लोचनेषु निमिनिवासजात-निमेषे
एवम्, उप दाक्षिण्येनामन्त्रित
भक्तवात्सल्याद्यशेषगुणप्रकटनपर
कल्याणं विशुद्धभक्तिलक्षणमङ्गलं
स्वयमेवागतम् । जनको यथेति प्र

व्रजेत् सुशान्ततपः ऊर्मिष

एवंविधाय तुभ्यं न प्रति
लोकसुखकरायाकुण्ठमेधसे । कृत
ऋषये तद्रूपेणावस्थिताय तस्मै पूर्वो
समेतस्सहितस्त्वं नोऽस्माकं गृहे
उपामन्त्रितः प्रार्थितः लोकपावन इ
उषितवान् ॥३७॥ श्रुतदेव इति । जन
हृष्टोऽत एव वासः उत्तरीयं विधुन्वन्नु

शान्तं सुखपूर्तिस्तपः ज्ञानं नि
॥३६॥ मिथिलायां विद्यमानानां नरयोषित

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ किञ्चिदग्रे प्रार्थयितुं प्राक् प्रणमति-नम इति । अकुण्ठमेधसे अपरिच्छिन्नज्ञानायेति । किमन्यैर्ज्ञाप्यस्त्वमिति भावः । सर्वलोकहितर्थमद्यापि बदरिकाश्रमे निजरूपेणैकेन तपोलीलामपि कर्त्र इत्याह-नारायणायेति । अतोऽस्माकमपि हितं स्येवेति भावः । यद्वा, किञ्च नारायणाय सर्वजीवाद्याश्रयाय यतः ऋषये वेदद्रष्ट्रे अत एव शान्ताय निर्विकाराय सुखघनाय थापि लोकशिक्षार्थं तपःक्षात्रगृहिधर्ममीयुषे आचारत इत्यर्थः । सुशान्ततप इति पाठे लोकहितकारितप इत्यर्थः ॥३५॥ एवं सदैन्यं प्रार्थयते-दिनानीति । कतिचिदिति विनयोक्तिः । हे भूमन्निति यद्यपि सर्वपरिपूर्णस्त्वं तथापि कृपयैवेति भावः । गृहानिति । निवसेत्यत्र निवसन्निति क्वचित्पाठः । निमेस्त्वद्भक्तस्य ॥३६॥ उप आधिक्येन आमन्त्रितः प्रार्थितः सन् जनको यथेति । प्रवृद्धभक्त्या सोऽपि अस्त्राविलेक्षण इत्यतिदिशति । मुनींश्चेति मुनीनिति वा पाठः । ह हर्षे ॥३८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

किञ्चिदग्रे प्रार्थयितुं प्राक् प्रणमति-नम इति । अकुण्ठमेधसेऽपरिच्छिन्नज्ञानायेति किमन्यैर्ज्ञाप्यस्त्वमिति भावः । किञ्च, लोकहितार्थमद्यापि बदरिकाश्रमे निजरूपेणैकेन तपस्तप्यमानायेत्याह-नारायणायेति । ऋषये जटमण्डलधारणादिना तपस्विवेषाय, कामाद्यनुपहतचित्ताय ब्रह्मचर्यनिष्ठत्वात्, तच्चैकादशस्कन्धे सुव्यक्तम्, अतोऽस्माकमपि हितं कर्तुमर्हसीति भावः । किञ्च, नारायणाय सर्वजीवाश्रयाय यत ऋषये वेदद्रष्ट्रे अत एव शान्ताय निर्विकाराय सुखघनाय वा, तथापि लोकशिक्षार्थं क्षात्रगृहिधर्ममीयुषे आचरत इत्यर्थः ॥३५॥ एवं स्तुत्वा सदैन्यं प्रार्थयते-दिनानीति । कतिचिदिति विनयादिनाऽस्वल्पानीति वध्यनुक्त्या अनन्तानीति भावः । ननु यादवादीनामपेक्षयान्यत्रापि न वासोऽपेक्षणे, तत्राह-भूमन् ! हे सर्वव्यापकेति प्यन्यत्रापि स्वयं स्थातुं प्रवभसीति भावः । इदं परोक्षज्ञानपरम् । पुनीहि अद्वैतादि-दुर्वासनातः शोधय । यद्वा, नृणां निमिनिवासजात-निमेषेण श्रीगोप्यादीनां त्वद्दर्शनानन्दविघाताज्जातापराधं तत्कुलम्, तस्मात् पुनीहीत्यर्थः ॥३६॥ इति उप दाक्षिण्येनामन्त्रितः प्रार्थितः सन्नुवास, यतो लोकभावनः सर्वजीवपरिपालकः, तत्रापि भगवान् वात्सल्याद्यशेषगुणप्रकटनपर इत्यर्थः । अतो मिथिलाया नराणां पुंसां योषितां च प्रायोऽज्ञानपराणां मोक्षादिप्रयासत्याजनेन विशुद्धभक्तिलक्षणमङ्गलं सुखविशेषं वा कुर्वन् सन् ॥३८॥ अच्युतं सर्वैश्वर्यपरिपूर्णं भगवन्तं प्राप्तं महाभक्तमुनिभिः सह मेवागतम् । जनको यथेति प्रवृद्धभक्त्यास्राविलेक्षण इत्यतिदिशति । ह हर्षे ॥३८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

व्रजेत् सुशान्ततपः ऊर्मिषट्कातीतं ज्ञानम् ॥३५-४०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवंविधाय तुभ्यं न प्रतिकर्तुं शक्नुमः । किन्तु केवलं नमस्कुर्म इत्यभिप्रेत्य नमस्करोति । नम इति । कृष्णाय सुखकरायाकुण्ठमेधसे । कृतज्ञतमाय सशान्तं शान्तिकरं लोकक्षेमावहं तपईयुषे प्राप्तायाधिकुर्वत इति यावत् नारायणाय तद्रूपेणावस्थिताय तस्मै पूर्वोक्तविधाय भगवते तुभ्यं नमः ॥३५॥ अभिप्रेतं निवेदयति-दिनानीति । हे भूमन् ! द्विजैर्मुनिभिः सहितस्त्वं नोऽस्माकं गृहे कतिचिद्दिनानि निवसन् पादरजसा इदं निमेः कुलं पुनीहि पवित्रं कुरु ॥३६॥ इतीति । प्रार्थितः लोकपावन इति हेतुगर्भम् अतो मिथिलायां पुरि नराणां योषितां च कल्याणं कुर्वन् कर्तुमित्यथः । उवास ॥३७॥ श्रुतदेव इति । जनकवंश्यत्वाद्बहुलाश्वः यथा तथा श्रुतदेवोऽपि स्वगृहं (प्रति) प्राप्तमच्युतं मुनींश्च नत्वा नितरां एव वासः उत्तरीयं विधुन्वन्नुत्क्षिपन् ननर्त । हेति हर्षे ॥३८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

शान्तं सुखपूर्तिस्तपः ज्ञानं निर्दोषपूर्णानन्दज्ञानमीयुषे प्राप्तवते ॥३५॥ राजा स्वगृहनिवासाय भगवन्तं प्रार्थयते-दिनानीत्यादिना मिथिलायां विद्यमानानां नरयोषिताम् ॥३७॥ तत्र श्रुतदेवेन किन्नु कृतमत्राह-श्रुतदेव इति । स्वगृहान् प्राप्तमच्युतं मत्वा ज्ञात्वा ॥३८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अंशरूपेणाप्याह-नारायणायेति ॥३५-४३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वगृहे कतिचिद्दिनानि वासयितुं स्तौति-अकुण्ठा मेधा यत इति तवात्र निवासेनास्माकमपि बुद्धिरकुण्ठ विषयशरैर्भेत्तुमशक्या भवत्विति भावः। ऋषये नारायणायेति यथा बदरिकाश्रमे भारतभूमिभाग्येन वर्तसे तथैवात्र मिथिलाभूभागं प्रकटयन् कियन्ति दिनानि वर्तस्वेति भावः। सुशान्ततपईयुषे इति द्वारकासमुचितभोग्यवस्तुवर्जितेऽत्र मम गृहे वसतस्तव तपश्चरणमेव भविष्यतीति भावः ॥३५॥ समेतः सहितः ॥३६-३७॥ धुन्वन्नानन्देन वासः कराभ्यां धृत्वा स्वमूर्धोपरि भ्रामयन् ॥३८॥

गूढार्थदीपिनी

सुशान्तं परानुद्वेजकं तपः ईयुषे कुर्वते ते नमः। अकुण्ठा कालादिना अप्रतिहता मेधा ज्ञानशक्तिर्यस्य तस्मै ॥३५॥ हे भूमन्! अपरिच्छिन्नमहिमन्! द्विजैः समेतः नोऽस्माकं गृहान् गृहेषु निवस निवासं कुरु इदं कुलं च पुनीहि ॥३६॥ उपामन्त्रितः प्रार्थितः। लोकान् भावयति पालयतीति तथा ॥३७॥ यथा जनकः तथा श्रुतदेवोऽपि स्वगृहान् प्रति प्राप्तं कृष्णं नत्वा ननर्त। हर्षेण। वासो धुन्वन् ऊर्ध्वाधश्चालयन् अन्तर्भावितण्यर्थः ॥३८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वास उत्तरीयं धुन्वन् परिभ्रामयन् ॥३८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं जगत्कृतार्थत्वायावतीर्णः स्वकृतार्थत्वाय च समागत इति निरूप्य कर्तव्यान्तराभावान्नमस्यति-नमस्तुभ्यमिति तुभ्यमित्यपोरक्षत्वाय अन्यो भगवान् भविष्यतीत्युकपचारव्यावृत्त्यर्थं कृष्णायेति साक्षाद्भगवत्त्वे हेतुः-अकुण्ठमेधस इति। कुण्ठा कुण्ठिता मेधा यस्येति सर्वस्यापि भगवत्त्वे एतेनैव वैलक्षण्येन अस्य तथात्वात् साम्प्रतं येन रूपेण समागतस्तं निर्दिशति-नारायणाय ऋषय इति। नारायण एवायं तृतीयलीलां करोतीति स एव ऋषिः अनेन ब्रह्माण्डविग्रहो नारायणः तदंशो वेति पक्षो निराकृतः। विशेषरूपनिर्वचने योत्कर्षहेतुस्तन्निर्दिशति-सुशान्ततपईयुष इत्। सर्वप्राणिनां सुखजनकं स्वस्याप्यक्षोभकरं एतादृशं तपः तन्नारायण एव करोतीति ॥३५॥ एवं भगवत्स्वरूपमुक्त्वा कर्तव्यं च कृत्वा प्रार्थयते-दिनानि कतिचिद् द्विजैरेतैः सह पादरजसा निमेः कुलं पुनीहि। यद्यपि सेवा कापि नास्ति तथापि पादरजः निमिकुलसञ्चारस्थाने पतिष्यति कुलपावित्र्यार्थमेतदुच्यते तेन सर्व एव कुलोत्पन्नाः कृतार्था भविष्यन्तीति तद्वंशसम्बन्धनिष्कृत्यै स्थितिप्रार्थनेति सूचितम् ॥३६॥ तथैव भगवान् कृतवानीत्याह-इत्युपामन्त्रित इति। तत्र हेतुः लोकभावन इति। लोकानेवानुभावयति तत्र निमिकुलानुभाव कः प्रयास इत्यर्थः। भगवान् स्वयं स्थितः स्वधर्मं तत्र योजयति। अनुभावः सम्पद्यते तदर्थमत्रापि स्थितः। प्रयोजनान्तरमप्या-मिथिलानरयोषितां कल्याणं कुर्वन्निति ज्ञानिनस्तेनात्यन्तमुत्सवं जानन्ति अतस्तेषामुत्सवसिद्ध्यर्थं कियत्कालं तत्र स्थितः ॥३७॥ प्रासङ्गिकं निरूप्य प्रस्तुतं निरूपयति-श्रुतदेवोऽच्युतं प्राप्तमिति। नन्वहं दरिद्रः कथं भगवन्तं नयामीति न विचारितवान् किन्तु यथा जनकः तथैव जातः किञ्च अधिकोऽपि जात इत्याह-मुनीन् नत्वा मुनींश्च प्राप्तान् दृष्ट्वा वासो धुन्वन् ननर्त आनन्द स्वस्याप्युपकारो जात इति नमनम् आगमनेनैवान्तःपरमानन्दश्च वृतः ॥३८॥

अकुण्ठमेधसे भगवते कृ
समेतस्त्वं नोऽस्माकं गृहान् निव
लोकपालको भगवान् मिथिलावा
मुनींश्च नत्वाऽतिप्रसन्नो वासो वस्त्र

एवम्भूतस्य सर्वेश्वरस्य प
सूचयन्नमस्करोति-नम इति। कृष
तपो लोकशिक्षार्थमीयुषे स्वीकृतव
। तत्र हेतुमाह-भगवत इति ॥३५
नोऽस्माकं गृहान् गृहे कतिचिद्दिना
सम्प्रार्थितः यतो लोकभावनः लोक
श्रुतदेववृत्तमाह-यथा जनकस्तथा श्र
ननर्त। हेति राज्ञोऽपि तस्य हर्षाधिक

नम इति। सुशान्तं परोद्वे
द्विजैर्मुनिभिः समेतस्त्वं नोऽस्माकं गृ
इतीति। राज्ञा जनकेनेत्येवमुपामन्त्रित
कर्तुं भगवांस्तत्रोवास ॥३७॥ श्रुतेति
वासो धुन्वन् परिभ्रामयन् ननर्त ॥३८॥

श्रीगो

गृहान् गृहेषु द्विजैः ॥ समेतः

नम इति ॥ भगवते परमेश्वराय
प्रतिकर्तुं तु न शक्नुमस्ततः केवलं नमस्कु
संशान्तं लोकशान्तिकरं क्षेमावहमित्यर्थः
तद्रूपेणावस्थिताय तुभ्यं नम इति सम्बन्धः
नोऽस्माकं गृहान् अस्माकं गृहेष्वित्यर्थः
॥३६॥ इतीति ॥ इतीत्थं राज्ञा मैथिलेन उप
श्रीकृष्णः मिथिलानरयोषितां मिथिलावा
श्रुतदेव इति ॥ जनकः जनकवंश्यत्वाज्जन
मुनींश्च नत्वा सुसंहृष्टः नितरां हृष्टः अत एव

सेनास्माकमपि बुद्धिरकुण्ठा
वर्तसे तथैवात्र मिथिलाभूभाग्यं
मम गृहे वसतस्तव तपश्चरणमेव
र्योपरि भ्रामयन् ॥३८॥

ज्ञानशक्तिर्यस्य तस्मै ॥३५॥ हे
लं च पुनीहि ॥३६॥ उपामन्त्रितः
न् प्रति प्राप्तं कृष्णं नत्वा ननर्त ह

तराभावान्नमस्यति-नमस्तुभ्यमिति ।
वत्त्वे हेतुः-अकुण्ठमेधस इति । न
तं येन रूपेण समागतस्तं निर्दिशति-
डविग्रहो नारायणः तदंशो वेति पक्षो
ानां सुखजनकं स्वस्याप्यक्षोभकम्
प्रार्थयते-दिनानि कतिचिद्भूमन्निति ।
: निमिकुलसञ्चारस्थाने पतिष्यतीति
धनिष्कृत्यै स्थितिप्रार्थनेति सूचितम्
ानेवानुभावयति तत्र निमिकुलानुभवने
र्मत्रापि स्थितः । प्रयोजनान्तरमप्याह-
त्सववसिद्ध्यर्थं कियत्कालं तत्र स्थितः
कथं भगवन्तं नयामीति न विचारितवान्
प्तान् दृष्ट्वा वासो धुन्वन् ननर्त आनन्दाद्

श्रीसुबोधिनीसारः

अकुण्ठमेधसे भगवते कृष्णाय तुभ्यं नमः । सुशान्तं तप ईयुषे सेवमानाय ऋषये नारायणाय नमः ॥३५॥ हे भूमन्! द्विजैः नोऽस्माकं गृहान् निवस पादरजसा चरणरेणुना इदं निमेः कुलं पुनीहि पवित्रं कुरु ॥३६॥ इत्येवं राज्ञोपामन्त्रितो पालको भगवान् मिथिलावासिनां कल्याणं कुर्वन्नुवास ॥३७॥ राजचेष्टामुक्त्वा विप्रलीलामाह । स्वगृहान् प्राप्तमच्युतं श्रीकृष्णं नत्वाऽतिप्रसन्नो वासो वस्त्रमुत्तरीयं धुन्वन् हावादिक्रियया कम्पयन् श्रुतदेवो ननर्त जनक इव ॥३८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवम्भूतस्य सर्वेश्वरस्य परमोपकारिणः परमकृपालोस्तव न वयं किञ्चित् प्रतिकर्तुं शक्ताः, अतः केवलं नमस्कुर्म इति नमस्करोति-नम इति । कृष्णाय तुभ्यं नमः । जगदुपकारं दर्शयन्नाह-सुशान्तं न ध्रुवहिरण्यकशिप्वादितपोवत्परोद्वेजकं लोकशिक्षार्थमीयुषे स्वीकृतवते । स्वार्थं तु तपश्चर्या सम्भाविता इत्याशयेनाह-अकुण्ठा मेधा बुद्धिर्यस्य तस्मै सर्वज्ञायेति हेतुमाह-भगवत इति ॥३५॥ एवं नमस्कृत्य स्वाभिप्रेतं प्रार्थयते-दिनानीति । हे भूमन् ! द्विजैर्मुनिभिः समेतस्त्वं स्माकं गृहान् गृहे कतिचिद्दिनानि निवसन् पादरजसेदं निमेः कुलं पुनीहि पवित्रीकुरु ॥३६॥ राज्ञा जनकेनेत्येवमुपामन्त्रितः र्थितः यतो लोकभावनः लोकपालकः अतो मिथिलानरयोषितां कल्याणं कुर्वन् कर्तुं भगवांस्तत्रोवास ॥३७॥ राजवृत्तमुक्त्वा स्ववृत्तमाह-यथा जनकस्तथा श्रुतदेवोऽपि स्वगृहान् प्रति प्राप्तमच्युतं मुनींश्च नत्वा सुसंहृष्टः सन् वासो धुन्वन् परिभ्रामयन् हेति राज्ञोऽपि तस्य हर्षाधिक्यं सूचयति ॥३८॥

अन्वितार्थप्रकाशिका

नम इति । सुशान्तं परोद्वेजनरहितं तपः ईयुषे लोकशिक्षार्थं कुर्वते । स्पष्टं शेषम् ॥३५॥ दिनानीति । हे भूमन् ! मुनिभिः समेतस्त्वं नोऽस्माकं गृहान् गृहेषु कतिचिद्दिनानि निवसन् पादरजसा इदं निमेः कुलं पुनीहि पवित्रीकुरु ॥३६॥ राज्ञा जनकेनेत्येवमुपामन्त्रितः सम्प्रार्थितः यतो लोकभावनः लोकपालकः अतो मिथिलानरयोषितां कल्याणं कुर्वन् भगवांस्तत्रोवास ॥३७॥ श्रुतेति । यथा जनकस्तथा श्रुतदेवोऽपि स्वगृहान् प्रति प्राप्तमच्युतं मुनींश्च नत्वा सुसंहृष्टः सन् धुन्वन् परिभ्रामयन् ननर्त ॥३८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गृहान् गृहेषु द्विजैः ॥ समेतः सहितः ॥३६-३७॥ वासो धुन्वन् कम्पयन् ननर्त नर्तनेन वस्त्रं कम्पितमित्यर्थः ॥३८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नम इति ॥ भगवते परमेश्वराय तुभ्यं नमः । सर्वेश्वर एव त्वं लोकोज्जिजीविषयाऽवतीर्ण इति भावः । उक्तविधाय तुभ्यं तु न शक्नुमस्ततः केवलं नमस्कुर्म इति गूढोऽभिप्रायः । कथम्भूताय । कृष्णाय लोकसुखकराय अकुण्ठमेधसे कृतज्ञतमाय लोकशान्तिकरं क्षेमावहमित्यर्थः । तपः ईयुषे प्राप्ताय अधिकुर्वत इति यावत् । नारायणाय ऋषये तत्कारणत्वेऽपि वस्थिताय तुभ्यं नम इति सम्बन्धः ॥३५॥ अभिप्रेतं निवेदयति ॥ दिनानीति ॥ हे भूमन्! त्वं द्विजैर्मुनिभिः समेतो युक्तः सन् गृहान् अस्माकं गृहेष्वित्यर्थः । कतिचित् दिनानि निवसावासं कुरु । पादरजसा इदं निमेः कुलं पुनीहि पवित्रीकुरु इति ॥ इतीत्थं राज्ञा मैथिलेन उपामन्त्रितः सम्प्रार्थितः लोकपावनः हेतुगर्भमिदम् । लोकभावन इत्यपि पाठः । भगवान् मिथिलानरयोषितां मिथिलावासिनां नराणां नारीणां चेत्यर्थः । कल्याणं कुर्वन् कर्तुमित्यर्थः । उवासोषितवान् ॥३७॥ इति ॥ जनकः जनकवंश्यत्वाज्जनकः नाम्ना तु बहुलाश्वः यथा तथा श्रुतदेवोऽपि स्वगृहान् प्राप्तम् अच्युतं श्रीकृष्णं नत्वा सुसंहृष्टः नितरां हृष्टः अत एव वास उत्तरीयवस्त्रं विधुन्वन् उत्क्षिपन्, हेति हर्षे । ननर्त ॥३८॥

कृष्णप्रिया

प्रभो ! आप अचिन्त्य, अनन्त ऐश्वर्य और माधुर्य की निधि है, सबके चित्त को अपनी और आकर्षित करने के लिये आप सच्चिदानंद स्वरूप परब्रह्म है। आपका ज्ञान अनन्त है। परम शान्ति का विस्तार करने के लिये आप ही नारायण ऋषि के रूपमें तपस्या कर रहे है। मैं आपको नमस्कार करता हूं ॥३५॥ एकरस अनन्त ! आप कुछ दिनों तक मुनिमण्डलि के साथ हमारे यहां निवास कीजिये और अपने चरणों की धूलसे इस निमिवंशको पवित्र कीजिये ॥३६॥ प्रिय परीक्षित् ! जैसे राजा बहुलाश्व भगवान श्रीकृष्ण को और मुनि मण्डलि के पधारने पर आनंमग्न हो गये थे, वैसे ही श्रुतदेव ब्रह्मण भी भगवान श्रीकृष्ण और मुनियों को अपने घर आया देखकर आनंद विह्वल हो गये, वे उन्हें नमस्कार करके अपने वस्त्र उछाल उछालकर नाचने लगे ॥३८॥

[1]तृणपीठबृसीष्वेतानानीतेषूपवेश्य [2]सः। स्वागतेनाभिनन्द्याङ्घ्रीन् सभार्योऽवनिजे मुदा ॥३९॥
तदम्भसा महाभाग आत्मानं [3]सगृहान्वयम्। स्नापयांचक्र उद्धर्षो लब्धसर्वमनोरथः ॥४०॥
[4]फलार्हणोशीरशिवामृता[5]म्बुभिर्मृदा सुरभ्भय तुलसीकुशाम्बुजैः।
आराधयामास यथोपन्नया [6]सपर्यया सत्त्वविवर्धनान्धसा ॥४१॥
स तर्कयामास कुतो ममान्वभूद् गृहान्धकूपे पतितस्य संगमः।
यः सर्वतीर्थास्पदपादरेणुभिः कृष्णेन चास्यात्मनिकेतभूरसुरैः ॥४२॥
सूपविष्टान् कृतातिथ्याञ्छुतदेव उपस्थितः। [7]सभार्यस्वजनापत्य उवाचाङ्घ्र्यभिमर्शनः ॥४३॥

कर्दमक्षमा

सः, आनीतेषु, तृणपीठबृसीषु, एतान्, उपवेश्य, स्वागतेन, अभिनन्द्य, सभार्यः, मुदा, अङ्घ्रीन्, अवनिजे ॥३९॥ महाभाग, तदम्भसा, आत्मानम्, सगृहान्वयम्, लब्धसर्वमनोरथः, उद्धर्षः, स्नापयाञ्चक्रे ॥४०॥ फलार्हणोशीरशिवामृताम्बुभिः, मृदा, सुरभ्या, तुलसीकुशाम्बुजैः, यथा, उपपन्नया, सपर्यया, सत्त्वविवर्धनान्धसा, आराधयामास ॥४१॥ सः, तर्कयामास, गृहान्धकूपे, पतितस्य, मम, आत्मनिकेतभूसुरैः, स्वतीर्थास्पदपादरेणुभिः, कृष्णेन, च, अस्य, यः, सङ्गमः, कुतः, अन्वभूत् ॥४२॥ सभार्यस्वजनापत्यः, उपस्थितः, अङ्घ्र्यभिमर्शनः, श्रुतदेवः, कृतातिथ्यान्, सूपविष्टान्, उवाच ॥४३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अवनिजे अवनिनिजे प्रक्षालितवान् ॥३९-४०॥ फलैरामलकादिभिरर्हणेनोशीरैस्तृणविशेषमूलैः सुवासितैः शिवैरमृतवत्स्वादुभिरम्बुभिः सुरम्या मृदा कस्तूरीप्रमुखया सपर्यया पूजया अथोपपन्नयाऽनायासेन सम्पन्नया भूतानुपद्रवलब्धत सत्त्वविवर्धनं यदन्धोऽन्नं तेन च ॥४१॥ अस्य श्रीकृष्णस्याऽऽत्मा मूर्तिस्तस्य निकेतैः स्थानविशेषैर्भूसुरैश्च सर्वतीर्थास्पदपादरेणुभि कृष्णादिभिर्यः सङ्गमः स मम कुतोऽन्वभूदिति अनु इति विस्मये यद्वा आ इति वितर्के नु इति विस्मये ॥४२॥ उपस्थितः सं उपविष्टः भार्या भर्तव्याः स्वजना आपत्यानि च तैः सहितः श्रीकृष्णस्याङ्घ्रिमभिमृशति सम्मर्दयतीत्यङ्घ्र्यभिमर्शनः ॥४३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तृणपीठानि कटानि कुशादिनिर्मितानि तान्येव बृष्यस्तासु। 'व्रतिनामासनं वृषी' इत्यमरः। एतान् कृष्णा आनीतेष्वन्येषूर्णाद्यासनेषु। अवनिजेऽत्राभ्यासलोपस्त्वार्षः ॥३९॥ तदम्भसाऽवनेजनजलेन। आत्मानं स्वदेहम्। गृहं भार्यां

---

[1] तृणपीठे सशिष्यांस्तानास्तृतेषूपवेश्य सः-विज.। [2]वेशयन्-गो. प्रे. टी.। [3]. सगृहान्स्वयं -वीर.। [4]. सिद्धार्हणोशीर-वीर.। [5]. अमृ मुदा-इति कस्यचित्। [6]. मालया-गो. प्रे. टी.। [7]. स्वभार्यः स्वगृहापन्नमुवाचा-वीर.।

पुत्रादिस्ताभ्यां सहितम्। सर्वै
दृग्विषयो जातोऽहो भाग्यं म
"स्याद्वीरणं वीरतरं मूलेस्योशी
कमलबीजपुष्पैः। सत्त्वविवर्ध
निकेत आश्रयो येषां तैः। सर्वत

"गङ्गाद्यास्सरितः सर्वा

वचनव्यत्यासेन कृष्णा
निकेतैराश्रयैः वेदस्य कृष्णात्मत
त्वमस्त्वाग्विप्रांस्तपोव्रतधरान्मुखत

एतानच्युतादीन् सर्वान् य
स्वयमेव चरणेषु गृहीत्वोपवेश्य ॥
तस्मिन्नादरः। उद्धर्षत्वे हेतुर्लब्धे
फलादिभिर्या सपर्य्या तया अ
ततोऽर्हणान्यर्घ्यादीनि ततो धूपन
स्वशुष्कामलक्या साधितं यदमृ
ज्ञेयः। ततश्च गतश्रमत्वे सति मध
वासितया अत एव कस्तूरीप्रमुखये
तुलस्यादिभिः ततश्चायाचितत्वादि
निजैकान्तिभिः सह स्वगृहागतेना
दैन्यमात्रस्येत्याह-स इति। अन्यत्तै
श्रीभगवन्तमधिकृत्येति शेषः। अङ्

एतानच्युतादीन् सर्वान् यत
स्वयमेव हस्तेषु गृहीत्वोपवेश्य ॥३९
यस्य तथाभूतः सन्, गृहकुटुम्बसहि
तमेव दीर्घच्छन्दसा गायन्नाह-फलेति
दूर्वादिकं वा, सत्त्वं सत्त्वगुणः साधुत
पूजाक्रमस्यासिद्धिः। अन्यत्तैर्व्याख्य
शिवाम्बुभिरित्यव पाठः। मृदेत्यस्य
[ग]।), अथवा उशीरं तदनुलेपः, चन्दन
मृत्तिकया, भर्जनादिना गन्धद्रव्यादिना
न्यमेव व्यवर्धतेत्याशयेनाह-स इति।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दिस्ताभ्यां सहितम् । सर्वेषां मनांसि रथो वाहनं यस्य स सर्वमनोरथः । सर्वहृद्वासी हरिस्स लब्धो येन स तथा । अन्तर्यामी विषयो जातोऽहो भाग्यं ममेत्यात्मानं श्लाघितवानिति भावः ॥४०॥ अर्हणेन चन्दनादिना । तृणविशेषस्य वीरणस्य मूलैः याद्वीरणं वीरतरं मूलेस्योशीरमस्त्रियाम्'' इत्यमरः । शिवैः कल्याणकरैरम्बुभिस्तीर्थोदकैरित्यर्थः । तुलसीदलमालाकुशपवित्र-मलबीजपुष्पैः । सत्त्वविवर्धनेन तमोरजोवारकं यदन्धः नीवारादि ॥४१॥ स श्रुतदेवः । निकेतैः स्थानभूतैः । यद्वा–अस्यात्मा केत आश्रयो येषां तैः । सर्वतीर्थानामास्पदं पादरेणुः येषां तैः ।

"गङ्गाद्यास्सरितः सर्वास्तीर्थैश्च पुष्करादिभिः । तिष्ठन्ति सततं राजन्विप्रपादरजस्सु वै ॥'' इत्यादिपुराणात् ॥

वचनव्यत्यासेन कृष्णविशेषणं च अनुपदं विस्मयेऽतिप्रसिद्धमत आह–यद्वेति । अस्याकारवाच्यवासुदेवस्यात्मा वेदस्तस्य तराश्रयैः वेदस्य कृष्णात्मत्वे 'वेदो नारायणः साक्षात्' इति यमपुरुषोक्तेरेव मानत्वम् । किञ्च– ''ब्रह्मात्मतत्त्वमवितुं प्रथमं विप्रांस्तपोव्रतधरान्मुखतश्च साक्षात्'' इति दक्षोक्तेश्च तथात्वम् ॥४२॥ अङ्घ्र्यभिमर्शनः पादसंवाहनं कुर्वन् ॥४३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एतानच्युतादीन् सर्वान् यतीनामासनं बृसिः पुंल्लिङ्गोऽपि । आनीतेषु स्वस्य प्रतिवेशिनां च गृहादाहृतेषु नूतनेषु प्रेमवैवश्येन मेव चरणेषु गृहीत्वोपवेश्य ॥३९॥ तदम्भसेति । श्रीकृष्णस्य चरणाम्भसा तु तदगोचरेणेत्यर्थः । महाभाग इति श्रीमन्मुनीन्द्रस्य मादरः । उद्धर्षत्वे हेतुर्लब्धेति ॥४०॥ तद्भाग्यविशेषेण सुप्रीतः संस्तमेव दीर्घच्छन्दसा गायन्नाह–फलेति द्वाभ्याम् । लादिभिर्या सपर्य्या तया आराधयामास तान् संतोषितवान् इत्यन्वयः । तत्र प्रथमतः फलानि मङ्गलोपायनानि र्हणान्यर्घ्यादीनि ततो धूपनार्थमुशीरेण वीरणमूलेन तथा जन्ममिष्टतादिसम्पादनार्थं शिवया प्रतिघटमेवैकप्रक्षिप्तया कामलक्या साधितं यदमृततुल्यमम्भस्तेन अम्बुभिरिति तेषां व्याख्या तु न मूलसंवादिनी तन्मते पाठस्तादृश एव वा । ततश्च गतश्रमत्वे सति मध्याह्नस्नानादिकं मुदा मृत्स्नया सुरभ्या मुद्रितनवघटे केतक्यादिभिः सह चिरस्थापनेन सुष्ठु तया अत एव कस्तूरीप्रमुखयेति तैर्व्याख्यातम् । तदादितुल्ययेत्यर्थः । कस्तूरीप्रमितयेति वा तत्पाठः । ततश्च देवपूजाद्यर्थं ादिभिः ततश्चायाचितत्वादिगुणैः सत्त्वगुणस्य विवर्धनेनान्धसेति उपलक्षणं चैतत् आचमनीयादीनाम् ॥४१॥ एवं कान्तिभिः सह स्वगृहागतेनापि भगवता तस्याभिमानो मा भूत् तत्कारणतया तस्यैव कृपायाः स्फुरणात् स्वात्मनस्तु स्येत्याह–स इति । अन्यत्तैः । तत्रात्मा मूर्तिरिति मनसि सदा प्रस्फुरन्ती मनोमयी ॥४२॥ उपस्थित उपेतः सन्नुवाच वन्तमधिकृत्येति शेषः । अङ्घ्र्यभिमर्शन इति । मुनीनामिति शेषः ॥४३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एतानच्युतादीन् सर्वान् यतीनामासनं बृषिः, पुँल्लिङ्गोऽपि । आनीतेषु स्वस्य प्रतिवेशिनां च गृहादाहृतेषु । प्रेमवैवश्येन हस्तेषु गृहीत्वोपवेश्य ॥३९॥ महान् भागो भागधेयं किंवा भक्तिलक्षणः प्राप्यांशो यस्य सः, अत एवोद्रिक्तो हर्षो तथाभूतः सन्, गृहकुटुम्बसहितमस्नपयत् । तेनैव लब्धाः सर्वे मनोरथा येन सः ॥४०॥ तद्भाग्यविशेषेण सुप्रीतः सन् र्घच्छन्दसा गायन्नाह–फलेति द्वाभ्याम् । फलादिभिर्या सपर्या तया आराधयामास सन्तोषितवानेतान्, तत्रार्हणमर्घ्यपाद्यादि वा, सत्त्वं सत्त्वगुणः साधुत्वं वा, तस्य विशेषतो वर्धनं यदन्धोऽयाचितादिनोपनतं निवाराद्यन्नम्, यथोपपन्नत्वादेव स्यासिद्धिः । अन्यत्तैर्व्याख्यातम् । तत्राम्भसेति पाठे वर्तमानेऽप्यम्बुभिरिति लेखोऽर्थानुसारात् । एवं द्वन्द्वैक्यम्, भिरित्येव पाठः । मृदेत्यस्य च कस्तूरीप्रमुखयेति व्याख्या, कस्तूर्या वने सुलभतया मृत्त्वादिति (मृत्तुल्यत्वादिति अथवा उशीरं तदनुलेपः, चन्दनाद्यभावात् । शिवा आमलकी, तस्याः फलान्तर्गतत्वेऽपि पृथगुक्तिः श्रीभगवत्प्रियत्वात् । मृदा मर्जनादिना गन्धद्रव्यादिना वा सुरम्या । अन्यत् समानम् ॥४१॥ तथापि तस्याभिमानो नाभूत्, प्रत्युत भक्त्युद्रेकेण वर्धतेत्याशयेनाह–स इति । तर्कयामास अचिन्तयदित्यर्थः । कुतः इति भक्त्वादादावनभिमानेन सहजदैन्यात्, अत

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवाह-गृहेति। सर्वेषां तीर्थानामास्पदमाश्रयः पादरेणुर्येषां तैः। अन्यत्तैर्व्याख्यातम्। तत्रात्मा मूर्तिरिति मनसि स्फ प्रस्फुरन्ती मनोमयी, अथवा आत्मनः श्रीभगवतो निकेतः श्रीद्वारकादिवर्तिगृहम्। तत्रत्यैर्भूसुरैः परमात्मीयैर्विप्रैरित्यर्थः अतएव भूसुरशब्दस्य प्रयोगः तेषामेव भुवि परमपूज्यत्वात् ॥४२॥ सुरवनोपविष्टं सन्तं श्रीभगवन्तम्, कृतमातिथ्यं पु पूजनेन मुखवासादिसमर्पणेन वा सर्वमतिथिकृत्यं यस्मिंस्तम्, इति श्रीभगवतोऽतिप्रसन्नत्वं तस्य वाव्यग्रचित्तत्वमुक्तम् अङ्घ्रिमभिमृशति शनैः सुखस्पर्शेन संवाहयतीति तथा सः ॥४३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सत्त्वविवर्धयाऽन्धसा सात्त्विकविकारवता अन्धः अन्नम् ॥४१-४३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तृणेति। स श्रुतदेवः आनीतेषु तृणमयेषु चासनेषु च तानुपवेश्य स्वागतप्रश्नपूर्वकमभिनन्द्य सभार्यो मुदा हर्षे अङ्घ्रीनवनिजे अवनिनिजे प्रक्षालितवान्। अभ्यासलोप आर्षः ॥३९॥ तदम्भसेति। हे महाभाग! तदम्भसा अ घ्रिजलेन स्वयमेवात्मानं देहं स्वगृहांश्च स्नापयामास। कथम्भूतः उद्धर्षः उत्कटो हर्षः यस्य सः लब्धः सर्वमनोरथो ये सः ॥४०॥ फलेति। फलानि चार्हणानि च गन्धपुष्पधूपदीपादीनि उशीराणि सुगन्धितृणविशेषमूलानि च शिवानि निर्मलानि अमृततुल्यान्यम्बूनि च तैः सुरभ्या मुदा कर्तूर्या तुलस्या कुशैरम्बुजैश्च सत्त्वविवर्धनान्धसा सत्त्ववर्धकान्ने जात्याश्रयनिमित्तादुष्टान्नेन चेत्यर्थः। एभिः कृत्वा यथोपपन्नयानायासेन सम्पन्नया सपर्यया पूजया आराधयामास ॥४१ स इति। स श्रुतदेवः तर्कयामास तर्कमेव दर्शयति-कुत इति। गृहमेवान्धकूपः तस्मिन् पतितस्य मम कृष्णेन तथा अ कृष्णस्य आत्मनो मूर्तेः निकेतैः स्थानभूतैः भूसुरैश्च कथम्भूतैः सर्वतीर्थानामास्पदान्याश्रयाः पादरेणवो येषां तथाभूतै सह यस्सङ्गमः स कुतोऽन्वभूत् अन्विति विस्मये ॥४२॥ सूपविष्टानिति। कृतमातिथ्यं यैस्तानुपस्थितः समीपमुपविष्ट स्वगृहानापन्नं प्राप्तं भगवन्तम् अङ्घ्र्यभिमर्शनः अङ्घ्री अभिमृशन्नाह उवाच ॥४३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

तृणपीठे कटे अवनिजे प्रक्षालयामास ॥३९-४०॥ सिद्धार्हणं सर्षपः उशीरं वालव्यजनं जया वा शिवा श्रेय अमृता प्रसिद्धा एताभिर्युक्तेन जलेन सुरभ्या सुगन्धेन मृदा सत्त्वेनात्मशक्त्या विवर्धमानया ॥४१ सर्वतीर्थानामास्पदपादरेणुभिः आश्रयचरणरेणुभिः सह कृष्णेन अध्यात्मा परमात्मा निकेतो निलयः आश्रयो येषां अध्यात्मनिकेताः। तैर्भूसुरैर्ब्राह्मणैश्च यः सङ्गमः स गृहान्धकूपे पतितस्य मम कुतोऽपतत् तस्मात्त्वत्पुण्यादभूदिति तर्कयाम अचिन्तयदित्यन्वयः ॥४२॥ अङ्घ्र्यभिमर्शनं पादसम्मर्दनं कुर्वन् ॥४३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥३५-४३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

बृसिर्दर्भासनं केषुचित् स्वगृहाभ्यन्तरात् केषुचित् प्रतिवेशिगृहादानीतेषु अवनिजे अवनिनिजे प्रक्षालयामास ॥३९- फलान्यामलकादीनि अर्हणान्यर्घ्यादीनि उशीरेण वीरणमूलेन शिवं सुगन्धं शीतं च यदमृततुल्यमम्भस्तेन यथोपपन्नया अनायास

सत्त्वविर्धनं यदन्धः पवित्रमन्त्र

इति विस्मये। यश्च सङ्गमः अ

एव अमात्या यस्य स च स च

स श्रुतदेवः आनीतेषु

आर्षः।) प्रक्षालयामासेत्यन्वय

तज्जलेन आत्मानं स्नापयाञ्चक्रे

तम् आराधयामासेत्यन्वयः।

तीर्थजलैः। सुरभ्या कस्तूरीप्रमुख

तेन ॥४१॥ अन्धकूपे पतितस्य

अभूत् इति तर्कयामासेत्यन्वयः

सहितः श्रुतदेवः तान् मुनीन् उ

कृष्णस्य अङ्घ्री अभिमृशति स

तृणमयेषु पीठेषु बृ

अर्हणैर्गन्धपुष्पादिभिः। उशीरैस्तृ

शोधकेनान्धसा अन्नेन च कृत्वा य

श्रीकृष्णस्य आत्मनिकेतभूसुरैः

कुतः अभूत् इति तर्कयामास ॥

सहितः स्वजनाः शिष्यादयः अप

एवं भक्तानां कार्यं शास्त्रा

मन्यते मुनीनां च सिंहासनापेक्षा ताद

तेषां प्रियं केषांचिदर्थे तृणान्येव

पश्चाल्लम्बमानपुत्राकारं क्रियते तेषु

कदाचिन्न करिष्यतीति शङ्क्या पुन

धर्मजनकत्वात् सन्तोषजनकत्वं न

लब्धसर्वमनोरथ इति। चरणोदकप्राप

तानि फलार्हणानीत्युच्यन्ते। उत्तमानि

च ततो हस्तपादप्रक्षालनार्थं मृत्सुरभि

किन्त्वनायासेनैव सिद्धैव सामग्री।

सम्पादितनीवाराद्योदनम् ॥४१॥ एवं

तर्कयामासेति। साधने सति साध्यं

मा मूर्तिरिति मनसि सदा
: परमात्मीयैर्विप्रैरित्यर्थः।
वन्तम्, कृतमातिथ्यं पुनः
स्य वाव्यग्रचित्तत्वमुक्तम्,

मभिनन्द्य सभार्यो मुदा हर्षेण
हे महाभाग ! तदम्भसा अङ
स: लब्धः सर्वमनोरथो येन
मूलानि च शिवानि निर्मलानि
र्धनान्धसा सत्त्ववर्धकान्नेन
पूजया आराधयामास ॥४१॥
ततस्य मम कृष्णेन तथा अस्य
याः पादरेणवो येषां तथाभूतैः
यैस्तानुपस्थितः समीपमुपविष्टः

लव्यजनं जया वा शिवा श्रेयसी
क्त्या विवर्धमानया ॥४१॥
निकेतो निलयः आश्रयो येषां तै
तस्मात्त्वत्पुण्याददभूदिति तर्कयामास

।

॥

अवनिनिजे प्रक्षालयामास ॥३९-४०
मम्भस्तेन यथोपपन्नया अनायासल

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्त्वविर्धनं यदन्धः पवित्रमन्नं तेन ॥४१॥ स श्रुतदेवः कृष्णेन सह सङ्गमो मम कुतो हेतोरभूत् इति तर्कयामास। आ इति स्मरणे नु ति विस्मये। यश्च सङ्गमः अस्य श्रीकृष्णस्य आत्मा मूर्तिस्तस्या निकेतैर्भूसुरैः सहितः ॥४२॥ सभार्यः भार्यया सहितः स्वसुता अमात्या यस्य स च स च सः अङ्घ्रिम् अभिमृशति सम्मर्दयतीति सः ॥४३॥

गूढार्थदीपिनी

स श्रुतदेवः आनीतेषु तृणपीठादिषु एतान् उपवेश्य अभिनन्द्य च तेषामङ्घ्रीन् अवनिनिजे (मूले अवनिजे। अभ्यासलोप र्थः।) प्रक्षालयामासेत्यन्वयः। तृणेषु तन्निर्मितकटेषु पीठेषु बृसीषु (व्रतिनामासनं वृषी इत्यमरः) कुशासनेषु ॥३९॥ तदम्भसा जलेन आत्मानं स्नापयाञ्चक्रे। गृहं गृहिणो अन्वयः पुत्रादिः ताभ्यां सहितम्। उत् उत्कटः हर्षो यस्य सः ॥४०॥ स फलादिभिः आराधयामासेत्यन्वयः। फलैः आमलकादिभिः। अर्हणेन चन्दनादिना उशीरैः खसवासितैः शिवैः अमृतवत्स्वादुभिः जलैः। सुरभ्या कस्तूरीप्रमुखया। यथोपपन्नया अनायासेन प्राप्तया सपर्यया। सत्त्वविवर्धनं सात्त्विकं यत् अन्धः अन्नं नीवारादि न ॥४१॥ अन्धकूपे पतितस्य मम कृष्णेन अस्य आत्मनो मूर्तैः निवासभूतैः (कित निवासे धातुः) भूसुरैश्च यः सङ्गमः सः कुतः अभूत् इति तर्कयामासेत्यन्वयः। अनु विस्मये। कथम्भूतैः भूसुरैः। सर्वतीर्थानामास्पदं पादरेणुः येषां तैः ॥४२॥ भार्यादिभिः हितः श्रुतदेवः तान् मुनीन् उपस्थितः समीपे उपविष्टः सन् इदमुवाचेत्यन्वयः। कृतमातिथ्यम् अतिथिसत्कारो येषां तान्। मास्य अङ्घ्री अभिमृशति सम्मर्दयतीति तथा पादंवाहनं कुर्वन् ॥४३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तृणमयेषु पीठेषु बृसीषु दर्भासनेषु च अवनिजे प्रक्षालयामास ॥३९-४०॥ फलैराम्रकदल्यादिभिः। गन्धपुष्पादिभिः। उशीरैस्तृणविशेषमूलैः शिवानि सुवासितान्यमृतवत्स्वादूनि यान्यम्बूनि तैश्च सत्त्वविवर्धनेनान्तःकरण-र्धकेनान्धसा अन्नेन च कृत्वा यथोपपन्नया अनायासलब्धया सपर्यया पूजया आराधयामास ॥४१॥ कृष्णेन सदानन्देन अस्य कृष्णस्य आत्मनिकेतभूसुरैः श्रीमूर्तिध्यातृभूदेवैः सर्वतीर्थानामास्पदमाश्रयः पादरेणुर्येषां तैश्च समागमः माम अनु अहो तः अभूत् इति तर्कयामास ॥४२॥ उपस्थितः समीपे उपविष्टः अङ्घ्रिमभिमृश्यति सम्मर्दयतीति सः सभार्यः भार्यया हिताः स्वजनाः शिष्यादयः अपत्यानि यस्य स च स च सः कृतमातिथ्यं यैस्तान् कृतमर्पितमातिथ्यं येभ्यस्तानुवाच ॥४३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भक्तानां कार्यं शास्त्रानुसारिणां ततो यथासम्भवं पूजां कृतवानित्याह-तृणपीठबृसीष्विति। भगवदासनं स्वहृदयमेव र्थं मुनीनां च सिंहासनापेक्षा तादृशान्येव प्रियाणि न हि तपोयुक्तानां ग्राम्याः पदार्थाः प्रियहेतवो भवन्ति अतः तृणपीठादिकमेव प्रियं केषांचिदर्थे तृणान्येव दत्तवान् केषांचित्पीठानि केषांचित् बृसी ऋषीणामासनं बृसीति कोमलकुशैः चतुरश्रं मानपुत्राकारं क्रियते तेषु आनीतानुपवेश्य ततः स्वागतेनाभिनन्द्य सभार्याः अङ्घ्रीन् अवनिनिजे ॥३९॥ राजवदुपचारं करिष्यतीति शङ्क्या पुनरुच्यते ब्राह्मणत्वात् अतः पुनराह-तदम्भसेति। स्त्रीपुत्रादिसहितमात्मानं स्नापयाञ्चक्रे तस्य जनकत्वात् सन्तोषजनकत्वं न भविष्यतीति आशंक्याह-उद्धर्ष इति। उद्गतो हर्षो यस्येति फलार्थमेव करोतीति चेत्तत्राह-सर्वमनोरथ इति। चरणोदकप्राप्त्यैव सर्वे मनोरथाः प्राप्ता इति ॥४०॥ ततः समाराधनमाह-फलार्हणेति। फलान्यर्हणसाधनानि फलार्हणानीत्युच्यन्ते। उत्तमानि फलानीत्यर्थः। उशीराणि च सुगन्धानि तत्सहितं शिवामृताम्बु पर्यवसानसुखदम् अमृतमिष्टं हस्तपादप्रक्षालनार्थं मृत्सुरभिः परिमलयुक्ता ततः पुजार्थं तुलसीकुशाम्बुजानि तैः यथाशास्त्रमाराधयामास पूजां कृतवान् अनायासेनैव सिद्धैव सामग्री। किञ्च, पूजानन्तरं तादृशमन्धः अन्नं दत्तवान् येन सत्त्वगुणो वर्धते। शिलोञ्छवृत्त्या नीवाराद्योदनम् ॥४१॥ एवं पूजां कृत्वा दुर्लभं भगवद्दर्शनं मम कथं जातमिति मानसिकपूजार्थं तस्यालोचनमाह-स सेति। साधने सति साध्यं भवति। गृहान्धकूपे पतितस्य मम साधनसम्पत्तिः सुवर्णशङ्खलावत् सात्त्विकमपि

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

गृहमन्धकूपप्रायमेव स्वपरासद्ग्राहात् तदेव निस्तारकं यद्भेदबुद्धिनिवर्तकम् अतो गृहान्धकूपे पतितस्य कृष्णेन मुनिभिर्वा सङ्गमः कृष्णस्य दुर्लभत्वं सर्ववादिसम्मतं मुनीनामपि तथात्वमाह–यः सर्वतीर्थास्पदपादरेणुभिरिति। ब्राह्मणपादरेणुषु सर्वा तीर्थानि वसन्तीति न केवलमेतावानेवोत्कर्षः किन्त्वस्य भगवतः आत्मनः निकेतरूपाः आश्रयभूताः ये भूसुराः ब्राह्मणा भूमावेव देवभावं प्राप्ता इति फलं भगवत्स्थानसाध्यत्वेन साध्योत्कर्षः तीर्थत्वेन साधनोत्कर्षश्चेति ॥४२॥ ततो भगवन्तं स्तोतुम् उपक्रान्तवानित्याह–सूपविष्टानिति। सत्त्वशोधकत्वात् अस्यान्नस्याग्रे दुःखजनकत्वाभावात् सम्भगुपवेशनमात्रेण पूजासमाप्तिः सूचिता, तदेवाह–कृतातिथ्यानिति। कृतमातिथ्यं येभ्यः तानुप समीपे स्थितः सभार्यः सर्वथाप्यरक्षितसूक्ष्मा स्वजनाः अपत्यानि च यस्येति भार्यास्वजनापत्यसहितः ॥४३॥

श्रीसुबोधिनीसारः

तृणनिर्मितेषु आसनेषु एतान् मुनीन् उपवेश्यारोपयित्वा स्वागतेन तानभिनन्द्य प्रशस्य सभार्यः सस्त्रीको मुदा हर्षे तेषामङ्घ्रीन् पादान् अवनिजे प्रक्षालितवान्। आर्षो वर्णलोपः ॥३९॥ हे महाभाग ! तदम्भसा तज्जलेन गृहेणान्वयेन कुटुम्बे सहितमात्मानं स्वदेहं स्नापयामास। उद्धर्षोऽत्यानन्दितः प्राप्तः प्राप्तव्यः ॥४०॥ फलैरर्हणेन उशीरैः सुवासितैः तृणैः शिवैरमृतेनाम्भ वारा मृदा सुरभ्या चन्दनेन तुलसीदर्भपद्मैः सत्त्वस्य विवर्धनं यदन्धोऽन्नं तेन यथोपपन्नया स्वतः सम्भृतया सपर्यया पूजयामा ॥४१॥ गृहान्धकूपे पतितस्य मम कृष्णेन अस्य कृष्णस्यात्मा मूर्तिस्तस्य निकेतैराश्रमैर्भूसुरैर्ब्राह्मणैः सर्वतीर्थास्पदपादरेणुभिः सङ्गमः स कुतोऽन्वभूत् ॥४२॥ कृतमातिथ्यं यैर्येषां वा तान् सूपविष्टान् उपस्थितः समीप उपविष्टः स्त्रीमित्रपुत्रैः सहितः श्रुतदे अङ्घ्री अभिमृशतीति तथा उवाच ॥४३॥ परमपूरुषः पुरुषोत्तमस्त्वम् अद्य इदानीं नोऽस्माकं दर्शनं परं केवलं प्राप्त इति न किन् शक्तिभिर्महदादिभिरिदं जगत् सृष्ट्वा यर्हि आत्ममायया प्रविष्टः ॥४४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

आनीतेषु तृणमयेषु पीठेषु बृसीषु ऋषीणामासनेषु चैतान् मुनीनुपवेश्य स्वागतप्रश्नेनाभिनन्द्य सभार्यः स श्रुतदे मुदा हर्षेण तेषामङ्घ्रीनवनिजे प्रक्षालितवान् ॥३९॥ गृहेण अन्वयेन कुटुम्बेन सहितमात्मानं तदम्भसा पादप्रक्षालनजले स्नापयाञ्चक्रे। उद्धर्षः उत्कटो हर्षो यस्य सः। तत्र हेतुमाह–भगवच्चरणस्पर्शादिनैव लब्धः मनोरथो येन सः। भगवत्कृपापात्रत्वं 'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।' इति वचनात् बहुजन्मानुष्ठितसुहृतेनैव भवति इत्याशयेना महाभाग इति ॥४०॥ फलानि वार्हणानि गन्धपुष्पधूपदीपादीनि च उशीराणि सुगन्धितृणविशेषमूलानि तैः सुवासित शिवानि शीतलानि निर्मलानि अमृतवत्स्वादूनि अम्बूनि च तैः, सुरभ्या मृदा कस्तूरीप्रमुखया च, तुलस्या, कुशैः, अम्बु सत्त्वविवर्धनान्धसा सत्त्वगुणवर्धकान्नेन च, यथोपपन्नया अनायासेन सम्पन्नया सपर्यया पूजया स श्रुतदेव आराधया ॥४१॥ दुस्तरत्वात् गृहमेवान्धकूपस्तस्मिन् पतितस्य मम कृष्णेन तथास्य कृष्णस्यात्मनो मूर्तेर्निकेतैः निवासस्थानभू अत एव सर्वतीर्थानामास्पदा दोषनिवर्तका पादरेणवो येषां तथाभूतैर्भूसुरैश्च सह सङ्गमः कुतोऽन्वभूदिति श्रुतदेवस्तर्कयामासेत्यन्वयः। अन्विति विस्मये ॥४२॥ भार्या, भर्तव्याः स्वजनाः, अपत्यानि च तैः सहितः श्रुतदे कृतमातिथ्यं पूजादि येषां तान् सुखेनोपविष्टान् मुन्यादीन् उपस्थितः समीप उपविष्टः कृष्णस्याङ्घ्री अभिमृशति सम्मर्द घ्रिमर्शनः सन्नुवाचेत्यन्वयः ॥४३॥

अन्वितार्थप्रकाशिका

तृणेति। स्वगृहाभ्यन्तरात् प्रतिवेशिगृहेभ्यश्च आनीतेषु तृणमयेषु पीठेषु बृसीषु दर्भासनेषु चैतान् मुनीनु स्वागतप्रश्नेनाभिनन्द्य सभार्यः स श्रुतदेवो मुदा हर्षेण तेषामङ्घ्रीनवनिजे अवनिनिजे प्रक्षालितवान्। अभ्यासलोप आर्षः तदिति। महाभागः उद्धर्षः उत्कटहर्षवान् लब्धसर्वमनोरथः स गृहेण अन्वयेन कुटुम्बेन च सहितमात्मानं तदम्भसा पादप्रक्षालन

स्नापयाञ्चक्रे ॥४०॥ फलेति
शिवानि शीतलानि अमृतवत
कस्तूरीतुल्यगन्धया मृदा च तु
अनायासेन सम्पन्नया सपर्यय
तथास्य कृष्णस्यात्मनो मूर्तेर्नि
स कुतोऽन्वभूदिति स श्रुतदेव
सविसर्गपाठे भार्यया सहितः ।
सुखेनोपविष्टान् मुन्यादीन् उप

अवनिजे अवनिनिजे
शिवेनामृतवन्मिष्टेनाम्भसा जलेन
अन्नेन चाराधयामास ॥४१॥ स
नारदादिविप्रैः कृष्णेन च सह
श्रीकृष्णस्य अङ्घ्री अभिमृशत

तृणेति ॥ स श्रुतदे
स्वागतप्रश्नपूर्वकमित्यर्थः । अ
अवनिनिजे प्रक्षालितवान् ॥३९
स्वदेहम् उद्धर्ष उत्कटहर्षयुक्तः
उद्धर्षः लब्धसर्वमनोरथश्च आसी
उशीराणि सुगन्धितृणविशेषमूला
मृत्तिकया सुगन्धिमन्मृत्तिकोपरि
दीनस्यास्यालभ्यत्वात्तत्सम्बन्धोऽ
जात्याश्रयनिमित्तादुष्टत्वात् सत्त्ववि
पूजया श्रुतदेवः आराधयामास ॥४१
आश्रयरूपाः पादरेणवो येषां तैः अ
विस्मयेऽव्ययम् । इति तर्कयामास
स्वगृहान् आपन्नं प्राप्तं भगवन्तं च उ
सहितः सभार्यः अङ्घ्री श्रकृष्णपा

श्रुतदेवने चटाई, पीढे ब
भाषण आदिके द्वारा उनका अ

अन्वितार्थप्रकाशिका

स्नापयाञ्चक्रे ॥४०॥ फलेति । फलानि चार्हणानि गन्धपुष्पधूपदीपादीनि च उशीराणि सुगन्धितृणविशेषमूलानि तैः सुवासितानि शिवानि शीतलानि अमृतवत्स्वादूनि अम्बूनि च तैः । यद्वा । शिवामिष्टतार्थं घटनिक्षिप्तपक्वशुष्कामलकी सुरभ्या मृदा कयाचित् कस्तूरीतुल्यगन्धया मृदा च तुलस्या कुशैरम्बुजैश्च सत्त्वविवर्धनान्धसा भूतानुपद्रवलब्धत्वात् सत्त्वगुणवर्धकंयदन्नं तेन च यथोपपन्नया अनायासेन सम्पन्नया सपर्यया पूजयामास श्रुतदेव आराधयामास ॥४१॥ स इति । गृहमेवान्धकूपस्तस्मिन् पतितस्य मम कृष्णेन अस्य कृष्णस्यात्मनो मूर्तेर्निकेतैः निवासस्थानभूतैः अत एव सर्वतीर्थानामास्पदभूता पादरेणवो येषां तथाभूतैर्भूसुरैश्च सह यस्सङ्गमः स कुतोऽन्वभूदिति स श्रुतदेवस्तर्कयामास ॥४२॥ सूपविष्टानिति । भार्या भर्तव्याः स्वजना अपत्यानि च तैः सहितः । सभार्यः इति सविसर्गपाठे भार्यया सहितः । स्वजनामात्य इतिपाठे स्वजनाः सुता एवामात्या यस्य सः श्रुतदेवः कृतमातिथ्यं पूजादि येषां तान् सुखेनोपविष्टान् मुन्यादीन् उपस्थितः समीप उपविष्टः कृष्णस्याङ्घ्री अभिमृशति सम्मर्दयतीत्यङ्घ्र्यमर्शनः सन्नुवाच ॥४३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अवनिजे अवनिनिजे प्रक्षालितवान् ॥३९-४०॥ फलैः नूतनफलादिभिश्च । अर्हणैरर्घ्यादिभिश्च उशीरैः वीरणमूलैश्च वासितेन शिवेनामृतवन्मिष्टेनाम्भसा जलेन । अत्र द्वन्द्वैक्यं सुरभ्या मृदा कस्तूरीप्रभृत्या एतैः उपपन्नया सम्पन्नया पूजया सत्त्वगुणविवर्धनेनान्धसा अन्नेन चाराधयामास ॥४१॥ सर्वतीर्थानामास्पदं स्थानं पादरेणुर्येषां तैः अस्य श्रीकृष्णस्यात्मा मूर्तिस्तस्य निकेतैर्निवासभूतैः भूसुरैः नारदादिविप्रैः कृष्णेन च सह यः समागमः समं कुतोऽभूत् ॥ अनु आश्चर्ये इति स तर्कयामास ॥४२॥ भार्यादिभिः सहितः श्रीकृष्णस्य अङ्घ्री अभिमृशति संमर्दयतीत्यङ्घ्र्यभिमर्शनः ॥४३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तृणेति ॥ स श्रुतदेवः आनीतेषु तृणपीठबृषिषु तृणमयेषु पीठेष्वासनेषु च एतान् ऋषीन् उपवेश्य स्वागतेन स्वागतप्रश्नपूर्वकमित्यर्थः । अभिवन्द्य अभिनन्द्येत्यपि पाठः । सभार्यः भार्यासहितः मुदा अङ्घ्री मुनिचरणावित्यर्थः । अवनिजे अवनिनिजे प्रक्षालितवान् ॥३९॥ तदम्भसेति ॥ हे महाभाग ! तदम्भसा अङ्घ्रिजलेन सगृहान्वयं गृहान्वयसहितं स्वात्मानं महोद्धर्ष उद्धर्ष उत्कटहर्षयुक्तः लब्धः सर्वो मनोरथो येन तथगााभूतः सन् स्नापयाञ्चक्रे । यद्वा । स्वात्मानं स्नापयाञ्चक्रे । ततः उद्धर्षः लब्धसर्वमनोरथश्च आसीदिति शेषः ॥४०॥ फलेति ॥ फलानि आमलकादीनि च अर्हाणि गन्धपुष्पधूपदीपादीनि च उशीराणि सुगन्धितृणविशेषमूलानि च शिवानि निर्मलानि अमृतान्यमृततुल्यानि यान्यम्बूनि च तैः सुरभ्या मृदा सुगन्धयुक्तया सुगन्धिकया सुगन्धिमन्मृत्तिकोपरि जलसेके सुगन्धिमानुष्मा प्रवर्तते । केचित्तु कस्तूरीं सुगन्धिमृदं वदन्ति । महार्घायास्तस्या कस्तूर्यास्त्वालभ्यत्वात्तत्सम्बन्धोऽस्याशक्य एवेत्युक्तार्थ एव युक्तः । तुलसी च कुशाश्च अम्बुजानि च तैः सत्त्वविवर्धनान्धसा तामसाश्रयनिमित्तादुष्टत्वात् सत्त्वविवर्धकान्नेन च एवमेभिः फलादिभिः कृत्वा यथोपपन्नया अनायासेन सम्पन्नयेत्यर्थः । सपर्यया पूजया श्रुतदेवः आराधयामास ॥४१॥ स इति ॥ स श्रुतदेवः गृहमेवान्धकूपस्तस्मिन् पतितस्य मम कृष्णेन तथा सर्वतीर्थानामास्पदानि सर्वतीर्थरूपाः पादरेणवो येषां तैः अस्य श्रीकृष्णस्य आत्मनो मूर्तेर्निकेतभूतब्राह्मणैश्च सह यः सङ्गमः सः कुतोऽनु अभूत् । अन्विति पश्चादर्थेऽव्ययम् । इति तर्कयामास ॥४२॥ सूपविष्टानिति ॥ स्वगृहापन्नान् कृतमातिथ्यं येषां तान् सूपविष्टान् मुनीन् पाठान्तरे मुनीन् आपन्नं प्राप्तं भगवन्तं च उपस्थितः तत्समीपं प्राप्य निषण्णः श्रुतदेवः सभार्यः सपत्नीकः यद्वा भार्या भर्तव्याः स्वजनास्तैः सहितः सभार्यः अङ्घ्री श्रकृष्णपादावभिमृशति संमर्दयतीति तथाभूतः सन् उवाच ॥४३॥

कृष्णप्रिया

श्रुतदेवने चटाई, पीढे बाजठ कुशासन बिछाकर उनपर भगवान श्रीकृष्ण और मुनियोंको बैठाया, स्वागत आदिके द्वारा उनका अभिनन्दन किया तथा अपने पत्नि के साथ बडे आनंद से सबके पांव पखारे ॥३९॥

कृष्णप्रिया

परीक्षित् ! महान सौभाग्यशाली श्रुतदेवने भगवान और ऋषियों को चरणोंदकसे अपने घर और कुटुम्बियों सींच दिया । इस समय उनके सारे मनोरथ पूर्ण हो गये थे । वे हर्षातिरेक से मतवाले हो रहे थे ॥४०॥ तदनन्त उन्होने फल गन्ध खससे सुवासित निर्मल एवं मधूर जल सुगन्धित मिट्टी तुलसी कुश आदि अनायास प्राप्त पूज सामग्री और सत्वगुण बढाने वाले अन्नसे सबकी आराधना की ॥४१॥ उस समय श्रुतदेवजी मन ही मन तर्क क लगे कि मैं तो घर गृहस्थी के अंधेरे कूएमें गिरा हुआ हुं अभागा हुं मुझे भगवान श्रीकृष्ण और उनके निवासस्थ ऋषिमुनियों का जिनके चरणोंकी धूल ही तमाम तीर्थ बनाने वाली है, सभाग कैसे प्राप्त हो गया ॥४२॥ जब सब लोग आतिथ्य स्वीकार करके आरामसे बैठ गये, तब श्रुतदेह अपने स्त्री पुत्र तथा अन्य सम्बन्धियों के सा उनकी सेवामें उपस्थित हुए । वे भगवान श्रीकृष्ण के चरणकमलों का स्पर्श करते हुए कहने लगे ॥४३॥

श्रुतदेव उवाच

[१]अद्य नो दर्शनं प्राप्तः परं परमपूरुषः । [२]यर्हीदं शक्तिभिः सृष्ट्वा [३]प्रविष्टो ह्यात्मसत्तया ॥४४॥
यथा शयानः पुरुषो मनसैवात्ममायया । सृष्ट्वा लोकं परं स्वाप्नमनुविश्यावभासते ॥४५॥
शृण्वतां गदतां शश्व[४]दर्चतां [५]त्वाभिवन्दताम् । [६]नृणां संवदतामन्तर्हृदि भास्यमलात्मनाम् ॥४६॥

कर्दमक्षमा

अद्य, परमपूरुषः, नः, परम्, दर्शनम्, प्राप्तः, न, यर्हि, इदम्, हि, शक्तिभिः, सृष्ट्वा, आत्मसत्तया, प्रविष्टः ॥४४॥ यथा, शयानः, पुरुषः, मनसा, एव, आत्ममायया, परम्, लोकम्, सृष्ट्वा, स्वाप्नम्, अनुविश्य, अवभासते ॥४५॥ त्वाम्, शश्वत्, अभिवन्दताम्, अर्चताम्, गदताम्, शण्वताम्, संवदताम्, अमलात्मनाम्, नृणाम्, अन्तर्हृदि, भासि ॥४६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यर्हीदं प्रविष्टस्तदैव दर्शनं प्राप्त इति स एव सन्मात्रोनाद्यतनीभूतस्त्वमित्यर्थः । यद्वा नोऽस्मानद्यैव प्राप्त इति न किन्तु तदैव प्राप्तो यर्हीदं विश्वं स्वशक्तिभिः सत्त्वादिभिः सृष्ट्वा स्वसत्तयाऽनुप्रविष्टस्त्वम् त्वद्दर्शनं तु परं केवलमद्यैव प्राप्तम् ॥४४॥ मायासृष्टिप्रवेशयोरविद्यासृष्टिप्रवेशौ दृष्टान्ततयाऽऽह-यथेति । आत्ममायया स्वाविद्यया यद्वा आत्मनस्तव मायेति ॥४५॥ किञ्च शृण्वतामिति । नित्यं श्रवणकीर्तनादिपराणाममलात्मनामपि हृद्येव त्वं भासि मम तु लोचनगोचरस्त्वमहो भाग्यमिति भावः ॥४६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेरिदं विश्वं यदा प्रविष्टः । इत्यर्थ इति-त्वं सृष्ट्यादिकर्ता साक्षान्नारायणो न तु देवदत्तादिसमः कश्चिदसीति प्राक्तनं निजानुभवं द्योतयमानो वक्तीति भावः । ननु मद्दर्शने पुनः कथं तव संसार इति चेदाह-यर्हीति तदापाततो दर्शनेऽपि विवेकस्तु दर्शनमद्यैव जातं विविक्तदर्शनस्यैव संसारनाशकत्वमिति भावः ॥४४॥ मयया सृष्टिप्रवेशौ तयोः जाग्रद्रचनासमर्थस्य स्वप्नरचनमपि न सम्भवत्यतो भगवन्मायारचितजाग्रत्रपञ्चवत्स्वाप्नप्रपञ्चोऽपि तन्मायारचित एवेत्याह-यथेति ॥४५॥ अन्यदद्भुतमाह-किञ्चेति । त्वा त्वाम् । इति भाव इति-ऐकान्तिकभक्तेभ्योऽपि मद्भाग्यमधिकमिति तात्पर्यम् ॥४६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अकस्माच्छ्रीभगवद्दर्शनेन सुप्रीतः स्तौति-नेति । नो दर्शनम् अस्मत्कर्तृकं दर्शनं परं केवलमद्य अस्मिन्नेव तव प्राकट्यसमये प्राप्तस्त्वं किं त्वात्मसत्तया परमात्मस्वरूपेण यर्हीदं सृष्ट्वानुप्रविष्टस्त्वं तदारभ्यैव न प्राप्तः कदाप्यस्मद्दृष्टिगोचरो न जातस्त्वमित्यर्थः

१.नाद्य-श्रीधर. वंशी. विश्व. : सोद्य नो-विज. । २. य इदं-वीर. विज. ; यदिदं-गो. प्रे. टी. । ३. विभजत्यात्म-विज. ; प्रविष्टेन्वात्म-वीर. । शश्वद्दर्शिनाभिनन्दतां-विज. । ५. चाभि०-गो. प्रे. टी. । ६. नृणां संवसतां नित्यं हृदिस्योयोऽमलात्मनां-वीर. ।

तथाप्यकस्मात्ति
दीनम्मन्यतयेति लक्ष्यते ।
कारणेन स्वाप्नं परं लोकं
स्मेति शेषः ॥४५॥ ननु
एवमेवम्भूतानां सताम् अत
सर्वैरप्यन्वयः । नित्यमेवेत

अकस्माच्छ्रीभगव
परमपुरुष ! हे परमात्मन्निति
अन्यत्तैर्व्याख्यातम् । तत्र प्रथ
साक्षात् श्रीभगवद्दर्शनं प्राप्याल
परमुत्कृष्टं दर्शनं न प्राप्तः । तत्र
भाग्यमस्माकमिति भावः ॥४४
भासते, स्वप्नचरितेन द्योतते ।
त्वज्जनो (सज्जनो [ग] ।) य
लोकं ..हं किंवा जगद्विलक्षण
सर्वैरप्यन्वयः । गदतां स्वयं सङ्की
अत एवामलात्मनां विशुद्धचित
निभृतमेव भासीत्यर्थः । यद्वा, अ

शक्तिभिः सर्गादिश
निर्भरः शेते तथा मायासहितश्च
अनित्यं कार्यजातम् ॥४५-४७

उक्तिमेवाह-सोऽद्येत्यादि
अत एव परमः पर उत्कृष्टो मा य
जगत्सृष्ट्वा आत्मसत्तया आत्मनः स
जीवशरीरकपरमात्मपरः । जीवस्य
स्वशरीरभूतजीवमनोरथानुसारिण्या अ
तत्कालमात्रावस्थायिनं च
जीवानुभाव्यदेशान्तरगमनराज्याभिषेक
उभयत्र जीवद्वारकोऽनुप्रवेशो व्याप्य
शश्वत् सदा श्रवणादिकं कुर्वतामत ए

घर और कुटुम्बियोंको
रहे थे ॥४०॥ तदनन्तर
दे अनायास प्राप्त पूजा
मन ही मन तर्क करने
और उनके निवासस्थान
प्त हो गया ॥४२॥ जब
न्य सम्बन्धियों के साथ
कहने लगे ॥४३॥

ो ह्यात्मसत्तया ॥४४॥
विश्यावभासते ॥४५॥
ास्यमलात्मनाम् ॥४६॥

सत्तया, प्रविष्टः ॥४४॥ यथा,
॥ त्वाम्, शश्वत्, अभिवन्दताम्,

मानद्यैव प्राप्त इति न किन्तु तदैव
रं केवलमद्यैव प्राप्तम् ॥४४॥
त्मनस्तव मायेति ॥४५॥ किञ्च,
त्वमहो भाग्यमिति भावः ॥४६॥

त्यादिकर्ता साक्षान्नारायणो न त्वं
र्थं तव संसार इति चेदाह-यद्वेति।
॥४४॥ मयया सृष्टिप्रवेशौ तयोः।
ऽपि तन्मायारचित एवेत्याह-यद्वेति
मधिकमिति तात्पर्यम् ॥४६॥

लमद्य अस्मिन्नेव तव प्राकट्यसमयेन
स्मद्दृष्टिगोचरो न जातस्त्वमित्यर्थः।

त्यात्म-विज. ; प्रविष्टोन्वात्म-वीर. । ५.
वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तथाप्यकस्मात्तदिदं दर्शनं परमया तत्कृपयैवेति भावः । तदेवमस्य द्वारकादावपि गमनं नासीदिति गम्यते । तच्च तिमन्यतयेति लक्ष्यते । तदुक्तं स तर्कयामासेत्यत्र ॥४४॥ ततश्च यथा शयानः पुरुषः आत्मनस्तव मायया हेतुना मनसा कारणेन स्वाप्नं परं लोकं देहादिकं सृष्ट्वा आत्मात्मीयत्वेन कल्पयित्वा तमनुविश्याविश्य चावभासते तथा त्वमवभाससे मीति शेषः ॥४५॥ ननु हृदि तु तवाहं स्फुरितवानेवेत्याशंक्य तदपि मम न सम्भवतीति सदैन्यमाह-श्रण्वतामिति । मेवम्भूतानां सताम् अत एवामलात्मनामेव अन्तर्हृदि त्वदन्तर्मुखे मनसि भासि न तु मद्विधानामित्यर्थः । अत्र शश्वदित्यस्य सर्वैरप्यन्वयः । नित्यमेवेत्यर्थः ॥४६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अकस्माच्छ्रीभगवद्दर्शनेन सुप्रीतः स्तौति-नेति । आत्मनः सत्ता अन्तर्यामितया सर्वत्र वर्तमानतया तया । तत्रैव हेतुः-परमपुरुष ! हे परमात्मन्निति । तद्वितीयपक्षे तु अद्यैव प्राप्त इत्यत्र हेतुः-परमपुरुष ! हे महाभगवन्निति, अशेषभगवत्ताप्रकटनात् । अन्यैर्व्याख्यातम् । तत्र प्रथमपक्षे-परं केवलं दर्शनमेव प्राप्तः, न त्वधुनेवानुग्रहविशेषपूर्वकमित्यर्थ इति । अथवा स्वत एव साक्षात् श्रीभगवद्दर्शनं प्राप्यालभ्यलाभेनानन्दितः । प्राक् तस्य सुदुर्लभतामेवाह-नेति । यर्हीदमनु सृष्टेरनन्तरं प्रविष्टस्त्वम्, तर्ह्यपि सुत्कृष्टं दर्शनं न प्राप्तः । तत्र हेतुः-परमपुरुषेति, अन्तर्यामित्वेनादृश्यत्वादिति भावः । तच्चाधुनाकस्मादेव सम्यग् लब्धम्, अहो भाग्यमस्माकमिति भावः ॥४४॥ लोकं देहं परं शासनदेहाद्भिन्नम्, यतः प्राप्तमनुविश्य सृष्ट्यनन्तरं सद्यः प्रविश्य, अवस्थाविशेषेण भासते, स्वप्नचरितेन द्योतते । स्वपक्षे-एवं त्वत्सन्दर्शनाभावेऽपि त्वत्कृपया त्वद्ध्यानादिना जीवाम इत्याशयेनाह-यथेति । पुरुषः सज्जनो (सज्जनो [ग] ।) यथा शयानः कश्चित् स्वाप्नम्, तथात्मनस्तव मायया कृपयैव मनसा परं मानसं सेवायोग्यतयोत्तमं लोकं ..हं किंवा जगद्विलक्षणं भिन्नं भुवनमेकं सृष्ट्वानुविश्यावभासते, त्वत्सेवाद्यवलम्बेन जीवतीत्यर्थः ॥४५॥ शश्वदित्यस्य सर्वैरप्यन्वयः । गदतां स्वयं सङ्कीर्तयताम्, अभितः साष्टाङ्गत्वादिना वन्दतां वन्दमानानाम्, संवदतां संवादरूपेणान्योऽन्यं कथयताम्, अत एवामलात्मनां विशुद्धचित्तानाम्, यद्वा, श्रवणादौ हेतुरयम्, सत्कर्मादिभिश्चित्ते शुद्धे सत्येव तत्र प्रवृत्तेः । अन्तरिति हृद्यपि निभृतमेव भासीत्यर्थः । यद्वा, अन्तः संवदतां जपतामित्यर्थः ॥४६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

शक्तिभिः सर्गादिशक्तिभिरुपेतः प्रविष्टः अनुप्रविष्टः आत्मसत्तया सदैकरूपेण ॥४४॥ यथा शयानः कृतकृत्यो निर्भरः शेते तथा मायासहितश्च भवति अतः शयानः पुरुषः दृष्टान्तः जीवस्य स्वप्नस्रष्टृत्वायोगात् सुषुप्तवत् स्वाप्नम् अनित्यं कार्यजातम् ॥४५-४७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उक्तिमेवाह-सोऽद्येत्यादिना । तावत् दर्शनेनात्मनः कृतार्थतामभिप्रयन्नाह-स इति । स तादृशः परः प्रकृतिपुरुषविलक्षणः अत एव परमः पर उत्कृष्टो मा यस्मात् स चासौ पुरुषस्त्वं नोऽस्माकं दर्शनं प्राप्तः । कीदृशः ? यो माययाऽऽत्मसङ्कल्पेनेदं सृष्ट्वा आत्मसत्तया आत्मनः सत्ता सदैकरूपता सदैकरूपेणात्मस्वरूपेणानुप्रविष्टः ॥४४॥ तत्र दृष्टान्तः यथेति । अत्र पुरुषशब्दो शरीरकपरमात्मपरः । जीवस्य स्वाप्नार्थस्रष्टृत्वायोगात् तदयमर्थः । यथा शयानः पुरुषः पुरुशरीरकः परमात्मा मनसा शरीरभूतजीवमनोरथानुसारिण्या आत्मनः स्वस्य मायया सङ्कल्पत्वेन परं शयानदेहादन्यं स्वाप्नं सुषुप्तजीवकर्मानुगुणं तदेकानुभाव्यं तत्कालमात्रावस्थायिनं च लोकं देहमनुप्रविश्य तज्जीवमनोरथानुगुणेन सङ्कल्पेनानुप्रविश्यावभासते तदनुभाव्यदेशान्तरगमनराज्याभिषेकशिरश्छेदनादिभिः साक्षादस्पृष्ट एव प्रकाशते जगत्सर्गतदनुप्रवेशयोः स्वाप्नसर्गतदनुप्रवेशदृष्टान्तौ जीवद्वारकोऽनुप्रवेशो व्याप्यगतदोषास्पर्शश्च तुल्यः ॥४५॥ ननु मद्दर्शनं दुर्लभं किमिति मन्यसे इत्यत आह-श्रण्वतामिति । ये सदा श्रवणादिकं कुर्वतामत एवामलात्मनां परिशुद्धान्तःकरणानामन्तर्हृद्येव भासि न तु चक्षुर्विषयो भवसीति ॥४६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

किमाहेत्याशंक्य कृष्णनामा वेदान्तप्रतिपाद्यः साक्षात् श्रीनारायणः एव न देवदत्तादिष्वेक इति भावेनाह-अद्येति । य सत्त्वादिगुणसृष्टाभिः शक्तिभिर्महदादिभिरिदं जगत् सृष्ट्वा आत्मसत्तया ब्रह्मव्यतिरिक्तेन विविधाकारेण विभजति 'तत्सृ तदेवानु प्राविशत्' इति श्रुतेः । स एवं परमपुरुषः श्रीकृष्णः अद्य नो दर्शनं प्राप्तो नान्य इति शेषः ॥४४॥ ननु सन् घटः स पटः इति सदनुविद्धतया प्रतीतेः ब्रह्मव्यतिरिक्तं जगन्नास्तीत्याशंक्य सदृष्टान्तं परिहरति-यथेति । यथा शयानः स्वपन् पुरु आत्मनः परमात्मनः मायया इच्छया प्रबोधितेन स्वमनोगतकरितुरगादिसंस्कारेणैव परं स्वव्यतिरिक्तं स्वाप्नं लोकं सृ अवरुध्य स्वविषयीकृत्वा अवभासते पृथक् प्रकाशते तथा भगवान् जगति स्थितोऽपि ततो व्यतिरिक्तमात्मानं प्रकाश तिष्ठतीत्यर्थः ॥४५॥ आलौकिकसिद्धवस्तुसत्तायां किं प्रमाणमिति तत्राह- शृण्वतामिति । यः स्वकथां शृण्वतां गदतां हृदि स्थ इत्यनेन श्रवणवचने प्रमाणत्वेन ज्ञातव्य इति दर्शितम् । शश्वद्दर्शिनामभिनन्दितां संवसताममलात्मनां नृणां नित्यं हृदि स्थ इत्यनेन प्रत्यक्षप्रमाणं दर्शितमिति ॥४६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अकस्माच्छ्रीभगवद्दर्शनेन सुप्रीतः स्तौति-नाद्य न इति । अस्मत्कर्तृकं दर्शनं परं केवलमद्यास्मिन्नेव तव प्राकट्यसमये न प्राप्तस्त्वं किं त्वध्यात्मशक्तया परमात्मस्वरूपेण यर्हीदं सृष्ट्वा प्रविष्टस्त्वं तदारभ्यैव न प्राप्तः । अस्मद्दृष्टिविषयः कदापि न जातोऽसीत्यर्थ । अहो अलभ्यलाभ इति भावः ॥४४॥ ततश्च यथा शयानः पुरुषोऽवभासते तथाऽहमवभास इति शेषः ॥४५-५९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

ीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भो भो भूसुरवर्य श्रुतदेव ! युष्मद्दर्शनमहं केनातिभाग्येनैवाद्य प्राप्त इति वदन्तं सवैदग्धीभङ्गीकमाह-नाद्येति । भो परमपुरुष ! नोऽस्माकं दर्शनं परं केवलं न अद्य प्राप्तः परन्तु इदं जगत् सृष्ट्वा स्वसत्तया यर्हि अनुप्रविष्टस्तदारभ्यापि वयं कि जीवास्त्वदीयतटस्थशक्तिवृत्तयः स्वकर्मफलभोगिनस्तदारभ्य अद्य पर्यन्तं त्वां दृष्टा एव वर्तामह एव किन्तु वयमेवाद्यैव त्वद्दर्शं प्राप्ता इति भावः । उत्तरालङ्कारोऽयम् । प्रश्नस्योन्नयनं यत्र तदुत्तरमुदाहतमिति तल्लक्षणम् ॥४४॥ भो भगवंस्त्वं स्वमनःसङ्कल्पमात्रेणैव सृष्ट्वा यत्तदनुप्रविष्टस्तत्राहं जीव एव दृष्टान्त इत्यतः स्वदृष्टान्तस्य जीवस्य मम दर्शनं तवोचितमेवेति पूर्ववत् सवैदग्धीभङ्गीकमेवाह- यथेति । आत्ममायया स्वविद्यया परं लोकं ग्रामनगरादिकम् अवभासते तत्तद्दर्शनादिकमनुभवति तथैव त्वमपीत्यर्थः । तदेव सृष्टिमारभ्याद्यपर्यन्तमस्मद्दर्शनं त्वं प्राप्नोष्येव वयं तु तामारभ्याद्यपर्यन्तं त्वदनुभवस्यापि गन्धमपि नैव प्राप्ताः किन्त्वद्यैव त्वत्कृप त्वद्दर्शनमपि प्राप्ता इति भावः ॥४५॥ ननु मदीयश्रवणकीर्तनादिमन्तो भवद्विधा मद्दर्शनं प्राप्नुवन्त्येव तत्राह- शृण्वतामिति । संवद त्वद्भक्तैः सह संलापं कुर्वतां भासि स्फुरसि किन्त्वमलः मत्सरादिमालिन्यरहितः आत्मा मनो येषां तेषामेव वयं तु मलिनात्म एव तदपि यदिदं दर्शनमदास्तदिदं ते विचित्रं कृपाचरित्रमिति भावः ॥४६॥

गूढार्थदीपिनी

परमपुरुषो भवान् नोऽस्माकम् अद्यैव दर्शनं दृष्टिगोचरं न प्राप्तः किन्तु यर्हि शक्तिभः रजआदिभिः इदं जगत् सृ आत्मसत्तया चिच्छक्त्या प्रविष्टस्तदैव प्राप्तः ॥४४॥ यथा एक एव शयानः पुरुषः आत्ममायया स्वाविद्यया मनसा हेतुभूतेन स्वाप्नं लोकं सृष्ट्वा तमनुविश्य नाना अवभासते तथा त्वमपि नाना अवभासि ॥४५॥ शश्वदिति पदं प्रत्येकं सम्बध्यते । ता क अर्चतां शृण्वतां नृणामन्तर्हृद्येव भासि मम तु नेत्रगोचरस्त्वमित्यहो भाग्यमित्यर्थः ॥४६॥

यर्हि यदा इदं वि
न प्राप्तः अस्माकं त्वदभक्त
इति श्रुतेः —

"भक्त्य

इति स्मृतेश्च ॥४४
अनुविश्य परं श्रेष्ठं स्वभक्त
प्रतिकूलस्वाप्नपदार्थदर्शना
शृण्वतामिति द्वाभ्याम् । त्व

ततो भगवतः अ
अद्य नो दर्शनं प्राप्त इत्यादि
नाद्य नो दर्शनं प्राप्त इति
सर्ववस्तुषु दर्शनं प्राप्तवान्
शक्तिभिः सृष्ट्वा आत्मसत्तया
सर्वत्र कथमनुप्रवेशः सम्भव
शङ्काव्युदासार्थमाह-यथा शय
नास्ति स्वप्नश्च मायिक इति
सङ्क्रान्तमिति मन्तव्यम् ।
जीववादो वा नातिरिच्यते दोष
स्वात्मानमेकदेशस्थं मन्यते ।
जानाति जीवस्तु न जानातीति
च लोकं परं सृष्ट्वा अस्माल्लोका
सर्वत्र भासते परं सोऽद्यैव दृष्ट
। ये पञ्चविधां भक्तिं कुर्वन्ति त
कीर्तनं वा तदा गृणन् उच्चारय
द्वयमिति उभयविधस्य संवदनं
तेषामेव हृदये भासीति तत्राह-
संस्कारकत्वं चित्तसंस्कारत्वं च
रूपस्य दृष्टिशोधकत्वं नाम्नोऽ

शयानः पुरुषः आत्मम
॥४५॥ शश्वत् निरन्तरं शृण्वतां गदत
अन्तर्हृदि त्वं भासि प्रतीयसे ॥४६॥

भावेनाह-अद्येति । यः
रेण विभजति 'तत्सृष्ट्वा .
४४॥ ननु सन् घटः सन
ा शयानः स्वपन् पुरुषः
रिक्तं स्वाप्नं लोकं सृष्ट्वा
तिरिक्तमात्मानं प्रकाश्य
कथां शृण्वतां गदतां हृदि
लात्मनां नृणां नित्यं हृदि

स्मन्नेव तव प्राकट्यसमये न
यः कदापि न जातोऽसीत्यर्थः
थः ॥४५-५१॥

ीभङ्गीकमाह-नाद्येति । भोः
प्रविष्टस्तदारभ्यापि वयं किल
व किन्तु वयमेवाद्यैव त्वद्दर्शनं
वंस्त्वं स्वमनःसङ्कल्पमात्रेणैवेदं
र्ववत् सवैदग्धीभङ्गीकमेवाह-
ति तथैव त्वमपीत्यर्थः । तदेव
व प्राप्ताः किन्त्वद्यैव त्वत्कृपया
तत्राह-शृण्वतामिति । संवदतां
षां तेषामेव वयं तु मलिनात्मान

नः रजआदिभिः इदं जगत् सृष्ट्वा
स्वाविद्यया मनसा हेतुभूतेन परं
यदं प्रत्येकं सम्बध्यते । त्वा त्वाम्

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यर्हि यदा इदं विश्वं शक्तिभिश्चेतनाचेतनरूपाभिः सृष्ट्वा अनुप्रविष्टः अन्तर्यामित्वेन जीवसहचरोऽपि तदा नोऽस्माकं दर्शनं प्राप्तः अस्माकं त्वदभक्तत्वादिति भावः । परं केवलमद्य प्राप्तः इदानीमस्माकं त्वद्भक्तत्वादिति भावः । "भक्तिरेवैनं दर्शयति" इति श्रुतेः —

"भक्त्यात्वनन्यया शक्यो ह्यहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥"

इति स्मृतेश्च ॥४४॥ यथा अशयानः नित्यप्रबुद्धः पुरुषः परमेश्वरो भवान् मनसैव सङ्कल्पमात्रेण स्वाप्नं लोकं सृष्ट्वा अनुविश्य परं श्रेष्ठं स्वभक्तजनं प्रत्येव आत्ममायया अवभासते न तु सर्वं प्रतीत्यर्थः । स्वप्नसृष्टिः परमेश्वरकृता न तु जीवकृता प्रतिकूलस्वाप्नपदार्थदर्शनानुपपत्तेः विस्तरस्त्वाकरे द्रष्टव्यः ॥४५॥ भक्तानामेव प्राप्योऽसि नाभक्तानामित्युक्तं तदेतत् दृढीकरोति-शृण्वतामिति द्वाभ्याम् । त्वत्स्वरूपगुणादिश्रवणादिपराणामेवामलात्मनां शुद्धचित्तानां हृदि भासि ॥४६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो भगवतः अङ्घ्र्यवमर्शनः चरणं स्पृशन् वाचा स्तोत्रं कृतवानित्याह-राजवदयमपि षड्भिर्भगवन्तं स्तौति-अद्य नो दर्शनं प्राप्त इत्यादिभिः षड्भिः । यथा राजा निरूपितवान् तथैव प्रथममयं निरूपयति-दर्शनं त्वद्यैव प्राप्तवानसि । अद्य नो दर्शनं प्राप्त इति पाठः क्वचित् अद्यैव दर्शनं प्राप्तः नोऽस्माकं किन्तु यदैवात्मसत्तया सर्वत्र प्रविष्टः तदैव सर्ववस्तुषु दर्शनं प्राप्तवान् हि युक्तश्चायमर्थः एतादृशमेव सर्वत्र त्वां पश्यामीति अथवा दर्शनं चक्षुषा अद्यैव शास्त्रतस्तु यः शक्तिभिः सृष्ट्वा आत्मसत्तया प्रविष्टः स कीदृश इति मनोरथ एव स्थितः न तु कदाचिद्दृष्टः अथ्व परं स दृष्ट इति नन्वेकस्य सर्वत्र कथमनुप्रवेशः सम्भवति सूर्यकिरणवदनुप्रवेशे वा कथमन्योन्याननुसन्धानम् ॥४४॥ तादृशस्य वा कथं सत्यत्वमिति शङ्काव्युदासार्थमाह-यथा शयानः पुरुष इति । एकं स्वप्नमेक एव पश्यति यानपि जीवतः स्वप्ने पश्यति तेषामप्यनुसन्धानं नास्ति स्वप्नश्च मायिक इति सिद्धं ततश्च स्वप्ने यावन्तो गजतुरगादयो दृश्यन्ते तेषामपि चैतन्यान्तराभावात् द्रष्टुरेव चैतन्ये ... क्रान्तमिति मन्तव्यम् । श्रुतौ भगवच्चैतन्यमित्युक्तं प्रकृते जीवब्रह्मणोर्वैलक्षण्यं न निरूप्यत इति पदार्थनिरूपणे ... वादो वा नातिरिच्यते दोषनिरासगुणाधानभेदेन मतद्वयस्य समर्थितत्वात् । अतो जीवः स्वयमेव स्वाप्नं दृष्ट्वा तत्रानुप्रविष्टः आत्मानमेकदेशस्थं मन्यते । अन्योन्यानभिज्ञश्च भवति परमेतावान् विशेषः तदज्ञानसृष्टं ज्ञानसृष्टमिती । अतो भगवान् जानाति जीवस्तु न जानातीति प्रकारस्तु तुल्य एव तदाह-यथा शयानः पुरुषः आत्ममायया सामग्र्या मनसैव करणेन इमं लोकं परं सृष्ट्वा अस्माल्लोकात्परं भिन्नं स्वाप्नं ततस्तमेवानुप्रविश्य अवभासते देवतिर्यगादिरूपेण अनेनैक एव भगवान् ... भासते परं सोऽद्यैव दृष्ट इति ॥४५॥ ननु दर्शनसाधनानि बहूनि श्रूयन्ते को विशेष इति चेत्तत्राह-शृण्वतां गृणतामिति ये पञ्चविधां भक्तिं कुर्वन्ति तेषां हृदये भासते न तु बहिः मम तु बहिरपीत्याधिक्यं संवदतामिति स्मरं सम्यग्वदतामिति ... वा तदा गृणन् उच्चारयन् सर्वदा भगवन्नामोच्चारणं कर्तव्यमिति । शश्वदित्युभयत्र सम्बध्यते नाम्नि द्वयं रूपे च ... मिति उभयविधस्य संवदनं पञ्चमी तेषां हृदि अन्तः तत्रापि सूक्ष्मतया भासि । ननु को विशेषः सर्वत्र वर्तसे तथापि ... मेव हृदये भासीति तत्राह-अमलात्मनामिति । विद्यमानोऽपि मलिनदर्पण इव न प्रकाशसे श्रवणादीनान्तु चक्षुः ... कत्वं चित्तसंस्कारत्वं च यथा केचन गुणाः दर्पणशोधकाः केचन दृष्टिशोधका इति तदुभयमत्रोक्तम् अमलात्मनामिति ... स्य दृष्टिशोधकत्वं नाम्नोऽन्तःकरणशोधकत्वमिति निर्णयः ॥४६॥

श्रीसुबोधिनीसारः

शयानः पुरुषः आत्ममायया स्वाज्ञानेन मनसा स्वाप्नं स्वप्नसम्बन्धिनं परं लोकमनुविश्य यथाऽवभासते इति दृष्टान्तः ... शश्वत् निरन्तरं शृण्वतां गदतां भाषमाणानां पूजयतां प्रणमतां मिथः संवादं कुर्वताम् अमलः शुद्ध आत्मा येषां तेषां नृणाम् हृदि त्वं भासि प्रतीयसे ॥४६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह-नाद्येति षड्भिः । परमपुरुषः पुरुषोत्तमो भवान् नोऽस्मान् अद्यैव प्राप्त इति न, किन्तु यर्हि स्वशक्तिभिः सत्त्वादिभिरिदं विश्वं सृष्ट्वा स्वसत्तयाऽनुप्रविष्टस्तदैव प्राप्तः । दर्शनं तु परं केवलमद्यैव प्राप्त इत्यन्वयः ॥४४॥ एकस्यैव सर्वप्रवेशे दृष्टान्तमाह-यथेति । आत्मनस्तव मायया मोहितेन मनसा यथैक एव शयानः पुरुषः परम् अस्माज्जाग्रद्देहाद्विलक्षणं स्वाप्नं लोकं देवतिर्यङ् मनुष्यादिदेहसमूहं सृष्ट्वा तमनुविश्य नानाऽवभासते तद्वदित्यर्थः ॥४५॥ किञ्च शश्वन्निरन्तरं श्रवणादिपराणाम् अत एवामलात्मनां शुद्धान्तःकरणानां नृणामपि त्वं हृद्येव भासि । मम तु लोचनगोचरोऽपि जात इत्यहो मम भाग्यमिति भावः ॥४६॥

अन्वितार्थप्रकाशिका

नेति । परमपूरुषः पुरुषोत्तमो भवानद्यैव प्राप्तः । यद्वा । यदीदं प्रविष्टः तदैव नोऽस्माकं दर्शनं प्राप्तः इति स एव सम्प्रति भवान् न त्वद्य नाद्यतनीभूतस्त्वमित्यर्थः ॥४४॥ यथेति । आत्मनस्तव मायया मोहितेन मनसा यथैक एव शयानः पुरुषः परम् अस्माज्जाग्रद्देहाद्विलक्षणं स्वाप्नं लोकं देवतिर्यङ् मनुष्यादिदेहसमूहं सृष्ट्वा तमनुविश्य नानाऽवभासते तद्वत् त्वमपि नानावभासि ॥४५॥ शण्वतामिति । शश्वन्निरन्तरम् एव त्वां गदताम् अर्चतामभिवन्दताम् । शतार्षः । अत एवामलात्मनां नृणामपि त्वं हृद्येव भासि । मम तु लोचनगोचरोऽपि जात इत्यहो मम भाग्यमिति भावः ॥४६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नाद्येति । यर्हीदं विश्वं शक्तिभिः पुरुषप्रकृतिमहतत्त्वादिरूपाभिः सृष्ट्वा आत्मसत्तया स्वविकसितान्तर्यामिशक्त्या ॥ अनुप्रविष्टोऽपि त्वं नोऽस्माकं दृष्टिगोचरतां न प्राप्तः । हे परमपुरुष ! तव परमुत्कृष्टं दर्शनं तु अद्यैव प्राप्तम् ॥४४॥ ननु सर्वेषां हृदिस्थस्तर्हि सर्वैरहं कथं न दृश्ये इति चेत्तत्राह-हृदिस्थ इति । कर्मविक्षिप्तचेतसां जनानामतिदूरस्थः आत्मशक्तिभिः स्वशक्तिरूपैरिन्द्रियान्तःकरणैः अग्राह्योऽपि उपेतः प्राप्तास्तव चरित्रश्रवणादिगुणाः यैस्तेषामात्मनां जीवानां तु भवान् अन्ति समीपे वर्तते ॥४६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह सोऽद्येत्यादिना ॥ तत्रादौ तद्दर्शनेनात्मनः कृतार्थतामभिप्रयन्नाह ॥ स इति ॥ यः शक्तिभिः स्वशक्तिद्वारेत्यर्थः । इदं विश्वं सृष्ट्वा आत्मसत्तया विकसितान्तर्यामितारूपस्वसत्तया प्रविष्टः सः शास्त्रयोनित्वात् शास्त्रैकगम्यतया प्रसिद्धः परः प्रकृतिपुरुषविलक्षणः अत एव पर उत्कृष्टो मा नास्ति यस्मादिति परमः स चासौ पुरुषः त्वम् अद्य नः अस्माकं दर्शनं नयनविषयतां प्राप्तः । अतः का न्वस्माकं कृतार्थतेति भावः हीति विस्मये ॥४४॥ प्रपञ्चं सृष्ट्वा तमनुप्रविश्यापि पृथगवस्थितिं स्वप्नदृष्टान्तेनाह यथेति ॥ अत्र पुरुषशब्दो जीवशरीरकपरमात्मपरः 'न तत्र रथा न रथपन्थानः' इति श्रुतीक्षया जीवस्य स्वाप्नार्थस्रष्टृत्वयोगात् तदयमर्थः । यथा शयानः पुरुषः सम्प्राप्तस्वप्नावस्थजीवरूपपुरुषशरीरकः परमात्मेत्यर्थः । मनसा स्वशरीरभूतजीवमनोऽनुसारिण्या एवेत्यर्थः । आत्ममायया स्वसङ्कल्पेनेत्यर्थः । परं जीवस्य शयानदेहादन्यं स्वाप्नं सुषुप्तजीवकर्मानुगुणं तदेकानुभाव्यं तत्कालमात्रावस्थायिनं च लोकं देहं सृष्ट्वा अनुविश्यापि अवभासते । तद्वत्तद्भोग्यकर्मफलानि यच्छन् पृथगवभासते इति भावः । जगत्सर्गतदनुप्रवेशयोः स्वाप्नसर्गतदनुप्रवेशौ दृष्टान्तौ । उभयत्र जीवद्वारकोऽनुप्रवेशो व्याप्यगतदोषास्पर्शश्च तुल्यः । क्षेपकावनेकपाठान्तरावप्येतावबोधनिवृत्तये व्याख्यातौ ॥४५॥ ननु मद्दर्शनं दुर्लभमिति किमिति मन्यसे इत्यत आह ॥ शण्वतामिति ॥ हे कृष्ण त्वं शश्वत् शण्वतां निरन्तरं वक्तृभ्यः त्वत्कीर्तिश्रवणं कुर्वतां गदतां श्रोतॄन् प्रति तद्गानं कुर्वताम् अर्चां वेदागमोक्तप्रका त्वदर्चनं कुर्वतां त्वा त्वाम् अभिवन्दतां त्वदभिवन्दनं कुर्वतां संवदतां परस्परं त्वत्कीर्तिं कथयतां अत एव अमलात्मनां नृणाम् अन्तर्हृद्येव भासि न तु चक्षुर्विषयो भवसीत्यर्थः ॥४६॥

कृष्णप्रिया

श्रुतदेवने कहा प्रभो ! आप व्यक्त अव्यक्तरूप प्रकृति और जीवों से परे पुरुषोत्तम है । मूझे आपने आज

दर्शन दिया हो, ऐसी बात
द्वारा इस जगत् की रचन
स्वप्नावस्थामें अविधावश म
मायम से जगत् की रचना
लोग सर्वदा आपकी लीला
आपसमें आपकी ही चर्चा

हृदिस्थोऽप्यतिदूरस्थ
नमोऽस्तु तेऽध्यात्म
सकारणाकारणति
स त्वं शाधि स्वभृत्य

तदुक्तमित्युपाकर्ण्य

हृदिस्थः, अपि, कर्मवि
अध्यात्मविदाम्, परमात्मने, स्वात्म
अस्तु ॥४८॥ देव, किम्, करवामहे,

श्रीशुकः, उवाच ।

प्रणतार्तिहा, भगवान्, इति,

ननु सर्वेषां हृदि स्थितः कथ
मायादित्यत आह-हृदिस्थोऽपीति
प्राप्तश्रवणकीर्तनादिसंस्कार आत्मा अ
नमोऽस्त्विति । तुभ्यं नमोऽस्तु अध्य
अनात्मने देहाद्यभिमानिने जीवाय पर
एतत्त्राऽऽह सकारणं महदादिकार्य
स्वस्मात्सकाशात्तदुभयवश्याय जीवाय
अतोऽलुप्तैश्वर्यत्वान्नियन्त्रे तुभ्यं नमः कि
अन्येषां रुद्धा दृष्टिर्येन तस्मै इत्येकं पदम

---

१. प्यन्तु-श्रीधर. वंशी. विज. ; ह्यर्याकारो
४. करवामहे-श्रीधर. वंशी. विज. ; करवाम

कृष्णप्रिया

दिया हो, ऐसी बात नही है । आपतो तभी से सब लोगों से मिले हुए है, जबसे अपपने अपनी शक्तियोंके इस जगत् की रचना करके आत्म सत्ता के रूपमें इसमें प्रवेश किया है ।।४४।। जैसे सोया हुआ पुरुष नावस्थामें अविधावश मन ही मन स्वप्न जगत् की सृष्टि कर लेता है और उसमें स्वयं उपस्थित हो क र अपनी से जगत् की रचना कर ली है, और सब इसमें प्रवेश करके अनेकों रूपों से प्रकाशित हो रहे है ।।४५।। जो सर्वदा आपकी लीला कथा का श्रवण कीर्तन तथा आपकी प्रतिमाओं का अर्चन वन्दन करते है और समें आपकी ही चर्चा करते है । उनका हृदय शुद्ध हो जाता हे और अप उसमें प्रकाशित हो जाते है ।।४६।।

हृदिस्थोऽप्यतिदूरस्थः कर्मविक्षिप्तचेतसाम् । आत्मशक्तिभिरग्राह्योऽप्य[1]भ्युपेतगुणात्मनाम् ।।४७।।
नमोऽस्तु तेऽध्यात्मविदां परात्मने [2]अनात्मने स्वात्मविभक्तमृत्यवे ।
सकारणाकारणलिङ्गमीयुषे स्वमाययासंवृत[3]रुद्धदृष्टये ।।४८।।
स त्वं शाधि स्वभृत्यान् नः किं देव करवाम[4] ते । एतदन्तो नृणां क्लेशो यद्भवानक्षि[5]गोचरः ।।४९।।

श्रीशुक उवाच

तदुक्तमित्युपाकर्ण्य भगवान् प्रणतार्तिहा । गृहीत्वा पाणिना पाणिं प्रहसंस्तमुवाच ह ।।५०।।

कर्दमक्षमा

हृदिस्थः, अपि, कर्मविक्षिप्तचेतसाम्, अतिदूरस्थः, आत्मशक्तिभिः, अग्राह्यः, अपि, उपेतगुणात्मनाम्, अन्ति ।।४७।। ध्यात्मविदाम्, परमात्मने, स्वात्मविभक्तमृत्यवे, अनात्मने, सकारणाकारणलिङ्गम्, ईयुषे, स्वमायया, संवृतरुद्धदृष्टये, ते, नमः, ।।४८।। देव, किम्, करवामहे, त्वम्, भृत्यान्, नः, शाधि, यत्, नृणाम्, एतदन्तः, क्लेशः, सः, भवान्, अक्षिगोचरः ।।४९।।

श्रीशुकः, उवाच ।

प्रणतार्तिहा, भगवान्, इति, तदुक्तम्, उपाकर्ण्य, पाणिना, पाणिम्, गृहीत्वा, प्रहसन्, ह, तम्, उवाच ।।५०।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु सर्वेषां हृदि स्थितः कथं केषाञ्चिदेव हृदि भासि मेघैः सूर्यवज्जीवोपाधिभिरावृतत्वादिति यद्युच्यते तर्हि न कस्यापि आह-हृदिस्थोऽपीति कर्मभिर्विक्षिप्तं चेतो येषां तेषामात्मशक्तिभिरहङ्कारादिभिरग्राह्यो व्यवहितोऽप्युपेतगुणः कीर्तनादिसंस्कार आत्मा अन्तःकरणं येषां तेषामन्ति समीपे अव्यवहितस्त्वमित्यर्थः ।।४७।। एतदेव प्रपञ्चयन्नमस्यति- । तुभ्यं नमोऽस्तु अध्यात्मविदां निवृत्तदेहाद्यहङ्काराणां परमात्मने परमात्मत्वेन प्रकाशमानाय मोक्षप्रदायेत्यर्थः । देहाद्यभिमानिने जीवाय परत्वेनाप्रकाशमानत्वात् स्वात्मनः सकाशाद्विभक्तः समर्पितो मृत्युः संसारो येन तस्मै कुत सकारणं महदादिकार्यमकारणं प्रकृतिस्तदुभयलिङ्गमुपाधिं नियम्यतया ईयुषे प्राप्तवते अत उभयनियन्तुः काशात्तदुभयवश्याय जीवाय विभक्तमृत्यव इत्यर्थः । नियन्तृनियम्यत्वे कारणं वदन्नाह-हे स्वमायया संवृतेति । त्वान्नियन्त्रे तुभ्यं नमः किञ्च रुद्धदृष्टये मायावित्वादेवान्येषां रुद्धा आवृता दृष्टिर्येन तस्मै यद्वा स्वमायया स्वस्यासंवृता रुद्धा दृष्टिर्येन तस्मै इत्येकं पदम् ।।४८।। स एवम्भूतः परमेश्वरस्त्वं नोऽस्मान् स्वभृत्यान् शाध्यनुशिक्षय ।।४९-५०।।

श्रीधर. वंशी. विज. ; ह्यर्याकारो गुणात्मकः-विज. । २. युक्तत्मनां-वीर. ; सर्वात्मविभक्तमूतंये-विज. । ३. ऽसंवृतदृष्टये नमः-विज.
श्रीधर. वंशी. विज. ; करवाम ते-वीर. । ५. नक्षयोचरः-श्रीधर. वंशी. विज. ; नक्षिगोचरः-वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्राक्षिपति-नन्विति। जीवोपाधिभिरहङ्कारादिभिः। भायात्प्रतीयात्। कर्मभिर्दानादानादिभिः। आत्मशक्तिभिर्जीवोपाधिभिः। त आह-अहङ्कारादिभिः। आदिना क्रोधलोभादिग्रहः। व्यवहितोऽपि अज्ञानां दृष्ट्या दूरस्थोऽपि। इत्यर्थ इति-श्रवणादिनाऽज्ञाननिवृत्त्याऽपरोक्षीभवसीति भावः ॥४७॥ एतदेव तवाऽज्ञपरोक्षत्वविज्ञापरोक्षत्वमेव। इत्यर्थ इति-स्वरूपप्रकाशस्यैव मोक्षहेतुत्वादिति भावः। परत्वेन ब्रह्मरूपत्वेन अहं जीवानां मृत्युदोऽत्र। को हेतुरित्याशङ्कते-कुत एतदिति। तत्राक्षेपे। यत उपाधिनियन्ता त्वमतो हेतोः। उभयनियन्तुः कार्यकारणप्रेरकस्य। तदुभयवश्याय कार्यकारणाधीनः। इत्यर्थ इति-नियन्तैव नियम्यानां सुखदुःखविभाजको भवतीति भावः। तेने नियन्त्र इति लब्धम्। जीवानां नियम्यत्वे असंवृतानाच्छादितदृष्टे। यतोऽसंवृतज्ञानोऽसि अतो हेतोः। अन्येषां लप्तदृष्टित्वमाह-किञ्चेति। स्वमाययेति पदस्य रुद्धदृष्टय इत्यनेन पृथक्पृथक्सम्बन्धे गौरवं मत्वाऽऽह-यद्वेति ॥४८॥ एवम्भूतो वशीकृतमायः ॥४९॥ तदुकंत श्रुतदेवोक्तम्। तदुक्तं श्रुतदेवोक्तम्। तं श्रुतदेवम् ॥५०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वन्तर्यामितया तेषामेव हृदि वर्ते। तत्किमुच्यते श्रवणादिपराणामेवावभासीति तत्राह-हृदिति। ननु सत्कर्मभिर्हृदि विशुद्धे सति तेषामपि मद्भानं सम्भवेदिति चेन्नेत्याह-आत्मेति। तादृशोऽपि कथं भामीत्याशंक्य श्रण्वतामित्युक्तमेव साधयति-अन्तीति ॥४७॥ तस्मात्तदसम्पन्नस्य मम युष्माकं सङ्गमे कारणं खलु तव कृपयैव पर्यवस्यतीत्यानन्देन प्रणमंस्तस्य तादृशत्वमाह-नम इति। अस्तुपदेन नमस्कारस्य सदा सत्तामाशास्ते अध्यात्मविदां त्वत्तत्त्वज्ञानिनां परमात्मने सर्वमूलस्वरूपत्वेन स्फुरते। यतः न विद्यते नराकृतिपरब्रह्मरूपेऽस्मिन्नात्मान्तरं यस्य तस्मै अत एव स्वेन स्वरूपभूतेनात्मना श्रीविग्रहेण अनेन विभक्तो दूरीकृतोऽन्येषामघासुरादीनामपि मृत्युर्येन तस्मै सर्वनित्यताश्रययायेत्यर्थः। एवं स्वरूपस्य महिमानमुक्त्वा वैभवस्याप्याह-सकारणम् अनित्यं जगद्रूपम् अकारणं नित्यं स्वलोकरूपं तद् द्वयमपि लिङ्गं वैभवरूपं ज्ञापकमीयुषे नियम्यत्वेन नित्यं प्राप्तवते "उतामृतत्वस्येशानः" इति श्रुतेः। तर्हि कथं जगद्गतैर्भवद्भिर्दुर्लभोऽहं तत्राह-स्वमायया स्वलोकसम्बन्धिनामसंवृता जगत्सम्बन्धिनां तु रुद्धा दृष्टिर्येन तस्मै इति तेन अस्माकं त्वद्दृष्टौ त्वत्कृपैव कारणमिति भावः ॥४८॥ शाधीत्यत्र हेतुः-स्वभृत्यानिति। तच्च नान्यत्किमपि किन्तु त्वत्प्रीतिकरमेवेत्याशयेनाह-किमिति। ते त्वत्प्रीत्यर्थमित्यर्थः। तत्रैव हेतुः-देवेति भृत्यैः निजेष्टदेवप्रीणनस्यावशकत्वादिति भावः। ननु संसारक्लेशाभिमानिनः कथं ममानुशासनकर्तृत्वं सम्यक्स्यात्तत्राह-एतदिति। स तु मम त्वद्दर्शनानुषङ्गेणैवापगतः सम्प्रति त्वदनुशासनकर्तृत्वलक्षण एव पुरुषार्थो ममावशिष्ट इति भावः ॥४९॥ इत्येतत् उप आधिक्येन सावधानत्वेनाकर्ण्य प्रहर्षेण प्रकृष्टं हसन्नुवाच यतः प्रणातानां भक्तानां किंवा सकृत्कृतप्रणामानामपि आर्तिहा अत एव गृहीत्वेति। ह हर्षे ॥५०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अन्यर्यामित्वेन हृदिस्थोऽपि कर्मविक्षिप्तचेतसामतिदूरस्थः, हृदि न प्रकाशस इत्यर्थः। अन्यत्तैर्व्याख्यातम्। त[illegible] भासीत्येतदनन्तरं केषां न भासीति लेखकभ्रमात् पतितमिति बुध्यते मेघैरित्यादेरभिमान एव हेतूपपत्तेरिति। अथवा ननु अन्तर्यामि[illegible] सर्वेषामपि हृदि वर्ते, तत् किमुच्यते श्रवणादिपराणामेव भासीति। तत्राह-हृदीति। ननु सत्कर्मभिर्हृदि विशुद्धे सति तेषामपि म[illegible] सम्भवेदिति चेत्तथापि त्वत्कृपयैव स्यान्न त्वन्यथेत्याह-आत्मेति। अन्ति समीपे स्वाधीनतयैवोपेता गुणाः सत्कर्मादयो यस्मिंस्त[illegible] आत्मा स्वभावो येषां तेषामप्यात्मशक्तिभिः सत्कर्मादिजातनिजमनःशुद्ध्यादिशक्तिभिः, बहुत्वं सत्कर्मादिबाहुल्येन शक्ति[illegible] बाहुल्यात्, गौरवाद्वा, अग्राह्यो हृद्यपि न प्रकाशस इत्यर्थः। स्वपक्षेऽपि समानमेव ॥४७॥ अस्त्विति नमस्कारस्य सदा सत्ताम[illegible] संसारस्यापि तदधीनत्वं बोधयति। लिङ्गं जीवोपाधिः, अन्यत्तैर्व्याख्यातम्। तत्र परमात्मनेति लेख्येऽनात्मेति वर्णं[illegible] लेखमभ्रमादित्यवगम्यते। परमात्मतया प्रकाशमानत्वान्मोक्षप्रदाय, परमात्मत्वेनाप्रकाशमानत्वाच्च मृत्युप्रदायेति व्याख्या[illegible]

अथवा स्वात्मनस्तस्यैव
स्वेच्छयैवाशेषफलप्रदानात्
पृथग्भूतानां जनानां मृत्युर्यस
किञ्चिदिष्टं प्रार्थयितुं प्रणमति-
। अनात्मन इति तत्रापि स्वात
स्वेषु भक्तेषु मायया कृपया
जीववत् कर्मादि-पारतन्त्र्याभ
निजातिसौन्दर्यादिना वशीकृत
त्वत्प्रीतिकरमेवेत्याशयेनाह-कि
भावः। ननु तदपि किमर्थमित्य
यद्वा, सत्त्वं साधुत्वं त्वद्भक्तिमि
एव भृत्याः पोष्या येषां तान्,
दर्शनस्य माहात्म्यमाह-एतदिति
शिक्षयेत्यर्थः। अन्यत् समानाम
तत्रात्मनोऽनर्हत्वमननादीति ॥४
कृत् कृतप्रणामानामप्यार्तिहा,
पाणिं स्वपाणिना गृहीत्वा इ

अनात्मने व्यापकान्तर
सकारणम् अनुग्रहकारणम् अनुग्र
दुर्रधिगमायेत्यर्थः ॥४८-५२॥

हृदिस्थ इति। कर्मणा
विषयोऽस्यतो दुर्लभं त्वद्दर्शनं
आह-आत्मशक्तिभि-रिति। उपेताः
ऽप्यात्मशक्तिभिर्देहाभिमान-स्वत
सदेवातिदूरस्थत्वमिति न विरोध इ
स्यापि तु मोचको बन्धकश्चेति वदन्
युक्तस्त्वयि निवेशित आत्मा ये
त्मने न इति पाठे व्यापकान्तरशू
कारणेति। सकारणमनुग्रहहेतुक
पात्ताकर्ममूलदिव्य-मङ्गलविग्र
मायया संवृत्ताः मोहिताः येषां रुद्धा दृ

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वात्मनस्तस्यैव स्वचित्ताद्दोषाद्धेतोर्विभक्तमृत्यवे । यद्वा, परमात्मत्वे हेतुः-अनात्मने प्रवर्तकरहिताय, विशेषफलप्रदानात् । किञ्च स्वात्मनः श्रीभगवतस्तच्चित्ताद्वा विभक्तानामभक्त्या (विविक्तानामभक्त्या [क, ग] ।) भूतानां जनानां मृत्युर्यस्मात्तस्मै, अन्यत् समानम् । स्वपक्षे-आत्मशक्त्यग्राह्यत्वं जीवानां त्वदेकाधीनत्वादेवेति बोधयन् प्रार्थयितुं प्रणमति-नमोऽस्त्विति । अध्यात्मविदां परमात्मनेऽन्यर्यामितया तत्र प्रवर्तकायेति । ज्ञानिनामपि तदधीनत्वम् त्मन इति तत्रापि स्वातन्त्र्यम्, स्वात्मेति अभक्तानामपि तदधीनत्वमेवोक्तम् । भक्तास्तु स्वत एव तदेकाधीना इत्याह-भक्तेषु मायया कृपया यत् सकारणं निजभक्तिप्रवर्तनादिप्रयोजनकम्, अकारणं च तत्रापी स्वाच्छन्द्येनाहेतुकम्, - कर्मादि-पारतन्त्र्याभावात् । लिङ्गं मनुष्यदेहं तदीयुषे प्रकटयते, अतोऽसंवृत ! हे प्रकटैश्वर्येत्यर्थः । अत एव रुद्धा सौन्दर्यादिना वशीकृता लोकदृष्टयो येन तस्मै ॥४८॥ शाधीत्यत्र हेतुः-स्वभृत्यानिति । तच्च नान्यत् किमपि, किन्तु तिकरमेवेत्याशयेनाह-किमिति । ते त्वत्प्रीत्यर्थमित्यर्थः । तत्रैव हेतुः-हे देवेति । भृत्यैर्निजेष्टदेवप्रीतेरवश्यापेक्ष्यत्वादिति । ननु तदपि किमर्थमित्यपेक्षायामाह-एतदिति । क्लेशस्त्वदप्राप्तिकष्टं पुनस्त्वद्विरहदुःखमेवेत्यर्थः । अन्यत्तैर्व्याख्यातम् । सत्वं साधुत्वं त्वद्भक्तिमित्यर्थः । ननु त्वं मद्भक्तिमानेवेति चेत् नेत्याह-स्वानां ज्ञातीनामेव भृत्यान्, न तु तव । यद्वा, स्वा भृत्याः पोष्या येषां तान्, उभयथापि कुटुम्बभरणव्यग्रानित्यर्थः । भक्तिशिक्षणं च सदा त्वद्दर्शनार्थमेवेतित्यभिप्रायेण माहात्म्यमाह-एतदिति । क्लेशः संसाराद्यशेषदुःखम् । यद्वा, अतोऽधुना क्लेशे नष्टे सति प्रेमानन्दसम्पत्तये भक्तिप्रकारं त्यर्थः । अन्यत् समानाम् । अतो गृहे तन्निवासश्च राजवन्न साक्षात् प्रार्थितः, - तात्पर्येण तत्सिद्धेः । किंवातिदैन्येन नोऽनर्हत्वमननादीति ॥४९॥ इत्येतत् उप दाक्षिण्येनाकर्ण्य प्रहर्षेण प्रकृष्टं हसन्नुवाच, यतः प्रणतानां भक्तानां किंवा कृतप्रणामानामप्यार्तिहा, यतो भगवान् साक्षात् परमेश्वरः । यद्वा, तत्राप्यशेषैश्वर्यप्रकटनपरः कृष्ण इत्यर्थः । अत एव पाणि स्वपाणिना गृहीत्वा इति तस्मिन् स्नेहविशेष उक्तः ॥५०॥

६श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अनात्मने व्यापकान्तरशून्याय अस्वात्मविभक्तमृत्यवे स्वस्मिन्निवेशितमतिषु प्राणिषु मृत्युं संसारं स्थापितासि कारणम् अनुग्रहकारणम् अनुग्रहहेतुकम् अकारणम् अकर्महेतुकम् लिङ्गं शरीरं रुद्धमूर्तये संसारिणामज्ञानसंवृतस्वान्ते मायेत्यर्थः ॥४८-५२॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

हृदिस्थ इति । कर्मणा विक्षिप्तं चेतो येषां तेषां तु हृदिस्थोऽप्यतीव दूरस्थः । एवं कस्याप्यचक्षुर्विषयस्त्वं योऽस्यतो दुर्लभं त्वद्दर्शनं मया लब्धमिति भावः । ननु हृदिस्थत्वमतिदूरस्थत्वं च परस्परविरुद्धं कथमिव घटते इत्यत आत्मशक्तिभि-रिति । उपेताः गुणाः रजस्तमस्तत्कार्यकामक्रोधमोहादयो येन स आत्मा मनो येषां तेषामन्ति समीपस्थो-शक्तिभिर्देहाभिमान-स्वतन्त्रात्माभिमानाद्यापनद्वारा त्वद्याथात्म्यानापादक-मायादि-शक्तिभिर्हेतुभिरग्राह्यः दूरस्थत्वमिति न विरोध इति भावः ॥४७॥ न केवलममलात्मनामन्तर्हृदि भासमान एव कर्मविक्षिप्तचेतसामग्राह्य मोचको बन्धकश्चेति वदन् प्रणमति-नमोऽस्तुत इति । अध्यात्मविदां त्वद्याथात्म्यवेदिनां परात्मने प्राप्यायात्मने न त्वयि निवेशित आत्मा येषां तेषां स्वात्मविभक्तमृत्यवे । स्वात्मना स्वसङ्कल्पेन विभक्तः समर्पितः मृत्युर्येन तस्मै न इति पाठे व्यापकान्तरशून्यायेत्यर्थः । ननु बन्धमोक्षहेतुत्वं वदन् मयि किं वैषम्यमापादयसीत्यतो विशिनष्टि-ति । सकारणमनुग्रहहेतुकम् अकारणमकर्महेतुकं लिङ्गं शरीरमीयुषे प्राप्तवते सर्वलोकोज्जिजीवयिषया कर्ममूलदिव्य-मङ्गलविग्रहाय अतो न वैषम्यमस्तीति भावः । तर्हि सर्वान् किं न मोचयसीत्यतो विशिनष्टि-संवृताः मोहिताः येषां रुद्धा दृष्टिर्ज्ञानं यस्मिन् विषयभूते तस्मै त्वन्माया-मोहितानां त्वद्याथात्म्यावेदिनां मुक्तिमप्रयच्छन्न त्वं

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

विषमः न ह्यवदतां कामानप्रयच्छन् सुरद्रुमो विषम इति भावः ॥४८॥ इत्थं प्रणम्य तत्कैङ्कर्यं प्रार्थयते-स त्वमिति । स उक्तविध स्वभृत्यान्नोऽस्मान् शाधि । हे देव ! ते तव किं करवाम किञ्चिदिष्टं करवामेति प्रार्थनायां लोट् । ननु मुक्तिमयाचित्वा कैङ्कर्यं किमिति प्रार्थयस इत्याह-एतदिति । नृणां क्लेशस्तापत्रयरूपः एतदन्तः एतदन्तोऽवधिर्यस्य तथाभूतः किं तत् यद्भवानक्षगोचर इत्येतत् ॥४९॥ एतदुक्तमिति । इतीत्थं तदुक्तं श्रुतदेवोक्तम् उपाकर्ण्य प्रणतार्तिहा आश्रितार्तिहरः ॥५०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

नन्वेवं तर्हि कस्मान्मादृशानां तज्ज्ञानाभाव इत्याशंक्योपासनाभावादुपासनं च कर्मप्रतिबद्धमिति भावेनाह-हृदि इति । उपासकैरपि स्वप्रयत्नेन ज्ञेयः किन्तु स्वप्रसादेनैवेत्याशयेनाह-आत्मेति । आत्मनां जीवानां शक्तिभिः प्रयत्नादिलक्षणाभिः अग्राह्यो न ज्ञेयः मुह्यन्ति यं सूरय इत्यादिस्वोक्तिं स्मारयति । हिशब्देन देवदत्तवच्छरीरी चेत् कथमग्राह्य इत्यत्राह-अर्थक इति । अर्थ्यत इत्यर्थः आनन्दः 'ऋ गतौ' इति धातुः । यद्वा, अर्थशब्देन ज्ञानं च ज्ञानानन्ददेह इत्यर्थः । अर्थो वस्तु अप्राकृत तदाकार इति वा । कुत एवमङ्गीकार इत्यत्राह-अगुणात्मक इति । सत्त्वादिगुणनिर्मितदेहवान्न भवति एवंविधस्त्वमस्माकं दर्शनं प्राप्त इति पूर्वेणान्वयः ॥४७॥ एवंविधत्वान्मम नमनमन्तरेण त्वदुपासनं दुस्साध्यमिति भावेनाह-नम इति । अध्यात्मविदां परमात्मादितत्त्वज्ञानिनां परमात्मने अशेषपुरुषार्थदात्रे सर्वात्मने सर्वव्यापिने स्वात्मविभक्तमूर्तये स्वात्मनैव विभक्तस्वरूप सकारणं जगदकारणलिङ्गम् अकारणं कारणान्तरशून्यस्वरूपं प्रधानमेवं द्वे ईयुषे व्याप्तवते स्वमायया स्वसामर्थ्येन असंवृतदृष्टये अव्यवहितज्ञानाय ॥४८॥ यद्यदा भवानक्षगोचरः स्यात् एतदन्तोऽयमवधिर्यस्य स तथा नृणां क्लेशः परिश्रमः ॥४९-५०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४५-५९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

किञ्चान्यदपि ते विचित्रं चरित्रं दृष्टम् अभक्तानामपि भक्तानामपि त्वं हृदि तिष्ठस्येव । प्रथमैर्नानुभूयसे द्वितीयैरनुभूयसे इत्याह-हृदिस्थैरिति । ननु मम हृदिस्थत्वे दूरस्थत्वं कुतस्तत्राह-आत्मशक्तिभिरविद्यावर्तिभिर्मत्सराहङ्कारा र्व्यवधायकैर्हेतुभिरग्राह्यः । उपेतगुणत्वेनैव व्यवहितोऽपि प्राप्तत्वगुणचिन्तन आत्मा अन्तःकरणं येषां तेषां भक्तानां अन्ति समीप एव वर्तसे तैरनुभूयसे इत्यर्थः ॥४७॥ उक्तमर्थं प्रपञ्चयन्नमस्यति-नम इति । अध्यात्मविदां शान्तभक्तानां परः मायातीत आत्मा श्रीविग्रहो यस्य तस्मै अन्येषां ज्ञानिनाम् अनात्मने निराकाराय अन्येषामसुराणां स्वात्मना कालरूपेण विभक्तः विभज्य विभज्य दत्तो मृत्युर्येन तस्मै वस्तुतस्तु सकारणं लिङ्गं विराड्रूपां मूर्तिं प्राकृतीम् अकारणं सच्चिदानन्दमयीं मूर्तिमप्राकृती च ईयुषे स्वमायया असंवृता भक्तानामनावृता रुद्धा भक्तानामावृता दृष्टिः येन ॥४८॥ शाधि अनुशिक्षय ॥४९॥ पाणिना पाणिं गृहीत्वेति । सवैदग्ध्यतद्वचःश्रवणेन तं स्वसख्यरसे निमज्जयन् भावः । प्रहसन्निति मत्तत्त्वं त्वया अवगतमेव । तव तत्त्वमप्यवगच्छता मया त्वं किमप्युपदेष्टव्योऽसीति भावः ॥५०॥

गूढार्थदीपिनी

कर्मभिः सकामैः दानादानादिभिः बहिर्मुखचेतसाम् अतिदूरस्थः । उपेतगुणः प्राप्तकीर्तनादिसंस्कारः आत्मा अन्तःकरणं येषां तेषां भक्तानां तु अन्ति समीपे वर्तसे । कथम्भूतः । आत्मशक्तिभिः जीवोपाधिभिः रागद्वेषादिभिः अग्राह्योऽपि स्वमायया असंवृत अलुप्तैश्वर्य ते तुभ्यं नमोऽस्तु । कथम्भूताय । अध्यात्मविदां ज्ञानिनां परमात्मने परतत्त्वरूपेण मोक्ष अनात्मने देहाभिमानिने जीवाय तु स्वात्मनः सकाशात् विभक्तः समर्पितः मृत्युलोकः संसारो येन तस्मै । पुनश्च

महदादिकार्यम् अकारणं प्रकृ
यद्वा । स्वमायया स्वस्य अस
आज्ञापय यत् यदा अक्षिगो
प्रणतानामार्तिं पीडां हरतीति त

कर्मभिः ऐहिकामुि
यतः तेषां हृदिस्थोऽपि अतिदूर
अतिदूरस्थोऽपि अतिसमी
अध्यात्मविदामात्मपरमात्मयाथा
विभक्तो मृत्युः पुनः पुनर्जन
कर्मकालाद्युत्पादकशून्यम् ईदृशं
तस्मै ॥४८॥ स एवम्भूतस्त्वं नो

अन्येषां तु हृदये वर्तम
जलप्रतिबिम्बो जले चलति दृश
दृश्यते इति भगवद्दर्शनमुक्तं स्यात्
इति । यद्यपि अन्तःकरणादिषु भ
शक्तीनामन्यत्र विनियोगाद्भगवद्
भगवद्दर्शनमुक्तम् । नन्वेवं सति
आभिमुख्येनाभितः सर्वतो वोपेत
भवति जडात्मस्वीकारात् भगवत
भगवतो दुर्लभं दर्शनमिति समर्थ
करोति-नमोऽस्तु त इति । कीदृशो
विदः नेषामात्मानुभवयुक्तानां पर उ
आत्मा स्यात् अत आह-अनात्मन
ये न ज्ञानिनः तेषामयमेव कालरू
कृत्वा स्थिताः तेषां मृत्युः ब्रह्मतम्
करोतीति युक्तमेव । ज्ञानिनां तु ज्ञानो
तथाङ्गीकर्तुः को दोष इति चेत्तत्राह-
कालादयो नित्याः घटादयोऽनित्याः
संवृतरुद्धदृष्ट इति । स्वमायया कृत्वा
अन्यथा आत्मप्रकाशेनैवातिपुष्टेन पि
मायाकार्यम् ॥४८॥ एवं भगवत्स्वरू

ो-स त्वमिति। स उक्तविधस्त्वं
ननु मुक्तिमयाचित्वा कैङ्कर्यमेव
भूतः किं तत् यद्भवानक्षिगोचर
५०॥

प्रतिबद्धमिति भावेनाह-हृदिस्थ
ां शक्तिभिः प्रयत्नादिलक्षणाभिः
कथमग्राह्य इत्यत्राह-अर्थाकार
इत्यर्थः। अर्थो वस्तु अप्रतिहतं
ात्र भवति एवंविधस्त्वमस्माकं
ावेनाह-नम इति। अध्यात्मविदां
र्तये स्वात्मनैव विभक्तस्वरूपाय
मायया स्वसामर्थ्येन असंवृतदृष्टये
ां क्लेशः परिश्रमः ॥४९-५०॥

॥

। प्रथमैर्नानुभूयसे द्वितीयैरनुभूयस
रविद्यावर्तिभिर्मत्सराहङ्काराद्य-
अन्तःकरणं येषां तेषां भक्तानां
। अध्यात्मविदां शान्तभक्तानां मते
येषामसुराणां स्वात्मना कालरूपेण
ां मूर्तिं प्राकृतीम् अकारणं लिङ्ग
द्धा भक्तानामावृता दृष्टिः येन तस्मै
न तं स्वसख्यरसे निमज्जयितुमिति
प्युपदेष्टव्योऽसीति भावः ॥५०॥

कीर्तनादिसंस्कारः आत्मा अन्तःकरण
रागद्वेषादिभिः अग्राह्योऽपि ॥४७॥
परमात्मने परतत्त्वरूपेण मोक्षप्रदाय।
संसारो येन तस्मै। पुनश्च। सकार

गूढार्थदीपिनी

रादिकार्यम् अकारणं प्रकृतिः तदुभयलिङ्गमुपाधिम् ईयुषे प्राप्तवते। पुनश्च। रुद्धा अभक्तानामावृता दृष्टिः ज्ञानशक्तिर्येन तस्मै। दा। स्वमायया स्वस्य असंवृता अन्येषां रुद्धा दृष्टिर्येन तस्मै इत्येकं पदम् ॥४८॥ स एवम्भूतस्त्वं नोऽस्मान् भृत्यान् अनुशाधि यत् यदा अक्षिगोचरो भवेत् एतत्पर्यन्त एव क्लेशो भवति ते सेवायामिति योज्यम् ॥४९॥ तदुक्तं श्रुतदेवोक्तम्। नानामार्तिं पीडां हरतीति तथा। ह हर्षे ॥५०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कर्मभिः ऐहिकामुष्मिकसुखसाधनैर्विक्षिप्तं चेतो येषां तेषामात्मशक्तिभिः स्वसुखार्थकृततपोव्रतादिबलैरपि अग्राह्यः तेषां हृदिस्थोऽपि अतिदूरस्थः उपेतगुणात्मनां तु उपेतगुणः लब्धत्वत्स्वरूपगुणादिश्रवणादिसंस्कारः आत्मा मनो येषां तेषाम् तिदूरस्थोऽपि अतिसमीपे एवासि ॥४७॥ तदेव प्रतिपादयन्नमस्यति-नमोऽस्त्विति। ते तुभ्यं नमोऽस्तु ध्यात्मविदामात्मपरमात्मयाथात्म्यवेदिनां परात्मने प्राप्यस्वरूपाय अनात्मने अनीश्वराय स्वविमुखाय जीवाय स्वात्मना स्वसङ्कल्पेन मृत्युः पुनः पुनर्जन्ममरणप्रवाहो येन तस्मै कारणेन भक्तानुग्रहेतरनिग्रहलक्षणेन सहितं सकारणम् अकारणं कालाद्युत्पादकशून्यम् ईदृशं लिङ्गमप्राकृतं शरीरमीयुषे प्राप्तवते स्वमायया संवृतानाम् अनादिभगवन्मायावृतानां रुद्धा दृष्टिर्यस्मिन् ॥४८॥ स एवम्भूतस्त्वं नोऽस्मान् शाधि अनुशिक्षय हे देव! ते तुभ्यं किं कैङ्कर्यं करवाम प्रार्थनायां लोट् ॥४९-५०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अन्येषां तु हृदये वर्तमानेऽपि न भाससे इति आह-हृदिस्थोऽप्यति दूरस्थ इति। कर्मणा विक्षिप्तं चित्तं येषां न हि प्रतिबिम्बो जले चलति दृश्यते यथातिदूरस्थो न दृश्यते तथा न दृश्यत इति धर्मसाम्यार्थं दूरस्थत्वम् अन्यथा दूरस्थोऽपि दृश्यते इति भगवद्दर्शनमुक्तं स्यात्। ननु कर्मविक्षेपे को दोषः सम्पद्यते येन हृदिस्थो न दृश्यत इति चेत्तत्राह-आत्मशक्तिभिरग्राह्य इति। यद्यपि अन्तःकरणादिषु भगवच्छक्त एव भगवद्ग्राहकाः सन्ति ताश्चेत्स्थिरा भवन्ति तदा भगवन्तं पश्यन्ति कर्मविक्षेपे तु तेनामन्यत्र विनियोगाद्भगवद्दर्शनं बाधितमित्यर्थः। तदा आत्मशक्तिभिरग्राह्यो भवतीति हेतुः शुद्धानामपि कर्मविक्षेपे भगवद्दर्शनमुक्तम्। नन्वेवं सति जडात्मकर्मविक्षेपरहितानां भगवद्दर्शनं स्यात् इत्यत आह-अभ्युपेतगुणात्मनामपीति। आभिमुख्येनाभितः सर्वतो वोपेताः स्वीकृताः गुणा एव आत्मा येन भगवान् गुणाश्चेति कोटिद्वयं सत्त्वादीनामात्मत्वे जडो भवति जडात्मस्वीकारात् भगवत आत्मत्वग्रहणे चेतनो भवति अतो यैर्जडात्मता स्वीकृता तेषामप्यग्राह्य इत्यर्थः ॥४७॥ एवं भगवतो दुर्लभं दर्शनमिति समर्थयित्वा तस्मिन् जाते प्रत्युपकारार्थं बहुकर्तव्यमिति विचार्य अन्यस्याशक्यत्वात् नमस्कारमेव करोति-नमोऽस्तु त इति। कीदृशो भगवानिति नमस्करणीयनिर्धारमाह-अध्यात्मविदां परात्मन इति ये आत्मविदः ब्रह्मात्मैकत्वं तेषामात्मानुभवयुक्तानां पर उत्कृष्ट आत्मा आत्मनामात्मेति। ननु ब्रह्मविदामात्मनामात्मा चेद्भगवान् तदा भगवतोऽप्यन्य आत्मा स्यात् अत आह-अनात्मन इति। न विद्यते अन्यः आत्मा यस्य एवं ये ज्ञाननिष्ठाः तेषामात्मत्वेन प्रकाशमानत्वमुक्त्वा ये ज्ञानिनः तेषामयमेव कालरूपेण मृत्युं प्रयच्छतीत्याह-स्वात्मविभक्तमृत्यव इति। स्वात्मन्येव ये विभक्ताः आत्मभेदं स्थिताः तेषां मृत्युः ब्रह्मतम्परादादित्यादिश्रुतिभिः ब्रह्मक्षत्रादिरूपत्वादात्मनः आत्मघाती दण्ड्य इति तादृशस्य वधं युक्तमेव। ज्ञानिनां तु ज्ञानोत्तरं पूर्वकृतदोषनिवृत्तिः भक्तावपि भगवत्स्मरणादिना तन्नाशः। ननु भेदस्य प्रत्यक्षसिद्धत्वात् कर्तुः को दोष इति चेत्तत्राह-सकारणाकारणलिङ्गमीयुष इति। एक एव भगवान् नित्यमनित्यं च जगद्रूपं शरीरं गृह्णाति नित्याः घटादयोऽनित्याः इति उभयमपि भगवच्छरीरम्। नन्वेवं सति कथं सर्वो न प्रतिजानीते तत्राह-स्वमायया दृष्ट इति। स्वमायया कृत्वा उभयशक्तिरूपया कृत्वा आत्मा संवृतः ज्ञानशक्तिश्च रुद्धा यथेन्द्रियं पिधत्ते घटश्चाच्छादयति आत्मप्रकाशेनैवातिपुष्टेन पिहितेऽपि ज्ञाने प्रकाशः स्यात्। ज्ञानापिधाने वा पिहितमप्यात्मानं पश्येत् अत उभयं कार्यम् ॥४८॥ एवं भगवत्स्वरूपमुक्त्वा नमस्कृत्य तादृशं प्रार्थयते-स त्वं शाधीति। स्वभृत्यानित्याज्ञापनावश्यकत्वं

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

शास्त्रद्वाराकर्तव्यमुपदिष्टमिति चेत्तत्राह–किं देव करवाम त इति । तुभ्यं किं करवाम । शास्त्रे तु स्वार्थं निरूपितम् । ननु स्वार्थमेव क्रियताम्, किं मदर्थेनेत्याशंक्याह–एतदन्तो नृणां क्लेश इति एतादृशदर्शनान्त एव प्राणिनां दुःखानुभवः न हि प्रसन्ने भगवति दु कस्यचिद्दुःखं सम्भवति अतः स्वार्थं नापेक्ष्यत इति दासत्वात् स्वामिकार्यमेव कर्तव्यम् अत आज्ञापयेत्यर्थः ॥४९॥ भगवांस् तस्येच्छालक्षणदुःखदूरीकरणार्थं स्वस्य सेवां निरूपयतीत्याह–तदुक्तमिति । गृहीत्वा पाणिना पाणिमिति स्वतुल्यता निरूपिता । ततो यत्स्वकर्तव्यं तदेवोपदेक्ष्यति–न सेवककर्तव्यमिति लक्ष्यते । प्रहसन्निति कृतकृत्यत्वात् । न तव किञ्चित् कर्तव्यम्, येनैतावत् जातं कर्तव्यं चेत्तदेव कर्तव्यम् । इदं च फलं तथापि यत्पृच्छति तदा यथा माया लोकसङ्ग्रहार्थं क्रियते व्यामोहार्थं वा तथाऽप्यमी करोत्विति भावः । हेत्याश्चर्ये । एतादृशमपि भगवान् स्वसेवायां न प्रेरयतीति स्वसेवाया दुर्लभत्वं द्योतितम् ॥५०॥

श्रीसुबोधिनीसारः

कर्मभिर्विक्षिप्तं चेतो येषां तेषां हृदिस्थोऽपि "अतिदूरस्थो नाहं प्रकाशः सर्वस्य" इति स्मृतेः । आत्मशक्तिभिरहङ्कारादिभिरग्राह्योऽप्रमेयत्वात् उपेतगुणः प्राप्तसंस्कार आत्मा येषां तेषामन्ति समीपे एव ॥४७॥ अध्यात्मविदां ज्ञानिनां परात्मनेऽनात्मने देहादिविलक्षणाय स्वात्मनः सकाशाद्विभक्तः समर्पितः कर्मफलभोगार्थं मृत्युः संसारो येन तस्मै सकारण महदादिकार्यमकारणं प्रकृतिं तदुभयं लिङ्गमुपाधिम् ईयुषे नियम्यतया प्राप्तवते सगुणनिर्गुणरूपं वा स्वमाययाऽसंवृता रुद्धा दृष्टिर्यस्य अलुप्तैश्वर्यत्वात् तस्मै ते तुभ्यं नमोऽस्तु ॥४८॥ स त्वं स्वभृत्यान्नोऽस्मान् शाधि हे देव ! किं करवाम नृणां क्लेशः संसार एषोऽन्तः समाप्तिर्यस्य सोऽस्ति नेत्रविषयो भवानिति यत् यः ॥४९॥ शुकोक्तिः । इति तदुक्तं श्रुत्वा प्रणतदुःखहन्ता भगवान् पाणिना पाणिं गृहीत्वा प्रहसंस्तं विप्रमुवाच । ह स्फुटम् ॥५०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु यदि सर्वेषां हृद्येव भगवानस्ति तर्हि कथं केषांचिदेव हृदि भाति, केषांचिच्च न भाति ? इत्याशंक्याह- हृदिस्थोऽपीति । कर्मभिः लौकिकवैदिकव्यापारैर्विक्षिप्तं चेतो येषां तेषां हृदिस्थोऽप्यतिदूरस्थ एव । ननु हृदि स्थितः कथं दूरस्थः स्यात् इत्याशंक्य —

"नायं वेद स्वमात्मानं यच्छक्त्याऽहंधियाहतम् ।" इति गजेन्द्रोक्तं हेतुमाह-

आत्मशक्तिभिरहङ्कारादिभिरग्राह्यः व्यवहित इति । अतो दूरस्थ इव । तर्हि सर्वेषां तथैव स्यात् इत्याशंक्याह-उपेतगुणे विषयाविष्ट आत्मा येषां तेषामन्ति समीपे हृद्येव वर्तमानोऽपि आत्मशक्तिभिरग्राह्यः, अतो दूरस्थ इवेत्यर्थः ॥४७॥ एतदेव प्रपञ्चयन् बन्धमोक्षप्रदत्वं च दर्शयन्नेवम्भूते प्रत्युपकारस्याशक्यत्वान्नमस्करोति–नमोऽस्तु त इति । अध्यात्मविदां ब्रह्मात्मैकत्वं परम निवृत्तदेहाद्यहङ्काराणां परमात्मने परमात्मत्वेन प्रकाशमानाय मोक्षप्रदाय । हिशब्दः सन्देहनिरासाय । अनात्मने देहाद्यभिमानि जीवाय तु स्वात्मपरमात्मत्वेनाप्रकाशमानत्वात् । स्वात्मनः सकाशात् विभक्तः समर्पितो मृत्युः मृत्यूपलक्षितसंसारो येन तस्मै कथमेवं संसारप्रदत्वम् इत्यपेक्षायामाह–सकारणं महदादिकार्यम्, अकारणं प्रकृतिः तदुभयं लिङ्गमुपाधिं नियम्यतया ईयुषे प्राप्तवते अत एव उभयनियन्तृत्वात्तदुभयवश्याय जीवाय संसारप्रदत्वं युक्तमेवेत्याशयः । देहाद्यात्माभिमानेऽपि त्वमेव हेतुः इत्याह- स्वमाययेति । स्वमायया संवृतानां मोहितानां रुद्धा स्वविषयिका दृष्टिर्ज्ञानं येन तस्मै तुभ्यं नम इति ॥४८॥ एवं प्रणम्य तत्कृपां प्रार्थयते–स त्वमिति । स उक्तविधः परमेश्वरस्त्वं भृत्यान्नोऽस्मान् शाधि आज्ञापय । हे देव ! तवेष्टं वयं किं करवामेति । ननु स्वार्थमेव किञ्चित्किमिति न प्रार्थयसे इत्याशंक्याह–यत् यदा भवानक्षगोचरो भवेत् एतदन्तः तत्पर्यन्तः एव नृणां क्लेशो भवति अतस्तव दर्शनेन सर्वपुरुषार्थे सिद्धे न किञ्चित्प्रार्थनीयमस्तीति भावः ॥४९॥ इत्येवं तदुक्तं श्रुतदेवोक्तमुपाकर्ण्य श्रुत्वा भगवान् स्वपाणिना तत्पाणिं गृहीत्वा हेति हर्षेण प्रहसंस्तमुवाच । तत्र हेतुमाह–प्रणतार्तिहेति ॥५०॥

हृदिस्थोऽपीति । क
अग्राह्यो व्यवहितोऽपि उपेत
समीपे अव्यवहित एव त्वि
प्रकाशमानाय मोक्षप्रदाय अन
मृत्युः मृत्यूपलक्षितसंसारो ये
स्वमायया असंवृत ! अलुप्तै
दृष्टिर्येनेत्येकं पदम् । यद्वा । स
स उक्तविधः परमेश्वरस्त्वं स्व
एतदन्तः एतत्पर्यन्त एव नृण
स्वपाणिना तत्पाणिं गृहीत्वा ह

पुनस्तदनुसारेण कथ
अनात्मने देहाभिमानिनामिति शे
देहिनां विभक्तो न्यूनाधिककाले
अकारणमक्षरादिचेतनवृन्दं च ए
संवृता आवृता रुद्धा विक्षिप्ता दृ
व्यावहारिकक्लेशयुक्तस्त्वं कथं
नृणां क्लेशः सन् एव भवान्
प्रणतानामार्तिहा पीडानिवर्तकः

हृदिस्थ इति ॥ कर्मणा
यातोऽतो दुर्लभं त्वद्दर्शनं मया लब
संप्राप्ता गुणा रजस्तमस्तत्कार्यका
देहात्माभिमानस्वतन्त्रत्वाभिमाना
भावः ॥४७॥ न केवलमनात्मन
मोचकश्चापि त्वमेवेति वदन् प्रण
मुक्तस्त्वय्यभिनिवेशित आत्मा येष
वदन् मयि किं वैषम्यमापादयसि
सर्वलोकोज्जिजीविष्या स्वेच्छोपात्त
विशिनष्टि । स्वमायया संवृता मोहि
तद्याथात्म्यावेदिनां मुक्तिमप्रयच्छ
तत्किङ्कर्यं प्रार्थयते ॥ स त्वमिति ॥ स
करवाम । प्रार्थनायां लोट् । ननु मुक्ति
एतदन्तोऽवधिर्यस्य तथाभूतः, किं त

अन्वितार्थप्रकाशिका

हृदिस्थोऽपीति। कर्मभिः लौकिकवैदिकव्यापारैर्निक्षिप्तं चेतो येषां तेषां हृदिस्थोऽप्यतिदूरस्थ एव। आत्मशक्तिभिरहङ्कारादिभिः व्यवहितोऽपि उपेतगुणः प्राप्तश्रवणकीर्तनादिसंस्कारः आत्मान्तःकरणं येषां तेषां तु आच्छादकाहङ्कारादिनिवृत्तेः अन्ति अव्यवहित एव त्वमित्यर्थः ।।४७।। नम इति । अध्यात्मविदां ब्रह्मात्मैकत्वं पश्यतां निवृत्तदेहाद्यहङ्काराणां परमात्मत्वेन मानाय मोक्षप्रदाय अनात्मने देहाद्यभिमानिने जीवाय तु परमात्मत्वेनाप्रकाशमानत्वात् स्वात्मनः सकाशात् विभक्तः समर्पितो मृत्यूपलक्षितसंसारो येन तस्मै सकारणं महदादिकार्यम् अकारणं प्रकृतिः तदुभयं लिङ्गमुपाधिं नियम्यतया ईयुषे प्राप्तवते हे असंवृत ! अलुप्तैश्वर्यरुद्धा मायावित्वादन्येषमावृता दृष्टिर्येन तस्मै । यद्वा । स्वमायया स्वस्यासंवृता अन्येषां रुद्धा नेत्येकं पदम्। यद्वा। स्वमायया संवृतानां मोहितानां रुद्धा स्वविषयिका दृष्टिर्ज्ञानं येन तस्मै तुभ्यं नमः ।।४८।। स त्वमिति । विधः परमेश्वरस्त्वं स्वभृत्यान्नोऽस्मान् शाधि आज्ञापय। हे देव ! तवेष्टं वयं किं करवामेति। यत् यदा भवानक्षगोचरो भवेत् एतत्पर्यन्त एव नृणां क्लेशो भवति ।।४९।। तदिति । इत्येवं तदुक्तं श्रुतदेवोक्तमुपाकर्ण्य श्रुत्वा प्रणतार्तिहा भगवान् पाणिना तत्पाणिं गृहीत्वा हेति हर्षेण प्रहसंस्तमुवाच ।।५०।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पुनस्तदनुसारेण कथयन्नमनं करोति–नम इति। अध्यात्मविदां देहाभिमानहीनानाम्। परमात्मने परमात्मतया भासमानाय त्मने देहाभिमानिनामिति शेषः। देहाभिमानिवत्प्रतीयमानाय। स्वात्मविभक्तमृत्यवे सुष्ठु यथायोग्यम् आत्मनां ब्रह्मादिस्थावरान्तानां विभक्तो न्यूनाधिककालेन विभागीकृतो मृत्युर्मरणकालो येन तस्मै। अतः सकारणं कारणेन प्रकृत्या सहितं महदादिकार्यम् रणमक्षरादिचेतनवृन्दं च एतदुभयं लिङ्गं स्वरूपम् ईयुषे नियन्तृत्वेन प्राप्तवते। अतः स्वमायया स्वप्रकृत्या। असंवृतरुद्धदृष्टये आवृता रुद्धा विक्षिप्ता दृष्टिर्ज्ञानं यस्य तथाभूनो न भवतीति तस्मै ते तुभ्यं नमोऽस्तु ।।४७।। नोऽस्मान् त्वं शाधि शिक्षय। ननु वहारिकक्लेशयुक्तस्त्वं कथं मदनुशासनं करोषीति चेत्तत्राह–एतदन्त इति। एतत्तव दर्शनमेव अन्तो नाशकं यस्य एवम्भूतः क्लेशः सन् एव भवान् यतः अक्षिगोचरो जातः अतो निःक्लेशा वयं त्वदाज्ञार्हाः अतो नः शाधीति सम्बन्धः ।।४८।। नामार्तिहा पीडानिवर्तकः ।।४९।। मया सहिता इमे मुनयः लोकान् पुनन्तः पवित्रयन्तः सञ्चरन्ति ।।५०।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हृदिस्थ इति ।। कर्मणा विक्षिप्तं चेतो येषां तेषां हृदिस्थोऽपि अतिदूरस्थः। एवं कस्याप्यचक्षुर्विषयस्त्वं मद्दृग्विषयतां तो दुर्लभं त्वद्दर्शनं मया लब्धमिति भावः। ननु हृदिस्थत्वमतिदूरस्थत्वं च परस्परविरुद्धं कथमिव घटते इत्यत आह। उपेताः गुणा रजस्तमस्तत्कार्यकामक्रोधमोहादयो येन तथाभूत आत्मा मनो येषां तेषाम् अन्ति समीपस्थः सन्नपि आत्मशक्तिभिः भिमानस्वतन्त्रत्वाभिमानादात्मयाथात्म्यानापादकमायादिशक्तिभिर्हेतुभिः अग्राह्यः एतदेवातिदूरस्थत्वमिति न विरोध इति ।।४७।। न केवलमनात्मनामन्तर्हृदि अभासमान एव कर्मविक्षिप्तचेतसां तेषां त्वमग्राह्य एव । भवपाशेन बन्धकस्ततो पि त्वमेवेति वदन् प्रणमति ।। नमोऽस्तु त इति ।। अध्यात्मविदां त्वद्याथात्म्यवेदिनां परात्मने प्राप्यायात्मने न विद्यते भिनिवेशित आत्मा येषां तेषां स्वात्मना स्वसङ्कल्पेन विभक्तः समर्पितो मृत्युः संसारो येन तस्मै ननु मयि बन्धमोक्षहेतुत्वं मयि किं वैषम्यमापादयसि इत्यतो विशिनष्टि। सकारणमनुग्रहहेतुकमकारणमकर्महेतुकं लिङ्गं शरीरं ईयुषे प्राप्तवते जीविष्या स्वेच्छोपात्ताकर्ममूलदिव्यविग्रहायातो न विषम्यमस्तीति भावः। तर्ह्येवम्भूतश्चेदहं सर्वान् किं मोचयामीत्यतो । स्वमायया संवृता मोहिता ये तेषां रुद्धा दृष्टिर्ज्ञानं यस्मिन् विषयभूते तस्मै ते तुभ्यं नमः अस्तु। त्वन्मायामोहितानां वेदिनां मुक्तिमप्रयच्छन् न त्वं विषमो न ह्यभजतां कामानप्रयच्छन् सुरद्रुमो विषम इति भावः ।।४८।। इत्थं प्रणम्य प्रार्थयते ।। स त्वमिति ।। स उक्तविधस्त्वं स्वभृत्यान् नोऽस्मान् शाधि अनुशिक्षय। हे देव ! ते तव किं करवाम किञ्चिदिष्टं प्रार्थनायां लोट्। ननु मुक्तिमयाचित्वा कैङ्कर्यमेव किमिति प्रार्थयस इत्यत आह। एतदिति। नृणां क्लेशस्तापत्रयरूपः वधिर्यस्य तथाभूतः, किं तत्। यत् भवान् अक्षगोचरः इत्येतत् यावद्भगवतोऽक्षगोचरत्वं न तावत्तु सांसारिकतापत्रयभाक्त्वं

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्तु त्वदक्षिगोचरत्वतो निवृत्तं साम्प्रतं मुक्तितोऽप्यधिकायास्त्वत्किङ्करताप्त्या अवसर आगतोऽतस्तदेव प्रार्थयामीति भावः ॥४९॥ तदुक्तमिति ॥ इत्येवम्भूतं तदुक्तं श्रुतदेवोक्तं उपाकर्ण्य प्रणतार्तिहा आश्रितार्तिहरः भगवान् श्रीकृष्णः पाणिना स्वकरेण पा श्रुतदेवहस्तं गृहीत्वा प्रहसन् सन् तं श्रुतदेवं प्रति ह स्फुटं यथा तथा उवाच ॥५०॥

कृष्णप्रिया

जिन लोगोका चित्त लौकिक वैदिक आदि कर्मो की वासनासे बहिर्मुख हो राह है, उनके हृदयमें रहने पर भी आप उनसे बहुत दूर है । किन्तु जिन लोगोंने आपके गणगानसे अपने अन्त:करणको सद्‌गुणसम्प बना लिया है, उनके लिये चित्तवृत्तियोंसे अग्राह्य होने परभी आप अत्यन्त निकट है ॥४७॥ प्रभो ! जो लो आत्मतत्तव को जानने वाले है उनके आत्मा के रुपमें ही आप स्थित है और जो शरीर आदि को ही अपन आत्मा मान बैठे है, उनके लिये आप अनात्मको प्राप्त होने वाली मृत्यु के रुपमें है । आप महतत्व आ कार्यद्रव्य और प्रकृतिरुप कारणके नियामक है शासक है । आपकी माया आपकी अपनी दृष्टि पर पर्दा न डाल सकती, किन्तु उसने दूसरोंकी दृष्टि को ढक रखा है । आपको मैं नमस्कार करता हुं ॥४८॥ स्वयं प्रका प्रभो ! हम आपके सेवक है । हमें आज्ञा दीजिये कि हम आपकी क्या सेवा करे ? नेत्रोके द्वारा आपका दर्श होने तक ही जीवों के क्लेश रहते है । आपके दर्शनमें ही समस्त क्लेशोंकी परिसमाप्ति है ॥४९॥ श्रीशुकदेव कहते है राजा परीक्षित् ! शरणागत भयहारी भगवान् श्रीकृष्ण ने श्रुतदेवकी प्रार्थना सुनकर अपने हाथ उनका हाथ पकड लिया और मुस्कुराते हुए कहा ॥५०॥

श्रीभगवानुवाच

ब्रह्मंस्तेऽनुग्रहार्थाय सम्प्राप्तान् विद्ध्यमून् मुनीन् । संचरन्ति मया लोकान् पुनन्तः पादरेणुभिः ॥५१
देवाः क्षेत्राणि तीर्थानि दर्शनस्पर्शनार्चनैः । [1]शनैः पुनन्ति कालेन तदप्यर्हत्तमेक्षया ॥५२
ब्राह्मणो [2]जन्मना श्रेयान् सर्वेषां प्राणिनामिह । तपसा विद्यया तुष्ट्या किमु [3]मत्कलया युतः ॥५३
न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम् । सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहम् ॥५४

कर्दमक्षमा

श्रीभगवान्, उवाच ।

ब्रह्मन्, ते, अनुग्रहार्थाय, सम्प्राप्तान्, अमून्, मुनीन्, विद्धि, पादरेणुभिः, लोकान्, पुनन्तः, मया, सञ्चरन्ति ॥५१॥ देव क्षेत्राणि, तीर्थानि, दर्शनस्पर्शनार्चनैः, शनैः, कालेन, पुनन्ति, तत्, अपि, अर्हत्तमेक्षया ॥५२॥ इह, सर्वेषाम्, प्राणिनाम्, ब्राह्म जन्मना, श्रेयान्, तपसा, विद्यया, तुष्ट्या, मत्कलया, युतः, किमु ॥५३॥ एतत्, चतुर्भुजम्, रूपम्, ब्राह्मणात्, मे, न, दयितम्, विप्रः, सर्ववेदमयः, अहम्, सर्वदेवमयः ॥५४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वस्मिन्नादरमित्यधिकं ब्राह्मणेषु मन्दमिवाऽऽलक्ष्य लोकसङ्ग्रहपरोभगवान् मत्तोऽपि ब्राह्मणेषु श्रद्धातिरेकं कुर्व तमनुशास्ति ब्रह्मन्निति सप्तभिः मया हृदि स्थितेन ॥५१॥ देवादिभ्योऽपि ब्राह्मणाः श्रेष्ठा इत्याह-देवा इति । ते शनैः पुनन्ति ए सद्यः किञ्च देवादीनि यत्पुनन्ति तदप्यर्हत्तमानामीक्षया ॥५२॥ मम कला परिकलनमुपास्ति तया युतः ॥५३॥ किञ्च ब्राह्मणा

---

[1] पुनन्ति चिरकालेन-वीर. ; लोकान्पुनन्ति कालेन-विज. । [2] जन्मतःश्रेयान्-विज. । [3] मत्कथया-विज. ।

मम प्रेष्ठमित्याह-नेति, हेतु
इत्यर्थः ॥५४॥

इदानीं ब्राह्मणमह
इति ध्येयम् । तदुक्तमभियुक्तैः

“पृथ्वी शेषधृता स
वाली राघवविष्णुना

इति ॥५१॥ तदेवाह
दर्शनसमकालमेव । देवादिषु
अर्हत्तमा ब्राह्मणा ममापि पूज
उपलब्धसुतीर्थकीर्तिः’ इति सन

“तीर्थयात्रा ज

इति तन्त्रशास्त्रात् ॥५२
तपआदिना, विप्रश्रैष्ठ्यं तु वक्तुं न
हेतुमाह-इत्यर्थ इति । मत्संबन्धिज्ञा
भावः । सर्वदेवमयत्वाद्विप्राः प्रकाश

स्वस्मिन्नेव स्तुत्यतिशये
बहुमन्यमानस्तत्प्रार्थितसिद्ध्युपायमे
एवार्थः । प्रयोजनं त्वदर्थमेव सम्य
किमाधिक्यं तत्राह-मयेति । हवि
पाणिनिस्मरणादहमप्येषामधीन इति
एव वा क्षेत्राणि स्थलरूपाणि तीर्थानि
देवादीनां पुनानात्वमप्यर्हत्तमानां तेभ्य
ममापि त्वदधीनत्वादिति भावः ॥५
तपआदिना श्रेयानिति स्थिते तत्रापि मत
मत्कला मत्स्फूर्तिः एषां यथोत्तरं श्रै
रूपं न प्रियं तत्र हेतुः-सर्वेति । तत्र स
विषयित्वं स्वस्य च विषयत्वं निर्दिश्य
तत्रैव नवमे वैकुण्ठनाथवाक्यम् “नाहम

श्र

भक्तवात्सल्यभरेणात्मभक्तेरपि स्
त्वं चूडमणित्वात् सङ्कुचननाह-ब्रह्म

श्रीधरस्वामिविरचिता भावार्थदीपिका

मम प्रेष्ठमित्याह-नेति, हेतुमाह सर्ववेदमयो विप्र इति । प्रमाणाधीनत्वात्प्रमेयस्य वेदमयो विप्रो देवमयादस्माद्रूपात्प्रेष्ठ इत्यर्थः ॥५४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इदानीं ब्राह्मणमहत्त्वमाह-स्वस्मिन्नित्यादिना । हृदिस्थेन सर्वदा मां हृदये वहन्तो विचरन्तीति तेनैते मत्तोऽधिका एते इति ध्येयम् । तदुक्तमभियुक्तैः—

"पृथ्वी शेषधृता स शम्भुमुकुटेकैलासवासोऽप्यसौ कैलासोऽपि दशाननेन तुलितो बद्धोऽप्यसौ वालिना ।
वाली राघवविष्णुना युधि जितो विष्णुः सतां मानसे तस्माद्विष्णुपरायणाद्दुस्तरो नान्योऽस्ति लोकत्रये ॥"

इति ॥५१॥ तदेवाह-देवादिभ्योऽपीति । ते देवादयः । शनैश्चिरकालसेवनेन । एते तु ब्राह्मणास्तु । सद्यो दर्शनसमकालमेव । देवादिषु यच्छोधनसामर्थ्यं तदपि ब्राह्मणप्रसादकृतमेवेत्याह-किञ्चेति । अर्हतः कुलवृद्धाद्या अर्हत्तरा देवा अर्हत्तमा ब्राह्मणा ममापि पूज्यत्वात् । 'स मत्मपरोऽहं द्विजदेवदेवः' इति पञ्चमे ऋषभदेवोक्तेः । 'सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्तिः' इति सनकादीन्प्रति वैकुण्ठनाथोक्तेः । तेषामीक्षया प्रसादेन ।

"तीर्थयात्रा जपो दानं व्रतमिष्टादिकं च यत् । विप्राराधनतः साङ्गमन्यथा विगुणं शिव ॥"

इति तन्त्रशास्त्रात् ॥५२॥ प्राणिनां जीवमात्राणाम् । जन्मना ब्राह्मणदेहावाप्तिलक्षणेन । शङ्खक्षीरन्यायेन कैमुत्यमाह-तपआदिना, विप्रश्रैष्ठ्यं तु वक्तुं न शक्यमिति भावः ॥५३॥ मम प्रियं स्वरूपं च ब्राह्मणा एवेत्याह-किञ्चेति । विप्राराधनस्य प्रेष्ठत्वे हेतुमाह-इत्यर्थ इति । मत्संबन्धिज्ञानं विप्रद्वारैव भवति ते एव शास्त्रद्वारा मां प्रकाशयन्ति, प्रकाश्यापेक्षया प्रकाशक एव महानिति भावः । सर्वदेवमयत्वाद्विप्राः प्रकाशका वेदस्यैव देवप्रकाशकत्वान्मम देवत्वात् अहं प्रकाश्य इति ॥५४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वस्मिन्नेव स्तुत्यतिशयेन सतां चूडामणित्वात् सङ् कुचंस्तथा भक्तवात्सल्यवरेणात्मभक्तेरपि स्वभक्तभक्तिं बहुमन्यमानस्तत्प्रार्थितसिद्ध्युपायमेव शिक्षयन्नाह-ब्रह्मन्निति । साक्षाद्वेदरूपत्वेन त्वयैतज्ज्ञायत एवेति भावः । ते त्वय्यनुग्रह एवार्थः । प्रयोजनं त्वदर्थमेव सम्यक् मत्साहित्यादिना प्राप्तान् स्वयमागतान् विद्धि । ननु त्वमेव साक्षादागतोऽसि मुनिभिः किमाधिक्यं तत्राह-मयेति । हृदिस्थेन क्वचित्साक्षाद्भूतेन च सह 'सह (युक्ते) योगेऽप्रधाने' (२/३/१९) इति पाणिनिस्मरणादहमप्येषामधीन इति भावः ॥५१॥ देवादयस्तु न तादृशास्तद्दत्तवैभवाश्चेत्याह-देवाः प्रतिमारूपाः साक्षाद्रूपा एव वा क्षेत्राणि स्थलरूपाणि तीर्थानि जलरूपाणि शनैः पुनन्ति तत्रापि कालेन चिरेणैव एते तु पुनन्त एव सञ्चरन्तीत्युक्तं देवादीनां पुनानात्वमप्यर्हत्तमानां तेभ्योऽपि पूज्यानामेतादृशमद्भक्तानामीक्षया देवादित्वसम्पादिन्या दृष्ट्यैव मूलहेतुनेत्यर्थः । ममापि त्वदधीनत्वादिति भावः ॥५२॥ तेषां तादृशत्वमेव कैमुत्येन स्थापयति-जन्मनेति । जन्मना जातिमात्रेणैव तत्र च तपआदिना श्रेयानिति स्थिते तत्रापि मत्कलया श्रेयानिति किं वक्तव्यमित्यर्थः । तपः स्वधर्मः विद्या शास्त्रीयज्ञानं तुष्टिरात्मारामत्वं मत्कला मत्स्फूर्तिः एषां यथोत्तरं श्रैष्ठ्यम् ॥५३॥ अत एवम्भूताद्ब्राह्मणात् ममैतद्भवतां दृश्यमानं श्रीकृष्णाख्यमपि चतुर्भुजं रूपं न प्रियं तत्र हेतुः-सर्वेति । तत्र सर्ववेदमयत्वं तदुत्थसर्वज्ञानाश्रयत्वं सर्वदेवमयत्वं च तज्ज्ञेयसर्वोपास्यमूलत्वं ततस्तेषां विषयित्वं स्वस्य च विषयत्वं निर्दिश्य विषयिणं विना विषयस्यानुपादेयत्वमपि लौकिकाभानकेनैव स्वभक्तमहिमा साधितः तथैव नवमे वैकुण्ठनाथवाक्यम् "नाहमात्मानमाशासे" इत्यादि ॥५४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भक्तवात्सल्यभरेणात्मभक्तेरपि स्वभक्तमभक्तिं बहुमन्यमानस्तत्प्रार्थितसिद्ध्युपायमेव शिक्षयन् । यद्वा, स्वस्मिन्नादरातिशयेन सतां चूडामणित्वात् सङ्कुचन्नाह-ब्रह्मन्निति । साक्षाद्वेदरूपेण त्वयैतज्ज्ञायत एवेति भावः । ते त्वय्यनुग्रह एवार्थः प्रयोजनम्,

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तदर्थमेव सम्यक् मत्साहित्यादिना प्राप्तान् स्वयमागतान् विद्धि । ननु मुननिभिरात्मारामैः किं ते ? तत्राह-सञ्चरन्तीति। अन्यत्तैर्व्याख्यातम् । यद्वा, मद्विरहदुःखशान्तये मदीयश्रीमूर्त्या सह, अत एव ते महाभागवतश्रेष्ठा एव, न त्वात्मारामा इति भावः ॥५१॥ महाभागवतश्रेष्ठत्वमेव दर्शयति-देवा इति द्वाभ्याम् । मृच्छिलादिमयाः साक्षादिन्द्रादयऽर्कज्योतिर्मयाः । क्षेत्रतीर्थयोः स्थलजलप्रधानत्वेन भेदः अर्हत्तमाः पूजादिकं सर्वं ये अर्हन्ति ते अर्हन्तस्तेषु श्रेष्ठतमा महाभागवतोत्तममहाभागवता इत्यर्थः। तेषामीक्षया तत्कर्तृकदेवाद्यपेक्षया, किंवा दृष्टिमात्रेणेत्यर्थः । पाठान्तरेऽप्यर्थः स एव ॥५२॥ जन्मना जातिमात्रेणैव । इह भूमौ त्रिलोक्यां वा सर्वेषां मध्ये श्रेयान्, तत्र च तप आदिना, तत्रापि मत्कलया श्रेयानिति किं वक्तव्यमित्यर्थः । तपः स्वधर्मः विद्या शास्त्राभ्यासः, तुष्टिर्यथालाभेन तृप्तिः शान्तिर्वा, कला भक्तिः, एषां यथोत्तरं श्रैष्ठ्यम् । एवं ब्राह्मणत्वेन तत्र च तपआदिभिर्मत्कलया चेति महाभागवतश्रेष्ठत्वमुक्तम् । तल्लक्षणं च पाद्मोत्तरखण्डे —

"तापादिपञ्चसंस्कारी नवेज्याकर्मकारकः । अर्थपञ्चकविद्विप्रो महाभागवतोत्तमः ॥" इति ॥

अस्यार्थश्च श्रीभगवद्भक्तिविलासटीकायां विवृत एव ॥५३॥ अतो मत्तोऽप्यधिकमेते पूज्या इति वक्ष्यन् महाभागवतोत्तमत्वमेवोक्तपोषन्यायेन द्रढयन्नाह-नेति त्रिभिः । एतदित्यनेन चतुर्भुजतयैव श्रुतदेवादयोऽर्जुनादिवत्तं पश्यन्तीति ज्ञेयम् । चतुर्भुजमित्यनेन च द्विभुजरूपं ब्राह्मणादपि प्रियं श्रीव्रजजनादिप्रियतमत्वादिति सूचयति । हि यतः, अन्यत्तैर्व्याख्यातम्। यद्वा, हि अपि सर्वदेवमयोऽप्यहम् । अतो यद्यपि वेदद्वारा ब्राह्मणेज्यसर्वदेवमयत्वेन ब्राह्मणानामपि सम्पूज्योऽहम्, तथापि मे मदीया ब्राह्मणाः, देवमयत्वादस्मद्रूपं न मे प्रियम्, भक्तिप्रियत्वेनैव निजस्यापि सर्वस्य मत्प्रियत्वादित्यर्थः । तथा च श्रीभगवद्वाक्यं नवमस्कन्धे दुर्वाससं प्रति (भा.९/४/६४) – 'नाहमात्मानमाशासे' इत्यादि । एकादशे चोद्धवं प्रति (भा.११/१४/१५) 'नैवात्मा च यथा भवान्' इति । अवजानन्ति नाद्रियन्ते, यतोऽसूयवः, तत्र हेतुः-दुष्प्रज्ञा दुष्टबुद्धय इति । तत्रैव हेतुः-अर्चादावेव, न तु मद्भक्दिष्विज्यबुद्धयः । आदिशब्दान्माल्यादिः । यद्वा, एवमविदित्वार्चादाविज्यादृष्टयः सन्तोऽवजानन्ति। यतो दुष्प्रज्ञाः, अतोऽसूयवः । गुरुमिति 'वर्णानां ब्राह्मणो गुरुः' इत्यादिवचनात् मामिति तदधिष्ठानपरत्वात् । तत्राप्यात्मानं मद्भक्ततया मप्रियतममित्यर्थः । यतो विप्रावज्ञया गुरौ मयि महत्सु चापराधः स्यादिति भावः । विशेषणानामेषां यथोत्तरं श्रैष्ठ्यम् । एवं भक्तस्य सर्वतः श्रैष्ठ्यम्, तदपराधाधिक्यादिति ॥५४-५५॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मत्कलया मद्विषयज्ञानेन ॥५३-५९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उक्तिमेवाह-ब्रह्मन्नित्यादिभिः सप्तभिः । इत्थं स्वाम्यभीष्टकरणानुरूपकैङ्कर्यं प्रार्थयमानं श्रुतदेवं प्रति मद्भक्तानामाराधनमेव निरतिशयं मत्कैङ्कर्यमिति वक्तुं तावद्भक्तान् प्रशंसति ब्रह्मन्निति षड्भिः । मया हृदिस्थेन मया पादरेणुभिर्लोकान् पुनन्तः पवित्रीकुर्वन्तः सञ्चरन्ति ॥५१॥ ननु देवादयोऽपि पुनन्त्येवेति किं विशेषेणैत एव पुनन्ति इत्यत आह-देवा इति । देवाः भगवत्प्रतिमाः क्षेत्राण्ययोध्यामथुरादीनि तीर्थानि गङ्गादीनि चिरकालेन दीर्घकालेन पुनन्ति । किञ्च देवादीनि यत्पुनन्तीति तदप्यर्हत्तमानामीक्षणान्मद्भक्तकर्तृकेक्षाप्रयुक्तमाहात्म्यादित्यर्थः ॥५२॥ मद्भक्तात् श्रेष्ठो नास्तीत्याह-ब्राह्मण इति । सर्वेषां प्राणिनां मध्ये इह श्रेष्ठेषु नरेषु ब्राह्मणो जन्मतः श्रेयान् । ब्राह्मणेष्वपि तपसा युतः युक्तः श्रेयान् । ततोऽपि विद्यया वेदान्तविद्यया युतः ततोऽपि तुष्ट्यानायासेन यत्किंचिप्राप्तसंतेषेण युतः श्रेयान् । मत्कलया कला विद्या (मम) मदुपासनेति यावत्तया युतस्तु श्रेयान् इति किमु वक्तव्यमित्यर्थः ॥५३॥ किं बहुनेत्याह-नैतदिति । एतद्द्विभुजं चतुर्भुजं वा मम रूपं ब्राह्मणात् मत्कलया युतात्र दयितं न प्रियं तत्र हेतुः सर्वेति । ब्राह्मणाधीनत्वात् प्रमेयसिद्धेः प्रमाणभूताद्वेदप्रचुराद्विप्राद्देवमयं वपुर्न दयितमित्यर्थः ॥५४॥

ब्रह्मन्
॥५२-५३॥
एवमप्यावयोर्वि

स्वस्तु
तव स्तव्यस्यापि
इति भावः ॥५१॥
अर्हत्तमानामीक्षय

मम कल
प्रमाणं ये वेदास्त

मया हृ
शनैः चिरकालसेव
न स्वतः । अत्र अ
कुतः । तपसा 'श्रे
युतः श्रेयानिति वि
प्रियं नास्ति । कुत

एवं प्रा
देवादयः दर्शनादि
शीघ्रं पुनन्तीतिभाव

अत्र भग
समाभवत्विति तेषां
ब्रह्मंस्तेऽनुग्रहार्थाये
वाक्यं न बाधितवि
समागमनं प्राधान्येन

श्रीमद्विजयध्वजकृता पदरत्नावली

ब्रह्मन् तपस्विन् ! ॥५१॥ देवादिभ्यो यच्छुद्धत्वं तदर्हत्तमानां पूज्यानां ब्राह्मणादीनामीक्षया दर्शनेन अपिशब्दोऽवधारणार्थः ॥५२-५३॥ ब्राह्मणभक्तिजननार्थम् अर्थवादमाह-न ब्रह्मणादिति । ब्राह्मणस्योत्तमत्वे हेतुमाह-सर्वेति । एवमप्यावयोर्विशेषोऽस्तीति हिशब्देनाह ॥५४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४५-५९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वस्तुतिमाकर्ण्य स्वसङ्गिनां विप्राणां स्तुतिं त्वनाकर्ण्य ब्रह्मण्यदेवो ब्राह्मणभक्त्युपदेशमिषेण स्वयमेव ब्राह्मणान् स्तुवन् तव स्तव्यस्यापि मम ब्राह्मणाः स्तव्या इत्यभिव्यञ्जयति-हे ब्रह्मन् ! हे ब्राह्मण ! स्वस्य ब्राह्मणत्वादेव स्वजातिषु तव नात्यादर इति भावः ॥५१॥ किञ्च देवादिभ्योऽपि ब्राह्मणाः श्रेष्ठा इत्याह-देवा इति । ते शनैः पुनन्ति एते तु सद्य एव तदपि तत्पुनानत्वमपि अर्हत्तमानामीक्षया अर्हत्तमकर्तृकावलोकनं यदि ते प्राप्नुवन्ति तदैव यदुक्तं —

"तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया ।" इति ॥५२॥

मम कलापरिकलनमुपासनोत्थसाक्षात्कारस्तया युतः ॥५३॥ सर्ववेदमयो विप्र इति मम सर्वदेवमयत्वात् सर्वेश्वरस्यापि प्रमाणं ये वेदास्तन्मय एव विप्रो भवेत् ॥५४॥

गूढार्थदीपिनी

मया हृदिस्थेन हेतुभूतेन लोकान् पुनन्तः सञ्चरन्ति तानेतान् तव अनुग्रहार्थमेव प्राप्तान् जानीहि ॥५१॥ ते देवादयः शनैः चिरकालसेवनेन पुनन्ति एते तु सद्य एव किञ्च देवादिषु यच्छोधनसामर्थ्यं तदपि अर्हत्तमानां ब्राह्मणानामीक्षया अनुग्रहदृष्ट्यैव न स्वतः । अत्र अर्हतः कुलवृद्धाः अर्हत्तरा देवा अर्हत्तमा ब्राह्मणा इति तृतीयकोटौ तमब्घटितप्रयोगः ॥५२॥ जन्मना श्रेयान् । कुतः । तपसा 'श्रेष्ठः' विद्यया श्रेष्ठतरः तुष्ट्या श्रेष्ठतमः मत्कला मदुपासना (कलाज्ञानप्रबोधनम् । इत्युक्तेः ।) ज्ञानसाधनं तया युतः श्रेयानिति किमुत वक्तव्यमिति चतुर्थकोटौ इयसुन् प्रत्ययः ॥५३॥ किं बहुना ब्राह्मणात् अन्यत् एतत् रूपमपि मे दयितं प्रियं नास्ति । कुतः । सर्वेति योज्यम् ॥५४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं प्रार्थयमानं तं भक्तेषु विप्रेषु अधिकां प्रीतिं कुर्वित्येतदेव मम कैङ्कर्यमित्यनुशास्ति ब्रह्मन्निति सप्तभिः ॥५१॥ देवादयः दर्शनादिभिस्तत्रापि शनैः कालेन महता पुनन्ति किञ्च यत्पुनन्ति तदपि अर्हत्तमानां भागवतानामीक्षयैव । अर्हत्तमास्तु शीघ्रं पुनन्तीतिभावः ॥५२॥ मत्कलया मदीयया धेयमूर्त्या ॥५३-५४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अत्र भगवानिति मन्यते समागता ब्राह्मणाः तांश्चायमात्मतुल्यान् मत्वा तथा न मन्यते तदा समागतानां क्षोभो भवेत् समाभवत्विति तेषां सम्बोधयति-समता तु स्वस्मिन्नेव स्थापिता । अतोऽहं परं तथा न पूजनीयः किन्त्वेत एव पूजनीया इत्युपदिशति-ब्रह्मंस्तेऽनुग्रहार्थायेति सप्तभिः । यावान् धर्मः स्वस्य सर्वश्रुतिप्रतिपाद्यः तावान् ब्राह्मणेषु निरूप्यते । तद्रूपोऽपि भगवान् इतीति वाक्यं न बाधितविषयम् इमान् मुनीन् तेऽनुग्रहार्थाय समागतान् विद्धि, न तु प्रसङ्गात् । अन्यार्थं ते वा समागताः । ननूभयोः समागमनं प्राधान्येन कथमेकस्मिन् कार्ये सम्भवतीति चेत्तत्राह-सञ्चरन्ति मया लोकानिति । मया सह एते लोकान् सञ्चरन्ति । तेन

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सहभावो मम प्राधान्यमेतेषामेवेति निरुक्तम् । एषां पावनप्रकारमाह–पादरेणुभिरिति ॥५१॥ न त्वन्यान्यपि लोके पावनानि सन्ति क एतेषामनुग्रह इति चेत्तत्राह–देवाः क्षेत्राणीति । देवाः क्षेत्राणि तीर्थानि च त्रयो लोके पावनहेतवः । कालस्याप्येतच्छेषेनैव पावनजनकत्वं स्नानान्त एव सूतकादपि शुद्धेः द्रव्याणां देश एवान्तर्भावः । कर्तारस्तु प्रकृताः मन्त्रकर्मणोरपि देवतास्वन्तर्भावः तादर्थ्यात् एवं शुद्धिहेतूनां षण्णामपि अत्रैवान्तर्भावात् तत्र य एव निरुक्ताः तद्दर्शनस्पर्शनार्चनैः पुनन्ति दर्शनं सर्वेषां दर्शनस्पर्शने तीर्थस्य त्रितयं देतायाः एवमप्येते शनैरेव पुनन्ति तत्र हेतुः–कालेनेति । कालो हि पृथक्शुद्धिहेतुः अन्यथा दशाहादर्वागपि तीर्थस्नानादिना पुरुषः शुद्धो भवेत् तस्मात् यावता कालेन शुद्धिर्भवति तावत्कालेनैव तीर्थादिना शुद्धो भवति । ब्राह्मणास्तु सद्यःशुद्धिहेतवः । तेषां वाक्यात् अत्यन्तनिकृष्टमपि शुद्धं भवति । आकरस्थं सदा शुचि स्नेहपक्वं न दुष्यति । प्रयतेन शूद्रेणाप्याहृतं भोज्यम् इत्यादिवाक्यानि निर्विचिकित्सं सर्वेषां शुद्धिप्रतिपादकानि तस्मात् क्षेत्रादिभ्यो ब्राह्मणाः श्रेष्ठाः । किञ्च तदपि तीर्थादिकृतमपि अर्हत्तमस्येक्षया दृष्ट्यैव भवति । सर्वत्र ब्रह्मदत्तं समं भवेत्–

"अभ्यनुज्ञाविहीनं हि ब्राह्मणानां विशेषतः । सर्वं निष्फलतां याति व्रतदानार्चनादिकम् ॥"

इति ॥५२॥ ननु ब्राह्मणस्योत्कर्षहेतुर्यः स चेदन्यत्रापि भवेत् किं ब्राह्मणेनेत्याशंक्याह–ब्राह्मणः जन्मना श्रेयानिति । उत्पन्न एव ब्राह्मणः सर्वेभ्यो वर्णेभ्योऽतिरिच्यते । सर्वेषां प्राणिनां पूज्यो भवति । तत्रापि तपसा विद्यया तुष्ट इति तुष्ट्या एवं त्रिभिरेव महत्त्वं सिध्यति । तपसा देहमाहात्म्यं विद्यया चेन्द्रियाणां तुष्ट्या त्वन्तःकरणस्येति । अनेन गुणत्रयमपगच्छति । सर्वोत्कृष्टमपरं हेतुमाह–किमु मत्कलयेति । मत्कला भगवदीयत्वं भक्तिर्वा तद्युक्तः श्रेयान् भवति इति किं वक्तव्यमित्यर्थः ॥५३॥ ननु तथापि त्वत्सेवकाः त्वामेव भजन्ते उत्कर्षापकर्षं न मन्यन्ते यथा स्त्री स्वपतिमेवोत्कृष्टमपकृष्टं मन्यते नान्यं महान्तमपि तस्मात् कथं ब्राह्मणा भक्तानां सेव्या इति चेत्तत्राह–न ब्राह्मणान्मे दयितमिति । मत्सेवकैर्मद्धितं कर्तव्यम् । मम तु प्रीतिः स्वस्माद्ब्राह्मण एवाधिका । तत्र हेतुः सर्वदेवमयो विष्णुः सर्ववेदमयो विप्र इति । सर्वे वेदा ब्राह्मणे तिष्ठन्ति देवास्तु मयि । प्रमेयाच्च प्रमाणमधिकं मानाधीना मेयसिद्धिरिति अनेनान्तर्हृदयमपि ज्ञापितम् । प्रमेयबलं मया क्व क्व प्रकटीकर्तव्यम् अतः प्रमाणभूता एत इत्येतदनुरोधः क्रियत इति युक्तश्चायमर्थः ॥५४॥

श्रीसुबोधिनीसारः

हे ब्रह्मन् ! मया सह पादरेणुभिर्लोकान् पुनन्तः सञ्चरन्ति ते तवानुग्रहार्थं सम्प्राप्तान् अमून् मुनीन् त्वं विद्धि जानीहि ॥५१॥ देवा अर्चनैः क्षेत्राणि दर्शनैः तीर्थानि स्पर्शनैः शनैः कालेन पुनन्ति । अर्हत्तमानामीक्षया तत् पुनन्ति । अर्हत्तमा इतिच्छेदनीयः सन्धिरार्ष इति गुरवः ॥५२॥ सर्वेषां प्राणिनामिह ब्राह्मणो जन्मना श्रेष्ठः मत्कलया तुष्ट्या विद्यया तपसा युतः श्रेयानिति किमु वक्तव्यम् ॥५३॥ एतच्चतुर्भुजं रूपं ब्राह्मणान्मे मम दयितं प्रियं नास्ति । तत्र हेतुः । विप्रस्सर्ववेदमयः अहं सर्वदेवमयो हि ॥५४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स्वस्मिन्नादरमधिकं मुनिषु च मन्दमालक्ष्य लोकसङ्ग्रहपरो भगवान् मत्तोऽपि मुनिष्वादरातिशयं कुरु इत्याशयेनाह–ब्रह्मन्निति सप्तभिः । तवाप्येतद्विदितम् इति सूचयन् सम्बोधयति–ब्रह्मन्निति । मया हृदि स्थितेन हेतुभूतेन स्वपादरेणुभिर्लोकान् पुनन्तो ये सञ्चरन्ति तानेतान् मुनीन् तवानुग्रहार्थायेह प्राप्तान् विद्धीत्यन्वयः ॥५१॥ ननु देवादयोऽपि पुनन्त्येवेति को वा एतेषु विशेषः इत्याशंक्याह–देवा इति । देवाः प्रतिमाः क्षेत्राणि अयोध्यामथुरादीनि, तीर्थानि गङ्गादीनि दर्शनादिभिः शनैर्महता कालेन पुनन्ति । तदपि पावत्र्यमर्हत्तमानामीक्षया दर्शनमात्रेण सद्य एव भवति ॥५२॥ मद्भक्ताद्ब्राह्मणादन्यः श्रेष्ठो नास्ति इत्याह–ब्राह्मण इति । इह संसारे सर्वेषां प्राणिनां मध्ये ब्राह्मणो जन्ममात्रेणैव श्रेयान् । तपआदिभिर्युक्तो ब्राह्मणः श्रेयानिति तु किमु वक्तव्यम्? । मत् मम कला परिकलनमुपासना ध्यानं तया युताः ॥५३॥ किं बहुना मदुपासकाद्ब्राह्मणात् एतत् द्विभुजं चतुर्भुजं च रूपं मम

क पावनानि सन्ति
लस्याप्येतच्छेषेनैव
। देवतास्वन्तर्भावः
सर्वेषां दर्शनस्पर्शने
था दशाहादर्वागपि
वति । ब्राह्मणास्तु
यतेन शूद्रेणाप्याहृतं
पि तीर्थादिकृतमपि

कम् ॥"

जन्मना श्रेयानिति ।
ष्ट इति तुष्ट्या एवं
णत्रयमपगच्छति ।
क वक्तव्यमित्यर्थः
कृष्टं मन्यते नान्यं
कर्तव्यम् । मम तु
णे तिष्ठन्ति देवास्तु
क प्रकटीकर्तव्यम्

विद्धि जानीहि ॥५१॥
र्हत्तमा इतिच्छेदनीयः
युतः श्रेयानिति किमु
र्वदेवमयो हि ॥५४॥

कुरु इत्याशयेनाह-
स्वपादरेणुभिर्लोकान्
त्येवेति को वा एतेषु
भिः शनैर्महता कालेन
स्ति इत्याह-ब्राह्मण
तु किमु वक्तव्यम् ?।
तुर्भुजं च रूपं मम

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दयितं प्रियं न भवति । तत्र हेतुमाह-सर्वेति । देवाः प्रमेयरूपाः वेदा हि तत्र प्रमाणभूताः, प्रमेयसिद्धेः प्रमाणाधीनत्वात् । प्रमेयभूतादपि सर्वदेवमयान्मम स्वरूपात् प्रमाणभूतं विप्ररूपं प्रियमित्यर्थः ॥५४॥

अन्वितार्थप्रकाशिका

स्वस्तुतिमाकर्ण्य स्वभक्तानां ब्राह्मणानां स्तुतिमनाकर्ण्य लोकसङ्ग्रहाय ब्राह्मणान् प्रशंसन्नाह-ब्रह्मन्निति । हे ब्रह्मन् ! मया हृदि स्थितेन हेतुभूतेन स्वपादरेणुभिर्लोकान् पुनन्तो ये सञ्चरन्ति तानेतान् मुनीन् तवानुग्रहार्थायेह प्राप्तान् विद्धि ॥५१॥ देवा इति । देवाः प्रतिमाः क्षेत्राणि अयोध्यामथुरादीनि तीर्थानि गङ्गादीनि दर्शनादिभिः शनैर्महता कालेन पुनन्ति । एते तु सद्यः किञ्च देवादीनि यत्पुनन्ति तदपि पावत्र्यमर्हत्तमानामीक्षया दर्शनमात्रेण सद्य एव भवति ॥५२॥ ब्राह्मण इति । इह संसारे सर्वेषां प्राणिनां मध्ये ब्राह्मणो जन्ममात्रेणैव श्रेयान् तपआदिभिर्युक्तो मत् मम कला परिकलनमुपासना तया युक्तः ब्राह्मणः श्रेयानिति किमु वक्तव्यम् ॥५३॥ नेति । किं बहुना मदुपासकाद्ब्राह्मणात् एतत् द्विभुजं चतुर्भुजं च रूपं मम दयितं प्रियं न भवति । तत्र हेतुःसर्वेति स्पष्टम् । अयम्भावः । देवाः प्रमेयरूपाः वेदा हि तत्र प्रमाणभूताः प्रमेयसिद्धेः प्रमाणाधीनत्वात् प्रमेयभूतादपि सर्वदेवमयान्मम स्वरूपात् प्रमाणभूतं विप्ररूपं प्रियमित्यर्थः ॥५४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

देवाः प्रतिमारूपाः क्षेत्राणि भूमिप्रधानानि । तीर्थानि जलप्रधानानि दर्शनादिभिः कालेन पुनन्ति तेषु तत्पवित्रीकरणत्वमपि अर्हत्तमानां मदेकान्तिकभक्तानामीक्षया दृष्ट्यैव भवति ॥५१॥ सर्वेषां श्रेयान् अतिश्रेष्ठः मत्कलया ध्यानेन हृदि प्राप्तया मन्मूर्त्या युतश्चेत्तर्हि श्रेयान् स्यात्तत्र किमु वक्तव्यम् ॥५२॥ ब्राह्मणाच्चतुर्भुजं मे रूपं न दयितं प्रियम् । कुतः सर्वदेवमयस्य मम सर्ववेदमयेन विप्रेण प्रतिपादनार्हत्वात् ॥५३॥ आत्मानं परमात्मानम् । मां गुरुं यथार्थम् । हितोपदेशकं विप्रं च । असूयवः तयोर्गुणेषु दोषारोपकाः अवजानन्ति अवमन्यन्ते ॥५४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वस्मिन्नत्यधिकमादरं वैष्णवेषु तेषु ब्राह्मणेषु तं मन्दमिवालक्ष्य लोकसङ्ग्रहपरो भगवान् मत्तोऽपि वैष्णवेषु एतेषु ब्राह्मणेषु श्रद्धातिरेककरणमेव मत्कैङ्कर्यं स्वामिनो ममाभीष्टकरणं चेत्येवं कैङ्कर्यं प्रार्थयमानं श्रुतदेवं प्रति वक्तुं तावत् स्वभक्तान् प्रशंसति ब्रह्मन्नित षड्भिः ॥ ब्रह्मन्निति ॥ हे ब्रह्मन् ! अमून् मुनीन् ते तव अनुग्रहार्थाय त्वदनुग्रहं सम्पादयितुं सम्प्राप्तान् विद्धि । मया हृदिस्थेन मया हेतुना पादरेणुभिः लोकान् पुनन्तः पवित्रीकुर्वन्तः सन्तः सञ्चरन्ति । कदाचिन्मया सह कदाचिदेकाकिनश्च विचरन्तीत्यर्थः ॥५१॥ ननु देवादयोऽपि पुनन्त्येवेति किं विशेषेणैत एव पुनन्तीति ब्रूषे इत्यत आह ॥ देवा इति ॥ देवा भगवत्प्रतिमारूपा देवताः क्षेत्राणि अयोध्यामथुरादीनि तीर्थानि गङ्गायमुनादीनि दर्शनस्पर्शनार्चनैः कालेन चिरकालेन दीर्घकालेनेति यावत् । शनैः इति ॥ सर्वेषां प्राणिनां मध्ये इह श्रेष्ठेषु नरेषु मध्ये ब्राह्मणः जन्मना श्रेयान् । ब्राह्मणेष्वपि तपसा युक्तः श्रेयान् । ततोऽपि विद्यया भगवदुपासनाबोधकवेदान्तविद्यया युतः श्रेयान् । ततोऽपि तुष्ट्या अनायासोपलब्धं यत्किञ्चित्तावतैव संतोषेण युक्तः श्रेयान् एवम्भूतः सन्नेव मत्कलया कला विद्या मदुपासनेति यावत् । तया यतस्तु किमु । तच्छ्रेष्ठतायां किमु वक्तव्यमित्यर्थः ॥५३॥ किं बहुनेत्यम्भूतब्राह्मणाराधनमेव मम प्रेष्ठमित्याह ॥ नेति ॥ एतत् चतुर्भुजं द्विभुजं वा मे मम रूपं ब्राह्मणात् मत्कलायुतब्राह्मणः सकाशात् दयितं प्रियं न । तत्र हेतुः । सर्ववेदमयः विप्रः अहं सर्वदेवमयः हि । प्रमाणाधीनत्वात्प्रमेयसिद्धेः प्रमाणभूताद्वेदप्रचुराद्विप्राद्देवमयं वपुर्न दयितमित्यर्थः ॥५४॥

कृष्णप्रिया

भगवान श्रीकृष्ण ने कहा - प्रिय श्रुतदेवजी ! ये बडे बडे ऋषि मुनि तुमपर अनुग्रहकरने के लिये ही यहां पधारे है । ये अपने चरणकमलोंकी धूलसे लोगों और लोको को पवित्र करते हुए मेरे साथ विचरणपा

कृष्णप्रिया

कर रहे है ।।५१।। देवता, पुण्यक्षेत्रऔर तीर्थ आदि तो दर्शन स्पर्श अर्चन आदि के द्वारा धीरे धीरे बहुत दिनोंमें पवित्र करते हैं, परन्तु संत पुरुष अपनी दृष्टि से हीसबको पवित्र कर देते है । यही नहीं, देवता आदिमें जो पवित्र करने की शक्ति है वह भी उन्हें संतोकी दृष्टि से ही प्राप्त होती है ।।५२।। श्रुतदेवजी ! तपस्या, विद्या, सन्तोष और मेरी उपासना - मेरी भक्ति से युक्त हो तब तो कहना ही क्या है ।।५३।। मुझे अपना यह चतुर्भुज रूप भी ब्राह्मणों की अपेक्षा अधिक प्रिय नहीं है । क्यों कि ब्राह्मण सर्ववेदमय है और में सर्व देवमय हुं ।।५४।।

दुष्प्रज्ञा अविदित्वैवमवजानन्त्यसूयवः । गुरुं मां विप्रमात्मान[1]मर्चादाविज्यदृष्टयः ।।५५।।
चराचरमिदं विश्वं भावा ये चास्य हेतवः । मद्रू[2] पाणीति चेतस्याधत्ते विप्रो मदीक्षया ।।५६।।
तस्माद् ब्रह्मऋषीनेतान् [3]ब्रह्मन् मच्छ्रद्धयार्चय । एवं चेत्तदर्चितोऽस्म्यद्धा नान्यथा [4]भूरिभूतिभिः ।।५७।।

कर्दमक्षमा

दुष्प्रज्ञाः, अर्चादौ, इज्यदृष्टयः, असूयवः, गुरुम्, विप्रम्, अविदित्वा, एवम्, माम्, आत्मानम्, , अवजानन्ति ।।५५।। इदम्, चराचरम्, विश्वम्, च, अस्य, ये, भावाः, हेतवः, मद्रूपाणि, इति, विप्रः, मदीक्षया, चेतसि, आधत्ते ।।५६।। ब्रह्मन्, तस्मात्, एतान्, ब्रह्मऋषीन्, मच्छ्रद्धया, अर्चय, एवं, चेत्, अद्धा, अर्चितः, अस्मि, अन्यथा, भूरिभूतिभिः, न ।।५७।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

असूयवो दोषदृष्टयः इज्यदृष्टयः पूज्यबुद्धयः ।।५५।। अस्य विश्वस्य हेतवो भावा महदादयः मदीक्षया ममैव सर्वत्रेक्षया ।।५६-५८।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मन्दमतय इत्थं न जानन्तीत्याह-दुष्प्रज्ञा इति । एवं मन्निश्चयम् । असूयवः पाषण्डविभिन्नमतयः । मां मद्रूपम् । गुरुं वर्णाश्रमपूज्यम् । आत्मानं सर्वव्यापि ब्रह्मरूपम् । "ब्रह्म ब्राह्मण आत्मना" इति श्रुतेः । मामित्यनेन पुनरुक्तिर्न शंक्या सगुणाभिप्रायत्वात्तस्या इति । आदिना जलाग्न्यादिग्रहः ।।५५।। विप्रो धत्त इत्यनेनाऽभेदविचारो ब्राह्मणस्यैव न त्वितरेषामिति सूचितम् । प्रव्रज्याधिकारिकत्वात्तद्विचारस्येति ।।५६।। फलितमाह-तस्मादिति । यतो विप्रार्चनमेव मदर्चनं तस्माद्धेतोः । एतानुपस्थितान् । मयि या श्रद्धाऽऽदराधिक्यं तया मच्छ्रद्धया । एवं चेत् मच्छ्रद्धया विप्रेऽर्चिते सति । अद्धा साक्षात् । अन्यथाऽपरप्रीत्या विप्रानर्चनेऽहं भूरिभूतिभिर्बहुविधसामग्रीभिरप्यर्चितो न भवामीत्यर्थः । यतो मे मुख्या मूर्तिब्राह्मण एव "ब्रह्म ब्राह्मण आत्मना" इति श्रुतेः । "सदाऽहं विप्ररूपेण विचरामि महीतले" इति स्मृतेश्च । किञ्च "अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि" इति पाद्मोक्तेश्च । अत एव स्वयमेव भगवतोक्तम्- "न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम्" इति ।।५७।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एवमविदित्वा अर्चादावेवेज्यदृष्टयः सन्तो विप्रं जात्यादिनैव पूज्यं तत्रापि गुरुं महाभागवतत्वात् सर्वोपदेष्टारम् अत एव मां मदीयपरमाधिष्ठानत्वान्मदभिन्नम् अत एवात्मानं परमात्मरूपमवजानन्ति यतो दुष्प्रज्ञा दुष्टबुद्धयः तत एवासूयवः मानुषत्वादिस्वसाम्यदृष्ट्या तद्गुणाऽसहिष्णवः ।।५५।। अथ तादृशस्य महाभागवतत्वमेव दर्शयन्नात्माभेदव्यपदेशहेतुं दर्शयति-चरेति । मम रूपाणि रूप्यन्ते यत्रेति निरुक्त्या अधिष्ठानानि इति चेतसि आ सम्यक् धत्ते धारयति तत्र हेतुः-मदीक्षयेति । तत्र तत्र मदेकस्फुरणादित्यर्थः । एकादशे —

---

[1] मर्चादावितिदृष्टयः-विज. । [2] मद्रूपाणीति वैतानि-वीर. ; मद्रूपाण्येभिरेतस्यां-विज. । [3] ब्रह्मन्संश्रद्धया-वीर. ; च्छद्धयार्चय नित्यशः इति कस्यचित् । [4] सविभूतिभः-वीर. विज. ।

"सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः । भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥" इति ॥

आत्मनोऽभीष्टो यो भगवद्भावस्तत्प्रादुर्भावविशेषस्तमेव यः सर्वभूतेषु पश्यति एवमात्मनि स्फुरन् यो भगवान् तदाश्रयत्वेन च भूतानि पश्यति यः स भागवतोत्तम इत्यर्थः । श्रीभगवद्गीतासु —

"मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः । स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥" इति ॥५६॥

ब्रह्मऋषीन् ब्राह्मणेषु मत्तत्त्वज्ञान् एतान् मत्प्रियतमान् एतानित्युपलक्षणं सर्वानेव मद्भक्तानित्यर्थः । मच्छ्रद्धया उत्तमप्रीत्या अद्धा साक्षादेवार्चितोऽस्मि । अन्यथा मद्भक्तत्यागेन भूरिभूतिभिर्बहुलसमृद्धिभिरप्यर्चितो न भवामि ॥५७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आत्मत्वमेव महाभागवतोत्तमत्वेन दर्शयति-चरेति । मम रूपाण्यधिष्ठानानीत्यर्थः । आ सम्यग् धत्ते धारयति । तत्र हेतुः-मदीयेति । मद्व्यतिरिक्तदृष्ट्यभावादित्यर्थः ॥५६॥ ब्रह्मर्षीन् ब्राह्मणेषु ऋषीन् तपस्विनो वेदद्रष्टॄन् वा । एतान् महाभागवतश्रेष्ठत्वेन मत्प्रियतमानित्यर्थः । पाठान्तरं स्पष्टम् । एतानित्युपलक्षणम्, सर्वानेव मद्भक्तानित्यर्थः । पाठान्तरं स्पष्टम् । एतानित्युपलक्षणम्, सर्वानेव मद्भक्तानित्यर्थः । सच्छ्रद्धया उत्तमप्रीत्या अद्धा साक्षादेवार्चितोऽस्मि, अन्यथा मद्भक्तत्यागेन भूरिभूतिभिर्बहुलसमृद्धिभिरप्यर्चितो न भवामि । हे ब्रह्मन्निति वेदावेक्षयापि वेदात्मकस्य भवादृशो युक्तमेवेदमिति भावः । एवं तत्प्रार्थनानुरूपं निजभक्तभक्तिमेव शिक्षयामासेति ज्ञेयम् ॥५७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥५३-५९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवं केचित्त्वद्भक्तान् कुतो वाऽवमन्यन्ते कुतो वा देवादीन् भजन्ते इत्यत आह-दुष्प्रज्ञा इति । एवमित्थम्भूतान् मद्भक्तानविदित्वा तत्र हेतुः-दुष्प्रज्ञाः दुरहङ्काराः देहात्माभिमानिन इति यावत् । अत एवासूयवः सत्स्वपि गुणेषु दोषाविष्करणैकशीलाः अत एवार्चादावावेवेज्यदृष्टयः पूज्यताबुद्धिमन्तो मां मदात्मकं गुरुमात्मानं विप्रं "ज्ञानी त्वात्मैव मे मतम्" इत्युक्तविधं ज्ञानिनं विप्रं चावजानन्ति ॥५५॥ ज्ञानिनो दृष्टिस्त्वन्यादृशी चेत्याह-चराचरमिति । चराचरात्मकमिदं विश्वस्य हेतवो ये भावाः पदार्थः विश्वं तथा अस्य महदादयः तान्येतानि सर्वाणि विप्रो मदीक्षया मद्विषयकज्ञानेन मदात्मकत्वबुद्ध्येत्यर्थः । धत्ते विषयीकरोति ॥५६॥ अतस्त्वेवं ततः किमत आह-तस्मादिति । तस्मान्मद्भक्तानाम् इत्थम्भूतत्वात् हे ब्रह्मन्नेतान् ब्रह्मर्षीन् श्रद्धयात्यादरेणार्चय । एवञ्चेदित्थमर्चयसि चेदद्धा साक्षादहमेवार्चितोऽस्मि । अन्यथा मद्भक्तार्चनं विना स्वविभूतिभिः पुष्कलोपचारैरर्चितोऽप्यहं नार्चितः ऋषीनेतानिति स्वभक्तमात्रोपलक्षणम् ॥५७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

असूयवः गुणेषु दोषाविष्करणशीलाः दुष्प्रज्ञा एवं गुरुं विप्रं मत्सन्निधानपात्रम् अविदित्वा अवजानन्ति आत्मानं माम् अर्चादौ अवजानन्ति कथम् अर्चैव हरिरिति दृष्टयः ॥५५॥ ब्राह्मणपूजया सर्वमपि पूजितं स्यादिति भावेनाह-चराचरमिति । इदं चराचरं विश्वं भावये कल्पये ब्रह्मणीति शेषः । अस्य ब्राह्मणस्य दैवतमहमिति शेषः । विप्रस्य सर्ववेदमयमुक्तं स्पष्टयति । मद्रूपाणीति । विप्रो मदीक्षया मत्प्रतिपादकत्वज्ञानेन एतस्यां सर्वे वेदा यत्पदमामनन्ति । इत्यादिश्रुत्या वायुना वै गौतमसूत्रेणायं च लोकः सर्वाणि च भूतानि सदृब्धानि भवन्तीति श्रुतिसिद्धैरेभिश्चराचरैः सहमद्रूपाणि भक्ते ॥५६॥ प्रतिपादनच्छलेन फलितमाह-तस्मादिति ॥५७-५८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४५-५९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ।।१-५९।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

असूयवः ब्राह्मणेषु दोषदर्शिनः प्रतिमादाविव न तु ब्राह्मणेषु पूज्यबुद्धयः ।।५५।। ईदृशस्य ब्राह्मणस्य लक्षणमाहचरेति । अस्य विश्वस्य हेतवो भावाः पदार्थाः महदादयः मदीक्षयेत्यस्यार्थस्य पौनरुक्त्यान्मदीक्षया मत्साक्षाद्दर्शनेन युक्तो विप्रविशेषो नारदादिरित्यर्थो द्रष्टव्यः ।।५६-५७।।

गूढार्थदीपिनी

एवं मन्निश्चयम् असूयवः ब्राह्मणेषु दोषदर्शिनः अवजानन्ति तिरस्कुर्वन्ति । अर्चा प्रतिमा आदिपदेन तीर्थं तत्र इज्यदृष्टयः पूज्यबुद्धयः ।।५५।। इदं विश्वं तथा अस्य ये हेतवो महदादयः एतानि सर्वाणि मद्रूपाणि इति चेतसि आधत्ते । कथा । मदीक्षया मद्दृष्ट्या ।।५६।। यतो विप्रार्चनमेव मदर्चनं तस्माद्धेतोः । एवम् अद्धा साक्षात् अहमर्चितोऽस्मि अन्यथा न ।।५७।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

असूयवः दोषदृष्टयः ।।५५।। इदं विश्वम् अस्य हेतवो येभावाः पदार्थाः महदादयः एतानि मद्रूपाणि मदीक्षया मदात्मकदृष्ट्या विप्रः चेतसि आ समन्ताद्धत्ते ।।५६-५८।।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ये तु पुनर्ब्राह्मणातिक्रमं कृत्वा गुरूपदेशं विनैव स्वतः पूजां कर्तुं वाञ्छन्ति तेऽतिदुर्बुद्धय इत्याह-दुष्प्रजा इति । एवं मदभिप्रायं सिद्धान्तं चाविदित्वा ब्राह्मणवाक्येष्वसूयां कृत्वा तानवजानन्ति तत्रापि मुख्यो गुरुः । तदवज्ञानेन पूजा फलति यतः सोऽहमेव अहं च पूजकस्यात्मा स्वरूपं तेनैत्मैवावज्ञात इति स्वार्थत्वात् सर्वस्य कथं तत्कर्तारः उत्तमा भवेयुः अर्चादौ अर्चा तीर्थक्षेत्रादिषु इज्यदृष्टयः पूज्यदृष्टयः व्यवस्थयैवार्चादिषु पूजा कर्तव्या न त्वव्यवस्थयेति भावः । स्नानालङ्करणं प्रेष्ठमर्चायामेवेति व्यवस्था ।।५५।। तथापि भगवत्सान्निध्यलक्षणो गुणः अर्चादावेव वर्तते इति जीवान्तरसम्बन्धेनाभिमानश्च नास्तीति दोषाभावसहितगुणस्य विद्यमानत्वादर्चैव ब्राह्मणादुत्कृष्टेति चेत्तत्राह-चराचरमिति । ब्राह्मणे सर्वमस्ति स हि स्वात्मनि सर्वं विश्वं ज्ञानेन मन्यते —

"मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् । मयि सर्वं लयं याति तद्ब्रह्माक्षरमव्ययम् ॥

अणोरणीयानहमेव विष्णुः॥" इत्यादिश्रुतेः ॥

"यावतीर्वै देवतास्ताः सर्वाः वेदविदि ब्राह्मणे वसन्ति ।" इति च ॥

तदाह-इदं चराचरं विश्वम् अस्य च मूलभूताः ये भावाः एतत्कार्याणि वा ये चास्य हेतवः कारणभूतानि तत्त्वान्येतानि सर्वाण्येव भगवद्रूपाणि इति चेतसि विप्रः आधत्ते । अत एव विप्रः विशेषेणात्मानं पूरयतीति 'प्रा पूरणे' इति तत्रापि मदीक्षया मम ईक्षा भगवत्साक्षात्कारः भगवन्तं स्थापयित्वा भगवद्रूपाण्यपि स्थापयति । अथवा आदौ मत्साक्षात्कारे जाते स्वात्मनि मां पश्यति । तत्र मयि चराचरं च पश्यतीति ब्राह्मणे चराचरं सर्वमेव वर्तत इत्यर्थः ।।५६।। एवं ब्राह्मणोत्कर्षमुक्त्वा कर्तव्यमाह-तस्माद्ब्रह्मर्षीनेतानिति । एते च तादृशाः ब्राह्मणाः काण्डरूपनिष्णाता इति ब्रह्मर्षित्वात् त्वमपि तादृश एव अतस्त्वया चेन्नाङ्गीक्रियते तदा अन्योऽपि नाङ्गीकरिष्यतीति ज्ञापितम् । किञ्च एकस्मिन् ब्राह्मणे यथाकथञ्चिदर्चिते अहं नानाविभूतिभिः अर्चितो भविष्यामि एवमुपदिष्टस्तथैव कृतवानित्याह-स इत्थं प्रभुणादिष्ट इति । प्रभुत्वान्नान्यथाकर्तुं शक्यं ततः सहकृष्णान् भगवत्सहितान् अधिष्ठानरूपान् स्वभावतोऽप्युत्तमान् द्विजोत्तमान् एकान्तभावे अनन्यभक्त्या आराध्य सद्गतिमवाप । सतां या गतिस्तां भगवत्सायुज्यं प्राप्तवान् । तदानीमेवान्यदा वा मैथिलश्च देहान्ते भगवत्सायुज्यं प्राप्तवान् चकारात् तत्सम्बन्धिनोऽपि तथा तथा प्रवृत्ताः ।।५७-५८।।

दुष्प्रज्ञाः
पूज्यबुद्धयः ।।५५
आधत्ते चिन्तयति
साक्षादहमर्चितोऽ

ननु तर्हि
सत्स्वपि गुणेषु दो
तीर्थग्रहणम् । तत्रैव
तदपमानेन ममैव
एतत्सिद्धान्तज्ञाने
तवापमानम् इत्यपे
ये भावाः पदार्था
भावः ।।५६।। तस्
एवं चेत् तानर्चयसि
अर्चितो नैव भविष्

दुष्प्रज्ञा इ
तत्रैवेज्यदृष्टयः पूज्
।।५५।। चराचरमिति
तत्त्वानि तानि सर्वा
मत्सिद्धान्तस्यैवंविध
अद्धा साक्षादहमर्चि
एतानिति सर्वभक्तोप

अस्य विश्
विप्रः चेतसि अन्त
अन्यथा भूतिभिः ब
एकान्तिकधर्मम् अ

एवं चेत् के
देहात्माभिमानिन इति
पूज्यताबुद्धिमन्तः जन
ज्ञानिनं विप्रं च अवज

श्रीसुबोधिनीसारः

दुष्प्रज्ञाः कुबुद्धयोऽसूयवो निन्दका विप्रं गुरुमात्मानं माम् एवमविदित्वाऽबुद्ध्वाऽर्चादौ प्रतिमादौ इज्यदृष्टयः पूज्यबुद्धयः ॥५५॥ चराचरमिदं विश्वम् अस्य विश्वस्य हेतवः कारणं महदादि मम रूपाणि इति सर्वत्र ममेक्षया चेतसि विप्र आधत्ते चिन्तयति ॥५६॥ तस्मात् हेतोः एतान् ब्रह्मर्षीन् मद्बुद्ध्या त्वमर्चय । हे ब्रह्मन् ! एवं चेत्करोषि तर्हि अद्धा साक्षादहमर्चितोऽस्मि । अन्यथा बहुसमृद्धिभिर्नार्चितोऽस्मि ॥५७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु तर्हि केचिद्ब्राह्मणान् कुतोऽवजानन्ति इत्यपेक्षायामाह–दुष्प्रज्ञा इति । एवं पूर्वोक्तं मम मतमविदित्वैव असूयवः सत्स्वपि गुणेषु दोषाविष्करणैकस्वभावा विप्रमवजानन्तीत्यन्वयः । कुत्र तेषां श्रद्धा इत्यपेक्षायामाह–अर्चा प्रतिमा, आदिपदेन तीर्थग्रहणम् । तत्रैवेज्यदृष्टयः पूज्यताबुद्धिमन्त इति । न च विप्रोऽपमानयोग्यः । तत्र हेतुमाह–गुरुमिति । वेदोक्तहितोपदेष्टारम् । तदपमानेन ममैवापमाननं भवति इत्याह–मामिति । एवं मदपमानेनात्मानमेवापकर्षन्ति इत्याह–आत्मानमिति । एतत्सिद्धान्तज्ञाने हेतुमाह–दुष्प्रज्ञा इति । दुष्टा प्रज्ञा बुद्धिर्येषां ते ॥५५॥ ननु ब्राह्मणापमानेन कथं स्वापमानं कथं वा तवापमानम् इत्यपेक्षायामाह–चराचरमिति । मदीक्षया मदुपासनया विप्रः चराचरात्मकमिदं विश्वं तथास्य विश्वस्य हेतवो ये भावाः पदार्था महदादीनि तत्त्वानि तानि सर्वाणि मद्रूपाणीति चेतसि धत्ते । अतस्तदपमानं सर्वापमाने पर्यवस्यति इति भावः ॥५६॥ तस्मात् मत्सिद्धान्तस्यैवंविधत्वात् हे ब्रह्मन् ! एतान् ब्रह्मर्षीन् मच्छ्रद्धया मयि या श्रद्धा आदरस्तेनार्चय । एवं चेत् तानर्चयसि चेत् अद्धा साक्षादहमर्चितोऽस्मि भवामि । अन्यथा एतदर्चनं विना तु भूरिभूतिभिः पुष्कलोपचारैरप्यर्चितः अर्चितो नैव भविष्यामि । एतान् इति सर्वभक्तोपलक्षणम् ॥५७॥

अन्वितार्थप्रकाशिका

दुष्प्रज्ञा इति । एवं पूर्वोक्तं मम मतमविदित्वैव असूयवः ब्राह्मणेषु दोषदर्शिनः अर्चा प्रतिमा, आदिपदेन तीर्थग्रहणं तत्रैवेज्यदृष्टयः पूज्यताबुद्धिमन्तः न तु ब्राह्मणेषु पूज्यबुद्धयः दुष्प्रज्ञा जना गुरुं पूज्यमात्मानं विप्रं विप्ररूपं माम् अवजानन्ति ॥५५॥ चराचरमिति । मदीक्षया मयैव सर्वत्रेक्षया चराचरात्मकमिदं विश्वं तथास्य विश्वस्य हेतवो ये भावाः पदार्था महदादीनि तत्त्वानि तानि सर्वाणि मद्रूपाणीति चेतसि आधत्ते । अतस्तदपमानं सर्वापमाने पर्यवस्यतीति ॥५६॥ तस्मादिति । तस्मात् मत्सिद्धान्तस्यैवंविधत्वात् हे ब्रह्मन् ! एतान् ब्रह्मर्षीन् मच्छ्रद्धया मयि या श्रद्धा आदरस्तेनार्चय । एवं चेत् तानर्चयसि चेत् अद्धा साक्षादहमर्चितोऽस्मि भवामि । अन्यथा एतदर्चनं विना तु भूरिभूतिभिः पुष्कलोपचारैरप्यर्चितो नैव भविष्यामि । एतानिति सर्वभक्तोपलक्षणम् ॥५७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्य विश्वस्य हेतवः ये भावाः महदादयः ते मद्रूपाणि मम शरीरभूता इति । मदीक्षया सर्वत्र ममान्तर्यामिरूपदर्शनेन विप्रः चेतसि अन्तःकरणे । आधत्ते अनुसन्धानं करोति ॥५५॥ एवं विप्रपूजनं कृतं चेत्तर्हि अहं साक्षादर्चितोऽस्मि । अन्यथा भूतिभिः बहुसमृद्धिभिः । अर्चितोऽपि नार्चितः ॥५६॥ एकात्मभावेन अनन्यभक्त्या आराध्य । सतां गतिं प्राप्यम् एकान्तिकधर्मम् आप प्राप्तवान् ॥५७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं चेत् केचित्त्वद्भक्तान् कुतो वावमन्यन्ते कुतो वा देवादीन् भजन्ते इत्यत आह ॥ दुष्प्रज्ञा इति ॥ दुष्प्रज्ञाः दुरहङ्काराः देहात्माभिमानिन इति यावत् । अत एव असूयवः सत्स्वपि गुणेषु दोषाविष्करणैकशीलाः अत एव अर्चादावेवेज्यदृष्टयः पूज्यताबुद्धिमन्तः जनाः एवमित्थम्भूतान्मद्भक्तजनान् अविदित्वा मां मदात्मकं गुरुं आत्मानं 'ज्ञानीत्वात्मैव मे मतम्' इत्युक्तविधं ज्ञानिनं विप्रं च अवजानन्ति ॥५५॥ ज्ञानिनो दृष्टिस्त्वन्यादृशी चेत्याह ॥ चराचरमिति ॥ चराचरं चराचरात्मकम् इदं विश्वं तथा अस्य

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विश्वस्य हेतवः ये भावः महदादयः पदार्थाश्च तान्येतानि सर्वाणि मद्रूपाणि इति विप्रः मदीक्षया मद्विषयकज्ञानेन मदात्मकत्वबुद्ध्येत्यर्थः । चेतसीति शेषः । धत्ते वै । विषयीकरोत्येव ॥५६॥ अस्त्वेवं ततः किमत एवाह ॥ तस्मादिति॥ तस्मान्मद्भक्तानामित्थम्भूतत्वात् हे ब्रह्मन् ! एतान् ब्रह्मऋषीन् मच्छ्रद्धया मयीवात्यादरेणेत्यर्थः । अर्चय पूजय । एवं चेदित्थमर्चयसि चेत् अद्धा साक्षात् अहम् एव अर्चितः अस्मि । अन्यथा मद्भक्तार्चनं विना तु भूरिभूतिभिः पुष्कलोपचारैः अर्चितोऽप्यहं नार्चित एव । ऋषीनेतानिति स्वभक्तमात्रोपलक्षणम् ॥५७॥

कृष्णप्रिया

दुर्बुद्धि मनुष्य इस बातको न जानकर केवल मूर्ति आदिमें ही पूज्य बुद्धि रखते है, और गुण में दोष निकालकर मेरे स्वरुप जगतगुरु ब्राह्मण का जो कि उनका आत्मा ही है, तिरस्कार करते है ॥५५॥ ब्राह्मण मेरा साक्षात्कार करके अपने चित्तमें यह निश्चय कर लेता है कि यह चराचर जगत्, इसके सम्बन्धकी सारी भावनाएं और इसके कारण प्रकृति महतत्त्वादि सब के सब आत्मस्वरुप भगवान के ही रुप है ॥५६॥ इसलिये श्रुतदेवजी ! तुम इन ब्रह्मर्षियोंको मेरा ही स्वरुप समझकर पूरी श्रद्धासे इनीक पूजा करो । यदि तुम ऐसा करोगे तब तो तुमने साक्षात् अनायास ही मेरा पूजन कर लिया, नही तो बडी बडी बहुमूल्य सामग्रियोंसे भी मेरी पूजा नहीं हो सकती ॥५७॥

श्रीशुक[1] उवाच

स इत्थं प्रभुणाऽऽदिष्टः सहकृष्णान् द्विजोत्तमान् । आराध्यैकान्त[2]भावेन मैथिलश्चाप [3]सद्गतिम् ॥५८॥
एवं स्वभक्तयो राजन् भगवान् भक्तभक्तिमान् । उषित्वाऽऽदिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे श्रुतदेवानुग्रहो नाम [5]षडशीतितमोऽध्यायः ॥८६॥

कर्दमक्षमा

इत्थम्, प्रभुणा, आदिष्टः, सः, मैथिलः, सहकृष्णान्, द्विजोत्तमान्, एकान्तभावेन, आराध्य, सद्गतिम्, आप ॥५८॥
राजन्, स्वभक्तयः, भक्तभक्तिमान्, भगवान्, एवम्, उषित्वा, सन्मार्गम्, आदिश्य, पुनः, द्वारवतीम्, अगात् ॥५९॥

॥ श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे षडशीतितमाऽध्यायाऽन्वयनिरूपणम् ॥८६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सतां वेदानां त्रिकाण्डविषयाणां प्रवृत्तिप्रकारमादिश्य ॥५९॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां षडशीतितमोऽध्ययः ॥८६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्थमुक्तरीत्या । स श्रुतदेवः । सहस्य सादेशो बाहुलकत्वान्न । एकात्मभावेनाभेदभावेन विप्राः श्रीकृष्णस्वरूपाः श्रीकृष्णश्च विप्ररूप इत्येवंरूपेण । मैथिलो बहुलाश्वश्च । तद्गतिं श्रीकृष्णसारूप्यम् ॥५८॥ एवमुक्त्वा । भक्तानां भक्तिर्विद्यते यस्य स तथा । भक्तेषु प्रसादलक्षणस्नेहवान् । त्रिकाण्डविषयाणां कर्मोपास्तिज्ञानरूपत्रिकाण्डविषयाणां ॥५९॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे षडशीतितमोऽध्यायः ॥८६॥

---

[1] बादरायणिरुवाच-गो. प्रे. टी. । [5] कात्म-श्रीधर. वंशी. वीर. ; कान्त-विज. । [6] तुर्गति-विज. । [7] पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. टी.।

एतमुप
निजेश्वरेणेति तदादे
भक्त्या आराध्य त
कृत्वा उषित्वा तयं

॥ इति श्रीम

एतमुपदे
निजेश्वरेणेति तदादे
भक्त्या आराध्य त
कृत्वा उषित्वा तयो

॥ इति श्रीमद्भाग

॥ इति श्

इत्थमिति
एवमिति । भक्तेषु भ
मार्गम् अनुष्ठेयधर्मप्र

॥ इति श्रीमद्भागव

भक्तेषु प्रस

॥ इति श्रीमद्भ

॥ इति श्रीमद्भ

॥ इति श्रीमद्भाग

॥ इति श्रीम

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एतमुपदेशं बहुलाश्वेऽपि श्रीभगवांश्चकारेत्यतिदिशन्नुभयोरन्तिमं फलमप्याह-स इति। स विप्रश्च मैथिलो नृपश्च प्रभुणा निजेश्वरेणेति तदादेशे विश्वासादिकं बोधयति। सह साहित्येन कृष्णद्विजोत्तमान् तं तांश्च एकात्मभावेन एकचित्तत्वेन तुल्यप्रयत्नतया भक्त्या आराध्य तस्य तेषां च गतिं नित्यलोकम् ॥५८॥ सतां सन्तं वं मार्गं स्वभक्तभक्तिप्रधानस्वभक्तियोगलक्षणमादिश्य किं कृत्वा उषित्वा तयोः प्रीत्यर्थं चिरं तत्रावस्थाय यतो भक्तेषु भक्तिरादरः प्रेमलक्षणा वा तद्वान् ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां षडशीतितमोऽध्यायः ॥८६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एतमुपदेशं बहुलाश्वेऽपि श्रीभगवांश्चकारेत्यतिदिशन्नुभयोरन्तिमं फलमप्याह-स इति। स विप्रश्च मैथिलो नृपश्च प्रभुणा निजेश्वरेणेति तदादेशे विश्वासादिकं बोधयति। सह साहित्येन कृष्णद्विजोत्तमान् तं तांश्च एकात्मभावेन एकचित्तत्वेन तुल्यप्रयत्नतया भक्त्या आराध्य तस्य तेषां च गतिं नित्यलोकम् ॥५८॥ सतां सन्तं वं मार्गं स्वभक्तभक्तिप्रधानस्वभक्तियोगलक्षणमादिश्य किं कृत्वा उषित्वा तयोः प्रीत्यर्थं चिरं तत्रावस्थाय यतो भक्तेषु भक्तिरादरः प्रेमलक्षणा वा तद्वान् ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिण्यां षडशीतितमोऽध्यायः ॥८६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥५३-५९॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये षडशीतितमोऽध्यायः ॥८६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थमिति। प्रभुणा भगवता आदिष्टः स श्रुतदेवः ऐकात्म्यभावेन परमात्म्यबुद्ध्या आराध्य सतां गतिं मुक्तिमवाप ॥५८॥ एवमिति। भक्तेषु भक्तिः प्रीतिः सा अस्यास्तीति तथा स भगवान् हे राजन्! स्वभक्तयोः श्रुतदेवबहुलाश्वयोः सन्मार्गं सतां साधूनां मार्गम् अनुष्ठेयधर्मप्रकारमादिश्योपदिश्य कतिपयदिनान्युषित्वा च पुनर्द्वारवतीं ययौ ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां षडशीतितमोऽध्यायः ॥८६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

भक्तेषु प्रसादलक्षणस्नेहवान् ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां षडशीतितमोऽध्यायः ॥८६॥

(श्रीविजयध्वजतीर्थरीत्या एकनवतितमोऽध्यायः ॥९१॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥४५-५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे षडशीतितमोऽध्यायः ॥८६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे षडशीतितमोऽध्यायः ॥८६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५९॥

॥ इति श्रीमद्भागवते महापुराणे श्रीनाथचक्रवर्तिविरचितायां चैतन्यमञ्जूषायां षडशीतितमोऽध्यायः ॥८६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ऐकात्म्यम् एकमनस्त्वं तद्रूपो यो भावस्तेन यद्वा, कृष्णतत्सङ्गिविप्रयोर्यदैकात्म्यमैक्यं तद्भावनया ॥५८॥ सन्मार्गं सतां भक्तानां मार्गं भगवद्विषयकं भक्तियोगम् ॥५९॥

॥ इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । षडशीतितमोऽध्यायो दशमेऽजनि सङ्गतः ॥८६॥

गूढार्थदीपिनी

आदिष्टः श्रुतदेवो मैथिलश्च तान् सर्वान् आराध्य सम्पूज्य सद्गतिं भगवन्तं प्राप्तवान् ॥५८॥ भक्तेषु भक्तिमान् प्रीतिमान् भगवान् स्वभक्तयोः सतां वेदानां मार्गं ब्रह्मपरत्वमुपदिश्य कतिपयदिनानि मिथिलायामुषित्वा पुनः द्वारवतीमगात् ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे गूढार्थदीपिन्यां षडशीतितमोऽध्यायः ॥८६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एवं स्वभक्तयोः श्रुतदेवबहुलाश्वयोः समीपे उषित्वा सन्मार्गं सतां साधूनां मार्गम् अनुष्ठेयं धर्मं स्वभक्तभक्तिं श्रुतदेवायादिश्य पुनर्द्वारवतीमगात् अनेन श्रुतदेवस्य हरिभक्तेषु पूर्वं भक्तिरल्पेति गम्यते ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे षडशीतितमाध्यायार्थप्रकाशः ॥८६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भगवच्चरित्रमुक्त्वा चरित्रान्तरकथनार्थं पुनर्भगवतः प्रत्यापत्तिमाह–एवं स्वभक्तयोरिति । राजन्निति विश्वासार्थं भक्तेषु भक्तिमानिति स्वतो गत्वा करणे हेतुः मैथिलवाक्यान्मैथिलगृहे उषित्वा श्रुतदेववाक्यात्तस्मै सन्मार्गमादिश्य सतां गतिर्भगवान् तत्र मार्गभूता ब्राह्मणा इति तेषां भजनमादिश्य पुनः प्रस्थानमागत इत्यर्थः ॥५९॥

॥ इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धविवरणे सप्तत्रिंशाध्यायविवरणम् ॥३७॥ ॥८६॥

श्रीसुबोधिनीसारः

शुकोक्तिः । एवं प्रभुणादिष्टः कृष्णेनाज्ञप्तः सहकृष्णान् कृष्णसहितान् विप्रश्रेष्ठान् एकात्मभावेन ब्रह्मभावनयाऽराध्योपास्य मैथिलो राजा चाद्विप्रः सद्गतिं मोक्षमाप ॥५८॥ शुकोक्तिः । हे राजन् ! एवं भक्तभक्तिर्विद्यते यस्य स भगवान् मिथिलायामुषित्वा स्वभक्तयोः स्वभक्ताभ्यां सन्मार्गं ब्रह्मज्ञानम् आदिश्योपदिश्य पुनर्द्वारकामयात् ॥५९॥

॥ इति श्रीमद्भा० दशमस्कन्धे उ० सुबो० टीकायां षडशीतितमोऽध्यायः ॥८६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रभुणा श्रीकृष्णेनेत्थमादिष्टः स श्रुतदेवो मैथिलो बहुलाश्वश्च कृष्णेन सहितान् द्विजोत्तमान् एकात्मभावेन अभेददृष्ट्या आराध्य सतां गतिं भगवन्तमेवाप ॥५८॥ भक्तेषु भक्तिमान् प्रीतियुक्तो भगवान् हे राजन् ! स्वभक्तयोः श्रुतदेवबहुलाश्वयोः सन्मार्गं सतां साधूनां मार्गम् अनुष्ठेयं भक्तिप्रकारमादिश्य कतिपयदिनानि मिथिलायामुषित्वा पुनर्द्वारवतीमगात् ॥५९॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥

श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥

रचिता दशमे तत्र भगवद्गुणवर्णने । षडशीतितमो यातः सतां मार्गनिरूपकः ॥३॥ ॥८६॥

स इति ।

अभेददृष्ट्या आराध्य

श्रुतदेवबहुलाश्वयोः स

कतिपयदिनानि मिथि

॥ इ

भक्तानां भक्ति

मार्गम् अनन्यभक्त्या पू

प्रवृत्तिप्रकारमादिश्येत्ये

तत्कृतेऽर्थे पूर्वापरविरोध

॥ इति श्रीशुद्धै

श्रीमद्

स इत्थमिति ॥

द्विजोत्तमान् एकात्मभावेन

राजन्! एवं भक्तेषु भक्तिः

आदिश्योपदिश्य उषित्वा

श्रीरघुवीराचार्यसू

श्रीशुकदेवजी

भगवान श्रीकृष्ण और

प्राप्त हो गये । राजा ब

की भक्ति करते है, वैसे

कुछ दिनों तक मिथिला

॥ इति श्रीमद्भागव

अन्वितार्थप्रकाशिका

स इति । प्रभुणा श्रीकृष्णेनेत्थमादिष्टः स श्रुतदेवो मैथिलो बहुलाश्वश्च कृष्णेन सहितान् द्विजोत्तमान् एकात्मभावेन अभेददृष्ट्या आराध्य सतां गतिं भगवन्तमेवाप ॥५८॥ एवमिति । हे राजन् ! भक्तेषु भक्तिमान् प्रीतियुक्तो भगवान् स्वभक्तयोः श्रुतदेवबहुलाश्वयोः सतां स्वतः प्रमाणभूतानामप्रामाण्यकारणरहितानां वेदानां मार्गं निराकारसाकारोभयविधब्रह्मपरत्वमुपदिश्य कतिपयदिनानि मिथिलायामुषित्वा पुनर्द्वारवतीमगात् ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमेऽन्वितार्थप्रकाशिकायां षडशीतितमोऽध्यायः ॥८६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भक्तानां भक्तिर्विद्यते यस्मिन्निति यद्वा भक्तेषु भक्तिरनुरागोऽस्यास्तीति भक्तभक्तिमान् भगवान् सतां नारदादिसाधुपुरुषाणां मार्गम् अनन्यभक्त्या पूजनाचरणरूपं वर्त्म आदिश्य उपदिश्य । इत्ययं समञ्जसोऽर्थः केचन सन्मार्गं सतां वेदानां त्रिकाण्डविषयाणां प्रवृत्तिप्रकारमादिश्येत्येवमर्थं कुर्वन्ति । सोऽसमञ्जस एव यतोऽत्र श्रीकृष्णकृतोपदेशो साधुजनपूजनाचाररूपमार्गस्य प्रदर्शितत्वात् तत्कृतेऽर्थे पूर्वापरविरोधप्रसङ्गाच्च ॥५८॥

॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने श्रुतदेवनृपानुग्रहो नाम षडशीतितमोऽध्यायः ॥८६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स इत्थमिति ॥ इत्थममुना प्रकारेण प्रभुणा श्रीकृष्णेन भगवता आदिष्टोऽनुशासितः स श्रुतदेवः सहकृष्णान् श्रीकृष्णसहितान् द्विजोत्तमान् एकात्मभावेन परमात्मबुद्ध्या आराध्य सः मैथिलश्च सद्गतिं सतां गतिरूपां मुक्तिम् आप अवाप ॥५८॥ एवमिति ॥ हे राजन्! एवं भक्तेषु भक्तिः प्रीतिरस्यास्तीति भक्तभक्तिमान् भगवान् स्वभक्तयोः श्रुतदेवबहुलाश्वयोः सतां साधूनां मार्गमनुष्ठेयधर्मप्रकारम् आदिश्योपदिश्य उषित्वा कतिपयदिनानि तत्र निवासं कृत्वा च पुनः द्वारवतीं द्वारकां अगात् आगतवान् ॥५९॥

॥ इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुत-श्रीरघुवीराचार्यसूनुभगवत्प्रसादविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धे षडशीतितमोऽध्यायः ॥८६॥

कृष्णप्रिया

श्रीशुकदेवजी कहते है - हे राजन् ! भगवान श्रीकृष्ण का यह आदेश प्राप्त कधारके श्रुत देवने भगवान श्रीकृष्ण और उन ब्रह्मर्षियोंकी एकात्मभावसे आराधना की तथा उनकी कृपासे वे भगवत्स्वरूपको प्राप्त हो गये । राजा बहुलखजी ने भी वही गति प्राप्त की ॥५८॥ प्रिय राजा परीक्षित् ! जैसे भक्त भगवान की भक्ति करते है, वैसे भगवान भी भक्तों की भक्ति करते है । वे अपने दोनोंभक्तो को प्रसन्न करने के लिये कुछ दिनों तक मिथिलापुरीमें रहे और न्हें साधु पुरुषोंके मार्ग का उपदेश करके वे द्वारका लौट आये ॥५९॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे **षडशीतितमाध्यायस्य** भाषाटीका समाप्ता ॥८६॥

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

श्रीश्रुतिस्तुतिः

॥ अथ सप्ताशीतितमोऽध्यायः[१] ॥

श्लोकाः	अनु.	नर्कु.	शा.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.
५०	२१	२८	१	८	२६५२	५०	५२	२७५४	८६

[२]परीक्षिदुवाच

ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः । कथं चरन्ति श्रुतयः साक्षात् सदसतः परे ॥१॥

कर्दमक्षमा

परीक्षित्, उवाच ।

हे ब्रह्मन्, !, अनिर्देश्ये, निर्गुणे, सदसतः, परे, ब्रह्मणि, गुणवृत्तयः, श्रुतयः, साक्षात्, कथम्, चरन्ति ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

श्रीनृसिंहाय नमः ॥

सप्ताशीतितमे नारायणनारदवादतः । वेदैः स्तुतिर्गुणालम्बा निर्गुणावधि वर्ण्यते ॥

वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि । यस्याऽऽस्ते हृदये संवित्तं नृसिंहमहं भजे ॥

सम्प्रदायविशुद्ध्यर्थं स्वीयनिर्बन्धयन्त्रितः । श्रुतिस्तुतिमितव्याख्यां करिष्यामि यथामति ॥

श्रीमद्भागवतं पूर्वैः सारतः सन्निषेवितम् । मया तु तदुपस्पृष्टमुच्छिष्टमुपचीयते ॥

पूर्वाध्यायान्ते —

''एवं स्वभक्तयो राजन् भगवान् भक्तभक्तिमान् । उषित्वाऽऽदिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥''

---

[१] अयमध्यायः चतुर्नवतितमः-विज.

[२] विष्णुरात उवाच-गो. प्रे. टी. ।

इत्यत्र सन्मार्गं सतां स्वतः प्रमाणभूतानामप्रामाण्यकारणसहितानां वेदानां मार्गं ब्रह्मपरत्वमुपदिश्य भगवानगादित्युक्तं तत्र ब्रह्मपरत्वमघटमानं मन्वानः पृच्छति–ब्रह्मन्निति । तत्र तावत् मुख्यालक्षणागुणभेदेन त्रिधा शब्दप्रवृत्तिः मुख्याऽपि रूढियोगभेदेन रूढिश्च स्वरूपेण जात्या गुणेन वा निर्देशार्हे वस्तुनि संज्ञासंज्ञिसङ्केतेन प्रवर्तते, यथा डित्थो गौः शुक्ल इति लक्षणा च तेनैव भिहितार्थसम्बन्धिनि यथा गङ्गायां घोष इति गौणीचाभिहितार्थलक्षितगुणयुक्ते तत्सदृशे यथा सिंहो देवदत्त इति यथाऽऽहुः–

"अभिधेयाविनाभूतप्रवृत्तिर्लक्षणेष्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ॥" इति ।

योगवृत्तिस्तु एतत्त्रित्त्रिविधवृत्तिप्रतिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्वा योगेन यथा पङ्कजमौपगवः पाचकः इत्यादि तत्र णि रूढिवृत्तिर्न सम्भवतीत्याह साक्षात्कथं चरन्तीति तत्र हेतुः अनिर्देश्ये अनिर्देश्यत्वेऽपि हेतुं वदन् गुणवृत्तिं निराकरोति, गुणवृत्तय इति । गुणैर्वर्तमानाऽपि निर्गुणे कथं चरन्तीत्यर्थः । निर्गुणत्वे च हेतुं वदन् लक्षणां योगञ्च निराकरोति सदसतः पर कार्यकारणाभ्यां परस्मिन्नसङ्गे केनचिदपि सम्बन्धाभावान्न लक्षणायोगवृत्ती सम्भवत इत्यर्थः । एवं पदार्थत्वायोगादपदार्थस्य र्थत्वायोगान्न श्रुतिगोचरत्वं ब्रह्मण इत्यभिप्रायः ॥१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

नारायणनारदयोर्वादतः [तत्त्वबुभुत्सोः कथा वादः, स चाष्टनिग्रहस्थानानामधिकरणम् । तानि च धिकापसिद्धान्तहेत्वाभासपञ्चकं चेत्यष्टौ । यथा–स्वसिद्धान्तसिद्धान्तितानामवयवानां मध्ये यत्किंचिदेकस्यावचनं तन्न्यूनम्, त्ववयवाश्चत्वारो द्वौ वेति । हेतूदाहरणाधिक्यमधिकम्, यथा–नित्यः शब्दः श्रावणत्वाच्छब्दत्वाद्वेति । एकसिद्धान्तमाश्रित्य वृत्तौ तद्विरुद्धसिद्धान्तमालम्ब्योत्तरदानमपसिद्धान्तः, यथा–इन्द्रं द्रव्यं जगदेकप्रकृतिविकारत्वात्, पिण्डप्रकृतिकशराववदिति । साङ्ख्यमतमालम्ब्य प्रयुङ्क्ते का प्रकृतिः को विकार इति प्रतिवादिना पृष्टे यस्मिन्नवस्थिते धर्मिणि र्मनिवृत्तौ धर्मान्तरमुत्पद्यते सा प्रकृत्तिः । यो धर्मो निवर्तते उत्पद्यते च स विकार इत्युत्तरमपसिद्धान्तः । तन्मतेऽसत नास्ति, किन्त्वाविर्भावतिरोभावमात्रं कार्यकारणयोरभेदः । कारणरूपेण सूक्ष्मतयाऽवस्थानं तिरोभावः, कार्यरूपेण तयाऽवस्थानमाविर्भाव इति । सत्कार्यवादिमते, प्रकृतिविकारयोर्भेदाभावादनुमानमिदं न सिद्ध्यति । असतः कार्यतावादे सिद्धान्त इति । हेत्वाभासेषु बहुवक्तव्यत्वात्तेऽत्र नोक्तास्तज्ज्ञैस्तेऽनुसन्धेयाः । तिष्ठत्वेतत् । वादत इति तृतीयार्थे तसिः । तथा च संवादेनेत्युक्तम् । वादशब्दस्य संवादवाचकत्वं तूपसर्गस्य त्रिधा गतित्वाद्वाद एव संवाद इति । इह समुपसर्गो धातुस्थमेव र्थं द्योतयति । "धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्तते । विशिनष्टि तमेवार्थमुपसर्गगतिस्त्रिधा ॥" इति वाक्यात् वादपदयोरेकार्थतैव । अत एव तत्त्वस्य याथात्म्यस्य बुभुत्सोर्बुद्धुमिच्छोः कथाऽन्योऽन्यप्रश्नोत्तरादिकथनं वादः संवाद] संवादेन । गुणान्कल्याणगुणानालम्बते विषयीकरोति या सा गुणालम्बा । निर्गुणोऽवधिर्यस्मिंस्तद्यथा भवति तथा (१) । स्वेष्टदेवं स्मरति–वागीशेति । वागीशा सरस्वती । संवित्सम्यग्ज्ञानम् (२) । सम्प्रदायो भक्तिरसाविघातः । स्वीयनिर्बन्धोऽहं व्याख्यास्य इति हठस्तेन यन्त्रितो बद्धः (३) । पूर्वैर्हनुमच्छङ्कररचित्सुखादिभिः । सारतः सारेण याथातथ्येन । व्याख्यातम् । तदुपस्पृष्टम् । त्यक्तं सुगमत्वान्न व्याख्यातम् । उच्छिष्टमवशिष्टमुपचीयत एकत्र सम्पाद्यते (४) । अप्रामाण्ये सहितानामिति–पुरुषवाक्यानामप्रामाण्यं भ्रम–प्रमाद–विप्रलिप्सा–करणापाटवरूपदोषचतुष्टयेन पुरुषबुद्धेर्दूषितत्वात् । भ्रमः प्रमादोऽनवधानता, विप्रलिप्सा लोभाधिक्यम्, करणापाटवं रोगादिनेन्द्रियाणां स्वविषयग्रहणे सामर्थ्याभावः । वेदस्य वाक्यं वेद इति लक्षितत्वेन पौरुषेयत्वाभावादप्रामाण्ये कारणाभाव इत्यर्थः । वेदः प्रमाणमित्यत्र किं प्रमाणमित्यत स्वतः प्रमाणभूतानामिति । वेदे वेद एव प्रमाणमन्यथाऽनवस्था स्यादिति भावः । ततर भगवदुपदेशवाक्ये "वेदा विषयास्त्रिकाण्डविषया इमे" इति श्रीमुखोक्तिरूपे ब्ह्मपरत्वं केवलं ब्रह्मैव प्रतिपादयन्ति । वेदो भूतत्वमघटमानमसम्भवम् । किञ्चात्रान्यदपि प्रश्नबीजं ध्येयम्–पूर्वाध्याये "सर्ववेदमयो विप्रो सर्ववेदमयो ह्यहम्" स्वयमेव भगवता वेदप्रमेयत्वमुक्तम् । ब्रह्मरातेनापि तस्मिन् श्रीकृष्णाख्ये भगवति परब्रह्मत्वं तत्रतत्रावधारितम् । 'गूढं परं ब्रह्ममनुष्यलिङ्गम्' इति । 'परं ब्रह्म नराकृति' इति । 'तदमितं ब्रह्माद्वयं शिष्यते' इति ।

‘तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयम्’ इति । ‘यन्मित्रं परमानन्दं पूर्णं ब्रह्मसनातनम्’ इत्यादिषु । अतस्तत्रैव वेदप्र सन्दिह्य पृच्छति–ब्रह्मन्निति । ‘ब्रह्मविद्ब्रह्मैव’ इति श्रुतेस्त्वमपि साक्षाद्ब्रह्मैव, वेदरूप एवेत्युत्तरकथने सामर्थ्य सम्बुद्ध्यभिप्रायः । तत्र तावत्सकलवेदादिशास्त्रे मुख्याद्यष्टशब्दवृत्तयः सन्ति । संज्ञा शब्दः, सञ्ज्ञी चार्थसङ्केतः शक्तिः । अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छातो भवति । शक्तेस्तु शब्दशब्दार्थोभयनिष्ठत्वात् संज्ञासंज्ञिसङ्केतत्वम् । स्वरूपेणारूढस्योदाहरणम्–डित्थ इति । छिन्नवृक्षस्य मूलभागो डित्थ इत्युच्यते । डित्थशब्दः संज्ञा, तद्वाच्यं छिन्नवृक्षस्य सङ्केतेनायमेव डित्थ इति रूढ्या प्रतीयते । समुदायशक्तिः रूढिः । न त्वत्रावयवकल्पनयार्थप्रतीतिरिति । एवं डवित्थोऽपि वल्मीककीटसमुद्धृतबृहन्मृत्पिण्डो डवित्थः । सुपद्मव्याकरणे तु —‘डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः’ इत्यु कलापटीकायां तु — ‘श्यामरूपो युवा विद्वान्सुस्वरः प्रियदर्शनः । सर्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते ॥’ इत्थमुक्तम्, त्विमौ शब्दौ जातिरूढ्युदाहरणत्वेन ज्ञेयौ । जातिरूढस्योदाहरणं गौरिति । जातेर्लक्षणं च– नित्यमेकमनेकसमवेतं सामान्य तच्च परापरपरापरभेदेन त्रिधा । सकलसामान्यव्यापकं परं सत्ता, सामान्यान्तरव्यापकमपरम्, परिमाणभेदेन भि बाल्यकौमारादियुक्तशरीरेषु देवदत्तत्वादि । कस्यचित्सामान्यस्य व्यापकं कस्यचित्सामान्यस्य व्याप्यं चान्त्यं द्रव्यत्वादि । पृथिवीत्वादि घटत्वादेर्व्यापकं सत्ताव्याप्यं च तदिति । तथा च–गोशब्दो हि गोत्वजातिविशिष्टपिण्डस्य वाचकः । सा गोत्वम्, एवं महिषादिरपि । गुणरूढस्योदाहरणम्–शुक्ल इति । शुक्लशब्दस्तु शुक्लगुणवाचकः, तथा रक्तपीतादिः । रूढिवृत्तिमु लक्षणावृत्तिमाह–लक्षणा चेति । तेनैव संज्ञासंज्ञिसङ्केतेनाभिहितो यो गङ्गादिरूढोऽर्थः प्रवाहस्तत्सम्बन्धिनि तीरादौ । मुख्यार्थ गौणार्थकल्पनं लक्षणा । तथा च– गङ्गायां घोषो वसतीत्युक्ते गङ्गाशब्देन लक्षणया तीरमुच्यते, गङ्गातीरे घोषो वसतीत्यर्थः अभीरपल्ली स्यात्’ इत्यमरः । तथा वटेषु गावो दुह्यन्ते इत्यादिकं ज्ञेयम् । गुणवृत्तिमाह – गौणी चेति । अभिहितो वाच्यो सिंहादिशब्दस्य सिंहादिरूपः पिण्डः । तत्र लक्षिता ये विक्रमादिगुणास्तद्युते दवदत्ते तत्सदृशे तद्गुणयोगात् । अयं देवदत्तः गुणयोगादिति । एवमयं देवोऽयं राक्षस इत्यादिकं ज्ञेयम् । लक्षणागौणीवृत्त्योर्लक्षणं वृत्तिकारभट्टवाक्येनाह–यथाहुरिति ।

“अभिधेयाविनाभूतप्रवृत्तिर्लक्षणोच्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टात्तु गौणता ॥” अभिधेयेन मुख्यया गङ्गादिशब्दवाच्येनार्थेन गङ्गादिस्वरूपेणाऽविनाभूतेन सार्द्धं शब्दसम्बन्धिनि तीरादौ गङ्गादिशब्दस्य या प्रवृत्तिर्व्यापारः लक्षणेत्यर्थः । यद्वा अभिधेयस्य वाच्यार्थस्य योऽविनाभूततीरादौ सम्बन्धस्तस्य प्रवृत्तिर्लक्षणेति पूर्वार्धार्थः । परार्धं लक्ष्यमाणगुणैः अभिधेये सिंहादिरूपे ये गुणा विक्रमप्रसह्यकारित्वादयो लक्ष्यमाणास्तैर्योगात्सम्बन्धात्सादृश्याद्देवदत्ता सिंहादिशब्दस्य प्रवृत्तिस्तस्या गौणतेष्टेति । रूढिवृत्तिमुक्त्वा योगरूढिमाह–योगवृत्तिस्त्विति । रूढिर्लक्षणा गौणी चेति वृत्ति एतत्त्रिविधवृत्तिप्रतिपादितपदपदार्थयोः प्रकृतिप्रत्यययोगेन योगवृत्तिर्भवतीत्यर्थः । उदाहरणं पङ्कजादि योगरूढेरुदाहरण पङ्कजमिति । पङ्कशब्दोपपदजनधातुः प्रकृतिः, प्रत्ययः जनेर्डः पङ्काज्जायत इति योगरूढिवृत्तिः प्रतिपादितपदार्थत्वम् ।

अवयवसमुदायोभयशक्तिकमेकजातीयार्थप्रतिपादकं योगरूढम् । यथा–पङ्कजमवयवशक्त्या पङ्कजत्वेन रूपेण कम बोधयति समुदायशक्त्या च कमलत्वेन रूपेणात एव समुदायशक्तिरावश्यकी । पङ्कजमानयेत्युक्तौ शैवालादेरप्रतिपत्तेः । कि एव रूढित्वम् । तथा मण्डप इत्युक्ते बहिर्मन्दिरे रूढिः न तु मण्डं पिबतीति यः स मण्डपः । मण्ड ओदनाद्य रसः ‘सर्वरसाग्रे मण्डमस्त्रियाम्’ इत्यमरः ‘मण्डपोऽस्त्री जनाश्रयः’ इति च । औपगवः उप समीपे गावो यस्य उपगुस्तस्यापत्यमौपगवः । उपगुशब्दस्तावल्लक्षणया प्रवृत्तो बहुव्रीहेस्तथैव प्रतीतेः । बहुव्रीहौ तार्किकलक्षणैव स्वीकृता चित्रगुरित्यत्र गोपदं चित्रगोस्वामिलक्षकं चित्रपदं तात्पर्यग्राहकम्, तथात्राप्युपगुरिह गोपदं समीपगोस्वामिलक्षकम् तात्पर्यग्राहकमिति ध्येयम् । उपगोः प्रकृतेः तद्धितप्रत्ययोऽण् स च गोत्रापत्ये । ‘गोत्रं च चरणैः सह’ इति भाष्योक्तजाति तत्र सत्त्वाज्जातिरूढिवृत्तिप्रतिपादितपदार्थत्वम् । यद्वा–उपगुपदं जातौ लाक्षणिकम् । पाचक इत्यत्र प्रकृतिः पचधातुः ण्वुल् पचतीति पाचकः स च पचनादन्यत्रापि पाचक इत्युच्यते इति पाचकत्वगुणयोगात् । गुणवृत्तिप्रतिपादित आदिपदेनान्यदपि यथायथमूह्यम् । एवञ्चाष्टधा शब्दप्रवृत्तिरुक्ता । सा यथा–मुख्याया रूढेरुदाहरणं स्वरूपे जात्या गोर्गुणेन शुक्ल इति । लक्षणाया उदाहरणं गङ्गायां घोष इति । गौण्या उदाहरणं सिंहो देवदत्त इति ।

योगवृत्तेरुदाहरणं रूढ्या
तत्र तासांमध्ये तावदधु
इत्यर्थ इति–शब्दप्रवृत्तिर्मा
प्रकृतिप्रत्ययसम्बन्धरूपस
लक्षणायाः शक्यसम्बन्धि
एवमुक्तविधया पदार्थत्वा
पदार्थज्ञाने पदज्ञानमिव वा
पदकदम्बवाक्यरूपास्ति
ब्रह्मपरत्वमुपदिश्य भगव
ब्रह्मणो रूपादिरहितत्वेन त
तत्र सङ्गच्छते । तथा हि–
निराकरोति–साक्षादिति । ब्र
स्वरूपेण, जात्या, गुणेन व
छिन्नवृक्षमूलभागात्मकस्वरू
वेदानां प्रवृत्तिः । अनिर्देश्ये
गुणकर्मादीनां जात्यादिना निर्दे
एव गौणी वृत्तिः । यथा–सिंहं
धर्मस्यासत्त्वान्न गौणीत्याशयः
इत्यर्थः । शक्यसम्बन्धो लक्ष
ब्रह्मणश्च केनापि सम्बन्धाभाव
पदार्थयोः प्रकृतिप्रत्ययार्थयोर्वा
कर्दमजनिपदार्थयोः कर्दमापा
ण्वुल् । तथा चात्र पाककर्तृ
वैदिकशब्दत्वाद्धर्मादिसम्बन्धरी
सत्स्वेव वृत्तिः शक्तिलक्षणाद्या
धर्मसम्बन्धिन्येव वस्तुनि प्रवृ
श्रुतिभिर्निर्धर्मकब्रह्मणः प्रतिपा
सन्मार्गमादिश्येत्युक्तम् । आदेशे

“वदन्ति तत्तत्त्वविदस्त
केचिद्वस्तुनो निर्विशेषमेव मन्यमा
च तत्रान्तर्यामित्वमात्रशक्त्या भगव
परमधामादौ स्वयं विलसन्त्या व
तां च विना तत्कार्य्याभावात्
किञ्चने’त्यनयोर्निषेध्यांस्तदवधि

“न तस्य कार्य्यं करण

ज्ञानबलक्रिया च ” इति ॥

वृत्तेरुदाहरणं रूढ्या पङ्कजम्, जातिलक्षणया औपगवः । गुणेन पाचक इति । अथैतासां वृत्तीनां ब्रह्मण्यभावमाह-तत्रेति ।
तासांमध्ये तावदधुना चरन्ति गतार्था भवन्तीत्यर्थः । तत्र रूढ्यभावे गुणैर्मायामयैर्वस्तमानास्तत्प्रतिपादनपराः ।
र्थ इति-शब्दप्रवृत्तिर्मायामये भवति न तु मायाऽतीत इति भावः । इत्यर्थ इति- लक्षणायोगवृत्त्योरुभयोरपि शक्यसम्बन्धरूप-
कृतिप्रत्ययसम्बन्धरूपसङ्गापरपर्याययोगसम्बन्धशब्दघटितत्वादसङ्गे तयोः प्रवृत्तिर्न सम्पद्यत इति भावः । तथैवाह-केनचिदिति ।
क्षणायाः शक्यसम्बन्धविषयत्वात् । योगवृत्तेरपि प्रकृतिप्रत्ययार्थयोगविषयत्वान्न ते वृत्ती असङ्गे ब्रह्मणि प्रवर्तेते इति भावः ।
क्तविधया पदार्थत्वायोगाद्ब्रह्म न कस्यापि पदार्थोऽतोऽपदार्थं ब्रह्म तस्यापदार्थस्य ब्रह्मणो वाक्यार्थत्वं सुतरां न भवति ।
र्थज्ञाने पदज्ञानमिव वाक्यार्थज्ञाने पदार्थज्ञानस्यैव कारणत्वात् । श्रुतिगोचरत्वं श्रुतिप्रतिपाद्यत्वम् । इत्यभिप्राय इति-श्रुतिर्हि
कदम्बवाक्यरूपास्ति ब्रह्मणश्च तदर्थत्वायोगान्न तद्विषयतेति तात्पर्यम् ॥★॥ श्रीधरानुयायिनी । पूर्वाध्यायान्ते वेदानां
परत्वमुपदिश्य भगवानगादित्युक्तं, तच्चाघटमानं मत्वा राजा पृच्छति-हे ब्रह्मन्ब्रह्मणि श्रुतयः कथं चरन्तीति ।
णो रूपादिरहितत्वेन तत्र प्रमाणान्तराप्रसक्त्या श्रुत्यैव तत्सिद्धिं मन्यसे इति ब्रह्मविदर्थकेन ब्रह्मन्निति सम्बोधनेन द्योत्यते
न सङ्गच्छते । तथा हि-शक्तिर्लक्षणा गौणी चेति त्रिधा शब्दवृत्तिः । शक्तिरपि रूढियोगभेदेन द्विधा । तत्र प्रथमं रूढिं
करोति-साक्षादिति । ब्रह्मणि साक्षात्कथं चरन्तीत्यन्वयः । तत्र हेतुमाह-अनिर्देश्य इति । निर्देष्टुमनर्ह इत्यर्थः । रूढिर्हि
रूपेण, जात्या, गुणेन वा निर्देशार्ह एव । वस्तुनि संज्ञासंज्ञिसङ्केतेन प्रवर्तते, यथा-डित्थो गौः शुक्ल इति । अत्र क्रमेण
क्षमूलभागात्मकस्वरूपेण, गोत्वजात्या, श्वेतरूपेण च डित्थादिशब्दप्रवृत्तिः । ब्रह्मणि चाकारजातिगुणाभावान्न रूढ्या
नां प्रवृत्तिः । अनिर्देश्येऽपि हेतुं वदन् गौणीं निराकरोति-निर्गुण इति । निर्धर्मक इत्यर्थः । यथा श्रुतार्थे तु निर्गुणानामपि
कर्मादीनां जात्यादिना निर्देशप्रसिद्ध्या निर्गुणत्वस्यानिर्देश्यत्वसाधकत्वानुपपत्तिः स्यात् । वाच्यार्थवृत्तिगुणसदृशगुणात्मकधर्माधार
गौणी वृत्तिः । यथा-सिंहो देवदत्त इत्यत्र वाच्यार्थे सिंहे ये क्रौर्यादयो गुणास्तत्सदृशक्रौर्याधारो देवदत्तः । ब्रह्मणि च कस्यापि
स्यासत्त्वान्न गौणीत्याशयः । निर्गुणत्वेऽपि हेतुं वदन् लक्षणां योगं च निराकरोति-सदसतः पर इति । कार्यकारणाभ्यां परस्मिन्नसङ्ग
र्थः । शक्यसम्बन्धो लक्षणा, यथा-गङ्गायां घोष इति । अत्र गङ्गापदशक्यस्य प्रवाहस्य सम्बन्धिनि तीरे गङ्गापदस्य लक्षणा ।
णश्च केनापि सम्बन्धाभावान्न लक्षणा । अत एव न योगेऽपि रूढिलक्षणागौणीनां मध्ये कयाऽप्येकया वृत्त्या प्रतिपादितयोः
र्थयोः प्रकृतिप्रत्ययार्थयोर्वा योगेन योगवृत्तिः । यथा-पङ्कजमित्यत्र पदार्थयोर्योगेन योगः रूढ्या पङ्केति जेतिपदाभ्यां प्रतिपादितयोः
जनिपदार्थयोः कर्दमापादानकजनिकर्तृत्वरूपेण योगात् पङ्कजपदं कमले यौगिकम् । एवं पाचके पचिधातोः कृत्प्रत्ययो
। तथा चात्र पाककर्तृकत्वरूपेण प्रकृतिप्रत्ययार्थयोर्योगेन यौगिकत्वम्, तच्चासङ्गत्वादेव ब्रह्मणि न सङ्गच्छते । ननु
शब्दत्वाद्धर्मादिसम्बन्धरहितेऽपि शक्त्यतिशयेन श्रुतीनां प्रवृत्तिः स्यादित्याशङ्क्याह-गुणवृत्तय इति । गुणेषु धर्मेषु निमित्तभूतेषु
व वृत्तिः शक्तिलक्षणाद्या यासां ता गुणवृत्तय इत्यर्थः । लोके वेदे च शब्दार्थयोरैक्येन लौकिकशब्दवदेव वैदिकशब्दस्यापि
सम्बन्धिन्येव वस्तुनि प्रवृत्तिरुचिता । लोके वेदे च शब्दार्थयोर्भेदे तु शक्तिमहासम्भवेन वेदो मूक एव स्यादित्युभयथाऽपि
र्निर्धर्मकब्रह्मणः प्रतिपादनमशक्यमेव । तथा च केन प्रमाणेन ब्रह्मणः सिद्धिरिति राज्ञः प्रश्नः ॥★॥ तोषिणी — ॐ
मादिश्येत्युक्तम् । आदेशे च "तत्तु समन्वयात्" (१/१/४) इति न्यायेन वेदसमन्वयापेक्षा लभ्यते समन्वयपरा काष्ठा च —

"वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥" इत्युक्तलक्षणे परतत्त्व एव तच्च
वस्तुनो निर्विशेषमेव मन्यमानैर्ब्रह्मेति शब्द्यते । स्वाभाविकशक्त्यानन्तविशेषमेव मन्यमानैः श्रीभागवतैस्तु परमात्मेति भगवानिति
न्तर्यामित्वमात्रशक्त्या भगवानेव परमात्मेति शुद्धपरिपूर्णैश्वर्याद्यात्मिकया परमधामादौ स्वयं विलसन्त्या वशीकृतमायाशक्तिकया
मादौ स्वयं विलसन्त्या वशीकृतमायाशक्तिकया परमस्वरूपशक्त्या तु भगवानिति अद्वयत्वं च शक्तिमात्रं विना शक्तेरभावात्
विना तत्कार्य्याभावात् वस्त्वनन्तरात्यन्ताभावाच्चेति । एवमेव खलु 'एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति
त्यनयोर्निषेध्यांस्तदवधिभूतांश्चार्थान् स्वयमाह मन्त्रवर्णः

"न तस्य कार्य्यं करणं च विद्यते न तत्समश्चाभ्यतिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी
क्रिया च" इति ॥

तदेवं सति मध्यमं मतं नात्याक्षिप्य सर्वशक्तिविशिष्टपरब्रह्मणि श्रीभगवति देवस्य प्रवृत्तिं सम्मतां निर्विशेषब्रह्मण्यसङ्गतं मन्यमानः श्रीविणुराततत्वेन तद्गुणाद्यपलापनिन्दामसहिष्णुः श्रीमुनीन्द्राभ्युपगमेन स्वमतं पुपुक्षुः केवलतन्मात्रवेदार्थिन आक्षिपति-ब्रह्मन्निति। अथवा पूर्वोक्तं 'सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहमि'त्येवाक्षेपबीजं मन्तव्यम्। यतस्तत्र व्याख्यातं वेदानां श्रीभगवत्ये तात्पर्य्यमङ्गीकृत्य पूर्वरीत्या परमतमाक्षिपति-ब्रह्मन्निति तैर्व्याख्यातम्। तत्र गुणेन तावद्रूढिवृत्तिर्न सम्भवतीति 'निर्गुणं गुणवृत्त' इत्युक्तम्। गुणाः सत्त्वादयस्तत्कार्य्यभूताः शुक्लशीतादयश्च तदतीते इत्यर्थः। निर्गुणत्वादेव जातिनिर्देश्यत्वमपि निरस्तम्। गुणभेदत्वाज्जातेः तथा स्वरूपानिर्देश्यत्वं च निर्गुणत्वेनैव दृष्टश्रुतविलक्षणस्वरूपत्वात्। अत आनन्दादिपदैश्च न तन्निर्दिश्यते प्रसिद्धचित्तवृत्तिविशेषादावेव तेषां सङ्केतितत्वादिति तेषां मतम्। अतोऽर्थापत्तिसहितानि वृत्त्यन्तराणि च निर्गुणत्वादिभिर्निरस्तान्येवं स्वरूपभूतगुणाश्च तेषां मते न सन्तीति निर्विशेषब्रह्मणि तेषां वेदसङ्गतिर्न सम्भवत्येव। श्रीभागवतानां तु श्रीभगवते विलक्षणस्वरूपत्वेऽपि विलक्षणस्वरूपपरापौरुषेयतत्तच्छब्दवाच्यतया मायिकगुणासम्बद्धत्वेऽपि मायातीतानन्तगुणतया सदसद्भ्यां परत्वेऽपि तेन तयोरनुस्यूततया सर्वा अपि वृत्तयः श्रीभगवानिति मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहमिति 'वेदैश्च सर्वैरहमेव वेद्यः' इति च श्रीभगवत्सम्मत्या यथायथं सन्त्येव। 'यतो वाचो निवर्तन्ते' इत्यादिकं त्वानन्त्यादिपरमेव। केवलानाप्तौ य इत्यवधित्वनिर्देशो न घटते कर्मणा ज्ञानेन वा आप्तमेवावधिः क्रियते न त्वनाप्तमिति। अन्यथा यच्छब्देनापि निर्देष्टुं न शक्यते। अप्राप्येति तु प्रकर्षेणैवाप्तिं निषेधयति न त्वंशेनापि "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति" मन्त्रशेषे(ण) तु दर्शयिष्यते एव। ज्ञानेन तत्प्राप्तिः एतेन यद्वाचानभ्युदितमित्यपि व्याख्यातम्। अत्राप्यतिशब्दोऽस्तीति अभिशब्दप्रयोगात् अवचनेनैव प्रोवाचेत्ये यतो वाच इत्यभिप्रायमेव अनन्ततया वक्तुमशक्यत्वमेव तस्याः प्रवचनमिति ततश्च 'शास्त्रयोनित्वात्' इति 'श्रुतेस्तुशब्दमूलत्वात्' इति 'तर्काप्रतिष्ठानात्' इत्यादिभ्यः 'तं त्वौपनिषदं पुरुषं पृच्छामी'ति। 'नैषा तर्केण मतिरापनेया' प्रोक्तन्यायेन सुज्ञानाय प्रेष्ठत्वात् श्रुतेश्च शास्त्रैकप्रमाणत्वादस्त्येव सर्ववेदसङ्गतिर्न च प्रमाणान्तरप्रयुक्तदोषगन्धोऽपीति विवेचनीयं तस्मात्तैः सम्मते निर्विशेषे ब्रह्मणि कथं चरन्ति नैव चरन्तीत्यर्थः ॥★॥ पूर्वाध्यायान्ते सन्मार्गमादिश्य भगवानगादित्युक्तम्। तत्र सतां भक्तानां मार्गो हि भक्तियोगो भगवद्विषयकोऽवगम्यत एव। एवं सतां ज्ञानिनां ज्ञानयोगोऽपि ब्रह्मविषयक एव ज्ञातव्यः। किन्तु ब्रह्मणः श्रुतिप्रतिपादितत्वमेतावत् बुध्यत इत्यतः पृच्छति-ब्रह्मन्निति। ब्रह्मणि श्रुतयः कथं साक्षात् अव्यवधानेन अभिधया वृत्त्या चरन्ति। यतः अनिर्देश्ये निर्देष्टुमशक्ये जातिद्रव्यगुणक्रियासु मध्ये ब्रह्म किमपि न भवतीति तस्यानिर्देश्यत्वम्। तथा हि निर्गुणे गुणेभ्यः परस्मिन् सदसतः परे स पृथिव्यादि द्रव्यम् असत् अनिष्पन्नस्वभावं वस्तु क्रिया ताभ्यां परस्मिन् तथा तत्तदाश्रितत्वाज्जातेरपि परस्मिन्। यद्वा-सद्द्रव्यं असत् अद्रव्यं जातिः क्रिया च ततः परस्मिन् गुणवृत्तयः गुणैः प्रवृत्तिनिमित्तैः जात्यादिभिर्वर्तमानाः श्रुतयो निर्जात्यादिके ब्रह्मणि कथं चरन्ति ॥१॥

नीलकण्ठी- ॐ श्रीगणेशाय नमः ॥ ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः।

श्रीमद्गोपालमानम्य श्रीधरोदितया दिशा। वेदस्तुतिं विवृणुते नीलकण्ठो यथामति ॥१॥
सर्वस्मिन् वाङ्मये सारं श्रीमद्भागवतं मतम्। तत्राप्येकादशस्कन्धस्तस्य सूत्रं श्रुतिस्तुतिः ॥२॥
पञ्चमान्ते यथा गीताषष्ठाध्यायार्थसूत्रणम्। स्पर्शान् कृत्वा बहिर्बाह्यानित्यादिश्लोकयुग्मतः ॥३॥
दशमान्ते तथैवैकादशस्कन्धार्थसूत्रणम्। श्रीमद्भागवते चक्रे वेदस्तुत्या महामुनिः ॥४॥
अत्र नर्कुटकैरष्टाविंशत्या यदुदीरितम्। यदेवान्यत्र विज्ञेयं यन्नेहास्ति न तत्क्वचित् ॥५॥
तत्र तु प्रथमे श्लोके कृत्स्नशास्त्रार्थसूत्रणम्। अध्यारोपापवादाभ्यां द्वितीये ब्रह्मलक्षणम् ॥६॥
कर्मन्यासो विविदिषोर्विदुषश्च तृतीयके। चतुर्थे बन्धमूलं च सनाशोपायमीर्यते ॥७॥
समष्ट्युपास्तेर्ब्रह्माप्तिशेषत्वं पञ्चमे स्थितम्। मूर्तिध्यानपथेनैव षष्ठे ब्रह्माप्तिरीर्यते ॥८॥
स्कर्मणार्चयेद्विष्णुं मुमुक्षुरिति सप्तमे। अवतारकथां विष्णोः शृणुयादिति चाष्टमे ॥९॥

अभक्तनिन्द
अतर्क्यमान्ध
इन्द्रियैस्तर्प्य
यं बहुत्वं प्र
वैराग्यमेकवि
बन्धमोक्षव्यव
जीवन्मुक्तिः
वेदान्तक्षीरधेः
श्रुतिशिरोऽम्बु
तदपि तं गुरुल
पूर्वाध्यायान्ते
माक्षिपन्परीक्षिदुवाच-ब्र
त्रिगुणमायारूपे। तत्रैव

श्रीराधाकृष्णाभ्
भूभृतं श्रीहरेर्दास
श्रीमद्भागवतं नौ
श्रीधरस्वामिपाद
वन्दे श्रीकृष्णचै
अत्र ब्रह्मन्नित्यावि
कृत् रूढिवृत्तिप्रतिपादित
बहुव्रीहेस्तथैव प्रवृत्तेः ततश्
प्रत्ययो णमुल् कृत्। स
सिंहदेवदत्तयोर्व्यक्तिभेदेन
गुणरहितत्वादनिर्देश्यत्वं श
इति य उक्तलक्षणोऽक्षराख
इच्छाप्रधानमैश्वर्य्यमित्यर्थः
पृथिव्यामित्यादिकं वृथिव
तदिति तच्छब्देन पूर्वोक्त
कथनात्। सत्यं ज्ञानमिति
दर्शितम्। एतच्चानुवादम
ज्ञेयम्। तदेकतदकल्पना
शब्दयोरेव सामानाधिक

अभक्तनिन्दा नवमे दशमे तु विमुक्तये । कामाद्द्वेषाद्भयाद्वापि ध्याता मूर्तिर्हरेर्भवेत् ॥१०॥
अतर्क्यमान्ध्यजं चित्तमात्रं जगदिति त्रिभिः । ज्ञानेनाधिकृतः शुद्धब्रह्मोपास्त्यापि मुक्तये ॥११॥
इन्द्रियैस्तर्प्यते यः स सर्वशक्तिभृदित्यपि । उक्तं पञ्चदशे सोऽयं सर्वस्रष्टेति षोडशे ॥१२॥
यं बहुत्वं प्रधानस्य हेतुत्वं च द्वयोर्हतम् । ततो द्वयोर्मुमुक्षूणां शरणं शिवसद्गुरू ॥१३॥
वैराग्यमेकविंशे च द्वाविंशेऽभ्यास ईर्यते । श्रुतार्थमननं द्वाभ्यां ततः परमुदीरितम् ॥१४॥
बन्धमोक्षव्यवस्था च पञ्चविंशे समीरिता । निःशेषकामविलयः षड्विंशे मोक्षलक्षणम् ॥१५॥
जीवन्मुक्तिः सप्तविंशेऽष्टाविंशे तु गिरां गतिः । अतन्निरसनेनैव निर्गुणात्मनि वर्णिता ॥१६॥
वेदान्तक्षीरधेः सारं श्रुतिगीतिसुधां बुधाः । पायंपायं प्रतृप्यन्तु श्रीमव्द्यासप्रसादतः ॥१७॥
श्रुतिशिरोऽम्बुधिर्गहनः क्व वा जडतरा मम बुद्धिरियं क्व वा ।
तदपि तं गुरुलक्ष्मणपादुकातरणिसंश्रयणेन तितीर्षति ॥१८॥

पूर्वाध्यायान्ते आदिश्य सन्मार्गमिति ब्रह्मप्राप्तिमार्गमुपदिश्येत्युक्तम्, तदेतद्वाचामगोचरस्य ब्रह्मण उपदेश्यत्व-क्षिपन्परीक्षिदुवाच-ब्रह्मन्नित्यादि । अनिर्देश्यत्वे निर्गुणत्वं हेतुः । निर्गुणत्वे सदसतः परत्वं हेतुः । सदसती हि कार्यकारणे त्रिगुणमायारूपे । तत्रैव खलु शब्दानां वृत्तिः सम्भवति, न तु मायातीते ब्रह्मणि ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

श्रीराधाकृष्णाभ्यां नमः ।

भूभृतं श्रीहरेर्दासवर्य्यं गोवर्धनं भजे । श्रुतिस्तुतिवचोव्याख्यां विधित्सामि यदाश्रयी ॥

श्रीमद्भागवतं नौमि यस्यैकस्य प्रसादतः । अज्ञातानपि जानाति सर्वः सर्वागमानपि ॥

श्रीधरस्वामिपादांस्तान्प्रपद्ये दीनवत्सलान् । यत्प्रसादेन वर्त्मेदं पश्यन् वर्तेय वैष्णवम् ॥

वन्दे श्रीकृष्णचैतन्यमन्तर्यामिणमीश्वरम् । यत्प्रेरणा हि सर्वस्य कारणस्यापि कारणम् ॥

अत्र ब्रह्मन्नित्यादिद्वये टीकासङ्गतिरियं तत्र प्रथमे पद्ये पङ्कजमित्यत्र प्रकृतिः पङ्कशब्दोपपदजनधातुः प्रत्ययीभूते जनेर्डः रूढिवृत्तिप्रतिपादितपदार्थत्वं शैवलादावप्रतीतेः किन्तु कमल एवेति औपगव इत्यत्र उपगुशब्दस्तावल्लक्षणया प्रवृत्तः । स्तथैव प्रवृत्तेः ततश्चोपगोः प्रकृतेः प्रत्ययस्तद्धितः । अतो लक्षणावृत्तिप्रतिपादितपदार्थत्वं च पाचक इत्यत्र प्रकृतिः पचधातुः त्ययो णमुल् कृत् । स च पचनादन्यदापि पाचक उच्यते इति पाचकत्वगुणयोगाद्गौणीवृत्तिप्रतिपादितपदार्थत्वं किन्तु स्तयोर्व्यक्तिभेदेन भेदः । अत्र त्ववस्थाभेदेनेति गम्यं निर्गुणे इति गुणातीते इत्यर्थः । न तु गुणरहिते गुणानामपि त्वादनिर्देश्यत्वं शङ्केतेति । अथोत्तरत्र पूर्वोक्तमर्थं क्रमेणाह-अयमभिप्राय इति । तत्र पूर्वार्धस्य तमाह सगुणमेवेति श्रुतौ य उक्तलक्षणोऽक्षराख्य इत्यर्थः । सर्वविदिति सर्वं विन्दत इति निरुक्तेः सर्वशक्तित्वं "यस्य ज्ञानमयं तपः" इति नमैश्वर्य्यमित्यर्थः । सर्वस्य वशी सर्वनियन्तेत्यर्थः । सर्वस्येशानः सर्वोपास्यः सर्वकर्मफलदाता चेत्यर्थः । यः मित्यादिकं वृथिव्याद्यन्तर्यामिताप्रतिपादकं पूर्वत्र हेतुः । प्रतीकदर्शनमेवेदं स ईक्षतेत्यत्राडागमाभावश्छान्दसः । तच्छब्देन पूर्वोक्तमित्यर्थः । सोऽकामयतेत्यादिकं सर्वकल्याणगुणनिलयत्वं दर्शयति । सर्वाश्रयत्वेन । सत्यं ज्ञानमिति सच्चिदानन्दमित्यर्थः । सगुणमेवेत्यारभ्य ब्रह्मेत्याद्या इत्येतदन्तलक्षणपराणां श्रुतीनां तत्परत्वं । एतच्चानुवादमात्रम् । निर्गुणपरताबोधनार्थं निर्गुणपरत्वं च तथेत्यादिना उपसंहरिष्यतीत्यन्तेनानन्तरग्रन्थेन । तदेकतदकल्पनायेत्यस्याभिप्रायः । अयमात्मा ब्रह्मेत्यादि ज्ञेयम् । एकार्थाभिधानेन सामानाधिकरण्यमिति व सामानाधिकरण्यं नार्थयोरित्यर्थः । पृथगर्थत्वं परिहरति-यथोक्तमिति । तद्धित एवेत्यन्वयः ।

तस्यैव तद्धितान्तस्यैवानुपयुक्ताभिधानशक्तितया प्रतीक्षमाणस्योपपदेनामिक्षारूपविषयदानमात्रं हि क्रियत इत्यर्थः। अजहत्स्वार्थया न जहत् न त्यजन् स्वार्थो नीलगुणादिरूपो यस्यां तया निरूढलक्षणया नितरां रूढा निरूढा सा चासौ लक्षणा च तया अनादिपरम्परासिद्धया न साम्प्रतं रचितयेत्यर्थः। नीलमुत्पलमितिवत्सामानाधिकरण्यमित्यनुषज्यते। स्वरूपसत्त्वामात्रेण न हि किञ्चिद्विशेषणमिति स्वबुद्ध्येत्यस्य वार्तिकस्य पूर्वार्धं येन नीलादिना कर्त्रा स्वबुद्ध्या स्वाकारज्ञानेन कारणभूतेन विशेष्यमुत्पलादिव्यज्यते अवभास्यते तद्विशेषणमित्यर्थः। अस्थूलादिवाक्यादीनामित्यादिकमप्यकल्पनायेत्यस्यैवाभिप्रायः। सामानाधिकरण्येन निषेधावशेषत्वेन चोपाधिपरित्यागात् उपासनादिति मात्रार्थं चेत्यादित्रयस्याभिप्रायः। आदिग्रहणात् सृष्ट्यादिक्रियार्थेति क्रिया यज्ञादिः। अन्यार्थेति पाठे अपवादार्थेत्यर्थः ॥

अथ स्वव्याख्या ॥ ॐ सन्मार्गमादिश्येत्युक्तम्। आदेशे च "तत्तु समन्वयात्" (१/१/४) इति न्यायेन वेदसमन्वयापेक्षा लभ्यते समन्वयपरा काष्ठा च —

"वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥"

इत्युक्तलक्षणे परतत्त्व एव तच्च कैश्चिद्वस्तुनो निर्विशेषमेव मन्यमानैर्ब्रह्मेति शब्द्यते। स्वाभाविकशक्त्यानन्तविशेषमेव मन्यमानैः श्रीभागवतैस्तु परमात्मेति भगवानिति च तत्रान्तर्यामित्वमात्रशक्त्या भगवानेव परमात्मेति शुद्धपरिपूर्णैश्वर्याद्यात्मिकया परमधामादौ स्वयं विलसन्त्या वशीकृतमायाशक्तिकया परमधामादौ स्वयं विलसन्त्या वशीकृतमायाशक्तिकया परमस्वरूपशक्त्या तु भगवानिति अद्वयत्वं च शक्तिमात्रं विना शक्तेरभावात् तां च विना तत्कार्य्याभावात् वस्त्वनन्तरात्यन्ताभावाच्चेति। एवमेव खलु 'एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किञ्चने'त्यनयोर्निषेध्यांस्तदवधिभूतांश्चार्थान् स्वयमाह मन्त्रवर्णः

"न तस्य कार्य्यं करणं च विद्यते न तत्समश्चाभ्यतिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति ॥

तदेवं सति मध्यमं मतं नात्याक्षिप्य सर्वशक्तिविशिष्टपरब्रह्मणि श्रीभगवति देवस्य प्रवृत्तिं सम्मतां निर्विशेषब्रह्मण्यसङ्गतिं मन्यमानः श्रीविणुरातत्वेन तद्गुणाद्यपलापनिन्दामसहिष्णुः श्रीमुनीन्द्राभ्युपगमेन स्वमतं पुपुक्षुः केवलतन्मात्रवेदार्थिन आक्षिपति- ब्रह्मन्निति। अथवा पूर्वोक्तं 'सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहमि'त्येवाक्षेपबीजं मन्तव्यम्। यतस्तत्र व्याख्यातं वेदानां श्रीभगवत्येव तात्पर्य्यमङ्गीकृत्य पूर्वरीत्या परमतमाक्षिपति-ब्रह्मन्निति तैर्व्याख्यातम्। तत्र गुणेन तावद्रूढिवृत्तिर्न सम्भवतीति 'निर्गुणं गुणवृत्तय' इत्युक्तम्। गुणाः सत्त्वादयस्तत्कार्य्यभूताः शुक्लशीतादयश्च तदतीते इत्यर्थः। निर्गुणत्वादेव जातिनिर्देश्यत्वमपि निरस्तम्। गुणभेदत्वाज्जातेः तथा स्वरूपानिर्देश्यत्वं च निर्गुणत्वेनैव दृष्टश्रुतविलक्षणस्वरूपत्वात्। अत आनन्दादिपदैश्च न तन्निर्देश्यत्वं प्रसिद्धचित्तवृत्तिविशेषादावेव तेषां सङ्केतितत्वादिति तेषां मतम्। अतोऽर्थापत्तिसहितानि वृत्त्यन्तराणि च निर्गुणत्वादिभिर्निरस्तान्येवेति स्वरूपभूतगुणाश्च तेषां मते न सन्तीति निर्विशेषब्रह्मणि तेषां वेदसङ्गतिर्न सम्भवत्येव। श्रीभागवतानां तु श्रीभगवतो विलक्षणस्वरूपत्वेऽपि विलक्षणस्वरूपपरापौरुषेयतत्तच्छब्दवाच्यतया मायिकगुणासम्बद्धत्वेऽपि मायातीतानन्तगुणतया सदसद्भ्यां परत्वेऽपि तेन तयोरनुस्यूततया सर्वा अपि वृत्तयः श्रीभगवानिति मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहमिति 'वेदैश्च सर्वैरहमेव वेद्यः' इति च श्रीभगवत्सम्मत्या यथायथं सन्त्येव। 'यतो वाचो निवर्तन्ते' इत्यादिकं त्वानन्त्यादिपरमेव। केवलानामेव इत्यवधित्वनिर्देशो न घटते कर्मणा ज्ञानेन वा आप्तमेवावधिः क्रियते न त्वनाप्तमिति। अन्यथा यच्छब्देनापि निर्देष्टुं न शक्यते। अप्राप्येति तु प्रकर्षेणैवाप्तिं निषेधयति न त्वंशेनापि "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति" मन्त्रशेषे(ण) तु दर्शयिष्यत एव। ज्ञानेन तत्प्राप्तिः एतेन यद्वाचानभ्युदितमित्यपि व्याख्यातम्। अत्राप्यतिशब्दोऽस्तीति अभिशब्दप्रयोगात् अवचनेनैव प्रोवाचेत्यर्थः यतो वाच इत्यभिप्रायमेव अनन्ततया वक्तुमशक्यत्वमेव तस्याः प्रवचनमिति ततश्च 'शास्त्रयोनित्वात्' इति 'श्रुतेस्तुशब्दमूलत्वात्' इति 'तर्काप्रतिष्ठानात्' इत्यादिभ्यः 'तं त्वौपनिषदं पुरुषं पृच्छामी'ति। 'नैषा तर्केण मतिरापनेया' प्रोक्तन्यायेन सुज्ञानाय प्रेष्ठेत्यर्थः श्रुतेश्च शास्त्रैकप्रमाणत्वादस्त्येव सर्ववेदसङ्गतिर्न च प्रमाणान्तरप्रयुक्तदोषगन्धोऽपीति विवेचनीयं तस्मात्तैः सम्मते निर्विशेषे ब्रह्मणि कथं चरन्ति नैव चरन्तीत्यर्थः ॥१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो पश्यन्तु धाष्ट्यं मे साहसं च सुबुद्धयः । प्रवर्तेयं महत्कृत्ये व्याख्यानेऽपि श्रुतिस्तुतेः ॥१॥
स्वस्यायोग्येऽप्यशक्येऽर्थे कः प्रवर्तेत बुद्धिमान् । महत्तमकृपामत्तं विना मां सुदुराग्रहम् ॥२॥
वन्दे तं परमात्मानमाश्चर्यचरितं प्रभुम् । बलात् प्रवर्तयेद्यो मां नीचमुच्चप्रयोजने ॥३॥
श्रीधरस्वामिपादांस्तान् प्रपद्ये दीनवत्सलात् । निजोच्छिष्टप्रसादेन ये पुष्णन्त्याश्रितं जनम् ॥४॥
वन्दे चैतन्यदेवं तं तत्तव्याख्याविशेषतः । योऽस्फोरयन्मे श्लोकार्थान् श्रीधरस्वाम्यदीपितान् ॥५॥
श्रीमद्भागवतं नौमि यस्यैकस्य प्रभावतः । वैष्णवानां कृपां विन्दन् मूर्खोऽपि स्याद्विशारदः ॥६॥
नमामीमं हरेर्दासवर्यं गोवर्धनं गिरिम् । यदाश्रयबलादाशां दुर्लभार्थेऽप्यहं दधे ॥८॥

विष्णुना सर्वैश्वर्यप्रकटनेन विश्वव्यापकेन श्रीभगवता रातो जीवयित्वा श्रीयुधिष्ठिरादिभ्यो दत्तः किंवा आदत्तः स्वीकृत इति तस्य माहात्म्यभरः सूचितः । अत उवाचेति तस्य तादृशप्रश्नो युक्त एवेति भावः । सन्मार्गमादिश्य स्वस्मिन् स्वभक्तौ ब्रह्मणि चामूर्ते स्वस्वरूपे वेदानां प्रवृत्तिप्रकारव्याख्ययोपदिश्येत्युक्तम् । तत्र श्रीभगवति तद्भक्तौ च तत्तन्माहात्म्यवर्णनादिना वेदानां प्रवृत्ति सङ्गतां ब्रह्मण्यसङ्गतां मन्यमानः पृच्छति–ब्रह्मन्निति । वेदस्वरूपत्वात्त्वं तद्वेत्स्येवेति भावः । अनिर्देश्ये स्वरूपक्रियाजातिगुणैर्निर्देष्टुमशक्ये निर्गेणे गुणोऽग्न्यादीनामुष्णतादिवत् सहजधर्मस्तेन रहिते गुणेषु तत्तत्स्वभावक्रियाजात्यादिषु वृत्तिर्यासां ताः । यद्वा । निर्गुणे त्रिगुणातीते गुणवृत्तयो गुणत्रयाश्रया इत्यर्थः । तथा च गीतासु (२/४५) – ''त्रैगुण्यविषया वेदाः'' इति । अत एव सदसतः परे स्थूलसूक्ष्मव्यतिरिक्ते श्रुतये उपनिषल्लक्षणाः कथं चरन्ति वर्तन्ते ? साक्षादिति तात्पर्यवृत्तिरपि निरस्तैव तत्प्रकारं वदेति शेषः । तत्रायमभिप्रायः – जीवानां मोक्षार्थं प्रभुर्बुद्ध्यादीनसृजत्, मोक्षस्तु ज्ञानेनैव, ज्ञानं च महावाक्याद्यर्थावधारणात्, तच्च प्रकारान्तरेणाघटमानं जहदजहत्स्वार्थलक्षणयैव स्यादिति महावाक्यादिश्रुतीनां ब्रह्मणि वृत्तिः सम्भवेदित्युत्तरमुक्तं ज्ञेयम् । अथवा सतां वेदानां मार्गं स्वस्मिन् कृष्णाख्ये परब्रह्मणि साक्षात् प्रवृत्तिप्रकारमादिश्य श्रीभगवान् वतीमगादित्युक्तम् । तत्र राजा बुभुत्सुः पृच्छति–ब्रह्मन्निति । ब्रह्मणि परब्रह्मणि श्रीकृष्णे श्रीगोपालतापन्यादिश्रुतिषु श्रीकृष्णस्य ब्रह्मत्वं प्रसिद्धमेव । तथा (भा०१०/१४/३२) – ''यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्'' इत्यत्रैव विरञ्चिनोक्तम् । ब्रह्मत्वादेवानिर्देश्ये शब्दागोचरे शब्दरूपाः श्रुतयः कथं चरन्ति ? तथा निर्गुणे गुणानां सत्त्वरजस्तमसां सम्बन्धरहिते तथा ह्यत्रैव वक्ष्यते (भा० १०/८८/५) –

"हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः । स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥" इति ॥

ताः कथम्भूताः ? गुणवृत्तयो गुणेषु प्रकृति गुणेषु सत्त्वादिषु तत्कार्येषु च वृत्तिर्यासां ताः, न तु (भा० १०/१४/७) – "गुणात्मनस्तेऽपि गुणान् विमातुम्'' इत्यादिवचनैः कृष्णस्य सगुणत्वमेव बोध्यते । कथमसौ निर्गुण इति चेन्न, सर्वेषामेव श्रीकृष्णगुणानां चिच्छक्तिविलासत्वेन श्रीभगवत्स्वरूप एव पर्यवसानान्निर्गुणत्वमेव । तथा च प्रथमस्कन्धे श्रीधरण्युक्तौ (भा० १/१६/३०) ''एते चान्ये च भगवन्नित्या यत्र महागुणाः'' इति । गुणा अप्राकृता एव नित्याः स्युः । तथा एकादशे (भा० ११/१३/४०)

"मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् । सुहृदं प्रियमात्मानं साम्यासङ्गादयोऽगुणाः ॥" इति ।

निर्गुणं प्रकृतिगुणैरसंस्पृष्टमेव मां गुणा भजन्ति । ननु तर्हि लक्षणया श्रुतयस्तत्र चरन्ति, तत्राह–साक्षादिति । लक्षणया अस्तु नाम, साक्षान्मुख्यया वृत्त्या केन प्रकारेण चरन्तीति । ननु हिरण्यगर्भे पुरुषे च चरन्त्यः श्रुतयस्तदभिन्नत्वात्तस्मिन् कृष्ण एव यदेष हिरण्यगर्भे नैर्गुण्यसन्निकृष्टत्वात् निर्गुणवदेव पुरुषश्च प्रकृत्यधिष्ठाता स्वेच्छया स्वीकृतगुणत्वात्; निर्गुण एवेति चेत्तत्राह–

सदसतः पर इति । सत् कार्यं हिरण्यगर्भादिरूपम्, असत् कारणं पुरुषादिरूपम्, ततः परे नितरामुत्कृष्टे कृष्णे हिरण्यगर्भादिषु चरन्त्योऽपि श्रुतयः कृष्णे चरितुं न शक्नुवन्ति, तस्य ब्रह्मानन्दघनस्वरूपत्वात् । तथात्रैव श्रीदेवर्षिणोक्तम् (भा० १०/३७/२२)“विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवाञ्छितम्” इति । श्रीगीतासु च स्वयमेव श्रीभगवतोक्तम् (१४/२७)

“ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥” इति ।

ब्रह्मानन्दघनरूपोऽहमित्यस्यार्थः । यद्वा, ‘परे’ इति ब्रह्मणीत्यस्य विशेषणम्, परे ब्रह्मणि श्रीकृष्णे सदसतः कार्यकारणस्य सम्बन्धिन्यः श्रुतय इति श्रुत्यगोचरत्वमेव श्रीकृष्णस्य श्रीमदुद्धवेनोक्तम् (भा० १०/४७/६१) “भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्” इति । यत्पदव्यापि श्रुतिभिर्विमृग्यैव स कथं तासां (सतां [घ, ङ]।) गोचरः स्यादिति ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

अनिर्देश्ये चेतनाचेतनसजातीयतया निर्देष्टुमशक्ये निर्गुणे त्रिगुणप्रत्यनीके तद्गुणप्रवृत्तिनिमित्ताश्च श्रुतयः कथं प्रवर्तन्ते।न हि प्रवृत्तिनिमित्तप्रहाणेन शब्दः प्रतिपादयितुमलमिति प्रश्नार्थः ॥१॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

“सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहम्” इति वेदानां ब्रह्मप्रमापकत्वं भगवदुक्त्यैवावगतं तत्पूर्वाध्यायेऽपि “विशुद्धसत्त्वधाम्न्यद्धा त्वयि शास्त्रशरीरिणि” इति बलिवचनेनाप्यवगतं तत्पूर्वाध्यायेऽपि “ब्रह्म ते हृदयं शुद्धम्” इत्यादिना शास्त्रयोनेस्त्वमात्मनः इत्यन्तेन मुनिवचसाप्यवगतम् । श्रूयते चैवं

“सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति” इति ।

स्मर्यते च ‘वेदैश्च सर्वैरहमेव वेद्यः’ इति ब्रह्मणश्चिदचिद्वैलक्षण्यं च बहुशः प्रतिपादितम् । तत्र चिदचिद्विलक्षणब्रह्मस्वरूपस्वभावपराणां ‘सत्यं ज्ञानमनन्तम् ॥ यः सर्वज्ञः सर्ववित्’ इत्यादिश्रुतिवचसां तत्प्रमापकत्वेऽपि ‘अयमात्मा ब्रह्म ॥ तत्त्वमसि ॥ सर्वं खल्विदं ब्रह्म’ इत्यादिना परमात्मशब्दसमानाधिकरणतया श्रुतानां चिदचिद्वाचिनां शब्दानां कथं परमात्मप्रमापकत्वम् ? इति पृच्छति राजा-ब्रह्मन्निति । हे ब्रह्मन् ! गुणवृत्तय इत्यत्र गुणशब्दो विशेषणपरः । गुणेन जातिगुणक्रियान्यतमेन द्वारभूतेन वृत्तिर्बोधनं यासां ताः जात्यादिकं प्रवृत्तिनिमित्तीकृत्य तद्विशिष्टाभिधायिन्यः श्रुतयः चिदचित्पराः कथं ब्रह्मणि साक्षाच्चरन्ति प्रवर्तन्ते । न हि प्रवृत्तिनिमित्तप्रहाणेन शब्दः प्रतिपादयितुमलमिति प्रश्नार्थः । न च लक्षणया चरन्तीति वक्तुं युक्तम् । उदाहृतश्रुतिस्मृत्यादिभ्योऽभिधावृत्तेरेवावगमात् । न च कतिपयश्रुतीनां तत्र मुख्यवृत्तिः चिदचिदादिपराणां तु लक्षणावृत्तिरिति युक्तं ‘सर्वे वेदा यत्पदमामनन्ति ॥ वेदैश्च सर्वैरहम्’ इति शब्दस्वारस्यात्सर्वासामपि तस्मिन्नभिधावृत्तेरेवावगमादत एव साक्षादित्युक्तं तावज्जातिशब्दानां वृत्त्यसम्भवं व्यञ्जयन् विशिनष्टि । अनिर्देश्ये चेतनाचेतनसजातीयतया निर्देष्टुमशक्ये । तत्र हेतुः-सदसतः परे सच्चासच्च तयोः समाहारस्तस्मात्परे चिदचिद्भ्यां परे विलक्षणे अन्यस्मिन्निति यावत् । न हि चिदचिद्गतजातिप्रवृत्तिनिमित्तकशब्दानां चिदचिद्भ्यामन्यस्मिन्मुख्यवृत्तिः सम्भवतीति भावः । अथ गुणशब्दानां वृत्तयसम्भवं द्योतयितुं विशिनष्टि-निर्गुण इति । निर्गतत्रैगुण्ये त्रैगुण्यप्रत्यनीके यद्वा गुणशब्दानां ये ये प्रवृत्तिनिमित्तभूताः गुणास्तेभ्यः सर्वेभ्यः निर्गते निर्गुणे इति निष्क्रियत्वाद्युपलक्षणम् ॥१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

यदनन्तनिगमनिकरनिरूपितगुणगणाकरं ब्रह्म तदेव कृष्णनाम्नाऽवतीर्णं नान्यदित्यतो मुमुक्षुभिरत्र भक्तिः इतरत्र विरक्तिमूला कर्तव्येति विधीयतेऽस्मिन्नध्याये । तत्र नारदनारायणसंवादलक्षणमितिहासमुत्थापयितुं शुकं परीक्षित्पृच्छति-ब्रह्मन्नित्यादिना । ब्रह्मन् ! पूर्णकाम ! “सर्वे वेदा यत्पदमामनन्ति” इति श्रूयते तत्र श्रुतयः साक्षादामनन्त्युत लक्षणया वा ? तत्र न प्रथम इत्याह कथमिति । साक्षात् चरन्ति वर्तन्ते वाचकत्वेनेति शेषः । तस्य काऽनुपपत्तिरत्राह-अनिर्देश्य इति । “यत्तददृश्यम्” इति श्रुतेः । द्वितीय इत्याह-निर्गुण इति । “केवलो निर्गणश्च” इति श्रुतेः । गुणैः प्रवर्तमानस्य कथं निर्गुणत्वमुपपद्यत इत्यत्राह-सदसत इति

निर्गुणे गुणसमर्पक
तत्राह-गुणवृत्तय इ
इत्यादिश्रुतेः । अत

॥१-१३॥

अथ श्रुति
ऊढानूढारूपास्तास्तु अ
कृष्णेन सह संयुज
द्वारकाधिनाथमेवाश्रि
दयितं रूपमेतच्चतुर्भु
चतुर्भुजमिति । चतुर्भुज
विप्रो सर्वदेवमयो ह्यह
गुरु....देष्टारं विप्रं विशे
असूयवः सन्तः अवजा
विप्रस्य दयितत्वे हेतुम
एवंविध एव ब्राह्मणः
मद्भावभावितानामर्चनमे
ययौ । इत्यादिषु वेदप्र
सविशेषब्रह्मप्रतिपादिका
सोऽकामयत इत्यादिषु इ
मुख्या वृत्तिश्च रूढियोगभे
गौणवीष्वेव क्वचित्पदाथ
योगेन मुख्ये पङ्कजनिडप्र
घुष्यत इति घोषः आभी
सादृश्ये गौर्वाहीकः । सम्ब
आयुः । घृततीति घृतम् । त
चरणम् । अतः सविशेष
अहो भगवान् श्रीकृष्णः
अनीश्वरत्वापत्तेः । वस्तुतस्
सर्वज्ञत्वादिगुणवत्ता । तेन
श्रुतिस्तूयमानतापि सिद्ध्येत्
तर्क्यं निर्विशेषं ब्रह्मेति परम
श्रुतयश्चरन्ति । कथमिति स
प्राकृतादिगुणरहिते साक्षाच्

निर्गुणे गुणसमर्पकत्वेन श्रुतीनां सञ्चरणं कथमिति दौर्घट्यमापादयितुं शक्यन्ते । यादृग्वस्तु तादृशावेदकत्वे न कोऽपि विरोध इति तत्राह-गुणवृत्तय इति । गुणार्पकत्वेन गुणवृत्तिर्यासां तास्तथा ''तुविग्रीवोवपोदरः सुबाहुरन्धसोमदे गुणाः श्रुताः सुविरुद्धाश्च देवे'' इत्यादिश्रुतेः । अत एव नः संशयं छिन्धीति वाक्यशेषः ॥१॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

॥१-१३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

अथ श्रुतिस्तवस्याकस्मिकप्रसङ्गे सङ्गतिरुच्यते । तत्र पूर्वोक्तानां गोपाङ्गनानां त्रैविध्ये नित्यसिद्धाया ऊढानूढारूपास्तास्तु अप्रकट एव वृन्दावनेऽप्रकटमेव विलसता श्रीकृष्णेन सह स्थिताः अप्रकट्य एव सत्यः मुनिरूपास्तु कुरुक्षेत्रयात्रायां कृष्णेन सह संयुज्य तमेवापुः ध्वस्तजीवकोशास्तमध्यगन्नित्युक्तेः । श्रुतिरूपास्तुश्रुतिरूपमेवाश्रित्य निगूढमेव द्वारकाधिनाथमेवाश्रितवत्यः सममेतं स्तुवन्ति चेति तत्स्तवे निरूपयितव्ये सति तत्र पूर्वाध्यायान्ते ''न ब्रह्मणान्मे दयितं रूपमेतच्चतुर्भुजम्'' इत्यादिभिर्भक्तयोः श्रुतदेवबहुलाश्वयोरुपदेशं कृत्वा भगवान् द्वारकां ययौ । तत्र भगवदुपदेशे तात्पर्यं चतुर्भुजमिति । चतुर्भुजमेव न दयितम् ऐच्छिकत्वात् । द्विभुजत्वं नराकृति सर्वेभ्यो मम दयितमित्यर्थः । तत्र हेतुमाह- ''सर्ववेदमयो विप्रो सर्वदेवमयो ह्यहम्'' अहं द्विभुजः सर्वदेवमयत्वात् द्विभुजं ....धः । अज्ञास्त्वेतन्न जानन्तीत्याह-दुष्प्रज्ञा इत्यादि । मां गुरु....देष्टारं विप्रं विशेषेण प्रतिपूरयतीति विप्रं परिपूरकं पोषकमित्यर्थः । आत्मानं सर्वात्मानम् अर्चादौ प्रतिमादौ अविदित्वैव असूयवः सन्तः अवजानन्ति । आदिशब्दात् वैष्णवेषु च .... इज्यदृष्टयः । इज्यं यज्ञियं कर्म । तत्रैव दृष्टिर्येषाम् अत एव दुष्प्रज्ञाः । विप्रस्य दयितत्वे हेतुमाह-चराचरमित्यादिना । चलं चराचरं ये चास्य हेतवो भावास्ते च मद्रूपाणीति विप्रश्चेतस्याधत्ते । अत एवंविध एव ब्राह्मणः । एवंविध एव ब्रह्म ... तस्माद्ब्रह्मऋषीन् एतान् अर्चय एवं चेत् तदा अर्चितोऽस्मि अद्धा साक्षादेव मद्भावभावितानामर्चनमेव मेऽर्चनं नान्यथा । एवं स्वभक्तयोः श्रुतदेवबहुलाश्वयोः सन्मार्गं वेदमार्गम् आदिश्य भगवान् द्वारकां ययौ । इत्यादिषु वेदप्रतिपाद्यं भगवद्भागवताराधनमेव । आराधनं हि सविशेषस्य ब्रह्मण एव न तु निर्विशेषस्य । श्रुतयश्च सविशेषब्रह्मप्रतिपादिका 'आनन्दं ब्रह्मणो रूपम्' इति ब्रह्मणः सम्बन्धित्वा षष्ठीरूपमिति स्वस्वाभिभावसम्बन्धः । अहं बहुस्यां सोऽकामयत इत्यादिषु इच्छावत्त्वात् सविशेषत्वमेव । तेन श्रुतीनां शब्दात्मकत्वात् शब्दानां च मुख्यलक्षणागुणभेदेन त्रैवृत्तिकत्वं मुख्या वृत्तिश्च रूढियोगभेदेन द्विधा । रूढिश्च स्वरूपेण जात्या गुणेन चेति त्रिधा । डित्थः गौः शुक्ल इति योगस्तु मुख्यलक्षणा । गौणीष्वेव क्वचित्पदार्थयोगेन क्वचित् प्रकृतिप्रत्ययार्थयोगेन योगः । यथा पङ्कजमिति पदस्य तदर्थस्य च कमलस्याश्रयस्य योगेन मुख्ये पङ्कजनिडप्रत्यययोगसिद्धिः । जेपगमन इत्यादौ प्रकृतिप्रत्ययार्थसिद्धिः । गङ्गायां घोष इति गमेर्डः वर्णादिक इति । घुष्यत इति घोषः आभीरपल्ली । उभयोरेव प्रकृतिप्रत्ययसिद्धयोः योगाभावात् लक्षणागौणीसादृश्यात् सम्बन्धात्ततश्चेति द्विधा सादृश्ये गौर्वाहीकः । सम्बन्धान्तरत आयुर्घृतम् । अत्रापि प्रकृतिप्रत्ययार्थयोगः । गच्छतीति गौः । वाहयतीति वाहीकः । अयत इति आयुः । घृततीति घृतम् । लक्षणागौण्यौ चानेनैव व्याख्याते । एवंविधशक्तिमच्छब्दकदम्बात्मिकानां श्रुतीनां निर्विशेषे ब्रह्मणि कथं चरणम् । अतः सविशेषब्रह्मैव श्रुतिप्रतिपाद्यमिति तदनुकूल्यहेतोः सरस्वतीप्रेरितस्यैव परीक्षितो मनसि विचार आसीत् । अहो भगवान् श्रीकृष्णः एव ब्रह्म । निर्गुणत्वं च तस्य प्राकृतगुणराहित्यादिपरं न हि सर्वज्ञत्वादिगुणराहित्यपरम् । तथा सति अनीश्वरत्वापत्तेः । वस्तुतस्तु 'यः सर्वज्ञः सर्ववित् । यस्य ज्ञानमयं तपः । सर्वस्य वशी सर्वस्येशानः ।' इत्यादिश्रुतिप्रतिपादितास्य सर्वज्ञत्वादिगुणवत्ता । तेन ब्रह्मशब्दोऽत्र मुख्यस्तेनैव बृंहणत्वात् बृहत्वाच्चेति सविशेषं ब्रह्मैव कृष्णः । अतः सविशेषत्वेन श्रुतिस्तूयमानतापि सिद्ध्येत् । निर्विशेषं यदि लाक्षणिकेन ब्रह्मशब्देन केवलं चिन्मात्रमेव प्रतिपाद्यं तदा श्रुतेरप्यविषयः स्यादिति अत्र निर्विशेषं ब्रह्मेति परमतमपाकर्तुं पृच्छति-ब्रह्मन्नित्यादि । ब्रह्मन् ! भोः ब्रह्मरात ! कथम् अनिर्देश्ये निर्विशेषे निर्गुणे ब्रह्मणि कथं चरन्ति । कथमिति सम्भावनापरं न तु प्रश्नपरम् । कथं चरन्ति न चरन्तीत्यर्थः । तर्हि निर्देश्ये सर्वज्ञत्व...विशेषे निर्गुणे सत्त्वादिगुणरहिते साक्षाच्छ्रीविग्रहे ... कृष्णे एव चरन्ति यतस्ता गुणवृत्तयः गुणेषु सत्त्वादिष्वप्राकृतेषु भगवत्त्वादिलक्षणेषु

वृत्तिरभिधानगुणा तात्पर्यरूपा वृत्तिर्यासां ताः तथाभूतानां निर्विशेषे...मसामर्थ्यात् सविशेषे साक्षाद्ब्रह्मणि चरितुं तात्पर्या कदाचिच्चरितुं समर्था भवन्ति तच्च साक्षाद्ब्रह्म श्रीकृष्णः सर्वासां सदसत्परः कार्यकारणयोः परः क्षराक्षरयोः परः उक्तं स्वयमेव —

'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥' इति ॥

तेन निर्विशेषे ब्रह्मणि श्रुतयश्चरितुं न सम्भवन्तीति मे मतं भवद्भिर्वा किमुच्यते इति वाक्यार्थः ॥१॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥१-११॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

श्रीगोविन्दो जयति।

सप्ताशीतितमे कृष्णस्वरूपं सर्वतोऽधिकम्। वेदैर्निरूपितं ज्ञातं नारदेन गुरोर्मुखात् ॥

मम रत्नवणिग्भावं रत्नान्यपरिचिन्वतः। हसन्तु सन्तो जिह्रेमि न स्वस्वान्तविनोदकृत् ॥

न मेऽस्ति वैदुष्यपि नापि भक्तिर्विरक्तिरक्तिर्न तथापि लौल्यात्।

सुदुर्गमादेव भवामि वेदस्तुत्यर्थचिन्तामणिराशिगृध्नुः ॥

मां नीचतायामविवेकवायुः प्रवर्तते पातयितुं बलाच्चेत्।

लिखाम्यतः स्वामिसनातनश्रीकृष्णाङ्घ्रिभास्तम्भकृतावलम्बः ॥

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम्। लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥

पूर्वाध्यायान्ते सन्मार्गमादिश्य भगवानगादित्युक्तम्। तत्र सतां भक्तानां मार्गो हि भक्तियोगो भगवद्विषयकोऽवगम्यत एव। एवं सतां ज्ञानिनां ज्ञानयोगोऽपि ब्रह्मविषयक एव ज्ञातव्यः। किन्तु ब्रह्मणः श्रुतिप्रतिपादितत्वमेतावन्न बुध्यत इत्यतः पृच्छति-ब्रह्मन्निति। ब्रह्मणि श्रुतयः कथं साक्षात् अव्यवधानेन अभिधया वृत्त्या चरन्ति। यतः अनिर्देश्ये निर्देष्टुमशक्ये जातिद्रव्यगुणक्रियासु मध्ये ब्रह्म किमपि न भवतीति तस्यानिर्देश्यत्वम्। तथा हि निर्गुणे गुणेभ्यः परस्मिन् सदसतः परे सत् पृथिव्यादि द्रव्यम् असत् अनिष्पन्नस्वभावं वस्तु क्रिया ताभ्यां परस्मिन् तथा तत्तदाश्रितत्वाज्जातेरपि परस्मिन्। यद्वा-सद्द्रव्यम् असत् अद्रव्यं जातिः क्रिया च ततः परस्मिन् गुणवृत्तयः गुणैः प्रवृत्तिनिमित्तैः जात्यादिभिर्वर्तमानाः श्रुतयो निर्जात्यादिके ब्रह्मणि कथं चरन्ति ॥१॥

गूढार्थदीपिनी

हे ब्रह्मन्! निर्गुणे गुणातीते शब्दातीते ब्रह्मणि गुणवृत्तयः शब्दात्मिकाः श्रुतयः त्रैगुण्यविषया वेदाः साक्षात् अव्यवधानेन अभिधावृत्त्या कथं चरन्ति कथं प्रवर्तन्ते? शब्दात्मिकाः श्रुतयः शब्दातीतं ब्रह्म कथं प्रतिपादयन्तीत्यर्थः। इति मे संशयं छिन्धीति वाक्यशेषः। कथम्भूते ब्रह्मणि। अनिर्देश्ये इदन्तया निर्देष्टुमशक्ये जातिद्रव्यगुणक्रियासु मध्ये ब्रह्म किमपि भवितुं नार्हतीति तस्यानिर्देश्यत्वम्। 'यत्तदद्रश्यम्' इति श्रुतेः। अत्र अनिर्देश्यत्वे निर्गुणत्वं हेतुः-, निर्गुणत्वे च सदसतः परत्वं हेतुः। गुणेषु सत्त्वादिषु तत्कार्येषु वा वृत्तिः प्रवृत्तिर्यासां ताः गुणवृत्तयः। अत्रेदमवधेयम्। पूर्वाध्यायान्ते सतां वेदानां मार्गं ब्रह्मप्रतिपादपरत्वमादिश्य भगवानगादित्युक्तं तत्र श्रुतीनां शब्दात्मकत्वा, शब्दानां च मुख्यालक्षणागौणीभेदेन त्रैवृत्तिकत्वात् मुख्यया अपि रूढियोगभेदेन द्वैविध्याच्च रूढिः स्वरूपेव जात्या गुणेन वा निर्देशयोग्ये वस्तुनि डित्थः गौः शुक्लः इत्यादौ क्रमेण शब्दार्थयोः सङ्केत प्रवर्तते। ब्रह्मणि चाकारजातिगुणाभावान्न रूढ्या श्रुतीनां तत्र प्रवृत्तिः। योगवृत्तिश्च प्रकृतिप्रत्ययार्थयोर्योगेन 'पाचकः' 'पङ्कजम्

चरितुं तात्पर्यादि..
रयोः परः उक्तं च

वद्विषयकोऽवगम्यत
तावन्न बुध्यत इत्यतः
निर्देश्ये निर्देष्टुमशक्ये
मन् सदसतः परे सत
मन्। यद्वा-सद्द्रव्यम
निर्जात्यादिके ब्रह्मणि

: साक्षात् अव्यवधानेन
इति मे संशयं छन्धीति
कमपि भवितुं नार्हतीति
तः परत्वं हेतुः। गुणेषु
ह्मप्रतिपादपरत्वमादिश्य
या अपि रूढियोगभेदेन;
ण शब्दार्थयोः सङ्केतेन
न 'पाचकः' 'पङ्कजम्'

अर्णव' इत्यादौ प्रवर्तते। लक्षणा च 'गङ्गायां घोषः' इत्यादौ मुख्यार्थबाधे गौणार्थकल्पनमिति लक्षणात् सम्बन्धिविषयत्वेन प्रवर्तते। ब्रह्मणश्च सदसतः परत्वेनासङ्गत्वान्न तयोरपि तत्र प्रवृत्तिः। गौणी च सिंहे वर्तमानक्रौर्यादिगुणानां माणवके दृश्यमानत्वात् सिंहो माणवकः' इत्यत्र प्रवर्तते। ब्रह्मणि च न कस्यापि धर्मस्य सत्त्वान्न गौण्या अपि तत्र प्रवृत्तिः। एवं च सर्वविधवृत्त्यतीते निर्गुणे ब्रह्मणि गुणवृत्तयः श्रुतयः साक्षात् कथं चरन्तीति राज्ञः प्रश्नाभिप्राय इति सङ्क्षेपः ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

श्रीमन्निम्बार्काय नमः।

अथ सप्ताशीतितमे वेदैर्भगवत्स्तुतिः कृतेति वर्ण्यते। अत्र मायावादध्वान्तभास्करैः श्रीकश्मीरिकेशवभट्टैः कृता व्याख्या तात्पर्येणोपन्यस्यते —

सनन्दनपदद्वन्द्वं भक्तिनम्रैकचेतसा। प्रणम्य क्रियते व्याख्या ब्राह्मयौपनिषदी मया॥

तत्र श्रीदशमस्कन्धे दुष्टभूभृतां निरोधलक्षणं द्वारि कृत्य प्रथमं लक्ष्यभूतमाश्रयं श्रीकृष्णं श्रीशुकेन तत्तत् ब्रह्मरुद्रेत्यादिवाक्यैस्तत्तद्गर्भस्तवादिस्थैरन्यस्कन्धस्थैश्च सर्वेषां विदुषां प्रमाणभूतैः शास्त्रविषयत्वेन प्रतिपादितं ज्ञात्वा तस्यैव सर्वज्ञसर्वशक्ते ब्रह्मणो भगवतः स्वरूपगुणशक्तिज्ञानान्मोक्षलक्षणं फलं निश्चित्य अन्येषां च स्वबुद्धिपरिकल्पितवेदविरुद्धकल्पनामाकल्य्य तदसम्भवं च निश्चित्यान्येषां तच्छ्रवणोत्सुकानां श्रद्धापशूनां स्वबुद्धिपरामर्शहीनानां श्रीकृष्णे भगवत्यसम्भावनादिनिवृत्तये राजा परीक्षिन्महाभागवतः श्रीशुकं पृच्छति इत्येतदध्यायस्य बीजम्। श्रीकृष्णस्य शास्त्रविषयत्वं प्रमाणसिद्धम्। तथा च श्रूयते

'तं त्वौपनिषदं पुरुषं पृच्छामः। सर्वे वेदा यत्पदमामनन्ति ॥'

'सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे। नमोऽवेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥'

इत्यादि। सूत्रितं च —

"शास्त्रयोनित्वात्।" (१-१-३) स्मर्यते च भगवता स्वयमेव 'वेदैश्च सर्वैरहमेव वेद्यः' इति अन्यत्रापि 'नारायणपरावेदाः' इत्यादि। तज्ज्ञानान्मुक्तिरपि प्रमाणसिद्धा। 'जुष्टं पश्यत्यन्यमीशं यन्महिमानमिति वीतशोकः। यदापश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्म वेति। तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति॥' 'तमेव विदित्याऽतिमृत्युमेति। पृथगात्मानं प्रेरितारं च मत्वा। संसारबन्धस्थितिमोक्षहेतु'रित्याद्याः ॥

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्। सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥

ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्। इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥

इति स्मृतेः। 'तन्निष्ठस्य मोक्षोपदेशात्' (१-१-७) इति न्यायाच्च। भगवता पराशरेणापि कैमुत्यन्यायेन श्रीकृष्णस्यैव ज्ञानमुक्तिः प्रतिपादिता। चतुर्थांशे वंशावल्यां —

"तच्च रूपमुत्फुल्लपद्मदलायमलामलाक्षमत्युज्ज्वलं पीतवस्त्रधार्य्यमलकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बाहुशङ्खचक्रगदाधरमतिरूढवैरानुभवेन भोजनस्नानाशनशयनादिष्ववस्थान्तरेषु ततस्तमेमेवाक्रोशेषूच्चारयंस्तमेव हृदये आत्मन्यवधारय। भगवदस्त्रचक्रांशुमालोज्ज्वलमक्षयतेजःस्वरूपं परम्ब्रह्मरूपमपगतरागद्वेषादिदोषं भगवन्तमद्राक्षन् भगवच्चक्रेणाशु व्यापादितः। तेन तत्स्मरणदग्धाखिलाघसञ्चयो भगवतैवान्तरमुपनीतस्तस्मिन्नेव लयमुपययौ। एतत्तवाभिहितं भगवानिहकीर्तितः संस्मृतश्च द्वेषानुबन्धेनाप्यखिलसुरासुरदुर्लभं फलं प्रयच्छति किमुत सम्यक् भक्तिमता ॥"

इत्यादिदण्डकैः। केचित्तु —

'एवं स्वभक्तयो राजन्भगवान्भक्तभक्तिमान्। उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥'

इत्यत्र सतां स्वतः प्रमाणभूतानामप्रामाण्ये कारणशून्यानां देवानां मार्गं निर्गुणब्रह्मपरत्वमुपदिश्य द्वारवतीमगादित्येतदध्यायस्योत्थानिकाबीजं कल्पयन्ति तदसत्। पूर्वाध्याये द्वयोर्विप्रराज्ञोरेकतरस्मा अपि तेषां विवक्षितार्थस्य भगवता नोपदिष्टत्वात्। ग्रन्थान्तरे च क्वाप्यप्रसिद्धेरतोऽस्मदुक्तस्यैव वरीयस्त्वं पूर्वश्लोकश्चैवमन्वेतव्यः। स्वभक्तयोः समीपे उषित्वा विप्राय सन्मार्गं सतां भागवतानां मार्गं भगवतोऽप्याधिक्यपूजार्हत्वमादिश्य द्वारवतीमगादिति। तथा च वक्ष्यते मद्भक्तपूजाऽभ्यधिकेति। अत्रापि भक्तभक्तिमानिति विशेषणसार्थक्यमुक्तम्। इदानीं प्रकृतं व्याख्यायते। शाब्दवृत्तिस्तावद् द्विधा मुख्या जघन्या चेति। मुख्या नाम सामान्याविशिष्टव्यक्तिविषयाऽस्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छारूपससङ्केतः शक्तिरिति तार्किकाः। सामान्यमात्रविषयः स्वाभाविक एवार्थप्रतीतिजननसामर्थ्यवल्लक्षणसम्बन्ध इति मीमांसकाः। सा च त्रिधा योगो रूढिर्योगरूढिश्चेति। तत्रावयवयोगसापेक्षतयार्थज्ञापको योगः। यथा माधवः लक्ष्मीकान्तः। वासुदेवः नियन्ता शास्तेति। सर्वाविप्रतिपन्नयोगेन प्रवृत्तिः जात्यादिविशिष्टवस्तुप्रतिपादकावयवनिरपेक्षा रूढिः। यथा घटः हरिः ब्राह्मणः (क)डवित्थः नीलं पीतम्। उभयप्रवृत्तिहेतुका तृतीया। यथा सोमः पङ्कजः। जघन्यापि द्विधा। लक्षणा गौणी चेति। तत्र शक्यसम्बन्धे लक्षणा। यथा गङ्गायां घोष इत्यत्र प्रवाहशक्तस्य गङ्गापदस्य तत्सम्बन्धे तीरे वृत्तिः। अत्र चोद्देश्यविधेयान्वयानुपपत्तिर्बीजम्। यथा मञ्चाः क्रोशन्तीत्यत्र मञ्चशक्तस्य मञ्चपदस्य तत्सम्बन्धेषु पुरुषेषु वृत्तिः। शक्यवृत्तिलक्ष्यमाणगुणसम्बन्धे गौणी। यथा सिंहो माणवक इत्यत्र सिंहवृत्तिशौर्यादिगुणलक्षणया तद्वति माणवके वृत्तिरिति। अत एव लक्षणा गौणीतो बलवती। गौण्या वृत्तिद्वयात्मकत्वात्सैव लक्षितलक्षतेति कैश्चिदुच्यते तदुक्तम्—

'अभिधेयाविनाभूतप्रवृत्तिर्लक्षणोच्यते। लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ॥'

इति। व्यञ्जनाख्याऽपरा वृत्तिरित्यालङ्कारिकाः। ते तु गौणीं लक्षणामध्ये अन्तर्भाव्य मुख्या लक्षणा व्यञ्जना चेति वृत्तेस्त्रैविध्यमाचक्षते। व्यङ्ग्येनार्थज्ञापिका व्यञ्जना। तत्र गतोऽस्तमर्क इति वाक्यप्रयोगानन्तरं दूरं म(ण्डप) इति पण्यान्ययसार्यतामिति सन्ध्योपास्यतामिति बहूनां बहुविधार्थप्रत्ययो भवति। तत्र न शक्तिर्न वा लक्षणा। किन्तु शब्दस्येवान्वयव्यतिरेकाभ्यामपरा व्यञ्जनाख्या वृत्तिराश्रयणीयेति तच्चिन्त्यं शास्त्रकृद्भिरपेक्षितत्वात्। यत्तु—

'यौगिको योगरूढश्च शब्दः स्यादौपचारिकः। मुख्यो लाक्षणिको गौणः शब्दः षोढा निगद्यते ॥'

इति वैयाकरणैः षड्विधत्वमुक्तं तन्मुख्यजघन्ययोरवान्तरभेदमादाय योजनीयम्। तथा हि मुख्यो यौगिको योगरूढ इत्येकम्। त्रिमुख्यायां लाक्षणिक औपचारिको गौण इत्यपरं त्रिकम्। जघन्यायामन्तर्भाव्यमिति अवान्तरभेदाश्चाकरे द्रष्टव्याः। तत्र पृच्छति–हे ब्रह्मन्! ब्रह्मणि श्रुतयः कथं चरन्ति। कया वृत्त्या चरन्ति। कया वृत्त्या ब्रह्म प्रतिपादयन्तीत्यर्थः। का वात्रानुपपत्तिरित्याशङ्कायां योगाद्यनुपपत्तिं दर्शयति–अनिर्देश्य इति। अवयवसंज्ञाजात्यादिशून्ये योगादिवृत्तित्रयाविषय इत्यर्थः। 'निष्फलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।' इति श्रुतेः। गौण्या वृत्तेर्विषयमस्त्विति चेत्तत्राह–निर्गुणे 'केवलो निर्गुणश्च' इति श्रुतेः। लक्षणया प्रतिपाद्यत इति चेत्तत्राह–साक्षादिति। सम्बन्धादिशून्ये यत्साक्षादपरोक्षात् ब्रह्मेति श्रुतेः। तत्र हेतुः सदसतः पं स्थूलसूक्ष्मादिभावरहिते 'अस्थूलमनणु' इत्यादिश्रुतेः। व्यतिरेके सर्वत्र हेतुः गुणवृत्तय इति। अवयवजातिसंज्ञादेरुपलक्षणम्। श्रुतीनां शब्दत्वेन गुणादिप्रतिपादनपरत्वादिति तात्पर्यार्थः ॥१॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

श्रीकृष्णाय नमः।

शब्दार्थयोरुत्तमयोः सम्बन्धो यादृशो मतः। तं विवेचयितुं कृष्णः श्रुतिगीतं चकार ह ॥१॥

प्रमाणं ब्राह्मणः प्रोक्तः प्रमेयमपि वै बृहत्। स एव भगवान् कृष्णस्ततो भजनमीरितम् ॥२॥

तत्रोपपत्तिः प्रष्टव्या वाच्यवाचकनिर्णये। अतो राजा श्रुतीनां वै निर्णयार्थमपृच्छत ॥३॥

सगुणं चेद्वेदवाच्यं ब्राह्मणास्तत्र च स्थिताः। ततोऽत्र भगवानेव पूज्यो नान्यः कथञ्चन ॥४॥

मतान्तरोक्तिरेषा ि

त्रयमेकं स्वशक्तिं

तथापि साङ्ख्यसि

अष्टत्रिंशे श्रुतीनां ि

राजा भगवद्गुणवि

श्रुतीनामेकवाक्यतामङ्गीकृत

अखण्ड एव वाक्यार्थ इति

सर्वैरहमेव वेद्यः।' इति 'स

भगवतः ज्ञानशक्तिं क्रियाश

लौकिक एवेति, अलौकिव

ब्रह्मणोऽलौकिकत्वापत्तिस्तत

सत् कृतार्थतां करिष्यतीति प्र

इति। निर्देशो लौकिकबु

लौकिकधर्मातिरिक्तत्वेन ब्रह्म

'अवाच्यः सर्वशब्दा

श्रुतयश्च पदशो गुणवृत्तयः, ध

धर्माङ्गीकारो अद्वैतहानिः। अ

तत्र पर्यवसितास्तद्द्वारा धर्मि

इति। कार्यकारणवार्ता

सम्बन्धाभावाद्गुणाभावादज्ञाना

श्रीमद्भागवतं से

शास्त्रैर्ब्रह्म विजा

मुख्या च लक्षणा

डित्थो गौः शुक्ल

प्रकृतिप्रत्ययद्वय

सिंहोऽयं

राजप्रश्नः। हे ब्रह्मन्!

वचनानर्हे वाङ्मनसोरगोचरत्वात्

वदन् लक्षणां योगं चापाकरोति।

बुद्धिप्रवर्तको

मतान्तरोक्तिरेषा हि सिद्धान्ते वैदिके तथा । अनन्तगुणपूर्णो हि हरिर्ब्रह्म श्रुतिस्तथा ॥५॥
त्रयमेकं स्वशक्ति हि त्रेधा स्वस्मिन्निधाय हि । फलप्रमेयमानत्वं सच्चिदानन्दतां गतम् ॥६॥
तथापि साङ्ख्यसिद्धान्ते तथा तदुपजीवके । वैष्णवेऽन्यत्र वा वाच्यं श्रुतिसङ्ग्रहणं यथा ॥७॥
अष्टत्रिंशे श्रुतीनां हि यथा वाच्यं बृहद्भवेत् । तदर्थं पूर्वपक्षादिसिद्धान्तफलमीर्यते ॥८॥

राजा भगवद्गुणविरोधे परिहृते प्रमाणविरोधमाशङ्कते-ब्रह्मन्निति । ब्रह्मणि साक्षात्कथं श्रुतयश्चरन्तीति प्रश्नः । अत्र नेकवाक्यतामङ्गीकृत्य पृच्छति । अथैकत्वादेकं वाक्यमिति । तत्र किं बृहद्वेदानां तात्पर्यार्थ आहो स्विद्वाक्यार्थ इति । द एव वाक्यार्थ इति मतमज्ञात्वा पृच्छति । पदार्था करणतामापन्नाः स्वसंसर्गवाक्यार्थं बोधयन्तीति मन्यते । 'वेदैश्च हमेव वेद्यः ।' इति 'सर्वे वेदा यत्पदमामनन्ति ।' इति च स्मृतिश्रुतिभ्यां सर्ववेदानामेकार्थप्रतिपादकत्वं च श्रूयते । श्रुतयश्च ज्ञानशक्तिं क्रियाशक्तिं च प्रतिपादयन्ति नानाविधां शक्तिं च गुणमयीं मन्यन्ते । अतः सगुणाः श्रुतयः । पदानां सङ्केतः क एवेति, अलौकिके सङ्केताभावात् । तैर्भगवत्सम्बन्धिनः पदार्थाः अलौकिकाः कथं स्मारयितव्याः, लौकिकत्वे ऽलौकिकत्वापत्तिस्तत्सम्बन्धात् । अतः पूर्वपक्षे साधनपरत्वमेव वेदानाम् । अतः स्वप्रकाशमेव ब्रह्म स्वानुभववेद्यं प्रसन्नं कृतार्थतां करिष्यतीति प्रमेयबलेनैव कार्यसिद्धिः, न प्रमाणबलेनेति पूर्वपक्षः । ब्रह्मणः अलौकिकत्वार्थं हेतुमाह-अनिर्देश्य । निर्देशो लौकिकबुद्धिविषयीकरणम्, 'अयं घटोऽयं पटः' इतिवत् । बृहत्त्वबृंहणत्वयोगोऽपि विचारे क्रियमाणे कधर्मातिरिक्तत्वेन ब्रह्मणि फलिष्यतीति न ब्रह्मपदानुपपत्तिः ।

'अवाच्यः सर्वशब्दानां बुद्ध्या वाच्यो निगद्यते । ततः समानधर्मेण व्यवहारो निरूप्यते ॥' इति ॥ किञ्च निर्गुणे निर्धर्मके पदशो गुणवृत्तयः, धर्मप्रतिपादकत्वात् । अन्यथा संसर्गप्रत्यायकत्वं न स्यात्, सर्वत्रैकार्थत्वप्रत्यायकत्वात् । ब्रह्मणश्च ङ्गीकारे अद्वैतहानिः । अतः साक्षान्निर्धर्मके ब्रह्मणि कथं श्रुतयश्चरन्ति । ननु कार्यकारणभावं स एवापन्न इति तत्प्रतिपादनद्वारा र्यवसितास्तद्द्वारा धर्मिणि पर्यवस्यन्तीति लक्षणया गौण्या तात्पर्यवृत्त्या वा ब्रह्मपरत्वं भविष्यतीत्याशङ्क्याह-सदसतः पर । कार्यकारणवार्तानभिज्ञे । किं तस्य वानन्दपूर्णस्य कार्येण कारणेन वा प्रयोजनम् ? । अतः भावाद्गुणाभावादज्ञानाभावादज्ञानादेव तात्पर्याभावाच्च न केनापि प्रकारेण श्रुतिप्रतिपाद्यं ब्रह्मेति ॥१॥

सुबोधिनीसारः

श्रीमद्भागवतं सेव्यं सच्छास्त्रं मोक्षकाङ्क्षिभिः । यत्र हि श्रुतयः प्रोतास्तासु वेदार्थ आहितः ॥१॥
शास्त्रैर्ब्रह्म विजानाति तत्र संशय्य पृच्छति । राजाऽसङ्गे तथाऽवाच्ये कथं वेदः प्रवर्तते ॥२॥
मुख्या च लक्षणा गौणी त्रिधा शब्दप्रवर्तनम् । तत्राद्या द्विविधा प्रोक्ता रूढियोगादिभेदतः ॥३॥
डित्थो गौः शुक्ल इत्यत्र रूढिर्वृत्तिरुदीरिता । स्वरूपजातिगुणतोऽपरा स्यात् पङ्कजादिषु ॥४॥
प्रकृतिप्रत्ययद्व्यर्थयोगेन परिवर्तते । गङ्गायां घोष इत्यादौ लक्षणाभिहितार्थयुक् ।
सिंहोऽयं बाल इत्यादौ गौणी च गुणयोगतः ॥५॥

राजप्रश्नः । हे ब्रह्मन् ! ब्रह्मणि श्रुतयः कथं चरन्ति रूपजातिगुणराहित्येन न रूढिवृत्तिः साक्षादित्युक्तेः । तत्र हेतुरनिर्देश्ये र्वे वाङ्मनसोरगोचरत्वात् तत्रापि हेतुं वदन् गुणवृत्तिं निराकरोति । निर्गुणे इति । कथम्भूताः श्रुतयो गुणैर्वर्तमानाः । तत्र हेतुं क्षणां योगं चापाकरोति । सदसतः । कार्यकारणाभ्यां परेऽसङ्गे ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

बुद्धिप्रवर्तको यस्तु ब्रह्मादीनां निरन्तरम् । वेदस्तुतेः स टीकायां करोतु मे सहायताम् ॥१॥

जनलोके पुरा गीता पूर्वेषां पूर्वजैर्धृता । सप्ताशीतितमेऽध्याये वेदस्तुतिर्निरूप्यते ॥२॥

त्रय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सात्त्वतैः । उपगीयमानमाहात्म्यं हरिं सामान्यतात्मजम् ॥३॥ "सर्वे वेदा यत्पदमामनं "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिवाक्यैर्वेदानां ब्रह्मप्रमापकत्वं श्रूयते, "यतो वाचो निवर्तन्ते अप्राप्यमहसा सं इत्यादिवाक्यैस्तन्निषेधश्च श्रूयते, तत्र संशयानो राजा पृच्छति-ब्रह्मन्निति । सर्वज्ञत्वात्तव सर्वं विदितमेव इति सम्बोधनेन सूचयं अनिर्देश्ये अनिर्वचनीये ब्रह्मणि श्रुतयः साक्षात् कथं चरन्ति मुख्यवृत्त्या तत्कथं प्रतिपादयन्तीत्यर्थः । अनिर्देश्यत्वे हेतुमाह-नि इति । गुणशब्दोऽत्र गुणजातिक्रियादिविशेषणमात्रपरः, तद्रहिते । तद्रहितत्वेऽपि कथमनिर्देश्यत्वम् इत्याशङ्क्याह-गुणवृत्तयः इ जात्याद्यन्यतमं द्वारीकृत्यैव तद्विशिष्टाभिधायिन्य इत्यर्थः । निर्गुणत्वे हेतुमाह-सदसतः परे इति । कार्यकारणाभ्यां परस्मिन् अ इत्यर्थः ॥१॥

अन्वितार्थप्रकाशिका

आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन् पदेऽस्तु मम चित्तमगोचरेऽपि ॥
यत्सद्व्रजस्तितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥१॥
यावन्निरञ्जनमजं पुरुषञ्जरन्तं सञ्चिन्तयामि सकले जगति स्फुरन्तम् ॥
तावद्बलात्स्फुरति हन्तहृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥२॥
प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥
गङ्गासहायजरठो हरितोपहेतोर्वेदस्तुतेर्विवरणं सुगमं तनोति ॥३॥

सप्ताशीतितमे वेदैः सगुणो निर्गुणो हरिः ॥ बहुधा स्तूयते स्मात्र श्लोकाः सार्द्धाः खमार्गणाः (५०॥) ॥
अष्टोवाचेति (८) सार्द्धा च त्र्यशीतिः (८३॥) स्युरनुष्टुभः ॥८७॥

पूर्वाध्यायान्ते स्वभक्तयोः सन्मार्गमादिश्येत्युक्तं तत्र नृपः पृच्छति-ब्रह्मन्निति ॥ हे ब्रह्मन् ! अनिर्देश्ये जात्यादिना निर्देष्टुमश निर्गुणे सदसतः कार्याच्च परे असङ्गे ब्रह्मणि गुणवृत्तिर्यासां ताः प्राकृतगुणैर्जात्यादिभिः प्रवर्तमानाः श्रुतयः साक्षात् मुख्यया वृ तत्कथं चरन्ति प्रवर्तन्ते । साकारे श्रीकृष्णाख्ये ब्रह्मणि च सर्वप्रत्यग्रूपत्वादिदन्तया इयत्तया च निर्देष्टुमशक्ये "हरिर्हि निर्गु साक्षात्" इत्यादिवक्ष्यमाणात् "सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः ।" इति विष्णुपुराणाच्च प्रकृतगुणरहिते सदसतः परे कथं प्रवर्तन्ते । अयम्भावः । श्रुतयो हि शब्दरूपाः । शब्दवृत्तिस्तावत्त्रेधा । मुख्या गौणी लक्षणा च । मुख्यैव शक्तिरभि चोच्यते । सा च योगेन रूढ्या योगरूढिभ्यां चेति त्रिधा । तत्र अवयवशक्तिर्योगस्तेन त्रिधा कृत्तद्धितसमासभेदात् । यथा पाचक दाशरथिः राजपुरुषः समुदायशक्ती रूढिः तया यथा गौः घटः योगरूढिभ्यामपि कृदादिभेदात्त्रिधा । यथा छत्रम् । छादनरूपयोगार्थेन आतपत्रमर्थः केवलेनानेन वस्त्रादौ प्रसक्तिवारणाय। रूढिरपि तद्धिते यथा वर्णी । अत्र योगार्थवर्णवत्त्वाद्ब्रह्म अर्थः । गृहस्थादिवारणाय रूढिरपि समासे । यथा पङ्कजम् । अत्र पङ्कजनिकर्तृरूपयोगार्थेन कमलमर्थः । कुमुदादिवार रूढिरपीति सङ्क्षेपः । परे तु मुख्यया वृत्त्या जातिसङ्केतयोगैस्त्रेधा । तत्र जातिशब्दाः गौः घटः अश्वकर्ण इत्याद्याः । शुक्ला गुणवाचका अपि जातिशब्दा एव । सङ्केतशब्दाः डित्थो डवित्थ इत्याद्याः । योगस्त्रेधा कृत्तद्धितसमासभेदात् । आद्यौ प्रकृतिप्रत्यय द्वौ । अन्त्यः पदद्वययोगः । यथा पाठकः औपगवः पङ्कजम् इत्याचक्षते । गौणी तु लक्ष्यमाणगुणयोगात्परशब्दस्य परत्रवृ यथा यजमानः प्रस्तरः सिंहो देवदत्तः । अत्र हि यजमानशब्देन लक्ष्यमाणं क्रतुनिवर्तकत्वं तत्प्रस्तरेऽप्यस्ति । एवं सिंहश देवदत्ते । लक्षणाशब्दस्य स्वशक्यसम्बद्धवृत्तिः । यथा द्विरेफपदस्य रेफद्वये शक्तस्य भ्रमरघटितपरम्परासम्बन्धेन मधुकरे वृ परे तु गौणीमपि लक्षितलक्षणामेवाहुः । सिंहशब्दवाच्यसम्बन्धिकौर्यादिसम्बद्धमाणवकप्रतीतेः । पुनर्लक्षणा त्रि जहत्स्वार्थाऽजहत्स्वार्थाजहदजहत्स्वार्था च । तत्राद्या गङ्गायां घोष इति । अत्र गङ्गापदशक्यप्रवाहस्य घोषाधारत्वासम्भवात्त

तीरे गङ्गापदस्य वृत्तिः । द्विती
एवं काकेभ्यो दधि रक्ष्यतामि
हि तद्देशकालविशिष्टो देवद
त्यक्त्वा विशेष्ये देवदत्तस्वरूप
लक्षणा भवति । यथा विषं
मतान्तराणि त्वत्र विस्तरभया
सदसद्भ्यामसङ्गे च केनचिद
कथमुभयविधे ब्रह्मणि श्रुतय
अत्यन्तासत्येऽप्यर्थे ज्ञानं जन
निराकृतानि । अथायमत्र निष

'निर्गुणं निष्क्रियं श

इत्यादिलक्षणं च ब्र
श्रुतेः प्रामाण्यमेव न स्वीक्रिय
ब्रुवते । नैयायिकादयः परमे
प्रधानास्तादृशं ब्रह्म निःसंश
शक्नोति । यदि च —

"एष वन्ध्या

अथ सप्ताशीतित

सहजानन्दपादाब्ज

यद्यप्यस्याध्यायस्
पूर्वाध्यायान्ते सन्मार्गशब्दाद
विवक्षितत्वात् ॥ किञ्च सत
सुतरामप्रसिद्धम् अत इदमुच
प्रतिपादितान् श्रुत्वा निग
दशमस्कन्धे —

इति सञ्चि

सत्यं ज्ञा

नन्दाद

इति कथाश्रवणा
प्रकृतकृष्णचरित्रकथासमाप
ब्रह्मन्निति ॥ सदसतः परे सी

"कार्ये स्थूले विद्

२॥

र्वे वेदा यत्पदमामनन्ति"
ति अप्राप्यमहसा सह"
ति सम्बोधनेन सूचयति।
निर्देश्यत्वे हेतुमाह-निर्गुणे
शङ्क्याह-गुणवृत्तय इति।
रणाभ्यां परस्मिन् असङ्गे

गाः (५०॥)॥

श्ये जात्यादिना निर्देष्टुमशक्ये
तयः साक्षात् मुख्यया वृत्त्या
र्देष्टुमशक्ये "हरिर्हि निर्गुणः
कृतगुणरहिते सदसतः परे च
च । मुख्यैव शक्तिरभिधा
समासभेदात्। यथा पाचकः
त्रधा । यथा छत्रम्। अत्र
त्र योगार्थवर्णवत्त्वाद्ब्रह्मचारी
लमर्थः । कुमुदादिवारणाय
कर्ण इत्याद्याः । शुक्लादयो
त्। आद्यौ प्रकृतिप्रत्यययोगौ
गात्परशब्दस्य परत्रप्रवृत्तिः।
ऽप्यस्ति । एवं सिंहवत्कौर्य
नरासम्बन्धेन मधुकरे वृत्तिः।
तिः । पुनर्लक्षणा त्रिधा।
घोषाधारत्वासम्भवात्तत्सम्बद्धे

पदस्य वृत्तिः । द्वितीया तु शोणो धावतीति । अत्रामूर्तस्य शोणगुणस्य धावनासम्भवाच्छोणपदं स्वार्थमजहत्तद्वृत्ति वर्तते । काकेभ्यो दधि रक्ष्यतामित्यत्रापि काकपदं स्वार्थमजहदपि स्वस्वेतरदध्युपघातकमात्रे वर्तते । सोऽयं देवदत्त इति तृतीया । अत्र कालविशिष्टो देवदत्तस्तच्छब्दार्थः । एतद्देशकालविशिष्ट इदंशब्दार्थः । तत्र विशिष्टयोरभेदासम्भवादुभयत्र विशेषणांशं विशेष्ये देवदत्तस्वरूपमात्रे तदिदंशब्दयोर्वृत्तिः । एवं "तत्त्वमसि, अयमात्मा ब्रह्म" इत्यादावप्येषैव लक्षणेति । क्वचिद्वाक्येऽपि भवति । यथा विषं भुङ्क्ष्वेति । अत्र हि विषभोजनरूपस्वार्थपरित्यागेन शत्रुगृहे न भोक्तव्यमित्यस्मिन्नर्थे वाक्यं वर्तते । णि त्वत्र विस्तरभयान्नोच्यन्ते । तत्र जात्यादिना निर्देष्टुमशक्ये रूढिवृत्तिर्न सम्भवति । निर्गुणे च गौणी वृत्तिर्न सम्भवति । समसङ्गे च केनचिदपि सम्बन्धाभावान्न लक्षणायोगवृत्ती सम्भवतः । एवं च पदार्थत्वायोगादपदार्थस्य च वाक्यार्थत्वायोगात् विधे ब्रह्मणि श्रुतयः प्रवर्तन्ते । अत्र श्रुतयः इत्युपलक्षणम् । निर्गुणेऽपि मनश्चरेत् इत्युपसंहारात् । तथा च ये शब्दमनसी सत्येऽप्यर्थे ज्ञानं जनयितुं प्रभवतस्ते अपि यत्र ब्रह्मणि कुण्ठीभवतस्तत्र का शङ्काऽप्यन्यप्रमाणप्रवृत्तेरित्यनुमानादीन्यपि नि । अथायमत्र निष्कृष्टार्थः ।

'निर्गुणं निष्क्रियं शान्तम्, अपाणिपादो जवनो ग्रहीता, पश्यत्यचक्षुः स शृणोत्यकर्णः ॥'

इत्यादिलक्षणं च ब्रह्म लौकिकैः प्रत्यक्षादिभिस्तावन्नावगम्यत एव । तादृशे च केवला श्रुतिरेव प्रमाणम् । तत्र नास्तिकैः प्रामाण्यमेव न स्वीक्रियते । आस्तिकेष्वपि कर्ममीमांसकाः पूर्वोत्तरलक्षणं ब्रह्म नाङ्गीकुर्वते । उपनिषदां च जपोपयोगित्वमात्रं नैयायिकादयः परमेश्वरमङ्गीकुर्वन्तोऽपि तत्र निर्गुणत्वादिकं नाङ्गीकुर्वते । एवं विप्रतिपत्तावपि । वयं तु श्रुतौ सम्यक् स्तादृशं ब्रह्म निःसंशयं स्वीकुर्म एव । परन्तु शब्दरूपा श्रुतिः स्वयमपि तद्ब्रह्मशब्दानिर्देश्यं ब्रुवती केन व्यापारेण बोधयितुं ति । यदि च —

"एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः ।" इति वाक्यसाम्ये वारयितुं कथं शक्नुयामेति ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ सप्ताशीतितमे नारायणनारदसंवादेन परमेश्वरनिरूपणरूपा वेदस्तुतिर्निगद्यते ।

सहजानन्दपादाब्जमिलिन्दीकृतमानसः । गोपालानन्दनामाहं कुर्वे श्रुत्यर्थदीपिकाम् ॥१॥

यद्यप्यस्याध्यायस्य पूर्वाध्यायेन सह सङ्गतिर्नास्ति ब्रह्मणि श्रुतयश्चरन्तीति वाक्यस्य तत्राश्रवणात् ॥ न च ध्याने सन्मार्गशब्दादयमर्थो लभ्यते इति वाच्यम् ॥ तत्र सन्मार्गशब्दस्य सतां साधूनां विष्णुबुद्ध्या पूजादिरूपस्यार्थस्य तत्वात् ॥ किञ्च सतामित्यस्य साधुपरत्वमिव वेदपरत्वमप्रसिद्धम् । मार्गशब्दस्याप्याचारपरत्वमिव परब्रह्मप्रतिपादनपरत्वं सिद्धम् अत इदमुच्यते ॥ विप्रशापात्पुराकृताश्वमेधो राजा स्वयज्ञप्रवृत्त्यवसरेऽग्निवरुणेन्द्रादीन् ब्राह्मणैः श्रुतिभिः श्रेष्ठत्वेन तान् श्रुत्वा निगमागुणवृत्तीन्द्रादिपरा अत एव स्वमपि गुणप्रधाना इति कृतनिश्चयः श्रीभागवतश्रवणाकाले न्ये —

इति सञ्चिन्त्य भगवान् महाकारुणिको हरिः । दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥

सत्यं ज्ञानमनन्तं यद्ब्रह्मज्योतिः सनातनम् । यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः ॥

नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः । कृष्णं च तत्र छन्दोभिस्तूयमानं सुविस्मिता ॥

इति कथाश्रवणावसरे निर्गुणं धाम कथं प्राप्ताः । निर्गुणं कथं भगवन्तं ते स्तुवन्तीति जातसंशयोऽधुना चरित्रकथासमाप्त्यवसरे प्रकरणसङ्गतेर्विद्यमानत्वाच्चित्तस्थं संशयं पप्रच्छेति न कश्चिद्विरोधः ॥ राजोवाचेति ॥ ॥ सदसतः परे सदिति स्थूलम् ॥ अस्तीति प्रतीतियोग्यत्वात् असदिति सूक्ष्मं नास्तीति प्रतीतियोग्यत्वात् ॥ यथाहुः —

"कार्ये स्थूले विद्यमाने सत्ये साधौ च दृश्यते । सच्छब्दस्तदसच्छब्दो ज्ञेयस्तत्प्रतियोगिनी"ति ॥

सतः स्थूलभावाभिमानिनः वै राजपुरुषादेः पुरुषसमूहात् असतः विद्यमानाक्षरपुरुषसमूहादतिसूक्ष्माद सकाशाच्च निखिलहेयप्रत्यनीकतया कल्याणैकतानतया च सर्वावस्थावस्थितं चिदचिद्व्यापकतया नियन्तृतयाशेषि परेऽत्यन्तविलक्षणे ॥ यद्वा ॥ स्वामिमतानुरूपैकरूपाचिन्त्यनित्याद्भुतनिरवदनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्यलावण्य द्यनन्तस्वरूपगुणैरनविधकातिशयज्ञानबलैश्वर्यशक्तितेजः प्रभृत्यसङ्ख्येकल्याणगुणगणैश्चापारकारुण्यसौशील्यवात्सल्यौ र्यादिस्वभावैश्चासङ्ख्यमहाविभूतिभिरत्युत्कृष्टतमे पुंसः स्ववशत्वावशत्वरूपौ गुणस्वभावयोः परस्परभेदौ स्तः तथा भग प्रोक्ताश्छान्दोग्ये प्रथमस्कन्धे च —

"अपहतपाप्मा विजरो विमृत्युरित्यादयोऽष्टमहागुणाः सत्यं शौचमित्यादयश्च यः कालकालो गुणी" इति श्रुति

अतोऽनिर्देश्येऽक्षराक्षरपुरुषैः समतया केनापि गुणेन निर्देष्टुमयोग्ये निर्गुणे सत्त्वादिगुणवर्जि तदुक्तम् एकादशविष्णुपराणयोः —

"मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकमि"ति ॥ "सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणा" इति॥

ब्रह्मणि बृहत्त्वगुणयोगिनि पुरुषयोत्तमे गुणवृत्तयः गुणेषु सत्त्वादिषु वृत्तिर्वर्तनं यासां ताः श्रुतयः साक्षात्कथं प्रत्यक्षतया केन प्रकारेण प्रवर्तन्ते ॥ यद्वा ॥ कथं प्रवर्तन्ते न कथञ्चिदपि स्वप्रवर्तनं कर्तुमर्हा इत्यर्थः ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

स्वामिनारायणं कृष्णं पितरं रघुवीरकम् ॥ गोपालानन्दसद्वर्यं ध्यायेऽहं धीप्रसत्तये ॥१॥
कारणत्वे हरिः सूक्ष्मचिदचिद्देहयुङ् ननु ॥ कार्यत्वे स्थूलचिदचिच्छरीरोऽपि श्रुतीरितः ॥२॥
एवं कारणकार्याख्यवस्थयोश्चिदचिद्युतः ॥ वर्तमानोऽपि नैजेनैश्वर्येणास्ते पृथक् ततः ॥३॥
कार्यावस्थां गतः सम्यक् वर्णयन्ति श्रुतेर्गणाः ॥ कारणावस्थमेतं तु कथञ्चित् किञ्चिदेव हि ॥४॥
गुणैः प्रकृतिजैर्हीनो निर्गुणः श्रुतिभिः स्मृतः ॥ अप्राकृतैर्गणैर्युक्तः सगुणोऽपि समीरितः ॥५॥
वाङ्मनोगोचरं प्राहुः श्रुतयः काश्चन प्रभुम् ॥ वाङ्मनोऽगोचरं चापि ता एवाहुर्हरिं पुनः ॥६॥
श्रुतयः प्रलयान्ते यः सर्गकर्मोन्मुखो हरिः ॥ लक्ष्यीकृत्य यथा प्राहुस्तं तथात्र स कीर्त्यते ॥७॥

"सर्वदेवमयो विप्रः सर्वदेवमयो ह्यहम् ॥" इति वेदानां ब्रह्मप्रमापकत्वं भगवदुक्त्यैवावगतम्। अस्याध्यायस्य "विशुद्धसत्त्वधाम्न्यद्धा त्वयि शास्त्रशरीरिणि" इति बलिवचनेन तथा तत्पूर्वाध्याये "ब्रह्म ते हृदयं शुद्धम्" "शास्त्रयोनेस्तवात्मनः" इत्यन्तेन मुनिवचसापि वेदानां ब्रह्मप्रमापकत्वमवगतम्। "सर्वे वेदा यत्पदमामनन्ति", "तपांसि च यद्वदन्ति" इति श्रूयते च "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादि स्मर्यते च। एवं श्रुतिस्मृतिभ्यामपि ब्रह्मणश्चिदचिच्छ प्रतिपादितमस्ति, तत्र वेदानां शब्दात्मकत्वात् शब्दानां च जातिं गुणं क्रियां संज्ञां च निमित्तीकृत्यार्थेषु प्रवृत्तिदर्श जात्यादीनामसम्बन्धाच्च जात्यादीन् विहाय कथं वेदाः साक्षात्तं प्रतिपादयन्तीति सञ्जातसंशयो राजा प्रकृतकथा लब्धावसरत्वात् पृच्छति ॥ ब्रह्मन्निति ॥ हे ब्रह्मन् शुक, अनिर्देश्ये चेतनाचेतनसजातीयतया निर्देष्टुमशक्ये, तत्र हेतुः तयोः समाहारस्तस्मात्, परे चिदचिद्भ्यां विलक्षणे अन्यस्मिन्निति यावत् । न हि चिदचिद्गतप्रवृत्तिनिमि चिदचिद्भ्यामन्यस्मिन् मुख्यवृत्तिः सम्भतीति भावः ॥ गुणिशब्दानां ये ये प्रवृत्तिनिमित्तभूता गुणास्तेभ्यो निर्गतं एतच्च निष्क्रियत्वाद्युपलक्षणम्। ब्रह्मणि, गुणैर्विशेषणैर्वृत्तिः अर्थेषु प्रवर्तनं यासां ताः श्रुतयः, साक्षात् कथं केन प्र प्रवर्तन्ते । जात्यादिकं प्रवृत्तिनिमित्तं स्वीकृत्य तद्विशिष्टत्वाभिधायिन्यः श्रुतयः कथं ब्रह्मणि साक्षाच्चरन्ति, न हि

शब्दः ब्रह्म गुणेन प्रतिपादि
तत्र च्छन्दोभिः स्तूयमा
द्योतित इत्याहुः ॥१॥

श्रीकृष्णं

श्रीवृन्दावन

सद्गूढार्थविबोधि

अथात्र "सर्वे वेदा
"सत्यं ज्ञानमनन्तं ब्रह्म" "नि
च श्रुतीनां ब्रह्मप्रतिपादकत्व
इत्यादीनां सगुणत्वप्रतिपादक
गुणसामान्यरहितमिति म
वृत्तिर्यासां ताः गुणवृत्तयः ।
वः । केवलगुणप्रतिपादने
गुगर्भविशेषणम् । अत एव
कथं चरन्ति प्रतिपादयन्तीत्यथ
मनश्चरेत् ॥' इति श्लोकपर्यन
इत्येतद्वर्णितं राजन्नित्यन्तेन ।
गुत्तर' इति श्रुतेः । यथा
इत्येतद्विणितमित्यन्तं ब्रह्मणः
तिपादनात् प्रश्नस्य प्रतिवचन
वर्तन्ते' इति वचनात् नि
भाविककल्याणगुणानां ज
प्रतिपादने विरोधो नास्ती
क्तम् । अत्रापि लोकानामस्
तीनां ब्रह्मप्रतिपादने विरोध
परतन्त्रप्राकृतगुणराहित्यपर
'साक्षी चेता केवलो निर्गु
स्वाभाविकी ज्ञानबल
पवादन्यायेन प्राकृतौपा
सगुणमेव गुणैरनभिभू
नन्दं भगवन्तं श्रुतयः प्र

गुणेन प्रतिपादयितुमलमिति प्रश्नार्थः । केचित्तु नटवद्वेषान्तरेणात्र विद्यमाने जात्यादीक्षणात्तत्प्रवृत्तिरस्तु, परं तु ''कृष्णं न्दोभिः स्तूयमानम्'' इति तत्र छन्दसां साक्षात् कथं प्रवृत्तिः निमित्ताभावात् प्रवृत्तिर्न युक्ता इति प्रश्नहेतुः साक्षात्पदेन त्याहुः ॥१॥

योगिरामानुजाचार्यकृतसरला व्याख्या

श्रीमते रामानुजाय नमः ।

श्रीकृष्णाय नमः ।

श्रीकृष्णं शिरसा नत्वा व्याख्यां वेदस्तुतेरिमाम् । योगिरामानुजार्योऽयं तनोति महताम्मुदे ॥

श्रीवृन्दावनमाधवाङ्घ्रिसुरजःकुञ्जालिसंसेविना रम्या योगसमाह्वयेन रचिता रामानुजार्येण सा ।

सद्गूढार्थविबोधिनी सुललिता वेदस्तुतेर्भावुका श्रीकृष्णस्य समर्पिताऽङ्घ्रिकमले व्याख्योत्तमा राजते ॥

अथात्र ''सर्वे वेदा यत्पदमामनन्ति ।'' 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिवचनैः ब्रह्मणः सर्ववेदप्रतिपाद्यत्वं प्रतीयते । तत्र ज्ञानमनन्तं ब्रह्म'' ''निर्गुणं निर्मलं शान्तं यत्तदद्रे(दृ)श्यमग्राह्यम्'' इत्यादीनां स्वरूपमात्रप्रतिपादकानां तथा निर्गुणत्वबोधकानां नां ब्रह्मप्रतिपादकत्वसम्भवेऽपि ''सोऽकामयत । बहु स्याम् । तत्सृष्ट्वा तदेवानुप्राविशत् । अन्तः प्रविष्टश्शास्ता जनानाम्'' नां सगुणत्वप्रतिपादकानां श्रुतीनां निर्गुणस्य ब्रह्मणः कथं प्रतिपादकत्वमिति ''केवलो निर्गुणश्च'' इत्यादिश्रुतीनामापातज्ञानेन सामान्यरहितमिति मन्वानः राजा पृच्छति ब्रह्मन्निति । गुणवृत्तयः गुणशब्दोऽत्र जातिगुणक्रियाविशेषणमात्रपरः । गुणेषु सां ताः गुणवृत्तयः । वृत्तिश्च शक्तिलक्षणागौण्यन्यतमरूपा । तथा च गुणप्रतिपादकाः गुणविशिष्टवस्तुप्रतिपादकाः इति । केवलगुणप्रतिपादने तात्पर्य्याभावात्, ''सोऽकामयत'' इत्याद्याः श्रुतयः सदसतः परे चेतनाचेतनाद्विलक्षणे । इदं च विशेषणम् । अत एव निर्गुणे जातिगुणक्रियादिविशेषणरहिते अत एवानिर्देश्ये अनिर्वचनीये ब्रह्मणि साक्षात् मुख्यावृत्त्या ति प्रतिपादयन्तीत्यर्थः । अस्य प्रत्युत्तरं तु इत्येतद्वर्णितम् । राजन् ! यन्नः प्रश्नः कृतस्त्वया 'यथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि ॥' इति श्लोकपर्यन्तेन ग्रन्थेन समर्थितम् । तस्य श्लोकस्यायमर्थः । इति पूर्वोक्तप्रकारेण जय जयेति श्लोकमारभ्य तं राजन्नित्यन्तेन । निर्गुणेऽपि अनिर्देश्ये ब्रह्मणि यथा मनः, अत्र मनशशब्देन मनःपूर्विका वाग् लक्ष्यते । 'मनःपूर्वो ' इति श्रुतेः । यथा येन प्रकारेण निर्गुणे अनिर्देश्ये वेदवाक् चरेत् प्रतिपादयेत् । अस्यायम्भावः - जय जयेत्यारभ्य तमित्यन्तं ब्रह्मणः सगुणत्वस्यैव प्रतिपादनात् तादृशसगुणत्वप्रतिपादनस्य कथं चरन्ति श्रुतयः ? इति प्रश्नस्य प्रत्युत्तरत्वेन त् प्रश्नस्य प्रतिवचनं सुसङ्गतम् । प्रत्युत्तरप्रदानपक्षे अनिर्देश्यशब्दस्य साकल्येन निरूपयितुमशक्य इत्यर्थः । 'यतो वाचो ' इति वचनात् निर्गुणशब्दस्तु कर्म्माधीनप्राकृतगुणराहित्यपरः, न तु स्वाभाविककल्याणगुणराहित्यपरः । कल्याणगुणानां जय जयेत्यारभ्य प्रतिपादनात् तथा च ब्रह्मणः स्वाभाविकदिव्यगुणवत्त्वात् गुणप्रतिपादकानां श्रुतीनां ने विरोधो नास्तीति भावः । एतादृशतात्पर्यज्ञापनायैव द्वितीयश्लोके 'बुद्धीन्द्रियमनःप्राणान् लोकानामसृजत्प्रभुः' । अत्रापि लोकानामसृजदित्युक्ते सृष्टिकर्तृत्वतदुपयुक्तज्ञानशक्त्यादिगुणानामप्यर्थसिद्धत्वेन ब्रह्म सगुणमेवातः गुणवृत्तीनां प्रतिपादने विरोधो नास्तीति लोकानामसृजत्प्रभुरिति वाक्यस्य तात्पर्यमिति रमणीयम् । ननु निर्गुणशब्दस्य कृतगुणराहित्यपरत्वे किम्मानमिति चेदुच्यते निर्गुणत्वप्रतिपादकेष्वेव वाक्येषु सगुणत्वस्यापि प्रतिपादनात् । तथा च क्षी चेता केवलो निर्गुणश्च' इति । अत्र श्रुतौ साक्षित्वादिगुणानां निर्गुणत्वस्यापि प्रतिपादनात् तथा 'परास्य शक्तिर्विविधैव भाविकी ज्ञानबलक्रिया च ।' इत्यादिश्रुतिभिश्च भगवतः अप्राकृतदिव्यगुणगणस्य प्रतिपादनात् निर्गुणशब्दः न्यायेन प्राकृतौपाधिकगुणनिषेधपरः इति निश्चीयते । (श्रीधरीव्याख्यायामपि एवमेव प्रतिपादितम् । अयमभिप्रायः गुणमेव गुणैरनभिभूतं सर्वज्ञं सर्वशक्तिम् सर्वेश्वरं सर्वनियन्तारं सर्वोपास्यं सर्वकर्मफलप्रदातारं समस्तकल्याणगुणनिलयं भगवन्तं श्रुतयः प्रतिपादयन्ति यथा 'यस्सर्वज्ञस्सर्ववित् ॥' 'यस्य ज्ञानमयन्तपः ॥' 'सर्वस्य वशी सर्वस्येशानः ॥'

'यः पृथिव्यां तिष्ठन् पृथिव्याः अन्तरः ॥' 'सोऽकामयत बहु स्याम् ॥' 'स ऐक्षत तत्तेजोसृजत ॥' 'सत्यं ज्ञानमनन्तं इत्याद्याः इत्यन्तेन अतः सगुणनिर्गुणशब्दयोः स्वाभाविककल्याणगुणगणवत्त्वकर्माधीनप्राकृतगुणराहित्यपरत्वेन न कोऽपि सर्वतत्त्वदर्शितसम्मतश्च। हे ब्रह्मन्! गुणवृत्तयः श्रुतयः सदसतः परे निर्गुणे अनिर्देश्ये ब्रह्मणि साक्षात् कथं चरन्तीत्यन्वयः

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

श्रीराधारमणो जयति।

श्रीचैतन्यं श्रीनृसिंहं मुरारिं विद्वद्वर्यं श्रीधरं भक्तमुख्यम्।
मिश्रं चन्द्रं गोकुलोपाधिकं च नत्वा कुर्वे व्याकृतिं व्याकृतेस्ताम्॥

राधारमणदासेन राधारमणसेविना। श्रुतिस्तुतेः स्वामिटीकाव्याख्यानं क्रियतेऽद्भुतम्॥

तत्र तेषामध्यायार्थनिरूपके पद्ये नारायणेति नारायणनारदसंवादं पुरस्कृत्येत्यर्थः। श्रीशुकेन कर्त्रा जगत्कर्तृत्वादीनामालम्बः आश्रयणं यस्यां तथाभूता वेदकर्तृका श्रुतिः निर्गुणे अवधिः पर्यवसानं यथा स्यात्तथा अधुना निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितकर्तव्यताकं मङ्गलं निबध्नन् स्वीयसंन्यासाश्रयोपास्यं श्रीनृसिंहं वर्णयति-। वाचां वाणीनामीशा वागीशा सरस्वती यस्य नृसिंहस्य वदने आस्ते तिष्ठति। यस्य वक्षसि च वक्षःस्थले तु लक्ष्मी श्रीर्विहरमाणा आस्ते तिष्ठति यस्य हृदये च संवित् स्वपरप्रकाशिका विशुद्धसत्त्वाऽपरपर्याया ज्ञानशक्तिरास्ते तं नृसिंहम् शरणं व्रजामि॥ स्वीयानां छात्राणां निर्बन्धनेन हठेन वशीकृतोऽहं श्रीधरः वेदस्तुतेर्मितां लघ्वक्षरमभिप्रायतो गम्भीरं यथामति स्वबुद्धिमनतिक्रम्य करिष्यामि किमर्थं सम्प्रदायस्य शेषीयस्य नारायणीयस्य च विवेकार्थम्॥ तथाहि—

"सम्प्रदायो भागवते द्विविधः परिकीर्तितः। शेषो नारायणीयश्च तत्र शेषो यथोच्यते॥
शेषः सनत्कुमाराय श्रीमद्भागवतं जगौ। सोऽपि साङ्ख्यायनायाह मुनये सम्प्रसादितः॥
पराशराय सोऽप्याह मैत्रेयाय जगौ च सः। विदुरायाथ मैत्रेयो द्वितीयोऽपि निगद्यते॥
नारायणस्तु विधये श्रीमद्भागवतं जगौ। नारदाय विधिः प्राह व्यासायाऽथ कलिप्रियः॥
व्यासः शुकाय मुनये सोऽपि प्राह परीक्षिते। तदैव सूतस्तं श्रुत्वा शौनकायाह प्रश्नतः॥"

पूर्वैश्चित्सुखादिभिष्टीकाकर्तृभिः सारतः सारं श्रेष्ठं श्रेष्ठमाख्यानं गृहीत्वा श्रीमद्भागवतं सम्यक् निषेवितम् मया तु तैरुपस्पृष्टम् उपस्पृश्य आचम्य त्यक्तं प्रसादरूपमुच्छिष्टं भक्त्या सङ्गृह्यते॥

अप्रामाण्ये कारणानि चत्वारो दोषाः भ्रमप्रमादविप्रलिप्साकरणाऽपाटवरूपास्तैः रहितानां तत्रातस्मिंस्तद्बुद्धि स्थाणौ पुरुष इति। प्रमादोऽनवधानताऽन्यचित्ततेति यावत्। येनान्तिके गीयमानमपि न श्रूयते। विप्रलिप्सा ज्ञातोऽप्यर्थः शिष्याय न प्रकाश्यते करणापाटवमिन्द्रियमान्द्यं येन यथावद्दत्तमनसा वस्तु न परिचीयते इति प्रमाणप्रमेयभावे तत्र वेदे तावत् साकल्येन साक्षात्सङ्केतितोऽर्थो यथा वृत्त्या प्रतीयते। सा वृत्तिर्मुख्या साऽपि तत्र रूढित्वं नाम प्रकृतिप्रत्ययार्थरहितत्वे सति अनादिपरम्परागतत्वं योगन्त्वग्रे वक्ष्यते। लक्षणा हि सापेक्षत्वात् स्वरूपरूढिर्जातिरूढिर्गुणरूढिश्चेति। संज्ञाशब्दः संज्ञी तदर्थः तयोः सङ्केतेन ईश्वरेच्छारूपेण रूढिवृत्तिः प्रवर्तते। निर्देशार्हे संस्थानेन कथनार्हे डित्थादिवस्तुनि डित्थ इति पदसंज्ञा शाखापल्लवादिशून्यत्वं तदर्थः। संज्ञी तयोस्सङ्केतः। शाखादिशून्यवृक्षएवार्थो बोद्धव्यः नान्य इति। एवं गोपदं संज्ञा गोत्वजातिस्तदर्थः। एवं शुक्लपदं संज्ञा श्वेतगुण तेनैव सङ्केतेन प्रवर्तते। अत्र प्रकृतिप्रत्ययार्थकरणे डीङ् विहायसा गतौ इत्यस्मादाकाशे गतिः प्रकृत्यर्थः। तत्कर्ता प्रतीयते। एवं गम धातुः प्रकृतिः डीप्रत्ययः कर्तरि तदर्थेनागमनकर्ता अश्वादिरपि प्रतीयते। एवं शुच धातुः प्रकृतिः प्रत्ययस्तदर्थेन शोककर्ता प्रतीयते। स च स च प्रकृतेऽनुपपन्न इति रूढिरेव स्वीक्रियते। तत्र तत्रेति रूढेः परिष्कार

संज्ञासंज्ञिरूपेण सङ्केतेन तत्र गङ्गेति पदं संज्ञा भागीरथखातावच्छिन्नजलप्रवाहस्तदर्थ एव संज्ञी । तयोस्सङ्केतः गीरथखातावच्छिन्नजलप्रवाह एवार्थो बोद्धव्यो नान्य इति ईश्वरेच्छारूपस्तेनेत्यर्थः । अभिहितार्थस्य वाच्यार्थस्य प्रवाहस्य न्धिनि तीरे प्रवर्तते । यथेति गङ्गाशब्दवाच्यप्रवाहाधिकरणकघोषान्वयानुपपत्त्या तीरे लक्षणा शैत्यपावनत्वादिप्रयोजनमिति वती लक्षणा गौणी चेति अभिहितार्थे वाच्ये सिंहत्वावच्छिन्ने पिण्डे लक्षिता ये कौर्य्यमारकत्वादिगुणास्तैर्युक्ते अत एव दृशे देवदत्ते गौणी वृत्तिः प्रवर्तते इति पूर्वेणैवान्वयः । अत्रोत्तरपदानुपादाने जलगतसङ्ख्यासंयोगादिगुणानामग्नावपि सत्त्वात् मिदं जलमित्यपि प्रयुज्येत । ततस्तदुपादानमिति सुधीभिर्विभाव्यम् । यथाऽऽहुरित्यत्र भट्टा इति शेषः । अभिधेयाऽविनाभूते यप्रवाहादिसम्बन्धिनि तटादौ गङ्गादिशब्दस्य या प्रवृत्तिः यत् शक्यसम्बन्धरूपवृत्तेः सा लक्षणावृत्तिरिष्यते । तथा सिंहादौ माणा दृश्यमाणाः ये कौर्य्यादयो गुणास्तैर्योगात्सादृश्यसम्बन्धात् तमुपेक्ष्य तु वृत्तेश्शब्दव्यापारस्य गौणता इष्टा सा वृत्तिरित्यर्थः । एतत्त्रिविधेति एताः रूढिलक्षणागौणीरूपाः यास्त्रिविधा वृत्तयस्ताभिः प्रतिपादितस्सम्पादितोऽर्थोऽभिधेया तयोः प्रकृतिप्रत्ययार्थयोर्योगेन सम्बन्धेन योगवृत्तिः प्रवर्तते । उदाहरणानि वर्णयति–यथेति । पङ्कजमित्यत्र पङ्कोपपदजनधातुः तिः । तदर्थस्तु पङ्काज्जनिमात्रम् । प्रत्ययस्तु जनेर्डस्तदर्थस्तु जनिकर्ता । एवं मण्डूकशैवालादावतिप्रसङ्गस्तद्व्यावृत्त्यर्थं रूपरूढ्या प्रतिपादितपदार्थत्वात् पङ्कजपदं रूढियोगरूपम् । एवम् उपगुशब्दः प्रकृतिस्तदर्थस्तु गोसामीप्यसम्बन्धी । स्तु अण् । तदर्थस्त्वपत्यरूपस्तत्र समीपगोमात्रवाचिन उपपूर्वकगोपदस्य मुख्यार्थानुपपत्त्या तत्सम्बन्धिनि गोपे लक्षणा । हेत्यपदार्थप्रधानत्वेन लक्षणयैव प्रवृत्तेः । एवं च लक्षणया प्रतिपादितपदार्थत्वात् औपगवपदं लक्षणायोगवृत्तिरूप्यम् । एवं तुः प्रकृतिस्तदर्थस्तु पाकरूपो णमुल् प्रत्ययः तदर्थः पाककर्ता । एवं च पचतीति पाचक इति निरुक्तौ पचनकाल एव पदप्रवृत्तौ तदन्यदा तत्पदप्रयोगस्याव्याप्तिस्तदर्थपाचकत्वगुणयोगात् पचनादन्यदापि पाचकपदप्रयोगोपपत्तिः । किन्तु सिंहो त इत्यत्र व्यक्तिभेदः । अत्र तु पचनापचनकालात्मकावस्थाभेद इति गौण्या प्रतिपादितपदार्थत्वात्पाचकपदं गुणयौगिकम् । क्वचित्प्रकृतिप्रत्ययार्थयोर्वेति पाठस्त्वागन्तुकः असम्बद्धार्थत्वात् । एवं च त्रिविधा रूढिस्त्रिविधा योगवृत्तिः एका लक्षणाऽन्या णीत्येवमष्टविधा शब्दवृत्तिः स्वामिभिर्व्याख्याता । तत्र साक्षात्कथं चरन्ति मुख्यया वृत्त्या ब्रह्म कर्मभूतं कर्तृभूताः श्रुतयः प्रतिपादयन्तीत्यर्थः । तत्र चरणानर्हत्वे हेतुः अनिर्देश्य इति । स्वरूपेण गुणेन जात्या च निर्देष्टुमशक्य इति त्रिविधरूढेर्निराकरणं लयोगात्पदवाच्यत्वाभावात् अपदार्थस्य पदवाच्यत्वरहितस्य ब्रह्मणः वाक्याभिधेयत्वाऽसम्भवान्न श्रुतिप्रतिपाद्यत्वं ब्रह्मो इति राज्ञः प्रश्न इति स्वामिचरणानामभिप्रायः ॥१॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

श्रीकृष्णाय नमः ।

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे । नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

अथ श्रीवेदस्तुतिव्याख्या श्रीधरपूज्यपादैर्या कृता सैव तदनुकूलाधिकपदकदम्बसंवर्द्धिता व्याख्योक्तार्था यथा स्यात्तथा नां सुखबोधाय मयाऽत्र लिख्यते । तथाऽत्र श्रीमच्छङ्करपूज्यपादकृतभाष्यानुमतेन श्रुतीनां व्याख्या क्रियते इति ज्ञातव्यम् । क्रमो ज्ञेयः - प्रथमाऽऽभासस्ततः श्लोकस्तस्यान्वयोऽर्थश्च ततः पूर्णा श्रुतिस्तदर्थश्च ततः सिद्धान्त इति स्वामिश्रीचरणाः ख्याते—

"एवं स्वभक्तयो राजन् भगवान् भक्तभक्तिमान् । उषित्वाऽऽदिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥"

इत्यत्र सतां स्वतः प्रमाणभूतानामप्रामाण्ये कारणरहितानां वेदानां मार्गं ब्रह्मपरत्वमुद्दिश्य भगवानगादित्युक्तम् । नां ब्रह्मपरत्वमघटमानं मन्वानः पृच्छति–ब्रह्मन्निति । अप्रामाण्ये कारणरहितानामिति पुरुषवाक्यानामप्रामाण्यं विप्रलिप्साकरणापाटवरूपदोषचतुष्टयैः पुरुषबुद्धेर्दूषितत्वात् पौरुषेयत्वाभावाद्वेदस्याप्रामाण्ये कारणाभाव इत्यर्थः । प्रश्नबीजं ज्ञातव्यम् । पूर्वाध्याये "सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहम्" इति स्वस्य स्वयं भगवता सर्वदेवप्रमेयत्वमुक्तम्

। विष्णुरातेनापि तस्मिन् श्रीकृष्णाख्ये भगवति परब्रह्मत्वं तत्र तत्रावधारितम् । तद्यथा ‘गूढं परं ब्रह्ममनुष्यलिङ्गम्’ इति। नाराकृतीति तदभिम(हि)तं ब्रह्मद्वयं ब्रह्माद्वयं शिष्यत इति ‘तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयमि’ति ‘यन्मित्रं परमानन्द ब्रह्मसनातनम्’ इत्यादिषु अतस्तत्रैव वेदप्रमेयत्वं सन्दिह्य पृच्छतःति–ब्रह्मन्निति । हे ब्रह्मन् ! अनिर्देश्येऽनिर्वचनीये ब्रह्मणि कथं चरन्ति ब्रह्म प्रतिपादयन्तीत्यर्थः । कथम्भूते ब्रह्मणि । निर्गुणे गुणातीते गुणवृत्तयो गुणैर्वर्तमानाः श्रुतयः कथं चरन्ति । सदसतः परे कार्यकारणाभ्यां परस्मिन्नसङ्गे केनचिदपि सम्बन्धाभावात्कथं चरन्ति । अत्र स्वामिचरणानां तत्र तावत् मुख्या गुणभेदेन त्रिधा शब्दप्रवृत्तिः । मुख्यापि रूढियोगिभेदेन द्विधा । रूढिः स्वरूपेण जात्या गुणेन वा निर्देशार्हे वस्तुनि संज्ञासंज्ञि सङ्केतेनैव प्रवर्तते । यथा डित्थः गौः शुकलः इति अस्यार्थः । संज्ञाशब्दः संज्ञी चार्यसङ्केतः शक्तिः । सा च अस्माच्छब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छातो भवति । शक्तेस्तु शब्दशब्दार्थोभयनिवृत्तत्वात् संज्ञासंज्ञिसङ्केतत्वं ततश्च स्वरूपेण रूढस्योदाहरणं इति । छिन्नवृक्षस्य मूलभागो डित्थ इत्युच्यते । डित्थशब्दः संज्ञा । तद्वाच्यच्छिन्नवृक्षस्य मूलपिण्डः सञ्ज्ञी । सङ्केतेनायमेव इति रूढ्या प्रतीयते तथा डवित्थोऽपि ज्ञेयः । वल्मीककीटसमुद्भूतबृहन्मृत्पिण्डो डवित्थः । जातिरूढस्योदाहरणं गौरिति जातेर्लक्षणं नित्यमेकमेकसमवेतत्त्वं जातित्वम् । गोशब्दो हि गोजातिविशिष्टस्य गोपिण्डस्य वाचकः सास्नावत्त्वं गोत्वम् - ‘‘सास्ना गलकम्बल’’ इत्यमरः । तथा महिषादिः गुणरूढस्योदाहरणम् । शुक्ल इति शुक्लशब्दस्तु शुक्लगुणवाचकः । रक्तपीतादिः । रूढिवृत्तिमुक्त्वा लक्षणावृत्तिमाह–लक्षणा च तेनैव सङ्केतेनाभिहितार्थसम्बन्धिनि । यथा गङ्गायां घोष इति अस्यार्थः तेनैव संज्ञासंज्ञिसङ्केतेनाभिहितो यो गङ्गादिरूपोर्थस्तत्सम्बन्धिनि तीरादौ मुख्यार्थवादे गौणार्थकल्पना लक्षणा अतो गङ्गायां वसतीत्युक्ते गङ्गाशब्देन लक्षणया तीरमुच्यते । गङ्गातीरे घोषोऽस्तीत्यर्थः । तथा वटेषु गावो दुह्यन्ते इत्यादिकं ज्ञेयम् । गुणवृत्ति । गौणी चाभिहितार्थलक्षितगुणशुक्ले तत्सदृशे यथा सिंहो देवदत्त इति अस्यार्थः । अभिहितोऽर्थः सिंहादिशब्दस्य सिंहादि पिण्डः तत्र लक्षिता ये विक्रमादिगुणास्तद्युते दवदत्ते तत्सदृशे अभिहितार्थसिंहसदृशे अयं देवदत्तः सिंहः गुणयोगादिति । एवम् देवोऽयं राक्षस इत्यादिकं ज्ञेयम् । लक्षणा गौणी इत्येतयोर्लक्षणं वृत्तिकारभट्टवाक्येनाह–यथाहुरिति —

‘‘अभिधेयाविनाभूतप्रवृत्तिर्लक्षणोच्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टात्तु गौणता ॥’’ इति ॥

अस्यार्थः– अभिधेयं रूपम् अविनाभूतम् अभिधेयाविनाभूतं तेन प्रवृत्तिः अभिधेयाविनाभूतप्रवृत्तिर्लक्षणोच्यते । मुख्यया वृत्त्या गङ्गादिशब्दवाच्येनार्थेन गङ्गादिस्वरूपेणाऽविनाभूतेन सार्द्धं शब्दसम्बन्धिनि तीरादौ गङ्गादिशब्दस्य या प्रवृत्तिः सा लक्षणेत्यर्थः । यद्वा अभिधेयस्य वाच्यार्थस्य योऽविनाभूतस्तीरादौ सम्बन्धस्तस्य प्रवृत्तिर्लक्षणेति पूर्वस्यार्थः । लक्ष्यमाणं गुणे अभिधेये सिंहादिरूपे गुणाविक्रमप्रसह्यकारित्वादयो या शब्दप्रवृत्तिः सा गौणता इष्टा । इति रूढिवृत्तिमु योगरूढिमाह–योगवृत्तिस्तु एतत्त्रिविधवृत्तिप्रतिपादितपदपदार्थयोः प्रकृतिप्रत्यययोगेन यथा पङ्कजम् औपगवः पाचक इति रूढिर्लक्षणा गौणी चेति वृत्तित्रयम् एतत्त्रिविधवृत्तितया प्रतिपादितयोः पदपदार्थयोः प्रकृतिप्रत्यययोगेन योगवृत्तिर्भवतीत्य उदाहरणं पङ्कजादियोगरूढेरुदाहरणं पङ्कजमिति । पङ्कशब्दोपपदजनधातुः प्रकृतिः प्रत्ययः जनेर्डः पङ्काज्जायतेति योगरूढिवृत्तिप्रतिपादितपदार्थत्वं पङ्कजमानयेत्युक्तौ बालादेरप्रतिपत्तेः किन्तु पद्म एव रूढित्वं तथा मण्डप इत्युक्ते रूढिः न तु ‘मण्डपोऽस्त्री जनाश्रयः’ इत्यमरः । औपगवः उप समीपे गावो यस्य सः उपगुः । तस्यापत्यम् उपगुशब्दस्तावल्लक्षणया प्रवृत्तः । बहुव्रीहेस्तथैव प्रतीतेः उपगोः प्रकृतेः तद्धितप्रत्ययः । अतो जातिरूढिवृत्तिप्रतिपादितपदार्थत्वम् । पाचक इत्यत्र प्रकृतिः पचधातुः कृत्प्रत्ययो (ण्वुल्) पचतीति पाचकः । स च पाचक इत्युच्यते इति पाचकत्वगुणयोगात् गुणवृत्तिप्रतिपादितपदार्थत्वम् । आदिपदेनान्यदपि यथायथमूह्यम् । अत्र शब्दप्रवृत्तिरुक्ता सा यथा मुख्या लक्षणा गौणी चेति त्रिधा । मुख्या द्विविधा रूढियोगभेदेन । लक्षणा गौणी रूढेरुदाहरणं मुख्यस्वरूपेण डित्थः जात्या गोगुणेन शुक्ला इति । लक्षणाया उदाहरणं गङ्गायां घोष इति । गौण्या देवदत्त इति । मुख्याया योगवृत्तेः उदाहरणं योगेन पङ्कजं जात्या औपगवः गुणेन पाचक इत्यष्टधा शब्दप्रवृत्तिः । एवं ब्रह्मणि तदभावमाह–तत्रेति । तत्र तावत् ब्रह्मणि रूढिवृत्तिर्न सम्भवतीत्याह–साक्षात्कथं चरन्तीति । तत्र हेतवः

अनिर्देश्यत्वेऽपि हेतुं
वदन् लक्षणां योगं
लक्षणायोगावृत्तीसम्भ
। केनचिदिति लक्षण
इत्यर्थः । सुगममन्यत्

श्रीश्री

तद्वाक्

तत्र —

‘‘एवं स्व

इत्युक्तं शुकार्यैः

‘चरा

तस्माद्ब्र

इति पूर्वोक्तप्रकारे
तत्र एतस्मादपि पूर्वं ‘भवा

‘नाद्य

इति च श्रुतदेवेनोत्त
भो ब्रह्मन् ! ब्रह्मणि निष्णा
तत्प्रचुरेषु पुरुषेषु वृत्तिर्यासां
चेतनाचेतनसजातीयतया नि
विलक्षणः क्षरं प्रधानममृत
शेषितया सर्वाधारतया अचिन्त
इत्यादिश्रुतेः । पुनः कीदृशो
इति अत एवानन्ताप्राकृतगुणा

‘‘न हि तस्य

तेजोबलैश्वर्यमहाबोधः

इत्यादि पुनः कीदृशे
सर्वभूतान्तरात्माऽपहतपाप्मा दिव
सजातीयादिभेदराहित्येन हेयाहे
चरन्तीति प्रश्नानर्थक्यमेवेति

अनिर्देश्यत्वेऽपि हेतुं वदन् गुणवृत्तिं निराकरोति । निर्गुणे गुणवृत्तय इति । गुणैर्वर्तमानापि निर्गुणे कथं चरन्तीत्यर्थः । निर्गुणत्वे हेतुं स्व लक्षणां योगं च निराकरोति-सदसतः पर इति । कार्यकारणाभ्यां परस्मिन्नसङ्गे केनचिदपि सम्बन्धाऽभावात् न लक्षणायोगावृत्तीसम्भवत इत्यर्थः । एवं पदार्थत्वायोगात् अपदार्थत्वस्य वाक्यार्थत्वायोगान्न श्रुतयो गोचरत्वं ब्रह्मणि इत्यभिप्रायः केनचिदिति लक्षणायाः शक्यसम्बन्धविषयत्वायोगवृत्तेरपि प्रकृतिप्रत्ययार्थयोर्योगविषयत्वान्न ते वृत्ती असङ्गे ब्रह्मणि प्रवर्तेते इत्यर्थः । सुगममन्यत् ॥१॥

श्रीनिवाससूरिकृततत्त्वदीपिका

श्रीमते रामानुजाय नमः ।

श्रीश्रीनिवासदासाख्यो नत्वा श्रीयतिशेखरम् । रामानुजं करोत्याढ्यां व्याख्यां वेदस्तुतेर्गुणैः ॥

वेदवेदान्ततत्त्वज्ञैः श्रीसुदर्शनसूरिभिः । शुकपक्षानुसारेण कृतं व्याख्यानमुत्तमम् ॥

तद्वाक्यान्येव सङ्गृह्य मया तत्कस्गेक्षणात् । अन्यान्यपि प्रमाणानि क्रियते तत्सविस्तरम् ॥

तत्र —

"एवं स्वभक्तयो राजन् भगवान् भक्तभक्तिमान् । उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥"

इत्युक्तं शुकार्यैः एवमिति कथम् इत्थं —

'चराचरमिदं विश्वं भावा ये चास्य हेतवः । मद्रूपाणीति चेतस्याधत्ते विप्रो मदीक्षया ॥

तस्माद्ब्रह्मऋषीनेतान् ब्रह्मन्मच्छ्रद्धयार्चय । एवं चेदर्चितोऽस्म्यद्धा नान्यथा भूरिभूतिभिः ॥'

इति पूर्वोक्तप्रकारेण सन्मार्गंसतां भागवतानां श्रुतिस्मृत्याद्युक्तभगवदाराधनरूपमुपादिश्य भगवान् द्वारवतीमगादित्युक्तमिति अत एतस्मादपि पूर्वं 'भवान् हि सर्वभूतानामात्मा साक्षी स्वदृक् प्रभो' इति मैथिलेनोक्तम् ।

'नाद्य नो दर्शनं प्राप्तः परं परमपूरुषः । यर्हीदं शक्तिभिः सृष्ट्वा प्रविष्टो ह्यात्मसत्तया ॥'

इति च श्रुतदेवेनोक्तं श्रुत्वा विष्णुरातः इत्थम्भूते सत्तामात्रे ब्रह्मणि श्रुतीनां प्रवृत्तिमघटमानां मन्वानः पृच्छति-ब्रह्मन्निति । हे ब्रह्मन् ! ब्रह्मणि निष्णात ! कथं तादृशे ब्रह्मणि श्रुतयः साक्षाच्चरन्ति । कथम्भूताः श्रुतयः गुणवृत्तयः गुणेषु सत्त्वादिषु गुणेषु पुरुषेषु वृत्तिर्यासां तादृश्यः तथा चोक्तं गीतोपनिषदि 'त्रैगुण्यविषया वेदाः' इति । कथम्भूते ब्रह्मणि । अनिर्देश्ये अचेतनसजातीयतया निर्देष्टुमशक्ये चिदचिद्विलक्षणत्वात् तथा हि अचिद्वस्तुनः स्वप्रकाशज्ञानैकाकारतया तदात्मभूतश्चेतनो विलक्षणः क्षरं प्रधानममृताक्षरो हर एषोणुरात्मा इत्यादिश्रुतेः । तस्मादपि परमात्मा चिदचिद्व्यापकतया नियन्तृतया शेषितया सर्वाधारतया अचिन्त्यशक्तितया ज्ञानानन्दैकरूपतया चात्यन्तविलक्षणः "क्षरात्मानावीशते देव एकः ॥ अणोरणीयान्०" इत्यादिश्रुतेः । पुनः कीदृशो निर्गुणे निर्गतत्रिगुणे हेयप्रत्यनीके इत्यर्थः । तदुक्तम् – 'सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः' इति अत एवानन्ताप्राकृतगुणाकरे तदप्युक्तम् —

"न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि । वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः ॥

तेजोबलैश्वर्यमहाबोधः स्ववीर्यशक्त्यादिगुणैकराशिः । परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥"

इत्यादि पुनः कीदृशे सदसतः परे चिदचिद्विलक्षणे तयोर्नियन्तरीत्यर्थः । 'तदनुप्रविश्य । सच्च त्यच्चाभवत् । एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देह एको नारायणः' इत्यादिश्रुतेः । ननु 'सौम्येदमग्र आसीत्' 'एकमेवाद्वितीयम्' इत्यादिश्रुतिभिः स्वगतादिभेदराहित्येन हेयाहेयसमस्तगुणदरिद्रे ब्रह्मणि कथं सगुणत्वप्रतिपादनं तथा सति ब्रह्मणः श्रुतिगोचरत्वेन कथं श्रुतीनां प्रसनानर्थक्यमेवेति चेन्न सूक्ष्मचिदचिद्विशिष्टवस्तु प्रतिपादनपरत्वात्तादृश्याः श्रुतेः अन्यथा तादृशब्रह्मणः

सकाशाज्जगदुत्पत्त्यसम्भवात् । ननु सर्वज्ञत्वादय ईश्वरगुणा न तु निर्विशेषे ब्रह्मणि तेषां सम्भवः तस्यापि मायोपाधिकत्वमे सर्वज्ञत्वादिकं न तु स्वाभाविकम् 'अस्मान्मायी सृजते विश्वमेतत्' इत्यादिश्रुतेरिति चेदीदृशं वाक्यम् आस्तिको भूत्वा कथं ब्रूषे भोः 'न तत्समश्चाभ्यधिकश्च दृश्यते' 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इत्यादिश्रुतिस्मृतिभिस्तस्यानित्यत्वावगमात् । ननु 'यतो वाचो निवर्तन्त' इत्यादिभिस्तस्य ब्रह्मणः श्रुत्यगोचरत्वं श्रूयते इति चेत्सत्यम् । तत्तु ब्रह्मणो महिम्न इयत्ता श्रुत्यगोचरा इत्यभिप्रायोऽस्याः श्रुतेः 'आनन्दं ब्रह्मणो विद्वान्' इत्युत्तरार्धेन तस्य ज्ञानविषयत्वावगमात् तथा चानन्तमहिमत्वमुक्तं भारते-

'वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपि सर्वदेवैः । महात्मनः शङ्खचक्रासिपाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्य ॥' इति॥

अन्यथा स्वरूपेण श्रुत्यगोचरत्वे प्रमाणाविषयत्वेन तादृशस्य ब्रह्मणस्तुच्छत्वमेव स्यात् । अतो हेयप्रत्यनीके अपरिच्छिन्नमहिम्नि ब्रह्मणि तत्तद्गुणप्रवृत्तिनिमित्ताश्च श्रुतयः कथं प्रवर्तन्ते । न हि प्रवृत्तिनिमित्तप्रहाणेन शब्दः प्रतिपादयितुं समर्थप्रसन्नार्थं इत्यर्थः ॥१॥

कृष्णप्रिया

हे ब्रह्मन् ! चेतनाचेतन की जातिगुणक्रियाओंमें किसी एक को प्रवृत्ति का निमत्तकर जाति आदि विशिष्ट चेतना चेतन को प्रतिपादन करने वाली श्रुति परब्रह्म के विषयमें किस प्रकार सत्तात् प्रवृत्त होती है क्योंकि वह ब्रह्म, चेतनाचेतन के सजातिसभाव से निर्देश करने के योग्य नहि हे कारण कि चेतनाचेतन की जातिगुक्रियाओंसे परमात्मा रहित है । इसी से वह चेतनाचेतन से भिन्न है राजा का अभिप्राय यह है कि - कोइ श्रुति परमात्मा का साक्षात् प्रतिपादन करती है तथापि चेतनाचेतन वाचक शब्दो से यह सब ब्रह्म है आत्मा ब्रह्म है ! वह जगत्कर्ता ब्रह्म तूम हि हो इस प्रकार ब्रह्म का साक्षात् प्रतिपादन किस प्रकार किया गया है ? क्योंकि, लोक में राजा से भिन्न प्रजा का वाचक प्रजा शब्द से यह प्रजा राजा हि है इस प्रकार राजा का प्रतिपादन न हि किया जाता है । वैसे हि परमात्मा से भिन्न चेतनाचेतन वाचि शब्दो से परमात्मा का साक्षात् प्रतिपादन कैसे हो सकता है ॥१॥

श्रीशुक उवाच[1]

बुद्धीन्द्रियमनःप्राणान् जनानामसृजत् प्रभुः । मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥२॥
सैषा ह्युपनिषद् ब्राह्मी पूर्वेषां पूर्वजैर्धृता । श्रद्धया धारयेद्यस्तां क्षेमं [2]गच्छेदकिंचनः ॥३॥

कर्दमक्षमा

श्रीशुकः, उवाच ।

प्रभुः, जनानाम्, आत्मने, अकल्पनाय, च, मात्रार्थम्, भावार्थम्, च, बुद्धीन्द्रियमनःप्राणान्, असृजत् ॥२॥

पूर्वेषाम्, पूर्वजैः, धृता, एषा, सा, हि, उपनिषत्, ब्राह्मी, यः, अकिञ्चनः, श्रद्धया, ताम्, धारयेत्, सः, क्षेमम्, गच्छेत् ॥३॥

श्रीधरस्वामिकृता भावार्थदीपिका

उत्तरमाह-बुद्धीन्द्रियेति । बुद्ध्यादीनुपाधीन् जनानामनुशायिनां जीवानां मात्राद्यर्थं प्रभुरीश्वरोऽसृजत् मीयन्त इति मात्रा विषयास्तदर्थम् भावार्थं भवो जन्मलक्षणं कर्म तत्प्रभृतिकर्मकरणार्थमित्यर्थः । आत्मने लोकान्तरगामिने आत्मनस्तत्तल्लोकभोगायेत्यर्थः । अकल्पनाय कल्पनानिवृत्तये मुक्तय इत्यर्थः । अर्थधर्मकाममोक्षार्थमिति क्रमेण पदचतुष्टयस्य

---

[1] ऋषिरुवाच-गो. प्रे. टी. ।
[2] गच्छत्यकिञ्चनः-वीर. ।

जनानामिति वदन्
अयमभिप्रायः सगुण
सच्चिदानन्दं भगव
पृथिव्यां तिष्ठन् पृथि
तावत्संसारिणो जीव
प्रकारान्तरेणाघटमानं
यथोक्तम्—

"आमिक्षां दे

कुतः ? भिन्ना
रज्यते येन विशेष्यं त
गङ्गेतिवत् कुतः एकार्थत
सामानाधिकरण्येन निर्गु
तथा चात्रैवोपक्रमे स्वसृ
इत्युपसंहरिष्यन्ति उपास

अत्र चानादिशि
वैतण्डिकतर्कानभिनिवेशे

अतन्निरसनेन ब्रह्म
इत्युक्तेर्विनाध्यारोपमपवादो
इत्युपाधिः । अनुशायिनां ब्र
जन्मना कर्म लक्ष्यते, इन्द्रियै
पञ्चसु' इत्याद्युक्तेर्लोकान्तर
वक्ष्यति च —

'आहारार्थं समीहेत यु
कर्तुं समर्थत्वादेव नित्यमुक्त
पर्यवसानमिति दर्शयितुमाह-
सर्वश्रुतीनां परम्परादिना ब्रह्म
क्रमेणाह-यः सर्वज्ञ इत्यादिश्रु
सर्वज्ञः, विशेषेण सर्वं वेत्तीति
वशीति-सर्वस्य ब्रह्मेन्द्रादेर्वशी

"एतस्य व

भारते च —

"ससुरासु

नामिति वदन् जीवार्थमीश्वरस्य सृष्ट्यादिषु प्रवृत्तिरिति दर्शयति प्रभुरितीश्वरस्योपाधिवश्यताभावेन नित्यमुक्ततां दर्शयति यमभिप्रायः सगुणमेव गुणैरनभिभूतं सर्वज्ञं सर्वशक्ति सर्वेश्वरं सर्वनियन्तारं सर्वोपास्यं सर्वकर्मफलप्रदातारं समस्तकल्याणगुणनिलयं च्चिदानन्दं भगवन्तं श्रुतयः प्रतिपादयन्ति "यः सर्वज्ञः स सर्ववित्' 'यस्य ज्ञानमयं तपः' सर्वस्य वशी सर्वस्येशानः' यः थिव्यां तिष्ठन् पृथिव्या आन्तरः' सोऽकामयत बहुस्याम्' स ऐक्षत तत्तेजोऽसृजत' सत्यं ज्ञानमनन्तं ब्रह्म" इत्याद्याः तथाभूतेश्वरतां वसंसारिणो जीवस्य तन्निवृत्तये तत्त्वमसीत्यादिवाक्यानि बोधयन्ति तत्र च तत्त्वपदयोः सामानाधिकरण्यं प्रतीयते तच्च न्तरेणाघटमानं ब्रह्मणि पर्यवसानं गमयति तथा हि न तावद्वैश्वदेव्यामिक्षेतिवदुभयोरेकार्थाभिधानेन सामानाधिकरण्यम् थोक्तम्—

"आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः । आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणम् ॥" इति ।

कुतः ? भिन्नार्थत्वात् न चाजहत्स्वार्थया निरूढलक्षणया विशेषणविशेष्यभावेन नीलमुत्पलमितिवत् यथोक्तम् "स्वबुद्ध्या यते येन विशेष्यं तद्विशेषणम्" इत्यादि कुतः विरुद्धार्थत्वेन तदयोगात् न च जहत्स्वार्थत्वेन सम्बन्धिलक्षणया कुसुमितद्रुमा तिवत् कुतः एकार्थत्वस्य विवक्षितत्वात् अतो जहदजहत्स्वार्थलक्षणया सोऽयं देवदत्त इतिवद्विरुद्धांशत्यागेनानुगतचिदंशेनैकार्थेन मानाधिकरण्येन निर्गुणे पर्यवसानम् अस्थूलादिवाकयानान्तु साक्षादुपाधिनिषेधेन तत्पदार्थशोधन उपयोगान्निर्गुण एव पर्यवसानं था चात्रैवोपक्रमे स्वसृष्टमिदमापीयेत्यादीना विशिष्टमालम्बनं वक्ष्यति अन्ते च श्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधना त्युपसंहरिष्यन्ति उपासनादिवाक्यानान्तु क्रियार्थप्रवृत्तसृष्ट्याद्यवलम्बनेन ज्ञानसाधनविधानेन तत्परत्वमित्येषा दिक् ॥२॥

अत्र चानादिशिष्टपरम्परागतत्वान्न सन्देहो युक्त इत्याह-सैषेति । सैषा यथोक्तालम्बना ब्राह्मी ब्रह्मपरा श्रद्धया आदरेण पिण्डकतर्कानभिनिवेशेन यः श्रवणादिना धारयेत् सः अकिञ्चनो निरस्तदेहाद्युपाधिः सन् परं पदं प्राप्नुयादिति ॥३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अतन्निरसनेन ब्रह्मणि श्रुतयश्चरन्ति । तन्निषेधार्थं बुद्ध्यादीनुपाधीन् जनानामसृजदित्यध्यारोपापवादाभ्यां 'निष्प्रपञ्चं प्रपञ्च्यते' युक्तेर्विनाध्यारोपमपवादो न सम्पनीपद्यत इत्युत्तरमाह-बुद्ध्यादीन् । इहादिनेन्द्रियादिग्रहः । उपाधीयते विषयतया स्वीक्रियते पाधिः । अनुशायिनां ब्रह्मणा सह प्रलये ईशं प्रविश्य शयित्वा जातानां मीयन्ते प्रमितिविषयीक्रियन्ते इति मात्राः । इत्यर्थ इति-मना कर्म लक्ष्यते, इन्द्रियैर्विना कर्मानिष्पत्तेरिति भावः । इत्यर्थ इति-मनो विना 'यतो यतो धावति दैवचोदितं मनो विकारात्मकमाप नुयु' इत्याद्युक्तेर्लोकान्तरभोगो न सम्भवतीति भावः । कल्पना माया । इत्यर्थ इति-प्राणं विना मोक्षोऽपि न सम्भवति । वति च —

'आहारार्थं समीहेत युक्तं तत्प्राणधारणम् । तत्त्वं विमृश्यते येन यत एतद्विमुच्यते ॥' इति श्रीकृष्णः । प्रभुरिति-कर्तुमकर्तुमन्यथा तुं समर्थत्वादेव नित्यमुक्तः । अत्र लक्षणापरैक्यपरनिषेधपरोपासनापरसृष्टिपराणां पञ्चविधानां श्रुतीनां सगुणालम्बनं निर्गुणे म्बनमिति दर्शयितुमाह-अयमभिप्राय इति । यद्यप्यष्टविधानां वृत्तीनां मध्ये उक्तरीत्या कापि वृत्तिर्ब्रह्मणि न सम्भवति, तथापि तीनां परम्परादिना ब्रह्मपरत्वं घटत एवेत्याह-सगुणमेवेति । सगुणं समस्तगुणाश्रयं तैर्गुणैरनभिभूतमवशीकृतं पूर्वोक्तमर्थं ह-यः सर्वज्ञ इत्यादिश्रुतिभिः । "यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः" सर्वज्ञतोदाहरणम् । सामान्येन सर्वं जानातीति ज्ञः, विशेषेण सर्वं वेत्तीति सर्ववित् । यस्य ज्ञानमयं ज्ञानविकार एव, सर्वज्ञतालक्षणं तपः, अनायासलक्षणमित्यर्थः । सर्वस्य ति-सर्वस्य ब्रह्मेन्द्रादेर्वशी सर्वो ह्यस्य वशे वर्तते —

"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः ॥" इति श्रुतेः ॥

भारते च —

"ससुरासुरगन्धर्वसयक्षोरगराक्षसम् । जगद्वशे वर्ततेऽदः कृष्णस्य सचराचरम् ॥"

इत्यनेन सर्वशक्तिता दर्शिता । न केवलं वशी, सर्वस्येशान ईशिता च । अनेन सर्वेश्वरता ।

"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः पृथिवी यस्य शरीरं पृथिवी यं न वेद यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥" इति ॥

अस्यार्थः — यः पृथिव्यां तिष्ठन् पृथिवीतोऽन्तरो भवति, अन्तरोऽभ्यन्तरो भूत्वा पृथिवीं यमयति नियमयति, एष ते तवान्तर्यामी अमृतः सदैकरसः, इत्यनेन सर्वनियन्तृत्वं सर्वोपास्यत्वं सर्वकर्मफलदातृत्वं चोक्तम् । श्रीमद्भगवद्गीतासु च—

"यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥

स तया श्रद्धयायुक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान् हि तान् ॥" इति ॥

अनेनान्तर्यामिणः श्रीकृष्णस्यैव तत्तद्देवतारूपेणोपास्यत्वं सर्वकर्मफलदातृत्वं चोक्तम् । सकलकल्याणगुणनिलयस्योदाहरणमाह- "सोऽकामयत बहु स्यां स ऐक्षत तत्तेजोऽसृजत ॥" इति । अर्थश्च-यत आकाशः सम्भूतः सोऽकामयत कामितवान् कथं बहु स्यां बहुतरं यथा भवति तथा स्यां भवेयम्, स आत्मा सर्वज्ञस्वभावत्वात् एक ऐक्षत अद्राक्षीत् । ईक्षतेति पाठेऽडागमाभावश्छान्दसः । स तत्प्रत्यक्षसिद्धं तेजोऽसृजत सृष्टवान् । ईश्वरस्य कामनादीनां लोकोपकारार्थत्वेन तादृशकल्याणगुणाभिव्यक्तेः । सच्चिदानन्दत्वोदाहरणमाह- "सत्यं ज्ञानमनन्तं ब्रह्म" आदिना "विज्ञानमानन्दं ब्रह्म" इति ग्रहः । अर्थस्तु- यद्रूपेण यन्निश्चितं तद्रूपं यतो न व्यभिचरति तत्सत्यं ब्रह्म । असत्यनिवृत्त्यर्थं विशेषणम् । असत्यतानिवृत्त्या विकारनिवृत्तिः, तन्निवृत्त्या च कारणता प्राप्ता । निर्विकारस्वावस्थो मृदादिरेव कारणं भवति न तु विकारो घटादिरिति । कारणस्य च कारकवस्तुत्वात् -

"कर्ता कर्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणमित्याहुः कारकाणि षट् ॥"

इत्युक्तषट्कारकान्यतमरूपत्वात् मृदादिवदचिद्रूपता प्राप्ता तन्निवृत्तये ज्ञानं ब्रह्मेति । ज्ञानं ज्ञप्तिरवबोधस्तद्रूपमित्यर्थः । लौकिकज्ञानस्यान्तवत्त्वादिदर्शनात्प्राप्तं ज्ञानरूपस्यापि ब्रह्मणोऽन्तवत्त्वं तन्निवृत्त्यर्थमनन्तमिति विशेषणम् । एतेन सच्चिदानन्दरूपत्वं स्पष्टमेवोक्तम् । एवं लक्षणापराणां श्रुतीनां सगुणपरत्वं प्रदर्श्य, स्वरूपपराणामपि स्वरूपपरत्वं च प्रदर्श्य, ऐक्यपरत्वश्रुतीनामपि सगुणप्रतिपादनमुखेन निर्गुणे पर्यवसानं दर्शयन्ति स्वामिचरणाः-तथाभूतेत्यादिना । निर्गुणे पर्यवसानमित्यन्तेन तथाभूतेश्वरतां पृथिव्यादिनियमनरूपामीश्वरताम् । तावदधुना । तन्निवृत्तये संसारनिवृत्तये । इत्यादिवाक्यानीत्यत्रादिना "प्रज्ञानं ब्रह्म ।" "अहं ब्रह्मास्मि" "अयमात्मा ब्रह्म" इत्यादीनि गृह्यन्ते । तद्ब्रह्म त्वमसि भवसि नान्यः संसारीत्यर्थः । तत्र च महावाक्ये तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते । अपर्यायपदानामेकार्थवृत्तित्वं सामानाधिकरण्यम् । पर्यायत्वं च स्वरूपभिन्नत्वे सत्येकार्थबोधकत्वं घटकलशवत् । तच्च सामानाधिकरण्यम् । तथाहीति । "आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ।" इत्यमरः । केचित्तु "पय एव घनीभूतमामिक्षेत्यभिधीयते" इत्याहुः । शृते स्थाल्यां कृतपाके उष्णे दुग्धे या विकृतिः सामिक्षेत्यर्थः । विश्वेदेवस्येयमामिक्षा वैश्वदेवी विश्वेदेवस्य सम्बन्धिनी आमिक्षा भवति न तु विश्वेदेवत्वं प्राप्नोति अत आमिक्षाविश्वेदेवपदयोः सामानाधिकरण्यं नानार्थयोरिति । यथोक्तं भट्टैः "अमिक्षां देवयुक्तायां वदत्येव" इत्यादि । आमिक्षां देवतायुक्तां विश्वदेवसम्बद्धाम् एष तद्धितोऽण्प्रत्ययो वदति'कथम् आमिक्षापदस्य सान्निध्यात्सन्निहितत्वात् तस्यैव तद्धितप्रत्ययान्तस्यैव वैश्वदेवीपदस्यैव विषये आमिक्षापदस्यार्थं तद्धितप्रत्ययेन क्रियत इति । यद्वा-ननु वैश्वदेव्यामिक्षापदयोर्नैकार्थाभिधायकत्वं वैश्वदेवीपदेनामिक्षाभिधाने आमिक्षापदप्रयोगो नोचितः, 'उक्तार्थानामप्रयोग' इति न्यायात् । किञ्च-विश्वेदेवस्तुतिपराया ऋगादेरपि वैश्वदेवीपदार्थत्वसम्भवात्कथमामिक्षामात्रार्थकत्वमिति चेत्तत्राह-यथोक्तमिति । एष देवतार्थस्तद्धितोऽण्प्रत्ययो विश्वेदेवदेवतायुक्तामामिक्षां वदत्येव न तूक्तदूषणभिया न वदतीति शङ्कनीयम् । तर्ह्यामिक्षापदसान्निध्यवैयर्थ्यं तत्राह-आमिक्षापदसान्निध्यादिति । वैश्वदेवीपदेन विश्वेदेवताकः कश्चन द्रव्यविशेष इति सामान्येनामिक्षापदोक्तावपि कोऽसौ द्रव्यविशेष इत्यपेक्षायामामिक्षापदसान्निध्यादामिक्षात्वं इत्यवगम्यते । वृक्षमाम्रं पश्येत्यादौ सामान्यविशेषशब्देषु तथा दर्शनात् । तथा चामिक्षापदसान्निध्येन तस्यैव तद्धितस्यैव सामान्ये

वाचकस्य विशेषतो
भिन्नार्थत्वादिति । तद्धि
न चेति । न जहत् अत्य
प्रादुर्भावो यस्याः सा च
साम्प्रतं रचितयेत्यर्थः ।
परोक्षत्वापरोक्षत्वरूपवि

"स्वरू

अर्थस्तु-स्वाक
येन पीतनीलादिना स्वबु
नीलगुणोत्पलद्रव्ययोर्गुण
निरूढलक्षणा । अत्र तु
विशेषणविशेष्यभावप्रका
चासौ लक्षणा चेति जहत्स
कुतस्तत्त्वंपदयोरेकार्थत्वस्य
भावः । प्रकारान्तरेणाघटमा
सम्भवति अतो हेतोः । जह
तया । एकार्थत्वेन निर्गुणे पर
इदंशब्देन च सन्निकृष्टदेशका

"इदमस्तु सन्निकृ

विप्रकृष्टं विदूरम्, स
भागलक्षणया सोऽयमिति
सन्नविद्यादोषवशादसंसारिणो
वस्तु कथ्यते । प्रकृतमेकमद्विती
न च परोक्षापरोक्षपरिच्छिन्नापरि
परित्यज्य जहदजहत्स्वार्थलक्ष
प्रत्ययार्थस्य च प्रतीचः सङ्घट्टने
ह्रस्वमदीर्घमित्यादिवाक्यानामु
स्थूलत्वाद्युपाधीनामनुवादाद्वि
उपासनादिवाक्यानामत्रादिना सृ
जायन्ते ।" इत्यादिवाक्यानां यज्ञ
इत्यादिष्वपि ध्येयम् । मुख्या प्रवृ
तत्परत्वं ब्रह्मणि पर्यवसानम् । उपा
तेन ब्रह्मणि पर्यवसानम् । कर्मादिप

तरो यमयत्येष त

यमयति नियमयति, एष ते
मद्भगवद्गीतासु च —

द्धाम्यहम् ॥
न् ॥" इति ॥

लदातृत्वं चोक्तम् ।
इति । अर्थश्च-यत आकाशः
सर्वज्ञस्वभावत्वात् एक ऐक्षत
मनादीनां लोकोपकारार्थत्वेन
दिना "विज्ञानमानन्दं ब्रह्म"
विशेषणम् । असत्यतानिवृत्या
कारो घटयदिरिति । कारणस्य च

णि षट् ॥"

नं ज्ञप्तिरवबोधस्तद्रूपमित्यर्थः ।
णम् । एतेन सच्चिदानन्दरूपत्वं
प्रदर्श्य, ऐक्यपरत्वश्रुतीनामपि
र्यवसानमित्यन्तेन तथाभूतेश्वरतां
आदिना "प्रज्ञानं ब्रह्म ।" "अहं
। तत्र च महावाक्ये तत्त्वंपदयोः
रूपभिन्नत्वे सत्येकार्थबोधकत्वं
गतः ।" इत्यमरः । केचित्तु "पय
क्षेत्यर्थः । विश्वेदेवस्येयमामिक्षा
विश्वेदेवपदयोः सामानाधिकरण्यं
विश्वदेवसम्बद्धाम् एष तद्धितोऽण्
पदस्यैव विषये आमिक्षापदस्यार्पणं
ामिक्षाभिधाने आमिक्षापदप्रयोगो
ऋगादेरपि वैश्वदेवीपदार्थ-
विश्वेदेवदेवतायुक्तामामिक्षां वदत्येव
ादिति । वैश्वदेवीपदेन विश्वेदेवताकः
मामिक्षापदसान्निध्यादामिक्षारूप
ध्येन तस्यैव तद्धितस्यैव सामान्यतो

कस्य विशेषतो विषयार्पणं भवतीत्यर्थः । अनेन प्रकारेणैकार्थत्वाभावं प्रदर्श्य कुत इति हेतुमाशङ्क्य समाधत्ते-र्थत्वादिति । तद्धितप्रत्ययेन पदयोः सामानाधिकरण्यं बोधितं न त्वर्थयोरिति भिन्नार्थतैवोभयोः । पुनः प्रकारान्तरेण दर्शयति-चेति । न जहत् अत्यजन् स्वार्थो नीलपीतादिरूपो यया साऽजहत्स्वार्था तया तृतीयान्तान्यपदार्थबहुव्रीहिः । निर्गतं रूढं प्राकट्यं दुर्भावो यस्याः सा चासौ लक्षणा चेति निरूढलक्षणा तया । यद्वा-नितरां रूढा निरूढा पुनः पूर्ववत् । अनादिपरम्परागतया न म्नातं रचितयेत्यर्थः । विशेष्यमुत्पलं विशेषणं नीलं नीलमुत्पलमितिवत् । सामानाधिकरण्यं न च कुतः विरुद्धार्थत्वेन तत्त्वंपदार्थयोः क्षत्वापरोक्षत्वरूपविरुद्धार्थत्वेन तस्या निरूढलक्षणाया अयोगात् अभावात् । यथोक्तं भट्टैः-

"स्वस्त्पसत्त्वमात्रेण न हि किञ्चिद्विशेषणम् । स्वबुद्ध्या रज्यते येन विशेष्यं तद्विशेषणम् ॥"

अर्थस्तु-स्वाकारेण विशेष्यमानवभास्य किञ्चिदपि वस्तु स्वरूपसत्त्वमात्रेण स्वस्थित्यैव विशेषणं न हि न भवति, किन्तु पीतनीलादिना स्वबुद्ध्या स्वाकारज्ञानेन विशेष्यमुत्पलादि रज्यते भ्रमरादिभ्यो व्यावर्त्यावभास्यते तद्विशेषणमित्यर्थः । अयम्भावः-लगुणोत्पलद्रव्ययोर्गुणगुणिनोरविरुद्धस्वभावत्वेन विशेषणविशेष्यभावः कल्प्यतेऽनुपपत्तेरभावात् । भवेत्तत्र जहत्स्वार्था निरूढलक्षणा । अत्र तु परोक्षत्वापरोक्षत्वादिविरुद्धार्थत्वेन विशेषणविशेष्यभावकल्पनानुपपत्तौ न निरूढलक्षणेति । अनेन विशेषणविशेष्यभावप्रकारेण चैकार्थत्वं प्रदर्श्य पुनः प्रकारान्तरेण दर्शयति-न चेति । जहत्त्यजन्स्वार्थो यया सा जहत्स्वार्था, सा सौ लक्षणा चेति जहत्स्वार्थलक्षणा तया कुसुमिता जातपुष्पा द्रुमां यस्यां सा कुसुमितद्रुमा गङ्गा इतिवत्सामानाधिकरण्यं न च तत्त्वंपदयोरेकार्थत्वस्य विवक्षितत्वात् वक्तुमिष्टत्वात् । सम्बन्धिलक्षणायां तु सम्बन्धिनः सम्बन्धस्य च स्फुरणान्नैकार्थत्वमिति वः । प्रकारान्तरेणाघटमानं प्रदर्श्य येन प्रकारेण ब्रह्मणि पर्यवसानं तद्दर्शयति-अत इति । यतः प्रकारान्तरेण सामानाधिकरण्यं न सम्भवति अतो हेतोः । जहती त्यजत्यजहती न त्यजती स्वार्थौ ये ते तत्त्वंपदे यस्यां सा जहदजहत्स्वार्था सा चासौ लक्षणा चेति तया । एकार्थत्वेन निर्गुणे पर्यवसानं सोऽयं देवदत्त इति यस्त्वया पूर्वं दृष्टः । तत्र तच्छब्देन विप्रकृष्टदेशकालविशिष्टोऽर्थोऽभिधीयते शब्देन च सन्निकृष्टदेशकालविशिष्टोऽर्थोऽभिधीयते । तदुक्तम् —

"इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥" इति ।

विप्रकृष्टं विदूरम्, सन्निकृष्टं सन्निहितम्, न च सन्निकृष्टविप्रकृष्टयोरेकार्थत्वं सम्भवति तस्माद्विरोधिविशेषणसम्बन्धपरित्यागेन लक्षणया सोऽयमिति पदद्वयं देवदत्तस्य स्वरूपमखण्डितं प्रतिपादयति । तथा जीवोऽपि परमार्थतो ब्रह्मैव विद्यादोषवशादसंसारिणो ब्रह्मणोऽत्यन्तभिन्नं संसारिणमात्मानं मन्यते तं श्रुतिर्बोधयति तत्त्वमसीति । तत्र तत्पदेन प्रकृतं परोक्षं कथ्यते । प्रकृतमेकमद्वितीयमीक्षितृ जगत्कारणं ब्रह्म त्वंपदेनाप्यविद्याद्युपाधिपरिच्छिन्नो नित्यापरोक्षः प्रत्यगात्माऽभिधीयते । परोक्षापरोक्षपरिच्छिन्नापरिच्छिन्नयोरेकत्वं सम्भवति । तस्मात्तत्पदार्थगतं परोक्षाऽपरिच्छेदादिकं त्वंपदार्थगतमपरोक्षपरिच्छेदादिकं जहदजहत्स्वार्थलक्षणया तत्त्वंपदद्वयं सच्चिदेकरसमखण्डमात्मतत्त्वं प्रतिपादयति । असिपदमपि प्रकृत्यर्थस्य सतः र्थस्य च प्रतीचः सङ्घट्टनेनानुवददाभ्यां सम्बध्यते । इति निषेधपरश्रुतीनां तत्परत्वमाह-अस्थूलेत्यादि । अस्थूलमत एव दीर्घमित्यादिवाक्यानामुपाधिनिषेधेन स्थूलत्वाद्युपाधिनिषेधेन साक्षाद्ब्रह्मणि पर्यवसानमित्यर्थः । सगुणगतानामिव त्वाद्युपाधीनामनुवादाद्विशिष्टालम्बनत्वमस्त्येव । विशिष्टं सगुणम् । उपासनापरसृष्टिपरश्रुतीनां तत्परत्वमाह-दिवाक्यानामत्रादिना सृष्ट्यादिग्रहः । क्रियार्थो यज्ञार्थस्तत्र प्रवृत्तानां सृष्ट्यादिवाक्यानां "यतो वा इमानि भूतानि न्ते ।" इत्यादिवाक्यानां यज्ञार्थैव प्रवृत्तिः । यतो वा एतानि जातानि तं यजतेति । एवं "स ऐक्षत" इति य ऐक्षत तं यजत ष्वपि ध्येयम् । मुख्या प्रवृत्तिस्तु वैराग्यार्थेत्याह-आगमापायिसृष्टिस्थितिप्रलयनिरूपणेन ज्ञानसाधनवैराग्यविधानं तेन तद्द्वारा तत्त्वं ब्रह्मणि पर्यवसानम् । उपासनावाक्यैस्तूदराद्युपाध्यालम्बनसगुणब्रह्मनिरूपणेनान्तःकरणशुद्धिलक्षणं यत् ज्ञानसाधनविधानं ब्रह्मणि पर्यवसानम् । कर्मादिपराणां "यावज्जीवमग्निहोत्रं जुहुयात् ।" इत्यादिकानां श्रुतीनां विविदिषायां विनियोगादनुपादानं

तमेतं वेदानुवचनेन यज्ञेनेत्यादिश्रुतेर्ज्ञानेच्छायामुपयोगादत्र न ग्रहणमिति ज्ञेयं सुधीभिरिति । अथान्यः सिद्धान्त उच्यते-निर्गु ब्रह्मणि सगुणाः श्रुतयः कथं चरन्तीति प्रश्नस्य सिद्धान्तः स्वामिचरणैर्लक्षणापरादिश्रुतीनां यथा ब्रह्मणि तात्पर्यं तथा प्रदर्श्य कृ एव । तथाप्यत्राशङ्कास्ति सा यथा —

"बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः । मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥"

इति लोकानां प्रभुरसृजदिति कथमुक्तं श्रीशुकदेवेन प्रश्नत्तराऽनुपयोगित्वादिवेति-अत्रोच्यतेऽस्माभिः-बुद्धिर्हि द्विविधा-व्यवसायात्मिकाऽव्यवसायात्मिका चेति, तत्राव्यवसायात्मिका हि त्रिवर्गसाधने सत्त्वादिगुणभेदेन त्रिधा भूत्वाऽनन्ता बुद्धयः स्युः ।

"व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन । बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥" इति ॥

"सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्" इत्युक्तेः । अतो बुद्धेः सर्जनं वेदोक्तकर्मप्रतिपादितभोगानन्तरं मोक्षार्थमिति । इन्द्रियादिसृष्टेः प्रयोजनं यथा-इन्द्रियं वागिन्द्रियं तस्य मुख्यत्वात् । मुख्यत्वं तु वचनपूर्वकत्वात् सर्वव्यवहारसिद्धेः । तत्र वाङ्मनःप्राणा ऋग्यजुःसामवेदा भवन्ति । तथा च श्रुतिः - "ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये" इति । अन्येऽपि लोकादयः सर्वे वागादय एव भवन्तीत्यत्र सम्यक्प्रबोधनार्थमन्याः श्रुतयोऽपि लिख्यन्ते —

"त्रीण्यात्मने कुरुतेति । मनो वाचं प्राणं तान्यात्मने कुरुत एव एतन्मयोऽयमात्मा वाङ्मयो मनोयः प्राणमयः । त्रयो लोका एत एव-वागेवायं लोको । मनोऽन्तरिक्षलोकः । प्राणोऽसौ लोकः । त्रयो वेदा एत एव-वागेव ऋग्वेदो मनो यजुर्वेदः प्राणः सामवेदः । देवाः पितरो मनुष्या एत एव-वागेव देवाः । मनः पितरः । प्राणो मनुष्याः । माता पिता प्रजैत एव-वाङ्माता । मनः पिता । प्राणः प्रजा । विज्ञानं विजिज्ञास्यमविज्ञातमेत एव ।"

"यत्किंचिद्विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वावति । यत्किञ्चिद्विजिज्ञास्यं मनस्तद्रूपं मन एनं तद्भूत्वावति । यत्किञ्चिद्विज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः । प्राण एनं तद्भूत्वावति । तस्यैव वाचः पृथिवी शरीरं ज्योतीरूपमग्निः यावत्येव वाक्तावती पृथिवी तावानयमग्निः । अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यः । तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यः । अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रः । तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रः । त एते सर्वे समाः सर्वेऽनन्ताः स यो हैतानन्तवत उपास्ते, अन्तवन्तं लोकं जयति । अथ यो हैतानन्तानुपास्ते सोऽनन्तलोकं जयति" इति ॥

सुगमत्वान्न व्याख्यायते । इहामुत्रानन्तलोकसुखभोगाय त्रीणि मनो वाचं प्राणम् एतान्यात्मने आत्मार्थं यूयं कुरुत यत एतन्मयोऽयमात्मा यतस्त्रयो वेदा एत एव असौ लोकः परलोकः यत्किञ्चिद्विज्ञातं विशेषेण ज्ञातं वस्तु तत्सर्वं वाचो रूपमतो वाक्तद्विज्ञातं वस्तु भूत्वा एनं पुरुषं सङ्कटादवति रक्षति एवमुत्तरत्रापि ज्ञेयम् । ज्ञातुमिच्छा जिज्ञासा यत्र विजिज्ञासा वर्तते तद्विजिज्ञास्यम् । अन्तवतो विनाशवतः । ह स्फुटम् । जयति प्राप्नोति स्पष्टमन्यत् । अकल्पनायेत्यस्यार्थः । एवं धर्मार्थकामान् वेदोक्तमार्गेण संसेव्य विमुक्तये विरज्य परमात्मानं ज्ञात्वा प्रव्रजेदित्यत्र श्रुतिः —

"एतमेव विदित्वा मुनिर्भवति । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । एतद्धै पूर्वे विद्वांसः प्रज्ञानं कामयन्ते । किं प्रजया करिष्यामो येषां नोऽयमात्मा लोक इति ते ह स्म पुत्रैषणायाश्च वैत्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा सा लोकैषणा उभे ह्येषणे एव भवतः तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्ये तिष्ठासेत् । बाल्यं च पाण्डित्यं च निर्विद्याथो मुनिरमौनं मौनं च निर्विद्याथो ब्राह्मणः स ब्राह्मणः येन स्यात्तेनेदृश एवातोऽन्यदार्तम्" इति सुगमम् । तस्मादिति ब्राह्मणः ब्राहम्णजातिगुणविशिष्टः बाल्येन बालस्वभावेन [पण्डाऽध्ययनजातब्रह्मबुद्धिः तद्वान्पण्डितस्तस्य कृत्यं पाण्डित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन ज्ञानबलाभावेन मननेन शुद्धान्तःकरणेन वा स्थातुमिच्छेत् । तद्द्वयं लब्ध्वाऽथ श्रवणमननानन्तरं मुनिर्मननशीलो निदिध्यासनपरः स्यात् । अमौनं श्रवणमनने मौनं च निदिध्यासनं लब्ध्वा उक्तत्रय

साक्षात्कारहेतुत्वात्त्रयानन्तरं ब्रह्मावगच्छतीति ब्राह्मणः साक्षात्कृतब्रह्मा भवतीत्यर्थः ।] तिष्ठासेत् स्थातुमिच्छेत् । तर्हि सदा ने तिष्ठेत् नेत्याह–बाल्यं च पाण्डित्यं च निर्विद्य त्यक्त्वा मुनिर्यतवाग्भवेत् । तर्हि किं सदा मौनेन तिष्ठेत् नेत्याह–मौनं चामौनं त्वा ब्राह्मणः ब्रह्मनिष्ठः स्यात् । स ब्राह्मणः केन स्यादित्यस्योत्तरम्–येनेति । येन ब्राह्मणः स्यात्तेनानिर्वचनीयेन ब्रह्मात्मलाभेन एवोक्तप्रकारेण ब्राह्मण एव स्यात् तद्वस्तु अतः पाण्डित्यादेरसतः अन्यत्पृथगेवार्तं सत्यमिति । तस्मादेतेन बुद्धीन्द्रियेत्यादिश्लोकेन नां चतुर्वर्गं प्रतिपादयन्त्यः श्रुतयो यथा ब्रह्मणि चरन्ति तथा प्रदर्श्य शुकदेवेन राद्धान्तः कृतः ।

नीलकण्ठस्तु तदेतन्मनो वाचं प्राणं तान्यात्मने कुरुतेत्येतामेव श्रुतिमनुसृत्य परिहरन् श्रीशुक उवाचेत्याह–तत्र श्रुतौ मनसा ज्ञानेन्द्रियाणि वाचा कर्मेन्द्रियाणि च सङ्गृह्य तेषां सप्राणानामात्मप्रकाशार्थत्वमुक्तम् । अत्र तु विषयविभागेनेति विशेषः । विषयपरिच्छेदो मात्रा तदर्थं प्रभुर्जनानां बुद्धिमसृजत् । परिच्छिद्यन्ते हि बुद्ध्याऽतीन्द्रिया अप्यपूर्वादयः । ब्रह्मणश्च फलात्मनो घटादिवत्फलव्याप्यत्वाभावेऽपि वृत्तिव्याप्यत्वमुपगम्यते "यन्मनसा न मनुते" "मनसैवानुद्रष्टव्यम्" इति तिद्वयविरोधाय । एवं वाच्यत्वाऽनुपगमेऽपि लक्ष्यत्वमुपगम्यते । "यद्वाचानभ्युदितम्०" "तं त्वौपनिषदं पुरुषं पृच्छामि" इति तिद्वयविरोधाय । तथा च तत्त्वमसीति वाक्यकरणकधीवृत्तिव्याप्यत्वोपगमान्नात्यन्तमनिर्देश्यत्वं ब्रह्मणोऽस्तीत्यर्थः । न केवलं विषयकर्तृगोचरो ब्रह्मापि तु इन्द्रियमनआख्यकरणगोचरोऽपीत्याह–भवार्थमिन्द्रियाण्यसृजत् । आत्मार्थं मनोऽसृजत् । ति । भवो घटाद्यधिष्ठानभूतप्रकाशः । प्राप्त्यर्थस्य भवतेर्ज्ञानार्थत्वोपपत्तेः । यमपेक्ष्य घटादिज्ञानमनुभव च्यते तदर्थमिन्द्रियाण्यसृजत् । इयमत्र प्रक्रिया–चित्प्रतिबिम्बगर्भमन्तःकरणं वृत्त्या कारणेन परिणम्य यदा चक्षुरादिद्वारा द्यवच्छिन्नब्रह्मचैतन्यावरके ज्ञानेऽभिभूते स्वतःप्रकाशमाने ब्रह्मणि घटाद्यध्यस्यते । तत्रान्तःकरणावच्छिन्नं चैतन्यं प्रमाता त्त्यवच्छिन्नं चैतन्यं प्रमाणं घटाद्यवच्छिन्नं प्रमेयम् । तत्र कुल्याद्वारा तटाककेदारसलिलयोरिव वृत्तिद्वारा प्रमातृप्रमेयचैतन्ययोरैक्यं फलमात्मबोध इति गीयते । एवं सति शुक्तिरजताद्यध्यास इव घटादिदृश्यवाच्याध्यासेऽपि दृग्वागन्वयव्यतिरेकयोरधिष्ठानप्रकाश पक्षयः । तदेतदाह–भवार्थमिन्द्रियाण्यसृजदिति । फलमपि ब्रह्मैव शास्त्रं च तदन्यनिवृत्त्यर्थमेवेत्युक्तं वृद्धैः । परागर्थप्रमेयेषु या लत्वेन सम्मता संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणत इति सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते प्रपञ्चस्य प्रविलयः शब्देन पाद्यते । इति च घटरजतादिकं त्वाविद्यकं प्रतिभासमात्रम् । एवं च रज्ज्वां स्रक्सर्पधियोरिव ब्रह्मणि रज्जुसर्पधियोर्जाग्रत्स्वप्नयोर्वा निरोधकत्वमेव बाधस्तु तयोर्ब्रह्मज्ञानेनैवेति दृष्टिसमसमयां सृष्टिमुपयन्तो वेदान्तवृद्धाः । तेषां ब्रह्मणि पारमार्थिकी सत्ता दृश्ये भासिकी इतरेषां तु सत्ताद्वैविध्यमभिमतं स्वप्नरज्जुभुजङ्गादौ प्रातिभासिकी सत्ता प्रबोधरज्ज्वादिज्ञानेन सद्यो बाध्या, जाग्रद्रज्ज्वादौ व्यावहारिकी ब्रह्मज्ञानैकबाध्येति । तत्र पूर्वेषां ब्रह्मणि सर्वशब्दवाच्यतास्ति "नामानि सर्वाणि यमाविशन्ति" इति श्रुतेः । वाच्यत्वश्रुतिस्तु लौकिकशब्दप्रवृत्तिनिमित्तजातिगुणाद्यभावपरा । परेषां तु 'शरीरं रथमेव तु' इत्यत्र यथाशरीरशब्देन पादानमव्यक्तं लक्ष्यते तद्वद्घटाद्युपादानं ब्रह्म घटादिशब्दैरिति मतम् । एवं कर्तृकरणसृष्टेः ब्रह्मप्रकाशार्थमुक्त्वा शक्तिमत्प्राणसृष्टेरपि तदुभयानुग्राहकतया तदर्थत्वमाह–कल्पनाय प्राणानसृजत् । कल्पनं बुद्ध्यादेः विषयकप्रकाशनसामर्थ्यसम्पादनं तस्मै । यस्माद्ब्रह्मणः सर्वशब्दप्रत्ययगम्यत्वमस्ति तस्माद्भवत्येव सन्मार्गोपदेश इति ॥★॥

श्रीधरानुयायिनी – उत्तरमाह श्रीशुकदेवः–बुद्धीति । प्रभवत्यस्मादिति प्रभुर्मायोपहितेश्वरः । आकाशादि सृष्ट्वा कांशेभ्यो जनानां प्रमातृणामुपाधिभूतान् बुद्धीन्द्रियमनःप्राणानसृजत् । कारणाज्ञाने लीनान्पुनः प्रादुरभावयत् । तत्र माह–मात्रार्थमिति । "मात्रा परिच्छदे माने प्रवृत्तौ कर्णभूषणे" इत्यनुशासनान्मात्रा प्रवृत्तिस्तदर्थम् । "कथं चरन्ति श्रुतयः" श्रुतीनामिति शेषः । तथा च श्रुतीनां ब्रह्मण्यपि प्रवृत्त्यर्थमित्यर्थः । बुद्ध्यादिकं विना वचनस्याप्रवृत्तेः । "मनसा वा अग्रे वाचा व्यवहरति" इति श्रुतेः । अयम्भावः — निर्धर्मके शुद्धे ब्रह्मणि श्रुतीनां प्रवृत्त्यसम्भवेऽपि "अध्यारोपापवादाभ्यां प्रपञ्च्यते" इत्युक्त्वा "यतो वा इमानि भूतानि जायन्ते" "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्याद्याः सृष्ट्याद्युक्त्वा ता एव तत्त्वमसीत्याद्या जीवेश्वरयोरभेदं बोधयन्त्यः सोऽयं देवदत्त इत्यादौ विरुद्धयोर्देशकालयोरिवात्रापि विशेषोपाध्योस्त्यागं विना तयोरभेदानुपपत्त्या जहदजहल्लक्षणया शुद्धे पर्यवस्यन्ति । अत एवान्ते 'अतन्निरसनेन भवन्निधना:'

इत्युक्तम् । एवं च मायोपहितस्येश्वरस्य कारणोक्त्या तत्र धर्मिसमसत्ताकधर्मसम्बन्धसत्त्वेन श्रुतीनां शक्त्यैव प्रवृत्तिः । असं शुद्धब्रह्मणि च तादृशधर्माभावेन वास्तवतत्सम्बन्धाभावेऽपि दीपे रज्जुसर्पस्येवाध्यासिकसम्बन्धोऽस्त्येवेति लक्षणाया सम्बन्धापेक्षत्वेऽपि तया वेदानां कल्पितधर्माधारे ब्रह्मणि प्रवृत्तिर्निराबाधैव ।

प्रेमभक्तास्तु – ब्रह्मणः शब्दवाच्यत्वाभावादेवानिर्देश्यत्वमित्याशङ्कायां यदि परमेश्वरो बुद्धीन्द्रियादीनि नास्रक्ष्यत रूपशब्दादयोऽप्यनिर्देश्यादृश्यत्वेन ब्रह्मतुल्या एवाभविष्यन् यतोऽद्याप्याजन्मान्धमूकस्य रूपशब्दौ ब्रह्मवददृश्यानिर्देश्यावे भवतः । अतोऽस्मदादिभ्यो येनाग्रहेण ग्राहकाणि बुद्धीन्द्रियादीनि दत्त्वा सर्वे विषयाः सुखेन दर्शननिर्देशादियोग्याः कृतास्तेन परमेश्वरेण कृपया कस्मैचित्स्वभक्ताय ब्रह्मणोऽपि ग्राहकं किमप्यलौकिकं सामर्थ्यविशेषं दत्त्वाऽऽकारजातिगुणक्रियातिरिक्तं किमपि शब्दप्रवृत्तिनिमित्तं सृष्ट्वाऽसृष्ट्वैव वा ब्रह्मापि शब्दनिर्देश्यं करिष्यत्येव । यतः प्रभुः अनिर्देश्यमपि निर्देश्यं कर्तुं समर्थः । अतः श्रुतये ब्रह्मणि चेरेयुरेवेत्युत्तरमाहुः । अन्यदपि प्रयोजनमाह–भवायेति । ऐहिकपारलौकिकभोगसुखायेत्यर्थः । बुद्ध्यादीन् विना यज्ञादिकर्मणां सुखभोगस्य चासम्भवात् । तथात्मनेकल्पनाय चेति ।आत्मानं जीवमुद्दिश्य या जन्ममरणादिकल्पना तदभावाय मोक्षार्थमिति यावत् । बुद्ध्यादिकं विना मोक्षसाधनीभूतस्य शमदमादेर्योगज्ञानयोश्चासम्भवात् । यद्वा–आत्मने स्वस्मै स्वोपासनार्थं यद्बुद्ध्यादे कल्पनं विनियोगस्तस्मै श्रीकृष्णभजनार्थमिति यावत् । बुद्ध्यादीन् विना भक्त्यङ्गस्य श्रवणकीर्तनादेरप्यसम्भवात् । भोगमोक्षयोर्वैलक्षण्यसूचनाय संध्यकरणम् । त्रयाणामपि प्राधान्यद्योतनाय चकारत्रयम् । अन्येतु स्वप्रकाशस्य ब्रह्मणः सिद्धि प्रमाणं नापेक्षते इत्याशयेनोत्तरमदत्त्वैव ब्रह्मणो ज्ञानार्थं तटस्थलक्षणमाहुः–बुद्धीत्यादि । तत्सृष्टौ प्रयोजनान्याह-मात्रर्थमैहिकविषयभोगार्थं भवार्थं पारलौकिकविषयभोगार्थम् आत्मने कल्पनाय मोक्षार्थं चेत्याहुरित्यलम् ॥★॥

तोषिणी — अत्र ऋषिरुवाचेति तस्य सर्वज्ञत्वात्तत्र प्रावीण्यं दर्शितम् । श्रीशुक उवाचेति पाठे ब्रह्मवैवर्तोक्तां कथां सूचयति । यत्र श्रीकृष्णेनैव तस्य तन्नाम कृं मायाबन्धनतश्च मोचित इति । ततः श्रीविष्णुरातवत्कृपाविशेषलाभेन समवासनत्व सोऽपि तदनुकूलमेवोवाचेत्यर्थः । तथा हि–बुद्धीन्द्रियेति । एतदुक्तं भवति येन स्वरूपलक्षणेन तटस्थलक्षणेन वा परमकारणं तत् निरूप्यते । तदुभयमपि श्रीभगवत्तत्त्वमेव पर्यवसाययति न तु निर्विशेषब्रह्मत्वम् । तत्रादौ "यः सर्वज्ञः सर्ववित् ।" इत्याद्यनुसारेण प्रभुरित्यन्यनैरपेक्ष्येणोक्तत्वात्स्वरूपेणैवेश्वरत्वम् । स च सर्वव्यापनशीलज्ञानेच्छाक्रियाशक्तिमान् "सत्यं ज्ञानमनन्तं ब्रह्म ।" इति "विज्ञानमानन्दं ब्रह्म" इति "यल्लक्ष्यते तस्यैव खल्वेतस्यानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति "को ह्येवान्यात् प्राण्याद्यद्येष अकाश आनन्दो न स्यात्" इति "आनन्दादेव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्द प्रयन्त्यभिसंविशन्ति ।" इति "न तस्य कार्यं कारणं च विद्यते ।" इत्यादिश्रुतयः स्वाभाविकशक्तिं दर्शयन्ति । वक्ष्यति च "त्वमकरणः स्वराडखिलशक्तिधरः ।" इति उपाधिसम्बन्धेन तत्तच्छक्तित्वे तूपाधेरेवेश्वरतापातात् । वक्ष्यन्ति श्रुतयः "त्वमसि यदात्मना समवरुद्धसमस्तभगः" इति । अथ द्वितीये "तत्तेजोऽसृजत" इत्याद्यनुसारेण जनानां बुद्धीन्द्रियादीनसृजदिति सुतरां तादृशत्वं परिणामे वा विवर्ते वा योग्यस्यैवोपादानात्तन्निमित्ते च स्वीकारौचित्यादिति योग्यमेव हि शक्तिरिति । अत एव कर्तृनिर्देशात्स्वातन्त्र्यप्राप्तेः सुतराम् । अत एव सर्वबुद्ध्यादिस्रष्टृत्वेन तदीक्षणात्पूर्वं प्रकृतिक्षोभाभावेन च तस्य हि विलक्षणस्वाभाविकबुद्ध्यादिमत्त्वमवगतम् । "स ऐक्षत" इत्याद्यनुसारेण मात्रार्थं चेत्यादिना विचारपूर्वकस्रष्टृत्वनिर्णयात्तु मुख्य तथैव । मात्रार्थमित्यादिना तत्तत्सर्वपुरुषार्थं परमाश्रयत्वं च । "सर्वकामः सर्वगन्धः सर्वरस अयमात्मापहतपाप्मा" इत्यादिश्रुतेः न चारोपितमेव सर्वमिदं तन्मतेऽपि तावदविषये वस्तुन्यारोपासम्भवात् । ब्रह्मणः कालत्रयेऽपि शुद्धत्वेनानन्त त्वारोप्यकोटिप्रवेशेनाज्ञानस्य जडत्वेनारोपकासम्भवे च तदसम्भवात् । तस्मान्न जीवरूपस्य स्वस्य स्वाज्ञानेन तदारोपक वेदस्यारोपकत्वम्, चेत्तस्य स्वाज्ञानमयत्वेन स्वप्नप्रलापतुल्यतया सकर्तृकारोप एव तात्पर्ये सत्यविशेषात् । वेदस्य स्वातन्त्र्येऽप्यारोपक हेयतया "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायेन स्वयं तद्बाधयितुमयोग्यत्वात् स्वाभाविकीत्यादिश्रुतिविरोधात् श्रु शब्दमूलत्वादिति न्यायविरोधाच्च आरोपितत्वे सत्यनीश्वरवादप्रसङ्गाच्च स्थाणौ पुरुषाभिमानिवद्ब्रह्मणीश्वराभिमानि

कालत्रयेऽप्यभावापत्तेः
रमननवैयर्थ्याच्च । संज्ञामू

"असत

असत्यं मिथ्या
अपरस्परसम्भूतमनाशाद्य
स्वप्नवदित्यर्थः । अत्र "प्र
निन्दिष्यते इति ज्ञेयम् । तस
"वेदैश्च सर्वैरहमेव वेद्यो वे
विष्णुपुराणे "मां विधत्तेऽभि
सतः सर्वकारणतया स्थितत्व
ब्रह्म ।" इति स्वरूपलक्षण
"स्वाभाविकी ज्ञानबलक्रिय
निषेधान्तरवाक्येनाऽपि तथात

"अपहतप

तमात्मान

इतीदृशमाहात्म्येनैव
न सन्दृशे तिष्ठति रूप
इति विलक्षणस्वर
त्वस्माकमेवाभीष्टरूपत्वमिति
यस्याक्षरं शरीरमेष स
प्रकाशकत्वात्पृथिव्यादीनामात्म

"ह्लादिनी स
कलाकाष्ठानि
ज्ञानशक्तिब

विष्णुपुराणे —

"न शक्यः स त
मोक्षधर्मस्थनारायणीयो

ऽप्यभावापत्तेः स्वाज्ञानकल्पितपुरुषकल्पिततत्वज्ञानस्य स्वाज्ञानकल्पितत्व एव पर्यवसानात् मध्ये कल्पकान्त-
र्थ्याच्च। संज्ञामूर्तिक्लृप्तिस्तु 'त्रिवृत्कुर्वत उपदेशात्' इत्यादिन्यायवृन्दासम्मतं हि तत्। निन्दितं च गीतासु —

"असत्यपमप्रतिष्ठं ते जगदाहुरनीश्वरम्। अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥" इति ॥

असत्यं मिथ्याभूतं सत्त्वासत्त्वाभ्यामनिर्वचनीयत्वेनाप्रतिष्ठम् निर्देशशून्यं स्वाज्ञानकल्पितत्वादनीश्वरम्।
सम्भूतमनाशाद्यज्ञानपरंपराजातम्- "अपरस्पराः क्रियासातत्ये।" अतः कामहेतुकं मनःसङ्कल्पमात्रजातं
त्यर्थः। अत्र "प्रवृत्तिं च निवृत्तिं च।" इत्यादिना पूर्वं तेषां संस्कारदोष उक्तः। "एतां दृष्टिमवष्टभ्य।" इत्यादिना गतिश्चि
ते इति ज्ञेयम्। तस्मात्सर्ववेदार्थः श्रीभगवानेव "यं सर्वे वेदा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च।" इति श्रीनृसिंहतापिन्यां
सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्।" इति श्रीगीतासु "नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती।" इति
"मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्।" इति एकादशे च। तथा "सदेव सौम्येदमग्र आसीत्।" इति यस्य
सर्वकारणतया स्थितत्वम्। "आत्मा वा इदमग्र आसीत्।" इति परमात्मस्वरूपम्। "सत्यं ज्ञानमनन्तं ब्रह्म।" "विज्ञानमानन्दं
।" इति स्वरूपलक्षणम्। "निर्गुणं निरञ्जनम्।" इति दोषराहित्यम्। "न तस्य कार्यं करणं च विद्यते।" इत्यादौ
भाविकी ज्ञानबलक्रिया च।" इति तत्तदागन्तुकशक्त्यादिराहित्यानुवादेनैव स्वाभाविकविलक्षणशक्त्यादियुक्तत्वम्। एवं
न्तरवाक्येनाऽपि तथात्वम्।

"अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः। सत्यकामः सत्यसङ्कल्पः ॥

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।

तमात्मानं ये तु पश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥" इति तत्तद्विवरणम् ॥

"तमीश्वराणां परमं महेश्वरं तं देवतानां परमं तु दैवतम्।

सकारणाकारणयोस्तथा धियो न तस्य कश्चिज्जनिता न चाधिपः ॥"

इतीदृशमाहात्म्येनैव सर्वकारणत्वम्। "आनन्दं ब्रह्मणो रूपम्। वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति रूपमस्य। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥"
इति विलक्षणस्वरूपमूर्तित्वं दर्शितम्। तस्य तु "एको ह वै नारायण आसीन्न ब्रह्मा नेशानः।"
कमेवाभीष्टरूपत्वमिति। तथा "यस्य पृथिवी शरीरम्। यस्यायमात्मा शरीरम्। यस्याव्यक्तं शरीरम्।
यस्याक्षरं शरीरमेष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः ॥" इति तु श्रुत्यन्तरम्। सर्वशक्तियुक्तत्वेन
कत्वात्पृथिव्यादीनामात्मत्वेन तमेवाह। पुराणेतिहासवचनानि च —

"ह्लादिनी सन्धिनी संवित्त्वयोक्ता सर्वसंश्रये। ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥
कलाकाष्ठानिमेषादिकालसूत्रस्य गोचरे। यस्य शक्तिर्न शुद्धस्य प्रसीदतु स मे हरिः ॥
ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥
कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः ॥" इति ॥

विष्णुपुराणे —

"न शक्यः स त्वया द्रष्टुमस्माभिर्वा बृहस्पते। यस्य प्रसादं कुरुते स वै तं द्रष्टुमर्हति ॥" इति।

मोक्षधर्मस्थनारायणीयोपाख्याने —

"एतत्त्वया न विज्ञेयं रूपवानिति दृश्यते । इच्छन्मुहूर्तान्नश्येयमीशानोऽहं जगतो गुरु ॥

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं नैवं त्वं ज्ञातुमर्हसि ॥" इति च ॥

तथैव तत्रैव श्रीश्वेतद्वीपवति वाक्ये, अस्यार्थः — त्वयैतन्न विज्ञेयं रूपवान् इति हेतोः अयं दृश्यते इति । यतो मद्दर्श मदिच्छैव कारणमित्याह–इच्छन्निति । नश्येयमदर्शनमापद्येयम् । तस्मादिन्द्रियगोचरत्वादलौकिकम्, स्वेच्छया स्व प्रकाशमानत्वात्स्वप्रकाशमेव मद्रूपमिति भावः । यथोक्तं नारायणाध्यात्म्ये —

"नित्याव्यक्तोऽपि भगवानीक्षते निजशक्तितः । तामृते परमात्मानं कः पश्येतामितं प्रभुम् ॥" इति ।

तदेवमपि मां सर्वभूतगुणैर्युक्तं यत्पश्यति तद्युक्तत्वेन प्रत्येषि एषा माया मयैव सृष्टा मम माययैव तथा भातमित्यर्थः । तस्मात्त्वमेवं ज्ञातुं नार्हसीति । तथा "कूटस्थोऽक्षर उच्यते ।" "अक्षरं परमं ब्रह्म ।"

"यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥
मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥
ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥" इति गीतासु ॥

वक्ष्यन्ति च श्रुतयः — "श्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः ।" इति । "त्वमसि यदेष्ववशेषमृतम्" इति । "त्वमसि यदात्मना समवरुद्धसमस्तभगः ।" इति । "त्वमुत जहासि त्वामहिरिव त्वचमात्तभगो महति महीयसेऽष्टगुणितेऽपरिमेयभगः ।" इति । "भवत उपासतेऽङ्घ्रिमभवं भुवि विश्वसिताः ।" इति । "न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ।" इति । अत एव "स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते सम समदृशोऽङ्घ्रिसरोजसुधाः" इति । व्याख्यास्यते तु तत्र तत्रैव । तदेवं सर्ववेदार्थत्वेन सर्वविलक्षणत्वात्सर्वविलक्षणत्वेन सर्ववेदार्थत्वाद्वेदैकवेद्यत्वाद्वेदानां च स्वतःप्रमाणभूतत्वादन्यशब्दवाच्यसाधारण्येन दोषा न प्रसञ्जनीयाः । श्रुतयोऽपि तथा वक्ष्यन्ति "त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः" इति । तदेवं श्रीभगवत्येव सङ्गतिस्तु सङ्गता । तथापि तत्त्वमस्यादिलक्षणमैक्यवाक्यमस्थूलादिलक्षणनिषेधवाक्यं वा महावाक्यत्वेन मत्वा लक्षणयोपासनादिवाक्यानि तदनुगतत्वेन मत्वा स्वमते ब्रह्मणि यथाकथञ्चिदेव सङ्गतिं कुर्वन्ति । तथाहि–तत्र तावत्तेषां मते मुख्या गौणी च शब्दवृत्तिर्ब्रह्मणि न सम्भवत्येव लक्षणा च न सम्भवतीत्युक्तम् । अत एव तन्निषेधान्यथानुपपत्त्यावगतार्थापत्तिश्च न । यद्धि स्वरूपादिभिः साक्षान्निर्देश्यं स्यात्तत्र सा सम्भवतीति । तथापि तत्र तावज्जहदजहल्लक्षणया मन्यते सा कथं घटेत । सा च खलु शब्दवृत्तिसामान्येन पूर्ववद्दोषवत्त्वे शुक्त्यादौ रूप्यारोपेण सम्बन्धाभावेऽप्यारोपेण सम्बन्धो मन्तव्य एव तेन विना कल्पनाऽनर्हत्वात् । आरोपस्याप्यारोप्यत्वेऽन वस्थाप्रसङ्गः । आरोपश्च वाङ्मनसागोचरे न सम्भवति । कथञ्चित्सम्भवे वा शब्दविषयत्व इवारोपविषयत्वेऽपि कथमनित्यत्वादि नापतेत् रज्जुशुक्त्यादिवदिति । यत्त्वौपाधिक एव वा जीवेश्वरविभाग इति मतं ब्रह्मस्तवव्याख्यायां मया परिहृतं तच्च तत्र द्रष्टव्यम् । श्रीवैष्णवानां माष्यतदीयीकयोः शतदूषण्यादिषु च तत्त्ववादिनां विष्णुतत्त्वप्रकाशिकादौ न्यायामृतादौ तथाऽन्य तद्दृष्टिलेशावष्टम्भिश्रीभागवतसन्दर्भे तट्टीकादौ च विशेषो द्रष्टव्यः । किञ्चाज्ञानस्यैव भेदमात्रमूलत्वे सति तत्त्वंपदार्थयोरैक्यज्ञानमात्रेण सङ्गच्छते । जीवत्वं तु कस्याज्ञानेन कुत्र कल्पितमिति न बुध्यते ब्रह्मणश्चिन्मात्रस्याज्ञानाश्रयत्वविषयत्वयोरसम्भवात् । ईश्वर जीवाज्ञानकल्पितं विद्यामयं चेति नाप्यसौ तदाश्रयविषयः । जीवाज्ञानेन जीवे जीवत्वं कल्पितमिति तु परस्पराश्रयेण स्वाश्रय च दुष्टमित्यलमति प्रसङ्गेन । तस्माद्यत्क्वचित्सामानाधिकरण्यमुच्यते तत्राप्येषा गतिः । लक्षणा हि तत्स्वरूपस्यान्यस्वरूप बोधयति किं तु तच्छब्देनान्यद्वाचयति । यथा नीलमुत्पलमिति तटमिदं गङ्गेति । सोऽयं देवदत्त इत्यत्र स इति तत्कालविशिष्ट स्मर्यमाण इत्यर्थः । अयमिति एतत्कालविशिष्टत्वेन दृश्यमान इत्यर्थः । ततोऽनयोः सामानाधिकरण्ये स्यान्न विरोध इति तत्

न स्यात् । ततस्तद्वदत्र न ल
शरीरम् ।" इति श्रुतेः सूर्य्यत
देवता अनेनात्मनानुप्रविश्य

"ममैवाशो जीवल
ययेदं धार्यते जगत् ॥" इति
सूर्यतद्रश्मिपरमाणुवृन्दवदवि
स्वशुद्धतानुभवेन देहाद्यावेशा

"स्वकृ

इति नृगतिं वि

येन श्रीभगवति सर्व
केचिदपवर्गमपीश्वर ते" इति
महावाक्यत्वमात्मैकत्वं प्रयोज
तादृशमहावाक्यानुगतानां सर्वा
निन्दितं च तासां सर्वासामेव गौ
लज्जा यत्र यत्राखिला वराः ।"
च जीवेशयोरैक्यज्ञानं सर्ववेदार्थ
नेति नेतीत्यादीनां च निषेधवाक्य
कर्तुं शक्यते निर्विशेषं वा ज्ञातुं शक
तथा "नेह नानास्ति किञ्चन ।" इ
किञ्चन नास्ति नाना वा नास्ति
तदेकात्मकत्वात्पूर्ववदेवाप्राकृ
स्वरूपशक्तेरहेयत्वावगमात् । द्युपत
तस्यां स्तुतौ निर्विशेषज्ञानमेव विव
इत्यादिभिः श्रीभगवद्भक्तिरेव स्तुत
तत्त्वमस्यादिवाक्यैः कथञ्चिदेव तत्त

"दुरवगमात्मत

न परिलषन्ति

इतिवत् परमानन्देनैवेति ज्ञेय
बीजत्वादेव वेदः प्रणव एवाग्र इ
समूहत्वाद्वाक्यत्वम् । ततश्च परमवा

"अमात्रोऽनन्तमात्र

इति श्रुत्यन्तरं तदेव निर्धारया

तो गुरु ॥

॥" इति च ॥

अयं दृश्यते इति । यतो मद्दर्शने
लौकिकम्, स्वेच्छया स्वतः

प्रभुम् ॥" इति ।
न माययैव तथा भातमित्यर्थः ।

थतः पुरुषोत्तमः ॥
भूयाय कल्पते ॥
व ॥" इति गीतासु ॥
"त्वमसि यदेष्ववशेषमृतम् ।"
हिरिव त्वचमात्तभगो महसि
न परिलषन्ति केचिदपवर्गमपीश्वर
त्रषक्तधियो वयमपि ते समाः
विलक्षणत्वात्सर्वविलक्षणत्वेनैव
याः । श्रुतयोऽपि तथा वक्ष्यन्ति-
तिस्तु सङ्गता । तथापि ते
नादिवाक्यानि तदनुगतत्वेन मत्वा
शब्दवृत्तिर्ब्रह्मणि न सम्भवत्येव
पादिभिः साक्षान्निर्देश्यं स्यात्तत्रैव
वृत्तिसामान्येन पूर्ववद्दोषावहैव ।
वात् । आरोपस्याप्यारोप्यत्वेऽन-
विषयत्वेऽपि कथमनित्यत्वादिकं
ख्यायां मया परिहृतं तच्च तैवात्र
कादौ न्यायामृतादौ तथाऽस्माकं
ति तत्त्वंपदार्थयोरैक्यज्ञानमात्रैक्यं
विषयत्वयोरसम्भवात् । ईश्वरत्वं तु
ति तु परस्पराश्रयेण स्वाश्रयाश्रयेण
हि तत्स्वरूपस्यान्यस्वरूपत्वं न
इत्यत्र स इति तत्कालविशिष्टत्वेन
करण्ये स्यात्र विरोध इति लक्षणैव

ततस्तद्वदत्र न लक्षणा गौणी चोभयत्र विवक्षितगुणयोगं स्थापयत्येव यथा-पित्तलमिदं सुवर्णमिति । तस्मात् "यस्यात्मा" इति श्रुतेः सूर्य्यतन्मण्डलगङ्गातत्प्रवाहगोजातितव्यक्तिवन्नियताधिष्ठानाधिष्ठात्रोः प्रसिद्ध एवाभेदप्रयोगः । यद्वा- "इमास्तिस्रो अनेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति महापुरुषवचनश्रुतौ अनेनेति जीवस्य भेदनिर्देशादंशत्वे प्राप्ते "ममैवांशो जीवलोके जीवभूतः सनातनः ।" इति "अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो यते जगत् ॥" इति गीतासु मायाख्या परप्रकृत्यतीततयैव जीवस्य तादृशत्वे व्यक्ते सत्यभिन्नशुद्धशक्त्या जीवेश्वरभेदे परमाणुवृन्दवदविनाभावेन प्रकाशैकरूपेण चाभेद उपदिश्यते । प्रयोजनं तु मुमुक्षूणां परमेश्वरतादात्म्यानुभावात् नुभवेन देहाद्यावेशनिरसनं, भक्तीच्छूनां तन्नित्यसम्बन्धज्ञानेन तद्भजनम् । वक्ष्यन्त्येव श्रुतयः —

"स्वकृतपरेष्वमीष्वबहिरन्तरसंवरणं तव पुरुषं वदन्त्यखिलशक्तिधृतोंऽशकृतम् ।

इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेऽङ्घ्रिमभवं भुवि विश्वसिताः ॥" इति ॥

येन श्रीभगवति सर्वपुरुषार्थशिरोमणिपरमप्रेमास्पदत्वस्यानुभवश्च स्यात् । तदनुभवं हि दुरवगमेत्यादौ "न परिलषन्ति केचिदपवर्गमपीश्वर ते" इति तथैव श्रीब्रह्मस्तवान्ते राजप्रश्नानन्तरं श्रीमुनीन्द्रेणोत्तरितं च । ननु तत्त्वमस्यादिवाक्यानां त्वमात्मैकत्वं प्रयोजनं वा युक्तं लक्षणामयवाक्यस्य प्रमाणान्तरसापेक्षत्वेन स्वतः प्रामाण्यहानेर्गौणत्वापातात्, महावाक्यानुगतानां सर्वासामपि श्रुतीनां तत्प्रसङ्गात् । अथानेकेषां वाक्यानां महावाक्यत्वायोगात् तेषां प्रादेशिकत्वाच्च च तासां सर्वासामेव गौणार्थत्वमात्रस्वीकरणम् । तथाहुः-एकस्यापि च शब्दस्य गौणत्वस्वीकृतौ सत्यां "महती जायते यत्राखिला वराः ।" अत्र मुख्यार्थ इति च देवास्तन्मार्गानुवर्तिनं "कथं न जायते लज्जा वक्तुं शाब्दत्वमात्मनः" इति । जीवेशयोरैक्यज्ञानं सर्ववेदार्थस्तत्सिद्धनिर्विशेषं वा निराकृतत्वात् भगवत एव तदर्थत्वेन दर्शितत्वाच्च । तथाऽस्थूलमित्यादीनां नेतीत्यादीनां च निषेधवाक्यानां तन्मते यद्वाङ्मनसातीतनिर्विशेषस्त्वधिकत्वं तदपि न सम्भवति । न हि यन्न जायते तदवधिः क्यते निर्विशेषं वा ज्ञातुं शक्यते तस्मात्प्राकृततत्तन्मात्रधर्मतानिषेधतात्पर्यत्वमेव तेषामप्राकृतयुगपद्विचित्रधर्माश्रयताज्ञापनााय "नेह नानास्ति किञ्चन ।" इत्यस्यापि यदिह किञ्चन नास्ति तन्नाना नास्ति किन्त्वेकात्मैकत्वमेव विवक्षितम् । अन्यथा इह नास्ति नाना वा नास्ति इति एकतरेणैवाभिप्रेतसिद्धिः स्यात् किं द्वयोरुपादानेन तस्मादपि तदीयधर्माणां त्वात्पूर्ववदेवाप्राकृतत्वादिकमिति न च निर्विशेषत्वं वक्ष्यमाणस्तुतेः सम्मतं जय जयेत्याद्युपक्रमे हेयत्वावगमात् । द्युपतय इत्याद्युपसंहारे च अतश्चशब्देन पूर्वार्धोक्तस्यार्थः कालदेशपरिच्छेद एव लभ्यते । यदि च स्तुतौ निर्विशेषज्ञानमेव विवक्षितं स्यात्, तर्हि तत्फलं ब्रह्मैक्यमेव मध्ये मध्ये स्तूयते प्रत्युत तदतिक्रमात् "न परिलषन्ति" श्रीभगवद्भक्तिरेव स्तुता तस्माद्यद्विधीयते तदेव स्तूयते इति वैदिकन्यायेन श्रीभगवानेव प्रकरणार्थः । स्वमतेऽपि दिवाक्यैः कथञ्चिदेव तत्तदर्थस्यावगमः सिद्धिश्च न तु —

"दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ।
न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ॥"

इतिवत् परमानन्देनैवेति ज्ञेयम् । तदेवं तत्त्वमस्यादीनामप्राधान्यं मत्वा स्वतः प्रमाणभूतानां वेदानां प्रादुर्भावकक्षाद्यबीजस्य वेदः प्रणव एवाग्र इत्युक्तत्वात्सर्ववेदवाक्यार्थसमन्वयविधानत्वेन महत्त्वमकाराद्यक्षरात्मकपरस्परसम्बद्ध-वाक्यत्वम् । ततश्च परमवाक्यस्य साक्षाद्भगवद्वाचकस्य श्रीमत्प्रणवस्यैव प्राधान्यम् । अत एव —

"अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः । ॐकारो विदितो येन स मुनिर्नेतरो जनः ॥"

इति श्रुत्यन्तरं तदेव निर्धारयति-स्वयममात्र एकरूपः स्ववृत्तिश्रुतिभिरनन्तमात्रः द्वैतस्योपशमः भगवन्मात्रवाचकतया

वेशान्तरनिरासकश्चेत्यर्थः । तदभिधेयस्य श्रीभगवत एव सर्वयोग्यताहेतुत्वेन परमयोग्यत्वं वदन्सर्ववेदाभिधेयत्वमाह-अत्र प्रणव साक्षाद्वाचकत्वादिकम् —"ओमित्येतद्ब्रह्मणो नेदिष्ठं नाम" इति श्रुतेः । नेदिष्ठमतिशयेन निकटं स्वल्पमपि व्यवधानं वाचकमित्यर्थः । तथा "ॐ विश्वं विष्णुः" इति सहस्रनामस्तोत्रात्

"स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः । स सर्वोपनिषद्ब्रह्मवेदबीजं सनातनम् ॥" इति ॥

"ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् । यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥" इति च द्वादशात् ॥

श्रीभगवतः सर्वयोग्यताहेतुत्वं च "दृतय इव श्वसन्त्यसुभृतो यदि तेऽनुविधाः" इत्यादि वक्ष्यमाणात्

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥" इति श्रुतेः ॥

"या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति नरो नारायणाश्रयः ॥" इति मोक्षधर्मात् ॥

"यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥

सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा । स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छति ॥" इति चैकादशात् ॥

अतो मोक्षान्यथानुपपत्त्या सामानाधिकरण्यं व्यज्यत इति निरस्तम् । अथ प्रणवार्थानुसारेण बुद्धीन्द्रियेत्यस्यार्थ अकाराद्यात्मकपदचयप्रणवार्थो हि "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः" इत्यादौ स्थित्यादय स्थितिसृष्टिप्रलयकर्तृत्वोपलक्षितः प्रणवमयसर्ववेदैः सर्वभजनीयः परमपुरुष एव समर्थितः अत्रापि तथेति । तथा हि जनानां प्रल निजैकाश्रयाणां जीवानां पालनाय मात्रार्थमैहिकविषयभोगार्थं, भवार्थं जन्मान्तरतद्भोगार्थम्, आत्मने शुद्धात्मभाव आत्यन्तिकप्रलयलक्षणमोक्षाय, अकल्पनाय कल्पनासङ्कल्पानन्तरं तद्रहिताय प्रेमैकमयशुद्धस्वभजनायेत्यर्थः । तस्मात्—

"ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः । द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥

यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः । एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः ॥" इति श्रीकपिलदेवदर्शितः सर्व पूर्णाविर्भावः श्रीभगवानेव न निर्विशेषं ब्रह्मेति साध्वेवोक्तं भवता । अतः स बन्दिजनतुल्यवेदवस्तुत्यत्वेनोपक्रमोपसंहारादिभिर्दर्शयितव्यः । किन्तु–ब्रह्मवादिनो द्विविधाः रजततया शुक्तिवदज्ञानेन ब्रह्मैव द्वैत विवर्तत इत्येके । तत्र पूर्वे तु श्रुतेस्तु शब्दमूलत्वादिति श्रीबादरायणमताद्बहिर्भूता अनीश्वरवादिन इति पूर्वपूर्वयुक्त्या खण्डिताः उत्तरे चैते खल्वीश्वरवादिनोऽपि भक्तिविशेषं विना सच्चिदानन्दविग्रहत्वादिभगवत्ताविशेषग्रहणासमर्था भगवन्तमेव निर्विग्रह मन्यन्ते उपासते च । तच्च तथैव बुद्धीन्द्रियेत्याद्यनुसारेण भगवद्दत्तशक्त्यैवानुभवन्ति । यथोक्तं श्रीमत्स्यदेवेन—

"मदीयं महिमानं च परब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदि ॥" इति ॥

अत्राभेदेऽपि महिमत्वेन निर्देशस्तदपि स्वस्यैकदेशाविर्भावरूपमिति वैभवविशेषतया रूपयता स्वस्य भगवद्रूप पूर्णप्रकाशकत्वं व्यञ्जितम् । यदुक्तं श्रीध्रुवेण — "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानात्" इत्यादौ "सा ब्रह्मणि स्वमहिम नाथ मा भूत्" इति तादृशब्रह्मोपासनाफलं शुद्धात्मतया तत्तादात्म्यप्राप्तिश्च नादृता सालोक्यसार्ष्टिसारूप्येत्यादिना तदद सर्वातीतप्रकाशत्वादप्राकृतस्वरूपगुणत्वादनिर्देश्यमेव तदेतच्च यया भगवद्दत्तशक्त्यानुभवन्ति चाप्राकृतस्वरूपगुणत्वावलम्बकोपनिषदाख्यश्रुतिसम्बन्धादुद्भवति । औपनिषदः पुरुष इति– "तं त्वौपनिषदं पुरुषं पृच्छामि" इति श्रुतेः । "यस्मान्मनोऽपि तस्मिंश्चरति" इति वक्ष्यते —

"तदेतद्वर्णितं राजन्येन प्रश्नः कृतस्त्वया । यथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत् ॥" इति ।

यथा जय जयेत्याद्यष्टाविंशप्रकारकश्रुतिमार्गेणाप्रकाशितनिजगुणेऽपि किमुत प्रकाशितनिजगुण इत्यर्थः । अथवा "सर्ववेदमयो विप्रो सर्वदेवमयो ह्यहम्" इति स्वस्य स्वयं भगवता सर्ववेदप्रमेयत्वमुक्तम् । श्रीविष्णुरातेन च तस्मिन् श्रीकृ भगवति तत्र तत्र ब्रह्मत्वमवधारितम् "गूढं परब्रह्म मनुष्यलिङ्गम् ।" "तदमितं ब्रह्माद्वयं शिष्यते" "यन्मित्रं परमानन्द

सनातनम् ।" इत्यादेः । अत
बृहत्तमत्वं तच्च स्वरूपेण गुणेन
श्रुतौ गान्धर्व्यायाः प्रश्नः । तत्र
सर्वविद्वत्परम्परादिगुरूणां श्रुती

"स्त्रिय उरगेन्द्र

अतः श्रीनारदोऽपि त

"नमस्तस्मै भग

अत एव श्रीविष्णुरात
ततस्तत्रैव वेदप्रमेयत्वं सन्दिह्य
प्रश्लेष्य जिज्ञासितं ज्ञास्यते किं
श्रीकृष्णत्वव्यञ्जकासाधारणो गुण
सन्तः" इति श्रीब्रह्मव्याख्यानुस
निर्देष्टुमशक्ये श्रूयन्त इति श्रुतयः
"यतो वाचो निवर्तन्ते॰
"भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग
तथैवाग्रे वक्ष्यति —

"हरिर्हि निर्गुणः

श्रीविष्णुपुराणे —

"सत्त्वादयो न सन्ती

एकादशे —

"मां भजन्ति गुणाः

अत्र निर्गुणं प्रकृतिगुणैरसं
प्रथमे — "एते चान्ये च
भगवति श्रुतीनां प्रमाणत्वं व्यञ्जितं
विशेषतः स्वतःप्रमाणभूतत्वमेवाङ्ग
भगवन्नामादिमहिमविज्ञैर्भवद्विधभाग
साक्षाच्चरन्ति स प्रकारः कथ्यतामि
प्रकृत्या सह स्वस्मिँल्लीनानां मात्रार्थं म
तद्द्वारा च भवार्थमभ्युदयार्थं ब्रह्मलो
भगवतत्त्वमकल्पनम् । यदुक्तं वरुणे
"नमस्तस्मै भगवते ब्रह्मणे
तदपि ज्ञापयितुं बुद्ध्यादी
भगवदेकार्थतेत्युत्तरोत्तरापादानप्राप्तपूर्व

म्।" इत्यादेः । अतः श्रीगोपालतापन्याम् — "कथमस्यावतारस्य ब्रह्मता भवति" इति प्रश्नः ब्रह्मत्वं त्वनुपचारितं त्वं तच्च स्वरूपेण गुणेन च वाच्यम्। अतः वैकल्ये तदंशहीनत्वादुपचरितत्वप्राप्तेः तदेवं ब्रह्मता कथं स्यादिति प्रसिद्धानुवादेनैव न्वर्यायाः प्रश्नः। तत्र च श्रीपरीक्षितः तत्प्रस्ताव एव चानेनात्र कर्तुं युक्तः तदर्थमेव श्रीदशमस्कन्धस्य श्रोतुमारब्धत्वात्। दुपरम्परादिगुरूणां श्रुतीनामपि तदेकालम्बता वाक्ये श्रीमुनीन्द्रोऽपि तथैवाङ्गीकरिष्यति।

"स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधाः।" इति॥

अतः श्रीनारदोऽपि तच्छ्रवणानन्तरं तमेवोद्दिश्य तदभेदेन श्रीनारायणं नमस्यति —

"नमस्तस्मै भगवते कृष्णायामलकीर्तये। यो धत्ते सर्वभूतानामभवायोशतीः कलाः॥" इति॥

अत एव श्रीविष्णुरात उवाचेत्युक्त्वा "द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गम्" इत्याद्यर्थस्य सूचनात्तस्य तादृशाभिप्राय एव दृढीकृतः त्रैव वेदप्रमेयत्वं सन्दिह्य पृच्छति- "ब्रह्मन्निति।" श्रीकृष्णत्वस्य साक्षाव्द्यञ्जकपदविशेषाप्रयोगस्तु सामान्याकारतयापि स्य जिज्ञासितं ज्ञास्यते किं विशेषेणेत्यभिप्रायात्। अतो जय जयेत्युपक्रमे वीप्सायुक्तो जिधातोरुत्कर्षाविष्करणरूपोऽर्थः कृष्णत्वव्यञ्जकासाधारणो गुणपर्यन्त एव ज्ञेयः। अतन्निरसनेनेत्युपसंहारेऽपि- "अन्तर्भवेऽनन्त भवन्तमेव ह्यतत्त्यजन्तो मृगयन्ति " इति श्रीब्रह्मव्याख्यानुसारेण तत्पर्यन्त एव। ततश्च ब्रह्मणि अनन्तस्वरूपगुणे तत्राप्यनिर्देश्ये सर्वप्रत्यग्रूपत्वादेकांशेनापि दृश्यवाक्ये श्रूयन्त इति श्रुतयः परिमिताः पराग्रूपाश्च साक्षान्मुख्यावृत्त्या कथं केन प्रकारेण चरन्ति तं प्रकारं कथयेत्यर्थः।

"यतो वाचो निवर्तन्ते०" "विष्णोर्नु कं वीर्याणि प्रवोचम्०" "यद्वाचानभ्युदितम्०" "येन वागभ्युद्यते" इति श्रुतेः। मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्" "अद्यापि यत्पदरजः श्रुतिमृग्यमेव" इत्युक्तत्वाच्च यतो निर्गुणे गुणत्वं च प्रसिद्धम्। ग्रे वक्ष्यति —

"हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः। स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत्॥" इति।

श्रीविष्णुपुराणे —

"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः। स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु॥" इति।

एकादशे —

"मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम्। सुहृदंप्रियमात्मानं साम्यासङ्गादयो गुणाः॥" इति।

अत्र निर्गुणं प्रकृतिगुणैरसंस्पृष्टमेव मां कथम्भूतास्ते अगुणाः गुणपरिणामरूपा न स्युरिति टीकासम्मतिश्च॥

प्रथमे — "एते चान्ये च भगवन्नित्या यत्र महागुणाः।" इति। अत्र च नित्यत्वादप्राकृतत्वमेव लभ्यते। एतदुक्तं पूर्वं श्रुतीनां प्रमाणत्वं व्यञ्जितं तच्च साक्षात्करणत्व एव सङ्गच्छते, अन्यथा साधकतमं करणमित्यत्र तमबर्थहानेः। तासां तु स्वतःप्रमाणभूतत्वमेवाङ्गीकृतं श्रीभगवतस्तदेकप्रमेयत्वं च। ततः साक्षाच्चरणमेवोभयवादिभिर्मन्तव्यं विशेषतश्च दिमहिमविज्ञैर्भवद्विधभागवतैरन्यथाचरणमात्रं मया न पृच्छ्यते मया त्विदं पृष्टं कथं साक्षाच्चरन्तीति। येन प्रकारेण रन्ति स प्रकारः कथ्यतामित्यर्थः। अत्र समाधत्ते-बुद्धीन्द्रियेति। जनानां मनुष्यत्वबीजनानाजातिजीवानां महाप्रलये सह स्वस्मिँल्लीनानां मात्रार्थं मीयन्ते गुणाः कार्याणि गुणातीतानि चाभिरिति मात्राः श्रुतयस्तदर्थं तद्धारणाद्यर्थं बुद्ध्यादीनसृजत् च भवार्थमभ्युदयार्थं ब्रह्मलोकादिभोगप्राप्त्यर्थम्, आत्मने जीवतत्त्वं ज्ञापयितुम्, अकल्पनाय कल्पना मायावृत्तयस्तद्रहितं कल्पनम्। यदुक्तं वरुणेन —

"नमस्तस्मै भगवते ब्रह्मणे परमात्मने। न यत्र श्रूयते माया लोकसृष्टिविकल्पना॥" इति।

तदपि ज्ञापयितुं बुद्ध्यादीनसृजत् तत्र विचाराऽसम्यक्त्वेन श्रुतिधारणादिकस्य पूर्वद्वयार्थता तत्सम्यक्त्वेन तु तेत्युत्तरोत्तरापादानप्राप्तपूर्वपूर्वपरितोषप्राप्तेनोत्तरोत्तरोत्कर्षेण लभ्यते। यदुक्तं द्वितीये —

"भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ॥" इति।

"यं सर्वे वेदा नमन्ति" इत्यादिपूर्वोदाहरणेभ्यश्च। अयम्भावः — श्रुतिधारणाद्यर्थं बुद्ध्यादीनसृजदिति ते च बुद्ध्यादे भवादिसाधनानीति बुद्ध्यादिषु श्रुतौ च तत्तद्योग्यतां न्यस्तवान् अत एव प्रभुपदोपादानं तत्र बुद्ध्यादीनां योग्यता श्रुतिधारणादि स्वतः अन्येषु श्रुतिद्वारा बुद्ध्यादिसंस्कर्त्रीणां श्रुतीनां सर्वत्र स्वतः यथा मन्त्रादीनां स्वरूपप्रभावमयी, उपनिषदादे तदंशमिश्रस्वाभिधादिशक्तिमयी, कर्मकाण्डादीनां तदंशद्वयमिश्रस्वविधिमात्रबलानुष्ठानमयीति । सा सा पुनर्द्विविधा मायातद्गुणावलम्बिनी स्वरूपद्गुणावलम्बिनी च । तत्र स्वरूपतो मायातद्गुणानां निष्कर्षः प्रसिद्ध एव। स्वरू त्वात्मपरमात्मब्रह्मभगवद्रूपेणावस्थितेऽपि भगवत्येव परमोत्कर्षो ज्ञेयः । "कृष्णमेनमवेहि त्वामात्मानमखिलात्मनाम्" "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" "ब्रह्मणो हि प्रतिष्ठाहम्" "यस्मात्क्षरमतीतोऽहम्" इत्यादिभ्य तस्मात्परमोत्कृष्टस्वरूपगुणनिर्देशेन चरन्त्यः श्रुतयः साक्षादेव श्रीभगवति चरन्ति। तदेकवाक्यत्वेनान्या अपि चरन्तीति "त्रैगुण्यविषया वेदाः" इति तु कर्मोपासनाविषयमेव। तथैव परममहावाक्यतयाङ्गीकृतं प्रणवमुद्दिश्योक्तं द्वादशे —

"स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः । स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम् ॥" इति।

अतः खण्डवाक्येन क्रमात्तमुपदेष्टुमेव मायादिषु आत्मादिषु अपि चरन्ति। तथैव वक्ष्यन्ति श्रुतयः- "क्वचिदजयात्म च चरतोऽनुचरेन्निगमः" इति। तथैव व्याख्यातं ब्रह्मस्तवे- "अन्तर्भवेऽनन्त भवन्तमेव ह्यतत्त्यजन्तो मृगयन्ति सन्तः" इति। स च — "मनोरथान्तं श्रुतयो ययुः" इति। एवमेवोक्तं "श्रुतिभिर्विमृग्याम्" इत्यादि। किञ्च-श्रीभगवति श्रुतयः साक्षाच्चरन्तीति किं वक्तव्यम्, यत्र भगवन्नाममन्त्रादिरूपा विनाप्यर्थज्ञानमुच्चारणमात्रेण तमाकर्षयन्ति । यथोक्तं षष्ठे — "नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ।" इति । टीका च नामोच्चारणं पुरुषविषया मतिर्भवतीत्यादिका "सद्यो हृद्यवरुध्यतेऽत्र कृतिभि शुश्रूषुभिस्तत्क्षणात्" इति । तत्स्वरूपभूता एव च ताः प्रभासपुराणे —

"मधुरमधुरमेतन्मङ्गलं मङ्गलानां सकलनिगमवल्लीसत्फलं चित्स्वरूपम् ।

सकृदपि परिगीतं श्रद्धया हेलया वा भृगुवर नरमात्रं तारयेत्कृष्णनाम ॥" इति ।

नारदपञ्चरात्रे, अष्टाक्षरमुद्दिश्य —

"व्यक्तं हि भगवानेव साक्षान्नारायणः स्वयम् । अष्टाक्षरस्वरूपेण मुखेषु परिवर्तते ॥" इति ॥

श्रुतिश्च- "नामचिद्विविक्तनमहस्ते विष्णो सुमतिं भजामहे" इति। माण्डूकोपनिषच्च प्रणवमुद्दिश्य- "प्रणवो ह्यपरं प्रणवश्च परं स्मृतम् ।" इत्यादिका। अतो "यतो वाचो निवर्तन्ते" इत्यादिकाः श्रुतयश्चानन्तत्वलोकप्रसिद्धतादि सूचयित्वा वदन्ति। वक्ष्यन्त्येव श्रुतयः "द्युपतय एव ते न ययुरन्तमनन्ततया" इत्यादि, "इह न वेदवतावरजन्मलयोऽग्रसरम्" इत्यादि॥

विश्वनाथी — जनानां जीवानां प्रभुरीश्वरो बुद्ध्यादीनसृजत्। मीयन्त इति मात्रा विषयास्तदर्थं कर्मफलभोगार्थमित्यर्थः भवः पुनः पुनर्जन्म तदर्थं भवबन्धहेतुकर्मकरणार्थमित्यर्थः। आत्मने ब्रह्मपरमात्मभगवत्स्वरूपिणे स्वस्मै यत्कल्पनं बुद्ध्यादे समर्पणं तदर्थम् । यद्वा- आत्मने स्वयमुपासयितुं यत्कल्पनं बुद्ध्यादीनां विनियोगस्तदर्थम् । त्रयाणामेव प्राधान्यबोधकं चकारत्रयम् । बुद्ध्यादीन्विना न कर्मफलस्वर्गादिभोगो, नापि कर्मकरणं, नापि शमदमाद्यङ्गज्ञानं, नाप्यष्टाङ्गयोगो, श्रवणकीर्तनादिभक्तियोगः सिद्ध्यतीत्यतस्तानसृजत्। ननु त्वं क्व गच्छसीति प्रश्ने, मयाद्य दध्यन्नं भुक्तमित्युत्तरं यथा तथैव कथं ब्रह्मणि चरन्तीति प्रश्ने प्रभुर्मात्राद्यर्थं बुद्ध्यादीनसृजदित्युत्तरमभूत्। मैवम् "परोक्षवादा ऋषयः परोक्षं मम च प्रियम्" भगवदुक्तेरत्राभिधया वृत्त्या प्रश्ने व्यञ्जनावृत्त्येदमुत्तरं सङ्गतमेव । तथाहि-शब्दवाच्यत्वाभावादेव ब्रह्मणः खल्वनिर्देश्यत्वं यदीन्द्रियाणि परमेश्वरो नास्त्रक्ष्यत्तदा शब्दस्पर्शादयोऽप्यनिर्देश्या ब्रह्मतुल्या एवाभविष्यन् । अद्यापि जन्मान्धबधिरस्य ब्रह्मवदनिरूप्यौ भवत एव, तेनास्मदादिभ्यो येन ग्राहकाणीन्द्रियाणि दत्त्वा शब्दादयो निर्देश्याः सुगमाः कृतास्तेनैव कस्मैचित्कृपया ब्रह्मणोऽपि तत्र सुखं चरेयुरिति । तदुक्तं भगवता मत्स्यदेवेन — "मदीयं महिमानं च परब्रह्मेति शब्दि

वेत्स्यस्यनुगृहीतं मे सम्प्रश्नै
कथं वेत्स्यामि सम्प्रश्नस्तद्व
भगवत्कृपया श्रीमदर्जुनेनापि

"ब्रह्म ते
प्रकृतिः स
सा साध्या
ममैव तद्व

यद्वा-भो राजन् ! नि
सविशेषे सच्चिदानन्दाकारे ब्रह
च प्राकृता गुणाः" इति वैष
निर्गुणत्वेऽप्यप्राकृतसाक्षित्व
शब्दप्रवृत्तिनिमित्तामप्राकृतजा
शब्दाद्याकाशादिकार्यज्ञानं च बे
कर्णभूषणे" इत्यनुशासनात्। प्रा
भवार्थं जीवानां कल्याणार्थं "
यत्कल्पनं स्वमुपासितुं विनियोग

"सत्पुण्डरीकन

अत्र सिद्धभक्तानामप्राकृ
तापनीश्रुतिर्भगवन्नयनादिवर्णयित्री
ते यथाकथञ्चिदेव बुद्धिं प्रवेशयन्त
भगवानप्यपारकृपातरङ्गवशादेवेभि
भगवत्स्वरूपस्य श्रुतिगम्यत्वं तत्

नीलकण्ठी —

तदेतन्मनो वाचं प्राणं ता
बुद्धिज्ञानेन्द्रियाणि वाचा कर्मेन्द्रिया
तत्र विषयपरिच्छेदो मात्रा तदर्थं प्र
फलात्मनो घटादिवत्फलव्याप्यत्व
श्रुतिद्वयविरोधाय। एवं वाच्यत्वानु
श्रुतिद्वयाविरोधाय। तथा च तत्त्वमस
बुद्धिमयकर्तृगोचरो ब्रह्मापि तु इन्द्रि
घटाद्यधिष्ठानभूतप्रकाशः प्राप्त्यर्थस्य
इयमत्र प्रक्रिया-चित्प्रतिबिम्बगर्भमन्त
इति गीयते। एवं सति शुक्तिरजताद्य
तदेतदाह- "भवार्थमिन्द्रियाण्यसृजत्

यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदि ॥'' इति ॥ अस्यार्थः-मम महिमानं महत्त्वरूपं सर्वव्यापकत्वलक्षणं यद्ब्रह्म तत्त्वं वेत्स्यसि वेत्स्यामि सम्प्रश्नस्तद्ब्रह्म कीदृशमिति तत्प्रश्नैर्ब्रह्मेदृशमिति मुनिदत्तैरुत्तरैश्च शब्दितं साक्षाच्छब्दनिर्दिष्टीकृतं ब्रह्म वेत्स्यसीति कृपया श्रीमदर्जुनेनापि ब्रह्म साक्षाद्दृष्टम् । यथा हरिवंशे विप्रकुमाराहरणप्रसङ्गे तं प्रति भगवद्वाक्यम् —

''ब्रह्म तेजोमयं दिव्यं महद्यद्दृष्टवानसि । अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् ॥
प्रकृतिः सा मम परा व्यक्ताव्यक्तसनातनी । तां प्रविश्य भवन्तीह मुक्ता योगविदुत्तमाः ॥
सा साध्यानां गतिः पार्थ योगिनां च तपस्विनाम् । तत्परं परमं ब्रह्म सर्वं विभजते जगत् ॥
ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत ॥'' इति ॥

यद्वा-भो राजन् ! निर्विशेषे ब्रह्मणि श्रुतयो नैव चरन्ति ''शब्दो न यत्र पुरुकारकवान्क्रियार्थः ।'' इति ब्रह्मोक्तेस्तथा शेषे सच्चिदानन्दाकारे ब्रह्मण्यपि श्रुतयो न चरन्ति तस्य प्राकृतजात्यादिपदार्थातीतत्वात् । किञ्च- ''सत्त्वादयो न सन्तीशे यत्र प्राकृता गुणाः'' इति वैष्णवोक्तौ प्राकृता न सन्तीत्युक्तेऽप्राकृताः सन्तीति लभ्यते ''साक्षी चेता केवलः'' इत्यादिना गुणत्वेऽप्यप्राकृतसाक्षित्वादिगुणोक्तेश्च 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिस्मृतेश्चाप्राकृतानन्तगुणान्वये तस्मिन् वृत्तिनिमित्तामप्राकृतजात्यादीनां सत्त्वात्साक्षादेव श्रुतयस्तत्र चरन्तीत्याह-बुद्धीति । बुद्धिपदेन महत्तत्त्वमिन्द्रियपदेन काशादिकार्यज्ञानं च बोध्यते । मात्रार्थं शब्दादीनां ब्रह्मण्यपि प्रवृत्त्यर्थं बुद्ध्यादीनसृजत् ''मात्राः परिच्छदे देशे प्रवृत्तौ पूर्णे'' इत्यनुशासनात् । प्राणादिकं विना वचनस्याप्यसम्भवान्मन आदिसृष्टिरपि शब्दप्रवृत्त्यर्था ज्ञेयाः । सृष्टेः फलान्तरमप्याह-र्थं जीवानां कल्याणार्थं ''भवो भद्रे हरे प्राप्तौ'' इत्यनुशासनात् । तथात्मने स्वस्मै बुद्ध्यादीनामप्राकृतानां प्राकृतानां च कल्पनं स्वमुपासितुं विनियोगस्तस्मै । यथा गोपालतापनी श्रुतिः —

''सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् । द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥'' इति ॥

अत्र सिद्धभक्तानामप्राकृतबुद्धीन्द्रियैरप्राकृतपुण्डरीकमेघविद्युतां सुग्राह्यत्वात्ताभिरुपमितेषु भगवन्नयनवपुर्वसनेष्वप्राकृती श्रुतिर्भगवन्नयनादिवर्णयित्री सुखेनैव चरति । साधकभक्तानां तु बुद्ध्यादिभिरग्राह्यत्वेऽपि तत्र प्राकृतपुण्डरीकादिसादृश्यारोपेणैव कथञ्चिदेव बुद्धिं प्रवेशयन्तश्चित्तैकाग्र्येणापि वस्तुतोऽस्पृष्टतद्रूपभासा अपि भगवन्तं प्रभुं ध्यायाम इत्यभिमानिनो हृष्यन्ति । नयपारकृपातरङ्गवशादेवैभिर्भक्तैरहं ध्यात इत्यभिमन्यमानस्तद्भक्तिपरिपाके सति तान्स्वभक्तान्स्वचरणान्तिकं सेवार्थमानयतीति स्वरूपस्य श्रुतिगम्यत्वं तत्कृपयैव सिद्धम् ॥२॥

नीलकण्ठी —

तदेतन्मनो वाचं प्राणं तान्यात्मनेऽकुरुतेति श्रुतिमनुसृत्य परिहरन् श्रीशुक उवाच-बुद्धीन्द्रियेत्यादि । तत्र श्रुतौ मनसा नेन्द्रियाणि वाचा कर्मेन्द्रियाणि च सङ्गृह्य तेषां सप्राणानामात्मप्रकाशार्थत्वमुक्तम् । अत्र तु विषयविभागेनेति विशेषः । विषयपरिच्छेदो मात्रा तदर्थं प्रभुर्जनानां बुद्धिमसृजत् । परिच्छिद्यन्ते हि बुद्ध्या अतीन्द्रिया अप्यपूर्वादयः । ब्रह्मणश्च स्वयं मनो घटादिवत्फलव्याप्यत्वाभावेऽपि वृत्तिव्याप्यत्वमुपगम्यते । ''यन्मनसा न मनुते'' ''मनसैवानुद्रष्टव्यम्'' इति विरोधाय । एवं वाच्यत्वानुपगमेऽपि लक्ष्यत्वमुपगम्यते । ''यद्वाचानभ्युदितम्'' ''तं त्वौपनिषदं पुरुषं पृच्छामि ।'' इति विरोधाय । तथा च तत्त्वमसीति वाक्यकरणकधीवृत्तिव्याप्यत्वोपगमान्नात्यन्तमनिर्देश्यत्वं ब्रह्मणोऽस्तीत्यर्थः । न केवलं गोचरे ब्रह्मापि तु इन्द्रियमनआख्यकरणगोचरोऽपीत्याह-भवार्थमिन्द्रियाण्यसृजत् आत्मार्थं मनोऽसृजदिति । भवो नभूतप्रकाशः प्राप्त्यर्थस्य भवतेर्ज्ञानार्थत्वोपपत्तेः । यमपेक्ष्य घटादिज्ञानमनुभव इत्युच्यते तदर्थमिन्द्रियाण्यसृजत् । क्रिया-चित्प्रतिबिम्बगर्भमन्तःकरणं वृत्त्याकारेण परिणम्य कुल्याद्वारा तटाककेदारसलिलयोरिव वृत्तिद्वारा प्रमाफलात्मबोध । एवं सति शुक्तिरजताद्यध्यास इव घटादिदृश्यवाव्याध्यासेऽपि दृग्वागन्वयव्यतिरेकयोरधिष्ठानप्रकाश एवोपक्षयः । ''भवार्थमिन्द्रियाण्यसृजत् ।'' इति । फलमपि ब्रह्मैव शास्त्रं च तदन्यनिवृत्त्यर्थमेवेत्युक्तं वृद्धैः —

"परागर्थप्रमेयेषु या फलत्वेन सम्मता । संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥" इति ।

सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते । प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते ॥" इति च । घटरजतादिकं त्वविद्या प्रतिभासमात्रम् । एवं च रज्ज्वां स्रक्सर्पधियोरिव ब्रह्मणि रज्जुसर्पधियोर्जाग्रत्स्वप्नयोर्वा परस्परनिरोधकत्वमेव । बाध्य तयोर्ब्रह्मज्ञानेनैवेति दृष्टिसमसमयां सृष्टिमुपयन्तो वेदान्तवृद्धाः । तेषां ब्रह्मणि पारमार्थिकी सत्ता दृश्ये प्रातिभासिकी इतरे सत्ताद्वैविध्यमभिमतं स्वप्नरज्जुभुजङ्गादौ प्रातिभासिकी सत्ता प्रबोधरज्ज्वादिज्ञानेन सद्यो बाध्या । जाग्रद्रज्ज्वादौ तु व्यावहारिकी ब्रह्मज्ञानैकबाध्येति । तत्र पूर्वेषां ब्रह्मणि सर्वशब्दवाच्यतास्ति "नामानि सर्वाणि यमाविशन्ति" इति श्रुतेः । अवाच्यत्वश्रुति लौकिकशब्दप्रवृत्तिनिमित्तजातिगुणाद्यभावपरा । परेषां तु 'शरीरं रथमेव तु' इत्यत्र यथाशरीरशब्देन शरीरोपादानमव्यक्तं लक्ष्य तद्वद्घटाद्युपादानं ब्रह्म घटादिशब्दैरिति मतम् । एवं कर्तृकरणसृष्टेः ब्रह्मप्रकाशार्थमुक्त्वा क्रियाशक्तिमत्प्राणसृष्टेरपि तदुभयानुग्राहकत्व तदर्थत्वमाह-कल्पनाय प्राणानसृजत् । कल्पनं बुद्ध्यादेः स्वस्वविषयकप्रकाशनसामर्थ्यसम्पादनं तस्मै । यस्माद्ब्रह्म सर्वशब्दप्रत्ययगम्यत्वमस्ति तस्माद्भवत्येव सन्मार्गोपदेश ॥२॥ अत्र च वेदानां ब्रह्मपरत्वे च । वितण्डा स्वपरपक्षस्थापनहीना कथा तद्युक्ता वैतण्डितास्तेषां तर्का निष्फलवादास्तत्रानभिनिवेशेन हठाभावेन । आदिना मननादिग्रहः । निरस्तोऽपाकृ देहाद्युपाधिर्देहाद्यभिनिवेशो येन स तथा सन् परं ब्रह्मावाप्तिरूपं या त्रिवर्गसाधनपरा सा तूपनिषत् त्रिवर्गनिष्ठैर्मरीच्यादिभिर्धृता एव ब्रह्मपरा ब्रह्मप्रतिपादिकाऽत एव ब्रह्मनिष्ठैः सनकादिभिर्धृतेति भावः ।

"उपनीयेयमात्मानं ब्रह्मापास्तद्वयं यतः । निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेत् ॥" इत्युपनिषल्लक्षणं भारते।

उपनिषद्यते प्राप्यते ब्रह्म यद्विचारेण सोपनिषदिति निरुक्तेः । कर्मादिप्रतिपादकविद्यासूपनिषत्प्रयोगस्तु परम्परया तासाम ब्रह्मपरत्वादेवेति ध्येयम् ॥★॥

श्रीधरानुयायिनी —

तत्र तावद्वेदस्तुतेरनादित्वं वदन्नेतच्छ्रवणादेर्मोक्षं फलं चाह-सैषेति । श्रीनारायणादिबुद्धिस्थां तत एव दक्षादीनामपि पूर्वैः सनकादिभिः श्रवणादिना धारितां ब्रह्मप्रतिपादिकां वेदान्तरहस्यविद्यामिमां यः श्रद्धया श्रवणादिना धारयेत्स निरस्तदेहाद्युपाधिः सन्मोक्षं प्राप्नुयात् ॥★॥

विश्वनाथी —

पूर्ववाक्यं प्रमाणयति स्तौति च-सा प्रसिद्धा एषा श्लोकद्वयी प्रश्नोत्तरमयी ब्राह्मी उपनिषद्भवति आवाभ्यामाविर्भूतत्वा त्वावाभ्यामेव कृता यतः पूर्वेषां श्रीनारदादीनां पूर्वजैः सनकादिभिः स्वान्तःकरणेषु धृता । यद्वा-सैषा जय जयेत्यादि वक्ष्यमाणा । क्षेमं "मर्त्यो मृत्युव्यालभीतः पलायन्" इत्याद्यनुसारेण श्रीभगवच्चरणारविन्दरूपम् । ब्रह्मपरा उपाधिनिरस्त ब्रह्मप्रतिपादनपरा ॥३॥

नीलकण्ठी — अत्रार्थे आख्यायिकामाचरयति-सैषा उपनिषद्रहस्यविद्या । अकिञ्चनो निष्परिग्रहः संन्यासीत्यर्थः ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत्र ऋषिरुवाचेति तस्य सर्वज्ञत्वात्तत्र प्रावीण्यं दर्शितम् । श्रीशुक उवाचेति पाठे ब्रह्मवैवर्तोक्तां कथां सूचयति । श्रीकृष्णेनैव तस्य तन्नाम कृं मायाबन्धनतश्च मोचित इति । ततः श्रीविष्णुरातवत्कृपाविशेषलाभेन समवासनतया तदनुकूलमेवोवाचेत्यर्थः । तथा हि-बुद्धीन्द्रियेति । एतदुक्तं भवति येन स्वरूपलक्षणेन तटस्थलक्षणेन वा परमकारणं निरूप्यते । तदुभयमपि श्रीभगवत्तत्त्वमेव पर्यवसाययति न तु निर्विशेषब्रह्मत्वम् । तत्रादौ "यः सर्वज्ञः सर्ववित् ।" इत्याद्यु प्रभुरित्यन्यनैरपेक्ष्येणोक्तत्वात्स्वरूपेणैवेश्वरत्वम् । स च सर्वव्यापनशीलज्ञानेच्छाक्रियाशक्तिमान् "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्म" इति "यल्लक्ष्यते तस्यैव खल्वेतस्यानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति "को ह्येवान्यात् प्राण्याद्यद्येष अकाश आनन्दो न स्यात्" इति "आनन्दादेव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति

आनन्दं प्रयन्त्यभिसंविश
"त्वमकरणः स्वराडखि
यदात्मना समवरुद्धसमस
तादृशत्वं परिणामे वा
कर्तृनिर्देशात्स्वातन्त्र्यप्रा
विलक्षणस्वाभाविकबुद्ध
तथैव । मात्रार्थमित्यादिना
न चारोपितमेव सर्वमि
त्वारोप्यकोटिप्रवेशेनाज्ञान
वेदस्यारोपकत्वम्, चेत्तस्य
हेयतया "प्रक्षालनाद्धि पङ्क
शब्दमूलत्वादिति न्यायसि
कालत्रयेऽप्यभावापत्तेः स
मननवैयर्थ्याच्च । संज्ञामूर्ति

"असत्य

असत्यं मिथ्याभू
अपरस्परसम्भूतमनाशाद्यज्ञ
स्वप्नवदित्यर्थः । अत्र "प्रवृ
निदिध्यते इति ज्ञेयम् । तस्म
"वेदैश्च सर्वैरहमेव वेद्यो वे
विष्णुपुराणे "मां विधत्तेऽभि
सतः सर्वकारणतया स्थितत्वम
ब्रह्म ।" इति स्वरूपलक्षणम
"स्वाभाविकी ज्ञानबलक्रिया
निषेधान्तरवाक्येनाऽपि तथात्व

"अपहतपाप्म

नि

तमात्मानं ये

सका

इतीदृशमाहात्म्येनैव सर्वकार

न सन्दृशे तिष्ठति रूपमस्य न

प्रयन्त्यभिसंविशन्ति ।" इति "न तस्य कार्यं कारणं च विद्यते ।" इत्यादिश्रुतयः स्वाभाविकशक्तिं दर्शयन्ति । वक्ष्यति च करणः स्वराडखिलशक्तिधरः ।" इति उपाधिसम्बन्धेन तत्तच्छक्तित्वे तूपाधेरेवेश्वरतापातात् । वक्ष्यन्ति श्रुतयः "त्वमसि ना समवरुद्धसमस्तभगः" इति । अथ द्वितीये "तत्तेजोऽसृजत" इत्याद्यनुसारेण जनानां बुद्धीन्द्रियादीनसृजदिति सुतरामेव त्वं परिणामे वा विवर्ते वा योग्यस्यैवोपादानात्तन्निमित्ते च स्वीकारौचित्यादिति योग्यमेव हि शक्तिरिति । अत्र तु निर्देशात्स्वातन्त्र्यप्राप्तेः सुतराम् । अत एव सर्वबुद्ध्यादिस्रष्टृत्वेन तदीक्षणात्पूर्वं प्रकृतिक्षोभाभावेन च तस्य हि स्वाभाविकबुद्ध्यादिमत्त्वमवगतम् । "स ऐक्षत" इत्याद्यनुसारेण मात्रार्थं चेत्यादिना विचारपूर्वकस्रष्टृत्वनिर्णयात्तु सुतरां मात्रार्थमित्यादिना तत्तत्सर्वपुरुषार्थं परमाश्रयत्वं च । "सर्वकामः सर्वगन्धः सर्वरस अयमात्मापहतपाप्मा" इत्यादिश्रुतेः आरोपितमेव सर्वमिदं तन्मतेऽपि तावदविषये वस्तुन्यारोपासम्भवात् । ब्रह्मणः कालत्रयेऽपि शुद्धत्वेनान्यस्य कोटिप्रवेशेनाज्ञानस्य जडत्वेनारोपकासम्भवे च तदसम्भवात् । तस्मान्न जीवरूपस्य स्वस्य स्वाज्ञानेन तदारोपकत्वं रोपकत्वम्, चेत्तस्य स्वाज्ञानमयत्वेन स्वप्नप्रलापतुल्यतया सकर्तृकारोप एव तात्पर्ये सत्यविशेषात् । वेदस्य स्वातन्त्र्येऽप्यारोप्यस्य "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायेन स्वयं तद्बाधयितुमयोग्यत्वात् स्वाभाविकीत्यादिश्रुतिविरोधात् श्रुतेश्च मूलत्वादिति न्यायविरोधाच्च आरोपितत्वे सत्यनीश्वरवादप्रसङ्गाच्च स्थाणौ पुरुषाभिमानिवद्ब्रह्मणीश्वराभिमानिनः त्रयेऽप्यभावापत्तेः स्वाज्ञानकल्पितपुरुषकल्पिततत्वज्ञानस्य स्वाज्ञानकल्पितत्व एव पर्यवसानात् मध्ये कल्पकान्तरवैयर्थ्याच्च । संज्ञामूर्तिक्लृप्तिस्तु 'त्रिवृत्कुर्वत उपदेशात्' इत्यादिन्यायवृन्दासम्मतं हि तत् । निन्दितं च गीतासु —

"असत्यपमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥"इति ॥

असत्यं मिथ्याभूतं सत्त्वासत्त्वाभ्यामनिर्वचनीयत्वेनाप्रतिष्ठम् निर्देशशून्यं स्वाज्ञानकल्पितत्वादनीश्वरम् । अपरस्परसम्भूतमनाशाद्यज्ञानपरंपराजातम्- "अपरस्पराः क्रियासातत्ये ।" अतः कामहेतुकं मनःसङ्कल्पमात्रजातं वदित्यर्थः । अत्र "प्रवृत्तिं च निवृत्तिं च ।" इत्यादिना पूर्वं तेषां संस्कारदोष उक्तः । "एतां दृष्टिमवष्टभ्य ।" इत्यादिना गतिश्चि प्यते इति ज्ञेयम् । तस्मात्सर्ववेदार्थः श्रीभगवानेव "यं सर्वे वेदा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च ।" इति श्रीनृसिंहतापिन्यां श्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ।" इति श्रीगीतासु "नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती ।" इति पुराणे "मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् ।" इति एकादशे च । तथा "सदेव सौम्येदमग्र आसीत् ।" इति यस्य सर्वकारणतया स्थितत्वम् । "आत्मा वा इदमग्र आसीत् ।" इति परमात्मस्वरूपम् । "सत्यं ज्ञानमनन्तं ब्रह्म ।" "विज्ञानमानन्दं ।" इति स्वरूपलक्षणम् । "निर्गुणं निरञ्जनम् ।" इति दोषराहित्यम् । "न तस्य कार्यं करणं च विद्यते ।" इत्यादौ भाविकी ज्ञानबलक्रिया च ।" इति तत्तदागन्तुकशक्त्यादिराहित्यानुवादेनैव स्वाभाविकविलक्षणशक्त्यादियुक्तत्वम् । एवं तरवाक्येनाऽपि तथात्वम् ।

"अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः । सत्यकामः सत्यसङ्कल्पः ॥

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।

तमात्मानं ये तु पश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥" इति तत्तद्विवरणम् ॥

"तमीश्वराणां परमं महेश्वरं तं देवतानां परमं तु दैवतम् ।

सकारणाकारणयोस्तथा धियो न तस्य कश्चिज्जनिता न चाधिपः ॥"

माहात्म्येनैव सर्वकारणत्वम् । "आनन्दं ब्रह्मणो रूपम् । वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।

तिष्ठति रूपमस्य न चक्षुषा पश्यति रूपमस्य । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥"

इति विलक्षणस्वरूपमूर्तित्वं दर्शितम् । तस्य तु "एको ह वै नारायण आसीन्न ब्रह्मा नेशानः ।" इत्यस्माकमेवाभी रूपत्वमिति । तथा "यस्य पृथिवी शरीरम् । यस्यायमात्मा शरीरम् । यस्याव्यक्तं शरीरम् ।

यस्याक्षरं शरीरमेष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः ॥" इति तु श्रुत्यन्तरम् । सर्वशक्तियुक्त प्रकाशकत्वात्पृथिव्यादीनामात्मत्वेन तमेवाह । पुराणेतिहासवचनानि च —

"ह्लादिनी सन्धिनी संवित्त्वय्येका सर्वसंश्रये । ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥
कलाकाष्ठानिमेषादिकालसूत्रस्य गोचरे । यस्य शक्तिर्न शुद्धस्य प्रसीदतु स मे हरिः ॥
ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥
कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः ॥" इति ॥

विष्णुपुराणे —

"न शक्यः स त्वया द्रष्टुमस्माभिर्वा बृहस्पते । यस्य प्रसादं कुरुते स वै तं द्रष्टुमर्हति ॥" इति ।

मोक्षधर्मस्थनारायणीयोपाख्याने —

"एतत्त्वया न विज्ञेयं रूपवानिति दृश्यते । इच्छन्मुहूर्तान्नश्येयमीशानोऽहं जगतो गुरुः ॥
माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं नैवं त्वं ज्ञातुमर्हसि ॥" इति च ॥

तथैव तत्रैव श्रीश्वेतद्वीपवति वाक्ये, अस्यार्थः — त्वयैतन्न विज्ञेयं रूपवान् इति हेतोः अयं दृश्यते इति । यतो मद्दर्श मदिच्छैव कारणमित्याह-इच्छन्निति । नश्येयमदर्शनमापद्येयम् । तस्मादिन्द्रियगोचरत्वादलौकिकम्, स्वेच्छया स्व प्रकाशमानत्वात्स्वप्रकाशमेव मद्रूपमिति भावः । यथोक्तं नारायणाध्यात्म्ये —

"नित्याव्यक्तोऽपि भगवानीक्षते निजशक्तितः । तामृते परमात्मानं कः पश्येतामितं प्रभुम् ॥" इति ।

तदेवमपि मां सर्वभूतगुणैर्युक्तं यत्पश्यति तद्युक्तत्वेन प्रत्येषि एषा माया मयैव सृष्टा मम माययैव तथा भातमित्यर्थः तस्मात्त्वमेवं ज्ञातुं नार्हसीति । तथा "कूटस्थोऽक्षर उच्यते ।" "अक्षरं परमं ब्रह्म ।"

"यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥
मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥
ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥" इति गीतासु ॥

वक्ष्यन्ति च श्रुतयः — "श्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः ।" इति । "त्वमसि यदेष्ववशेषमृतम्" इति । "त्वमसि यदात्मना समवरुद्धसमस्तभगः ।" इति । "त्वमुत जहासि त्वामहिरिव त्वचमात्तभगो महति महीयसेऽष्टगुणितेऽपरिमेयभगः ।" इति । "भवत उपासतेऽङ्घ्रिमभवं भुवि विश्वसिताः ।" इति । "न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ।" इति । अत एव "स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते सम समदृशोऽङ्घ्रिसरोजसुधाः" इति । व्याख्यास्यते तु तत्र तत्रैव । तदेवं सर्ववेदार्थत्वेन सर्वविलक्षणत्वात्सर्वविलक्षणत्वे सर्ववेदार्थत्वाद्वेदैकवेद्यत्वाद्वेदानां च स्वतःप्रमाणभूतत्वादन्यशब्दवाच्यसाधारण्येन दोषा न प्रसञ्जनीयाः । श्रुतयोऽपि तथा वक्ष्य "त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः" इति । तदेवं श्रीभगवत्येव सङ्गतिस्तु सङ्गता । तथापि तत्त्वमस्यादिलक्षणमैक्यवाक्यमस्थूलादिलक्षणनिषेधवाक्यं वा महावाक्यत्वेन मत्वा लक्षणयोपासनादिवाक्यानि तदनुगतत्वेन स्वमते ब्रह्मणि यथाकथञ्चिदेव सङ्गतिं कुर्वन्ति । तथाहि-तत्र तावत्तेषां मते मुख्या गौणी च शब्दवृत्तिर्ब्रह्मणि न सम्भव लक्षणा च न सम्भवतीत्युक्तम् । अत एव तन्निषेधान्यथानुपपत्त्यावगतार्थापत्तिश्च न । यद्धि स्वरूपादिभिः साक्षान्निर्देश्यं यत्

सा सम्भवतीति । तथापि
शुक्त्यादौ रूप्यारोपेण स
नवस्थाप्रसङ्गः । आरोपश्च
नापतेत् रज्जुशुक्त्यादिवदि
द्रष्टव्यम् । श्रीवैष्णवानां म
तद्दृष्टिलेशावष्टम्भिश्रीभागवत
सङ्गच्छते । जीवत्वं तु कस्
जीवाज्ञानकल्पितं विद्यामयं
च दुष्टमित्यलमति प्रसङ्गेन
बोधयति किं तु तच्छब्देनान्य
स्मर्यमाण इत्यर्थः । अयमिति
न स्यात् । ततस्तद्वदत्र न लक्ष
शरीरम् ।" इति श्रुतेः सूर्य्यतन्म
देवता अनेनात्मनानुप्रविश्य न

"ममैवांशो जीवलोके
ययेदं धार्यते जगत् ॥" इति
सूर्यतद्रश्मिपरमाणुवृन्दवदविन
स्वशुद्धतानुभवेन देहाद्यावेशनि

"स्वकृ तप

इति नृगतिं वि

येन श्रीभगवति सर्वपु
केचिदपवर्गमपीश्वर ते" इति
महावाक्यत्वमात्मैकत्वं प्रयोज
तादृशमहावाक्यानुगतानां सर्वास
निन्दितं च तासां सर्वासामेव गौ
लज्जा यत्र यत्राखिला वराः ।" अ
न च जीवेशयोरैक्यज्ञानं सर्ववेदार्थ
नेति नेतीत्यादीनां च निषेधवाक्या
कर्तुं शक्यते निर्विशेषं वा ज्ञातुं शक
तथा "नेह नानास्ति किञ्चन ।" इ
किञ्चन नास्ति नाना वा नास्ति
तदेकात्मकत्वात्पूर्ववदेवाप्राकृ
स्वरूपशक्तेरहेयत्वावगमात् । द्युप

सम्भवतीति। तथापि तत्र तावज्जहदजहल्लक्षणया मन्यते सा कथं घटेत। सा च खलु शब्दवृत्तिसामान्येन पूर्ववद्दोषावहैव। यादौ रूप्यारोपेण सम्बन्धाभावेऽप्यारोपेण सम्बन्धो मन्तव्य एव तेन विना कल्पनाऽनर्हत्वात्। आरोपस्याप्यारोप्यत्वेऽस्याप्रसङ्गः। आरोपश्च वाङ्मनसागोचरे न सम्भवति। कथञ्चित्सम्भवे वा शब्दविषयत्व इवारोपविषयत्वेऽपि कथमनित्यत्वादिकं तत् रज्जुशुक्त्यादिवदिति। यत्त्वौपाधिक एव वा जीवेश्वरविभाग इति मतं ब्रह्मस्तवव्याख्यायां मया परिहृतं तच्च तैवात्र स्यम्। श्रीवैष्णवानां माष्यतदीयीकयोः शतदूषण्यादिषु च तत्त्ववादिनां विष्णुतत्त्वप्रकाशिकादौ न्यायामृतादौ तथाऽस्माकं शावष्टम्भिश्रीभागवतसन्दर्भे तट्टीकादौ च विशेषो द्रष्टव्यः। किञ्चाज्ञानस्यैव भेदमात्रमूलत्वे सति तत्त्वंपदार्थयोरैक्यज्ञानमात्रेणैक्यं च्यते। जीवत्वं तु कस्याज्ञानेन कुत्र कल्पितमिति न बुध्यते ब्रह्मणश्चिन्मात्रस्याज्ञानाश्रयत्वविषयत्वयोरसम्भवात्। ईश्वरत्वं तु ज्ञानकल्पितं विद्यामयं चेति नाप्यसौ तदाश्रयविषयः। जीवाज्ञानेन जीवे जीवत्वं कल्पितमिति तु परस्पराश्रयेण स्वाश्रयाश्रयेण मित्यलमति प्रसङ्गेन। तस्माद्यत्क्वचित्सामानाधिकरण्यमुच्यते तत्राप्येषा गतिः। लक्षणा हि तत्स्वरूपस्यान्यस्वरूपत्वं न यति किं तु तच्छब्देनान्यद्वाचयति। यथा नीलमुत्पलमिति तटमिदं गङ्गेति। सोऽयं देवदत्त इत्यत्र स इति तत्कालविशिष्टत्वेन मान इत्यर्थः। अयमिति एतत्कालविशिष्टत्वेन दृश्यमान इत्यर्थः। ततोऽनयोः सामानाधिकरण्ये स्यान्न विरोध इति लक्षणैव स्यात्। ततस्तद्वदत्र न लक्षणा गौणी चोभयत्र विवक्षितगुणयोगं स्थापयत्येव यथा-पित्तलमिदं सुवर्णमिति। तस्मात् "यस्यात्मा रम्।" इति श्रुतेः सूर्य्यतन्मण्डलगङ्गातत्प्रवाहगोजातितद्व्यक्तिवन्नियताधिष्ठानाधिष्ठात्रोः प्रसिद्ध एवाभेदप्रयोगः। यद्वा- "इमास्तिस्रो ता अनेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति महापुरुषवचनश्रुतौ अनेनेति जीवस्य भेदनिर्देशादंशत्वे प्राप्ते

"ममैवाशो जीवलोके जीवभूतः सनातनः।" इति "अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां महाबाहो यदं धार्यते जगत्॥" इति गीतासु मायाख्या परप्रकृत्यतीततयैव जीवस्य तादृशत्वे व्यक्ते सत्यभिन्नशुद्धशक्त्या जीवेश्वरभेदे सूर्यतद्रश्मिपरमाणुवृन्दवदविनाभावेन प्रकाशैकरूपेण चाभेद उपदिश्यते। प्रयोजनं तु मुमुक्षूणां परमेश्वरतादात्म्यानुभावात् अनुद्भूतानुभवेन देहाद्यावेशनिरसनं, भक्तीच्छूनां तन्नित्यसम्बन्धज्ञानेन तद्भजनम्। वक्ष्यन्त्येव श्रुतयः —

"स्वकृतपरेष्वमीष्वबहिरन्तरसंवरणं तव पुरुषं वदन्त्यखिलशक्तिधृतोंऽशकृतम्।
इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेऽङ्घ्रिमभवं भुवि विश्वसिताः॥" इति॥

येन श्रीभगवति सर्वपुरुषार्थशिरोमणिपरमप्रेमास्पदत्वस्यानुभवश्च स्यात्। तदनुभवं हि दुरवगमेत्यादौ "न परिलषन्ति दपवर्गमपीश्वर ते" इति तथैव श्रीब्रह्मस्तवान्ते राजप्रश्नानन्तरं श्रीमुनीन्द्रेणोत्तरितं च। ननु तत्त्वमस्यादिवाक्यानां वाक्यत्वमात्मैकत्वं प्रयोजनं वा युक्तं लक्षणामयवाक्यस्य प्रमाणान्तरसापेक्षत्वेन स्वतः प्रामाण्यहानेर्गौणत्वापातात्, महावाक्यानुगतानां सर्वासामपि श्रुतीनां तत्प्रसङ्गात्। अथानेकेषां वाक्यानां महावाक्यत्वायोगात् तेषां प्रादेशिकत्वाच्च तरं च तासां सर्वासामेव गौणार्थत्वमात्रस्वीकरणम्। तथाहुः-एकस्यापि च शब्दस्य गौणत्वस्वीकृतौ सत्यां "महती जायते यत्राखिला वराः।" अत्र मुख्यार्थ इति च देवास्तन्मार्गानुवर्तिनं "कथं न जायते लज्जा वक्तुं शाब्दत्वमात्मनः" इति। जीवेशयोरैक्यज्ञानं सर्ववेदार्थस्तत्सिद्धनिर्विशेषं वा निराकृतत्वात् भगवत एव तदर्थत्वेन दर्शितत्वाच्च। तथाऽस्थूलमित्यादीनां स्थूलादीनां च निषेधवाक्यानां तन्मते यद्वाङ्मनसातीतनिर्विशेषस्त्वधिकत्वं तदपि न सम्भवति। न हि यन्न जायते तदवधिः शक्यते निर्विशेषं वा ज्ञातुं शक्यते तस्मात्प्राकृततत्तन्मात्रधर्मतानिषेधतात्पर्यत्वमेव तेषामप्राकृतयुगपद्विचित्रधर्माश्रयताज्ञापनााय नेह नानास्ति किञ्चन।" इत्यस्यापि यदिह किञ्चन नास्ति तन्नाना नास्ति किन्त्वेकात्मैकत्वमेव विवक्षितम्। अन्यथा इह नास्ति नाना वा नास्ति इति एकतरेणैवाभिप्रेतसिद्धिः स्यात् किं द्वयोरुपादानेन तस्मादपि तदीयधर्माणां मकत्वात्पूर्ववदेवाप्राकृतत्वादिकमिति न च निर्विशेषत्वं वक्ष्यमाणस्तुतेः सम्मतं जय जयेत्याद्युपक्रमे हेयत्वावगमात्। द्युपतय इत्याद्युपसंहारे च अतश्चशब्देन पूर्वार्धोक्तस्यार्थः कालदेशपरिच्छेद एव लभ्यते। यदि च

तस्यां स्तुतौ निर्विशेषज्ञानमेव विवक्षितं स्यात्, तर्हि तत्फलं ब्रह्मैक्यमेव मध्ये मध्ये स्तूयते प्रत्युत तदतिक्रमात् "न परिलषन्ति" इत्यादिभिः श्रीभगवद्भक्तिरेव स्तुता तस्माद्यद्विधीयते तदेव स्तूयते इति वैदिकन्यायेन श्रीभगवानेव प्रकरणार्थः। स्वमतेऽपि तत्त्वमस्यादिवाक्यैः कथञ्चिदेव तत्तदर्थस्यावगमः सिद्धिश्च न तु —

"दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ।
न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ॥"

इतिवत् परमानन्देनैवेति ज्ञेयम्। तदेवं तत्त्वमस्यादीनामप्राधान्यं मत्वा स्वतः प्रमाणभूतानां वेदानां प्रादुर्भावकक्षाद्यबीजत्व तद्बीजत्वादेव वेदः प्रणव एवाग्र इत्युक्तत्वात्सर्ववेदवाक्यार्थसमन्वयविधानत्वेन महत्त्वमकाराद्यक्षरात्मकपरस्परसम्बद्धपदसमूहत्वाद्वाक्यत्वम्। ततश्च परमवाक्यस्य साक्षाद्भगवद्वाचकस्य श्रीमत्प्रणवस्यैव प्राधान्यम्। अत एव —

"अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः । ॐकारो विदितो येन स मुनिर्नेतरो जनः ॥"

इति श्रुत्यन्तरं तदेव निर्धारयति–स्वयममात्र एकरूपः स्ववृत्तिश्रुतिभिरनन्तमात्रः द्वैतस्योपशमः भगवन्मात्रवाचकत्वावेशान्तरनिरासकश्चेत्यर्थः। तदभिधेयस्य श्रीभगवत एव सर्वयोग्यताहेतुत्वेन परमयोग्यत्वं वदन्सर्ववेदाभिधेयत्वमाह–अत्र प्रणवस्य साक्षाद्वाचकत्वादिकम् —"ओमित्येतद्ब्रह्मणो नेदिष्ठं नाम" इति श्रुतेः। नेदिष्ठमतिशयेन निकटं स्वल्पमपि व्यवधानं विनैव वाचकमित्यर्थः। तथा "ॐ विश्वं विष्णुः" इति सहस्रनामस्तोत्रात्

"स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः । स सर्वोपनिषद्ब्रह्मवेदबीजं सनातनम् ॥" इति ॥

"ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट्। यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥" इति च द्वादशात्॥

श्रीभगवतः सर्वयोग्यताहेतुत्वं च "दृतय इव श्वसन्त्यसुभृतो यदि तेऽनुविधाः" इत्यादि वक्ष्यमाणात्

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥" इति श्रुतेः॥

"या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये। तया विना तदाप्नोति नरो नारायणाश्रयः ॥" इति मोक्षधर्मात्॥

"यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्। योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥
सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा। स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छति ॥" इति चैकादशात्॥

अतो मोक्षान्यथानुपपत्त्या सामानाधिकरण्यं व्यज्यत इति निरस्तम्। अथ प्रणवार्थानुसारेण बुद्धीन्द्रियेत्यस्यार्थः अकाराद्यात्मकपदचयप्रणवार्थो हि "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः" इत्यादौ स्थित्यादय इतिवत् स्थितिसृष्टिप्रलयकर्तृत्वोपलक्षितः प्रणवमयसर्ववेदैः सर्वभजनीयः परमपुरुष एव समर्थितः अत्रापि तथेति। तथा हि जनानां प्रलये निजैकाश्रयाणां जीवानां पालनाय मात्रार्थमैहिकविषयभोगार्थं, भवार्थं जन्मान्तरतद्भोगार्थम्, आत्मने शुद्धात्मभावक आत्यन्तिकप्रलयलक्षणमोक्षाय, अकल्पनाय कल्पनासङ्कल्पानन्तरं तद्रहिताय प्रेमैकमयशुद्धस्वभजनायेत्यर्थः। तस्मात्–

"ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः। द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥

यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः। एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः ॥" इति श्रीकपिलदेवदर्शितः सर्वपूर्णाविर्भावः श्रीभगवानेव न निर्विशेषं ब्रह्मेति साध्वेवोक्तं भवता। अतः स एव बन्दिजनतुल्यवेदवस्तुत्वेनोपक्रमोपसंहारादिभिर्दर्शयितव्यः। किन्तु–ब्रह्मवादिनो द्विविधाः रजततया शुक्तिवदज्ञानेन ब्रह्मैव द्वैततया विवर्तत इत्येके। तन्न तु श्रुतेस्तु शब्दमूलत्वादिति श्रीबादरायणमताद्बहिर्भूता अनीश्वरवादिन इति पूर्वपूर्वयुक्त्या खण्डिताः। उत्तरे चैते खल्वीश्वरवादिनो भक्तिविशेषं विना सच्चिदानन्दविग्रहत्वादिभगवत्ताविशेषग्रहणासमर्था भगवन्तमेव निर्विग्रहतया मन्यन्ते उपासते च। तच्च बुद्धीन्द्रियेत्याद्यनुसारेण भगवद्दत्तशक्त्यैवानुभवन्ति। यथोक्तं श्रीमत्स्यदेवेन —

"मदीयं म

अत्राभेदेऽपि महि
पूर्णप्रकाशकत्वं व्यञ्जितम्।
नाथ मा भूत्" इति तादृश
सर्वातीतप्रकाशत्वादप्र
चाप्राकृतस्वरूपगुणत्वावल
इति श्रुतेः। "यस्मान्मनोऽपि

"तदेतद्वर्णितं

यथा जय जयेत्याद्य
"सर्ववेदमयो विप्रो सर्वदेवम
भगवति तत्र तत्र ब्रह्मत्वमवध
सनातनम्।" इत्यादेः। अत
बृहत्तमत्वं तच्च स्वरूपेण गुणेन
श्रुतौ गान्धर्व्यायाः प्रश्नः। तत्र
सर्वविद्वत्परम्परादिगुरूणां श्रुती

"स्त्रिय उरगेन्द्र

अतः श्रीनारदोऽपि त

"नमस्तस्मै भग

अत एव श्रीविष्णुरात उ
ततस्तत्रैव वेदप्रमेयत्वं सन्दिह्य
प्रश्लेष्य जिज्ञासितं ज्ञास्यते किं
श्रीकृष्णत्वव्यञ्जकासाधारणो गुण
सन्तः" इति श्रीब्रह्मव्याख्यानुसा
निर्देष्टुमशक्ये श्रूयन्त इति श्रुतयः

"यतो वाचो निवर्तन्ते०"
"भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग
तथैवाग्रे वक्ष्यति —

"हरिर्हि निर्गुणः स

श्रीविष्णुपुराणे —

"सत्त्वादयो न सन्तीश

एकादशे —

"मां भजन्ति गुणाः

अत्र निर्गुणं प्रकृतिगुणैरसंस

दतिक्रमात् "न परिलषन्ति"
व प्रकरणार्थः । स्वमतेऽपि

मणाः ।
हाः ॥"
वेदानां प्रादुर्भावकक्षाद्यबीजस्य
त्मकपरस्परसम्बद्धपदसमूह-
—

जनः ॥"
पशमः भगवन्मात्रवाचकतया
दाभिधेयत्वमाह-अत्र प्रणवस्य
टं स्वल्पमपि व्यवधानं विनैव

नातनम् ॥" इति ॥
।" इति च द्वादशात् ॥
इत्यादि वक्ष्यमाणात्
नः ॥" इति श्रुतेः ॥
" इति मोक्षधर्मात् ॥

॥" इति चैकादशात् ॥
र्थानुसारेण बुद्धीन्द्रियेत्यस्यार्थ
इत्यादौ स्थित्यादय इतिवत्
पि तथेति । तथा हि जनानां प्रलये
र्थम्, आत्मने शुद्धात्मभावाय
भजनायेत्यर्थः । तस्मात् —

ब्दलक्षणः ॥
इति श्रीकपिलदेवदर्शितः सर्वतः
बन्दिजनतुल्यवेदवस्तुत्यत्वेनो-
द्वैततया विवर्तत इत्येके । तत्र पूर्वे
: । उत्तरे चैते खल्वीश्वरवादिनोऽपि
या मन्यन्ते उपासते च । तत्त्व

"मदीयं महिमानं च परब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदि ॥" इति ॥

अत्राभेदेऽपि महिमत्वेन निर्देशस्तदपि स्वस्यैकदेशाविर्भावरूपमिति वैभवविशेषतया रूपयता स्वस्य भगवद्रूपतायां काशकत्वं व्यञ्जितम् । यदुक्तं श्रीध्रुवेण — "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानात्" इत्यादौ "सा ब्रह्मणि स्वमहिमन्यपि मा भूत्" इति तादृशब्रह्मोपासनाफलं शुद्धात्मतया तत्तादात्म्यप्राप्तिश्च नादृता सालोक्यसार्ष्टिसारूप्येत्यादिना तदेतद्ब्र च तीतप्रकाशत्वादप्राकृतस्वरूपगुणत्वादनिर्देश्यमेव तदेतच्च यया भगवद्दत्तशक्त्यानुभवन्ति सा कृतस्वरूपगुणत्वावलम्बकोपनिषदाख्यश्रुतिसम्बन्धादुद्भवति । औपनिषदः पुरुष इति- "तं त्वौपनिषदं पुरुषं पृच्छामि ।" श्रुतेः । "यस्मान्मनोऽपि तस्मिंश्चरति" इति वक्ष्यते —

"तदेतद्वर्णितं राजन्येन प्रश्नः कृतस्त्वया । यथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत् ॥" इति ।

यथा जय जयेत्याद्यष्टाविंशप्रकारकश्रुतिमार्गेणाप्रकाशितनिजगुणेऽपि किमुत प्रकाशितनिजगुण इत्यर्थः । अथवा पूर्वम् - र्ववेदमयो विप्रो सर्वदेवमयो ह्यहम्" इति स्वस्य स्वयं भगवता सर्ववेदप्रमेयत्वमुक्तम् । श्रीविष्णुरातेन च तस्मिन् श्रीकृष्ण एव वति तत्र तत्र ब्रह्मत्वमवधारितम् "गूढं परब्रह्म मनुष्यलिङ्गम् ।" "तदमितं ब्रह्माद्वयं शिष्यते" "यन्मित्रं परमानन्दं पूर्णं ब्रह्म नातनम् ।" इत्यादेः । अतःश्रीगोपालतापन्याम् — "कथमस्यावतारस्य ब्रह्मता भवति" इति प्रश्नः ब्रह्मत्वं त्वनुपचारितं मत्वं तच्च स्वरूपेण गुणेन च वाच्यम् । अतः वैकल्ये तदंशहीनत्वादुपचरितत्वप्राप्तेः तदेवं ब्रह्मता कथं स्यादिति प्रसिद्धानुवादेनैव गान्धर्व्यायाः प्रश्नः । तत्र च श्रीपरीक्षितः तत्प्रस्ताव एव चानेनात्र कर्तुं युक्तः तदर्थमेव श्रीदशमस्कन्धस्य श्रोतुमारब्धत्वात् । विद्वत्परम्परादिगुरूणां श्रुतीनामपि तदेकालम्बता वाक्ये श्रीमुनीन्द्रोऽपि तथैवाङ्गीकरिष्यति ।

"स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधाः ।" इति ॥

अतः श्रीनारदोऽपि तच्छ्रवणानन्तरं तमेवोद्दिश्य तदभेदेन श्रीनारायणं नमस्यति —

"नमस्तस्मै भगवते कृष्णायामलकीर्तये । यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥" इति ॥

अत एव श्रीविष्णुरात उवाचेत्युक्त्वा "द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गम्" इत्याद्यर्थस्य सूचनात्तस्य तादृशाभिप्राय एव दृढीकृतः स्यैव वेदप्रमेयत्वं सन्दिह्य पृच्छति- "ब्रह्मन्निति ।" श्रीकृष्णत्वस्य साक्षाद्व्यञ्जकपदविशेषाप्रयोगस्तु सामान्याकारतयापि जिज्ञासितं ज्ञास्यते किं विशेषेणेत्यभिप्रायात् । अतो जय जयेत्युपक्रमे वीप्सायुक्तो जिधातोरुत्कर्षाविष्करणरूपोऽर्थः कृष्णत्वव्यञ्जकासाधारणो गुणपर्यन्त एव ज्ञेयः । अतन्निरसनेनेत्युपसंहारेऽपि- "अन्तर्भवेऽनन्त भवन्तमेव ह्यतत्त्यजन्तो मृगयन्ति सन्तः" इति श्रीब्रह्मव्याख्यानुसारेण तत्पर्यन्त एव । ततश्च ब्रह्मणि अनन्तस्वरूपगुणे तत्राप्यनिर्देश्ये सर्वप्रत्यग्रूपत्वादेकांशेनापि श्रूयन्त इति श्रुतयः परिमिताः पराग्रूपाश्च साक्षान्मुख्यावृत्त्या कथं केन प्रकारेण चरन्ति तं प्रकारं कथयेत्यर्थः ।

"यतो वाचो निवर्तन्ते०" "विष्णोर्नु कं वीर्याणि प्रवोचम्०" "यद्वाचानभ्युदितम्०" "येन वागभ्युद्यते" इति श्रुतेः । "मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्" "अद्यापि यत्पदरजः श्रुतिमृग्यमेव" इत्युक्तत्वाच्च यतो निर्गुणे गुणत्वं च प्रसिद्धम् । वक्ष्यति —

"हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः । स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥" इति ।

श्रीविष्णुपुराणे —

"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः । स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु ॥" इति ।

एकादशे —

"मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् । सुहृदंप्रियमात्मानं साम्यासङ्गादयो गुणाः ॥" इति ।

अत्र निर्गुणं प्रकृतिगुणैरसंस्पृष्टमेव मां कथम्भूतास्ते अगुणाः गुणपरिणामरूपा न स्युरिति टीकासम्मतिश्च ॥

प्रथमे — "एते चान्ये च भगवन्नित्या यत्र महागुणाः ।" इति । अत्र च नित्यत्वादप्राकृतत्वमेव लभ्यते । एतदुक्तं पूर्व भगवति श्रुतीनां प्रमाणत्वं व्यञ्जितं तच्च साक्षात्करणत्व एव सङ्गच्छते, अन्यथा साधकतमं करणमित्यत्र तमबर्थहानेः । तासां तु विशेषतः स्वतःप्रमाणभूतत्वमेवाङ्गीकृतं श्रीभगवतस्तदेकप्रमेयत्वं च । ततः साक्षाच्चरणमेवोभयवादिभिर्मन्तव्यं विशेषतश्च भगवन्नामादिमहिमविज्ञैर्भवद्विधभागवतैरन्यथाचरणमात्रं मया न पृच्छ्यते मया त्विदं पृष्टं कथं साक्षाच्चरन्तीति । येन प्रकारेण साक्षाच्चरन्ति स प्रकारः कथ्यतामित्यर्थः । अत्र समाधत्ते-बुद्धीन्द्रियेति । जनानां मनुष्यत्वबीजनानाजातिजीवानां महाप्रलये प्रकृत्या सह स्वस्मिँल्लीनानां मात्रार्थं मीयन्ते गुणाः कार्याणि गुणातीतानि चाभिरिति मात्राः श्रुतयस्तदर्थं तद्धारणाद्यर्थं बुद्ध्यादीनसृजत् तद्द्वारा च भवार्थमभ्युदयार्थं ब्रह्मलोकादिभोगप्राप्त्यर्थम्, आत्मने जीवतत्त्वं ज्ञापयितुम्, अकल्पनाय कल्पना मायावृत्तयस्तद्रहितं भगवत्तत्त्वमकल्पनम् । यदुक्तं वरुणेन —

"नमस्तस्मै भगवते ब्रह्मणे परमात्मने । न यत्र श्रूयते माया लोकसृष्टिविकल्पना ॥" इति ।

तदपि ज्ञापयितुं बुद्ध्यादीनसृजत् तत्र विचाराऽसम्यक्त्वेन श्रुतिधारणादिकस्य पूर्वद्वयार्थता तत्सम्यक्त्वेन तु भगवदेकार्थतेत्युत्तरोत्तरापादानप्राप्तपूर्वपूर्वपरितोषप्राप्तेनोत्तरोत्तरोत्कर्षेण लभ्यते । यदुक्तं द्वितीये —

"भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ॥" इति ।

"यं सर्वे वेदा नमन्ति" इत्यादिपूर्वोदाहरणेभ्यश्च । अयम्भावः — श्रुतिधारणाद्यर्थं बुद्ध्यादीनसृजदिति ते च बुद्ध्यादयो भवादिसाधनानीति बुद्ध्यादिषु श्रुतौ च तत्तद्योग्यतां न्यस्तवान् अत एव प्रभुपदोपादानं तत्र बुद्ध्यादीनां योग्यता श्रुतिधारणादिषु स्वतः अन्येषु श्रुतिद्वारा बुद्ध्यादिसंस्कर्त्रीणां श्रुतीनां सर्वत्र स्वतः यथा मन्त्रादीनां स्वरूपप्रभावमयी, उपनिषदादीनां तदंशमिश्रस्वाभिधादिशक्तिमयी, कर्मकाण्डादीनां तदंशद्वयमिश्रस्वविधिमात्रबलानुष्ठानमयीति । सा सा पुनर्द्विविधा मायातद्गुणावलम्बिनी स्वरूपद्गुणावलम्बिनी च । तत्र स्वरूपतो मायातद्गुणानां निष्कर्षः प्रसिद्ध एव । स्वरूपे त्वात्मपरमात्मब्रह्मभगवद्रूपेणावस्थितेऽपि भगवत्येव परमोत्कर्षो ज्ञेयः । "कृष्णमेनमवेहि त्वामात्मानमखिलात्मनाम्" "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" "ब्रह्मणो हि प्रतिष्ठाहम्" "यस्मात्क्षरमतीतोऽहम्" इत्यादिभ्यः । तस्मात्परमोत्कृष्टस्वरूपगुणनिर्देशेन चरन्त्यः श्रुतयः साक्षादेव श्रीभगवति चरन्ति । तदेकवाक्यत्वेनान्या अपि चरन्तीति "त्रैगुण्यविषया वेदाः" इति तु कर्मोपासनाविषयमेव । तथैव परममहावाक्यतयाङ्गीकृतं प्रणवमुद्दिश्योक्तं द्वादशे —

"स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः । स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम् ॥" इति ।

अतः खण्डवाक्येन क्रमात्तमुपदेष्टुमेव मायादिषु आत्मादिषु अपि चरन्ति । तथैव वक्ष्यन्ति श्रुतयः- "क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः" इति । तथैव व्याख्यातं ब्रह्मस्तवे- "अन्तर्भवेऽनन्त भवन्तमेव ह्यतत्त्यजन्तो मृगयन्ति सन्तः" इति । एवं च — "मनोरथान्तं श्रुतयो ययुः" इति । एवमेवोक्तं "श्रुतिभिर्विमृग्याम्" इत्यादि । किञ्च-श्रीभगवति श्रुतयः साक्षाच्चरन्तीति किं वक्तव्यम्, यत्र भगवन्नाममन्त्रादिरूपा विनाप्यर्थज्ञानमुच्चारणमात्रेण तमाकर्षयन्ति । यथोक्तं षष्ठे — "नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ।" इति । टीका च नामोच्चारणं पुरुषविषया मतिर्भवतीत्यादिका "सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्" इति । तत्स्वरूपभूता एव च ताः प्रभासपुराणे —

"मधुरमधुरमेतन्मङ्गलं मङ्गलानां सकलनिगमवल्लीसत्फलं चित्स्वरूपम् ।
सकृदपि परिगीतं श्रद्धया हेलया वा भृगुवर नरमात्रं तारयेत्कृष्णनाम ॥" इति ।

नारदपञ्चरात्रे, अष्टाक्षरमुद्दिश्य —

"व्यक्तं हि भगवानेव साक्षान्नारायणः स्वयम् । अष्टाक्षरस्वरूपेण मुखेषु परिवर्तते ॥" इति ॥

श्रुतिश्च- "नामचिद्विविक्तनमहस्ते विष्णो सुमतिं भजामहे" इति । माण्डूकोपनिषच्च प्रणवमुद्दिश्य- "प्रणवो ह्यपरं

परं स्मृतम् ।" इत्यादिका । अतो "यतो वाचो निवर्तन्ते" इत्यादिका: श्रुतयश्चानन्तत्वलोकप्रसिद्धतादि सूचयित्वा वदन्ति । वक्ष्यन्त्येव श्रुतय: "द्युपतय एव ते न ययुरन्तमनन्ततया" इत्यादि, "इह न वेदवतावरजन्मलयोऽग्रसरम्" त्यादि च ॥२॥

पूर्ववाक्यं प्रमाणयति स्तौति च-सा प्रसिद्धा एषा श्लोकद्वयी प्रश्नोत्तरमयी ब्राह्मी उपनिषद्भवति आवाभ्यामाविर्भूतैव न वाभ्यामेव कृता यत: पूर्वेषां श्रीनारदादीनां पूर्वजै: सनकादिभि: स्वान्त:करणेषु धृता । यद्वा-सैषा जय जयेत्यादिना क्ष्यमाणा । क्षेमं "मर्त्यो मृत्युव्यालभीत: पलायन्" इत्याद्यनुसारेण श्रीभगवच्चरणारविन्दरूपम् ॥३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत्र समाधत्ते-बुद्धीति । जनानां महाप्रलये स्वस्मिन् लीनानां मात्रार्थं विषयभोगार्थम् । यद्वा, मीयन्ते गुणा: कार्याणि तीतानि चाभिरिति मात्रा: श्रुतयस्तदर्थं तद्धारणाद्यर्थम् तद्धारणादिकं किमर्थमिति तदाह-भवार्थमित्यादिना पदत्रयेण । मभ्युदयापवर्गार्थम् । यद्वा, भवार्थमभ्युदयार्थं ब्रह्मलोकाद्यैश्वर्यप्राप्त्यर्थम्, अत्मने स्वस्वरूपप्राप्त्यर्थं मोक्षार्थमित्यर्थ: । कल्पनाय भजनाय, (भा० ११/२५/२६) "निर्गुणो मदपाश्रय:" इत्याद्युक्ते:, भजनस्य निर्गुणत्वेन कल्पनातीतत्वात् । यद्वा, त्मने स्वस्य कृष्णस्य प्राप्त्यर्थं स्वप्राप्त्युपायमाह-कल्पनायेति । भक्ते: कल्पनाय विधानायेत्यर्थ: । भक्त्यैवाहं लभ्य: स्याम्, न्योपायेनेति भाव: । तथा हि श्रीमद्भागवतैवैकादशस्कन्धे वक्ष्यते (भा० ११/१४/२१) "भक्त्याहमेकया ग्राह्य:" इति गीतासु (८/२२) "पुरुष: स पर: पार्थ भक्त्या लभ्यस्त्वनन्यया" अतोऽधोक्षजत्वादवाङ्मनसागोचरोऽपि श्रीभगवान् भक्तिं कुर्वति भक्तिजन्येनैव प्रसादेन तत्र स्वशक्तिं सङ्गम्य बाढमघटमानामपि चक्षुरादिगोचरतां प्राप्नोतीत्यभिप्रेत्य "भक्त्यैव श्रुतय: कृष्णे न्ति नान्यथा" इति प्रथमं सङ्क्षेपेणोत्तरं दत्त्वा श्रीसनन्दनमुखेन (भा० १०/८७/१३) "यथा शयानं सम्राजम्" इति दृष्टान्तितेन श्रुतीनां भक्तिं वर्णयता श्रीशुकेन पूर्वं नारदकृतस्यैवास्य प्रश्नस्य विस्तरेणोत्तरतया श्रुतिगोचरताहेतु: भगवन्माहात्म्यभरप्रतिपादका श्रुतिस्तुरेवोपक्षिप्ता । तथा च स्तुत्यारम्भे (भा० १०/८७/१४)

"क्वचिदजयात्मना च चरतोऽनुचरेन्निगम:" इत्यनुवरणं वक्ष्यते ।

अयम्भाव: — श्रुतयस्त्रिविधा: कर्मपरा:, ज्ञानपरा:, श्रीभगवत्पराश्चेति । तत्र कर्मपरास्त्रैगुण्यविषयत्वात् कृष्णे चरितुं न वन्ति, ज्ञानपराश्च लक्षणया भगवत्स्वरूपविशेषे चरन्त्योऽमुत्रापूर्त्या साक्षात्तमेव दिदृक्षवोऽतन्निरसनद्वारा भगवन्तं मृगयन्ते । ह्मणैवोक्तम् (भा० १०/१४/३४) "अद्यापि यत्पदरज: श्रुतिमृग्यमेव" इति; भगवत्परास्तु श्रीनारायणोपनिषदि लतापनीप्रमुखाभक्तिविशेषेण साक्षादेव श्रीभगवति चरन्त्यमुं प्राप्नुवन्ति । तथा तदनुगतानां चागमपुराणादीनां पदवाक्यानि रन्तीति । अत एव रासक्रीडाप्रसङ्गे कथितम् (भा० १०/३२/१३) "मनोरथान्तं श्रुतयो यथा ययु:" इति ।

अस्यार्थ: — कर्मकाण्डादिश्रुतय: परमेश्वरमपश्यन्त्यस्तत्तत्कामाद्यनुबन्धैरपूर्णा भवन्ति, भगवत्परास्तु तं लब्ध्वा मनोरथान्तं कामतां गच्छन्तीति । तथा हि बृहद्वामने —

"ब्रह्मानन्दमयो लोको व्यापी वैकुण्ठसंज्ञित: । तल्लोकवासी तत्रस्थै: स्तुतो वेदै: परात्पर: ॥
चिरं स्तुत्या ततस्तुष्ट: परोक्षं प्राह तान् गिरा । तुष्टोऽस्मि ब्रूत भो: प्राज्ञा वरं यन्मनसीप्सितम् ॥"

श्रुतय ऊचु: —

"यथा तल्लोकवासिन्य: कामतत्त्वेन गोपिका: । भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथा ॥"

श्रीभगवानुवाच —

"अगामिनि विरिञ्चौ तु जाते सृष्ट्यर्थमुद्यते । कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ॥"

इति शुद्धभक्तानामेव दृश्यो भवतीत्यस्मिन्नर्थे मोक्षधर्मे नारायणीयोपाख्याने वसुराजाश्वमेधे भीष्मादिवाक्यमेव प्रमाणम् तथाहि —

"प्रीतस्ततोऽस्य भगवान् देवदेवः सनातनः। साक्षात्तं दर्शयामास सोऽदृश्योऽन्येन केनचित्॥
स्वयं भागमुपाघ्राय पुरोडाशं गृहीतवान्। अदृश्येन हृतो भागो देवेन हरिमेधसा॥
बृहस्पतिस्ततः क्रुद्धः स्रुचमुद्यम्य कोपितः।" इति ॥२॥

उप लक्षणया वृत्त्या तात्पर्येण मुख्यया वृत्त्या वा, ब्रह्मसमीपे निषीदति स्थिरतया वर्तत इत्युपनिषत्। अत एव ब्राह्मी ब्रह्मपरा, पूर्वजैः श्रीसनकादिभिर्धृता हृदि न्यस्ता नित्यमभ्यस्ता वा, अकिञ्चनः श्रीभगवदर्थं त्यक्त्वाशेषपरिग्रहः सन्, क्षेमं भक्तियोगम् (भा० ६/१/१७)

"सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः।" इत्युक्तेः; गच्छत्प्राप्नोतीति ॥३॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सर्वे शब्दाः चिदचिद्द्वारा तस्मिन् वर्तन्त इति परिहार उच्यते-बुद्धीन्द्रियेति। मात्रार्थं देहोत्पादनार्थं भवार्थम् आत्मने आत्मज्ञानार्थम्। कल्पनाय सृष्ट्याद्यर्थम्। जगव्द्यापाररूपक्रियार्थमित्यर्थः ॥२॥

ब्राह्मणी वेदसम्बन्धिनी। उपनिषद्रहस्यमित्यर्थः ॥३-५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अत्र —

"अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि। नामरूपयोर्निर्वहिता ते यदन्ता तद्ब्रह्म। सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन् यदास्ते। तत्सृष्ट्वा तदेवानु प्राविशत्। तदनुप्रविश्य सच्च त्यच्चाभवत्॥"

इत्यादिश्रुतयः स्वपर्यन्तानामरूपव्याकरणेन तत्तच्चिदचिद्वस्तुशरीरकतया तत्तच्छब्दवाच्योऽभूदिति प्रतिपादयन्त परिहारमाहुरित्यभिप्रेत्य तत्र तत्र बहुशो जगत्सर्गप्रकारवर्णनयैव प्रकृतप्रश्नस्योत्तरमुक्तप्रायमिति।

जनानां जीवानां बुद्ध्यादीनसृजत् प्रभुरध्यक्षः निर्वाहक इति यावत्। अयमभिप्रायः —

स्वयमन्तरात्मतया नारूपनिर्वाहको भवितुं बुद्ध्यादिशब्दोपलक्षितसमष्टिपरम्परया महाभूतपर्यन्तमात्मानं तत्तच्छरीरं परिणमय्य तन्मयः पुनः सदसच्छब्दवाच्यचिदचिन्मिश्रदेवादिस्थावरान्तगद्रूपतत्तच्छब्दवाच्यश्चाभवदिति एवं चिदचित्पदार्थानां सर्वेषां परमात्मशरीरतैकस्वाभाव्यात् तत्त्वेनैव तेषां वस्तुत्वादपृथक्सिद्धविशेषणत्वाच्चापृथक्सिद्धविशेषणवाचिशब्दानामाकृत्यधिकरणन्यायेन विशेष्यपर्यन्ताभिधानस्वाभाव्याद्गवादिशब्दानां गोत्वादिकं प्रवृत्तिनिमित्तीकृत्य व्यक्तिपर्यन्ताभिधानस्य मुख्यत्ववत् सर्वे लोकव्युत्पत्तिसिद्धिस्वस्वार्थाभिधायिनां स्वस्वार्थान् परमात्मा पृथक्सिद्धविशेषणभूतान् प्रवृत्तिनिमित्तीकृत्य परमात्मपर्य मुख्यमेवेति विस्तरस्तु भाष्यादिष्वनुसन्धेयः। परमकारुणिकस्य अवाप्तसमस्तकामस्य स्वपरप्रयोजननिरपेक्षस्य ब्रह्मणो जगत् प्रयोजनं किमित्यत आह-मात्रार्थमिति। आत्मने कल्पनाय चेति तादर्थ्यचतुर्थ्यन्तं मात्रार्थं देहार्थं तदुत्पादनमित्यर्थः। असत्क जीवानां स्वाराधनोपयुक्तकरणकलेवरादिप्रदानेनोज्जीवनार्थं जगत्सर्गे प्रवृत्तिरिति परिपूर्णस्यापि परानुजिघृक्षा सङ्गतैवेति अत एव गर्भजन्मजरामरणाद्यनेकदुःखावहजगत्सर्गप्रयुक्तनैर्घृण्यशङ्कापि निरस्ता। दुःखस्य तत्तज्जीवानादिकर्मप्रयुक्तत्वात् इति मात्राः देहाः भवार्थमभ्युदयार्थमाराधयितृभ्यो निःश्रेयसरूपाभ्युदयप्रदानार्थमित्यर्थः। अनेन देहोत्पादनस्यापि प्रयोजन। यद्वा। भवार्थं त्रैवर्गिकरूपश्रैयःप्रदानार्थम् आत्मने अध्यात्मज्ञानार्थं मुक्तिसाधनोपासननिष्पत्तये इत्यर्थः। यद्वा। अ जीवात्मस्वरूपसत्तालाभार्थं प्रलयावस्थायामसत्प्रायाणां जीवानां परमात्मनः आत्मवत्त्वं शेषशेषिभावज्ञानेनैव ह्यात्मसत्ता

अकल्पनाय कल्पनं
देवादिभेदनिवृत्तिपूर्वकमु
तस्मै परिपूर्णस्यापि क्रीड

नन्वित्थं सर्वशब्द
व्युत्पत्तिः साध्यत इत्य
अनधीतवेदान्तशास्त्राणां
घटशब्दव्युत्पत्तिमगृहीतवत
पूर्वजैर्वामदेवादिभिरेषा व्युत्प
शरीरवाचिनां शब्दानां शरीरि
"अहं मनुरभवं सूर्यश्च कक्षी

"सर्वग

इति निर्दिशन्तः स
भावः। इत्थं गृह्यमाणाया व्
किञ्चन प्रार्थनीयं यस्य सः क्षे

श्रुतयः सत्त्वादिगुणरा
पीठिकामारचयति-बुद्धीति।
मात्राप्रवृत्तिः शब्दानामिति शेष
"भवो भद्रे हरे प्रासौ" इत्यतो
तपस्तद्धि तपः" इति श्रुतिः। च
पुण्यसाधनमित्यभिप्रायेणाह-अ
भावः। ततः परमप्रयोजनमाह-व
नित्यम्" इति श्रुतेः। चशब्देन
वक्तृविवक्षापूर्विका शब्दप्र
ज्ञानप्रसन्नभगवत्सारूप्यादिमोक्षप्र

शब्दमात्रस्य हर्येकविषय
मुख्यवृत्त्या विषयत्वमिति भावेन
सैषोपनिषद्वेदान्तापरपर्याया पूर्वेषां
स्तौमीत्यादेः। हि यस्मात्तस्मात् य
स्यादित्यत्राह-ब्राह्मीति। अथ क
मुक्तिहेतुत्वोपपत्तेः। ज्ञानं च विरक्त

॥१-१३॥

ष्मादिवाक्यमेव प्रमाणम्;

।

युपनिषत्। अत एव ब्राह्मी
ग्रिहः सन्, क्षेमं भक्तियोगम्

ोत्पादनार्थं भवार्थम् आत्मने

ह्म। सर्वाणि रूपाणि विचित्य
॥"
ाच्योऽभूदिति प्रतिपादयन्त्यः

भूतपर्यन्तमात्मानं तत्तच्छरीरकं
नवदिति एवं चिदचित्पदार्थानां
नैव तेषां
नाकृत्यधिकरणन्यायेन
भिधानस्य मुख्यत्ववत् सर्वेषां
त्तिनिमित्तीकृत्य परमात्माभिधानं
जननिरपेक्षस्य ब्रह्मणो जगत्सर्गे
तदुत्पादनमित्यर्थः। असत्प्रायाणां
परानुजिघृक्षा सङ्गतैवेति भावः।
जीवानादिकर्मप्रयुक्तत्वात् मीयन्त
न देहोत्पादनस्यापि प्रयोजनमुक्तम्
प्त्तये इत्यर्थः। यद्वा। आत्मार्थं
शेषिभावज्ञानेनैव ह्यात्मसत्तालाभः

ल्पनाय कल्पनं ज्ञानैकाकारेष्वात्मसु देवमनुष्यादिकल्पनं भेद इति यावत् तदभावाय मुक्तये उपायानुष्ठानेन भेदनिवृत्तिपूर्वकमुक्त्यर्थं चेत्यर्थः। यद्वा। सर्वमिदं सङ्कल्पमात्रेणैवोपपद्यतामित्यत आह-कल्पनाय चेति। कल्पनं क्रीडनं परिपूर्णस्यापि क्रीडार्थं जगव्द्यापार इति भावः ॥२॥

नन्वित्थं सर्वशब्दानां ब्रह्मणि मुख्यवृत्तिर्न लौकिकैर्गृहीता अपि तु तत्तदर्थेष्वेव तत्कथं सार्वजनीनव्युत्पत्तिभञ्जनेन ब्रह्मणि वृत्तिः साध्यत इत्यत आह-सैषेति। सैषोपपादिता उपनिषद्रहस्यतमा उपनिषदर्थविचारेणावगन्तव्येति वार्थः। तवेदान्तशास्त्राणां तत्तदर्थमात्रपर्यवसितव्युत्पत्तावप्यधिगतवेदान्तार्थतदनुष्ठाननिष्ठैर्ब्रह्मण्येव व्युत्पत्तिर्गृहीता। न हि ब्दव्युत्पत्तिमगृहीतवतः कस्यचित्पुंसो घटशब्दात्तदर्थानवगतावपि तस्य तद्बोधकशक्तिर्विहितेति भावः। तथा हि पूर्वेषामपि मदेवादिभिरेषा व्युत्पत्तिर्द्धृताऽवधृता निश्चितेति यावत्। वामदेवप्रह्लादादयो हि परस्य ब्रह्मणः सर्वान्तरात्मत्वं सर्वस्य तच्छरीरकत्वं वाचिनां शब्दानां शरीरिणि पर्यवसानं च पश्यन्तः अहमिति स्वात्मशरीरकं परं ब्रह्म निर्दिश्य तत्सामानाधिकरण्येन मनुसूर्यादीन् हं मनुरभवं सूर्यश्च कक्षीवानृषिरस्मि विप्रः।" इति।

"सर्वगत्वादनन्तस्य स एवाहमवस्थितः। मत्तः सर्वमहं सर्वं मयि सर्वं सनातने ॥"

इति निर्दिशन्तः सर्वबुद्धिशब्दान् परमात्मपर्यन्तान् प्रदर्शयन्तस्सर्वशब्दानां परमात्मन्येव व्युत्पत्तिमध्यवसितवन्त इति । इत्थं गृह्यमाणाया व्युत्पत्तेः फलमाह-श्रद्धयेति। तामुक्तविधां व्युत्पत्तिं यो पुमान् श्रद्धया धारयेत् सोऽकिञ्चनः नास्ति प्रार्थनीयं यस्य सः क्षेमं मुक्तिं गच्छति प्राप्नोति ॥३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

श्रुतयः सत्त्वादिगुणराहित्येन निर्गुणे ज्ञानानन्दादिगुणगणमणिमालालङ्कृतविग्रहे ब्रह्मणि साक्षाद्वर्तन्तम् इति परिहारमभिप्रेत्य कारमारचयति-बुद्धीति। बुद्ध्यादिसर्जनेन किं प्रयोजनमत्राह-मात्रार्थमिति। मात्रापरिच्छेदे देशे प्रवृत्तौ कर्णभूषण इत्यतो वृत्तिः शब्दानामिति शेषः। तदर्थं "मनसा अग्रे सङ्कल्पयत्यथ वाचा व्याहरति" इति श्रुतेः किमतोऽत्राह-भवार्थं चेती। भद्रे हरे प्राप्तौ" इत्यतो भवो भद्रं कल्याणं पुण्यमिति यावत् तदर्थं "स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि दि तपः" इति श्रुतिः। चशब्दो समुच्चयार्थौ। बुद्ध्यादीन्द्रियपूर्विका शाब्दीप्रवृत्तिरपि न स्वर्गादिविषया किन्तु परमात्मविषयैव धनमित्यभिप्रायेणाह-आत्मन इति। सन्ध्यकरणात् सदसद्विलक्षणः एवात्मा। तमात्मानमुद्दिश्य शब्दराशेः प्रवृत्तिरिति । ततः परमप्रयोजनमाह-कल्पनायेति। कल्पनाय परमात्मज्ञानाय "सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण " इति श्रुतेः। चशब्देन मोक्षायेति सूचयति "तमेवं विद्वानमृत इह भवति। ज्ञानेनामृती भवति।" इति श्रुतेः। अनेन विवक्षापूर्विका शब्दप्रवृत्तिरित्यतो बुद्धीन्द्रियादिमत एव सुप्रयुक्तशब्देन ज्ञातपरब्रह्मतत्त्वगुणोपसंहार-भगवत्सारूप्यादिमोक्षप्राप्तेः शब्दानां श्रीहरिविषयत्वं साक्षादङ्गीकर्तव्यमित्युक्तं भवति ॥२॥

शब्दमात्रस्य हर्येकविषयत्वमुक्त्वा अधुना "वेदान्तविज्ञानसुनिश्चितार्थाः" इति वचनादुपनिषद्भागतस्य तद्गुणगणावेदकत्वेन विषयत्वमिति भावेनाह-सैषेति। हिशब्दो हेतौ। ईशबुद्धिस्थिताः सदेतिवचनात् या श्रीमन्नारायणबुद्धिस्थिता न्तापरपर्याया पूर्वेषां पूर्वजैः ब्रह्मादिभिः धृता अध्ययनरूपेण न तु कृता नित्यवाक्यत्वात्। नित्ययानित्यया । हि यस्मात्तस्मात् यस्तां श्रद्धया धारयेत्स क्षेमं मोक्षं गच्छेत् ब्रह्मज्ञानलभ्यस्य मोक्षस्य कथं श्रुतिधारणया मोक्षः ह-ब्राह्मीति। अथ कस्मादुच्यते ब्रह्मेति "बृहन्तो ह्यस्मिन् गुणाः" इति श्रुतेः। ब्रह्मगुणावेदकत्वेन तज्ज्ञानद्वारा पपत्तेः। ज्ञानं च विरक्त्यादिमत एव स्यादिति भावेनाह अकिञ्चन इति ॥३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥१-१३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

इति राज्ञो निर्णयमाकलय्य स्वीकार्य्यापि तदेवानुमोदमान आह-बुद्धीन्द्रियेत्यादि। प्रभुर्भगवान् श्रीकृष्णः जनानां जीव बुद्ध्यादीन्यसृजत्। जायत इति जनाः जीवाः। तेषां बुद्धीन्द्रियाणि मनः प्राणांश्च असृजत् वस्तुतस्तस्यैव स्वांशश्चित्स्व जीवस्तस्य बुद्ध्यादीनां स्वतोऽसम्भवात् स्वयं स्वेनांशेन जीवान् सृष्ट्वा बुद्ध्यादनप्यसृजदित्यर्थः। ममैवांशो जीवलोके जीवभू सनातः। इति तदुक्तेः। एकस्यैव ममांशस्य जीवस्यैव महात्मन इति च किमर्थं ससर्ज्ज? मात्रार्थम् इत्यादि। मात्रा विषयास्त भव ऐश्वर्य्यं तदर्थम् आत्मने आत्मभजनार्थम् अकल्पनाय अपुनरावृत्तये कैवल्याय कौतुकान्नानाभावदिदृक्षा नानाकल्पनं कौतुकम्। केचिद्विषयासक्ताः सन्तु केचिद्बुद्धिमन्तो मां भजन्तु केचित्कैवल्यार्थं यतन्तामिति हि कौतुकम्। तच्च तेषां बुद्ध्यादियो भवतीति तत्तत्कल्पनं तेनासौ भगवान् ब्रह्मशब्दवाच्यः स्वयं प्रकृतगुणरहितोऽ जगत्कर्तृत्वादिसर्वज्ञत्वादिभक्तवात्सल्यत्वादिनित्याप्राकृतगुणोऽचिन्त्यैश्वर्यो ब्रह्मैव सविशेषं तस्मिन्नेव श्रुतयश्चरन्ति इति युक्त वितर्क्कितं भवता ब्रह्मन्! ब्रह्मण्यनिर्देश्य इति। यद्यपि भगवानपि अनिर्देश्यः अचिन्त्यमहिमा निर्गुणः प्राकृतगुणरहि साक्षाद्विग्रहः। स च सदसत्परः तथापि श्रुतयस्तमेव चरन्तीत्यर्थः ॥२॥

न केवलमिदं मयैवोच्यते नाप्येतदप्रमाणमित्याह-सैषेत्यादि। सा एषा ब्राह्मी सविशेषब्रह्मपरा उपनिषत् जगत्क सर्वज्ञः सर्वशक्तिर्भगवान् ब्रह्म इत्यादिरूपी पूर्वेषामपि पूर्वजैर्महात्मभर्धृताम् एतां श्रद्धया धारयेत् निर्विशेषत्वं परित्यज्य सविशेषत्वे तदर्थं यो धारयेत् स अकिञ्चनः अनन्यो भक्त इत्यर्थः। क्षेमं तत्पादाब्जं गच्छतीत्यर्थः ॥३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥१-११॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

उत्तरमाह-बुद्धीति। जनानां जीवानां मात्राद्यर्थं बुद्ध्यादीन् प्रभुरीश्वरोऽसृजत्। मीयन्त इति मात्रा विषयास्त कर्मफलभोगार्थमित्यर्थः। भवः पुनः पुनर्जन्म तदर्थं भवबन्धहेतुकर्मकरणार्थमित्यर्थः। आत्मने ब्रह्मपरमात्मभगवत्स्वरूपा स्वस्मै यत्कल्पनं बुद्ध्यादीनां समर्पणं तदर्थम्। यद्वा- आत्मने स्वयमुपासयितुं यत्कल्पनं बुद्ध्यादीनां विनियोगस्तदर्थम् त्रयाणामेव प्राधान्यबोधकं चकारत्रयम्। बुद्ध्यादीन्विना न कर्मफलस्वर्गादिभोगो, नापि कर्मकरणं, नापि शमदमाद्यङ्ग नाप्यष्टाङ्गयोगो, नापि श्रवणकीर्तनादिभक्तियोगः सिद्ध्यतीत्यतस्तानसृजत्। ननु त्वं क्व गच्छसीति प्रश्ने, मयाद्य दध्यन्नं भुक्तमित्यु यथा तथैव श्रुतयः कथं ब्रह्मणि चरन्तीति प्रश्ने प्रभुर्मात्राद्यर्थं बुद्ध्यादीनसृजदित्युत्तरमभूत्। मैवम् "परोक्षवादा ऋषयः परोक्षं मम च प्रियम्" इति भगवदुक्तेरत्राभिधया वृत्त्या प्रश्ने व्यञ्जनावृत्त्येदमुत्तरं सङ्गतमेव। तथाहि-शब्दवाच्यत्वाभावादेव ब्रह्म खल्वनिर्देश्यत्वं ब्रूषे यदीन्द्रियाणि परमेश्वरो नास्रक्ष्यत्तदा शब्दस्पर्शादयोऽप्यनिर्देश्या ब्रह्मतुल्या एवाभविष्यन्। अत जन्मान्धबधिरस्य रूपशब्दौ ब्रह्मवदनिरूप्यौ भवत एव, तेनास्मदादिभ्यो येन ग्राहकाणीन्द्रियाणि दत्त्वा शब्दादयो निर्दे सुगमाः कृतास्तेनैव परमेश्वरेण कस्मैचित्कृपया ब्रह्मणोऽपि तत्र सुखं चरेयुरिति। तदुक्तं भगवता मत्स्यदेवेन— "मदीयं महिमानं च परब्रह्मेति शब्दितम्। वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदि॥" इति॥ अस्यार्थः-मम महिमानं महत्त्वरूपं सर्वव्यापकत्व यद्ब्रह्म तत्त्वं वेत्स्यसि कथं वेत्स्यामि सम्प्रश्नस्तद्ब्रह्म कीदृशमिति तत्प्रश्नैर्ब्रह्मेदृशमिति मुनिदत्तैरुत्तरैश्च शब्दितं साक्षाच्छब्दनिर्दि ब्रह्म वेत्स्यसीति भगवत्कृपया श्रीमदर्जुनेनापि ब्रह्म साक्षाद्दृष्टम्। यथा हरिवंशे विप्रकुमाराहरणप्रसङ्गे तं प्रति भगवद्वाक्यम्-

"ब्रह्म तेजोमयं दिव्यं महद्यद्दृष्टवानसि। अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम्॥
प्रकृतिः सा मम परा व्यक्ताव्यक्तसनातनी। तां प्रविश्य भवन्तीह मुक्ता योगविदुत्तमाः॥
सा साध्यानां गतिः पार्थ योगिनां च तपस्विनाम्। तत्परं परमं ब्रह्म सर्वं विभजते जगत्॥
ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत॥" इति॥

यद्वा-भो राजन्
सविशेषे सच्चिदानन्दाका
च प्राकृता गुणाः" इति
निर्गुणत्वेऽप्यप्राकृतसा
शब्दप्रवृत्तिनिमित्तामप्राकृ
शब्दाद्याकाशादिकार्यज्ञानं
कर्णभूषणे" इत्यनुशासनात्
भवार्थं जीवानां कल्याणार्थ
यत्कल्पनं स्वमुपासितुं विनि

"सत्पुण्डरी

अत्र सिद्धभक्तानामप्र
तापनीश्रुतिर्भगवन्नयनादिवर्णयि
ते यथाकथञ्चिदेव बुद्धि प्रवेश
भगवानप्यपारकृपातरङ्गवशादेवे
भगवत्स्वरूपस्य श्रुतिगम्यत्वं
आवाभ्यामाविर्भूतैव न त्वावा

उत्तरमाह-बुद्धीति। प्र
इत्यन्वयः। बुद्धिं मात्रार्थं विषय
प्राणम् अकल्पनाय मोक्षार्थं च
गच्छसीति प्रश्ने मया क्षीरान्नं भुक्त
प्रभुः सच्चिदानन्दविग्रहः सन् भ
इदमपि नोचितं मुख्यया वृत्त्या इत
सदसतः प्रकृतेः परश्च तत्रैव श्रुतयः
परः' एवं सति प्राकृतबालवत् अ
जनानामित्युक्तम्। किञ्च 'अ
वास्तविकब्रह्मरसोपलब्धिः; रात्रिं
तदर्थम्। ताश्च मात्राः कर्मानुष्ठानं वि
परस्परं सम्बन्धं द्योतयतः। ततश्च
आत्मार्थम् आत्मभोगार्थम्। एतेन
योगवैरस्यात् कल्पनं कल्पना माय
सङ्क्षेपः। च आत्मने इत्यत्र सन्ध्यभा
इत्यपि सूचितम्। यद्वा अध्यारोपापवाद
श्रुतयो ब्रह्मणि चरन्तीत्युपाधिनिषेधा
मात्रार्थं विषयार्थं भवार्थं कल्याणा

यद्वा-भो राजन् ! निर्विशेषे ब्रह्मणि श्रुतयो नैव चरन्ति "शब्दो न यत्र पुरुकारकवान्क्रियार्थः ।" इति ब्रह्मोक्तेस्तथा शेषे सच्चिदानन्दाकारे ब्रह्मण्यपि श्रुतयो न चरन्ति तस्य प्राकृतजात्यादिपदार्थातीतत्वात् । किञ्च- "सत्त्वादयो न सन्तीशे यत्र प्राकृता गुणाः" इति वैष्णवोक्तौ प्राकृता न सन्तीत्युक्तेऽप्राकृताः सन्तीति लभ्यते "साक्षी चेता केवलः" इत्यादिना गुणत्वेऽप्यप्राकृतसाक्षित्वादिगुणोक्तेश्च 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिस्मृतेश्चाप्राकृतानन्तगुणान्वये तस्मिन् वृत्तिनिमित्तामप्राकृतजात्यादीनां सत्त्वात्साक्षादेव श्रुतयस्तत्र चरन्तीत्याह-बुद्धीति । बुद्धिपदेन महत्तत्त्वमिन्द्रियपदेन काशादिकार्यज्ञानं च बोध्यते । मात्रार्थं शब्दादीनां ब्रह्मण्यपि प्रवृत्त्यर्थं बुद्ध्यादीनसृजत् "मात्राः परिच्छदे देशे प्रवृत्तौ सम्पूर्णे" इत्यनुशासनात् । प्राणादिकं विना वचनस्याप्यसम्भवान्मन आदिसृष्टिरपि शब्दप्रवृत्त्यर्था ज्ञेयाः । सृष्टेः फलान्तरमप्याह- र्थं जीवानां कल्याणार्थं "भवो भद्रे हरे प्राप्तौ" इत्यनुशासनात् । तथात्मने स्वस्मै बुद्ध्यादीनामप्राकृतानां प्राकृतानां च कल्पनं स्वमुपासितुं विनियोगस्तस्मै । यथा गोपालतापनी श्रुतिः —

"सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् । द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥" इति ॥

अत्र सिद्धभक्तानामप्राकृतबुद्धीन्द्रियैरप्राकृतपुण्डरीकमेघविद्युतां सुग्राह्यत्वात्ताभिरुपमितेषु भगवन्नयनवपुर्वसनेष्वप्राकृती श्रुतिर्भगवन्नयनादिवर्णयित्री सुखेनैव चरति । साधकभक्तानां तु बुद्ध्यादिभिरग्राह्यत्वेऽपि तत्र प्राकृतपुण्डरीकादिसादृश्यारोपेणैव कथञ्चिदेव बुद्धिं प्रवेशयन्तश्चित्तैकाग्र्येणापि वस्तुतोऽस्पृष्टतद्रूपभासा अपि भगवन्तं प्रभुं ध्यायाम इत्यभिमानिनो हृष्यन्ति । नन्यपरकृपातरङ्गवशादेवैभिर्भक्तैरहं ध्यात इत्यभिमन्यमानस्तद्भक्तिपरिपाके सति तान्स्वभक्तान्स्वचरणान्तिकं सेवार्थमानयतीति स्वरूपस्य श्रुतिगम्यत्वं तत्कृपयैव सिद्धम् ॥२॥ सा प्रसिद्धा एषा श्लोकद्वयी प्रश्नोत्तरमयी ब्राह्मी उपनिषद्भवति भ्यामाविर्भूतैव न त्वावाभ्यामेव कृता यतः पूर्वेषां श्रीनारदादीनां पूर्वजैः सनकादिभिः स्वान्तःकरणेषु धृता ॥३॥

गूढार्थदीपिनी

उत्तरमाह-बुद्धीति । प्रभुः जनानां जीवानां मात्राद्यर्थं क्रमेण अर्थधर्मकाममोक्षार्थं तत्साधनभूतान् बुद्ध्यादीन् असृजत यः। बुद्धिं मात्रार्थं विषयभोगार्थम्; इन्द्रियाणि भावार्थं भावो जन्म सम्बन्धिकर्मकरणार्थं मन आत्मने आत्मलोकभोगार्थम्, न् अकल्पनाय मोक्षार्थं च असृजत् । यद्वा । बुद्ध्यादियुक्तान् देहान् असृजत् । नन्विदमुत्तरमपि अयुक्तमिव प्रतिभाति । ब्र ति प्रश्ने मया क्षीरान्नं भुक्तमितिवदिति चेन्न । उत्तरस्य अत्रैव गर्भितत्वात् । तथा हि प्रकर्षेण सगुणत्वेन भवति आविर्भवतीति सच्चिदानन्दविग्रहः सन् भगवानसृजत् । एवं योऽसृजत् तमेव श्रुतयः प्रतिपादयन्ति तात्पर्यवृत्त्या च निर्गुणमपि । वस्तुतस्तु नोचितं मुख्यया वृत्त्या इत्येव वक्तव्यं यतः प्राकृतगुणरहितः निर्गुणः भगवान् श्रीकृष्ण एव अकारो वासुदेवस्तेन निर्देश्यश्च तः प्रकृतेः परश्च तत्रैव श्रुतयः साक्षाच्चरन्तीति प्रश्नोत्तरयोः पूर्णा सङ्गतिः । यथोक्तमत्रैव 'हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः एवं सति प्राकृतबालवत् अप्राकृतबालमुकुन्दस्यापि चिक्रीडिषा सम्भवति । सा च स्वांशभूतजीवद्वारैव सम्पत्स्यते अतो मित्युक्तम् । किञ्च 'असत्ये वर्त्मनि स्थत्वा ततः सत्यं समीहते' इत्युक्तेर्न हि विरुद्धसृष्टिं विना जीवानां ब्रह्मरसोपलब्धिः; रात्रिं विना दिनस्येव; अतो मात्रार्थमित्युक्तम् । मीयन्ते बुद्ध्या ज्ञायन्ते इति मात्राः अर्था विषयाः; ताश्च मात्राः कर्मानुष्ठानं विना न स्युः; अतः भवार्थमित्युक्तम् । इन्द्रियैर्भवतीति भवः कर्म तदर्थम् । चकारौ मात्राभवयोः सम्बन्धं द्योतयतः । ततश्च कर्मफलभोगाय मनसा सह तत्र तत्र लोकेषु अतति सातत्येन गच्छतीति आत्मा; तदर्थम् आत्मभोगार्थम् । एतेन कामभोगो दर्शितः; ततश्च तत्त्वज्ञानसहायीभूतप्राणोपासनया ईशभक्त्यैव ज्ञानवैराग्योदयेन स्यात् कल्पनं कल्पना माया तन्निवृत्तिसत्त्वान्मोक्षश्च घटते । इत्यतोऽकल्पनायेत्युक्तम् । एवं चतुर्वर्गार्थमिदंमसृजदिति च आत्मने इत्यत्र सन्ध्यभावो हि ऐहिकपारलौकिकविषयेषु सन्धिर्न कार्य इति द्योतनार्थम् । अग्रे सन्धिना च मोक्षे कार्य सूचितम् । यद्वा अध्यारोपापवादाभ्यां निष्प्रपञ्चः प्रपञ्च्यते, इत्युक्तेर्न हि अध्यारोपं विना अपवादः सम्भवतीति उपाधिनिषेधद्वारैव ह्मणि चरन्तीत्युपाधिनिषेधार्थमेव बुद्ध्याद्युपाधीनसृजदित्युत्तरसङ्गतिः । केचित्तु कल्पनाय वासनायुक्ताय आत्मने जीवाय विषयार्थं भवार्थं कल्याणार्थं च तद्भोगमोक्षसिद्ध्यर्थमित्यर्थः । चकारद्वयं भोगमोक्षसाधनभूतौ अनुक्तौ अर्थधर्मौ

समुच्चिनोतीत्याहु: ॥२॥ या नारायणबुद्धिस्था सा एषा रहस्यमयी विद्या । उप श्रीकृष्णस्य समीपं नि निश्चयेन सादयति प्रापयतीति तथाभूता । यद्वा । उपनिषद्यते प्राप्यते ब्रह्म यद्विचारेण सोपनिषत् इति निरुक्तेः । पूर्वेषां नारदादीनां पूर्वजैः सनकादिभिर्ब्रह्मादिभिर्वा धृता स्वान्तःकरणेषु । हि यस्मादेवं तस्मात् यस्तां श्रद्धया श्रवणादिना धारयेत् सोऽकिञ्चनः देहाद्युपाधिशून्यः सन् क्षेमं मोक्षं मङ्गलमयं श्रीकृष्णधाम वा प्राप्नुयात् । नास्ति किञ्चन प्रार्थनीयं यस्य सोऽकिञ्चनः विरक्तो वा । हि-शब्दो हेतौ । यद्वा । य पूर्वजैर्धृता सा एषा इत्यन्वयः ॥३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पूर्वमङ्गलश्लोके प्रथमस्कन्धे स्वपितृश्रीव्यासोक्तं ब्रह्मलक्षणं स्मरयन्नुत्तरमाह-प्रभुः परमेश्वरः सर्वशक्तिर्जनानां बुद्धीन्द्रियमनःप्राणान् असृजत् । तथा च श्रुतिः —

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापश्च पृथिवी विश्वस्य धारिणी'ति ॥

तत् ब्रह्म तस्मिन्नेव श्रुतीनां समन्वयः । न ततोऽन्यत्तत्त्वमिति प्रत्यभिज्ञापकः प्रभुशब्दः तैत्तिरीयके स एव प्रत्यभिज्ञापकशब्दः । 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्तीति । तद्ब्रह्म विजिज्ञासस्व ॥'

इति पुनरपि यत्तदुत्थसामान्यशङ्कानिरासार्थं तत्रैव स्पष्टितम् —

'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशीन्तीति । तद्ब्रह्म । तद्विजिज्ञासस्व ॥'

इत्यादिनाभ्यस्तम् । न तु करणभिन्नं किमपि जिज्ञासाविषयत्वेन प्रतिपादितम् । एवमेव भगवता सूत्रकृता अपि 'अथातो ब्रह्मजिज्ञासा ।' (१-१-१) इति जिज्ञास्यं प्रतिज्ञाय तथाभूतस्य ब्रह्मणः स्वरूपाकाङ्क्षायां तदेवौपनिषदं ब्रह्म जगत्कारणभूतं ज्ञेयत्वेन लक्षणसूत्रे निर्णीते नान्यत् किमपीति । ननु

'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । न चक्षुषा गृह्यते नापि वाचा । अशब्दमस्पर्शमगन्धमपाणिपादो जवनो ग्रहीता । पश्यत्यचक्षुः स शृणोत्यकर्णः । केवलो निर्गुणश्च ।' इत्यादिवाक्यपुञ्जैः प्रतिपादितं वस्तु कथमह्णूयते इति चेन्न । तेषां वाक्यानां लौकिकवाक्यादिविषयत्वेन मायातद्गुणसत्त्वादिकार्यतत्सम्बन्धनिषेधपरत्वात्सर्वथा विषयत्वेन शशशृङ्गतुल्यतापत्तेः । तथा च शास्त्रम् —

'सदा पश्यन्ति सूरयः ।' 'सर्वे वेदा यत्पदमामनन्ति । तं त्वौपनिषदं पुरुषं पृच्छामः । मनसैवानुद्रष्टव्यः । दृश्यते त्वग्र्यया बुद्ध्यासूक्ष्मैः सूक्ष्मात्मदर्शिभिः । सर्वरूपः सर्वगन्धः सर्वरसः । विश्वतश्चक्षुः । यः सर्वज्ञः सर्वशक्तिः ।'

इत्यादिश्रुतिविरोधाच्च लौकिकस्थूलबुद्ध्याद्यविषयत्वेन सूक्ष्मा लौकिकास्तदनुगृहीतैर्बुद्ध्यादिकरणैर्ग्रा[illegible] सर्वमनवद्यम् । ननु तत्त्वमस्यादिवाक्यानां का गतिरिति चेच्छृणु । तत्त्वम्पदार्थयोरीश्वरप्रत्यगात्मनोर्गुणाः द्विविधाः प्रतिभासिकस्वाभाविकभेदात् । तत्र प्रतिभासिकाश्च मायातद्गुणतत्कार्यजन्मादिविकारसुखदुःखादयः । तत्रेश्वरजन्मादीनामाविर्भाव[illegible] दिव्यत्वादौपचारिकत्वं जीवे चाविद्यकत्वादनित्यत्वमत उभयत्रापीश्वरजीवयोरधर्मत्वेन 'नेह नानास्ति किञ्चन' इत्यादिनिषेधविषयत्वादसमन्विताः । स्वाभाविकाश्च सर्वज्ञत्वसर्वशक्तित्वस्वतन्त्रत्वसर्वनियन्तृत्वादयः ईश्वरासाधारणाः ।

'यः सर्वज्ञः सर्ववित् ।'

'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।' 'आत्मा हि परमः स्वतन्त्रोऽनिर्गुणः अन्तः प्रवि[illegible] शास्त् जनानाम् । एष सर्वेश्वर एव सर्वाधिपतिः ॥'

इत्यादिश्रुतयः ॥
(१-२-२) इत्यादिन्यायाच

'मत्त

इत्यादिस्मृतयश्च
भालवेप(य)श्रुतिः ।

'एषोऽणुरात्मा
'तद्गुणसारत्वात्०' (२-३-

'न हि द्रष्टुर्दृष्टेर्विपरि
विधत्तेऽविनाशित्वान्न हि वि

'यथोदया
तथा हेयगु
यथा न क्रि

इति स्मरणं च । सा

'सत्यं ज्ञानमनन्तं

तत्रोभयत्रासाधारणै
धर्मैश्चाभिन्नस्त्वमसीति वाक्य
प्रपञ्चितः । ननु जीवेश्वरयोरपि गु
मायाजन्यत्वं वा शशविषाण
जडत्वेन जनकत्वधर्मानधिकर
त्वयाऽङ्गीकार्य्यः । स चास्मा
'स्वाभाविकी ज्ञानबलक्रिया च

'तवाष्टगुणमैश्

तत्रैव चतुर्थांशे ब्रह्मवच

'कलामुहूर्तादिमयश्च क

तस्माद्धूमोष्णादीनामग्नि
कृतोऽग्नौ प्रतिभासेत । औष्मप्रक
सर्वज्ञत्वादयश्च स्वाभाविका इति
भद्रार्थं 'भवो भद्रे हरे प्राप्तौ' इ
तद्योगमोक्षसिद्धय इत्यर्थः । चक

एवं राजप्रश्नस्योत्तरं सङ्क्षे
रहस्यविद्या ब्राह्मी ब्रह्मनारायणादि
सः अकिञ्चनः निर्मलस्सन् क्षेमं भ

इत्यादिश्रुतयः ॥ 'अधिकन्तु भेदनिर्देशात् ।' (२-१-२२) भेदव्यपदेशाच्चान्यः (१-१-२२) विवक्षितगुणोपपत्तेश्च -२) इत्यादिन्यायाच्च —

'मत्तः परतरन्नान्यत् किञ्चिदस्ति धनञ्जय । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥'

इत्यादिस्मृतयश्च अल्पज्ञानपारतन्त्र्याल्पशक्तित्वाणुत्वादयो जीवासाधारणाः । 'जीवोऽल्पशक्तिरस्वतन्त्रोऽवर' इति (य)श्रुतिः ।

'एषोऽणुरात्मा चेतसा वेदितव्यः ।' 'बालाग्रशतभागस्य शतधा कल्पितस्य ।' इति श्रुतेः । सारत्वात्०' (२-३-२९) 'ज्ञोऽत एव' (२-३-२९) इत्यादिन्यायाच्च । स्वाभाविकत्वे च

'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विधत्ते विनाशित्वात् न हि श्रोतुः श्रुतेर्विपरिलोपो विधत्ते । अविनाशित्वान्न हि मन्तुर्मतेर्विपरिलोपो विनाशित्वान्न हि विज्ञातुर्विज्ञातोः' इत्याद्यारण्यकेऽभ्यासः प्रमाणम् —

'यथोदया नखनतात् क्रियते न जलान्तरम् । सदेव नीयते व्यक्तिमसतः सम्भवः कुतः ।
तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥
यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः । दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥'

इति स्मरणं च । साधारणाश्च सत्यज्ञानपापस्पर्शाभावादयः —

'सत्यं ज्ञानमनन्तं ब्रह्म । स आत्मा कतमः योऽयं विज्ञानमयः । य आत्मा अपहतपाप्मा' इत्यादिश्रुतेः ।

तत्रोभयत्रासाधारणैरुदाहृतैः सर्वज्ञत्वादिभिरल्पज्ञानपारतन्त्र्यादिधर्मैर्भिन्नत्वे सति उभयसाधारणैः सत्यज्ञानादि- भिन्नस्त्वमसीति वाक्यार्थः । सिद्धान्तजाह्नव्यां शारीरकमीमांसा चतुरध्यायीव्याख्यायां श्रीभगवद्भिदेवाचार्य्यपादैर्निपुणं । ननु जीवेश्वरयोरपि गुणानां मायिकत्वात्सर्वेषां निषेधविषयत्वमेव । तथा चोक्तसिद्धान्तसिद्धिरिति चेन्न । किं तावन्मायिकत्वं जन्यत्वं वा शशविषाणतुल्यत्वं वा स्वाभाविकानां सद्रूपाणामेवात्मद्वारा व्यक्तिकरणं वा ? नाद्यः । मायायाः जनकत्वधर्मानधिकरणत्वात् । नापि द्वितीयः । सर्वप्रमाणविरोधेन सर्वत्रातिप्रसङ्गात् परिशेषात् तृतीय एवाकामेनापि ङ्गीकार्य्यः । स चास्माकमिष्टापत्तिः आस्तां तावद्विकल्पप्रसङ्गोऽस्माकं तु वैदिकानां भगवत्याः श्रुतेः स्मृतेश्च प्रामाण्यं भाविकी ज्ञानबलक्रिया च ।' इत्यादिश्रुतयः स्मृतिश्च पञ्चमांशे कालियवाक्येन पराशरवचनम् —

'तवाष्टगुणमैश्वर्यं नाथ स्वाभाविकं परम् । निरस्तातिशयं यस्य तस्य तोष्यामि किन्त्वहम् ॥'

तत्रैव चतुर्थांशे ब्रह्मवचनम् —

'कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः ।' इत्यादि ।

तस्माद्धूमोष्णादीनामग्निगुणानामिव ब्रह्मगुणानामप्युभयप्रकारकत्वमविरुद्धम् । यथाग्नौ धूमो न तद्गुणः किन्तु काष्ठार्द्रत्वेन प्रतिभासेत । औष्मप्रकाशादयस्तु स्वाभाविकास्तस्यैव एवमेव मायागुणाः सत्त्वादयो ब्रह्मणि भासमानाः प्रातिभासिकाः श्च स्वाभाविका इति अत्रापि न विवादावकाशः । तत्र प्रयोजनमाह–आत्मने जीवाय । मात्रार्थं च विषयार्थं भवार्थं च 'भवो भद्रे हरे प्राप्तौ' इति प्रामाण्यात् कल्याणार्थमिति यावत् । कथम्भूताय जीवाय । कल्पनाय वासनायुक्ताय । सिद्धय इत्यर्थः । चकारो भोगमोक्षसाधनभूतावर्थधर्मौ समुच्चिनोति ॥२॥

एवं राजप्रश्नस्योत्तरं सङ्क्षेपतः कथितं विस्तरत उत्तरं दातुं ब्राह्म्यौपनिषदः माहात्म्यमाह–सेति । सैषा वर्ण्यमाना उपनिषत् ब्राह्मी ब्रह्मनारायणादिपदवाच्यभगवत्सम्बन्धिनी । का । या पूर्वेषां पूर्वजैः सनन्दनादिभिर्धृता । यस्तां श्रद्धया धारयेत् नः निर्मलस्सन् क्षेमं भगवद्भावा(प्ति)पत्तिलक्षणं मोक्षं गच्छेत् ॥३॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

सिद्धान्तमाह-बुद्धीन्द्रियेति। अत्र पूर्वकक्षवादी प्रष्टव्यः किं ब्रह्म श्रुतिसिद्धं श्रुतिद्वारा त्वया अवगतं विचार्यत्वेन निर्दिष्टं आहोस्वित् स्वबुद्ध्या परिकल्पितम् ? आद्ये प्रतिपाद्यत्वे न सन्देहः प्रकारश्चिन्तयिष्यते। द्वितीयपक्षस्त्वप्रामाणिकः सद्भिरुपेक्ष्यः ब्रह्म च यादृशं वेदान्तष्ववगतं तादृशमेव मन्तव्यम्। तत्र मूलभूतं सर्वव्यवहारातीतमपि स्वयमेव स्वशक्तिरूपेण स्वधर्मरूपेण स्वकार्यरूपेण च जातमिति श्रुतिः प्रतिपादयति, स्वयमेव च वक्ति। अतः सर्वस्यैव श्रुत्येकसमधिगम्यत्वात् सङ्केतश्चादूरविप्रकर्षे लोकधर्मसाम्येन वैदिकपरम्परयैव जायत इति सर्वस्यैव भगवद्भावस्य खण्डशः प्रतिपादकत्वात्सम्पूर्णवाक्यस्य तादृशं ब्रह्मणि ब्रह्मपरत्वं सेत्स्यति। स च वाक्यार्थः अपूर्वः। यथा लोके लौकिकबुद्धिविषयः तदभिप्रेप्सोर्ज्ञापकः। एवमीश्वरबुद्धिविषयः तद्वाक्यप्रतिपाद्यः तज्ज्ञानेच्छुं बोधयतीत्येवं निश्चित्य शुको भगवता कृतां चतुर्विधां सृष्टिं प्रतिपादयति, तत इन्द्रियाणि, ततो मनः ततः प्राणानिति। सर्वेषां जनानां करणचतुष्टयं जनयति जीवसम्बन्धित्वेन चतुष्टयमुत्पादयतीत्यर्थः। तत्र सामर्थ्यं प्रभुरिति। प्रत्येकं चतुर्णामुत्पादने प्रयोजनमाह। तत्र बुद्धेः प्रयोजनं मात्रार्थमिति। मीयन्ते त्रायन्त इति मात्राः ज्ञानक्रियोपयोगिनो विषयाः सर्वमेव जगत्। ते विशकलिताः शब्देनापि बोधिताः। पुरुषस्य ज्ञानकंरियाविषयोपयोगिनो न भविष्यन्तीति बुद्धिमुत्पादितवान्। स बुद्धिः सर्वानेव सङ्गृह्णाति। यथा चित्रे सर्वपदार्थस्फूर्तिः तथा बुद्धौ सर्वजगत्स्फूर्तिरिति। ततस्तया बुद्ध्या यत्किञ्चित् ज्ञेयं कार्यं वा तत्सर्वं कर्तुं शक्यत इति मात्रार्थबुद्धिनिर्माणम्। अनेन वेदानामपि खण्डशोऽर्थप्रतिपादकानां बुद्ध्या महावाक्यार्थज्ञानं भवतीति तात्पर्यतो ब्रह्मप्रतिपादकत्वं सेत्स्यति। चकारादग्रे यत्त्रयं प्रतिपाद्यं फलत्वेन तदर्थं च बुद्धेर्निर्माणं निरूपितम्। भगवद्भवाः सर्वे प्राणिनः बुद्ध्यैवोत्कर्षं प्राप्नुवन्ति। तथैवात्मने। बुद्ध्यैव भगवन्निष्ठाः आत्मनिष्ठाश्च भवन्ति। भगवत्सेवां च कुर्वन्ति। अकल्पनाय च। बुद्ध्यैव ज्ञाननिष्ठा भवन्ति। नानाविधपदार्थध्यानार्थं कल्पनामपि कुर्वन्ति। तस्मात्सर्वं यथा सेत्स्यति। सर्वा चानुपपत्तिः सर्वेषां परिहृता भवति तदर्थं बुद्धिमुत्पादितवान्। अनेनायं पूर्वपक्षोऽपि बुद्ध्यैव परिहर्तव्य इति सूचितम्। तथा भवार्थमुद्भवार्थं जन्मान्तरसिद्ध्यर्थं वा इन्द्रियाणि सूचयति। विषयास्तैरेव ज्ञायन्ते क्रियन्ते च इन्द्रियैरेव भगवत्सेवा भवति। इन्द्रियैरेव च नानाविधकल्पना भवति। मोक्षश्च योगादिद्वारा। तथा आत्मने। आत्मार्थं मनः सृजति। 'मनसैवानुद्रष्टव्यम्।' 'नेह नानास्ति किञ्चन।' इति श्रुतेः। इन्द्रियाणां च वृत्त्यर्थं मनसः सृष्टिः। प्राणानां प्रयोजनमाह-अकल्पनायेति। प्राणा हि कल्पनां दूरीकुर्वन्ति। सर्वमेकतामापादयन्ति। यदि प्राणा न भवेयुः तदान्नादिपरिणामप्रदर्शनेन सर्वस्यापि जगतः प्रलये एकताबुद्धिर्न स्यात् क्रियाशक्तिश्च तत एवेति सर्वत्र हेतुभूताश्च। अन्नेन प्राणाः प्राणैर्बलमित्यत्र प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानन्दो ब्रह्मयोनिरिति निरूपितम्। स क्रमोऽत्रापि ग्राह्यः। एवं सर्वोपयोगार्थं यतो भगवांश्चतुष्टयमुत्पादितवान्। अनेनैव सर्वानुपपत्तिः परिहर्तव्येति शुकहृदयम् ॥२॥

अयमर्थः स्वेनैव परिहित इति कदाचिच्छङ्का स्यात्, तत्परिहारार्थमाह-सैषा ह्युपनिषद्ब्राह्मीति। इयमुपनिषद् ब्रह्मविद्याप्रतिपादिका श्रुतिः ब्राह्मी ब्रह्मणैव प्रतिपादिता। अत्र प्रमाणं सा प्रसिद्धा। युक्तश्चायमर्थः, न ह्यन्य इममर्थं परब्रह्म निर्वक्तुं शक्नोति। उपनिषच्छब्देन च ब्रह्मविद्या निरूप्यते। उपोपसर्गः सामीप्ये तत्प्रतीति समाप्यते। त्रिविधस्य पदार्थस्य निःशब्दोऽपि विशेषणम् ॥ 'षद्लृ विशरणगत्यवसादनेषु' इति श्रुत्यनुशासनम्। जीवात्मानं परब्रह्ंमनयनार्थं पूर्वभावादिदोषं कृत्वा ततः सङ्घातात्केवलमुद्धृत्य ब्रह्म प्रापय्य तत्रैव समवसादयतीति। यथा सर्वोऽप्यंशः विशीर्णो भवति, यथा वा सर्वभावेन प्राप्नोति, यथा वा कदाचिदपि ततो न निवर्तते स निःशब्दार्थः। एतादृशी ब्रह्मविद्यैव भवति। तथाऽत्रापि सर्वानुपपत्तिपरिहारं कृत्वा वेदान् ब्रह्मप्रतिपादकान् कृत्वा ब्रह्मणि संयोज्य तत्रैव पर्यवसितान् करोतीति इदं वाक्यं तादृशार्थं प्रतिपादकत्वेनानुपपत्तिं परिहृत्य सिद्धान्तं स्थापयतीत्युपनिषत्प्रतिपादकत्वादुपनिषत्। तर्हि मदन्तःकरणस्थित इयमनुपपत्तिः कथं गच्छतीत्याकाङ्क्षायामाह-पूर्वे पूर्वजैर्धृतेति। धारणे सम्मतिः। एतादृशीं श्रद्धया यो धारयेत् स त्वकिञ्चनः सन् क्षेमं गच्छेत् सर्वसन्देहनिवृत्त्या भगवत् प्राप्नुयात्। अतः सर्वसन्देहा उपनिषदर्थविचारेणैव निराकर्तव्या इति सिद्धान्त उक्तः ॥३॥

"अध्यारोपापवादाभ्या
जनानामनुशायिनां जीवानां मं
तत्तल्लोकभोगार्थम् अकल्पनाय
युक्तम्। अकिञ्चनो देवाद्युपाध
मतिस्तर्केणापनीया'' इति श्रुतेः।

एवं पृष्टः शुक उत्तरम
असृजदित्यन्वयः। तथा च श्रुतयो
इति मात्रा रूपरसादयो विषयास्त
पुनर्जन्मार्थं चेत्यर्थः। आत्मने इति,
देवतिर्यङ्मनुष्यादिनानाविधदेहकल

अत्रानादिशिष्टपरम्परागतत
पूर्वेषां पूर्वजैः अतिवृद्धैः सनका
निरस्तदेहादिसमस्तोपाधिः सन्, य
प्राप्नुयादित्यर्थः ॥३॥

उत्तरयति-बुद्धीति। प्रभुः उ
जन्मप्रभृतिकर्मकरणार्थम् आत्मने अ
क्रमेणार्थः। जनानां बुद्धीन्द्रियमनःप्रा
अत्र मात्रार्थमित्यादिप्रयोजनचतुष्टयव
विशेषणमपि लभ्यते। तथा च प्रकर
विषयाद्यनुभवाय श्रुतितात्पर्यबोधाय ब्रह
तत्तच्छक्तिः स्फुटमनुमीयते। अन्यथा
श्रुतितदर्थश्रवणे इन्द्रियाणां श्रुतस्य मी
शक्तिरस्त्येव। तथा च श्रवणादिद्वारा श्रु
ब्रह्मबोधकत्वन्नासिद्धम् ॥२॥

तदेव स्फुटमाह-सैषेति। सा ए
भूता ब्रह्ममीमांसानिर्णेतृभिर्निर्णीतार्था वा
निरस्तदेहाद्यभिमानः सर्वतो विरक्तो वा स

"यः सर्वज्ञः सर्ववित्, यस्य ज्ञान
बहु स्याम्, तत्तेजो असृजत, सत्यं ज्ञानमन

इत्यादयः श्रुतयः सगुणं गुणैरनभि
भगवन्तं प्रायशः प्रतिपादयन्ति। तादृशं च

अवगतं विचार्यत्वेन निर्दिश्यते
स्त्वप्रामाणिकः सद्भिरुपेक्ष्यः।
स्वशक्तिरूपेण स्वधर्मरूपेण
म्यत्वात् सङ्केतश्चादूरविप्रकर्षेण
सम्पूर्णवाक्यस्य तादृशं ब्रह्मेति
र्पिकः । एवमीश्वरबुद्धिविषयः
ति, तत इन्द्रियाणि, ततो मनः,
। तत्र सामर्थ्यं प्रभुरिति। प्रत्येकं
क्रियोपयोगिनो विषयाः सर्वमेव
न्तीति बुद्धिमुत्पादितवान्। सा
बुद्ध्या यत्किञ्चित् ज्ञेयं कार्यं वा
द्ध्या महावाक्यार्थज्ञानं भवतीति
निरूपितम्। भगवद्भवः। सर्वे
त्सेवां च कुर्वन्ति। अकल्पनाय
था सेत्स्यति। सर्वा चानुपपत्तिः
सूचितम्। तथा भवार्थमुद्भवार्थं
वत्सेवा भवति । इन्द्रियैरेव च
सैवानुद्रष्टव्यम् ।' 'नेह नानास्ति
ल्पनायेति । प्राणा हि कल्पनां
जगतः प्रलये एकताबुद्धिर्न स्यात्
ज्ञानं विज्ञानादानन्दो ब्रह्मयोनिरिति
नैव सर्वानुपपत्तिः परिहर्तव्येति

ह्युपनिषद्ब्राह्मीति । इयमुपनिषत्
मर्थः, न ह्यन्य इममर्थं परब्रह्मणो
समाप्यते । त्रिविधस्य पदार्थस्य
परब्रहंमनयनार्थं पूर्वभावाद्विशीर्ण
र्णो भवति, यथा वा सर्वभावेन तं
थाऽत्रापि सर्वानुपपत्तिपरिहारं कृत्वा
र्थं प्रतिपादकत्वेनानुपपत्ति परिहृत्य
थं गच्छतीत्याकाङ्क्षायामाह-पूर्वेषां
च्छेत् सर्वसन्देहनिवृत्त्या भगवन्तं

सुबोधिनीसारः

"अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यन्ते" इत्यभिप्रायेणोत्तरमाह-मुनिः । बुद्धीन्द्रियमनः प्राणान् प्रभुरीश्वरोऽसृजत् नुशायिनां जीवानां मीयन्ते इति मात्रा विषयास्तदर्थं भवो जन्म लक्षणं कर्म तत्प्रभृति कर्मकरणार्थं च आत्मने कभोगार्थम् अकल्पनाय कल्पनानिवृत्तये मोक्षाय ॥२॥ सा एषा ब्राह्मी ब्रह्मपरम्परा उपनिषत् पूर्वेषां पूर्वजैर्धृताऽनादिः । हि म्। अकिञ्चनो देवाद्युपाध्यभिमानशून्यो यः श्रद्धया तां ब्राह्मीमुपनिषदं धारयेत् स क्षेमं गच्छेन्मुक्तः स्यात् । "नैषा तर्केणापनीया" इति श्रुतेः ॥३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं पृष्टः शुक उत्तरमाह-बुद्धीति । प्रभुः सर्वकरणसमर्थो भगवान् जनानां जीवानां मात्राद्यर्थं बुद्ध्यादीन् दित्यन्वयः। तथा च श्रुतयो जगज्जन्मादिकर्तृत्वेन प्रतिपादयन्तीत्यर्थः। "जन्माद्यस्य यत" इत्यादौ तथा प्रतीतेः। मीयन्ते मात्रा रूपरसादयो विषयास्तदर्थं तद्भोगार्थमित्यर्थः । भावार्थं चेति । भवो जन्म कायिकवाचनिकमानसिककर्मद्वारा पुनः न्मार्थं चेत्यर्थः। आत्मने इति, उपासनाद्वारा स्वर्गप्राप्त्यर्थमित्यर्थः। तत्प्राप्तिः किमर्थम्, इत्यपेक्षायामाह-अकल्पनाय चेति। देवमनुष्यादिनानाविधदेहकल्पनानिवृत्तये, संसारविमोक्षायेत्यर्थः ॥२॥

अत्रानादिशिष्टपरम्परागतत्वान्न सन्देहो युक्त इत्याह-सैषेति। सा एषा यथोक्तालम्बना ब्राह्मी ब्रह्मप्रतिपादिका उपनिषत् षां पूर्वजैः अतिवृद्धैः सनकादिभिर्धृता । इदानींतनोऽपि यस्तां श्रद्धया आदरेण श्रवणादिभिर्धारयेत् स अकिञ्चनः देहादिसमस्तोपाधिः सन्, यद्वा नास्ति किञ्चन प्रार्थनीयं यस्य तथाभूतः सर्वतो विरक्तः सन् क्षेमं गच्छेत् परं पदं प्नुयादित्यर्थः ॥३॥

अन्वितार्थप्रकाशिका

उत्तरयति-बुद्धीति। प्रभुः उपाधिपारवश्यरहितः सर्वशक्तिमांश्च भगवान् जनानां जीवानां मात्रार्थं विषयभोगार्थं भवार्थं प्रभृतिकर्मकरणार्थम् आत्मने आत्मनस्तत्तल्लोकभोगाय अकल्पनाय कल्पनावृत्तिरूपमोक्षाय च अर्थधर्मकाममोक्षार्थमिति र्थः। जनानां बुद्धीन्द्रियमनःप्राणान् असृजत्। नन्विदमुत्तरमाप्रसङ्ख्याप्रश्ने कोविदारगुणकथनतुल्यं भातीति चेत् सत्यम्। मात्रार्थमित्यादिप्रयोजनचतुष्टयकथनबलात् बुद्धीन्द्रियमनःप्राणानित्यस्य मात्राद्युपयोगियोग्यतारूपनानाशक्तियुक्तानिति मपि लभ्यते। तथा च प्रकरणबलादयमर्थः । यथा परमेश्वरः जीवानां चतुर्विधपुरुषार्थप्राप्तये आदौ श्रुतीरसृजत् तथा नुभवाय श्रुतितात्पर्यबोधाय ब्रह्मानुभवाय च तत्तद्योग्यताख्यशक्तियुक्तान्बुद्ध्यादीनसृजत्। तत्र रूपशब्दाद्यनुभवायेन्द्रियादिषु क्तिः स्फुटमनुमीयते । अन्यथा जन्मान्धबधिरादीनामिव रूपशब्दादयोऽपि ब्रह्मवदविषया एव स्युः । तथा प्रकृतेऽपि र्थश्रवणे इन्द्रियाणां श्रुतस्य मीमांसायां मनने मनसः तदर्थनिश्चये ब्रह्मानुभवे च बुद्धेः सर्वमूलभूतजीवने च प्राणानां क्त्येव। तथा च श्रवणादिद्वारा श्रुतितदर्थादि बुद्ध्वा मनसा सम्यङ्मीमांसित्वा बुद्ध्या जना ब्रह्मानुभवन्तीति। अतः श्रुतीनां वेधकत्वन्नासिद्धम् ॥२॥

तदेव स्फुटमाह-सैषेति। सा एषा प्रकृता ब्राह्मी उभयविधब्रह्मप्रतिपादिका उपनिषत् पूर्वेषां पूर्वजैः अतिवृद्धैः सनकादिभिः ब्रह्ममीमांसानिर्णेतृभिर्निर्णीतार्था वा । इदानींतनोऽपि यस्तां श्रद्धया आदरेण श्रवणमनननिदिध्यासनैर्धारयेत् सः अकिञ्चनः देहाद्यभिमानः सर्वतो विरक्तो वा सन्, क्षेमं मोक्षं गच्छेत्। श्रुत्युक्तं ब्रह्मानुभवेद्वा तत्रायं ब्रह्ममीमांसानिर्णीतोऽर्थः ।

"यः सर्वज्ञः सर्ववित्, यस्य ज्ञानमयं तपः, सर्वस्य वशी सर्वस्येशानः, यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः, सोऽकामयत स्याम्, तत्तेजो असृजत्, सत्यं ज्ञानमनन्तं ब्रह्म"

इत्यादयः श्रुतयः सगुणं गुणैरनभिभूतं सर्वज्ञं सर्वशक्ति सर्वेश्वरं सर्वनियन्तारं सर्वोपास्यं कर्मफलदं समस्तकल्याणगुणं प्रशः प्रतिपादयन्ति। तादृशं च ध्यानादिभिर्मनो विषयीकरोति। "विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतयस्तापिन्यादिश्रुतयश्च

मुख्यवृत्त्या वृत्तिज्ञानादिकं प्राकृतभक्तवात्सल्यादिगुणांश्च प्रतिपादयन्त्यो लक्षणया ज्ञानादिस्वरूपमप्राकृतस्वरूपभूतचिद्रूपगुणं ब्रह्म प्रतिपादयन्ति। तथाभूतेश्वरतां च संसारिणो जीवस्य तन्निवृत्तये तत्त्वमसीत्यादिवाक्यानि लक्षणया बोधयन्ति। अस्थूलादिवाक्यं तु साक्षादुपाधिनिषेधेन तत्पदार्थशोधनउपयोगान्निर्गुण एव पर्यवसानम्। 'न चासङ्गो ह्ययं पुरुषः' इति श्रुतेः। ब्रह्मणि केनचि सम्बन्धाभावात्कथं लक्षणापीति वाच्यम्। श्रुतेः संयोगसमवायादिसम्बन्धनिषेधपरत्वेनाध्यासिकसम्बन्धस्य सत्त्वात् तस्याप्यनङ्गीके सम्बन्धहीनस्य बुद्ध्यादिजगत्कर्तृत्वोपादानत्वाभावेन जगदभावापत्तेः। सत्यसम्बन्धाभावेऽप्याध्यासिकसम्बन्धमात्रेण लक्षणय श्रुतीनामद्वितीयब्रह्मबोधनयोग्यतायाः प्रभुणा सृष्टत्वात्। अत्र च प्रमाणम् 'तं त्वौपनिषदं पुरुषं पृच्छामि' इत्यादिना मुख्यवृ पराकृतत्वात्। श्रीकृष्णाख्यब्रह्मणि तु चक्षुरादिजन्यवृत्तिव्याप्यतापि 'विदितोऽसि भवान् साक्षात्, स एव यद्य दृग्विषये स्व स्थितः' इत्याद्युक्तेः। न च गुणकार्यप्राकृतरूपादिरहितकृष्णब्रह्मविषयकवृत्तिश्चक्षुरादिभिः कथं जन्यत इति वाच्यम्। चक्षुरादेस्तद्योग्यताया अपि भगवता सृष्टत्वात्। अकल्पनं श्रीकृष्णब्रह्म ज्ञापयितुं प्रभुश्चक्षुरादीन्द्रियाणि तद्योग्यतावन्त्यसृजदित्यस्याप्यर्थस्योहनीयत्वात्। अत्र च निर्गुणत्वदृग्विषयत्वबोधकवाक्यद्वयानुपपत्तेरेव मानत्वात्। एवं सति एव दृग्विषये स्वयं स्थितः।' इत्यादेः 'न संदृशे तिष्ठति रूपमस्य, पराञ्चि खानि व्यतृणत्' इत्यादिना तत्र तत्रातीन्द्रियत्वोक्त चेन्द्रियजन्यज्ञानागोचरत्वार्थकाधोक्षजत्वसमाख्यया च न विरोधः। उक्तविधे वृत्तिव्याप्यत्वे फलव्याप्यत्वाभावे च यथा तात्पर्यादिति दिक् ॥३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

राज्ञा यः प्रश्नः कृतस्तदुत्तरमाह ॥ बुद्धीन्द्रियमन इति ॥ बुद्धीन्द्रियमनःप्राणान् ॥ बुद्ध्यादिगुणान् ॥ यद्वा ॥ बुद्धि इन्द्रियाणि च मनश्च प्राणाश्च बुद्धीन्द्रियमनःप्राणास्ते विद्यन्ते येषु तान् देहान्। अत्रार्शआदिभ्योऽजित्यप्रत्ययः। जन सत्त्वादिगुणवतामनुशायिनां जीवानां मात्राद्यर्थं प्रभुरीश्वरः स्रष्टाऽसृजत् सृष्टवान् मात्रार्थं मीयन्त इति मात्राविषयाः कामा इति या तदर्थं भवार्थं भवो देवादिसजञ्जन्म तद्धेतुभूतं धर्मलक्षणं कर्म तत्करणार्थमित्यर्थः। आत्मने परमात्मप्राप्त्यथम् ॥ अयम्भावः—

जीवाः करणकलेवरैर्भक्तिं कृत्वा मां प्राप्नुवन्ति। बुद्ध्येति कल्पनाय अर्थसम्पादनसामर्थ्यायेत्यर्थः धर्मार्थकाममोक्षार्थमित्यक्रमेण पदचतुष्टयस्यार्थो बोद्धव्यः। भवार्थं कल्पनाय मात्रार्थम् आत्मन इत्येतैः पदैर्जीवा धर्मार्थकाममोक्षलक्षणपुरुषार्थचतुष्टयप्राप्तिरुक्ता। सैव करणकलेवरप्रदानस्य प्रयोजनमिति भावः। अत्रैवमुत्तराशयः। परमकृपा स्वस्वगुणकर्मानुसारेण प्रापितकरणकलेवराः क्षेत्रज्ञाः स्वत एव पुरुषार्थचतुष्टयस्य ज्ञाने प्राप्तौ चासमर्था अत एव कथं चतु सगुणनिर्गुणदेवतोपासनेन तत्प्राप्तिं च बोधयन्ति। त्रिवर्गस्वरूपबोधनात्। सगुणदेवतोपासननिरूपणाच्च न वेदाः केवलं गुण अपि तु स्वदृष्टस्वकृतनिर्गुणभगवत्प्रतिपादनपरा अत एव निर्गुणास्तस्मिन् प्रवर्तन्ते इति न कश्चित्संशयाव एवमुत्तराशयनिष्कासनात्ते(नावे) कर्णे पृष्टे कटिं चालयतीतिवत्। अथ च केनचिदुक्तं क्व गच्छसीति तत्रोत्तरं दध्य वत्प्रश्नोत्तरासङ्गतिः स्यादतः प्रश्नाशयः पूर्वसूचितः सर्वोऽपि समञ्जस एव ॥२॥

सैषेति। सा ब्रह्मनिलयस्थपरब्रह्मान्तिकस्थवेदकृतस्तुतिरूपा एषा ॥ नारदनारायणसंवादरूपा ॥ बृहत्त्वगुणयोगिपरब्रह्मसम्बन्धिनी ॥ उपनिषत् सिद्धान्तवाणी ॥ उपनिषीदति सम्यग्बोधयतीत्युपनिषदिति व्युत्पत्तेः ॥ पूर्वेषां व्याख पूर्वजैर्नारदसनकादिभिः धृता श्रवणादिभिः साक्षात्कृता भगवत्स्वरूपनिरूपणस्य रीतिः सम्यग् ॥ ज्ञातेति यावत् ॥ धारणमाहात्म्यमाह ॥ श्रद्धयेति ॥ यः पुमान् श्रद्धया विश्वासपूर्वकत्वरया तां स्तुतिं धारयेदवधारयेत्स पुमान् अकिञ्चनः किञ्चन यस्य सः। मयूरव्यंसकादयश्चेति तत्पुरुषः। वासनारहितः सन् क्षेमं परमपदं गच्छेत् प्राप्नुयात् ॥३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अत्रानेन "जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि", "नामरूपयोनिर्वहिता ते यदन्तरा तद्ब्रह्म" "सर्वाणि विचिन्त्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते", "तत् सृष्ट्वा तदेवानुप्रविश्य सच्च त्यच्चाऽभवत्" इत्याद्याः

स्वपर्यन्तनामरूपव्याकरणे
बहुशो जगत्सर्गप्रकारवर्णन
निर्वाहक इति यावत्। जना
भवितुं बुद्ध्यादिशब्दो
सदसच्छब्दवाच्यचिदचि
परमात्मशरीरकैकस्वाभा
श्रीभाष्यवेदार्थसङ्ग्रहतद्व्याख
किं प्रयोजनमत आह मा
स्वाराधनोपयुक्तकरणकलेवर
गर्भजन्मजरामरणाद्यनेकदुःखा
च आराधयितृभ्यो निःश्रेय
त्रैवर्गिकरूपश्रेयःप्रदानार्थम्, अ
इत्यर्थः। यद्वा। प्रलयावस्थाय
देवमनुष्यादिकल्पनं भेदस्तद
परिपूर्णस्यापि क्रीडनार्थं जगव्द
चिज्जडशरीरकं प्रभुं सगुणनि
व्याख्यानाभावे कर्णे पृष्टे कटिं

नन्वेवं सर्वशब्दानां ब्र
ब्रह्मणि मुख्यवृत्तिः साध्यते इ
मुख्यतया वर्तमानाऽभिधा वृत्ति
अनधीतवेदान्तशास्त्राणां तत्तदर्थ
हि। एषा, पूर्वेषां पूर्वजैः सर्वेषा
सर्वान्तरात्मत्वं तच्छरीरकत्वं शरीरव
मनुसूर्यादीन् "अहं मनुरहं सूर्यश्च
मयि सर्वं सनातन" इति निर्दिशन्
इति भावः। इत्थं गृह्यमाणाया व्यु
नास्ति किञ्चन प्रार्थनीयं यस्य तथा

एवं पृष्टः शुकः उत्तरमाह-
च प्रतिपादकानां श्रुतीनां भगवत्प्र
प्राकृतौपाधिकगुणराहित्यपरत्वं च
प्रत्युत्तरं सम्यगुक्तंभवतीति तात्पर्येण
इति प्रभुः सर्वकारणसमर्थो भगवान्
भूतानि जायन्ते।" इत्यादिश्रुतयः
भावः। "जन्माद्यस्य यतः।" इति

र्यन्तनामरूपव्याकरणेन तत्तच्चिदचिद्वस्तुशरीरकतया तत्तच्छब्दवाच्योऽभूदिति प्रतिपादयन्त्यः परिहारमाहुरित्यभिप्रेत्य तत्र तत्र जगत्सर्गप्रकारवर्णनयैव प्रकृतप्रश्नस्योत्तरमुक्तप्रायमिति चाभिप्रेत्य केवलं सृष्टिमात्रं स्मारयति ॥ बुद्धीन्द्रियेति ॥ प्रभुरध्यक्षो नियामक इति यावत्। जनानां जीवानां, बुद्धीन्द्रियमनःप्राणान्, असृजत्। अस्यायमभिप्रायः। स्वयमन्तरात्मना नामरूपनिर्वाहको भवितुं बुद्ध्यादिशब्दोपलक्षीतसमष्टिपरम्परया महाभूतपर्यन्तमात्मानं तच्चरीरकं परिणमय्य तन्मयः। पुनः तत्तच्छब्दवाच्यचिदचिन्मिश्रदेवादस्स्थावरान्तजगद्रूपस्तच्छब्दवाच्यश्चाभवदिति। एवं सर्वेषां चिदचित्पदार्थानां परमात्मशरीरकैकस्वाभाव्यात् गवादिशब्दानां गोत्वादिकं प्रवृत्तिनिमित्तीकृत्य परमात्माभिधानं मुख्यमेवेति विस्तरः श्रीभाष्यवेदार्थसङ्ग्रहतद्व्याख्यादिभ्योऽवगन्तव्यः। परमकारुणिकस्यावाप्तसमस्तकामस्य स्वपरप्रयोजननिरपेक्षस्य ब्रह्मणो जगत्सर्गेण किं प्रयोजनमत आह मात्रार्थमिति। मीयन्ते इति मात्रा देहास्तदर्थं च, मायोदरानादिकालपतितासत्प्रायजीवानां आराधनोपयुक्तकरणकलेवरादिप्रदानेनोज्जीवनार्थं जगत्सर्गे प्रवृत्तिः परानुजिघृक्षया परिपूर्णस्यापि सङ्गतैवेति भावः। अत एव जन्मजरामरणाद्यनेकदुःखावहजगत्सर्गप्रयुक्तनैर्घृण्यशङ्कापि निरस्ता ॥ दुःखस्य तत्तज्जीवानादिकर्मप्रयुक्तत्वात्। भवार्थमभ्युदयार्थं, आराधयितृभ्यो निःश्रेयसरूपाभ्युदयप्रदानार्थमित्यर्थः। अनेन देहोत्पादनस्यापि प्रयोजनमुक्तम्। यद्वा। भवार्थं स्वर्गकरूपश्रेयःप्रदानार्थम्, आत्मने अकल्पनायेति च तादर्थ्यचतुर्थ्यन्तम्। आत्मने अध्यात्मज्ञानार्थं, मुक्तिसाधनीभूतोपासननिष्पत्तये इत्यर्थः। यद्वा। प्रलयावस्थायामसत्प्रायाणां जीवानां परमात्मशेषशेषीभावेनात्मसत्तालाभार्थम्, अकल्पनाय ज्ञानैकाकारेष्वात्मसु देवमनुष्यादिकल्पनं भेदस्तदभावाय, उपायानुष्ठानेन भेदनिवृत्तिपूर्वकं मुक्तमित्यर्थः। कल्पनायेति च्छेदे कल्पनं क्रीडनं तस्मै, परिपूर्णस्यापि क्रीडनार्थं जगव्द्यापार इत्यर्थः। अनेन वेदाः पूर्वकल्पेक्षितजगत्सर्गादिकं स्मृत्वा सर्गकाले प्रवृत्तिनिमित्तानि सम्प्राप्य चिज्जडशरीरकं प्रभुं सगुणनिर्गुणभावेन वर्णयन्तश्चरन्तीति सूचितमेतदेव "स्वसृष्टमिदमापीय" इत्यनेन दर्शयिष्यति। इत्थं व्याख्यानाभावे कर्णे पृष्टे कटिं चालयतीतिवत् प्रश्नोत्तरासङ्गतिः स्यात् ॥२॥

नन्वेवं सर्वशब्दानां ब्रह्मणि मुख्यवृत्तिर्न लौकिकैर्गृहीतास्त्यपि तु तत्तदर्थेष्वेव, तत् कथं सार्वजनीनव्युत्पत्तिर्भागभञ्जनेन ब्रह्मणि मुख्यवृत्तिः साध्यते इत्यत आह ॥ सैषेति ॥ सा एषा, उक्तप्रकारेणोपपादितेयमित्यर्थः। ब्राह्मी सर्वशब्दानां ब्रह्मणि मुख्यतया वर्तमानाऽभिधा वृत्तिः, उपनिषत् उपनिषद्रहस्यरूपा, अस्ति। उपनिषदर्थविचारेणावगन्तव्या भवतीति भावः। अनधीतवेदान्तशास्त्राणां तत्तदर्थमात्रपर्यवसितव्युत्पत्त्यवबोधवत्त्वेऽप्यधिगतवेदान्तार्थतदनुष्ठाननिष्ठैर्ब्रह्मण्येव वृत्पत्तिर्गृहीता। तथा हि। एषा, पूर्वेषां पूर्वजैः सर्वेषामपि पूर्वजैर्वामदेवादिभिः, धृता निश्चितास्तीति यावत्। वामदेवप्रह्लादादयो हि परस्य ब्रह्मणः सर्वान्तरात्मत्वं तच्छरीरकत्वं शरीरवाचिनां शब्दानां शरीरिणि पर्यवसानं च पश्यन्तः स्वात्मशरीरकं परं ब्रह्म निर्दिश्य तत्सामानाधिकरण्येन मनुसूर्यादीन् "अहं मनुरहं सूर्यश्च कक्षीवानृषिरस्मि विप्रः" इति "सर्वगत्वादनन्तस्य स एवाहमवस्थितः" "मत्तः सर्वमिदं सर्वं मयि सर्वं सनातन" इति निर्दिशन्तः सर्वशब्दान् परमात्मपर्यन्तान् प्रदर्शयन्तः सर्वशब्दानां परमात्मन्येव व्युत्पत्तिमध्यवसितवन्त इति भावः। इत्थं गृह्यमाणाया व्युत्पत्तेः फलमाह। श्रद्धयेति। तामुक्तविधां व्युत्पत्तिं, यः पुमान्, श्रद्धया धारयेत्, सः अकिञ्चनः नास्ति किञ्चन प्रार्थनीयं यस्य तथाविधः सन्, क्षेमं मुक्तिं, गच्छेत् प्राप्नोति ॥३॥

योगिरामानुजाचार्यकृतसरला व्याख्या

एवं पृष्टः शुकः उत्तरमाह- भगवतः जगज्जन्मादिकारणत्वे निरूपिते ब्रह्मणः जगत्कारणत्वस्य तदुपयुक्तज्ञानशक्त्यादिगुणानां च प्रतिपादकानां श्रुतीनां भगवत्प्रतिपादकत्वप्रकारं भगवतश्च तादृशश्रुतिप्रतिपादितकल्याणगुणाकरत्वं निर्गुणशब्दस्य च प्राकृतौपाधिकगुणराहित्यपरत्वं च अर्थात्प्रतिपादितं भवति। ततश्च निर्गुणे ब्रह्मणि गुणवृत्तयः श्रुतयः कथं चरन्तीति प्रश्नस्य उत्तरं सम्यगुक्तंभवतीति तात्पर्येण ब्रह्मणः जगत्कारणत्वप्रतिपादकं श्लोकमवतारयति- बुद्धीति। प्रभवति समर्थो भवति सर्वकार्येषु इति प्रभुः सर्वकारणसमर्थो भगवान् जनानां चेतनानां बुद्धीन्द्रियमनःप्राणान् असृजत् सृष्टवान्। एतद्विशेषेण च "यतो वा इमानि भूतानि जायन्ते।" इत्यादिश्रुतयः जगज्जन्मादिकारणत्वादि गुणविशिष्टत्वरूपेण ब्रह्म प्रतिपादयन्तीति प्रत्युत्तरं सुसङ्गतमिति भावः। "जन्माद्यस्य यतः।" इति सूत्रे च तथा गुणविशिष्टत्वेव ब्रह्मणः निरूपितत्वात् किमर्थमसृजदित्यत आह- मात्रेति।

मीयन्त इति मात्राः। शब्दादयो विषयाः तदर्थं तद्भोगार्थमित्यर्थः। भवार्थं च भवः वारं वारं देवमनुष्यादिशरीरप्राप्तिरूपं जन तदर्थमित्यर्थः। बुद्धीन्द्रियादिसम्प्राप्त्या कर्मोत्पत्तिः तादृशकर्मणा च तत्तत्कर्मानुगुणशरीरप्राप्तिरिति भावः —

''शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः। गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥''

इति वचनात्। प्रयोजनान्तरमाह-आत्मन इति। आत्मने सर्वान्तरात्मभूतभगवदर्थं तदाराधनार्थमिति यावत्। भगवदाराधनार्थमेव करणकलेवरदानमिति भावः:-

''विचित्रा देहसम्पत्तिरीश्वराय निवेदितुम्। पूर्वमेव कृता ब्रह्मन् हस्तपादादिसंयुता॥''

इत्यादिवचनात्। यद्वा। आत्मने भगवदर्थं तल्लीलार्थं करणकलेवरादिसृष्टेः भगवल्लीलार्थत्वात् ''लोकवत्तु लीलाकैवल्यम्।'' इत्यादिसूत्रादिषु तथा निरूपितत्वात् अकल्पनाय देवमनुष्यादिनानाविधदेहकल्पनानिवृत्तये संसारविमोक्षणायेति यावत्। अथवा न कल्पना अकल्पना अकार्यं नित्यमित्यर्थः। मोक्षमिति यावत्। तत्पदप्रापणायेत्यर्थः। ''नास्त्यकृतः कृतेन'' इति श्रुतेः। एतेन अर्थपञ्चकमप्युक्तं भवति। असृज्यत्प्रभुरित्युक्ते सिद्धोपायस्य प्राप्यस्वरूपस्य च भगवतः स्वरूपमुक्तं भवति। जनानामित्यनेन प्राप्तुः प्रत्यगात्मनः स्वरूपमुक्तं भवति। आत्मने इत्यनेन भगवत्सेवार्थमित्यर्थकत्वात् साध्यभूतमोक्षोपायस्वरूपमुक्तं भवति। ''मन्मना भव मद्भक्तो, मदर्थमपि कर्माणि कुर्वन्नाप्नोति किल्बिषमि''त्यादिवचनात् अकल्पनायेत्यनेन मोक्षरूपफलस्वरूपमुक्तं भवति। 'मात्रार्थं च भवार्थं चे'त्यनेन मोक्षप्रतिबन्धकमायासंसर्गरूपविरोधिस्वरूपमुक्तं भवति। तथा च —

''प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः। प्राप्त्युपायफलं प्राप्तेस्तथा प्राप्तिविरोधि च॥''

इति वचनमत्रानुसन्धेयम्॥

प्रभुर्जनानाम् मात्रार्थं च भवार्थं च आत्मने अकल्पनाय च बुद्धीन्द्रियमनःप्राणानसृजत् इत्यन्वयः॥२॥

भगवत्स्वरूपाद्यर्थपञ्चकप्रतिपादनेनास्य श्लोकस्य अर्थपञ्चकप्रतिपादकोपनिषत्समानार्थकत्वेनोपनिषद्रूपत्वं प्रमाणतमत्वं महत्परिगृहीतत्वं च प्रतिपादयितुमुत्तरश्लोकमवतारयति। अनादिशिष्टपरम्परागतत्वादत्र न सन्देहो युक्त इत्याह-सैषेति। सा एषा यथोक्तालम्बना ब्राह्मी ब्रह्मप्रतिपादिका उपनिषत् तत्समानार्थकत्वात्तद्रूपा पूर्वेषां पूर्वजैरतिवृद्धैस्सनकादिभिः धृता अभ्यासेन धृता। यो धीमान् तामुपनिषदं श्रद्धया आदरेण श्रवणादिभिः धारयेत् सः अकिञ्चनस्सन् देहादिसर्वोपाधिरहितस्सन् क्षेममकुतोभयं परमपदं गच्छेत्। सैषा उपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता हि यः श्रद्धया धारयेत् सः अकिञ्चनस्सन् क्षेमं गच्छेत् इत्यन्वयः॥३॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

अनुशायिनां सवासनानां विषयाः द्रव्याणि अर्था इति यावत्। अयमभिप्राय इत्यारभ्य ब्रह्मेत्याद्या इत्येतत्पर्यन्ता टीका बुद्धीत्यारभ्यात्मनः इत्येतत्पर्य्यन्तं तस्य मूलस्याभिप्रायसूचिकाऽवशिष्टा चाऽकल्पनाय चेत्यस्येति ज्ञेयम्। तत्र यः सामान्येन सर्वज्ञः विशेषेणापि सर्वविदिति सर्वज्ञत्वे प्रमाणम्। तथा यस्य ज्ञानमयं तप इच्छाप्रधानमैश्वर्यमिति सर्वशक्तित्वे तथा सर्वस्य वशी इत्यपि तत्रैव। यद्वा। य उक्तलक्षणोऽक्षरः सर्वज्ञ इति सर्वज्ञत्वे सर्वं विन्दति प्राप्नोतीति सर्वशक्तित्वे यस्य ज्ञानमयं तप ऐश्वर्यम् इति सर्वेश्वरत्वे सर्वस्य वशी सर्वनियन्तेति। सर्वनियन्तृत्वे सर्वस्येशान इति सर्वोपास्यत्वे सर्वकर्मफलदातृत्वे च सर्वनियन्तृत्वादौ हेतुः। यः पृथिव्यामित्यादिकं पृथिव्याद्यन्तर्य्यामित्वप्रतिपादकं वचनमेव। सोऽकामयत इत्यादि सत्यसङ्कल्पत्वपरोपकारार्थ-सृष्ट्यादिकर्तृत्वादिगुणवत्त्वे। सत्यं ज्ञानमित्यादि तु सर्वज्ञानदत्वे तत्त्वमस्यादिवाक्यस्य निर्गुणे पर्यवसानं बोधयितुमारभते-तथाभूतेति। सर्वज्ञत्वादिगुणविशिष्टेश्वरत्वम्। तन्निवृत्तये संसारनिवृत्तये तत्र च तत्त्वमसीति वाक्ये सामानाधिकरण्यं भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तित्वम्। वैश्वदेव्यामिक्षेत्यत्र द्वयोः पादयोरेवैकार्थाभिधाने सामानाधिकरण्यम्। न तु घटः पृथ्वीतिवदर्थयोरपि तत्राभिज्ञोक्तिं प्रमाणयति-यथोक्तमिति। एष तद्धित एवाण् प्रत्ययः आमिक्षां देवतायुक्तां वदति देवतार्थकत्वात्। तदुक्तं तैरेव —

''तद्धितेन चतु
इत्यत्र विश्वेदेवप्रतिपा
वैश्वदेवीपदसविधेऽव्यव
विहितोद्देश्यस्यार्पणं दा
दध्यानयति। सा वैश्वदेव्य
यागो विधेयः। द्रवद्रव्ये
एकार्थत्वादेव। न तथा तत्त
नीलगुणरूपं यस्यां तया
नीलगुणान्वयस्योत्पलेऽनु
अनादिपरम्परासिद्धया।
सामानाधिकरण्यमित्यनुष
पूर्वार्धम्। अयमर्थः-स्वरू
भवति। विशेषणं तु तदेव
विशेष्य एव तस्य स्थि
तदाश्रयत्वमविरुद्धस्वभावम्
नीलगुणोत्पलद्रव्ययोः न त
तदयोगादजहत्स्वार्थलक्ष
गङ्गासम्बन्धितटमितिवदङ्गीव
सिद्धान्तमाह-अत इति।
स्यैतद्देशकालविशिष्टवाच
तद्देशकालैतद्देशकालविरुद्धवि
तत्त्वम्पदयोर्विरुद्धांशो यः सर्वज्ञ
गृहीत्वा ऐकार्थ्येनाखण्डैकत्व
निर्गुणे पर्यवसानम् अस्थूलेऽपि
साक्षादुपाधिनिषेधेनेऽत्यन्तमक
तात्पर्यग्रहणमाह-अन्ते
सृष्ट्यादिवाक्यकर्मकाण्डस्थ
क्रियापेक्षिता। तदर्थं प्रवृत्तं यत्सृ
तत्परत्वम्। अन्यार्थेति पाठे अप

अत्र चेति। सर्वासामपि
बुद्धीन्द्रियेत्यादिश्लोकरूपा। निर्
वितण्डा स्वपक्षस्थापनहीना ताम

उत्तरमाह-बुद्धीन्द्रियेति
तथा भवार्थम्। भवो जन्मलक्ष

दशरीरप्राप्तिरूपं जन्म

—

॥''

धनार्थमिति यावत्।

''

ार्थत्वात् ''लोकवत्तु
नये संसारविमोक्षणायेति
''नास्त्यकृतः कृतेन।''
तः स्वरूपमुक्तं भवति।
भूतमोक्षोपायस्वरूपमुक्तं
ात् अकल्पनायेत्यनेन
धिस्वरूपमुक्तं भवति।

च ॥''

त्यन्वयः ॥२॥
नोपनिषद्रूपत्वं प्रमाणतमत्वं
ऽ इत्याह-सैषेति। सा एषा
कादिभिः धृता अभ्यासेन
धिरहितस्सन् क्षेममकुतोभयं
गच्छेत् इत्यन्वयः ॥३॥

त्याद्या इत्येतत्पर्यन्ता टीका
ति ज्ञेयम्। तत्र यः सामान्येन
ति सर्वशक्तित्वे तथा सर्वस्य
र्वशक्तित्वे यस्य ज्ञानमयं तप
यत्वे सर्वकर्मफलदातृत्वे च
कामयत इत्यादि सत्यसङ्कल्प-
दिवाक्यस्य निर्गुणे पर्यवसानं
तत्र च तत्त्वमसीति वाक्ये
द्वयोः पादयोरेवैकार्थाभिधानेन
एष तद्धित एवाण् प्रत्ययः।

''तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः। देवताया विधिस्तत्र दुर्बलं तु परं परम् ॥'' इति। ननु विश्वेदेवा देवताः यस्या तत्र विश्वेदेवप्रतिपादिकाः(ऋगा)दिरपि कुतो न प्रतीयते, इत्याशङ्कायामाह-आमिक्षापदसान्निध्यादिति। श्रुतौ देवीपदसविधेऽव्यवधानेनामिक्षापदस्य श्रुतत्वात्तस्यैव तद्धितान्तवैश्वदेवीपदस्यैव सम्बन्धे समीपस्थामिक्षापदेनामिक्षारूपविषयस्य विहितोद्देश्यस्यार्पणं दानं क्रियते। न तु तत्स्तुतिपराया ऋचः विश्वेदेवा एवामिक्षामुद्दिश्य विधीयन्त इत्यर्थः। तप्ते पयसि ध्यानयति। सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रुतिस्थवाजिशब्दस्य द्रवद्रव्यवाचकत्वं तथा चामिक्षया विश्वेदेवादेवताको गो विधेयः। द्रवद्रव्येण तु वाजिदेवतोको यागो विधेय इत्यर्थः। एवं च यथा वैश्वदेवीपदामिक्षापदयोस्सामानाधिकरण्यम् कार्थत्वादेव। न तथा तत्त्वम्पदयोः परोक्षापरोक्षार्थकत्वेन भिन्नार्थत्वात् अजहत्स्वार्थया। न जहत्स्ववाचकनीलपदं न कर्तृत्यजत्स्वार्थं नीलगुणरूपं यस्यां तया। यथा प्रवाहरूपं स्वार्थं गङ्गापदं हित्वा लक्षणया तटरूपमर्थं द्योतयति अन्वयानुपपत्तेरेव न तथात्र नीलगुणान्वयस्योत्पलेऽनुपपत्तिः। किन्तु गुणद्रव्ययोरभेदस्यैवानुपपत्त्या निरूढलक्षणया। नितरां रूढा चासौ लक्षणा च तया। अनादिपरम्परासिद्धया। न साम्प्रतं रचितयेत्यर्थः। नीलाभिन्नमुत्पलमिति विशेषणविशेष्यभावेन नीलमुत्पलमितिवन्न सामानाधिकरण्यमित्यनुषज्यते। वैधर्म्ये दृष्टान्तः-स्वरूपसत्त्वमात्रेण न हि किञ्चिद्विशेषणमिति हि स्वबुद्ध्येत्यस्य वार्तिकस्य र्थम्। अयमर्थः-स्वरूपसत्त्वमात्रेण स्वस्थितिमात्रेण किञ्चिदपि विशेषणं न भवत्येवापि तु विशेष्यमेव स्वस्थितिमात्रेण वति। विशेषणं तु तदेव, येन नीलादिना स्वबुद्ध्या स्वाकारज्ञानेन विशेष्यमुत्पलादि रज्यते भास्यते इतरस्माद्व्यावर्त्यते इति शेष्य एव तस्य स्थितिर्न तु स्वस्वरूपे विरुद्धार्थत्वेनेति। यथा नीलगुणस्योत्पलाश्रितत्वम् उत्पलद्रव्यस्य च श्रयत्वमविरुद्धस्वभावम्। अतःस्वार्थनीलगुणमपरित्यज्यैव अजहत्स्वार्थनिरूढलक्षणया विशेषणविशेष्यभावेन सामानाधिकरण्यं नीलगुणोत्पलद्रव्ययोः न तथा तत्त्वंपदयोःपरोक्षापरोक्षत्वादि विरुद्धार्थत्वेन स्वार्थत्यागमन्तरा विशेषणविशेष्यभावानुपपत्त्या त्यागादजहत्स्वार्थलक्षणया सामानाधिकरणासम्भवादिति निष्कर्षः। गङ्गेयं तट इत्यत्र जहत्स्वार्थलक्षणया सम्बन्धितटमितिवदङ्गीकारे तत्सम्बन्धित्वमित्यर्थकरणे विवक्षितं जीवेश्वरयोरैक्यं न सिद्ध्येत्। एवं प्रकारान्तराणि दूषयित्वा सिद्धान्तमाह-अत इति। प्रकारान्तराणामघटितत्वात् सोऽयं देवदत्त इत्यत्र तद्देशकालविशिष्टदेवदत्तदेहवाचकतच्छब्द-तद्देशकालविशिष्टवाचके दंशब्दस्य च सामानाधिकरण्यरूपमुख्यार्थबाधे भागलक्षणा विधेया। तथा च शकालैतद्देशकालविरुद्धविशेषणभागत्यागेनानुगताऽविरुद्धदेहरूपविशेष्यांशमात्रग्रहणेनैक्यबोधनाद्यथासामानाधिकरण्यं तथा म्पदयोर्विरुद्धांशो यः सर्वज्ञत्वकिञ्चिज्ज्ञत्वपरोक्षत्वापरोक्षत्वादिरूपो विशेषणभागस्त्यागे नानुगतमविरुद्धं यच्चैतन्यमात्रं तत्पदद्वयेन ऐकार्थ्येनाखण्डैकत्वबोधनेन यत्सामानाधिकरण्यम् अपर्यायरूपयोस्तत्त्वम्पदयोरेकविभक्त्यन्तत्वरूपम्। तेन लक्षणया पर्यवसानम् अस्थूलेऽपि। 'अस्थूलमनण्वह्रस्वमदीर्घमशब्दमस्पर्शमरूपमव्ययम्' इत्यादिवाक्यानां तथाभूतेश्वरतामित्यारभ्य पाधिनिषेधेनेऽत्यन्तमकल्पनायेत्यस्याभिप्रायः। सामानाधिकरण्येन निषेधावधित्वेन चोपाधिपरित्यागात्। लक्षणायां ग्रहणमाह-अन्ते चेत्यादि। उपासनादीति मात्रार्थं चेत्यादिपदत्रयस्याभिप्रायः। आदिशब्देन दिवाक्यकर्मकाण्डस्थाग्निहोत्रादिवाक्यग्रहः। क्रियार्थेति सृष्टिमन्तरा यज्ञादिक्रियासम्भवात् चित्तशोधनार्थं हि पेक्षिता। तदर्थं प्रवृत्तं यत्सृष्ट्याद्याश्रयणम्। तेन यत्परम्परया ज्ञानसाधनविधानम्। तेन उद्गीथदहरवैश्वानराद्युपासनादिवाक्यानां त्वम्। अन्यार्थेति पाठे अपवादार्थेत्यर्थः। एवं सर्वस्यापि वेदस्य ब्रह्मपरत्वं सिद्धम् ॥२॥

अत्र चेति। सर्वासामपि श्रुतीनां पूर्वरीत्या ब्रह्मणि पर्यवसानलक्षणे उत्तरे वेदप्रामाण्याभ्युपगन्तृत्वं शिष्टत्वम्। सैषा प्रसिद्धा त्यादिश्लोकरूपा। निर्गुणे पर्यवसानं यथा स्यात्तथा। सगुणालम्बनेत्यर्थः। ब्रह्मपरा। उपाधिनिरसनद्वारा ब्रह्मप्रतिपादनपरा स्वपक्षस्थापनहीना तामर्हन्तीति वैतण्डिकाः तार्किकादयस्तेषां ये तर्काः कुयुक्तयः तदाग्रहराहित्येन ॥३॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

उत्तरमाह-बुद्धीन्द्रियेति। प्रभुरीश्वरः जनानां जीवानां बुद्ध्यादीन् मात्रार्थमसृजत्। मीयन्ते इति मात्राः। विषयभोगार्थं र्थम्। भवो जन्मलक्षणं कर्म तदर्थम् जन्मप्रभृति कर्मकरणार्थमित्यर्थः। आत्मने लोकान्तरगामिने तत्तल्लोक-

भोगार्थमित्यर्थः । तत्क्रमः अकल्पनाय । कल्पना माया । तन्निवृत्तये मोक्षायेत्यर्थः । अर्थधर्मकाममोक्षा(या)र्थमसृजदिति क्रमे पदचतुष्टयस्यार्थः । अत्र स्वामिचरणाः जनानामिति वदन् जीवार्थमीश्वरस्य सृष्ट्यादिषु प्रवृत्तिरिति दर्शयति प्रभुरितीश्वरस्योपाधिवश्यताभावेन नित्यमुक्ततां दर्शयति । अयमभिप्रायः । सगुणमेव गुणैरनभिभूतं सर्वज्ञं सर्वज्ञं सर्वशक्ति सर्वेश्वरं सर्वनियन्तारं सर्वोपास्यं सर्वकर्मफलप्रदातारं समस्तकल्याणगुणनिलयं सच्चिदानन्दं भगवन्तं श्रुतयः प्रतिपादयन्ति-

"यः सर्वज्ञः सर्ववित् । यस्य ज्ञानमयं तपः । सर्वस्य वशी सर्वस्येशानः । यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः सोऽकामयत । बहु स्याम् । स ऐक्षत । तत्तेजोऽसृजत । सत्यं ज्ञानमनन्तं ब्रह्म ।" इत्याद्या इति अस्यार्थः लक्षणापरैक्यपरानिषेधपरोपासनापरसृष्टिपराणां पञ्चविधानां श्रुतीनां सगुणावलम्बनं निर्गुणे पर्यवसानमिदं दर्शयितुमाह- अयमभिप्राय इति ।

यद्यप्यष्टविधानां वृत्तीनां मध्ये उक्तन्यायेन कापि वृत्तिर्ब्रह्मणि न सम्भवति, तथापि सर्वश्रुतीनां परम्परादिना ब्रह्मपर्य घटत एवेत्याह-सगुणमेवेति । सगुणं समस्तगुणाश्रयं तैर्गुणैरनभिभूतमवशीकृतं पूर्वोक्तमर्थं क्रमेणाह-यः सर्वज्ञ इत्यादिश्रुतिभिः "यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः" सर्वज्ञतोदाहरणम् । सामान्येन सर्वं जानातीति सर्वज्ञः, विशेषेण सर्वं वेत्तीति सर्ववित् यस्य ज्ञानमयं ज्ञानविकार एव, सर्वज्ञतालक्षणं तप अनायासलक्षणमित्यर्थः । सर्वस्य वशीति-सर्वस्य ब्रह्मेन्द्रादेर्वशी सर्वो ह्यस्य वशे वर्तते उक्तं च—

"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः ॥" इत्यादिना ॥

भारते च —

"ससुरासुरगन्धर्वसयक्षोरगराक्षसम् । जगद्वशे वर्ततेऽदः कृष्णस्य सचराचरम् ॥"

इत्यनेन सर्वशक्तिता दर्शिता । न केवलं वशी, सर्वस्येशान ईक्षिता च । अनेन सर्वेश्वरता ।

"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः पृथिवी यस्य शरीरं पृथिवी यं न वेद यः पृथिवीमन्तरो यमयत्येष आत्मान्तर्याम्यमृतः ॥" इति ॥

अस्यार्थश्च — यः पृथिव्यां तिष्ठन् पृथिव्याः प्रथिवीति अन्तरो भवति । य अन्तरोऽभ्यन्तरो भूत्वा पृथिवीं यमयति नियमयति । एष ते तवान्तर्यामीति । अनेन सर्वनियन्तृत्वं सर्वोपास्यत्वं सर्वकर्मफलदातृत्वं चोक्तम् । श्रीभगवद्गीतासु च—

"यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छतीति अनेन सर्वनियन्तृत्वं सर्वोचितमिच्छति; तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥

स तया श्रद्धयायुक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान् हि तान् ॥" इति ॥

अनेनान्तर्यामिणः श्रीकृष्णस्यैव तत्तद्देवतारूपेणोपास्यत्वं सर्वकर्मफलप्रदातृत्वं चोक्तम् सकलकल्याणगुणनिलयस्योदाहरणमाह-

सोऽकामयत कामितवान् । कथम् । बहु स्यां बहुतरं यथा भवति तथा स्यां भवेयम् । स आत्मा सर्वज्ञस्वभावत्वात् एकः । स ऐक्षत अद्राक्षीत् । ईक्षतेति पाठेऽडागमाभावश्छान्दसः । स तत्प्रसिद्धं तेजोऽसृजत सृष्टवान् । ईश्वरस्य कामनायां लोकोपकारकत्वेन तादृशकल्याणगुणाभिव्यक्तेः । सच्चिदानन्दत्वोदाहरणमाह- "सत्यं ज्ञानमनन्तं ब्रह्म" आदिपदात् "विज्ञानमानन्दं ब्रह्म" अस्यार्थश्च- यद्रूपेण यन्निश्चितं तद्रूपं यतो न व्यभिचरति तत्सत्यं ब्रह्म । कथम्भूतं सत्यम् असत्यनिवृत्त्यर्थं विशेषणम् असत्यतानिवृत्त्या विकारनिवृत्तिः । तन्निवृत्त्या च कारणता प्राप्ता । तया च कारणस्य च कारकनिवृत्त्या च कारणा प्राप्ता । तत् कारणस्य कारकवस्तुत्वान्मृत्तिकावदचिद्रूपता प्राप्ता । तन्निवृत्त्यर्थं ज्ञानं ज्ञप्तिरवबोधस्तद्रूपमित्यर्थः लौकिकज्ञानस्यान्तवत्त्वादिदर्शनात्प्राप्तं ज्ञानरूपस्य ब्रह्मणोऽप्यन्तवत्त्वं तन्निवृत्त्यर्थमनन्तमिति विशेषणम् । एतेन सच्चिदानन्द

स्पष्टमेवदर्शितम् । एवं ल
लक्षणपरत्वं प्रदर्श्य स्वरू
स्वामिचरणास्तथाभूतेत्या
घटमानं ब्रह्मणि पर्यवसान
इति कुतः भिन्नाथ
ब्रह्मे"त्यादीनि गृह्यन्ते ।
अपर्यायपदानामेकार्थवृत्ति
या क्षीरे स्याद्दधियोगतः ।
विश्वेदेवस्येयमामिक्षा वैश्वदे
सामानाधिकरण्यं नानार्थयो
आमिक्षां देवतायुक्त
इति अस्यार्थः । अ
सान्निध्यात्सन्निहितत्वात् तस्यै
प्रकारेणैकार्थत्वाभावं प्रदर्श्य
नीलमुत्पलमितिवत् । यथोक्तं
न जहत् न त्यजत् स्वार्थो नि
प्राकट्यं यस्याः सा निरूढा चा
न साम्प्रतं रचितयेत्यर्थः ।
विरुद्धार्थत्वेन । तदयोगात् । त
"स्वरूपसत्त्वमात्रेण
अर्थश्च-स्वाकारेण वि
पीतनीलादिना स्वबुद्ध्या स्वाका
नीलगुणोत्पलद्रव्ययोर्गुणगुणिन
निरूढलक्षणा । अत्र तु परोक्ष
विशेषणविशेष्यभावप्रकारेण चै
जहत्स्वार्थलक्षणा । तया कुसुमित
विवक्षितत्वात् अर्थश्च-जहत् त्यज
बकुमिष्टत्वात् । सम्बन्धिलक्षणाय
येन प्रकारेण ब्रह्मणि पर्यवसानं
सत्यागेनानुगतचिदंशेनैकार्थत्वेन
न घटते । अतो कारणाज्जहती अ
एकार्थत्वेन निर्गुणे पर्यवसानं सो
देशकालविप्रकर्षात् प्रत्यभिज्ञातुमर
इति । तत्र तच्छब्देन विप्रकृष्टदेशका
"इदमस्तु सन्निकृष्टं समीपत

या)र्थमसृजदिति क्रमेण
प्रवृत्तिरिति दर्शयति-
सर्वज्ञं सर्वशक्ति सर्वेश्वरं
तिपादयन्ति-

तिष्ठन् पृथिव्या अन्तरः।
याद्या इति अस्यार्थः।
वसानमिदं दर्शयितुमाह-

नां परम्परादिना ब्रह्मपरत्वं
पः सर्वज्ञ इत्यादिश्रुतिभिः।
षेण सर्वं वेत्तीति सर्ववित्।
ब्रह्मेन्द्रादेर्वशी सर्वो ह्यस्य

पृथिवीमन्तरो यमयत्येष त

न्तरे भूत्वा पृथिवीं यमयति
। श्रीभगवद्गीतासु च —
तस्य तस्याचलां श्रद्धां तामेव

इति ॥
लप्रदातृत्वं चोक्तम्।

स आत्मा सर्वज्ञस्वभावत्वात्
सृष्टवान्। ईश्वरस्य कामनादीनां
ह्म" आदिपदात् "विज्ञानमानन्द
असत्यनिवृत्त्यर्थं विशेषणम्।
वृत्त्या च कारणा प्राप्ता। तया च
सिरवबोधस्तद्रूपमित्यर्थः।
शेषणम्। एतेन सच्चिदानन्दत्वं

मेवदर्शितम्। एवं लक्षणापराणां श्रुतीनामपि सगुणपरत्वं प्रदश्य, स्वरूपपराणामपि स्वरूपपरत्वं च प्रदश्य, ऐक्यपरत्वश्रुतीनामपि गुणपरत्वं प्रदश्य स्वरूपपराणामपि स्वरूपपरत्वं च प्रदश्य ऐक्यपरत्वश्रुतीनामपि सगुणप्रतिपादनमुखेन निर्गुणे पर्यवसानं दर्शयन्ति मिचरणास्तथाभूतेत्यादिना निर्गुणे पर्यवसानमित्यन्तेन। तथाभूतेश्वरतान्तावत्संसारिणो जीवस्य तन्निवृत्तये तत्त्वप्रकारान्तरेण नं ब्रह्मणि पर्यवसानं गमयति। तथा हि तावद्वैश्वदेव्यामीक्षेति च तदुभयोरेकार्थमभिधानेन सामानाधिकरण्यम्। यथोक्तम् —

इति कुतः भिन्नार्थत्वात्। अस्यार्थः। तत्त्वमसीत्यादिवाक्यानीत्यत्रादिपदेन "प्रज्ञानं ब्रह्म।" "अहं ब्रह्मास्मि" "अयमात्मा "त्यादीनि गृह्यन्ते। तद्ब्रह्म तत्त्वमसि भवसि। नान्यः संसारीत्यर्थः। तत्र तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते। र्यायपदानामेकार्थवृत्तित्वं सामानाधिकरण्यम्। तच्च प्रकारान्तरेणाघटमानं प्रदर्शयति-तथा हि इति। "आमिक्षा सा शृतोष्णे क्षीरे स्याद्दधियोगतः।" इत्यमरः। शृते स्थाल्यां कृतपाके उष्णे दुग्धे दधियोगतो या विकृतिः स्यात् सामिक्षेत्यर्थः। श्वेदेवस्येयमामिक्षा वैश्वदेवी। विश्वेदेवस्य सम्बन्धिनी आमिक्षा भवति न तु विश्वेदेवत्वं प्राप्नोति। अत आमिक्षाविश्वेदेवपदयोः मानाधिकरण्यं नानार्थयोरिति। यथोक्तं भट्टैः —

आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः। आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणम्॥

इति अस्यार्थः। आमिक्षां देवतायुक्तां विश्वदेवसम्बद्धाम्। एष तद्धितोऽण्प्रत्ययो वदति। कथम् वदति। आमिक्षापदस्य न्निध्यात्सन्निहितत्वात् तस्यैव तद्धितप्रत्ययान्तस्य वैश्वदेवीपदस्यैव विषये आमिक्षापदस्यार्पणं तद्धितप्रत्ययेन क्रियत इति। अनेन रणैकार्थत्वाभावं प्रदश्य पुनः प्रकारान्तरेण दर्शयति-न चेति। न चाजहत्स्वार्थया निरूढलक्षणया विशेषणविशेष्यभावेन लमुत्पलमितिवत्। यथोक्तं- 'स्वबुद्ध्या रज्यते येन विशेष्यं तद्विशेषणम्।' इति कुरुः। विरुद्धार्थत्वेन तदयोगात्। अस्यार्थः। जहत् न त्यजत् स्वार्थो नीलपीतादिरूपो या साऽजहत्स्वार्था। तया। तृतीयान्तान्यपदार्थबहुव्रीहिः। निर्गतं रूढं प्रादुर्भावः रूढं यस्याः सा निरूढा चासौ लक्षणा चेति निरूढलक्षणा। तया। यद्वा-नितरां रूढा चासौ लक्षणा चेति। तयानादिपरम्परागतया साम्प्रतं रचितयेत्यर्थः। विशेष्यमुत्पलम्। विशेषणं नीलम्। नीलमुत्पलमितिवत्। सामानाधिकरण्यं न च कुतः द्धार्थत्वेन। तदयोगात्। तयोः तत्त्वंपदार्थयोः विरुद्धत्वेन तस्याः निरूढलक्षणाया अयोगात् अभावात्। यथोक्तं भट्टैः-

"स्वरूपसत्त्वमात्रेण न हि किञ्चिद्विशेषणम्। स्वबुद्ध्या रज्यते येन विशेष्यं तद्विशेषणम्॥"

अर्थश्च-स्वाकारेण विशेष्यमानवभाष्य किञ्चिदपि वस्तु स्वरूपसत्त्वमात्रेण स्वस्थित्यैव विशेषणं न हि न भवति, किन्तु नीलादिना स्वबुद्ध्या स्वाकारज्ञानेन विशेष्यमुत्पलादि रज्यते भ्रमरादिभ्यो व्यावर्त्यावभास्यते तद्विशेषणमित्यर्थः। अयम्भावः- गुणोत्पलद्रव्ययोर्गुणगुणिनोरविरुद्धस्वभावत्वेन विशेषणविशेष्यभावः कल्पनेऽनुपपत्तेरभावात्। भवेत्तत्राजहत्स्वार्था रूढलक्षणा। अत्र तु परोक्षापरोक्षत्वादिविरुद्धार्थत्वेन विशेषणविशेष्यभावकल्पनानुपपत्तौ न निरूढलक्षणेति। अनेन षणविशेष्यभावप्रकारेण चैकार्थत्वं प्रदश्य पुनः प्रकारान्तरेण दर्शयति-न चेति। न च जहत्स्वार्था चासौ लक्षणा चेति त्स्वार्थलक्षणा। तया कुसुमिताः द्रुमा यस्यां सा कुसुमितद्रुमा गङ्गा। इति लक्षणया कुसुमितद्रुमा गङ्गेतिवत् कुतः एकार्थत्वस्य क्षितत्वात् अर्थश्च-जहत् त्यजत्स्वार्थो यासां जहत्स्वार्थवत् सामानाधिकरण्यम्। न च कुतः तत्त्वंपदयोरेकार्थस्य विवक्षितत्वात् त्वात्। सम्बन्धिलक्षणायां तु सम्बन्धिनः सम्बन्धस्य च स्फुरणान्नैकार्थत्वमिति भावः। इति प्रकारान्तरेणाघटमानं प्रदश्य प्रकारेण ब्रह्मणि पर्यवसानं तद्दर्शयति-अत इति। अतो जहदजहत्स्वार्थलक्षणया सोऽयं देवदत्त इतिवद्विरुद्धाम्। नानुगतचिदंशेनैकार्थत्वेन सामानाधिकरण्येन निर्गुणे पर्यवसानमिति। अर्थश्चायम् — यतः प्रकारान्तरेण सामानाधिकरण्यं। अतो कारणाज्जहती अजहती च स्वार्थौ ये ते तत्त्वंपदे यस्यां सा जहदजहत्स्वार्था। सा चासौ लक्षणा चेति तया। त्वेन निर्गुणे पर्यवसानं सोऽयं देवदत्त इति। यथा कश्चित्काश्यां दृष्टं देवदत्तं यतिर्बहुकालान्तरेण काश्यामपश्यन् कालविप्रकर्षात् प्रत्यभिज्ञातुमसमर्थः पूर्वदृष्टादन्यं पश्चाद्दृष्टं मन्यतेति मन्यः प्रत्यभिज्ञाकुशलः प्रतिबोधयति-सोऽयं देवदत्त त तच्छब्देन विप्रकृष्टदेशकालविशिष्टोऽर्थोऽभिधीयते इदंशब्देन सन्निकृष्टदेशकालविशिष्टोऽर्थः। तदुक्तम् —

"इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्॥" इति।

विप्रकृष्टं विदूरम्, सन्निकृष्टं सन्निहितमित्यर्थः । न च सन्निकृष्टविप्रकृष्टयोरेकत्वं सम्भवति। तस्माद्विरोधिविशेषणसम्बन्धपरित्यागेन भागलक्षणया सोऽयमिति पदद्वयं देवदत्तस्य स्वरूपमखण्डितं प्रतिपादयति। तथा जीवोऽपि परमार्थतो ब्रह्मैव सन्नविद्यादोषवशादसंसारिणो ब्रह्मणोऽत्यन्तभिन्नं संसारिणमात्मानं मन्यते तं श्रुतिर्बोधयति तत्त्वमसीति। तत्र तत्पदेनाप्रतिं परोक्षं वस्तु अभिधीयते । प्रकृतमेकमद्वितीयम् ईक्षितृ जगत्कारणं ब्रह्म । त्वंपदेनाप्यविद्याद्युपाधिपरिच्छिन्नो नित्यापरोक्षः प्रत्यगात्माऽभिधीयते । न च परोक्षापरोक्षापरिच्छिन्नापरिच्छिन्नयोरेकत्वं सम्भवति । तस्मात्तत्पदार्थगत परोक्षाऽपरिच्छेदादिकं त्वंपदार्थगतमपरोक्षपरिच्छेदादिकं परित्यज्य जहदजहत्स्वार्थलक्षणया तत्त्वमितिपदद्वयं सच्चिदेकरसमखण्डमात्मतत्त्वं प्रतिपादयति। असिपदमपि प्रकृत्यर्थस्य सतः प्रत्ययार्थस्य च प्रतीचः सङ्घट्टनेनानुवद् आत्म सम्बध्यत इति निषेधपरश्रुतीनां तत्परत्वमाह-अस्थूलादिवाक्यानां साक्षादुपाधिनिषेधेन तथाचात्रैवोपक्रमे स्वसृष्टमिदमापीयेत्यादिना विशिष्टमालम्बनं वक्ष्यति । अन्ते च 'श्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः' इत्युपसंहरिष्यति । अर्थोऽयम्-अस्थूलमनण्वह्रस्वमदीर्घमित्यादिवाक्यानां साक्षाद्ब्रह्मणि पर्यवसानमित्यर्थः । सगुणगतानामिव स्थूलत्वाद्युपाधीनामनुवादाद्विशिष्टालम्बनत्वमस्त्येव । उपासनासृष्टिपरश्रुतीनां तत्परत्वमाह-उपासनादिवाक्यानां क्रियार्थप्रवृत्तसृष्ट्यावलम्बनेन ज्ञानसाधनविधानेन तत्परत्वमिति। अर्थोऽयम्। आदिपदेन सृष्ट्यादिग्रहणम्। क्रियार्थो यज्ञार्थः। यज्ञार्थप्रवृत्तानां सृष्ट्यादिवाक्यानां आगमापायिसृष्टिस्थितिप्रलयनिरूपणेन यज्ज्ञानसाधनवैराग्यविधानं तेन तद्द्वारा तत्परत्वं ब्रह्मणि पर्यवसानम् । उपासनावाक्यैस्तूदराद्युपाध्यालम्बनसगुणब्रह्मनिरूपणेनान्तःकरणशुद्धिलक्षणं यत् ज्ञानविधानं तेन ब्रह्मणि पर्यवसानम्। कर्मादिपराणां श्रुतीनां विविदिषायां विनियोगादनुपादानमिति। अथान्यः सिद्धान्त उच्यते-निर्गुणे ब्रह्मणि सगुणाः श्रुतयः कथं चरन्तीति प्रश्नस्य सिद्धान्तः स्वामिचरणैर्लक्षणापरादिश्रुतीनां यथा ब्रह्मणि तात्पर्यं तथा प्रदर्श्य कृत एव। तथाप्यत्राशङ्का वर्तते सा यथा —

"बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः । मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥"

लोकानां प्रभुरसृजदिति कथमुक्तं श्रीशुकेन प्रश्नोत्तराऽनुपयोगित्वादिवेति-तत्राऽस्माभिरुच्यते-बुद्धिर्हि द्विविधा-व्यवसायात्मिकाऽव्यवसायात्मिका च। तत्राव्यवसायात्मिका हि त्रिवर्गसाधने सत्त्वादिगुणभेदेन त्रिधा भूत्वाऽनन्ता बुद्धयः स्यु

"व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन। बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥" इति ॥

"सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्" इत्युक्तेः ।

अतो बुद्धेः सर्जनं वेदोक्तकर्मप्रतिपादितभोगानन्तरं मोक्षार्थमिति । इन्द्रियादिसृष्टेः प्रयोजनं यथा-इन्द्रियं वागिन्द्रि ज्ञेयम्। तस्य मुख्यत्वात्ततो वाङ्मनःप्राणाः । ऋग्यजुःसामवेदा भवन्ति। तथा च श्रुतिः -

"ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये। वागोजःसहौजो मयी"त्यादि। अन्येऽपि लोकादयः सर्वे वागादय एव भवन्तीत्यत्र सम्यक्प्रबोधनार्थमन्याः श्रुतयोऽपि लिख्यन्ते —

"त्रीण्यात्मने कुरुतेति। मनो वाचं प्राणं तान्यात्मने कुरुत एव एतन्मयोऽयमात्मा। वाङ्मयो मनोयः प्राणमयः। त्र लोका एत एव-वागेवायं लोको मनोऽन्तरिक्षलोकः। प्राणोऽसौ लोकः। त्रयो वेदा एत एव-वागेव ऋग्वेदो मनो यजुर्वेदः प्रा सामवेदः। देवाः पितरो मनुष्या एत एव-वागेव देवाः। मनः पितरः। प्राणो मनुष्याः। माता पिता प्रजैत एव-वाङ्माता। म पिता। प्राणः प्रजा। विज्ञानं विजिज्ञास्यमविज्ञातमेत एव।"

"यत्किंचिद्विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वावति। यत्किञ्चिद्विजिज्ञास्यं मनस्तद्रूपं मन एनं तद्भूत्वावति। यत्किञ्चिद्विज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः । प्राण एनं तद्भूत्वावति । तस्यैव वाचः पृथिवी शरीरं ज्योतीरूपम यावत्येव वाक्तावती पृथिवी तावानयमग्निः । अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यः । तद्यावदेव मनस्त

द्यौस्तावानसावादित्यः
त एते सर्वे समाः सर्वे
जयति" इति ॥

सुगमत्वान्न व्य
एतन्मयोऽयमात्मा यतस्त्र
वाक्तद्विज्ञातं वस्तु भूत्वा
तद्विजिज्ञास्यम् । अन्तवत
वेदोक्तमार्गेण संसेव्य विम

"एतमेव विदित्व
प्रजया करिष्यामो येषां न
लोकैषणायाश्च व्युत्थाय भि
पाण्डित्यं निर्विद्य बाल्ये ति
स्यात्तेनेदृश एवातोऽन्यदार्त
स्थातुमिच्छेत्। तर्हि बाल्येन
तिष्ठेत् नेत्याह-मौनं चामौनं
स्यात्तेनानिर्वचनीयेन ब्रह्मात्
सत्यमिति। तस्मादेतेन बुद्धी
राद्धान्तः कृतः ॥२॥ अत्रान
उपनिषत्। पूर्वेषां पूर्वजैश्सन
प्राप्नुयादिति । या त्रिवर्गस
सनकादिभिर्धृतेति भावः ॥३॥

सर्वे शब्दाश्चिदचिद्द्वा
सर्वेश्वरे जनानां जीवानां बुद्ध्य

"एभिर्भूतानि भूतात्मा

किमर्थमसृजत्तत्राह-म
भगवदाराधनरूपकर्मकरणमित्
कार्यकारणोभयावस्थपरब्रह्मप्रति

अस्यार्थस्य दृढीकरणार्थ
उपनिषत् रहस्यमित्यर्थः । पूर्वेषां
सोऽकिञ्चनो देहाद्यभिमानरहितः

श्रीशुक उवाच ! उपरो

तावानसावादित्यः । अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रः । तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रः । ते सर्वे समाः सर्वेऽनन्ताः स यो हैतानन्तवत उपास्ते, अन्तवन्तं लोकं जयति । अथ यो हैतानन्तानुपास्ते सोऽनन्तलोकं यति" इति ॥

सुगमत्वान्न व्याख्यायते । इहामुत्रानन्तलोकसुखभोगाय त्रीणि मनो वाचं प्राणम् एतान्यात्मने आत्मार्थं यूयं कुरुत यत मयोऽयमात्मा यतस्त्रयो वेदा एत एव असौ लोकः परलोकः यत्किञ्चिद्विज्ञातं विशेषेण ज्ञातं वस्तु तत्सर्वं वाचो रूपमतो द्विज्ञातं वस्तु भूत्वा एनं पुरुषं सङ्कटादावति रक्षति ॥ एवमुत्तरत्रापि ज्ञेयम् । ज्ञातुमिच्छा जिज्ञासा यत्र विजिज्ञासा वर्तते विजिज्ञास्यम् । अन्तवतो विनाशवतः । ह स्फुटम् । जयति प्राप्नोति स्पष्टमन्यत् । अकल्पनायेत्यस्यार्थः । एवं धर्मार्थकामान् लोकमार्गेण संसेव्य विमुक्तये विरज्य परमात्मानं ज्ञात्वा प्रव्रजेदित्यत्र श्रुतिः —

"एतमेव विदित्वा मुनिर्भवति । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । एतद्वै पूर्वे विद्वांसः प्रज्ञानं कामयन्ते । किं प्रजया करिष्यामो येषां नोऽयमात्मन् लोकैषणा उभेह्येषणे एव भवतः तस्माल्लोक इति ते ह स्म पुत्रैषणायाश्च वैत्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यां चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा सा लोकैषणा उभे ह्येषणे एव भवतः तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्ये तिष्ठासेत् । बाल्यं च पाण्डित्यं च निर्विद्याथो मुनिरमौनं मौनं च निर्विद्याथो ब्राह्मणः स ब्राह्मणः येन स्यात्तेनेदृश एवातोऽन्यदार्तम्" इति सुगमम् । तस्मादिति ब्राह्मणः ब्राह्मणजातिगुणविशिष्टः बाल्येन बालस्वभावेन तिष्ठासेत् स्थातुमिच्छेत् । तर्हि बाल्येन सदा तिष्ठेत् नेत्याह-बाल्यं च पाण्डित्यं च निर्विद्य त्यक्त्वा मुनिर्यतवाग्भवेत् । तर्हि किं सदा मौनेन तिष्ठेत् नेत्याह-मौनं चामौनं च हित्वा ब्राह्मणः ब्रह्मनिष्ठः स्यात् । स ब्राह्मणः केन स्यादित्यस्योत्तरम्-येनेति । येन ब्राह्मणः स्यात्तेनानिर्वचनीयेन ब्रह्मात्मलाभेन ईदृश एवोक्तप्रकारेण ब्राह्मण एव स्यात् तद्वस्तु अतः पाण्डित्यादेरसतः अन्यत्पृथगेवार्तं न्यमिति । तस्मादेतेन बुद्धीन्द्रियेत्यादिश्लोकेन जनानां चतुर्वर्गं प्रतिपादयन्त्यः श्रुतयो ब्रह्मणि यथा चरन्ति तथा प्रदर्श्य शुकदेवेन दृष्टान्तः कृतः ॥२॥ अत्रानादिशिष्टपरम्परागतत्वान्न सन्देहो युक्त इत्याह-सैषेति । सा एषा यथोक्तालम्बना ब्राह्मी ब्रह्मपरा उपनिषत् । पूर्वेषां पूर्वजैश्सनकादिभिर्धृतां श्रद्धया श्रवणादिभिर्धारयेत् । अकिञ्चनः निरस्तदेहाद्युपाधिः सन् क्षेमं परं पदं गच्छेत् प्राप्नुयादिति । या त्रिवर्गसाधनपरा सा उपनिषत् त्रिवर्गनिष्ठैर्मरीच्यादिभिर्धृता एषा तु ब्रह्मपरा अत एव ब्रह्मनिष्ठैः सनकादिभिर्धृतेति भावः ॥३॥

श्रीनिवाससूरिकृततत्त्वदीपिका

सर्वे शब्दाश्चिदचिद्द्वारा तस्मिन्नेव प्रवर्तन्ते इति तस्य परिहार उच्यते-बुद्धीन्द्रियेति । प्रभुः सर्वस्वामी सर्वनियन्ता सर्वशेषी श्वरो जनानां जीवानां बुद्ध्यादीनसृजदुत्पादितवान् । तथा च वक्ष्यते एकादशे —

"एभिर्भूतानि भूतात्मा महाभूतैर्महाभुजः । ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये ॥" इति ।

किमर्थमसृजत्तत्राह-मात्रार्थम् । मीयन्ते शब्दादिविषया येन मात्रो देहस्तदुत्पादनार्थम् । भवार्थम् । भव उत्पत्तिस्तत्प्रभृति-भवसाधनरूपकर्मकरणमित्यर्थः । आत्मने । अध्यात्मज्ञानार्थं जगद्व्यापाररूपलीलार्थमित्यर्थः । सूक्ष्मचिदचिद्विशिष्ट-कारणोभयावस्थपरब्रह्मप्रतिपादनेन चिदचिद्वस्तुशरीरतया श्रुतीनां तत्प्रतिपादकत्वमिति प्रत्युत्तरार्थ इत्यर्थः ॥२॥

अस्यार्थस्य दृढीकरणार्थं माहात्म्यकथनपूर्वकमितिहासमवतारयति-सैषेत्यादिभिर्नवभिः श्लोकैः । ब्राह्मी वेदसम्बन्धिनी । उपनिषत् रहस्यमित्यर्थः । पूर्वेषां पूर्वजैः दक्षादीनामपि पूर्वजैः सनकादिभिर्धृतेयं श्रवणादिभिरित्यर्थः । एवं तत् श्रद्धया धारयेत् अकिञ्चनो देहाद्यभिमानरहितः सन् क्षेमं मोक्षं गच्छेदित्यर्थः ॥३॥

कृष्णप्रिया

श्रीशुक उवाच ! उपरोक्त राजा के प्रश्न का प्रत्युत्तर इस प्रकार श्रीशुक देवजीने दिया है कि सर्वशक्तिमान

परमात्माने प्रलयस्थ जीवों को शरीर प्राप्ति के अर्थ शरीर से योगादिकर्मानुष्ठान द्वारा स्वर्गादि श्रेय: प्राप्ति के अर्थ तथा परमात्मा के उपासना रूप ज्ञान प्राप्ति के अर्थ और ज्ञान से मोक्ष प्राप्ति के अर्थ महदादि तत्त्वनकी सृष्टि कर उन से ब्रह्मांड की रचना कर उस ब्रह्माण्ड में निजनाभिकमल से ब्रह्मा को उत्पन्न कर उनके द्वारा प्रलयस्थजीवोंके शरीर इन्द्रिय प्राणो की सृष्टि की । इसका यह तात्पर्य है कि महदादि तत्त्वरूपसे माया का परिणाम है और शरीर इन्द्रियप्राण प्रदानपूर्वक ज्ञान प्रक्षा रूप करने से जीवों की सृष्टि कर पश्चात् चेतनाचेतन के सद्भाव रहने के लिए परमात्मा उन दोनो में अन्तर्यामी रूपसे निज संकल्प द्वारा व्याप्त हुए । इस कारण चेतनाचेतन दोनो परमात्मा से अलग नहि होकर उसके शरीर रूप विशेषण है और परमात्मा उसके शरीरी आत्मा है । अतएव गोत्वादि वाचक गौहत्यादिशब्द जैसे साक्षात् गोव्यक्तिपर्यन्त के वापी होते है वैसे ही ब्रह्म के शरीरभूत चेतनाचेत वाचि श्रुति साक्षात् ब्रह्म पर्यन्त को प्रतिपादित करती है इसी अर्थ को समष्ट प्रतिपादन करनेवाली श्रुतियोंको दिखाते है । चेतनाचेतन की सृष्टि कर पश्चात् चेतनाचेतन के नाम रूपका भागीभी अप ही है जिसका जीवात्मा शरीर है, माया जीसका शरीर है । गीतामें भी इन्हीं श्रुतियोंको ले कर कहा है हे भगवान ! आप सब चेतनाचेतनमें व्याप्त हो रहे हो इसी कारणसे सब चेतनाचेतन रूपी आप ही हो ! में शरीरभूत चेतना चेतन और शरीरी परमात्मा तथा व्याप्त भूत चेतना चेतन और व्यापक परमात्मा इनका परस्परमें भेद है ॥२॥ इस प्रकार चेतनाचेतन के वाचक सब शब्दो की परमात्मा के साक्षात् प्रतिपादन करने में शक्ति का प्रतिपादन किया सो यह ब्रह्म के प्रतिपादन करने वाली शक्ति अत्यन्त रहस्यमय है । इसीसे आचार्य द्वारा उपनिषद के अर्थ विचार करने से इसका ज्ञान होता है और पहले ब्रह्म ज्ञानियों के भी पहले उत्पन्न हुए ज्ञानियोंने उपरोक्त शक्ति को धारण किया है । परमात्मा के बिना जिसको स्वर्गादि किसी फलकी चाहना नहीं है वो प्राणी इस शक्ति का श्रद्धा के साथ धारण करेगा वह मोक्ष को प्राप्त करेगा ॥३॥

अत्र ते वर्णयिष्यामि गाथां नारायणान्विताम् । नारदस्य च संवादमृषेर्नारायणस्य च ॥४॥
एकदा नारदो लोकान् पर्यटन् भगवत्प्रियः । सनातनमृषिं द्रष्टुं ययौ नारायणाश्रमम् ॥५॥
यो वै भारतवर्षेऽस्मन् क्षेमाय स्वस्तये नृणाम् । धर्मज्ञान[1]शमोपेतमाकल्पादास्थितास्तपः ॥६॥
तत्रोपविष्टमृषिभिः कलापग्रामवासिभिः । परीतं प्रणतोऽपृच्छदिदमेव कुरूद्वह ॥७॥
[2]तस्मै ह्यवोचद्भगवानृषीणां शृण्वतामिदम्[3] । यो ब्रह्मवादः पूर्वेषां जनलोकनिवासिनाम् ॥८॥

कर्दमक्षमा

अत्र, नारायणान्विताम्, गाथाम्, ऋषेः, नारदस्य, नारायणस्य, च, संवादम्, ते, वर्णयिष्यामि ॥४॥एकदा, भगवत्प्रियः, नारदः, लोकान्, पर्यटन्, ऋषिम्, सनातनम्, द्रष्टुम्, नारायणाश्रमम्, ययौ ॥५॥ यः, आकल्पात्, अस्मिन्, भारतवर्षे, नृणाम्, स्वतस्तये, क्षेमाय, वै, धर्मज्ञानशमोपेतम्, तपः, आस्थितः ॥६॥ हे कुरूद्वह, तत्र, कलापग्रामवासिभिः, ऋषिभिः, परीतम्, उपविष्टम्, प्रणतः, इदम्, एव, अपृच्छत् ॥७॥ पूर्वेषाम्, जनलोकनिवासिनाम्, ऋषीणाम्, शृण्वताम्, यः, ब्रह्मवादः, भगवान्, हि, तस्मै, इदम्, अवोचत् ॥८॥

---

[1] रामोपेत आकल्पा-वीर. ; रामोपेतः साकल्या ।

[2] तस्मा अवो च-वीर. विज. ।

[3] मिमं-वीर. ; मिमां-विज. ।

एतदेव सर्वश्रुत्यर्थनिर
ताम् गाथामितिहासम् ॥४-८॥

भावार्थदीपिकाप्रकाशः
सनन्दादिभिर्यन्निर्णीतं तदेव श्रीन

श्रीधरानुयायिनी —
नारदायोपदिष्टमितिहासं ते वर्णयि
वर्णयिष्यामि चिरमतीतामपि वर्ण
सर्वदेहिनामित्याद्यनुसारेण स्व
परमभागवतत्वाच्छ्रीभगवन्माहात्म
ऋषेरिति क्षीरोदशायिपरमव्योमेश्वर

भावार्थदीपिकाप्रकाशः
नारायणं वा ॥★॥

श्रीधरानुयायिनी
भारतवर्षवासिनामैहिकामुष्मिकक
श्रीनारायणमृषिं द्रष्टुं बदरिकाश्रमे क
धर्मपुत्रं श्रीनारायणम् । श्रीनारायणा

नीलकण्ठी — ॥५॥

भावार्थदीपिकाप्रकाशः
आकल्पात्कल्पमभिव्याप्य ॥★॥

श्रीधरानुयायिनी — ॥★॥

विश्वनाथी — ऋषित्वे का
मङ्गलाय लोकशिक्षार्थं धर्माद्युपेतं त
विवेकः । आकल्पाद्ब्रह्मदिनप्रथमांशम

नीलकण्ठी — ॥६॥

भावार्थदीपिकाप्रकाशः वंशी
वैयग्र्यराहित्यमाह तेन प्रश्नावसर उक्त

श्रीधरानुयायिनी — हे राजन्

विश्वनाथी — तत्र निजाश्रमे
प्रलोत्कर्षोऽसूचि । इदमेव ब्रह्मन्ब्रह्मण्य

नीलकण्ठी — ॥७॥

र्गादि श्रेयः प्राप्ति के अर्थ
महदादि तत्त्वनकी सृष्टि
उत्पन्न कर उनके द्वारा
दि तत्त्वरूपसे माया का
कर पश्चात् चेतनाचेतन
व्याप्त हुए । इस कारण
ात्मा उसके शरीरी आत्मा
वैसे ही ब्रह्म के शरीरभूत
मष्ट प्रतिपादन करनेवाली
ागीभी अप ही है जिसका
हे भगवान ! आप सब
शरीरभूत चेतना चेतन और
में भेद है ॥२॥ इस प्रकार
का प्रतिपादन किया सो यह
निषद के अर्थ विचार करने
रोक्त शक्ति को धारण किया
इस शक्ति का श्रद्धा के साथ

मृषेर्नारायणस्य च ॥४॥
यौ नारायणाश्रमम् ॥५॥
कल्पादास्थितास्तपः ॥६॥
छदिदमेव कुरूद्वह ॥७॥
जनलोकनिवासिनाम् ॥८॥

यिष्यामि ॥४॥एकदा, भगवत्प्रियः,
आकल्पात्, अस्मिन्, भारतवर्षे,
, कलापग्रामवासिभिः, ऋषिभिः,
षीणाम्, शृण्वताम्, यः, ब्रह्मवाद,

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतदेव सर्वश्रुत्यर्थनिरूपणेन प्रपञ्चयितुमितिहासमवतारयति-अत्रेति । नारायणान्वितां नारायणः प्रवक्तृत्वेनान्वितो यस्यां गाथामितिहासम् ॥४-८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — एतदेव ब्रह्मपरत्वमेव । अत्र श्रुतीनां ब्रह्मपरत्वे । एतेन क्षीरोदशायिनः श्रीनारायणाच्छ्रुत्वा र्यादिभिर्यन्निर्णीतं तदेव श्रीनारायणोऽपि नारदायोक्तवानित्यवगम्यते । नियतलिङ्गत्वाद्गाथामित्यस्य विशेषणं संवादमिति ॥★॥

श्रीधरानुयायिनी — अत्र सन्देहाभावार्थमाख्यायिकामवतारयति-अत्रेति । श्रुतीनां ब्रह्मपरत्वे श्रीनारायणेन योपदिष्टमितिहासं ते वर्णयिष्यामि ॥★॥ **विश्वनाथी** — उक्तमर्थं द्रढयितुमितिहासमवतारयति-अत्र प्रसङ्गे, गाथामितिहासम्, ष्यामि चिरमतीतामपि वर्णयिष्यामीत्यर्थः । नारायणो महत्स्रष्ट्रादिपुरुषत्रयाश्रयः सर्वजीवाश्रयश्च । स तु नारायणस्त्वं न हि हितामित्याद्यनुसारेण स्वयं भगवान् श्रीकृष्णः स एवान्वित उपक्रमोपसंहारादिष्वनुगतो यस्यां तां नारदस्य भागवतत्वाच्छ्रीभगवन्माहात्म्यमेवोद्देश्यमिति सिद्धान्तः सूचितः । अतो भगवत्प्रिय इति । वक्ष्यते च संवादं संवादरूपाम् । रिति क्षीरोदशायिपरमव्योमेश्वरयोर्व्यावृत्त्यर्थम् ॥४॥

भावार्थदीपिकाप्रकाशः वंशीधरी — एकदैकस्मिन्काले । नारायणाश्रमं कलापग्रामम् । सनातनं तन्नामानं प्राक्तनं वा णं वा ॥★॥

श्रीधरानुयायिनी — कदाचिद्भगवद्भक्तो नारदो लोकान् पर्यटन् सन् वर्षवासिनामैहिकामुष्मिककल्याणाकल्याणमभिव्याप्य ब्रह्मदिनप्रथमांशमारभ्य धर्मज्ञानशमोपेते तपसि स्थितं सनातनं ारायणमृषिं द्रष्टुं बदरिकाश्रमे कलापग्रामाख्यं तदाश्रमं ययौ ॥★ ॥ **विश्वनाथी** — सनातनमाद्यं श्रीभगवन्तम् ऋषिं श्रीनारायणम् । श्रीनारायणाश्रमं तन्नाम्नैव प्रसिद्धं बदरिकाश्रमप्रदेशम् ॥५॥

नीलकण्ठी — ॥५॥

भावार्थदीपिकाप्रकाशः वंशीधरी — कोऽसावृषिस्तमाह-य इति । स्वस्तये सुस्थितये । क्षेमाय समृद्धये । ल्पाकल्पमभिव्याप्य ॥★॥

श्रीधरानुयायिनी — ॥★॥

विश्वनाथी — ऋषित्वे कारणं वदंस्तदीयकारुण्यमयलीलामाह-य इति । क्षेमाय ऐहिकाय, स्वस्तये आमुष्मिकाय, लोकशिक्षार्थं धर्माद्युपेतं तपोयोगं स्वधर्मं वावस्थितः । धर्मो भक्त्युपयोगि ज्ञानं भगवद्विषयं शमो भगवच्चित्ततेति ः। आकल्पाद्ब्रह्मदिनप्रथमांशमारभ्य ॥६॥

नीलकण्ठी — ॥६॥

भावार्थदीपिकाप्रकाशः वंशीधरी — तत्र कलापग्रामे । स्वाश्रमे स्थितम् । इदं श्रुतीनां ब्रह्मपरत्वम् । उपविष्टमिति हित्यमाह तेन प्रश्नावसर उक्तः । ऋषिभिः परीतमिति सर्वसङ्गत्वेन प्रश्नमाहात्म्यं चोक्तम् ॥★॥

श्रीधरानुयायिनी — हे राजन् ! सशिष्यं स्वाश्रमे स्थितं नारायणं प्रणम्य नारदस्तमिदमेवापृच्छत् ॥★॥

विश्वनाथी — तत्र निजाश्रमे । उपविष्टमिति वैयाग्र्यराहित्येन प्रश्नावसर उक्तः । ऋषिभिः परीतमिति सर्वसंमतत्वात् र्वसूचि । इदमेव ब्रह्मन्ब्रह्मण्यनिर्देश्य इत्येव । कुरूद्वहेति शुद्धवंशोद्भूतत्वेनैव तवाप्ययं प्रश्न इति भावः ॥७॥

नीलकण्ठी — ॥७॥

भावार्थदीपिकाप्रकाशः वंशीधरी — तस्मै नारदाय। इदं किं यो ब्रह्मवादस्तदिदम्। उद्देश्यविधेयभावत्वाल्लिङ्गवैषम्यम् । ''यत्रोद्देश्वविधेयत्वं तत्रायं नियमो न हि।'' इत्युक्तेः। शृण्वतामिति सावधानत्वमुक्तम्। जनशब्दोऽदन्तोऽपि भुवनवाची सन् ''जनस्तपःसत्यनिवासिनो जनाः'' इति तृतीयोक्तेः ॥★॥ श्रीधरानुयायिनी — शृण्वतामृषीणां मध्ये स्थितो नारदः जनलोकनिवासिभिः सनन्दनादिभिः प्राक्प्रवर्तितां ब्रह्मविषयगाथां नारदायावोचत् ॥★॥ विश्वनाथी — शृण्वतामिति सावधानत्वम् । ब्रह्मणि वेदे वादस्तत्त्वबुभुत्सार्थकथारूपः न तु जल्पवितण्डारूपः ॥८॥

नीलकण्ठी — ॥८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत्र एतत्प्रसङ्गे गाथां च वर्तयिष्यामि चिरमतीतामपि प्रवर्तयिष्ये वर्णयिष्यामीत्यर्थः। नारायणो महत्स्रष्ट्रादिपुरुषत्रयात्मकः सर्वजीवाश्रयश्च। स तु नारायणस्त्वं न हि सर्वदेहिनामित्याद्यनुसारेण स्वयं भगवान् श्रीकृष्णः स एवान्वित उपक्रमोपसंहारादिष्वनुगतो यस्यां तां नारदस्य परमभागवतत्वाच्छ्रीभगवन्माहात्म्यमेवोद्देश्यमिति सिद्धान्तः सूचितः। अतो भगवत्प्रिय इति। वक्ष्यते च संवादं संवादरूपाम्। ऋषेरिति क्षीरोदशायिपरमव्योमेश्वरयोर्व्यावृत्त्यर्थम् ॥४॥ सनातनमाद्यं श्रीभगवन्तम् ऋषिं धर्मपुत्रं श्रीनारायणम्। श्रीनारायणाश्रमं तन्नाम्नैव प्रसिद्धं बदरिकाश्रमप्रदेशविशेषमित्यर्थः ॥५॥ ऋषित्वे कारणं वदंस्तदीयकारुण्यमयलीलामाह-य इति। क्षेमाय ऐहिकाय, स्वस्तये आमुष्मिकाय, मङ्गलाय लोकशिक्षार्थं धर्मानुष्ठं तपोयोगं स्वधर्मं वावस्थितः। धर्मो भक्त्युपयोगि ज्ञानं भगवद्विषयं शमो भगवच्चित्ततेति विवेकः। आकल्पाद्ब्रह्मदिनप्रथमामारभ्य ॥६॥ तत्र निजाश्रमे। उपविष्टमिति वैयग्र्यराहित्येन प्रश्नावसर उक्तः। ऋषिभिः परीतमिति सर्वसंमतत्वात् तत्प्रश्नादेर्माहात्म्यमभिप्रेतम् ॥७॥ शृण्वताम् शृण्वत्सु सत्स्विति सावधानत्वम्। ब्रह्मणि वेदविषये वादस्तत्त्वबुभुत्सार्थकथारूपः न तु जल्पवितण्डारूपः जनलोक इत्यकारान्तोपि भुवनवाची जनशब्दोऽस्तीति ''जनस्तपःसत्यनिवासिनो जनाः'' इत्याद्युक्तेः सकारान्तोऽपि क्वचित् ॥८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अत्र श्रुतीनां ब्रह्मपरत्वे वर्तयिष्यामि, चिरमतीतामपि प्रवर्तयिष्ये, वर्णयिष्यामीत्यर्थः। गाथामेव विशिंषंस्तस्या उत्पत्तिप्रकारमाह-नारदस्येति। संवादे प्रश्नोत्तराभ्यामन्योन्यं सम्भाषालक्षणम्। ऋषेरिति श्रीवैकुण्ठेश्वर-क्षीराब्धशायिनोर्व्यावृत्त्यर्थम्। च-काराभ्यां द्वयोरपि संवादे प्राधान्यं बोधयति, अन्यत्तैर्व्याख्यातम्। यद्वा, नारायणः श्रुतिस्तुतः श्रीभगवान् वर्ण्यत्वेनाभिमतो यस्यां ताम्। अत एव वर्णयिष्यामि ॥४॥

ननु तयोः संवादः कदा कुत्र कथं वाभूदित्यपेक्षायामाह-एकदेति चतुर्भिः। कस्मिंश्चित्तत्प्रसादावसरे किंवाऽत्म श्रवणौत्सुक्यकाले ययौ, लोकान् सर्वभुवनानि पर्यटन् परिभ्रमन्। किमर्थम् ? भगवत्प्रियः श्रीभगवन्माहात्म्यश्रवणश्रावणार्थमित्यर्थः। तदुक्तं प्रथमस्कन्धे (भा० १/६/३९)

''अहो देवर्षिर्धन्योऽयं यः कीर्तिं शार्ङ्गधन्वनः। गायन्माद्यन्निदं तन्त्र्या रमयत्यातुरं जगत् ॥'' इति ॥

अत एव सनातनमाद्यमृषिम्। यद्वा, ऋषिरूपं सनातनं भगवन्तं द्रष्टुम् ॥५॥

ऋषित्वे कारणं वदन् तदीय-कारुण्यभरमाह-य इति। **अस्मिन् कर्मक्षेत्रतया सर्वलोकसेव्यत्वेन प्रसिद्धे। यथोक्तं पञ्चमे** देवैः (भा० ५/१९/२०) ''अहो अमीभिः किमकारि शोभनम्'' **इत्यादि। यद्वा, भवदर्थेऽधिष्ठित इति तस्य सौभाग्यं सूचयन्** प्रसिद्धौ। **क्षेमायाभवाय स्वस्तये च सुखाय। यद्वा, ऐहिकामुष्मिकमङ्गलायेति क्रमेण पवयार्थः। अतो धर्मादिभिरुपेतं** रामो भगवन्निष्ठचित्तता, लोकशिक्षार्थं तानि स्वयमेवास्थित इत्यर्थः। तच्च मोक्षधर्मे नारायणीये व्यक्तमेव, धर्मादीनां च श्रैष्ठ्यम्। आकल्पात् श्रीब्रह्मदिनप्रथममारभ्य ॥६॥

तत्र निजाश्रमे
सभामध्ये कृतत्वात् प्रश्
युक्तमेवेति ॥७॥

तमुत्साहयति-
तच्छ्रवणौत्सुक्यमभिप्रेतम्
इदमिति वा, ब्रह्मणो व
श्रीभगवद्वचनाद्वितण्डाजल
एव प्रायः। जन-शब्दः (

क्षेमाय अभयरूप

इत्थं परस्य ब्रह्मण
अथोक्तार्थस्य स्वमनीषोत
तावत्स्वप्रश्नपरिहारानितिहास
अन्वितां गाथां ते तुभ्यं वर्णयि
श्रीतेत्यत आह-नारदस्येति।
कथिष्यामीति सम्बन्धः ॥४॥

संवादमेव प्रस्तोतुं त
ययौ ॥५॥

ऋषिं विशिनष्टि-य
स्वात्मोपासनात्मकमास्थितः अ
शमः रागद्वेषादिराहित्यम् एभिर

तत्रेति। तत्र नारायण
त्वत्प्रश्नमपृच्छत् ॥७॥

तस्मा इति। तस्मै पृष्ट
साम्प्रदायिकत्वं वदन् तं विशि
मिममवोचदिति सम्बन्धः ॥८॥

भवच्छिष्यत्वेन मम भ
न्तीत्यस्मिन्नर्थे गाथां त्रिषट्
कथमभून्नारदस्येत्यत्राह-एकदेति।

त्र निजाश्रमे उपविष्टमिति धर्माद्यर्थवैयग्रयराहित्येन वरः प्रश्नावसर उक्तः । ऋषिभिः परीतमीति प्रायो योगेश्वराणां ये कृतत्वात् प्रश्नस्य सर्वसम्मतत्वेन माहात्म्यमभिप्रेतम् । कुरूद्वह ! हे महावंशजेति त्वप्रश्नस्य श्रीनारदप्रश्नेन साम्यं स्येति ॥७॥

तमुत्साहयति-भगवान् सर्वज्ञो महादयालुर्वा, शृण्वत्स्वति वक्ष्यमाणब्रह्मवादस्य सर्वसम्मतत्वे तेषां च मौत्सुक्यमभिप्रेतम् । इदमिति सदा तस्य हृदि वर्तमानत्वादिना प्रत्यक्षत्वादिकं सूचयति । यो ब्रह्मवादः पुरा जनलोकेऽभवत्, ति वा, ब्रह्मणो वादः प्रश्नोत्तरद्वारा तत्तत्त्वनिर्धारलक्षणः, स च (गी० १०/३२) "वादो विवदतामहम्" इति वद्वचनाद्वितण्डाजल्पवादानां मध्ये तन्महाविभूतित्वेनोत्तमः । तच्च सर्वं श्रीस्वामिपादैस्तत्रैव व्याख्यातम् । जनेत्यकारान्त यः । जन-शब्दः (भा० ३/१३/४४) "जनस्तपःसत्यनिवासिनो जनाः" इत्याद्युक्त्या सकारान्तोऽपि क्वचित् ॥८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

क्षेमाय अभयरूपमोक्षाय ॥६-८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थं परस्य ब्रह्मणः स्वपर्यन्तसर्वबुद्धशब्दत्वं सर्वान्तरात्मत्वं जगत्कारणत्वं परमकारुणिकत्वं मोक्षप्रदत्वं चोक्तम् । कार्थस्य स्वमनीषोत्प्रेक्षितत्वशङ्कानिरासाय मूर्तिधरा वेदा एवोक्तानुक्तगुणविशिष्टं भगवन्तं तुष्टुवुरिति वक्तुं स्वप्रश्नपरिहारानितिहासान्तरेण संवादयति-अत्र ते इत्यादिना । अत्र त्वत्प्रश्ने मदुत्तरे च संवादरूपां नारायणेन प्रवर्तकेन कां गाथां ते तुभ्यं वर्णयिष्यामि शृण्विति शेषः । कोऽसौ नारायणः किं परमव्योमनिलयः किंवा अवतारविशेषः कश्च तस्याः त्र आह-नारदस्येति । ऋषेः ऋषिवेषधरस्य बदर्याश्रमवासिनो नारायणस्य नारदस्य च संवादं प्रश्नत्तररूपम् इतिहासं ष्यामीति सम्बन्धः ॥४॥

संवादमेव प्रस्तोतुं तावन्नारदस्य नारायणोपसत्तिमाह-एकदेति । सनातनं पुरातनमृषिं नारायणं द्रष्टुं तस्याश्रमं बदर्याख्यं ॥५॥

ऋषिं विशिनष्टि-यो वा इति । नृणां क्षेमायाभयरूपाय स्वस्तये मोक्षार्थं चाकल्पात् कल्पावधि तपः उपासनात्मकमास्थितः अधिकृतवानित्यर्थः । कथम्भूतः धर्मः वर्णोचितः ज्ञानमात्मनः प्रकृतिपुरुषाभ्यां विलक्षणेनावलोकनं द्वेषादिराहित्यम् एभिरुपेतः ॥६॥

तत्रेति । तत्र नारायणाश्रमे कलापग्रामवासिभिः परमात्मस्वरूपध्याननिष्ठैर्ऋषिभिः परीतं परिवृतं नारायणं प्रतीदमेव मपृच्छत् ॥७॥

तस्मा इति । तस्मै पृष्टवते नारदाय ऋषीणां शृण्वतां सताम् इदं मदुक्तपरिहारगर्भं परिहारमवोचत् । तदुक्तपरिहारस्यापि कत्वं वदन् तं विशिनष्टि-य इति । जनलोकनिवासिनां पूर्वेषामग्रजानां सनन्दनादीनां यः संवादः प्रश्नोत्तररूपः वदिति सम्बन्धः ॥८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

विच्छिष्यत्वेन मम भवदुक्तिः प्रमाणमस्तु इतरेषां कथमिति शङ्का माभूदिति भावेनाह-अत्रेति । श्रुतयः कथं मित्यर्थे गाथां त्रिषट्पादलक्षणप्रबद्धां कथां नारायणोदितां नारायणेन कथिताम् ॥४॥ नारायणस्य सङ्गमः दस्येत्यत्राह-एकदेति ॥५॥ कस्मिन् खण्डे नारायणाश्रमः तत्र किं कुर्वन् किं प्रयोजन आस्त इति तत्राह-योऽसाविति ।

तपसोऽङ्गवैकल्यपरिहाराय साकल्यादित्युक्तं धर्मः सुकृतं विहिताचारो वा ज्ञानं स्वपरपदार्थावगाहि शमो निष्ठा एतैः उपे लोकदृष्ट्यैतदुक्तम् ॥६॥ तत्राऽऽश्रमे उपविष्टं तम् ॥७॥ तस्मै नारदायेमां गाथामवोचत् । गाथां विशिनष्टि-य इति । ब्रह्मवाद ब्रह्मविषया गाथा ॥८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥१-१३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

परीक्षित्कृतप्रश्नं पूर्वमप्यन्यत्र जातत्वेन दर्शयन्नितिहासमाह-अत्रेत्यादि बहुभिः ॥४-७॥ तस्मा अवोचदित्यादि ब्रह्मसंवाद सविशेषस्य ब्रह्मणो विचारः ब्रह्मनिरुक्तिः मुख्यार्थतया ब्रह्मशब्दव्युत्पत्तिः ॥८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥१-११॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उक्तमर्थं द्रढयितुमितिहासमवतारयति-अत्र प्रसङ्गे, गाथामितिहासम्, वर्णयिष्यामि चिरमतीतामपि वर्णयिष्यामीत्यर्थः नारायणो महत्स्रष्ट्रादिपुरुषत्रयाश्रयः सर्वजीवाश्रयश्च । स तु नारायणस्त्वं न हि सर्वदेहिनामित्याद्यनुसारेण स्वयं भगवान् श्रीकृष्णः स एवान्वित उपक्रमोपसंहारादिष्वनुगतो यस्यां तां नारदस्य परमभागवतत्वाच्छ्रीभगवन्माहात्म्यमेवोद्देश्यमिति सिद्धान्तः सूचितः अतो भगवत्प्रिय इति । वक्ष्यते च संवादं संवादरूपाम् ॥४॥ सनातनमाद्यं श्रीभगवन्तम् ऋषिं धर्मपुत्रं श्रीनारायणम् ॥५॥ क्षेमाय ऐहिकाय, स्वस्तये आमुष्मिकाय, मङ्गलाय लोकशिक्षार्थं धर्माद्युपेतं तपोयोगं स्वधर्मं वावस्थितः । धर्मो भक्त्युपयोगी ज्ञा भगवद्विषयं शमो भगवच्चित्ततेति विवेकः । आकल्पाद्ब्रह्मदिनप्रथमांशमारभ्य ॥६॥ उपविष्टं श्रीनारायणम् । इदमेव ब्रह्मन्ब्रह्मण्यनिर्दे इत्येव वदन्नित्यर्थः ॥७॥ यो ब्रह्मवादो इममेव ऋषीणां मध्यस्थितो भगवांस्तस्मै नारदाय ह्यवोचदित्यन्वयः ॥८॥

गूढार्थदीपिनी

अत्र श्रुतयः कथं चरन्तीत्येतस्मिन्नर्थे श्रुतीनां ब्रह्मपरत्वे वा । ते तुभ्यं गाथां वर्णयिष्यामि । कीदृशीम् । नारायण प्रवक्तृरूपेणान्वितो यस्यां तां गाथामितिहासमिति तोषणी । ऋषेरिति नारायणविशेषणम् क्षीरोदशायिनो व्यावृत्त्यर्थमुक्तम् । एक सम्बन्धपरम्परां द्योतयति ॥४॥ एकदा भगवत्प्रियो नारदः लोकान् लोकेषु पर्यटन् सनातनमाद्यम् ऋषिं धर्मपुत्रं श्रीनारायणं तदाश्रमं बदरिकाश्रमं ययौ । भगवत्प्रिय इत्यत्र षष्ठीसमासो बहुव्रीहिर्वा ॥५॥ वै प्रसिद्धेऽस्मिन् भारतवर्षे नृणां क्षेमाय स्वस्त भोगाय च यः तप आस्थितः आश्रित्य स्थितः तं द्रष्टुमित्यन्वयः । आकल्पात् कल्पो ब्रह्मदिनं तदारभ्य अद्यावधि । एत लोकशिक्षार्थमुक्तम् । धर्मो मद्भक्तिकृत् । ज्ञानं मद्विषयकम् । शमो वैराग्यं च तैरुपेतं युक्तम् ॥६॥ तत्र कलापग्रामे स्वा तन्निवासिभिः ऋषिभिः सह उपविष्टम् आवृतं श्रीनारायणं नारदः प्रणतो भूत्वा इदमेव श्रुतयः कथं चरन्तीत्येतदेव अपृच्छ कुरूद्वह परीक्षित् ! उद्वहो जन्म ॥७॥ पूर्वेषां सनन्दनादीनां यो ब्रह्मणि वेदे वादः तत्त्वजिज्ञासारूपः ब्रह्मप्रतिपादनविषयको निर्ण वा, तदिदं तस्मै नारदाय अवोचत् अन्येषाम् ऋषीणां शृण्वतां सताम् । हीति प्रसिद्धार्थे । इदमिति लिङ्गवैषम्यं न दोष 'यत्रोद्देश्यविधेयत्वं तत्रायं नियमो न हि । रामदाराश्च सीतेयं करुणाभाजनं हरिः' ॥ इति साहित्योक्तेः ॥८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अत्र अस्मिन् तव संशयनिराकरणे । तामेव गाथां ब्राह्म्यौपनिषल्लक्षणां वर्णयिष्यामि । नारायणेन विषयभूतेन अन्विताम् । तत्रादौ नारदस्य नारायणस्य ऋषेः संवादं च वर्णयिष्यामि ॥४॥ तयोः संवादमाह-एकदेति ॥५॥ क्षेमाय मोक्ष

स्वस्तये भोगार्थम् च । अ
ब्रह्मनिर्णयः ब्राह्म्युपनिषद्

स च विचारो राज्ञा
वक्तुं प्रतिजानीते । 'अत्र ते व
नारायणान्वितामिति । आदि
प्रवृत्तेति । 'अयमप्यर्थः कु
पूर्वेणैव सम्बन्धः । महता
कथयिष्यामि । चकारात्तेन
लोकानिति । लोकपर्यटनेनास
पर्यटने हेतुमाह-भगवत्प्रिय इ
च परिभ्रमणं कर्तव्यं यथा कं
बदरीस्थाने गतः ॥५॥ स्थानस
येन जगदेव प्रलयं याति । अत
तप आस्थितः ॥६॥ तत्रापि
तत्रोपविष्टमृषिभिरिति । उपवि
कलापा इति । तैर्वेष्टित इति ब
विश्वासार्थं माहात्म्यम् ॥७॥ अ
निरूपिता । तस्या अपि भगवा

अत्रार्थे नारायणो वक्तृ
इति गाथाविशेषणं नियतलिङ्गत
जगाम ॥५॥ कोऽसौ नारायण इत्य
धर्मादियुक्तं तपो य आस्थितः ॥६
हे कुरूद्वह ॥७॥ तस्मिन्स्थाने ऋ

के ते पूर्वजा यैर्धृता कथ
जगत्कारणभूतो गर्भोदकशायी स
ऋषेर्नारदस्य नारायणस्य बदरीनाथ
लोकान् पर्यटन् नारद एकदा सना
भगवद्भक्तत्वादित्यर्थः ॥५॥ अ
संसारदुःखनिवृत्त्यर्थं स्वस्तये परमा
क्रिया, ज्ञानम् आत्मतत्त्वज्ञानम्, शम
करिष्यामीति सङ्कल्पेन आस्थितः

भोगार्थम् च । आकल्पात्कल्पावधि । तपः आस्थितः ।।६।। तत्र नारायणाश्रमे ।।७।। पूर्वेषां सनन्दनादीनां ब्रह्मवादः र्यः ब्राह्म्युपनिषद्रूपः । तमवोचत् ।।८।।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स च विचारो राज्ञा कर्तुमशक्य इति सर्वश्रुत्यालोडनं महतामपि दुर्घटमिति कृपया स्वयमेव पूर्वविस्तरेण निर्णीतमिममर्थं प्रतिजानीते । 'अत्र ते वर्णयिष्यामि' इति । गाथा पूर्ववृत्तान्तप्रतिपादिका वाक्यपरम्परा । सा श्रुतिगीतारूपा । तत्रापि प्रमाणमाह- णान्वितामिति । आदिनारायणेन लक्ष्मीभुजान्तरगतेन उदारगुणवारिधिना संस्थापितोदरगजताशयानेनान्विता तत्प्रबोधनार्थमेव ति । 'अयमप्यर्थः कुतो ज्ञात' इत्याकाङ्क्षायामाह- 'नारदस्य च संवादमृषेर्नारायणस्य च' इति । अत्र ते वर्णयिष्यामीति सम्बन्धः । महता कृते निर्णये निरुक्ते च सर्वेषां सन्देहनिवृत्तिर्भवति, न तु येन केनचिदुदाहृते । अत्र एतदर्थं संवादं यिष्यामि । चकारात्तेन प्रोक्तं जनलोकसंवादं चोदाहरिष्यामीति ज्ञापितम् ।।४।। संवादार्थं कथाप्रस्तावमाह-एकदा नारदो ति । लोकपर्यटनेनास्याः श्रवणे अधिकारनिरूपिका शुद्धिर्भवतीति सूचितम् । एकदेति । कालस्तत्र न नियामकः । नारदस्य हेतुमाह-भगवत्प्रिय इति । क्व भगवतो माहात्म्यं ज्ञातं भवति ? क्व भगवानिति प्रियान्वेषणार्थं परिभ्रमतीत्यर्थः । एवमेव परिभ्रमणं कर्तव्यं यथा कौण्डिन्येन ब्रूतम् । ततो भगवद्रूपं भगवत्प्रतिपादकं च नारायणमृषिं बदरीनाथं द्रष्टुं नारायणाश्रमं ययौ स्थाने गतः ।।५।। स्थानस्याप्युत्कर्षमाह-यो वै भारतवर्षेऽस्मिन्निति । अस्मिन् भारते कर्मभूमौ । एकेनापि तादृशं कर्म क्रियते देव प्रलयं याति । अतस्तस्य रक्षा दुर्लभेति स्वयं तत् क्षेमाय उत्तरोत्तरकल्याणसिद्धये च सर्वेषामेव आकल्पात् कल्पप्रभृति आस्थितः ।।६।। तत्रापि तपः कुर्वाणं कार्यान्तरव्यग्रम् एकान्ते स्थितं प्रष्टुमशक्त इति सुगमावस्थां निरूपयति- विष्टमृषिभिरिति । उपविष्टत्वादवैय्यग्र्यं कलापग्रामः सर्वविद्यानिधानभूतः कलाः पातीति ग्रामस्तेषामपि समूहरूपः सर्व एव इति । तैर्वेष्टित इति बहिःसत्त्वावस्था प्रतिपादिता । ततः स्वयं प्रणतः सन्नपृच्छत् । इदमेव यत्त्वया पृष्टम् । कुरूद्वहेति । र्थं माहात्म्यम् ।।७।। अत एव तस्मै नारायणाय वृत्तान्तमवोचत् । ऋषीणां शृण्वतामिति अतिप्राकट्यात् निःसन्दिग्धता ता । तस्या अपि भगवानिदमेव पूर्वं निरूपितवान् ।।८।।

श्रीसुबोधिनीसारः

अत्रार्थे नारायणो वक्तृत्वेनान्वितो यस्यां तां गाथां ते तुभ्यमहं वक्ष्यामि । नारदस्य ऋषेर्नारायणस्य च संवादम् इतिहासम् विशेषणं नियतलिङ्गत्वात् ।।४।। एकस्मिन् समये लोकान् परिभ्रमन् नारदो हरिभक्तः सनातनमृषिं द्रष्टुं नारायणस्याश्रमं ।।५।। कोऽसौ नारायण इत्यत आह । अस्मिन् भारतखण्डे नृणां क्षेमाय मोक्षाय स्वस्तये कल्याणार्थं चाकल्पात् कल्पमभिव्याप्य तपो य आस्थितः ।।६।। तत्राश्रमे उपविष्टम् ऋषिभिः कलापग्रामवासिभिः परीतं परितो युक्तं प्रणतो नारद इदमेवापृच्छत् ।।७।। तस्मिन्स्थाने ऋषीणां शृण्वतां सतां भगवान्नारायण इदमवोचत् हि । पूर्वेषां जनलोकनिवासिनां यो ब्रह्मवादः ।।८।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

के ते पूर्वजा यैर्धृता कथं वा निर्णयो जात इत्यपेक्षायां तद्वक्तुं प्रतिजानीते-अत्रेति । अत्र तव सन्देहनिरासार्थमुत्तरे वक्तव्ये भूतो गर्भोदकशायी स्तोतव्यतयान्वितो यस्यां तां गाथां श्रुतिकृतस्तुतिरूपां ते तुभ्यं वर्णयिष्यामि । तत्प्रस्तावार्थं च नारायणस्य बदरीनाथस्य च संवादं वर्णयिष्यामि ।।४।। तत्संवादं प्रस्तोतुं तावन्नारदस्य नारायणोपसत्तिमाह-एकदेति । न् नारद एकदा सनातनं पुरातनमृषिं नारायणं द्रष्टुं तस्याश्रमं बदर्याख्यं ययौ । तदर्थगमने हेतुमाह-भगवत्प्रिय इति । वादित्यर्थः ।।५।। अस्यावतारस्य सर्वोपकारित्वं दर्शयन्नाह-अस्मिन् भारतवर्षे यः श्रीनारायणः नृणां क्षेमाय निवृत्त्यर्थं स्वस्तये परमानन्दस्वरूपलाभार्थं च । यद्येवं नराः कुर्युस्तदा एतत्फलं स्यादिति शिक्षार्थम् । धर्मो वर्णाश्रमोचिता आत्मतत्त्वज्ञानम्, शमो वैराग्यम्, तैरुपेतं युक्तम् । तपः आहारादिनियमपूर्वकसन्तापसहनरूपमाकल्पात् कल्पपर्यन्तमेव सङ्कल्पेन आस्थितः कुर्वन् वर्तत इत्यर्थः ।।६।। हे कुरूद्वह ! तत्र स्वाश्रमे उपविष्टमिति । वैय्यग्र्याभावेन प्रश्नावसरो

दर्शितः । समाजोऽपि विचारेण निर्णययोग्य एव इत्याह-कलापेति । तदाश्रमस्य वैकलापं ग्राम इति नामान्तरम् । तद्वासिभिः ऋषिभिः परीतमावृतं नारायणं प्रणतः सन्नारदः इदमेव ब्रह्मणि श्रुतयः कथं चरन्तीति यत्त्वं पृच्छसि तदेव अपृच्छत् ।।७।। तस्मै पृच्छते नारदाय अन्येषामप्यृषीणां शृण्वतां सतां भगवान् नारायण इदमवोचत् । इदमिति किम् इत्यपेक्षायां तदुक्तस्यापि साम्प्रदायिकत्वं दर्शयंस्तदाह-य इति । जनलोकनिवासिनां पूर्वेषां वृद्धानां सनकादीनां यः संवादः प्रश्नोत्तररूपः निर्णयः अभूत्तदिदमिति सम्बन्धः ।।८।।

अन्वितार्थप्रकाशिका

अत्रेति । अत्र विषये नारायणः वक्तृत्वेनान्वितो यस्यां नारायणे ब्रह्मणि अन्वितां वा तां गाथाम् इतिहासरूपां ते तुभ्यं वर्णयिष्यामि । तत्र ऋषेर्नारदस्य नारायणस्य संवादं वर्णयिष्यामि ।।४।। एकदेति । लोकान् पर्यटन् भगवत्प्रियो नारद एकदा सनातनं पुरातनमृषिं नारायणं द्रष्टुं तस्याश्रमं बदर्याख्यं ययौ ।।५।। य इति । अस्मिन् भारतवर्षे यः श्रीनारायणः नृणां क्षेमाय ऐहिकसुखाय स्वस्तये आमुष्मिकमङ्गलाय लोकशिक्षार्थम् । धर्मोदयादिरूपः ज्ञानम् आत्मतत्त्वज्ञानं शमो वैराग्यं तैरुपेतं युक्तं तपः आकल्पं ब्रह्मादिनारम्भप्रभृति स्वयमेव आस्थितः कुर्वन् वर्तते ।।६।। तत्रेति ।। हे कुरूद्वह ! तत्र स्वाश्रमे उपविष्टं कलापग्राम इति तदाश्रमस्य नामान्तरं तद्वासिभिः ऋषिभिः परीतमावृतं नारायणं प्रणतः सन्नारदः इदमेव ब्रह्मणि श्रुतयः कथं चरन्तीति यत्त्वं पृच्छसि तदेव अपृच्छत् ।।७।। तस्मै इति ।। तस्मै पृच्छते नारदाय अन्येषामप्यृषीणां शृण्वतां सतां भगवान् नारायण इदमवोचत् । किमवोचत्तत्राह य इति । जनलोकनिवासिनां पूर्वेषां वृद्धानां सनकादीनां यः ब्रह्मणि विषये वादः तत्त्वबुभुत्सुकथारूपः प्रश्नोत्तराभ्यां निर्णयः अभूत्तदिदमिति सम्बन्धः ।।८।।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

राजकृतप्रश्नस्य सङ्क्षेपत उत्तरं कृत्वा पूर्वाख्यानेन सविस्तरमुत्तरमाह अत्र त इति ।। अत्र ब्रह्मणि श्रुतिप्रवर्तनरूपप्रश्ने नारायणान्वितां नारायणः प्रवक्तृत्वेनान्वि(तो) यस्यां ताम् ।। यद्वा ।। नारायणेन सहान्वितां प्रतिपाद्यप्रतिपादकतया सम्बद्धां नारदस्य ब्रह्मपुत्रस्य नारायणस्य बदर्याश्रमवासिनश्चोभयोर्ऋष्योः संवादं संवादरूपां गाथामितिहासम् संवादशब्दस्याजहल्लिङ्गत्वाद्गाथाविशेषणत्वमविरुद्धम् ।।४।। एकदेति ।। भगवत्प्रियः भगवतो हरेः प्रियः ।। यद्वा ।। भगवान् प्रियो यस्य स वाहिताग्न्यादिष्विति प्रियशब्दस्य परत्वम् ।। नारायणाश्रमं बदर्याश्रमम् ।।५।। य इति ।। क्षेमाय मोक्षाय । स्वस्तये एहिकरुखाय च ।।६।। तत्रेति ।। कलापग्रामवासिभिः बदर्याश्रमवासिभिः कलापग्रामशब्दो बदर्याश्रमे रूढः ।।७।। तस्मायिति ।। इदं वक्ष्यमाणम् । ब्रह्मवादः आसीत् ।।८।।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

परस्य ब्रह्मणः स्वपर्यन्तं सर्वबुद्धिशब्दत्वं सर्वान्तरात्मत्वं जगत्कारणत्वं परमकारुणिकत्वं मोक्षप्रदत्वं चोक्तम् । स्वोक्तार्थस्य स्वमनीषोत्प्रेक्षितत्वनिरायास मूर्तिधरा वेदा एवोक्तानुगुणविशिष्टं भगवन्तं तुष्टुवुरिति वक्तुं तावत् स नृपकृतप्रश्नपरिहारायेतिहासान्तरेण संवादयति । अत्रेत्यादिना ।। अत्रेति ।। अत्र त्वत्प्रश्नोत्तरे च, नारायणस्य, ऋषेः नारदस्य संवादं च संवादरूपामेव, नारायणः अन्वितो यस्यां तां, गाथां, ते तुभ्यं, वर्णयिष्यामि । शृण्विति शेषः । किमयं परमव्योम नारायणः, विशालतरुतलवासीवेति शङ्कानिरासाय ऋषेरिति नारायणविशेषणम् । तेनर्षिवेषधारिणो नारायणस्य नारदस्य प्रश्नत्तररूपमितिहासं कथयिष्यामीत्यर्थः ।।४।। संवादमेव प्रस्तोतुं तावन्नारदस्य नारायणोपसत्तिमाह ।। एकदेति ।। एकदा कदाचित् भगवतः प्रियः भगवान् प्रियो यस्येति वा । "वाहिताग्न्यादिषु०" इति प्रियशब्दस्य परत्वम् । नारदः, लोकान् भूरादीन्, परिभ्रमन् सन्, सनातनं पुरातनम्, ऋषिं नारायणर्षिं द्रष्टुं, नारायणाश्रमं तस्यैव बदर्याख्यमाश्रमं, कलापग्राममिति नारायणाश्रमशब्दः कलापग्रामे रूढः । ययौ ।।५।। ऋषिं विशिनष्टि ।। यो वा इति ।। यो नारायणर्षिः, अस्मिन् भारतवर्षे क्षेमायाभवरूपाय, स्वतस्तये मोक्षार्थं च, यद्वा क्षेमाय मोक्षाय, स्वस्तये ऐहिकसुखाय च, आकल्पात्कल्पावधि, धर्मो वर्णा

वृषश्च ज्ञानमात्मनः प्रकृति
कुर्वन्ति । तपः स्वात्मोपा
कलापग्रामवासिभिः ऋषि
प्रणतः सन्, इदं तदुक्तमेव,
मदुक्तपरिहारगर्भपरिहारवाक
पूर्वेषामग्रजानां सनकादीनां,

एतदेव सर्वश्रुत्यर्थ
यस्याम् । गाथामितिहासम् ।

एतदेवं बुद्धीन्द्रि
अत्र बुद्धीन्द्रियेत्यादिश्लोको
संवादस्तद्रूपामित्यर्थः । गाथा
ऐहिकाय स्वस्तये आमुष्मिक
वादस्तत्त्वबुभुत्सार्थकथारूपः

एतदेव सर्वश्रुत्यर्थनिरू
कथम्भूतां गाथाम् । नारायणा
प्रवर्तयिष्यामि । एतेन क्षीरोदश
अवगम्यते । यद्वा । नियतलिङ्गत्व
लोकान् पर्यटन् सनातनमृषिं द्रष्
सुस्थितये क्षेमाय समृद्धये य अ
युक्तम् ।।६।। हे कुरूद्वह ! तत्र
कलापग्रामवासिभिः परीतमावृतम्
तत्पृष्टदेर्माहात्म्यं श्रेष्ठमभिप्रेतम् ।।
सनन्दनादीनाम् । यो ब्रह्मवादोऽ
जनलोकनिवासिनामित्यकारान्तोऽ
जनाः' इति ।।८-९।।

नारायणान्वितां तत्सम्बन्धि
ब्रह्मनिरूपणम् । ब्राह्मणानां वादो व

आप के प्रश्न और उस

ज्ञानमात्मनः प्रकृतिपुरुषाभ्यां विलक्षणत्वेनावलोकनं च शमो रागद्वेषादिराहित्यं च तैरुपेतः सन्, केचित्त्वेतत्तपसो विशेषणं तपः स्वात्मोपासनात्मकम्, आस्थितः अधिकृतवानित्यर्थः ॥६॥ तत्रेति ॥ हे कुरूद्वह कुरुश्रेष्ठ ! तत्र नारायणाश्रमे, ग्रामवासिभिः ऋषिभिः, परमात्मस्वरूपध्याननिष्ठैस्ततरत्यर्षिभिरित्यर्थः । परीतं परिवृतं सन्तम्, उपविष्टं नारायणं, नारदः सन्, इदं तदुक्तमेव, अपृच्छत् ॥७॥ तस्मा इति ॥ तस्मै पृच्छते नारदाय, भगवान् नारायणः, ऋषीणां शृण्वतां सताम्, इदं परिहारगर्भपरिहारवाक्यम्, अवोचत् हि। तदुक्तपरिहारस्यापि साम्प्रदायिकत्वं वदन् तं विशिनष्टि य इति। जनलोकनिवासिनां, प्रजानां सनकादीनां, यः ब्रह्मवादः प्रश्नोत्तररूपः संवादस्तमवोचदिति सम्बन्धः ॥८॥

योगिरामानुजाचार्यकृतसरला व्याख्या

एतदेव सर्वश्रुत्यर्थनिरूपणेन प्रपञ्चयितुमितिहासमवतारयति-अत्रेति । नारायणान्वितां नारायणः प्रवक्तृत्वेनान्वितो गाथामितिहासम् ॥४-८॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

एतदेवं बुद्धीन्द्रियेत्यादिश्लोकेन प्रतिपादितमुत्तरमेव इतिहासं पुरावृत्तम् अवतारयति-आरभते । बुद्धीन्द्रियेत्यादिश्लोकोक्तोत्तरप्रसङ्गे वर्णयिष्यामीत्यत्र वर्तयिष्यामीति सभ्यः पाठः । क्वचित् गतिसामान्येन वर्णनं तद्रूपामित्यर्थः । गाथासंवादशब्दयोः नियतलिङ्गत्वात्सामानाधिकरण्यम् ॥४॥ नारायणाश्रमं बदरिकाश्रमम् ॥५॥ क्षेमाय स्वस्तये आमुष्मिकाय मङ्गलाय । आकल्पात् ब्रह्मदिनप्रथमांशमारभ्य ॥६॥ तत्र निजाश्रमे ॥७॥ ब्रह्मणि वेदे । बुभुत्सार्थकथारूपः ॥८-९॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

एतदेव सर्वश्रुत्यर्थनिरूपणेन प्रपञ्चयितुमितिहासम् अवतारयति-अत्रेति। अत्र ते तव प्रश्ने गाथामितिहासं वर्णयिष्यामि। भूतां गाथाम् । नारायणान्वितां श्रीनारायणः प्रवक्तृत्वेनान्वितो यस्यां ताम् । पुनः नारदस्य ऋषेर्नारायणस्य संवादं च वर्णयिष्यामि। एतेन क्षीरोदशायिनः श्रीनारायणात् श्रुत्वा सनन्दनादिभिर्निर्णीतं तदेव श्रीनारायणोऽपि नारदाय कथितवानिति यद्वा। नियतलिङ्गत्वाद्गाथामित्यस्य विशेषणं नारदस्य श्रीनारायणस्य संवादमिति ॥४॥ एकदा एकस्मिन् काले नारदो पर्यटन् सनातनमृषिं द्रष्टुं नारायणाश्रमं कलापग्रामं ययौ ॥५॥ कोऽसावृषिस्तमाह । अस्मिन् भारतवर्षे नृणां स्वस्तये क्षेमाय समृद्धये य आकल्पात् कल्पमभिव्याप्य आस्थितः धृतवान् । तं द्रष्टुम् । किम्भूतम् । तपः धर्मज्ञानसमैरुपेतं ॥६॥ हे कुरूद्वह ! तत्र कलापग्रामे स्वाश्रमे । उपविष्टं नारायणं नारदः प्रणतो भूत्वा इदमेवापृच्छत् । कथम्भूतम् । ग्रामवासिभिः परीतमावृतम्। निजाश्रमे उपविष्टमिति वैराग्यराहित्येन पृष्टावसरः श्रेष्ठ उक्तः । ऋषिभिः परीतमिति सर्वसङ्गत्वेन माहात्म्यं श्रेष्ठमभिप्रेतम् ॥७॥ शृण्वताम् ऋषीणां मध्ये तस्मै नारदाय इदमवोचत्। इदं किम्। जनलोकनिवासिनां पूर्वेषां दीनाम्। यो ब्रह्मवादोऽभूत् । तदिदमुद्देश्यविधेयभावत्वात् लिङ्गवैषम्यदोषः । शृण्वतामित्यनेन सावधानत्वमुक्तम् । लोकनिवासिनामित्यकारान्तोऽपि भुवनवाची जनशब्दोऽयमुक्तः। सकारान्तोऽपि वर्तते। तृतीयस्कन्धे 'जनस्तपःसत्यनिवासिनो इति ॥८-९॥

श्रीनिवाससूरिकृततत्त्वदीपिका

नारायणान्वितां तत्सम्बन्धिनीम् । स्पष्टमन्यत् ॥४-५॥ क्षेमाय अभयरूपमोक्षाय । स्पष्टमन्यत् ॥६-७॥ ब्रह्मवादो णम्। ब्राह्मणानां वादो वा 'वादः प्रवदतामहमि'ति स्मृतेः । स्पष्टमन्यत् ॥८॥

कृष्णप्रिया

आप के प्रश्न और उसके उत्तर के विषयमें नारायण से युक्त कथा वर्णन में करुंगा आप उसका श्रवण

करो ऋषि वेषधारी वदरिकाश्रम निवासी नारयण और नारद के प्रश्नोत्तर इतिहास का वर्णन करुंगा ॥४॥ समय भगवान के प्रिय नारद मुनि लोकन में प्रमण करते करते सनातन नारायण ऋषि के दर्शन करने की से वदरिकाश्रम गए ॥५॥ वर्णों के उचित धर्म संपन्न चेतनासे विलक्षण आत्मज्ञानसे सम्पन्न शम दमादि से नारायणऋषिने इस भरत खण्डमें मनुष्यों को निर्भय होने के अर्थ तथा मोक्ष के अर्थ निज आत्म स्वरूप उपासना रूप तपमें अधिकार किया है ॥६॥ हे कुरुद्वह ! उस आश्रममें कालपग्राम निवासी ऋषिओं से चारों से युक्त विराजमान नारायण ऋषी को प्रणाम कर नादजी ने आपके प्रश्न को ही पुछा ॥७॥ जनलोक वृध्द सनकादिक ज्ञानियोंको ब्रह्मके विषयमें जो संवाद किया है इसीको ऋषियों को श्रवण करते करते के अर्थ भगवान नारायण ऋषि ने कहा ॥८॥

श्रीभगवानुवाच

स्वायम्भुव ब्रह्मसत्रं जनलोकेऽभवत् पुरा । [1]तत्रस्थानां मानसानां मुनीनामूर्ध्वरेतसाम् ॥९॥
श्वेतद्वीपं गतवति त्वयि द्रष्टुं [2]तदीश्वरम् । ब्रह्मवादः [3]सुसंवृत्तः श्रुतयो यत्र शेरते ।
[4]तत्र हायमभूत् प्रश्नस्त्वं मां यं [5]परिपृच्छसि ॥१०॥
[6]तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः । अपि चक्रुः [7]प्रवचनमेकं शुश्रूषतोऽपरे ॥११॥

कर्दमक्षमा

श्रीभगवान्, उवाच ।

हे स्वायम्भुव, पुरा, जनलोके, तत्रस्थानाम्, मानसानाम्, ऊर्ध्वरेतसाम्, मुनीनाम्, ब्रह्मसत्रम्, अभवत् ॥९॥

त्वयि, तदीश्वरम्, द्रष्टुम्, श्वेतद्वीपम्, गतवति, ब्रह्मवादः, सुसंवृतः, यत्र, श्रुतयः, शेरते, त्वम्, माम्, यम्, प्रश्नम्, परिपृच्छसि, तत्र, ह, अयम्, अभूत् ॥१०॥

तुल्यश्रुततपःशीलाः, तुल्यस्वीयारिमध्यमाः, अपि, एकम्, प्रवचनम्, अपरे, शुश्रूषवः, चक्रुः ॥११॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ब्रह्मसत्रमिति । यथा यजमाना एव समाना ऋत्विगादिरूपेण यत्र कर्म कुर्वन्ति तत्कर्मसत्रं प्रसिद्धं तथा यत्र समाना वक्तृश्रोतृभावेन ब्रह्म मीमांसन्ते तद्ब्रह्मसत्रम् ॥९॥ अहो तर्हि मया कथं तत्र ज्ञातमित्यत आह–श्वेतद्वीपमिति । तदीश्वरं मामेवानिरुद्धमूर्तिम् ॥१०॥ ननु सर्वज्ञास्ते कस्तत्र वक्ता प्रष्टा वा तत्राऽऽह–तुल्यश्रुतेति । श्रुतादिभिरविशेषा अरिमित्रोदासीन निरुपमकरुणया अतः सर्वे प्रवचनयोग्या अपि केनापि कौतुकेनैकं प्रवक्तारं कृत्वाऽन्ये पप्रच्छुरित्यर्थः ॥११॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — स्वायम्भुव स्वयम्भुवोऽपत्यं स्वायम्भुवस्तत्सम्बुद्धौ । गुणाभावश्चार्षः कल्पादौ । तत्रस्थानां जनलोकस्थानाम् । मानसानां ब्रह्मणो मनसो जातानाम् सनकादीनाम् ॥★॥ श्रीधरानुयायिनी श्रीभगवानुवाच । हे नारद ! श्वेतद्वीपपतिमनिरुद्धमूर्तिं मां द्रष्टुं त्वयि श्वेतद्वीपं गतवति सति श्रुतिसमाजवति जनलोके पुरा

---

१. तत्रत्यानां-वीर. विज. । २. तमीश्वरं-विज. । ३.संप्रवृत्तः-वीर. । ४. तत्राप्य-विज. । ५. यमनुपृच्छसि-श्रीधर. वंशी. वीर. वि
''परिहारांश्च तान्सर्वान्वक्ष्येऽहं श्रृणु तेऽनध''-इदमर्धमधिकं-वीर. । ७. प्रवचन एकं-वीर. ।

कादीनां वेदतपःशीलैः सर्वत्र समदृष्ट्या च तुल्यानामपि भगवच्चरित्रास्वादनार्थमेकं सनन्दनं वक्तारं परिकल्प्य त्वत्पृष्टप्रश्नपूर्वकमेव विचारः प्रावर्तत। यत्र समा एव सर्वे ब्रह्म वेदं वा मीमांसन्ते तद्ब्रह्मसत्रम्॥★॥ विश्वनाथी — स्वायम्भुवेति। ब्रह्मसत्रे तवापि यतास्तीति तत्समानत्वादिति भावः ॥९॥

नीलकण्ठी — ॥९॥

भावार्थदीपिकाप्रकाशः वंशीधरी — तद्ब्रह्मसत्रम्। तदीश्वरं श्वेतद्वीपाधीशम्। तत्र जनलोके। अयं कः यं प्रश्नं त्वं सीति। ततश्चायं प्रश्नस्त्वां विना न केनापि कृत इति श्लाघा सूचिता। श्रुतयः शेरते निवृत्तव्यापारा वक्तुमशक्ता अभवन्निति वत्। क्वचित्पुस्तके "ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते" इत्यर्धश्लोको नास्ति॥★॥

श्रीधरानुयायिनी — ॥★॥

विश्वनाथी — अनु तेभ्यः पश्चात्पृच्छति तत्पश्चादयं प्रश्नो न केनापि कृतोऽस्तीति श्लाघा सूचिता। अत्र पद्यार्धमधिकमपि क्वचिदस्तीति तदनुपयुक्तमेव। शेरते समन्विता भवन्तीत्यर्थः ॥१०॥

नीलकण्ठी — ॥१०॥

भावार्थदीपिकाप्रकाशः वंशीधरी — अत्र शङ्कते-नन्विति। तुल्यानि श्रुतानि शास्त्राणि तपांसि शीलानि च येषां तथा। यतः सर्वथा समाना अतो हेतोः केनापि कौतुकेन श्रौतविचारकुतूहलेन। इत्यर्थ इति-एवम्भूताः सनन्दनमेकं वक्तारं विना श्रोतृजनाह्लादो न भवतीति भावः ॥★॥

श्रीधरानुयायिनी — ॥★॥

विश्वनाथी — ॥११॥

नीलकण्ठी — प्रवचनं प्रकृष्टं वचनं यस्येति प्रवक्तारम्। शेषं स्पष्टम्॥११॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

हे स्वायम्भुवेति। ब्रह्मसत्रे तवापि योग्यतास्तीति तत्समानत्वादिति भावः। पुराकल्पादौ मानसानां श्रीब्रह्ममनोजातानामिति विशुद्धत्वं व्यक्तम् अतो मुनीनां श्रीभगवन्मननशीलानाम् अत एवोर्ध्वरेतसां नैष्ठिकब्रह्मचारिणामित्यर्थः। इति तेषां ब्रह्मसत्रयोग्यता ता॥९॥ तत्र जनलोके ह स्फुटम्। अनु तेभ्यः पश्चात्पृच्छति इति। तत्पश्चादयं प्रश्नो न केनापि कृतोऽस्तीति श्लाघा सूचिता। त्र पद्यार्धमधिकमपि क्वचिदस्तीति तदनुपयुक्तमेव। शेरते समन्विता भवन्तीत्यर्थः ॥१०॥ तपश्चित्तैकाग्रता। प्रवचनमिति ल्युः ॥११॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वायम्भुव! हे ब्रह्मपुत्र नारद! अतस्तवापि तैः सह ब्रह्मसत्रे तच्छ्रवणे वा योग्यताऽस्त्येवेति भावः। पुरा कल्पादौ सानां श्रीब्रह्ममनोजातानामिति महाविशुद्धत्वमुक्तम्। अतो मुनीनां ज्ञानपराणाम्, किंवा श्रीभगवद्ध्याननिष्ठानाम् ज्ञाननिष्ठानाम् [ग] ।), अत एवोर्ध्वरेतसां नैष्ठिकब्रह्मचारिणामित्यर्थः। इति तषां ब्रह्मसत्रयोग्यतोक्ता॥९॥

तत्र जनलोके, ह स्फुटम्, अनु तेभ्यः पश्चात्, 'पृच्छसि' इति तत्पश्चादयं प्रश्नस्त्वां विना न केनापि कृतोऽस्तीति ॥१०॥ श्रुतं शास्त्राभ्यासः। तपश्चित्तैकाग्रता। शीलं शान्त्यादिस्वभावः। प्रवचनं प्रवक्तारम् एकं श्रीसनन्दनम् श्रीसनकादयः ॥११॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

स्वायम्भुवं स्वयम्भुवाऽनुष्ठितं ब्रह्मसत्रम् । वेदसिद्धभगवदाराधनरूपं मन्त्रम् ॥९॥ ब्रह्मवादः ब्रह्मणां वादः ॥१०॥ प्रवचनम् एकं चक्रुः । सनन्दनं प्रतिवक्तारं चक्रुः ॥११-१३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

उक्तिमेवाह–स्वायम्भुवेति । हे स्वायम्भुव नारद ! तस्य स्वयम्भुवः पुत्रत्वादेवं सम्बोधनं पुरा जनलोके तत्रत्यानां जनलोकस्थानां मानसानां ब्रह्ममानसपुत्राणाम् ऊर्ध्वरेतसां जन्मप्रभृति जितेन्द्रियाणां मुनीनां सनकादीनां सम्बन्धि ब्रह्मस परब्रह्मगुणानुभवात्मकं सत्रमभूत् ॥९॥

तर्हि तदाहं क्व गतः । कथं मया न श्रुतमित्यत आह–श्वेतद्वीपमिति । तं श्वेतद्वीपवासिनम् ईश्वरं (तत्रस्थं मामेवानिरुद्धमूर्तिमित्यर्थः ।) द्रष्टुं त्वयि गतवति सति तदा ब्रह्मवादः ब्रह्मणां वादः सम्प्रवृत्तः । तं विशिनष्टि–यत्र ब्रह्मवादे श्रुतयः शेरते प्रतारणभयरहिताः ऐककण्ठ्यं प्राप्ताः सुखेनासत इत्यर्थः । तत्रेति । हेति हर्षे आश्चर्ये वा । ऋषिभिः कृत एव प्रश्नः त्वया कृतः अहो तव बुद्धिकौशलमिति मां प्रति यं प्रष्टव्यमर्थं पृच्छसि स तदर्थविषयकः प्रश्न अभूत्प्रवृत्तः ॥१०॥

तथा परिहारांश्च तान् तत्र प्रवृत्तान् प्रश्नपरिहारान् सर्वानहं हे अनघ ! ते तुभ्यं वक्ष्ये शृणु ॥०॥

ननु कस्तत्र वक्ता बभूव के वा श्रोतारः किं वा ब्रह्मसत्रस्य लक्षणम् इत्यत आह–तुल्येति । यद्यपि सर्वे श्रुतं शास्त्रजन्यं ज्ञानं तपोऽनशनादि । यद्वा । "तप आलोचने" इति धातुरूपं तप इति । ब्रह्मोपासनात्मकं ज्ञानमित्यर्थः । शीलं तदुपयुक्त सद्वृत्तिराधनाद्यात्मकस्वभावश्च तुल्यान्येतानि येषां ते तुल्याः स्वीयाः अरयो मध्यमा उपेक्ष्याश्च येषां ते —

"सर्वं खल्विदं ब्रह्म तज्जलानि शान्त उपासीत ।"

इत्युक्तविधसार्वात्म्यब्रह्मोपासननिष्ठत्वात् स्वीयादिरहिता इत्यर्थः । अनेन सर्वेषामपि प्रवचनसामर्थ्यं सूच्यते । अपि तथापि प्रवचने एकं चक्रुः सनन्दनं प्रतिवक्तारं चक्रुरित्यर्थः । अपरे सनकादयः सर्वे शुश्रूषवो बभूवुरिति शेषः । एतदेव ब्रह्मसत्रं न यत्सर्वेऽप्यधिगतपरमार्थयाथात्म्या अप्येकं प्रवक्तारं कृत्वा अन्ये तु तूष्णीं शृणुयुरिति भावः ॥११॥

श्रीमद्विजयध्वजकृता पदरत्नावली

पुरा तत्रत्यानां जनलोकस्थितानां मानसानामूर्ध्वरेतसां मुनीनां स्वायम्भुवं स्वयम्भूपुत्रैः क्रियमाणम् । ब्रह्मसत्रं ब्रह्मयज्ञं ब्रह्मविचारलक्षणो यज्ञो जनलोकेऽभवदित्यर्थः ॥९॥ यत्र श्वेतद्वीपे ब्रह्मणि श्रुतयः शेरते । अन्यबोधकत्वव्यापारमन्तरे तद्गुणावबोधनपरा एव सन्ति । तं श्वेतद्वीपम् । त्वयि गतवति । ब्रह्मवादः सम्प्रवृत्त इत्यन्वयः । कथमत्राह–तत्रेति । मुनयः कीदृ इत्यत्राह–तुल्येति । अरिः शत्रुः । एकं प्रवचनम् । प्रकृष्टं वचनं यस्य स तथा । प्रवक्ता व्याख्यातेत्यर्थः । तम् अपरे शुश्रू श्रोतारः । योऽत्र प्रवक्ता स श्रेष्ठ इत्यत्र तात्पर्यं ज्ञातव्यम् 'सनकाद्याः समाः सर्वे तत्र श्रेष्ठः कुमारकः ।' इति वचनात् ॥१०-११

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥१-१३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

स्वायम्भुवेत्यादि । हे स्वायम्भुव नारद ! ब्रह्मसत्रमिति ब्रह्मशब्दो मुख्यो लाक्षणिको वेति मीमांसनं ब्रह्मसत्रं प्रक सविशेषतया मुख्य एवेति मीमांसितमिति भावः ॥९॥ त्वं तदा तत्र नासीः । त्वं श्वेतद्वीपं गत इत्याह–श्वेतद्वीपमित्यादि ॥१०-

: ब्रह्मणां वादः ॥१०॥

पुरा जनलोके तत्रत्यानां
कादीनां सम्बन्धि ब्रह्मसत्रं

वासिनम् ईश्वरं (तत्रस्थं
शनष्टि-यत्र ब्रह्मवादे श्रुतयः
कृत एव प्रश्नः त्वया कृतः
॥

यद्यपि सर्वे श्रुतं शास्त्रजन्यं
मित्यर्थः । शीलं तदुपयुक्ता
ते —

सामर्थ्यं सूच्यते । अपि तथापि
शेषः । एतदेव ब्रह्मसत्रं नम

यमाणम् । ब्रह्मसत्रं ब्रह्मयज्ञम् ।
अन्यबोधकत्वव्यापारमन्तरेण
मत्राह-तत्रेति । मुनयः कीदृशा
तितेत्यर्थः । तम् अपरे शुश्रूषवः
ः ।' इति वचनात् ॥१०-११॥

मीमांसनं ब्रह्मसत्रं प्रकरणबलात्
ाह-श्वेतद्वीपमित्यादि ॥१०-११॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥९-११॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वायम्भुव ! हे स्वयम्भूपुत्र ! ब्रह्मसत्रमिति यजमाना एव समानाः । ऋत्विगादिरूपेण यत्र कर्म कुर्वन्ति तत् कर्मसत्रमिति सिद्धम् । तथा यत्र समाना एव वक्तृश्रोतृभावेन ब्रह्म मीमांसन्ते तत् ब्रह्मसत्रम् ॥९॥ अहो तर्हि क्वाहमगमम् । कथं नावगतवांस्तत्राह-श्वेतद्वीपमिति । ह स्पष्टम् ॥१०॥ ननु सर्वज्ञा एव ते तत्र कः प्रष्टा को वा वक्ता तत्राह-तुल्येति । श्रुतादिभिरविशेषाः पक्षविपक्षतटस्थपक्षरहिताः अतः सर्वेऽपि वक्तृत्वे योग्या अपि केनापि कौतुकेनैकं प्रवचनं प्रवक्तारं चक्रुः । कर्तरि ल्युः ॥११॥

गूढार्थदीपिनी

हे स्वायम्भुव ब्रह्मपुत्र नारद ! पुरा कल्पादौ जनलोके मानसानां ब्रह्मणो मानसपुत्राणां मुनीनां सनन्दनादीनां ब्रह्मसत्रं र्निर्णयविषयको ज्ञानयज्ञोऽभूत् । कथम्भूतानाम् ऊर्ध्वरेतसां नैष्ठिकब्रह्मचारिणाम् । यत्र समाना एव साधवः वक्तृश्रोतृभावेन ह्म वेदं वा मीमांसते विचारयन्ति तद् ब्रह्मसत्रम् ॥९॥ अहो मया तत्कथं न ज्ञातमित्याह-श्वेतेति । श्वेतद्वीपं क्षीरोदस्थानं त्वयि वति सति । भगवतोऽनिरुद्धस्य क्रीडासाधनमिति श्रीवल्लभाचार्याः । तदीश्वरमनिरुद्धं द्रष्टुम् । ब्रह्मवादः वेदः कं प्रतिपादयतीति विचारः सम्यक् प्रवृत्तः । यत्र वादे सर्वा अपि श्रुतयः शेरते निवृत्तव्यापाराः सत्यः नेति नेति कृत्वा वक्तुमशक्ता अभवन्नित्यर्थः । द । ब्रह्मवादः श्रुतिनिर्णयः सुसम्पन्नः । यत्र श्रुतयः दिव्यविग्रहधारिण्यः सत्यः शेरते भगवता सह दिव्यशय्यायामिति शेषः । स्पर्शसुखानुभवं चक्रुरित्यर्थः । 'वयमपि ते समाः' इति वक्ष्यमाणोक्तेः तादृगिच्छासम्पन्नत्वादिति केचिदाहुः ॥१०॥ तत्र जनलोके । ह स्पष्टम् । अयं प्रश्नोऽभूत् यं प्रश्नं त्वं मामनुपृच्छसि अतः तान् सर्वानपि प्रश्नस्य परिहारान् उत्तराणि अहं ते वक्ष्ये शृणु हे अनघ ! निर्मलमते ! अनु इत्युपसर्गेण ततः पश्चात् त्वां विना न केनापि प्रश्नः कृतोऽस्तीति श्लाघा सूचिता ॥११॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्रस्थानां जनलोकस्थानाम् । मानसानां ब्रह्मणो मनस आविर्भूतानां सनन्दनादीनाम् । ब्रह्मसत्रं ब्रह्मनिर्णयरूपो यज्ञ अभूत् । यत्र ब्रह्मवादे श्रुतयः स्वगृहे जना यथासुखं तथा स्वपन्ति तथा स्वविषये ब्रह्मणि शेरते ॥९॥

अहं तच्छिष्यस्तदा क्व गतः इत्यत्राह-श्वेतद्वीपमिति ॥१०॥

यद्यपि लोकशिक्षार्थमुपादेयतया तुल्यानि श्रुतादीनि येषां ते तुल्याः स्वीयादयः अनुपादेयतया येषां ते अपि तथापि एकं प्रवचनं प्रवक्तारं चक्रुः । अपरे शुश्रूषवः बभूवुः ॥११॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सङ्क्षिप्तत्वात् यदा नारदस्यापि सन्देहो न गतः तदा नारायणः पुरावृत्तमाह-स्वायम्भुवेति । पूर्वं जनलोके ब्रह्मसत्रमासीत् । कर्म सत्रं सप्तदशावरास्तुल्यफलास्तुल्यसाधनाश्च अहमहमिकया प्रधानगुणभावमाश्रित्य कर्म कुर्वन्ति एवं निःसन्दिग्धब्रह्मज्ञानार्थं ह्मण एव निर्णयार्थं प्रवृत्ताः तेषां विचारो ब्रह्मसत्रम् । तज्जनलोके आसीत् । महःपर्यन्तं कर्मफलमेवेति शुद्धब्रह्मविचारो न भवतीति लोकग्रहणम् । स्वायम्भुवेति सम्बोधनं विश्वासार्थम् । न स्थानोत्कर्षणमात्रेण विचारः समीचीनो भवतीति विचारकाणां कर्मणामुत्कर्षमाह-तत्रस्थानमिति । तत्रैव तिष्ठन्तीति कर्मसम्बन्धिदोषाभावस्तेषामुक्तः । मानसानामिति ब्रह्मणो मनसा उत्पन्नानां चारिणाम् । अनेन जन्मोत्कर्षः सूचितः । तेषां कर्माह-मुनीनामिति, मननशीलानाम् । ऊर्ध्वरेतसामिति ब्रह्मविद्याया अधिकारः ॥९॥ नन्वहं कथमिममर्थं न ज्ञातवान् तत्राह-श्वेतद्वीपं गतवतीति । क्षीरोदस्थानं भगवतोऽनिरुद्धस्य क्रीडासाधनम् । तत्र द्वीपपतिं द्रष्टुं त्वयिगते ब्रह्मवादः सुसंवृत्तः इति सम्बन्धः । अनेन सर्वे स्वस्वस्थाने यदा स्थिताः तदा ब्रह्मवादो जायत इत्यपि सूचितम् । पूर्वलोकानां स्थितत्वात् कर्मिणः सुखिनः भक्ता अपि भगवद्दर्शनं कुर्वाणाः यदा सुखिनः तदा ब्रह्मवादः सुसंवृत्तः

ब्रह्मनिरूपणार्थं वादो वीतरागा कथा यत्र तादृशो विचारः सम्यक् निष्पन्न इत्यर्थः । ननु तदपि स्थानं स्थानान्तरतुल्यमिति कथं त निर्णय इति चेत्तत्राह-श्रुतयो यत्र शेरत इति । श्रुतयः सर्वत्र भ्रमणं कृत्वा शयनार्थं यत्र गच्छन्ति, अतस्तासामेव विश्रामस्थानमिति । तत्र स्थिताः श्रुतयः स्वाभिप्रायं निवेदयन्तीति श्रुत्यभिमानिनां देवतानां मूर्तिधराणां श्रुतीनां वा विचारे वाक्संवादीति तत्रत्यो निर्णयः अबाधितः । ननु तत्रत्यानां श्रुत्यभिप्रायपरिज्ञानान्निःसन्देहानां विचार एव कथं घटत इति चेत्तत्राह-त हायमभूत्प्रश्न इति । तत्रैव ह निश्चयेनायं प्रश्नोऽभूत् । तत्राप्ययं विचारः अपेक्षित इति विचारस्योत्तमत्वमुक्तम् । यन्मां त्वं परिपृच्छसि, कथं चरन्ति श्रुतय इति । अत एव प्रश्नो न निरूपितः ॥१०॥ ननु प्रश्ने अज्ञोऽधिकारी उत्तरे च सर्वज्ञ इति कथं तत्र संवाद इति चेत्तत्राह-तुल्यश्रुततपःशीला इति । तुल्यमेव श्रुतम् अध्ययनं तपः शीलं च येषाम् । त्रयं समानमदृष्टजनकम् । एकतराभावेऽपि शिष्टप्रयोजकं स्यात् । तुल्यस्वीयारिमध्यमा इति । अन्तःकरणशुद्धिः ब्रह्मज्ञानौपयिकी । एवं दृष्टादृष्टप्रकरणे येऽधिकारिणः तेषां मध्ये एकं प्रवचनकर्तारं चक्रुः । प्रकर्षेण वचनं सिद्धान्तनिरूपणरूपं वचनं यस्येति । अपरे च शुश्रूषवो जाताः । आवृत्तिरसकृदुपदेशादिति न्यायेन ब्रह्मविचारावृत्तिं कुर्वन्तो जाता इत्यर्थः । तत्र सनन्दनो वक्ता, सनकादयः श्रोतार इति ॥११॥

श्रीसुबोधिनीसारः

हे स्वायम्भुव "समानैः क्रियते कर्म तत्सत्रमभिधीयते । सम्भूय ब्रह्ममीमांसा ब्रह्मसंत्रं प्रचक्षते ॥" इति जनलोके पूर्वमभूत् । केषामित्यत आह । तत्र लोके वर्तमानानां नैष्ठिकानां मुनीनां मानसानां सनकादीनाम् ॥९॥ मया किमिति न ज्ञातं तत्राह । तदीश्वरम् अनिरुद्धं द्रष्टुं त्वयि श्वेतद्वीपं गते सति ब्रह्मविचारः प्रवृत्तः सुनिश्चितो वा कोऽसौ तत्राह । श्रुतयो यत्र शेरते ब्रह्मणि प्रवर्तन्ते तत्र स्थानेऽयं प्रश्नोऽभूत् । यं मां त्वमनुपृच्छसि ॥१०॥ तुल्यानि श्रुततपःशीलानि येषां तुल्यमित्रारिमध्यमा अपि ते एकं प्रवचनं वक्तारं चक्रुः । अन्ये श्रोतारः ॥११॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमेवाह-स्वायम्भुव इति । सम्बोधनेन स्वयम्भुवो ब्रह्मणः पुत्रत्वात्त्वमप्येतत् श्रवणादियोग्योऽसीति सूचयति । पुरा पूर्वं जनलोके तत्रस्थानां मुनीनां ब्रह्मसत्रमभवत् । यथा समाना एव यजमाना ऋत्विगादिरूपेण यत्र कर्म कुर्वन्ति फलमपि तेषां तुल्यमेव भवति, तत्कर्मसत्रमिति प्रसिद्धम् । तथा यत्र समाना एव निःसन्दिग्धब्रह्मज्ञानार्थं वक्तृश्रोतृभावेन ब्रह्ममीमांसते तत् ब्रह्मसत्रमिति ज्ञेयम् । तत्कृतनिर्णयस्य प्रामाण्यं सूचयन्नाह-मानसानां ब्रह्मणो मनसो जातानाम् । ऊर्ध्वरेतसां नैष्ठिकब्रह्मचारिणां जितेन्द्रियाणाम् ॥९॥ अहं तदा क्व गतः, येन तन्न श्रुतं मया इत्यपेक्षायामाह-श्वेतद्वीपमिति । तदीश्वरं श्वेतद्वीपवासिनमीश्वरमनिरुद्धमूर्तिं द्रष्टुं त्वयि गतवति सति तत्र जनलोके यं प्रश्नं मां पृच्छसि मां प्रति त्वं करोषि तदयं प्रश्नोऽभूत् । तथाभूतानामपि सन्देह इत्याशङ्कां सूचयति-हेति । तदा ब्रह्मवादः ब्रह्मविचारः सुसम्प्रवृत्तः । अत्र निर्णीतेऽर्थे सन्देहो न कार्य इत्याशयेनाह-यत्रेति । यत्र विचारे श्रुतयः शेरते अर्थतो निर्णीता भवन्तीत्यर्थः ॥१०॥ ननु प्रश्ने अज्ञोऽधिकारी, उत्तरे च सर्वज्ञोऽधिकारी, तत्रत्यास्तु सर्वे एव सर्वज्ञाः अतः कथं प्रश्नादिप्रवृत्तिः, इत्याशङ्कां निरस्यन्नुक्तब्रह्मसत्रलक्षणमाह-तुल्येति । तुल्यानि श्रुतानि अध्ययनादीनि, तपांसि जितेन्द्रियत्वादीनि, शीलानि स्वभावाश्च येषां ते । तथा सर्वे ब्रह्मदर्शनेन तुल्याः स्वीया मित्राणि, अरयः शत्रवः, मध्यमाः उदासीनाः उपेक्ष्याश्च, येषां ते । यद्यपि सर्वे प्रवचनयोग्यास्तथापि ब्रह्मविचारार्थमेकं सनन्दनं प्रवचनं प्रवक्तारं चक्रुः । अपरे सनकादयः शुश्रूषवो बभूवुः, पप्रच्छुरित्यर्थः ॥११॥

अन्वितार्थप्रकाशिका

स्वायम्भुवेति । हे स्वायम्भुव ! पुरा पूर्वं जनलोके तत्रस्थानां मानसानां ब्रह्मणो मनसो जातानामूर्ध्वरेतसां नैष्ठिकब्रह्मचारिणां जितेन्द्रियाणां मुनीनां ब्रह्मसत्रमभवत् । यथा समाना एव यजमाना ऋत्विगादिरूपेण यत्र कर्म कुर्वन्ति फलमपि तेषां तुल्यमेव भवति तत्कर्म सत्रमिति प्रसिद्धम् । तथा यत्र समाना एव साधवः निःसन्दिग्धब्रह्मज्ञानार्थं वक्तृश्रोतृभावेन ब्रह्ममीमांसते

ब्रह्मसत्रमिति ज्ञेयम् ॥९॥
श्रुतयः शेरते अर्थतो निर्णी
तदयं प्रश्नोऽभूत् ब्रह्मवाद
शीलानि स्वभावाश्च येषां
येषां ते यद्यपि सर्वे प्रवचनय
पप्रच्छुरित्यर्थः ॥११॥

स्वायम्भुवेति ॥ हे
प्रसिद्धम् ॥ तथा यत्र सर्वे
ब्रह्मसत्रम् ॥९॥ अहो तर्हि म
ब्रह्मवादः नारायणस्वरूपविच
यावत् ॥१०॥ तत्रेति । ह इति प्र
पृच्छतिर्द्विकर्मकः । तत्र सर्वेषाम
इति भावः । तुल्यस्वीयारिमध्
अपरे च शुश्रूषवो बभूवुः । अ
सूचितम् ॥११॥

उक्तिमेवाह स्वायम्भुवे
जनलोके, तत्रत्यानां जनलोकस
मुनीनां सनकादीनां सम्बन्धि, ब्र
कर्म कुर्वन्ति, तत् कर्म सत्रमिति
ममापि प्रायः तन्निवासित्वान्मया
गतवति सति, तदा ब्रह्मवादः ब्रह्म
सत्यः सुखमासतेत्यर्थः ॥१०॥ त
तत्परिहारश्च, तत्र अभूत् । तान् सव

ब्रह्मसत्रमिति यत्र समाना

यत्र ब्रह्मवादे । श्रुतयः शेरत

हे स्वायम्भुव ! स्वयम्भूपु
स्थितानाम् । पुनश्च मानसानां ब्रह्म

स्थानान्तरतुल्यमिति कथं तत्र
गच्छन्ति, अतस्तासामपि
णां श्रुतीनां वा विचारे वाक्यं
कथं घटत इति चेत्तत्राह-तत्र
विचारस्योत्तमत्वमुक्तम्।
अज्ञोऽधिकारी उत्तरे च सर्वज्ञ
पः शीलं च येषाम्। त्रयं
शुद्धिः ब्रह्मज्ञानौपयिकी। एवं
गरूपं वचनं यस्येति। अपरे च
त्र सनन्दनो वक्ता, सनकादयः

त्रं प्रचक्षते ॥" इति जनलोके
म् ॥९॥ मया किमिति न ज्ञातं
तत्राह। श्रुतयो यत्र शेरते ब्रह्मणि
तुल्यमित्रारिमध्यमा अपि ते एकं

ादियोग्योऽसीति सूचयति। पुरा
यत्र कर्म कुर्वन्ति फलमपि तेषां
कृश्रोतृभावेन ब्रह्ममीमांसन्ते तत्
। ऊर्ध्वरेतसां नैष्ठिकब्रह्मचारिणां
श्वेतद्वीपवासिनमीश्वरमनिरुद्धमूर्तिं
। तथाभूतानामपि सन्देह इत्याश्चर्य
त्याशयेनाह-यत्रेति। यत्र विचारे
कारी, तत्रत्यास्तु सर्वे एव सर्वज्ञाः,
श्रुतानि अध्ययनादीनि, तपांसि
अरयः शत्रवः, मध्यमाः उदासीना
वक्तारं चक्रुः। अपरे सनकादयः

जातानामूर्ध्वरेतसां नैष्ठिकब्रह्मचारिणां
र्म कुर्वन्ति फलमपि तेषां तुल्यमेव
वक्तृश्रोतृभावेन ब्रह्ममीमांसन्ते तत्

सत्रमिति ज्ञेयम् ॥९॥ श्वेतद्वीपमिति सार्धम्। तदीश्वरं श्वेतद्वीपवासिनमीश्वरमनिरुद्धमूर्तिं द्रष्टुं त्वयि गतवति सति तत्र विचारे शेरते अर्थतो निर्णीता भवन्ति स ब्रह्मवादः ब्रह्मविचारः सम्प्रवृत्तः। तत्र जनलोके यं प्रश्नं मां पृच्छसि मां प्रति त्वं करोषि प्रश्नोऽभूत् ब्रह्मवाद इत्यर्धमसार्वत्रिकमाहुः ॥१०॥ तुल्येति ॥ तुल्यानि श्रुतानि अध्ययनादीनि तपांसि जितेन्द्रियत्वादीनि स्वभावाश्च येषां ते तथा। सर्वत्र ब्रह्मदर्शनेन तुल्याः स्वीयामित्राणि अरयः शत्रवः मध्यमाः उदासीना उपेक्ष्याश्च यद्यपि सर्वे प्रवचनयोग्यास्तथापि ब्रह्मविचारार्थमेकं सनन्दनं प्रवचनं प्रवक्तारं चक्रुः। अपरे सनकादयः शुश्रूषवो बभूवुः, रित्यर्थः ॥११॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्वायम्भुवेति ॥ हे स्वायम्भुव नारद ! यथा यजमाना एव समाना ऋत्विगादिरूपेण यत्र कर्म कुर्वन्ति तत्कर्म सत्रं सिद्धम् ॥ तथा यत्र सर्वे समाना अपि वक्तृश्रोतृभावेन भवन्ति तद्वर्णनं सत्रमित्युच्यते सत्राख्ययज्ञसादृश्यात्। ब्रह्मणः सत्रं सत्रम् ॥९॥ अहो तर्हि मया कथं तन्न ज्ञातमित्यत आह-श्वेतद्वीपमिति ॥ तदीश्वरं तस्य श्वेतद्वीपस्येश्वरमधिपतिं वासुदेवम्। वादः नारायणस्वरूपविचारः। सुसंवृत्तः सुतरां जातः। यत्र वादे। श्रुतयः शेरते प्रसरन्ति ब्रह्मसुखानुभवं कुर्वन्तीति भवत् ॥१०॥ तत्रेति। ह इति प्रसिद्धौ। अयं प्रश्नोऽभवत्। कोऽयमित्यत्राह ॥ यं प्रश्नं वेदकृतभगवत्स्तुतिरूपं त्वं मामनुपृच्छसि; द्विकर्मकः। तत्र सर्वेषामप्यधिकारतुल्यत्वेकः पृच्छकः कश्चानूचान इत्याकाङ्क्षायामाह- तुल्येति ॥ तुल्यश्रुततपःशीलास्तुल्यगुणा भावः। तुल्यस्वीयारिमध्यमाः ब्रह्मनिरूपणे नितरामधिकारिण इति भावः ॥ तथाऽप्येकं सनन्दनमेवप्रवचनं वक्तारं चक्रुः च शुश्रूषवो बभूवुः। अन्यथा ब्रह्मवादो न सिध्येदिति भावः। तेषां च तुल्यगुणत्वादुत्कर्षापकर्षकशङ्कानाभूदित्यपिशब्देन सूचितम् ॥११॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्तिमेवाह स्वायम्भुवेति षड्भिः ॥ स्वायम्भुवेति ॥ हे स्वायम्भुव नारद ! स्वयम्भुवः पुत्रत्वादेवं सम्बोधनम्। पुरा पूर्वं, लोके, तत्रत्यानां जनलोकस्थानां, मानसानां ब्रह्मणो मनःसङ्कल्पजनानां पुत्राणाम्, ऊर्ध्वरेतसां जन्मप्रभृति जितेन्द्रियाणां, नां सनकादीनां सम्बन्धि, ब्रह्मसत्रं परब्रह्मगुणानुभवात्मकं सत्रम्, अभवत्। यथा यजमाना एव समाना ऋत्विगादिरूपेण यत्र कुर्वन्ति, तत् कर्म सत्रमिति प्रसिद्ध, तथा यत्र समाना एव वक्तृश्रोतृभावेन ब्रह्म मीमांसन्ते, तद्ब्रह्मसत्रमित्यर्थः ॥९॥ अहो तर्हि प्रायः तन्निवासित्वान्मया कथं तन्न ज्ञातमित्यत आह ॥ श्वेतद्वीपमिति ॥ तदीश्वरं श्वेतद्वीपर्थं महापुरुषं द्रष्टुं, त्वयि श्वेतद्वीपं सति, तदा ब्रह्मवादः ब्रह्मविचारः, सुसंवृत्तः सम्प्रवृत्तः, यत्र ब्रह्मवादे, श्रुतयः शेरते प्रतारणभयरहिता ऐककण्ठ्यतां प्राप्ताः सुखमासतेत्यर्थः ॥१०॥ तत्रेति ॥ हेति हर्षे आश्चर्ये वा। हे अनघ नारद ! त्वं मां यं प्रश्नम् अनुपृच्छसि, अयं प्रश्नः, हारश्च, तत्र अभूत्। तान् सर्वान् प्रश्नपरिहारान्, ते तुभ्यम्, अहं वक्ष्ये शृणु ॥११॥

योगिरामानुजाचार्यकृतसरला व्याख्या

ब्रह्मसत्रमिति यत्र समाना एव वक्तृश्रोतृभावेन ब्रह्म मीमांसन्ते तत् ब्रह्मसत्रम् ॥९-११॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

यत्र ब्रह्मवादे। श्रुतयः शेरते समन्विता भवन्ति। तत्र जनलोके ॥१०-१३॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

हे स्वायम्भुव ! स्वयम्भूपुत्र। पुरा कल्पादौ। जनलोके मुनीनां ब्रह्मसत्रमभवत्। कथम्भूतानाम्। तत्रस्थानां जनलोके नाम्। पुनश्च मानसानां ब्रह्मणो मनसो जातानाम्। ऊर्ध्वरेतसां नैष्ठिकब्रह्मचारिणाम्। कर्मसत्रब्रह्मसत्रयोर्लक्षणमाहुः

स्वामिचरणाः-यजमाना एव समाना ऋत्विगादिरूपेण यत्र कर्म कुर्वन्ति तत् कर्मसत्रं प्रसिद्धम्। तथा यत्र समाना एव वक्तृश्रोतृभावे ब्रह्म मीमांसन्ते तद्ब्रह्मसत्रमिति ॥९॥

अहो तर्हि मया कथं तन्न ज्ञातमित्यत आह-तदीश्वरं तत्रस्थम् अनिरुद्धमूर्तिम्। द्रष्टुं त्वयि श्वेतद्वीपं गतवति सति। तत्र जनलोकेऽयं प्रश्नोऽभूत्। कोऽसौ। त्वं यं प्रश्नं मामनुपृच्छसि। अनु सनन्दनादिभिः पश्चात् पृच्छसि तत्पश्चादयं प्रश्नः त्वां विना केनापि कृतोऽस्तीति श्लाघा सूचिता। क्वचित् पुस्तके

"ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते।" इत्यधिकं श्लोकार्धमस्ति ॥१०॥

ननु सर्वज्ञास्ते। कोऽत्र वक्ता प्रष्टा वा, तत्राह-ते मुनयः सर्वे प्रवचनयोग्या अपि केनापि कौतुकेन एकं प्रवचनं प्रवक्तारं चक्रुः। अपरे शुश्रूषवो बभूवुः। कथम्भूताः। तुल्यश्रुततपःशीलाः। तुल्यानि श्रुतानि तपांसि शीलानि च येषां ते। पुनश्च। तुल्यस्वीयारिमध्यमाः। तुल्याः स्वीया अरयो मध्यमा येषां ते। अरिमित्रोदासीनहीनत्वेन निरुपमकरुणाः। एवम्भूता अपि सनन्दनं प्रवक्तारं कृत्वाऽन्ये पप्रच्छुरित्यर्थः ॥११॥

श्रीनिवाससूरिकृततत्त्वदीपिका

स्वायम्भुवं स्वयम्भुवा अनुष्ठितम्। ब्रह्मसत्रं भगवदाराधनरूपं सत्रम्। स्वायम्भुवेति पाठे नारदसम्बोधनम्। स्पष्टमन्यत्। नन्वहं कुत्र गतस्तदानीमित्यत आह-श्वेतद्वीपमिति। तदीश्वरं तत्रस्थमनिरुद्धस्वामिनम्। स्पष्टम् ॥९-१०॥ ननु, ते सर्वेऽपि तत्त्वज्ञाः कस्तत्र प्रवक्तृत्वे स्थितः को वा प्रष्टा इत्यत आह-तुल्येति। श्रुतादिभिस्तुल्या अपि तथापि। भगवच्चरित्रास्वादनहेतुना प्रवचने एकं सनन्दनं चक्रुः अपरे शुश्रूषवो बभूवुरित्यर्थः ॥११॥

कृष्णाप्रिया

श्रीभगवानुवाच। हे स्वायम्भुव ! ब्रह्मा के मन से उत्पन्न जन्म से लेकर इन्द्रियजित जनलोकमें रहने वाले सनकादिक मुनिजनों का जनलोकमें पहले परब्रह्म के कल्याण गुणों का अनुभव रूप हय प्रवृत्त कहा ॥९॥ उस समय श्वेदद्वीपमें विराजमान अनिरूद्धरूपी मेरा दर्शन करनेको तुम श्वेतद्विप में गए थे तब वह सनकादिकों का संवाद प्रवृत्त था जिस ब्रह्म संवाद में सब ही श्रुति एक होकर ब्रह्म के विषय में सुखपूर्वक वर्तत भइ मेरे प्रति जिस प्रष्टव्य अर्थ को तुम पूछ रहे हो अर्थ के विषयमें वहां ऋषियों का यह प्रसिद्ध प्रश्न होता था तथा उसका प्रत्युत्तर भी इसी प्रकार का था ॥१०॥ यद्यपी वेदशास्त्र का श्रवण, तप, शीलस्वभाव जैसे गुण सच के समान हि है और अपने तथा गैर उदासीन यह भी उनके समान ही थे। तथापि एक सनन्दन को तो उन्होंने उपदेष्टा कर लिया और सनकादिक श्रवण करने की इच्छा से श्रोता हो गए इसी का नाम ब्रह्म सूत्र है, कि सब तत्त्ववेता होकर परमात्मा के गणानुमव करने के लिये एक को उपदेशक कर अन्य लोग चुपचाप होकर श्रवण करें ॥११॥

सनन्दन उवाच

स्वसृष्टमिदमापीय शयानं सह शक्तिभिः। तदन्ते बोधयांचक्रुस्तल्लिङ्गैः श्रुतयः परम् ॥१२॥
यथा शयानं सम्राजं बन्दिनस्तत्पराक्रमैः। प्रत्यूषेऽभ्येत्य सुश्लोकैर्बोधयन्त्यनुजीविनः ॥१३॥

समाना एव वक्तृश्रोतृभावेन

श्वेतद्वीपं गतवति सति । तत्र
त्पश्चादयं प्रश्नः त्वां विना न

तुकेन एकं प्रवचनं प्रवक्तारं
लानि च येषां ते । पुनश्च ।
णाः । एवम्भूता अपि सनन्दनं

रदसम्बोधनम् । स्पष्टमन्यत् ।
१०॥ ननु, ते सर्वेऽपि तत्त्वज्ञाः
च्चरित्रास्वादनहेतुना प्रवचने

जित जनलोकमें रहने वाले
हय प्रवृत्त कहा ॥९॥ उस
तब वह सनकादिको का
क वर्तत भइ मेरे प्रति जिस
ता था तथा उसका प्रत्युत्तर
सच के समान हि है और
ोंने उपदेष्टा कर लिया और
ब तत्त्ववेता होकर परमात्मा
करें ॥११॥

ङ्गैः श्रुतयः परम् ॥१२॥
धयन्त्यनुजीविनः ॥१३॥

कर्दमक्षमा

सनन्दनः, उवाच ।

इदम्, स्वसृष्टम्, आपीय, शक्तिभिः, सह, शयानम्, परम्, तदन्ते, श्रुतयः, तल्लिङ्गैः, बोधयाञ्चक्रुः ॥१२॥ अनुजीविनः, यथा, प्रत्यूषे, अभ्येत्य, तत्पराक्रमैः, सुश्लोकैः, शयानम्, समाजम्, बोधयन्ति ॥१३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स्वसृष्टमिति स्वयं निर्मितमिदं विश्वं प्रलयसमये आपीय संहृत्य शयानं योगेन निद्राणमिव वर्तमानं तदन्ते प्रलयान्ते स्तत्प्रतिपादकैर्वाक्यैः परमीश्वरं सृष्टिसमये प्रथमनिःश्वासभूताः श्रुतयः प्रबोधयामासुः ॥१२॥ सुश्लोकैः शोभनाः श्लोकाः येषु तैः पराक्रमैः ॥१३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — तत्रेतिहासपीठिकां बध्नाति-स्वसृष्टमिति । तत्प्रतिपादकैरीशप्रतिपादकैः । श्रुतय । श्रूयन्त एव शिष्याचार्यपरम्परया न तु भारतादिवत्केनचित्प्रणीयन्त इति श्रुतयो वेदाः । अपौरुषेयतया स्वतः प्रमाणाभाव । यदि "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः" इति वेदानां ब्रह्मप्रभवत्वं सिद्धं तथापि "वाचा विरूपनित्यये"ति त्वबोधकश्रुत्यन्तरादीश्वरोऽपि पूर्वपूर्वकल्पीयामेवानुपूर्वीं रचयति न त्वभिनवामित्यपौरुषेयत्वं ज्ञेयम् । एवमादिमतमाख्यायिका विग्रहभुवनकोशानां प्रतिपादिका श्रुतिरादिमतीति प्रत्याख्यातव्यम् "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।" इति प्रतिकल्पसृष्टेः नामरूपश्रवणेन व्रीह्यादिवदेषामपि संसारानादितया जातिशब्दतुल्यत्वादिति ॥★॥

श्रीधरानुयायिनी — तत्र ब्रह्मणि श्रुतीनां समन्वयं श्रुतिमुखेनैव प्रतिपादयन् सनन्दन उवाच-यथानुजीविनो बन्दिजनाः गत्य शयानं चक्रवर्तिनं तद्यशोयुक्तदिग्विजयादिपराक्रमोक्तिभिर्बोधयन्ति तथा स्वसृष्टमिदं विश्वं प्रलयकाले संहृत्य स्थ्यादिशक्तिभिः सह योगेन निद्राणमिव वर्तमानं परमेश्वरं सृष्ट्यादावीश्वरप्रथमश्वासप्रसूताः यस्तत्स्वरूपगुणयशःपराक्रमादिसूचकैः सत्यज्ञानानन्तादिजगत्कर्तृत्वादिलक्षणैः प्रबोधयामासुः ॥★॥ विश्वनाथी — पूर्वं निर्विशेषं ब्रह्म सर्ववेदाभिधेयं सविशेषत्वेऽपि तत्र मायाविभूत्यासक्तमिति व्यञ्जितम् । तथैव "योऽस्योत्प्रेक्षक आदिमध्यनिधने" दिकमुपसंहरिष्यति तथैवोपक्रमते-स्वसृष्टमिति । स्वशब्देन विश्वस्य तदुपादानकत्वं तदधीनत्वं चोक्तम् । महदादिपृथिव्यन्तमिदं आ सम्यक् तत्कारणेन प्रकृत्या तद्भोक्त्रा जीववृन्देन च संयुक्तं यथा स्यात्तथा पीत्वा सूर्यो रसानिवाविनाश्य स्ततच्छक्तिमयपुरुषाद्यवतारैः सह मिलित्वैकीभूय —

"अनन्तानि तथोक्तानि यान्यण्डानि मया पुरा । सर्वाणि तानि संहृत्य समकालं जगत्पतिः ॥

प्रकृतौ तिष्ठति तदा सा रात्रिस्तस्य कीर्तिं ॥" इति विष्णुधर्मोत्तरादौ महापुरुषस्य स्वप्रकृतौ श्रीभगवति प्रवेशश्रवणात् जगत्कार्यं प्रति निद्राणमिव कृतानवधानं सन्तं परम् "आद्योऽवतारः पुरुषः परस्य" इति द्वितीयोक्तेः स्वयं भगवन्तं स्वलोकवासिनं तदन्ते तादृशशयनान्ते बहिरावरणगताः श्रुतयस्तदधिष्ठातृदेवतास्तल्लिङ्गैः साक्षात्परम्परया वा स्वयं बोधकैर्वाक्यैर्बोधयाञ्चक्रुः पुनर्विश्वसृष्ट्यामवधापयाञ्चक्रुः । सर्वज्ञमपि तं स्वीयस्तुत्यर्थेषूत्साहवशादेवाधापयामासुरिति । अयम्भावः — यद्यपि तस्य बोधनं नाम मायावैभवं प्रत्यवधापनमेव तच्च तदीयस्वरूपवैभवमात्रतत्परेभ्यः स्वेभ्यो तथापि बोधनस्य स्वाधिकारप्राप्तत्वेनावश्यकर्तव्यत्वात् तत्तिरस्कारपूर्वकस्वरूपवैभवपुरस्कारेणैव तच्चक्रुरिति तथैव जय व्यक्तं भावि तादर्थ्यं, प्राकृतप्रलयेऽपि तदधिष्ठानवैकुण्ठस्यानश्वरत्वमेव तैः सम्मतम् यत्रासौ शेते । यदुक्तं द्वितीये —

"प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः । न यत्र माया किमुताऽपरे हरेरनुव्रता
यत्र सुरासुरार्चिताः" ॥१२॥

नीलकण्ठी — तत्र श्रुतीनां जीवबोधनप्रकारमवतारयन् सनन्दन उवाच-स्वसृष्टमित्यादि । इदं नामरूपात्मकस्य जगत

एकदेशभूतं देहपुत्रादि स्वसृष्टं अनाद्यविद्यावशादात्मत्वेनात्मीयत्वेन च कल्पितम् आपीय अमुष्य पुत्रोऽहं ममेदं पुत्रादीत्यभिनिवेशपूर्वकमवेत्य शयानं विस्मृतात्मयाथात्म्यम्। अत्र हेतुः-सह शक्तिभिरिति। रागद्वेषादिवासनाभिः तद्वता चित्तेन सहाभेदाध्यासादित्यर्थः। उक्तं च- "मायामये वासनया शयाने" इति। तदन्ते वासनानां तानेव सति तल्लिङ्गैरात्मस्वरूपावगमकैः श्रुतियुक्त्यादिभिः परम्परमेव सन्तम् अबुद्धात्मतत्त्वमेनं श्रुतयः श्रूयन्त एव शिष्याचार्यपरम्परया न तु भारतादिवत्केनचिद्रच्यन्त इति श्रुतयो वेदाः। अपौरुषेयतया स्वतः प्रमाणाभाव इत्यर्थः। यदि "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः" इति वेदानां ब्रह्मप्रभवत्वं सिद्धं तथापि "वाचा विरूपनित्यये"ति तन्नित्यत्वबोधकश्रुत्यन्तरादीश्वरोऽपि पूर्वपूर्वकल्पीयामेवानुपूर्वीं रचयति न त्वभिनवामित्यपौरुषेयत्वं ज्ञेयम्। एवमादिमतमाख्यायिका देवताविग्रहभुवनकोशानां प्रतिपादिका श्रुतिरादिमतीति प्रत्याख्यातव्यम् "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।" इति प्रतिकल्पसृष्टेः समाननामरूपश्रवणेन व्रीह्यादिवदेषामपि संसारानादित्व जातिशब्दतुल्यत्वात् बोधयाञ्चक्रुः ॥१२॥

भावार्थदीपिकाप्रकाशः वंशीधरी — अत्र दृष्टान्तमाह-सम्राजं चक्रवर्तिनम्। बन्दिनः स्तावकाः। तत्पराक्रमैः पराक्रम दिग्विजयादयो जगत्कर्तृत्वादयश्च क्रमेण दृष्टान्तदार्ष्टान्तिकयोर्ज्ञेयाः। प्रत्यूषेऽहर्मुखे 'प्रत्यूषोऽहर्मुखं कल्यम्' इत्यमरः ॥★॥

श्रीधरानुयायिनी — ॥★॥

विश्वनाथी — तच्च प्रबोधनं तासां सर्वपरावरगुरूणां सहजतद्दास्येनैवेति दृष्टान्तेन प्राचीनसिद्धान्तमेव द्रढयति-यथेति। सुश्लोकैः श्रेष्ठपद्यैः। तस्य पराक्रमः प्रभावो यत्र तैः सर्वैश्वर्यं सर्ववैलक्षण्यं च सूचयित्वाऽन्येन साम्यमपि नास्मिन्सन्दर्भे विवक्षितं किं पुनरैक्यमिति पूर्व एव सिद्धान्तः स्थापितः एवं सर्ववेदसम्मतार्थत्वेन स्वयं भगवत्येव स्वभावतया लब्धे श्रीकृष्ण एव स इति लभ्यते। "कृष्णस्तु भगवान् स्वयम्" इति निर्णीतत्वात्स्तवस्यास्य तल्लीलामहाप्रकरणान्तःपातात् "निभृतमरुन्मनोक्ष" इत्यादितल्लिङ्गात् "कृष्णं च तत्र छन्दोभिः स्तूयमानं सुविस्मिता" इत्यादिसाक्षिकत्वात् "योऽसौ सर्वेषु वेदेषु तिष्ठति" "योऽसौ सर्वैर्वेदैर्गीयते" इति गोपालतापनीश्रुतेः "नमस्तस्मै" इत्यादिना एतच्छ्रवणानन्तरं नारदेन तस्यैव नमस्कृतत्वाच्च अत एव सर्वत्रैव पद्ये साक्षाच्छ्रीकृष्णताव्यञ्जकमर्थान्तरं ग्रन्थान्ते लिखितमस्ति कौतुकं चेदं द्रष्टव्यम् ॥१३॥

नीलकण्ठी — अत्र दृष्टान्तमाह-यथेत्यादि। शोभनाः श्लोकाः यशांसि पद्यानि च पराक्रमा दिग्विजयादयः जगत्कर्तृत्वादयश्च क्रमेण दृष्टान्तदार्ष्टान्तिकयोर्ज्ञेयाः। अयम्भावः — यथा शयानः सम्राट् प्रबुद्धमात्र एव दुःस्वप्नदुःखमसदपि सदिवाभातं जहाति सदप्यसद्वदनवभातं साम्राज्यसुखमाप्नोति एवं जीवस्यापि प्रयक्तत्त्वज्ञानमात्राद्भवदुःखक्षयस्वरूपानन्दावाप्ती भवतः "ज्ञानादेव तु कैवल्यम्।" इति श्रुतेः। "सुषुप्तनरवच्छुत्या बोध्यते प्रेर्यते न तु" इति वार्तिकोक्तेश्च विनाप्यनुष्ठानं कृत्स्नपुरुषार्थहेतुज्ञानाय शास्त्रमारम्भणीयमिति ॥१३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पूर्वं यथा न निर्विशेषं ब्रह्म सर्ववेदाभिधेयं सविशेषत्वेऽपि तन्न मायाविभूत्यासक्तमिति व्यञ्जितम्। तथैव "योऽस्योत्प्रेक्षक आदिमध्यनिधने" इत्यादिकमुपसंहरिष्यति तथैवोपक्रमते-स्वसृष्टमिति। स्वशब्देन विश्वस्य तदुपादानकत्वं तदधीनत्वं चोक्तम् महदादिपृथिव्यन्तमिदं विश्वम् आ सम्यक् तत्कारणेन प्रकृत्या तद्भोक्त्रा जीववृन्देन च संयुक्तं यथा स्यात्तथा पीत्वा सूर्यो रसानिवाविकृत शक्तिभिस्तत्तच्छक्तिमयपुरुषाद्यवतारैः सह मिलित्वैकीभूय —

"अनन्तानि तथोक्तानि यान्यण्डानि मया पुरा। सर्वाणि तानि संहृत्य समकालं जगत्पतिः ॥

प्रकृतौ तिष्ठति तदा सा रात्रिस्तस्य कीर्तिं ॥" इति विष्णुधर्मोत्तरादौ महापुरुषस्य स्वप्रकृतौ श्रीभगवति प्रवेशप्रव शयानं जगत्कार्यं प्रति निद्राणमिव कृतानवधानं सन्तं परम् "आद्योऽवतारः पुरुषः परस्य" इति द्वितीयोक्तेः स्वयं श्रीकृष्णं स्वलोकवासिनं तदन्ते तादृशशयनान्ते बहिरावरणगताः श्रुतयस्तदधिष्ठातृदेवतास्तल्लिङ्गैः साक्षात्परम्परया वा भगवत्ताबोधकैर्वाक्यैर्बोधयाञ्चक्रुः पुनर्विश्वसृष्ट्यामवधापयाञ्चक्रुः। अयम्भावः — यद्यपि तस्य बोधनं नाम

प्रत्यवधापनमेव तच्च तद
तत्तिरस्कारपूर्वकस्वरूप
तदधिष्ठानवैकुण्ठस्यानश्वरत

"प्रवर्तते यत्र र
सुरासुरार्चिताः ॥" इति ॥१
यथेति। सुश्लोकैः श्रेष्ठपद्यैः
विवक्षितं किं पुनरैक्यमिति
एव स इति लभ्यते। "कृष्ण
इत्यादितल्लिङ्गात् "कृष्णं च त
सर्वैर्वेदैर्गीयते" इति गोपालता
पद्ये साक्षाच्छ्रीकृष्णताव्यञ्जक

स्व-शब्देन विश्वस्य त
महदादिभिः, किंवा विद्याविद्या
श्रीलक्ष्म्यादिभिः सह शेषपर्यङ्के
दृष्टान्तेनाह-यथेति। अनुजीविनः
श्रुतयश्चरन्तीति प्रश्नस्य भक्त्यैव
र्भमानाभिः श्रीराधाचन्द्रवाल्या
स्वसृष्टमिदं धर्ममर्यादावर्त्य, आ
बोधयाञ्चक्रुर्जागरयामासुः। कैः ?
सर्वासु करलिपिषु तथा मुद्रितग्रन्
व्रजलीलापरव्याख्यानमेकत्र ग्रथि
सिचितासन्निवेशितमिति ज्ञेयम्।)

॥११-१३॥

प्रश्नस्तु त्वत्कृत एवेत्यभि
पादयितुं प्रस्तौति सनन्दनः-स्वसृ
लावस्थामापन्नाभिः प्रकृतिपुरुषका
तथा निरवधिकस्वानन्दानुभवपरं (
: यद्वा वेदाभिमानिनो देवाः तल्लि
॥ तत्र दृष्टान्तमाह-यथेति। अनुजी
तस्य सम्राजः पराक्रमैः पराक्रमप्रक

मुष्य पुत्रोऽहं ममेदं
वासनाभिः तद्वता चित्तेन
द्वङ्गैरात्मस्वरूपावगमकैः
भारतादिवत्केनचिद्रच्यन्त
द्यदृग्वेदो यजुर्वेदः" इति
कल्पीयामेवानुपूर्वीं रचयति
दिमतीति प्रत्याख्यातव्यम्
वदेषामपि संसारानादितया

काः। तत्पराक्रमैः पराक्रमा
कल्यम्' इत्यमरः ॥★॥

सद्धान्तमेव द्रढयति-यथेति।
मपि नास्मिन्सन्दर्भे विवक्षितं
था लब्धे श्रीकृष्ण एव स इति
तमरुन्मनोक्ष" इत्यादितल्लिङ्गात
ति" "योऽसौ सर्वैर्वेदैर्गीयते"
ाच्च अत एव सर्वत्रैव पद्ये

दिग्विजयादयः जगत्कर्तृत्वादयश्च
ःखमसदपि सदिवाभातं जहाति
ानन्दावासी भवतः "ज्ञानादेव तु
यनुष्ठानं कृत्स्नपुरुषार्थहेतुज्ञानाय

यञ्जितम्। तथैव "योऽस्योत्प्रेक्षक
दुपादानकत्वं तदधीनत्वं चोक्तम्।
यात्तथा पीत्वा सूर्यो रसानिवाविनाश्य

तिः ॥
स्वप्रकृतौ श्रीभगवति प्रवेशश्रवण
" इति द्वितीयोक्तेः स्वयं भगवान्
स्तल्लिङ्गैः साक्षात्परम्परया वा स्व
द्यपि तस्य बोधनं नाम मायावैभ

पनमेव तच्च तदीयस्वरूपवैभवमात्रतत्परेभ्यः स्वेभ्यो न रोचते तथापि बोधनस्य स्वाधिकारप्राप्तत्वेनावश्यकर्तव्यत्वात् कारपूर्वकस्वरूपवैभवपुरस्कारेणैव तच्चक्रुरिति तथैव जय जयेत्यादौ व्यक्तं भावि तादर्थ्यं, प्राकृतप्रलयेऽपि वैकुण्ठस्यानश्वरत्वमेव तैः सम्मतम् यत्रासौ शेते। यदुक्तं द्वितीये —

"प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः। न यत्र माया किमुताऽपरे हरेरनुव्रता यत्र र्चिताः ॥" इति ॥१२॥ तच्च प्रबोधनं तासां सर्वपरावरगुरूणां सहजतद्दास्येनैवेति दृष्टान्तेन प्राचीनसिद्धान्तमेव द्रढयति-सुश्लोकैः श्रेष्ठपद्यैः। तस्य पराक्रमः प्रभावो यत्र तैः सर्वैश्वर्यं सर्ववैलक्षण्यं च सूचयित्वाऽन्येन साम्यमपि नास्मिन्सन्दर्भे कि पुनरैक्यमिति पूर्व एव सिद्धान्तः स्थापितः एवं सर्ववेदसम्मतार्थत्वेन स्वयं भगवत्येव स्वभावतया लब्धे श्रीकृष्ण इति लभ्यते। "कृष्णस्तु भगवान् स्वयम्" इति निर्णीतत्वात्स्तवस्यास्य तल्लीलामहाप्रकरणान्तःपातात् "निभृतमरुन्मनोक्ष" लिङ्गात् "कृष्णं च तत्र छन्दोभिः स्तूयमानं सुविस्मिता" इत्यादिसाक्षिकत्वात् "योऽसौ सर्वेषु वेदेषु तिष्ठति" "योऽसौ गीयते" इति गोपालतापनीश्रुतेः "नमस्तस्मै" इत्यादिना एतच्छ्रवणानन्तरं नारदेन तस्यैव नमस्कृतत्वाच्च अत एव सर्वत्रैव च्छ्रीकृष्णताव्यञ्जकमर्थान्तरं ग्रन्थान्ते लिखितमस्ति कौतुकं चेत्तदपि द्रष्टव्यम् ॥१३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्व-शब्देन विश्वस्य तदधीनत्वमुक्तम्। अत आपीय जलपानादिवदनायासेनात्मान्तर्निधायेत्यर्थः। शक्तिभिस्त्रिगुणतत्कार्य-भिः, किंवा विद्याविद्यादिभिः सह शयानम्, तासां तदानीं स्वकार्ये प्रवृत्त्यभावात्। अन्यत्तैर्व्याख्यातम्। यद्वा, शक्तिभिः दिभिः सह शेषपर्यङ्के शयानं निद्रालीलां भजन्तम्, तस्य लिङ्गैर्माहात्म्यप्रतिपादकैर्वाक्यैः। तच्च तासां सहज-तद्दास्यादिति -यथेति। अनुजीविनः सेवका इति तस्य प्रसादविशेषार्थमिति योजनं च सूचितम् ॥१२-१३॥ [★ यद्वा, श्रीकृष्णे कथं तीति प्रश्नस्य भक्त्यैव चरन्तीत्युत्तरमुक्तम्। तदेव कृष्णैकपरत्वमाह-स्वसृष्टमिति शक्तिभिः शक्तिरूपाभिः पराङ्गनात्वेन भिः श्रीराधाचन्द्रवाल्यादिभिः सह शयानं निकुञ्जादौ निद्रां भजन्तं परमपुरुषोत्तमं श्रीकृष्णम्। किं कृत्वा शयानम्? धर्ममर्यादावर्त्य, आपीय ताभिः सह शयनेन समाच्छाद्य, तदन्ते तस्या निशायाः शेषे श्रुतयो गोपीभावं प्राप्ता जागरयामासुः। कैः? तल्लिङ्गैर्बोधोचितैर्वचोभिरित्यर्थः। यथेति दृष्टान्तितं पद्यं सुसङ्गतमेव ॥१२-१३॥] (★ यद्यपि लिपिषु तथा मुद्रितग्रन्थेष्वपि श्रुतस्तवस्य साधारणव्याख्यानानन्तरमेव द्वादशश्लोकत एकचत्वारिंश-श्लोकं यावत् व्याख्यानमेकत्र ग्रथितं विद्यते, तथापि पाठकानां पाठ-सौकर्यार्थं प्रतिश्लोकव्याख्यानमश्वेव तत्तद्व्याख्यानं त्रिवेशितमिति ज्ञेयम्।)

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

॥१२-१३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स्तु त्वत्कृत एवेत्यभिप्रेत्य तमनुक्त्वैव सनन्दनोक्तमुत्तरमाह-स्वसृष्टमित्यादि। तत्र स्वविवक्षितमुत्तरं श्रुतिगीत्या प्रस्तौति सनन्दनः-स्वसृष्टमिति द्वाभ्याम्। स्वेनात्मना सृष्टमिदं चिदचिदात्मकं जगत् आपीय संहृत्य शक्तिभिः त्राभिः प्रकृतिपुरुषकालात्मिकाभिः सह शयानं निद्राणमिव वर्तमानं प्रकृतिपुरुषादीन् स्वस्मिन् विभागानर्हान् कस्वानन्दानुभवपरं (सन्तं परं) परमपुरुषं तदन्ते प्रलयान्ते सृष्ट्यादौ इत्यर्थः। श्रुतयः तन्निःश्वासरूपाः मूर्तिधराः वेदाभिमानिनो देवाः तल्लिङ्गैः परमपुरुषासाधारणधर्मप्रकाशकैः वचोभिर्बोधयाञ्चक्रुः प्रबोधयन्त्य इव तुष्टुवुरित्यर्थः। माह-यथेति। अनुजीविनो भृत्याः वन्दिनः स्तुतिपाठकाः प्रत्यूषे प्रभाते अभ्येत्य आगत्य शोभनाः श्लोकाः येषु पराक्रमैः पराक्रमप्रकाशकैः स्तोत्रैर्बोधयन्ति तद्वदित्यर्थः ॥१३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

स एकः कथं प्रावोचदत्राह-स्वसृष्टमिति। ब्रह्मलये स्वसृष्टमिदं जगदापीय संहृत्य शक्तिभिः श्रीभूदुर्गाख्याभिर्विभक्तप्रकृतिमूर्तिभिः सह शयानं योगनिद्रां कुर्वाणं परं परमात्मानं तदन्ते ब्रह्मप्रलयावसाने श्रुतयस्तल्लिङ्गैः संसारनिर्मूलनादिब्रह्मलक्षण-बोधयाञ्चक्रुरित्यन्वयः। अवेदं तात्पर्यं मूलप्रकृतिः श्रीभूरूपाभ्यां विष्णुना सह शेते श्रुतिनाम्ना दुर्गारूपेण विष्णुं स्तौति-ज जयेति। पुंशक्तिविषयबोधनवचनं दुर्गाख्यया अपि तादृक्शक्तिमत्त्वात्तदर्थत्वेन भगवदाज्ञया गृहीतविग्रहत्वाच्च श्रुतीनामनन्तत्वेनाधिगन्तुमशक्यत्वात् दुर्गानाम्नोऽपि तथात्वाच्च काली भद्रेत्यादि बहुरूपत्वप्रतीतेश्च श्रुतेश्चानन्तत्वेन वाक्ये भेदाच्छ्रुतय इति बहुवचनं च युज्यते तदुक्तम् —

"श्रीर्भूमिरिति रूपाभ्यां प्रकृतिर्विष्णुना सह। शेते श्रुतिस्वरूपेण स्तौति ब्रह्मलये हरिम्॥

एकाप्यनन्तरूपा सा वाक्यभेदात् सरस्वती। अनादिनिधना नित्या स्तौति नारायणं प्रभुम्॥" इति।

अनेनेदं पौरुषेयं वाक्यत्वादितरवाक्यवदिति प्रत्युक्तं 'यावद्ब्रह्म विष्ठितं तावती वागि'ति श्रुतेः। त्रिरूपायाः रमायाः शक्तिशब्दाभिधेयत्वं वेदापरपर्यायाः शक्तेश्चेतनाभिधेयत्वं विष्णोः स्वरूपभूतशक्तेः शक्यत्वगुणयोगेन युज्यते। नित्याव्यवधानादि विशेषशक्तित्वाच्च —

"विष्णोः स्वरूपशक्तेः सा शक्यत्वाच्छक्तिरेव तु। नित्या व्यवहितत्वात्तु विशेषाच्छक्तिनामिका॥"

इतर्तीति वचनात्सामान्यवाचिनोऽपि शक्तिशब्दस्य विशेषनिष्ठत्वं पङ्कजादिशब्दवद्युज्यते पङ्काज्जातमिति शैवलादि वृत्तिसम्भवेऽपि पद्मे एव वर्तते विप्रादावपि ब्रह्मशब्दस्य वृत्तियोगेऽपि चतुर्मुख एव रुद्रशब्दस्य रौद्रगुणयोगेनातपे वृत्तावपि श एव आदित्यशब्दस्यादितिपुत्रसामान्यवाचित्वसम्भवेऽपि सूर्य एवेत्याद्यूह्यं "यथैव पङ्कजं ब्रह्मा रुद्र इत्यादिकं पदम्" इति वचना उमादीनामपि प्रकृतिशब्दवाच्यत्वेन प्रसिद्धेः कथम् उच्यते अपरप्रकृतित्वं तासां लक्ष्म्या एव परमप्रकृतित्वं तदुक्तम्—

"श्रीः परा प्रकृतिः प्रोक्ता ब्रह्माणी त्ववरा ततः। उमा शचीमुखास्तस्या अवराः सम्प्रकीर्तिताः॥" इति ॥१२॥

नित्यबुद्धस्य हरेः कदाचित्कबोधनं विडम्बनमात्रं न तु सत्यमिति हृदि कृत्वा लौकिकमतमनुसरति-यथेति। अनुजीवि इत्यनेन वेदान्तानां तदेकनिष्ठत्वं सूच्यते राजवज्जयशब्दाद्यानित्यबुद्धस्य बोधनं "विडम्बमात्रं क्वेवास्य निद्राविद्यापतेर्हरेः" इति च ॥१३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥१-१३॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

एवं चेतिहासकथनपूर्वकं सविशेष एव ब्रह्मणि श्रुतयश्चरन्तीति दर्शयन् जगत्संहार्य्ययोगनिद्रामुपेतं भगवन्तं श्रुतयश्चेरुस्तत्कथनद्वारा द्वारकालीलाप्रकरणे द्वारकायामपि तथा श्रुतिरूपा गोप्यः श्रुतिरूपेण परिचरन्तीति दर्शयितुमेकेनैव प श्लेषालङ्कारेणोभयं प्रस्तौति-स्वसृष्टमित्यादि। तत्र योगनिद्राशायिपक्षे योऽर्थः स पूर्वैरेव व्याख्यातः द्वारकेन्द्रपक्षे तु यः स व्याख्यायते स्वैः प्रियजनैः सृष्टं कल्पितम् इदं कामदम् अस्यापत्यम् इः कामः तं ददातीति तथा मधु तावत् कामदं म विशेषणमर्य्यादया पानक्रियाशक्त्या मधुरूपं विशेष्यमाक्षिप्यते यथा "अयमुदयति मुद्राभञ्जनः पद्मिनीनाम्" इत्यादि। स इदं मधु आपीय सम्यक् पीत्वा शक्तिभिः श्रीरुक्मिण्यादिभिः प्रियाभिः सह शयानं तदन्ते निशान्ते शयनं हि निशायां शयानशब्दश्रुत्या तत्परस्तच्छब्दो निशामाक्षिपति तल्लिङ्गैर्बोधनगमकैर्वचनैः श्रुतयः परं श्रीकृष्णं बोधयाञ्चक्रुः ॥१२॥ तत्र दृष्टा यथा शयानं सम्राजमित्यादि। उभयत्र समानम् अतः पूर्वस्मिन्नपि पक्षे दृष्टान्तेनापि सविशेषे ब्रह्मण्येव श्रुतिपरि सिद्धान्तः। इह परस्मिंस्तु भवत्येव श्रीकृष्णस्य परब्रह्मत्वात् ॥१३॥

गांख्याभिर्विभक्तप्रकृतिमूर्तिभिः
संसारनिर्मूलनादिब्रह्मलक्षणै-
दुर्गारूपेण विष्णुं स्तौति-जय
वदाज्ञया गृहीतविग्रहत्वाच्च
श्रुतेश्चानन्तत्वेन वाक्ये भेदाच्छ्रुतया

॥
म् ॥" इति ।
'ति श्रुतेः । त्रिरूपायाः रमायाः
गेन युज्यते । नित्याव्यवधानादिति

कनामिका ॥"
यते पङ्काज्जातमिति शैवलादिषु
रौद्रगुणयोगेनातपे वृत्तावपि
द्र इत्यादिकं पदम्" इति वचनात्
मप्रकृतित्वं तदुक्तम् —
कीर्तिताः ॥" इति ॥१२॥
मतमनुसरति-यथेति । अनुजीवन
त्रं क्वेवास्य निद्राविद्यापतेहरेः ।"

हार्य्ययोगनिद्रामुपेतं भगवन्तं
परिचरन्तीति दर्शयितुमेकेनैव
ाख्यातः द्वारकेन्द्रपक्षे तु यः स
त तथा मधु तावत् कामदं भवति
नः पद्मिनीनाम्" इत्यादि ।
ते निशान्ते शयनं हि
बोधयाञ्चक्रुः ॥१२॥ तत्र
विशेषे ब्रह्मण्येव श्रुतिपरि

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥१-११॥ स्वसृष्टमित्यादि । स्वैः प्रियजनैः सृष्टं कल्पितम्, इदं-कामदम्- 'इः कामः' आपीय पीत्वा अर्थात् मधु । शक्तिभिः श्रीरुक्मिण्यादिभिः सह परं श्रीकृष्णं प्रबोधयाञ्चक्रुः । तदन्ते रात्र्यन्ते तल्लिङ्गैः प्रबोधगमकैरर्चनैरित्यर्थः ॥१२॥ एव तं प्रबोधयन्ति, कथं श्रुतय इत्याह- यथा शयानं सम्राजमित्यादि । सम्यक् राजत इति सम्राट् श्रीकृष्णस्तं यथा वन्दिनः प्रत्यूषे प्रबोधयन्ति, तथा श्रुतयोऽपि तं प्रबोधयन्ति ॥१३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

परीतं प्रणतोऽपृच्छदिदमेव कुरूद्वहेति । श्रीशुकोक्तेस्तत्र हायमभूत् प्रश्नस्त्वं मां यमनुपृच्छसीति श्रीनारायणोक्तेश्च सनकादयः प्रति ब्रह्मन् ब्रह्मण्यनिर्देश्य इति वदन्तः प्रथमं पप्रच्छुः ततश्च श्रीसनन्दनस्तदुत्तरत्वेन बुद्धीन्द्रियमनःप्राणानिति पदुत्तरभागमुक्त्वा अत्रार्थे ता एव श्रुतयः स्वयं प्रमाणमिति प्रपञ्चयितुमितिहासमवतारयति-स्वसृष्टमिति । स्वयं निर्मितं प्रलयसमये आपीय संहृत्य शयानं योगेन निद्राणमिव वर्तमानं तदन्ते प्रलयान्ते तल्लिङ्गैस्तत्प्रतिपादकैर्वाक्यैः परं परमेश्वरं तदा समये प्रथमनिःश्वासप्रसृताः श्रुतयः प्रबोधयामासुः । सर्वज्ञमपि तं स्वीयस्तुत्यर्थेषूत्साहवशादेवाधापयामासुः ॥१२-१३॥

गूढार्थदीपिनी

श्रुतं शास्त्रम् । तपः चित्तैकाग्रता । शीलं सुस्वभावः । स्वीया मित्राणि अरयः शत्रवः मध्यमा उदासीना उपेक्ष्याश्च तुल्यानि येषां ते । तुल्याः स्वीयादयो येषां ते । एकं सनन्दनं प्रवचनं प्रवक्तारं चक्रुः अपरे त्रयः सनकादय शुश्रूषवः श्रोतारो प्रवचनमिति कर्तरि ल्युः । यद्वा । प्रकृष्टं महत्त्वपूर्णं वचनं व्याख्यानम् उपदेशो वा यस्य तम् ॥१२॥ स्वेन सृष्टमिदं विश्वं समये आपीय संहृत्य शक्तिभिः प्रकृत्यादिभिः रुक्मिण्यादिभिर्वा सह शयानं निद्राणमिव प्रतीयमानं परं ब्रह्म श्रीकृष्णं प्रलयान्ते श्रुतयः तन्निःश्वासभूता वेदा बोधयाञ्चक्रुः । बोधयन्त्य इव तुष्टुवुरित्यर्थः । कैः तल्लिङ्गैः । तत्प्रतिपादकैर्वाक्यवैः ॥१३॥ अत्र दृष्टान्तः यथा अनुजीविनः सेवकाः वन्दिनः स्तुतिपाठकाश्च प्रत्यूषे प्रातःकालेऽभ्येत्य सम्राजं चक्रवर्तिनं राजानं बोधयन्ति तद्वत् । कैः । तस्य पराक्रमा दिग्विजयादयो येषु तैः सुश्लोकैः सुमधुरपद्यैः । जीविन इति वन्दिविशेषणं वा ॥१४॥ (अस्य टीकाकारस्य मतेन एकः श्लोकोऽधिकोऽतः क्रमभेदः ।)

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रश्नस्तु त्वत्कृत एव तत्र हायमभूत् प्रश्न इत्युक्तत्वात् । अतस्तमनुक्त्वैव सनन्दनोक्तमुत्तरमाह-स्वसृष्टमित्यादिभिः । स्वसृष्टमिदं प्रलयसमये आपीय संहृत्य शक्तिभिः सूक्ष्मरूपाभिः प्रकृतिपुरुषकालादिभिः सह शयानं निद्राणमिव सन्तम् । तदन्ते प्रलयान्ते । भगवन्निःश्वसिताः वेदाः तल्लिङ्गैः भगवत्स्वरूपगुणादिपरैर्वचनैर्बोधयाञ्चक्रुः । बोधयन्त्य इव तुष्टुवुरित्यर्थः ॥१२॥

यथा सुश्लोकैः शोभनाः श्लोकाः प्रतिपादकानि पद्यानि येषां तैस्तस्य पराक्रमैर्वन्दिनः सम्राजं बोधयन्ति तद्वत् ॥१३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सनन्दन आह । सन्दिग्धार्थनिर्णयार्थं श्रुतीनां वचनानि तत्तस्य च प्रसङ्गार्थं स्वयमाह-द्वाभ्याम् । वेदवाक्यैरेव वेदार्थनिर्णय सन्दिग्धेषु वाक्यशेषादिति न्यायात् सर्वेषु वेदेषु तत्त्वनिरूपणप्रकारेणाष्टाविंशतिधा भिन्नेषु तत्तत्सन्देहनिवृत्त्यर्थं वाक्यशेषरूपाः श्लोकाः । तेषां प्रकरणं नास्तीति तत्तत्प्रकारेषु न पठिता इति । अनारभ्याधीतानामपि निर्णायकत्वात् सर्वतत्त्वरूपे शयाने शुद्धरूपेणास्फुरणदशायां मुख्यस्फुरणार्थं तत्त्वभेदनिर्णयान्वदन्तः प्रकृते तात्पर्यरहिताः बोधनमेव तात्पर्यविषयं नयइव रसाभिनयेन । अर्थनिरूपाकौ शब्दार्थरूपौ वेदभगवन्तौ यथोचतुः तन्निरूपयितुं तादृशीमवस्थां निरूपयति सर्ववेदसन्देहनिवृत्तिः किन्तु केषाञ्चिदेव परार्थं प्रवृत्तानां वेदानां बोधकमेतदिति ज्ञापनार्थम् । वेदानां वैतालिकत्वं च दृष्टान्तेन निरूप्यते, तेन निर्णायका अपि अदूरविप्रकर्षेणैव स्वप्रकरणसन्देहं वारयन्ति, न तु भगवन्तं दृष्ट्वेति

सूचितम्। वेदतत्त्वानां निवृत्तिरूपत्वं वक्तुर्भगवतः पूर्वावस्था निरूप्यते-स्वसृष्टमिदमापीयेति। सृष्टेरनादिकत्वं वक्तुं स्वसृष्टमिति इदञ्जगत्परिदृश्यमानं तस्य सर्वतः पानं पूर्वसृष्टान् सर्वान् मुक्तान् विधायाग्रे स्वस्य कर्तव्याभावमिव ज्ञापयन् शयान एव भगवा स्थितः। ततो वेदाः सृष्टौ तत्त्वभेदं विस्मृत्य तिष्ठतीति सदुक्तिभिः निःसन्देहप्रतिपादकैः बोधयन्त इव जाताः। ननु कालातिके शक्तिः प्रबोधिका वर्तते, किं वेदैरिति चेत्तत्राह-स्वशक्तिभिः सहेति। ततस्तदन्ते शयनान्ते प्रबोधसमये अन्य बोधनमपराधायेति। तत्त्वलिङ्गैः तत्त्वान्येव भगवतो लिङ्गानि तानि वीर्यापरनामानि भगवन्तं लीनमर्थं गमयन्तीति तैरेव बोधयाञ्चक्रुः। यत एताः श्रुतयः श्रवणमात्ररूपाः, न तु प्रत्यक्षदर्शिन्यः, तत्रापि न साक्षाद्बोधनं किन्तु बोधकमेवोपस्थापयन्ति ॥१२॥

एतासां श्रुतीनां पुनः स्वतन्त्रतयाऽन्यार्थप्रतिपादकत्वे एतद्विचारोऽपि कर्तव्यो भवेदिति नैषां प्रकरणरूपेण बोधनमिति ज्ञापयितुं दृष्टान्तमाह-यथा शयानमिति। तेषामनुवादकत्वात् न स्वातन्त्र्येण प्रतिपादकत्वं तथैताः श्रुतयो न भगवन्तमेव तत्कृता पराक्रमान् श्रावयन्ति। तत्र हेतुमाह-वन्दिन इति। प्रबोधनाधिकारिणस्ते विद्योपजीविनश्च। तत्त्वविद्या उपजीव्यैव अधिकफलनिर्णया प्रवृत्ताः प्रबुद्धो भगवान् कदाचित्साक्षात्कृतो भवेत् कदाचित्स्वानन्दं वा प्रयच्छेदिति तासामप्यभिलाषाः। ताः पूर्ववृत्तान्तमे जानन्ति, नाग्रिमवृत्तान्तमिति ज्ञापयितुं त्रिंशन्मुहूर्ते अहोरात्रे मुहूर्तद्वयात्पूर्वमेव समागताः तावदेव बोधयन्ति। यतस्ते अनुजीवि सेवकाः। तदप्रबोधे तासां स्वरूपनाश एव स्यादिति सूचितम्। श्रुतयश्च प्रथमनिःश्वासोद्गता इति केचित्। तद्दृष्टान्तादिना विरुध्य परं ताः पृथगेव तिष्ठन्ति दृष्टान्तानुरोधेन निरूप्यते ॥१३॥

श्रीसुबोधिनीसारः

सनन्दनोक्तिः। स्वेन सृष्टं स्वस्मिन् वा इदं विश्वम् आपीय संहृत्य शक्तिभिः सह शयानं परमीश्वरं तदन्तं प्रलया सृष्टिसमये तल्लिङ्गैः तत्प्रतिपादकैर्वाक्यैः श्रुतयो बोधयाञ्चक्रुः "सगुणा निर्गुणालम्बा स्तुतिः श्रुतिभिरीर्यते" ॥१२॥ यथा सुतं सम्राजं चक्रवर्तिनं बन्दिनः प्रत्यूषेऽभ्येत्य ब्राह्मे मुहूर्ते प्राप्य सुश्लोकैः सुमङ्गलैः तस्य पराक्रमैर्बोधयन्ति यतोऽनुजीविनः तद्वशाः ॥१३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्र सनन्दन उत्तरमाह-स्वसृष्टमिति। स्वेन सृष्टमिदं विश्वमापीय संहृत्य शक्तिभिः सूक्ष्मावस्थामापन्नाभिः प्रकृतिपुरुषकालादिभिः सह शयानं निद्राणमिव वर्तमानं परं परमपुरुषं भगवन्तं तदन्ते प्रलयान्ते श्रुतयस्तल्लिङ्गैस्तत्प्रतिपादकैर्वाक्यैर्बोधयाञ्चक्रुः प्रबोधयामासुः। यदा सर्वमवकृष्य शयीत तदा न शास्त्रमिति मूले वक्ष्यमाणत्व "तस्य महतो भूतस्य निःश्वसितं यदृग्वेदः" इति श्रुतेश्च। सृष्टिसमये श्रीनारायणस्य प्रथमनिःश्वासाच्छ्रुतयो विनि इति ज्ञेयम् ॥१२॥ प्रबोधने दृष्टान्तमाह-यथेति। सम्राजं चक्रवर्तिनं राजानं शयानं प्रत्यूषेऽभ्येत्य प्रातःकाले आगत्य बन्दि स्तावकास्तत्पराक्रमैस्तस्य पराक्रमप्रतिपादकवचनैर्यथा बोधयन्ति तथा बोधयन्ति। कदाचित्प्रमादात् गोब्राह्मणपीडकोऽ पराक्रमो भवति तद्वचनमनुचितमिति तद्वारणायाह-सुश्लोकैरिति। शोभनाः श्लोकाः कीर्तयो येषु तैः। तेषां तद्बोधने हेतुमा अनुजीविनः इति, तदधीनजीविका इत्यर्थः ॥१३॥

अन्वितार्थप्रकाशिका

अत्र उभयविधब्रह्मविषयकप्रश्नेऽपि प्रायशः साकारब्रह्मविषयकश्रुत्यर्थोदाहरणेनोत्तरयन् तत्र सनन्दन उवाच-स्वसृष्ट स्वेन सृष्टमिदं विश्वमापीय संहृत्य शक्तिभिः सूक्ष्मावस्थामापन्नाभिः प्रकृतिपुरुषकालादिभिः सह शयानं निद्राणमिव वर्तम परमपुरुषं भगवन्तं तदन्ते प्रलयान्ते प्रथमनिःश्वासादविर्भूताः श्रुतयः श्रुत्यधिष्ठात्र्यो देवताः स्वाधिकार्यतया त तत्प्रतिपादकैर्वाक्यैर्बोधयाञ्चक्रुः प्रबोधयामासुः ॥१२॥ यथेति ॥ सम्राजं चक्रवर्तिनं राजानं शयानं प्रत्यूषेऽभ्येत्य प्रात आगत्य अनुजीविनः बन्दिनः स्तावकाः तत्पराक्रमैस्तस्य सुश्लोकैः शोभनाः श्लोकाः कीर्तयो येषु तैः पराक्रमप्रतिपादकव बोधयन्ति तथा बोधयन्ति तथा बोधयाञ्चक्रुरिति। अत्र भागवताः सर्वेश्वरे श्रीकृष्ण एवास्य स्तवस्य सम्वयं

तल्लीलामहाप्रकरणान्तः
नारदेन कृष्णायेति कृष्

प्रस्तुतमाह-स्व
सह आपीय स्वधामाक्षर
"वासुदेवः परं
सकार्यमूलप्रकृ
विष्णुपुराणे च —
"प्रकृतिर्या मया
परमात्मा च सर्वे
भागवतैकादशस्क
"एको नारायणो
एक एवाद्वितीयोऽ
सत्त्वादिष्वादिपुरुष
शयानं जगत्सृष्टिहेत
इत्येवार्थो युक्तः। तस्य सदा
तृतीयस्कन्धे —
"स वा एष तदा द्रष्टा
दशमे च —
"यस्यानुभूतिः काले
परं क्षराक्षरपुरुषाभ्यां
ऐक्षते"त्यादि श्रुत्युक्त रीत्या स्वने
इति यावत्। श्रुतयः सदा तत्पार्श्व
विलक्षणमस्ति॥ यच्चरणव्यूहा
बोधयाञ्चक्रुः स्वकर्तव्याभीष्टकाय
बोधने दृष्टान्तमाह-यथे
श्लोकाः कीर्तयो येषु तैः तस्य परा
सामन्तस्य सपरिकरस्याष्टदशव्यव
तद्वदनन्तब्रह्माण्डाधिपशास्तुर्दि
नित्यमुक्तादिपरिकरसहितस्य
भगवदवतारगुणचरित्रादिवर्णनैर्वेदबा
आत्सृष्ट्यर्थं च प्राकृतगुणैः सगुणं
प्रति शुककथनाभिप्रायः ॥१३॥

ादिकत्वं वक्तुं स्वसृष्टमिति।
ज्ञापयन् शयान एव भगवान्
जाताः। ननु कालात्मिकैव
ान्ते प्रबोधसमये अन्यथा
मयन्तीति तैरेव बोधयाञ्चक्रुः,
स्थापयन्ति ॥१२॥

षां प्रकरणरूपेण बोधनमिति
तयो न भगवन्तमेव तत्कृतान
पजीव्यैव अधिकफलनिर्णयार्थ
भलाषाः। ताः पूर्ववृत्तान्तमेव
ाधयन्ति। यतस्ते अनुजीविनः
चित्। तद्दृष्टान्तादिना विरुध्यते

यानं परमीश्वरं तदन्तं प्रलयान्ते
तुतिः श्रुतिभिरीर्यते" ॥१२॥
ङ्लैः तस्य पराक्रमैर्बोधयन्ति

कभिः सूक्ष्मावस्थामापन्नाभिः
भगवन्तं तदन्ते प्रलयान्ते
न शास्त्रमिति मूले वक्ष्यमाणत्वात्
थमनिःश्वासाच्छ्रुतयो विनिर्गत
ेत्य प्रातःकाले आगत्य बन्दि
त्प्रमादात् गोब्राह्मणपीडाकरे
येषु तैः। तेषां तद्बोधने हेतुम

तत्र सनन्दन उवाच-स्वसृष्ट
सह शयानं निद्राणमिव वर्त
देवताः स्वाधिकार्यतया
नं शयानं प्रत्यूषेऽभ्येत्य प्रा
येषु तैः पराक्रमप्रतिपाद
एवास्य स्तवस्य सम्भवो

महाप्रकरणान्तःपातात् निभृतमरुन्मनोक्षेत्यादिलिगत्। कृष्णं च तत्र छन्दोभिः स्तूयमानमित्यन्यत्र वाक्यात्। एतच्छ्रुत्वा कृष्णायेति कृष्णपदश्रुत्यैव तस्य नमस्कृतत्वाच्चेति सङ्क्षेपः ॥१३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रस्तुतमाह-स्वसृष्टमिति ॥ स्वसृष्टं स्वेच्छया स्वयं निर्मितम् इदं कालमायादिसहितं विश्वं शक्तिभिः सह कालमायापुरुषैः आपीय स्वधामाक्षरजसि लीनं कृत्वा। तथा चोक्तं स्कान्दे —

"वासुदेवः परं ब्रह्म बृहत्यक्षरधामनि। आदावेकोऽद्वितीयोऽभून्निर्गुणो दिव्यविग्रहः ॥१॥
सकार्यमूलप्रकृतिः सकालाऽक्षरतेजसि। प्रकाशोऽर्कस्य रात्रीव तिरोभूता तदाभवदि"ति ॥२॥

विष्णुपुराणे च —

"प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥
परमात्मा च सर्वेषामाधारः पुरुषोत्तम इति ॥१॥"

भागवतैकादशस्कन्धे च —

"एको नारायणो देवः पूर्वसृष्टं स्वमायया ॥ संहत्यकालकलया कल्पान्त इदमीश्वरः ॥
एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः। कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु ॥२॥
सत्त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः। परावराणां परम आस्ते कैवल्यसंज्ञित" इति ॥३॥

शयानं जगत्सृष्टिहेतुभूतपुरुषादीनां स्थितिप्रेरणाभ्यां विरामं प्राप्तं परमात्मनो निद्राभावात् सदा जागरूकत्वाच्च विराम र्यो युक्तः। तस्य सदा जागरूकत्वे श्रुतिस्मृतयः "यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वत, इति ॥"

तृतीयस्कन्धे —

"स वा एष तदा द्रष्टा नापश्यद्दृश्यमेकराट्। मेने संतमिवात्मानं सुप्तशक्तिरसुप्तदृक् ॥१॥"

दशमे च —

"यस्यानुभूतिः कालेन लयोत्पत्त्यादिना स्य वै। स्वतोऽन्यस्माच्च गुणतो न कुतश्चन रिष्यती"ति ॥१॥

परं क्षराक्षरपुरुषाभ्यां दिव्यकल्याणगुणैः अत्युत्कृष्टतमं निर्गुणाक्षरधाम्नि स्थितं प्रलीनशक्तिप्रादुर्भावाय तदुपरि "स त्यादि श्रुत्युक्त रीत्या स्वनेत्रप्रसारं कर्तुमिच्छन्तं दिव्यावयविनं भगवन्तमिति भावः। तदन्ते प्रलयान्ते स्वेच्छया सृष्टिकरणसमय वत्। श्रुतयः सदा तत्पार्श्ववर्तिनस्तत्कर्तव्याभिज्ञाः वेदाः। अत्र वेदानां शब्दमयस्वरूपाद्भगवदुपासकनिर्गुणदिव्यपुरुषाकाररूपं मस्ति॥ यच्चरणव्यूहादिषु वर्णितम् ॥ तल्लिङ्गैः तन्निरूपकैः तदवतारगुणचरित्रप्रतिपादकैरिति यावत्। वाक्यैरिति शेषः। क्रुः स्वकर्तव्याभीष्टकार्यबोधनं चक्रुरित्यर्थः ॥१२॥

बोधने दृष्टान्तमाह-यथेति ॥ शयानं सम्राजं महाराजम् ॥ अनुजीविनो बन्दिनः प्रत्यूषेऽभ्येत्य ॥ सुश्लोकैः शोभनाः कीर्तयो येषु तैः तस्य पराक्रमैः ॥ बोधयन्ति सनकाद्याख्यानेन नारायणनारदसंवादे यथाशयानमिति दृष्टान्तेन मण्डलाधिपतेः स्य सपरिकरस्याष्टदशव्यवहारनिपुणस्योत्पथगराजन्यशिक्षकस्य राज्ञो यथा निकटमेत्योषसि तद्गुणवर्णनैर्बन्दिनो बोधयन्ति ब्रह्माण्डाधिपशास्तुर्दिव्येक्षणस्य दिव्यसङ्कल्पस्य दिव्यमुखस्य प्राकृतगुणवर्जितस्य कल्याणगुणसहितस्य दिपरिकरसहितस्य दिव्यमूर्तेः सर्वकर्तव्यविद उत्पथगमुक्तपुरुषादिनियन्तुर्भगवतः सान्निध्यमाप्य गुणचरित्रादिवर्णनैर्वेदबन्दिकृतबोधनस्य गदितत्वान्नित्यदिव्यावयविनं भगवन्तं दृष्टान्ताभिप्रायप्रहाणेनादौ निर्गुणं निराकारं र्थं च प्राकृतगुणैः सगुणं साकारं जातं वदन्तो मन्दभाग्या देवानां प्रिया एव शास्त्रस्तेनाश्च दूरतः परिहर्तव्याः एव परीक्षितं कथनाभिप्रायः ॥१३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु ते सर्वे तु सर्वज्ञा: अत: कस्तत्र वक्ता बभूव, के वा श्रोतार: बभूवुरित्यत आह ॥ तुल्येति ॥ श्रुतं शास्त्रजन्यं ज्ञानं तपोऽनशनादिरूपं च शीलं तदुपयुक्ता यद्वृत्तिरक्रोधाद्यात्मस्वभावश्च तुल्यानि श्रुतादीनि येषां ते, तुल्या: स्वीया: अरय: मध्यस्था येषां ते, अनेन सर्वेषामपि प्रवचनसामर्थ्यं सूचितम्। अपि तथापि, एकं सनन्दनं, प्रवचनं प्रतिवक्तारं, चक्रु: । अपरे सनकादय: शुश्रूषव: बभूवुरिति शेष: ॥१२॥ प्रश्नस्तु त्वत्कृत एवेत्यभिप्रेत्य तमनुक्त्वैव सनन्दनोक्तमुत्तरमाह स्वसृष्टमित्यादिभि: स्वसृष्टमिति ॥ तत्र स्वविवक्षितमुत्तरं श्रुतिगीत्या संवादयितुं प्रस्तौति सनन्दन: द्वाभ्याम्। स्वसृष्टं स्वेनात्मना सृष्टम्, इदं चिदचिदात्मकं जगत्, आपीय संहृत्य, शक्तिभि: सूक्ष्मावस्थापन्नाभि: प्रकृतिपुरुषकालात्मिकाभि: सह, शयानं निद्राणमिवान्तर्वृत्त्या वर्तमानं प्रकृतिपुरुषकालान् स्वस्मिन् विभागानर्हान् कृत्वा निर्बाधितस्वानन्दानुभवपरमित्यर्थ: । परं परमपुरुषं, तदन्ते प्रलयान्ते सृष्ट्यादावित्यर्थ: । श्रुतय: तन्नि:श्वसितरूपा मूर्तिधरा वेदा:, यद्वा । वेदाभिमानिनो देवा:, तल्लिङ्गै: परमपुरुषासाधारण-धर्मप्रकाशकैर्वचोभि:, बोधयाञ्चक्रु: । प्रतिबोधयन्त्य इव तुष्टुवुरित्यर्थ: ॥१३॥

योगिरामानुजाचार्यकृतसरला व्याख्या

स्वसृष्टमिति । स्वयं निर्मितमिदं विश्वं प्रलयसमये आपीय संहृत्य शयानं योगनिद्राणमिव वर्तमानं तदन्ते प्रलयान्ते तल्लिङ्गैस्तदसाधारणधर्मगुणक्रियाप्रतिपादकै: वाक्यै: परमीश्वरं सृष्टिसमये प्रथमनि:श्वासभूता: श्रुतय: प्रबोधयामासु: ॥१२॥ तत्पराक्रमै: तस्य पराक्रमा: येषु तै: तस्य शत्रुजयादिपराक्रमप्रतिपादकै: सुश्लोकै: शोभना श्लोका: 'पाठ्ये गेये च मधुरम्' इतिवत् अर्थालङ्कारशब्दालङ्कारसहितै: पद्यै: ॥१३॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी ॥१०-१३॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

इदं स्वसृष्टं विश्वं प्रलयसमये आपीय संहृत्य शक्तिभि: सह शयानं परमेश्वरं तदन्ते प्रलयान्ते श्रुतयस्तल्लिङ्गैस्तत्प्रतिपादकैर्वाक्यैर्बोधयाञ्चक्रु: प्रबोधयामासु: । शयानमिति योगेन निद्राणमिव वर्तमानमित्यर्थ: । सृष्टिसमये श्रीनारायणस्य प्रथमनि:श्वासात् विनिर्गता: श्रुतय: स्तुवन्ति ॥१२॥ दृष्टान्तमाह-सम्राजं चक्रवर्तिराजानम्। शयानम्। वन्दिन: स्तावका: । प्रत्यूषे अभ्येत्य तत्पराक्रमैर्यथा बोधयन्ति तथा परमेश्वरं बोधयन्ति । कथम्भूतैस्तत्पराक्रमै: । सुश्लोकै: । शोभना श्लोका: कीर्तयो येषु तै: ॥१३॥

श्रीनिवाससूरिकृततत्त्वदीपिका

स्वसृष्टं स्वेनैव रचितमिदं विश्वम्। प्रलयावसरे आपीय संहृत्य । शयानं योगनिद्रया वर्तमानम्। तदन्ते प्रलयान्ते तल्लिङ्गैस्तत्पारमार्थिकचरित्रप्रतिपादकस्ववाक्यै: । परं परमेश्वरम् । तन्नि:श्वासरूपा: श्रुतय: 'तस्य वा एतस्य महतो भूतस्य नि:श्वसितमेतद्यदृग्वेद:०' इतिश्रुते: ॥१२॥ तत्पराक्रमै: तस्य पक्रमा: येषु तै: । तस्य शत्रुजयादिपराक्रमप्रतिपादकै: सुश्लोकै: शोभना: श्लोक: 'पाठ्ये गेये च मधुरम्' इतिवत् अर्थालङ्कारशब्दालङ्कारसहितै: पद्यै: ॥१३॥

कृष्णप्रिया

आपके सृजे इस चेतनामय जगत का संहार कर सुक्ष्म माया जीव काल रुप शक्तियों सहित प्रलय काल शेशशय्या पर मानो शयन करने वाले अर्थात निरवधिक निज आनन्द का अनुभव कर वर्तमान परमात्मा असाधारण पराक्रम के प्रकाश करने वाले वचनों से मानो जगावत स्तुति करने लगी ॥१२॥ जैसे चक्रवर्ति के मृत्यु और स्तुति पाठ करने वाले प्रात:कालमें आय कर उस चक्रवर्ति के पराक्रम को प्रकाश करने वाले श्लोकों से उस सोते हुए चक्रवर्ति राजा को जगाते है वैसे ही श्रुतियोनें परमात्मा को जगाया ॥१३॥

जय जय जह्यज
अगजगदोकसा

श्रुतय:, ऊचु: ।
अगजगदोकसाम्, अजाम्,
चरत:,ते,निगम:, अनुचरेत्,

जयजयेति । भो अ
जगन्ति जङ्गमानि च ओकां
दोषगृभीतगुणाम्। दोषायानन्द
गुणान् गृह्णात्यतो हन्तव्येति त
स्वरूपेणैव समवरुद्धसमस्तभ
हन्युरित्यत आह-अखिलशक्त
न्वहमकुण्ठछ्ज्ञानैश्वर्यादिगुणो
वेद: नन्वेवम्भूते मयि कथं श्रुतीन
सत्यज्ञानानन्तानन्दैकरसेनाऽऽत्म
जायन्ते। योग ब्रह्माणं विदधाति
तिष्ठन् सत्यं ज्ञानमनन्तं ब्रह्म । य

जयजयाजित जह्यगज

भावार्थदीपिकाप्रकाश: व
बहुधा भवन्ति । तत्राप्यष्टाविंश
लक्षणाशरणान्तर्यामिभेदाभेदज्ञा
सृष्टिबन्धमोक्षातर्क्यशक्तित्वसर्वेश्वर
अत्र तावत्सर्वा: श्रुतय: सगुणं गु
श्रीगोपालतापन्याम्- ''योऽसौ सव
छन्दोभि: स्तूयमानं सुविस्मिता:

''किं विधत्ते किमाचष्टे वि
मां विधत्तेऽभिधत्ते मां वि
मायामात्रमनूद्यान्ते प्रतिषि

---

१. एतदारभ्य २७ श्लोका भिन्नपाठा:
विजयध्वजयो: मतानि पाठान्तराण्यपि

श्रुतय ऊचु:[१]

जय जय जह्यजामजित दोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभग: ।
अगजगदोकसामखिलशक्त्यवबोधक ते क्वचिदजयाऽऽत्मना च चरतोऽनुचरेन्निगम: ॥१४॥

कर्दमक्षमा

श्रुतय:, ऊचु: । भो अजित, हे अगजगदोकसाम्, अखिलशक्त्यवबोधक, त्वम्, जय, जय, दोषगृभीतगुणाम्, गदोकसाम्, अजाम्, जहि ।, यत्, यत:, त्वम्, आत्मना, समवरुद्धसमस्तभग:, असि, क्वचित्, अजया, आत्मना, च, त:,ते,निगम:, अनुचरेत्, ॥१४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

जयजयेति । भो अजित ! जयजय उत्कर्षमाविष्कुरु आदेरवीप्सा केन व्यापारेण अगजगदोकसाम् अगानि स्थावराणि जङ्गमानि च ओकांसि शरीराणि येषां जीवानां तेषामजामविद्यां जहि नाशय किमिति गुणवती हन्तव्येत्यत आह–भीतगुणाम् । दोषायानन्दाद्यावरणाय गृहीता गुणा यया ताम् "हृग्रहोर्भश्छन्दसि" इति भकार: इयं हि स्वैरिणीव परप्रतारणाय गृह्णात्यतो हन्तव्येति तर्हि मय्यपि दोषमावहेदिति ममापि तत्र का शक्ति: स्यादत आह–त्वमिति । यद्यस्मात्त्वमात्मना णैव समवरुद्धसमस्तभग: सम्प्राप्तसमस्तैश्वर्योऽसि वशीकृतमायात्वादिति भाव: । ननु स्वयमेव ते ज्ञानवैराग्यादिना किं न त्यत आह–अखिलशक्त्यवबोधकेति । तेषां त्वमेवान्तर्यामी सर्वशक्त्युद्बोधक: अतो न ते ज्ञानादौ स्वतन्त्रा इति भाव: । कुण्ठछज्ञानैश्वर्यादिगुणो जीवानां कर्मज्ञानादिशक्त्यवबोधनेनाविद्याहन्तेत्यत्र किं प्रमाणमिति चेदहमेव प्रमाणमित्याह, निगमो न्वेवम्भूते मयि कथं श्रुतीनां प्रवृत्तिस्तत्राह–क्वचिदिति ।कदाचित्सृष्ट्यादिसमयेऽजया मायया चरत: क्रीडतो नित्यं चालुप्तभगतया ज्ञानानन्तानन्दैकरसेनाऽऽत्मना च चरतो वर्तमानस्य निगमोऽनुचरेत् प्रतिपादयेत् कर्मणि षष्ठ्यौ 'यतो वा इमानि भूतानि न्ते। योग ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये य आत्मनि सत्यं ज्ञानमनन्तं ब्रह्म । य: सर्वज्ञ: स सर्ववित्' इत्यादिनिगमकदम्बस्त्वामेवम्भूतं प्रतिपादयतीत्यर्थ: ॥१४॥

जयजयाजित जह्यगजङ्गमावृतिमजामुपनीतमृषागुणाम् । न हि भवन्तमृते प्रभवन्त्यमी निगमगीतगुणार्णवता तव ॥१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाश:

भावार्थदीपिकाप्रकाश: वंशीधरी — अथ यद्यपि श्रुतयस्त्रिकाण्डविषयत्वात्त्रिविधा एव तथापि तत्तदवान्तरफलसाधनपरत्वेन भवन्ति । तत्राप्यष्टाविंशतिभेदास्ता: सपरिकरा: पृथक्पृथक् स्तुवन्तीति तत्तत्प्रसङ्गे दर्शयिष्याम: । तासां नामानि रणान्तर्यामिभेदाभेदज्ञाननिन्दोपदेशोपासनाभक्त्यनुक्रोशदुर्विज्ञेयत्वानिर्वचनीयत्वासद्वादादिखण्डनस्तवैकात्म्य-मोक्षातर्क्यशक्तित्वसर्वेश्वरत्वसोपाधिलयनिरुपाधिलयवैराग्यगुरूपसदनब्रह्मानन्दातन्निरसनानन्तत्वप्रतिपादनक्रमेण ज्ञेया: ॥ सर्वा: श्रुतय: सगुणं गुणैरनभिभूतं श्रीनारायणमवलम्ब्य निर्गुणं परं ब्रह्म श्रीकृष्णाख्यं स्तुवन्तीति तात्पर्यम् । तथा हि तापन्याम्- "योऽसौ सर्वेषु वेदेषु तिष्ठति" योऽसौ सर्वैर्वेदैर्गीयतेऽसौ श्रीकृष्ण: पूर्वतोऽनुवर्तते । दशमे – "कृष्णं च तत्र मे स्तूयमानं सुविस्मिता: ।" इति । एकादशस्कन्धे एकविंशाध्याये —

"किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥
मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् । एतावान्सर्ववेदार्थ: शब्द आस्थाय मां भिदाम् ॥
मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति ॥" इति ।

---

[१] य २७ श्लोका भिन्नपाठा: प्रवर्तन्ते विज. ते च श्रीविजयध्वजीयटीकायामेव मूलश्लोकसहितं द्रष्टव्या: । तथैव वीरराघव-वयो: मतानि पाठान्तराण्यपि टीकायामेव दत्तानीति ज्ञेयम् ॥

व्याख्यातं स्वामिचरणैः । इयं बृहती श्रुतिः कर्मकाण्डे मन्त्रवाक्यैः किमाचष्टे किं प्रकाशयति, ज्ञानकाण्डे
निषेधार्थं विकल्पयेत् इत्यस्याः श्रुतेर्हृदयं तात्पर्यं मत्तोऽन्यः कश्चिदपि न वेद । स्वयमेव कथयति । मां विधत्ते मामेव
विधत्ते मामेव तत्तद्देवतारूपेणाभिधत्ते न मत्तः पृथक् यच्चाकाशादिप्रपञ्चजातम् – "तस्माद्वा एतस्मादाकाशः सम्भूतः"
विकल्प्यापोह्यते निषिध्यते तदप्यहमेव न मत्तः पृथगस्ति । एतावानिति । शब्दो वेदः मां परमार्थरूपमाश्रित्य
मायामात्रमित्यनूद्य नेह नानस्ति किञ्चन इति प्रतिषिध्य प्रसीदति निर्वृत्तव्यापारो भवतीति एतावान्सर्ववेदार्थः । श्रीगीतासु च–

"वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्" इति । तस्मात्सर्वाः श्रुतयः श्रीकृष्णमाहात्म्यमुदीर्य
स्तुवन्तीति । ग्रन्थविस्तरभियात्राधिकं न लिखितम् । अथ प्रकृतमनुसरामः । प्रथमं स्वमनोरथं निवेदयन्तः श्रुत्यभिमानि
आहुः । नर्कुटकं नाम छन्दः 'हयदशभिर्नजौ भजजला गुरु नर्कुटकम्' इति तल्लक्षणम् । सप्तभिर्दशभिश्च यतिरत्रेत्यर्थः ।
ह्रग्रहोर्धात्वोर्हस्य भादेशो वेद इत्यर्थः । यतो दोषाय गुणान्गृह्णात्यतो हेतोः । तत्र तद्धननादौ । इति भाव इति–मायापरतन्त्रत्वाज्जीवे
तत्सामर्थ्यं न त्वयीति "विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया" इत्युक्तेः । "नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य
इत्युक्तेश्चेत्याशयः । ते जीवाः । अतस्त्वदधीनप्रवृत्तित्वात् । इति भाव इति–"केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि
करोमि ।" इत्युक्तेः । एवम्भूतेऽकुण्ठज्ञानैश्वर्ये क्रीडतः पुरुषरूपेण नित्यं चात्मना ज्ञानानन्दैकरसेन भगवदादिरूपेण स्वयोग
चिच्छक्त्यान्तर्याम्यवतारादिशुद्धलीलायां चरतः निगमो वेदसमूहः प्रनुचरेत्त्वां प्रतिपादयेत् । अत्र श्रुतयो भृगुणा ब्रह्मणः
लक्षणमिति पृष्टो वरुणः प्राह–यतो वा इति । वै प्रसिद्धौ । यतो यस्मात् इमानि ब्रह्मादिस्तम्बपर्यन्तानि जायन्ते जीवन्ति
धारयन्ति वर्धन्ते च नाशकाले यत्प्रति प्रयन्ति गच्छन्त्यभिविशन्ति तादात्म्यमेव प्रतिपद्यन्ते तत्त्वं ब्रह्मेति विशेषेण ज्ञातुमिच्छ
उत्पत्तिस्थितिनाशकाले यदात्मतां न जहति भूतानि तद्ब्रह्मणो लक्षणमित्यर्थः । तटस्थलक्षणपरेयं श्रुतिः । यः परमेश्व
पूर्वं सर्गादौ । विदधाति ससर्ज । तस्मै ब्रह्मणे । प्रहिणोति प्रददौ । तं देवं द्योतमानमात्मबुद्धिप्रकाशं स्वविषयां बुद्धिं प्रकाश
मुमुक्षुरहं शरणं प्रपद्ये मोक्षसिद्ध्यर्थमाश्रयं प्राप्नोमि । शरणपरेयं श्रुतिः । इत्युभे श्रुती, 'अजया चरतः' इत्यस्योदाहरण
'अगजगदोकसाम्' इत्यस्योदाहरणं दर्शयति–य आत्मनीति । 'य आत्मनि तिष्ठन्नात्मनोऽन्तरोऽयमात्मा न वेद यस्य
शरीरमात्मानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः' इति । अन्तर्यामिणं ब्रूहीत्युद्दालकेन मुनिना पृष्टः प्राह याज्ञवल्क्य
आत्मपदेन जीवात्मा गृह्यते य आत्मनि जीवात्मनि तिष्ठन्नात्मनः सकाशादन्तरः दूरस्थः आत्मा यं न वेद न जानाति कुतः
शरीरमात्मा भवति य आत्मानमन्तरोऽभ्यन्तरः सन् यमयति नियमयति एष ते तवान्तर्याम्यात्माऽमृत इत्यर्थः । तथा–

"यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरः । यं सर्वाणि भूतानि न विदुः । यस्य सर्वाणि भूतानि शरीरम् । यः
भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।" इति ॥

नियमनलीलापरेयं श्रुतिरपि ज्ञेया । "आत्मना चरतः" इत्यस्योदाहरणमाह–सत्यमिति । व्याख्यातचरम् । स्वरूपलक्षण
श्रुतिः । निगमकदम्बः श्रुतिसमूहः । स्वामिश्लोकार्थः । अगजङ्गमानामावृतिवारकम् । निगमैर्गीतो गुणानामर्णवो यस्य
तान् जीवान् अव रक्ष ॥★॥ श्रीधरानुयायिनी — ॐ नमो विघ्नहर्त्रे । हे अजित कारुण्यात्स्वप्रभावमाविष्कुरु ।
वीप्सा । यतस्त्वं वशीकृतमायोऽसि । अजितत्वे हेतुः । तथा स्वरूपेणैव सम्प्राप्तसमस्तैश्वर्यः सर्वेषामन्तर्यामी
सर्वशक्त्युद्बोधकोऽसि । नन्वज्ञाननाशेऽपि "भक्त्याहमेकया ग्राह्यः" इत्युक्त्या भक्तिं विना कथं मत्प्राप्तिरित्याशङ्क्य
सर्वशक्त्युद्बोधकोऽसीति । यथा बुद्ध्यादीन् सृष्ट्वा जीवानां भोगादिशक्तीरुद्बोधयसि तथा ज्ञानयोगभक्तीरपि
कृपयोद्बोधयसीत्यर्थः । यद्वा–अगस्थिरजगदोकसां जगदाश्रयभूतानां ब्रह्मादीनामपि सृष्ट्याद्यखिलशक्त्यवबोधकेति ।
स्वतोऽस्वतन्त्राणां स्थावरजङ्गमजीवानामानन्दाद्यावरणार्थमङ्गीकृतगुणां वेश्यावद्भोगिजीववजातवञ्चनचतुराम् ।
दोषैरज्ञानदुःखादिभिर्गृहीताः संवृता जीवगुणाः सत्यज्ञानानन्दा यया तां त्वत्प्राप्तिप्रतिकूलामविद्यां नाशय, अतो

हननमावश्यकमेवेत्याशयः ।
जहदजहल्लक्षणया वेदः प्रति
शक्तत्वेन गोत्वे आनयनस
जीवेशयोरभेदस्यासम्भवेनो
इत्यादेश्चासत्यजडसान्तोपा
क्वचित्सृष्ट्यादावजया प्रकृ
विधिनिषेधरूपेण प्रवर्तेत प्र
जीवस्तस्मात्सृष्टिं विधाय वेदै
जहीति प्रार्थना । अत्राचार्याः

"सर्वश्रुत्यर्थसम्पन्ना

बबन्धतान्भागवते प्र

विश्वनाथी — पूर्वं
च याः सर्वाध्यक्षा महोपनिष
बन्दिजनोचितपरिहासपूर्वकं
निजोत्कर्षमवश्यमाविष्कुरु ।
स्यात्तत्राहुः ।–त्वमसीति । आ
तयेति भावः । तथा च वक्ष्य
चोक्तम् – "विशुद्धविज्ञानघनं
अगेति । अगानि सर्वदा स्थिर
अप्राकृत्यः प्राकृत्यो वा शक्तयः
तादृशत्वादुद्बोधे तव स्वरूपश
स्यात्सर्वाश्रयत्वादिति च गम्यत
मन्निकटस्था अपि मत्तत्त्वं न जा
पूर्वकयाऽजया मायया पुरुषरूपे
चरन्तं त्वां निगमाऽस्मल्लक्षणो
किन्तु तन्निषेधार्थं तदनुवादिन्यः
वक्तव्यं यासां श्रुतीनामत्यन्तान्तर
कारणं भक्तिरेवेति सिद्धान्तोपक्र
विद्यते ।" इत्यादि । "तमेवभान्त
इत्यादिकाश्च ज्ञेयाः (१) ॥१४॥
जय जयेत्यादि । जयत्यविद्यां शा
देहादावात्मबुद्धिरूपामविद्यां नाश

"सैषा ह्युपनिषद्ब्राह्मी
विद्यावतारदर्शनादविद्यावान् जीव
अगजगदोकसामजां जहीति व्यवहि

वश्यकमेवेत्याशयः । किञ्च-सृष्ट्यादौ मायया क्रीडन्तमपि वर्णयन् वस्तुतस्तु तात्पर्येण सत्यज्ञानानन्दैकरसस्वरूपमेव त्वां जहल्लक्षणया वेदः प्रतिपादयति सेवते वा । यथा- 'गामानय' 'घटो भग्नः' इत्यादौ गोघटशब्दयोर्व्यक्ताविव गोत्वघटत्वजात्योरपि त्वेन गोत्वे आनयनस्य घटत्वे भग्नत्वस्यासम्भवाद्व्यक्तावेव तात्पर्यावसानं तथा तत्त्वमस्यादिवाक्येषु श्रूयमाणस्य योरभेदस्यासम्भवेनोपाधिभागत्यागेन शुद्धचिदानन्द एव पर्यवसानम् । एवं मायोपहित एव प्रवृत्तस्य "सत्यं ज्ञानमनन्तम्" देश्चासत्यजडसान्तोपाधौ सत्यत्वज्ञानत्वानन्तत्वासम्भवेनोपाधिमपहाय शुद्ध एव पर्यवसानमिति भावः । यद्वा- सृष्ट्यादावजया प्रकृत्या आत्मना पुरुषरूपेण जीवेन च चरतो वर्तमानस्य तव वेदः अनुचरेत् त्वच्चित्तानुवर्तित्वेन निषेधरूपेण प्रवर्तेत प्रलयकाले तु स्तुतिरूपेणेत्यर्थः । तदा विधिनिषेधप्रयोजनाभावात् । तथा च, यस्माद्विधिनिषेधविषयो स्मात्सृष्टिं विधाय वेदैर्जीवान्बोधयित्वा तदुक्तानुष्ठानं सम्पाद्य स्वज्ञानमुत्पाद्य त्वं प्रसन्नः सन् जीवेषु पिशाचीवदाविष्टामजां इति प्रार्थना । अत्राचार्याः —

"सर्वश्रुत्यर्थसम्पन्नाञ्छ्लोकान्सत्यवतीसुतः । एकैकशाखाश्रुत्यर्थाङ्गौ सर्वोपलक्षणान् ॥
बबन्धतान्भागवते प्रतिश्लोकं प्रतिश्रुति ॥" इति ॥★॥

विश्वनाथी — पूर्वं बुद्धीन्द्रियेत्यादिना प्रणवस्य साक्षाद्भगवद्वाचित्वं दर्शयित्वा तद्विवृतिरूपाः श्रुतयश्चाष्टाविंशतिधा तत्र सर्वाध्यक्षा महोपनिषदः सर्वश्रुतिसमन्वयार्थं श्रुत्यन्तरानुदितातन्निरसनपूर्वकस्वरूपगुणनिर्देशेन तत्र चरन्ति प्रथमं ता एव जनोचितपरिहासपूर्वकं प्रथमं स्वमनोरथं निवेदयन्ति-जय जयेति । हे अजित ! मायाद्यनभिभूत ! जय जय त्कर्षमवश्यमाविष्कुरु । कथं वा न करोषीति वीप्सार्थः । ननु मम जगद्वैभवहेतुभूतायाः अस्या हनने ममैव हानिः आहुः ।-त्वमसीति । आत्मना स्वरूपभूतेन परमानन्देनैव शक्त्येत्यर्थः । सम्यग् निरवशेषं प्राप्तपूर्वैश्वर्यादिरसि किं तुच्छया इति भावः । तथा च वक्ष्यते स्वामिभिः -न हि निरन्तराह्लादिसंवित्कामधेनुवृन्दपतेरजया कृत्यमस्तीति । भगवता देवर्षिणा म्- "विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थम्" इत्यादि । ननु-मम तादृशस्वरूपशक्तेरस्तित्वे किं प्रमाणं तत्राहुः- ति । अगानि सर्वदा स्थिराणि वैकुण्ठादीनि । जगन्ति चास्थिराणि ब्रह्माण्डानि ओकांसि येषां तेषां जीवानां या अखिला कृतयः प्राकृत्यो वा शक्तयः सन्ति हे तदवबोधक ! तच्छक्तीनामपि शक्तिदायक ! तत्र प्रकृतेर्जडत्वात्तद्वृत्तीनां तत्तच्छक्तीनामपि त्वादुद्बोधे तव स्वरूपशक्तिश्चिद्रूपैव कारणं लभ्येतेति स्पष्टमेव । अप्राकृतीनां चिच्छक्तिवृत्तीनामप्युद्बोधस्तस्या एव सर्वाश्रयत्वादिति च गम्यत एव चेति भावः । ननु-युक्तिमात्रज्ञातार्थाः साक्षिणो न भवन्ति किन्तु साक्षाद्द्रष्टार एव । किञ्च- स्था अपि मत्तत्त्वं न जानन्ति किन्तु मत्सेवका एवेति नैतावता युष्मद्वचसि प्रामाण्यं तत्राहुः-ते क्वचिदिति । सृष्टिलीलायां जया मायया पुरुषरूपेण चरन्तं क्वचिद्विशुद्धानन्दलीलायामात्मना पूर्वोक्तया स्वरूपानन्दशक्त्या स्वयं भगवदादिरूपेण त्वां निगमाऽस्मल्लक्षणो वेदकदम्बः अनुचरेत्सेवेत इति तस्मादेनां जहि । तदेवं वस्तुतो श्रुतयो गुणवृत्तय एव न भवन्ति तन्निषेधार्थं तदनुवादिन्यः स्वरूपैश्वर्यादिमति भगवति तत्तदालम्बनेनैव साक्षाच्चरेयुः । तत्रापि अजितसम्बोधनेन चरेयुरित्येव यासां श्रुतीनामत्यन्तान्तरङ्गभूतेन तत्तन्नामरूपेण शब्दविशेषेण सोऽप्यभिमुखीक्रियत इति । अत्रानुचरेदिति । तत्र तत्र मूलं पकिरेवेति सिद्धान्तोपक्रमः । श्रुतयस्तु- "सत्यं ज्ञानमनन्तं ब्रह्म ।" "विज्ञानमानन्दं ब्रह्म ।" "न तस्य कार्यं करणं च ।" इत्यादि । "तमेवभान्तमनुभाति सर्वम् ।" इत्यादिकाः । "सर्वे वेदा यत्पदमामनन्ति ।" "यस्य देवे परा भक्तिः ।" श्च ज्ञेयाः (१) ॥१४॥ नीलकण्ठी — तत्र तावत्प्रथमे श्लोके कृत्स्नशास्त्रार्थप्रदर्शनेन श्रुतयः शिष्यं सम्मुखयन्तीत्याह- इत्यादि । जयत्यविद्यां शास्त्राचार्योपदेशादिति हे जय हे जीव त्वं जय उत्कर्षमाविष्कुरु । कथम् । अविद्यां जहि अनात्मनि त्मबुद्धिरूपामविद्यां नाशय । एतेन स्वाज्ञानाद्बन्धः स्वज्ञानान्मोक्ष इत्युक्तम् । अत्र

"सैषा ह्युपनिषद्ब्राह्मी ।" "श्रुतयो बोधयाञ्चक्रुः" "आश्रुत्यात्मानुशासनम्" इत्युपक्रमपरामर्शोपसंहारेषु दर्शनादविद्यावान् जीव एव सम्बोध्यः न तु तद्रहित ईश्वरः स्तव्यः । स्तुतिफलस्य प्रार्थितवरदानादेरत्रादर्शनात् । तेन कसामजां जहीति व्यवहितान्वयकल्पनाक्लेशोऽपार्थ इति दिक् । नन्वैहिकामुष्मिकसुखहेतुरजा कुतो निहन्तव्येत्याशङ्क्याह-

अजितदोषगृभीतगुणाम्। अनिर्जितरागादिदोषैरेव गृभीतो रमणीयतालक्षणो गुणो यस्यां सा तथा। वारवनितावद्रागिजनवञ्चनचतुरे हन्तव्यैव नीरागैरिति भावः। गृभीतः कल्पितः छान्दसं हस्य भत्वम्। नन्वजयैवाहं जितः कथं तां नाशयेयमत आह-त्वमिति। यद्यस्माद्धेतोस्त्वमात्मना स्वरूपेणैव प्राप्तकृत्स्नैश्वर्यादिषट्कोऽसि, अतस्तव तन्नाशनमीषत्करमित्यर्थः।

"""ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानविज्ञानयोश्चैव षण्णां भग इतीङ्गना" ॥ इति।" इति ऐश्वर्यादिषट्कम्। एवं तत्त्वमसीति शास्त्रात्रेश्वरादनन्ययस्त्वमित्युक्तं शुक्तेरिव रजतम्। साङ्ख्यास्तु-जीव एव सत्त्वोत्कर्षवशात्समवरुद्धसमस्तभगो भवतीत्याहुस्तन्निरासायात्मनेत्युक्तम्। ऐश्वर्यस्य परायत्तत्वे स्वतःसिद्धैश्वर्यप्रतिपादकं "तत्त्वमसि।" "अहं ब्रह्मास्मि।" इत्यादिवाक्यं व्याकुप्येतैवेति भावः। यत्पुनः साङ्ख्यो ब्रवीति "पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्" इत्यादि —

"महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च। इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥

इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः। एतत्क्षेत्रम्०"

इत्युक्तरूपाणाम् अखिलाः प्राणनादिशक्तयः तासामवबोधक एतच्च "येन प्राणः प्रणीयते" "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इत्यादिश्रुतिप्रसिद्धम्। अत्रापि "योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां सञ्जीवयति" इत्युक्तम्। यद्वा तु अगजगदोकसामखिलशक्त्यवबोधक! जय जयेति सम्बन्धः क्रियते तदा जय जयेति द्विरुक्तिरादरार्था। ननु यद्यहमीश्वरस्तर्हि कथं ब्राह्मणो यजेतेति मम नियोज्यत्वमित्याशङ्क्यशुद्धचिदात्मनस्तव द्वयमपि तन्मृषेत्याह-त इति। ते चरत इति कर्मणि षष्ठ्यौ। त्वं क्वचित्काले सुप्तिप्रलयादेरन्यत्राजया मायया जीवेशावाभासेन करोषि माया चाविद्या च स्वयमेव भवतीति सिद्धरूपद्वयेन शुद्धाशुद्धसत्त्वप्रधानेन त्वदुपाधितां गत्वा तवेश्वरत्वं जीवत्वं चापादयन्त्या सह चरन्तं शास्तृशास्यत्वादिधर्ममनुसरन्तं निगमः निश्चितं यथाभूतमर्थं गमयन्कर्मोपास्तिपरो वेदोऽनुचरति। मायिकाविद्यके तवैश्वर्यब्राह्मण्यादिके अनुवदत्येव न प्रतिपादयतीत्यर्थः। आत्मनां चानुपाधिरूपेणानुचरन्तं कारणप्रपञ्चं ग्रसन्तं रज्जुमिव सर्पं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिनिगमः अनृतजडपरिच्छिन्नत्वादिव्यावर्तनेनानुचरेत् लक्षणया आवेदयेन्न साक्षात्। "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति श्रुतेः। अत्र क्वचिदिति जीवेशयोः स्वप्नेन्द्रजालादिवत्कादाचित्कजीवितव्येशितव्यसापेक्षत्वेन मृषात्वं तदनुवादिवेदस्य च स्वप्नादिदृष्टार्थानुवादिवाक्यस्येव नाप्रामाण्यमतो न निगमत्वव्याहतिः। एवं जीवेशोपाध्योर्बाधे यच्छिष्टमनुपाधि तज्ज्ञानादजानाम इति दर्शितम् (१) ॥१४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पूर्वं बुद्धीन्द्रियेत्यादिना प्रणवस्य साक्षाद्भगवद्वाचित्वं दर्शयित्वा तद्विवृतिरूपाः श्रुतयश्चाष्टाविंशतिधा तत्र च याः सर्वाध्यक्ष महोपनिषदः सर्वश्रुतिसमन्वयार्थं श्रुत्यन्तरानुदितातन्निरसनपूर्वकस्वरूपगुणनिर्देशेन तत्र चरन्ति प्रथमं ता एव बन्दिजनोचितपरिहासपूर्वकं प्रथमं स्वमनोरथं निवेदयन्ति-जय जयेति। हे अजित! मायाद्यनभिभूत! जय जय निजोत्कर्षमवश्यमाविष्कुरु। कथं वा न करोषीति वीप्सार्थः। ननु मम जगद्वैभवहेतुभूतायाः अस्या हनने ममैव हानिः स्यात्तत्राहुः।-त्वमसीति। आत्मना स्वरूपभूतेन परमानन्देनैव शक्त्येत्यर्थः। सम्यग् निरवशेषं प्राप्तपूर्वैश्वर्यादिरसि किं तुच्छया तयेति भावः। तथा च वक्ष्यते स्वामिभिः -न हि निरन्तराह्लादिसंवित्कामधेनुवृन्दपतेरजया कृत्यमस्तीति। भगवता देवर्षिणा चोक्तम् - "विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थम्" इत्यादि। ननु-मम तादृशस्वरूपशक्तेरस्तित्वे किं प्रमाणं तत्राहुः- अगेति। अगानि सर्वदा स्थिराणि वैकुण्ठादीनि। जगन्ति चास्थिराणि ब्रह्माण्डानि ओकांसि येषां तेषां जीवानां या अखिला अप्राकृत्यः प्राकृत्यो वा शक्तयः सन्ति हे तदवबोधक! तच्छक्तीनामपि शक्तिदायक! तत्र प्रकृतेर्जडत्वात्तद्वृत्तीनां तत्तच्छक्तीनामपि तादृशत्वादुद्बोधे तव स्वरूपशक्तिश्चिद्रूपैव कारणं लभ्येतेति स्पष्टमेव। अप्राकृतीनां चिच्छक्तिवृत्तीनामप्युद्बोधस्तस्या एव स्यात्सर्वाश्रयत्वादिति च गम्यत एव चेति भावः। ननु-युक्तिमात्रज्ञातार्थाः साक्षिणो न भवन्ति किन्तु साक्षाद्द्रष्टार एव।

किञ्च-मन्निकटस्था अपि
सृष्टिलीलायां पूर्वक्तयाऽज
भगवदादिरूपेण चरन्तं त्व
एव न भवन्ति किन्तु तन्निषे
चरेयुरित्येव वक्तव्यं यासां
तत्र तत्र मूलं कारणं भक्तिरे
करणं च विद्यते।" इत्या
परा भक्तिः।" इत्यादिकाश्च

(★ यद्यपि सर्वासु
श्लोकं यावत् व्रजलीलापरव्
विचितासन्निवेशितमिति ज्ञेय

अजित! हे मायान
परमदैन्येनाति-नम्रताबोधनाथ
किमित्यपसार्या? तत्राह-दो
कासाञ्चिल्लीलानां हेतुरिय
प्राप्तसकलमधुरलीलादिपरमैश्व
कुर्य्युः? तत्राहुः-अगेति। श
कुतो ज्ञातम्? तत्राहुः-क्वचि
श्रीनारायणादिरूपेण चरन्तं त्व

[जय जयेति माङ्गृ
दोषेति। दोषेण वचनामृतली
लीलास्वरूपो यस्यास्ताम्, गृ
वैशिष्ट्यादित्यर्थः। ननु भवतु
सप्राप्तसर्वानन्दोऽसि। ननु यद्यहं
न कुर्वन्तीति युष्माकभिप्र
निजानन्दहेतुतत्तत्सर्वसामर्थ्यप्रव
कृपावलोकेन तेषां शक्तिं बोधि
आनन्दनीया इत्याहुः-क्वचिदिति
त्वरतश्चरन्तं सर्वपार्श्वे विचरन्तं त्व
तथा च तापनीश्रुतिः (पू० २३)

"एको वशी सर्वगः कृ

यद्वा, ननु मत्प्रेयस्यावपि
ललिते वा, क्वचित् अन्तर्लीला
स्वरूपभूतया चिच्छक्त्या। तथा

ावद्रागिजनवञ्चनचतुरैषा
येयमत आह-त्वमिति।

न्ना" ॥ इति ।" इति
साङ्ख्यास्तु-जीव एव
स्वतःसिद्धैश्वर्यप्रतिपादकं
रुषार्थ एव हेतुर्न केनचित

ो ह्येवान्यात्कः प्राण्याद्यदेष
ञ्जीवयति" इत्युक्तम्। यदा
ार्था। ननु यद्यहमीश्वरस्तर्हि
त । ते चरत इति कर्मणि
मेव भवतीति सिद्धरूपद्वयेन
त्वादिधर्ममनुसरन्तं निगमः
त्येव न प्रतिपादयतीत्यर्थः।
तं ब्रह्म" इत्यादिनिगमः
प्य मनसा सह" इति श्रुतेः।
षात्वं तदनुवादिवेदस्य च
छष्टमनुपाधि तज्ज्ञानादजानाश

शतिधा तत्र च याः सर्वाध्यक्षा
त्र चरन्ति प्रथमं ता एव
मायाद्यनभिभूत ! जय जय
ः अस्या हनने ममैव हानिः
ग्रासपूर्वैश्वर्यादिरसि किं तुच्छया
यमस्तीति । भगवता देवर्षिणा
क्तिरस्तित्वे किं प्रमाणं तत्राहुः-
षां तेषां जीवानां या अखिला
डत्वात्तद्वृत्तीनां तत्तच्छक्तीनामपि
क्तिवृत्तीनामप्युद्बोधस्तस्या एव
न्ति किन्तु साक्षाद्द्रष्टार एव।

-मन्निकटस्था अपि मत्तत्त्वं न जानन्ति किन्तु मत्सेवका एवेति नैतावता युष्मद्वचसि प्रामाण्यं तत्राहुः-ते क्वचिदिति । लीलायां पूर्वक्तयाऽजया मायया पुरुषरूपेण चरन्तं क्वचिद्विशुद्धानन्दलीलायामात्मना पूर्वोक्तया स्वरूपानन्दशक्त्या स्वयं वादिरूपेण चरन्तं त्वां निगमाऽस्मल्लक्षणो वेदकदम्बः अनुचरेत्सेवेत इति तस्मादेनां जहि । तदेवं वस्तुतो श्रुतयो गुणवृत्तय भवन्ति किन्तु तन्निषेधार्थं तदनुवादिन्यः स्वरूपैश्वर्यादिमति भगवति तत्तदालम्बनेनैव साक्षाच्चरेयुः । तत्रापि अजितसम्बोधनेन त्येव वक्तव्यं यासां श्रुतीनामत्यन्तान्तरङ्गभूतेन तत्तन्नामरूपेण शब्दविशेषेण सोऽप्यभिमुखीक्रियत इति । अत्रानुचरेदिति । तत्र मूलं कारणं भक्तिरेवेति सिद्धान्तोपक्रमः । श्रुतयस्तु- "सत्यं ज्ञानमनन्तं ब्रह्म ।" "विज्ञानमानन्दं ब्रह्म ।" "न तस्य कार्यं करणं च विद्यते ।" इत्यादि । "तमेवभान्तमनुभाति सर्वम् ।" इत्यादिकाः । "सर्वे वेदा यत्पदमामनन्ति ।" "यस्य देवे परा भक्तिः ।" इत्यादिकाश्च ज्ञेयाः ॥१॥१४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

(★ यद्यपि सर्वासु करलिपिषु तथा मुद्रितग्रन्थेष्वपि श्रुतस्तवस्य साधारणव्याख्यानानन्तरमेव द्वादशश्लोकत एकचत्वारिंशश्लोकं यावत् व्रजलीलापरव्याख्यानमेकत्र ग्रथितं विद्यते, तथापि पाठकानां पाठ-सौकर्यार्थं प्रतिश्लोकव्याख्यानमध्येव तत्तद्व्याख्यानं विचितासन्निवेशितमिति ज्ञेयम् ।)

अजित ! हे मायानभिभूत ! अनुचरेदिति निगमस्य त्वत्सेवकत्वं सूचितमेव । वयमिति वक्तव्ये निगम इति स्वजातिकथनं स्वदैन्येनाति-नम्रताबोधनार्थम् । अन्यत्तैर्व्याख्यातम् । यद्वा, अजां मायां जहि, निःशेषतया अपसारया । ननु सत्त्वगुणेनोपकर्त्रीयं कथमित्यपसार्या ? तत्राह-दोषेति । दोषैरावरणविक्षेपस्वभावादिभिर्गृहीत आक्रान्तो गुणः सत्त्वलक्षणो यस्याः । ननु तथापि रासाख्यलीलानां हेतुरियं नापसारयितुं युक्ता, तत्राहुः-त्वमसीति । आत्मना स्वरूपभूतया चिच्छक्त्या त्वं रासकलमधुरलीलादिपरमैश्वर्योऽसि, किं ते माययेति । नन्वेवम्भूतसर्वाद्भुतचिच्छक्तिविलासं मामनुभवितुं जीवा मद्भक्तिं कुतो न कुर्युः ? तत्राहुः-अगेति । शक्तिप्रदानरूपं त्वदनुग्रहं विना जीवास्त्वद्भक्तकढतावशक्ता इत्यर्थः । ननु सर्वशक्तिभिरहं क्रीडामीति कुतो ज्ञातम् ? तत्राहुः-क्वचिदिति । सृष्टिलीलायां मायया पुरुषरूपेण चरन्तं क्वचिद्विशुद्धानन्दलीलया आत्मना चिच्छक्त्या नारायणादिरूपेण चरन्तं त्वां निगमः सेवतेति त्वत्सेवयैव ज्ञानमिति भावः ॥१४॥

[जय जयेति माङ्गृये । हे अजित ! अजां निद्रां जहि जहीहीत्यर्थः । ननु ममैकलीलेयं किमिति हेयाः ? तत्राहुः-दोषेति । दोषेण वचनामृतलीलावलोकाद्यनाविर्भावरूपेण । यद्वा, दोषेण] व्रजप्रामाणिकजनागमनाशङ्कालक्षणेन गृहीतो गुणो लीलास्वरूपो यस्यास्ताम्, गृहीतस्तिरस्कृतो गुणो लीलात्वलक्षणो यस्यास्ताम्, निद्रालीलातो जाग्रल्लीलायाः सर्वसुखकरत्वेन श्रेष्ठ्यादित्यर्थः । ननु भवतु लीलात्वे गौणतास्याः, किन्तु विश्रामसुखकरीयं हातुं न युज्यते अत्राहुः-त्वमसीति । स्वस्वरूपेणैव सर्वानन्दोऽसि । ननु यद्यहं स्वस्वरूपानन्देनैवानन्दीत्युच्यते, तर्हि वृन्दावनस्य द्रुमलतादयो भ्रमरमयूरमृगादयश्च ममानन्दोत्कर्षं कुर्वन्तीति युष्माकभिप्रेतमित्याशङ्क्याहुः-अगजगदोकसां द्रुमादिभ्रमरादीनामखिलशक्त्यवबोधक ! हे आनन्दहेतुतत्तत्सर्वसामर्थ्यप्रकाशक ! त्वत्कृपावलोकाद्यलाभात्तेऽपि परदुःखेन लीनशक्तयः स्युरिति भावः । अतोऽवबुध्य कृपावलोकेन तेषां शक्तिं बोधयित्वा तानानन्दयंस्तद्द्वारा आत्मानमप्यानन्दयेत्यर्थः । नन्वेकेन मया कथं वृन्दशो वृन्दावनस्था आनन्दनीया इत्याहुः-क्वचिदिति । वत्सवत्सपालहरणपद्मयोनिमोहनादौ सारक्रीडादौ च अजया बहुरूपतामिव तन्वत्या चिच्छक्त्या आवरन्तं सर्वपार्श्वे विचरन्तं त्वाम्, क्वचिच्च गोवर्धनोद्धरणादावात्मना एकेनैव स्वरूपेण चरन्तम्, निगमः श्रुतिः प्रतिपादयेत् । तथा च तापनीश्रुतिः (पू० २३)

"एको वशी सर्वगः कृष्ण ईड्य एकोऽपि सन् बहुधा योऽवभाति ।" इति ।

यद्वा, ननु मत्प्रेयस्यावपि किमिदानीं वृन्दावनजीववदलब्धानन्दे ? न हि न हीत्याहुः-ते इति । ते राधाचन्द्रावल्यौ राधा-चन्द्रावल्यौ वा, क्वचित् अन्तर्लीलायाम्, अजया निद्रया द्वारा क्वचिज्जागरलीलायाम् (जाग्रल्लीलायाम् [घ, ङ] ।) आत्मना तव स्वरूपभूतया चिच्छक्त्या । तथा च श्रुतिः (श्वे १/३)

"ते ध्यानयोगानुगता अपश्यन्, देवात्मशक्तिं [देवात्मभूतां (घ, ङ)] स्वगुणैर्निगूढाम्।" इति ॥

सर्वत्र चरतः समीपे चरन्त्या वानन्दयत इत्यर्थः। स्वप्ने जाग्रति च ताभ्यां सह सदा वृन्दावने विहारात्। ननु मम स्वाप्निकविहारः कथमन्यवेद्यः स्यात्? तत्राहुः निगमो विद्विधः, अनुचरेत् सेवेत, स्वप्ने विश्रामसहचरत्वान्मादृशाम्। यद्वा निगमो गोपीरूपो मद्विधः परिचरेत्, निद्रावसरे त्वदङ्गे पुलकादिसौष्ठवेन विहारं जानीयादित्यर्थः। अत्र बहूनां वक्तृत्वात् काश्चिदाहुरिति सर्वपद्येषु ज्ञेयम्, तथापि क्वचित् सङ्गतिः कार्य्या ॥१४॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

श्रुतयः ऊचुः ॥ जय जयेति। अजां प्रकृतिम्। जहि विध्वंसय। संसरतां चेतनानां प्रकृतिसम्बन्धं निराकुर्या इत्यर्थः। दोषगृभीतगुणः दोषेभ्यः गृहीतगुणः सत्स्वपि दोषगुणानां ग्रहीतेत्यर्थः। यद्वा, अजितदोषेषु सापराधेष्वपि जनेषु गुणलवोऽस्ति चेत् तद्ग्राहीत्यर्थः। आत्मना समवरुद्धसमस्तभगः। स्वत एव स्वीकृताऽसङ्कुचितज्ञानैश्वर्यादिगुणकस्त्वमसि। यत् यस्मादजां जहि आश्रितवत्सलत्वात् निरङ्कुशैश्वर्यत्वाच्च त्वमेव मोक्षं दातुं क्षमः। तस्मात् अजां विध्वंसयेत्यर्थः। अगजगदोकसां स्थावरजङ्गमशरीराश्रयाणां जीवात्मनामखिलचिच्छक्तिशक्त्यवबन्धकशक्त्यावबोधक ! अजया आत्मना च प्रकृतिपुरुषाभ्यां विशिष्टस्य चरतः जगत्सर्गादिलीलां कुर्वतः ते ते इति सम्बन्धसामान्ये कर्मणि षष्ठी। निगमोऽनुचरेत् चिदचिच्छरीरकस्य जगत्कारणत्वं वेदः प्रतिपादयेदित्यर्थः। एवं जगत्कारणत्वं मोक्षप्रदत्वं तदौपयिकगुणपूर्णत्वं शास्त्रप्रमाणकत्वं चोक्तम् ॥१४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

वेदपुरुषमुखनिर्गलितानष्टाविंशतिसङ्ख्याकान् श्लोकानाह ॥ जय जयेत्यादि ॥ जय जयेत्यादरे द्विर्भावः। जयोत्कर्षं प्राप्नुहीत्यर्थः। ननु स्वभावत एव निःसमाभ्यधिकस्यानवाप्तः को वा प्राप्य उत्कर्ष इत्यत आहुः। अजामिति। अजां प्रकृतिं जहि नाशय त्याजयेत्यर्थः। त्वयि प्रलीनानां सर्वेषां जीवानां संसृतिनिदानभूतप्रकृतिसम्बन्धं त्याजयता त्वया कारण्यातिशयावह कश्चिदुत्कर्षोऽभूतपूर्व एव प्राप्यत इति भावः। नन्वहमपि प्रकृतिवश्यस्तत्कथमजां त्याजयामीत्यतः सम्बोधयन्ति-अजितेति। सर्वान् जितवत्या प्रकृत्याप्यजित ! वशीकृतप्रकृते इति भावः। नन्वदादितयाऽनादितया सा अपराधिनां जीवानां सा कथं त्याजयितव्येत्यतः सम्बोधयन्ति-दोषगृभीतगुणेति। सत्स्वपि दोषेषु गृभीतो गृहीतः गुणो यादृच्छिकप्रासङ्गिकाद्यन्यतमो येन तथाभूत सापराधजनेष्वपि कश्चिद्गुणलेशोऽस्ति चेत्तमपेक्ष्यानुग्रहशीलः त्वमित्यर्थः। गृभीतेत्यत्र "ग्रहेर्भश्छन्दसि" इति भकारादेशः। दोषगृहीतगुणाम् इति पाठान्तरम्। तदा ननु कुतः प्रकृतेर्भोग्यभोगोपकरणादिरूपायाः महागुणवत्यास्त्याजनं प्रार्थ्यते इत्यतस्तां विंशिषन्ति-दोषाः जीवानां दोषावहाः गृभीता गृहीताः गुणाः सत्त्वरजस्तमोरूपाः यया ताम्। निष्ठान्तस्य पूर्वनिपाताभाव आर्षः। जीवानां संसृतिनिदानभूतगुणाश्रयत्वात्तां जहीत्यर्थः। ननु तत्त्याजनोपयुक्तज्ञानशक्त्यादिरहितोऽहं कथं हापयेयं (त्याजयेयम्) इत्यत आहुः-यद्यस्मात् त्वम् आत्मना स्वत एव समवरुद्धः स्वीकृतः समस्तो भगो येन सः असि। तस्माज्जहीत्यर्थः।

"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणा" ॥

इति श्रीविष्णुपुराणवचनाद्भगशब्दार्थोऽवगन्तव्यः। असङ्कुचितज्ञानैश्वर्यशक्तिमत्त्वाद्वात्सल्यसागरत्वाच्च प्रकृतेर्मोचने क्षममः अतः जहीति भावः। ननु य एव प्रकृतिसम्बन्धापादकः स एव त्याजयितुं प्रभुर्न त्वहमित्याशङ्क्यां त्वं प्रकृतिपुरुषकालशरीरकत्ववेषेण सर्वकारणतया तत्सम्बन्धापादक इति द्योतयितुमनुद्बुद्धसामर्थ्यानां प्रकृत्यादीनां परमात्मविशेषणतावेषेणाऽपि कार्याक्षमत्वादन्यथा प्रलयानापत्तेश्च तेषां स्वस्वकार्यौन्मुख्य- (रूप)सामर्थ्योद्बोधकस्त्वमेवेत्यभि सम्बोधयन्ति-अगजगदोकसामखिलशक्त्यवबोधकेति। अगानां स्थावराणां जगतां जङ्गमानां शरीराणां चराचरात्मकशरीराणां (वि)करिष्यमाणानां प्रकृतिगुणानामित्यर्थः। ओकसां तादृशशरीराश्रयीभविष्णूनां जीवानां चाखिलाः शक्तयः स्वस्वकार्यौन्मुख्यरूपास्तासामवबोधक उद्बोधक तत्र जीवशक्त्युद्बोधकत्वं नाम चिच्छक्त्युद्बोधकत्वं प्रलयदशायामनुद्बुद्धचिच्छक्तिकत्वात्। अत एव सर्वकारणतया सर्वकार्यानन्यं त्वामेव वेदोऽभिदधातीत्याहुः-क्वचिदिति।

स्कं. १० उ. अ.

आत्मना चेति स
इति कर्मणः श
चिदचिद्वाचिशब्द
प्रश्नस्योत्तरमुक्तं
अगजगदोकसां
अगजगदोकसामि
पारोक्ष्यनिर्देशः
प्रकृतिसम्बन्धमोच
विशिष्टकारणत्वादे
विशेष्यात्मपर्यन्ताभि

श्रुतयोऽपि त
ऊचुरिति। जय जयेति
प्रकाशयेत्यर्थः। सर्वदा
जहीति। हे अजित !
गतिक्षेपणयो"रिति धाते
"प्राधान्ये प्रकृती दुष्टे नृ
प्रकृत्याच्छन्नत्वाविशेषाज
अनपगतः समस्तः पूर्णो

"भगो योऽन्यां

अतस्त्वत्प्रतिबि
इत्यारभ्य स्वतोऽसि त्वमि
श्रीब्रह्मादीनां सृष्ट्याद्यखि
ब्रह्मणि कथं चरन्तीत्यस्य
प्रकृत्या च अनुचरतः प्रवर्त
जीवानां निर्देहकत्वेन तत्प्र

"लयस्य त्वष्टमो

इति स्मृतिः। यस्म
प्रसन्नः तत्स्थां पिशाचवद्वर्तम
वर्तन्त इति प्रश्नपरिहारो दर्शित
वर्तन्ते स त्वमजां जहीति योज

"विध्यादीनां नियन्त
हरिं वदन्ति सर्वेषां त
'अस्य सृजतो हित'

॥

वने विहारात्। ननु मम

ञ्चरत्वान्मादृशाम्। यद्वा,

ां वक्तृत्वात् काश्चिदाहुरिति

म्बन्धं निराकुर्या इत्यर्थः।

पि जनेषु गुणलवोस्ति चेत

मसि। यत् यस्मादजां जहि

त्यर्थः। अगजगदोकसां

त्मना च प्रकृतिपुरुषाभ्यां

चिदचिच्छरीरकस्य जगतः

कत्वं चोक्तम्॥१४॥

त्यादरे द्विर्भावः। जयोत्कर्ष

जामिति। अजां प्रकृतिं जहि

ा त्वया कारण्यातिशयावहः

तः सम्बोधयन्ति-अजितेति।

अपराधिनां जीवानां सा कथं

च्छकप्रासङ्गिकाद्यन्यतमो येन

तेत्यत्र "ग्रहेर्भश्छन्दसी"ति

महागुणवत्यास्त्याजनं प्रार्थ्यते

म्। निष्ठान्तस्य पूर्वनिपाताभाव

ऽहं कथं हापयेयं (त्याजयेयम्)

से। तस्माज्जहीत्यर्थः।

॥

ल्यसागरत्वाच्च प्रकृतेर्मोचयितुं

भुर्न त्वहमित्याशङ्कायां त्वमेव

द्वुद्धसामर्थ्यानां प्रकृत्यादीनां

सामर्थ्योद्बोधकस्त्वमेवेत्यभिप्रेत्य

शरीराणां चराचरात्मकशरीररूपेण

जीवानां चाखिलाः शक्तयः

न चिच्छक्त्युद्बोधकत्वं तेषां

धातीत्याहुः-क्वचिदिति। अजया

आत्मना चेति सहार्थे तृतीया। साहित्यं च विशेषणविशेष्यभावेन तदयमर्थः। अजयाऽऽत्मना च प्रकृतिपुरुषाभ्यां विशिष्टस्य ते कर्मणः शेषत्वविवक्षया षष्ठी। चरतः जगदाकारेण परिणममानस्य तावधितिष्ठतश्चेत्यपि विवक्षितं निगमः चिदचिद्वाचिशब्दसमुदायात्मकोऽपि वेदभागः अनुचरेत् अनुवर्तेत। त्वामेवाभिदध्यादित्यर्थः। अनेन "कथं चरन्ति श्रुतयः" इति प्रश्नस्योत्तरमुक्तं भवति। कारणत्वं चिदचिद्विशिष्टताकारेण च तथा मोक्षप्रदत्वं तदौपयिकगुणपूर्णत्वं शास्त्रप्रमाणकत्वं च अगजगदोकसां स्थावरजङ्गमात्मकशरीराश्रयजीवानामजां जहीति वा सम्बन्धः। जीवानामित्यनुक्त्वा अगजगदोकसामित्युक्तिरासन्नसृष्ट्यभिप्रायिका प्रवृत्तिस्तत्स्तुतिकाले स्थावरजङ्गमात्मकशरीराणामभावान्निगमोऽनुचरेदिति पारोक्ष्यनिर्देशः। स्तुतेस्संसारिजीवगतत्वाभिप्रायकः क्वचिदजयात्मना च चरतोऽनुचरेन्निगम इत्यनेन प्रकृतिसम्बन्धमोचकत्वनियततत्सम्बन्धापादकत्वज्ञापनाय सर्वकारणत्वं तस्य निर्विकारेऽनुपपन्नत्वात्तस्मिन् चिदचिद्वैशिष्ट्यं विशिष्टकारणत्वादेव विशिष्टकार्याणां विशिष्टकारणानन्यत्वाच्छरीरात्मभावाच्च कार्यशरीरभूत चिदचिद्वाचिशब्दानां शेष्यात्मपर्यन्ताभिधायकत्वं चोक्तम्॥१४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

श्रुतयोऽपि लक्ष्मीविभूतयः पुराणस्य स्त्रीशूद्रादिश्रुतिगोचरत्वेन श्रुत्यर्थ एव गृह्यते न तु शब्द इत्यभिप्रेत्य कथितं श्रुतय ऊचुरिति। जय जयेति नित्यजयाधिकरणस्सस्स्य हरेर्लोटैष्यत्कालविजयो नाशास्यते किन्तु विजयप्रकाशनं भक्तानुकम्पित्वेन जयं प्रकाशयेत्यर्थः। सर्वदा जयतो विष्णोर्जयस्तस्य प्रकाशनमित्यादि। अत्र राजवद्दिशां जयो न प्रार्थ्यते किन्तु दुस्तरं प्रकृत्यादेरित्याशयेनाह-जहीति। हे अजित! दोषैर्जन्मदुःखाज्ञानादिभिरानन्दज्ञानादयो जीवगुणा गृहीताः संवृता यथा सा दोषगृहीतगुणा तामजां "अज गतिक्षेपणयो"रिति धातोः जीवगुणक्षेपिकां जहि हन तथा परमाच्छादिकां जहि गमय अपसारयेति यावत्। एते अपि प्रकृतिशब्दवाच्ये "प्राधान्ये प्रकृती दुष्टे नृषु प्रातिस्विकं स्थितम्।" इत्यादिः। एतेन जय जयेत्यारभ्य संवृताधिसंवृतेत्यन्ता श्रुतिर्गृहीता। अरतिं तन्द्रीं प्रकृत्याच्छन्नत्वाविशेषाज्जीवात्मनोः को विशेष इति तत्राह-त्वमसीति। त्वं यद्यस्मादात्मना स्वत एव स अभिन्नोऽत एवावरुद्धः अनपगतः समस्तः पूर्णो भग ऐश्वर्यादिगुणो यस्य स तथा। अनपगतपूर्णैश्वर्यादिगुणोऽसीत्यर्थः —

"भगो योऽन्यां भगोपस्थे यशो वीर्यार्कभूतिषु। कान्तीच्छाज्ञानवैराग्यधनैश्वर्यतपस्सु च॥" इति यादवः॥

अतस्त्वत्प्रतिबिम्बभूतस्य जीवस्य प्रकृत्याच्छादितत्वात् त्वत्प्रसादमन्तरेणैश्वर्याद्या गुणाः न प्रकाशन्ते। अनेन ह्येष ह्यानन्द [illegible] स्वतोऽसि त्वमित्यन्ता गृहीता। इतोऽपि विशेषोऽस्तीत्याह-अजेति। अज! हे विष्णो! जगदौकसां जगदाश्रयभूतानां [illegible]दीनां सृष्ट्याद्यखिलशक्त्यवबोधक रमाया इत्यारभ्य अनन्तोऽसीत्यन्ताऽनेन सूचिता। इदानीं गुणवृत्तयः श्रुतयः निर्गुणे [illegible] कथं चरन्तीत्यस्य परिहारमाह-क्वचिदजयेति। निगमस्तत्त्वनिश्चायको वेदः। क्वचित्सृष्टिकाले आत्मना जीवेन अजया [illegible] च अनुचरतः प्रवर्तमानस्य ते तवानुचरेत् चित्तानुवर्तित्वेन विधिनिषेधरूपेण वर्तते। हरेस्तदगोचरत्वाल्लये केवलं स्तुतिरूपेण [illegible] निर्देहकत्वेन तत्प्रयोजनको नेति शेषः —

"लयस्य त्वष्टमो भागः सृष्टिकाल उदाहृतः। तत्रैव वेदसञ्चारो ह्यन्यदा स्तुतिमात्रकः॥"

इति स्मृतिः। यस्माद्विधिनिषेधविषयो जीवस्तस्मात्सृष्टिं कृत्वा वेदैर्जीवान्बोधयित्वा तदुक्तमनुष्ठाय स्वज्ञानमुत्पाद्य त्वं [illegible] तस्यां पिशाचवद्वर्तमानाम् अजां प्रकृतिं जहीति अनेन सृष्टिकाल एव गुणमये जगति वर्तमानाः सदा निर्गुणे परमेश्वर एव [illegible] इति प्रश्नपरिहारो दर्शितः। यजेत न हन्तव्य इत्यादिविधिनिषेधानां स्तुतितरत्वं युक्तम्। कथं यत्प्राप्त्यर्थं यन्नियमाद्विधिनिषेधा [illegible] स त्वमजां जहीति योजनोपपत्तेः —

"विध्यादीनां नियन्ता यः पूज्यः प्राप्यश्च तद्वताम्। इत्यादिस्तुतिरूपेण विध्यादिश्रुतयोऽपि तु॥

हरिं वदन्ति सर्वेषां तन्नामत्वादथापि च॥" इति स्मृतेः।

'अस्य सृजतो हित' इति प्रभृति 'मा ते क्षणोऽत्यगादि'ति पर्यन्तं मूलश्रुतिरियं "हन हिंसाया"मिति धातुः पृथक्

श्रुतित्वात्र पूर्वापरसम्बन्धः उपलक्षणत्वादनन्तत्वाच्छ्रुतीनां सर्वश्रुत्यर्थोपबृंहितत्वाच्च तेषां श्लोकानां न सर्वश्रुतीनां पृथगुक्तिः-

''सर्वश्रुत्यर्थसम्पन्नान् श्लोकान् सत्यवतीसुतः। एकैकशाखाश्रुत्यर्थान् जगौ सर्वोपलक्षणान्॥

बबन्ध तान् भागवते प्रतिश्लोकं पृथक्श्रुतीः॥''

इत्याचार्यैरेवोक्तत्वान्नास्माभिर्मिथः सम्बन्धार्थं प्रपञ्च्यते ॥१४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्राष्टाविंशतिधा श्रुतयस्तत्र चरन्तीति वक्तुं तत्तद्वर्गभेदेनैकैकं पद्यं दर्शयितुं तत्राप्येकैकप्रकरणान शुद्धतद्भक्तिप्रतिपादकश्रुतीनामुत्कर्षं दर्शयितुमाह- श्रुतय ऊचुरिति। तत्र च याः सर्व्वाध्यक्षा महोपनिषदः सर्व्वश्रुतिसमन्वया श्रुत्यन्तरानुदिता तन्निरसनपूर्व्वकस्वरूपनिर्देशेन श्रीभगवति चरन्ति। प्रथमां ता एवं वन्दिजनोचितपरिहासपूर्व्वकं प्रथमं स्वमनो निवेदयति जय जय ॥१४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

प्रकृतं तत्स्तवमाह- जय जयेत्यादि। हे अजित श्रीकृष्ण! जय जय अजितस्य सर्वदा जय एव। ननु किमर्थोऽयं जयध्वनिः अपि किञ्चितभिलषितमस्ति बाढमित्याह- अजां जहि जहिहीत्यर्थः। निद्रां त्यज। निद्रा तु योगनिद्रा। सा तु अजा अतः त्वयैव सा स्वीकर्तुं त्यक्तुं च शक्यते तेन नान्यैस्त्वन्निद्रा दूरयितुमर्हा कीदृशी दोषगृहीतगृणां दोषाय परिचारकाणां सेवाफलापहनाय गृहीतो गुणः स्वगुणो यया अथवा अजिता दोषा यैर्निद्रालुभिस्तैर्गृहीता गुणा यस्याः निद्रालुभिरेव निद्रागुणो गृह्यते अस्मिन् हे जय श्रीकृष्ण! जयेति व्याख्येयम्। त्वं तु न निद्रालुर्लीलागृहीतनिद्रात्वात् इच्छाधीनामेनां जहीति भावः। नन्वियं मद्वशा न भवति कथं मया हातव्येत्याशङ्क्याह- त्वमसीत्यादि। यत् यस्मात् त्वम् आत्मना स्वयमेव समवरुद्धं वशीकृतं समस्तभगं समस्तैश्वर्यं ये सर्वेश्वरत्वात् सर्वनियामकः तत्र केयं निद्रा वराकी समवरुद्धभगत्वं स्पष्टयति अगजगदित्यादि। अगजगदोकसाम् अगाः स्थावराः जगन्तः जङ्गमाः ओकांसि चतुर्दशलोकाः तेषाम् अथवा हे अग अगम्य जगदोकसां स्थावरजङ्गमानाम् अखिला याः शक्त तासाम् अवबोधक प्रकाशक त्वच्छक्त्यैव सर्वे शक्तिमन्त इत्यर्थः। अतो नेयं स्वतन्त्रा। नन्वियं योगमायैव तावन्न तु सामान्य निद्रैव कथं युष्माकं वाङ्मात्रेणैव त्यक्तुं शक्यते तत्राह- ते क्वचिदित्यादि। क्वचित् कुत्राप्यवतारे जगत्सृष्ट्यादिलीलायां वा अजय मायया आत्मना च स्वातन्त्र्येण च चरतस्ते चरन्तं त्वां निगमो वेदः अनुचरेत् अनुचरति निरूपयति न त्वहं सर्वेश्वरे सर्वकारणे व अजासम्बन्धः त्वं स्वयं भगवत्त्वात् स्वतन्त्र एव आत्मनैव स्वातन्त्र्येणैव चरसीति भावः। तदिदं तवेषत्करं निद्रारूपाजाहानमि अथवा हे अजय दुर्जय! आत्मना स्वातन्त्र्येण चरतस्तव स्वैश्वर्य्येण विलसन्तं त्वां निगमोऽस्मद्विधः क्वचित् कुत्रचिदेव अनुचरे न सर्वदा तेनायमेवास्माकं सेवासमयस्तदवश्यं प्रबोधयितव्य एव भवान् अव मा कोऽपं कार्षीरिति भावः ॥१४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

जय जयेत्यादि। हे अजित! श्रीकृष्ण! जय जय, अजां निद्रां जहि। निद्रैव ते माया, अतो मायां च जहि। नि कीदृशीम्? अजितदोषगृभीतगुणाम्- अजिता दोषा रात्रियैस्तैर्गृभीता गुणा यस्या इति वा। निद्रेयं मामपि परिभवति कथं मया हन्तव्या? तत्राह- त्वमसीत्यादि। यद् यस्मात् समवरुद्धं वशीकृतं समस्तभगं सर्वैश्वर्यं येन, सर्वेश्वरत्वात् सर्वनियामकः निद्रानाम वराकी? आत्मना समवरुद्धसमस्तभगत्वं स्पष्टयति- अगजगदोकसां स्थावरजङ्गमशरीराणामस्मिन् शक्त्यवबोध त्वच्छक्त्यैव सर्वे शक्तिमन्त इति निद्रायाः शक्तिरपि तवैव शक्तिः, अतो नेयं स्वतन्त्रा, इयं तावन्न निद्रा मायैवेयम् तत् तद्वचसैव झटिति हन्तुं शक्यते? तत्राह- ते क्वचिदित्यादि। क्वचित् कुत्राप्यवतारे आत्मना स्वयं स्वातन्त्र्येणैव अजय चरतस्ते चरन्तं त्वां निगमोऽस्मद्विधो वेदश्च अनुचरेत् अनुचरति निरूपयति। न त्विह सर्वेश्वरेश्वरे सर्वकारण सर्वशक्तिकदम्बसंवलिते सच्चिदानन्दविग्रहे भवति भवत्यजासम्बन्धः, अत्र वयमेव प्रमाणमित्यर्थः ॥१४॥

जय ज
केन प्रकारेणोत्क
जगन्ति जङ्गमानि
मत्प्राप्तिप्रतिकूलेत
यद्वा। दोषैस्त्वद
एवानर्थकारिणस्त्व
एवेति भावः।
समवरुद्धसमस्तभ
प्रातिर्भवेत्। भक्त
शक्तीः कर्मकरण
ज्ञानयोगभक्तिकारण
प्रमाणमिति चेद्वयमे
स्वरूपशक्त्या च
तत्तत्प्रतिपादकरूपप्र
वयमेव प्रतिपादय
विज्ञानमानन्दब्रह्मेति

एको देवः

कर्माध्यक्षः

इति यः सव
सोऽकामयत। बहु
सर्वविदित्यखिलशक्त
प्रतापात्मकमैश्वर्यम्
सर्वव्यापकत्वम्। अन
प्राकृतत्वात् कल्याणगु
तथैव तत्तेज एव व्या
ब्रह्मेत्यष्टमोक्तेः।
ब्रह्मत्वपरमात्मत्वभगव
चातुर्मास्ययाजिनः। सुकृ
''शतं चैका च
नयति। सच्चिदानन्दैक

अथ वेदस्तुतिः

तदेवं सर्वश्रुतीनां

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

जय जयेति। भो अजित ! जय जय सर्वोत्कर्षेण वर्तस्व। स्वीयसर्वोत्कर्षमाविष्कुर्वित्यर्थः। द्विरुक्तिरादरेण हर्षेण वा। न प्रकारेणोत्कर्षमाविष्कुर्यामिति चेज्जीवेषु करुणया स्वचरणमाधुर्यप्रापणेनैवेत्याहुः-अगजगदोकसाम्। अगानि स्थावराणि गन्ति जङ्गमानि ओकांसि शरीराणि येषां तेषां जीवानामजामविद्यां त्वत्प्राप्तिप्रतिकूलां जहि नाशय। ननु गुणवती सा कथं त्प्राप्तिप्रतिकूलेत्यत आहुः-दोषगृभीतगुणाम्। दोषाय ज्ञानाद्यावरणाय देहादिषु दुरभिमानप्रापणाय च गृभीता गुणा यया ताम्। द्वा। दोषैस्त्वदस्फूर्तिरूपैर्गृभीता ग्रस्ता गुणा सत्त्वरजस्तमांसि यस्यास्ताम्। हृग्रहोर्भश्छन्दसीति भकारः। तस्या गुणा त्वनर्थकारिणस्त्वत्प्राप्तिप्रतिकूला इति भावः। अजितेति। त्वमेवैकस्तया जेतुमशक्यः। अन्ये तु ब्रह्माद्या अपि तया स्वगुणैर्जिता वेति भावः। ननु तया अहमजित इत्यत्र किञ्चिह्नमित्यत आहुः-त्वमिति। यत् यस्मात् त्वम् आत्मना स्वरूपेणैव मवरुद्धसमस्तभगः सम्प्राप्तसमस्तैश्वर्योऽसि। वशीकृतमायात्वादिति भावः। न त्वविद्योपरामे सत्यपि भक्त्या विना न मे तिर्भवेत्। भक्त्याहमेकया ग्राह्य इति मदुक्तेस्तत्राहुः-हे अखिलशक्त्यवबोधक ! बुद्धीन्द्रियादीन् सृष्ट्वा जीवानाम् अखिलाः क्तीः कर्मकरणशक्तीः कर्मफलभोगशक्तीश्च यथोद्बोधयसि तथैव ब्रह्मपरमात्मात्मभगवत्स्वरूपिणं स्वं प्रापयितुं ज्ञानयोगभक्तिकारणशक्तीः कृपया त्वमेव उद्बोधयसि तत्तत्परिपाके सति ब्रह्मपरमात्मभगवदनुभवश्चोद्बोधयसीत्यर्थः। अत्र किं प्रमाणमिति चेद्वयमेवेति सविनयमाहुः-क्वचिदजया कदाचित्सृष्ट्यादिसमये मायया बहिरङ्गशक्त्या सह आत्मना च सर्वकालमेव स्वरूपशक्त्या च सह चरत इति कर्मणि षष्ठ्यार्षी। चरन्तं क्रीडन्तं त्वां निगमोऽस्मल्लक्षणः श्रुतिकदम्बः अनुचरेत् परिचरेत् तत्प्रतिपादकरूपप्रमाणीभवनमेवास्माकं त्वत्परिचरणमित्यर्थः। तेन सृष्ट्यादिसमयभवं कर्मादिकं सार्वकालिकं त्वदनुभवं च त्वमेव प्रतिपादयाम इत्यतः साधूक्तम्, बुद्धीन्द्रियमनःप्राणानिति। ब्रह्मोपनिषद्वाक्यम्। अत्र प्रमाणानि, नित्यं विज्ञानमानन्दब्रह्मेति।

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च॥

इति यः सर्वज्ञः सर्ववित्। यस्य ज्ञानमयं तपः। सर्वस्य वशी। सर्वस्येशानः। यः पृथिव्यां तिष्ठन् पृथिव्यामन्तरः। सोऽकामयत। बहुस्याम्। स ईक्षत। तत्तेजोऽसृजत। सत्यं विज्ञानमानन्दं ब्रह्म। इति सर्वज्ञ इति सम्पूर्णज्ञानं सर्वविदित्यखिलशक्त्युद्बोधकत्वलक्षणस्वचिच्छक्तिः स्वतः एव लाभः। ज्ञानमयं तप इति ज्ञानं परामर्शस्तन्मयं तपः। ज्ञानात्मकमैश्वर्यम्। वशीति सर्वनियन्तृत्वम्। ईशान इति सर्वकर्मफलदातृत्वम्। सर्वोपास्यत्वे पृथिव्यां तिष्ठन्निति सर्वव्यापकत्वम्। अन्तरः अन्तर्भूतः। तेन पृथिवी तन्न जानातीति सर्वदुर्ज्ञेयत्वम्। सोऽकामयतेति प्रकृतिक्षोभात्पूर्वस्य कामस्य कृतत्वात् कल्याणगुणमयत्वम्। ईक्षतेत्यडागमाभावश्छान्दसः। तत्तेज इति तदंशरूपस्य तेजसः पुरुषस्यैव जगत्स्रष्टृत्वम्। व तत्तेज एव व्यापकं सत्येत्यादिलक्षणम्। ब्रह्म यस्य प्रभा प्रभवत इति ब्रह्मसंहितोक्तेः। मदीयं महिमानं च परं ब्रह्मेत्यष्टमोक्तेः। ब्रह्मज्योतिः सनातनमिति दशमोक्तेः। ब्रह्मणो हि प्रतिष्ठाहमिति गीतोक्तेश्चेत्येवमेता ब्रह्मपरमात्मत्वभगवत्त्वप्रतिपादिकाः। यतो वा इमानि भूतानि जायन्त इत्याद्याः सृष्ट्यादिप्रतिपादिकाः। अक्षय्यं ह वै र्मास्ययाजिनः। सुकृतं भवतीति कर्मप्रतिपादिकाः। ब्रह्मविदाप्नोतिपरमिति। तमेवविदित्वातिमृत्युमेतीत्याद्याः ज्ञानप्रतिपादिकाः।

"शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिसृतैका। तयोर्ध्वमायन्नमृतत्वमेती"त्याद्याः योगप्रतिपादिकाः। "भक्तिरेवैनं वै। सच्चिदानन्दैकरसे भक्तियोगे तिष्ठती"त्याद्या भक्तिप्रतिपादिकाः श्रुतयः॥१४॥

गूढार्थदीपिनी

अथ वेदस्तुतिः

तदेवं सर्वश्रुतीनां परब्रह्मस्वरूपश्रीकृष्णप्रतिपादने तात्पर्यं तत्र तत्र च सर्वा अपि श्रुतयः अष्टाविंशतितत्त्वजालाज्जीवराशीनुद्धर्तुं

स्वस्ववर्गभेदेनाष्टाविंशतिधा भूत्वा अष्टाविंशत्या पद्यैः स्तुतिव्याजेन नानाकुमतानि खण्डयन्त्यः प्रधानमुखेन सर्वोपनिषदादिसारभूतां भक्तिमेव दर्शयन्त्यश्च आदौ श्रीकृष्णस्वरूपलक्षणमभिधाय वन्दिन इव जयोद्घोषपूर्वकमविद्यानिवृत्तिं नर्कुटकच्छन्दसा प्रार्थयन्ते- जय जयेत्यादिना ।

पद्यानुवादः

समुपलब्धभगोऽसि यदात्मना जहि जयाऽजित दोषगुणामजाम् ।
स्वयमिमे न हि तद्धनने (तद्धनने मायानिवारणे) क्षमा वदति ते क्षमतां श्रुतिरादितः ॥१॥

सङ्क्षिप्तसार्थान्वयः —

हे अजित ! अगजगदोकसां स्थावरजङ्गमजीवानाम् अखिलशक्त्यवबोधक ! त्वं जय । अथ च दोषगृभीतगुणाम् अजाम् अविद्यां जहि त्वं जय । यत् यस्मात् त्वम् आत्मना स्वरूपेणैव समवरुद्धसमस्तभगोऽसि; अतः निगमो वेदः ते त्वाम् अनुचरेत् प्रतिपादयेत् । कथम्भूतस्य ते ? क्वचित् सर्गादौ अजया मायया सर्वदा च आत्मना स्वरूपशक्त्या च सह चरतः विहरतः ते । चरतस्ते इति शेषे कर्मणि षष्ठ्यौ । चरन्तं त्वामित्यर्थः । हे अजित श्रीकृष्ण ! त्वं जय निजोत्कर्षं प्रकटीकुरु । कथम् ? जीवानामजामविद्यां जहि नाशय इत्यतो जय । किञ्च हे शक्त्यवबोधक ! तेषां शक्त्युद्बोधं च कुरु इत्यतोऽपि जयेति द्विरुक्तिः साभिप्राया । यत् यस्मात् त्वं तु आत्मना स्वरूपेणैव समवरुद्धसमस्तभगः आत्मनीति शेषः । समवरुद्धः समस्तो भगो येन स तथाभूतः सम्प्राप्तसमस्तैश्वर्योऽसि । कुतः ? हे अखिल ! पूर्णस्वरूप ! अतः निगमः श्रुतिसमूहः एवंविधं ते त्वामेव अनुचरेत् अनुचरति सदा सेवते प्रतिपादयतीत्यर्थः । लडर्थे लिङ् । कथम्भूतस्य ते । क्वचित् सृष्ट्यादिसमये अजया मायया बहिरङ्गशक्त्या सह चरतः चरन्तं विहरन्तम् । सर्वदा च आत्मना स्वरूपशक्त्या श्रीराधया वा सह विहरन्तं त्वाम् । चरतः ते इति कर्मणि षष्ठ्यौ सम्बन्धद्योतनार्थे । कीदृशीमजाम् ? दोषाय ज्ञानाद्यावरणाय अभिमानप्रापणाय वा गृभीताः गृहीताः प्रकटिताः गुणा सत्त्वादयो यया ताम् । यद्वा । न जिताः दोषाः कामादयो यैस्तैरजितदोषैरज्ञानिभिः गृहीता भोग्यत्वेन स्वीकृता गुणाः शब्दादयो यस्य इत्येकं पदम् । अजितेत्यस्योभयथा सम्बन्धः । कथम्भूतानां जीवानाम् ? अगजगदोकसाम् । अगानि स्थावराणि जगन्ति जङ्गमानि च ओकांसि शरीराणि येषां तेषां स्थावरजङ्गमदेहवतामित्यर्थः । अखिलेत्येकं पदं वा । एतेन निर्गुणे श्रुतयः कथं चरन्तीति प्रश्नस्योत्तरमप्युक्तं भवति । तथा च निर्गुणशब्दस्य प्राकृतगुणराहित्यपरत्वाद् ब्रह्मणो जगज्जन्मादिकारणत्वोपयुक्तानन्तकल्याणगुणगणविशिष्टत्वात् सत्यज्ञानानन्दादिगुणनिधित्वाच्च सगुणश्रुतीनां निर्गुणब्रह्मप्रतिपादने न कोऽपि विरोध इति सर्वमनवद्यम् । केचितु जय जयेति आदरे हर्षे वा वीप्सेत्याहुः । परे तु जयति सर्वमिति व्युत्पत्त्या जयेति सम्बोधनमाहुः । गृभीतेत्यत्र हृग्रहोर्भश्छन्दसीति भकारः । इतः परं भवन्निधना इत्यन्तं सप्तभिर्दशभिश्च यतिसत्त्वान्नर्कुटकं नाम छन्दः । 'हयदशभिर्नजौ भजजला गुरु नर्कुटकम्' इति वृत्तरत्नाकरलक्षणात् ॥१॥ ॥१५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे अजित ! त्वं जय । स्वोत्कर्षमाविष्कुरु । आदरे द्विरुक्तिः । नन्वसिद्धे पदार्थे विधिर्विशतेन स्वाभाविकोत्कर्षे अन्यथा नित्यत्वहानिरिति चेन्न । स्वाभाविकस्यापि वस्तुनः आविष्कारमात्रेणाग्नेरौष्ण्यादिवन्न जन्यत्वादिदोषभाक्त्वम् । न सद्रूपस्यापि स्वाभाविकस्योत्कर्षादेर्जीवानां तद्विषयिकाज्ञानं वारयित्वा तज्ज्ञापनमात्रेण न क्षतिरित्यर्थः । उत्कर्षाधायि क्रियाकारणमित्यपेक्षायामाह–अजां जहि त्याजयेति फलितार्थः । कथम्भूताम् । दोषगृभीतगुणाम् । जीवानां तव भजनवैमुख्य गृहीता गुणा यया ताम् । हृग्रहोर्भश्छन्दसि इति भगवान्पाणिनिः । यथा गृभ्णामि ते दक्षिणामित्यादि वैदिकप्रयोगः । उत्कर्षं द्योतयन्नाह–यद्यत आत्मना समवरुद्धसमस्तभग इति । स्वत एवावरुद्धमनपगतं स्वाभाविकं समस्तैश्वर्यं यस्येति तथाभूतस्त्वं स्वतःसिद्धैकरसैश्वर्य्योऽसीत्यर्थः ।

'स्वाभाविकी

तत्र हेतुः–हे अ
कारणावस्थं ब्रह्मस्वरूपं

'भोक्ता भोग्यं प्रेरि
प्रकृतिशब्दवाच्यया आत्म
त्वां भिन्नाभिन्नत्वेन प्रतिपा

एवं प्रसङ्गमुक्त्वा
शक्तेर्देवताया वा प्राधान्यं स्
प्रयत्नेन स्वरूपज्ञानेन वा निव
भगवच्छक्तिर्लक्ष्मीरूपा सत्य
प्रकृतिप्रतिपादिकानां श्रुतीनां
तैलमधुक्षीरादिनिवृत्तिः एवं भ
वक्तव्याः । आदौ प्रकृतिनिरा
सर्वोत्कर्षप्रार्थना, अन्यथा अस
येन सम्यक्प्रबोधो भवतीति भाव
जितः । योगनिद्रा त्वया ली
स्वरूपत्रयमेकमेव । अत एव
प्रपञ्चसृष्टिः परन्तया सृज्यते न
परमानन्दलक्षणं गुणं प्रयच्छतीति
स्वशक्तिद्वारा जीवान् व्यामोहय
स्थावरजङ्गमदेहस्थितानां जीवान
समसीति । यद्यस्मात्कारणात्त्वमात्म
सात्त्विकानन्दो न सम्भवति । बाधक
सम्यगवरुद्धाः समस्तभगाः अणिम
येन्द्रियवर्गः प्राकृतो भवति ।
स्थावरजङ्गमानामखिलेन्द्रियाणां श
समेवोद्बोधकः । प्राकृतानां तु विचारे
कश्चिदिति । निगमो वेदः त्वामनुचरे
वसीति सूचितम् । अत एव तदर्थमि
स्वरूपस्थितस्यैव । नन्वेतादृशमेव वे
प्रतिपादयन्ति । तथाऽन्या अपि श्रुतयः
जयेति प्रार्थना ।

"प्राकृताः श्रुतयः सर्वा भगव

र्वोपनिषदादिसारभूतां
च्छन्दसा प्रार्थयन्ते-

षगृभीतगुणाम् अजाम्
दः ते त्वाम् अनुचरेत्
ह चरतः विहरतः ते।
प्रकटीकुरु । कथम् ?
ोऽपि जयेति द्विरुक्तिः
: समस्तो भगो येन स
धं ते त्वामेव अनुचरेत्
मायया बहिरङ्गशक्त्या
ते इति कर्मणि षष्ठ्यौ
कटिताः गुणा सत्त्वादयो
शब्दादयो यस्य इत्येकं
णि जगन्ति जङ्गमानि च
श्रुतयः कथं चरन्तीति
त्वोपयुक्तानन्तकल्याण-
रोध इति सर्वमनवद्यम्।
ीतेत्यत्र ह्यग्रहोर्भश्छन्दसीति
भजजला गुरु नर्कुटकम्'

शतेन स्वाभाविकोत्कर्षादौ
त्वादिदोषभाक्त्वम् । तथा
त्यर्थः । उत्कर्षाद्यविकारे
ीवानां तव भजनवैमुख्यार्थं
दिकप्रयोगः । उक्तार्थे शक्ति
ं यस्येति तथाभूतस्त्वमसि ।

'स्वाभाविकी ज्ञानबलक्रिया च ।' इति श्रुतेः ।

त्र हेतुः–हे अजगजदोकसामखिलशक्त्यवबोधक ! चेतनाचेतनानां शक्तिप्रवर्तकप्रधानक्षेत्रज्ञपतिर्गुणेश इति श्रुतेः । वस्थं ब्रह्मस्वरूपं निरूप्य तस्यैव त्रिविधं कार्यावर्थं रूपं निरूपयन्

'भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ।' इत्यादिश्रुतीनामर्थमाह–क्वचिदिति । अजया जडात्मिकयाऽपरा शब्दवाच्यया आत्मना जीवेन परा प्रकृतिशब्दवाच्येन च रममाणस्य ते तवेति कर्मणि षष्ठी । त्वां निगमोऽनुचरेत् उभयावस्थं भिन्नाभिन्नत्वेन प्रतिपादयेदित्यर्थः । 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेये'त्यादिश्रुतयः ॥१४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं प्रसङ्गमुक्त्वा वाक्यशेषरूपेषु प्रथमं प्रकृतिप्रतिपादिकाः श्रुतयः किं स्वतन्त्रतया प्रकृतिं प्रतिपादयन्ति तथा सति न्त्रतया वा प्राधान्यं स्यात् । आहोस्विद्भगवद्रूपां भगवत्तत्त्वेन निरूपयन्ति । आहोस्विज्जीवधर्मरूपेयं प्रकृतिरिति तेषामेव स्वरूपज्ञानेन वा निवर्तनीयेति निरूपयन्ति । आहोस्विन्निःस्वभावशशविषाणवत् प्रतिभासत इति । आहोस्विदन्तरङ्गा इयं क्तिर्लक्ष्मीरूपा सत्या अतस्तस्यामेव स्थितिर्युक्तेति प्रपञ्चनिष्प्रपञ्चैस्तुल्यतया प्रतिपादयन्ति । एवमनेकविधसन्देहोत्पत्तौ प्रतिपादिकानां श्रुतीनां निर्णयार्थमाह–जय जयेति । यथा शर्करा अक्ता उपदध्यात् तेजो वै घृतमिति घृतपदश्रवणेनैव क्षीरादिनिवृत्तिः एवं भगवत्समीपे मायास्वरूपगुणप्रतिपादनश्रवणेनैव सन्देहो निवृत्त इति न पुनस्तत्पक्षनिराकरणार्थं युक्तयो । आदौ प्रकृतिनिराकरणार्थं भगवतः स्वरूपेण स्थितिं प्रार्थयन्ते–जय जय सर्वोत्कर्षेण वर्तस्वेति । वीप्सया सर्वदा र्षप्रार्थना, अन्यथा अस्मांस्तत्सम्बन्धिनो हन्युः । अन्यदपि प्रार्थयन्ते–जह्यजामिति । निद्रां त्यज ततस्तां मूलतो नाशय । स्यप्रबोधो भवतीति भावः । ननु तयैवाहमेतावत्कालं वशे नीतः, कथं हन्तुं शक्येति चेत्तत्राहुः । हे अजितेति । त्वं न केनापि । योगनिद्रा त्वया लीलयैव गृहीता, न तु जीव इव निद्रया अभिभूतः । भगवन्निद्रा माया सैव प्रकृतिरिति यमेकमेव । अत एव मार्कण्डेयपुराणे ब्रह्मणा योगनिद्रा स्तुता । अनेन तस्य जगत्कर्तृकत्वं सुतरामेव निवारितम् । ष्टिः परतया सृज्यते न तु सत्या । अग्रे सत्यसृष्टेरुत्पत्तिप्रकारं वक्ष्यति । नन्वेषा कथं हन्तव्या यतो गुणवती सुषुप्तौ लक्षणं गुणं प्रयच्छतीति चेत्तत्राह–दोषगृभीतगुणामिति । दोषार्थमेव स्वरूपाज्ञानार्थमेव गृहीता गुणा यया । इयमेव द्वारा जीवान् व्यामोहयति तेषामपि निद्रालस्यादिरूपेण व्यामोहिका वर्तते । तत आह–अगजगदोकसामिति । मदेहस्थितानां जीवानामर्थे जीवानां सम्बन्धिनी वा । ननु ममाप्येषां सुखदायिनी, अतस्तिष्ठत्विति चेत्तत्राहुः– । यद्यस्मात्कारणात्त्वमात्मनैव समवरुद्धसमस्तभगोऽसि । स एव क्षुद्रादिसुखमपेक्षेत निद्रालस्यप्रमादोत्थं यस्य स्वरूपानन्दः न सम्भवति । बाधकत्वं तु तन्निवर्तितमेव, अजितेति पदेन इष्टसाधकत्वं तु निराक्रियते त्वमात्मनैव तदपेक्षाव्यतिरेकेणैव द्धाः समस्तभगाः अणिमादिसुखानि स्वरूपानन्दाश्च यस्य अत एतदपेक्षाकेत्यर्थः । ननु सेवार्थं जीवा अपेक्षन्ते तेषां र्थं प्राकृतो भवति । तत्प्रकृतिविनाशे सर्वमेव विनश्येतेति बाधकमिति चेत्तत्राह–अगजगदोकसामिति । नामखिलेन्द्रियाणां शक्त्यवबोधकस्त्वमेव, न प्रकृतिरिति । किञ्च सुतरां ये ते स्थावरजङ्गमास्त्वदीयाः तेषां । प्राकृतानां तु विचारोऽप्यस्ति । ननु प्रकृतेर्नाशे तत्पुरःसरतया वेदा मद्बोधने प्रवृत्ताः कथं प्रवर्तिष्यन्त इति चेत्तत्राह– । निगमो वेदः त्वामनुचरेदेव क्वचिदेवानया चरतः सर्वदा आत्मनैव चरतः । चकारादजया चरणदशायामपि आत्मनैव सूचितम् । अत एव तदर्थमपि अजया संरक्ष्या निगम इत्येकवचनात् कश्चिदेव वेदः अजासम्बन्धपुरःसरं बोधयति तत्रापि येव । नन्वेतादृशमेव वेदो बोधयतीति कुतो नोच्यते ? मैवम् । 'अरूपमस्पर्शम्' इत्यादिश्रुतयः तत्सम्बन्धाभावमेव । तथाऽन्या अपि श्रुतयः स्वरूपानन्दबोधकाः सृष्टिप्रतिपादिकाश्च कैवलब्रह्मपरा इत्यग्रे वक्ष्यते । अतो मोहिनीं शक्तिं र्थना ।

कृताः श्रुतयः सर्वा भगवन्तमधोक्षजम् । स्तुवन्ति दोषनाशाय तत्राविष्टो भवेद्यथा ॥'' ॥१॥१४॥

श्रीसुबोधिनीसारः

वेदोक्तिः । अजित ! हे त्वं जय जय उत्कर्षमाविष्कुरु । वीप्सादरे न गच्छन्त्यगानि स्थावराणि गच्छन्ति जगन्ति जङ्गमानि ओकांसि निवासस्थानानि शरीराणि येषां तेषां जीवानामजामविद्यां दोषायानन्दादिगुणाच्छादनाय गृभीता गुणा यया ताम् । हृग्रहोर्भश्छन्दसीति भकारः । त्वं जहि नाशय । जीवाः किमिति न हन्युर्मयि कोऽधिको गुणस्तत्राह । यत् यस्मात्त्वम् स्वरूपेणैव समवरुद्धं सप्राप्तं समस्तं भगमैश्वर्यं येन स त्वमसि । हे अखिलशक्त्यवबोधक ! अन्तर्यामिन् क्वचित्कदाचित्सृष्ट्यादिकाले अजया मायया चरतः क्रीडतः आत्मना नित्यानन्दैकरूपेण चरतो वर्तमानस्य ते । कर्मणि षष्ठ्यौ त्वां निगमो वेदो अनुचरेत्प्रतिपादयेत् ॥१॥१४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्रुतिभिर्बोधनप्रकारं दर्शयति-जय जयेत्यष्टाविंशतिभिः । त्वयि तु पराभवशङ्कैव नास्ति, वशीकृतमायत्वात् इत्याशये सम्बोधयति-अजितेति । जय जय सोत्कर्षमाविष्कुरु । आदरे वीप्सा । केन व्यापारेणोत्कर्षः प्रकटनीय इत्यपेक्षायामाहुः अगजगदोकसामिति । अगानि स्थावराणि जगन्ति जङ्गमानि ओकांसि शरीराणि येषां जीवानां तेषामजामविद्यां जहि नाशय । ननु किमिति गुणवती हन्तव्या तां विना विषयभोगानुपपत्तेः इत्याशङ्क्याहुः-दोषगृभीतगुणामिति । दोषाय आनन्दाद्यावरणाय गृभीता गृहीता गुणाः सत्त्वादयो यया तामित्यर्थः । "हृग्रहोर्भश्छन्दसि" इति भकारः । इयं हि स्वैरिणीव परप्रवारणायैव गुणान् गृह्णाति अतो हन्तव्येत्याशयः । ननु तर्हि जीवाः स्वयमेव ज्ञानवैराग्यादिसाधनैः किं न हन्युः इत्याशङ्क्य सम्बोधयन्ति अखिलशक्त्यवबोधकेति । तेषां जीवानां त्वमेवान्तर्यामितया सर्वासामिन्द्रियान्तःकरणादीशक्तीनां सामर्थ्यविशेषाणामुद्बोधक अतो न ते ज्ञानादिसाधने स्वतन्त्रा इति भावः । ननु कथमहमखिलशक्त्यवबोधकः कथं वा तदविद्यानिरासे समर्थ इत्यपेक्षायामाहुः त्वमिति । यत् यस्मात्त्वम् आत्मना स्वरूपेणैव समवरुद्धसमस्तभगः संप्राप्तसमस्तैश्वर्यादिगुणोऽसि,

"ऐश्वर्यस्य समस्तस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥" इति वचनात् ।

एवम्भूते मयि किं प्रमाणम्, इत्यपेक्षायां, वेदसमूह एव इत्याहुः-ते क्वचिदिति । क्वचित् कदाचित् सृष्ट्यादिसमये अजया मायया शक्त्या चरन्तं क्रीडतम् ।

"यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति, तद्ब्रह्म" इत्यादिः । तथाऽऽत्मना स्वरूपेण च वर्तमानम् । "सत्यं ज्ञानमनन्तं ब्रह्म । विज्ञानमानन्दं ब्रह्म ।" इत्यादिर्निगमो वेदसमूहस्त्वामनुचरेत् प्रतिपादयेदित्यर्थः । कर्मणि षष्ठ्यौ । अत्र च प्राकृतगुणरहितत्वेऽपि

"परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेर्नित्यानां स्वाभाविकानां गुणानां सत्त्वात् श्रुतयश्चरन्तीति स्पष्टमुक्तं वेदितव्यम् ॥१४॥ ॥१॥

अन्वितार्थप्रकाशिका

तत्र सर्वाः श्रुतयस्तत्तद्वर्गभेदेनाष्टाविंशतिधा भूत्वाऽष्टाविंशत्या पद्यैः स्तुवन्ति । अत्रैतेष्वेव पद्येषु सर्वासां श्रुतीनां परमेश्वरविषयाणां तात्पर्यसङ्ग्रहः । तत्रादौ बन्दिजनोचितजयाशंसनपूर्वकं सर्वशास्त्रविधेयभूतमविद्यानाशनं प्रार्थयन्ते जयेति । भो अजित ! हे अगजगदोकसामखिलशक्त्यवबोधक ! त्वं जय जय दोषगृभीतगुणाम् अगजगदोकसामजां जहि । यतः त्वम् आत्मना समवरुद्धसमस्तभगः असि । क्वचित् अजया आत्मना च चरतस्ते निगमः अनुचरेत् औचित्यादगजगदित्यस्यावृत्तिः । भो अजित ! अगानि स्थावराणि जगन्ति जङ्गमानि ओकांसि शरीराणि येषां तेषां जीवानां अखिलाः कर्मज्ञानादिकाः शक्तयस्तासामवबोधकत्वं जय जय उत्कर्षमाविष्कुरु । केन व्यापारेणेत्याशङ्क्याहुः । दोषगृभीत दोषाय आनन्दाद्यावरणाय गृभीता गृहीता गुणाः सत्त्वादयो यया तामित्यर्थः । "हृग्रहोर्भश्छन्दसि" इति भकारः ।

एवम्भूताम् अगज
हरेस्तव कः प्रयासः निरन्त
समवरुद्धसमस्तभगः सम्प्राप्त
अजया मायया शक्त्या चरन्त

"यतो वा इमानि भ
स्वरूपेण च वर्तमानम् "सत्य
इति शेषे कर्मणि षष्ठ्यौ । निराव
नाशयित्वा उत्कर्षमाविष्कुरु
स्वरूपेणैवाप्तसमस्तैश्वर्योऽतस
कर्मज्ञानादिशक्तयस्त्वदधीना अ
स्फुटेऽर्थः । नीलकण्ठचतुर्द्धरास

वेदा ऊचुः ॥ जय जयेति
उत्कर्षप्रकटने प्राप्तकालोऽसीत्यर्थ
तथोक्ताम् ॥ अगजगदोकसाम् अ
जीवानाम् ॥ अजां मायाम्
स्वप्रकाशान्तर्वर्तिमायोदरस्थका
मायोदरवर्तिजीवाविद्यानाशाय
पुरुषोत्तमप्रकाशतिरोहितमायोदरवर्ति
जीवाजानाशं प्रार्थयन्ते । तेन च
पूर्वोक्तजीवानामनादिमायाविनाशे
अखिलशक्त्यवबोधक ! अखिलाना
प्रकाशकस्तत्सम्बुद्धेः ॥ यद्वा
ज्ञानवैराग्याचलस्वधर्मादिरूपास्तासामव
लमिति भावः । यस्मात् अनन्तालौकि
न तथेति भावः । ननु मदुत्कर्षसूचक
मायया सह चरतः गुणोद्भूतरुद्रेन्द्राग
अनुचरेत्प्रतिपादयेत् ॥ तत्र श्रुतयः ॥

"अजामेकां लोहितशुक्लकृष्णां

"नमस्ते रुद्रमन्यव" इति ॥

"यत इन्द्रो यातोऽवसितस्य राजा

अस्या अर्थः — इन्द्रः यतो जङ्ग

"अग्निर्मूर्द्धा दिव" इति च ॥

"विभ्राट्बृहत्पिबतु" इति च ॥

एवम्भूताम् अगजगदोकसामजामविद्यां जहि नाशय । यथेयं पुनर्जीवान्न दुनुयात् तथा कुर्वित्यर्थः । अजामात्रहनने
कः प्रयासः निरन्तराह्लाददिसंवित्कामधेनुवृन्दपतेस्तव किं वाजयाकृत्यमित्याहुः । यत् यतः त्वम् आत्मना स्वरूपेणैव
समस्तभगः सम्प्राप्तसमस्तैश्वर्यादिगुणोऽसि उक्तेऽर्थे त्वहमेव प्रमाणमित्याहुः । क्वचिदिति । क्वचित् कदाचित् सृष्ट्यादिसमये
मायया शक्त्या चरन्तं क्रीडन्तं

"यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति, तद्ब्रह्म" इत्यादिः । तथाऽऽत्मना
च वर्तमानम् "सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्म " इत्यादिर्निगमो वेदसमूहस्त्वामनुचरेत्, प्रतिपादयेत् । ते चरत
कर्मणि षष्ठ्यौ । निराकारसाकारब्रह्मणोः समानमिदं पद्यम् । तथा च हे प्रभो ! स्थावरजङ्गमात्मकानां स्वरूपावरणकरीमविद्यां
उत्कर्षमाविष्कुरु । इयं हि स्वैरिणी इव परप्रतारणाय गुणान् गृह्णाति अतो गुणवन्त्यपि हन्तव्या । त्वं च
वाप्तसमस्तैश्वर्योऽतस्त्वयि दोषं नो वक्ष्यति नापि तवानया कृत्यं नापि तन्नाशे तव प्रयासः । जीवानां च
शक्तयस्त्वदधीना अतो जीवाः स्वयं तां हन्तुमशक्ताः । अत्र विषये चाहं श्रुतिरेव त्वां प्रतिपादयन्ति प्रमाणमस्मीति
र्थः । नीलकण्ठचतुर्द्धरास्तु जय जयेत्यादिना जीवं सम्बोध्य प्रकल्प्य व्याचक्षते ॥१४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

वेदा ऊचुः ॥ जय जयेति ॥ हे अजितगुणैश्वर्यविभूत्यादिभिर्न केनापि जित इत्यर्थः ॥ त्वं जय जय । अत्र प्राप्तकाले लोट
प्राप्तकालोऽसीत्यर्थः । दोषगृभीतगुणां दोषरूपा जीवदुःखदा गृभीता गृहीता गुणा मलिनसत्त्वरजस्तमांसि यया
॥ अगजगदोकसाम् अगानि स्थावराणि जगन्ति जङ्गमानि ओकांसि सद्मानि शरीररूपाणि येषां तेषां तथोक्तानां
॥ अजां मायाम् ॥ अजामेकामित्यादिश्रुतेः । जहि नाशय ॥ आत्यन्तिकप्रलयावसानावसरे
रान्तर्वर्तिमायोदरस्थकारणशरीरवतां जीवानां नामरूपव्याकरणमिच्छन्तं भगवन्तं दृष्ट्वा तद्रुचिमालक्ष्य च
वर्तिजीवाविद्यानाशाय श्रुतयोऽजां जहीति प्रार्थयन्त इत्यर्थः । जीवानामजां जहीत्यनेनात्यन्तिके प्रलये
प्रकाशतिरोहितमायोदरवर्तिनोऽनाद्यविद्यावतो नित्यान् जीवान् दृष्ट्वा मायानियन्तारं नित्याखण्डाकारं भगवन्तं प्रति वेदा
नाशं प्रार्थयन्ते । तेन च जीवेश्वरभेदो वास्तवः फलितो वेदानां तस्मिन् काले विद्यमानत्वान्नित्यत्वं च ॥ ननु
जीवानामनादिमायाविनाशे मम का शक्तिरिति चेन्मैवं प्रावोच अखिलशक्त्यवबोधकत्वादित्याहुरखिलेति । हे
शक्त्यवबोधक ! अखिलानां कालमायामहतत्त्वादीनां याः शक्तयः कालनमोहनजगत्सर्गादिरूपास्तासामवबोधकः
तत्सम्बुद्धेः ॥ यद्वा ॥ अखिलेषु स्वभजनकर्तृजीवेषु स्वनिष्ठाविद्यानाशार्थं याः शक्तयो
वलस्वधर्मादिरूपास्तासामवबोधक-प्रकाशकेति जीवेषु स्वभावतोऽविद्यमानपूर्वोक्तगुणप्रादुष्कर्तुस्तव भवत्येव मायानाशे
भावः । यस्मात् अनन्तालौकिकशक्तिस्त्वम् आत्मना स्वत एव समवरुद्धसमस्तभगः सम्प्राप्तसमस्तैश्वर्योऽसि । जीवस्तु
भावः । ननु मदुत्कर्षसूचकसृष्टिकरणेन किं स्यात्तत्राहुः-हे भगवन् अजया लोहितशुक्लकृष्णगुणात्मकसृष्टिरूपया
चरतः गुणोद्भूतरुद्रेन्द्राग्निसूर्याद्यन्तर्यामिरूपेण चरन्तं त्वां तदैक्येन क्वचिन्निगमोऽस्मदीयवाग्लक्षणो वेद
पादयेत् ॥ तत्र श्रुतयः ॥

"अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् ॥" इति ॥

"नमस्ते रुद्रमन्यव" इति ॥

इन्द्रो यातोऽवसितस्य राजा" इति ॥

अर्थः — इन्द्रः यतो जङ्गमस्य अवसितस्य स्थावरस्य च राजेति प्रतिपाद्यते ॥

अग्निर्मूर्द्धा दिव" इति च ॥

भ्राट्बृहत्पिबतु" इति च ॥

परं आत्मना रमणीयगुणधाममनोहरावयवयादिव्यमूर्त्या ॥"

"परमव्योम्न्यक्षरे विचरन्तं त्वा निगमः प्रतिपादयेत् ॥"

"यः सर्वज्ञः स सर्ववित् । यस्य महिमा भुवि दिव्ये पुरे ह्येषः स व्योम्न्यात्मा प्रतिष्ठित इति योऽक्षरे सञ्चरतीति ॥"

"स्वभक्तेभ्योरमते समे सर्वस्वमिति ॥" "दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वमिति आत्मैवेदमग्र आसीत्पुरुषविध" ॥

इत्याद्याः श्रुतयः ॥ यद्वा आत्मना कृष्णवामनादिरूपेण जगद्धितार्थं भूमौ विचरन्तं त्वामिति ॥

"विष्णुर्विचक्रमेत्रेधे"ति ॥ "आकृष्णेनेति" गोपालतापनीयोपनिषदि च । "कृष्णो वै परमं दैवतं गोविन्दान्मृत्युर्बिभेति गोपीजनवल्लभज्ञानेन तज्ज्ञाने भवती"त्याद्याः श्रुतयः ॥

अत्रायं वेदाशयः —

भगवत्कृतायां सृष्टौ तल्लब्धकरणकलेवरा जीवास्तत्रान्वयव्यतिरेकभावेन स्थितस्य कृतावतारस्य भगवतो वेदकृतप्रतिपादनं निशम्य ततो भगवत्स्वरूपं ज्ञात्वा तद्भजनं करिष्यन्ति । तेन च तेषामजानाशो भविष्यतीति ॥१४॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तत्र दृष्टान्तमाह ॥ यथेति ॥ अनुजीविनः भृत्याः, बन्दिनः स्तुतिपाठकाः, प्रत्यूषे प्रभाते, अभ्येत्यागत्य, सु शोभनः श्लोका यशांसि येषु तैः, तस्य सम्राजः पराक्रमास्तैः पराक्रमप्रकाशकैः स्तोत्रैः, शयानं सम्राजं, यथा बोधयन्ति, तद्वदित्यर्थः ॥१४॥ वेदपुरुषमुखनिर्गलितानष्टाविंशतिसङ्ख्याकान् श्लोकानाह ॥ जय जयेत्यादि ॥ जय जयेति ॥ जय जयेत्या द्विर्भावः । जयोत्कर्षं प्राप्नुहीति तदर्थः । ननु स्वभावत एव निःसमाभ्यधिकस्य मम को वाऽनवाप्तः प्राप्य उत्कर्ष इत्यत आहुः अजामनादिकालतः प्रकृतिवशवर्तिनो जीवानां प्रकृतिं, जहि नाशय त्याजयेत्यर्थः । त्वयि प्रलीनानां सर्वे संसृतिनिदानभूतप्रकृतिसम्बन्धं त्याजयता त्वया कारुण्यातिशयावहः कश्चिदभूतपूर्व उत्कर्षः प्राप्यत एवेति भावः । नन्वहम प्रकृतिवश्यस्तत्कथमजां त्याजयामीत्यतः सम्बोधयन्ति । हे अजित ! सर्वान् जितवत्या प्रकृत्याप्यजितत्वाद्धहे वशीकृतप्रकृते भावः । ननु कर्माधीनतयाऽनादित एव सापराधानां जीवानां सा कथं त्याजयितव्येत्यतः सम्बोधयन्ति । हे दोषगृभीतगुण दोषवत्स्व गृभीतो गृहीतो गुणो यादृच्छिकप्रासङ्गिकाद्यन्यतमो येन तथाभूत, सापराधजनेष्वपि कश्चिद्गुणलेशोऽस्ति चेत्तद्दोषोऽपेक्षा तद्गतगुणलेशेक्षया तदनुग्रहणशीलः त्वमित्यर्थः । गृभीतेत्यत्र "ग्रहे भश्छन्दसि" इति भकारादेशः । पाठान्तरे, ननु कु प्रकृतेर्भोग्यभोगोपकरणादिरूपमहागुणवत्यास्त्याजनं प्रार्थ्यते इत्यतस्तां विशिनष्टि । दोषा जीवानां दोषावहा गृभीता गृहीताः गु सत्त्वरजस्तमोरूपा यया तां, निष्ठान्तस्य पूर्वनिपाताभाव आर्षः । जीवानां संसृतिनिदानभूतगुणाश्रयत्वात्तां जहीत्यर्थः । न तत्त्याजनोपयुक्तज्ञानशक्त्यादिरहितोऽहं कथं त्याजयेयमित्यत आह । यद्यस्मात्, त्वम् आत्मना स्वत एव, समवरुद्धः स्वीकृ समस्तो भगो येन सः, असि । तस्माज्जहीत्यर्थः ।

"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणा" ॥ इति ॥

वैष्णववचनाद्भगशब्दार्थोऽवगन्तव्यः । असङ्कुचितज्ञानशक्तिमत्त्वाद्वात्सल्यसागरत्वाच्च जीवान् प्रकृतेर्मोचयितुं क्षमोऽसि भावः । प्रकृतिपुरुषकालशरीरकत्ववेषेण सर्वकारणतया त्वमेव जीवानां प्रकृतिसम्बन्धापादक इति द्योतयितुमनुद्बुद्धसाम प्रकृत्यादीनां परमात्मनस्तव शरीरभावेन विशेषणत्वेऽपि स्वतस्तेषां कार्याक्षमत्वात्तेषां स्वस्वकार्योन्मुख्यरूपसामर्थ्यो कस्त्वमेवेत्यभिप्रेत्य सम्बोधयन्ति । हे अगजगदोकसामखिलशक्त्यवबोधकेति । अगानां स्थावराणां जगतां जङ्गमानां चराचरात्मकशरीररूपेण विकरिष्यमाणानां प्रकृतिगुणानामित्यर्थः । ओकसां तादृक्शरीराश्रयीभविष्णूनां जीवानां च अ स्वस्वकार्योन्मुख्यरूपास्तासामवबोधक उद्बोधक, तत्र जीवशक्त्युद्बोधकत्वं नाम चिच्छक्त्युद्बोधकत्वं प्रलयदशायामनुद्बुद्धचिच्छक्तिकत्वात् । सर्वकारणतया सर्वकार्यानन्यं त्वामेव वेदोऽभिदधातीत्याहुः । क्वचित्, अजय

सहार्थे तृतीया । साहित्यं च विशेषणविशेष्यभावेन, तदयमर्थः । प्रकृतिपुरुषाभ्यां विशिष्टतयेत्यर्थः । चरतः, ते तव मित्यर्थः । कर्मणि षष्ठी । प्रकृतिपुरुषान् जगदाकारेण परिणमय्य वर्तमानं भवन्तमित्यर्थः । निगमः चिशब्दसमुदायात्मकोऽपि वेदभावः, अनुचरेत् अनुवर्तेत । त्वामेवाभिदध्यादित्यर्थः । अनेन "कथं चरन्ति श्रुतयः" इति त्तरमुक्तं भवति । अनेन चिदचिच्छरीरविशिष्टताकारेण कारणत्वं तथा मोक्षप्रदत्वं तदौपयिकगुणपूर्णत्वं शास्त्रप्रमाणकत्वं धाय स्थावरजङ्गमात्मकशरीराश्रयजीवानामजां जहीत्येवमुक्तमिति भावः । अत्र "यतो वा इमानि भूतानि जायन्ते" "यो विदधाति पूर्वं वेदांश्च प्रहिणोति" "य आत्मनि तिष्ठन्" "सत्यं ज्ञानमनन्तम्" "यः सर्वज्ञः सर्ववित्" इत्यादिनिगमराशिरेवेत्थं कः ॥१॥ ॥१५॥

योगिरामानुजाचार्यकृतसरला व्याख्या

जयेति । हे जय ! जयति सर्वमिति जयः । 'जी जये' इति धातोः पचाद्यच् । सर्ववशीत्यर्थः । जितेन्द्रिय इत्यस्य न्द्रियः इत्यर्थवत् ।

'जितं ते पुण्डरीकाक्ष' इत्यादिवचनात् भगवतः सर्वजयित्वं प्रसिद्धम् । 'विनयो जयः सत्यसन्धः' इति सहस्रनामसु दस्य भगवद्वाचकत्वेन पठितत्वात् । अयमपि जयशब्दो भगवद्वाचकः । सर्वविजयी त्वं जय । स्वोत्कर्षं प्रकाशयेत्यर्थः । मया कथं जेतव्यमित्यत आहुः-जयेति । भगवतः निर्गुणत्वेऽपि स्वभावतस्सर्वज्ञत्वसर्वशक्त्यादिमत्त्वात् । अत एव त्वस्वभाववत्त्वात् स्वोत्कर्षं प्रकाशयेति भावः । जयशब्दस्यार्थभेदान्न पौनरुक्त्यं जयेत्यनेन भगवतः आशीरात्मकमङ्गलमुक्तं । अवाप्तसर्वकामस्यापि भगवतः भक्तैः प्रेमातिशयेन क्रियमाणमङ्गलं तत्र तत्र दृश्यते । यथा वा । 'स्वस्त्यस्तु रामाय स णाय ।' इत्यादौ केन व्यापारेण स्वोत्कर्षप्रकाशनं भवतीत्यत आहुः-अगेति । अगानि स्थावराणि जगन्ति जङ्गमानि च शरीराणि येषां तेषां जीवानामजाम् । बुद्धेर्विक्षेपकारिणामविद्यां "अज-गतिक्षेपणयो"रिति धातोः तां जहि विमोचय । मोचनमीश्वरं विना अन्येन न शक्यमित्यर्थः ।

"तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।" इत्यादिवचनात् । कथम्भूतामजाम् । अजितदोषगृभीतगुणाम् । अजिताः दोषाः कामक्रोधादिदोषाः यैस्ते अजितदोषाः अज्ञानिनः । "काम एष क्रोध एषः" "जहि शत्रुम्महाबाहो कामरूपं " इत्यादिवचनैः कामादयोऽत्र दोषशब्देन बोध्याः । तैः कामादिदोषयुक्तैश्चेतनैर्गृहीता भोग्यत्वेन स्वीकृताः गुणाः शब्दादयः सा । अज्ञैर्निषेव्यमाणशब्दादिगुणवतीमित्यर्थः । "पिबन्त्येनामविषमामविज्ञाताः कुमारकाः ।" "अजो ह्येको जुषमाणोऽनुशेते भुक्तभोगामजोऽन्यः ॥" इत्यादिवचनमत्रानुसन्धेयम् । चेतनानां बुद्धीन्द्रियाणि भगवत्सकाशादाकृष्य शब्दादिप्रवणानि अधः पतनकारिणीमित्यर्थः । श्रीधर्य्यामेवं व्याख्यातम् दोषाय चेतनानां ज्ञानानन्दाद्यावरणाय त्वादिगुणवतीमिति । एतच्च न रुचिरम् । रजस्तमसोर्ज्ञानावरकत्वेऽपि सत्त्वस्य ज्ञानावरकत्वाऽभावात् गृहीतगुणामित्यत्र सत्त्वादिगुणसामान्यवाचकत्वात् "सत्त्वात्सञ्जायते ज्ञानम्" "ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ।" इत्यादिवचनैः सत्त्वस्य ज्ञानजनकत्वप्रतिपादनात् । किञ्च । मूलप्रकृतेः त्रिगुणात्मकत्वे प्रकृतेर्गुणसम्बन्धस्याऽनादित्वेन गृहीतगुणामित्यपि । मध्ये प्राप्तस्यैव गृहीतत्वव्यवहारात् । अत एव गृहीतप्रकाशो रविरित्यादयो न प्रयोगाः । सूर्यस्य च स्याऽगन्तुकत्वाभावात् । इदमेव रमणीयम् । अज्ञानाम्मोहजनकशब्दादिगुणवतीम्मायां जहीति भावः । ईश्वर इवाविद्यायाः त्वात्तस्याः हनने मम का शक्तिरित्यत आहुः-त्वमिति । यद्यस्मात्त्वमात्मना स्वरूपेणैव समवरुद्धसमस्तभगः ज्ञानशक्त्यादिषड्गुणैश्वर्यः । तादृशाणिमाद्यैश्वर्यो वा —

"ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥"

शित्वं चाष्टभूतयः । इत्यादिवचनोक्तैश्वर्यवानसि । ननु ते ज्ञानकर्मादिना स्वयमेव मायां हनिष्यन्ति । मया किमित्यत आहुः-यवबोधक ! अखिलानां नानाविधानां चेतनगतशक्तीनामवबोधक प्रकाशक ! अतः ज्ञानादौ न स्वतन्त्रा इति भावः ।

"उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।" "मत्तः स्मृतिर्ज्ञानमपोहनं च ।" इत्यादिवचनात् सदसतः परस्य निःस्पृहस्य मम कथं तादृशशक्त्युद्बोधकत्वमित्यत आहुः-क्वचिदिति । क्वचित् सृष्टिसमयादौ । अजया मायया चरतः विहरतः सर्वचेतनानां ज्ञानशक्त्यादिप्रदानार्थमेव मायया स एव भगवतो विहार इति भावः । तदुक्तम् पूर्वमेव "बुद्धीन्द्रियमनःप्राणान् लोकानामसृजत्प्रभुः ।" इत्यादिना । "लोकवत्तु लीलाकैवल्य"मिति सूत्रेऽपि भगवतः सृष्ट्यादिव्यापारः क्रीडार्थमित्युक्तत्वात् "अन्तः प्रविष्टश्शास्ता जनानाम्" "आत्मानमन्तरो यमयति" इत्यादिश्रुतिभिश्च अखिलचेतनानां प्रेरणार्थमेव मायया सह विहार इति सिद्धम् । क्वचिदात्मना च चरतः आनन्दरूपेण स्वात्मना स्वस्वरूपेणेत्यर्थः । चरतः विहरतः । "रसो वै सः । रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती"त्यादिश्रुतिभिः स्वानन्दानुभवैकपरितुष्टस्य ब्रह्मणः आनन्दार्थं प्रकृत्यादिनिरपेक्षत्वात् । आत्मना सह विहारो युक्त एव । तथा च मायया विहरतः इत्युक्तेः "सोऽकामयत" "तत्सृष्ट्वा तदेवानुप्राविशत्" "अन्तःप्रविष्टश्शास्ता जनानाम्" इत्यादिश्रुतिप्रतिपादितजगज्जन्मादिकारणत्वोपयुक्तज्ञानशक्त्यादिगुणविशिष्टत्वं ब्रह्मणः प्रतिपादितं भवति । तथा आत्मना चरतः इत्युक्ते "सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दं ब्रह्मे"त्यादिश्रुतिप्रतिपादितब्रह्मणः स्वरूपलक्षणीभूतसत्यज्ञानानन्दादिगुणविशिष्टत्वं प्रतिपादितम् । एतादृशविहारविशिष्टत्वे ब्रह्मणः किं प्रमाणमित्यत आहुः-निगम इति । निगमः वेदः । अनुचरेत् प्रतिपादयेत् । चरत इति कर्मणि षष्ठी । तथा च निर्गुणे वृणवृत्तयः कथं चरन्तीति प्रश्नस्य एतदुत्तरमुक्तं भवति । निर्गुणशब्दस्य प्राकृतगुणराहित्यपरत्वात् ब्रह्मणः जगज्जन्मादिकारणत्वोपयुक्तानन्तकल्याणगुणविशिष्टत्वात् सत्यज्ञानानन्दादिगुणविशिष्टत्वाच्च सगुणश्रुतीनां ब्रह्मप्रतिपादने न कोऽपि विरोधः इति अन्वयः । हे जय त्वं जय । अजितदोषगृभीतगुणामजां जहि । यद्यस्मात्त्वमात्मना समवरुद्धसमस्तभगोऽसि । हे अगजगदोकसामखिलशक्त्यवबोधक ! क्वचिदजया चरतः क्वचिदात्मना च चरतः ते निगमः अनुचरेत् इत्यन्वयः ॥१४॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

स्वैरिणीवेत्यत्राभिज्ञमिश्रप्रवरपद्यम् —

कयाचित्स्वैरिण्या वलययुगलं याचितमथो तथोचे तन्मित्रं किमिति परवेद्यं न हि भवेत् ।
प्रदेयं स्वर्धुन्या लघुपयसि तद्विद्धि जननीसुते त्वं धन्यासीत्यवददथ दूती सुरसरित् ॥इति ॥

तत्र हनने अतः अन्तर्यामिण एव शक्त्युद्बोधकत्वात् शरणमहं प्रपद्य इत्यन्ता श्रुतिरजया चरत इत्यस्योदाहरणम् । अवशिष्टात्त्वात्मनः इत्यस्य विदधाति सृजति प्रहिणोति ददाति सङ्कल्पमात्रेणाध्यापयतीत्यर्थः । य आत्मनि स्वस्वरूप एव तिष्ठन् आत्मानं जीवं नियमयति न तु जीववत् देहे लिप्तो भवति इत्यादि सत्यज्ञानान्तादिस्वरूपबोधने प्रमाणम् 'यः सर्वज्ञ' इत्यादि लुप्तभगत्वे प्रमाणम् । सत्यं त्रिकालाबाध्यं ज्ञानं जडप्रतियोगि अनन्तं त्रिविधपरिच्छेदशून्यं ब्रह्म यो वेद सोऽश्नुते सर्वान् कामान् सहेति ॥१४॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

अथ यद्यपि श्रुतयस्त्रिकाण्डविषयत्वात्त्रिविधा एव तथापि तत्तदवान्तरफलसाधनपरत्वेन बहुधा भवन्ति तत्राप्यष्टाविंशतिभेदास्ताः सपरिकराः पृथक्पृथक् स्तुवन्तीति तत्तत्प्रसङ्गे दर्शयिष्यामः । तासां नामानि लक्षणाशरणान्तर्यामिभेदाभेदज्ञाननिन्दोपदेशोपासनाभक्त्यनुक्रोशदुर्विज्ञेयत्वानिर्वचनीयत्वासद्वादादिखण्डनस्तवैकात्म्यसृष्टिबन्धमोक्षातर्क्यशक्तित्वसर्वेश्वरत्वसोपाधिलयनिरुपाधिलयवैराग्यगुरूपसदनब्रह्मानन्दातन्निरसनानन्तत्वप्रतिपादनक्रमेण ज्ञेयाः ॥ अत्र तावत्सर्वाः श्रुतयः सगुणं गुणैरनभिभूतं श्रीनारायणमवलम्ब्य निर्गुणं परं ब्रह्म श्रीकृष्णाख्यं स्तुवन्तीति तात्पर्यम् । तथा हि श्रीगोपालतापन्याम्- "योऽसौ सर्वेषु वेदेषु तिष्ठति" योऽसौ सर्वैर्वेदैर्गीयतेऽसौ श्रीकृष्णः पूर्वतोऽनुवर्तते । दशमे - "कृष्णं च तच्छन्दोभिः स्तूयमानं शुचिस्मिताः ।" इति । एकादशस्कन्धे एकविंशाध्याये श्रीकृष्णवाक्यम् —

"किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥

मां विधत्तेऽभि
मायामात्रमनूद्या
व्याख्यातं स्वामि
निषेधार्थं किं कल्पयेत् इ
विधत्ते मामेव तत्तद्देवता
इत्यादिना विकल्प्यापोह्यते
मायामात्रमित्यनूद्य नेह नान
"वेदैश्च सर्वैरहमेव
स्तुवन्तीति । ग्रन्थविस्तरभि
आहुः । नर्कुटकं नाम छन्दः "
ग्रहोर्धात्वोर्हस्य भादेशो वेद इ
तत्सामर्थ्यं न त्वयीति "विल
इत्युक्तेश्चेत्याशयः । ते जीवाः
करोमि ।" इत्युक्तेः । एवम्भूते
चिच्छक्त्यान्तर्याम्यवतारादिशुद्ध
लक्षणमिति पृष्टो वरुणः प्राह-
धारयन्ति वर्धन्ते च नाशकाले
उत्पत्तिस्थितिनाशकाले यदात्मत
पूर्वं सर्गादौ । विदधाति ससर्ज ।
मुमुक्षुरहं शरणं प्रपद्ये मोक्षसिद्ध
'अगजगदोकसाम्' इत्यस्योदाहर
शरीरमात्मानमन्तरो यमयत्येष त
आत्मपदेन जीवात्मा गृह्यते य आत
शरीरमात्मा भवति य आत्मानमन्तरो

"यः सर्वेषु भूतेषु तिष्ठन्सर्वे
भूतान्यन्तरो यमयत्येष त आत्मान्तर्या

नियमनलीलापरेयं श्रुतिः । "
सर्ववित् ।' इत्यादिनिगमकदम्बस्त्वामे
अथ स्वामिश्लोकः —

जय जयाजित जह्यगजङ्गमावृ
न हि भगवन्तमृते प्रभवन्त्यमी

हे अजित ! जय जय । जीवाना
निगमगीतगुणार्णव ! निगमैर्गीतो गुणानाम्

मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् । एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ॥
मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति ॥'' इति ।

व्याख्यातं स्वामिचरणैः । इयं बृहती श्रुतिः कर्मकाण्डे मन्त्रवाक्यैः किमाचष्टे किं प्रकाशयति, ज्ञानकाण्डे किमनूद्य र्थं किं कल्पयेत् इत्यस्याः श्रुतेर्हृदयं तात्पर्यं मत्तोऽन्यः कश्चिदपि न वेद । स्वयमेव कथयति । मां विधत्ते मामेव यज्ञरूपं मामेव तत्तद्देवतारूपमभिधत्ते । न मत्तः पृथक् यच्चाकाशादिप्रपञ्चजातम् – ''तस्माद्वा एतस्मादाकाशः सम्भूतः'' विकल्प्यापोह्यते तदप्यहमेव न मत्तः पृथगस्ति । एतावानिति । शब्दो वेदः मां परमार्थरूपमाश्रित्य भिदां भेदं त्रमित्यनूद्य नेह नानस्ति किञ्चन इति प्रतिषिध्य प्रसीदति निर्वृत्तव्यापारो भवतीति एतावान्सर्ववेदार्थः । श्रीगीतासु च —

''वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्'' इति । तस्मात्सर्वाः श्रुतयः श्रीकृष्णमाहात्म्यमुदीर्य तमेव तीति । ग्रन्थविस्तरभियात्राधिकं न लिखितम् । अथ प्रकृतमनुसरामः । प्रथमं स्वमनोरथं निवेदयन्तः श्रुत्यभिमानिदेवता नर्कुटकं नाम छन्दः 'हयदशभिर्नजौ भजजला गुरु नर्कुटकम्' इति तल्लक्षणम् । सप्तभिर्दशभिश्च यतिरत्रेत्यर्थः । हृग्रहोरिति– र्हस्य भादेशो वेद इत्यर्थः । यतो दोषाय गुणान्गृह्णात्यतो हेतोः । तत्र तद्धननादौ । इति भाव इति–मायापरतन्त्रत्वाज्जीवेष्वेव र्थ्यं न त्वयीति ''विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया'' इत्युक्तेः । ''नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च ।'' त्याशयः । ते जीवाः । अतस्त्वदधीनप्रवृत्तित्वात् । इति भाव इति–''केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा मि ।'' इत्युक्तेः । एवम्भूतेऽकुण्ठज्ञानैश्वर्ये क्रीडतः पुरुषरूपेण नित्यं चात्मना ज्ञानानन्दैकरसेन भगवदादिरूपेण स्वयोगमायया त्यान्तर्याम्यवतारादिशुद्धलीलायां चरतः निगमो वेदसमूहः प्रनुचरेत्त्वां प्रतिपादयेत् । अत्र श्रुतयो भृगुणा ब्रह्मणः किं मिति पृष्टो वरुणः प्राह–यतो वा इति । वै प्रसिद्धौ । यतो यस्मात् इमानि ब्रह्मादिस्तम्बपर्यन्तानि जायन्ते जीवन्ति प्राणान् न्ति वर्धन्ते च नाशकाले यत्प्रति प्रयन्ति गच्छन्त्यभिविशन्ति तादात्म्यमेव प्रतिपद्यन्ते तत्त्वं ब्रह्मेति विशेषेण ज्ञातुमिच्छेति स्थितिनाशकाले यदात्मतां न जहति भूतानि तद्ब्रह्मणो लक्षणमित्यर्थः । तटस्थलक्षणपरेयं श्रुतिः । यः परमेश्वरः । दौ । विदधाति ससर्ज । तस्मै ब्रह्मणे । प्रहिणोति प्रददौ । तं देवं द्योतमानमात्मबुद्धिप्रकाशं स्वविषयां बुद्धिं प्रकाशयन्तं हं शरणं प्रपद्ये मोक्षसिद्ध्यर्थमाश्रयं प्राप्नोमि । शरणपरेयं श्रुतिः । इत्युभे श्रुती, 'अजया चरतः' इत्यस्योदाहरणम् । कसाम्' इत्यस्योदाहरणं दर्शयति–य आत्मनीति । 'य आत्मनि तिष्ठन्नात्मनोऽन्तरोऽयमात्मा न वेद यस्यात्मा मानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः' इति । अन्तर्यामिणं ब्रूहीत्युद्दालकेन मुनिना पृष्टः प्राह याज्ञवल्क्यः– ने जीवात्मा गृह्यते य आत्मनि जीवात्मनि तिष्ठन्नात्मनः सकाशादन्तरः दूरस्थः आत्मा यं न वेद न जानाति कुतः यस्य त्मा भवति य आत्मानमन्तरोऽभ्यन्तरः सन् यमयति नियमयति एष ते तवान्तर्याम्यात्माऽमृत इत्यर्थः । तथा —

''यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरः । यं सर्वाणि भूतानि न विदुः । यस्य सर्वाणि भूतानि शरीरम् । यः सर्वाणि रो यमयत्येष त आत्मान्तर्याम्यमृतः ।'' इति ॥

नियमनलीलापरेयं श्रुतिः । ''आत्मना चरतः'' इत्यस्योदाहरणं दर्शयति–सत्यमिति । 'सत्यं ज्ञानमनन्तं ब्रह्म । यः सर्वज्ञः इत्यादिनिगमकदम्बस्त्वामेवम्भूतं प्रतिपादयतीत्यर्थः । सत्यमित्यस्यार्थः प्रागेव लिखितः । स्वरूपलक्षणपरेयं श्रुतिः । मिश्लोकः —

जय जयाजित जह्यगजङ्गमाकृतिमजामुपनीतमृषागुणाम् ।
हि भगवन्तमृते प्रभवन्त्यमी निगमगीतगुणार्णवता तव ॥

अजित ! जय जय । जीवानाम् अगजङ्गमाकृतिमजां जहि । अमी जीवा भवन्तमृते विना न प्रभवन्ति न समर्थाः । हे गुणार्णव ! निगमैर्गीतो गुणानामर्णवो समुद्रः यस्य सः । तान् जीवान् । अव रक्ष ॥१४॥

श्रीनिवाससूरिकृततत्त्वदीपिका

भो भगवन् ! अजित जय जय अत्यादरे वीप्सेयम् । अजां प्रकृतिम् । जहि विध्वंसय । संसरतां चेतनानां प्रकृतिसम्बन् निराकुर्या इत्यर्थः ।

नन्वहं यथा कर्मफलप्रदाता प्रसिद्धो वैषम्याद्यभावात् कथं तेषामजां विध्वंसयामीत्यत्राह–दोषगृभीतगुण इति । दोषे गृहीता गुणा येन स एवम्भूतोऽसि । तस्मादजां जहि । सत्स्वपि दोषेषु आश्रितवत्सलत्वा निरङ्कुशैश्वर्यत्वाद्गुणान् गृ(ग)हीतेत्यर्थः । यद्वा

अजितदोषेषु सापराधेष्वपि गुणलवोस्ति चेत् तद्ग्राहीत्यर्थः ।

तथा च रामायणे —

''नस्मरत्यपकाराणां शतमप्यात्मवत्तया । कथञ्चिदुपकारेण कृतेनैकेन तुष्यती''ति ।

तत्रैव —

'मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन । दोषो यद्यपि तस्य स्यात् सता नैतदगर्हितम् ॥' इति ॥

'अविज्ञाता सहस्रांशु'रिति नामसहस्रमपि । आश्रितानां दोषान्न जानातीत्यर्थः । अन्योऽप्यजाविध्वसे हेतुरित्याह-आत्म समवरुद्धसमस्तभग इति । आत्मना स्वत एव स्वीकृताऽसङ्कुचितज्ञानैश्वर्यादिगुणकस्त्वं यत्तस्मादजां जहीति ।

'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'त्यादिश्रुतेः —

''ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥''

इत्युक्तेश्च । अत आश्रितवात्सल्यान्निरङ्कुशैश्वर्यत्वाच्च त्वमेव मोक्षं दातुं क्षमस्तस्मादजां विध्वंसयेत्यर्थः ।

ननु त एव ज्ञानवैराग्यादिना कथं न हन्युरित्यत आह–अगजगदोकसामखिलशक्त्यवबोधक इति । अगानि स्थावराणि जगन्ति जङ्गमानि । ओकांसि शरीराणि येषां ते तथा । तेषां स्थावरजङ्गमशरीराश्रया जीवात्मनामखिलचिच्छक्तिशक्त्यवबन्धकशक्त्यावबोधकस्त्वमेव अतस्ते परतन्त्राः स्वयमेवाजादूरीकरणे असमर्थाः तथ श्रीविष्णुपुराणे उक्तम् —

''नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना । नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥''

इति । अत्राप्यग्रे स्वयमेव वक्ष्यति श्रुतिः —

''महदहमादयोऽण्डमसृजन् यदनुग्रहतः'' इति ॥

अतः सर्वेषामखिलशक्त्युद्बोधकत्वात्त्वमेवाजानिराकरणे क्षम इत्यर्थः । नन्वनन्तमहिमस्य मम एवम्प्रतिपादने श्रुतीनां प्रवृत्तिरित्यत्राह–अजयेति । अजया प्रकृत्या । आत्मना जीवेन च । जात्यभिप्रायेण एकवचनम् । प्रकृतिपुरुषाभ्यां विशिष्ट चरतो जगत्सर्गादिलीलां कुर्वतस्ते निगमो वेदोऽनुचरेत् चिदचिच्छरीरकस्य तव जगत्कारणत्वं प्रतिपादयेदित्यर्थः ।

''सकारणं करणाधिपाधिपः । परास्य शक्तिर्विविधैव श्रूयते । प्रधानक्षेत्रज्ञपतिर्गुणेशः ।

क्षरं प्रधानममृताक्षरं हरः क्षरात्मना (वि)वीशते देव एकः । यः पृथिव्यां तिष्ठन् यस्य पृथिवी शरीरम् । य आत्मनि ति यस्यायमात्मा शरीरम् । य आत्मानमन्तरो यमयति । यस्याव्यक्तं शरीरम् । यस्याक्षरं शरीरमेष सर्वभूतान्तरात्मा अपहतपाप्मा दि देव एको नारायणः ॥ ''यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । सत्यं ज्ञानमनन्तं ब्र विज्ञानमानन्दं ब्रह्म ॥''

इत्यादिवेदवाक्यकदम्बेन ब्रह्मणश्चिदचिद्वस्तुशरीरकत्वेन वेदस्य प्रतिपादकत्वमित्यर्थः । अत्र ''सत्यं ज्ञान विज्ञान''मित्यादिशब्दाः सत्यत्वज्ञानत्वानन्तत्वादिपराः । सामानाधिकरणत्वाद्वाक्यस्य भिन्नप्रवृत्तिनिमित्तानां शब्दानामेक

वृत्तिः सामानाधिक

''द्व्यैकयो

च्छिन्नव्यावृत्ततया ब्र

व्यावर्त्यबहुत्वेन व्या

नन्वसत्यव्यावृत्तिरेव

जडव्यावृत्तिपरिच्छिन्न

भेदकत्वेन विशेषणभे

व्यावर्तयतामन्योन्यविरो

कयसाधनभूतविशेष्यत्

शुकपाठः । अर्थस्वारस्

दोषगृभीतगुणामित्यस्य

अजाया जडत्वात् गृहीत

सत्त्वादीनां सर्वेषां दोषरू

''सत्त्वात्सञ्जायते

इति भगवद्वचनवि

नाप्यपरमार्था । तथा सत्यपर

केन कल्पिता; जीवेन ब्रह्मण

अभिमता त्वया सा इत्यादयो

श्रुतय उचु : हे अ

गुणों को ग्रहण करनेवाली

है अर्थात् स्वतः स्वाभाविक

का उद्बोधन होकर सृष्टिका

चेतनावाची शब्द समुदाय रू

बृहदुपलब्धमेतदवय

अत त्र्क्षयो दधुस्त्वयि

घटादिविकृतिः, मृत्, एव,

यतः, बृहतः, विकृतेः, उदयास्तमयौ,

दत्तपदानि, भुवि, अयथा, कथं, भव

त्तिः सामानाधिकरण्यमिति हि सामानाधिकरण्यलक्षणं यथा —

"द्व्यैकयोर्द्विवचनैकवचने।" (१-४-१२) इति पाणिनिसूत्रे व्द्येकशब्दौ द्वित्वैकत्वपरौ। ननु सत्यादिशब्दैरनृतजडपरि-व्यावृत्ततया ब्रह्मण एकस्यैव प्रतिपाद्यतया तस्य निर्विशेषत्वं प्रतीयते इति चेन्न। सत्यादीनां तत्तत्पदार्थविरोधिव्यावृत्तिपरत्वे वर्त्यबहुत्वेन व्यावृत्तीनामपि बहुत्वादेकार्थपर्यवसानासिद्धेः। न हि गन्तव्यग्रामभेदे गमनक्रियाया अभेदः सम्भवतीति। सत्यव्यावृत्तिरेव जडव्यावृत्तिः। सैव परिच्छिन्नव्यावृत्तिरिति व्यावृत्तिबहुत्वं नास्तीति चेन्न। असत्यव्यावृत्तिरित्यनेनैव डव्यावृत्तिपरिच्छिन्नव्यावृत्तितया स्वरूपस्य प्रतिपन्नतया पदान्तरवैयर्थ्यप्रसङ्गात्। ननु सत्यत्वाद्यनेकविशेषणविवक्षायां विशेषणानां कत्वेन विशेषणभेदाद्विशेष्यभूतब्रह्मणोऽप्यनेकत्वं स्यात्। तत्तु तवाप्यनिष्टमिति चेन्न। सत्यत्वादीनां स्वविरोध्यवच्छिन्नात्साश्रयं वर्तयतामन्योन्यविरोधाभावात्। "अरुणयैकहायन्या पिङ्गाक्ष्या गवाक्ष्या सोमं क्रीणाती"त्यादावनेकविशेषणाविवक्षायामपि यसाधनभूतविशेष्यत्वाङ्गीकारात्तत्रापि विशेषणौ विशेष्यभेदाभावाविति। अतः यथोक्त एवार्थः। अत्राजितदोषगृभीतगुण इत्येव पाठः। अर्थस्वारस्यात् प्रमाणसद्भावाच्च। न त्वजाविशेषणम्। अर्थानौचित्यात् प्रमाणासद्भावाच्च। कथमितिचेदित्थं गृभीतगुणामित्यस्य दोषायानन्दाद्यावरणाय गृहीता गुणा यया सा। तामिति केवलाद्वैतवादिना व्याख्या कृता। स प्रष्टव्यः जाया जडत्वात् गृहीतृत्वस्य चेतनधर्मत्वाच्च तस्याः दोषगृहीतगुणकत्वं कथमिति। किञ्च। गृहीता गुणा इति बहुवचनेन त्वादीनां सर्वेषां दोषरूपत्वाभ्युपगमे —

"सत्वात्सञ्जायते ज्ञानं रजसो लोभ एव च। प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥"

इति भगवद्वचनविरोधः स्यात्। अपि च। सा अजा परमार्था अपरमार्था वा। न तावत् परमार्था। अनभ्युपगमात्। परमार्था। तथा सत्यपरमार्थशब्देन किं विवक्षितं काल्पनिकत्वमिति चेन्न। मूलदोषान्तरापेक्षया अनवस्थापत्तेः। किञ्चेयमजा कल्पिता; जीवेन ब्रह्मणा वा ? न तावज्जीवेन, तस्यैव कल्पितत्वात्। नापि ब्रह्मणा; तस्याज्ञानविरोधित्वात्। ज्ञानबाध्या भिमता त्वया सा इत्यादयो दोषाः श्रीभाष्यादौ प्रपञ्चिता इत्यलमतिविस्तरेणेति। अतो यथोक्त एवार्थः समीचीन इति ॥१४॥

कृष्णप्रिया

श्रुतय उचु : हे अजित आप उन्नति को प्राप्त हुए जीवो को अनेक दोष संपादन करने वाली सत्वरजतम ों को ग्रहण करनेवाली माया का नाश कीजियेगा। क्योंकि स्वतः हि आपने स्वमस्त ऐश्वर्य का स्वीकार किया र्थात् स्वतः स्वाभाविक समस्त ऐश्वर्य सम्पन्न आप हो। स्थावर जंगम शरीरधारी जीवों की समस्त शक्तियों द्बोधन होकर सृष्टिकालमें जगदाकार रूपसे परिणाम को प्राप्त और उन दोनों अे अधिष्ठाता आप को वाची शब्द समुदाय रूप वेद मुख्य क्षतिमें प्रतिपादन करता है ॥१४॥

बृहदुपलब्धमेतदवयन्त्यवशेषतया यत उदयास्तमयौ विकृतेर्मृदि वाविकृतात्।
अत ऋषयो दधुस्त्वयि मनोवचनाचरितं कथमयथा भवन्ति भुवि दत्तपदानि नृणाम् ॥१५॥

कर्दमक्षमा

टादिविकृतिः, मृत्, एव, इति, इव, अवशेषतया, हेतुना, ऋषयः, एतत्, उपलब्धम्, बृहत्, एव, अवयन्ति, अविकृतात्, तः, विकृतेः, उदयास्तमयौ, भवतः, अतः, ते, ऋषयः, मनोवचनाचरितं, त्वयि, एव, दधुः।, यतः, नृणाम्, कुत्र, अपि, भुवि, अयथा, कथं, भवन्ति ॥१५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु कथं मामेवं प्रतिपादयन्ति 'यत इन्द्रो यातोऽवसितस्य राजा' इत्यादिभिरिन्द्रो यातो जङ्गमस्यावसितस्य स्थावरस्य च राजेति प्रतिपाद्यते तथा "अग्निर्म्मूर्द्धादिवः" इत्यादिभिश्चैवम्भूतत्वेनाग्न्यादयः प्रतिपाद्यन्ते तत्राह बृहदुपलब्धमेतदिति अयमर्थः एतदुपलब्धं दृष्टमिन्द्रादिसर्वं बृहद्ब्रह्म त्वमित्येवावयन्ति जानन्ति कथम् बृहत एवावशेषतयाऽवशिष्यमाणत्वेन कुतः यतो बृहतः सर्वस्योदयास्तमयावुत्पत्तिलयौ सर्वोपादानत्वात् तर्हि किं विकारित्वं बृहतः न अविकृतात् विवर्ताधिष्ठानत्वेनाविकारादित्यर्थः। वाशब्दः उपमार्थः यथा घटादेर्विकृतेर्मृदि उदयास्तमयौ तद्वत् 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् सर्वं खल्विदं ब्रह्म' इत्यादिभिस्तथा प्रतिपादनादित्यर्थः। अतः कारणादृषयो मन्त्रास्तद्द्रष्टारो वा त्वय्येव मनोवचनाचरितं दधुः मनसा आचरितं तात्पर्यं वचनाचरितमभिधानं च धृतवन्तः न पृथग्विकारेष्वित्यर्थः। अत्र निदर्शनम् कथमयथेति। नृणां भूचराणां यत्र कुत्रापि दत्तानि निःक्षिप्तानि पदानि भुवि कथमयथाभवन्त्यदत्तानि भवन्ति अतो यथा मृत्पाषाणेष्टकादिषु दत्तानि पदानि भुवं न व्यभिचरन्ति तथा यत्किमपि विकारजातं वदन्तो वेदास्त्वामेव सर्वकारणं परमार्थभूतं प्रतिपादयन्तीत्यर्थः ॥१५॥

द्रुहिणवह्निरवीन्द्रमुखामरा जगदिदं न भवेत्पृथगुत्थितम्। बहुमुखैरपि मन्त्रगणैरजस्त्वमुरुमूर्तिरतो विनिगद्यसे ॥२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — सर्वश्रुतिप्रतिपाद्यत्वमाक्षिपति-नन्विति। अत्र श्रुतयः यातो जङ्गमस्य, 'या-प्रापणे' इत्यस्य शतृप्रत्ययान्तं रूपम्। अवसितस्य स्थावरस्य, अपूर्व 'षिञ्-बन्धने' अस्य निष्ठान्तं रूपम्। तथा —

"अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाꣳरेताꣳसि जिन्वति ॥" इति ॥

अयं परावररूपेणावस्थितोऽग्निर्दिवो मूर्धा, अहश्च सूर्यात्मना द्युलोकस्य मूर्धा भवति, ककुभां दिशां पतिः पालकः। भस्य तश्छान्दसः। तथा पृथिव्याः पतिः अपां पयसां रेतांसि वीर्याणि जृण्वति उद्रिक्तभावं नयति —

"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिः" इति स्मृतेः ॥

जिन्वतीति पाठस्तु शाखाभेदेन। तथा "सूर्य आत्मा जगतस्तस्थुषश्च" इति "सोमोऽस्माकं ब्राह्मणानाꣳ राजा।" इत्यादिभिश्चैवम्भूतत्वेनेश्वरत्वेन। भेदप्रतिपादनपरेयं श्रुतिः। अत्राशयमाह-अयमर्थ इति। कथं जानन्ति। बृहतो। ब्रह्मणः अत्र हेतुमाशङ्कते-कुत इति। तर्हि सर्वोपादानत्वेनेत्याह-इत्यर्थ इति-अतात्त्विकान्यथाभावो विवर्तस्तदधिष्ठानत्वेन यथा रज्जुविवर्तो भुजङ्गस्तदधिष्ठानभूता रज्जुर्निर्विकारा तथा ब्रह्मविवर्तजगतोऽधिष्ठानं ब्रह्मापि निर्विकारमेव जगत्प्रतीतेस्तत्रातात्त्विकत्वादिति भावः। घटादेरिहादिना शरावादिग्रहः। वाचारम्भणं वचनालम्बनम्। वस्तुतस्तु सर्वं नामधेयमेव केवलं विकारो नाम वस्त्वन्तरमसि परमार्थतस्तु मृत्तिकेत्येव सत्यं तत्रोत्पत्तिप्रलयत्वात्। तथा कार्यस्य प्रपञ्चस्य परमकारणब्रह्ममात्रत्वं बोधयति-सर्वं खल्विति। इदं सर्वं जगत् नामरूपविकृतं प्रत्यक्षादिविषयं ब्रह्मैव भवति कथं तज्जलान् तस्माद्ब्रह्मणो जातं तज्जम्, तस्मिन् ब्रह्मणि लीयत इति तल्लम्, तस्मिन्नेव स्थितिकालेऽनिति प्राणिति चेष्टत इति तदन् तज्जलानिति जगदित्यस्य विशेषणम्। यस्मात्त्रिष्वपि कालेषु ब्रह्मतयाऽवशिष्टं तव्द्यतिरिक्तं किञ्चिन्नास्ति, तस्मात्सर्वमिदं ब्रह्मातः शान्तः रागद्वेषादिरहितः उपासीत वाचारम्भणं नरदेवतिर्यगादिनामधेयं परमकारणं ब्रह्म सत्यमिति ज्ञात्वोपासनां कुर्वीत अभेदोपासनपरेयंश्रुतिरित्यादिना गृहीताः। तथा प्रतिपादनात्सर्वोपादानत्वेन कथनात्। इत्यर्थ इति-परमकारणप्रतिपादन एव वाचारम्भणादीनां तात्पर्यं दृष्टान्ततयेति भावः। यतस्त्वमेव सर्वकारणमतो हेतोः। तद्द्रष्टारो मन्त्रद्रष्टारः। इत्यर्थ इति- "सर्वे पदा हस्तिपदे निमग्नाः" इति न्यायेन पृथक्पृथग् न ध्यायन्तीति भावः। अत्र सर्वाधिष्ठानत्वेन निदर्शनं दृष्टान्तः यतोऽदत्तानि स्युरतो हेतोः। इत्यर्थ इति-परमकारणाभिन्नत्वात्सर्वस्येति भावः। द्रुहिणो ब्रह्मा द्रुहिणाद्यमरा एवेदं जगत् पृथग् नोत्थितं भवेत्। किन्तु त्वत्त एव उद्देश्यविधेयभावत्वादेकवचनम्। अत एककारणकत्वात् बहुमुखैरग्नीन्द्रादिवर्णनरूपैरजोऽपि बहुमूर्तिः ब्रह्मेन्द्रादिरूपेण प्रतिपाद्यस इत्यर्थः ॥★॥ श्रीधरानुयायिनी — इन्द्रादीनामपि वेदप्रतिपाद्यत्वादीश्वरत्वमाशङ्क्याहुः घटादेर्मृत्तिकायामिवेन्द्रादिरूपप्रपञ्चस्य त्वयि विवर्ताधिष्ठान एवोत्पत्तिप्रलयौ भवतः।

"अहं कृत

मयि सर्वा

इत्यत ईश्वरत

भवतः। वाकार इवा

इदमधिकमितोऽपीदम

ज्ञानेनेन्द्रियादिरूपप्रपञ्च

वर्णनं सेवनं वा तदेतद

यतो वेदवचनानामास

कथमिति। नृणां पाषा

यत्किमपीन्द्रादिविक

तदेवमस्वरूपगुणनिरस

काश्चिदन्यास्तदविवेकेन

घटयितुं स्तुवन्ति-बृहदि

बृहत्वहानेरिति भावः। न

तदनतिरिक्तत्वप्राप्तेः। तत्र

तत्राहुः-बृहतः सकाशात्,

हीत्याहुः-अविकृताद्विक

श्रुतिभिस्तथैवाचिन्त्यशक्ति

केचिदस्मदनुवर्तिनस्तज्जगदे

तात्पर्याभिधारूपं धृतवन्तः।

परमकारणं त्वां विना तेषामत

तस्मात्त्वामेकमुद्दिश्य प्रवृत्तास

ब्रह्मेत्यादिकाः। अथ तत्पक्षदृ

इत्यादिकाः, अत्रेतिशब्देन सर्वमे

प्राकृतेन्द्रियैर्यत्किञ्चिद्घटादिकं

गौतममतादिवत्ततोभिन्नमित्यर्थः

व्याख्यातम्। तदुक्तं भगवता —

"यदुपादाय पूर्वस्तु भा

ततश्चास्याः श्रुतेरयमर्थः

कारणं भवतीति (२) ॥१५॥

नीलकण्ठी — यद्भजन

स्वमन्त्रेभ्यः "पुरुष एवेद ꣳ स

जानन्ति। किं प्रपञ्च एव ब्रह्म नेत्य

ब्रह्मावशेषयन्ति। यथोक्तम् —

"योऽयं स्थाणुः पुमानेष पुं

तस्य स्थावरस्य च
मेतदिति अयमर्थः
। कुतः यतो बृहतः
नाविकारादित्यर्थः ।
त्यम् सर्वं खल्विदं
धुः मनसा आचरितं
चराणां यत्र कुत्रापि
भुवं न व्यभिचरन्ति

वनिगद्यसे ॥२॥

ङ्गमस्य, 'या-प्रापणे'
—

दिशां पतिः पालकः ।

ब्राह्मणानाँ राजा ।"
। बृहतो । ब्रह्मणः अत्र
र्तस्तदधिष्ठानत्वेन यथा
तीतेस्तत्रातात्त्विकत्वादिति
कारो नाम वस्त्वन्तरमस्ति
यति-सर्वं खल्विति । इदं
स्मिन् ब्रह्मणि लीयत इति
। यस्मात्त्रिष्वपि कालेषु
: उपासीत वाचारम्भणं
रित्यादिना गृहीताः । तथा
न्ततयेति भावः । यतस्त्वमेव
न पृथक्पृथग् न ध्यायन्तीति
भिन्नत्वात्सर्वस्येति भावः ।
नम् । अत एककारणकत्वात्
युयायिनी — इन्द्रादीनामपि
त्पत्तिप्रलयौ भवतः ।

"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ॥
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥" इति गीतोक्तेः ।

इत्यत ईश्वरत्वेन प्रतीयमाना अपि इन्द्रादयो ब्रह्म त्वमेवेति तत्त्वविदो जानन्ति यतोऽधिकृताद्ब्रह्मणः सकाशात्सर्वस्योदयास्तमयौ भवतः । वाकार इवार्थे । मृदि विकृतेर्घटादेरिवेत्यन्वयः । यद्वा–मृद इवेति च्छेदः । आर्षत्वात्पञ्चम्यर्थे प्रथमा । यद्वा–बृहदिति इत समधिकमितोऽपीदमधिकमित्यन्विष्य विचार्य सर्वाधिक्येनावशेषतया त्वामेव बृहत्सर्वतोऽधिकं जानन्ति विज्ञा इत्यर्थः । मनेन्द्रियादिरूपप्रपञ्चे बाधिते ब्रह्मणस्तवैव घटादिनाशे मृत्तिकाया इवावशिष्यमाणत्वात् । यद्वा–यन्मनोवाचामगोचरस्यापि तव सर्वं सेवनं वा तदेतदतिदुर्लभं बृहत् महत्फलमद्यास्माभिरुपलब्धम्, तत्र हेतुः–अवयन्तीति । अत्र यतस्त्वमित्यादिरर्थस्तुल्य एव यतो वेदवचनानामासमन्ताच्चरितं तात्पर्येण पर्यवसानं त्वय्येव । अतः, ऋषयस्त्वयि मनो धृतवन्तः । अत्र दृष्टान्तमाहुः–कथमिति । नृणां पाषाणेष्टिकादिरूपायां भुवि दत्तानि पदानि कथं भुव्यदत्तानि भवन्ति, पाषाणादीनामपि भूविकारत्वात् । एवं किमपीन्द्रादिविकारजातमपि वदतां वेदानां तात्पर्यं त्वय्येवेत्यर्थः ॥★॥ तोषिणी — देवमस्वरूपगुणनिरसनपूर्वकसाक्षात्स्वरूपगुणनिर्देशेनान्यश्रुतिश्रव्यपक्षपातशून्यासु श्रुतिषु स्तुवतीषु तत्तत्पक्षपातिन्यः काश्चिदन्यास्तदविवेकेन तन्निर्देशिकाः श्रुतयः सलज्जा इव स्वेषां स्वापेक्षणीयानां च तत्रैव लक्षणामयमपि चरणं साक्षादेव दर्शयितुं स्तुवन्ति–बृहदिति । उपलक्षकं दृष्टान्तमिदं यत्किञ्चिदेतज्जगत्सर्वं बृहद्ब्रह्मस्वरूपस्त्वमेवेत्यर्थः । तद्व्यतिरिक्तस्याप्स्तित्वे बृहत्वहानेरिति भावः । ननु बृहज्जगतोर्वैलक्षण्यं महदेव सत्यं तथाप्येवं घटेतेत्याहुः–अवशेषतया प्रलये तस्यैवावशिष्यमाणत्वेन तदनतिरिक्तत्वप्राप्तेः । तत्र दृष्टान्तः । विकृतेर्घटादेः कारणं मृदेवेति । ननु घटादेरुत्पत्त्यादिकं मृदो दृश्यते न तु जगतो बृहतः, इत्याहुः–बृहतः सकाशात्, उदयास्तमयौ जगतो वदन्ति श्रुतिविशेषाः । कथम्, तर्हि तस्या इव तस्यापि विकारित्वं न हि न इत्याहुः–अविकृताद्विकारशून्यादेव तस्मात्तौ वदन्ति । श्रुतेस्तु शब्दमूलत्वादिति न्यायेन चिन्तामण्यादिदृष्टान्तेन च श्रुतिभिस्तथैवाचिन्त्यशक्तितया तत्प्रतिपादनादिति भावः । विवक्षितमाहुः–अत इति । अस्मादेव हेतोर्ऋषयो वेदाः केचिदस्मदनुवर्तिनस्तज्जगदेकदेशस्तावक इवापि तथास्मद्विधास्तच्छुद्धस्वरूपगुणाविवेकिन इवापि त्वय्येव बृहति मनोवचनाचरितं तात्पर्याभिधारूपं धृतवन्तः । तत्र तात्पर्यं सर्वस्य कार्यस्य कारणपर्यवसायित्वे स्थिते तन्निर्देशस्यापि तत्पर्यवसानात् । अभिधा च सर्वकारणं त्वां विना तेषामत्यन्ताभावादिति भावः । तदेव स्पष्टयितुमर्थान्तरन्यासमाहुः–कथमिति । पदानि पदार्था घटादिवस्तूनि तत्त्वामेकमुद्दिश्य प्रवृत्तास्वस्मास्वज्ञानामेवान्यचारित्वं भाति न तु विज्ञानमिति भावः । अत्र मुख्याः श्रुतयः सर्वं खल्विदं इत्यादिकाः । अथ तत्पक्षदृष्ट्या "इन्द्रो यतोऽवसितस्य राजा ।" इत्यादिकास्तास्वेव दृष्टान्तदर्शिकाः, "वाचारम्भणं विकारः" इत्यादिकाः, अत्रेतिशब्देन सर्वमेव वाक्यं परामृश्यते न तु मृत्तिकैव तस्यैव मुख्यत्वात् । विनापीति विवक्षितार्थसिद्धेः । तस्माद्वाचारभ्यते कर्मेन्द्रियैर्यत्किञ्चिद्घटादिकं व्यवहारास्पदीक्रियते तत्सर्वं विकारसंज्ञं मृत्तिका तदनन्यभूतमित्यर्थः । इत्येव सत्यं न तु रजतादिवत्ततोभिन्नमित्यर्थः । 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इति न्यायात् ॥★॥ विश्वनाथस्तु — सत्यशब्देन कारणमेव व्याख्यातम् । तदुक्तं भगवता —

"यदुपादाय पूर्वस्तु भावो विकुरुते परम् । आदिरन्तो यदा यस्य तत्सत्यमभिधीयते ॥" इति ।

ततश्चास्याः श्रुतेरयमर्थः — आरम्भणं विकारः कार्यं भवति वाचा यस्य नामधेयं घटादिकं भवति मृत्तिकेत्येव सत्यं भवतीति (२) ॥१५॥

नीलकण्ठी — यद्भजनादजानाशस्तस्य ब्रह्मणो लक्षणमाह–बृहदिति । ऋषय इत्युत्तरार्धादपकृष्यते । ऋषयो मन्त्रद्रष्टारः "पुरुष एवेद ँ सर्वम्०" इत्यादिभ्यः एतदुपलब्धं प्रत्यक्षाद्यवगतम्, नामरूपात्मकं सर्वं बृहद्ब्रह्मैवेत्यवयन्ति किं प्रपञ्च एव ब्रह्म नेत्याह–अवशेषतयेति । रजतं शुक्तिरितिवदिदं ब्रह्मेति सामानाधिकरण्यमध्यस्तप्रपञ्चबाधावधिभूतं यन्ति । यथोक्तम् —

"योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव । ब्रह्मास्मीतिधियाशेषा त्वंबुद्धिर्विनिवर्तते ॥" इति । एवं जगद्विवर्ताधिष्ठानत्वं

ब्रह्मणो लक्षणं दर्शितम्। कुत एतदित्याशङ्क्योभयविधश्रुतिदर्शनादित्याह–यत इति।

"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति। यथोर्णनाभिः सृजते गृह्णते च। यथा पृथिव्यामोषधयः सम्भवन्ति। यथा सतः पुरुषात्केशलोमानि तथाक्षरात्सम्भवतीह विश्वम्॥"

इत्याद्याः श्रुतयस्तूर्णनाभिदृष्टान्तेन ब्रह्मैव स्वप्राधान्येन चोपाधिभूतमायाप्राधान्येन च क्रमाज्जगतो निमित्तमुपादानं चेत्याहुः। तत्रोपादानांशे दृष्टान्तः–मृदिवेति। यथा मृद्विकृताः घटशरावोदञ्चनाद्याः लोष्टपांसुपिण्डाद्याश्च मृदित्येवावयन्ति। एवं जगदपि ब्रह्मेत्यवयन्ति। किं मृद्विक्रियते ब्रह्म नेत्याह–अविकृतादिति। "अजायमानो बहुधा विजायते।" इत्यविक्रियमाणस्यैव बहुभवनश्रवणान्न विक्रियत इत्यर्थः। एवं ब्रह्मण उपादानत्वाविक्रियत्वश्रुतिभ्यां सिद्धं जगद्विवर्ताधिष्ठानत्वम्, अन्यथा श्रुतिद्वयविरोधपरिहारासम्भवात्। "जगतश्च ज्ञाने द्वैतं न विद्यते।" इति ज्ञाननिवर्त्यत्वश्रुत्यर्थापत्त्या सिद्धं मिथ्यात्वम्। नन्वेवं मृदिवेति विषमो दृष्टान्तः। न हि मृद्विकाराणां रज्जुभुजङ्गवद्बाध्यतास्ति। न। "वाचारम्भणं विकारो नामधेयम्" इति तेषामप्यनित्यत्वश्रवणात्। अयम्भावः — पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणामः। स च नित्यपरिणामिनि प्रधाने पाकजरूपाद्याश्रये पर्थिवपरमाणौ चास्ति। अतस्तावपि विकारत्वादनृतौ तेन परमाण्वादिप्रासादान्तेषु मिथो व्यावर्तमानेषु मृद्विकारेषु यत्कुसुमसूत्रवदनुस्यूतं मृत्सामान्यं तदेव सत्यं "मृत्तिकेत्येव सत्यम्।" इति श्रुतेः। तदेव चास्माकमात्मा। यथाहुः शाब्दिकाः —

"सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु। जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः॥

सा नित्या सा महानात्मा तामाहुस्त्वतलादयः॥" इति॥

व्यावहारिकत्वेन बाधाभावेऽपि श्रुतियुक्तिभ्यां मृद्विकाराणामपि मिथ्यात्वं सिद्धमिति न दृष्टान्तवैषम्यमिति। ननु—

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥" इति॥

मन्त्रवर्णात्साङ्ख्याः सुखदुःखमोहात्मकस्य जगतस्तादृशीप्रकृतिरुपादानं बन्धमोक्षादिव्यवस्थार्थं पुरुषाश्च बहव इत्याहुस्तत्कथं ब्रह्मण उपादानत्वं जगतश्च मिथ्यात्वमित्यत आह–अत इति। यतो वचनाचरितं त्वयि अतः ऋषयस्त्वयि मनो दधुरिति योजना। वचनानां वेदान्तानाम् आसमन्ताच्चरितं तात्पर्येण पर्यवसानं त्वयि, अतो न प्रधानादेरुपादानत्वम् "ईक्षतेर्नाशब्दम्।" इति न्यायादित्यर्थः। तथा हि छान्दोग्ये तावत् —

"सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्। ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा श्वेतकेतो॥" इत्युपक्रमोपसंहारयोरैकरूप्यम् ऐतदात्म्यमित्यादेर्नवकृत्वः–श्रवणमभ्यासः मानान्तरानवगतत्वमपूर्वता उत्तमादेशमप्राक्ष्मः, येनाश्रुतं श्रुतं भवतीत्यादिना एकविज्ञानात्सर्वविज्ञानं फलं न्यग्रोधफलमत आहरेति बीजे वटस्येव सूक्ष्मे स्थूलस्य सद्भावःलवणमेतदुदकेवधायेति लवणोदकवत्कारणे कार्यलयश्च न्यग्रोधफलाहरणाद्यर्थवादैर्दर्शितः। यथा —

"सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादित्येकविज्ञानात्सर्वज्ञानात्सर्वविज्ञाने उपपत्तिश्चेति षड्विधतात्पर्यलिङ्गैः ब्रह्म प्रतिपाद्यते॥" तथा आथर्वणे —

"कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" इत्युपक्रम्य ब्रह्मैवेदममृतं पुरस्तादित्युपसंहृतम्। एवमजामन्त्रेऽतितेजोबन्नरूपैवाजा प्रतिपत्तव्या। छान्दोग्ये — यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति श्रूयमाणानामेव रोहितादीनां तत्रापि प्रत्यभिज्ञानात्। न च सुखदुःखमोहात्मत्वं घटादेर्घटते सुखादीनामन्तःकरणधर्मत्वात्। बन्धमोक्षव्यवस्थाया अपि वक्ष्यमाणविधया सिद्धेर्न चेतनबहुत्वमभ्युपेतव्यमिति दिक्। ननु ब्रह्मण्यध्यस्तप्रपञ्चस्यान्यत्र सत्त्वं वाच्यम् अत्यन्तासतो गगनकुसुमादेरनध्यासादित्याशङ्क्य दृष्टान्तमुखेन परिहरति–कथमिति। भुवीत्यलुक्समासः। नृणां पुं दत्तानि पदानि कथमयथा भुव्यदत्तानि भवन्ति। न कथञ्चित्। एवं ब्रह्मण्यध्यस्तस्य प्रपञ्चस्य "नेह नानास्ति किञ्च

इति ब्रह्मण्येव नि

(*अत्र ए*

बृहदित्या
कप्रत्ययात् रूपम् '
वागालम्बनमिति या
परमकारणब्रह्ममात्रस
तत्राह–तज्जलानिति
भावः। यस्मात्
तदेवमस्वरूपगुणनि
काश्चिदन्यास्तदविवेके
घटयितुं स्तुवन्ति–बृहि
बृहत्वहानेरिति भावः।
तदनतिरिक्तत्वप्राप्तेः।
तत्राहुः–बृहतः सकाशा
हीत्याहुः–अविकृताद्वि
श्रुतिभिस्तथैवाचिन्त्यश
केचिदस्मदनुवर्तिनस्तज्ज
तात्पर्याभिधारूपं धृतवन्त
परमकारणं त्वां विना तेषा
तस्मात्त्वामेकमुद्दिश्य प्रवृ
ब्रह्मेत्यादिकाः। अथ तत्प
इत्यादिकाः, अत्रेतिशब्देन स
प्राकृतेन्द्रियैर्यत्किञ्चिद्घटावि
गौतममतादिवत्ततोभिन्नमित

अतो वयम् ऋषयः
तद्वत्कृत्येनात्मन एव वा, अ
बृहदिति। तेषां तदीयत्वेन तद्
महद्वन्तु जानन्ति मद्विधा इति
यस्मात् त्वदनुचरणात् त्वद्भज
यथा मृदि विकृतेर्घटादेरुदयास्
यद्वा, यतो भजनाद्विकृतेः सञ्चा
च बीजादेरुत्पत्तिप्रलयौ, अत

द्विजिज्ञासस्व । तद्ब्रह्मेति ।
रात्सम्भवतीह विश्वम्॥"
माज्जगतो निमित्तमुपादानं
श्च मृदित्येवावयन्ति । एवं
ते ।" इत्यविक्रियमाणस्यैव
द्वर्ताधिष्ठानत्वम्, अन्यथा
सिद्धं मिथ्यात्वम् । नन्वेवं
विकारो नामधेयम्" इति
च नित्यपरिणामिनि प्रधाने
दान्तेषु मिथो व्यावर्तमानेषु
: । तदेव चास्माकमात्मा ।

: ॥

ृष्टान्तवैषम्यमिति । ननु —
जुषमाणोऽनुशेते जहात्येनां

ादिव्यवस्थार्थं पुरुषाश्च बहव
त्वयि अतः ऋषयस्त्वयि मनो
अतो न प्रधानादेरुपादानत्वम्

्यं स आत्मा श्वेतकेतो ॥"
पूर्वता उत्तमादेशमप्राक्ष्मः, येनाश्रुतं
ाजे वटस्येव सूक्ष्मे स्थूलस्य
र्शतः । यथा —
पपत्तिश्चेति षड्विधतात्पर्यलिङ्गैरद्वैतं

ादममृतं पुरस्तादित्युपसंहृतम् ।
यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति
टते सुखादीनामन्तःकरणधर्मत्वात् ।
नु ब्रह्मण्यध्यस्तप्रपञ्चस्यान्यत्र सत्त्वं
। भुवीत्यलुक्समासः । नृणां भुवि
प्रपञ्चस्य "नेह नानास्ति किञ्चन ।"

ति ब्रह्मण्येव निषिद्धस्यान्यत्र सत्त्वं कथं स्यादित्यर्थः । एवं चानादिभ्रमतत्संस्कारपरंपरयाऽध्यासोपपत्तिरिति भावः (२) ॥१५॥

(अत्र एकः श्लोकोऽधिकोऽतः क्रमभेदः ।)

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

बृहदित्यादिटीकायां यातो जङ्गमस्येति "या प्रापणे" इत्यस्य शतृप्रत्ययात् अवसितस्येति अवपूर्वस्य षिञ् बन्धने इत्यस्य प्रत्ययात् रूपम् 'अग्निर्मूर्धा दिवः' इति योऽयमहन्यादित्यात्मना द्युलोकस्य मूर्धा भवतीत्यर्थः । वाचारम्भणमिति वाचारम्भणं वागालम्बनमिति यावत् । तत्सर्वं नामधेयमेव केवलम् । ननु विकारो नाम वस्त्वित्ति परमार्थतो मृत्तिकेत्येव सत्यम् वस्त्विति समकारणब्रह्ममात्रसत्यत्वं बोधयति । सर्वं खल्विदं ब्रह्मेति तज्जलानिति शान्त उपासीतेति श्रुतिशेषः । कथं सर्वस्यैव ब्रह्मत्वं तत्राह-तज्जलानिति तस्माज्जातं तज्जं तस्मिन् लीयते तल्लं तस्मिन्नेव अनिति तिष्ठति तदन् इति तद्व्यतिरेकेण व्यतिरेकादिति भावः । यस्मात् सर्वमिदं ब्रह्म तस्माच्छान्तः सन् वक्ष्यमाणैस्तद्गुणैरेवोपासीतेत्यर्थः । अथ स्वव्याख्या । तदेवमस्वरूपगुणनिरसनपूर्वकसाक्षात्स्वरूपगुणनिर्देशेनान्यश्रुतिश्रव्यपक्षपातशून्यासु श्रुतिषु स्तुवतीषु तत्तत्पक्षपातिन्यः काश्चिदन्यास्तदविवेकेन तन्निर्देशिकाः श्रुतयः सलज्जा इव स्वेषां स्वापेक्षणीयानां च तत्रैव लक्षणामयमपि चरणं साक्षादेव दर्शयितुं स्तुवन्ति-बृहदिति । उपलक्षकं दृष्टान्तमिदं यत्किञ्चिदेतज्जगत्सर्वं बृहद्ब्रह्मस्वरूपस्त्वमेवेत्यर्थः । तद्व्यतिरिक्तस्याप्स्तित्वे बृहत्वहानेरिति भावः । ननु बृहज्जगतोर्वैलक्षण्यं महदेव सत्यं तथाप्येवं घटेतेत्याहुः-अवशेषतया प्रलये तस्यैवावशिष्यमाणत्वेन तदनतिरिक्तत्वप्राप्तेः । तत्र दृष्टान्तः । विकृतेर्घटादेः कारणं मृदेवेति । ननु घटादेरुत्पत्त्यादिकं मृदो दृश्यते न तु जगतो बृहतः, तत्राहुः-बृहतः सकाशात्, उदयास्तमयौ जगतो वदन्ति श्रुतिविशेषाः । कथम्, तर्हि तस्या इव तस्यापि विकारित्वं न हि न इत्याहुः-अविकृताद्विकारशून्यादेव तस्मात्तौ वदन्ति । श्रुतेस्तु शब्दमूलत्वादिति न्यायेन चिन्तामण्यादिदृष्टान्तेन च श्रुतिभिस्तथैवाचिन्त्यशक्तितया तत्प्रतिपादनादिति भावः । विवक्षितमाहुः-अत इति । अस्मादेव हेतोर्ऋषयो वेदाः कोचिदस्मदनुवर्तिनस्तज्जगदेकदेशस्तावक इवापि तथास्मद्विधास्तच्छुद्धस्वरूपगुणाविवेकिन इवापि त्वय्येव बृहति मनोवचनाचरितं तात्पर्याभिधारूपं धृतवन्तः । तत्र तात्पर्यं सर्वस्य कार्यस्य कारणपर्यवसायित्वे स्थिते तन्निर्देशस्यापि तत्पर्यवसानात् । अभिधा च समकारणं त्वां विना तेषामत्यन्ताभावादिति भावः । तदेव स्पष्टयितुमर्थान्तरन्यासमाहुः-कथमिति । पदानि पदार्था घटादिवस्तूनि त्वामेकमुद्दिश्य प्रवृत्तास्वस्मास्वज्ञानामेवान्यचारित्वं भाति न तु विज्ञानमिति भावः । अत्र मुख्याः श्रुतयः सर्वं खल्विदं ब्रह्मेत्यादिकाः । अथ तत्पक्षस्था "इन्द्रो यतोऽवसितस्य राजा ।" इत्यादिकास्तास्वेव दृष्टान्तदर्शिकाः, "वाचारम्भणं विकारः" इत्यादिकाः, अत्रेतिशब्देन सर्वमेव वाक्यं परामृश्यते न तु मृत्तिकैव तस्यैव मुख्यत्वात् । विनापीति विवक्षितार्थसिद्धेः । तस्माद्वाचारभ्यते वाक्प्रवृत्तेरिन्द्रियैर्यत्किञ्चिद्घटादिकं व्यवहारास्पदीक्रियते तत्सर्वं विकारसंज्ञं मृत्तिका तदनन्यभूतमित्यर्थः । इत्येव सत्यं न तु कम्बुग्रीवत्वादिमत्ततोभिन्नमित्यर्थः । 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इति न्यायात् ॥२॥१५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतो वयम् ऋषयः, यत इति पञ्चम्यन्तत्वेऽपि मृदीति दृष्टान्ते सप्तम्यन्तत्वमर्थमात्रापेक्षया, मनोवचनाचरितं तच्छ्रुतीनां तत्स्वरूपेनात्मन एव वा, अन्यत्तैर्व्याख्यातम् । यद्वा, ननु इन्द्रादीनामपि माहात्म्यवर्णनादिना तानपि वेदोऽनुचरेदेव, तत्राहुः-अत इति । तेषां तदीयत्वेन तद्वर्णन एव पर्य्यवस्येदिति भावः । शेषं समानम् । अथवैतत् मद्विधैरुपालब्धं त्वदनुचरणलक्षणं बृहत् ब्रह्म तु जानन्ति मद्विधा इति । तस्य दौर्लभ्यं सूचयन्त्यो माहात्म्यविशेषमाहुः-अवशेषतयाअनश्वरतया हेतुना, अकृतादेव यतो भवन्त्यद्विधा त्वदनुचरणात् त्वद्भजनात् सकाशाद्विकृतेः प्रपञ्चस्यास्तमयौ भवतः, विधिहरौ त्वद्भजनेनैव सृष्टिप्रलयसमर्थावित्यर्थः । तत्र मृदि विकृतेर्घटदेरुदयास्तमयाविति दृष्टान्तेन विधिहरयोस्त्वत्र यत्किञ्चिन्निमित्तमात्रत्वम्, भजनकृतसामर्थ्यमेव मुख्यो हेतुः । यद्वा यतो भजनाद्विकृतेः सञ्चारिसात्त्विकभावादेर्निर्वेदौत्सुक्यादिकम्पपुलकादिरूपविकारस्योत्पत्तिलयौ मृद इव नवस्य पुराणस्य भावादेरुत्पत्तिप्रलयौ, अतस्त्वत्पूजनमाहात्म्यचमत्कारादृषयस्ते मनोवचनाचरितम्, द्वन्द्वैक्यम्, मनोवाक्कर्माणि त्वय्येव

दधुरर्पयामासुः । न च कथञ्चित् कदाचित्तत्र वैफल्यं स्यादित्याहुः-भुवि सर्वार्पणयोग्स्थाने त्वयि नृणां नृभिर्जीवैर्दत्तान्यपि तानि पदानि वस्तूनि व्यवसाया वा कथमयथा (कथमयथा [च] ।) व्यर्थानि भवन्ति, अत एव दधुः ॥१५॥

[ननु कीदृशं तद्वृन्दावनम्, यत्र मे सदा विहारः ? इत्यत आहुः-बृहदिति । उपलब्धं दृष्टम्, एतद्वृन्दावनादिकं बृहद्रूपेण अवयन्ति अनुभवन्ति महाभागवताः । कथम् ? अवशेषतया प्रलयेऽप्यवश्यशिष्यमाणत्वेन, यतो वृन्दावनाद्विकृतेर्विकृतिवत् प्रतीयमानस्य पुष्पफलादेरुदयास्तमयौ प्रादुर्भाव-तिरोभावौ । नन्वायातं तर्हि विकारित्वम्, तत्राहुः-अविकृतात् पुष्पादेर्हेतुत्वेऽपि विकारशून्यात् । प्राकृतोऽपि हि कल्पतरुः स्वर्णरत्नादिकुलं प्रसुवन्नप्यविकारी दृश्यते, किमुत चिद्रूपं श्रीवृन्दावनम् । तच्च स्वर्णरत्नादिकुलं सत्यमेव, तथापि विकारशून्यादेवास्मात् प्रादुर्भवत् पुष्पादिकं सदेव, किन्तु प्रादुर्भाव-तिरोभावाभ्यां विकृतिवत् प्रतीयत इत्यर्थः । मृदि वा, वा-शब्दश्चार्थे, वृन्दावनादिमृत्तिकायां च विकृतेस्त्वणादिरूपाया उदयास्तमयौ अविकृतादिति लिङ्गादिविपरिणामेन मृदीत्यस्य च विशेषणं ज्ञेयम् । तथा च तापनी श्रुतिः (गो० भा० उ० २९) "भूगोलचक्रे सप्त पुर्यो भवन्ति, तासां मध्ये साक्षाद्ब्रह्मगोपालपुरी हीति । यथा वै सरसि पद्मं तिष्ठति, तथा भूम्यां हि तिष्ठति" इति ॥

किञ्च वृन्दावनस्य कृष्णवनत्वेन श्रुत्या प्रतिपादितत्वात् कृष्णवनं नित्यानन्दवनमित्यर्थः । यतस्त्वद्विलासाधारस्य वृन्दावनादिकस्यापि ईदृशं माहात्म्यम्, अत ऋषयो नारदादयः, मनश्च वचनं च, आचरितं च दैहिकचेष्टा, तत्त्वय्येव दधुः, न तु क्वचिदन्यत्र । ननु तर्हि मदवताराः किमुपास्या न स्युः ? तत्राहुः-कथमिति । भुवि दत्तपदानि यथा खर्परपाषाणादिभूपरिणामं न व्यभिचरन्ति, तथा त्वद्भजनमेव तवावतारभजनाय क्वचित्त्वदवतारभजनं च त्वद्भजनाय स्यादित्यर्थः । तव सर्वावताराविर्भावपदत्वात् । यद्वा, ऋषयोऽत्र ऋक्स्वरूपा मद्विधा गोप्यः, शेषं पूर्ववत् । यद्वा, त्वयि तु अयि इति पदद्वयम्, अयि भगवन् ! ऋषयस्तु वेदतात्पर्याभिज्ञाः अतोऽत्र वृन्दावने, सार्व्वविभक्तिकस्तसिः, मनोवचनाचरितं दधुः, मनो दधुर्ध्यानेन, वचनं दधुः स्तवादिना, आचरितं दैहिकचेष्टां दधुः, सर्वतः पर्य्यटनादिना । ननु वृन्दावनादिकं ब्रह्मेत्युक्तं ब्रह्मप्रविष्टानामावृत्तिर्न श्रूयते, वृन्दावनप्रविष्टानां तु ततो निष्क्रान्तिर्विषयभोगश्च दृश्यते, तत् कथं तद्घटतामित्यत आहुः-कथमिति । भुवि वृन्दावनभूमौ न्यस्तानि पदानि कथं व्यर्थानि भवन्ति ? अतस्तेऽपि सर्व्वानर्थक्षयेण त्वत्पदाब्जमेव प्राप्नुयुरिति भावः ॥१५॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उपरितनश्लोकैरयमेवार्थः प्रपञ्च्यते-बृहदित्यादिना । सृष्टेः पूर्वकाले यतः त्वत्तः सृष्टिकाले आविर्भूतम् उत्पन्नम् । प्रभवदेतज्जगत् भवान् स्थितिकाले संरक्षति वा तत्काले अत्ति संहरति । एवम्भूतस्य विकृतैर्विकारं प्राप्तस्य कार्यभूतस्य जगतः सृष्टेः पूर्वकाले एवम्भूतस्य उदयास्तमयौ यतस्त्वत्तः तत्कालगं बृहत् अनन्तगुणयुक्तं ब्रह्म । त्वामेव ऋषयोऽवयन्ति जानन्ति इत्यन्वयः । किम्भूतं ब्रह्म । अवशेषतया सर्वोपरिसंहारे व्यवस्थिततया जगत्कारणत्वादुपलब्धज्ञानम् । कस्मात् । केवलघटद्युतेः पूर्वं मृदिव घटाद्यवस्थारहिता मृदिव भवदिति ब्रह्मप्रलयकाले कार्यावस्थाविधुरमित्यर्थः । एवमप्येतत्कारणावस्थाप्रपञ्चनेन स सर्गरक्षणसंहारहेतुत्वमुक्तम् । जगत्कारणत्वान्मुमुक्षुभिः सेव्यत्वमाह-अत इति । अतः कारणात् ऋषयो ज्ञानिनो मनोवचनाचरितानि ध्यानस्तुतिचेष्टितानि । पदानि मोघानि पतनस्यावर्जनीयत्वात् भुवि निहितानि पदानि अमोघानि पश्चात् पतनाभावात् । एवं मनोवाक्कायचेष्टितानि त्वदाराधनरूपाणि अमोघानि संसारगर्तपतननिवारणानीत्यर्थः ॥१५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अथ कार्यकारणयोरनन्यत्वं दृष्टान्तमुखेनोपपाद्य कारणत्वनियतमुमुक्षूपास्यत्वमाहुः-बृहदिति । अवशेषतया सर्वोपसंहारेण व्यवस्थिततातया जगत्कारणत्वादुपलब्धं सृष्टिकाले आविर्भूतमुत्पन्नमेतज्जगद्बृहत् ब्रह्मेत्यवयन्त्यामनन्ति ।

"सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" "ऐतदात्म्यमिदं सर्वम्" "सर्वं खल्विदं ब्रह्म" ॥ वेदान्ताः अवगमयन्तीत्यर्थः ।

अवयन्त्यवशेषतयेति पाठान्तरम्। तदोपलब्धमुत्पन्नमेतज्जगत् स्थितिकालेऽवति रक्षत्यन्तकालेऽत्ति संहरति। ततोऽवशेषतया कारणत्वाद्बृहदेवेदं जगदिति । सर्वं खल्विदं ब्रह्म तज्जलानि । ' इतिवत्सहेतुको(नन्यत्व) निर्देशः । एतदुपपादयन्ति । यस्य विकृतेः कार्यस्य यत इति तन्त्रेण पञ्चमीसप्तम्यर्थयोः सार्वविभक्तिकस्तसिः यत उदयः उत्पत्तिः यतो यस्मिंश्च लयः सा विकृतिः तत्कारणात्मिका ततोऽनन्या मृदिवाविकृता यथा तावत् अविकृता पिण्डाकारा मृत् ततो घटशरावादिरूपविकृता तदनन्या तद्वत्। अविकृतादिति पाठन्तरं यदा तदा अविकृतात् यतो यस्मात् यस्याः विकृतेः कार्यस्य उदयास्तमयौ सा विकृतिस्तदनन्या मृदिव। यथा तावदविकृतान्मृत्पिण्डादुदिता घटशरावादिरूपा मृत् तदनन्या तद्वदित्यर्थः ।

"यथा सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातं स्यात् ॥"

इत्यादिका श्रुतिरिहानुसन्धेया। तत्र हि घटेन जलमाहरेदित्यादि वाग्व्यवहारपूर्वकजलाहरणादिकार्यार्थं मृत्पिण्डस्य घटादिनाम कम्बुग्रीवादिरूपविकारसंस्पर्शमभिधाय मृत्पिण्डस्य तद्विकारघटादेश्चानन्तत्वमुक्तम् अतः सर्वकारणत्वात्त्वयि ऋषयो मनोवचनाचरितानि ध्यानस्तुतिचेष्टितान्यदधुः । त्वामेव निदध्युः तुष्टुवुः त्वदर्थेऽचेष्टन्त स्म चेत्यर्थः । तत्र सदृष्टान्तं हेतुमाहुः- कथमिति। आकाशे निहितानि पदानि यथा मोघानि भवन्ति पतनस्यावर्जनीयत्वात्। भुवि निहितानि नृणां पदानि तु कथं अयथा भवन्ति कथं मोघानि भवन्ति मोघानि न भवन्त्येव । पश्चात्पतनाभावात् । एवं मनोवाक्कायचेष्टितान्यमोघानि त्वदाराधनरूपाणि अमोघानि सांसारिकतापनिवारकाण्यन्यविषयाणि ध्यानादीनि तु न तन्निवारकाणि प्रत्युत पतनावहानि अतस्त्वय्येवादध्युरित्यर्थः । द्वा। एवं जग(तस्त्व)त्कारकत्वेन त्वदनन्यत्वाज्जगद्विषयाः सर्वे वैदिकाः शब्दास्तात्पर्यतः शक्त्या च त्वय्येव वर्तन्त इत्याहुः । अत इति। ऋषयो वेदाः तदुक्तमृषिणेत्यादौ ऋषिशब्दस्य वेदे प्रयोगान्मनोवचनाचरितम्। मनस आचरितं तात्पर्यं वचनाचरितमभिधानं च त्वय्येव दधुः धृतवन्तः । ननु तत्तदर्थविषयाणां कथमभिधायकत्वमित्याशङ्कायां दृष्टान्तमुखेन तदुपपादयन्ति-कथमिति । प्रासादपर्यङ्कादिषु दत्तानि निहितानि नृणां पदानि कथं भुव्ययथाऽदत्तानि भवन्ति। प्रासादपर्यङ्कादिधारकत्वात्तस्यामेव यथा दत्तानि भवन्त्येवं प्रकृतिपुरुषान्तरात्मतया तद्गतनामरूपनिर्वाहकत्वात्त्वय्येव तत्तदर्थशरीरके निर्वाहके च वेदा वर्तन्त इत्यर्थः । अपृथक्सिद्धविशेषणवाचिशब्दानामाकृत्यधिकरणन्यायेन विशेष्यपर्यन्ताभिधानं मुख्यमेवेत्यभिप्रायः ॥१५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

"बृहद्धि दृष्टमवशेषितं यत्स्वरूपमीशस्य तमोऽधिकस्य सर्वाधिकत्वेन तमो हि दुर्गा ततस्तथैनं विबुधा यथाऽगुः ॥"

इत्यौद्दालकायनश्रुत्यर्थनिबद्धोऽयं श्लोकः बृहदुपलब्धमिति । तथा हि 'अविकृते तमसि तम आसीत्तमसा गूढमग्र' । इति श्रुतेः ॥

नित्यतमोविषये त्वमुदगा उत्कृष्टत्वं गतः । मूलप्रकृतेरपि त्वमधिकोऽसि यतः अतो बृहत्त्वेन 'बृह वृद्धावि'ति धातोः त्वेन एतत्स्वरूपमुपलब्धं वेदेषु दृष्टं कथमत्राह-अवशेषतयेति । इत इदमधिकमितोऽपीदमधिकमिति सर्वाधिकत्वेन प्रमाणसिद्धत्वेनेत्यर्थः ।

"स एष रसानां रसतमः परमपराध्योऽष्टमो यदुद्गीथः ॥" इति श्रुतिः —

"द्वितीयार्थे तृतीयार्थे पञ्चम्यर्थे च सप्तमी। चतुर्थ्यर्थे च सम्प्रोक्ता विषयेऽपि च तां विदुः ॥"

इति महाव्याकरणवचनात् विषयपञ्चम्यौ युज्येते। कीदृशस्त्वम्। अविकृतः विकाररहितः अतः ऋषयो ब्रह्मादिज्ञानिनस्त्वं इत्येतदर्थपराणि त्वयि तानि मनोवचनाचरितमित्येकवद्भावविवक्षयैकवचनम्। मनोवचनाचरितानि दधतामिति दधुः । धृतवन्तः। पुंसां त्वयि तानि मनआदीनि कथमयथा अतद्विषयाणि भवन्तीति दधुः। तत्र दृष्टान्तः-नृणां पदं भूमौ निक्षिपामीति नानां दत्तानि निहितानि यथा भूमेरन्यत्र न भवन्ति तथेत्यर्थः । जलवृक्षादेराधारशक्तिमत्त्वेऽपि भूम्यन्तर्भावान्न पृथगुक्तिः । बृहत्त्वेन दधुरिति वा —

"अतः शब्दश्च हेत्वर्थे तथेत्यर्थे च वर्तते। उभयार्थे च भवति यथाशब्दविदो विदुः ॥"

इति वचनात् अनिर्देश्यमप्येकदेशेन निर्दिष्टं भवतीत्युक्तं कथमयथाभवन्तीत्यनेन यथा सर्वां भूमिमसञ्चरन्नप्येकदेशसञ्चारेण भूसञ्चारीभवति तथेति —

निरपेक्षबृहत्त्वस्य ज्ञानाज्ज्ञानं भवेत्परम् । बृहत्त्वमेव तु गुणैः सर्वैरुद्दिश्यते यतः ॥

इति सामान्यसंहितायाम् ॥२॥१५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तत्र केवलब्रह्मनिर्देशपरा अपि श्रुतयः स्वतात्पर्यं श्रीभगवत्येवं निर्दिशन्ति-बृहदिति ॥१५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु भोः श्रुतयः ! वसुदेवपुत्रोऽहं कुत एवं मामसदृशं स्तुथेत्याहुः-बृहदुपलब्धमेतदित्यादि । एतत्तव उपलब्धम् अनुभूतम् ऐश्वर्यमिति यावत् ब्रह्म तवैश्वर्य्यमेव ब्रह्म अतो ब्रह्मवैभवत्वात् त्वं ब्रह्मैव न तावद्वसुदेवसुतत्वेन यादव एव इति अवयन्ति जानन्ति मनीषिण इत्यर्थः । किं रूपेण जानन्ति अवशेषतया अवशिष्यमाणत्वेन इदं वैभवं तव सार्वकालिकं सदैकरूपत्वात् यतो वैभवात् विकृतो उदयास्तमयौ ब्रह्माण्डमण्डलानामुत्पत्तिप्रलयौ । कीदृशात् । अविकृतात् सदैकरूपात् । तत्र दृष्टान्तः मृदिव मृद इव पञ्चम्यर्थे सप्तमी वा इवार्थः । यद्वा । मृदोर्विकृतेर्मृदिव मृत्तिकेव सत्यमित्युक्तेः अत्र न केवलमस्माकमेव वचनमेव प्रमाणं ब्रह्मादिव्यवहारोऽपि प्रमाणमत्रेत्याहुः-अत ऋषय इत्यादि । ऋषयो ब्रह्माद्यास्त्वयि श्रीकृष्णे मनश्च वचनं च आचरितं प्रधन विदधुः त्वदतिरिक्तमदृष्ट्वा त्वय्येव सर्वतोभावेन भक्ता इत्यर्थः । ननु, तर्हि कथमेवमहं नृलोके नृलोकवदाचरन् स्यामित्याशङ्क्याहुरर्थान्तरन्यासेन कथमित्यादि । नृणां मध्ये भुवि दत्तपदानि कृतव्यवसायानि वस्तूनि अयथाभवन्ति स्वभावं त्यजन्ति बहुमानाद्बहुवचनं भुवो भाग्यात् भक्तानुकम्पनाच्च भुवि क्रीडसि तेन ते कृपाविशेष एव न तु ते महिमाहानिरित्यर्थः ॥१५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

भोः श्रुतयः ! कथमेवं भ्राम्यथ ? ब्रह्मैव तत् तथाविधम्, नाहमित्याह- बृहदुपलब्धमित्यादि । एतत्तवोपलब्धमनुभूतं परमैश्वर्यं बृहद्ब्रह्म इतः परं नान्यद्ब्रह्म इत्यवयन्ति, जानन्ति सुधिय इत्यर्थः । अवशेषतया अवशिष्यमाणतया, यतो बृहदिति उक्तिः, अतो मुनयस्त्वय्येव मनोवचनाचरितं दधुः ॥१५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु च यूयं न केवलं मामेव परमेश्वरं बुद्ध्वे अपि तु ''इन्द्रो यातो वसितस्य राजे''ति यातो जङ्गमस्य अवसितस्य स्थावरस्य च इन्द्र एव राजेन्द्रमपि अग्निर्मूर्धा दिव इत्यग्निमपीति चेत् सत्यम् जगत्कारणस्यैव परमेश्वत्वरनियमनादिन्द्रादीनां च जगत्कारणत्वदर्शनात् । त्वमेव सर्वजगत्कारणं परमेश्वर इन्द्रादयस्तु त्वद्दत्तयत्किंचिदैश्वर्या एवेत्याहुः-बृहदिति । एतदुपलब्धं श्रोत्रनेत्रादिभिरवगतमिन्द्रादिकं सर्वं बृहद्ब्रह्मैव अवयन्ति जानन्ति । कुतः ? अवशेषतया ब्रह्मणस्तवैवावशिष्यमाणत्वेनेत्यर्थः । अत्र दृष्टान्तः । वाशब्दः उपमार्थः । विकृतेर्घटादेर्यथा मृदि उदयास्तमयौ तथैव यतस्त्वत्त एवोपादानकारणादस्य विश्वस्य उदयास्तमयौ भवतः तर्हि मम विकारित्वमायातम् । न अविकृतात् विकारशून्यात् । एतदद्भुतमेव यत्तवोपादानत्वेऽपि विकाराभावः । यदुक्तं गजेन्द्रेण —

''नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाये''ति ।

व्याख्यास्यते च श्रीधरस्वामिभिः । उपादानत्वेऽपि मृदादिवद्विकाराभाव इति अत एवेदमविक्रियमाण एव सृजसि हंसि पासीति देवैरप्युक्तम् । वयमपि ब्रूमः । यद्वा । प्रकृतेस्त्वच्छक्तित्वात्तस्या जगदुपादानत्वादेव तव जगदुपादानत्वम् । यदुक्तं त्वयैव-

प्रकृतेर्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहमिति ॥

किन्तु तस्य

सर्वशास्त्रप्रसिद्धिः । अ

अत्र खल्वर्थान्तरन्यास

अदत्तानि भवन्ति अतो

सर्वकारणं परमेश्वरं प्रि

श्रुतयः । अत्र सत्यशब्दे

''यदुपादाय पू

ततश्चास्याः श्रुते

कारणं भवतीति ॥२॥१५

ननु 'इन्द्रो यातो

पद्यानुवादः

श्रुतिषु वर्णितमि

त्वदुपगाः★ श्रुत

★ अपरा अन्यप्र

त्रापि दत्तं पदं भुवि कथम

सङ्क्षिप्तसार्थान्वयः -

हे भगवन् ! एतत्

अविकृतात् । यतो ब्रह्मणः स

मनोवचनाचरितं ध्यानकीर्तना

भुवि कथमयथा भवन्ति अद

लब्धं प्रतीयमानमिन्द्रादि सर्व

कुतः ? यतो बृहतः त्वत्त ए

कारशून्यात् इत्यद्भुतकारणत

दादिविकृतिर्मृदेव । अतः ऋष

ः प्रतिपादयामासुः न पृथग्

कुड्यप्रेङ्खनादिषु वा दत्तानि

रजातमाकाशादि वस्तु प्रति

हस्तिपादे निमग्नाः, इति न्य

नमित्यनेन कीर्तनमुक्तम् आच

सार्वविभक्तिकः तसिः तेन प

एवमनुचरेन्निगम इत्यनेन

देवता आकाशो नामरूपयो

न्यप्येकदेशसञ्चारेण

उपलब्धम् अनुभूतम्
ति अवयन्ति जानन्ति
त्पत्वात् यतो वैभवात
ान्तः मृदिव मृद इव
मेव वचनमेव प्रमाणं
नं च आचरितं प्रधना
के नृलोकवदाचरन्
अयथाभवन्ति स्वभावं
वेशेष एव न तु ते

। एतत्तवोपलब्धमनुभूतं
ा, यतो बृहदिति उक्तिः,

तो जङ्गमस्य अवसितस्य
त्वरनियमनादिन्द्रादीनां च
:-बृहदिति । एतदुपलब्धं
वावशिष्यमाणत्वेनेत्यर्थः ।
दस्य विश्वस्य उदयास्तमयौ
ऽपि विकाराभावः । यदुक्तं

क्रियमाण एव सृजसि हरसि
पादानत्वम् । यदुक्तं त्वयैव -
।

किन्तु तस्याविकारित्वेऽपि न ते विकारित्वम् । तस्यास्त्वत्स्वरूपशक्तित्वाभावात् । त्वत्स्वरूपस्य मायातीतत्वेन प्रसिद्धिः । अतः कारणादृषयस्त्वय्येव मनोवचनाचरितं ध्यानकीर्तनपरिचर्यां दधुः । न तु पृथग्विकारेष्विन्द्रादिष्वित्यर्थः । र्थान्तरन्यासः । कथमयथेति नृणां भूतलवर्तिनां पदानि यत्र कुत्रापि दत्तानि निःक्षिप्तानि भुवि कथमयथा भवन्ति भवन्ति अतो यथा मृत्पाषाणेष्टकादिषु दत्तानि पदानि भुवं न व्यभिचरन्ति तथैव यत्किमपि विकारजातं वदन्तो वेदास्त्वामेव परमेश्वरं प्रतिपादयन्तीत्यर्थः । अत्र वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । सर्वं खल्विदं ब्रह्मेत्याद्याः अत्र सत्यशब्देन कारणमेव व्याख्यातम् । यदुक्तं भगवता

"यदुपादाय पूर्वस्तु भावो विकुरुते परम् । आदिरन्तो यदा यस्य तत्सत्यमभिधीयते ॥"

ततश्चास्याः श्रुतेरयमर्थः — आरम्भणं विकारः कार्यं भवति वाचा यस्य नामधेयं घटादिकं भवति मृत्तिकेत्येव सत्यं भवतीति ॥२॥१५॥

गूढार्थदीपिनी

नु 'इन्द्रो यातोऽवसितस्य राजा' इत्यादिना इन्द्रादयः प्रतिपाद्यन्ते कथमहमिति चेदत्राहुः-बृहदिति ।

पद्यानुवादः

श्रुतिषु वर्णितमिन्द्रियमादि यत् त्वमसि शेषतया मृदि वाऽत्र सत् ।
त्वदुपगाः★ श्रुतयोऽप्यपरा यथा क्व च न दत्तमदत्तपदं भुवि ॥२॥

★ अपरा अन्यप्रतिपादनपरा अपि श्रुतयः त्वदुपगाः त्वामुपगच्छन्तीति त्वत्प्रतिपादनपरा एवेत्यर्थः । यथा क्व च यत्र त्तं पदं भुवि कथम् अदत्तपदं भवति न कथमपि तथेत्यन्वयः ।

सङ्क्षिप्तसार्थान्वयः —

हे भगवन् ! एतत् उपलब्धं दृष्टं सर्वमपि बृहद् ब्रह्म त्वमेव इति अवयन्ति ऋषयो जानन्ति अवशेषतया । कुतः ? त् । यतो ब्रह्मणः सकाशात् सर्वस्य उदयास्तमयौ भवतः । वा उपमार्थः । यथा विकृतेर्घटादेर्मृदि तद्वत् । अत ऋषयो वेदा चरितं ध्यानकीर्तनादि त्वयि त्वन्निमित्तमेव दधुः प्रतिपादयामासुः, न पृथग्विकारेषु । यतो नृणां यत्र कुत्रापि दत्तपदानि मयथा भवन्ति अदत्तानि भवन्ति अतो यत्किमपि विकारजातं प्रतिपादयन्तो वेदास्त्वामेव प्रतिपादयन्तीत्यर्थः । एतत् प्रतीयमानमिन्द्रादि सर्वं बृहद् ब्रह्मैव तच्च त्वमित्येव श्रुतयोऽवयन्ति । कथम् ? ब्रह्मणस्तवैव अवशेषतया अवशिष्यमाणत्वेन । यतो बृहतः त्वत्त एव सकाशात् सर्वस्य उदयास्तमयौ उत्पत्तिलयौ भवतः । सर्वोपादानत्वात् । अथापि अविकृतात् त् इत्यद्भुतकारणत्वं तवेत्यर्थः । अत्र दृष्टान्तः । वा यथा विकृतेर्घटादेर्मृदि उदयास्तमयौ भवतस्तद्वत् तथा सति तिमृदेव । अतः ऋषयो मन्त्राः तद्द्रष्टारो वा मनसा आचरितं ध्यानं, वचनाचरितं कीर्तनं च त्वय्येव त्वन्निमित्तमेव दधुः पादयामासुः न पृथगिन्द्रादिविकारेष्वित्यर्थः । युक्तं चैतत् । यतो नृणां भूतलचारिणां यत्र कुत्रापि मृत्पाषाणेष्टकादिषु दिषु वा दत्तानि स्थापितानि पदानि भुवि कथमयथा भवन्ति अदत्तानि भवन्ति, न कथमपि, अतो यत्किमपि काशादि वस्तु प्रतिपादयन्तो वेदास्तत्तद्द्वारा मुख्यविषयं सर्वान्तर्यामिणं सर्वकारणभूतं त्वामेव प्रतिपादयन्ति । सर्वे निमग्नाः, इति न्यायादित्यर्थः । यद्वा । मनोवचनाचरितमिति समाहारैकवचनम् । मनो दधुरित्यनेन ध्यानमुक्तम् । कीर्तनमुक्तम् आचरितमित्यनेन पूजनं चोक्तम् । एवं च मनोवाक्कायैर्मुमुक्षुभिः भगवत आराधनीयं सूचितम् । यत कः तसिः तेन पञ्चमीसप्तम्योरुभयोरपि तन्त्रेण निर्देशः, यस्मादुत्पत्तिः यस्मिंश्च लय इत्यर्थः ॥२॥ ॥१६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

चरेन्निगम इत्यनेन 'तत्तु समन्वयात्' इति सूत्रार्थ इत्युक्तस्तत्रानुपपत्तिशङ्कायां समाधत्त उत्तरश्लोकेन । ननु, 'वायुर्वै आकाशो नामरूपयोर्निर्वहिता' 'हिरण्यगर्भः समवर्तताग्रे' 'शिव एव केवलम्' इत्यादिना वेदस्य विश्वतोमुखत्वं

प्रसिद्धम् । कथं मदेकपरत्वमिति चेन्न । तत्तच्छब्दैर्योगवृत्त्या तदन्तर्यामितया वा त्वमेव प्रतिपाद्यस इत्याह-एतदुपलब्धम् । वाक्यैकरूढिवृत्त्यान्यपरत्वेन प्रसिद्धं वाय्वाकाशब्रह्मरुद्रेन्द्रादिसर्वं शब्दजातं बृहत् ब्रह्म । त्वामेव श्रुतयोऽवयन्ति निश्चिन्वन्ति । कुतः ? अवशेषतया । अवगतः शेषो यस्मात् तस्य भावस्तत्ता तया । पूर्णतया निरतिशयबृहत्त्वेनेति यावत् । अनेन ब्रह्मशब्दस्य निरुक्तिरुक्ता । बृहि 'बृंहि वृद्धौ' इत्यस्माद्धातोः । अथ कस्मादुच्यते परं ब्रह्म बृहीति बृंहयति चेति श्रुतेः । स्वरूपगुणशक्तिभिर्निरतिशयबृहत्तयेत्यर्थः । तदपेक्षया वस्तुजातस्य सातिशयत्वेनापूर्णत्वात् । तथा च श्रुतयः —

"यो वायौ तिष्ठन् य आकाशे तिष्ठन् एको ह वै नारायण आसीन्न ब्रह्मा नेशानः ।"

"तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥"

'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । स ब्रह्मा । स शिवः । सेन्द्रः । सोऽक्षरः परमः स्वराट् ।

'यमिन्द्रमाहुर्वरुणं यमाहुः ॥' इत्याद्याः ॥

समन्वयाध्याये स्पष्टमेतत् व्याख्यातम् । निरुक्तिमुखेन प्रतिपाद्यलक्षणमुखेन दृढयति-यतो विकृतेरुदयास्तमयौ । य कारणाद्विकृतेः कार्यस्याकाशादेः ब्रह्मरुद्रेन्द्रादेश्च जन्मप्रलयौ भवतः । उपलक्षणं चैतत् । जन्मस्थितिभङ्गा भवन्तीत्यर्थः ।

'यतो वा इमानि भूतानि जायन्ते ।' इत्यादिश्रुतेः । 'नारायणाद्ब्रह्मा जायते । नारायणाद्रुद्र' इत्यादेश्च —

'यतः सर्वाणि भूतानि प्रभवन्ति युगागमे । यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । एष प्रकृतिरव्यक्तकर्ता चैव सनातनः ॥

परं च सर्वभूतेभ्यस्तस्माद्वृद्धतमोऽच्युतः । बुद्धिर्मनो महद्वायुस्तेजोऽम्भः खं मही च या ॥

चतुर्विधं च यद्भूतं सर्वं कृष्णे प्रतिष्ठितम् । चतुर्विधानां भूतानां त्रिषु लोकेषु माधवः ॥

प्रभवश्चैव सर्वेषां निधनं च युधिष्ठिर ॥'

इत्यादिस्मृतेश्च । 'जन्माद्यस्य यत' इत्यादिन्यायाच्च । ननु, कथं ब्रह्मणः सृष्ट्यादेरभ्युपगमः । न तावदारम्भवादे न्यायमतप्रवेशात् । नापि सङ्घातादि बौद्धसिद्धान्तापत्तेः । नापि परिणामः । कृत्स्नप्रसक्तिर्निरवयवश्रुतिव्याकोपप्रसङ्गात् । परिशेषात् एवाकामेनापि त्वया अङ्गीकरणीयस्तथा चास्माकमिष्टापत्तिरित्याशङ्कायां 'स्वयमात्मानमकुरुत' 'आत्मकृतेः परिणामा इत्यादिशास्त्रोक्त एवास्माकं वैदिकानां सिद्धान्तः । ननु, तथाप्युक्तदोषस्तदवस्थ एवेति चेत्तत्राह-अविकृतात् । विकारस्तु अप्रच्युतस्वरूपात् परिणामे कथं निर्विकारतेति चेच्छृणु । परिणामोऽत्रशक्तिविशेषः । शक्तिविशेषेणैव तद्गतं विश्वं विस्तार तदुपसंहारेण च संहरति । ऊर्णनाभिरिव तन्तुसन्तानोपसंहारः । तथा च श्रुतिः —

'यथोर्णनाभिः सृजते गृह्णते च । यथा सतः पुरुषात्केशलोमानि ।

यथा पृथिव्या ओषधयः सम्भवन्ति । तथाक्षरात्सम्भवतीह विश्वम् ॥' इति ॥

'सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥'

इति वाक्यानि विवर्तवादस्य निर्मूलतां द्योतयन्तीति भावः । न च 'वाचारम्भणं विकारो नामधेय'मित्यादिश्रुतिमूल विवर्तवादः प्रामाणिकोऽयं न निषेद्धुं शक्य इति वाच्यम् । तत्रैव विकारशब्दप्रयोगेण तस्य निरस्तत्वात् । न हि विवर्तवादे विकारत्वं भवताभ्युपगम्यतेऽपि तु भ्रान्तत्वम् । तथाभूतप्रयोगस्य क्वाप्यदर्शनान्निर्मूलत्वमेव सिद्ध्यति विवर्तवा अस्मत्पक्षे तु —

'प्रकृतिं पुरुषं चापि प्रविश्यात्मेच्छया हरिः । क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्यौ ॥'

इति विक्षेपपर्यायान्तरं क्षोभशब्दं कण्ठरवेणोच्चारितवान् भगवान् पराशरः । तत्र दृष्टान्तः-मृदिव घटादिवदित्यर्थः । ऋषयो मन्त्राभिमानिनो देवतास्त्वयि मनोवचनाचरितं दधुः ध्यानपूर्वकं तव कीर्तनं चक्रुः । ध्येयत्वेन ज्ञेयत्वेन च प्रतिपा

'एको देवः' इत्यादि
भवन्ति । अत आकाशा
त्वामेव प्रतिपादयन्ति
व्याख्यातम् ॥१५॥

ततो ब्रह्मप्रतिपा
इति मध्ये भूतभौतिकसृ
ब्रह्मावबोधस्थिरीकरणार्थं
सिद्धं श्रुत्यनुभावाभ्यां तदा
साक्षाद्भगवत्प्रतिपादिका इ
ब्रह्मविदो वेदाश्च । नन्वेतत
चेत्तत्राह-अवशेषतयेति । अ
यदेवावशिष्यते तस्यैव मूल्य
क्रयविक्रयादिः । तथा विक
नन्वशेष एव कथं ब्रह्मणः नि
ब्रह्मेति चेत्तत्राह-यत उदयास
मृदादिदृष्टान्तेन ब्रह्मावशेषोऽङ्गी
कुण्डलमिति लोका जानन्ति
अविकृता एव स्युः, ब्रह्मत्वात्
दृष्टान्तमाह-मृदिवेति । यथा मृद
चेत्तत्राह-अविकृतादिति । अवि
इत्यर्थः । कुण्डले द्रव्यान्तरसम्ब
दधुरिति । ऋषयो वेदास्तद्द्रष्टारो
त्वय्येव विषये भवतीति त्वय्येव
ज्ञानमर्थे शब्दः तत्करोतीति, 'अ
कार्त्स्न्येनाभिव्यक्तस्य जगतः ब्रह्म
लोप इति सिद्ध्यति । नन्वसत्यस्
कथमयथा भवन्ति भूमिं न व्यभिच
भ्रमप्रतीतपदार्थानामपि ब्रह्मत्वात् त
सत्तारूपेण विभावे भगवदिच्छायां
भावादन्यथाबुद्ध्यापि मनोवचनास
"सत्यो हरिः समस्तेषु भ्रम

एतदुपलब्धं प्रतीतम् इन्द्रादि
अस्तमयौ उत्पत्तिविनाशौ न विकारि

देवः' इत्यादिमन्त्राश्च । युक्तमेवैतत् । यतो यत्र कुत्रापि वृक्षकुड्यप्रेङ्खनादिषु जनैर्दत्तानि पदानि पृथिव्यामदत्तानि कथं
। अत आकाशादीनपि कयाचिद्विवक्षया प्रतिपादयन्तो वेदास्तत्तद्द्वारा मुख्यविषयं सर्वान्तर्यामिणं सर्वाधिष्ठानं सर्वधीप्रवर्तकं
प्रतिपादयन्ति । सर्वेषां तवैव कार्य्यत्वात् नियम्यत्वादाश्रितत्वात् पारतन्त्र्याच्च । अनेन तत्तुसमन्वयाधिकरणं
ख्यातम् ॥१५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो ब्रह्मप्रतिपादनार्थं प्रवृत्ताः श्रुतयः 'यतो वा इमानि भूतानि जायन्ते ॥ तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः ॥'
मध्ये भूतभूतिकसृष्टिं सम्पादयन्ति ब्रह्मनिरूपणार्थं तासां किं ब्रह्मपरत्वं वा जगतो वा ब्रह्मत्वप्रतिपादकत्वं अध्यारोपापवादेन
बोधस्थिरीकरणार्थं माहात्म्यप्रतिपादनार्थं वेत्यादिनानासन्देहे तन्निरासार्थमाह-बृहदुपलब्धमेतदिति । यद्वा विश्वस्य ब्रह्मत्वं
श्रुत्यनुभावाभ्यां तदाऽन्याः श्रुतयः तदेकवाक्यतया योजिता एव भवन्तीति भगवन्माहात्म्यप्रतिपादनद्वारा सिद्धार्थप्रामाण्याः
भगवत्प्रतिपादिका इति फलिष्यति । तदर्थं प्रथमं जगतो ब्रह्मत्वं प्रतिपाद्यते । एतदुपलब्धं चराचरं जगत् बृहदित्येवावयन्ति
विदो वेदाश्च । नन्वेतदनित्यानात्मदुःखात्मकं ब्रह्म तु तद्विपरीतमिति युक्त्या बाधात् प्रत्यक्षविरोधाच्च कथं ब्रह्मत्वमिति
आह-अवशेषतयेति । अवशिष्यत इत्यवशेषः तस्य भावस्तत्ता लोके यदवशिष्यते तस्यैव व्यपदेशः । यथा काचादिसहितसुवर्णे
अवशिष्यते तस्यैव मूल्यादौ व्यपदेशः । यथा वा घृतार्थिनः तंदुलार्थिनो वा दुग्धधान्यादिषु यदेवावशिष्यते तत्त्वेनैव व्यवहारः
क्रयादिः । तथा विकारसहिते जगति विकारेष्वपगतेषु ब्रह्मैवावशिष्यत इति ब्रह्मत्वेनैव व्यपदिशन्ति । धान्यमन्नत्वेनैव ।
एव कथं ब्रह्मणः निरवशेषतयापि नाशसम्भवात् । न ह्यग्निना जल आवर्त्यमाने सर्वशोषे किञ्चिदवशिष्यते तस्मात्कथं
चेत्तत्राह-यत उदयास्तमयाविति । यतो वा इमानीत्यादिषु श्रुतिषु ब्रह्मण एव जगदुत्पद्यते ब्रह्मणि च लीयते । अतो
दृष्टान्तेन ब्रह्मावशेषोऽङ्गीकर्तव्यः । यथा सुवर्णाज्जाते कुण्डले सुवर्णे च लीने अवश्यं सुवर्णमेववावशिष्यते, अतः सुवर्णमेव
लमिति लोका जानन्ति । ननु जगत उदयास्तमयावेव न त्वसतः सत्ताध्वंसो वाङ्गीकर्तुं शक्य इति चेत्तत्राह-विकृतेरिति ।
कृता एव स्युः, ब्रह्मत्वात् । अत उदयास्तमयावेव विकारजातस्याङ्गीकर्तव्यौ तथा विकारेषु गतेषु ब्रह्मैवावशिष्यत इति । तत्र
आह-मृदिवेति । यथा मृदवशिष्यते तथा वा पार्थिवमुपलब्धं मृदेव । ननु मृदेव कथमवशिष्यते कपालादीनामवशेषदर्शनादिति
आह-अविकृतादिति । अविकाराद्धेतोः । न हि विकृतं स्थिरं भवति । ततः कपालस्यापि विकृतत्वादविकृता मृवेवावशिष्यत
। कुण्डले द्रव्यान्तरसम्बन्धोऽपि कदाचिद्भवेदिति मृदेव दृष्टान्तीकृता । ननु किमतो यद्येवं एवमेतदित्याह-अत ऋषयो
। ऋषयो वेदास्तद्द्रष्टारो वा त्वय्येव मनोवचनाचरितं दधुः । यत् किञ्चिन्मनसा विभाव्यं यत् किञ्चिद्वा अनूद्यं तत्सर्वं
विषये भवतीति त्वय्येव दधुः । मनस्तु मनोरथं भावयतीति मिथ्याविषयमेव भवति । तथा वागपि अत्यन्ता सत्यपि
शब्दः तत्करोतीति, 'अनृतं वाचा वदति अनृतं मनसा ध्यायति ।' इति श्रुतेः । यत्र वाङ्मनोविषयस्यापि ब्रह्मत्वं तत्र
नाभिव्यक्तस्य जगतः ब्रह्मत्वे कः सन्देह इत्यर्थः । तेन ब्रह्मविदां सर्वे व्यवहारा ब्रह्मपरा एवेति न केनापि कर्मणा तेषां
सिद्ध्यति । नन्वसत्यस्य कथं ब्रह्मत्वमिति चेत्तत्राह-कथमयथा भवन्तीति । यत्र क्वचित्स्थापितानि पदानि भुवि
भवन्ति भूमिं न व्यभिचरन्तीत्यर्थः । भूमावेव पतन्ति । भ्रमादपि स्वीकृतो विषयः परमार्थतो भगवानेव भवतीत्यर्थः ।
पदार्थानामपि ब्रह्मत्वात् तत्त्वेनैव तस्य भानात् । न हि ब्रह्मातिरिक्तो भासते । तन्तुभ्यः पटरूपेणाविर्भावे शुक्तिकायां वा
विभावे भगवदिच्छायां कश्चन विशेषोऽस्ति कार्यस्यापि प्रावरणस्य सुखस्य वा तुल्यत्वात् । अतो मूलभूतस्य
यथाबुद्ध्यापि मनोवचनास्थापनं ब्रह्मविषयमेव भवतीत्यर्थः ।

सत्यो हरिः समस्तेषु भ्रमभानेष्वपि स्थिरः । अतः सन्तः समस्तार्थे कृत्यमेव विजानते ॥" ॥२॥१५॥

श्रीसुबोधिनीसारः

तदुपलब्धं प्रतीतम् इन्द्रादि सर्वं बृहत् ब्रह्मेत्येवावयन्ति जानन्ति । कथम् । अवशेषतया । कुतः । यत उपादानकारणात्
उत्पत्तिविनाशौ न विकारित्वं तस्य अविकृतात् विवर्ताधिष्ठानत्वेन निर्विकारात् विकृतेर्घटादेरुदयास्तमयौ मृदि वा इव

अतः कारणात् ऋषयो वा मनोवचनाचरितं तात्पर्यं वचनेनाचरितमभिधानं च त्वयि दधुः न पृथगविकारेषु "सर्वे वेदा यत्पदमामनन्ति" इति श्रुतेः । भुवि मृदादिषु नृणां दत्तानि निक्षिप्तानि पदानि अयथाऽदत्तानि कथं भवन्ति ॥२॥१५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु तत्र तत्रेन्द्राग्निवायुसूर्यादीनामपि श्रुतिप्रतिपादनदर्शनात् कथं "सर्वे वेदा यत्पदमामनन्ति" इति सिद्धान्तः सङ्गच्छे तत्राहुः-बृहदुपलब्धमेतदिति । एतदुपलब्धं दृष्टं स्थावरजङ्गमात्मकं सर्वं बृहत् ब्रह्म त्वमेवेत्यवयन्ति श्रुतयो जानन्ति । तत्र हेतुमाहुः-अवशेषतयेति । सर्वविनाशेऽप्यवशिष्यमाणत्वेनेत्यर्थः । तत्र हेतुमाहुः-यत इति । यत उपादानभूताद्ब्रह्मणो विकृतेः विकारमात्र सर्वस्य कार्यस्योदयास्तमयौ उत्पत्तिप्रलयौ भवतः । अत्र यत इति तसेः सार्वविभक्तिकत्वात्तन्त्रेण पञ्चमीसप्तम्योरुभयोः प्रयो ज्ञेयः । यस्मादुत्पत्तिः यस्मिंश्च प्रलयो भवतीत्यर्थः । अत्र दृष्टान्तमाह-मृदिवेति । यस्या मृदः सकाशाद्विकृतेर्घटादिकार्यस्योत्पत्तिस्तस्यामेव लयश्च भवति, अतो मृदेवावशिष्यते, कार्यावस्थायामपि वस्तुतः सैवोपलभ्यते च तथैव ब्रह्मापीत्यर्थः । तथा च श्रुतिः- "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । सर्वं खल्विदं ब्रह्म" इत्यादिः । नु तर्हि यथा पाकादिना मृदो विकारित्वं भवति, तथा ब्रह्मणोऽपि विकारित्वं स्यात्, इत्याशङ्क्याह-अविकृतादिति । यथ मणिमन्त्रकामधेनुयोग्यादिभ्यः पदार्था जायन्ते, तथापि मण्यादयो न विकृता भवन्ति तथेत्यर्थः । अत उपादानत्वेन सर्वात्मकत्वादे ऋषयो मन्त्रास्तद्द्रष्टारो वा त्वय्येव मनोवचनाचरितं दधुः मनसा आचरितं तात्पर्यं वचनाचरितमभिधानं च धृतवन्तः, निश्चितवन्तो न पृथक् विकारेष्वित्यर्थः ।

"येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो । सर्व एव भजन्ति त्वां सर्वदेवमयेश्वरम्" इत्यादिवचनात् ॥ एतदे दृष्टान्तेनोपपादयति-कथमयथेति । नृणां भूचराणां यत्र कुत्रापि दत्तानि निक्षिप्तानि पदानि भुवि कथमयथा भवन्ति कथमदत्तानि भवन्ति ? तथा च यथा मृत्पाषाणेष्टकादिषु दत्तान्यपि पदानि भुवं न व्यभिचरन्ति तथा यत्किमपि विकारजातं वदन्तो वेदास्त्वाम सर्वकारणतया परमार्थभूतं प्रतिपादयन्तीत्यर्थः ॥१५॥२॥

अन्वितार्थप्रकाशिका

ननु कथं श्रुतयो मामेव प्रतिपादयन्ति —

"यत इन्द्रो जातोऽवसितस्य राजा । अग्निर्मूर्द्धादिवः, सोमः पवते जनिता मतीनाम्" इत्यादिश्रुतय इन्द्रादीन प्रतिपादयन्तीत्याशङ्क्याहुः-बृहदिति ॥ घटादिविकृतिर्मृत् एव इतीव अवशेषतया हेतुना ऋषयः एतदुपलब्धं बृहदेव अवय अविकृतात् यतो बृहतो विकृतेः उदयास्तमयौ भवतः अतस्ते ऋषयः मनोवचनाचरितं त्वय्येव दधुः । यतः नृणां कुत्रापि दत्तपदा भुवि अयथा कथं भवन्ति इत्यन्वयः । यथा लोका अपि घटादिमृद्विकारजातं मृदेव इति जानन्ति तथैव अवशेषत सर्वनाशेऽप्यवशिष्यमाणतया हेतुना ऋषयो मन्त्रद्रष्टारो वा एतदुपलब्धं दृष्टं श्रुतं च स्थावरजङ्गमात्मकमिन्द्रादिकं चसर्वं बृ ब्रह्मत्वमेवेत्यवयन्ति जानन्ति । उपादानत्वेऽपि अविकृतात् मणिमन्त्रादिवत्स्वयं विकाररहिताद्यत उपादानभूतात् ब्रह्मणो विकृ विकारमात्रस्य सर्वस्य कार्यस्योदयास्तमयौ उत्पत्तिप्रलयौ भवतः । अविकृतादिदित्यनेन विकारवतो मृदादेर्ब्रह्मणो वैल सूचितम् । अत्र वा शब्द उपमार्थः । यथा घटादेर्मृदि उदयास्तमयौ तद्वदिति स्वामिपादाः । अत्र यत इति तसेः सार्वविभक्तिकत्वा पञ्चमीसप्तम्योरुभयोः प्रयोगो ज्ञेयः । यस्मादुत्पत्तिः यस्मिंश्च प्रलयो भवतीत्यर्थः । तथा च श्रुतिः —

"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ।" "एकं सद्विप्रा बहुधा वदन्ति !" "सर्वं खल्विदं ब्रह्म" इत्या अत उपादानत्वेन सर्वात्मकत्वादेव ऋषयो मनोवचनाचरितं त्वय्येव दधुः । मनसा आचरितं तात्पर्यं वचनाचरितमभिधानं धृतवन्तः निश्चितवन्तः । न पृथक् विकारेष्वित्यर्थः ।

"येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो । सर्व एव भजन्ति त्वां सर्वदेवमयेश्वरम् ॥"

इत्यादिवचनात् सर्वस्य कार्यस्य कारणं त्वां विनात्यन्ताभावात्तत्तद्वर्णनं त्वय्येव पर्यवसिति मिति भावः । तत्र

कथमयथेति । नृणां भूच
मृत्पाषाणेष्टकादिषु दत्तान्य
परमार्थभूतं प्रतिपादयन्ति ।

ननु वेदास्तु क्वचि
भगवन् ! तव स्वरूपमादौ प्र
तदनु प्राविशदिति श्रुत्युक्तरीत
अन्तर्याम्यन्वयद्रष्टारो मुनयः अ
यतः अन्वयव्यतिरेकप्राप्तात् ब्र
मृदिति लुप्तसप्तम्यन्तं छान्दस
कारणादृषयो मन्त्रास्तद्द्रष्टारो
समाहारद्वन्द्वः । मनोवाक्कायकम
दत्तानि पदानि पृथिव्यां धृतानि
कुत्रापि धृतानि पदानि वस्तुत
शरीरमित्यादिश्रुतिभिरुक्तस्य चि
प्रतिपादयन्तीत्यर्थः ॥ यद्वा ॥ अ
कर्तव्यः । ऋषयः नारदव्यास
सकलजनकल्याणार्थं वसुदेवकश
चोक्तं प्रथमस्कन्धे —

"स वै किलायं पुरुषः पु

अतो बृहत्त्वज्ञानाद्धेतोः तनि
कथमयथा भवन्ति भुवि दत्तपदा
पूर्ववत् तथा तवावतारान्वर्ण

अथ कार्यकारणयोरनन्तत्वं
सर्वोपसंहारेण व्यवस्थिततारूपा या
प्रत्यभिमुखवृक्षाङ्कुरवद्वर्तमानमिति
इति न्यायमालम्ब्येत्थं निर्देशः । बृहद्ब्रह

"सन्मूलाः सोम्येमाः सर्वाः प्र
उपासीत" ॥

इत्यादयो निगमा अवगमयन्ती
एतदुपपादयन्ति । विकृतेः यस्य
उदय उत्पत्तिः यतो यस्मिंश्च लयः स
विकार मृत् ततो घटशरावादिरूपेण

यथेति । नृणां भूचराणां यत्र कुत्रापि दत्तानि निक्षिप्तानि पदानि भुवि अयथा अदत्तानि कथं भवन्ति । तथा च यथा पाणेष्टकादिषु दत्तान्यपि पदानि भुवं न व्यभिचरन्ति तथा यत्किमपि इन्द्रादिविकारजातं वदन्तो वेदास्त्वामेव सर्वकारणतया भूतं प्रतिपादयन्ति ॥१५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु वेदास्तु क्वचिदेव मत्प्रतिपादनं कुर्वन्ति बहुशस्त्विन्द्राग्न्यादीनामेवेतीमामाशङ्कां परिहरन्त्य आहुः–बृहदिति ॥ हे वन्! तव स्वरूपमादौ प्रलयेऽवशेषतया शिष्यमाणतया स्थितिमिति शेषः । व्यतिरेकभावेनावशिष्टमभूदित्यर्थः । पश्चात्तत् सृष्ट्वा प्राविशदिति श्रुत्युक्तरीत्या स्वसृष्टं ब्रह्मेन्द्रादित्र्यन्वयत्वेन प्रविष्टम् इन्द्राद्यैक्येनोपलब्धं दृष्टम् एतदन्वयप्राप्तं बृहत् ब्रह्म ऋषयः यन्वयदृष्टारो मुनयः अवयन्ति अवगच्छन्ति जानन्त्यन्ये त्विन्द्रादीनेव जानन्तीत्यर्थः । इन्द्रादिषु प्रवेशे सत्यपि अविकृतात् अन्वयव्यतिरेकप्राप्तात् ब्रह्मणो विकृतेर्घटादेः कुलालादिति शेषः । मृदि वा मृत्तिकायामिव । वा-शब्द इवार्थे ॥ यद्वा ॥ लुप्तसप्तम्यन्तं छान्दसम् । इवशब्दः सादृश्यार्थः । प्रकृताविति शेषः । सर्वस्योदयास्तमयौ उत्पत्तिनाशौ भवतः अतः ऋषयो मन्त्रास्तद्द्रष्टारो वा ॥ ऋषिशब्द उभयत्रान्वेति । त्वय्येव मनोवचनाचरितं मनश्च वचनं च आचरितं चेति द्वन्द्वः । मनोवाक्कायकर्माणीत्यर्थः । दधुः धृतवन्तः । न पृथग्भूतेन्द्रादिष्वित्यर्थः । अत्र दृष्टान्तः कथमयथेति ॥ नृणां भुवि नि पदानि पृथिव्यां धृतानि पदानि कथं केन प्रकारेण अयथा भवन्ति ॥ पृथिव्यामधृतानि भवन्ति ॥ यथा काष्ठपाषाणादौ यत्र पि धृतानि पदानि वस्तुतः पृथिव्यामेव धृतानि भवन्ति । तथा यस्यात्मा शरीरं यस्य प्रकृतिः शरीरं यस्यादित्यः मित्यादिश्रुतिभिरुक्तस्य चिदचिद्वस्तुशरीरिणस्तव शरीरभूतानिन्द्रादीन् वर्णयन्तो वेदास्त्वामेव सर्वान्तर्यामिणं सर्वकारणं पादयन्तीत्यर्थः ॥ यद्वा ॥ अविकृतात् निर्विकारात् यतः परब्रह्मणः उदयास्तमयौ विकृतेर्मृदिवाऽस्यवाक्यस्यार्थः पूर्ववत् यः । ऋषयः नारदव्यासशुकादयः वा गोपालतापनीयादीनां मन्त्रा आदौ तदवशेषतया स्थितं पश्चात् सृष्टौ सत्यां जनकल्याणार्थं वसुदेवकश्यपदशरथपुत्रतामुपलब्धं प्राप्तं कृष्णादिस्वरूपम् एतत् बृहत् परब्रह्म अवयन्ति जानन्ति ॥ तथा प्रथमस्कन्धे —

"स वै किलायं पुरुषः पुरातनो य एक आसीदि"ति ॥

अतो बृहत्त्वज्ञानाद्धेतोः तस्मिंस्त्वयि मनोवचनाचरितं दधुः ॥ ननु मदवतारवर्णने कृते सति मम वर्णनं कथं भवेदित्याहुः–यथा भवन्ति भुवि दत्तपदानि नृणामिति ।" अस्यार्थः —

पूर्ववत् तथा तवावतरान्वर्णयन्तो ऋषयो वेदाश्च त्वामेव सर्वावतारधारकं प्रतिपादयन्तीत्यर्थः ॥१५॥२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ कार्यकारणयोरनन्तत्वं दृष्टान्तमुखेनोपपादयन् कारणत्वनियतं मुमुक्षूपास्यत्वमाहुः ॥ बृहदिति ॥ अवशेषतया ब्रह्मणः रण व्यवस्थिततारूपा याऽवशेषता तया, उपलब्धं सृष्टिकाले आविर्भूतमुत्पत्त्यभिमुखतां प्राप्तं भूमिगतबीजकारणत मुखवृक्षाङ्कुरवद्वर्तमानमिति भावः । एतज्जगत्, वेदैकवीक्ष्यत्वादेतदिति निर्देशः । यद्वा, "अवश्यभाविनि भूतवदुपचारः" मालम्ब्येत्थं निर्देशः । बृहद्ब्रह्म इति, अवयन्त्यामनन्ति ।

"सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" "ऐतदात्म्यमिदं सर्वम्" "सर्वं खल्विदं ब्रह्म तज्जलानिति सीत" ॥

त्यादयो निगमा अवगमयन्तीत्यर्थः ।

दुपपादयन्ति । विकृतेः यस्य कार्यस्य यतः, उदयास्तमयौ भवतः, यत इत्यत्र तन्त्रेण पञ्चमीसप्तम्योः सार्वविभक्तिकस्तसिः, त्पत्तिः यतो यस्मिंश्च लयः सा विकृतिः कारणात्मिका कारणतोऽनन्या, मृदिव अविकृता च । यथा तावदविकृता मृत् ततो घटशरावादिरूपेण विकृता अपि सा तदनन्या तद्वत् । अविकृतादिति पाठन्तरं यदा तदा, अविकृतात् यतो

यस्मात्, यस्याः विकृतेः कार्यस्य, उदयास्तमयौ, भवतः। सा विकृतिः, तदनन्या मृदिव। यथा तावदविकृतान्मृत्पिण्डादुदित घटादिरूपा मृत् तदनन्या तद्वदित्यर्थः।

"यथा सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातं स्यात्॥"

इत्यादिका श्रुतिरत्रानुसन्धेया।

अतः सर्वकारणत्वाद्धेतोः, ऋषयः त्वयि, मनोवचनाचरितं ध्यानस्तुतिचेष्टितानि, दधुः आदधुः। त्वामेव निदध्युः तुष्टुवुः त्वदर्थे चेष्टन्ते स्म चेत्यर्थः। तत्र सदृष्टान्तं हेतुमाहुः। कथमिति। आकाशे निहितानि पदानि मोघानि भवन्ति पतनस्यावर्जनीयत्वात्। भुवि, नृणां दत्तपदानि निहितानि पदानि तु, कथं अयथा भवन्ति, मोघानि न भवन्त्येव। पश्चात्पतनाभावात्। एवं त्वदाराधनरूपाणि मनोवाक्कायचेष्टितान्यमोघानि सांसारिकतापनिवारकत्वात्। अन्यविषयाणि ध्यानादीनि तु न तन्निवारकाणि, प्रत्युत पतनावहान्यतस्त्वय्येवादधुरित्यर्थः। यद्वा। जगतः त्वत्कारकत्वेन त्वदनन्यत्वात्तद्विषयाः सर्वे वैदिकाः शब्दास्तात्पर्यतः शक्त्या च त्वय्येव वर्तन्त इत्याहुः। अत इति। अतः सर्वकारणत्वाद्धेतोः, ऋषयो वेदाः, "तदुक्तमृषिणा" इत्यादौ ऋषिशब्दस्य वेदे प्रयोगात्। मनश्च वचनं च ताभ्यामाचरितं, द्वन्द्वान्ते श्रूयमाणत्वादाचरितशब्दस्य मनोवचनाभ्यां सम्बन्धः। मनसा आचरितं तात्पर्यं वचनाचरितमभिधानं च, त्वयि दधुः धृतवन्त इत्यर्थः। ननु तत्तदर्थविषयाणां कथं तदभिधायकत्वमित्याशङ्कायां दृष्टान्तमुखेन तदुपपादयन्ति। प्रासादपर्यङ्कादिषु, नृणां, दत्तपदानि, कथं भुवि, अयथा अदत्तानि भवन्ति। पृथिव्य एव प्रासादपर्यङ्कादिधारकत्वात्तस्यामेव यथा दत्तानि भवन्ति, एवं प्रकृतिपुरुषान्तरात्मतया तद्गतनामरूपनिर्वाहकत्वात्तत्तदर्थशरीरके निर्वाहके च त्वय्येव वेदाः प्रवर्तन्त इत्यर्थः। अपृथक्सिद्धविशेषणवाचिशब्दानामाकृत्यधिकरणन्यायेन विशेष्यपर्यन्ताभिधानं मुख्यमेवेत्यभिप्रायः ॥२॥ ॥१६॥

योगिरामानुजाचार्यकृतसरला व्याख्या

जगत्कारणत्वेन मुमुक्षूपास्यत्वमेवाहुः–बृहदिति। एतत्परिदृश्यमानं प्रपञ्चं मृदिवावशेषतयोपलब्धम् घटशरावादिविकाराणां नाशे अन्ते यथा मृण्मात्रमवशिष्यते तथा सर्वप्रपञ्चस्य नाशे अवशिष्यत्वेन रूपेण ब्रह्ममात्रमुपलब्धं ज्ञानं श्रुतिष्वित्यर्थः। अवशिष्य इत्यवशेषः। तस्य भावः अवशेषतया। तया उपलब्धमित्यनेनान्वयः। 'अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः परे देवे एकीभवति।' इत्यादिवचनमत्रानुसन्धेयम्। एवंरूपं बृहत् परम्ब्रह्म बृहति बृहन्ति तस्मादुच्यते परं ब्रह्मेति निरुक्त अनन्तज्ञानशक्त्यादिविशिष्टमपरिच्छिन्नं त्वमेव ब्रह्मपदवाच्यमिति ऋषयः अवयन्ति जानन्ति। ब्रह्मणः अवशिष्टत्वेन हेतुना प्रप ब्रह्मणस्सकाशात् विकृतेः विकाररूपस्य कार्यमात्रस्य उदयास्तमयौ उत्पत्तिप्रलयौ भवतः। अत्र यतः इति तसेः सार्वविभक्तिकत्व तन्त्रेण पञ्चमीसप्तम्योरुभयोः प्रयोगो ज्ञेयः। यस्मादुत्पत्तिः यस्मिंश्च लयो भवतीत्यर्थः। तथा च ब्रह्मोपादानकत्वात् ब्रह्मावशेषकत्वा एतज्जगत् ब्रह्मस्वरूपमेवेत्यर्थः। यथा मृदुपादानकं मृदवशेषकं च घटशरावादिकं मृत्स्वरूपादानातिरिक्तम् तद्वदिति भावः। तथा च श्रुतिः–

'वाचारम्भणविकारो नामधेयं मृत्तिकेत्येव सत्यम्। सर्वं खल्विदं ब्रह्म।' इत्यादि।

ननु तर्हि पाकादिना मृदो यथा विकारित्वं भवति तथा ब्रह्मणोऽपि विकारित्वं स्यादित्याशङ्क्याहुः–अविकृतादिति विकाररहितात् यथा मणिमन्त्रकल्पकामधेनुयोग्यादिभ्यः पदार्थाः जायन्ते मण्यादयः न विकृताः भवन्ति तद्वदिति भावः। तु ध्येयम्' इत्यादिश्रुत्युक्तरीत्या जगत्कारणभूतं त्वामेव ऋषयः मोक्षार्थं मनोवाक्कायैरुपासन्ते इत्याहुः–अत इति। जगत्कारणत्वाद्धेतोः ऋषयः मनोवचनाचरितं ध्यानस्तुतिचेष्टितानि त्वयि ईश्वरे दधुः समर्पितवन्तः। मनोदधुरित्येके। भवति। वचनं दधुरित्यनेन कीर्तनमुक्तं भवति। आचरितं दधुरित्यनेन भगवदर्चनमुक्तं भवति। मनोवचनाचरितमिति समाहारैकवचनम्। एतेन मनोवाक्कायैर्मुमुक्षुभिराराधनीयत्वं भगवतः उक्तं भवति –

'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तमस्यसि कौन्तेय ! तत्कुरुष्व मदर्पणम्॥' इति।

'मन्मना भव म

इतिवचनात् भ
पृथिवीनिहितपददृष्टान्तेना
भवन्ति। आकाशजलादौ
पतिष्यन्तीति भावेनाहुः–क
भवन्ति। कथमिति काकु
अयथा निष्फलानि न भवन्
पतनहेतुकत्वाभावादमोघं भ

'येऽन्येऽरविन्दाक्ष

आरुह्य कृच्छ्रेण परं

इति श्रीमद्गीतोपनिष

'अन्तवत्तु फलं तेषां

'कौन्तेय प्रतिजानीहि

यात इति या प्रापणे इत

"अग्निर्मूर्द्धादिवःककु
ष्ठः। पृथिव्याः पतिः जाठरादि
भतात्त्विकोऽन्यथाभावो विवर्तः
वत्। तत्सर्वं नामधेयमेव केवलम्
बोधयति। 'सर्वं खल्विदं ब्रह्मे'त्य
हुः। तज्जलानिति तस्माद्ब्रह्मणो ज
तोः शान्तः सन् वक्ष्यमाणैस्तद्गुणैः स
ब्रह्मणि पर्यवसानरूपम् अभिधानं
करणः। इत्यादिरूपाम् अत्र कार्यवण

ननु कथं श्रुतयः मामेव प्रतिपा
विशिष्यमाणत्वेन एतदिन्द्रादि सर्वं बृह
त्पत्तिप्रलयौ अविकृतात् बृहतः सका
रि मृत्तिकायां भवतः। तद्वत्। अतः क
चरितं तात्पर्यं वचनाचरितम्। त्वयि
अयथा अदत्तानि भवन्ति। अतो य
ति वेदास्त्वामेव सर्वकार्यं कारणे प
स्य, 'या-प्रापणे' इत्यस्य शतृप्रत्यय
"अग्निर्मूर्धा दिवः ककुत्पतिः पृ

'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामैवैष्यसि कौन्तेय सदा मद्भावभावितः ॥'

इतिवचनात् भगवन्तं विहाय इन्द्रादीनामुपासनन्तु अयथार्थफलम् । भगवदुपासनं तु अयथार्थफलं न भवतीति निहितपददृष्टान्तेनाहुः-यथा दृढाधारताशून्ये आकाशजलादौ निहितानि पदानि अयथाभवन्त्येव निहितदेशात् पतितानि आकाशजलादौ दृढाधारत्वाभावात् भुवि निहितानि पदानि तु भूमेः दृढाधाररूपत्वेन भूमिसकाशात् आकाशादिव न ...तीति भावेनाहुः-कथमिति। नृणां भुवि धरायां दत्तानि स्थापितानि पदानि अयथा मोघानि व्यर्थव्यापाराणीति यावत् कथं कथमिति काकुः । अमोघप्रयोजनान्येव भवन्तीत्यर्थः । तथा दार्ष्टान्ते परमात्मनि समर्पितानि मननकीर्तनार्चनादीनि निष्फलानि न भवन्तीत्यर्थः। भगवव्द्यतिरिक्ते निहितानि मननादीनि यथार्थसमीचीनफलशून्यान्येवेत्यर्थः। भगवदुपासनं तु ...कत्वाभावादमोघं भवति भगवव्द्यतिरिक्तोपासनं तु पतनहेतुकत्वात् मोघमेव भवतीति पूर्वमप्युक्तम्, यथा —

'येऽन्येऽरविन्दाक्षविमुक्मानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधो नादृत युष्मदङ्घ्रयः ॥'

इति श्रीमद्गीतोपनिषदि च तथैवोक्तम्।

'अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसा'मिति।

'कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यती'ति च ॥१५॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

यात इति या प्रापणे इत्यस्य शतृप्रत्ययात् षष्ठ्यन्तम्। अवसितस्येति अवपूर्वस्य षिञ् बन्धन इत्यस्य क्तप्रत्ययाद्रूपम्। "अग्निर्मूर्द्धादिवःककुत्पतिः पृथिव्या अयम्।" इति अयमग्निरादित्यरूपेण दिवसो द्युलोकस्य मूर्धा भवति। ककुत् पृथिव्याः पतिः जाठरादिरूपेण भूर्लोकस्य पालक इत्यर्थः। एवम्भूतत्वेन स्वर्गपृथिव्यादीनां शिरस्त्वपालकत्वादिरूपेण ...कोऽन्यथाभावो विवर्तः । यथा रज्ज्जां भुजग इति । वाचारम्भणं वाचाऽऽरभ्यमाणम् उच्चार्यमाणं वागालम्बनमिति तत्सर्वं नामधेयमेव केवलम्। न तु विकारो नाम वस्त्विति परमार्थतो मृत्तिकेत्येव सत्यं वस्तु। इति। परमकारणब्रह्ममात्रसत्यत्वं ...। 'सर्वं खल्विदं ब्रह्मे'त्यस्य तज्जलानीति शान्त उपासीतेति वाक्यशेषः । सर्वमिदं विश्वम्। खलु निश्चये। ब्रह्मैव तत्र तज्जलानिति तस्माद्ब्रह्मणो जातं तज्जम्। तस्मिन्नेव लीयत इति तल्लम्। स्थितिसमये तस्मिन्नेवानिति जीवतीति तदन्। इति ...नः सन् वक्ष्यमाणैस्तद्गुणैः सर्वज्ञत्वादिभिरुपासीतेत्यर्थः। तात्पर्यम्, निखिलकार्यस्य कारणे पर्यवसानात् इन्द्रादिनिर्देशस्यापि पर्यवसानरूपम् अभिधानं मुख्यां योगवृत्तिम् इन्दति परमैश्वर्यं प्राप्नोतीति इन्द्रः । अग्रे नयतीत्यग्निः । आवृणोतीति इत्यादिरूपाम् अत्र कार्यवर्णनस्य कारणपर्यवसाने ॥१५॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

नु कथं श्रुतयः मामेव प्रतिपादयन्ति। यतो बह्वीन्द्रादीनीश्वरत्वेन प्रतिपादयन्ति तत्राह-एतदुपलब्धं दृष्टं किं तत् अवशेषतया ...त्वेन एतदिन्द्रादि सर्वं बृहद् ब्रह्मैव भवतीति अवयन्ति जानन्ति श्रुतयः। कुतः। यतो विकृतेः सर्वस्य उदयास्तमयौ ...यो अविकृतात् बृहतः सकाशात् भवतः सर्वोपादानत्वात्। वाशब्द उपमार्थः। मृदिवायथा घटादिविकृतेरुदयास्तमयौ। ...कायां भवतः। तद्वत्। अतः कारणादृषयो मन्त्राः मन्त्रदर्शिनो वा मनोवचनाचरितं त्वय्येव दधुः न पृथग्विकारेषु। मनसा ...त्पर्यं वचनाचरितम्। त्वयि चात्मनीत्यर्थः। अत्र निदर्शनं कथमिति नृणां भूचराणां यत्र क्वापि दत्तानि पदानि कथं किं ...था अदत्तानि भवन्ति। अतो यथा मृत्पाषाणादिषु दत्तानि पदानि भुवि भुवं न व्यभिचरन्ति तथा किं मयि विकारजातं ...त्वामेव सर्वकार्यं कारणे परमार्थभूतं वदन्तीत्यर्थः । अत्र श्रुतयः 'इन्द्रो यातोऽवसितस्य राजे'ति। अर्थश्च - यातः 'या-प्रापणे' इत्यस्य शतृप्रत्ययान्तरूपम्। अवसितस्य स्थावरस्य। अपूर्व 'षिञ्-बन्धने' इत्यस्य रूपम्। तथा —

"अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाꣳरेताꣳसि जिन्वति ॥" इति ॥

अयं परावररूपेणावस्थितोऽग्निर्दिवो मूर्धा, अहश्च सूर्यात्मना द्युलोकस्य मूर्धा भवति। ककुभां पतिः। तथा पृथिव्याः पतिः पालकः। अपां पयसां रेतांसि वीर्याणि जृण्वति उद्रिक्तभावं नयति तथा "सूर्य आत्मा जगतस्तस्थुषश्चे"ति "सोमोऽस्माकं ब्राह्मणानाः राजा।" इत्यादिभिश्चैवम्भूतत्वेनेन्द्रादयः प्रतिपाद्यन्ते। भेदप्रतिपादनपरेयं श्रुतिः। यद्यप्येवम्भूतास्तथापि सर्वान्तर्यामित्वात् त्वामेव प्रतिपादयन्तीत्यर्थः। मृदिवेत्यस्योदाहरणमाह–वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। सर्वं खल्विदं ब्रह्म तज्जलानिति। शान्त उपासीतेति अर्थः। वाचारम्भणं वचनालम्बनमिति। यावद्वस्तु नामधेयमेव केवलं विकारो नाम वस्त्वन्तरमस्ति। परमार्थतो मृत्तिकेत्येव सत्यम्। तत्रोत्पत्तिप्रलयत्वात्। तथा कार्यस्य प्रपञ्चस्य परमकारणब्रह्ममात्रत्वं बोधयति-सर्वं खल्विति। खलु निश्चये। इदं सर्वं जगत् नामरूपविकृतं प्रत्यक्षादिविपर्ययं ब्रह्मैव भवति। कथम्। तज्जलानि। तस्माद्ब्रह्मणे जातं तज्जम्, तस्मिन् ब्रह्मणि लीयत इति तल्लम्, तस्मिन्नेव स्थितिकालेऽनिति प्राणिति चेष्टते इति अन् तज्जलान्। इदं जगदित्यस्य विशेषणम्। यस्मात्त्रिष्वपि कालेषु ब्रह्मतयाऽवशिष्टं तव्द्यतिरिक्तं किञ्चिन्नास्ति, तस्मात्सर्वमिदं ब्रह्मातः शान्तः रागद्वेषादिरहितः उपासीत। वाचारम्भणं नरदेवतिर्यगादिनामधेयं मात्रपरमकारकं ब्रह्म सत्यमिति ज्ञात्वोपासनां कुर्वीत। अभेदोपासनपरेयंश्रुतिः। स्वामिचरणानां 'द्रुहिणवह्निरवीन्द्रमुखामराज्जगदिदं न भवेत्पृथगुत्थितम्। बहुमुखैरपि मन्त्रगणैरजस्त्वमुरुमूर्तिरतो विनिगद्यसे।

द्रुहिणवह्निरवीन्द्रमुखा अमरा जगदिदं न पृथगुत्थितं भवेत्। किन्तु त्वत्त एव उद्देश्यविधेयभावत्वादिकवचनम् अतः कारणान्मन्त्रगणैरपि बहुमुखैरजोऽपि बहुमूर्तिस्त्वं निगद्यसे। ब्रह्मेन्द्रादिरूपेण त्वमेव प्रतिपाद्यस इत्यर्थः ॥१५॥

श्रीनिवाससूरिकृततत्त्वदीपिका

एवं जगत्कारणत्वं मोक्षप्रदत्वं तदुपयिकगुणपूर्णत्वं शास्त्रप्रमाणकत्वं चोक्तम्। उपरितनश्लोकैरप्ययमेवार्थः प्रपञ्च्यते बृहदित्यादिना अवशेषतया सर्वोपसंहारे व्यवस्थिततया जगत्कारणत्वादुपलब्धं सृष्टिकाले आविर्भूतमुत्पन्नं प्रभवदेतज्जगत् स्थितिकाले भवानवति। अन्तकाले संहरति। विकृतेः कार्यभूतस्य जगत उदयास्तमयौ सृष्टिप्रलयौ यतस्तत्कारणं बृहत् अनन्तगुणपू ब्रह्म। त्वामेव ऋषय अवयन्ति जानन्ति। सृष्टेः पूर्वकाले घटाद्युत्पत्तेः पूर्वं घटावस्थारहिता मृदिव भवति। ब्रह्मप्रलयका कार्यावस्थाविधुरमित्यर्थः। 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म' 'वाचारम्भणं विकारो नामधेयं मृत्तिके सत्यमि'त्यादिश्रुतेः। नन्वेवं सति घटशरावादिकारणभूतमृत्पिण्ड इव मय्यपि सविकारित्वं किमित्यत्राह–अविकृतात्। निर निरञ्जनम्।

'सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः। एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः।'

इत्यादिश्रुतेः। विभक्तनामरूपावस्थानर्हसूक्ष्मचिदचिद्वस्तुविशिष्टं ब्रह्मैव कारणमित्यर्थः। तथा चोक्तं गीतोपनिषदि–

"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा। मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ॥
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥" इति ॥

एवमेतत्कारणावस्थाप्रपञ्चेन सह सर्गरक्षणसंहारहेतुत्वमुक्तम्। जगत्कारणत्वान्मुमुक्षुभिः सेव्यत्वमप्याह-अत इति अतः कारणात् मनोवचनाचरितं ध्यानस्तुतिचेष्टितानि। त्वयि दधुः। कथमिति। यत आकाशे निहितानि पदानि मे पतनस्यावर्जनीयत्वात्। पाद्मे उत्तरखण्डे —

"यथा धृत्वा शुनः पुच्छन्तर्तुमिच्छेत्सरित्पतिम्। तथा त्यक्त्वा हरिं सेव्यमन्योपासनया भवेत् ॥"

भुवि निहितानि पदानि अमोघानि पश्चात्पतनाभावात् एवं मनोवाक्कायचेष्टितानि त्वदाराधनरूपाणि अमोघा संसारपतननिवारणानीत्यर्थः। उक्तं च भगवता —

"अनन्यांश्चिन्तयन्तो मां ये जनाः पर्युपासते। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥"

इति। अन्ये तु, त्वदवज्ञानात्संसारे पतन्तीति तदप्युक्तं तेनैव —

"अवज
मोघाशा

प्रलयकाल
मनुष्यादि नाम रू
रूपसे जो यह जग
जिससे उत्पत्ती होतं
उत्पन्न और उसी में
देव मनुष्यादि नाम
है इसी कारण उक्त
ब्रह्म हि सृष्टिस्थ स्थू
में ऋषियोंने मन वच
आपके हि अर्थ कर्म
पांव रखने पर पतन
विषयन के ध्यानादिक
के हेतु होने से निष्फल
प्रतिपादक वचनों की प्र
पर धरे हुए मनुष्यों के प
लिए पांव धरा जाए पर
अन्नात्मा शरीरी हो इस

इति तव सूरयस्त्र्य
किमुत पुनः स्वधा

हे त्र्यधिपते, सूरयः, तव,
तदा, ये, पुनः) स्वधामविधुताश
(वक्तव्यमित्यन्वयः) ॥१६॥

त्वमेव सर्वनिगमगोचर इ
त्रिगुणमायामृगीनर्तक ! सूरयो विवेवि

"अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानन्तो मम भूतमहेश्वरम् ॥
मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥" इति ॥१५॥

कृष्णप्रिया

प्रलयकालमें सूक्ष्मचेतन एक विशिष्ट कारण से ब्रह्म ही अवशेष रहता है । इसीसे सृष्टिकालमें वहि ब्रह्मदेव मनुष्यादि नाम रूप सम्पन्न स्थूल चेतनाचेतन विशिष्ट रूपसे प्रकाशित होता है इसी कारण इस समयमें चेतना ससे जो यह जगत् प्रतीत होता है सो ब्रह्म हि है । इस प्रकार श्रुति प्रतिपादन करती है क्योंकि जिस कार्य की जिससे उत्पत्ती होती है, जिसमें लय होता है वह कार्य कारण रूप हि देखा जाता है जैसे विकार शून्य मृत्पिण्डसे त्पन्न और उसी में लय होने वाली घटादि रूप मृत्तका मृत्पिण्ड हि है उससे भिन्न नही । इसी प्रकार प्रलयकालमें व मनुष्यादि नाम रूप शून्य चेतना विशिष्ट कारण रूप ब्रह्म में इस कार्यरूप प्रपंच शरीर का ब्रह्म का लय होता है इसी कारण उक्त कार्य रूप उक्त कारणरूप ब्रह्म हि है । उससे भिन्न नहिं । अर्थात् प्रलयस्थ सूक्ष्म चेतना विशिष्ट ब्रह्म हि सृष्टिस्थ स्थूल चेतना विशिष्ट होकर प्रकाशित हो रहा है इसी लिये परम कारण स्वरूप आ ही के विषय में ऋषियोंने मन वचन चेष्टाओं को धारण किया है, अर्थात् ऋषियोंने आपका हि ध्यान आप की हि स्तुति और आपके हि अर्थ कर्म किया है क्योंकि आकाशमें पांव रखने पर पतन होने से निष्फल हो जाता है और पृथ्वीमें पांव रखने पर पतन की सम्भावना नहि, इसलिये पांव का धरना निष्फल नहि होता है इसी प्रकार संसार के विषयन के ध्यानादिक पतन के हेतु होने से निष्फल होते है और आप के विषयमें ध्यानादिक संसार के निवृत्ति के हेतु होने से निष्फल नहीं होते । अथवा आप परम कारण हो इसी लिये वे दोनों मन के तात्पर्य का और चेतना तिपादक वचनों की प्रतिपादन रूप शक्त का आप के हि विषयमें निश्चय किया है । जैसे महल अथवा शय्या र धरे हुए मनुष्यों के पांव पृथ्वी पर नहिं हो सकते क्योंकि महल का तथा शय्या का धरक तो पृथ्वी हि है इस र पांव धरा जाए पर वा पृथ्वी पर ही धरा कहा जाता है, इसी प्रकार सब चेतना के आप परम कारण है और त्मा शरीरी हो इस लिए सर्वे खल्विदं ब्रह्म इत्यादि वेद वचन आप का हि प्रतिपादन करते है ॥१५॥

इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपक्षकथामृताब्धिमवगाह्य तपांसि जहुः ।
किमुत पुनः स्वधामविधुताशयकालगुणाः परम भजन्ति ये पदमजस्रसुखानुभवम् ॥१६॥

कर्दमक्षमा

हे त्र्यधिपते, सूरयः, तव, अखिललोकमलक्षपणकथामृताब्धिम्, अवगाह्य, तपांसि, जहुः ।, हे परम (यदि, कथाश्रवणमात्रेणैव, पुनः) स्वधामविधुताशयकालगुणाः, सन्तः, अजस्रसुखानुभवम्, ते, पदं, भजन्ति, ते, तपांसि, जहति, इति, किमुत मित्यन्वयः) ॥१६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्वमेव सर्वनिगमगोचर इति सतां प्रवृत्त्या द्रढयति–इति तवेति । त्वमेव सर्वकारणत्वेन परमार्थ इति कृत्वा भो त्र्यधिपते ! गीनर्तक ! सूरयो विवेकिनस्तवाखिललोकमलक्षपणकथामृताब्धिं सकलजनवृजिननिरसनहेतुं कीर्तिसुधासिन्धुमवगाह्य

निषेव्य तपांसि तपन्तीति तपांसि पापानि दु:खानि वा जहुस्त्यक्तवन्त: त्वदीयकथामात्रेण यदा पापत्यागस्तदा किमु वक्तव्यं ये पुन: स्वधामविधुताशयकालगुणा: स्वधाम्ना स्वरूपस्फुरणेनैव विधुतास्त्यक्ता आशयगुणा अन्त:करणधर्मा रागादय: कालगुणा जरादयश्च यैस्ते तथा हे परम ! तवाजस्रसुखानुभवमखण्डानन्दानुभवं पदं स्वरूपं भजन्ति सेवन्ते तथाभूता दु:खानि त्यजन्तीति "तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवम्विदि पापं कर्म न श्लिष्यते न कर्मणा लिप्यते पापकेन तत्सुकृतदुष्कृते विधुनुते एतꣳहवावनतपति किमहंसाधुनाकरवङ्किमहम्पापमकरवम्" इत्यादिश्रुतेरित्यर्थ:—

सकलवेदगणेरितसद्गुणस्त्वमिति सर्वमनीषिजना रता: । त्वयिसुभद्रगुणश्रवणादिभिस्तव पदस्मरणेन गतक्लमा: ॥३॥॥१६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाश:

भावार्थदीपिकाप्रकाश: वंशीधरी — त्वमेव सर्ववेदप्रतिपाद्य इति । तद्यथा दर्शयति । अत्र श्रुति:- "शृणु तस्य ब्रह्मणो माहात्म्यम् ।" इत्युपकोशलं प्रति जाबालस्य वचनम् । यथा पुष्करपलाश इति । यथा पुष्करपलाशे पद्मपत्रे आपो जलानि न श्लिष्यन्ति न लगन्ति एवमेवंविदि यथोक्तब्रह्मविदि पापं कर्म न श्लिष्यते । तन्महिमानमाह-पापेन धर्माधर्मलक्षणेन कर्मणा न लिप्यते सम्बध्यते संसारहेतुत्वादुभयमेव पापपुण्ययो: परिपाकं ज्ञानेन परित्यजतीत्यर्थ: । ह-वाव-शब्दाववधारणे । आसन्नमरणकालेऽविदुषां नरकपातादिभयं भवति तद्द्वयमेनं न तपते नोद्वेजयति । किं तद्द्वयं तदाह-किं कस्मात्साधु शोभनं कर्म अहं नाकरवं न कृतवानस्मि । किं कस्मात्पापं निषिद्धं कर्माकरवमित्यादिभयम् एनं न तपतीति । भक्तिस्त्रिधा कर्ममयी ज्ञानमयी प्रेममयीति । ज्ञानमयीभक्तिपरेयं श्रुति: । स्मृतिश्च —

"समस्ततत्त्वान्तरसङ्गतोऽपि सच्चिन्मयश्रेष्ठयिता विशुद्ध: ।
षडूर्मिभावैर्गुणजैर्विकारैर्न भिद्यते वार्भिरिवाब्जपत्रम् ॥" इति स्वामिचरणा: ॥

सकलेति । सकलवेदगणैरीरिता उक्ता: सद्गुणा यस्य स त्वम् इति हेतोर्हे सुभद्र ! सर्वे च ते मनीषिजना विवेकिन: रता अनुरागयुक्ता भवन्ति तवेति गुणश्रवणादिभि: पदस्मरणेनोभयत्र सम्बध्यते । क्लमो दु:खम् ॥★॥

श्रीधरानुयायिनी — त्वमेव सर्ववेदगोचर इति सतां प्रवृत्तिं द्रढयति-इतीति । हे त्रिगुणमायामृगीनर्तक सर्वकारणत्वेन परमार्थसत्यस्य तव या सर्वजीवपापनाशिकाऽमृतसमुद्रात्मककीर्तिरूपा कथा तच्छ्रवणमात्रेणैव यदा सामान्यविवेकिनां परोक्षज्ञानवतां सन्तापकपापदु:खहानिस्तदा त्वदीयस्वरूपस्फुरणेन हेतुना रागद्वेषादिभिरन्त:करणधर्मैर्जरामरणादिभि: कालधर्मैश्च रहितानां त्वदीयाखण्डानन्दानुभववतामपरोक्षज्ञानवतामनन्यभक्तानां सर्वपापदु:खहानिरिति किमाश्चर्यम् । यद्वा-पदं त्वच्चरणारविन्दं तद्विशेषणमजस्रसुखस्यानुभवो यस्मादिति ॥★॥

विश्वनाथी — अथ शुद्धलीलातात्पर्यं तेन तत्रैव केवलं चरन्त्य: श्रुतयस्तदेवमासां सर्वासां तत्रैव तात्पर्यं श्रुत्वा लब्धसमया: स्तुवन्ति-इतीति । हे त्र्यधिपते ! ऊर्ध्वाधोमध्यवर्तमानानां सर्वेषामधीश्वर ! यत एवं सर्वासामेव श्रुतीनां त्वामेव प्रतिपादयितुं तत्तद्विचारप्रयास इति हेतोस्तं परित्यज्य सूरयो विवेकिन: अखिलमलस्य वासनापर्यन्तकर्मदोषस्य निरसनीया कथा सैवामृताब्धि: अपारपरमानन्द: तव तमवगाह्याविश्य तपांसि सर्वसांसारिकदु:खानि जहु: । तदेवं सति हे परम ! हे सर्वोत्कृष्ट ! किमुत वक्तव्यं ये पुन: स्वधामविधुताशयकालगुणा आत्मारामतया जीवन्मुक्ता अपि अजस्रसुखानुभवं प्रतिक्षणं सुखानुभवोल्लासरूपपदं त्वच्चरणारविन्दं भजन्ति ते तमवगाह्य तानि जहुरिति । अपि तु तत्सुखेनात्मारामतासुखावेशमपि जहुरित्यर्थ: । तदेवं स्वाभाविक एवातिशयित एव च लीलाप्रतिपादितानां श्रुतीनां भगवत्सम्बन्धो विवक्षित: । अन्यथा तत्तन्न स्यादिति । अत्र मुख्या: श्रुतय: "नैवाभ्यसेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ।" "यस्य नाम महद्यश: ।" "विष्णोर्नु कं वीर्याणि प्रवोचं य: पार्थिवानि विममे रजाꣳसि" इत्यादिषु किमिति क इत्यर्थ: । प्रवोचमित्यडागमाभावश्छान्दस:, प्रकर्षेण वदेदित्यर्थ: । अथ तत्पक्षस्था: "यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च ।" इत्याद्या ज्ञेया: । नानाश्रुतीनां सर्वोत्तमत्वं च —

"यस्यां न मे पावनमङ्ग कर्म सृष्टिस्थितिप्राणनिरोधमस्य । लीलावतारेप्सितजन्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न रः ॥" इत्येकादशात् ॥

सृष्ट्याद्यर्थं कर्म, साक्षादीक्षणादिलीलेत्यर्थः (३) ॥१६॥

नीलकण्ठी — ऋषयस्त्वयि मनो दधुरित्युक्तं तत्र मनःप्रणिधानस्याविक्षेपेण सिद्ध्यर्थम् "एतमेव प्रव्राजिनो लोकमिच्छन्तः व्रजन्ति" "वेदान्तान्विधिवच्छ्रुत्वा सन्न्यसेदनृणो द्विजः ।" इति श्रुतिस्मृतिप्रसिद्धं विविदिषासंन्यासमाह-इति तव सूरय इति । हे धिपते इति । इत्थमुक्तप्रकारेण तव कथा वेदान्तश्रवणं सैवामृतसाधनत्वादुरवगाहत्वाच्चामृताब्धिस्तम् अवगाह्य क्रमादितात्पर्यलिङ्गैः पर्यालोच्य सूरयः पण्डिता भूत्वा, तपांसि तपन्तीति तपांसि एषणा जहुस्त्यक्तवन्तः । "तमेव धीरो विज्ञाय ज्ञां कुर्वीत ब्राह्मणः ।" वेदनिमं लोकममुं च परित्यज्यात्मानमन्विच्छेदित्यादिवचनेभ्यः हे त्र्यधिपते ! हे अखिललोकमलक्षपणेति बोधनद्वयेन त्रयाणामाश्रमाणां कर्मफलप्रदातृत्वेनाधिपतिः अत एवाखिललोकमलक्षपणः ।

"त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति । प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयः, सर्व एते पुण्यलोका वन्ति ब्रह्मसंस्थोऽमृतत्वमेति ॥"

आश्रमत्रयोचितकर्मणा शुद्धसत्त्वः सम्पन्नात्मविविदिषः संन्यासेऽधिक्रियते इति दर्शितम् । विविदिषवः संन्यस्यन्तीत्युक्त्वा षुणां संन्यसनं कैमुतिकन्यायसिद्धमित्याह-किमुतेति । स्वधाम्ना स्वरूपप्रकाशनेन विधुता रज्जुभुजङ्गवद्बाधिता आशयो दयग्रन्थिः । कालो मुत्युः । गुणाः सुखदुःखमोक्षात्मकाः सत्त्वरजस्तमःसंज्ञास्तन्मयी मूलविद्या च यैस्ते । तथा —

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥"

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥"

इत्यादिश्रुतिभ्यः कृतकृत्याः पुरुषधौरेयाः याज्ञवल्क्यादयः । हे परम ! अजस्रसुखानुभवम् अखण्डानन्दसंविद्रूपं पदं नीयं तत्त्वं ये भजन्ति समाधिना ते संन्यस्यन्तीति किमु वक्तव्यम् । सोऽयं विद्वत्संन्यासः ।

"एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति ॥"

इत्यादिश्रुतिसिद्धः । तत्र पूर्वार्धे साधनभूतो विविदिषासंन्यासः उक्तः उत्तरार्धे फलभूतो विद्वत्संन्यास इति विवेकः (३) ॥१६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इतीत्यस्य टीकायां श्रुतिव्याख्यां शृणु । तस्य मयोच्यमानस्य ब्रह्मज्ञानस्य माहात्म्यमित्युपकोशलं प्रति जाबालस्य वचनं ते पापकेन धर्माधर्मलक्षणेन संसारहेतुत्वादुभयमेव पापकं विदुष इति पूर्वं साधनान्तरनैरपेक्ष्येणैव विरजां नदीं मनसैवा-तुकम् । तत्राशङ्कते-ननु सुकृतमप्यस्ति साहाय्यमस्य विरजोत्तारे इत्यत आह-तत्तत्र उपास्यात्मसाक्षात्कारावसरे सुकृतदुष्कृते नुते तयोः परिपाकं ज्ञानेन त्यजतीत्यर्थः । स्वव्याख्या तु अथ शुद्धलीलातात्पर्यं तेन तत्रैव केवलं चरन्त्यः श्रुतयस्तदेवमासां तत्रैव तात्पर्यं श्रुत्वा लब्धसमयाः स्तुवन्ति-इतीति । हे त्र्यधिपते ! ऊर्ध्वाधोमध्यवर्तमानानां सर्वेषामधीश्वर ! यत एवं श्रुतीनां त्वामेव प्रतिपादयितुं तत्तद्विचारप्रयास इति हेतोस्तं परित्यज्य सूरयो विवेकिनः अखिलमलस्य वासनापर्यन्तकर्मदोषस्य कथा सैवामृताब्धिः अपारपरमानन्दः तव तमवगाह्याविश्य तपांसि सर्वसांसारिकदुःखानि जहुः । तदेवं सति हे परम ! हे ष्ट ! किमुत वक्तव्यं ये पुनः स्वधामविधुताशयकालगुणा आत्मारामतया जीवन्मुक्ता अपि अजस्रसुखानुभवं प्रतिक्षणं विलासरूपपदं त्वच्चरणारविन्दं भजन्ति ते तमवगाह्य तानि जहुरिति । अपि तु तत्सुखेनात्मारामतासुखावेशमपि । तदेवं स्वाभाविक एवातिशयित एव च लीलाप्रतिपादितानां श्रुतीनां भगवत्सम्बन्धो विवक्षितः । अन्यथा तत्तत्र अत्र मुख्याः श्रुतयः "नैवाभ्यसेद्बहूञ्शब्दान्वाचो विग्लापनं हि तत् ।" "यस्य नाम महद्यशः ।" "विष्णोर्नु कं वीर्याणि यः पार्थिवानि विममे रजांऽसि" इत्यादिकाः । किमिति क इत्यर्थः । प्रवोचमित्यडागमाभावश्छान्दसः, प्रकर्षेण । अथ तत्पक्षस्थाः "यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च ।" इत्याद्या ज्ञेयाः । नानाश्रुतीनां सर्वोत्तमत्वं च —

"यस्यां न मे पावनमङ्ग कर्म सृष्टिस्थितिप्राणनिरोधमस्य । लीलावतारेप्सितजन्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न धीरः ॥" इत्येकादशात् ॥

सृष्ट्याद्यर्थं कर्म, साक्षादीक्षणादिलीलेत्यर्थः ॥३॥१६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

यतस्त्वमृषीणां त्रिविधक्रियाविषयः, इति हेतोः, त्र्यधिपते ! हे मनोवाक्कायकर्मेश्वर ! अखिलशब्दस्य लोकविशेषणत्वेऽधिकारापेक्षा निरस्ता। मलविशेषणत्वे सवासनाशेषपापस्य, पक्षान्तरे समूलदुःखस्य क्षपणमभिप्रेतम्। अब्धिरूपं स्वरूपमात्रापेक्षया, अवगाह्य स्पृष्ट्वेत्यर्थः, तल्लेशसम्पर्कमात्रेणैव सर्वदुःखत्यागसिद्धेः । यद्वा, समास्वाद्य तन्महामाधुर्येण तत्त्यागाशक्त्या स्वभावतस्तद्बाहुल्यस्यैव वा प्रवृत्तेः। पुनर्वाक्यालङ्कारे। अन्यत्तैर्व्याख्यातम्। यतस्त्वद्भजनमेव सर्वसारमिति हेतोः स्वस्वधाम्ना त्वद्भक्तिप्रभावेण विधूताशयकालगुणाः तत्रापि पदं त्वत्प्रियस्थानं श्रीमथुरामण्डलम्। किम्भूतम्? अजस्रसुखस्यानुभवो यस्मात्तदखण्डसुखानुभवरूपं वा ये भजन्ति सेवन्ते, तेषां तपांसि जहुरिति किं वक्तव्यमित्यर्थः। तथा हि पाद्मे-

"अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी। क्षणमेकं निवासेन हरौ भक्तिः प्रजायते ॥" इति ॥

यद्वा, स्वधाम्ना भवदीयमथुरामण्डलेन विधूताशयकालगुणा जीवन्मुक्ताः, ते तपांसि जहुरिति किं वक्तव्यम्। तथा च सौरपुराणे -

"अस्तीह मथुरा नाम त्रिषु लोकेषु विश्रुता। पवनेन नरस्तस्या मुच्यते जन्मबन्धनात् ॥" इति ॥

यद्वा, पदं स्वरूपं घनश्यामोज्ज्वलपूर्णानन्दश्रीविग्रहम्, मूर्तामूर्तयोर्भवत्स्वरूपयोर्मूर्तस्यैव सर्वथा श्रैष्ठ्यात् ॥१६॥

[इति निखिलस्वरूपेभ्यस्तवोत्कर्षाद्धेतोः। यद्वा, यतस्तद्वृन्दावनस्यापीदृशो महिमेति हेतोः। त्र्यधिपते! त्रयाणां नृत्यगीतवाद्यानामधिपते, हे क्वाप्यभूतपूर्वतौर्यत्रिकमाधुर्यवैचित्रीनवसृष्टिकारक! यद्वा, त्रयाणां त्रिविधानां मुनिचरी-श्रुतिचरी-नित्यप्रिया गोपीकुलानां प्राणनाथ! देवीनामनुक्तिर्नित्यप्रियाणामंशत्वात् (प्रियाणामैक्यात् [घ, ङ] ।)। अखिललोकमलक्षपणकथामृताब्धिम् - अखिलानि तपोयोगोपासनादिभिरप्यप्रहतानि प्रहन्तुमशक्यानि यानि लोकानां मलानि दुष्प्रारब्धादीनि भक्तिप्रतिबन्धकानि त्वदपराधादीनि वा, तेषां क्षपणी परमचमत्कारि-तौर्य्यत्रिकशोभाभररासलीलादि-कथा, सैवामृतं तस्याब्धिम्, अवगाह्य तत्र निमज्ज्य सूरयो महाभागवताः, तपांसि स्वधर्म्मान् ज्ञानमार्गादि-गतिपरिश्रमान् वा। हे परम! सर्वोत्कृष्ट! अजस्रसुखानुभवं यथा स्यात्तथा ये तव पदं पदारविन्दं सेवन्ते, - पादसेवायाः सर्वविधभजनास्पदत्वात्, स्वधाम्नां निजप्रभावाणां विधुता चन्द्रता स्वतः परमसुखत्वात् तथा सर्वेषां सन्तापहरत्वादाह्लादजनकत्वाच्च (आह्लादनत्वाच्च [घ, ङ] ।); धाम्नां विधुत्वम्, तस्यां शेरते लीयन्तेऽपुनरावृत्तितया नश्यन्तीति स्वधामविधुताशयाः, तथाभूताः कालगुणाः येषाम्। तत्र कालो मृत्युः, गुणाः प्रकृतिगुणाः, ते तपांसि जहुरिति किमुत वक्तव्यमिति ॥१६॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भगवत्कथाश्रवणादीनां पापहरत्वमाह-इतीति । हे त्र्यधिपते ! जन्मस्थितिविनाशनिर्वाहक ! लोकस्य मलं पा तत्क्षपणकथामृताब्धिम् अवगाह्य तपांसि जहुः। आध्यात्मिकादितापानि जहुः त्यक्तवन्तः किम्पुनर्ध्यानपरा इत्याहुः-किमुतेति। स्वधाम तेजः स्वज्ञानम् । तेन विधुताः आशयगुणा रागादिमनोवृत्तयः कालगुणा जरामरणादयश्च यैस्ते । पद्यत इति प स्वरूपम्। अजस्रसुखानुभवं नित्यज्ञानानन्दरूपम्। भजन्ति समाधिना साक्षात्कुर्वन्ति ॥१६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अत ऋषय इत्यादेः पूर्वयोजनायां कैमुत्यन्यायेन भगवद्ध्यानस्य सांसारिकतापनिवर्तकत्वमाहुः-इति तवेति। द्वितययोजनायां तु कारणत्वसमनियतं मुमुक्षूपास्यत्वं कैमुत्यन्यायेनाहुः-इतीति। त्र्यधिपते इति सम्बोधनम्। जगज्जन्मस्थितिनाशनिर्वाहक

ग्रां गिरं तां बिभृयात्र

र ! अखिलशब्दस्य
मभिप्रेतम्। अब्धिरूपकं
स्वाद्य तन्महामाधुर्य्येण
नमेव सर्वसारमिति हेतोः
{ ? अजस्रसुखस्यानुभवो
ह पाद्मे-
॥
1 किं वक्तव्यम् । तथा च

॥
र्वथा श्रैष्ठ्यात् ॥१६॥
। त्र्यधिपते ! त्रयाणां नृत्य-
चरी-श्रुतिचरी-नित्यप्रियाणां
ोकमलक्षपणकथामृताब्धिम्,
धादीनि भक्तिप्रतिबन्धकानि
ब्धिम्, अवगाह्य तत्र निमज्ज्य,
जस्रसुखानुभवं यथा स्यात्तथा
। चन्द्रता स्वतः परमसुखत्वात्,
ां शेरते लीयन्तेऽपुनरावृत्तितया
गाः, ते तपांसि जहुरिति किमुत

नर्वाहक ! लोकस्य मलं पापं
ुनर्ध्यानपरा इत्याहुः-किमुतेति।
ादयश्च यैस्ते । पद्यत इति पदं

माहुः-इति तवेति। द्वितययोजना
जगज्जन्मस्थितिनाशनिर्वाहक श्री

अतो हेतोः सूरयो विवेकिनः तवाखिललोकमलक्षपणकथमृताब्धिमखिलानां लोकानां जनानां शृण्वतां वदतां च मलं पापं क्षपयति नयशतीति तथा सा कथैवामृतं तस्याब्धिमवगाह्यैव तपांसि आध्यात्मिकादितापान् जहुः तत्यजुः किम्पुनर्ध्यानपरा इत्याहुः-किमुतेति। हे परम ! ये स्वधाम स्वतेजः स्वविषयकं ज्ञानं स्वशब्दः परमात्मपरस्तेन विधुता आशयगुणा रागादिमनोवृत्तयः कालगुणा जरामरणादयश्च यैस्तेऽजस्रसुखानुभवं नित्यज्ञानानन्दात्मकं पद्यत इति पदं स्वरूपं भजन्ति समाधिना साक्षात् कुर्वन्ति। ते तपांसि विजहुरिति किं पुनर्वक्तव्यमित्यर्थः ॥१६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

"त्यजन्ति तापं य उते भवत्कथा इति स्म मुक्ताः कुमुते स्वरूपगाः परावरेशे शपद भजन्तः परं परानन्दमनारतन्त ।"

इतीन्द्रद्युम्नश्रुतिग्रथितस्य इतिश्लोकस्यायमर्थः । इति शब्दो हेत्वर्थः । पुनरवधारणार्थः । पुनरप्रथमे प्रश्ने व्यावृत्तावधारणे इति हे परम ! परावरेशेश । ते तवाजस्रसुखानभवम् अनारतमजस्रं सुखं परानन्दः अनुभवः ज्ञानं यस्य तत्तथा । तत्पदं स्वरूपं भजति अनन्याश्रयत्वात्स्वधामापरमः तेन विधुताः आशयगुणा दुःखाद्याः कालगुणा उत्पत्त्यादयो यैस्ते मुक्ताः तपांसि तापान् जहुरिति किमुत पुनः वक्तव्यमेव । हे त्र्यधिपते ! त्रिलोकीनाथ ! सूरयः दर्शनादिभाषाविचक्षणाः अखिललोकस्य मङ्गलं क्षपयतीति अखिललोकमलक्षपणः । तं तव कथामृताब्धिम् अवगाह्यापि तपांसि जहुरिति यस्मादिति शेषः ॥३॥१६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ शुद्धलीलातात्पर्य्येण श्रीभगवत्येव केवलं चरन्त्यः श्रुतयस्तदेवमासां सर्वासां तत्रैव तात्पर्य्यं श्रुत्वा लब्धसमयाः नुवन्ति इति तव ॥१६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

इममेवार्थं पुनर्द्रढयन्त्य आहुः-इति तवेत्यादि । इति सर्वेश्वरत्वादिमहिमत्वेऽपि भुवि कृताविर्भावतया परमकृपालुत्वहेतोः सूरयः परममहानुभावा मुनयः हे अधिपते ! त्रयाणां ब्रह्मविष्णुमहेशानां पुरुषाणां गुणानां वा गोकुलमथुराद्वारकाणां वा अधिपते सर्वेश्वरत्वम् अखिलमलक्षपणा याः कथास्ता एवामृताब्धिस्तम् अवगाह्य तपांसि जहुः त्वत्कथां शृण्वन्त एव सन्ति तत्कृतानन्देन सु जुगुप्सैव तेषां जायते न तु तेषु पुनः प्रवृत्तिः हे परम ! अजस्रसुखानुभवं तव पदं चरणारविन्दं ये भजन्ति ते पुनः तत्र आदिषु यज्जुगुप्सां करिष्यन्ति तत् किमुतेति भावः । कीदृशाः स्वधाम्नि स्वशरीरे विधुता आशयो कालो गुणा रजआदयश्च नैव शरीरेण प्राकृता इत्यर्थः ॥१६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

इममेवार्थं द्रढयति- इति तवेत्यादि । इति कृत्वा सूरयः पण्डिताः । हे अधिपते ! अखिललोकमलक्षपणास्त्वदुक्तास्तेषां कथामृताब्धिमवगाह्य तपांसि जहुः । त्वत्कथाः शृण्वन्त एव सन्ति, एतावानेव तत्रानन्दः, किमुत हे परम ! ये अजस्रसुखानुभवं पदं चरणारविन्दं भजन्ति, ते तत्रानन्दितवन्तो यद्भविष्यन्ति, तत् किमुतेत्यर्थः । स्वधाम्नि स्वशरीर एव विधुताशयकालगुणा कृतशरीरा इत्यर्थः ॥१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सर्वेश्वरत्वात्तवैवोपास्यत्वमिति सतां प्रवृत्त्या निश्चिन्वन्ति-इतीति । हे त्र्यधिपते ! ऊर्ध्वाधोमध्यवर्तिनां सर्वेषामधीश्वर ! अतो हेतोः सूरयो विवेकिनः अखिलमलस्य वासनापर्यन्तकर्मदोषस्य निरसनी कथैवामृताब्धिस्तमवगाह्य तपांसि ज्ञानाङ्गतयः सर्वसांसारिकदुःखानि वा जहुरिति साधका उक्ताः । किमुत किम्पुनर्वक्तव्यम् । ये स्वधाम्ना स्वप्रभावेणैव विधुता आशयगुणा अन्तःकरणधर्मा रागायदः कालगुणा जरादयश्च यैस्ते सिद्धभक्ताः । हे परम ! ते पदम् अजस्रसुखानुभवं भजन्ति ते तपांसि जहतीति । अत्र

"विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांऽसि" ।

इत्याद्या लीलाप्रतिपादिकाः । कमिति क इत्यर्थः । प्रवोचदित्यर्थः ।

'एको वशी सर्वगः कृष्ण ईड्य एकोऽपि सन् बहुधा योऽवभाति ।

तं पीठगं येऽनु यजन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥'

इत्याद्या भजनप्रतिपादिकाः श्रुतयः ॥१६॥

गूढार्थदीपिनी

उक्तमेवार्थं प्रकारान्तरेण पुनर्द्रढयन्त्य आहुः-इतीति ।

(भक्तिपरेयम्)

पद्यानुवादः

इति बुधा जनकल्मषनाशिनीं तव निशम्य कथां विजहुर्व्यथाम् ।

किमुत ये चरितास्तमोगुणा जहति तां नु [नु अहो ये तव पदं भजन्ति ते तां व्यथां किमुत वक्तव्यमित्यर्थः ।] भजन्ति पदं तव ॥३॥

सङ्क्षिप्तसार्थान्वयः — हे त्र्यधिपते ! हे त्रिलोकाधिपते ! सूरयः तव अखिललोकमलक्षपणकथामृताब्धिम् अवगाह्य निषेव्य तपांसि दुःखानि जहुः । हे परम ! ये पुनः अजस्रसुखानुभवम् तव पदं स्वरूपं भजन्ति ते तपांसि जहति त्यजन्तीति किमुत वक्तव्यम् ? कथम्भूता ये ? स्वधामविधुताशयकालगुणाः ।

हे त्र्यधिपते ! त्रयाणां गुणानां लोकानां वा अधिपते हे भगवन् ! त्वमेव परमार्थत्वाद्भजनीय इति हेतोः सूरयो विवेकिनः अखिललोकानां मलस्य पापस्य क्षपणा विनाशिका मलं क्षपयतीति वा या कथा सैव अमृताब्धिः, तमवगाह्य प्रविश्य अत्यादरेण श्रुत्वेत्यर्थः । तपन्तीति तपांसि तापत्रयाणि आध्यात्मिकादीनि सर्वदुःखानि जहुः त्यक्तवन्तः । यदा एवं तदा हे परम परमेश्वर ! भगवन् ! ये पुनः तव पदं स्वरूपं श्रीविग्रहं भजन्ति ध्यायन्ति, ते तपांसि जहतीति किमुत वक्तव्यम् । कथम्भूतं पदम् ? अजस्रसुखानुभवं नित्यानन्दानुभवस्वरूपम् । केचित्तु गोपीभावेन अजस्रसुखस्य नित्यसुखस्य आश्लेषादेरनुभवो यस्मात्तत् । कथम्भूता ये ? स्वधामविधुताशयकालगुणाः । स्वधाम्ना तेजसा स्वरूपसाक्षात्कारेण वा । यद्वा । स्वस्य भगवतः धामानि आश्रयीभूतलीलाचरितानि, तैर्विधुताः दूरीकृता आशयगुणा अन्तःकरणधर्मा रागद्वेषादयः कालगुणाः जरादयश्च यैस्ते तथाभूताः दिव्यविग्रहाः सन्तः । यद्वा । परा सर्वोत्कृष्टा मा राधाशक्तिर्यस्य तत्सम्बुद्धौ । केचित्तु मा न परोऽधिको यस्मात्स परम इत्याहुः । तपांसि इति तप सन्तापे इत्यस्मात् ॥१७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

'त्यजन्ति तापं य उ ते भवत्कथा इति स्म मुक्ताः किमुत स्वरूपगाः ।

परावरेशेशपदं भजन्तः परम्परानन्दमनारजन्तः ॥'

इतीन्द्रद्युम्नश्रुत्यर्थमाह-स्पष्टोऽन्वयः कैमुत्यन्यायश्च । यतः सर्वागमविषयस्त्वमसीत्यतः सूरयो विवेकिनः । हे त्रिगुणनि अखिललोकानां जनानां मलनाशकास्तव कथास्तदेवामृताब्धिस्तमवगाह्य तपांसि अध्यात्मादीनि । बहु स्वधामविधुताशयकालगुणाः । स्वस्य तव । धामाधिष्ठानं मन्दिरं प्रत्यगात्मरूपम् । तद्विचारेण विधुताः कालगुणा दार आशयगुणा रागादयो यैस्ते । जरादयो रागादयश्च प्रत्यगात्मनो भवदीयांशस्य सत्यज्ञानात्मनो ममैते न भवन्ति । प्रकृतिकार्य परामर्षपरायणाः आविष्कृतसत्यज्ञानापहतपाप्मत्वादिगुणा इति भावः । यद्वा । स्वस्य जीवात्मनो धामाधिष्ठानं भगवत्स्व तद्ध्यानेन । विधुता इत्यादि पूर्ववत् । हे परम ! क्षराक्षराभ्यामुत्कृष्टं पदं प्राप्यम् अजस्रसुखः सदानन्दः श्रीकृष्णः । स एवानु

तथा भगवद्वाक्यम

'मामुपेत

श्लिष्यन्ते । एवमेव

साधु नाकरवम् ॥'

इत्यादि ॥

एवं प्रकृति

किमहङ्कारप्रतिपादिव

'शान्तो दान्

कर्तृत्वाभावात् एकस

वाक्यार्थध्यानकर्तुः म

निरहङ्कारः शान्तो भवति

शमादिविधौ न तात्पर्यम

साधनश्रुतीनामपि भगव

इत्यर्थः । तर्हि कथं मो

कार्यसिद्धिस्तत्तदंशभागि

ननु वेदेन शमादिविधयः प्र

तानेवोद्दिश्य श्रुतिः शमा

दुःखसाधनेभ्यो निवर्तन्त

इतीति । पूर्वोक्तसर्वब्रह्मत

तूत्तत्रासङ्गतिः, तापाभावात

य एव कथादिषु सम्बध्यते

अमृतत्वं तव कथामृतमित्य

भवन्ति तत एवोत्पद्यन्ते । य

"यस्य कस्यापि प

एवं तस्य हृदये सहस

तयैव निवृत्त्या पूर्णाः क्लेशा

गुरूपदेशलक्षणः विप्रुट् वर्णितः

ततोऽपि क्लेशोक्तिर्न दोषाय ।

तिष्ठति वैकुण्ठस्थ इव उद्धव

चरणसेवका अपि पुष्टिविच

स्वधामविधुताशयकालगुणा इ

कामादयः, कालगुणा जरादयः

मुख्याः भगवत्सेवकाः मुक्तोपसृ

यमित्यर्थः।] भजन्ति

थामृताब्धिम् अवगाह्य

हति त्यजन्तीति किमुत

त हेतोः सूरयो विवेकिनः

वगाह्य प्रविश्य अत्यादरेण

वं तदा हे परम परमेश्वर!

व्यम्। कथम्भूतं पदम्?

लेषादेरनुभवो यस्मात्तत्।

। स्वस्य भगवतः धामानि

: जरादयश्च यैस्ते तथाभूताः

को यस्मात्स परम इत्याहुः।

विवेकिनः। हे त्रिगुणनियन्तः!

अध्यात्मादीनि। जहुः।

विधुताः कालगुणा जरादयः

न भवन्ति। प्रकृतिकार्यत्वा

धामाधिष्ठानं भगवत्स्वरूप

दः श्रीकृष्णः। स एवानुभवस्

तथा भगवद्वाक्यम् —

'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।' इति। विदुषामनुभवज्ञापिकाः श्रुतयश्च 'यथा पुष्करपलाशे आपो न लिप्यन्ते। एवमेवंविदि पापं कर्म न श्लिष्यते। न कर्मणा लिप्यते। पापकेन तत्सुकृतदुष्कृते विधुनुते। एवं ह वा न तपति। किमहं साधु नाकरवम्॥'

इत्यादि॥१६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं प्रकृतिप्रतिपादिकाः पुरुषप्रतिपादिकाश्च श्रुतयो निरूपिताः। साधनप्रतिपादिकास्तु शान्त उपासीतेत्याद्याः किमहङ्कारप्रतिपादिकाः तद्द्वारा आत्मप्रतिपादिका वेत्यादिसन्देहे निर्णयमाह–इति तव सूरय इति॥

'शान्तो दान्त उपरतस्तितिक्षुः आत्मन्येवात्मानं पश्येत्॥' इत्यादिश्रुतयः अहङ्कारमेव प्रतिपादयन्ति। अन्यथा जीवस्य कर्तृत्वाभावात् एकस्य कर्मकर्तृभावाभावात्। आत्मनः स्वप्रकाशत्वाच्च यो ब्रह्मविदमात्मानं मन्यते तस्याहङ्काराविष्टस्य वाक्यार्थध्यानकर्तुः मनोव्यापारेणनूद्यते। शान्त इत्यत्रापि मनश्चाञ्चल्यनिराकरणं प्रयत्नानुसाध्यमपि साहङ्कारस्यैव तत्कृत्यम्। न हि निरहङ्कारः शान्तो भवति दान्तो वा, अन्तःकरणादावध्यासाभावात्। न हि पुत्ररहितः पण्डितः पुत्रवान् भवति। तस्मादेतासां श्रुतीनां शमादिविधौ न तात्पर्यम्। किन्तु साहङ्कारस्य महान् क्लेश इति तत्क्लेशमनूद्य निरीहमानस्य स्वत एवात्मा स्फूर्तिरिति (आत्मस्फूर्ति०) साधनश्रुतीनामपि भगवत्परत्वमेव। अस्मिन्नर्थे हेतुमाह–इत्येवं विनिश्चित्य सूरयस्तपांसि जहुरिति। साधनक्लेशांस्त्यक्तवन्त इत्यर्थः। तर्हि कथं मोक्षसिद्धिरिति चेत्तत्राह–अखिललोकमलक्षपणकथामृताब्धिमवगाह्येति। ननु कथावगाहनमात्रेणैव कथं कार्यसिद्धिस्तत्तदंशभागिनां प्रीत्यभावात् अतो विघ्नाभावाय तेषां प्रीत्यर्थं साधनानुष्ठानमपि कर्तव्यमिति चेत्तत्राह–अधिपत इति। नु वेदेन शमादिविधयः प्रतिपादिता इति अपेक्षाभावेऽपि विधिबलादपि शमादयः कर्तव्या इति चेत्तत्राह–सूरय इति। ये अविद्यावन्तः नेवोद्दिश्य श्रुतिः शमादिकं विधत्ते, न तु सूरीन्। अतः सूरयः, परमानन्दरूपं साधनं गृहीत्वा साधनदशायामेव कृतार्थाः सन्तः दुःखसाधनेभ्यो निवर्तन्त इति। ननु विद्वांसोऽपि साधनेषु प्रवर्तन्ते इति चेत्तत्राह–तव सूरय इति। त्वदीयास्तु न प्रवर्तन्त इत्यर्थः। इति। पूर्वोक्तसर्वब्रह्मत्वपक्षेऽपि साधनादीनां ब्रह्मत्वात् यदि सर्वमात्मैवाभूदिति न्यायेन साधननिवृत्तिर्युक्ता। तस्मिन् पक्षे त्वासङ्गतिः, तापाभावात्। तव च पण्डिताः त्वं च त्रिलोकाधिपतिरिति तेषां निर्भयत्वमुक्तम्। भगवत्सम्बन्धिनामपहतपाप्मत्वात् एव कथादिषु सम्बध्यते तस्यैव पापं दूरीकरोतीति अखिललोकमलक्षपणत्वं तवेत्यत्रापि सम्बध्यते। कथैव अमृताब्धिः कथाया मृतत्वं तव कथामृतमित्यत्र निरूपितम्। कथायास्त्वब्धित्वं एकस्यां कथायां हृदि स्थितायां ततो भगवदीयाः कथाः सहस्रं र्थानि तत एवोत्पद्यन्ते। यथैकस्य वाक्यस्य बुद्धिमतां सहस्रार्थस्य स्फूर्तिः। यथा कस्यचिद्वदनम् —

"यस्य कस्यापि पद्यस्य शतमर्थान् प्रचक्ष्महे॥ हठादुक्तस्य तस्यैव सहस्रं सम्प्रचक्ष्महे॥" इति॥

एवं तस्य हृदये सहस्रशो भगवत्कथास्फूर्तिः समृद्धो विवक्षितः। तत्रावगाहनं निरन्तरं येषां हृदये भगवत्कथानन्त्यं स्फुरति एव निवृत्या पूर्णाः क्लेशान् जहुरित्युक्तम्। एतादृशा एव गुरवो भवन्तीति। अथ ह वाव तव महिमा समुद्रविप्रुषेत्यत्रापि शलक्षणः विप्रुट् वर्णितः। अत्र तु कथामात्रमिति समुद्रावगाहनोक्तिर्न विरुध्यते सिद्धान्तान्तराद्वा। अत्र तापनिवृत्तिरात्यन्तिकी। अपि क्लेशोक्तिर्न दोषाय। तपःप्रभृतिसाधनानीति विमर्शः। अयं भगवत्परोक्षस्थितस्य साधनविचार उक्तः। यः पुनरपरोक्षे वैकुण्ठस्थ इव उद्धव इव वा तस्य किं वक्तव्यमित्याह–किमुतेति। प्रसङ्गादनवगतमाहात्म्यः यथा यादवाः समागताः ते सेवका अपि पुष्टिविचारेण कृतार्थाः मर्यादायामकृतार्था उच्यन्ते यथा यदवो नितरामिति तद्व्यावृत्त्यर्थमाह–विधुताशयकालगुणा इति। स्वस्यैव धाम स्फूर्तिः तेनैव विधुताः दूरीकृताः आशयगुणा कालगुणाश्च यैः। आशयगुणाः दयः, कालगुणा जरादयः। यथा भगवत्कृपया कालगुणाभावो निरूपितः तथा स्वस्फूर्त्यैव येषामाशयकालगुणनिवृत्तिः ते भगवत्सेवकाः मुक्तोपसृप्यो भगवानिति। ननु किं तेषां भजनेनेत्याशङ्क्याह–परमेति। तेषामप्युत्तमः यथा तेषामपि फलं

भवति तादृश इत्यर्थः । अत एव ते अजस्रसुखानुभवरूपं फलं भजन्ति । अन्तर्याम्यवतारादिरूपे पादत्वमित्यन्तरेव तं ब्रह्मानन्दमनुभवन्तीत्यर्थः ॥

"कथानन्त्योक्तिहृदयाः साधनानि न कुर्वते । साक्षात्ते पादसंश्लिष्टास्ते किं वाच्या महाशयाः ॥" ॥३॥१६॥

श्रीसुबोधिनीसारः

हे त्र्यधिपते सर्वेश्वर ! ते तवाखिललोकस्य सर्वजनस्या यन्मलं पापं तस्य क्षपणं निवृत्तिहेतुं कथामृतसिन्धुम् अवगाह्य निषेव्य तपांसि पापानि तत् निवृत्तिसाधनानि वा जहुः तत्यजुः । हे परम ! तवाजस्रं निरन्तरं सुखानुभवम् आनन्दमात्रं पदं स्वधाम्ना स्वरूपस्फूर्त्या विधुतास्त्यक्ता आशया गुणा अन्तःकरणधर्मा रागादयो यैस्ते तथाभूता ये भजन्ति सेवन्ते ते दुःखानि त्यजन्तीति किं पुनर्वक्तव्यम् ॥३॥१६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सर्वात्मकभगवद्भजनपराणां किं फलम्, इत्यपेक्षायां सर्वसन्तापनिवृत्तिरूपं फलं कैमुत्यन्यायेनाहुः-इतीति । तव भजनादेव त्रिगुणरूपमायानिवृत्तिः नान्यथा, इत्याशयेन सम्बोधयन्ति-त्र्यधिपते त्रिगुणमायामृगीनर्तक ! त्वमेव सर्वकारणत्वेन परमार्थत्वाद्भजनीय इति कृत्वा सूरयो विवेकिनस्तवाखिललोकमलक्षपणकथामृताब्धिमखिलानां लोकानां श्रवणकीर्तनादिपराणां जनानां मलं पापं क्षपयति नाशयतीति तथाभूता । कथैवामृतं तस्याब्धिमवगाह्य निषेव्य तपन्तीति तपांसि अध्यात्मिकादिदुःखानि जहुः त्यक्तवन्तः । यदा त्वदीयकथाश्रवणकीर्तनादिमात्रेणापि सर्वसन्तापनिवृत्तिस्तदा हे परम पुरुषोत्तम ! ये पुनः स्वधामविधुताशयकालगुणाः स्वधाम्ना स्वरूपसाक्षात्कारेण विधुतास्त्यक्ता अन्तःकरणादिनिष्ठतया निश्चिताः आशयगुणाः अन्तःकरणधर्मा रागादयः, कालगुणा जरादयः, उपलक्षणमेतत् देहधर्माः कार्श्यादयः, प्राणधर्माः क्षुधादयः, इन्द्रियधर्माः करणत्वादयश्च, यैस्तथाभूतास्तव अजस्रसुखानुभवं नित्यानन्दचिदात्मकं पदं स्वरूपं भजन्ति सेवन्ते ते तपांसि त्यजन्तीति किमुत वक्तव्यमित्यन्वयः । तद्यथा पुष्करपलाशे आपो न श्लिष्यन्ते, एवमेवैवंविदि पापं कर्म न श्लिष्यते । न "न कर्मणा लिप्यते पापकेन" इत्यादिश्रुतेः ॥१६॥३॥

अन्वितार्थप्रकाशिका

इतीति ॥ हे त्र्यधिपते ! इति पूर्वोक्तहेतोः सूरयः तव अखिललोकमलक्षपणकथामृताब्धिम् अवगाह्य तपांसि जहुः । हे परम ! यदि कथाश्रवणमात्रेणैव तदा ये पुनः स्वधामविधुताशयकालगुणाः सन्तः अजस्रसुखानुभवं ते पदं भजन्ति । ते तपांसि जहतीति किमुत वक्तव्यमित्यन्वयः ॥

हे त्र्यधिपते ! त्रिगुणमायामृगीनर्तक ! त्वमेव सर्वकारणत्वेन परमार्थत्वाद्भजनीय इति कृत्वा सूरयो विवेकिनस्तवाखिललोकमलक्षपणकथामृताब्धिमखिलानां लोकानां श्रवणकीर्तनादिपराणां जनानां मलं पापं क्षपयति नाशयतीति तथाभूता । कथैवामृतं तस्याब्धिमवगाह्य निषेव्य तपन्तीति तपांसि अध्यात्मिकादिदुःखानि जहुः त्यक्तवन्तः । यदा त्वदीयकथाश्रवणकीर्तनादिमात्रेणापि सर्वसन्तापनिवृत्तिस्तदा हे परम ! ये पुनः स्वधाम्ना स्वरूपसाक्षात्कारेण विधुतास्त्यक्ता आशयगुणाः अन्तःकरणधर्मा रागादयः कालगुणा जरादयः उपलक्षणमेतत् । देहधर्माः कार्श्यादयः प्राणधर्माः क्षुधादयः इन्द्रियधर्माः करणत्वादयश्च यैस्तथाभूतास्तवाजस्रसुखानुभवं नित्यानन्दचिदात्मकं पदं स्वरूपं भजन्ति सेवन्ते । ते तपांसि त्यजन्तीति किमुत वक्तव्यमिति ।

"तद्यथा पुष्करपलाशे आपो न श्लिष्यन्ते एवमेवैवंविदि पापं कर्म न श्लिष्यते" इत्यादिश्रुतेः । साकारपक्षे स्वधाम्ना स्वप्रभावेणैव यद्वा स्वस्य स्वीयप्रभोस्तव धाम्ना चैतन्यमूर्तिस्फुरणेन विधुताशयकालगुणाः सन्तस्ते पदं चरणकमलं सेवन्ते इत्याद्यपि । अत्र श्रुतयः ।

"विष्णोर्नु

यथा वेदास्त
त्र्यधिपते ! त्रयाणां ब्रह
तत्सम्बुद्धौ ॥ इत्यस्म
तवावतारगुणचरित्रादि
अनुप्रविश्य तपांसि आ
तादृशा अधुनातना अन्
भगवत्स्वरूपमाहात्म्यप्र
कालगुणाः ॥ मनुष्यदेववै
तव अजस्रसुखानुभवम्
वक्तव्यमिति शेषः ॥१६॥

पूर्वोक्तभगवद्ध्या
जन्मस्थितिनाशनिर्वाह
मलं पापं क्षपयति नायशती
यदा तत्यजुः तदा, हे
आदिमनोवृत्तयः, कालगुण
भजन्ति समाधिना साक्षात् कु
"तद्यथा पुष्करपला
इत्याद्याः श्रुतय एतद

शिष्टाचारेणापि मुमुक्षूप
कृत्वा हे त्र्यधिपते ! उत्पत्ति
अथवा । त्रिगुणमायानियामक
ऽमृताब्धिस्तमवगाह्य अत्
क्तवन्तः । अथवा । कायक्ले
तस्मान्न्यूनत्वेन दुस्साध्यत्वे
'एष मे सर्वधर्माणां धर्मो
इति तैत्तिरीयोपनिषदि च
दितम् । यथा
'स्वाध्यायप्रवचन एवेति
हे रम ! सर्वाधिक ! ये भक्ता

"विष्णोर्नु कं वीर्याणि प्रवोचम्, विष्णोः कर्माणि पश्यत" इत्याद्याः ॥१६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

था वेदास्तव प्रतिपादनं कुर्वन्ति तथा महासाधुसदाचारा अपि तवैव प्रतिपादनं कुर्वन्तीत्याहुः-इति तवेति ॥ हे त्रयाणां ब्रह्मादीनाम् ॥ यद्वा ॥ त्रयाणां कालमायापुरुषाणाम् ॥ यद्वा ॥ त्रयाणां चेतनाचेतनमुक्तानाम् । अधिपतिर्नियन्ता ॥ इत्यस्मात्पूर्वोक्तद्धेतोः सूरयः पण्डिताः प्रवृत्तिधर्मप्रवर्तका ब्रह्मादयः ॥ तादृग्विधा आधुनिका अन्ये च गुणचरित्रादिभिः प्रतिपाद्यस्य भवतः अखिललोकमलक्षपणकथामृताब्धिसकलजनवृजिननाशककथामृतसागरमवगाह्य तपांसि आध्यात्मिकाधिभौतिकाधिदैविकान् तापान् । जहुः त्यक्तवन्तः । ये निवृत्तिधर्मप्रवर्तका नारदसनकादयो वा धुनातना अन्ये पुनः स्वधामविधुताशयकालगुणाः स्वधाम्ना स्वरूपस्फुरणेनात्मस्वरूपप्रकाशेनेति यावत् ॥ यद्वा ॥ रूपमाहात्म्यप्रकाशेन विधुतास्त्यक्ताः ॥ आशयकालयोर्गुणा यैस्ते ॥ आशयगुणा ॥ अन्तःकरणस्वभावा देहदैहिकरागादयः ॥ मनुष्यदेववैराजपुरुषादिषु नित्यनैमित्तिकप्राकृतप्रलयहेतुभूतकालप्रवर्तितजरादयश्च तथोक्ताः सन्तः । हे परमसर्वोत्कृष्ट ! सुखानुभवम् अखण्डानन्दानुभवं पदम् अङ्घ्रिकमलमति यावत् ॥ भजन्ति सेवन्ते । तपांसि जहुरिति किमु ति शेषः ॥१६॥३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पूर्वोक्तभगवद्ध्यानस्य कैमुत्यन्यायेन सांसारिकतापनिवर्तकत्वमाहुः ॥ इति तवेति ॥ हे त्र्यधिपते इति सम्बोधनम् । स्थितिनाशनिर्वाहक ! इति अतो हेतोः, सूरयो विवेकिनः, तव अखिलानां समग्राणां लोकानां जनानां शृण्वतां वदतां च क्षपयति नायशतीति तथाभूता या कथा सैवामृतं तस्याब्धिस्तम्, अवगाह्य अनुप्रविश्य, तपांसि आध्यात्मिकादितापान्, तत्यजुः तदा, हे परम ! ये स्वस्य परमात्मनस्तव सम्बन्धि धाम ज्ञानं तेन विधुता आशयकालगुणा आशयगुणा वृत्तयः, कालगुणा जरामरणादयश्च यैस्ते, तथाभूताः सन्तः, अजस्रसुखानुभवं नित्यज्ञानानन्दात्मकं, पदं त्वत्स्वरूपं, समाधिना साक्षात् कुर्वन्ति । ते तपांसि जहुः । पुनः किमुत । ध्यानपरास्तपांसि जह्युस्तत्र पुनः किं वक्तव्यमित्यर्थः ।

"तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवैदंविदि पापं कर्म न श्लिष्यते । न कर्मणा लिप्यते पापकेन ॥"

इत्याद्याः श्रुतय एतदर्थपराः ॥३॥ ॥१७॥

योगिरामानुजाचार्यकृतसरला व्याख्या

चारेणापि मुमुक्षूपास्यत्वं भगवतः दृढीकुर्वन्ति-इतीति । इति पूर्वोक्तप्रकारेण सर्वजगत्कारणत्वेन त्वमेव मुमुक्षूपास्य हे त्र्यधिपते ! उत्पत्तिस्थितिविनाशानां निर्वाहक ! अथवा भूर्भुवस्स्वर्लोकानां निर्वाहकेति वा सप्तलोकानामुपलक्षणमेतत् । त्रिगुणमायानियामक ! सूरयः ज्ञानिनः तव अखिलानां लोकानां मलस्य पापस्य क्षपणा विनाशिका । या कथा ब्धिस्तमवगाह्य अत्यादरेण श्रुत्वेत्यर्थः । तपांसि आध्यात्मिकाधिभाूतिकाधिदैविकाख्यानि तापत्रयाणि जहुः । अथवा । कायक्लेशसाध्यानि तपांसि जहुः भगवत्कथाश्रवणकीर्तनस्य सर्वोत्कृष्टधर्मत्वेन सुकरत्वेन च तदितरेषां न्यूनत्वेन दुस्साध्यत्वेन च त्यक्तवन्त इत्यर्थः । तदुक्तं सर्वधर्मज्ञेन श्रीभीष्मेण —

मे सर्वधर्माणां धर्मोऽधिकतमो मतः । यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥'

तैत्तिरीयोपनिषदि च भगवद्गुणप्रतिपादकस्य तदाराधनविधिप्रतिपादकस्य वेदस्य च श्रवणकीर्तनस्य परमतपोरूपत्वं । यथा

ध्यायप्रवचन एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धितपः ।' इति ।

सर्वाधिक ! ये भक्ताः विधुताशयकालगुणाः सन्तः विधुताः दूरीकृताः आशयस्यान्तःकरणस्य गुणाः कामक्रोधादयः

मानावमानादयः कालगुणाः शीतोष्णादयः यैस्ते । तेषां शीतोष्णादीनां दूरीकरणं नाम तेषु प्राप्तेषु मनसि विकाराहित्यमेव। एवम्भूतस्यैव भगवद्भजनाधिकारत्वात्। तस्यैव परमात्मा प्रसन्नो भवति तदुक्तं गीतासु –

'जितात्मनः प्रशान्तस्य परमात्मा समाहितः । शीतोष्णसुखदुःखेषु तथा मानावमानयोः ॥'

इति । शीतोष्णसुखदुःखेषु मानावमानयोः जितात्मनः निर्विकारमनसः परमात्मा समाहितो भवति । मनसि सम्यक् स्थितो भवतीत्यर्थः । तथा च विधुताशयकालगुणाः सन्तः अजस्रसुखानुभवम् अखण्डानन्दज्ञानाकारं तव प ये भजन्ति सेवन्ते —

'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥'

इत्युक्तरीत्या ये उपासते ते पुनः स्वधाम स्वस्य परमात्मनः धाम तेजोरूपं भजन्तीति प्राप्नुवन्तीति किं पुनः वक्तव्यमित्यन्वयः । भजन्तीत्यस्य उभयत्रान्वयः । प्राप्नुवन्तीत्यस्याध्याहारो वा अजस्रसुखानुभवं ते पदं विधुताशयकालगुणास्सन्तः ये भजन्ति प्राप्नुवन्तीति किं पुनर्वक्तव्यमित्यन्वयः । स्वधाम प्राप्नुवन्तीत्युक्ते मोक्षदशायां जायमानभगवत्स्वरूपप्राप्तिरुच्यते। तदुक्तं गीतोपनिषदि —

'यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥' इति ॥

'मामुत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥'

इति च एतव्द्याख्याने अन्वयसौकर्यमर्थसौष्ठवं च वर्तते । श्रीधरीयादिषु तु बहुपदाध्याहारः क्लिष्टान्वयः । अर्थसौन्द चास्ति । तत् सहृदयसंवेद्यम् । अ० हे त्र्यधिपते ! इति सूरयः तवाखिललोकमलक्षपणकथामृताब्धिमवगाह्य तपांसि जुहुः । हे परम ! ये विधुताशयकालगुणास्सन्तः अजस्रसुखानुभवं ते पदं भजन्ति ते स्वधाम भजन्तीति । किमुत पुनः । किं वक्तव्य इत्यन्वयः ॥१६॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

सतां प्रवृत्त्या सदाचारेण उपकोशलं प्रति जाबालवचनं तद्यथेति–एवंविदि यथोक्तब्रह्मज्ञानवति । पापकेन धर्माधर्मलक्षणे संसृतिहेतुत्वादुभयमेव पापकं विदुष इति तत्तद्दोषास्यात्मसाक्षात्कारकाले विधुनुते । तयोः परिपाकं त्यजतीत्यर्थः । ए यथोक्तात्मविदम् । न तपति न सन्तापयति । ह स्फुटम् । वावेत्यवधारणे ॥१६॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

त्वमेव सर्वनिगमगोचर इति सतां प्रवृत्त्या दृढयति–इतीति । भो त्र्यधिपते ! त्रिगुणमायामृगीमायानर्तक

त्वमेव सर्वकारणत्वेन परमार्थ इति कृत्वा सूरयो विवेकिनः तवाखिललोकमलक्षपणकथामृताब्धिमवगाह्य निषेव्य तानि तापानि दुःखानि वा जहुः त्यक्तवन्तः । हे परम ! ये पुनः स्वधामविधुताशयकालगुणाः सन्तस्तव एदं स्वरूपं भजन्ति ते तथा दुःखानि त्यजन्ति इति किमु वक्तव्यम् ।

स्वधाम्ना स्वरूपस्फुरणेन विधुतास्त्यक्ता आशयगुणाः अन्तःकरणधर्मा रागादयः । कालगुणा जरादयश्च यैस्ते त कथम्भूतं पदम् । अजस्रसुखानुभवम् ।

अत्र श्रुतिः-

"शृणु तस्य ब्रह्मणो ज्ञानमाहात्म्यम् ।" इत्युपकोशलं प्रति जाबालस्य वचनम् । यथा पुष्करपलाशे आपो लि एवमेवंविदि पापं कर्म न श्लिष्यते । न कर्मणा लिप्यते । पापकेन एतत्सुकृतदुष्कृते विधुनुते । एवं ह वाव न तपति । पापमकरवमिति । अर्थश्च — यथा पुष्करपलाशे पद्मपत्रे आपो जलानि न श्लिष्यन्ति न लगन्ति एवमेवंविदि यथोक्तब्र कर्म न श्लिष्यते । तन्महिमानमाह–पापकेन धर्माधर्मलक्षणेन कर्मणा न श्लिष्यते सम्बध्यते । संसारहेतुत्वादुभयमेव पाप

परिपाकं ज्ञानेन परित्य
तद्द्वयमेनं यथोक्तमात्म
कृतवानस्मि । किं क
ज्ञानमयी प्रेममयीति ।

स्वामिनाम् –

"सकलवेदगणेरि

त्वयि सुभद्रगुणश्र

सकलवेदगणैरीरित

भवन्ति । कथम्भूताः । तव
इत्यर्थः ॥१६॥

अथ भगवत्कथाश्रव
त्र्यधिपते ! जन्मस्थितिविनाशि

"गतिर्भर्ता प्रभुः साक्ष

इति । लोकस्य मलं प
जहुस्त्यक्तवन्तः । यदिति तदा
रागादिमनोवृत्तयः । कालगुणा
स्वरूपम् । अजस्रसुखं ते संसारं

हे अधिपते ! जगतके
आप के अखिल लोकों के पाप
कर दिया है । हे परम ! सर्वोत्त
के मन के राग लोभादि नष्ट हो
आपके नित्यज्ञानानन्द स्वरूप को

दृतय इव [१]श्वसन्त्यसुभृत
पुरुषविधोऽन्वयोऽत्र चर

सुपो-वीर.

पाकं ज्ञानेन परित्यजतीत्यर्थः। ह-वाव-शब्दौ अवधारणार्थे। आसन्नमरणकालेऽविदुषां नरकपातादिभयं भवति। मेनं यथोक्तमात्मविदं न तपति नोद्वेजयति। किं तद्भयं तदाह-किं कस्मात्साधु शोभनं कर्म अहं नाकरवं न वानस्मि। किं कस्मात्पापं निषिद्धं कर्माकरवं कृतवानस्मीत्यादि भयमेनं न तपतीति। भक्तिस्त्रिधा कर्ममयी मयी प्रेममयीति। भक्तिपरेयं श्रुतिः।

स्वामिनाम् -

"सकलवेदगणेरितसद्गुणस्त्वमिति सर्वमनीषिजना रताः।
त्वयि सुभद्रगुणश्रवणादिभिस्तव पदस्मरणेन गतक्लमाः॥"

सकलवेदगणैरीरिताः कथिताः सद्गुणा यस्य स त्वम् इति हेतोर्हे सुभद्र! सर्वमनीषिजना विवेकिनः त्वयि रता अनुरागयुक्ता ते। कथम्भूताः। तवपदमुभयत्र सम्बध्यते। तव गुणश्रवणादिभिः तव पदस्मरणेन गतक्लमाः गतपरिश्रमादिदुःखा र्थः॥१६॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवत्कथाश्रवणादीनामेव पापापहत्वं यदि तदा किं वक्तव्यम्। तद्ध्यानपराः पापानि विधुन्वन्तीत्याह-इतीति। हे पते! जन्मस्थितिविनाशनिर्वाहक! तथा चोक्तं गीतायाम् —

"गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्। प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्॥"

इति। लोकस्य मलं पापं तत्क्षपणरूपा तव कथैवामृताब्धिस्तमवगाह्य अत्यादरेण श्रुत्वा तपांसि आध्यात्मिकादितापानि क्तवन्तः। यदिति तदा किम्पुनर्ध्यानपरा इत्याह-किमुतेति। स्वधाम तेजः स्वज्ञानम्। तेन विधुता दूरीकृता आशयगुणा मनोवृत्तयः। कालगुणा जरामरणादयश्च यैस्ते। हें परम! मा परो यस्मात्स परमस्तत्सम्बुद्धौ हे परम!। पद्यत इति पदं म्। अजस्रसुखं ते संसारं तिरस्कुर्वन्तीति किं वक्तव्यम्। तदुक्तम् —

"त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नि समाधिनावेशितचेतसैके।
त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिम्॥"

इति॥१६॥

कृष्णप्रिया

हे अधिपते! जगतके उत्पत्ति पालन संहारक निर्वाह करने वाले परमेश्वर! इसी कारणसे विवेकीजनोंने के अखिल लोकों के पाप को नाश करने वाले कथारूप अमृत के समुद्रमें स्नान कर संसार के ताप का त्याग या है। हे परम! सर्वोत्तम निखिल कल्याण गुण संपन्न सर्व व्यापक आपके स्वरूप के तत्त्व ज्ञान से जिन के राग लोभादि नष्ट हो गए है और जिन के काल कृत जरामरणादि नष्ट हो गए है। ऐसा ज्ञानीजन जो नित्यज्ञानानन्द स्वरूप को समाधि में साक्षात्कार करते है वे संसार के ताप को त्याग करते है॥१६॥

तय इव [१]श्वसन्त्यसुभृतो यदि तेऽनुविधा महदहमादयोऽण्डमसृजन् यदनुग्रहतः।
विधोऽन्वयोऽत्र चरमोऽन्नमयादिषु यः सदसतः परं त्वमथ यदेष्ववशेषमृतम्॥१७॥

मीर.

कर्दमक्षमा

सर्वे, जना, दृतय, इव, वृथा, श्वसन्ति, यदि, च, ये, तव, अनुविधाः, स्युः, तदा, एव, असुभृतः, भवन्ति, यस्य, तव, अनुग्रहतः, महदहमादयः, अण्डम्, असृजन्, यः, पुरुषविधः, अत्र, अन्नमयादिषु, अन्वयः, च, अन्नमयादिषु, उपदिश्यमानेषु चरमः, स, त्वम्, तथा, यत्, सदसतः, परम्, एषु (अन्नमयादिषु) अवशेषम्, ऋतं, च, तत्, त्वम् ॥१७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

"असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः । तांस्ते प्रेत्याभिगच्छन्ति येके चाऽऽत्महनो जनाः" तथा 'न चेदवेदीन्महती विनष्टिः ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ती'त्याद्याः श्रुतयः पूर्वश्लोकोक्तोभयविधभजनहीनान्निन्दन्ति, दृतय इवेति। असुभृतो नरा यदि ते अनुविधा अनुविदधतीत्यनुविधा अनुवर्तिनो भक्ता इति यावत् तर्हि श्वसन्ति जीवन्ति सफलजीवना भवन्ति इतरथा दृतय इव भस्त्रा इव वृथाश्वासा इत्यर्थः । नन्वभक्तानामपि कामादिफलमस्त्येव न कार्यकारणानुग्राहकत्वेन जीवनहेतोर्तवाभक्ते कृतघ्नानां तदपि न सिध्येदित्याशयेनाह, महदहमादय इति । महानहङ्कारश्चादिर्येषां ते यदनुग्रहतो यस्यानुप्रवेशेन लब्धसामर्थ्याः सन्तोऽण्डं देहं समष्टिव्यष्टिरूपं सृष्टवन्तस्तत्र च पश्चापि कोशानन्नमयादीनाविश्य तत्तदाकारः सन् यश्चेतयते स त्वं तदाह पुरुषविध इति पुरुषस्यान्नमयादेर्विधेव विधा आकारो यस्य स तथा ननु, चिदेकरसस्य कथं तत्तदाकारतात आह-अन्वयोऽत्रेति अत्र एष्वन्नमयादिष्वन्वेतीत्यन्वयः अतस्तत्तदाकारतेति एवं तर्हि सत्यत्वमसङ्गत्वञ्च कथं तत्राऽऽह चरमोऽन्नमयादिषु य इति अन्नमयादिषूपदिश्यमानेषु यश्चरमो ब्रह्मपुच्छं प्रतिष्ठेति पुच्छत्वेनोक्तः स त्वमिति सम्बन्धः । ननु तथाऽप्यन्नमयादिष्वन्वितत्वेऽसङ्गत्वव्याहतिरेव तत्राऽऽह सदसतः परं त्वमथ यदेष्ववशेषमृतमिति सदसतः स्थूलसूक्ष्मादन्नमयादेः परं व्यतिरिक्तं तत्साक्षिभूतम् अवशेषमवशिष्यत इत्यवशेषमबाध्यम् अथात एव ऋतं सत्यम् तर्हि किमर्थं तेष्वन्वय उक्तः शाखाचन्द्रवच्छुदद्धधस्वरूपलक्षणार्थम् तथाहि 'स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिरः' इत्यादिना स्थूलसूक्ष्मक्रमेण पञ्चकोशानुपदिश्य तस्य पुरुषविधतामन्वयं पुरुषविध इति पुनः पुनस्तदन्वितत्वेनाऽऽलक्ष्य ब्रह्मपुच्छं प्रतिष्ठेति सर्वसाक्षिशुद्धस्वरूपनिरूपणमित्यनवद्यम्।

नरवपुःप्रतिपद्य यदि त्वयि श्रवणवर्णनसंस्मरणादिभिः । नरहरे ! न भजन्ति नृणामिदं दृतिवदुच्छ्वसितं विफलन्ततः ॥४॥॥१७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिका प्रकाशः वंशीधरी — उभयविधभजनं तद्धीनान् श्रुतयो निन्दन्ति । तथा हि-जनकं याज्ञवल्क्यः । अभु इति । भगवद्विमुखाः सर्वे एवासुराः ते हि श्रीमुखेनैवोक्ताः —

"अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः । दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥

कर्शयन्तः शरीरस्थं भूतग्राममचेतसः । मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥" इति गीतासु ॥

आग्नेयेऽपि —

"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च । विष्णुभक्तिपरो दैव आसुरस्तद्विपर्ययः ॥" इति ।

असुर्या नाम लोकाः कर्मफलानि अन्धेन तमसा परमात्माज्ञानेनावृताः ये के च आत्महनो भवद्विमुखाः प्रेत्य तााँल्लोकानभिगच्छन्ति । अभक्तनिन्दापरेयं श्रुतिः । आदिनास्या अन्यासां च ग्रहणम् ।

"इहैव सन्तोऽथ विद्मस्तद्वयं, न चेदवेदीर्महती विनष्टिः । यत्तद्विदुरमृतास्ते भवन्त्यपरे दुःखमेव यन्ति ॥" इति॥

वयमिहैव सन्तस्तद्विजानीमः त्वं चेद्यदि नावेदीः तत्परमात्मतत्त्वं न विदितवान् तर्हि तव महती विनष्टिर्जन्ममरणा महत्यनन्ता संसृतिः स्यात्कुतः । ये तद्विदुस्तेऽमृता जन्ममरणादिदुःखाद्विमुक्ताः परमानन्दरूपा भवन्ति । इतरेऽज्ञाः दुःखमे

प्राप्नुवन्ति, इति ।
इत्यर्थ इति- "धित्ते
"श्वविड्व
"सफलं ज
कामादीहादिनाऽर्थवा
स्वस्वसामर्थ्यदातुः —
"देहेन्द्रियप्रा
नैवान्यदा लो
कृतघ्नानां त
विधेव प्रकार इव । अत्र
पुच्छत्वेनोक्तेऽपि तत्सा
द्वितीयायां चन्द्रनिरीक्षण
इत्यादिना ।
अथ पञ्चविधा अ
प्रथममन्नरसमयपुरुषविधा
"""स वा एष पु
प्रतिष्ठा ॥" इति । अस्यार्थः
स वै अन्नरसमयः अन्नरसवि
बाहुर्दक्षिणः पक्षः । अयं वा
नाभेरधस्ताद्यदङ्गं तत्पुच्छमि
अथ प्राणमयं पुरुषम
पुरुषविधतामन्वयं पुरुषविध
प्रतिष्ठा । तस्यैष शारीर आत्मा
अर्थः — तस्मादन्न
एषोऽन्नरसमयः पूर्णः । वायु
तस्यान्नरसमयस्यात्मनः पुरुषवि
तस्य प्राणमयस्य वायुविकारस्य
पक्षः । अपानोऽधोवायुः उत्तर
तदभिमानिनी देवता तस्य पु
इति श्रुतेः । अन्यथोदानवृत्त्योर्ध्व
शारीरः य एष प्राणमयः । स तस
श्रुतेः । प्राणबलेन सेन्द्रियस्य देह
अथ मनोमयं पुरुषमाह —
पुरुषविधतामन्वयं पुरुषविधः । त

नुवन्ति, इति । उपवेशपरेयं श्रुतिः । असून्प्राणेन्द्रियादीन् बिभ्रतीत्यसुभृतः । अनुविदधति अनुसरन्ति । इतरथा भक्त्यभावे । र्थ इति- "धिक्तेषां धिक्तेषां येषां भक्तिर्न केशवे राजन् !" इत्यादिपुराणात् ।

"श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः । न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥" इति ॥

"सफलं जीवितं तेषां येषां भक्तिर्जनार्दने ।" इत्युक्तेरितरेषां वृथैवेति मुखत एवोक्तमिति भावः । अत्राक्षिपति-नन्विति । मादोहादिनाऽर्थावाप्त्यादिग्रहः । नेत्याह-कार्यं देहादि कारणं महदादि तयोरनुग्राहकत्वेन निजचिच्छक्त्यावेशप्रदानेन जीवनहेतोः वसामर्थ्यदातुः —

"देहेन्द्रियप्राणमनोधियोऽमी यदंशवृद्धाः प्रचरन्ति कर्मसु ।
नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्ट्रपदेशमेति ॥" इत्युक्तेः ।

कृतघ्नानां तत्कृतमुपकारमजानतां तदपि कामादिसुखमपि तत्राण्डे तत्तदाकारः अन्नमयाद्याकारः तदन्नमयाद्याकारत्वं व प्रकार इव । अत्र पुनराशङ्कते-नन्विति । अतोऽन्वयात् । एवं तर्हि तत्तदाकारत्वे । तत्राक्षेपे । पुनराशङ्कते-नन्विति । तथापि त्वेनोक्तेऽपि तत्साक्षिभूतमन्नमयादेः साक्षिभूतम् । अत एवाबाध्यत्वादेव । पुनराक्षिपति-तर्हीति । शाखाचन्द्रेति । यथा- यायां चन्द्रनिरीक्षणार्थं बालं बोधयति प्रथमं वृक्षमेव चन्द्रमाह-यदा स वृक्षं पश्यति शुद्धमेवमत्रापि तथा दर्शयति-स वा त्यादिना ।

अथ पञ्चविधा अन्नमयादिषु यथा तैत्तिरीयोपनिषदि तथात्र लिखामः — "ब्रह्मविदाप्नोतिपरम् ।" इत्यधिकृत्याम्नायान्ते मन्नरसमयपुरुषविधामाह —

""स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं ष्ठा ॥" इति । अस्यार्थः — अन्नाद्वै प्रजाः प्रजायन्ते । अन्नाद्वै पुरुषः सम्भूतः इत्याद्युक्तः अन्नरसविकारः । एष पुरुषो देहः । वै अन्नरसमयः अन्नरसविकारः तस्येदं प्रसिद्धं शिरः न तु प्राणमयादिष्विव कल्पनामयम् । एवं पक्षादिषु योजना । अयं दक्षिणो दक्षिणः पक्षः । अयं वामो बाहुरुत्तरः पक्षः । अयं मध्यमो देहभाग आत्मा "अङ्गानां मध्ये ह्येष आत्मा ।" इति श्रुतेः । इदं धस्ताद्यदङ्गं तत्पुच्छमिव पुच्छमधोलम्बनसाम्यात् तदेव प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठाऽऽश्रयः ॥" इति (१)

अथ प्राणमयं पुरुषमाह — "तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयस्तेनैष पूर्णः । स वा एष पुरुषविधस्तस्य विधतामन्वयं पुरुषविधस्तस्य प्राणमेव शिरः । व्यानो दक्षिणः पक्षः अपान उत्तरः पक्षः । आकाश आत्मा । पृथिवी पुच्छं ष्ठा । तस्यैष शारीर आत्मा । यः पूर्वस्य ॥" इति ।

अर्थः — तस्मादन्नरसमयात्पुरुषादन्य अन्तरस्तदभ्यन्तरस्थ आत्मा प्राणमयो वर्तते प्राणो वायुस्तन्मयस्तेन प्राणमयेन न्नरसमयः पूर्णः । वायुना दृतिरिव (दृतिश्चर्मयन्त्रम्) स वै एष प्राणमय आत्मा पुरुषविधः पुरुषाकारः । कुतः । रसमयस्यात्मनः पुरुषविधतामनुलक्ष्यीकृत्यायं प्राणमयोऽपि पुरुषविधो भवति तदन्तर्वर्तित्वात् । मूषायन्त्रनिषक्तधातुप्रतिमावत् प्राणमयस्य वायुविकारस्य मुखनासिकादिनिःसरणशीलो वायुवृत्तिविशेषः प्राणः शिरः । व्यानो वायुवृत्तिविशेषः दक्षिणः । अपानोऽधोवायुः उत्तरः पक्षः । आकाश आत्मा वायुवृत्तिविशेषः समानाख्यो यः स आत्मा मध्यभागः । पृथिवी मानिनी देवता तस्य पुच्छं प्रतिष्ठा आध्यात्मिकप्राणस्य धारयित्री स्थितिहेतुत्वात् । "सैषा पुरुषस्यापानमवष्टभ्य" ति । अन्यथोदानवृत्त्योर्ध्वगमनं गुरुत्वात्पतनं वा स्याच्छरीरस्य तस्मात्पृथिवी पुच्छं प्रतिष्ठेति । तस्येति शरीरेऽन्नमये भवः य एष प्राणमयः । स तस्यान्नमयस्य शारीर आत्मा भवति । अन्नमयात्प्राणमयः श्रेष्ठश्च "प्राणं देवा अनुप्राणन्ति ।" इति प्राणबलेन सेन्द्रियस्य देहस्य बलमिति । (२)

अथ मनोमयं पुरुषमाह — "तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमयस्तेनैष पूर्णः । स वा एष पुरुषविधस्तस्य विधतामन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं

प्रतिष्ठा । तस्यैष शारीर आत्मा । यः पूर्वस्य ॥'' इति ॥

अर्थः —

तस्मात्प्राणमयादेतस्मादन्यः अन्तर आत्मा मनोमयः । मनः सङ्कल्पविकल्पात्मकमन्तः**करणं** तन्मयः मनोमयः । सोऽयं प्राणमयस्याभ्यन्तर आत्मा तेन मनोमयेन प्राणमयः पूर्णः । स एष **पुरुषविधो** भवति । तस्य प्राणमयस्य पुरुषविधतामुनलक्ष्यीकृत्यायमपि पुरुषविधः । तस्य मनोमयस्य । यजुरेव शिरः यजुर्वेदमन्त्रविशेषः शिरः । तस्य शिरःप्रधानत्वात् । यजुषां हि हविर्दीयते स्वाहाकारादिना । तथा ऋग्वेदमन्त्रविशेषः तस्य दक्षिणः पक्षः । सामवेदमन्त्रविशेष उत्तरो वामपक्षः । आदेशोऽत्र ब्राह्मणमन्त्रविशेषः आत्मा । अथर्वणाङ्गिसा दृष्टा मन्त्रविशेषाः । ब्राह्मणं पुच्छं शान्तिपौष्टिकादिप्रतिष्ठाहेतुकर्मप्रधानत्वात्प्रतिष्ठा । य एष मनोमयस्तस्य पूर्वस्य प्राणमयस्य शारीर आत्मा भवति । प्राणमयादस्य श्रेष्ठत्वं ज्ञानसम्बन्धात् । ''मनसा पश्यति मनसा श्रृणोति'' इत्यादिश्रुतेः (३)

अथ विज्ञानमयं पुरुषमाह — ''तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमयस्तेनैष पूर्णः । स वा एष पुरुषविधः । तस्य पुरुषविधतामन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग आत्मा । मह पुच्छं प्रतिष्ठा । तस्यैष शारीर आत्मा । यः पूर्वस्य ॥'' इति ॥

अर्थः —

तस्मान्मनोमयादन्योऽन्तरस्थ आत्मा विज्ञानयो भवति । निश्चयात्मिकाबुद्धिर्विज्ञानं तन्मयः । ''बुद्धिर्विज्ञानरूपिणी ।'' इत्युक्तेः । एष मनोमयस्तेन विज्ञानमयेन पूर्णः । स एष विज्ञानमयः । पुरुषविधः तस्य मनोमयस्य पुरुषविधतामनुलक्ष्यीकृत्यायमपि पुरुषविधो भवति । तस्य विज्ञानमयस्य । श्रद्धैव शिरः । ऋतं सूनृता वाणी । दक्षिणः पक्षः । सत्यं यथार्थभाषणमुत्तरः पक्षः । योगो युक्तिसमाधानं तस्यात्मा । महः महत्तत्त्वं पुच्छं प्रतिष्ठा । सर्वेषां कारणत्वात् कारणं हि कार्याणां प्रतिष्ठेत्युक्तेः । य एष विज्ञानमयः । स प्राणमयाच्छ्रेष्ठः सूक्ष्मश्च । मनोमयो हि वेदात्मक उक्तः । वेदार्थनिश्चयात्मिका बुद्धिर्विज्ञानं तन्मय आत्मा विज्ञानमयः । प्रमाणविज्ञानपूर्वको हि यज्ञादिर्वितन्यते ''विज्ञानं यज्ञं तनुते ।'' इति श्रुतेः । निश्चयविज्ञानवतो हि पुंसः कर्तव्यार्थेष्वपूर्वश्रद्धोत्पद्यते । सा श्रद्धा सर्वकर्तव्यानां प्राथम्यात्तस्य शिर इति (४)

आनन्दमयं पुरुषमाह — ''तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमयस्तेनैष पूर्णः । स वा एष पुरुषविधस्तस्य पुरुषविधतामन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा । तस्यैष शारीर आत्मा । यः पूर्वस्य ।'' इति ॥

अर्थः — तस्माद्विज्ञानमयादन्योऽन्तरोऽभ्यन्तर आत्माऽऽनन्दमयः । अन्नमयादीनां कार्यात्मनामधिकारात् मयट्प्रत्ययाच्चानन्दमयः कार्यात्मा वेदितव्यः । आनन्दस्य विकारः आनन्दमयः शुद्धजीवस्तेनानन्दमयेन । एष विज्ञानमयः पूर्णः । स वै आनन्दमयः । पुरुषविधः पुरुषाकारः । कुतस्तस्य विज्ञानमयस्य पुरुषविधतामनुलक्ष्यीकृत्य पुरुषविधस्तस्यानन्दमयस्य । प्रियमेव शिरः । प्रियमिष्टस्त्रीपुत्रादिसन्दर्शनं प्राधान्याच्छिर इव शिरः । मोदः प्रियवस्तुलाभनिमित्तो हर्षः मुखप्रसादरूपः । दक्षिणः पक्षः । प्रमोदः स एव प्रकृष्टो हर्षप्रहास्ययुक्तः । उत्तरः पक्षः । आनन्दः सुखसामान्यं तस्यात्मा प्रियादीनां सुखावयवानाम् । तेषु तस्यानन्दस्यानुस्यूतत्वात् आनन्द आत्मा । एवं चोत्कृष्टमाणस्यानन्दमयस्यात्मनः ब्रह्म पुच्छं प्रतिष्ठा आश्रयः यस्य शाखाचन्द्रवदन्तरतमत्वज्ञानार्थमन्नमयादिपञ्चकोशा उपन्यस्तास्तद्ब्रह्म सर्वेषामाश्रयः (५) ॥ इति पञ्चकोशाः ।

अन्तर्यामिब्राह्मणं यः सर्वेषु भूतेषु तिष्ठन्निति प्रागेव लिखितम् ।

''यः प्राणे वै तिष्ठन्प्राणादन्तरो यं प्राणो न वेद । यस्य प्राणः शरीरम् । यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद । यस्य मनः शरीरम् । यो मनोऽन्तरो यमयत्येष त आत्मान्यर्याम्यमृतः । यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यं विज्ञानं न वेद । यस्य विज्ञानं शरीरम् । यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आत्मनि

तिष्ठन्नात्मनोऽन्तरो य

अर्थस्तु प्रा

तदुक्तं ब्रह्मस्तुतौ श्रीश्

''कृष्णमेनम

सर्वेषामपि भ

रासक्रीडायां

''गोपीनां तत्प

तस्मात्तद्गुणकी

''पानेन ते देव

''अनिमित्ता भा

अथ ज्ञानेन तत्प्रा

शुद्धः । यस्त्वविद्यायुक्त

संस्तत्तत्कोशोत्थसुखदु

स्वाभीष्टस्त्रीपुत्रार्थदर्शनला

एवात्मज्ञानाभावात्संसरतो

सहैकीभूयानन्दमयो भूत्वा

पञ्चकोशोपन्यासोऽत्रेति दिक्

नृणामिति पाठो लेखकप्रमाद

त्यपपाठ एव । नरहरे न रमन्ति

न करोतीत्यर्थः । तद्वदत्रापीति ।

श्रीधरानुयायिनी —

अभक्ताश्चेत्तदा ते भस्त्रा इव वृ

महदिति । महत्तत्त्वाहङ्कार

मनोमयविज्ञानमयानन्दमयाख्यप

मानन्दमयकोशपुच्छत्वेनोक्तस्त्व

सिद्ध्यतीत्युक्तम् । तत्तत्कोशान्वयि

★॥ विश्वनाथी — तदेवं साम

यति । तत्र काश्चित्पूर्वोक्तशुद्धभ

काश्चित्स्वानुगतश्रुतीश्चान्यास्तत्पर

कसाधर्म्यान्निष्प्राणत्वेऽपि भस्त्रा

यावत् । तदैवासुभृतः प्राणधा

माणस्तत्राहुः–महदहमादयश्चित्त

व्यष्टिशरीरमसृजन् ''नमामि ते दे

अतो येषां चित्तश्रोत्रादयो नैव भज

न्मयः मनोमयः । सोऽयं
धो भवति । तस्य
मन्त्रविशेषः शिरः । तस्य
। सामवेदमन्त्रविशेष उत्तरो
षाः । ब्राह्मणं पुच्छं
त्मा भवति । प्राणमयादस्य

स्तेनैष पूर्णः । स वा एष
: पक्षः । योग आत्मा । महः

। "बुद्धिर्विज्ञानरूपिणी ।"
विधतामनुलक्ष्यीकृत्यायमपि
र्थभाषणमुत्तरः पक्षः । योगो
र्णां प्रतिष्ठेत्युक्तेः । य एष
बुद्धिर्विज्ञानं तन्मय आत्मा
निश्चयविज्ञानवतो हि पुंसः

यस्तेनैष पूर्णः । स वा एष
प्रमोद उत्तरः पक्षः । आनन्द

दीनां कार्यात्मनामधिकारण
द्वजीवस्तेनानन्दमयेन । एष
य पुरुषविधतामनुलक्ष्यीकृत
: । मोदः प्रियवस्तुलाभनिमित्तो
ानन्दः सुखसामान्यं तस्यात्मा ।
त्यानन्दमयस्यात्मनः ब्रह्म पुच्छं
श्रयः (५) ॥ इति पञ्चकोषाः ॥

मयत्येष त आत्मान्तर्याम्यमृतः ।
आत्मान्यर्याम्यमृतः । यो विज्ञाने
आत्मान्तर्याम्यमृतः । य आत्मनि

त्मनोऽन्तरो यमात्मा न वेद । यस्यात्मान्तर्याम्यमृतः ।" इति ॥

अर्थस्तु प्राग्लिखितप्रायः । अत्र तु अन्नमयादिषु यश्चरमः स त्वमित्यनेन श्रीकृष्ण एवोक्तः । योऽन्यर्यामी स कृष्ण एव । ब्रह्मस्तुतौ श्रीशुकेन —

"कृष्णमेनमवैहि त्वमात्मानमखिलात्मनाम् । जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥
सर्वेषामपि भूतानां भावार्थो भवति स्थितः । तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यताम् ॥" इति ॥

रासक्रीडायां च —

"गोपीनां तत्पतीनां च सर्वेषामपि देहिनाम् । योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥" इति ॥

तस्मात्तद्गुणकीर्तनादिभिर्निर्दग्धपञ्चकोशस्य भक्तस्य सुखेन तत्प्राप्तिः सर्वत्रोक्ता —

"पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये । त्वामेव धीराः पुरुषा विशन्ति" इत्याद्युक्तेः ।

"अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी । जरयत्याशु या कोशं निगीर्णमनलो यथा ॥" इत्याद्युक्तेश्च ॥

अथ ज्ञानेन तत्प्राप्तिमाह–जीवात्मा द्विविधो विद्यायुक्ताविद्यायुक्तभेदात् । यस्तु विद्यायुक्तः स तु नित्यमुक्त आनन्दमयः । यस्त्वविद्यायुक्तः शुद्धस्य प्रतिबिम्बरूपः स तु नित्यबद्धोऽशुद्धश्चेति । अयमेवान्नमयादिपञ्चकोशात्मकः तत्कोशोत्थसुखदुःखद्वेषजराक्षुत्पिपासाशोकमोहादिकमनुभवति । यच्चानन्दमयत्वमस्याविर्भवति तदपि स्त्रीपुत्रार्थदर्शनलाभाद्युपाधिनैव, न त्वात्मलाभेन "सर्वेषामानन्दानामुपस्थमेकं परमायतनम्" इति श्रुतेः । अत ज्ञानाभावात्संसरतोऽस्य प्रबोधस्तत्त्वमसीत्यादिवाक्यैः क्रियते यदा दैवादहं ब्रह्मास्मीति प्रबुद्धस्तर्हि शुद्धात्मना भूयानन्दमयो भूत्वा पञ्चकोशादविद्याकार्यादसङ्गः सन् विद्योपाधितोऽपि निर्मुक्तः सन् ब्रह्मैव भवतीति एतदर्थं कोशोपन्यासोऽत्रेति दिक् । स्वामिचरणाः । नरेति । ततस्तर्हि तेषां नृणामुच्छ्वसितं जीवितं दृतिवद्विफलमित्यर्थः । न भजन्ति ति पाठो लेखकप्रमादस्तथापि अस्य योजनिकेयम्, त्वयि त्वां न भजन्ति किन्तु सप्तम्यां द्वितीयाकल्पनमपौरुषेयत्वादयो पाठ एव । नरहरे न रमन्ति नृणामिदमिति यथा विपूर्वस्य रमेः परस्मैपदित्वं तथा नपूर्वादपि ज्ञेयमर्थसाम्यात् । अधर्माद्विरमतीत्यधर्मे तीत्यर्थः । तद्वदत्रापीति ॥★॥

श्रीधरानुयायिनी — उक्तोभयविधभजनहीनान्निन्दति–दृतय इति । हे हरे ! प्राणिनो यदि ते भक्तास्तदैव सफलजीवनाः तदा ते भस्त्रा इव वृथाश्वासा जीवन्तोऽपि मृता एव । ननु भक्तानामभक्तानामपि कामादिसुखमस्त्येवेत्याशङ्क्याहुः– ति । महत्तत्त्वाहङ्कारादयः स्वयमसमर्थाः पुनस्त्वदनुप्रवेशेन लब्धसामर्थ्यास्ततोऽन्नमयप्राणमय- विज्ञानमयानन्दमयाख्यपञ्चकोशसमुदायात्मकं समष्टिव्यष्टिदेहसमूहमुत्पादितवन्तः । ततश्च तत्तत्कोशान्वयेन तत्तत्कोशविधः मयकोशपुच्छत्वेनोक्तस्त्वमेव साक्षिरूपोऽसि । एतेन त्वत्कृतप्रकाशादिरूपानुग्रहं विना जीवानां कामसुखादिकमपि न त्युक्तम् । तत्तत्कोशान्वयित्वेऽप्यसंयोगित्वमाह–स्थूलसूक्ष्मस्वरूपान्नमयादेः परं तत्साक्षिरूपमबाध्यं सत्यं त्वमेवासीति

विश्वनाथी — तदेवं सामान्याकारेण सर्वश्रुतीनां समन्वयस्तच्छुद्धभक्तिप्रतिपादनपर्यन्तो दर्शितः । अथ तद्विशेषाणामपि । तत्र काश्चित्पूर्वोक्तशुद्धभक्तिप्रतिपादकश्रुत्यनुगामिन्यः श्रुतयोऽन्वयव्यतिरेकाभ्यां तद्वाक्यं पुष्णन्त्यस्तेनैव तत्र चरन्त्यः नुगतश्रुतीश्चान्यास्तत्पर्यवसानवत्त्वेन स्तुवन्ति–दृतय इति । ते जना दृतय इव श्वसन्ति त्वद्भक्तिहीनत्वेन निष्प्राणत्वेऽपि भस्त्रा इव वृथाश्वासा इत्यर्थः । यदि तु ते तवानुविधा अनुविदधत्यानुकूल्यं कुर्वन्तीत्यनुचरा भक्ता म् । तदैवासुभृतः प्राणधारिणो जीवन्तो नरा उच्यन्ते । नन्वभजतामपि सूक्ष्मः स्थूलश्च देहो जीवन्नेव दृश्यते न तु त्राहुः–महदहमादयश्चित्ताहङ्कारबुद्धिमनःश्रोत्रचक्षुरादयो देहद्वयारम्भका यदनुग्रहतो यद्भजनप्राप्तानुग्रहादेव अण्डं शरीरमसृजन् "नमामि ते देव पदारविन्दं प्रपन्नतापोपशमातपत्रम् ।" इत्यादितृतीयोक्तेश्चित्ताहङ्कारादयो भजने प्रवृत्ता एव येषां चित्तश्रोत्रादयो नैव भजने प्रवर्तन्ते ते देहा नैव चित्तश्रोत्रादिमन्तः । अतो देहाभासा एव मृता एवेति भावः । नन्वहं

कीदृशाकारः यं मां ते भजेरन्नित्यत आहुः-अन्नमयादिषु अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः स्थूलदेहप्राणान्तःकरण-जीवपरमात्मानः क्रमेण बस्तिपुच्छपृथिवीपुच्छाथर्वाङ्गिरःपुच्छमहःपुच्छब्रह्मपुच्छा एव ये पञ्चपुरुषाः श्रुतावुक्तास्तेषु मध्ये पञ्चम आनन्दमयः स त्वमिति सम्बन्धः। ननु तर्ह्यन्नमयाद्याः किमहं न भवामि तत्र विशिषन्ति-अत्रान्नमयादिषु अन्वेति अनुप्रविशतीत्यन्वयः। स त्वं तव कारणत्वात्। अन्नमयादीनां तत्कार्यत्वादेतेऽपि त्वमेव भवसि किन्तु न स्वरूपेण, तु त्वमानन्दमय एव सर्वकारणं परमात्मेत्यर्थः। किन्त्वेषु सर्वेष्वपि मध्ये यदवशेषं परमपरमं "रसो वै सः।" इति श्रुत्या रसत्वेन प्रतिपादितम् "स्त्रीणां स्मरो मूर्तिमान्" इति भागवतविवृतं सदसतः परमन्नमयादिस्थूलसूक्ष्मसर्वविलक्षणं सर्वश्रेष्ठात्सत आनन्दमयादसतस्तत निकृष्टाद्विज्ञानमयादेश्च परमन्यत् योऽसौ जाग्रत्स्वप्नसुषुप्तिमतीत्य तुर्यातीतो गोपाल इति। श्रीगोपालतापनीश्रुत्युक्तम् "ब्रह्मणो हि प्रतिष्ठाऽहम्" इति गीतास्पष्टीकृतं सर्वोत्कृष्टं श्रीकृष्णस्वरूपं वस्तु तदपि ऋतमस्माभिः श्रुतिस्तपःप्राप्तस्वरूपभिः प्राप्तमनुभूतं वा। अर्तेर्गत्यर्थत्वाद्गत्यर्थानां च प्राप्त्यर्थत्वाज्ज्ञानार्थत्वाच्च। अत्र —

"असुर्या नाम ते लोका अन्धेन तमसावृताः। तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥" इत्याद्या भक्त्यभाव दोषप्रतिपादिकाः। असुर्याः —

"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च। विष्णुभक्तिपरो दैव आसुरस्तद्विपर्ययः॥"

इत्याग्नेयविष्णुधर्मोत्तरोक्तेरसुराणां विष्णुभक्तिहीनानां प्राप्य इत्यर्थः।

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्। तं पीठगं ये तु यजन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्॥"

इत्याद्या भक्तिसत्त्वे गुणप्रतिपादिकाः श्रुतयः।

"स वा एष पुरुषोऽन्नरसादिमयस्तस्येदमेव शिरः। अयं दक्षिणः पक्षः। अयमुत्तरः पक्षः। इदं पुच्छं प्रतिष्ठा॥"

इत्येवमन्नमयादिचतुःपुरुषनिरूपणोत्तरं पञ्चम आनन्दमयो निरूपितो यथा —

"तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमयस्तेनैष पूर्णः। स वा एष पुरुषविधस्तस्य पुरुषविधतामन्वयं पुरुषविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा॥" इति तैत्तिरीटकश्रुतिर्जीवात्मपरमात्मब्रह्मप्रतिपादिका। अत्र यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यस्य विज्ञानं शरीरमि जीवान्तर्यामिप्रतिपादकश्रुतेरात्मनि तिष्ठन् इति श्रुत्यन्तरवाच्यविज्ञानमयो जीवात्मैवोक्तस्तदनन्तरोक्त आनन्दमयः सर्वान्तर्यामी परमात्मा परमोपास्य इति वैष्णवमते व्याख्या। अतोऽत्र पुत्रदर्शनजानन्दादिकं प्रियादिशब्दैर्न व्याख्येयम् किन्त्वेकस्यैव परमानन्दस्वरूपस्य परमात्मन आन्दोदयोत्कर्षतारतम्यादेव प्रियादीनां चतुर्णां तत्तन्नामभेदः। ब्रह्मणस्तु सर्वतोऽपि बृहत्तमानन्दत्वादानन्दप्रतिष्ठात्वम् प्रतिष्ठीयतेऽस्यामिति प्रतिष्ठा आश्रयः "ब्रह्मणो हि प्रतिष्ठाऽहम्" इत्युक्तेः "रसो वै सः" इति सर्वान्तिमश्रुत्युक्तेश्च तस्य प्रतिष्ठा। कृष्णः सर्वबृहत्तमानन्दस्तदवधिरूपो गोपालतापनीश्रुत्या तुरीयादपि विलक्षणत्वेन प्रतिपादितः प्रेमरसमयवपु परमावधिरुक्तः "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।" इत्युक्तेरन्तर्याम्यानन्दमयः खलु यस्यैक एवांशः अत प्रेक्षावच्छिरोमणीनां श्रुतीनां कृष्णस्यैवोपासना बृहद्वामने दृष्टा। प्राप्तिश्च गोपीत्वेन "स्त्रिय उरगेन्द्रभोगभुजदण्ड०" इति वक्ष्यते। अतो भगवत्स्वरूपेष्वपि मध्ये कृष्णमेव सर्वोत्कृष्टतया श्रुतिभिः प्रतिपादितमवधार्य नारदः श्रीनारायणस्यापि पुर "नमस्तस्मै भगवते कृष्णायामलकीर्तये।" इत्युच्चारयन्कृष्णमेव नमस्करिष्यते (४) ॥१७॥

नीलकण्ठी — एवं स्वधर्मानुष्ठानाच्चित्तशुद्धिस्ततो वेदान्तश्रवणं ततः संन्यासस्ततो निदिध्यासनं तेनात्मानुभव क्रमानभिज्ञान्निन्दति-दृतय इति। हे भगवन्! महदहमादयस्ते तवानुग्रहतो यदण्डमसृजन् तदनुविधा यदि असुभृतः तर्हि श्वसन्तीति सम्बन्धः। अयमत्राण्डसृष्टिक्रमः —

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। अग्नेरापः। अद्भ्यः पृथिवी।" इति श्रुतेरविद्याशबल

शब्दवानाकाश उत्पन्न
तेषामेव राजसांशेभ्यो
वचनादागतिविसर्गान
पञ्च वृत्तयः तासु प्रा
देहादुत्क्रमणम्। समान

"पञ्चप्राणम
मनस्यहङ्कारस्यान्तर्भावः
वैश्वानरहिरण्यगर्भेश्वरापर
तवानुग्रहतस्त्वदनुप्रवेशेन
महान्तवटविटपिनम्। तदि
ते अनुविधाः देहादिधर्मे
व्यष्टिदेहाभिमानिनो
समष्ट्यभिमानिनामुपासक
अत एवात्मविवादिनां विप्र
देह एवात्मेत्याहुः। देहस्य
संहतानामात्मत्वे एकविनाशे
प्राण आत्मेत्यन्ये। प्राणेऽपि
सर्वेन्द्रियानुग्राहकतया मनसः
सुप्तौ लयदर्शनाच्छून्यमात्मे
बाल्यस्थविरयोरात्मैक्यप्र
स्तनपानादिप्रवर्तकजन्मान्त
सर्वात्मसान्निध्याविशेषेण भोगस
इत्यार्हताः। एकस्यात्मनः
चानित्यत्वप्रसङ्गादणुत्वे च
तत्तन्मनःसंयोगजसुखादिव्य
तार्किकवैशेषिकप्राभाकराः।
भोगवैचित्र्यादात्ममनसां
भोगवैचित्र्यमित्यन्योन्याश्रयता
दणुरनागन्तुकदुःखादिमानित्येकदे
मोक्षाभ्युपगमे वा दुःखादेरात्मधर्मत
अतो विभुं दुःखाद्यसंस्पृष्टमकर्तारं

"अजो ह्येको जुषमाणोऽ

इति बन्धमोक्षव्यवस्थापक
सङ्ख्याः पातञ्जलाश्चाहुः। अस्माकं
मनोविज्ञाने मनोमयविज्ञानमयौ एत

स्थूलदेहप्राणान्तःकरण-
श्रुतावुक्तास्तेषु मध्ये यश्चरम
-अत्रान्नमयादिषु अन्वेति
स्वरूपेण, तु त्वमानन्दमय
श्रुत्या रसत्वेन प्रतिपादितम
त्सत आनन्दमयादसतस्ततो
ापनीश्रुत्युक्तम् "ब्रह्मणो हि
मस्वरूपभिः प्राप्तमनुभूतं वा।

ना: ॥" इत्याद्या भक्त्यभावे

,

न्ति धीरास्तेषां शान्तिः शाश्वती

ः । इदं पुच्छं प्रतिष्ठा ॥"

रुषविधस्तस्य पुरुषविधतामन्वयं
मा । ब्रह्म पुच्छं प्रतिष्ठा ॥" इति
न्तरो यस्य विज्ञानं शरीरमिति
आनन्दमयः सर्वान्तर्यामी परमात्मैव
किन्त्वेकस्यैव परमानन्दस्वरूपस्य
बृहत्तमानन्दत्वादानन्दप्रतिष्ठात्वम्।
इति सर्वान्तिमश्रुत्युक्तेश्च तस्यापि
प्रतिपादितः प्रेमरसमयवपुरुपास्ये
ः खलु यस्यैक एवांशः अत एव
उरगेन्द्रभोगभुजदण्ड०" इति पद्ये
र्य नारदः श्रीनारायणस्यापि पुरः
॥
ततो निदिध्यासनं तेनात्मानुभव
दनुविधा यदि असुभृतः तर्हि
पृथिवी ।" इति श्रुतेरविद्याशबल

शब्दवानाकाश उत्पन्नः । ततःशब्दस्पर्शवान्वायुः । ततः शब्दस्पर्शरूपरसवत्य आपः । ताभ्यः शब्दस्पर्शरूपगन्धान्गृह्णन्ति तथा तेषामेव राजसांशेभ्यो व्यस्तेभ्यः क्रमाद्वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि जातानि । वह्नीन्द्रविष्णुमित्रप्रजापतिभिरनुगृहीतानि वचनादागतिविसर्गानन्दान्निर्वर्तयन्ति तेषामेव राजसांशेभ्यो मिलितेभ्यः प्राणो जायते । स कर्मेन्द्रियाण्यनुगृह्णाति । तस्य प्राणाद्याः पञ्च वृत्तयः तासु प्राणः श्वासप्रश्वासौ करोति । अपानोऽशितपीतादेरधोनयनम् । व्यानो बलसाध्यं भारोद्यमनादि । उदानो देहादुत्क्रमणम् । समानोऽशितपीतादिसमीकरणम् । तदेतल्लिङ्गशरीरम् । तदुक्तम् —

"पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥" इत् । अत्र मनस्यहङ्कारस्यान्तर्भावः । बुद्धौ चित्तस्य । अत्र स्थूलसूक्ष्मकारणव्यष्टयः क्रमाद्विश्वतैजसप्राज्ञसंज्ञाः स्थूलसूक्ष्मकारणसमष्टयस्तु वैश्वानरहिरण्यगर्भेश्वरापरपर्यायाः विराट्सूत्रान्तर्यामिसंज्ञाः । तत्र हैरण्यगर्भे बुद्धिमनसी महदहङ्कारौ तत्प्रभृतयो महदहमादयस्ते त्वदनुग्रहतस्त्वदनुप्रवेशेन लब्धात्मकाः सन्तः तादृशमेव त्वदनुप्रविष्टं कार्यमसृजन्ब्रह्माण्डं सृष्टवन्तः । वटधानेव भूम्याद्यनुप्रवेशेन महान्तवटविटपिनम् । तदिति द्वितीयान्तं यच्छब्दाभिसम्बन्धादध्याहार्यम् । तत् अण्डम् अनुविदधति तदभेदाध्यासेन तद्धर्माननुकुर्वन्ति ते अनुविधाः देहादिधर्मेणासङ्गमात्मानं विशिषन्तो यदि स्युः तर्हि दृतिश्चर्मकोशो यथा वृथा श्वसिति तथा ते असुभृतः प्राणिनो व्यष्टिदेहाभिमानिनो व्यर्थं जीवन्तीत्यर्थः । असुभृत इति बहुवचनाद्व्यष्ट्यभिमानिनामेव व्यर्थं जीवनं न समष्ट्यभिमानिनामुपासकानामिति गम्यते । देहाद्यनुविधानं चासुभृताममुष्य पुत्रोऽहं ब्राह्मणोऽहमन्धोऽहमित्याद्यनुभावात्स्पष्टम् । अत एवात्मविवादिनां विप्रतिपत्तिः । तथा हि- लोकायतेषु तावत्केचित्स्थूलोऽहं कृशोऽहमित्याद्यनुभवाद्भूतयोगजचैतन्यवान्स्थूलो देह एवात्मेत्याहुः । देहस्य स्वप्नसुषुप्त्योरभोक्तृत्वादन्धोऽहं बधिरोऽहं पश्यामि शृणोमीत्यनुभवादिन्द्रियाण्यात्मेत्यन्ये तेषां संहतानामात्मत्वे एकविनाशेऽप्यात्मनाशापत्तेः। प्रत्येकमात्मत्वे विरुद्धदिक्क्रियया शरीरमुन्मथ्येताक्रियं वा स्यादतोऽशितपीतादिभोक्ता प्राण आत्मेत्यन्ये । प्राणेऽपि सुप्तौ भोक्तृत्वादर्शनात्सुख्यहं दुःख्यहमित्यनुभवात्सुखादिधर्मकं मन आत्मेत्यपरे । तथा बौद्धेष्वपि सर्वेन्द्रियानुग्राहकतया मनसः करणत्वानुभवात्कर्तृरूपविज्ञानमात्मा । तच्च क्षणिकं प्रदीपकलिकावदिति योगाचारादयः । विज्ञानस्यापि सुप्तौ लयदर्शनाच्छून्यमात्मेति माध्यमिकाः । "योऽहं बाल्ये पितरावन्वभूवं सोऽहं स्थविरे प्रणप्तृननुभवामि ।" इति बाल्यस्थविरयोरात्मैक्यप्रत्यभिज्ञानान्न क्षणविनाशी नापि शून्यं निरधिष्ठानकभ्रमासम्भवात् स्तनपानादिप्रवर्तकजन्मान्तरीयसंस्काराऽनुवृत्तिदर्शनाच्च नित्यः । स च न व्यापकः प्रमाणाभावात् एकस्मिन्देहे सर्वात्मसान्निध्याविशेषेण भोगसाङ्कर्यप्रसङ्गाच्च । नाप्यणुः गङ्गाह्रदनिमग्नस्य युगपत्सर्वाङ्गीणशैत्योपलम्भाभावप्रसङ्गात् देहपरिमित इत्यार्हताः । एकस्यात्मनः क्रमेण मशकमतङ्गजमनुजशरीरप्राप्तावयवोपचयापचयस्यावश्यकवक्तव्यत्वात्तथात्वे वानित्यत्वप्रसङ्गादणुत्वे चोक्तदोषाद्विभुत्वेऽपि तत्तदात्ममनसामनादिस्वस्वामिभावसम्बन्धवशेन तत्तदात्मनि तन्मनःसंयोगजसुखादिव्यवस्थोपपत्तेश्च नित्यो विभुः स्वतो जडोऽपि बुद्ध्यादिगुणानामाश्रयः कर्ता भोक्तेति तार्किकवैशेषिकप्राभाकराः । अहमनुभवस्योभयात्मत्वदर्शनाज्जडबोधरूप इति भाट्टाः । मध्यमत्वे उक्तदोषाद्विभुत्वेऽपि भोगवैचित्र्यादात्ममनसां स्वस्वामिभावनियमकल्पना ततश्च भोगवैचित्र्यमित्यन्योन्याश्रयतापत्तेर्भोगसाङ्कर्यानिवारणाच्चन्दनबिन्दुवदेकदेशस्थत्वेऽपि सर्वाङ्गीणशैत्योपलम्भदर्शना- ज्ज्ञानगुणकदुःखादिमानित्येकदेशिनः । सति घटे यावद्रूपनाशादर्शनात्सत्यात्मनि यावद्दुःखनाशलक्षणस्य मोक्षस्यासम्भवः तदभ्युपगमे वा दुःखादेरात्मधर्मत्वासम्भवः वह्न्यौष्ण्यवत्स्वाभाविकस्य धर्मस्य धर्मिनाशमन्तरेण निवृत्त्यसम्भवादनिर्मोक्षापत्तेः । अतो विभुं दुःखाद्यसंस्पृष्टमकर्तारं शुद्धचिन्मात्ररूपम् —

"अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥"

इति बन्धमोक्षव्यवस्थापकश्रुत्यर्थापत्त्या जन्ममरणादिप्रतिनियमदर्शनाच्च भोगसाङ्कर्यानुमानस्य दुर्बलत्वाच्चानेकमात्मानं साङ्ख्याः पातञ्जलाश्चाहुः । अस्माकं तूक्तप्रक्रियया स्थूलदेहोऽन्नमयः कोशः कर्मेन्द्रियैः सह प्राणः प्राणमयः ज्ञानेन्द्रियैः सह ते बुद्धिमनसी मनोमयविज्ञानमयौ एते त्रयोऽपि क्रमेण क्रियाकरणकर्तृरूपाः । कारणशरीरमानन्दमयः एतैरुपहितं चैतन्यं

जीवोऽनुपहितमीश्वर इति। शुद्धचिन्मात्रस्योपाधीभेदमन्तरेण भेदस्यासम्भवात्। तर्कमते श्रोत्रैक्येऽपि तत्तत्कर्णशष्कुल्युपाधिभेदेन शब्दग्रहव्यवस्थावदात्मैक्येऽप्यन्तःकरणभेदादेव बन्धादिव्यवस्थोपपत्तेरेक एवात्मेति। तत्र चार्वाका बौद्धाश्च एकैकं कोशमात्मानमाहुः। तार्किकादीनां त्वानन्दमय आत्मा विज्ञानमयस्तद्गुणाः उभयेऽपि क्षेत्रमेवात्मानं वदन्तो मूढा एव। नग्नभट्टवेदान्त्येकदेशिनस्तु क्षेत्रक्षेत्रज्ञवैशिष्ट्यस्यात्मतां वदन्तो मध्यमाः। त एते उपाध्यनुविधाना दृतय इव श्वसन्ति। इदं श्लोकार्धं पाठक्रममनादृत्यार्थक्रमेण व्याख्यातम्। कुतोऽनुविधानमित्यत आह–पुरुषेति। त इत्यनुषज्यते। यतस्ते तवात्र अण्डे महदादिसृष्टे द्विविधे शरीरेऽन्वयोऽनुगमोऽस्ति कीदृशोऽनुगमः पुरुषविधः स्थूलशरीरप्रकारानुकारी तस्य पुरुषविधतामन्वयं पुरुषविध इत्यन्नमयादिषु पूर्वपूर्वधर्मानुकारित्वमुत्तरोत्तरस्य श्रूयते। कोऽसौ यस्यान्वयोऽत्रास्ति तमाह–चरमोऽन्नमयादिषु य इति। आनन्दमय इत्यर्थः। अस्य हि कारणीभूतमायाशबलस्य कार्यशबलता युक्ता। एवं देहाद्यनुविधानादीश्वरस्यापि संसार इत्युक्त्वा तन्नाशोपायमाह–सदिति। सत्कार्यम् असत्कारणम् अतः परं पदेषु कोशेषु रज्जुभुजङ्गवद्बाध्यमानेष्ववशेषं बाधावधिभूतमत एव ऋतं सत्यं पुच्छं ब्रह्म तदसि त्वमिति शेषः। तज्ज्ञानान्मुक्तिरित्याशयः। पाठान्तरे तु अथशब्दोऽतःशब्दार्थः। शेषं पूर्ववत्। सदसतः परं त्वमथेति पाठो वृत्तमङ्गादुपेक्षितः (४) ॥१७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

दृतय इत्यस्य टीकायामसूर्य्या इति श्रीभगवद्बहिर्मुखाः सर्व एवासुरास्तेषामेते असूर्याः सांसारिका लोकाः कर्मफलानि तथा चोक्तमाग्नेयविष्णुधर्मोत्तरयोः —

"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च। विष्णुभक्तिपरो दैव आसुरस्तद्विपर्ययः ॥" इति।

अन्धेन तमसा परमाज्ञानेन तान् लोकान् प्रेत्य मृत्वाभिगच्छन्ति, आत्महनो भगवद्विमुखा इति अथ एव ऋतं सत्यमित्यत्र अविद्ययैव तत्तत्कल्प्यत इति शेषः। अथ स्वव्याख्या।

तदेवं सामान्याकारेण सर्वश्रुतीनां समन्वयस्तच्छुद्धभक्तिप्रतिपादनपर्यन्तो दर्शितः। अथ तद्विशेषाणामपि दर्श्यते। तत्र काश्चित्पूर्वोक्तशुद्धभक्तिप्रतिपादकश्रुत्यनुगामिन्यः श्रुतयोऽन्वयव्यतिरेकाभ्यां तद्वाक्यं पुष्णन्त्यस्तेनैव तत्र चरन्त्यः काश्चित्स्वानुगतश्रुतीश्चान्यास्तत्पर्यवसानवत्त्वेन स्तुवन्ति–दृतय इति। असुभृतो जीवा यदि ते तवानुविधा भक्ता भवन्ति तदैव श्वसन्ति प्राणन्ति अन्यथा दृतयो भस्त्रा इव श्वसदाभासा एव समष्टिव्यष्टिजीवकरणानां महदादीनामनुग्राहकस्यापि तवोपेक्षणात् सर्वोपेक्षितत्वेन मृततुल्यत्वप्राप्तेरित्यर्थः। न केवलं सृष्टावेव तवानुग्राहकत्वं किन्तु स्थितावपीत्याहुः–पुरुषेति अत्र तैत्तिरीयकोपनिषदि

"ब्रह्मविदाप्नोतिपरम्।" इत्यधिकृत्य श्रूयते "स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिरः। अयं दक्षिणः पक्षः। अयमुत्तरः पक्षः। अयमात्मा। इदं पुच्छं प्रतिष्ठा ॥" तदप्येष श्लोको भवति। "अन्नाद्वै प्रजाः प्रजायन्ते।" "तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयस्तेनैष पूर्णः। स वा एष पुरुषविधस्तस्य पुरुषविधतामन्वयं पुरुषविधस्तस्य प्राणमेव शिरः। व्यानो दक्षिणः पक्षः अपान उत्तरः पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति। प्राणं देवा अनुप्राणन्तीत्यादि। "तस्यैष शारीर आत्मा। यः पूर्वस्य ॥" "तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमयस्तेनैष पूर्णः। स वा एष पुरुषविध एव" इत्यादि पूर्ववत्। "तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश आत्मा। अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा तदप्येष श्लोको भवति, यतो वाच:०" इत्यादि। तस्यैष इत्यादि पूर्ववत् ॥ "तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमयस्तेनैष पूर्णः। स वा एष" इत्यादि। "तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति"। "विज्ञानं यज्ञं तनुते" इत्यादि। तस्यैष इत्यादि।" "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमयस्तेनैष पूर्णः। स वा एषः" इत्यादि। "तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति। 'असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्।' इत्यादि। "तस्यैष एव शारीर आत्मा। यः पूर्वस्य।" इत्यादि श्रीवैष्णवभाष्यमतेन व्याख्या चेयम्। वैशब्दः प्रसिद्धौ निश्चये वा। एष मृज्जलादिपिण्डलक्षणः पुरुषः अन्नरसमयः। अन्नरसो नामात्रान्नरसविकारस्तेन त्वगादिरूप

र्वोऽपि तद्विकारो लभ्यते । तन्मयत्वं जलादिविकारश्लेष्माद्यपेक्षया तस्याधिक्यात् तत्प्राचुर्य एव मयट् । मयड्वैतयो मित्यनेन भषायामेव विकारावयवयोर्यः मयट् विधानात् छन्दसि तु व्यच् एव तद्विधानात् । तत्प्रकृतत्वेन मयडिति तु प्राचूर्य सर्वतस्तद्विधानात् । विकारार्थोऽत्र न प्रकृति इति इदं प्रसिद्धं शिर एव शिरः । ननूत्तरोत्तरत्रेव कल्पनामयम् एवं पक्षादिष्वपि ख्येयम् । पक्षो बाहुरुत्तरो वामः । अयं मध्यमो देहभाग आत्मा । अङ्गानां मध्यं ह्येषामात्मेति श्रुतेः ॥ इदमिति नाभेरधस्ताद्यदङ्गं पुच्छमिव पुच्छं लम्बनसाम्यात् तदेव प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठा आश्रयः । तदेवं शाखाचन्द्रवदन्तरतमत्वज्ञानार्थं कप्रसिद्धमात्मानमनूद्य तस्यान्तरमन्तरमात्मानं शास्त्रप्रसिद्धसाधनादिक्रमेण प्रवेशयन् प्राणमयादीनप्याह-तत्र मनसो धारणार्थं प्राणो धार्य्य इति प्रथमं प्राणमयमाह-तस्मादिति । अनन्तरस्तदपगमादन्नरसमयस्य मृतेः एषोऽन्नरसमयस्तेन पूर्णो वायुनेव स च पुरुषविधः पुरुषाकारः कथं तस्य पूर्वस्यान्नरसमयस्य पुरुषविधतामेव लक्षीकृत्य विशेषं बोधयितुमयमपि रूपककल्पितैः पक्षादिभिः पुरुषाकार एव वर्ण्यते तदेवं रूपकं दर्शयति । तस्य प्राणमयस्य हृदिस्थ प्राणवायुप्रचुरस्य प्राणं प्राणवायुरेव धार्यत्वेन शिरः वर्ण्यते एवं साधनक्रमेणैव दक्षिणपक्षत्वादिक्रमो ज्ञेयः । उदानादिनिर्देशः प्राणेनाभेदोपासनात् आकाशः आकाशस्थः वायुवृत्तिविशेषः समानाख्यो वायुः वायुवृत्त्यधिकारात् मध्यस्थत्वादितराः पर्य्यन्तवृत्तिरपेक्ष्यात्मा अध्यक्षः पृथिवी भिमानिनो देवता आध्यात्मिकस्य प्राणस्य धारयित्री स्थितिहेतुत्वात् सैषा पुरुषस्यापानमवष्टभ्येति श्रुत्यन्तरात् तस्य प्राणमयस्य "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः ।" इत्यत्रोपक्रमे प्रोक्त एवात्मा शारीर आत्मा तद्रूपशरीरान्तर्यामी । कथम्भूतः । पूर्वस्यान्नमयरसस्यापि शारीर आत्मा एवं यः पूर्वस्य प्राणमयस्येत्यादिकमुत्तरत्रापि योज्यम् ॥

"यच्चानन्दमयान्तेऽपि तस्यैष एव शारीर आत्मा ।" इति श्रूयते । तत्र तस्योपचारिकभेदनिर्देशेनानन्यात्मत्वमेव बोधयति, न्तरं विज्ञानमयादन्योऽन्तर आत्मेतिवदन्याप्रस्तावात् । प्राणमयान्तोक्तेर्यः पूर्वस्येत्यत्रापरैरपि तथाभ्युपगमनीयत्वात् ततश्च पूर्वोक्त आनन्दमयतात्पर्यावसानविवेक आत्मैतव तस्य शारीर आत्मेति योज्यम् । एवं प्राणधारणया मनो वशीकृत्य तच्च निष्कामकर्मात्मकतया धारणीयमित्याशयेन मनोमयमाह-मनः सङ्कल्पाव्द्यात्मकमन्तःकरणम् । अस्य पूर्वस्मादन्तरत्वं सम्बन्धेन जडरूपात् प्राणमयात् श्रेष्ठतया यजुरित्यनियताक्षरपादावशेषो मन्त्रविशेषः तज्जातिवचनो यजुःशब्दः तस्य शिरस्त्वं न्यात् । यजुषा हि हविर्दीयते । एवम् ऋक्सामयोरपि वैशिष्ट्यं ज्ञेयम् । आदेशोऽत्र ब्राह्मणम् आदेष्टव्यविशेषान्निर्दिशति । र्वाङ्गिरसा दृष्टा मन्त्रा ब्राह्मणं च शान्त्यादिप्रतिष्ठाहेतुकर्मप्रधानत्वात्पुच्छं प्रतिष्ठा मनोमयाङ्गत्वं चैषां मनोवृत्तावाविर्भावित्वेन चुर्यात् । तद्विकारत्वे तु पौरुषेयत्वापातः स्यात् । अत्र पारमार्थिकपथस्यैव प्रकृतत्वात् व्यावहारिकसङ्कल्पाद्यात्मकमनोमयत्वं मुच्यते । प्राणधारणायाः पूर्वमेव हि त्यक्तं तत् अत एव मनुष्याधिकारत्वान्मनुष्यशरीरमेवोत्कान्तम् । एवमुत्तरत्रापि । तथैव नमयमाह-अस्य पूर्वस्मादन्तरत्वं करणरूपात्तस्मात्कर्तृरूपत्वेन श्रैष्ठ्यात् श्रद्धा अध्यात्मशास्त्रयाथार्थ्यप्रतीतिः । ऋतं निश्चिता बुद्धिः । सत्यं तदर्थानुभवप्रयत्नः । योगो युक्तिः । समाधानम् आत्मा । श्रद्धादीनामेत्साक्षात्काराङ्गत्वात् महः प्रकाशहेतुत्वेनोत्तमतरं शुद्धजीवरूपम् । यस्यैव प्रसिद्धेन विज्ञानमयत्वमुच्यते । "यो विज्ञाने तिष्ठन् विज्ञानादन्तरोऽयम् । विज्ञानं शरीर"मिति जीवान्तर्यामिप्रतिपादकश्रुतेः । अत्र स्थान एव यत्रात्मनि तिष्ठन्नित्यादि श्रुत्यन्तरात् प्रतिष्ठा तेषां सर्वेषामाश्रयः शुद्धजीवपर्यन्तमुपदिश्य तथा तथा लब्धान्तराणां पुनः सर्वान्तरतमत्वेन तत्रैव पूर्वोपक्रान्तमुख्यात्मत्वं पर्यवसाययन् मयमुपदिशति । अस्य सर्वस्मादन्तरत्वम् । सर्वान्तर्यामित्वात् । अत्र पूर्वपूर्वशास्त्रीयपरमार्थप्रक्रियैव लब्धा, न तु की । ततो नेष्टपुत्रदर्शनजानन्दादिकम् । प्रियादिशब्दैर्व्याख्येयं किन्त्वेकस्यैव परमानन्दरूपस्य ब्रह्मण उत्तरोत्तरोत्कर्षतारतम्यात् नाम् । चतुर्णां तत्तन्नामभेदः । आनन्दस्य तु सामान्यत्वेन प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे इति न्यायेन ब्रह्मण दिषु गुणेषु सर्वत्रोपासनायामादीयमानेषु प्रियशिरस्त्वादीनामप्राप्तिः ते हि न गुणाः किन्त्वेकस्यान्नमयादि-सनाभूमिकारोहावस्थानां भेदे खलु प्रियादिशब्दैस्तस्यैवानन्दमयस्य ब्रह्मण उदयोपचयापचयौ विवक्षिताविति हि तत्रार्थ पूर्वपूर्वक्रमानुसारादात्मस्थानपतितत्वेनात्मत्वरूपकम् । ब्राह्मणस्तु सर्वोत्तरोदितत्वेन पुच्छत्वरूपकम् । सर्वबृहत्तमत्वेन कम् । पूर्ववत् सुखपर्यायशब्दानुक्तिरन्तरोक्तानन्दशब्दव्यपदेश्यत्वमेवाभिप्रैति । एतदेव च परकाष्ठारूपत्वात् ।

प्रियादिलक्षणोत्तरोत्तराधिकशुद्धस्वप्रकाशविशेषाणामाश्रयत्वेन प्रतिष्ठा । इदमेव च प्रियाद्याश्रयत्वेन “सोऽकामयत । बहु स्याम् ।” इत्याद्यन्तरोक्तेस्तत्तदशेषशक्तिविशेषाश्रयत्वेन च आनन्दमय आत्मेत्युच्यते । यत एव च ब्रह्मेति व्यपदिश्यते । एव च ‘सोऽकामयत बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । रसो वै सः ।’ इत्यादिभिरभ्यस्तः आत्मतया पुच्छतया च परिभाषितस्यानन्दस्य प्राचुर्यान्मयट् । सोऽखण्डोऽपि परब्रह्मैव स्वप्रकाशविशेषाणां स्वशक्तीनां चापृथग्वस्तुत्वात् प्रत्युत तत्तत्प्रकाशे प्रकाशाधिक्यात् । श्रुतौ च — ‘ब्रह्मविदाप्नोति परम् ।’ इति यद्ब्रह्मोपक्रान्तं तस्यैवात्मत्वम् । ‘तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः ।’ इत्यनेन दर्शयित्वा तस्यात्मत्वस्य पर्यवसानमानन्दमय एव दर्शितम् अन्यानुक्तेः । तत्र प्रकरणप्राप्तं यत्तस्य ब्रह्मत्वं तदभ्यासने निर्णीयते । ततो जीवस्तु सुतरां नासौ तदुक्तम् — ‘आनन्दमयोऽभ्यासात् (१/१/१३)’ इत्यादिकमारभ्य ‘नेतरोऽनुपपत्तेः (१/१/१७)’ इत्यन्तेन विवृत्तिश्चैषां सूत्राणां श्रीरामानुजाचार्यादिमतेन श्रीभागवतसन्दर्भस्य टीकायां कृतास्ति तदलमतिप्रसङ्गेन । तदेतावति तत्स्वरूपे श्रुतिप्रतिपादिते स्थिते ‘यस्मात्क्षरमतीतोऽहम्’ इत्यादि निजोक्तिसंवादेन स्वयं भगवदाख्यमूर्तब्रह्मण एवाखण्डस्वरूपशक्तिगुणरूपलीलादिपूर्णतया प्रतिष्ठापरकाष्ठात्वं स्वयमेव तु दर्शितं श्रीगीतोपनिषत्सु—

मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥”

इति अस्यार्थः हि शब्दः प्राचीनार्थस्य हेतुता विवक्षया अतो गुणातीतब्रह्मभवलक्षणप्राचीनार्थहेतुवचने अस्मिन् उपचारेण तच्छब्दस्यान्यार्थत्वमप्राकरणिकत्वात्कल्प्यत्वेन न्यूनत्वादयोग्यत्वेन चायुक्तं किन्त्वेवमेव युक्तम् । ननु, त्वद्भक्त्या कथं निर्गुणधर्मत्वप्राप्तिः । सा तु सर्वोत्कृष्टतदेकानुभवेन भवेत् । तत्राह-ब्रह्मणो हीति । हि यस्मात् परमप्रतिष्ठात्वेन प्रसिद्धं श्रुतं यद्ब्रह्म तदेव चानन्दमयः तस्यापि स्वयं भगवदाख्यपरब्रह्ममूर्तिरयमहं प्रतिष्ठा अत एवामृतस्य परमपुरुषार्थस्य मोक्षस्याहं प्रतिष्ठा तत्र लक्षणया स्वर्गादिपरत्वं वारयति अव्ययस्येति तथा —

“कालेन नष्टा वाणीयं प्रलये देव संज्ञिता । मयाऽऽदौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥” इत्येकादशोक्तेः । शाश्वतस्य धर्मस्य भगवद्धर्माख्यस्य सर्वपुरुषार्थैकमूलस्य परमसाधनस्याप्यहं प्रतिष्ठा तथा “नात्यन्तिकं विगणयन्त्यपि ते प्रसादम् ।” इत्यादितृतीयोक्तेः । एकान्तिकस्य सुखस्य मत्प्रेमरसलक्षणस्य परमातिपरमसाध्यस्याप्यहं प्रतिष्ठा अत एव “रसो वै सः । रसं ह्येव लब्ध्वानन्दी भवति” इति यदानन्दमयमधिकृत्योक्तं तच्चैतदपेक्षयैव ज्ञेयम् । “मल्लानामशनिः” इत्यादिदर्शितप्रेमपाञ्चविध्येन रस्यमानत्वादिति । अतः सर्वस्यापि मदधीनत्वात्कैवल्यकामनया कृतेन मद्भजनेन ब्रह्मणि लीयमाने ब्रह्मधर्ममपि प्राप्नोति इत्यर्थः ।

“यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परं साम्यमुपैति ॥” इति श्रुतेः ।

अत्र श्रीविष्णुपुराणमपि — सम्प्रवदते

“शुभाश्रयः सचित्तस्य सवर्गस्य तथाऽऽत्मनः ।” इति व्याख्यातं च तत्रापि स्वामिभिः सर्वगस्यात्मनः परब्रह्मणोऽप्यहं प्रतिष्ठा तदुक्तं श्रीभगवता —

“ब्रह्मणो हि प्रतिष्ठाहम्” इति । तथा विष्णुधर्मोत्तरे नरकद्वादशीप्रसङ्गे श्रीविष्णुस्तवे —

“आकाशादिषु शब्दादौ श्रोत्रादौ महदादिषु । प्रकृतौ पुरुषे चैव ब्रह्मण्यपि च स प्रभुः ॥

यथैक एव सर्वात्मा वासुदेवो व्यवस्थितः । तेन सत्येन मे पापं नरकार्तिप्रदं भयम् ॥

प्रजा तु सुकृतस्यास्तु ममानुदिवसञ्जयः ॥” इति ।

अत्र सर्वात्मशब्देन दुःसमाधानान्तरं च निरस्तम् । तत्रैव मासर्क्षपूजाप्रसङ्गे —

“यथाऽच्युतस्त्वं परतः परस्मात् स ब्रह्मभूतात्परतः परात्मा ।

तथाच्युतत्वं
“यन्मयं ब्रह
श्रुतिश्च पूर्वम्
महदादिपरिणामरूपे स
पूर्वपूर्ववत् पुरुषरूपके
“को ह्येवान्या
तत्तस्य कल्पितशिरआ
इत्यादिना पञ्चविधभक्ति
प्रसिद्धम् । सतः प्रिय
इत्यस्मादधिकरणार्थक्तप्र
भवति असद्ब्रह्मेति वेदचेद
विन्दते । अथ सो भयङ्ग
अन्तरं व्यवधानं स्मरणवि
“सा हानिस्तन्मह
श्रीविष्णुपुराणानुस
“एको वशी सर्व
तमात्मस्थं येऽनुप
“नित्यो नित्यानां च
तं पीठगं येऽनुयजि
इति श्रीगोपालतापन

दृतयो लोहकाराद्यु
ब्रह्मतत्त्वम् । अन्यत्तैर्व्याख्या
भक्तिमाहात्म्यमेवाभक्तनिन्दापू
भवन्ति, तदैव श्वसन्ति प्राण
महदादीनामनुत्पादकस्यापि
जगत्कारणमहदाद्यनुग्राहकत्वेन
पुरुषेति । अन्नमयादिषु अन्नमय-
आद्यानां त्रयाणामात्मानं तत्रात्माध
ततः समुद्भव इति श्रुतिप्रसिद्धे
वदपगमान्मृतिः स्यात् । ततो जड
(कारणरूपत् [घ, ङ ।] विज्ञान
पुरुषस्यान्नमयादेर्विधैव विधा शिर

तथाच्युतत्वं कुरु वाञ्छितं तन्ममापदं चापहराप्रमेय ॥" इति उत्तरक्षत्रबन्धूपाख्याने च ।

"यन्मयं ब्रह्म परमं तदव्यक्तं च यन्मयम् । यन्मयं व्यक्तमप्येतद्भविष्यामि हि तन्मय ॥" इति ।

श्रुतिश्च पूर्वमुदाहृता । "यस्य पृथिवी शरीरम् ।" इत्यादिः । तस्मात्पुरुषविध इत्यस्य प्रकृतपद्यार्धस्यायमर्थः अत्र दिपरिणामरूपे समष्टिव्यष्टिजीवदेहे जीवाना मनुग्रहार्थमन्वयः प्रविष्टस्त्वम् । कथम्भूतः । अन्नमयादिषु यश्चरमः पुरुषविधः पूर्ववत् पुरुषरूपकेणानिरूपित आनन्दमयस्तद्रूपः प्राणनादिचेष्टानां परमानन्दात्त्वत्त एव समुद्भव इति प्रसिद्धेस्तवानुग्राहकत्वम्

"को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यात् ।" इति श्रुतेः । नन्वानन्दमयाख्यं ब्रह्म भवतु । तादृशं न चाहं कल्पितशिरआदिरूपत्वान्मम तु साक्षात्तद्रूपत्वात् तत्राहुः एषु प्रतिष्ठान्तवाक्येषु यदवशेषं वाक्यशेषावगम्यं रसो वै स दिना पञ्चविधभक्तिरसाश्रयत्वेन सूचितम् । "ब्रह्मणो हि प्रतिष्ठाहम्" इति । "यस्मात्क्षरमतीतोऽहम्" इति च । श्रीगीतोपनिषदादौ सिद्धम् । सतः प्रियादेरसतोऽन्नरसमयादेश्च परं श्रेष्ठं यत एव ऋतं तत्तत्सर्वाश्रयरूपं तत्सत्त्वमिति । ऋ गतौ । स्मादधिकरणार्थक्तप्रत्ययेन तच्छब्दस्य तदर्थत्वं गीतादिवाक्यैकवाक्यत्वाद्गम्यम् । अत्र मुख्याः श्रुतयः — "असन्नेव स ति असद्ब्रह्मेति वेदचेदस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुः । यदाह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभये प्रतिष्ठां न्दते । अथ सो भयङ्गतो भवति । यदाह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति ।" इति उत् उत अरमल्पमपि न्तरं व्यवधानं स्मरणविच्छेदमित्यर्थः ।

"सा हानिस्तन्महच्छिद्रं स मोहः स च विभ्रमः । यन्मुहूर्तं क्षणं वा पि वासुदेवं न चिन्तयेत् ॥" इति ।

श्रीविष्णुपुराणानुसारादित्यर्थः । अथ अन्याः श्रुतयः —

"एको वशी सर्वभूतान्तरात्मा एकं रूपं यः बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥" इत्याद्याः ।

"नित्यो नित्यानां चेतनश्चेतानानामेको बहूनां यो विदधाति कामान् ।
तं पीठगं येऽनुयजन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥"

इति श्रीगोपालतापन्याद्याश्च तदनुगताः श्रुतयस्तु दर्शिताः ॥४॥१७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

दृतयो लोहकाराद्युपकरणचर्मकोशविशेषाः, आदिशब्दादिन्द्रियतदधिष्ठातृदेवतादयः, एष्वन्नमयादिषु यदवशेषं तम् । अन्यत्तैर्व्याख्यातम् । तत्रोत्तरथेत्यर्थवशाव्द्याख्यातम् । यद्वा, विशुद्धवैष्णवसम्प्रदायानुसारेण व्याख्यायते । माहात्म्यमेवाभक्तनिन्दापूर्वकं दर्शयन्ति-दृतय इति । ये दृतय इव श्वसदाभासा अप्यसुभृतो जीवा यदि तेऽनुविधास्त्वद्भक्तास्ते , तदैव श्वसन्ति प्राणन्ति, तेषामेव जीवनं जीवनमुच्यते, न त्वन्येषाम् । समष्टि-व्यष्टि-जीवदेहकारणानां णानामनुत्पादकस्यापि तवोपेक्षणाज्जीववदाभासत्वप्राप्ते इति तुल्यत्वमेव युक्तमिति भावः । न केवलं कारणमहदाद्यनुग्राहकत्वेन तवोपास्यत्वम्, किन्तु सर्वदा परमोपकारित्वेन । तथैवासमोर्ध्वपरमैश्वर्यस्वभावेन चेत्याहुः- । अन्नमयादिषु अन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयेषु पञ्चस्वात्मसु मध्ये यश्चरमः, स आनन्दमयस्त्वमेवासि, याणामात्मानं तत्रात्माध्यासेन । कथम्भूतः ? अत्र एष्वन्नमयादिषु जीवानामुपकारार्थमन्वयः । प्राणादिचेष्टानां परमानन्दादेव समुद्भव इति श्रुतिप्रसिद्धेस्तवोपकारित्वम्, तत्र अन्नमय आत्मा देह एव, प्राणमयः पञ्चवृत्तिप्राणरूपोऽन्नमयादन्तरङ्गः, तिः स्यात् । ततो जडरूपात् प्राणान्मनोमय आत्माऽन्तरङ्गः, तस्य चित्सम्बन्धेन ज्ञानसामर्थ्यात् । तस्मात् करणरूपात् रूपात् [घ, ङ ।] विज्ञानमय आत्मा जीवोऽन्तरङ्गः, तस्य कर्तृत्वेन सर्वतः श्रैष्ठ्यात् । पुनः कथम्भूतः ? त्वं पुरुषविधः अन्नमयादेर्विधैव विधा शिरःपक्षादिकथनप्रकारो यस्य । यद्वा, पुरुषाणां चतुर्णामन्नमयादीनां विधा विधानं रचना यस्मात्

तथाभूत आनन्दमय पञ्चम आत्मा त्वमसि, तथा हि पारमर्षसूत्रम् (ब्र० सू० १/१/१२) "आनन्दमयोऽभ्यासात्" इति सर्वथा प्रकृतिगन्धास्पृष्टः परिच्छेदातीतः परमानन्दो विवक्षितः श्रीरामानुजादिभिः सर्ववेदार्थविवेकाभिज्ञैः । अस्यार्थस्यैव निरूपितत्वादत्र विरोधो नाशङ्क्यः । इत्यानन्दमय आनन्दप्रचुर इति मयट् । प्राचुर्यार्थत्वेऽपि प्रकाशप्रचुरो रविरिति तत्तद्विरोधान्तराप्रवेशात् नानन्दैकस्वरूपताहानिः, यद्वा, ब्रह्ममोदादिरूपानन्दविशेषप्रकाशेभ्यश्चानन्दरूपप्रकाशस्यैव चातुर्यात् सुसङ्गतमेव, किंवा स्वरूपार्थे मयट्, स तु जीवन्मुक्तसेवकगुरुजनजयस्यप्रेयसीरूपेषु पञ्चविधेषूपासकेषु ब्रह्ममोदप्रमोदप्रियानन्दस्वरूपेण पुच्छदक्षिणापक्षोत्तरपक्षशिरआत्मतया निरूपितेन पञ्चधा प्रकाशते । पूर्वेषामन्नमयादीनां चतुर्णामुक्तिस्तु शाखाचन्द्रन्यायेनो पलक्षणार्था । तत्र श्रैष्ठ्यदृष्ट्या तावदार्थिकक्रमेण व्याख्यायते-तथा हि द्विविधा जीवन्मुक्ताः, एके भक्तिशून्याः स्वस्वरूपैकनिष्ठा आत्मारामाः, परे श्रीभगवत्कृपालब्धशान्तरतित्वान्नात्यादृता आत्मारामतासुखाः शान्तभक्ताः । तेषु द्विविधेषु उपासकेषु प्रायः स्वाभेदेन यत्तस्य प्राकट्यम्, तादृशप्रकाश एव ब्रह्म, तत्राद्येषु तावत् द्वैतैकनिष्ठेषु स्वस्वरूपनिर्विशेषं चिद्रूपमेव ब्रह्म प्रकाशते, द्वितीयेषु तु चिद्घनरूपं मूर्तं परं ब्रह्मघनाघनत्वविशेषाविवेकेन; द्वयोश्चित्त्वेनैक्यादपृथक्त्वेन निर्देशः, तस्य च निर्विशेषत्वेन स्वादविशेषा-[स्वादु-(ग);]भावादनुत्तमाङ्गतया पुच्छत्वम्, पुच्छमेवेदं प्रतिष्ठा मोदादीनामाधारः । यद्यपि सर्वेषामानन्दमय एव प्रतिष्ठा, तथापि तयोर्निर्विशेष-सविशेषयोर्वस्तुत ऐक्याभिप्रायेण तथोक्तम् । अथ न्यूनाधिकसामान्यास्त्रिविधा उच्छन्ते, -तत्रात्मानमतिन्यूनतया जानन्तः, श्रीभगवन्तं सर्वोत्कर्षपदत्वात् सर्वाधिकत्वेन जानन्त एव ये तमुपासते, तेषु भयगौरवादिनानम्रेषु परमाधिदैवततया स्फुरन्तं परममिष्टम् उत्तरोत्तररुच्युत्पादिनं प्रीतिरतेः प्रकर्षप्रमाणमनुभवत्सु तादृशचमत्कारकृदानन्दरूपत्वेन श्रीभगवतः प्रकाशविशेषो मोदः । तस्य पुच्छतो वैशिष्ट्याद्दक्षिणपक्षत्वम्, ये लालकत्वपालकत्वादिना आत्मानमधिकतया जानन्तो लाल्यत्वेनानुग्राह्यत्वादिना श्रीभगवन्तं न्यूनं जानन्त एवोपसेवन्ते, ते व्रजेश्वरीप्रभृतयो गुरुजनाः, तेषु पुत्रादिभावेनोपासीनेषु वत्सलेषु परमानुग्राह्यतया स्फुरन्तं वात्सल्यरतेः प्रकर्षं प्रेमविशेषमनुभवत्सु तादृशपरमानन्दरूपत्वेन श्रीभगवतः प्रकाशविशेषः प्रमोदः । पूर्वतोऽस्य श्रैष्ठ्यादुत्तरस्य श्रैष्ठ्यार्थत्वादत एव प्र-शब्दः । ये तु सहशयनाशन-क्रीडादिषु जय-पराजयादिषु च निर्विशेषत्वेन श्रीभगवता तुल्यम्मन्याः, स्वात्मना श्रीभगवन्तं चान्यूनाधिकं मन्यमाना उपासते, ते तु श्रीदामादयो वयस्याः, तेषु भयगौरवानुग्रहादि-शून्येषु परमस्वाधिष्ठमैत्रीभावादिपूर्णं परमप्रणयितया प्रादुर्भवन्तं सख्यरतेः प्रकर्षप्रेमवरमनुभवत्सु तादृशभावानुसारेण परमप्रेमास्पदत्वेन श्रीभगवतः प्रकाशविशेषः प्रिय-शब्दव्यपदेश्यः । तस्य पूर्वतः श्रैष्ठ्याच्छिरस्त्वम् । चतुर्विधा निरूपिताः । पञ्चमा उपासकजना निरूप्यन्ते, - ये तु परमकान्तत्वेन कन्दर्पकोटिरम्यत्वेन स्वात्मकोटिप्रियतया च श्रीभगवन्तमुपासते, ते प्रेयसीवर्गा व्रजदेवी प्रभृतयः । तेषु सन्ततमसमोर्ध्वमाधुरीभरपूर्णमनुरागराशिं सदास्वादयत्सु तादृशमहाभावानुगुण्येन परमप्रेष्ठत्वेन श्रीभगवतः प्रकाशविशेष आनन्दः, तस्यामोदादिभ्यः श्रैष्ठ्यादात्मत्वम् । एवं स्थिते तत्र प्रथमं ब्रह्मत्वमाहुः-सदिति । एषु पञ्चप्रकाशेषु मध्ये त्वं सदसतः परम् । सत्-स्थूलम्, अन्नमयादित्रयम् । असत् - सूक्ष्मं विज्ञानमयरूपं जीवाख्यम्, तयोः परं ब्रह्मासि । तथा पञ्चसु मध्ये ब्रह्मत्वे निरूपिते; यदवशेषमवशिष्टं मोदादिचतुष्टयं तच्च त्वमसि, तत्र रश्मिस्थानीयं ब्रह्मस्वरूपममूर्तं सूर्यस्थानीयस्य घनानन्दमूर्तेः प्रकाशरूपं परब्रह्मरूपम्, तथा मोदादिचतुष्टयं च मूर्तम्, इत्येष शान्तप्रीतवत्सलप्रियोज्ज्वलानां पञ्चानां मुख्यरसानां विषयभूत एकोऽपि श्रीभगवानुपासकभेदेन पञ्चधोक्तः । किन्तु निरुपमपरमसान्द्रानन्दरूपत्वेनानुभवादुक्तस्वरूपोऽयं रस एव भगवान् । तथा ह्यानन्दमयाधिकारे श्रुतिश्च (तै. २/७/१)

"रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति ।" इति ॥

प्रोक्तमेवार्थं किञ्चिद्विशेषार्थमनुवदन्नुपसंहरति-ऋतमिति । श्रुत्युक्तप्रतिष्ठानीयमिदम्, आनन्दमयं तद्रूपमृतं प्रतिष्ठा सर्वेषां मूर्तामूर्तानां प्रकाशानां तदेकस्वरूपत्वादिदमेवानन्दमयं तद्रूपं श्रीभगवद्गीतादिषु परमनिगूढोपदेशे दृष्टसर्वापरिप्रतिष्ठाप्रभवत्वे सर्वप्रतिष्ठारूपमित्यर्थः । तथा हि (गी० १४/१६)

"स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ।" इत्यस्यानन्तरम् —

"ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥" इति ॥

अस्यार्थः
श्यामोज्ज्वलसव्वा
"यस्य प्र
तद्ब्रह्मनिष्
तथा परम
प्रीतिभक्तिप्रकाश्यत्व
[घ, ङ] ।)विशे
प्रगाढवात्सल्यविषयत
परमाचिन्त्यसर्वैश्वर्यभ
सेवकगणनानन्तरमेष
परमप्रेयसीगणैश्चानुशील
सर्वोत्तममत्प्रकाशवि
परमरहस्यत्वादर्जुनस्यो
आनन्दमयपदवाच्यः, त
[एवं भक्तिनि
कार्त्स्न्येन प्रसिद्धाः । अस
बिभर्ति पुष्णन्ति, न तु त्व
त्वत्प्रार्थनाभङ्गात् दृतय
यदनुग्रहाद्यदीयांशपुरुषानुग्र
(पू० २९-३०)
"गोपवेषो मे पुरस
मे प्रादुरभूतेष्वक्षरेषु भविष्य
अस्तु तावत् प्राक्त
ब्रह्मविष्णुरुद्राणां विधो प्रक
आदिशब्देन बहुविधगोरसादि
स्वभक्तदत्तत्वेन परमप्रीत्यात्र
श्वसन्तीति । अथ अतः क्रीड
असतः परमदुर्जनस्य कंसादेः
"ईश्वरेण प्रियं सर्वं य
शेषं किम्भूतम् ? ऋत

अथ भगवद्भजनविमुख
जीवाः असुभृतः असुतृपो यि
श्वसन्तीत्यर्थः । तच्छब्दनिर्दिष्टं

अस्यार्थः — ब्रह्मविद्भिः स्वस्वरूपेण शान्तभक्तैस्तु ब्रह्मघनत्वेनोपास्यस्य श्रुत्या पुच्छत्वेनोक्तस्य ब्रह्मणः सर्वव्यापकस्यापि श्यामोज्ज्वलसर्व्वानन्दकन्दकदम्बमूर्तिरेषोऽहं प्रतिष्ठा । तथा हि ब्रह्मसंहितायामादिपुरुषरहस्यस्तोत्रे (५/५१)

"यस्य प्रभा प्रभावतो जगदण्डकोटि; कोटिष्वशेषवसुधादिविभूतिभिन्नम् ।

तद्ब्रह्मनिष्कलमनन्तमशेषभूतं गोविन्दमादिपुरुषं तमहं भजामि ॥" इति ॥

तथा परमाभीष्टदैवतत्वेन सेवमानैः परमाराध्यस्य शाश्वतस्य धर्मस्य प्रीतिभक्ति-(प्रीतभक्ति- [च])तयाख्यातस्य प्रीतिभक्तिप्रकाश्यत्वात् श्रीभगवानेवोपचारेण शाश्वतधर्मरूपप्रीतिभक्तितयोक्त इत्यदोषः । तस्य मोदस्य मत्-प्रकाश(मुत्प्रकाश- [घ, ङ] ।)विशेषस्याहं प्रतिष्ठा । प्रोक्तेनामुना मोदरूपेण सेवकेष्वहं प्रतिष्ठितो भवामीति, तथा गुरुजनैः गाढवात्सल्यविषयत्वेनानुशील्यमानस्यामृतस्याव्ययस्य मदैकरूपमाधुर्यसारस्वरूपस्य प्रमोदाख्यमत्प्रकाशविशेषस्याहं प्रतिष्ठा समाचिन्त्यसर्वैश्वर्यभरपूर्णत्वाज्जगदनुग्राहकोऽप्यहं पूज्येषु परमानुग्राह्येणैव प्रमोदरूपेण प्रतिष्ठितो भवामीत्यर्थः । पूर्वोक्तक्रमेण सेवकगणनानन्तरमेषां निर्देशौचित्येऽपि गीतासु शान्तभक्तानन्तरनिर्देशः पूज्यत्वेनोभयेषां साम्यात्, तथा परमप्रियजनैः परमप्रेयसीगणैश्चानुशील्यमानस्य सुखस्यैकान्तिकस्य परमात्मन्तिकसुखरूपस्य प्रिय-शब्दानन्द-शब्दाभ्यां श्रुत्या व्यपदेश्यस्य सर्वोत्तममत्प्रकाशविशेषस्याहं प्रतिष्ठा, परप्रेष्ठेषु परमप्रेयसीषु च सर्वोत्कृष्टप्रेष्ठतया प्रतिष्ठितो भवामीति । पञ्चमस्य परमरहस्यत्वादर्जुनस्योपदेश्यत्वाच्च तदुभयमेवाविविक्ततया युगपत् सूचितम् । केचित्तु श्रीपुरुषोत्तमे महावैकुण्ठनाथ आनन्दमयपदवाच्यः, तस्य चत्वारो व्यूहाः-प्रिय-मोद-प्रमोदानन्द-शब्दव्यपदेश्याः तस्यामूर्तं स्वरूपं ब्रह्मेत्याहुः ॥१७॥

[एवं भक्तिनिष्ठान् प्रशस्य तद्विहीनानंगिरससत्रयाजिनो द्विजानाक्रोशन्त्यस्तत्प्रियजनप्रीणनं प्रार्थयन्ते-दृतय इवेति । ते कार्त्स्न्येन प्रसिद्धाः । असुभृतः प्राणिनः, दीक्षितत्वब्राह्मणत्वादेरनुक्त्या केवलमसुभृत्त्वेन निर्देशः परमक्रोधावेशात्; असून् प्राणानेव बिभर्ति पुष्णन्ति, न तु त्वां विदन्तीत्यपीत्यर्थः । यदि यद्यपि अनुविधा अनु अन्वनु निरन्तरं विधा यज्ञविधयो येषां तादृशाः, तथापि त्वत्प्रार्थनाभङ्गात् दृतय इव श्वसन्ति । ननु मम गोपनन्दनस्य प्रार्थनाभङ्गात् को नाम दोषः ? तत्राहुः-महदिति । मदनुग्रहाद्यदीयांशपुरुषानुग्रहात् । यद्वा, यस्य गोपालवेशस्यानुग्रहात्, महान् ब्रह्मा अहमादयो मद्विधादयश्चेत्यर्थः । तथा च तापनीश्रुतिः (पू० २९-३०)

"गोपवेषो मे पुरस्तादाविर्बभूव, ततः प्रणतामयानुकूलेन हृदा मह्यमष्टादशाक्षरं स्वरूपं सृष्टये दत्त्वान्तर्हितः, पुनः सिसृक्षा प्रादुर्भूतेष्वक्षरेषु भविष्यज्जगद्रूपं प्राकाशत" इत्याद्याः ॥

अस्तु तावत् प्राक्तनमैश्वर्यम्, तथा आधुनिका व्रजसम्पदेव लोकोत्तरेत्याहुः-हे पुरुषविधो नृचन्द्र ! यद्वा, पुरुषाणां ब्रह्मविष्णुरुद्राणां विधो प्रकाशक ! यश्च त्वमन्नमयादिषु तत्र प्रचुरान्नकूटादिषु कूटीभूतचतुर्विधान्नशालिगोवर्धनादिष्वित्यर्थः । कूटशब्देन बहुविधगोरसादिप्रचुरेषु, बहुवचनेन नन्दीश्वरादिकं च सङ्गृह्णन्ति । अत्र एषु अन्वयः कृतासक्तिः सन्, रमत इति रमः, कृतत्वेन परमप्रीत्यान्नादीन्यास्वादयन् रमस इत्यर्थः । एवम्भूतमपि त्वां येऽन्नाप्रदानेनावहेलयाञ्चक्रुः, ते दृतय इव श्वसन्ति । अथ अतः क्रीडापरत्वात्, एषु गोवर्धन-नन्दीश्वरादिषु सद्वर्तमानं यद्गोष्ठं तत् अव रक्ष प्रीणयेति वा । कथम्भूतम् ? खलः परमदुर्जनस्य कंसादेः परं वैरीभूतम्, तेन वैरितया निश्चितमित्यर्थः । शेषं शेषिणस्तव यथेष्टविनियोगार्हम् —

"ईश्वरेण प्रियं सर्वं **यथेष्टं** विनियुज्यते । यथेष्टविनियोगार्हं शेषशब्देन कथ्यते ॥" इति श्रीवैष्णवाः ।

शेषं किम्भूतम् ? ऋतं सत्यस्वरूपम् ॥१७॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अथ भगवद्भजनविमुखानां जन्मवैय्यर्थ्यमाह-दृतय इति । ते अनुविधाः तवानुविधायिनः त्वदाश्रयणयोग्यजन्मभाजोऽपि ते असुभृतः असुतृपो यदि प्राणेन्द्रियतर्पणपराः शब्दादिविषयचपलाश्चेत् दृतय इव श्वसन्ति ! ते सकलपुरुषार्थहीनाः इत्यर्थः । तच्छब्दनिर्दिष्टं भगवन्तं कारणत्वेन विशिनष्टि-महदहमादय इति । महदहङ्कारादयः पदार्थाः । यदनुग्रहतः

यत्सङ्कल्पानुगृहीतास्सन्तोऽण्डं ब्रह्माण्डगोलकमसृजन् । त्वत्कटाक्षेण निर्माणकरणसमर्था भवन्ति इति भावः । यद्वा । तस्य तेऽनुविधायिन इत्यर्थः । अथ सर्वान्तरात्मत्वेन विशिनष्टि-पुरुषविधोऽन्वय इति । अन्नमयादिषु यः चरमः आनन्दमयान्नमयप्राणमयमनोमयविज्ञानमयानां मध्ये यः चरमः अन्तिमः स आनन्दमयः ।

'तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः ।' इति श्रूयते ।

स पुरुषविधोऽन्वयः । 'स वा एष पुरुषविध एव ।' इत्यादिप्रकारेण शिरःपक्षपुच्छादिरूपपुरुषप्रकारान्वयवान् । पक्षपुच्छादिरूपनामसम्बन्धवान् । तस्य पुरुषप्रकारान्वयवतः 'प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा ।' इति । पुरुषपुरुषविधत्वं हि निरूप्यते । एष्वन्नमयादिषु अवशेषं पश्चान्निर्दिष्टम् । एषु संहतेषु अवस्थितं वा । अतः परं चिदचिद्वाचिसदसच्छब्दवाच्यम् ऋतं निर्विकारम् । 'तदनुप्रविश्य सच्च त्यच्च सत्यमभवत् ।' इति हि श्रूयते । एवम्भूतं यत्तस्य तेऽनुविधाः भक्ताः ते जीवन्ति सफलजन्मानो भजन्तीत्यन्वयः ॥१७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अथ भगवद्भजनविमुखानां जन्मवैयर्थ्यमाहुः-दृतय इति । ते तवानुविधाः अनुविधायिनः त्वदाश्रयणयोग्यजन्मभाजोऽपीत्यर्थः । असुतृपः त्वां विहाय केवलं यदि प्राणेन्द्रियसन्तर्पणपराः शब्दादिविषयचपलाश्चेत्तर्हि दृतय इव उच्छ्वसन्ति । दृतयश्चर्मभस्त्रिकाः ता यथा वायुपूरिताः उच्छ्वसन्ति तद्वद्वृथोच्छ्वासा इत्यर्थः । अनेनात ऋषयो दधुरित्यादेरग्रयोजनायां कथमयथाभवन्तीत्यादि सूचितमन्यविषयध्यानादिमोघत्वं स्पष्टीकृतम् । ननु, सति मम कारणत्वे तत्समनियतमुमुक्षूपस्यत्वसिद्धिः कारणत्वमेव त्वनुपपन्नमचेतनस्य प्रधानस्यैव महदहङ्कारादिरूपेण परिणामस्वभावस्य कारणत्वात् । तथा हि चेतनभोग्यभूतस्य सत्त्वरजस्तमोमयस्य विकारावस्थितस्य जगद्रूपस्य वस्तुनः कारणभूतं वस्तु तत्स्वभावमेवेति युक्तं गुणसाम्यावस्थं प्रधानं कारणमित्यत एव कार्यकारणयोरनन्यत्वोपपादकमृदादिदृष्टान्तोपपत्तिरितीक्षत्यधिकरणपूर्वकपक्षानुसारिणामाशङ्कामभिप्रेत्य परिहारमाहुः । महदित्यादिना यदनुग्रहत इत्यन्तेन यस्य तवानुग्रहतः "तदैक्षत बहु स्याम्" इतीक्षात्मकयत्सङ्कल्पलब्धसत्ताका येनानुप्रविष्टाश्च महदहङ्कारादयः अण्डमसृजन् अचेतनस्येक्षात्मकानुग्रहासम्भवान्न तस्य कारणत्वमिति भावः । न च वृष्टिप्रतीक्षाः शालय इतिवत् गौणानुग्रहसम्भवः । "ऐतदात्म्यमिदं सर्वं तत्सत्यम् । स आत्मा ।" इति कारणस्यात्मत्वश्रवणात् स्यादेतत् मा भूत् प्रधानं कारणं जीवस्तु भवितुमर्हत्येव तस्येक्षासङ्कल्पापरपर्यायानुग्रहसम्भवात् तथा हि 'आत्मन आकाशः सम्भूतः ।' इत्यात्मशब्देन कारणत्वं प्रक्रम्य तस्यात्मशब्दवाच्यस्य जीवातिरिक्तशङ्काव्युदासाय प्रतिपर्यायं 'तस्यैष एव शारीर आत्मा ।' इति । शरीरसम्बन्धमभिधायानन्दमयशब्देन स्वार्थकमयडन्तेन तस्यानन्दमयरूपतां चाभिधाय 'सोऽकामयते'ति तस्येक्षापूर्वकसृष्टिराम्नायते । इत्यानन्दमयाधिकरणपूर्वपक्षानुसारिणामाशङ्कामभिप्रेत्य परिजह्रुः पुरुषविध इत्यादिना । अत्रानन्दवल्ल्यां अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयेषु यश्चरमः आनन्दमयः पुरुषविधः 'स वा एष पुरुषविध एव ।' इत्यादिना पुरुषाकारत्वेन निरूपितः । अन्वयः 'तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आदन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा ।' इत्युक्तशिरःपक्षपुच्छादिरूपपुरुषप्रकारान्वयवान् स त्वमेव न तु प्रत्यगात्मेत्यर्थः । कुत इत्यतो विशिंषन्ति । यत् सदसदिति । सदसत् चिदचिदात्मकप्रपञ्चाकारं यदित्यदः 'तत्सृष्ट्वा तदेवानुप्राविशत् । तदनुप्रविश्य सच्च त्यच्चाभवत् ।' इति स्वसृष्टचिदचिदनुप्रवेशेन तदुभयात्मकजगद्रूपेण भवनस्य चिदचिद्वाचिशब्दाभिधेयत्वस्य च श्रूयमाणस्य बद्धमोक्तोभयावस्थजीवसम्भावितस्य त्वय्येव सम्भवादिति भावः । किञ्च । यदतः चिदचिदात्मकप्रपञ्चात्परं विलक्षणं निरुक्तानिरुक्तानिलयनानिलयनविज्ञानाविज्ञानसत्यानृतशब्दैः प्रकृतिपुरुषौ निर्दिश्य तदन्तरात्मतया तदनुप्रवेष्टृतया श्रूयमाणं यत्तज्जीवातिरिक्तस्त्वमेव । अथ यच्चैष्वन्नमयादिषु चतुर्षु संहतेष्वप्यवशेषमवस्थितमानन्दमयरूपम् ऋतं निर्विकारं तत् त्वमेव । एवमुक्तधर्मसमानाधिकरणतया श्रूयमाणमीक्षितृत्वात्मकानुगृहीतृत्वं जीवासम्भावितं त्वय्येवोपपन्नमिति समुदायाभिप्रायः । शारीरत्वं च सर्वशरीरके त्वय्येवोपपन्नमिति च भावः । अत्र केचिदन्नमयादिषूपदिश्यमानेषु यश्चरमो ब्रह्मपुच्छं प्रतिष्ठेति पुच्छत्वे चोक्तः त्वमिति सम्बन्धमाहुः । तथा हि

"तस्येदं ब्रह्मपुच
श्लोकस्य वक्ष्यम
इहानन्दमयस्यास्य
अंशित्वासङ्गतेर्नि
तस्यैष एव शारीर
ब्रह्मत्वं नावगमये
नानन्दमयशब्देन वा
इति तत्तुच्छम् —
"कृत्स्ने प्रकरणे ह्यत्र
शिरःपक्षादिरूपेण पु
न भिद्यते ब्रह्मणोऽत्र
तस्यैष एव शारीर आ
अन्यस्य ब्रह्मपर्यायस्य
वाक्यानां पक्षपुच्छादिम
अनन्तरे सोऽकामयतेति
प्रधानप्रकृतार्थस्य पराम
ब्रह्मणो व्यवधानेन तदुप
सम्प्रतिपन्नत्वादानन्दस्था
आनन्दानन्दमययोरेकार्थ
आनन्दो ब्रह्मेति व्यजना
प्रतीतार्थश्रुतेः पश्चादुपपत्ते
स्वाभिन्नपक्षपुच्छादिपरप्रक
अंशांशित्वेनोपपत्तेर्व्यतिरेक
तेषामन्यतमेनापि श्लोकस्य
आनन्दमयवाच्यस्य प्रसिद्धे
शङ्कायाः सम्भवादस्य रूपण
मयटः स्वार्थिकत्वेन प्राचुर्या
निर्विकारित्वनिर्वाहादनन्यात्म
तद्वस्त्वनुगुणत्वेन शोधनस्य
आनन्दमयशब्देन वाच्यस्य ब्र

"तस्येदं ब्रह्मपुच्छं स्यात्प्रतिष्ठा हेतुरित्यतः । व्यतिरेकश्रुतेर्ब्रह्मविषयत्वप्रतीतितः ॥
श्लोकस्य वक्ष्यमाणस्य ब्रह्मप्राधान्यनिश्चयात् । प्रियमोदादिरूपेण विदितस्य जनैः समैः ॥
ह्यानन्दमयस्यास्य शङ्कायाश्चात्र सङ्गतेः । सदसद्भावयोर्ज्ञानाज्ञानयोश्च निरंशिनः ॥
अंशित्वासङ्गतेर्निर्विकारस्य मयटोऽत्रव वै । विकारित्वाबोधनाच्च मयटो ह्यत्र सङ्गतेः ॥
तस्यैष एव शारीर आत्मेति च तदन्तरम् । आत्मान्तरं कीर्त्यमानमानन्दमयवस्तुनः ॥
ब्रह्मत्वं नावगमयेदित्यतः पुनरस्य हि । परे तस्मिन्नित्यशुद्धे शोध्यत्वानुपपत्तितः ॥
नानन्दमयशब्देन वाच्यं ब्रह्मेचि निश्चितम् । पुच्छत्वेनैव यत्तत्र रूपितं तु तदिष्यते ॥"

इति तत्तुच्छम् —

"कृत्स्ने प्रकरणे ह्यत्र पूर्वमन्नमयादिषु । स्वस्मादनतिरिक्तैः स्वावयवैस्तु निरूपणात् ॥
शिरःपक्षादिरूपेण पुरुषत्वस्य निश्चितम् । प्रियमोदादिभिः स्वस्मादभिन्नैरेव रूपितः ॥
न भिद्यते ब्रह्मणोऽत्र ह्यानन्दमयशब्दितः । तत्तदन्तरभूतस्य वस्तुनो बोधकस्य वै ॥
तस्यैष एव शारीर आत्मेत्यात्मपदस्य हि । व्याख्यानन्दमये पर्यवसन्ना कीर्तनात्पुनः ॥
अन्यस्य ब्रह्मपर्यायस्यानन्दमयतस्ततः । अन्नादिमयपर्यायेषूक्तानां श्लोकरूपिणाम् ॥
वाक्यानां पक्षपुच्छादिमदर्थपरतः पुनः । पुच्छमात्रपरस्यास्य श्लोकस्यास्याप्यसङ्गतेः ॥
अनन्तरे सोऽकामयतेति वाक्याश्रुतेन सह । इतिशब्देन पुंवस्तुबोधकेन तथा पुनः ॥
प्रधानप्रकृतार्थस्य परामर्शनसाधुना । अनन्तरस्यानन्दमयस्यात्राबोधनसङ्गतेः ॥
ब्रह्मणो व्यवधानेन तदुपस्थापनक्षतेः । ब्रह्मण्यानन्दशब्दस्य आनन्दो ब्रह्म इति श्रुतेः ॥
सम्प्रतिपन्नत्वादानन्दस्थापने क्षमात् । आनन्दमयमात्मानमुपसङ्क्रम्य वाक्यतः ॥
आनन्दानन्दमययोरेकार्थस्य प्रतीतितः । आनन्दमयशब्देन परब्रह्मावबोधनात् ॥
आनन्दो ब्रह्मेति व्यजनादिति पर्यायतुल्यतः । आनन्दमयतुल्यार्थाच्छब्दादानन्दतः परम् ॥
तीतार्थश्रुतेः पश्चादुपपत्तेरभावतः । न पुच्छमेव ब्रह्मेति किन्तु पुच्छवदिष्यते ॥
स्वाभिन्नपक्षपुच्छादिपरप्रकरणस्य वै । आनुगुण्येन षष्ठ्या च निर्देशस्य तथा पुनः ॥
अंशांशित्वेनोपपत्तेर्व्यतिरेकस्य निश्चयात् । आत्मा ब्रह्मानन्दमय शब्दैरेकार्थबोधनात् ॥
अन्यतमेनापि श्लोकस्य ह्युपपत्तितः । आनन्दस्यापरिच्छित्तेः पुच्छब्रह्मपदस्य हि ॥
आनन्दमयवाच्यस्य प्रसिद्धेरप्यभावतः । सदसद्भावयोर्ज्ञानाज्ञानयोश्च तथा पुनः ॥
सम्भवादस्य रूपणस्योपपत्तितः । अंशांशिभ्यां तदा नादमयशब्दगतस्य वै ॥
टः स्वार्थिकत्वेन प्राचुर्यार्थेऽपि वा पुनः । उपपत्तेर्विकारार्थकत्वाभावाच्च ब्रह्मणः ॥
कारित्वनिर्वाहादनन्यात्मत्ववादिनः । तस्यैष एव शारीर आत्मेत्यस्याविरोधतः ॥
नुगुणत्वेन शोधनस्य विधेः पुनः । प्रत्यगर्थस्य शोध्यत्वं संसृतेर्निहतेस्तथा ॥
मयशब्देन वाच्यस्य ब्रह्मतः तथा । शोध्यत्वस्य प्रपत्त्या च साध्यस्य ह्युपपत्तितः ॥

कालुष्यशान्तिरूपस्य न पुच्छं ब्रह्म वै मतम्। अन्यदाऽऽनन्दमयतः स एव ब्रह्म तु स्थितम् ॥
इति पुच्छब्रह्मवादिदूषणोद्धार इष्यते ॥" ॥१७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

"अनिशमनुश्वसन्त्यसुखोद्धरितास्तव रिपवो दृतिवत्तमासिप्रविष्टाः तव गुणप्रथनाः परिहाय तमः पर्यान्ति पदमजस्रमनन्तसुखम्" इति पैङ्गिश्रुत्यर्थरूपस्य दृतय इवेत्यस्य श्लोकस्यायं भावः। महदहमादयः ब्रह्मरुद्राद्यभिमन्यमाना महदहङ्कारादितत्त्वानि यस्यानुप्रवेशलक्षणानुग्रहतो ब्रह्माण्डमसृजन्। तस्यात्यन्तोपकारकस्य ते तव यद्यसुहृदः सर्वमिथ्यात्ववादि तर्हि ते दृतयः कारुशालायामग्निधमननिर्मितचर्मविशेषा इवोच्छ्वसन्ति। तमसि प्रविष्टाः दुःखभराक्रान्तत्वाद्विनष्टप्राणबला दीर्घश्व कुर्वन्ति। अत्र चरमोत्तममध्यमादिषु चरमा मनुष्योत्तमाः उत्तमा इन्द्रादिदेवाः। मध्यमाः ऋषिगन्धर्वाः। आदिः मुक्तसमु प्रथमो ब्रह्मा। एषु पुरुषेषु यस्तवाजस्रम् ऋतमेकप्रकारं नित्यमिति यावत् अनन्तसुखम् अविशे विषयविशेषनिमित्तक्षणभङ्गुरसुखमन्तरेण स्वरूपभूतापरिमितानन्दपूर्णं सदसतः परं प्रथयेत् जानाति शिष्यादिषूपदिश्य प्रख्याप च। सः पुरुषविधस्य जीवदेहगतत्वेन तदाकारस्य तवान्वयः अनुकूला प्राप्तिर्यस्य तथा —

"असक्तो देहपुरुषजीववद्देहगोऽपि यत्। अथवा पुम्विधातृत्वात्पुम्विधः पुरुषोत्तमः ॥"

इति वचनात् तादृशं त्वामाप्नोतीत्यर्थः। प्रथयतीति प्रथनः ॥४॥१७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवं सामान्याकारेण सर्वश्रुतीनां समन्वयस्तच्छुद्धभक्तिप्रतिपादनपर्य्यन्तो दर्शितः। अथ तद्विशेषाणामपि दर्शयति। काश्चित् पूर्व्वोक्तशुद्धभक्तिप्रतिपादकश्रुत्यनुगामिन्यः श्रुतयोऽन्वयव्यतिरेकाभ्यां द्वाभ्यां पुष्पन्त्यस्तेनैव तत्र चा स्वानुगतश्रुतिश्चान्यास्तत्पर्य्यवसानत्वेन दर्शयन्त्यः स्तुवन्ति दृतय इति ॥१७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अतस्त्वत्पदाब्जं ये न भजन्ति ते केवलं जीवच्छवा इत्याहुः–दृतय इवेत्यादि। यदि ते तव अनुविधा अनुक्षणं विदधत इत्यनुविधाः तदा असुभृतः सार्थकमसून् बिभ्रतीत्यर्थः। अन्यथा दृतय इव भस्त्रा इव श्वसन्ति इत्यर्थः। यदनु यस्यानुग्रहात् महदहमादयः अण्डं सृजन् स च पुरुषविधः पुरुष इति विधा संज्ञा यस्य स नारायणोऽपि अत्र त्वयि अ अनुअयत इति अनुगत इत्यर्थः। त्वयि विषये अनुगतवत् यः पुरुषविधो नारायणः अन्नमयादिषु पञ्चकोशेषु चरमः न केवलं सदसतः परं स्थूलसूक्ष्मतः कार्य्यकारणतः परम्पारे इत्यर्थः। अथ अतो नारायणादपि त्वमिति यद्वस्तु तदेषु नारायणादिषु पु प्रतिपाद्येषु अवशेषम्। अवशिष्यत इत्यवशेषः। तत् अत एव ऋतं सत्यं यद्वा इति यदुक्तं तदृतं सत्यम् ॥१७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

अतस्त्वत्पादारविन्दं ये न भजन्ति, ते केवलं मृता एव, तर्हि कथं श्वसन्ति? तत्राह– दृतय इवेत्यादि। यदि तेऽनुवि अनुचरत्वेन सेवां विदधतीत्यनुविधा भक्ताः, तदा असुभृतो जीवन्त एव इत्यर्थः। अन्यथा मृता एव ते तु श्वसन्तीति यदृतं दृतयो भस्त्रा इव। अन्यत् सर्वं तुल्यम्। यस्य तवानुग्रहतो महदहमादयोऽपि शक्तिमन्तः सन्तोऽण्डमसृजन्, यस्त्वम पञ्चसु कोषेषु चरमः, अतः पुरुषविधः पुरुषेषु नारायणादिषु विधा विधानं प्रेरणं यस्य तेषामपि प्रेरक इत्यर्थः पुरुषेष्वन्वयस्तच्छरीरेणानुगमनं यस्य अतः सदसतः परम्, अवशेषमवशिष्यते इत्यवशेषरूपम् ऋतं सत्यं त्वमेवेत्यर्थः।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पूर्वश्लोकोक्तभजनव्यतिरेके जनाः कीदृशाः स्युरित्यपेक्षायामाहुः––दृतय इवेति। ते जना दृतय इव श्वसन्ति त्वद् मृतकसाधर्म्यान्निष्प्राणत्वेऽपि भस्त्रा इव वृथाश्वासा इत्यर्थः। यदि तु ते तवानुविधा अनुविदधत्यानुकूल्यं कुर्वन्तीत्

इति यावत्। तदैवा
प्रियमाणस्तत्राहुः–म
समष्टिव्यष्टिशरीरमसृज
दृष्टा अतो येषां चित्तश्र
कीदृशाकारः यं मां
करणजीवपरमात्मानः
यश्चरम आनन्दमयः स
अनुप्रविशतीत्यन्वयः।
एव सर्वकारणं परमात्मे
"स्त्रीणां स्मरो मूर्तिमान्"
निकृष्टाद्विज्ञानमयादेश्च पर
प्रतिष्ठाऽहम्" इति गीतास्
अर्तेर्गत्यर्थत्वाद्गत्यर्थानां च
"असुर्या नाम ते
दोषप्रतिपादिकाः। असुर्या
"द्वौ भूतसर्गौ लोके
इत्याग्नेयविष्णुधर्मो
"नित्यो नित्यानां चे
नेतरेषाम् ॥"
इत्याद्या भक्तिसत्त्वे गु
"स वा एष पुरुषोऽन्न
इत्येवमन्नमयादिचतुःपु
"तस्माद्वा एतस्माद्विज्ञा
पुरुषविधः। तस्य प्रियमेव शि
तैत्तिरीटकश्रुतिर्जीवात्मपरमात्
जीवान्तर्यामिप्रतिपादकश्रुतेरात्मनि
परमोपास्य इति वैष्णवमते व्याख्य
परमात्मन आन्दोदयोत्कर्षतारतम्या
ठीयतेऽस्यामिति प्रतिष्ठा आश्र
ष्ठा। कृष्णः सर्वबृहत्तमानन्दस्त
मावधिरुक्तः "विष्टभ्याहमिदं कृ
वच्छिरोमणीनां श्रुतीनां कृष्णस्
ते। अतो भगवत्स्वरूपेष्वपि मध
मस्तस्मै भगवते कृष्णायामलकीर्त

यावत् । तदैवासुभृतः प्राणधारिणो जीवन्तो नरा उच्यन्ते । नन्वभजतामपि सूक्ष्मः स्थूलश्च देहो जीवन्नेव दृश्यते न तु माणस्तत्राहुः-महदहमादयश्चित्ताहङ्कारबुद्धिमनःश्रोत्रचक्षुरादयो देहद्वयारम्भका यदनुग्रहतो यद्भजनप्राप्तानुग्रहादेव अण्डं व्यष्टिशरीरमसृजन् "नमामि ते देव पदारविन्दं प्रपन्नतापोपशमातपत्रम् ।" इत्यादितृतीयोक्तेश्चित्ताहङ्कारादयो भजने प्रवृत्ता एव अतो येषां चित्तश्रोत्रादयो नैव भजने प्रवर्तन्ते ते देहा नैव चित्तश्रोत्रादिमन्तः । अतो देहाभासा एव मृता एवेति भावः । नन्वहं कारः यं मां ते भजेरन्नित्यत आहुः-अन्नमयादिषु अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः स्थूलदेहप्राणान्तः- जीवपरमात्मानः क्रमेण बस्तिपुच्छपृथिवीपुच्छाथर्वाङ्गिरःपुच्छमहःपुच्छब्रह्मपुच्छा एव ये पञ्चपुरुषाः श्रुतावुक्तास्तेषु मध्ये आनन्दमयः स त्वमिति सम्बन्धः । ननु तर्ह्यन्नमयाद्याः किमहं न भवामि तत्र विशिषन्ति-अत्रान्नमयादिषु अन्वेति विशतीत्यन्वयः । स त्वं तव कारणत्वात् । अन्नमयादीनां तत्कार्यत्वादेतेऽपि त्वमेव भवसि किन्तु न स्वरूपेण, तु त्वमानन्दमय सर्वकारणं परमात्मेत्यर्थः । किन्त्वेषु सर्वेष्वपि मध्ये यदवशेषं परमपरमं "रसो वै सः ।" इति श्रुत्या रसत्वेन प्रतिपादितम् णां स्मरो मूर्तिमान्" इति भागवतविवृतं सदसतः परमन्नमयादिस्थूलसूक्ष्मसर्वविलक्षणं सर्वश्रेष्ठात्सत आनन्दमयादसतस्ततो विज्ञानमयादेश्च परमन्यत् योऽसौ जाग्रत्स्वप्नसुषुप्तिमतीत्य तुर्यातीतो गोपाल इति । श्रीगोपालतापनीश्रुत्युक्तम् "ब्रह्मणो हि ष्ठाऽहम्" इति गीतास्पष्टीकृतं सर्वोत्कृष्टं श्रीकृष्णस्वरूपं वस्तु तदपि ऋतमस्माभिः श्रुतिस्तपःप्राप्तस्वरूपभिः प्राप्तमनुभूतं वा । र्थत्वाद्गत्यर्थानां च प्राप्त्यर्थत्वाज्ज्ञानार्थत्वाच्च । अत्र —

"असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥" इत्याद्या भक्त्यभावे प्रतिपादिकाः । असुर्याः —

"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च । विष्णुभक्तिपरो दैव आसुरस्तद्विपर्ययः ॥"

इत्याग्नेयविष्णुधर्मोत्तरोक्तेरसुराणां विष्णुभक्तिहीनानां प्राप्य इत्यर्थः ।

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तं पीठगं ये तु यजन्ति धीरास्तेषां शान्तिः शाश्वती षाम् ॥"

इत्याद्या भक्तिसत्त्वे गुणप्रतिपादिकाः श्रुतयः ।

"स वा एष पुरुषोऽन्नरसादिमयस्तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । इदं पुच्छं प्रतिष्ठा ॥"

इत्येवमन्नमयादिचतुःपुरुषनिरूपणोत्तरं पञ्चम आनन्दमयो निरूपितो यथा —

"तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमयस्तेनैष पूर्णः । स वा एष पुरुषविधस्तस्य पुरुषविधतामन्वयं । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा ॥" इति कश्रुतिर्जीवात्मपरमात्मब्रह्मप्रतिपादिका । अत्र यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यस्य विज्ञानं शरीरमिति मिप्रतिपादकश्रुतेरात्मनि तिष्ठन् इति श्रुत्यन्तरवाच्यविज्ञानमयो जीवात्मैवोक्तस्तदनन्तरोक्त आनन्दमयः सर्वान्तर्यामी परमात्मैव इति वैष्णवमते व्याख्या । अतोऽत्र पुत्रदर्शनजानन्दादिकं प्रियादिशब्दैर्न व्याख्येयम् किन्त्वेकस्यैव परमानन्दस्वरूपस्य आनन्दोदयोत्कर्षतारतम्यादेव प्रियादीनां चतुर्णां तत्तन्नामभेदः । ब्रह्मणस्तु सर्वतोऽपि बृहत्तमानन्दत्वादानन्दप्रतिष्ठात्वम् । स्यामिति प्रतिष्ठा आश्रयः "ब्रह्मणो हि प्रतिष्ठाऽहम्" इत्युक्तेः "रसो वै सः" इति सर्वान्तिमश्रुत्युक्तेश्च तस्यापि कृष्णः सर्वबृहत्तमानन्दस्तदवधिरूपो गोपालतापनीश्रुत्या तुरीयादपि विलक्षणत्वेन प्रतिपादितः प्रेमरसमयवपुरुपास्येषु क्तेः "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।" इत्युक्तेरन्तर्याम्यानन्दमयः खलु यस्यैक एवांशः अत एव मणीनां श्रुतीनां कृष्णस्यैवोपासना बृहद्वामने दृष्टा । प्राप्तिश्च गोपीत्वेन "स्त्रिय उरगेन्द्रभोगभुजदण्ड०" इति पद्येन अतो भगवत्स्वरूपेष्वपि मध्ये कृष्णमेव सर्वोत्कृष्टतया श्रुतिभिः प्रतिपादितमवधार्य नारदः श्रीनारायणस्यापि पुरःस्थितो भगवते कृष्णायामलकीर्तये ।" इत्युच्चारयन्कृष्णमेव नमस्करिष्यते ॥१७॥

गूढार्थदीपिनी

सम्प्रति पूर्वपद्योक्तकथाश्रवणभगवत्स्वरूपचिन्तनोभयविधभजनहीनान् साक्रोशं निन्दन्त्य आहुः-दृतय इति।

(उपदेशपरेयम्)

पद्यानुवाद:

न दृतिवद्विफलश्वसना जनास्तव [तव जना भक्तजनाः। यतो यदनुग्रहात् महदादि कर्तृ जगत् कर्म असृजत् सोऽन्तिमः आनन्दमयः पुरुषः सेव्यः। कथम्भूतः ? सः सदसतः अन्नमयादेः कोशात् परः। सर्वेषु लीयमानेषु अवशिष्यते अवशिष्यमाणश्च।] यतो महदाद्यसृजज्जगत्।

स पुरुषोऽखिलकोशगतोऽन्तिमः सदसतः पर एष्ववशिष्यते ॥४॥

सङ्क्षिप्तसार्थान्वयः — हे भगवन्! असुभृतो जीवा यदि तेऽनुविधा अनुवर्तिनो भक्ताः, तर्हि श्वसन्ति सफलश्वासा भवन्ति, अन्यथा दृतयः भस्त्रा इव श्वसन्ति वृथाश्वासाः जीवन्तोऽपि मृतका एवेत्यर्थः। किं बहुना यदनुग्रहतः लब्धसामर्थ्याः सन्तः महदहमादयोऽण्डम् ब्रह्माण्डमसृजन् समष्टिव्यष्टिरूपं देहमुत्पादयामासुरित्यर्थः। अथ अतः स त्वमेक एव सेव्य इति वाक्यशेषः। कुतः ? अन्नमयादिषु पञ्चसु कोशेषु पुरुषविधः पुरुषसंज्ञकः सन् योऽन्वयः अनुप्रविष्टः अत्र एषु चरमोऽन्तिमः आनन्दमयश्च। किञ्च सदसतः परं सर्वेषु एषु लीयमानेषु अवशेषम् ऋतं सत्यं च यद् ब्रह्म तदेव त्वं नित्यानन्दमयत्वात्तव सेव्यत्वमित्यर्थः। महत् महत्तत्त्वम् अहङ्कारश्च आदिर्येषां ते।

हे भगवन्! यदि ते तव अनुक्षणं सेवां विदधाति कुर्वन्तीति अनुविधाः भक्ताः, तर्हि असुभृतः सार्थकमसून् बिभ्रतीति सफलश्वासा इत्यर्थः। अन्यथा भक्त्यभावे दृतयः भस्त्रा इव श्वसन्ति निष्फलश्वासा इत्यर्थः। किं बहुना यस्य तव अनुग्रहात् जगद्धेतवो महदहङ्कारादयो ब्रह्माण्डमसृजन् उत्पादयामासुः। अथ अतः अन्नमयादिषु शरीरान्तर्वर्तिषु पञ्चसु काशेषु मध्ये पुरुषविधः पुरुषस्य अन्नमयादेः कोशस्य विधेव विधा आकारो यस्य सः अन्तर्यामिसंज्ञकः योऽन्वयः अनुप्रविष्टः सन् चेतयते स त्वम्। अत्र एषु चरमोऽन्तिम आनन्दमयश्च स त्वमेक एव सेव्य इति वाक्यशेषः। कुतः ? सदसतः स्थूलसूक्ष्मादन्नमयादेः परं व्यतिरिक्तमसङ्गम्। किञ्च एषु सर्वेषु लीयमानेषु अवशिष्यते इत्यवशेषम् अतः ऋतं सत्यं च यत् वेदान्तिनां ब्रह्म तदेव त्वमित्यन्वयः। अनु पश्चात् कारणत्वेन एति प्रविशतीत्यन्वयः। आनन्दमयः इत्यत्र प्राचुर्ये मयट् आनन्दनिधिः। पञ्चकोशास्तु अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्या ज्ञेयाः। केचित्तु "अनु हीने च सादृश्ये" इति विश्वकोषात् अनुशब्दो हीनार्थकः। विधीयन्ते शास्त्रेणेति विधाः भगवद्भजनाद्यास्ताभिर्हीना अनुविधाः। तथा हि असुभृतो जीवाः यदि तेऽनुविधाः विमुखाः तर्हि दृतय इव श्वसन्तीति एकान्वयमाहुः। यद्वा। जना यदि विधा भजनादिप्रकारान् अनुलक्ष्य तेषाम् असुभृतः सुष्ठु भृतः धारका न भवन्ति तदा दृतय इव श्वसन्तीत्यर्थः। नीलकणठस्तु महदहमादयस्तवानुग्रहतः यदण्डमसृजन् तदनुविधाः तत्प्रपञ्चासक्ता यदि असुभृतः जीवाः स्युः तर्हि दृतय इव श्वसन्तीत्यन्वयमाह ॥१८॥ ॥४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

एतदेवान्वयव्यतिरेकेण दृढयति-यदि तेऽनुविधास्तव गुणस्तवनादिना तवानुयायिनस्तर्हि असुभृतःप्पप्राणवन्त इत्यन्वयार्थः। व्यतिरेकमाह-अन्यथा दृतय इव श्वसन्ति। अग्निज्वालनसाधनभूतचर्मेव प्राणहीना इव श्वसन्ति। यथा तच्छ्वसनमपि तापकं तद्वत्तेषां जीवानामपीति जीवन्मृता इत्यर्थः। तथा च पैङ्गी श्रुतिः -

'अनिशमनुश्वसन्त्यसुखोद्धरितास्तव रिपवो दृतिवत्तमसि प्रतिष्ठाः।
तव गुणपृ(प्र)थनाः परिहाय तमः प्रयान्ति पदमजस्रमनन्तसुखम्॥' इति।

भारते सभापर्वणि नारदवचनम् —

हु:-दृतय इति।

् कर्म असृजत् सोऽन्तिमः
, लीयमानेषु अवशिष्यते

श्वसन्ति सफलश्वासा भवन्ति,
यदनुग्रहतः लब्धसामर्थ्याः
: स त्वमेक एव सेव्य इति
विष्टः अत्र एषु चरमोऽन्तिमः
देव त्वं नित्यानन्दमयत्वात्तव

ुभृतः सार्थकमसून् बिभ्रतीति
क बहुना यस्य तव अनुग्रहात्
पञ्चसु काशेषु मध्ये पुरुषविधः
ष्टः सन् चेतयते स त्वम्। अत्र
ः स्थूलसूक्ष्मादन्नमयादेः परं
च यत् वेदान्तिनां ब्रह्म तदेव
ट् आनन्दनिधिः। पञ्चकोशास्तु
' इति विश्वकोषात् अनुशब्दो
सुभृतो जीवाः यदि तेऽनुविधाः
लक्ष्य तेषाम् असुभृतः सुष्ठु भृतः
सृजन् तदनुविधाः तत्प्रपञ्चासक्ता

असुभृतःप्पप्राणवन्त इत्यन्वयोक्तिः
न्ति। यथा तच्छ्वसनमपि तापायैव

"कृष्णं कमलपत्राक्षं नार्चयिष्यन्ति ये नराः। जीवन्मृतास्तु ते ज्ञेया न सम्भाष्याः कदाचन॥"

इति। अनेन तेषां सम्भाषणादिकर्ता तत् गतिं व्रजतीत्यर्थः सूचितः। चेतनाचेतनवस्तुजातं त्वच्छक्त्यैव कार्य्यकरणे सामर्थ्यवदित्याह-महदहमादयस्तदभिमानिन्यो देवताः। यदनुग्रहतः यस्य तव तेषां तत्त्वानां तृतीयस्कन्धोक्तेन स्तोत्रेण प्रसन्नस्य अनुग्रहोन्मुखस्यानुग्रहतः शक्तिप्रदातृत्वेनोक्ता सर्वोत्कृष्टत्वेन स्तौति। योऽन्नमयादिषु अन्नमयो भूत्वा चरमः आनन्दमयस्त्वमसि। मयट्प्रत्ययकथनेन प्रतीतं विकारार्थं वारयति। सदसतः परं स्थूलसूक्ष्मादन्नमयादेः परमत्यन्तोत्कृष्टं घनीभूतानन्दमिति यावत्। महदादिष्वहङ्कारादिषुं लीयमानेषु अवशेषम्। तेषामधिभूतम्। अत एव ऋतं सत्यम् अप्रच्युतस्वरूपम्। तथा च श्रुत्याभ्यासः 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्ति।' इत्यादि। अनेन 'आनन्दमयोऽभ्यासात्।' इत्यधिकरणं व्याख्यातम्॥१७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं साधनविधीनां निर्णयमुक्त्वा ये देवतान्तरोपासनादिविधयः कर्मविधयो वा तेषां निर्णयो निरूप्यते-सूत्रात्मको भवन्तीति। तेषां किं करणं विधिसामर्थ्यात् नियोगन्यायेनाहोस्वित्कामनायां सत्यामभ्यनुज्ञामात्रं क्रियते आहोस्विन्निषेधार्थमनुवाद इति। अथ योऽन्यां देवतामुपास्त इत्यादिषु तेषां निर्णयार्थमाह-दृतय इव श्वसन्तीति। ये लौकिकाः कामनया प्रवृत्ताः केवललौकिकाः करणेनैव निषिद्धा अत एव नोच्यन्ते, ब्रह्मविदामेव विचारविषयत्वात्। वैदिकाः सर्व एव ब्रह्मवादिनो भवन्तीति कामनापरत्वं विधिपरत्वं वा ये मन्यन्ते वेदानां ते निन्द्यन्ते। प्राणपोषका इति प्राणोपाधिग्रस्ता इति च। दृतयो हि अतप्तानेव सर्वानेव धातून् तप्तान् कुर्वन्ति। अतस्ते परतापकर्तारः बहिर्मुखाः समर्थाः सन्तः सन्तः अन्यानेव पीडयन्तीति। सुतरां पशुघातकाः।

'यो नः शपादशपतः यो नः सम्पन्नः यो मां द्वेष्टि जातवेदः॥'

इत्यादिश्रुतिभिः अलौकिकप्रकारेणापि सर्वोपद्रवकर्तारः ते मृतप्राया एव इहामुत्रार्थफलरहिताः परोपद्रवार्थमेव श्वसन्तीत्यर्थः। ये पुनः 'यज्ञेन यज्ञमयजन्त' इति प्रकारेण यज्ञादिभिः त्वदावरणत्वेन देवतान्तरोपासनं च कुर्वन्ति ते त्वदनुविधाः। ये त्वदनुविधाः त एवासुभृतः सफलप्राणाः न तैः परोपद्रवः सम्भवतीति। किञ्च ये पूर्वोक्ताः तेषां दूषणान्तरमुच्यते-महदहमादय इति। 'कृतघ्ने नास्ति निष्कृतिः' इति भगवदाज्ञया महदादिभिः कृते ब्रह्माण्डे तत्र स्थित्वा तैरेव निष्पादितं शरीरं भुञ्जते तेषां तत्स्वामिनो वा ये अनुविधानं न कुर्वन्ति ते कृतघ्नाः। अथ च ये भगवत्सेवकास्तेषां सर्वभावेन भजनं युक्तमिति वक्तुं महदादयोऽपि भगवत्सेवार्थं भगवत्क्रीडाभाण्डं ब्रह्माण्डं ससृजुरिति निरूपितम्। करणेऽपि तेषां न स्वतः सामर्थ्यं किन्तु भगवदनुग्रहादेव। अतो भगवच्छेषतया देवतान्तरभजने न कोऽपि दोष इत्यपि सूचितम्। प्रकारान्तरेणाप्युभयेषां निन्दास्तुती उच्यते। पुरुषविधोऽन्वयोऽत्र चरमोऽन्नमयादिषु य इति। अत्र देहे पुरुषविधोऽन्वयः। यश्च भगवान् अन्नमयादिषु चरमः यथा मूर्तिकर्तारः प्रथमतः आकृतिं कृत्वा पश्चाद्धातून् पूरयन्ति, अन्यथा पूरितभाण्डनिर्माणं न भवति तादृशो देहः। अन्ये तु घटादयः असाध्याः। ततोऽत्र देहे कश्चिदान्तरो वर्तते य एवंविधः, यदुपरि समागताः अन्नरसादयो भवन्ति। अन्यथा भस्मोत्कर इव सम्भूताः स्युः। अतो योऽन्तः स्थितः प्रत्यहं तादृग्भावं सम्पादयति सोऽत्यन्तं मान्यो भवति। तस्य पुरुषविधतामन्वयं पुरुषविध इति तस्य भगवतः पुरुषप्रकारमेव लक्षीकृत्य अयमन्नमयादिः पुरुषविध इति अस्य पुरुषविधत्वं भगवदन्वयेनैव उक्तम्। पुरुषविधस्त्वन्वयः वंशन्यायेन समागत इत्यर्थः। नन्वन्नमयान्वय एव भगवतो भवतु, को विशेष इति चेत्तत्राह-अन्नमयादिषु यश्चरम इति। अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयेषु चरम आनन्दमयः, स तु सर्वान्तरः। आनन्दमयत्वादेव न प्रयोजनमन्यदस्ति, अन्यं च नापेक्षत इति सूचितम्। अन्तःस्थितो ह्याकारसमर्पको भवति तस्य पुरुषविधानामित्यत्र प्रकृतः उच्यते। तस्यैव पूर्वोक्तत्वात्। पूर्वोक्त एव हि परामृश्यते। स वा एष पुरुषविध एवेति पूर्ववाक्यम्। अयमिति सर्वत्रान्नमय आदिः अनन्तरोक्तो वा। न तु पूर्वपुरुषविधत्वेनोत्तरस्य पुरुषविधत्वमिति कदाचिदपि मन्तव्यम्। भगवांश्चानन्दमयः अत्र शोकप्रतिपादकाः स्वार्थं शोकप्रतिपादका एव। आनन्दमयस्य त्यागे शोकस्यैवावशेषात्। मयट्प्रत्ययानुपपत्तिश्च सूत्रकारेणैव प्राचुर्यादिति द्व्यचश्छन्दसीति व्याकरणेऽपि विकारे आन्दशब्दात्त्र्यचा मयड्विधानाभावः। तस्मात्साकारब्रह्मद्वेषादेव

कैश्चित्तथा व्याख्यातं ब्रह्मपदश्रद्धया वा। ब्रह्मपुच्छं प्रतिष्ठेति आनन्दमयस्य पुच्छत्वेन ब्रह्मनिरूपणात्। हंसाकृतित्वकथने 'पुच्छं परमात्मनः' इति सिद्धान्तापरिज्ञानात्। अन्यथा ज्ञानभक्तिमार्गयोरेकफलत्वं न स्यात्। भगवच्चरणस्याब्रह्मत्वादित्यलं विस्तरे भाष्ये विस्तरस्योक्तत्वात्। अतः योऽन्तः स्थितः आनन्दं सम्पादयति पुरुषत्वं चैतादृशं ये न मन्यन्ते ते कृतघ्ना इति किं वक्तव्यम्? ये वाऽभजंस्तेषां युक्तमिति वा किं वक्तव्यमित्यर्थः। किञ्च यत् किञ्चिज्जगति कार्यं तस्य सर्वस्य त्वमेव नियन्ता। तदाह–सदसतः परं त्वमिति। यदस्य सदसतः कार्यकारणयोः परं नियन्तृत्वेन विचारितं ब्रह्म त्वमेवेत्यर्थः। किञ्च न केवलं नियामकत्वमात्रं किन्तु भिन्नप्रक्रमेण भेदं परिहृत्य एतद्रूपत्वेनैवोत्तरमुच्यते–यदेष्ववशेषमिति। अवशिष्यत इति अवशेषः। एतत्पूर्वमुपपादितम्। यथा सर्ववस्तुष्वयं भगवानवशिष्यत इति। अतः पर्यवसानन्यायेन तस्यैवानुसरणं कर्तव्यं सर्वत्र नान्यस्य नश्वरस्येति हेतुरुक्त उभयत्रापि। किञ्च। यदेषु ऋतं तद्भगवानेवेत्यर्थः। अवशेषमात्रेण न कार्यं सेत्स्यति। तस्यापि कालान्तरे नाशसम्भवात् घृतादिवत्। अतो हेत्वन्तरमुच्यते–कृतमिति। एवं पञ्च हेतवो निरूपिताः। स्तुतौ निन्दायां च

"कृष्ण एव सदा सेव्यो निर्णीतः पञ्चधा बुधैः। शरीरदः प्रेरकश्च सुखदः शेषसत्यदः॥" ॥४॥१७॥

श्रीसुबोधिनीसारः

असुभृतः प्राणिनो यदि इत्यकारं प्रश्लिष्य यदि ते तवानुविधा अनुवर्तिनो भक्ता न तर्हि दृतयो भस्त्रा इव श्वसन्ति जीवन्ति यस्यानुग्रहतोऽनुप्रवेशबलेन महदहमादयो महत्तत्त्वाहङ्कारादयोऽण्डं ब्रह्माण्डं सृष्टवन्तः पुरुषस्यान्नमयादेर्विधा इव विधाकारो यस्य सोऽत्र एषु अन्नमयादिष्वन्वेतीत्यन्वयः। यः चरमोऽन्ते आनन्दमयाख्यः "ब्रह्मपुच्छं प्रतिष्ठा" इति श्रुतेः। कथं तर्हि असङ्ग तत्राह–सदसतः स्थूलसूक्ष्मात् परं व्यतिरिक्तं तत्साक्षिभूतम् एषु पञ्चसु कोशेषु यदवशिष्यत इत्यवशेषमबाध्यमृतं सत्यं तत्त्वमसि ॥४॥१७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

उक्तमेवान्वयव्यतिरेकाभ्यां द्रढयति–दृतय इवेति। असुभृतः प्राणिनो यदि ते तवानुविदधीत्यनुविधा अनुवर्तिनो भक्ता इ यावत्। तर्हि श्वसन्ति जीवन्ति सफलजीवना भवन्ति, इतरथा दृतय इव अग्निज्वालनसाधनभूतचर्मेव परप्रतापनार्थं जीवन्तीत्यर्थः। ननु अभक्तानामपि कामादिफलं भवत्येव इति चेन्न, कार्यकारणानुग्राहकत्वेन जीवनहोतोस्तवाभजने कृतघ्न तस्यापि दुर्लभत्वात् इत्याशयेनाहुः–महदिति। महान् अहङ्कारश्चादिर्येषां ते यदनुग्रहतः यस्यानुप्रवेशेन लब्धसामर्थ्याः सन्तोऽयं समष्टिव्यष्टिदेहं ब्रह्माण्डं सृष्टवन्तः। तर्हि कीदृशोऽहमुपास्यः इत्यपेक्षायामाहुः–पुरुषविध इति। पुरुषस्य विधेव विधा आकारो यस्य सः। ननु चिदेकरसस्य कथं तत्तदाकारता इत्याशङ्क्याहुः–अन्वयोऽत्रेति। अत्रान्नमयप्राणमयमनोमयविज्ञानमयानन्दमये अन्वेति अनुप्रविशतीत्यन्वयः। अतस्तत्तदाकारतेत्यर्थः। शाखाचन्द्रन्यायेन प्रथमतः सूक्ष्मदर्शनस्याशक्यत्वादन्नमयादिको श्रुतिषु निरूपितः। वस्तुतस्तु अन्नमयादिषु यश्चरमः अन्त्यः आनन्दमयः सः। ननु अन्नमयादिष्वन्वितत्वे तस्यासङ्गत्वं व्या स्यात्, इत्याशङ्क्याहुः–सदसतः परमिति। सदसतः स्थूलसूक्ष्मादन्नमयादेः परं व्यतिरिक्तमसङ्गं तत्साक्षिभूतम् एषु अवशेषमवशि इत्यवशेषमबाध्यं तत्परमार्थभूतम्। अथ अत एव ऋतं सत्यं यद्वस्तु तत्त्वमित्यर्थः ॥१७॥४॥

अन्वितार्थप्रकाशिका

दृतय इवेति॥ सर्वे जना दृतय इव वृथा श्वसन्ति। यदि च ये तवानुविधाः स्युस्तदा एव असुभृतो भवन्ति। यस्य अनुग्रहतः महदहमादयः अण्डम् असृजन् यः पुरुषविधः अत्रान्नमयादिषु अन्वयश्च अन्नमयादिषूपदिश्यमानेषु चरमः स तं यत् सदसतः परं एष्वन्नमयादिषु अवशेषम् ऋतं च तत् त्वमित्यन्वयः॥

यद्वा। यदि यद्यपि असुभृतः ते अनुविधास्तथापि दृतय इव पारतन्त्र्येण श्वसन्ति। शेषः प्राग्वदेवान्वयः। मनुष्यः इव अग्निज्वलनसाधनभूतचर्म्माणीव वृथा श्वसन्ति। यदि च ते तवानुविदधत्यनुवर्तन्त इत्यनुविधा भक्ताः स्युस्तदैव ते अनु प्राणभृतः सफलश्वासा भवन्ति इत्यर्थः। स्वामिपादास्तु असुभृतः यदि तेऽनुविधास्तदा सफलं श्वसन्ति। अन्यथा दृ

न्वयमाहुः । यदि च वाक्यद्वयसम्भवे वाक्यत्रयकल्पनक्लेशो विभाव्येत तदा असुभृतो यदि तेऽनुविधा विमुखाः स्युः
इव श्वसन्तीत्यन्वयः । विधीयन्ते शास्त्रेणेति विधाः भगवद्भजनाद्यास्ताभिर्हीना अनुविधाः प्रादिसमासः । "अनु हीने च
" इति विश्वः । यद्वा । अनुशयिता द्वेषवती विधा कृतिर्येषां तेऽनुविधाः "प्रादिभ्यो धातुजस्य" इति बहुव्रीहिः । "भवेदनुशयो
इति विश्वः । जना यदि ते विधाः भजनादिप्रकारान् अनुलक्षीकृत्य भजनादीन् असुभृतो भवन्ति सुष्ठु धारका न भ
र्थः । तदा दृतय इव श्वसन्तीति । नीलकण्ठचतुर्द्धरास्तु महदहमादयस्तवानुग्रहतो यदण्डमसृजन् तदनुविधा यदि असुभृतः
दृतय इव श्वसन्तीत्यन्वयमाहुः । यस्य तवानुप्रवेशलक्षणादनुग्रहाल्लब्धसामर्थ्या महदहमादयश्चित्ताहङ्कारबुद्धिमनःश्रोत्रचक्षुरादयो
त्मकाः जडा अपि अण्डं ब्रह्माण्डम् असृजन् । अतः सर्वकारणस्य तव भजनं विना कृतघ्ना जना वृथा श्वसन्ति । यद्वा ।
यद्यपीत्यर्थे । 'मन्यसे यद्युपशमं स्नेहपाशनिकृन्तनम्' इति षष्ठस्कन्धवत् । तथा च यदि यद्यपि असुभृतः प्राणाद्युपाधयः
ते तवानुविधाः ज्ञानादिमत्तया त्वदनुकारिणस्तथापि दृतय इव पारतन्त्र्येण श्वसन्ति । न तु तेषां कुत्रापि स्वातन्त्र्यं यतः
योऽपि तवानुप्रवेशलक्षणानुग्रहत एवाण्डमसृजन् इति यः त्वं चिदेकरसोऽपि पुरुषस्यान्नमयादेर्विधेव विधा आकारो
तदाकारः सन् यश्चेतयसे सत्त्वं तत्र हेतुः अत्रान्नमयादिषु कारणत्वेन अन्वेतीत्यन्वयः । अतस्तदाकारता
न्नमयादिषूपदिश्यमानेषु यश्चरमः ब्रह्मपुच्छं प्रतिष्ठा रसो वै स इती पुच्छत्वेन रसत्वेन चोक्तः सत्त्वं तस्यासङ्गत्वमाह । यत्
स्थूलसूक्ष्मादन्नमयादेः परं व्यतिरिक्तमसङ्गम् एषु अन्नमयादिषु अवशिष्यत इत्यवशेषं परमचरममबाध्यमृतं सत्यं चेति
म् । अत्र छन्दःस्वारस्यमपेक्षमाणाः नीलकण्ठचतुर्धराः सदसदतः परं त्वसि यदेष्विति पेठुः । अन्नमयादिष्वन्वयस्तु
शुद्धस्वरूपलक्षणार्थम् । तथा हि तैत्तिरीयाणामुपनिषदपि "स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिरः" इत्यादिना
क्रमेण अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः क्रमेण पञ्च कोशा उक्ताः । तस्य पुरुषविधतामन्वयं पुरुषविध
पुनस्तदन्वितत्वेनालक्ष्य ब्रह्मपुच्छं प्रतिष्ठेति सर्वसाक्षिशुद्धस्वरूपनिरूपणम् । साकारब्रह्मविषये तु पुरुषविधः पुरुषाकारो
र्भुजादिः ॥१७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पूर्वश्लोकोक्तोभयविधपुरुषकृतभजनहीनान् जनान्निन्दन्ति ॥ दृतय इति ॥ असुभृतः प्राणिनः यदि ते तव अनुवधा
तीत्यनुविधा अनुवर्तिनो केनापि प्रकारेणानुसृता इति यावत् ॥ तर्हीति शेषः ॥ श्वसन्ति जीवन्ति । सकलजीवाना भवन्ति ॥
इति शेषः । दृतयः भस्त्रा इव श्वसन्ति ॥ वृथाश्वासा इत्यर्थः ॥ ननु सकामानां जीवनां मद्भजनेन किं स्यादित्याहुः-
॥ महदहमादयः महांश्च अहं च महदहमौ तौ आदी येषां ते तत्त्वाभिमानिनो देवः स्तुतिरूपभजनानन्तरमिति शेषः । यस्य
॥ अनुग्रहात् ॥ अण्डं वैराजदेहम् ॥ असृजन् सृष्टवन्तः ॥ भक्तभजनीयं महदाद्यनुग्राहकं भगवत्स्वरूपं साकारं वा
कर्तृ वाऽकर्तृ कीदृशमित्याशङ्कायामाहुः पुरुषविध इति अन्नमयादिषु अन्नमय आदिर्येषां तेषु आदिशब्देन
विज्ञानमयाख्यजीवानन्दमयाख्यपरमात्मा च तेषां ग्रहणम् ॥ एषु तैत्तिरीयकश्रुत्युक्तेषु पञ्चसु यश्चरमः आनन्दमयः
परं यत् सतः महदादिकार्यात् असतः कालमायापुरुषरूपकारणाच्च परम् अन्यत् सदसत्प्रवर्तयितृ ब्रह्म ॥ अत्र
ऽण्डे योऽन्वेतीत्यन्वयः ॥ अन्वयं प्राप्तः । अथानन्तरं प्रलये सति अवशेषे अवशेषतया स्थितम् ॥ यदृतं
स्ति ॥ पुरुषविधः स त्वं पुरुषविधोऽसि ॥ पुरुषस्य द्विभुजादियुक्तस्य नरस्य विधा इव विधाः करचरणाद्यवयवा
इत्यनेन पदेन भगवान् दिव्यपुरुषाकृतिरुक्तः । अत्रान्वय इत्यनेन दिव्यपुरुषाकारे सत्यपि व्यापकश्च अन्नमयादिष्वेषु
नवधिकातिशयानन्दरूपश्च सदसतः परमित्यनेन प्रकृतिजन्यगुणकार्यरहितत्वान्निर्गुणः सर्वकर्ता च सर्वनियन्ता च
गुणप्रेरकश्च समग्रचेतनाचेतनवर्गादतिविलक्षणश्चोक्तः ॥ अवशेषमृतमित्यनेन पदेन सकलाधारः सदा नित्यश्च सर्वेषां
सर्वकारणं च स्वयमविनाशी चोक्तः । एतैः पञ्चभिः वाक्यैर्भगवत्स्वरूपं स्फुटतयोक्तम् ॥ तथा चोक्तं पुरुषाकृतिरूपं
भिः ॥

त्मैवेदमग्र आसीत् । पुरुषविध इति पूर्वमेवाहमिहासंतत्पुरुषस्य पुरुषत्वमिति ॥ चरणे पवित्रविततं पुराणमिति ॥

सर्वगन्धः सर्वरसः महारजनंवास इति ॥ स्वभक्तेभ्यो रमते स मे सर्वस्वमिति ॥ य ऐषोऽन्तरादित्यहिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणवात्सर्व एव सुवर्ण इति पुरुषो ह वै नारायणोऽकामयत प्रजा सृजै इति ॥ पुरुषान्न परं किञ्चित् काष्ठा सा परागतिरिति ॥

स ऐक्षत इति तथा व्याससूत्रे पुरुषमपि चैनमधीय इति ईक्षतेर्नाशब्दमिति ॥ तथा ब्रह्मवैवर्ते - ददर्श कृष्णं ग्रीष्म कोटिसूर्यसमप्रभम् ॥ द्विभुजं मुरलीहस्तं किशोरमिति ॥" स्कान्दे च —

"वासुदेवः परं ब्रह्म बृहत्यक्षरधामनि ॥ आदावेकोऽद्वितीयोऽभून्निर्गुणो दिव्यविग्रहः ॥

कृष्णस्यानुग्रहो यस्मिन् स तेजसि तमीक्षते । केवलं तेज एवान्ये पश्यन्ति न तु तं मुने ॥" इति ॥

मार्कण्डेये —

"एका मूर्तिरनिर्देश्या शुक्लां पश्यन्ति तां बुधाः । ज्वालामालोपरुद्धाङ्गी निष्ठा सा योगिनां परा ॥

रूपवर्णादयस्तस्य न भावाः कल्पनामयाः ॥" इत्यादिभिः ॥१॥

अथ अन्वयः । स चोक्तः श्रुत्यादिभिः वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णपुरुषेण सर्वमिति ॥ अन्तःप्रवि शास्ताजनानामिति ॥ ईशावास्यमिदमिति ॥ हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ॥ सृष्ट्वा तदनुप्राविशदिति ॥ तत्तु समन्वयात् ॥ स्कान्दे ॥ स वासुदेवः प्रकृतौ पुंसि कार्येषु चैतयोः ॥ अन्वितश्च पृथग्वास्ते सर्वां स्वधामनीत्यादिभिश्च ॥२॥

आनन्दमयत्वं चोक्तं सूत्रश्रुतिस्मृतिभिः ॥ तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमय इ आनन्दमयोऽभ्यासादिति ॥

"निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः ॥ आनन्दमात्रकरपादमुखोदरादिः सर्व स्वगतभेदविवर्जितात्मा ॥"

दशमे च —

"केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक्" इत्यादिभिः ॥३॥

सदसतः परमित्यस्यार्थेषु श्रुतिसूत्रस्मृतयश्च —

साक्षीचेताःकेवलो निर्गुणश्चेति । यो वै वा लोके एतेषां पुरुषाणां कर्ता यस्य चैतत् कर्म स वै वेदितव्य विद्वान्नामरूपादिमुक्तः परात्परं पुरुषमुपैति दिव्यमिति ॥ प्रधानक्षेत्रज्ञपतिर्गुणेश इति ॥ भीषास्माद्वातः पवते भीषोदेति सूर्य अक्षरात्परतः पर इति । यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि सर्वाणि भूतान्तरो यमयति एष ते आत्मान्तर्याम्यमृत इति ॥ य आत्मनि तिष्ठन्नात्मनोऽन्तरोऽयमात्मा न वेद यस्यात्मा शरीरं आत्मानमन्तरो यमयतीति योऽक्षरे तिष्ठन्नक्षरमन्तरोऽयमक्षरं न वेद । यस्याक्षरं शरीरं योऽक्षरमन्तरो यमयतीति ॥ स वा अ सर्वस्य वशी सर्वस्येशानः सर्व्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्चन साधुना कर्म्मणा भूयान्नो एवासाधुना भूताधिपतिरेष लोकेश्वर एष लोकपालः स सेतुविधरण एषं लोकानामसम्भेदायेति ॥ जन्माद्यस्य यतः भेदव्यपदेशा

मार्कण्डेये —

"दूरस्था चान्तिकस्था च विज्ञेया सा गुणातिगा । वासुदेवाभिधानासौ निर्ममत्वेन दृश्यते ॥"

विष्णुपुराणे —

"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः । स शुद्धेभ्यः पुमानाद्यः प्रसीदत्वि"ति ॥

सगुणो
सत्त्वाद्यैरखिलैर्गु

भागवते

"प्रकृति

गीतायां च

'यस्मात्क्ष

अवशेषमृ

सकारणं क
कामानिति ॥ महान
प्रकरणादसन्निहितत्वा

जगद्व्यापार
अपि स्वतन्त्रतया जग
प्रकृतत्वात् ॥ इतरेष
हेतुद्वयदर्शनार्थः ॥

तथा श्रुतिस्मृत

"पुरुषेणात्मभू
कर्माविभागादिति चेन्नान

विष्णुपुराणे —

"प्रकृतिर्या मया

परमात्मा च सर्वे

एकादशे —

"एक एवाद्वितीयो

अथ भगवद्भजनवि
विधा भक्ताः, यदि न भवन्ति,
इत्यर्थः । ननु मम कारणत्वे सति
परिणामस्वभावस्य
कार्यकारणयोरनन्यत्वोपपादकम्
बहु स्याम्" इतीक्षात्मकय
अचेतनस्येक्षात्मकानुग्रहासम
तस्येक्षासङ्कल्पापरपर्यायानुग्रहस
पुरुषविधः पुरुषाकारत्वेन निरू

सगुणो निर्गुणो विष्णुर्ज्ञानगम्यो ह्यसौ स्मृतः ॥ न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि । वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैरिति ॥

भागवते —

"प्रकृतिपुरुषयोः परस्येति त्वतः पुमान् समधिगम्य ययास्यवीर्यमिति ॥"

गीतायां च —

'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः' इत्याद्याः ॥४॥

अवशेषमृतमित्यस्यार्थेषु सूत्रश्रुतिस्मृतयः —

सकारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामानिति ॥ महानव्यक्ते लीयतेऽव्यक्तम् अक्षरे लीयत अक्षरं तमसि लीयते तमः परे देवे एकीभवति ॥ जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च । अस्यार्थः —

जगद्व्यापारवर्ज्जं स्वतन्त्रतयोत्पत्त्यादिजगद्व्यापारवर्जितं मुक्तैश्वर्यम् ॥ ननु जगद्व्यापारवर्जमिति कुत अक्षरपुरुषादयो मुक्ता अपि स्वतन्त्रतया जगद्व्यापारं कुर्वन्तीत्याशङ्कायामाह–प्रकरणात् ॥ उत्पत्त्यादिकर्तृबोधकसच्छास्त्रवाक्येषु मुख्यतया परमेश्वरस्यैव प्रकृतत्वात् ॥ इतरेषां तु तदाधीन्येनैव असन्निहितत्वात् तेषु वाक्येषु मुक्तस्वातन्त्र्यस्य सान्निध्यरहितत्वात् । चकारो हेतुद्वयदर्शनार्थः ॥

तथा श्रुतिस्मृतयः ॥ हन्ताहमिमास्तिस्रोदेवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ॥

"पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ।" 'योऽस्योत्प्रेक्षक आदिमध्यनिधन०' इत्यादयः ॥ इति सूत्रार्थः ॥ न कर्माविभागादिति चेन्नानादित्वादुत्पद्यते चाप्युपलभ्यते च ॥

विष्णुपुराणे —

"प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥

परमात्मा च सर्वेषामाधार इति ॥"

एकादशे —

"एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रय" इत्याद्याः ॥१७॥४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ भगवद्भजनविमुखानां जन्मवैयर्थ्यमाहुः ॥ दृतय इति ॥ हे हरे! असुभृतः प्राणिनः, ते तव, विशेषेण दधति त्वामिति भक्ताः, यदि न भवन्ति, तर्हि, दृतयः इव, श्वसन्ति चर्मभस्त्रिका इव उच्छ्वसन्ति । ता यथा वायुपूरिता उच्छ्वसन्ति तद्वद्वृथोच्छ्वासा र्थं । ननु मम कारणत्वे सति तत्समनियतमुमुक्षूपस्यत्वस्य सिद्धिः, परं तु मम कारणत्वमेवानुपपन्नमचेतनस्य महदहङ्कारादिरूपेण णामस्वभावस्य प्रधानस्यैव कारणत्वात् । गुणसाम्यावस्थप्रधानस्य कारणत्वे कारणयोरनन्यत्वोपपादकमृदादिदृष्टान्तोपपत्तिरित्याशङ्कापरिहारमाहुः । यदनुग्रहतः यस्य तवानुग्रहात्, महदहमादयः, "तदैक्षत स्याम्" इतीक्षात्मकयत्सङ्कल्पलब्धसत्ताका येनानुप्रविष्टाश्च महदहङ्कारादय इत्यर्थः । अण्डम्, असृजन् । स्येक्षात्मकानुग्रहासम्भवात् न प्रधानस्यकारणत्वमिति भावः । ननु तर्हि जीवः कारणं भवितुमर्हत्येव सङ्कल्पापरपर्यायानुग्रहसम्भवादिति चेन्न । अन्नमयादिषु आनन्दवल्ल्यां गणितेषु अन्नमयादिषु, यः चरमः आनन्दमयः, पुरुषाकारत्वेन निरूपितः, स एव अत्र, अन्वयः अनुप्रविष्टः, स च त्वमेव न जीवः । किं च । यत् सदसतः

चिदचिदात्मकप्रपञ्चात्, परं विलक्षणम्, एषु अन्नमयादिषु चतुर्षु संहृतेषु सत्स्वपि, अवशेषमानन्दमयरूपेणावस्थितम्, अथ ऋतं निर्विकारं, तत् त्वमेव। जीवासम्भावितमनुग्राहकत्वं त्वय्येवोपपन्नं तव सर्वशरीरकत्वादिति भावः ॥४॥ ॥१८॥

योगिरामानुजाचार्यकृतसरला व्याख्या

अथ भगवद्भजनविमुखानां जन्मवैयर्थ्यमित्याहुः-दृतय इवेति। महदहमादयः महदहङ्कारादिरूपाः प्रकृतिविकाराः यदनुग्रहतः यस्यानुप्रवेशेन लब्धसामर्थ्याः सन्तः अण्डमसृजन् ब्रह्माण्डमसृजन् । यः परमपुरुषः अन्नमयादिषु अन्नमयप्राणमयमनोमयविज्ञानमयआनन्दमयाख्येषु पञ्चसु कोशेषु अन्वयः अन्वेतीत्यन्वयः । सर्वान्तरात्मत्वाकारेणानुप्रविष्टः। अत्र अन्नमयादिपञ्चकोशेषु यः चरमः पञ्चमः आनन्दमयाख्यः पुरुषविधः पुरुषस्य विधा इव विधा यस्य सः पुरुषप्रकारः आनन्दमयाख्यस्य स्वभावतो पुरुषसदृशशिराः पक्षाद्याकाररहितत्वेऽपि अन्नमयादीनां पुरुषाकारस्योक्तत्वेन तत् प्रकरणात् आनन्दमयस्य निरवयवस्यापि पुरुषाकृतिमत्त्वं रूपितम्। न तु वास्तविकम्। आनन्दमयाधिकरणे शङ्करभाष्येऽपि तथैवोक्तम्। तथा च पुरुषविध इत्युक्ते श्रुत्या पुरुषाकारत्वेन रूपित इत्यर्थः। श्रीधरीयाख्याने तु अन्नमयादिषु यश्चरमः इत्युक्ते ब्रह्मपुच्छं प्रतिष्ठा इति श्रुत्युक्तरीत्या पुच्छत्वाकारेण रूपितः परमात्मा आनन्दमयादन्यः इति व्याख्यातम् । तदत्यन्तासङ्गतम् । ब्रह्मणः आनन्दमयादन्यत्वस्य प्रकरणविरुद्धत्वात् प्रमाणविरुद्धत्वाच्च । अतः आनन्दमयाख्यस्यैव ब्रह्मत्वं चरमपुरुषविधत्वं च एवमेव शङ्कररामानुजभाष्यादिषु व्याख्यातम् । अतो विस्तरभयादधिकं न लिख्यते । यत् परं ब्रह्म सदसत् कार्यकारणरूपं चिदचिदात्मकं वा।

'तत्सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्च त्यच्चाभवत्।'

इति श्रुतेः। यत् ब्रह्म अतः परं चिदचिद्विलक्षणम् —

'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥'

इत्युक्तरीत्या चिदचिद्विलक्षणपुरुषोत्तमस्वरूपमित्यर्थः। अनेन 'इहैकस्थं जगत्कृत्स्नं पश्याद्यं सचराचरम्।' त्युक्तरीत्या जगदविशिष्टशुद्धब्रह्मस्वरूपमुक्तं भवति। इहैकस्थमित्युक्ते यस्मिन् प्रदेशे जगन्नास्ति तत् शुद्धब्रह्मचिदचिदित्यनेन तदनुप्रविश्य सच्च त्यच्चाभवदिति श्रुत्युक्तसदसदनुप्रविष्टब्रह्मस्वरूपमुक्तं भवति। अथ प्रलयादनन्तरम् एषु चिदचिदात्मकसर्वदार्थेषु अन्नमयादिषु वा अवशेषम् अवशिष्टं सर्वेषु नश्यत्सु अविनाशित्वेन स्थितमित्यर्थः —

'समं सर्वेषु भूतेषु समवस्थितमीश्वरम्। विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥'

इति भगवद्वचनात्। अविनाशित्वादेव ऋतं सत्यस्वरूपम्। एवम्भूं यद्ब्रह्मस्वरूपं तस्य ते असुभृतः प्राणिनः अनुविधाः अनुविदधतीत्यनुविधाः। अनुशरणशीलाः भक्ता इति यावत्। अयदि न यदि ते भक्ता न भवन्ति यदीत्यर्थः। तदा दृतय इव श्वसन्ति भस्त्रा इव श्वसन्ति। निरर्थकश्वासाः भवन्तीत्यर्थः। अन्यथा त्वद्भजनशीलाः यदि तदा सफलजीवना एवेत्यर्थसिद्धम्। असुभृतोऽयदि तेऽनुविधाः इत्यत्र असुभृतः अयदीति पदच्छेदः। असुभृतोऽयदीत्यत्र अकारस्य असुभृतो इत्यत्र तकारोत्तरे ओकारस्य पूर्वरूपस्यैकदेशो बोध्यः। 'अस्यादभावे स्वल्पार्थे' इति विश्वः। श्रीधर्यां तु एतद्वाक्यस्य क्लिष्टान्वयः। लक्षणा अध्याहारश्च कृतः। अस्य श्लोकस्य चतुर्थपादे श्रीधरीव्याख्यायामेवं पाठः प्रक्षिप्तः, सदसतः परं त्वमथेति । अत्र सदसतः इति पदम्। त्वमथेत्यत्र त्वमिति पदं च प्रक्षिप्तमसङ्गतं च। अस्य श्लोकस्य पादचतुष्टयेऽपि नगणजगणभगणाः आदितः क्रमशः सन्ति। अतः सदसतः परं त्वमथेति पाठे जगणभगणयोर्हानिर्भवति । अतः छन्दोभङ्गो दोषः । अस्य श्लोकस्यैवमन्वयः —

महदहमादयः यदनुग्रहतः अण्डमसृजन् अन्नमयादिषु यः चरमः पुरुषविधः । अत्र यः अन्वयः अन्नमयादिषु अन्तर्यामितयानुगत इत्यर्थः। यत् ब्रह्म सदसत् सदसत्स्वरूपमित्यर्थः। यत् अतः परं यत् ब्रह्म प्रपञ्चादिलक्षणमित्यर्थः। अथ ऋत एष्वशेषम् अतः एतादृशस्य ते असुभृतः अनुविधाः अयदि अनुसरणशीलाः न यदीत्यर्थः। तदा दृतय इव श्वसन्ति निरर्थकश्वासा भवन्ति। अन्यथा तु अनुशरणशीलाः यदि सफलजीवना एवेति भावः। इत्यन्वयार्थः ॥१७॥

श्रुतावसुय
चोक्तमाग्नेयविष्णु
"द्वौ भूतस
अन्धेन नि
नावेदीर्नाज्ञासीस्तदा
अखण्डानुभवस्वरू
तत्तदाकार अन्नमयप्रा
"ब्रह्मविदा
अयमुत्तरः पक्षः। अ
अत्रान्नरसशब्दे
पृथिवीकार्यस्य देहे अ
प्राणमयः पुरुषो प्राण
चैतन्यम्। तत्प्रचुरो वि
वैष्णवाः व्याचक्षते। प
तन्मतरजोघट्टनया । प्र
अन्नमयादिप्रतीतौ अधि
अन्नमयाद्याकारत्ववर्णनस्
भावः। तथापि व्यापकत्
मिथ्यात्वेन वस्तुतस्तत्सङ्ग
पुरुषविधः पुरुषाकारः इ
विषये श्रवणादिभिः साध
चक्षिङो ङित्करणात् ज्ञापक

पूर्वश्लोकोक्तमुभ
इति। असुभृतो जीवा यदि
श्वसन्ति। अभक्तानां कामा
स्थूलसूक्ष्मत्वेनाविश्य तत्तद
अन्नमयादिपुरुषेऽन्वयः सदन्
तत्राह-सदसत इति। सदसत
यद्भवति तत्त्वम् इति तर्हि
शाखायां चन्द्रोऽस्तीति तद्वात्
"असुर्या नाम ते लो
"इहैव सन्तोऽथ वि

स्थितम्, अथ ऋतं
॥

तविकारः यदनुग्रहतः
षः अन्नमयादिषु
त्वाकारेणानुप्रविष्टः ।
स्य सः पुरुषप्रकारः
त्वेन तत् प्रकरणात्
ाष्येऽपि तथैवोक्तम्।
त्युक्ते ब्रह्मपुच्छं प्रतिष्ठा
तासङ्गतम् । ब्रह्मणः
चरमपुरुषविधत्वं च
दसत् कार्यकारणरूपं

चराचरम्।' त्युक्तरीत्या
चिदित्यनेन तदनुप्रविश्य
कसर्वदार्थेषु अन्नमयादिषु

सुभृतः प्राणिनः अनुविधाः
र्थः । तदा दृतय इव श्वसन्ति
यर्थसिद्धम्। असुभृतोऽयदि
ओकारस्य पूर्वरूपस्यैकदेशो
श्च कृतः । अस्य श्लोकस्य
त्वमथेत्यत्र त्वमिति पदं च
: सदसतः परं त्वमथेति पाठे

यः अन्वयः अन्नमयादिषु
ादिलक्षणमित्यर्थः । अथ यत्
तय इव श्वसन्ति निरर्थकश्वासा

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

श्रुतावसुर्य्या इतिश्रीभगवद्बहिर्मुखाः सर्व एवासुरास्तेषां स्वभूतामेते असूर्याः सांसारिका लोकाः कर्मफलानि तथा कमाग्नेयविष्णुधर्मोत्तरयोः —

"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च। विष्णुभक्तिपरो दैव आसुरस्तद्विपर्ययः ॥" इति।

अन्धेन निबिडेन । तमसाऽज्ञानेन । तान् लोकान् प्रेत्य मृत्वा आत्महनो भगवद्विमुखा अभिगच्छन्ति चेद्यदि त्वं वेदीर्नाज्ञासीस्तदा ते महती जन्ममरणलक्षणा विनष्टिः हानिर्भविष्यति । उभयविधभजनं गुणश्रवणकीर्तनरूपं भजनम् नुभवस्वरूपभजनं च तेन हीनान् इतरथा भक्तत्वाभावे । तदपि कामादिफलमपि । तत्र च समष्टिव्यष्ट्यात्मकदेहेऽपि दाकार अन्नमयप्राणमयाद्याकारः । तदाह-तत्तदाकारेण चेतयितृत्वमाह-पुरुषेति । तैत्तिरीयोपनिषदि —

"ब्रह्मविदाप्नोतिपरम् ।" इत्यधिकृत्य श्रूयते "स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिरः । अयं दक्षिणः पक्षः । मुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा ॥" तदप्येष श्लोको भवति । "अन्नाद्वै प्रजाः प्रजायन्त" इत्यादि ।

अत्रान्नरसशब्देनैतद्विकारस्त्वगादिरूपो लक्ष्यते। तन्मयस्तदेकप्रचुरः पुरुषो देहरूपोऽन्नमयकोशः । जलादिकार्यश्लेष्माद्यपेक्षया पृथिवीकार्यस्य देहे आधिक्यात् प्राचुर्य एव मयट्। 'विकारार्थादिति चेन्न प्राचुर्यात्' इति न्यायात्। एवं हृदिस्थप्राणवायुप्रचुरः णमयः पुरुषो प्राणमय कोशः एवं सङ्कल्पाद्यात्मकान्तःकरणवाचकमनःप्रचुरः पुरुषः मनोमयः कोशः । एवं विज्ञानं नमयम्। तत्प्रचुरो विज्ञानमयः पुरुषो विज्ञानमयः कोशः । एवमानन्दप्रचुरः श्रीभगवानानन्दमयः कोशः । एवं कोशपञ्चकं भावाः व्याचक्षते। परस्य व्याख्यानं तु तद्भाष्य एव द्रष्टव्यम्। तच्च श्रीवैष्णवैः सर्वज्ञैस्तोषणीकृद्भिश्च बहुतरमेवाक्षिप्तमित्यलम् स्तरजोघट्टनया । प्रकृतमनुसरामः । चिदेकरसस्य चिन्मात्रानन्दरूपस्य ब्रह्मणः तत्तदाकारता अन्नमयाद्याकारता अन्वेति न्नमयादिप्रतीतौ अधिष्ठानतयानुगतोऽनुस्यूतो भवतीत्यन्वयः । अतः अन्नमयादिष्वन्वितत्वात् पुच्छत्वेन सर्वाधारत्वेनोक्त इति न्नमयाद्याकारत्ववर्णनस्य निराकारपुच्छरूपब्रह्मबोधनपरत्वात् तत्तत्प्रतीत्यधिष्ठाननिराकारब्रह्मण एव वास्तवत्वात्सत्यत्वमव्याहतमिति वः। तथापि व्यापकत्वेन सत्यत्वे सत्यपि अत एव बाध्यत्वादेव ऋतं सत्यमित्यत्राविद्ययैव तत्तत्कल्प्यत इति शेषः । अतस्तेषां ध्यात्वेन वस्तुतस्तत्सङ्गाभावान्नासङ्गत्वव्याहतिरिति भावः । तस्यान्नमयादेः पुरुषविधतां पुरुषाकारतामनुलक्षीकृत्य अयं प्राणमयादिः रुषविधः पुरुषाकारः इत्येवं पुनः पुनः प्रतिकोशं कोशान्वितत्वम् आलक्ष्य प्रदर्श्य तेषां निष्कृष्टार्थप्रदर्शकनरवपुरिति पद्ये त्वयि ये श्रवणादिभिः साधनैः त्वां न भजन्तीति व्याख्येयम् । न रमन्तीति पाठः सुगमः । अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् । चक्षिङो ङित्करणात् ज्ञापकात् विशेषजिज्ञासा चेद्वैष्णवतोषणी दृश्या ॥१७॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

पूर्वश्लोकोक्तमुभयविधभजनं कथामृतश्रवणादिकम् अजस्रसुखानुभवरूपभजनम् इत्युभयविधभजनहीनान्निन्दन्ति-दृतय । असुभृतो जीवा यदि ते तवानुविधा अनुवर्तिनो भक्ता भवन्ति सफलजीवना भवन्ति इतरथा दृतय इव भस्त्रा इव वृथा न्ति। अभक्तानां कामादिकमपि न सिध्येदित्याशयेनाह-महदहमिति । महदहमादयो यदनुग्रहत अण्डं समष्टिरूपं चासृजन् । प्रविष्टत्वेनाविश्य तत्तदाकारः सन् यः चेतयते स त्वमित्याह-पुरुषविध इति । यः पुरुषविधः अन्नमयादिपुरुषकारः यश्चात्र मयादिपुरुषेऽन्वयः सदन्वयः अन्नमयादिषु अचरमः ब्रह्मपुच्छत्वेनोक्तः स त्वम्। ननु अन्नमयादिषु अन्वितत्वेऽसङ्गत्वव्याहतिरेव -सदसत इति। सदसतः स्थूलसूक्ष्मादन्नमयादेः परं व्यतिरिक्तंतत्साक्षिभूतम्। एष्ववशेषमबाध्यम् अथ अत एव ऋतं सत्यं तत्त्वम् इति तर्हि कथं तेष्वन्वयः । उक्तं शाखाचन्द्रवच्छुद्धस्वरूपलक्षणार्थमित्याह-बालकं कश्चिद्दर्शयति । वृक्षस्य चन्द्रोऽस्तीति तद्वात्। उभयविधभजनहीनान्निन्दयति। श्रुतिः—जनकं प्रति याज्ञवल्क्यः ।

"असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥"

"इहैव सन्तोऽथ विद्मस्तद्वयं, न चेदवेदीर्महती विनष्टिः । यत्तद्विदुरमृतास्ते भवन्त्यपरे दुःखमेव यन्ति ॥"

इत्याद्या: । अर्थ: — भगवद्विमुखा: सर्वेऽसुरा: ।

तथा चोक्तमाग्नेये —

"द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च । विष्णुभक्तिपरो दैव आसुरस्तद्विपर्यय: ॥" इति ।

तेषाम् असुर्या नाम लोका: कर्मफलानि अन्धेन तमसा परमात्माज्ञानेनावृता: । ये के च आत्महनो भवद्विमुखा: प्रेत्य मृत्वा ताँल्लोकानभिगच्छन्ति । अभक्तनिन्दापरेयं श्रुति: ।

वयमिहैव सन्तस्तद्विद्म: जानीम: । त्वं चेद्यदि नावेदी: तत्परमात्मतत्त्वं न विदितवान् तर्हि तव महती विनष्टि: हानिर्जन्ममरणादिरूपा महती संसृति: स्यात् । कुत: । ये तद्विदु: तेऽमृता जन्ममरणादिदु:खाद्विमुक्ता: परमानन्दरूपा भवन्ति । इतरेऽज्ञा: दु:खमेव यन्ति प्राप्नुवन्ति, इत्यर्थ: । उपदेशपरेयं श्रुति: ।

अथ अन्नरसमयादिषु पुरुषविधा: पञ्च क्रमेण लिख्यन्ते-तैत्तिरीयोपनिषदि — "ब्रह्मविदाप्नोतिपरम् ।" इत्यधिकृत्याम्नायान्ते । प्रथममन्नरसमयपुरुषविधामाह —

"स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिर: । अयं दक्षिण: पक्ष: । अयमुत्तर: पक्ष: । अयमात्मा । इदं पुच्छं प्रतिष्ठा ॥" इति । अस्यार्थ: — अन्नाद्वै प्रजा: प्रजायन्ते । अन्नाद्वै पुरुष: सम्भूत: इत्याद्युक्त: अन्नरसविकार: । एष पुरुषो देह: । स वै अन्नरसमय: अन्नरसविकार: तस्येदं प्रसिद्धं शिर: न तु प्राणमयादिष्विव कल्पनामयम् । एवं पक्षादिषु योजना । अयं दक्षिणो बाहुर्दक्षिण: पक्ष: । अयं वामो बाहुरुत्तर: पक्ष: । अयं मध्यमो देहभाग आत्मा "अङ्गानां मध्ये ह्येष आत्मा ।" इति श्रुते: । इदं नाभेरधस्ताद्यदङ्गं तत्पुच्छमिव पुच्छमधोलम्बनसाम्यात् तदेव प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठाऽऽश्रय: ॥" इति (१)

अथ प्राणमयं पुरुषमाह — "तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयस्तेनैष पूर्ण: । स वा एष पुरुषविधस्तस्य पुरुषविधतामन्वयं पुरुषविधस्तस्य प्राणमेव शिर: । व्यानो दक्षिण: पक्ष: अपान उत्तर: पक्ष: । आकाश आत्मा । पृथिवी पुच्छं प्रतिष्ठा । तस्यैष शारीर आत्मा । य: पूर्वस्य ॥" इति ।

अर्थ: — तस्मादन्नरसमयात्पुरुषादन्य अन्तरस्तदभ्यन्तरस्थ आत्मा प्राणमयो वर्तते प्राणो वायुस्तन्मयस्तेन प्राणमयेन एषोऽन्नरसमय: पूर्ण: । वायुना दृतिरिव (दृतिश्चर्मयन्त्रम्) स वै एष प्राणमय आत्मा पुरुषविध: पुरुषाकार: । कुत: । तस्यान्नरसमयस्यात्मन: पुरुषविधतामनुलक्ष्यीकृत्यायं प्राणमयोऽपि पुरुषविधो भवति तदन्तर्वर्तित्वात् । मूषायन्त्रनिषक्तधातुप्रतिमावत् तस्य प्राणमयस्य वायुविकारस्य मुखनासिकादिनि:सरणशीलो वायुवृत्तिविशेष: प्राण: शिर: । व्यानो वायुवृत्तिविशेष: दक्षिण: पक्ष: । अपानोऽधोवायु: उत्तर: पक्ष: । आकाश आत्मा वायुवृत्तिविशेष: समानाख्यो य: स आत्मा मध्यभाग: । पृथिवी तदभिमानिनी देवता तस्य पुच्छं प्रतिष्ठा आध्यात्मिकप्राणस्य धारयित्री स्थितिहेतुत्वात् । "सैषा पुरुषस्यापानमवष्टभ्य" इति श्रुते: । अन्यथोदानवृत्त्योर्ध्वगमनं गुरुत्वात्पतनं वा स्याच्छरीरस्य तस्मात्पृथिवी पुच्छं प्रतिष्ठेति । तस्येति शरीरेऽन्नमये भव: शारीर: य एष प्राणमय: । स तस्यान्नमयस्य शारीर आत्मा भवति । अन्नमयात्प्राणमय: श्रेष्ठश्च "प्राणं देवा अनुप्राणन्ति ।" इति श्रुते: । प्राणबलेन सेन्द्रियस्य देहस्य बलमिति । (२)

अथ मनोमयं पुरुषमाह — "तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमयस्तेनैष पूर्ण: । स वा एष पुरुषविधस्तस्य पुरुषविधतामन्वयं पुरुषविध: । तस्य यजुरेव शिर: । ऋग्दक्षिण: पक्ष: । सामोत्तर: पक्ष: । आदेश आत्मा । अथर्वाङ्गिरस: पुच्छं प्रतिष्ठा । तस्यैष शारीर आत्मा । य: पूर्वस्य ॥" इति ॥

अर्थ: —

तस्मात्प्राणमयादेतस्मादन्य: अन्तर आत्मा मनोमय: । मन: सङ्कल्पविकल्पात्मकमन्त:करणं तन्मय: मनोमय: । सोऽयं प्राणमयस्याभ्यन्तर आत्मा तेन मनोमयेन प्राणमय: पूर्ण: । स एष पुरुषविधो भवति । तस्य प्राणमयस्य पुरुषविधतामनुलक्ष्यीकृत्यायं पुरुषविध: । तस्य मनोमयस्य । यजुरेव शिर: यजुर्वेदमन्त्रविशेष: शिर: । तस्य शिर:प्रधानत्वात् । यजुषां हि हवि

कारादिना। तथा ऋग्वेदमन्त्रविशेषः तस्य दक्षिणः पक्षः। सामवेदमन्त्रविशेष उत्तरो वामपक्षः। आदेशोऽत्र ब्राह्मणमन्त्रविशेषः त्मा। अथर्वणाङ्गिसा दृष्टा मन्त्रविशेषाः। ब्राह्मणं पुच्छं शान्तिपौष्टिकादिप्रतिष्ठाहेतुकर्मप्रधानत्वात्प्रतिष्ठा। य एष मयस्तस्य पूर्वस्य प्राणमयस्य शारीर आत्मा भवति। प्राणमयादस्य श्रेष्ठत्वं ज्ञानसम्बन्धात्। "मनसा पश्यति मनसा शृणोति" त्यादिश्रुतेः (३)

अथ विज्ञानमयं पुरुषमाह — "तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमयस्तेनैष पूर्णः। स वा एष पुरुषविधः। तस्य पुरुषविधतामन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। तस्यैष शारीर आत्मा। यः पूर्वस्य॥" इति॥

अर्थः —

तस्मान्मनोमयादन्योऽन्तरस्थ आत्मा विज्ञानयो भवति। निश्चयात्मिकाबुद्धिर्विज्ञानं तन्मयः। "बुद्धिर्विज्ञानरूपिणी।" श्रुतेः। एष मनोमयस्तेन विज्ञानमयेन पूर्णः। स एष विज्ञानमयः। पुरुषविधः तस्य मनोमयस्य पुरुषविधतामनुलक्ष्यीकृत्यायमपि पुरुषविधो भवति। तस्य विज्ञानमयस्य। श्रद्धैव शिरः। ऋतं सूनृता वाणी। दक्षिणः पक्षः। सत्यं यथार्थभाषणमुत्तरः पक्षः। योगो योगसमाधानं तस्यात्मा। महः महत्तत्त्वं पुच्छं प्रतिष्ठा। सर्वेषां कारणत्वात् कारणं हि कार्याणां प्रतिष्ठेत्युक्तेः। य एष विज्ञानमयः। स प्राणमयाच्छ्रेष्ठः सूक्ष्मश्च। मनोमयो हि वेदात्मक उक्तः। वेदार्थनिश्चयात्मिका बुद्धिर्विज्ञानं तन्मय आत्मा विज्ञानमयः। प्रमाणविज्ञानपूर्वको हि यज्ञादिर्वितन्यते "विज्ञानं यज्ञं तनुते।" इति श्रुतेः। निश्चयविज्ञानवतो हि पुंसः कर्तव्यार्थेष्वपूर्वश्रद्धोत्पद्यते। सा श्रद्धा सर्वकर्तव्यानां प्राथम्यात्तस्य शिर इति (४)

आनन्दमयं पुरुषमाह — "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमयस्तेनैष पूर्णः। स वा एष पुरुषविधस्तस्य पुरुषविधतामन्वयं पुरुषविधः। तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। तस्यैष शारीर आत्मा। यः पूर्वस्य।" इति॥

अर्थः — तस्माद्विज्ञानमयादन्योऽन्तरोऽभ्यन्तर आत्माऽऽनन्दमयः। अन्नमयादीनां कार्यात्मनामधिकारात् प्रत्ययाच्चानन्दमयः कार्यात्मा वेदितव्यः। आनन्दस्य विकारः आनन्दमयः शुद्धजीवस्तेनानन्दमयेन। एष विज्ञानमयः पूर्णः। स वै आनन्दमयः। पुरुषविधः पुरुषाकारः। कुतस्तस्य विज्ञानमयस्य पुरुषविधतामनुलक्ष्यीकृत्य पुरुषविध आनन्दमयस्य। प्रियमेव शिरः। प्रियमिष्टस्त्रीपुत्रादिसन्दर्शनं प्राधान्याच्छिर इव शिरः। मोदः प्रियवस्तुलाभनिमित्तो हर्षः आनन्दरूपः। दक्षिणः पक्षः। प्रमोदः स एव प्रकृष्टो हर्षप्रहास्ययुक्तः। उत्तरः पक्षः। आनन्दः सुखसामान्यं तस्यात्मा। सर्वेषां सुखावयवानाम्। तेषु तस्यानन्दस्यानुस्यूतत्वात् आनन्द आत्मा। एवं चोत्कृष्टमाणस्यानन्दमयस्यात्मनः ब्रह्म पुच्छं आश्रयः यस्य शाखाचन्द्रवदन्तरतमत्वज्ञानार्थमन्नमयादिपञ्चकोशा उपन्यस्तास्तद्ब्रह्म सर्वेषामाश्रयः (५)॥ इति पञ्चकोषाः॥

अन्तर्यामिब्राह्मणं

"यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद। यस्य मनः शरीरम्। यो यमयत्येष त आत्मान्यर्याम्यमृतः। य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद। यस्यात्मा शरीरम्। यः आत्मानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः।"

इति अर्थस्तु प्रागेव लिखितः। अत्र तु अन्नमयादिषु यः चरमः स त्वमित्यनेन श्रीकृष्ण एवोक्तः। यतोऽन्यर्यामी स एव ब्रह्मस्तुतौ श्रीशुकेन —

"कृष्णमेनमवैहि त्वमात्मानमखिलात्मनाम्। जगद्धिताय सोऽप्यत्र देहीवाभाति मायया॥
सर्वेषामपि भूतानां भावार्थो भवति स्थितः। तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यताम्॥" इति॥

रासक्रीडायां च —

"गोपीनां तत्पतीनां च सर्वेषामपि देहिनाम्। योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक्॥" इति॥

तस्मात्तद्गुणश्रवणकीर्तनार्चनादिभिर्निर्दग्धपञ्चकोशस्य सुखेन तत्प्राप्तिः सर्वत्रोक्ता —

"अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी। जरयत्याशु या कोशं निगीर्णमनलो यथा॥" इत्यादिभिः।

अथ ज्ञानेन तत्प्राप्तिमाह-जीवात्मा द्विविधः। यस्तु विद्यायुक्तः स तु नित्यमुक्त आनन्दमयः शुद्धः। यस्त्वविद्यायुक्तः शुद्धस्य प्रतिबिम्बरूपः स तु नित्यबद्धोऽशुद्धश्चेति। अयमेवान्नमयादिपञ्चकोशात्मकः संस्तत्तत्कोशोत्थसुखदुःखरागद्वेषजराक्षुत्पिपासाशोकमोहादिकमनुभवति। यच्चानन्दमयत्वमस्याविर्भवति तदपि स्वाभीष्टस्त्रीपुत्रादिदर्शनलाभाद्युपाधिनैव, न त्वात्मलाभेन। "सर्वेषामानन्दानामुपस्थमेकं परमायतनम्" इति श्रुतेः। अत एवात्मज्ञानाभावात्संसरतोऽस्य प्रबोधस्तत्त्वमसीत्यादिवाक्यैः क्रियते यदा दैवादहं ब्रह्मास्मीति प्रतिबुद्धस्तर्हि शुद्धात्मना सहैकीभूयानन्दमयो भूत्वा पञ्चकोशादविद्याकार्यादसङ्गः सन् विद्योपाधितोऽपि निर्मुक्तः सन् ब्रह्मैव भवतीति एतदर्थं पञ्चकोशोपन्यासोऽत्रेति दिक्। स्वामिचरणाः। नरेति। ततस्तर्हि तेषां नृणामुच्छ्वसितं जीवितं दृतिवद्विफलमित्यर्थः। न भजन्ति नृणामिति पाठो लेखकप्रमादस्तथापि अस्य योजनिकेयम्, त्वयि त्वां न भजन्ति किन्तु सप्तम्यां द्वितीयाकल्पनापौरुषेयत्वादयोग्यं चेति वा पाठः। नरहरे न रमन्ति नृणामिदमिति यथा विपूर्वस्य रमेः परस्मैपदित्वं तथा नपूर्वादपि ज्ञेयम्। अर्थस्य साम्यात्। अधर्माद्विरमति। अधर्मं न करोतीत्यर्थः। तद्वदत्रापि ज्ञेयम्॥१७॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवद्भजनविमुखानां जन्मवैयर्थ्यमाह-दृतय इति।

तेऽनुविधाः त्वदनुविधायिनः। त्वदाश्रयणयोग्यजन्मभाजोऽपि असुभृतो यदि। जन्तव इति शेषः। असुतृपः प्राणेन्द्रियतर्पणपराः शब्दादिविषयचपलाश्चेत् दृतय इव श्वसन्ति। ते सकलपुरुषार्थहीना भवन्तीत्यर्थः।

तदुक्तं शौनकेन —

"तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत। न खादन्ति न मेहन्ते किं ग्रामपशवोऽपरे॥

श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः। न यत्कर्णपथोपेतो जातु नाम गदाभृतः॥"

इति। किञ्चास्तामिदम्। यद्विषयपरा व्यर्थश्वासा इति। यतः केवलज्ञानयत्नपरास्तेऽपि व्यर्थाश्रमाः। तथोक्तं ब्रह्मणा—

'श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये।

तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम्॥'

इति। तच्छब्दनिर्दिष्टं भगवन्तं कारणत्वेन विशिनष्टि-महदहमादय इति। महदहङ्कारादयः पदार्थाः यदनुग्रहात् यत्सङ्कल्पानुगृहीताः सन्तोऽण्डं ब्रह्माण्डगोलकमसृजन्नुत्पादितवन्तः। यद्वृत्तं तस्य तेऽनुविधायिन इत्यर्थः। पुनः सर्वात्मत्वेन विशिनष्टि-पुरुषविधान्वय इति।अन्नमयादिषु चरमः अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयानां चरमः स आनन्दमयः।

'तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्माऽऽनन्दमयः।' इति श्रूयते।

अन्नमयादिकोशाकारः सन् चेतयितापि त्वमेवेत्याह-पुरुषविधाऽन्वय इति। 'स वा एष पुरुषविध एव।' इत्यादिश्रुत्युक्त शिरःपक्षपुच्छादिरूपपुरुषप्रकारान्वयवान्। 'तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा।' इति। पुरुषपुरुषविधत्वं हि निरूप्यते। एष्वन्नमयादिषु अवशेषं पश्चान्निर्दिष्टम्। एषु संहतेषु अनुस्यूतत्वेन व्यवस्थितम्। अतः परं चिदचिदात्मकप्रपञ्चविलक्षणं सदसदपि चेदचिदनुप्रवेशात् चिदचिद्वाचिसदसच्छब्दवाच्यम्। तर्हि किमसत् किम्? नेत्याह। ऋतं निर्विकारम्। 'तदनुप्रविश्य सच्च त्यच्च सत्यमभवत्।' इत्यादिश्रुतेः। एवम्भूतं यत्तस्य तेऽनुविधायिनो असृतृपश्चेत् दृतय इव श्वसन्तीत्यर्थः॥१७॥

आपके आ
इन्द्रियोकी तृप्ति करन
से महत्तत्व अहंकार त
सबने मिलकर ब्रह्मा
निरूपण किया गया है
सम्बन्ध है ऐसा जो स
सो भी अप ही हो
निर्विकार आनन्द स्वरू

उदरमुपासते य
तत उदगादनन्त

ऋषिवर्त्मसु, ये, कू
ततः, परमम्, तव, धाम, शिरः

एवं तावत्सर्वात्मके पर
प्रथमं तावदुपाध्यालम्बनमुपासन
इत्याद्याः श्रुतयो विदधतीत्याह-उ
ब्रह्मोपासते ध्यायन्ति शार्कराक्षा इ
स्थूलदृष्टयः इति यावत् उदरस्य
तत्प्रवेशाय प्रथममुदरस्थमुपासत इ
परितः सरन्ति प्रसर्पन्तीति परिसरा
भो अनन्त! तव धामोपलब्धिस्थानं
प्रत्युद्गतमित्यर्थः। कथम्भूतं धाम य
हृदयस्य नाड्यस्तासां मूर्धानमभिनिः
उदरादिषु यः पुंसां चिन्तितो

भावार्थदीपिकाप्रकाशः वंशी
तदेव सद्भजनीयत्वमेव अवगाह्यो दुर्ज्ञे

कृष्णप्रिया

आपके आश्रय के योग्य मनुष्यादि जन्म पा करभी जो आपको छोडकर यदि विषय भोगसे प्राण-द्रियोकी तृप्ति करनेमें लग रहे है, वे तो प्राणी, चर्म की धोंकनी के समान व्यर्थ ही श्वास लेते है। आपके अनुग्रह महत्तत्व अहंकार तत्त्व से आदि लेकर आकाशादि पंचभूत तथा उनके सूक्ष्म प्रपंचरूप और एकादश इन्द्रिय इन सबने मिलकर ब्रह्माण्ड को उत्पन्न किया। शरीर-प्राण-मन-विज्ञान-आनन्द इनमें पुरुषाकार रूपसे जिसका निरूपण किया गया है औप पुरुषाकार रूपसे जिसका निरूपण किया गया है और पुरुषत्वाकार धर्म का जिसमें सम्बन्ध है ऐसा जो सत्य का आनन्दमय रूप है वह आप हि हो ! जिवात्मा नहीं। और जो जड चेतन से परे है भी अप ही हो ! जिवात्मा नहीं। शरीर प्राण मन विज्ञानमय जीव स्वरूप इन सबके लय होने पर जो निर्विकार आनन्द स्वरूपी अवशिष्ट रह जाता है वह भी आप ही हो ! जीवात्मा नहीं है ॥१७॥

उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो दहरम्।
तत उदगादनन्त तव धाम शिरः परमं पुनरिह यत्समेत्यन पतन्ति कृतान्तमुखे ॥१८॥

कर्दमक्षमा

ऋषिवर्त्मसु, ये, कूर्पदृशः, ते, उदरम्, उपासते, आरुणयः, तु, परिसरपद्धतिम्, हृदयम्, दहरम्, उपासते।, भो अनन्त, ततः, परमम्, तव, धाम, शिरः, प्रतिउदगात्, यत्, समेत्य, पुनः, इह, कृतान्तमुखे, न, पतन्ति ॥१८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं तावत्सर्वात्मके परमेश्वरे सर्वश्रुतिसमन्वयेन सद्भजनीयत्वमुक्त्वाऽभक्तनिन्दया च तदेव दृढीकृयेदानीमनवगाह्यमहिमनि तावदुपाध्यालम्बनमुपासनमुदरं ब्रह्मेति शार्कराक्षा उपासते हृदयं ब्रह्मेत्यारुणयो ब्रह्म है वैता इत ऊर्ध्वन्त्वेवोदसर्पत्तच्छिरोऽश्रयत श्रुतयो विदधतीत्याह–उदरमुपासत इति। ऋषिवर्त्मसु ऋषीणां सम्प्रदायमार्गेषु ये कूर्पदृशस्ते उदरालम्बनं मणिपूरकस्थं पासते ध्यायन्ति शार्कराक्षा इति श्रुतिपदस्य प्रतिपदं कूर्पदृश इति कूर्पं शर्करा रजो विद्यते दृक्ष्वक्षिषु येषां ते तथा रजःपिहितदृष्टयः दृष्टयः इति यावत् उदरस्य हृदयापेक्षया स्थूलत्वात् यद्वा कूर्पं सूक्ष्मं सूक्ष्मदृश इत्यर्थः। तदा हृदयस्थं सूक्ष्ममेवाऽऽलक्ष्य वसाय प्रथममुदरस्थमुपासत इति भावः। आरुणयस्तु साक्षाद्धृदयस्थं दहरं सूक्ष्ममेवोपासते हृदयविशेषणं परिसरपद्धतिमिति सरन्ति प्रसर्पन्तीति परिसरा नाड्यस्तासां पद्धतिं मार्गं प्रसारणस्थानमित्यर्थः विशेषणस्य फलमाह–तत इति। ततो हृदयात् नन्त! तव धामोपलब्धिस्थानं सुषुम्णाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरो मूर्द्धानं प्रत्युदगादुदसर्पत् मूलाधारादारभ्य दृहयमध्याद्ब्रह्मरन्ध्रं तमित्यर्थः। कथम्भूतं धाम यत्समेत्य प्राप्य पुनरिह कृतान्तमुखे मृत्युमुखे संसारे न पतन्ति तथा च श्रुतिः 'शतं चैका च नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति' इति ॥

उदरादिषु यः पुंसां चिन्तितो मुनिवर्त्मभिः। हन्ति मृत्युभयं देवो हृद्गतं तमुपास्महे ॥५॥ ॥१८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — एवमुक्तरीत्या सर्वश्रुतीनां समन्वयेन गतार्थत्वेन सतां शास्त्रनिष्ठानां भजनीयत्वं द्भजनीयत्वमेव अवगाह्यो दुर्ज्ञेयो महिमा यस्य तस्मिन्। प्रथममादौ तावदधुना उपाधिरालम्बनं यस्य तत्। उदरमिति

वैश्वानराग्निरूपेण जाठरानलभूतेन ब्रह्मणाधिष्ठितत्वादुदरं ब्रह्मेति। शर्कराक्षस्यापत्यानि शार्कराक्षा ऋषय उपासते। आरुणेरपत्यानि आरुणय ऋषयः। हृदयमुदरादूर्ध्वप्रदेशं परब्रह्मोपलब्धिस्थानत्वात् ब्रह्मेत्युपासते। ब्रह्मा हैव ता ह स्फुटम्। ता ते उदरोरसी ब्रह्म ब्रह्मणी उपास्ते। उदरोरसी ब्रह्मणी एव भवत इत्यर्थः। ब्रह्मा ता इति प्रथमाद्विवचनान्ते पदे छान्दसत्वादाकारः। तद्ब्रह्म ऊर्ध्वंते चोदसर्पत् ऊर्ध्वमुत्क्रम्यागच्छत्। शिरोऽश्रयत आश्रितवान्। शिरसि चक्षुःश्रोत्रादीनि करणानि स्वस्वस्थाने पृथङ्निक्षिप्य दर्शनादिव्यापारं कारयित्वा चास्त इत्यर्थः। स्थूलदृष्टीनां तूदरस्थोपासनापि दुर्घटेत्याह-यद्वेति। इत्यर्थ इति- "कूर्प मृत्कणिकासूक्ष्महिंसाविक्षेपणेषु च।" इति निरुक्तिः। तदोदरस्थोपासनकालेऽपि तत्प्रवेशाय हृदयस्थसूक्ष्मप्रवेशाय। इति भाव इति-स्थूलमार्गं विना सूक्ष्ममार्गस्य दुर्ज्ञेयत्वमिति तात्पर्यम्। इत्यर्थ इति-मार्गादेव प्रसरणमस्तीति भावः। इत्यर्थ इति-सुषुम्ना हि नाडी मूलाऽऽधाराख्यश्चक्रविशेषश्च पायुदेशेऽस्ति। ततो निःसृत्य हृदयमध्यात् हृन्मध्यं प्राप्य ब्रह्मरन्ध्रं दशमद्वारं ब्रह्मलोकं गच्छतस्तद्विवृतं भवति। योगबलेन "सुषुम्नया ब्रह्मपथेन शोचिषा" इत्युक्तेरुद्गतोर्ध्वमितास्तीति भावः। अत्र प्रमाणमाह-तथा चेति। एकोत्तरशतं नाड्यो हृदयस्य सम्बन्धिन्यः सन्ति। तासां मध्ये एका नाडी मूर्धानमभि मूर्ध्नो बहिरूर्ध्वमभिनिस्सृता सषुम्नाख्या। तयाऽऽसमन्तादयन् गच्छन्नुपासकोऽमृतत्वं मोक्षमेति। अन्या नाड्यो विष्वङ् नानागतयस्तिर्यक्सर्पिण्यः उत्क्रमणे संसारभ्रमणद्वारे भवन्ति वर्तन्त इति। स्वामिश्लोकस्तु सुगमत्वान्न व्याख्यातः ॥★॥

श्रीधरानुयायिनी — तव भजनमावश्यकमित्युक्तं तत्र सुन्दरसूक्ष्माक्षरलिखनचातुर्येच्छोः प्रथमस्थूलाक्षराभ्यास इव परब्रह्मप्राप्तीच्छोश्चित्तस्थैर्यार्थं तावदुपाध्यालम्बनं स्थूलोपासनं विधेयमित्याहुः-उदरमिति। हे अनन्त! तवोपासनमार्गेषु ये स्थूलदृष्टयस्ते उदरालम्बनं मणिपूरकचक्रे वैश्वानरान्तर्यामिणं त्वाम् अन्नरसादिप्रवर्तनया क्रियाशक्तिदायकं ध्यायन्ति।

"अहं वैश्वानरो भूत्वा प्राणिनां देहमास्थितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥" इति गीतोक्तेः।

तथा स्वप्राप्त्या संसारनिवर्तिका भगवदुपलब्धिस्थानरूपा या ज्योतिर्मयी सुषुम्नाख्या नाडी सा मूलाधारादारभ्य हृदयमध्यतः शिरोगतं ब्रह्मरन्ध्रं प्रत्युद्गतेत्यतः सुषुम्नासम्बन्धिनि सकलनाडीप्रसरणमार्गे त्वन्नैकट्यप्रापके हृदये तव सूक्ष्मं रूपं जीवान्तर्यामिणं बुद्ध्यादिप्रवर्तनया ज्ञानशक्तिप्रदायकम् "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः।" इति श्रुतेः। सूक्ष्मदृष्टयो ध्यायन्ति। उदरापेक्षया हृदयस्य सूक्ष्मत्वात्सूक्ष्मरूपध्यानास्पदं हृदयमेव। अनेन दूरदेशगमनाद्यभावेनानायाससेव्यत्वं दर्शितम्। यद्वा-उद्गतोऽरः परिच्छेदो यस्मात्स उदरस्तम्। यद्वा-हे अनन्त ! ततः अनुपदोक्तत्वदुपासनतः तव परमं सर्वोत्कृष्टमत एव धाम शिरः ब्रह्मलोकान्तानां चतुर्दशधाम्नां शिरो मौलिभूतं वैकुण्ठाख्यमुदगात् उदयं प्रापेत्यर्थः। अग्रे पुनरिहेत्यादि वैकुण्ठविशेषणमेव ॥★॥

विश्वनाथी — तदेवं तासु श्रुतिषु तत्र समन्वितासु ताभिः स्पष्टमप्रस्तुताः काश्चिदन्याः श्रुतयोऽपि स्वेषां तदनुगतिमेव दर्शयन्ति। तत्र च प्रथमं क्रमसोपानतया पञ्चात्मवर्णनमयं पूर्वोक्तश्रुतिसाम्याल्लब्धावसराः क्रममक्तिवर्त्मदर्शकयोगोपदेष्ट्रीश्रुतयः स्तुवन्ति-उदरमिति। उदरं तत्स्थितवैश्वानरान्तर्यामिणमन्नरसादिप्रवर्तनया क्रियाशक्तिदायकम् —

"अहं वैश्वानरो भूत्वा प्राणिनां देहमास्थितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥" इति गीतोपनिषद्भ्यः।

हृदयं तत्स्थितजीवान्तर्यामिणं बुद्ध्यादिप्रवर्तनया ज्ञानशक्तिदायकं

"महान्प्रभुर्वै पुरुषः सत्त्वस्यैव प्रवर्तकः। अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदि सन्निविष्टः ॥" इति श्रुतेः॥

क्रमस्तु द्वितीयस्कन्धोक्तो ज्ञेयः। एवं व्यष्टिमारभ्य व्याख्यातम्। समष्टिमारभ्य त्वेवं ज्ञेयम्। उदरं नभस्तलं वैराजस्य नाभिविशिष्टोदरं "नभस्तलं नाभिसरो गृणन्ति" इति द्वितीयोक्तेः। हृदयं स्वर्गरूपं वैराजस्य "उरःस्थलं ज्योतिरनीकमस्य" इति तत्रैवोक्तेः। किम्भूतं परिसरपद्धतिं त्वन्निकटप्रापकमित्यर्थः। दहरं दुर्गमम्। ततस्तस्मादुपासनद्वयात्तव धाम सुषुम्नाख्यं कर्तृभूतं "सुषुम्नया ब्रह्मपथेन शोचिषा" इति द्वितीयोक्तेराधिदैविकी च सुषुम्ना ज्योतिर्मयी वर्तते। शिरः परमं कर्मभूतमुदसर्पत्। शिरो ब्रह्मलोकः "सत्यं च शीर्षाणि सहस्रशीर्ष्णः" इति तत्रैवोक्तेः। ततोऽपि परमं श्रेष्ठं वैकुण्ठपुरं प्रविशतीत्यर्थः। तया सुषुम्नयोपासका वैकुण्ठं व्रजन्तीत्यर्थः। यद्वा-वैकुण्ठपुरं समेत्य "नावर्तन्त उपासकाः" इति श्रुतयस्तु दर्शिता एव (५) ॥१८॥

नीलकण्ठी —
द्रुमे च फलशलाटवस्तथा
न शलाट्वन्तर्गते। एवं कृष
अङ्कुरादिभावं प्रतिपद्यन्ते
कृष्णादिभावः कीट
उपादानोपादेयभावस्याभाव
सती भवनोदरगतं विषय
दीपकलिकामात्रीभवति।
अन्येषां तु प्रत्यक्प्राविण्य
क्रमादुत्तरैस्त्रिभिर्विधास्यते।
इति श्रुत्युक्तमाह-तत्र शर्क
द्वितीयालोपः। तत्राक्षिदृष्टि
समष्टिकार्योपासकास्ते उदरम
अरुणवदकृत्स्नप्रकाशस्य मुने

"अथ यदिदमस्मिन्ब्र

इत्युपक्रम्य "तस्यैत
कामचारः सर्वकामावाप्तिः प

"शतं चैका हृदयस्य

तयोर्ध्वमायन्नमृतत्वमे

ननु "अग्निर्ज्योतिरहः
चेत्र अहरादिशब्देनातिवाहिकत
कालस्याकिञ्चित्करत्वात्। अन
प्रसज्येत। तस्मान्नित्यमेव दहरस
हैव ता' इति श्रुतेर्ब्रह्मावाप्तिद्वारत्व
भेदोपचारः। उदगात् उद्गतवत् नि
ते आयुर्यन्ति।" "न बिभेति
क्रमेणान्नमयप्राणमयमनोमयविज्ञ

"जागरितस्थानो वैश्वान

इत्यादिना त्रयाणां पाद
सर्वत्र दृश्यते। तत्र तैत्तिरीयोक्त
कार्यकारणोपास्तिद्वयमेवोक्तम्। अ
विवक्षाभेदेन। यथोक्तम् —

"सोपाधिकविवक्षायां जी

"हिरण्यगर्भेपश्यत जायम

नते। आरुणेरपत्यानि
ता ते उदरोरसी ब्रह्म
ार: । तद्ब्रह्म ऊर्ध्वत्वे
स्थाने पृथङ्निक्षिप्य
त्यर्थ इति- "कूपं
प्रवेशाय। इति भाव
त्यर्थ इति-सुषुम्ना हि
दशमद्वारं ब्रह्मलोकं
अत्र प्रमाणमाह-तथा
बहिरूर्ध्वमभिनिस्सृता
र्यक्सर्पिण्य: उत्क्रमणे

मस्थूलाक्षराभ्यास इव
मार्गेषु ये स्थूलदृष्टयस्ते

गीतोक्ते: ।
धारादारभ्य हृदयमध्यत:
मं रूपं जीवान्तर्यामिणं
इति श्रुते: । सूक्ष्मदृष्टयो
सेव्यत्वं दर्शितम्। यद्वा-
कृष्टमत एव धाम शिर:
ठविशेषणमेव ॥★॥
ऽपि स्वेषां तदनुगतिमेव
दर्शकयोगोपदेष्ट्रीश्रुतय:

त गीतोपनिषद्भ्य: ।

विष्ट: ॥" इति श्रुते: ॥
उदरं नभस्तलं वैराजस्य
ं ज्योतिरनीकमस्य" इति
धाम सुषुम्नाख्यं कर्तृभूतं
ं कर्मभूतमुदसर्पत्। शिरो
र्थ: । तया सुषुम्नयोपासका
॥१८॥

नीलकण्ठी — सदसत: परं यदृतं तदसीत्युक्त्वा तत्प्राप्त्युपायमाह-उदरमुपासते य इति। अत्र यथा-भूमौ बीजाङ्कुरद्रुमा: शलाटवस्तथा शुद्धचैतन्ये ईशसूत्रविराज: विराजि च कृष्णादयोऽस्मदादयश्च। यथा-फलान्तर्गते बीजे द्रुमप्रसवसामर्थ्यमस्ति न्तर्गते। एवं कृष्णादिषु जगत्सृष्टिसामर्थ्यमस्ति नास्मदादिषु। यथा-बीजादयो भूमात्रा: सन्त: विशिष्टशक्तियोगाद्भुवाऽऽपूरिता दिभावं प्रतिपद्यन्ते एवमीशादयोऽपि चिन्मात्रा एव सन्तो मायाशक्तियोगाच्चिदाऽऽपूरिता: सूत्रादिभावम्। तत्रास्मदादीनां दिभाव: कीटभृङ्गन्यायेन भावनाजन्य: विराडादिभावस्तु लवणोदकन्यायेन मन:प्रणिधानप्राप्य: पादेयभावस्याभावसद्भावाभ्यां तथावगमात्। यथा हि-घटोदरगता दीपप्रभा तन्मात्रं व्याप्नोति घटच्छिद्रद्वारा बहिर्गता भवनोदरगतं विषयं सर्वात्मना घटाद्बहिर्गता सती कृत्स्नं भवनोदरं व्याप्नोति। प्रबलाभि: सौरीभिर्भाभिरभिहता कामात्रीभवति। कलिकोपरमेऽनुपाख्यं भावमेति। सोऽयं प्रत्यक्प्रवणचित्तानामात्मप्राप्त्युपायोऽनेन श्लोकेन विधीयते। तु प्रत्यक्प्राविण्यसम्पादनाय कृष्णमूर्तिध्यानं तत्राशक्तानां कृष्णे स्वधर्मार्पणं तत्राप्यशक्तानां कृष्णगुणगानं च भिर्विधास्यते। तत्र तावदुदरं ब्रह्मेति शार्कराक्षा उपासते। हृदयं ब्रह्मेत्यारुणयो ब्रह्म हैव ता इत ऊर्ध्वत्वे चोदसर्पत्तच्छिरोऽश्रयत युक्तमाह-तत्र शर्कराभिर्निर्वृत्तं शार्करं ब्रह्माण्डम् अदृंहथा: शर्कराभिस्त्रिविष्टपीति मन्त्रलिङ्गात्। अत्रापि छान्दसो लोप:। तत्राक्षिदृष्टिर्येषां ते शार्कराक्षा:। अस्य प्रतिपदं कूर्पदृश: ऋषिवर्त्मसु आर्षोपासनामार्गेषु ये कूर्पदृश: योपासकास्ते उदरमल्पमुपासते। कारणापरिज्ञानात् उदरशब्दस्याल्पत्ववाचित्वम् उदरमन्तरं कुरुत इत्यत्र दृष्टम्। आरुणय: कृत्स्नप्रकाशस्य मुने: पुत्रास्ततोऽपि सूक्ष्मदृश इत्यर्थ:। ते दहरं सूक्ष्मं हृदयं हृदयायतने ब्रह्मोपासत इत्यनुषङ्ग:।

"अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्। तद्वाव विजिज्ञासितव्यम्॥"

इत्युपक्रम्य "तस्यैतदेव निरुक्तं हृद्ययम्" इति श्रुते:। दहरं विशिनष्टि-परिसरपद्धतिमिति। परित: सर्वत: सरणं गमनं सर्वकामावाप्ति: पद्धतिर्मोक्षमार्गस्तयो: प्रापकत्वात्परिसरपद्धतिर्दहरस्तम्। "तेषां सर्वेषु लोकेषु कामचारो भवति।"

"शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनि:सृतैका।
तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति॥" इति दहरोपास्तिफलश्रुते:॥

ननु "अग्निर्ज्योतिरह: शुक्ल:" इति भगवद्गीतासु योगिनाममृतस्य कालविशेषाधीनत्वोक्ते: पाक्षिकमस्य पद्धतित्वमिति दिशब्देनातिवाहिकतत्तत्कालाभिमानिदेवतापरत्वेन कालवाचित्वाभावात्। तत्तल्लोकप्रापकनाडीरश्मिसम्बन्धस्य नित्यत्वेन श्चित्करत्वात्। अन्यथा "कर्मणा पितृलोको विद्यया देवलोक:" इति श्रुतेर्मरणकालभेदेन फलभेदेऽसत्यप्रामाण्यं । तस्मान्नित्यमेव दहरस्य पद्धतित्वम्। तत इति ल्यब्लोपे पञ्चमी। उदरहृदये सोपाधिके ब्रह्मणी प्राप्येत्यर्थ:। 'तयोर्ब्रह्म इति श्रुतेर्ब्रह्मावाप्तिद्वारत्वावगमात्। हे अनन्त! त्रिविधपरिच्छेदशून्य! तव धाम स्वरूपप्रकाश:। राहो: शिर इतिवदभेदेऽपि । उदगात् उद्गतवत् निरुपाधिकस्य सोपाधिकादधिकत्वादित्यर्थ:। अत्र तैत्तिरीयके "सर्वं वैते माप्नुवन्ति।" "सर्वमेव पुनन्ति।" "न बिभेति कदाचन।" इति। "सर्वान्कामान्समश्नुते।" इति। "न बिभेति कुतश्चन" इति प्राणमयमनोमयविज्ञानमयानन्दमयाख्यानां पञ्चानां कोशानां पृथगुपास्तिफलान्युक्तानि। माण्डूक्ये तु —

"जागरितस्थानो वैश्वानरोकार: स्वप्नस्थानस्तैजस उकार: सुषुप्तिस्थान: प्राज्ञो मकार:॥"

इत्यादिना त्रयाणां पादानामयमेव संन्यासिनामनुष्ठानक्रमश्चतुष्पदो ब्रह्मण: पूर्वपूर्वपादस्योत्तरोत्तरमस्मिन्प्रविलापनरूप: यते। तत्र तैत्तिरीयोक्तमध्यमकोशत्रयात्मा माण्डूक्योक्ततैजस:। अत्र तु कार्यत्वसामान्याद्विराट्सूत्रयोरैक्यविवक्षया पास्तिद्वयमेवोक्तम्। अन्यत्र तु सोपाधिकत्वसामान्यादीशसूत्रविराजामैक्यं विवक्षित्वा तस्यैव पुनर्जीवत्वमीश्वरत्वं चोक्तं । यथोक्तम् —

"सोपाधिकविवक्षायां जीव एव विराड्भवेत्। निरुपाधिविवक्षाय परमात्मैव नेतर:॥" इति।

"हिरण्यगर्भंपश्यत जायमानम्" "हिरण्यगर्भ: समवर्तताग्रे" इति मन्त्रलिङ्गात्तस्य कार्यत्वं कारणत्वं च सङ्गच्छते।

श्रुतिश्च —

"स एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत्समभवत् ॥" इति।

छान्दोग्येऽप्येतदेवोक्तम् —

"अत्रोपसम्पद्य स्वेन रूपेण परं ज्योतिरभिनिष्पद्यते ।" इति ।

"सम्बन्धः स्वरूपं य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघित्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः॥" इति ।

श्रुतगुणाष्टकयुक्तं परं ज्योतिर्निष्कलं ब्रह्म सोपाधिर्निरुपाधिश्च द्वेधा ब्रह्मविदुच्यते ।

"सोपाधिकः स्यात्सर्वात्मा निरुपाख्योऽनुपासिकः ।"

इत्यादिना वार्तिकसारेऽपि स्पष्टीकृतम् । कीदृशं धाम शिरः परमं शीर्यते नश्यतीति शिर उपाधिः । तत परममनुपाधीत्यर्थः । शिरसि वेदान्ते तात्पर्येण प्रतिपाद्यं वा इहास्मिन्नेव देहे यद्धाम समेत्य प्राप्य कृतान्तमुखे मृत्युमुखरूपसंसा पुनः न पतन्ति । कर्तृत्वादिमदन्तःकरणस्य विविक्तेनात्मनि त्रैकालिककर्तृत्वबाधात् । "तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते ।

तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते ॥" इति भूतभव्यकर्मणोर्दाहाश्लेषश्रुतेः।

प्रारब्धस्य च भोगेनोपक्षयान्न संसारे पतन्ति हेत्वभावादित्यर्थः । प्राञ्चस्तु-उदरहृदयशिरःशब्दैस्तत्स्थानि मणिपूरानाहतसहस्राराणि ब्रह्मोपस्तिस्थानानि लक्ष्यन्त इत्याहुः (५) ॥१८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उदरमित्यादि टीकायामुदरं ब्रह्मेत्यादिश्रुतौ वैश्वानरभूतेन ब्रह्मणाऽधिष्ठितत्वादिति भावः । हृदयं ब्रह्मेति ब्र उपलब्धिस्थानत्वात् । ब्रह्मा हैवेति ब्रह्मा ह एवेतिच्छेदः । ब्रह्मा ब्रह्मणी एवेति समुदायार्थः । ह स्फुटम् । ता इह इति शब्दौ वाक्पूरणे । ता ते इत्यर्थः । उभयत्र औ स्थाने डादेशश्छान्दसः । उदरोरसी ते ब्रह्मणी एवेति समुदायार्थः । पुनरपि ऊर्ध्वत उदसर्पत् तद्ब्रह्म । ऊर्ध्वमुद्दिश्य शिरोऽश्रयत आश्रितवत् । तत्र चक्षुःश्रोत्रादीनां महेन्द्रियाणां प्रकाशात् शतमिति विष्वङ्नानागत अन्याः संसारगमनद्वारभूता इत्यर्थः । अथ स्वव्याख्या ।

तदेवं तासु श्रुतिषु तत्र समन्वितासु ताभिः स्पष्टमप्रस्तुताः काश्चिदन्याः श्रुतयोऽपि स्वेषां तदनुगतिमेव दर्शयन्ति। तत्र प्रथमं क्रमसोपानतया पञ्चात्मवर्णनमयं पूर्वोक्तश्रुतिसाम्याल्लब्धावसराः क्रममक्तिवर्त्मदर्शकयोगोपदेष्ट्रीश्रुत स्तुवन्ति-उदरमिति । उदरं तत्स्थितवैश्वानरान्तर्यामिणमन्नरसादिप्रवर्तनया क्रियाशक्तिदायकम् —

"अहं वैश्वानरो भूत्वा प्राणिनां देहमास्थितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥" इति गीतोपनिषद्भ्यः।

हृदयं तत्स्थितजीवान्तर्यामिणं बुद्ध्यादिप्रवर्तनया ज्ञानशक्तिदायकं

"महान्प्रभुर्वै पुरुषः सत्त्वस्यैव प्रवर्तकः । अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदि सन्निविष्टः ॥" इति श्रुतेः।

क्रमस्तु द्वितीयस्कन्धोक्तो ज्ञेयः । एवं व्यष्टिमारभ्य व्याख्यातम् । समष्टिमारभ्य त्वेवं ज्ञेयम् । उदरं नभस्तलं वैराज नाभिविशिष्टोदरं "नभस्तलं नाभिसरो गृणन्ति" इति द्वितीयोक्तेः । हृदयं स्वर्गरूपं वैराजस्य "उरःस्थलं ज्योतिरनीकमस्य" तत्रैवोक्तेः । किम्भूतं परिसरपद्धतिं त्वन्निकटप्रापकमित्यर्थः । दहरं दुर्गमम् । ततस्तस्मादुपासनद्वयात्तव धाम सुषुम्नाख्यं कर्म "सुषुम्नया ब्रह्मपथेन शोचिषा" इति द्वितीयोक्तेराधिदैविकी च सुषुम्ना ज्योतिर्मयी वर्तते । शिरः परमं कर्मभूतमुदसर्पत् ब्रह्मलोकः "सत्यं च शीर्षाणि सहस्रशीर्ष्णः" इति तत्रैवोक्तेः । ततोऽपि परमं श्रेष्ठं वैकुण्ठपुरं प्रविशतीत्यर्थः । तया सुषुम्नया वैकुण्ठं व्रजन्तीत्यर्थः । यद्वा-वैकुण्ठपुरं समेत्य "नावर्तन्त उपासकाः" इति श्रुतयस्तु दर्शिता एव ॥५॥१८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वर्त्मानि ज्ञानमार्गाः । आरुणयोऽरुणवंश्याः सूक्ष्मदृष्टय (सूक्ष्मदृशः [घ, ङ] ।) इति भावः । अनन्त ! हे अपरिच्छिन्नेति परिच्छिन्नत्वमभिप्रेतम् । इह अस्मिन् सदा सर्वानुभूयमानानन्तदुःखमये, सम्यगेत्य योगाभ्यासादिना नितरां लब्ध्वा । ख्यातम् । यद्वा, भक्तिमाहात्म्यमेव दर्शयन्त्योऽधिकारिभेदेन स्थूलसूक्ष्मोपासनयोः फलमाहुः–उदरमिति । उदरं पास्यत्वात् स्थूलं ब्रह्माण्डान्तर्वर्तिविराडादिरूपम्, हृदयं सूक्ष्ममन्तर्यामिरूपम्, अतो दहरं दुर्गम्, अत एव परिसरपद्धतिं मार्गम् । यद्वा, उदरं नभःस्थलरूपं वैराजस्य नाभिविशिष्टोदरम् (भा० २/१/२७) "नभःस्थलं नाभिसरो गृह्णन्ति ।" इति न्धोक्तेः, हृदयं स्वर्गरूपं वैराजस्योरःस्थलमुदरस्थलम् (भा २/१/२८) "उदरस्थलं ज्योतिरनीकमस्य" इति तत्रैवोक्तेः । तम्? परिसरपद्धतिं त्वन्निकटप्रापकमित्यर्थः । उदरं गहनं ततस्तस्मादुपासनाद्धयात् तव धाम सुषुम्नाख्यं कर्तृभूतम् (भा० २/ "सुषुम्नया ब्रह्मपथेन शोचिषा" इति द्वितीयस्कन्धोक्तेः । आधिदैविकी च सुषुम्ना ज्योतिर्म्मयी वर्तते, शिरः परमं उदगात् उदसर्पत्, शिरो ब्रह्मलोकः सत्यं च शीर्षाणि, – सहस्रशीर्ष इत्युक्तेः । ततोऽपि परमश्रेष्ठं वैकुण्ठपुरं त्यर्थः । तेनोपासका वैकुण्ठं व्रजन्तीति भावः । अतो यत् सुषुम्नाख्यं समेत्य नावर्तन्ते उपासकाः, अथवा उदरं समुद्रं २/१/३२) "कुक्षिः समुद्राः" इत्युक्तेः, समुद्रोपलक्षितं समुद्रशायिनमित्यर्थः । हृदयं ज्योतिरनीकं स्वर्गस्थविष्णुपदं नीकं चक्रं यत्रेति विष्णुपदाधारत्वाज्ज्योतिश्चक्रस्य, तेन विष्णुपदोपलक्षितं विष्णुमित्यर्थः । कथम्भूतम् ? परिसरपद्धतिं स्वप्राप्त्युपायसम्पादनेनात्मोपलम्भकम्, – स्वस्यैव साध्य-साधनरूपत्वात्, ततस्तस्मादात्मशब्दवाच्याद्विष्णोः, ऊर्ध्वस्थं तव धाम वैकुण्ठाख्यं श्रीवैकुण्ठपुरविशिष्ट-महानारायणमित्यर्थः । द्वयमन्त्राधिकारिण उपासकाः, सत इति न्वयः । तत्राधिकारिणामनुक्तिः सर्वोत्कृष्टत्वेन परमरहस्यत्वात् । कथम्भूतम् ? शिरः सर्वोपरिवर्तित्वेन सर्वेषां लोकानां रूपम् । अतः परमं सर्वथा सर्वत उत्कृष्टं किंवा परा सर्वोत्कृष्टा मा लक्ष्मीर्यस्मिन् तम् । यत् स्वरूपत्रयमुपेत्य उपास्य सकाः पुनः संसारे न पतन्तीति ॥१८॥

[अथ काश्चित् माथुरवनद्वयस्य सर्वतः श्रैष्ठ्यं कथयन्त्यः प्रोक्तमेव गोष्ठमाहात्म्यमतृप्त्या भूयोऽप्याहुः–उदरमिति । ऋषियोग्यभक्तिमार्गेषु ये कूर्मदृशः सूक्ष्मदृष्टयो वसिष्ठाद्याः, वसिष्ठादीनां मधुपुरे आश्रमदर्शनात्, ते स्योदरमुदरस्थानीयं मधुवनमुपासते । मधुवनस्य मुख्यभूतपुरीसमाश्रयन्वेनान्तरङ्गत्वात्, तथा सर्वमध्यवर्तित्वात्तथा स्थानत्वाच्च उदरत्वम् । आरुणयोऽनुरागिणस्तु हृदयं श्रीवृन्दावनमुपासते, हृदयं हि श्रीभगवदावासः अतो सत्वाद्वृन्दावनस्य हृदयत्वम् । तथा हि तापनीश्रुतिः (पू० ३७) —

"तमेकं गोविन्दं सच्चिदानन्दविग्रहं पञ्चपदं वृन्दावनसुरभूरुहतलासीनं सततम् ।" इत्यादि ॥

थम्भूतम् ? परिसरपद्धतिम्, परितः सरन्तीति परिसरा निर्झरादयस्तेषां पद्धतिमागमनस्थानमित्यर्थः । तेन सुखहेतुत्वं । दहरं कुञ्जादिभिर्गह्वरम्, हे अनन्त ! ततस्तदनन्तरं शिरः शिरोभूतं परमश्रेष्ठमिति यावत्, नन्दीश्वरमभिव्याप्य; यद्वा, शिरो नन्दीश्वरशृङ्गरूपं तव धाम निवासस्थानमुदगात् । परमं सर्वोत्कृष्टम् । तथा च श्रुतिः (ऋक् १/१५४/६) —

"ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ॥ अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि ॥" इति ।

स्या अर्थः — ता तानि, वां युवयोः, वास्तूनि गृहाणि गृहोचितस्थानानि वा, गमध्यै प्राप्तये, उश्मसि । तानि कानि ? यत्र येषु वास्तुषु पद्मसु भूरिशृङ्गा सुन्दरशृङ्ग्या गावः अयासः सर्वसुखदाः, अत्र वास्तुषु, तदनिर्वचनीयं पदं श्रीनन्दगृहम्, उरुगायस्य वृष्णः सर्वकामवर्षणस्य भूरि यथा स्यात्तथावभाति, सदा र्तते । अतस्तव धाम समेत्य अर्वाचीनजना अपि कृतान्तमुखे दैवमुखे न पतन्ति, दैववशगा न भवन्तीत्यर्थः यमसिद्धान्तदैवाकुशलकर्मसु" इत्यमरः ॥१८॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

शरीरान्तरस्थानभेदेन उपासनाभेदान् विवक्षन् भगवदुपासकानां मोक्षफलमाह–उदरमिति । ऋषिवर्त्मसु ज्ञानमार्गेषु निष्ठिता: आरुणय: अरुणवंश्या: ऋषयस्तु साक्षात् हृदयस्थं त्वाम् उपासते । कूर्पदृश: सूक्ष्मदृश: उदरमुपासते । उदरस्थं वैश्वानररूपं त्वामुपासते । परिसरत्यस्याम् आत्मेति परिसरपद्धति: । सुषुम्णामार्गान्त: । उपासते अनुसन्दधते । हृदयं हृदयगतं दहरपरिमाणत्वात् दहराकाशशब्दवाच्यं त्वामुपासते । हे अनन्त ! तत: पद्धते: शिर उदगात् भ्रूमध्यगतं त्वामुपसते । पुनरिह यत् सङ्गं कृत्व कृतान्तमुखे मृत्युमुखे न पतन्तीत्यर्थ: । 'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभि निस्सृतैका ।

तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति ॥' इति श्रुति: ॥१८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अस्तु कारणत्वेन उपास्यत्वं के के कुत्र कुत्र कथं कथमुपासते कीदृशं च तेषां फलमित्यपेक्षायामुपासनाभेदानभिधाय सर्वेषामुपासकानां मोक्षैकफलत्वमाहु: ॥ उदरमिति ॥ ऋषिवर्त्मसु वेदान्तविहितेषूपासनामार्गेष्वित्यर्थ: । ये कूर्पदृश: सूक्ष्ममतय: तत्र केचिदारुणयो अरुणवंश्यास्तदनुयायिनो दहरविद्यानिष्ठा इति यावत् । हृदयं हृदयगतं दहरं दहरशब्दवाच्य हृदयपुण्डरीकान्तर्गताकाशरूपं त्वाम् उपासते । केचित्तु वैश्वानरविद्यानिष्ठा: उदरं जाठराग्निशरीरकं त्वाम् उपासते । केचित्तु परिसरपद्धतिं परित: सरति व्याप्नोतीति तथा सुषुम्णाख्या नाडी सैव पद्धितिर्मार्गस्तं सुषुम्णामार्गस्थं त्वामुपासत इत्यर्थ: । सुषुम्णाया: हृदयादारभ्य शिर:पर्यन्तव्याप्ते: । तदभिप्रायेण परिसरपद्धतिमित्युक्तम् । तदेव स्पष्टयितुं परिसरवर्त्म विशिंषन्ति । तत: हृदयादारभ्येत्यर्थ: । हे अनन्त ! यत् तव परमं धाम उपासनस्थानं शिरोभ्रूमध्यं तत्पर्यन्तं यदुदगादूर्ध्वमाक्रमत् —

"शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनि:सृतैका" ॥ इति श्रुत्यर्थोऽत्राभिसंहित: । तव धाम शिर: परम इत्यनेन शिरोऽपि त्वदुपासनस्थानमित्युक्तं भवति ।

'एष देवपथो ब्रह्मपथ: तयोर्ध्वमायन्नमृतत्वमेति ॥' एतेन प्रतिपाद्यमाना "इमं मानवमावर्तनावर्तन्त" इत्यादिश्रुत्यर्थमभिप्रेत्य विशिंषन्ति–यन्मध्यनाडीवर्त्म शिरो वा सर्वेऽप्युपासका: समेत्य प्राप्य पुनरिह प्रकृतिमण्डले कृतान्तमुखे यममुखसदृशे संसारे पतन्ति । यदिति वर्त्माभिप्रायेण नपुंसकनिर्देश: ॥१८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

"तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं यत्प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं तस्मात्प्रपेदे तस्मात्प्रपेद इत्याचक्षते शफा: खुरा इत्यन्येषां पशूनां तदूर्ध्वमुदसर्पत्ता ऊरू अभवतामुरुगृहीणीत्यब्रवीत्तदुदरमभवदुर्वेव मे कुर्वित्यब्रवीत्तदुरोभवदुदरं ब्रह्मेति शार्कराक्षा उपासते हृदयं ब्रह्मेत्यारुणयो ब्रह्मा है व ता ई ऊर्ध्वं त्वेवोदसर्पत्तच्छिरो श्रयत यच्छिरो श्रयत तच्छिरो भवत्तच्छिरस: शिरस्त्वं एता: शीर्षञ्छ्रिय: श्रिताच्चक्षु:श्रोत्रं मनोवाक्प्राण: श्रयन्तेऽस्मिञ्छ्रियो य एवमेतच्छिरस: शिरस्त्वं वेद" इत्यादिश्रुते: । कस्मिन् वहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत इति श्रुते: । "प्राण एवैनमनुप्रविशति प्राणमितरा देवता न प्राणादपर: परमनुप्रविशाते प्राण एवैनमनुभुङ्क्ते प्रविशति प्राणमितरा देवता न प्राणादपर: परमनुभुङ्क्ते प्राणमितरा देवतप्राणादपर: परमनुप्रविशति प्राण एवैनमनुप्रविशति प्राण एवैनमन्वानन्दी भवति प्राणभिरातदेवता न प्राणदपर: परमन्वानन्दी भवति तस्मादाहु: प्राण: पद्धति:" इति हिरण्यनाभश्रुतेश्चार्थप्रतिनिधिरुदरमुपासत इति तस्यायमभिप्राय: "शर्करा क्षुद्रपाषाणे सुसूक्ष्मे खण्डिते गुडे ।" इति —

"शर्करा तु शिलाभेदे ऋग्भेदाल्पकपालयो: । शर्करं तत्र देशेषु सितायां शकले गुडे ॥" इति च ।

अत: शर्कराक्षा: सूक्ष्मदृष्टय: तेषु ख्याता: शार्कराक्षा: त एव वर्त्मनि ब्रह्मणि सूक्ष्मदृष्टय: हरेरविशेषान् विजानन्त: यस्मात् प्राणं प्रत्युरुगृहिणीत्यब्रवीदिति वचनादुदरनामकब्रह्मोपासने उदरं पूर्णं ब्रह्म उद्गत: अर: परिच्छेदो यस्मात् पूर्णमित्येकार्थत्वात् यस्माच्चारुणयो हृद्ययनात् हृदयनामकं ब्रह्मोपासते यस्माच्चेतरे माण्डूकेयादयो दहरमाकाशादयं

परिसरो मुख्यप्राण:
शिर:प्रत्युदगात् । अथ

तदेव तासु
पश्चात्मवर्णनमयक्रमस

एवं भजनाभज
निस्सन्देहतां दर्शयन्त्य
परिसरपद्धतिं क्रीडास्था
कूर्पा: कूर्परांशास्तानिव
हृदयं वृन्दावनम् । तत्क
अनुरागवृन्दप्राप्तिमेदुरमित
शाश्वतमित्यर्थ: । केचित्
उपासकानामुपासनार्थमुद
पक्षद्वयमेव पूर्ववत् ते त
ऐश्वर्य्यकारुण्यप्रकाशकत्व
तम् । चरणमित्यर्थ: । तत्रा
अरुणि: ते । अतस्ते धाम
किञ्चिन्नास्ति यत्समेत्य पुन
हृदयमित्यादि । अत एव उद

एवं भजनाभजनयोर
वर्णयति- उदरमुपासत इत्या
तवाङ्गानि उपासते, किमुदरम्,
एतान्युपलक्षणानि एकैकमङ्ग
यत्र वा सा बबन्धेति च, ऐश्वर्य
प्रकटीबभूव । किम्भूतम् ? पर
समूह आरुणं तस्य या यानं प्रा
तथापि अहरं न हरतीति तथा न
कृतान्तमुखेन न पतन्ति ॥१८॥

तदेवमिति तव सूरय
उदरमिति —

मुख्यप्राणः पद्धतिर्मार्गो यस्य स तथा परिसरस्य पद्धतिर्वा तदुपासते तद्ब्रह्म ततः हृदः नन्दनपथा ब्रह्मनाडीद्वारा युदगात्। अथ यत्परमं ब्रह्म पुनरिह हृदयादिषु स्थितम् उपास्य तत्समीपमुपेत्य कृतान्तमुखे संसारे न पतन्तीत्यन्वयः ॥५॥१८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेव तासु श्रुतिषु ताभिः स्पष्टमप्रस्तुताः श्रुतयोऽपि स्वेषां तदनुगतिमेव दर्शयन्ति । तत्र प्रथमं क्रमसोपानतया वर्णनमयक्रमसाम्याल्लब्धावसराः क्रममुक्तिर्वर्त्मदशयोगापदेष्टॄः श्रुतयः स्तुवन्ति उदरमिति ॥१८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं भजनाभजनयोरभिनन्दानिन्दे निरूप्यभजनस्यावश्यकत्वे किं ब्रह्म उपासितव्यं किं श्रीकृष्णो भगवानिति सन्देहे न्देहतां दर्शयन्त्य आहुः–उदरमित्यादि । हे अनन्त ! ऋषयो भक्तास्तेषां वर्त्मसु ये कूर्पदृशः सूक्ष्मदृशः ते तव पद्धतिं क्रीडास्थानम् उपासते अतस्तु दूरतस्तव विग्रहः । यद्वा । ऋषिवर्त्मसु ऋषीणां ज्ञानिनां वर्त्मसु अध्यात्ममार्गेषु ये कूर्परांशास्तानिव पश्यन्तीति तथा तत्रापि केचित् उदरं मध्यवर्तित्वात् तव जन्मस्थलवत् वा उदरं मथुरामित्यर्थः । केचित् वृन्दावनम् । तत्कीदृशम् । आरुणयोत् अरुणो रागस्तस्य समूहः आरुणं तस्य या प्राप्तिः तया उदन्तीति आरुणयोत् णवृन्दप्राप्तिमेदुरमित्यर्थः । पुनः कीदृशम् । अहरं न ह्रियते न प्राप्यते इति अहरं दुरापमित्यर्थः । यद्वा । न विद्यते हरो हरणं यस्य मित्यर्थः । केचित् शिरः द्वारकारूपम् । कीदृशम् । परा मा लक्ष्मीर्यत्र अतः कारणात्तव धाम स्थानं क्रीडास्थानम् उदगात् कानामुपासनार्थमुदगादित्यर्थः । यद्धाम समेत्य पुनः इह कृतान्तमुखे न पतन्ति । यद्वा । हे अनन्त ! ऋषिवर्त्मसु कूर्पदृश इति यमेव पूर्ववत् ते तदुदरमुपासते मात्रे यत्र विश्वमदर्शयः यत्र च सा त्वं बबन्ध येन बन्धेन दामोदरत्वमगात् अत र्यकारुण्यप्रकाशकत्वादुदरमेव उपासते ध्यायन्ति । आरुणयोऽनुरक्ताः परिसरपद्धतिं परिसरे वृन्दावने पर्यन्ते पद्धतिश्चिह्नं यस्य चरणमित्यर्थः । तत्रापि केचित् हृदयं वक्षःस्थलम् । कीदृशम् । अदहरम् उच्चैस्तरं विस्तारि वा अरुणो रागः तस्यापत्यमिव ते । अतस्ते धाम श्रीविग्रहं उदगात् प्रादुर्बभूव उपासकानामिति पूर्ववत् । कीदृशं धाम । परमं शिरः प्रायं यदूर्ध्वं स्ति यत्समेत्य पुनरिह कृतान्तमुखे न पतन्तीत्यर्थः । अथवा तव धाम तव श्रीविग्रहम् उपासते । तत्र केचित् उदरं केचित् मित्यादि । अत एव उदगात् प्रादुर्बभूव उपासनार्थमेव त्वदाविर्भाव इत्यर्थः ॥१८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

एवं भजनाभजनयोरभिनन्दननिन्दे निरूप्य भजनस्यावश्यकत्वे किं भजनीयम् ? किं ब्रह्म किं श्रीविग्रहो वेति श्रीविग्रहमेव ति- उदरमुपासत इत्यादि । ऋषिवर्त्मसु ऋषीणां मार्गेषु ये कूर्मदृशः कूर्पाः शर्करांशास्तानिव ये तद्वर्त्मानि पश्यन्ति, ते उपासते, किमुदरम्, किं हृदयम्, किं परिरसपद्धतिं परिसरः श्रीवृन्दावनपर्यन्तभूस्तत्र या पद्धतिश्चरणचिह्नम्, किं शिवः– लक्षणानि एकैकमङ्गं सर्वाण्येव वोपासत इत्यर्थः । उदरस्य प्राङ् निर्देशस्यायं भावः– मात्रे यत्र विश्वमदर्शयत् सा बबन्धेति च, ऐश्वर्यकारुण्यप्रकाशकप्राङ्निर्देशः । ततस्तेनैव हेतुना तव धाम श्रीविग्रह उदगात् प्रादुर्बभूव, उपासनार्थमेव भूव। किम्भूतम् ? परमं परा उत्कर्षयुक्ता मा लक्ष्मीर्यत्र परात्परं वा । पुनः कीदृशम् ? आरुणय इति- अरुणस्य सूर्यस्य आरुणं तस्य या यानं प्राप्तिरेककालोदयस्तदपि उन्दति क्लेदयति शीतलयतीति तथा परमशीतलसूर्यकोटिभाभिर्भास्वरतरम्, अहरं न हरतीति तथा न दृष्टिहरमित्यर्थः । लोचनयोः सुखदमिति यावत् । यत् स्वधाम विग्रहं समेत्य उपास्यत्वेन लब्ध्वा मुखेन न पतन्ति ॥१८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदेवमिति तव सूरय इति श्लोकद्वयेन भक्तानां भगवद्विषयिकां भक्तिमुक्त्वा योगिनां परमात्मविषयकं योगमाहुः–

–

"अहं वैश्वानरो भूत्वा प्राणिनां देहमास्थितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥"

इति श्रीगीतोक्तेरुदरं उदरस्थवैश्वानरान्तर्यामिणं क्रियाशक्तिदायकं ये उपासते ते ऋषिवर्त्मसु ऋषीणां सम्प्रदायमार्गेषु कूर्पदृशः। कूर्पं शर्करा रजोदृक्षु अक्षिषु येषां ते रजःपिहितदृष्टयः स्थूलदृष्टय इति यावत्। उदरस्य हृदयापेक्षया स्थूलत्वात्। यद्वा। कूर्पं सूक्ष्मं सूक्ष्मदृश इत्यर्थः। तदा हृदयस्थं सूक्ष्ममेवालक्ष्य तत्प्रवेशाय प्रथममुदरमुपासत इति भावः। आरुणयस्तु हृदयम्। हृदयस्थजीवमन्तर्यामिणं बुद्ध्यादिप्रवर्तनया ज्ञानशक्तिदायकं दहरं दुर्ज्ञेयत्वात् सूक्ष्मम्। परितः सरन्ति प्रसर्पन्तीति परिसरा नाड्यस्तासां पद्धतिं मार्गं प्रसरणस्थानमिति हृदयविशेषणम्। विशेषणस्य फलमाहुः-तत इति। ततो हृदयात् भो अनन्त तव परमात्मनो धाम उपलब्धिस्थानं ज्योतिर्मयं शिरः प्रति उदगात् उदसर्पत्। मूलाधारादारभ्य हृदयमध्याद्ब्रह्मरन्ध्रं प्रत्युद्गतमित्यर्थः। धामैव स्थलत्रयगतं बभूवेति वस्त्वर्थः। यत्समेत्य शिरःस्थं परमं धाम प्राप्य पुनरिह कृतान्तमुखे संसारे न पतन्ति। अत्र उदरं ब्रह्मेति शार्कराक्षा उपासते। इति हृदयं ब्रह्मेत्यारुणय इति

"महान्प्रभुर्वै पुरुषः सत्त्वस्यैव प्रवर्तकः। अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदि सन्निविष्टः ॥" इति ॥

"शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका।
तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति ॥" इति श्रुतयः ॥१८॥

गूढार्थदीपिनी

उपासनाया नानाप्रकारत्वाद्योगोपासनया भगवत्प्राप्तिं दर्शयन्त्य आहुः-उदरमिति।

(योगपद्धतिपरेयम्)

पद्यानुवादः

तनुदृशो मणिपूरगतं हरिं हृदयमारुणयः समुपासते। इति तवोर्ध्वमवाप्य सुषुम्णया परपदं न पतन्ति भवाम्बुधौ ॥५॥

सङ्क्षिप्तसार्थान्वयः — हे भगवन्! ऋषीणां वर्त्मसु सम्प्रदायमार्गेषु ये कूर्पदृशः सूक्ष्मदृशो योगिनस्ते पूर्वम् उदरम् उदरस्थं ब्रह्म उपासते पश्चात् आरुणयः अरुणोदयवत् किञ्चित्प्रकाशोन्मुखाः सन्तः परिसरपद्धतिं सुषुम्णादिप्रसरणमार्गं दहरं सूक्ष्मं हृदयं हृदयस्थं ब्रह्म उपासते। हे अनन्त! ततो हृदयात् तव परमं धाम सुषुम्णाख्यं शिरः प्रति उदगात् ऊर्ध्वमगच्छत्। यत् धाम समेत्य प्राप्य पुनरिह कृतान्तमुखे संसारे न पतन्ति।

हे भगवन्! ऋषयोऽन्तर्गतिमन्तो योगिनस्तेषां वर्त्मसु दीक्षामार्गेषु ये कूर्पदृशः कूर्पेण शर्करया रजसा युक्ता दृशो दृष्टयो येषां ते रजःपिहितदृष्टयः स्थूलदृष्टयः प्रथमदीक्षापन्नाः साधकाः इत्यर्थः। यद्वा। सूक्ष्मदृशः। "कूर्पं मृत्कणिकासूक्ष्मर्हिंसाविक्षेपणेषु च।" इति निरुक्तेः। ते उदरस्थं नाभिचक्रस्थं वैश्वानररूपं ब्रह्म उपासते। मूलाधारान्नाभिचक्रपर्यन्तं गतिं कुर्वन्तीत्यर्थः। ये च अरुणस्य इमे अपत्यानि आरुणयः अरुणोदयवत् किञ्चित्प्रकाशोन्मुखाः द्वितीयदीक्षापन्ना इत्यर्थः। इदमर्थे सम्बन्धिनि अपत्यत्वारोपः। ते दहरं दुर्ज्ञेयत्वात् सूक्ष्मं हृदय हृदयस्थमनाहतचक्रस्थं ब्रह्म उपासते। तदुक्तं योगशास्त्रे —

"अनाहताख्यं तत्पद्मं योगिभिः परिकीर्तितम्। आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ॥"

केचित्तु अरुणस्य सूर्यस्य तन्नामकस्य ऋषेर्वा इमे आरुणयः "विवस्वान् मनवे प्राह" इति गीतावचनात् तत्सम्प्रदायवक्तारः इत्याहुः। कथम्भूतं हृदयम्। परिसरपद्धतिम्। परितः सरन्ति प्रसर्पन्तीति परिसराः सुषुम्णादिनाड्यः तासां पद्धतिम्। विशेषणस्य फलमाहुः-ततो हृदयात् हे अनन्त! तव धाम उपलब्धिस्थानं सषुम्णाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरो मूर्धानं प्रति उदगात् ऊर्ध्वमगच्छत्। आक्रामत् वा। मूलाधारादारभ्य हृदयं मध्यमं कृत्वा ब्रह्मरन्ध्रं प्रत्युद्गतं धामैव स्थलत्रयं गतं बभूवेत्यर्थः। यत्र शिरःस्थं ब्रह्मरन्ध्रं समेत्य प्राप्य पुनरिह कृतान्तमुखे मृत्युमुखे अस्मिन् संसारे न पतन्ति। तन्निर्भिद्य गतस्य मोक्षाभ्युपगमात्। च श्रुतिः —

"शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति॥" एका सुषुम्णाख्या मूर्धानं ब्रह्मरन्ध्रं गता। अमृतत्वं मोक्षः। विष्वङ् नानागतयोऽन्यथा नाड्य उत्क्रमणे प्राणोत्क्रमणे नद्वारभूता भवन्तीति तदर्थः। श्रीमज्जीवगोस्वामिनस्तु पूर्ववदेतत्पद्यमपि भक्तिपरकमेव योजयन्ति। तथा हि – ऋषयो भक्तास्तेषां वर्त्मसु ये कूर्पदृशः सूक्ष्मदृशः ते तव परिसरपद्धतिं क्रीडास्थानमुपासते अस्तु दूरतस्तव विग्रहः। केचित् उदरं मध्यवर्तित्वात् तव जन्मस्थलत्वाद्वा उदरं मथुरामुपासते इत्यर्थः। केचित् हृदयं वृन्दावनमुपासते। म्? आरुणयोत्। अरुणो रागस्तस्य समूह = आरुणं तस्य या = [या धातोः सम्पादादित्वाद्भावे क्विप्।] प्राप्तिः तया ल्लीभवतीति आरुणयोत् अनुरागवृन्दप्राप्तिमेदुर[सान्द्रस्निग्धस्तु मेदुरः। इत्यमरः।]मित्यर्थः। यत् धाम समेत्य पुनः इह मुखे न पतन्ति इति॥१९॥५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्साधनमाह–ऋषिवर्त्मसु ऋष्युपासनसम्प्रदायेषु ये कूर्प्पदृशः शर्कराख्याः। 'शर्कराः क्षुद्रपाषाणे च खण्डिते गुडे।' शात्। सूक्ष्मदृष्टयः। ते उदरम् उद्गत अरः परिच्छेदो यस्मात्तदुदरम्। अपरिच्छिन्नं ब्रह्म ह्युपासते 'उदरं ब्रह्मेति शर्कराख्याः' तेः। ये चारुणयस्ते हृदयम्। ह्रियते इति हृदयम्। हृद्यवच्छिन्नं ब्रह्मोपासते। 'हृदयं ब्रह्मेत्यारुणय' इति श्रुतेः। कथम्भूतम्। म्। 'इत ऊर्ध्वत्वेनोदृर्प्पत्। तच्छिरोऽश्रयत।' इति शेषवाक्यार्थमाह। हे अनन्त! तव धाम ततो हृदयादेरुदगात् सर्पत्। ब्रह्मरन्ध्रं प्राप्तमित्यर्थः। कथम्भूतम्। परिसरपद्धतिम्। परिसरन्ति पद्धतयः सम्प्रदायाः यस्मात्तत्तथा। सर्वसम्प्रदायमूलं प्राप्यं फलम्। तत्र हेतुः–यत्समुपेत्य कृतान्तमुखे संसारे न पतन्तीति न पुनरावर्तेत इत्यर्थः।

'तयोर्ध्वमायन्नमृतत्वमेति।' 'न स पुनरावर्तते।' इत्यादिश्रुतेः॥१८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं देवतान्तरकर्मान्तरविधीनां निर्णयमुक्त्वा भगवदुपासकानामेव बहुविधानां तारतम्येन फलनिर्णयमाह–उदरमुपासत भगवदुपासकास्त्रिविधाः, कर्मिणो योगिनो ज्ञानिनश्चेति। तत्र ज्ञानिनः श्रेष्ठाः, अन्ये तु प्रथममध्यमा इति।

"एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्" इति वाक्यात् भगवद्भजनं बहुधा सम्भवति, केचिदिदं पद्यं योगपरत्वेनैव तच्छ्रुतिनिर्णये विरुद्धमिव प्रतिभाति। कृषिवर्त्मसु वेदोक्तमार्गेषु य उदरमुपासते कर्मोपासत इत्यर्थः। वेदस्योदरं उदरपर्यवसानाच्च। उदरशब्दस्योभयथापि लक्षणा मणिपूरकचक्रपरत्वे कर्मपरत्वे वा। षण्णां चक्राणामत्रानिरूपणात् स्थ। पञ्चात्मकविचारेऽपि उदरं सोमो भवति। निन्दार्थं चोदरपदम्। शिश्नोदरपरायणा लोके निन्दिता भवन्तीति ते स्थूलदृष्टयः। शर्कराः कूर्पशब्देनोच्यन्ते अतिस्थूलदृष्टय इत्यर्थः। कूर्पापेक्षया न्यूनं न पश्यन्ति। अथवा कच्छपपृष्ठं कूर्पं भवन्ति ता दृष्टिवन्निरूप्यन्ते। तेन किमपि न पश्यन्तीत्युक्तं भवति।

एवं धर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते' इति वचनात् निन्दा श्रूयते इति एवं प्रथमस्थितानुक्त्वा मध्यमानाह– हृदयमिति। परितः सरन्तीति परिसरा नाड्यः तासां पद्धतिः मार्गो हृदयमनेन तत्र स्थिताः योगाभ्यासेनाधश्चोर्ध्वं च न् शोधयन्ति। एवं योगिनः हृदये भगवच्चिन्तकाः निरुक्ताः ते आरुणयः अरुणवदल्पप्रकाशयुक्ताः। अरुणस्य । दहरमिति अल्पं छिद्रमिति केचित्। दहरशब्दोऽल्पवाचको वेदे निरुक्तः। 'दहरं वै सापराभ्यां दोहाभ्यां दुह' प्रकाशाः स्वल्पं चोपासत इत्यर्थः। एवं सर्वात्मकस्य भगवतः केचन उदरं केचन हृदयं चोपासते। कर्मयोगौ योगप्रशंसा तु योगशास्त्रत्वात् बहिर्मुखोद्देश्यत्वाद्वा। तर्हि मुख्याः के इति जिज्ञासायामाह–तत उदगादिति। तव धाम

शिरः परमं, 'तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् । विष्णोर्धाम' इति वाक्यात् । भगवतो बहूनि स्थानानि तेष्वप्यक्षरं परमम् अक्षरपदप्रयोगादेव परमत्वं ज्ञातव्यम् । अतस्त्रैलोक्यात् कालादपि शिरः ऊर्ध्वमेवोदगात् । तस्यैवाधिभौतिकं रूपं ब्रह्मलोक इति तस्य शिरस्त्वम् । पूर्वात् फलतस्तस्योत्कर्षमाह-पुनरिह यत्समेत्येति । यद्भगवत्स्वरूपं प्राप्य प्राणितः कृतान्तमुखे न पतन्ति । 'मामुपेत्यतु कौन्तेय पुनर्जन्म न विद्यते ।' इति । अतो ज्ञानिन एवोत्कृष्टा इत्यर्थः ।

''कर्मरूपं हरिं केचित्सेवन्ते हरिरूपिणम् । तेभ्योऽप्यक्षररूपस्य सेवकाः सम्मताः सताम् ॥'' ॥५॥१८॥

श्रीसुबोधिनीसारः

ऋषीणां वर्त्मसु सम्प्रदायमार्गेषु ये कूर्मदृशः कूर्पं शर्कराराजो विद्यते दृक्षु नेत्रेषु येषां ते तथा रजोव्याप्तदृष्टयः स्थूलदृश उवरमुदरालम्बनं मणिपूरकस्थं ब्रह्मोपासते चिन्तयन्ति । अरुणयोऽतिसूक्ष्मदृष्टयस्तु हृदयं हृत्पद्मस्थं दहरं सूक्ष्मं परितः सरन्ति सर्वतः प्रचरन्तीति परिसरा नाड्यः तासां पद्धतिं मार्गं प्रसरणस्थानम् उपासते भो अनन्त ततो हृदयात् तव धामोपलब्धिस्थानं सुषुम्णाख्यं परमं श्रेष्ठं शिरो मूर्धानं प्रति उदगात् उदसर्पत् यत् समेत्य प्राप्य पुनरिह कृतान्तस्य मृत्योर्मुखे न पतन्ति ॥५॥१८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अनवगाह्यस्वरूपे ब्रह्मणि प्रथमतो मनोप्रवेशादेव शाखाचन्द्रन्यायेनोपासनान्तरसम्प्रदायमाहुः-उदारमिति । ऋषिवर्त्मसु ऋषीणां सम्प्रदायमार्गेषु ये कूर्पदृशः ''उदरं ब्रह्मेति शार्कराक्षा उपासते'' इति श्रुतिस्थशार्कराक्षपदस्य प्रतिपदं कूर्पदृश इति । कूर्पं शर्करा रजो विद्यते दृक्षु अक्षिषु येषां ते तथा रजःपिहितदृष्टयः स्थूलदृष्टय इति यावत् । ते उदरालम्बनं मणिपूरकस्थं ब्रह्मोपासते ध्यायन्ति । तेषां स्थूलदृष्टित्वं तु उदरस्य हृदयापेक्षाया स्थूलत्वाद्बोध्यम् । आरुणयस्तु साक्षाद्धृदयं दहरं सूक्ष्ममेवोपासते । हृदयं विशिनष्टि-परिसरपद्धतिमिति । परितः सरन्ति परिसरा नाड्यः तासां पद्धतिं मार्गं प्रसरणस्थानमित्यर्थः । विशेषणफलमाहुः-त इति । हे अनन्त ! ततो हृदयात् तव धाम उपलब्धिस्थानं सषुम्नाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरः मूर्धानं प्रति उदगात् उदसर्पत् मूलाधारादारभ्य हृदयमध्यात् ब्रह्मरन्ध्रं प्रत्युद्गतमित्यर्थः । तन्माहात्म्यमाहुः-यत्समेत्य प्राप्य पुनरिह कृतान्तस्य कालस्य मुखे संसारे न पतन्ति । तथा च श्रुतिः-

''शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति'' इति ॥१८॥५॥

अन्वितार्थप्रकाशिका

उदारमिति ॥ ऋषिवर्त्मसु ये कूर्पदृशस्ते उदरमुपासते । आरुणयस्तु परिसरपद्धतिं हृदयं दहरमुपासते । भो अनन्त ! तत् परमं तव धाम शिरः प्रतिउदगात् यत्समेत्य पुनरिह कृतान्तमुखे न पतन्तीत्यन्वयः । ऋषिवर्त्मसु ऋषीणां सम्प्रदायमार्गेषु कूर्पदृशः उदरं ब्रह्मेति शार्कराक्षा उपासते इति श्रुतिस्थशार्कराक्षपदस्य प्रतिपदं कूर्पदृश इति कूर्पं शर्कराराजो विद्यते दृक्षु येषां ते तथा रजःपिहितदृष्टयः स्थूलदृष्टय इति यावत् । ते उदरम् उदरालम्बनं मणिपूरकस्थं ब्रह्मोपासते ध्यायन्ति । तेषां स्थूलदृष्टित्वं तु उदरस्य हृदयापेक्षाया स्थूलत्वाद्बोध्यम् । यद्वा कूर्पं सूक्ष्मं सूक्ष्मदृश इत्यर्थः । तदा हृदयस्थं सूक्ष्ममेवालक्ष्य तत्प्रवेशाय प्रथममुदरस्थमुपासते इति भावः । आरुणयः अरुणवदल्पप्रकाशस्य मुनेः पुत्रास्तु ततोऽपि सूक्ष्मदृश इत्यर्थः । ते परितः सरन्ति प्रसर्पन्ति परिसरा नाड्यः तासां पद्धतिं मार्गं प्रसरणस्थानम् । यद्वा । त्वन्निकटप्रापकं साक्षात् हृदयस्थं दहरं सूक्ष्ममेवोपासते ।

हे अनन्त ! ततो
मूलाधारादारभ्य हृदयमध्
कृतान्तस्य कालस्य मुखे

''उदरं ब्रह्मेति शार्कराक्ष

पूर्वश्लोके भगवतः
उदरमित्यादित्रिभिः ॥ हे अनन्
सारं पुरुषोत्तमं परित्यज्य असार
इत्यादिप्रयोगदर्शनात् ते उदरं मा
सगुणदेवमन्वयन्ति प्राप्नुवन्ति
आरुणयः ॥ अथ च ॥ आत्मकै
हृदयमित्यत्र हृत् अयम् इति चद
ताच्छब्द्यमिति न्यायेन हृदि स्थित
निरवयवं भर्गो मात्रमुपासते न तु
विजिज्ञासितव्यमिति ॥ तथा गीता

''एवं सततयुक्ता

तत्कीदृशमित्यत्राहुः-हे अ
शिरः शीर्षं प्रत्युदगात् तत्स्थां सुष
संसारे कृतान्तमुखे मृत्युमुखे पुनर्न प
भावः ॥ तथा सुषुम्णागमने श्रुतिः '

शत

तयोर्ध्व

अस्तु कारणत्वेनोपास्यत्वं के
सर्वेषामुपासकानां मोक्षैकफलत्वमाहुः
तेष्वपि ये, आरुणयोऽरुणवंश्याः त
हृदयपुण्डरीकान्तर्गताकाशरूपमित्यर्थः

हे अनन्त ! ततो हृदयात् तव धाम उपलब्धिस्थानं सषुम्नाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरः मूर्धानं प्रति उदगात् उदसर्पत् मूलाधारादारभ्य हृदयमध्यात् ब्रह्मरन्ध्रं प्रत्युद्गतमित्यर्थः । सुषुम्णामार्गेण गतिप्रकारो द्वितीयस्कन्धे उक्तः । यत्समेत्य प्राप्य पुनरिह कृतान्तस्य कालस्य मुखे संसारे न पतन्ति । तथा च श्रुतिः —

"उदरं ब्रह्मेति शार्कराक्षा उपासते, हृदयं ब्रह्मेत्यारुणयो, ब्रह्मा हैवैता इत ऊर्ध्वं त्वेवोदसर्पत्तच्छिरोऽश्रयत, यदिदमस्मिन्
ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः;

शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।

तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति ॥" इति ॥१८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पूर्वश्लोके भगवतः स्वरूपमुक्तम् । तन्माहात्म्यज्ञानार्थमिदानीं ज्ञानभेदेन त्रिविधानुपासकांस्तेषां पृथक्पृथक्प्राप्यं चाहुः- उदरमित्यादित्रिभिः ॥ हे अनन्त ! ऋषिवर्त्मसु ऋषिप्रोक्तेषूपासनामार्गेषु ये कूर्पदृशः कूर्पाण्येव पश्यन्ति न तु रत्नानीति कूर्पदृशः । सारं पुरुषोत्तमं परित्यज्य असारग्राहिण ऐश्वर्यार्थिन इति यावत् । कूर्पशब्द इष्टकादिशकलवाची ॥ कूर्पादिभिर्भ्रमति धीर्भवदायुषां न इत्यादिप्रयोगदर्शनात् ते उदरं मायोदरवर्तिप्राकृतैश्वर्ययुक्तं सगुणदेवतास्वरूपम् । तव स्वरूपमाहात्म्याज्ञानेनोपासते तदुपासनादार्ढ्येन सगुणदेवमन्वयन्ति प्राप्नुवन्ति । अन्वयन्तीत्युत्तरश्लोकादाकृष्यते ॥ किञ्च ॥ य आरुणयः अरुणस्य मुनेरपत्यानि शिष्या वा आरुणयः ॥ अथ च ॥ आत्मकैवल्येप्सव इति शेषः । परिसरपद्धतिं परिसराणां नाडीनां पद्धतिं मार्गम् । प्रसरणस्थानमित्यर्थः ॥ हृदयमित्यत्र हृत् अयम् इति चदच्छेदः । रुत् प्रति अयते प्राप्नोतीति अयं दहरं सूक्ष्मम् ॥ यद्वा ॥ हृदयमित्येकपदम् । हृदयं तात्थ्यात् तच्छब्द्यमिति न्यायेन हृदि स्थितं दहरं क्षेत्रज्ञान्तर्यामितया स्थितम् ॥ गायत्र्युदितसवितुर्देवस्य सर्वजनकदिव्यमूर्तेर्हरेः सूक्ष्ममक्षरं निरवयवं भर्गो मात्रमुपासते न तु तेजःस्थदिव्यमूर्तिम् ॥ तथा च श्रुतिः- दहरोऽस्मिन्नंतराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यम् । तद्वाव विजिज्ञासितव्यमिति ॥ तथा गीतायां चोक्तम् —

"एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः" इति ॥

तत्कीदृशमित्यत्राहुः-हे अनन्त ! तत् तव परममुत्कृष्टं धाम चिदाकाशाख्यां पदं स्थानमिति यावत् ॥क ततो हृदयादारभ्य मूर्ध्नः शीर्षं प्रत्युदगात् तत्स्थां सुषम्णामुदसर्प्पदित्यर्थः । ननु दहरोपासनेन तत्प्राप्तौ सत्यां किं स्यादित्याहुः यत्समेत्य प्राप्य इह संसारे कृतान्तमुखे मृत्युमुखे पुनर्न पतन्ति ॥ अमूर्तेन चिदाकाशेन सहात्मैक्यं प्राप्नुवन्ति ॥ न तु तत्स्थदिव्यमूर्तिपुरुषोत्तमसेवामिति भावः ॥ तथा सुषुम्णागमने श्रुतिः '

शतं चैका च हृदयस्य नाड्यः । तासां मूर्धानमभिनिसृतैका ।

तयोर्ध्वमापन्नमृतत्वमेतिविश्वङ्ङन्याउक्रमणेभवन्तीति ॥१८॥५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अस्तु कारणत्वेनोपास्यत्वं के के कुत्र कुत्र कथं कथमुपासते कीदृशं च तेषां फलमित्यपेक्षायामुपासनाभेदानभिधाय तेषामुपासकानां मोक्षैकफलत्वमाहुः ॥ उदरमिति ॥ ऋषिवर्त्मसु वेदान्तविहितेषूपासनामार्गेष्वित्यर्थः । ये कूर्पदृशः सूक्ष्ममतयः, किञ्च ये, आरुणयोऽरुणवंश्याः तदनुयायिनो दहरविद्यानिष्ठा इति यावत् । हृदयं हृदयगतं, दहरं दहरशब्दवाच्यं, पुण्डरीकान्तर्गताकाशरूपमित्यर्थः । त्वाम्, उपासते । ये केचिद्वैश्वानरविद्यानिष्ठाः, उदरं जाठराग्निशरीरकं, त्वामुपासते, ये

केचित्, परिसरपद्धतिं परितः सरति व्याप्नोतीति परिसरः सुषुम्णाख्या नाडी स एव पद्धितिर्मार्गस्तां, सुषुम्णामार्गस्थं त्वामुपासते इत्यर्थः । सुषुम्णायाः हृदयादारभ्य शिरःपर्यन्तव्याप्तेः ।

"शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका" ॥ इति श्रुत्यर्थोऽनेन स्मारितः ।

"शिरः परमम्" इत्यनेन शिरोऽपि त्वदुपासनास्थानमित्युक्तं भवति । यत् शिरोवर्त्म, समेत्य, पुनः इह प्रकृतिमण्डले, तत्रापि, कृतान्तमुखे यममुखसदृशे संसारे, न पतन्ति । यदिति वर्त्माभिप्रायेण नपुंसकनिर्देशः ॥५॥ ॥१९॥

योगिरामानुजाचार्यकृतसरला व्याख्या

अथ उपासनाभेदानाहुः–उदरमिति । ऋषिवर्त्मसु ऋषीणां सम्प्रदायमार्गेषु ये कूर्पदृशः शूर्पेण शर्करया रजसा युक्ताः दृशः दृष्टयः येषां ते स्थूलदृष्टय इत्यर्थः । ते उदं उदरे मणिपूरकाख्यचक्रस्थं ब्रह्मोपासते ध्यायन्ति । उदरस्य हृदयापेक्षया स्थूलत्वात् तदुपासकानां स्थूलदृष्टित्वम् । आरुणयस्य सूर्यस्य ऋषेर्वा सम्प्रदायोपदेशसम्बन्धिनः । विवस्वान् मनवे प्राहेति गीतावचनात् तत्सम्प्रदायवंशजा इत्यर्थः । 'अथवा योगिनामेव कुले भवतीधिमता'मीति च भगवदुक्तेः । परिसरपद्धतिं परिसरस्य समीपदेशस्य पद्धतिः परिसरपद्धतिः । समीपदेशसम्बन्धिमार्गः । एवंरूपं हृदयस्थं दहरं दहराख्यं परमात्मानम् । 'दहर उदरेभ्यः' इति सूत्रप्रतिपादितम् उपासते भजन्ति । परिसरपद्धतिमिति दहराख्यस्य भगवतः विशेषणम् । परिसरः समीपः पद्धतिर्मार्गरूप इत्यर्थः । 'सर्वस्य चाहं हृदिसन्निविष्टः' इत्युक्तत्वात् । भगवतः समीपवृत्तित्वं बोध्यम् । 'पर्यन्तभूः परिसरः' इत्यमरः । हृदये उपास्यमानस्य परमात्मनः शीघ्रं मोक्षप्रापकत्वात् समीपमार्गत्वेन रूपितः । 'अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ।' इति वराहवचनात् । उदराद्युपासनस्य स्थूलत्वेन दूरमार्गः विलम्बेन कार्यजनकत्वात् । हे उत् ! सर्वदोषरहित भगवन् ! 'स सर्वेभ्यः पाप्मभ्यः उदितः तस्योदिति नाम' इति श्रुतेः । अगात् न गच्छतीत्यगः तस्मात् निश्चलादित्यर्थः । एवम्भूतात् ततः पूर्वोक्तहृदयस्थभगवदुपासनाद्धेतोः उदित्यस्य अगादित्यस्य विशेषणत्वं वा । तदा उदगात् अत्यन्तनिश्चलादुपासनादित्यर्थः । यद्वा । उत् अगात् उन्नतसंसारवृक्षात् हे अनन्त ! त्रिविधपरिच्छेदरहित ! हे भगवन् ! तव धाम शिरः । तव धाम्नां वासुदेवसङ्कर्षणप्रद्युम्नाऽनिरुद्धरूपचतुर्विधव्यूहमूर्त्यादीनां यानि धामानि वासस्थानानि क्षीराब्ध्यादीनि तेषां शिरः शिरोभूतं सर्वधाम्नामुपरिस्थितमित्यर्थः । अत एव परमं परम् उत्कृष्टं नास्ति यस्मात्तत् परमम् । सर्वस्थानादुत्कृष्टं वैकुण्ठाख्यम् । समेत्य प्राप्य । अथवा । तव धाम शिरः तव धाम्नां स्वरूपाणां वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धादिस्वरूपाणां शिरःप्रधानरूपं सर्वोपरिस्थितमिति यावत् । 'आदित्यवर्णं तमसः परस्ता'दिति श्रुतेः । एवम्भूतं परमं सर्वोत्कृष्टं सर्वकारणकारणं भगवत्स्वरूपं

'शिरोऽग्रं शिखरं वा ना' इत्यमरः ।

'तद्विष्णोः परमं पदं सदा पशयन्ति सूरयः । दिवीव चक्षुराततम् ॥' इति श्रुतेः ।

तथा च एतादृशं भगवतः स्थानं भगवतः स्वरूपं वा परमं धाम शिरः इति प्रतिपादितम् । समेत्य प्राप्य पूर्वोक्तदहराद्युपासनात् भगवन्तं प्राप्येत्यर्थः ।

'सैषसम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते ॥'

इति श्रुतेः । मुमुक्षूपासकानां प्राप्यं भगवत्स्वरूपमुक्तं भवति । यत् प्रसिद्धं पूर्वोक्तं परमं धाम शिरः उपेत्य पु
कृतान्तमुखे कालस्य मुखे मृत्युमुखे वा न पतन्ति ।

इति भगवदु
मणिपूरकाख्यचक्रस्थ
परमात्मानमुपासते । हे
'परं ज्योतिरुसम्पद्य' इ
प्राप्य पुनः कृतान्तमुखे

अथ पूर्वोक्तश
बृहदुपलब्धस्यानुवादः ।
सम्भजनीयत्वमिति । इति त
उदरं वैश्वानररूपेण ब्रह्मणा
दहराकाशाख्यं ब्रह्म । अरुण
वाक्पूरणे । उभयत्र ओस्थाने
सुषुम्णानाडीरूपेणोर्ध्वभागे च
ब्रह्मप्राप्तिसाधनब्रह्मरन्ध्राधारत्व
हृदयविशेषणत्वेऽपि न यत्तत्त्व
'शतं चैका' एकोत्तरं
नाड्यः उत्क्रमणे प्राणोत्क्रमणे स

एवं तावत्सर्वात्मके परमे
महिमनि प्रथमं तावदुपाधिरालम्ब
ऋषीणां सम्प्रदायमार्गेषु उदरं उदरा
ब्रह्म उपासते । कथम्भूतं हृदयम् ।
विशेषणफलमाह–तत इति । हे अन
प्रति उदगात् उदसर्पत् । मूलाधारम
कृतान्तमुखे संसारेणापतन्तीतिवत् । उ
ब्रह्मा हैव त ऊर्ध्वं चोदसर्पत तच्छिरोऽ
अर्थः — वैश्वानरभूतेन ब्र
आरुणेरपत्यानि आरुणय ऋषयः । हृद
ते उदरोरसी ब्रह्मा ब्रह्मणी उपास्ते
दसत्वादाकारः । तद्ब्रह्म ऊर्ध्वत्वे चो

सुषुम्णामार्गस्थं त्वामुपासते

य, पुनः इह प्रकृतिमण्डले,
९॥

शर्करया रजसा युक्ताः दृशः
स्य हृदयापेक्षया स्थूलत्वात्
मनवे प्राहेति गीतावचनात्
द्धतिं परिसरस्य समीपदेशस्य
दरेभ्यः' इति सूत्रप्रतिपादितम्
रूप इत्यर्थः । 'सर्वस्य चाहं
न उपास्यमानस्य परमात्मनः
हवचनात् । उदराद्युपासनस्य
यः उदितः तस्योदिति नाम'
ावदुपासनाद्धेतोः उदित्यस्य
न्नतसंसारवृक्षात् हे अनन्त !
चतुर्विधव्यूहमूर्त्यादीनां यानि
व परमं परम् उत्कृष्टं नास्ति
ार: तव धाम्नां स्वरूपाणां
र्णं तमसः परस्ता'दिति श्रुतेः ।

तेः ।

य प्राप्य पूर्वोक्तदहराद्युपासनात्

पद्यते ।।'
रमं धाम शिरः उपेत्य पुनः

'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।' 'यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ।'

इति भगवदुक्तेः । अस्यैवमन्वयसङ्ग्रहार्थः । ऋषिवर्त्मसु ऋषीणां सम्प्रदायमार्गेषु ये कूर्पदृशः रजोयुक्तदृष्टयः ते उदरमुपासते पूरकाख्यचक्रस्थपरमात्मानमुपासते । अरुणयः तद्वंशजाः हृदिस्थं परिसरपद्धतिं समीपमार्गभूतं मोक्षप्रापकं दहरं दहराख्यं ात्मानमुपासते । हे अनन्त ! उदगात् अत्यन्तनिश्चलात् ततः दहरोपासनात् । यद्वा । उदगात् उत् उत्कृष्टात् अगात् । संसाररूपवृक्षात् ज्योतिरुसम्पद्य' इति श्रुतेः । 'समानं वृक्षं परिषस्व जाते' इति श्रुतेश्च । यत् परमं सर्वाधिकं तव धाम शिरः स्थानश्रेष्ठं वा उपेत्य पुनः कृतान्तमुखे न पतन्तीत्यन्वयार्थः ॥१८॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

अथ पूर्वोक्तश्लोकचतुष्टयस्यार्थमनुवदन् उदरमित्यस्याभासं रचयति-एवन्तावदिति । तत्र सर्वात्मके इति ुपलब्धस्यानुवादः । परमेश्वर इति जय जयेत्यस्य सर्वश्रुतिसमन्वयेनेति निगमोऽनुचरेदित्यस्य अत ऋषयो दधुरित्यस्य च जनीयत्वमिति । इति तव सूरय इत्यस्यानुवादः अभक्तनिन्दयेति दृतय इवेत्यस्येति । न चाबद्धं किञ्चिदपि तदेव सम्भजनीयत्वमेव वैश्वानररूपेण ब्रह्मणाऽधिष्ठितत्वाल्लक्षणया वैश्वानरोपाधिकं ब्रह्मेत्यर्थः । शर्कराक्षस्यापत्यानि शार्कराक्षा ऋषयः । हृदयं तत्स्थं ाकाशाख्यं ब्रह्म । अरुणस्यापत्यान्यारुणय ऋषय उपासते । ता ते उदर हृदये ब्रह्माब्रह्मणी एव । ह स्फुटम् । निपातरूपहशब्दो पूरणे । उभयत्र ओस्थाने डादेशश्छान्दसः । ता इ ऊर्ध्वत्वे चेत्येव पाठः । इत इति तु लेखकप्रमाद एव । तच्च ब्रह्म पुनः सुषुम्नानाडीरूपेणोर्ध्वभागे चोदसर्पदगच्छत् । तद्ब्रह्मोर्ध्वमुद्गम्य शिरोऽश्रयत । आश्रितवत् । तत्र चक्षुरादिज्ञानेन्द्रियाणां प्रकाशात् प्राप्तिसाधनब्रह्मरन्ध्राधारत्वाच्च ब्रह्मोपासकानां स्थूलदृष्टित्वकथनमश्लीलमित्यस्वरसाद्वेति । पद्धतिमित्यजहल्लिङ्गमिति विशेषणत्वेऽपि न यत्तत्त्वम् । परिसरपद्धतिमिति वाच्ये ह्रस्वो ङ्यापोसंज्ञाच्छन्दसो बहुलमिति सूत्रेण ह्रस्वश्छान्दसः ।

'शतं चैका' एकोत्तरं शतमित्यर्थः । तासां मध्ये एका सुषुम्णाऽऽख्या मूर्धानं ब्रह्मरन्ध्रं गता विश्वङ्नानागतयः । अन्या ाडयः उत्क्रमणे प्राणोत्क्रमणे संसारगमनद्वारभूता भवन्तीत्यर्थः ॥१८॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

एवं तावत्सर्वात्मके परमेश्वरे सर्वश्रुतीसमन्वयेन सद्भजनीयत्वमुक्त्वा अभक्तनिन्दया च तदेव दृढीकृत्येदानीमवगाह्य ानि प्रथमं तावदुपाधिरालम्बनमुपासनं श्रुतयो विदधतीत्याह-उदरमिति । यु कूर्पदृशः स्थूलदृष्टयः ते ऋषिवर्त्मसु ऋषीणां सम्प्रदायमार्गेषु उदरं उदरालम्बनमणिपूरस्थं ब्रह्म उपासते ध्यायन्ति । आरुणयस्तु हृदयं साक्षाद्धृदयस्थं दहरं सूक्ष्ममेव ब्रह्म उपासते । कथम्भूतं हृदयम् । परिसरपद्धतिं परितः सरन्ति प्रसराः नाड्यः । तासां पद्धतिं मार्गप्रसरणस्थानमित्यर्थः । उपासनफलमाह-तत इति । हे अनन्त तव धाम तदुपलब्धिस्थानं सुषुम्नाख्यं परमं श्रेष्ठं ज्योतिर्मयं ततो हृदयाच्छरो मूर्धानं ते उदगात् उदसर्पत् । मूलाधारमारभ्य हृदयमध्याब्राह्मरन्ध्रं प्रत्युद्गतमित्यर्थः । किं तत् । यद्धाम समेत्य प्राप्य पुनरिह कृतान्तमुखे संसारेणापतन्तीतिवत् । उपाध्यालम्बनमुपासनमाह श्रुतिः-उदरं ब्रह्मेति शार्कराक्षा उपासते । हृदयं ब्रह्मेत्यारुणयो ब्रह्म हैव त ऊर्ध्वं चोदसर्पत तच्छिरोऽश्रयतेत्यादि ॥

अर्थः — वैश्वानरभूतेन ब्रह्मणादिष्टत्वादुदरं ब्रह्मेति । शर्कराक्षस्यापत्यानि शार्कराक्षा ऋषय उपासते । अरुणस्यापत्यानि आरुणय ऋषयः । हृदयमुदरादूर्ध्वप्रदेशं परब्रह्मोपलब्धिस्थानत्वात् ब्रह्मेत्युपासते । ब्रह्मा हैव ता ह स्फुटम् । ते उदरोरसी ब्रह्मा ब्रह्मणी उपास्ते । उदरोरसी ब्रह्मणी एव भवत इत्यर्थः । ब्रह्मा ता इति प्रथमाद्विवचनान्ते पदे आकारान्तादाकारः । तद्ब्रह्म ऊर्ध्वत्वे चोदसर्पत् ऊर्ध्वमुत्क्रम्यागच्छत् । शिरोऽश्रयत आश्रितवान् । शिरसि चक्षुःश्रोत्रादीनि

करणानि स्वस्वस्थाने पृथङ्निक्षिप्य दर्शनादिव्यापारं कारयित्वा चास्त इत्यर्थः । तत उदगादनन्तेत्यत्र श्रुतिः-

"शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।

तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति ॥"

इति अर्थः- एकोत्तरशतं नाड्यो हृदयस्य सम्बन्धिन्यः सन्ति । तासां मध्ये एका नाडी मूर्धानमभि मूर्ध्नो बहिरूर्ध्वमभिनिस्सृता सषुम्नाख्या । तयाऽऽसमन्तादयन् गच्छन्नुपासकोऽमृतत्वं मोक्षमेवेति । अन्या नाड्यो विष्व नानागतयस्तिर्यक्सर्पिण्यः उत्क्रमणे संसारभ्रमणद्वारे भवन्ति वर्तन्त इति । स्वामिश्लोकः —

उदरादिषु यः पुंसां चिन्तितो मुनिवर्त्मभिः । हन्ति मृत्युभयं देवो हृद्गतं तमुपास्महे ॥ सुगमम् ॥१८॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ शरीरान्तरस्थानभेदेनोपासनाभेदान् विवक्ष्यन् भगवदुपासकानां मोक्षफलमाह-उदरमिति । ऋषिवर्त्मसु ज्ञानमार्गेषु निष्ठिताः आरुणयः अरुणवंश्याः । ऋषयः कूर्पदृशः सूक्ष्मदृशः उदरमुपासते उदरस्थं वैश्वानररूपं त्वामुपासते । तथा च सूत्रकारः 'वैश्वानरः साधारणशब्दविशेषात् ।' (१-२-२५) तदुक्तं भगवतैव —

'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥' इति ।

हृदयं हृदयायतनं त्वामुपासते । दहरपरिमाणत्वात् दहराकाशशब्दवाच्यं तथा च सूत्रम् — 'दहर उत्तरेभ्यः ।' (१-१-१३) इति दहराकाशः परं ब्रह्म । कुतः । उत्तरेभ्योपहतपाप्मत्वादिपरमात्मासाधारणधर्मेभ्यो हेतुभ्य इति सूत्रार्थः । पं सरत्यस्यामात्मेति परिसरपद्धतिः । सुषुम्णामार्गस्तामुपासते अनुसन्दधते । ततो हृदयायतनात् तव धाम प्राप्तिस्थानम् । शिरो मूर्धानं प्रति उदगात् उद्गच्छत् । कीदृशः सुषुम्णामार्गः । पुनरिह यत्समेत्य यत्सङ्गं कृत्वा कृतान्तमुखे मृत्युमुखे न पतन्तीत्यर्थः । तथा च श्रुतिः —

'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभि निस्सृतैका ।

तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति ॥' इति । स्मृतिरपि —

"ऊर्ध्वमेकं स्थितं तेषां यो भित्त्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥" इति । ॥१८॥

कृष्णप्रिया

वेदान्तमें जिनका विधान किया गया है एसा उपासना मार्गोमें जिनकी सूक्ष्म दृष्टि है ! एसे अरुण ऋषिके वंशके जो उपासकजन है वे निज हृदय कमल के मध्य अतिसूक्ष्म प्रकाशमान आकारूप आपकी उपासना कर है, और कोइ एक उपासक निज जठराग्निरूप को उपासना करते है तथा कोइ एक उपासक व्यापक सुषुम्णा नाडी मार्गमें आपकी उपासना करते है वह नाडी रूपमार्ग हृदय से लेकर शिर पर्यन्त व्याप्त हो रहा है । हे अनन्त ! आपकी उपासना का धाम नाडी रूप मार्ग को अथवा मस्तक को उपासक अनन्त समयमें प्राप्त हो कर फिर इ मृत्यु मुख संसार में नहीं पडते है ॥१८॥

स्वकृतवि
अथ वितथ

स्वकृतविचित्र
वितथासु, अमूषु, योनि

नन्वीश्वरस्यापि
परिहरन्त्यः "एको देवः
इत्याद्याः श्रुतयः स्तुवन्
देहादिषु हेतुतयोपादानत
अवभाससे स्वकृता योन
प्रकाशते तद्वत् अथातो
विरजधियो निर्मलमतयो
व्यवहारे" इत्यस्य
सन्मात्रमतस्तवोपाधिकृत

स्वनि

भावार्थदीपिकाप्रक
न्यूनाधिकभावे सति परिहर
ज्ञानघनत्वेनाजड इत्याह । स
परिच्छिन्नत्वाभावमाह-सर्वव्य
कर्माध्यक्षः सर्वकस्मसाक्ष्येव
च कल्पितमधिष्ठानादर्थान्तरि
इति । चित्स्वभाव इत्यर्थः ।
भासीत्यर्थः । अन्वयन्तीति अनु
यन्तीति 'इण्-गतौ' लटो रू
अविशेषत्वाद्विशेषाभाववत्त्वाद
स्वामिश्लोकः-कार्येषु देहेषु ।

श्रीधरानुयायिनी — ई
स्वमायारचितेषूत्तममध्यमाधम
तदेवानुप्राविशत् ।" इति श्रुतेस

मूर्धानमभि मूर्ध्नो
ा नाड्यो विष्वङ्

षवर्त्मसु ज्ञानमार्गेषु।
ते। तथा च सूत्रकार

इति।
- 'दहर उत्तरेभ्यः।'
य इति सूत्रार्थः। परे
स्थानम्। शिरो मूर्धानं
पतन्तीत्यर्थः। तथा च

' इति। ॥१८॥

! एसे अरुण ऋषिके
ापकी उपासना करते
व्यापक सुषुम्ना नाडी
रहा है। हे अनन्त!
प्राप्त हो कर फिर इस

स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्स्यनलवत् स्वकृतानुकृतिः।
अथ वितथास्वमूष्ववितथं तव धाम समं विरजधियोऽन्वयन्त्यभिविपण्यव एकरसम् ॥१९॥

कर्दमक्षमा

स्वकृतविचित्रयोनिषु, हेतुतया, विशन्, इव, वर्तमानः, स्वकृतानुकृतिः, त्वम्, अनलवत्, तरतमतः, चकास्सि।, अथ, थासु, अमूषु, योनिषु, अवितथम्, समम्, एकरसं, च, तव, धाम, अभिविपण्यवः, विरजधियः, अन्वयन्ति ॥१९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वीश्वरस्यापि तर्हि जीववदुदरादिसम्बन्धे तदनुप्रविष्यस्य च तारतम्ये सति केन विशेषेणोपास्यत्वमितीमामाशङ्कां न्त्यः "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च" याः श्रुतयः स्तुवन्तीत्याह–स्वकृतविचित्रयोनिष्विति। स्वयङ्कृतासूच्चनीचमध्यमासु योनिष्वभिव्यक्तिस्थानेषु कार्येषु र्येषु हेतुतयोपादानतया प्रागेव विद्यमानत्वेन मुख्यप्रवेशासम्भवाद्विशन्निव वर्तमानस्तरतमतो न्यूनाधिकभावेन चकास्सि मासे स्वकृता योनीरनुकरोतीति स्वकृतानुकृतिरनलवत् अग्निर्यथा स्वतस्तारतम्यहीनोऽपि काष्ठाऽनुसारेण तथा तथा काशते तद्वत् अथातो वितथासु मिथ्याभूतास्वमूषु योनिष्ववितथं सत्यं यतः स मम विशेषमतः सत्यं तव धाम स्वरूपं जधियो निर्मलमतयोऽन्वयन्ति जानन्ति नु इति पृथक्पदं वा अत्र हेतुः अभिविपण्यव इति अभितो विगतव्यवहाराः "पण वहारे" इत्यस्य रूपं पण्युरिति ऐहिकामुष्मिककर्मफलरहिता इत्यर्थः। अविशेषत्वादेवैकरसं मतस्तवोपाधिकृततारतम्याभावादप्रच्युतैश्वर्यस्योपास्यत्वमिति भावः।

स्वनिर्मितेषु कार्येषु तारतम्यविवर्जितम्। सर्वानुस्यूतसन्मात्रं भगवन्तं भजामहे ॥६॥ ॥१९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — अत्राशङ्कते–नन्विति। तदनुप्रविष्टस्योदरादिष्वनुप्रविष्टस्य देहानां योनिभेदात्तारतम्ये धिकभावे सति परिहरन्त्यः श्रुतयः स्तुवन्तीत्याह–तथा हि। एको देव इति। एक इति मूर्तिभेदाभावमाह। देव इति नत्वेनाजड इत्याह। सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु। तर्हि किमिति न प्रतीयते गूढोऽनादिमायया छन्नः। तत्तद्भूतावच्छिन्नत्वेन न्नत्वाभावमाह–सर्वव्यापीति। नभोवत्ताटस्थ्यं वारयति–सर्वभूतान्तरात्मेति। सर्वभूतेष्वन्तस्त्वेऽपि तत्तत्क्रियाकर्तृत्वाभावमाह– ध्यक्षः सर्वकस्मसाक्ष्येव न तु कर्तेति। सर्वभूतेष्वित्यादिना भूतानां पृथगुक्तेः। सद्वितीयत्वमाशङ्क्याह–सर्वभूतानामधिष्ठानं न ल्पितमधिष्ठानादर्थान्तरमित्यर्थः। न केवलं कर्मणामेवाध्यणोऽपि तु तत्कर्तृणामपीत्याह–साक्षीति। साक्षित्वे हेतुः–चेता चित्स्वभाव इत्यर्थः। केवलो दृश्यवर्जितोऽद्वितीयो निर्गुणो ज्ञानादिगुणवर्जित इति तद्वत्त्वमपि स्थूलसूक्ष्मशरीरेषु तथातथा र्थः। अन्वयन्तीति अनुपूर्वादयतेः परस्मैपदाविधानादार्षत्वाश्रयेण तन्निष्पत्तिर्भवेत्तच्चागतिकगतिरूपमित्याह–नु इति पृथक्पदं तौ 'इण्-गतौ' लटो रूपम्। नु निश्चयेन जानन्ति। अत्र ज्ञाने। इत्यर्थ इति। कर्मफलेप्सूनां ज्ञानं दुर्लभमिति भावः। त्वाद्विशेषाभाववत्त्वादेव। अत एकरसत्वात्। इति भाव इति–अप्रच्युतैश्वर्यःप्रच्युतैश्वर्येणोपास्यत एवेति तात्पर्यम्। लोकः-कार्येषु देहेषु। तारतम्यं न्यूनाधिकभावः ॥★॥

श्रीधरानुयायिनी — ईश्वरस्यापि जीववद्देहादौ प्रवेशेऽनुपास्यत्वमाशङ्क्याहुः–स्वकृतेति। स्वतोऽसङ्गस्य निर्विकारस्यापीश्वरस्य चितेषूत्तममध्यमाधमदेहेषु ब्रह्मादिस्थावरान्तेषु कुण्डलादौ सुवर्णस्येवाग्र एवोपादानतया स्थितस्य पुनः "तत्सृष्ट्वा विशत्।" इति श्रुतेस्तत्तद्देहप्रवेशो न्यूनाधिकभावेन तत्तद्देहानुकारिता च प्रतीयमानापि स्वतस्तारतम्यरहितस्य वह्नेः

काष्ठानुसारेणेव मिथ्यैव । अतस्त्यक्तसर्वविश्वविश्वव्यवहारास्तत्त्वविदो मिथ्याभूततत्तद्देहेष्वविशेषं सत्यं सन्मात्रमेव तव स्वरूपं जानन्ति । तथा चोपाधिकृततारतम्यरहितत्वात्तवोपासना योग्यैवेत्याशयः ॥★॥

विश्वनाथी — ननु परमात्मनः प्रतिदेहगतत्वेन बहुत्वाद्देहतारतम्येन तारतम्याच्च जीवसाम्ये सति कथमुपास्यत्वमत आहुः-स्वकृतासु स्वेनैवाचिन्त्यशक्त्या निष्पादितासु ब्रह्मादिस्थावरान्तासु योनिषु स्वाभिव्यक्तिभूमिषु हेतुतया प्रयोजकतयान्तर्यामितया "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यादिश्रुतेः । इवेन मुख्यप्रवेशासम्भवो दर्शितः । तरतमतस्तारतम्येन चकास्सि स्वशक्तिं तत्रतत्र प्रकाशयसि । तत्र हेतुः-स्वकृतासु देवादियोनिषु अनुकृतिस्तदनुकरणशक्तिप्रकाशो यस्य सः । यावत्कार्यमुपादत्से तावतीमेव तत्र शक्तिं प्रकाशयसीत्यर्थः । अनलवत् अनलो यथा यावत्स्फुलिङ्गादिकमुपादत्ते तावतीमेव तत्र शक्तिं प्रकाशयति तद्वत्स्वतस्तु तत्राप्यनन्तशक्तितास्त्येवेति भावः । विकारावर्ति च तथा हि दर्शयतीति न्यायात् । श्रुतयः दर्शिता एव (६) ॥१९॥

नीलकण्ठी — उक्ता सङ्गतिः । स्वकृतविचित्रयोनिष्विति । सङ्कल्पमात्रेण कृता विचित्रा मत्स्यकूर्मादियोनयोऽभिव्यक्तिस्थानानि । योनिशब्दस्य स्थानवाचित्वं "योनिष्ट इन्द्र निषदे अकारि" इति मन्त्रे दृष्टम् । तासु योनिषु विशन्निव घटाकाशवद्व्यापकत्वेन मुख्यप्रवेशायोगात् हेतुतया —

"परित्रायाणाय साधूनां विनाशायच दुष्कृताम् । धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥" इति स्वोक्तहेतोरित्यर्थः ।

"ऐतदात्म्यमिदं सर्वम् ।" इतिवत् स्वार्थे भावप्रत्ययः । हेतुतया योनिकल्पनाधिष्ठानतया वा तासु योनिषु प्रविष्टश्च त्वं तरतमतश्चकास्सि तारतम्येन दीप्यसे । कथम् । अनलवत् । यथाऽनलोऽग्निरल्पे उपाधौ अल्पप्रकाशो महति महाप्रकाशस्तद्वत् । अत्र हेतुमाह-स्वकृतानुकृतिः । स्वेन कृता या मर्यादा तामनुकरोतीति स तथा । तथा हि-दाशरथेर्भार्यावियोगजं दुःखं भृगुशापनिमित्तम् । बाणासुरसङ्ग्रामे शङ्करस्य कृष्णात्पराजय इति परमेश्वरस्यापि स्वकृतमर्यादापरिपालनं दृश्यते । नन्वैश्वर्यतारतम्यं क्वचिद्विश्रान्तं तारतम्यत्वाद्वयदितारतम्यवत् इत्यनुमानात् "य एष सर्वोत्तमः स एवोपास्यः ।" इत्याशङ्क्य अथ वितथास्विति । अथेत्युपास्त्यन्तरारम्भार्थः । अमूषु योनिषु वितथासु मिथ्याभूतासु प्रविष्टम् अवितथं सत्यं तव धाम स्वरूपप्रकाशः समं तुल्यमुपादानत्वात् । तथा हि योनीनां वितथत्वं गम्यते । शिवविष्णुब्रह्मणां मिथः पितृपुत्रादिभावस्मृतिभ्यः श्रुतिष्वपि "विष्णुरित्था परममस्य विद्वाञ्जातो बृहन्नभियाति तृतीयम् ॥" इति । विष्णोः सोमतत्त्वज्ञानादर्चिरादिमार्गेणोपासकप्राप्यब्राह्मलौकिकैश्वर्याद्धूमादिमार्गेण कर्मिप्राप्यचन्द्रलोकैश्वर्याच्चान्यस्य तृतीयस्य योगैश्वर्यस्यागस्त्यादेरिव प्राप्तिः । "न ते विष्णो जायमानो न जातो देवमहिम्नः परं मतमा उ" इति । विष्णोरनन्तमहिमत्वं च सूचितम् । किन्तु विधित्सितस्तुतिमात्रम् । अन्यथा हाने विधिद्वयवैयर्थ्यम् उपादाने त्वन्यतरवैयर्थ्यम् । एकेनैव तत्त्वसाक्षात्कारोपयोगिचित्तैकाग्र्यसिद्धेः । तथा च-पारमर्षं सूत्रम् — "विकल्पो विशिष्टफलत्वात् ।" इति । उपास्तीनां विकल्पतुल्यफलत्वादिति सूत्रार्थः । तस्मान्नटवत्सौभर्यादिवच्च पर्यायेण युगपद्वा रामकृष्णहरिहरमैरालादिमूर्तीरधितिष्ठन्नेक एव शिवविष्ण्वादिशब्दैः प्रतिपाद्यते । "सर्वशास्त्रपुराणेषु यो देवानां नामधा एक एव ।" इति श्रुतेः । परविद्याधिकारेषु शिवविष्ण्वोर्विष्णुशिवयोर्वा निन्दास्तुती क्रमात्सगुणनिर्गुणब्रह्मापेक्षे । तत्र निन्द्यभजनान्नरकं व्रजन्तीत्यपि कार्यब्रह्मलोकं व्रजन्तीत्येव । परं शास्त्रीयस्य भजनस्य रागतः प्राप्तब्रह्मवधादिवन्नरकहेतुत्वासम्भवात् । शौनकीयप्रणवपटलव्याख्याने हेमाद्रिरप्येवमेव व्याचख्यौ नरकं ब्रह्मलोकमिति । तस्माद्भगवान्मूर्तिषूत्कर्षापकर्षचिन्ता पाखण्डापसदयोग्या स्वामिद्रोहहेतुः । अत एव तासु भेददृष्टिर्निन्द्यते । स्कान्दे —

"ब्रह्माणं केशवं रुद्रं भेदभावेन मोहिताः । पश्यन्त्येकं न जानन्ति पाखण्डोपहता जनाः ॥" इति ।

योनीनां प्रतिपाद्यत्वे तु कृत्स्नं शास्त्रं परस्परविरोधादप्रमाणं स्यादतो युक्तमुक्तं वितथास्वमूष्विति । यद्वा-अथेति हेतौ । यतः स्वकृतानुकृतिः स्वकर्मार्जितदेहप्रतिकृतिः अनल इव दुष्पूरत्वात् । जाठरानलसम्बन्धादनस्य प्राणस्य लानादादानाद्वाऽनलो जीवदेहः लुप्तोपमा । पक्षे अनलवान्यो जीवद्देहः तद्वद्भोगदा भवन्ति । अतो वितथास्विति योज्यम् । अयम्भावः — यथा चैत्रः स्वकर्मार्जिते देहे कौलिकप्रसिद्ध्या शत्रुनिर्मितायां वा देहप्रकृतौ कण्ठकेन तुद्यमानायां व्यथते एवमीश्वरोऽपि स्वमायाकल्पिते जीवाविद्याकल्पिते

वा कृष्णादिविग्रहे द्
भोगनिर्वाहे तत्सत्यकल
कदाचिदभेदेन पर्याये
बाधितत्वाच्च । एवमं
तद्विरजधियो वीतरागम
इत्यर्थः । एतेनैकादशो

"तत्सर्वव्याप
तत्र लब्धपदं
एकत्राङ्गे अन्य
कारणत्वमपि त्यक्त्वा म

स्वकृतेति तैरव
विचित्रयोनयो ब्रह्मादिस्थ
शब्दप्रयोगो विभोर्मुख्यप्रवे
यावत्कार्यमुपादत्से तावत
प्रकाशयति । तद्वत् । स्व
न्यायात् । वितथत्वं नश्वरत

हेतुर्नियोजकः, त
तद्योनिनितारतम्यानुसारादित
तारतम्यं व्यक्तमेव । स्व-श
समं विषमासु वर्तमानमपि
यद्वा, न केवलं प्रपञ्चाद्बहिरेव
योनिषु मत्स्य-कूर्म्म-वराह
चकास्सि । हंस जामदग्न्या
स एव महत्तमः, तथा यथो
"पश्चात्सादृश्ययोरनु" इत्यम
ज्ञायेय ? तत्राहुः-अथेति । प्र
तत्तज्जातिप्रादुर्भावेनापि तत्स
यमलार्जुनाभ्याम् (भा० १०/

"यस्यावतारा ज्ञायन्

अविपण्यवः सर्वथा

[श्रीवृन्दावनादिप्रसङ्गे
क्रीडार्थमत्र स्वयमाविर्भावितासु

कृष्णादिविग्रहे द्रुग्धे पूजितेवा द्रुग्धः पूजितश्च भवति । यथा-चैत्रस्य देहप्रकृत्येव देहेनापि सम्बन्धो मिथ्या तादृशेनापि निर्वाहे तत्सत्यकल्पनाया अयोगात् "असङ्गो ह्ययं पुरुषः" इत्यादिश्रुत्या बाधाच्च । ततश्च सर्वास्ववस्थास्वनुवर्तमाने प्रत्यगात्मनि चिदभेदेन पर्यायेण च प्रतीयमानं देहत्रयं मिथ्या शुक्ताविव रङ्गरजतादिकम् । "नेह नानास्ति किञ्चन ।" इति श्रुत्या बाधितत्वाच्च । एवमीश्वरेऽपि विग्रहादिर्मिथ्येति । तदेवं वितथासु हरिहरादिषु मूर्तिषु यत्समं कारणम् एकरसं शुद्धं तव धाम जधियो वीतरागमतयोऽन्वयन्ति मूर्त्युपास्तिमनुप्राप्नुवन्ति । के । अभिविपण्यवः सर्वतो विगतव्यवहाराः एकान्ते ध्यातार त्यर्थः । एतेनैकादशोक्तोऽर्थो दर्शितः यथा —

"तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् । नान्यानि चेन्तयेद्भूयः सुस्मितं भावयेन्मुखम् ॥

तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् । तच्च त्यक्त्वा मदारोहो न किञ्चिदपि चिन्तयेत् ॥" इति ॥

एकत्राङ्गे अन्यान्यङ्गानि न चिन्तयेत् । एकत्रेति यदुक्तं तदेवाङ्गं दर्शयति-सुस्मितमिति । व्योम्नि सर्वकारणरूपे तच्च कारणत्वमपि त्यक्त्वा मयि शुद्धब्रह्मण्यारूढः सन्न किञ्चित् ध्यातृध्येयविभागमपि न चिन्तयेदिति श्रीधराचार्यव्याख्या (६) ॥१९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वकृतेति तैरवतारितमेव स्वेनैव कृताः अचिन्त्यशक्त्या स्वस्याविष्कृतस्यापि परिणामरूपा निष्पादितरूपाश्चेत्यर्थः । विचित्रयोनयो ब्रह्मादिस्थावरान्ताः हेतुतया प्रयोजकतया अन्तर्यामितयेत्यर्थः । "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यादिश्रुतेः । अत्रैव ब्दप्रयोगो विभोर्मुख्यप्रवेशासम्भवात् । तरतमतश्चकास्सि तारतम्येन चकास्सि स्वशक्तिं तत्रतत्र प्रकाशयसि । तत्र हेतुः-स्वकृतानुकृतिः यावत्कार्यमुपादत्से तावतीमेव तत्र शक्तिं प्रकाशयसीत्यर्थः । अनलो यथा यावत्स्फुलिङ्गादिकमुपादत्ते तावतीमेव तत्र शक्तिं प्रकाशयति । तद्वत् । स्वतस्तु तत्राप्यनन्तशक्तितास्त्येवेति भावः । तथैवाहुः-अथेति । "विकारावर्ति च तथा हि दर्शयती"ति न्यायात् । वितथत्वं नश्वरत्वम् । अन्यत्तैः । श्रुतयश्च तद्दर्शिता एव ॥६॥१९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हेतुर्नियोजकः, तत्तया अन्तर्यामित्वेनेत्यर्थः । इवेति बहिरपि वर्तमानत्वात् । तारतम्येन चकासने हेतुः- स्वेति । योनिनितारतम्यानुसारादित्यर्थः । सात्त्विकेषु भगवतोऽधिकः प्रकाशः, राजसेषु स्वल्पः, तामसेषु स्वल्पतरः, इति तत्तद्भावानुसारेण तारतम्यं व्यक्तमेव । स्व-शब्दद्वयेन स्वेच्छयैव लीलया प्रवेशोऽनुकृतिश्चेति जीवतो वैलक्षण्यमुक्तम् । वितथास्ववितथं सत्यत्वात्, समं विषमासु वर्तमानमपि तारतम्यहीनं धाम रूपम् । नु निश्चितम्, यन्ति जानन्ति, अमूष्वेव प्राप्नुवन्तीति वा । एकरसमविकारम् । न केवलं प्रपञ्चाद्बहिरेव त्वं विराजसे, किन्तु प्रपञ्चान्तरमपीत्याहुः-स्वेति । स्वयं कृतासु विचित्रासु सात्त्विकादिभेदेन बहुविधासु निषु मत्स्य-कूर्म्म-वराह-हंस-क्षत्र-देव-विप्रादिषु विशन्निव । इवेत्यनधिकार्य्यम्, हेतुतया स्वातन्त्र्येण प्राविशत् । तारतम्येन चकास्सि । हंस जामदग्न्यादिषु सर्वशक्तीनामाविष्कारात्, श्रीनृसिंहादिष्वाविकारात्तारतम्यम्, यथा अनलः क्वचिदल्पः, क्वचित् एव महत्तमः, तथा यथोपयोगमेव शक्त्याविष्कारात् स्वकृतानुकृतिः स्वकृतानां मत्स्यादिजातीनामनु सादृश्येन कृतिर्यस्य । सादृश्ययोरनु" इत्यमरः । तत्तज्जात्यनुरूपक्रिय इत्यर्थः । ननु यदि तत्तज्जातीयनिर्विशेषः स्याम्, तत्तद्रूपोऽहमिति कथं ? तत्राहुः-अथेति । प्रवेशानन्तरमेव अमूषु वितथास्वनित्यासु जातिषु वर्तमानं तव धाम श्रीमूर्तिम् । कथम्भूतम् ? अवितथं त्यातिप्रादुर्भावेनापि तत्समवेतत्वेनैव सत्यं विशुद्धबुद्धयो जानन्ति । तत्र हेतुः-समं सशोभमेकरसं श्रेष्ठक्रीडं चेति । यथोक्तं मलार्जुनाभ्याम् (भा० १०/१०/३४)

"यस्यावतारा ज्ञायन्ते शरीरिष्वशरीरिणः । तैस्तैरतुल्यातिशयैर्वीर्य्यैर्देहिष्वसङ्गतैः ॥" इति ॥

अविपण्यवः सर्वथा विगतव्यवहाराः परमार्थदर्शिनो भक्ता इति यावत् । इदं ज्ञाने हेतुः ॥१९॥

[श्रीवृन्दावनादिप्रसङ्गेन काश्चिद्वत्स-वत्सपादिहरणे श्रीभगवतस्तद्रूपतामुद्दिशन्त्यो भक्त्येकगम्यतामाहुः-स्वकृतेति । स्वकृतासु त्र स्वयमाविर्भावितासु विचित्रासु बहुविधासु वत्सवत्सपादिरूपासु योनिष्वाकृतिषु हेतुतया उपादानत्वेन विशन्निव, तत्तद्रूपो

भवन्निव, श्रीव्रजेन्द्रानन्दनस्य पृथक्त्वेन तथैवावस्थानात् । इव-शब्दोऽनधिकार्थे वा, तरतमतस्तारतम्येन च, क्वापि यष्टिशृङ्गादिरूपत्वेन च तथा च कामनातारतम्यमनलवत् । यथाग्निकाष्ठादीनां न्यूनाधिकत्वेन न्यूनाधिकस्तथा तत्तदाकृतीनां सादृश्येन त्वमपीत्यर्थः । ननु मायया तत्तद्रूपतास्तु नेत्याहुः-स्वकृतेति । सुष्ठु न कृता अनुकृतिर्मायया तद्रूपविडम्बनं येन स तथा । ननु न भवतु मायिकत्वं तेषाम्, किन्तु चिद्रूपविग्रहा मयैव ते जीवविशेषा आविष्कृता इत्यन्तु; कथमहमेव तत्तद्रूप इत्युच्यते ? इत्यत आहुः-अथेति । तद्रूपताविष्कारानन्तरमेवामूषु वत्सपाद्याकृतिषु वितथास्वतत्प्रकारासु सर्वत्र तत्तद्रूपलक्षणहीनास्वपीत्यर्थः । अभिविपण्योऽभितो विशेषेण पणयन्ति स्तुवन्ति सेवन्ते इत्यभिविपण्यवः परमभक्तास्तव धाम श्रीमूर्तिमवितथमबाधितं तत्तदाकृतिभिरनाच्छन्नं जानन्ति । तत्तद्रूपस्त्वमेवासीति परिचिन्वन्तीत्यर्थः । तत्र लिङ्गम्-सममिति, 'मा' तरमशोभा तत्सहितम् । एकरसं च मुख्यरसं तत्तदसाधारणलीलारसिकमित्यर्थः ॥१९॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कार्यान्तःप्रविष्टस्यापि निर्दोषतया परमप्राप्यत्वमाह-स्वकृतेति । स्वकृतविचित्रयोनिषु हेतुतया विशन्निव तरतमतश्चकास्सीत्यन्वयः । विचित्रयोनिषु हेतुतया विचित्रा उत्पत्तयो येषां तेषु । विशन् जीवान्तरात्मतया तिष्ठन् । तरतमतः अल्पत्वमहत्त्वादियुक्तत्वेन । चकास्सि प्रकाशसे । किम्भूतस्त्वम् । सुकृतानुकृतिः । स्वेन त्वया कृतेषु महदादिकार्येषु अनु पश्चात् कृतिः प्रेरणा यस्य असौ कार्यपरिणामानुकारी । अथ वितथासु संहृतास्वमूषु योनिषु । तव धामावितथम् असंहृतं समम् एकरसम् कार्यानुप्रवेशतारतम्यरहितम् अविच्छिन्नानन्दम् । तव धाम स्वरूपम् । विरजधियः निर्मलधियः । अवयन्ति उपासते । अभिवियन्ति प्राप्नुवन्ति चेत्यर्थः । 'पण व्यवहारे' इत्यस्य रूपं पण्युरिति । तारतम्यभावे दृष्टान्तः । अनलवत् । यथा अनलः अग्निः काष्ठगतह्रस्वत्वदीर्घत्वतारतम्यरहितः ॥१९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमुपासनास्थानमुपासनस्थापनप्रसङ्गात् परमात्मनोऽशुचिदेहसम्बन्ध उक्तः । अथैवं कार्यान्तःप्रविष्टस्यापि तस्य निर्दोषतया परमप्राप्यत्वमाहुः-स्वकृतेति । हेतुतया सर्वोपादानत्वेन हेतुना स्वेन त्वया कृता निर्मिता विचित्रा योनयो देहाः येषां तेषु देवमनुष्यादिविचित्रभवत्कृतशरीरकेषु जीवेष्वित्यर्थः । विशन् अन्तरात्मतया विशन् यद्वा देवादिशरीरेष्वेव उपासकानुग्रहेणोपासनार्थं विशन् तिष्ठन्निवशब्दोऽनतिरिक्तार्थः । विशन्नेवेत्यर्थः । तरततः ज्ञानाल्पत्वमहत्त्वादिभावेन स्वकृतानुकृतिः स्वकृता योनीरनुकरोतीति तथा हृदयादिकार्यपरिणामोत्पत्तिविनाशाद्यनुकारी चकास्सीत्यर्थः । अनलवत् । यथाऽग्निः स्वतस्तारतम्यहीनोऽपि तृणकाष्ठाद्यनुसारेण तथा प्रकाशते तद्वत् । अथ यद्यप्येवमथापीत्यर्थः । अमूषु योनिषु वितथासु अविद्यमानास्वुपसंहृतास्वित्यर्थः । अवितथमनुपसंहृतम् । कुतः । सममेकरूपं कार्यानुप्रवेशकृतकार्यगतदोषसंस्पर्शरहितम् । तत् कुतः । एकरसमविच्छिन्नानन्दं तव धाम स्वरूपं विरजधियः निर्मलमतयः अनुनयन्ति उपासते अभियन्ति । प्राप्नुवन्तिचेत्यर्थः । अन्वयन्त्यभिविपण्यव एकरसम् इति पाठान्तरम् । तदा अभिविपण्यवः विविधत्वद्गुणवादात्मकस्तुतियुक्ताः अन्वयन्ति अवगच्छन्ति प्राप्नुवन्तीति यावत् । अत्र—

"सर्वज्ञः सर्वदृक् सर्वज्ञानशक्तिबलर्द्धिमान् । अन्यूनश्चाप्यवृद्धिश्च स्वाधीनोऽनादिमान् वशी ॥
क्लमतन्द्रीभयक्रोधकामादिभिरसंयुतः । निरवद्यः परप्राप्तिर्निरधिष्ठोऽक्षरक्रमः ॥"

इत्यादिस्मृत्यर्थोऽप्यनुसन्धेयः ॥१९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

"यो जीववद्योनिषु भात्यनन्तो मूढैस्तमोगैर्भरताधिगम्यः । निचाय्य तं शाश्वतमात्मसंस्थं तदिच्छवोत्मन्यदधुर्महान्तः ॥"

इति कमठश्रुत्यर्थग्राहिणः स्वकृतविचित्रेतिश्लोकस्यार्थ उच्यते । स्वकृतविचित्रयोनिषु स्वनिर्मितसुरनरादिनानाविधशरीरेषु विशन्निव विशन् जीवस्तद्वदज्ञानां यस्त्वं चकास्सि । कथमिव । अनलवत् स्वकृतनुकृतिः । यथाऽनलः स्वकृतस्यानुकृतिर्यस्य

तथा स्वकृतदार्वादिरप
हेतुतयेति । सर्वहेतुतय
"रतत्वाद्भात्म
इति स्मृतेः ।
अनन्यथा भूत्वैव शाश्वत
मनसि नयन्ति ध्यायन्ती
"या निवेश्याह
सर्वहेतुतयैवेशं
इन्धनानयने त्व
अशाश्वतेषु देहेषु
इत्यादितन्त्रभागव

स्वकृतेति अत्र टी

ननु, भोः ममाप्यु
सर्वकारणकारणं तव धाम
वस्तुभूतं समं सर्वदा तुल्याव
अभिविपण्यवः सर्वतो भावेन
धाम । एकरसं सान्द्रानन्दं नर
स्वकृतेत्यादि । तरतमतो मध्यम
वर्तत इति शेषः । स्वस्य तव
"अवाप नारायण आ
प्राजसे न तु त्वं तासु विशन्निव

ननु जीवस्यैवं ममाप्यु
विचित्रासु योनिषु नानाविध
स्वकृतविचित्रयोनिष्वनुकृतिरनुव
स्वयमेवोक्तम् (गी० १५/७) —
अतस्त्वदंशस्य (चित्)-सम्बन्धा
मङ्गले आनन्तर्ये च । अमूषु विचि
तरतमभावरहितं यदंशस्य प्रवेशा
भवः । अत एकरसमानन्दमात्रम्,

सर्वादेरपनयने गच्छन् तत्स्थापने तिष्ठन्त अनुवर्तते एवं स्वकृतशरीरादिष्वनुवर्तसे। तद्गत: सन्नित्यर्थ:। ज्ञानिमतमाह– सर्वहेतुतया भरतेन मे ज्ञानात्मके विष्णौ रतेन वायुना मत: ज्ञात: —

"तत्वाद्भ्रात्मके विष्णावथवापि जगद्भृते:। भरतो वायुरुद्दिष्टो भारती तत्सरस्वती ॥"

इति स्मृते:। वितथासु अन्यथा भवन्तीषु अशाश्वतीष्वपि सम्भावितास्वसम्भावितास्वपि अमूषु योनिषु अवितथात्वेन पूर्वैव शाश्वतत्वेन उरुविधं बहुविधं तिष्ठन्तं निकटधिय: त्वत्समीपस्थबुद्धय: महान्तस्ते तव त्वामभिविपत्त्या मनसाऽभिगम्य यन्ति ध्यायन्तीत्यर्थ: —

"या निवेश्याह्वयो जीवस्त्वज्ञाना तद्वदेव तु। प्रकाशते परो देवस्तेन यान्त्यधरं तम: ॥

सर्वहेतुतयैवेशं प्राणो जानाति तत्त्वत:। तेन चासौ परो देवस्तत्परं याति केशवम् ॥

इन्धनानयने त्वग्निर्यथैवानीयते सह। एवं देहगतो विष्णु: सह गच्छेन्निजेच्छया ॥

अशाश्वतेषु देहेषु शाश्वतं बहुधा स्थितम्। निचाय्य मनसा सन्तो जानन्ति निकटेच्छव: ॥"

इत्यादितन्त्रभागवते सिद्धोऽयमर्थ: ॥६॥१९॥

श्रीमज्जीवगोस्वामिकृत: क्रमसन्दर्भ:

स्वकृतेति अत्र टीकावतारणैव गम्या ॥१९॥

श्रीमज्जीवगोस्वामिकृत: बृहत्क्रमसन्दर्भ:

ननु, भो: ममाप्युदरादिसम्भवात् जीवेन सह को भेद इत्याशङ्क्याहु:–स्वकृतविचित्रेत्यादि। अथ भो भगवन्! कारणं तव धाम मूर्ति: वितथासु असुषु विचित्रासु योनिषु वितथासु प्राकृतत्वात् अवस्तुत्वेन ज्ञायमानासु अवितथं समं सर्वदा तुल्यावस्थं सन्तं वयसि कैशोरे इत्युक्ते:। विरजधियो निर्मलबुद्धयो भक्ता अनुयन्ति अनुभजन्ते। यतोऽमी अभिविपण्यव: सर्वतो भावेन विशेषेण पण्यव: स्तुत्या: "पण व्यवहारे स्तुतौ च" इति औणादिको युण्मन्युप्रभृतिवत्। कीदृशं एकरसं सान्द्रानन्दं नराकृतिब्रह्मत्वात्। ननु मां सर्वान्तर्य्यामिणमाहु:–सर्वान्तर्य्यामित्वे कथं मूर्तिमत्त्वं मे इत्याशङ्क्याहु:– स्वकृतविचित्रयोनिषु इत्यादि। तरतमतो मध्यमोत्तमादिभावेन स्वेन त्वयैव कृतासु विचित्रासु नानाप्रकारासु योनिषु स्वकृतानुकृतिर्नारायणो विशन्निव इति शेष:। स्वस्य तव कृतेऽनुकृतिरनुकारो यस्य। त्वदाद्यावतार:। तथा चोक्तम् —

"अवाप नारायण आदिदेव:।" इति तर्हि कस्तावदहं किं वा करोमीत्याशङ्क्याहु:–हेतुतया सर्वकारणकारणत्वेन चकास्सि ननु त्वं तासु विशन्निव वर्तसे अनलवत्सर्वप्रकाशक इत्यर्थ: ॥१९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ननु जीवस्यैवं ममाप्युदरादि–सम्बन्धे तेन सह को विशेष इत्याह–स्वकृत–विचित्रेत्यादि। स्वकृतासु त्वयैव कृतासु योनिषु नानाविधेषु शरीरेषु हेतुतया त्वमेव विशन्नेव तरतमत उच्चनीचभावेन चकास्सि भ्राजसे, स्वकृतविचित्रयोनिष्वनुकृतिरनुकारो यस्य तथा इव शब्दोंऽशेन प्रवेशे (स्वस्य) प्रवेश–सम्भावनायां, वस्तुतस्तु त्वदंश एव जीव:, उक्तम् (गी० १५/७) — "ममैवांशो जीवलोके" इत्यादि। अनलवदग्निर्यथा काष्ठाद्युपाधिवशात् तरतमत: प्रकाशते, तस्य (चित्)–सम्बन्धाद्विचित्रयोनिशरीराणि जडान्यप्यजडवद्भ्रान्ति, वस्तुतस्तु तानि वितथान्येव। अथ प्रकृतोपक्रमे अन्तर्यं च। अमूषु विचित्रासु योनिषु सतीषु तव धाम सममवितथं सत्यमानन्दमयम्, अभिन्नत्वादन्तर्यामिरहितम्, समं रहितं यदंशस्य प्रवेशाद्वितथा अपि नानायोनयोऽवितथवद्भान्ति तस्य त्वद्भिन्नस्य तव धाम्नोऽवितथं किं विचित्रमिति एकरसमानन्दमात्रम्, अतो विरजधियो भक्तास्तदनुयन्ति अनुगच्छन्ति भजन्त इच्छन्ति अभिविपण्यव इति तुल्यम् ॥१९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु परमात्मनः प्रतिदेहगतत्वेन बहुत्वाद्देहतारतम्येन तारतम्याच्च जीवसाम्ये सति कथमुपास्यत्वमत आहुः-स्वकृतासु स्वेनैवाचिन्त्यशक्त्या निष्पादितासु ब्रह्मादिस्थावरान्तासु योनिषु स्वाभिव्यक्तिभूमिषु हेतुतया प्रयोजकतयान्तर्यामितया "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यादिश्रुतेः। इवेन मुख्यप्रवेशासम्भवो दर्शितः। तरतमतस्तारतम्येन चकास्सि स्वशक्तिं तत्रतत्र प्रकाशयसि।

तदेवाहुः-स्वकृतासु ब्रह्मादिस्थावरान्तयोनिषु अनुकृतिस्तदनुकरणशक्तिप्रकाशो यस्य सः अनलवत् अनलो यथा यावत्स्फुलिङ्गादिकमुपादत्ते तद्वत्।

अथ वितथासु विनष्टासु अमूषु योनिषु विरजधियो निर्मलमतयः अनुयन्ति जानन्ति। ते एव के। अभि सर्वतो भावेन विपण्यवो विगतव्यवहाराः। 'पण व्यवहारे' इत्यस्य रूपं पण्युरिति। ऐहिकामुष्मिककर्मफलशून्या इत्यर्थः। एकरसं केवलानन्दास्वादस्वरूपम्। अतस्तव सर्वकारणत्वात् स्वातन्त्र्यादुपाधिकृततारतम्याभावादप्रच्युतैश्वर्य्याच्चोपास्यत्वमिति भावः। अत्र "तत्सृष्ट्वा तदेवानुप्राविशत्" इति

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च ॥

इत्याद्याः श्रुतयः ॥१९॥

गूढार्थदीपिनी

ननु भगवतः प्रतिदेहगतत्वेन नानात्वात् देहतारतम्येन तारतम्याच्च जीवसाम्ये सति कथमुपास्यत्वमिति शङ्कां परिहरन्त्यः श्रुतयः आहुः-स्वकृतेति।

(स्वरूपनिरूपणपरेयम्)

पद्यानुवादः

स्वकृतयोनिषु हेतुतया विशन्निव विभास्यसमं त्वमिहाग्निवत्। सममुष्वसतीषु भवद्वपुः सदभियन्ति हरेऽमलबुद्धयः ॥१९॥

सङ्क्षिप्तार्थान्वयः — हे भगवन्! स्वकृतविचित्रयोनिषु उच्चनीचमध्यमासु योनिषु हेतुतया उपादानतया प्रागेव विद्यमानत्वे मुख्यप्रवेशासम्भवाद् विशन्निव वर्तमानस्त्वम् तरतमतः न्यूनाधिकभावेन अनलवत् चकास्सि। कथम्भूतस्त्वम्? स्वकृतानुकृतिः। स्वकृता योनीः देवमनुष्यादिरूपाः अनुकरोति अनुसरतीति तथाभूतः। अथ अतः वितथासु मिथ्याभूतासु अमूषु योनिषु एकरसं समं तव धाम स्वरूपम् अवितथं सत्यमेव विरजधियोऽनुयन्ति जानन्ति। कथम्भूताः? अभिविपण्यवः सर्वव्यवहारातीताः।

स्वकृतासु स्वेनैव कृतासु स्पृष्टासु विचित्रासु योनिषु स्वाभिव्यक्तिस्थानेषु देवमनुष्यादिदेहेषु हेतुतया प्रयोजकतया अन्तर्यामितयेत्यर्थः। प्रवेशं कुर्वन्निव वर्तमानस्त्वं तरतमतः प्रवेशासम्भवादिवेत्युक्तम्। कथम्भूतस्त्वम्। स्वकृताः देवमनुष्यादि हेतुतया प्रयोजकतया अन्तर्यामितयेत्यर्थः। प्रवेशं कुर्वन्निव वर्तमानस्त्वं तरतमतः न्यूनाधिकभावेन चकास्सि प्रकाशसे। अन्तः प्रतीयसे इत्यर्थः। पूर्वमेव स्थितस्य मुख्यतया प्रवेशासम्भवादिवेत्युक्तम्। कथम्भूतस्त्वम्। स्वकृताः देवमनुष्यादियोनीरनुकरोति तथा भासते तद्वत्। यद्यप्येवम् अथ अथापि वितथासु मिथ्याभूतासु उपसंहृतासु सतीषु अमूषु योनिषु तव धाम स्वरूपम् अवि सत्यं विरजधियो निर्मलमतयोऽनुयन्ति जानन्ति। सत्यत्वे हेतुः समम् एकरूपम्। कार्यानुप्रवेशेऽपि तारतम्यरहितमितत्यर्थः। कूट एकरसं निर्विकारम्। मा राधा तया सहितं सममिति वा राजाकृष्णमयं जगत् इत्युक्तेः। विरजधिय इत्यत्र हेतुः। अभिविपण्य अभितः सर्वतोभावेन विगतो निष्टः पण्युर्व्यवहारो येषां ते। यद्वा। अभितः सर्वतो विशिष्टाः पण्यवः स्तुतिकीर्तनादयो ये

: । पण् व्यवहारे स्तुतौ च इत्युभयार्थकः तस्यैव धातो रूपं पण्युरिति । एतेन स्वातन्त्र्यात्तवोपाधिकृत-भावादखण्डितैश्वर्यस्योपास्यत्वं सुदृढमिति द्योतितम् । नु इति पृथक्पदं वा । नु निश्चयेन यन्ति प्राप्नुवन्ति । अन्वयन्तीति मार्थिकः । अनुपूर्वकेण्धातोः अनुयन्तीति पूर्वाचार्यव्याख्यानात् । अयधातुकल्पने तु तस्यात्मनेपदित्वादाकर्षकल्पनाया तित्वाच्च ॥२०॥६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तत्वेन तत्सम्बन्धप्रतीतिं वारयन्नीश्वरं स्तौति —

'एको देवः सर्वभूतेषु गूढः साक्षी चेता केवलो निर्गुणश्च ॥'

इति आथर्वणमन्त्रः । स्वकृतविचित्रयोनिषु स्वीययाऽचिन्त्यया स्वाभाविक्या शक्त्या । रचितासु विचित्रासु नानाविधासु स्थावरान्तासु योनिषु । विशन्निव तारतम्यहीनोऽपि सर्वान्तर्यामी स्वकृतानुकृतिः सन् तरतमतश्चकास्सि । अज्ञैः प्रतीयसे । ता योनीरनुकरोतीति तथा । तत्तत्र दृष्टान्तः-अजलवत् । काष्ठादिसम्बद्धाग्निरिवेति । विशन्निवेत्यत्रेवशब्दस्य सार्थकतामाह-कारणत्वेन विद्यमानतया । तथा च द्वितीयेऽप्यष्टोक्तिः —

'यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु । प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥'

अथ अतो हेतोः । वितथासु च्युतस्वभावास्वस्थिरास्वमूषु । तव धामावितथम् अप्रच्युतस्वभावं यथार्थं वस्तु । अत एव समत्वादेवैकरसं निर्विकारम् । विरजधियः शुद्धसत्त्वास्तत्राप्यभिविपण्यवः सर्वतो निर्वेदतः यन्ति प्राप्नुवन्ति । नु निश्चितम् ॥१९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवमुपासनाभेदे निर्णयमुक्त्वा अनुप्रवेशश्रुतीनां निर्णयमाह-स्वकृतविचित्रयोनिष्विति । 'तत् सृष्ट्वा तदेवानुप्राविशत् । स प्रविष्ट आनखाग्रेभ्यः' इत्यादिश्रुतिषु प्रवेशः श्रूयते । गुहां प्रविष्टावात्मानौ हि तद्दर्शनादिति न्यायेनापि निर्णीतः । स च सर्वथा बहिःस्थितस्य आहोस्विदन्तरेऽवस्थितस्य प्रकाशे लोकास्तत्र पश्यन्तीति लोकप्रतीतिमाश्रित्य प्रवेशोऽनूद्यते इति विचारः । तत्र बहिःस्थितस्यैव प्रवेशे आत्मसृष्टिविरोधः अद्वैतविरोधश्च निरवयवत्वशब्दकोपश्च । प्रवेशेऽपि उभयोः प्रवेशो निरूपितः । क्वचित्प्रविष्टस्य जीवब्रह्मभावः पूर्वं तु भेदे कारणभावादतो द्वयं निर्णेतव्यम् । किं बहिःस्थितः प्रविशति उभौ त इति । एतदत्र क्रमेण श्लोकद्वयेन निर्णयं करिष्यति । स्वेनैव कृतेषु विचित्रयोनिषु भगवान् हेतुतया तत्र स्थित एव चकास्ति । अनेन दृष्टानुवादिका प्रवेशश्रुतिरिति निरूपितम् । कार्ये कारणस्यानुप्रवेशः पृथक् वर्तते इति केचित्, अन्यथा र्तितं स्यादिति । अत उभयसङ्ग्रहार्थम् इवेत्युक्तवान् 'परस्य दृश्यते धर्मो ह्यपरस्मिन् समन्वयात् ।' इति भागवतेऽपि कार्ये प्रवेश उक्तः । अतो हेतुतया उपादानत्वेन स्थितोऽपि पुनः प्रविशति । एवं प्रवेशमुक्त्वा सच्च त्यच्चाभवदित्यादिभिः लक्षण्यश्रुतेः तस्यापि निर्णयमाह । तरतमतश्चकास्सीति । देवतिर्यङ्मनुष्यादिभावेन राजसादिभावेन च । नन्वेक विष्टः कथं नाना भासते तत्राह-अनलवदिति । अनेन जीवकृतं वैलक्षण्यमिति पक्षो निराकृतः । भगवांस्त्वन्तर्यामी एव जीववैलक्षण्येन देवादिभेद इति । यथाग्निः सर्वत्र काष्ठेषु स्थित एव पुनस्तत्र प्रविशन् वर्णभेदं स्थूलसूक्ष्मभेदं च तनुते न त्वन्येन तस्य वैलक्षण्यमित्यर्थः । ननु दृष्टान्तमात्रमुक्तं न तूपपत्तिरिति चेत्तत्राह-स्वकृतानुकृतिरिति । सर्वत्र स्वकृतमनुकरोति । यथा शिक्षकः शिष्यविद्यामनुकरोति एवं जगद्रूपेण भगवान् क्रीडितुं सर्वत्रानुप्रविष्टः तत्तद्रूपो जात तथा सति ये दोषास्तान् वारयति-अथेति । अमूषु वितथास्वपि अवितथं तव धाम । पाञ्चभौतिकानां वितथत्वे स्वस्य हेतुमाह-सममिति । विषमाः पृथिव्यादयः । उत्तरोत्तरदेशगुणत्वात् । प्रवेशे तेषां न समता सम्भवति । कठिनविरलावयवत्वेन भावात् आकाशस्याप्यनित्यत्वाद्वैषम्यमेव परं सूक्ष्मत्वात्तदाकलयितुं न शक्यते, भगवांस्तु सम एव सर्वत्र प्रविष्टः । समं ब्रह्म' इति । ज्ञानादितारतम्यं तु जीवनिष्ठमित्युत्तरश्लोके वक्ष्यते । सर्वत्र सर्वसमत्वमत्र विवक्षितम् । यत्र प्रविशति पूर्णः तत्र प्रविशति 'समः ऋषिणा समो नागेन समो मशकेन' इत्यादिश्रुतेः । भगवतस्तुल्यांशप्रवेशे तु सर्वसमत्वं

नोपपद्यते। नन्वेवं सति कथं समता न प्रतीयते, अन्यथा भगवत्कार्येष्वपि वैषम्यप्रतीतिर्न स्यात्। भगवत्कार्याणि च 'योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्ताम्' इत्यादिना निरूपितानि। तत्राह–विरजधियोऽन्वयन्तीति। ये विरजधियः रजोगुणरहिताः ब्रह्मदृष्टयः त एव तद्वैलक्षण्यं जानन्ति। यथा यो रत्नपरीक्षकः स एव कृत्रिमं सहजं च जानाति। अनु भगवत्स्वरूपमन्वयन्ति जानन्तीत्यर्थः। ननु तेषामेव तदभिज्ञाने को हेतुस्तत्राह–अभिविपण्यव इति। अभितः सर्वतः इह लोके परलोके च विगतपणयुक्ताः सर्वव्यवहारातीताः। यो हि यदभ्यासं करोति स तं पश्यति। यथा व्यवहारनिपुणाः तोलनादिविना (तैलादिना) पदार्थसमतां विषमतां वा जानन्ति तथा ये व्यवहारं परित्यज्य सर्वथा ब्रह्मानुचिन्तकाः ते सर्वत्र ब्रह्मैव पश्यन्ति, न तु विकारजातम्। तच्च सममेव। ननु ब्रह्मैव पश्यन्तु नाम, सममेव पश्यन्तीत्यत्र को हेतुः ? ब्रह्म सममेवेति (ब्रह्मसममेवेति) चेत् एतदेव विचार्यते। समं विषमं चेति। तस्मात् समतायां हेतुरतिरिक्तो वक्तव्य इति चेत्तत्राह–एकरसमिति। रसस्त्वनुभवगम्यः। सर्वत्रैव च तेषां रतिः समा। अन्यथा अनुभवविरोधे दृष्टिः समा न स्यात्। लोके रसवैलक्षण्याभिज्ञाः विलक्षणरसेषु पदार्थेषु तुल्यरूपेष्वपि विषमदृष्टय एव भवन्ति। 'ब्राह्मणे पुल्कसे स्तेने' इति वाक्ये समदृष्टेर्निरूपितत्वात्। अतो भगवान् सर्वसम एव सर्वानुस्यूतः प्रवि इति जगद्रूपेण प्रविश्य क्रीडन्नपि निर्दुष्ट इति निरूपितम्।

"सर्वत्र भगवांस्तुल्यः सर्वदोषविवर्जितः। क्रीडार्थमनुकुर्वन् हि सर्वत्रैव विराजते॥" ॥६॥१९॥

श्रीसुबोधिनीसारः

स्वकृतासु विचित्रासु योनिषु देहादिषु हेतुतया उपादानः तथा तरतमो न्यूनाधिकभावेन चकास्ति अनलोऽग्निरिव स्वकृतय योनीरनुकरोतीति तथा। अथातो वितथासु मिथ्याभूतासु अमूषु योनिषु अवितथं सत्यं यतः समम् एकरसं तव धाम स्वरूपं विरजधियो निर्मलमतयोऽन्वयन्ति जानन्ति अभिविपण्यवः सर्वतो विगतव्यवहारा निवृत्तिपराः ॥६॥१९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु ईश्वरस्यापि यदि जीववदुदरादिसम्बन्धोऽस्ति तदा केन विशेषेण तस्योपास्यत्वम् इत्याशङ्क्याहुः–स्वकृतेति। स्वेन कृतासु विचित्रासु उच्चनीचमध्यमासु योनिषु अभिव्यक्तिस्थानेषु देवतिर्यङ्मनुष्यादिदेहेषु हेतुतया उपादानतया प्रागेव विद्यमानत्वे मुख्यप्रवेशासम्भवाद्विशन्निव वर्तमानस्त्वं तरतमतः उत्कृष्टापकृष्टभावेन चकास्सि अवभाससे। तत्र हेतुमाह–स्वकृतानुकृतिरिति। स्वकृता योनीरनुकरोतीति। तत्र दृष्टान्तमाहुः–अनलवदिति। अग्निर्यथा स्वतस्तारतम्यहीनोऽपि काष्ठानुसारेण दीर्घह्रस्वस्थूलसूक्ष्मरूपोऽवभासते तथेत्यर्थः। अथ अत एव वितथासु उत्पत्त्यादिनानाविकारवतीषु अमूषु योनिषु अवित सर्वविकाररहितमत एव समं तुल्यं सर्वदा एकरसमेकरूपं तव धाम विरजधियो निर्मलमतयोन्वयन्ति जानन्ति। ननु नानाविधव्यवहार कथं बुद्धेर्निर्मलत्वम् इत्याशङ्क्याहुः–अभिविपण्यव इति। अभितो विगतव्यवहाराः। "पण व्यवहारे" इत्यस्य धातो पण्युरिति। ऐहिकामुष्मिकफलकर्मरहिता इत्यर्थः। तथा चाप्रच्युतस्वभावत्वात् सर्वोपास्यत्वं युक्तमेवेत्याशयः ॥१९॥६॥

अन्वितार्थप्रकाशिका

ईश्वरस्यापि जीववदुदरादिसम्बन्धे तारतम्यमाशङ्क्याहुः–स्वकृतेति। स्वकृतविचित्रयोनिषु हेतुतया विशन्निव वर्तमा स्वकृतानुकृतिः त्वम् अनलवत् तरतमतश्चकास्सि। अथ वितथासु अमूषु योनिषु अवितथं समम् एकरसं च तव धाम अभिविपण्य विरजधियः अन्वयन्तीत्यन्वयः। स्वेनैव कृतासु विचित्रासु उच्चनीचमध्यमासु योनिषु अभिव्यक्तिस्थानेषु देवतिर्यङ्मनुष्यादिदेहेषु हेतुतया उपादानतया प्रागेव विद्यमानत्वेन मुख्यप्रवेशासम्भवाद्विशन्निव वर्तमानः स्वकृताः योनीरनु इति तथाभूतस्त्वम् अनलवत् अग्निर्यथा स्वतस्तारतम्यहीनोऽपि काष्ठानुसारेण दीर्घह्रस्वस्थूलसूक्ष्मरूपोऽवभासते तथा तर उत्कृष्टापकृष्टभावेन चकास्सि अवभाससे न तु वस्तुतस्तारतम्यम्।

तथा च श्रुतिः —

"एको देवः स
इति॥ तत्सृष्ट्वा तदेवानुप्र
अथ अत एव वि
तव धाम स्वरूपम् अ
ऐहिकामुष्मिकफलकर्मरहि

प्रकारान्तरेण दहरा
कर्त्रा कृता विचित्राः योनयो
योनिशब्दो लक्षणया शरीरवा
अन्यथा विशन्नेवेत्यवक्ष्यन् अ
अनलवत् वह्निवत् स्वकृतानु
तरतमतस्तारतम्येन न्यूनाधिक
यथा वह्निः स्वतस्तारतम्यहीनो
च श्रुतिः —

"अग्निर्यथैको भुवनं प्र

बहुस्यामिति श्रुत्यनुसा
बोद्धव्यः। ननु प्राकृतभावेषु
योनिषु वितथासु नष्टासु सतीषु
रजशब्दोऽकारान्तोऽप्यस्ति। पृषो
रूपं पण्युरिति॥ ऐहिकामुष्मिकक
कर्मणि तथा अन्वयन्ति अ
ज्ञापकादनुदात्तेत्त्वलक्षणात्मनेपदस्या
समं तव धाम तव निकेतं तद्व्याप्यमि
शेषं पूर्ववत्॥१९॥६॥

एवमुपासनास्थानप्रसङ्गात्
परमप्राप्यत्वमाहुः॥ स्वकृतेति॥ हेतुत
देवमनुष्यादिविचित्रभवत्कृतशरीरकेषु
ज्ञानाल्पत्वमहत्त्वादिभावेन, स्वकृता
स्वतस्तारतम्यहीनोऽपि तृणकाष्ठानुसारेण
यद्यप्येवमथापीत्यर्थः। अमूषु योनिषु
सर्वानुप्रवेशकृतकार्यगतदोषसंस्पर्शरहिति
अभिविपन्यवः विविधत्वद्गुणतादात्म्यकस
"सर्वज्ञः सर्वदृक् सर्वज्ञानशक्तिब

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥"
तत्सृष्ट्वा तदेवानुप्राविशत् ॥ इति च ॥

अथ अत एव वितथासु मिथ्याभूतासु योनिषु अवितथं सर्वविकाररहितं सत्यमत एव सममविशेषं सर्वदा एकरसमेकरूपं धाम स्वरूपम् अभिविपण्यवः अभितो विगतव्यवहाराः "पण व्यवहारे" इत्यस्य धातो रूपं पण्युरिति । मुष्मिकफलकर्मरहिता इत्यर्थः । विरजधियो निर्मलमतयोऽन्वयन्ति जानन्ति ॥१९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रकारान्तरेण दहराकाशाख्याक्षरपदनिरूपणमाहुः–स्वकृतेति । हे भगवन्! स्वकृतविचित्रयोनिषु स्वेन कर्मणा करणेनेशेन कृता विचित्राः योनयो देहाः येषां तेषु ईश्वरेण जीवकर्मानुगुणं कृतोच्चनीचमध्यमदेहेषु शरीरविशिष्टक्षेत्रज्ञेषु इत्यर्थः ॥ अत्र ब्दो लक्षणया शरीरवाची हेतुतया विशन्निव सर्वकारणतया स्वयं प्रविष्ट इव अत्रेवशब्दो भगवतस्ततो व्यतिरेकत्वं द्योतयति विशन्नेवेत्यवक्ष्यन् अतः स्वयं तु स्वधामनि स्थितः सन् स्वधामाक्षरशक्त्या व्याप्त इत्यर्थः । व्याप्तिप्रकारमाहुः — वत् वह्निवत् स्वकृतानुकृतिः स्वकृता योनीरनुकरोतीति तथाभूतः सन् तत्तत्कर्मफलप्रदानार्थं स्वकृतसमानाकारः सन् तारतम्येन न्यूनाधिकभावेनेति यावत् ॥ तरतमशब्दौ तद्धितप्रतिरूपकौ निपातौ । तयोरत्र भावप्रधानो निर्देशः । चकास्सि वह्निः स्वतस्तारतम्यहीनोऽपि महदल्पकाष्ठानुसारेण प्रकाशते तद्वत्कर्मानुगुणप्राप्तशरीरविशिष्टजीवानुसारेण भासीत्यर्थः । तथा श्रुतिः —

"अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एवं तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥" इति ॥

बहुस्यामिति श्रुत्यनुसारेण स्वकर्मानुगुणशरीरविशिष्टं क्षेत्रज्ञं प्रति तत्तत् प्रकाशनार्थं तत्तद्रूपो जात इत्यस्या अर्थो ः । ननु प्राकृतभावेषु नष्टेषु सत्सु क्षेत्रज्ञानां तद्व्याप्ताक्षरस्य च नाशो भवेदित्याशङ्कायामाहुः–अथानन्तरम् अमूषु वितथासु नष्टासु सतीषु अवितथम् अविनाशि सममन्यूनाधिकं तव धाम अक्षरपदं विरजधियो निर्मलबुद्धयः ऽकारान्तोऽप्यस्ति । पृषोदरादित्वात् सकारलोपो वा । अभिविपण्यवः अभितो विगतव्यवहाराः 'पण व्यवहार' इत्यस्य पण्युरिति ॥ ऐहिकामुष्मिककर्मफलरहिता इत्यर्थः ॥ आत्मकैवल्यैप्सवो जनाः एकरसम् एक एव रस आनन्दस्वादो यस्मिन् तथा अन्वयन्ति अनुभवन्ति वा प्राप्नुवन्ति ॥ इण गताविति धातोर्लट् चक्षिङो ङित्करणात् नुदात्तेत्त्वलक्षणात्मनेपदस्यानित्यत्वेन व्यत्तयो बहुलमिति बाहुलकात्पदव्यत्ययेन वा परस्मैपदम् ॥ यद्वा ॥ ज्ञानैकाकारेण धाम तव निकेतं तद्व्याप्यमिति यावत् । क्षेत्रज्ञानां शुद्धं स्वरूपं यस्यात्मा शरीरमिति श्रुतिवचनात् ॥ अविनाशि जानन्ति ॥ वत् ॥१९॥६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवमुपासनास्थानप्रसङ्गात् परमात्मनोऽशुचिदेहसम्बन्ध उक्तः, परं तु अशुचिदेहे, प्रविष्टत्वेऽप्यस्य निर्दोषतया वमाहुः ॥ स्वकृतेति ॥ हेतुतया तव सर्वोपादानत्वेन हेतुना, स्वेन त्वया कृता निर्मिता विचित्रा योनयो देहा येषां तेषु, दिविचित्रभवत्कृतशरीरकेषु जीवेष्वित्यर्थः । विशन्नन्तरात्मतया प्रविशन् इव, इवशब्दोऽनतिरिक्तार्थः । तरतमतः महत्त्वादिभावेन, स्वकृता योनीरनुकरोतीति स्वकृतानुकृतिः सन्, अजलवदग्निवत्, चकास्सि । यथाऽग्निः हीनोऽपि तृणकाष्ठानुसारेण तथा तथा प्रकाशते तद्वत् । तथा च "एको देवः सर्वभूतेषु गूढः ।" इत्याद्याः श्रुतयः । वमथापीत्यर्थः । अमूषु योनिषु, वितथासु अविद्यमानासु, उपसंहृतास्वित्यर्थः । अवितथमनुपसंहृतं, कुतः । सममेकरूपं, कृतकार्यगतदोषसंस्पर्शरहितमित्यर्थः । तत् कुतः । एकरसमविच्छिन्नानन्दं, तव धाम स्वरूपं, विरजधियः निर्मलमतयः, वः विविधत्वद्गुणतादात्म्यकस्तुतियुक्ताः सन्तः, अन्वयन्ति प्राप्नुवन्तीत्यर्थः । अत्र

"सर्वज्ञः सर्वदृक् सर्वज्ञानशक्तिबलर्द्धिमान् । अन्यूनश्चाप्यवृद्धश्च स्वाधीनोऽनादिमान् वशी ॥

क्लमतन्द्राभयक्रोधकामादिभिरसंयुतः । निरवद्यः परप्राप्तिर्निरधिष्ठोऽक्षरक्रमः ॥"

इति स्मृत्यर्थोऽप्यनुसन्धेयः ॥६॥ ॥२०॥

योगिरामानुजाचार्यकृतसरला व्याख्या

ईश्वरस्य सर्वानुप्रवेशेऽपि तद्गतदोषैरसंस्पृष्टत्वमाहुः-स्वकृतेति । स्वकृतेषु स्वेनैव निर्मितेषु विचित्रेषु उच्चनीचादिभावेन नानारूपेषु योनिषु देवमनुष्यादिशरीरेषु हेतुतया उपादानकारणत्वेन हेतुना विशन्निव प्रवेशं कुर्वन्निव पूर्वमेव स्थितस्य यथार्थानुप्रवेशासम्भवात् विशन्निवेत्युक्तम् । अनलवत् स्वकृतनुकृतिः स्वकृताः देवमनुष्यादियोनीरनुकरोतीति अनुकृतिः । एवम्भूतस्त्वं तरतमतः उत्कृष्टापकृष्टभावेन चकास्सि भाससे । यथा वह्नेः स्वभावतः स्थूलदीर्घवक्रवर्तुलत्वाद्यभावेऽपि स्वाश्रयद्रव्योपाधिना स्थूलदीर्घवक्रवर्तुलादिरूपत्वं तथा ईश्वरस्यापि स्वनिर्मितदेवमनुष्यादिशरीरानुप्रवेशकृतं देवमनुष्याद्याकाररूपतारतम्यापत्तिरिति भावः । अथ अनन्तरम् अमूषु देवमनुष्यादियोनिषु वितथासु पूर्वाकारं परित्यज्योत्तरोत्तरविकारं प्राप्तवतीषु विनष्टास्वित्यर्थः । अवितथं विकाररहितम् । पूर्वाकारं परित्यज्य आकारान्तरप्राप्तिशून्यमित्यर्थः । अत एव समं न्यूनाधिकभावरहितम् एकरूपं तव धाम स्वरूपम् । अभिविपण्यवः । अभितः सर्वदेशकालावस्थासु विपण्यवः विशेषेण भगवत्स्तोत्रपराः सन्तः 'पण व्यवहारे स्तुतौ च' इति धातोः रूपम् । अथवा । अभितः सर्वतः विगतः पण्युर्व्यवहारः येषां ते भगवद्भजनानुपयुक्तसर्वव्यवहाररहिताः इत्यर्थः —

'सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी । नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥'

इति भगवदुक्तेः । एवम्भूताः विरजधियो निर्मलज्ञानाः अन्वयन्ति जानन्ति भजन्तीति भावः । ज्ञअनस्य भक्तिप्रधानकत्वात् भक्तिरिहाभिधीयते । 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।' इति श्रुतेः । स्वकृतविचित्रयोनिषु हेतुतया विशन्निव अनलवत् स्वकृतानुकृतिः तरतमतश्चकास्सि । अथामूषु वितथासु अवितथं समम् एकरसं तव धाम विरजधियः अभिविपण्यवः सन्तः अन्वयन्तीत्यन्वयः ॥१९॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

तदनुप्रविष्टस्य हृदयोदरादिप्रविष्टस्य तारतम्ये हृदयाद्युपाधिगतन्यूनाधिकतयोपाहितस्य ब्रह्मणोऽपि न्यूनाधिकत्वे सतीत्यर्थः । एक उपाधिभेदेऽपि स्वाचिन्त्यशक्त्या भेदशून्यः अयं(पि) देवः सर्वोपास्यभूतस्थत्वे हेतुः आकाशवत् सर्वव्यापी साक्षी साक्षाद्द्रष्टा । स्वतो जडस्यापीश्वरस्य नित्यज्ञानयोगाद्द्रष्टृत्वमिति तार्किकमतं निराचष्टे । चेता ज्ञानस्वरूपः केवलः शुद्धो यतो निर्गुणः प्राकृतगुणशून्यः अतो वस्तुतस्तारतम्यशून्यस्यैव तथाभानात् यथाधिष्ठानरज्जुसत्तया सद्वद्भासमानासु मिथ्याभूतासु सर्पभूदलनाम्बुधारासु अनुगता रज्जुरेव सत्या । तथा मिथ्याभूताष्वमूषु सत्यमित्यर्थः । अत्र निर्मलमतित्वे ज्ञाने वा अतो व्यापकत्वे सर्वत्र सत्त्वात् ॥१९॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

नन्वीश्वरस्यापि तर्हि जीववदुदरादिसम्भन्धे तदनुप्रविष्टस्य च तारतम्ये सति परिहरन्त्यः श्रुतय आहुः-स्वकृतेति ।

हे अनन्त ! स्वकृतविचित्रयोनिषु स्वयं कृतासु उच्चनीचमध्यमासु योनिषु देहेषु हेतुतया उपादानतया विशन्निव तरतमतो न्यूनाधिकभावेन त्वं चकास्सि अवभाससे । कथम्भूतः । स्वकृतानुकृतीः स्वकृता योनी च मध्यमासु योनिरनुकरोतीति तथा इत्यर्थः । कथनं समासस्तु स्वकृतासु योनिषु अनुकृतिः अनुकरणं यस्य । अनलवत् अग्निर्यथा स्वतस्तारतम्यहीनोऽपि कारणानुसारे तथा भासते तद्वत् । अथ अतः कारणाद्विरजधियो निर्मलमतयः वितथासु मिथ्याभूतासु अमूषु तव धाम स्वरूपम् अवयन्ति जानन्तीति । नु इति पृथक् पदम् वा । नु यन्तीत्यनुभवन्ति । कथम्भूतं धाम । अवितथं सत्यं समम् अविशेषणम् एकरसं सन्तः विरजधियः । कथम्भूताः ? अभिविपण्यवः अभितो विगता पण्यवो व्यवहारा येषां ते "पण व्यवहारे" इत्यस्य रूपं पण्युरिति

ऐहिकामुष्मिककर्मफलरहि
भावः । श्रुतिः ——

"एको देवः सर्व

इति स्वरूपनिरू
भजामहे । भगवन्तं वयं भ
विवर्जितम् । अत एव सर्वा

अथ कार्यान्तःप्रवि
उत्पत्तयो येषां तेषु । देवादि
विशन्निवेत्युक्तम् । 'तदनु
अल्पत्वमहत्त्वादियुक्तश्चका
स्वकार्यपरिणामानुकारीत्यर्थः
अविच्छिन्नानन्दम् । तव धाम
इत्यस्य रूपं पण्युरिति ॥१९॥

निर्मल बुद्धियुक्त ज्ञा
करते है और प्राप्त होते है ।
से आपकी स्तुति करने वाले

स्वकृतपुरेष्वमीष्वब
इति नृगतिं विविच्य

श्रुतयः, अबहिरन्तरसंव
वदन्ति, वस्तुतः, इति, नृगतिम
भवतः, अङ्घ्रिम्, उपासते ॥२०

अपि च कुतोऽन्वियमाश
भगवद्भावं लक्षणया बोधयन्त्यस्तं
कत्वर्थस्याऽऽत्मनः स्तुतिरियमीश्वरत
गुणे । तस्यैते कथिता ह्यर्थाः प्रका

---

१. निःश्वसिताः - वीर ।

मुष्मिककर्मफलरहिता इत्यर्थः । अविशेषत्वादेकरसं सन्मात्रम् अतस्तवोपाधिकृततारतम्याभावादप्रच्युतैश्वर्यस्योपास्यत्वमिति श्रुतिः ——

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥"

इति स्वरूपनिरूपणपरेयम् । सुगमं स्वामिनाम् । स्वनिर्मितेषु कार्येषु तारतम्यविवर्जितं सर्वानुस्यूतं सन्मात्रं भगवन्तं हे। भगवन्तं वयं भजामहे । कथम्भूतं कार्येषु देहेषु तारतम्यविवर्जितम् । तरतमस्य भावस्तारतम्यम् । न्यूनातिरिक्तत्वं तेन तम्। अत एव सर्वानुस्यूतं सन्मात्रम् । सर्वानभिव्याप्य स्थितम् । सन्मात्रमेकरसम् । सर्वानुस्यूतं च सन्मात्रं चेति ॥१९॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ कार्यान्तःप्रविष्टस्यापि निर्दोषतया परमप्राप्यत्वमाह–स्वकृतेति । स्वकृतविचित्रयोनिषु स्वेनैव कृता विचित्रयोनयः येषां तेषु । देवादिशरीरेषु विशन्निव पूर्वमेव सर्वान्तरात्मतया विद्यमानत्वात्कार्यरूपचिदचिन्नियन्तृतया अनुप्रवेशात् निवेत्युक्तम् । 'तदनुप्रविश्य सच्च त्यच्चाभवत्' इति श्रुतेः । हेतुतया जीवान्तरात्मतया तिष्ठन् तरतमतः तमहत्त्वादियुक्तश्चकास्सि प्रकाशसे । कीदृशस्त्वम् । सुकृतानुकृतिः । स्वकार्यमनुकरोतीति स्वकृतानुकृतिः । र्यपरिणामानुकारीत्यर्थः । अथ तासु वितथासु उपसंहृतासु अवितथम् असंहृतं समं कार्यानुप्रवेशतारतम्यरहितम् एकरसम् नन्दम्। तव धाम स्वरूपम् । विरजधियः अवयन्ति उपासते । अभिविपण्यवन्ति प्राप्नुवन्ति चेत्यर्थः । 'पण व्यवहारे' रूपं पण्युरिति ॥१९॥

कृष्णप्रिया

निर्मल बुद्धियुक्त ज्ञानीजन आपके स्वरूपको अविनाशी दोशरहित विच्छेद शून्य आनन्द रूपसे उपासना है और प्राप्त होते है । यदि आन्वयंत्यभिविपण्व एकरस इस प्रकार का पाठ हो तो सर्व प्रकार नाना भांति पकी स्तुति करने वाले निर्बल बुद्धियुक्त ज्ञानीजन आपके उक्त स्वरूप को प्राप्त होते है ॥१९॥

स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणं तव पुरुषं वदन्त्यखिलशक्तिधृतोंऽशकृतम् ।
इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेऽङ्घ्रिमभवं भुवि विश्वसिताः ॥२०॥

कर्दमक्षमा

श्रुतयः, अबहिरन्तरसंवरणम्, अपि, अमीषु, स्वकृतपुरेषु, वर्तमानम्, पुरुषम्, अखिलशक्तिधृतः, तव, अंशकृतं, वस्तुतः, इति, नृगतिम्, विविच्य, भुवि, वर्तमानाः, कवयः, विश्वसिताः, सन्तः, निगमावपनम्, अभवम्, अङ्घ्रिम्, उपासते ॥२०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

अपि च कुतोऽन्वियमाशङ्का स्याद्भगवतो देहाद्युपाधिकृतदोषप्रसङ्ग इति यतोऽविदाकामकर्मभिः संसरतो जीवस्यापि लक्षणया बोधयन्त्यस्तं दोषं निषेधयन्ति "स यश्चायं पुरुषे यश्चासावादित्ये स एकः तत्त्वमसि" इत्याद्याः श्रुतयः ननु ऽऽत्मनः स्तुतिरियमीश्वरत्वेन क्रियते न तु तस्येश्वरत्वं बोध्यते नैतद्युज्यते यतस्तत्र "यस्य देवे परा भक्तिर्यथा देवे तथा स्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इत्याद्याः श्रुतयः कृतावतारस्य भगवतश्चरणभजनमुपायं वदन्तीत्याह–

ताः - वीर. ।

स्वकृतपुरेष्विति । स्वकर्म्मोपार्जितेषु परेषु देहेष्वमीषु नरादिषु भोक्तृत्वेन वर्तमानं पुरुषमखिलशक्तिधृतः सर्वशक्त्याश्रयस्य पूर्णस्य तवांशकृतं वदन्ति अंश इवांशः कृत इव कृतः त्वद्रूपं वदन्तीत्यर्थः । ननु कार्यकारणसंवृतस्य कुत एवम्भूतत्वं तवा अबहिरन्तरसंवरणमिति । बहिः कार्यमन्तरं कारणम् वस्तुतस्तदावरणशून्यम् तयोरसत्त्वादित्यर्थः । इत्येवं नृगतिं नुर्जीवस्य गतिं तत्त्वं विविच्य विशोध्य कवयोऽन्यथेदं न प्राप्यत इति जानन्तो निगमावपनं निगमोक्तकर्मणामावपनमासमन्तादुप्यतेऽस्मिन्नित्यावपनं क्षेत्रं सर्वकर्मार्पणविषयमित्यर्थः । यत्रार्पितानि कर्माणि मुक्तिफलं फलन्ति तं भवतोऽङ्घ्रिमभवं भवनिवर्तकं विश्वसिताः कृतविश्वासाः उपासतेऽर्चनवन्दनादिभिः सेवन्ते भुवीति मर्त्यलोके इदमेवोचितमिति दर्शयन्ति ।

त्वदंशस्य ममेशान त्वन्मायाकृतबन्धनम् । त्वदङ्घ्रिसेवामादिश्य परानन्द निवर्तय ॥७॥ ॥२०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — अत्र पूर्वोक्तार्थासम्भवमाह-अपि चेति । यतो हेतोरविद्याकामकर्मभिः देहादावात्मबुद्धिरविद्या तद्वशेन विषयेच्छा कामस्तन्निष्पत्तये कर्माणि क्रियान्त इति तेन च संसार इति संसरतो जीवस्य लक्षणया भागत्यागरूपया भगवद्भावमीश्वरतां बोधयन्त्यः श्रुतयस्तद्दोषं देहाद्युपाधिकृतसङ्गदोषं निषेधयन्ति । ततो हेतोर्भगवतोऽप्रच्युतज्ञानैश्वर्यस्येयमाशङ्का देहाद्युपाधिकृततारतम्यादिरूपा शङ्का । नु वितर्के । कुतः स्त्याकथं सम्भवेन्न कथमपीति भावः । श्रुतीराह- "स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः ।" "अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नःप्रज्ञानघन एव ।" इति "तत्त्वमसि ।" इत्याद्या इहादिनाऽयमात्मा ब्रह्मेत्यादिग्रहः । अर्थः — परमे व्योम्नि आकाशाद्यन्नमयान्तं कार्यं सृष्ट्वा तदेवानुप्रविष्टो यः स एवायं पुरुषः । अयं कः यश्चासावादित्ये वर्तते । स एक एव भवति । अयमात्माऽनन्तरः अन्तरशून्यः । अबाह्यो बाह्यशून्यः । कृत्स्नः पूर्णः । ज्ञानघनो ज्ञानस्वरूप इति । तत्त्वमसीति व्याख्यातचरम् । पुनराक्षिपत्यत्र-नन्विति । क्रतुर्यज्ञोऽर्थः प्रयोजनं यस्य स तथा यज्ञकर्तेत्यर्थः । आत्मनः पुरुषस्य तत्त्वमसीत्यादि वाक्यैः स्तुतिरियं न तु तस्य यज्ञकर्तुः । परिहरति-नैतदिति । एतद्यज्ञकर्तुः स्तवनं न युज्यते युक्तं यद्यहो हेतोः भगवद्भक्तियुक्तस्यैव कथितार्थाः श्रुतितात्पर्यविषयीभूतार्था अतस्तत्रात्मज्ञानं यस्येत्याद्याः कृतावतारस्य रामकृष्णादिविग्रहस्य चरणभजनमुपायं तत्प्राप्तिकारणं वदन्तीति योज्यम् । श्रुतीराह-"यस्य देवे" इति । श्वेताश्वतरेण कथिता अर्थाः पदार्थास्तस्यैव महात्मनः प्रकाशन्ते यथावत्स्फुरन्ति नान्यस्येत्यर्थः । कस्येत्याकाङ्क्षायामाह-यस्य पुरुषस्य देवे परमेश्वरे परा फलाभिसन्धानशून्या भक्तिरनुरागो भवति । यथा देवे तथैव चेद्गुरौ तदर्थोपदेष्टरि भक्तिर्भवेत्तस्येत्यर्थः । स्मादेवं ब्रह्मविद्यार्थिभिर्देवतागुरुविषया निरुपाधिर्भक्तिः कार्येति दर्शितम् । इत्यर्थ इति- "निष्कलं निष्क्रियं शान्तम्" इत्यादिश्रुत्या निरंशत्वबोधनादिति भावः । अत्राशङ्कते-नन्विति । कार्यं देहादि कारणमज्ञानं ताभ्यां संवृतस्याच्छन्नस्य । एवम्भूतत्वं भगवद्रूपत्वम् । इत्यर्थ इति-न ह्यसद्भ्यां कार्यकारणाभ्यां स्वाभाविकी सद्रूपताऽपाकर्तुं शक्येति भावः । तत्त्वं स्वरूपम् । अन्यथा भक्तिं विना इदं ज्ञानं नाप्येत ।

"श्रेयःस्रुतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये । तेषामसौ क्लेशल एव शिष्यते॰" इत्याद्याः । इत्यर्थ इति-सुक्षेत्रार्पितं बीजं शुभफलाय भवतीति भावः । अंशकृतमिति । गोपालतापनीये — "ब्रह्मणोंशभूतस्तथेतरो भोक्ता" इति । नारदपञ्चरात्रे-प्राधानिकसर्गमुक्त्वा शुद्धसर्गकथने —

"यत्तटस्थं तु चिद्रूपं स्वसंवेद्याद्विनिर्गतम् । रञ्जितं गुणरागेण स जीव इति कथ्यते ॥" इति ॥

गीतासु च — "ममैवाशो जीवलोके जीवभूतः सनातनः ।" इति । अङ्घ्र्युपासनमाह श्रुतिः —

"चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन शुद्धेन पवित्रेण पूतेनातिपाप्मानमरातिं तरेम ॥

लोकस्य द्वारमर्चिष्मद्भ्राजमानं महस्वदमृतस्य धारा बहुधा दोहमानं चरणं लोके सुधितां ददातु ॥" इति ।

अर्थः — श्रीकृष्णस्य कृतत्रिविक्रमरूपस्य चरणं याचमाना आहुः-येन पातक्यपि पूतः पवित्रः सन् दुष्कृतानि पापानि तरति तच्चरणं पवित्रकरम् । विततं विस्तीर्णम्-भूर्भुवःस्वरतिक्रम्य वर्तमानम् । पुराणं सनातनम् । तेन चरणेनारातिं वैरिणं पापं

वयमतिशयेन तरेम
सुधितां सुधाधारां द
केवलमेतावदपि तु
धर्मार्थकाममोक्षभक्ति
त्वदंशस्येति सुगमम्

श्रीधरानुयायि
द्रढयति-स्वकृतेति ।
स्वरूपम्- "ममैवांशो
शरीरादेर्मिथ्यात्वात् ।
कुर्वन्सिद्धिमवाप्स्यसि'
"मामेव ये प्रप
यद्वाऽखिलशक्तिधृतस्
जीवमुद्दिश्याबहिरन्तरसंव
ऐहिकेषु स्वप्रारब्धरचितेषु
बन्धनान्मुक्तिरिति विश्वसित
इत्यर्थः ॥★॥

विश्वनाथी —त
जीवतत्त्वानुवादिनीनां श्रुती
त्वत्तो भिन्नत्वेनाभिन्नत्वेन
ब्रह्मणोंऽशभूतस्तथेतरो भोक्त
सनातनः ।" इति गीतोप
अखिलशक्तिधृत इति ।

"विष्णुशक्तिः परा
इति विष्णुपुराणोक्ता
"भूमिरापोऽनलो वा
अपरेयमितस्त्वन्यां प्र
एतद्योनीनि भूतानि स
मत्तः परतरं नान्यत् कि
इति श्रीभगवतः प्रकृतिद्व
शक्तयः कार्यमात्रगम्याचिन्त्यप्र
नित्यमेव वर्तन्त इति स्थिते तव त
युज्यते तदभावे महदादिवन्
अन्तस्तवान्तरङ्गस्वरूपत्वेऽसंव
च्छाययोरन्तरालवर्तिमयूखपर

मतिशयेन तरेम। किम्भूतेन। शुद्धेन स्वयम्भूदत्तार्घजलधौतेन। पुनश्च पवित्रेण पवित्रकारकेण पूतेन निर्मलेन। तच्चरणं लोके र्षितां सुधाधारां ददातु। तारकादित्वादितच्। किम्भूतम्। लोकस्य वैकुण्ठस्यार्चिष्मद्दीपवत् द्वारं भ्राजमानं देदीप्यमानम्। न वलमेतावदपि तु महस्वत् महः ब्रह्मतेजोमण्डलं तद्युक्तम्। अत एव लोके बहुधा बहुप्रकारा अमृतस्य धारा र्थकाममोक्षभक्तिरूपाः कामधेनुरिव भक्तेभ्यो दोहमानमत एवम्भूतं चरणं भजामेत्यर्थः। भक्तिपरेयं श्रुतिः। स्वामिनां स्येति सुगमम् ॥★॥

श्रीधरानुयायिनी — एवं परमात्मानमुपास्यं निरूप्य जीवात्मानं तदंशतुल्यत्वेन निरूपयन्कैमुतिकन्यायेन प्रागुक्तमेव यति-स्वकृतेति। यतः स्वप्रारब्धोपार्जितेषु मनुष्यादिदेहेषु भोक्तृत्वेन वर्तमानमपि जीवं "जातावेकत्वम्।" सर्वशक्तेस्तव रूपम्- "ममैवांशो जीवलोके जीवभूतः सनातनः।" इति श्रीगीतोक्तेर्वस्तुतो देहाद्यनावृतं च विवेकिनो वदन्ति भेदकोपाधेः रादेर्मिथ्यात्वात्। अत एव जीवतत्त्वं विवेकिनो विशोध्य यत्रार्पितानि वैदिकानि कर्माणि "मदर्थमपि कर्माणि र्वसिद्धिमवाप्स्यसि" इति भगवदुक्तेर्मोक्षदायकानि भवन्ति। तं गर्भवासादिदुःखहरं कल्पपादपं तव पादपद्मम्। भारतखण्डे मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।" इत्यादिभगवद्वाक्ये कृतविश्वासा भजन्ति। ऽखिलशक्तिधृतस्त्वांशोऽयमतस्तत्कृतमभक्तदण्डनार्थं स्वरचितेषु पुरेषु रौरवादिनरकेषु पुरुषं देहादिलम्पटं मुद्दिश्याबहिरन्तरसंवरणम् अबहिर्यथा स्यात्तथा चौरमुद्दिश्य कारागार इवान्तरेव संवरणं बन्धनं वदन्ति तथा नरकभोगानन्तरममीषु केषु स्वप्रारब्धरचितेषु पशुपक्ष्यादिविचित्रशरीरेषु संवरणमित्येवं जीवगतिं विविच्य विचार्य कवयः शास्त्रतात्पर्यज्ञास्त्वत्कृपयैव न्मुक्तिरिति विश्वसिताः सन्तो भुवि भारतखण्डे निगमानां वेदोक्तकर्मणामावपनं क्षेत्रमत एवाभवं भवनिवर्तकं भवतोऽङ्घ्रिमुपासत त्यर्थः ॥★॥

विश्वनाथी —तदेवमन्तर्यामित्वांशेऽपि भगवतः शुद्धत्ववर्णनेन तत्पराणां श्रुतीनां वचनं श्रुत्वा स्वानुगृहीतानां त्वानुवादिनीनां श्रुतीनामपि तत्रैव तात्पर्यं काश्चिदन्याः श्रुतयो वर्णयन्ति-स्वकृतपुरेषु पूर्वोक्तेष्वेव वर्तमानं पुरुषं जीवसमूहं तो भिन्नत्वेनाभिन्नत्वेन वा या वदन्ति तास्त्वांशेनैव कृतं सिद्धं वदन्ति। तथाऽभिप्रायेणैव वर्णयन्ति नान्यथेत्यर्थः। णोंऽशभूतस्तथेतरो भोक्ता भवतीति श्रीगोपालतापनीश्रुतेः। ननु-कथमपरिच्छेद्यस्यांशत्वं तथा "ममैवांशो जीवलोके जीवभूतः नातनः।" इति गीतोपनिषदुक्तम्। "द्वा सुपर्णा सयुजा सखाया" इत्यादिश्रुत्युक्तञ्च नित्यत्वं स्यात्। अत्राहुः- खिलशक्तिधृत इति।

"विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा। अवीद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते॥"

इति विष्णुपुराणोक्तानुसारेण;

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मेपराम्। जीवभूतां महाबाहो ययेदं धार्यते जगत्॥
एतद्योनीनि भूतानि सर्वाणीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥
मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥"

इति श्रीभगवतः प्रकृतिद्वयतत्कार्यसाधकत्वसूचनया दर्शितस्वरूपशक्तिपर्यन्तश्रीगीतोपनिषदनुसारेण च या अखिलास्त्रिविधाः कार्यमात्रगम्याचिन्त्यप्रभावास्ता धरसि। यस्त्वं तस्य तावत्तादृश्यः शक्तय एव तत्तद्दोषं विनैव तत्तद्दुर्घटं सम्पादयन्त्यो मेव वर्तन्त इति स्थिते तव तादृशक्त्याद्यात्मकजीववृन्दरूपांशो नित्यमेव वर्तत इत्यर्थः। ननु-तर्हि मत्स्यदेवादिवदैश्वर्यमेवास्य तदभावे महदादिवन्मायिकत्वमेव वा। तत्राहुः-अबहिरन्तरसंवरणमिति। न विद्यते बहिर्मायिकत्वे वान्तरङ्गस्वरूपत्वेऽसंवरणं व्याप्तिर्यस्य तथाभूतमित्यर्थः। श्रीविष्णुपुराणादावान्तरालपाठान्मार्तण्डमण्डल- योरन्तरालवर्तिमयूखपरमाणुवृन्दमिवेति भावः। अतो मण्डलस्थानीयस्य भगवत एव स्वल्पशक्ति-

व्यक्तिमयाविर्भावविशेषत्वात्स्वांशत्वं श्रीमत्स्यदेवादीनां रश्मिस्थानीयत्वाद्विभिन्नांशत्वं जीवानामिति तत्त्ववादिनः। अत्र तदुदाहृतं महावाराहवचनञ्च —

"स्वांशश्चाथ विभिन्नांश इति द्वेधांश इष्यते। अंशिनो यत्तु सामर्थ्यं यत्स्वरूपं यथास्थितिः॥

तदेव नाणुमात्रोऽपि भेदः स्वांशांशिनोः क्वचित्। विभिन्नांशोऽल्पशक्तिः स्यात् किञ्चित्सामर्थ्यमात्रयुक्॥" इति।

अत इदमेव व्याचक्षते न विद्यते बहिः क्रियाशक्तिरन्तर्ज्ञानशक्तिर्वा असंवरणमसङ्क्षिप्तत्वसर्वव्यापकत्वं यस्य तमिति। अतच्छायया सूर्यमण्डलमिव भगवत्स्वांशश्रीमत्स्यदेवादिभिर्मायया नाव्रियते रश्मिस्थानीयो विभिन्नांशो जीवस्त्वाव्रियते। यथोक्तं विष्णुपुराणे-शक्तित्रयकथनानन्तरमेव "यया क्षेत्रज्ञशक्तिः सा तारतम्येन वर्तते।" इति। यया पूर्वोक्ताविद्याकर्मसंज्ञया अविद्याकर्मवृत्तिर्यस्याः साऽविद्याकर्मा तन्नाम्नी मायेत्यर्थः। यथोक्तं नारदपञ्चरात्रे-प्राधानिकसर्गमुक्त्वा शुद्धसर्गकथने —

"यत्तटस्थं तु चिद्रूपं स्वसंवेद्याद्विनिर्गतम्। रञ्जितं गुणरागेण स जीव इति कथ्यते॥" इति॥

अथ एवांशकृतमिति। अंशश्चासौ कृतो मायोपाधितया संपादितश्चेति तमित्ययमेवार्थः। विवक्षितमेवाहुः-इतीति। पूर्वोक्तप्रकारान्तरेण जीवस्य गतिं त्वदंशत्वलक्षणं तत्त्वं विविच्य विश्वसिता जातविश्वासा ये कवयो विवेकिनस्ते भवतोऽङ्घ्रिमुपासते, विनांशिभजनमंशस्य तुच्छतापत्तेः। नन्वन्येऽपि सन्ति केषाञ्चित्केऽप्यंशिनस्तेऽप्युपासन्ताम्, तत्राहुः-निगमाः सर्वे वेदाः आसमन्तादुप्यन्ते समन्विताः क्रियन्ते यस्मिंस्तादृशत्वात्सर्ववेदार्थत्वात्त्वमेव सर्वोत्तमभजनीयः सर्वोत्तमपुरुषार्थश्चेत्यर्थः। ननु-सावयवत्वेनान्यतुल्यत्वात्कथं तादृशत्वं तत्राहुः-निगमावपनत्वादेव न विद्यते भवो जन्म यस्य तं नित्यमित्यर्थः। न विद्यते भवो यस्मादिति विग्रहेऽपि कैमुत्येन तत्सिद्धयति। भुवीति-पृथिव्यां तादृशसाधकप्राचुर्यविवक्षयोक्तम्। अत्र मुख्याः श्रुतयः —

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्। अस्यावयवभूतैश्च व्याप्तं सर्वमिदं जगत्॥

यो योनिमधितिष्ठत्येको यस्मिन्निदं सञ्चरीचर्ति सर्वम्। तमीशानं वरदं देवमीड्यं विचार्येमां शान्तिमत्यन्तमेति॥" इत्याद्याः। तदनुगताश्च "सर्वे वेदा यत्पदमामनन्ति" इत्याद्याः "चरणं पवित्रं विततं पुराणम्" इत्याद्याश्च (७) ॥२०॥

नीलकण्ठी — सङ्गतिः पूर्वोक्ता। स्वकृतपुरेष्विति। स्वाज्ञानकल्पितेषु अमीषु दृश्यमानेषु प्रविष्टं पुरुषं पुरि शयं जीवमखिलशक्तिधृतस्तव "परास्य शक्तिर्विविधैव श्रूयते" इति श्रुतेः। स्वशक्तिमतस्तवांशकृतमविद्ययांशमिव कृतं घटाकाशवन्निरंशस्य वास्तवांशांशिभावायोगात् वदन्ति श्रुतयः स्मृतयश्च —

"पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः। पुरः स पक्षीभूत्वा पुरः पुरुष आविशत्॥" इति॥

"ममैवांशो जीवलोके जीवभूतः सनातनः।" इत्याद्याः। अस्य जीवस्य पूर्वश्लोक्तैकरसब्रह्मभावस्योपपादनाय तात्त्विकं रूपमाह-अबहिरन्तरसंवरणम्। न सन्ति बहिः अन्तरं संवरणं च यस्य तम् अस्य बहिर्नास्ति महत्तरत्वात्, नान्तरमणुतरत्वात्, संवृणोति व्याप्नोति संव्रियते व्याप्यते इति कर्तृकर्मव्युत्पत्तिभ्यां संवरणमुपादानमुपादेयं च तदुभयमस्य नास्तीत्यर्थः। तथा च श्रुतयः "अणोरणीयान् महतो महीयाम्" "न तदश्नोति कश्चन" "न त दश्नोति कश्चन" इति शास्त्रानुभवाभ्यां नृणां जीवानां गतिं निःसङ्गित्वदुःखित्वरूपां विविच्य कवयः शास्त्रज्ञाः भवतो विष्णोरङ्घ्रिमुपासते। अङ्घ्रिं विशिंषन्नेवोपासनायाः स्वरूपं फलं चाह-निगमावपनम्। अभवं वेदोक्तकर्मणां समर्पणस्थानं "मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि" इति स्मृतेः। तत्त्वजिज्ञासुना भगवत्प्रीत्यर्थं कर्माणि कर्तव्यानीत्यर्थः। अभवं भवनिवर्तकं मूर्तिध्यानादिक्रमेण विश्वसिताः श्रद्धालवः "श्रद्धावाँल्लभते ज्ञानम्" इति स्मृतेः, इदं मुख्यमधिकारिविशेषणम्। "इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीर्महती विनष्टिः" इति श्रुतेर्मर्त्यलोक एव साधनानुष्ठानं घटते नान्यत्रेति दर्शयितुं भुवीत्युक्तम् (७) ॥२०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वकृतपुरेष्वित्यस्य टीकायां तस्येश्वरत्वं बोध्यते। इत्यस्यायं विशेषः। अतो जीव एव तदीश्वरत्वेन स्तूयते इति।

मित्यादिवाक्येनेश्वराख्यं पदार्थान्तरं न कल्पनीयमिति तत्राह-नैतद्युज्यत इति। कृतावतारस्येत्युत्तरश्लोकाभिप्रायेण कृतावतारत्वेन प्रसिद्धस्तदानीन्तनानुभवसिद्धश्चैष इति भावः। अत्र त्वन्ये वदन्ति यदि चेश्वरो नाम कश्चित्स्वतः सिद्धः स्यात्तदा जीवस्य तयैव तदभेदनिर्देशो घटते। यदि तु जीवाविद्याकल्पितः स्यात्तदा जीवैः कथं नोपलभ्यते। सत्यं चानुपलब्धौ तस्य किं तेनाभेदनिर्देशेन चेति। अथ स्वव्याख्या।

तदेवमन्तर्यामित्वांशेऽपि भगवतः शुद्धत्ववर्णनेन तत्पराणां श्रुतीनां वचनं श्रुत्वा स्वानुगृहीतानां जीवतत्त्वानुवादिनीनां तेनामपि तत्रैव तात्पर्यं काश्चिदन्याः श्रुतयो वर्णयन्ति-स्वकृतपुरेषु पूर्वोक्तेष्वेव वर्तमानं पुरुषं जीवसमूहं त्वत्तो भिन्नत्वेनाभिन्नत्वेन वा वदन्ति तास्तवांशेनैव कृतं सिद्धं वदन्ति। तथाऽभिप्रायेणैव वर्णयन्ति नान्यथेत्यर्थः। ब्रह्मणोंऽशभूतस्तथेतरो भोक्ता इति श्रीगोपालतापनीश्रुतेः। ननु-कथमपरिच्छेद्यस्यांशत्वं तथा "ममैवांशो जीवलोके जीवभूतः सनातनः।" इति गीतोपनिषदुक्तम्। "द्वा सुपर्णा सयुजा सखाया" इत्यादिश्रुत्युक्तश्च नित्यत्वं स्यात्। अत्राहुः-अखिलशक्तिधृत इति।

"विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा। अवीद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते॥"

इति विष्णुपुराणोक्तानुसारेण;

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मेपराम्। जीवभूतां महाबाहो ययेदं धार्यते जगत्॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥

मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥"

इति श्रीभगवतः प्रकृतिद्वयतत्कार्यसाधकत्वसूचनया दर्शितस्वरूपशक्तिपर्यन्तश्रीगीतोपनिषदनुसारेण च या अखिलास्त्रिविधाः शक्तयः कार्यमात्रगम्याचिन्त्यप्रभावास्ता धरसि। यस्त्वं तस्य तावत्तादृश्यः शक्तय एव तत्तद्दोषं विनैव तत्तद्दुर्घटं सम्पादयन्त्यो नित्यमेव वर्तन्त इति स्थिते तव तादृशक्त्याद्यात्मकजीववृन्दरूपांशो नित्यमेव वर्तत इत्यर्थः। ननु-तर्हि मत्स्यदेवादिवदैश्वर्यमेवास्य स्यात् तदभावे महदादिवन्मायिकत्वमेव वा। तत्राहुः-अबहिरन्तरसंवरणमिति। न विद्यते बहिर्मायिकत्वे तस्य अन्तरङ्गस्वरूपत्वेऽसंवरणं व्याप्तिर्यस्य तथाभूतमित्यर्थः। श्रीविष्णुपुराणादावान्तरालपाठान्मार्तण्डमण्डलतद्रश्म्योरन्तरालवर्तिमयूखपरमाणुवृन्दमिवेति भावः। अतो मण्डलस्थानीयस्य भगवत एव स्वल्पशक्तिव्यक्तिमयाविर्भावविशेषस्वांशत्वं श्रीमत्स्यदेवादीनां रश्मिस्थानीयत्वाद्विभिन्नांशत्वं जीवानामिति तत्त्ववादिनः। अत्र तदुदाहृतं महावाराहवचनञ्च —

"स्वांशश्चाथ विभिन्नांश इति द्वेधांश इष्यते। अंशिनो यत्तु सामर्थ्यं यत्स्वरूपं यथास्थितिः॥

तदेव नाणुमात्रोऽपि भेदः स्वांशांशिनोः क्वचित्। विभिन्नांशोऽल्पशक्तिः स्यात् किञ्चित्सामर्थ्यमात्रयुक्॥" इति।

अत इदमेव व्याचक्षते न विद्यते बहिः क्रियाशक्तिरन्तर्ज्ञानशक्तिर्वा असंवरणमसङ्कुचितत्वसर्वव्यापकत्वं यस्य तमिति। यथा सूर्यमण्डलमिव भगवत्स्वांशश्रीमत्स्यदेवादिभिर्मायया नाव्रियते रश्मिस्थानीयो विभिन्नांशो जीवस्त्वाव्रियते। यथोक्तं विष्णुपुराणे-शक्तित्रयकथनानन्तरमेव "यया क्षेत्रज्ञशक्तिः सा तारतम्येन वर्तते।" इति। यया पूर्वोक्ताविद्याकर्मसंज्ञया विद्याकर्मवृतिर्यस्याः साऽविद्याकर्मा तन्नाम्नी मायेत्यर्थः। यथोक्तं नारदपञ्चरात्रे-प्राधानिकसर्गमुक्त्वा शुद्धसर्गकथने —

"यत्तटस्थं तु चिद्रूपं स्वसंवेद्याद्विनिर्गतम्। रञ्जितं गुणरागेण स जीव इति कथ्यते॥" इति॥

अथ एवांशकृतमिति। अंशश्चासौ कृतो मायोपाधितया संपादितश्चेति तमित्ययमेवार्थः। विवक्षितमेवाहुः-इतीति। प्रकारान्तरेण जीवस्य गतिं त्वदंशत्वलक्षणं तत्त्वं विविच्य विश्वसिता जातविश्वासा ये कवयो विवेकिनस्ते भवतोऽङ्घ्रिमुपासते, भजनमंशस्य तुच्छतापत्तेः। नन्वन्येऽपि सन्ति केषाञ्चित्केऽप्यंशिनस्तेऽप्युपासन्ताम्, तत्राहुः-निगमाः सर्वे वेदाः तदुपन्ते समन्विताः क्रियन्ते यस्मिस्तादृशत्वात्सर्ववेदार्थत्वात्त्वमेव सर्वोत्तमभजनीयः सर्वोत्तमपुरुषार्थश्चेत्यर्थः।

ननु-सावयवत्वेनान्यतुल्यत्वात्कथं तादृशत्वं तत्राहुः-निगमावपनत्वादेव न विद्यते भवो जन्म यस्य तं नित्यमित्यर्थः। न विद्यते भवो यस्मादिति विग्रहेऽपि कैमुत्येन तत्सिद्ध्यति। भुवीति-पृथिव्यां तादृशसाधकप्राचुर्यविवक्षयोक्तम्। अत्र मुख्याः श्रुतयः-

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्। अस्यावयवभूतैश्च व्याप्तं सर्वमिदं जगत्॥

यो योनिमधितिष्ठत्येको यस्मिन्निदं सञ्चरीचर्ति सर्वम्। तमीशानं वरदं देवमीड्यं विचार्येमां शान्तिमत्यन्तमेति॥" इत्याद्याः। तदनुगताश्च "सर्वे वेदा यत्पदमामनन्ति" इत्याद्याः "चरणं पवित्रं विततं पुराणम्" इत्याद्याश्च ॥७॥२०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

पुरेषु स्थिरचरदेहेषु वर्तमानत्वात् पुरुषं तवांशकृतं तवाचिन्त्यशक्तेरंशेन सामान्यचिच्छक्तिवृत्तिविशेषेण कृतं विशिष्टं चिद्रूपं जीवं वदन्तीत्यर्थः। अतो न विद्यते बहिः क्रियाशक्तौ अन्तश्च ज्ञानक्रियाशक्तावसंवरणं परिच्छेदाभावो यस्य तम्, परिच्छिन्नक्रियाज्ञानशक्तिकमित्यर्थः। तथा च महावाराहे —

"स्वांशश्चाथो विभिन्नांश इति द्वेधांश इष्यते। अंशिनो नाणुमात्रोऽपि भेदः स्वांशांशिनोः क्वचित्॥

विभिन्नांशोऽल्पशक्तिः स्यात् किञ्चित्सामर्थ्यमात्रयुक्" ॥ इति ॥

तत्र स्वांशोऽवतारः विभिन्नांशो जीव इति। अखिलाः सृष्ट्यादिशक्तीर्धरतीति तथा तस्येति जीवेभ्योऽत्यन्तवैलक्षण्यम्। इत्येवं नृगतिं भिन्नाभिन्नं जीवतत्त्वं कवयो विवेकिनो निगमावपनं सर्वकर्म्मार्पणपूर्व्वकमित्यर्थः। भुवि वर्तमानमिति श्रीवृन्दावनविहारिश्रीकृष्णपादाब्जाभिप्रायेण। यद्वा, स्वयमाविष्कृतेषु पुरेषु श्वेतद्वीपमहाकालादिषु सन्तं पुरुषं श्रीनारायणादिरूपं तवांशकृतं त्वच्चिच्छक्त्याविर्भावितं तवावतारविशेषमित्यर्थः। इति सर्वत्र प्राकट्याद्धेतोः, कवयो भवन्तोऽङ्घ्रिं नृगतिं नृणां गतिं गम्यं विचार्य्य। यद्वा, स्वकृतेषु पुरेषु वैकुण्ठविशेषेषु समष्टिव्यष्टिदेहेषु च स्थितं पुरुषम्-

"एकन्तु महतः स्त्रष्टृ द्वितीयन्त्वण्डसंस्थितम्। तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते॥" इत्युक्तम्॥

पुरुषत्रयं तवांशकृतम्, अंशेन चिच्छक्त्या प्रकटितं वदन्ति शास्त्रज्ञाः। अखिलाः शक्तिर्षा या लीलासंविदाद्या धरतीति तस्य। कथम्भूतम्? पुरुषत्रयम्, इति हेतोर्नृषु जीवेष्वपि तव गतिमन्तर्यामितया प्राप्तिं विविच्य शास्त्रानुभवाभ्यां निश्चित्य विश्वसिताः सन्तः कवयो विवेकिनो भुवि हृदयस्थाने भवतोऽङ्घ्रिं सेवन्ते। कथम्भूतम्? निगमावपनं वर्व्ववेदानामाश्रयमवलम्बनम्। पुनः कथम्भूतम्? अभवं संसारध्वंसकम् ॥२०॥

[न केवलं गोकुलाविष्कृत-वत्सपादिरूपं त्वत्स्वरूपतया परिचिन्वन्ति, किन्तु तत्र तत्राविष्कृतं तत्तद्रूपमपीत्याहुः-स्वकृतेति। स्वकृतेषु पुरेषु निवासेषु बदरिकाश्रम-नीलाचल-पाण्डुरङ्गाख्येषु (सिद्धरङ्गाख्येषु [ख]।) सन्तं पुरुषं पुरुषत्रयं नारायण-जगन्नाथविट्ठलस्वरूपं तवांशकृतं गोकुलेन्द्रस्यांशावतारविशेषमित्यर्थः। अबहिरन्तरसंवरणं यथा स्यात्तथा सुप्रकटमेव वदन्तीत्यर्थः। अथवा स्वकृतेषु पुरेषु स्वैर्भक्तैः कृतेषु बृहद्वन-वृन्दावन-नन्दीश्वरादिस्थित-व्रजपुरेषु पुरुषं बलदेव-प्रद्युम्नानिरुद्धरूपं व्यूहत्रयलक्षणं त्वत्स्वांशकृतमंशावतारारूपेणाविर्भावप्राप्तम् (अंशेनाविर्भातं [घ, ङ]।) तथा हि तापनी श्रुतिः (उ० ३५)-

"तत्र हि रामस्य राममूर्तिः प्रद्युम्नस्य प्रद्युम्नमूर्तिः, अनिरुद्धस्यानिरुद्धमूर्तिः" इति।

कथम्भूतम्? अबहिरन्तरसंवरणम्, न विद्यते बहिः सुव्यक्तलीलायाम्, अन्तरे अबहिर्लीलायां संवरणमनभिव्यक्तिः सहावस्थानाभावो यस्य। तत्र श्रीबलदेवस्य बहिर्लीलायां सहावस्थानाभावो नास्ति, किन्तु सहचरत्वमेव (सहावस्थानत्वमेव [ख]।); प्रद्युम्नानिरुद्धयोस्तु सुव्यक्तव्रजलीलानुगुण्याभावादबहिर्लीलायामनभिव्यक्तिरित्यर्थः (व्रजजनादृश्यतायामनभिव्यक्तिरित्यर्थः [ख]।) यद्वा, पुरुषं बलदेवमेव। कथम्भूतम्? स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणम्, व्रजनगरेषु बहुत्र, तत्र तत्र प्रसिद्धत्वाद्बहुत्वम्, न विद्यते बहिर्वर्तनशैलादिषु अन्तरेषु च व्रजगृहादिषु संवरणमनभिव्यक्तिर्यस्य तम्, अखिलशक्तिधृतोऽनन्तसाधारणसर्वशक्तीः सम्प्रति प्रकटयतः, इति परमैश्वर्य्याद्धेतोः कवयः सर्व्वज्ञा ब्रह्मरुद्रादयः, भुवि श्रीमथुरा

विराजमानस्य भवतो

श्रीमत्पादपद्ममुपासते

तावदुपासक

धर्मतश्च ज्ञानस्वरूपम्

अंशकृतम्। पुरुषसम

धर्मभूतज्ञानेन अन्तर्बहि

विचार्य। भवतोऽङ्घ्रि

किम्भूताः कवयः। भु

उपासत इत्यर्थः ॥२०॥

"परम भजन्ति

इत्युदरादिस्थानी

फलमित्यभिप्रेत्य तदुपास

देहेषु सन्तमिति शेषः। अ

कृतं कल्पितमुपात्तमबहि

रिच्छिन्नत्वशङ्काव्यावृत्तिः

"अङ्गुष्ठमात्रो

जनानां हृदये सन्निविष्टः"

इत्याद्या वेदान्ताः

इतीत्थम्भूतं तव

कवयः केचिद्विवेकिनः निः

क्षेत्रं प्रतिपादनविषयमिति

"तेषां सततयुक्ता

इति भगवदुक्तेः।

विद्यते भवः संसार

इत्यर्थः ॥२०॥

मूलम्

प्रक्रमवत्स्वसत्कृतं

स्वकृतम् ॥७-२०/२१॥

"निषुसीद गणपते

मानस्य भवतो नृगतिं मनुष्यलीलां विविच्य सर्वोत्कर्षपदत्वेन विमृश्य विश्वसिता:, अत्रैव लब्धविश्वासा:, अङ्घ्रि पादपद्ममुपासते। कथम्भूतम् ? निगमावपनं सर्व्वश्रुतीनां तात्पर्यविषयम् ॥२०॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

तावदुपासकस्य जीवस्य परेण सम्बन्धमाह-स्वकृतेति। स्वशब्दो भगवद्वाची। पुरेषु बहिरन्तरसंवरणम्। स्वरूपतो ज्ञानस्वरूपम्। यद्वा। शरीरेष्वन्तर्बहिश्च प्रसृताज्ञानं पुरुषं नाम जीवम्। अखिलशक्तिधृतस्तव अंशकृतम्। विशेषणतया कृतम्। पुरुषसमष्टेर्विभक्तं वदन्ति। यद्वा। तदधीनत्वे सति तत्सदृशत्वं ज्ञानानन्दाकारत्वेन। किम्भूतम्। बहिरन्तरसंवरणम्। भूतज्ञानेन अन्तर्बहिरसंवरणम्। सर्वत्र प्रसृतज्ञानमिति। पूर्वोक्तप्रकारेण। नृगतिम्। नुः जीवस्य गतिम्। तत्त्वं विविच्य र्य। भवतोऽङ्घ्रि चरणम्। उपासते सेवन्ते। किम्भूतमङ्घ्रिम् ? निगमावपनं ज्ञानोत्पादकम्। अत: अभवम् भवनिवर्तकम्। भूता: कवय:। भुवि संसारे नि:श्वसिता: प्राणायामपरा: उपासका इत्यर्थ:। विश्वसिता इति पाठे कृतविश्वासा: अनन्यपरा: सत इत्यर्थ: ॥२०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

"परम भजन्ति ये पदमजस्रसुखानुभवम् उदरमुपासते अवितथं तव धाम समम् एकरसम्।"

इत्युदरादिस्थानविशेषाधिष्ठानकदिव्यात्मस्वरूपोपासकानां तत्प्राप्तिरुक्ता। अथ दिव्यविग्रहोपासकानामपि तत्सारूप्यापत्तिरूपं मित्यभिप्रेत्य तदुपासकाश्च केचित्सन्तीत्याहुः-स्वकृतपुरेष्विति। अमूषु देवमनुष्यादिषु स्वेन त्वया कृतेषु पुरेषु त्वन्निवासभूतेषु सन्तमिति शेष:। अखिलशक्तिधृत: अखिला: शक्ती: आश्चर्यशक्ती: धरतीति तथा तस्य। तवांशकृतमंशेन सङ्कल्पात्मकज्ञानेन कल्पितमुपात्तमबहिरन्त: अन्तर्बहिर्देशरहितमन्तर्बहिश्च व्याप्तिक्षममित्यर्थ:। अनेन विग्रहस्यापि पुरान्तरवस्थानप्रयुक्तप- च्छिन्नत्वशङ्काव्यावृत्ति:। असंवरणं सङ्कोचकहेतुरहितं पुरुषं पुरुषाकारं विग्रहं वदन्ति। वेदान्ता इति शेष:।

"अङ्गुष्ठमात्रो रवितुल्यरूप:" "अङ्गुष्ठमात्र: पुरुषो मध्य आत्मनि तिष्ठति" "अङ्गुष्ठमात्र: पुरुषोऽन्तरात्मा सदा नानां हृदये सन्निविष्ट:"।

इत्याद्या वेदान्ता: प्रतिपादयन्तीत्यर्थ: ॥

इतीत्थम्भूतं तव पुरुषं तथा नृगतिं नरजन्मत्वदाराधनोपयुक्तमिदं नृजन्मेति च विचिन्त्य विचारपूर्वकं निश्चित्य भुवि भूमौ केचिद्विवेकिन: नि:श्वसिता: प्राणायामपरा: जितप्राणेन्द्रिया: इत्यर्थ:। तवाङ्घ्रिं उपासते। कथम्भूतम्। निगमानां वेदानामावपनं प्रतिपादनविषयमिति यावत्। यद्वा। निगमस्य ज्ञानस्यावपनं आसमन्तादुप्यतेऽनेनेत्यावपनम् उत्पादकम्।

"तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तम्।"

इति भगवदुक्ते:।

विद्यते भव: संसारो यस्मात् सेव्यमानात्तम्। भुवि विश्वसिता इति पाठान्तरं तदा मोक्षयिष्यतीति दृढविश्वासयुक्ता: उपासत ॥२०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

प्रक्रमवत्स्वसत्कृतं सर्वेषु पुरुषेषु सर्वासु सुधीषु स्थित्वा त्वां तु बहिरन्तरसच्चरणेऽपि। तव पुरुषवदन्त्यखिलशक्तिधृत: ॥७-२०/२१॥

"निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम्। न ऋते त्वत्क्रियते किञ्चनारेमहामर्कं मघवं चित्रमर्च"

इत्यादि श्रुत्यभिप्रायभर्भस्य प्रक्रमवदित्यस्य श्लोकस्यायमर्थः। सर्वेषु पुरुषेषु सर्वधीषु सर्वेन्द्रियेषु च स्थित्वा श्रीब्रह्मादिषु प्रक्रमवत्प्रकृष्टक्रमयुक्तत्वेन स्वसत्कृतं स्वात्मनैव सत्कृतं त्वां वदन्ति। किञ्च। हे पुरुष अण्डाद्यन्तर्बहिश्च असच्चरणे असदमङ्गलं चरणं कर्म यस्यासावसच्चरणः तस्मिन् पापाचारे स्थित्वा पापाचारमपि स्वात्मनः पूजात्वेनैव कारयन्तं त्वां वदन्ति। तुशब्दे यथाकरणं तस्याधोगत्यर्थमिति सूचयति। किम्बहुना तत्सर्वं तव स्वकृतम् अनन्यापेक्षया त्वयैव कृतं वदन्ति। कुत इति तत्राह-अखिलेति। सर्वपुरुषेन्द्रियशक्तिप्रेरकत्वात् श्रुतिश्लोकयोः सर्वत्रैकार्थत्वाभावोनैकतन्नियतत्वद्योतनाय ज्ञायते —

"श्रीब्रह्मरुद्रपूर्वेषु क्रमात्स्थित्वा जनार्दनः। स्वात्मानमर्चयत्यद्धा बहिरन्तरसत्सु च॥
असतामधमाचारो हरिदृष्ट्यात्मपूजनम्। तस्याऽधोगमनायेति श्रुतिराहाखिलक्रियम्॥"

इत्यादिना त्रिपादोऽयं श्लोकः॥२०-२१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवमन्तर्य्यामित्वांशेऽपि भगवतः शुद्धवर्णनेन तत्पराणां श्रुतीनां वचनं श्रुत्वा स्वानुगृहीतानां श्रुतीनामपि तत्रैव तात्पर्यं काचिदन्या दर्शयति। स्वकृतपुरेष्विति॥२०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु सर्वान्तर्य्यामी नारायण एव "अवाप नारायण आदिदेवः" इत्युक्तेरिति सत्यमेव किन्त्वसावादिदेवत्वात् कथं तस्य हेतुरहमित्याशङ्क्याहुः-स्वकृतपुरेष्वित्यादि। स्वकृतानि स्वतःसिद्धानि यानि पुराणि गोकुलमथुराद्वारकाख्यानि पुराणि तेषु अमीषु अबहिरन्तरं संवरणं यथा भवति। बाह्याभ्यन्तरसङ्गोपनाभावपूर्वकम् अखिलशक्तिधृतः अखिलाः श्रीराधाप्रभृतयो गोप्यः श्रीरुक्मिणीप्रभृतयो महिष्यश्च याः शक्तयस्ताः धरतीति तस्य तव श्रीकृष्णस्य अंशकृतं पुरुषं नारायणं वदन्ति ब्रह्मादयो सुरादयश्च नारायणोऽङ्ग नरभूजलापणादित्युक्तेः। इति विविच्य विचार्य्य कवयो ब्रह्मादयो भवतोऽङ्घ्रिम् उपासते। किम्भूताः। निगमावपनं यथा भवति तथा विश्वसिताः सन्तः निगमेषु वेदेषु आ सम्यक् वपनं यथा भवतीति निगमानामयमेवार्थ इति कृत्वा कृतविश्वासा इत्यर्थः। कीदृशम् अङ्घ्रिम्। नृगतिं सर्वलोकैकशरणम्॥२०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ननु सर्वभूतेषु वर्तमानो हि पुरुष एष, कथं ममांशः? इत्याह-स्वकृतपुरुषमेवाखिलशक्तिधृतस्तव श्रीकृष्णस्यांशकृतं वदन्ति। कीदृशम्? अबहिरन्तरसंवरणं बाह्यान्तरावरणशून्यमबहिरन्तरसंवरणं यथा भवति, तथाखिलशक्तिधृत इति वा। इति विविच्य कवयः (तवाङ्घ्रिमुपासते), कीदृशम्? नृगतिं सर्वलोकशरणम्, न विद्यते भवो यस्मात्। विश्वसिताः कृतविश्वासाः, अतस्त्वच्चरणारविन्दोपासनमेव सर्वोत्तममिति भावः॥२०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

परमात्मानमुपास्यं निरूप्य जीवात्मानं तदुपासकं च तदंशतुल्यत्वेन निरूपयन्ति-स्वकृतेति। स्वकर्मोपार्जितेषु पुरेषु अमीषु नरदेहादिषु पुरुषं भोक्तृत्वेन वर्तमानमपि जीवं "जात्या एकत्वम्।" अखिलशक्तिधृतस्तव अंशकृतम्। अंशमिव कृतं वदन्ति। वस्तुतस्तटस्थशक्तित्वेन प्रसिद्धमपि अंशतुल्यं वदन्तीत्यर्थः। यदुक्तं विष्णुपुराणे 'विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा।' इति। गीतासु च 'प्रकृतिं विद्धि मे परां जीवभूताम्' इति। नारदपञ्चरात्रे च —

"यत्तटस्थं तु चिद्रूपं स्वसंवेद्याद्विनिर्गतम्। रञ्जितं गुणरागेण स जीव इति कथ्यते॥"

इत्येवं तस्य तटस्थशक्तित्वेऽपि 'ममैवांशो जीवलोके जीवभूतः सनातनः।' इति भगवद्वचनात् —

स्वांशश्चाथ विभिन्नांश इति द्वेधांश इष्यते। अंशिनो यत्तु सामर्थ्यं यत्स्वरूपं यथा स्थितिः।

तदेव नाणुम

इति महावरा
सर्वथा स्वीयत्वेन स्वी
बहिरन्तरावृतमित्यर्थः
वेदस्तद्रूपे क्षेत्रे आ सम
उपासते। विश्वसिताः '
भवतीति। द्वौ सुपर्णौ
मथुरामण्डले। यस्तु ज
प्रतिमायामित्यर्थः॥२०

अपि च कुतो
वस्तुतस्तत्कृतावरणादि

(भगवच्चरित्रम

पद्यानुवादः

★पुरकृतावरणं
इति बुधा नृगतिं

★[पुरं शरीरम्

सङ्क्षिप्तसार्थान्वयः
अंशमिव वदन्ति व्यासाद
विशोध्य कवयः विश्वसिता
अभवं भवनिवर्तकं च। पु

हे भगवन्! स्वकृ
त्वद्रूपम्। यद्वा। अंशेन ली
भगवानपि। कुतः? अ
कथम्भूतं पुरुषम्? अबहि
तयोरसत्त्वादित्यर्थः। इति पू
विवेकिनस्ते भवतोंऽशिस्वर
निगमावपनम्। निगमा वेदा
भजनीय इत्यर्थः। निगमो
वेदोक्तकर्मणामावपनं क्षेत्र
आवपनं क्षेत्रं तत्त्वेन ज्ञानोत
इदमेवोचितमिति सूचितम्

तदेव नाणुमात्रोऽपि भेदः स्वांशांशिनोः क्वचित् । विभिन्नांशोऽल्पशक्तिः स्यात् किञ्चित्सामर्थ्यमात्रयुक् ॥

इति महावराहवचनाच्चांशतुल्यत्वं कीदृशं न विद्यते बहिर्बहिरङ्गमायाशक्त्या अन्तरेणान्तरङ्गचिच्छक्त्या च सम्यग्वरणं स्वीयत्वेन स्वीकारो यस्य तम् । यद्वा । न विद्यते बहिरन्तश्च असंवरणमनावरणं यस्य तम् । स्थूलसूक्ष्मोपाधिभ्यां मायया वृतमित्यर्थः । इति एवं नृगतिं नुर्जीवस्य गतिं ताटस्थ्यं मायाबन्धनावस्थत्वं वा विविच्य विचार्य्य निगमावचनम् । निगमो द्रूपे क्षेत्रे आ सम्यक्तया वपनं यस्य तथाभूतम् अङ्घ्रिम् भगवच्चरणकल्पतरुम् । अभवं भवबन्धनिवर्तकं भुवि स्थित्वा सते । विश्वसिताः 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।' इति भगवद्वाचि कृतविश्वासाः । अत्र ब्रह्मणोंशभूतस्तथेतरो भोक्ता वतीति । द्वौ सुपर्णौ भवतो ब्रह्मणोंशभूतस्तथेतरो भोक्ता भवति । अन्यो हि साक्षी भवतीति भोक्तारो वृक्षधर्मे तिष्ठत इति मण्डले । यस्तु जम्बूद्वीपे स्थितोऽथवा योर्च्चयेत् प्रतिमां प्रति स मे प्रियतरो भुवीति गोपालतापन्याद्याः श्रुतयः । प्रतिमां प्रति मायामित्यर्थः ॥२०॥

गूढार्थदीपिनी

अपि च कुतो नु इयमाशङ्का भगवतो देहाद्युपाधिकृतदोषप्रसङ्ग इति । यतोऽविद्यादिभिः संसरतस्त्वदात्मनो जीवस्यापि तत्कृतावरणादि न घटते कुतस्तव ? इत्याशयेनाहुः श्रुतयः स्वकृतेति ॥

(भगवच्चरित्रमहत्तापरेयम्)

पद्यानुवादः

★पुरकृतावरणं न तवात्मनः सकलशक्तिधरस्य कुतस्तव ।
इति बुधा नृगतिं सुविविच्य ते भुवि पदं विपदन्तमुपासते ॥७॥

★[पुरं शरीरम् अज्ञानं च ।]

सङ्क्षिप्तसार्थान्वयः — हे भगवन् ! अमीषु स्वकृतपुरेषु वर्तमानं पुरुषं जीवम् अखिलशक्तिधृतः पूर्णस्य तव अंशकृतम् मिव वदन्ति व्यासादयः । कीदृशं पुरुषम् ? अबहिरन्तरसंवरणं बाह्याभ्यन्तरावरणशून्यम् । इति नृगतिं जीवस्वरूप विविच्य कवयः विश्वसिताः सन्तः भुवि भवतः अङ्घ्रिम् उपासते । कथम्भूतम् अङ्घ्रिम् ? निगमावपनं ज्ञानोत्पादकम् । अत एव भवनिवर्तकं च । पुरं शरीरम् ।

हे भगवन् ! स्वकृतेषु स्वकर्मोपार्जितेषु अमीषु पुरेषु देवमनुष्यादिदेहेषु भोक्तृत्वेन वर्तमानं पुरुषं जीवं तव अंशमिव कृतं रुषम् । यद्वा । अंशेन लीलाशक्त्या कृतं पृथक् कृतमिव वदन्ति व्यासादयः । "ममैवांशो जीवलोके" इत्यादिना गीतायामाह नापि । कुतः ? अखिलशक्तिधृतः । अखिला नानाविधाः शक्तीर्धरतीति तथाभूतस्य सर्वशक्त्याश्रयस्येत्यर्थः । भूतं पुरुषम् ? अबहिरन्तरसंवरणम् । बहिः कार्यदेहादि अन्तरं कारणमज्ञानं ताभ्यां यत् आवरणं तन्न विद्यते यस्य । त्वादित्यर्थः । इति पूर्वोक्तप्रकारेण नुर्जीवस्य गतिं तत्त्वं त्वदंशलक्षणं विविच्य विशोध्य विश्वसिताः कृतविश्वासा ये कवयो स्ते भवतोंऽशिस्वरूपस्य अङ्घ्रिमुपासते । अंशिभजनं विना अंशस्योद्धरणासम्भवादित्यर्थः । कथम्भूतमङ्घ्रिम् । वपनम् । निगमा वेदा आ समन्तात् उप्यन्ते समन्विताः क्रियन्ते यस्मिन् तादृशम् । सर्ववेदार्थत्वात्त्वमेव मुख्यतया सर्वेषां इत्यर्थः । निगमो वेदस्तद्रूपे क्षेत्रे आ सम्यक्तया वपनं यस्येति कल्पतरुत्वादिति चक्रवर्ती । यद्वा । निगमानां कर्मणामावपनं क्षेत्रं सर्वकर्मार्पणविषयमित्यर्थः । यद्वा । समन्तादुप्यतेऽत्रेत्यावपनं क्षेत्रं निगमस्य ज्ञानस्य क्षेत्रं तत्त्वेन ज्ञानोत्पादकमित्यर्थः । अत एव न भवः संसारो यस्मात्तम् । भुवीत्यनेन मर्त्यलोके मुख्यविधया चितमिति सूचितम् ॥७॥२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ईश्वरस्वरूपमनूद्य जीवस्वरूपं कथयन् वैदिकनिष्ठां निरूपयति–स्वकृतपुरेष्वमीषु बहिरन्तरसंवरणं श्रुतयो वदन्ति प्रतिपादयन्ति। अन्तर्यामित्वेनान्तः सर्वाधिष्ठानत्वेन च बहिस्तथाऽप्यसंवरणं तत्सम्बन्धाद्यनावृतम्। तत्र हेतुः–पुरुषं पूर्णम्।

'यो जीववद्योनिषु भात्यनन्तो मूढैस्तमोहैर्भरताधिगम्य।

निचाय्य तं शाश्वतमात्मसंस्थं तदिच्छयात्मन्यदधुर्महान्तः।' इति कमठश्रुतिः।

'अन्तः प्रविष्टः शास्त् जनानाम् एष त आत्माऽन्तर्याम्यमृतः॥'

इत्यारण्यकेन नियम्यः सः कस्यापि स सर्वस्य नियामक इति कमठश्रुतिः। एको देव इत्यादिनानुवादः।

एवम्भूतस्याखिलशक्तिधृतस्तवांशकृतम् अंशेन शक्तिरूपेण कृतं भिन्नं 'कृति छेदने' इत्यस्माद्धातोः विज्ञानात्मानं वदन्तीति सम्बन्धः। तथा च श्रुतयः —

'अंशो ह्येष परस्य। योऽयं पुमानुत्पद्यते च म्रियते च। नाना ह्येनं व्यपदिशन्ती'ति पाराशर्य्यायणश्रुतिः। 'अंशो ह्येष परस्य भिन्नं ह्येनमभिधीयत।' इत्यग्निवेश्मकाश्रुतिः। 'अंशो नानाव्यपदेशात्' इति पारमार्षं सूत्रम्। 'ममैवांशो जीवलोके' इत्यादिभगवदुक्तेश्च। अन्यत्र चाभेदेनापि श्रुतयः प्रतिपादयन्ति। 'ब्रह्मदासा ब्रह्मदाशा ब्रह्मकितवाः' इत्यादिका यापण श्रुतिः। तत्त्वमसीत्यादिश्च। 'क्षेत्रज्ञं चापि मां विद्धि' इत्यादिस्मृतिश्च इति हेतोरुभयविधवाक्यप्रामाण्यात् उक्तप्रकारेण भिन्नाभिन्नरूपां नृगतिं प्रत्यगात्मरूपां विविच्य देहादिभ्यो विभक्तीकृत्य कवयो विवेकिनो विवेचनकुशलाः, न तु कुतर्कनिष्ठा भगवत्पराङ्मुखाः तत्प्राप्तये भवतोऽङ्घ्रिमुपासते। किं व्यवहारदृष्ट्या न भुवि विश्वसिताः इदमेव प्राप्यं प्रापकं चेति। विश्वासयुक्ताः सन्तः। निगमावपनं निगमोक्तपुरुषार्थानां क्षेत्रम्। पुरुषार्थचतुष्टयदातारमित्यर्थः। अत एव अभवं भवनिवर्तकं भवसम्बन्धशून्यमित्यर्थः ॥२०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं प्रवेशप्रसङ्गेन भगवतो दोषान् परिहृत्य द्वयोः प्रवेशस्य श्रुतत्वात् द्वितीयस्य का वार्तेति शङ्कां वारयितुमाह-स्वकृतपुरेष्विति। भगवत्कृतेष्वेव देवतिर्यङ्मनुष्यादिशरीरेषु भगवदंशः पुरुषो जीवः बहिरन्तः संवरणरहित एव तत्कृतगुणदोषै रहित एव अंशेन कृत इति विषमो भवति। अयमर्थः, जीवो नाम भगवतश्चिदंशः अत्यन्तं विरलात्मा सर्वेषु पुरेषु प्रविशन्नन्तर्बहिश्चैतन्यगुणपूर्ण एव तिष्ठति। तेन स्वभावतः सोऽप्यविषम एव। तथाप्यंशेन विषमभावापन्नेन तिरोहितानन्द इति यतः कुतश्चिदानन्दमपेक्षते न विषम इव भवतीति। अंशकृतपदेन चायमर्थः सूचितः। एवं जीववैलक्षण्यं ये जानन्ति ते भगवन्तं भजन्ते, न त्वन्य इत्याह–इति नृगतिं विविच्येति। आनन्दार्थमेव जीवस्य प्रवृत्तिः आनन्दश्च भगवत्येवास्ति, नान्यत्र।

'को ह्येवान्यात् कः प्राण्यात् यदेष आनन्दो न स्यात् एष ह्येवानन्दयति'। इति श्रुतेः॥

यत्र जीवानामेवानन्दस्तिरोहितः तत्र जडानामानन्दगन्धोऽपि नास्ति परं मरुमरीचिकावत् अत्यन्तं निर्जलभूमौ यथा जलप्रतीतिर्भ्रान्तानाम् एवं स्रक्चन्दनादिष्वपि आनन्दोऽस्तीति भ्राम्यति लोकः। सर्वो हि स्वस्मिन् विद्यमानं प्रयच्छति न त्वविद्यमानम्। अतः पण्डिता इममर्थं ज्ञात्वा भगवत एवाङ्घ्रिमुपासते आनन्दनिधिम्। ननु परमानन्दो भगवति भवतु नाम, स्वर्गाद्यानन्दस्त्वन्यत्रापि भविष्यतीत्याशङ्क्याह–निगमावपनमिति। निगमाः आसमन्तादुप्यन्ते अस्मिन्नङ्घ्राविति। 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतेः। वेदानां प्रतिपाद्यो भगवदङ्घ्रिरेव, स च फलसाधनरूपः, अतो यागा अपि चरणरूपाः स्वर्गोऽपीति मुख्यः सिद्धान्तः। 'अस्यैवानन्दस्यैवान्यानि मात्रामुपजीवन्ति' इति श्रुतेः। तथा सत्येष एवानन्दयतीत्येवकारोऽपि सङ्गच्छते। अतो वेदोक्त्याऽपि भवच्चरणारविन्दादन्यत्र नानन्द इत्यर्थः। नन्वस्याप्युत्पत्त्यादिना विरुद्धधैर्यसमवायात् जीववदानन्दतिरोभावो भविष्यतीति चेत्तत्राह–अभवमिति। कदाचिदुत्पत्त्यादिरहितं प्रत्युत अन्येषामपि तन्निवर्तकमित्यर्थः। स्वर्गादि सामग्रीदर्शनाद्विशेषादर्शनाच्च आनन्दशङ्कापि भवेत्, भुवि तु सम्भावनापि नास्तीत्याह–भुवि विश्वसिता इति तीर्थादिसम्भावना

वा शुद्धान्तःकरणाः

"गुप्तानन्

स्वकृतेषु स

पूर्णस्य तवांशेन कृतं

विविच्य विशोध्य क

भवनिवर्तकमभयमि

"यो यदंशः

पुरेषु देवादिदेहेषु भोक्तृ

अंशत्वेऽपि कार्यकारण

बहिः कार्यम्, अन्तरक

स्वरूपसाक्षात्कारेणाध्य

कवयो विवेकिनो विश्वसि

आ समन्तादुप्यन्तेऽस्मि

जन्ममरणादिसंसारदुःखि

स्वकृतेति॥ श्रुत

वस्तुतः इति नृगतिं विवि

बहिः कार्यमन्तरं कारणं त

वर्तमानं पुरुषं जीवमखिल

वदन्ति। इत्येवं नृगतिं ज

संसारदुःखनिवृत्तिर्नान्यथेति

समर्पितानि कर्माणि विमुक्ति

सेवन्ते। अत्र श्रुतयः—

"बुद्धेर्गुणेनात्मगुणे

यस्य देवे परा भक्तिर्यथा देवे

जीवस्य प्रतिबिम्बव

यथार्थभगवन्माहात्म्य

प्रकृत्यधिष्ठात्राऽक्षरपुरुषेण कृ

लाक्षणिकः अबहिरन्तरसंव

बहिरन्तरयोर्जीवनियन्तृत्वेन वस

न्तःकरणाः सन्तः भूमौ भगवति विश्वासं कुर्वन्ति अन्यत्र भोगाभिनिवेशात् न विश्वासो जायत इत्यर्थः ।

"गुप्तानन्दायतो जीवो निरानन्दं जगद्यतः । पूर्णानन्दो हरिस्तस्माज्जीवैः सेव्यः सुखार्थिभिः ॥" ॥७॥२०॥

श्रीसुबोधिनीसारः

स्वकृतेषु स्वकर्मोपार्जितेषु अमीषु नरादिषु पुरेषु देहेषु पुरुषं भोक्तृत्वेन वर्तमानं जवम् अखिलशक्तिधृतः सर्वशक्त्याश्रयस्य तवांशेन कृतं कल्पितं वदन्ति । बहिः कार्यम् अन्तरं कारणं तदावरणशून्यं वस्तुतस्तयोरसत्त्वात् इत्येवं नुर्जीवस्य गतिं तत्त्वं विशोध्य कवयोऽन्यथेदं न प्राप्यत इति जानन्तो निगमो वेदस्तदुक्तकर्मणामावपनं क्षेत्रं सर्वकर्मार्पणविषयम् अभवं र्तकमभयमिति वा पाठः । भवतस्तवाङ्घ्रि चरणं भुवि पृथिव्यां विश्वासं प्राप्ता उपासते भजन्ते ॥७॥२०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

"यो यदंशः स तं भजेत्" इति सिद्धान्तादपि भगवद्भजनं युक्तमित्याहुः-स्वकृतेति । स्वकृतेषु स्वकर्मोपार्जितेषु अमीषु वादिदेहेषु भोक्तृत्वेन वर्तमानं पुरुषं जीवमखिलशक्तिधृतः सर्वशक्त्याश्रयस्य पूर्णगुणस्य तवांशकृतं श्रुतयो वदन्ति । ननु ऽपि कार्यकारणावृतस्य तस्य नानाविकारवत्त्वात्साधनकलापैर्विमुक्तिर्न स्यात् इत्याशङ्क्याहुः-अबहिरन्तरसंवरणमिति । कार्यम्, अन्तरकारणम्, ताभ्यामनावृतम् । अध्यासव्यतिरेकेण सम्बन्धान्तरस्य निरूपयितुमशक्यत्वात् । साधनसम्पत्त्या साक्षात्कारेणाध्यासनिवृत्त्या मुक्तिः सम्भवत्येवेत्याशयः । इत्येवं नृगतिं जीवस्य तत्त्वं विविच्य निश्चित्य भुवि वर्तमानाः विवेकिनो विश्वसिताः भवच्चरणशरणतयैव संसारदुःखनिवृत्तिर्नान्यथेति विश्वासयुक्ताः निगमावपनं निगमोक्तकर्मणामावपनम् मन्तादुप्यन्तेऽस्मिन्नित्यावपनं क्षेत्रं सर्वकर्मार्पणविषयम्, यत्र समर्पितानि कर्माणि विमुक्तिं फलन्ति तम्, अत एव अभवं रणादिसंसारदुःखनिवर्तकं भवतः अङ्घ्रिमुपासते अर्चनवन्दनादिभिः सेवन्त इत्यर्थः ॥२०॥७॥

अन्वितार्थप्रकाशिका

स्वकृतेति ॥ श्रुतयः अबहिरन्तरसंवरणमपि अमीषु स्वकृतपुरेषु वर्तमानं पुरुषम् अखिलशक्तिधृतस्तव अंशकृतं वदन्ति । इति नृगतिं विविच्य भुवि वर्तमानाः कवयः विश्वसिताः सन्तः निगमावपनं अभवं भवतः अङ्घ्रिमुपासत इत्यन्वयः । कार्यमन्तरं कारणं ताभ्यामनावृतमपि अमीषु आध्यासिकसम्बन्धेन स्वकृतेषु स्वकर्मोपार्जितेषु पुरेषु देवादिदेहेषु भोक्तृत्वेन पुरुषं जीवमखिलशक्तिधृतः सर्वशक्त्याश्रयस्य पूर्णगुणस्य तवांशकृतम् अंश इवांशः कृत इव कृतः तादृशं त्वद्रूपं श्रूतयो । इत्येवं नृगतिं जीवस्य तत्त्वं विविच्य निश्चित्य भुवि वर्तमानाः कवयो विवेकिनो विश्वसिताः भगवच्चरणतयैव खनिवृत्तिर्नान्यथेति विश्वासयुक्ताः निगमोक्तकर्मणामावपनमासमन्तादुप्यन्तेऽस्मिन्नित्यावपनं क्षेत्रं सर्वकर्मार्पणविषयम् यत्र नि कर्माणि विमुक्तिं फलन्ति तम् अत एव अभवं जन्ममरणादिसंसारदुःखनिवर्तकं भवतः अङ्घ्रिमुपासते अर्चनवन्दनादिभिः । अत्र श्रुतयः—

"बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः, य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति, सर्व एवात्मनो व्युच्चरन्ति, परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिताह्यर्था प्रकाशन्ते महात्मनः ॥"

जीवस्य प्रतिबिम्बवादेऽपि बिम्बमेव प्रतिबिम्बात्मना गृह्यते । भेदादिधर्मा एवाध्यस्ता न तु धर्मी इति ॥२०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यथार्थभगवन्माहात्म्यज्ञातृन् भक्तान् स्तुवत्य ऊचुः-स्वकृतेति । हे भगवन् ! अमीषु स्वकृतपुरेषु स्वेन स्वकीयेन तवात्मभूतेन त्राऽक्षरपुरुषेण कृतानि च तानि च तानि पुराणि बाह्याभ्यन्तरबद्धक्षेत्रज्ञशरीराणि च तेषु पुरसादृश्यात् पुरशब्दः शरीरे : अबहिरन्तरसंवरणं बहिः स्थूलदैहिकेषु अन्तः सूक्ष्मकारणसूत्रात्माऽव्याकृतेषु च संवरणरहितम् ॥ जीवनियन्तृत्वेन वसन्तमव्यवधानमित्यर्थः । पुरुषं प्रकृत्यधिष्ठातारं पुरुषोत्तमात्मभूतं प्रकृतिप्रेक्षकं भगवदनुग्रहेण सृष्टिकर्तारं

निर्गुणं प्रकृतेः परं सावयवमक्षरपुरुषम् ॥ तथा चोक्तं स्कान्दे —

"तां कालशक्तिमादाय वासुदेवोऽक्षरात्मना । सिसृक्षयैक्षत यदा सा चुक्षोभ तदैव हि ॥" इति ॥

तृतीये —

पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् । अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ॥

प्रत्यग्धाम स्वयंज्योतिर्विश्वं येन समन्वितमिति ॥

विष्णुपुराणे —

प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चेति०

दशमे —

अजयोत्थनिमित्तयुजो विहर उदीक्षयेति ॥

एकादशे —

त्वत्तः पुमान् समधिगम्य ययास्य वीर्यमिति ॥ अखिलशक्तिधृतः अखिलेषु बद्धजीववैराजप्रकृतिप्रकृत्यधिपाक्षरपुरुषस्वधामाक्षरतत्स्थमुक्तेषु शक्तिधरस्य ॥ यद्वा ॥ अखिलाः पूर्वोक्ता या शक्तयस्तासां धरस्य धारकस्य ॥

विष्णुपुराणे —

परमात्मा च सर्वेषामाधारः पुरुषोत्तम इति ॥

एकादशे च —

आत्माधारोऽखिलाश्रय इति ॥

वेदस्तुतौ च —

स्वराडखिलकारकशक्तिधर इति ॥

तव परमात्मनः ॥ अंशकृत अंश इव कृतः अखण्डस्यांशाभावात्त्वदैश्वर्यांशं प्राप्त इत्यर्थस्तम् ॥ तथा च स्मृतिः —

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति ॥

अंशेन अक्षरेणेत्यर्थः । यद्वा । अंशेन त्वत्प्राप्तवीर्यरूपांशेन समर्थः कृतः अंशकृतस्तम् ॥ अत्र विनापि प्रत्ययं पूर्वोत्तरपदयो लोप इति वार्तिकेन पूर्वपदलोपः ॥ तथा चोक्तम् एकादशे —

त्वत्तः पुमान्समधिगम्य ययास्यवीर्यं धत्ते महान्तमिवगर्भममोघवीर्यः ॥ इति ॥

तथाभूतं मुनयो वदन्ति ॥ नन्वक्षरं प्रकैवल्यार्थिप्राप्यं निरवयवं प्रकाशरूपं चोक्तम् इदानीमत्र तु साव सर्वनियन्तृप्रकृत्यधिष्ठातृपुरुषोत्तमांशभूतं पुरुषाकृति चात उभयथापि वर्णनदर्शनादक्षरस्वरूपं कीदृशं निश्चेतव्यं तत्रोच्यते-अ निराकृति च ॥ उभयविधत्वे श्रुतिस्मृतयः, एतस्याक्षरस्य प्रणसने गार्गिद्यावापृथिवी विधृते तिष्ठतः एतस्याक्षरस्य प्र गार्गिसूर्याचन्द्रमसौ विधृतौ तिष्ठत इति ॥ त्वत्तः पुमान् समधिगम्य इत्यादिपूर्वोक्तश्रुतिस्मृतिभिः प्रकृत्यधिष्ठाता साकृतिरक्ष उक्तस्तादृशा अन्येऽपि बहवः सन्ति तानाह–

अक्षराख्याः पुमांसस्ते श्वेतद्वीपेऽत्र धामनि ॥ सेवितुं वासुदेवं तं स्थिता देवर्षिणेक्षिताः ॥१॥

प्राप्ते प्रलयकाले तु पुनश्चाक्षरधामनि । स्थास्यन्ति ते स्वतन्त्राश्च कालमायाभयोज्झिताः ॥२॥

अतीन्द्रिया निर्गतसर्वपापा निष्यन्दहीनाश्च सुगन्धिनश्च । द्विबाहवः केऽपि चतुर्भुजाश्च श्वेताश्च केचिन्नवनीरदाभाः ॥

पद्मच्छदाक्षाः सममानगात्राः सुरूपदिव्यावयवाः सुसाराः । विकीर्णकेशाश्च सदा किशोराः सद्भिश्च चिह्नैर्निखिलैरुपेताः ॥४॥ सरोजरेखाङ्कितपाणिपादाः षडूर्मिहीना मिहिरातितेजसः । सितांशुका ध्यानपराश्च सौम्याः कालोऽपि येभ्यो भयमेति म्॥५॥ इति स्कान्दे ॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ इति ॥

बहवो ज्ञानतपसा पूता मद्भावमागता इति गीतायां च ॥ अक्षरपुरुषबहुत्वं तत्साकृतित्वं च भारतमोक्षधर्मनारायणीयाख्यानेऽपि राश उक्तम् । ततो ज्ञातव्यम् ॥

तथा शतानन्दश्च —

सत्यसंज्ञमनन्तं च पूर्णं चाखण्डमक्षरम् । धाम यद्वासुदेवस्य मूर्तं चामूर्तमुच्यते ॥

अग्निर्यथैको भुवनं प्रविष्ट इति श्रुतेः ।

विशुद्धं केवलं ज्ञानं प्रयत्क्सम्यगवस्थितम् ॥ सत्यं पूर्णमनाद्यन्तं निर्गुणमित्यष्टमे ॥

तत्त्वेककालसम्भूतं कोटिकोट्यर्कसन्निभम् ॥ स व्यचष्ट महत्तेजो दिव्यं सिततरं मुने ॥१॥

दिशश्च विदिशः सर्वा ऊर्ध्वाधो व्याप्नुवच्च यत् । अक्षरं ब्रह्मकथितं सच्चिदानन्दलक्षणम् ॥२॥

प्रकृतिं पुरुषं चाभौ तत्कार्याण्यपि सर्वशः । व्याप्तं यद्योगसंसिद्धाः षट्चक्राणि निजां परे ॥

व्यतीत्य मूर्ध्नि पश्यन्ति वासुदेवप्रसादतः ॥३॥

यद्भासा भासितः सूर्यो वह्निरिन्दुश्च तारकाः । भासयन्ति जगत्सर्वं स्वप्रकाशं तथामृतम् ॥

यद्ब्रह्मपुरमित्याहुर्भगवद्धामसात्त्वताः ॥४॥ इति स्कान्दे च ॥

तृतीये च —

दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् । लक्ष्यन्तेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः ॥

तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् । विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ॥

इत्यलमक्षरसाकारादिप्रतिपादनप्रसङ्गेनेदानीं प्रकृतमनुसरामः ॥ इति पूर्वोक्तप्रकारेण नृगतिं नृणां गतिम् ॥ अल्पोऽपि जीवो नया द्विविधाक्षरसमानतां प्राप्नोतीत्येवंरूपां प्राप्तिं विविच्य विवेचनां कृत्वा कवयो विवेकिनो भगवत्स्वरूपमाहात्म्यविदो नाम् आवपनं क्षेत्रं ध्यानेन निवासस्थानमित्यर्थः । अभवं संसारनिवर्तकं च ॥ नास्ति भवो यस्मादिति व्युत्पत्तेः भवतः श्चरणसरोजं भुवि पृथिव्यां विश्वसिताः श्रद्दधानाः सन्त उपासते सेवन्ते ॥ चरणग्रहणं सर्वाङ्गोपलक्षणार्थं दासत्वसूचनार्थं च ॥ न्वयन्ति प्राप्नुवन्ति अन्वयन्तीति पूर्वश्लोकादृकृष्यते ॥ त्रिविधोपासकानामुपासने प्राप्तौ च प्रमाणमाह ॥

देवान् देवयजो यान्ति पितृन् यान्ति पितृव्रताः ॥ भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते । सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः । ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ माम् उपासनानुरूपं प्राप्नुवन्तीत्यर्थः ॥

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् । अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते । श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः । अनन्येनैव योगेन मां ध्यायन्त उपासते ॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥

इति भगवद्वाक्यानि गीतायाम् ॥२०॥७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पूर्वश्लोके दिव्यविग्रहस्वधामस्थपरमात्मस्वरूपोपासकानां तत्प्राप्तिरुक्ता, अथ दव्यविग्रहसर्वान्तःस्थपरमात्मोपासकानामपि तत्सारूप्याप्तिरूपं फलं मिलतीत्यभिप्रेत्य तदुपासकाश्च केचित्सन्तीत्याहुः ॥ स्वकृतपुरेष्विति ॥ अमीषु देवमनुष्यादिषु, स्वकृतपुरे स्वेन त्वया कृतेषु त्वन्निवासभूतेषु देहेष्वित्यर्थः । सन्तमिति शेषः । अखिलाः शक्तीरैश्वर्यशक्तीः धरतीति तस्य अखिलशक्तिधृतः, तव अंशेन सङ्कल्पात्मकेन ज्ञानेन कृतं कल्पितमित्यंशकृतं, सङ्कल्पात्मकज्ञानेनोपात्तमित्यर्थः । पुरुषं पुरुषाकारविग्रहम्, अबहिरन्तः अन्तर्बहिर्देशरहितमित्यर्थः । अन्तर्बहिश्च व्याप्तिक्षममिति भावः । असंवरणं सङ्कोचकहेतुरहितं, वदन्ति । वेदान्ता इति शेषः ।

"अङ्गुष्ठमात्रो रवितुल्यरूपः" "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति" "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः" "अत्यतिष्ठद्दशाङ्गुलम्"॥

इत्याद्या वेदान्ताः प्रतिपादयन्तीत्यर्थः ॥

इतीत्थम्भूतं तव पुरुषाकारविग्रहं, तथा, नृगतिं त्वदाराधनोपयुक्तमिदं नृजन्म च, विचिन्त्य, भुवि भूमौ, कवयः केचिद्विवेकिनः, निःश्वसिताः प्राणायामपराजितप्राणेन्द्रियाः सन्त इत्यर्थः । निगमानां वेदानामावपनं क्षेत्रं प्रतिपादनविषयमिति यावत् । न विद्यते भवः संसारो यस्मात् सेव्यमानादित्यभवस्तं भवतस्तव, अङ्घ्रिं चरणम्, उपासते, अनेन स्वधाम्नि दिव्यविग्रहपुरुषभावेन स्थितस्य सर्वान्तरात्मतया दिव्यविग्रहपुरुषभावेनावस्थितस्य चाङ्घ्र्युपासका द्वयेऽपि तवोपासनया मोक्षं प्राप्नुवन्तीति भावः । विश्वसिता इति पाठे सेवितः सन्मोक्षयिष्यतीति विश्वासयुक्ताः सन्तः उपासते इत्यर्थः । केचित्तु आ समन्तादुप्यतेऽनेनेति आवपनमुत्पादकं निगमस्य वेदोदितज्ञानस्यावपनमित्यपि व्याचक्षते । तत्पक्षे,

"तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयन्ति ते ॥"

इति भगवदुक्तिः प्रमाणम् ॥७॥ ॥२१॥

योगिरामानुजाचार्यकृतसरला व्याख्या

त्वच्चरणकमलभजनेनैव मुक्तिरिति निश्चित्य ज्ञानिनः त्वच्चरणावुपासन्ते इत्याहुः–स्वकृतेति । अमीषु बुद्धीन्द्रियमनःप्राण लोकानामसृजत्प्रभुरित्युक्तरीत्या चेतनानां तत्तत्कर्मानुगुणं भगवता निर्मितेषु देवमनुष्यादिशरीरेषु स्थितमिति शेषः । अबहिरन्तरसंवरणम् । बाह्ये अन्तरे च आवरणरहितं ज्ञानैकाकारत्वेन बाह्याभ्यन्तरे एकरूपमित्यर्थः । विज्ञानघनः अन्तरे बाह्ये च कृत्स्नो रसघन एवेति श्रुतेः । अखिलशक्तिधृतः सर्वशक्तिधारिणः तव ईश्वरस्यांशकृतम् अंशस्वरूपं वदन्ति–सूरय इति । एवम्प्रकारे नृगतिं पुरुषस्य गतिं भवाब्धौ देवमनुष्यादिशरीरेषु संसरणं विविच्य विचार्य ज्ञानस्वरूपस्य चेतनस्य ज्ञानावरणेन तापत्रयावलि भगवद्रचितमायानिबन्धना मायानिवृत्तिरूपमोक्षप्राप्तिश्च भगवच्चरणोपासनासाध्या इति निश्चित्याथवा इति नृगतिं पूर्वोक्तनानायोनि भ्रमतः भगवदंशभूतस्य चेतनस्य गतिं संसारबन्धं दूरीकृत्य मोक्षप्राप्तिसाधकमुपायं विविच्य विचार्य उपासनानुगृहीतः भगवानेव मोक्षप्रापकोपाय इति विचार्येत्यर्थः ।

'आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ।' इति भगवदुक्तेः ।

भुवि कवयः ज्ञानिनः विश्वसिताः सन्तः भगवदङ्घ्रिभजनेनैव संसारनिवृत्तिर्नान्यथेति विश्वासवन्तः ।

'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।' इति भगवदुक्तेः । निगमावपनं निगमोक्तकर्मणां 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिनिगमोक्तश्रवणादीनां भगवदाराधनरूपयज्ञादीनां 'यज्ञेन यज्ञमयजन्त देवाः' 'यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।' 'यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।'

इत्यादिश्रुतिस्मृत्यादिभिः भगवतः सर्वकर्माराध्यत्वेन प्रतिपादनात् । निगमोक्तकर्मणां मोक्षफलप्राप्त्यर्थं समर्पणविषय अत एवाभवम् । नास्ति भवो यस्मादुपास्यमानादित्यभवम् । भवतः मोक्षप्रदस्य तवाङ्घ्रिमुपासते । अर्चनवन्दनादिभिः

थपरमात्मोपासकानामपि
मनुष्यादिषु, स्वकृतपुरेषु
तस्य अखिलशक्तिधृतः,
कारविग्रहम्, अबहिरन्तः
वेदान्ता इति शेषः ।
त्रः पुरुषोऽन्तरात्मा सदा

त्य, भुवि भूमौ, कवयः
क्षेत्रं प्रतिपादनविषयमिति
उपासते, अनेन स्वधाम्नि
द्वयेऽपि तवोपासनया मोक्षं
त्ते इत्यर्थः । केचितु आ

अमीषु बुद्धीन्द्रियमनःप्राणान
शरीरेषु स्थितमिति शेषः ।
। विज्ञानघनः अन्तरे बाह्ये च
दन्ति-सूरय इति । एवम्प्रकारेण
त्य ज्ञानावरणेन तापत्रयावासिः
। इति नृगतिं पूर्वोक्तनानायोनिषु
र्य उपासनानुगृहीतः भगवानेव

श्वासवन्तः ।
ोक्तकर्मणां 'श्रोतव्यो मन्तव्यो
न्त देवाः' 'यज्ञैरिष्ट्वा स्वर्गतिं

ोक्षफलप्राप्त्यर्थं समर्पणविषयम
सते । अर्चनवन्दनादिभिः सेवन्ते

। अमीषु स्वकृतपुरेषु स्थितम् अबहिरन्तरसंवरणं पुरुषम् अखिलशक्तिभृतः तव देवाः इति शेषः । वदन्ति इति नृगतिं भुवि कवयः विश्वसितास्सन्तः निगमावपनम् अभवं भवतः अङ्घ्रिमुपासते इत्यन्वयः ॥२०॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

लक्षणया पूर्वोक्तजहदजहल्लक्षणया तं देहाद्युपाधिकृतं दोषं यश्चायं पुरुषे देहे प्रत्यगात्मा जीवः यश्चासावादित्ये ध्येयः सदा ण्डलमध्यवर्तीत्यादिनोपास्यत्वेनोक्तः परमेश्वरः सच्चिन्मात्रस्वरूपलक्षणया एकः । एवं तत्त्वमसीत्यस्यैवार्थ उक्तः । तत्र शङ्कते नन्विति । क्रत्वर्थस्य यज्ञाङ्गरूपस्य यजमानात्मनः इयम् ईश्वराभेदरूपा स्तुतिरर्थवादवेदेन क्रियते न तु तस्य श्वरत्वं बोध्यते । यथा 'आदित्यो यूपः प्रस्तरोऽयं यजमानः' इत्यादिगुणवादरूपार्थवादेन यूपादीनामादित्यादिरूपत्वेन त्येतत्पर्यन्तं पूर्वपक्षः । समाधत्ते नैतदिति । एतत् उपनिषदा अर्थवादत्वेन स्तुतिमात्रपरत्वं न युज्यते न सङ्गच्छते । यतो त्र जीवस्येश्वराभेदेन ब्रह्मात्मैक्यज्ञाने एते तत्त्वमसीत्याद्युक्त्या अर्था जीवब्रह्मैक्यादयः जीवब्रह्माभेदोक्तेः स्तुतिमात्रत्वे ज्ञानार्थ उपायोक्तिः न सङ्गच्छते । न हि यूपमादित्यभेदोक्तौ कश्चन उपायः कैश्चिदुक्तः । तस्मादुपनिषद्वाक्यानि नार्थवादरूपाणि स्वार्थपरत्वेनैक्यबोधकान्येव । विधिशेषत्वादितिभावः । अन्यथा भगवद्भजनं विना इदमैक्यज्ञानं

'सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम् ।' इत्युक्तेः ॥२०॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

अपि च कुतो न्वियमाशङ्का स्यात् । भगवतो देहाद्युपाधिकृतदोषप्रसङ्ग इति । यतो विद्याकामकर्मभिः संसरतो जीवस्यापि द्भावं लक्षणया बोधयन्त्यस्तं दोषं निषेधयन्ति । अतः कृतावतारस्य भगवच्चरणभजन उपायं वदन्तीत्याहुः- कृतपुरेष्विति । अमीषु स्वकृतपुरेषु स्वकर्मोपार्जितेषु देहेषु भोक्तृत्वेन वर्तमानं पुरुषं जीवम् अखिलशक्तिधृतः सर्वशक्त्याश्रयस्य तव अंशकृतं त्वत्स्वरूपं वदन्ति । अंश इवांशः कृत इव कृतः मायोपाधितया सम्पादितं त्वत्स्वरूपमित्यर्थः । ननु कारणसंवृतस्य कुत एवम्भूतत्वं तत्राह-अबहिरन्तरसंवरणम् । बहिः कार्यम् अन्तरं कारणम् । वस्तुतस्तदावरणं शून्यम् । त्वादित्यर्थः । इति ऐवं नृगतिम् । नुः जीवस्य गति विविच्य विशोध्य कवयो विश्वसिताः कृतविश्वासाः सन्तः भुवि ऽङ्घ्रिं चरणमुपासते । अर्चनवन्दनादिभिः सेवन्ते । कथम्भूतमङ्घ्रिम् । भवनिवर्तकम् । पुनश्च निगमावपनम् नादुप्यतेऽस्मिन्नित्यावपनं क्षेत्रम् । सर्वकर्मार्पणविषयमित्यर्थः । यत्रार्पितानि कर्माणि मोक्षफलं फलन्तीति तात्पर्यार्थः । मर्त्यलोके इदमेवोचितमिति भावः । भगवद्भावं बोधयन्त्यस्तं दोषं निषेधयन्तीत्यत्र श्रुतयः-

"स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः ।" "अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नःप्रज्ञानघन एव ।" इति मसी"त्याद्याः । अर्थः — परमे व्योम्नि आकाशादि अन्नमयान्तं कार्यं सृष्ट्वा तदेवानुप्रविष्टो यः स एवायं पुरुषः । अर्कः । वादित्ये वर्तते । स एक एव भवति । अयमात्माऽनन्तरः अन्तरशून्यः । अबाह्यः बाह्यशून्यः । कृत्स्नः पूर्णः । ज्ञानघनो रूप इति । तत्त्वमसीति पूर्वमेव व्याख्यातम् । ननु क्रत्वर्थस्यात्मनः स्तुतिरियमीश्वरत्वेन क्रियते न तु तस्य ईश्वरत्वं बोध्यते । ध्यते । यतो भगवद्भक्तियुक्तस्यैव कथितार्थाः । अर्थाः पदार्थाः तस्यैव महात्मनः प्रकाशन्ते यथावत्स्फुरन्ति नान्यस्येत्यर्थः । तस्माद् ब्रह्मविद्यार्थिभिर्देवतागुरुविषया निरुपाधिर्भक्तिः कर्तव्येति दर्शितम् ।

पुरुषम् अंशकृतमित्यत्र श्रुतिः गोपालतापनीये — "ब्रह्मणोंशभूतस्तथेतरो भोक्ता" इति । नारदपञ्चरात्रे-प्राधानिकसर्गमुक्त्वा कथने —

"यत्तटस्थं तु चिद्रूपं स्वसंवेद्याद्विनिर्गतम् । रञ्जितं गुणरागेण स जीव इति कथ्यते ॥" इति ॥

गीतासु — "ममैवांशो जीवलोके जीवभूतः सनातनः ।" इति । इत्यादिकं सुगमम् । भवतोऽङ्घ्रिमुपासत श्रुतिः —

"चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन शुद्धेन पवित्रेण पूतेनातिपाप्मानमरातिं तरेम ॥

लोकस्य द्वारमर्चिष्मद्भ्राजमानं महस्वदमृतस्य धारा बहुधा दोहमानं चरणं लोके सुधितां ददातु ॥" इति।

अर्थः — श्रीकृष्णस्य कृतत्रिविक्रमरूपस्य चरणं याचमाना (आहुः)-येन पातक्यपि पूतः पवित्रः सन् दुष्कृतानि पापानि तरति तच्चरणं पवित्रं पवित्रकरम्। विततं विस्तीर्णम्-भूर्भुवःस्वरतिक्रम्य वर्तमानम्। पुराणं सनातनम्। तेन चरणेनारातिं वैरिणं पाप्मानं वयमतिशयेन तरेम। कथम्भूतेन। शुद्धेन स्वयम्भूदत्तार्घजलधौतेन। पुनश्च पवित्रेण पवित्रकारकेण पूतेन निर्मलेन। तच्चरणं लोके सुधितां सुधाधारां ददातु। तारकादित्वादितच् प्रत्ययः। कथम्भूतम्। लोकस्य वैकुण्ठलोकस्य अर्चिष्मद्दीपवत् द्वारं भ्राजमानं न केवलमेतावदपि च महस्वत्। महः ब्रह्मतेजोमण्डलं युक्तम्। अत एव लोके बहुधा बहुप्रकाराः। अमृतस्य धारा धर्मार्थकाममोक्षरूपम्। भक्तिकामधेनुरिव भक्तेभ्यो दोहमानम् एवम्भूतं चरणं भजाम इत्यर्थः। भक्तिपरेयं श्रुतिः। अथ स्वामिनां —

"त्वदंशस्य ममेशान त्वन्मायाकृतबन्धनम्। त्वदङ्घ्रिसेवामादिश्य परानन्द निवर्तय" ॥२०॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ तावदुपासकस्य जीवस्य परेण सम्बन्धमाह-स्वकृतेति। स्वशब्दो भगवद्वाची। स्वकृतपुरेषु शरीरेषु। बहिरन्तरसंवरणम्। स्वरूपतो धर्मतश्च ज्ञानस्वरूपम्। यद्वा। शरीरेष्वन्तर्बहिश्च प्रसृताज्ञानं पुरुषं नाम जीवम् अखिलशक्तिभृतस्तव अंशकृतम्। विशेषणतया अंशकृतम्। पुरुषसमष्टेर्विभक्तं वदन्तीति। तथा च सूत्रम् - 'अंशे नानाव्यपदेशादन्यथा चापि दासकितवादित्वमधीयत एके।' इति। व्याख्यातमिदं सूत्रं वेदान्तदीपे श्रीभाष्यकारैः। तथा हि - नानात्वव्यपदेशादेकत्वव्यपदेशाच्च परमात्मनः सत्यसङ्कल्पत्वसर्वज्ञत्वनिरवद्यत्वश्रुतेरज्ञत्वोपाधिसम्बन्धाद्यनुपपत्तेर्जीवशब्दस्य जीवशरीरकपरमात्मवाचित्वेन तत्त्वमस्ययमात्मा ब्रह्मेत्यादिसामानाधिकरण्यमुख्यत्वात् शरीरशरीरिणोर्विशेषणविशेष्यभूतयोः स्वरूपभावभेदेन च भेदश्रुतेर्मुख्यत्वाच्च। परमात्मांशो जीवः जीवशरीरत्वं च परमात्मनो 'यस्यात्मा शरीरमि'त्यादिश्रुतिसिद्धम्। ब्रह्मदासा ब्रह्मदाशा इत्यादिदासकितवादित्वमप्यधीयत एके शाखिनः। सर्वजीवव्यापित्वादभेदोपदेशस्य तत्रत्यादरः प्रतीयते इत्यर्थः। इति। तथा च भगवताऽप्युक्तम् — 'ममैवांशो जीवलोके जीवभूतः सनातनः।' इति। अत एव जीवस्य सोपाधिकब्रह्मांशत्वं न सम्भवतीति। नृगतिम्। नुर्जीवस्य गतिम्। तत्त्वं विविच्य अन्विष्य। निगमावपनम्। निगमस्तत्त्वज्ञानं तदुत्पादकं भवतोऽङ्घ्रिं निःश्वसिताः प्राणायामपराः उपासते ध्यायन्तीत्यर्थः। विश्वसिता इति पाठे कृष्णे विश्वासा अनन्यपराः उपासत इत्यर्थः ॥२०॥

कृष्णप्रिया

आपके रचे गए आपके निवासरूप शरीरोंमें विराजमान अखिल शक्तिधारी आपने अपने संकल्पसे जिसका स्विकार किया सर्वत्र व्याप्त होनेमें समर्थ आवरण रहित एसा पुरुषाकार दिव्य रूपको वेदान्तगण प्रतिपादन करते है। आपके उस दिव्यरूप को आराधनीय भावसे चिन्तवन कर तथा इसी प्रकार आपके आप के योग्य मनुष्य जन्म हे इसका भि विचार कर इस भूमिमें कोइ एक विवेकी जन जितेन्द्रिय होकर आपके चरणारविन्द की उपासना करते है। वह चरणारविन्द वेदो के प्रतिपादन करने का भूमि रुप है। अर्थात् वह चरणारविन्द वेद प्रतिपादित है अथवा वह चरणारविन्द उपासकजनों को ज्ञान का उत्पादक है और संसार का निवर्त्तक है ॥२०॥

[1]दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः।
न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः ॥२१॥

---

[1] दुरधिगमात्म - वीर.।

ु ॥'' इति।

पवित्रः सन् दुष्कृतानि
ातनम्। तेन चरणेनारार्ति
कारकेण पूतेन निर्मलेन।
क्रस्य अर्चिष्मद्दीपवत् द्वारं
प्रकाराः। अमृतस्य धारा
:। भक्तिपरेयं श्रुतिः।

। स्वकृतपुरेषु शरीरेषु।
वम् अखिलशक्तिभृतस्तव
ानाव्यपदेशादन्यथा चापि
व्यपदेशादेकत्वव्यपदेशाच्च
शरीरकपरमात्मवाचित्वेन
ोः स्वरूपभावभेदेन च
द्धम्। ब्रह्मदासा ब्रह्मदाशा
यते इत्यर्थः। इति। तथा च
ऽब्रह्मांशत्वं न सम्भवतीति।
क भवतोऽङ्घ्रि निःश्वसिताः
र्थः ॥२०॥

आपने अपने संकल्पसे
दिव्य रूपको वेदान्तगण
सी प्रकार आपके आधन
जितेन्द्रिय होकर आपके
ूमि रूप है। अर्थात् वह
पादक है और संसार का

:।
॥२१॥

कर्दमक्षमा

हे ईश्वर, !, दुरवगमात्मतत्त्वनिगमाय, आत्ततनोः, तव, चरितमहामृताब्धिपरिवर्तपरिश्रमणाः, तव, सरोजहंसकुलसङ्गविसृष्टगृहाः, केचित्, अपवर्गम्, अपि, न, परिलषन्ति ॥२१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

भक्तिरल्पसाधनमिति वचनमनुचितमिव मन्वानो भक्तिं गुरूकरोति-दुरवगमेति। भो ईश्वर! दुरवगमं दुर्बोधं यदात्मतत्त्वं निगमाय ज्ञापनाय तवात्ततनोराविष्कृतमूर्तेश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः चरितमेव महामृताब्धिस्तस्मिन् परिवर्तो विगाहस्तेन श्रमणाः परिवर्जनार्थः श्रमणं श्रमः गतश्रमा इत्यर्थः। अपवर्गमपि केचिन्न परिलषन्ति नेच्छन्ति कुतोऽन्यदिन्द्रपदादि नीत्येवम्भूता भक्तिरसिका विरला इति दर्शयन्ति न केवलमन्यन्नेच्छन्ति किन्तु तेनैव सुखेन पूर्णाः सन्तः पूर्वसिद्धं दिसुखमप्युपेक्षन्त इत्याह-तव चरणसरोजहंसकुलसङ्गविसृष्टगृहा इति। तव चरणसरोजे हंसा इव रममाणा ये भक्तास्तेषां कुलं सङ्गस्तेन विसृष्टा गृहास्ते तथा अनेन श्रवणकीर्तने दर्शिते श्रुतिश्च मुक्तेरप्याधिक्यं भक्तेर्दर्शयति यथाऽऽह ''यं सर्वे देवा नमन्ति वो ब्रह्मवादिनश्च'' इति व्याख्यातं च सर्वज्ञैर्भाष्यकृद्भिः मुक्ता अपि लीलया विग्रहं कृत्वा भजन्त इति।

त्वत्कथामृतपाथोधौ विहरन्तो महामुदः। कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥८॥ ॥२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः — ''तमेतं वेदानुवचनेन यज्ञेन दानेन तपसानाशकेन'' इत्यादिषु ज्ञानसाधनेषु नुकूलत्वात्साऽल्पेति वचनमनुचितमिति मत्वाह-भक्तिरित्यादिना। इत्यर्थ इति-व्याख्या। अन्यत्स्वर्गादि। तेनैव भक्तिसुखेन। र्थस्तु-सर्वे देवा यं परमेश्वरं नमन्ति तथा मुमुक्षवो ब्रह्मवादिनश्च यं नमन्ति। अत्र देवाः पृथिव्यन्तरिक्षनाकब्रह्मलोकनिवासिनो भगवद्भक्तास्ते सर्वे देवाः संसारविजिगीषुत्वान्मोदशालित्वाच्च। तेषां मध्ये द्विविधा उपासकाः मुमुक्षवः संसारान्मुक्तिकामाः वदनशीला ब्रह्मवादिनो मुक्ता एते सर्वे यं नमन्ति भजन्त इति व्याख्यातं सर्वज्ञैर्भाष्यकृद्भिर्भगवत्पूज्यपादैर्नृसिंहतापन्याम्। अपि श्रीशुकादयो लीलया विग्रहं धृत्वा भजन्ति।

''आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे। कुर्वन्त्यहैतुकीं भक्तिम्'' इत्याद्युक्तेः। स्वामिनां त्वदिति। तव मृतपाथोधिरमृतसमुद्रस्तत्र ॥★॥

श्रीधरानुयायिनी — सर्वसाधनेभ्यो भक्तेराधिक्यं वदन्ति-दुरवगमेति। भो ईश्वर! त्वदीयानन्यभक्तसमूहसङ्गलब्धत्वत्कीर्तिश्रवणकीर्तनहेतुकसुखेन परिपूर्णा अत एव प्राक्सिद्धमपि गृहपुत्रस्त्र्यादिसुखं परित्यज्य स्यात्मतत्त्वज्ञापनाय प्रकटीकृतश्रीमूर्तेस्तव चरित्रामृतसमुद्रावगाहनेन दूरीकृतसंसारश्रमसन्तापास्त्वया दीयमानमि मोक्षमपि न्ति कुतोऽन्यदिन्द्रादिपदमिति। विरला एव ते। यद्वा-तव चरितान्येव महामृताब्धयस्तेषु ये परिवर्तास्तरङ्ग[illegible]पुञ्जास्तेषु नोन्मज्जनोत्थं परिश्रमणमतिश्रमो येषां त इत्यर्थः। ननु-मोक्षमपि त्यक्त्वा पुनरीदृशपरिश्रमस्वीकारः कथमिति चेच्छृणु- विषयलम्पटाः परमसुकुमाराः परिश्रमासहना अपि भोगसुखाद्युपयोगिनं युद्धव्यवहारादिपरिश्रममेव सर्वसुखाधिकं सुखं तथा त्वद्भक्तास्त्वल्लीलाकथामाधुर्यपानोत्थं नर्तनकीर्तनादिपरिश्रममेव परमानन्दसाधनत्वेन परमसुखं मन्यमाना ब्रह्मास्वादसुखं तृणचर्वणसुखमिव मन्यन्तेऽत एवोक्तं भाष्यकारैः-मुक्ता अपि लीलया विग्रहं धृत्वा भगवन्तं भजन्ते, इति। त्वत्कथेत्याद्या रिकाऽप्येतदभिप्रायिकैव ॥★॥

तोषणी — तच्छ्रुत्वा लब्धनिजभावोद्दीपनाश्चरणोपनिषदाद्याः साक्षादेव तन्माधुरीं वर्णयन्ति-दुरवगमेति। हे ईश्वर! विराजमानवैभव! केचिद्विरलप्रचारा अपवर्गमपि परि सर्वतो भावेन एकांशेनापि न लषन्ति किमुतान्यत्। कथम्भूतास्ते, दुरवगमम्। सर्वागोचरपरमगोलोकादिवैकुण्ठविहारित्वेन दुर्बोधं यदात्मनस्तव तत्त्वं स्वरूपगुणलीलादियाथार्थ्यं तस्य नुभावनाय आत्ततनोः प्रपञ्चे समानीतनिजविग्रहस्य तव चरितरूपे महामृताब्धौ यदि महामृताब्धिः कश्चिद्भवति तदा

साधारणजनबोधनाय तेन रूप्ये श्लष्टस्वतस्त्वमृतानां सालोक्यादिमोक्षानन्दानां तदन्तर्भावित्वात् त्वदीयमहासमुद्रतुल्ये यः परिवर्तो मुहुरवगाहोऽनुभवस्तेनानुषङ्गिकतयैव गतसंसारश्रमाय इत्यर्थः। ननु-बहवोऽपि तच्चरितं शृण्वन्ति तथापि न तादृशत्वमिति केषाञ्चित्तादृशत्वे किं कारणमित्याशङ्क्य परमरहस्यतया सर्वान्त एव तद्व्यञ्जयन्ति-चरणेति। हंसाः परमतत्त्वानुभाविनस्तेषामि चरणसम्बन्धिनः "मुक्तानामपि सिद्धानाम्" इत्यादिशास्त्रे तच्चरणसम्बन्धेन लोकेऽपि सरोजसम्बन्धेन हंसानामुत्कर्षो वर्ण्यते इति परमोत्कृष्टा ये तन्माधुरीसमास्वादतिरस्कृतमोक्षानन्दास्तेषां कुलं शिष्योपशिष्यादिरूपं तदेकस्यापि प्रसङ्गेन विसृष्टं त्यक्तमपि गृहं यैस्तेऽपि किमुत तत्र चिरं प्रावृताः किमुततरां तादृशहंसानां शिष्यादयः किमुततमां स्वयमेव तादृशहंसा इत्यर्थः। अत्र मुख्याः श्रुतयः—

"चरणं पवित्रं विततं पुराणं तेन पूतास्तरन्ति दुष्कृतानि। तेन शुद्धेन पवित्रेण पूतेनाऽतिपाप्मानमरातिं तरेम॥"

"लोकस्य द्वारमर्चिष्मद्भ्राजमानं महस्वदमृतस्य धाराः बहुधा दोहमानं चरणं लोके सुधितां दधातु ॐतत्सत्॥" इत्याद्याः॥

"अमृतस्य धारा बहुधा दोहमानम्" इति चरितमहामृताब्धिमत्त्वमुक्तम्। भक्त्या चरणवर्णनं तदुपलक्षणत्वेन श्रीभगवन्तमेव बोधयन्तीति श्रुत्यैकार्थम्। तदनुगाः श्रुतयस्तु- "यं सर्वे देवा नमन्ति" इत्याद्याः। अत्र देवा विषयिणः। ततश्च मुमुक्षव इत्युत्तरपाठाद्ब्रह्मवादिशब्देन क्रमोत्कृष्टदृष्ट्या तदुपदेष्टारो मुक्ता एव लभ्यन्ते ब्रह्मणि वदन्ति प्रकाशन्ते इति। अत्र मध्वाचार्यधृताः श्रुतयः:- "मुक्ता ह्येनमुपासते मुक्तानामपि भक्तिर्हि परमानन्दरूपिणी।" इत्याद्याः। तथा च ब्रह्मसूत्रम्- "मुक्तोपसृप्यव्यपदेशात्।" इति॥★॥

अत्र विश्वनाथाः — भगवद्विषयकभक्तियोगस्य सर्वोत्कर्षं स्वाभिधेयञ्च द्योतयितुंतमेव पुनरप्यभ्यस्यन्ति-दुरवगमेति चतुर्भिः। हे ईश्वर! सर्वनियन्तः! दुरवगमं जीवैर्ज्ञातुमशक्यं यदात्मतत्त्वं स्वीयलीलारूपगुणकृपैश्वर्यमाधुर्यं तस्य निगमज्ञापनायात्ततनोराविष्कृतश्रीमूर्तेस्तव चरितान्येव महामृताब्धयस्तेषु ये परिवर्तास्तरङ्गभ्रमिपुञ्जास्तेषु निमज्जनोन्मज्जनपरिश्रमसुखमेवं भावः। यथा विषयलम्पटपरमसुकुमाराः श्रमलेशासहना अपि साम्प्रयोगिकं परिश्रममेव सर्वसुखाधिकं सुखं मन्यन्ते तथैव त्वद्भक्तास्त्वल्लीलाकथामाधुर्यपानोत्थं नर्तनकीर्तनक्रोशनमिथःपादतलप्रपतनमूर्च्छनप्रबोधनहाहाकरणरोदनद्रावणादिपरिश्रममेव परमसुखं मानयन्तो ब्रह्मास्वादसुखं पशूनां तृणचर्वणसुखमिव मन्यन्ते। तदुक्तं श्रीस्वामिचरणैरपि-

"त्वत्कथामृतपाथोब्धौ विहरन्तो महामुदः। कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम्॥" इति। त्वत्सुखप्राप्तिकारं वदन्तो विशिनष्टि-ते तव चरणसरोजमाधुर्यास्वादिनो हंसा ये परमभागवतास्तेषां कुलस्य सङ्गेन विसृष्टं गृहं स्त्रीपुत्रादिसङ्गश्च यैस्तेऽन्यत्पूर्ववत् (८)॥२१॥

नीलकण्ठी — सङ्गतिरुक्ता। दुरवगमात्मतत्त्वेति। दुरवगमं दुर्बोधम् आत्मनस्तत्त्वं याथात्म्यं तस्य निगमायापरोक्षज्ञान तव ब्रह्मणः आत्ततनोः स्वीकृतमत्स्यादिमूर्तेश्चरितं वेदोद्धारादि तदेव महन्निरतिशयफलहेतुत्वात् अमृतवन्मधुरत्वात् अब्धिवदनन्तत्वात् महामृताब्धिः। तत्र परिवर्तो नित्यं वर्तनम्। तेन हेतुना "परिवर्जनार्थः।" परित्यक्तं श्रमणं शोकमोहायासो यैस्ते तथाभूताः केचिद्विरलाः। ईश्वर! ते तव चरणसरोजे रममाणाः हंसा इव हंसाः संन्यासिनः। तेषं कुलं समूहस्तेषां सङ्गेन विसृष्ट गृह ये तथाभूता यतय इत्यर्थः। ते अपवर्गं मोक्षमपि न परिलषन्ति नेच्छन्ति। पूर्वश्लोकोक्तकर्मयोगापेक्षया भक्तियोगो महीयानित्यर्थः। यत्तु भक्तेर्मोक्षाद्गरीयस्त्वमुक्तं "यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनः" इति श्रुत्या मुक्ता अपि लीलया विग्रहं कृत्वा भजन्ते इति तद्भाष्येण च दृढीकृतं तद्भक्तिस्तुत्यर्थम्। कार्यब्रह्मलोकैकदेशभूतवैकुण्ठकैलासादिप्राप्तौ भक्त्युपचारात् इति ध्येयम्। त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदिति विद्यायां भेददर्शनाभावश्रुतेः यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यविद्याविषय भक्तेस्तद्वतां मुक्तत्वायोगाच्च प्रजापतिशिष्यस्यापि विरोचनस्य मोहवत्त्वश्रुतेर्जयविजययोर्वैकुण्ठात्पतनस्मृतेश्च न कार्य क्रममुक्तिहेतुतापि सम्भाव्यते। अतो भक्तिस्तुत्यर्थमेव। तच्छ्रुतेस्तु जीवन्मुक्तविषयत्वमपि सम्भवतीति दिक् (८)॥२१॥

तच्छ्रुत्वा
विराजमानवैभव!
दुरवगमं सर्वागोचर
निगमनाय अनुभावन
साधारणजनबोधनाय
मुहुरवगाहोऽनुभवः
केषञ्चित्तादृशत्वे किं
चरणसम्बन्धिनो "मु
परमोत्कृष्टा ये तन्माधु
यैस्तेऽपि किमुत तत्र
श्रुतयः—

"चरणं पवित्रं

"लोकस्य द्वा
इत्याद्याः॥

"अमृतस्य धार
बोधयन्तीति श्रुत्यैकार्थम्
उत्तरपाठाद्ब्रह्मवादिशब्देन
श्रुतयः- "मुक्ता ह्येन
"मुक्तोपसृप्यव्यपदेशात्

अभवमित्युक्तम्,
निर्विशेषस्यापि चमत
सच्चिदानन्दघनमधुरमधुररू
एतस्यैव मधुरमधुरानन्ताश्चर्य
अपि-शब्दश्चतुर्वर्गेषु तस्य
विघातकत्वाच्च। हे ईश्वरेति त
त्वच्चरणसरोजहंसकुलसङ्ग
मोक्षतुच्छतापादकः। यत उ

"तुलयाम लवेनापि

[अतस्त्वद्भक्तेरेव स
जनिमत्त्वम्, निरुपमैश्व
दामबन्धनस्वीकारगोवर्धनोद्धरण
सत्यव्रतवचनम् —

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तच्छ्रुत्वा लब्धनिजभावोद्दीपनाच्चरणोपनिषदाद्याः साक्षादेव तन्माधुर्यं वर्णयन्ति-दुरवगमेति । हे ईश्वर ! सर्वोपरि राजमानवैभव ! केचिद्विरलप्रचाराः अपवर्गमपि परि सर्वतोभावेनैकांशेनापि न लषन्ति, किमुतान्यत् । कथम्भूतास्ते । तत्राहुः- वगमं सर्वागोचरपरमगोलोकादिवैकुण्ठविहारित्वेन दुर्बोधं यत् आत्मनस्तव तत्त्वं स्वरूपगुणलीलादियाथार्थ्यं तस्य निगमाय गमनाय अनुभावनाय आत्ततनोः प्रपञ्चे समानीतनिजविग्रहस्य तव चरितरूपे महामृताब्धौ यदि महामृताब्धिः कश्चिद्भवति तदा धारणजनबोधनाय तेन रूप्येत श्लेषात् स्वतस्त्वमृतानां सालोक्यादिमोक्षानन्दानां तदन्तर्भावित्वात्तदीयमहासमुद्रतुल्ये यः परिवर्तः रवगाहोऽनुभवः तेनानुषङ्गिकतयैव गतसंसारश्रमाय इत्यर्थः । ननु बहवोऽपि तच्चरितं शृण्वन्ति तथापि न तादृशत्वमिति । श्चित्तादृशत्वे किं कारणमित्याशङ्क्य परमरहस्यतयासर्वान्त एव तद्व्यञ्जयन्ति चरणेति । हंसाः परमतत्त्वानुभाविनस्तेष्वपि णसम्बन्धिनो "मुक्तानामपि सिद्धानाम्" इत्यादिशास्त्रे तच्चरणसम्बन्धेन लोकेऽपि सरोजसम्बन्धेन हंसानामुत्कर्षो वर्ण्यत इति मोत्कृष्टा ये तन्माधुरीसमास्वादतिरस्कृतमोक्षानन्दास्तेषां कुलं शिष्योपशिष्यादिरूपं तदेकस्यापि प्रसङ्गेन विसृष्टं त्यक्तमात्रं गृहं तेऽपि किमुत तत्र चिरं प्रावृताः किमुततरां तादृशहंसानां शिष्यादयः किमुततमां स्वयमेव तादृशहंसा इत्यर्थः । अत्र मुख्याः तयः—

"चरणं पवित्रं विततं पुराणं तेन पूतास्तरन्ति दुष्कृतानि । तेन शुद्धेन पवित्रेण पूतेनाऽतिपाप्मानमरातिं तरेम ॥"

"लोकस्य द्वारमर्चिष्मद्भ्राजमानं महस्वदमृतस्य धाराः बहुधा दोहमानं चरणं लोके सुधितां दधातु ॐतत्सत् ॥"

त्याद्याः ॥

"अमृतस्य धारा बहुधा दोहमानम्" इति चरितमहामृताब्धिमत्त्वमुक्तम् । भक्त्या चरणवर्णनं तदुपलक्षणत्वेन श्रीभगवन्तमेव धयन्तीति श्रुत्यैकार्थम् । तदनुगाः श्रुतयस्तु- "यं सर्वे देवा नमन्ति" इत्याद्याः । अत्र देवा विषयिणः । ततश्च मुमुक्षव इत्यत त्तरपाठाद्ब्रह्मवादिशब्देन क्रमोत्कृष्टदृष्ट्या तदुपदेष्टारो मुक्ता एव लभ्यन्ते ब्रह्मणि वदन्ति प्रकाशन्ते इति । अत्र मध्वाचार्यधृताः श्रुतयः- "मुक्ता ह्येनमुपासते मुक्तानामपि भक्तिर्हि परमानन्दरूपिणी ।" इत्याद्याः । तथा च ब्रह्मसूत्रम्- "मुक्तोपसृज्यव्यपदेशात् ।" इति ॥८॥२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अभवमित्युक्तम्, तर्हि किं मोक्षार्थमुपासते ? नेत्याहुः-दुरवगमेति । अचिन्त्यं यदात्मनस्तव तत्त्वम्, तत्त्वत एकस्याप्यनेकत्वम्, र्विशेषस्यापि चमत्कारिबहुविशेषवत्त्वम्, चतुर्भुजादिमूर्तेरप्यपरिच्छिन्नत्वं चेत्यादिलक्षणम्, किंवा च्चिदानन्दघनमधुरमधुररूपगुणलीलादिमत्त्वं स्वरूपं तस्य निगमाय भक्तेषु ज्ञापनाय । आत्ततनोरिति श्रीकृष्णस्य प्राकट्याभिप्रायेण, तस्यैव मधुरमधुरानन्ताश्चर्य्यलीलत्वेन चरित्रस्य महामृताब्धित्वम्, चरितेत्यानुषङ्गिकत्वेन संसारभ्रमणश्रमध्वंसः सूचित एव । पि-शब्दश्चतुर्वर्गेषु तस्य श्रैष्ठ्यात्, तथापि परिहासेऽपि न लषन्ति, - दुःखाभावमात्रत्वेन तुच्छसुखत्वाद्भक्तिरस-घातकत्वाच्च । हे ईश्वरेति त्वद्भक्तिप्रभावेणैव तेषां तादृशत्वमिति भावः । अन्यत्तैर्व्याख्यातम् । यद्वा, चरितमहामृताब्धिपरिवर्तनार्थमेव च्चरणसरोजहंसकुलसङ्गविसृष्टगृहा इति त्वदेकरसत्वमुक्तम् । चरणसरोजहंसा एकान्तिनो भगवत्प्रियाः, त्वत्सङ्ग एव क्षतुच्छतापादकः । यत उक्तम् (भा० ४/३०/३४) —

"तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् । भगवत्सङ्गिसङ्गस्य " इति ॥

[अतस्त्वद्भक्तेरेव सर्वोत्कृष्टत्वाद्भक्तानामनन्यनिष्ठता युक्तेत्याहुः-दुरवगमेति । विभुत्वेऽपि परिच्छिन्नत्वम्, अजत्वेऽपि न्मत्त्वम्, निरुपमैश्वर्यभरयुक्तत्वेऽपि पलायनादिकार्पण्यवत्त्वमित्यादि दुरवगमत्वम् । चरितानि बन्धनस्वीकारगोवर्धनोद्धरणादिरासक्रीडादीनि । चरणसरोजहंसकुलसङ्गविसृष्टगृहाः सत्यव्रतादयः । तथा हि पाद्मे कार्तिकमाहात्म्ये त्यव्रतवचनम् —

"वरं देव मोक्षं न मोक्षावधिं वा न चान्यं वृणेऽहं वरेशादपीह" इति ॥

अत्र सौपर्णश्रुतिश्च श्रीमदानन्दतीर्थपादपद्मैः प्रमाणिता —

"सर्वदैनमुपासीत यावद्विमुक्तिः, मुक्ता अपि ह्येनमुपासते ॥ इति ॥" ॥२१॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अवताराणां भक्तिवर्धकत्वमाह-दुरवगमेति । भो ईश्वर ! सर्वनियन्तः ! दुरवगमात्मतत्त्वनिगमाय । दुरवगमं दुर्बोधं यदात्मतत्त्वं तस्य निगमाय ज्ञानप्रवर्तनाय । आत्ततनोः आविष्कृता मूर्तिः येन तस्य तव चरितमेव महामृताब्धिः महासमुद्रः । तस्मिन् परिवर्तेन आवर्तेन परिवर्जने गतः परिश्रमो येषां ते तथोक्ताः । अपवर्गमपि कैवल्यं मोक्षमपि भक्तिरसिका न वाञ्छन्ति, कुतोऽन्यान् । कालविधुतम् इन्द्रादिपदमिति भावः । कीदृशस्तव । चरणसरोजहंसकुलसङ्गविसृष्टगृहाः । त्वच्चरणकमले हंसा इव रममाणा ये भक्ताः । तेषां कुलं वृन्दम् । तेन यः समागमः । तेन विसृष्टाः त्यक्ताः गृहाः यैः तथाभूताः । त्यक्तगार्हस्थ्याः ॥२१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

केचिदुभयविधमप्युपासनं विहाय केवलं त्वद्गुणानुभवामृतपानसुखिताः मोक्षमपि नेच्छन्तीत्याहुः- दुरवगमेति ॥ दुरवगमं दुःखेनाप्यवगन्तुमशक्यं यदात्मनस्तव तत्त्वं याथात्म्यं तस्य निगमाय प्रकाशनायात्तोपात्ता तनुः रामकृष्णादिरूपा येन तस्य तव चरितमेव महानमृताब्धिः तस्मिन् परिवर्तेनावगाहनेन परिश्रमणाः । परिरत्र वर्जने । परिविधूताः श्रमाः आध्यात्मिकादितापाः येषां ते । हे ईश्वर! ते तव चरणसरोजसम्बन्धिनो हंसाः भागवताः तत्कुलसङ्गेन विसृष्टाः त्यक्ताः गेहदेहाद्यनुरागा यैस्तेऽपवर्गं मोक्षसुखमपि न परिलषन्ति न काङ्क्षन्ति ॥२१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

"इति विमृशन्ति कवयो निगमावपनं यजन्त उपासते भवमध्यविनिःश्वसिताः । दुरवगमात्मतत्त्वनिगमायतवाङ्मनसश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः" ॥८॥२२॥

"विमथ्य वेदाब्धिमतिश्रमेण ज्ञात्वा परेशं मुनयो विमुक्ताः ।
मृशन्ति यज्ञैश्च यजन्ति नित्यमुपासते वेदफलप्रदं तम् ॥"

इति कुशिकश्रुतिरूपस्य इति विमृशन्तीति श्लोकस्यायमर्थः । प्राणिनो भवमध्ये विनिःश्वसिता इति यतोऽतः कवयो विमृशन्तीति सामान्येनोक्तं विशिनष्टि-निगमेति । हे दुरवगमात्मतत्त्व ! दुर्ज्ञेयनिजस्वरूप ! चरितलक्षणमहामृताब्धेः परिवर्तनेन मथनेन परिश्रमणाः "चर गतिभक्षणयोः" इत्यतस्त्वत्तत्त्वावगतिहेतुर्वेदश्चरितशब्देनोच्यते । स एव महासमुद्रः । तस्य परिवर्तनं परिलोडनं मथनमिति यावत् । तेन परिश्रान्ता इति यतः अतो भवमध्याद्विनिःश्वसिताः मुक्ताः निगमानामावपनं स्थानं निगमानां ततोऽभिव्यक्तेस्तत एव फलप्रदत्वाद्विषयत्वाच्च निगमावपनं त्वां विमृश्य यज्ञादिभिर्यजन्ते उपासते । सजातीयविजातीयप्रत्ययानन्तरितत्वेन ध्यायन्ति । कीदृशः । निगमविषयेषु आयतवाङ्मनसः विस्मृतवाङ्मनोव्यापार इत्यनेन वेदेन विज्ञातभगवत्तत्त्वा इत्युक्तं भवति ॥२२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तच्छ्रुत्वा लब्धनिजभावोद्दीपनाश्चरणोपनिषदाद्याः सक्षादेव तन्माधुरीं वर्णयन्ति-दुरवगमेति । आत्मतत्त्वं स्वीयस्वरूपगुणलीलारहस्यम् । आत्ता जगत्याकृष्टा प्रकटिता तनुर्येन तस्य । परिभ्रमणाः श्रमवर्ज्जिताः चरणसरोजयोर्ये हंसाः श्रीशुकादयस्तेषां कुलं शिष्योपशिष्यपरम्परा तस्य सङ्गमात्रेण विसृष्टमात्रं गृहं यैस्तेऽपि । किमुत तेषां हंसानां कुलं ते वा स्वयमित्यर्थः ॥२१॥

ननु, अ
करणसाधनो वाङ्
ते के इत्याहुः च
विसृष्टगृहाः । यैर्मह
चरितेत्यादि । तव
संसारक्लेशो येषाम्
निगमाय सुखबोधाय
शुभावहोविधे ! आ
शरीराणि येन शयानं

ननु मद्भजन
केचिद्विरला अपवर्गम
तवात्मेत्यादि किमर्थं
तव भावो जायत इति ।
यस्य तस्य तव चरितमह
गतागतश्रमो येषाम् ॥२

भगवद्विषयक
सर्वनियन्तः ! दुरवगमं
श्रीमूर्तेस्तव चरितान्येव
विषयलम्पटपरमसुकुम
त्वद्भक्तास्त्वल्लीलाकथामा
परमसुखं मानयन्तो ब्रह्मा

"त्वत्कथामृतपा
वदन्तो विशिनष्टि-ते तव
यैस्ते । श्रुतिश्च मुक्तेरप्याधि

"यं सर्वे देवा न
कृत्वा भगवन्तं भजन्ते इ
परमानन्दरूपिणीत्याद्याः । अ

सर्वसाधनेभ्यो भक्तै

पद्यानुवादः

कृततनोर्निजतत्त्ववि

ाय । दुरवगमं दुर्बोधं
ृताब्धिः महासमुद्रः ।
रसिका न वाञ्छन्ति,
च्चरणकमले हंसा इव
यक्तगार्हस्थ्याः ॥२१॥

दुरवगमेति ॥ दुरवगमं
ादिरूपा येन तस्य तव
्यात्मिकादितापाः येषां
ते ऽपवर्गं मोक्षसुखमपि

रवगमात्मतत्त्वनिगमा

ा इति यतोऽतः कवयो
महामृताब्धेः परिवर्तनेन
समुद्रः । तस्य परिवर्तनं
मावपनं स्थानं निगमानां
भर्यजन्ते उपासते ।
नोव्यापार इत्यनेन वेदेनैव

मतत्त्वं स्वीयस्वरूपगुण-
र्हंसाः श्रीशुकादयस्तेषां
स्वयमित्यर्थः ॥२१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु, अङ्घ्रिभजनं नाम किम् । अङ्घ्रिर्गतिर्ज्ञानं किं वा अङ्घ्रिमेव चरणारविन्दम् । अहिगतावित्यस्माद्भावसाधनः णसाधनो वाङ्घ्रिशब्द इत्याशङ्क्य स्पष्टमाहुः-दुरवगमात्मतत्त्वेत्यादि । हे ईश्वर ! केचिद्विरला अपवर्गं कैवल्यमपि न परिलषन्ति के इत्याहुः चरणसरोजेति । ते तव चरणसरोजयोर्ये हंसास्तन्निवासिनो महाभागवतास्तेषां यत् कुलं समूहस्तस्य सङ्गेन ष्टगृहाः । यैर्महदुपदेशेन त्यक्तसंसाराः । ननु तेषामुपदेशमात्रत्यक्तगृहत्वमेव पुरुषार्थः किंवा तत्रान्यत् किञ्चिदस्तीत्याशङ्क्याहुः- र्तेत्यादि । तव यच्चरितं वृन्दावनविलासादिलीला तदेवापरोऽमृताब्धिः तत्र यः परिवर्तोऽवगाहस्तत्र परिगतं श्रमणं श्रमः सारक्लेशो येषाम् । परिर्विर्जनार्थः । तव कीदृशस्य । दुरवगमं दुर्बोधं यत् आत्मतत्त्वं सच्चिदानन्दघनत्वनित्यलीलादिकम् । तस्य गमाय सुखबोधाय आत्ता आविर्भाविता तनुर्मूर्तिर्येन । अथवा हे दुरधिगमात्मतत्त्व ! हे निगमाय ! निगमानां वेदानाम् अय वहोविधे ! आयश्चाश्रयवेदाश्रय इती वा । तव कीदृशस्य । आत्ता दोर्भ्यामालिङ्गनेन गृहीताः तनवः श्रीरुक्मिणीप्रभृतीनां राणि येन शयानं सह शक्तिभिरित्युक्तेः । एवम्भूतस्य तवेत्यर्थः ॥२१॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ननु मद्भजनमेव परमपुरुषार्थ उच्यते, नैवापवर्गस्तत् किमेतदिति शङ्कां निराकुर्वन्ति-दुरवगमात्मेति । हे ईश्वर ! नैतच्चित्रं चिद्विरला अपवर्गमपि न परिलषन्ति, न कामयन्ते । तव च राजहंसानां कुलं समूहस्तत्सङ्गेन विसृष्टगृहास्ते केचिदिति वा । तदा त्मेत्यादि किमर्थं न परिलयन्ति ? तत्राहुः-दुरवगममात्मनस्तव श्रीकृष्णस्य यत् तत्त्वं तन्निगमाय तदवबोधाय हेतवे भजनेनैव भावो जायत इति । अथवा, दुरवगमात्मतत्त्वनिगमाय आत्ता (उपास्यत्वेन) गृहीता अर्थात् भक्तैर्तनुः श्रीकृष्णाख्यः श्रीविग्रहो स्य तस्य तव चरितमहामृताब्धिश्चरितमेव मह उत्सवस्तद्रूपस्यामृतसमुद्रस्य (परिवर्तेन विगाहेन परि परिगतं श्रमणं श्रमो) भवकान्तार- गतश्रमो येषाम् ॥२१॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भगवद्विषयकभक्तियोगस्य सर्वोत्कर्षं स्वाभिधेयञ्च द्योतयितुंतमेव पुनरप्यभ्यस्यन्ति-दुरवगमेति चतुर्भिः । हे ईश्वर ! नियन्तः ! दुरवगमं जीवैर्ज्ञातुमशक्यं यदात्मतत्त्वं स्वीयलीलारूपगुणकृपैश्वर्यमाधुर्यं तस्य निगमाय ज्ञापनायात्ततनोराविष्कृत- र्तेस्तव चरितान्येव महामृताब्धयस्तेषु ये परिवर्तास्तरङ्गभ्रमिपुञ्जास्तेषु निमज्जनोन्मज्जनपरिश्रमसुखमेवेति भावः । यथा लम्पटपरमसुकुमाराः श्रमलेशासहना अपि साम्प्रयोगिकं परिश्रममेव सर्वसुखाधिकं सुखं मन्यन्ते तथैव क्तास्त्वल्लीलाकथामाधुर्यपानोत्थं नर्तनकीर्तनक्रोशनमिथःपादतलप्रपतनमूर्च्छनप्रबोधनहाहाकरणरोदनद्रावणादिपरिश्रममेव सुखं मानयन्तो ब्रह्मास्वादसुखं पशूनां तृणचर्वणसुखमिव मन्यन्ते । तदुक्तं श्रीस्वामिचरणैरपि-

"त्वत्कथामृतपाथोब्धौ विहरन्तो महामुदः । कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥" इति । त्वत्सुखप्राप्तिकारणं तो विशिनष्टि-ते तव चरणसरोजमाधुर्यास्वादिनो हंसा ये परमभागवतास्तेषां कुलस्य सङ्गेन विसृष्टं गृहं स्त्रीपुत्रादिसङ्गसुखं ।श्रुतिश्च मुक्तेरप्याधिक्यं भक्तेर्दर्शयति यथाह-

"यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च ।" व्याख्यातं च सर्वज्ञैर्भाष्यकृद्भिः मुक्ता अपि लीलया विग्रहं भगवन्तं भजन्ते इति । अत्र मध्वाचार्य्यधृताः अन्याः श्रुतयश्च — "मुक्ता ह्येतमुपासते मुक्तानामपि भक्तिर्हि न्दरूपिणीत्याद्याः । अमृतस्य धारा बहुधा दोहमानं चरणं लोके सुधितां दधातु । ॐ तत्सत् ।" इत्याद्याश्च ॥२१॥

गूढार्थदीपिनी

सर्वसाधनेभ्यो भक्तैर्गरीयस्त्वं तन्निष्ठानां निःस्पृहत्वं च द्योतयन्त्यः श्रुतय आहुः-दुरवगमेति ।

पद्यानुवादः

कृततनोर्निजतत्त्वविबोधने तव कथामृतपानगतक्लमाः ।★

अभिलषन्ति न मुक्तिमपीह ते भुजि जना ★★विजनाभिरताश्च ये ॥

★[क्लमः शोकमोहादिरूपं दुःखम् ।] ★★ [विजने एकान्ते अभितो रममाणाश्च ये ते जना इत्यन्वयः विजना भक्ता तेषु अनुरक्ता वा ।]

सङ्क्षिप्तसार्थान्वयः — हे ईश्वर ! सर्वनियन्तः ! दुरवगमात्मतत्त्वनिगमाय दुर्ज्ञेयं यत् आत्मतत्त्वं तस्य प्रकाशनाय आत्ततनोः स्वकृतमूर्तेः तव चरितमहामृताब्धिपरिवर्तपरिश्रमणाः । परिवर्तोऽवगाहः तेन गतश्रमाः केचित् विरलाः अपवर्गमपि न परिषलन्ति । ते के ? ये ते तव चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ते । चरणसरोजे हंसा इव सारग्राहिणो ये भक्तास्तेषां कुलं तत्सङ्गेन विसृष्टगृहाः ।

हे ईश्वर ! कर्तुमकर्तुमन्यथाकर्तुं समर्थ हे भगवन् ! केचित् अनन्यभक्ता अपवर्गं मोक्षसुखमपि परि सर्वतोभावेन एकांशेनापीत्यर्थः । न परिलषन्ति नेच्छन्ति किमुतान्यत् त्रैवर्गिकसुखमिन्द्रादिपदं वा । कथम्भूतास्ते ? दुःखेनापि अवगन्तुं ज्ञातुमशक्यं दुरवगमं दुर्ज्ञेयं यत् आत्मतत्त्वम् । यद्वा । आत्मनस्तव तत्त्वं स्वरूपलीलादिमाधुर्यं तस्य निगमाय नितरां ज्ञापनाय प्रापणाय प्रकाशनाय वा आत्ततनोः आविष्कृतमूर्तेस्तव लीलाचरितमेव महामृताब्धिः निरतिशयसुखराशिस्तस्य परिवर्तं श्रवणकीर्तनादिना पुनः पुनरावर्तनमालोडनं तेन परि गतं श्रमणं श्रमः संसारक्लेशो येषां ते तथोक्ताः । यथोक्तम्

''यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहम् ।'' इति ॥

परिरत्र वर्जने । यद्वा । परिवर्तनम् आलोडनं तत्र परिश्रमणाः कृतपरिश्रमा इत्यर्थः । केचित्तु तत्र परिवर्तोऽवगाहनं स्नानपानस्थानीभूतेन श्रवणादिना सेवनं तेनेत्याहुः । अत एव च ते तव चरणसरोजे हंसा इव रममाणाः सारासारविवेकिनो ये भक्तास्तेषां यत्कुलं समूहस्तस्य सङ्गेन विसृष्टाः त्यक्ता गृहाः स्त्रीपुत्रादिसुखानि यैस्ते तथाभूताः । श्रीमज्जीवगोस्वामिनस्तु हे दुरवगमात्मतत्त्व ! हे निगमाय ! इति सम्बोधने कृत्वा निगमानां वेदानां अय शुभावहविधे ! यद्वा । आय आश्रय वेदाश्रय ! इति । तव कीदृशस्य ? आत्ता दोर्भ्यामालिङ्गनेन गृहीताः तनवः श्रीरुक्मिणीप्रभृतीनां शरीराणि येन । ''शयनं सह शक्तिभिः'' इत्युक्तेः एवम्भूतस्य तवेत्यर्थ इत्याहुः ।।८।।२२।।

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति । 'भक्तिवशः पुरुषो भक्तिरेव भूयसी ।' इति माठरश्रुतिर्भक्तेर्गरीयस्त्वं तन्निष्ठानां च निःस्पृहत्वं द्योतयन्ती स्तौति–हे दुरवगम ! दुष्प्राप ! आत्मतत्त्वनिगमाय । आत्मनः स्वस्य भगवतः स्वरूपज्ञापनाय आत्ततनोराविष्कृतसदानन्दविग्रहस्य चरितकथा एव महामृताब्धिस्तदावर्तोऽवगाहनं स्नानपानस्थानीभूतेन श्रवणादिना सेवनम् । तेन परिश्रमणं येषां ते तथाभूतश्रवणाद्यभिनिवेशेन त्यक्तव्यवहारतत्फलरागादिदोषात्मकश्रमा इति यावत् । यद्वा । परिश्रमणाः परिकर्षेण तदभ्यासरूपं श्रवणं येषां ते । यद्वा । अन्यसाधनानि जन्मकोटिभिः कृत्वा चरमजन्मनि तव कथामृताब्धिमवगाहनं प्राप्य विश्रामवन्तः निवृत्तसाधना इत्यर्थः । तदुक्तम् —

'जन्मान्तरसहस्रेषु तपोदानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥'

इति । एतदेव फलेच्छाभावेन दृढयति–न परिलषन्तीति । अपिशब्देन कैमुत्यन्यायमाह–यद्यपवर्गमपि नेच्छन्ति त्रिवर्गस्य का वार्तेत्यर्थः । ननु नैतन्नियमो विषयिणां मुमुक्षाभावेऽपि भोगाभिलाषदर्शनादित्याशङ्क्याह–तव चरणसरोजहंसकुलसङ्गविसृष्टगृह इति । तव चरणसरोजाश्च ते हंसाश्च यथा सरसो वियोगे पद्मानि शुष्यन्ति तथा तव चरणवियोगे तेषां प्राणधारणं दुष्करमित्येतत्तात्पर्यात्मकोपमागर्भितविशेषणम् । तेषां कुलं समूहस्तत्सङ्गेन विसृष्टास्त्यक्ताः स्वतः प्राप्तभोगसम्पन्ना गृहाश्च यैस्ते एवम्भूतानां भगवच्चरणशरणैकाश्रयाणामत्यन्तदौर्लभ्यं दर्शयति–केचिदिति । तथा चोक्तं षष्ठे —

'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥'

इति ॥२१॥

त्यन्वयः विजना भक्ता

प्रकाशनाय आत्ततनोः
रलाः अपवर्गमपि न
गो ये भक्तास्तेषां कुलं

मपि परि सर्वतोभावेन
? दुःखेनापि अवगन्तुं
नगमाय नितरां ज्ञापनाय
खराशिस्तस्य परिवर्तनं
थोक्तम्

तु तत्र परिवर्तोऽवगाहनं
ाः सारासारविवेकिनो ये
ोमज्जीवगोस्वामिनस्तु हे
आश्रय वेदाश्रय! इति।
सह शक्तिभिः" इत्युक्तेः

र्भक्तेर्गरीयस्त्वं तन्निष्ठानां च
भगवतः स्वरूपज्ञापनाय
ूतेन श्रवणादिना सेवनम्।
ग्रावत्। यद्वा। परिश्रमणाः
तव कथामृताब्धिमवगाहनं

पवर्गमपि नेच्छन्ति त्रिवर्गस्य
ासरोजहंसकुलसङ्गविसृष्टगृह
णवियोगे तेषां प्राणधारणं
प्रासभोगसम्पन्ना गृहाश्च यैस्ते।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं प्रवेशश्रुतिप्रसङ्गविचारेण जीवानां स्वरूपमुक्त्वा तेषामानन्दाकाङ्क्षायां भगवत्सेवैव कर्तव्येति निश्चित्य असम्भावनाविपरीतभावनाव्युदासार्थं भगवत्यपि कदाचिदानन्दो न भवेदिति, को वा भगवान् यः पूर्णानन्द इति सन्देहद्वयं यितुमाह-दुरवगमात्मतत्त्वनिगमायेति। भगवत्यानन्दोऽस्ति न वेति शङ्कापि न कर्तव्या, नापि को वा भगवानिति। नापि वज्जनने आनन्दतिरोभावः शङ्कनीयः। यतोऽवतीर्णस्य कृष्णस्य चरित्रमात्रश्रवणेऽपि तादृश आनन्दो जायते येन विचारिकाः अपवर्गमपि परमानन्दप्रापकं न परिलषन्ति कदाचिदपि न वाञ्छन्ति। न हि दृष्टे अनुपपन्नं नाम व्याघातात्। तस्याप्यभिज्ञापकमन्यदस्तीत्याह-चरणसरोजहंसकुलसङ्गविसृष्टगृहा इति। गृहे हि महत्सुखं भवति तत्सिद्धं विद्यमानं तदपि त्यजन्ति यदि भगवति सहस्रांशेनाप्यानन्दसन्देहो भवेत् तर्हि विद्यमानं को वा त्यजेत्। अतो भगवति आनन्दे कोऽपि सन्देहो न र्तव्य इत्यर्थः। अवतारोऽपि भगवतो ज्ञानार्थम् इति विपरीतार्थतां वदन् संव्यवहार्यस्यापि पूर्णानन्दत्वं स्थापयति। दुरवगमो य आत्मा केनापि ज्ञातुमशक्यः यश्चक्षुष्मान्न पश्यति तत्रोपायः कठिनः यः स्वात्मानमेव न जानाति तं को वा बोधयेत्। तथापि न श्यते स्वात्मा एवं सति कीदृशोऽयमात्मेति भगवति सन्देहः। तस्य च तत्त्वमपि दुर्ज्ञेयं किंरूपं तस्य परमार्थभूतमिति। तादृशस्य ज्ञानं यदि लोके प्रसिद्धं स्यात् तदैतावता कालेन सर्वे मुक्ताः स्युः अत आत्मतत्त्वज्ञानार्थं लोकावगतं कारणं नास्तीति भावनाविर्भूतः नितरां गमो ज्ञानं देहग्रहणमज्ञानकार्यं भगवतश्चेदमद्भुतचरित्रम् अज्ञानकार्यसदृशं गृह्णन् प्रकटीकुर्वन् सर्वेषां ज्ञानं म्पादयतीति। अतोऽद्भुतकर्मणो भगवतश्चरित्रमेव महानमृताब्धिः महत्त्वं लोकसिद्धसमुद्रापेक्षयाऽप्यधिकमिति। अयं समुद्रः श्चित् शोषं पानं बन्धनमुल्लङ्घनं वा प्राप्नोति, स तु केनाप्येतत्कर्तुं शक्य इति। अच्छिन्नं तूपपादितमेव अमृतत्वं च। तत्र परिवर्तनं परिवर्तः बहुधा आलोडनं तदर्थं परितः श्रमो येषाम्। येषां तादृशचरित्रालोडने सामर्थ्यं भवति ते महारसपानमत्ता इव स्वयं प्राप्तं केनचिद्दीयमानं वा अपवर्गं न गृह्णन्तीति किं वक्तव्यम्? बहुधा प्ररोचनायामपि तेषामिच्छा नोत्पद्यत इत्यर्थः। ईश्वरेति सम्बोधनात् या दीयमानमपि न गृह्णन्तीति सूचितम्। ननु परमानन्दस्योभयत्रापि तुल्यत्वात् कथं समुद्रे अवगाहनक्लेशाधिक्यात् किमित्यपवर्गं न वाञ्छन्तीति चेत्तत्राह-ते चरणेति। यथा लोके एकाकी यथा रसानुभवं करोति तदपेक्षया सर्वैर्योग्यैः सह रसानुभवः सुखाधिक्यहेतुर्भवति एवं परमानन्दोऽपि ते चरणसरोजैकाश्रयाः ये हंसास्तेषां कुलं समूहः तेषां सङ्गार्थं विसृष्टं गृहं यैः तैः सह परमानन्दः बहुधा भोक्तव्य इति मोक्षापेक्षयापि भगवत्कथाश्रवणरसोऽधिको निरूपितः गृहस्य प्रतिबन्धकत्वात् भगवत्सेवकानां न सम्मत्यभावात्त्यागः।

"कृष्णे हरौ भगवति परमानन्दसागरः। वर्तते नात्र सन्देहः कथा तत्र नियामिका॥" ॥८॥२१॥

श्रीसुबोधिनीसारः

हे ईश्वर! दुरवगमं दुर्ज्ञेयं यदात्मतत्त्वं तस्य निगमाय ख्यापनार्थम् आत्ता गृहीता तनुर्मूर्तिर्येन तस्य तव चरितमेव महामृतस्याब्धिः स्तस्मिन् परिवर्तो विगाह्य स्नानं तेन परिगतं श्रमणं श्रमो येषां ते केचित् अपवर्गं मोक्षं न वाञ्छन्ति। कुतोऽन्यत् सम्पदादि ते चरणसरोजे पादपद्मे हंसा इव रममाणा ये भक्तास्तेषां कुलं तेन सङ्गः समागमः तेन विसृष्टास्त्यक्ता गृहा यैस्ते तथा॥८॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मोक्षापेक्षयापि भगवद्भजने महानानन्द इत्याहुः-दुरवगमेति। ईश्वरत्वात्, इति हेतुं सूचयन् सम्बोधयन्ति-ईश्वरेति। दुरवगमं र्ज्ञेयं यदात्मनस्तव तत्त्वं तस्य निगमाय ज्ञापनाय आत्ततनोः स्वीकृतमूर्तेस्तव चरितमेव महामृताब्धिस्तस्मिन् परिवर्तोऽवगाहस्तेन श्रमणाः। परिस्त्र वर्जने। श्रमणं श्रमः, गतश्रमा इत्यर्थः। यद्वा परिवर्तः आलोडनं तत्र परिश्रमणाः, कृतपरिश्रमा इत्यर्थः। एवं दिभक्तिरसिकाः केचित् अपवर्गं मोक्षमपि न परिलषन्ति नेच्छन्ति, इन्द्रादिपदं नेच्छन्तीति तु किं वक्तव्यम्? त्यनेनैवम्भूतानां दुर्लभत्वं सूचितम्। यथोक्तं षष्ठस्कन्धे —

"मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने॥" इति॥

नेकवलमन्यन्नेच्छन्ति, किन्तु तेनैव सुखेन पूर्णाः सन्तः पूर्वसिद्धं गृहादिसुखमप्युपेक्षन्त इत्याहुः- ते चरणेति । तव चरणसरोजे हंसा इव रममाणा ये भक्तास्तेषां कुलं समूहस्तेन सङ्गः कथाश्रवणकीर्तनादिना सम्बन्धस्तेन विसृष्टाः त्यक्ता गृहा यैस्तथाभूता भवन्तीत्यर्थः ॥२१॥८॥

अन्वितार्थप्रकाशिका

दुरवगमेति ॥ हे ईश्वर ! दुरवगमात्मतत्त्वनिगमायात्ततनोः तव चरितमहामृताब्धिपरिवर्तपरिश्रमणाः तव चरणसरोजहंसकुलसङ्गविसृष्टगृहाः केचित् अपवर्गमपि न परिलषन्ति इत्यन्वयः । हे ईश्वर ! दुरवगमं दुर्ज्ञेयं यदात्मनस्तव तत्त्वं तस्य निगमाय ज्ञापनाय आत्ततनोः स्वीकृतमूर्तेस्तव चरितमेव महामृताब्धिस्तस्मिन् परिवर्तोऽवगाहस्तेन परिश्रमणाः । परिरत्र वर्जने श्रमणं श्रमः गतश्रमा इत्यर्थः । यद्वा । परिवर्तः आलोडनं तत्र परिश्रमणाः कृतपरिश्रमा इत्यर्थः । तव चरणसरोजे हंसा इव रममाणा ये भक्तास्तेषां कुलं समूहस्तेन सङ्गः कथाश्रवणकीर्तनादिना सम्बन्धस्तेन विसृष्टाः त्यक्ता गृहा यैः अनेन श्रवणकीर्तने दर्शिते । तादृशाः भक्तिरसिकाः केचित् अपवर्गं मोक्षमपि न परिलषन्ति नेच्छन्ति । इन्द्रादिपदं नेच्छन्तीति तु किं वक्तव्यम् । केचिदित्यनेनैवम्भूतानां दुर्लभत्वं सूचितम् । श्रुतिश्च मुक्तितोऽपि भक्तेराधिक्यं दर्शयति —

"यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च" इति व्याख्यातं च । सर्वज्ञैर्भाष्यकृद्भिः मुक्ता अपि लीलाविग्रहं कृत्वा भजन्त इति ॥२१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु मायोदरवर्तिनस्त्रिगुणबद्धा अल्पज्ञा जीवाः परात्परस्मिन्नक्षरे धाम्नि निवसतः प्रकृतिपुरुषपरस्य ममोपासनं कथं कुर्युरित्यत्राहुः-दुरवगमेति ॥ हे दयालो ! दुरवगमात्मतत्त्वनिगमाय दुःखेनावगम्यते इति दुरवगमं यदात्मतत्त्वं तस्य अवगमोऽवबोधनं तस्मै ॥ जीवानां दुःप्राप्यपरमात्मतत्त्वबोधनायेत्यर्थः । आत्ततनोः आत्ता देवमनुष्यादिसमानरूपा गृहीता तनुर्येन तस्य स्वमूर्तिस्थमपरिमितदिव्यप्रकाशैश्वर्यादिकं सङ्कुच्य देवमनुष्यादिरूपेण जनैर्दृश्यस्येति भावः । तव प्रत्यक्षमुर्तेः चरितमहामृताब्धिपरिवर्तपरिश्रमणाः चरित्ररूपागाधसुधासागरपरिवर्तनेन परित्यक्तश्रमाः भवच्चरित्रश्रवणादिभिर्गतसांसारिकक्रियोत्पन्नदुःखा इत्यर्थः । ते चरणसरोजहंसकुलसङ्गविसृष्टगृहाः तव चरणसरोजयोः पादपद्मयोर्हंसा इव रममाणाः ॥ यद्वा ॥ हंसाः परिचारिका ये साधवस्तेषां कुलस्य समूहस्य सङ्गेन विसृष्टास्त्यक्ता गृहा यैस्ते ॥ यद्वा ॥ विसृष्टगृहाः परित्यक्तगृहसुखाभिलाषाः सन्तः हे ईश्वर ! अपवर्गमपि मोक्षमपि न परिलषन्ति नाभिलषन्ति ॥ अनेन तच्छ्रवणकीर्तने दर्शिते ॥ श्रुतिश्च मोक्षादपि प्रत्यक्षभगवद्भक्तेराधिक्यं दर्शयति ॥ यथाह ॥

यं सर्वे देवानमन्ति मुमुक्षवो ब्रह्मवादिनश्चेति ॥२१॥८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

केचिदुक्तप्रकारमुभयविधमुपासनं विहाय त्वद्गुणानुभवामृतपानसुखिनो मोक्षमपि नेच्छन्ति, किं तु त्वत्सेवामेवेच्छन्तीत्याहुः ॥ दुरवगमेति ॥ हे ईश्वर ! केचिज्जनाः, दुरवगमं दुःखेनाप्यवगन्तुमशक्यं यदात्मनस्तव तत्त्वं याथात्म्यं तस्य निगमाय प्रकाशनाय, आत्तोपात्ता तनू रामकृष्णादिरूपा येन तस्य तव, चरितमेव महानमृताब्धिस्तस्मिन् परिवर्तेनावगाहनेन परि विधूताः श्रमणाः श्रमाः आध्यात्मिकादयस्तापा येषां ते, परिरत्र वर्जने । ते तव, चरणसरोजसम्बन्धिनो हंसा भागवतास्तेषां कुलं तस्य सङ्गस्तेन विसृष्टास्त्यक्ता गृहा गेहदेहाद्यनुरागा यैस्ते तथाभूताः सन्तः, अपवर्गं मोक्षसुखमपि, न परिलषन्ति न काङ्क्षन्ते । अपि तु त्वत्सेवामेवेच्छन्तीति भावः । श्रुतिश्च मुक्तितोऽप्याधिक्यं भक्तेर्दर्शयति । यथाह —

"यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च ।" इति ॥

व्याख्याता च सर्वज्ञैर्भाष्यकृद्भिः । यं भगवन्तं, सर्वे देवा द्योतमाना भगवद्भक्ताः, नमन्ति मुमुक्षवो जनाः, ब्रह्मवादिनो मुक्ताश्च नमन्ति ॥८॥ ॥२२॥

त्वदीयपरम
सर्वचेतननियमनका
निगमाय बोधाय चे
चरितमहामृताब्धिपरिव
अधीतिबोधाचरणप्रचा
तत्तत्परिवृत्ते तच्छ्रवणादौ
श्रवणमननादौ परिवृत्ते
कृतपरिश्रमा इत्यर्थः ।
सुखरूपाणामर्थानामनुभ
धकाभावात् । अत एव पु
क्लेशः श्लाघितः । श्रीज

'व्यक्तानुरागमिव
कान्तरतिक्लान्तमपि मण
सुखरूपत्वे प्रार्थनीयः श्ल
परमस्वारस्यो भावः । भग
तादृशभगवच्चरितस्य सम्पू
प्रतिपादितत्वेन सर्वेषाम
आदरेणानुभवन्त्येव । तथ
बोद्धव्यम् । एतदभिप्रायेणैव

'यद्वाश्रमावधि यथ

वेदाश्चतुर्मुखमुखाश्च

इति श्रीरामायणे च

'चरितं रघुनाथस्य

इति । वेदे च —

'यतो वाचो निवर्तन्ते

इत्यादिप्रमाणैर्भगवद्गु
भवतीत्यर्थः सूचितः । परिवृ
क्लिष्टकल्पनयार्थः कृतः । स च
चरणसरोजयोः हंसाः चरणसरो
स्थितिरूपः सम्बन्धः । तेन विसृ
एकस्य विशेषस्वारस्याभावात् ।
महतां सङ्गकरणे गृहादीनां प्रतिब
बहवस्सन्ति किन्तु कतिपया एवा

योगिरामानुजाचार्यकृतसरला व्याख्या

त्वदीयपरमभक्ताः त्वत्कथामृतसेवनपराः मुक्तिमपि नाभिलषन्तीत्याहुः-दुरवगमेति । भो ईश्वर ! शास्त्रोपदेशादिना चेतननियमनकारिन् ! दुःखेनाप्यवगन्तुमशक्यं दुरवगमं दुर्बोधं यदात्मतत्त्वम् आत्मनः भगवतस्तत्त्वं स्वरूपम् । तस्य य बोधाय चेतनानामिति यावत् । आत्ततनोः स्वीकृतरामकृष्णाद्यवतारस्य तव ज्ञानशक्त्याद्यनन्तकल्याणगुणाकरस्य रितमहामृताब्धिपरिवर्तपरिश्रमणाः । चरितमेव महामृताब्धिः तस्मिन् परिवर्तः सर्वतःस्थितिः । सा च श्रवणमनननिदिध्यासनरूपा । तिबोधाचरणप्रचारणरूपा च । 'ब्रह्मवित् ब्रह्मणि स्थित' इत्युक्तेः । यथा तच्छ्रवणादिकारीत्यर्थो भवति तद्वत् तथा च परिवृत्ते तच्छ्रवणादौ या स्थितिः तत्र परिश्रमणाः कृतपरिश्रमाः महाविश्वासश्रद्धाभ्यां भगवच्चरिते एकैकाक्षरस्य विचित्रनानार्थकानां णमननादौ परिवृत्ते स्थितौ कृतपरिश्रमा इत्यर्थः । अथवा । परिवर्तः अवगाहः । प्रत्यक्षरस्य सम्यगर्थविचाररूपः । तस्मिन् परिश्रमा इत्यर्थः । ननु भगवच्चरितामृतस्यानुभवे प्रयासश्चेत् प्रयासस्य दुःखहेतुत्वेन तत्र प्रवृत्तिः कस्यापि न भवेदिति चेन्न । रूपाणामर्थानामनुभवे जायमानस्य परिश्रमस्यापि सुखवत् प्रियत्वेन तादृशपरिश्रमविशिष्टसुखपदार्थानुभवेषु प्रवृत्तेर्बा- भावात् । अत एव पुरुषार्थप्रयोजकं परिश्रममर्थयन्ति श्लाघयन्ति च महाकवयः । यथा वा गुरुकुलक्लिष्टो मुरारिः कविरित्यत्रापि श्लाघितः । श्रीजयदेवेनापि श्रीकृष्णस्य शृङ्गाररसानुभवे परिश्रमः श्लाघितः । यथा गीतगोविन्दे

'व्यक्तानुरागमिव खेलदनङ्गखेदस्वेदावपूर' मित्यनेन भगवतः शृङ्गाररसानुभवे परिश्रमो वर्णितः । तथा तत्रैव 'अथ रतिक्लान्तमपि मण्डनवाञ्छया' इत्यत्रापि शृङ्गारे परिश्रमो वर्णितः । तथा प्रकृतेऽपि भगवत्कथामृतरसानुभवे परिश्रमस्य रूपत्वे प्रार्थनीयः श्लाघनीयश्च । शृङ्गारानुभवे परिश्रमवत् । इत्यलं विस्तरेण । किञ्च । चरितमहामृताब्धिपरिश्रमणाः इत्यस्यायं स्वारस्यो भावः । भगवच्चरितामृतस्य महाब्धिरूपत्वेन तस्यापरिमितत्वात् वाङ्मनसागोचरानन्दादिभगवद्गुणवर्णनविशिष्टत्वेन भगवच्चरितस्य सम्पूर्णानुभवं ब्रह्मादीनामप्यशक्यत्वात् ब्रह्मादिभिरपि यावच्छक्ति यावत्परिश्रमं तावदनुभवनीयत्वेन सूरिभिः पादितत्वेन सर्वेषामपि भगवद्गुणानां चरितानां चानुभवे परिश्रमो भवत्येव तथापि यावच्छक्ति यावत्परिश्रमं भक्ताः रेणानुभवन्त्येव । तथापि यावच्छक्ति भगवच्चरित्रस्य लेशस्याप्यनुभवो महानन्दजनकत्वेन परमपुरुषार्थरूपाण्येवेति व्यम् । एतदभिप्रायेणैव परिवृत्तपरिश्रमणाः इत्युक्तम् । अस्मिन्नर्थे प्रमाणानि वक्ष्यन्ते । तदुक्तं श्रीयामुनाचार्यैः —

'यद्वाश्रमावधि यथामति वाप्यशक्तः स्तौम्येवमेव खलु तेऽपि सदा स्तुवन्तः ।
वेदाश्चतुर्मुखमुखाश्च महार्णवान्तःकोमज्जतोरणुकुलाचलयोर्विशेषः ॥'

इति श्रीरामायणे च —

'चरितं रघुनाथस्य शतकोटिप्रविस्तरम् । एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥'

इति । वेदे च —

'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्न बिभेति कदाचनेति ॥'

इत्यादिप्रमाणैर्भगवद्गुणचरितानां च वर्णने वेदानामप्यशक्यत्वात् । अतः भक्तैरपि यावच्छक्ति यावत्परिश्रमं वर्णनीयं र्थः सूचितः । परिवृत्तपरिश्रमणाः इत्यनेनेति मन्तव्यम् । इममर्थमविचार्यान्येषु व्याख्यानेषु परिश्रमणाः इत्यस्य कल्पनयार्थः कृतः । स च सहृदयसंवेद्यः । अत एव विचित्रमहदानन्दकरचरितस्य तव चरणसरोजहंसकुलसङ्गविसृष्टगृहाः रोजयोः हंसाः चरणसरोजयोः हंसवद्रममाणा भक्ता इत्यर्थः । तेषां कुलं समूहः । तेन सङ्गः कथाश्रवणकीर्तनादिना सह पः सम्बन्धः । तेन विसृष्टाः गृहाः यैस्ते त्यक्तगृहाः । एवम्भूतास्सन्तः एकस्स्वादु न भुञ्जीतेति रीत्या भगवत्कथामृतानुभवे विशेषस्वारस्याभावात् । बोधयन्तः परस्परमित्युक्तप्रकारेण परस्परबोधनादिना कथामृतानुभवस्य महदानन्दकरत्वात् तदर्थं सङ्करणे गृहादीनां प्रतिबन्धकत्वात् गृहादीन् परित्यजन्तीति भावः । एवम्भूताः केचन कतिपयाः भक्ताः । एवंविधाः तव न्ति किन्तु कतिपया एवातः एतादृशः भक्ताः दुर्लभाः इत्यर्थः । तदुक्तं भगवता —

'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते। वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ॥' इति।

कश्चिन्मां वेत्ति तत्त्वतः इति च। तथा च एवम्भूताः भक्ताः अपवर्गमपि न परिलषन्ति नेच्छन्ति। स्वर्गादिकं नेच्छन्तीति किं वक्तव्यमिति भावः। हे ईश्वर ! दुरवगमात्मतत्त्वनिगमायात्ततनोस्तव चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ते चरणसरोजहंसकुलसङ्गविसृष्टगृहाः केचित् अपवर्गमपि न परिलषन्तीत्यन्वयः ॥२१॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

अन्यस्यैक्यज्ञानस्य साधनमेव भक्तिर्न तु स्वतः परमपुरुषार्थफलरूपा इति वचनं पूर्वश्लोकरूपं प्रतीतिमनुचितमेव मन्वानो विचारयन् श्रुतिगणो भक्तिं गुरूकरोति। मोक्षादप्यधिकपञ्चमपुरुषार्थरूपत्वेन स्थापयतीत्यर्थः। अल्पसाधनमिति तु लेखकभ्रम एव। महानिति सालोक्यादीनां तत्रान्तर्भावात् तेनैव चरितामृतावगाहनपेणैव सुखेन अनेन श्लोकेन श्रवणकीर्तन इति चतुष्षष्ट्यङ्गानामुपलक्षणम्। श्रुतिर्नर्हसिंहतापनीरूपा तत्र देवा विषयिणः ब्रह्मणि वदन्ते प्रकाशन्ते इति मुक्ता व्याख्याता इति विषयिमुमुक्षुमुक्तसेव्यत्वं दर्शितम् ॥२१॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

भक्तेरन्यसाधनमनुचितमिव मन्वानो भक्तिं गुरूकरोति-दुरवगमेति। भो ईश्वर ! केचिद्विरलाः भक्तिरसिकाः दुरवगमात्मतत्त्वनिगमाय। दुर्बोधात्मतत्त्वस्य ज्ञापनाय आत्ततनोराविष्कृतमूर्तेस्तव चरितमहामृताब्धिपरिश्रमणाः सन्तः अपवर्गमपि न परिलषन्ति नेच्छन्ति। कुतोऽन्यदिन्द्रपदादिकं चरितमेव महामृताब्धिस्तस्मिन् परिवर्तो विगाहस्तेन परिश्रमणाः गतश्रमाः। परिर्वर्जनार्थः। श्रमणं श्रमः। न केवलमन्यन्नेच्छन्ति। किन्तु गृहादिसुखमप्युपेक्षन्ते इत्याह-ते चरणसरोजहंसकुलसङ्गविसृष्टगृहाः। तव चरणसरोजहंसा इव रममाणा ये भक्तास्तेषां कुलेन सह यः सङ्गस्तेन विसृष्टास्त्यक्तगृहा यैस्ते। अनेन श्रवणकीर्तने दर्शिते। श्रुतिश्च – मुक्तेरप्याधिक्यं भक्तेर्दर्शयति यथाह —

"यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनः" इति अर्थः। सर्वे देवाः यं परमेश्वरं नमन्ति। तथा मुमुक्षवो ब्रह्मवादिनश्च यं नमन्ति। अत्र देवाः पृथिव्यन्तरिक्षनाकब्रह्मलोकनिवासिनः। ये भगवद्भक्ताः ते सर्वे देवाः, संसारविजिगीषुत्वात् मोदशालित्वाच्च। तेषां मध्ये द्विविधा उपासकाः। मुमुक्षवः संसारान्मोक्षकामाः। ब्रह्मवादनशीलाः ब्रह्मवादिनः मुक्ता इत्यर्थः। एते सर्वे नमन्ति भजन्त इति व्याख्यानं च सर्वयज्ञैर्भाष्यकृद्भिर्नृसिंहतापिन्यां मुक्ता अपि लीलया विग्रहं कृत्वा भजन्ते। इति। स्वामिनाम् —

"त्वत्कथामृतपाथोब्धौ विहरन्तो महामुदः। कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥"

॥ इति ॥२१॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवदवताराणां भगवद्भक्तिवर्धकत्वमाह-दुरवगमेति। भो ईश्वर ! चिदचिन्नियन्तः ! दुरवगमं दुर्बोधं यदात्मतत्त्वं तस्य निगमाय ज्ञानप्रवर्तनाय। आत्ततनोः स्वीकृतमत्स्यादिमूर्तेस्तव। चरितमेव महामृताब्धिः सुधानिधिस्तस्मिन् परिवर्तोऽवगाहस्तेन परिश्रमणा विगतश्रमाः। ईदृशास्त्वद्भक्ताः केचिद्विरला अपवर्गं मोक्षमपि न परिषलन्ति नेच्छन्ति। तथा च भगवद्वाक्यम्–

'नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवाभिरता मदीहाः। येऽन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणि ॥' इति।

कथम्भूतास्ते। चरणसरोजयोर्हंसा इव रममाणा यतयस्तेषां कुलं तस्य सङ्गस्तेन विसृष्टगृहाः त्यक्तगार्हस्थ्याः। तथा च वक्ष्यते श्रुतिः —

"दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथ।" इति ॥२१॥

स्वर्गादिकं नेच्छन्तीति
रिवर्तपरिश्रमणाः ते

रूपं प्रतीतिमनुचितमेव
। अल्पसाधनमिति तु
केन श्रवणकीर्तन इति
मुक्ता व्याख्याता इति

द्विरलाः भक्तिरसिकाः
मणाः सन्तः अपवर्गमपि
परिश्रमणाः गतश्रमाः ।
ते चरणसरोजहंसकुल-
त्यक्तगृहा यैस्ते । अनेन

मुमुक्षवो ब्रह्मवादिनश्च यं
:, संसारविजिगीषुत्वात्
ह्मवादिनः मुक्ता इत्यर्थः ।
ग्रहं कृत्वा भजन्ते । इति ।

दुरवगमं दुर्बोधं यदात्मतत्त्वं
स्तस्मिन् परिवर्तोऽवगाहस्तेन
तथा च भगवद्वाक्यम् —
जयन्ते मम पौरुषाणि ॥' इति ।
: त्यक्तगार्हस्थ्याः । तथा च

।२१॥

कृष्णप्रिया

दुःखसे भी जानना अशक्य ऐसा आपने तत्तव के अर्थ राम कृष्णादि दिव्यावतार तनुधारि आपके प्रति चरित्र रूप अगाध अमृत समुद्रमें स्नान करने से जिन के संसार नापने व्रत हो गऐ है । हे इश्वर ! आप के रविन्द के मकरन्द को लेने वाले हंसरूपी भगवतन के समूह के संग करनेमें जिन्होंने देह आदि का त्याग कर है ऐसा कोइ ज्ञानीजन अपने स्वार्थ के लिये मोक्ष सुखकी कांक्षा भी नहीं करते है ॥२१॥

त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरतितथोन्मुखे त्वयि हिते प्रिय आत्मनि च ।
न बत रमन्त्यहो असदुपासनयाऽऽत्महनो यदनुशया भ्रमन्त्युरुभये कुशरीरभृतः ॥२२॥

कर्दमक्षमा

त्वदनुपथम्, इदम्, कुलायम्, आत्मसुहृत्प्रियवत्, चरति, तस्मिन्, त्वयि, साक्षात्, एव, आत्मनि, हिते, प्रिये, दा, एव, उन्मुखे, च, अहो, बत, तथा, अपि, ये, न, रमन्ति, ते, असदुपासनया, आत्महनः, यदनुशयाः, रीरभृतः, सन्तः, उरुभये, भ्रमन्ति ॥२२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

"आराममस्य पश्यन्ति न तं पश्यन्ति कश्चन न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरम्बभूव । नीहारेण प्रावृता ल्प्यास्वासुतृप उक्थशासश्चरन्ति" इत्याद्याः श्रुतयोऽनुक्रोशन्त्यो जगदात्मनीश्वरे रतिमुपदिशन्तीत्याह-त्वदनुपथमिति । नुवर्तित्वात्त्वत्सेवौपयिकमिदं कुलायं कौ पृथिव्यां लीयत इति कुलायं शरीरमात्मसुहृत्प्रियवत् आत्मा च सुहृच्च प्रियश्च तद्वच्चरति धीनतया वर्तत इत्यर्थः । तथाऽपि त्वयि उन्मुखे हिते प्रिये आत्मनि च अप्यर्थे चकारः एवम्भूते सुसेव्येऽपि त्वयि बताहो कष्टं मन्ति न सख्यादिना भजन्ति असदुपासनया देहाद्युपलालनेनाऽऽत्महनः प्रमादादिनः कुतः यदनुशयाः यस्यामसदुपासनायामनुशयो येषां ते कुशरीरभृतः सन्त उरुभये संसारे भ्रमन्ति परिवर्तन्ते अत आत्महन इति भावः ॥

त्वय्यात्मनि जगन्नाथे मन्मनो रमतामिह । कदा ममेदृशं जन्म मानुषं सम्भविष्यति ॥९॥ ॥२२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — विषयिणो बहिर्मुखान्प्रत्यनुक्रोशन्त्यो जुगुप्सन्त्य "आराममस्य" इत्याद्याः श्रुतयः था-आराममिति । अस्यात्मन आराममारमणं ग्रामं नगरं स्त्रियं पुत्रमन्नाद्यमित्यादिवासनारूपमाक्रीडस्थानं सर्वे पश्यन्ति । नं कश्चन कश्चिदपि न पश्यति । अहो भाग्यहीनता लोकस्येति लोकं प्रत्यनुक्रोशं दर्शितम् । अत्यन्तविविक्तः स्वयञ्ज्योतिरात्मा भवतीत्यर्थः । अनुक्रोशपरेयम् । विश्वकर्मा मनुष्याणां हितमुपादिशति-न तमिति । तं यूयं न विदाथ न जानीथ । य इमा भूतानि । जजान जनयामास । अतो युष्माकं तस्य चान्यन्महदन्तरं बभूव स पुरुषो जनको यूयं जन्याः यदि ज्ञात्वात्मतत्त्वं पासिष्यध्वे तदा न संसृतिः स्यादित्यभिप्रायः । उपदेशपरेयं श्रुतिः । एवं प्रत्यक्षमुक्त्वा परोक्षमभिनयेन दर्शयन्नाह-नीहारेण जल्प्या जल्पप्रवृत्तास्तार्किकाः, ये चासुतृपः असूनेव तर्पयन्तीत्यसुतृपो विषयिणः, ये चोक्थानां कर्मफलानामाशासितारो एते नीहारेणाविद्ययावृताः सन्तश्चरन्ति संसारे भ्रमन्तीति सनिन्दोपदेशपरेयम् । आदिनाऽसुर्यानामेत्यादिग्रहः । त्वामनु पन्था तथा । उपयिकमुपयोगः । इत्यर्थ इति-यथात्मादयः स्वाधीना भवन्ति तथेदमपीति भावः । यद्वा-पन्थानमनुगतमनुपथम् । देहस्याह-आत्मवदहङ्कारास्पदत्वात् सुहृद्वद्विषयसमर्पकत्वात् प्रियवत्सर्वतः प्रीतिविषयत्वाद्देहस्त्वेवमाचरति तथापि उन्मुखे भजनमात्रात्संसारादुद्धर्तुमुद्यते । हिते पितृवद्धितकरे । प्रिये मनोनुकूले सख्यौ । एवम्भूते उन्मुखत्वादिरूपे यतो देहाद्युपासका अतो हेतोः । इति भाव इति-देहादिलालनपरा आत्महन एवानात्मप्रवृत्तत्वान्मोक्षमार्गमुग्धत्वादिति मिनाम् । त्वयीति । ईदृशं त्वद्रमणशीलम् ॥★॥

श्रीधरानुयायिनी — अतः सर्वथा परमेश्वरे रतिमेव व्यतिरेकमुखेनोपदिशन्ति-त्वदन्विति । समर्थमात्मवत् अहङ्कारास्पदत्वादात्मतुल्यत्वम् । सुहृद्वद्विषयसमर्पकलक्षणहितकारित्वात् सुहृत्तुल्यं प्रियवच्च सर्वतः प्रीतिविषयत्वात्प्रियतुल्यत्वम् स्वाधीनं त्वत्सेवायोग्यं ब्राह्मणादिदेहं लब्ध्वापि तथा सदा प्रसादोन्मुखं परमदयालुमात्मत्वेन प्रियं सुसेव्यं च स्वामिनमपि त्वां लब्ध्वा ये मिथ्याभूतदेहाद्युपलालनपरा भोगलम्पटा महाप्रमादिनस्त्वां बताहो कष्टं सख्यादिनामपि न भजन्ति ते व्यर्थीकृतजन्मानः श्वशृगालादियोनिगता महाभये संसार एव भ्रमन्ति, अत आत्मघातिनस्ते । रमन्तीत्यार्षम् ॥★॥

विश्वनाथी — तदेवं पूर्ववत्तदीयशुद्धरतेरेवं सर्वतः प्रकर्षं ताभ्यां श्रुत्वापरास्तदनुगताः श्रुतयो व्यतिरेकेण पुष्यन्त्यः स्तुवन्ति-त्वदिति । पन्थानमनुगतमनुपथम् । जीवरूपत्ववदंशसम्बन्धपरम्परायामनुगतमित्यर्थः । तथाभूतमेव सदिति परमात्मनस्तव सम्बन्धपरम्परयैव इदं जडं कुलायं नश्वरशरीरमात्मादिवच्चरति भाति । तत्तद्रूपतया स्फुरणेन रतिविषयतया प्रतीयत इत्यर्थः । मृतशरीरे तत्तद्भानाभावादिति भावः । अत्रात्वमत्त्वमहङ्कारास्पदत्वात् । सुहृद्वत्त्वं तस्मिन् विषयसमर्पणलक्षणहितकारित्वात्, प्रियवत्त्वं ततस्ततः प्रीतिविषयत्वात् । किंवाऽऽत्मवत्त्वादेव तद्युगलवत्त्वमिति ज्ञेयम् ।एवं यत्सम्बन्धपरम्परयैव तस्मिंस्तत्तद्भानाद्रतिविषयत्वं तस्मिन् परमात्मत्वात्साक्षात्स्वयमेव तत्तद्रूपे विशेषत उन्मुखे स्वप्रकाशत्वात्स्वत एव तत्तदनुसन्धानस्य कर्तरि कारयितरि च न तु जडत्वाद्देहवत्तदभाववति त्वयि तथा तुल्यतया न रमन्ति रतिं न कुर्वन्ति इत्यहो आश्चर्यम्, बत कष्टं चेत्यर्थः । नाप्याश्चर्यमिदमिति स्वयं हेतुं च विन्यस्यति । असतस्तस्य कुलायस्य तत्सम्बन्धिनां चासतामुपासनया शुश्रूषयेति तस्माद्युक्तमेवैतदित्याह-यदिति । तैर्व्याख्यातम् । श्रुतयोऽप्यत्र दर्शिता एव ज्ञेयाः । अन्याश्च "असुर्या नाम" इत्याद्याः (९) ॥२२॥

नीलकण्ठी — एवमीशसूत्रविराड्विष्णूनां बीजाङ्कुरद्रुमफलाभानामुपास्त्या प्रत्यक्तत्त्वावगम उक्तः । अशक्तानां विष्णौ कर्मार्पणं तन्नामकीर्तनादिकं च चित्तशुद्ध्यर्थमुक्तम् । तदुभयभ्रष्टं निन्दति-त्वदनुपथं कुलायमिति । इदं कुलायं कौ पृथिव्यां लीयत इति कुलायं नीडं शरीरं त्वदनुपथं त्वत्सेवानुकूलम् आत्मसुहृत्प्रियवत् आत्मवत्स्वायत्तत्वात्, सुहृत्प्रत्युपकारमनपेक्ष्योपकर्ता प्रियः प्रत्युपकारमनपेक्ष्योपक्रियमाणः पुत्रादिस्तद्वत्, स्वाधीनतयाऽनुवर्तते श्रवणकीर्तनध्यानादिना त्वद्भजनं कर्तुं योग्यं शरीरमस्तीत्यर्थः । तथा त्वयि उन्मुखे भक्ताननुग्रहीतुम् अत एव हिते मत्रे प्रिये च निरुपाधिप्रेमगोचरत्वात् । प्रियत्वादेव आत्मनि प्रतीचि सुसेव्ये सतीत्यर्थः । अहो आश्चर्ये । बत खेदे । न रमन्ति त्वय्येव त्वद्गुणगानादिना न रमन्ते । कुतः । असदुपासनया मृषाकल्पतस्त्र्याद्यमङ्गलवस्तुप्रावण्यादित्यर्थः । अत एवात्महनः आत्मानं नानादुःखेषु पातनात् घ्नन्ति हिंसन्तीति तथा । यदनुशयाः यस्यामसदुपासनायाम् अनुशयो वासना येषां ते भोगलम्पटाः, उरुभये महाभयवति संसारे भ्रमन्ति । अत एव कुशरीरभृतः कापुरुषास्ते कुत्सितं शरीरं बिभ्रतीति वा । श्रूयते च-देवपितृमार्गभ्रष्टानां क्लिष्टागतिः ।

"अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं शूकरयोनिं वा चण्डालयोनिं वा । अथैतयोः पथयोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रयस्वेत्येतत्तृतीयं स्थानम् ॥" इति ॥

"असुर्या नाम ते लोका अन्धेन तमसा वृताः । ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः" ॥ इति च (९) ॥२२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्वदनुपथमित्यस्य टीकायां श्रुतौ आराममधिष्ठानं जगद्रूपं विदाथ जानीथ इमा इमानि भूतानि जजान जनयति अन्यद्युष्माकमन्तरं बभूव । अतः कारणाद्युष्माकं तस्य च महदन्तरमित्यर्थः । नीहारेणाविद्यया जल्प्याः जल्पप्रवृत्तास्तार्किकाः इत्यर्थः । असुतृपः विषयिणश्च उक्थशासो यज्वानः उक्थानि हि यज्ञे शस्यन्ते चरन्ति संसरन्तीति । अथ स्वव्याख्या ।

तदेवं पूर्ववत्तदीयशुद्धरतेरेवं सर्वतः प्रकर्षं ताभ्यां श्रुत्वापरास्तदनुगताः श्रुतयो व्यतिरेकेण पुष्यन्त्यः स्तुवन्ति-त्वदिति । पन्थानमनुगतमनुपथम् । जीवरूपत्ववदंशसम्बन्धपरम्परायामनुगतमित्यर्थः । तथाभूतमेव सदिति परमात्मनस्तव सम्बन्धपरम्परयैव इदं जडं कुलायं नश्वरशरीरमात्मादिवच्चरति भाति । तत्तद्रूपतया स्फुरणेन रतिविषयतया प्रतीयत इत्यर्थः । मृतशरीरे तत्तद्भानाभावादिति भावः । अत्रात्वमत्त्वमहङ्कारास्पदत्वात् । सुहृद्वत्त्वं तस्मिन् विषयसमर्पणलक्षणहितकारित्वात्, प्रियवत्त्वं ततस्ततः

न्विति । समर्थमात्मवत्
तिविषयत्वात्प्रियतुल्यत्वम्
सुसेव्यं च स्वामिनमि त्वां
जन्ति ते व्यर्थीकृतजन्मानः

तिरेकेण पुष्यन्त्यः स्तुवन्ति-
व सदिति परमात्मनस्तव
षयतया प्रतीयत इत्यर्थः ।
णहितकारित्वात्, प्रियवत्त्वं
स्मिंस्तत्तद्भानाद्प्रतिविषयत्वं
य कर्तरि कारयितरि च न तु
त्यर्थः । नाप्याश्चर्यमिदमिति
द्युक्तमेवैतदित्याह-यदिति ।

म उक्तः । अशक्तानां विष्णौ
कुलायं कौ पृथिव्यां लीयत
उपकारमनपेक्ष्योपकर्ता प्रियः
ना त्वद्भजनं कर्तुं योग्यं
त्वात् । प्रियत्वादेव आत्मनि
न्ते । कुतः । असदुपासनया
हिंसन्तीति तथा । यदनुशयाः
न्त । अत एव कुशरीरभृतः

चण्डालयोनिं वा । अथैतयोः
म् ।।" इति ।।
नाः" ।। इति च (९) ।।२२।।

नि भूतानि जजान जनयति
ल्प्याः जल्पप्रवृत्तास्तार्किकाः
अथ स्वव्याख्या ।
पुष्यन्त्यः स्तुवन्ति-त्वदिति ।
त्मनस्तव सम्बन्धपरम्परयैव
। मृतशरीरे तत्तद्भानाभावादिति
त्वात्, प्रियवत्त्वं ततस्ततः

विषयत्वात् । किंवाऽऽत्मवत्त्वादेव तद्युगलवत्त्वमिति ज्ञेयम् ।एवं यत्सम्बन्धपरम्परयैव तस्मिंस्तत्तद्भानाद्प्रतिविषयत्वं तस्मिन्
त्वात्साक्षात्स्वयमेव तत्तद्रूपे विशेषत उन्मुखे स्वप्रकाशत्वात्स्वत एव तत्तदनुसन्धानस्य कर्तरि कारयितरि च न तु
देहवत्तदभाववति त्वयि तथा तुल्यतया न रमन्ति रतिं न कुर्वन्ति इत्यहो आश्चर्यम्, बत कष्टं चेत्यर्थः । नाप्याश्चर्यमिदमिति
हेतुं च विन्यस्यति । असतस्तस्य कुलायस्य तत्सम्बन्धिनां चासतामुपासनया शुश्रूषयेति तस्माद्युक्तमेवैतदित्याह-यदिति ।
ख्यातम् । श्रुतयोऽप्यत्र दर्शिता एव ज्ञेयाः । अन्याश्च "असुर्या नाम ते लोकाः" इत्याद्याः (९) ।।२२।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

श्रीभगवत्पादाब्जरतिरेव परमात्यन्तिकपुरुषार्थ इत्याशयेन रतिमुपदिशन्ति-त्वदिति । कुलायमिति नश्वरत्वं सूचितम् । इदं
तस्यैव बहुपार्थिवत्वेन प्रायः कौ लयात् । यद्वा, इदं प्रत्यक्षमेवात्मादिवच्चरति । तत्रात्मेति प्रायस्तस्मिन् लोकानामात्मत्वाध्यासां
त्वातिशयात्, किंवा आत्मनः सुहृदिति जन्मसम्बन्धात् हिताचरणाद्वा । प्रियमिति पुत्रादिभ्योऽप्यधिकस्नेहविषयत्वात्
कारित्वाद्वा । वति-प्रत्ययस्तत्त्वविचारेण तादृशत्वाभावात् । तथा तथापि किंवा तथा तेनानिर्वचनीयप्रकारेण, अस्य
न्वयः । उन्मुखेऽभिमुखे सहजनित्यकृपार्णवत्वात्, हिते निरुपाधिबन्धौ, प्रिये प्रीतिविषये प्रीतिकारिणि वा, आत्मनि
नि, अंशित्वेनात्मनोऽप्यत्यन्तप्रिये, किंवा चेतयितरि सत्कर्मसु प्रवर्तके गुरावित्यर्थः । एवमुभयथा रतेः साधनस्य विषयस्य
योग्यतोक्ता । तथापि न रमन्ते । तत्र हेतुः-असदुपासनयात्महन इति । अथवा कुत्सितो लोयो भस्मादिरूपत्वेन विनाशो
तदिदं देहं त्वदनुपथंत्वद्भक्तिमार्गानुवर्ति चेद्भवति, तर्हि चात्मसुहृदादिवदाचरति । किञ्च, त्वमप्युन्मुखादिः स्याः, तथापि
श्रवणकीर्तनादिना न रमन्त इत्यर्थः ।।२२।।

[एवमसमोर्ध्वभक्तिमाहात्म्ये प्रस्तुते काश्चिच्छ्रुतयः कांश्चिद्यादवानपि भक्तिहीनानालोच्य तान् स्वात्मना सह
विनाभावेन सम्बद्धम्, अर्थाच्छरीरमित्यर्थः । अत एव आत्मसुहृत्प्रीयवच्चरति, आत्मनः स्वस्य सुहृत् प्रियवत् चरति
नुकूलत्वेन वर्तत इत्यर्थः । कुलायं कुलं त्वत्प्रभव-यदुकुलम्, अयते जन्मना समेतीति यदुकुलोद्भवमित्यर्थः । अत एव
पथं यादवत्वात्त्वत्सेवोचितम्, बत कष्टम्, अहो आश्चर्य्यम्, तथा तथापि, प्रसेन-शतधन्वादयस्त्वयि रतिं न कुर्वन्ति । त्वयि
भूते? उन्मुखे स्वबान्धवत्त्वात् त्वद्भजनापेक्षके आत्मनि स्वविषये हिते प्रिये च, असतो धनादेरुपासनया आत्महन आत्मघातिनः,
शया यत्र धनादौ अनुशयो वासना येषां तेषां ते कुशरीरभूतस्त्वद्भजनाभावात् कुत्सितदेहं पुष्णन्तः । उरुभये महति त्रासे,
त्वत्तो धनप्राणादिनाशशङ्क्या सदा महाभये मग्ना वर्तन्त इत्यर्थः । यथा (भा० १०/३१/३) —

"वृषमयात्मजाद्विश्वतो भयात्" इत्यादौ भविष्यमति सूचितम् । तद्वदत्रापि ।।२२।।]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भगवदाश्रयणं शरीरस्य फलम् । अन्यथा कुत्सितभगवद्विमुखदेहयोगात् संसरन्तीत्याह-त्वदनुपथमिति । 'कुलायो
याम् ।' इति कोशात् । कुलायं नीडतुल्यं शरीरं त्वदनुपथं त्वदाराधनादिप्रवणं चेत् आत्मा च सुहृच्च प्रियश्च तद्वच्चरति ।
तुल्यरूपात् स्वाधीनतया वर्तत इत्यर्थः । तथापि असदुपासनया शब्दादिविषयसेवया आत्महनः आत्मघातिनः पुरुषास्त्वयि
न रमन्ते इत्यन्वयः । कीदृशे त्वयीत्यत्राह-तथोत्सुखे यथावस्थितानुकूलानन्दे । प्रिये हितरूपे आत्मनि । एवम्भूते सुसेव्ये
बत कष्टम् । अहो आश्चर्यम् । विषयादिसेवनया शिश्नोदराद्युपासनया स्वतन्त्राभिमानेन आत्मानं नरके पातयन्तीत्यर्थः ।
नुशयाः । यस्मिन् शब्दादौ विषयेऽनुशयवन्तः सन्तापवन्तः । उरुभये संसारे बहुदुःखपूर्णे संसारे भ्रमन्ति नात्मानं
नश्वरे शरीरे देहे अहमित्यभिभाववन्तः तारयन्तीत्यर्थः । अतः शब्दादेः उपासनयैव त्वयि रमन्ते इत्यन्वयः ।।२२।।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

र्गति विचिन्त्येत्यनेन नृदेहस्य भगवत्सेवोपयुक्तत्वमभिप्रेतम् । तदेव स्पष्टयन्त्यस्तथैव सति तस्य साफल्यमन्यथा तु न
प्रत्युतानर्थहेतुत्वं चेत्याहुः-त्वदनुपथमिति ।। कुलायं नीडतुल्यम् इदं नृशरीरं त्वदनुपथं त्वदनुवर्ति त्वदाराधनप्रवणं

चेत्यर्थः । तर्ह्यात्मादिवच्चरति आत्मादिभिस्तुल्यं स्यादित्यर्थः । तथाप्यसदुपासनया शब्दादिविषयसेवया हेतुभूतया आत्महनः आत्मघातिनः विषयसेवायाः अन्ततः स्थावरत्वापदकतयाऽऽत्मनोऽसत्प्रायतापादकत्वात् तत्सेवापराः आत्मघातिन एवेति भावः । त्वय्यहो न रमन्ते अहो ! निरतिशयगुणवदिदं शरीरं प्राप्यापि त्वां न भजन्त इति खेदः । कथम्भूते । यथोन्मुखे यथावस्थितोत्कूलानन्देऽत एव प्रियेऽत एव च हिते उन्मुखे इति पाठे ईषदानुकूल्येनाप्यभिमुखीभवितुम् उद्युक्त इत्यर्थः । कुतस्तान्प्रति खिद्यध्वे इत्यत आहुः-यद्यस्मादनुशयाः प्रतिजन्म भुक्तावशिष्टोत्तरदेहनिमित्तकर्मयुक्ताः उरु बहु भयं यस्मिंस्तस्मिन् संसारे भ्रमन्ति अतस्ते कुशरीरभृतः कुत्सितदेहभाजः केवलं शोच्या एवेति भावः । भुक्तावशिष्टं कर्मानुशयः स एषामस्तीत्यर्श आद्यच् ॥२२॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ।

त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरन्ति तथोन्मुखास्त्वयि हिते प्रिय आत्मनि च ॥९॥२३॥

"न किञ्चिदभिवाञ्छन्ति यतयः सुसदाश्रयाः । प्रेष्ठस्य रमणस्याप्त्यै प्रियवद्देहदृष्टयः ॥"

इत्यर्थद्योतकस्य न परिलषन्तीत्यस्यायम्भावः ।

ईश्वरेत्यनेन श्रुत्यन्तरमत्राप्यनुकूलं लक्षयति । केचिद्यतयः किञ्चिदपवर्गलक्षणमुपासनाफलमपि न परिलषन्ति न वाञ्छन्ति । तत्र निमित्तमाह-चरणेति । चरणसरोजसेविनां हंसानां संन्यासिनां कुलस्य समूहस्य सङ्गेन सेवालक्षणेन विसृष्टगृहाः गृह्णन्ति त्यक्तुं न मुञ्चन्तीति गृहाः भार्यापुत्रादयो विसृष्टाः सन्त्यक्ताः यैस्ते । अनेन सुसदाश्रया इति विवृतम् । किञ्च । त्वदनुपथं त्वन्मार्गानुकूलमार्गं त्वत्प्राप्त्यनुसारित्वादिदमात्मनः स्वस्य सुहृदनिमित्तबन्धुभूतं कुलायं शरीरं प्रियवच्चिच्छरीरवच्चरन्ति पश्यन्ति । प्रिये सर्वतः प्रियतमे आत्मनि सर्वादानकर्तरि त्वयि तथा हिते तत्तत्प्राप्ताप्राप्तपरिहारेण उन्मुखाः अभिमुखाः ॥९-२३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेव पूर्ववत् तदीयरतेरेव सर्वतः प्रकर्षं ताभ्यः श्रुत्वा अपरास्तदनुगतश्रुतयो व्यतिरेकेण पुष्णन्त्यः स्तुवन्ति त्वदिति ॥२२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं मोक्षनैरपेक्ष्येण चरणारविन्दं भजतोऽभिनन्द्य भजनविमुखान् निन्दन्त्य आहुः-त्वदनुपथमित्यादि । हे भगवन् ! इदं कुलायं शरीरं कुलायं नीडं तदाकारत्वात्तव्द्यपदेशः । यद्वा । इदं शरीरं कीदृशं कुलं परम्परा तेन अयति संसरति कुलायं तत् यथा आत्मवत् सुहृद्वत् प्रियवत् चरति भजति अर्थाज्जनः । जातावेकवचनम् । तथा त्वयि शरीरभृतो जना न रमन्ति न रमन्ते । बत खेदे । अहो आश्चर्य्यं त्वयि कीदृशे त्वदनुपथं यथा स्यात् तथा उन्मुखे त्वयि अनुगतः पन्था यथा भवति तथा उन्मुखे मयि सर्वे चरन्तु । अहमेवानुगतः स्वयमुपगतः पन्था इति उन्मुखे । अथवा । इदं कीदृशं त्वदनुपथं त्वद्भजनमकृत्वा तदेव भजतीत्यर्थः । पुनः कीदृशे । हिते अनुकूले । अतः प्रिये यतः आत्मनि यत् हितं प्रियम् आत्मा च न भवति तत् हितादिवद्भजति यत् हितादि भजति तन्न भजतीत्यहो आश्चर्य्यम् । ननु तदेव कुतः इत्याहुः-आत्महनः आत्मघ्नाः । तथैव कुतः तत्राहुः-असदुपासनया । असतः संसारस्य कुजनस्य वा । कीदृशाः यदनुशयाः यस्यामसदुपासनायाम् अनुशयो वासना येषां तथाभूताः सन्तः संसारचक्रे भ्रमन्ति अत एव कुशरीरभृतः ॥२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

एवं मोक्षनैरपेक्ष्येनापि चरणारविन्दं भजतोऽभिनन्द्य भजनविमुखान्निन्दन्ति- त्वदनुपथमित्यादि । इदं मनुष्यशरीरं त्वदनुपथं त्व[illegible]वोपयुक्तं यद्यपि आत्मवत् सुहृद्वत् प्रियवत् कुलायं चरति कौ लीनं सत् वर्तते तथा तथापि जना अनेन शरीरेण त्वयि न रमन्ते । कीदृशे ? उन्मुखे अपि कश्चिन्मां भजेदित्यतो हिते अनुकूले प्रिये सुहृदि, किम्बहुना, आत्मनि च । बत खेदे, अहो आश्चर्ये । असदुपासनया आत्मानं हन्तीति आत्महनः, यस्यामसदुपासनायामनुशयो वासना येषाम् अतः कुशरीरभृत एव ते ॥२२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

विसृष्टगृहा इत्युक्तमतो गृहासक्तान् भक्तियोगमकुर्वतो जीवान् शोचन्ति । त्वदनुपथं तव पन्थानं भक्तियोगमनुगतं नादिमत्त्वात् त्वच्छ्रवणकीर्तनाद्युपयोगि कुलायं जीवात्मपक्षिणो नीडम् । यद्वा । कुं पृथिवीं लीयते श्लिष्यतीति कर्मण्यण् । शरीरमिदम् आत्मा च सुहृच्च प्रियश्च तद्वत् चरति भाति । मृतशरीरे आत्मादिभानादर्शनात् यत्सम्बन्धेनैव आत्मादिवदिदं यस्मिंस्त्वयि कृपालुत्वादुन्मुखे सौहार्दवत्त्वादेवहिते हितकारिणि देहजीवाभ्यां सकाशादप्यतिप्रीतिविषयत्वात् । प्रिये आत्मनि तानि परमसुसेव्येऽपि । बत अहो कष्टम् । न रमन्ति दास्यादिना न भजन्ति । असदुपासनया असच्छास्त्राध्ययनाध्यापनादि- भ्यासेन । यद्वा । पुत्रकलत्रदेहगेहाद्युपलालनेन आत्महनः आत्मघातिनः कुतः यदनुशयाः यस्यामसदुपासनायाम् अनुशयो येषां ते । कुशरीरभृतः शृगालादियोनिगताः सन्तः । उरुभये संसारे भ्रमन्ति परिवर्तन्ते अत आत्महनः इति भावः । अत्र –

"आराममस्य पश्यन्ति न तं पश्यति कश्चन । न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता श्चासुतृप उक्थशासश्चरन्ति ॥"

इति अर्थश्च–अस्य परमेश्वरस्य आराममधिष्ठानम् । घटपटादिमयं जगदेव पश्यन्ति । अरे जल्प्या जल्पपरास्तार्किकाः न तं यूयं तं न जानीध्वे । य इमा इमानि भूतानि जजान ससर्ज । अन्यत् सृज्येभ्यो भूतेभ्योऽन्यः । युष्माकमन्तरं बभूव युष्मत्तः कारणवादिभ्यः सकाशादन्तर्भूतो बभूव । यतो यूयं नीहारेण अविद्यया प्रकर्षेणैवावृता । अत एवासुतृपः । स्वप्राणांस्तर्पयन्तः उक्थशासः कर्मप्रवर्तकाः भ्रमन्तीति ।

"असुर्या नाम ते लोका अन्धेन तमसा वृताः । ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥" इत्याद्याः ॥२२॥

गूढार्थदीपिनी

विसृष्टगृहा इत्युक्तम्, अतो गृहासक्तान् भक्तिमकुर्वतो जनान्निन्दन्त्यः श्रुतय आहुः–त्वदनुपथेति ।

(अभक्तदुर्गतिपरेयम्)

पद्यानुवादः

त्वदुपयोगि शरीरमिदं प्रभो चरति निघ्नतया [स्वाधीनतया] सुहृदादिवत् ।

असदुपासनयाऽत्र★ रता न ते तव तनौ बत नौरिव तारिणी ॥९॥

★[विषयविषगर्ते । नौरिव तारिणी या तत्र तव तानै ते न रता अत आत्मघातिन इत्यर्थः । बत खेदे ।]

सङ्क्षिप्तसार्थान्वयः — हे भगवन् ! त्वदनुपथं त्वत्सेवोपयोगि इदं कुलायं शरीरम् आत्मसुहृत्प्रियवत् चरति स्ववशे हिते हितकरे प्रिये आत्मनि परमात्मनि त्वयि च उन्मुखे सदा जीवोन्मुखे न तु पराङ्मुखे । तथापि । अहो आश्चर्ये । बत ये त्वयि न रमन्ति ते असदुपासनया विषयभोगासक्त्या आत्महनः आत्मघातिनः । कुतः ? यदनुशया यद्विषयवासनायुक्ताः भृतः सन्त उरुभये मृत्युभये संसारे भ्रमन्ति न तु मुच्यन्त इत्यर्थः ।

हे भगवन् ! त्वामनु पन्था यस्य तत् त्वदनुपथं त्वत्सेवायोग्यम् इदं कौ पृथिव्यां लीयते इति कुलायं शरीरम् । आत्मा च प्रियश्च तद्वच्चरति । अहङ्कारास्पदत्वात् आत्मवत् । विषयसमर्पकत्वात् सुहृद्वत् । सर्वतः–प्रीतिविषयत्वा प्रियवच्च चरति वर्तते इत्यर्थः । तथा च तथापि त्वयि न रमन्ति प्रीतिं न कुर्वन्ति अहो आश्चर्ये बत खेदे च । दुर्लभं मानुष्यं जन्म त्वां न भजन्तीत्यस्माकमाश्चर्यं खेदश्च । किञ्च त्वयि आत्मनि न रमन्ते परस्मिन् विषयवर्गे च रमन्तीति सूचनाय साभिप्रायम् । एतेन विषयोत्कर्षजन्यः स्वार्थनाशो ध्वनितः । कथम्भूते त्वयि ? उन्मुखे सदा भक्ताननुग्रहीतुमुत्कण्ठिते । मुखे । तत्कुतः ? आत्मनि अंशिनि अत एव हिते हितकरे च । एतैर्विशेषणैरंशिनः सर्वथाऽऽनुकूल्येऽप्यंशस्यैव वैमुख्यमित्यतो च्छ्वासः अत उक्तमहो बतेति । न रमन्तीत्यत्र हेतुः । असदुपासनया विषयसेवनेन आत्महनः आत्मघातिनः आत्मपतनहेतवः

आत्मानं नानादुःखगर्तेषु पातनात् घ्नन्ति हिंसन्तीति आत्महन इत्यर्थः । यस्यामसदुपासनायामनुशयो वासना येषां ते यदनुशयाः कुत्सितं निन्दितं शरीरं बिभ्रतीति कुशरीरभृतः शूकरकुक्कुरादियोनिगताः सन्तः उरुभये महाभये संसारे भ्रमन्ति न तु कदाचिदपि सुखलेशं प्राप्नुवन्तीत्यर्थः । 'कुलायो नीडमस्त्रियाम्' इत्यमरात् पक्षिनीडाकारत्वात्तद्व्यपदेशः । यद्वा। जीवेश्वरपक्षिणोर्नीडमेव तत् । कुं पृथ्वीं लीयते श्लिष्यतीति कुलायं "कर्मण्यण्" इति चक्रवर्ती । कुलं परम्परा तेन अयते संसरतीति सन्दर्भः । तव पन्थानं भक्तियोगमनुगतं त्वदनुपथं श्रोत्ररसनादिमत्त्वात् त्वच्छ्रवणकीर्तनाद्युपयोगीत्यर्थः ॥९॥२३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पूर्वोक्तमेव भक्तेरुत्कर्षं व्यतिरेकमुखेन दृढीकर्तुं तद्विमुखान्निन्दति । यद्यपीदं कुलायम् आत्मनः स्वस्य सुहृत् प्रियवच्चरति बन्धे हेतुर्भवति । तथापि त्वदुन्मुखे आत्मनि जीवे 'सकृदेव प्रपन्नाय तवास्मी'त्यादि । 'मामेकं शरणं व्रज ।' 'तेषामहं समुद्धर्ते'त्यादि । स्वप्रतिज्ञापालनाय त्वयि श्रीभगवति प्रिये प्रसन्ने सति त्वदनुपथं तवानुकूलं चरति । कथम्भूतम् । त्वयि हिते सुहृदि 'सर्वस्य शरणं सुहृत्' इति श्रुतेः । अहो बत इति करुणया खेदं प्राप्ता सती श्रुतिराह । न रमन्ति त्वद्भजने न प्रवर्तन्त इति । तत्र हेतुगर्भितविशेषणम् आत्महनः आत्मनो घातः संसरणं तत्पराङ्मुखाः सन्तः विषयोन्मुखा इत्यर्थः । वक्ष्यति चैकादशे श्रीभगवान् स्वयमेव —

'नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् ।
मयाऽनुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा ॥'

इति । तत्र हेतुमाह-असदुपासनयेति । असतामस्वतन्त्राणामीश्वराणां मायां कृतैश्वर्यताम् उपासनया । तथा च श्रुतिः —

'योऽन्यां देवतामुपास्ते अन्यो सावन्योऽहमस्मीति न स वेद यथा पशुः ॥'

इत्यादिच्छान्दोग्ये । अस्यार्थः — यः पुमान् श्रीभगवतः सर्वेश्वराच्छास्त्रयोनेः सकाशादन्यां देवतां ब्रह्मरुद्रादिरूपाम् उपास्ते असौ ब्रह्मरुद्रादिः अन्यः ईश्वरोऽहमन्यो जीव इति भावनया स न वेद । तेषां सर्वेश्वरत्वशास्त्रयोनित्व मायानियन्तृत्वाद्यभावेन मायिकैश्वर्य्यवत्त्वेऽपि मोक्षदातृत्वाभावात् मायानिवारणस्य च मायानियन्त्रधीनत्वादिति । 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।' इति वचनात् भगवतो निरतिशयैश्वर्यादौ शास्त्रमेव प्रमाणम् ।

'तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् ।
पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम् ॥
न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥
स कारणं कारणाधिपाधिपः न तस्य कश्चिज्जनिता न चाधिपः ।
एको ह वै नारायण आसीन्न ब्रह्मा नेशानः ।
नारायणाद्ब्रह्मा जायते । नारायणाद्रुद्रः' इत्यादिश्रुतिकदम्बः अन्येषां मायिकैश्वर्ये सातिशयत्वे चापि तदेव प्रमाणम् ।
'जीशावाभासेन करोति माया चाविद्या च स्वयमेव भवति ।' इत्यादिश्रुतेः ।

अस्यायमर्थः — क्षेत्रज्ञानां सर्वेषामपि भगवतो ब्रह्मणश्चत्रच्छक्तित्वेनाविशेषत्वेऽपि ज्ञानादितारतम्यप्रकारात्मके मायाभासेन पुण्यादिरूपकर्मलक्षणाभासेन च स्वभावेन जीवेशौ जीवं मनुष्यादिम् ईशं ब्रह्मरुद्रेन्द्रादिं करोति भासयति ज्ञानस्य ऐश्वर्य्योपचारेण । तच्च श्रुत्यैवोच्यते —

'आत्मनि श्रुते अश्रुतं श्रुतं भवति । ' इत्यादि । ऐश्वर्यतारतम्येनापीश्वरत्वमुपचय्यते । जीवानामेव पुण्यतारतम्येन ब्रह्माद्यष्टलोकपदवीं प्राप्तानां श्रुत्येश्वरादिशब्दैरुच्यमानत्वात् । अन्यथा 'अजो ह्येको जुषमाणोऽनुशेते' इत्यादि 'प्रकृतिं पुरुषं च

विद्ध्यनादी उभावपि'
ब्रह्मणोऽनादित्वेन तच
प्रजायेये'त्यादिसर्ववेद
मोक्षाभावः । शिवेनैव
'अहं कैलास
ततः प्रसन्नो म
मुक्तिं प्रार्थयमा
तस्माद्गत्वा च
इत्यादि । एतच
'महादेवः सर्वय
विश्वांल्लोकान्व्या
असदुपासनस्य
कथम्भूताः । कुशरीरभृ
भगवतोऽन्यस्योपासनया न

एवं जीवानां परमा
स्वाभिलषितस्यैव प्रतिबन्ध
शरीरं हि सर्वदोषदुष्टमसमर्थ
अनुगुणसेवकरूपं सर्वेन्द्रिय
स्यात् तदा भगवदर्थं व्यापृतं
शरीरपुत्रादिभ्यश्च भिन्नं तथा यै
जातेसर्वदा त्यक्तव्यमिति यैरव
आह-आत्मसुहृत्प्रियवच्चरती
भवतीति निरूपितम् । तत्तु प
मित्रवत् । मित्रं हि स्वस्य हित
महापातकयुक्तमिव द्विष्टं चण्ड
प्रतिबन्धं कुर्यात्तदा का गतिरि
कदा मत्सेवां करिष्यतीत्युन्मुखो
तथा भगवान् प्रियः प्रीतिविषय
एवं साधने सेव्ये चानुगुणे यो न
बाह्यदेवताः परिगृहीताः तासामि
इत्याशङ्क्याह-आत्महन इति ।
उपासना । ततः किमत आह । अ
न तु कदाचिदपि सुखलेशं प्राप्नु

ासना येषां ते यदनुशयाः
भ्रमन्ति न तु कदाचिदपि
तद्व्यपदेशः । यद्वा ।
रम्परा तेन अयते संसरतीति
॥९॥२३॥

: स्वस्य सुहृत् प्रियवच्चरति
व्रज ।' 'तेषामहं समुद्धर्ता'
। त्वयि हिते सुहृदि 'सर्वस्य
ति । तत्र हेतुगर्भितविशेषणम्
भगवान् स्वयमेव —

सनया । तथा च श्रुतिः —

न्यां देवतां ब्रह्मरुद्रादिरूपाम
ं सर्वेश्वरत्वशास्त्रयोनित्व-
न्त्रधीनत्वादिति । 'मामेव ये

यत्वे चापि तदेव प्रमाणम्।

ा ज्ञानादितारतम्यप्रकाशात्मकेन
ादि करोति भासयति ज्ञानशक्त्या

ते । जीवानामेव पुण्यतारतम्येन
शेते' इत्यादि 'प्रकृतिं पुरुषं चैव

नादी उभावपि' इत्यादिशास्त्रविरोधात् । तस्माज्जीवानामेव मायिकैश्वर्यादितारतम्यविभागः । मायाविद्ये स्वयमेव भवत इति ऽनादित्वेन तच्छक्तीनामप्यनादित्वात् । न चेश्वराभावे मायाससत्तासम्भवः । 'सदेव सौम्येदमग्र आसीत्तदैक्षत बहु स्यां येत्यादिसर्ववेदविरुद्धत्वात् । केचित्तु जीवेशशब्दौ व्यष्टिसमष्टिसूचकौ इति वदन्ति । तच्चिन्त्यम् । तथा चेश्वरोपासनाभावे भवः । शिवेनैव हरिवंशे घण्टाकर्णं प्रति स्वयमेवोपदिष्टः तदेवाह-स्वानुभवं घण्डाकर्णः —

'अहं कैलासनिलयमासाद्य वृषभध्वजम् । आराध्य तं महादेवमस्तुवं सततं शिवम् ॥
ततः प्रसन्नो मामाह वृणीष्वेति वरं हरः । ततो मुक्तिर्मया तत्र प्रार्थिता देवसन्निधौ ॥
मुक्तिं प्रार्थयमानं मां पुनराह त्रिलोचनः । मुक्तिप्रदाता सर्वेषां विष्णुरेव न संशयः ॥
तस्माद्गत्वा च बदरीं तत्राराध्य जनार्दनम् । मुक्तिं प्राप्नुहि गोविन्दान्नरनारायणाश्रमे ॥'

इत्यादि । एतच्च भारतसन्दर्भे निपुणमुक्तं रुद्रादीनां मायिकैश्वर्ये राजधर्मे देवस्थानवाक्यमपि प्रमाणम् —

'महादेवः सर्वयज्ञे महात्मा हुत्वाऽऽत्मानं देवदेवो बभूव ।
विश्वांल्लोकान्व्याप्यविष्टभ्य कीर्त्या विराजते द्युतिमान् कृत्तिवासः ॥' इत्यादि ॥

असदुपासनस्य फलमाह-यदनुशया इति । यस्यामसदुपासनायाम् अनुशयो वासना येषां ते । उरुभये संसारे भ्रमन्ति । भूताः । कुशरीरभृतः ग्रामशूकररक्षोगणादियोनिं गच्छन्तः सन्तस्तस्मान्निरतिशयस्वाभाविकीज्ञानक्रियादिशक्तिमतो तोऽन्यस्योपासनया न संसारनिवृत्तिरिति सिद्धान्तः ॥२२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं जीवानां परमानन्देप्सूनां भगवानेव सेव्य इति निरूप्य तत्सिद्ध्यर्थं तत्प्रतिबन्धं विशेषतो निर्दिशति-त्वदनुपथमिति । लषितस्यैव प्रतिबन्धकत्वं नान्येषामिति वक्तुमन्येषां प्रतिबन्धकतां निराकरोति । तत्र प्रथमं शरीरप्रतिबन्धकता निराक्रियते । हि सर्वदोषदुष्टमसमर्थमालस्ययुक्तं च । अतो भगवद्भजने इदं प्रतिबन्धकं भविष्यतीति शङ्का निराक्रियते । तव अनुपथम् । सेवकरूपं सर्वेन्द्रिययुक्तं बलविवेकादियुक्तं च । इन्द्रियवत्त्वमेवाधिकारिविशेषणमिति तादृशे चेत् अहंता ममता दृढा वा तदा भगवदर्थं व्यापृतं न कुर्यादिति तदर्थमाह-कुलायमिति । कुलायः पक्षिणां नीडम् । पक्षयोः समागतयोः तत्र ते न तिष्ठन्ति दिभ्यश्च भिन्नं तथा यैः स्वशरीरं ज्ञातमस्ति केवलमिदं गृहरूपं तत्राप्यविवेकिनामेवाहितकारीन्द्रियादिभ्योऽपि भिन्नं विवेके त्यक्तव्यमिति यैरवगतम् । तत्रापि स्त्रीदेहश्चेत् सेवकदेहो वा भिन्नस्वभावेन द्वेषिदेहो वा भवेत् तदा कार्यं न सिद्ध्यतीत्यत आत्मसुहृत्प्रियवच्चरतीति । आत्मवत् सुहृद्वत् प्रियवच्चेति । आत्मा स्वाधीनो भवति तेनास्य स्त्रीदेहवत् सेवकदेहवद्वा न निरूपितम् । तत्तु पराधीनम् ।तथापि धर्मकार्ये चेदसहिष्णुः न क्षमं भवेत् तथापि कार्यं न सेत्स्यति, तदर्थमाह-सुहृद्वत् । मित्रं हि स्वस्य हितमेव करोति तथेदमपि धर्मकार्यादिसमर्थम् । किञ्च प्रियो यथा स्नेहविषयो भवति एवं स्नहपात्रं न तु कमिव द्विष्टं चण्डालादिदेहवन्मनःपीडाजनकम् । एवं देहस्य प्रतिबन्धकता निवारिता, कदाचिद्भजनीयो भगवान् कुर्यात्तदा का गतिरिति चेत्तत्राह-तथोन्मुखे त्वयि हिते प्रिय आत्मनि चेति । भगवानपि ब्राह्मणादिदेहमुत्पाद्य स्वसेवार्थं करिष्यतीत्युन्मुखोऽस्ति किञ्च हितकारी यदा तस्य देहस्य विघातकं किञ्चिदापतति प्रमादात्तदा पालयति सहृत्कृत्यमेतत् प्रियः प्रीतिविषयः । न हि प्रियकार्यं कुर्वन् कश्चित्खिन्नो भवति । आत्मा चास्य देहस्य सर्वेषामात्मा आवश्यक इति सेव्ये चानुगुणे यो न सेवते तत्र हेतुः-असदुपासनयेति । असतामुपासनया । दुष्टसङ्गान्न भवतीत्यर्थः । उपासनापदेन च परिगृहीताः तासामपि सकृदपि सङ्गे भगवद्भजनं नश्यतीति ज्ञापितम् । ननु तत्सङ्गं सर्वपुरुषार्थनाशकं किमिति कुर्वन्ति -आत्महन इति । ते पूर्वकृतपापात् आत्महनो जाताः यद्वशादसत्सङ्गस्तेषां जात इति । असतामिन्द्रियाणां वा ततः किमत आह । अदनुशयाः यस्मिन्नसत्सङ्गे अनुशययुक्ताः । उरुभये संसारे कुशरीरं प्राप्य अनेकजन्मसु परिभ्रमन्ति पि सुखलेशं प्राप्नुवन्तीत्यर्थः ।

"असत्सङ्गो न कर्तव्यो भक्तिमार्गस्य बोधकः । देहे ह्यनुगुणे कृष्णे नेन्द्रियाणां प्रियं चरेत् ॥" ॥९॥२२॥

श्रीसुबोधिनीसारः

त्वदनुपथं त्वत्सेवायोग्यम् इदं कुलायं शरीरं कौ पृथिव्यां लीयते इति वयुत्पत्त्या आत्मवत् सुहृद्वत् प्रियवत् चरति चेष्टते तथा च एवं सति उन्मुखे सानुकूले हिते प्रिये आत्मनि त्वयि असतां कुतर्कवतामुपासनया कुसङ्गेन हेतुना न रमन्त्यहो मूढता तेषाम् । बत खेदे । यस्यां बहिर्मुखोपासनायामनुशयो वासना येषां ते कुशरीरभृतो भूभाररूपा उरुभये संसारे भ्रमन्ति सततं परिवर्तन्तेऽत आत्महनः कृतघ्ना इत्यर्थः ॥९॥२२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं भगवद्भक्तानां भजनानन्दं निरूप्य तद्विमुखान्निन्दन्ति-त्वदनुपथमिति । त्वदनुपथं त्वदनुवर्तित्वात्त्वत्सेवौपयिकमिदं कुलायं कौ पृथिव्यां लीयत इति तथा, यद्वा नीडरूपम् आत्मसुहृत्प्रियवच्चरति रोगादिग्रस्तत्वे विकलेन्द्रियत्वे च यथेष्टभजनासम्भवात्तद्राहित्येन आत्मनः सुहृत् मित्रमत एव प्रियश्च तद्वत्स्वाधीनतया वर्तते । तथापि बत अहो कष्टं ये त्वयि न रमन्ति त्वां श्रवणादिना न भजन्ति ते आत्महन इत्यन्वयः । कदाचिद्भगवानेव स्वभजनप्रतिबन्धं कुर्यात्तदा जीवस्य तद्भजने का शक्तिः इत्याशङ्क्य भगवन्तं विशिंषन्ति-उन्मुख इति । "तेषामहं समुद्धर्ता मृत्युसंसारसागरात्" इति वचनात्संसारादुद्धारे उन्मुख इत्यर्थः । तत्र हेतुमाहुः-हित इति । प्रियस्य सेवापि सुखकरैव, इत्याशयेनाहुः-प्रिय इति । प्रियत्वे हेतुमाहुः-आत्मनि चेति "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुतेः । कुतो न भजन्ति, इत्यपेक्षायामाहुः- असुदपासनयेति । असतां दुष्टानां प्राणिनां देहेन्द्रियादीनां विषयाणां च उपासनया आसक्त्येत्यर्थः । ननु "अच्छेद्योऽयमदाह्योऽयम्" इत्यादिनिषेधात् कथमात्महननं सम्भवति, इत्याशङ्क्य तद्धननस्वरूपमाह-यदिति । यस्यामसदुपासनायामनुशयो वासना येषां ते कुशरीरभृतः श्वसूकरादिशरीरवन्तः सन्तः उरुभये संसारे भ्रमन्ति परिवर्तन्ते इत्यर्थः ।

"असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥" इति श्रुतेः ॥२२॥

अन्वितार्थप्रकाशिका

त्वदिति ॥ त्वदनुपथमिदं कुलायं आत्मसुहृत्प्रियवच्चरति तस्मिंस्त्वयि साक्षादेव आत्मनि हिते प्रिये च सदैवोन्मुखे च अहो बत तथापि ये न रमन्ति ते असदुपासनया आत्महनः यदनुशयाः कुशरीरभृतः सन्तः उरुभये भ्रमन्ति इत्यन्वयः । तव पन्थानमनुगतं जीवाख्यत्वदंशसम्बन्धं प्राप्तं परमात्मनस्तव जीवात्मना सम्बन्धादेव इदं कुलायं कौ पृथिव्यां लीयत इति तथा नीडरूपं शरीरम् आत्मसुहृत् प्रियवच्चरति भातीत्यर्थः । मृतशरीरे तद्भानाभावात् तत्रात्मवत्त्वमहंतास्पदत्वात् सुहृत्त्वं विषयापेक्षया हितकारित्वात् प्रियवत्त्वं ततस्ततः प्रीतिविषयत्वात् एवं यत्सम्बन्धादेव शरीरे तत्तद्भानाप्रीतिः तस्मिंस्त्वयि साक्षादेव आत्मनि हिते प्रिये च सदोन्मुखे न तु देहवत् विषयवच्च कदाचित्पराङ्मुखेऽपि एवम्भूतेऽपि त्वयि अहो आश्चर्यं बत कष्टं तथा देहादावपि ये न रमन्ति । तङ्भाव आर्षः । ते असुदुपासनया असतो देहादेरुपलालनेन आसक्त्येत्यर्थः । आत्महनः यस्यामसदुपासनायामनुशयो वासना येषां ते कुशरीरभृतः श्वशूकरादिशरीरवन्तः सन्तः उरुभये संसारे भ्रमन्ति परिवर्तन्ते इत्यर्थः । तथा च श्रुतिः —

"आराममस्य पश्यन्ति न तं पश्यति कश्चन ॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥" इति ॥२२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आदौ जनैर्दुःप्राप्यो भगवान् पश्चाज्जीवोपरि परमदयां कृत्वा देवमनुष्यादिरूपेण प्रादुर्भूतस्तं ये न भवन्ति
आहुः-त्वदनुपथमिति ॥ हे भगवन् ! त्वदनुपथं तव पन्थानमनुवर्तते इति त्वदनुपथम् । त्वत्सेवानुकूलम् इदम्, कुलायं कौ
लीयते इति कुलायं शरीरम् ॥ यद्वा ॥ कुलायं नीडम् ॥ कुलायो नीडमस्त्रियामित्यमरः ॥ क्लीबत्वं छान्दसम् ।

श्रुत्युक्तरीत्या हंस
आत्मवच्चरति इष्ट
स्वानुकूलतया वर्त
बुद्धिप्रेरकत्वाद्धित
वा । अनित्यशरीरा
इत्याश्चर्ये । ध्यानश्र
यथाऽऽत्मसुहृदादिव
यस्यामसदुपासनाया
यदनुवर्तिनः यानसत्
महाभये मृत्युभये । ज

आरामं तस्य

न तं विदाथ

पूर्वश्लोके स

नृगतिं विचिन्त
साफल्यं प्रत्युतानर्थहेतुत्व
सयुजा" इत्यादिश्रुतिभि
त्वदाराधनप्रवणमित्यर्थः
प्रवर्तते । सुहृद्वच्चरति सु
सद्बुद्धिप्रेरकत्वाद्धितकारि
उन्मुखतयावस्थिते, ए
असाधुजनसङ्गत्याऽनित्यश
आत्मघातकाः आत्म
असदुपासनाजातदुष्कर्मवास
इत्यर्थः । भ्रमन्ति परिवर्तन्ते

सर्वाधिकं सर्वप्रदम
तवानुपथं त्वदनुपथं त्वदनुव
शरीरं कर्तृपदमेतत् । आत्मसुह
यथा स्वस्यात्यन्तानुकूलाः स्व
शरीरं वर्तत इति भावः । यथा श
तथा हि तस्य श्रेयसः कर्ता भग
इत्यर्थः । आत्मनि आत्मा यथा
इत्यर्थः । एवं सर्वोपकारके त्व

युक्तरीत्या हंसतुल्यजीवस्याश्रयत्वेन शरीरे नीडत्वोपचारः ॥ आत्मसुहृत्प्रियवत् ॥ आत्मा च सुहृच्च प्रियश्च तद्वच्चरति । आत्मवच्चरति इष्टसाधने प्रवर्तते मित्रवच्चरति मित्रवत्सहायं कुरुते । प्रियवच्चरति । पुत्रादिवदप्रेरितमपि हितं करोति तद्वज्जीवानां ानुकूलतया वर्तत इत्यर्थः ॥ तथापि उन्मुखे सन्मुखे ॥ मनुष्यादिसमानस्थित्या हेतुनाऽऽश्रयितुं योग्ये इत्यर्थः ॥ हिते उपदेशादिना बुद्धिप्रेरकत्वाद्धितकारिणि प्रिये । प्रेमास्पदे च ॥ आत्मनि ॥ आत्मनात्मनि परमात्मनि त्वयि प्रत्यक्षे असदुपासनया असत्पुरुषसङ्गेन न। अनित्यशरीरादिलालनेन । आत्महनः आत्मघातकाः । आत्मनः संसारकूपनिक्षेपका इति यावत् ॥ बतेति खेदे । अहो इत्याश्चर्ये । ध्यानश्रवणादिनेति शेषः । न रमन्ति । परस्मैपदं छान्दसम् । रमणं न कुर्वन्ति ॥ यद्वा ॥ जीवात्मनः शरीरं यथाऽऽत्मसुहृदादिवच्चरति तथा यस्यात्मा शरीरमिति श्रुत्युक्तन्यायेन तव शरीरभूता जीवात्मानो न रमन्ति न चरन्ति ॥ यदनुशयाः यस्यामसदुपासनायामनुशयो वासना येषां ते ॥ कुशरीरभृतः कुत्सितानि शरीराणि बिभ्रतीति तथाभूताः सन्तः ॥ यद्वा ॥ यदनुशयाः यदनुवर्तिनः यानसत्पुरुषान् अनुशेरते अनुवर्तन्ते इति व्युत्पत्तेः कुशरीरभृतः कुत्सितजीवाः भगवद्भक्तिहीना इत्यर्थः । उरुभये महाभये मृत्युभये । जगति भ्रमन्ति परिवर्तन्ते । न तु मृत्युभयान्मुच्यन्ते इति भावः ॥ तथा च श्रुतयः—

आरामं तस्य पश्यन्ति न तं पश्यति कश्चन ॥ इति

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ इत्याद्याः ॥

पूर्वश्लोके सत्सङ्गगुणोक्तिः इह तु दुःसङ्गदोषोक्तिरिति भेदः ॥२२॥९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नृगतिं विचिन्त्येत्यनेन नृदेहस्य भगवत्सेवोपयुक्तत्वमभिप्रेतं तदेव स्पष्टयन्त्यस्तथैव सति तस्य साफल्यमन्यथा तु न साफल्यं प्रत्युतानर्थहेतुत्वं चेत्याहुः ॥ त्वदनुपथमिति ॥ कुलायं नीडतुल्यम्, इदं शरीरं, "सुपर्णावेतौ सदृशौ सखायौ" "द्वा सुपर्णा सयुजा" इत्यादिश्रुतिभिर्जीवस्य पतत्रित्वोक्तेस्तन्निवासभूतत्वाज्जीवशरीरस्य नीडत्वेन व्यपदेशः । त्वदनुपथं त्वदनुवर्ति, त्वदाराधनप्रवणमित्यर्थः । आत्मसुहृत्प्रियवत्, चरति च । वतेर्द्वन्द्वान्तत्वात्प्रत्येकं सम्बन्धः । तत्रात्मवच्चरति आत्मवदिष्टसाधने प्रवर्तते । सुहृद्वच्चरति सुहृद्वत्सहायं कुरुते । प्रियवच्चरति पुत्रादिवदप्रेरितमपि हितं करोति, तथा त्वयि परमेश्वरे च, हिते सद्बुद्धिप्रेरकत्वाद्धितकारिणि, प्रिये प्रेमास्पदीभूते, आत्मनि आत्मस्थत्वाददूरवर्तिनि, उन्मुखे स्वं भजन्तं भक्तं प्रति तद्धितविधानाय उन्मुखतयावस्थिते, एवं सर्वथा स्वहितानुकूलसाधनसम्पादानुकूल्ये सति अपि, ये जनाः, असदुपासनया असाधुजनसङ्गत्याऽनित्यशरीरादिलालनेन, बतेति खेदे । अहो इत्याश्चर्ये । न रमन्ति न रमन्ते त्वां न भजन्तीत्यर्थः । आत्महनः आत्मघातकाः आत्मनः आत्मघातकाः आत्मनः संसारकूपपातका इत्यर्थः । ते जनाः, यदनुशयाः असदुपासनाजातदुष्कर्मवासनायुक्ताः, अत एव कुशरीरभृतः कुत्सितदेहभाजः सन्तः, उरुभये जन्ममरणादिमहाभययुक्ते संसारे इत्यर्थः । भ्रमन्ति परिवर्तन्ते । पूर्वश्लोके सत्सङ्गगुणोक्तिः । इह दुःसङ्गदोषोक्तिरिति भेदः ॥९॥ ॥२३॥

योगिरामानुजाचार्यकृतसरला व्याख्या

सर्वाधिकं सर्वप्रदमपि भगवन्तं ये न भजन्ति ते अधः पतन्तीत्याहुः-त्वदनुपथमिति । अनुसृतः पन्था येन तदनुपथं तदनुपथं त्वदनुपथं त्वदनुवर्तित्वत्सेवौपयिकमित्यर्थः । कुलायं पक्षिणां गृहमिव स्वेच्छानुरूपम् आत्मनः नीडरूपमित्यर्थः । इदं शरीरं कर्तृपदमेतत् । आत्मसुहृत्प्रियवत् आत्मसुहृत् प्रियाणामिवात्मसुहृत्प्रियवत् । स्वस्यात्मा जीवात्मा सुहृत् मित्रं प्रियाः हिताश्च स्वस्यात्यन्तानुकूलाः स्ववशे वर्तन्ते तथा शरीरमपि स्वानुकूलं स्वाधीनं सत् चरति वर्तत इत्यर्थः । भगवदुपासनार्थंसर्वानुकूलं वर्तत इति भावः । यथा शरीरं सर्वानुकूलं तथा भगवानपि सर्वानुकूलोऽस्तीर्ति सूचयति । हिते यथा मातृपित्रादयः हितकर्तारः हितस्य श्रेयसः कर्ता भगवानित्यर्थः । प्रिये प्रियः यथा आपदि प्राप्तयामापन्निवारको भवति । तथेश्वरोऽपि चेतनानामापन्निवारक इत्यर्थः । आत्मनि आत्मा यथा शरीरस्य धारकः पोषको भवति तथा भगवानपि सर्वचेतनानामन्तरात्मत्वेन सर्वेषां धारकपोषकः इत्यर्थः । एवं सर्वोपकारके त्वयि परमात्मनि वर्तमानं सति सर्वरक्षकं सर्वप्रदं सुलभं भगवन्तं परित्यज्य असदुपासनया असतां

दुष्टानां धनिनां देहेन्द्रियादिदेवतान्तराणां वोपासनया करणेनात्महनः आत्मानं हन्तीत्यात्महनः स्वात्मघातिनः । आत्मनोऽधः पतनकारिण इत्यर्थः ।

"तैस्तैः कामैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः । न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ॥"

इत्यादिवचनैर्भगवन्तं विहायेतरोपासकानामन्ते दुर्गतिप्राप्तिकथनात् । ये जनाः न रमन्ति पूर्वोक्तप्रियादिरूपे त्वयि न रमन्ति श्रवणादिना न भजन्तीत्यर्थः । अहो ! बतात्यन्ताद्भुतमिदं यतः भगवद्भजनाय सर्वानुकूलं शरीरमपि वर्तते । सर्वेश्वरः सर्वरक्षकः सर्वविधोपकारकः सर्वफलप्रदः यज्ञाद्यर्थमिव द्रव्यार्जनादिकायक्लेशमन्तरा श्रवणादिमात्राराध्यः । एतादृशं भगवन्तं परित्यज्याधोगतिहेतुभूतं बहुक्लेशसाध्यं बहुप्रमादयुक्तम् असदुपासनं कुर्वन्ति । यथा वा उत्तमाङ्गना मनोरमं सर्वगुणोपेतं शरीं प्राप्य सर्वगुणोपेतं सर्वसुखदं सार्वभौमं पतिं परित्यज्य दुर्भगं किरातं यथा भजति तथेति भावः । तदुक्तं मुकुन्दमालायाम्—

'नाथे नः पुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा सेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति ।

यं कंचित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं सेवायै मृगयामहे नरमहो मूका वराका वयम् ॥'

इति आत्महननप्रकारं दर्शयन्ति-यदिति । यदनुशयाः यस्यामसदुपासनायामनु वारम्वारं शयः शयनं निद्रारूपेण स्थितिः येषां ते यदनुशयाः । यथा शयानस्य सदसद्विवेकं नास्ति तथा सदसद्विवेकं विना निरन्तरमसदुपासनायामेव वर्तमानाः इति भावः । यद्वा यदनुशयाः यस्याः असदुपासनायाः अनुशयः वासना येषाम् असदुपासनायुक्ता इत्यर्थः । कुशरीरभृतः भगवद्भजनहीनत्वात् कुशरीरमेव बिभ्रन्तीति कुशरीरभृतः । दृतय इव श्वसन्तीत्युक्तत्वात् उरुभये महाभये संसारे जन्ममरणादिदुःखप्रदे इत्यर्थः । भ्रमन्ति कृमिकीटखगमृगनरादियोनिष्वित्यर्थः । त्वदनुपथं कुलायमात्मसुहृत्प्रियवच्चरति । तथा हि ते प्रिये आत्मनि त्वयि उन्मुखे सति असदुपासनयाऽऽत्महनः त्वयि न रमन्ति । अहो ! बत यदनुशयाः कुशरीरभृतः उरुभये भ्रमन्तीत्यन्वयः ॥२२॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

श्रुतौ अस्य परमात्मनः आराममधिष्ठानं जगद्रूपं सर्वे पश्यन्ति । तमारामकर्तारं परमात्मानं कश्चन कोऽपि न पश्यति । न विदाथ न जानीथ इमा इमानि भूतानि जजान जनयति अतः कारणादन्यद्युष्माकमन्तरं व्यवधानं बभूव । यतो भवन्तो नीहारेणाविद्यया प्रावृता अवगुण्ठिताः जल्प्याः जल्पप्रवृत्तास्तार्किका इत्यर्थः । असुतृपः प्राणतर्पणपराः विषयिणश्च उक्थानां शासितारः कर्मोपदेशकः यज्वानः चरन्ति संसरन्तीत्यर्थः । रमन्ति रमन्ते ॥२२॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

विषयिणो बहिर्मुखान्प्रत्यनुक्रोशन्त्यो जगदात्मनि ईश्वरे रतिमुपदिशन्ति इत्याह–त्वदनुपथमिति । कौ पृथिव्यां लीयत इति कुलायं शरीरं त्वदनुपथं त्वत्सेवायोग्यम् आत्मसुहृत्प्रियवच्चरति स्वाधीनतया वर्तते तथापि असदुपासनया आत्महनः प्रमादिनो जना आत्मनि त्वयि न रमन्ति । सख्यमात्मनिवेदनादिना न भजन्ति । बत अहो कष्टम् । पन्थानमनुगतम् अनुपथम् आत्मवत् अहङ्कारास्पदत्वात् सुहृद्वत् विषयार्पणहितकारित्वात् प्रियवत् इतस्ततः प्रीतिविषयत्वात् एवं । देहस्त्वेवमेवाचरति तथापि त्वयि न रमन्त इति कष्टम् । कुतः । यदनुशयाः कुशरीरभृतः सन्तः उरुभये संसारे अत एवात्महन इति भावः । अस्यामसदुपासनायां यः अनुशयो वासना येषां ते यदनुशयाः । त्वयि कथम्भूते । उन्मुखे भजनमात्रेण संसारादुद्धर्तुमुद्यते हिते पितृवत्कारिणि प्रिये मनोऽनुकूले सख्यौ । एवम्भूते सुखसेव्ये आत्मनि त्वयि न रमन्त इति कष्टम् आहुः–श्रुतयः ता यथा

"आराममस्य पश्यन्ति न तं पश्यति कश्चन ।"

"न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्याचासुतृप उक्थशासश्चरन्ति ॥" इति ।

अर्थः – अस्यात्मन आराममारमणं ग्रामं नगरं स्त्रियं पुत्रमन्नाद्यमित्यादिवासनारूपमाक्रीडस्थानं सर्वे पश्यन्ति । तवात्म

आतिनः । आत्मनोऽधः

ादिरूपे त्वयि न रमन्ति
ते । सर्वेश्वरः सर्वरक्षकः
: । एतादृशं भगवन्तं
नोरमं सर्वगुणोपेतं शरीरं
ुकुन्दमालायाम् —

ायनं निद्रारूपेण स्थितिः
त्र वर्तमानाः इति भावः ।
: भगवद्भजनहीनत्वात् ।
:खप्रदे इत्यर्थः । भ्रमन्ति
त्मनि त्वयि उन्मुखे सति
॥२२॥

न कोऽपि न पश्यति । न
ो भवन्तो नीहारेणाविद्यया
शासितारः कर्मोपदेशकः

। कौ पृथिव्यां लीयत इति
नया आत्महनः प्रमादिनो
ातम् अनुपथम् आत्मवत्
नेवाचरति तथापि त्वयि न
अस्यामसदुपासनायां यः
हेते पितृवत्कारिणि प्रिये

शासश्चरन्ति ॥" इति ।
ं सर्वे पश्यन्ति । तवात्मानं

कश्चिदपि न पश्यति । अहो भाग्यहीनता लोकस्येति लोकं प्रत्यनुक्रोशं दर्शितम् । अत्यन्तविविक्तः स्वयञ्ज्योतिरात्मा ादौ भवतीत्यर्थः । अनुक्रोशपरेयम् । विश्वकर्मा मनुष्याणां हितमुपादिशति–न तमिति । तं यूयं न विदाथ न जानीथ । य इमा भूतानि । जजान जनयामास । अतो युष्माकं तस्य चान्यन्महदन्तरं बभूव स पुरुषो जनको यूयं जन्याः यदि ज्ञात्वात्मतत्त्वं नोपासिष्यध्वे तदा न संसृतिः स्यादित्यभिप्रायः । उपदेशपरेयं श्रुतिः । एवं प्रत्यक्षमुक्त्वा परोक्षमभिनयेन दर्शयन्नाह–नीहारेण जल्प्या जल्प्रवृत्तास्तार्किकाः, ये चासुतृपः असूनेव तर्पयन्तीत्यसुतृपो विषयिणः, ये चोक्थानां कर्मफलानामाशासितारो ानः एते नीहारेणाविद्ययावृताः सन्तश्चरन्ति संसारे भ्रमन्तीति सनिन्दोपदेशपरेयम् । "असुर्या नाम ते लोकाः" इत्यपि यम् । अथ स्वामिनाम् —

त्वय्यात्मनि जगन्नाथे मन्मनो रमतामिह । कदा ममेदृशं जन्म मानुषं सम्भविष्यति ॥ सुगमम् ॥२२॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवदाश्रयणमेव शरीरफलम् अन्यथा कुत्सितदेहयोगात्संसरन्तीत्याह–त्वदनुपथमिति । कुलायं नीडतुल्यं शरीरम् । नुपथं त्वदाराधनादिप्रवणं चेदात्मसुहृत्प्रियवच्चरति । आत्मादितुल्यं स्यादित्यर्थः । अहो बत इति खेदे । तथापि असदुपासनया नादिसेवया आत्महनः आत्मघातिनः पुरुषाः त्वयि न रमन्ति न रमन्ते । परस्मैपदमार्षम् । त्वदाराधनादिकं न कुर्वन्तीत्यर्थः । त्वयीत्यत आह–तथोत्सुखे यथावस्थितानुकूलानन्दे । प्रिये हितरूपे यदनुशयाः । यस्मिन् शब्दादावनुशयवन्तः । अनुशयो शेषसन्तद्वन्तः । सन्तापवन्त इति यावत् ।अत एव कुशरीरभृतः उरुभये संसारे भ्रमन्ति । तथा चैकादशे वक्ष्यते —

'य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् । न भजन्त्यवजानन्ति स्थानात् भ्रष्टाः पतन्त्यधः ॥'

इति । अत्र शब्दादौ तैरुपासनं ये च त्वयि रमन्ते इत्यन्वयः ॥२२॥

कृष्णप्रिया

जीवरूप पक्षी के घोंसले के समान यह मनुष्य शरीर यदि आपके आराधन रूप सन्मार्ग के अनुकुल हो र्थात आप के आराधनमें लीन हो जायें तो यही शरीर अनुकूल आत्मा के सुहृद के प्रिय के तुल्य हो जाएगा । कीसी भी निमित्त मात्र को लेकर जीव के सन्मुख होने वाले जीव के हितकारी जिवके प्रिय जीव के आत्मघाती संसारी जीवन ही रमण करते है यह अतिखेद की वार्ता है । प्रतिजन्म में कर्म के भोग को भोग करने अवशेष कर्म से सम्पन्न होकर श्वान सूकादि निन्दित शरीर धारी होकर वे संसारी जीव बहुत भयंकर ऐसे यह संसारमें भ्रमते है ॥२२॥

निभृत[1]मरुन्मनोऽक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोऽपि ययुः स्मरणात् ।
स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वियमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधाः ॥२३॥

कर्दमक्षमा

निभृतमरुन्मनोक्षदृढयोगयुजः, मुनयः, यत्, तत्त्वम्, हृदि, उपासते, तत्, एव, तत्त्वम्, अरयः, अपि, तव, स्मरणात्, ययुः ।, तथा, रगेन्द्रभोगभुजदण्डविषक्तधियः, स्त्रियः, गोप्यः, तथा, तव, अङ्घ्रिसरोजसुधाः, समदृशः, वयम्, अपि, च, ते, समाः, एव ॥२३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इदानीम् "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्याद्याः श्रुतयो ध्यानमङ्गत्वेनोपदिशन्तीत्याह भृतमरुन्मनोऽक्षदृढयोगयुज इति । मरुत्प्राणो मनश्चाक्षाणि इन्द्रियाणि च निभृतानि संयमितानि यैस्ते च दृढं योगं युञ्जन्ति ते

-वीर ।

दृढयोगयुजस्ते तथाभूता: मुनयो हृदि यत्तत्त्वमुपासते तदेवारयोऽपि तव स्मरणाद्ययु: प्रापु: स्त्रियोऽपि कामत: उरगेन्द्रभोगभुजदण्डविषक्तधिय: अहीन्द्रदेहसदृशयोर्भुजदण्डयोर्विषक्ता धीर्यासां ता: परिच्छिन्नदृष्टय: समदृश: सममपरिच्छि त्वां पश्यन्त्यो वयं श्रुत्यभिमानिन्यो देवता अपि ते समा एव कृपाविषयतया अङ्घ्रिसरोजसुधा: अङ्घ्रिसरोजं सुष्ठु धारयन्त्य: अयं भाव: इत्थम्भूतस्तव स्मरणानुभाव: योगिनस्त्वां हृद्यालम्बनमुपासते याश्च वयं त्वां समं पश्यामो याश्च स्त्रिय: कामत: परिच्छि ध्यायन्ति ये च द्वेषेण सर्वानपि तांस्त्वामेव प्रापयतीति।

चरणस्मरणं प्रेम्णा तव देव सुदुर्लभम्। यथाकथञ्चिन्नृहरे मम भूयादहर्निशम् ॥१०॥ ॥२३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाश:

भावार्थदीपिकाप्रकाश: वंशीधरी — अधुना ध्यानमात्मप्राप्तावङ्गत्वेनाहु: — "आत्मा वा" इत्याद्या: श्रुतयस्ता आह। स्वभार्यां मैत्रेयीं प्राह याज्ञवल्क्य:।

"न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्य: श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳसर्वं विदितम्" इति ॥

अरे इति निकृष्टसम्बुद्धौ भार्यात्वात्। मैत्रेयि, सर्वस्य पतिस्त्रीपुत्रधनादिवसुमात्रस्य कामाय सर्वं प्रिय न भवति किन्त्वा कामाय सर्वं प्रियं भवति स आत्मा त्वया द्रष्टव्य: साक्षात्कर्तव्य:, श्रोतव्य: पूर्वमाचार्यत आगमतश्च पश्चान्मन्तव्य: तर्कादित:, ततो निदिध्यासितव्यो निश्चयेन ध्यातव्य:। एवमात्मनो दर्शनं भवति मत्या मननेन विज्ञानेन निदिध्यासनेन। इयमप्युपदेशपरा। एतदभिप्रेत्यैव श्रीशुकेनोक्तम् —

"तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वर:। श्रोतव्य: कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥" इति द्वितीये ॥

तथा पाद्मेऽपि-शिव: —

"स्मर्तव्य: सततं विष्णुर्विस्मर्तव्यो न जातुचित्। सर्वे विधिनिषेधा: स्युरेतयोरेव किंकरा: ॥" इति ॥

तदेव तत्त्वमत्र निर्गलितार्थमाह-अयं भाव इति-वयं श्रुत्यभिमानिन्यो देवता:। ये च द्वेषेण शिशुपालादय: भवांस्तान्योगिप्रभृतीन् त्वात्मानमेव प्रापयतीति। अत्रेदमवधेयम्-यद्यपि भगवत्प्रसादो गोपीनामसाधारणोऽस्ति —

"नायं श्रियोऽङ्ग उ नितान्तरते: प्रसाद: स्वर्योषितां नलिनगन्धरुचां कुतोऽन्य:।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषां य उदगाद्व्रजवल्लवीनाम् ॥"

इत्यादिभिरुक्तस्तथाप्यत्र "तन्मध्यपतितस्तद्ग्रहणेन गृह्यते" इति न्यायात् मुन्यादीनां मध्ये कथितानां गोपीनामपि श्रीकृष्णस्मरणजन्यब्रह्मानन्दसुखसमम्यं भवतु नाम किन्तु भजनानन्दसुखाधिक्यमस्त्येव निदर्शनं च —

"अहल्या द्रौपदी सीता तारा मन्दोदरी तथा। पञ्च कन्या: स्मरेन्नित्यं सुप्रभातं दिने दिने ॥"

एता: पञ्च कन्या नित्यं दिने दिने स्मरेत्तर्हि तद्दिनं सुप्रभातं भवतीत्यर्थ:। अहल्यादीनां मध्ये श्रीसीतापि पठिता। एतावता ताभि: सह सीताया: साक्षाल्लक्ष्म्या: किं साम्यं भवति किन्तु कन्यास्मरणफलदातृत्वेन साम्यमुक्तम्। सीता तु साक्षाल्लक्ष्मीरहल्याद्यास्तदंशांशा एवेति तथा कर्मादौ पञ्चदेवतापूजाविधौ गणेशादीनां मध्ये विष्णुरप्येको देव उक्त:। एतावता विष्णुना तेषां किं साम्यं मन्तव्यम्। किन्तु कर्मफलदातृत्वेन कर्माङ्गत्वात्समत्वम्। अन्यदा तु विष्णुरीश्वरौ गणेशाद्यास्तदंशांश एवेति दिक्। स्वामिनां चरणेति सुबोध: ॥★॥

श्रीधरानुयायिनी — इदानीमीश्वरभजने ध्यानमङ्गत्वेनापदिशन्त्यस्त्वां स्मरता सर्वेषां तुल्यैव त्वत्प्राप्तिरित्याहु:-निभृतै ये वशीकृतप्राणेन्द्रियमनसो दृढयोगिनो हृद्युपासते, ये च कंसचैद्यादयो द्वेषेण त्वां स्मरन्ति, य भवदीयशेषशरीरानुकारिभुजदण्डद्वयासक्तधियो गोप्यस्त्वां परिच्छिन्नं कामोपभोगाय ध्यायन्ति। याश्च त्वत्पादपद्माराधनपरा ब्र

स्त्वात्मपरिच्छिन्नं ध्यायाम इति ते सर्वेऽपि समदृशस्तव समा एव । अहो अपूर्वस्तव स्मरणानुभावो यः सर्वानपि त्वामेव यतीति कीटभृङ्गन्यायेन ध्यानमात्रस्यैव ध्येयसारूप्यापादकत्वं न भक्तेरेवेत्याशयः ॥★॥

विश्वनाथी — भगवत्स्वरूपेष्वपि मध्ये श्रीकृष्णस्य तद्विषयकसर्वविलक्षणभक्तियोगस्य च सर्वोत्कर्षं वक्तुं प्रथमं विषयकं ज्ञानयोगमपकर्षकक्षायां निक्षिपन्त्य आहुः-निभृतैः संयमितैर्मरुन्मनोक्षैर्यो दृढो निश्चलो योगस्तं युञ्जन्ति । ये तथाभूता हृदि परमशुद्धे ब्रह्माकारीभूते यद्ब्रह्मस्वरूपमुपासते, तदरयः कृष्णावतारसमयगता असुरा अप्यरिभावभयादपि स्मरणाद्ययुः । कृष्णाकारस्य माहात्म्यं तादृशा अपि मुनयोऽपरिच्छिन्नदृष्टयोऽपि यावद्ब्रह्मकेवलमुपासीना एव तिष्ठन्ति । तन्मध्य एव योऽसुराः परिच्छिन्नदर्शिनः पापात्मत्वादशुद्धचित्ता अपि अरिभाववत्त्वात्कृष्णाङ्गसङ्गमाधुर्यस्यापरोक्षानुभवरहिता अपि तदाकारमात्रस्मरणात्तदेव ब्रह्म प्राप्यैव स्थिताः । मुनयस्तु न जानीमः कियता कालेन तं प्राप्स्यन्तीति भावः । एवं च गणप्राप्तं ब्रह्मरसास्वादं मुनयो यत्नेन प्राप्नुवन्तीति पूर्वार्धेनोक्त्वा तन्मित्रगणप्राप्तं प्रेमरसास्वादं वयं वयं श्रुतयो यत्नेन प्राप्नुम -स्त्रियो व्रजदेव्यः उरगेन्द्रदेहसदृशयोस्तद्भुजदण्डयोरतिरागेणैव विषक्ता संलग्ना धीर्यासां ता हृदि स्ववक्षःस्थले ''यत्ते चरणाम्बुरुहं स्तनेषु'' इत्युक्तरीत्या अङ्घ्रिसरोजयोर्याः सुधा उपासते सेवन्तेऽनुभवन्तीति यावत् । ता एव वयं श्रुतयोऽपि समास्तपसा गोपीत्वप्राप्त्या तत्तुल्यरूपाः सत्यः । कथं ययिथ तत्राहुः-समदृशः समदृष्टयः तासां यस्मिन्वर्त्मनि तदनुगत्या रसना इत्यर्थः । अत्र चत्वारो गणा वर्णितास्तत्र पूर्वार्धगतौ मुनिगणदैत्यगणौ यथा समप्राप्यौ तथैवोत्तरार्धगतौ गोपीगणश्रुतिगणौ प्यौ पृथक्पृथगपि शब्दाभ्यां गम्येते । अत्र स्त्रियोऽपीत्यपिरध्याह्रियतेऽत्र पूर्वोऽपिरयोग्यतायामुत्तरो यग्यतायामिति गम्यते सामयोग्यताव्यञ्जनार्थमेवापिरध्याहृतः । यद्यपि स्त्रियो न योग्या वयं तु योग्यास्तथापि भगवदाकारस्य तव स्मरणप्रभावेणास्माकं योग्यानां साम्यं प्राप्ता इत्यर्थः । श्रुत्यभिमानिनां ब्रह्मणा लयाद्ययुरिति इह पूर्वार्धपरार्धयोर्वाक्यतया विभेदेन स्वसिद्धान्तानुसारेण ऽपि मीमांसकनये सोढव्यम् । इतिहासश्चात्र बृहद्वामन उत्तरस्थाने खिले —

''ब्रह्मानन्दमयो लोको व्यापी वैकुण्ठसंज्ञितः । तल्लोकवासी तत्रस्थैः स्तुतो वेदैः परात्परः ॥

चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान् गिरा । तुष्टोऽस्मि ब्रूत भोः प्राज्ञा वरं यन्मनसेच्छथ ॥

श्रुतय ऊचुः —

यथा तल्लोकवासिन्यः कामतत्त्वेन गोपिकाः । भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथा ॥

श्रीभगवानुवाच —

दुर्लभो दुर्घटश्चैव युष्माकं सुमनोरथः । मयानुमोदितः सत्यक्सत्यो भवितुमर्हति ॥

आगामिनि विरिञ्चौ तु जाते सृष्ट्यर्थमुद्यते । कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ॥

पृथिव्यां भारते क्षेत्रे माथुरे मम मण्डले । वृन्दावने भविष्यामि प्रेयान् वो रासमण्डले ॥

जारधर्मेण सुस्नेहं सुदृढं सर्वतोऽधिकम् । मयि सम्प्राप्य सर्वेऽपि कृतकृत्या भविष्यथ ॥

ब्रह्मोवाच —

श्रुत्वैतच्चिन्तयन्त्यस्ता रूपं भगवतश्चिरम् । उक्तकालं समासाद्य गोप्यो भूत्वा हरिं गताः ॥'' इति ॥

अत्र ''आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।'' इति । अर्थश्च-द्रष्टव्यः साक्षात्कर्तव्यः । अस्य ह-श्रोतव्यः श्रीगुरोर्मुखादुपक्रमादिभिस्तात्पर्येणावधारयितव्यः । मन्तव्यः असम्भावनाविपरीतभावनानिवारणाय स्वयं णीयः । निदिध्यासितव्यो निश्चयेन ध्यातव्य इति । अत्र ज्ञानिनां मते सविशेषनिर्विशेषभेदेऽपि निर्विशेष एव तात्पर्यम् । मते तु अप्राकृतविचित्रविशेषवति श्रीभगवदाकार एव ''यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्'' कल्याणगुणमयतनुमानात्मा श्रीभगवान् द्रष्टव्यस्ततसाधनान्याह-श्रोतव्य इति । श्रीगुरोर्मुखात्तन्मन्त्रश्रवणं ''मन्त्रमयवपुषः''

इति क्रमदीपिकाद्युक्तेस्तन्मन्त्रस्य तत्स्वरूपत्वोक्तेः । मन्तव्य इति । मन्त्रशब्दार्थयोः सम्यङ्मननलक्षणं स्मरणम् । निदिध्यासितव्य इति । "निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरोक्तेर्निध्यानं दर्शनं तस्येच्छा निदिध्यासनम् । मन्त्रार्थसम्यङ्मननपूर्वकभजनाभ्यासात्स्वेष्टदेवः स दिदृक्षितव्य इत्यर्थः । दिदृक्षाभ्यासाद्द्रष्टव्य इति । अत्र निनिरोरेकार्थत्वमिष्टम् । वेदानां कामभावेच्छायां तु "यं मां स्मृत्वा निष्कामः सकामो भवति" इति । श्रीकृष्णोक्तिरूपगोपालतापनी श्रुतिः "व्रजस्त्रीजनसम्भूतश्रुतिभ्यो ब्रह्मसङ्गतः ।" इति । अर्थश्च-व्रजस्त्रीजनेषु सम्भूता बृहद्वामनदृष्टतपोभिरुत्पन्ना याः श्रुतयस्ताभ्यो हेतुभ्यः तां प्राप्येति वा कृष्णो वा ब्रह्मसङ्गतः प्राप्तवेदसङ्गोऽभूदिति (१०) ॥२३॥

नीलकण्ठी —

एवमभक्तननुक्रोश्य भक्तिं स्तौति-निभृतेति । निभृता निगृहीताः मरुत्प्राणः । मनः प्रसिद्धम् । अक्षा इन्द्रियाणि । यैस्ते निभृतमरुन्मनोक्षाः । ते च दृढयोगयुजश्च निभृता मरुन्मनोक्षा यस्मिन्दृढयोगे तद्युो वा मुनयो यद्धृदि तत्त्वम् उपासते । तत् तदेव तत्त्वम् । द्वेषपूर्वकं नित्यं चिन्तयन्तः अरयः कंसशिशुपालादयो ययुः प्रापुः । कुतः । स्मरणात् । कीटभृङ्गन्यायेन ध्यानमात्रं ध्येयसारूप्यप्रापकं न भक्तिरेवेत्यर्थः । यथोक्तं सप्तमे —

"गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः । सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं प्रभो: ॥" इति ।

त्वां प्राप्ता इति शेषः । अत एव स्त्रियो गोप्यादय उरगेन्द्रभोगः फणीन्द्रशरीरं तत्सदृशौ यौ भुजदण्डौ तत्राश्लेषसुखलिप्सया विषक्ता संलग्ना धीर्यासां तास्तथा । ता अपि यन्मुनय उपासते तद्ययुरिति सम्बन्धः । ननु -

"यमेवैष [एष भक्त्या तुष्ट ईशः यमेव भक्तं वृणुते मामयं साक्षात्करोत्विति वाञ्छति तेन लभ्य इत्यर्थः ।] वृणुते तेन लभ्यः ।"

"एष ह्येव साधु कर्म कारयति यं यमेभ्यो लोकेभ्य उन्निनीषते एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते ।"

इतीश्वरप्रसादप्रकोपापत्तेरू र्ध्वाधोगती श्रूयेते तत्कथं तदरयोऽपि ययुरित्युच्यते इत्याशङ्क्याह-वयमपीति । वयं वेदवाचोऽपि ते त्वत्सम्बन्धिन्यः समाः तदरयोऽपि ययुरित्यस्य प्रतिपादने समाः । अयम्भावः — तं यथायथोपासते तथेतः प्रेत्य भवति -

"यं यं चापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥"

इत्यन्त्यप्रत्ययवशात्स्मर्यमाणसारूप्यं प्राप्यते अन्त्यप्रत्ययश्च यथाकथञ्चित्तीव्रध्यानायत्तो न केवलं भक्त्यायत्तः, एव ह्येवेति श्रुतिस्तु कर्मगोचरगतिविषया न ध्यानविषया । एवं ध्यानेन भगवत्सारूप्यं प्राप्योपाधिविशेषमहिम्ना पूर्वं द्वेषादिमन्तोऽपि भगवल्लोके दिव्यज्ञानादिमन्तो भूत्वा मुच्यन्त इति कुत एतत् यतः समदृशः ब्रह्मदर्शिन्यः ब्रह्मदर्शनमपि तासां कुतः यतस्ते तवाङ्घ्रिसरोजं पादपद्मं सुधेवामृतमिवातिवल्लभं यासां ताः । अङ्घ्रिसरोजं सुष्ठु धारयन्तीति वाङ्घ्रिसरोजसुधा (१०) ॥२३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

निभृतेत्यस्य टीकादर्शितश्रुतौ द्रष्टव्यः साक्षात्कर्तव्यः । अस्य साधनान्याह-श्रोतव्य इति । श्रोतव्यो गुरोः सकाशादुपक्रमादिभिस्तात्पर्येणावधारयितव्यः मन्तव्यस्तदनुकूलतर्केणासम्भावनाविपरीतभावनानिवारणाय स्वयं पुनर्विचारणीयः । निदिध्यासितव्यो निश्चयेन ध्यातव्य इति । अत्राज्ञानद्वयवादिज्ञेयम् । तत्र सामान्याकारनिदिध्यासनमहिमातिशयदर्शिन्यां टीकायां चैवं विवेचनीयम् । यत्र पूर्वोत्तराभ्यामर्धाभ्यां वाक्यभेदः समर्थितः यत्रैकं वाक्यं ययुरिति पर्यवसानमन्यत्तु समा इति पर्यवसानं यत्र वाक्यार्थायोजनायामरयोऽपि इत्यपिशब्दो मुन्यादियुगले द्वितीयस्यायोग्यत्वविवक्षया लब्धः । तच्चारिशब्दसम्बन्धाद्युक्तमेव । स्त्र्यादियुगले वयमपीत्यपिशब्दस्तु तया लब्धुं न युज्यते । स्वत एव श्रुतित्वाद्विशेषतस्समदृक्त्वाच्च । तस्मादध्याहृत्य स्त्रिय इत्यत्राप्यसौ योजितः । तच्च स्त्रीशब्दसम्बन्धाद्युक्तमेव । श्रुतानां त्वपिशब्दः श्रुत्यादित्वाद्योग्यतामेव व्यनक्ति इति तेषामभिप्रायः । किन्तु वयमपीतिवन्मुनयोऽपि इत्यध्याहृत्यापि नायोज्यं पूर्वार्धक्रमरीत्या तस्या एव योग्यतया च वयमपि स्त्रियोऽपीत्येव

म्। निदिध्यासितव्य
निदिध्यासनम्।
निरेरेकार्थत्वमिष्टम्।
ोपालतापनी श्रुतिः
त्रा याः श्रुतयस्ताभ्यो

क्षा इन्द्रियाणि। यैस्ते
म् उपासते। तत् तदेव
भृङ्गन्यायेन ध्यानमात्र

॥" इति।
तत्राश्लेषसुखलिप्सया

त्र इत्यर्थः।] वृणुते तेन

यमधो निनीषते।"
पीति। वयं वेदवाचोऽपि
तथेतः प्रेत्य भवति –

केवलं भक्त्यायत्तः, एव
म्ना पूर्वं द्वेषादिमन्तोऽपि
मपि तासां कुतः यतस्ते
सुधा (१०) ॥२३॥

इति। श्रोतव्यो गुरोः
णाय स्वयं पुनर्विचारणीयः
हेमातिशयदर्शिन्यां टीकायां
त्तु समा इति पर्यवसानं यत्र
ारिशब्दसम्बन्धाद्युक्तमेव।
न्च। तस्मादध्याहृत्य स्त्रिय
ग्यतामेव व्यनक्ति इति
या च वयमपि स्त्रियोऽपीत्येव

म्। अरयोऽपि स्त्रियोऽपीत्येतावतैव योग्यायोग्यत्वे लब्धे पुनरधिकमपि द्वयं वयमपीत्यत्रापरस्थानपतितत्वं च सोढव्यम्। र्थे तु चार्थम् एवापिशब्दौ योजितौ। युगलभङ्गश्च कृतः। स्वदर्शितक्रमेणैवायोग्यता च दर्शिता। किन्तु तत्रापि योगिनां प्रागेव मिति योज्यम्। तत्रान्त्येनैवापिशब्देन तत्तत्सिद्धौ द्वितीयस्त्वार्षत्वात्सोढव्यः। किञ्च भावार्थे चतुर्णामपि साम्यं वस्तुप्रभावजातया त्वप्राप्त्या दर्शितम्। वाक्यार्थेतूत्तरयुगलस्य कृपाविषयतया यदि च कृपाविषयतयेत्यस्योत्तरेणान्वयः। तत्र च "चरणस्मरणं ना तव देव सुदुर्लभम्।" इत्यनेन श्रीभगवदाकारनिदिध्यासनमहिमातिशयं दर्शयिष्यमाणायां टीकायां वाक्यार्थस्तावद्विशेष्य च्यते। निभृतेत्यादिलक्षणा मुनयः श्रुतिमननशीलत्वादपरिच्छिन्नदृष्टयो हृदि यद्ब्रह्माख्यं तत्त्वरूपं त्वामुपासते तदेवारयोऽपि भगवदाकारस्य तव स्मरणप्रभावाद्ययुः अपीति यद्यपि ते परिच्छिन्नदृष्टयः श्रुतिविमुखाः श्रीभगवद्रूपत्वद्विरोधिश्च। तथापि णि लयं प्रापुर्मुनयस्तु तदुपासीना एवासत इत्यर्थः। किन्त्वत्र प्रतिकल्पं तादृशलीलामयतदवतारसमयस्थान् भूतान् भविष्यतश्च पुरूपानन्यान् जीवान्सर्वानेवोद्दिश्य श्रुतीनां प्रलयात्ते स्तुवतीनां वचनमिदम्। ततश्च तदा तदा ते ते मुनयो यावद्ब्रह्माख्यं मुपासीनास्तिष्ठन्ति तावत्तेऽरयः स्वेन तत्प्राप्तिमतीनां कुर्वन्तीति पर्यवसितं तदेवमेकं वाक्यं साश्चर्यतया समाप्य वाक्यान्तरमाश्चर्यान्तरं न्त्य आहुः-उरगेन्द्र इत्यादिलक्षणत्वात्परिच्छिन्नदृष्टयः स्त्रियोऽपि सुष्ठु चरणसरोजधारयितृत्वेऽपि समदृक्त्वादपरिच्छिन्नदृष्टयो मपि कृपाविषयतया समाजाता इति शेषः। अत्र स्त्रियोऽपीत्यपिरप्यध्याह्रियते। तत्र पूर्वोऽपिरयोग्यतामुत्तरोऽपिः योग्यतायामिति ते। पूर्वासामयोग्यताव्यञ्जनार्थमेव ह्यपिरध्याहृतः। यद्यपि स्त्रियो न योग्या वयं तु योग्यास्तथापि श्रीभगवदाकारस्य तव णप्रभावेण अस्माकं परमयोग्यानामपि साम्यं प्राप्ता इत्यर्थः। अरिवदद्यापि श्रुत्यभिमानिनीनां ब्रह्मण्यलयाद्ययुरिति नान्वेतीति भेद एवात्र मतः। किन्त्वत्र पूर्वार्धगतयोग्यताऽयोग्यतयोः क्रमवैपरीत्यं स्त्रिय इत्यत्राप्यपेरध्याहरणम्। पूर्वापरार्धयोर्वाक्यद्वयतया च स्वसिद्धान्तानुरोधेन सोढव्यम्। आत्मा वा इत्यत्र श्रुतौ तु निदिध्यासनं श्रीभगवदाकारविषयमेव मतम्। तथा श्रुत्या स्यास्यैकार्थ्यमवश्यमभ्युपगन्तव्यमिति तदेवं वाक्यार्थेऽवगते भावार्थश्च विविच्यते। यद्यपि वाक्यार्था योग्यतयोरेवापिशब्दाः प्रतिपद्यन्ते तथारिवत्प्राप्तिश्च मुन्यादीनां न प्रतिपद्यते तथापि प्राप्स्यन्त्येवेति सम्भाव्य तव स्मरणानुभावो ष्यरीनिव त्वां प्रापयतीत्युक्तम् एतदर्थमेव पुनस्त एवापिशब्दाश्च शब्दार्थत्वेन विपरिणमिताः। स्वतन्त्रतया वा त एते च निर्दिष्टाः। किन्तु सर्वगुरूणां श्रुतीनामेव प्रथमपाठो गम्यते। श्रुतीनामपरिच्छिन्नदृष्टित्वाद्ब्रह्मधारणैव मुख्या चरणसरोजधारणा त्वेनेति मुनीनां तदनुगतानामपि ब्रह्मैकनिष्ठत्वादग्रतः पाठो युक्त इत्यास्ताञ्चेदास्तां तच्चेति तदा तया हेतुना अङ्घ्रिसरोजं सुष्ठु न्त्य इति ताः सकामाः वयं भक्ता अत एव कृपापात्रात्रिचेत्यत्रांशेऽप्यस्माकं योग्यतैवेति भावः। किन्तु धारणायामपरिच्छिन्नत्वं कथमिति विचार्यम्। भुजदण्डविषक्तधीभिः साम्यात् तत्र चार्धद्वयैकवाक्यत्वाय समाः सत्यः वयं च तदेव तत्त्वं ययिमेति योज्यम्। समाशब्दस्य चावैय्यर्थ्यमपिशब्दवदेव ज्ञेयम्। कृपाविषयतया समा इत्यर्थत्वे तु एव वाक्यं तावतैवाकाङ्क्षापरिसमाप्तेः। तदेवं यद्वाक्यार्थाद्भावार्थो विलक्षणो दर्शितस्तदभीष्टसिद्धान्तानुरोधेनेति ज्ञेयम्। यायां तु अथ श्रीगोपालतापनीप्रभृतयः श्रीकृष्णैकपरा गाम्भीर्येण सर्वान्ते स्तोतुकामतया स्थिता अपि तासां नानान्यप्रकारेणैव सानतां श्रुत्वा समुत्कण्ठां संवरीतुमशक्ताः सेर्ष्यमिव साक्षात्तदीयमहिमानं सर्वं तदाविर्भावोत्कृष्टतया वर्णयन्ति। न्तरोक्तमवलम्ब्येदमुद्भावयन्ति। कथमहो साधारणं वर्ण्यते तदिदमसाधारणं श्रूयताम् यतो निभृतेति। अत्र चत्वारो गणा। तत्र च प्रत्यर्धं प्रतियुग्ममपिशब्दान्तं तेन च युग्मयोः पार्थक्यं स्वस्वयुग्मे च पूर्वेभ्य उत्तरेषां न्यूनत्वं बोधयन्ति। स्पष्टतया तत्पूर्वयुग्मात् तस्मादयमर्थः। स्वतो मुनयः यत्नतो निभृतेत्यादिलक्षणयोग्यतातो हृदि शुद्धान्तःकरणे यन्निर्विशेषाविर्भावरूपं विर्भावब्रह्माख्यं तत्त्वमुपासते अनुभवन्ति प्राप्स्यन्ति तु चिरादेव तदेवारयः। पूर्वोक्त तत्तद्विपरीतस्वभावतया नित्यमेव योग्या अपि स्मरणात् महापराधमयादपि स्मरणमात्रात्तेभ्यः प्रथममेव ययुः प्रापुः तत्र लीना बभूवुरित्यर्थः। अहो! अस्तु सर्वावतारावतारिभ्यो विलक्षणः स्वद्वेष्टिवृन्दमुक्तिदानलक्षणो महिमा। तत्प्रेयसीनामप्यस्मद्गुरुत्वलक्षणः श्रूयतामित्याहुः– ति। स्त्रियस्तव नित्यप्रेयस्यः। श्रीराधादयो यत् यास्तवाङ्घ्रिसरोजसुधास्तदीयस्पर्शमाधुर्याणि हृदि 'यत्ते सुजात हं'मित्यादिरीत्या साक्षाद्वक्षस्येवोपासते भजन्ते। बहुत्वमपरिच्छिन्नवैशिष्ट्यापेक्षया। तथा चोक्तं बादरायणिनाऽप्यनुमोद्य दिते 'गोप्यस्तपः किमचरन्'इत्यादौ मथुरास्त्रीवचने असमोर्ध्वम् अनुसवाभिनवमिति। ता एव सुधा वयमपि 'आसामहो'

इत्यादौ 'भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्या'मिति न्यायेन तादृशत्वायोग्या अपि ययिम। तत्रापि समाः श्रीमन्नन्दव्रजगोपीत्वप्राप्त्या कायव्यूहेन तत्तुल्यरूपाः सत्यः स्त्रियः। कथम्भूताः। उरगेन्द्रादिलक्षणाः गोप्यस्तपः किमचरन्नित्यादेः एताः परं तनुभृत इत्यादे 'नाऽयं श्रियोऽङ्ग उ नितान्तरतेः प्रसाद' इत्यादेश्चानुसारेण सर्वदुर्लभमाधुर्यानुभवोद्दीपितमहाभावा इत्यर्थः। तस्य मन्वन्तरावतारः श्रीविकुण्ठासुतोऽपि परमहंसमहामुनीनामन्वेषणीयचरण इति तृतीयस्कन्धे दर्शित इति भावः। तर्हि कथं ययिथ तत्राहुः-समदृशः तद्भावानुगतभावाः सत्य इत्यर्थः। तदेवमहो अस्मदिष्टदैवतस्यास्य सर्वोत्कृष्टस्वभावता तादृक्परिकरता च दृश्यतामित भावः। अत्र भुजशब्दस्तासां रागविशेषप्राधान्यविवक्षया। अङ्घ्रिशब्दस्तु स्वेषां भक्तिमात्रविवक्षया दैन्येनोक्त इत्युपलक्षणमेव श्रीमन्नराकृतिपरब्रह्मविग्रहस्येति ज्ञेयम्। इतिहासश्चात्र बृहद्वामने —

"ब्रह्मानन्दमयो लोको व्यापी वैकुण्ठसंज्ञितः। तल्लोकवासी तत्रस्थैः स्तुतो वेदैः परात्परः॥

चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान् गिरा। तुष्टोऽस्मि ब्रूत भोः प्राज्ञा वरं यन्मनसेच्छथ॥

श्रुतय ऊचुः —

कन्दर्पकोटिलावण्येत्यपि दृष्टे मनांसि नः। कामिनीभावमासाद्य स्मरक्षुब्धा न संशयः॥

यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः। भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथा॥

श्रीभगवानुवाच —

आगामिनि विरिञ्चौ तु जाते सृष्ट्यर्थमुद्यते। कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ॥ इति॥

तास्वेव परममुख्याया गायत्र्या अपि तद्रूपेण तत्प्राप्तिः। पाद्मसम्मत्या रासपञ्चाध्याय्यां दर्शितास्ति। तत्र मुख्याः श्रुतयः —

"अपूतः पूतो भवति। यं मां श्रुत्वा अव्रती व्रती भवति। यं मां स्मृत्वा निष्कामः सकामो भवति। यं मां स्मृत्वा अश्रोत्री श्रोत्री भवति। यं मां स्मृत्वेति साक्षाच्छ्रीकृष्णवचनरूपाः॥" ॥१०॥२३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं तत्र विमुखानां संसारभ्रमणमुक्त्वा तदुपासकानां तत्प्राप्तिमाहुः-निभृतेति। मुनयो मननशीलाः, यद्ब्रह्म ह्युपासते ययुश्च, तदरयोऽपि द्वेषेण स्मृतिमात्रतो ययुः। किञ्च स्त्रियो वयं किंवा मथुरापुरस्त्रियः। तत्र उरगेति सौन्दर्यातिशयानुभवेनासक्तधीत्वाद्भावविशेष उक्तः। तथा समदृशः-अन्तर्यामित्वेन समदृष्ट्या भक्ताः। यद्वा, समं सलक्ष्मीकं हरिं पश्यन्तः सालोक्यभाज इत्यर्थः। तथा अङ्घ्रिसरोजसुधा विशुद्धभक्तिनिष्ठाः। किंवा संवाहनादिना साक्षात् सेवमाना अपि तव समास्तुल्याः। एतेषां सर्वेषां प्राप्यस्यैक्यात्। तत्र यद्यपि द्वेषिणां भक्तानां च प्राप्यस्यैक्यं न स्यात्, तथापि ब्रह्मस्वरूपस्य श्रीभगवत्स्वरूपस्य चाभेदविवक्षया तथोक्तम्। यद्वा, पूर्वमुक्ता द्विविधा भक्तिशून्यत्वाद्ब्रह्मैव ययुः, स्त्रीप्रभृतयस्तु तव समाः प्रियतया तुल्यास्त्वयि भावशालित्वात्॥२३॥

[काश्चिच्छ्रुतयो गाढानन्दप्रकर्षकृतेन चापलेन मुखरीकृताः श्रीभगवति स्वेषामेव भावमाधुर्य्यसारप्रदर्शनाय भक्तिहीनानां प्राप्यमाहुः-निभृतेति। यद्ब्रह्म उपासते, उपासनया प्राप्नुवन्ति, अरयोऽप्यघासुरादयस्तदेव प्रापुः। स्त्रियस्तु गोपिकास्ते तवाङ्घ्रिसरोजसुधाः पाद्ममकरन्दान् सान्द्रानुरागमाधुरीरित्यर्थः। तत्र हेतुः-उरगेति। तासामसमोर्ध्वत्वमाधुर्यभरमग्नत्वात्तदेवोचितमिति भावः। वयमपि श्रुतयस्त्वदङ्घ्रिसरोजसुधा ययिम। कथम्भूताः? समा गोपीभिस्तुल्यास्तत्सखीत्वं प्राप्ताः, अत एव समदृशः सजातीयभावाः, मुनीनामरीणां च प्राप्यस्यैकत्वादपि-शब्दप्रयोगः। स्त्रीणां प्राप्यस्य तु भिन्नत्वादपि-शब्दो नात्र प्रयुक्तः। वयमपि इत्यत्र तु स प्रयुक्त एव। गोपीनां श्रुतीनां च प्राप्यस्यैकत्वादिति॥२३॥]

न्दव्रजगोपीत्वप्राप्त्या
ताः परं तनुभृत इत्यादौ
। तस्य मन्वन्तरावतार
ायिथ तत्राहुः–समदृशः
च दृश्यतामित भावः ।
नोक्त इत्युपलक्षणमेव

। ॥

ाध्याय्यां दर्शितास्ति ।

ति । यं मां स्मृत्वा अश्रोत्री

नशीलाः, यद्ब्रह्म हृद्युपासते
रस्त्रियः । तत्र उरगेति
। यद्वा, समं सलक्ष्मीकं हरिं
साक्षात् सेवमाना अपि तव
ात्, तथापि ब्रह्मस्वरूपस्य
, स्त्रीप्रभृतयस्तु तव समाः

र्यसारप्रदर्शनाय भक्तिहीनानां
पुः । स्त्रियस्तु गोपिकास्ते
धुर्यभरमग्नत्वात्तदेवोचितमिति
चं प्राप्ताः, अत एव समदृशः
-शब्दो नात्र प्रयुक्तः । वयमपि

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्रतिकूलानामपि भगवत्स्मरणमुत्तारकमिति कथयन्ति हृदयं हृद्गतं त्वामनु य उपासते तान् विशिनष्टि– निभृतमरुन्मनोऽक्षदृढयोगयुजः । मरुत् प्राणवायुश्च नमश्चाक्षाणि इन्द्रियाणि च तानि निभृतानि यैस्ते निभृतमरुन्मनोऽक्षाः । ते दृढं योगं युञ्जन्तीति स्मरणात् त्वत्स्मरणात् अरयोऽपि त्वां ययुरिति । यद्यस्मात् त्वां मुनयः उपासते इत्यन्वयः । स्त्रियः गोप्यः कमनीयमूर्तिं त्वां मनसि निधाय त्वां प्रापुः । किम्भूताः । उरगेन्द्रभोगभुजदण्डविषक्तधियः । उरगेन्द्रभोगतुल्ये तव दण्डे विशेषेण सक्तधियः । त्वां प्रापुः । वयं देवाः समाः पक्षपातरहिततया प्रमाणभूताः । परमकृपालोस्तव समा तुल्या समाना येषां ते । तव अङ्घ्रिसरोजमेव सुधा येषां ते तवाङ्घ्रिमेव भोग्यतया प्रकाशयाम इत्यर्थः ॥२३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

आस्तां त्वयि न रमन्त इत्यहो बत त्वयि द्वेषादिकमपि न कुर्युर्यतस्त्वयि विलक्षणविषये तस्यापि त्वत्प्राप्तिसाधनत्वादिति सोदाहरणं सोपपादनं चाहुः–निभृतेति । मरुतः प्राणाः मनश्चाक्षाणि इन्द्रियाणि च निभृतानि संयमितानि मरुदादीनि यैस्ते दृढमविचाल्यं योगमुपासनात्मकं युञ्जत इति तथा ते मुनयः हृदि यत् त्वत्स्वरूपमुपासते तदेवारयः शत्रवोऽपि प्रीतिपूर्वकस्मरणाद्ययुः प्रापुः । तथा स्त्रियः गोप्योऽपि उरगेन्द्रस्य अहीन्द्रस्य देहसदृशयोर्भुजदण्डयोर्विशेषेण सक्ता धीर्यासां ययुरित्यन्वयः । विषयस्य विलक्षणत्वादिति भावः ।

किं बहुना । वयं वेदाभिमानिनो देवा अस्याङ्घ्रिसरोजमेव सुधा तद्वद्भोग्यं येषां ते त्वच्चरणसरोजप्रकाशका पीत्यर्थः । यद्वा अङ्घ्रिसरोजं सुष्ठु धयन्ति पिबन्ति अनुभवन्तीति यावत् । 'धेट् पाने' इति धातो रूपमिदम् । त्वयि प्रमाणतया भूतास्त्वत्स्वरूपादिप्रकाशका वयमपीत्यर्थः । ते तव समास्तुल्याः मुनिभृतय इव त्वामेव विषयभूतं तात्पर्यतोऽर्थतश्च इत्यर्थः । तत्र हेतुत्वेन विशिंषन्ति–समादृश इति । समा दृग्यस्य अनादृतनिम्नोन्नतभावस्य वैषम्यनैर्घृण्यादि परिहाराय मात्रावलम्बिनः सर्वानुजिघृक्षोस्तव सर्वेऽपि तुल्यकक्षा इति भावः ॥२३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

"न च रमयन्त्यहो असदुपासनयात्महनो यदनुशयाः भ्रमन्त्यभवाः कुशरीरभृतः । निभृतमोक्षहृदययोगयुजो हृदयं मुनय तदरयोऽपि ययुः स्मरणात्" ॥१०–२४॥

"असुर्यानाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥"

इति श्रुतिसूचिताभिप्रायस्य न च रमन्त्यस्यायमर्थः । असदुपासनयाऽन्यथोपासनया ब्रह्माहमित्याद्युपासनया आत्महनः घ्नन्तो जनाः असुर्यान् सृष्ट्वारमणरूपत्वादसुरप्राप्तत्वाच्च नित्यनिरतिशयदुःखान्निरस्तसमस्तसुखान् लोकानाप्नुवन्तीत्येतन्न न्त्यहो इत्यनेन लक्ष्यते । सुखलक्षणा रतिरेव नास्तीति न किन्तु नित्यदुःखमनुभवन्ति च । अहो आश्चर्यम् पासकानामनर्थपरम्परा । किञ्च । यदनुशयाः यस्मिन्ननुशयो येषां ते तथा यत्रानुशयानास्तमस्येव भ्रमन्तीत्यर्थः । कुतोऽत्राह– इति । उत उत्थाय पुनर्जन्मवर्जिताः जन्माभावेन देहाभावे दुःखाभोगाभाव इति तत्राह–कुशरीरभृत इति । नित्यदुःखभोगसाधनव निन्द्यं शरीरं बिभ्रतीति न केवलं भगवद्द्वेषिणामेतादृशलोकप्राप्तिः अपि तु तद्भक्तद्वेषाणिमपि तल्लोकावाप्तिरिति -निभृतेत्यादिना । निभृतं परिपूर्णं मोक्षार्थं हृदयं ज्ञानं यस्य स निभृतमोक्षहृदयो वायुः । तेन योगेन नियोगेन युजो, नियमिताः सन्तः ये मुनयो ज्ञानिनः हृद्ययनात् हृदयं भगवन्तमुपासते । तेषां मुनीनामरयो द्वेषिणोऽपि तदेव द्वेषिप्राप्यन्तमो ययुरित्यन्वयः —

"नित्यदुःखसुसम्पूर्णं निरस्तानन्दमव्ययम् । तमायान्त्यन्यथा ज्ञानात् देवाद्वा हरिसंश्रये ॥"

इति हरिसंश्रये हरिभक्तजने ।

"निमभृतो मोक्षवित्प्राणस्तद्योगात्तत्प्रसादतः । जानन्ति परमं देवं नान्यथा तु कथञ्चन ॥"

इति स्मरणादित्युत्तरश्लोकान्वयि ॥१०-२४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ श्रीगोपालतापन्यां श्रुतयः श्रीकृष्णैकपरा गाम्भीर्येण सर्वान्ते स्तोतुकामनया स्थिता एतासां नात्यप्रकारेणैव तत्पर्य्यवसानं श्रुत्वा संवरीतुमशक्ताः सेर्ष्यमिव साक्षात्तदीयमहिमानं सवादाविर्भावोत्कृष्टतया वर्णयति । तत्राप्यनन्तरोक्तमवलम्ब्येदमुद्भावयन्ति। कथमहो साधारणं वर्ण्यते । तदिदमसाधारणं श्रूयताम् । यतो निभृता । इतिहासश्चात्र बृहद्वामनम् —

"ब्रह्मानन्दमयो लोको व्यापी वैकुण्ठसंज्ञितः । तल्लोकवासी तत्रस्थैः स्तुतो वेदैः परात्परः ॥
चिरं स्तुत्वा ततस्तुष्टः परोक्षं प्राह तान् गिरा । तुष्टोऽस्मि ब्रूत भोः प्राज्ञा वरं यन्मनसेप्सितम् ॥
श्रुतय ऊचुः ।
यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः । भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथा ॥
श्रीभगवानुवाच ।
आगामिनि विरिञ्चौ तु जाते सृष्ट्यर्थमादरात् । कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ॥"

इति एवं गायत्र्या अपि गोपिकात्वप्राप्तिः । पाद्मे सृष्टिखण्डे कथितास्ति । अत्र गोपालतापनी श्रुतयः—

"अपूतः पूतो भवति । यं मां स्मृत्वा अव्रती व्रती भवति । यं मां स्मृत्वा निष्कामः सकामो भवति । यं मां स्मृत्वा अश्रोत्री श्रोत्री भवति । यं मां स्मृत्वेति ॥२३॥"

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु मोक्ष एव पुरुषार्थः तन्निरपेक्षतया मच्चरणभजनमेव कार्य्यम् । तदकरणे कुशरीरीभूत्वाऽऽत्महत्यादिना निन्दा च कृता । पूर्वपूर्वश्लोकाभ्यां तदयमतिस्तवः । मैवम् । अनुभवबाधादित्याहुः-निभृतेत्यादि । निभृतानि यमितानि मरुतः प्राणाः मनः अक्षाणि इन्द्रियाणि यैस्ते च ते दृढयोगयुजश्चेति बहुव्रीहिगर्भः कर्मधारयः । एवम्भूता ये मुनयः ते यत्कैवल्यम् उपासते आकाङ्क्षन्ति तत् अरयः शिशुपालादयोऽपि वैरानुबन्धेन यत्स्मरणं तस्मादपि हेतोर्ययुः प्रापुः । अतः कैवल्यं तावत् न दुर्लभं यद्विग्रहद्वेषिण एव प्राप्नुवन्ति तव चरणारविन्दरतिरेव दुर्ल्लभा । तव वयमेव प्रमाणम् । यतो ब्रह्मोपासनामवहेलयन्त्यस्त्वच्चरणरत्यर्थं श्रुतिरूपमपहाय व्रजे गोपाङ्गनाभावमासादिता इत्याहुः-स्त्रिय इत्यादि । वयमपि श्रुतयोऽपि तव उरगेन्द्रभोगवत् वृत्तः कोमलो यो भुजदण्डस्तत्र विषक्तधियः सत्यः स्त्रियो भूत्वा अङ्घ्रिसरोजं सुष्ठु दधतीति अङ्घ्रिसरोजसुधा अभवाः इत्यर्थः । ते इत्युभयत्र योज्यम् । कथम्भूतस्य । समदृशः नित्यसिद्धासु गोपाङ्गनासु यथा अनुरक्त आसीः तथा ॥२३-२४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ननु मोक्ष एव परः पुरुषार्थः, तन्निरपेक्षतया चरणारविन्दभजनमेव कार्यम्, तदकरणे च कुशरीरभृतो भूत्वाऽऽत्महत्यादिनिन्दानुपूर्वपूर्वाभ्याम्, तदयमतिस्तवनैरलम्, यतोऽनुभवसिद्धमेवैतदित्याहुः- निभृतेत्यादि । निभृतानि संयमितानि मरुन्मनोऽक्षाणि यैस्ते तथा ते च दृढयोगयुजश्चेति कर्मधारयः । एवम्भूता मुनयो हृदि यत् उपासते उपासत एव, न अनुभवन्ति तदरयः पौण्ड्रकादयोऽपि स्मरणात् स्मरणमात्रेणैव ययुः, अतो मोक्षस्तावदतिसुलभ एव । सुलभे हि साधकास्तथा न प्रयतन्ते । दुर्लभत्वं त्वच्चरणसेवाया एव । तत्र स्वानुभवं प्रमाणयन्ति- स्त्रिय इत्यादि । ते तव उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि स्त्रियो गोपीरूपा अभवाम। कीदृशस्य तव ? समदृशः । वयं कीदृश्यः ? समा भावसिद्धानां गोपीनां तद्रूपाभिरस्माभिः साम्यमेव तारतम्यं तव नास्ति, समदृक्त्वादित्यर्थः । अङ्घ्रिसरोजं सुष्ठु दधतीति तथा वयं ब्रह्मोपासनामपि त्वक्त्वा चरणसरोजमेव सुष्ठु धृतवत्य इति वयमेव त

प्रमाणमिति वाक्यशेषः
निश्चायकमेतत् ॥२३॥

भगवत्स्वरूपेष
ज्ञानयोगमपकर्षकक्षायां
परमशुद्धे ब्रह्माकारीभूते
कृष्णाकारस्य माहात्म्यं ता
परिच्छिन्नदर्शिनः पाप
केवलतदाकारमात्रस्मरणा
तच्छत्रुगणप्राप्तं ब्रह्मरसास्व
इत्याहुः-स्त्रियो व्रजदेव्यः
सुजातचरणाम्बुरुहं स्तनेषु
ययिम समास्तपसा गोपीत्व
दृष्टिं ददाना इत्यर्थः । अत्र च
समप्राप्यौ पृथक्पृथगपि श
पूर्वासामयोग्यताव्यञ्जनार्थमे
परमयोग्यानां साम्यं प्राप्ता इत
दोषत्वेऽपि मीमांसकनये स

"ब्रह्मानन्दमयो लो
चिरं स्तुत्वा ततस्तु
श्रुतय ऊचुः —
यथा त्वल्लोकवासिन
श्रीभगवानुवाच —
दुर्लभो दुर्घटश्चैव यु
आगामिनि विरिञ्चो
पृथिव्यां भारते क्षेत्रे
जारधर्मेण सुस्नेहं सुदृ
ब्रह्मोवाच —
श्रुत्वैतच्चिन्तयन्त्यस्त

अत्र "आत्मा वा अरे
साधनान्याह-श्रोतव्यः श्रीगुरोर्मु
पुनर्विचारणीयः । निदिध्यासित
वैष्णवानां मते तु अप्राकृतविचि

मिति वाक्यशेषः । एतेन (१२श-श्लो०) "स्वसृष्टमिदमापीय" इत्यादिना श्रीकृष्णपरैवेयं श्रुतिस्तुतिरिति यन्निरणायि तस्यैव कमेतत् ॥२३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भगवत्स्वरूपेष्वपि मध्ये श्रीकृष्णस्य तद्विषयकसर्वविलक्षणभक्तियोगस्य च सर्वोत्कर्षं वक्तुं प्रथमं ब्रह्मविषयकं मपकर्षकक्षायां निक्षिपन्त्य आहुः-निभृतैः संयमितैर्मरुन्मनोक्षैर्यो दृढो निश्चलो योगस्तं युञ्जन्ति । ये तथाभूता मुनयो हृदि ब्रह्माकारीभूते यद्ब्रह्मस्वरूपमुपासते, तदरयः कृष्णावतारसमयगता असुरा अप्यरिभावभयादपि स्मरणाद्ययुः । अहो कारस्य माहात्म्यं तादृशा अपि मुनयोऽपरिच्छिन्नदृष्टयोऽपि यावद्ब्रह्मकेवलमुपासीना एव तिष्ठन्ति । तन्मध्य एव कंसादयोऽसुराः दर्शिनः पापात्मत्वादशुद्धचित्ता अपि अरिभाववत्त्वात्कृष्णाङ्गसङ्गमाधुर्यस्यापरोक्षानुभवरहिता अपि दाकारमात्रस्मरणात्तदेव ब्रह्म प्राप्यैव स्थिताः । मुनयस्तु न जानीमः कियता कालेन तं प्राप्स्यन्तीति भावः । एवं च णप्राप्तं ब्रह्मरसास्वादं मुनयो यत्नेन प्राप्नुवन्तीति पूर्वार्धेनोक्त्वा तन्मित्रगणप्राप्तं प्रेमरसास्वादं वयं वयं श्रुतयो यत्नेन प्राप्नुम -स्त्रियो व्रजदेव्यः उरगेन्द्रदेहसदृशयोस्तद्भुजदण्डयोरतिरागेणैव विषक्ता संलग्ना धीर्यासां ता हृदि स्ववक्षःस्थले "यत्ते चरणाम्बुरुहं स्तनेषु" इत्युक्तरीत्या अङ्घ्रिसरोजयोर्याः सुधा उपासते सेवन्तेऽनुभवन्तीति यावत् । ता एव वयं श्रुतयोऽपि समास्तपसा गोपीत्वप्राप्त्या तत्तुल्यरूपाः सत्यः । कथं ययिथ तत्राहुः-समदृशः समदृष्टयः तासां यस्मिन्वर्त्मनि तदनुगत्या रसना इत्यर्थः । अत्र चत्वारो गणा वर्णितास्तत्र पूर्वार्धगतौ मुनिगणदैत्यगणौ यथा समप्राप्यौ तथैवोत्तरार्धगतौ गोपीगणश्रुतिगणौ यौ पृथक्पृथगपि शब्दाभ्यां गम्येते । अत्र स्त्रियोऽपीत्यपिरध्याह्रियतेऽत्र पूर्वोऽपिरयोग्यतायामुत्तरो यग्यतायामिति गम्यते मयोग्यताव्यञ्जनार्थमेवापिरध्याहृतः । यद्यपि स्त्रियो न योग्या वयं तु योग्यास्तथापि भगवदाकारस्य तव स्मरणप्रभावेणास्माकं यानां साम्यं प्राप्ता इत्यर्थः । श्रुत्यभिमानिनां ब्रह्मणा लयाद्ययुरिति इह पूर्वार्धपरार्धयोर्वाक्यतया विभेदेन स्वसिद्धान्तानुसारेण वेऽपि मीमांसकनये सोढव्यम् । इतिहासश्चात्र बृहद्वामन उत्तरस्थाने खिले —

"ब्रह्मानन्दमयो लोको व्यापी वैकुण्ठसंज्ञितः । तल्लोकवासी तत्रस्थैः स्तुतो वेदैः परात्परः ॥
चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान् गिरा । तुष्टोऽस्मि ब्रूत भोः प्राज्ञा वरं यन्मनसेच्छथ ॥

श्रुतय ऊचुः —

यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः । भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथा ॥

श्रीभगवानुवाच —

दुर्लभो दुर्घटश्चैव युष्माकं सुमनोरथः । मयानुमोदितः सत्यक्सत्यो भवितुमर्हति ॥
आगामिनि विरिञ्चौ तु जाते सृष्ट्यर्थमुद्यते । कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ॥
पृथिव्यां भारते क्षेत्रे माथुरे मम मण्डले । वृन्दावने भविष्यामि प्रेयान् वो रासमण्डले ॥
जारधर्मेण सुस्नेहं सुदृढं सर्वतोऽधिकम् । मयि सम्प्राप्य सर्वेऽपि कृतकृत्या भविष्यथ ॥

ब्रह्मोवाच —

श्रुत्वैतच्चिन्तयन्त्यस्ता रूपं भगवतश्चिरम् । उक्तकालं समासाद्य गोप्यो भूत्वा हरिं गताः ॥" इति ॥

अत्र "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।" इति । अर्थश्च-द्रष्टव्यः साक्षात्कर्तव्यः । अस्य -श्रोतव्यः श्रीगुरोर्मुखादुपक्रमादिभिस्तात्पर्येणावधारयितव्यः । मन्तव्यः असम्भावनाविपरीतभावनानिवारणाय स्वयं णीयः । निदिध्यासितव्यो निश्चयेन ध्यातव्य इति । अत्र ज्ञानिनां मते सविशेषनिर्विशेषभेदेऽपि निर्विशेष एव तात्पर्यम् । मते तु अप्राकृतविचित्रविशेषवति श्रीभगवदाकार एव "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्"

इति श्रुतेः। कल्याणगुणमयतनुमानात्मा श्रीभगवान् द्रष्टव्यस्तत्साधनान्याह- श्रोतव्य इति। श्रीगुरोर्मुखात्तन्मन्त्रश्रवणं "मन्त्रमयवपुषः" इति क्रमदीपिकाद्युक्तेस्तन्मन्त्रस्य तत्स्वरूपत्वोक्तेः। मन्तव्य इति। मन्त्रशब्दार्थयोः सम्यङ्मननलक्षणं स्मरणम्। निदिध्यासितव्य इति। "निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरोक्तेर्निध्यानं दर्शनं तस्येच्छा निदिध्यासनम्। मन्त्रार्थसम्यङ्मननपूर्वकभजनाभ्यासात्स्वेष्टदेवः स दिदृक्षितव्य इत्यर्थः। दिदृक्षाभ्यासाद्द्रष्टव्य इति। अत्र निनिरोरेकार्थत्वमिष्टम्। वेदानां कामभावेच्छायां तु "यं मां स्मृत्वा निष्कामः सकामो भवति" इति। श्रीकृष्णोक्तिरूपगोपालतापनी श्रुतिः "व्रजस्त्रीजनसम्भूतश्रुतिभ्यो ब्रह्मसङ्गतः।" इति। अर्थश्च- व्रजस्त्रीजनेषु सम्भूता बृहद्वामनदृष्टतपोभिरुत्पन्ना याः श्रुतयस्ताभ्यो हेतुभ्यः तां प्राप्येति वा कृष्णो वा ब्रह्मसङ्गतः प्राप्तवेदसङ्गोऽभूदिति (१०) ॥२३॥

गूढार्थदीपिनी

इदानीमात्मप्राप्तौ ध्यानमङ्गत्वेनोपदिशन्त्यः श्रुतयः आहुः- निभृतेति।

(गोपीत्वप्रार्थनापरेयम्)

पद्यानुवादः

यदभजन्दृढयोगयुजो हरे तदरयोऽपि ययुः स्मरणात्तव।

भुजविषक्तधियोऽपि★ वयं पदे तव सुधावसुधाः किमु मा समाः ॥१०॥

★[भुजविषक्तधियः गोप्यः। वयमपि तथाभूताः तव पदे स्थिता इति शेषः। कुतः। सुधा पदगतसुधैव वसु तत् दधति चिन्तयन्तीति तथा किमु मा समा न समाः अपि तु समा एवेत्यर्थः।]

सङ्क्षिप्तसार्थान्वयः — हे भगवन्! मुनयो मननशीला हृदि यत् तत्त्वं ब्रह्माख्यम् उपासते अरयोऽपि स्मरणात् तत् तत्त्वं ययुः प्रापुः। स्त्रियः गोप्योऽपि तदेव तत्त्वं ययुः। अतः समदृशस्ते वयमपि समाः तुल्या एव जाताः कृपाविषयतया। कथम्भूताः? ते अङ्घ्रिसरोजं सुष्ठु दधति धारयन्तीति तथाभूताः। कथम्भूता मुनयः? निभृतमरुन्मनोऽक्षदृढयोगयुजः। कथम्भूताः स्त्रियः? उरगेन्द्रभोगभुजदण्डविषक्तधियः। मरुत् प्राणः मनश्च अक्षाणि इन्द्रियाणि एतानि रुद्धानि यैस्ते॥

हे भगवन्! मुनयो हृदि यत् ब्रह्मस्वरूपमुपासते ध्यायन्ति तदेव अरयः शिशुपालादयोऽपि वैरानुबन्धेन साकारस्य तव स्मरणात् ययुः प्रापुः। उपासते ययुरिति वर्तमानभूतप्रत्ययाभ्यां मुनय उपासीना एव वर्तन्ते तेषां तत्प्राप्तितः पूर्वमेवारयस्तत्प्रापुरिति व्यज्यते। स्त्रियः गोपिकाश्च कामतस्तदेव तत्त्वं ययुः। अतो वयं श्रुत्यभिमानिन्यो देवता अपि समदृशस्ते समाः कृपाविषयीभूता एव। यथा मुनयोऽरयो गोप्यश्च तव कृपाविषये समाः, तथा वयं श्रुतयोऽपि तव समा एव त्वत्संयोगं प्राप्तुं योग्या एवेत्यर्थः। यतः तेऽङ्घ्रिसरोजं सुष्ठु दधति धारयन्ति चिन्तयन्तीति तथाभूता वयम्। कथम्भूता मुनयः? मरुत् प्राणः मनोऽन्तःकरणम् अक्षाणि इन्द्रियाणि च एतानि निभृतानि निरुद्धानि यैस्ते अत एव दृढं योगं युञ्जन्ति कुर्वन्तीति ते च ते च तथाभूताः। बहुव्रीहिगर्भितकर्मधारयः। कथम्भूताः स्त्रियः? उरगेन्द्रः शेषः तस्य भोगवत् देहवत् वर्तुलयोः सुकोमलयोश्च भुजदण्डयोर्विषक्ता अत्यासक्ता संलग्ना धीर्यासां तास्तथाभूताः। सधुति "डुधाञ् धारणपोषणयोः" इत्यस्मात् "आतश्चोपसर्गे कः"। यद्वा। अङ्घ्रिसरोजमेव सुधा भोग्यं वस्तु यासाम्। तवाङ्घ्रिसरोजमेव अस्माकं प्रकाश्यत्वेन भोग्यमित्यर्थः। अत्र सन्दर्भः। अरयोऽपि ययुरतः कैवल्यं तावन्न दुर्लभम् किन्तु तव चरणरतिरेव सुदुर्लभा इत्यत्र प्रमाणं यतो ब्रह्मोपासनामवहेलयन्त्यस्त्वच्चरणरतिप्राप्त्यै श्रुतिरूपमपहाय व्रजे गोपाङ्गनाभावमासादिता इत्याहुः- स्त्रिय इति। वयं श्रुतयोऽपि ते भुजदण्डयोर्विषक्तधियः सत्यः स्त्रियो भूत्वा तेऽङ्घ्रिसरोजं सुष्ठु दधतीति तथाभूताः जाताः ते इत्युभयत्रान्वेति। चक्रवर्ती तु अत्र चत्वारो गणा वर्णिताः तत्र पूर्वार्धगतौ मुनिगणदैत्यगणौ यथा समप्राप्यौ तथैवोत्तरार्धगतौ गोपीगणश्रुतिगणौ समप्राप्यौ इति पृथक्पृथगपि शब्दाभ्यामवगम्यते। अत्र बृहद्वामनोक्त- इतिहासोऽपि द्रष्टव्यः; तथा हि —

"ब्रह्मानन्दमयो लोको व्यापी वैकुण्ठसंज्ञितः। तल्लोकवासी तत्रस्थैः स्तुतो वेदैः परात्परः॥

चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान् गिरा । तुष्टोऽस्मि ब्रूत भोः प्राज्ञा वरं यन्मनसेच्छथ ॥

श्रुतय ऊचुः —

यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः । भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथा ॥

श्रीभगवानुवाच —

दुर्लभो दुर्घटश्चैव युष्माकं सुमनोरथः । मयानुमोदितः सत्यक्सत्यो भवितुमर्हति ॥

आगामिनि विरिञ्चौ तु जाते सृष्ट्यर्थमुद्यते । कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ॥

पृथिव्यां भारते क्षेत्रे माथुरे मम मण्डले । वृन्दावने भविष्यामि प्रेयान् वो रासमण्डले ॥

जारधर्मेण सुस्नेहं सुदृढं सर्वतोऽधिकम् । मयि सम्प्राप्य सर्वेऽपि कृतकृत्या भविष्यथ ॥

ब्रह्मोवाच —

श्रुत्वैतच्चिन्तयन्त्यस्ता रूपं भगवतश्चिरम् । उक्तकालं समासाद्य गोप्यो भूत्वा हरिं गताः ॥" इति ॥

वस्तुतस्तु ते इति त्रिष्वप्यन्वेति । ते भुजदण्डविषक्तधियः । तेऽङ्घ्रिसरोजसुधाः अत एव ते स्त्रियः भोग्या जाता इति । ते भुजदण्डविषक्तधियः इत्यनेन श्रुतीनां सहेतुको भगवत्यनुरागः । तेऽङ्घ्रिसरोजसुधा इत्यनेन भगवत्प्राप्त्युपायः ते स्त्रियो गोपिका जाता इत्यनेन अपवर्गाधिकभगवद्भोग्यत्वरूपमहाफलावाप्तिश्च सूचिता ॥२४॥१०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अनीश्वरोपासनया संसरन्तीत्युक्तम् इदानी'मात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।' सोऽन्वेष्टव्यः स ध्यासितव्य इति । 'अथातो ब्रह्मजिज्ञासा ।' इत्यादिशास्त्र भगवद्ध्यानस्यैव संसारनिवृत्तयेऽसाधारणकारणत्वं प्रतिपादयत् ज्ञानान्मोक्षं प्रलयतां पक्षस्य निष्प्रमाणत्वं दर्शयति-निभृतानि मरुदादीनि दृढयोगेन समाधौ युक्तानि च यैस्ते । विषयेभ्यः परमात्मप्रवणे मनआदिकरणका मुनयो हृदि यत् वस्तु ध्यायन्ति तदेवारयोऽपि मिथ्यावासुदेवशिशुपालादयोऽपि तव प्रापुः । अहो ध्यानस्य माहात्म्यमिति । हृष्यत्तनूरुहः पराशरोऽप्याह चतुर्थांशे तच्च —

"तच्च रूपमुत्फुल्लपद्मदलायमलामलाक्षमित्यारभ्य भगवानिहकीर्तितः संस्मृतश्च । द्वेषानुबन्धेनाप्यखिलसुरासुरदुर्लभं प्रयच्छति । किमुत सम्यग्भक्तिमतेन दण्डकेन । तथा च स्त्रियः उरगेन्द्रभोगसदृशयोर्भुजदण्डयोर्विषक्ता धीर्यासां तास्तदेव कामदृष्ट्या प्रापुः । एतेन सर्वज्ञत्वादिसच्चिदानन्दादिगुणस्वरूपादिज्ञानाभावेऽपि भगवत एकदेशध्यानमात्रस्यापि संसारनिवारणे च निरपेक्षत्वे दर्शितम् । तथा च वक्ष्यति —

'मत्कामा रमणं जारमस्वरूपविदोऽबलाः । ब्रह्म मां परमं प्रापुरि'ति ।

तथा वयमपि मन्त्राभिमानिन्यो देवताः समदृशस्तव सर्वेऽपि चतुःप्रकारेणोक्ताः अधिकारिणः समाः मोक्षानन्दभाज । कथम्भूताः । तवाङ्घिसरोजं सुष्ठु धारयन्त्यो ध्यायमाना इत्यर्थः । वाक्यज्ञानान्मोक्षाङ्गीकारेति प्रसङ्गो दुर्वारः । तथा हि पुंसो भोजनाच्छादनादिविहीनस्य वाक्योत्क्तकल्पतरुकामधेनुचिन्तामण्यादिभिर्दारिद्र्यनिवृत्तिः निगाढं कुहूशर्वर्यास्तमो भानोर्निवृत्तं स्यात् । तथा च क्षुधया पीडितस्य चतुर्विधभोजनकथनात् क्षुधाहानिश्चेत्यलं विस्तरेण । तस्मात्सर्वशक्तेर्माया गन्धशून्यस्य ब्ह्मणस्तथैव ज्ञानाद्ध्यानान्यपर्यायात्तवानुग्रहयुक्तात् संसारनिवृत्तिरिति सिद्धान्तः ॥२३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भगवद्भजनमेव जीवानामवश्यं कर्तव्यमिति निरूपितम् । तत्र केन प्रकारेण भगवान् भजनीय इति जिज्ञासया माह-निभृतमरुन्मनोक्षदृढयोगयुज इति । तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेदिति भगवच्चरणपरतैव प्रयोजिका,

न तु प्रकारविशेषः प्रयोजक इति वक्तुं मर्यादामार्गेण निषिद्धमार्गेण पुष्टिमार्गेण प्रवर्तकमार्गेण वा ये भगवदुपासकाः ते सर्वे भगवद्विचारेण समा एव साधारणधर्मस्य प्रयोजकस्य सर्वत्र विद्यमानत्वात्। तत्र विहितमर्यादामार्गेण ये सेवन्ते तान् प्रथमं निर्दिशति। नितराम्भृतः मरुद्वायुः मनः अक्षाणि च प्राणायामः प्रत्याहारो ध्यानं चोक्तम्। एवं त्रिभिः कृत्वा ये दृढयोगयुजः योगेन निरन्तरं भगवच्चिन्तकाः हृदि भगवन्तं मानसपूजादिना उपासते भगवति दृढं मनः स्थापयन्ति। तदेव भगवत्स्वरूपं तदरयोऽपि स्मरणाद्ययुः सर्वात्मना यत्रैव मनो निविशते त एव प्राप्नुवन्तीति विहितानां निषिद्धानां तुल्यैव गतिरुक्ता। अनेन भगवति प्रमेयबलमेव मुख्यं न प्रमाणबलमित्यपि सूचितम्। उभयेषामेषामन्तर्मुखता वर्तत इति बहिर्मुखानप्याह–स्त्रिय इति। उरगेन्द्रस्य शेषस्य भोग इव काय इव यौ बाहू तत्र च विषक्ता धीर्यासां तादृश्यो गोप्यः अतिबहिर्मुखाः वयं च श्रुतयः अन्तर्मुखाः सर्वादरणीयाः एवं पुरुषाः स्त्रियश्च सर्व एव ते समाः। यतो भगवान् समदृक् सर्वानेव स्वकीयान् समत्वेन मन्यते। साधारणं तेषां धर्ममाह- अङ्घ्रिसरोजं सुष्ठु धारयन्तीति मुनीनां चरणधारणं स्पष्टम्। द्वेषिणां तु मारणार्थं समायातीति भावनया चरणदर्शनमेव दृढं भवति समागमनमेव तेषां भावनीयमिति। गोपिकानामपि तथा अभिसारप्रेप्सूनाम्। वयं च श्रुतयः 'सर्वे वेदा यत्पदमामनन्ति' इति।

"सर्व एव हरेर्भक्तास्तुल्या यान्मन्यते हरिः। अतः कृष्णो यथात्मीयान् मन्यते भजतं तथा॥" ॥१०॥२३॥

श्रीसुबोधिनीसारः

निभृतैः स्वाधीनैर्मरुन्मनोक्षैः प्राणमनइन्द्रियैर्दृढं गाढं योगं यञ्जन्ति साधयन्तीति ते मुनयो हृदि यत्तत्त्वमुपासते तदेवाऽरयो वैरिणोऽपि शिशुपालमिथ्यावासुदेवादयो ययुः प्रापुः। स्मरणाद्धेतोः उरगेन्द्रः शेषनागस्तस्य भोगः शरीरं तत्सदृशयोर्भुजदण्डयोर्विषक्ता संलग्ना धीर्बुद्धिर्यासां ताः स्त्रियः परिच्छिन्ना दृष्टयोऽपि ययुः। सममेकरसं पूर्णं पश्यन्त्यो वयं श्रुत्यभिमानिन्यो देवता अपि ते समाः कृपाविषयत्वेन तुल्याः अङ्घ्रिसरोजं सुष्ठु धारयन्त्यः ॥१०॥२३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

"कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च। नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते॥

तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्॥" इति सिद्धान्तमाहुः–निभृतेति।

मरुत् प्राणः मनश्च अक्षाणि इन्द्रियाणि च निभृतानि संयमितानि यैस्ते च ते दृढं योगं युञ्जन्तीति दृढयोगयुजश्च ते मुनयो यत्तत्त्वं हृदि उपासते ध्यायन्ति तदुेव तत्त्वमरयोऽपि तव स्मरणात् ययुः। तथा उरगेन्द्रस्य शेषस्य भोगो देहस्तत्सदृशयोर्भुजदण्डयोर्विषक्ता धीर्यासां ताः परिच्छिन्नदृष्टयः स्त्रियः गोप्योऽपि कामतो ध्यानात्तदेव तत्त्वं ययुः। तथा अङ्घ्रिसरोजसुधाः तवाङ्घ्रिसरोजं सु धारयन्त्यो ध्यायन्त्यः वर्णयन्त्यः समदृशः सममपरिच्छिन्नं त्वां पश्यन्त्यो वयं श्रुत्यभिमानिन्यो देत्रता अपि ते तव कृपाविषयतया तत्समा एवेति ॥२३॥१०॥

अन्वितार्थप्रकाशिका

निभृतेति॥ निभृतमरुन्मनोक्षदृढयोगयुजः मुनयः यत्तत्त्वं हृदि उपासते तदेव तत्त्वमरयोऽपि तव स्मरणात् ययुः। तथा उरगेन्द्रभोगभुजदण्डविषक्तधियः स्त्रियो गोप्यः तथा तवाङ्घ्रिसरोजसुधाः समदृशः वयमपि च ते समा एवेत्यन्वयः। निभृतानि संयमितानि यैस्ते च ते दृढं योगं युञ्जन्तीति दृढयोगयुजः ते मुनयो यत्तत्त्वं हृदि शुद्धेऽन्तःकरणे उपासते ध्यायन्ति ध्यानविषये प्रवर्तन्ते तदेव तत्त्वमरयो दुर्भावना अपि तव स्मरणात् ययुः। लिट्प्रयोगात्। मुनिभ्यः पूर्वमेव ब्रह्मणि अलीयन्त। तथा उरगेन्द्रस्य शेषस्य भोगो देहस्तत्सदृशयोर्भुजदण्डयोर्विषक्ता धीर्यासां ताः परिच्छिन्नदृष्टयः स्त्रियः गोप्योऽपि कामतो ध्यानात्तदेव तत्त्वं ययुः। ताः अङ्घ्रिसरोजसुधाः तवाङ्घ्रिसरोजं सुष्ठु धारयन्त्यो ध्यायन्त्यः वर्णयन्त्यः समदृशः सममपरिच्छिन्नं त्वां पश्यन्त्यो वयं श्रुत्यभिमानिन्यो देवता अपि ते तव कृपाविषयतया तत्समा एवेति। इत्थम्भूतस्य स्मरणानुभावः ये योगिनः त्वां ध्यायन्ति याश्च वयं त्वां समं पश्यामः याश्च स्त्रियस्त्वां परिच्छिन्नं ध्यायन्ति ते च त्वां द्विषन्ति तान्सर्वानपि त्वामेव प्रापयतीति। अत्र चत्वारो गणा वर्णिताः। पूर्वार्धगतौ मुनिदैत्यगणौ च समप्राप्यौ तथैवोत्तरार्धगतौ गोपीगणश्रुतिगणौ समप्राप्यौ पृथगपिशब्दाभ्यामवगम्येते। श्रुतीनां गोपीरूपत्वं बृहद्वामने—

"तुष्टोऽस्मि ब्रू

"यथा त्वल्लोक

उवाच व्रजे गोप्यो भविष

अनवधिकातिश

भवेयुरिति तत्स्वरूपबलम

संयमितानि मरुन्मनोक्षाणि

तथोक्ताः प्राणा विजयिनो

अरयोऽपि स्मरणात् क्रोधा

यो भोगः शरीरं तत्सदृश

स्मरणात्कामभावेनातिस्मर

यद्वा॥ अङ्घ्रिसरोजे एव

तत्कृतस्मरणे समदृष्टेः ते त

"गोप्यः कामाद्भय

अभक्तानां त्वत्स्मर

समोऽहं सर्वभूतेषु

साम्प्रतं येन केना

सदृष्टान्तमाहुः॥ निभृतेति॥

दृढमविचाल्यं योगमुपासनात्

मननशीलाः, "आत्मा वाऽरे

त्वत्स्वरूपम्, उपासते। तत्तदे

महोरगस्य यो भोगः शरीरं तत

अङ्घ्रिसरोजे पादपद्मे सुष्ठु दधति

वयं देवा अपीत्यर्थः। त्वच्च

वैषम्यनैर्घृण्यादिपरिहाराय व्याज

तात्पर्यतोऽर्थतश्च प्राप्नुम इत्यर्थ

च भगवत्प्राप्त्यभिधानात् कृष्ण

ज्ञानभक्तिरागद्वेषादिष्वन

मरुत्प्राणा मनः अक्षाणीन्द्रियाण

एवम्भूताः मुनयः यत् भगवत्स्वर

मुनयोऽपि प्रापुरित्यर्थः। तथा

वा ये भगवदुपासकाः ते सर्वे
ामार्गेण ये सेवन्ते तान् प्रथमतो
भः कृत्वा ये दृढयोगयुजः योगेन
तदेव भगवत्स्वरूपं तदरयोऽपि
ग्रैव गतिरुक्ता । अनेन भगवति
ज्ञानप्याह–स्त्रिय इति । उरगेन्द्रस्य
श्रुतयः अन्तर्मुखाः सर्वादरणीयाः
मन्यते । साधारणं तेषां धर्ममाह–
ावनया चरणदर्शनमेव दृढं भवति
त्रेदा यत्पदमामनन्ति' इति ।
तथा ॥" ॥१०॥२३॥

यो हृदि यत्तत्त्वमुपासते तदेवाऽरयो
शरीरं तत्सदृशयोर्भुजदण्डयोर्विषक्ता
यं श्रुत्यभिमानिन्यो देवता अपि ते

ते ॥

ां युञ्जन्तीति दृढयोगयुजश्च ते मुनयो
ागो देहस्तत्सदृशयोर्भुजदण्डयोर्विषक्ता
ङ्घ्रिसरोजसुधाः तवाङ्घ्रिसरोजं सुष्ठु
ा देवता अपि ते तव कृपाविषयतया

मरयोऽपि तव स्मरणात् ययुः । तथा
च ते समा एवेत्यन्वयः । निभृतानि
उपासते ध्यायन्ति ध्यानविषये प्रवर्तन्ते
नलीयन्त । तथा उरगेन्द्रस्य शेषस्य भगो
ादेव तत्त्वं ययुः । ताः अङ्घ्रिसरोजसुधाः
त्रयं श्रुत्यभिमानिन्यो देवता अपि ते तव
वयं त्वां समं पश्यामः याश्च स्त्रियस्त्वां
र्णिताः । पूर्वार्धगतौ मुनिदैत्यगणौ यथा
गोपीरूपत्वं बृहद्वामने —

"तुष्टोऽस्मि ब्रूत बो विज्ञा वरं यन्मनसेप्सितम् ।" इति । भगवदुक्ताः श्रुतय ऊचुः —

"यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः ॥ भजन्ति रमणं मत्वा चिकीर्षाजनिनस्तथा ॥" इति प्रार्थितः भगवान् वाच व्रजे गोप्यो भविष्यथेति ॥२३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनवधिकातिशयकल्याणैकतानस्य प्रत्यक्षपुरुषोत्तमस्य स्वरूपातिस्मरणेनातिकनिष्ठा अपि जीवा एकान्तिकभक्ततुल्या भवेयुरिति तत्स्वरूपबलमाहुः ॥ निभृतमरुदिति ॥ हे अनवधिकातिशयकृपासागर ॥ निभृतमरुन्मनोऽक्षदृढयोगयुजः निभृतानि संयमितानि मरुन्मनोक्षाणि यस्ते निश्चलप्राणान्तःकरणा बाह्येन्द्रियाः ते च ते दृढयोगयुजः दृढं यथा तथा योगं युञ्जन्ति साधयन्तीति तथोक्ताः प्राणा विजयिनो योगनिष्ठा इत्यर्थः । मुनयो मननशीलाः यद्भगवत्स्वरूपं हृदि उपासते सेवन्ते भजन्तीति यावत् ॥ अरयोऽपि स्मरणात् क्रोधाभिनिवेशेन भवदतिस्मरणात् तद्ययुः प्रापुः । किञ्च उरगेन्द्रभोगभुजदण्डविषक्तधियः उरगेन्द्रस्य महोरगस्य यो भोगः शरीरं तत्सदृशौ यौ भुजदण्डौ तयोर्विषक्तधियोऽनुरक्तबुद्धयः ॥ आलिङ्गनाभिलाषिण्य इत्यर्थः । स्त्रियोऽपि स्मरणात्कामभावेनातिस्मरणात् तदेव ययुः । अङ्घ्रिसरोजसुधाः अङ्घ्रिसरोजे चरणाम्भोजे सुष्ठु दधति ध्यायन्तीति तथोक्ताः । पद्म ॥ अङ्घ्रिसरोजे एव सुधा अमृतमिव सेव्ये यासां तथोक्ताः वयं श्रुतयोऽपि समदृशः अतिकृपालुत्वात् गुणग्राहकत्वाच्च कृतस्मरणे समदृष्टेः ते तव समाः अनुग्राह्यतया तुल्या एव तेऽप्यस्मत्तुल्या भविष्यन्तीति भावः । तथा चोक्तम् —

"गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः । सम्बद्धा वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ॥" इति ॥

अभक्तानां त्वत्स्मरणेनोत्तमा गतिर्यर्हि तर्हि भक्तानां तु किमु ॥ गीतायां च —

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ इति ॥२३॥१०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

साम्प्रतं येन केनाप्युपायेन मनः कृष्णे निवेशयेत् इति मतमालम्ब्य त्वयि मनोनिवेशनमपि त्वत्प्राप्तिसाधनमिति दृष्टान्तमाहुः ॥ निभृतेति ॥ हे भगवन् ! मरुतः प्राणाश्च मनश्च अक्षाणि बाह्येन्द्रियाणि च निभृतानि संयमितानि मरुदादीनि यैस्ते दृढमविचाल्यं योगमुपासनात्मकं युञ्जन्त इति दृढयोगयुजः ते च ते च, निश्चलप्राणान्तःकरणबाह्येन्द्रिया योगनिष्ठाश्चेत्यर्थः । मुनयः मननशीलाः, "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति श्रुत्युक्तार्थावलम्बिनो मुनय इत्यर्थः । हृदि, यत् तत्स्वरूपम्, उपासते । तत्तदेव, अरयः शत्रवोऽपि, स्मरणादप्रीतिपूर्वं चिन्तात्, ययुः प्रापुः ॥ तथा स्त्रियो गोप्योऽपि, उरगेन्द्रस्य महोरगस्य यो भोगः शरीरं तत्सदृशौ यौ भुजदण्डौ तयोर्विशेषेण सक्ता धीर्यासां तास्तथाभूताः सत्यः, तदेव, ययुः । किं बहुना । अङ्घ्रिसरोजे पादपद्मे सुष्ठु दधति ध्यायतीत्यङ्घ्रिसरोजसुधाः अङ्घ्रिसरोजमेव सुधावद्भोग्यं येषां ते इति वा । वयम् अपि, वेदाभिमानिनो यं देवा अपीत्यर्थः । त्वच्चरणसरोजप्रकाशका वयं श्रुतयोऽपीति भावः । समा दृग्यस्य स तस्य अनादृतनिम्नोन्नतभावस्य, वैषम्यनैर्घृण्यादिपरिहाराय व्याजमात्रावलम्बिनः सर्वाननुजिघृक्षोरित्यर्थः । ते तव, समाः तुल्याः । मुनिप्रभृतय इव त्वामेव विषयभूतं शब्दतोऽर्थतश्च प्राप्नुम इत्यर्थः । अपारकारुण्यवात्सल्यौदार्यादिगुणवतस्तव सर्वेऽपि तुल्यकक्षा इति भावः । अत्र शत्रूणां स्त्रीणां च भगवत्प्राप्त्यभिधानात् कृष्णावतारे श्रुतीनामादराधिक्यं गम्यते ॥१०॥ ॥२४॥

योगिरामानुजाचार्यकृतसरला व्याख्या

ज्ञानभक्तिरागद्वेषादिष्वन्यतमेनापि भगवन्तं स्मरन्तो भगवन्तमेव प्राप्नुवन्तीत्याह–निभृतेति । निभृतमरुन्मनोक्षदृढयोगयुजः । मरुतः प्राणा मनः अक्षाणीन्द्रियाणि च निभृतानि संयमितानि निश्चलीकृतानि यैस्ते च ते दृढं दृढीभूतं योगं युञ्जन्तीति दृढयोगयुजः । एवंभूताः मुनयः यत् भगवत्स्वरूपं हृदि उपासते ध्यायन्ति तदेव भगवत्स्वरूपं अरयोऽपि तव स्मरणात् ययुः प्रापुः । अरयोऽपीत्यनेन शत्रवोऽपि प्रापुरित्यर्थः । तथा उरगेन्द्रः शेषः । तस्य भोगः कायः । तत्सदृशभुजदण्डयोर्विषक्ताऽऽसक्ता धीर्यासां ताः स्त्रियः

गोप्यः । विज्ञानशून्या इत्यर्थः । तथा अङ्घ्रिसरोजे भगवच्चरणकमलं सुष्ठु धारयन्ति वर्णयन्तीति वाऽङ्घ्रिसरोजसुधाः ध्यानादिना धारयन्त्यो वयमपि श्रुत्यभिमानिन्यः विशेषज्ञाः देवताः अपि । अपीत्यनेन विज्ञानरहिता गोप्योऽपि इत्यर्थः । समदृशः समदर्शिनस्ते समाः स्त्रियः गोप्यः श्रुतयश्च समाः इति भावः । निभृतमरुन्मनोऽक्षदृढयोगयुजो मुनयः हृदि यदुपासते तदरयोऽपि स्मरणाद्ययुः । उरगेन्द्रभोगभुजदण्डविषक्तधियः स्त्रियः अङ्घ्रिसरोजसुधाः वयमपि समदृशः ते समाः इत्यन्वयः ॥२३॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

आत्मा वा अरे इति । वै निश्चये । अरे मैत्रेयि ! आत्मा श्रीभगवान् द्रष्टव्यस्साक्षात्कर्तव्यः । आत्मासाक्षात्कारस्य साधनान्याह-श्रोतव्य इति । श्रीगुरोस्सकाशात् उपक्रमोपसंहारादिभिस्तात्पर्यलिङ्गैस्तात्पर्य्येणावधारयितव्यः । मन्तव्यस्तदनुकूलेनानुमानेनासम्भावना विपरीतभावनानिवृत्तये स्वयं पुनर्विचारणीयः । निदिध्यासितव्यो निश्चयेन ध्येय इति । यत्तत्त्वमसम्यगाविर्भावलक्षणं निर्विशेषं ब्रह्म हृदि मुनय उपासते तदेवारयोऽपि तव श्रीकृष्णरूपस्य भयद्वेषाभ्यां स्मरणमात्रप्रभावाद्भयद्वेषजनिताघं हित्वा ययुः प्रापुरित्यर्थः । कामात् द्वेषादित्यारभ्यावेश्य तदघं हित्वा बहवस्तद्गतिं गताः इत्युक्तेः । स्वामिटीकायामेव तद्गुणद्वयस्य विशेषजिज्ञासा चेच्छ्रीवैष्णवतोषणी दृश्या ॥२३॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

इदानीं ध्यानमङ्गत्वेनोपदिशन्तीत्याह-निभृतेति । मुनयो यत्परं तत्त्वं हृदि उपासते तदरयोऽपि स्मरणाद्ययुः । वयमपि तदेव यास्यामः । अतो वयं च ते च सर्वे तव समाः । कृपाविषयतया इत्यन्वयः । मुनयः कथम्भूताः । निभृतमरुन्मनोऽक्षाश्च ते दृढयोगयुजश्चेति ते । दृढयोगं युञ्जन्तीति दृढयोगयुजः । उरगेन्द्रोऽनन्तस्तस्य भोगसदृशयोर्भुजदण्डयोर्मध्ये विषक्ता धीर्यासां ताः वयम् । कीदृशाः । समदृशः । सममपरिच्छिन्नं पश्यन्तीति तथा । पुनश्च । अङ्घ्रिसरोजसुधाः अङ्घ्रिसरोजं सुष्ठु धरन्ति "डुधाञ्-धारणपोषणयोः" इत्यस्मात् सुधा इति । अत्र स्वामिचरणाः । अयम्भावः । इत्थम्भूतस्य तव स्मरणानुभावः । ये योगिनस्त्वां हृद्यालम्बनमुपासते याश्च स्त्रियः कामतः कामतः परिच्छिन्नं याश्च श्रुत्यभिमानिन्यो देवताः वयं त्वां समं पश्यामः । सर्वान् तांस्त्वामेव प्रापयति । तव स्मरणानुभावः इति ध्यानविषये श्रुतिः-स्वजायां मैत्रेयीं प्राह याज्ञवल्क्यः —

"न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳसर्वं विदितम्" इति ॥

अरे इति निकृष्टसम्बुद्धौ भार्यात्वात् । मैत्रेयि, सर्वस्य पतिस्त्रीपुत्रधनादिवसुमात्रस्य कामाय सर्वं प्रिय न भवति किन्त्वा कामाय सर्वं प्रियं भवति स आत्मा त्वया द्रष्टव्यः साक्षात्कर्तव्यः, श्रोतव्यः पूर्वमाचार्यत आगमतश्च पश्चान्मन्तव्यः तर्कादितः, त निदिध्यासितव्यो निश्चयेन ध्यातव्यः । एवमात्मनो दर्शनं भवति मत्या मननेन विज्ञानेन निदिध्यासनेन । इयमप्युपदेशपरा । एतदभिप्रेत्यैव श्रीशुकेनोक्तम् —

"तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥" इति द्वितीये ॥

तथा पाद्मेऽपि-शिववाच्यम् - "स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् । सर्वे विधिनिषेधाः स्युरेतयो किंकराः ॥" इति ॥

इति अत्रैवं ज्ञातव्यम् । यद्यपि भगवत्प्रसादो गोपीनामसाधारणोऽस्ति —

"नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्यः ।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषां य उदगाद्व्रजवल्लवीनाम् ॥"

इत्यादिभिरुक्तः । तथाप्यत्र "तन्मध्यपतितस्तद्ग्रहणेन गृह्यते" इति न्यायात् मुन्यादीनां मध्ये कथितानां गोपीना श्रीकृष्णस्मरणजन्यब्रह्मानन्दसुखसमम्यं भवतु नाम किन्तु भजनानन्दसुखाधिक्यमस्त्येव निदर्शनञ्च —

"अहल्या

एताः पञ्च

ताभिः सह सीता
साक्षाल्लक्ष्मीरहल्याद्या
विष्णुना तेषां किं सा
दिक् । अथ स्वामिनां

चरणस्मरणं

अथ भगवत्प्री
निभृतानि वशीकृतानि ।
दृढयोगयुज इत्यर्थः ।
गोप्यः अपि कामेन उर
तथा चोक्तं सप्तमे नारदेन

'गोप्यः कामा

इति । वयं वेदा
सुधा भोग्यं यासां तास्त

जिन्होंने प्राण
आपके जो स्वरूप की
भुज दगडोमें जिनकी बु
चरणारविंद को अमृत
मूर्तिमान हम वेदरूपी दे
प्राप्त हुए है । वैसे ही
क्योंकि, अपनी प्राप्तिमें
व्याज मात्र का अवलम्बन
है इसलीए आप की दृष्टि

क इह नु वेद बत
तर्हि न सत्र चास

इह, जगति, अग्रसर
देवगणा, उदगुः ।, यदा, तु,
कालजवः, न, च, अन्यत्, कि

---

१. मपकृष्य-वीर ।

"अहल्या द्रौपदी सीता तारा मन्दोदरी तथा । पञ्च कन्याः स्मरेन्नित्यं सुप्रभातं दिने दिने ॥"

एताः पञ्च कन्या नित्यं दिने दिने स्मरेत्तर्हि तद्दिनं सुप्रभातं भवतीत्यर्थः । अहल्यादीनां मध्ये श्रीसीतापि पठिता । एतावता भिः सह सीतायाः साक्षाल्लक्ष्म्याः किं साम्यं भवति किन्तु कन्यास्मरणफलदातृत्वेन साम्यमुक्तम् । सीता तु क्षाल्लक्ष्मीरहल्याद्यास्तदंशा एवेति । तथा कर्मादौ पञ्चदेवतापूजाविधौ गणेशादीनां मध्ये विष्णुरप्येको देव उक्तः । एतावता ष्णुना तेषां किं साम्यं मन्तव्यम् । किन्तु कर्मफलदातृत्वेन कर्माङ्गत्वात्समत्वमन्यदा तु विष्णुरीश्वरः गणेशाद्यास्तदंशा एवेति क् । अथ स्वामिनां —

चरणस्मरणं प्रेम्णा तव देव सुदुर्लभम् । यथाकथञ्चिन्नृहरे मम भूयादहर्निशम् ॥ सुगमम् ॥२३॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवत्प्रतिकूलानामपि भगवत्स्मरणं संसारोत्तारकमित्याह-निभृतेति । हृदयं हृद्गतं त्वां मुनयः उपासते । तान् विशिनष्टि- भृतानि वशीकृतानि । मरुत् प्राणश्च नमश्च अक्षाणीन्द्रियाणि यैस्ते ते च दृढयोगं युञ्जन्ति । दृढयोगयुजः वश्रृकीतप्राणमनइन्द्रियत्वात् ढयोगयुज इत्यर्थः । स्मरणात् द्वेषबुद्ध्या तत्स्मरणादरयोऽपि त्वां ययुरिति । यत् यस्मात् त्वां मुनय उपासते इत्यन्वयः । स्त्रियो यः अपि कामेन उरगेन्द्रभोगभुजदण्डविषक्तधियः । भोगीन्द्रशरीरतुल्ययोर्भुजदण्डयोर्विषक्ता धीर्यासां ता अपि त्वां ययुरिति । था चोक्तं सप्तमे नारदेन —

'गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः । सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ॥'

इति । वयं वेदाः समाः पक्षपातरहिततया प्रमाणभूताः समदृशः समाना दृष्टिर्यासां श्रुतीनां ता अपि तवाऽङ्घ्रिसरोजमेव सुधा भोग्यं यासां तास्तवाङ्घ्रिमेव भोग्यतया प्रकाशयाम इत्यर्थः ॥२३॥

कृष्णप्रिया

जिन्होंने प्राण मन इन्द्रियो को विषयन से रोके है और द्रढ उपासना करने वाले है ऐसे मुनिजन निजहृदयमें आपके जो स्वरुप की असुर भी प्रेमके बिना स्मरण करने से प्राप्त हो गए है, तथा आपके श्रेष्ठ भुजंग देह सदृश भुज दण्डोमें जिनकी बुद्धि अत्यन्त आसक्त हुई ऐसी गोपी भी आपके उसी स्वरुप को प्राप्त हो गई तथा आपके रणारविंद को अमृत समान मानने वाले अथवा आपके चरणारविन्द को सम्यक् प्रकार अनुभव करने वाले मूर्तिमान हम वेदरूपी देवता भी आप को मुनि जन आद्यी के समान है, अर्थात् जैसे मुनिजन आद्यी आप को प्त हुए है । वैसे ही हम सब मूर्तिमान वेद भी, तात्पर्य से तथा वास्तविक अर्थसे आप को हि प्राप्त हुऐ है, योंकि, अपनी प्राप्तिमें आप उंचनीच भेदभाव का आदर नहीं करते हो, विषमता और निर्दय भाव के केवल मात्र का अवलम्बन कर आप समदर्शी हो इस लिए सब के उपर अनुग्रह करने की ही आप को इच्छा रहती है इसलीए आप की दृष्टिमें सब ही तुल्य है ॥२३॥

क इह नु वेद बतावरजन्मलगोऽग्रसरं यत उदगादृषिर्यमनु देवगणा उभये ।
तर्हि न सन्न चासदुभयं न च कालजवः किमपि न तत्र शास्त्रम[1]वकृष्य शयीत यदा ॥२४॥

कर्दमक्षमा

इह, जगति, अग्रसरम्, त्वाम्, अवरजन्मलयः, कः, नु, पुमान्, वेद ।, यतः, त्वत्तः, ऋषिः, उदगात्, तदनु, उभये, गणा, उदगुः ।, यदा, तु, भवान्, सर्वम्, अवकृष्य, शयीत, तर्हि, न, सत्, शिष्यते, न, च, असत्, न, च, उभयम्, न, च, कालजवः, न, च, अन्यत्, किमपि, शिष्यते ।, न, च, शास्त्रम्, अपि, अवशिष्यते ।, बत, खेदे ॥२४॥

---

[1] वकृष्य-वीर. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" "को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव अनेजदेकम्मनसो जवीयो नैतद्देवा आप्नुवन्पूर्व्वमर्शत् तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति" इत्याद्याः श्रुतयो भगवत्तत्त्वं दुर्ज्ञेयं वदन्त्यो भक्तिमेवोररीकृत्य स्तुवन्तीत्याह-क इह नु वेदेति। बत अहो भगवन्निह जगत्यग्रसरं पूर्वसिद्धं त्वामवरजन्मलयोऽर्वाचीनोत्पत्तिनाशवान् को नु पुमान्वेद जानाति ईश्वरस्य पूर्वसिद्धावन्यस्य चार्वाचीनत्वे प्रमाणं वदन् ज्ञानकारणाभावमाह-यत उदगादिति । यतस्त्वत्त ऋषिर्ब्रह्मा उत्पन्नोऽयं ब्रह्माणमनु उभये आध्यात्मिकाधिदैविकाः देवगणा उत्पन्नास्ततोऽप्यर्वाचीनाः सर्वे यदा तु भवान् सर्वमवकृष्योपसंहृत्य शयीत तर्हि तदा अनुशायिनां जीवानां ज्ञानसाधनं नास्ति यतस्तदा न सत्स्थूलमाकाशादि न चासत् सूक्ष्मं महदादि न चोभयं सदसद्भ्यामारब्धं शरीरम् न च कालजवस्तन्निमित्तभूतं कालवैषम्यम् एवंसति तत्र तदा न अर्वाक्सृष्टिगतानां देहाद्युपाधिकृतान्तराणां न कालवशेन च मलिनसत्त्वानां तावद्भगवज्ज्ञानसामर्थ्यं तथा च श्रुतिः "न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव" इत्याद्याः यदा तु प्रलयसमये न बह्वन्तरमस्ति तदाऽपि साधनाभावान्न भगवज्ज्ञानसामर्थ्यम् अतस्त्वदेकशरणतया श्रवणकीर्तनादिभक्तिरेव सुकरोति॥

क्वाऽहं बुद्ध्यादिसंरुद्धः क्व च भूमन्महस्तव ॥
दीनबन्धो दयासिन्धो भक्तिं मे नृहरे दिश ॥११॥ ॥२४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — यतो ध्यानज्ञानद्वेषभयकामसम्बन्धस्नेहभक्तिपराणां विषमस्वभावकर्मणां सर्वेषां त्वत्सायुज्यमेकमेव फलं स्यादतस्तव तत्त्वं दुर्ज्ञेयं वदन्त्यो "यतो वाचः" इत्याद्याः श्रुतयः उररीकुर्वन्ति ता आह-यत इति। ब्रह्मप्रकाशनाय प्रयोक्तृभिः सर्वथा प्रयुज्यमाना अपि वाचः मनसा सह यदप्राप्य यतो यस्मान्निर्विकल्पादद्वयानन्दात्मनो निवर्तन्ते तद्ब्रह्मण आनन्दं विद्वान् जानन् कुतश्चिन्निमित्तान्न बिभेतीति अलभ्यलाभमाहात्म्यपरेयम्। परमात्मनो दुर्विज्ञेयत्वे श्रुत्यन्तरमुदाहरति-क इति। तं परमात्मानमद्धा साक्षात्को वेद जानाति। इह कः प्रवोचत्प्रावोचद्वदति। इयं विसृष्टिर्विविधा सृष्टिः कुतो जाता कुतः कस्मादायाता। ननु हिरण्यगर्भादेः सकाशात्सृष्टिरुत्पद्यते नेत्याह-अर्वाग्देवा अर्वाचीना ब्रह्मादिदेवा अस्य जगतो विसर्जने न समर्था इत्यर्थः। अथा इत्याकारान्तो निपातोऽथेत्यर्थे। अथा तं को वेद यत एतत्सर्वमाबभूवेति दुर्विज्ञेयत्वप्रतिपादनपरेयम्। ननु यदि कोऽपि न वेद कथं तर्हि संसारनिवृत्तिः तदर्थं तत्स्वरूपमनिर्वचनीयत्वे नाह-अनेजदिति। तत्परमात्मतत्त्वमनेजत्स्वरूपाच्चलनरहितमेकद्वितीयं मनसो जवीयः मनसोऽपि वेगवत्तमम्। यत्र मनो धावति तत्र तस्य पूर्वमेव तद्वर्तत इत्यर्थः। एतत्परमात्मतत्त्वं देवश्चक्षुरादीनीन्द्रियाणि तदधिष्ठातारो वा नाप्नुवन् न प्राप्ताः। तत्र हेतुः-यस्मान्मनसोऽपि पूर्वमर्शत् पूर्वमेवागच्छत्। तत्तिष्ठत्स्थितरतमपि धावतोऽन्यान्वागिन्द्रियादीनत्येति अतिक्रम्य गच्छति। मातरिश्वा वायुः। तस्मिन्नपः प्राणिनां चेष्टालक्षणानि कर्माणि। दधाति धारयति। यः सर्वप्राणभृत् क्रियात्मकः यदाश्रयाणि कार्यकारणजातानि यस्मिन्नोतानि प्रोतानि च। यः सूत्रसंज्ञः वायुर्वै गौतमसूत्रमित्यादिभिरुक्तः सर्वस्य जगतो विधारयिता स मातरिश्वा वायुरिति ज्ञातव्यम्। अनिर्वचनपरेयम्। ब्रह्माणमनु पश्चात् आध्यात्मिका देवगणा वाय्विन्द्रादयोऽधिकारिणो देवा आधिदैविकास्तान्देवानधिकृत्य तत्तन्नामान इन्द्रियाद्यधिष्ठातारश्च "दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः" एत इत्यर्थः। अधिकारिदेवानां ब्रह्मणः पश्चाद्भावित्वेन तत्समाननामत्वादाधिदैविकेष्वग्रभाविष्वपि पाश्चात्यकथनं ज्ञेयमिति। ततो देवगणेभ्योऽपि सर्वे मनुष्यादयः। निर्गलितार्थमाह-अयमभिप्राय इति। न तमित्यादिश्रुतिस्तु व्याख्यातार्था। साधनाभावाद्गुरुशास्त्रादिरूपसाधनस्याभावात्। यतः सर्वथा तव ज्ञानं दुर्घटमतो हेतोः स्वामिनां क्वाहमिति। अत्यन्ताघटनायां द्वौ क्वौ। हे भूमन्नपरिच्छिन्नव्यापक ! बुद्ध्यादिसंरुद्धो बुद्ध्यादिरहितं महःस्वरूपं वागाद्यगोचरं क्व अत्यन्तासम्भावनाऽतो भक्तिं देहीति ॥★॥

श्रीधरानुयायिनी — पुनरपि भक्तेरेवावश्यकत्वं द्रढयितुं तदभावे तव ज्ञानमशक्यमित्याहुः-क इति। यतस्त्वत्त

सकाशात्तावत्तव
सर्वेभ्यः त्वामाधुनि
तन्निमित्तभूतकाल
सृष्टिकाले देहाद्यु
कदाचित्कस्यचिद्
सम्भवेदतो ज्ञानाग्रहे

विश्वनाथी
तदभावेऽपीदंशब्देनो
अग्रसरम्। सर्वेषां
उदगात्। "आद्योऽव
दशमात्। यमृषिमनु
जाता इति "एको ह
सुतरामेव कश्चन न वे
शास्त्रं स्वलोक एव
कालजगस्तद्व्यापारः

नीलकण्ठी –
ननु तत्त्वज्ञाने
आन्तरालिकजन्ममरण
कर्तारं च को वेद।
वर्णव्यत्यासभ्रमनिबन्धन
परमाणवः पुञ्जात्पुञ्जक्र
इति सौगतलोकायतता
प्रधानं क्षीरादिवत्स्वयमे
महदादिक्रमेण वा उत्प
सत्यान्तरालिकया बुद्ध्या
उदगात् उत्पन्नः "यो ब्र
चोदगुः पश्चाद्भावित्वादेन
"को अद्धा वेद
इति सृष्टेर्दुर्ज्ञेयत्व
शयीत स्स्वरूपमात्रेणास्ते
अव्याकृतमपि नासीत्। च
आसीत्प्रकेतः" इति श्रुतेः
सदासीत्तदानीम्। नासीद्रज
परमात्मनो हिरण्यगर्भस्य
कश्चन पश्यति अथास्मिन्

शात्तावत्तव किञ्चिन्मात्रतत्त्वज्ञापको वेदो ब्रह्मा वा जातस्तत उभये उभयेन्द्रियाधिष्ठातारो देवाः पश्चादर्वाचीनाः सर्व इत्यतः ध्यः त्वामाधुनिको जन्ममरणभागी कः पुमान् जगति ज्ञातुं समर्थः स्यात्। प्रलयकालेऽप्याकाशादीनां महदादीनां तदारब्धशरीराणां मित्तभूतकालवैषम्यस्येन्द्रियप्राणादेवास्तत्त्वज्ञापकस्य शास्त्रस्य च लीनत्वान्न त्वां ज्ञातुं कोऽपि समर्थः। अयम्भावः — काले देहाद्युपाधिकृतबहुव्यवधाने सत्यपि ज्ञापकस्य शास्त्रस्य साधनसमूहस्य च सम्भवाद्यत्किञ्चित्तत्त्वज्ञानं चित्कस्यचिद्भवेदपि प्रलयकाले तु बहुतरव्यवधानाभावेऽपि शास्त्रस्य साधनसमूहस्य चाभावान्न किञ्चिन्मात्रमपि तत्त्वज्ञानं वेदतो ज्ञानाग्रहं त्यक्त्वा त्वद्भक्तिरेव कर्तुं युज्यत इति ॥★॥

विश्वनाथी — अथ काश्चिच्छ्रुतयस्तदेवानुमोदमानास्तदज्ञाने स्वदोषं परिहरन्ति-क इति। इह जगतीति तदानीं भावेऽपीदंशब्देनोक्तिः पूर्वसंस्कारात्। ता एव तदधिकृता एव। श्रुतय इति। नु सभ्रूभङ्गं वितर्के न कोऽपि वेदेत्यर्थः। तत्र हेतुः- सरम्। सर्वेषां जन्मादेर्ज्ञानादेश्चागोचर एव वर्तमानम्। तत्र च हेतुः-यत ऋषिर्निःश्वासेन सर्ववेदप्रवर्तकः कारणार्णवशायी यात्। "आद्योऽवतारः पुरुषः परस्य" इति द्वितीयात्। "यस्यांशांशांशभङ्गेन विश्वस्थित्यप्ययादयः।" इति श्रीकृष्णं लक्ष्कृत्य मात्। यमृषिमनु उभयेन्द्रियाधिष्ठातारो ब्रह्मलोकाद्यधिष्ठातारश्च दिग्वातार्कादयोऽध्यात्मसंज्ञा ब्रह्मादयश्चाधिदैवसंज्ञा देवगणा ता इति "एको ह वै नारायण आसीन्न ब्रह्मा नेशानस्तस्मादेवैते व्यजायन्ते।" इति श्रुतेः। तस्मात्ततोऽप्यवरजन्मलयस्तु को वेद रामेव कश्चन न वेदेत्यर्थः। एवं स्थितिसमये शास्त्रे प्रवर्तमानेऽप्यश्रवणशक्तिभ्यां तत्त्वदज्ञानं यदा तु प्रलयसमये स्वस्तावकं स्वलोक एव नीत्वा भगवान् जगत्कार्यं प्रत्यनवधानं करोति ज्ञानमात्राभावात्सुतरामेव तेषां त्वदज्ञानमित्याह-तर्हीति। लजगस्तद्व्यापारः सृष्ट्यादिरूपः। अत्र श्रुतयस्तैरेव दर्शिताः (११) ॥२४॥

नीलकण्ठी —

ननु तत्त्वज्ञानेनैव मुच्येमहि किं सगुणभक्त्येत्याशङ्क्य ज्ञानदौर्लभ्यमाह-त्रिभिः-क इह नु वेदेति। इह लोके कः अवरजन्मलयः न्तरालिकजन्ममरणः तौ जन्मलयौ समासान्तः स्थावपि बुद्धिस्थतया गृह्येति। ताविति। तौ जन्मलयौ तं चाग्रसरं पूर्वसिद्धं र्त्तां च को वेद। न कोऽपीत्यर्थः। "वेद तावरजन्म" इति पाठे इदं व्याख्यानम्। वेद तावरजन्मलयेति पाठस्तु त्यासम्भ्रमनिबन्धनो वृत्तभङ्गादुपेक्षितः। अयम्भावः — क्षणिकाः स्थिरा वा खरस्नेहोष्णेरणस्वभावाः पार्थिवाप्यतैजसवायवीयाः माणवः पुञ्जात्पुञ्जक्रमेण घटाद्याकारेण संहन्यन्ते त एव नित्या निरधिष्ठातृकाः साधिष्ठातृका वा द्व्यणुकादिक्रमेण कार्यमारभन्त सौगतलोकायततार्किकाः। अधिष्ठातुर्विकरणत्वात्कुलालवत्क्रियया वा योगिवत्सङ्कल्पेन वा स्वष्टृत्वायोगादसहायं त्रिगुणात्मकं क्षीरादिवत्स्वयमेव महदाद्याकारेण परिणमत इति साङ्ख्याः। तदस्मिन्मतत्रयेऽपि पुञ्जात्पुञ्जक्रमेण व्यणुकादिक्रमेण वा दिक्रमेण वा उत्पन्नैर्देहेन्द्रियादिभिरवच्छेदलाभे सत्यात्मनो बुद्ध्याद्युदयः। तथा तेषां नाशात्प्रागेव बुद्ध्यादेर्नाशः। एवं न्तरालिकया बुद्ध्या पार्यन्तिकौ प्रथमचरमकार्योत्पादविनाशौ तत्कर्ता च न केनचित्परिच्छेत्तुं शक्य इति। यतः अग्रेसरादृषिर्ब्रह्मा त् उत्पन्नः "यो ब्रह्माणं विदधाति पूर्वम्" इति श्रुतेः। यं ब्रह्माणमनु पश्चात् उभये देवगणाः ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि पश्चाद्भावित्वादेनमग्रसरं तत्कर्तव्यौ जगज्जन्मलयौ च ऋषिर्देवाश्च न विदुरित्यर्थः। तथा च श्रुतिः —

"को अद्धा वेद क इह प्रवोचत्। कुत आजाता कुत इयं विसृष्टिः। अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव॥"

इति सृष्टेर्दुर्ज्ञेयत्वमाह-सृष्टेः प्राक्कोऽपि तामीशं च ज्ञातुं नासीदित्याह-तर्हीति। यदा भवान् सर्वं प्रपञ्चम् अनुकृष्य संहृत्य स्वरूपमात्रेणास्ते तर्हि तदा न सत् प्रधानपरमाण्वादिकं नासीत् न असत् शून्यमपि नासीत् उभयं च सदसदात्मकम् कृतमपि नासीत्। चकारान्नेत्यनुकृष्यते। कालजवोऽपि संवत्सरर्त्वयनमासादिपरिवर्तः नासीत् सूर्याद्यभावात्। "न रात्र्या अह्न प्रकेतः" इति श्रुतेः। न च किमपि शास्त्रं शास्तृशास्ययोरभावात् तत्र स्वरूपे किमपि नासीदित्यर्थः। श्रुतिश्च- "नासदासीन्नो दानीम्। नासीद्रजो नो व्योमापरो यत्॥" इति असदिति शून्यस्य सदिति प्रधानस्य रज इति परमाणूनां व्योमेत्यव्याकृतस्य हिरण्यगर्भस्य चाभावं भक्तिमार्गेणैवावस्थात्रयातीतं तव स्वरूपं विज्ञातुं शक्यमिति भावः। ननु "यदा सुप्तः स्वप्नं न पश्यति अथास्मिन् प्राण एवैकधा भवति। तदेनं वाक्सर्वैर्नामभिः सहाप्येति, चक्षुः सर्वै रूपैः सहाप्येति, श्रोत्रं सर्वैः शब्दैः

सहाप्येति, मनः सर्वैर्ध्यानैः सहाप्येति, स यदा प्रबुद्ध्यते यथाऽग्नेर्ज्वलतः सर्वा दिशः विस्फुलिङ्गाः प्रतिष्ठन्ते। एवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते। प्राणेभ्यो देवा देवेभ्यो लोकाः ॥"

इति जीवस्यैव नामरूपप्रपञ्चलगोदयाधिष्ठानत्वं श्रूयते नान्योऽतोऽस्ति द्रष्टेति द्रष्ट्रन्तरप्रतिषेधाच्च कथं प्रतीचोन्यस्योपास्यत्वमुच्यते यद्येवं प्रतिबुद्धोऽसि नास्ति कश्चित्त्वदन्य इत्यवेहि। तर्हीत्यत्र —

"रेफात्स्वरोपहिताद्व्यञ्जनोदयाद्दकारवर्णा स्वरभक्तिरुत्तरा" इति प्रातिशाख्ये स्वरव्यञ्जनयोर्मध्यः स्याद्रेफात्परः स्वरभक्तिः ऋकाररूपास्ति तस्याश्च "द्राघीयसी तूष्मपरा" इति दीर्घत्वं विहितम्। तथा च तकारः दीर्घस्वरभक्त्या सहितो रेफः हिकार इति वर्णत्रयं वैदिकरीत्या सिद्धं "वेदवद्वेदविदां वचनम्" इति न्यायेन च नात्र वृत्तभङ्गशङ्कावकाशः (११) ॥२४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

क इह न्वित्यस्य टीकायां श्रुतौ प्रवोचत् प्रावोचत्। अथेत्यर्थे। अथाशब्द आकारान्तः। अनेजत्। स्वस्वरूपाच्चलनरहितोऽपि जववत्तरं यत्र यत्र तत् धावति तत्र तत्र तदगोचरत्वात्। देवा इन्द्रियाणि मर्शत्। पूर्वमेव गतमित्यर्थः। सर्वागोचरत्वादेवेति भावः। तिष्ठत् स्थिरमपि तस्मिन् परमात्मचैतन्य इति तदाश्रयत्वेनैव वर्तमानः सन्नित्यर्थः। स मातरिश्वा सूत्राख्यो वायुः अपस्तद्वत्प्रवाहापन्नाः सर्वेषां सर्वचेष्टा दधाति सम्पादयतीति। स्वव्याख्यायां तु अथ काश्चिच्छ्रुतयस्तदेवानुमोदमानास्तदज्ञाने स्वदोषं परिहरन्ति-क इति। इह जगतीति तदानीं तदभावेऽपीदंशब्देनोक्तिः पूर्वसंस्कारात्। ता एव तदधिकृता एव। श्रुतय इति। नु सभ्रूभङ्गं वितर्के न कोऽपि वेदेत्यर्थः। तत्र हेतुः-अग्रसरम्। सर्वेषां जन्मादेर्ज्ञानादेश्चागोचर एव वर्तमानम्। तत्र च हेतुः-यत ऋषिर्निःश्वासेन सर्ववेदप्रवर्तकः कारणार्णवशायी उदगात्। "आद्योऽवतारः पुरुषः परस्य" इति द्वितीयात्। "यस्यांशांशांशभङ्गेन विश्वस्थित्यप्ययादयः।" इति श्रीकृष्णं लक्ष्कृत्य दशमात्। यमृषिमनु उभयेन्द्रियाधिष्ठातारो ब्रह्मलोकाद्यधिष्ठातारश्च दिग्वातार्कादयोऽध्यात्मसंज्ञा ब्रह्मादयश्चाधिदैवसंज्ञा देवगणा जाता इति "एको ह वै नारायण आसीन्न ब्रह्मा नेशानस्तस्मादेवैते व्यजायन्ते।" इति श्रुतेः। तस्मात्ततोऽप्यवरजन्मलयस्तु को वेद सुतरामेव कश्चन न वेदेत्यर्थः। एवं स्थितिसमये शास्त्रे प्रवर्तमानेऽप्यश्रवणशक्तिभ्यां तत्त्वदज्ञानं यदा तु प्रलयसमये स्वस्तावकं शास्त्रं स्वलोक एव नीत्वा भगवान् जगत्कार्यं प्रत्यनवधानं करोति ज्ञानमात्राभावात्सुतरामेव तेषां त्वदज्ञानमित्याह-तर्हीति। कालजगस्तव्द्यापारः सृष्ट्यादिरूपः। अत्र श्रुतयस्तैरेव दर्शिताः ॥११॥२४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इत्थं श्रीभगवच्छ्रवण-कीर्तन-स्मरण-माहात्म्यमद्भुतमुक्तम्, तथापि ज्ञानं केचिन्मन्यन्ते, तच्चायुक्तमित्याहुः-क इति। नु वितर्के सम्भूभङ्गे, न कोऽपि वेदेत्यर्थः। तत्र हेतुः-अवरेति। तत्रानपेक्ष्यस्यापि लयस्यासक्तिश्चिरजीवने सत्यपि, तदसम्भवापेक्षया, अवरौ ब्रह्माद्यपेक्षया निकृष्टौ जन्मलयौ यस्येति। किञ्च, अग्रसरं स्वत एव पूर्वतो वर्तमानम्, किंवा इन्द्रियाणामग्रेसं तदगोचरमित्यर्थः। यद्वा, ऋषिः परमेष्ठी, देवगणा इन्द्रियादयः उभये च प्रवृत्तिनिवृत्तिपरा मुनय इति, दिने सृष्ट्यादिव्यापारेण ज्ञानासिद्धिः सूचिता, रात्रौ शयानस्य तस्य नैश्चित्येनापि न सिध्येदित्याहुः-यदा तु श्रीनारायणनाभिपद्मे स ऋषिः शयीत, त तस्मिन् ज्ञाने तन्निमित्तं न सदादि, सत् स्थूलं यज्ञादिकर्म, असत् सूक्ष्मं ध्यानादि, उभयं सदसन्मिश्रितमुपासनादि, कालजवो नित्यं दिनरात्र्यादिपरिवर्तः, शास्त्रं वेदागमादि, तस्य प्रवृत्ति स्त्रिलोक्यां नास्तीत्यर्थः। तस्या लयात् जनलोकादौ त्वस्त्येव। यद्वा, ऋषिः पुरुषो यत्र तत्रैव महदादीनां जन्म, तथा तेभ्यो ब्रह्माण्डे उत्पन्ने तत्रान्तर्यामितया प्रविष्टस्य जलाशायिनो भगवतः श्रीनारायणस्य नाभिकमलाद्ब्रह्मणो जन्म। अत उभय इति कारणरूपा महदादयः, कार्यरूपाश्च ब्रह्मादयः, इति सर्वेषामर्वाचीनत्वं स्यादेव,-कालवाचिनोस्तर्हि-यदा-शब्दयोः प्रयोगात्। कालोऽस्त्येव, तस्य तु जवो नास्ति। शास्त्र च वेदोऽस्त्येव, श्रीभगवन्निःश्वाससहचरत्वात्तस्य किन्तु बहिर्न प्रचरतीति नास्तीत्युक्तम्। महोपनिषदश्च बहिरपि सन्त्येव-तदा ताभिरेवास्याः स्तुतेः क्रियमाणत्वात्। अवकृष्य निखिल-ब्रह्माण्डमण्डलमेव संहृत्य। तथा च विष्णुधर्मोत्तरे —

"अनन्तानि तथोक्तानि यान्यण्डानि मया पुरा। सर्वाणि तानि संहृत्य समकालं जगत्पतिः ॥

प्रकृतौ तिष्ठति तदा सा रात्रिस्तस्य कीर्तिता" ॥ इति ॥

प्रकृतौ स्वरूपे । शेषं समानम् ॥२४॥

[गोपीनां प्रसङ्गे तासां महामोहनस्य तस्य वेणोर्माधुर्य्यवर्णनेन कृष्णं स्तुवन्ति-क इहेति । नु भो भगवन् ! अग्रसरमग्रे शब्दरूपेण सरति गच्छतीत्यग्रसरो वेणुस्तम्, इह अखिलभुवने, अवरजन्मलयोऽवरस्य प्राकृतस्य जन्मनो लयो यस्य सः, चिद्रूपदेहलाभ इत्यर्थः । तादृशोऽपि को वेद । बत आश्चर्ये, तयो वेणोर्ऋषिर्मन्त्रो मेहिनमन्त्ररूपो नाद इत्यर्थः । उदगात् वाभ्युत्थित उदितो वा, कृष्णस्य वंशी कदाचित् स्वयमपि शब्दायत इति हि प्रसिद्धिः । यमनु यं वेणुनाद-महामन्त्रमनु, तत्रैके अधिकारिणो ब्रह्मरुद्रादयः, अन्ये श्रीगरुड-विष्वक्सेनादयो वैकुण्ठेशनित्यपारिषदाः, इति द्विविधा देवगणा उदगुः, परि गगने उदयं चक्रुः । यदा तु शस्त्रं गान्धर्वविद्याशास्त्रमवकृष्य समानीय स्वस्मिन् समावेश्य तत्र भवदधरबिम्बे शयीत, सक्त्या निविष्टो भवेत्, वेण्वधरयोः नामाग्रहणं मोहशङ्कया । तर्हि न सत् प्रियजनकुलम्, तस्य परमानन्देन मोहात्, न षिकुलम्, तस्य केनाप्यनिर्वचनीयेन महाक्षोभकारिणा भावेन मोहात् । यद्वा, महात्रासेन मोहात् । यथा जगत्प्रकाशिकापि रुलूकानामन्धङ्करणी, न चोभयं भक्तिद्वेषरहितं मध्यस्थं ज्ञानि-कर्म्मिकुलं (ज्ञानिकर्मिशैवकुलं [ख] ।) चेत्यर्थः । यद्वा, चेतनकुलम्, तस्य मोहेन जाड्यतिशयात्, न चासत् अचेतनकुलं पाषाणादि, तस्य द्रवभावापत्तेः, न च उभयम्, वस्तुतः पि जडत्वेन प्रतीयमानं तरुलतादि, - तस्य पुलक-मधुधारा-कम्पाद्युद्गमेन वैलक्षण्यातिशयात् । न च कालजवः, कालस्यापि त्वात् (स्तम्भत्वात् [ख] ।), सूर्यादीनां गत्यभावात् कालस्तम्भोऽनुमेयः । न चान्यत् किमपि, नदी-मरुदादीनां दिकमित्यर्थः । सर्वमेव जगद्वेणुनाद-सन्दर्भाम्बुधौ मज्जतीत्यर्थः । तथा च श्रुतिः (ऋक् ६/४९/७ ; १०/६५/१३) —

"पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धयन्धात्, पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः ॥"

अस्यार्थः — अजः श्रीकृष्णः एकपाद् भूत्वा पावीरवी वेणुनादानतन्वत ततान । कीदृशः सन् ! दिवः सूर्यचन्द्रादेर्धर्ता कः सन् सिन्धुरित्रापो नद्यादिजलानामपि स्तम्भकः सन्, अतः पावीरवी तथाभूतैः पावीरवैः कन्या व्रजकन्याः, चित्र आयुः, वद् बभूवुरित्यर्थः । किम्भूता अपि ? सरस्वती या वीरपत्नी पतिव्रता तस्या धियं धारयन्ती या तथा विवेकवीर्ययुक्तापीत्यर्थः । सा पावीरूपा सरस्वती वीरस्य तस्यैव पत्नी कान्ता प्रायो मम बुद्धिं दधातु, आगृह्णातु, आकर्षयत्वित्यर्थः ॥२४॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

शास्त्रेण विना भवतो दुरधिगमत्वमाहुः-क्व इहेति । अवरजन्मलयः आदिसृष्टेः पश्चात् जन्मलयभागी कः अत्र प्रथमसृष्टेः भाविनं त्वां वेद । ऋषिः ब्रह्मा उभये प्रवृत्तिनिवृत्तिनिष्ठाः । प्रवृत्तिनिष्ठाः मरीच्यादयः । निवृत्तिनिष्ठाः सनकादयश्च । तर्हि तदा पूर्वकाले सत्कार्यावस्थं चिद्वस्तु असत्कार्यावस्थमचिद्वस्तु उभयं मिश्ररूपं कार्यं नेत्यर्थः । कालजवः कालप्रवृत्तिः सर्गविषया शास्त्रमनुकृष्य स्वहृदये भवान् शयीत तदा न सन्तीत्यर्थः ॥२४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अङ्घ्रिसरोजसुधा इत्यनेन भगवत्स्वरूपस्वभावादिप्रकाशकं वेदाख्यं शास्त्रमेवेत्यभिप्रेतम् । अतः तेन विना भगवतो सत्त्वं लयहेतुकमाहुः-क इहेति । अवरजन्मलयः अर्वाचीनोत्पत्तिनाशवान् इह लोके को नु पुमानग्रसरं सृष्टेः पूर्वभाविनं चिद्विशिष्टत्वेन कारणतयाऽवस्थितं त्वां वेद । शास्त्रेण विना न कोऽपि वेदेत्यर्थः । बतेति विस्मये । "यतो वाचो " इत्युक्तरीत्या वाङ्मनसापरिच्छेद्यस्वरूपस्वभावं तं वेत्तुमुद्युक्तो विस्मीयते सर्वेषामवरजन्मलयत्वमुपपादयन्ति । यतः ऋषिर्ब्रह्मा उदगादुद्बभूव । यमनु पश्चाच्चतुर्मुखोत्पत्त्यनन्तरमित्यर्थः । उभये निवृत्तिनिष्ठाः सनकादयः प्रवृत्तिनिष्ठाः मरीच्यादयश्च गुर्मनुजादयस्तेभ्योऽप्यर्वाचीना इति किमु वक्तव्यमिति भावः । अग्रसरत्वमुपपादयन्ति । तर्हीति । यदा भवान् शास्त्रमपकृष्य निधाय शयीत शयितवान् । तर्हि तदा सृष्टेः पूर्वकाले सत्कार्यावस्थं चिद्वस्तु असत् कार्यावस्थमचिद्वस्तु उभयं मिश्ररूपं कालजवः कालप्रवृत्तिः सर्वादिविषया नासीत् । बहुना तत्र तदा न किमप्यासीदित्यर्थः । अत्र —

''नासदासीन्नो सदासीत्'' ''एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी'' इत्यादिश्रुत्यर्थोऽनुसंहितः। अवरजन्मलयोऽग्रसरं इति च हेतुगर्भं यद्यप्यवरजन्मा पुत्रादिः अग्रसरं पित्रादिकमयमित्थम्भूत इति जानात्येव तथाप्यत्र भगवतो वाङ्मनसापरिच्छेद्यस्वरूपस्वभावत्वेऽवरजन्मलयानां तन्मायामोहितत्वेन तदनुग्राह्यज्ञानत्वेन च तद्वेदनाक्षमत्वे च तात्पर्यं तर्हि न सन् न चासदिति सृष्टेः पूर्वं सच्छब्दवाच्यकार्यावस्थचिदचिन्निषेधेन नामरूपविभागानर्ह-कारणावस्थचिदचिद्विशिष्टस्य ब्रह्मणोऽग्रसरत्वोक्त्या सूक्ष्मचिदचिद्विशिष्टब्रह्मात्मकस्य सत एव द्रव्यस्य स्थूलचिदचिद्विशिष्टतारूपकार्यावस्थायोगित्वलाभात् सत्कार्यवादः फलितः ॥२४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

''स्वनुरागतद्भवानुरगेन्द्रभोगदण्डविषक्तधियो वयमपि ते समा समदृशोऽङ्घ्रिसरोजसुधाम्। क इह वेद नु वक्तुमपेतजन्मलयो यत उदगादृषिरनु देवगणा उभये'' ॥११-२५॥

''त्वं वेत्थ नापरस्ते स्वरूपं न नित्यवाङ्नागभोगप्रियस्य। कुतो ब्रह्मा प्राप्तलोकश्च देवास्तथा प्राप्ता जनिमन्तो यतोऽस्मात्॥''

इति साङ्कृतिश्रुत्यर्थभूतस्यायमर्थः। हे स्मरणात् स्वनुराग! सुष्ठु अनुरागः स्नेहो यस्य स तथा तस्य सम्बुद्धिः स्वनुरागेति स्मरणादेव अनुरक्त इत्यर्थः। यत्तव सच्चिदानन्दलक्षणं तत्ते स्वरूपं भगान्वेद नान्यो वेत्ति। अनेन त्वं वेत्थ नापरस्ते स्वरूपमिति विवृतम्। भवत्यो मत्स्वरूपं विदन्ति हीति तत्राहुः-उरगेन्द्रेति। उरसा गच्छन्तीत्युरगाः। तेषामिन्द्रः उरगेन्द्रस्तस्य ते तव अङ्घ्रिसरोजसुधामुद्दिश्य वयं नित्यवाचोऽपि समा समदृशः सर्वमाहात्म्यस्य वेदैरपि वक्तुमशक्यत्वादसमदृशः। माहात्म्योपमितज्ञानाभावाः वेदागम्यमाहात्म्यस्यापि वेदैरेव गम्यत्वात्समदृशः तुल्यज्ञानाः। अत इह जगति अन्यः को नु पुमान् माहात्म्यं वक्तुं वेद। अमुना नित्यवाङ्नागभोगप्रियस्य। कुत इत्येतद्विवृतम्। को ह्यस्मान् वेदान् त्वां चर्ते अपेतजन्मलयः उत्पत्तिनाशरहितः। यतस्त्वत्तः ऋषिर्ब्रह्मा उदगादुत्पन्नः। अतो जन्मादिरहितो न भवति। देवगणा अपि उक्तगुणा नेत्याहुः। ब्रह्मणोन्वनन्तरम् उभये प्राप्तपदाः प्राप्यपदाश्च देवगणाः। अनेन कुतो न ब्रह्माप्राप्तलोकाश्च देवास्तथाप्राप्ताजनिमन्तो यतोऽस्मादिति श्रुतिर्व्याख्याता —

''महिम्नः सर्वशोऽनुक्तेर्वेदाश्चासमदर्शिनः। तस्यापि वेदगम्यत्वात्तथैव समदर्शिनः॥''

इति वाक्यं चानुगृहीतम् ॥११॥२५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ काश्चित् श्रुतयस्तदेवानुमोदमानाः तदज्ञाने स्वदोषं परिहरन्ति-क इह नु वेदेति। ऋषिरत्र नारायणः कारणार्णवशायी उभये देवगणाः इन्द्रियाधिष्ठातारो ब्रह्मलोकाद्यधिष्ठातारश्च।

''एको ह वै नारायण आसीन्न ब्रह्मा नेशानस्तस्मादेवैते व्यजायन्त'' इति श्रुतेः ॥२४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

॥२३-२४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

नन्वहं वसुदेवगृहे कृतावतारतया वृन्दावने च गोपीभिः सह कृतविहारतया चार्वाचीनव्यवहारतया च परात् परत्वेन कं स्तूये? नैवम् यतस्त्वामेवम्भूतनिखिलाचिन्त्यपरमैश्वर्यशालिनं निरतिशयान्तःशक्तिकदम्बं कोऽपि न जानातीत्याह- क इह न्वित्यादि। यतो यस्मात् ऋषिर्ब्रह्मा उदगात्, तस्मादपि श्रीनारायणादग्रसरं त्वामिह लोकेषु को वेद? न कोऽपीत्यर्थः।

श्रुत्यर्थोऽनुसंहितः ।
त्र तथाप्यत्र भगवतो
त्रे च तात्पर्यं तर्हि न
थचिदचिद्विशिष्टस्य
त्रस्थायोगित्वलाभात्

नु वक्तुमपेतजन्मलयो

मन्तो यतोऽस्मात् ॥"
। सम्बुद्धिः स्वनुरागेति
नापरस्ते स्वरूपमिति
उरगेन्द्रस्तस्य ते तव
शक्यत्वादसमदृशः ।
ते अन्यः को नु पुमान्
ां चर्ते अपेतजन्मलयः
पि उक्तगुणा नेत्याहुः ।
निमन्तो यतोऽस्मादिति

ारायणः कारणार्णवशायी

तया च परात् परत्वेन कथं
न जानातीत्याह- क इह
वेद ? न कोऽपीत्यर्थः ।

स्यैवार्वाचीनत्वात् पूर्वसिद्धस्य तव श्रीकृष्णस्य तत्त्वज्ञानं कथं भवतु ? अतस्तव तत्त्वं त्वमेव जानासि । क इत्यस्य विशेषणम्- जन्मलयोऽर्वाचीनोत्पत्तिलयवानयं ब्रह्माणमनु उभये आध्यात्मिकाधिदैविका देवगणा इति तुल्यम् । यदा सर्वमवकृष्य नारायणः तर्ह्येव न सत् न चासत्, न चोभयम्, न च कालजवः, न च शास्त्रम्, सर्वमिदं तुल्यमेव त्वदुपदिष्टादपि पूर्वसिद्धस्य स्तदा कः किं वेत्तुमर्हत्वित्यर्थः । अतस्त्वं हि सर्वकारणकारणं सर्वेश्वरेश्वरः श्रीकृष्णः अतः शास्त्रमपि त्वां न वेत्तीति भावः, सिद्धत्वात्, न ह्यर्वाचीनाः प्राचीनवृत्तिं जानन्ति ॥२४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्माद्भक्तिरेव सर्वश्रेष्ठा सुघटा च । भक्तिविषयस्य तव ज्ञानं तु सदैव दुर्घटमित्याहुः-क हेति । बत अहो भगवन् ! इह ति अग्रसरं पूर्वसिद्धं त्वाम् अवरजन्मलयः अर्वाचीनोत्पत्तिनाशवान् को नु पुमान् वेद सम्यक्तया जानाति यतस्त्वत्तः ऋषिर्वेदः गुह्यानि हृत्पतेरिति श्रुतिमृग्यमेवेत्याद्युक्तेस्तव यत् किञ्चिन्मात्रतत्त्वज्ञापकं प्रथममुदगात् प्रादुर्बभूव । यं देवं नु उभये देवाः न्द्रियाधिष्ठातारो दिग्वातार्कादयः ब्रह्मलोकाद्यधिष्ठातारो ब्रह्मादयश्च उदगुः । तस्मात्तेभ्योऽप्यवरजन्मलयस्तु सुतरामेव वेत्यर्थः । यदा तु भवान् सर्वमवकृष्य उपसंहृत्य शयीत तदा न सत् स्थूलमाकाशादि न चासत् सूक्ष्मं महदादि न चोभयं सद्भ्यां प्रारब्धं शरीरं न च कालजवः तन्निमित्तभूतं कालवैषम्यं न किमपि इन्द्रियप्राणाद्यपि न च ज्ञापकं शास्त्रमपि । अभिप्रायः-सृष्टिसमये देहाद्युपाधिकृतबहुव्यवधाने सत्यपि ज्ञापकशास्त्रसत्त्वात् साधनसम्भवाच्च वरं यत् किञ्चित्त्वद्ध्यानं सम्भवेदपि प्रलयसमयेषु बहुतरव्यवधानाभावेऽपि शास्त्राभावात् साधनाभावाच्च न किञ्चिन्मात्रमपि त्वज्ज्ञानमतस्त्वज्ज्ञानाग्रहं परित्यज्य भक्तिरेव कर्तुं युज्यत इति अत्र को अद्धा वेद । क इह प्रवोचत् । कुत आयाताः । कुत इयं विसृष्टिः । अर्वाग्देवाः अस्य नाथा को वेद यत आबभूवेत्याद्याः । अर्थश्च-अद्धा साक्षात् को जानाति, नापि कश्चित् ज्ञापयितेत्याहुः-कः प्रवोचत् प्रवोचत्) अस्य विसर्जनेन एतत्कर्तृकविविधसृष्ट्या एव देवा अर्वाक् अभवन्निति अथेत्यर्थे । अथा आदन्तः । तस्मात् य इदं समावभूव । तं को वेदेति ॥२४॥

गूढार्थदीपिनी

कामक्रोधद्वेषभयादिभिः त्वत्पराणां विषमस्वभावकर्मणामपि सर्वेषां त्वत्प्राप्तिरूपमेकमेव मुख्यं फलं भवतीत्यतस्तव दुर्ज्ञेयमिति वदन्त्यो ज्ञानं निरस्य भक्तिमेव दृढीकुर्वन्ति-क इति ।

(अनिर्वचनपरेयम्)

पद्यानुवादः

क इह वेद भवन्तमनीश्वरो [अनीश्वरः परतन्त्रः कः पुमान्] विधिरथोभयदेवगणा यतः ।
यदि शयीत विकृष्य तदेतरत् भुवि न ते विनतेश स सेव्यताम् ॥११॥

सङ्क्षिप्तसार्थान्वयः — हे भगवन् ! यतः ऋषिर्ब्रह्मा वेदो वा उदगात् उत्पन्नः यं ब्रह्माणम् अनु पश्चात् उभये देवगणा इन्द्रियाधिष्ठातारः उदगुः उत्पन्नाः बभूवुः, तमग्रसरं पूर्वसिद्धं त्वाम् इह जगति अवरजन्मलयः आधुनिको जन्ममरणवान् को नु न कोऽपीत्यन्वयः । बतेति विस्मये । यदा तु प्रलये सर्वमवकृष्य भवान् शयीत तर्हि सत् स्थूलं न, असत् सूक्ष्मं न, उभयं प्रारब्धं शरीरं न, कालजवश्च न, किं बहुना तत्र किमपि ज्ञापकं शास्त्रमपि नासीत् अतस्तदाऽपि को वेद ? न कोऽपीति ।

बत अहो हे भगवन् ! इह जगति अग्रसरं पूर्वतो वर्तमानं त्वाम् अवरजन्मलयः आधुनिको जन्ममरणभागी को पुमान् न कोऽपीत्यर्थः । नु इति सभ्रूभङ्गं वितर्के । यतः त्वत्तः ऋषिर्वेदः प्रथममुदगात् उत्पन्नः किञ्चित्त्वज्ज्ञापकः प्रादुरभूत् । यं नु उभये देवगणा उभयेन्द्रियाधिष्ठातारः । यद्वा । इन्द्रियाधिष्ठाताराः दिग्वातार्कादयः । ब्रह्मलोकाद्यधिष्ठातारो ब्रह्मादयश्च उभये उत्पन्ना बभूवुः । तस्मात्तेभ्योऽप्यवरजन्मलयस्तु जीवः सुतरामेव न वेदेत्यर्थः । यदा तु प्रलये सर्वमवकृष्य उपसंहृत्य भवान् स्वरूपेणास्ते । तर्हि तदा सत् स्थूलमाकाशादि नासीत् । असत् सूक्ष्मं महदादि च नासीत् । उभयं सदसद्भ्यामारब्धं शरीरं च

नासीत् । कालजवः गुणक्षोभकारणभूता कालचेष्टा च नासीत् । शास्त्रं, ज्ञापकं शास्त्रं च नासीत् । किं बहुना तत्र तदा किमपि इन्द्रियप्राणादिकमपि नासीत् कुतो ज्ञानम् ? इत्यर्थः ।

सृष्टिकाले देहाद्युपाधिकृतबहुव्यवधाने सत्यपि ज्ञापकस्य शास्त्रस्य साधनसमूहस्य च सत्त्वात् यत् किञ्चित्तत्त्वज्ञानं कदाचित्कस्यचिद्भवेदपि प्रलयकाले तु बहुतरव्यवधानाभावेऽपि शास्त्रस्य साधनसमूहस्य चासत्त्वान्न किञ्चिन्मात्रमपि तत्त्वज्ञानं सम्भवेदतो दुर्घटज्ञानाग्रहं त्यक्त्वा त्वद्भक्तिरेव कर्तुं युज्यते इति फलितम् । यद्वा । यदा प्रलये सर्वं प्रपञ्चमवकृष्य भवान् शयीत तर्हि सत् आकाशादि किमपि अन्यद्वस्तु नासीत् । सृष्टेरादौ तु यतः ऋषिर्वेदः ब्रह्मा वा उदगात् । यमनु ब्रह्मानन्तरम् उभये प्रवृत्तिनिवृत्तिनिष्ठा देवा उदगुः । तं त्वामिह जगति को नु वेद ? न कोऽपीत्यन्वयः । न हि पितुरुत्पत्तिं पुत्रो जानातीत्यर्थः । कथम्भूतं त्वाम् ? अग्रसरं ब्रह्मादिसर्वजगत्कारणत्वेन सृष्टेः पूर्वमेव सिद्धम् । प्रवृत्तिनिष्ठा मरीच्यादयः । निवृत्तिनिष्ठाः सनकादयश्च ॥११॥२५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्य भगवतः सविशेषनिर्विशेषलक्षणं ज्ञानं दु(र्ज्ञा)नरूप्यं तत् स्वरूपगुणशक्तीनामियत्ताशून्यत्वादित्याह - 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । को अद्धा वेद क इह प्रवोचत् । कुत आयाता कुत इयं विसृष्टिः ॥'

'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि ॥'

'न ते विष्णोर्जायमानो न जातः ।'

इत्यादिश्रुतिगुम्फः । बत इति हर्षे सम्बोधनं वा । इह लोके अग्रसरम् अनाद्यनन्तमीश्वरेश्वरं देवदेवं त्वां को वेद । न कोऽपीत्यर्थः । तस्य स्वतःसिद्धौ ह्यन्येषामर्वाचीनत्वे प्रमाणमाह-यतस्त्वत्तः ऋषिर्ब्रह्मा जातः ।

'यो ब्रह्माणं विदधाति पूर्वम् ।' इति श्रुतेः । 'वेदो वा एतस्य निःश्वसितं यदृग्वेदः ।' इति श्रुतेः ।

यं ब्रह्माणम् अनु पश्चादुभये आध्यात्मिकाधिदैविका देवगणा जाताः । संहारकाले अत्यन्तसूक्ष्मावरणं गता अपि त्वां न विदुरित्याह-यदा त्वं चेदं सर्वमवकृष्य शयीत तदा न सत्स्थूलं न चासत्सूक्ष्मं न च कालजगः क्षोभकारणम् उभयमिन्द्रियगणं किमिति शास्त्रं ज्ञापकम् न आस । कुतो ज्ञानमित्यर्थः ॥२४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भक्तानां तुल्यता निरूपिता तत्र शास्त्रविरोधमाशङ्क्य परिहरति-क इह नु वेदेति । 'ननु ज्ञानी प्रियतमो ज्ञानेनासौ बिभर्ति माम् ।' 'चतुर्विधा भजन्ते माम्' इत्युपक्रम्य 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यत ।' इति ज्ञानिनः प्रशंसाश्रवणात् मुनीनां तासां द्विष्टानां श्रुतीनां च कथं तुल्यतेति चेत्तत्राह-क इह नु वेदेति । इयं ज्ञानप्रशंसा यो जानामीति मन्यते तद्बुद्धिमाश्रित्य निरूपिता । ननु परमार्थतः कश्चिज्जानाति । तत्र हेतुः-इहास्मिन्संसारे को वा भगवन्तं जानाति यतो वयमपि न जानीमः । अत एव श्रुतिः —

'यस्या मतं तस्य मतं मतं यस्य न वेद सः ।' इति ॥

ननु कथमज्ञानं प्रमाणस्य विद्यमानत्वादित्याशङ्क्याह-अग्रसरं सर्वप्रमाणात् । पूर्वमेव सिद्धं ज्ञाता च अवरजन्मलयः मध्य एवोत्पद्य गतः । भगवान् प्रथमत एव सृष्टिमुत्पाद्य तिरोहिता जातः । मध्ये सृष्टौ जीवा उत्पन्नाः श्रान्ताश्च । पश्चात्प्रलयं समायास्यति, यदि वा अयं प्रथमत एव स्थितः स्यात् प्रलयपर्यन्तं वा तिष्ठेत् तदा सृष्टेर्व्यवधायकस्याभावात् भगवन्तं जानीयात् । 'न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।' इति श्रुतेः । अतः सृष्टेर्व्यवधायकत्वान्न कश्चित्सृष्टावुत्पन्नो भगवन्तं ज्ञातुं शक्तः । यत उदगादिति । यतस्त्वत्तः ऋषिर्ब्रह्मा उत्पन्नः । तं ब्रह्माणमनु उभये आध्यात्मिका आधिदैविका देवगणा उत्पन्नाः । ननु प्रलयानन्तरं व्यवधायकत्वाभावात् कथं न ज्ञायत इति चेत्तत्राह-तर्हि न सन्न चासदिति । यर्हि भगवान् सर्वमेवावकृष्य शयीत तर्हि ज्ञानसामग्री कापि नास्ति । प्रथमतो न सत् सन्वा ज्ञाता । नासत् ज्ञापकमिन्द्रियादिकार्यं वा हेतुभूतम् । नाप्युभयम् इन्द्रियसन्निकर्षो व्यापारो वा । उभौ यातीत्युभयं सदसदात्मकं मनो वा । 'नासदासीन्नो सदासीत्तदानीम्' इति मन्त्रव्याख्याने उभयात्मकं मनः

र्क बहुना तत्र तदा किमपि

त्वात् यत् किञ्चित्त्वत्त्वज्ञानं
त्र किञ्चिन्मात्रमपि तत्त्वज्ञानं
मवकृष्य भवान् शयीत तर्हि
तरम् उभये प्रवृत्तिनिवृत्तिनिष्ठ
। कथम्भूतं त्वाम्? अग्रसरं
श्च ॥११॥२५॥

ून्यत्वादित्याह – 'यतो वाचो

श्वरं देवदेवं त्वां को वेद। न

श्रुतेः।
न्तसूक्ष्मावरणं गता अपि त्वां न
क्षोभकारणम् उभयमिन्द्रियगणं

ु ज्ञानी प्रियतमो ज्ञानेनासौ बिभर्ति
नेनः प्रशंसाश्रवणात् मुनीनां स्त्रीणां
ति तद्बुद्धिमाश्रित्य निरूपिता। न तु
नीमः। अत एव श्रुतिः —

व सिद्धं ज्ञाता च अवरजन्मलयः
उत्पन्नाः श्रान्ताश्च। पश्चात्प्रलयार्थं
यकस्याभावात् भगवन्तं जानीयात्।
त्र कश्चित्सृष्टावुत्पन्नो भगवन्तं ज्ञातुं
आधिदैविका देवगणा उत्पन्नाः। ननु
भगवान् सर्वमेवावकृष्य शयीत तर्हि
ुभूतम्। नाप्युभयम् इन्द्रियसन्निकर्षः
इति मन्त्रव्याख्याने उभयात्मकं मनो

तम्। तथैवाग्निरहस्ये उभयात्मकं मनो निरूपितम्। केचिदुभयात्मकं जगदित्याहुः। 'मनसैवानुद्रष्टव्यम्' इति प्रयोजकस्य निषेधः। कालवेगोऽपि मात्रस्वरादिनियामकः सत्त्वगुणप्रेरको वा यो ज्ञानमुत्पादयति। न वा किमपि शास्त्रं वेदपुराणादि। सर्वसमवकृष्य शयनं करोति अतो ज्ञानसामग्र्याः सर्वस्या एवाभावात्कस्यापि नापरोक्षं भगवज्ज्ञानमित्यर्थः। भगवत्साक्षात्कारस्तु तावन्मात्रज्ञापको नाशेषविशेषं बोधयति। अवतारे तु मर्यादावादी आनन्दमयं देहं मन्यते। साक्षात्कारे तु न भगवद्वैभवपरिज्ञानम्। योगधर्मजनितत्वाच्च स्वप्नवन्न तस्य वस्तुनियामकत्वम्। प्रमाणसंवादस्तु नुभवात् न निर्विचिकित्सं ज्ञानमुपपादयति। तस्मात्सृष्टिदशायां प्रलयदशायां वा सर्वथा ज्ञानसामग्र्या अभावान्न कोऽपि प्रशंसा तु प्रवर्तिका यथाकथञ्चिच्चित्तशुद्ध्यर्थं प्रवर्तयति ततः शुद्धौ भगवद्भजनं कुर्यादिति भावः।

"ज्ञानमार्गो भ्रान्तिमूलस्ततः कृष्णं भजेद्बुधः॥ प्रवर्तकं ज्ञानकाण्डं चित्तशुद्ध्यै यतो भजेत्॥" ॥११॥२४॥

श्रीसुबोधिनीसारः

बत नु अहो इह संसारेऽग्रसरं पूर्वसिद्धं त्वाम् अवरौ अर्वाचीनौ जन्मलयौ उत्पत्तिवर्नाशौ यस्य स कः पुमान् वेद जानाति, तथा हि यतस्त्वत्त ऋषर्ब्रह्मा उदगादुत्पन्नोऽभूत्। यं ब्रह्माणमनु उभये द्विप्रकारा देवानां गणा आसन् ततोऽप्यर्वाचीनाः उत्पन्नाः यदा यस्मिन् काले तु सर्वं विश्वमवकृष्योपसंहृत्य भवान् शयीत तर्हि तदाऽनुशायिनां जीवानां साधनं नास्ति न सत् आकाशादि न नासत् सूक्ष्मं यहदादि न न चोभयं सदसभ्द्यामारब्धं शरीरं न न च कालजवः तन्निमित्तभूतं कालवैषम्यं न तत्र किमपि इन्द्रियप्राणादि न शास्त्रं ज्ञापकं च न ॥११॥२४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं भक्तेः सुलभत्वं प्रतिपाद्य

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। अर्वाग्देवा अस्य विसर्जने नाथा को वेद यत आबभूव" इत्यादि वक्तुं ज्ञानस्य वमाहुः-क इह नु वेदेति। स्वजनकज्ञानाभावात् खेदमाश्चर्यं वा सूचयन्ति-बतेति। इह जगति अग्रसरं पूर्वसिद्धं त्वाम् जन्मलयः अर्वाचीनोत्पत्तिविनाशवान् पुमान् को नु वेद जानाति? । भगवतः पूर्वसिद्धत्वमन्यस्य चार्वाचीनत्वं चोपपादयन्ति- उदगादिति। यतस्त्वत्तः ऋषिर्ब्रह्मा उदगात् उत्पन्नः, "यो ब्रह्माणं वदधाति पूर्वम्" इति श्रुतेः। यमनु यदनन्तरं उभये निष्ठाः सनकादयः प्रवृत्तिनिष्ठा मरीच्यादयश्च देवा उत्पन्नाः। अन्ये तु मनुजादयस्ततोऽप्यर्वाचीनाः। ननु देवानामर्वाचीनत्वेऽपि अन्य एव कश्चित्ततोऽपि पराचीनः स्यात् इत्याशङ्क्याहुः-यदा तु भवान् सर्वमवकृष्य उपसंहृत्य तर्हि तदा तत्र न सत् स्थूलम् आकाशादि न चासत् सूक्ष्मं महदादि, न च उभयं सदसद्भ्यामारब्धं शरीरं चिदचिदात्मकं मनो न च कालस्य जवो वेगः, न शास्त्रं वेदपुराणादि ज्ञापकम्। किं बहुनाऽन्यत्किमपि इन्द्रियप्राणादि वस्तु नासीदिति। अतो दुर्लभत्वाद्भगवदेकशरणतया श्रवणकीर्तनादिभक्तिरेव सुकरेत्याशयः ॥२४॥११॥

अन्वितार्थप्रकाशिका

क इहेति॥ बतेति खेदे। इह जगति अग्रसरं त्वाम् अवरजन्मलयः को नु पुमान् वेद। यतस्त्वत्तः ऋषिः उदगात् तदनु गणा उदगुः। यदा तु भवान् सर्वमवकृष्य शयीत तर्हि न सत् शिष्यते न चासत् न चोभयं न च कालजवः न च किमपि शिष्यते। न च शास्त्रमप्यवशिष्यत इत्यन्वयः। बत खेदे॥

इह जगति अग्रसरं पूर्वसिद्धं त्वाम् अवरजन्मलयः अर्वाचीनोत्पत्तिविनाशवान् पुमान् को नु वेद जानाति भावमाहुः। यतस्त्वत्तः ऋषिर्वेदो ब्रह्मा वा उदगात् उत्पन्नः। "यो ब्रह्माणं वदधाति पूर्वम्" इति श्रुतेः। यमनु उभये ज्ञानकर्मोभयेन्द्रियाधिष्ठातारो लोकपाश्च उदगुः। यद्वा। निवृत्तिनिष्ठाः सनकादयः प्रवृत्तिनिष्ठा मरीच्यादयश्च देवा

उदगुः। अन्ये तु मनुजादयस्ततोऽप्यर्वाचीनाः अतः त्वत्तः पूर्वाभावात्त्वां को वेद। यदा तु भवान् सर्वमवकृष्य उपसंहृत्य शयीत तर्हि तदा तत्र न सत् स्थूलम् आकाशादि शिष्यते न चासत् सूक्ष्मं महदादि न च उभयं सदसद्भ्यामारब्धं शरीरं चिदचिदात्मकं मनो वा न कालस्य जवो वेगो नान्यत्किमपि इन्द्रियप्राणादिसृष्ट्यादिव्यापारो वा न च ज्ञापकं शास्त्रं वेदपुराणादि अतो ज्ञानस्य दुर्लभत्वाद्भगवदेकशरणतया श्रवणकीर्तनादिभक्तिरेव सुकरेत्याशयः। तथा च श्रुतिः —

"न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव॥ को अद्धा वेद॥ क इह प्रवोचत्॥ कुत आजाता॥ कुत इयं विसृष्टिः॥ अर्वाग् देवा अस्य विसर्जने नाथाः॥ यतो वाचो निवर्तन्ते" इत्याद्याः॥२४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अजनित्यसर्वकारणसर्वशेषिसर्वजनावाङ्मनसगोचरस्वभावस्य स्वधाम्नि निजैः सह वसतः सर्वजनोपरि परमकरुणां कृत्वा देवमनुष्यादिरूपेण प्रादुर्भूतस्य तत्समतया स्थितस्य चाजहत्स्वभावस्य सर्वजनानुभवनीयस्यापि हरेः स्वरूपमवरजन्मलया अ महत्सङ्गिनो जानन्ति तथाभूता अन्ये तु न कथञ्चिज्जानन्तीत्याहुः- क इहेति॥ हे भगवन्! बत अहो इह जातिअग्रसरं पूर्वसिद्धं प्रत्यक्षं त्वाम्। अवरजन्मलयोऽर्वाचीनोत्पत्तिनाशोऽमहत्सङ्गी को नु वेद न कोऽपीत्यर्थः। महत्सङ्गि तु जानातीति भावः। तथा च श्रुतिः-

सवेतिवेद्यंनहितस्यास्तिवेतातमाहुरग्रंपुरुषं महान्तमिति॥ स्मृतयश्च॥

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्। मोहितं नाभिजानाति मामेभ्यः परमव्ययम्॥

भविष्याणि च भूतानि मां तु वेद न कश्चन।

मनुष्याणां सहस्त्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥ इति॥

उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इति॥ भागवते च। सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिरित्युक्तेः श्रुतिस्मृतिभिः अमहत्सङ्गिनां महत्सङ्गिनां च परमात्मस्वरूपाऽवेदनवेदने उक्ते यतः त्वत्तः पुरुषोत्तमात् ऋषिः प्रकृत्यधि पुरुष उदगात् वीर्यं प्राप्य प्रकृतिप्रेक्षणे उद्युक्तोऽभूत्॥ यमनु यं पुरुषमनु पश्चात्॥ उभये द्विधा सर्गजा महदादितत्त्वरूपाः विसर्ग ब्रह्मादयश्च देवगणाः उदगुः उदपद्यन्त॥ यदा यर्हि भवान् सप्रकृतिकं सर्वं तत्रावकृष्य पूर्वोक्ताक्षरतेजसि लीनं कृत्वा सूर्यप्रका ज्योतिषि यथा वने सारङ्गा यथा वृक्षे पतत्रिणो यथा जलेऽश्मादयो यथा लीना भवन्ति तद्वदिति भावः॥ यद्वा॥ शास्त्रं क्षेत्रज्ञ कर्मानुगुणशिक्षां वा जगत्सृष्टिकारणपुरुषादिषु स्थितिप्रेरणरूपं शासनम् अवकृत्य का तत्र स्वाक्षरस्थाने शयी परमेश्वरनिद्राऽभावात्तत्स्था गणिताक्षरपुरुषकृतपादसंवाहनादिसेवाङ्गीकारार्थमिति शेषः। यद्वा। शयीत स्वभक्तैः सह रमेत नि निषीदेत् सञ्चरेद्वा॥ बहुलमेतन्निदर्शनमिति गणसूत्राद्धातूनामनेकार्थत्वादितिवचनाच्चायमर्थः॥ आत्यन्तिकेऽपि प्रल स्वभक्तैरक्षरपुरुषैः सह भगवतो रमणादिषु प्रमाणानि स्वभक्तेभ्योरमते समे सर्वस्वमिति दिवि तिष्ठत्येक इति यः सर्वज्ञः सर्ववि यस्यैषमहिमा भुवि दिव्ये ब्रह्मपुरे ह्येष सव्योम्न्यात्मा प्रतिष्ठित इति अक्षरे परमे व्योमन् तस्मिन्नधिविश्वदेवा निषेदुरिति॥ अधिविश्वे विश्वेभ्यः सर्वेभ्यो देवेभ्यः आधिक्येनात्युत्कृष्टत्वेन वर्तमाना देवा दिव्यदेहा अप्राकृतशरीरा मुक्ता भगवत्सेवार्थं निषेदुः न्युर्षित बभूवुरित्यर्थः। योऽक्षरे सञ्चरतीति अक्षराख्याः पुमांसस्ते इति॥ कालोऽपि येभ्योऽभयमेति नित्यमिति

प्राप्ते प्रलयकाले तु पुनश्चाक्षरधामनि॥ स्थास्यन्ति ते स्वतन्त्राश्च कालमायाभयोज्झिता॥ इति स्कान्दे॥

मम साधर्म्यमागताः॥ सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥

बहवो ज्ञानतपसा पूता मद्भावमागताः॥ इति गीतायाम्॥

मोक्षधर्मे च —

कालः सम्पच्यते तत्र कालस्तत्र न वै प्रभुः। स कालस्य प्रभू राजन् स्वर्गस्यापि तथेश्वरः॥

आत्मा केवलतां प्राप्तस्तत्र गत्वा न शोचति। ईदृशं परमं स्थानम्० इति ॥

दशमे च —

सत्यं ज्ञानमनन्तं यद्ब्रह्मज्योतिः सनातनम्। यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः ॥

कृष्णं च तत्र छन्दोभिस्तूयमानं सुविस्मिताः ॥ इत्याद्याः श्रुतिस्मृतयः ॥

तर्हि तदा प्रलयकाले। अत्र रेफस्य रत्वं छान्दसम्। सत्स्थूलं पृथ्व्यादिनासीत् ॥ असत्सूक्ष्मं महदादिकं न ॥ उभयं सूक्ष्मजनितं ब्रह्माण्डशरीरादिकञ्च न। कालजवः संवत्सरादिपरिवर्तश्च न ॥ प्रकृतिजन्यं किमपि नासीत् त्वद्धामस्वभक्तसहितं स्वरूपं चासीदिति भावः ॥ एतादृशं त्वा को वेदेति सम्बन्धः ॥२४॥११॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अङ्घ्रिसरोजसुधा इत्यनेन सर्वथा सर्गस्थित्योः तव प्रादुर्भावावसर एव भक्तानां ध्यानादिसुखप्रदः, प्रलये तु त्वदर्वाचीनानां वानां स्वतोऽपटुत्वादुपायाभावाच्च दुर्ज्ञेयोऽसीत्याहुः ॥ क इति ॥ हे भगवन्! इह लोके, जन्मलयस्त्वत्तोऽर्वाचीनोत्पत्तिविनाशवान्, कः नु पुमान्, अग्रसरं सृष्टेः पूर्वभाविनं, सूक्ष्मचिदचिद्विशिष्टत्वेन कारणतयाऽवस्थितं मित्यर्थः। वेद। शास्त्रेण विना न कोऽपि वेदेत्यर्थः। बतेति विस्मये। "यतो वाचो निवर्तन्ते" इत्युक्तरीत्या मनसापरिच्छेद्यस्वरूपस्वभावं वेत्तुमुद्युक्तो विस्मीयते इत्यर्थः। सर्वेषामवरजन्मलयत्वमुपपादयन्ति। यतस्त्वत्तः, ऋषिर्ब्रह्मा, दुद्बभूव। यमनु चतुर्मुखोत्पत्त्यनन्तरम्, उभये निवृत्तिनिष्ठाः सनकादयः, प्रवृत्तिनिष्ठा मरीच्यादयश्च, देवगणाः, उदगुः। दयस्तेभ्योऽप्यर्वाचीना इति किमु वक्तव्यमिति भावः। अग्रसरत्वमुपपादयन्ति। तरहीति। अत्र रेफस्य सस्वरत्वं छान्दसम्। भवान्, शास्त्रम् अवकृष्य स्वहृदये निधाय, शयीत शयितवान्। तरहि तदा, सृष्टेः पूर्वकाले इत्यर्थः। सत् कार्यावस्थं चिद्वस्तु, त् कार्यावस्थमचिद्वस्तु च, न, उभयं मिश्रतोपेतं शरीरादिकं च, न। कालजवः कालप्रवृत्तिः संवत्सरादिपरिवर्तश्चेत्यर्थः। न, किं तत्र तदा, किमपि न, नासीदित्यर्थः। अत्र —

"नासदासीन्नो सदासीत्" "एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी"

इत्यादिश्रुत्यर्थोऽनुसंहितः। भगवतो वाङ्मनसापरिच्छेद्यस्वरूपस्वभावत्वेन अवरजन्मलयानां तन्मायामोहितत्वेन च क्षमत्वं ततो भगवद्ध्यानभजनादिज्ञानं नासीदतः सर्गस्थित्योस्तदवताररामकृष्णादिभक्तिः साध्वीति गम्यते ॥११॥ ॥२५॥

योगिरामानुजाचार्यकृतसरला व्याख्या

भगवज्ज्ञानस्य दुर्ज्ञेयत्वात् भक्तिरेव समाश्रयणीयेत्याहुः-क इहेति। यदा तु यस्मिन् काले भवान् सर्वं प्रपञ्चं अवकृष्य शयीत शयनं कुर्वीत तर्हि तदा तत्र सत् चेतनः न आसीत् न चासदासीत्। अचेतनं नासीत् न चोभयं सदसदात्मकप्रपञ्चो सीत्। न च कालस्य जवो निमेषकलामुहूर्तादिः न च शास्त्रं वेदपुराणादि न किमपि अन्यद्वस्तु, नासीत्।

'नासदासीन्नो सदासीत्तदानीम्' इति श्रुतेः।

'तदनु प्रविश्य सच्च त्यच्चाभवत्' इत्यादिश्रुतेश्च। भगवदनुप्रवेशानन्तरमेव सदसच्छब्दवाच्यस्य वस्तुत्वसिद्धिः। सृष्टेरादौ परमात्मनः सकाशात् ऋषिः ब्रह्मा उदगादुत्पन्नः। यमनु ब्रह्मानन्तरम्। उभये निवृत्तिनिष्ठाः सनकादयः प्रवृत्तिनिष्ठाः श्च देवाः उत्पन्नाः। अतः तं ब्रह्मादिजगत्कारणम् अग्रसरं सृष्टेः पूर्वसिद्धं त्वाम् इह जगति अवरजन्मलयः त्पत्तिविनाशवान् पुरुषः को नु वेद जानाति। नु इति वितर्के। न कोऽपि जानातीत्यर्थः। बत इति आश्चर्ये। अतः भगवतः प्राप्यत्वात् भक्तिरेव समाश्रयणीयेति भावः। इह लोके यतः ऋषिरुदगात् यमनु उभये देवगणाः उदगुः। अग्रसरं तं को यदा भवान् सर्वमवकृष्य शयीत तर्हि सत् नासीत् असच्च नासीत्, उभयं च नासीत् कालजवश्च नासीत्। तत्र किमपि त्यन्वयः ॥२४॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

यतो निर्विशेषब्रह्मणः सकाशाद्वाचो वाचकशब्दा अप्राप्य मुख्यया वृत्त्याऽप्रकाश्यैव निवर्तन्ते । अद्धा प्रत्यक्षतः प्रवोचत् प्रावोचत् । इयं विविधा आकाशादिरूपा सृष्टिः कुतः कस्माज्जाता । कुतः कस्माच्चायाता । स्थितिं प्राप्तेत्यपि को वेद, न कोऽपीत्यर्थः । अस्य सर्वस्यैव देवादिपर्यन्तस्य विश्वस्य विसर्जनेन सृष्ट्या हेतुना देवा अपि अर्वाक् अर्वाचीनाः । अथेत्यर्थे अथाशब्दः आकारान्तः अत इत्यर्थः । अनेजत् स्वस्वरूपाच्चलनरहितं मनसोऽपि वेगवत्तरं मनः प्राप्यस्थाने पूर्वमेव सत्त्वात्तदगोचरमित्यर्थः । देवा इन्द्रियाणि मर्शत्पूर्वमेव गतमित्यर्थः । सर्वागोचरत्वादेवेति भावः । तिष्ठत् स्थिरमपि तस्मिन् परमात्मचैतन्ये इति तदाश्रयत्वेन वर्तमानस्सन्नित्यर्थः । स मातरिश्वा सूत्राख्यो वायुः अपस्तद्वत् प्रवाहापन्नाः सर्वेषां जीवानां भाजनगमनादिलक्षणास्सर्वचेष्टा दधाति सम्पादयतीत्यर्थः । आध्यात्मिका इन्द्रियाधिष्ठातारः आधिदैविकाः लोकाधिष्ठातारः । तं विदाथेत्यादिश्रुतिर्व्याख्यातचरी । यतो ज्ञानं दुर्घटम् अतः ॥२४॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

यतो ध्यानज्ञानद्वेषभयकामसम्बन्धस्नेहभक्तिपराणां विषमस्वभावकर्मणां सर्वेषां त्वत्सायुज्यमेकमेव फलं स्यादतस्तव तत्त्वं दुर्ज्ञेयं वदन्त्यो "यतो वाचः" इत्याद्याः श्रुतयः उररीकुर्वन्ति ता आह–यत इति । ब्रह्मप्रकाशनाय प्रयोक्तृभिः सर्वथा प्रयुज्यमाना अपि वाचः मनसा सह यदप्राप्य यतो यस्मान्निर्विकल्पादद्वयानन्दात्मनो निवर्तन्ते तद्ब्रह्मण आनन्दं विद्वान् जानन् कुतश्चिन्निमित्तान्न बिभेतीति अलभ्यलाभमाहात्म्यपरेयम् । परमात्मनो दुर्विज्ञेयत्वे श्रुत्यन्तरमुदाहरति–क इति । तं परमात्मानमद्धा साक्षात्को वेद जानाति । इह कः प्रवोचत्प्रावोचद्वदति । इयं विसृष्टिर्विविधा सृष्टिः कुतो जाता कुतः कस्मादायाता । ननु हिरण्यगर्भादेः सकाशात्सृष्टिरुत्पद्यते नेत्याह–अर्वाग्देवा अर्वाचीना ब्रह्मादिदेवा अस्य जगतो विसर्जने न समर्था इत्यर्थः । अथ इत्याकारान्तो निपातोऽथेत्यर्थे । अथा तं को वेद यत एतत्सर्वमाबभूवेति दुर्विज्ञेयत्वप्रतिपादनपरेयम् । ननु यदि कोऽपि न वेद कथं तर्हि संसारनिवृत्तिः तदर्थं तत्स्वरूपमनिर्वचनीयत्वेनाह–अनेजदिति । तत्परमात्मतत्त्वमनेजत्स्वरूपाच्चलनरहितमेकद्वितीयं मनसो जवीयः मनसोऽपि वेगवत्तमम् । यत्र मनो धावति तत्र तस्य पूर्वमेव तद्वर्तत इत्यर्थः । एतत्परमात्मतत्त्वं देवश्चक्षुरादीनीन्द्रियाणि तदधिष्ठातारो वा नाप्नुवन् न प्राप्ताः । तत्र हेतुः–यस्मान्मनसोऽपि पूर्वमर्शत् पूर्वमेवागच्छत् । तत्तिष्ठत्स्थितमपि धावतोऽन्यान्वागिन्द्रियादीनत्येति अतिक्रम्य गच्छति । मातरिश्वा वायुः । तस्मिन्नपः प्राणिनां चेष्टालक्षणानि कर्माणि । दधाति धारयति । यः सर्वप्राणभृत् क्रियात्मकः यदाश्रयाणि कार्यकारणजातानि यस्मिन्नोतानि प्रोतानि च । यः सूत्रसंज्ञः वायुर्वै गौतमसूत्रमित्यादिभरुक्तः सर्वस्य जगतो विधारयिता स मातरिश्वा वायुरिति ज्ञातव्यम् । अनिर्वचनपरेयम् । अथ स्वामिनाम्–

"क्वाहं बुद्ध्यादिसंरुद्धः क्व च भूमन्महस्तव । दीनबन्धो दयासिन्धो भक्तिं मे नृहरे दिश ॥"

अत्यन्ताघटने क्व द्वौ । हे भूमन् ! परिच्छिन्नव्यापकबुद्ध्यादिसंरुद्धः अहं क्व । तव महः स्वरूपं वागाद्यगोचरं क्व । त्वज्ज्ञाने अत्यन्तासम्भावना अतो हे नृहरे ! भक्तिं दिश देहि ॥२४॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ शास्त्रं विना भवतो दुरधिगमत्वमाह–क्व इहेति । बत इत्याश्चर्ये । हे भगवन् ! अवरजन्मलयः आदिसृष्टेः पश्चाज्जन्मलयभागी क इह लोके प्रथमसृष्टेः पूर्वभाविनं त्वां वेद जानाति । यतः सकाशात् ऋषिः ब्रह्मा उदगाज्जातः । यस्मात् उभये प्रवृत्तिनिष्ठाः कर्मभावना इन्द्रादयः । निवृत्तिनिष्ठा ब्रह्मभावनाः सनकादयश्च उत्पन्नाः । न हि पितुरुत्पत्तिं पुत्रो जानाति । तर्हि तदा सृष्टेः पूर्वकाले सत्कार्यावस्थं चिद्वस्तु असत्कार्यावस्थमचिद्वस्तु उभयं मिश्ररूपं कार्यं नेत्यर्थः । कालजवः कालवेगः सर्गविषया प्रवृत्तिरिति यावत् । किमपि नामरूपावस्थं नेत्यन्वयः । कदेत्याकाङ्क्षायामाह–यदा शास्त्रमनुकृष्य स्वहृदये भवान् शयीत तदा न सन्तीत्यन्वयः ।

'तद्धेदन्तर्ह्यव्याकृतमासीन्नामरूपाभ्यां व्याक्रियत ।' इत्यादिश्रुतेः ॥ तथा च मनुराह —

'आ

ततः

योऽस

अप

तस्मि

सृष्टि के पहले
पुरुष इस लोकमें जान
जीवमात्र है वह आपके
भी यह प्रत्यक्ष है कि जो
सकता यदि जानेगा तो
यदि जानेंगे तो वेद शास

जनिमसतः सतो
त्रिगुणमयः पुमा

ये, असतः, जनिम्,
विपणम्, ऋतम्, स्मरन्ति, ते,
विषये, अबोधकृता, ततः, अ

इतोऽपि ज्ञानं न सुशक
वदन्ति असत एव ब्रह्मत्वस्योत
उतापि ये च साङ्ख्यादयः आ
आरुपितैरारोपितैर्भ्रमैरेवोपदिशन्ति
जङ्घन्यमानाः परियन्ति मूढा अन्धे
एकधा बहुधा चैव दृश्यते जल
तदस्तीत्याह–त्रिगुणमयः पुमानि
सा यस्मात्त्वयि विषये अबोधकृत
सङ्गेऽवबोधरसे ज्ञानघने सः अबो
"मिथ्यातर्कसुकर्कशेरित
श्रीमन्माधव वामन त्रियन

'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥
ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम् । महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥
योऽसावतीन्द्रियग्राह्यः स एव स्वयमुद्बभौ । सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ॥
अप एव ससर्जादौ तासु वीर्यमुपासृजत् । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ॥
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥' इति ॥२४॥

कृष्णप्रिया

सृष्टि के पहले सूक्ष्म जीवमाया युत होकर कारणरुप से वर्तमान आप को वेद शास्त्र के विना कोन सा इस लोकमें जानता है कोइ भी नहीं जानता क्योंकि आप सब से पहले रहनेवाले और इस संसार में जो मात्र है वह आपके पश्चात् उत्पत्ति नाश वाला जीव सब से पहले रहने वाले आप को कैसे जान सकता है। लोकमें यह प्रत्यक्ष है कि जो जिस के पश्चात् उत्पन्न होकर मरने वाला है वह अपने जन्म के पहले रहने को नहि जान यदि जानेगा तो उसको इतिहास को श्रवण कर जानेगा। इसीलीये परमात्मा को जीव नहीं जान सकते जानेंगे तो वेद शास्त्र के श्रवण से ही जान सकते है ॥२४॥

जनिमसतः सतो मृतिमुतात्मनि ये च भिदां विषणमृतं स्मरन्त्युपदिशन्ति त आरुपितैः ।
त्रिगुणमयः पुमानिति भिदा यदबोधकृता त्वयि न ततः परत्र स भवेदवबोधरसे ॥२५॥

कर्दमक्षमा

ये, असतः, जनिम्, स्मरन्ति, ये, च, सतः, एव, मृतिम्, स्मरन्ति, उत, अपि, ये, च, आत्मनि, भिदां, स्मरन्ति, ये, च, ऋतम्, स्मरन्ति, ते, सर्वे, आरुपितैः, एव, उपदिशन्ति, त्रिगुणमयः, पुमान्, इति, हेतुना, या, भिदा, सा, यत्, त्वयि, अबोधकृता, ततः, अबोधात्, परत्र, अवबोधरसे, त्वयि, सः, अबोधः, न, भवेत् ॥२५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इतोऽपि ज्ञानं न सुशकम् उपदिशतामपि भ्रमबाहुल्यादित्याह–जनिमसत इति। असतो जगतो जनिमुत्पत्तिं ये वैशेषिकादयो असत एव ब्रह्मत्वस्योत्पत्तिं ये च पातञ्जलादयः सत एवैकविंशतिप्रकारस्य दुःखस्य नाशं मोक्षं वदन्ति ये नैयायिकाः ये च साङ्ख्यादयः आत्मनि भिदां भेदञ्च ये मीमांसका विपणं कर्मफलव्यवहारमृतं सत्यं स्मरन्ति वदन्ति ते सर्वे रोपितैर्भ्रमैरेवोपदिशन्ति न तत्त्वदृष्ट्या 'सदेव सौभ्येदमग्र आसीत् ब्रह्मैव सन् ब्रह्माप्येति' अनीशया शोचति मुह्यमानाः मानाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः। एकमेवाद्वितीयं ब्रह्म "एक एव हि भूतात्मा भूते भूते व्यवस्थितः। बहुधा चैव दृश्यते जलचन्द्रवत्" इत्यादिश्रुतिविरोधात् किञ्च वस्तुतः पुरुषस्य त्रिगुणमयत्वे सर्वमिदं सङ्गच्छेत न तु त्रिगुणमयः पुमानिति। भिदा यदबोधकृता त्वयीति त्रिगुणमयः पुमानित्यनेन हेतुना या भिदा उपलक्षणमेतद्विदादि त्वयि विषये अबोधकृता तद्विषयाज्ञानविजृम्भिता तर्हि किमज्ञानमस्ति वस्तुतः पुंसि नैवेत्याह ततः अवबोधात्परत्र परे बोधरसे ज्ञानघने सः अबोधो न भवेन्न सम्भवतीत्यर्थः ॥

"मिथ्यातर्कसुकर्कशेरितमहावादान्धकारान्तरभ्राम्यन्मन्दमतेरमन्दमहिमंस्त्वज्ज्ञानवर्त्मास्फुटम् ।
श्रीमन्माधव वामन त्रियनयन श्रीशङ्कर श्रीपते गोविन्देति मुदावदन्मधुपते मुक्तः कदा स्यामहम् ॥" ॥१२॥ ॥२५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — इतोऽस्मादपि हेतोः कुतः यत उपदिशतामुपदेष्टॄणामाचार्याणां भ्रमाधिक्यमस्ति इत्यन्वयः। ननु भक्त्या ब्रह्मात्मबोधेन मोक्ष इती कथं तत्र वादिनां प्रतिपत्तिस्तत्राह-जनिमिति। असतः जगतः कार्यस्योत्पत्तिं पुनस्तस्यैव सत एकविंशतिप्रकारदुःखस्य मृतिं नाशं ध्वंसं मोक्षं ये तार्किकास्तत्र "सदेव सौम्येदमग्र आसीत्" "नासतो विद्यते भावो नाभावो विद्यते सतः।" इत्यादिश्रुतिस्मृतिविरोधस्तथा स्वकारणे समवायः स्वस्मिन् सत्तासमवायो वाजनिः असतः समवायनिरूपकत्वाधारत्वयोरसम्भवेन जन्यनुपपत्तिरसति सत्तासमवाये व्याघातः स्वभावपरित्यागश्च। एकविंशतिदुःखानि-शरीरम्। षडिन्द्रियाणि। षडूर्मयः। सुखम्। दुःखं चेति। तत्र श्रोत्रं चक्षुर्घ्राणं त्वग्रसना मन एतानीन्द्रियाणि। शब्दो रूपं गन्धः स्पर्शो रसः सङ्कल्पादिरेते विषयाः।

"बुभुक्षा च पिपासा च प्राणस्य मनसस्तथा। शोकमोहौ शरीरस्य जरामृत्यू षडूर्मयः॥"

नन्वेकविंशतिदुःखान्तर्गतयोर्मनःश्रवणयोर्नित्यत्वात्कथं तन्नाश इति चेन्न, यद्रूपविशिष्टस्य श्रवणस्य ज्ञानद्वारा दुःखहेतुतया दुःखं तद्रूपस्य कर्णशष्कुल्या नाशेन तद्विशिष्टश्रवणेन्द्रियदुःखस्य नाशात्। एवमात्मसंयोगरूपव्यापारविशिष्टस्यैव मनसो ज्ञानद्वारा दुःखरूपतया व्यापारनाशेन तद्विशिष्टमनोरूपदुःखस्यनाशसम्भवादिति विशेषणाभावे विशिष्टाभावात्। एतच्च मतं विरुद्धं सदेवेति श्रुत्योक्तं तदर्थश्च-हे सौम्य ! श्वेतकेतो इदं नामरूपं विकृतं जगत् अग्रे सृष्टेः पूर्वं सदेवासीत्। सद्वस्तु निर्विशेषंनिरञ्जनं नित्यं निरवयवं यद्वेदान्तेषूपपाद्यं तद्रूपमासीत्। अनेन असद्वादः परिहृतः। सतो मृतिमिह श्रुतिमाह ———

"अथ योऽकामो निष्काम आप्तकाम आत्मकामो ब्रह्मैव सन् ब्रह्माप्येति।"

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिस्थिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥" इति।

अर्थः-सकामस्य गतिमुक्त्वा निष्कामस्य गतिमाह-यस्तु अकामो नास्ति कामोऽभिलाषो यस्य स तथा निष्कामो निर्गतसर्वकामः आप्तकामः पूर्णकामः अत्मैव कामो यस्य स एवम्भूतः आत्मानं निर्विशेषमद्वैतं चिद्रूपं ज्योतिःस्वरूपं पश्यति, स यद्यपि देहवानिव लक्ष्यते तथापीह ब्रह्मैव सन् शरीरपातोत्तरकालं ब्रह्माप्येति प्राप्नोति। एतदर्थद्योतकमेव "यदा सर्वे" इति श्रुतिपद्यं स्पष्टमेव। अनेनैकविंशतिदुःखध्वंसो मोक्ष इत्यपास्तम्। ये चासतो ब्रह्मत्वस्य योगाज्जनिं ये पातञ्जला योगज्ञास्तत्रापि ब्रह्मैव सन्निति श्रुतिविरोधो जन्यब्रह्मत्वस्य नश्वरत्वापत्तिश्च, ये साङ्ख्यादयः आदिना तार्किकादिग्रहः एकमेवेत्यादिश्रुतिविरोधो नास्ति। एकं ब्रह्मैव। नन्वनेकत्वं प्रतीयत इति चेदाह-एक एव परमेश्वरः सर्वेषु भूतेषु व्यवस्थितः। तत्रोपाधेरेकत्वं एकधा भानं तदनेकत्वे चानेकधा भानम्। तत्र दृष्टान्तः-जलचन्द्रवदिति। यथा बहुयोजनव्यापके जलहृदे प्रतिबिम्बितश्चन्द्र एकधैव दृश्यते घटशरावादिषु प्रतिबिम्बितश्चानेकधेति तद्वदिति एतावता साङ्ख्यादिमतं स्पष्टमेव निराकृतम्। अद्वैतप्रतिपादनपरेयम्। ये च मीमांसका इति। कर्मफलं सत्यमिति निराकरोति श्रुतिः "समानवृक्षे पुरुषो निमग्नो ह्यनीशया शोचति मुह्यमानः।" इत्यादि। अर्थः-समाने वृक्षे देहे निमग्नो निरूढाभिमानः पुरुषः अनीशा माया तया मुह्यमानः शोचति अनेकैरपि प्रकारैश्चिन्तामाप्नोतीत्यर्थः। किञ्चाविद्यायामन्तरे मध्ये वर्तमाना अविवेकप्रायाः स्वयं वयमेव धीरा धीमन्त इति मन्यमाना जरारोगाद्यनेकानर्थैर्जङ्घन्यमाना अत्यर्थं हन्यमानाः परियन्ति भ्रमन्ति। स्वयं मूढैरेवोपदिष्टा भ्रमन्तीत्यत्र दृष्टान्तमाह-अन्धेनेति। कर्मफलनिन्दापरेयम्। अथैतदपि स्यादेव पुरुष आत्मा यदि त्रिगुणात्मको भवेदित्याह-किञ्चेति। इदं पूर्वोक्तमेव जनिः सतो मृतिः कर्मफलसत्यत्वात्मभेदादितत्पुरुषस्य त्रिगुणात्मकम्। स्वामिनाम्-मिथ्यातर्केण सुकर्कशं यथा स्यात्तथेति। यो महावादान्धकारस्तस्यान्तरे भ्राम्यतो मन्दमतेः हे अमन्दमहिमन्नतीवोत्कृष्टकीर्ते त्वज्ज्ञानस्य वर्त्मास्फुटं भवति अतः श्रीमन्माधवेत्यादीनि नामानि वदन् संसारात्कदाऽहं मुक्तः स्यां भवेयम्। शिवनामान्यपि विष्णोर्नामानि भवन्तीति ज्ञापयितुमत्र त्रिनयनादिनामोक्तम्। नामापराधश्रवणाच्च यथोक्तं श्रीसनत्कुमारेण —

"सतां निन्दा नाम्नः प्रथममपराधं वितनुते यतः ख्यातिं यातं कथमुत्सहेत्तद्विगर्हाम्।

शिवस्य श्रीविष्णोर्य इह गुणनामादि सकलं धिया भिन्नं पश्येत्स खलु हरिनामाहितकरः ॥"

इत्यादिकं वर्णाश्रमाचारधर्मपराणामयमपराधः भगवदेकपराणां नामपराणां तु नास्तीति तेनैवोक्तम् — "नामापराधांस्तरति एव सदा जपात् ।" इति । श्रीगोविन्दपदारविन्दशरणाः शुद्धा भवन्तीति दिक् ॥★॥ श्रीधरानुयायिनी — उपदिशतामपि हुल्यात्तव ज्ञानं दुष्करमेवेत्याहुः-जनिमिति ।

(१) वैशेषिकाः — परमाण्वादिष्वसत एव व्यणुकादेरुत्पत्तिं वदन्ति । अत्र मते "सदेव सौम्येदमग्र आसीत् ।" इति विरोधः ।

(२) पातञ्जलाश्च यथा-ताम्रादिकमसुवर्णमपि रसायनप्रभावात्सुवर्णं सम्पद्यते तथैवाब्रह्मभूतोऽपि जीवो योगप्रभावाद्ब्रह्म तोऽत्र मते "ब्रह्मैव सन् ब्रह्माप्येति" इत्यादिश्रुतिविरोधः ।

(३) नैयायिकाश्च — षडिन्द्रियाणि षडिन्द्रियविषयाः षडिन्द्रियजन्यज्ञानषट्कं शरीरं वैषयिकसुखं दुःखं कविंशतिदुःखानां सत्यानामेव ज्ञानान्नाशो मोक्ष इति वदन्ति । अत्र मते "नासतो विद्यते भावो नाभावो विद्यते सतः ।" इति विरोधः ।

(४) साङ्ख्यादयश्च-आत्मनि वास्तवं नानात्वं वदन्ति, अत्र मते "एको देवः सर्वभूतेषु गूढः" इत्यादिश्रुतिविरोधः ।

(५) मीमांसकाश्च — "न कदाचिदनीदृशं जगत्" इत्युक्तेर्यज्ञादिफलं स्वर्गादिकमनाश्यं परमपुरुषार्थं च वदन्ति । अत्र "नेह नानास्ति किञ्चन ।" अतोऽन्यदार्तं "तद्यतेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" दिश्रुतिविरोधः ।

एवमिमे पञ्चापि मतप्रवर्तका अन्धपरम्परया भ्रमेणैवोपदिशन्ति शिष्यादीन्न तु तत्त्वदृष्ट्या "अविद्यायामन्तरे वर्तमाना नीयमाना यथान्धाः ।" इत्यादिश्रुतेः 'अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे ।' इति न्यायेनैते स्वयं नष्टाः परानप्युपदेशेन नीत्याशयः । किञ्च-यदि पुरुषे त्रिगुणमयत्वं वास्तवं स्यात्तदाऽनेन हेतुना तत्र भेदादिकमपि वास्तवं स्यात् तच्चासम्भवि भेदादिकं त्वदीयाविद्याशक्त्यैव कल्पितं न वस्तुतः । सा च जीवात्मन्येव प्रभवति न तु त्वय्यपीत्याहुः-सोऽबोधस्त्वयि न तः परत्र "आदित्यवर्णं तमसः परस्तात् ।" इति श्रुतेः तद्विषयत्वाश्रयत्वयोरयोग्ये । तव मायातीतत्वादविद्यायाश्च तित्वात्त्वन्नियम्यत्वाच्चेति भावः । तदपि कुतः अवबोधरसे सम्पूर्णचिदेकरसे यथान्धकारस्तेजोंऽशीभूतस्वर्णाद्यावरकोऽपि सूर्यमावरीतुमसमर्थ एवेत्याशयः । यद्वा- "तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदार्युदायुधम् ।" इत्येवंरूपेण तव गृहे दर्शनमभूत् । तथा च प्राक् तेन रूपेणासत एव तत्र जनिं तवोत्पत्तिं ततस्तेनैव रूपेण सतो वर्तमानस्य तव पुनर्मृतिं वसाने प्रभासे मरणं तथात्मनि त्वयि सच्चिदानन्दविग्रहे भिदां देहात्मभेदं तथा विपणं तव पितृमातृगुर्वादिव्यवहारमृतं वदन्ति, तथा पुराणपुरुषोऽपि श्रीकृष्णस्त्रिगुणमयो जीवविशेष एवेति ये वदन्ति पुनः शिष्येभ्यस्तथैव सर्वमिदमुपदिशन्ति प्रमैमौढ्यादेव न वस्तुत इत्यर्थः । श्रुतिस्मृतियुक्त्यनुभवविरोधात् । तत्फलमनिष्टमेवेत्याहुः-यद्यतः अवबोधरसे त्वयि अबोधमज्ञानं करोतीत्यबोधकृत् प्रागुक्तो वादिसमूहस्तेन तत्सङ्गेन स्फुरितेन भिदा भेदादिना हेतुना ततः जन्मान्तरेऽपि कोऽपि स बोधो मोक्षो वा न भवेदेव तेषामित्यर्थः । किन्तु तेन पापेन जन्ममरणनरकवासादिदुःखमेवानिशमनुभवन्तीति अत्यस्वामिश्लोकपदार्थमाह- मिथ्यातर्केण सुकर्कशं यथा स्यात् तथेरितो यो महावादः स एवान्धकारस्तस्यान्तरे मतेरित्यन्वयः । त्रिनयनेति सम्बुद्धिद्वयं हरिहरयोरभेदबोधनाय । यद्वा-त्रयाणां लोकानां नेत्ररूपो नायको वा । तथा समत्या वा भक्तानां शं सुखं करोतीत्यर्थः । गोविन्द ! गोकुलादौ विहारशील ! मुक्तः मुक्त्युत्तरकालमपि मुदा कानन्देन वदन् कदा स्यामित्यन्वयः ॥★॥

नाथी — अथ तदेवानुमोदमानाः काश्चित्पारिशेष्यप्रमाणेनैव तत्र चरन्त्यः सर्वगुरुमन्यानामपि तदज्ञानं दर्शयन्ति- आत्मनि सर्वस्मिन् जीवे स्थितिं परमात्मन एकस्यामननात् । किञ्च त्वयि परमात्मनि येनावबोधेन त्वय्यन्यथाज्ञानेन

कृता त्रिगुणमयः पुमान् जीव इति भिदा भेदः केनचिन्मन्यते स एव स्वयमबोधस्त्वयि न सम्भवति किमुत तद्भिदेत्यर्थः। यस्मात्ततः परत्र प्रत्यग्रूपे तद्विषयत्वाश्रयत्वयोरयोग्य इत्यर्थः । तत्र हेतुः-अवबोधरसे । स खलु बोधस्त्वं पुनरवबोधैकरसः कथमिव यस्त्वां तिमिरमिव तेजोमालिनं विषयमाश्रयं करोतित्वित्यर्थः । तस्मात्तवाचिन्त्यशक्तिवैभवस्याज्ञानादेव ते तथोत्प्रेक्षन्ते इति भावः । शेषं टीकाभिप्रायम् । अत्र जनिमसत इत्यस्य परिहाराय "सदेव सौम्येदमग्र आसीत्" इति सतो मृतिरित्यस्य "यत्प्रयन्त्यभिसंविशन्ति" इति यथोदके शुद्धमुदकमासिक्तं तादृगेव भवति । एवं "मुनेर्विज्ञानत आत्मा भवति गौतम" इति "समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः" इति च आत्मनि भिदामित्यस्य "एको देवः" इत्यादौ । "सर्वभूतान्तरात्मा" इति । "एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ।" इति च । विपणमृतं स्मरन्तीत्यस्य "यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति । त्रिगुणमय इत्यादेः "आदित्यवर्णं तमसः परस्तात् ।" इति । अचिन्त्यशक्तित्वस्य "पराऽस्य शक्तिर्विविधैव श्रूयते" "मायां तु प्रकृतिं विद्यात्" इत्यादिश्रुतीरवलम्ब्य श्रुतयोऽप्येताः "नैषा तर्केण मतिरापनेया" "प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ"

"अविद्यायामन्तरे वर्तमानाः स्वयं धीरा पण्डितम्मन्यमानाः । जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥" इत्याद्याः ॥

जलचन्द्रवदित्यनेकधात्वमात्रे प्रतिबिम्बतुल्यत्वान्न तु प्रतिबिम्बत्वादेव "अम्बुवदग्रहणात्तु न तथात्वम्" "वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्" इति न्यायात् (१२) ॥२५॥

नीलकण्ठी — एवं स्वमते जगदुत्पत्त्यादेर्दुर्ज्ञेयत्वमुक्त्वा परोक्तान् सृष्ट्युपपादनप्रकारान् दूषयति-जनिमसत इति । अत्रासतः सत इति पदद्वयं पञ्चम्यन्तं कार्यस्येति षष्ठ्यन्तं पदं जनिमृतिसम्बन्धवाचकमध्याहार्यम् । ततश्चासतः कारणात् सतोऽसतो वा कार्यस्योत्पत्तिप्रलयाविति शून्यवादिनां द्वौ पक्षावुक्तौ तौ चात्यन्तहेयौ न ह्यसतः सतः शशशृङ्गस्य विकारो विवर्तो वा क्वचिद्दृष्टम् । अप्रकृतिकविकारासम्भवान्निरधिष्ठानकभ्रमासम्भवाच्च कथमसतः सज्जायेतेत्यसद्धेतुककार्यासम्भवश्रुतेश्च । असत एव कारणादसतः सतो वा कार्यस्य जनिमृती वक्तव्ये । तत्र वैशेषिकास्तार्किकाश्च कारकव्यापारात्प्रागसदेव कार्यं तदूर्ध्वमुत्पन्नं ध्वस्तं च निरन्वयनाशमेति । ईदृशावेव जीवोत्पत्तिविनाशाविच्छन्तः पाञ्चरात्राः कृतहानाकृताभ्यागमदोषं न पश्यन्ति । एवं सर्वेऽपि तैर्थिकाः सतो बन्धस्य निरन्वयनाशमसतो मोक्षस्य जनिं चेच्छन्ति । साङ्ख्यपातञ्जलास्तु असत उत्पत्तौ निदर्शनाभावात्कूर्मावयववत्सिन्धुसैन्धववद्वा सत एव कार्यस्याविर्भावतिरोभावावेव जनिमृती इत्याहुः । अत्यन्तासतो जन्मायोगादत्यन्तसतो निरन्वयनाशायोगाच्च एकस्य सतो विवर्तः कार्यमिति वृद्धाः । तद्व्याख्यातं बृहदुपलब्धमित्यत्र । एवं जनिमसतः सतो मृतिं ये स्मरन्ती उत अपि च आत्मनि भिदां भेदं च ये स्मरन्ति साङ्ख्यादयः यथा जन्ममरणकरणानां प्रतिनियमादनुयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चेति । तार्किकास्तु परसमवेतानां जन्मादीनामात्मनि घटनाभिव व्योम्नि भेदकत्वासिद्धेरात्मसमवेतमेव दुःखं स्वाश्रयभेदसिद्धिहेतुर्वाच्यं नान्यसमवेतमित्याहुः । ये च मीमांसका विपणं व्यवहारम् ऋतं प्रवाहनित्यं "न कदाचिदनीदृशं जगत्" इति स्मरन्ति ते सर्वे आरुपितैरारोपैः क्षेत्रधर्मं क्षेत्रज्ञे दृतय इवेत्यत्रोक्तदिशा स्फटिके जपाकुसुमलौहित्यवदारोप्यात्मानं दुःखादिमन्तमुपदिशन्ति स्वशिष्यान्प्रति बोधयन्ति । अत्रेदं विवक्षितं यावद्दुःखनाशो हि तेषां मोक्षः स च घटे यावद्रूपनाशवदात्मनि धर्मिनाशमन्तरेण न सम्भवति वक्ष्यमाणरीत्या जगतः सत्यत्वं प्रधानाद्युपादानत्वं च न सम्भवतीति ते "अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे ।" इति न्यायेन स्वयं नष्टाः परानपि नाशयन्तीति तदिदमाह श्रुतिः-

"अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः । जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥" इति ।

त्रिगुणमयः पुमानित्यत्रेतिशब्दः प्रकारार्थः । तेनैवंप्रकारकम् आकाशकालदिङ्मनसां पार्थिवाप्यतैजसवायवीयपरमाणूनां च नित्यत्वमपि तेषु सत्त्वं निरवयवत्वं चारोप्य स्वोत्प्रेक्षितमारम्भप्रकारमपश्यन्तः उपदिशन्तीत्यपि सङ्ग्राह्यम् नन्वारुपितैरुदिशन्तीत्येतदेव कुत इत्याशङ्क्याह- भिदा यदबोधकृतेति । भिदा भेदो यत् यस्मादबोधेन भावरूपेण

अमित्रादिपदवदबोध
ब्रह्मणि जगत्कल्पना
हि निद्रारूपमज्ञानं व्य
त्रिगुणात्मकं प्रकृतिरि
जगज्जनयितृज्ञानाभाव
ह्यभावस्य स्वप्रतियोग्य
गौरश्च इतिवदग्निरुष्ण
अन्यत्र तदभावान्नेति
समवायवदेवौष्ण्यमपि
लोहितः प्रकाशते बालो
स्वतन्त्रमिति श्लिष्टम् ।

"तम आसीत्त

तमःशब्दिताया
इदमित्यत्रोपपादयिष्यते ।
सुष्ठूक्तम् । भिदा यदबोध
आह-त्वयि नेति । स अब
इति श्रुतेः । अत एवावबो

"स यथा सैन्धव

अकार्यकारणे त्व
"अस्मान्मायी सृजते वि
पृथगाम्नानात् (१२) ॥२५

जनिमसत इत्यस्य
सदेवेति सत्तादात्म्येनैवेत्यर्थ
पीड्यमाना भ्रमन्ति ।

'एक एव हि भूतात

इति पूर्णवाक्यमिति
तदज्ञानं दर्शयन्ति-जनिमिति
त्वय्यन्यथाज्ञानेन कृता त्रिगुण
तद्भिदेत्यर्थः । यस्मात्ततः परत्र
कथमिव यस्त्वां तिमिरमिव
इति भावः । शेषं टीकाभिप्रा
"यत्प्रयन्त्यभिसंविशन्ति" इति
"समाने वृक्षे पुरुषो निमग्न

मित्रादिपदवदबोधपदस्यात्र भाववाचित्वं न त्वभावपरत्वं तेनाबोधेन कृता । इदमत्राकूतं स्वप्नद्रष्टरीव स्वरूपाबोधकृतैवेयं हाणि जगत्कल्पना न च स्वप्नादिकं निःस्वरूपाज्ज्ञानाभावाद्भवितुमर्हति तस्य सर्वत्र सुलभ्वेन सर्वस्मात्सर्वोद्भवापत्तेः । दृश्यते निद्रारूपमज्ञानं व्यावहारिकौ जगज्जीवावावृत्य स्वाप्नौ जगज्जीवौ विक्षिपतीति तस्मादावरणविक्षेपशक्तियोगादज्ञानं भावरूपं गुणात्मकं प्रकृतिरविद्या माया प्रधानं देवात्मशक्तिरव्यक्तमव्याकृतमित्यादिशब्दैर्वेदान्तेषूच्यते "न तं विदाथ" इति मन्त्रेऽपि ज्जनयितृज्ञानाभावमुक्त्वा नीहारेण प्रावृता इति तन्निमित्तं भावपमज्ञानमुक्तम् । "अज्ञानेनावृतं ज्ञानम्" इति गीतास्वपि न भावस्य स्वप्रतियोग्यावरकत्वं खड्गकोशवत्सम्भवत्यतो भावरूपमेवाज्ञानं न च तेन द्वैतापत्तिः शक्तिशक्तिमतोरभेदात् । भेदे हि गस्य इतिवदग्निरुष्ण इति सामानाधिकरण्यं न स्यात् । न च वह्नावौष्ण्यं समवायसम्बन्धेनास्तीति तत्र सामानाधिकरण्यं युज्यते । अन्यत्र तदभावान्नेति वाच्यं वह्निसमवाययोरपि भिन्नत्वाविशेषात्सम्बन्धान्तरापेक्षावश्यम्भावेनाऽनवस्थापातात् । अनुपेक्षायां च समवायवदेवौष्ण्यमपि वह्नौ सम्बन्धान्तरमनपेक्षैवास्तु किं समवायकल्पनेन तस्माद्द्रव्यमेव तत्तदवस्थाविशेषापन्नम् । उष्णो लोहितः प्रकाशते बालो युवा वृद्धो भूर्बीजमङ्कुरो वृक्षः, कनकं कटकं कुण्डलमिति भेदेन विकल्प्यते न त्वौष्ण्यादिकं भावान्तरं स्वतन्त्रमिति शिलष्टम् । न चैवं ब्रह्मणो विचित्रशक्तियोगादैकरस्यहानिः शक्तिमद्विनाशमन्तरेण शक्त्यनाशापत्तिश्चेति वाच्यम्;

"तम आसीत्तमसा गूढमग्रे प्रकेतं सलिलं सर्वमाइदं तुच्छेनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकम् ॥" इति ।

तमःशब्दितायाः शक्तेस्तुच्छत्वश्रवणात् न ह्यध्यस्तेनाधिष्ठानस्य सद्वितीयत्वमस्ति । तमसोऽध्यस्तत्वं चोपरिष्टात्सत इमित्यत्रोपपादयिष्यते । तस्मान्मामहं जानामीत्यनुभवसिद्धमात्माश्रयविषयं वा जीवाश्रयं ब्रह्मविषयं वाऽज्ञानं जगत्कारणमस्तीति मुक्तम् । भिदा यदबोधकृतेति । आरुपितैरुपदिशन्तीति च । ननु स्वप्नदृष्टवन्ममापि कारीभूताज्ञानाधीनतयानीश्वरत्वं स्यादत आह-त्वयि नेति । स अबोधः त्वयि आश्रये न भवेन्न सम्भवति कुतः ततः परत्र अबोधात्परस्मिन् "आदित्यवर्णं तमसः परस्तात्" इति श्रुतेः । अत एवावबोधरसे शुद्धचिन्मात्रे । तथा च श्रुतिः —

"स यथा सैन्धवघनोनन्तरोबाह्यः कृत्स्नो रसघन एवं वा अरेऽयमात्मानन्तरोबाह्यः कृत्स्नप्रज्ञानघनः ॥" इति ।

अकार्यकारणे त्वय्यज्ञानसम्बन्धसम्भावनापि नास्ति मायाशबलस्यापि तवैन्द्रजालिकवन्मायाप्रयोक्तुर्न मायाधीनत्वम् । "अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः ।" इति । मायानियामकात्त्वत्तो मायानियम्यस्य श्वेताश्वतरैः पृथगाम्नानात् (१२) ॥२५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

जनिमसत इत्यस्य टीकायाम् एकविंशतीति षडिन्द्रियाणि । षड्बुद्धयः । षड्विषयाः । सुखं दुःखं शरीरं चेति । श्रुतौ भवेति सत्तादात्म्येनैवेत्यर्थः । ब्रह्मैव सन्नित्यज्ञानरूपतदावरणापगमात् अनीशया मायया जङ्घन्यमानाः परियन्ति दुःखैरत्यन्तं न्यमाना भ्रमन्ति ।

'एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥'

इति पूर्णवाक्यमिति । स्वव्याख्यायां तु अथ तदेवानुमोदमानाः काश्चित्पारिशेष्यप्रमाणेनैव तत्र चरन्त्यः सर्वगुरुमन्यानामपि ज्ञानं दर्शयन्ति-जनिमिति । आत्मनि सर्वस्मिन् जीवे स्थितिं परमात्मन एकस्यामननात् । किञ्च त्वयि परमात्मनि येनावबोधेन न्यथाज्ञानेन कृता त्रिगुणमयः पुमान् जीव इति भिदा भेदः केनचिन्मन्यते स एव स्वयमबोधस्त्वयि न सम्भवति किमुत वेत्यर्थः । यस्मात्ततः परत्र प्रत्यग्रूपे तद्विषयत्वाश्रयत्वयोरयोग्य इत्यर्थः । तत्र हेतुः-अवबोधरसे । स खलु बोधस्त्वं पुनरवबोधैकरसः मिव यस्त्वां तिमिरमिव तेजोमालिनं विषयमाश्रयं करोत्वित्यर्थः । तस्मात्तवाचिन्त्यशक्तिवैभवस्याज्ञानादेव ते तथोत्प्रेक्षन्त भावः । शेषं टीकाभिप्रायम् । अत्र जनिमसत इत्यस्य परिहाराय "सदेव सौम्येदमग्र आसीत्" इति सतो मृतिरित्यस्य न्त्यभिसंविशन्ति" इति यथोदके शुद्धमुदकमासिक्तं तादृगेव भवति । एवं "मुनेर्विज्ञानत आत्मा भवति गौतम" इति, माने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः" इति च आत्मनि भिदामित्यस्य "एको देवः" इत्यादौ ।

"सर्वभूतान्तरात्मा" इति । "एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ।" इति च । विपणमृतं स्मरन्तीत्यस्य "यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति । त्रिगुणमय इत्यादेः "आदित्यवर्णं तमसः परस्तात् ।" इति। अचिन्त्यशक्तित्वस्य "परास्य शक्तिर्विविधैव श्रूयते" "मायां तु प्रकृतिं विद्यात्" इत्यादिश्रुतीरवलम्ब्य श्रुतयोऽप्येताः "नैषा तर्केण मतिरापनेया" "प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ"

"अविद्यायामन्तरे वर्तमानाः स्वयं धीरा पण्डितम्मन्यमानाः । जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ।।" इत्याद्याः ।।

जलचन्द्रवदित्यनेकधात्वमात्रे प्रतिबिम्बतुल्यत्वान्न तु प्रतिबिम्बत्वादेव "अम्बुवदग्रहणात्तु न तथात्वम्" (३-२-१९) "वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवदर्शनाच्च " (३-२-२०) इति न्यायेन ।।१२।।२५।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

आत्मनि भिदां ब्रह्मतोऽत्यन्तभिन्नत्वम् । यद्वा, बहुविधं भेदम् । अन्यत्तैर्व्याख्यातम् । यद्वा, असतोऽनित्यस्य धनपुत्रादेः स्मरन्ति चिन्तयन्ति, (गी० १६/१२)

"ईहन्ते काम(दान-[घ, ङ।] भोगार्थमन्यायेनार्थसञ्चयान् ।" इति ।।

किंवा दुष्टस्य स्वस्य दुष्टत्वादात्मानुरूपस्यैव पुत्रादेर्लाभचिन्तनाद्दुष्टत्वं सतः साधुजनस्य स्वदोषेणैव साधुजनं विपक्षीकृत्य तस्य मृतिं मरणोपायं चिन्तयन्तीत्यर्थः । उत अपि, आत्मन्यपि भिदां भिन्नत्वमन्यतो वैलक्षण्यम् — (गी० १६/१३-१५)

"इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।।

असौ मया हतः शत्रुर्हनिष्ये चापरानपि । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ।।

आढ्योऽभिजनवानस्मि कोऽन्योस्ति सदृशो मया । यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ।।"

इत्यादिगीताद्युक्तानुसारिऋ-दुर्म्मदत्वमित्यर्थः । विपणं व्यवहारं पुत्र-दार-धनाद्युपभोगसुखम्, ऋतं सत्यं ध्यायन्ति ये दुर्म्मतयस्ते आरुपितैर्मनसि मिथ्यैवाध्यस्तैर्दुरभिमानैरेव कथयन्तीत्यर्थः । यतः पुमान् सर्वजीवस्त्रिगुणमयः, अतस्तत्रैवासुरस्वभाव निज-राजस-तामसादिस्वभावानुरूपं तत्तत् स्मरन्त्युपदिशन्ति चेति भावः । यद्वा, त्रयो गुणाः-सम्पत्-पौरुष-विद्याः। यथोक्तमर्थशास्त्रे —

"सम्पदात्मोपभोगाय शत्रुनाशाय पौरुषम् । गोष्ठीजयाय विद्येति सङ्ख्याः पुंसां गुणास्त्रयः ।।" इत्येतत् ।।

त्रिगुणमयस्त्रिप्रचुरः पुमान् भवेदिति चोपदिशन्ति, इति ईदृशी भिदा मतिभेदः, यस्य तवाबोधेन त्वद्विषयकाज्ञानेन कृता, तस्मिंस्त्वयि विषये स भिदायाः स्मर्ता उपदेष्टा च पुमान् न भवेत्, त्वद्दिग्ज्ञानवानपि न स्यादित्यर्थः । किन्तु घोरसंसारमेव प्राप्नुयादिति । पूर्वं बहुवचनान्ततया निर्दिष्टस्यापि तच्छब्दस्य पुनः स इत्यनेनैकवचनान्तेन परामर्शस्तेषां मिथ्योपदिशतां मध्ये कश्चिदेकोऽपि त्वदुन्मुखो न स्यादित्येतद्बोधनार्थम् । यद्वा, स परमाज्ञानमयो दुर्व्यवसायस्त्वयि त्वद्विषये नैव भवेत्, त्वद्वर्त्मदिशमपि न स्पृशेत्, किन्तु महानरकायैव कल्पत इति भावः । कुतः ? ततस्तस्मात् पुंसः परत्र दूरतो वर्तमाने । तच्च कुतः ? अवबोधस्य। ज्ञानघनस्य तव ज्ञानेनापि दुर्लभत्वम्, अतस्तथा भेदादिना अत्यधोगतिरेव ।।२५।।

[अथ काश्चिद्गोवर्धनोद्धरणादिलीलां सूचयन्त्यः स्तुवन्ति-जनिमसत इति । असतो दुःसह संवर्तकमेघाशनिझंझानिलादेर्जनिमुत्पत्तिं ये शुक्रतदनुगादयः स्मरन्ति, हृदि चिन्तयन्ति । न केवलं स्मरन्त्येव, उपदिशन्ति, स्वयं प्रकटयन्ति च । तथा सतो गोकुलस्य मृतिम् (भा० १०/२५/७)

"नन्दगोष्ठजिघांसया" इत्युक्तत्वात् । किञ्च आत्मनि त्वयि भिदां श्रीजगदीश्वराद्भिन्नत्वं सामान्यमनुष्यदृष्टित्वमित्यर्थः। तथा ह्युक्तमिन्द्रेण (भा० १०/२५/५) - "वाचालं बालिशं स्तब्धम्" इत्यादि । विपणं व्यवहारमात्रं शक्रध्वजोत्थापनादि

मखं ऋतं नित्यं स्मरन्ति, ते आरुपितैः स्वबुद्ध्यारोपितैः स्वबुद्ध्या निरूपितैर्वा, अज्ञानैरेतदेवाहुः–त्रिगुणेति। अस्तु तावत् मान्यमनुष्यदृष्टित्वम्, यद्यस्मात् कृष्णस्त्रिगुणमयः प्रकृत्यधिष्ठाता पुरुष इति भिदापि लीलापुरुषोत्तमादन्यत्वकथनेऽबोधकृता ज्ञानविजृम्भिता। कथम्भूते त्वयि ? ततः पुरुषात् परत्र, अत एवाबोधरसे, अतस्त्वयि गोवर्धनोद्धरणेन व्रजपालके स इन्द्रस्य ङ्कल्पो न भवेत्, पदं न कुर्य्यात्, (भा० १०/२५/२४) "भग्नस्तम्भो हतोद्यमः" इत्युक्तत्वात्। था च श्रुतिः (ऋक् १०/११३/४) –

> "जज्ञामन एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभि पौंस्यं रणम्। अवृश्चदद्रिमव सस्यदः सृजदस्तभ्णान्नाकं स्वपस्यया युम्॥" इति॥२५॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उक्तार्थविरुद्धतार्किकसिद्धान्तानामज्ञानमूलत्वं भगवद्धानवतां तादृशभ्रमाभावं चाह–जनिमिति। असतो द्रव्यस्य जनिं योगं सतश्च द्रव्यस्य पश्चान्मृतिं नाशं स्मरन्तीत्यसत्यार्थवाद उक्तः। आत्मनि ये च भिदां स्थूलत्वकृशत्वमनुष्यत्वादिरूपां न्ति। कर्मफलस्यैव नित्यत्वाद्वा इदमुक्तम्। विपणं कर्मफलं पुत्रादिव्यवहारम् ऋतं निर्दुष्टं स्वाभाविकं च ये वदन्ति। तैः रोपितैः युक्त्याभासैः उपदिशन्ति इति मतान्तरेष्वप्युपदिशन्तीत्यनुषङ्गः। त्रिगुणमयः गुणैः सत्त्वादिभिः कार्यश्चायमिति गुणगणः। प्रकृतिः पुमान् जीवः इति भिदा। अब्रह्मात्मकतया स्वनिष्ठभेद इति साङ्ख्यमतमुक्तम्। ततः परत्र प्रकृतिपुरुषाभ्यां स्मिन् ज्ञानस्वरूपे त्वयि साक्षात्कृते तर्काभासमूला न भवन्तीत्यर्थः॥२५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अथ तद्विरुद्धमसत्कार्यवादं विरुद्धवादप्रसङ्गान्मतान्तराणि चानूद्य दूषयन्ति जनिमिति।

असतो द्रव्यस्य जनिमुत्पत्तिं सत्तायोगमिति यावत्। सतश्च द्रव्यस्य पश्चात् मृतिं नाशं च ये तार्किकाः स्मरन्ति सत्कार्योऽनूदितः। उतेति पक्षान्तरे। आत्मनि भिदां स्थूलत्वकृशत्वमनुष्यत्वमृगत्वादिरूपां भिदां च ये केचित्स्मरन्तीति कमतानुवादः। ते हि देहमेवात्मानं मन्यन्ते। विपणं देवमनुष्ययोरन्योन्योपकारभावजनितं वाणिज्यफलतुल्यं स्वर्गादिफलम् सत्यं ये मीमांसकाः स्मरन्तीति कर्मफलनित्यत्ववादानुवादः। न केवलं स्मरन्ति किं तु ते तार्किकादयः रोपितैर्युक्त्याभासैरुपदिशन्ति च। तमारुपितैः इति पाठे तं स्वमतसिद्धं युक्त्याभासैरुपदिशन्ति चेत्यर्थः। तथा पुमान् मयः सत्त्वादिगुणत्रयप्रचुरो जीव एव न तु तदतिरिक्तः सन्नीश्वराख्य इति निरीश्वरसाङ्ख्यमतानुवादः। तत्र साधारणं दूषणमित्याहुः– वादिना। इति भिदा इत्थम्भूतो मतभेद इत्यर्थः। यदबोधकृता यस्य तवाबोधकृता याथात्म्याज्ञानप्रयुक्ता चिदचिद्विशिष्टत्वद्रूपस्य एव द्रव्यस्य जगदात्मकस्थूलावस्थारूप कार्यतायोगित्वं पूर्वपूर्वसंस्थानत्यागात्मिकां मृतिमावृत्तिविधादिभिः कर्मफलस्य मत एवानित्यत्वं ब्रह्मज्ञानफलस्य नित्यत्वं जीवासम्भावितसार्वज्ञसत्यसङ्कल्पत्वकरणाधिपत्वादिस्वभावं परमात्मानं नुष्यादिदेहविलक्षणं प्रत्यगात्मानं चाजानताम् इत्थं मतभेदः प्रवृत्त इत्यर्थः। ननु बुद्धिशब्दान्तरादिभेदात् रणयोर्भेदः। अत एवासदेव कार्यमपूर्वमुत्पद्यत इति युक्तम्। किञ्च, कारणमेवचेत् कार्यं कारकव्यापारवैयर्थ्यं सर्वस्य सत्त्वेन कार्यस्य नित्यानित्यविभागश्च न स्यात्। अथ कार्यं सदेव पूर्वमनभिव्यक्तं कारकव्यापारेण अभिव्यज्यते। अतः पारार्थवत्त्वं नित्यानित्यविभागश्चोच्येत तदसत्। अभिव्यक्तेरभिव्यक्त्यन्तरापेक्ष्यत्वेऽनवस्थानादनपेक्षत्वे कार्यस्य प्रसङ्गात्। तदुत्पत्त्यभ्युपगमेऽसत्कार्यवादप्रसङ्गात्। अतोऽसतः कार्यस्य उत्पत्तिहेतुत्वेनैव कारकव्यापारार्थवत्त्वमतश्च सिद्धिः। नन्वसत्कार्यवादिनोऽपि कारकव्यापारो नोपपद्यते। प्रागुत्पत्तेः कार्यस्यासत्त्वात्कार्यादन्यत्र कारकव्यापारेण म्। तत्रान्यत्वाविशेषात् तन्तुगतकारकव्यापारेण घटोत्पत्तिरपि प्रसज्येत। नैवम्। यत्कार्योत्पादनशक्तं यत् कारणं व्यापारेण तत्कार्योत्पत्तिसिद्धेः। अत्रोच्यते सत एव मृद्धिरण्यादेर्द्रव्यस्य संस्थानान्तरभाक्त्वमात्रेण बुद्धिशब्दान्तराद्युत्पत्तेर्न सत्कार्यवादप्रसङ्गः। तत्तवदस्थस्य तस्यैव द्रव्यस्य ते ते शब्दास्तानि तानि च कार्याणीति द्रव्यस्य तत्तदवस्थतायाः

कारकव्यापारायत्तत्वेन तस्यार्थवत्त्वोपपत्तिः अभिव्यक्त्यनुबन्धीनि चोद्यानी तस्या अनभ्युपगमादेव परिहृतानि। उत्पत्त्यभ्युपगमेऽपि सत्कार्यवादो न विरुध्यते। सत एवोत्पत्तेः। ननु विप्रतिषिद्धमभिधीयते। पूर्वमेव सत्तदुत्पद्यते चेतीति चेन्न। द्रव्यस्योत्तरसंस्थानयोगो हि पूर्वपूर्वसंस्थानसंस्थितस्य विनाशः स्वावस्थितस्य तूत्पत्तिः अतः सर्वावस्थस्य द्रव्यस्य सत्त्वात्सत्कार्यवादो न विरुध्यते। संस्थानस्यासतः उत्पत्तावसत्कार्यसङ्ग इति चेत् असत्कार्यवादिनोऽप्युत्पत्तेरनुत्पत्तिमत्त्वे सत्कार्यवादप्रसङ्गः। उत्पत्तिमत्त्वे चानवस्था अस्माकं त्ववस्थानाम् उत्पत्तिस्थानीयानां पृथक्प्रतिपत्तिकार्ययोगावस्थावत एव उत्पत्त्यादिकं सर्वं निरवद्यमिति एवं ममायं देहः शिरसि मे दुःखम्। पादे मे वेदनेत्यपोरक्षमेव देहात्मनो व्यतिरेकप्रतीतेः 'नित्यो नित्यानां चेतनश्चेतनानाम्' इत्यादिशास्त्राच्च तदवगतेः 'पुमान्न देवो न नरः।' इत्यादिना देवत्वादिप्रतिषेधत्वात्मना भिदावादोऽज्ञानमूलः

"तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" "नास्त्यकृतः कृतेन" ॥ इत्यादिश्रुतेः।

"दाक्षायणयज्ञेन सुवर्गकामो यजेत।" इत्यादिवृत्तिविधानाच्च। कर्मफलानित्यत्वावगतेस्तन्नित्यत्ववादोऽप्यज्ञानमूलः। 'यः सर्वज्ञः सर्ववित्। सत्यकामः सत्यसङ्कल्पः। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।' 'करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ॥' इत्यादीनि बहुप्रमाणानीश्वरेऽवगन्तव्यानि। इत्थमेषां वादानामज्ञानमूलत्वमुक्तम्। अथ भगवज्ज्ञानवतां तादृशभ्रमाभावमाहुः–त्वयीति। ततः पूर्वप्रस्तुतसदसच्छब्दवाच्यप्रकृतिपुरुषाभ्यां परत्र परस्मिन् विलक्षण इति यावत्। अवबोधरसे ज्ञानस्वरूपे त्वयि यथावद्विज्ञाते सतीति शेषः। स अबोधः तन्मूलो वादभेदश्च नास्तीत्यर्थः ॥२५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

"त्रिगुणमयः पुमानिति यदबोधकृता त्वयि न तु भवेत्तदवबोधरसे। सदिवमनस्त्रिवृत्त्वयि भक्त्यसतां मनुजादयो विमृशन्त्यशेषमिदमार्ततयाऽऽत्मविदः ॥१३॥२६॥"

"सत्त्वादिकं देहमथो मनश्च सत्त्वादिबद्धं च वदन्त्यसन्तः।

परं पुमांसं न सुरास्तुतैर्हि जीवाः सुदृष्टाः परमार्थरूपाः ॥"

इतिश्रुत्यर्थोपनिबद्धस्य त्रिगुणमय इत्यस्यायमर्थः।

पुमान् जीवस्त्रिगुणमयः सत्त्वादिगुणबद्ध इति जीवस्यापि त्रिगुणबद्धता अबोधकृता अज्ञानकृता यतस्तस्मादवबोधरसे त्वयीति सप्तमी षष्ठ्यर्थे। त्रिवृत्त्रिगुणात्मकं मनः त्वयि तवापि सदिव विद्यत इत्यर्थः। असतां पक्षो भवति न तु सताम्। सतां पक्षस्त्वयमित्याहुः–मनुजादय इति। आत्मविदः सम्यक् परमात्मतत्त्वज्ञानिनः मनुजानामादयो देवाः भवतस्त्रिगुणातीतत्वाद्भवानेव परमानन्दस्त्वदन्यदिदमशेषं जीवजातम् आर्ततया स्थितमित्येव विमृशन्ति जानन्ति —

"त्रैगुण्यदेहेन्द्रियकामा सुराजानते हरिम्। त्रिगुणातीतमीशेशमतः पूर्णं सुखं सुराः ॥

जानन्ति गुणबद्धत्वाज्जीवानार्तांश्च कृत्स्नशः। अनार्तस्य प्रसादेन तेषामार्तिविनाशनम् ॥"

इति चैतन्यविवेके ॥१३॥२७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ देवानुमोदमानाः काश्चित् पारिशेष्यप्रमाणे तत्र चरन्त्यः सर्व्वगुरुम्मन्यानामपि तदज्ञानं दर्शयन्ति–जनिमिति। आत्मनि सर्व्वस्मिन् भिदां स्वतन्त्रां स्थितिं परमात्मन एकस्यामननात्। किञ्च। त्वयि परमात्मनि येनावबोधेनान्यथाज्ञानेन कृता त्रिगुणमयः पुमान् जीव इति भिदा भेदः कैश्चिन्मन्यते स एव स्वयमबोधस्त्वयि न सम्भवति। किमुत तद्भिदेत्यर्थः। ये यस्मात् [illegible] एतद्विषयत्वाश्रयत्वयोरयोग्य इत्यर्थः। तत्र हेतुः अवबोधरसे ॥२५॥

नि। उत्पत्त्यभ्युपगमेऽपि
द्रव्यस्योत्तरसंस्थानयोगो
कार्यवादो न विरुध्यते।
। उत्पत्तिमत्त्वे चानवस्था
वद्यमिति एवं ममायं देहः
नानाम्' इत्यादिशास्त्राच्च

न" ॥ इत्यादिश्रुतेः।
त्यत्ववादोऽप्यज्ञानमूलः।
या च।' 'करणाधिपाधिपो
मज्ञानमूलत्वमुक्तम्। अथ
रत्र परस्मिन् विलक्षण इति
नास्तीत्यर्थः ॥२५॥

त्वयि भक्त्यसतां मनुजादयो

ज्ञानकृता यतस्तस्मादवबोधरसे
पक्षो भवति न तु सताम्। सतां
ः भवतस्त्रिगुणातीतत्वाद्भवानेव

॥"

ानं दर्शयन्ति-जनिमिति। आत्मनि
बोधेनान्यथाज्ञानेन कृता त्रिगुणमयः
त तद्भिदेत्यर्थः। ये यस्मात्ततः पर

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

उत अपि केचित्साङ्ख्या आत्मभिदां स्मरन्ति विपणं कर्मफलम् ऋतं सत्यमिति केचिन्मीमांसकाः स्मरन्ति। ते सर्वे आरुपितैः स्वस्वमत्यनुसारेण कृतैरारोपैरेवोपदिशन्ति न तु तत्त्वतः किमपि केऽपि निर्णेतुं शक्नुवन्ति। अतस्तव तत्त्वविचारणे ते भ्रान्ता एव। ननु कथममी भ्रान्ताः पुरुषममी जानन्त्येव तज्ज्ञानेनैव मज्ज्ञानमित्याहुः-त्रिगुणमयः पुमानित्यादि। यत् यद्यपि त्रिगुणमयः इति भिदा अबोधकृता अज्ञानकृता पुरुषोऽपि त्वदंश एव अतस्तदभिन्न एव तथापि स त्रिगुणमयः ब्रह्मविष्णुरुद्रात्मकत्वात् क एव त्वं तु निर्गुण एव तेन ततः पुरुषात्परे त्वयि शास्त्रकृताम् अबोधो वादे न भवेत् न भवितुमर्हतीति। कीदृशे त्वयि। अवबोधरसे ज्ञानानन्दघने ॥२५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ननु सर्वेषामेवार्वाचीनत्वात् शास्त्रकृतां च शास्त्रस्य चार्वाचीनत्वे शास्त्रकृतोऽत्र रमन्ते एव, नोचेदन्योन्यं कथं विवदन्ते ? तव तत्त्वं न जानन्त्येवेत्याहुः-जनिमसत इत्यादि। असतो जगत उत्पत्तिं केचिद्वैशेषिकाः स्मरन्ति, उत अपि च केचित् साङ्ख्या आत्मभिदां स्मरन्ति, विपणं कर्मफलमृतं सत्यमिति केचिन्मीमांसकाः स्मरन्ति, ते सर्वे आरुपितेरारोपैर्भ्रमैरेवोपदिशन्ति, न तु तत्त्वतः किमपि केऽपि निर्णेतुं शक्नुवन्ति, अतः कार्यविवेचन एव ते भ्रान्ताः, अस्तु तावद्दूरे सर्वकारणकारणस्य तव तत्त्वनिरूपणम्। ननु कथं मत्तत्त्वनिरूपणं दूरे वर्ततां निरुच्यताम्- पुरुषं तु ते जानन्त्येव, पुरुषज्ञानेनैव मज्ज्ञानं भवतीत्याहुः-त्रिगुणमयः पुमानित्यादि। यत् यद्यपि पुमानिति भिदा अबोधकृता अज्ञानकृताः, पुरुषोऽपि त्वमेवेति वास्तवम्। तथापि स त्रिगुणमयः, त्वं त्रिगुणरहितः, तेन ततः परत्र जन्यात् पुरुषादपि परे त्वयि स शास्त्रकृतामवबोधो वादो न तु भवेत्, त्वत्समीपगामी न भवतीत्यर्थः। कथम्भूते त्वयि ? अवबोधरसे अवबोधोऽपि यस्मात्तथाभूतो रसो लीला यस्य। यद्वा, त्रिगुण-प्रकृतिमय इति त्रिगुणमयत्वं तु न तथा ॥२५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

न केवलं भगवतस्तवैव तत्त्वं दुर्ज्ञेयमपि तु विदुषामैकमत्याभावात् परमपुरुषार्थतया जीवात्मनोऽपि तत्त्वतो ज्ञानं प्रायो दुर्लभमित्याहुः-जनिमसत इति। असत एव ब्रह्मत्वस्योत्पत्तिं मोक्षं ये पातञ्जलादयो वदन्ति षडिन्द्रियाणि। षड्बुद्धयः। षडूर्मयः। सुखं दुःखम्। शरीरं चेत्येकविंशतिप्रकारस्य दुःखस्य सत एव मृतिं नाशं मोक्षं वदन्ति ये नैयायिकाः उत अपि आत्मनि गुणमयात्मनि भिदां तस्य अगुणमयात्मवतामेव मोक्षं वदन्ति ये साङ्ख्यादयः विपणं व्यवहारं कर्मफलं स्वर्गाद्येव ऋतं परमपुरुषार्थं स्मरन्ति वदन्ति ये च मीमांसकास्ते सर्वे आरुपितैः आरोपितैरेवोपदिशन्ति। न तत्त्वदृष्ट्या। यतः पुरुषस्य जीवात्मनस्त्रिगुणमयत्वे सर्वमिदं सङ्गच्छेत। न तु तदस्ति। स तु वस्तुतो निर्गुण एवेति द्योतयन्त्यः आहुः-त्रिगुणमयः पुमान् जीव इति। या भिदा जीवस्य त्रिगुणमयत्वरूपो यो भेद इत्यर्थः। सा यत् यस्मात् अबोधकृता या त्वदीया मायाशक्तिस्तत्कल्पितैव। न तु वस्तुत इत्यर्थः। सा च जीवात्मन्येव प्रभवति। न तु त्वयि परमात्मनीत्याहुः-स अबोधस्त्वयि जीवस्यैवाविद्यया आवरणं प्रतीतम्। न तु तवेत्यर्थः। कुतः। ततः परत्र तव मायातीतत्वादविद्यायाश्च मायावृत्तित्वात्त्वन्नियम्यत्वाच्चेति कीदृशे। अवबोधरसे। सम्पूर्णचिदेकरसे। यथान्धकारस्तेजःपुञ्जं सूर्यमावरीतुमसमर्थस्तेजःकणं स्वर्णरजतादिकं स्वव्याप्तं करोत्येवेति भावः। अत्र —

"अविद्यायामन्तरे वर्तमानाः स्वयं धीरा पण्डितम्मन्यमानाः। जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥" इत्याद्याः ॥

अर्थश्च - पण्डितं मन्यमानाः पण्डितम्मन्याः जङ्घन्यमाना वादविवादैरित्यर्थः। पीड्यमानाः परियन्ति भ्रमन्ति ॥२५॥

गूढार्थदीपिनी

किञ्चोपदेशकर्तॄणामाचार्याणामपि भ्रमबाहुल्यात्तव ज्ञानं दुष्करमेव अतस्तत्तन्मतानि प्रदर्श्य तानि युक्तियुक्तं खण्डयन्त्यो निर्दुष्टो भक्तिमार्ग एव सर्वैराश्रयणीय इत्याहुः श्रुतयः जनिमसत इति।

(पञ्चवादिमतखण्डनपरेयम्)

पद्यानुवादः

काणादा असतो जनिं, विधिबलाद्ब्रह्मेति पातञ्जला जीवास्ताभ्रवदत्र दुःखविरतिं मोक्षं च नैयायिकाः।

साङ्ख्या आत्मनि भेदमाहुरिति वा भाट्टाः फले नित्यतां पञ्चोक्ताः [उक्ता पूर्वोक्ताः] कुमतप्रवर्तकतया भ्रान्ता इमे वादिनः॥

गुणमये पुरुषे मतसङ्गतिर्न तु तथा त्वदबोधकृता भिदा।

त्वयि परे विदिते तु कुतो भ्रमो भजनतो जनतोत्तमभावतः★ ॥१२॥

★ [जनताया उत्तमभावतः श्रद्धाभक्तितः यद्भजनं तस्मात् त्वयि विदिते सति कुतो भ्रम इत्यन्वयः।]

सङ्क्षिप्तसार्थान्वयः — असतो जनिं काणादा वैशेषिकाः स्मरन्ति स्वप्नपदार्थवत् न तु विचार्य वदन्ति। असत एव ब्रह्मत्वस्य जनिमुत्पत्तिं पातञ्जलाः स्मरन्ति। सतः सत्यस्यैव दुःखस्य मृतिं नाशं मोक्षं नैयायिकाः स्मरन्ति। उत अपि ये च साङ्ख्यादयः आत्मनि भिदां स्मरन्ति। ये च मीमांसका विपणं कर्मफलव्यवहारम् ऋतं सत्यं स्मरन्ति ते सर्वे आरोपितैर्भ्रमैरेव उपदिशन्ति न तत्त्वदृष्ट्या। त्रिगुणमयः पुमानिति हेतुना भिदा पञ्चमतभेदः यस्य अबोधकृता तस्मिन् त्वयि विज्ञाते सति जीवानां सोऽबोधस्तन्मूलो भेदश्च न भवेत् न सम्भवति। कथम्भूते त्वयि ? ततः अबोधात्परत्र परस्मिन्। पुनः अवबोधरसे ज्ञानघने च।

अत्र काणादपातञ्जलनैयायिकसाङ्ख्यमीमांसकानां पञ्चानामपि मतानि प्रदर्श्य षष्ठेन वेदान्तशास्त्रेण तानि खण्डयन्ति। तथा हि। काणादा वैशेषिकाः सप्तपदार्थवादिनो नवीनास्तार्किकाः हि उत्पत्तेः पूर्वं कार्यमात्रस्य प्रागभावोऽस्ति; स च तत्तत्प्रागभावस्तत्तत्कार्यं निमित्तकारणं उत्पन्ने कार्ये प्रागभावनाशः; एवमसत उत्पत्तेः प्रागविद्यमानस्य जगतः जनिमुत्पत्तिः स्मरन्ति विदन्ति। तेषां मते 'सदेव सौम्येदमग्र आसीत्' इति श्रुतिविरोधः॥★

★ [हे सौम्य श्वेतकेतो ! अग्रे जगदुत्पत्तेः पूर्वम् इदं नामरूपात्मकं जगत् सदेव सूक्ष्मरूपेण सत्तादात्म्यात् सदेवासीत् अभावाद्भावोत्पत्तेरसम्भवाच्च। तेनासत्कार्यवादिनः काणादा वैशेषिका निरस्ताः।]

पातञ्जलाश्च यथा ताम्रादिकमसुवर्णमपि रसायनप्रभावात्सुवर्णं सम्पद्यते तथैव जिवेऽसत एव ब्रह्मत्वस्य योगादिना जनिमुत्पत्तिं वदन्ति अब्रह्मभूतोऽपि जीवो योगप्रभावाद्ब्रह्म सम्पद्यत इत्यर्थः। तेषां मते "ब्रह्मैव सन् ब्रह्माप्येति" इत्यादिश्रुतिविरोधः॥★

किञ्च यज्जन्यं तद्विनाशीति व्याप्तेः जन्यब्रह्मत्वस्य नश्वरत्वापत्तिश्च। एवमसतो जनिमित्यनेन पक्षद्वयमुद्घोषितम्।

★ [ब्रह्मैव सन् इत्यज्ञानस्वरूपस्यैवाज्ञानेनावरणमात्रं तस्माज्ज्ञानात्पूर्वमपि सदेव ब्रह्म आवरणापगमे स्वस्वरूपं ब्रह्म प्राप्नोतीति तेन ब्रह्मत्वासत्त्ववादिनः पातञ्जला निरस्ताः।]

नैयायिकाश्च सतो मृतिं स्मरन्ति। सत एकविंशतिप्रकारकस्य दुःखस्य सत्यस्यैव मृतिं ज्ञानान्नाशं मोक्षं वदन्ति। तेषां मते "नाभावो विद्यते सतः।" 'अनीशया शोचति मुह्यमानः' इति गीताश्रुतिविरोधः ★। एकविंशतिप्रकारं दुःखं च — षडिन्द्रियाणि षडिन्द्रियविषयाः क्षुत्पिपासे शोकमोहौ जरामृत्यू★★ षडूर्मयः शरीरं सुखं दुःखं चेति॥

★ [अनीशा माया तया मुह्यमानः शोचति दुःखी भवति इति मायिकमज्ञानकल्पितमेव दुःखं न वस्तुतः सतीति तेन दुःखसत्यत्ववादिनो गौतमीया निरस्ताः।]

★★ [बुभुक्षा च पिता सा च प्राणस्य मनसस्तथा। शोकमोहौ शरीरस्य जरामृत्यू षडूर्मयः॥]

उत अपि ये च साङ्ख्यादयः आत्मनि भिदां भेदं वदन्ति । तत्र केचित् जीवानामन्योन्यभेदम् । जीवब्रह्मणोर्भेदम् । वजडयोर्भेदम् । ब्रह्मजडयोर्भेदम् । जडानां परस्परभेदं चेति पञ्चधा भेदं वदन्ति । तेषां मते "एको देवः सर्वभूतेषु गूढः" त्यादिश्रुतिविरोधः ॥★

★ [वस्तुत एक एवात्मा जीवात्मपरमात्मभेदजीवपरस्परभेदादिकं च घटाकाशमठाकाशादिभेदवदुपाधिकल्पितमेव न तेन भेदवादिनो निरीश्वरसाङ्ख्यादयो निरस्ताः ।]

ये च मीमांसका विपणं व्यवहारं कर्मफलं स्वर्गाद्येव ऋतं सत्यं परमपुरुषार्थं च स्मरन्ति वदन्ति । तेषां मते "नेह नानास्ति ञ्चन।" "तद्यतेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादिश्रुतिविरोधः ॥★

★ [अक्षय्यमिति श्रुतेः कर्मफलस्य स्वर्गादेश्चिरस्थायित्वश्रवणेऽपि क्षीयते इत्यग्रिमश्रुत्या तस्य नाशाङ्गीकारः सृष्टिप्रलययोः लोकाश्च, तेन कर्मफलस्य सत्यत्ववादिनो मीमांसका निरस्ताः ।]

एवमिमे पञ्चापि मतप्रवर्तका अन्धपरम्परया आरोपितैर्भ्रमैरेवोपदिशन्ति न तु तत्त्वदृष्ट्येति प्राञ्चः । यतः पुरुषस्य त्रिगुणमयत्वे र्वमिदं★ सङ्गच्छेत, न तु तदस्ति किन्तु स निर्गुण ऐवेति द्योतयन्त्यः श्रुतय आहुः-त्रिगुणमयः पुमान् जीव इति हेतुना या भिदा ञ्चमतभेदः सा यत् यस्मात् अवबोधकृता अविद्याशक्तिकल्पिता न वस्तुतः । सा च जीवात्मन्येव प्रभवति न त्वयीत्याहुः सः अबोधोऽविद्याशक्तिः त्वयि न भवेत् न प्रभवेत् । जीवस्यैवाऽविद्यायाऽऽवरणं घटते न तु तवेत्यर्थः । तत्र हेतुद्वयम्- ततः अबोधात् अविद्याशक्तेः परत्र परेऽसङ्गे । तव मायातीतत्वादविद्यायाश्च मायावृत्तित्वात्त्वन्नियम्यत्वाच्चेति भावः । कुतः ? अवबोधरसे=ज्ञानघने । यद्वा । भिदा=पञ्चमतभिदा यस्य तव अबोधकृता अज्ञानकृता तस्मिन् त्वयि विज्ञाते सति जीवानां सोऽबोधस्तन्मूलो वादभेदश्च न भवेत्, न सम्भवतीत्यन्वयः । कथम्भूते त्वयि ? ततोऽबोधात्परत्र परस्मिन् । पुनः । अवबोधरसे च। स्मरन्ति इत्येवं वदन्तीति वक्तुमुचितेऽपि स्मरन्तीत्युक्त्या स्वाप्निकमिथ्यापदार्थस्मृतिवत् तेषां शास्त्रस्मृतिरपि अतात्त्विकी न्तिमूलैवेति सूचितम् । आरुपितैरित्यत्र गुणाभावेन च तेषूपदेशकेषु तदुपदेश्येषु च गुणाभावादन्धपरम्परान्यायेनोभयोरेव पातः सम्भवेत्, अतः सर्वैरेव विशेषतस्तार्किकैः कुतर्कादि विहाय भगवानेवाश्रयणीय इति ध्वनितम्। अद्वैतप्रतिपादनपरेयं वा ॥१२॥२६॥

★ [अयम्भावः — त्रिगुणमये हि जीवे गुणपरिणामरूपादृष्टवशादेव असतोऽपि वस्तुन उत्पत्तिरिति काणादमतं ङ्गच्छेत । वस्तुतस्त्रिगुणमये हिजीवे ब्रह्मत्वासत्त्वसम्भवात्पातञ्जलमतमपि सङ्गच्छेत । तथा वस्तुतस्त्रिगुणमयस्यैव विंशतिदुःखसद्भाव इति गौतमीयमतं सङ्गच्छेत । एवं साङ्ख्यमतेऽपि प्रकृतिगुणमयत्वे एव तन्मतसङ्गतिः । तदुक्तं तैरेव स्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् । गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ।' इति । एवं त्रिगुणमयस्यैव जीवस्य वकर्मफलभोगः सम्भवति न निर्गुणस्येति त्रिगुणमयत्वे सत्येव मीमांसकमतसङ्गतिरिति सङ्क्षेपः ।]

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवती'ति श्रुतेः । ईश्वरकल्पानां ब्रह्मरुद्रादीनां क्षेत्रज्ञानां त्वजन्यत्वादिप्रतिपादनपरत्वमविज्ञाय भ्रान्तिवशेनान्यथाकल्पमानानां कलौ भविष्यतां स्वबुद्ध्योत्प्रेक्षितं सिद्धान्तमनूद्य यति। ये केचित् असत ईश्वरस्य जीवस्य चेति तन्त्रपाठेनोभयपरत्वं मायाविद्याभ्यां जनिं स्मरन्ति सर्वत्रानुषज्जते । आत्मनि भिदां सगुणनिर्गुणाध्यास्तोपहितध्येयज्ञेयादिलक्षणां च । विपणं पण्यते निर्णीयतेऽनेनेति व्युत्पत्त्या पणं प्रमाणम् । विगतं भेदलक्षणं यस्मात्तद्विपणम् । प्रमाणशून्यं वा वस्तु । ऋतं परमार्थं स्मरन्ति । आरुपितैः भ्रान्तिभिरेवोपदिशन्ति न तत्त्वं ति। कुतोऽघटनात् । तथा हि न तावज्जीवेशयोर्जन्मजाशौ सम्भवतः । अजत्वादनन्तत्वाच्च । तथा च श्रुतयः —

'द्वावजावीशनीशौ अजं ध्रुवं । सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपापैः अजो ह्येको जुषमाणोऽनुशेते भुक्तभोगामजोऽन्याम् वेदाहमेतमजरं पुराणं त एते वा चिदात्मानोऽविनष्टाः । परञ्ज्योतिर्निर्विशन्त्यविनष्टा न्ते न विनश्यन्ति कदाचन ॥'

इत्यादिकाः —

'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतःपरम् ॥'

इति भगवदुक्तेः । ईश्वरस्य सर्वजनकत्वं सुप्रसिद्धं स एवैक उद्भवे इति सम्भवे च ।

'एष देवो विश्वकर्मा महात्माविद्याविद्ये ईशते यस्तु सोऽन्यः ।
न तस्य कश्चित्पतिरस्ति लोके न तस्य कश्चिज्जनिता न चाधिपः । सकारणं करणाधिपाधिपः ॥'

इत्यादिश्रुतिभिः सर्वकारणत्वसर्वनियन्तृत्वसर्वकर्तृत्वसर्वाधिपत्वादिप्रतिपादनपूर्वकान्यकार्यत्वान्यनियम्यत्वान्यकर्मत्वान्यपाल्यत्वादीनां डिण्डिमघोषेण निषेधात् । इदमत्र चिन्तनीयम्-जीवेश्वरो अनादीवाऽर्वाचीनो वा ? आद्ये तव सिद्धान्तहानिः । आभासेन करोतीत्यत्र कृञो धातोः कर्मत्वासिद्धेः अनाद्योर्जन्मानुपपत्तेश्च तदीङ्गीकारे वाक्यमूकत्वप्रसङ्गात् द्वितीये अजत्वप्रतिपादकशास्त्रव्याकोपात् —

'जीवो ब्रह्मविशुद्धाचिद्विभागस्त्वनयोर्द्वयोः । अविद्यातच्चितोर्योगः षडस्माकमनादयः ॥'

इति सम्प्रदायविरोधेनाप्रसिद्धान्ताच्च । किञ्च । जीवस्य जन्मनाशाभ्युपगमे कृतनाशाकृताभ्यागमप्रसङ्गः । अपि च मायाऽविद्ययोः स्वयमेव भवतीति प्रमाणादनादित्वस्वातन्त्र्यत्वसर्वनियन्तृत्वादीनामप्यवश्यं स्वीकार्यम् । तथात्वे च ब्रह्मण्यतिप्रसङ्गेन जडत्वादि स्वरूपहानिप्रसक्तेः जडत्वादीनां स्वातन्त्र्यादिसामानाधिकरण्याभ्युपगमे च घटादावतिव्याप्तिस्तेषां चापि जडत्वाविशेषात् । कालकर्मसंस्कारप्रागभावादयोऽपीश्वराद्युत्पादकाः स्युरिति भावः । मायाऽविद्याभ्यामीश्वरादेर्जन्म सनिमित्तं वा निर्मितं वा । आद्ये तत्र निमित्तस्याप्रसिद्धत्वात् द्वितीये मुक्तानामपि तत्प्रसङ्गात् । निर्निमित्तत्वस्य च तत्रापि सत्त्वात् तस्मात्र कथमपीश्वरजीवयोर्जन्मनाशकथनावकाश इति । नापि सर्वज्ञे स्वाभाविकाचिन्त्यानन्तशक्तौ जगज्जन्मादिकारणे ब्रह्मणि भेदकथनावकाशः । 'नेह नानास्ति किञ्चन ।' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । द्वितीयाद्वै भयं भवति ।'

इत्यादिना कारणान्तरनिषेधात् । नापि वैदिकप्रमाणशून्यत्वं तत्त्वम् । शशशृङ्गतुल्यत्वात् । 'सर्वे वेदा यत्पदमामनन्ति ।' 'तन्त्वौपनिषदं पुरुषं पृच्छामः ।' 'तत्ते पदं सङ्ग्रहेण ब्रवीमी'त्यादिश्रुतिव्याकोपात् । इत्यादिदूषणकदम्बविवक्षया आह-त्रिगुणमयः पुमानिति । त्रिगुणाया मायाया विकारभूतः पुरुष इति उपलक्षणं चैतत् । उक्तपरामर्शस्य इति भेदात्पूर्वोक्तपक्षस्य भेदप्रकारः । त्वयि पुरुषोत्तमे मायानियन्तरि । अबोधकृता तेषां नास्तिकानां स्वोत्प्रेक्षितसिद्धान्तवादिनामबोधेनाज्ञानेन भ्रान्त्या कृता कल्पिता भास्करे उलूकैस्तमोवत् आरोपितेत्यर्थः । अतस्त्वयि स न भवेत् । तेषामारोपो न सम्भवति । तत्र हेतुगर्भितं विशेषणम् । ततः परत्रेति । ततो मायाविद्या । तत्कार्य्यजन्मादितत्सम्बन्धेभ्यः परस्मिन् अत्यन्तवैलक्षण्यवति अत एवावबोधरसे । अवबोधश्चासौ रसश्च तस्मिन् । न हि सूर्य्ये तमस्तत्कार्य्यावरणं तत्सम्बन्धश्च सम्भवति । तथा च श्रुतिः —

'यः सर्वज्ञः सर्ववित् ।' 'यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः ।' 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः ।'

इति भगवद्गीतायां च ॥२५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं ज्ञानकाण्डस्य भगवद्भजनपरत्वं निरूप्य येऽन्ये वादिनो भगवद्भजनं न सहन्ते अन्यथा च शास्त्रं वदन्ति तान्निषेधति-जनिमसत इति द्वाभ्याम् । ते प्रतिकूलाः द्विविधाः अर्धवैनाशिकाः सर्ववैनाशिकाश्च । तत्र प्रथममर्धवैनाशिकान्निराकरोति- चत्वारो वादिनः नैयायिकाः वैशेषिकाः मीमांसकाः साङ्ख्याश्चेति । तन्मतं हसन्त्य इव श्रुतयो निरूपयन्ति । तत्र नैयायिकाः असत एव घटादेः जनिं वदन्ति असन्नेव पश्चाज्जनने न सद्भवतीति । एतदसङ्गतम् । सत्तायाः सम्बन्धस्य च नित्यत्वे कथं घटस्यासत्त्वं स्यात्, सत्त्वासत्त्वयोर्विरोधात् । नाप्यसत्त्वस्य जातित्वं सतसमवायोऽङ्गीक्रियते । येन कालव्यवस्थया घट उभयं प्राप्नुयात् ।

'

कार्यत्वान्यनियम्यत्वा-
आद्ये तव सिद्धान्तहानिः ।
मूकत्वप्रसङ्गात् द्वितीये

भ्यागमप्रसङ्गः । अपि च
तथात्वे च ब्रह्मण्यतिप्रसङ्गेन
दावतिव्याप्तिस्तेषां चापि
ामीश्वरादेर्जन्म सनिमित्तं वा
च तत्रापि सत्त्वात् तस्मान्न
जगज्जन्मादिकारणे ब्रह्मणि
याद्वै भयं भवति ।'
'सर्वे वेदा यत्पदमामनन्ति ।'
म्बविवक्षया आह-त्रिगुणमयः
र्वोक्तपक्षस्य भेदप्रकारः । त्वयि
भ्रान्त्या कृता कल्पिता भास्करे
विशेषणम् । ततः परत्रेति । ततो
नवबोधश्चासौ रसश्च तस्मिन् । न

।' 'न त्वत्समोऽस्त्यभ्यधिकः

था च शास्त्रं वदन्ति तान्निषेध
थममर्धवैनाशिकान्निराकरोति
रूपयन्ति । तत्र नैयायिकाः अस
स्य च नित्यत्वे कथं घटस्यास
व्यवस्थया घट उभयं प्राप्नुया

केवलं मद्दर्शनमात्रेणासत्त्वं वदन्तो भ्रान्ता एव नैयायिकाः एवं सति भक्तिमार्गो विरुद्ध्येत । भगवत्कृपादीनां नित्यत्वे कृपा न स्यात् इच्छादीनामपि नित्यत्वादिच्छावतारो न स्यात् । परमानन्दस्य च सुखत्वेनानित्यत्वात्पूर्णानन्दो भगवान्न अत इदं मतं निराक्रियते । वैशेषिकादयस्तु सतो मृतिमाहुः । सङ्घातः सन्नेव पश्चान्म्रियते । तथा सति तस्याग्रे परलोकचिन्ता ख्या सङ्घातस्यैव देवदत्तशब्दवाच्यत्वात् बाह्यानां मुख्योऽयं सिद्धान्तः । भोगव्यवस्था तु तादृशान्येव तानि भूतानि स्वभावादेव । एतत्पक्षे तु ज्ञानभक्त्यादिमार्गाः सर्व एवातिलापाः कृताः । अत एव तन्निराकर्तव्यम् । सङ्घातादिन्द्रियवर्गसहितः आत्मा मति । 'उत्क्रामन्तं स्थितं वापि' इति वाक्यात् ब्रह्मविदामनुभवोऽस्त्येव । जातिस्मरणमपि लोके सम्भवात् अन्यथा हिंसादिविधिर्व्यर्थः स्यात् । ज्योतिःशास्त्रप्रामाण्याच्च संवादित्वेनापि तन्मतं व्यर्थं स्यात् । 'अनन्तं नाम' इति श्रुतेः । श्रवणाच्च नित्यसिद्धोऽर्थः देवतारूपो वा आधिदैविको वा देवदत्तशब्दवाच्यः । एतदुपपादितं चतुर्थे कर्मनिर्णये । लक्षकत्वमेव न तु विशेषणत्वमिति । यथाऽवस्थान्तरेण पाकादिसाधनमुत्पाद्य पुनरन्यावस्थापन्नः पुनरन्यद्भोगं करोतीति । नामकरणं च तत्रत्यात्मन एव न तु देवसहितस्यैव, शास्त्रीयत्वात् । केशादिवद्वस्त्रादिवद्वा देहस्यापि सहभावमात्रत्वात् । मत आत्मनः मुख्यसङ्घातस्य वा परलोकाद्यन्यथानुपपत्त्या न मृतिः । तस्मिन्सति पूर्वोक्तन्यायेन भक्तिमार्गः सेत्स्यति । कादयः आत्मनां जीवानां भेदमङ्गीकुर्वन्ति । आत्मनीश्वरे यज्ञादिरूपे वा तथा सत्येक ईश्वर इति पक्षो न सङ्गच्छते । अन्यथा श्वरः कर्तुमकर्तुमन्यथाकर्तुं समर्थः स कथं विषमं जीवेभ्यः फलं दद्यात् । कुतो वा विषमं कर्म कारयेत् । कारयिष्यन्वा पुण्ये वा कथं न प्राप्नुयात् । तस्मादीश्वर एव नास्ति कर्मातिरिक्तः स चानेक इति प्रतिनियतं कर्मैव कर्तव्यमिति मन्यन्ते । पि निराकर्तव्यम् । अन्यथेश्वराभावे कस्य प्रणिधानं स्यात् । तेऽप्यारोपादेव तथा मन्यन्ते । कर्म कुर्वाणाः फलं प्राप्नुवन्ति तु न पश्यन्तीति अन्याधीने फले अवश्यं दातुरपेक्षा । साक्षादजन्यफलेषु राजभित्तिनिर्माणादिषु तथादर्शनात् । न हि यागः पाक ओदनमिव साधयति । येनेश्वरापेक्षा न स्यात् । स्वर्गश्च ब्रह्माण्डाधिपत्याधीनो लोकात्मकः सुखसाधनान्यपि नी । अन्यथा तदानीमेव स्वर्गः कुतो न भवेत् । अत ईश्वरे अवश्याङ्गीकर्तव्ये एकेनैव महाराजवत् कार्यसिद्धौ प्रतिनियतेश्वरकल्पना रवात् । जीवानां तु भेदः नात्रोद्दिष्ट इति प्रतिभाति, एकवचनप्रयोगात् प्रकृतानुपयोगाच्च । जीवभेदः प्रत्युत भक्तिसाधकः धकः । सोऽपि बहुधा निराकृतो निराकरिष्यते च । अन्ये पुनः साङ्ख्यैकदेशिनो योगिनश्च कर्मफलं नित्यं मन्यन्ते ।

'योगेन साधितो योऽर्थः स नित्यो हि निगद्यते । वैदिकेनाप्यक्षयात्मा लोकः स्यान्नित्यकर्मणा ॥'

तस्मिन्नपि पक्षे नाशश्वरप्रयोजनम् । स्वसाध्येनैव कार्यसिद्धेः । तदपि निराकर्तव्यम् आरोपैरेव प्रशंसावाचकशब्दानां कबुद्ध्यैव तत्सम्भवात् । 'अपामसोमममृता अभूम' इति सोमप्रशंसावाक्यम् । 'अक्षय्यं ह वै चातुर्मास्ययाजिनः ।' इति तु सुकृतप्रशंसा । तस्माद्भ्रमसिद्धान्ता एत इति नैतद्वाक्यानुरोधेन पूर्वोक्तसिद्धान्ते दूषणमाशङ्कनीयमिति भावः । मार्गोऽपि त्वदुक्तन्यायेन न सङ्गच्छते । विष्णुर्हि सेव्यः शिवो ब्रह्मा वा एते गुणाभिमानिनः प्रतिनियतकार्यकर्तारः मेव स्वभक्ताय कार्यं कुर्वन्ति । अतस्त्रिगुणमयोऽयं पुरुषः नारायणो ब्रह्माण्डाभिमानी गुणैः कृत्वा सत्त्वरजस्तमोभिः भेदेन जीवभेदेन वा स्थित्यादिकं करोतीति अल्पदातृत्वात्किं भक्तिमार्गेणापि गुणमयत्वाच्च सोऽपि तिरोहितानन्द कवदन्योन्यपधावनमपेक्षते दृश्यते च । 'तथा पुराणे लोके च' इति यत्स्मार्तानां मतं तदपि निराकर्तव्यम् । अन्यथा न सिद्ध्येदिति । त्रिगुणमयः पुमानिति । यो भजनीयभेदः सोऽपि यदबोधकृतः भगवत्स्वरूपाज्ञानादेव जायते । यतः आर्ताः स्मार्तशब्दवाच्याः ते यमाचक्षते सा त्वेका भगवद्विभूतिः न तु तावन्मात्रो भगवान् भक्तिमार्गप्रतिपाद्यः किन्तु इति बहुधा निरूपितम् । ननु पुरुषोत्तमत्वपक्षेऽपि यद्यज्ञानं स्यात् मूलभूतस्य तदा स दोषस्तदवस्थः अत एव मेव ब्रह्म अज्ञानाश्रयो विषयश्चेत्याहुः ।

यत्वविषयत्वभागिनी निर्विभागचितिरेव केवला ॥

तमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ॥' इति ॥

अयमपि पक्षो निराकर्तव्यः । अन्यथा भक्तिमार्गः परमार्थपर्यवसायी न स्यात् । अतो निषेधति-त्वयि न ततः परत्र स भवेदवबोधरस इति । त्वयि पुरुषोत्तमे सः अवबोधः कथमपि न प्रवर्तते । तत्र हेतुद्वयम् । ततः परत्रेति अवबोधरस इति च। 'आदित्यवर्णं तमसः परस्तात्' 'यः सर्वज्ञः सर्वशक्तिरिति' 'सत्यं ज्ञानमनन्तं ब्रह्म' इति, 'स्वप्रकाशश्चिदात्मा' इत्यादिश्रुतिसहस्रैः अज्ञानसम्बन्धः निराक्रियते । ज्ञानस्यापि यो रसः परमानुभवरूपः स एवात्मा स्वरूपं यस्येति । अतो मतान्तराणां भ्रान्तिमूलत्वात् निर्दुष्टत्वाच्च भगवन्मार्गस्य भगवान् सेव्य इति सिद्धम् ।

"भ्रान्तिमूलतया सर्वसमयानामयुक्तितः ॥ न तद्विरोधात् कृष्णाख्यं परं ब्रह्म त्यजेद्बुधः ॥" ॥१२॥२५॥

श्रीसुबोधिनीसारः

ज्ञानिनां भ्रमबाहुल्यान्न ज्ञानं सुशकं भवेत् । अतो भक्तिर्नरैः कार्या सुसुखार्थप्रसाधिनीत्याहुः । असतो विश्वस्य जनिमुत्पत्तिं ये वैशेषिकादयो वदन्ति । असत एव ब्रह्मत्वस्योत्पत्तिं ये च पातञ्जलादयः सत एकविंशतिप्रकारस्य दुःखस्य नाशं मोक्षं वदन्ति ये नैयायिकाः उतापि ये साङ्ख्यादयः आत्मनि भिदां भेदं चाहुः । विपणं कर्मफलव्यवहारमृतं सत्यं स्मरन्ति ये मीमांसकाः ते सर्वे आरोपितैर्भ्रमैरेव मन्दानुपदिशन्ति न तत्त्वदृष्ट्या त्रिगुणमयः पुमान् पुरुष इति भिदा भेदस्त्वयि अधिष्ठानेऽबोधेनाज्ञानेन कृतास्ति यत् यतः ततोऽबोधात् परत्र परस्मिन्नसङ्गेऽवबोधरसे ज्ञानघने त्वयि सोऽबोधोऽज्ञानं न भवेत् नास्ति ॥१२॥२५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वादिनां मतबाहुल्यादपि ज्ञानं दुर्घटम् इति सूचयन्त्य आहुः-जनिमसत इति । असतः पदार्थस्य जनिमुत्पत्तिं तथा सतो मृतिं विनाशं च ये स्मरन्ति वदन्ति ते सर्वे आरुपितैर्भ्रमैरेवोपदिशन्ति, न तत्त्वदृष्ट्या । "सदेव सौम्येदमग्र आसीत्" "सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" "नासतो विद्यते भावो नाभावो विद्यते सतः । उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥" इत्यादिश्रुतिस्मृतिविरोधात् ॥ उतेत्यपार्थे । येऽप्यात्मनि भिदां भेदं स्मरन्ति तेऽप्यारुपितैरेवोपदिशन्ति, "एकमेवाद्वितीयं ब्रह्म" "एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥" इत्यादिश्रुतिविरोधात् । हेत्वन्तरमाहुः-यदिति । यस्मात् त्वयि त्रिगुणमयः पुमानिति कृता भिदा आत्मभेदव्यवहारः अबोधकृता अज्ञानकल्पिता इत्यर्थः ॥ तथा ये च विपणं कर्म फलव्यवहारमृतं सत्यं स्मरन्ति "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इति तदपि ते आरुपितैरेव वदन्ति। "यथेह कर्मचितो लोकः क्षीयेत एवमेवामुत्र पुण्यचितो लोकः क्षयीत" इत्यादिश्रुतिविरोधात् ॥ एवं यः प्राणिषु भ्रमः स त्वयि न भवेत् नास्त्येवेत्यर्थः । तत्र हेतुमाहुः- ततः परत्रेति । ततो मायातः परत्र परे तदावरणरहिते । तत्र हेतुमाहुः-अवबोधरस इति। ज्ञानैकस्वरूपे । न हि सूर्ये तमः सम्भवतीत्यर्थः ॥२५॥१२॥

अन्वितार्थप्रकाशिका

उपदिशतामपि भ्रमबाहुल्याज्ज्ञानं न सुकरमित्याहुः-जनिमिति ॥ ये असतः जनिं स्मरन्ति ये च सत एव मृतिं स्मरन्ति अपि ये च आत्मनि भिदां स्मरन्ति ये च विपणम् ऋतं स्मरन्ति ते सर्वे आरुपितैरेव उपदिशन्ति त्रिगुणमयः पुमानिति हेतुना भिदा सा यद्यस्मात्त्वयि विषये अबोधकृता ततः अबोधात्परत्र अवबोधरसे त्वयि सः अबोधो न भवेत् इत्यन्वयः । ये पातञ्जलाद असत एव ब्रह्मत्वस्य जनिमुत्पत्तिं स्मरन्ति वदन्ति । यद्वा । ये वैशेषिकाः असतः प्रागविद्यमानस्य जगत्कार्यस्य जनिं स्मरन्ति ये गौतमीयाः सतः सत्यस्यैव एकविंशतिविधस्य दुःखस्य मृतिं विनाशं मुक्तिं स्मरन्ति । ये नैयायिकसाङ्ख्यादयो भेदवादि आत्मनि भिदां भेदं जीवानामन्योन्यभेदं जीवब्रह्मणोर्जीवजडयोर्जडजडयोश्चेति पञ्चधा भेदं स्मरन्ति । उतेत्यप्यर्थे । तथा ये कर्म विपणं कर्मफलं व्यवहारम् ऋतं सत्यं स्मरन्ति "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इति तदपि आरुपितैरारोपणैः । भावे क्तः । भ्रमैरेवोपदिशन्ति न तत्त्वदृष्ट्या । यद्वा । ते आरुपितैः लौकिकारोपैरेव स्मरन्ति, न तेषां तत्र मु तात्पर्यम् ।

"ब्रह्मैव सन् ब्रह्माप्येति, सदेव सोम्येदमग्र आसीत् ॥ अनीशया शोचति मुह्यमानः ॥ अनीशया मायया। एकमेवाद्वि

ब्रह्म ॥ नेह नानास्ति
त्रिगुणमयः पुमानिति
भवति । अतः ततः
अबोधः न भवेत् नास्

"आदित्यव
बाह्यः ॥ नैषा तर्केण म

सर्वव्यवहारशा
जानन्तीत्याहुः ॥ जा
जन्मोत्पथनाशनायेत्युक्तप्र
भक्तवात्सल्यतया स्वभक्त
गतस्यैन्द्रजालिकनटवत्क्री
मनुष्याकारे चाभिदां द्विधोक्ते
च वदन्ति ये ते आरुपितैः
आत्मगुणानुसारेणेत्याहुः-
स्वस्वरुच्यनुसारोक्तिरूपो
कर्मपरवशजीववज्जन्मादिरू
भिदोत्पादकोऽबोधस्त्वां न स

अज्ञत्वे पारवश्यत्वं
क्वचित् ॥ इति ॥॥२५॥१२॥

सर्गस्थितिकालयोः स्थ
सूक्ष्मभावापन्नं नामरूपा
भगवतस्तथाविधजगच्छरीरतया
इत्यनेन ज्ञापितमथ तत्प्रसङ्गान्मता
यावत् । सतः द्रव्यस्य च पश्च
स्थूलत्वकृशत्वमनुष्यत्वमृगत्वादि
मन्यन्ते । ये मीमांसकाः, ते तु विप
अयं कर्मफलनित्यत्वरूपस्तद्वादा
उपदिशन्ति च । तमारुपितैरिति पा
नपुंसके भावे क्तः । तथा, ये निरीश्वर
इति स्मरन्ति उपदिशन्ति च । इत्
ज्ञानवबोधकृता । अथ भगवत्स्व
भ्याम्यामित्यर्थः । परत्र परस्मिन्

॥ नेह नानास्ति किञ्चन ॥ यथेह कर्मचितो लोकः क्षीयेत एवमेवामुत्र पुण्यचितो लोकः क्षयीत" इत्यादिश्रुतिविरोधात् । गुणमयः पुमानिति हेतुना या भिदा आत्मभेदव्यवहृतिः पञ्चधोक्ता सा यद्यस्मात् त्वयि विषये अबोधकृता त्वद्विषयज्ञानकल्पिता ति । अतः ततः अबोधात् परत्र असङ्गे अज्ञानविषयत्वाश्रयत्वयोरयोग्ये आवरणरहिते अवबोधरसे ज्ञानैकस्वरूपे त्वयि सः बोधः न भवेत् नास्त्येव ।

"आदित्यवर्णं तमसः परस्तात् ॥ स यथा सैन्धवघनोऽनन्तरो बाह्यः कृत्स्नो रसघन एव स्यादेवं वा ॥ अरेयमात्मानन्तरो ॥ नैषा तर्केण मतिरापनेया ॥" इत्यादिश्रुतेः ॥२५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सर्वव्यवहारशास्त्रविदोऽपि जनाः भगवत्स्वरूपयाथार्थ्यविद्भक्तसमागमं विना प्रयत्क्षपुरुषोत्तमस्य जन्मकर्मदिव्यत्वं न न्तीत्याहुः ॥ जनिमिति ॥ असतः सर्वकारणत्वेन वा अति सूक्ष्मत्वेन स्वधाम्नि वर्तमानस्य अजस्य त्यथनाशनायेत्युक्तप्रकारेणालौकिकजन्मवतो दिव्यमूर्तेस्तव ॥ कर्माधीनजीववत् ये जनिं जन्म स्मरन्ति वदन्ति सतः वात्सल्यतया स्वभक्तकृतसेवाद्यङ्गीकारार्थम् । स्वदर्शनदानादिना तान् सुखयितुं वा सर्वजननयनगोचरतां रामकृष्णादिदिव्यरूपेण न्द्रजालिकनटवत्क्रीडाकस्तुः सत्यमूर्तेस्तव मृतिं कर्माधीनजीववन्मृत्युं च ये स्मरन्ति वदन्ति ॥ आत्मनि तव दिव्याकारे याकारे चाभिदां द्विधोक्ते एकस्मिन् तवाकारे भेदं वदन्ति । कृतं मोक्षादिदातृत्वेन सत्यं तव चरितं विपणम् अन्यजीवकृतव्यवहारमिव वदन्ति ये ते आरुपितैः स्वबुद्धिकल्पितभ्रमैरेव उपदिशन्ति कथयन्ति जनानिति शेषः । एवं ते भ्रान्ताश्चेत्कथमुपदिशन्ति त्मगुणानुसारेणेत्याहुः–त्रिगुणमय इति ॥ पुमानुपदेष्टा जीवः । त्रिगुणमयो गुणत्रयप्रधान इति हेतोः भिदा पूर्वोक्तः स्वरुच्यनुसारोक्तिरूपो भेदः सर्वोऽपि यदबोधकृता यस्य दिव्यमूर्तिस्तव स्वरूपा ज्ञानकृता भवति ॥ ततः र्मवशजीववज्जन्मादिरूपभिदातः परत्र अवबोधरसे त्वयि स भिदाजनकोऽबोधो न भवेत् ॥ स्वस्वरुच्यनुसारोक्तिरूपो भेदजनकोऽबोधस्त्वां न स्पृशतीत्यर्थः । तेषां वचसस्त्वत्स्वरूपाज्ञानजनितत्वादिति भावः ॥ तथा चोक्तं विष्णुपुराणे —

अज्ञत्वे पारवश्यत्वं विधिभेदादिकं तथा । तथा प्राकृतदेहत्वं देहत्यागादिकं तथा ॥ आसुराणाविमोहाय विष्णोर्दोषा न हि त् ॥ इति ॥॥२५॥१२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सर्गस्थितिकालयोः स्थूलभावापन्नं नामरूपविभागेन प्रतीयमानं कार्यरूपं भगवच्छरीरभूतं जगत् आसीत् तत् प्रलयकाले भावापन्नं नामरूपाविभागेनाप्रतीयमानं कारणावस्थं भगवच्छरीरभूतं जायते, ततस्तदानीमपि तथाविधजगच्छरीरतयावस्थानात्सत्कार्यवादः फलितस्तेनासत्कार्यवादिमतं मिथ्यात्वं प्राप्तं तच्च "तरहि न सन्न चासीत्" पितमथ तत्प्रसङ्गान्मतान्तराणि चानूद्य दूषयन्ति ॥ जनमिति ॥ ये तार्किकाः, ते असतो द्रव्यस्य, जनिमुत्पत्तिं सत्तायोगमिति सतः द्रव्यस्य च पश्चात्, मृतिं नाशं, स्मरन्ति । इत्यसत्कार्यानुवादः । उतेति पक्षान्तरे । आत्मनि, भिदां कृशत्वमनुष्यत्वमृगत्वादिरूपां भिदां च, ये चार्वाकाः, ते स्मरन्ति । इति चार्वाकमतानुवादः । ते हि देहमेवात्मानं ये मीमांसकाः, ते तु विपणं देवमनुष्ययोरन्योन्योपकारकभावजनितवाणिज्यफलतुल्यं व्यवहारम्, ऋतं नित्यं, स्मरन्ति । फलनित्यत्वरूपस्तद्वादानुवादः । न केवलं स्मरन्त्येव । किं तु ते तार्किकादयः, आरुपितैः आरोपितैर्युक्त्याभासैः, न्ति च । तमारुपितैरिति पाठे, तं स्वमतसिद्धान्तं, युक्त्याभासैरुपदिशन्ति चेत्यर्थः । अरुपितैरित्यत्र गुणाभावश्छांन्दसः । भावे क्तः । तथा, ये निरीश्वरसाङ्ख्यमतगाः, ते पुमान्, त्रिगुणमयः सत्त्वादिगुणत्रयप्रचुरो जीव एव तदतिरिक्तः सन्नीश्वराख्यः, न्ति उपदिशन्ति च । इत्यनीश्वरसाङ्ख्यमतानुवादः । इति भिदा, इत्थम्भूतो मतभेद इत्यर्थः । यदबोधकृता यस्य बोधकृता । अथ भगवत्स्वरूपज्ञानवतां तादृशभ्रमाभावमाहुस्त्वयीति । ततः पूर्वप्रस्तुतसदसच्छब्दवाच्यप्रकृति-मित्यर्थः । परत्र परस्मिन् विलक्षणे इति यावत् । अवबोधरसे ज्ञानस्वरूपे, त्वयि, यथावद्विज्ञाते सतीति शेषः ।

स अनवबोधः, न भवेत् । त्वयि यथार्थ ज्ञाने सति जीवानामबोधनिवृत्तिरिति सिद्धान्तः । अनामरूपविभागवतोश्चिदचितोः प्रलयकाले कारणावस्थभगवतः शरीरत्वेन सत्त्वात् सर्गकाले कार्यावस्थायामपि सतोरेव तयोर्नामरूपभाक्त्वमेव जनिः, पुनः प्रलयकालेऽनामरूपविभागतयाऽवस्थानमेव मृतिः, अतः असतो जनिं सतो मृतिं च ब्रुवाणास्तार्किकाः भ्रान्त्यैव तथोपदिशन्ति। कार्यकारणयोरन्योन्यसत्त्वे तथात्वेन व्यपदेशः । "यस्य पृथ्वी शरीरं यस्यात्मा शरीरम्" इति कार्यकारणावस्थायां भगवच्छरीरत्वेन नित्ययोरपि चिदचितोर्नामरूपभाक्त्वं नामरूपभाक्त्वं च जनिमृतिशब्दव्यवहार्यत्वं तदन्यथा कथनं भ्रातिजमेव । एतावता सत्कार्यवादः सिद्धः । "नित्यो नित्यानां" "अजो नित्यः शाश्वतः" इत्यादिश्रुतिसमीक्षयात्मनामनादित्वात् "पुमान्न देवो न नरः" इत्यादिश्रुत्या च आत्मनि देवमनुष्यमृगादिशरीरत्वादिभिदाभावाद्देहमेवात्मानं मन्यमानाश्चार्वाका अपि भ्रान्त्यैव तथा वदन्ति, अत्मनो देहतो विलक्षणत्वात् ।

"तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" "नास्त्यकृतः कृतेन" ॥

इत्यादिश्रुतिभिः कर्मफलानित्यत्वावगतेस्तन्नित्यत्ववादा मीमांसका अपि भ्रान्त्यैव कर्मफलनित्यतां मत्वा विपणमृतं वदन्ति । आत्मा सत्त्वादिगुणत्रयभाक् सन् जीवः, स एव गुणत्रयातिरिक्तभाक् सन्नीश्वर इति निरीश्वरसाङ्ख्यमतभाजोऽपि मतं भ्रान्तिजमेव । जीवेश्वरयोः "द्वा सुपर्णा सयुजा" "ज्ञाज्ञौ द्वावजावीनाशौ" इत्यादिश्रुतिभिस्तयोः पृथक्त्वेनाभिधानात्। यथार्थतया जीवेश्वरस्वरूपानभिज्ञानां निरीश्वरसाङ्ख्यवादिनामयं भ्रमो न तु तयोः स्वरूपयाथार्थ्याभिज्ञानामिति साकल्येन श्लोकभावः ॥१२॥ ॥२६॥

योगिरामानुजाचार्यकृतसरला व्याख्या

शास्त्रविरुद्धवादिनां मतानि दूरीकरोति–जनिमिति । असतः अविद्यमानस्य पदार्थस्य जनिमुत्पत्तिं तथा सतः विद्यमानस्य मृतिं विनाशं च ये नैय्यायिकाः स्मरन्ति तथा आत्मनि जीवेषु । जात्यैकवचनम् । भिदां भेदं जीवेषु प्रत्येकं न्यूनाधिकाकृतिमत्त्वं तत्तत् शरीरसमपरिणामरूपं ये चार्वाकाः स्मरन्तितथा ये मीमांसकाः विपणं देवमनुष्याणां परस्परव्यवहाररूपं 'देवान् भावयतानेन ते देवा भावयन्तु वः ।' इत्युक्तत्वात् तादृशकर्मफलव्यवहारम् ऋतं सत्यं नित्यमिति यावत् । स्मरन्ति जानन्तीत्यर्थः ।

'सदेव सौम्येदमग्र आसीत् ।' 'नासतो विद्यते भावो नाऽभावो विद्यते सतः ।' इत्यादिवचनैः । असतः उत्पत्तेः सतः विनाशस्य च निराकृतत्वात् असतः उत्पत्तिं सतः विनाशं च वदतां नैय्यायिकानां भ्रान्तत्वं बोध्यम् ।

'समस्सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।' इत्यादिवचनैर्न्यूनाधिकदेहेषु वर्तमानस्यापि जीवस्य न्यूनाधिकभावस्य निराकृतत्वात् जीवस्य न्यूनाधिकरूपत्ववादिनां चार्वाकाणां भ्रान्तत्वं बोध्यम् । तथा —

'क्षीणे पुण्ये मर्त्यलोकं विशन्ती'त्यादिवचनैः कर्मफलस्य नित्यत्वस्य निराकृतत्वात् कर्मफलस्य नित्यत्ववादिनां मीमांसकानां भ्रमत्वं बोध्यम् । तथा पुमान् ब्रह्माण्डाभिमानी परमपुरुषो नारायणः त्रिगुणमयः सत्त्वरजस्तमोगुणयुक्तः इति हेतोः या भिदा भेदः सा अबोधकृता । भगवत्स्वरूपज्ञानाभावकल्पितः भगवान् त्रिगुणाशयस्सन् रजोगुणविशिष्टः सृष्टिं करोती। सत्त्वगुणविशिष्टः रक्षणं करोति । तमोगुणविशिष्टः विनाशं करोतीति सत्त्वादिगुणभेदेन भेदः । यः हरिहरब्रह्मरूपभेदः स्मार्तादिभिः प्रतिपादितः । यद्वा । पुमानीश्वरोऽपि त्रिगुणमयः त्रिगुणप्रचुरः जीवसजातीयः नातिरिक्तः इति निरीश्वरसाङ्ख्यैः या भिदा भेदः उपनिषत्प्रतिपाद्यमानेश्वराद्भेदरूपः प्रतिपादिता सेत्यर्थः । यत् यस्मात् कारणात् अबोधकृता सा अज्ञानकृतेत्यर्थः —

'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । ततोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥'

इत्यादिवचनैः भगवतः प्रकृतिपुरुषविलक्षणत्वेन त्रिगुणातीतत्वात् 'निस्त्रैगुण्यो भवार्जुने'त्युक्तेश्च । अतः सुगुणत्रयप्रयुक्तः इति भेदः । ततः गुणत्रययुक्तप्रकृतेः परस्य 'आदित्यवर्णं तमसः परस्तात् ।' इति श्रुतेः । अवबोधरसे ज्ञानस्वरूपे ।

'यस्सर्वज्ञः स सर्ववित्' इति वचनात् त्वयि एतादृशपरमात्मनि सः त्रिगुणमयः इति भेदः न भवेत् । ये असतः जनिं सतः मृतिं च स्मरन्ति । उत ये आत्मनि भिदां च ये स्मरन्ति । ये विपणमृतं स्मरन्ति ते आरुपितैरुपदिशन्ति । पुमान् त्रिगुणमय इति च

भिदा तदबोधकृता ।

वैशेषिकाः
साङ्ख्यवेदान्तिनौ सत्
कार्यस्य स्थूलतयोत्पा
योगादिनोत्पत्तिं च पात
शरीरं चेति । ये च साङ्ख्
प्रतिनियमादयुगपत्प्रवृत्ते

पुरुषबहुत्वं सि

सत्यं नित्यं मीम
षष्ठेन वेदान्तशास्त्रेणापव
सदेवासीदित्यसत्कार्यवा
ब्रह्म आवरणापगमे स्वस्
भवति इति मायिकमज्ञान
अन्तरे मध्ये वर्तमानाः
परियन्ति संसारे परिभ्रमन्
यलोपश्चेत्येवं साधुः । ए
निरीश्वरसाङ्ख्यादयो निरस्ताः
वस्तुतस्त्रिगुणमयत्वे सङ्ग

त्रिगुणमये हि जीवे
हि ब्रह्मत्वासत्त्वसम्भवात्
साङ्ख्यमतेऽपि प्रकृतिगुणस
पुरुषस्य नानात्वसाध्यसिद्धि

'तस्मात्तत्संयोगादचे

गुणकर्तृत्वे च तथा

इति एवं त्रिगुणम
मीमांसकमतसङ्गतिरिति न तु
त्रिलोक्याः नयनवत्प्रकाशक !
तथा ॥२५॥

इतोऽपि ज्ञानं न सुशक्य
वदन्ति । ये च पातञ्जलादयः अ
मोक्षं वदन्ति । उत अपि ये च स

भिदा तदबोधकृता । ततः परत्रावबोधरसे त्वयि सः न भवेत् इत्यन्वयः ॥२५॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

वैशेषिकाः काणादाः परमाण्वादिष्वसत एव व्यणुकादेरुत्पत्तिं वदन्ति तेषां मते प्रागभावस्य निमित्तकारणत्वाभ्युपगमात् साङ्ख्यवेदान्तिनौ सत्कार्यवादिनौ तु उत्पत्तेः पूर्वमपि सूक्ष्मरूपत्वेन कार्यस्य कारणे सत्त्वमुपगच्छन्ति । कुलालादिकारकेण तु कार्यस्य स्थूलतयोत्पादनमात्रं क्रियत इति यथा ताम्रेऽन्नेव सुवर्णश्चमत्काररसायनप्रयोगेणोत्पद्यते तथा जीवेऽसत एव ब्रह्मत्वस्य योगादिनोत्पत्तिं च पातञ्जलादयः स्मरन्ति । पातञ्जला योगतन्त्रवेत्तारः एकविंशतीति षडिन्द्रियाणि षड्बुद्धयः षड्विषयाः सुखदुःखे शरीरं चेति । ये च साङ्ख्यादयः आत्मनि भेदं पञ्चविंशतितत्त्वानां प्रतिक्षेत्रं च पुरुषस्य बहुत्वं वदन्ति । तच्चोक्तं तैरेव 'जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च

पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चेति ॥'

सत्यं नित्यं मीमांसकमते कर्मफलस्य नित्यत्वोपगमात् सृष्टिप्रलयानुपगमाच्च । एवं पञ्चानामपि शास्त्राणामनुवादं कृत्वा स्वेन वेदान्तशास्त्रेणापवदति–ते सर्व इत्यादिना । अग्रे सृष्टेः पूर्वम् इदं नामरूपात्मकं जगत् सदेव सूक्ष्मरूपेण सत्तादात्म्यात् सदेवासीदित्यसत्कार्यवादिनो वैशेषिका निरस्ताः । ब्रह्मैव सन् इत्यज्ञानस्वरूपस्यैवाज्ञानेनावरणमात्रं तस्माज्ज्ञानात्पूर्वमपि सदेव ब्रह्म आवरणापगमे स्वस्वरूपं ब्रह्मैवाप्नोति इति ब्रह्मत्वासत्त्ववादिनो निरस्ताः । अनीशा माया । तया मुह्यमानः शोचति दुःखी भवति इति मायिकमज्ञानकल्पितमेकमेव दुःखं न वस्तुतस्सदिति दुःखसत्यत्ववादिनो गौतमीयाः निरस्ताः । अविद्यायां कर्मरूपायाम् अन्तरे मध्ये वर्तमानाः धीरा इति स्वयमात्मानं पण्डितं मन्यमानाः जङ्घन्यमानाः दुःखैरत्यर्थं पीड्यमानाः मूढाः कर्मजडाः परियन्ति संसारे परिभ्रमन्ति । जङ्घन्यमाना इति हन्तेर्यङ् । अभ्यासस्य नुक् । अभ्यासाच्चेत्युत्तरखण्डेन कुत्वयक् । ततः शानच् अल्लोपश्चेत्येवं साधुः । एवं कर्मफलस्य सत्यत्ववादनिनो मीमांसका निरस्ताः । 'एकमेवाद्वितीयं ब्रह्मे'त्यादिना भेदवादिनो निरीश्वरसाङ्ख्यादयो निरस्ताः । आत्मभेदस्य सर्वमतसम्मतत्वादन्ते तत्परिहार इति क्रमभङ्गे विनिगमकं सर्वमिदं मतपञ्चकं पुरुषस्य वस्तुतस्त्रिगुणमयत्वे सङ्गच्छेत । अयम्भावः —

त्रिगुणमये हि जीवे गुणपरिणामरूपा दृष्टवशादेवासतोऽपि वस्तुनः उत्पत्तिः इति कणादमतं सङ्गच्छेत । वस्तुतस्त्रिगुणमये हि ब्रह्मत्वासत्त्वसम्भवात् पातञ्जलमतमपि तथा वस्तुतस्त्रिगुणमयस्यैवैकविंशतिदुःखसद्भाव इति नैयायिकमतं सङ्गच्छेत एवं साङ्ख्यमतेऽपि प्रकृतिगुणसन्निधानादेव पुरुषस्य कर्तृत्वं गुणपरिणामरूपादृष्टवशादेव पुरुषस्य कर्तृत्वं गुणपरिणामरूपादृष्टवशादेव पुरुषस्य नानात्वसाध्यसिद्धिरिति तस्य त्रिगुणमयत्व एव तन्मतसङ्गतिस्तदुक्तं तैरेव —

'तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीन इति ॥'

इति एवं त्रिगुणमयस्यैव जीवस्य वास्तवकर्मफलभोगस्सम्भवति न निर्गुणस्येति तस्य त्रिगुणमयत्वे सत्येव मीमांसकमतसङ्गतिरिति न तु तदस्ति । वस्तुतस्त्रिगुणमयत्वं तु नास्ति । एतद्भिदेति पदं मतचतुष्टयस्योपलक्षणम् । हे त्रिनयन ! त्रिलोक्याः नयनवत्प्रकाशक ! हे त्रिलोकनायकेति वा । षष्ठे तथा सम्बुद्ध्योक्तेः । श्रिया प्रेमसम्पत्त्या भक्तानां शं सुखं करोतीति [illegible] ॥२५॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

इतोऽपि ज्ञानं न सुशक्यम् उपदिशतामपि भ्रमबाहुल्यादित्याह–जनिमसत इति । ये वैशेषिकादयः असतो जगतो जनिमुत्पत्तिं [illegible] । ये च पातञ्जलादयः असत एव ब्रह्मत्वस्योत्पत्तिं वदन्ति । ये च नैयायिकाः सत एव एकविंशतिप्रकारस्य दुःखस्य नाशं [illegible] । उत अपि ये च साङ्ख्यादयः आत्मनि भिदां भेदं वदन्ति । ये च मीमांसकाः विपणं कर्मफलव्यवहारम् ऋतं सत्यं

स्मरन्ति ते सर्वे आरुपितैरारोपितैर्भ्रमैरेवोपदिशन्ति, न तत्त्वदृष्ट्या । सर्वश्रुतिविरोधात् । किञ्च । पुरुषस्य त्रिगुणमयत्वे सति सर्वमिदं सङ्गच्छते । न तु तदस्तीत्याह-त्रिगुणमय इति । त्रिगुणमयः पुमानित्यनेन हेतुना या भिदा सा यस्माच्च त्वयि विषये अबोधकृता त्वद्विषयाज्ञानविजृम्भिता तर्हि किमज्ञानमस्ति । वस्तुतः पुंसि नैवेत्याह । ततः प्रबोधात्परत्र परे असङ्गे अवबोधरसे ज्ञानघने पुंसि अबोधो न भवेत् न सम्भवतीत्यर्थः । एकविंशतिदुःखानि यथा — षडिन्द्रियाणि षड्विषयाः षडूर्मयः सुखं दुःखं शरीरं चेति। तत्र श्रोत्रं चक्षुर्घ्राणं त्वग्रसना मनः, एतानीन्द्रियाणि । शब्दो रूपं गन्धः स्पर्शो रसः सङ्कल्पादिरेते विषयाः ।

"बुभुक्षा च पिपासा च प्राणस्य मनसस्तथा । शोकमोहौ शरीरस्य जरामृत्यू षडूर्मयः ॥"

एते ऊर्मयः सुखं शरीरमित्येकविंशतिदुःखानि । एतेषां मतं सर्वश्रुतिविरुद्धं तद्यथा श्रुतिः-

"सदेव सौम्येदमग्र आसीत् ।" व्याख्यातं भाष्यकृद्भिः । हे सौम्य ! श्वेतकेतो इदं नामरूपं विकृतं जगत् अग्रे सृष्टेः पूर्वं सत् एवासीत् । सत् अस्तितामात्रं वस्तु । सूक्ष्मं निर्विशेषं सर्वगतम् एकं निरञ्जनं नित्यं निरवयवं यतो वेदान्तेभ्यः अवगम्य तत्तदात्म्यापन्नमित्यर्थः । अनेन असद्वादः परिहृतः । सतो मृतिमित्यत्र श्रुतिः—

"अथ योऽकामो निष्काम आप्तकाम आत्मकामो ब्रह्मैव सन् ब्रह्माप्येति ।"

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिस्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥" इति ।

अर्थः-सकामस्य गतिमुक्त्वा निष्कामस्य गतिमाह-यस्तु अकामो नास्ति कामो यस्य सः निष्कामः निर्गताः सर्वे कामा यस्मात् सः आप्तकामः प्राप्ताः कामाः येन सः पूर्णकामः इत्यर्थः । आत्मकामः अत्मैव कामो यस्य स एवम्भूतः सन् आत्मानं निर्विशेषम् अद्वैतं चिद्रूपं ज्योतिःस्वभावं पश्यति । स यद्यपि देहवानिव लक्ष्यते तथापीह ब्रह्मैव सन् शरीरपातोत्तरकालं ब्रह्माप्येति प्राप्नोति ।

अस्यार्थद्योतकं "यदा सर्वे" इति पद्यं सुगमम् । अनेन एकविंशतिदुःखनाशो मोक्ष इति मतं निरस्तम् । मीमांसामतं निराकरोति श्रुतिः—

"समानवृक्षे पुरुषो निमग्नो ह्यनीशया शोचति मुह्यमानः । अविद्याया अन्तरे वर्तमानाः वयं धीराः पण्डितम्मन्यमानाः जङ्घन्यमानाः परियन्ति मूढाः । अन्धेनैव नीयमाना यथान्धाः ॥"

अस्यार्थः-समानवृक्षे देहे निमग्नो निरूढाभिमानः पुरुषः अनीशा माया तया मुह्यमानः शोचति अनेकैरपि प्रकारैश्चिन्तामाप्नोतीत्यर्थः । अविद्यायामन्तरे मध्ये वर्तमाना अविवेकप्रायाः स्वयं वयमेव धीरा धीमन्त इति मन्यमाना जरारोगाद्यनेकानर्थैर्जङ्घन्यमाना अत्यर्थं हन्यमानाः परियन्ति भ्रमन्ति । स्वयं मूढाः मूढैरेवोपदिष्टा भ्रमन्तीत्यत्र दृष्टान्तः-अन्धेनेति। कर्मफलनिन्दापरेयम् ।

इदानीं नाना अत्मपक्षं निराकरोति श्रुतिः-

एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥"

अर्थः-एकं स्वजातीयाऽचेतनद्रव्यान्तररहितं इह किञ्चन नाना वस्तु नास्ति । एकं ब्रह्मैव । नन्वेकत्वप्रतिभाष इत्यत आह-एक इति ॥ एक एव परमेश्वरः सर्वेषु भूतेषु व्यवस्थितः । तत्रोपाधेरेकत्वं एकधा भानं तदनेकत्वे चानेकधा भानम् । त दृष्टान्तः-जलचन्द्रवदिति । यथा बहुयोजनव्यापके जलहृदे प्रतिबिम्बितश्चन्द्र एकधैव दृश्यते घटशरावादिषु प्रतिबिम्बितश्चानेकधैव तद्वदिति एतावता साङ्ख्यादिमतं स्पष्टमेव निराकृतम् । अद्वैतप्रतिपादनपरेयम् । अथ स्वामिनाम् —

"मिथ्यातर्कसुकर्कशेरितमहावादान्धकारान्तरभ्राम्यन्मन्दमतेरमन्दमहिमंस्त्वज्ज्ञानवर्त्मास्फुटम् ।
श्रीमन्माधव वामन त्रियनयन श्रीशङ्कर श्रीपते गोविन्देति मुदावदन्मधुपते मुक्तः कदा स्यामहम् ॥"

मिथ्यातर्केण सुकर्कशं यथा स्यात्तथेति । यो महावादान्धकारस्तस्यान्तरे भ्राम्यतो मन्दमतेः हे अमन्दमहिमन्नतीवोत्कृष्टं

त्वज्ञानस्य वर्त्मास्फुटं
विष्णोर्नामानि भवन्तीति

"सतां निन्दा ना
शिवस्य श्रीविष्ण
इत्यादिकं वर्णाश्र
नाम्न एव सदा जपादिति ।

अथोक्तार्थविरुद्धत
द्रव्यस्य जनिं सत्तायोगं स
सादिसिद्धान्तविरोधात् ।
नामरूपमात्रव्याकरणात् —
'नासतो विद्यते भाव
इति गीतास्मृतिवर
तस्मात्कारणाद्ब्रह्मणोऽनन्यत्वं
इति सूत्रार्थः । अतः कारणभ
द्रव्यमिति ये च चार्वाकाः ।
स्वप्रकाशज्ञानरूपत्वात् । स्थूलत
इदमुक्तविपणं व्यवहारादिकं क
'तद्यथेह कर्मचितो लो
इत्यादिश्रुतेस्तस्यानित्यत
भिदा त्रिगुणमयः प्रकृतिपदार्थः
कृतः । 'ऐतदात्म्यमिदं सर्वं तत्सर्वं
परस्मिन् अवबोधैकरसे ज्ञानस्वरू

राश के सींग के तथा
को जो न्यायमतवादी मानते है
मनुष्यपना पशुपना आदि भेद
के तुल्य स्वर्गादि फल को जो म
जो अपने शिष्यन् के अर्थ उपदेश
है। इससे भिन्न कोइ इश्वर नहि
ज्ञान के न होने से इस प्रकार वे
यथावत् जानने पर उपरोक्त अज्ञा

मयत्वे सति सर्वमिदं
य विषये अबोधकृता
ोधरसे ज्ञानधने पुंसि
खं दुःखं शरीरं चेति।

ं जगत् अग्रे सृष्टेः पूर्वं
वेदान्तेभ्यः अवगम्य

ति।
निष्कामः निर्गताः सर्वे
यस्य स एवम्भूतः सन्
व सन् शरीरपातोत्तरकालं

ं निरस्तम्। मीमांसामतं

धीराः पण्डितम्मन्यमानाः

मानः शोचति अनेकैरपि
धीमन्त इति मन्यमाना
ीत्यत्र दृष्टान्तः-अन्धेनेति।

। नन्वेकत्वप्रतिभाष इत्यत
कत्वे चानेकधा भानम्। तत्र
ादिषु प्रतिबिम्बितश्चानेकधेति

टम्।
महम्॥"
अमन्दमहिमन्नतीवोत्कृष्टकीर्ते

नस्य वर्त्मास्फुटं भवति अतः श्रीमन्माधवेत्यादीनि नामानि वदन् संसारात्कदाऽहं मुक्तः स्यां भवेयम्। शिवनामान्यपि र्नामानि भवन्तीति ज्ञापयितुमत्र त्रिनयनादिनामोक्तम्। नामापराधश्रवणाच्च यथोक्तं श्रीसनत्कुमारेण —

"सतां निन्दा नाम्नः प्रथममपराधं वितनुते यतः ख्यातिं यातं कथमुत्सहेत्तद्विगर्हाम्।
शिवस्य श्रीविष्णोर्य इह गुणनामादि सकलं धिया भिन्नं पश्येत्स खलु हरिनामाहितकरः॥"

इत्यादिकं वर्णाश्रमाचारधर्मपराणामयमपराधः भगवदेकपराणां नामपराणां तु नास्तीति तेनैवोक्तम् — "नामापराधांस्तरति एव सदा जपादिति। श्रीगोविन्दपदारविन्दशरणाः शुद्धा भवन्तीति दिक्॥२५॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथोक्तार्थविरुद्धतार्किकसिद्धान्तानामज्ञानमूलत्वं भगवद्धानवज्ज्ञानवतां तादृशभ्रमाभावं चाह-जनिमिति। असतो स्य जनिं सत्तायोगं सतश्च द्रव्यस्य पश्चान्मृतिं नाशं स्मरन्तीत्यसत्कार्यवाद उक्तः। स चाज्ञानमूलः। सूत्रकारव्यासिद्धान्तविरोधात्। 'तद्धेदन्तर्ह्यव्याकृतमासीन्नामरूपाभ्यां व्याक्रियत।' इत्यादिश्रुतिवाक्यैरव्याकृतद्रव्यस्यैव रूपमात्रव्याकरणात् —

'नासतो विद्यते भावो नाभावो विद्यते सतः। उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥'

इति गीतास्मृतिवरोधाच्च। तथा च सूत्रम् - 'तदनन्यत्वमारम्भणशब्दादिभ्यः॥' (२-१-१६) इति। कारणाद्ब्रह्मणोऽनन्यत्वं कार्यस्य जगतः। कुतः। आरम्भणशब्दादिभ्यः। 'वाचारम्भणविकारो नामधेयमि'त्यादिवाक्येभ्य सूत्रार्थः। अतः कारणभूतमृद्द्रव्यस्यैव घटाद्यवस्थाप्राप्तिः कार्यमिति व्यपदिश्यते। कार्यावस्थाप्रहाणमेव कारणावस्थं मिति ये च चार्वाकाः। आत्मनि भिदां स्थूलत्वकृशत्वमनुष्यत्वादिरूपां स्मरन्ति। तदप्यज्ञानमूलम्। कुतः। आत्मनः काशज्ञानरूपत्वात्। स्थूलत्वादीनां जडपदार्थधर्मत्वाच्च। 'क्षरं प्रधानममृताक्षरं हरः।' इत्यादिश्रुतेः। कर्मफलस्यैव नित्यत्वाद्वा कृषिपणं व्यवहारादिकं कर्मफलम् ऋतं सत्यमिति स्मरन्ति तेऽप्यज्ञाः।

'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लकः क्षीयते।'

इत्यादिश्रुतेस्तस्यानित्यत्वश्रवणात्। अतस्ते सर्वे आरुपितैः युक्त्याभासैरुपदिशन्तीत्यनुषङ्गः। त्रिगुणमयः पुमानिति त्रिगुणमयः प्रकृतिपदार्थः पुमान् जीवः इति भिदा अब्रह्मात्मकतया स्वनिष्ठभेद इति साङ्ख्यमतमुक्तम्। तदपि भ्रममूलम्। 'ऐतदात्म्यमिदं सर्वं तत्सर्वं वै हरेस्तनुः॥' इत्यादिश्रुतिस्मृतिभिस्तयोर्ब्रह्मात्मकत्वप्रतिपादनात् अतस्ततः परत्र प्रकृतिपुरुषाभ्यां अवबोधैकरसे ज्ञानस्वरूपे त्वयि साक्षात्कृते सति तर्काभासमूला न सम्भवन्तीत्यर्थः॥२५॥

कृष्णप्रिया

शश के सींग के तथा आकाश पुष्प के समान अविद्यमान कार्य की उत्पत्ति और विद्यमान वस्तु के नाश न्यायमतवादी मानते है और देह को ही आत्मा माननेवाले नास्तिकजन आत्मा में स्थूलपना कृशपना पशुपना आदि भेद मानते है तथा देवता और मनुष्यों के परस्पर उपकार भाव से उत्पन्न व्यापार फल स्वर्गादि फल को जो मीमांसक मतवादी नित्य मानते है केवल मानतें ही नहीं किन्तु वेद विरुद्ध कुतर्को शिष्यन् के अर्थ उपदेश भी करते है इसी प्रकार सत्वरजतम इन तीन गुणों से प्रचुर जीव ही चेतन स्वरूप भिन्न कोइ इश्वर नहि है। इस प्रकार जो कपिलमतवादी मानते है। आपके विषयमें जीवों को यथावत् होने से इस प्रकार के मतभेद लोकमें प्रवृत्त हो रहे है। जीवमाया से परे ज्ञानानन्द स्वरूप आपको जानने पर उपरोक्त अज्ञान और अज्ञान से आया जो मतभेद यह दोनों हि नहि ठहर सकते॥२५॥

सदिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात् सदभिमृशन्त्यशेषमिदमात्मतयाऽऽत्मविदः।
नहि विकृतिं त्यजन्ति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितम् ॥२६॥

कर्दमक्षमा

मनः, मनोमात्रविलसितम्, इदम्, अशेषं, त्रिवृत्, आमनुजात्, असत्, अपि, त्वयि, अधिष्ठाने, सति, सत्, इव, विभाति।, आत्मविदः, तु, आत्मतया, सत्, अभिमृशन्ति ।, हि, कनकार्थिनः, तदात्मतया, कनकस्य, विकृतिम्, न, त्यजन्ति ।, अतः, स्वकृतम्, इदम्, विश्वम्, अनुप्रविष्टम्, पुरुषरूपम्, च, आत्मतया, एव, अवसितम् ॥२६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु, यद्यसन्नोत्पद्यते यदि च त्रिगुणमयः पुरुषो न भवति तर्हीदं प्रपञ्चजातं पुरुषश्च पृथङ्नास्तीत्युक्तं स्यात् कथं तर्हि तयोः सत्त्वेन प्रतीतिरत आह-सदिव मन इति। मनो मनोमात्रविलसितमिदं त्रवृत्त्रिगुणात्मकं प्रपञ्चजातमसदेव सदिव विभाति कथमिति चेत्तत्राह-त्वयीति । त्वय्यधिष्ठाने अधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः । न केवलमिदङ्कारास्पदं किन्त्वामनुजात् मनुजः पुरु अभिविधावाकारः पुरुषमभिव्याप्येति पुरुषस्यापि पृथक्सत्त्वप्रतीतिर्मनोमात्रविलसितेत्यर्थः तथा च श्रुतिः "असतोऽधिमनोऽसृज्य मनः प्रजापतिमसृजत प्रजापतिः प्रजा असृजत तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदङ्किञ्च" इति नन्विदात्मविदामपि विश्वं सदेव स्फुरत्यतः कथमसत्स्यादत आह-सदभिमृशन्तीति । आत्मविदस्त्वशेषमिदं भोक्तृभोग्यात्मकं विश्वमात्मतयैव सदभिमृशन्ति सदिति जानन्ति आत्मकार्यत्वान्न पृथगित्यर्थः । तथाहि यदुपादानकं यत्कार्यं भवति तत्तेनैव रूपेण प्रतीयते उपादीयते चेति लोकाचारेण दर्शयति-न हि विकृतिमिति । कनकस्य विकृतिं कुण्डलादिकं कनकार्थिनो न त्यजन्ति अत्र हेतुः तदात्मतया कनकरूपत्वेनेत्यर्थः । अतः स्वकृतमिदं विश्वमनुप्रविष्टं च पुरुषरूपमात्मतयैवावसितं निश्चितम् ॥

यत्सत्त्वतः सदा भाति जगदेतदसत्स्वतः । सदाभासमसत्यस्मिन् भगवन्तं भजाम तम् ॥१३॥ ॥२६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — अत्राशङ्कते-नन्विति । पृथङ्नास्ति किन्त्वेक एवेत्येवं स्यात् भवत्विति चेदा कथमिति । तयोः प्रपञ्चपुरुषयोः । नन्वसतः प्रतीतिः कथमिति चेदाह-त्वयीति । इत्यर्थ इति । रज्जुसत्तयाऽहिसत्त्रापि य सद्वत्प्रतीयते इति भावः । इदङ्कारास्पदं घटादि पुरुषा आत्मा । इत्यर्थ इति-पृथक्सत्त्वप्रतीतिर्न वास्तवी स्वप्नादिवन्मनस्येवेति भावः । विश्वस्य मानसत्वे प्रमाणमाह-तथा चेति । असतः अव्याकृतात्परमेश्वरादधि अधिकं समष्टिरूपं मनोऽसृज्यताभूदित्यर्थः कर्मकर्तरिप्रयोगः अनायासेन सृज्यमानत्वात्स्वयमभूदित्यर्थः । पच्यते ओदनः स्वयमेवेत्यादिवत् । तच्च मनः प्रजाप ब्रह्माणमसृजत्स तत्तस्मादिदं दृश्यमानं किञ्च किञ्चन वस्तु तन्मनस्येव मनोभावापन्नेऽव्याकृते एव परमं यथा भवति तथा प्रति प्रकर्षेण स्थितमित्यर्थः । सृष्टिपरेयम् । पुनराशङ्कते-नन्विति । यतो ज्ञानिनामपि सत्त्वेन प्रतीयतेऽतो हेतोः । इत्यर्थ इति कार्यस्यकारणात्मकत्वादिति भावः । अत्रात्यागे । इत्यर्थ इति-कुण्डलादिरूपत्वेन स्वर्णमेव प्रतीयते न तस्य पृथक्सत्त्वं दृष्ट भावः ।यतः कारणमेव कार्यरूपेण प्रतीयतेऽतो हेतोः । आत्मतया परमात्मरूपतया । स्वामिनाम्-यदिति । एतज्जगत् असत् स्वरूपेण यत्सत्त्वतः यतस्त्वत्तः सत्तां प्राप्य तत्सत्यमाभाति । अस्मिन्नसति संसारे सदाभासं सर्वदा प्रकाशमानम् ॥★॥

श्रीधरानुयायिनी —

ननु कथं भिदाया मिथ्यात्वं सत्यत्वेन प्रतीतेरित्याशङ्क्याहुः-सदिवेति । जलचन्द्रवदध्यस्तेन प्रमात्रा सहितं त्रिगुणात्मकं प्रपञ्चजातं यतो मनोमात्रविलसितमतोऽसदेव तदप्यधिष्ठानस्य तव सत्तयैव त्वयि सदिव रज्जुसर्पादिवद्विभाति । आत्मवि भोक्तृभोग्यात्मकमिदं विश्वं न शिष्यत इत्यशेषं यथा स्यात्तथाऽऽत्मतयैव सदिति जानन्ति न तु प्रमातृप्रमेयादिविभक्तं यदुपादानात्मकं तत्तेनैव रूपेण प्रतीयते उपादीयते चेति प्रसिद्धेः । यथा सुवर्णविकारं कुण्डलादिकं सुवर्णार्थिनो न त्यजन्ति सुवर्णत्वेन तद्गृह्णन्त्येव तथात्रापि । अतः स्वकृतमिदं विश्वं तदनुप्रविष्टं पुरुषस्वरूपं चात्मतयैव निश्चितम् । यद्वा-अवसित

बाधं प्रापितमित
च भक्तिं विना
मनोविलसितमत
सच्छोभनमेव वि
वल्लभतयाऽभिमृश
स्वसम्बन्धाद्विकार
त्वया स्वयं निर्मितं

विश्वनाथी
श्रीभगवानुच्यते "अ
ततश्चासत इत्यसता ते
ललाटात्स्वेदोऽपतत्
कस्यचित्पूर्वपक्षमाश
पर्यवसानेऽपि स्थितिः
तत्तद्दूष्यत इति । समाध
प्रतीयते वस्तुविचारे त्व
तु जीवमभिव्याप्याशेष

"चेतना तु द्विध

इतरेष्वात्मशब्द

तदेवार्थान्तरन्याये
तदात्मतया तदनुगततन्मात्र
तस्मादात्मतया तत्स्वरूपतयै
श्रुतेरेव मुख्यं प्राधान्यमिति

"यस्त्वविज्ञानवान्

यस्त्वविज्ञानवान् भ

यस्तु विज्ञानवान्भव

यस्तु विज्ञानवान्भव

विज्ञानसारथिर्यस्तु म

इन्द्रियेभ्यः परा ह्यर्था

महतः परमव्यक्तमव्य

इत्याद्या "औपनिषदः

नीलकण्ठी — ननु भेद
सदिव मन इति । आमनुजात्त्रिवृ
जलचन्द्रवत्प्रमातुरप्यध्यस्तत्वेन त
भेदस्य मिथ्यात्वेऽपि स्वप्नवद्व्यवहा

बाधं प्रापितमित्यर्थः। एतदेवापरोक्षज्ञानं संसारबन्धमोचकम्। एवं चाज्ञानां सत्यत्वेन प्रतीयमानापि भिदा ज्ञानोदये मिथ्यैव। ज्ञानं च भक्तिं विना नैवोदेतीत्याशयः। यद्वा–अमनुजात् मनुजमविद्याद्युपहितं जीवमभिव्याप्य त्रिवृत्त्रिगुणात्मकमशेषमिदं विश्वं मनोविलसितमतः सदिव शोभनमिव वर्तमानमप्यसत् अशोभनमेव। पुनरेवम्भूतामपि यदि त्वयि त्वत्सेवानिमित्तं समर्पितं स्यात्तदा सच्छोभनमेव विभाति। नन्विदमज्ञानामेव किमित्याशङ्क्याहुः–आत्मविदस्त्यक्तदेहमात्रैषणा अपि त्वयि समर्पितमिदमात्मतया वल्लभतयाऽभिमृशन्ति स्पृशन्ति अङ्गीकुर्वन्ति नान्यवत्त्यजन्तीत्यर्थः। अत्यागे दृष्टान्तमाहुः–नहीति। यथा सुवर्णस्य विकृतिं स्वसम्बन्धाद्विकारकारकमपि रौप्यताम्रादिकं तदात्मतया सुवर्णप्राप्तिहेतुत्वेन तत्स्वरूपतया न हि त्यजन्ति तद्वत्। किञ्च–स्वकृतं तया स्वयं निर्मितं पुनरात्मतयान्तर्यामितया त्वयाऽनुप्रविष्टं विश्वमतस्त्वदावासस्थानमित्यपि निश्चित्य न त्यजन्तीत्यर्थः ॥★॥

विश्वनाथी — अत्रासतोऽधि मनोऽसृज्यतेत्यादिश्रुतिरपि अत्रासच्छब्देन सच्छब्दप्रसिद्धकार्यपरम्परातिरिक्तं सर्वकारणं श्रीभगवानुच्यते "असद्व्यपदेशान्नेति चेन्न, धर्मान्तरेण वाक्यशेषात्" इति न्यायात्। अधिमनःशब्देन सर्वाधिकारि तदीयमेव मनः ततश्चासत इत्यसता तेनासृज्यतेति तदर्थं व्यापारयामासेत्यर्थः। अथ पुनरेव नारायणः– "सोऽन्यं कामं मनसा ध्यायेत्तस्य ध्यानान्तःस्थस्य ललाटात्स्वेदोऽपतत्। ता इमाः प्रथमापः तासु तेजो हिरण्मयमण्डम्। तत्र ब्रह्मा चतुर्मुखोऽजायत ॥" इति श्रुतेः। एतमर्थमज्ञातुः कस्यचित्पूर्वपक्षमाशङ्क्य समादधते–तत्राशङ्का, ननु–श्रुत्या शून्यमेव प्रथममुपदिष्टं तदनन्तरं मनोविज्ञानपरम्परा ततोऽसत एव पर्यवसानेऽपि स्थितिः स्यात्। तथा मनसः प्रधानत्वात्तर्क एव सर्वत्र ज्ञानहेतुः। श्रुतेस्तु कल्पितत्वात्तदनन्तरमेव कथं पुनः श्रुत्या तद्दूष्यत इति। समाधानं तु–सदिवेति। त्रिवृत् उत्पत्तितो गुणत्रये वर्तमानं मनस्त्वयि असत् प्रवर्तमानं चेत्तदा सदिव यथार्थदर्शीव प्रतीयते वस्तुविचारे त्वयथार्थदर्श्येवेत्यर्थः। "तर्काप्रतिष्ठानात्" इति भावः। यत एवात्मविदः सर्वमूलस्वरूपस्य तव वेत्तारो ये ते तु जीवमभिव्याप्याशेषमिदं सद्रूपत्वेनानुगतं त्वामेव पश्यन्ति तच्चात्मतया सर्वमूलस्वरूपतया। यथा पाद्मे —

"चेतना तु द्विधा प्रोक्ता जीव आत्मा च सा प्रभो। जीवा ब्रह्मादयः प्रोक्ता आत्मैकस्तु जनार्दनः ॥
इतरेष्वात्मशब्दस्तु सोपचारोऽभिधीयते ॥" इति।

तदेवार्थान्तरन्यायेन बोधयन्ति–न हीति। कनकस्य विकृतिं कटककुण्डलादिकं कनकवणिजो हि न त्यजन्ति। तत्र हेतुः–तदात्मतया तदनुगततन्मात्रदृष्ट्येति। उभयत्र साम्यं योजयन्ति–स्वकृतमिति। स्वेन कृतं स्वेनाप्यनुगतं चेति। उपसंहरन्ति। स्मादात्मतया तत्स्वरूपतयैव निश्चितमिति। तस्मान्न शून्यस्य कारणत्वं न वा मनसः प्राधान्यं किन्तु तवैव तत्तदिति त्वद्वचनरूपायाः तैव मुख्यं प्राधान्यमिति भावः। अत्र श्रुतयः —

"यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥
यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः। न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥
यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥
यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः। स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥"

इत्याद्या "औपनिषदः पुरुषः" इत्याद्याश्च (१३) ॥२६॥

नीलकण्ठी — ननु भेदस्याबोधकृतत्वे शुक्तिरजतवन्मिथ्यात्वं स्यात्तथा च कथं लौकिकवैदिकव्यवहार इत्यत आह–मन इति। आमनुजात्त्रिवृन्मनः असदपि सदिव त्वयि विभातीति सम्बन्धः। आ इत्यभिविधावाङ्। मनुजः प्रमाता तद्वत्प्रमातुरप्यध्यस्तत्वेन तत्सहितं मनोमयं सर्वं मन एव स्वरूपेणासदपि त्वयि अधिष्ठाने स्वप्नसदृशीव विविधं भाति मिथ्यात्वेऽपि स्वप्नवद्व्यवहारोपपत्तिरिति भावः। मनो विशिनष्टि–त्रिवृदिति। त्रिभिर्मातृमानमेयैः सत्त्वरजस्तमोभिस्तेजोऽबन्नैर्वा

सह वर्तते इति त्रिवृत् । तत्र तेजोऽबन्नात्मत्वे मनसस्तत्त्वान्तरित्वनिरासो लभ्यते । "तासां त्रिवृतं त्रिवृतमेकैकामकरोत्" इति तेजोऽबन्नानां त्रिवृत्करणे श्रुतेः । तच्चैषामेकैकस्मिन्नर्धं स्वांशः अर्धमितरयोरंशः समत्वेनेति तदेतत्त्रिवृत्करणं पञ्चीकरणोपलक्षणार्थं सृष्टिवदित्येके । अन्ये तु सम्प्रदायागतमपि पञ्चीकरणं नाद्रियन्ते त्रिवृत्करणमेव श्रौतं विवक्षितमित्याहुः । ननु स्वप्नवद्व्यवहारश्चेद्बुद्धानां तद्वदेव स लुप्येतेत्याशङ्क्याह–सदिति । आत्मविद इदं सत् अशेषं न शिष्यते इत्यशेषं यथा स्यात्तथा आत्मतयाभिमृशन्ति तत्त्वज्ञाः परिदृश्यमानं कार्यं द्विचन्द्रवत्सहैव बाधेनात्मतया जानन्ति । समाधौ भेददर्शाभावेऽपि व्युत्थाने दग्धपटवदविद्यासंस्कारादनुवर्तमानमनःकल्पितं भेदं प्रत्याख्यातुं समर्थास्ते इत्यतो न तेषां व्यवहारलोप इति भावः । ननु स्वरूपानन्दतृप्तास्ते मातृमानमेयात्मकं मनोव्यवहारं कुतो न त्यजन्तीत्यत आह–न हीति । अत्र मनस इति षष्ठ्यन्तं विपरिणामेनानुषञ्जनीयम् । कनकस्येति दृष्टान्तार्थमुक्तम् । तदात्मतयेति हेतुः । यथा कनकार्थिनः कनकस्य विकृतिं कुण्डलादिरूपां कनकात्मतया न त्यजन्ति एवात्मविदोऽपि प्रारब्धकर्मावष्टब्धमनःकल्पितदेहेन्द्रियादिनिर्वाहार्थिनः मनोविकृतिं मात्रादिरूपां व्यवहृतिं चक्रभ्रमिवदनुवर्तमानमनस्तादात्म्यमत्तया न त्यजन्तीत्यर्थः । मनस्तादात्म्ये बीजमाह–स्वकृतमनुप्रविष्टमिति । "तत्सृष्ट्वा तदेवानुप्राविशत् ।" इति श्रुतेः । स्वकृतं स्वस्मिन्कल्पितमनुप्रविष्टं स्वेनैव सदात्मतानुविद्धं शुक्तिसत्तयेव तत्र कल्पितं रजतं प्रतीच्यध्यस्तत्वात्तत्त्वविदामपि व्यवहारेऽस्त्येव मनस्तादात्म्यमित्यर्थः । मनसोऽध्यस्तत्वेऽनुमानमाह–इदमात्मतयावसितमिति । इदमर्थास्पदत्वेन दृश्यत्वेन हेतुनेति यावत् ।अवसितमवसानं बाधं प्रापितम् । तथा चायं प्रयोगः सूचितः । अहमादिर्बाधयोग्यः दृश्यत्वात्स्वप्नमायादिवदिति । न च पुष्कलार्थक्रियाकारित्वेन बाधायोग्यत्वमपि सिद्ध्यतीति वाच्यम्–गरुडोऽस्मीति भावनायाः सत्यविषनिवर्तकत्वेऽपि बाधदर्शनात् । एवं च तुच्छादज्ञानान्मनस उत्पत्तिः ततः प्रमात्रादिविकल्प इति सिद्धम् । तथा च श्रुतिः —

"असतोऽधि मनोऽसृज्यत । मनः प्रजापतिमसृजत । प्रजापतिः प्रजा असृजत । तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किञ्च ॥" (१३) ॥२६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सदिवेत्यस्य टीकायां श्रुतौ "असद्वा इदमग्र आसीत् ।" इति श्रुतेरसतो ब्रह्मणो निमित्तत्वात् अधि न विद्यते धीर्यस्मादित्यज्ञानमेव मनोरूपेण व्यवर्ततेत्यर्थः । तच्च समष्ट्यात्मकं मनः प्रजापतिं तदभिमानिनं ब्रह्माणं व्यक्तमकरोदित्यर्थः । स्वमते त्वियं व्याख्या । अत्रासतोऽधि मनोऽसृज्यतेत्यादिश्रुतिरपि अत्रासच्छब्देन सच्छब्दप्रसिद्धकार्यपरम्परातिरिक्तं सर्वकारणं श्रीभगवानुच्यते "असव्द्यपदेशान्नेति चेन्न, धर्मान्तरेण वाक्यशेषात्" इति न्यायात् । अधिमनःशब्देन सर्वाधिकारि तदीयमेव मनः ततश्चासत इत्यसता तेनासृज्यतेति तदर्थं व्यापारयामासेत्यर्थः । अथ पुनरेव नारायणः– "सोऽन्यं कामं मनसा ध्यायेत्तस्य ध्यानान्तःस्थस्य ललाटात्स्वेदोऽपतत् । ता इमाः प्रथमापः तासु तेजो हिरण्मयमण्डम् । तत्र ब्रह्मा चतुर्मुखोऽजायत ॥" इति श्रुतेः । एतमर्थमज्ञातुः कस्यचित्पूर्वपक्षमाशङ्क्य समादधते–तत्राशङ्का, ननु–श्रुत्या शून्यमेव प्रथममुपदिष्टं तदनन्तरं मनोविज्ञानपरम्परा ततोऽसत एव पर्यवसानेऽपि स्थितिः स्यात् । तथा मनसः प्रधानत्वात्तर्क एव सर्वत्र ज्ञानहेतुः । श्रुतेस्तु कल्पितत्वात्तदनन्तरमेव कथं पुनः श्रुत्या तत्तद्दूष्यत इति । समाधानं तु–सदिवेति । त्रिवृत् उत्पत्तितो गुणत्रये वर्तमानं मनस्त्वयि असत् प्रवर्तमानं चेत्तदा सदिव यथार्थदर्शीव प्रतीयते वस्तुविचारे त्वयथार्थदर्श्येवेत्यर्थः । "तर्काप्रतिष्ठानात्" इति भावः । यत एवात्मविदः सर्वमूलस्वरूपस्य तव वेत्तारो ये ते तु जीवमभिव्याप्याशेषमिदं सद्रूपत्वेनानुगतं त्वामेव पश्यन्ति तच्चात्मतया सर्वमूलस्वरूपतया । यथा पाद्मे —

"चेतना तु द्विधा प्रोक्ता जीव आत्मा च सा प्रभो । जीवा ब्रह्मादयः प्रोक्ता आत्मैकस्तु जनार्दनः ॥
इतरेष्वात्मशब्दस्तु सोपचारोऽभिधीयते ॥" इति ।

तदेवार्थान्तरन्यायेन बोधयन्ति–न हीति । कनकस्य विकृतिं कटककुण्डलादिकं कनकवणिजो हि न त्यजन्ति । तत्र हेतुः तदात्मतया तदनुगततन्मात्रदृष्ट्येति । उभयत्र साम्यं योजयन्ति–स्वकृतमिति । स्वेन कृतं स्वेनाप्यनुगतं चेति । उपसंहरन्ति ।

तस्मादात्मतया तत
श्रुतेरेव मुख्यं प्राधा

"यस्त्ववि
यस्त्वविज्ञ
यस्तु विज्ञा
यस्तु विज्ञा
विज्ञानसार
इन्द्रियेभ्यः
महतः परमव
इत्याद्या "औ

अहो भगवन्!
सोऽपि साधुर्भवेदित्याशये
जीवजातम् । कथम्भूतम्
चेत् स्यात्, तर्हि तत् साधुस
हि परमो हरिः" इत्यात्म
सदभिमृशन्ति, साध्वेव जा
त्वयि आत्मा मनो यस्य तत्
स्वस्य तव कृतं चरितमनुप्र
प्रायस्त्रिवृत् तापत्रयावर्तितम
किञ्चित्त्वत्सम्बन्धगन्धि भवे
चित्रमित्याहुः–सदिति । ये तु

"चेतनस्तु द्विधा प्रो
इतरेष्वात्म–शब्दस्तु

ते इदं त्वत्सम्बन्धि
सदेवानुभवन्तीत्यर्थः । श्रीमदे
११/२५/२५) "मन्निकेतं तु
श्रीभगवता नैर्गुण्यस्यापादितत्वात्
श्रीभगवतः सम्बन्धेनेति । एतदे
म्बन्धीत्यर्थः । आत्मतया श्रीभ
विश्वमशेषमेव सत्यमनुभवन्ति, स
अतः सत्यतानुभवेनैव तानि तानि
इदमेव द्रढयन्ति–न हिति । भवता

दात्मतया तत्स्वरूपतयैव निश्चितमिति। तस्मान्न शून्यस्य कारणत्वं न वा मनसः प्राधान्यं किन्तु तवैव तत्तदिति त्वद्वचनरूपायाः व मुख्यं प्राधान्यमिति भावः। अत्र श्रुतयः —

"यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः॥
यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः। न स तत्पदमाप्नोति संसारं चाधिगच्छति॥
यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः॥
यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः। स तु तत्पदमाप्नोति यस्माद्भूयो न जायते॥
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः॥"

इत्याद्या "औपनिषदः पुरुषः" इत्याद्याश्च ॥१३॥२६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो भगवन्! ईदृशोऽपि विसदृशभेदोऽपदेष्टा पुमान् यदि कदाचित् केनापि दुस्तर्क्यभाग्योदयेन त्वदाश्रितः स्यात्, तर्हि पि साधुर्भवेदित्याशयेनाहुः-सदिति। इवेति लोकोक्तिरीत्यानधिकारार्थम्। आमनुजात्, मनुजो मनुष्यस्तमभिव्याप्य, तिर्यक्पर्यन्तं जातम्। कथम्भूतम्? मनस्त्रिवृत् त्रिगुणात्मकं मन इत्यर्थः। तथाभूतमपि तथा असदपि त्वयि त्वद्विषयकं यथाकथञ्चिद्भजनपरं स्यात्, तर्हि तत् साधुस्वरूपं विशेषेण ज्ञानादिकृतशुद्धितोऽप्याधिक्येन भाति। अत आत्मविदः – "आत्ततत्त्वाच्च मातृत्वादात्मा परमो हरिः" इत्यात्मानं त्वां सेव्यतया विदन्तीति त्वद्भक्ता इदं त्वद्भजनपरमशेषं जीवजातमात्मतयाऽऽत्मनोऽपृथक्तया मृशन्ति, साध्वेव जानन्ति। अत एव जनाः कनकस्य विकृतिमिव तत्ते न त्यजन्ति, अपि तु स्वीकुर्वन्ति। तदात्मतया तस्मिन् आत्मा मनो यस्य तत् तदात्मा, तस्य भावस्तदात्मता तया तद्गतमनस्तया हेतुना गृह्णन्ति च। भवता चेदं त्वद्भजनपरं स्वकृतं तव कृतं चरितमनुप्रविष्टम्, आत्मतया प्रियतया, अवसितं निश्चितम्। यद्वा, आमनुजात् मनुजादेस्तिर्यक्पर्य्यन्तस्य मनः वृत् तापत्रयावर्तितमपि असत् सर्वदोषास्पदमपि, यदि कथञ्चिद्भवज्जनकारुण्यादिना त्वयि त्वद्विषयकं स्यात्, सत् त्वत्सम्बन्धगन्धि भवेदित्यर्थः, तर्हि सद्यः सदिव स्यात्, तर्हि त्वदीयसुष्ठुसम्बन्धपदार्थानां नैर्गुण्यपर्य्यवसायित्वे किं त्याहुः-सदिति। ये तु आत्मविदस्त्वद्विदः। यथा पाद्मे —

"चेतनस्तु द्विधा प्रोक्तो जीव आत्मेति च प्रभो। जीवा ब्रह्मादयः प्रोक्ता आत्मैकस्तु जनार्दनः॥
इतरेष्वात्म-शब्दस्तु सोपचारोऽभिधीयते॥" इति।

ते इदं त्वत्सम्बन्धिप्रमेयजातमशेषमेव पदमभिमृशन्ति, आत्मतया ज्ञान(ध्यान-[च]।)तादात्म्यापन्नतया भवन्तीत्यर्थः। श्रीमदेकादशस्कन्धे पञ्चविंशाध्याये (भा० ११/२५/२४)- "ज्ञानं मन्निष्ठं निर्गुणं स्मृतम्" तथा (भा० २५) "मन्निकेतं तु निर्गुणम्" तथा (भा० ११/२५/२६) "निर्गुणो मदपाश्रयः" इत्यादिना सर्वेषां स्वसम्बन्धिनां नैर्गुण्यस्यापादितत्वात्, यत् प्राकृतस्यापि स्पर्शमणेः स्पर्शमात्रादेव लोहमपि सुवर्णीभवति, किमुताप्राकृताचिन्त्यानन्तशक्तेः सम्बन्धेनेति। एतदेवाह-न हि विकृतिमिति। तदेवावधारणार्थमनुवदति-स्वकृतेनेति। स्वैर्भक्तैः कृतं स्वभक्तस- र्थः। आत्मतया श्रीभगवत्तादात्म्यापन्नतया, अनुप्रविष्टमित्यवशिष्टमित्यवसितम्। यद्वा, आत्मविदस्त्वद्भक्ताः इदं मेव सत्यमनुभवन्ति, सर्वस्यैव प्रपञ्चस्य सदसद्रूपत्वात्। त्वद्भक्त्या अस्यासद्रूपत्वे विलीने सत्यरूपतामेवानुभवन्ति, तानुभवेनैव तानि तानि गन्ध-पुष्प-धूप-दीप-सदन्नादीनि वस्तूनि प्रभवे निजाभीष्ट-दैवताय तुभ्यं समर्पयन्तीति। यन्ति-न हिति। भवताऽपि भक्तकृतमात्मतया प्रियतया अनुप्रविष्टं सुष्ठु स्वीकृतमित्यस्माभिर्निश्चितम्॥२६॥

[अथान्याः काश्चिद्गोवर्धनस्वरूपप्रियस्थानकथनप्रसङ्गेन सर्वस्यैव भगवत्प्रियस्थानस्य सत्यताप्रतिपादनेन तं स्तुवन्ति-सदिवेति। आमनुजान्मनुष्यमभिव्याप्य स्थावरपर्यन्तं मर्त्यभुवनमसदपि मन इवास्थिरमपि, त्रिवृत् तापत्रयावृतमपि सदिव सर्वोत्तममिव विभाति । तत्र हेतुः-त्वयीति । त्वयि सति त्वय्यत्रावतीर्णेन इति शेषो वा, तवावतारादित्यर्थः । ननु मर्त्यभुवनान्तर्वर्ति श्रीमथुराद्वारकादिस्थानमपि किं खल्वसदित्युच्यते ? नेत्याहुः-सदिति। आत्मविद आत्मनि त्वां जानन्तः, इदमशेषं मथुराद्वारकादिकं तव स्थानं सत् सत्यं जानन्ति । तत्र हेतुः-आत्मतया चिद्रूपतया हेतुना चित्त्वादात्म्यापन्नत्वादित्यर्थः । तत्र निदर्शनम्-न हीति। अतः स्वकृतं स्वयमेवाविर्भावितमिदं त्वदीयस्थानमात्मतया निश्चितम्, तत्राप्यचिन्त्याद्भुतशक्तिना त्वयानुप्रविष्टं निरन्तरं कृतप्रवेशं त्वन्नित्यास्पदमिति यावत्। तथा हि तापनीश्रुतिः (उ० ३९-४०) -

"प्राप्यमथुरां पुरीं रम्यां सदा ब्रह्मादिसेविताम्। शङ्खचक्रगदाशार्ङ्गरक्षितां मुषलादिभिः ॥
यत्रासौ संस्थितः कृष्णस्त्रिभिः शक्त्या समन्वितः ॥ इत्यादि ॥" ॥२६॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विश्वस्य भगवदात्मकत्वाग्रहणं मनोदोषात् मनसि शुद्धे भगवदात्मकतया प्रतीयमानं विश्वमुपादेयं स्यादित्याह-सदिवेति। आमनुजात् मनुष्यपर्यन्तात्। मनुष्यपर्यन्तानां देहिनाम्। त्रिवृत् त्रिगुणात्मकम्। सदिव सत्त्वमर्थक्रियाकारित्वम्। मनसि कार्यकरमिव प्रतीयमानमपि त्वयि असद्भाति। कार्यकरं न भाति। त्वां न प्रकाशयति। अथशब्दः पक्षान्तरे विशुद्धे त्वत्प्रकाशनक्षमे मनसीत्यर्थः । आत्मविदः अशेषं न जगदिति परमात्मतया विमृशन्ति । हि आत्मशब्दः परमात्मपरः । अजयात्मना च चरत इत्युक्तप्रकारेण चिदचिद्विशिष्टं कारणं परं ब्रह्मैव कार्यावस्थं जगद्रूपेण स्थितमिति विमृशन्ति। ब्रह्मात्मकत्वेन जगतो हेतयत्वाभावे दृष्टान्तमाह-न हि त्यजन्ति कार्यावस्थायामपि कनकस्य न व्यतिरेकात् जगदुपादेयत्वमित्याह-स्वकृतमिति। स्वकृतं जगत्तेन परमात्मनानुप्रविष्टं व्याप्तं 'तत्सृष्ट्वा तदेवानुप्राविशत्।' इति श्रुतिः। अतः इदं जगदात्मतया रूपितं परमात्मशब्दवाच्यम्। वस्त्वन्तर्गततया सुखरूपमित्यर्थः ।

'तदात्मानं स्वयमकुरुत।' 'तद्वैतत्सुकृतम्। रसो वै सः।' इति श्रुतिः ॥२६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

किमबोधनिदानमित्यपेक्षायां मनोदोष एवेति किं तन्निवृत्तिनिदानमित्यपेक्षायां भगवदुपासनात्मकयोग एवेति विशुद्धान्तःकरणास्तु सर्वमिदं जगद्भगवदात्मतया सूक्ष्मचिदचिद्विशिष्टभगवत्कार्यतया च तदनन्यदेव पश्यन्तीति वदन्तः सत्कारणवादरूपदूषणपरिहारपूर्वकमसत्कारणवादासाधारणानुपपत्तिमाहुः-सदिवेति ॥ आमनुजात् मनुजपर्यन्तं मनुष्यपर्यन्तानां देहिनामित्यर्थः। त्रिवृत् त्रिगुणात्मकं मनः सदिव सत्त्वमर्थक्रियाकारित्वं कार्यकरमिव प्रतीयमानमपि त्वयि असत् भाति कार्यकरं न भवति । चिदचिदात्मकजगद्विशिष्टं तदात्मानं त्वां न प्रकाशयतीत्यर्थः । आत्मानं त्वां विदन्त्युपासत इत्यात्मविदः त्वदुपासनात्मकयोगपरिशुद्धान्तःकरणास्तु अशेषं कृत्स्नमिदं जगदात्मतया। आत्मशब्दः परमात्मपरः। "अजयात्मना च चरतः" इत्युक्तप्रकारेण सदभिमृशन्ति । सच्छब्दवाच्यं सूक्ष्मचिदचिद्विशिष्टं कारणं ब्रह्मैव कार्यजगद्रूपेणावस्थितमतस्ततोऽनन्यदित्येवमुपास्यपरब्रह्मविशेषणतया उपास्यकोट्यन्तर्गतत्वाज्जगदप्युपादेयमेव पश्यन्तीत्यर्थः । ब्रह्मात्मकत्वेन जगतो हेयत्वाभावे दृष्टान्तमाहुः- न हीति। कनकस्य विकृतिं विकारं कटकमुकुटादिकं न हि त्यजन्ति। किं तु तदात्मतया प्रकृतिभूतकनकानन्यत्वं उपाददत एवेति शेषः। कार्यावस्थायामपि कनकाव्यतिरेकादिति भावः। यदि कार्यं कारणादन्यत्तदा कनकस्य विकृतिं त्यजेयुरिति असत्कार्यवादेऽनुपपत्तिरभिसंहिता। एवं जगदुपादेयमेवेत्याहुः-स्वकृतमिति। स्वरूपपरिणामशङ्काव्यावृत्त्यर्थमनुप्रवेशोक्तिः। स्वशब्दः परमात्मपरः । स्वकृतं जगत् । तेन तेन व्याप्तं 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति हि श्रुतिः। अतः इदं जगदात्मतयावसितमुपास्यपरमात्मशब्दवाच्यवस्त्वन्तर्गततया सुखरूपं निश्चितमित्यर्थः। "तदात्मानं स्वयमकुरुत। यद्वै तत्सुकृतम्"

"रसो वै सः" इ
अनेनाकाशवन्न तू
फलितम् ॥२६॥

मूलम्

"न हि वि
तव ये परिच
"सर्वगं ये प्र
इति श्रुत्यर्थेन
यथा कनक
तदात्मतयेति। कनक
हेतुरात्मतयेति । एकस्व
विष्णुरिति ज्ञातव्य इति
निकेतनानि अधिष्ठानतया
निकेततया ते ज्ञानिनः
अविगणय्य। संसारमिति
तत्र श्रुत्युक्ताधिकार्थे पुरा
"यथैव कुण्डलं
एवं सुरासुरनरेष्वा
ये तथाभिन्नमीशे
अगणय्य पदाक्रम

स खलु बोधस्त्वं
तस्मात्तवाचिन्त्यशक्तिवैभव
श्रुतिरस्ति। तत्रासच्छब्देन सच्
वाक्यशेषादिति न्यायात्। अ
तु सर्वाधिकाधिकारी तदीयम
ध्यायेत् तस्य ध्यानान्तःस्थस्य
श्रुतेः। एतदर्थमज्ञातुः कस्यचि
मनोविज्ञानपरम्परा। ततोऽसत
कल्पितत्वात् तदनन्तरमेव क

वै सः" इति श्रुतिः । यद्वा आत्मतयान्तः प्रविश्य धारकतया धारकत्वं हि आत्मशब्दार्थः । तेन अवसितं व्याप्तम् । काशवन्न तूष्णीं व्याप्तिः किं तु धारकतयेत्युक्तम् । अनेनेदं सदित्यभिमृशन्तीत्युक्तं सामानाधिकरण्यं शरीरात्मभावनिबन्धनमिति तम् ॥२६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

"न हि विकृतं त्यजन्ति कनकस्य तदात्मतया स्वकृतमनुप्रविष्ट इदमात्मतया रसितम् ।

तव ये परिचरन्त्यखिलतत्त्वनिकेततया ननु ते पदाक्रमन्त्यविगणय्य शिरो निर्ऋतेः ॥"

"सर्वगं ये प्रपश्यन्ति ब्रह्मानन्दमजाक्षरम् । एकमेवाद्वयं नित्यं निर्ऋतेस्ते शिरोगताः ॥"

इति श्रुत्यर्थेन ग्रथितस्य न हि विकृतमित्यस्य श्लोकस्यायं भावः ।

यथा कनकस्य विकृतं विविधकृतं कुण्डलादिरूपं कनकं विना परित्यक्तुं न शक्यते नेदं कनकं सर्वमिति तत्र हेतुः तयेति । कनकस्वरूपत्वेन प्रमाणसिद्धत्वात् तथा स्वकृतमिदं जगदनुप्रविष्टो भवान्मूलरूपं विना परित्यक्तुं न शक्यः । तत्र त्मतयेति । एकस्वरूपत्वात् । कीदृशम् । जगत्प्रविष्टः रसितं लसितम् आत्मना प्रकाशितम् । जगत्प्रविष्टस्तस्मात्सर्वगतो युरिति ज्ञातव्य इति तात्पर्यार्थः । एवंविधज्ञानेन किं प्रयोजनं तदाह–तवेति । ये तव अखिलतत्त्वानि सर्वपदार्थाः अधिष्ठानतया त्त्वानि अधिष्ठानतया आश्रयो यस्य स तथा तस्य भावस्तत्ता तया स्वरूपं ज्ञात्वा परिचरन्ति पूजयन्ति । यद्वा । अखिलतत्त्वानां ततया ते ज्ञानिनः ऋतात्मकब्रह्मप्राप्तिविरुद्धत्वान्निर्ऋताख्यस्य संसारस्य शिरः स्फुटं पदा क्रमन्ति । ननु किं कृत्वा । गणय्य । संसारमिति शेषः । आचार्यैरत्र या याः श्रुतयोऽध्येतृपरम्परासिद्धास्तास्ता एवोदाह्रियन्ते न त्वन्याः लोकप्रत्ययार्थम् । श्रुत्युक्ताधिकार्थे पुराणानि चोपात्तानि —

"यथैव कुण्डलं त्यक्त्वा नादातुं कनकांशकम् । तस्यैव तदवस्थत्वात्केवलाभेदतः स्फुटम् ॥

एवं सुरासुरनरेष्वास्थितो भगवान् हरिः । नैव भेदेन मन्तव्यो जीवभेदे तु सत्यपि ॥

ये तथाभिन्नमीशेशं पश्यन्ति परमर्षयः । ऋतप्राप्तिविरुद्धत्वात्संसारनिर्ऋतेः शिरः ॥

अगणय्य पदाक्रम्य वैष्णवं निलयं ययुः ॥" इति गारुडे ॥१४॥२८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

स खलु बोधस्त्वं पुनरवबोधैकरसः । कथमिव सत्तां तिमिरमिव तेजोमलिनं विषयमाश्रयं वा करोत्वित्यर्थः । वाचिन्त्यशक्तिवैभवस्याज्ञानादेव तथोत्प्रेक्षन्त इति भावः । शेषं टीकाभिप्राये । अथासतोऽभिमतोऽसृज्यतेत्यादि । तत्रासच्छब्देन सच्छब्दप्रसिद्धकार्यपरम्परातिरिक्तं सर्व्वकारणं श्रीभगवानुच्यते । असद्व्यपदेशान्नेति चेन्न । धर्मान्तरेण वादिति न्यायात् । अधिमनश्शब्देन समष्टिमनोऽधिकारी अनिरुद्ध एवोच्यते । तस्य सृष्टिश्च प्रादुर्भावनमेव तदभेदविवक्षायां धिकाधिकारी तदीयमन एवैतेनोच्यते असृज्यत तदर्थं व्यापारयामासेत्यर्थः । अथ पुनरेव नारायण सोऽन्यं कामं मनसा तस्य ध्यानान्तःस्थस्य ललाटात् स्वेदोऽपतत् । ता इमा प्रतताप तास्तु तेजो हिरण्मयमण्डं तत्र ब्रह्मा चतुर्मुखोऽजायतेति एतदर्थमज्ञातुः कस्यचित् पूर्व्वपक्षमाशङ्क्य समादधते । तत्राशङ्काः । ननु श्रुत्या शून्यमेव प्रथममुपदिष्टम् । तदनन्तरं परम्परा । ततोऽसत एव पर्य्यवसानेन स्थितिः स्यात् । तथा मनसः प्रधानत्वात्तर्क एव सर्व्वत्र ज्ञाने हेतुः । श्रुतयस्तु त्वात् तदनन्तरमेव कथं पुनः श्रुत्या तत्तद्दूष्यत इति समाधानं तु सदिव ॥२६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

न केवलं त्वमेव निर्गुणः अपि तु तव धाम पार्षदादयश्च निर्गुणाः यतः स्वयमेवोक्तं निर्गुणं मदपाश्रयमित्यादि। अतस्तदेव सत्यमिति तत्प्रकारमाहुः-सदिव मन इत्यादि। इदं विश्वं मनः मनःकल्पितत्वात् अत आमनुजात् आपुरुषात् पुरुषं मर्य्यादीकृत्य। आङ्मर्यादाभिविध्योः। पुरुषं त्यक्त्वा सर्वमिदं त्रिवृत् त्रिगुणात्मकम् अतोऽसदपि सदिव भाति। सदेव भाति। इव एवार्थकः। कथं भवतीत्याहुः-त्वयि त्वद्विषयकं यदि भवतीत्यर्थः। त्वत्सम्बन्धेन असदपि विश्वं सदिव भाति किम्पुनः सत् नित्यभूतं यत्तव लोकादि तस्य नित्यत्वे कारणमाहुः-अशेषं न विद्यते शेषो यस्य। ननु, क एवं मम लोकादेः सत्यतां वदन्तीत्याहुः-आत्मानंभवन्तं विदन्तीत्यात्मविदः। कया बुद्ध्या वदन्तीत्याहुः-आत्मतया त्वत्स्वरूपतया त्वल्लोकादिकं त्वत्सरूपमेव क्षेमं विन्दन्ति। मत्स्थानं यत् ब्रह्म परमं विदुरिति तवैवोक्तेः। अत उक्तं 'न यत्र कालोनिमिषां परप्रभुरि'त्यादि। आत्मतयेति यदुक्तं तद्दृष्टान्तेन स्पष्टयन्ति न हीत्यादि। कनकविकृतिं कुण्डलादिकनकार्थिनो न त्यजन्ति। कुत इत्याहुः-तदात्मतया। तदपि कुण्डलादिकनकमेव आकारमात्रेणैव विकृतत्वं न तु विकृतिः। एतेन त्वं कृष्णरूपेण नित्याविकृत एव घनानन्दत्वात्। तव लोकाश्च घनाघनानन्दत्वेन न विकृता अपि तु पार्षदादितरुगुल्मखगमृगाद्याकारेणैव। अतः त्वत्सम्बन्धादसदपि सदिव भासते। यत्तु नित्यसत् तत्सदेवेति तात्पर्य्यार्थः ॥२६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ननु जनिमसत इत्यनेन जगतोऽसत्त्वमेव वास्तवम्। सदसत्त्वे तदन्तर्यामिणः पुरुषस्यापि पृथक्त्वमसत्, तत् कथमयं प्रपञ्च एतदन्तर्यामि पुरुषश्चेति प्रतीतिरित्याहुः-सदिवेत्यादि। त्रिवृत् त्रिगुणात्मकं विश्वमामनुजात् आपुरुषात् पुरुषमवधिकृत्य सर्वं मनः मनःकल्पितत्वात्, एतेनासदपि सदिव भाति, कुतस्त्वयि त्वद्विषये, त्वद्विषयं यदि भवति, तदा सदिव सदेव भवतीत्यर्थः। अत आत्मविद् आत्मानं भवन्तं विन्दन्तीति आत्मविदो भक्ता इदमवशेषं तत्सम्बन्धेन सत् सत्यमिति जानन्ति, आत्मतया भवदीयतया। अयमर्थः —

इदं विश्वं स्वतोऽसदेव, त्वल्लोकवर्ति यत् किञ्चित् तत् सत्यमेव अत उक्तम् - (भा० १/१/१) "यत्र त्रिसर्गोऽमृषा" तदेव दृष्टान्तेन स्पष्टयति- न हीत्यादि। कनकस्य विकृतिं कनकार्थिनो न त्यजन्ति तदात्मतया हेतुभूतया। अतस्तव सम्बन्धो ह्येव विकृतिस्तेन तव विकृतं त्वं त्वदीयमिति तदपि सत्, न हि वस्तुतस्त्वं प्रपञ्चरूपेण विकरोषि, अत इदं स्वकृतं विश्वमनुप्रविष्टं च पुरुषरूपमात्मतया भवदीयत्वेनावासितं व्यवसितम्, यद्यद्भवदीयम्, तत्तदेव सत्यमित्यर्थः ॥२६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अत्र त्रिगुणमयः पुमानिति भिदेत्यत्र ज्ञानिनां मते जीवात्मनि त्रिगुणमयत्वेन भिदा परमात्मनः सकाशाद्भेदोऽज्ञानकल्पित एव। ज्ञानेन तु तस्मिन्नज्ञाने नष्टे सति भेदे च तिरोहिते स परमात्मैव भवति। अतो जीवात्मा नाम परमात्मतो न पृथग्वस्तुरूप इति तत्त्वम्। बन्धमोक्षौ त्वज्ञानविजृम्भितावेव। किञ्चैवमिदङ्कारास्पदं विश्वमपि ततः पृथक्प्रतीतमज्ञानादेवेत्याहुः-सदिवेति। इदमशेषं त्रिवृत् त्रिगुणात्मकं प्रपञ्चजातम् आमनुजात् मनुजः पुरुषो जीवस्तमभिव्याप्य। सदिव न तु सत्। यतो मनः मनोमात्रविलसितमित्यर्थः। तथा च श्रुतिः —

असतोऽधिमनोऽसृज्यत। मनः प्रजापतिमसृजत्। प्रजापतिः प्रजा असृजत्। तद्वा इदं मनस्येव परमं प्रतिष्ठितम्। यदिदं किञ्च ॥

इति अर्थश्च - असद्वा इदमग्र आसीदिति असतो ब्रह्मणो निमित्तात् अधि न विद्यते धीर्यस्मादित्यज्ञानमेव मनोरूपं व्यवर्ततेत्यर्थः। तच्च समष्ट्यात्मकं मनः प्रजापतिम् तदभिमानिनम् असृजत्। व्यक्तमकरोदित्यर्थः। न त्वात्मविदामपि किं सदेव स्फुरति। अतः कथमसत् स्यादत आहुः-सत अभिमृशन्ति। सदिति जानन्ति। आत्मकार्यत्वान्न। ततः पृथगित्यर्थः। न हि यदुपादानकं यतः कार्यं भवति तत्तेनैव रूपेण प्रतीयते उपादीयते चेति लोकाचारेण दर्शयन्ति न हि विकृतमिति। कनक

विकृतिं कुण्डलादिकं कनकार्थिनो न त्यजन्ति। तत्र हेतु:-तदात्मतया कनकरूपत्वेनेत्यर्थ:। अत: स्वकृतमिदं विश्वं तदनुप्रविष्टं पुरुषस्वरूपं च आत्मतयैव अवसितं निश्चितं ज्ञानिभि:। एतदेवापरोक्षज्ञानं संसारबन्धमोचकमिति भाव: ॥२६॥

गूढार्थदीपिनी

तदेवम् असन्नोत्पद्यते त्रिगुणमय: पुरुषश्च न सम्भवति इति सिद्धम्, ततश्च जगत् जीवश्च ब्रह्मण: पृथङ् न स्त इत्युक्तं स्यात्। कथं तर्हि तयो: पृथक् सत्त्वेन प्रतीति: ? अत आहु: श्रुतय: सदिवेति।

(सृष्टिसत्यासत्यत्वपरेयम्)

पद्यानुवाद:

असदपि त्वयि सज्जगदाजनात्सदभियन्ति तदात्मतया विद: ।★

कनककुण्डलवद्भगवन्निदं★ तव सतो वशतो मितमात्मना ॥१३॥२७॥

सङ्क्षिप्तसार्थान्वय: — हे भगवन्! आमनुजात् मनुजं जीवमभिव्याप्य त्रवृत् त्रिगुणात्मकम् अशेषम् इदं दृश्यमानं जगत् मन: कल्पितम् असदपि त्वयि अधिष्ठाने सति सदिव विभाति न तु वस्तुत: सत्। आत्मविदस्तु अशेषम् इदम् आत्मतया सत् अभिमृशन्ति सदिति जानन्ति। हि यत: कनकस्य विकृतिं कटककुण्डलादिकं कनकार्थिनो न त्यजन्ति किन्तु तदात्मतया कनकरूपतया तद् गृह्णन्त्येव अत: स्वेन भगवता कृतमिदं विश्वं तत्र अनुप्रविष्टं जीवरूपं च आत्मतयैव अवसितं निश्चितम् आत्मविद्भि:। हे भगवन्! मन: मनोमात्रविलसितमिदं त्रिवृत् त्रिभिर्गुणैर्वर्तते प्रवर्तते इति त्रिवृत् त्रिगुणात्मकमशेषमिदं जगत् असदेव त्यजति अधिष्ठाने सति सदिव विभाति अधिष्ठानसत्तया सद्वत्प्रतीयते न वस्तुत: सदित्यर्थ:। न केवलमिदमेव किन्तु आमनुजात् मनुजो जीवस्तमभिव्याप्येतर्तीति जगत: जीवस्यापि च पृथक् प्रतीतिर्मनोमात्रविलसितेत्यर्थ:। नन्वात्मविदमपि विश्वं सदेव स्फुरति, अत: कथमसत् ? तत्राहु:-आत्मविदो ज्ञानिनस्तु। यद्वा। आत्मानं परमात्मानं श्रीकृष्णंविदन्तीति आत्मविदो मकास्तु अशेषं सम्पूर्णमिदं भोक्तृभोग्यात्मकं जगत् आत्मतया परमात्मस्वरूपतया सत् अभिमृशन्ति सदिति जानन्ति। आत्मकार्यत्वान्न त: पृथगिति निश्चिन्वन्तीत्यर्थ:। युक्तं चैतत्। हि यत: कनकस्य विकृतिं कटककुण्डलादिकं कनकार्थिनो न त्यजन्ति अपि तु तदात्मतया तद् गृह्णन्त्येवेति शेष:। अत: स्वकृतं स्वेन सृष्टमिदं जगत् तदनु पश्चात् प्रविष्टं जीवरूपं च आत्मतया तत्स्वरूपयैव अवसितं निश्चितं व्यासादिभि:। अनेन कथं तयो: सत्त्वेन प्रतीति: ? इति समाहितम्॥

श्रीवल्लभाचार्यास्तु स्वेनैव कृतम् आत्मोपादानकम्। "स आत्मानं स्वयमकुरुत" इति श्रुते:। "स्वेनैव चानुप्रविष्टम्। सृष्ट्वा तदेवानुप्राविशत्।" इति श्रुते:। अतो जगत् तत्र स्थिता च सामग्री भगवानिति। इदं सर्वमात्मतयैवावसितम्, तत: र्वस्यापि ब्रह्मत्वात्कस्य दोष: कुत्र भवेत् ? मतान्तर एव दोषाणां दोषत्वं ब्रह्मवादे तु ब्रह्मत्वमेवेति सर्वमविरुद्धम्। जीवानां ब्रह्मस्वरूपत्वाद्दोषा अपि च मानसा:। जगच्च सकलं ब्रह्म ततो दोष: कथं हरौ इत्याहु: ॥१३॥२७॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

शक्तिशक्तिमतो: कार्यकारणयोश्च भिन्नाभिन्नत्वं स्पष्टयति-आमनुजात् मनुर्मन्त्रोमनु: स्वायम्भुवो वा जायतेऽस्मादिति नो ब्रह्मा चतुर्मुखपर्यन्तं क्षेत्रज्ञजातपर्यन्तं प्रति प्रिवृत् गुणमयं मन: सदिव स्वतन्त्रतुल्यमपि त्वयि विषये असत्। अस्वतन्त्रं ति क्षेत्रज्ञानां वशीकरणे सामर्थ्यवदपि त्वद्वशीकरणेऽसामर्थ्यवत् त्वन्नियम्यमायाकार्य्यत्वादिति भाव:। आत्मविदस्तु त्वयि त्वद्विषयकं मन: सदेवाभिमृशन्ति तव प्राप्तिसाधनत्वात् सत्कार्य्यत्वाद्वा। न केवलमेतावदेव सदभिमृशन्ति। किं त्विदमशेषं जातमपि। कुत:। आत्मतया सद्रूपतया। तथा च श्रुति: —

'सन्मूला: सौम्येमा: सर्वा: प्रजा: सदायतना: सत्त्वप्रविष्टा:। सर्वं खल्विदं ब्रह्मे'त्यादि।

तत्र दृष्टान्तमाह-कनकार्थिन: कनकस्य विकृतिं कटककुण्डलादिम् अन्यत्वेन न हि त्यजन्ति। तत्र हेतु:।

तदात्मतया कनकात्मकत्वात् । किञ्च । युक्तमेवैतत् । यतः स्वकृतं स्वेन सृष्टम् इदं जडजातं तदनुप्रविष्टं च विज्ञानात्मस्वरूपं च तदात्मतयाऽवसितम् । शास्त्रेण व्यासादिभिरिति शेषः । तथा च श्रुतिः —

'भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ।' 'तत्त्वमसी'त्यादि ।

असाधारणधर्मैर्भिन्नमपि साधारणैरभिन्नमिति निश्चितमिति भावः ॥२६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं सिद्धान्तान्तराणि परिहृत्य भक्तिमार्गे स्थापितेऽपि जगत्कर्तृत्वसर्वाश्रयत्वादिधर्माणां माहात्म्यार्थमङ्गीकरणे तद्गतो दोषः प्रसज्येत । तत्र परः सहस्रं दूषणानां सम्भवेऽपि दूषणद्वयं मुख्यं जगदाश्रयत्वेन जगत्सम्बन्धिदोषसमूहः उपादानत्वाच्च भगवत्येव भवति जीवस्य च भगवत्त्वे कामक्रोधादिसर्वे दोषाः भगवति भवन्ति । एतदुभयपरिहारार्थमाह–सदिव मन इति। आदौ जीवभावे यानि दूषणानि तानि परिहीयन्ते । मनस एव ते दोषाः, न तु जीवस्य । तच्चासदेव विशेषतो निरूपयितुं न शक्यत इति। नासदासीन्नो सदासीदिति मनस्तादृशं रूपं सदसदात्मकमिति । तत्रापि तस्यासत्त्वं सहजं, सत्त्वं तु आगन्तुकमिति श्रुत्यादिना जायत इति सदिवेत्युपमया निरूपितम् । तस्योभयात्मकत्वे हेतुमाह–त्रिवृदिति, गुणत्रयवेष्टितम् । तत्र सत्त्वांशे सत्त्वं भवति, अंशद्वये त्वसत्त्वमिति । एतादृशस्य प्रकाशो न जीवसम्बन्धात् किन्तु त्वय्येव विभाति ।

'मनसो वशे सर्वमिदं बभूव नान्यस्य मनो वशमन्वियाय ॥ भीष्मोऽपि देवः सहसः सहीयान् ॥' इति श्रुतिः ।मनसो माहात्म्यमाह–न ह्येतन्माहात्म्यं जीवाश्रयत्वे घटते । नन्वस्तु भगवदाश्रयत्वेनैव तस्य माहात्म्यं तथापि तद्दोषसम्बन्धः स्यादेवेति चेत्तत्राह–आमनुजादिति । मनुष्यपर्यन्तमेव परिभ्रमणे तस्य मनसः सः स्वभावः । तृणस्तम्बमारभ्य महत्तत्त्वपर्यन्तं जीवगणाः। तत्र मनुष्यो मध्यस्थः मनश्च सर्वेषामर्थे भगवता नियुक्तं सर्वत्र परिभ्रमति । यथा तस्य परिभ्रमणं सम्भवति तथांशभेदाः सामर्थ्यं वा कल्पनीयम्, उत्पत्तौ तस्यैकत्वप्रतिपादनात् । अतो मनुष्यपर्यन्तमेव यावत्परिभ्रमति तावत् असत् सदिव प्रतिभाति । अग्रे तु सदेव क्वचिदसदिव प्रतिभाति । तस्मात् कामादिदोषाणां मनोमूलत्वात् मनसश्च तत्स्वाभाविकं न भवतीति न तद्दोषेण भगवति दोषः। द्वितीयं परिहरति–सदभिमृशन्तीति । अभिमर्शो ज्ञानम् । अत्मविदोऽत्यन्तं प्रमाणभूताः । इदमशेषं जगत्सर्वं नानाप्रकारेण भ्रान्तदृष्ट्या भासमानमपि आत्मतयैव सदेत्यभिमृशन्ति सर्वं ब्रह्मेत्येव जानन्ति । मनसोऽप्यत्र दोषः परिहृतः । यथैन्द्रजालिकस्य अन्यथाप्रदर्शनसामर्थ्यं गुणः, न तु दोषो भवति । तथा मनसोऽपि कामादिभासनं गुण एव, कौतुकार्थत्वात् । वस्तुतस्तु ब्रह्मैव। अत्मविद इति वचनात् तेषां ज्ञानमात्मनि पर्यवसितम् । अत आत्मा परमार्थसत्यः । स एव यदि सर्वं कथमसत्यता आशङ्क्येतेत्यर्थः । तथापि युक्तिर्वक्तव्येति चेत्तत्राह–न हि विकृतिं त्यजन्ति कनकस्य सदात्मतयेति । कनकस्य विकृतिं कुण्डलादिकं कनकार्थिनो वणिजः किं त्यजन्ति ? अपि तु गृह्णन्त्येव, तत्रापि हेतुस्तदात्मतयेति । कनकात्मतया । ननु कनकमुपादानमिति मध्ये द्रव्यान्तरापूरिते विकृते कनकतया ग्रहणं युक्तम् । जगत्तु जडोपादानकं जीवसामग्र्या पूरितं कथं भगवानिति चेत्तत्राह-स्वकृतमनुप्रविष्टमिदमिति । स्वेनैव कृतम् आत्मोपादानं 'क स आत्मानं स्वयं न कुरुते' इति श्रुतेः । स्वेनैव चानुप्रविष्टं तत्सृष्ट्वा तदेवानुप्राविशदिति । अतो जगत्तत्र स्थिता च सामग्री भगवानिति । इदं सर्वमात्मतयैवावसितम् । ततः सर्वस्यापि ब्रह्मत्वात् कस्य दोषः कुत्र भवेत् । मतान्तर एव दोषाणां दोषत्वं ब्रह्मवादे तु ब्रह्मत्वमेवेति सर्वमविरुद्धम् ।

"जीवानां ब्रह्मरूपत्वाद्दोषा अपि च मानसाः । जगच्च सकलं ब्रह्म ततो दोषः कथं हरौ ?" ॥१३॥२६॥

श्रीसुबोधिनीसारः

शुक्तौ रूप्यमही रज्ज्वौ तद्वत्प्रातीतिकं भ्रम इत्याहुः । मनो मनोमात्रविलसितं त्रिवृत् त्रिगुणात्मकं प्रपञ्चजातम् असदेव सदिव जानन्ति । कार्यकारणयोरभेदात् तथा हि । कनकस्य सुवर्णस्य विकृतिं कटककुण्डलादिकं सुवर्णार्थिनो न त्यजन्ति तदात्मतया कनकरूपत्वेन अतः स्वकृतमिदं विश्वम् अनुप्रविष्टं पुरुषरूपं चात्मतयावसितं निश्चितम् ॥१३॥२६॥

ननु "अहं सु
भ्रान्तिमूलत्वमेव स्पष्टयि
मनः सदिव चैतन्यरूपा
मनसो जडादिरूपत्वे हे
सर्वाधारस्य चैतन्यरूपस्य
ब्रह्म" इति श्रुत्यनुगुणवि
आत्मविदस्त्वशेषमिदं वि
दृष्टान्तमाहुः–न हीति
कनकरूपत्वेनैव स्वीकुर्व
निश्चितमात्मवद्भिरित्यर्थः ।

ननु यद्यसन्नोत्पद्यते
कथं तयोः सत्त्वेन प्रतीतिरत
सदिव विभाति । आत्मविद
स्वकृतमिदं विश्वमनुप्रविष्टं पु
प्रपञ्चजातमिदङ्कारास्पदम् अ
अधिष्ठानसत्तया सद्वत्प्रतीयते
तथा च श्रुतिः — "असतो
यदिदं किञ्च ॥" इति ॥ ननु
भोक्तृभोग्यात्मकम् आत्मतय
स्वर्णक्रयिकाः जनाः तदात्मत
स्वीकुर्वन्ति तथा स्वेनोपा
निश्चितमात्मवद्भिः ॥२६॥

अज्ञानां विचित्रबो
विश्वस्मिन्नन्वयप्रकारमाहुः–सवि
सततपरिणामित्वादेकरूपेण न
आत्मविदः परमात्मविदः इदम
सत् अभिमृशन्ति जानन्ति । न
तथाभूताः इदम् अशेषं क्षेत्रक्षेत्रज्ञ
इति शेषः । कनकस्य रजतादि
तदात्मतया तस्य रजतादेरात्मतया

अयम्भावः —

यथा कनकार्थिनो रजता

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु "अहं सुख्यहं दुःख्यहं ज्ञानीत्याद्यात्मभेदस्य ब्रह्मादिपर्यन्तप्रसिद्धत्वात् कथमात्मभेदो नास्ति" इत्याशङ्क्य तस्य मूलत्वमेव स्पष्टयति-सदिवेति। मनुर्मन्त्रः, स्वायम्भुवो वा जायते यस्मात्स मनुजो ब्रह्मा तत्पर्यन्तमसत् जडमनित्यं तुच्छमपि सदिव चैतन्यरूपात्मवद्विभाति। अतो मनोभेदादेव तदध्यासेनात्मभेदव्यवहारः, न वस्तुत आत्मनि भेदोऽस्तीत्याशयः। जडादिरूपत्वे हेतुमाहुः-त्रिवृदिति। त्रिगुणात्मकप्रकृतिकार्यत्वादित्यर्थः। तथापि चेतनतया भावे हेतुमाहुः-त्वयीति। चैतन्यरूपस्य तव सन्निधानात् तस्य दर्पणवत् स्वच्छत्वेन चैतन्यग्रहणयोग्यत्वाच्च तथा भातीत्यर्थः। "सर्वं खल्विदं" इति श्रुत्यनुगुणविद्वदनुभवात्तु कस्यापि केनापि भेदो नास्ति, आत्मभेदस्तु दुरापास्त इत्याशयेनाहुः-सदभिमृशन्तीति। विदस्त्वशेषमिदं विश्वं सदभिमृशन्ति सदिति जानन्ति। तत्र हेतुमाहुः-आत्मतयेति। आत्मोपादानकत्वादित्यर्थः। तत्र माहुः-न हीति। यथा जनाः कनकस्य विकृतिं कटककुण्डलादि न हि त्यजन्ति किन्तु तदात्मतया रूपत्वेनैव स्वीकुर्वन्ति तथा स्वेनोपादानभूतेन कृतं तदनुप्रविष्टं पुरुषरूपं च सर्वमिदं भोग्यभोक्त्रात्मकमात्मतयाऽवसितं आत्मवद्भिरित्यर्थः ॥२६॥१३॥

अन्वितार्थप्रकाशिका

ननु यद्यसन्नोत्पद्यते यदि च त्रिगुणमयः पुरुषो न भवति तर्हीदं प्रपञ्चजातं पुरुषो भोक्ता च पृथक् नास्तीत्युक्तं स्यात्। ततः सत्त्वेन प्रतीतिरत आहुः-सदिवेति ॥ मनः मनोमात्रविलसितमिदमशेषं त्रिवृत् आमनुजात् असदपि त्वयि अधिष्ठाने सति विभाति। आत्मविदस्तु आत्मतया सदभिमृशन्ति। हि यतः कनकार्थिनः तदात्मतया कनकस्य विकृतिं न त्यजन्ति। अतः मिदं विश्वमनुप्रविष्टं पुरुषरूपं च आत्मतयैवावसितमित्यन्वयः। मनः मनोमात्रविलसितमिदं दृश्यमानमशेषं त्रिवृत् त्रिगुणात्मकं जातमिदङ्कारास्पदम् आमनुजात् मनुजं जीवमहङ्कारास्पदमभिव्याप्य असत् तुच्छमपि त्वयि अधिष्ठाने सति सदिव विभाति सत्तया सद्वत्प्रतीयते। इदङ्कारास्पदस्य जगतः अहङ्कारास्पदस्य जीवस्यापि च पृथकं प्रतीतिर्मनोमात्रविलसितेत्याशयः। श्रुतिः — "असतोऽधि मनोऽसृजत मनः प्रजापतिमसृजत प्रजापतिः प्रजा असृजत, तद्वा इदं मनस्येव परमं प्रतिष्ठितं किञ्च ॥" इति ॥ ननु आत्मविदामपि विश्वं सदेव स्फुरति ततः कथमसदिति चेत्तत्राह। आत्मविदस्तु अशेषमिदं विश्वं मयात्मकम् आत्मतया आत्मस्वरूपत्वेन सदभिमृशन्ति सदिति जानन्ति। आत्मकायत्वान्न ततः पृथगित्यर्थः। यथा र्थिकाः जनाः तदात्मतया कनकरूपत्वेन हेतुना कनकस्य विकृतिं कटककुण्डलादि न हि त्यजन्ति किन्तु कनकरूपत्वेनैव र्वन्ति तथा स्वेनोपादानभूतेन कृतं तदनुप्रविष्टं पुरुषरूपं च सर्वमिदं भोग्यभोक्तात्मकमात्मतयावसितं आत्मवद्भिः ॥२६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अज्ञानां विचित्रबोधास्पदस्य ज्ञानिनामनवधिकातिशयासङ्ख्येयकल्याणगुणगणमूर्त्यवबोधास्पदस्य भगवतो न्वयप्रकारमाहुः-सदिवेति ॥ मनः मनोमात्रविलसितमीश्वरसंश्वरसङ्कल्पादुत्पन्नमिति यावत् ॥ असदपि अपीति शेषः। मित्वादेकरूपेण न तिष्ठति तथापि तत्र त्वयि अन्तर्यामितया स्थिते सति सदिव विभाति। अज्ञानामिति शेषः ॥ परमात्मविदः इदमशेषं देवदिक्षेत्रक्षेत्रज्ञरूपं परमात्मनः शरीरभूतं विश्वम् आत्मतया क्षेत्रज्ञकर्मफलप्रदान्तर्यामितया मृशन्ति जानन्ति। न तु क्षेत्रभावेन ॥ यद्वा ॥ आत्मविदः सत्त्वादिगुणयुक्तानात्मनो जीवान् विन्दन्ति जानन्तीति इदम् अशेषं क्षेत्रक्षेत्रज्ञरूपं विश्वम् आत्मतया जीवात्मनया सत् अभिमृशन्ति न तु देहदैहिकभावेन ॥ यथा कनकार्थिन। कनकस्य रजतादिमिश्रणोद्भूतैकावलीपूराद्याकारेण स्थितस्य सुवर्णस्य विकृतिमेकावलीनूपुरादिरूपां विकृतिम्। तस्य रजतादेरात्मतया सुवर्णात्मतया न त्यजन्ति रजतादेरपि सुवर्णाकारदर्शनेन रजतमपि सुवर्णत्वेन गृह्णन्तीत्यर्थः ॥

अयम्भावः —

कनकार्थिनो रजतादिमिश्रमपि कनकं तदात्मतयानुगृह्णन्ति तथा परमात्मविदः आत्मविदो वा क्षेत्रज्ञकर्मफलप्रदानार्थं

प्रविष्टान्तर्यामिशक्त्यन्वितक्षेत्रक्षेत्रज्ञरूपां क्षेत्रज्ञान्वितक्षेत्ररूपां वा विकृतिं परमात्मत्वेन क्षेत्रज्ञत्वेन वाऽनुगृह्णन्ति ॥ ननु सुवर्णमेव यथा कुण्डलादिरूपेण कृतं सवर्णाद्यथा भिन्नं न भवति तथा तथा परमात्मैव क्षेत्रक्षेत्रज्ञरूपो जात इति कुतो नोच्यते, तत्राह- स्वकृतमिति ॥ स्वकृतं स्वेन नित्याजानादिनिधनेन परमात्मना नित्याजानां क्षेत्रज्ञानां कर्मानुसारेण कृतं तत्तत्कर्मफलप्रदानाय तेनान्तर्यामितयानुप्रविष्टम्। अत आत्मतया परमात्मतया अवसितं वेदविद्भिरुक्तम्। न तु वस्तुतः परमात्मरूपं परमात्मनः क्षेत्रक्षेत्रज्ञानां च नित्याजत्वे भोग्यभोगोपकरणभोगस्थानरूपेण वर्तमानस्य विश्वस्यानित्यन्वे च श्रुतिस्मृतयः ॥

नित्योनित्यानामिति द्वावजावीशानीशाविति महानव्यक्ते लीयत इति । पृथ्वी अप्सु लीयत इति । अजोऽपि सन्नव्ययात्मेति ॥ न जायते म्रियते वा कदाचिदिति ॥

अव्यक्ताद्व्यक्तय: सर्वा: प्रभवन्त्यहरागमे । रात्र्यागमे प्रलीयन्त० इत्यादय: ॥ यद्वा ॥

विश्वे परमात्मव्याप्तौ दृष्टान्त: कथा कनकस्य शावीयकर्णण्ठहस्ताद्यङ्गेस्थितां कुण्डलहारकटकादिरूपां विकृतिं तदात्मतया कनकरूपतया कनकार्थिनो न त्यजन्ति हि तथा देवमनुष्यपश्वादिरूपे विश्वे न्यूनाधिकभावेन तत्तत्कर्मफलप्रकाशिकां हरेरन्तर्यामिशक्तिरूपां विकृतिं हर्येकान्तिकभक्ता: न त्यजन्ति । कुत: । स्वकृतं स्वेन त्वया कृतं स्थावरजङ्गमात्मकं विश्वं प्रति अनुप्रविष्टं विश्वस्थाविनाशिक्षेत्रज्ञानां कर्मफलप्रदानाय तरतमतोऽनुस्यूतम् इदमन्तर्यामिरूपे आत्मतया परमात्मत्वेन अवसितं ज्ञानिभक्तैर्ज्ञातम् अतस्ते न त्यजन्तीति सम्बन्ध: ॥ न हि विकृतिमित्यस्येदानीन्तनप्रच्छन्नबौद्धैरसुरवद्भगवदुपासनप्रतिकूलै: प्रकटीकृतात् विवर्ताशांशिबिम्बप्रतिबिम्बवादिवादानुपादायार्थविधाने सति श्रुतिस्मृतिष्वक्षराखण्डाच्युतनित्यशब्दैरुक्तस्येश्वरस्य क्षरत्वं खण्डत्वं च्युतत्वमनित्यत्वं च स्यादतोऽस्माकृत एवार्थ: । समञ्जस: अस्मिन् श्लोके यस्याक्षरं शरीरम् ॥ यस्याऽऽत्मा शरीरम् ॥ यस्य प्रकृति: शरीरम् ॥ यस्य पृथ्वी शरीरमित्यादिश्रुतिभिश्चिदचिद्वस्तुशरीरितयोक्तत्वात्सर्वं खल्विदं ब्रह्मेत्यादिषु चिदचिदैक्येनोक्तस्य सर्ववस्तुशरीरिण एकस्य परमात्मनश्चिदचिद्वस्तुविशिष्टाद्वैतत्वमुक्तम् ॥२६॥१३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किमबोधनिदानमित्यपेक्षायां मन एवेति किं तन्निवृत्तिनिदानमित्यपेक्षायां भगवदुपासनात्मकयोग एवेति तद्विशुद्धान्तःकरणाः सर्वमिदं जगद्भगवदात्मतया सदसच्चिदाचिद्विशिष्टभगवत्कार्यतया च तदनन्यं पश्यन्तीति वदन्तः सत्कारणवाददूषणपरिहारपूर्वकमसत्कारणवादासाधारणानुपपत्तिमाहु: ॥ सदिवेति ॥ आमनुजात् मनुजपर्यन्तं, मनुजपर्यन्तानां देहिनामित्यर्थ: । त्रिवृत् त्रिगुणात्मकं, मन: सदिव सत्त्वमर्थक्रियाकारित्वं, कार्यकरमिव प्रतीयमानमपीत्यर्थ: । त्वयि, असत् विभाति । कार्यकरं न भवति । चिदचिदात्मकजगद्विशिष्टं तदात्मानं त्वां न प्रकाशयतीत्यर्थ: । आत्मानं त्वां विदन्त्युपासते इत्यात्मविद:, त्वदुपासनात्मकयोगपरिशुद्धान्त:करणास्त्वित्यर्थ: । अशेषम् इदं जगत्, आत्मतया परमात्मतया, "अजयात्मना च चरत:" इत्युक्तप्रकारेण, सत् अभिमृशन्ति जानन्ति । सच्छब्दवाच्यं सूक्ष्मचिदचिद्विशिष्टं कारणं ब्रह्मैव कार्यजगद्रूपेणावस्थितमतस्तदेनान्यदित्येवमुपास्यपरब्रह्मविशेषणतयोपास्यकोट्यन्तर्गतत्वात्तत्र जगदप्युपादेयमेवेति पश्यन्तीत्यर्थ: । ब्रह्मात्मकत्वेन जगतो हेयत्वाभावे दृष्टान्तमाहु: । न हीति । कनकस्य, विकृतिं विकारं कनककुण्डलादिकं, न हि त्यजन्ति । कनकार्थिन इति शेष: । किं तु, तदात्मतया प्रकृतिभूतकनकानन्यतया, उपाददत एवेति शेष: । कार्यावस्थायामपि कनकाव्यतिरेकादिति भाव: । यदि कार्यं कारणादन्यत्तदा तु, कनकस्य विकृतिं त्यजेयुरित्यसत्कार्यवादे उपपत्तिरभिहिता । एवं जगदुपादेयमेवेत्याहु: । स्वकृतमिति । स्वकृतं स्वेन परमात्मना कृतम्, इदं जगत्, अनुप्रविष्टं तेन परमात्मना व्याप्तं, 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति श्रुतिरत्र प्रमाणम् । स्वरूपपरिणामशङ्काव्यावृत्त्यर्थमनुप्रवेशोक्ति: । अनेन स्वपदात् दूषणोद्धार: । अत: जगदिति शेष: । आत्मतया अवसितमुपास्यपरमात्मशब्दवाच्यवस्त्वन्तर्गततया सुखरूपं निश्चितमित्यर्थ: । "तदात्मानं स्वयमकुरुत यद्वै तत् सुकृतम्" "रसो वै स:" इति श्रुते: । यद्वा आत्मतया अन्त: प्रविश्य धारकतया, धारकत्वं ह्यात्मशब्दार्थ: । तेन व्याप्तम् अवसितम् अनेनाकाशवन्न तस्मिन् व्याप्ति:, किं तु धारकतयेत्युक्तम् । अनेन प्रकारेणेदं सदित्यभिमृशन्तीत्युक्तं सामानाधिकरण्यं शरीरात्मभावनिबन्धनमिति फलितम् ॥१३॥ ॥२७॥

गृह्णन्ति ॥ ननु सुवर्णमेव
ति कुतो नोच्यते, तत्राह-
कृतं तत्तत्कर्मफलप्रदानार्थ
पं परमात्मनः क्षेत्रक्षेत्रज्ञानां

लीयत इति । अजोऽपि

दिरूपां विकृतिं तदात्मतया
तत्तत्कर्मफलप्रकाशिकां
ावरजङ्गमात्मकं विश्वं प्रति
तया परमात्मत्वेन अवसितं
पासनप्रतिकूलैः प्रकटीकृतान्
क्तस्येश्वरस्य क्षरत्वं खण्डत्वं
यस्याऽऽत्मा शरीरम् ॥ यस्य
त्यादिषु चिदचिदैक्येनोक्तस्य

ग एवेति तद्विशुद्धान्तःकरणास्तु
यं पश्यन्तीति वदन्त्यः
मनुजपर्यन्तं, मनुजपर्यन्तानां
मानमपीत्यर्थः । त्वयि, असत्
। आत्मानं त्वां विदन्त्युपासते
परमात्मतया, "अजयात्मना च
कार्यजगद्रूपेणावस्थितमतस्ततो
त्यर्थः । ब्रह्मात्मकत्वेन जगतो
न्ति । कनकार्थिन इति शेषः । किं
यतिरेकादिति भावः । यदि कार्य
मिवेत्याहुः । स्वकृतमिति । स्वकृतं
विशत्' इति श्रुतिरत्र प्रमाणम् ।
जगदिति शेषः । आत्मतया,
स्वयमकुरुत यद्वै तत् सुकृतम्"
ब्दार्थः । तेन व्यासम् अवसितम्,
भमृशन्तीत्युक्तं सामानाधिकरण्यं

योगिरामानुजाचार्यकृतसरला व्याख्या

जगदुपादानत्वेन जगत्स्वरूपस्त्वमेवेत्याहुः-आमनुजात् मनुष्यपर्यन्तं त्रिवृत् गुणत्रयवेष्टितम् । अत एवासत् असाधु । खलत्वात् । विषयाभिनिविष्टत्वात् जडत्वाच्चेत्यर्थः । एवम्भूतं मनः त्वयि स्थितं यदि सदिव चेतनसदृशं चेतनवत् गुणरहितं रागादिरहितं सत् विभाति प्रकाशते निर्मलं सत् मोक्षोपयोगज्ञानजनकं भवतीत्यर्थः । भवति स्थितस्य मनसः कारणत्वं दृश्यते ।

'बन्धाय विषयासङ्गीमोक्षाय परमात्मनः' । इत्यादिवचनात् । आत्मविदः ज्ञानिनः अशेषमिदं प्रपञ्चं आत्मतया आत्मस्वरूपत्वेन आत्मोपादानकत्वादित्यर्थः । सदभिमृशन्ति । सदिति जानन्ति । सच्छब्दवाच्यभगवत्स्वरूपं जानन्तीत्यर्थः । दृष्टान्तमाहुः-यथा कनकार्थिनो जनाः कनकस्य विकृतिं कटककुण्डलादिकं तदात्मतया कनकस्वरूपत्वेन हेतुना न त्यजन्ति न परित्यजन्ति । किन्तु परिगृह्णन्त्येव । तथा स्वकृतं उपादानभूतेन स्वेन कृतम् इदं विश्वम् आत्मतयोपादानभूतभगवत्स्वरूपत्वेन कारणानुप्रविष्टं भगवता व्याप्तं यथा घटशरावादिकार्यं स्वोपादानभूतमृदानुप्रविष्टं तथा उपादानभूतेन भगवता कारणत्वाकारेणेदं तदनुप्रविष्टमित्यर्थः । इदं विधेयविशेषणम् । एवं प्रकारेणावसितं ज्ञानं ज्ञानिभिरित्यर्थः ।

'सदे सौम्येदमग्र आसीत् ।' इत्यादिभिः जगतः ईश्वराभिन्नत्वं सर्वसम्मतमेव । अत्र हि आत्मतयाऽऽत्मविदः इत्यत्र कनकस्य तदात्मतयेत्यत्र आत्मतयावसितमित्यत्र चात्मतयेत्यस्य स्थानत्रयोक्तस्य समानार्थः उचितः । आमनुजात् त्रिवृत् असत् मनः त्वयि सदिव विभाति । आत्मविदः अशेषमिदम् आत्मतया सदभिमृशन्ति तदात्मतया कनकस्य विकृतिं न त्यजसि हि स्वकृतमिदमात्मतयानुप्रविष्टमवसितम् इत्यन्वयः ॥२६॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

प्रपञ्चजातं प्रपञ्चसमूहः । तथा च श्रुतिः — प्रपञ्चपुरुषयोः पृथक् प्रतीतेर्मायिकत्वे प्रमाणं श्रुतिः - असत इति ।

'असद्वा इदमग्र आसीदि'ति श्रुतेरसतो ब्रह्मणो निमित्तात् अधि न विद्यते धीर्यस्मादित्यज्ञानमेव मनोरूपेण भवतीत्यर्थः । तच्च समष्ट्यात्मकं मनः प्रजापतिं तदभिमानिनं ब्रह्माणं व्यक्तमकरोदित्यर्थः । तत्तस्माद्यदिदं दृश्यमानं किञ्च किञ्चन तदिदं सर्वं मनस्येव समष्ट्यात्मके परमं यथा स्यात्तथा प्रतिष्ठितं प्रकर्षेण स्थितम् । मनोमात्रविलसितमित्यर्थः । तेनैव तेन उपादानकारणरूपेणैव अत्र त्यागाभावे हेतुः । असति मिथ्याभूते प्रपञ्चे सद्रूपेण भासमानम् ॥२६॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

ननु, यद्यसन्नोत्पद्यते यदि च त्रिगुणमयः पुरुषो न भवति तर्हि इदं प्रपञ्चजातं पुरुषश्च पृथङ्नास्तीत्युक्तम् स्यात् । कथम्, तयोः सत्त्वेन प्रतीतिरत आह-सदिव मन इति । इदं त्रिवृत् त्रिगुणात्मकं प्रपञ्चजातं मनः मनोमात्रविलसितम् असदेव त्वयि सदिव भाति । आमनुजात् मनुजं पुरुषमभिव्याप्य पुरुषस्य पृथक् सत्त्वप्रतीतिर्मनोमात्रविलसितेत्यर्थः । आत्मविदस्त्वशेषमिदं त्रिगुणात्मकं विश्वम् आत्मतया सदभिमृशन्ति सदिति जानन्ति । आत्मकार्यत्वान्न पृथगित्यर्थः । तथा हि यदुपादानकं यत्कार्यं तत्तेनैव रूपेण प्रतीयते उपादीयते चेति लोकाचारेण दर्शयति-न हि विकृतमिति । कनकार्थिनः कनकस्य विकृतिं कुण्डलादिकं न त्यजन्ति । कुतः । तदात्मतया कनकरूपत्वेन अतः स्वकृतमिदं विश्वम् अनुप्रविष्टं च पुरुषरूपम् आत्मतयैवावसितं निश्चितम् विश्वं मनोविलसितमत्यत्र श्रुतिः-

"असतोऽधि मनोऽसृज्यत । मनः प्रजापतिमसृजत । प्रजापतिः प्रजा असृजत । तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किञ्च ॥"

अर्थः — अव्याकृतात्परमेश्वरादधि अधिकं समष्टिरूपं मनोऽसृज्यताभूदित्यर्थः । कर्मकर्तरिप्रयोगः । अनायासेन साधनत्वात्स्वयमभूदित्यर्थः । पच्यते ओदनः स्वयमेवेत्यादिवत् । तच्च मनः प्रजापतिं ब्रह्माणमसृजत्स तत्तस्मादिदं दृश्यमानं यत्किञ्चन वस्तु तन्मनस्येव मनोभावापन्नेऽव्याकृते एव परमं यथा भवति तथा प्रतिष्ठितं प्रकर्षेण स्थितमित्यर्थः । सृष्टिपरेयम् ।

यत्सत्त्वतः सदा भाति जगदेतदसत्स्वतः । सदाभासमसत्यस्मिन् भगवन्तं भजाम तम् ॥

एतत् जगत् स्वत असत् यतः अस्य सत्त्वतः सत्तां प्राप्य तत्सत्यमाभाति । तं भगवन्तं वयं भजाम । कथम्भूतम् । अस्मिन्नसति जगति सदाभासं प्रकाशमानम् ॥२६॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ विश्वस्य भगवदात्मकत्वाग्रहणं मनोदोषाद्भवति । मनसि शुद्धे तु भगवदात्मकतया प्रतीयमानं विश्वमुपादेयं स्यादित्याह-सदिवेति । आमनुजात् मनुजमभिव्याप्य । मनुष्यपर्यन्तानां देहिनाम् । त्रिवृत् त्रिगुणात्मकम् । मनः सदिव सत्त्वमर्थक्रियाकारित्वं कार्यकरमिव प्रतीयमानमपि त्वयि असद्भाति । कार्यकरं न भाति । विषयाविषत्वात् त्वां न प्रकाशयतीत्यर्थः । तदुक्तम्—

'विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः । वारुणी दिग्गतं वस्तु व्रजन्नैन्द्रीं किमाप्नुयात् ॥' इति ॥

अथशब्दः पक्षान्तरे विशुद्धे त्वत्प्रकाशनक्षमे मनसीत्यर्थः ।

'मनसा तु विशुद्धेन दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरि'ति श्रुतेः ॥

आत्मविदस्तु अशेषं न जगदात्मतया । अत्रात्मशब्दः परमात्मपरः । परमात्मतया विमृशन्ति । अजया आत्मना च चरत इत्युक्तप्रकारेण चिदचिद्विशिष्टं कारणं परं ब्रह्मैव कार्यावस्थमिति निश्चिन्वन्ति । चिदचिच्छरीरकतयाऽवस्थितं त्वामेवाध्यवस्यन्तीत्यर्थः । परमात्मात्मकत्वेन जगतो हेयत्वाभावे दृष्टान्तमाह-न हि विकृतिमिति । कटकमुकुटादिभिः कार्यावस्थमपि कनकं न त्यजन्ति । कुतः । तदात्मकतया । कनकात्मकत्वात्कटकादेः । कार्यावस्थायामपि कनकस्य न व्यतिरेकात् जगदुपादेयत्वमित्याह-स्वकृतमिति । स्वशब्दोऽपि परमात्मपरः । स्वकृतं जगदिदम् । तेन परमात्मनानुप्रविष्टं व्याप्तम् । स्वरूपपरिणामादिव्यावृत्त्यर्थं प्रवेशोक्तिः । 'तत्सृष्ट्वा तदेवानुप्राविशदि'ति श्रुतेः । अतः इदं जगदात्मतया रूपितं परमात्मशब्दवाच्यवस्त्वन्तरगततया सुखरूपं चिदचिदात्मकं जगत् भगवच्छरीरत्वेनोपादेयमित्यर्थः । भगवच्छरीरत्वन्तु 'यस्यात्मा शरीरम् । य आत्मानमन्तरो यमयति । यस्याव्यक्तं शरीरम् । तत्सर्वं वै हरेस्तनुः ।' इति श्रुतिस्मृतिसिद्धम् । अतस्तदात्मकत्वेन सुखरूपम् । अब्रह्मात्मकत्वेन दुःखरूपमित्यर्थः । 'तदात्मान ꣳ स्वयमकुरुत ।' 'तद्धैतत्सुकृतम् । रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति ॥' इति श्रुतिरपि तदानन्दलाभेनानन्दित्वं प्रतिपादयतीति ॥२६॥

कृष्णप्रिया

मनुष्य पर्यन्त देहधारी जीवों का सत्वरजतम नीतगुण युक्त मन संसार के वस्तुओं का प्रकाश करने में सफल कार्य करने वाले के समान प्रतीत होता भी है तथापि आप के विषयमें तो यह मन असत हि प्रतीत होता है क्योंकि जीवमाया विशिष्ट आप को प्रकाश नहि करता यह भाव है । मलीन मन संसार के मलीन वस्तुओं का ही प्रकाश करता है आपका प्रकाश नहि करता आप का प्रकाश तो शुद्ध मन करता है और आप की उपासना से जिनके मन शुद्ध हो गए है ऐसे आत्मज्ञानी पुरुष तो चेतना चेतन मिश्रित इस निखिल जगतको परमात्म भाव से सत् हि देखते है क्योंकि सूक्ष्म चेतना चेतन विशिष्ट कारण ब्रह्म हि स्थूल चेतना चेतन कार्य रूप प्रपंच का आत्मा होकर स्थित है । इसलिए परमात्मा से पृथक होकर कुछ भी नहीं है किन्तु पावन चेतना सब जगत परमात्मा का शरीर होने से उपासनीय परमात्मा के अन्तर्गत है । इस रीति से इस प्रपंच को परमात्मा रुप देखते है । लोकमें भी सुवर्ण के कार्य कटक मुकुटादि भूषणों का त्याग नहि करते किन्तु कारण स्वरूप सुवर्ण रूप होने से उन का स्वीकार ही करते है । इसी प्रकार परमात्मा का रचा गया जगत परमात्म भाव से निश्चिन किया गया है क्योंकि प्रलय कालमें सूक्ष्म चेतना विशिष्ट कारण ब्रह्मा ही सृष्टि कालमें स्थूल चेतना कार्य रूप जगत का आत्मा होकर स्थित है । सब जगत उसके अन्तर्गत हे । इसलीऐ कारण रूप निखिल प्रपंच का आत्मा ब्रह्म ही है इस प्रकार प्रपंचमें ब्रह्म भाव निश्चय किया गया है ॥२६॥

तव परि
परिवयसे

ये, अखिल
तान्, प्रसिद्धान्, विबु
त्वत्तो, विमुखाः, ते,

ननु, "सत्यं
भगवतः प्रतिपादनात्त
"छन्दसि व्यवहिताश्च
तथा तस्य भावस्तत्ता
पादेनाक्रमन्ति मृत्योर्मू
परिवयसे बध्नासि कु
शेषः । नेतरे तथा च श्र
सत्यमेवम्भूतमात्म
तथाऽप्यसम्भावनाविप
तु सम्यगमलचित्तानां त
व्याचष्टे यमेवैष वृणुते

भावार्थदीपिका
मोक्षस्येत्याशङ्क्ते-नन्वि
[एक एव हीत्यादेरर्थः ।
। रुद्रः परमात्मा 'एष एव
एकत्वं कारणत्वं चाव्याकृ
इति देवः । अव्याकृतस्य
सर्वेति । सर्वेषु भूतेषु चिदे
सर्वभूतेषु सर्वदैकरूपेण
विद्यमानत्वेऽपि मेघैः सूर्य
बुद्ध्यादिवत्परिच्छिन्नत्वं
बहिरन्तःपूर्णत्वाद्ब्रह्मणः
भूतानामन्तर्बुद्धिगुहायामात्म
सर्वभूतात्मत्वे ब्रह्मणः कर्मक

तव परि ये चरन्त्यखिलसत्त्वनिकेततया त उत पदाऽऽक्रमन्त्यविगणय्य शिरो निर्ऋतेः ।
परिवयसे पशूनिव गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनन्ति न ये विमुखाः ॥२७॥

कर्दमक्षमा

ये, अखिलसत्त्वनिकेततया, तव, त्वाम्, परिचरन्ति, ते, एव, अविगणय्य, निर्ऋतेः, शिरः, पदा, आक्रामन्ति ।, यतः, त्वं, प्रसिद्धान्, विबुधान्, अपि, गिरा, पशून्, इव, परिवयसे ।, अतः, तेषु, ये, त्वयि, कृतसौहृदाः, भवन्ति, ते, खलु, पुनन्ति, ये, तु, विमुखाः, ते, तु, न, पुनन्ति ॥२७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु, "सत्यं ज्ञानमनन्तं ब्रह्म नेह नानास्ति किञ्चन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिश्रुतिभिरेवम्भूतस्य वतः प्रतिपादनात्तज्ज्ञानं सुकरमेवेति कृतं भक्त्या अत आह–तव परि ये चरन्तीति तवेति कर्मणि षष्ठी त्वां ये परिचरन्ति सि व्यवहिताश्च" इति यच्छब्देन व्यवधानमदोषः केन रूपेण अखिलसत्त्वनिकेततया अखिलानि सत्त्वानि निकेतो यस्य स तस्य भावस्तत्ता तया सर्वभूतावासतयेत्यर्थः । उत एव अविगणय्य तिरस्कृत्य त एव निर्ऋतेर्मृत्योः शिरो मूर्धानं पदा क्रमन्ति मृत्योर्मूर्ध्नि पादं दधति तं तरन्ति मुच्यन्त इत्यर्थः । ये पुनर्विमुखा अभक्तास्तान् गिरा वाचा पशूनिव विबुधान्विदुषोऽपि वयसे बध्नासि कुतः त्वयि कृतसौहृदाः त्वयि कृतं सौहृदं प्रेम यैस्ते खलु निश्चितं पुनन्ति पवित्रयन्ति आत्मानमन्यानपीति । नेतरे तथा च श्रुतिः 'तस्य वाक्तन्तिर्नामानिदामानि तस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितमिति' अयमभिप्रायः मेवम्भूतमात्मानं श्रुतयः प्रतिपादयन्ति तत्र च यद्यपि वस्तुनोऽपरोक्षत्वादपरोक्षमेव ज्ञानमुत्पद्यते सम्भावनाविपरीतभावनातिरस्कृतित्वान्मलिनचित्तेषु परोक्षमिव भवतीति नापरोक्षसंसारभ्रमनिवृत्तिसमर्थम् । भगवत्परिचर्या मलचित्तानां तत्प्रसादेन लब्धापरोक्षज्ञानानामयत्नत एव करकलितो मोक्ष इति तथा च श्रुतयः 'देहान्ते देवः परं ब्रह्म तारकं यमेवैष वृणुते तेन लभ्यः यस्य देवे परा भक्तिः' इत्यादयः ॥

तपन्तु तापैः प्रपतन्तु पर्वतादटन्तु तीर्थानि पठन्तु चागमान् ।
यजन्तु यागैर्विवदन्तु वादैर्हरिं विना नैव मृतिं तरन्ति ॥१४॥ ॥२७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — ज्ञानस्य सुलभत्वेनातीव कठिनायां भक्तौ प्रयासो न कार्यो ज्ञानैकावाप्तव्यत्वेन त्याशङ्कते-नन्विति । एवम्भूतस्य सत्यज्ञानादिरूपस्य तज्ज्ञानं भगवज्ज्ञानमिति श्रुत्यर्थः पूर्वमुक्तः । इत्यर्थ इति- "एक एव हीत्यादेरर्थः । जगतो ब्रह्मादिभेदेन प्राप्तमीश्वरानेकत्वं निरस्यति–एक इति । 'एक एव हि रुद्रो न द्वितीयाय तस्थुः' इति परमात्मा 'एष एव रुद्र एष एवेन्द्रः ।' इत्यादिश्रुतेः । एतेषामैश्वर्यं प्राकृतमनित्यं चाभासिकं चेति एवकारेणासूचि । तत कारणत्वं चाव्याकृते पर्यवसितं निरस्यति–देव इति । कालत्रयेऽपीतराऽनपेक्षयाऽखण्डचिदात्मना स्वयमेव दीप्यते प्रकाशत । अव्याकृतस्य जडत्वेन देवत्वासम्भवात् स्वतः कारणत्वानुपपत्तेः देवत्वेकत्वसम्पत्त्या रवेः प्राप्तमीश्वरत्वं निरस्यन्नाह– सर्वेषु भूतेषु चिदेकरसात्मना स्थित इत्यर्थः । एतेन रवेर्दैवत्वे एकत्वेऽपि चिदात्मना भूतेष्ववस्थितेरसत्त्वादीश्वरत्वाभावः । सर्वदैकरूपेण चित्प्रकाशात्मना स्थितत्वेन ब्रह्मणः प्राप्तं सर्ववेद्यत्वं निरस्यति–गूढ इति । सर्वभूतेषु प्रकाशात्मना त्वेऽपि मेघैः सूर्यवदविद्यातत्कार्यैस्तिरोहितत्वात्परमात्मा न सर्वेषां वेद्योऽस्तीत्यर्थः । भूतेषु गूढत्वे सति ब्रह्मणा प्राप्तं परिच्छिन्नत्वं निरस्यति–सर्वव्यापीति । घटादिकं मृदिव जगद्बहिरन्तश्च सर्वतः स्वसत्तया व्याप्नतीति सर्वव्यापी पूर्णत्वाद्ब्रह्मणः परिच्छित्त्यभावः । गूढात्मना सर्वव्यापकत्वमाकाशेऽस्ति तत्राह–सर्वभूतान्तरात्मेति । सर्वेषां बुद्धिगुहायामात्मरूपेण तिष्ठतीत्यर्थः । सर्वव्यापकत्वेऽप्याकाशस्य जडत्वेन सर्वभूतात्मत्वासम्भवान्न ब्रह्मत्वम् । ब्रह्मणः कर्मकर्तृत्वतत्फलभोक्तृत्वसंसारित्वं च प्राप्तं तत्राह–कर्माध्यक्ष इति । उपाधिमधिष्ठाय तद्धर्मानीक्षत इत्यध्यक्षः,

भूतानां तत्कर्मणां तत्फलभोगानां च साक्ष्येवात्मा निरवयवत्वान्निष्क्रियत्वाच्च स्वयं कर्म न किञ्चित्करोतीति नापि भुङ्क्ते इत्यर्थः। ब्रह्मणः सर्वभूतान्तरत्वे भूताश्रयत्वं तदधीनत्वं चासं निरस्यति–सर्वभूताधिवास इति। वसत्यस्मिन्सर्वमिति वासः। अधिकतमश्चासौ वासश्चेत्यधिवासः। शुक्तौ रजतवद्दर्पणे पुरवत्स्वस्मिन्कल्पितानां भूतानां परमात्माऽधिवासोऽधिष्ठानमेवाऽस्ति, न तु स्वयं तदधिकरण इत्यर्थः। न केवलं कर्मणामेव ज्ञाताऽयमात्मा किन्तु भूतानां तद्धर्माणां तत्कर्मणां तत्फलानुभूतीनां तदवस्थानां च द्रष्टेत्याह-साक्षीति। बुद्धितद्विकाराणां सर्वेषां साक्षीत्यर्थः। साक्षादीक्षत इति साक्षीत्यात्मन ईक्षणक्रियाकर्तृत्वे प्रासे सत्याह-चेतेति। चेतयितृत्वमविक्रियत्वं स्वयमविक्रियात्मना सर्वं पश्यतीत्यर्थः। अविक्रियत्वे हेतुः–केवल इति। केवलो निरवयवः निरवयवत्वादविक्रियः स्वयमविक्रियः सन्नेव सर्वं पश्यतीत्यर्थः। शब्दगुणमाकाशमिति निरवयवस्याप्याकाशस्य यथा गुणवत्त्वं तथा ब्रह्मणो निरवयवस्यापि सत्त्वचित्त्वादिगुणवत्त्वे प्रासे परिहरति श्रुतिः–निर्गुण इति। 'आत्मन आकाशः सम्भूतः।' इत्याकाशस्य जनिश्रुतेस्तस्य जनिमत्त्वेन सावयवत्वादाकाशस्य गुणवत्त्वं युक्तम्। निष्कलमिति श्रुतेर्ब्रह्मणो निरवयवत्वाद्गुणवत्त्वमनुपपन्नमेव। ततः सत्त्वचित्त्वादिस्वरूपमेव भवति, न तु गुण इति परस्य ब्रह्मणोऽखिलविशेषाभावप्रतिपादनाय चकार इति शङ्करानन्दो गीतायां व्याचख्यौ ॥] एव हि भूतात्मा" इत्यादिश्रुतिभिः सर्वभूतावासत्वेनोक्तत्वादिति भावः। इत्यर्थ इति–

"ये मां सर्वेषु भूतेषु भगवन्तमुपासते। ऐहिकामुष्मिकं त्यक्त्वा तान्मृत्योरतिपारये ॥"

इत्यादिश्रीमुखोक्तेर्मृत्युमतितुच्छं कृत्वा मुच्यन्त इति भावः। अन्यान्निजसङ्गिनोऽपीत्यर्थः। इतरे त्वद्विमुखा नात्मानं कुतोऽन्यानिति भावः। अभक्तान् बध्नातीत्यत्र श्रुतिमाह–तथा चेति। तस्येश्वरस्य वाक् वेदरूपा तंतिर्बन्धनार्थं महारज्जुः नामानि ब्राह्मणादीनि दामानि गलबन्धनानि नामभिर्दामस्थानीयैः सर्वमशेषं सितं बद्धम् अमुकस्त्वमेवं कुर्वित्याज्ञया बद्धमित्यर्थः। अभक्तबन्धनपरेयं श्रुतिः। स्वमिचरणानामाशयस्त्वयमित्याह–अयमिति। सत्यं निश्चितं तत्र प्रतिपादनेऽपरोक्षत्वात्प्रत्यक्षत्वात् को कलितः स्थापितः। अत्र प्रमाणमाह–तथा चेति। श्रीनृसिंहतापन्यां —

"य इह स्थातुमपेक्षते सर्वैश्वर्यं ददाति यत्र कुत्रापि म्रियेत
देहान्ते देवः तारकं व्याचष्टे येनामृतीभूत्वा सोऽमृतत्वं गच्छति ॥" इति।

अर्थः — अयमात्मा प्रवचनेन शास्त्राध्ययनेन मेधया बुद्ध्या बहुना श्रुतेन श्रवणेन च न लभ्यते किन्तु यमात्मानमेव उपासको वृणुतेऽनन्यभावेन भजते तेनैव वरणेनैव स आत्मा लभ्यो नान्यसाधनान्तरेण। यद्वा–यमेव भक्तं भक्त्या परितुष्ट आत्मा हरिर्वृणुते आत्मसात्कर्तुमिच्छति तेनैवैष लभ्यते नान्यैरिति भक्तमोक्षपरेयम्। "यस्य देवे परा" इति व्याख्यातैव। स्वामिनाम्-तपन्त्विति। तापैः पञ्चाग्न्यादिभिः। पर्वतात् भृगुतुङ्गात्। तीर्थानि पुष्करादीनि। आगमान्साङ्गवेदादीन्। यागैरग्निहोत्रादिभिः। योगैर्युक्तिसमूहैः। वादैरिति पाठे तु वादैर्जल्पवितण्डादिभिः मृतिं मृत्युं सृतिमिति पाठे संसृतिं जन्मजरामृत्युरूपामित्यर्थः ॥★॥

श्रीधरानुयायिनी —

सत्यज्ञानादिस्वरूपेण तस्य ज्ञानं सुकरमेव किं भक्त्येत्याशङ्क्याहुः–तवेति। द्वितीयार्थे षष्ठी। ये च त्वां सर्वान्तर्यामितया भजन्ति ते कोऽयं वराको मृत्युरिति तिरस्कृत्य मृत्योरपि शिरसि पदं धृत्वा मुच्यन्ते तत्सोपानेन त्वत्पदं गच्छन्तीति निश्चितम्। किन्तु महता कष्टेन तत्रापि केचिदेव ये तु त्वयि प्रेमभक्तास्ते सर्वे स्वयमतिपूता एवान्यान् शिष्यादीन्निश्चितं पुनन्ति। एवं च भगवद्भक्त्या नितरां निर्मलीकृतमनसां सर्वेषामेव त्वत्कृपया विना प्रयासं लब्धापरोक्षज्ञानानां सुलभ एव मोक्षः। ये तु त्वय्यभक्तास्ते स्वात्मानमपि न पवित्रयन्ति कुतोऽन्यानतस्तान् विबुधानपि ऐहिकामुष्मिकसाधनसमूहदक्षानपि ज्ञानिनोऽपि वा विधिनिषेधरूपायां तत्तन्मतप्रतिपादिकायां वा वेदवाचि तन्त्यां ब्राह्मणतार्किकादिनामभिस्त्वं खरोष्ट्रमहिषादिपशूनिव बध्नासि। एवं चापरोक्षज्ञानमेवापरोक्षभ्रमनिवर्तकमिति नियमाज्ज्ञानिनामपि भक्तिं विना ज्ञानं परोऽक्षमेवातो व्यर्थमित्याशयः। यद्वा–नराकारत्वेऽपि पशुतुल्यत्वमाहुः–अविबुधानिति। अवयो मेषाख्याः पशवस्तद्वद्बोधो येषां तानाहारनिद्राभयमैथुनमात्रं जानत इत्यर्थः। त एवाग्रेऽविमुखा इत्युक्ताः। नये वेदशास्त्ररहस्ये तद्वर्णनेऽविवन्मेषपशुवन्मुखानि येषां ते इत्यर्थः। यथा ते वृथैवामङ्गलं प्रलपन्ति

तथा तवाभक्ताः प
महता क्रोधेन तां
"वासुदेवः सर्वि
स्वपादेनाक्रमन्त्ये
मा कुरुध्वमिति अ

तोषिणी –
विपणवादिनो विवत
तेन कृच्छ्रसाध्येन त्व
सर्वगुणाकारखण्डशु
परमपुरुषार्थस्तथाप्यप
स्वाभाविकबन्धो नाप
इत्यर्थः। विबुधानपि
पुनन्ति न तु ये ततो वि
महिमानमिति वीतशोव

जुष्टं प्रीत्या सेव
व्योमन् परमव्योमाभिधे
परमव्योमनि देवाः पार्षद
"यो देवानामधि
विश्वनाथस्तु —
भगवत्प्राप्तये च भक्तिरेव
"दैवी ह्येषा गुणम
"भक्त्याऽहमेकया
इति। वैष्णवमतस्यैव सर्वम
षष्ठी। त्वां ये परिचरन्ति "छ
आश्रयो येषां तेऽखिलसत्त्व
"प्रधानपुम्भ्यां नरदेवसत्यकृ
निकृष्टमशुद्धमखिलं श्रेष्ठं शुद्ध
तिरस्कृत्य निर्ऋतेर्मृत्योः शिरः
सत्येव तत्र नेत्याहुः–परिवयस
त्वा तान्विशिष्टबुधान् दार्शनि
"यस्य देवे
इति श्रुतेस्त एव सम्य

भक्ता: पण्डितम्मन्या अपि स्वस्वमतारूढा: परबुद्धिभ्रंशार्थं वृथैव प्रलपन्ति । अत एव मदीयमाशयमन्यथैते वर्णयन्तीति क्रोधेन तांस्त्वं बध्नासीत्यर्थ: । यद्वा-ये त्वय: कृतसौहृदा अत एव न ये सांसारिकव्यवहारे विमुखा विरक्ता: । अत एव देव: सर्वमिति स महात्मा सुदुर्लभ: ।" इतिगीतोक्त्या सर्वात्मत्वेन त्वामुपासते ते मृत्युं तिरस्कृत्य तस्य शिर: क्रमन्त्येव । तथात्मानमन्यांश्च पवित्रयन्त्येव । भक्तानां मृत्युभयाभावे हेतु: तान्मृत्युप्रभृतीन्देवानपि गिरा मद्भक्तेष्वेवं र्वमिति अप्रतिहताज्ञारूपया वाण्या त्वं पशूनिव बध्नासि ॥★॥

तोषिणी — पूर्वस्मिन् पद्यद्वये परमपुरुषार्थनिरूपणमधिकृत्यासदुत्पत्तिवादिन: सद्विनाशवादिन: सगुणत्वभेदवादिनो वादिनो विवर्तवादिन इत्येवं पञ्च वादिन उक्ता: । इह पद्ये तु परिचर्यावादिन उच्यन्ते । काश्चिदन्या भक्तिपरा: श्रुतय आहु:-किं साध्येन त्वत्प्रेमशून्येन ज्ञानेन तत्फलभूतं परमप्रेममयं त्वत्परिचरणमेव श्रेयो यतस्तत्रेति अखिलसत्त्वनिकेततया सर्वाश्रयतया कारखण्डशुद्धसत्त्वाश्रयतया वा सर्वान्त:करणाभिनिवेशात्मतया वा हेतुना तत: परमप्रेम्णा कृतत्वात्तदेव तेषां यद्यपि र्थस्तथाप्यपवर्गश्चानुषङ्गिकतया त्वत्प्रसादेन निर्विरोध एव स्यात् । पूर्वोक्तज्ञानसाधकानां तु त्वन्मायामयविधिनिषेधलक्षणगिरा कबन्धो नापयात्येवेत्याहु:-त उतेति पदद्वयेन । उतापि ते मृत्यो: शिरोऽप्यविगणय्य अननुसन्धायैव पदाक्रमन्ति मुच्यन्ते । विबुधानपि श्रुतिनिर्णीतपूर्वोक्तज्ञानानपि तान्परिवयसे यतस्त्वयि कृतं सौहृदं तादृशप्रेमसेवेच्छा तद्युक्ता एवात्मानं परं च न तु ये ततो विमुखास्त इति । तदुक्तम्- "श्रेय:स्रुतिं भक्तिमुदस्य" इत्यादिना । श्रुतयश्च - "जुष्टं यदा पश्यत्यन्यमीशमस्य मानमिति वीतशोक: ।"

"ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधिविश्वे निषेदु: ।

यस्तं न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥" इत्याद्या: ।

जुष्टं प्रीत्या सेव्यमानं सन्तं पश्यति तदास्य महिमानं च पश्यत्यनुभवति इत्यनेन प्रकारेण वीतशोको भवति । कुत्र । परमे परमव्योमाभिधे महावैकुण्ठे । कीदृशेऽक्षरे नित्यरूपे । यत ऋच इति । ऋच: सम्बन्धिनि तत्प्रतिपाद्य इत्यर्थ: । यस्मिन् मनि देवा: पार्षदादय: विश्वे सर्वेऽधिनिषेदुरधिरूढा इत्यर्थ: । अग्रे च जुष्टत्वमेव दर्शयति —

"यो देवानामधिपो यस्मिँल्लोका अधिश्रिता: । य ईशो द्विपदश्चतुष्पदस्तस्मै देवाय हविषा विधेम ॥" इति ।

विश्वनाथस्तु — वैष्णवमते जीव: खलु चित्कण: अल्पज्ञ: अल्पव्यापी अस्वतन्त्रो निर्गुण एव । तस्य संसारदु:खनिवृत्तये त्तये च भक्तिरेव घटते न त्वन्यो ज्ञानादिक: कोऽप्युपाय: —

"दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥" इति ।

"भक्त्याऽहमेकया ग्राह्य:" इति च भगवदुक्तेस्तद्भक्तिरेवोपाय: "दुरवगमात्म" इत्याद्यस्मदुक्तेश्च सैवोपाय: परमपुरुषार्थ वमतस्यैव सर्वमतश्रैष्ठ्यं प्रतिपादयन्त्यो वैष्णवानेवोत्कर्षयन्त्योऽन्यान्सर्वानेव वादिन आक्षिपन्ति-तवेति । द्वितीयार्थे ं ये परिचरन्ति "छन्दसि व्यवहिताश्च ।" इति यच्छब्देन व्यवधानमदोष: । अखिलानां लोकानां सत्त्वं सत्यत्वमेव निकेत षां तेऽखिलसत्त्वनिकेतास्तेषां भावस्तत्ता तयोपलक्षिता: "सत्यं ह्येवेदं विश्वमसृजत" इति माध्वभाष्यधृतश्रुते: । म्यां नरदेवसत्यकृत्" इति सप्तमोक्तेश्च द्वैतप्रपञ्चस्य सत्यत्वमिति मतमाश्रित्य वर्तमाना इत्यर्थ: । श्लेषेण खिलं द्धमखिलं श्रेष्ठं शुद्धं यत्सत्त्वं तदेव निकेतो वैकुण्ठादि धाम यस्य तत्तयोपलक्षितं त्वामित्यर्थ: । त उत त एव अविगणय्य निर्ऋतेर्मृत्यो: शिर: पदा स्वपादेन आक्रामन्ति अवहेलामात्रेणैव संसारं तरन्तीत्यर्थ: । ननु पूर्वे वादिनोऽनुश्रुत्युक्तज्ञानाद्युपायेन नेत्याहु:-परिवयस इति । गिरा तत्तन्मतप्रतिपादिकया वेदवाचैव "असतोऽपि मनोऽसृज्यत मन: प्रजापतिम्" इत्यादिकया विशिष्टबुधान् दार्शनिकानपि पशूनिव बध्नासि न च सोपपत्ति वक्तुमपारयन्तो वैष्णवा एव न ज्ञानवन्त इति वाच्यम्—

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्था: प्रकाशन्ते महात्मन: ॥"

ति श्रुतेस्त एव सम्यग्ज्ञानवन्तो ज्ञेया: । तस्मात्त्वयि कृतं सौहृदं प्रेम यैस्ते खलु निश्चितं पुनन्ति स्वयं पूता अन्यानपि

स्वोपदेशात्पवित्रयन्तीत्यर्थः । ये विमुखा अभक्तास्ते तु न । अत्र —

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तं पीठगं येऽनु यजन्ति विप्रास्तेषां सिद्धिः शाश्वती नेतरेषाम् ॥" इति ॥

"जुष्टम्" इत्याद्याश्च ॥ (१४) ॥२७॥

नीलकण्ठी —

एवं क इहेत्यादिश्लोकत्रयेण जगत्कारणस्य दुर्ज्ञेयत्वं तमसो जगत्कारणत्वं जगतो मनोमात्रत्वं चोक्तम् । अर्थाच्च तत्त्वज्ञानेनाज्ञाननाशे तत्कार्यस्य मनसो नाशः तस्मिन् सति संसारोच्छेद इति श्रौतयौक्तिकविचारः साङ्ख्यनामोक्तः अत्यन्तबुद्धिमान्द्याद्वा विशिष्टगुर्वाद्यलाभाद्वा ये तत्राशक्तास्ते निर्गुणब्रह्मोपास्तिलक्षणयोगेनापि मुच्यन्त इत्याह-तव परि ये चरन्तीति । येन ये विमुखा अखिलसत्त्वनिकेततया तव परिचरन्ति ते उत निर्ऋतेः शिरः पदाक्रमन्तीत्यन्वयः । ये पुरुषा नये श्रवणमननात्मकन्यनयविचारे विमुखा अयोग्याः सन्तः अखिलसत्त्वनिकेततया सर्वभूताधिवासतया —

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥"

इति श्रुत्युक्त्या । तव त्वां कर्मणि षष्ठी । परिचरन्ति —

"ईश्वरो जीवकलया प्रविष्टो भगवानिति । प्रणमेद्दण्डवद्भूमावाश्वचण्डालगोखरम् ॥"

इति स्मृत्युक्तप्रकारेणोपासते व्युत्थानकाले । समाधिकाले तु-उपाध्यंशमनन्तर्भाव्य केवलं निर्गुणमुपासते ते उत तेऽपि विमुच्यन्त इति शेषग्रन्थार्थः । यद्वा-अखिलं रजस्तमोबोधशून्यत्वेन कृत्स्नं शुद्धं सत्त्वमन्तःकरणसत्त्वं तदेव निकेत उपलब्धिस्थानं ज्ञापकं वा यस्य तस्य भावस्तत्ता तया । "विशुद्धासत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः ।" इति श्रुतेः । तव शुद्धसत्त्वे प्रकाशमानतया हेतुना ये त्वामात्मानं सर्वप्रत्यग्भूतं परिचरन्ति तत्तदुपाध्याकारतां परित्यज्य प्राप्नुवन्ति त उत तेऽपि निर्ऋतेः शि अविगणय्य हेलया पदा आक्रमन्ति मुच्यन्त इत्यर्थः । विनापि श्रवणादिप्रनाडीं केवलोपास्त्यापि मुच्यन्त इति गीतास्वपि दृ —

"अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते । तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥" (१) ।

ध्यानदीपे —

"अत्यन्तबुद्धिमान्द्याद्वा सामग्र्या वाप्यसम्भवात् । यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम् ॥" (१)

वाशिष्ठे —

"द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव । योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥१॥
असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिर्णयः । प्रकारौ द्वौ ततो देवो जगाद परमः शिवः ॥२॥" इति ॥

ननु- "ज्ञानादेव तु कैवल्यम्" "नान्यः पन्था विद्यतेऽयनाय ।" इति प्रकारान्तरव्यावृत्तेः कथमुपास्त्यापि मुच्यन्त इ उच्यते उपास्तेरपि साक्षात्कारार्थत्वान्न कोऽपि दोषः । यथोक्तं भगवता —

"यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥"

ननु-कुतो मत्परिचर्याया ईदृशो महिमेत्याशङ्क्य तव सर्वेश्वरत्वादित्याह-परीति । विबुधान्सूर्यादीन्गिरा आज्ञावचनेन पर्ये परिवयसे कालयसे ।

"भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥" इति ॥

"एतस्य वा अक्षरस्य प्रशासते गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः ।" इत्यादिश्रुतिभ्यः अत्यल्पमिदमित्याह-श्री

न्ति। तानपि विबुधानपि त्वयि कृतसौहृदाः नारदादयः खलु निश्चितं पुनन्ति दर्शनादिना। अयमर्थः — द्विविधमुपास्त्यपरपर्यायं यानं "योषितमग्निं ध्यायीत" इत्यादि प्रभूतविषयं भावनारूपमेकम्, परोक्तस्य रत्यादिगतसूक्ष्मविशेषस्य ग्रहणाय चक्षुष इव तुक्तस्य प्रतीचोऽवस्थात्रयातीतनिर्विशेषत्वस्य ग्रहणाय मनसः प्रणिधानरूपं द्वितीयम्, आद्यं मानसक्रियारूपत्वादनित्यफलं द्वितीयं धर्ममेधसमाधिरूपं वस्तुतत्त्वविषयत्वान्मुक्तिहेतुरपि "क्षणमेकं क्रतुशतस्य चतुःसप्तत्या" इति श्रुतेर्धर्मर्द्धिहेतुरपि ध्यानजधर्माधिक्याच्च नारदादयोऽन्यान्पुनन्ति स्वयं च जीवन्मुक्तिसुखं पुष्कलमनुभवन्ति। श्रवणादिप्रनाडीप्राप्तज्ञानास्तु स्वयं कृतार्था अपि पुष्कलतपोवृद्ध्यभावान्नान्यं पातुं क्षमा इति ध्यानयोगस्य श्रेष्ठत्वमिति। अत्रायं योगानुष्ठानक्रमः — शमदमादिसम्पन्नो मनोऽनुकूले शुचौ देशे स्थिरसुखमध्यासीनः उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् —

"य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एवष सर्वेभ्यः पाप्मभ्य उदितः। अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमन्तः पुरुषे ज्योतिः ॥"

इत्याद्याध्यात्मविद्यानाम् —

"सैषा दहरविद्याऽत्र द्विधा ते परिकीर्तिता। आध्यात्मिकी भवेदेका तथाऽन्या त्वाधिभौतिकी ॥" इति।

शैवे चिदम्बरमाहात्म्यादौ आधिभौतिकीकरणात्। "ध्यानमन्तः परे तत्त्वे लक्ष्येषु च निवेशयेत्।" इति बाह्यलक्ष्यश्रुतेश्च उमामहेश्वरप्रतिमायां सूर्यमण्डले वा निबिडतरशुक्लभास्वरान्धकारकल्पसततोदितानस्तमितरूपान्तरदर्शनापलापिषु सूर्यरश्मिषु वा गुरूक्तयुक्त्या दत्तदृष्टिरुमासहायादिशब्दान्संज्ञासंज्ञिसङ्केतग्राहकानुमानस्मृतिपूर्वकं तदर्थांश्चानुसन्दधानोऽयमहमस्मि साम्बशिव इत्याद्याकारं प्रत्ययान्तरानन्तरितां सवितर्काख्यां भावनां कुर्यात्। इयमेवोक्तविधानुसन्धानाकारशून्या देहाहंधीवदर्थमात्रनिर्भासाकारा निर्वितर्केत्युच्यते। तथा च श्रुतिः - "अतो विशेषविज्ञानं विशेषमुपगच्छति।" इति। अतो विशेषेषु ध्याननिवेशनाद्विशेषः स्थूलभौतिकः। तत्र विविधं शब्दादिविकल्पोपेतं ज्ञानं विज्ञानं विगलितः शेषो ज्ञानादन्यो विकल्पो यस्मात्तत्तथेति श्रुत्यर्थः। इत्थमेव प्रतिमादिकं यदा विषयेभ्यः प्रत्याहृतकरणः स्वप्न इव विगलितस्थूलदेहाभिमानः पूर्ववदेव शब्दाद्युल्लेखसहितं च समापद्यते तदा ते सविचारनिर्विचारसमापत्ती उच्येते। एतद्द्वयं मानसम्। एताश्चतस्रः समापत्तयः सूत्रिता भगवता पतञ्जलिना। तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का। एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता। अतिपरिशुद्धिर्वर्जनं स्वरूपशून्याहमिदं भावयामीत्याकारशून्या, उत्तरत्र सूक्ष्मविषयेति विशेषणात्पूर्वयोः स्थूलविषयत्वं सिद्धम्, तेन स्थूले आत्ममनःशरीरविषयाणां सान्निध्यमस्ति सूक्ष्मे आत्ममनसोरेव। स्थूलेऽपि यदा देहसङ्गाद्वृत्तिलाभस्तदाऽसौ महाविदेहा नाम धारणा। अत्रेदमुक्तम् - "बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः" इति। अस्यां चावश्यं ध्येयस्यातिवाहिकत्वं व्यक्तीभवति। तथा हि वितर्कालम्बने प्रतिमादौ यद्यपि लोकदृष्ट्या देवतादृष्टिरध्यस्यते स्यातिवाहिकी देवतैवाधिभौतिक्याः प्रतिमायास्तत्त्वं शुक्तिरिव रूप्यस्य तत्र भातस्य। यथोक्तं वासिष्ठे —

"आतिवाहिक एवायं त्वादृशैश्चित्तदेहकः। आधिभौतिकया बुद्ध्या गृहीतश्चिरभावनात् ॥" इति। अयं प्रपञ्चः अतिक्रम्य लोदरादिकमपि वहत्यभिमानिनमित्यतिवाहि अप्रतिमं भूतसूक्ष्मं तेन निर्वृत्त आतिवाहिकः। अस्यापि तत्त्वं चित्तदेहकः चित्तमेव हो यस्य स तथा। एवं च यथा तीव्राभियोगेन निरीक्ष्यमाणे शुक्तिरजते रजतं तिरोधीयते शुक्तिश्च प्रकाशते, एवं देवताभावनादार्ढ्ये तिमाया अचेतनत्वं तिरोधीयते शास्त्रीयं चेतनं देवतारूपमाविर्भवति। अत एव दृढभक्ता बाणादयः स्वाराध्यैः शङ्करादिभिः सह व्यवहरन्तीति बहुलमुपाख्यायते। एवं परिच्छिन्नविग्रहवत्या देवताया अपि तत्त्वमनन्तत्वमेव। तद्भावनया तत्परिच्छेदतिरोधानेऽनन्तं सर्वतः पाणिपादं तदित्याद्युक्तलक्षणं विश्वरूपमपि प्रकाशते, यदपश्यद्यशोदा कृष्णमुखे। विश्वरूपाध्यायोऽप्येतमर्थमुपबृंहयति। तदेव निर्वितर्कजं प्रत्यक्षं प्रकृत्योक्तं योगभाष्ये तत्परं प्रत्यक्षं तच्च श्रुतानुमानयोर्बीजमिति विश्वरूपस्यापि तत्त्वं निर्विशेषसन्मात्रम् तदेव चक्षुरादीनां प्रमेयमित्युक्तम् - "बुद्धीन्द्रियमनःप्राणान्" इत्यत्र। उपपद्यते चैतत्। यथा गोपुराकारे मुकुरे दत्तदृगपि स्वच्छत्वादजानंस्तत्र प्रतिबिम्बितं पुरमेव पश्यति यथा वा हिंगुलारूढं स्फटिकं पश्यन्नेव चन्द्रिकायां नीलमणिमिव सौरालोके

पद्मरागमिव च मन्यते । एवं चक्षुःसौक्ष्म्यतारतम्यात्प्रतिमादौ चेतनत्वमनन्तत्वं सन्मात्रत्वं चास्मितापरपर्यायं गृहीत्वा विलीयते तदेतत्सम्यग्दर्शनं श्रुत्याऽप्युक्तम् -

"मानसे च वव्लीने तु यत्सुखं स्वात्मसाक्षिकम् । तद्ब्रह्म चामृतं शुक्रं सा गतिर्लोकः एव सः ॥" इति ॥

सोऽवितर्कक्रमोऽनलवत्स्वकृतानुकृतिरित्यस्य द्वितीयव्याख्यानरीत्या कौलिकन्यायेन बहुतरमहामुनिमहीकृतायां श्रीकण्ठश्रीनाथादिप्रतिमायां प्रयुक्तः क्षिप्रं प्रसिद्ध्यति निबिडतरार्करश्म्यालम्बनस्त्वव्यवधानेन विश्वरूपमेव गोचरयन्नाशुतर इति विवेकः । निर्विचारवैशारद्यफलं सार्वज्ञ्यं पातञ्जले प्रोक्तम् । तत्सर्वस्य कल्पितत्वं विना न सङ्गच्छते इत्युक्तं वेदान्तकतके —

(१) "अतीतानागतं वस्तु वीक्षते करबिल्ववत् । योगी सङ्कल्पमात्रोत्थमिति शास्त्रेषु डिण्डिमः ॥
(२) मायायां सर्वदा सर्वं सर्वावस्थमिदं जगत् । अस्तीति तदुपाधिश्चित्सार्वात्म्यात्सर्वमीक्षते ॥
(३) आरम्भपरिणामाभ्यां स्वेन रूपेण यत्र सत् । अतीतानागतं वस्तु योगी तद्वीक्षतां कथम् ॥
(४) सङ्कल्पमात्रभातं वस्त्वतीतादि यदीष्यते । नष्टस्त्रीदर्शनाभं तत्स्याद्योगिज्ञानमप्रभा ॥
(५) योगिसङ्कल्पमात्रेण तस्योत्पत्तिर्यदीष्यते । ईशसङ्कल्पमात्रेण सर्वोत्पत्तिस्तदेष्यताम् ॥
(६) नारम्भे परिणामे वा दृष्टः कालाद्यतिक्रमः । कल्पनायां तु स स्पष्टः स्वप्नमायाभ्रमादिषु ॥
(७) तस्मान्नाणुभिरारब्धं भित्तिवन्नापि गव्यवत् । प्रकृतेः परिणामो वा जगत्किं त्विन्द्रजालवत् ॥" इति ॥

उक्ता ग्राह्यसमापत्तिरीश्वरप्रणिधानरूपाऽस्याः फलं व्याधिदुःखाद्यन्तरायाभावपूर्विका आशुसमाधिसिद्धिः । यतो भगवान् पतञ्जलिः-अधिमात्रश्रद्धाद्युपायोपेतानामधिमात्रवैराग्यादासन्नतमं समाधिलाभमुक्त्वाऽसूत्रयत् — "ईश्वरप्रणिधानाद्वा ।" इति । "ततः प्रत्यक्चेतनाऽधिगमोऽप्यन्तरायाभावश्च ।" इति च । अन्तराया व्याधिदुःखादयः । निर्विचारग्राह्यं षष्ठश्लोकोक्तरीत्या विलाप्य मनोमये समष्टौ चित्तं धारयतो मनोमयः प्राणशरीरो भारूपः "सत्यसङ्कल्पः सर्वकामः सर्वगन्धः सर्वरसः ।" इत्यादिश्रुत्युक्तसार्वज्ञ्यं सत्यसङ्कल्पत्वं चाविर्भवति तत्र कुतूहलितया मनसो विषयविकल्पाभिमुख्ये सानन्दस्तदभावे सास्मितः सम्प्रज्ञातो भवति । त एते ग्रहणगृहीतृसमापत्ती पूर्ववच्छब्दादिविकल्पसङ्कीर्णत्वासङ्कीर्णत्वाभ्यां प्रत्येकं द्विविधे । मनो महान्मतिर्ब्रह्मापूर्बुद्धिः ख्यातिरीश्वर इत्यनयोरेव नामद्वन्द्वानि । सोऽयमवान्तरभेदादष्टविधश्चतुर्विधः सूत्रितः । "वितर्कविचारानन्दास्मितारूपानुगमात्सम्प्रज्ञातः ।" इति । अस्मितासमापत्तिरेव शास्त्रसंस्कृतधियां तत्त्वमस्यादिवाक्योत्था ब्रह्मविद्याख्या चेतोवृत्तिः । अस्याः फलम् —

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥" इति । परो हिरण्यगर्भः अवरो यस्मात्स परावर ईश्वरः । उपबृंहितश्चायमन्त्यः पाद एकादशे "दृष्ट एवात्मनीश्वरे" इति । हृदयग्रन्थिभेदः सत्त्वपुरुषान्यताख्यातिरित्यनर्थान्तरम् । विवेकख्यातेरपि परवैराग्यबलान्निरोधे दग्धेन्धनानलवदुपशमे वा सति असम्प्रज्ञातो धर्ममेधाख्यः समाधिर्भवति । यमपेक्ष्य श्रूयते —

"यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् । यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यन्मनुते नान्यद्विजानाति स भूमाथ यत्रान्यत्पश्यत्यन्यच्छृणोति अन्यन्मनुते अन्यद्विजानाति तदल्पं यो वै भूमा तत्सुखं नाल्पे सुखमस्ति ॥" इति ।

"तावन्मनो निरोद्धव्यं हृदि यावत्क्षयं गतम् । एतद् ज्ञानं च ध्यानं च शेषोऽन्यो ग्रन्थविस्तरः ॥"

स्मर्यते च वशिष्ठेन — "निर्विकल्पसमाधिर्हि सिद्धान्तः सर्ववाङ्मये ।" इति । यं चासूत्रयत् "प्रसङ्ख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेधः समाधिः ।" प्रसङ्ख्यानेऽस्मितान्तध्यानफले ऋतम्भरप्रत्यक्षादावभिलाषशून्यस्य सर्वथा विवेकख्यातिव भवति । तत्फलेऽपि सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वाज्ञातृत्वं चेति सूत्रिते विरक्तस्य धर्ममेधो भवतीत्यर्थः । तत्त्वं चास्य "क्षणमेकं क्रतुशतस्य चतुःसप्तत्या यत्फलं तदवाप्नोति" इति श्रुतेः एतत्समापत्तिपञ्चकम् । "यच्छेद्वाङ्मनसी" इति श्रुत्या वाङ्मनोज्ञानमहच्छान्तशब्दैरुपात्तं वाचं बाह्येन्द्रियं स्वविषये निरुध्य जित्वा स्वकारणे मनसि प्रविलापयेदिति यच्छेदित्यस्यार्थः

मुत्तरत्र शान्तावधि यच्छेत्। अत्रापि विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि। तत्र वितर्कालम्बनाद्विशेषाद्विचारानन्दालम्बनम् विशेषं प्रतिविवक्षतो योगिनो दैनन्दिनलयाभ्यासान्मनो लीयते प्रविष्टमात्रं वा रजःप्राबल्यात्पूर्वां भूमिमुत्सर्पति सर्वक्षेपः तावेतौ लयविक्षेपौ हेयतया श्रूयेते —

"लयविक्षेपरहितं मनः कृत्वा सुनिश्चलम्। यदा यात्यमनीभावं तदा तत्परमं पदम्॥" इति। एवमविशेषादस्मितालम्बनं ङ्गमात्रं प्रविविक्षतस्ततः पुरुषं च प्रविविक्षतो लयविक्षेपौ स्तः। तेष्वाद्यो लीनो मूढ एव। द्वितीयतृतीयौ द्विदेहप्रकृतिलयान्वर्थसंज्ञौ क्रममुक्तिभाजौ। एतयोरवान्तरभेदकल्पनया फलभेदः स्मर्यते वायुपुराणे —

"दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः। भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः॥

बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः। पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः॥

पुरुषं निर्गुणं प्राप्य कालसङ्ख्या न विद्यते॥" इति। सूत्रं च — "भवप्रत्ययोविदेहप्रकृतिलयानाम्।" इति। एषामसम्प्रज्ञातो रूपत्वाद्भवप्रत्ययो जन्महेतुरिति सूत्रार्थः। असम्प्रज्ञातावस्थायां योगी जीवन्मुक्त इत्युच्यते। यां प्रकृत्योक्तं योगभाष्ये स्यामवस्थायामीश्वरस्यानीश्वरस्य विवेकज्ञानवतोऽन्यस्य वा कैवल्यं सिद्धमिति। सोऽयं योगी त्र्यवस्थः। यः स्वतो व्युत्तिष्ठति स द्वरः। यः परतः स विद्वद्वरीयान्। यो नोभयतः स विद्वद्वरिष्ठः। इमं प्रकृत्योक्तं "देहं विनश्वरमवस्थितमुत्थितं वा सिद्धो न ति यतोऽध्यगमत्स्वरूपम्।" इति। वासिष्ठे सप्त योगभूमयः उक्ताः —

"ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता। विचारणा द्वितीया तु तृतीया तनुमानसा॥

सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका। पदार्थभावनी षष्ठी सप्तमी तुर्यगा स्मृता॥" इति।

आस्वाद्या शास्त्रोक्ता धनसम्पत्। द्वितीया श्रवणमनने। यस्यां क्रमेण मीमांसातर्कावुपक्षीणौ। तृतीया निदिध्यासनम्। स्यां पातञ्जलं योगशास्त्रं चरितार्थम्। चतुर्थी साक्षात्कारो, यस्यां ध्यायी विद्वानित्युच्यते। शेषा जीवन्मुक्तेरवान्तरभेदाः। यासु क्रमेण विद्वद्वरादिसंज्ञां लभते। आसु विचारणादार्ढ्ये क्षणिकसत्त्वापत्त्यापि कृतार्थतास्तीति श्रवणादिप्रणाली नेदीयसी पि नित्योद्युक्तस्य शीघ्रमेव सिद्ध्यति नान्यस्येति श्रूयते —

"षड्भिर्मासैस्तु युक्तस्य नित्ययुक्तस्य देहिनः। आनन्दः परमो गुह्यः सम्यग्योगः प्रवर्तते (१)

रजस्तमोभ्यां विद्धस्य सुसमिद्धस्य देहिनः। पुत्रदारकुटुम्बेषु सक्तस्य न कदाचन (२)"

"अथेदानीं ज्ञानोपसर्गाः राजन्!" इत्युपक्रम्य —

"अथ ये चान्ये ह नित्यप्रमुदिता नित्यप्रवासिता नित्ययाजनका नित्यभिपोपजीविनोऽथ ये चान्ये ह पुरयाचका न्ययाजकाः शूद्रशिष्याः शूद्राश्च शास्त्रविद्वांसोऽथ ये चान्ये ह यक्षराक्षसभूतगणपिशाचोरगग्रहादीनामर्थं पुरस्कृत्य म इत्येवं ब्रुवाणा अथ ये चान्ये चाटजटनटभटप्रव्रजितरङ्गादतारिणो राजकर्मणि पतितादयोऽथ ये चान्ये ह र्कदृष्टान्तकुहकेन्द्रजालैर्वैदिकेषु परिष्ठातुमिच्छन्ति तैः सह न संवसेत्। बृहस्पतिर्हि शुक्रो भूत्वेन्द्रस्याभया-पः क्षयायेमामविद्यामसृजत्। तया शिवमशिवमित्युपदिशन्त्यशिवमिति वेदादिशास्त्रं हिंसाधर्माभिधानं ति वदन्तः॥" इत्यादि।

एवं चात्र नये विमुखा इत्यशास्त्रज्ञानां पुनन्तीति गुर्वनुग्रहः उक्तः। त्वयि कृतसौहृदा इति। ग्राह्यसमापत्तिः से पशूनिति ग्राह्यैश्वर्यम्। अखिलसत्त्वनिकेततयेति। ग्रहणगृहीतृसमापत्ती। निर्ऋतेरिति। "द्वितीयाद्वै भयं भवति" भयहेतुर्द्वैतम्। अविगणय्येति। ब्रह्मलोकान्ते यत्र वैराग्यम् आक्रमन्तीति। तदतिक्रमेण भूमब्रह्मस्थितिः। इत्येते अर्थाः ः। विस्तरभयात्तु नातिप्रपञ्चिताः (१४) ॥२७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तव परीत्यस्य टीकायां श्रुतिव्याख्या नेहेति पूर्वं मनसैवानुद्रष्टव्यमित्युक्तं तत्राहुः-दर्शनविषये ब्रह्मणि नाना नास्ति किञ्चन किञ्चिदपीत्यर्थः । वाक्तन्तीति तन्ती रज्जुः वागेव तन्तिरिव तन्तिः तत्संयुक्तानि नामानि दामानीव सितम् अमुकस्त्वमेवं करिष्यस्यसीत्याज्ञया बद्धमित्यर्थः । देहान्त इति य इह स्थातुमपेक्षते सर्वैश्वर्यं ददाति । यत्र कुत्रापि म्रियेत देहान्ते देवः परं ब्रह्मतारकं व्याचष्टे । येनामृतीभूत्वा सोऽमृतत्वं गच्छतीति श्रीनृसिंहतापन्यां ह्युक्तम् । अथ स्वव्याख्या । काश्चिदन्या भक्तिपराः श्रुतय आहुः-किं तेन कृच्छ्रसाध्येन त्वत्प्रेमशून्येन ज्ञानेन तत्फलभूतं परमप्रेममयं त्वत्परिचरणमेव श्रेयो यतस्तत्रेति अखिलसत्त्वनिकेततया सर्वाश्रयतया सर्वगुणाकारखण्डशुद्धसत्त्वाश्रयतया वा सर्वान्तःकरणाभिनिवेशात्मतया वा हेतुना ततः परमप्रेम्णा कृतत्वात्तदेव तेषां यद्यपि परमपुरुषार्थस्तथाप्यपवर्गश्चानुषङ्गिकतया त्वत्प्रसादेन निर्विरोध एव स्यात् । पूर्वोक्तज्ञानसाधकानां तु त्वन्मायामयविधिनिषेधलक्षणगिरा स्वाभाविकबन्धो नापयात्येवेत्याहुः-त उतेति पदद्वयेन । उतापि ते मृत्योः शिरोऽप्यविगणय्य अननुसन्धायैव पदाक्रमन्ति मुच्यन्ते इत्यर्थः । विबुधानपि श्रुतिनिर्णीतपूर्वोक्तज्ञानानपि तान्परिवयसे यतस्त्वयि कृतं सौहृदं तादृशप्रेमसेवेच्छा तद्युक्ता एवात्मानं परं च पुनन्ति न तु ये ततो विमुखास्त इति । तदुक्तम्- "श्रेयःस्रुतिं भक्तिमुदस्य" इत्यादिना । श्रुतयश्च - "जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ।"

"ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधिविश्वे निषेदुः ।

यस्तं न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥" इत्याद्याः ।

जुष्टं प्रीत्या सेव्यमानं सन्तं पश्यति तदास्य महिमानं च पश्यत्यनुभवति इत्यनेन प्रकारेण वीतशोको भवति । कुत्र । परमे व्योमन् परमव्योमाभिधे महावैकुण्ठे । कीदृशेऽक्षरे नित्यरूपे । यत ऋच इति । ऋचः सम्बन्धिनि तत्प्रतिपाद्य इत्यर्थः । यस्मिन् परमव्योमनि देवाः पार्षदादयः विश्वे सर्वेऽधिनिषेदुरधिरूढा इत्यर्थः । अग्रे च जुष्टत्वमेव दर्शयति —

"यो देवानामधिपो यस्मिँल्लोका अधिश्रिताः । य ईशो द्विपदश्चतुष्पदस्तस्मै देवाय हविषा विधेम ॥" इति ॥१४॥२७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अखिलसत्त्वनिकेततया सकलसत्त्वगुणनियामकतया पुरुषावतारो यः स्थितिकर्ता विष्णुस्तत्तयेत्यर्थः । परिचरन्ति भजन्ति, उत अपि, तेऽपि आक्रमन्ति, किं पुनर्वृन्दावनादिविहारिश्रीकृष्णरूपत्वेन ये परिचरन्ति, ते मृत्युमाक्रामन्तीति । तत्राविगणय्येति तस्यानायाससिद्धत्वेनानुषङ्गिकत्वमभिप्रेतम् । तान्-कर्म्मण्येव पुरुषार्थबुद्ध्या त्वय्यभक्तान् । गिरा विधि-निषेधलक्षणया वाक्तन्त्या परिवयसे । विबुधानपि सुबुद्धीनपि, अनेन भक्तानां विधि-निषेधाधीनत्वं निरस्तम् । यद्वा, त्वयि कृतसौहृदास्तु पुनन्ति, ये तु विमुखास्ते न पुनन्ति । यतस्तान् परिवयस इति योग्यम् (योज्यम् [घ, ङ] ।) । अतस्ते मुहुः संसारदुःखं लभन्त इति भावः । अथवा पशूनिव पशुवदबुद्धान् मूर्खान् यान् गिरा परिवयसे कर्म्मजडानित्यर्थः । तानपि त्वयि कृतसौहृदाः पुनन्ति ॥२७॥

[ननु कंसाद्भयेन वने निलीय वसतो मे किमियमतिस्तुतिः क्रियते ? इत्याशङ्क्य कंसात्ते भयं तावद्दूरेऽस्तु, साधारणा अपि त्वत्पादसेवका मृत्योरपि न बिभ्यतीत्याहुः-तवेति । हे अखिलसत्त्वनिकेत ! हे सम्पूर्णशुद्धसत्त्वाश्रय ! तया प्रसिद्धया प्रत्रेयस्या सह त्वां ये ये केचिज्जनाः परिचरन्ति, त उत तेऽपि मृत्योरपि न बिभ्यतीत्याहुः-तत्र को वराकस्त्वयि कंस इत्यर्थः । तर्हि स्वरूपनिष्ठाः किमिति मां न भजेरन् ? इत्यतः आहुः-परिवयस इति । गिरा मोक्षोत्कर्षप्रतिपादकवेदरूपया । तथा च वेदः (बृ. २/४/३) "येनाहं नामृतः स्यां किमहं तेन कुर्य्याम् ।" इत्यादि । खलु निश्चितं त्वयि कृतसौहृदाः पुलिन्दीप्रभृतयोऽपि भुवनानि पुनन्ति, ये तु विमुखा याज्ञिकविप्रादयस्ते नात्मानमपीत्यर्थः ॥२७॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

एवं भगवत्पराणां प्रभावं भगवद्विमुखानामपकर्षं चाह-तवेति । अखिलसत्त्वानां जन्तूनां निकेतत्व तथाविधसम्बन्धानुसन्धानेन । ये तव त्वाम् । परिचरन्ति सेवन्ति जानन्ति । ते निर्ऋतेः मृत्योरपि शिरः अविगणय्य अनादृत्य । प

क्रमन्ति पादेनाक्रमन्ति
पुनन्ति लोकमिति शेषः

नन्विदमात्मवि
तथा हि अखिलसत्त्वान
यावत् । त उत त एव
(तरन्ति) ततो मुच्यन्त
अविदुषः सार्वात्म्यब्रह्म
'वी गतिव्याप्त्यो'रित्यस
बोधयसीत्यर्थः । यद्वा ।
सम्यक् शिक्षयन्ति तद्वत् श
निरतिशयकृपावत्त्वं सर्वा
विमुखाः वैमुख्यरहिताः
भागवतसेवया तेऽपि मुच

मूलम्

"परिवयसे पशूनिव
त्वमेकः स्वराडखिल

परिवयस इति श्लोक

ये ते देवास्त्वत्पादैव
इत्यर्थः । "वय बन्धने" इति
जगदिति शेषः । ते तव विमुख
जगदपुनन् शुचयो न परे
परिपूर्णकर्तृकारयितृशक्तिधरस्त
विवृतनयनत्वात् ये अनिमिषाः
इतरे स्युः सुराः सुखिन इ
पुराणवाक्योदाहरणेनैतच्छ्रुत्यर्थत्व

तच्छ्रुत्वा काश्चिदन्या भ
त्वत्परिचरणामेव श्रेयः । यतस्त

त्वदीयस्य सत्यत्वमुक
पुनर्भजनमेवाभिनन्दन्त्य आहुः-त

पादेनाक्रमन्ति । अविबुधान् अज्ञानविवशान् पशूनिव । परिचरसे कृपया रक्षसि । गिरा उपदेशेनामानित्वादिना रक्षसीत्यर्थः । लोकमिति शेषः । परिवयसे इति पाठे, तान् गिरा वाचा पशूनिव विबुधान् पण्डितानपि परिवयसे बध्नासीत्यर्थः ॥२७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

नन्विदमात्मविद सदित्यभिमृशन्तु ततः किमत आहुः-तव परीति ॥ इत्थमिदं सदभिमृशन्त एव मृत्युं तरन्तीति भावः । हि अखिलसत्त्वानां सर्वेषां जन्तूनां निकेततया ये तव परि चरन्ति अखिलात्मान्तरत्वेन त्वं सेवन्ते त्वामुपासत इति त् । त उत त एव निर्ऋतेर्मृत्योः शिरो मूर्धानमविगणय्य अनादृत्य पदा पादेन आक्रमन्ति । मृत्योर्मूर्ध्नि पदं दधति न्ति) ततो मुच्यन्त इत्यर्थः । तर्हीत्थमनभिमृशतां का गतिरित्यत आहुः-परिवयस इति । अविबुधानिति च्छेदः । दुषः सार्वात्म्यब्रह्मोपासनारहितान् गिरा शास्त्रात्मकसम्यगुपदेशेन परिवयसे 'अयवये'त्यादिदण्डकपठितस्य वयतेः गतिव्याप्त्यो'रित्यस्य ण्यन्तस्य वा इदं रूपम् । (गत्यर्था बुद्ध्यर्थाः बोधयसीत्यर्थः) अस्य गत्यर्थकस्य ज्ञानार्थकत्वात् यसीत्यर्थः । यद्वा । परिवयसे गमयसि सन्मार्गं नयसीत्यर्थः । पशून् इव यथा दुर्दमान् पशून् नासिकासूत्रादिभिः क् शिक्षयन्ति तद्वत् शास्त्रात् त्वामित्थम्भूतं ज्ञात्वा क्रमेणोपासीनाः मुच्यन्त इति भावः । परिवयस इति लण्मध्यमपुरुषेण तिशयकृपावत्त्वं सर्वानुजिघृक्षत्वं च सूचितम् । तर्हि शास्त्रानधिकारिणां का गतिरित्यत आहुः-तानिति । ये त्वयि न मुखाः वैमुख्यरहिताः अत एव कृतं सौहृदं यैस्ते ते त्वद्यभक्ताः तान् अज्ञान् शास्त्राधिकाररहितानपि पुनन्ति खलु वत्सेवया तेऽपि मुच्यन्त इति भावः । येषां सत्सेवापि न रोचते तेषामधोगतिरेवेति तात्पर्यम् ॥२७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

"परिवयसे पशूनिवगिराविबुधानपि तांस्त्वयि दृढसौहृदा ननु पुनन्ति न ते विमुखाः ।

त्वमेकः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहन्ति समदन्ति च येऽनिमिषाः" ॥१५॥२९॥

परिवयस इति श्लोकस्यायं भावः ।

ये ते देवास्त्वत्पादैकाश्रयास्तान्विबुधानपि गिरा वैदिकवाचा परिवयसे परितो बध्नासि वेदोक्तकर्मानुष्ठानेन प्रवर्तयस र्थः । "वय बन्धने" इति धातोः । कानिव । दाम्ना पशूनिव । त्वयि दृढसौहृदाः गाढबद्धस्नेहपाशाः पुरुषाः पुनन्ति । ननु न्तीति शेषः । ते तव विमुखाः द्वेषिणो न पुनन्ति प्रत्युत मलीमसं कुर्वन्तीति शेषः । अनेन वयति गा इव यः सुरादिकांस्तन्मनसो पुनन् शुचयो न परे इति विवृतम् । कुतः शुद्धिरपि त्वन्नियतेत्यत्राहुः-त्वमिति । अखिलकारकशक्तिधरः पूर्णकर्तृकारयितृशक्तिधरस्त्वमेक एव नान्यः । कुतः । स्वराट् चक्रवर्ती अस्मत्स्वामी । किमस्मान् ज्ञापयसीति प्रतीक्ष्य सर्वदा नयनत्वात् ये अनिमिषाः देवास्ते तव बलिमुद्वहन्ति मनुजैर्दीयमानं सम्यगदन्ति च अनेन स एक ईशः परिपूर्णशक्तिर्बलिहरा स्युः सुराः सुखिन इत्येतत् व्याख्यातम् । 'समभेदे समीचीनसुष्ठु पूजासुखेषु चे'ति यादवः । तत्र तत्र वाक्योदाहरणेनैतच्छ्रुत्यर्थत्वेन श्लोको ग्रथित इति निश्चीयते । सा श्रुतिरपि प्रमाणीक्रियते ॥१५॥२९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तच्छ्रुत्वा काश्चिदन्या भक्तिपराः श्रुतय आहुः-किं तेन कृच्छ्रसाध्येन त्वत्प्रेमशून्येन ज्ञानेन तत्फलभूतं परमप्रेममयं चरणामेव श्रेयः । यतस्तव परिचरन्तीति ॥२७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

त्वदीयस्य सत्यत्वमुक्त्वा त्वदीयताया एकान्तभक्तपरत्वे प्रतिपादिते त्वद्भजनमेव सर्वोत्तममिति निर्णीय नमेवाभिनन्दन्त्य आहुः-तव परीत्यादि । तव चरणारविन्दं ये परिचरन्ति । तवेति द्वितीयार्थे षष्ठी । ते । उत निश्चयम् ।

अखिलसत्त्वनिकेततया अखिलप्राण्याश्रयतया विशिष्टाः सन्तः। विशेषणे तृतीया। ते अविगणय्य अविचारेणैव निर्ऋतेर्मृत्योः शिरः पदा आक्रमन्ति। ये पुनर्न भजन्ति त्वयि विमुखास्तान् विबुधानपि देवानपि किम्पुनर्मनुजान् गिरा स्वर्गकामोऽग्निष्टोमेन यजेदित्यादिकया वेदरूपया वाचा पाशभूतया परिवयसे। सर्वतोभावेन बध्नाति वेत्रतन्तुसन्ताने पशूनिव पशवो यथा पाशेन बध्यन्ते त्वयि कृतसौहृदास्तु खलु निश्चितं पुनन्ति परानपि पवित्रयन्ति भजन्तस्तु मृत्युशिर आक्रमन्ति कृतप्रेमाणस्तु सर्वानेव पवित्रयन्ति। ननु तर्ह्यभजतोऽपि पवित्रयेयुर्नेत्याहुः-न ये विमुखाः। ये त्वयि विमुखास्तान् तेऽपि न पवित्रयन्तीत्यर्थः ॥२७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

त्वदीयस्य सत्यत्वमुक्त्वा त्वदीयतायाश्च एकान्तपरत्वे प्रतिपादिते त्वद्भजनमेव सर्वोत्तममिति पुनर्भजनमेवाभिनन्दन्ति-तव परीत्यादि। ये तव चरणारविन्दं परिचरन्ति, परि ये इति यच्छब्दस्य व्यवधानं छान्दसम्। परि ये चरन्ति ध्यायन्तीत्यादि प्रागपि दृष्टम्, तवेति कर्मणि वा षष्ठी। ते उत निश्चितमखिलसत्त्वनिकेततया सर्वप्राणिनामाश्रयरूपतया विशिष्टा अविगणय्य अविचारेणैव निर्ऋतेर्मृत्योः शिरः पदा आक्रमन्ति, ये पुनर्न भजन्ति, त्वयि विमुखास्तान् विबुधानपि गिरा- "स्वर्गकामोऽग्निष्टोमेन यजेत्" इत्यादिकमद्विधैकतमया रज्जुरूपया वाचा परिवयसे बध्नासि, 'वेञ् तन्तुसन्ताने' पशूनिव पशवो यथा रज्ज्वा बध्यन्ते। अतस्त्वयी कृतसौहृदा एव पुनन्ति पवित्रयन्ति, न ये विमुखाः, नेतरे ये पुनर्विमुखास्तेषां गतिरुक्तैव। अथवा ये विमुखास्तान् त्वयि कृतसौहृदा अपि न पुनन्ति, गिरा पशूनिव त्वमपि परिवयसे विबुधान् देवानपीत्यन्वयः ॥२७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पूर्वस्मिन् श्लोकद्वये परमपुरुषार्थनिरूपणमधिकृत्य असदुत्पत्तिवादिनः सद्विनाशवादिनः सत्त्वभेदवादिनः विपणवादिनः विवर्तवादिनः इत्येवं पञ्च वादिन उक्ताः। अत्र श्लोके तु परिचर्यावादिन उच्यन्ते। एषां वैष्णवानां मते जीवः खलु चित्कणः अल्पज्ञः अल्पव्यापी अस्वतन्त्रो निर्गुण एव। तस्य संसारदुःखनिवृत्तये भगवत्प्राप्तये च भक्तिरेव घटते न त्वन्यो ज्ञानादिकः कोऽप्युपायः —

"दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥" इति।

"भक्त्याऽहमेकया ग्राह्यः" इति च भगवदुक्तेस्तद्भक्तिरेवोपायः "दुरवगमात्म" इत्याद्यस्मदुक्तेश्च सैवोपायः परमपुरुषार्थ इति। वैष्णवमतस्यैव सर्वमतश्रैष्ठ्यं प्रतिपादयन्त्यो वैष्णवानेवोत्कर्षयन्त्योऽन्यान्सर्वानेव वादिन आक्षिपन्ति-तवेति। द्वितीयार्थे षष्ठी। त्वां ये परिचरन्ति "छन्दसि व्यवहिताश्च।" इति यच्छब्देन व्यवधानमदोषः। अखिलानां लोकानां सत्त्वं सत्यत्वमेव निकेत आश्रयो येषां तेऽखिलसत्त्वनिकेतास्तेषां भावस्तत्ता तयोपलक्षिताः "सत्यं ह्येवेदं विश्वमसृजत" इति माध्वभाष्यधृतश्रुतेः। "प्रधानपुम्भ्यां नरदेवसत्यकृत्" इति सप्तमोक्तेश्च द्वैतप्रपञ्चस्य सत्यत्वमिति मतमाश्रित्य वर्तमाना इत्यर्थः। श्लेषेण खिलं निकृष्टमशुद्धमखिलं श्रेष्ठं शुद्धं यत्सत्त्वं तदेव निकेतो वैकुण्ठादि धाम यस्य तत्तयोपलक्षितं त्वामित्यर्थः। त उत त एव अविगणय्य तिरस्कृत्य निर्ऋतेर्मृत्योः शिरः पदा स्वपादेन आक्रामन्ति अवहेलामात्रेणैव संसारं तरन्तीत्यर्थः। ननु पूर्वे वादिनोऽनुश्रुत्युक्तज्ञानाद्युपायेन तरन्त्येव तत्र नेत्याहुः-परिवयस इति। गिरा तत्तन्मतप्रतिपादिकया वेदवाचैव "असतोऽपि मनोऽसृज्यत मनः प्रजापतिम्" इत्यादिकया रज्ज्वा तान्विशिष्टबुधान् दार्शनिकानपि पशूनिव बध्नासि न च सोपपत्ति वक्तुमपारयन्तो वैष्णवा एव न ज्ञानवन्त इति वाच्यम्,

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥"

इति श्रुतेस्त एव सम्यग्ज्ञानवन्तो ज्ञेयाः। तस्मात्त्वयि कृतं सौहृदं प्रेम यैस्ते खलु निश्चितं पुनन्ति स्वयं पूता अन्यानपि स्वोपदेशात्पवित्रयन्तीत्यर्थः। ये विमुखा अभक्तास्ते तु न। अत्र —

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।
तं पीठगं येऽनु यजन्ति विप्रास्तेषां सिद्धिः शाश्वती नेतरेषाम् ॥" इति ॥

"जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ।"

"ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधिविश्वे निषेदुः ।"

इत्याद्याः । अर्थश्च-यदा स्वेन जुष्टं प्रीत्या सेव्यमानं पश्यति तदास्य महिमानं च पश्यत्यनुभवति इति अनेन प्रकारेण वीतशोको जितमृत्युर्भवति । कुत्र । परमे व्योमन् परमव्योमाभिधे महावैकुण्ठे अक्षरे नित्यरूपे । ऋच इति-ऋचःसम्बन्धिनि तत्प्रतिपाद्य इत्यर्थः । यस्मिन् देवाः पार्षदाः । विश्वे सर्वे । अधिनिषेदुरधिरूढाः ॥२७॥

गूढार्थदीपिनी

ननु सत्यज्ञानानन्दादिस्वरूपेणैव भगवतः प्रतिपादनात् तस्य ज्ञानं सुकरमेव किं भक्त्येति जल्पतां दार्शनिकानामपि बन्धनं सूचयन्त्यः पुनर्भजनोत्कर्षमेव द्योतयन्ति श्रुतयः-तवेति ।

(अभक्तदार्शनिकबन्धनपरेयम्)

पद्यानुवादः

सकलजीवनिवासतया★ जनास्तव भजन्ति जयन्ति मृतिं हरे ।
अभजनान्विनिपात्य पशूनिव कविमुखान् विमुखानपि नह्यसि ॥१४॥

★ [तव जना भक्तजना ये त्वां भजन्ति ते मृतिं संसारं जयन्ति तरन्तीत्यर्थः ज्ञ अभजनान् भक्तिशून्यान् अत एव त्वद्विमुखान् दार्शनिकानपि नह्यसि । णह बन्धने धातुः ।]

सङ्क्षिप्तसार्थान्वयः — हे भगवन् ! अखिलसत्त्वनिकेततया सकलजीवावासतया सर्वत्र त्वद्दृष्ट्येत्यर्थः । ये तव ये त्वां परिचरन्ति सेवन्ते ते उत ते एव अविगणय्य तुच्छीकृत्य तिरस्कृत्य निर्ऋतेर्मृत्योः शिरः पदा आक्रमन्ति मृत्युं जयन्तीत्यर्थः । ये विमुखाः अभक्ताः तान् विबुधान् विशिष्टान् बुधान् दार्शनिकानपि गिरां वेदलक्षणया वाचा पशूनिव त्वं परिवयसे बध्नासि । अतः खलु निश्चितमेतत् ये त्वयि कृतसौहृदाः ते सर्वं लोकमेव पुनन्ति किमुत आत्मानम् । अकृतसौहृदासस्तु आत्मानमेव न पुनन्ति कुतो लोकम् ॥

हे भगवन् ! तव भवतः । अखिलसत्त्वनिकेततया अखिलसत्त्वान्येव निकेतो ['कित् निवासे' इत्यस्मात्] निवासो यस्य तस्य भावस्तत्ता तया सर्वप्राणिनिवासतया ये तव ये त्वाम् । कर्मणि षष्ठी । परिचरन्ति सेवन्ते ते उत ते एव अविगणय्य अनादृत्य निर्ऋतेर्मृत्योः शिरः पदा पादेन आक्रमन्ति मर्दयन्ति मृत्युं जयन्तीत्यर्थः । ये पुनर्विमुखाः त्वदभक्ताः, तान् विशिष्टान् बुधान् दार्शनिकानपीति विश्वनाथः त्वं परिवयसे सर्वतो बध्नासि । कया । गिरा । त्वं ब्राह्मणः एवं कुरु, त्वं क्षत्रियः एवं कुरु, इत्येवं वेदलक्षणया वाचा । अतः खलु एष निश्चितसिद्धान्तः, ये त्वयि कृतसौहृदाः सम्पादितस्नेहाः ते वासनामयसंसारात् आत्मानम् अन्यानपि पुनन्ति उद्धरन्तीत्यर्थः । अकृतसौहृदास्तु आत्मानमेव न पुनन्ति कुतोऽन्यानित्यर्थादायातम् । यद्वा । ये कृतसौहृदास्ते सर्वं लोकमेव पुनन्ति पवित्रयन्ति किमुत आत्मानम् । "मद्भक्तियुक्तो भुवनं पुनाति ।" इत्येकादशोक्तेः । अतस्त्वद्भजनमेव मुख्यं न श्रेयास इति भावः । गिरा परिवयसे इत्यत्र श्रुतिः "तस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्" [सितं बद्धम् । षिञ् बन्धने इत्यस्मात् क्तः ।] । तस्येश्वरस्य विधिनिषेधलक्षणया दीर्घरज्जुतुल्यया वेदवाचा दामतुल्यैर्ब्राह्मणादिनामभिश्चेदं सर्वं जगत् सितं बद्धं ब्राह्मणस्त्वमेवं षट् कर्माणि कुरु, क्षत्रियस्त्वं यजनादित्रयमित्याद्याज्ञया संबद्धमिति तदर्थः । परिचरन्तीति सम्बन्धे पदव्यवधानमपि न दोषाय "छन्दसि व्यवहिताश्च" इति नियमात् ॥१४॥२८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवद्भक्ता ह्यनन्यशरणा एव तत्प्रसादेन तरन्तीत्यन्वयव्यतिरेकाभ्यां प्रतिपादयन्त्यो वाक्यश्रवणान्मुक्तिं जल्पन्त्योऽज्ञान् निरस्यन्ति श्रुतयः । शृण्वन्तोऽपि बहवो यं न विद्युः 'यमेवैष वृणुते तेन लभ्यः ।' 'तमक्रतुं पश्यति वीतशोको धातुः

प्रसादान्महिमानमीशम्, तपःप्रभावाद्देवप्रसादाच्च ब्रह्महश्वेताश्वतरोऽथ विद्वानि'त्यादयः । ये जनास्तवेति कर्मणि षष्ठी । त्वां परिचरन्ति सेवन्ते । अखिलसत्त्वनिकेततया सर्वसत्त्वाधिष्ठानतया । यद्वा । अखिलसत्त्वान्तर्यामितया उभयथापि नारायणं त्वां ये पूजयन्ति । ते एव निर्ऋतेः शिरः पदा आक्रमन्ति ताडयन्ति । तुच्छीकुर्वन्तीत्यर्थः । तथा च श्रुतिः —

'सर्वगेयं प्रपश्यन्ति ब्रह्मानन्दमजाक्षरम् । एकमेवाद्वयं नित्यं निर्ऋतेस्ते शिरोगताः ॥' इति । अन्वयमुक्त्वा व्यतिरेकमाह- अभक्तांस्तु विबुधानपि श्रवणादौ कुशलानपि कालरूपस्त्वं गिरा वयं कुशला इति तेषां गिरा बध्नासि । तथा वेदवाक्योच्चारणकुशलानपि परिवियसे इत्यर्थः । तथा च श्रुतिः —

'वयति गा इव यः सुरादिकांस्तन्मनसो जगदपुनन् शुचयो न परे ' इत्यादि ।

ननु तर्हि श्रोतव्य इत्यादिश्रुतेर्वैयर्थ्यापत्तिरिति चेन्न । श्रुत्वापि भगवत्पराङ्मुखस्य तत्कृपाकटाक्षेणानवलोकितस्य भगवत्स्वरूपादिप्रकाशाभावेन संसारानिवृत्तेर्हेतोः तत्रैव 'निदिध्यासितव्य' इति वाक्यशेषे ध्यानात् । श्रवणादेश्च ध्यानसापेक्षत्वेन सार्थक्यमेव । अत्र तु शृण्वन्तोऽपि बहव इत्यस्मिन् वाक्ये स्पष्ट एव कण्ठरवेण पठित इत्यर्थः । एतदेव स्पष्टयति । त्वयि कृतसौहृदाः । खल्वित्यवधारणे । पुनन्ति । ये विमुखाः श्रवणादिसाधनैर्लोकदृष्टौ युक्ता अपि न पुनन्त्यात्मानम् । कुतोऽन्यमिति । अनेन भगवत्प्रसादस्य निरपेक्षत्वं तदन्यसाधनजातस्य तत्प्रसादसापेक्षत्वं च दर्शितं मन्तव्यम् । आह च भगवान् सनत्सुजातः —

'नैनं सामान्यृचो वापि न यजूंष्यविचक्षणम् । त्रायन्ते कर्मणः पापान्न ते मिथ्या ब्रवीम्यहम् ॥'

'न छन्दांꣳसि वृजिनात्तारयन्ति । मायाविनं मायया वर्तमानं नीडं शकुन्ता इव जातपक्षाः ।

छन्दांस्येनं प्रजहन्त्यन्तकाले अविचक्षणं वाक्यार्थादौ कुशलमपि भगवत्पराङ्मुखम् ।'

'एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् । यत्सत्यमनृते नेह मर्त्येनाप्नोति मामृतम् ।'

'व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।' इत्यादिभगवदुक्तं प्रज्ञाहीनम् । अत एव मायाविनं भगवति कपटचारिणं ममाविद्याकल्पिते नियन्ता भगवानीश्वरः न तु वस्तुतो मदन्योऽस्ति । किञ्चाहमेवेश्वर इति निष्ठालक्षणा माया विद्यते तस्य तम् । तथा च श्रीभगवानाह स्वयमेव —

'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥'

इत्यादिना । एवम्भूतं स्वतन्त्रवादिनं वेदचतुष्टयवाक्यानि न हि पुनन्ति । अर्थवादशङ्कां निरासयति-न ते मिथ्येति । किन्तु अन्तकाले प्राणत्यागसमये एवं वाक्यकौश्रयज्ञापकं त्यजन्ति । तत्र दृष्टान्तः-नीडमित्यादि । इति स्मृत्यर्थः ॥२७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भगवति दोषान्परिहृत्य भक्तिमार्गे भगवान्निर्दुष्टो निरूपितः । इदानीं फलतो दोषं परिहरन्त्यः भक्तानां दोषं निराकुर्वन्ति-तव परि ये चरन्तीति । ये त्वां परिचरन्ति उत त एव निर्ऋतेर्मृत्योः शिरः पदा आक्रमन्ति । तत्रापि नाज्ञानात् । किन्तु ज्ञात्वैवाविगणय्य । अनेन भगवतो दानं तिष्ठतु, सेवामात्रेणैव मृत्योर्जयो भवतीत्युक्तम् । सर्वस्यापि द्वयमभीष्टं दुःखहानिः सुखावाप्तिश्चेति । तत्र सुखं भगवतैव सिद्ध्यति, नान्यथेति निरूपितम् । दुःखहानिरपि भगवत्सेवयैव, नान्यथेति निरूप्यते । दुःखानामवधिर्मृत्युः । स कर्मानुसारेण प्राणिभ्यो दुःखं प्रयच्छति । सर्वकर्मापेक्षयापि दुःखदातुरवज्ञा महांश्चातिक्रमः । शिरोमर्दनरूपः बह्वेव दुःखं प्रयच्छति । तदपि चेत्तेषां भगवद्भजनसाधनं ततः कुतस्तेषां दुःखम् । स्पष्टमेव मृत्योर्मूर्ध्नि पददानं ध्रुवे निरूपितम् । ये हि निरन्तरं सेवां कुर्वन्ति सेवार्थं वैकुण्ठेऽप्यपेक्षन्त इति देहान्तरादिनिर्माणे कदाचित् संस्कारनाशो विलम्बश्च भवेदिति तदेव शरीरं गृहीत्वा ते सेवार्थं द्रुतं गच्छन्ति । तदा मध्ये प्रतिबन्धकत्वेन मृत्युश्चेदायाति तदा तं दृष्ट्वा अभीता एव तस्यावगणनां कृत्वा आरोहे निःश्रेणिकामिव तच्छिरस आक्रमणं कुर्वन्ति । मृत्योः शिरो महासाहसानि तेषां करणं पदा शिरसोऽधिरोहणम् । आधिभौतिकव्यवस्थेयं । आध्यात्मिके तु देहदैहिकवैदिकादिधर्मान् सर्वानुल्लङ्घ्य विरुद्धानपि कृत्वा भगवत्सेवां कुर्वन्तीत्यर्थः । 'सर्वं तद्धिष्ण्यमीक्षध्वं

षितो ह्यसौ ।' इति वाक्यात् तथा दर्शनमपि तोषहेतुर्भवति । अन्यथा दोषश्रवणाच्च । 'कुरुतेऽर्च्चाविडम्बनम्' 'भस्मन्येव ति सः' इत्यादिवत् । तवेति षष्ठ्या त्वत्सम्बन्धिनं पदार्थं यं कञ्चन परिचरन्ति परं सर्वात्मभावोऽपेक्ष्यते । 'मृत्योः स प्नोति य इह नानेव पश्यति ॥' इति भेददर्शन एव मृत्युपराक्रमश्रवणात् । ननु सर्वातिक्रमे कथं दोषो न स्यात् तेषां वा धर्मरक्षकाणां तत्राहुः-परिवयस इति । तान् प्रसिद्धानपि विबुधान् पशूनिव परिवयसे बध्नासि । यत्र स्वस्वामी मृत्योरपि देवान् बध्नाति तत्र तत्सेवकानां मृत्योरवगणनायां का शङ्केत्यर्थः । किञ्च । गिरा भगवान् बध्नाति । साक्षात्तु बन्धनं वका एव कुर्वन्ति । यथा राजाज्ञया राजसेवकाः । अतस्तेषां तदतिक्रमः अभ्यासप्राप्त इति न शङ्कामुत्पादयति । किञ्च वेति । यथा पशवः शकटादिषु योजनार्थं निरूप्यन्ते । तत्र सेवका एव निरूपकाः । तान् भगवत्सेवायां योजयन्ति । अतः प्राप्य कृतार्था एव ते भविष्यन्तीति न तेषां कोऽपि मनःक्लेशः । अतः सेवकानां देवापेक्षयाप्युत्कर्षो निरूपितः । ननु सेवकानाममर्यादत्वात् निन्दितत्वमशुद्धत्वं च स्यादित्याशङ्क्याह-त्वयि कृतसौहृदा इति । त्वय्येव कृतसौहृदाः जगत्पुनन्ति तपस्विनोऽन्ये वा धार्मिकाः । यतस्त्वयि विमुखाः । अयमर्थः । शुद्धिर्द्विविधा, दोषनिर्हरणात्मिका गुणाधानकर्त्री च । गुणानामुत्कर्षः भगवत्सेवावधिः ।

'यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुरा' इत्यत्र निरूपितम् ।

दोषानामवधिर्भगवदाज्ञा ।

"ब्रह्महत्यासहस्रस्य पापं शाम्येत्कथञ्चन । न पुनस्त्वय्यवज्ञाते कल्पकोटिशतैरपि ॥" इति वाक्यात् ।

ततश्च ये गुणवन्तो भवन्ति तैरेव गुणलेशैर्निवर्तितदोषाभासाश्च त एवान्येषां दोषान् दूरीकृत्य गुणाधाने समर्था भवन्ति । ननु पूर्णाः तदंशैरेव निवर्तितसर्वगुणाः ते शुद्धिं कर्तुं शक्नुवन्तीत्यर्थः । खल्विति प्रमाणम् ।

"सर्वथा सर्वतः शुद्धा भक्ता एव न चापरे ॥ अतः शुद्धिमभीप्सद्भिः सेव्या भक्ता न चापरे ॥" ॥१४॥२७॥

श्रीसुबोधिनीसारः

सुलभं भक्तितोऽज्ञानं तां विना दुष्करं मतमित्याहुः । अखिलानां सर्वेषां सत्त्वानां प्राणिनां निकेततयाश्रयत्वेन तव त्वाम् । षष्ठी । ये परिचरन्ति सेवन्ते छन्दसि व्यवहिताश्चेत्यदोषः । ते उत एवाविगणय्य तिरस्कृत्य निर्ऋतेर्मृत्योः शिरः पदा मन्ति "मृत्योर्मूर्ध्नि पदं दत्त्वा निर्भयं यान्ति ते पदम्" इत्युक्तेः । ये विमुखा अभक्तास्तान् विबुधान् ज्ञानिनोऽपि गिरा वत्या रज्ज्वा पशूनिव परिवयसे त्वं बध्नासि ते आत्मानमपि न पुनन्ति । त्वयि कृतं सौहृदं प्रेम यैस्ते खलु नूनम न्यानपि च पुनन्ति पावयन्ति ॥१४॥२७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तथा च आत्मज्ञानस्य दुःसाध्यत्वात्त्वत्सेवयैव कृतार्थता इत्याहुः- तवेति । तवेति कर्मणि षष्ठी । "छन्दसि व्यवहिताश्च" यच्छब्दव्यवधानं न दोषः । उतशब्दः एवकारार्थे । अखिलसत्त्वनिकेततया अखिलानि सत्त्वानि प्राणिनो निकेतः नं यस्य स तथा तस्य भावस्तत्ता तद्रूपेण सर्वत्र त्वद्दृष्ट्या ये त्वां परिचरन्ति सेवन्ते ते एव अविगणय्य तिरस्कृत्य त्योः शिरः मूर्धानं पदा पादेन आक्रामन्ति मृत्योर्मूर्ध्नि पदं दधति तरन्ति विमुच्यन्ते इत्यर्थः । तेषां कृतार्थत्वे कः सन्देहः कृतं सौहृदं प्रेम यैस्ते खलु निश्चितं अन्यानपि पुनन्ति भक्तिमार्गोपदेशेन प्रतिबन्धकपापं निराकृत्य विमुक्तियोग्यान् ये तु त्वद्विमुखास्ते नेति आत्मानमपि न पुनन्ति, अन्यांस्तु कुतः पुनीयुरित्यर्थः । तत्र हेतुमाहुः-परिवयस इति । तान् मुखान् विबुधान् वेदार्थज्ञानपि त्वं गिरा वेदरूपया वाचा पशूनिव परिवयसे तत्तत्कर्माधिकारित्वेन बध्नासि । तथा च तस्य वाक्तन्तिर्नामानि दामानि तदस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्" इति ॥२७॥१४॥

अन्वितार्थप्रकाशिका

ननु ''सत्यं ज्ञानमनन्तं ब्रह्म'' इत्यादिभिरेवम्भूतं भगवन्तं श्रुतयः प्रतिपादयन्ति तज्ज्ञानं सुकरमेवेति किं भक्त्येत्यत आह-तवेति ॥ ये अखिलसत्त्वनिकेततया तव त्वां परिचरन्ति ते एव अविगणय्य निर्ऋतेः शिरः पदा आक्रामन्ति । यतः त्वं तान् प्रसिद्धान् विबुधानपि गिरा पशूनिव परिवयसे । अतः तेषु ये त्वयि कृतसौहृदा भवन्ति ते खलु पुनन्ति ये तु त्वत्तो विमुखाः ते तु न पुनन्ति इत्यन्वयः । तवेति कर्मणि षष्ठी । ''छन्दसि व्यवहिताश्च'' इति सूत्रात् परीत्यस्य यच्छब्दव्यवधानं न दोषः । उतशब्दः एवकारार्थे । अखिलसत्त्वनिकेततया अखिलानि सत्त्वानि प्राणिनो निकेतः निवासस्थानं यस्य स तथा तस्य भावस्तत्ता तद्रूपेण सर्वत्र त्वद्दृष्ट्या ये त्वां परिचरन्ति सेवन्ते । ते एव अविगणय्य तिरस्कृत्य निर्ऋतेर्मृत्योः शिरः मूर्धानं पदा पादेन आक्रामन्ति । मृत्योर्मूर्ध्नि पदं दधते मृत्युं तरन्ति विमुच्यन्ते इत्यर्थः । ह्रस्वाभाव आर्षः । तेषां कृतार्थत्वे कः सन्देहः तान् प्रसिद्धान् विबुधान् आपततो वेदार्थज्ञान् पण्डितानपि त्वं गिरा वेदरूपया वाचा पशूनिव परिवयसे तत्तत्कर्माधिकारित्वेन बध्नासि । तथा च श्रुतिः- ''तस्य वाक्तन्तिर्नामानि दामानि तदस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्'' इति । अतः त्वयि कृतं सौहृदं प्रेम यैस्ते खलु निश्चितम् । आत्मानमन्यानपि च पुनन्ति पवित्रयन्ति विमुक्तियोग्यान् कुर्वन्ति । ये तु त्वद्विमुखास्तेनेति आत्मानमपि न पुनन्ति अन्यांस्तु कुतः पुनीयुरित्यर्थः । अयम्भावः —

श्रुतयः सत्यादिरूपमात्मानं प्रतिपादयन्ति यत्र यद्यपि वस्तुनः अपरोक्षत्वादपरोक्षमेव ज्ञानमुत्पद्यते तथाप्यसम्भावनाविपरीतभावनातिरस्कृतत्वान्मलिनचित्तेषु परोक्षमेव भवति इति नापरोक्षसंसारभ्रमनिवृत्तिक्षमं भवति । भगवत्परिचर्यया शुद्धे चित्ते तु अपरोक्षमेव भवतीति करतलकलितो मोक्ष इति श्रुतिश्च —

''यमेवैष वृणुते तेन लभ्यः, यस्य देवे परा भक्तिः'' इत्यादि ॥२७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सर्वव्यापकप्रत्यक्षपुरुषोत्तमभक्तानां सबलत्वमभक्तानां नैर्बल्यं च वर्णयन्त्य आहुः-तवेति ॥ हे भगवन् ! अखिलसत्त्वनिकेततया अखिलानां सत्त्वानां निकेतस्तस्य भावस्तत्ता तया । सर्वसत्त्वाधारतया । यद्वा । अखिलानि सत्त्वानि निकेतभूतानि यस्य ॥ तस्य भावस्तत्ता तया । सर्वभूतान्तर्यामितया तव स्वरूपं ज्ञात्वेति शेषः ॥ ये जनास्त्वां प्रत्यक्षं परिचरन्ति सेवन्ते ॥ तवेति पदं विभक्तिविपरिणामेनात्रापि सम्बध्यते ॥ व्यवहिताश्चेति सूत्रेण छान्दसत्वाद्यच्छब्दव्यवधानेऽप्युपसर्गप्रयोगः । ते जनाः अविगणय्य अगणयित्वा हेलां कृत्वेत्यर्थः । निर्ऋतेत्योः ऋतिः सौत्रो धातुः सुखार्थः ॥ ऋतेरीयुजस्वार्थे निपूर्वस्य । ऋतेरौणादिक इकारप्रत्ययः तेन निर्ऋतीयतेन सुखयतीति निर्ऋतिरिति व्युत्पत्तिर्बोध्या ॥ शिरो मस्तकं पदा पादेनाक्रमन्ति मृत्युं जयन्तीत्यर्थः ॥ पदाऽऽक्रमणेन लक्षणया जयो विवक्षितः । उतशब्द एवकारार्थः ॥ अभक्तानां तु शुकज्ञानेन किमपि न स्यादित्याहुः- परिवयस इति ॥ ये विमुखास्त्वत्सेवारहिताः सन्ति तान् विबुधानपि शास्त्रज्ञानवतोऽपि गिरा व्यावहारिकनामधेयरूपया वाचा पशूनिव जडानिव परिवयसे निबध्नासि ॥ त्वद्भर्ति विना मृत्युजयो न स्यादिति भावः । पुनः पुनर्जन्मनामनुष्यपश्वादिनामधारणं बन्धनशब्दार्थः ॥ परिपूर्वस्य वयतेर्बन्धनार्थत्वम् । यतस्त्वयि कृतसौहृदाः कृतस्नेहाः । स्वं परांश्चापि पुनन्ति ॥ विमुखास्त्वद्भक्तिरहितास्तु न पुनन्ति । विघ्नोपल्पलुताः सन्तो नश्यन्त्येवेत्यर्थः । अत्र विमुखशब्दस्य प्रयोजनवशादुभयत्रान्वयः ॥२७॥१४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वात्मविद इदंसदित्यभिमृशन्तु ततः किमिति चेत् इत्थमिदं सदभिमृशन्त एव मृत्युं तरन्तीत्याहुः ॥ तव परीति ॥ अखिलसत्त्वानां सर्वेषां जन्तूनां निकेततया तया, ये तव त्वामित्यर्थः । परि चरन्ति सेवन्ते, अखिलात्मान्तरत्वेनाभिमृश्य त्वामुपासत इत्यर्थः । त उत ते एव, निर्ऋतेर्मृत्योः, शिरो मस्तकम्, अविगणय्य मृत्युमनादृत्य, पदा पादेन, आक्रामन्ति । मृत्योर्मूर्ध्नि पदं धृत्वा मुच्यन्ते इत्यर्थः । तर्हीत्थमनभिमृश्य सेवमानानां का गतिरित्यत आहुः । परिवयस इति । अविबुधानिति च्छेदः । अविबुधानविदुषः सार्वात्म्यब्रह्मोपासनारहितानिति यावत् । गिरा सच्छास्त्रोक्तसदुपदेशेन, परिवयसे बोधयसीत्यर्थः । अयवयेत्यादिदण्डकपठित

वयतेः 'वी गतिव्याप्तिप्रजन
गमयसि सन्मार्गं नयसीत्यर्थ
शास्त्रात्मकनस्बद्धाः पशुस
मध्यमपुरुषरूपेण भगवतो
तानिति । ये त्वयि न विमुखाः
पुनन्ति खलु । भागवतसेवया

''दृष्टाः स्पृष्टा नता वा कृतप
येषां सत्सेवापि न रो

ज्ञानिभ्योऽपि भगवद्भ
सत्त्वानि प्राणिनो निकेतः वास
षष्ठी । त्वां परिचरन्ति भजन्ति
अविगणय्य तिरस्कृत्य निर्ऋते
सौहृदं प्रेम यैस्ते । खलु इति निश
कुर्वन्तीत्यर्थः । ये तु परमात्मा
पुनन्तीत्यर्थः । तान् त्वद्भजनवि
बध्नासि । यथा पशवः यत्र निब
भवन्तीति भावः ।

'यामिमां पुष्पितां वाचं प्र
भवतीति भावः ।

तदुक्तं यथा —

'तपन्तु तापैः प्रतपन्तु पर्व
यजन्तु यागैर्विवदन्तु वादै

ये अखिलसत्त्वनिकेततया
ये विमुखाः ते न पुनन्ति विबुधानपि

नेहेति पूर्वं मनसैवानुद्रष्टव्य
किञ्चन किमपि वस्तुनो नास्ति किन्तु
वस्तुगत्या पश्यति स मृत्योरन
ज्ञानं ब्रह्मज्ञानं सुकरमेवेति हेतोः
महारज्जुः सत्संयुक्तानि ब्राह्मणादि
निषेधरूपया दीर्घरज्जुतुल्यया वे
यजनादित्रयमित्याद्याज्ञया स

वेति किं भक्त्येत्यत
मन्ति। यतः त्वं तान्
वत्तो विमुखाः ते तु न
न दोषः। उतशब्दः
य भावस्तत्ता तद्रूपेण
पादेन आक्रामन्ति।
न् प्रसिद्धान् विबुधान्
सि। तथा च श्रुतिः-
सौहृदं प्रेम यैस्ते खलु
आत्मानमपि न पुनन्ति

द्यते तथाप्यसम्भावना-
वत्परिचर्यया शुद्धे चित्ते

नवेति ॥ हे भगवन्!
। अखिलानि सत्त्वानि
ास्त्वां प्रत्यक्षं परिचरन्ति
धानेऽप्युपसर्गप्रयोगः। ते
तेरीयुजस्वार्थे निपूर्वस्य।
पदा पादेनाक्रमन्ति मृत्युं
न किमपि न स्यादित्याहुः-
ारिकनामधेयरूपया वाचा
नामनुष्यपश्वादिनामधारणं
। विमुखास्त्वद्भक्तिरहितास्तु
॥२७॥१४॥

न्तीत्याहुः ॥ तव परीति ॥
न्तरत्वेनाभिमृश्य त्वामुपासत
नन्ति। मृत्योर्मूर्ध्नि पदं धृत्वा
च्छेदः। अविबुधानविदुषः,
भयवयेत्यादिदण्डकपठितस्य

'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' इत्यस्यान्तर्भाविण्यन्तस्य वा इदं रूपम्। गत्यर्थास्ते बुद्ध्यर्थाः। यद्वा। परिवयसे सि सन्मार्गं नयसीत्यर्थः। कथमिव। पशून् इव। यथा दुर्दम्यान् पशून् नासिकासूत्रादिभिः सम्यक् शिक्षयन्ति, तद्वदित्यर्थः। त्मकनसम्बद्धाः पशुसमा अबुधाः शास्त्रात्त्वामित्थम्भूतं ज्ञात्वा क्रमेणोपासीना मुच्यन्त इति भावः। परिवयसे इति पुरुषरूपेण भगवतो निरतिशयकृपावत्त्वं सर्वानुजिघृक्षत्वं च सूचितम्। तर्हि शास्त्रानधिकारिणां का गतिरित्यत आहुः। ति। ये त्वयि न विमुखाः वैमुख्यरहिता इत्यर्थः। अत एव, कृतं सौहृदं यैस्ते, ते त्वद्यभक्ताः, तान् अपि शास्त्राधिकाररहितानपि, ति खलु। भागवतसेवया तेऽपि मुच्यन्त एवेति भावः। तथा च सत्सङ्गिजीवने हरिगीतायां —

स्पृष्टा नता वा कृतपरिचरणा भोजिताः पूजिता वा सद्यः पुंसामघौघं बहुजनिजनितं घ्नन्ति ये वै समूलम् ॥'' इति ॥

येषां सत्सेवापि न रोचते तेषामधोगतिरेवेति तात्पर्यम्। अनेन सत्सङ्गस्यापारमहिमत्त्वं चाप्यभिहितम् ॥१४॥ ॥२८॥

योगिरामानुजाचार्यकृतसरला व्याख्या

ज्ञानिभ्योऽपि भगवद्भक्ताः एव परमोत्कृष्टाः इत्याहुः-ये भक्ताः अखिलसत्त्वनिकेततया अखिलानि देवमनुष्यपशुपक्ष्यादीनि नि प्राणिनो निकेतः वासस्थानं यस्य सः। तस्य भावः निकेतता। तया सर्वप्राणिनां हृदयवर्तित्वप्रकारेण। ते इति कर्मणि त्वां परिचरन्ति भजन्ति। सर्वप्राणिनां भगवद्वासस्थानत्वेन तेषु द्वेषरहिताः सर्वव्यापकं त्वां ये भजन्तीत्यर्थः। ते भक्ताः गणय्य तिरस्कृत्य निर्ऋतेः मृत्योः शिरः मस्तकं दा पादेनाक्रमन्ति। मृत्युं तरन्तीत्यर्थः। उतेति निश्चयार्थः। त्वयि कृतं प्रेम यैस्ते। खलु इति निश्चये। पुनन्ति तादृशभक्ताः खलु स्वानुवर्तिनोऽपि भक्तिमार्गमुपदिश्य सर्वपापं दूरीकृत्य मुक्तियोग्यान् न्तीत्यर्थः। ये तु परमात्मनि विमुखाः ते न पुनन्त्येव 'स्वयं तरितुमक्षमः' इति न्यायेन स्वयमेव मलिनाः कथमन्यान् न्तीत्यर्थः। तान् त्वद्भजनविमुखान् विबुधानपि सर्वशास्त्रज्ञामपि त्वङ्गिरा वेदरूपवाण्या पशूनिव वयसे। तत्तत् कर्मस्वेव सि। यथा पशवः यत्र निबद्धाः तस्मादन्यत्र गन्तुं न शक्नुवन्ति तथा भगवद्विमुखाः अपि त्रैगुण्यविषयवेदवाक्यैः निबद्धाः न्तीति भावः।

'यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।' इत्यादिवचनमत्रानुसन्धेयम्। भगवद्भजनं विनान्यत्कर्मादिकं मोक्षसाधनं न तीति भावः।

तदुक्तं यथा —

'तपन्तु तापैः प्रतपन्तु पर्वतादटन्तु तीर्थानि पठन्तु चागमान्।
यजन्तु यागैर्विवदन्तु वादैर्हरिं विना नैव मृतिं तरन्ति ॥'

ये अखिलसत्त्वनिकेततया तव परिचरन्ति ते निर्ऋतेः शिरः अविगणय्य पदा क्रमन्त्युत त्वयि कृतसौहृदाः खलु पुनन्ति। मुखाः ते न पुनन्ति विबुधानपि तान् पशूनिव गिरा परिवयसे इत्यन्वयः ॥२७॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

नेहेति पूर्वं मनसैवानुद्रष्टव्यमित्युक्तं तत्र इह दर्शनविषये ब्रह्मणि सजातीयविजातीयभेदयुक्तं यन्नानावस्तु भासते तत् किमपि वस्तुनो नास्ति किन्तु कल्पितमेव सर्वं भासत इत्यर्थः। इह ब्रह्मणि नानेव भेदयुक्तमिव यच्चेतनाचेतनयुक्तं विश्वं त्या पश्यति स मृत्योरनन्तरं मृत्युं जन्ममरणादिपरम्परारूपं संसारं प्राप्नोतीत्यर्थः। एवम्भूतस्य निर्विशेषब्रह्मरूपस्य ब्रह्मज्ञानं सुकरमेवेति हेतोः कृतम्। अलं भक्त्येत्यतः शङ्कात आह-वेदः तव परीतिवाक् तन्तीति वागेव वेदरूपा। रज्जुः सत्संयुक्तानि ब्राह्मणादिनामानि दामानीव गलबन्धनरज्जवः यथा वणिजां वृषाः तन्त्या दामभिश्च बद्ध्यन्ते तथेश्वरस्य रूपया दीर्घरज्जुतुल्यया वेदवाचा दामतुल्यैर्ब्राह्मणादिनामभिश्चेदं सर्वं जगत् सितं बद्धं ब्राह्मणस्त्वमेवं षट्कर्माणि कुरु यजनादित्रयमित्याद्याज्ञया सम्बद्धमित्यर्थः। एवम्भूतं निर्विशेषब्रह्मरूपं तत्र च प्रतिपादने तु ज्ञानस्यापरोक्षतयोत्पन्नत्वेऽपि

असम्भावनासन्देहरूपा विपरीतभावना । गुरूपदिष्टादर्थाद्वैपरीत्यचिन्तनं ताभ्यां तिरस्कृतत्वाद्वाक्यजन्यस्य ज्ञानस्येति शेषः । नापरोक्षज्ञानसमर्थमित्यस्यायमर्थः । यथोत्पन्नोऽपि वह्निर्मणिमन्त्रादिभिस्तिरस्कृतश्चेन्न दाहसमर्थो भवति । सत्यान्तूत्तेजकस्थानीयायां भगवत्परिचर्यायां तत्प्रसादेन भ्रमनिवृत्तिसमर्थं भवत्येवेति वाचस्पत्यादिसम्मत्या शुष्कज्ञानिनः परास्ता इति । देहान्त इति ।

'य इह स्थातुमपेक्षते सर्व्वैश्वर्य्यं ददाति । यत्र कुत्रापि म्रियेत । देहान्ते देवः परब्रह्मतारकं व्याचष्टे । येनमृतीभूत्वा सोऽमृतत्वं च गच्छति ॥'

इति नृसिंहपूर्वतापन्यां ह्युक्तम् । अमयर्थः —

यस्तु श्रीनृसिंहोपासकः सर्वोत्कर्षेणात्र स्थातुमपेक्षते तस्मै स नृसिंहः सर्वैश्वर्य्यं ददाति । स च यत्र कुत्रापि मगधमरुदेशेऽपि म्रियते तस्मै देवो नृसिंहो देहान्त एव तारकमोङ्कारप्रतिपाद्यं परम्ब्रह्म व्याचष्टे उपदिशति । अत्राद्वैतगुरूणां भाष्यम्, कामिनं प्रकृत्य देहान्त इति विशेषणोपादानं कामित्वेन प्रागनधिकारात् निष्कामस्य त्ववर्वागपि देवः परम्ब्रह्म तारकं व्याचष्टे इति येनोपदिष्टेनोङ्कारप्रतिपाद्येन भगवताऽधिगतेनामृतीभूत्वा देहाद्युपाधेर्विमुच्य स श्रोता कैवल्यमाप्नोतीति ॥२७॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

ननु "सत्यं ज्ञानमनन्तं ब्रह्म । मनसैवानुद्रष्टव्यम् । नेह नानास्ति किञ्चन । मृत्योः स मृत्युमाप्नोति । य इह नानेव पश्यति ॥" इत्यादिश्रुतिभिः एवम्भूतस्य भगवतः प्रतिपादनात्तज्ज्ञानं सुकरमेवेति कृतं किम्भक्त्या अत आह-तव परीति । येऽखिलसत्त्वनिकेततया सर्वभूतावासतया तव त्वां परिचरन्ति त एवाविगणय्य तिरस्कृत्य शिरः पदा पादेन क्रमन्ति । मृत्युमतितुच्छं कृत्वा तरन्तीत्यर्थः । ये पुनर्विमुखास्ते नात्मानम् अभक्तास्तान् विबुधानपि विदुषोऽपि गिरा वाचा परिवयसे बध्नासि । कुतः । त्वयि कृतसौहृदाः भक्ताः खलु निश्चितम् आत्मानं अन्यांश्च पुनन्ति । ये विमुखास्ते नात्मानमपि पुनन्ति उत एवार्थः । तवेति कर्मणि षष्ठी । परि ये चरन्तीति "छन्दसि व्यवहिताश्च" इति यच्छब्देन व्यवधानमदोषः । स्वामिचरणाः । अयमभिप्रायः ।

सत्येवम्भूतमात्मानं श्रुतयः प्रतिपादयन्ति इति तत्र च यद्यपि वस्तुनोऽपरोक्षत्वादपरोक्षमेव ज्ञानमुत्पद्यते । तथाप्यसम्भावनाविपरीतभावनातिरस्कृतत्वान्मलिनचित्तेषु परोक्षमिव भवति । इति नापरोक्षसंसारभ्रमनिवृत्तिसामर्थ्यम् । भगवत्परिचर्यया तु सम्यक् अमलचित्तानां तत्प्रसादेन लब्धापरोक्षज्ञानानाम् अयत्नत एव करकलितो मोक्ष इति अभक्तान् बध्नातीत्यत्र श्रुतिभिः —

"तस्य वाक्तन्ति नामानि दामानि तदस्यैवं वाचा तन्त्या नामभिर्दामभिः ॥"

अर्थः — तन्तिः रज्जुः । तन्तिरेव तन्तिः तत्संयुक्तानि नामानि दामानीव तत्ततः अस्येश्वरस्य वाचा तन्त्या नामभिर्दामस्थानीयैः सर्वमशेषं सितं बद्धम् अमुकस्त्वमेवं कुर्वित्याज्ञया बद्धमित्यर्थः । अभक्तबन्धनपरेयम् । भक्तानामयत्नतः संसारतरणमित्यत्र श्रुतिः - श्रीनृसिंहतापिन्याम् —

"य इह स्थातुमपेक्षते सर्वैश्वर्यं ददाति यत्र कुत्रापि म्रियेत देहान्ते देवः तारकं व्याचष्टे येनामृतीभूत्वा सोऽमृतत्वं गच्छति ॥"

इति । अर्थश्च - य उपासक इह लोके स्थातुमपेक्षते इच्छति तस्मै सर्वैश्वर्यं ददाति देवः श्रीनृसिंहः । स यत्र कुत्रापि कीकटम्लेच्छदेशे वापि म्रियते तस्य देहान्ते तु तारकं व्याचष्टे । परमं ब्रह्म तारः प्रणवः तत्रस्थं तारकं समाङ्गप्रणवे व्याख्यातम् । परं ब्रह्म कथयतीत्यर्थः । येन परब्रह्मकथनेन अमृतो भूत्वा स श्रोता अमृतत्वं कैवल्यं प्राप्नोति । श्रुत्यन्तरम् -

"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन । यमेवैष वृणुते तेन लभ्यः " इति ।

अर्थः — अयमात्मा प्रवचनेन शास्त्राध्ययनेन मेधया बुद्ध्या बहुना श्रुतेन श्रवणेन च न लभ्यते किन्तु यमात्मानमेव उपासको वृणुतेऽनन्यभावेन भजते तेन वरणेनैव स आत्मा लभ्यो नान्यसाधनान्तरेण । यद्वा-यमेव भक्तं भक्त्या परितुष्ट आत्मा हरिर्वृणुते आत्मसात्कर्तुमिच्छति तेनैवैष लभ्यते नान्यैरिति भक्तमोक्षपरेयम् स्वामिनाम् —

अथैवं भगवत
। ये तव त्वाम् । कर्मणि
। तथा च गीतायाम् —
शिरः अविगणय्य पदा
'त्वां सेवतां रसु
नान्यस्य बर्हिषि
अविबुधान् अज्ञ
रक्षसीत्यर्थः । त्वयि कृतस
'वाग्गद्गदा द्रवते
इति । न ये विमुख
'विप्राद्धि षड्गुण
मन्ये तदर्पितमनोव

अनात्मा होने से
है । वे हि मृत्यु के मस्त
चरण धरकर संसार समुद्र
नासिकामें नथ डालकर उ
जन आपको शास्त्र द्वारा ज
है आपके विषयमें जिन्होंने
से पवित्र कर देते है । अथ
भक्त की सेवा करने से संस

[1]त्वमकरणः स्वरा
वर्षभुजोऽखिलक्षि

त्वम्, अकरणः, अपि,
अखिलक्षितिपतेः, वर्षभुजः, इव
सन्तः, तत्, तत्, कार्यं, विदधति ।

---

[1] त्वमरकरः-वीर. ।

तपन्तु तापैः प्रपतन्तु पर्वतादटन्तु तीर्थानि पठन्तु चागमान् ।
यजन्तु यागैर्विवदन्तु वादैर्हरिं विना नैव मृतिं तरन्ति ॥ सुगमम् ॥२७॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथैवं भगवत्पराणां प्रभावं भगवद्विमुखानामपकर्षमाह–तवेति । अखिलसत्त्वानां जन्तूनां निकेततया तथाविधानुसन्धानेन तव त्वाम् । कर्मणि षष्ठी । परिचरन्ति सेवन्ते जानन्तीति यावत् । 'छन्दसि व्यवहिताश्च ।' इति सूत्रेण यच्छब्दव्यवधानेऽपि दोषः था च गीतायाम् — 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।' 'सर्वस्य चाहं हृदि सन्निविष्टः ।' इति । ते । उताप्यर्थे । मृत्योरपि अविगणय्य पदा क्रमन्ति पादेनाक्रमन्ति । तथा च वक्ष्यति शुको देवानां भृत्यगणवाक्येन —

'त्वां सेवतां रसुभृतां बहवोऽन्तरायाः स्वौकोविलङ्घ्य परमं व्रजताम्पदन्ते ।
नान्यस्य बर्हिषि बलीन् ददतः स्वभागान् धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥' इति ॥

अविबुधान् अज्ञान् पशूनिव । परिवयसे कृपया रक्षसि । गिरा 'अमानित्यमदम्भित्वमहिंसाक्षान्तिरार्जवमि'त्याद्युपदेशेन सीत्यर्थः । त्वयि कृतसौहृदाः खलु पुनन्ति लोकमिति शेषः । तथा च भगवद्वाक्यमेकादशे —

'वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च । विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥'

इति । न ये विमुखा आत्मानमपि पुनन्ति । कुतो लोकमिति, तदुक्तं सप्तमे प्रह्लादेन —

'विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखात् श्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचनेहितार्थः प्राणं पुनाति सकुलं न तु भूरिमानः ॥' इति ॥२७॥

कृष्णप्रिया

अनात्मा होने से परमात्मा अखिल प्राणियोंका आधार है इस भावना से जो आपकी उपासना करते । वे हि मृत्यु के मस्तक का अनादर कर निज चरणसे उसके शिरको दबाय देते है । अर्थात् मृत्यु के शिर पर धरकर संसार समुद्र को तैर जाते है और उपरोक्त भावना से जो उपासना नहि करते उनको जैसे वैलो की कामें नथ डालकर उनकी शिक्षा करते है वैसे हि आप वेद वाणी से बोध कराते हो इसलीऐ वे शास्त्राधिकारी आपको शास्त्र द्वारा जानकर कर क्रमसे उपासना करते हुए संसार से छूटजाते है और जो आपसे विमुख नहि आपके विषयमें जिन्होंने भक्ति की है ऐसे उपासक जिनको वेदशास्त्रमें अधिकार नहि है उनके भी अपने सहवास वित्र कर देते है । अर्थात् वेदशास्त्र के अधिका शूत्य स्त्री शूद्र आदि कभी वेद शास्त्राधिकारि परमात्मा के की सेवा करने से संसार से छूट जाते है ॥२७॥

त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहन्ति समदन्त्यजयानिमिषाः ।
वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः ॥२८॥

कर्दमक्षमा

त्वम्, अकरणः, अपि, अखिलकारकशक्तिधरः, स्वराट्, च, असि ।, अजया, युक्ता, विश्वसृजः, अनिमिषाः, च, क्षितिपतेः, वर्षभुजः, इव, तव, बलिम्, उद्वहन्ति, स्वयं, च, समदन्ति ।, यत्र, तु, ये, अधिकृताः, ते, भवतः, चकिताः, तत्, तत्, कार्यं, विदधति ॥२८॥

कः-वीर ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु यद्यखिलसत्त्वनिकेतनत्वेन भवतः सेव्यत्वमुच्यते तर्हि तत्करणसम्बन्धात्कर्तृत्वभोक्तृत्वे प्रसज्ज्येयाताम् न वस्तुतस्तथात्वमिति चेत्तर्हि जीवानामपि तत्तुल्यत्वमिति केन विशेषेण पुनः सेव्यसेवकत्वमितीमामाशङ्कां परिहरन्त्यः 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः शृणोत्यकर्णः । स वेत्ति वेद्यं न च तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराणम् ॥' इत्याद्याः श्रुतयः स्तुवन्तीत्याह-त्वमकरण इति । करणसम्बन्धरहित एवाखिलकारकशक्तिधरः अखिलानां प्राणिनां यानि कारकाणीन्द्रियाणि तेषां शक्तीर्धारयतीति तथा कुतः स्वराट् यतः स्वेनैव राजसे दीप्यसे न हि स्वतःसिद्धज्ञानशक्तेरिन्द्रियापेक्षेत्यर्थः अतस्तव बलिमुद्वहन्ति पूजां कुर्वन्ति अजया अविद्यया सहितास्तया वृता इत्यर्थः । अनिमिषा देवा इन्द्रादयस्तत्पूज्या विश्वसृजो ब्रह्मादयोऽपि यथा सस्त्रीका एव किङ्कराः स्वामिनं सेवन्ते तथाऽविद्यायुक्ता देवादयस्त्वामिति लोकोक्तिः समदन्ति च मनुष्यैर्दत्तं हव्यकव्यादिलक्षणं बलिं भक्षयन्ति अत्र दृष्टान्तः वर्षभुजोऽखिलक्षितिपतेरिवेति यथा वर्षभुजः खण्डमण्डलपतयोऽखिलक्षितिपतेर्महामण्डलेश्वरस्य स्वप्रजादत्तबलिभुजो बलिमुद्वहन्ति तद्वदिति कथं बलिं वहन्ति तदाह विदधति यत्र ये त्वधिकृता भवतश्चकिता इति त्वत्तो भीताः सन्तो यस्मिन् कर्मणि नियुक्तास्ते तत्कुर्वन्तीति त्वदाज्ञापालनमेव बल्युद्वहनमित्यर्थः । तथा च श्रुतिः "भीषास्मद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति ॥"

अनिन्द्रियोऽपि यो देवः सर्वकारकशक्तिधृक् । सर्वज्ञः सर्वकर्ता च सर्वसेव्यं नमामि तम् ॥१५॥ ॥२८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — अत्राक्षिपति-नन्विति । तत्तत्करणसम्बन्धात्तद्देहेन्द्रियसंयोगात् ब्रह्मणोऽहं पश्यामि तीर्थमित्यादिप्रतीतेस्तीर्थदर्शने कर्तृत्वं तज्जन्यफलभोक्तृत्वं च प्रसक्तमेवात्मनीति चेदाह-न वस्तुत इति । तथात्वं तत्तत्करणसम्बन्धत्वमात्मनः "असङ्गो ह्ययं पुरुषः" इत्यात्मनोऽसङ्गत्वादेवं चेज्जीवस्यात्मत्वाविशेषात्परमात्मसाम्यतैवेत्येवंरूपामाशङ्कां परिहरन्त्यः "अपाणिपादः" इत्याद्याः । तासामर्थस्तु सुगमः । अकरणेऽपाणिपाद इत्याद्याः । अखिलकारकशक्तिधरत्वे तु "प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुस्ते निर्विचिक्युर्ब्रह्म पुराणमग्र्यम् ।" इति । पुरुषस्यातर्क्यशक्तिपरेयम् । कारणसम्बन्ध इन्द्रियसम्बन्धस्तेन रहितः । इन्द्रियाणि श्रोत्रादीनि । तेषां शक्तीः शब्दग्रहाद्याः । अत्र हेतुमाशङ्कते-कुत इति । इत्यर्थ इति-स्वप्रकाशस्य प्रकाशकान्तरापेक्षणे स्वप्रकाशत्वमेव न स्यादिति भावः । "करणं कारकं चेमे इन्द्रियेऽपि स्मृते पदे ।" इति निरुक्तिः । यतः स्वराडतो हेतोः । इत्यर्थ इति-अविद्वदधिकारित्वात्कर्ममार्गस्येति भावः । अत्र साविद्यदेवकर्तृकभगवत्सम्प्रदानकबलौ तद्वत्त्वामनिमिषा इत्यर्थः । इत्यर्थ इति —

"एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ । यदादरेण ग्रहणमाज्ञायाः" इत्याद्युक्तन्यायेन मुख्यसेवनमाज्ञाधारणमेवेति भावः । अत्र प्रमाणम्-तथा चेति । "भीषा" इति । अस्मादीश्वराद्भीषा भीत्या पवते वातीत्यर्थः । धावति स्वकालवशं प्राप्तानेव प्राणिनो नयन्सर्वत्र चरतीत्यर्थः । यद्यपीह पञ्चानां ग्रहणं तथापि तदादिन्यायेन ब्रह्मादीनामपि ग्रहणं ज्ञेयम् । सर्वेश्वरत्वकथनपरेयम् । स्वामिश्लोकः स्पष्टार्थः ॥★॥

श्रीधरानुयायिनी —

ननु सर्वान्तर्यमित्वे तत्तज्जीवेन्द्रियसम्बन्धेनेश्वरे कर्तृत्वभोक्तृत्वापत्त्या तस्यावास्तवत्वे जीवेऽपि तथात्वमेवेति जीवसाम्यादसेव्यत्वमाशङ्क्याहुः-त्वमिति । यस्मात्स्वप्रकाशत्वेनेन्द्रियानपेक्षतयेन्द्रियसम्बन्धरहितोऽपि सर्वजीवेन्द्रियप्रवर्तकोऽसि तस्मादविद्यया वृता इन्द्राद्या देवास्तत्पूज्या ब्रह्मादयश्च त्वां सस्त्रीकाः सेवकाः स्वामिनमिव सेवन्ते । यथा खण्डमण्डलेश्वर

स्वप्रजादत्तं बलिं चक्रवर्तिने निवेद्यैव तदाज्ञया यत्किञ्चित्स्वयमपि गृह्णन्ति तथा यस्मिन् कर्मणीन्द्रादयस्त्वया यथा नियुक्तास्ते भीताः सन्तस्तथैव तत्कुर्वन्तीति त्वदाज्ञां पालयन्तो यज्ञादौ मनुष्यैर्दत्तं हव्यकव्यादिरूपं बलिं त्वयि निवेद्यैव स्वयमपि श्नन्ति । यद्वा-त्वमकरणः असाधारणं कारणं करणम्, यथा च-घटादौ दण्डचक्रादि । सृष्ट्यादौ करणानपेक्षोऽसीत्यर्थः । न तु सौन्दर्यहानिकारककरनेत्राद्यभाववानित्यर्थः । अन्यथा परमसुन्दरश्रीकृष्णमूर्तिध्यानमसङ्गतं स्यात् । करणानपेक्षत्वे हेतुमाह-अखिलेत्यादि । अखिलानां कारकाणां ब्रह्मादीनां शक्तीर्धारयसीत्यर्थः । अनेन ब्रह्मादिभिर्विनापि स्वयं सर्वव्यापारसाधनसामर्थ्यमेकस्मिन्नेव त्वयीति सूचितम् । सृष्ट्यादौ तेषां प्रवृत्तिश्च केवलं त्वत्कृपयैवेत्याशयः । अत एवाजया शया श्रीरुक्मिण्या वा सह सिंहासने स्थितस्य तवाग्रे महिष्या सह सार्वभौमस्याग्रे मण्डलेश्वरा इव ब्रह्मादयो भीताः सन्तो बलिमुद्वहन्ति स्वयं च तद्दत्तमदन्तीत्यर्थः । अथवा नन्वेवं मम माहात्म्यं व्यर्थं कथमुच्यते यतोऽहं नन्दात्मजः कंसकरप्रदोऽस्मीति तत्राहुः-हे अखिलकारक ! अखिलं विश्वं ब्रह्मादिद्वारा कारयसीति तथा तत्सम्बोधनमिदम् । अत एव त्वमकरणः स्वयं सृष्ट्यादिश्रमं न करोषि, यतस्त्वं शक्तिधरः शक्तिं सामर्थ्यमव्याहताज्ञां वा धारयसि । अत एव स्वराट् सकलचक्रवर्तिशिरोमणिस्त्वमेवासि । अत एव यत्र कर्माणि ये यथा कृतास्ते विश्वसृजो ब्रह्मादयोऽपि ज्ञप्तकार्यान्यथाभावभयान्निमेषरहिताश्चकिताश्च सन्तोऽजया स्वाविद्यया पत्न्या सहितास्तथैव त्वदाज्ञां पालयन्तश्चक्रवर्तिनोऽग्रे वर्षभुज इव तवाग्रे बलिमुद्वहन्ति । उत ऊर्ध्वं शिरसि कृत्वा वहन्ति प्रापयन्ति विष्टिं कुर्वन्तीति यावत् । ते च त्वद्दत्तं विष्टिवेतनरूपं मदन्ति । लोके विष्टिकर्तृभ्यो भोजनंदीयत एवेत्यर्थः । तथा च यस्य ब्रह्मादयो विष्टिकर्तारस्तस्य कंसाय करदानमत्यन्तासम्भावितमेवेत्याशयः ॥★॥ तोषिणी — अन्यास्तदेव पुष्णन्त्य आहुः-त्वमिति । अकरणः सृष्ट्यादौ कुलालादिवत्पृथक्साधनरहितोऽत एव क्रियारहितश्च । ब्रह्मादिजीवेन्द्रियप्रवर्तनलीलायां तत्तदिन्द्रियसम्बन्धरहितः स्वतः स्थितौ प्राकृतपाणीन्द्रियरहितोऽपि त्वं स्वरूपतस्तत्तत्करणपरार्धातिक्रमिपरमातिपरमशक्तितया प्रादुर्भावभेदेन, सङ्ख्यातश्चानन्ततयाऽखिलानि नां कारकाणि करणानि तानि तथा "सर्वतः पाणिपादं तत्" इति न्यायेन कदाचित्तत्रतत्र तादृशनिजकरणप्राकट्यरहितोऽपि सर्वं तत्तच्छक्तीर्धरसि बिभर्षि तथा यथायोगं तत्तदंशाभासांस्तत्रतत्र प्रापयसि चेति तथाभूत इत्यर्थः । कथम् । स्वराट् स्वरूपशक्तिमयेन स्वेनैव तथातथा राजस इति । अतो जीवकरणानामिव तव करणानां तदधीनप्रकाशत्वाभावात् प्रत्युत तत्करणानां धीनत्वात् । अनिमिषा ब्रह्मादयस्तव बलिमुद्वहन्ति । सन्तु च ते तेषामधिकारिणी माया च तथेत्याहुः-अजयेति । सहार्थे तृतीया । शेषं तैर्व्याख्यातम् । अतः साधूक्तं पूर्वाभिस्तव ये परिचरन्तीति । श्रुतयश्चात्र "न तस्य कार्यम्" इत्याद्यनुगता एव । पाणिपादः" इत्याद्याः ॥★॥ विश्वनाथी — तस्मादस्वतन्त्रैरीशितव्यैः जीवैस्त्वमेव स्वतन्त्र ईश्वरः सेव्य इति चेन्मैवम्, श्रोत्रभुजादिमत्त्वादहमपि जीव इव करणपरतन्त्र इत्यतः कुतो मे स्वातन्त्र्यमैश्वर्यं वेत्यत आहुः-त्वमकरणः । प्राकृतमनोनेत्रश्रोत्रादिरहितस्तर्हीमानि मन्नेत्रादीनि कुतस्त्यानि तत्राहुः-स्वराट् । स्वैः स्वरूपभूतैरेव नेत्रश्रोत्रादीन्द्रियै राजस इति । अत एव खिलानि तुच्छानि प्राकृतानीत्यर्थः । अखिलानि खिलभिन्नानि चिदानन्दमयत्वत्स्वरूपभूतानीन्द्रियाणि शक्तीः चक्षुश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" इति श्रुतेः । प्राकृतेन्द्रियशक्तीश्च धरतीति तथा सः । न त्वं प्राकृतेन्द्रियो नाप्यनिन्द्रियः किन्तु स्वरूपशक्तिमयेन्द्रियः प्रत्युत प्राकृतेन्द्रियेष्वपि श्रवणादिशक्त्याधायक इत्यर्थः । "न तस्य कार्यं करणम्" इत्यादिश्रुतेः । आहुः-तव बलिं पूजोपहारम् अनिमिषा ब्रह्माद्याः प्रापयन्ति तुभ्यं समर्पयन्ति । अजया सहेति । या तेषामधिकारिणी माया सापि ते बलिहारिणीत्यर्थः । समदन्ति त्वत्प्रसादान्नैर्दत्तं हव्यादिकं भक्षयन्ति । तत्र दृष्टान्तः-वर्षभुजो मण्डलेशा क्षितिभुजः सम्राज इवेति सुगमम् । कीदृशा भूत्वा तत्राहुः-यत्र कर्मणि ये त्वया नियुक्तास्तत्कर्मणि त्वत्तश्चकिता भूता एव । अत्र "भीषाऽस्मात्" इत्याद्याः श्रुतयः (१५) ॥२८॥

नीलकण्ठी —

एवं साङ्ख्ययोगाभ्यां शोधितौ तत्त्वपदार्थावनूद्य तयोरभेदमभिधत्ते द्वाभ्याम्-त्वमकरण इति । हे भगवन् ! त्वमकरणः अनिन्द्रियोऽपि स्वराट् राजसे प्रकाशसे। अनिन्द्रियोऽपि स्वरूपप्रकाशेनैव सर्वमवभासयसीत्यर्थः। "तस्य भासा सर्वमिदं विभाति"

"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।

स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥" इति श्रुतिभ्याम् ।

यद्वा-न सन्ति करणानि सृष्टिक्रियायां साधकतमानि मृद्दण्डादिस्थानीयानि यस्य सोऽकरणः । अत एव प्राक्सृष्टेः स्वेनैव एकाद्वितीयेन स्वरूपेण राजत इति स्वराट् "आत्मा वा इदमेक एवाग्र आसीत्।" इत्यादिश्रुतिभ्यः। एवंविधोऽप्यखिलकारकशक्तिधरः सर्वेषां कर्तृकरणादिकारकाणां शक्तयः कार्यजननसामर्थ्यानि धारयतीति स तथा —

"न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥" इति श्रुतेः ।

केवलात्त्वत्त एव सर्वमुत्थितमिति भावः। एवं तत्पदार्थमुक्त्वा त्वंपदार्थमनुवदति-तवेति। अनिमिषाः प्राणाद्यभिमानिदेवताः । अजया आत्मनस्त्वभेदाज्ञानाच्च तत्तत्करणात्मताभिमानेन तव देहेन्द्रियादिसङ्घातापन्नस्य तुभ्यं बलिमन्नाद्युपहारम् उद्वहन्ति प्रापयन्ति समदन्ति स्वयं च भुञ्जते।

"सर्वेऽस्मै देवा बलिमावहन्ति प्राणे तृप्यति सति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किञ्चिद्द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति ॥" इति श्रुतेः ॥

प्राणादयः स्वयं तृप्यन्ति स्वाधिष्ठातारं त्वामपि तर्पयन्तीति भावः । अत्रदृष्टान्तः-वर्षेति । अत्रापि तर्हीतिवत्स्वरभक्त्या अक्षरपूरणम्। यथा वर्षभुजो मण्डलाधिपतयः स्वयं प्रजाभ्यो बलिमाददानाः सन्तः अखिलक्षितिपतेः सार्वभौमस्य तस्मै बलिमुद्वहन्ति तद्वत्। किञ्च-तेषामनिमिषाणां मध्ये ये चक्षुःश्रोत्रादयो यत्र रूपशब्दादिग्रहणे अधिकृताः ते तत्स्वग्राह्यविषयाश्रयभूतं तेजोवियदादि विदधते निर्मिमिते अत एव ते विश्वसृजः एतेन "यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक्सर्वैर्नामभिः सहाप्येति ।" इत्यारभ्य "स यथा प्रतिबुद्ध्येत यथाग्नेर्ज्वलतः" इत्यग्निविस्फुलिङ्गदृष्टान्तेन जीवस्यैव सुप्तिप्रबोधयोर्जगल्लयोदयाम्नानाद्दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृता इत्यक्षपादसूत्राच्च सिद्धा दृष्टि-सम-समयैव सृष्टिरिति शास्त्ररहस्यं दर्शितम् । "आत्मन आकाशः सम्भूतः" इत्यादिश्रुतीनामद्वैतप्रतिपत्तावेव तात्पर्यं न सृष्टौ वियत्प्राणपादयोरपि सृष्टिश्रुतिविरोधपरिहारोऽप्यभ्युपेत्य वाद एव। वक्ष्यते चैतन्न यदिदमित्यस्मिन् श्लोके। भवतश्चकिता इति। सर्वलयाधिष्ठानात्त्वतः स्वनाशभीत्या त्रस्ताः। श्रुतिश्चैषां प्राक्प्रावण्यं प्रत्यगवृत्तिमाह- "पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन्।" इति। व्यतृणद्धिंसितवान् (१५) ॥२८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

त्वमकरण इत्यस्य टीकायाम् अपाणीति यथा जीवस्तदुपाधावासक्तस्तथा अन्तर्यामित्वेन तत्र प्रविश्याप्यनासक्त इत्यर्थः। एवमुत्तरत्रापि जवनः विभुत्वाज्जवासम्भवेऽपि तच्छक्तिधारकत्वात् तच्छक्तिमानित्यर्थः । ग्रहीता सर्वधारकत्वात्। धारणाशक्तिहेतुत्वाच्च पश्यति। स्वरूपज्ञानेन सार्वदिकं सार्वत्रिकमपि पश्यतीत्यर्थः। एवं शृणोतीत्यपि भीषेति भीत्यर्थः। पवते वातीति। स्वव्याख्यायां तु-अन्यास्तदेव पुष्णन्त्य आहुः-त्वमिति। अकरणः सृष्ट्यादौ कुलालादिवत् पृथक्तत्साधनरहितोऽत एव क्रियारहितश्च ब्रह्मादिजीवेन्द्रियप्रवर्तनलीलायां तदिन्द्रियसम्बन्धरहितः स्वतः स्थितौ तद्वत्पृथगिन्द्रियरहितोऽपि त्वं स्वरूपतस्ततद्वत्करणपरार्धातिक्रमिपरमातिपरमशक्तितया प्रादुर्भावभेदेन सङ्ख्यातश्चानन्ततया अखिलानि यानि कारकाणि करणानि तानि यथा सर्वतः पाणिपादं तदिति न्यायेन कदाचित्तत्र तत्र तादृशनिजकरणप्राकट्यरहितोऽपि तत्तदर्थं तत्तच्छक्तीर्धरसि बिभर्षि। तथा यथा योग्यांस्तत्तदंशाभासांस्तत्र तत्र प्रापयसि चेति तथाभूत इत्यर्थः । कथं स्वराट् अचिन्त्यशक्तिमयेन स्वेनैव तथा तथा

राजसे इति अतो जीवकरणानामिव तव करणानां तदधीनप्रकाशत्वाभावात् प्रत्युत तत्करणानां तदधीनत्वादनिमिषा ब्रह्मादयस्तव बलिमुद्वहन्ति । सन्तु च ते तेषामधिकारिणी माया च तथेत्याहुः-अजयेति । सहार्थे तृतीया । शेषं तैर्व्याख्यातम् अतः साधूक्तं पूर्वाभिः तव परि ये चरन्तीति भावः । श्रुतयश्चात्र 'न तस्य कार्य'मित्याद्यनुगता एव 'अपाणिपाद इत्याद्याः ।' ॥१५॥२८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अकरणः प्राकृतजीवेन्द्रियसम्बन्धरहितः, - प्राकृताप्राकृतयोर्योगासम्भवात् । तथाप्यखिलकारकशक्तिधरः । कुतः ? स्वराट् स्वशक्तिविशेषेण स्वयं राजत इति तथा सः । सम्बन्धाभावेऽपि त्वच्छक्तिप्रभावेणैव सर्वजीवेन्द्रियशक्तिप्रवृत्तेरित्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, करणं कर्म घटादिनिर्म्माणे कुलालादेरिव व्यापारः, तद्रहित एवात्राखिलानां कारकाणां सृष्टिहेतूनां महदादीनां शक्तिधरः सृष्ट्यादिसामर्थ्यप्रवर्तकः, - इच्छामात्रेणैव तत्सिद्धेः । यतः स्वराट् अन्यनैरपेक्ष्येण स्वशक्त्या स्वयमेव राजसीत्यर्थः । इति सर्वे जीवास्त्वदधीना एवेति भावः । यद्वा, जीवेन्द्रियवदिन्द्रियरहितः, - सच्चिदानन्दघनविग्रहत्वात् । श्रीभगवति देहदेहिविभागवदिन्द्रियेन्द्रियवद्विभागोऽपि नास्तीत्यर्थः, (श्वे. ३/१९) "अपाणिपादः" इत्यादि श्रुतेः । अखिलानां ब्रह्मादीनां यानि कारकाणि तेभ्योऽपि शक्तीर्दर्शनश्रवणादिसामर्थ्योत्कर्षा धरतीति करणानामपृथक्त्वेऽपि सर्व्वातिशायिकरणसामर्थ्योत्कर्ष इत्यर्थः । अत एव स्वराट् । केचित्तु वैष्णवास्तस्य देहेन्द्रियादेः पार्थक्यं मन्यन्ते वल्युद्वहनादेव सम्यक् सुखमदन्ति भुञ्जते । अनिमिषाः श्रीब्रह्मरुद्रादयो देवाः । न च बल्युद्वहनेन समदनेन च वर्यभुजामिव सम्राजः सकाशान्निर्भयतया क्षणमपि स्वातन्त्र्यसुखमित्याहुः-विश्वसृजः श्रीब्रह्मादयः, चकिता इत्यनेन सदा सशङ्कत्वमुक्तम् ॥२८॥

श्रीभगवतोऽवश्यसेव्यताप्रतिपादनाय ब्रह्मादीनामपि सेव्यतामाहुः-त्वमिति । अजय हे अन्यकर्तृकजयरहित ! हे अजितेत्यर्थः त्वमकरणः क्रियारहितः । ननु विधिक्रीडां कुर्वन्नहं कथमक्रियः ? तत्राहुः-स्वराट् स्वेन स्वरूपभूतचिच्छक्तिविलासेन रासक्रीडादिना राजसे । त्वं प्राकृतक्रियाशून्य इत्यर्थः । कथं तर्हि जगत्सृष्ट्यादिसिद्धिः ? तत्राहुः-अखिलेति । अखिलानां कारकाणां सृष्ट्यादिकर्तृणां गुणादीनां ब्रह्मादीनां च शक्तिधरः त्वच्छक्त्यैव ते ब्रह्मादयः सृष्ट्यादाकिं कुर्वन्तीत्यर्थः । अतो विश्वसृजो ब्रह्माद्याः, अनिमिषाश्चेन्द्रचन्द्रादयोऽपि तव बलिमुद्वहन्ति, सेवां कुर्वन्ति । तत्र ब्रह्मेन्द्रादीनां श्रीभगवतःस्तवादिभिः परमोत्कर्षवर्णनादिना गोविन्दाभिषेकादिना च सेवा । पवनस्य (भा० १०/३५/२१) "मन्दवायुरुपवात्यनुकूलम्" इत्याद्युक्तप्रकारेण, चन्द्रस्य रासविहारादौ सम्पूर्णमण्डलतया सहोदयेन, अन्येषां च (भा० १०/३३/२३) "वैमानिकैः कुसुमवर्षिभिरीड्यमानः" इत्याद्युक्तेन प्रकारेण सा सेवा । तथा च त्वत्कृतेन दुर्मदमहादुष्टासुरदमनेन यज्ञादिषु निर्विघ्नं बलिं च समदन्ति । तत्र दृष्टान्तः-वर्षभुज इति । किञ्च, न केवलं स्वस्वदेहेनैव ते भजन्ति, किन्तु निजनिजैश्वर्यार्पणेन चेत्याहुः-विदधतीति । यत्र यस्मिन् ऐन्द्राद्यैश्वर्ये ये इन्द्रादयोऽधिकृताः सम्भ्रान्ताः सन्तः, तेनैश्वर्य्येण भवतो विदधति सेवामिति शेषः । तथा ह्यत्रैवोक्तम् (भा० १०/५०/५६)

"यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये । सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ॥" इति ॥२८॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भगवतः सर्वप्रशास्तृत्वमुच्यते-त्वमकरण इति । त्वरकरण इति पाठे हे विभो ! त्वर शीघ्रं सङ्कल्पमात्रेण करोतीति त्वरकरणः । स्वराट् स्वतन्त्रः । अखिलकारकशक्तिधर ! निमित्तोपादानादिसर्वकारकशक्तिधरः । शमदात्र्या दुःखप्रासामदायिन्या शब्दाभिहतया प्रकृत्या परतन्त्रा । अनिमिषाः देवास्तव बलिमुद्वहन्ति । वर्षभुजः भारतादिवर्षभोक्तारः । विश्वसृजः प्रजापत्यादयो [illegible] । यत्र पदे येऽधिकृताः तत्र स्थिता ते भवदाज्ञाभीताः बलिमुद्वहन्तीत्यन्वयः ॥२८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ननु सर्वकारणत्वान्मदनन्यत्वेनाभिमृशन्त एव मृत्योःशिरः पादेनाक्रमन्तीति सत्यं सर्वकारणत्वोपास्यत्वनियतसार्वज्ञसर्वशक्तित्वपरत्वादिगुणपौष्कल्यं स्यादित्यपेक्षायां तत्पौष्कल्यमाहुः-त्वमिति । अरं शीघ्रं सङ्कल्पमात्रेण करोतीत्यरकरः । सङ्कल्पमात्रपरिक्लृप्तविश्वः । जगत्सर्गापादकसङ्कल्पात्मकज्ञानाश्रय इति यावत् ।

प्राकृतशरीरेन्द्रियतदायत्तज्ञानरहितः नित्यनिरुपाधिकसार्वज्ञाश्रय इति तदर्थः अनेन सार्वज्ञ्यं फलितम् । त्वमकरण इति पाठे करणायत्तज्ञानरहितः । 'पश्यत्यचक्षुः स शृणोत्यकर्णः । न तस्य कार्यं करणं च विद्यते' इति हि श्रुतिः । कार्यं शरीरं करणम् इन्द्रियं च न विद्यते प्राकृतशरीरेन्द्रियतदायत्तज्ञानरहितः । नित्यनिरुपाधिक सार्वज्ञ्याश्रय इति तदर्थः । सार्वज्ञ्यस्य निरुपाधिकत्वस्फुरणाय स्वराडित्युक्तम् । स्वराट् स्वतन्त्रः अकर्मवश्यः कर्मवश्यानां प्रेरकश्च स्वातन्त्र्यस्य सप्रतियोगिकत्वात् अखिलकारकशक्तिधरः निमित्तोपादानकारणसम्प्रदानोपादानाधिकरणात्मकानि कारकाणि तच्छक्तीश्च धरतीति तथा । सकलकारकतच्छक्तिनिर्वाहकः इत्यर्थः । अथ परत्वमाहुः–तवेत्यादिना । अजया अजाशब्दाभिधया प्रकृत्या सहिता इति शेषः । प्रकृतिपरतन्त्राः अनिमिषा देवाः वायुसूर्याग्नीद्रादयः विश्वसृजः प्रजापतयश्च ये ये यत्र यत्र व्यापारे अधिकृतास्ते सर्वे भवतश्चकिताः भीताः सन्तः तव बलिं स्वस्वाधिकारानुवर्तनात्मिकां पूजामुद्वहन्ति विदधति समदन्ति त्वया दत्तान् भोगाननुभवन्ति च यथा वर्षभुजो भारतादिवर्षभोक्तारः अखिलक्षितिपतेः सार्वभौमस्य बलिं विदधति तद्वत् । अत्र —

'भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥' इति ।

'भयादस्याग्निस्तपति । भयात्तपति सूर्यः । भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥

यदिदं किञ्च जगत्सर्वं प्राण एजति । निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति ॥'

इति श्रुत्यर्थोऽनुसन्धेयः । प्राणशब्दनिर्दिष्टे परमात्मनि स्थितानां सर्वेषां ततो निःसृतानां तस्मात्सञ्जातमहाभयनिमित्तमेजनं कम्पनमस्ति । तच्छासनानिवृत्तौ किं भविष्यतीति महतो भयाद्वज्रादिवोद्यतात् कृत्स्नं जगत्कम्पते इति तदर्थः । महद्भयं वज्रमुद्यतमिति पञ्चम्यर्थे प्रथमा ॥२८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

''वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजां विदधति यत्र ये त्वधिकृता भवतश्चकिताः ।
स्थिरचरजातयः स्युरजये त्वनिमित्तयुजा विरह उदीक्षयेद्यदि परस्य विमुक्तसतः'' ॥१६-३०॥

वर्षभुज इत्यस्य श्लोकस्यायं भावः ———

ये यत्र यस्मिन् पदे त्वधिकृताः अधिकारं प्राप्ताः विश्वसृजस्ते भवतश्चकिताः भीताः । तत्र स्थित्वा भवतो विदधति बलिमिति शेषः । कस्मै के इव । वर्षभुजः खण्डेशाः अखिलक्षितिपतेश्चक्रवर्तिन इव । यदि पुरुषो विमुक्ताः सन्तो यस्मात् विमुक्तः सन् तस्य विमुक्तसतः परस्य सकाशात् विरहे मुक्तौ उदीक्षयेत् परमात्मन एव मुक्तिरिति पश्येत्

''तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥''

इति श्रुतेः । हे अज ! तर्हि स्थिरचरजातयः स्थिरत्वं च चरत्वं च जातिर्येषां ते तथा ते अनिमित्तयुजः स्युः । अः परमात्मा निमित्तं युक् योगो संसारस्य येषां ते तथा । भगवन्नियोगादेव संसारभाज इत्यर्थः । मुक्तेस्तन्नियतत्वाद्बन्धोऽपि तदधीन इति भावः । खण्डाधीशाः सार्वभौमस्य यद्वद्ब्रह्मेशाद्याः कुर्वते तेऽनुशास्ति ''त्वं मुक्तिदो बन्धदोऽतो मतो नस्त्वं ज्ञानदोऽज्ञानदश्चासि विष्णो'' इति शाण्डिल्यश्रुतेः —

''आत्मानं मुक्तिदं विष्णुं यदि पुंस उदीक्षयेत् । सुप्रसन्नस्तथा बन्धस्तत एवेति सेत्स्यति ॥''

इति स्मृत्यनुगृहीतश्लोकस्यार्थमनुवदतीति ॥१६॥३०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

श्रुतयश्च —

"जुष्टं यदा पश्यत्यन्यमीशस्य महिमानमिति वीतशोकः ऋचोऽक्षरे परमेव्योमन् यस्मिन् देवा अधिविश्वे निषेदुः ।
यस्तं वेद किमृचा करिष्यति य इत् तद्विदन्त इमे समासते ॥" इत्याद्याः ।

"अन्यं स्वस्माज्जीवान्महाविलक्षणं जुष्टं प्रीत्या सेवमानमीशं पश्यति तदास्य महिमानं च पश्यत्यनुभवति" । इति ।

अनेन प्रकारेण वीतशोको भवति । कुत्र । परमेव्योमन् परव्योमाभिधे महावैकुण्ठे । वीदृशे । अक्षरे नित्यरूपे यत ऋच इति ऋक्सम्बन्धिनि तत्प्रतिपाद्ये इत्यर्थः । यस्मिन् परमव्योम्नि देवाः पार्षदादयः इत् इत्थमिति श्रुतिपदार्थः । अग्रे च जुष्टत्वमेव दर्शयति —

"यो देवानामधिपो यस्मिल्लोका अधिश्रिताः । य ईशो द्विपदश्चतुष्पदस्तस्मै देवाय हविषा विधेमेति"

अन्यास्तदेव पुष्णन्त्य आहुः-त्वमकरणः ॥२८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

त्वयि बद्धसौहृदा इति त्वच्छब्दार्थं विवृण्वते-त्वमकरण इत्यादि । त्वं श्रीकृष्णः अकरणः । करणं कृतिः क्रिया । अक्रिय इत्यर्थः । तर्हि जगत्कर्ता क इत्याहुः-आत्मनः कारकशक्तिधरः अखिलेषु ब्रह्मादिषु या कारिकाशक्तिस्तां धरतीति तथा जगत्कर्तृत्वादिशक्तिं तेषु प्रकाशयन् स्वयमुदास्स इत्यर्थः । ननु तेषु स्वकर्तृतादिनिक्षिप्य स्वयमुदासीनदशया स्थितस्य किं सुखमधिकमित्याहुः-स्वराट् । स्वैः प्रियगोष्ठीगरिष्ठैः सह राजत इति स्वराट् । उक्तं पुरैव —

"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्" इति ।

आनन्दलीलामन्तरङ्गां हित्वा बहिरङ्गां सृष्ट्यादिलीलां किमिति स्वयं करिष्यसि । सा तु परद्वारापि कारयितुं शक्यते । ननु ते यदि जगत्कर्तृत्वादिमन्तस्तदा किमीशितृत्वं ममेत्याहुः-तव बलिमित्यादि । ते अनिमिषा देवाः ब्रह्मादयो विश्वसृजः तव बलिम् उद्वहन्ति तुभ्यं पूजां प्रापयन्ति अन्यैर्दत्तं बलिं च अदन्ति । अजया तवैव मायया विशिष्टाः । त्वं तु तयाऽस्पृष्टः । तत्र दृष्टान्तमाहुः-वर्षभुज इत्यादि । यथा अखिलक्षितिपतेः सार्वभौममहाराजस्य बलिम् वर्षभुजः खण्डमण्डलेश्वराः ब्रह्माद्याः । कथम्भूताः । भवतः सकाशाच्चकिताः भीताः । तथापि ये यत्र अधिकृतास्ते तद्विदधति । तादृशा एव तत्तत् कुर्वत इत्यर्थः । "यद्भयाद्वाति वातोऽयमि"त्यादि ॥२८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

त्वयि बद्धसौहृदा इति त्वच्छब्दार्थं व्याचक्षते- त्वमकारण इत्यादि । त्वं श्रीकृष्णोऽकरणः करणं कृतिः क्रिया-अक्रिय इत्यर्थः । तर्हि प्रपञ्चस्य कर्तादिः कः ? तत्राह-अखिलकारकशक्तिधरः- अखिलेषु ब्रह्माण्डादिषु कारयतीति कारिका या शक्तिस्तस्या धरः । किमिति कारयसि एव, स्वयं न कुरुषे तत्राह-स्वराट् स्वैर्गोपीजनैः सह राजस इति स्वराट् । अत उक्तं (भा० १/१/१) "जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्" । ते तु अनिमिषा देवा विश्वसृजो ब्रह्मादयस्तव बलिमुद्वहन्ति, अन्यैः कृतं बलिमदन्ति च, अजया मायया विशिष्टाः । त्वं तु न तथा । तत्र दृष्टान्तः - अखिलक्षितिपतेश्चक्रवर्तिनो राज्ञः पूजां यथा वर्षभुजोऽखण्डमण्डलेश्वरा उद्वहन्ति, कथं ब्रह्माद्या अप्येवं कुर्वन्ति ? तत्राहुः- भवतः प्रकाशाच्चकिता भीताः सन्तः । तत्र अधिकृतास्ते तद्विदधति (भा० ८/२९/४०) "यद्भयाद्वाति वातोऽयम्" इत्याद्युक्तत्वात् ॥२८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तस्मादस्वतन्त्रैरीशितव्यैः जीवैस्त्वमेव स्वतन्त्र ईश्वरः सेव्य इति चेन्मैवम्, नेत्रश्रोत्रभुजादिमत्त्वादहमपि जीव इव करणपरतन्त्र इतः कुतो मे स्वातन्त्र्यमैश्वर्यं वेत्यत आहुः-त्वमकरणः । अहङ्कारिकमनोनेत्रश्रोत्रादिरहितस्तर्हीमानि मन्नेत्रादीनि कुतस्त्यानि आहुः-स्वराट् । स्वैः स्वरूपभूतैरेव नेत्रश्रोत्रादीन्द्रियै राजस इति स्वराट् । अत एव खिलानि तुच्छानि प्राकृतानीत्यर्थः । अखिलानि नेत्रश्रोत्रानि चिदानन्दमयत्वत्स्वरूपभूतानीन्द्रियाणि शक्तीः "चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" इति श्रुतेः । प्राकृतेन्द्रियशक्तीश्च

धरतीति तथा सः । न त्वं प्राकृतेन्द्रियो नाप्यनिन्द्रियः किन्तु पराख्यस्वरूपशक्तिमयेन्द्रियः प्रत्युत प्राकृतेन्द्रियेष्वपि श्रवणादिशक्त्याधायक इत्यर्थः । "न तस्य कार्यं करणम्" इत्यादिश्रुतेः महैश्वर्यमाहुः-तव बलिं पूजोपहारम् अनिमिषा ब्रह्माद्याः प्रापयन्ति तुभ्यं समर्पयन्ति । अजया सहेति । या तेषामधिकारिणी खल्वजा माया सापि ते बलिहारिणीत्यर्थः । समदन्ति त्वत्प्रसादान्नरैर्दत्तं हव्यादिकं भक्षयन्ति । तत्र दृष्टान्तः-वर्षभुजो मण्डलेशा अखिलक्षितिभुजः सम्राज इवेति सुगमम् । कीदृशा भूत्वा तत्राहुः-यत्र कर्मणि ये त्वया नियुक्तास्तत्कर्मणि त्वत्तश्चकिता भूता एव विदधति । अत्र "भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥" इत्याद्याः । भीषा भीत्या पवते वाति ॥२८॥

गूढार्थदीपिनी

त्वयि कृतसौहृदा इत्युक्ते तत्र त्वच्छब्दार्थं विवृण्वते-त्वमकरण इति ।

(सर्वेश्वरत्वबोधनपरेयम्)

पद्यानुवादः

स्वयमनिन्द्रिय इन्द्रियचालको बलिनिदेशकरास्तव लोकपाः ।
निखिलभूमिपतेरिव खण्डपाः प्रभवतौ★ भवतो भयशङ्किताः ॥१५॥

★ [प्रभवत्यस्मात्सर्वमिति प्रभवः ऋदोरप् । तस्मात्पञ्चम्यन्तात्तसिल् प्रभवतः सर्वसमर्थात् भवतः । शेषं स्पष्टम् ।]

सङ्क्षिप्तसार्थान्वयः — हेभगवन् ! त्वमकरणः प्रकृतेन्द्रियरहितः स्वराट् स्वैरप्राकृतैरिन्द्रियै राजसे च अत एव अखिलकारकाणामिन्द्रियाणां शक्तीर्धारयति प्रवर्तयतीति तथाभूतः अत एव च अनिमिषाः देवाः तत्पूज्या विश्वसृजः ब्रह्मादयोऽपि अजया स्वस्वशक्त्या सह तव बलिं पूजाम् उद्वहन्ति कुर्वन्ति त्वदाज्ञां पालयन्तीत्यर्थः । स्वयं च मनुष्यैर्दत्तं बलिं समदन्ति । यत्र कर्मणि येऽधिकृता नियुक्ताः ते तत्तु कर्म भवतः चकिता भीताः सन्तः विदधति कुर्वन्ति । वर्षभुजः खण्डमण्डलपतयः अखिलक्षितिपतेः यथा बलिं समर्पयन्ति तदाज्ञां पालयन्ति च तद्वत् ।

हे भगवन् ! त्वम् अकरण इन्द्रियसम्बन्धरहितोऽपि अखिलकारकशक्तिधरः । अखिलानां प्राणिनां यानि कारकाणि इन्द्रियाणि तेषां शक्तीर्धारयति प्रवर्तयतीति तथाभूतस्त्वम् अखिलेन्द्रियशक्तिसञ्चालक इत्यर्थः । यतः स्वराट् तेजसा अप्राकृतशक्त्या राजसे दीप्यसे तथा । तथा स्वतः सिद्धज्ञानशक्तिमांस्त्वम् । नेन्द्रियापेक्षा तवेत्यर्थः । यद्वा । स्वाभाविकैः शक्तिज्ञानानन्दादिभिर्गुणैः राजसे इति तथा । अत एव अनिमिषा देवाः तत्पूज्या विश्वसृजो ब्रह्मादयोऽपि अजया स्वशक्त्या सह तव तुभ्यं बलिं पूजोपहारम् उद्वहन्ति स्वयं च मनुष्यैर्दत्तं बलिं हव्यकव्यादिलक्षणं समदन्ति भक्षयन्ति । किञ्च त्वया यत्र कर्मणि येऽधिकृताः नियुक्तास्ते तत् तच्च कर्म विदधति कुर्वन्ति । कथम्भूताः । भवतस्त्वत्तश्चकिताः भीताः सन्तः ।

अत्र दृष्टान्तः यथा वर्षभुजः खण्डमण्डलपतयः अखिलक्षितिपतेश्चक्रवर्तिनो बलिं समर्पयन्ति तदाज्ञां च पालयन्ति तद्वदित्यर्थः । करणं कारकं चात्रेन्द्रियवाचकम् । 'करणं कारकं चेमे इन्द्रियेऽपि स्मृते पदे' इति निरुक्तेः ।

केचित्तु हे अजय ! भक्तिहीनैर्नानाविधवैदिकादिसाधनैः तत्सम्पन्नैः साधकैर्वा न जीयते इत्यजयस्तत्सम्बुद्धौ । "ना वेदैर्न तपसा" "भक्त्या त्वनन्यया शक्य" इति च गीतोक्तेः । त्वमकरणः प्राकृतेन्द्रियरहितः "अपाणिपादो जवनः" इति श्रु तर्हीमानि मन्नेत्रश्रोत्रादीनि कुतस्त्यानि तत्राहुः-स्वेः स्वाभाविकैरप्राकृतैः नेत्रश्रोत्रादीन्द्रियैः राजसे इति स्वराट् । अत ए अखिलकारकशक्तिधरः । खिलानि तुच्छानि प्राकृतानीत्यर्थः । अखिलानि खिलभिन्नानि चिदानन्दमयस्वरूपभूतानीन्द्रियाणि शक्तीः प्राकृतेन्द्रियशक्तीश्च धरतीति तथा सः । न त्वं प्राकृतेन्द्रियो नाप्यनिन्द्रियः किन्तु पराख्यस्वरूपशक्तिमयेन्द्रियः प्राकृतेन्द्रियेष्वपि श्रवणादिशक्त्याधायक इत्यर्थः । "चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्"

"परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।"

"विश्वतश्चक्षुरुत विश्वतो मुखः" इत्यादिश्रुतेरित्याहुः। शेषं पूर्ववत् ॥१५॥२९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तव परिचारका मृत्युं तरन्तीत्युक्तम्। इदानीं भगवतः करणपारतन्त्र्यशून्यत्वं स्वाभाविकशक्तिमत्त्वं सर्वनियन्तृत्वं चाह- पूर्वोक्तलक्षणः सर्वकारणभूतोऽकरणः करणैर्मायाकार्य्यैः प्राकृतैः शून्यः। तथा च श्रुतिः —

'अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः।

स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं पुराणम् ॥'

इति। स्वराट् स्वैः स्वाभाविकैः शक्तिज्ञानानन्दादिभिर्गुणैः राजते इति स्वराट्। **'स्वाभाविकी ज्ञानबलक्रिया च।'**

'विश्वतश्चक्षुस्त्तविश्वतो मुखो विश्वतो बाहुस्त विश्वतस्पात्।' इति श्रुतेः।

तत्र हेतुगर्भं विशेषणम्।,अखिलकारकशक्तिधरः। अखिलस्य क्षेत्रज्ञजातस्य कारकाणां शक्तिं धारयति प्रवर्तयति। तथा।

'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।

सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत् वशी सर्वस्य लोकस्य स्थावरस्य च ॥'

इत्यादिश्रुतेः। हे अजय! वैदिकैरपि भक्तिपराङ्मुखैः साधनैस्तत् सम्पन्नैः साधकैर्वा न जीयते इति। तथा।

'नाहं वेदैर्न तपसा .. भक्त्यात्वनन्यया शक्य' इत्यन्वयव्यतिरेकमुखेन भगवदुक्तेः। अनिमिषा इन्द्रादयस्तेषामपि पूज्या विश्वसृजो ब्रह्मादयः। तव बलिमुद्वहन्ति। तेऽपि प्रजया दत्तं भागं स्वयमदन्ति। तथा च श्रुतिः —

'स एक ईशः परिपूर्णशक्तिर्बलिहरा इतरे स्युः।' इत्यादि। तत्र दृष्टान्तः-अखिलक्षितिपतेश्चक्रवर्तिनो वर्षभुजो मण्डलेश्वरा खण्डाधीशाः सार्वभौमस्य यद्वद्धलेशाद्याः कुर्वते ते नु शास्ति त्वं मुक्तिदो बन्धदोऽतो मत्तो नस्त्वं ज्ञानदोऽज्ञानदश्चासि। विष्णो श्रुतेः। बलिवहनप्रकारमाह-यत्र यस्मिन् अधिकारे भवताऽधिकृतास्तदेव विदधति सम्पादयन्ति। तत्रापि न तेषां स्वातन्त्र्यमित्याह- किताः भीताः सन्तस्तव नियोगं पालयन्तीत्यर्थः ॥२८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भजनीयदोषान् भक्तदोषान् परिहृत्य भजने स्थिरीकृतेऽपि प्रातीतिकदोषैरभजनमाशङ्क्य निराकरोति-त्वमकरण इति। गवानवतारे इन्द्रियवान् प्रतीयते। तानि चेन्द्रियाणि नान्यार्थं कल्पानि भवन्ति। तथा सत्यन्यधर्मत्वं तत्कार्यबाधश्च स्यात्। मुक्तानां जीवानां न्यायसिद्धान्त इति तानि स्वीकर्तुं शक्यानि 'वाङ्मनसि सम्पद्यत' इत्यादिश्रुतिभिः लयश्रवणात्। नभवदिति आधिदैविकभावाच्च। तस्मादवैदिकैरेव तादृशः सिद्धान्तः श्रोतुं शक्यः। अत ईश्वरस्य इन्द्रियाणि तन्नियतानि नि। जीवानामदृष्टैर्वा कृतानि। सर्वथा तानीन्द्रियाणि भगवदीयानि भगवदर्थमेव कृतानि प्रतिनियतानीति मन्तव्यम्। ततस्तैः स्वाभाविको वा आध्यात्मिको वा सम्बन्धो वक्तव्यः। ततस्तद्द्वारा दोषसम्भव इति चेत्तत्राह-त्वमकरण इति। तव न्द्रियाणि कथमपि न सन्तीत्यर्थः। ननु तथा सति कथमिन्द्रियकार्याणीति चेत्तत्राह-स्वराडिति। स्वेनैव राजते सर्वसमर्थ पमेव तस्य। अन्यथेन्द्रियाणां तत्सामर्थ्यं कुत आगच्छेत्। मूलभूतेन्द्रियकल्पनायां त्वद्वैतविरोधः। किञ्च कारकशक्तिधरस्त्वम्। सर्वेषां कारकाणां षण्णामप्याधाराधिशक्तयः तेषां शब्दाश्रयत्वात् अनित्यत्वात् जातिवन्नियतशक्तिमत्त्वे नुदयात्। सर्वशक्तिमत्त्वे एकेनैव सर्वकार्यसम्भवात् शुद्धब्रह्मत्वापत्तेः अनेककृतिवैय्यर्थ्याच्च। सर्वाः शक्तीः कारकाणां सर्वदा बिभर्ति, तत्तदवसरे तां तां तत्र स्थापयतीति च मन्तव्यम्। अस्मिन्नर्थेऽन्यथा उपपत्तिरूपं हेतुमाह-तव बलिमुद्वहन्ति जयाऽनिमिषा इति। यदि निमिषाणां स्वतः शक्तिः स्यात् स्वाधीना वा तदा भगवते बलिं दत्त्वा तच्छेषं स्वयं न गृह्णीयुः त्या प्रार्थना च श्रूयते —

''यावद्बलिं तेऽज हराम काले ।'' इति वाक्ये । किञ्च अजया व्याप्तास्ते प्रकृत्या वशीकृताः कथं स्वतन्त्रा भवेयुः । लोके हि अजारक्षका अपि स्वामिने सेवां कुर्वन्ति । अजामात्रपरिग्रहा वा एते अत्यल्पाः । यत्रेन्द्रियस्वामिनामप्येषा गतिः तत्रेन्द्रियशक्तयः कथमिन्द्रियेषु स्थास्यन्तीत्यर्थः । एतदल्पानां कृत्यमित्याशङ्क्य विश्वसृजां महतामप्येतदिति ज्ञापयितुमल्पान्तररूपं दृष्टान्तमाहुः- वर्षभुजोऽखिलक्षितिपतेरिति । नव वर्षाणि जम्बूद्वीपे तथान्येषु सप्तसप्त वर्षाणि । तत्र एकैकोऽधिपतिर्भवति । ते सार्वभौमस्य सेवां कुर्वन्ति स्वनिर्वाहार्थं तथैकेन्द्रियस्वामिनः सर्वसङ्घाताधिपतेः सेवां कुर्वन्ति । नाप्येते अप्रयोजकाः, किन्तु विश्वसृजः । किञ्च वर्षाधिपतयः कदाचित्स्वतन्त्रा अपि भवन्ति, एते तु केवलं त्वदधीना एवेत्याहुः-विदधति यत्र ये त्वधिकृता इति । सुतरां भगवतः सकाशाद्भीताः सन्तः तथा तथा कुर्वन्ति । अन्यथा अनभिप्रेतेन वर्तेरन् ।

''दुर्गन्धे दुष्टशब्दे च विरसे च भयानके ॥ खरस्पर्शे दुःखपुञ्जे वर्तन्ते खानि यद्भयात् ॥
सुतरां मलोत्सर्गादौ लोकनिन्दिते अधिकारं न गृह्णीयुः ।''
''सुवर्णप्रतिमेवासौ सर्वानन्दमयोऽधिराट् । सर्वसेव्यो नियन्ता च निर्दुष्टः सर्वथैव हि ॥'' ॥१५॥२८॥

श्रीसुबोधिनीसारः

अकरण इन्द्रियसम्बन्धरहितः ''अपाणिपादो जवनो ग्रहीता'' इति श्रुतेः । स्वेन राजते इति स्वराट् अखिलानां सर्वेषां कारकाणीन्द्रियाणि तेषां शक्तीर्धारयति प्रवर्तयतीति अजया विभूत्या अनिमिषा देवाः तव बलिमुद्वहन्ति पूजां कुर्वन्ति । तुभ्यं बलिं ददति वा स्वयं समदन्ति च भक्षयन्ति । अखिलक्षितिपतेः सार्वभौमस्य वर्षभुजः खण्डपतय इव यत्र कर्मसु येऽधिकृता नियुक्ता भवतः त्वत्तश्चकिता भीताः तानि कर्माणि विदधति कुर्वन्ति आज्ञानरणमेव बलिहरणमिति तु शब्दार्थः ॥१५॥२८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अत एव ब्रह्मादयो देवा अपि त्वां भजन्ति, त्वदाज्ञां पालयन्ति च इत्याहुः-त्वमिति । विश्वसृजो ब्रह्मादयः अनिमिषाः लोकपाला देवा इन्द्रादयश्च तव बलिमुद्वहन्ति पूजां कुर्वन्ति । तथा ये तु यत्र कार्ये अधिकृता नियुक्तास्ते भवतश्चकिता भीताः सन्तस्तत्कार्यं विदधति कुर्वन्तीति शेषेणान्वयः ।

''भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम'' इति श्रुतेः ॥ समदन्तीति प्रजाभिर्दत्तं हव्यकव्यादिलक्षणं बलिं स्वयमपि भक्षयन्तीत्यर्थः । तत्र दृष्टान्तमाहुः-वर्षभुजोऽखिलक्षितिपतेरिति । यथा वर्षभुजः खण्डमण्डलपतयः स्वप्रजादत्तं बलिं भुञ्जाना अपि अखिलक्षितिपतेर्महामण्डलेश्वरस्य बलिमुद्वहन्ति तद्वदित्यर्थः । तद्भजनमन्तरेण मायानिवृत्तेरशक्यत्वात्तन्निवृत्त्यर्थमपि त्वद्भजनमावश्यकम्, इत्याशयेनाहुः-अजया मायया मोहिता इति शेषः । सर्वभोगमोक्षसम्पादकत्वेनापि तव भजनमावश्यकम् इत्याशयेनाहुः-अखिलेति । अखिलानां प्राणिनां यानि कारकाणि इन्द्रियाणि तेषां शक्तीर्धारयति प्रवर्तयतीति तथा । तर्हि तस्यापि प्राकृतेन्द्रियादिकरणानि स्युः, प्रवर्तकत्वात् इत्याशङ्क्याहुः-त्वमकरण इति । प्राकृतदेहेन्द्रियादिरहित इत्यर्थः । तर्हि कथं प्रवर्तकत्वं तत्राहुः-स्वराडिति । ''न तस्य कार्यं करणं च विद्यते न तत्समाश्चाप्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'' इति श्रुतेः स्वरूपभूताभिः शक्तिभी राजत इति तथा । अतो न प्राकृतेन्द्रियादिविना काचित् क्षतिरिति भावः ॥२८॥१५॥

अन्वितार्थप्रकाशिका

त्वमिति ॥ त्वम् अकरणः अपि अखिलकारकशक्तिधरः स्वराट् च असि । अजया युक्ता विश्वसृजः अनिमिषा अखिलक्षितिपतेर्वर्षभुज इव तव बलिम् उद्वहन्ति स्वयं च समदन्ति । यत्र तु येऽधिकृतास्ते भवतश्चकिताः सन्तः तत्तत्कार्यं विदधति इत्यन्वयः । त्वम् अकरणः चक्षुरादिरहितोऽपि स्वराट् स्वेन राजते तथाभूतः स्वतन्त्रः करणाद्यनपेक्ष अतः अखिलानां प्राणिनां यानि कारकाणि इन्द्रियाणि कर्मधारयो वा तेषां शक्तीर्धारयति प्रवर्तयतीति तथाभूतश्चासि ।

"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ॥" इति श्रुतेः ॥ किम्बहुना अजया अविद्यया युक्तास्तया सृजो ब्रह्मादयः अनिमिषाः लोकपाला देवा इन्द्रादयश्च करणाधिष्ठातोऽपि बलिमुद्वहन्ति पूजां कुर्वन्ति । यथा सस्त्रीका एव करा: स्वामिनं सेवन्ते तथा अविद्यायुक्ता देवास्त्वामिति लोकोक्तिः । तथा प्रजाभिर्दत्तं हव्यादिलक्षणं बलिं स्वयमपि समदन्ति यन्तीत्यर्थः । यथा वर्षभुजः खण्डमण्डलपतयः स्वप्रजादत्तं बलिं भुञ्जाना अपि अखिलक्षितिपतेर्महामण्डलेश्वरस्य बलिमुद्वहन्ति [illegible]। तथा ये तु यत्र कार्ये अधिकृता नियुक्तास्ते भवतश्चकिता भीताः सन्तस्तत्कार्यं विदधति कुर्वन्तीति त्वदाज्ञापालनमेव युद्वहनमित्यर्थः ।

"भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥" इति श्रुतेः ॥२८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ननु मम भक्तानां बलाधिक्यमन्यभक्तानां कस्मान्नेत्याशङ्कायां तदुपास्याः सर्वे देवास्त्वदधीना यतस्ततस्तेषां कुतो लाधिक्यमित्याहुः ॥ त्वमकरण इति ॥ हे भगवन् ! अकरणः न सन्ति करणानि प्रकृतिजन्येन्द्रियान्तःकरणानि यस्य दिव्यविग्रह र्थः। तथा च श्रुतयः — स ऐक्षत इति ॥ आत्मैवेदमग्र आसीत्पुरुषविध इति ॥ पूर्वमेवाहमिहासमिति ॥ चरणं पवित्रं विततं णमिति ॥ सर्वगन्धः सर्वरसः महारजनंवास इति । स्वभक्तेभ्यो रमते स मे सर्वस्वमिति ॥ हिरण्मयः पुरुषो दृश्यते ण्यश्मश्रुर्हिरण्यकेशआप्रणवात्सर्व एव सुवर्ण इति ॥ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजा इति ॥

तथा च सूत्रे —

पुस्त्रमपि चैनमभिधीयत इति । ईक्षतेर्ना शब्दम् इति ॥

तथा च स्मृतयः —

ग्रीष्मस्य कोटिसूर्यसमप्रभं द्विभुजं मुरलीहस्तं किशोरमिति ॥

आदेवेकोऽद्वितीयोऽभून्निर्गुणो दिव्यविग्रह इति ॥

एका मूर्तिरनिर्देश्या शुक्लां पश्यन्ति तां बुधा इति ॥

मार्गन्ति यत्ते मुखपद्मनीडैः छन्दःसुपर्णैर्ऋषयो विविक्त इति ॥

कवयो निगमावपनं भवत उपासतेऽङ्घ्रिमभवम् ॥ इत्याद्याः ॥

नेत्रपादमुखमनोहस्तादिकथनेन भगवतो दिव्यविग्रहत्वं बोधयन्ति ॥ यद्वा ॥ अकरणः मायया पुरुषकालादिकरणैः रापि सृष्टिं विधातुं समर्थः अतः स्वराट् स्वेन स्वतन्त्रैश्वर्येण राजते इति तथाभूतः । प्रकृतिपुरुषादय एव कर्तारो नाहमित्याशङ्कायां त्तसामर्थ्येनैव कुर्वन्तीत्याहुः–अखिलकारकशक्तिधरः । अखिलानां प्राणिनां यानि कारकाणीन्द्रियाणि तेषां शक्तिं धारयति यतीति तथाभूतः ॥ तदुक्तं भागवते यत् —

उदीरितोऽसुःस्पंदतेतमनुवाङ्मनइन्द्रियाणीति ॥ देहेन्द्रियासुहृदयानि च इति येन सञ्जीवितानि तदवेहि परं नरेन्द्र इति ॥ ॥ अखिलेषु विकारेषु सृष्टिकारकेषु पुरुषादिषु शक्तिधरः प्रविश्य सामर्थ्यधारकः ॥ तदुक्तं गीतायाम् —

परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर इति ॥

लोकत्रयं चिदचिन्मुक्तास्तत्त्रयमिति श्रीलक्ष्मणाचार्याः वा तेषां सामर्थ्यदाता(रः) ॥ यद्वा ॥ अखिला ये कारकाः पुरुषादयस्त यस्तासां धारकः प्रवर्तकः महतो व्यापारवतो वणिजः सकाशात् किञ्चिद्धनं व्यापारकर्त्री बुद्धिं प्राप्याल्पीयांसो णस्तत्सहायेनोद्यमं कुर्वन्ति तद्वत्ते सृष्टिकर्तार इति भावः ॥ एतादृशस्त्वमसि ॥ अत इति शेषः ॥ हे अजय हे अजित ! इति यावत् ॥ अनिमिषाः ब्रह्मादयो देवाः विश्वसृजः तेषां पूज्याः सृष्टिकर्तारः प्रकृतिपुरुषादयश्च तव बलिं पूजोपहारं निवेदयन्तीत्यर्थः ॥ स्वयं च समदन्ति ॥ स्वोपासकैरर्पितं बलिं गृह्णन्ति च ।

तत्र दृष्टान्तः – वर्षभुजः खण्डमण्डलपतयः वर्षं भुञ्जतीति व्युत्पत्तेः ॥ वर्षोऽस्त्रीभारतादौ स्याद्वर्षणे वत्सरेऽपि चेति मेदिनी ॥ अखिलक्षितिपतेरिव सार्वभौमस्य यथा बलिं करम् उद्वहन्ति मनुष्यैरर्पितं स्वयं च गृह्णन्ति तथा ॥ करोपहारयोः पुंसि बलिः प्राण्यङ्गके स्त्रियामित्युभयत्राप्यमरः ॥ ये तु उभयविधास्तु यत्र येषु येषु कर्मसु अधिकृता नियुक्ताः ते भवतश्चकिताः भीताः सन्तः तानि तानि कर्माणि विदधति कुर्वन्तीत्यर्थः ॥

तथा श्रुतिस्मृतयः —

भीषाऽस्माद्वातः पवत इति ॥ मद्भयाद्वाति वातोऽयमिति ॥ ब्रह्मणोऽपि भयं मत्त इति ॥

कालस्य ते प्रकृतिपूरुषयोः परस्येति ॥२८॥१५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु मम सर्वकारणत्वाज्जगत् मदनन्यत्वेनाभिमृशन्त एव मृत्योःशिरः पादेनाक्रमन्तीति यत् भवदभिहितं तत् सत्यत्वं तु यदि मयि कारणत्वोपास्यत्वनियतसार्वज्ञसर्वशक्तित्वपरत्वादिगुणपौष्कल्यं स्यात्तदा स्यादित्यपेक्षायां तत्पौष्कल्यमाहुः ॥ त्वरेति॥ वरं शीघ्रं सङ्कल्पमात्रेण करोतीति त्वकरणः सङ्कल्पमात्रपरिक्लृप्तविश्वः, जगत्सर्गापादकसङ्कल्पात्मकज्ञानाश्रय इति, 'न तस्य कार्यं करणं च विद्यते' इति श्रुतेः । कार्यं विधेयं, करणमिन्द्रियं च न विद्यते । प्राकृतशरीरेन्द्रियतदायत्तज्ञानरहितः, नित्यनिरुपाधिकसार्वज्ञाश्रय इति तदर्थः । सार्वज्ञस्य निरुपाधिकत्वस्फुरणाय स्वराट्त्वमाहुः । स्वराट् स्वतन्त्रः, अकर्मवश इत्यर्थः । कर्मवश्यानां प्रेरक इति भावः । अखिलकारकशक्तिधरः सकलेन्द्रियदेवशक्तिनिर्वाहकः, असि ।क अथ परत्वमाहुस्तवेत्यादिना । अजया प्रकृत्या, सहिता इति शेषः । प्रकृतिपरतन्त्रा इत्यर्थः । अनिमिषाः वायुसूर्याग्नीद्रादयो देवाः, विश्वसृजः प्रजापतयश्च, ये यत्र व्यापारे, अधिकृताः नियोजिताः, ते सर्वे, भवतः सकाशात्, चकिताः भीताः सन्तः, वरषभुजः भारतादिवर्षभोक्तारः, अखिलक्षितिपतेः सार्वभौमस्य, इव यथा, बलिम् उद्वहन्ति निवेदयन्ति । तु स्वयं च, समदन्ति लोकैरर्पितं बलिं गृह्णन्ति च । तद्वत् तव बलिं, स्वस्वाधिकारानुवर्तनात्मिकां पूजां, विदधति उद्वहन्ति समदन्ति, त्वया दत्तान् भोगान् अनुभवन्ति च । अत्र —

'भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥'

इत्याद्याः श्रुतयः प्रमाणभूताः ॥१५॥ ॥२९॥

योगिरामानुजाचार्यकृतसरला व्याख्या

ब्रह्मादयोऽपि त्वां भजन्ति त्वदाज्ञां पालयन्ति चेत्याहुः-त्वमकरणः देहेन्द्रियादिरहितः अखिलकारकशक्तिधरः देहेन्द्रियादिरहितत्वेऽपि सर्वकार्यकरणसमर्थः इत्यर्थः ।

'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुस्स शृणोत्यकर्णः ।

स वेत्ति वेद्यं न च तस्य वेत्ता तत्राहुरग्र्यं पुरुषं पुराणमि'ति श्रुतेः ॥

'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रुतिः ॥

यतः स्वराट् । स्वेनैव राजते दीप्यते इति स्वराट् । स्वतस्सिद्धज्ञानशक्तिमान् । अतः इन्द्रियादीनां नापेक्षेत्यर्थः । अतः अजया प्रकृत्या दारपुत्रादिविभवादिरूपया सहिता अनिमिषाः देवाः इन्द्रादयः विश्वसृजः ब्रह्मादयोऽपि वर्षभुजः मण्डलाधिपतयः अखिलक्षितिपतेरिव सर्वभूमीश्वरस्यैव तव सर्वनियामकस्य तव बलिम् आज्ञापरिपालनरूपां पूजां उद्वहन्ति शिरसि धारयन्ति। आदरेण कुर्वन्तीत्यर्थः । समदन्ति च । मनुजैर्दत्तं हव्यकव्यादिरूपं बलिं स्वयमपि भक्षयन्ति । कथं बलिमुद्वहन्ति तत्स्वरूपमाह-यत्रेति । यत्र यस्मिन् कर्मणि ये इन्द्रादयः अधिकृताः नियुक्ताः भवतस्सकाशात् चकिता भीतास्सन्तः तदाज्ञप्तं कार्यं कुर्वन्ति। त्वदाज्ञापालनमेव बल्युद्वहनमित्यर्थः । तथा च श्रुतिः —

'भीषास्माद्वातः पवते भोषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥' इति ।

त्वमकरण:अखिलकारकशक्तिधर: स्वराट् अजया सहिता: अनिमिषा: विश्वसृजश्च वर्षभुज: अखिलक्षितिपतेरिव तव मुद्वहन्ति समदन्ति च । ये तु यत्राधिकृता: ते भवतश्चकितास्सन्त: तत् विदधति । इत्यन्वय: ॥२८॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

तथात्वं कर्तृत्वभोक्तृत्वं तद्वास्तवकर्तृत्वभोक्तृत्वराहित्यं जीवानामपि तुल्यमीश्वरसममेवेति हेतो: केनोत्कर्षेणेश्वरस्य सेव्यत्वं वापकर्षेण जीवस्य सेवकत्वमित्यर्थ: । अपाणीति । यथा जीव: पाणिपादाद्युपाधावासक्तस्तथान्तर्यामिरूपेण पाण्याद्युपाधौ स्याप्यनासक्त इत्यर्थ: । जवन: वेगवान् व्यापकत्वाद्वेगसम्भवेऽपि अन्येषांवेगशक्तिसम्पादकत्वाद्वेगशक्तिमानित्यर्थ: । ग्रहीता धारक: अन्येषां धारणशक्तिप्रदश्चेति इतरकर्म्मेन्द्रियोपलक्षणम् । तथा चक्षुरादिज्ञानेन्द्रियशून्योऽपि पश्यति । स्वरूपज्ञानेन दिकं सार्व्वत्रिकमपि वस्तु पश्यतीत्यर्थ: । एवं शृणोतीत्यपि वेद्यं ज्ञेयं सार्व्वदिकं सार्व्वत्रिकमपि सर्व्वं जडवस्तु स ईश्वरो वेत्ति । ज्ञानेन पश्यतीत्यर्थ: । सर्व्वस्य जडत्वाज्जीवस्य च तत्प्रकाश्यत्वात्तस्य वेत्ता नास्ति । तं पुराणं पुरापि नरं सनातनमित्यर्थ: ।

"अग्र्यं श्रेष्ठं पुरुषं पुरुषोत्तममि"त्यर्थ: । तदुक्तं गीतायाम् —

"यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तम: । अतोऽस्मि लोके वेदे च प्रथित: पुरुषोत्तम: ॥" इति ।

यतस्तवोपास्यत्वप्रयोजकोऽन्तर्यामित्वस्वप्रकाशत्वादिलक्षणो महान् विशेषोऽस्ति । अत उपासकास्तव बलिमुद्वहन्ति । इन्द्रादीनामीश्वरबलिवहने स्वप्रजादत्तबल्यदने च दृष्टान्त इति । तदाह तस्मिन् बलिवहने प्रकारमाहेत्यर्थ: । तथा च श्रुति: —

"आज्ञापालने प्रमाणं स्तुतिरित्यर्थ: ।" भीषेति । भीत्येत्यर्थ: । पवते वातीति ॥२८॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

ननु यद्यखिलसत्त्वनिकेतनत्वेन भगवत: सेव्यत्वमुच्यते तर्हि तत्तत्करणसम्बन्धात्कर्तृत्वभोक्तृत्वे प्रसज्येयाताम् । न वस्तुत: त्वमिति चेत्तर्हि जीवानामपि तत्तुल्यत्वमिति केन विशेषेण पुन: सेव्यसेवकत्वमितीमामाशङ्कां परिहरन्त्य: स्तुवन्तीत्याह- करण इति । करणानीन्द्रियाणि । करणसम्बन्धरहितोऽपि अखिलकारशक्तिधरोऽसि । अखिलानां प्राणिनां यानि कारकाणि तेषां शक्तिर्धारयति प्रवर्तयतीति तथा । कुत: । स्वराट् स्वेनैव राजते । न हि स्वत: सिद्धज्ञानशक्तेरिन्द्रियापेक्षेत्यर्थ: । अतो निमिषा इन्द्रादिदेवा: विश्वसृजो ब्रह्मादयोऽपि अजया अविद्यया युक्ता: सन्त: तव बलिमुद्वहन्ति । पूजां कुर्वन्ति । मनुष्यैर्दत्तं हव्यादिलक्षणं बलिं स्वयं समदन्ति भक्षयन्ति च । अत्र दृष्टान्त: वर्षभुज इति । यथा वर्षभुज: खण्डमण्डलपतय: क्षितिपते: महामण्डलेश्वरस्य प्रजादत्तं बलिं करमुद्वहन्ति स्वयमदन्ति च । तद्वत् कथं बलिं वहन्ति च तत्राह-विदधतीति । कर्माणि तेऽधिकृता नियुक्ता: तत्र ते स्थिता: भवतश्चकितास्त्वत्तो भीता: सन्तस्तत्कर्म विदधति कुर्वन्ति । त्वदाज्ञापालनमेव नमित्यर्थ: । त्वमकरण इत्यत्र श्रुति: -

"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षु: स शृणोत्यकर्ण: ।

स वेत्त्यवेद्यं न च तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराण" मिति । सुगमम् ।

अखिलकारकशक्तिधर इत्यस्य श्रुति: -

"प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुस्ते निर्विचिक्युर्ब्रह्म पुराणमग्र्यम् ।" इति । सर्वशक्तित्वकथनपरेयम् ।

भवतश्चकिता इत्यस्य श्रुति: -

"भीषाऽस्माद्वात: पवते भीषोदेति सूर्य: । भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम: ॥" इति ॥

अस्मादीश्वराद्भीषा भीत्या पवते वातीत्यर्थः। धावति स्वकालवशं प्राप्तानेव प्राणिनो नयन्सर्वत्र धावति। यद्यपि पञ्चानां ग्रहणं तथापि तत्तदधीनानामेव ब्रह्मादीनामपि ग्रहणं ज्ञेयम्। सर्वेश्वरत्वकथनपरेयम्। स्वामिनाम् —

अनिन्द्रियोऽपि यो देवः सर्वकारकशक्तिधृक्। सर्वज्ञः सर्वकर्ता च सर्वसेव्यं नमामि तम् ॥

तं तमामि। सः कः। अनिन्द्रियोऽपि यः सर्वकारकशक्तिधृक्। सर्वेषां कारकाणामिन्द्रियाणां शक्तीर्धरतीति तथा तम् ॥२८॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवतः सर्वप्रशास्तृत्वमाह–त्वमकरण इति। विवक्षातः कारकाणि भवन्तीति न्यायादतिसौकर्यात्कर्तर्य्यपि ल्युट्। अथवा कृत्यल्युटो बहुलमिति बहुलग्रहणात्कर्तरि ल्युट्। हे विभो ! त्वर शीघ्रं सङ्कल्पमात्रेण करोतीति त्वरकरणः। 'तदैक्षत। बहु स्यां प्रजायेयेति। तत्तेजोऽसृजते'त्यादिश्रुतेः। तथा च वैष्णवे पुराणे पराशरेणोक्तम् —

'समर्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशोद्धृतभूतसर्गः। इच्छागृहीताभिमतोरुदेहः संसाधिता शेषजगद्धितोऽसौ ॥'

इति। त्वमकरण इति पाठे तु प्राकृतकरणरहितः। 'आदित्यवर्णं तमसः परस्तादि'ति श्रुतेः। 'सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः।' इति स्मृतेश्च। स्वराट् स्वतन्त्रः। 'सर्वस्य वशी सर्वस्येशानः।' इत्यादिश्रुतेः। अखिलकारकशक्तिधरः निमित्तोपादानादिसर्वकारकशक्तिधरः। अनन्तशक्तित्वात्। 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी' इत्यादिश्रुतेः। शमदात्र्या दुःखप्रशमदायिन्या अजाशब्दाभिहितया प्रकृत्या परतन्त्राः दुःखप्रशमदायित्वं तु प्रकृतिपरिणामभूतशरीरद्वारा भगवदाराधनोपयोगितया इति। तया परवशा अनिमिषा देवास्तव बलिमुद्वहन्ति त्वदाज्ञां परिपालयन्ति। अखिलक्षितिपतेश्चक्रवर्तिनः वर्षभुजः भारतादिवर्षभोक्तारः इव विश्वसृजः प्राजापत्यादयो देवाः। यत्र यस्मिन् पदे ये अधिकृताः स्थापितास्तत्र स्थितास्ते भवदाज्ञाभीता बलिमुद्वहन्तीत्यन्वयः। त्वदाज्ञापरिपालनमेव बल्युद्वहनं न त्वन्यत्। अवाप्तसमस्तकामत्वात्।

'भीषास्माद्वातः पवते भीषोदेति सूर्य्यः। भीषादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥' इत्यादिश्रुतेः।

उपबृंहिता चेयं श्रुतिस्तृतीये भगवता कपिलेन —

'मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात्। वर्षतीन्द्रो दहत्यग्निर्मृत्युर्धावति मद्भयात् ॥' इति ॥२८॥

कृष्णप्रिया

जगत् की सृष्टि आदि करनेमें स्वतः सिद्धज्ञान के सिवाय अन्य साधन रहित कर्म परवश्य रहित अखिल कारकन की शक्ति के धारक आप हो और माया से परवश होकर माया सहित वर्तमान पवन सूर्य अग्नि इन्द्रादि देवता तथा ब्रह्मादिक प्रजापति जिनका जिस कार्य करनेमें अधिकार है वे सब आपसे भयभीत होकर अपने अधिकार के अनुगुण वर्ताव करने से आपकी पूजा करते है। जैसे एक एक खण्ड के राजा लोग चक्रवर्ति महाराजसे भयभीत होकर अपने अपने अधिकार के अनुगुण वर्ताव करके चक्रवर्ति राजा की पूजा करते है ॥२८॥

स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि परस्य विमुक्त ततः।
न हि परमस्य कश्चिदपरो न परश्च भवेद्वियत इवापदश्च[1] तव शून्यतुलां दधतः ॥२९॥

कर्दमक्षमा

हे विमुक्त ! यदि, ततः, अजातः, परस्य, तव, अजया, मायया, विहरः, भवति, तदा, उदीक्षया, उत्थनिमित्तयुजः, स्थिरचरजातयः, स्युः ।, वियतः, इव, अपदस्य, शून्यतुलाम्, दधतः, परमस्य, तव, कश्चित्, अपि, अपरः, न, भवेत्, परः, च, न, भवेत् ॥२९॥

---

[1] पदस्य-श्रीधर. वंशी. वीर. विज. विश्व. शुक.।

त्रति । यद्यपि पञ्चानां

तीति तथा तम् ॥२८॥

कर्यात्कर्तर्य्यपि ल्युट्।
करणः । 'तदैक्षत । बहु

शेषजगद्धितोऽसौ ॥'
ादयो न सन्तीशे यत्र च
अखिलकारकशक्तिधरः
इत्यादिश्रुतेः । शमदात्र्या
भगवदाराधनोपयोगितया
तेश्चक्रवर्तिनः वर्षभुजः
स्थितास्ते भवदाज्ञाभीता

: ।

॥२८॥

परवश्य रहित अखिल
पवन सूर्य अग्नि इन्द्रादि
भयभीत होकर अपने
लोग चक्रवर्ति महाराजसे
करते है ॥२८॥

क ततः ।
तः ॥२९॥

भवति, तदा, उदीक्षया,
:, परमस्य, तव, कश्चित्,

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवं करणप्रवर्तकमीश्वरं करणपरतन्त्रा नरा भजन्तीत्युक्तम् न केवलमियदेव कारणं तत उत्पन्नत्वेनापि तत्परतन्त्रत्वादिति ति "यथाग्नेः क्षुद्रा विस्फुलिङ्गाव्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत मनो व्युच्चरन्ति" इत्याद्याः श्रुतय इत्याह–स्थिरचरजातय इति । हे विमुक्त नित्यमुक्त ! यदि तवाजया मायया विहरो विहारः भवति तदा स्थिरचरजातयः स्थिराश्च चराश्च जातयो जात्या लिङ्गिता देहा येषां ते जीवाः स्युर्भवेयुः कथम्भूतस्य ततोऽजातः दूरे वर्तमानस्यासङ्गस्येत्यर्थः । कथं विहारः उदीक्षया ईक्षणलेशेन ननु, मयि लीनानां जीवानां कथं जन्म स्यात्तत्राऽऽह–निमित्तयुज इति । ईक्षयैवोत्थान्युत्थितान्याविर्भूतानि निमित्तानि कर्माणि तद्युक्तानि लिङ्गशरीराणि वा तैर्युज्यन्त इति तथा ननु, निमित्तोत्थानेन मदिच्छयैव भवन्तु न त्वयि वैषम्याभावाद्विषमसृष्टेरयोगादित्याह–परमस्येति । तव परमस्योत्तमस्य परमकारुणिकस्य स्य इवाकाशसदृशस्य समस्येत्यर्थः । कश्चिदपरः स्वीयः परोऽस्वीयश्च न भवेत् न सम्भवतीत्यर्थः "असद्वा इदमग्र आसीत् वै सदजायत" इत्यादिश्रुत्या शून्यपूर्वकत्वमिव प्रतीयते तदर्थं पुनर्विशिनष्टि–शून्यतुलां दधतः शून्यसाम्यं भजतः तदेव र्थं तु पुनर्विशिनष्टि–अपदस्येति । न पद्यत इत्यपदस्तस्य वाङ्मनसयोरगोचरस्येत्यर्थः ॥

त्वदीक्षणवशक्षोभमायाबोधितकर्मभिः । जातान् संसरतः खिन्नान्नृहरे पाहि नः पितः ॥१६॥ ॥२९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — तदेवं तदित्थम् । इयदेव इयन्मात्रमेव । तद्भजने कारणं किन्तु तत ईश्वरात् । थाग्नेः" इत्याद्याः श्रुतयो वदन्तीति योज्यम् । तदर्थः पूर्वमात्मव्यतिरिक्तं वसत्वन्तरं नास्तीत्युक्तं तदुत्पन्नत्वात्सर्वस्य । तत्र तः–यथैकरूपादेकस्मादग्नेः सकाशात् क्षुद्रा अल्पप्रमाणा विस्फुलिङ्गा वह्निकणा विविधा उच्चरन्ति उत्तिष्ठन्ति एवमस्मादात्मनः नमयस्य प्राक्प्रबोधाद्यत्स्वरूपं तस्मात् एत आत्मनो जीवा व्युच्चरन्ति उपाधिसम्पर्कजनितविशेषप्रतिबुद्ध्यमाना आत्मान र्थः । तत्र प्राणा इन्द्रियाणि । लोकाः कर्मफलानि । देवा इन्द्रियाणां लोकानां चाधिष्ठातारोऽग्न्यादयः । भूतानि दिस्थावरान्तानि । एते आत्मान इति । केवलात्मसृष्टिपरेयम् । "यद्गत्वा न निवर्तन्ते" "न स पुनरावर्तते" इत्यादिस्मृतिश्रुत्योरर्थं याधायाक्षिपति–नन्विति । तत्राक्षेपे । केवलकर्मणा विना शरीराणामकिञ्चित्करत्वादाह–तद्युक्तानीति । कर्मयुक्तानीत्यर्थः । शरीरसम्बन्ध एव तेषां जन्म न तूत्पत्तिलक्षणम् "सर्गेऽपि नोपजायते" इत्याद्युक्तेः । पुनराक्षिपति–नन्विति । नेत्याह– ति । इत्यर्थ इति–असङ्गस्येति भावः । इत्यर्थ इति–अविषमत्वेन सर्वत्र समत्वादिति भावः । श्रुत्यवष्टम्भेनाशङ्कते– दिति । इदं सर्वमग्रे जगदुत्पत्तेः पूर्वमसदेवाविद्यमानमेवासीत् । ततः सृष्ट्यवसरे सदजायत सद्रूपत्वेनाविर्बभूव दिश्रुतेः । तदर्थं तन्निवृत्त्यर्थम् । तदेव शून्यसाम्यम् । इत्यर्थ इति–अविषयत्वाच्छून्यमिव प्रतीयत इति भावः । नां त्वदीक्षणवशेन क्षोभो यस्यां मायायां तया बोधितैः कर्मभिर्जातान् ॥★॥

श्रीधरानुयायिनी — स्वजनकत्वादपि त्वद्भजनमावश्यकमित्याहुः–स्थिरेति । हे नित्यमुक्त ! त्वमसङ्गो मायासङ्गरहितोऽपि वीक्षणमात्रेण मायया क्रीडसि "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः ।" इति पाद्मात् । तदा तव वीक्षणेन त्यनुकूलक्षणेनैवोत्थितैराविर्भूतैः प्रारब्धकर्मभिस्तद्युक्तलिङ्गशरीरैर्वा निमित्तभूतैर्युक्ताः स्थावरजङ्गमस्थूलशरीरोपाधयो जीवा शवदुपाधिसृष्टिसमकालमेव भवेयुः । ननु मदिच्छयैवाविर्भवन्तु किन्निमित्तोत्थापनेनेत्याशङ्कायामाहुः–नहीति । लोर्वाङ्मनसयोरगोचरत्वेन शून्यवत्प्रतीयमानस्य महादुरात्मनामपि मूढानां नास्तिकानां शून्यतुलामविद्यमानसादृश्यं प्याकाशवत्समस्य तव कोऽप्येकोऽपि स्वीयः परकीयो वा न सम्भवति । एवं च त्वयि "समोऽहं सर्वभूतेषु न मे स्ति न प्रियः ।" इत्यादिगीतोक्तेर्वैषम्याभावात्तवेच्छया कथमियं विषमा सृष्टिरुपपद्यते इति भावः । यद्वा–तव श्रीकृष्णस्य लां खपुष्पतुल्यामसतीमेव तुलामहमेवेश्वर इतीश्वरतुल्यतां दधतोऽङ्गीकुर्वतोऽत एवापदस्य त्वमपदस्य त्वामनादृत्य लब्धशरणस्य वेनादेरिवाभाग्यस्य साहङ्कारस्य पापिनः पुरुषस्य फलमेकैकस्थावरजङ्गमयोनावनेकजन्मानि स्युः । ननु ोऽहं पश्यत गतिं ललितामिति तन्मनाः ।" "मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं हि वः ।"

इत्यादिश्रीकृष्णसादृश्यं भजतीनां गोपीनामपि किमियमेव गतिरित्याशङ्क्य न हि न हीत्याहुः-अजयेति। अजया व्रतैराराधितया श्रीकात्यायन्या कर्त्र्या उत्थितमुद्बोधितं यन्निमित्तं श्रीकृष्णविहारप्राप्तिकारणमदृष्टं तद्वत्यो गोप्यस्तु विहरे श्रीरासविहारे इपरस्य इः कामसुखं तत्परस्य तव उदीक्षया प्रेमामृतदृष्ट्या स्थावरजङ्गमजन्मभागिन्यो हि निश्चयेन न स्युः किन्तु परं सर्वोत्कृष्टश्रीकृष्णप्राप्तिरूपमेव तासां फलं भवेदित्यर्थः । नन्वेवं मयि वैषम्यमागतमित्याशङ्क्याहुः-वियत इवेति। आकाशवत्समस्येत्यर्थः । साम्यमेवाहुः-अस्य तु कश्चिदनपरः स्वजनोऽपि परो भवति, यथा कंसो रुक्मी वा। कश्चित् परोऽपि अनपरः स्वीयो भवति, यथा रावणानुजो विभीषणः। एवं च सर्वशुभाशुभफलप्रदस्य जडस्य प्रारब्धस्योद्बोधनमात्रमेव त्वया क्रियत इत्याशयः। अत एव ततो वैषम्याद्विमुक्तेति सम्बुद्धिः ॥★॥ विश्वनाथी — तदेवं करणप्रवर्तकः परमोत्कृष्टगुणः श्रीभगवाँस्तदधीनकरणपरतन्त्रैः स्वल्पगुणैर्जीवैर्भजनीय इति पूर्वाचारेण पूर्वाभिर्दृढीकृतम्। तत्र परा शक्तिश्च दर्शिता। तथैवान्याः श्रुतयोऽभिप्रयन्ति। यतो न केवलमियदेव कारणं तत उत्पन्नत्वमपीत्याहुः-स्थिरेति। हे विमुक्त ! प्रकृत्यादिसङ्गातीत ! यदि तव विहरः प्रपञ्चगतभक्तवृन्दसुखार्थं प्रपञ्चे तत्तदवतारैर्विहारो दृष्टः स्यात्ततस्तदनन्तरम् उदीक्षया प्रकृतिलीलासिद्धभक्तोद्देशत्वेनोत्कृष्टया त्वदुदीक्षया उत्थानि प्रकृतिक्षोभेणोत्थितानि यानि निमित्तानि कर्मादीनि तैर्युक्ताः स्थिरचरजातय उद्बुद्धतत्तज्जातिसंस्कारसूक्ष्मदेहाः सर्व एव जीवा उद्भवन्ति स्वाविर्भावमाप्नुवन्ति। कीदृश्येक्षया। अजया प्रकृतिक्षोभाप्राचीनत्वात्स्वभावसिद्धयैवेत्यर्थः। तथैव व्याख्यातं भाष्यकृद्भिः "ईक्षतेर्नाशब्दम्।" इत्यत्र। कथम्भूतस्य तव। परस्य सर्वविलक्षणस्वरूपतच्छक्तिकस्य। ननु यैः सह विहरेच्छा तेषामेवोद्बोधो यथा स्यात्तथैव कुतो नेक्षते तत्राहुः-न हीति। परमस्येति-परमत्वात्प्राकृतधर्मेष्वादररहितस्येत्यर्थः। अत एव न कश्चिदपरः परमश्च भवेत्, अन्यत्र रागद्वेषाभावेन तदसङ्कोचनादित्यर्थः।

"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः। ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्॥" इति श्रीगीतोक्तेः।

"मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः।" इति पाद्मोक्तेश्च। तर्हि कथं तेऽपि न भजन्ति येन तव विहारहेतवः स्युस्तत्राह-शून्यतुलां दधतः। वियत इवापदस्येति सर्वगोचरस्येत्यर्थः। अयम्भावः — यद्यपि वियत् खलु वस्त्वेव तथापि न केनचिद्ग्रहीतुं शक्येत तद्ग्रहणशक्त्यभावात्। एवं सर्वागोचरस्वभावगुणो भवानपि भक्त्यभावादिति। तस्माद्भक्तेभ्यो भक्तिर्ग्राह्येति च श्रुतयश्च "स ऐक्षत।" इति। "यथाग्नेः क्षुद्राः" इत्यादि। "अक्षरात्परतः परः।" इति। "असद्वा इदमग्र आसीत्।" "न सन्दृशे तिष्ठति रूपमस्य" इत्यादि। "सद्रूपमद्वयं ब्रह्म मध्याद्यन्तविवर्जितम्। सुप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम्॥" इत्याद्याः। (१६) ॥२१॥

नीलकण्ठी —

पूर्वश्लोके जीवकर्तृका जीवसृष्टिरुक्ता। तत्रैव प्रथमे पादे ईशकर्तृकापि सृष्टिः शक्तिधर इति सूत्रिता, तां प्रपञ्चयति-स्थिरचरजातय इति। हे ततो विमुक्त ! अजातो नित्यमुक्त ! यदि तव विहरः विहारः भोगः क्रीडा वा इष्टा भवति "भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे।" इति श्रवणात् तर्हि तव उदीक्षया ईक्षणेन स्थिरचरजातयः स्थावरजङ्गमशरीराणि तदुपाधयो जीवाश्च घटाकाशवदुपाधिसृष्टिसमकालमेव स्युः प्रादुः स्युः "स ऐक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजत।"

"यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि च भूतानि सर्व एत आत्मनो व्युच्चरन्ति॥" इति श्रुतिभ्याम्। नन्वेवं सृष्टेराकस्मिकत्वे ईश्वरस्योच्चनीचस्त्रष्टुर्नैर्घृण्यवैषम्ये जीवानां च कृतनाशादिप्रसक्तिरत आह-अजयोत्थनिमित्तयुजः। माययोत्थितं यन्निमित्तं कालादृष्टादि तेन युज्यन्ते इति तथा। ईशा पर्जन्यवत् साधारणं कारणं जीवजातीनामदृष्टन्तु बीजवदसाधारणं फलभेदहेतुरतो नोक्तदोषप्रसक्तिः। ननु कुलालवद्विहरत उदीक्षितुरप्यदृष्टादि युक्तं स्यादित्याशङ्क्याह-परस्येति। अदृष्टादिभ्यो हि वर्जितस्य "हिरुग्वर्जने" इत्यव्ययपाठात् रुग्भूतस्येत्यर्थः। अत एव सम्बोधनम्-ततो विमुक्तेति। अयम्भावः — "देवस्य हि स्वभावोऽयमात्मकामस्य का स्पृहा।" इति श्रुते रज्ज्वा भुजङ्गस्त्रष्टृत्वमिव तव

। अजया व्रतैराधितया
ीरासविहारे इपरस्य इ:
किन्तु परं सर्वोत्कृष्टं
हु:-वियत इवेति ।
नो रुक्मी वा । कश्चित्
प्रारब्धस्योद्बोधनमात्रमेव
प्रवर्तक: परमोत्कृष्टगुण:
क्तिश्च दर्शिता । तथैवान्या:
यादिसङ्गातीत ! यदि तव
सिद्धभक्तोद्देशत्वेनोत्कृष्टया
ज्जातिसंस्कारसूक्ष्मदेहा:
वसिद्धयैवेत्यर्थ: । तथैव
च्छक्तिकस्य । ननु यै: सह
वादररहितस्येत्यर्थ: । अत

म् ।।" इति श्रीगीतोक्ते: ।
जन्ति येन तव विहारहेतव:
त् खलु वस्त्वेव तथापि न
तस्माद्भक्तेभ्यो भक्तिर्ग्राह्येति
ह्वा इदमग्र आसीत् ।" "न
क्त्या जानाति चाव्ययम् ।।"

इति सूत्रिता, तां प्रपञ्चयति-
डा वा इष्टा भवति "भोगार्थं
वरजङ्गमशरीराणि तदुपाधयो
लोकानसृजत ।"
: सर्वाणि च भूतानि सर्व एते
वानां च कृतनाशादिप्रसक्तिरत
पर्जन्यवत् साधारणं कारणं
रत उदीक्षितुरप्यदृष्टादि युक्तं
त्यर्थ: । अत एव सम्बोधनम्-
रज्ज्वा भुजङ्गस्रष्टृत्वमिव तव

तत्स्रष्टृत्वं न स्वादृष्टनिमित्तं किन्त्वज्ञानाश्रयजीवादृष्टनिमित्तेन विवर्तमानत्वरूपम् । एवमीश्वरसृष्टिमुक्त्वा पूर्वश्लोके त्वमकरण: तव बलिमित्येकपदोपादानेन सूचितं जीवेशयोरभेदमुपाधिप्रहाणसिद्धमाह-न हीति । परमस्य मायातत्कार्यबहिर्भूतस्य तव कश्चिन्नापर: पूर्वभाविकारणं भवेदस्ति नापि पर: पश्चाद्भाविकार्यमस्ति । अत्र परमतसिद्धो दृष्टान्त:-वियत इवेति । यथा निरवयवत्वाद्वियत: कारणं कार्यं वा नास्ति तथा तवापीति । अत एवापदस्य पद्यते गम्यतेऽनेनेति पदं गमकं नास्त्येत्यपदस्तस्य "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।" इति श्रुतेर्वाङ्मनसातीतस्येत्यर्थ: । अत एव शून्यतुलां शून्यत्वान्निर्गुणत्वमनुपाख्यत्वं च दधतो न तु शून्यतां तत्साक्षित्वात् । अयम्भाव: —

"न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा । अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ।।"

न रूपमस्य नान्तोऽस्य छित्त्वैनमिति चेशगी: । युक्ता भवतरोरिन्द्रजालत्वे सति नान्यथा ।।

सम्यग्दृशा वीक्ष्यमाणं रूपं नास्योपलभ्यते । उपादानस्य नित्यत्वादयमाद्यन्तवर्जित: ।।

दु:स्वप्न इव संसार: सङ्गमात्रेण दु:खद: । तमसङ्गासिना छित्त्वा प्रयाति परमं पदम् ।।"

इति वेदान्तकतकोक्तदिशा ईश्वरोऽस्त्येव सर्वदा इन्द्रजालतुल्य: प्रपञ्च इति तस्य तत्स्रष्टृत्वं युक्तम् । तथा सत्येव विषये द्वौ [illegible] घटौ मृन्मयधीमयावित्युक्तेरसति विषये धीमय एव घटोऽस्ति नान्य: अत एव स्वप्ने "न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथ: सृजते ।।"

इति श्रुतिर्भौतिकान्रथादीन्निषिध्य सृष्टिमाह-प्रपञ्चोऽपि धीमय एव तेन तत्स्रष्टा बुद्ध्युपाधिर्जीव इत्यपि युक्तम् । तथा च-"गता: कला: पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रति देवतासु" इति । "एवमेवास्य परिद्रष्टुरिमा: षोडशकला: पुरुषायणा: पुरुषं प्राप्यास्तं यान्ति ।" इति च श्रुतिद्वयोक्तो विदुषो विदेहकैवल्यकाले प्राणमन:प्रभृतीनां कलानां प्रलय: परदृष्ट्या स्वकारणेषु विद्वद्दृष्ट्या स्वरूपे चेत्युपपद्यते । यथा धीमयमपीन्द्रजालं नास्त्येवाबुद्धानामस्त्येव तद्वत् । अत्र सार्द्धशलोकेन जीवेशयो: सोपाधिके [illegible] भूतमयधीमयजगत्कर्तृत्वेनानूद्यार्धेन घटमठाकाशवत्तयोरनुपाध्योरभेद उक्त इति ध्येयम् (१६) ।।२९।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्थिरेत्यस्य टीकायां श्रुतौ प्राणा इन्द्रियाणि लोका: कर्मफलानि देवा इन्द्रियाणां लोकानां चाधिष्ठातारा: भूतानि ब्रह्मादिस्थावरान्तानि आत्मन उपाधिसम्पर्कजनितविशेषप्रतिबुद्ध्या नानात्मान इति ।। स्वव्याख्यायां तु — तदेवं करणप्रवर्तक: परमोत्कृष्टगुण: श्रीभगवाँस्तदधीनकरणपरतन्त्रै: स्वल्पगुणैर्जीवैर्भजनीय इति पूर्वाचारेण पूर्वाभिर्दृढीकृतम् । तत्र परा शक्तिश्च दर्शिता । तथैवान्या: श्रुतयोऽभिप्रयन्ति । यतो न केवलमियदेव कारणं तत उत्पन्नत्वमपीत्याहु:-स्थिरेति । हे विमुक्त ! प्रकृत्यादिसङ्गातीत ! यदि तव विहर: प्रपञ्चगतभक्तवृन्दसुखार्थं प्रपञ्चे तत्तदवतारैर्विहारो दृष्ट: स्यात्ततस्तदनन्तरम् [illegible] प्रकृतिलीलासिद्धभक्तोद्देशत्वेनोत्कृष्टया त्वदुदीक्षया उत्थानि प्रकृतिक्षोभेणोत्थितानि यानि निमित्तानि कर्मादीनि तद्युज: स्थिरचरजातय उद्बुद्धतत्तज्जातिसंस्कारसूक्ष्मदेहा: सर्व एव जीवा उद्भवन्ति स्वाविर्भावमाप्नुवन्ति । कीदृश्येक्षया । [illegible] प्रकृतिक्षोभाप्राचीनत्वात्स्वभावसिद्धयैवेत्यर्थ: । तथैव व्याख्यातं भाष्यकृद्भि: "ईक्षतेर्नाशब्दम् ।" इत्यत्र । बहिर्भूतस्य तव । परस्य सर्वविलक्षणस्वरूपतच्छक्तिकस्य । ननु यै: सह विहरेच्छा तेषामेवोद्बोधो यथा स्यात्तथैव कुतो न तत्राहु:-न हीति । परमस्येति-परमत्वात्प्राकृतधर्मेष्वादररहितस्येत्यर्थ: । अत एव न कश्चिदपर: परमश्च भवेत्, अन्यत्र [illegible] भावेन तदसङ्कोचनादित्यर्थ: ।

"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रिय: । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।।" इति श्रीगीतोक्ते: ।

"मद्भक्तानां विनोदार्थं करोमि विविधा: क्रिया: ।" इति पाद्मोक्तेश्च । तर्हि कथं तेऽपि न भजन्ति येन तव विहारहेतव:

स्युस्तत्राह-शून्यतुलां दधतः । वियत इवापदस्येति सर्वगोचरस्येत्यर्थः । अयम्भावः — यद्यपि वियत् खलु वस्त्वेव तथापि केनचिद्ग्रहीतुं शक्येत तद्ग्रहणशक्त्यभावात् । एवं सर्वागोचरस्वभावगुणो भवानपि भक्त्यभावादिति । तस्माद्भक्तेभ्यो भक्तिग्राह्येति च श्रुतयश्च "स ऐक्षत ।" इति । "यथाग्नेः क्षुद्राः" इत्यादि । "अक्षरात्परतः परः ।" इति । "असद्वा इदमग्र आसीत् ।" "न सन्दृशे तिष्ठति रूपमस्य" इत्यादि । "सद्रूपमद्वयं ब्रह्म मध्याद्यन्तविवर्जितम् । सुप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम् ॥" इत्याद्याः । ॥१६॥२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हे विमुक्तेति नित्यमायाकार्य्यसङ्गरहित्यम्, तत्र च वि-शब्देन मुक्तजीवेभ्योऽपि वैलक्षण्यं सूचितम्, सत्यनित्यसर्वैश्वर्यवत्त्वात् । विमुक्तत्वमेवाभिव्यञ्जयति-परस्येति । हि निश्चितम्, स्थिरचरजातयः-स्थिराः स्थावराः, चरा जङ्गमाः, जातयो भाविन्यो येषां ते, परमेश्वराज्जीववृन्दानां प्रादुर्भावो महदादीनां च सर्गः स्या, विरिञ्चेस्तु स्थिरचराणां विसर्ग इति । तत एव तैर्व्याख्यातम्; — जीवा भवेयुरिति । ननु विहारोऽपि किमर्थम् ? तत्राहुः-विमुक्तेति । हे परमस्वतन्त्रेति, तत्रैव हेतुः-परस्य परमेश्वरस्येति, अतस्तवाभिप्रायः केन ज्ञातुं शक्यतामित्यर्थः । अन्यत्तैर्व्याख्यातम् । यद्वा, यदि स्थिरचरजातयो विविधा जीवास्तवोदीक्षया इच्छया भवेयुः ततोऽजया तव विहारः स्यात्, विचित्रविहारार्थमेव तव विसर्ग इत्यर्थः । ननु तर्हि किमहं मायाकार्य्येष्वासक्तः स्यामित्यत आहुः-परस्येति, मायासङ्गरहितस्य । यतो विमुक्त ! हे नित्यमुक्त ! ननु यदि नित्यमुक्त एवाहम्, तर्हि कथं देवासुरादिषु मैत्रीवैरादिकं मम दृश्यते ? इत्यत आहुः-न हीति । कुत्रापि तवानुग्रह-निग्रहादिकं न स्यात्, तवाज्ञेयत्वाज्जनैः केवलं जयपराजयादिदृष्ट्या तथा कल्प्यत इत्यर्थः । यद्वा, ननु स्थिरा दुःखिन एव, चरेषु च तिर्य्यगादयो दुःखिनः, ततः कथं तथाभूता जीवा मया सृज्येरन्नित्यत आहुः-उत्थनिमित्तेति । स्थिरत्व-चरत्वयोर्निमित्तानि कर्म्माणि तेषु सन्त्येव, तानि तवेक्षया केवलमुत्तिष्ठन्ति । ननु तेषां तान्यनादीनि दुष्कर्म्माण्यपनीय कथं ते सुखिन एव क्रियेरन् ? इत्यत आहुः-न हीति । परमस्याविषमस्य कश्चिदुपकार्य्यः कश्चिदपकार्य्यश्च न स्यात् । कथम्भूतस्य ? अपदस्य तैस्तैर्जीवैरकृतप्रतिपत्तेः, अतस्तेषु वियत इव शून्यतुलां दधतः, कदाचिदपि तच्छ्रुतिपथमप्यनारोहत इत्यर्थः । अयमर्थः — भक्तेतरेषु सामान्यजीवेषु कर्म्मानुसारेण फलं प्रयच्छतस्तव साम्यमेव, भक्तेषु तु प्रारब्धमपि क्षपयतो वैषम्यमपि साम्यशिरसि विराजमानत्वाच्छोभैव ॥२१॥

[नातीवान्तरङ्गाणामधिकारिभक्तानां सेवामुक्त्वा परमान्तरङ्गाणां वृन्दावनवासिनां सेवामाहुः-स्थिरेति । विमुक्त ! हे विमुक्तचित्त ! हे महावदान्यशेखरेत्यर्थः । परस्य पुरुषोत्तमस्य तव अजया योगनिद्रयाऽपि हेतुभूतया यदि विहारः, किं पुनर्लीलाशक्त्या ततो वृन्दावनस्य स्थिरचरजातयः स्थिराश्च चराश्च जातयश्च सजातयः, तास्तव उदीक्षया साभिलाषावलोकनेन उत्थनिमित्तयुजः स्युः, उत्था प्रकटा निमित्ता विहारकारणानां युग् योगो यासु तथाभूता भवेयुः । तत्र स्थिरेषु लताद्रुमादिषु विहारनिमित्तानि पुष्पकोरकपल्लवादीनि, चरेषु मयूर-भृङ्गकोकिलादिषु शिखण्डमधुरकूजितादीनि स्वजाति-श्रीदामप्रभृतिषु व्रजसुन्दरीषु च तत्तदुचितवेषभूषणवैदग्धीनर्म्मविलासादीनिति ज्ञेयम् । इति बहिर्विहार इवान्तर्विहारेऽपि सर्व्वेषां भजनमुक्तम् । तत्र यदि विहार इत्यनेनान्तर्लीलायां सर्व्वैर्विहारः कादाचित्कः एवेति ध्वनितः, प्रेयसीभिर्विहारस्तु सार्व्वदिकः, स तु ते (१४श. श्लो.) 'क्वचिदजया' इत्यनेन पूर्व्वं समर्थितः । यद्वा, अजया लीलाशक्त्या, शेषं समानम् । प्रियजनेषु श्रीभगवतो भावमुक्त्वा सामान्यजनेषु विद्वेषिषु च क्रमेण साम्यमस्फूर्तिं चाहुः-न हीति । परमस्य तव सामान्येषु पुण्यपापकारिषु मध्ये कश्चिदपरो मित्रं हि निश्चितं न भवेत्, परः शत्रुश्च न भवेत्, पक्षपातं विना कर्म्मानुसारेण स्वर्गनरकादिरूपं फलं ददासीत्यर्थः । कथम्भूतस्य ? तव विद्वेषिषु भक्तजनवैरिप्रभृतिषु शून्यतुलां दधतो मनागप्यस्फुरत इत्यर्थः । अत एवापदस्य तेषां चक्षुराद्यविषयस्य वियत इव, यथा बाढमदृश्येऽपि वियति भ्रान्त्या नीलमाकाशमिति बुद्धिः स्यात्, तथा त्वाभासमात्रे विद्विषां त्वद्बुद्धिरिति भावः । यद्वा, व्रजवासिजनेषु श्रीभगवतो भावमभिव्यज्य तस्यैवोत्कर्षाय परमैश्वर्यमाहु-न हीति । परमस्यासमोर्ध्वस्वातन्त्र्यादिवैभवस्यापदस्य मनआद्यगोचरस्य, अत एव वियत इव शून्यसादृश्यं दधतः, स्वेच्छां विना परमशुद्धहृदयानामपि ब्रह्मरुद्रादीनां महासमाधावपि क्षणमपि मनागप्यस्फुरत इत्यर्थः । तथा च बृहद्वामने श्रीरुद्रवचनम् —

"कृतः समाधि

इति ॥ अत ए
इत्यहो चित्रमिति भावः

सर्वचेतनैरवर्ज
स्थावरजङ्गमसंस्थानाः स
विरहो यदि कदाचित्
विमुक्तप्रकृतेर्हेयात् विशे
अतः सर्वरक्षकस्त्वमित्यर्थः
परमः अतः एव स्वयं क
कालाकाल्यत्वाज्जन्माद्यव

इत्थं कल्याणग
कथमवर्जनीयप्रकृतिसम्बन्ध
अजयोत्थनिमित्तयुजः प्रकृति
विरहो यदि कदाचित् प्रकृति
भावः । नन्ववर्जनीयप्रकृति
हेयाद्विशेषेण मुक्त ! हेयप्रति
यस्मात्तस्य परमकारुणिकस्य
सर्वरक्षकस्त्वमतो न वैषम्
वैषम्यनैर्घृण्यरूपहेयाभाव
इवाकाशस्येवापदस्यास्थान
तद्वद्धेयानाश्रयस्येत्यर्थः । अ
तुलस्येत्यर्थः । विहर उदी
जगव्द्यापारानुपपत्तिश्च । सक
विहारः चिकीडिषोदेति इत्यर्थ
प्रकृतेः सकाशादुत्थान्युदितानि
सर्वे प्राणिनः स्युः । उदीक्ष
जगत्सर्गरूपव्यापारस्य जीवव्य
यथोक्त एवार्थः । जीवानां तु अ
कस्तर्हि ममोदीक्षिता इत्यत आह
भावः । अत एवापरः कार्यभूतः
सर्वस्य त्वदात्मकत्वादिति भावः

"कृतः समाधिस्तं द्रष्टुं सहस्त्रं परिवत्सरान् । अहो बत मम स्वान्ताद्दूराद्दूरतरो हरिः ॥"

इति ॥ अत एव निरतिशयैश्वर्यपरिपूर्णत्वात्तव न कुत्रापि परापरबुद्धिः । एवम्भूतस्यापि तव व्रजवासिषु तादृक्प्रेमोद्रेक चित्रमिति भावः ॥२९॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

सर्वचेतनैरवर्जनीयसम्बन्धविशेषानुभवेन हेयप्रत्यनीकतया च तत्र कटाक्षादेव मोक्ष इत्याह-स्थिरचरेति । वरजङ्गमसंस्थानाः सर्वे प्राणिनः । अजयोत्थनिमित्तयुजः । प्रकृतिकार्यदुःखनिमित्तयुजः प्रकृतिकार्यदुःखनिमित्तशरीरयुक्ताः । यदि कदाचित् प्रकृतिमोक्षः सम्भवति चेत् परमस्य तव उदीक्षया त्वत्कटाक्षान्मोक्षः सिद्ध्यतीत्यर्थः । ततो प्रकृतेर्हेयात् विशेषेण मुक्तः । मोक्षदाने हेतुमाह-न हि कश्चित् तवापरोऽस्तीति सर्वात्मनां स्वशरीरभूतत्वात् अन्यो नास्ति सर्वरक्षकस्त्वमित्यर्थः । कीदृशस्य तवेत्याह-परस्येति । परत्वम् उत्पत्तिकालात् पूर्वत्वम् । अपरत्वं पश्चाद्भावित्वम् । परमस्येति अतः एव स्वयं कस्यचिदपरः पश्चाद्भावी न भवतीत्यर्थः । वियत इवापदस्येति व्योमेव स्पर्शरहितस्य । अत्र यस्य एवं काल्यत्वाज्जन्माद्यवस्थात्रयरहितस्य सर्वव्यापिनोऽपि व्याप्यगतदोषस्पर्शाभावेनाविद्यमानतुलस्येत्यर्थः ॥२९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थं कल्याणगुणपौष्कल्यमुक्तं तर्हि किं हेया अपि गुणाः सन्तीत्यपेक्षायां ते न सन्तीति वदन्त्यः वर्जनीयप्रकृतिसम्बन्धनिवृत्तिरित्यपेक्षायां हेयप्रत्यनीकभवत्कटाक्षादेवेत्याहुः-स्थिरेति ॥ स्थावरजङ्गमसंस्थानाः सर्वे प्राणिनः निमित्तयुजः प्रकृतिकार्यदुःखनिमित्तशरीरयुक्ताः स्युः सर्वेषामजासम्बन्धोऽवर्जनीय इति भावः । ततस्तत्र केषाञ्चिदेवम्भूतानां यदि कदाचित् प्रकृतिमोक्षः सम्भवति चेत् परस्य तव उदीक्षया कटाक्षादेव मोक्षः स्यादित्यर्थः । उपायनिष्पत्तिस्त्वत्कटाक्षमूलैवेति । नन्ववर्जनीयप्रकृतिसम्बन्धेषु काश्चित्ततस्त्याजयन् अहं किं वैषम्यनैर्घृण्यादिहेयगुण इत्यतः सम्बोधयन्ति-विमुक्तेति । षेण मुक्त ! हेयप्रतिभट इत्यर्थः । एतदेव विशदीकुर्वन्ति-न हीति । परमस्य पर उत्कृष्टः कारुणिको मा न विद्यते तस्य परमकारुणिकस्य तव कश्चिदपरः करुणाविषयः परस्तदविषयश्च नास्ति । सर्वात्मनां शरीरभूतत्वादनादरणीयो नास्त्यतः कस्त्वमतो न वैषम्यादिहेयसम्भावनापि तथापि व्याजमात्रावलम्बित्वान्न सर्वान् मोचयसीति भावः । न केवलं र्घृण्यरूपहेयाभाव एवापि तु सर्वे हेयगुणा न सन्तीत्यभिप्रायेण सदृष्टान्तं विशिंषन्ति-वियत इत्यादिना । वियत शस्येवापदस्यास्थानस्य हेयानाश्रयस्य यथा सर्वत्र व्याप्य स्थितस्याप्याकाशस्येव व्याप्यगतदोषानाश्रयत्वं यानाश्रयस्येत्यर्थः । अत एव शून्यतुलां शून्योपमां दधतः सर्वव्यापिनोऽपि व्याप्यगतदोषस्पर्शाभावेनाविद्यमान-त्यर्थः । विहर उदीक्षयेति पाठान्तरं तदायमार्थः । ननु यद्यहमकरणस्तर्हि जगत्स्रष्टृत्वानुपपत्तिः । स्वराजो पारानुपपत्तिश्च । सकरणानां कर्मवश्यानां चैव कर्तृत्वव्यापारत्वादिदर्शनादित्यत आहुः-स्थिरेति । यदि यदा विहरः विक्रीडिषोदेति इत्यर्थः तदा परस्य प्रकृतिपुरुषाभ्यां विलक्षणस्य तवोदीक्षया 'बहु स्याम्' इत्युक्तसङ्कल्पमात्रेणैवाजाया सकाशादुत्थान्युदितानि निमित्तानि देहनिमित्तानि बुद्धीन्द्रियादीनि तैर्युज्यन्त इति तथा स्थिरचरजातयः स्थावरजङ्गमसंस्थानाः णिनः स्युः । उदीक्षयेत्यनेन करणायत्तकर्तृत्वव्युदासः । विहर इत्यनेन कर्मायत्तव्यापारवत्त्वव्युदासः । अत एव व्यापारस्य जीवव्यापारवत्सुखदुःखनिमित्तार्थत्वव्युदासश्च फलितः । तत्र हेतुत्वेन सम्बोधयन्ति-विमुक्तेति । अस्य र्थः । जीवानां तु असर्वज्ञत्वासर्वशक्तित्वासत्यसकल्पत्वादिहेयास्पदत्वान्न सङ्कल्पमात्रेण घटादिकर्तृत्वमिति भावः । मोदीक्षिता इत्यत आहुः-ततः यत एवं ततः परमस्य सर्वोत्कृष्टस्य परः पूर्वभावी उदीक्षिता नास्ति । परमकारणत्वादिति अत एवापरः कार्यभूतः कश्चिदपि नास्ति । सर्वस्य त्वत्कार्यत्वादिति भावः । यद्वापरोऽन्योऽशरीरभूतः कश्चिदपि नास्ति त्मकत्वादिति भावः । तर्हि व्याप्यगतदोषप्रसक्तिरित्यतः सदृष्टान्तं विशिंषन्ति । वियत इवेत्याद्यथोक्त एवार्थः ॥२९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

"न हि परमस्य कश्चिदपरो न परस्य भवेद्व्ययत इवात्र यस्य च शून्यतुलसन्दधतः ।

अपरिमिताध्रुवास्तनुभृतो यदि सर्वततो न हि न शास्यतेति नियमो ब्रुवते च तथा" ॥१७॥३१॥

न हि परमस्येति श्लोकस्यायं भावः ।

अनात्प्राणात् परस्य उत्तमस्य सर्वं सन्दधता यस्य परमस्य ते तव कश्चिदपरः स्वतन्त्रो न भवेत् । हे शून्यतुल ! समानवर्जित ! यस्य अत्र जीवसमुदाये व्ययतः सर्वं जानतः सर्वज्ञस्येत्यर्थः । "अय गतौ" इति धातोः गत्यर्थानां ज्ञानार्थत्वात् इव यथा प्राणस्य नापरः स्वतन्त्रो नास्ति त्वमेव स्वतन्त्रः । हे सर्वपूर्ण ! यदि ततः तस्मात् स्वतन्त्रः । यद्वा । प्राणश्रीरन्यो वा त्वां विना प्राणात्तनुभृतो जीवाः ध्रुवा प्राणाधीनाः जीवाः कियन्तः सन्तीत्यर्थः । तर्हि सत्यं ते अपरिमिताः असङ्ख्याताः । नन्वेवं चेत् "एकमेवाद्वितीयम्" इत्यादिश्रुतिवाक्यविरोध इति तत्राह–न हीति । श्रुतेरयं नियमोऽर्थो जीवानां शास्यता अधीनता नेत्यत्रार्थे न हि किन्तु स्वतभेदस्य ईश्वरान्तरस्यातत्तन्त्रस्य च निषेधो नियमः तत्र किं प्रमाणमत्राह–ब्रुवत इति । अतोऽन्यदार्तं "नेह नानास्ति किञ्चन । न तत्समश्चाभ्यधिकश्च दृश्यते ।" इत्यादिश्रुतिस्मृतयस्तथा ब्रुवते च तव स्वतन्त्रो नापरो यद्वदत्र —

"प्राणान्नान्यस्तुल्यशून्यस्य सन्धिन् । प्राणाधीना अमिता जीवसङ्घाः प्राणोऽवशेते प्रकृतिश्च भूमन् ॥"

इति श्रुतिरनेन गृहीता । "स्वतन्त्रो नापरः कश्चिद्विष्णोः प्राणपतेः प्रभोः ।"

इत्यादिस्मृतेः श्रुतिरपि सत्यार्थेत्यर्थः ॥१७॥३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अतः साधूक्तं पूर्वाभिस्तव परि ये चरन्तीति भावः । श्रुतयश्चात्र न तस्य कार्य्यमित्याद्यनुगता एव 'अपाणिपाद' इत्याद्याः तदेवं करणपूर्वकः परमोत्कृष्टगुणः श्रीभगवांस्तदधीनकरणः परतन्त्रः स्वगुणैर्जीवैर्भजनीय इति सदाचारेण पूर्वाभिर्दृढीकृतम् । तत्र परा शक्तिश्च दर्शिता । तत्रैवान्याः श्रुतयोऽभिप्रयन्ति । यतो न केवलमियदेव कारणं तत् उत्पद्यत्वमपीत्याहुः–स्थिरचरेति ॥२९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

सर्व एव त्वदधिकृताः । सर्व एव तुभ्यं बलिमुद्वहन्ति । सर्व एव भवतो भयं विदधति । एषुस्वपरभावस्तव नास्त्येवेत्याहुः-स्थिरचरजातय इत्यादि । स्थिरचरजातयश्चरजातयश्च आब्रह्मस्तम्बपर्य्यन्ताः प्राणिनः अजया अजयैव सम्पादिता अजैव तेषां कारणमित्यर्थः । ननु अजा तावज्जडा कथमस्यास्तदुत्पादनेन कर्तृत्वमित्याहुः–हे ततो विमुक्त ! अजातो विमुक्त ! विहरे विहारे तां प्रति या ते उदीक्षा दृक्पातः तया ते इत्यर्थापत्त्या ज्ञेयम् । कथम्भूतस्य तव । उत्थनिमित्तयुजः । उत्तिष्ठतीति उत्थम् । यत्रिमि सर्वकारणता तज्जुषः । अत एव परस्परातपरस्य । यदि एवं तदा परमस्य सर्वोत्कृष्टस्य तव न हि कश्चिदपरः आत्मीयः न कश्चित् प अनात्मीयः भवेत् । परम्परया सर्वेषां त्वदुद्भवत्वात् कस्येव शून्यतुलां शून्योपमां दधतः अपदस्य निरालम्बनस्य वियत आकाशस्य यथा दूरं दूरतरं दूरतमम् अल्पमल्पतरमल्पतमं च समुत्पतन्तं खगसमूहं प्रति साम्यं सर्वस्यैव निरालम्बनत्वादिना साम्यं तथा तवा यथाशक्ति भजतः प्रति साम्यमेव न वैषम्यमिति भावः ॥२९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

सर्व एव भवदधिकृताः सर्व एव भवतो भयं दधति, सर्व एव बलिमुद्वहन्ति । तत्राहुः– स्थिरचरजातय इति । आब्रह्मस्त जातयोऽजया स्युः, सर्व एव जीवाः । ननु अजा तावत् जडा, तस्याः कथं तदुत्पत्तौ शक्तिरिति ? तत्राह– हे अजया विमु

तव विहरे या तां प्र
उदीक्षा तयैव उत्था
वैषम्यम्, वैषम्यं तु
न भवेत् । कान्येव
मन्दतरमुत्पतन्तं च
भजतः प्रति वैषम्यं

परमेश्वरस्योप
कारणमाहुः–स्थिरेति ।
भवति तदा स्थिरचरजा
दूरे वर्तमानस्य असङ्ग
कर्माणि ततश्च तद्युक्तानि
जन्मव्यवह्रियत इति भा
वैषम्याभावाद्विषमसृष्टेर
सम्भवेदित्यर्थः । तत्र दृ
अपि त्वाकाशमेव त्वत्तु
व्युच्चरन्ति एवमेवास्मादात

इन्द्रियप्रवर्तकत्वा

(जीवसृष्टिपरेयम्)

पद्यानुवादः

यदिविहार उदीक्षण

निस्समस्य समस्य

सङ्क्षिप्तसार्थान्वयः —
स्थावरजङ्गमजातिमन्तो जीवाः
लिङ्गशरीराणि तैर्युज्यन्ते तथाभु
कश्चित् अपरः स्वीयः परः परक

हे विमुक्त !★ मायाति
तर्हि स्थिरचरजातयः स्थावरजङ्ग
यानि निमित्तानि प्रारब्धकर्माणि

★ [हे विमुक्त ! नित्य
अनपरः स्वीयः परःपरकीयश्च कश्चि

तव विहरे या तां प्रति उदीक्षा तया तव उदीक्षयैव तत्र कारणम् । स्थिरचरजातयः किम्भूताः ? उत्थनिमित्तयुजो तव विहारे या उदीक्षा तयैव उत्थानि उत्थानशीलानि यानि निमित्तानि तानि युजः, अतः सर्वेषामेव परस्परया त्वदुद्भवत्वात् कुत्रापि तव न वैषम्यम्, वैषम्यं तु अजाकृतम्, सा त्वयि नास्त्येवेत्याह– ततः परस्य सर्वोत्तमस्य तव कश्चिदपर आत्मीयः परोऽनात्मीयो न भवेत् । कान्येव शून्यतुलां शून्यस्योपमां दधतोऽपदस्य अनालम्बस्य वियत आकाशस्येव, आकाशस्य यथा दूरतरमुत्पतन्तं मन्दतरमुत्पतन्तं च खड्गं प्रति साम्यम्, सर्वस्यैव खड्गत्वात् न हि काश्चित्तदन्तं लभन्ते, अन्यत्वात्तथा तव च यथाशक्ति भजतः प्रति वैषम्यं नास्तीति भावः ॥२९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

परमेश्वरस्योपास्यत्वे स्वातन्त्र्यमैश्वर्यं च कारणमुक्त्वा जीवानामपि तदुपासकत्वे तदुत्पन्नत्वात् तत्पारतन्त्र्यमनैश्वर्यं च कारणमाहुः-स्थिरेति । हे विमुक्त ! यदि तव अजया मायया सह उदीक्षया उद्गतेन ईक्षणेनैव कादाचित्केन विहरः विहारः क्रीडा भवति तदा स्थिरचरजातयः स्थिराश्च चराश्च जातयः । जात्यालिङ्गिता देहा येषां ते जीवाः स्युः । कथम्भूतस्य । ततोऽजातः परस्य रे वर्तमानस्य असङ्गस्येत्यर्थः । ननु मयि लीनानां पुनः कथं जन्म स्यात्तत्राहुः-उत्थनिमित्तयुजः । ईक्षयैव उत्थानि निमित्तानि कर्माणि ततश्च तद्युक्तानि लिङ्गशरीराणि च तैर्युज्यन्त इति ते तथेति । कार्य्योपाधीनां लयादेव जीवानां लीनत्वम् । तेषां जन्मनैव जन्मव्यवह्रियत इति भावः । एवं च कर्मनियम्यत्वलक्षणमनैश्वर्यत्वमुक्तम् । ननु किं निमित्तोत्थानेन मदिच्छयैव भवन्तु, न त्वयि वैषम्याभावाद्विषमसृष्टेरयोगादित्याहुः-परमस्य निर्दोषपुरुषोत्तमस्य कश्चिदपरः आत्मीयः परोऽनात्मीयश्च न भवेत् न सम्भवेदित्यर्थः । तत्र दृष्टान्तः वियत इवापदस्य आकाशवन्निर्लेपत्वाद्वैषम्यानास्पदस्येत्यर्थः । न चात्र आकाशतुल्यस्त्वम् अपि त्वाकाशमेव त्वत्तुल्यमित्याहुः-शून्यस्याकाशस्यापि तुलामुपमां दधतः । अत्र श्रुतयः- "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्वे एत आत्मनो व्युच्चरन्ती"त्याद्याः ॥२९॥

गूढार्थदीपिनी

इन्द्रियप्रवर्तकत्वादेव न केवलमीश्वरभजनमपि तु तदुत्पन्नत्वेन तत्परतन्त्रत्वादपीत्याशयेनाहुः-श्रुतयः-स्थिरेति ।

(जीवसृष्टिपरेयम्)

पद्यानुवादः

यदिविहार उदीक्षणतोऽजया तव भवन्ति चराचरयोनयः ।
निस्ममस्य समस्य विमुक्त कोऽप्यनपरो न परो वियदात्मनः ॥१६॥

सङ्क्षिप्तसार्थान्वयः — हे विमुक्त ! ततः अज्ञातः परस्य असङ्गस्य तव यदि अजया विहारो भवति तर्हि स्थिरचरजातयो वरजङ्गमजातिमन्तो जीवाः स्युः भवन्ति । कथम्भूताः । उदीक्षया ईक्षणलेशेन उत्थनिमित्तयुजः उत्थानि उत्थितानि निमित्तानि ङ्गशरीराणि तैर्युज्यन्ते तथाभूताः । हि यतः वियत आकाशस्य इव अपदस्य मनोवचनागोचरस्य परमस्य परमकारुणिकस्य तव त् अपरः स्वीयः परः परकीयश्च न भवेत् न सम्भवति । कथम्भूतस्य तव । शून्यतुलां दधतः अतिसूक्ष्मस्य ॥

हे विमुक्त !★ मायातीत भगवन् ! यदि सृष्टिकाले तव अजया मायया सह उदीक्षया ईक्षणलेशेन विहरः विहारो भवति स्थिरचरजातयः स्थावरजङ्गमजातिमन्तो जीवाः स्युः । कथम्भूताः । उत्थानि निमित्तयुजः । उदीक्षयैव उत्थानि उत्थितानि निमित्तानि प्रारब्धकर्माणि तद्युक्तलिङ्गशरीराणि वा तैर्युज्यन्ते तथाभूताः ।

★ [हे विमुक्त ! नित्यमुक्त ! भगवन् ! तव अजया मायया सह यदि विहारस्तदेत्यन्वयः । अपरः परकीयः न भवतीति रः स्वीयः परःपरकीयश्च कश्चिदपि न भवेत् ।]

कथम्भूतस्य तव। ततोऽजात: मायात: परस्य दूरे वर्तमानस्य असङ्गस्येत्यर्थ:। अत एव हे विमुक्तेत्यस्य सङ्गति:। ननु मदिच्छयैव ते भवन्तु किं निमित्तोत्थापनेनेत्याशङ्क्याहु:-न हीति। पर उत्कृष्ट: दयालुर्मा न विद्यते यस्मात्तस्य परमस्य। परा सर्वोत्कृष्टा मा कृपाशक्तिर्यस्येति वा परमस्य परमदयालोस्तव कश्चित् अपर आत्मीयो न, पर: स्वकीयश्च न भवेत् न सम्भवति। हीति निश्चितमेतत्। कुत:। वियत इव आकाशवत्समस्य अत एव अपदस्य वैषम्यानास्पदस्य। कुत:। शून्यतुलां दधत: शून्यस्य तुलामुपमां सादृश्यं धारयत:। अयम्भाव: —

यथा ब्राह्मणचाण्डालयोर्बाह्याम्भन्तरे वर्तमानस्याप्याकाशस्य न तयोरुत्कर्षापकर्षाभ्यां संबन्धस्तद्वत्तवापि। एतेन त्वयि वैषम्याभाव: सृष्टौ च वैषम्यमतो निमित्तोत्थापनस्यावश्यकत्वमिति सूचितम्। यद्वा। वियत इव अपदस्य इयत्ताज्ञानाविषयस्य। तत्र हेतु: शून्यतुलां दधत: निरतिशयसूक्ष्मस्येत्यर्थ:। "अणोरणीयान्" इतिश्रुते: ॥

यद्वा। शून्यतुलां शून्योपमां दधत: अपदस्य निरालम्बनस्य वियत आकाशस्येव समस्येत्यन्वय:। अयम्भाव: — यथा आकाशस्य दूरं दूरतरं दूरतमम् अल्पं अल्पतरम् अल्पतमं च समुत्पतन्तं खगसमूहं प्रति साम्यं सर्वस्यैव गगनस्य निरालम्बनत्वादिना साम्यात् तथा तवापि यथाशक्ति भजत: भक्तान् प्रति साम्यमेव न वैषम्यमिति। परे तु शून्यतुलां दधत: वियत इव अपदस्य सर्वागोचरस्य। यद्यपि वियत् खलु वस्त्वेव तथापि न केनापि ग्रहीतुं शक्यते तद्ग्रहणशक्यत्वाभावात् एवं सर्वागोचरस्वभावगुणो भवानपि न गृह्यते भक्त्यभावात्। तस्माज्ज्ञानाग्रहं त्यक्त्वा भक्तिरेव करणीया।

"सुप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम्।" इत्यादिश्रुतेरित्यर्थमाहु:। विहर इति।

अत्र विहरणमिति व्युत्पत्त्या विहार इति वक्तव्ये वृद्ध्यभावेन बहिरङ्गशक्त्या सह दृक्पातेन कादाचित्कोऽल्पकालिक एव वृद्धिरहितो विरह: अन्तरङ्गशक्त्या स्वप्रेयस्या तु सर्वाङ्गीण: सार्वकालिकोऽन्योन्यप्रेमाश्लेषयोर्वृद्धिकर: विहार इति सूचितम्। अथवा विहरतीति व्युत्पत्त्या पचाद्यच्। अतो मूले न व्याकरणदोष: ॥१६॥३०॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

भगवत: करणापारतन्त्र्यादीनुक्त्वा भोग्यात्मकस्य कृत्स्नस्य जगत: कारणत्वमपि तस्यैवेत्याहु:-हे विमुक्त! नित्यमुक्त! यदि यत्र सृष्टिसमये अजया मायया सह तव उदीक्षया ईक्षणेन कृत्वा विहर: क्रीडा स्यात्। 'तदैक्षत। बहुस्याम्' इति श्रुते:। तत इक्षणत एव हेतो: स्थिरचरजातय: स्यु: भवेयु:। स्थावरजङ्गमा जायन्त इत्यर्थ:। मायासम्बन्धवारणार्थं विशिनष्टि-परस्य क्षराक्षराभ्यामुत्कृष्टस्यासङ्गस्येत्यर्थ:। 'अक्षरात्परत: पर:।' इति श्रुते:। वैषम्यं वारयति। उत्थनिमित्तयुज: आविर्भूतैर्निमित्तैरनादिकर्मसंस्कारादिभिर्युक्ता: कर्मसापेक्षमेव तेषां जन्म भवत ईक्षणं चेत्यर्थ:। किं कर्मपारतन्त्र्यं ममेति चेन्न। परमस्य परान् कर्मादीन् मातीति तथा तस्य स्वतन्त्रस्येशान:। 'संसारबन्धस्थितिमोक्षहेतु:। न तस्य कश्चिज्जनिता न चाधिप:। देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम्।' इत्यादिश्रुते:। एवम्भूतस्य तव पर: उत्कृष्ट: अपरो निकृष्टश्च न भवेत्। वियत् इव ब्राह्मणचाण्डालयोर्बाह्याभ्यन्तरे वर्तमानस्याप्याकाशस्य यथा न तयोरुत्कर्षापकर्षाभ्यां सम्बन्धस्तद्वत्तवापि। यथा मेघो वर्षत् उत्कृष्टापकृष्टबीजानुसारेणाङ्कुरमुत्पादयन्न वैषम्यं भजते तथा तत्कर्मानुसारेण तेषां कर्मफलात्मकजन्मादिभोगदानेन तवापि न वैषम्यमित्यर्थ:। अनेन 'फलमत उपपत्ते:।' (३-२-३७) इत्यधिकरणं व्याख्यातम्। दृष्टान्तसाम्ये विशेषणम्। अपदस्य इयत्ताज्ञानाऽविषयस्य। तत्र हेतु:-शून्यतुलां दधत:। निरतिशयसूक्ष्मस्येत्यर्थ:। 'अणोरणीयान्' इति श्रुते: ॥२१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं धर्माधर्मिप्रकारेण भजनार्थं दोषाभावमुक्त्वा कार्यद्वारा प्राप्तं दोषं निराकुर्वन्ति-स्थिरचरजातय: स्युरिति। ननु यदि भगवान् पूर्णानन्द: सर्वदोषविवर्जित: तर्हि किमर्थं तदंशा: नानाविधां योनिं प्राप्नुवन्ति। अतो ज्ञायते भगवानेव तानुत्पादयति स्वहितार्थम्। अन्यथा तेषामुत्पत्तिर्न घटेतेति चेत् तत्रोच्यते। यदि तव विहर: विहार: स्वानन्देन क्रीडा यथा राज्ञ: स्वगृहे रमतोऽपि रममाणस्येति पाठान्तरम्, तदानन्दोद्रेकात् बहिर्गमनेच्छा भवति। तथा भगवातोऽपि कदाचित्तद्विहार: तदा स्थिरचरजातय:

स्थावरजङ्गमभेदा
जीवानामुत्पत्त्यर्थ
भवन्ति। यथा रा
विस्फुलिङ्गा एव ज
जीवा: भगवत: स
प्राप्नुवन्ति। यथा वि
पतिता: निर्वीर्या भव
निरूपयन्ति। अजया
निमित्तम्। केवलं क्रि
ज्ञानपूर्विका क्रीडेत्यर्थ
नियामक:। ननु भार्य
कार्यं कुर्यात् तथा राज्ञ:
शक्तयस्तत्प्रेरिका भव
लोकवार्तानभिज्ञस्य क
कश्चित् यस्य प्रेयो विषय
वा भवति। यस्तु केवल
पञ्चविधा। स्वरूपं स्था
उत्कर्षापकर्षभावरहित: स
स्वत: सिद्ध्यर्थमपदश्च स्थ
निराधार इति चेत्तत्र दृष्टान्त
स्वरूपमपि न कस्यचित्प्र
'अरूपमस्पर्शम्' इत्यादिश्रु

"सर्वभावविनिर्मुक्त

हे विमुक्त! यदि त
स्युर्भवेयु:। उदीक्षया ईक्षण
परस्तात्" इति श्रुते:। परमस्यो
दुर्ज्ञेयस्य वाङ्मनसयोरगोचरस्य

जीवानां त्वदुत्पन्नत्वेना
नास्ति इति सूचयन्त्य: सम्बोध
विहारेच्छा भवति तदा उदीक्षया त
स्थिरचरजातय: स्थावरजङ्गमशरी
इत्याशङ्क्य त्वयि वैषम्याभावात्सृष्टे
तव कश्चिदपर: स्वीय: परोऽस्वी

त्यस्य सङ्गतिः । ननु
त्तस्य परमस्य । पर
भवेत् न सम्भवति ।
तुलां दधतः शून्यस्य

द्वत्तवापि । एतेन त्वयि
इयत्ताज्ञानाविषयस्य ।

। अयम्भावः — यथा
नस्य निरालम्बनत्वादिना
तः वियत इव अपदस्य
त्रं सर्वागोचरस्वभावगुणो

ाचित्कोऽल्पकालिक एव
रः विहार इति सूचितम् ।

हुः-हे विमुक्त ! नित्यमुक्त !
। बहुस्याम्' इति श्रुतेः । तत
धवारणार्थं विशिनष्टि-परस्य
रयति । उत्थनिमित्तयुजः
क कर्मपारतन्त्र्यं ममेति चेन्न ।
य कश्चिज्जनिता न चाधिपः ।
ष्टः अपरो निकृष्टश्च न भवेत् ।
म्बन्धस्तद्वत्तवापि । यथा मेघो
त्मकजन्मादिभोगदानेन तवापि
न्तसाम्ये विशेषणम् । अपदस्य
इति श्रुतेः ॥२९॥

थरचरजातयः स्युरिति । ननु यदि
ो ज्ञायते भगवानेव तानुत्पादयति
क्रीडा यथा राज्ञः स्वगृहे रमतोऽपि
चित्तद्विहारः तदा स्थिरचरजातयः

थावरजङ्गमभेदाः स्वयमेवोत्पद्यन्ते । यथा वर्षाकाले जीवाः । न हि पर्जन्यः वर्षणादधिकं किञ्चित्कार्यं करोति जीवानामुत्पत्त्यर्थम् । तथा भगवानपि केवल एव विहरति । ततश्चेष्टायामुद्गतायाम् । स काल इति तेन प्रकृत्यादिशक्तयः प्रेरिता वन्ति । यथा राजनि निर्गते सेवका अप्रेरिता अपि कार्येषु प्रवर्तन्ते । तथा कालो गुणक्षोभं कृतवान् । तथा प्रबलाग्नौ उद्गते स्फुलिङ्गा एव जीवा अपि निःसरन्ति । ततः कालेन क्षुब्धा गुणाः साक्षात्परम्परया च सर्वमेव कार्यजातमुत्पादयन्ति । ततस्ते जीवाः भगवतः सकाशान्निर्गताः प्रकृतिमुपगूह्य यत्र क्वचित् कामवशात् निमित्तं कर्म अज्ञानं वा समाश्रित्य नानाविधयोनीः नुवन्ति । यथा विस्फुलिङ्गा अग्रे निर्गताः वायुमालिङ्ग्य तेन यतः कुतश्चिन्नीयमानाः तृणादिषु पतिता उद्भवं प्राप्नुवन्ति, जले तिताः निर्वीर्या भवन्ति, भूमौ पतिताः मध्यभावेन तिष्ठन्ति, न त्वत्र मूलभूतो वह्निः कमपि विस्फुलिङ्गं क्वचिद्योजयति तथेदमिति रूपयन्ति । अजया प्रकृत्या उच्छ्रिताः (उत्थिताः) सन्तः त एवोच्छ्रितं (उत्थितं) कर्मादिनिमित्तं युञ्जत इति विहार एव तत्र मित्तम् । केवलं क्रियाशक्तेर्निमित्तत्वमाशङ्क्य ज्ञानशक्तिमप्याहुः-उदीक्षयेति । यदा उद्गता ईक्षा भवति तया सहितश्च विहारः पूर्विका क्रीडेत्यर्थः । ननु विहारोऽप्यजया भवतु तथा सति प्रकारान्तरेणापि दोषाः स्यादत आह-परस्येति । अजायाः परो नियामकः । ननु भार्ययेव तया मोहोऽस्तु आसक्तिर्वा तस्यां हेतुतो विमुक्तेति । तया सह स्म्बन्ध एव नास्ति । यतः सा किञ्चिदपि र्यं कुर्यात् तथा राज्ञः प्रेरिकाः क्षुद्रा दास्यो न भवन्ति क्वापि विहारे । ननु मा भवतु प्रकृतिः गुणाः कालो वा अन्या एवान्तरङ्गाः न्यस्तत्प्रेरिका भवन्तु ताभिरेव दोषसम्बन्धः स्यादत आह-न हि परमस्येति । परमस्यातिपरस्य अक्षरादप्यग्रे स्थितस्य सकवार्तानभिज्ञस्य कश्चिदपि पदार्थः अपरः हीनः परः उत्कृष्टो वा न भवेत् । विहारार्थमेव राजदृष्टान्तः । न तु प्रेरणार्थः । तं प्रेरयति श्चित् यस्य प्रेयो विषयो भवति यथान्तःकरणं चक्षुःश्रोत्रे बोधनार्थं ततोऽश्वशस्त्रादिक्रियार्थं तत्रान्तरङ्गः सामग्रीसम्पादको प्रेरको भवति । यस्तु केवल एवानन्दः सर्वसम्बन्धरहितो भवति तं कथं कश्चित्प्रेरको भवेत् । तत्र भगवतः सामग्र्यभावमाह-सामग्री विधा । स्वरूपं स्थानं विशेषाकृतिः उत्कर्षापकर्षभावापन्नाः पदार्थाश्च ते केऽपि भगवति न सन्ति । यतः सर्वेभ्यः परमः त्कर्षापकर्षभावरहितः सर्वविलक्षणः । अत एव तस्य कोऽपि नावरः परोऽपि न । नकारद्वयं पृथगेव निर्दिशति । सर्वनिषेधानां तः सिद्ध्यर्थमपदश्च स्थानरहितोऽपि न भवति चकारात्तत्सामग्रीरहितश्च । ननु यदा पदार्थः सर्वोऽपि साधारो भवतीति कथमयं धार इति चेत्तत्र दृष्टान्तमाह-वियत इवेति । आकाशसदृशस्य कयापि क्रियया अव्यापृतस्य अनेन सर्वविशेषरहित उक्तः । रूपमपि न कस्यचित्प्रत्यक्षमित्याह-शून्यतुलां दधत इति । शून्यवादव्युदासाय तुलापदम् । एतदेवाहुः 'असङ्गो ह्ययं पुरुषः' रूपमस्पर्शम्' इत्यादिश्रुतयः । केवलमस्तीत्येवोपलब्धयः अत एतादृशं को वा जानीयात् यतः प्रेरयेत् ।

"सर्वभावविनिर्मुक्तः पूर्णः क्रीडार्थ उद्गतः । निमित्तं तं समाश्रित्य जायन्ते जीवराशयः ॥" ॥१६॥२९॥

श्रीसुबोधिनीसारः

हे विमुक्त ! यदि तवाजया मायया विहरो विहारः क्रीडास्ति त्वं विहर क्रीडसि इति गुरवः । तदा स्थिरचरजातयः स्युः । उदीक्षया ईक्षणलेशेन उत्थानि उत्थितानि निमित्तानि कर्माणि तैर्युज्यन्ते इति तथा ततोऽजातः परस्य "तमसः स्तात्" इति श्रुतेः । परमस्योत्तमस्य वियत आकाशस्येव समस्यारूपिणो व्यापकस्य शून्यतुलां शून्यसाम्यं दधतो भजतोऽपदस्य स्य वाङ्मनसयोरगोचरस्याऽपरः स्वीयः परश्च न भवेत् ॥१६॥२९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

जीवानां त्वदुत्पन्नत्वेनापि तव भजनं युक्तम् इत्याशयेन ततो जीवनामुत्पत्तिमाहुः-स्थिरचरेति । तव च मायावशवर्तित्वं इति सूचयन्त्यः सम्बोधयन्ति-विमुक्तेति । यदि सृष्टिसमये ततः अजातः परस्य तत्प्रेरकस्य तव अजया मायया विहरः डा भवति तदा उदीक्षया तवेक्षणमात्रेण उत्थितानि आविर्भूतानि निमित्तानि विचित्रकर्मयुक्तानि लिङ्गशरीराणि तैर्युज्यन्ते ते जातयः स्थावरजङ्गमशरीरविशिष्टाः प्राणिनः स्युः जायन्त इत्यर्थः । ननु किंनिमित्तोत्थापनेन मदिच्छयैव त आविर्भवन्तु न्तु त्वयि वैषम्याभावात्सृष्टेर्वैषम्यं न स्यात्, अतो निमित्तान्तरं युक्तमेव इत्याशयेनाहुः-न हीति । परमस्य परमकारुणिकस्य परः स्वीयः परोऽस्वीयश्च न भवेत् नास्ति, येन विषमा सृष्टिः स्यादिति शेषः । ननु तर्हि व्यापकस्य ब्रह्मणः

सृष्टिगतदोषसम्बन्धः स्यात् इत्याशङ्क्य दृष्टान्तपूर्वकं तां निषेधन्ति– वियत इवेति । आकाशस्येवापदस्य व्याप्यगतदोषानाश्रयस्येत्यर्थः । तत्र हेतुमाहुः–शून्यतुलां साम्यं दधतः, अतिसूक्ष्मस्येत्यर्थः । यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरन्ति इत्याद्याः श्रुतयोऽत्रानुसन्धेयाः ॥२९॥१६॥

अन्वितार्थप्रकाशिका

स्थिरेति ॥ हे विमुक्त ! यदि ततः अजातः परस्य तव अजया मायया विहरो भवति तदा उदीक्षया उत्थनिमित्तयुजः स्थिरचरजातयः स्युः । वियत इवापदस्य शून्यतुलां दधतः परमस्य तव कश्चिदपि अपरो न भवेत् परश्च न भवेत् इत्यन्वयः ।

हे विमुक्त ! यदि सृष्टिसमये ततः अजातः परस्य दूरेवर्तमानस्य तत्प्रेरकस्य तव अजया मायया विहरः विहारेच्छा भवति तदा उदीक्षया तवेक्षणमात्रेण उत्थानि उत्थितानि आविर्भूतानि निमित्तानि विचित्रकर्मयुक्तानि लिङ्गशरीराणि तैर्युज्यन्ते ते स्थिरचरजातयः स्थावरजङ्गमशरीरविशिष्टाः प्राणिनः स्युः जायन्ते इत्यर्थः ।

"यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मदात्मनः सर्वे प्राणाः सर्वे देवाः सर्वे लोकाः सर्वाणि भूतानि सर्व आत्मानो व्युच्चरन्ति" इति श्रुतेः । कर्मणां विचित्र्यमेव सृष्टिवैचित्र्ये हेतुस्तव तु वैषम्यं नास्तीत्याहुः । न हीति । वियत आकाशस्येवापदस्य वाङ्मनसयोरगोचरस्य व्याप्यगतदोषासंश्लिष्टस्य वां शून्यतुलां शून्यसाम्यं दधतः अतिसूक्ष्मस्य न तु शून्यस्यैवेति परमस्य उत्तमस्य परमकारुणिकस्य तव कश्चिदपरः स्वीयः परोऽस्वीयश्च न भवेत् नास्ति । येन विषमा सृष्टिः स्यादिति शेषः ॥२९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पूर्वश्लोके परमेश्वरस्य सर्वनियन्तृत्वमुक्तम् । इह तु सर्वस्रष्टृत्वं वदन्ति ॥ स्थिरेति ॥ हे विमुक्त ! नित्यमुक्त ! यदि यर्हि तव अजया प्रकृत्या सह पुरुषरूपेणेति शेषः विहरो भवेत् तर्हि उदीक्षया क्षेत्रज्ञानां कर्मानुगुणमीक्षणेन उत्थनिमित्तयुजः उत्तिष्ठन्ते इत्युत्थानि प्रबुद्धानि तैर्निर्मितै राजसतामससात्त्विकदेहजनकैः प्राचीनकर्मभिर्युज्यन्ते इति तथोक्ताः स्थिरचरजातयः स्युः स्थिराश्चराश्च तेषां जातयः सजातीयभेदा भवेयुः ॥ प्रकृतिस्थानां नित्यक्षेत्रज्ञानां स्थावरजङ्गमदेहाः परमपुरुषेक्षणेन भजन्तीति भावः ॥ स ऐक्षत । स इमाँल्लोकानसृजदिति श्रुतेः ॥ ईक्षतेर्ना शब्दमिति न्यायाच्च ॥ सृष्टेर्भगवदुदीक्षापूर्वकत्वमुक्तम् ॥ ततश्चोदीक्षाया मनःसङ्कल्पपूर्वकत्वात्तस्य चक्षुष्मत्त्वं समनस्कत्वं च श्रुतिः स्फुटमेव वदति ॥ भगवतः पुरुषरूपेण विहरणे प्रमाणे पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवानिति ॥ नन्वजया सह मम विहरणकथनेन को दोष इत्याहुः ॥ ततः अजातः परस्य दूरे वर्तमानस्य ॥ तथा प्रमाणं विलज्जमानया यस्य स्थातुमीक्षापथेऽमुयेति भागवते ॥ अत एव परमस्य सर्वोत्कृष्टस्य । सर्वोत्कृष्टत्वात् वियत इवापदस्य ॥ नास्ति पदं कस्यापि आधारो यस्य तस्य ॥ आत्माधारस्येत्यर्थः ॥ आकाशदृष्टान्तेनेश्वरस्य निराधारत्वं सर्वाधारत्वं व्यापकत्वं च सूचितम् ॥ तथोक्तम् — आत्माऽऽधारोऽखिलाश्रय इति ॥

शून्यतुलां दधतः शून्यागारादिसाम्यं दधतः शून्यागारादौ हि निवाससूचकलेपादि यथा न स्यात्तथा त्वयि विषमजगत्सर्गादिजनितदोषलेपो नास्तीत्यर्थः ॥

तथा सूत्रकारः — वैषम्यनैर्घृण्येन सापेक्षत्वात्तथा हि दर्शयतीति ॥ अस्यार्थः —

वैषम्यनैर्घृण्ये इति क्षेत्रज्ञानां कमनीयाकमनीयदेहादिप्रदाने परमेश्वरस्य वैषम्यं पक्षापक्षकरत्वं च दुःखरूपजगत्कर्तृत्वे निर्दयत्वं च ते द्वे न स्तः ॥ कुतः ॥ जीवकर्मणां सापेक्षत्वात्कर्मानुगुणत्वात् ॥ क्षेत्रज्ञकर्मानुगुणं वैषम्यमीश्वरस्य न स्वत इत्यर्थः ॥ तथा हि दर्शयति श्रुतिः —

साधुकारी साधुर्भवति । पापकारी पापो भवतीति ॥ एवं च दृष्टान्ते पुनरुक्तिर्नास्ति ॥ एतैर्विशेषणैर्विशिष्टस्य तव कश्चित् परकीयः अपरः स्वकीयश्च ॥ हि निश्चितम् ॥ न भवेत् न भवितुमर्हति ॥ अर्हार्थे लिङ् ॥२९॥१६॥

इत्थं श्रितज

कथमवर्जनीयसम्बन्ध
सर्वे प्राणिनः, अजय
ततस्तत्र, केषाञ्चिदेव
स्यादित्यर्थः । उपाय
वैषम्यनैर्घृण्यादिहेयगुण
एतदेव विशदीकुर्वन्ति
। कश्चित्, अपरः करुण
सर्वरक्षके तत्तत्कर्मानुगुण
न केवलं वैषम्यनैर्घृण्यर
वियत इव आकाशस्ये
व्याप्यगतदोषानाश्रयत्वं त
अविद्यमानतुल्यस्य तवेत
स्वराजो मम जगद्व्यापारा
यदि यदा, विहरो विहारः
उदीक्षया 'बहु स्याम्' इत
कारयेत्' इत्युक्तेरजाया इत्य
स्थिरचरजातयः स्थावरज
कर्मायत्तव्यापारव्युदासः । अ
सम्बोधयन्ति विमुक्तेति । अस
घटादिकर्तृत्वमिति भावः । व
नास्ति । परमकारणत्वादिति
अपरोऽन्यः अशरीरभूतः कश्चि
। वियत इवेत्यादियथोक्त एवा

भगवतस्सर्वकारणत
चेतनाचेतनाद्विलक्षणस्य तव य
तदा उदीक्षया तवेक्षणमात्रेण अ
इति उत्थनिमित्तयुजः । एवम्भू
जायन्ते । चेतनानामुच्चनीचरूप
'कारणं गुणसङ्गोऽस्य स
न वैषम्यनैर्घृण्यादिदोष इत्यर्थः ।
स्थावरजङ्गमभेदाः स्वयमेवोत्पद्यन
तथापि विचित्राः जीवाः तत्कालव

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थं श्रितजनकल्याणकारिगुणपौष्कल्यमुक्तं तर्हि किं हेया अपि गुणा मयि सन्तीत्यपेक्षायां ते न सन्तीति वदन्त्यः मवर्जनीयसम्बन्धनिवृत्तिरित्यपेक्षायां हेयप्रत्यनीकभवत्कटाक्षादेवेति प्राहुः ॥ स्थिरेति ॥ स्थिरचरजातयः स्थावरजङ्गमसंस्थानाः प्राणिनः, अजया उत्थनिमित्तयुजः प्रकृतिकार्यदुःखनिमित्तशरीरयुक्ताः, स्युः, सर्वेषामजासम्बन्धोऽवर्जनीय इति भावः । त्र, केषाञ्चिदेवम्भूतानां, विरहः यदि कदाचित् प्रकृतिमोक्षः सम्भवति चेत्, परस्य तव, उदीक्षया त्वत्कटाक्षादेव मोक्षः दित्यर्थः । उपायनिष्पत्तिस्त्वत्कटाक्षमात्रेणैवेति भावः । ननु प्रकृतिसम्बन्धेऽवर्जनीये सत्यपि काश्चित्तं त्याजयतो मम म्यनैर्घृण्यादिहेयगुणसम्बन्धः संप्राप्तः इति चेन्नेति वदन्त्यः सम्बोधयन्ति । हे विमुक्त ! हेयाद्विशेषेण मुक्त ! हेयप्रतिभटेत्यर्थः । व विशदीकुर्वन्ति न हीति । पर उतकृष्टः कारुणिकः मा न विद्यते यस्मादिति परमस्तस्य तव, परमकारुणिकस्य भवत इत्यर्थः । श्चित्, अपरः करुणाविषयः, न । परस्तदविषयश्च, न भवेत् । नास्तीत्यर्थः । सर्वात्मना शरीरभूतत्वादनादरणीयो नास्त्यतः के तत्तत्कर्मानुगुणं कर्मफलप्रदे कल्पतरूपमाने त्वयि विषम्याद्यभावात्प्रपत्तिमतो मोचयसि तद्रहितान्न मोचयसीति भावः । केवलं वैषम्यनैर्घृण्यरूपहेयाभाव एव, अपि तु सर्वेऽपि हेयगुणा न सन्तीत्यभिप्रायेण सदृष्टान्तं विशिंषन्ति वियत इत्यादिना । त इव आकाशस्येव, अपदस्य अस्थानस्य, हेयानाश्रयस्येत्यर्थः । यथा सर्वत्र व्याप्य स्थितस्यापि आकाशस्य गतदोषानाश्रयत्वं तद्वद्धेयानाश्रयस्येत्यर्थः । अत एव, शून्यतुलां शून्योपमां, दधतः सर्वव्यापिनोऽपि व्याप्यगतदोषस्पर्शाभावेन मानतुल्यस्य तवेत्यर्थः । यदा विहर उदीक्षयेति पाठान्तरं, तदायमार्थः । ननु यद्यहमकरणस्तर्हि जगद्द्रष्टुत्वानुपपत्तिः । जो मम जगव्द्यापारानुपपत्तिश्च । कुतः सकरणानां कर्मवश्यानां च कर्तृत्वव्यापारत्वादिदर्शनादित्यत आहुः । स्थिरेति । हे हरे ! यदा, विहरो विहारः चिक्रीडिषेति यावत् । उदेति उदयं प्राप्नोतीति शेषः । तदा, परस्य प्रकृतिपुरुषाभ्यां विलक्षणस्य, तव, या 'बहु स्याम्' इत्याद्युक्तसङ्कल्पमात्रेणैव, अजया अजायाः प्रकृतेः सकाशात् 'अपि माषं मषं कुर्यात् छन्दोभङ्गं न त्' इत्युक्तेरजाया इत्यत्राजयेति समभिहितम् । उत्थान्युदितानि देहनिमित्तानि बुद्धीन्द्रियादीनि तैर्युज्यन्त इति उत्थनिमित्तयुजः, चरजातयः स्थावरजङ्गमसंस्थानाः सर्वे प्राणिनः स्युः । उदीक्षयेत्यनेन करणायत्तकर्तृत्वव्युदासः । विहर इत्यनेन त्तव्यापारव्युदासः । अत एव जगत्सर्गरूपव्यापारस्य जीवव्यापारवत्सुखदुःखनिमित्तार्थत्वव्युदासश्च फलितः । तत्र हेतुत्वेन यन्ति विमुक्तेति । अस्य यथोक्त एवार्थः । जीवानां असर्वशक्तित्वात् असत्यसकल्पत्वात् हेयास्पदादित्वाच्च न सङ्कल्पमात्रेण कर्तृत्वमिति भावः । कस्तर्हि ममेक्षिता इत्यत आहुः । ततः यत एवं ततः, परमस्य सर्वोत्कृष्टस्य, परः पूर्वभावी उदीक्षिता, । परमकारणत्वादिति भावः । अत एव, अपरोऽकार्यभूतः, कश्चित् नास्ति । सर्वस्य त्वत्कार्यभूतत्वादिति भावः । यद्वा । न्यः अशरीरभूतः कश्चिदपि नास्ति, सर्वस्य त्वदात्मकत्वादिति भावः । तर्हि व्याप्यगतदोषप्रसक्तिरित्यतः सदृष्टान्तं विशिंषन्ति त इवेत्यादियथोक्त एवार्थः ॥१६॥ ॥३०॥

योगिरामानुजाचार्यकृतसरला व्याख्या

भगवतस्सर्वकारणत्वेऽपि तद्दोषैरसंस्पृष्टत्वमाहुः-स्थिरेति । हे विमुक्त ! मायावशवर्तित्वरहित ह परमस्य नाद्विलक्षणस्य तव यदि सृष्टिसमये ततः मायया सह । तसेस्सर्वविभक्तिकत्वादत्र तृतीया बोध्या । विहरः विहारः ईप्सितः क्षया तवेक्षणमात्रेण अजया मायया कारणीभूतया उत्थनिमित्तयुजः । उत्थमुत्पन्नं यन्निमित्तं त्रिगुणसंसर्गरूपं तेन युज्यन्ते त्थनिमित्तयुजः । एवम्भूताः स्थिरचरजायतः । स्थिरचरयोर्जातिर्येषां ते स्थिरचरत्वजातिविशिष्टशरीरिणः इत्यर्थः । स्युः । चेतनानामुच्चनीचरूपस्थावरजङ्गमयोनिप्राप्तौ मायाजन्यत्रिगुणसम्बन्ध एव कारणमित्यर्थः ।

'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ।' इति भगवद्वचनात् । अतः चेतानानां विषमसृष्टौ भगवतः कारणत्वाभावात् । र्घृण्यादिदोष इत्यर्थः । अत्र योगिनः एवं वर्णयन्ति-आत्मारामस्यापि भगवतः यदा मायया सह विहारेच्छा भवति तदा भेदाः स्वयमेवोत्पद्यन्ते । यथा वर्षाकाले जीवाः न हि पर्जन्यवर्षणादधिकं किमपि कार्यम् जीवानामुत्पत्त्यर्थं करोति चित्राः जीवाः तत्कालवशात्स्वयमेवोत्पद्यन्ते । तथा भगवानपि केवल एव विहरति ततः विहारेच्छायामुद्गतायां सः काल

इति तेन कालेन प्रकृत्यादिशक्तयः प्रेरिता भवन्ति। यथा राजनि निर्गते सेवकाः अप्रेरिता अपि तत्तत्कार्येषु प्रवर्तन्ते तत्समयानुसारेण तथा ईश्वरे क्रीडायां प्रवृत्ते त्वद्विहारकाल एव गुणक्षोभं कृतवान् भवति तेन विचित्रसृष्टिः। यथा प्रलयाग्नावुद्गते स्फुलिङ्गा इव जीवाः साक्षात्परम्परया वा सर्वकार्यजातमुत्पादयन्ति। ततः ते जीवाः भगवत्सकाशान्निर्गताः प्रकृतिमुपगुह्य यत्र कुत्रचित्कामवशादज्ञानं वा कर्म वा निमित्तं समाश्रित्य नानाविधयोनीन् प्राप्नुवन्ति। यथा विस्फुलिङ्गाः महदनिर्गताः वायुमालिङ्ग्य ते न यतः कुतश्चिज्जा(जी)यमानाः तृणादिषु पतिताः महत्स्वरूपं प्राप्नुवन्ति। जले पतिताः निर्वीर्याः भवन्ति। भूमौ पतिताः मध्यभावेन तिष्ठन्ति। न त्वत्र मूलभूतो वह्निः कमपि विस्फुलिङ्गं क्वचिद्योजयति तथा भगवानपि जीवं न नियोजयतीति निरूपयन्ति। अतः मायया उन्नताः जीवाः स्वत एवोन्नतकर्मादिनिमित्तं युञ्जन्त इति विहार एव। तत्र निमित्तमात्रं न त्वीश्वरप्रेरणम्। तत्र निमित्तमिति तत्त्वम्। सृष्टेः भगव एव निमित्तत्वाङ्गीकारे भगवतः वैषम्याभावात् विषमसृष्टिरूपं कार्यं न स्यात्।

'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।' इति च भगवतैवोक्तत्वात्। अतः प्रकृतिसङ्ख्ब्धगुणवैषम्यमेव विषमसृष्टेः निमित्तमित्याशयेनाहुः–नहीति। परमस्य परमकारुणिकस्य तव कश्चिदपरः स्वीयः परः अस्वीयश्च न भवेत् नास्ति। येन विषमसृष्टिः स्यादिति दोषमाशङ्क्य परिहरति–वियत इवेति। आकाशस्येवापदस्य व्याप्यगतदोषानाश्रयस्य। तत्र हेतुः शून्यतुलां दधतः शून्यसाम्यं दधतः अतिसूक्ष्मस्येत्यर्थः।

"यथाग्नेः क्षुद्राः विस्फुलिङ्गाः व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरन्ति॥"

इत्याद्याः श्रुतयोऽत्रानुसन्धेयाः॥ हे विमुक्त! परस्य यदि ततः विहरः तदा उदीक्षया अजयोत्थनिमित्तयुजः स्थिरचरजायतः स्युः। हि परमस्य वियत इवापदस्य शून्यतुलां दधतः तवापरः परश्च न भवेदित्यन्वयः ॥२९॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

तदेवं पूर्वोक्तार्थप्रकारेण इयदेव करणप्रवर्तकत्वमेव। ततः ईश्वरात् तत्परतन्त्रत्वादीश्वराधीनत्वादपि ईश्वरं भजन्तीति यथाग्नेरित्याद्याः श्रुतयो वदन्तीत्याह–वेद इति। योजनाश्रुतौ प्राणा इन्द्रियाणि लोकाः कर्म्मफलानि देवा इन्द्रियाणां लोकानां चाधिष्ठातारः भूतानि ब्रह्मादिस्थावरान्तशरीराणि आत्मा न उपाधिसम्बन्धेन जनितो यः कर्तृत्वादिविशेषस्तेन ज्ञायमानस्वरूपाः जीवा व्युच्चरन्ति जायन्ते। ईक्षणलेशेन सृष्टीच्छारूपेण असद्वेत्यत्र पूर्वपक्षे सृष्टेः पूर्वं शून्यमेवासीत्ततः शून्यादेव सज्जगदजायत इत्यर्थेन शून्यपूर्वकत्वं प्रतीयते। तदर्थं शून्यपूर्वकप्रतीतिनिवृत्त्यर्थं मशकार्थो धूम इतिवत्। अर्थशब्दो निवृत्तिपरः। सिद्धान्ते तु सृष्टेः पूर्वम् इदं विश्वम् असव्द्याकृतनामरूपं ब्रह्मैवासीत्ततो ब्रह्मणः सव्द्याकृतनामरूपं जगदजायतेत्यर्थः ॥२९॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

तदेवं करणप्रवर्तकमीश्वरं करणपरतन्त्रा नरा भजन्तीत्युक्तम्। न केवलमियदेव कारणं तत उत्पन्नत्वेनापि तत्परतन्त्रत्वादिति वदन्तीत्याह–स्थिरचरजातय इति। हे विमुक्तनित्यमुक्त! यदि यदा अजया मायया सह उदीक्षया कटाक्षेण तव विहरः विहारो भवति तदा स्थिरचरजातयो जीवाः स्युर्भवेयुः। स्थिरजातयश्चरजातयः जातिसंस्कारे का लिङ्गता देहा येषाम्। कथम्भूताः। उत्थनिमित्तयुजः। ईक्षयैव उत्थानि आविर्भूतानि निमित्तानि कर्माणि तद्युक्तानि लिङ्गशरीराणि वा। तैर्युज्यन्त इति उत्थनिमित्तयुजः। तव कथम्भूतस्य। ततः परस्य अजातः परस्य दूरे वर्तमानस्य अत ईक्षया विहारः। ननु किं निमित्तोत्थानेन मदिच्छयैव भवन्तु। नन्वपि वैषम्यभावाद्विषमसृष्टेरयोगादित्याह–न हीति। हि यस्मात् परमस्य परमकारुणिकस्य वियत इव आकाशसदृशस्य समस्येत्यर्थः। तव कश्चिदपरः आत्मीयः परः अनात्मीयश्च न भवेत् न सम्भवतीत्यर्थः।

"असद्वा इदमग्र आसीत्। ततो वै सदजायत।" इत्यादिश्रुत्या शून्यपूर्वकत्वमिव प्रतीयते। तदर्थं पुनर्विशिनष्टि। पुनः कथम्भूतस्य। शून्यतुलां दधतः शून्यसाम्यं भजतः। पुनश्च। अपदस्य न पद्यते इति अपदः। तस्य वाङ्मनसयोरगोचरस्य। एवम्भूतस्य तव वैषम्याभावात् ईक्षयेव उत्थनिमित्तयुजो जीवाः भवन्तीति। स्थिरचरजायतः स्युरित्यस्य श्रुतिः।

"यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे देवाः सर्वाणि भूतानि । एत आत्मनो व्युच्चरति ॥"

अर्थः - पूर्वमात्मव्यतिरिक्तं वसत्वन्तरं नास्तीत्युक्तं तदुत्पन्नत्वात् । तत्र दृष्टान्तः-यथा एकरूपादेकस्मादग्नेः सकाशात् अल्पप्रमाणा विस्फुलिङ्गा अग्निकणा विविधाः उच्चरन्ति उत्तिष्ठन्ति । एवमस्मादात्मनः विज्ञानमयस्य प्राक्प्रतिबोधात् स्वरूपं तस्मात् एत आत्मनो जीवा व्युच्चरन्ति उपाधिसम्पर्कजनितविशेषप्रतिबुद्ध्यमाना आत्मान इत्यर्थः । इयमपि वलात्मसृष्टिपरा ।

स्वामिनाम् —

त्वदीक्षणवशक्षोभमायाबोधितकर्मभिः । जातान् संसरतः खिन्नान्नृहरे पाहि नः पितः ॥

भो नृहरे पितः ! नोऽस्मान् पाहि । कथम्भूतान् । तव ईक्षणवशेन सिसृक्षारूपेण यः क्षोभस्तेन मायया धितैः कर्मभिः जनान् ॥२९॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ सर्वचेतनैरवर्जनीयं सम्बन्धविशेषानुभवेन हेयप्रत्यनीकतया च तत्र कटाक्षादेव मोक्ष इत्याह-स्थिरचरेति । चरजातयः स्थावरजङ्गमसंस्थानाः सर्वे जन्तवः । अजयोत्थनिमित्तयुजः । प्रकृतिकार्यदुःखनिमित्तयुजः कृतिकार्यदुःखनिमित्तशरीरयुक्ताः स्युः । एवमजयोत्थनिमित्तयुजां तेषां विरहो यदि कदाचित् प्रकृतिमोक्षः सम्भवति चेत् परस्य क्षया त्वत्कटाक्षान्मोक्षः । तथा च श्रुतिः —

'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्य०'

इति । तदुक्तं मोक्षधर्मे —

'जायमानं तु पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकः स तु विज्ञेयो भवेन्मोक्षार्थचिन्तकः ॥'

अन्ये ब्रह्मादयस्तु कर्मवश्या अतस्ते मोक्षप्रदाने असमर्थाः । तथा चोक्तं देवैर्मुचुकुन्दं प्रति —

'वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः । एक एवेश्वरस्तस्य भगवान् विष्णुरव्ययः ॥'

इति । ब्रह्मादीनां कर्मवश्यत्वमुक्तं शौनकेन —

'आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः । प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥'

इति । त्वं तु ततोऽजातो विमुक्त एव । तन्नियामकत्वात् । नन्वहं यदि कस्यचिन्मोक्षं ददामि कस्यचिन्नेति तदा मम म्यादिदोषप्रसक्तिः स्यादत आह-न हि परमस्येति । अयमाशयः — सत्यं त्वं सर्वत्र समोऽपि न हि तं वापरोऽस्तीति सर्वात्मनां भूतत्वादन्यो नास्ति । अतः सर्वरक्षकत्वमित्यर्थस्तथापि आनुकूल्यमात्रणाज्ञातसुकृतलेशं व्याजीकृत्य मोक्षं ददासीति । वैषम्यादिदोषो नास्त्येवेति । कीदृशस्य तवेत्याह-परस्येति । परत्वं कालपूर्वत्वम् । अपरत्वं पश्चाद्भावित्वम् । परमस्येति यस्मात्सः परमः । सर्वोत्कृष्टस्येत्यर्थः । तथा च भगवद्वाक्यम् —

'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥'

इति अतस्त्वत्तः परः पूर्वभावी नास्त्येव । अत एव स्वयं कस्यचिदपरः पश्चाद्भावी न भवतीत्यर्थः । अत्र यस्यैवं ल्यत्वाज्जन्माद्यवस्थात्रयरहितस्य तव सर्वव्यापिनोऽपि वियत इव आकाशस्यैव शून्यतुलां दधतः धारयतः दोषस्पर्शाभावेनाविद्यमानतुलस्येत्यर्थः ।

तथा च गीतोपनिषदि —

'यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान् । तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥' इति ॥२९॥

कृष्णप्रिया

स्थावर जंगम जाति युत सब प्राणी माया से उत्पन्न शरीर युक्त होते है। उन प्राणियोके मध्यमें किसी प्राणी का यदि माया से मोक्ष होता हे तो वे विमुक्त आप की कृपासे ही मोक्ष होता है अथवा जब आपको विहार करने की इच्छा होती है तब आप के संकल्प मात्र से माया से उत्पन्न भोग के निमित्त देह बुद्धि ईन्द्रीयोंसे युक्त हो जाते है। सभी प्राणी परम करुणा सम्पन्न आपको पराया कोई भी नहीं है क्योंकि आपके दृष्टिमें सभी प्राणी है और जीव माया के दोष भी आपमें नहीं है। जैसे आकाश सर्वत्र व्याप्त हो रहा है तथा वस्तुके दोषों का आधार आकाश नहीं होता वैसे ही आप सर्वत्र व्याप्त हो रहे हो तथा व्याप्त रूप चेतना के दोषों का आश्रय आप नही हो। इसी कारण चेतनामे अविद्यमान उपमा को आप धारण करते हो कि मानो आप चेतनामें व्याप्त ही नहीं हो ॥२९॥

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा।
अजनि च यन्मयं यदविमुच्य नियन्तृ भवेत् सममनु[१]जानतां यदमतं मतदुष्टतया ॥३०॥

कर्दमक्षमा

हे ध्रुव, !, यदि, तनुभृतः, अपरिमिताः, ध्रुवाः, सर्वगताः, च, स्युः, तर्हि, तेषाम्, शास्यता, इति, नियमः, न, स्यात्।, इतरथा, तु, अयं, दोषः, न, स्यात्।, अतः, यन्मयम्, जीवाख्यम्, अजनि, तद्वस्तु, कारणं, कारणतया, स्वकार्यम्, अविमुच्य, स्वकार्यस्य, जीवस्य, नियन्तृ, भवेत्।, यत्, कारणाख्यं, वस्तु, समम्, तन्मतस्य, दुष्टतया, हेतुना, अनुजानताम्, अमतम् ॥३०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं तावत्परमात्मनः सकाशादविद्याकृतकार्योपाधयस्तदंशा एव जीवा जाताः संसरन्तो भजन्तीत्युक्तम् तत्र यद्येकाऽविद्या तदा जीवस्याप्येकत्वादेकमुक्तौ सर्वमुक्तिप्रसङ्गः अथ नानविद्यास्तर्हि तस्यैवांशान्तरेण संसारानपगमादनिर्मोक्ष इत्यादितर्कबलेन वस्तुत एव नानात्मानस्तत्र च तेषामणुत्वे देहव्यापिचैतन्यं न स्यात् देहपरिमाणत्वे च मध्यमपरिमाणानां सावयवत्वेनानित्यत्वं स्यात् अतः सर्वगता नित्याश्चेति केचन मन्यन्ते तत्र न तावदुक्तदोषप्रसङ्गः अविद्याभेदेन तच्छक्तिभेदेन वा बद्धमुक्तव्यवस्थासम्भवात् ईश्वरस्य तु न केनाप्यंशेन संसारशङ्केत्युक्तमेव प्रसिद्धं चात्मैक्यं सर्वश्रुतिषु किञ्च इमं पक्षमन्तर्यामिब्राह्मणमपि न सहत इत्याह-अपरिमिता इति। वस्तुत एवानन्ता ध्रुवास्तेनैव रूपेण नित्याः सर्वगताश्च तनुभृतो जीवा यदि स्युस्तर्हि तेषां समत्वाच्छास्यता न घटते इति कृत्वा हे ध्रुव नियमो नियमनं त्वया न स्यादितरथा तु घटेत कथम् यन्मयमुपाधितो यद्विकारप्रायं यज्जीवाख्यमजनि जातं तत्तस्य स्वविकारस्य नियन्तृ नियामकं भवेत् अविमुच्य कारणतयाऽपरित्यज्य किं तत् सममनुस्यूतम् ननु किं यत्तच्छब्दैर्ज्ञायते चेदुच्यतामिदं तदित्यत आह-अनुजानतां यदमतमिति जानीम इति वदतां यदमतमविज्ञातप्रायम् अविषयत्वात् तथा च श्रुतिः 'यस्यामतं मतं तस्य मतं यस्य न वेद सः अविज्ञतिं विजानतां विज्ञातमविजानताम् अवचनेनैव प्रोवाच सह तूष्णीं बभूव' इत्यादिः किञ्च मतस्य ज्ञातस्य दुष्टतया दोषश्रवणात् तथा च श्रुतिः 'यदि मन्यसे सुवेदेति दह्ममेवापिनूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेषु' इत्यादि तस्माद्यत्तच्छब्दावद्योत्यमतर्क्यं किमपि सर्वानुस्यूतत्वेन समं नियन्तृभवेदित्यर्थः ॥

अन्तर्यन्ता सर्वलोकस्य गीतः श्रुत्या युक्त्या चैवमेवावसेयः।
यः सर्वज्ञः सर्वशक्तिर्नृसिंहः श्रीमन्तं तं चेतसैवावलम्बे ॥१७॥ ॥३०॥

---

[१] मविजानतां-वीर.।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — एवमित्थम् । तत्र पक्षे । अस्यार्थः — अत्र तार्किका दूषयन्ति यद्येकाविद्या
प्येकविधस्तया बद्धोऽस्ति तर्हि जीवस्याप्येकत्वादेकस्य मुक्तौ सर्वजीवमुक्तिप्रसङ्गः स्यात् । अथैकविधो जीवो नानाविधा
स्ताभिर्बद्धश्चेत्तर्हि तस्यैवेश्वरस्यैवांशान्तरेण जीवरूपांशेन कृत्वा संसारानपगमात्संसारनिवृत्त्यभावादनिर्मोक्षः स्यात् ।
विद्यया मुक्तो जीवः पुनरन्यया बद्धः पुनरन्यया मुक्तः पुनरन्यया बद्ध इत्यनिर्मोक्षः । एवं च सति चतुर्थपुरुषार्थाभावः
त्यादितर्कबलेन नानात्मानः स्थाप्यन्ते । तत्र च नानात्वेऽपि सर्वगतत्वमाह-तेषामात्मनामणुत्वे सूक्ष्मत्वे देहस्य स्थूलत्वे
पि चैतन्यं न स्यादिति जीवपरिमाणमुक्तं श्रुत्या "आराग्रमात्रो ह्यपरो हि दृष्टः" इति । श्रुत्यन्तरं च —

"बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः सुखदुःफलैकभुक् ॥" इति ।

"सूक्ष्माणामप्यहं जीवः" इत्येकादशे भगवदुक्तेः । एवम्भूतसूक्ष्मस्य स्थूलदेहैकप्रदेशे पिपीलिकादिस्पर्शजं चैतन्यं कथं
तस्मात् सर्वगता इति नित्यत्वं साधयति-देह इति । देहपरिमाणत्वे च देहस्य मध्यमं हृदयं दशाङ्गुलिपरिमाणम्
तिष्ठद्दशाङ्गुलम्" इति श्रुतेः । हृदयपरिमाणानामात्मनां सावयवत्वादनित्यत्वं स्यात्तस्मात्परिमाणाभावान्नित्या अत एवात्मानो
सर्वगता जीवरूपणैव नित्याश्चेति केचन तार्किका मन्यन्ते, एतन्मतं निराकुर्वन्सिद्धान्तयति-तत्र न तावदित्यादिना । तत्र
प्रसङ्गे उक्तदोषः एकस्मिन्बद्धे मुक्ते च सर्वबन्धरूपो दोषो नास्ति । कुतः । अविद्याभेदेन अविद्यया बन्धो विद्यया च
"अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ।" इति श्रुतेः । एकादशे च —

"काममयोऽयं पुरुषः स यत्कामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म करोति यत्कर्म कुरुते तदभिसम्पद्यते ॥"

"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेयनाय ।" इति च । ईश्वरांशस्य जीवस्य बन्धमोक्षव्यवस्थां प्रदर्श्यांशिनस्तु
ङ्कां निराकरोति-ईश्वरस्येति । समष्ट्युपाधेरखण्डितत्वस्येश्वरत्वात् तस्य विद्याशक्तिप्रधानत्वात् केनाप्यंशेन संसारशङ्का
। "एक एव हि भूतात्मा" इत्यादिश्रुतिष्वात्म्यैक्यं प्रसिद्धमस्त्येव कुतो नानात्वं किञ्च जीवस्य कुतः
मन्तर्यामिसम्भवात् अत इमं तार्किकपक्षं नाना जीवाः स्वतन्त्रा नित्याः सर्वगता इति मतमन्तर्यामिब्राह्मणाख्यो वेदो न
त्याह-अपरिमिता इति । ध्रुवाः स्थिराः । तेनैव रूपेण ध्रुवत्वरूपेणैव । तेषां जीवानाम् । शास्यता शासनगोचरता इति कृत्वा
नेकात्मवादे भोगसाङ्कर्यप्रसङ्गोऽपि दुर्वारस्तथा हि न ह्येकत्रान्तःकरणे सुखादिरूपेण परिणते तत्प्रतिसंवेदी एक एव चेतन
नियन्तुं शक्यं सर्वेषां सान्निध्याविशेषेण प्रतिसंवेदनापत्तेरवर्जनीयत्वात् । श्रोत्रस्यैकस्यापि
कुलीरूपापाधिभेदादिवान्तःकरणरूपोपाधिभेदादेकस्याप्यात्मनः शब्दग्रहव्यवस्थावज्जन्मादि व्यवस्थापि सेत्स्यतीति न
तुं वक्तव्यमिति नीलकण्ठः । शास्यता गोचराभावत्वेन नियमनं नियोगत्वम् । इतरथा समत्वाभावे कथं तदाह-यदग्निमयं
ङ्गं जातं तदग्नित्वं कर्तृ विस्फुलिङ्गं स्वकार्यमपरित्यज्य स्वरूपांशेन सत्यांशेन च सर्वांशं व्याप्यैव नियन्तृ प्रवर्तकं भवेत् ।
कारणस्य प्रवृत्त्यभावात्तद्वत् । किं तदिति प्रश्ने तद्दर्शयति-सममनुस्यूतं मणिषु सूत्रमिव प्रोतम् । अत्राक्षिपति-नन्विति ।
समाकारकमिति समपदमावृत्त्या योज्यम् । समं क्वचिदप्यंशेन तुल्यं वस्त्वन्तरं ज्ञात्वा तद्ब्रह्मेति यदन्तार्याम्याख्यं तद्रूपं
अमतम् । अत्र प्रमाणमाह-तथा चेति । यस्य ब्रह्मविद अमतमविज्ञातमविदितं ब्रह्मेति मतम् तस्य मतं ब्रह्म
मिति यस्य पुनर्मतं मया ब्रह्म ज्ञातमिति स न वेदैव । अत एव विजानतां जानीम इति वदतामविज्ञातमज्ञातमेव ।
न जानीम इति वदतां विज्ञातमिति निदर्शनम् । अवचनेनेति । वेदान्तशास्त्रमधीत्य गुरुकुलादागतं पुत्रं पिता पृष्टवान्
ज्ञातवान्न वेति । अविशेषे प्रत्यग्ब्रह्मणि शब्दप्रवृत्तिहेतुजातिगुणादेरभावाद्ब्रह्मवित्त्वप्रद्योतकमुखकान्त्यादिना तदभिनयं
नैव प्रोवाच प्रत्यग्ब्रह्म मयाऽनुभूतमिति सूचितवान् स पिता तूष्णीं बभूव ब्रह्मात्मतत्त्वमयं ज्ञातवानिति निश्चयं
। अन्यदाह-किञ्चेति । मतस्य दुष्टत्वे श्रुतिः-यदीति । यदि कदाचिदस्य ब्रह्मणो यद्रूपमहं सुवेदेति मन्यसे तर्हि दहं

दभ्रं स्वल्पमेवापि त्वं न वेत्थ न जानीषे न केवलमेतावदपि तु अध्यात्मोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो वेदेषु यद्रूपं गीतं तदपि त्वं दभ्रमेव वेत्थेति मन्येऽहं यत्तु निरुपाधिभूमाख्यं ब्रह्म न तत्सुवेद्यमित्यभिप्रायः । मतखण्डनपरेयं श्रुतिः। अन्तर्यामिब्रह्माणम् —"यः पृथिव्यां तिष्ठन्" इत्यादिकं प्रागेव लिखितम् । स्वामिनाम्-अन्तरिति । अन्तर्यामी श्रुत्या गीतो युक्त्या चैवमेवावसेयो निश्चितस्तम् ॥★॥

श्रीधरानुयायिनी —

ननु किमिति लिङ्गाद्युपहितत्वेनैकस्यैव परमस्य पुंसो बहुत्वमुक्तम् । यतः साङ्ख्यादयस्तार्किकाश्च वस्तुत एव बहवो नित्या विभव आत्मान इति मन्यन्ते तत्राहुः-अपरिमिता इति । हे ध्रुव ! जीवा यदि वस्तुत एवानन्तास्तेनैवोपहितरूपेणैव नित्याः सर्वगताः स्वतन्त्राश्चेश्वरवत्स्युस्तदा सर्वेषां तेषां त्वत्तुल्यत्वापत्त्या न शास्यता । सर्वैः सर्वदाऽनुभूयमानमपि त्वच्छासनयोग्यता न स्यादित्यर्थः । तत्रेष्टापत्तौ त्वाह-इति नियमो नेतरथेति । इतीत्यनेन सर्वैः शिष्टैः प्रमाणीकृतः "शास्ता विष्णुरशेषस्य" इति नियमोऽभिनीय दर्शितः, स च नेतरथा कदाप्यन्यथा न भवतीत्यर्थः । "य आत्मानमन्तरो यमयति" इति श्रुतेः "न त्वत्समश्चाभ्यधिकश्च दृश्यते" "स्वतन्त्रो नापरः कश्चिद्विष्णोः प्राणपतेः परः ।" इत्याद्युक्तेश्च । तदेव सयुक्तिकमाह-अजनीति । मुखादिव बिम्बरूपाद्ब्रह्मणः सकाशाद्दर्पणादौ प्रतिमुखमिवाविद्यान्तःकरणादौ प्रतिबिम्बरूपं यज्जीवाख्यं यन्मयमुपाधिप्राधान्येनाजनि उपाधिजन्मना तदध्यासेन जातं तदिदं जीवाख्यं कार्यमत्यजन्नेवोपाधावपि समत्वेनानुस्यूतं कारणीभूतं बिम्बरूपं ब्रह्म सर्वेषां जीवानां स्वतो मिथो व्यावृत्तत्वेन परस्परमनियम्यानां प्रतिमुखानां मुखमिव नियन्तृ भवेत् । तच्च मनोवाचामगोचरमतर्क्यं किमपि सर्वत्रानुस्यूतं साक्षिभूतमित्येव तस्य ज्ञानं नान्यत् अविषयत्वात् "यस्यामतं तस्य मतं मतं यस्य न वेद सः" इत्यादिश्रुतेर्ज्ञातस्य दोषश्रवणाच्च जानीम इति वदतामविज्ञातप्रायम् ॥★॥ विश्वनाथी — तदेवं भगवद्भक्तिप्रतिपादनोपयोगार्थमेव वयमप्येवं जीवस्वरूपं निरूपयाम इत्यन्या आहुः-अपरीति । अत्रैके वदन्ति-एकमेव सर्वव्यापि चैतन्यमेकस्या एवाविद्याया रजस्तमः प्रधानवृत्तिभेदोपाधित्वेनानन्तजीवायते । सत्त्वप्रधानमूलाविद्योपाधित्वेन तु परमेश्वरायते इति । अपरे तु वदन्ति तदसत् अविद्यायाः शुद्धचैतन्याश्रयत्वात् । तन्मूलपक्षान्तराणां च तत एव निरस्तत्वात् तस्मादेवं मन्तव्यम् ईश्वरवत् स्वत एव सिद्धा अनन्ता नित्या विभवश्च जीवा इति । तत्राग्रे स्वतःसिद्धत्वं खण्डयिष्याम इति मनसिकृत्वाऽनन्तत्वं नियतत्वं च यदिशब्दात्पूर्वपाठेन स्वीकुर्वन्यस्तदुत्तरपाठेन विभुत्वं परिहरन्ति-हे ध्रुव ! सर्वाश्रय उभयसम्मतावनन्ता नित्याश्च जीवा यदि सर्वगता विभवो भवन्ति तर्हि जीवानां त्वच्छास्यतेति यो निमयः शास्त्रे निर्णयः स न स्यात्, व्याप्यत्वाभावात् । इतरथा विभुत्वाभावे तु त्वन्नियमो न स्यादिति न किन्तु स्यादेवेत्यर्थः व्याप्यत्वात् । किञ्च-त्वत्तो न कश्चित्पदार्थः स्वतन्त्रोऽस्ति सर्वेषामन्वयैरैक्यश्रवणात् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानाच्च । विशेषतो जीवानां त्वत्तो जन्मापि श्रूयते तत एव त्वव्द्याप्यत्वात्त्वच्छास्यत्वं तेषामित्याहुः-अजनि चेति । यदग्न्यादिमयं स्फुलिङ्गादिकमजनि जातं तदग्न्यादिकमेव तर्तृ स्फुलिङ्गादिस्वकार्यमविमुच्य स्वरूपांशेन शक्त्यंशेनैव वा सर्वांशं व्याप्यैव नियन्तृ भवेत्प्रवर्तकं भवेत् तदभावे तत्प्रवृत्त्यभावात् । किञ्च समं क्वचिदंशे तुल्यं वस्त्वन्तरमनुजानतां यत्किञ्चित्तथा वदन्ति तत्रानुज्ञामपि ददतां यदन्तर्याम्याख्यं त्वद्रूपं परमकारणं वस्तु अमतमज्ञातम् । तत्र हेतुः-मतस्य तस्य दुष्टतया दर्शयिष्यमाणश्रुतित्यक्ततयेति । तस्माद्रवितद्रश्मिपरमाणुवृन्दवत्तदुद्भूतनित्यतटस्थांशरूपाश्चित्परमाणवोऽप्ययस्कान्तादिवत्स्वप्रभावविशेषरूपेण गुणेन गुणाद्वेति न्यायसिद्धेन स्वशरीरमखण्डमपि चेतयन्ति तस्य महानज आत्मेति महद्व्यपदेशश्च प्राज्ञस्येव यत्किञ्चिद्गुणसारत्वादेव लोके महारत्नादिशब्दप्रयोगवत् । तदेवमेव शास्यशासकत्वे सिद्धे सेवकत्वमपि सिद्ध्यतीति पूर्वापरदर्शिता भक्तिः सिद्ध्यतीति भावः । अत्र श्रीगीतोपनिषदः —

"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥" इति ।

भगवदुद्धवसंवादश्च- "महतां च महानहम्" इति महत्त्वस्य स्वरूपपरिमाणानन्तर्येणोक्तत्वात्तथैव जीवस्य परिमाणोक्तौ "सूक्ष्माणामप्यहं जीवः" इति । अत एव विष्णुधर्मोत्तरं —

"बालाग्रशतशो भागः कल्पितो यः सहस्रधा । तस्यापि शतशो भागो जीव इत्यभिधीयते ॥"

श्रुतयश्च —

"एको देव

परमात्मसन्दर्भतट्टीक

नीलकण्ठी

जीवेश्वरयोर्भेदं चाहुस्त

सर्वगता व्यापकाः स्यु

न चैषामदृष्टाद्यचेतनश

धीपूर्वकारिणश्चेतनस्य

"यो विज्ञाने

यस्य विज्ञानं

इति विज्ञानात्म

मध्यमत्वाणुत्वयोरुक्तदो

"घटसंवृतमाक

एक एव तु भूत

इति श्रुत्यनुसारेण

जीवानां शास्यत्वाभावेन

दृश्यन्ते हि दुर्बलैरपि बल

मितमेवाहारं लभन्ते न य

न विभुत्वेन रूपेणेति चे

परस्परं भेदे सिद्धे किम

शब्दग्रहव्यवस्थावदात्मैक्ये

च यन्मयं तदविसुच्य

मायाकार्यान्तःकरणप्रतिबि

इति श्रुतेः प्रतिबिम्

(द्वितीयायाम् ।) जीव एव

नियम्यनियामकत्वं सम्भवति

कारणस्याधिष्ठानस्य वा विक

भवेत् । कथं तत् अविमुच्य

यदमतं मतदुष्टतयेति । "सम

सर्वपर्यायत्वावधारणात् । तेन

साक्षात्कुर्वताम् अमतमज्ञातं प्र

श्रुतयश्च — "बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः" इत्याद्याः । "एको देवः सर्वभूतेषु गूढः" इत्याद्याः । "न तत्समश्चाभ्यधिकश्च दृश्यते" इत्याद्याश्च । अत्र विशेषविचारश्च भगवत्सन्दर्भे त्मसन्दर्भतट्टीकयोश्च दृश्यः (१७) ॥३०॥

नीलकण्ठी — एवं द्वैतस्य मिथ्याभूतमनोमात्रत्वेन जीवस्य ब्रह्माभिन्नत्वेन च ब्रह्माद्वैतं साधितम् । परे तु जीवबहुत्वं योर्भेदं चाहुस्तन्निरस्यति-अपरिमिता इति । हे ध्रुव ! यदि अपरिमिता असङ्ख्याता ध्रुवा अबाध्याः तनुभृतो जीवाः सर्वे व्यापकाः स्युस्तर्हि तेषांन शास्यता स्यात् । पृथिव्यादिवद्विभूनां व्योमादीनां परस्पराधीनत्वादर्शनेन त्वत्तुल्यत्वादित्यर्थः । मदृष्टाद्यचेतनशास्यता युज्यते दृष्टान्ताभावात् । न हि चेतनस्याचेतनः शास्ता क्वचिद्दृष्टोऽस्ति नापि स्वस्य स्वशास्यता कारिणश्चेतनस्य निषिद्धे प्रवृत्त्यनुपपत्तेः ।

"यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद ।

यस्य विज्ञानं शरीरं विज्ञानमन्तरो यमयति य आत्मनि तिष्ठन्नात्मोत्तरः ॥"

इति विज्ञानात्मशब्दवाच्याज्जीवात्तच्छास्तुः पृथगाम्नानात् । तस्मात्त्वच्छास्यानां जीवानां त्वत्तौल्यत्वं वाच्यम् । तच्च त्वाणुत्वयोरुक्तदोषात् —

"घटसंवृतमाकाशं नीयमाने यथा घटे । घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः ॥

एक एव तु भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥"

इति श्रुत्यनुसारेण घटाकाशवज्जलचन्द्रवदौपाधिकां बोध्यम् । ननु, शास्यतैव मास्त्वित्याशङ्क्याह-इतीति । इतरथा नां शास्यत्वाभावेन प्रवृत्तेर्यादृच्छिकत्वाभ्युपगमे इति नियमो न स्यात् । इतिशब्देन दृश्यमानं नियममभिनीय दर्शयति न्ते हि दुर्बलैरपि बलवन्तो बाध्यन्ते अनिरुद्धा अपि व्याघ्रादयः स्वभक्ष्यैर्नृपशुभिः परिपूर्णेऽपि भुवने क्षुधा पीड्यमाना वाहारं लभन्ते न यथेष्टम् । सोऽयं नियमः शास्यत्वाभावे न स्यादित्यर्थः । ननु देहेन्द्रियावच्छेदेन जीवानां शास्यत्वं विभुत्वेन रूपेणेति चेत्तर्हि- "कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ।" इति श्रुतेरौपाधिके जीवेश्वरयोर्जीवानां च भेदे सिद्धे किमन्तर्गडुना तेषां विभुत्वेन बहुत्वेन वा । तर्कमते श्रोत्रैक्येऽपि कर्णशष्कुलीरूपोपाधिभेदेन व्यवस्थावदात्मैक्येऽप्युपाधिभेदादेव शास्यशासितृविभागस्य बन्धमोक्षव्यवस्थायाश्च सिद्धेरित्याशयवानाह-अजनि न्मयं तदविसुच्य नियन्तृ भवेदिति । अत्र द्वयी प्रक्रिया-उदाहृतश्रुतेर्मायाप्रतिबिम्बितं चैतन्यमीश्वरः, कार्यान्तःकरणप्रतिबिम्बितं जीवः, बिम्बस्थानीयं शुद्धं चैतन्यं तृतीयमित्येका ।

"यथा ह्ययं ज्योतिरात्मा विवस्वानथो भिन्ना बहुधैकोऽनुगच्छन् ।

उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥"

इति श्रुतेः प्रतिबिम्बो जीवः, बिम्बभूत ईश्वरः, इति चिद्द्वैविध्यरूपाऽपरा । तत्राद्यायामुभावप्यध्यस्तौ परस्यां यायाम् ।) जीव एव । तथा च कार्यकारणोपाधिकयोरध्यस्ताधिष्ठानस्वरूपयोर्वा जीवेशयोर्मिथो वियोगाभावेन नियामकत्वं सम्भवति । परेषां तु तटस्थस्येश्वरस्य नान्तर्यामित्वं सम्भवतीत्याशयः । अक्षरार्थस्तु-यन्मयं यस्य धिष्ठानस्य वा विकारो विवर्तो वा यत् कार्यं घटादि रजतादि वा तस्य कार्यस्य तन्मृच्छुक्त्यादिरूपं नियन्तृ । कथं तत् अविमुच्य अपरित्यज्य । कार्यमिति । यन्मयं कार्यं तत्किंविधमित्यपेक्षायामाह-सममनुजानतां मतदुष्टतयेति । "समं सर्वं नमन्तामन्यके समे" "माभूवन्नन्यके सर्वे" इति मन्त्रतन्निरुक्ताभ्यां समशब्दस्य त्वावधारणात् । तेन समं कारणं ब्रह्मेत्यर्थः । अस्य तात्त्विकं रूपमाह-यदनुजानताम् । शास्त्राचार्योपदेशमनु जानताम् अमतमज्ञातं प्रत्यक्त्वेनाविषयत्वात् । "अदृष्टं द्रष्टृ अमतं मन्तृ अज्ञातं विज्ञातृ" इति श्रुतेः ।

अमतत्वे हेतुः-मतदुष्टतयेति। मतस्य ज्ञातस्य घटादिवदनात्मत्वेन ''अतोऽन्यदार्तम्'' इति श्रुतेर्मिथ्यात्वापत्तिदोषग्रस्ततया यत् ज्ञातं तन्न ब्रह्मेत्यर्थः । तथा च श्रुतिः—

''यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम् ॥

यदि मन्यसे सुवेदेति दह्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम् ॥'' इति (१७) ॥३०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अपरिमिता इत्यस्य टीकायामेकैकांशस्य बन्धमोक्षौ स्थापयित्वा सर्वांशेऽप्यनिर्मोक्षप्रसङ्गस्य सिद्धान्तमाह-ईश्वरस्य त्विति। समष्ट्युपाधेरखण्डतत्त्वस्येश्वरत्वात्तस्य च विद्याशक्तिप्रधानत्वादित्यर्थः । श्रुतौ तु अवचनेनेति वेदान्तमधीत्यागतं पुत्रं पिता पृष्टवान्, प्रत्यग्ब्रह्म त्वं ज्ञातवान् न वेति । तत्रोत्तरमिदमिति ज्ञेयम् । दह्रमित्यल्पमेवेत्यर्थः । यदस्य ब्रह्मणो रूपमिति पूर्वेण सम्बन्धः । न केवलमध्यात्मोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो रूपं त्वं दभ्रमल्पं वेत्थ । तदप्यधिदैवतोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो रूपं तदपि त्वं दभ्रमल्पं वेत्थेति मन्येऽहमिति । अथ स्वव्याख्यायाम् — तदेवं भगवद्भक्तिप्रतिपादनोपयोगार्थमेव वयमप्येवं जीवस्वरूपं निरूपयाम इत्यन्या आहुः-अपरीति । अत्रैके वदन्ति-एकमेव सर्वव्यापि चैतन्यमेकस्या एवाविद्याया रजस्तमः प्रधानवृत्तिभेदोपाधित्वेनानन्तजीवायते। सत्त्वप्रधानमूलाविद्योपाधित्वेन तु परमेश्वरायते इति। अपरे तु वदन्ति तदसत् अविद्यायाः शुद्धचैतन्याश्रयत्वात् । तन्मूलपक्षान्तराणां च तत एव निरस्तत्वात् तस्मादेवं मन्तव्यम् ईश्वरवत् स्वत एव सिद्धा अनन्ता नित्या विभवश्च जीवा इति । तत्राग्रे स्वतःसिद्धत्वं खण्डयिष्याम इति मनसिकृत्वाऽनन्तत्वं नियतत्वं च यदिशब्दात्पूर्वपाठेन स्वीकुर्वन्यस्तदुत्तरपाठेन विभुत्वं परिहरन्ति-हे ध्रुव ! सर्वाश्रय उभयसम्मतावनन्ता नित्याश्च जीवा यदि सर्वगता विभवो भवन्ति तर्हि जीवानां त्वच्छास्यतेति यो निमयः शास्त्रे निर्णयः स न स्यात्, व्याप्यत्वाभावात् । इतरथा विभुत्वाभावे तु त्वन्नियमो न स्यादिति न किन्तु स्यादेवेत्यर्थः व्याप्यत्वात्। किञ्च-त्वत्तो न कश्चित्पदार्थः स्वतन्त्रोऽस्ति सर्वेषामन्वयैरैक्तम्यश्रवणात् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानाच्च। विशेषतो जीवानां त्वत्तो जन्मापि श्रूयते तत एव त्वद्व्याप्यत्वात्त्वच्छास्यत्वं तेषामित्याहुः-अजनि चेति। यदग्न्यादिमयं स्फुलिङ्गादिकमजनि जातं तदग्न्यादिकमेव तर्तृ स्फुलिङ्गादिस्वकार्यमविमुच्य स्वरूपांशेन शक्यांशेनैव वा सर्वांशं व्याप्यैव नियन्तृ भवेत्प्रवर्तकं भवेत् तदभावे तत्प्रवृत्त्यभावात्। किञ्च समं क्वचिदंशे तुल्यं वस्त्वन्तरमनुजानतां यत्किञ्चित्तया वदन्ति तत्रानुज्ञामपि ददतां यदन्तर्याम्याख्यं त्वद्रूपं परमकारणं वस्तु अमतमज्ञातम् । तत्र हेतुः-मतस्य तस्य दुष्टतया दर्शयिष्यमाणश्रुतित्यक्ततयेति । तस्माद्रवितद्रश्मिपरमाणुवृन्दवत्तदुद्भूतनित्यतटस्थांशरूपाश्चित्परमाणवोऽप्ययस्कान्तादिवत्स्वप्रभावविशेषरूपेण गुणेन गुणाद्वेति न्यायसिद्धेन स्वशरीरमखण्डमपि चेतयन्ति तस्य महानज आत्मेति महव्द्यपदेशश्च प्राज्ञस्येव यत्किञ्चिद्गुणसारत्वादेव लोके महारत्नादिशब्दप्रयोगवत्। तदेवमेव शास्यशासकत्वे सिद्धे सेवकत्वमपि सिद्ध्यतीति पूर्वापरदर्शिता भक्तिः सिद्ध्यतीति भावः। अत्र श्रीगीतोपनिषदः —

''यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥'' इति।

भगवदुद्धवसंवादश्च- ''महतां च महानहम्'' इति महत्त्वस्य स्वरूपपरिमाणानन्तर्येणोक्तत्वात्तथैव जीवस्य परिमाणोक्तेः ''सूक्ष्माणामप्यहं जीवः'' इति। अत एव विष्णुधर्मोत्तरं —

''बालाग्रशतशो भागः कल्पितो यः सहस्रधा। तस्यापि शतशो भागो जीव इत्यभिधीयते ॥''

श्रुतयश्च — ''बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः'' इत्याद्याः । ''एको देवः सर्वभूतेषु गूढः'' इत्याद्याः । ''न तत्समश्चाभ्यधिकश्च दृश्यते'' इत्याद्याश्च । अत्र विशेषविचारश्च भगवत्सन्दर्भ-परमात्मसन्दर्भतट्टीकयोश्च दृश्यः ॥१७॥३०॥

ननु प्रोक्त

प्रतिमहाकल्पं कोटि

स्युः । भक्त्या तेषा

स्युः, ततस्त्वया सा

विस्फुलिङ्गादिकमज

क्षुद्रत्वाच्च । द्विविध

पारिषद्गणे, अन्तिमा

परमात्मलक्षणमहाचै

श्रीविष्णुधर्म्मोत्तरे —

''कल्पानां ज

एकैकस्मिन्

इति श्रीवज्रेण

''जीवस्थानस

ब्रह्मणा सह मु

सर्व्वजीवाः प्र

जीवानां स

अप्यनुपस्थितकर्म्मभोग

तत्र कल्पे प्रादुर्भावनमेव

श्रुत्या प्रतिपादनात्, तथा

'सूक्ष्माणामप्यहं

जीव इत्यभिधीयते ॥'

इति विष्णुधर्मोत्त

व्याप्नोति, तथायमणुरपि च

तथा च ब्रह्माण्डपुराणे —

''अणुमात्रोऽप्ययं

किन्तु यद्यपि साम

स्वरूपं सर्वतो विलक्षणमेव

[घ, ङ] ।) सममिति । प्रि

मतस्य ज्ञानस्य दुष्टतया त

आहुः-सममिति । रुद्रादीना

पत्तिदोषग्रस्ततया

द्धान्तमाह-ईश्वरस्य
धीत्यागतं पुत्रं पिता
णो रूपमिति पूर्वेण
च्छिन्नस्यास्य ब्रह्मणो
गार्थमेव वयमप्येवं
वाविद्याया रजस्तमः
त तदसत् अविद्यायाः
सिद्धा अनन्ता नित्या
यदिशब्दात्पूर्वपाठेन
र्वगता विभवो भवन्ति
भावे तु त्वन्नियमो न
यश्रवणात् एकविज्ञानेन
मित्याहुः-अजनि चेति।
शक्यांशेनैव वा सर्वांशं
मनुजानतां यत्किञ्चित्तथा
:-मतस्य तस्य दुष्टतया
णवोऽप्ययस्कान्तादि-
ति महद्व्यपदेशश्च प्राज्ञस्येव
सिद्ध्यतीति पूर्वापरदर्शिता

इति।

त्तथैव जीवस्य परिमाणोक्तौ

।।"

' इत्याद्याः। "एको देवः
षविचारश्च भगवत्सन्दर्भे

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु प्रोक्तानां जीवानां किं स्वरूपमित्यपेक्षायां प्रथमं परमतव्याक्षेपेण तेषां स्वरूपमाहुः-अपरिमिता इत्यसङ्ख्याः, तिमहाकल्पं कोटिशो मुच्यमानेष्वपि जीवेष्वनादिना कालेनापि तेषां बाहुल्यभावस्यादर्शनात्। ध्रुवा वैष्णवानां मते नित्या एव यु:। भक्त्या तेषामविद्योपाधिषु लिङ्गदेहादिषु लीनेषु विशुद्धचिद्देहाविर्भावात्, किन्तु अनन्ता ध्रुवाश्च यदि सर्वगता व्यापकाः यु:, ततस्त्वया साम्याच्छास्यता न स्यात्, इतरथा उक्ताद् व्यापकत्वादेरन्यप्रकारेण तमेवाहुः- अजनीति। यन्मयं यद्वह्निमयं विस्फुलिङ्गादिकमजनि, तद्वह्निरूपमविमुच्य स्वीयतया तत् स्वीकृत्य तस्य विस्फुलिङ्गादेर्नियामकं भवेत्, - निजांशत्वात् तत्वाच्च। द्विविधा हि चिच्छक्तिः - परमोत्तमा सामान्या च। तत्राद्या श्रीभगवत्येव विराजते, यस्या वृत्तिविशेषस्तत्प्रसादेन पार्षद्गणे, अन्तिमा तु कालप्रधानजीवादिषु वर्तते, इत्यतः सामान्यचिच्छक्तिवृत्तिविशिष्टा वह्नेर्विस्फुलिङ्गा इव महाप्रलयस्यान्ते समात्मलक्षणमहाचैतन्यरूपाद्वासुदेवाच्चिद्रूपा अनाद्यविद्याभाजो जीवा अपि व्यक्तिं यन्तीति श्रीभगवन्नियम्या एवामी। ननु श्रीविष्णुधर्म्मोत्तरे —

"कल्पानां जनसाम्ये हि मुक्तिर्नैवोपपद्यते। कदाचिदपि धर्म्मज्ञ तत्र पृच्छामि कारणम्॥
एकैकस्मिन् नरे मुक्तिं कल्पे कल्पे गते द्विज। अभविष्यज्जगच्छून्यं कालस्यादेरभावतः॥" इति।

इति श्रीवज्रेण पृष्टो मार्कण्डेयः प्राह —

"जीवस्थानस्य सर्गेण नरे मुक्तिमुपागते। अचिन्त्यशक्तिर्भगवान् जगत्पूरयते सदा॥
ब्रह्मणा सह मुच्यन्ते ब्रह्मलोकमुपागताः। सृज्यन्ते च महाकल्पे तद्विधाश्चापरा जनाः॥
सर्व्वजीवाः प्रमाणाः (जीवप्रमाणाः [घ, ङ]।) स्युः सर्वे कल्पास्तथा नृप॥" इति॥

जीवानां सर्गश्रवणात् कथं तेलऽनादयः? उच्यते। सत्यम्, कुटीभूतकर्म्मकदम्बा यनुपस्थितकर्म्मभोगत्वाद्भगवन्मायाशक्तिविशेषगह्वर एवानन्ताः खलु जीवानां गणा लीना वर्तन्ते। तेषां मध्यात् केषाञ्चित्तत्र कल्पे प्रादुर्भावनमेव सर्गः, न तु नूतनजीवसृष्टिरिति सर्व्ववादिनां सम्भूतम्। वैष्णवसिद्धान्ते च अणव एव आराग्रमात्रत्वेन प्रतिपादनात्, तथा (भा० ११/१६/११) —

'सूक्ष्माणामप्यहं जीवः' इति श्रीभगवद्वचनात्, 'बालाग्रशतशो भागः कल्पितो यः सहस्रधा। तस्यापि शतशो भागो इत्यभिधीयते॥'

इति विष्णुधर्मोत्तरवचनाच्च। तेषामणुत्वेऽपि देहव्यापिचैतन्यं सम्भवेदेव। यथा गृहैकदेशस्थोऽपि दीपः सर्वं गृहं तेजसा ति, तथायमणुरपि चेतनालक्षणेन स्वप्रभावविशेषेण सर्व्वदेहं चेतयति। यथा अयस्कान्तः स्वसन्निहितं लोहं चालयतीति। च ब्रह्माण्डपुराणे —

"अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति। यथा व्याप्यशरीराणि हरिचन्दनविप्रुषः॥" इति।

किन्तु यद्यपि सामान्यतः सर्व्वजीवानां स्वरूपमिदमुक्तम्, तथापि भक्तिप्रभावेणाविर्भूतालौकिकशक्तीनां भगवत्प्रियाणां सर्वतो विलक्षणमेव। ते हि भक्तैकप्रियतयैव श्रीभगवन्तमनुभवन्ति, तदितरे तु सर्वत्र समतयैवेति तद्विदन्ति (तन्निन्दन्ति ङ]।) सममिति। प्रियेषु प्रियतरेषु च श्रीभगवन्तं सममनुजानताम्। यद्वा, जीवानां नियम्यत्वात्तैस्त्वां सममनुजानताम्, ज्ञानस्य दुष्टतया तदमतम्, अज्ञानमेवेत्यर्थः। यद्वा, ननु भवन्तु ते जीवास्तस्य नियम्याः, रुद्रादयस्तु तत्समा एवेत्यत सममिति। रुद्रादीनामपि समं तुल्यमिति॥३०॥

[ननु व्रजवासिषु मत्प्रेमा कथं ज्ञात: ? तेषां गोपानां पशूनां च सर्वेषां पुत्रत्वस्वीकारादिति चेन्न, ते खलु जीवा एव भवन्तु किमिति मद्रूपा इत्युच्छन्ते। इत्यत आहु:-अपरिमिता इति। वत्सवत्सपालादिषु ब्रह्मणा हृतेषु ये केऽप्यपरिमिता असङ्ख्या ध्रुवा नित्या: सर्वगता व्यापका: प्रादुर्भूतास्ते यदि तनुभृतो जीवा: स्यु:, तर्हि हे ध्रुव ! त्वया सह तेषां सर्वथा साम्यात् शास्यता न स्यात् इति नियमनं त्वदिच्छैकमयता न स्यात्, इतरथा तेषां तादृशजीवत्वं विना सम्भवेदित्यर्थ:। तदेवाहु:-अजनीति। यन्मयं यस्य तव स्वरूपभूतं वत्सपालादिरूपमजनि प्रादुर्भूतम्, तत् तव स्वरूपं वत्सपालादिरूपस्य निजरूपत्वेन नियन्तृ प्रादुर्भावतिरोभावादिषु समर्थं भवेत्, तस्मात् त्वद्रूपा एव ते न तु जीवा इत्यर्थ:। यद्यपीयं लीला पूर्व्वं (१९श-श्लो.) 'स्वकृतविचित्रयोनिषु' इत्यत्रोद्दिष्टा; तथापि परममाधुर्य्यात् पुनरुच्यत इत्यदोष:। ननु ब्रह्मरुद्रादीनां मत्साम्यादेते त्वद्रूपा: किं न स्युरित्यत आहु:-सममिति। त्वत्सममन्यमनुजानतां यन्मतं तस्य मतस्य दुष्टतया तदमतमेव, ब्रह्मरुद्रादिभिस्तवाभेदेऽपि परमैश्वर्यादिषु परमवैसादृश्यादित्यर्थ:। तथा च श्रुति: (श्वे० ६/८)

"न तस्य कार्य्यं न करणं च विद्यते, न तत्समश्चाभ्यधिकश्च दृश्यते।" इति ॥३०॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अथ जीवानाम् अणुत्वं परस्य तदन्त: प्रविश्य नियन्तृत्वं चाह-अपरिमिता इति। अपरिमिता: असङ्ख्येया: जीवा: सर्वगताश्चेत् ध्रुवा: अस्पन्दा: स्यु:। उत्क्रान्तिगत्या गतिश्रुतिविरोध: स्यात्। तनुभृत इति सर्वेषां शरीरसम्बन्धेन सर्वशरीराचरितपुण्यपापानां सर्वसाधारणत्वेन व्यवस्थितफलदानायोगात्, शासनं नोपपद्यते। इतरथा असर्वगतत्वे अध्रुवत्वे स्पन्दनवत्त्वे अणुत्वे अध्रुवतास्पन्दनवत्त्वम्। उत्क्रान्तिगत्या गतयश्चोपपद्यन्ते इत्यर्थ:। शासनोपपत्ति: स्फुटत्वादनभिहिता। यद्वा। इतरथा शासनीयत्वे अध्रुवतास्पन्दनवत्त्वम् अणुत्वं स्वीकार्यमित्यर्थ:। प्रशासनं चान्त:प्रविश्येत्याह-अजनि चेति। यन्मयम् अजनि। व्यापकेन प्रचुरं जगदजनि तद्ब्रह्म अविमुच्य नियाम्यत्वमविमुच्य अन्त:स्थितत्वेन नियन्तृत्वमिति समजानतां सम्यगजानतां यन्मतदुष्टतया दुष्टमतत्वात्। अमतम् अनभिमतमित्यर्थ: ॥३०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

'स्थिरचरजातय: स्यु'रित्यनेन चराचरात्मकस्थूलसूक्ष्मशरीरान्त:प्रवेशयोग्यं जीवानां स्वाभाविकं स्वाभाविकपरमाणुस्वरूपत्वं सूचितम्। तद्विरुद्धं जीवस्वरूपविभुत्ववादं दूषयन्ति-अपरिमिता इति। हे ध्रुव नित्य ! तनुभृतो जीवा: अपरिमिता: असङ्ख्येया: ध्रुवा नित्याश्च। ते यदि सर्वानुगतास्तर्हि न शास्यता सर्वेषां तुल्यत्वात् परमात्मना जीवान्तरेण वा शास्यता नियम्यता नोपपद्येत। इतीत्थं नियम: उत्क्रान्तिगत्या गत्यादिविषय: नित्यं श्रूयमाणो नोपपद्यते उत्क्रान्तिस्तावच्छ्रूयते- 'तेन प्रद्योतेनैष आत्मा निष्क्रामति। चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्य:।' इति गतिरपि 'ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति।' इति आगतिरपि। 'तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे।' इति इतरथा अणुत्वे तु शास्यता नियमादय उपपद्यन्त इत्यर्थ:। यद्यपि शरीरवियोगरूपत्वेन उत्क्रान्ति: शरीरस्थितस्याप्यात्मन: कथञ्चिदुपपद्यते गत्या गती तु न कथञ्चिदुपपद्यते। अतस्ते स्वात्मनैव सम्पाद्ये इत्यभिप्रायेण नियमशब्द: प्रयुक्त: तथा च शारीरकं सूत्रम्- 'स्वात्मना चोत्तरयो:।' इति चशब्दोऽवधारणे। तनुभृत इत्यनेन सर्वेषां सर्वशरीरसम्बन्धाविशेषात् सर्वशरीरानुचरपुण्यपापानां सर्वसाधारणत्वेन व्यवस्थितफलादानायोगाच्छासनं नोपपद्यत इत्यात्मविभुत्ववादेऽनुपपत्तिरुद्घाटिटा। अपरिमिता इत्यनेन जीवैक्यवादव्युदास:। तत्र बन्धमोक्षशिष्याचार्यत्वाज्ञत्वादिव्यवस्थानुपपत्तिदूषणमभिप्रेतम्। नन्वणुत्वपक्षेऽपि जीवानां परमात्मशास्यता किं भृत्यादीनां राजा शास्यते वेत्यपेक्षायामन्त:प्रविश्यैवेत्याहु:-अजनि चेति। यन्मयमजनि व्यापकेन येन प्रचुरं जगदजनि जातं तद्ब्रह्म अविमुच्यान्त: स्थित्वैव नियन्तृ(न्ता)इति सम्यगजानतां यन्मतं तस्य मतस्य दुष्टत्वादमतमनभिमतं प्रामाणिकानामिति शेष:। सममनुजानतामिति पाठान्तरं तत्र समशब्द: सर्वपर्याय:। समं सर्वं तत् जगत् अविमुच्य अन्त:स्थित्वैव नियन्तृ इत्यनुजानतां प्रामाणिकानां यदमतमनभिमतं तदनादरणीयमित्यध्याहार:। कुतस्तस्य मतस्य दुष्टतया प्रमाणविरुद्धतयेत्यर्थ:। जगदजनीति प्रकृतिपुरुषात्मकजगदुत्पत्तिरुक्ता ॥३०॥

मूलम्

"अजन परि

न घटत उद्भव

"मुच्यते तत्त्व

इति कलापश्रुत

"देशत: काल

इति कौटरव्यश्रु

हे अजन ! लोक

सम्यक् ज्ञानवताऽऽचार्येण

मुक्तो भवति। कथमनुजा

घटत इति यतस्तत: प्रकृति

भवति। तदुभययो: प्रकृति

इत्युभययुजो:। तत्र दृष्टान्त

"सम्यग्ज्ञानवदाच

इति स्मृते: ॥१८॥

तदेवं भगवद्भक्तिप्र

ननु स्थिरचरजातीनां

सर्वे ध्रुवा:। अत: स्वतन्त्राश्च

ध्रुवास्तदा तव ध्रुवत्वं तेषामपि

सर्वगता: व्यापका ध्रुवा नित्या

केवलमित्येव न अपि तु अप

सर्वगताश्च। तथापि तेषां शास्यतै

अजनि यदंशत्वेन यन्मयं जातं

अविसदृशमित्यर्थ:। अतो अंश

इति वदतां यत् अमतम् अनिर्वच

न भवसि। यो ज्ञेयो न भवति स

"ममैवांशो जीवलोके

अतस्त्वमेवामत: त्वमेव

वाक्यार्थ: ॥३०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

"अजन परिमुच्यतेऽत्र भवात्सततात्सममनुजानता ततमनन्तमदुष्टतया ।

न घटत उद्भवः प्रकृतिपूरुषयोरजयोरुभययुजोर्भवन्त्यसुभृतो जलबुद्बुदवत्" ॥१८॥३२॥

"मुच्यते तत्त्वसम्बुद्धादाचार्यात् पुरुषो भवात् । एतावेव स्वतो बद्धौ परमः प्रकृतस्तथा ॥"

इति कलापश्रुत्यर्थतया —

"देशतः कालतश्चैव समव्याप्तावजावुभौ । ताभ्यामुभययोगाभ्यां जायन्ते पुरुषाः परे ॥"

इति कौटरव्यश्रुत्यर्थतया च ग्रथितस्याजनपरिमुच्यते इत्यस्यायं भावः ।

हे अजन ! लोकविलक्षण ! जन्मरहितेति वा समम् एकप्रकारतया ततं व्याप्तम् । अनन्तमदुष्टतया निर्दोषत्वेन अनुजानता म्यक् ज्ञानवताऽऽचार्येण उपदिष्टमार्गेण अत्र जगति ज्ञानवान् पुरुषः सततात्सन्ततमज्ञानकल्पिताद्भवात्संसारात्परिमुच्यते सम्यक् भवति । कथमनुजानतेति तत्राह–नेति । अजशब्दस्य अनेकवृत्तित्वेनानिश्चय इत्यतः प्रकृतिपूरुषयोरिति तयोरुद्भव उत्पत्तिर्न इति यतस्ततः प्रकृतिपूरुषौ विनाऽन्यो बन्धनरहितो न विद्यते । मुख्यतोऽजशब्दप्रवृत्तिनिमित्तान्यथानुपपत्त्या न घटत इत्युक्तं ति । तदुभययोः प्रकृतिपूरुषयोर्युजोर्योगयोरसुभृतो जीवा भवन्ति । देशतः कालतश्च यत्र परमस्तत्र प्रकृतिर्यत्र प्रकृतिस्तत्र परमः भययुजोः । तत्र दृष्टान्तः–जलबुद्बुदवत् । जलबुद्बुदानि यथोत्पद्यन्ते तथेति —

"सम्यग्ज्ञानवदाचार्यान्मुच्यते पुरुषो भवात् । द्वावेव नित्यमुक्तौ तु परमः प्रकृतिस्तथा ॥"

इति स्मृतेः ॥१८॥३२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवं भगवद्भक्तिप्रतिपादनोपयोगार्थमेवं वयमप्येव जीवस्वरूपं निरूपयाम इत्यन्या आहुः–अपरिमिताः ॥३०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु स्थिरचरजातीनां मद्विहारे मदीक्षया अजया निमित्तभूतयोत्पन्नत्वमुक्तं तत्कथं सङ्गच्छताम् । यतोऽपरिमिताः जीवाः ध्रुवाः । अतः स्वतन्त्राश्च कुतो वा तेषां मदंशत्वं मदधीनत्वं चेत्याशङ्क्याहुः–अपरिमिता इत्यादि । हे ध्रुव ! नित्या यदि तनुभृतो तव ध्रुवत्वं तेषामपि च ध्रुवत्वे साम्यात् शास्ता न घटते इति कृत्वा नियमो नियमनं न स्यात् । येऽपरिमिता अनन्ताः ताः व्यापका ध्रुवा नित्या भवन्ति तेषां को नियन्ता इतरथा अन्यथा यदि अपरिमितादयो न भवन्ति तदैव नियमनं स्यात् । मित्येव न अपि तु अपरिमितया एव जीवास्त्वदंशत्वात् अहं बहुस्यामिति बहुशब्दोऽपरिमितपरः । तेन त्वदंशाः ध्रुवाः श्च । तथापि तेषां शास्यतैव । ततो नियमनं चेत्याहुः–अजनीत्यादि । चकारः पक्षान्तरं सूचयति । यज्जीवाख्यं वस्तु यन्मयम् यदंशत्वेन यन्मयं जातं तत् अंशिरूपं वस्तु नियन्तृ भवेत् । अविमुच्य कारणत्वमविहाय । यतः समम् अंशत्वेन समम् शमित्यर्थः । अतो अंशानामंशी नियन्ता भवतीति भावः । ननु स एतावत् कस्तन्निरूप्यतामित्याहुः–अनुजानतां जानीम तां यत् अमतम् अनिर्वचनीयं वस्तु अमतम् अविज्ञातमतं चेत्को दोष इत्याहुः–मतदुष्टतया । मतं यत् तद्दुष्टम् अतस्त्वं ज्ञेयो सि । यो ज्ञेयो न भवति स एवांशीति त्वदंशास्तु जीवा न चैतद्वक्तव्यम् । मदंशा न भवन्ति जीवाः । यतः —

"ममैवांशो जीवलोके जीवभूतः सनातनः ।" इति तवैवोक्तेः ।

अतस्त्वमेवामतः त्वमेवांशी । अतो नियन्ता च, न तु जीवः उक्तप्रकारा परिमितध्रुवादिमन्तोऽपि न स्वतन्त्रा इति ॥३०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ननु स्थिरचरजातीनां मदीक्षया मद्विहारे अजया निमित्तभूतया उत्पन्नत्वमुक्तं भवतीति तत् कथं सङ्गच्छताम्, यतो जीवा अपरिमिता ध्रुवाः, अतः स्वतन्त्राः, अतः कुतो वा तेषु मदंशत्वमित्याशङ्क्याहुः- अपरिमिता इत्यादि। हे ध्रुव नित्य! नित्यस्त्वमेवेत्यर्थः। यदि तनुभृतो जीवा ध्रुवास्तदा तव ध्रुवत्वे तेषामपि ध्रुवत्वे च साम्यात् 'साम्यता न घटते' इति कृत्वा नियमो नियमनं तेषां न स्यात्। ते कीदृशाः ? अपरिमिता अनन्ताः सर्वगता ध्रुवा इव, समत्वे विशेषणद्वयम्। इतरथा अन्यथा तु एतद्वैपरीत्ये नियमनं स्यात्। कुत इत्याह- अजनीत्यादि। यज्जीवाख्यं वस्तु यन्मयमजनि तदंशत्वेन यन्मयं जातम्, तदंशिरूपम् वस्तु नियन्तृ भवेत्, अविमुच्य कारणत्वमविहाय, यतः सममंशभावेनैव सममविसदृशम्, अतोंऽशस्यांशी हि नियन्ता भवति। ननु अंशी तावन्निरूप्यताम्, यत्तद्भ्यां किं निर्दिश्यते इति स त्वं निरूपितो भवतीत्याहुः- अनुजानतां जानीम इति वदतां त्वमित्यनिर्वचनीयं वस्तु अमतमविज्ञातं मतं चेत् सदोष इत्याहुः- मतदुष्टतया मतं यत्तद्दुष्टम्, अतस्त्वं ज्ञेयो न भवसि, त्वदंशो एव जीवाः, त्वं सर्वनियन्ता सर्वकारणकारणमिति ॥३०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अत्र स्थिरचरजातिजीवतत्त्वविचारवादिनां नानाविधान्येव मतानि। तत्र यद्येकैवाविद्या एक एव जीव इति मतं तर्ह्येकमुक्तौ सर्वमुक्तिप्रसङ्गः। यदि च नाना अविद्यास्तर्हि तस्यैवांशान्तरेण संसारानपगमादनिर्मोक्षस्तस्माद्बहव एवात्मनस्तत्र तेषामणुपरिमाणत्वे देहव्यापिचैतन्यं न स्यात्। देहमात्रव्यापित्वे मध्यमपरिमाणत्त्वे नानित्यत्वं स्यात्। तस्मात्ते सर्वगता नित्याश्च न तु जन्यास्तत्र न तावदुक्तदोषप्रसङ्गः। अविद्याभेदेन तच्छक्तिभेदेन वा बद्धमुक्तव्यवस्थासम्भवादित्येतन्मतमप्यन्ये न सहन्त इति तन्मतमनुवदन्ति-अपरिमिताः असङ्ख्या एव तनुभृतो जीवाः यदि ध्रुवा नित्या एव न तु त्वज्जन्या सर्वगता एव च स्युस्तर्हि तेषां त्वज्जन्यत्वे सति जन्यत्वादेवासर्वगतत्वे च सति त्वच्छास्यत्वाभावो न स्यात्। किन्तु त्वच्छास्यतैव घटत इत्यर्थः। कथम्। यन्मयं यत्कार्यं जीवाख्यं वस्त्वजनि। तत् किल ब्रह्म तेषां जीवानां नियन्तृशास्तृ भवेदेव। किं कृत्वा। तदविमुच्य। कारणतया तान् जीवान् अपरित्यज्य तद्ब्रह्मैव किं तत्राहुः-समं यत् सर्वान् जीवान् प्रति अन्तर्यामित्वांशेन समं तुल्यमित्यर्थः। ननु किं यत्तच्छब्दैर्ज्ञायते चेदुच्यतामिदं तदिति तत्राहुः-अनुजानतां यदमतमिति। जानीम इति वदतां यत् ब्रह्म अमतम् अज्ञातप्रायम्। किञ्च। मतस्य ज्ञातस्य दुष्टतया दोषश्रवणाच्च। अत्र श्रुतयः —

यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजातनाम् ॥इति॥

"अवचनेनैव प्रोवाचेति सह तूष्णीं बभूवेति यदि मन्यसे सुवेदेति दभ्रमेवापि। नूनं त्वं वेत्थ ब्रह्मणो रूपम्। यदस्य त्वं तदस्य देवे"ष्वित्याद्याः ॥

अर्थश्च — अस्य ब्रह्मणो यद्रूपं तत् यदि सुवेद सुवेद्मीति मन्यसे तर्हि त्वम् दभ्रमेव वेत्थेत्यन्वयः। यदस्य देवेष्वधिदेवादिषु रूपं त्वं मन्यसे तदप्यल्पमेवेति पूर्वेणैवान्वयः ॥३०॥

गूढार्थदीपिनी

ननु स्थिरचरजातीनां त्वत्त एवोत्पन्नत्वादन्तर्यामितया नियन्तृत्वमपि तवैव तदा स्यात् यदा तार्किकाभिमतं जीवस्य विभुत्वादिरूपं खण्डितं स्यादन्यथा समत्वान्नियन्तृत्वं दुर्घटम् अतः पूर्वं तन्मतं खण्डयन्त्यस्तस्य नियन्तृत्वं सोपपत्तिकं श्रुतयो द्रढयन्ति-अपरिमिता इति।

(तार्किकमतखण्डनपरेयम्)

पद्यानुवादः

बहुविभुध्रुवता★ यदि जीवगा तव न शासकताऽजनि यद्यतः।
तदिह तस्य नियन्तृ विजानतामविदितं विदितं यदजानताम् ॥१७॥

★ [

सङ्क्षि
घटते इति कृत्व
वस्तु अजनि तत्
वेदान्तिनां यत् अ

हे ध्रुव
तर्हि तेषां समत्वा
असर्वगतत्वे च
स्यादेवेति काकुः
यो नियमः स च
कर्मकारणरूपं ब्रह्मै
इति गीतोक्तेः। यद्
जानतां "वयं ब्रह्म
घयदिज्ञानवदनात्मत

"यस्यामतं

वस्तुतस्तु भ
तस्य मतमनुभूतिविष
मतं स कोटिजन्मस्वा
अविज्ञातं कदापि न ज्ञ
वासुदेवस्तस्य विशिष्टे
तन्निरूप्य तद्रसास्वा
जीवस्वरूपमपरिमिता
सर्वमुक्तिप्रसङ्गः। यदि
बद्ध इत्थमनिर्मोक्षः स्य
इति भगवदुक्तेः तर्हि देह
कथं स्यात् तस्मात्सर्वग
इति श्रुतेः। हृदयपरिमा
मन्यन्ते तन्न सत् बन्धमो
बद्धमुक्तव्यवस्थासम्भवा
किञ्च श्रुतिषु आत्मैक्यं प्र

इदानीं विज्ञानात्म
असङ्ख्याकाः। अनेनैकज
स्वाभाविकाल्पज्ञत्वादिधर्म
'ज्ञाज्ञौ द्वावजावी

★ [बहुत्वं विभुत्वं ध्रुवत्वं च यदि जीवानां स्यात्तदा शासकता नेत्यन्वयः । शेषं स्पष्टम् ।]

सङ्क्षिप्तसार्थान्वयः — हे ध्रुव ! तनुभृतो जीवा यदि अपरिमिताः ध्रुवाः सर्वगताश्च स्युः तर्हि तेषां समत्वात् शास्यता न इति कृत्वा नियमो नियमनं त्वया न स्यात् इतरथा समत्वाभावे च घटते । कुतः । यन्मयम् उपाधितो यद्विकारप्रायं जीवाख्यं अजनि तत् अविमुच्य अपरित्यज्य समं ब्रह्मैव सर्वस्य नियन्तृ भवेत् । कथम्भूतं तत् । अनुजानतां वयं ब्रह्म जानीम इति वदतां न्तिनां यत् अमतम् अज्ञातमेव दुर्ज्ञेयत्वात् । कथम् । मतदुष्टतया मतस्य ज्ञातस्य दोषग्रस्ततया । यद् ज्ञातं तद् ब्रह्म नेत्यर्थः ॥

हे ध्रुव नित्यमूर्ते ! भगवन् ! तार्किकमते तनुभृतो जीवा अपरिमिता बहवः ध्रुवा नित्याः सर्वगताः व्यापकाश्च यदि स्युः तेषां समत्वात् शास्यता न घटते इति कृत्वा त्वया कृतः नियमः नियमनं न स्यात् । इतरथा अन्यथा तु अपरिमितत्वे अध्रुवत्वे र्वगतत्वे च घटेत । यद्वा । तर्हि तेषां त्वत्साम्यात् शास्यतेति नियमो न स्यात् । इतरथा समत्वाभावे च न नियमः किन्तु वेति काकुः । अथवा । शास्यता न स्यात् । भवत्वेवं का हानिरिति चेत्तत्राहुः– "शास्ता विष्णुरशेषस्य" इति शिष्टैः प्रमाणितो नियमः स च नेतरथा कदाप्यन्यथा न भवतीत्यर्थः । कथम् । यन्मयम् उपाधितो यद्विकारप्रायं यत् जीवाख्यमजनि जातं तत् कारणरूपं ब्रह्मैव तस्य नियन्तृ नियामकं भवेत् । किं कृत्वा । अविमुच्य कारणतया तत् अपरित्यज्य । "निर्दोषं हि समं ब्रह्म" गीतोक्तेः । यद्वा । मा राधा तया सहितं सममिति श्लेषोऽपि व्याख्येयः । कथम्भूतं तत् ब्रह्म । अनु अनुगतेन ज्ञानाहङ्कारेण नतां "वयं ब्रह्म जानीम" इति प्रलपतां वेदान्तिनां यत् अमतमज्ञातमेव अविषयत्वात् । कुतः । मतस्य ज्ञातस्य दुष्टतया ज्ञानवदनात्मत्वेन "अतोऽन्यदार्तम्" इति श्रुतेर्मिथ्यात्वापत्तिरूपदोषग्रस्ततया । यद् ज्ञातं तद् ब्रह्म नेत्यर्थः । तथा हि —

"यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम् ॥" इत्यादिश्रुतेः ॥

वस्तुतस्तु भक्तिपक्षेऽप्यस्य योजना कार्या तथा हि–यस्य येन भक्तेन अकारो वासुदेवस्तेन रूपेण मतं ब्रह्म ज्ञातं निश्चितमित्यर्थः मतमनुभूतिविषयः । यस्य येन शुष्कवेदान्तिना स्वयं देहाध्यासवताऽपि केवलं शब्दत एवाहं ब्रह्मास्मीति आत्मप्रवञ्चनद्वारा स कोटिजन्मस्वपि न वेद भक्तिशून्यान्तःकरणत्वादित्यर्थः । फलितमाह–एवं विशिष्टेनाहङ्कारेण जानतां शुष्कवेदान्तिनाम् तत् विज्ञातं कदापि न ज्ञातम् । यद्वा । अल्पमपि ज्ञातं नेत्यर्थः । अत्राल्पार्थे नञ् । "तदन्यत्वं तदल्पता" इति कारिकोक्तेः । अकारो सुदेवस्तस्य विशिष्टेन भजनेन जानतां भक्तानांतु विशेषेण पूर्वरूपेण ज्ञातमिति गूढार्थः । अद्वैतवेदान्तिनस्तु वाङ्मनसागोचरत्वेन निरूप्य तद्रसास्वादहीनाः सन्तो मुह्यन्ति तेषामेवायं श्रुतेरादेशः भक्तिराश्रयणीयेति तत्त्वम् । तार्किका हि स्वरूपमपरिमितादिरूपेण निर्दिशन्ति तस्योपपत्तिस्तु एवं ज्ञेया । तथा हि एकाऽविद्या एक एव जीवस्तर्हि एकमुक्तौ मुक्तिप्रसङ्गः । यदि च नानाऽविद्यास्तर्हि तस्यैवांशान्तरेण संसारनिवृत्त्यभावादनिर्मोक्षः एकयाऽविद्यया मुक्तो जीवः पुनरन्यथा त्यमनिर्मोक्षः स्यात् तस्मादपरिमिता जीवा मन्यन्ते । किञ्च तेषां जीवानां यदि अणुत्वं सूक्ष्मत्वं "सूक्ष्माणामप्यहं जीवः" भगवदुक्तेः तर्हि देहस्य स्थूलत्वेन सर्वव्यापिचैतन्याभावात् । एवम्भूतसूक्ष्मस्य स्थूलदेहैकप्रदेशे पिपीलिकादिस्पर्शजं चैतन्यं स्यात् तस्मात्सर्वगताश्च मन्यन्ते । एवं देहपरिमाणत्वे च देहस्य मध्यमं हृदयं दशाङ्गुणपरिमाणम् "अत्यतिष्ठद्दशाङ्गुलम्" श्रुतेः । हृदयपरिमाणानां जीवानां सावयवत्वादनित्यत्वं स्यात् तस्मात्परिमाणाभावाद् ध्रुवाः नित्याश्चेति केचन तार्किकाः तत्र सत् बन्धमोक्षप्रसङ्गे एकस्मिन् बद्धे मुक्ते च सर्वबन्धमोक्षरूपो दोषो नास्ति । अविद्याभेदेन तच्छक्तिभेदेन वा मुक्तव्यवस्थासम्भवात् । ईश्वरस्य तु समष्ट्युपाधेरखण्डितत्वस्येश्वरत्वात् तस्य विद्याशक्तिप्रधानत्वान्न केनाप्यंशेन संसारशङ्का । श्रुतिषु आत्मैक्यं प्रसिद्धमत इमं तार्किकपक्षं वेदो न सहते इति ॥१७॥३१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इदानीं विज्ञानात्मनः सङ्ख्यापरिमाणयोर्विवादं परिहरन्ति श्रुतयः–हे ध्रुव ! शाश्वत षाड्गुण्यशक्ते ! तनुभृतोऽपरिमिताः ख्याकाः । अनेनैकजीववादिमुखं पिधाय तेन त्वौपाधिकभेदेन व्यवहारेऽनेकत्वमिष्टमेवेति चेत्तत्राहुः–ध्रुवा इति । कल्पज्ञत्वादिधर्मवतोऽनाद्यनन्ताः । अनेनोपाधिकभेदवादिनां जिह्वा त्रोटिता । तथा च श्रुतयः —

'ज्ञाज्ञौ द्वावजावीशानीशौ०' 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ।'

'नित्यो नित्यानां चेतनश्चेतनानाम् ।' इत्यादयः । 'अंशो नानाव्यपदेशात् ।' (२-३-४२) इति न्यायाच्च साङ्ख्यविवादं निरस्य परिणामं निर्धारयन्त्यः साङ्ख्यनैयायिकादीनां वक्त्रे धूलीः कुर्वन्ति श्रुतयः । यदि सर्वगता इति । यदि विभुपरिमाणकाः स्युः तर्हि तव शास्यता नेति कृत्वा नियमो नियमनं शासनं न स्यात् ।

"अन्तः प्रविष्टः शास्ता जनानां य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः ।"

इत्यादिनियमो नश्येदित्यर्थः । इतरथाऽणुपरिमाणकत्वे तु समञ्जसम् । तथा —

'अणुर्ह्येष आत्मा चेतसा वेदितव्यः । बालाग्रशतभागस्य शतधा कल्पितस्य च ।

भामो जीवः स विज्ञेयस्स चानन्त्याय कल्पते ॥' इति श्रुतिप्रोक्तस्य जीवस्य शास्यत्वं भगवतः शास्तृत्वं घटेत । ननु तर्हि देहव्यापिचैतन्यं न स्यान्नितरां शिरः पादादिगतसुखाद्यनुभव इति चेन्न । स्वासाधारणधर्मभूतज्ञानव्याप्त्या न विरोधावकाशः । न च प्रकाशस्याश्रयं विहायान्यत्र गमनासम्भव इति वाच्यम् । प्रदीपप्रभायाः प्रदीपं विना वह्निं विनोष्ण्यादेः पुष्पं विना गन्धादेः धर्मिणं विना जातिसमवायादेर्वर्तमानस्य सुप्रसिद्धत्वात् । नात्र तर्कमात्रस्य प्रमाणत्वम् । अपि तु श्रुतिरि अणुतश्चक्षुषः प्रकाशो व्याप्त एवमेवास्य पुरुषस्य प्रकाशो व्याप्तो वै पुरुष इत्यादिदृष्टान्तसहकृतभगवद्वाक्यमपि —

'यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥'

इति । मणिद्युमण्यादौ परिच्छिन्नेऽपि विभुपरिमाणकप्रभालक्षणगुणवत्त्वस्य प्रत्यक्षप्रमाणगोचरत्वात् । न च मण्यादीनामवयवा एव प्रभात्वेनोच्यन्ते इति शङ्कनीयम् । तथात्वे द्रव्यनाशप्रसङ्गात् । तथा च वाल्मीकिनापि प्रभाप्रभावतोर्भेदो दर्शितः —

'रामेण सङ्गता सीता भास्करेण प्रभा यथा ।' इति सुन्दरकाण्डे । एतच्च सिद्धान्तजाह्नव्यां विस्तृतं व्याख्यातं भगवच्चरणैर्देवाचार्य्यैः । एतदेव स्पष्टयति । यन्मयं यद्विकारम् अजनि तत्कारणत्वमविमुच्य नियन्तृ भवेदिति व्याप्तिः । किं तन्नियन्तृस्वरूपम् ? तत्राह-समं सर्वस्य ब्रह्मादिस्थावरान्तर्य्यामित्वेऽप्यप्रच्युतषाड्गुण्यं तर्हि बहिरभावत्वादियत्तायुक्तमिति चेत्तत्राहुः-अनुजानतां प्रज्ञाभिमानिनां भगवतः स्वरूपगुणशक्त्यादिषु तर्कबलेनेयत्तां परिभाव्यमानानाममतम् अज्ञातम् । कुतः । मतदुष्टतया । मतस्येयत्ताज्ञानस्य ज्ञातुर्वा दोषश्रवणेन । तथा हि —

'यस्यामतं मतं तस्य मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानतामि'त्यादिश्रुतयः ॥३०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं जीवानां नानाविधयोनिसम्बन्धेन प्राप्तो दोषः परिहृतः, अधुना प्रसङ्गाद्भगवतो माहात्म्यसिद्ध्यर्थं जीवानां भगवदधीनत्वं स्थापयितुं स्वातन्त्र्यपक्षमनूद्य निराकुर्वन्ति-अपरिमिता ध्रुवा इति । जीवानां व्यापकत्वे स्वरूपतो भगवन्नियम्या न भवेयुः । भोगमोक्षदुःखाभावार्थं तदपेक्षाव्यापकत्वेन भविष्यतीत्यग्रे वक्तव्यम् । अतो यदि श्रौत एव न्यायः विस्फुलिङ्गरूपः अङ्गीक्रियते तदैव नियम्यनियामकभावो भवति, न स्मार्तपक्षे व्यापकत्वे तदर्थं व्यापकता निराक्रियते । केचन नैयायिकादयः जीवं व्यापकं मन्यन्ते तेषामयमभिप्रायः । नित्यः अणुर्वा व्यापको वा भवति नावान्तरपरिमाणवान् । अवान्तरपरिमाणमनित्यत्वेन व्याप्तम् । अणुपरिमाणत्वे सर्वशरीरव्यापिचैतन्योपलम्भो न स्यात् । किञ्च देशान्तरे यद्द्रव्यमस्मद्भोगायोत्पद्यते तत्रास्मददृष्टं कारणत्वेन वक्तव्यमत उत्पत्तिदेशे अदृष्टवदात्मसंयोगः कारणं वर्तत इत्यात्मनो व्यापकसिद्धिः । तेन आत्मनो देशपरिच्छेदरहिताः । ध्रुवा इति कालपरिच्छेदरहिताः । यथात्मा अनित्यः स्यात् अनिर्मोक्षः स्यात् । व्यापकस्य चानित्यत्वमसिद्धम् । किञ्च सर्वगतास्ते सर्वत्र तेषां सकलमूर्तद्रव्यसंयोगो वक्तव्यः । अन्यथा तेषां भोगसाधनाय तानि द्रव्याणि न भवेयुः । न ह्यनादिसंसारे कश्चित्पदार्थः कस्यचिन्न भवतीति सिद्धम् । एवमात्मनः परिच्छेदद्वयाभावः सकलमूर्तद्रव्यसंयोगश्च अवश्यमङ्गीकर्तव्य इति तन्मतमनूद्य परिहरति । तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमः । अत्र शासनं न कर्मनिमित्तं तत्तु यमादिकार्यं किन्तु दासस्वामिवत् नियम्यनियामकभावः । व्यापकत्वे जीवानां दासत्वं न स्यादित्यर्थः । तथा सति नेश्वरश्च सेत्स्यति, प्रयोजनाभावात् । सर्वत्रात्मनः कारणत्वेन विद्यमानत्वात् स्वभोगस्तेनैव सम्पादयितुं शक्यते । अदृष्टनियामकं तु कर्मैव । भोगस्त्वदृष्टनियम्यः । कर्म

स्कं. १० उ. अ.

प्रयत्ननियम्यम् ।
नियम्यनियामकभा
भोगं नियमः । बहु
भवेत् । तददृष्टेन
तुल्यत्वापत्तिः । न
नियामकेऽङ्गीक्रियमा
नियामको वक्तव्यः ।
सेत्स्यति प्रतिनियतः
एव गन्धस्य युक्तः, अ
वायोर्गन्धवाहत्वप्रसि

"यादृशः प्र

तस्माद्गन्धवच्

परिच्छिन्नोऽस्तु को दोष
इति ईश्वरो व्यापक ए
चेन्नेतराधिकारात्' इति
नोपपद्यत इति भावः ।
महागजो नियम्यते, सू
नियामक इति, नापि सू
भवेदिति । यत् यन्मय
दाह्यदाहकभावश्चान्यः, नि
प्रजाः । तथा जीवा अपि
साहसी भवति । तस्मात्त
नियम्यनियामकभावं नाङ्गी
सममनुजानतां यदमतमिति

"ब्राह्मणे पुल्कसे

ब्रह्मविदः समदृश
न स्यात्, 'चतुर्विधा भजन्
मतदृष्टतयेति । मते ब्रह्मवा
नियामकश्रवणात् ।

'एतस्यैवाक्षरस्य प्र

इत्यादिभिः श्रुतिभि
सर्ववादिसम्मतं तच्च व्यापक

"नियन्ता जीवसङ्घ

प्रयत्ननियम्यम् । अतो जीवार्थमीश्वरापेक्षाया अभावात् नेश्वरोऽपि सेत्स्यति, नियम्यनियामकभावो दूरे । यच्छुतय एवमाहुः– नियम्यनियामकभावो न सेत्स्यतीति, तासामयमभिप्रायः–भोगनियामकः परमेश्वर एव, अन्यथा भोगनियमो न स्यात् । दृश्यते च भोगां नियमः । बहुषु विद्यमानेष्वेकस्मिन् शरीरे सर्वेषामेव सम्बन्धस्य तुल्यत्वात् एकशरीरे आम्रफले भक्षिते कथमेकस्यैव सुखं भवेत् । तददृष्टेन जनितमिति चेत्तस्यैव तददृष्टं नान्यस्येत्यत्र को नियमः । आत्मसंयोगस्य तुल्यत्वात् ज्ञानेच्छाप्रयत्नानामपि तुल्यत्वापत्तिः । न चेश्वरव्यतिरेकेण कश्चिदन्यो नियामकोऽस्ति येन प्रतिनियतभोगदर्शनस्य नियमः सिद्ध्येत् । ईश्वरे तु नियामकेऽङ्गीक्रियमाणे एक एव भुक्तां नान्य इतीश्वरनियमनात् नियमः सङ्गच्छते । तथा अदृष्टेऽपि । अतोऽवश्यं भोगनियमार्थमीश्वरो नियामको वक्तव्यः । तच्च व्यापकत्वेन सङ्गच्छते, महत्त्वेन तस्याभिमानात् । तुल्यत्वाच्च न भगवन्तं मन्यते । ईश्वरेणैव चेद्भोगः सेत्स्यति प्रतिनियतः तर्हि व्यापकता न वक्तव्या । अणुपरिमाणस्यापि आदेहव्यापिचैतन्यगुणः सम्भवति गन्धवत् । आश्रयाविच्छेद एव गन्धस्य युक्तः, अदृष्टत्वात् । यत्र निरन्तरोत्पत्तिर्मृग्यते अन्यथा आश्रयमपि परित्यज्य पत्रपुष्पादिवदन्यत्र न गच्छतीत्येव मन्तव्यं वायोर्गन्धवाहत्वप्रसिद्ध्यै । यथा वृक्षस्य सम्पुष्पितस्य दूराद्गन्धो वातीति श्रुतेश्च । अवयवगतिकल्पना तु योजनगन्धायां बाधिता ।

"यादृशः प्रकटो गन्धो पुष्पाणां सन्निधौ भवेत् ॥ एकस्मिन्नपि तत्पुष्पे तथा घ्राणगतेन हि ॥"

तस्माद्गन्धवच्चैतन्यमपि सर्वदेहव्यापि तिष्ठति लोके च परिच्छिन्न एव नियम्यनियामकभावः । ननु नियामकोऽपि परिच्छिन्नोऽस्तु को दोष इति चेत्तत्राह–हे ध्रुवेति । यो निश्चलः स व्यापक एव भवति प्रकारान्तरेण ध्रुवता तु भूम्यादावपि न दृश्यते इति ईश्वरो व्यापक एव, 'यस्मिन्नाकाशर्तुश्च प्रोतश्च' इति श्रुतेः । 'आराग्रमात्रो ह्यपरोऽपि दृष्ट' इति, 'नाणुः अतच्छ्रुतेरिति चेतराधिकारात्' इति न्यायाच्च । इतरथा जीवस्य व्यापकत्वे भगवतः अणुत्वे एकदेशस्याप्यन्यथात्वे वा नियम्यनियामकभावो नोपपद्यत इति भावः । नन्वत्र न काचिद्दृढोपपत्तिः, व्यापकत्वमप्यस्तु नियम्यत्वमप्यस्तु को दोषः ? अल्पेनापि बालकेन सिंहेन महागजो नियम्यते, सूक्ष्मेणापि राज्ञा सर्वे लोका नियम्यन्ते, सूक्ष्मेणाप्यग्निकणेन सर्वे गृहा दह्यन्ते, इति न स्थूलपरिणामवान् नियामक इति, नापि सूक्ष्मपरिणामवान् नियम्य इति, अतो व्यर्थ आग्रह इति चेत्तत्राह–अजनि च यन्मयं तदविमुच्य नियन्तृ भवेदिति । यत् यन्मयमजनि तदविमुच्य तदत्यक्त्वा नियन्तृ किं भवेत् ? अपि तु न भवेदेवेत्यर्थः । बाध्यबाधकाभावो दाह्यदाहकभावश्चान्यः, नियम्यनियामकभावस्त्वन्यः, राज्योत्पन्नाः प्रजा राज्यमया भवन्ति राज्यं च राज्ञोऽङ्गमिति राजमया एव प्रजाः । तथा जीवा अपि भगवन्मया व्यापकाश्चेत् कथमपि न तन्मया भवन्ति । नियतान्वये विद्यमानेऽपि अप्रयोजकत्वं वदन् साहसी भवति । तस्मात्तन्मयत्वान्यथानुपपत्त्या न व्यापकत्वं जीवस्येति सिद्धम् । ननु वेदान्तिनोऽपि आत्मैकत्वं वदन्तः नियम्यनियामकभावं नाङ्गीकुर्वन्ति, सर्वत्र तुल्यदर्शनात् । अतो वेदान्ते नियम्यनियामकभावो नास्तीति ये वदन्ति तदनूद्य परिहरन्ति– सममनुजानतां यदमतमिति । ये सर्वत्र ब्रह्मसममनु जानन्ति ।

"ब्राह्मणे पुल्कसे स्तेने ब्रह्मण्यर्के स्फुलिङ्गके ॥ अक्रूरे क्रूरके चैव समदृक् पण्डितो मतः ॥" इति ।

ब्रह्मविदः समदृश इति । तेषामप्येतदननुमतः । तेऽपि नियम्यनियामकभावमङ्गीकुर्वन्त्येव । अन्यथा भगवान् मुक्तोपसृप्यो न स्यात्, 'चतुर्विधा भजन्ते माम्' इति ज्ञानिनोऽपि भजनश्रवणाच्च । नन्वस्त्वनियम्यता ज्ञानमार्गे को दोष इति चेत्तत्राह– मतदुष्टतयेति । मते ब्रह्मवादे अयमर्थो दुष्ट इति । एष सर्वेश्वर एष लोकपाल एष भूताधिपतिरिति सर्वत्रोपनिषत्सु भगवतो नियामकश्रवणात् ।

'एतस्यैवाक्षरस्य प्रशासने गार्गिद्यावापृथिवी घृते तिष्ठत'

इत्यादिभिः श्रुतिभिः स्पष्टमेव प्रशासनं दृश्यते । सा च प्रशासनादिति न्यायेन च निर्णीतः । तस्माद्भगवतः प्रशासनं वादिसम्मतं तच्च व्यापकत्वेन घटते अतन्मयत्वप्रसङ्गादिति ।

"नियन्ता जीवसङ्घस्य हरिस्तेनाणवो मताः ॥ जीवा न व्यापकाः क्वापि चिन्मया ज्ञानिनां मताः ॥" ॥१७॥३०॥

श्रीसुबोधिनीसारः

एका विद्या जीवा नाना एको जीव इति वा पक्षेऽनिर्मोक्षप्रसङ्गादविद्यावैभवेन सर्वं सम्पद्यत इत्याहुः। नैयायिकमतमनूद्य दूषयति। अपरिमिता अनन्ता ध्रुवा नित्यास्तनुभृतो जीवाः व्यापका यदि स्युः तर्हि शास्यता न घटते इमे नियम्या इति नियमो नियमनं त्वया न स्यात्। इतरथा तु परास्य शक्तिर्विविधैव श्रूयते इति मतेन तु सम्पद्यते। हे ध्रुव ! यन्मयमुपाधितो यद्विकारप्रायं यज्जीवाख्यमजनि जातं तस्य विकारस्य तत् नियन्तृ नियामकं भवेत्। अविमुच्य कारणतयाऽपरित्यज्य किं तत्तत्राह-समम अनुस्यूतं कार्यमात्रे अनुजानतां वयं जानीम इति वदतां यदमतमविज्ञातम् अविषयत्वात् "यस्यामतं तस्य मतम्" इति श्रुतेः। मतस्य ज्ञातस्य दुष्टतया दोषश्रवणात् ॥१७॥३०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं जीवानामुत्पत्तिर्निरूपिता। तत्र तेषामणुत्वे देहव्यापि चैतन्यं न स्यात्। देहपरिमाणत्वे च मध्यमपरिमाणानां सावयवत्वेनानित्यत्वं स्यात्। तथात्वे च परलोकसाधनानां वैयर्थ्यं स्यात्। अतः सर्वगता नित्याश्चेति केचन मन्यन्ते तन्मतं दूषयन्ति-अपरिमिता इति। त्वमेवैको नित्यो व्यापकश्च जीवानां तु त्वत्त उत्पत्तिलयश्रवणेनानित्यत्वस्येष्टत्वान्मोक्षदशायां साधनवैय्यर्थ्यस्येष्टत्वाच्च इत्याशयेन सम्बोधयन्ति-ध्रुवेति। अपरिमिता वस्तुत एवासङ्ख्याता ध्रुवास्तेनैव रूपेण नित्याः सर्वगता व्यापकाश्च यदि तनुभृतो जीवाः स्युस्तर्हि तेषामपि त्वत्समत्वात्त्वया तेषां शास्यता नियम्यता न स्यात्। श्रूयते चान्तः प्रविष्टः शास्ता जनानामिति शास्यता। तथा इत्येवं जीवानां नित्यव्यापकत्वाङ्गीकारे नियमः। पुण्यपापादिसाधननियमो दुःखसुखादिफलनियमश्च न स्यात्। व्यापकत्वेन सर्वसम्बन्धस्य सर्वत्र विद्यमानत्वात्। इतरथा जीवानां जन्यत्वे अणुत्वे तूभयमपि घटत एवेति शेषः। कथं घटत, इत्यपेक्षायामाहुः-अजनि चेति। यन्मयं यद्विकारप्रायं जीवाख्यमजनि जातं तत्कारणवस्तु तत्कार्यमविमुच्य उपादानत्वेनापरित्यज्य तस्य नियन्तृ नियामकं भवेत्। किं तत्कारणं वस्तु इत्यपेक्षायामाहुः-सममनुजानतामिति। वयं जानीम एव समं सर्वानुस्यूतमेव ब्रह्मेति वदतामपि वस्तुतो यन्मतं तदमतम् अविज्ञातप्रायमेव, दुर्ज्ञेयत्वात्। तथा च श्रुतिः-

"यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम् ॥" इति। तत्र हेतुमाहुः-मतदुष्टतयेति। मतस्य सामान्यबुद्धिविषयस्य दुष्टतया दुष्टत्वश्रवणात्। तथा च श्रुतिः- "यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम्।" इति। न च जीवस्याणुत्वे सर्वदेहव्यापि चैतन्यं न स्यात् इति शङ्कनीयम्, तत्प्रभया व्याप्तत्वेन सर्वदेहचैतन्यं न स्यात्, इति शङ्कनीयम्, तत्प्रभया व्याप्तत्वेन सर्वदेहचैतन्योपपत्तेः। यथोक्तं गीतासु —

"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥" इति ॥३०॥१७॥

अन्वितार्थप्रकाशिका

अकृतकार्योपाधीनामीश्वरस्यांशानां जीवानामुत्पत्तिर्निरूपिता। तत्र यद्येकाविद्या तदा जीवस्याप्येकत्वादेकमुक्तौ सर्वमुक्तिप्रसङ्गः। यदि नानाविद्यास्तर्हि तस्यैवांशान्तरेण संसारानपगमादनिर्मोक्षप्रसङ्ग इत्यादियुक्त्या वस्तुत एव नानात्मानः तत्र च तेषामणुत्वे देहव्यापि चैतन्यं न स्यात्। देहपरिमाणत्वे च मध्यमपरिणामानां सावयवत्वेनानित्यत्वं स्यात्। तथात्वे च परलोकसाधनानां वैयर्थ्यं स्यात्। कृतनाशाकृताभ्यागमापत्तिश्चेति अतः सर्वगता नित्याश्चेति केचन नैयायिकादयो मन्यन्ते तन्मतं दूषयन्ति-अपरिमिता इति ॥ हे ध्रुव ! यदि तनुभृतो जीवाः अपरिमिताः ध्रुवाः सर्वगताश्च स्युस्तर्हि तेषां शास्यता इति नियमो न स्यात्। इतरथा तु अयं दोषो न स्यात्। अतः यन्मयं जीवाख्यमजनि तद्वस्तु कारणं कारणतया स्वकार्यमविमुच्य स्वकार्यस्य जीवस्य नियन्तृ भवेत्। यत्कारणाख्यं वस्तु समं तन्मतस्य दुष्टतया हेतुना अनुजानताममतमेवेत्यन्वयः। हे ध्रुव ! यदि तनुभृतो जीवाः अपरिमिता वस्तुत एवासङ्ख्याताः ध्रुवास्तेनैव रूपेण नित्याः सर्वगता व्यापकाश्च स्युस्तर्हि तेषां शास्यता नियम्यता इति नियमो न स्यात्। इतरथा तेषां त्वज्जन्यत्वे अव्यापकत्वे चायं त्वच्छास्यताभावरूपो दोषो न स्यात्। यद्वा तेषामपि त्वत्समत्वात्त्वया तेषां शास्यता नियम्यता न स्यात्। श्रूयते च।

"अन्तः प्रविष्टः शास्ता जनानाम्" इति शास्यता। तथा जीवानां जन्यत्वे अणुत्वे तूभयमपि घटत एवेति शेषः। यन्मयं स्य ब्रह्मणो विकारप्रायं जीवाख्यमजनि जातं तत्कारणं वस्तु कर्तृकारणतया स्वकार्यमविमुच्य उपादानत्वेनापरित्यज्य तस्य कार्यस्य जीवाख्यस्य नियन्तृ नियामकं भवेत्। किं तत्कारणं वस्त्वित्यपेक्षायामाहुः। यत् कारणं वस्तु समं सर्वानुस्यूतं तत् स्य सामान्येन बुद्धिविषयमात्रस्य दुष्टतया हेतुना अनुजानतां वयं जानीम एव समं ब्रह्मेति वदतामपि वस्तुतः अमतम् अविज्ञातप्रायमेव दुर्ज्ञेयत्वात्। तथा च श्रुतिः-

"यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्॥" इति। न च जीवस्याणुत्वे र्वदेहव्यापि चैतन्यं न स्यात् इति शङ्कनीयं तत्प्रभया व्याप्तत्वेन सर्वदेहचैतन्योपपत्तेः। यथोक्तं गीतासु —

"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥" इति॥

अद्वैतवेदान्तिमते चायम्भावः। अविद्याप्रतिबिम्बो जीवः स चाविद्योपाधिभेदेन भिन्नः प्रतिबिम्बस्य च बिम्बरूपेणैव त्यत्वादि न तु स्वरूपेण। एवं च बिम्बस्य तव नियन्तृत्वेन जनकत्वे च सिद्धे सिद्धं पूर्वोक्तं भजनीयत्वमिति श्रुत्वा च जीवस्य त्वाभिन्नब्रह्मसाक्षात्कारवतः परमेश्वरभावापत्तिरूपा मुक्तिः प्रतिपाद्यते तेन बिम्बचैतन्यरूपत्वं परमेश्वरस्य व्यवस्थाप्यते। तिबिम्बरूपत्वे तु मुक्तजीवसायुज्यास्पदत्वासम्भवात्। न हि प्रतिबिम्बं स्वोपाधिलये प्रतिबिम्बान्ते लीयते किन्तु बिम्ब एव। दाहुः कल्पतरुकाराः —

"न मायाप्रतिबिम्बस्य निर्मुक्तैरुपसृप्यता॥" इति॥३०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

पूर्वश्लोके क्षेत्रज्ञानां स्वकर्मानुसारेण देहोत्पत्तिरुक्ता॥ इह तु तेषां नित्यत्वं परमेश्वरोपासनेन सर्वगतत्वं सर्वगतत्वेऽपीश्वराधीनत्वं स्य सर्वेभ्यः श्रेष्ठत्वं चाहुः॥ अपरिमिता इति॥ हे ध्रुव! नित्य! ध्रुवं नित्ये निश्चिते चेति शाश्वतः॥ स्वत एवापरिमिताः ध्रुवा त्याः॥ "नित्योनित्यानामि"ति श्रुतेः॥ तनुभृतः क्षेत्रज्ञाः यदि त्वदुपासनेन सर्वगताः सर्वान्तर्यामिणो भवेयुः तर्हि तस्मिन् लेऽपि॥ अपीति शेषः॥ शास्यता त्वदुपासनोद्भूतान्तर्यामित्वगुणैर्मुक्तैः कृतान्यजीवानां शास्यता तादधीन्यं न स्यात्॥ तान्तर्यामिगुणानां तेषामन्यजीवावशवर्तिनो न भवेयुरित्यर्थः॥ तदभावे नियमो नियमनं च न स्यात् इति शब्दः समुच्चये था तु त्वदाज्ञया तु तदुभयमपि भवेत्॥ तदेवाह॥ यन्मयं यदाज्ञाप्रधानं भवद्भवदीयान्यसर्वजीवनियमनं तेषु अजनि उत्पन्नं तां त्वदाज्ञामविमुच्यात्यक्त्वा त्वदीयान्यजीवानां तेषु नियन्तृत्वं भवेत् भावप्रधानो निर्देशः एवं सति स्वतन्त्रैश्वर्यं सर्वदिव्यकल्याणगुणं न् अथ सदा त्वदधीनैश्वर्यान् यावत्त्वदुपासनशुभगुणयुक्तान् तान् अन्यमुक्तांश्च समं समत्वेनानुजानतां यन्मतं तन्मतदुष्टतयाऽमतं तविरुद्धमेव॥ यद्वा॥ हे ध्रुव! नित्य! स्वत एवापरिमिताः ध्रुवा नित्यास्तनुभृतः क्षेत्रज्ञाः यदि यद्यपि त्वदुपासनेन सर्वगताः न्तर्यामिणो भवेयुरिति शेषः॥ तर्हि तेषामुद्भूतान्तर्यामित्वानामन्तर्यामिधर्मत्वेन त्वया सह समत्वात् तेषां मुक्तानां शास्यता धीनता न स्यात् ते मुक्तास्तववशवर्तिनो न भवेयुरित्यर्थः॥ तदभावे त्वया तेषां नियमनमपि न भवेत्॥ इतरथा तु तेषु धीनैश्वर्यत्वात् प्राप्तत्वदैश्वर्यलेशत्वात् स्वाभाविकानां ह्यन्तर्यामित्वाभावाच्च साहजिकसमत्वाभावेन तु घटेत॥ भावः —

त्वदुपासनजातान्तर्यामिगुणेषु तेषु स्वाभाविकान्तर्यामित्वाभावात् तेषामैश्वर्यस्य त्वदधीनत्वात्त्वत्त्वदीयेभ्योऽन्यत्र तेषां त्वात् सदा दिव्यकल्याणपरिपूर्णगुणवता त्वयैव तेभ्योऽन्तर्यामित्वगुणलेशस्य दत्तत्वात्॥ त्वयि नित्यमेव तच्छासकत्वं च नित्यमेव त्वच्छास्यत्वमिति हेतोर्नित्यमेव तेषां त्वं नियामकः ते च नित्यमेव तव नियम्या इति॥ तथा हि यन्मयं यस्य जातत्वात्त्वदाज्ञाप्रधानमुक्तैष्वैश्वर्यमजनि उद्भूतं तत् तां त्वदाज्ञामविमुच्यात्यक्त्वा विचार्य ते तर्हीति शेषः॥ भवानेव यन्ता भवेत्॥ क्लीबत्वं छान्दसम्॥ एतादृशैश्वर्यस्य नित्यं त्वय्येव विद्यमानत्वात्॥ त्वत्त एव ते ऐश्वर्यं प्राप्तास्त्वदधीनाश्चेति तु त्वमेव सत्यो नियन्तासीति भावः॥ अमात्यादिसेवककृतायाः शिक्षाया मुख्यतया राजनि विद्यमानत्वात् पुरुषादीश्वरेषु

परमेश्वरोपासनजनितान्यजीवनियन्तृत्वस्य परमेश्वरे त्वयि मुख्यतया विद्यमानत्वात्त्वमेव सत्यो नेतासीत्यर्थः ॥ अन्यत् समानम् ॥ यथा सर्वनियन्ता पुरुषोत्तमस्त्वं ध्रुवो नित्य इति नात्रशङ्का तथैवेमे जीवात्मेश्वरात्मानोऽपि ध्रुवा नित्या एवेति ज्ञातव्याः ॥ एवं परमेश्वरात्सर्वनियन्तुर्जीवात्मनामीश्वरात्मनां चान्योन्यं च भेदोऽनादिसिद्ध इति वेदैरेवोक्त इति प्रतीयते ॥ प्रलीनजीवेश्वरे प्रलये निवृत्तिप्राप्तं स्वधाम्नि निवसन्तमेकाद्वितीयशब्देन निर्दिष्टमीश्वरेश्वरे प्रत्युक्तं यद्भेदवचनं पारमार्थिकम् ॥ अपरिमिताध्रुवा इति ॥ सममनुजानतां यदमतं मतदुष्टतयेति व्यपदेशात् । परमात्मन ईश्वराणां जीवात्मनां च भेद उपाधिकृत इति केचिद्वदन्ति तेषां मते भेदस्यासत्यत्वेन भेदवर्जितप्रलयावसरे जीवात्मादिभेदनिर्देशेन सङ्घटते ॥ अतो वेदोक्तो जीवात्मादिभेदः स्वाभाविक इति ॥ सूत्रश्रुतिस्मृतयोऽप्याहुः —

उभयेऽपि हि भेदेनैनमधीयत इति ॥

गुहां प्रविष्टावात्मानौ हि तद्दर्शनादिति ॥ भेदव्यपदेशाच्चेति कर्मकर्तृव्यपदेशाच्चेति ॥

अस्यार्थः — उपास्यस्य कर्मत्वेनोपासकस्य च कर्तृत्वेन श्रुतिषु व्यपदेशस्तस्मात्तथा हि विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति ॥

यं सर्वदेवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्चेति सूत्रार्थः ॥

न कर्मविभागादितिचेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति ॥ अस्यार्थः ॥ एकमेवाद्वितीयं ब्रह्मेत्यादि श्रुत्युक्तायां प्रलयावस्थायाम् अविभागात् ॥ क्षेत्रज्ञाभावात् ॥ कर्म न स्यात्कर्माणि न भवेयुः ॥ इति चेत् इत्युच्यते चेत् न सत्यम्, अनादित्वात् क्षेत्रज्ञानां तत्कर्मप्रवाहाणां चानादिकालसिद्धत्वात् उपपद्यते ॥ आद्यन्तवर्जितेषु क्षेत्रेषु विभागस्तत्तत्कर्म चोपपद्यते ॥ अस्ति अन्यथाऽकृताभ्यागमः कृतविप्रनाशश्च स्यात् ॥ उपलभ्यते च ॥ क्षेत्रज्ञानादित्वं श्रुतिस्मृत्योरुपलभ्यते प्राप्यते ॥ तथा हि —

तद्वेद तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियते ॥

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ॥

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूय इति सूत्रार्थः ॥

न तत्समश्चाभ्यधिकश्च दृश्यत इति ॥

समानवृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमेति वीतशोक इति ॥

यदापश्यः ॥ पश्यतेरुक्तवर्णनकर्तारमीशं पुरुषं ब्रह्मयोनिं तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ इति ॥

यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वत इति ॥

भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः ॥ भीषाऽस्मादग्निश्चन्द्रश्च मृत्युर्धावति पञ्चम इति ॥

भोक्ता भोग्यं प्रेरितारं च मत्वा पृथगात्मानं प्रेरितारं च मत्वा । जुष्टस्ततस्तेनामृतत्वमेतीति ॥

द्वावनावीशानीशाविति ॥

योऽक्षरे तिष्ठन्नक्षरमन्तरो यमक्षरो न वेदश्च यस्याक्षरः शरीरं योऽक्षरमन्तरो यमयति ॥

य आत्मनि तिष्ठन्नात्मनोऽन्तरोऽयमात्मा न वेद यस्यात्मा शरीरम् ॥

यमात्मानमन्तरो यमयति ॥ स त आत्मान्तर्याम्यमृत इति ॥

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ॥

तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषामिति ॥

तमीश्वराणां परमं महेश्वरं तं वेदतानां परमं च दैवतमिति ॥

र्थः ॥ अन्यत् समानम् ॥
एवेति ज्ञातव्याः ॥ एवं
॥ प्रलीनजीवेश्वरे प्रलये
अपरिमिताध्रुवा इति ॥
ति केचिद्वदन्ति तेषां मते
भेदः स्वाभाविक इति ॥

न्त्रामरूपाद्विमुक्तः परात्परं

यं ब्रह्मेत्यादि श्रुत्युक्तायां
त् न सत्यम्, अनादित्वात
कर्म चोपपद्यते ॥ अस्ति
प्राप्यते ॥ तथा हि —

ानमेति वीतशोक इति ॥
: परमं साम्यमुपैति ॥ इति ॥

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपा इति ॥

दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥ सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥

बहवो ज्ञानतपसा पूता मद्भावमागता इति ॥

यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत इति ॥

स्कान्दे च —

जीवानामीश्वराणां च तनवः क्षेत्रसंज्ञकाः ॥ महदातितत्त्वमय्यः क्षेत्रज्ञाख्यास्तु तद्विदः ॥

क्षेत्राणां च क्षेत्रविदो प्रधानपुरुषस्य च ॥ मायायाः कालशक्तेश्चाऽक्षरस्य च परात्मनः ॥

पृथक्पृथग्लक्षणैर्यज्ज्ञानमुच्यते ॥ तां कालशक्तिमादाय वासुदेवोऽक्षरात्मना सिसृक्षयैक्षत ॥ यदा सा चुक्षोभ तदैव हि ॥

तस्याः प्रधानपुरुषकोट्यो जज्ञिरे ॥ मुने युज्यन्ते स्म प्रधानैस्ते पुरुषाश्चेच्छया प्रभोः ॥

इत्यादिसूत्रश्रुतिस्मृतिभिरुपास्योपासकयोर्नियन्तृनियम्ययोः स्वतन्त्रपरतन्त्रयोरीशानीशयोः शास्तृशासकयोः कर्तृव्यपदिष्टयोः सर्वज्ञाल्पज्ञयोः स्वरूपस्वभावाभ्यामत्यन्तविलक्षणयोर्द्विविधक्षेत्रज्ञपरमात्मनोर्नित्यभेद उक्तः ॥ तन्मिथ्यात्वकथने गुरुशिष्यत्वे उपदेष्टुपदेशौ ज्ञानिज्ञाने च बद्धमुक्तत्वे धर्माधर्मौ च बन्धमोक्षौ च पुण्यपापे च सत्सङ्गकुसङ्गौ च वृथा स्याताम् ॥ तं प्रतिपादकानि शास्त्राणि च मुमुक्षुभिर्मोक्षार्थं कृतः प्रयत्नश्च वृथा स्युः ॥ किञ्च ॥ बिम्बप्रतिबिम्बवादांशांशिवादपरिणामादिवादा जीवेश्वरमायादिभेदवर्जिते एकस्मिन्नद्वितीये ब्रह्मणि न घटेयुः ॥ अथ च ॥ ये गुरवः परिणामादिवादैः सजातीयविजातीयस्वगतभेदशून्यस्याच्युतस्यापरिणामिन एकस्याद्वितीयस्य ब्रह्मण उपदेशं वन्ध्यासुतवज्जातेभ्यः स्वशिष्येभ्यः कुर्वन्ति। ते पण्डितम्मन्या निरंशमपरिणामं स्वतन्त्रं मायावर्जितमेकमद्वितीयं सजातीयादिभेदशून्यं ब्रह्मद्वितीयं स्थावरजङ्गमजीवरूपं जगत् शशशृङ्गखपुष्पवन्ध्यासुतमरीचिकाजलवच्च विदन्ति न वा विदन्तीति चेत् द्वितीयवस्त्वभावात्तेषां शिष्यान् प्रत्युपदेशः खपुष्पादिवन्निरर्थकः न जानन्तीत चेत् अद्वितीयज्ञानाभावात्तेषामुपदेशारम्भोऽपि न सम्भवति ॥ अतस्तैः कृता उपदेशा ग्रन्था दयश्च ते सर्वेऽपि मिथ्या भवन्ति अतस्ते भगवदुपासकैरनादरणीयाः ॥ किञ्च ॥ तेषां मतस्य सम्यग्निरसनं तु लक्ष्मणाचार्यशतानन्दादिवैष्णवाग्रेसरकृतग्रन्थेभ्य अवगन्तव्यम् ॥३०॥१७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

'स्थिरचरजातयः स्युः' इत्यनेन चराचरात्मकस्थूलसूक्ष्मशरीरान्तःप्रवेशयोग्यं जीवानां स्वाभाविकं स्वरूपमिति सूचितम्। तद्विरुद्धं तार्किकैरभिमतं तत्स्वरूपविभुत्वं दूषयन्ति। तत्र तार्किकाः 'जीवः प्रतिशरीरं भिन्नो विभुर्नित्यश्च' इति वदन्ति, न 'नित्यो नित्यानाम्' इत्यादिश्रुतीक्षया तार्किकाभिहितं यज्जीवानां प्रतिशरीरभिन्नत्वेनापरिमितत्वं नित्यत्वेनाभिहितं यद्ध्रुवत्वं ते उभे प्रमाणमूलत्वाद्युक्ते। विभुत्वेन तैरभिरहितं यत्तेषां सर्गवतत्वं तत्प्रामाण्याभावाद्विरुद्धमित्याहुः ॥ अपरिमिता इति ॥ हे ध्रुव नित्य! तनुभृतो जीवाः, अपरिमिताः असङ्ख्येयाः, ध्रुवा नित्याश्च, इति तु श्रुतिप्रामाण्यात् सत्यमेव। यदि ते जीवाः, सर्गवताः विभवः स्युः, तर्हि शास्ता न स्यात्। सर्वेषां तुल्यत्वात् परमात्मना जीवान्तरेण वा शास्यता नोपपद्येत। इति सति, नियमः सिद्धः शास्यशासकतारूपो नियमः, न स्यात्। इतरथा विभुत्वाभावे तु शास्यता नियमादय उपपद्यन्ते। इत्थमात्मनो विभुत्ववादेऽनुपपत्तिरुद्घाटिता। अपरिमिता इत्यनेन जीवैक्यवादव्युदासः। ननु जीवानां विभुत्वाभावपक्षेऽपि या जीवानां परमात्मकृता शास्यता सा किं भृत्यादीनां राजशास्यतेवेति चेन्न, किं त्वन्तः प्रविश्येत्याहुः। अजनि चेति। इदं जगत्, यन्मयम् अजनि च एकेन येन प्रचुरं जगज्जातमित्यर्थः। तद्ब्रह्म, अविमुच्य अन्तः स्थित्वैव, नियन्तृ भवेत्। इत्येवं सत् सम्यक्, अजानतां, यत् मतं, दुष्टतया तस्य मतस्य दुष्टत्वात्, अमतमनभिमतं प्रामाणिकानामिति शेषः। यदा सममनुजानतामिति पाठान्तरं, तदा समशब्दः

सर्वपर्यायः । समं सर्वं जगत्, अविमुच्य, अन्तः स्थित्वैव नियन्तृ, इति अनुजानतां प्रामाणिकानां, यत् अमतमनभिमतं, तदनादरणीयमित्यध्याहारः । कुतः । तस्य मतस्य दुष्टतया प्रमाणविरुद्धतयेत्यर्थः । जगदजनीति प्रकृतिपुरुषात्मकतया जगदुत्पत्तिरुक्ता ॥१७॥ ॥३१॥

योगिरामानुजाचार्यकृतसरला व्याख्या

जीवानां नियाम्यस्वरूपत्वमीश्वरस्य नियन्तृत्वं चाहुः-हे ध्रुव ! नित्यस्वरूप !

'नित्यो नित्यानां चेतनश्चेतनाना'मिति श्रुतेः । अपरिमिताः असङ्ख्येयाः ध्रुवाः नित्याः । एवंविधास्तनुभृतो जीवाः सर्वगताः सर्वव्यापका यदि तर्हि तदा न शास्यता नियाम्यत्वं नोपपद्यते न नियमः उत्क्रान्तिगत्या गतादिविषयः नियमश्च श्रूयमाणः नोपपद्यते । जीवस्य विभुत्वे ईश्वरसाम्यत्वेन तस्य नियाम्यत्वासम्भवात् । जीवस्य सर्वगतत्वेन उत्क्रान्तिगत्या गतादीनां चासम्भवादित्यर्थः । इति पूर्वोक्तं शास्यत्वभावनियमाभावद्वयम् इतरथा जीवानामणुत्वे शास्यत्वाभाख्यदोषः नियमाभावदोषश्च न भवति । शास्यत्वाभावनियमाभावरूपदोषवारणाय जीवानामणुत्वमेवाङ्गीकार्यमित्यर्थः । मतदुष्टतया मतस्य सामान्यबुद्धिविषयस्य दुष्टतया दुष्टत्वश्रवणात् । तथा च श्रुतिः —

'यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपमिति ।'

अनुजानतामपि वयं जानीम एव ब्रह्मेति वदतामपि यत् ब्रह्मस्वरूपम् अमतम् अविज्ञातप्रायं याथार्थ्यस्वरूपस्य दुर्ज्ञेयत्वात् यन्मयं यद्विकारप्रायं यत्प्रचुरं वा व्यापकेन येन प्रचुरं विकारप्राचुर्यार्थयोश्च मयटः विधानात् । समं सर्वं जगत् अत्र सममिति सर्वपर्यायकम् अजनि जातम् । तत् जगदुपादानभूतं जगव्द्यापकरूपं वा ब्रह्म तदन्तस्स्थितमविमुच्यापरित्यज्य अन्तस्स्थितत्वेनेत्यर्थः । नियन्तृ नियामकं भवेत् ।

'अन्तः प्रविष्टश्शास्ता जनानामि'ति श्रुतेः । हे ध्रुव ! अपरिमिताः ध्रुवास्तनुभृतस्सर्वगता यदि तर्हि शास्ता न नियमः इति इतरथा न मतदुष्टतया अनुजानतां यदमतं यन्मयं सममजनि तदविमुच्य नियन्तृ भवेदित्यन्वयः ॥३०॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

तदंशा एव परमांशा एव संसरतो भजन्ति । संसारात् मोक्षार्थं भजन्तीत्यर्थः । तत्र पूर्वोक्तेऽर्थे सर्वमोक्षप्रसङ्गः । कश्चित् बद्धः कश्चिन्मुक्त इति व्यवस्था न स्यादित्यर्थः । अथ यदि तस्यैव समष्ट्युपाधेरीश्वरस्यैव बद्धजीवरूपेणांशेन अनिर्मोक्षप्रसङ्ग इत्यस्यायमर्थः । यथा अनेकघटावच्छिन्न एक एवाकाशः एकघटनाशेन तद्गताकाशस्य एकोऽपि बद्ध एव तिष्ठतीति सर्वांशेऽप्यनिर्मोक्षप्रसङ्गः । न हि पटैकदेशस्य दग्धत्वे पटो न दग्ध इति व्यवस्थीयते न च हस्तपादादौ बहु निगडैर्निबद्धः एकदेशान्मुक्तत्वेऽपि मुक्त इति व्यवस्थीयते इति तर्कबलेन तर्कोऽनिष्टप्रसङ्गः । युक्त्यात्मकतद्बलेन तत्र च नानात्वपक्षे च केचन कारणादयः तत्र काणादमते तावदिति वाक्यालङ्कारे उक्तौ यौ वेदान्तदूषकौ सर्वमुक्तिप्रसङ्गानिर्मोक्षरूपौ दोषौ तयोः प्रसङ्गः प्राप्तिर्नास्तीत्यर्थः । तत्र सर्वमुक्तिप्रसङ्गदोषं द्विधा व्यवस्थया परिहरति-अविद्याभेदेनेति । अविद्याशब्देन विद्याकार्यं देहेन्द्रियादिकं लक्ष्यते । तेन देहाद्युपाधिभेदेन ब्रह्मप्रतिबिम्बानां नानात्वात् यस्योपाधिर्ज्ञानेन नष्टस्तस्यैव प्रतिबिम्बस्य बिम्बेन सहैक्यं नान्यस्येति तस्यैव मोक्षो नान्येषां प्रतिबिम्बस्थानीयानां जीवानामिति न सर्वमुक्तिप्रसङ्गः । तदुक्तमभिज्ञैः —

"यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते । न सर्वे सम्प्रयुज्यन्ते तथा जीवाः सुखादिभिः ॥"

इति । अस्यां च व्यवस्थायाम् अविद्यायाः नानात्वमननगौरत्वमतः पक्षान्तरमाह-तच्छक्तिभेदेनेति । तथा च यत्र सत्त्वात्मिका शक्तिरविद्या या प्रकाशते तत्र मोक्षः स्फुरति यत्र राजसी तामसी च शक्तिस्तु उद्भवति तत्र बन्धः प्रतीयते । तदुक्तं गीतायाम्—

'दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।' इत्यादि । इति सर्वमुक्तिप्रसङ्गदोषं परिहृत्यानिर्मोक्षप्रसङ्गं परिहरति-ईश्वरस्येति । समष्ट्युपाधेरखण्डतत्त्वस्येश्वरत्वात्तस्य च विद्याशक्तिप्रधानत्वान्न केनाप्यंशेन संसारशङ्केत्यर्थः । इत्युक्तमेव

स्वकृतविचित्रयोनिष्वि

तत्र प्रमाणमाह-प्रसि

'एको देवः

उपाधिना क्रियते भेदरू

इत्यादिश्रुतिषु

व्यञ्जयति-किञ्चेति ।

अन्तर्यामिप्रतिपादकः प्र

साम्यता । तत्कर्तृकनिय

तस्य प्रतीतत्वे न वस्तुतः

स्वकार्यस्य जीवस्य तथा

तस्यैव मतम् अविषयत्वे

इति वदतां यद्ब्रह्माऽविज्ञा

ज्ञेयम् । वक्ता पुत्रो

पिता ब्रह्मानुभवसूचक

अस्याध्यात्मोपाधिपरिच्छि

त्वं दहरमल्पमेव वेत्थे

तार्किकमतखण्डनमप्यासूत्

स्वामिचरणानाम्

भजन्तीत्युक्तम् । तत्र यद्यै

तस्यैवेश्वरस्यैवांशान्तरेण संसा

स्यात् देहपरिमाणत्वे च मध्य

न तावदुक्तदोषप्रसङ्गः ।

श्लो. ३० श्लो. ३०संसारशङ्

अस्यार्थः सङ्क्षेपेण लिख्यते ।

अंशान्तरेण जीवारूपांशेन कृत्

बद्धः इत्थं निर्मोक्षः । एवं च

आत्मनामणुत्वे सूक्ष्मत्वे देहस्य

'आराग्रमात्रो ह्यपरो हि

बालाग्रशतभागस्य शत

इति सूक्ष्माणामप्यहं जी

स्यात् । तस्मात्सर्वगा इति नित्य

परिमाणानाम् आत्मनां सावय

नित्यश्चेति केचन तार्किका मन्यन्ते

विचित्रयोनिष्वित्यादौ त्वमकरण: स्वराडित्यादौ चैत्युपपादितमेवेत्यर्थ: । पूर्वोक्तव्यवस्था चात्मन ऐक्य एव सम्भवतीत्याशङ्क्य प्रमाणमाह-प्रसिद्धं चेति । सर्वश्रुतिषु —

'एको देव: सर्वभूतेषु गूढ: । नेह नानास्ति किञ्चन । यथा ह्ययं ज्योतिरात्मा विवस्वान् अपां भिन्ना बहुधैकोऽनुगच्छन् । भिन्ना क्रियते भेदरूपो देव: क्षेत्रेष्वेवजोऽयमात्मा । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥'

इत्यादिश्रुतिषु एवं श्लोकाद्बहिरेव स्वसिद्धान्तेन तार्किकदूषणं परिहृत्य प्रत्युत तार्किकमतं दूषयन् स्वसिद्धान्तं श्लोकारूढं यति-किञ्चेति । इमं पक्षं तार्किकाद्युक्तं जीवानामनन्तत्वनित्यत्वव्यापकत्वं पक्षं कर्मभूतम् अन्तर्यामिब्राह्मणं कर्तृ र्यामिप्रतिपादक: प्रयोगात् बहिरनुष्ठानविधायकसमुदायो न सहत इति । तेषां जीवानाम् असमत्वाव्यापकत्वेन चेश्वरतुल्यत्वात् यता । तत्कर्तृकनियम्यता । इतरथा अस्मदभिमतपक्षान्तरे तु यद्विकारप्रायं यस्येश्वरबिम्बाधिष्ठानस्थानीयस्य कार्यप्रायं तस्मिन् प्रतीतत्वे न वस्तुत: कार्यत्वाभावात् प्रायमित्युक्तम् । तदीश्वराख्यं ब्रह्म वह्निस्थानीयम् । तस्य विस्फुलिङ्गस्थानीयस्य स्वविकारस्य कार्यस्य जीवस्य तथा च श्रुतिनिर्विषयत्वे प्रमाणं श्रुति:-यस्येति । यस्यानुभवज्ञानीय: ब्रह्माऽमतं ज्ञातं न भवतीति मतिर्भवति मतम् अविषयत्वेनैव ज्ञानस्य सिद्धान्तिततत्वात् । यस्य तु ब्रह्म मतं ज्ञातं भवतीति निश्चय: स तु नैव वेद । विजानतां जानीम नतां यद्ब्रह्माऽविज्ञातम् अवचनेनेति वेदान्तमधीत्यागतं पुत्रं पिता पृष्टवान् प्रत्यग्ब्रह्म त्वं ज्ञातवान्न वेति । तत्रोत्तरमिदमिति म् । वक्ता पुत्रोऽवचनेनैव वचनाभावेनैवोत्तरं लक्षणया ददौ । वाङ्मनसोऽगोचरं ब्रह्मेतीति स ब्रह्मानुभवसूचकमुखनेत्रविकासादिलिङ्गेन तुष्ट: तूष्णीं बभूवेति । यहि अहं सुवेदेति त्वं मन्यसे तर्हि ध्यात्मोपाधिपरिच्छिन्नस्य ब्रह्मणो रूपं त्वं न्यूनं दहरम् अल्पमेव वेत्थ । यच्च देवेष्वस्याधिदैवतोपाधिपरिच्छिन्नं रूपं तदपि दहरमल्पमेव वेत्थेत्यहं मन्ये । इति यस्मात् सर्वथा दुर्ज्ञेयं ज्ञाने च दोषस्तस्मादित्यर्थ: । श्लोके युक्त्या र्किकमतखण्डनमप्यासूक्तोक्तयेति ॥३०॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

स्वामिचरणानाम् एवं तावत् परमात्मन: सकाशादविद्याकृतकार्य्योपाधय: तदंशा एव जीवा जाता: । संसरतो त्युक्तम् । तत्र यद्यैकाऽविद्या तदा जीवस्याप्येकत्वादेकमुक्तौ सर्वमुक्तिप्रसङ्ग: । अथ नानाविधा अविद्यास्तर्हि श्वरस्यैवांशान्तरेण संसारानपगमादनिर्मोक्ष: इत्यादितर्कबलेन वस्तुत एव नानात्मान: तत्र च तेषामणुत्वे देहव्यापि चैतन्यं न देहपरिमाणत्वे च मध्यमपरिमाणानाम् सावयवत्वेनानित्यत्वं स्यात् । अतो (नाना) सर्वगता नित्याश्चेति केचन मन्यन्ते । तत्र क्तदोषप्रसङ्ग: । अविद्याभेदेन तच्छक्तिभेदेन वा बद्धमुक्तव्यवस्थासम्भवात् । ईश्वरस्य तु न केनाप्यंशेन श्लो. ३०संसारशङ्केत्युक्तमेव । प्रसिद्धं चात्म्यैक्यं किञ्चेमं पक्षमन्तर्यामिब्राह्मणमपि न सहत इत्याह-अपरिमिता इति । सङ्क्षेपेण लिख्यते । अत्र तार्किका दूषयन्ति यद्येकाऽविद्या जीवोऽप्येकविध: । तया बद्धोऽस्ति तर्हि तस्यैव ईश्वरस्यैव जीवारूपांशेन कृत्वा संसारानपगमात् संसारनिवृत्त्यभावादनिर्मोक्ष: स्यात् । एकया अविद्यया मुक्तो जीव: पुण्यनरया निर्मोक्ष: । एवं च सति चतुर्थपुरुषार्थो भाव: स्यादित्यादितर्कबलेन नाना आत्मन: स्थाप्यते । सर्वगतत्वमाह-तेषाम् अणुत्वे सूक्ष्मत्वे देहस्य स्थूलत्वे सर्वव्यापिचैतन्यं न स्यात् । जीवपरिमाणमुक्तं श्रुत्या-

'आराग्रमात्रो ह्यपरो हि दृष्ट: ।' इति । श्रुत्यन्तरम् ।

बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीव: स विज्ञेय: सुखदु:खफलैकभुक् ॥

इति सूक्ष्माणामप्यहं जीव: इत्येकादशे भगवदुक्ते: । एवम्भूतसूक्ष्मस्थूलदहैकप्रदेशे पिपीलिकादिस्पर्शजं चैतन्यं कथं तस्मात्सर्वगा इति नित्यत्वं साधयति-देहे इति । देहपरिमाणत्वे च देहस्य मध्यमं हृदयं 'दशाङ्गुलम्' इति श्रुते: । णानाम् आत्मनां सावयवत्वादनित्यत्वं स्यात् । तस्मात्परिमाणाभावान्नित्या इति । अत एवात्मनो नानासर्वगता जीवरूपेणैव केचन तार्किका मन्यन्ते । एतन्मतं निराकुर्वन् सिद्धान्तं करोति-तत्र न तावदित्यादिना । तत्र बन्धमोक्षप्रसङ्गे उक्तदोषप्रसङ्गो

नास्ति। कुतः। अविद्याभेदेन। अविद्यया बन्धः विद्यया मोक्षः

'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥ इतिश्रुतेः।'

एकादशे च —

'विद्याविद्ये मम तनू विशुद्धैव शरीरिणाम्। बन्धमोक्षकरी आद्ये मायया ते विनिर्मिते॥' इति।

तच्छक्तिभेदेन भवती अविद्यायाः क्रियाशक्त्या बन्धः। विद्यायाः ज्ञानशक्त्या मोक्षः। श्रुतिश्च

'काममयोऽयं पुरुषः सत्यकामो भवति।' यत्क्रतुर्भवति तत्कर्म करोति। यत्कर्म कुरुते तदपि सम्पद्यते। इति।

'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।'

इतीश्वरस्य बन्धमोक्षव्यवस्थामुक्त्वा अंशिनस्तु बन्धशङ्कां निराकरोति-ईश्वरस्येति। समष्ट्युपाधेरखण्डितत्वस्येश्वरत्वात् तस्य विद्याशक्तिप्रधानत्वात् केनाप्यंशेन संसारशङ्केत्यर्थः।

'एक एव हि भूतात्मा भूते भूते व्यवस्थितः॥ एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥'

इत्यादिसर्वश्रुतिषु आत्मैक्यं प्रसिद्धमस्त्येव। कुतो नानात्वं किञ्च जीवस्य कुतः स्वातन्त्र्यम् अन्तर्यामिसम्भवात्। अत इमं तार्किकाणां पक्षं नानाजीवा स्वतन्त्राः नित्याः सर्वगताः इति मतम्। अन्तर्यामी ब्राह्मणाख्यो वेदो न सहते इत्याह-अपरिमिता इति। हे ध्रुव! तनुभृतो जीवाः यदि अपरिमिताः अनन्ताः ध्रुवाः तेनैव रूपेण नित्याः सर्वगताश्च स्युः। तर्हि तेषां समत्वात् शास्यता न घटते।

इति कृत्वा त्वया नियमो नियमनं न स्यात्। इतरथा घटते कथम्

अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्। इति यन्मयम् उपाधितो यद्विकारप्रायं जीवाख्यम् अजनि जातं तद्विमुच्य कारणतया अपरित्यज्य तस्य स्वविकारस्य नियन्तृ नियामकं भवेत्। तथ यत् अग्निमयं विस्फुलिङ्गं जातं तदग्नित्वं कर्तृ विस्फुलिङ्ग स्वकार्यम् अपरित्यज्य स्वरूपांशेन शक्यांशेन च व्याप्यैव नियन्तृ प्रवर्तकं भवेत्। कार्याभावे कारणस्य प्रवृत्त्यभावात्तद्वत्। किं तत् समम् अनुस्यूतं तद्दर्शयति। समं क्वचिदप्यंशेन तुल्यं वस्त्वन्तरं ज्ञात्वा तद्ब्रह्म अनुजानतां जानीम इति वदतां यत् अन्तर्याम्याख्यं तद्रूपं परमकारणं वस्तु अमतं अविज्ञातप्रायं अविषयत्वात् मतदुष्टतया मतस्य ज्ञातस्य दुष्टतया दोषश्रवणात्। तस्मात् यत्तच्छब्दद्योत्यम् अतर्क्यं किमपि सर्वानुस्यूतत्वेन नियन्तृ भवेदित्यर्थः। तथा च श्रुतिः –

'यस्यामतं मतं यस्य मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्॥'

'अवचनेनैव प्रोवाच स ह तूष्णीं बभूव।' इत्यादि।

अर्थः – यस्य ब्रह्मविद अमतमविज्ञातमविदितं ब्रह्मेति मतम् तस्य मतं ब्रह्म सम्यग्ज्ञातमिति यस्य पुनस्मतं मया ब्रह्म ज्ञातमिति स न वेदैव। अत एव विजानतां जानीम इति वदतामविज्ञातमज्ञातमेव। अविजानतां न जानीम इति वदतां विज्ञातमिति निदर्शनम्। अवचनेनेति। वेदान्तशास्त्रमधीत्य गुरुकुलादागतं पुत्रं पिता पृष्टवान् प्रत्यग्ब्रह्म त्वं ज्ञातवान्न वेति। अविशेषे प्रत्यग्ब्रह्मणि शब्दप्रवृत्तिहेतुजातिगुणादेरभावाद्ब्रह्मवित्त्वप्रद्योतकमुखकान्त्यादिना तदभिनयं कृत्वाऽवचनेनैव प्रोवाच प्रत्यग्ब्रह्म मयाऽनुभूतमिति सूचितवान् स पिता तूष्णीं बभूव। ब्रह्मात्मतत्त्वमयं ज्ञातवानिति निश्चयं जगामेत्यर्थः।

मतदुष्टत्वे श्रुतिः-

यदि मन्यसे सुवेदेति दह्रमेवापि नूनं वेत्थ ब्रह्मणो रूपं यदस्य वेदेषु इति।

अर्थः – यदि कदाचिदस्य ब्रह्मणो यद्रूपमहं सुवेदेति मन्यसे तर्हि दह्रं स्वल्पमेवापि त्वं न वेत्थ न जानीषे न केवलमेतावदपि तु अध्यात्मोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो वेदेषु यद्रूपं गीतं तदपि त्वं दह्रमेव वेत्थेति। मन्येऽहं यत्तु निरुपाधिभूमाख्यं ब्रह्म न

वेद्यमित्यभिप्रायः । मतखण्डनपरेयं श्रुतिः । अन्तर्यामिब्राह्मणम् "यः पृथिव्यां तिष्ठन्" इत्यादिकं प्रागेव लिखितम् । स्वामिनाम्–

अन्तर्यन्ता सर्वलोकस्य गीतः श्रुत्या युक्त्या चैवमेवावसेयः । यः सर्वज्ञः सर्वशक्तिर्नृसिंहः श्रीमन्तं तं चेतसैवावलम्बे ॥

आश्रयामि । तं कम् । यः सर्वलोकस्य अन्तर्यन्ता अन्तर्यामी श्रुत्या गीतो युक्त्या चैवमेवावसेयो निश्चितः तम् ॥३०॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ जीवानामणुत्वं परमात्मनस्तदन्तः प्रविश्य नियन्तृत्वं चाह–अपरिमिता इति । अपरिमिता असङ्ख्येयास्तनुभृतो जीवाः चेत् सर्वगता ध्रुवा अस्पन्दाः स्युस्तर्हि उत्क्रान्तिगत्या गतिश्रुतिविरोधापत्तिः स्यात् । तथा च सूत्रकारः — 'उत्क्रान्तिगत्या नाम् ।' (२-३-२०) इति श्रुतेरित्यर्थः ।

"तेन प्रद्योतेनैव आत्मा निष्क्रामति । ये वै के चास्माल्लोकात्प्रयन्ति ।

चन्द्रमसमेव सर्वे गच्छन्ति । तस्माल्लोकात्पुनरेत्यास्मै लोकाय कर्मणे ।"

इत्यादिगत्या गतीनां श्रुतेरणुरेव जीवः प्रतिपादितः । तनुभृत इति सर्वेषां शरीरसम्बन्धेन सर्वशरीराचरितपुण्यपापानां साधारणत्वेन व्यवस्थितफलदानायोगात् शासनमपि नोपपद्यते । इत्याह–तर्हि न शासितेति कृत्वा नियमो नियमनं न स्यात् । हे हेयप्रतिभट ! इतरथास्पन्दनवत्त्वे अणुत्वे उत्क्रान्तिगत्या गतयश्चोपपद्यन्ते शासनमपि उपपद्यत इत्यर्थः । यद्वा । इतरथा नीयत्वे उत्क्रान्तिगत्या गत्यविरोधाय अध्रुवतास्पन्दनत्वम् अणुत्वं च स्वीकार्यमित्यर्थः । शासनं चान्तःप्रविश्येत्याह–अजनि तद्ब्रह्म अविमुच्य नियाम्यत्वम् अविमुच्य अन्तःस्थितत्वेन नियन्तृ भवेत् ।

'अन्तः प्रविष्टः शास्ता जनानामि'त्यादिश्रुतेर्नियन्तृत्वं स्यादित्यर्थः । इति समजानतां सम्यगजानतां यन्मतं मतदुष्टतया त्वादमतम् अनभिमतम् अस्माकमिति शेष इत्यर्थः ॥३०॥

कृष्णप्रिया

हे ध्रुव ! निश्चल स्वरूप असंख्यात नित्य शरीरधारी जीव यदि विमुखरूप हो तो विमुखरूप परमात्मा के होने से उनको परमात्मा से नियमन करना नही हो सकता तथा जीवन का शरीर से निकलना और परलोक वहां से आना यह श्रुतियोंमें सुना जाता है । विभमान यह नियम भी नहि घट सकता है और जीवन को नमें उनका परमात्मा से नियम न । परमात्मा से प्रचुर यह जगत इसे उत्पन्न हुआ है वह परब्रह्म इस जगत् छोडकर अन्तर्यामि रुपसे सब के भीतर स्थित होकर सबका नियन्ता होता है इस प्रकार तत्व ज्ञानियोके जो विरुद्ध मत है वय दुष्ट है ॥३०॥

न घटत उद्भवः प्रकृतिपूरुषयोरजयोरुभययुजा भवन्त्यसुभृतो जलबुद्बुदवत् ।
त्वयि त इमे ततो विविधनामगुणैः परमे सरित इवार्णवे मधुनि लिल्युरशेषरसाः ॥३१॥

कर्दमक्षमा

अजयोः, प्रकृतिपूरुषयोः, उद्भवः, न, घटते ।, उभययुजा, असुभृतः, जलबुद्बुदवत्, भवन्ति, ततः, ते, इमे, जीवाः, गुणैः, सह, सरितः, अर्णवे, इव, अशेषरसाः, मधुनि, इव, परमे, त्वयि, लिल्युः ॥३१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु, यदि च परमात्मनो जीवा जायन्त इति नियन्तृनियम्यभाव उच्येत तथा सति जीवानामनित्यत्वप्रसङ्गेन प्रतिदिनं कृतनाशाकृताभ्यागमप्रसङ्गः स्यात् किञ्च तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात् न चैतद्युक्तम् स्वप्रकाशानन्दात्मनोऽविद्याकृतानर्थनिवृत्तिमात्रस्य मोक्षत्वाभ्युपगमादित्याशङ्क्योपाधिजन्मनैव जीवानां जन्मोच्यते न स्वतः अघटनादित्याह-न घटत इति। तत्र किं प्रकृतेर्जीवरूपेणोद्भवः स्यात् पुरुषस्य वा उभयोर्वा आद्ये जीवानां जडत्वापत्तिः द्वितीये पुरुषस्य विकारित्वप्रसङ्गः अत एव न तृतीय इत्याशयेनोक्तं प्रकृतिपुरुषयोरुद्भवो न घटत इति श्रुत्वाऽजत्वप्रतिपादनादपीत्याह-अजयोरिति। तथा च श्रुतिः "अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्ती सरूपाम् अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" इति उभययुजा तु भवन्ति उभयञ्च तद्युज्यत इति युक्सम्बद्धं परस्पराध्यास्तमिति यावत् तेनासुभृतः प्राणाद्युपाधयो जीवा जायन्त इत्यर्थः। जलबुद्बुदवदिति यथा केवलेन जलेनानिलेन वा जलबुद्बुदा न भवन्ति किन्तु मिलिताभ्यां तद्वत् तत्र यथाऽनिलो निमित्तं जलमुपादानमेवमत्रापि प्रकृतिर्निमित्तं पुरुष उपादानम् 'तस्माद्वा एतस्मा दात्मन आकाशः सम्भूतः। सोऽकामयत बहुस्यां प्रजायेयेति याथाऽग्नेः क्षुद्राः विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एवाऽऽत्मानो व्युच्चरन्ति' इत्यादिश्रुतिषु चेतनाचेतनप्रपञ्चस्य परमात्मोपादानत्वश्रवणात् न च विकारित्वम् परिणामानङ्गीकारात केचित्पुनः परिणाममङ्गीकृत्याऽऽत्मनोऽविकारभिया विपरीतं निमित्तोपादानभावमिच्छन्ति सर्वथा तावत्प्रकृतिपुरुषैक्यात् भवतीति सिद्धम् 'तदेकमेवाद्वितीयं ब्रह्म अजामेकामविनाशीवारेऽयमात्मा' इत्यादिश्रुतिबलादुत्पत्तिश्रवणाच्च जीवानामौपाधिकमेव जन्म न वस्तुत इत्युक्तम् उपाधिलयेन परमात्मनि पुनर्लयश्रवणादपि न वास्तवं जन्मेत्याह-त्वयि त इति। त्वयि कारणात्मनि त इमे जीवाः तत इति यतो न वास्तवं जन्म तस्माद्विविधनामगुणैरनेकप्रकारकार्योपाधिभिः सह निलिल्युः लीना बभूवुः तत्र सुषुप्तिप्रलययोर्मधुन्यशेषरसा इव लीयन्ते यथा मधुनि सकलकुसुमरसाविशेषतोऽनुपलक्ष्यमाणा अपि सामान्येनोपलक्ष्यन्ते एवं स्वापादौ विशेषमत्रालयात्कारणस्य विद्यमानत्वात्सामान्यतो वर्तन्ते मुक्तौ तु कारणस्यापि लयात्त्वयि परमे निरुपाधौ सरित इवार्णवे लीयन्त इति विवेकः तथा च श्रुतयः 'यथा सौम्य मधु मधुकृतोनिस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां सङ्गमयन्ति ते तथा तत्र न विवेकं लभन्ते अमुष्याहं वृक्षस्य रसोस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सौम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामहे' इति "यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" इत्याद्याः ॥

यस्मिन्नुद्यविलयमपि यद्भाति विश्वं लयादौ जीवोपेतं गुरुकरुणया केवलात्मावबोधे। अत्यन्तान्तं व्रजति सहसा सिन्धुवत्सिन्धुमध्ये मध्ये चित्तं त्रिभुवनगुरुं भावये तं नृसिंहम् ॥१८॥ ॥३१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — पुनराक्षिपति-तथा सतिजीवानामुत्पत्त्यङ्गीकारे सति। "यज्जन्यं तद्विनाशि" इति व्याप्तेरनित्यप्रसङ्गेन। तथा च कृतानां कर्मणां विनैव फलभोगं नाशोऽकृतानां पूर्वमसम्पादितानामेव फलदानायाभ्यागमः प्राप्तिः स्यादिति। न केवलमेतावानेव दोषः किन्त्वन्योऽपीत्याह-किञ्चेति। तदोत्पत्तिस्वीकारे स्वरूपहानिः स्वरूपनाशः। भवत्विति चेदाह-न चेति। एतज्जविस्वरूपनाशलक्षणमुक्त्युपादानं न च युक्तं स्वप्रकाशानन्दात्मनः स्वयंज्योतिःसुखस्वरूपस्यात्मनोऽविद्याकृतानर्थस्य कर्तृत्वभोक्तृत्वादिधर्माणां निवृत्तिमात्रस्य। तत्रोत्पत्तिस्वीकारे। उभयोः प्रकृतिपुरुषयोः। आद्ये प्रकृतेर्जीवरूपेणोद्भवे। द्वितीये पुरुषस्य जीवरूपेणोद्भवे। अत एव पूर्वोक्तोभयदोषत्रासादेव तृतीयः उभयोर्जीवरूपेणोद्भवपक्षोऽपि नेत्यभिप्रायेणाह-प्रकृतिपूरुषयोरिति। श्रुतिमाह-तथा चेति। न जायत इत्यजा मूलप्रकृतित्वात्। मूलप्रकृतिरविकृतिरिति ससत्यामुक्तेः। तां लोहितशुक्लकृष्णां रजःसत्त्वतमोवर्णाम्। सरूपां राजसीसात्त्विकीतामसीरूपां नरसुरनारकीमित्यर्थः। अजः पुरुषः एकोऽजः क्षेत्रज्ञो जीवः अजां जुषमाणः सेवमानः अनुशेते निरन्तरं मुह्यति। अन्योऽजः परमात्मा एनामजां जहाति। किम्भूताम्। पुरुषरूपेण भुक्तो भोगो यस्यास्ताम्। सृष्टेः प्रकृतौ पुरुषस्तु वीर्यं निहितवान्।

तद्वीर्यं प्रकृतेर्गर्भान्मह
इत्यर्थ इति-तात्पर्यम्
च दृष्टान्ते । अत्रापि
यत्तस्मादात्मशब्दवाच्
परमात्मोपादानकत्वमेव
कुण्डलादिरूपेण परिण
स्वीकुर्वन्ति । एवं कृ
"यथाग्नेः" इत्यादिश्
नित्यनैमित्तिकात्यन्तिक
मधुनीति । विशेषोऽ
आत्यन्तिकलये त्वहं ब्र
तथा चेति । यथेति । यत
लोके मधुकृतो मधुमक्षि
नानाभवा नानात्या, नाना
समवहारं समवहृत्य एक
एवमेवेमाः सर्वाः प्रजाः
इति । सोपाधिलयपरेयम्
गच्छन्ति अदर्शनं यान्ति ए
निरुपाधिलयपरेयम् । श्रुत्

"यथोदके शुद्धम्

यथा नद्यादिजले
शुद्धो लिङ्गनिर्मुक्तः सन् ब्र
मध्ये षष्ठ्या वा ।" इति स
विश्वम् उद्यत् उद्भवत्, यस्मि
केवलात्मावबोधे सति यस्मि
समुद्रेऽत्यन्तान्तं व्रजति तद्वत्
इति ॥★॥

श्रीधरानुयायिनी —
जीवानामनित्यत्वापत्त्या कृत
यथाऽनवच्छिन्नमाकाशमेव घ
वा जीवानां जन्म तद्भङ्गे मोक्ष
पुरुषस्य जीवरूपेणोत्पत्तौ तस्य
ह्येकः" इत्यादिश्रुतौ "प्रकृतिं
परस्पराध्यासरूपसम्बन्धेनैव त
जीवा जायन्ते । यद्वा-प्रकृति

तृतीयं प्रकृतेर्गर्भान्महत्तत्त्वं जातमित्यत आह-भुक्तभोगाम् । बन्धमोक्षनिदर्शनपरेयम् । उभयं प्रकृतिपुरुषं तेन परस्पराध्यासेन । त्यर्थ इति-तात्पर्यम् । दृष्टान्तेनोक्तमर्थं स्फुटयति-जलबुद्बुदेति । दृष्टान्तं स्फुटयति मिलिताभ्यां जलानिलाभ्यां तद्वदत्रापीति । तत्र व दृष्टान्ते । अत्रापि प्रकृतेऽपि । पुरुषोपादानत्वे श्रुतिमाह- "तस्माद्वा" इति । "सत्यं ज्ञानमनन्तं ब्रह्म ।" इत्युक्तं तस्मादात्मशब्दवाच्यात् । स्पष्टमन्यत् । सृष्टिपरेयम् । श्रुत्यन्तरे च व्याख्याते । "यथाग्नेः" इत्यादिश्रुतौ चेतनाचेतनात्मकप्रपञ्चस्य मात्मोपादानकत्वमेव श्रूयते । तथा च परमात्मन उपादानत्वे विकारित्वं स्यादिति चेदाह-न चेति । केचित्तु परिणामे वस्तुस्वरूपस्थितेः कुण्डलादिरूपेण परिणामेऽपि स्वर्णस्वरूपानाशदर्शनात्तमङ्गीकृत्यापि विकारभियाऽऽत्मन उपादानत्वं नाङ्गीकुर्वन्ति किन्तु निमित्तत्वं स्वीकुर्वन्ति । एवं कृतेऽप्यस्मत्पन्था एवाङ्गीकृतो भवेदित्याह-सर्वथेति । तदित्थम् "अजमेकम्" इत्यादिश्रुतेरजत्वस्मरणात् "यथाग्नेः" इत्यादिश्रुतेरुत्पत्तिश्रवणात्र वास्तवं किन्त्वौपाधिकं देहाद्युपाधिकृतमेवेत्याह-न वस्तुत इति । लयो हि नित्यनैमित्तिकात्यन्तिकभेदात्त्रिधा । तत्र तेषु सुषुप्तिर्नित्यलयः प्रलयः प्राकृतिकनैमित्तिकरूपो ज्ञेयः । सुषुप्तिप्रलययोर्दृष्टान्तमाह-मधुनीति । विशेषोऽनेकभेदभिन्नः प्रपञ्चः कारणस्याज्ञानस्य विद्यमानत्वात् "न किञ्चिदवेदिषम्" इति तत्स्मृतेः । आत्यन्तिकलये त्वहं ब्रह्माऽस्मीति स्वरूपसाक्षात्कारेणाज्ञानं निवर्तत एवेत्याह-मुक्तौ त्विति । मधुनि लिल्युरित्यत्र प्रमाणमाह-तथा चेति । यथेति । यत्पृच्छसि अहन्यहनि सम्पद्य न विदुः सत्सम्पन्नाः स्म इति । शृणु तत्र दृष्टान्तम्-हे सोम्य ! श्वेतकेतो ! यथा लोके मधुकृतो मधुमक्षिका मधु निस्तिष्ठन्ति थूत्कृत्य निष्पादयन्ति । तत्प्रकारमाह-नानात्ययानाम् । नानाशब्द उभयत्र सम्बध्यते । नानाभवा नानात्या, नाना यान्तीति नानायाः । ततश्च नानात्यानां नानास्थानोद्भवानां नानायानां नानाजातिं प्राप्तानां वृक्षाणां रसान् समवहारं समवहृत्य एकतां गमयन्ति मधुत्वमापादयन्ति तथा ते रसास्तत्र मधुनि विवेकं न लभन्तेऽमुष्य वृक्षस्याहं रसोऽस्मीति । एवमेवेमाः सर्वाः प्रजाः सति श्रीनारायणे सम्पद्य न विदुः सुषुप्तिकाले मरणप्रलययोश्च । अत एव "तस्मिन्सति सम्पद्यामहे" इति । सोपाधिलयपरेयम् । सरित इवार्णव इत्यत्र श्रुतिमाह-यथेति । यथा स्यन्दमाना गच्छन्त्यो नद्यः नामरूपे विहाय समुद्रेऽस्तं गच्छन्ति अदर्शनं यान्ति एवं विद्वान् ज्ञानी नामरूपे त्यक्त्वा परात्परं सूक्ष्मात्प्रकृतिपुरुषादपि परं दिव्यं यथोक्तलक्षणं पुरुषमुपैति । निरुपाधिलयपरेयम् । श्रुत्यन्तरं चात्र टीकाकारैर्गृहीतं —

"यथोदके शुद्धमुदकमासिक्तं तादृगेव भवत्येवं मुनेर्विजानत आत्मा भवति गौतम ।" इति ।

यथा नद्यादिजले घटादिष्ठं शुद्धं निर्मलं जलमासिक्तं तादृगेव भवति हे गौतम एवं विजानतो ज्ञानवतो मुनेरात्मा देहान्ते शुद्धो लिङ्गनिर्मुक्तः सन् ब्रह्मणि युक्तो ब्रह्मैव भवतीति । अथ स्वामिनाम्-यस्मिन्निति । तं नृसिंहं मध्येचित्तं चित्तस्य मध्ये "पारे मध्ये षष्ठ्या वा ।" इति समासः । भावये चिन्तयामि । "भू-मिश्रीकरणचिन्तनयोः" । तं कम्, यस्मिन् जीवोपेतं जीवसमेतं विश्वम् उद्यत् उद्भवत्, यस्मिन् विलयमपि यत् गच्छत्, यस्मिन् भासते प्रकाशते तम् । लयादौ सुषुप्तिप्रलयादिषु भाति । गुरुकरुणया लात्मावबोधे सति यस्मिन्नत्यन्तमपुनरावृत्तिं व्रजति तम् । तत्र दृष्टान्तः-सिन्धुवन्नदीवत् । सिन्धुमध्ये समुद्रमध्ये यथा सन्धुर्गङ्गा सिन्धुरत्यन्तान्तं व्रजति तद्वत्सर्वा नद्यो गङ्गायां निपतन्ति सैव समुद्रे प्रविशतीति । यद्वा-सिन्धुभिस्तुल्यं सन्धुवत् यथा नद्यः समुद्रे ति॥★॥

श्रीधरानुयायिनी — बिम्बाद्ब्रह्मणो जातानां प्रतिबिम्बरूपाणां जीवानां कारणत्वेन ब्रह्मैव नियामकमित्युक्तम् । तथा च जीवानामनित्यत्वापत्त्या कृतनाशाकृताभ्यागमादिदोषापत्तिरित्याशङ्क्यान्तःकरणरूपोपाधिजन्मनैव जीवानां जन्म न स्वतः । अनवच्छिन्नमाकाशमेव घटोपाधिना घटाकाशं भवति घटभङ्गे तु पुनस्तदेव महाकाशम् एवमविद्योपाधिनान्तःकरणोपाधिना जीवानां जन्म तद्भङ्गे मोक्षः । अतः स्वरूपतो जीवोऽपि ब्रह्मैवेत्याहुः-नेति । प्रकृतेर्जीवरूपेणोत्पत्तौ जीवानां जडत्वापत्तिः पुरुषस्य जीवरूपेणोत्पत्तौ तस्य विकारित्वप्रसङ्गः । उभयोः प्रकृतिपुरुषयोर्मिलित्वापि जीवरूपेणोत्पत्तिर्न सङ्गच्छते । "अजामेकामजो" इत्यादिश्रुतौ "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि" इति श्रीगीतायां च द्वयोरप्यजत्वेन प्रसिद्धेः । अत उभयोः परस्पराध्यासरूपसम्बन्धेनैव त उत्पाद्यन्ते, तथात्राप्युपादानकारणभूते पुरुषे निमित्तकारणीभूतया प्रकृत्या विवर्तरूपा बुद्बुदा इव जायन्ते । यद्वा-प्रकृतिरूपोपादानकारणे निमित्तकारणीभूतेन वायुनेति मिलितयोस्तयोः सम्बन्धेनैव त उत्पद्यन्ते,

तथात्राप्युपादानकारणभूते पुरुषे निमित्तकारणीभूतया प्रकृत्या विवर्तरूपा बुद्बुदा इव जीवा जायन्ते। यद्वा–प्रकृतिरूपोपादानकारणे निमित्तकारणीभूतेन पुरुषेण परिणामरूपा जीवा जायन्ते। उभयथापि प्रकृतिपुरुषयोरैक्यादेवाविद्यया परस्पराध्यासादेवेत्यर्थः। परमात्मनि प्रकृतिः स्वरूपेणाध्यस्ता प्रकृतौ च परमात्मापि सत्तास्फूर्तिरूपेण संसर्गेऽध्यस्तः। यथाऽधिष्ठानस्य शुक्त्यादेः संसर्गमात्रं रजतेऽध्यस्यते रजतं तु स्वरूपेण शुक्तावध्यस्यते परमात्मनोऽपि स्वरूपेणाध्यासे बाधापत्त्या शून्यवादप्रसङ्गादिति। एवं चौपाधिकमेव जीवानां जन्म न वास्तवमित्युक्तम्। उपाधिलयेन जीवानां ब्रह्मणि लयश्रवणादपि न वास्तवं जन्मेत्याहुः–त्वयीति। सर्वे जीवाः स्वोपाधिसहिता यतस्त्वत्तः उत्पन्ना अतस्त्वय्येव कारणे लीना बभूवुः। लयश्च सुषुप्तिप्रलययोर्मुक्तौ चेति द्विधा। आद्यो यथा–मधुमक्षिकाभिर्नीता अनेकपुरष्परसा मधुनि लीनाः सन्तोऽमुकस्य पुष्पस्याहं रस इति विशेषतोऽनुपलक्ष्यमाणा अपि सामान्यत उपलक्ष्यन्त एव, तथा प्रारब्धकर्मनीता अन्तःकरणाद्युपाधिसहिता जीवास्त्वयि लीनाः सन्तो मनुष्यपशुपक्ष्यादिरूपेण विशेषतोऽनुपलक्ष्यमाणा अपि सामान्यतोऽविशिष्टसंस्कारा लक्ष्यन्त एव, तदानीं संसारकारणीभूताविद्यायाः विद्यमानत्वात्। अत एव जीवानां पुनर्जन्म। द्वितीयो यथा–मुक्तौ च ज्ञानेनाविद्याया अपि विलयात्तदा त्वयि निरुपाधिब्रह्मणि सर्वे जीवाः समुद्रे श्रीगङ्गादिनद्य इव सामान्यविशेषाभ्यामनुपलक्ष्यमाणा अनवशिष्टसंस्कारा एव लीयन्ते। अत एव तेषां न पुनर्जन्मेत्यर्थः। एवञ्चाविद्योपहितानामप्यनादित्वाज्जीवानां वास्तवजन्ममरणराहित्यान्न कृतनाशाकृताभ्यागमादिदोषापत्तिरिति ध्येयम्। यद्वा–ननु, स्वप्रियया सह लोकवद्विदेहवृषभानुभीष्मकदशरथनन्दवसुदेवादिगृहे वारं वारमुत्पद्यमानस्य कथं मम महती स्तुतिरित्याशङ्क्य सर्ववैलक्षण्यं वदन्त्यः स्तुवन्ति–नेति। हे प्रभो ! प्रकृतिपुरुषयोर्जगज्जननीजनकयोः श्रीसीतारामयोः श्रीराधाकृष्णयोः श्रीरुक्मिणीवासुदेवयोर्वोद्भवो जन्म न घटते। यतः अजयोर्नीत्यसिद्धत्वेन जन्मरहितयोः। इमे जीवास्तु ततः त्वत्तो नियन्तुरीश्वराद्धेतुभूतात् उभययुजा मातृपितृसंयोगेन जलवायुसंयोगजबुद्बुदवत् असुभृतः क्षणविनाशिदेहधरा भवन्ति। एवम्भूता अपि ते केचित्कृतपुण्यपुञ्जास्तव विविधनामगुणैः कृत्वा त्वदीयनानाविश्वनामगुणकीर्तनश्रवणादिना परमे मधुनि परमामृतरूपे त्वयि लिल्युर्लयं प्रापुः त्वत्पादपद्मच्छायायां लीना बभूवुः। ननु, नानाभेदाः प्राणिनः कथं समफलभाज इत्याकाङ्क्षायां दृष्टान्तमाहुः–यथाऽशेषरसाः मधुरक्षारादिविविधजलाः सरितो नद्योऽर्णवे समुद्रे लीना बभूवुर्तद्वदित्यर्थः। अभीष्टप्राप्तौ मार्गे निरोधकाऽभावेऽप्ययं दृष्टान्तो बोद्धव्यः। यद्वा–हे उभय ! युगलमूर्ते श्रीराधाकृष्ण ! असुभृतो देवमनुष्याद्या जीवाः अजयोः आद्वासुदेवात्त्वत्तो जातयोराविर्भूतयोः प्रकृतिपुरुषयोर्युजा संयोगेन जलवायुसंयोगेन बुद्बुदा इव जायन्ते। ततस्तदनन्तरं त इमे जीवाः अशेषरसाः न शेषो रसः पुनरुत्पत्तिहेतुरदृष्टादिर्येषां ते तथाभूताः सन्तो मधुनि अमृतादपि मिष्टतमे परमे परा मा यस्येति। युगलमूर्ताविव त्वयि समुद्रे नद्य इव विविधनामगुणैः सह लीना भवेयुः। एवं च त्वयि लीनानां तेषां पुनरुद्भवो जन्म न घटत इत्यर्थः। स्वामिश्लोकपदार्थः–लयादौ प्रलये सुषुप्तिकाले च सर्वजीवसहितं लिङ्गदेहादिरूपं विश्वं यस्मिंस्त्वय्यधिष्ठाने विलयं यदपि प्राप्नुवदपि भाति संस्काररूपेण सूक्ष्मतया तिष्ठति। "इण्–गतौ" अतः शतरि यदिति स्वरूपम्। ततः सृष्टिकाले जाग्रति चोत्पन्नं भवतीत्यर्थः। गुरूपदेशेन कूटस्थात्मसाक्षात्कारे सति अत्यन्तान्तं निरवशेषप्रलयम् समुद्रमध्ये श्रीगङ्गावत् चित्तस्य मध्ये ॥★॥ विश्वनाथी — अथ पूर्वोक्तमजनि च यन्मयमिति व्याचक्षाणा जीवानां तव्द्याप्यत्वमेव स्थापयन्तस्तदनुगताः काश्चिदन्याश्च श्रुतयस्तत्तात्पर्येणैव स्वतात्पर्यं ज्ञापयन्ति–न घटत इति। अयमर्थः — कार्यलक्षणं द्विविधम्, अन्यथा सिद्धीनयतपश्चाद्भावित्वं परान्वयव्यतिरेकानुकारित्वं चेति। तत्र पूर्वं रसादावव्याप्तमाश्रयसमानकालत्वेन प्रतीयमानत्वात्। भवतु वा स्वादौ वस्तुनि रसादेरुत्तरभावित्वम्, अण्वादौ न घटते, कुतः अजयोः "अजामेकाम्" इत्यादिश्रुतौ द्वयोरप्यजत्वेन सिद्धयोरीश्वरवदनाद्यन्तयोरित्यर्थः। "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।" इति तद्वाक्यादौ ततश्चाजनि च यन्मयमिति यदुक्तं तत्तु परमेश्वरव्याप्यत्वेनोपाधिजन्मनि तत्तादात्म्यापेक्षयैवेत्याहुः–उभययुगिति। उभयं प्रकृतिपुरुषरूपं युनक्ति व्याप्नोतीत्युभययुक्। त्वदंशः परमपुरुषः तेन तच्छक्तिद्वयविशिष्टेन हेतुनाऽसुभृतः सोपाधिकावस्थतया ते जीवा जायन्ते। यथा जलवायुविशिष्टेनाकाशेन बुद्बुदा इत्यर्थः। तथापि त्वदुपादानत्वम् —

"प्रकृतिर्यस्योपादानमाधारः पुरुषः परः। सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम् ॥"

इत्येकादशस्

स्थितमिति। तथा च

"प्रधानं च

यत एवं तत अ

च तत्तद्गुणनाम्नामेव ना

अत्र पूर्वार्धे श्रु

उत्तरार्धे च —

नीलकण्ठी —

कृतनाशाकृताभ्यागमप्रस

इत्यसदुत्पत्तिनिषेधात्।

जन्माशङ्क्यत इति विक

अजयोरिति। "अजाम

तयोरजत्वावगमादित्यर्थः

आह–उभययुजेति। जलब

बुद्बुद आविर्भवति। एवं

मायाक्षोभे सत्युभयात्मा अ

जीवाः जले बुद्बुदा इव त्व

लिल्युः लीनाः। अस्मिन् व

"यथा नद्यः स्यन्द

तथा विद्वान्नामरूपा

"यथा सौम्य मधु

ते यथा तत्र न विवेक

एवमेव खलु सोम्येम

यद्वा–मधुनीति सम्ब

"एतद्वै मधु दैव्यं यदाज्यम्"

विषयानन्दाः "एतस्यैवानन्दस्

दर्शितम्। पूर्वस्मिन्व्याख्याने र

न घटत इत्यस्य टीकाय

परस्परमारोपितमित्यर्थः। तेन क

संयोगमात्रांशे ज्ञेयः। श्रुतौ लो

जहात्येनाम् अस्यां न सज्जतीत्यर्थ

निष्पादयन्ति। नानात्ययनं नानाग

इत्येकादशस्थश्रीभगवदुक्तन्यायेन लब्धशक्तिमतः सकाशाच्छक्तेरनन्यत्वेन एव स्वरूपतोऽपि त्वव्याप्यत्वमेव तेषां मिति। तथा च श्रीविष्णुपुराणे —

"प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया। विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ॥" इति।

यत एवं तत आत्यन्तिकाख्येऽपि किमुत प्राकृताख्ये प्रलये तेषां त्वयि प्रवेश एवेत्याहुः-त्वयीति। अत्र यथा सरितामशेषरसानां तद्गुणनाम्नामेव नाशः न तु तत्तत्स्वरूपस्य नाप्यभेदवत्त्वं पृथक्तत्तदंशसम्भवात् तथा मयि त्वयीत्यपि ज्ञापितम्।

अत्र पूर्वार्धे श्रुतयः — "हन्तेमास्तिस्रो देवता अनेनात्मनानुप्रविश्य नामरूपे विहाय व्याकरवाणि।" इत्याद्याः।

उत्तरार्धे च — "यथा सोम्य मधुकृतः"। इत्याद्याः (१८) ॥३१॥

नीलकण्ठी — एवं जीवेश्वरयोर्जीवानां च परस्परभेदो निराकृतः। इदानीं कार्योपाधीनां जीवानामुपाधिजन्मना जन्मवतां शाकृताभ्यागमप्रसङ्गः स्यादित्याशङ्क्य न हि वयं कार्यस्य प्रागत्यन्तासत उत्पत्तिं ब्रूमः। "नासतो विद्यते भावः" सदुत्पत्तिनिषेधात्। किन्तु कारणे सत एव तिलतैलवदाविर्भावं जन्मेति मत्वा किं प्रकृत्युत्पत्त्या पुरुषोत्पत्त्या वा जीवानां शङ्क्यत इति विकल्प्य दूषयति-न घटत इति। प्रकृतिपूरुषयोरुभयोरपि उत्पत्तिर्न घटते। अत्र हेतुगर्भं विशेषणम् योरिति। "अजामेकामजो ह्येकः" इति श्रुत्या, "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।" इति स्मृत्या च जत्वावगमादित्यर्थः। कथं तर्हि, एते आत्मनो व्युच्चरन्ति इत्यग्निविस्फुलिङ्गन्यायेन ब्रह्मणः सकाशाज्जीवोत्पत्तिराम्नायतेऽत -उभययुजेति। जलबुद्बुदे यथा जलं नोत्पद्यते नापि तवदच्छिन्न आकाशः अथापि केनचिन्निमित्तेन जलक्षोभे सत्युभयात्मको आविर्भवति। एवं जीवेऽपि नान्तःकरणमुत्पद्यते नापि तदवच्छिन्नं चैतन्यम्। अथापि अनादिकालप्रवृत्तजीवादृष्टादिना क्षोभे सत्युभयात्मा आविर्भवतीति युज्यते। एवं व्युच्चरणश्रुतिः कृतहानाद्यभावश्चेति भावः। यत एव ततो हेतोः त इमे जले बुद्बुदा इव त्वयि परमे विविधैर्नामभिर्गुणैश्चोपलक्षिताः सन्तोऽर्णवे सरित इव मधुनि अशेषरसा इव च पूर्वकल्पान्ते लीनाः। अस्मिन् कल्पेऽपि त्वत्त एवोत्पन्नास्त्वय्येव वसन्तीत्यर्थः। तथा च श्रुती भवतः —

"यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।

तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्॥"

"यथा सौम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयन्ति।

ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीति।

एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामहे॥" इति॥

यद्वा-मधुनीति सम्बन्धः "इदं वैतन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच" इति ब्रह्मण्यपि मधुशब्दप्रयोगदर्शनात्। स च मधु दैव्यं यदाज्यम्" इति श्रुतेर्घृतापरपर्यायः सन् ब्रह्मणि घृतकाठिन्यवत्प्रपञ्चप्रलयोदयौ, इति दर्शयति-अस्मिन् पक्षे रसा न्दाः "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः सर्वेऽपि विषयानन्दा ब्रह्मानन्दाम्भोधेरेव विप्रुष इति । पूर्वस्मिन्व्याख्याने रसाः कटुतिक्तकषायादयस्तत्तद्वृक्षोद्भवाः (१८) ॥३१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न घटत इत्यस्य टीकायाम् उपाधिजन्मनैवेति तज्जन्मनोऽप्यनादिप्रभावो मन्तव्य इति भावः। परस्पराध्यस्तमित्यविद्यया पितमित्यर्थः। तेन कारणोपाधिना जीवेन असुभृतः कार्योपाधय इति यावत्। अत एव न विकारित्वम्। बुद्बुददृष्टान्तस्तु शे ज्ञेयः। श्रुतौ लोहितेति रजःसत्त्वतमआत्मिकामित्यर्थः। सरूपाः रजआद्यात्मिकाः अनुशेते निरन्तरं मुह्यति अस्यां न सज्जतीत्यर्थः। भुक्तो भोगो यस्याः जीवरूपेण अजैवेति शेषः। अन्यः परमात्मेति अग्रिमश्रुतौ निस्तिष्ठन्ति ति। नानात्ययनं नानागतिनानादिक्कालानां यथा तत्रेत्यादिकमौपचारिकोक्तिः सम्पाद्येति सुषुप्तिप्रलययोः यथा नद्य इति

मुक्त्यवस्थायां परात्पूर्वोक्तादक्षरात्परं दिव्यं पुरुषं यथोक्तलक्षणमिति। स्वव्याख्यायां तु - अथ पूर्वोक्तमजनि च यन्मयमिति व्याचक्षाणा जीवानां तव्द्याप्यत्वमेव स्थापयन्तस्तदनुगताः काश्चिदन्याश्च श्रुतयस्तत्तात्पर्येणैव स्वतात्पर्यं ज्ञापयन्ति-न घटत इति। अयमर्थः — कार्यलक्षणं द्विविधम्, अन्यथा सिद्धीनयतपश्चाद्भावित्वं परान्वयव्यतिरेकानुकारित्वं चेति। तत्र पूर्वं रसादावव्याप्तसमाश्रयसमानकालत्वेन प्रतीयमानत्वात्। भवतु वा स्वादौ वस्तुनि रसादेरुत्तरभावित्वम्, अण्वादौ न घटते, कुतः अजयोः "अजामेकाम्" इत्यादिश्रुतौ द्वयोरप्यजत्वेन सिद्धयोरीश्वरवदनाद्यन्तयोरित्यर्थः। "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।" इति तद्वाक्यादौ ततश्चाजनि च यन्मयमिति यदुक्तं तत्तु परमेश्वरव्याप्यत्वेनोपाधिजन्मनि तत्तादात्म्यापेक्षयैवेत्याहुः-उभययुगिति। उभयं प्रकृतिपुरुषरूपं युनक्ति व्याप्नोतीत्युभययुक्। त्वदंशः परमपुरुषः तेन तच्छक्तिद्वयविशिष्टेन हेतुनाऽसुभृतः सोपाधिकावस्थतया ते जीवा जायन्ते। यथा जलवायुविशिष्टेनाकाशेन बुद्बुदा इत्यर्थः। तथापि त्वदुपादानत्वम् —

"प्रकृतिर्यस्योपादानमाधारः पुरुषः परः। सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम्॥"

इत्येकादशस्थश्रीभगवदुक्तन्यायेन लब्धशक्तिमतः सकाशाच्छक्तेरनन्यत्वेन एव स्वरूपतोऽपि त्वद्व्याप्यत्वमेव तेषां स्थितमिति। तथा च श्रीविष्णुपुराणे —

"प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया। विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ॥" इति।

यत एवं तत आत्यन्तिकाख्येऽपि किमुत प्राकृताख्ये प्रलये तेषां त्वयि प्रवेश एवेत्याहुः-त्वयीति। अत्र यथा सरितामशेषरसानां च तत्तद्गुणनाम्नामेव नाशः न तु तत्तत्स्वरूपस्य नाप्यभेदवत्त्वं पृथक्तत्तदंशसम्भवात् तथा मयि त्वयीत्यपि ज्ञापितम्।

अत्र पूर्वार्धे श्रुतयः — "हन्तेमास्तिस्रो देवता अनेनात्मनानुप्रविश्य नामरूपे विहाय व्याकरवाणि।" इत्याद्याः।

उत्तरार्धे च — "यथा सोम्य मधुकृतः" इत्याद्याः॥१८॥३१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु (२९ श.श्लो.) 'स्थिरचरजातयः' इत्यादिना शक्तिसम्बन्धान्मत्तो जीवानां जन्मोक्तम्, तत्र किं मत्प्रकृतेरंशस्य जीवरूपेण जन्म, मदवतारस्य पुरुषस्य वेत्याशङ्क्य निराकरोति-न घटत इति। तत्र हेतुः-अजयोरिति। ननु ततः कथमेते स्युरित्यपेक्षायामाहुः-उभयेति। उभयस्य प्रकृति-पुरुषयोर्द्वयस्य युजा योगेन, योगस्तावत् प्रकृतौ पुरुषस्येक्षारूपस्तेन चिद्रूपा जीवाः प्रादुर्भवन्ति, तयोर्योगस्य स्वाभाविक-प्रभावादुह्यन्त इत्यर्थः। यद्वा, उभयं प्रकृतिपुरुषरूपं युनक्ति नियोजयतीति उभययुक् सामान्यचिच्छक्तिः। तथा च श्रीविष्णुपुराणे —

"प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया। विष्णुशक्त्या महाबुद्धे वृत्तौ संश्रयधर्म्मिणौ॥"

यद्वा, उभयस्य जीवभिन्नाभिन्नत्वस्य युग् योगः समाधानंयया सा उभययुक् सामान्यचिच्छक्तिः, तया तु भवन्त्येव। अतस्ते त्वदीयशक्तिविलसितत्वात् त्वत्तो भिन्नाभिन्नाश्चेति भावः। चिच्छक्तिविशिष्टचित्कणत्वाज्जीवस्य तत्रानुरूपो दृष्टान्तः - जलेति। यथा बुद्बुदा वायुविशिष्टत्वाज्जलादिभिन्ना एव, जलरूपत्वादभिन्नाश्चेति, एतदुपलक्षणम्, यथा सूर्य्य-तत्किरणकणादयश्चेति, अतस्त्वत्तो नात्यन्तभिन्नत्वात् त्वयि लयविशेषं प्राप्नुयुरित्याहुः-त्वयीति। परमे परमकारणे सरितामर्णवे लयेनात्यन्तभेदाभावमाशङ्क्य दृष्टान्तान्तरमाहुः-मधुनीति। मोक्षेण तेषां श्रीभगवति लये सत्यपि पृथक् सत्ता भात्येव, अतो लिङ्गदेहादिसर्व्वोपाधिक्षयात् मुक्त्या लीनानामपि श्रीभगवदिच्छया पुनः कल्याणदेहभाक्त्वं सिध्येत्, तच्च ब्रह्माण्डपुराणादौ श्रीभगवति लीनस्यापि श्रीप्रह्लादस्य तादृशत्वोक्त्याव्यक्तमेव। यद्वा, ननु लक्ष्मीसहितस्य मम तत्र तत्र जन्मना जीवैः साम्यं किं न स्यात्? तत्राहुः-नेति। प्रकृतिपुरुषयोर्लक्ष्मीनारायणयोरुद्भवो जीववदुत्पत्तिर्न घटत एव, यतोऽजयोः। जीववन्न जायेथे, किन्तु लीलया स्वयमेव प्रादुर्भवथ इत्यर्थः। असुभृतो जीवा एवोभययुजा मातापितृयोगेन भवन्ति उत्पद्यन्ते, बुद्बुदा यथा वायुजलयोर्योगेन युवयोः प्रादुर्भावोऽप्येषां संसारध्वंसायैवेत्याहुः-त्वयीति। युवयोर्विविधैर्नामभिर्गुणैः नाम्नां गणनैरनुशीलनैरिति वा। अशेषरसा अशेषो रसो येषु तथाभूताः सन्तस्त्वयि मधुनि महामहामधुररसके निलिल्युरित्यतीतनिर्देशस्तन्निर्धारविवक्षया, ध्रुवमत्यन्तसंयोगं प्राप्नुवन्तीत्यर्थः। शेषं समानम्॥३१॥

[ननु यस्य मम स्वरूपभूतास्ते वत्सपालादय उक्ताः, सोऽहं प्रेयसीसहितः किंस्वरूपः ? परे मत्प्रियजना वा किंस्वरूपाः ? इत्यपेक्षायां प्रियजनसहितयोर्भगवत्प्रेयसीश्रीभगवतोः स्वरूपमाहुः-नेति। अयमुद्भवो युवयोः प्रादुर्भावः प्रकृति पुरुषयोरिति न घटते, राधामाधवावेव युवां प्रकृति-पुरुषौ न भवथ इत्यर्थः। तथा च ऋक्परिशिष्टम्

"राधया माधवो देवो माधवेनैव राधिका। विभ्राजन्ते जनेष्वा" ॥ इति।

अघटने हेतुः-रजयोः सरजयोरित्यर्थः । रज-शब्दोऽकारान्तोऽप्यस्ति, ततोऽर्शआदित्वादच्प्रत्ययः । अतो ह्लादिनी-लीलापुरुषोत्तमावेव युवामित्युक्तम्। नन्वावयोरेव केवलं प्रकृतिपुरुषत्वनिरासेन मत्प्रियाणां व्रजलोकादीनां किं प्रकृतिपुरुषात्मकतां वदन्ति भवत्यः ? इत्याशङ्क्याहुः-उभयेति। उभयं चिच्छक्तिर्लीलाशक्तिश्चेति शक्तिद्वयम्, न तु प्रकृतिपुरुषरूपम्, (श्वे. ६/८)

"परास्यशक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।" इति श्रुतेः ॥

तस्य युजा योगेन सम्बन्धेनासुभृतो व्रजवासिप्रभृतयो भवत्प्रियजना भवन्ति प्रादुर्भवेषुः । अयम्भावः — द्विविधा नित्यसिद्धरूपा गोविन्द-प्रियजनाः। एके - विमलोत्कर्षिणीत्याद्याः शक्तयः, तथाष्टासु दलेषु पूज्यमाना रुक्मिणीप्रभृतयः, तथा कृष्णैकपरा अन्याः साध्यनामदेवविशेषादयश्च सदा चिच्छक्तिविलासरूपे तत्परमैश्वर्य्ये वर्तन्ते, श्रीभगवदिच्छया कदाचिदेव व्रजे तद्वासिनामदृश्यतया प्रादुर्भवेयुः । अन्ये श्रीदामाद्यास्तथा श्रीव्रजदेवीप्रभृतयश्च। एते तु लीलाशक्तिमाधुरीरूपे व्रजविलासे सदा विराजन्ते। एवं साधनासिद्धाश्च द्विविधा, - ये मधुरैश्वर्यशालिनीं सार्वदिक-तत्सङ्गतिमिच्छन्तश्चिच्छक्तिप्रधानत्वेन गोविन्दमुपासते, ते व्रजे प्रायः प्रकट्य न स्युः, किन्तु परमैश्वर्य एव सदा वर्तन्ते। ये तु लीलाशक्तिप्रधानत्वेन खलु व्रज एव वसन्तस्तेन सह सदा क्रीडन्ति, तत्राद्यानाहुः-त इति । ते परोक्षत्वेन वर्तमानाश्चिच्छक्तिसम्बन्धिनः, ततः कादाचित्कबहिःक्रीडानन्तरं त्वयि त्वदैश्वर्यपपरमैश्वर्यस्य तादात्म्यापन्नत्वात् त्वयीत्युक्तम्। निलिल्युर्निलीनाः स्युरित्यर्थः। तत्र दृष्टान्तः-जलबुद्बुदवत्, जलबुद्बुदा इव व्रजे तदा तेषामदृश्यत्वात् । इमे प्रत्यक्षत्वेन वर्तमाना व्रजवासिजना मधु मधुरं यथा स्यात्तथा त्वयि निलीनाफ । कथम्भूते ? विविधनामगुणैः परमे । विविधानि जन्मकर्मगुणोपाधीनि नामानि व्रजेन्द्रनन्दन-गोवर्धनधर-भक्तवात्सल्यादीनि, विविधा गुणाः सौन्दर्य्य-माधुर्य्य-वैदग्धी-प्रियंवदतादयस्तैस्तैः परमे सर्वोत्तमे प्रेम्णा तन्नामरूपगुणादिषु निलीना वर्तन्त इत्यर्थः। सरित इवार्णव इति दृष्टान्तेन प्रेष्ठे प्रेयसीभावेन मज्जनं बोधितम्। कथम्भूताः ? अशेषरसाः सम्पूर्णरसास्वादनपरा इत्यर्थः ॥३१॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

एवं नियमात् तदनुपपत्तिः परिहृता। नित्यस्योत्पत्त्यनुपपत्तिं परिहरति-न घटत इति। यद्यपि अजत्वात् प्रकृतिपुरुषस्य च नोत्पत्तिस्तथापि विद्यमानानामेवाप्यवयवानां परस्परसंयोगात् बुद्बुदोत्पत्तिवत् उभययुजात् प्रकृतिपुरुषयोः संयोगात् । तनुभृतो भवन्ति । देवमनुष्यादिशरीरविशिष्टरूपेणोत्पत्तिर्युज्यत इत्यर्थः । तर्हि कथं ब्रह्मणः कार्यत्वमित्यत्राह-त्वयीति । विविधनामगुणः विविधनामरूपभाजः सर्वे पदार्थाः। ततः परमे सर्वान्तरात्मनि त्वयि वर्तन्ते। अर्णवे सरित इव त्वयि प्रलयकाले निलिल्युरित्यर्थः। चिदचिच्छरीरब्रह्मस्थाने अर्णवो मधु च ॥३१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ननु प्रकृतिपुरुषयोर्नित्ययोः उत्पत्तिरनुत्पत्तिरत आहुः-न घटत इति। यद्यप्यजत्वात् प्रकृतेः पुरुषस्य च नोत्पत्तिः तथापि विद्यमानानामेवाप्या(नाम)वयवानां वायुप्रेरितानां परस्परं संयोगाज्जले बुद्बुदोत्पत्तिवत्। उभययुजा प्रकृतिपुरुषसंयोगेनासुभृतः प्राणिनः विविधैर्नामभिः रूपैश्चोपलक्षिताः त्वय्याधारभूते भवन्ति देवमनुष्यादिशरीरविशिष्टरूपेणोत्पत्तिर्युज्यत इत्यर्थः। ततस्तेऽसुभृतः परमे त्वयि निलिल्युः। प्रलयदशायां नामरूपे विहाय त्वय्यविभक्ततामापुरित्यर्थः। यथा सरितः अर्णवे यथा च मधुनि माक्षिके अशेषरसाः मकरन्दास्तद्वत् द्रव्यस्योत्तरोत्तरसंस्थानयोगो हि पूर्वपूर्वसंस्थानस्थितस्य विनाशः स्वावस्थावस्थितस्य तूत्पत्तिः अतोऽवस्थानामनित्यत्वेऽपि अवस्थाश्रयस्य द्रव्यस्य नित्यत्वात्तस्य (एव) पूर्वोत्तरावस्थात्यागोपादानात्मकविनाशोत्पत्त्यविरोध इति भावः। अत्रार्णवादिस्थानीयं चिदचिद्विशिष्टं ब्रह्म ॥३१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

"त्वयि त इमे ततो विबुधनामगुणाः परमेऽमृत इवार्णवे मधुनि लिल्युरशेषरसाः ।
नृषु तव मायया स्वगतया कुशलं त्वयि सुधियोऽङ्ग भेदमनुधातु मनुप्रभवः ।
कथकनुवर्तिनां भवभयं तव भ्रुकुटी सृजति मुहुर्नृणाम्" ॥१९॥३३॥

"यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तं सम्प्रश्नं भुवनायन्त्यन्या ।
त अयाजन्तद्रविणं समस्मा ऋषयः पूर्वे जनितारो न भूता ।
असूर्तेसूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥"

इत्यादिश्रुतेः —

"ब्रह्मेशेन्द्रादिसन्नाम्नां येर्थभूता गुणा मताः । पूर्तीशितृत्वद्रष्टृत्वप्रमुखास्ते हरेः सदा ॥"इति ।

"अतस्तु सर्वनामासौ सर्वकर्ता च केशवः ।"

इत्यादिस्मृतीनां चार्थत्वेन सन्दृब्धस्य त्वयि त इम इति श्लोकस्यायं भावः ।

मधुनि निलिल्युरिति वक्तव्ये मधुनिलिल्युरिति पाठो गाथाभङ्गभयात् । समाने लोप इति न्यायाच्च कृतः । ततो इति पाठोऽपि वैलक्षण्यज्ञापनायाकारि । "तत तात पितरित्यर्थः ततेति ताते"ति श्रुतिः । अ उ आनन्दपूर्णत्वादनामा सर्वस्मादुत्कृष्टत्वादुनामा —

"आनन्दत्वादनामासावुत्कृष्टत्वादुनामकः । एतन्नामद्वयं विष्णोर्ज्ञात्वा पापैः प्रमुच्यते ॥"

इति स्मृतेः । तयोः सन्धिः ओ इत्यनेन नाम्नोर्नामिनश्चाभेदः ।

"उनाम्नः सम्बुद्धिरसूचि । ये गुणाः श्रुताः सुविरुद्धाश्च देवे सन्ति ॥"

इत्यादिश्रुतौ प्रतीतास्त इमे विबुधनामगुणाः विबुधानामिन्द्रादीनां नाम्नामर्थभूताः परमैश्वर्यादिगुणाः अमृते नित्यमुक्ते परमे त्वयि निलिल्युः निलीनतया स्थिताः । कस्मिन् के इव । मधुन्यर्णवे मकरन्दमधुलक्षणसमुद्रे अशेषपुष्परसा इव । यतोऽशेषगुणाकरो भवान् अतो नृषु सुधियः । निर्धारणे सप्तमी । नृणां मध्ये सम्यक् ज्ञानिनः स्वगतया सुष्ठ्वन्यैरनवगतया मायया स्वेच्छया त्वयि भेदं समस्तादन्यो विशिष्टगुणः पर इति भेददर्शनलक्षणं कुशलमनुविधातुमनुप्रभवः सम्यक् समर्थाः । अनेन अज्ञानिनां निलीनाः ज्ञानिनामभिव्यक्ताः गुणा इत्यतस्तेषां सद्भावो दर्शित इति तदुक्तम् —

"अन्याविज्ञातया विष्णोः शक्त्यैव कुशलं जनाः । कुर्वन्ति कुशलेपूच्चभेददर्शनमेव तु ॥
पूर्णानन्दादिसम्पत्तिं विष्णोर्ज्ञात्वेतरेषु च । तदपेक्ष्य विष्णुमात्रज्ञानं तद्भेददर्शनम् ॥
अनाद्यनन्तो भेदोऽयं स्वभावः परजीवयोः । स्वतो वा परतो वाऽपि न कदाचित्प्रणश्यति ॥
एवं ज्ञानवतां विष्णुर्बहुजन्म न दास्यति । अनुवृत्तिर्यद्यनल्पा स हि सर्वेश्वरः प्रभुः ॥"

इति अनेन कथमनुवर्तिनां भवभयं तव भ्रुकुटी सृजति मुहुर्नृणामित्येतदर्थो विवृतः । तथा हि यथा तव गुणविधानसामर्थ्यं तथा अनुकूलभूतत्वत्प्रसादानुवर्तिनां मुहुर्निरन्तरं सेवमानानां तव भ्रुकुटी भवभयं कथं सृजति न कथमपि, प्रत्युत निर्मूलयतीत्यर्थः —

"यः पाता जनिता चैव कल्पको नित्यपोषकः । प्रापकः सर्वदेवानां प्रदानां पुरुषोत्तमः ॥
सर्वदेवाभिधावाच्यो भूतभव्यभवत्प्रभुः । विचार्यः सर्वदेवेशैस्तं ब्रह्माद्या यजन्ति च ॥
त्रिगुणात्मकस्त्रष्टारस्तथापि न यजन्ति तम् । यतः पूर्णेशशक्त्यैव तेषां यजनमिष्यते ॥
अतः सर्वेश्वरो विष्णुरेक एव महागुणः ।"

इत्यनेन ब्रह्मादीनामखण्डगुणत्वं स्वातन्त्र्येण सर्वकर्तृत्वमित्यादिकं दूरतोऽपहस्ति(हसि-हारि)तमिति ज्ञातव्यम् ॥१९॥३३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ पूर्व्वोक्तमजनि च यत् । यमिति व्याचक्षाणा जीवानां तव्द्याप्यत्वमेव स्थापयन्त्यस्तदनुगताः काश्चिदन्याः श्रुतयस्तत् पर्यायेणैव ज्ञापयन्ति न घटते ॥३१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु, प्रकृतिपुरुषाभ्यां जीवानां समुद्भवः कथं तेषां मदंशत्वं भवतु वा तेषां मदंशत्वं मत्पार्षदैः सह वा तेषां कथं न साम्यम् । तेऽपि मदंशा इत्याशङ्क्याहुः-न घटत उद्भवः इत्यादिप्रकृतिपूरुषयोरिति । पञ्चम्यर्थे षष्ठी । ताभ्यां सकाशात् तव पार्षदादीनाम् उद्भवो न घटते । कीदृशयोः । अजयोः । पुरुषश्च तवांशत्वादेव अजः प्रकृतिश्च अजा । "अजामेकाम्" इत्यादिनोक्तेः एवम्भूतयोरपि पुरुष उपादानकारणम् । अजा निमित्तकारणम् । अयं तु प्रकारः खलु जीवानामेव । यत उभययुजा प्रकृतिपुरुषयोगेन असुभृतो जीवा एव भवन्ति ये जीवाः जलबुद्बुदवत् क्षणभङ्गुराः त्वत्परिकरास्तु नित्यभूतास्तेन तैः समं कथं जीवानां साम्यं यतः प्रकृतिपुरुषयोगस्य प्रागपि तेषां ते परिजनानामस्तित्वश्रवणात् ।

"न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्च्चिताः ॥" इति मायायाः प्रकृतेस्तत्राभावात् । तर्हि कुतस्तेषां ह्याविर्भाव इति पुनराहुः-त्वयि त इम इति । त इमे तव परिजनास्ततो हेतोस्त्वय्येव । कीदृशे त्वयि । परमे परा उत्कृष्टा मा शोभा यस्य तस्मिन् । पुनः कीदृशे । मधुनि मधुवन्मधुरे । ते कीदृशाः । अशेषरसा अशेषो रसोऽनुरागो येषाम् । तर्हि किं मयि कैवल्यं प्राप्ता एव वर्तन्ते, नेत्याहुः-सरित इवार्णव इति । विविधनामगुणैर्युक्ताः सत्यो हि सरितोऽर्णवे निलिल्युस्तथा सरितो हि इयं गङ्गा इयं यमुना इयं नर्मदा इत्यादि नामानि न त्यजन्ति । अस्या अयं गुणः एतस्या अयं गुण इत्यादिगुणांश्च न त्यजन्ति । अथ च एकदेशेनैवार्णवे लीयन्ते लीनतायां च तत्तदाकारेण पृथग्विधा एव तथा ते परिजना इन्द्रियवृत्तिभिस्त्वयि प्रविशन्ति । नामगुणाकारैः पृथक् वर्तन्त एव अतस्त्वयीत्युच्यते । त्वदेकनिष्ठत्वादिना त्वयीत्युपचर्य्यते तेनामी प्रकृतिपुरुषोद्भवा न भवन्ति न चानित्या भवन्ति । अतो नैषां जीवसाम्यमिति स्थितम् ॥३१॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ननु जीवत्वं नाम किं यत्तु मदेकनियन्तृत्वेन नियमनमित्याह-न घटत इत्यादि । कथं न घटेत ? तत्रेयं युक्ति — जडायाः प्रकृतेर्जीवरूपेणोद्भवश्चेत् अतो जीवस्यापि जडत्वम्, पुरुषस्य चेत्तदा विकारित्वम् उभयं युनक्तीत्युभययुक् तेन तवेच्छाविलसितेनासुभृतः असुधारिणो जीवा भवन्ति अन्यथोभयोरेव न घटते इति । कथं न घटते ? प्रकृतेर्निमित्तत्वे पुरुषस्योपादानत्वे उभयोरेव उद्भवो न घटत एव । एवं चेत्तर्हि उभयोरेकजातीयकारणवतोरिति बोद्धव्यम्, वस्तुतस्तु तयोर्निमित्तोपादानरूपयोः कारणत्वे विजातीयत्वम् । जलबुद्बुदा यथा अनिलजलाभ्यां निमित्तोपादानाभ्यां भवन्ति, तथा तेऽपि चेत्तथापि उभयोः कारणत्वमनुगतम् उभयोरुद्भव इति अनिर्वाच्यः । तेनान्यदपि बुद्बुदान्तर्वर्त्याकाश इव तवेच्छान्तरं तृतीयमेष्टव्यं सर्वकारणकारणात्तव । ततस्तदनन्तरं प्रलयादौ मोक्षे इमे असुभृतो विविधनामगुणैः सह ते तव त्वयि ब्रह्मणि त्वदभिन्ने तव परमैश्वर्ये ब्रह्मणि लिल्युर्लीयन्ते । कस्मिन् क इव ? मधुनि अशेषरसा इव यद्यपि विविधानां कुसुमानां रसा 'विशेषतोऽनुपलक्ष्यमाणा अपि सामान्येनोपलक्ष्यन्ते' इति स्वाम्युक्तेन तस्मिन् त्वयि ब्रह्मणि कीदृशे ! परमे परे भवति मा यस्येति तथा तस्मिन् । यद्वा, ते इमे असुभृतस्त्वयि समयमासाद्य लीयन्ते ।

ननु मयि श्रीकृष्णे कथं लीयन्ते, ब्रह्मण्येव ते लीयन्ते ? तत्राहुः- अशेषरसाः सर्वे आनन्दास्त्वयि लिल्युः, तेन ब्रह्मानन्दोऽपि त्वय्येव, अतस्त्वयीत्युक्तम्, यथा मधूनि कुसुमरसाः ॥३१॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एतन्मतमप्यन्ये दूषयन्तो दृष्टाः। तथा हि ननु यदि परमात्मनो जीवा जायन्त इत्युच्यते तथासति जीवानामनित्यत्वप्रसङ्गेन प्रतिदिनं कृतनाशाकृताभ्यागमप्रसङ्गः स्यात्। किञ्च। तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात्। तस्य स्वरूपं तु ब्रह्मैव। तस्मात् यथा अनवच्छिन्नमाकाशमेव घटावच्छिन्नं भवेत्। घटभङ्गे सति तन्महाकाशमेव एवमेवाविद्यकोपाधेर्भङ्ग एव मोक्षस्तजन्मत्येव सति जन्म जीवानामुच्यते न तु स्वतः। इति ये वदन्ति तन्मतमनुवदन्त्यः स्तुवन्ति न घटत इति। तत्र तत्र किं प्रकृतेर्जीवरूपेणोद्भवः स्यात् पुरुषस्य वा उभयोर्वा। आद्ये जीवानां जडत्वापत्तिः। द्वितीये पुरुषस्य विकारित्वप्रसङ्गः इत्याशयेनाहुः- न घटत इति। श्रुत्या अजत्वप्रतिपादनादपीत्याहुः-अजयोरिति। तथा च श्रुतिः —

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।

अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥" इति अर्थश्च लोहितशुक्लकृष्णां रजःसत्त्वतमःस्वरूपां सरूपाः रज आद्यात्मिकाः अनुशेते निरन्तरं मुह्यति। जहात्येनाम् अस्यां नासज्जतीत्यर्थः। भुक्तभोगां भुक्तो भोगो यस्यां जीवरूपेणाजेन ताम् अन्यः परमात्मेति तस्मादुभयस्य प्रकृतेः पूरुषस्य च युजा योगेनैव तनृभृतः प्राणादिमहदुपाधयो जायन्ते इत्यर्थः। जलबुद्बुदवदिति यथा केवलेन जलेनानिलेन वा जलबुद्बुदा न भवन्ति किन्तु ताभ्यां मिलिताभ्यामेव तद्वत्। तस्माज्जीवानामुपाधिजन्मनैव जन्म, न स्वत इत्युक्तम्। उपाधिलयेनैव पुनर्ब्रह्मणि लयश्रवणादपि न वास्तवं जन्मेत्याहुः- त्वयीति। त इमे जीवाः तत इति यतो न वास्तवं जन्म तस्मात् विविधनामगुणैः सहितास्त्वयि लिल्युर्लीना बभूवुः। तेषां लयो द्विविधः। तत्र मुक्तौ स्थूलसूक्ष्माणां कार्योपाधीनामविद्यायाः कारणोपाधेश्च लयादात्यन्तिको लयः। तत्र दृष्टान्तः-सरितो नद्यः अर्णवे लीना इव सुषुप्तिप्रलययोस्तु कार्योपाधीनामेव लयः न तु कारणस्याविद्यायाः। अतस्तत्र विशेषमात्रस्यैव लयः सामान्यं वर्तत एव। तत्र दृष्टान्तः-मधुनि अशेषरसाः सकलकुसुमरसाः विशेषतोऽनुलक्ष्यमाणा अपि सामान्यतः उपलक्ष्यन्ते एव। अत्र श्रुतयः —

"यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।

तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" इति ॥

"यथा सौम्य मधु मधुकृतो निस्तिष्ठति नानात्ययानां वृक्षाणां रसान् समवहारमेकतां गमयन्ति ते यथा न विवेकं लभन्ते अमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सौम्येमाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामहे ॥"

इत्याद्याः। अर्थश्च। निस्तिष्ठन्ति निष्पादयन्ति नानात्ययानां नानाविधपरिणतिमतां रसान् समवहारं समाहृत्य एकतां सम एकरसतामित्यर्थः। यथा नद्य इत्याद्या मुक्तिव्यञ्जिका। यथा सौम्येत्याद्या श्रुतिः प्रलयव्यञ्जिका ॥३१॥

गूढार्थदीपिनी

ननु भगवतः सकाशाज्जीवनां जन्म तस्य नियामकत्वं चोक्तं तथा सति जीवानामनित्यत्वापत्तिः कृतनाशाकृताभ्यागमादिदोषापत्तिरित्याशङ्क्य [कृतानां कर्मणां विनैव फलभोगं नाशः अकृतानां पूर्वमसम्पादितानामेव फलदान अभ्यागमः प्राप्तिश्च स्यादिति शेषः।] औपाधिकमेव जन्म न वस्तुतः इत्याहुः श्रुतयः-न घटत इति।

(निरुपाधिपरेयम्)

तेन ब्रह्मानन्दोऽपि

नामनित्यत्वप्रसङ्गेन
स्वरूपं तु ब्रह्मैव।
द्यकोपाधेर्भङ्ग एव
त इति। तत्र तत्र किं
प्रसङ्गः इत्याशयेनाह-

रजःसत्त्वतमःस्वरूपां
गां भुक्तो भोगो यस्यां
दिमहदुपाधयो जायन्ते
मिलिताभ्यामेव तद्वत्।
न वास्तवं जन्मेत्याहुः-
र्लीना बभूवुः। तेषां लयो
तत्र दृष्टान्तः-सरितो नद्यः
त्रस्यैव लयः सामान्यं तु
न्यतः उपलक्ष्यन्ते एव।

त ते यथा न विवेकं लभन्ते
''
मवहारं समाहृत्य एकतां रसम्
३१॥

त जीवानामनित्यत्वापत्त्या
र्वमसम्पादितानामेव फलदानाय
इति।

पद्यानुवादः

प्रकृतिपूरुषयोगभवा इमे न च पृथग्जलबुद्बुदवज्जनाः ।
त्वयि विशन्ति रसा इव ते मधुन्युपरमे परमे सरितोऽर्णवे ॥१८॥

सङ्क्षिप्तसार्थान्वयः — हे भगवन्! प्रकृतिपुरुषयोः उद्भवो जन्म न घटते न सङ्गच्छते। कुतः। अजयोः जन्मरहितयोः। प्येवं तथापि असुभृतो जीवाः जलबुद्बुदवत् उभययुजा प्रकृतिपुरुषसंयोगेन भवन्ति जायन्ते। यतो न वास्तवं जन्म ततो हेतोः इमे जीवाः विविधनामगुणैः सह त्वयि लिल्युः। तत्र दृष्टान्तद्वयम् — सुषुप्तिप्रलययोः मधुनि अशेषरसा इव। मुक्तौ तु अर्णवे रित इव लीयन्ते। उपाधिजन्मलयाभ्यामेव जीवानां जन्ममरणे भवतः न वस्तुत इति॥

यदि प्रकृतेर्जीवरूपेणोद्भवस्तर्हि प्रकृतेर्जडत्वात् जीवानां जडत्वापत्तिः। यदि च पुरुषस्य जीवरूपेणोद्भवस्तर्हि र्विकारपुरुषस्य विकारित्वप्रसक्तिः। एवं प्रकृतिपूरुषयोरुभयोरपि उद्भवो जन्म न घटते न सङ्गच्छते। कुतः। अजयोः न्मशून्यत्वात्तयोरित्यर्थः।

"प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।" इति गीतोक्तेः। तर्हि कथं भवन्ति तत्राहुः-उभयस्य प्रकृतेः पूरुषस्य च युजा योगेन असुभृतः प्राणाद्युपाधिमन्तो जीवाः जायन्ते विविधनामगुणैः सह। जलबुद्बुदाः केवलेन जलेन अनिलेन वा न भवन्ति नु ताभ्यां मिलिताभ्यामेव तद्वत्। तस्माज्जीववानामुपाधिजन्मनैव जन्म न वस्तुतः इत्युक्तम्, उपाधिलयेनैव पुनर्ब्रह्मणि तेषां श्रवणादपि न वास्तवं जन्मेत्याहुः-त्वयीति। यतो न वास्तवं जन्म ततो हेतोः ते इमे जीवा विविधनामगुणैः सह परमे परा र्वोत्कृष्टा मा शक्तिर्यस्य तस्मिन् परमे परमकारणे त्वयि श्रीकृष्णे लिल्युः लीना बभूवुः तत्र लयश्च द्विविधः। एकः सुप्तिप्रलययोः। तत्र दृष्टान्तः-मधुनि अशेषरसा इव। द्वितीयश्च मुक्तौ। तत्र दृष्टान्तः-अर्णवे सरित इवेति। अत्रेदं तत्त्वम्। यथा मक्षिकाभिर्नीता अनेकपुष्परसाःमधुनि लीनाः सन्तोऽमुकस्य पुष्पस्यायं रस इति विशेषतोऽनुपलक्ष्यमाणा अपि सामान्यत लक्ष्यन्ते एव तद्वत्प्रकृतेऽपि प्रारब्धकर्मनीता जीवास्त्वयि लीनाः सन्तः सामान्यतोऽवशिष्टसंस्कारा लक्ष्यन्त एव यतः तदानीं कारणीभूताया अविद्याया विद्यमानत्वात्। अत एव जीवानां पुनर्जन्म। द्वितीयो दृष्टान्तः यथा मुक्तौ। तत्र ज्ञानेनाविद्याया विलयात्तदा निरुपाधौ परमकारणे त्वयि सर्वे जीवाः समुद्रे गङ्गादिनद्य इव सामान्यविशेषाभ्यामनुलक्ष्यमाणा अनवशिष्टसंस्कारा लीयन्ते। अत एव न तेषां पुनर्जन्मेत्यर्थः। एवं चाविद्योपहतानामपि जीवानामनादित्वाद्वास्तवजन्ममरणाभावान्न नाशकृताभ्यागमादिदोषापत्तिरित्यवधेयम् सुधीभिः।

केचित्तु हे प्रभो! प्रकृतिपूरुषयोः जगतः मातापित्रोः श्रीसीतारामयोः, श्रीराधाकृष्णयोः, श्रीरुक्मिणीवासुदेवयोर्वा वो जन्म न घटते। कुतः। अजयोः नित्यसिद्धत्वेन जन्मरहितयोः। इमे जीवास्तु ततः प्रागुक्तात् नियन्तुरीश्वरात् हेतुभूतात् युजा मातापितृसंयोगेन जलवायुसंयोगजन्यजलबुद्बुदवत् असुभृतः क्षणविनाशिदेहधरा भवन्ति। एवम्भूता अपि केचित् ण्यपुञ्जाः ते तव विविधनामगुणैः श्रुतैः कीर्तितैश्च परमे मधुनि परममाधुर्यरूपे त्वयि लिल्युः लयं प्रापुः। रणकमलमाधुर्यानुभवं चक्रुः।

ननु नानाभेदाः प्राणिनः कथं समानफलभाजस्तत्र दृष्टान्तमाहुः-यथा अशेषरसा मधुरक्षारादिविविधजलाः सरितः अर्णवे लद्वदित्यर्थः। अभीष्टप्राप्तौ मार्गनिरोधकाभावेऽप्ययं दृष्टान्तो बोद्धव्यः। यद्वा। हे उभय! युगलमूर्ते श्रीराधाकृष्ण! असुभृतो णाद्या जीवा अजयोः आत् वासुदेवात् त्वत्तो जातयोः प्रकृतिपूरुषयोर्युजा संयोगेन जायन्ते। यथा जलवायुसंयोगेन द्वत्। ततो भक्तसङ्गात् ते इमे जीवा अशेषरसाः त्वयि पूर्णस्नेहाः सन्तः युगलमूर्तौ त्वय्येव विविधनामगुणैः सह लिल्युः द्य इव। कथम्भूते त्वयि। परा मा शोभा यस्य तस्मिन् अत एव मधुनि अमृतादपि मिष्टतमे ॥१८॥३२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ननु ध्रुवा इत्यादिनाऽनाद्यनन्तत्वं प्रतिपादितम् । स्थिरचरजातयः स्युरित्यादिना जन्माप्युक्तमेव । उभयथात्वाभ्युपगमे वदतो व्याघातः स्यात् । न केवलमेतावदेव दूषणं किन्तु जन्माङ्गीकारेऽजत्वनाशेन कृतानाशकृताभ्यागमप्रसङ्गोऽपीति चेन्न। भगवतोंऽशभूतानां क्षेत्रज्ञानामनाद्यनन्तत्वेऽपि देहजन्मना जन्मोक्तेरप्यविरुद्धत्वादित्याहुः-प्रकृतिपुरुषयोरुद्भवो जन्म न घटते न सम्भवति । कुतः । उभयोरजत्वादित्यर्थः ।

''अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।

अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥'' इति श्रुतेः ।

तर्हि तस्माद्वा एतस्मादाकाशः सम्भूतः इत्यादिना, ''यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि च भूतानि सर्व एते आत्मनो व्युच्चरन्ति ॥'' इत्यादिना च कथमुभयोरपि जन्मोक्तिरत आहुः-उभययुजेति । उभयस्थानादिसिद्धलिङ्गस्य प्रत्यक्चतनस्य च योगेन हेतुना असुभृतो भवन्ति । स्थूलशरीरयोग एव जन्मेत्युपचर्यत इत्यर्थः । तत्र दृष्टान्तः-जलबुद्बुदवत् । यथा जलमात्रस्य न बुद्बुदरूपेण जन्म किन्तु वायुसंयोगादेव बुद्बुदा भवन्ति । तद्वदत्रापि जीवात्मनो जन्माभावेऽपि देहयोगाज्जन्मोक्तिरिति भावः । किञ्च । कर्मात्मिकाविद्यानिवृत्त्या पुनरपि भगवत्प्राप्तिमाहुः-त्वयि सर्वज्ञे सर्वशक्तौ भगवति इमे तनुभृतो जडवर्गश्चाकाशादयः विविधनामगुणैः सह देवदत्तादिनामानि गुणा वर्णाश्रमधर्माः शमोदमस्तपश्शौचमित्यादिनाष्टादशाध्याये भगवतोक्तास्तैः सह लिल्युः । पृथक्त्वेऽपि पृथग्ग्रहणानर्हतां प्रापुरित्यर्थः । तत्र दृष्टान्तः-सरित इवार्णवे अशेषरसा इव मधुनि यथा सरितः समुद्रं प्राप्य तथैव तिष्ठन्ति तथा तनुभृतोऽपि भगवन्तं प्राप्यात्यन्तपृथग्ग्रहणानर्हतां भजन्तीति भावः । ननु यदि पृथग्ग्रहो नास्ति तर्हि कुतो भेदसम्भावनेति चेन्न । मधुनि रसविशेषवैचित्र्यस्य दृश्यमानत्वात् । जलेऽपि जलान्तरसंयोगवृद्धिदर्शनात् । ननु समुद्रे वृद्धिर्न दृश्यते इति चेत्सत्यम् । तस्य निरतिशयत्वेन नैवं सामान्याद्वृद्धिर्दृश्यतेऽल्पेन तत्राप्यनुमानात् समुद्रस्याप्यल्पजलानां तरङ्गात्मनान्यत्र नदीषु संयुक्तानां रसभेदस्य दर्शनात् । तत्रापि भेदस्य वर्तमानत्वात् । तथा हि श्रुतयः —

''यथा सौम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयन्ति ।

ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीति ।

एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामहे ॥'' इति ॥

''यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।

तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥''

अयमर्थः — यथाशेषवृक्षाणां रसा मधु प्राप्य स्वस्य नामरूपाभ्यां विमुक्ताः मधुनो नामरूपे साधारणे भजन्ति । यथा च नद्यः समुद्रं प्राप्य स्वनामरूपाभ्यां अमुका नदी चर्मण्वतीत्यादिनामनीलजला इत्यादिरूपं ताभ्यां विमुक्ताः वियुक्ताः सत्यः समुद्रसाधारणनामरूपे भजन्ति तथा विद्वानपि स्वस्य देहाद्यभिमतस्य नामरूपाभ्यां देवदत्तादिदेवतिर्य्यगादिभ्यां विमुक्तो भगवतो ब्रह्मणः साधारणनामरूपे सत्यं ज्ञानमिति श्रुत्युक्तं सत्यज्ञानादिनाम 'आदित्यवर्णं तमसः परस्ता'दित्यादि श्रुत्युक्ताप्राकृतरूपं च प्राप्नोतीत्यर्थः । तदेवाह-दिव्यमिति । प्रकाशात्मकमित्यर्थः । एतच्च प्रश्नोपनिषदि स्पष्टमेव ।

'यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे समुद्र इत्येवोच्यते । एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे पुरुष एवोच्यते ॥'

इत्यादि । कथम्भूते त्वयि । परमे पैर्वेदमन्त्रैर्मीयते इति परमस्तस्मिन् । अनेन वेदस्यापि जन्मादिकारणत्वं व्याख्यातम् । एतेन जीवसाहचर्य्योक्तेन प्रकृतेरपि स्वरूपतोऽजत्वं कार्य्यात्मना प्रपञ्चरूपेण जन्मादिमत्त्वं ज्ञातव्यम् । 'अजामेकामि'त्युक्तत्वादिति भावः ॥३१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भक्तिसिद्ध्यर्थं नियम्यनियामकभावो निरूपितः तत्र हेतुश्च तन्मयत्वमुक्तम् तेन यन्मयं यत् तत्तस्य नियम्यं भवतीति फलति । एवं सति देहादिसङ्घाताविष्टे जीवे जडांशस्य प्रकृतिमयत्वाच्चिदंशस्य पुरुषमयत्वाच्च प्रकृतिपुरुषनियम्यतैव युक्ता, न पुरुषोत्तमनियम्यतेत्याशङ्क्य परिहरति-न घटत उद्भवः प्रकृतिपूरुषयोरजयोरिति । तदात्मकता तदा घटते, यत् रूपेणाविर्भवितुमर्हति । जीवास्तु विस्फुलिङ्गन्यायेन भवन्तीति तदात्मकता युक्ता । सङ्घातस्तु न प्रकृत्यात्मकः नापि पुरुषात्मकः नाप्युभयात्मकः, उभयोरप्यजत्वेन कार्यरूपाविर्भावाभावात् । तदाह-न घटत उद्भवः प्रकृतिपूरुषयोरजयोरिति । तर्हि कथं सङ्घातोत्पत्तिरिति चेत्तत्राह-उभययुजा भवन्त्यसुभृत इति । उभययुजा उभययोगेन प्रकृतिपुरुषसम्बन्धेनासुभृतः सङ्घाताः देवतिर्यगादयः भवन्ति । यत्केवलाभ्यां न जायते तत्तत्संयोगे सति कथं जायत इति तत्राह-जलबुद्बुदवदिति । न केवलं जलेन वायुना वा बुद्बुदा जायन्ते उभययोगेन जायन्त इति । तथा प्रकृतिपुरुषसंयोगेन सङ्घाता जायन्त इति न काप्यनुपपत्तिः । किमतो यद्येवम् । एवमेतदित्याह-त्वयि त इम इति । ते असुभृतः इमे परिदृश्यमानाः सर्वे ततः कारणात् त्वय्येव । अयमभिप्रायः । अजयोः संयोगो नेष्यते । उभयोरप्यजत्वेन व्यापकत्वेन च क्रियावत्त्वाभावात्संयोगाभावः । तादृशयोः संयोगः अघटमानः सन् भगवद्रूपो भगवता वा सिद्धो भवति अद्भुतकर्मा भगवानेव भवतीति अतो भगवदात्मकतैव सर्वेषां सङ्घातानाम् । अतो भगवत्येव ते सर्वे पर्यवसिता भवन्ति, नान्यत्रेति निर्णयः । किञ्च विविधनामगुणैरिति । एकरूपाश्चेत्सङ्घाताः भवेयुः तदा कथञ्चित् प्रकृतिपुरुषात्मकतापि कल्प्येत तत्तु नास्ति । किञ्च विविधानि नामानि रूपाणि गुणाश्च परस्परविलक्षणाः सर्वेषां भवन्ति, अतस्तैर्ज्ञायते भगवत एव भवन्ति । अचिन्त्यशक्तिरनन्तमूर्तिश्च भगवानेवेति । नन्वर्वाचीनयोरपि प्रकृतिपुरुषयोः कथं नानन्तशक्तितेत्याशङ्क्याह-परम इति । परम एव धर्मा नान्यस्येति सिद्धान्तादित्यर्थः । किञ्च त एव तदात्मका भवन्ति ये यत्रैकतामापद्यन्ते । यथा सर्वाः सरितः अर्णवे भवन्ति । अर्णवादेव मेघद्वारा उत्पद्यन्ते अर्णवे च प्रविशन्ति । ततोऽर्णवस्य जलात्मकस्य नद्योऽपि जलात्मिकास्तदात्मिका भवन्ति, न तु पर्वतात्मिका भूम्यात्मिका वा । अतः सच्चिदात्मका एते सच्चिदात्मके भगवति एव प्रतिष्ठिता भवितुमर्हन्ति नान्यत्रेत्यर्थः । ननु यदि भगवदात्मकं विश्वं भवेत्तर्हि भगवति विश्वं प्रतीयते, यस्य यस्य भगवत्साक्षात्कारो भवति तस्य तस्यानुभवे विश्वस्फूर्तिः स्यात् सर्वज्ञानीक्षापि प्रसज्येतेति चेत्तत्राह-मधुनि लिल्युरशेषरसा इति । यथा अशेषरसाः मधुनि लीना भवन्ति तथापि भिन्नतया न प्रतीयन्ते अयममुकपुष्पस्य रसोऽयममुकपुष्पस्य रस इति । किन्त्वेकतामापन्ना मधुत्वेनैव प्रतीयन्ते । तथा भगवत्यपि सर्वे सूक्ष्मरूपेण तिष्ठन्ति, न तु भिन्नतया प्रतीयन्त इत्यर्थः ।

"नामरूपप्रपञ्चं हि देवतिर्यङ्नरात्मकम् ॥ कृष्णादेव समुद्भूतं लीनं तत्रैव तन्मयम् ॥" ॥१८॥३१॥

श्रीसुबोधिनीसारः

प्रकृतिपुरुषसंयोगेन जगदुत्पन्नमित्याहुः । अजयोर्जन्मरहितयोः प्रकृतिपुरुषयोरुद्भवो जगद्रूपपरिणामो न घटते किं तु उभययुजा द्वयोर्योगेनासुभृतः प्राणिनो भवन्ति । जले बुद्बुद इव वातजलसंयोगात् ततोऽवास्तवाद्धेतोः परमे त्वयि ते इमे विविधनामगुणैरनेकप्रकारकार्योपाधिभिः सह निलिल्युर्लीना भवेयुः । अर्णवे समुद्रे सरितो गङ्गादिनद्य इव मधुनि क्षौद्रे शेषाः सर्वे लीना इव ॥१८॥३१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं जीवानामुत्पत्तिमभिधाय तत्कारणयोः प्रकृतिपुरुषयोरप्युत्पत्तिमाशङ्क्य निराकुर्वन्ति- न घटत इति । प्रकृतिपूरुषयोरुभयोरप्युद्भवः उत्पत्तिर्न घटते । तत्र हेतुमाहुः-अजयोरिति । श्रुत्याऽजत्वप्रतिपादनादित्यर्थः । तथा च श्रुतिः —

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥" इति । ननु जीवानां जन्मकथं सम्भवति ? प्रकृतेर्जीवरूपेणोद्भवः सम्भवति जीवानां जडत्वापत्तेः, न च पुरुषस्य जीवरूपेणोद्भवः सम्भवति पुरुषस्य विकारिप्रसङ्गात्, इत्याशङ्क्याहुः-उभययुजेति । उभययोगेन प्रकृतिपुरुषसम्बन्धेन

असुभृतः प्रागाद्युपाधयो जीवा भवन्ति जायन्ते इत्यर्थः । तत्र दृष्टान्तमाहुः- तत्र केवलेनानिलेन जलेन वा जलबुद्बुदा न भवन्ति किन्तु मिलिताभ्यां तद्वदित्यर्थः । तत्र च यथाऽनिलो निमित्तं जलमुपादानमेवमत्रापि प्रकृतिनिमित्तं पुरुष उपादानम् । यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवात्मनः सर्वे प्राणादयो व्युच्चरन्तीत्यादौ चेतानाचेतनप्रपञ्चस्य परमात्मोपादानश्रवणात् । उपादानत्वादेव तत्र लीना भवन्ति, इत्याहुः-त्वयीति । ततस्तस्मादुपादानादेव विविधनामगुणैः अनेकप्रकारेन्द्रियान्तःकरणाद्युपाधिभिः सह ते त्वत्त उत्पन्ना इमे जीवाः त्वयि परमेश्वरे परमकारणे लिल्युर्लीना बभूवुः । तत्र दृष्टान्तद्वयमाहुः-तत्र सुषुप्तिप्रलययमर्धुन्यशेषरसा इव लीयन्ते । यथा मधुनि सकलकुसुमरसा विशेषतोऽनुपलक्ष्यमाणा अपि सामान्येनोपलक्ष्यन्ते । एवं स्वपादौ विशेषमात्रलयात् कारणस्य विद्यमानत्वात्सामान्यतो वर्तन्त एव । तथा च श्रुतिः-

"यथा सौम्य मधु मधुकृतो निस्तिष्ठति नानात्ययानां वृक्षाणां रसान् समवहारमेकतां गमयन्ति ते यथा न विवेकं लभन्ते अमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सौम्येमाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह" इति ।

तथा मुक्तौ तु सर्वोपाधेर्लयात् अर्णवे सरित इव लीयन्ते । तथा च श्रुतिः-

"यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" इति ॥३१॥१८॥

अन्वितार्थप्रकाशिका

ननु परमात्मनो जीवा जायन्त इत्यङ्गीकारे जीवानामनित्यत्वप्रसङ्गात्पूर्वोक्तदोषप्रसङ्गः । किञ्च तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात् न चैतद्युक्तं स्वप्रकाशानन्दात्मनोऽविद्याकृतानर्थनिवृत्तिमात्रस्य मोक्षत्वाभ्युपगमात् इत्याशङ्क्योपाधिजन्मनैव जीवानां जन्मोच्यते न स्वतः । तत्र किं प्रकृतेर्जीवरूपेणोद्भवः स्यात् पुरुषस्य वा उभयोर्वा । आद्ये जीवानां जडत्वापत्तिः । द्वितीये पुरुषस्य विकारित्वप्रसङ्गः इत्याशयेनाह-न घटत इति ॥ अजयोः प्रकृतिपूरुषयोः उद्भवो न घटते । उभययुजा असुभृतः जलबुद्बुदवत् भवन्ति ततः ते इमे जीवाः विविधनामगुणैः सह सरितः अर्णवे इव अशेषरसा मधुनि इव परमे त्वयि लिल्युः इत्यन्वयः । अजयोः श्रुत्याजत्वेन प्रोक्तयोः प्रकृतिपूरुषयोरुद्भवः न घटते उभयं च तद्युक् च परस्पराध्यस्तमिति यावत् । तेन असुभृतः प्राणाद्युपाधयो जीवा जलबुद्बुदवत् भवन्ति जायन्त इत्यर्थः । यथा केवलेनानिलेन केवलेन जलेन वा जलबुद्बुदा न भवन्ति किन्तु मिलिताभ्यां तद्वदित्यर्थः । तत्र च यथाऽनिलो निमित्तं जलमुपादानमेवमत्रापि प्रकृतिर्निमित्तं पुरुषं उपादानम् । यथा "अग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवात्मनः सर्वे प्राणादयो व्युच्चरन्ति" इत्यादौ चेतनप्रपञ्चस्य परमात्मोपादानश्रवणात् न च विकारित्वं परिणामानङ्गीकारात् । केचित्पुनः परिणाममङ्गीकृत्य आत्मनो विकारभिया विपरीतं निमित्तोपादानभावमङ्गीकुर्वन्ति सर्वथा तावत् प्रकृतिपुरुषैक्याद्भवतीति सिद्धम् । तत् —

"एकमेवाद्वितीयं ब्रह्म, अजामेकाम्, अविनाशी वा अरेयमात्मा" इत्यादिश्रुतिबलात् उत्पत्तिश्रवणाच्च जीवानामौपाधिकमेव जन्म न स्वत इत्युक्तम् । उपाधिलयेन परमात्मनि लयश्रवणादपि न वास्तवं जन्मेत्याह । त्वयीति । यतो न वास्तवं जन्म ततो हेतोः त इमे जीवाः विविधनामगुणैः अनेकप्रकारेन्द्रियान्तःकरणाद्युपाधिभिः सह त्वयि परमेश्वरे परमकारणे लिल्युर्लीना बभूवुः । तत्र दृष्टान्तद्वयमाहुः-तत्र मुक्तौ सर्वोपाधेर्लयात् अर्णवे सरित इव लीयन्ते तथा च श्रुतिः —

"यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" इति ॥

सुषुप्तिप्रलययोस्तु मधुन्यशेषरसा इव लीयन्ते । यथा मधुनि सकलकुसुमरसा विशेषतोऽनुपलक्ष्यमाणा अपि सामान्येनोपलक्ष्यन्ते एवं स्वपादौ विशेषमात्रलयात् कारणस्य विद्यमानत्वात्सामान्यतो वर्तन्त एव ।

तथा च श्रुतिः-

"यथा सौम्य मधु मधुकृतो निस्तिष्ठति नानात्ययानां वृक्षाणां रसान् समवहारमेकतां गमयन्ति ते यथा न विवेकं लभन्ते …वृक्षस्य रसोऽस्मीत्येवमेव खलु सौम्येमाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह" इति । अन्ये पुनराहुः । ननु …यादिनियन्तुर्जीवात्मनोऽन्यत उत्पन्नत्वेन नियम्यत्वं चेत् परमात्मनोऽप्यात्मत्वनियन्तृत्वाविशेषादन्यत उत्पन्नत्वमस्तु …प्रकृतिपूरुषयोरेवोत्पत्तिर्न सम्भवति किं पुनः परमात्मन इति द्योतयन्त्यः अजनि च यन्मयमिति समनन्तरोक्तयत्पदार्थं …आहुः । न घटत इति । प्रकृतेस्त्रिगुणात्मकमूलशक्तेः पुरुषस्य महत्स्रष्टुश्च उद्भवो न घटतेऽनादित्वात् । किं …याधिष्ठानस्य तवेति असुभृतो जीवास्तु उभयं प्रकृतिपुरुषात्मकं विश्वं युनक्ति व्याप्नोति तेन मूलाधिष्ठानेन बिम्बभूतेन …भवन्ति जायन्ते बुद्बुदा यथा जलेनैव जायन्ते वाय्वादिषु निमित्तमात्रमिति । एवं जीवास्तदुपादानका अविद्याद्युपाधयस्तु …जीववृन्दमजनीति प्राणादिलिङ्गदेहाद्युपाधिजन्मनैव जीवानां जन्म न स्वत इति बोधितं शेषं प्राग्वत् । केचिद्भगवतास्तु …ता ध्रुवा इति न घटत इति च द्वयमपि पूर्वपक्षतया व्याख्याय नृषु तवेत्यग्रिमश्लोकं सिद्धान्तत्वेन व्याचख्युः ॥३१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अत्र प्रकृतिपुरुषयोरजत्वं नित्यक्षेत्रज्ञानां देहोत्पत्तिप्रकारं च प्रकृतिकार्याणां नामरूपगुणानां प्रलये नाशं च वर्णयन्त्यो हरिं …॥ न घटत इति ॥ अजयोः अजत्वेन वेदप्रसिद्धयोः तथा च श्रुतिः —

अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् ।

अजो ह्येको जषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति ॥

प्रकृतिपुरुषयोः मायाक्षरपुरुषयोः ॥ यद्वा ॥ प्रकृतिपुरुषयोः प्रकृतिरविद्या च पुरुषः क्षेत्रज्ञश्च । क्षेत्रज्ञबहुत्वेऽपि …देकवचनम् ॥ तयो अविद्याक्षेत्रज्ञयोः ॥ उद्भवः अजत्वादनादित्वाच्चोत्पत्तिर्न घटते ॥

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ॥ इति कृष्णोक्तेः ॥

ननु तर्हि केषामुत्पत्तिरिति चेत्तत्राहुः असुभृतः क्षेत्रज्ञानामसून् बिभ्रतीत्यसुभृतः क्षेत्रज्ञदेहा इत्यर्थः ॥ शास्त्रादिना देहे नष्टे …त्यभावः अतोऽत्र असुभृत् शब्दो देहवाची ॥ उभययुजा प्रकृतिपुरुषयोगेन युजेः सम्पदादित्वाद्भावे क्विप् ॥ जलबुद्बुदवत् …योगोत्पन्नस्थासकवत् भवन्ति उत्पद्यन्ते ॥

बुद्बुदस्थासकौ समावित्यमरः ॥ नन्विह देहानामुत्पत्तिरुक्त जीवानामुत्पत्तिः कथं नोक्ता इति चेज्जीवोत्पत्तिकथने 'नित्यो …' ति द्वावजावीशानीशाविति ॥

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ॥

अच्छेद्योऽयमदाह्योऽयमदाह्योऽयमिति ॥ अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥

बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः ॥ न घटत उद्भवः प्रकृतिपुरुषयोरजयोरिति यः सृष्टेदमनुप्रविश्य ऋषिणा चक्रे …ता ॥ इत्यादि श्रुतिस्मृतिष्विह च जीवानां नित्यत्वमजत्वमच्छेद्यादिकत्वं करणकलेवरप्राप्तित्वं चोक्तं यत्तन्मृषा स्यात् ॥ …तो जीवा उत्पन्ना इत्यर्थो न कर्तव्यः । तथाविधेऽर्थे कृते वदतो व्याघातप्रसङ्गाच्च ॥ ततः तदनन्तरं प्राकृतप्रलये सति …गुणैः विविधैर्नामभिर्गुणैर्मनुष्यादिजातिस्वभावैश्चोपलक्षितास्तेऽन्तवत्त्वेन स्मृतिप्रसिद्धा इमे वायुयोगेन …पुरुषयोगेन प्रकृतेः सकाशादुत्पन्नाविराजादिमनुजान्ताः क्षेत्रज्ञानां देहाः त्वयि त्वच्छरीरभूतायां प्रकृतौ ॥ 'यस्य प्रकृतिः …ति श्रुतेः ॥ परमे महातडागादिभ्य उत्कृष्टे अर्णवे सिन्धौ सरितो नद्य इव मधुनि क्षौद्रे चाशेषरसा इव लिल्युः लयं …। तथा चोक्तं गीतायाम् —

…र्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ॥ कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ इति ॥

…कारणदेहा जीवास्तु जले पाषाणा इव लिल्युरिति भावः ॥ व्यत्ययो बहुलमिति लटः स्थाने लिट्प्रयोगः ॥ एवमर्थो न

क्रियते चेदथ च नदीजलानां समुद्रे इव अशेषरसानां मधुनीव जीवात्मनां परमात्मनि लय इत्यर्थः क्रियते चेत्तदा — न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूय, इति अपरिमिता ध्रुवा इति न कर्माविभागादिति चेन्नानादित्त्वादुपपद्यते चाप्युपलभ्यते चेत्यादिस्मृतिसूत्रैरुक्तं जीवानामविनाशित्वं ध्रुवत्वं च तेषां तत्कर्मप्रवाहाणां चानादित्वं तद्वृथा भवेत् ॥ अत एव जीवनां देहस्यैवोत्पत्तौ नाशे चाऽसुभृतो जीवा उत्पन्नास्ततस्त इमे नष्टा इति केषाञ्चिन्मते योऽर्थः स तु प्राप्तदेहेषु तेष्वौपचारिकः ॥ अन्यथा पूर्वोक्तदोषप्रसङ्गाच्च यत्र प्रकृतिपुरुषयोगेनैव विश्वोत्पत्तेरुक्तत्वात्तल्लयोऽपि प्रकृतावेवोक्तः ॥३१॥१८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु प्रकृतिपुरुषयोरुत्पत्तिरनुत्पत्तिर्वाऽत आहुः ॥ न घटत इति ॥ अजयोः प्रकृतिपूरुषयोः, उद्भवः, न घटते। 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इति भगवदुक्तेः । यद्यप्यजत्वात् प्रकृतेः पुरुषस्य च नोत्पत्तिः तथापि, जगबुद्बुदवत् विद्यमानानामेवाप्यानामवयवानां वायुप्रेरितानां परस्परं संयोगेन जले बुद्बुदोत्पत्तिवत् । उभययुजा प्रकृतिपुरुषसंयोगेन, यतः ये असुभृतः प्राणिनः, विविधैर्नामभिः गुणै रूपैश्च उपलक्षिताः सन्तः, त्वयि आधारभूते, भवन्ति देवमनुष्यादिशरीरविशिष्टरूपेण उत्पद्यन्त इत्यर्थः । ततः ते इमेऽसुभृतः, परमे त्वयि लिल्युः । प्रलयदशायां नामरूपे विहाय त्वय्यविभक्ततामापुरित्यर्थः। कथमिव । सरितो नद्यः, अर्णवे इव । मधुनि माक्षिके, अशेषरसाः मकरन्दाः इव तद्वत् । अयम्भावः —

ब्रह्मणि जगतो लीनत्वेऽर्णवमधुदृष्टान्तावभिहितौ, तेन न तद्विनाशो बोध्योऽर्णवात्मताभाजां मधुस्वरूपसंवीक्षकानां च योगिनां तत्पृथक्तया संवीक्षणोक्तेरिति ॥१८॥ ॥३२॥

योगिरामानुजाचार्यकृतसरला व्याख्या

अजयोः प्रकृतिपुरुषयोः कथमुत्पत्तिरित्यत्राहुः-न घटत इति । अजयोः न जायेते इत्यजौ तयोः जन्मरहितयोः प्रकृतिपुरुषयोरुद्भवः जन्म न घटते । तथापि उभययुजा उभययोर्युक् उभययुक् । तेन उभययोगेन जलबुद्बुदवत् असुभृतः प्राणिनः विविधनामगुणैर्विविधैर्नामभिः रूपैश्चोपलक्षिताः त्वयि आधारभूते त्वयि भवन्ति जायन्ते शुद्धयोः प्रकृतिपुरुषयोरुत्पत्त्यसम्भवेऽपि देवमनुष्यादिशरीरविशिष्टत्वरूपेणोत्पत्तिरविरुद्धेत्यर्थः । ते पूर्वोक्ताः इमे प्राणिनः ततः प्रलयदशायां परमे प्रकृतिपुरुषाभ्यां परे ब्रह्मणि अर्णवे सागरे सरित इव मधुनि अशेषरसा इव तत्तत्पुष्पगतमकरन्दलेशा इव निलिल्युः नामरूपे विहाय साम्यमापुरित्यर्थः । अत्राचार्याः एवं वदन्ति, अर्णवसरितदृष्टान्तेन च जीवानां ब्रह्मणि नैकस्वरूपतावाप्तिरूपो लयः प्रतिपादितो भवति । किन्तु नामरूपविभागानर्हसाम्यतापत्तिरूप एव लयः प्रतिपादितो भवतीति । तथा च —

"नद्यस्समुद्रे मिलितास्समन्तान्नैक्यङ्गता भिन्नतयैव भान्ति ।
क्षारोदशुद्धोदकयोर्विभेदादास्ते तयोर्वास्तव एव भेदः ॥"

इत्यादि । यथा निरञ्जनः परमं साम्यमुैति । 'मम साधर्म्यमागताः' इत्यादिश्रुतिस्मृतिभिः मोक्षदशायां जीवानामीश्वरसाम्यतापत्तेरेव प्रतिपादनात् अजयोः प्रकृतिपुरुषयोः उद्भवः न घटते तथापि उभययुजा जोलबुद्बुदवत् असुभृतः विविधनामगुणैस्त्वयि भवन्ति ततः ते इमे परमे सरितः अर्णवे इव अशेषरसाः मधुनि इव लिल्युः इत्यन्वयः ॥३१॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

नन्वित्याद्याभासे सति जीवानां जन्माङ्गीकारे सति प्रतिदिनं ब्रह्मण इति शेषः । कृतनाशाकृताभ्यागमप्रसङ्गः । इति पूर्वकल्पे जातानां जीवानां मृतत्वेन तद्गतपुण्यपापयोर्भोगाभावात्कृतयोः पुण्यपापयोर्नाशः भाविकल्पे जनिष्यमाणानां नवीनानां जीवानां तैरकृतयोः पुण्यपापयोर्भोगरूपेणाभ्यागमप्राप्तिस्तल्लक्षणस्य दोषस्य प्रसङ्गः प्राप्तिरित्यर्थः । तदा यदा जीवानां वास्तवे जन्ममरणे तदेत्यर्थः । एतत् स्वरूपहानेर्मोक्षत्वम् उपाधिना जन्मनादिजप्रवाहवतान्तःकरणोपाधिजन्मना न स्वतस्स्वरूपतस्सम्भवं न सङ्गच्छते इति । तत्र जीवानां जन्माङ्गीकारमते आद्ये प्रकृतेर्जीवरूपेणोत्पत्तिपक्षे द्वितीये पुरुषस्य जीवरूपेणोत्पत्तिपक्षे । अत एव

जीवजडत्वपुरुषविकारित्वप्रसङ्गादेव न तृतीयः । प्रकृतिपुरुषयोर्द्वयोर्मिलित्वाऽपि न जीवरूपेणोद्भवः । तथा च श्रुतिः - पुरुषयोरजत्वे प्रमाणं श्रुतिः । अजाम्, न जायत इति । मूलप्रकृतिम् । लोहितशुक्लकृष्णां रजःतमस्सत्त्वात्मिकाम् । बह्वीः कारा: स्वरूपाः रजआद्यात्मिकाः प्रजाः जनयन्तीं सृजन्तीम् । तामेकोऽजो जीवरूपः जुषमाणः शब्दादितत्कार्यविषयभोगेन नोऽनुशेते । निरन्तरं मुह्यति । अन्योऽजः परमात्मा तु भुक्तभोगां भुक्तो जीवरूपेणाजेन भोगो यस्यां तामेनाम् । जहाति । प्यस्यां नासज्जतीत्यर्थः ।

"मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ।" इत्युक्तेः ।

उभयं प्रकृतिपुरुषरूपं परस्पराध्यस्तम् । अविद्यया परस्परमारोपितमित्यर्थः । तेन कारणोपाधिना जीवेन असुभृतः कार्योपाधयो जीवा जायन्त इत्यर्थः । कार्यरूपोपाधिद्वारैव जीवानां जन्माङ्गीकारात् न वस्तुतो विकारित्वमिति तात्पर्यम् । तस्तु योगमात्रांशे ज्ञेयः । तथा च प्राणाद्युपाधिरूपस्य लिङ्गस्य प्रलयेऽपि संस्काररूपेण सत एव प्रादुर्भावात् तत्र पादेः सत्त्वात् कृतनाशाऽकृताभ्यागमप्रसङ्गादिदोष इति भावः । तत्र सुषुप्त्यादिलयत्रयमध्ये कारणस्याविद्यायाः । तथा च पूर्वोक्तसदृष्टान्तलयविवेके प्रमाणं श्रुतयः । मधुकृतो मधुमक्षिकाः निस्तिष्ठन्ति निष्पादयन्ति । नानात्ययानां नानाजातीयानां कालभवानां च समवहारमेकीकृत्य एकतां मधुरूपतां सङ्गमयन्ति प्रापयन्ति । तत्र मधुरूपावस्थायां कथं विवेकं न लभन्ते क्षायां प्रकारमाह- अमुष्येत्यादि । न लभन्ते न जानन्ति मधूनि पृथक्पृथक् रसानामज्ञानं पुरुषनिष्ठं वारोपितमित्युपचारोक्तिरियम् । सम्पद्येति । सुषुप्तिप्रलययोः सति ब्रह्मणि सम्पद्य एकीभूय सति ब्रह्मणि सम्पद्यामहे । वयम् प्राप्ता इति न विदुरिति । यथा नद्य इति । मुक्त्यवस्थाविषया श्रुतिः । स्यन्दमानाः स्रवन्त्यः परात्पूर्वोक्तादक्षरात्परम् । दिव्यं यथोक्तलक्षणमिति । लयादौ लये सुषुप्तौ च विश्वं सजीवं लिङ्गं देहादि यस्मिन् ब्रह्मणि विलयं यदपि प्राप्नुवदपि भाति रूपेण भात्येव । सूक्ष्मतया प्रलये सुषुप्तौ च ब्रह्मणि विश्वस्य सद्भावे हेतुः । उद्यदिति सृष्टिकाले जागरणकाले च पुनरपि यथोत्पन्नं भवेदित्यर्थः । सर्वथा लये तु पुनर्नोत्पद्येत इति भावः । गुरुकरुणया तु केवले शुद्धे आत्मनि ब्रह्मस्वरूपे अत्यन्तान्तं लयं व्रजति प्राप्नोति निरुपाधि ब्रह्मैव भवति इत्यर्थः । मध्ये चित्तमिति - 'पारे मध्ये षष्ठ्या वा' (पा०सू० २/१/१८) व्ययीभावसमासः ॥३१॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

नु, यदि च परमात्मनो जीवाः जायन्ते इति नियन्तृनियम्यभाव उच्यते तथा सति जीवानामनित्यत्वप्रसङ्गेन प्रतिदिनं कृताभ्यागमप्रसङ्गः स्यात् । किञ्च । तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात् । न चैतत् युक्तम् । नन्दात्मनोऽविद्याकृतानर्थनिवृत्तिमात्रस्य मोक्षत्वाभ्युपगमादित्याशङ्क्य उपाधिजन्मनैव जीवानां जन्म उच्यते । न स्वतः दित्याह-न घटत इति । अजयोर्जन्मरहितयोः प्रकृतिपुरुषयोरुद्भवो जन्म न विद्यते उभययुजा तु परस्पराध्यस्तेनाऽसुभृतः धयो जीवा भवन्ति जायन्ते । जलबुद्बुदवत् यथा जलवायुभ्यां मिलिताभ्यां बुद्बुदाः जायन्तेतद्वत् । उभयं च तद्युज्यते इति सम्बद्धां परस्पराध्यस्तमिति यावत् । प्रकृतिर्निमित्तं पुरुष उपादानम् । केचित् प्रकृतिरुपादानं पुरुषो निमित्तकारणम् इति सर्वथा तावत् प्रकृतिपुरुषैक्यात् भवतीति सिद्धम् उत्पत्तिश्रवणात् जीवानामौपाधिकं जन्म न स्वत इत्युक्तम् उपाधिलयेन पुनर्लयश्रवणादपि न वास्तवं जन्मेत्याह-त्वयि त इति । यतो न वास्तवं जन्म । ततः तस्मात् त इमे वा गुणैरनेकप्रकारकार्योपाधिभिः । स हि त्वयि कारणात्मनि लिल्युः लीना बभूवुः । तत्र सुषुप्तिप्रलययोर्लये दृष्टान्तः । मधुनि यथा लिल्युस्तथा यया मधुनि सकलकुसुमरसाः विशेषतोऽनुपलक्ष्यमाणापि सामान्येन मधुत्वेनोपलक्ष्यन्ते । एवं विशेषमात्रस्य लयात् कारणस्य विद्यमानत्वात्सामान्यतो वर्तन्ते । मुक्तौ तु कारणस्यापि लये दृष्टान्तः-सरित इति । यथा अर्णवे लिल्युः तथा त्वयि परमे निरुपाधौ लिल्युरिति विवेकः । अत्र आशङ्कते-किं प्रकृतेर्जीवरूपेणोद्भवः स्यात् उभयोर्वा इति पक्षत्रयम् । आद्ये पक्षे प्रकृतेर्जडत्वाज्जीवानां जडत्वापत्तिः द्वितीये पुरुषस्य विकारित्वप्रसङ्गः । तृतीये जन्माभावः । तस्मादुभयोर्योगेन परस्पराध्यस्तेन जीवानामुद्भवः । इति प्रकृतिपुररुषयोरजत्वप्रतिपादने श्रुतिः-

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥" इति ॥

सुगमम् । न जायत इत्यजा मूलप्रकृतित्वात् । मूलप्रकृतिरविकृतिरिति सप्तत्यामुक्तेः । तां लोहितशुक्लकृष्णां रजःसत्त्वतमोवर्णाम् । सरूपां राजसीसात्त्विकीतामसीरूपां नरसुरनारकीमित्यर्थः । अजः पुरुषः एकोऽजः क्षेत्रज्ञो जीवः अजां जुषमाणः सेवमानः अनुशेते निरन्तरं मुह्यति । अन्योऽजः परमात्मा एनामजां जहाति । किम्भूताम् । पुरुषरूपेण भुक्तो भोगो यस्यास्ताम् । सृष्टेः प्रकृतौ पुरुषस्तु वीर्यं निहितवान् । तद्वीर्यं प्रकृतेर्गर्भान्महत्तत्त्वं जातमित्यत आह–भुक्तभोगामिति । बन्धमोक्षनिदर्शनपरेयम् । अत्र प्रकृतेर्निमित्तकारणं पुरुष उपादानकारणम् अत्र श्रुतिः–

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः ॥"

इति सृष्टिपरेयम् ।

आत्मन इति "सत्यं ज्ञानमनन्तं ब्रह्म ।" इत्युक्तं यत्तस्मादात्मशब्दवाच्यात् । सुगममकन्यत् । सृष्टिपरश्रुत्यन्तरम् ।

"सोऽकामयत । बहु स्याम् । प्रजायेय ।"

"यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि च भूतानि सर्व एते आत्मनो व्युच्चरन्ति ॥"

इत्यादिश्रुतिषु चेतनाचेतनात्मकप्रपञ्चस्य परमात्मोपादानकत्वश्रवणात्–न च विकारित्वं परिणामानङ्गीकारात् । केचित्पुनः परिणाममङ्गीकृत्याऽऽत्मनो विकारभिया विपरीतं प्रकृतिरुपादानं पुरुषो निमित्तमिति मन्यन्ते ।

सर्वथा तावत् प्रकृतिपुरुषैक्यात् भवन्तीति सिद्धं मधु मधुनि लिल्युरित्यत्र श्रुति :–

"यथा सौम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयन्ति ।

ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीति ।

एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामहे ॥" इति ॥

अर्थश्च – यत् पृच्छसि अहन्यहनि सम्पद्य न विदुः सत्सम्पन्नाः स्म इति । शृणु तत्र दृष्टान्तम्–हे सोम्य ! श्वेतकेतो ! यथा लोके मधुकृतो मधुमक्षिका मधु निस्तिष्ठन्ति थूत्कृत्य निष्पादयन्ति । तत्प्रकारमाह–नानात्ययानाम् । नानाशब्द उभयत्र सम्बध्यते । नानाभवा नानात्या, नाना यान्तीति नानायाः । ततश्च नानात्यानां नानास्थानोद्भवानां नानायानां नानाजातिं प्राप्तानां वृक्षाणां रसान् समवहारं समवहृत्य एकतां गमयन्ति मधुत्वमापादयन्ति तथा ते रसास्तत्र मधुनि विवेकं न लभन्तेऽमुष्य वृक्षस्याहं रसोऽस्मीति । एवमेवेमाः सर्वाः प्रजाः सति श्रीनारायणे सम्पद्य न विदुः सुषुप्तिकाले मरणप्रलययोश्च । अत एव "तस्मिन्सति सम्पद्यामहे" इति । सोपाधिलयपरेयम् । सरित इवार्णव इत्यत्र श्रुतिः–

"यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।

तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥" इति ।

अर्थः – यथा स्यन्दमाना गच्छन्त्यो नद्यः नामरूपे विहाय समुद्रेऽस्तं गच्छन्ति अदर्शनं यान्ति एवं विद्वान् ज्ञानी नामरूपे त्यक्त्वा परात्परं सूक्ष्मात्प्रकृतिपुरुषादपि परं दिव्यं यथोक्तलक्षणं पुरुषमुपैति । निरुपाधिलयपरेयम् । श्रुत्यन्तरं चात्र टिप्पणीकारैर्गृहीतं —

"यथोदके

हे गौतम !

स्वामिनाम्–

यस्मिन्नुद्यवि

अत्यन्तान्तं

यस्मिन्निति ।

जीवसमेतं विश्वम् उद्य

गुरुकरुणया केवलात्म

यथा सन्धुर्गङ्गा समुद्रे

एवं नियमात्तद

उद्भवः उत्पत्तिर्न घटते नो

परस्परसंयोगात् बुद्बुदोत्पत्ति

इत्यर्थः ।

तदुक्तं वैष्णवे –

'यथा सक्तो जले

इति । अत्राभेदव

जायन्त इत्युक्तम् । तदयुक्त

तु जडस्य । अतः परस्परा

निर्विशेषचिन्मात्रस्वप्रकाश

रजतस्यैवेति वक्तुं शक्यम्

प्रकाशैकस्वरूपस्याध्यासा

चाणुपरिमाणः । अणुत्वं च

ब्रह्मणि न सम्बध्यन्ते इति

एवाणुरूपोपाधिसंयुक्तं चेतन

जीवस्य स्यात् । एकस्य सतो

स्युः । उपाधौ गच्छत्युपाधि

स्याताम् । आकर्षणे चाच्छिन्न

गच्छतीति पूर्वोक्त एव दोषः

स्यात् । प्रदेशभेदादप्रतिसन्धाने

जीवत्वापातात् तदतिरिक्तानुप

जीवभेदस्यौपाधिकत्वं परित्य

"यथोदके शुद्धमुदकमासिक्तं तादृगेव भवत्येवं मुनेर्विजानताम् आत्मा भवति।"

हे गौतम ! एवं विजानतो मुनेरात्मदेहान्ते शुद्धः सङ्गविनिर्मुक्तः ब्रह्मैवेति।

स्वामिनाम्-

यस्मिन्नुद्यविलयमपि यद्भाति विश्वं लयादौ जीवोपेतं गुरुकरुणया केवलात्मावबोधे।

अत्यन्तान्तं व्रजति सहसा सिन्धुवत्सिन्धुमध्ये मध्ये चित्तं त्रिभुवनगुरुं भावये तं नृसिंहम्॥

यस्मिन्निति। तं नृसिंहं मध्ये चित्तं भावये चिन्तयामि। 'पारे मध्ये षष्ठ्या वा' इति समासः। तं कम्, यस्मिन् जीवोपेतं वसमेतं विश्वम् उद्यत् उद्भवत्, यस्मिन् विलयमपि यत् गच्छत्, यस्मिन् भासते प्रकाशते तम्। लयादौ सुषुप्तिप्रलयादिषु भाति। गुरुकरुणया केवलात्मावबोधे सति यस्मिन्नत्यन्तमपुनरावृत्तिं व्रजति तम्। तत्र दृष्टान्तः-सिन्धुवन्नदीवत्। सिन्धुमध्ये समुद्रमध्ये यथा सिन्धुर्गङ्गा समुद्रे अत्यन्तान्तं व्रजति तद्वत् सर्वा नद्यो गङ्गायां निपतन्ति सैव समुद्रे प्रविशतीत्येकवचनम्॥३१॥

श्रीनिवाससूरिकृततत्त्वदीपिका

एवं नियमात्तदनुपपत्तिः परिहृता। अथ नित्यस्योत्पत्त्यनुपपत्तिं परिहरति-न घटत इति। यद्यपि प्रकृतिपुरुषस्योः स्वतः उत्पत्तिर्न घटते नोपपद्यते। कुतः। तयोरजत्वश्रवणात्। 'अजामेकामजो ह्येक' इत्यादिश्रुतेस्तथापि विद्यमानानामेवाप्यवयवानां परस्परसंयोगात् बुद्बुदोत्पत्तिवदुभययुजा प्रकृतिपुरुषयोः संयोगात् असुभृतस्तनुभृतो भवन्ति। देवमनुष्यादिशरीरविशिष्टरूपेणोत्पत्तिर्युज्यत इत्यर्थः।

तदुक्तं वैष्णवे —

'यथा सक्तो जले वातो बिभर्ति कणिका इति। शक्तिः सापि तथा विष्णोः प्रधानपुरुषात्मनः॥'

इति। अत्राभेदवादिना उभयं च तद्युज्यते इति उभययुक् सम्बद्धं परस्पराध्यस्तमिति तेनासुभृतः प्राणाद्युपाधयो जीवा भवन्त इत्युक्तम्। तदयुक्तम्। कथमित्युक्ते अध्यासो नामा तस्मिन् तद्भानम्। यथा शुक्तिरजतादि। तत्र चेतनस्यैवाध्यासो दृष्टो न जडस्य। अतः परस्पराध्यस्तमित्यसङ्गतम्। किञ्च। स अध्यास अज्ञानोपाधिना भवतीति। उपाधिः कस्येति वक्तव्यम्। किं निर्विशेषचिन्मात्रस्वप्रकाशस्वपस्य ब्रह्मणः उत जीवस्येति। न तावत् जीवस्य् तस्याध्यासकार्यत्वात्। न हि शुक्तौ रजताध्यासो रजतस्यैवेति वक्तुं शक्यम्। किन्तु द्रष्टुरेवेति। अतो रजतस्थानीयस्य जीवस्याध्यासो न सम्भवति। नापि ब्रह्मणस्तस्य ज्ञानैकस्वरूपस्याध्यासासम्भवात्। तथा च भगवत्पादैः शेषावतारश्रीभाष्यकारैर्यदि मन्वीत उपाध्युपहितं ब्रह्म जीवः स अणुपरिमाणः। अणुत्वं चावच्छेदकस्य मनसोऽणुत्वात्। सचाऽवच्छेदोऽनादिरेवमुपाध्युपहितेशे सम्बध्यमाना दोषा अनुपहिते णि न सम्बध्यन्ते इति मिथ्यावादिनः पक्षमुपन्यस्य अयं प्रष्टव्यः। किमुपाधिना छिन्नो ब्रह्मखण्डो जीव उताच्छिन्न अनुरूपोपाधिसंयुक्तं चेतनान्तरमथोपाधिरेवेति पञ्चविकल्पान् कृत्वा अच्छेद्यत्वाद्ब्रह्मणः प्रथमः कल्पो न कल्पते। आदिमत्त्वं च त्वस्य स्यात्। एकस्य सतो द्वैधीकरणं हि छेदनम्। द्वितीये कल्पे ब्रह्मण एव प्रदेशविशेषे उपाधिसम्बन्धादौपाधिका दोषास्तस्यैव । उपाधौ गच्छत्युपाधिना स्वसंयुक्तब्रह्मप्रशादेशाकर्षणायोगादनुक्षणमुपाधिसंयुक्तब्रह्मप्रदेशभेदात् क्षणेक्षणे बन्धमोक्षौ च म्। आकर्षणे चाच्छिन्नत्वात्कृत्स्नस्य ब्रह्मण आकर्षणं स्यात्। निरंशस्य व्यापिन आकर्षणं न सम्भवतीति चेत्तर्ह्युपाधिरेव न्तीति पूर्वोक्त एव दोषः स्यात्। अच्छिन्नब्रह्मप्रदेशेषु सर्वोपाधिसंसर्गे सर्वेषां जीवानां ब्रह्मण एव प्रदेशत्वेनैकत्वप्रतिसन्धानं प्रदेशभेदादप्रतिसन्धाने चैकस्यापि स्वोपाधौ गच्छति सति प्रतिसन्धानं न स्यात्। तृतीये तु कल्पे ब्रह्मस्वरूपस्यैवोपाधिसम्बन्धेन पातात् तदतिरिक्तानुपहितब्रह्मासिद्धिः स्यात्। सर्वेषु च देहेष्वेक एव जीवः स्यात्। तुर्ये तु कल्पे ब्रह्मणोऽन्य एव जीव इति भेदस्यौपाधिकत्वं परित्यक्तं स्यात्। चरमे तु चार्वाकपक्ष एव परिगृहीतः स्यादित्यादिना तिलशः खण्डितमिति। किञ्च। सृष्टेः

पूर्वं सन्मात्रं ब्रह्मैव सृष्ट्युत्तरकाले नानाजीवरूपेण जातमिति भवतोऽभिमतम् । तथासति मृत्पिण्डस्य घटशरावादिरूपेण परिणतस्येव ब्रह्मैव जीवरूपेण परिणतमिति जीवस्योत्पत्तिमत्त्वमनित्यत्वं स्वरूपहानिश्चेत्येवंरूपा दोषाः परपक्षे उद्घाटितास्त्वन्मतेऽपि प्रसक्तास्तेषां परिहारो दुःशक इति । अतः पूर्वकर्मापेक्षेश्वरेक्षया प्रकृतिपुरुषयोः संयोगात्तनुभृतो जायन्ते इत्यभ्युपगन्तव्यमिति। तथा च भगवद्वाक्यम् —

'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् । सम्भवः सर्वभूतानां ततो भवति भारत ॥'

इति जगद्योनिभूता प्रकृतिर्ब्रह्मशब्दवाच्या । तस्यां चेतनाख्यं गर्भं दधामि संयोजयामि । ततो भूतानामुद्भव इत्यर्थः । इति प्रकृतिपुरुषसंयोगादेव जगदुद्भवश्चेत्तर्हि कथं ब्रह्मणः कारणत्वमित्यत्राह–त्वयीति । विविधनामगुणः विविधनामरूपभाजः सर्वे पदार्थास्ततः परमे प्रकृतिपुरुषाभ्यां परस्मिन् सर्वान्तरात्मनि त्वयि वर्तन्ते । अर्णवे सरित इव रससङ्घसम्पादिते मधुनि तत्कृतपुष्पगतमकरन्दलेशा इव च त्वयि प्रलयकाले निलिल्युरित्यर्थः । चिदचिच्छरीरब्रह्मस्थाने अर्णवो मधु च । अत्रापि मुक्तौ तु कारणस्यापि लयात्त्वयि परमे निरुपाधौ सरित इवार्णवे लीयन्ते इति विवेकः ।

"यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥"

इति श्रुतिरपि मोक्षविषया उपन्यस्ता तदप्ययुक्तम् । कथमिति चेदित्थम् । श्रुतिस्तावत् जीवब्रह्मणोर्मोक्षे स्वरूपैक्यं न वदति । तस्याः परब्रह्मसाम्यविषयत्वात् । "निरञ्जनः परमं साम्यमुपैति । मम साधर्म्यमागताः" इत्यादिश्रुतिस्मृत्यनुरोधाच्च। अन्यच्च नदीदृष्टान्तोऽपि न सङ्गच्छते । स्वरूपैक्ये तत्र नदीजलसमुद्रजलयोरैक्याभावात् । किन्तु तत्र इयं गङ्गा इयं यमुना इति नामरूपे न स्तः । जलस्य तु क्षारमधुररूपेण भेद एवेति । अत एव साम्ये स्वरसतया दृष्टान्तानुकूल्यादिति । तथा च पूर्णानन्दचक्रवर्तिकारिकाः —

'नानारसा मधुनि भिन्नतया तरूणां सन्ति त्रिदोषहरणं कथमन्यथा स्यात् ।

जीवास्तथा भगवति प्रलये विलीना नैक्यं गताः खलु यतः पृथगेव सृष्टौ ॥

नदीसमुद्रयोर्भेदः शुद्धोदलवणोदयोः । तथा जीवेश्वरौ भिन्नौ विलक्षणगुणान्वितौ ॥

नद्यः समुद्रे मिलिताः समन्तान्नैक्यं गता भिन्नतया न भान्ति ।

क्षारोदशुद्धोदकयोर्विभेदादास्ते तयोर्वास्तव एव भेदः ॥'

"इति श्रुतौ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ॥

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।" इत्यादिश्रुतिस्मृतिभिर्नित्यत्वादिप्रतिपादनात् चिदचिदीश्वराणां स्वरूपभेद एवेति अभेदश्रुतीनां, 'सर्वं खल्विदं ब्रह्म ।' 'तत्त्वमसी'त्यादीनां तु सर्वस्य चिदचिदात्मकस्य परमात्मशरीरतया सामानाधिकरण्यतया च सर्वस्य ब्रह्मात्मकत्वप्रतिपादनादविरोध इत्यलं दैवहतमुद्गरविघातेनेति ॥३१॥

कृष्णप्रिया

यद्यपी जीव माया दोनों आत्मा है । इस कारण इनकी स्वतः उत्पत्ति नहि हो सकती तथा जैसे विद्यमान जल मार्ग का पवनकी प्रेरणासे परस्परमें संयोग होकर बुदबुदा उत्पन्न हो जाता है वैसे ही जीव कर्म को निमित्त कर परमात्मा के संकल्पसे जीव माया के परस्पर संयोग से प्रलयकालिक जीव माया विशिष्ट सर्वाधार आपके बीचमें देव मनुष्यादि विविधनाम और आकार संपन्न प्राणी उत्पन्न होते है । अर्थात् महदादितत्त्व रूपसे परिणाम होना ही माया की उत्पत्ति है और जीव माया दोनों स्वतः स्वरूपसे नित्य है और जैसे समुद्रमें अनेक नदी मिल रही है तथा मधुमें जैसे अनेक वनस्पति के रस मिल रहे है वैसे हि प्रलय कालमें देव मनुष्यादि स्थूल नामरूप का परित्याग कर माया एव् दोनो सूक्ष्मरूपसे आपके बीचमें लय को प्राप्त हो जाता है ॥३१॥

नृषु तव म
कथमनुवत

अमीषु, नृषु,
अभवच्छरणेषु, तव, भ्

नन्वेवं तावत्पर
भूतानि परीत्य लोकान्पर
विदधतीत्याऽऽह–नृषु त
भवनिवर्तके भावं स्वभा
कथमिति अनुवर्ततामनुव
भ्रुकुटिर्भ्रूभङ्गरूपस्त्रिणेमि
भवान् शरणं रक्षिता येषां
भावं दधतीति ॥

भावार्थदीपिकाप्रक
निवृत्त्यर्थम् । "परीत्य" इत
संसरचक्रे भ्रमन्तीति ज्ञात्वा त
दिगादिशब्दस्तत्रत्यपरो ज्ञेयः
सर्वतो विरक्तेन मनसात्मानं
सर्वाणि भूतानि मयि सन्तीति
परमात्मानमभिसंविवेशैक्यं ग
संसारेऽतो हेतोः एवम्भूतं पौन
संसारेति । संसारचक्रमेव क्र
उत्क्रम्य नानाध्यात्मादिरूपा भव
प्रपन्नं शरणागतं त्वमुद्धर ॥★।

श्रीधरानुयायिनी —
इत्यादिश्रुतिकदम्बोक्तनानावादि
श्रीनारदाद्या भक्तिं कुर्वन्ति —
"नानायोनिसहस्त्रेषु येषु
एवं सर्वमतशिरोमणिं वै

शरावादिरूपेण परिणतस्येव
पक्षे उद्घाटितास्त्वन्मतेऽपि
न्ते इत्यभ्युपगन्तव्यमिति ।

भूतानामुद्भव इत्यर्थः । इति
विविधनामरूपभाजः सर्वे
व रससङ्घसम्पादिते मधुनि
वो मधु च । अत्रापि मुक्तौ तु

जीवब्रह्मणोर्मोक्षे स्वरूपैक्यं न
इत्यादिश्रुतिस्मृत्यनुरोधाच्च ।
तत्र इयं गङ्गा इयं यमुना इति
ष्टान्तानुकूल्यादिति । तथा च

ात् चिदचिदीश्वराणां स्वरूपभेद
त्मशरीरतया सामानाधिकरण्यतया

हो सकती तथा जैसे विद्यमान
वैसे ही जीव कर्म को निमित्त
माया विशिष्ट सर्वाधार आपके
त् महदादितत्त्व रूपसे परिणाम
जैसे समुद्रमें अनेक नदी मिल
देव मनुष्यादि स्थूल नामरूप का
 है ॥३१॥

नृषु तव मायया भ्रमममीष्ववगत्य भृशं त्वयि सुधियोऽभवे दधति भावमनुप्रभवम् ।
कथमनुवर्ततां भवभयं तव यद् भ्रुकुटिः सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भयम् ॥३२॥

कर्दमक्षमा

अमीषु, नृषु, तव, मायया, भृशं, भ्रमम्, अवगत्य, सुधियः, अभवे, त्वयि, अनुप्रभवम्, भावम्, दधति ।, यत्, यतः, वच्छरणेषु, तव, भृकुटिः, त्रिणेमिः, भयम्, मुहुः, सृजति, अतः, अनुवर्तताम्, भवभयं, कथम्, स्यात् ॥३२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वेवं तावत्परमेश्वराज्जीवा जायन्ते तद्वशेन च कर्माणि कुर्वन्ति इति संसारचक्रे परिभ्रमणमुक्तमिदानीं तन्निवृत्तये "परीत्य परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च उपस्थाय प्रथमजामृतस्याऽऽत्मनाऽऽत्मानमभिसंविवेश" इत्याद्याः भगवदनुवृत्तिं तीत्याऽऽह-नृषु तव माययेति । नृषु जीवेष्वमीषु तव मायया भ्रममुक्तलक्षणमवगत्य ज्ञात्वा सुधियो भृशं त्वय्यभवे वर्तके भावं स्वभावमनुवृत्तिं दधति कुर्वन्ति कीदृशं भ्रमम् अनुप्रभवम् अन्वनुप्रभवो यस्मिंस्तं भ्रमं ततः किमत आह-ति अनुवर्ततामनुवर्तमानानां त्वामेव शरणं भजतां भवभयं संसारभयं कथं भवेत् न कथञ्चिदपीत्यर्थः । कुतः यद्यस्मात्तव भ्रूभङ्गरूपस्त्रिणेमिस्तिस्रो नेमय इवावच्छेदाः शीतोष्णवर्षाः काला यस्य संवत्सरात्मकस्य कालस्य सः अभवच्छरणेषु न शरणं रक्षिता येषां तेष्वेव भयं जन्ममरणादिलक्षणं सृजति करोति अत एवम्भूतं संसारमाकलय्य तन्निवृत्तये सुधियस्त्वयि दधतीति ॥

संसारचक्रक्रकचैर्विदीर्णमुदीर्णनानाभवतापतप्तम् ।
कथञ्चिदापन्नमिह प्रपन्नं त्वमुद्धर श्रीनृहरे नृलोकम् ॥१९॥ ३२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — एवमुक्तरीत्या तद्वशेनेश्वरप्रेरणया पुनः सृष्यन्ते तत्रेश्वरे तन्निवृत्तये संसारभ्रमण-त्यर्थम् । "परीत्य" इत्याद्याः श्रुतयो भगवदनुवृत्तिं भगवद्भक्तिं विदधतीति श्रुतत्यर्थः । स मुनिः भूतानि प्राणिनः परीत्य चक्रे भ्रमन्तीति ज्ञात्वा लोकान्स्वर्गादीन्क्षयिष्णुत्वेन परीत्य ज्ञात्वा सर्वा दिशः प्राच्याद्या विदिश आग्नेय्याद्याश्च दुःखमयत्वेन शब्दस्तत्रत्यपरो ज्ञेयः । ऋतस्य सदा सत्यस्य श्रीविष्णोः प्रथमजां वाचं त्रयीलक्षणामुपस्थाय त्रय्युक्तनैष्कर्म्यमासेव्यात्मना विरक्तेन मनसात्मानं परमात्मानं भगवन्तं शरणमभिसंविवेश गतवान् । व्याख्यान्तरं पूर्वैः कृतम्, सर्वेषु भूतेषु अहमस्मि भूतानि मयि सन्तीति ज्ञात्वा प्रथमजां वाचमुपस्थाय यावज्ज्ञानोत्पत्तिः तावत् आत्मना शुद्धेन त्वंपदार्थेनात्मानं तत्पदार्थं नमभिसंविवेशैक्यं गतवानिति ततस्त्वदनुवृत्तेः । इत्यर्थ इति व्याख्या । अत्र हेतुमाशङ्कते-कुत इति । यतस्त्वद्विहीनानां हेतोः एवम्भूतं पौनःपुन्येन भवनशीलमाकलय्य विचार्य तस्य संसारस्य निवृत्तये सुधियो विवेकिनः । स्वामिनाम्-। संसारचक्रमेव क्रकचं करपत्रं काष्ठविदारणास्त्रविशेषस्तेन विदीर्णम् । बहुत्वं संसारचक्रदुःखानन्त्यपरम् । उदीर्णा नानाध्यात्मादिरूपा भवतापाः संसारतापास्तैस्तप्तम् । अत आपन्नमापद्ग्रस्तम् इह संसारे कथञ्चित्केनापि भाग्योदयेन त्वां शरणागतं त्वमुद्धर ॥★॥

श्रीधरानुयायिनी — एवं नानामतान्यनूद्य वैष्णवमतमेव स्थापयन्ति-नृष्विति । नृषु विद्वन्मानिषु अमीषु जनिमसत श्रुतिकदम्बोक्तनानावादिषु तव मायया भृशं भ्रमं भ्रान्त्यैव नानामतकल्पनं ज्ञात्वा भवनिवर्तके त्वयि अनु प्रतिजन्म सुधियः भक्तिं कुर्वन्ति —

"नानायोनिसहस्रेषु येषु येषु भ्रमाम्यहम् । तत्र तत्राच्युता भक्तिरच्युतास्तु दृढं त्वयि ॥" इति विष्णुपुराणात् ।

एवं सर्वमतशिरोमणिं वैष्णवमतमेव ते स्थापयन्तीत्याशयः । एवमेषां वैष्णवानां संसारभयं कथमनुवर्ततामनुवृत्तं भवतु न

कथमपीति त्वद्भजनारम्भदशायामेव तेषां तस्यापगमात्। अतस्त्वद्भ्रूभङ्गरूपः कालस्तवाभक्तेष्वेव जन्ममरणादिभयं मुहुः सृजति न तु भक्तेष्वपीत्यर्थः । यद्वा-अन्यसर्वसाधनसम्पन्नानामपि त्वद्भजनं विना संसारभयं न निवर्तत इत्याहुः-नृष्विति। अमीषु वेदविज्ञेष्वपि नृषु दीक्षितविप्रादिषु तव मायया भ्रममिन्द्रादिभ्योऽन्नमदत्त्वा प्रागेव गोपालजातये श्रीकृष्णाय न देयमिति भ्रमं भगवद्याचनाभङ्गेन तेषां भाविजन्ममरणभ्रमणानवस्थां वा निश्चित्य सुधियो यज्ञपत्न्यादयस्त्वयि भवनिवर्तके अनुप्रभवम् अन्वनु प्रति क्षणं प्रभव उल्लासो यस्य तं तादृशं भावं भक्तिं भृशमत्यन्तं कुर्वन्ति । एवं त्वामनुवर्ततां भजतां संसारभयं कथं न कथमपीत्यर्थः ।

"सकृदेव प्रपन्नो यस्तवास्मीति च याचते। अभयं सर्वथा तस्मै ददाम्येतद्व्रतं मम॥" इति श्रीभगवदुक्तेः।

अयम्भावः — संसारदशायां त्वन्माधुर्यरसावेशेन भयानवधानमेव भयहेतूनामकिञ्चित्करत्वं वा। संसारातीतदशायां तु भयहेतव एव न सन्ति । अत एव त्रयो गुणा नेमयश्चक्रधारावदावरका यस्यां सा तव भ्रुकुटिरभक्तेषु जन्ममरणादिदुःखं मुहुः सृजति। अथवाऽमीषु भगवदाराधनपरेष्वपि नृषु पञ्चायतनमध्ये को देवः पूज्यः सेव्यश्चेति भ्रमं मनोभ्रमणात्मकं संशयमवगत्य तेषां निश्चयार्थं सुधियः श्रीनारदाद्यास्तव मायया कृपया "माया दम्भे कृपायां च" इति विश्वः । अभवे भवनिवर्तके त्वय्येव सर्वदेवेभ्यः मुख्यतया भावं सख्यदास्यादिकं प्रतिजन्म प्रतिक्षणं कुर्वन्तीत्यर्थः । स्वामिश्लोकपदार्थस्तु-चक्रवदूर्ध्वाधोभावेन भ्रमणवति संसारे क्रकचवद्दुःखप्रदै रोगादिभिर्विदीर्णमुदीर्णैरुत्कटैर्नानाविधाध्यात्मिकादिसंसारतापैस्तप्तमत आपन्नमापद्ग्रस्तमिह संसारे कथञ्चिदार्ततया जिज्ञासुतया कामनया दम्भादिना वा केनापि भाग्योदयेन त्वां शरणागतं नृलोकमुद्धरेत्यर्थः॥ तोषिणी— तदेवं पूर्वोक्तानुसारेण लब्धावसरा भवभयनिवर्तकतालक्षणे तस्मिन्भक्तितात्पर्यकाः काश्चिदन्याः श्रुतयः स्तुवन्ति-नृष्विति साधारजीवानां यया मायया भ्रमो भवति सैव त्वद्भक्तसङ्गजातसद्बुद्धीनां भक्तिमाधुर्यानुभावेन तां त्यक्तुं न शक्नुवन्तीत्यर्थः हेतुर्भवति भ्रममय्यां तस्यां भयहेतुत्वं त्वयि तु तन्निवर्तकत्वं बुद्ध्वेति भावः । तत्रापि तु अनुक्षणं प्रभव उल्लासो यस्य तादृ भावम् । यद्वा-प्रतिजन्मैव तं दधति पक्षद्वयेऽपि परममाधुर्यानुभावेन तां त्यक्तुं न शक्नुवन्तीत्यर्थः । तदुक्तं वैष्णवे - " हानिस्तन्महच्छिद्रम्" इत्यादि "नाथ योनिसहस्रेषु" इत्यादिना "न वै जनः" इत्यादि "विहातुमिच्छेन्न रसग्रहो यतः" श्रीभागवते च । तर्हि किं तस्माद्भक्तिर्जाता तदपि नेच्छेत् न हीत्याहुः-संसारिदशायां तन्माधुर्यावेशेनतदनवधानात् भयहेतू किञ्चित्कर्तुमशक्तत्वाद्वा। तदतीतदशायां तु भयकारणानामपि नाशादिति भावः। तत्र कैमुत्येनाहुः-तवेति।

"सकृदेव प्रपन्नो यस्तवास्मीति च याचते। अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम॥" इति रामायणे श्रीराघवेन्द्रप्रतिज्ञानुसा च "ददात्येतद्व्रतं हरेः" इत्यत्र तादृशगरुडपुराणोक्तानुसारेण च शरणागतमात्रेष्वपि भयाभावादित्यर्थः । त्रिणेमिरिति भूतभविष्यद्वर्तमानार्थकत्वेनेति। अत्र श्रुतयः परीत्येत्याद्या एव। तत्र प्रथमजाम् —

"कालेन नष्टा वाणीयं प्रलये वेदसंज्ञिता। मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः॥"

इत्येकादशानुसारेण भक्तिप्रतिपादिका ऋतस्य स्वयं भगवतो वाणीति व्याख्येयम्। यद्वा-तादृशमोक्षप्रस्तावमसहि काश्चिदन्या आहुः । नृषु अमीषु पूर्वोक्तेषु मुक्तिसाधकेषु त्वद्भक्तिसुखानवधानरूपं त्वन्मायाहेतुकभ्रममवगत्येति व्याख्ये श्रुतयस्तु पूर्वपूर्वानुसारेणान्वेषणीयाः । अत्र विश्वनाथः — एवं नानामतान्यनूद्य दूषयन्त्यो वैष्णवमतमेव स्थापयन्ति। विद्वन्मानिषु अमीषु पूर्वपद्यद्वयार्थावगमितेषु नानावादिषु भ्रममवगत्य भ्रान्त्यैव नानामतकल्पनं ज्ञात्वा त्वयि अभवे भवनि भावं दास्यसख्यादिकमेव केवलम् अनु प्रतिक्षणं प्रभव उल्लासो यस्य तम्। यद्वा-प्रतिजन्मैव दधति कुर्वन्ति। यथोक्तं वैष्णवे

"नाथ योनिसहस्रेषु येषु येषु भ्रमाम्यहम्। तत्र तत्राच्युता भक्तिरच्युतास्तु दृढा त्वयि॥" इति।

ननु, तर्हि त्वंपदार्थतत्पदार्थयोर्ज्ञानाभावाच्च तेषां संसारस्तु नैव निवर्तते तत्राहुः-कथमिति। भवभयं तेषां कथमनुवर्तता भवेत् त्वद्दास्यारम्भदशायामेव तस्यापगमात्। किन्तु निष्कामत्वातिशयाद्भजनोत्थदैन्याच्च स्वेषु तेषां संसारित्वाभिमानः यद्य भ्रुकुटिर्भ्रूभङ्गरूपस्त्रिणेमिस्त्रिगुणः तीक्ष्णधारः कालः अभवच्छरणेषु त्वच्छरणापत्तिरहितेष्वेव भवभयं जन्ममरणादि सृजति। तदुक्तं "सकृदेव प्रपन्नाय" इत्यादिना —

"दैवी ह
वादिनामिव परमत
तन्मतमेव सर्वशा
तत्पदार्थत्वंपदार्यो
जीवः' इति भगव
कल्पितस्य च । भ
तदपि सम्पूर्णदेहव्या
नासमञ्जसम् । स्वर्ग
इति । तेषां बहुत्वं नि

इति श्रुत्या
बद्धजीवा एके, अ
तदावरणोन्मोचितप्रापि
तल्लक्षणं च नारदपञ्चरा

"यत्तटस्थं तु
ज्ञेयं चिद्वस्तु स जीवः'
गुणरागेण रञ्जितं बहि
प्रधानीभूतया वा भक्त्या
स्यादित्यर्थः । एवं च, मा
स्थितं नैव गुणरागेण रञ्जि
तत्त्वमसीत्महावाक्यार्थं
प्रसृमरसान्द्रज्योतिःपुञ्जोप
भारत।" इति हरिवंशोक्तेश्च
श्रीभगवान् यथा-नगरस्या
अनतिदूरस्था ध्वजपताका
भगवन्तमेव ज्योतिर्मयं ब्रह्
तत्राप्यन्तःप्रविष्टा अपारमा

इत्येवमेतावन्मात्रम
अत्र श्रुतयः —

ते

"दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥" इति। अयम्भावः — अन्येषां वादिनामिव परमतखण्डने स्वमतस्थापने च नात्याग्रहः, अत्याग्रहस्तु त्वद्भजन एव। वैष्णवानां तत्र च केषमपि वादिनां विप्रतिपत्तिरिति तन्मतमेव सर्वशास्त्रार्थसारम्। विचित्ररूपगुणलीलामहोदधौ त्वयि कृष्णरामादिस्वरूपे उपास्यबुद्धिः स्वेषूपासकबुद्धिरित्येव तेषां तत्पदार्थत्वंपदार्थोर्ज्ञानं सूर्योपमस्य भगवतो बाह्यप्रभोपमा जीवा अत एव ततो भिन्नत्वेनाभिन्नत्वेनापि व्यपदिश्यन्ते 'सूक्ष्माणामप्यहं जीवः' इति भगवदुक्तेः 'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश ॥' इति। 'बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः।' इति। "आराग्रमात्रो ह्यपरो हि दृष्टः" इत्यादिश्रुतिभ्यश्च तेषां परमाणुपरिमाणत्वमेव तदपि सम्पूर्णदेहव्यापि शक्तिमत्त्वं जतुजटितस्य महामणेर्महौषधखण्डस्य च शिरस्युरसि वा धृतस्य सम्पूर्णदेहपुष्टिकरिष्णुशक्तिमत्त्वमिव नासमञ्जसम्। स्वर्गनरकनानायोनिषु गमनं च तेषामुपाधिपारवश्यादेव। यदुक्तं प्रमाणमधिकृत्य दत्तात्रेयेण- "येन संसरते पुमान्" इति। तेषां बहुत्वं नित्यत्वं च —

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ॥"

इति श्रुत्या प्रतिपादितम्। समुदितानां तेषां भगवतस्तटस्थशक्तित्वेनैकत्वं च ज्ञेयम्। ते च मेघोपमयाऽविद्ययाऽऽवृता बद्धजीवा एके, अन्ये भक्तिमज्ज्ञानेन तदावरणोन्मुक्ता मुक्तजीवाः, अन्ये केवलया प्रधानीभूतया वा भक्त्या तदावरणोन्मोचितप्रापितचिदानन्दमयभजनोपयोगिशरीराः सिद्धभक्ताः, अन्येऽविद्यायोगरहिता एव नित्यपार्षदा इति चतुर्विधाः। तल्लक्षणं च नारदपञ्चरात्रे —

"यत्तटस्थं तु विज्ञेयं स्वसंवेद्याद्विनिर्गतम्। रञ्जितं गुणरागेण स जीव इति कथ्यते ॥" अस्यार्थः — यत्तटस्थं विशेषतो ज्ञेयं चिद्वस्तु स जीवः "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति" इति श्रुतेः। स्वसंवेद्याच्चित्पुञ्जाद्भगवतः सकाशाद्विनिर्गतं चेत्तदा गुणरागेण रञ्जितं बहिरङ्गया मायाशक्त्या स्वीयानां गुणानां रागेण रञ्जितं मायिकाकारं स्यादित्यर्थः। यदा तु केवलया प्रधानीभूतया वा भक्त्या मायोत्तीर्णं स्यात्तदाऽन्तरङ्गया चिच्छक्त्या स्वीयकल्याणगुणेन रञ्जितं भगवत्यनुरक्तीकृतं चिन्मयाकारयुक्तं स्यादित्यर्थः। एवं च, मायाचिच्छक्त्योस्तटस्थवर्तित्वात्तटस्थमिति तन्नाम कृतम्। यदा तु भक्तिमज्ज्ञानेन मुक्तं स्यात्तदा ब्रह्मण्यपृथग्भूय स्थितं नैव गुणरागेण रञ्जितमित्युपासकनिरूपणम्। अत एव राजकीयपुरुषोऽपि राजपुरुष इति तत्पदार्थसम्बन्धी त्वंपदार्थ इति तत्त्वमसीत्महावाक्यार्थं केचित्तु तस्य त्वमिति षष्ठीतत्पुरुषेणापि वदन्ति। अथोपास्यनिरूपणम् - सूर्योपमस्य भगवतः प्रसृमरसान्द्रज्योतिःपुञ्जोपमं ब्रह्म "ब्रह्मसंज्ञमभूदेकं ज्योतिर्यत्सर्वकारणम्।" इति नारसिंहोक्तेः "मामैव तद्घनं तेजो ज्ञातुमर्हसि भारत।" इति हरिवंशोक्तेश्च। तस्यान्तर्मण्डलोपमः परमात्मा रथसारथ्यादिपरिकरविशिष्टवदननयनपाणिपादादिसुन्दरसूर्योपमः सपरिकरः श्रीभगवान् यथा-नगरस्यातिदूरस्था जना विशेषमनुपलभमाना इदमग्रे स्थितं कान्तिमयं वस्तुमात्रमिति तदेव तदेव नगरं पश्यन्ति, अनतिदूरस्था ध्वजपताकादिविशिष्टं वृक्षखण्डमिति, अतिसमीपस्थास्तु पुरगोपुरनिष्कुटरथ्याप्रासादादियुक्तं नगरमिति, तथैवातिदूरस्था भगवन्तमेव ज्योतिर्मयं ब्रह्मेति, अनतिदूरस्था अतिचिद्विशेषमयः परमात्मेति, अतिसमीपस्था नानानन्तचिद्विशेषमयो भगवानिति तत्राप्यन्तःप्रविष्टा अपारमाधुर्यानुभविनः कृष्ण इति वदन्ति। यथाहुः-प्राञ्चोऽपि —

"चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः ॥"

इत्येवमेतावन्मात्रमपि स्वमतं वैष्णवाः केऽपि ज्ञातुमपेक्षन्ते च केऽपि नापेक्षन्ते सदैवापेक्षन्ते भजनप्रकारमेवेति।

अत्र श्रुतयः —

"एतद्विष्णोः परमं पदं ये नित्योद्युक्ताः संयजन्ते न कामात्।
तेषामसौ गोपरूपः प्रयत्नात्प्रकाशयेदात्मपदं तदैव ॥" इत्याद्याः (१९) ॥३२॥

नीलकण्ठी —

एवं ब्रह्माद्वैतं प्रसाध्य तदज्ञानाद्बन्धस्तज्ज्ञानान्मुक्तिरित्याह–नृषु तवेति । अमीषु नृषु पुरुषेषु न तु मनुष्यमात्रेषु —

''तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम् ॥''

इति देवादीनां ब्रह्मविद्यायां तुल्यवदधिकारश्रवणात्तव मायया कर्तैवाहं पुत्रादिरेव हितः अर्थकामावेव पुरुषार्थावित्येवंरूपया अविद्यया भ्रममूर्ध्वाधोगमनेनानेकयोनिसञ्चरणं भृशमत्यन्तमवगत्य —

''न साम्परायः प्रतिभाति बलं प्रमाद्यन्तं वित्तलोभेन मूढम् ।
अयं लोको नास्ति पर इति मानी पुनःपुनर्वशमापद्यते मे ॥''

इति श्रुतेर्ज्ञात्वा सुधियः सूक्ष्मधियः ''दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ।'' इति श्रुतेः शोभनधियो वा त्वयि अभवे न भवत्ययमिति न भवत्यस्मादिति व्युत्पत्तिभ्यामकार्यकारणे ब्रह्मणि भावं जीवात्मानं मनो वा ''आत्मभावो मनोभावः'' इत्यनेकार्थपदमञ्जरी । दधत्यभेदेन स्थापयन्ति ।

''यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति तद्यच्छेच्छान्त आत्मनि ॥''

इति श्रुत्युक्तप्रकारेण ''यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति ।'' इति भेददर्शनस्य निन्दितत्वात् । ''यच्छेत्'' इति श्रुतिस्तु भाष्ये व्याख्याता–वाचं मनसि नियच्छेत् वागादिबाह्येन्द्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत्, मनोऽपि विषयविकल्पाभिमुखं विषयदोषदर्शनेन ज्ञानशब्दोदितायां बुद्धौ अध्यवसायस्वभावायां धारयेत्, तामपि बुद्धिं महत्यात्मनि भोक्तरि अग्र्यायां वा बुद्धौ सूक्ष्मतापादनेन नियच्छेत्, तं महान्तमात्मानं शान्त आत्मनि प्रकरणवति परस्मिन् पुरुषे परस्यां काष्ठायां प्रतिष्ठापयेदिति । ये त्वयि भावं विदधति तेषां भवभयं संसारदुःखं कथमनुवर्तताम् । न कथमपीति यत्तच्छब्दाध्याहारेण योज्यम् । भयाननुवृत्तौ हेतुः–अनुप्रभवम् । प्रभव उपाध्यभिव्यक्तिः तामनुसृत्य वर्तत इत्यनुप्रभवम् —

''न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति ।
अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः ॥''

इति श्रुतेःउपाधिनिरसनेन त्वयि भावं विदधतां नास्ति भवभयमित्यर्थः । ननु कुतो मय्येव भावो विधेयो नान्यत्र धर्मादावित्यत आह तत्र–यदिति । यत् यस्माद्धेतोस्तव भ्रुकुटिस्तल्लक्ष्या ईक्षा ''तदैक्षत बहु स्यां प्रजायेय'' इति श्रुत्या अभवच्छरणेषु नभवान् शरणं रक्षिता येषां तेषु भयं जन्ममरणादिदुःखं मुहुः सृजति । भ्रुकुटिं विशिनष्टि–त्रिणेमिरिति । त्रयो गुणा नेमिश्चक्रधारा तद्वत् आवरका यस्यां सा तथा ।

''न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥'' इति स्मृतेः ।

त्वद्विमुखाः त्वदीक्षाकृते त्रिगुणमये संसारचक्रेऽनवरतं भ्रमन्तीति भावः (१९) ॥३२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नृष्वित्यस्य टीकायां श्रुतौ परीत्य ज्ञात्वा प्रथमजां वाचं त्रयीलक्षणाम् ऋतस्य श्रीविष्णोः आत्मना मनसाम् आत्मानं स्वरूपम् अभिसंविवेश आश्रितवानिति । अथ स्वव्याख्या– तदेवं पूर्वोक्तानुसारेण लब्धावसरा भवभयनिवर्तकतालक्षणे तस्मिन्भक्तितात्पर्यकाः काश्चिदन्याः श्रुतयः स्तुवन्ति–नृष्विति । साधारजीवानां यया मायया भ्रमो भवति सैव त्वद्भक्तसङ्गजातसद्बुद्धीनां भक्तिमाधुर्यानुभावेन तां त्यक्तुं न शक्नुवन्तीत्यर्थः । हेतुर्भवति भ्रममय्यां तस्यां भयहेतुत्वं त्वयि तु तन्निवर्तकत्वं बुद्ध्वेति भावः । तत्रापि तु अनुक्षणं प्रभव उल्लासो यस्य तादृशं भावम् । यद्वा–प्रतिजन्मैव तं दधति पक्षद्वयऽपि परममाधुर्यानुभावेन तां त्यक्तुं न शक्नुवन्तीत्यर्थः । तदुक्तं वैष्णवे – ''सा हानिस्तन्महच्छिद्रम्'' इत्यादि ''नाथ योनिसहस्त्रेषु'' इत्यादिना ''न वै जनः'' इत्यादि

विहातुमिच्छेन्न रसग्रहो यतः" इति श्रीभागवते च । तर्हि किं तस्माद्भक्तिर्जाता तदपि नेच्छेत् न हीत्याहुः-संसारिदशायां माधुर्यावेशेनतदनवधानात् भयहेतूनां किञ्चित्कर्तुमशक्तत्वाद्वा । तदतीतदशायां तु भयकारणानामपि नाशादिति भावः । तत्र मुख्येनाहुः-तवेति ।

"सकृदेव प्रपन्नो यस्तवास्मीति च याचते । अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम ॥"

इति रामायणे श्रीराघवेन्द्रप्रतिज्ञानुसारेण च "ददात्येतद्व्रतं हरेः" इत्यत्र तादृशगरुडपुराणोक्तानुसारेण च शरणागतमात्रेष्वपि भयाभावादित्यर्थः । त्रिणेमिरिति । भूतभविष्यद्वर्तमानार्थकत्वेनेति । अत्र श्रुतयः परीत्येत्याद्या एव । तत्र प्रथमजाम् —

"कालेन नष्टा वाणीयं प्रलये वेदसंज्ञिता । मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥"

इत्येकादशानुसारेण भक्तिप्रतिपादिका ऋतस्य स्वयं भगवतो वाणीति व्याख्येयम् । यद्वा-तादृशमोक्षप्रस्तावमसहिष्णवः केचिदन्या आहुः । नृषु अमीषु पूर्वोक्तेषु मुक्तिसाधकेषु त्वद्भक्तिसुखानवधानरूपं त्वन्मायाहेतुकभ्रममवगत्येति व्याख्येयम् । श्रुतयस्तु पूर्वपूर्वानुसारेणान्वेषणीयाः ॥१९॥३२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो भगवन् ! ऋतेस्तैः कृतोऽयं मोक्षस्वीकारोऽपि सुधीभ्यस्त्वद्भक्तेभ्यो न रोचत इत्याहुः-नृष्विति । अमीषु भक्तेषु (अमीष्वभक्तेषु [ग] ।) नृषु तव मायया भ्रमं त्वद्भक्तिमहानन्दाब्धित्यागेन सर्वोत्तमतया मोक्षज्ञानरूपमवगत्य, सुधियो विवेकिनो भावं भक्तिं भद्रे सर्व्वश्रेयोरूपे त्वयि । इति मोक्षसुखस्यापि भक्तिसुखे एवान्तर्भावोऽभिप्रेतः, कूपादिप्रयोजनस्य सम्प्लुतोदक इव । तथा च गीतासु (२/४६) —

"यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।" इत्यादि ॥

अनुप्रभवं प्रतिजन्म, - भक्तिरसिकतया मोक्षास्वीकारेण जन्मग्रहणात् । ननु तर्हि जन्ममरणादिना संसारदुःखं स्यादेव, आहुः-कथमिति । तेषु संसारभयं कथमनुवर्तताम् ? भक्तौ प्रवृत्त्यैव निवृत्तं पुनः कथमायात्वित्यर्थः । तत्र हेतुः-तवेत्यादि । अभवच्छरणेष्विति त्वच्छरणागतेष्वपि कालभयं नास्ति, भावं कुर्वत्सु च तत् कथं स्यात् ? अतो भक्तिवासनाभरानुवृत्त्या सदा [illegible] तेषां गर्भवासाद्यस्फूर्त्या कथञ्चिदपि दुःखस्पर्शोऽपि न स्यादेवेति । यद्वा, शुद्धबुद्धयस्तु त्वयि भक्तिं कुर्व्वन्तीत्याहुः-नृष्विति । नृषु भृगुवंशादिभवेषु पुरुषेषु षण्डामर्कादिषु भ्रमं श्रीविष्णुपरित्यागेन दैत्यसेवालक्षणम्, तथा नारदेनोक्तम्, (हरिभक्तिसुधोदयः ८/१००) "विष्णुं विसृज्यान्वचरच्च दैत्यं किंवा न कुर्य्युः भरणाय लुब्धाः" इति । अधिगत्य अनुभूय, सुधियः प्रह्लादप्रभृतयः, त्वयि भावं रतिम् । कथम्भूतम् ? अनुप्रभवमनन्तरमेव प्रभवः प्रकृष्टो भवोऽभ्युदयस्त्वत्प्रसादरूपो यस्मात्तम् । ननु भक्तानामपि जन्म श्रूयते, तस्मिंश्च सति कथं संसृतिभयनिवृत्तिहेतुरित्यत आहुः-कथमिति । अनुवृत्तिभावं कुर्व्वतामपि भयं नास्ति, किं पुनर्भावं दधताम् । अत एव श्रीप्रह्लादेन प्रार्थितम् (वि० पु० १/२०/१८) "नाथ योनिसहस्रेषु येषु येषु" इत्यादि । अस्तु तावदनुवर्तिनाम्, शरणागतानामपि तावत् कालभयं नास्तीत्याहुः-तवेति । तथा श्रीराघवेन्द्रवचनम् (रामायणम्, युद्धकाण्डम् १८/३३) —

"सकृदेव प्रपन्नो यस्तवास्मीति च याचते" इत्यादि ॥३२॥

[प्रियजनप्रसङ्गेन दीक्षितपत्नीनामपि भावमाहुः-नृष्विति । पुंसु पतिष्विति यावत् । भ्रमं त्वयि मनुष्यदृष्टिरूपां भ्रान्तिम्, अयथार्थं ज्ञात्वा, भवे प्रपञ्चमध्ये सुधियो याज्ञिकभार्य्यास्त्वयि भावं दधति । कथम्भूतं भावम् ? अनुप्रभवमनुभवमेव प्रकृष्टः मोक्षसाधकत्वेन श्रेष्ठो भवो जन्म यस्मात्तथाभूतम् । ननु (भा०१०/२३/५२) "दिदृक्षवो व्रजमथ कंसाद्भीता न चाचलन्" इति तासामपि मयि भक्तिर्जातैव । ननु किमिति ते भ्रान्ता इत्युच्यते, इत्याशङ्क्याहुः-कथमिति । अनुवर्ततां तवानुवृत्तिं कुर्वतां जनानां भयं भवात् कालाग्निरुद्रादपि भयं कथम् ? यद्यस्मात् तव भ्रुकुटिर्मन्युरूपो हरः, त्रिनेमिस्त्रिनेत्र इत्यर्थः । अभवच्छरणेषु केष्वेव मुहुः प्रतिप्रलयं भयं सृजति । भक्तास्तु प्रलयेऽपि निर्भयाः, तेन भक्त्यभावात्ते कंसाद्भीता इति भावः ॥३२॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

एवं जगत्कारणे त्वयि भक्तिमतां न भयमित्याह–नृषु तवेति । तव मायया त्वदीयया प्रकृत्या समम् अहङ्कारममकाररूपं भावं भक्तिं प्रपत्तिं वा अनुवर्ततां त्वामनुवर्तमानानां कालः । स तवैव भ्रुकुटीस्थानीयः । अभवच्चरणेषु त्वच्चरणानाश्रितेषु ॥३२॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तर्हि उत्पत्तिविनाशाद्यात्मकसंसारनिवृत्त्यनुवृत्त्योः किं निदानमित्यपेक्षायां त्वद्भक्तितदभावावेवेत्याहुः–नृष्विति । अनु पृष्ठतः प्रभवः संसारो यस्मात् तममीषु नृषु तव मायया त्वदीयया प्रकृत्या भ्रमं देहात्माभिमानस्वतन्त्रत्वात्माभिमानादिरूपमवमृष्य अयमेव संसृतिहेतुरिति निश्चित्य सुधियः त्वयि भृशं भावभक्तिं विदधति। अनुवर्ततां त्वां भजतां भवभयं संसृतिभयं कथं भवेत्। न भवेदेवेत्यर्थः । कुतः । यत् यस्मादभवच्छरणेषु न भवान् शरणं येषां ते तेष्वेव तव भृकुटिः भ्रूभङ्गरूपः त्रिणेमिः तिस्रो नेमयः शीतोष्णवर्षाकालात्मका यस्य सः संवत्सरात्मकः कालः (इत्यर्थः) । भयं संसृतिभयं सृजति अभवच्चरणेषु इति पाठे न भवतश्चरणं येषां तेषु उपेयोपेयभावेन भवतश्चरणमनाश्रितेषु इत्यर्थः ॥३२॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

इह भवच्चरणेषु सुजातभुवो जितहृषीकवायुभिरुदात्तमहत्तुरगैः ।
य इह यतन्त्यनतिलोलमुपायविदो व्यसनशताब्धितारमपहाय गुरोश्चरणम् ॥२०॥३४॥

''यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥'' इति श्रुतेः ।

''देवा अपि सुयोगाद्या यतन्ते सर्वसाधनैः । पुत्रदारादिभिः सार्धं नोच्छ्वसन्तीह संसृतौ ॥
गुरोरनुग्रहमृते साधनं न हरेः प्रियम् । गुरूपदेशात्तु हरिं प्राप्नोत्येव न संशयः ॥''

इति स्मृत्यनुगृहीतायाः श्रुतेः अभिप्रायगर्भस्य इह भवच्चरणेष्वित्यादिश्लोकद्वयस्य अयमभिसन्धिः —

हेऽअजित ! भक्तभक्त्या वशीकृत ! —

''जयो विष्णोश्च वाययोश्च भक्त्या तत्प्रीतिसाधनम् । जगदीशयोः कुतो ह्येनोः सर्वशक्त्योर्बलाज्जय ॥''

इति वचनात् भक्तिलक्षणसाधनसामग्र्या विष्णोः प्रसादो जयो नाम हे हरे ! य इह संसारे व्यसनशताब्धितारं गुरोश्चरणमपहाय हृषीकवायुभिरुदात्तमहत्तुरगैः कर्मणि यतन्तीत्यन्वयः । व्यसनानां शतमेवाब्धिर्व्यसनशताब्धिः । तं तारयतीति यः तम् । षण्णवत्यङ्गुलो यस्त्वित्यादिलक्षणोपेतस्य गुरोश्चरणमिति सेवेह लक्ष्यते तां सेवां त्यक्त्वा उदात्तः सारथिः ''रथोपरि स्वीकरणादुदात्तः सारथिर्मतः ।'' इति वचनात् वायुरेवोदात्तो येषां ते तथा । पृथक्पदत्वं छान्दसम् । हृषीकाण्येव महान्तस्तुरगाः महत्तुरगाः । महादेशाभावश्छान्दसः ॥२०॥३४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवं पूर्वोक्तानुसारेण लब्धावसरा भवभयनिवर्तकतालक्षणे तस्मिन् भक्तितात्पर्यधराः काश्चिदन्याः श्रुतयः स्तुवन्ति नृषु तवेति ॥३२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अत एव सुधियो जनास्त्वद्भजनेन त्वत्पार्षदत्वं प्रार्थयन्ते इत्याहुः–नृषु तव माययेत्यादि । नृषु उक्तप्रकारेषु प्रकृतिपुरुषोद्भवत्वाज्जलबुद्बुदायमानेषु अमीषु असुभृत्सु तव मायया भ्रममज्ञानमवगत्य सुधियो जनास्त्वयि अनुप्रभवम् अनुजन्म

नम् अहङ्कारममकाररूपं
च्चरणानाश्रितेषु ॥३२॥

हुः-नृष्विति । अनु पृष्ठतः
माभिमानादिरूपमवमृष्य
ं संसृतिभयं कथं भवेत् ।
पः त्रिणेमिः तिस्रो नेमयः
भवच्चरणेषु इति पाठे न

तीह संसृतौ ॥
शयः ॥''
अभिसन्धिः —

र्वशक्त्योर्बलाज्जय ॥''
सनशताब्धितारं गुरोश्चरणमपहाय
यतीति यः तम् । षण्णवत्यङ्गुलो
: ''रथोपरि स्वीकरणादुदात्तः
येव महान्तस्तुरगाः महत्तुरगाः ।

काश्चिदन्याः श्रुतयः स्तुवन्ति नृषु

मायये त्यादि । नृषु उक्तप्रकारेषु
ो जनास्त्वयि अनुप्रभवम् अनुजन्म

प्रमाणं भृशं दधति । कीदृशे त्वयि । अभवे न विद्यते भवः संसारो यस्मात् । पार्षदत्वं प्राप्य न पुनः संसरणमिति भावः । तेषां भवभयं न प्रवर्तते इत्याहुः कथमित्यादि । तेषां भवभयं कथमनुवर्ततां तदनुवर्तने योग्यता नास्ति । यत् यस्मात् तव कालः अभवच्छरणेषु भयं सृजति न तु भवच्छरणेषु । तत्रापि मुहुः कीदृशः । त्रिनेमिः भूतभविष्यद्वर्तमानाख्यः ॥३२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

अतस्तवैव परात्परत्वे त्वमेव भजनीय इति पुनर्भजनमभिनन्दन्ति- नृषु तवेत्यादि । नृषु उक्तलक्षणेषु जीवेषु पण्डितास्तव मायया भ्रममवगत्य भृशं त्वयि भावं प्रमाणं दधति । कीदृशे त्वयि ? अभवे न विद्यते भवो यस्मात् । कीदृशम् ? अनुप्रभवम् । नन्वनुप्रभवः प्ररोहो यस्य यथोत्तरं वर्धमानम् । भावकरणे सति किं भवतीत्याह- कथमित्यादि । नुवर्ततामनुभजतां कथं भवभयमिति ? भवभयनिवृत्तिरेव भावफलम् । यद्वा, तेषां भवभयं कथमनुवर्तताम्, अथमन्वेतु यद् स्मात्तव भ्रुकुटिरूपः कालस्त्रिनेमिरभवच्छरणेषु भयं सृजन्ति, भवच्छरणभिन्नेषु ॥३२॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एवं नानामतान्यनूद्य दूषयन्त्यो वैष्णवमतमेव स्थापयन्ति । नृषु विद्वन्मानिषु अमीषु पूर्वश्लोकद्वयार्थावगमितेषु नानावादिषु मवगत्य भ्रान्त्यैव नानामतकल्पनं ज्ञात्वा त्वयि अभवे भवनिवर्तके भावं दास्यसख्यादिकमेव केवलम् अनु प्रतिक्षणं प्रभव यस्य तम् । यद्वा-प्रतिजन्मैव दधति कुर्वन्ति । यथोक्तं वैष्णवे —

"नाथ योनिसहस्रेषु येषु येषु भ्रमाम्यहम् । तत्र तत्राच्युता भक्तिरच्युतास्तु दृढा त्वयि ॥" इति ।

ननु, तर्हि त्वंपदार्थतत्पदार्थयोर्ज्ञानाभावाच्च तेषां संसारस्तु नैव निवर्तते तत्राहुः-कथमिति । भवभयं तेषां कथमनुवर्ततामनुवृत्तं त्वद्दास्यारम्भदशायामेव तस्यापगमात् । किन्तु निष्कामत्वातिशयाद्व्रजनोत्थदैन्याच्च स्वेषु तेषां संसारित्वाभिमानः स्मात्तव भ्रुकुटिर्भ्रूभङ्गरूपस्त्रिणेमिस्त्रिगुणः तीक्ष्णधारः कालः अभवच्छरणेषु त्वच्छरणापत्तिरहितेष्वेव भवभयं जन्ममरणादिलक्षणं ति । तदुक्तं "सकृदेव प्रपन्नाय" इत्यादिना —

"दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥" इति ।

अयम्भावः —

अन्येषां वादिनामिव परमतखण्डने स्वमतस्थापने च नात्याग्रहः, अत्याग्रहस्तु त्वद्व्रजन एव । वैष्णवानां तत्र च केषमपि विप्रतिपत्तिरिति तन्मतमेव सर्वशास्त्रार्थसारम् । विचित्ररूपगुणलीलामहोदधौ त्वयि कृष्णरामादिस्वरूपे उपास्यबुद्धिः उपासकबुद्धिरित्येव तेषां तत्पदार्थत्वंपदार्योर्ज्ञानं सूर्योपमस्य भगवतो बाह्यप्रभोपमा जीवा अत एव ततो भिन्नत्वेनाभिन्नत्वेनापि स्यन्ते 'सूक्ष्माणामप्यहं जीवः' इति भगवदुक्तेः 'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश ॥' इति । शतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः ।' इति । "आराग्रमात्रो ह्यपरो हि दृष्टः" इत्यादिश्रुतिभ्यश्च परमाणुपरिमाणत्वमेव तदपि सम्पूर्णदेहव्यापि शक्तिमत्त्वं जतुजटितस्य महामणेर्महौषधखण्डस्य च शिरस्युरसि वा धृतस्य देहपुष्टिकरिष्णुशक्तिमत्त्वमिव नासमञ्जसम् । स्वर्गनरकनानायोनिषु गमनं च तेषामुपाधिपारवश्यादेव । यदुक्तं प्रमाणमधिकृत्य - "येन संसरते पुमान्" इति । तेषां बहुत्वं नित्यत्वं च —

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ॥"

इति श्रुत्या प्रतिपादितम् । समुदितानां तेषां भगवतस्तटस्थशक्तित्वेनैकत्वं च ज्ञेयम् । ते च मेघोपमयाऽविद्ययाऽऽवृता एके, अन्ये भक्तिमज्ज्ञानेन तदावरणोन्मुक्ता मुक्तजीवाः, अन्ये केवलया प्रधानीभूतया वा भक्त्या चितप्रापितचिदानन्दमयभजनोपयोगिशरीराः सिद्धभक्ताः, अन्येऽविद्यायोगरहिता एव नित्यपार्षदा इति चतुर्विधाः ।

च नारदपञ्चरात्रे —

"यत्तटस्थं तु विज्ञेयं स्वसंवेद्याद्विनिर्गतम्। रञ्जितं गुणरागेण स जीव इति कथ्यते ॥" अस्यार्थ: — यत्तटस्थं विशेषतो ज्ञेयं चिद्वस्तु स जीव: "यथाग्ने: क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति" इति श्रुते: । स्वसंवेद्याच्चित्पुञ्जाद्भगवत: सकाशाद्विनिर्गतं चेत्तद् गुणरागेण रञ्जितं बहिरङ्गया मायाशक्त्या स्वीयानां गुणानां रागेण रञ्जितं मायिकाकारं स्यादित्यर्थ: । यदा तु केवलया प्रधानीभूतया वा भक्त्या मायोत्तीर्णं स्यात्तदाऽन्तरङ्गया चिच्छक्त्या स्वीयकल्याणगुणेन रञ्जितं भगवत्यनुरक्तीकृतं चिन्मयाकारयुक्तं स्यादित्यर्थ: । एवं च, मायाचिच्छक्त्योस्तटस्थवर्तित्वात्तटस्थमिति तन्नाम कृतम्। यदा तु भक्तिमज्ज्ञानेन मुक्तं स्यात्तदा ब्रह्मण्यपृथग्भूय स्थितं नैव गुणरागेण रञ्जितमित्युपासकनिरूपणम् । अत एव राजकीयपुरुषोऽपि राजपुरुष इति तत्पदार्थसम्बन्धी त्वंपदार्थ इति तत्त्वमसीत्महावाक्यार्थं केचित्तु तस्य त्वमिति षष्ठीतत्पुरुषेणापि वदन्ति । अथोपास्यनिरूपणम् - सूर्योपमस्य भगवत: प्रसृमरसान्द्रज्योति:पुञ्जोपमं ब्रह्म "ब्रह्मसंज्ञमभूदेकं ज्योतिर्यत्सर्वकारणम् ।" इति नारसिंहोक्ते: "मामैव तद्घनं तेजो ज्ञातुमर्हसि भारत ।" इति हरिवंशोक्तेश्च । तस्यान्तर्मण्डलोपम: परमात्मा रथसारथ्यादिपरिकरविशिष्टवदननयनपाणिपादादिसुन्दरसूर्योपम: सपरिकर: श्रीभगवान् यथा-नगरस्यातिदूरस्था जना विशेषमनुपलभमाना इदमग्रे स्थितं कान्तिमयं वस्तुमात्रमिति तदेव तदेव नगरं पश्यन्ति, अनतिदूरस्था ध्वजपताकादिविशिष्टं वृक्षखण्डमिति, अतिसमीपस्थास्तु पुरगोपुरनिष्कुटरथ्याप्रासादादियुक्तं नगरमिति, तथैवातिदूरस्था भगवन्तमेव ज्योतिर्मयं ब्रह्मेति, अनतिदूरस्था अतिचिद्विशेषमय: परमात्मेति, अतिसमीपस्था नानानन्तचिद्विशेषमयो भगवानिति तत्राप्यन्त:प्रविष्टा अपारमाधुर्यानुभविन: कृष्ण इति वदन्ति । यथाहु:-प्राञ्चोऽपि —

"चयस्त्विषामित्यवधारितं पुरा तत: शरीरीति विभाविताकृतिम् ।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि स: ॥"

इत्येवमेतावन्मात्रमपि स्वमतं वैष्णवा: केऽपि ज्ञातुमपेक्षन्ते च केऽपि नापेक्षन्ते सदैवापेक्षन्ते भजनप्रकारमेवेति।

अत्र श्रुतय: —

"एतद्विष्णो: परमं पदं ये नित्योद्युक्ता: संयजन्ते न कामात् ।
तेषामसौ गोपरूप: प्रयत्नात्प्रकाशयेदात्मपदं तदैव ॥" इत्याद्या: ॥३२॥

गूढार्थदीपिनी

[पृथक् न भवन्ति किन्तु मिलिताभ्यामेव यथा जलबुद्बुदा: । मधुनि रसा इव अर्णवे सरित इव त्वयि विशन्तीत्यन्वय: । परमे परमकारुणरूपे त्वयि । कथम्भूते । उप समीपे रमा यस्य तस्मिन् ।]

एवं जीवानां जन्म तत: कर्माणि पुनस्तत्र लय इति संसारचक्रे परिभ्रमणमुक्तमिदानीं तन्निवृत्तये भयप्रदर्शनपूर्वकं भगवदनुरागमुपदिशन्त्य: श्रुतय: स्तुवन्ति-नृषु तवेति ।

(भगवदनुरागपरेयम्)

पद्यानुवाद:

भ्रममवेत्य हरे भुवि वादिनां विदधते तव भक्तिमनीश्वर: ।
सृजति कालबली विमुखेषुते भयमसौ यमसौख्यकरोऽनिशम् ॥१९॥

सङ्क्षिप्तसार्थान्वय: — हे भगवन् ! अमीषु वादिषु तव मायया भृशं दुस्तरं भ्रमम् अवगत्य ज्ञात्वा सुधिय: अनुप्रभवं प्रतिजन्मैव त्वयि भावं दधति प्रेम कुर्वन्ति । कथम्भूते त्वयि । अभवे भवनिवर्तके । यत् यत: त्रिणेमि: कालरूपा तव भ्रुकुटि: अभवच्छरणेषु भवच्छरणरहितेषु अभक्तिष्वित्यर्थ: । मुहु: भयं सृजति करोति । अत: तव त्वामनुवर्ततां भक्तानां भवभयं संसारभयं कथं न कथमपीत्यर्थ: ।

हे भ
विवेकिन: अ
कथम्भूतं भाव
भवत: प्रादुर्भा
यद्वा । त्वयि भ
शरणं रक्षक अ
अनुवर्तमानानां
नेमयश्चक्रधारादव
अनुवृत्तं भवतु ।
पूज्य: सेव्यश्चेति
कृपायां च " इति
इत्याहु: ॥१९॥३

भगवद्भ
मुण्डकश्रुति: —
'अविद्या
भृशं भ्रमम
'विश्वम्भरं
मनसा संस
यस्मात्स्वभ
यं सर्वे देवा
'सत्पुण्डरीव
वनमालिनम
चिन्तयंश्चेतस
कथम्भूते त्व
निरन्तरप्रवर्धमानम् । य
भजतां भवभयं कथं
शरणम् त्राता आश्रयो
तथा च श्रुति: —
'एको वशी स
'एको वशी स

हे भगवन् ! अमीषु पूर्वोक्तेषु नृषु नानावादिषु तव मायया भ्रमं भ्रान्त्यैव नानामतकल्पनम् अवगत्य ज्ञात्वा सुधियो विवेकिनः अभवे संसारनिवर्तके त्वयि भृशमतिशयेन भावं भक्तिं दास्यादिभावं दधति कुर्वन्ति। अनुप्रभवं प्रतिजन्मैव। यद्वा। कथम्भूतं भावम्। अनु अनुथणं प्रभव उल्लासो यस्मिन् तम्। यद्वा। अनुप्रभवं निरन्तरं प्रवर्धमानम्। यद्वा। अनु अनन्तरं प्रभवः भवतः प्रादुर्भावो यस्मात्तं शीघ्रं त्वत्प्रापकमित्यर्थः। स्वामिचरणास्तु अनु अनु प्रभवो जन्म यस्मिन् तमिति भ्रमविशेषणमाहुः। यद्वा। त्वयि भावं श्रवणकीर्तनादिना मनोवृत्तिं दधति स्थापयन्ति। यत् यस्मात् तव भ्रुकुटिः कालरूपा अभवच्छरणेषु न भवान् शरणं रक्षक आश्रयो वा येषां तेषु त्वद्भजनविमुखेष्वेव भयं जन्ममरणादिदुःखं मुहुः वारं वारं सृजति उपादयति अतस्त्वामेव अनुवर्तमानानां भजतां भक्तानां भवभयं संसारभयं कथं स्यान्न कथञ्चिदपीत्यर्थः। कथम्भूता भ्रुकुटिः। त्रिणेमिः। त्रयो गुणा नेमयश्चक्रधारादवावरका यस्यां सा। यद्वा। तिस्रो नेमयः भूतभविष्यद्वर्तमानाख्या यस्याम्। चक्रवर्ती तु भवभयं तेषां कथमनुवर्तताम् अनुवृत्तं भवतु। लोट् विद्यारम्भदशायामेव तस्यापगमादित्याह। केचित्तु अमीषु भगवदाराधनपरेष्वपि नृषु पञ्चायतनमध्ये को देवः पूज्यः सेव्यश्चेति भ्रमं मनोभ्रमणात्मकं संशयमवगत्य प्राप्य तेषां निश्चयार्थं सुधियः श्रीनारदाद्यास्तव मायया कृपया। "माया दम्भे कृपायां च" इति विश्वः। अभवे भवनिवर्तके त्वय्येव सर्वदेवेभ्यो मुख्यतया भावं सख्यदासादिकं प्रतिजन्म प्रतिक्षणं कुर्वन्तीत्यर्थ इत्याहुः ॥१९॥३३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भगवद्भजने सदाचारं प्रमाणयन्ति श्रुतयः-अमीष्विति। अमीषु पाण्डित्याभिमानिषु स्वोत्प्रेक्षिततर्कनिष्ठेषु तथा च मुण्डकश्रुतिः —

'अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ते बालाः।' इत्यादि।

भृशं भ्रममवगत्य निश्चित्य सुधियो निर्मलमतयस्त्वयि भावं विदधति। श्रवणध्यानादिपूर्वकं प्रेम कुर्वन्ति।

'विश्वम्भरं महाविष्णुं नारायणमनामयम्। पूर्णानन्दैकविज्ञानं परं ज्योतिःस्वरूपिणम् ॥

मनसा संस्मरन् ब्रह्मा तुष्टाव परमेश्वरम्' इति रामतापन्युपनिषदि ॥

यस्मात्स्वभक्तानां स्मृत एव मृत्युमपमृत्युं च मारयति। तस्मादुच्यते मृत्युमृत्युरिति ॥

यं सर्वे देवा नमन्ति। मुमुक्षवो ब्रह्मवादिनश्चेत्यादि ॥ नृसिंहतापिन्याम्।

'सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरं द्विभुजं ज्ञानमुद्राढ्यम्।

वनमालिनमीश्वरं कालिन्दीजलकल्लोलसङ्गिमारुतसेवितं

चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेः ॥' इति गोपालतापन्युपनिषदि।

कथम्भूते त्वयि। अभवे संसारनिवर्तके। 'संसारबन्धस्थितिमोक्षहेतुः।' इति श्रुतेः। कथम्भूतं प्रेम। अनुप्रभवम्। न्तरप्रवर्धमानम्। यद्वा। अनु अनन्तरं भवतः प्रभवः प्रादुर्भावो यस्मात्तथा। अचिरं त्वत्प्रापकमित्यर्थः। अत एव तवानुवर्ततां तां भवभयं कथं स्यान्न कथञ्चिदपीति युक्तमेवैतत्। यतस्तव भ्रुकुटिः कालरूपा त्रिणेमिः। अभवच्छरणेष्वेव। न भवान् णम् त्राता आश्रयो येषां तेष्वेव तव पराङ्मुखेष्वेव अन्ययोगव्यवच्छेदेऽवधारणशब्दः। भयं सृजति। मुहुर्नितराम्। च श्रुतिः —

'एको वशी सर्वगः कृष्ण ईड्य' इत्यारभ्य 'तेषां सुखं शाश्वतं नेतरेषा'मित्यन्तम्। अन्यत्रापि —

'एको वशी सर्वभूतान्तरात्मे'त्यादि। 'येनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषा'मिति कठवल्लीषु ॥३२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं नियम्यत्वाय भगवदात्मकता प्रत्येकसमुदायाभ्यां जीवसङ्घातयोर्निरूपिता, तेनावश्यं भजनीयत्वं निरूपितम्। एवं भजनीयत्वे ज्ञातेऽपि भजनार्थं प्रवृत्ता अपि भक्त्युन्मुखान् कालश्चेद्भक्षयेत् तदा भजनं कथं सिद्ध्येदिति शङ्कां निराकर्तुमाह-नृषु तव माययेति। भगवान् सृष्ट्यादौ कालं मायां च सृष्टवान्। ये मायया मुग्धा भविष्यन्ति तान् कालो ग्रसिष्यति। ये तु लोकान् भगवन्मायाग्रस्तान् ततः कालेन ग्रस्तानालोक्य मायापगमे निस्तारे च भगवद्भजनमेव गतिरिति ये भगवन्तं सेवन्ते तेषां पुनर्मायामोहः सर्वथा न सङ्गच्छते। ततः कालग्रासाभावोऽपि सिद्धः। यदि कथञ्चिद्भक्तिमार्गे विषयाणां विद्यमानत्वात् कदाचिन्मोहः स्यादपि तदापि कालग्रासो न भवेत्। तत्र हेतुः–कथमनुवर्ततां भवभयमिति। तत्रापि हेतुः–यस्मात्कारणात्तवैव भ्रुकूटिः अभवच्छरणेषु भयं सृजति। अतो भक्तिमार्गस्य सर्वथा कालनाशकत्वं मनुष्याधिकारित्वाच्छास्त्रस्य कर्माधिकारादन्येषां भोगदेहित्वात् मनुष्यशरीरानन्तरमेव पुनर्नानाविधयोनिसम्बन्धः, 'स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च।' इति वाक्यात्। अतो नृणां भ्रममित्युक्तम्। अतो ये सुधियः स्वयमपि नरत्वं प्राप्ताः यदि प्रमत्ताः भवेयुः तदा पुनः कालचक्रेण हीनमुत्तमत्वं वा प्राप्ताः कृतार्था न भविष्याम इति निस्तारार्थं यतमानाः तादृशं गुरुमेव भजन्ते। स च गुरुर्भगवानेव, भगवानेव वा गुरुः। शक्तिद्वयं तत्रैव ज्ञातमिति प्रवर्तकत्वं भजनीयत्वं च। ननु 'यो यच्छ्रद्धः स एव स' इति न्यायेन कालान्तरे तत्त्वं सिद्ध्यति सोऽपि चेत् पुनरुत्पद्येत तदा को विशेष इति शङ्कायामाह–अभव इति। भिन्नगुरुपक्षेऽपि भगवदीयत्वान्न तस्यापि भवः। ननु कियत्प्रभृति भगवद्भजनं कर्तव्यमिति चेत्तत्राह-अनुप्रभवमिति। प्रकृष्टो भवो बुद्धिसहितं जन्म यदैव भगवति सद्बुद्धिर्भवति तत आरभ्यैव भगवति भावः कर्तव्य इत्यर्थः। अनुवृत्तिश्च कर्तव्या। कालो हि बाह्यः न केवलमान्तरेण भावेन पीडातो निवर्तते, अपि तु पीडयत्येव। अत एव ज्ञानिनामान्तरभक्तानां बहिर्मुखात् क्लेशः। स च जडभरते वर्णितः। तेन क्लिष्टाः कदाचिन्मुग्धा अपि भवेयुरिति प्रथमत एव बाह्याप्यनुवृत्तिः कर्तव्या। एवं बाह्याभ्यन्तरभेदेनानुवर्तमानान् वस्तुतः सेवकभूतान् जीवान् कामात् सेवामकुर्वतः शिक्षार्थमेव दण्डं कुर्वाणः कालः कथं भयं तेषां कुर्यात् अन्यद्वा। कालस्य भ्रूरूपत्वं पूर्वं वर्णितम्। ननु कालेनाल्पो दण्डः कर्तव्यः ततो लौकिकभयवत्सोऽप्यल्प इति कथं भजनं सिद्ध्येदित्याशङ्क्याह–मुहुरिति। ननु कालो न दृश्यते, दृष्टादेव हि लोका बिभ्यति, अत आह-त्रिणेमिरिति। संवत्सरात्मकः प्रत्यक्ष एव कालः। यस्य शीतातपवर्षाख्यास्त्रयो नेमयः। तल्लोके प्रकटीकुर्वन् स्वपराक्रमं ज्ञापयतीत्यर्थः। न विद्यते भवान् शरणं येषाम् 'ये यथा मां प्रपद्यन्ते' इति शरणत्वेन न स्वीकृतवन्त इत्यर्थः।

"नृणां दुर्गतिमालोक्य ये सेवन्ते दृढव्रताः। कृष्णं तद्भ्रूकुटिः कालो न तान् हन्ति कदाचन॥" ॥१९॥३२॥

श्रीसुबोधिनीसारः

अमीषु नृषु जीवेषु तव मायया भ्रमं नानामतरूपम् अवगत्य ज्ञात्वा सुधियो निपुणा भृशमत्यर्थम् अभवे भवनिवर्तके त्वयि भावमनुवृत्तिं दधति कुर्वन्ति। अनु अनुगतः प्रभवो यस्मिस्तं भ्रमविशेषणं ततः किं तत्राह। अनुवर्ततां त्वां भजतां पुंसां भवात्संसाराद्भयं कथं स्यात् न कथमपि। कुतः। यत् यस्मात्तव भ्रुकुटिर्भ्रूभङ्गरूपस्त्रिणेमिः तिस्रो नेमयो इवावच्छेदाः शीतोष्णवर्षाकाला यस्य संवत्सराख्यस्य स अभवच्छरणेषु न भवान् शरणं रक्षिता येषां तेषु मुहुरसकृद्भयं संसरणरूपं सृजति करोति ॥१९॥३२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ज्ञानादिसाधनस्य दुःसाधनत्वाद्भगवद्भजनस्य सुकरत्वात्तेनैव संसारदुःखनिवृत्तिः, नान्यथा इत्यत्र सदाचारं प्रमाणयन्ति-नृषु तवेति। अमीषु नृषु जीवेषु तव मायया भृशं दुस्तरं भ्रमं देहाद्यात्माभिमानलक्षणमवगत्य ज्ञात्वा सुधियो विवेकिनः अनुप्रभवमनुक्षणं वर्धमानं भावं श्रवणकीर्तनादिना मनोवृत्तिं त्वयि विदधति। तत्फलं दर्शयन्त्य आहुः–अभव इति। मायानियन्तृत्वेन मायां निवर्त्य स्वस्वरूपसाक्षात्कारेण जन्ममरणादिलक्षणभवनिवर्तके इत्यर्थः। कालभयमाशङ्क्याहुः–कथमिति। यत् यस्मात् अभवच्छरणेषु न भवान् शरणं रक्षको येषां तेष्वेव तव भ्रूकुटिः भ्रूभङ्गरूपः त्रिणेमिस्तिस्रो नेमय इवावच्छेदकाः शीतोष्णवर्षाकाला यस्य

संवत्सरात्मकस्य स

भवभयं संसारभयं क

नृषु तवेति

अभवच्छरणेषु तव भृ

मायया भृशं दुस्तरं भ्रम

भावं श्रवणकीर्तनाभ्यां

भ्रूभङ्गरूपः त्रिणेमिस्ति

मुहुः सृजति करोति।

कथञ्चिदपीत्यर्थः। तथ

परीत्य भूतानि

उपस्थाय प्रथम

अतः प्राकृतदेह

भगवन्! अमीषु प्राकृतदे

श्रीकृष्णोक्तेः भृशमत्यन्त

जीवात्मपरमात्मज्ञानरूपभ

मोक्षदातरि त्वयि अनुप्रभव

भावं प्रेमलक्षणचित्तवृत्तिवि

वा कथं स्यात् न कथञ्चिद

हैमः॥ भयङ्करत्वसाम्यादु

नेमिश्चक्रधारा यस्येति व्युत्प

प्रधिर्नेमिरित्यमरः॥ अभवच

अत्र अर्णवादिस्थानि

त्वद्भक्तिभावावेवेत्याहुः॥

देहात्माभिमानस्वतन्त्रत्वाभिम

सुमतयः, अभवे मुक्तिदातरि

अनुवर्ततां त्वां भजतां, भवभ

भ्रुकुटिः भ्रूभङ्गरूपः, तिस्रो ने

सृजति, अभवच्चरणेष्विति पा

सृजति ॥१९॥ ॥३३॥

रात्मकस्य स कालः भयं जन्ममरणादिलक्षणं मुहुः सृजति करोति । अतोऽनुवर्ततामनुवर्तमानानां त्वामेव शरणं भजतां भयं संसारभयं कथं स्यात् ? न कथञ्चिदपीत्यर्थः ॥३२॥१९॥

अन्वितार्थप्रकाशिका

नृषु तवेति ॥ अमीषु नृषु तव मायया भृशं भ्रममवगत्य सुधियः अभवे त्वयि अनुप्रभवं भावं दधति । यत् यतः वच्छरणेषु तव भृकुटिस्त्रिणेमिः भयं मुहुः सृजति अतः अनुवर्ततां भवभयं कथं स्यादित्यन्वयः । अमीषु नृषु जीवेषु तव भृशं दुस्तरं भ्रमं देहाद्यात्माभिमानलक्षणमवगत्य ज्ञात्वा सुधियो विवेकिनः भवनिवर्तके त्वयि अनुप्रभवमनुक्षणं वर्धमानं श्रवणकीर्तनाभ्यां मनोवृत्तिं विदधति कथमिति यत् यस्मात् अभवच्छरणेषु न भवान् शरणं रक्षको येषां तेष्वेव तव भृकुटिः रूपः त्रिणेमिस्तिस्रो नेमय इवावच्छेदकाः शीतोष्णवर्षाकाला यस्य संवत्सरात्मकस्य स कालः भयं जन्ममरणादिलक्षणं सृजति करोति । अतोऽनुवर्ततामनुवर्तमानानाम् । शतार्षः । त्वामेव शरणं भजतां भवभयं संसारभयं कथं स्यात् । न ञ्चिदपीत्यर्थः । तथा च श्रुतयः —

परीत्य भूतानि परीत्य लोकान् सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनाऽऽत्मानमभिसंविवेश ॥'' इत्यादयः ॥३२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अतः प्राकृतदेहभोगसक्तानां जीवानामुत्पत्तिप्रलयादिषु कालककृतभयमस्ति न त्वद्भक्तानामिति वर्णयन्ति नृष्विति ॥ हे वन्! अमीषु प्राकृतदेहविषयसक्तेषु नृषु शरीरेषु तव मायया त्रिगुणमय्या प्रकृत्या ''दैवी ह्येषा गुणमयी मम माया दुरत्ययेति'' णोक्तेः भृशमत्यन्तं भ्रमं भ्रमणं जन्ममरणादिरूपम् ॥ यद्वा ॥ अनुप्रभवम् अन्वनु प्रभयो यस्मिन् तं भ्रमं भ्रान्ति परमात्मज्ञानरूपभगवत्यज्ञात्वा निश्चित्य वास्तुधियो निर्मलबुद्धयः अभवे नास्ति भयो यस्मादित्यभवस्तस्मिन् तथोक्ते तरि त्वयि अनुप्रभवशब्दस्योभयत्र संयोजनम् ॥ अनुप्रभवं प्रभवे इत्यनुप्रभवं जन्मनि जन्मनि ॥ वीप्सायामव्ययीभावः ॥ प्रेमलक्षणचित्तवृत्तिविशेषं दधति धारयन्ति ॥ अनुवर्ततां त्वामनुवर्तमानानां भवभयं संसारभयं संसरणदुःखभयमिति यावत् । यं स्यात् न कथञ्चिदपीत्यर्थः ॥ यद्यस्मात्तव भ्रूकुटिः क्रोधसूचकभ्रूचेष्टाविशेषः ॥ सकोपभ्रूविकारे स्याद्भ्रूभ्रुभृपराकुटिरिति ॥ भयङ्करत्वसाम्यादुपचारः ॥ त्रिणेमिः कालत्रयः शीतकालाद्या नेमयो यस्य ॥ यद्वा ॥ त्रिषु गुणेषु त्रिषु लोकेषु वा क्रधारा यस्येति व्युत्पत्तेः त्रिगुणात्मके संसारे त्रिषु लोकेषु वा कालचक्रधाराप्रसरणस्य प्रसिद्धत्वाद्योगरूढोऽयम् ॥ चक्रधारा मिरित्यमरः ॥ अभवच्छरणेषु न भवान् शरणं रक्षिता येषां तेषु जनेषु मुहुः वारं वारं भयं सृजति ॥३२॥१९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अत्र अर्णवादिस्थानीयं चिदचिद्विशिष्टं ब्रह्म तल्लीनानामुत्पत्तिऽविनाशाद्यात्मकसंसारनिवृत्त्यनुवृत्त्योः किं निदानमित्यपेक्षायां भावावेवेत्याहुः ॥ नृष्विति ॥ हे भगवन्, अमीषु नृषु तव मायया त्वदीयप्रकृत्या, अनुप्रभवं प्रतिजन्मजातं, भ्रमं भिमानस्वतन्त्रत्वाभिमानरूपं, संसृतिहेतुमिति शेषः । अवगत्य, भ्रम एव संसृतिहेतुर्भवतीति निश्चित्येत्यर्थः । सुधियः अभवे मुक्तिदातरि त्वयि, भृशमतिशयितं, भावं प्रेमलक्षणां चित्तवृत्तिं, दधति सर्वथा धारयन्ति । ततः किमत आहुः । त्वां भजतां, भवभयं संसृतिभयं, कथं, भवेत् । न भवेदित्यर्थः । कुतः । यद्यस्मात्, न भवान् शरणं येषां तेषु एव, तव भ्रूभङ्गरूपः, तिस्रो नेमयः शीतोष्णवर्षाकालात्मका यस्य सः, संवत्सरात्मकः काल इत्यर्थः । भयं संसृतिभयं, मुहुः अभवच्चरणेष्विति पाठे, न भवतः चरणः उपेयोपायभावेनोपास्यो येषां तेषु, अकृतभवच्चरणसमाश्रयेष्वित्यर्थः । भयं १९॥ ॥३३॥

योगिरामानुजाचार्यकृतसरला व्याख्या

ज्ञानादिसाधनस्य दुष्करत्वात् भगवद्भजनस्य सुकरत्वेन तेनैव संसारनिवृत्तिर्नान्यथेत्यत्र सदाचारं प्रमाणयन्ति-नृष्विति। अमीषु नृषु जीवेषु तव मायया भृशं दुस्तरं भ्रमं देहाद्यात्माभिमानलक्षणं ब्रह्म निर्गुणमेवेति सगुणमेवेति च इन्द्रशक्त्यादय: ब्रह्मेत्यादि रूपं च भ्रममवगत्य ज्ञात्वा सुधियो विवेकिन: । अभवे । नास्ति भव: यस्मादभव: । तस्मिन् स्वाश्रितानां जन्ममरणादिलक्षणभवनिवर्तके इत्यर्थ: । त्वयि ईश्वरे अनुप्रभवम् अनुक्षणं प्रकर्षेण जायमानं वर्धमानं भावं श्रवणकीर्तनादिना मनोवृत्तिं दधति स्थापयन्ति । यत् यस्मादभवच्छरणेषु न भवान् शरणं रक्षक: येषां तेषु त्वद्भजनविमुखेष्वित्यर्थ: । तेष्वेव तव भ्रुकुटि: भ्रूभङ्गरूप: त्रिणेमि: तिस्रो नेमय इवावच्छेदका: शीतोष्णवर्षाकालात्मका: यस्य संवत्सरात्मकस्य स: काल: । भयं जन्ममरणादिजन्यम् । मुहु: वारम्वारं सृजति करोति । अत: अनुवर्ततां त्वामेवानुवर्तमानानां भजमानानां भवभयं संसारभयं कथं स्यात् । न कथञ्चिदपीत्यर्थ: । अमीषु नृषु तव मायया भृशं भ्रममवगत्य सुधिय: अभवे त्वयि अनुप्रभवं भावं दधति । यत् तव भ्रुकुटि: त्रिणेमि: अभवच्छरणेषु भयं सृजति अत: अनुवर्ततां भवभयं कथं स्यात् इत्यन्वय: ॥३२॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

भूतानि परीत्य चराचरशरीराणि अनित्यत्वेन ज्ञात्वा । एवं लोकान् स्वर्गादीनपि कर्मभूतत्वेनानित्यतया ज्ञात्वा दिश: प्रदिश इति ऐहिकभोगा एवोक्ता: । तानप्यनित्यान् ज्ञात्वा प्रथमजां प्रथमं जातां प्रथमप्रश्वासोद्भवाम् । त्रयीलक्षणाम् उपस्थाय विचार्य । विश्वस्य वा ऋतस्य श्रीविष्णो: आत्मानं स्वरूपम् आत्मना मनसाऽभिसंविवेश । आश्रितवानिति । उक्तलक्षणं जन्मादिरूपसंसारप्रदम् अन्यात्मन्यात्मबुद्धिरूपम् । तत अनुवृत्तिकरणात् किं तदीयपक्षे आपन्नं विपद्ग्रस्तम् ॥३२॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

एवं तावत् परमेश्वरात् जीवा जायन्ते तद्वशेन च कर्माणि कुर्वन्ति । पुनस्तत्र लीयन्ते इति संसारचक्रे भ्रमणम् उक्तम्। इदानीं तन्निवृत्तये भवदनुवृत्तिं विदधतीत्याह-नृषु तवेति । अमृषु नृषु तव मायया भ्रमं भ्रमणम् अवगत्य ज्ञात्वा सुधिय: त्वयि भावमनुवृत्तिं विदधति कुर्वन्ति । त्वयि कथम्भूते । अभवे भवनिवर्तके । भ्रमं कथम्भूतम् । अनुप्रभवोम् । अनुप्रभवो जन्म यस्मिन् तम् । तत: किमत आह-कथमिति । अनुवर्ततां त्वमेव शरणं गतानां भवभयं संसारभयं कथम्भवेत्, न कथञ्चिदपि । कुत: । यत् यस्मात् तव भ्रुकुटि: भ्रूभङ्गरूपस्त्रिणेमि: काल: अभवच्छरणेषु भयं जन्ममरणादिलक्षणं सृजति करोति, न तु त्वच्छरणागतेषु न भवान् शरणं रक्षिता येषां ते अभवच्छरणा: । त्रिणेमिरिति । तिस्रो नेमय इवावच्छेदा: शीतोष्णवर्षकाला: यस्य संवत्सरात्मकस्य कालस्य स: । अत एवम्भूतं संसारमाकलय्य तन्निवृत्तये सुधियस्त्वयि भावं दधीति अत्र श्रुति: —

''परीत्य भूतानि परीत्य लोकान् परीत्य सर्वा: प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश ॥''

इति ॥ अर्थ: - स मुनि: भूतानि प्राणिन: परीत्य संसरचक्रे भ्रमन्तीति ज्ञात्वा लोकान्स्वर्गादीन्क्षयिष्णुत्वेन परीत्य ज्ञात्वा सर्वा दिश: प्राच्याद्या विदिश आग्नेय्याद्याश्च दु:खमयत्वेन दिगादिशब्दस्तत्रत्यपरो ज्ञेय: । ऋतस्य सदा सत्यस्य श्रीविष्णो: प्रथमजां वाचं त्रयीलक्षणामुपस्थाय त्रय्युक्तनैष्कर्म्यमासेव्यात्मना सर्वतो विरक्तेन मनसात्मानं परमात्मानं भगवन्तं शरणमभिसंविवेश गतवान् । व्याख्यान्तरं पूर्वै: कृतम्, सर्वेषु भूतेषु अहमस्मि सर्वाणि भूतानि मयि सन्तीति ज्ञात्वा प्रथमजां वाचमुपस्थाय यावज्ज्ञानोत्पत्ति: तावत् आत्मना शुद्धेन त्वंपदार्थेनात्मानं तत्पदार्थं परमात्मानमभिसंविवेशैक्यं गतवानिति । स्वामिनाम्-

संसारचक्रक्रकचैर्विदीर्णमुदीर्णनानाभवतापतप्तम् ।
कथञ्चिदापन्नमिह प्रपन्नं त्वमुद्धर श्रीनृहरे नृलोकम् ॥

भो नृहरे ! नृलोकं त्वं समुद्धर । कथम्भूतम् । संसारचक्रक्रकचैर्विदीर्णम् । संसारचक्रमेव क्रकचं करपत्रं विदारणास्त्रविशेषस्तेन विदीर्णम् । अत एव उदीर्णनानाभवतापतप्तम् उदीर्णैरुद्भूतैर्नानाध्यात्मादिभवतापैस्तप्तम् । अत मापद्ग्रस्तम् । इह संसारे कथञ्चित्केनापि भाग्योदयेन त्वां प्रपन्नं शरणागतम् उद्धर ॥३२॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथैवं जगत्कारणे त्वयि भक्तिमतां न भयमित्याह–नृषु तवेति । हे भगवन् ! गुरोः सकाशात् —

'गुकारस्त्वन्धकारः स्यादुकारस्तन्निरोधकः । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते ॥'

इत्युक्तप्रकारेण शब्दब्रह्मणि परब्रह्मणि निष्ठा तत्त्वत्रयाभिज्ञाद्गुरोस्तव मायया त्वदीयया प्रकृत्या अमीषु नृषु मनुष्येषु भ्रमं त्मभ्रमं देहात्मभ्रमम् । तत्प्रयुक्ताहङ्कारममकारं चावगम्य ज्ञात्वा । सुधियो विवेकिनस्त्वयि सर्वस्वामिनि सर्वाधारे सर्वनियन्तरि नीके कल्याणगुणाकरे भवनिवर्तके । भावम् अनुप्रभवम् अनुक्षणं प्रीतिरूपां भक्तिं विदधति कुर्वन्तीत्यर्थः । तथा चैकादशे वद्वचनम् —

'निष्किञ्चना मय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सलाः ।
कामैरनालब्धधियो जुषन्तियत्ते नैरपेक्ष्यं न विदुः सुखं मम ॥'

इत्थम्भूता मद्भक्ता एव मम नैरपेक्ष्यं सुखं विदुर्नान्ये इत्यर्थः । अत एव त्वय्यनुवर्ततां त्वामनुवर्तमानानां सेवमानानां भयं संसारभयं कथं भवति । तदुक्तं सिद्धैश्चतुर्थे —

'अयं त्वत्कथामृतपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः ।
तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसम्पन्नवन्त ॥'

इति । त्रिणेमिः कालः । स तवैव भ्रुकुटीस्थानीयः ।

अभवच्चरणेषु त्वच्चरणानाश्रितेषु स्वतन्त्रात्मभ्रमदेहात्मभ्रमयुक्तेषु —

'ईश्वरोऽहमहं योगी सिद्धोऽहं बलवान् सुखी । आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ॥'

इत्युक्तासुरस्वभावेषु भयं सृजति । तथा च रुद्रगीतं चतुर्थे —

'प्रमत्तमुच्चैरिति कृत्यचिन्तया प्रवृद्धलोभं विषयेषु लालसम् ।
त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमन्तकः ॥' इति ॥३२॥

कृष्णप्रिया

इन जीवों में आपकी माया से देहमें आत्मभ्रम और आत्मा में स्वतन्त्रपने का भ्रम यह दो प्रकार का भ्रम सार का हेतु है इसी के होने के पश्चात् संसार होता है । इस प्रकार का निश्चय कर विवेकी जन आपके में अति भक्ति करते है । इसी से आपके भजन करनेवाले को किसी प्रकार संसार से भय नहीं होता क्योंकि भक्तजन संसार से भुक्त हो जाते है मुक्ति भूमि पर मपद में काल का कुछ वश नहीं चलता ॥३२॥

विजितहृषीकवायुभिरदान्तमनस्तुरगं य इह यतन्ति यन्तुमतिलोलमुपायखिदः ।
व्यसनशतान्विताः सम[1]पहाय गुरोश्चरणं वणिज [2]इवाज सन्त्यकृतकर्णधरा जलधौ ॥३३॥

कर्दमक्षमा

हे अज, !, गुरोः, चरणम्, समवहाय, ये, अतिलोलं, विजितहृषीकवायुभिः, अदान्तमनस्तुरगं, यन्तुं, यतन्ति, ते, उपायखिदः, तथा, व्यसनशतान्विताः, बहुदुःखाः, च, सन्तः, इह, जलधौ, अकृतकर्णधराः, वणिजः, इव, सन्ति ॥३३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स च भगवति भावो मनोनियमे सति भवति सोऽपि गुरूपसदनादिति गुरूपसदनं विदधति "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । आचार्यवान् पुरुषो वेद नैषा तर्केण मतिरपनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ" इत्याद्याः श्रुतय इत्याह–विजितहृषीकवायुभिरिति । विजितानि हृषीकाणि इन्द्रियाणि वायुश्च प्राणो यैस्तैरप्यदान्तमनस्तुरगमदान्तमदमितं मन एव तुरगो दुर्गमत्वासाम्यात्तं ये यन्तुं नियन्तुं यतन्ति प्रयतन्ते अतिलोलमतिचञ्चलं गुरोश्चरणं समवहाय अनाश्रित्य ते उपायेषु खिद्यन्ते क्लिश्यन्तीत्युपायखिदः सन्तो व्यसनशतान्विताः बहुव्यसनाकुलाः इह संसारसमुद्रे सन्ति तिष्ठन्ति दुःखमेव प्राप्नुवन्तीत्यर्थः । हे अज ! अकृतकर्णधरा अस्वीकृतनाविका वणिजो यथा तद्वद्गुरुणोपदर्शितभगवद्भजनसुखानुभूतौ तु स्वत एव मनो निश्चलं भवति नान्यथेति भावः ॥

यदा परानन्दगुरो भवत्पदे पदं मनो मे भगवँल्लभेत ।
तदा निरस्ताखिलसाधनश्रमः श्रयेय सौख्यं भवतः कृपातः ॥२०॥ ॥३३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — स च भक्तिलक्षणो भावः प्रेमा मनसो नियमे निरोधे, सोऽपि मनोनियमोऽपि गुरूपसदनं गुरुसमीपगमनम् श्रुतयो विधानं कुर्वन्ति । ताश्च तद्विज्ञानार्थमित्याद्याः ।

"परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन ।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः ॥" इत्यादि ।

अर्थः–ब्राह्मणः ब्राह्मणत्वजातिविशिष्टः कर्मचितान्संसारगतभूतान् लोकान् परीक्ष्य प्रत्यक्षानुमानागमैः सर्वतो याथात्म्येनावधार्य निर्वेदं वैराग्यमायात् कुर्यात् । ब्राह्मणग्रहणं ब्रह्मविद्याधिकारिषु प्राधान्यात् । वैराग्यप्रकारं दर्शयति-इह संसारे कश्चिदपि पदार्थः अकृतो नास्ति किं कृतेन कर्मणायासबहुलेन इत्येवं निर्विण्णो चिद्वज्जनप्राप्यं नित्यं पदं यत्तद्विज्ञानार्थं स ब्राह्मणः समित्पाणिः गृहीतकाष्ठभारहस्तो गुरुमेवाभिगच्छेत्प्राप्नुयात् । समित्पदं रिक्तपाणिर्न गच्छेदितिपरम् वस्त्वन्तराभावे काष्ठमेव गृहीत्वा गच्छेदिति । श्रोत्रियमध्ययनश्रुतार्थसम्पन्नं ब्रह्मनिष्ठं सर्वाणि कर्माणि हित्वा केवले ब्रह्मणि निष्ठा यस्य तम् । ननु, विद्वन्स्वयमेव जानातु नेत्याह–आचार्यवान् गुरुमानेव पुरुष आत्मानं वेद जानाति नान्य इति । यदा तु आत्मन्युत्पन्नागमप्रतिपाद्यात्ममतिः एषा तर्केण स्वबुद्ध्याभ्यूहनमात्रेण नापनेया न हन्तव्या किन्तु सेयं मतिरन्येनैवागमाभिज्ञेनाचार्येण प्रोक्ता सती सुज्ञानाय भवति । हे प्रेष्ठ ! प्रियतम नाचिकेत ! सम्प्रति यमस्य सम्बुद्धिः । यद्वा–एषा ब्रह्मात्मविषयामति स्तर्केणोहापोहरूपेण नापनेया न प्राप्या किन्त्वन्येन गुरुणा प्रोक्तैव सुज्ञानाय सुबोधायेति । गुरूपसदनपरेयम् । नवोऽश्वो यथा दुर्दमो भवति तथा मनोऽपीति साम्यात् । इत्यर्थ इति-दुःखतरणज्ञानाभावात्तदनुभवन्तीति भावः । "कर्णधारस्तु नाविकः" इत्यमरः । छन्दोभङ्गभयात्कर्णधरा इति । यो मनुष्यदेहं प्राप्य गुरुं नाश्रयते सोऽतिपापीयान् भवतीत्यभिप्रायेणोक्तं श्रीकृष्णेनैकादशे – "नृदेहमाद्यम्" इति । नृदेहं प्लवं संसारतरणसाधनं

---

१. वहाय-श्रीधर. वंशी. वीर. शुक. जीव. विश्व. ; मपहाय-विज. । २. इवाविशन्त्यकृत-वीर. ।

सुलभमधुना विना
नृदेहं प्राप्येति शेषः
भवाब्धि संसाराब्धि
संस्कृतैर्देवभाषाभिर्
परम्परावासैः बोधये
स्वामिनां यदेति-पदं

श्रीधरानुयायि
जितबहिरिन्द्रियप्राणैर्यो
विना वा ये प्रयतन्ते ते

"युञ्जानानाम
इत्युक्तेर्मनोनिर
नाव्यारूढा वणिजः सत
भगवन्मूर्तिस्फूर्तिरिति सु

विश्वनाथी —
विश्रान्तेः, तत्प्रभावं विना

"यु
इति न्यायेन त्व
ये तादृशस्य गुरोश्चरणं सम
विजितहृषीकवायुभिः प्राण
विना व्यसनशतान्विता भव
न तु तत्पराः परमानन्दद्वीप
"सर्वं ह्येतद्गुरौ भक्त्या पुरुष

नीलकण्ठी —
एवं ज्ञानान्मुक्तिरन्य
"परीक्ष्यलोकान्कर्म
तद्विज्ञानार्थं स गुरुमे
"यस्य देवे परा भक्ति
इति श्रुतिभ्यामुक्तं नि
विजितानि हृषीकाणि इन्द्रियाणि
नियन्तुं निग्रहीतुं यतन्ति यतन्ते
शक्नुवन्तीत्यर्थः । अत एव ते
व्यसनानि नानौषधिमन्त्रयन्त्रादि
गुरूपयुक्तिं विना नानोपायैरपि म
गुरुभक्तिपूर्वकं श्रवणादिकर्तव्यि

मधुना विना यत्नं प्राप्तुं सुदुर्लभं पुनर्यत्नेनापि प्राप्तुं दुर्लभं सुकल्पं रोगादिरहितमाद्यं पुरुषार्थचतुष्टयहेतुम्। यद्वा-आद्यं द्विजोत्तमरूपं प्राप्येति शेषः। मायाऽनुकूलेन पवनेन पवनवत्पारं नेतुं चालयित्रेत्यर्थः। ईरितं प्रेरितम्। गुरुरेव कर्णधारो यस्मिंस्तम्। यो ब्धिं संसाराब्धिम्। स आत्महा आत्मघातीत्यर्थः। अभियुक्तोक्तं गुरुलक्षणमाह-प्राकृतैर्नरनागपैशाचादिभाषाभिः कृतैर्देवभाषाभिर्गद्यैश्छन्दोबन्धहीनवाक्यैः पद्यैश्छन्दोबन्धयुक्तैर्वाक्यैरक्षरैर्देशभेदभिन्नैर्वर्णैः देशभाषा तत्तद्देशभाषादिना सङ्केतैः वासैः बोधयेत् विद्वांसं कुर्यात्स गुरुरिति। इति भाव इति-गुरुभक्तिलब्धोपायं विना संसारतरणं भवतीति तात्पर्यम्। मिनां यदेति-पदं स्थानम्। निरस्तोऽखिलसाधनश्रमो येन स तथा ॥★॥

श्रीधरानुयायिनी — सा च भगवति भक्तिर्गुरूपदेशसाध्यं मनोनिग्रहं विना दुर्लभेत्याहुः-विजितेति। हे अजित! बहिरिन्द्रियप्राणैर्योगिभिरप्यशक्यवशीकारमतिचञ्चलं दुर्दमतुरगतुल्यं मनो वशीकर्तुं गुरूपदेशं विना कर्णधारस्य गुरोस्तव परिचरणं वा ये प्रयतन्ते तेऽनेकविधभक्तिभिन्नोपायक्लेशेन दुःखिता एव —

"युञ्जानानामभक्तानां प्राणायामादिभिर्मनः। अक्षीणवासनं राजन् दृश्यते क्वचिदुत्थितम्॥"

इत्युक्तेर्मनोनिरोधरूपफलालाभाव्द्यसनशतान्विता असङ्ख्यविपदाकुलाः सत्स्वपि ज्ञानसाधनेषु संसारसमुद्रे कर्णधारं विना रूढा वणिजः सत्यपि पोते समुद्र एव निमज्जन्ति एवं च गुरूपदिष्टसत्साधनानुष्ठानेनानायासेन स्थिरीकृते मनसि स्वत एव वन्मूर्तिस्फूर्तिरिति सुलभा भक्तिरिति भावः॥★॥

विश्वनाथी — तच्छ्रुत्वान्याः श्रुतय आहुः-वयमित एव श्रीगुरुचरणाश्रयं प्रशंसामः, सर्वगुरुत्वस्य त्वदुपदेष्टृगुरुत्व एव श्रान्तेः, तत्प्रभावं विना त्वद्भावासिद्धेश्च। साप्यस्तु संसारध्वंसनिदानम्। केवलमनोनिरोधोऽपि न स्यात् —

"युञ्जानानामभक्तानां प्राणायामादिभिर्मनः। अक्षीणवासनं राजन्दृश्यते क्वचिदुत्थितम्॥"

इति न्यायेन त्वद्भक्त्यभावात्तदसिद्धेः। यतो विजितेति-हे अज! जीववज्जन्ममात्रेण सुकरं यत्प्रत्यक्षत्वं तदतीतेत्यर्थः। दृशस्य गुरोश्चरणं समवहाय ईषदप्यनाश्रित्य यतः स्वत एवातिलोलं तदनाश्रयेणादान्तं दमनाशक्यं च मनस्तदेव तुरगस्तं जितहृषीकवायुभिः प्राणेन्द्रियैश्च विजितैः क्रियमाणैर्नियन्तुं प्रयतन्ते ते तु तद्विजयाद्युपायेषु खिद्यमाना एव भवन्ति यतस्तत्प्रभावं व्यसनशतान्विता भवन्ति। अतः साधनबाहुल्ये सत्यपि वणिजः सांयात्रिका जलधावकर्णधरा इव संसारजलधावेव तिष्ठन्ति तु तत्पराः परमानन्दद्वीपायमानं त्वां प्राप्नुवन्तीत्यर्थः। श्रुतयः 'तद्विज्ञानार्थम्' इत्याद्याः, "आचार्यवान्पुरुषो वेद" इत्याद्याः, र्वं ह्येतद्गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत्" इत्याद्याः स्मृतयश्च (२०) ॥३३॥

नीलकण्ठी —

एवं ज्ञानान्मुक्तिरन्यथा बन्ध इत्युक्तम्। तत्र ज्ञानावाप्तये

"परीक्ष्यलोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन।

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥"

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिताः ह्यर्थाः प्रकाशन्ते महात्मनः॥"

इति श्रुतिभ्यामुक्तं निर्वेदपूर्वकं गुरुभजनमाह-विजितहृषीकवायुभिरिति। हे अज! ये नरा गुरोश्चरणं समवहाय परित्यज्य नि हृषीकाणि इन्द्रियाणि वायवश्च प्राणा यैस्ते तैः अदान्तप्रतिपत्त्ययोग्या मनस्तुरगं तिच्चहयम् अतिलोलं स्वभावतः तं तुं निग्रहीतुं यतन्ति यतन्ते यत्नं कुर्वन्ति ते इह संसारे जलधौ अकृतकर्णधराः वणिज इवावसन्नाः सन्ति न बहिर्निर्गन्तुं न्तीत्यर्थः। अत एव ते उपायखिदः आसनबन्धाद्यैरुपायैः खिद्यन्ते व्यर्थश्रमा इत्यर्थः। व्यसनशतान्विताश्च ते भवन्ति नि नानौषधिमन्त्रयन्त्रादिशक्तिपातादिसाधनानि प्राकृतनिदाघभारद्वाजादिवदर्थानुष्ठानपाठग्रहरूपाणि तेषां शतैरन्विताः। क्ति विना नानोपायैरपि मनोजयो न भवति तदभावादभवे भावनिधानासम्भवः ततो भावमयं न निवर्तते। इति मुमुक्षुणा पूर्वकं श्रवणादिकर्तव्यमित्यर्थः (२०) ॥३३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विजितेत्यस्य टीकायां श्रुतौ समित्पाणिः गृहीतकाष्ठभारहस्तः श्रोत्रियमध्यवनश्रुतार्थसम्पन्नम् एषा उपनिषत्प्रभवा अन्येन औपनिषदेनाचार्येण हे प्रेष्ठ! प्रियतमेति नाचिकेतं संलक्षीकृत्य यमसम्बोधनम्। तव्द्याख्यया गुरुणोपदर्शितेत्यादौ गुरूपदेशप्रभावेण भक्तिमाहात्म्यावगतेर्या सुखानुभूतिस्तस्यां सत्यां स्वत एव मनो निश्चलं भवति ततोऽवतारितोक्तभावपर्यायपूर्वोक्तानुवृत्तिः स्वत एव प्रवर्तत इत्यर्थः। स्वस्वाख्यायां तु — तच्छ्रुत्वान्याः श्रुतय आहुः-वयमित एव श्रीगुरुचरणाश्रयं प्रशंसामः, सर्वगुरुत्वस्य त्वदुपदेष्टृगुरुत्व एव विश्रान्तेः, तत्प्रभावं विना त्वद्भावासिद्धेश्च। साप्यस्तु संसारध्वंसनिदानम्। केवलमनोनिरोधोऽपि न स्यात्—

"युञ्जानानामभक्तानां प्राणायामादिभिर्मनः। अक्षीणवासनं राजन्दृश्यते क्वचिदुत्थितम् ॥"

इति न्यायेन त्वद्भक्त्यभावात्तदसिद्धेः। यतो विजितेति-हे अज ! जीववज्जन्ममात्रेण सुकरं यत्प्रत्यक्षत्वं तदतीतेत्यर्थः। ये तादृशस्य गुरोश्चरणं समवहाय ईषदप्यनाश्रित्य यतः स्वत एवातिलोलं तदनाश्रयेणादान्तं दमनाशक्यं च मनस्तदेव तुरगस्तं विजितहृषीकवायुभिः प्राणेन्द्रियैश्च विजितैः क्रियमाणैर्नियन्तुं प्रयतन्ते ते तु तद्विजयाद्युपायेषु खिद्यमाना एव भवन्ति यतस्तत्प्रभावं विना व्यसनशतान्विता भवन्ति। अतः साधनबाहुल्ये सत्यपि वणिजः सांयात्रिका जलधावकर्णधरा इव संसारजलधावेव तिष्ठन्ति न तु तत्पराः परमानन्दद्वीपायमानं त्वां प्राप्नुवन्तीत्यर्थः। श्रुतयस्तु 'तद्विज्ञानार्थम्' इत्याद्या एव ॥२०॥३३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ननु किं भवद्भक्त्या, स्वयमेव योगशास्त्रमवेक्ष्य तन्निरूपितैरुपायैः सुधीभिर्निस्तरिष्यते ? इत्यत आहुः-विजितेति। विजितहृषीकवायुभिरपि योगिभिर्योऽदान्तो मनस्तुरगस्तमिति स्वशक्त्यनियम्यत्वं सूचितम्। यतोऽतिलोलं गुरोश्चरणाश्रयणं विना केनाप्यदमितं मनस्तुरगम्, ये गुरोश्चरणं सम्यगवहाय नियतं यतन्ते, संशब्देन कथञ्चिदाश्रयणेनापि संसारार्णवतरणं सूचयति। उपायखिदत्वादौ हेतुः-हे अजेति। यतस्त्वं प्राणायामादिभिर्न प्रकटो भवसि, किन्तु गुरोः परमभागवतत्वात् त्वत्पादाश्रयणेनैवेति भावः। वणिजः सांयात्रिकाः, कर्णधरः कर्णधारः, इह अस्मिन् लोके, व्यसनशतान्विताः सन्ति भवन्ति, बहुलसाधनसद्भावेऽपि एकाभावेन बहुव्यसनप्राप्तौ दृष्टान्तः-जलधावकृतकर्णधरा वणिज इवेति ॥३३॥

[कर्म्मनिष्ठानामभक्तानां प्रसङ्गेन केवलशुष्कज्ञानेच्छून् योगिनोऽपि निन्दति-विजितेति। अज ! हे जीववज्जन्मरहित! गुरोर्ब्रह्मादीनामप्युपदेशकस्य तव। तथा हि तापनीश्रुतिः (पू० २९-३०) —

"असावनवरतं मे ध्यातः स्तुतः परार्द्धान्ते सोऽवबुध्यत। गोपवेषो मे पुरस्तादाविर्बभूव। ततः प्रणतो मयानुकूलेन हृदा मह्यमष्टादशार्णं स्वरूपं सृष्टये दत्त्वाऽन्तर्हितः" ॥ इति।

चरणपद्मं समवहाय सम्यग्दूरतस्त्यक्त्वा ये योगिनः प्रत्याहार-प्राणायामादिना विजितैरपीन्द्रियप्राणैर्मनो वशीकर्तुं प्रयत्नं कुर्वन्ति, ते साधनक्लिष्टाः सन्त इह संसारसमुद्रे व्यसनशतान्विता वर्तन्ते। तथा ह्युक्तम् (भा० १०/१४/४)

"तेषामसौ क्लेशल एव शिष्यते नान्यत्" इत्यादि। शेषं सुसङ्गतमेव ॥३३॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

आचार्यसेवाविरहितानामुक्तभगवद्भजनालाभमाह-विजितेति। हृषीकं बाह्येन्द्रियम्। यतन्ति यतन्ते। ये त्वकृतकर्णधराः अलब्धकर्णधराः ॥३३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

कुतस्तर्हि मयि भाव इत्यपेक्षायां मनोनिग्रहादेव वैराग्यात्मकात् स च गुरूपासनादेव न तूपायान्तरेभ्य इत्यभिप्रेत्याहुः-विजितेति॥ अतिचञ्चलमत एव विजितानि हृषीकाणीन्द्रियाणि वायवः प्राणाश्च यैस्तैरप्यदान्तं दुर्निग्रहं मन एव तुरगमश्वं ये पुरुषाः यन्तुं नियन्तुं गुरोश्चरणं विहाय उपायान्तरेषु क्लिश्यन्तो यतन्ते यत्नं कुर्वन्ति ते व्यसनशतान्विताः बहुव्यसनाकुलाः इह संसारसागरे

षा उपनिषत्प्रभवा अन्येन
तेत्यादौ गुरूपदेशप्रभावेण
मपूर्वोक्तानुवृत्तिः स्वत एव
प्रशंसामः, सर्वगुरुत्वस्य
नोनिरोधोऽपि न स्यात् —

त्प्रत्यक्षत्वं तदतीतेत्यर्थः ।
क्यं च मनस्तदेव तुरगस्तं
एव भवन्ति यतस्तत्प्रभावं
व संसारजलधावेव तिष्ठन्ति
।३३॥

इत्यत आहुः-विजितेति ।
लोलं गुरोश्चरणाश्रयणं विना
संसारार्णवतरणं सूचयति ।
ातत्वात् त्वत्पादाश्रयणेनैवेति
न्ति, बहुलसाधनसद्भावेऽपि

अज ! हे जीववज्जन्मरहित !

ततः प्रणतो मयानुकूलेन हृदा

न्द्रियप्राणैर्मनो वशीकर्तुं प्रयत्नं
/१४/४)

न्ति यतन्ते । ये त्वकृतकर्णधराः

तूपायान्तरेभ्य इत्यभिप्रेत्याहुः-
नग्रहं मन एव तुरगमश्वं ये पुरुषाः
बहुव्यसनाकुलाः इह संसारसागरे

ति सङ्गच्छन्ते सन्निविशन्ते । दुःखमेव प्राप्नुवन्तीत्यर्थः । हे अज ! अकृतर्णधराः अलब्धकर्णधरा वणिजो यथा जलधौ ति तद्वत् ॥३३॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

वणिज इवोच्छ्वसन्त्यकृतकर्णधरा जलधौ स्वजनसुतात्मदारधनधामधराः ।
सुस्वशान्तिमति त्वयि हि सन्ति न तानि नृणां विभव उद्यति श्रयत आत्मनि सर्वरसे ॥२१॥३५॥

तैस्ते उच्छ्वसन्ति निःश्वसन्तीत्यन्वयः । अत्र दृष्टान्तः-जलधावकृतकर्णधराः अकृतकर्णधरः कर्णधारो यैस्ते तथा वणिजः णिका इवेत्यर्थः । यतमानाः । कीदृशाः । स्वजनसुतात्मधाम गृहं जितहृषीक इत्येकं वा पदम् । उक्तमेव विवरणम् । ये च कल्पाः पुरुषाः भवच्चरणेषु भवद्विषयेषु कर्मसुसुजातभुवः सुष्ठु जातस्थानाः उत्तमयोग्यतायुक्ताः लक्षणवायुसारथियुक्ततुरगैरतिलोलं बुद्धिचाञ्चल्यं विना निष्कामत्वेन यतन्ति ते स्वजनादियुक्ता उच्छ्वसन्ति उत्कृष्टं श्वसन्ति ति जीवन्तीत्यर्थः । 'श्वस प्राणने' इति धातुः । किं कृत्वा । गुरोश्चरणमपहाय हानं त्यागमपाकृत्य । गुरचरणनिषेवणं त्यर्थः । नास्त्यकृतः कृतेनेति श्रुतेरकृतो भगवानेव कर्णधारो येषां ते तथा । दैवानुकूलकर्णधारा इत्यर्थः । ते उपायविदः ज्ञाः किन्तु नृणां यानि विहितानि साधनानि सुखशान्तिमति त्वयि सुखस्यापि सुखं सुखशं दुःखमिश्ररहितसुखमित्यर्थः । न्तिमति पूर्तिमति पूर्णसुखे इत्यर्थः । यस्मिंस्त्वयि न सन्ति हि गुर्वभावात् तस्माद्विभवे विगतसंसारे देहाभिमानरहिते जीवन्मुक्ते द्यति उपदिशति साधनजातमुपदिशति सति सर्वरसे सर्वस्मात्सारभूते आत्मनि परमात्मनि श्रयत एव तत्साधनसर्वस्वं तिजनकत्वेन श्रीहरिं विषयीकरोतीत्यर्थः —

"षण्णवत्यङ्गुलो यस्तु तालोस्योदशतालकः । दशप्रादेशकः सप्तपदो हस्तचतुष्टयः ॥
कमलत्र्यङ्गुलश्चैव वाग्मी सन्देहवर्जितः । वासुदेवैकशरणो गुरुरित्युच्यते बुधैः ॥
गुरुलक्षणसम्पूर्णः साक्षादेकश्चतुर्मुखः । ततः शेषेन्द्रवह्न्याद्याः क्रमादेव प्रकीर्तिताः ॥"

इत्यादिवाक्यमत्र प्रमाणम् —

"ये वा योग्यतया जाता विष्णुपादाम्बुजाश्रयाः । तथापि साधनैस्तेषां तत्प्राप्तिर्गुर्वनुग्रहात् ॥"

इति च ॥२१॥३५॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तच्छ्रुत्वाऽन्याः श्रुतय आहुः-वयमित एव श्रीगुरुचरणाश्रयं प्रशंसामः । सर्व्वगुरुत्वस्य त्वदुपदेष्टृगुरुत्व एव विश्रान्तेः वं विना प्रभावासिद्धेश्च । साप्यस्तु संसारध्वंसनिदानं केवलमनोनिरोधोऽपि न स्यात् ।

"युञ्जानानामभक्तानां प्राणायामादिभिर्मनः ॥ अक्षीणवासनं राजन् दृश्यते क्वचिदुत्थितम् ॥"

इति न्यायेन त्वद्भक्त्यभावात्तदसिद्धेः । यतो विजितेति ॥३३॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

स च त्वयि भावो विना गुरूपसत्तिं न परिणामसुरसः स्यादित्याहुः-विजितहृषीकेत्यादि । गुरोस्त्वद्भावोपदेशकस्य चरणं त्वद्भक्तं गुरुमकृत्वा स्वयमेव यथाश्रुतं विजितैर्हृषीकैर्वायुभिः प्राणैश्च ये अदान्तं मनस्तुरगम् अतिलोलं यन्तुं नियन्तुं व्यसनशतान्विताः सन्त उपायखिदः सन्ति इह संसारे क इव अकृतकर्णधरा इव । कुत्र । जलधौ । सुगमम् ॥३३॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

स च त्वयि भावो विना गुरूपदेशं न परिणामस्वरसः स्यादित्याह- हे विजितहृषीकेत्यादि । विजितैरपि हृषीकैर्वायुभि प्राणैर्ये अदान्तमदमितं मनोरूपतुरगं नियन्तुं यतन्ति, ते गुरोश्चरणं समवहाय व्यसनशतान्विताः सन्त उपायखिदो भूत्वा सन्ति । अज श्रीकृष्ण ! क इह जलधौ अकृतकर्णधरा इव धर्णधरः कर्णधारः । अन्यत् सुगमम् ॥३३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ननु च तैरपि मद्व्रजने मनोनिश्चलीकरणार्थमष्टाङ्गयोगः खल्वनुष्ठेय एव । मैवम् । तेषां श्रीगुरुचरणदृढभक्त्यैव मनोनैश्चल्यमनायासेनैव भवेत् । यदुक्तं —

सर्वं चैतद्गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत् । इति । गुरुभक्तिं विना तु मनोजयार्थका अपि योगा अकिञ्चित्करा एवेत्याहुः- विजितैरपि हृषीकैरिन्द्रियैर्वायुभिः प्राणैः अदान्तः अप्राप्तदमनः मन एव तुरगस्तं यन्तुं नियन्तुं ये यतन्ति प्रयतन्ते ते गुरोश्चरणं चरणपरिचरणं समवहाय विहाय उपायखिदः अन्येषूपायेषु खिद्यमानाः सन्तः व्यसनशतान्विता बहुविपव्द्याकुला इह संसारसिन्धौ सन्ति तिष्ठन्ति । हे अज अकृतकर्णधरा अस्वीकृतनाविकाः वणिज इव । अत्र श्रुतयः —

"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् । समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । आचार्य्यवान् पुरुषो वेद ।" इति ।

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥"

इत्याद्याः ॥३३॥

गूढार्थदीपिनी

स च भगवति भावो गुरूपदेशसाध्यं मनोनिग्रहं विना दुर्लभ इत्याहुः-श्रुतयः-विजितेति ।

(गुरुशरणागतिद्योतनपरेयम्)

पद्यानुवादः

विजितवायुभिरप्यदमं मनो जगति ये विनियन्तुमिहोद्यताः ।
अकृतनाविकवद्विपदब्धिगास्तव पदे वपने★ च गुरोर्विना ॥२०॥

★ [वपनं वपः घञर्थे कः । बन्धनभूतसंसारबीजानां कर्मणां वपनम् । आसक्तिपूर्वकमनुष्ठानं तद्यतः खण्डयतः । यद्वा । अकारपदच्छे(दे)न अवपदे रक्षास्थाने तव पदे विना द्वितीयाद्विवचनम् ।]

सङ्क्षिप्तसार्थान्वयः — हे अज ! ये गुरोः चरणं समवहाय ईषदप्यनाश्रित्य विजितहृषीकवायुभिः निरुद्धेन्द्रियप्राणैः योगिभिरपि अदान्तमनस्तुरगम् अदान्तं वशीकर्तुमशक्यं मनोरूपमश्वंयन्तुं यतन्ति निरोद्धुं प्रयतन्ते ते उपायखिदः उपायेषु क्लिश्यन्तः व्यसनशतान्विताश्च सन्तः इह संसारे सन्ति तिष्ठन्ति । कुत्र के इव ? जलधौ अकृतकर्णधराः अकृतनाविका वणिज इव । अतिलोलम् अतिचञ्चलम् इति तुरगविशेषणम् ॥

हे अज ! जन्मादिरहित हे भगवन् ! विजितानि हृषीकाणि इन्द्रियाणि वायुः प्राणवायुश्च यैस्तैः योगिभिरपि अदान्तं दुर्निग्र मनोरूपं तुरगं ये नराः गुरोश्चरणं समवहाय अनाश्रित्य । यद्वा । कर्णधारस्य गुरोस्तव चरणपरिचर्यां समवहाय आसनबन्धाद्यैरुपायैः विद्यमानाः तैरेव यन्तुं निरोद्धुं यतन्ते यत्नं कुर्वन्ति ते व्यसनशतान्विताः असङ्ख्यविपदाकुलाः सन्तः इह संसारसमुद्रे सन्ति तिष्ठन्ति । संसारसमुद्रे निमग्ना भवन्तीत्यर्थः । अत्र दृष्टान्तः-यथा, अकृतकर्णधरा अस्वीकृतनाविका वणिजः जलधौ सन्ति निमज्जन्ति तद्वत् । कर्णं धरतीति कर्मण्यण् । [कर्णधार इति स्यात् ।] छन्दोऽनुरोधेन ह्रस्वत्वम् । वस्तुतस्तु धरतीति धरः कर्णस

धराः कर्णधराः । कर्णः नौपृष्ठस्थचालनकाष्ठम् । कथम्भूतं तुरगम् ? अतिलोलम् अतिचञ्चलम् । "कर्णधारस्तु नाविकः" इत्यमरः । उक्तं च श्रीवल्लभाचार्यैः—

"अदान्ते मनसि ज्ञाते योगार्थं न यतेद्बुधः । गुरुसेवापरो भूत्वा भक्तिमेव सदाभ्यसेत् ॥" इति ।

इन्द्रियैः प्राणैश्च विजितैः क्रियमाणैर्ये यन्तुं यतन्त इति वा । एतेन योगमेव ये मुख्यं साधनं मन्यन्ते तेऽपि निरस्ताः ।

"युञ्जानानामभक्तानां प्राणायामादिभिर्मनः । अक्षीणवासनं राजन् दृश्यते पुनरुत्थितम् ॥" इति वचनात् ॥२०॥३४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पूर्वोक्तो भगवति भावो गुर्वनुग्रहभूतेन सम्भवति । तदर्थं गुरूपसदनं विदधति ।

"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् । समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । आचार्य्यवान् पुरुषो वेद । नैषामतिस्तर्केणापनेया । प्रोक्ताऽन्येनैव सुज्ञाताय प्रेष्ठा । आचार्य्यदेवो भव । तस्मै स विद्वानुपसन्नाय । सम्यक्प्रशान्तचित्ताय शमान्विताय । येनाक्षरं परमं वेद । सत्यं प्रोवाच । तां तत्त्वतो ब्रह्मविद्याम् ।"

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥"

इत्याद्याः श्रुतयः । विजितानि नियमितानि हृषीकाणि इन्द्रियाणि वायुश्च प्राणो यैस्तेऽप्यदान्तमनस्तुरगम् अवश्यं मनोरूपमश्वम् । निरतिशयचाञ्चल्ये उपमानम् । नियन्तुं यतन्ति वशीकर्तुं यत्नपरायणा भवन्ति । गुरोश्चरणं समवहाय अनाश्रित्य असाधारणं साधनं विहाय साधारणसाधनपरा इत्यर्थः । कीदृशं मनः । अतिलोलम् अत्यन्तचञ्चलम् । ते उपायखिदः । उपायेषु श्रान्ताः सन्तो व्यसनानां शतैर्व्याप्ता इह जन्मादिदुःखात्मके संसारे । सन्ति वर्तन्ते । नित्यसंसारिणो भवन्ति । हे अज ! अकृतकर्णधरा अस्वीकृतनाविका वणिज इवेति मज्जने दृष्टान्तः ॥३३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भजनमुपपाद्य योगादिना भजनं न कार्यसाधकं योगशेषत्वादिति स्वतन्त्रमेव भक्तिमार्गानुसारेण भजनं कर्तव्यमित्यभिप्रायेण योगपक्षं निन्दति-विजितहृषीकवायुभिरिति । पूर्वश्लोके गुरुद्वारा भजनं निरूपितं तदेव फलपर्यवसायि । योगस्तु सर्वथा न कस्यापि सेत्स्यति, स्वतःप्रवृत्तस्य मनसः प्रतिबन्धकत्वात् । मनो ह्यसत् लब्धशक्ति ईश्वरगुरुप्रसादयुक्तश्चेत् किं योगेन साधनेनैव कृतार्थत्वात् । अतो लौकिका इव योगिनोऽपि संसार एव परिभ्रमन्ति, न कृतार्था भवन्तीति निरूप्यते । ननु योगमार्गः कथं कृत इति चेदुच्यते ।

"अणिमादिसुखार्था ये वाऽत्यन्तबहिर्मुखाः । क्लेशकार्यरता ये च तदर्थं योग उच्यते ॥

परम्परासाधनं वा फलार्थं वा निरूपितः । योगः साक्षान्न मोक्षाय निषेधाद्व्याससूत्रतः ॥

एतेन योगः प्रत्युक्तः प्रशंसार्था फलश्रुतिः ॥"

अतः स्वतन्त्रयोगनिषेधार्थमिदमुच्यते । विशेषेण जितानि हृषीकाणीन्द्रियाणि वायुश्च यैः, अनेन प्रत्याहारपर्यन्तं सिद्ध्यतीति निरूपितम् । अन्यथा योगाङ्गेषु प्राथमिकेष्वसिद्ध्यमानेषु प्रवर्तमानस्य शङ्का स्यात् । अतो बोध्यते पञ्चाङ्गान्येव सेत्स्यन्ति नाधिकानीति बोधयति । मनसो निग्रहाशक्यत्वे हेतुमाह-अदान्तेति । स्वभावत एव अदान्तः प्रतिनियतेन्द्रियपक्षे येषां मनः स्वभावतो दान्तं सात्त्विकप्रकृति तेषां योगः सिद्ध्येदपीति ज्ञापितम् । येषां त्वदान्तमेव मनः तदपि तुरगरूपम् तस्मिन्नारूढो जीवो भवति मनो लालसाकाङ्क्षि तस्य त्वशक्य एव निग्रह इति ज्ञापितम् । स्वयं च इहलोकानुसारेणैव स्थितः यन्तुं वाञ्छति । ननु तुरगोऽपि श्चेन्नियम्यते, तद्वन्मनोनियमनमपि भविष्यतीति चेत्तत्राह-अतिलोलमिति । प्रयत्नेन ग्रहीतुमेवाशक्यम् । ननूक्तं 'यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।' इति, चञ्चलस्यापि निग्रहे साधनमुक्तमिति चेत्तत्राह-उपायखिद इति । उपाय एव खेदं प्राप्नुवन्ति । शास्त्रे ततः पूर्वं पञ्चाङ्गानि निरूपितानि तान्येव मनसोऽतिचाञ्चल्ये साधयितुमशक्यानि । न हि विक्षिप्ते मनस्यासनं सिद्ध्यति

यमादिकं वा । अतः सर्वथाऽदान्ते योगारम्भ एव न कर्तव्यः । किञ्च । महता कालेन यमादिसाधनानुष्ठाने चित्तशुद्धौ सत्यां कदाचित्साधनान्तरं सिद्ध्येदपि तदपि नास्तीत्याह–व्यसनशतान्विता इति । उत्पन्नस्य प्राणिनो विक्षिप्तमनसः प्रतिक्षणमनेकानि व्यसनानि भवन्ति । ननु प्रथमं व्यसननिराकरणाय साधनान्तरं कर्तव्यमिति चेत्तत्राह–समवहाय गुरोश्चरणमिति । आदौ व्यसनापगमे गुरुरेवैकं साधनम् 'एतत्सर्वं गुरौ भक्त्या' इति वाक्यात् । सम्यक्त्यागः साधनत्वेनापि, गुरुसेवायां तु तेनैव कृतार्थत्वात् योगो व्यर्थ इति भावः । ततस्तेषामुभयभ्रंशमाह–वणिज इवाज सन्तीति । सांयात्रिकः कर्णधारमप्यकृत्वा जलधावेव सीदमाना भवन्ति । न तु कार्येऽप्यसिद्धे गृहमागच्छन्ति । जलधित्वात्तत्र महान्क्लेशः सूचितः । तथा योगे शरीरशोधनं कृत्वा स्थितः महान्तं क्लेशमेव प्राप्नोतीत्यर्थः ।

"अदान्ते मनसि ज्ञाते योगार्थं न यतेद्बुधः ॥ गुरुसेवापरो भूत्वा भक्तिमेव सदाऽभ्यसेत् ॥" ॥२०॥३३॥

श्रीसुबोधिनीसारः

विजितानि हृषीकाणीन्द्रियाणि वायुश्च प्राणो यैस्तैरपि न दान्तं मन एव दुर्दमत्वसाम्यात्तुरगोश्वस्तमतिलोलमतिचञ्चलं यन्तुं वशीकर्तुं ये यतन्ते यत्नं कुर्वन्ति । गुरोश्चरणं समुपसत्तिं समवहाय त्यक्त्वाचार्यवान् पुरुषो वेदेत्यनाश्रित्य उपायेषु प्राप्तिसाधनेषु खिद्यन्ते क्लिश्यन्त इत्युपायखिदो व्यसनशतान्विता बहुदुःखाकुला इह संसारसागरे । सन्ति वर्तन्ते न कृतः कर्णधरो नाविको यैस्ते वणिजो वैश्या जलधौ समुद्रे इव हे अज ॥२०॥३३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

स च भगवति भावो मनसो निरोधे सति भवति, तन्निरोधश्च गुरूपसदनादेव भवति, तद्विना तु सुदुष्कर एव स, इत्याहुः–विजितहृषीकवायुभिरिति । त्वमेवैको जन्मादिदुःखरहितः, अतोऽन्येऽपि त्वत्कृपाभाज एव तद्रहिता भवन्ति, नान्ये इति सूचयन्त्यः सम्बोधयन्ति–अजेति । विजितानि हृषीकाणीन्द्रियाणि वायुः प्राणाश्च यैस्तैर्योगिभिरपि अदान्तमदमितं वशीकर्तुमशक्यं मन एव तुरगः, दुर्दमत्वात्साम्यात् । तत्र हेतुमाहुः–अतिलोलम् अतिचञ्चलमिति । गुरोश्चरणं समवहाय अनाश्रित्य ये जनास्तं यन्तुं वशीकर्तुं यतन्ति प्रयतन्ते ते उपायेषु खिद्यन्ते क्लिश्यन्तीत्युपायखिदः व्यसनशतान्विता बहुदुःखाकुलाश्च सन्त इह संसारसमुद्रे सन्ति तिष्ठन्ति संसारदुःखे निमग्ना भवन्तीत्यर्थः । तत्र दृष्टान्तमाहुः–अकृतकर्णधरा अस्वीकृतनाविका वणिजो यथा जलधौ निमग्ना भवन्ति तथेति । गुरुलक्षणं तु —

"प्राकृतैः संस्कृतैश्चैव गद्यपद्याक्षरैस्तथा । देशभाषादिभिः शिष्यं बोधयेत् स गुरुः स्मृतः ॥ श्रोत्रियं ब्रह्मनिष्ठम्" ।

इत्याद्युक्तं ज्ञेयम् । एवम्भूतेन गुरुणोपदर्शितभगभजनसुखानुभूतौ स्वत एव मनो निश्चलं भवति, नान्यथेति भावः ॥३३॥२०॥

अन्वितार्थप्रकाशिका

स च भवति भावो मनोनियमेन भवेत् तच्च गुरूपसदनादिति । गुरूपसदनादनमाहुः–विजितेति । हे अज ! गुरोश्चरणं समवहाय अनाश्रिय ये जना अतिलोलं चञ्चलं विजितानि हृषीकाणीन्द्रियाणि वायुः प्राणश्च यैस्तैर्योगिभिरपि अदान्तमदमितं वशीकर्तुमशक्यं मन एव तुरगः दुर्दमत्वसाम्यात्तं यन्तुं वशीकर्तुं यतन्ति प्रयतन्ते । तडभाव आर्षः । ते उपायेषु खिद्यन्ते क्लिश्यन्तीत्युपायखिदः तथा व्यसनशतान्विता बहुदुःखाश्च सन्तः इह संसारसमुद्रे सन्ति तिष्ठन्ति संसारदुःखे निमग्ना भवन्तीत्यर्थः । तत्र दृष्टान्तमाहुः । अकृतकर्णधरा अस्वीकृतनाविका वणिजो यथा जलधौ निमग्ना भवन्ति तथैव गुरूपदर्शितभगवद्भजनसुखानुभूतौ तु मनः स्वयमेव निश्चलं भवति नान्यथा । तथा च श्रुतिः —

"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् ॥ आचार्यवान् पुरुषो वेद ॥" इत्यादि ॥३३॥

सुधियाम

विजितहृषीकेति ।

प्रादुर्भूतस्योपदेष्टुस्त

त्यक्त्वा । अतिलोल

प्राणैश्च यतन्ति प्रयत

संसारसमुद्रे व्यसनश

अकृतकर्णधरा अ

कृतनाविकपोतवणि

तद्विज्ञानार्थं स

प्रोक्तान्येनैव सुज्ञानप्रेष्ठी

यस्य देवे परा

एकादशे च —

दशमे —

स वै सत्कर्मणां स

कुतस्तर्हि मयि भाव

विजितेति ॥ हे अज भगव

यैस्तैरपि, अदान्तः दुर्निग्रहः व

खिद्यन्ति क्लिश्यन्ति इति उप

बहुव्यसनाकुलाः सन्तः, इह

अनाश्रितनाविकाः, वणिजः इ

भावः ॥२०॥ ॥३४॥

स च भगवति भावो

विजितेति । हे अज ! जन्मादिरहि

यैस्ते । योगिभिरपि अदान्तम

दुर्दमत्वसाम्यात् । अदान्तत्वे हेतुम

वशीकर्तुं यतन्ति प्रयतन्ते । ते

ने चित्तशुद्धौ सत्यां
तः प्रतिक्षणमनेकानि
। आदौ व्यसनापगमे
तार्थत्वात् योगो व्यर्थ
दमाना भवन्ति। न तु
तः महान्तं क्लेशमेव

॥३३॥

तिलोलमतिचञ्चलं यन्तुं
य उपायेषु प्राप्तसाधनेषु
: कर्णधरो नाविको यैस्ते

सुदुष्कर एव स, इत्याहुः-
न्ति, नान्ये इति सूचयन्त्यः
ं वशीकर्तुमशक्यं मन एव
य ये जनास्तं यन्तुं वशीकर्तुं
ह संसारसमुद्रे सन्ति तिष्ठन्ति
था जलधौ निमग्ना भवन्ति

। श्रोत्रियं ब्रह्मनिष्ठम्" ।
, नान्यथेति भावः ॥३३॥२०॥

विजितेति । हे अज ! गुरोश्चरणं
स्तैर्योगिभिरपि अदान्तमदमिदं
आर्षः । ते उपायेषु खिद्यन्ते
तिष्ठन्ति संसारदुःखे निमग्ना
धौ निमग्ना भवन्ति तथेति ।

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सुधियामपि शास्त्रोक्तलक्षणे सम्पन्नगुरुसेवनमन्तरायस्य कस्यापि कल्याणसाधनस्य विघ्नबाहुल्यात्सिद्धिर्न भवेदित्याहुः- जितहृषीकेति ॥ हे अज हे दिव्याप्राकृतजन्मन् ! ये नराः गुरोः धार्मात्रिकर्दमकश्यपवसुदेवादिग्रहे जनोपदेशार्थं पुत्रत्वेन र्भूतस्योपदेष्टुस्तव वा शास्त्रोक्तलक्षणा सम्पन्नस्योपदेशकर्तुराचार्यस्य चरणं परिचरणं सेवनमिति यावत् अङ्घ्रिं वा समपहाय त्वा। अतिलोलम् अतिशयचपलम् अदान्तमनस्तुरगं दुर्दान्तस्वान्तःकरणहयं यन्तुं वशीकर्तुं विजितहृषीकवायुभिः विजितैरिन्द्रियैः श्च यतन्ति प्रयतन्ते ॥ परस्मैपदं छान्दसम् । ते पुरुषाः उपायखिदः उपायैः प्राणायामादिभिरन्यै साधनैर्वा खिद्यमानाः इह सारसमुद्रे व्यसनशतान्विताः व्यसनानां शतैरन्विता विपद्गणाकुलाश्च सन्तः ॥ व्यसनं विपदि भ्रंश इत्यमरः ॥ जलधौ सिन्धौ कृतकर्णधरा अनाश्रितनाविकाः वणिज इव सन्ति भवन्ति सीदन्तीत्यर्थः ॥ पूर्वोक्तद्विविधगुणशरणं प्राप्ताः नाविकपोतवणिगिवसंसाराब्धिं सुखेन तरन्तीति भावः । तथा च श्रुतिस्मृतयः —

तद्विज्ञानार्थं स गुरुमेव गच्छेत् ॥ समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ आचार्यवान्पुरुषो वेद ॥ नैषा तर्केण मतिरपनेया ॥ न्येनैव सुज्ञानप्रेष्ठेति ॥

यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति ॥

अचक्षुरन्धस्य यथाऽग्रणीकृतः वृथा जनस्याविदुषोऽबुधो गुरुः ।
त्वमर्कदृक्सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सताम् ॥

एकादशे च —

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् । शब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥
मदभिज्ञं गुरुं शान्तमुपासीत मदात्मकम् ॥ इति ॥

दशमे —

स वै सत्कर्मणां साक्षात् द्विजातेरिह सम्भवः । आद्योऽङ्ग यत्राश्रमिणां यथाहं ज्ञानदो गुरुः ॥ इत्याद्याः ॥३३॥२०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कुतस्तर्हि मयि भाव इत्यपेक्षायां दृढविरक्तिपूर्वकं मनोनिग्रहात्, स च गुरूपासनादेव न तूपायान्तरेभ्य इत्यभिप्रेत्याहुः ॥ जितेति ॥ हे अज भगवन् ! ये षुरुषाः, अतिलोलमतिचञ्चलम्, अत एव विजितानि हृषीकाणीन्द्रियाणि वायवः प्राणाश्च पि, अदान्तः दुर्निग्रहः वशीकर्तुमशक्य इति यावत् । मन एव तुरगोऽश्वस्तं, यन्तुं नियन्तुं, गुरोः चरणं समवहाय, उपायेषूपायान्तरेषु न्ति क्लिश्यन्ति इति उपायखिदः प्राणायामादिभिः खिद्यमानाः सन्तः, यतन्ति यत्नं कुर्वन्ति । ते पुरुषाः, व्यसनशतान्विताः सनाकुलाः सन्तः, इह संसारे, सन्ति गच्छन्ति निविशन्ति । दुःखमेव प्राप्नुवन्तीत्यर्थः । क इव । अकृतकर्णधराः श्रितनाविकाः, वणिजः इव वणिजो यथेत्यर्थः । जलधौ मज्जन्ति, तद्वत्तेऽपीत्यर्थः । 'आचार्यवान् पुरुषो वेद' इति श्रुतेरिति वः ॥२०॥ ॥३४॥

योगिरामानुजाचार्यकृतसरला व्याख्या

स च भगवति भावो मनसः निरोधेन भवति । तन्निरोधश्च गुरूपसदनादेव भवति । तद्विना तु सुदुष्कर एवेत्याहुः- जितेति। हे अज ! जन्मादिरहित हे भगवन् ! विजितहृषीकवायुभिः विजितानि वशीकृतानि हृषीकाणि इन्द्रियाणि वायुः प्राणश्च योगिभिरिपि अदान्तमनस्तुरगम् अदान्तमदमितं वशीकर्तुमशक्यमित्यर्थः । मनस्तुरगम्, मन एव तुरगम् । साम्यात् । अदान्तत्वे हेतुमाहुः-अतिलोलमिति । अतिचञ्चलम् । गुरोश्चरणमवहायाचार्यचरणावनाश्रित्य ये जनाः तं यन्तुं र्तुं यतन्ति प्रयतन्ते । ते जनाः उपायखिदः उपायेषु खिद्यन्ते क्लिश्यन्तीति उपायखिदः । तथा व्यसनशतान्विताः

खु:खशतेन युक्तास्सन्त: तिष्ठन्ति । संसारदु:खे निमग्ना भवन्तीत्यर्थ: । तत्र दृष्टान्तमाहु:-अकृतकर्णधरा: अस्वीकृतनाविका: वणिजो यथाजलधौ निमग्ना भवन्ति तथेति । सद्गुरूपदर्शितभगवद्भजनसुखानुभवे सत एव मनो निश्चलं भवति। नान्यथेति भाव: । अत्र च —

"आचार्य्यादेवविद्याविदितासाधिष्ठं प्राप । आचार्यवान् पुरुषो वेद ।

नैषा तर्केण मतिरपनेया । प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ ॥"

इत्याद्या: श्रुतय: अनुसन्धेया: ॥ हे अज ! अतिलोलम् अत एव विजितहृषीकवायुभिरप्यदान्तमनस्तुरगं ये गरोश्चरणं विहाय यन्तुं यतन्ति । ते उपायखिद: व्यसनशतान्वितास्सन्त: इह जलधौ अकृतकर्णधरा: वणिज इव सन्ति । इत्यन्वय: ॥३३॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

भावोऽनुवृत्ति: । सोऽपि मनोनियमोऽपि । तद्विज्ञानार्थं तस्यात्मतत्त्वस्याभवार्थम् । समित्पाणि: गृहीतकाष्ठभारहस्त: । श्रोत्रियमध्ययनश्रुतार्थसम्पन्नम् । अन्यथा शिष्यस्य सन्देहव्युदासो न स्यात् । ब्रह्मनिष्ठम् अनुभवेन ब्रह्मणि पारङ्गतम् । अन्यथा शिष्ये सञ्चारशक्तिर्न स्यादिति । एषा उपनिषत्प्रभवा तर्केण स्वोत्प्रेक्षितकुयुक्त्या नापनेया न बाधनीया । अन्येनैपनिषदेन आचार्येण प्रोक्तोपदिष्टा । सुज्ञानाय शोभनानुभवायैव भवति । हे प्रेष्ठेति । नाचिकेतं प्रति यमस्य सम्बोधनम् । प्राकृतै: नाटके तद्भाषारूपगद्यपद्याक्षरै: । काव्ये तु संस्कृतैस्तैरेव देशभाषाकाश्मीरादिदेशभाषा । आदिनाभिनयाचारादिग्रह: ॥३३॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

स च भगवति भावो मनोनियमे सति भवति । सोऽपि गुरूपसदनादिति गुरूपसदनं विदधति इत्याह-विजितेति। भो अज ! ये गुरोश्चरणं समवहाय त्यक्त्वा विजितहृषीकवायुभि: साधकतमै: अतिलोलं चञ्चलम् अदान्तं मनस्तुरगं यन्तुं नियमयितुं यतन्ति तत्नं कुर्वन्ति ते उपायखिद: सन्त: इह संसारसमुद्रे सन्ति तिष्ठन्ति दु:खमेव प्राप्नुवन्ति इत्यर्थ: । कथम्भूता: । व्यसनशतान्विता: बहुव्यसनाकुला: अकृतकर्णधरा वणिजो यथा जलधौ सन्ति विजितानि हृषीकाणि इन्द्रियाणि विजितो वायुश्च यैस्ते उपायेषु खिद्यन्ति क्लिश्यन्ति इत्युपायखिद: अदान्तमदमितं मन एव तुरगस्तं दुर्दमत्वसाम्यात् गुरुणोपदर्शितभगवद्भजनसुखानुभूतौ तु स्वत एव मनो निश्चलं भवति नान्यथेति भाव: । वैराग्यपूर्वकं गुरूपसदनं विदधति श्रुति: —

"परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात् नास्त्यकृत: कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणि: श्रोत्रियं ब्रह्मनिष्ठम् । आचार्यवान् पुरुषो वेद । नैषा तर्केण मतिरपनेया । प्रोक्ता अन्येनैव सुज्ञानाय प्रेष्ठ॥" इति ॥

अर्थ:-ब्राह्मणजातिविशिष्ट: कर्मचितान्संसारगतभूतान् लोकान् परीक्ष्य प्रत्यक्षानुमानागमै: सर्वतो याथात्म्येनावधार्य निर्वेदं वैराग्यमायात् कुर्यात् । ब्राह्मणग्रहणं ब्रह्मविद्याधिकारिषु प्राधान्यात् । वैराग्यप्रकारं दर्शयति-इह संसारे कश्चिदपि पदार्थ: अकृतो नास्ति अत: किं कृतेन कर्मणा । आयासबहलेन इत्येवं निर्विण्णो विद्वज्जनप्राप्यं नित्यं पदं यत्तद्विज्ञानार्थं स ब्राह्मण: समित्पाणि: गृहीतकाष्ठभारहस्तो गुरुमेवाभिगच्छेत् । कथम्भूतं गुरुम् । श्रोत्रियम् अध्ययनश्रुतार्थसम्पन्नं ब्रह्मनिष्ठं हित्वा सर्वाणि कर्माणि केवले ब्रह्मणि निष्ठा यस्य तम् । ननु विद्वान्स्वयमेव जानातु नेत्याह- 'आचार्यवान् पुरुषो वेद नान्य' इति यदा तु आत्मनि उत्पन्नागमप्रतिपाद्यात्ममति: एषा तर्केण स्वबुद्ध्याभ्यूहनमात्रेण नापनेया न हन्तव्या किन्तु सेयं मतिरन्येनैवागमाभिज्ञेनाचार्येण प्रोक्ता सती सुज्ञानाय भवति । हे प्रेष्ठ ! प्रियतमेति नाचिकेतसम्प्रति यमस्य सम्बोभनम् । तस्मात् गुरूपदेशप्रभावेण भक्तिमाहात्म्यावगतेर्या सुखदु:खानुभूतिस्तस्यां स्वत एव मनो निश्चलं भवति इति गुरूपसदनपरेयं श्रुति: ।

स्वामिनाम् - यदा परानन्दगुरो भवत्पदे पदं मनो मे भगवँल्लभेत ।

तदा निरस्ताखिलसाधनश्रम: श्रयेय सौख्यं भवत: कृपात: ॥

भो भगवन् ! परानन्दगुरो ! मे मम मनो भवत्पदे यदा पदं स्थानं लभेत तदा भवत: कृपात: निरस्ताखिलसाधनश्रम: सन् सौख्यं श्रयेय प्राप्नुयाम् । निरस्ता त्यक्ता अखिलानां साधनानां श्रमा येन स: ॥३३॥

स्वीकृतनाविकाः
निश्चलं भवति ।
नस्तुरगं ये गरोश्चरणं
। इत्यन्वयः ॥३३॥
गृहीतकाष्ठभारहस्तः ।
पारङ्गतम् । अन्यथा
नैपनिषदेन आचार्येण
तद्भाषारूपगद्यपद्याक्षरैः
ति इत्याह-विजितेति ।
नस्तुरगं यन्तुं नियमयितुं
भूताः । व्यसनशतान्विताः
तो वायुश्च यैस्ते उपायेषु
गवद्भजनसुखानुभूतौ तु
गच्छेत्समित्पाणिः श्रोत्रियं
॥
तो याथात्म्येनावधार्य निर्वेदं
कश्चिदपि पदार्थः अकृतो
र्थं स ब्राह्मणः समित्पाणिः
त्वा सर्वाणि कर्माणि केवले
य' इति यदा तु आत्मनि
तिरन्येनैवागमाभिज्ञेनाचार्येण
तस्मात् गुरूपदेशप्रभावेण
श्रुतिः ।
: निरस्ताखिलसाधनश्रमः सन्

श्रीनिवाससूरिकृततत्त्वदीपिका

अथाचार्यसेवारहितानामुक्तभगवद्भजनालाभमाह-अजित इति । गुरोश्चरणं अपहाय अनाश्रित्य तद्विज्ञानार्थं —

'स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । आचार्यवान् पुरुषो वेद' इत्यादिश्रुत्युक्ताचार्यसमाश्रयणमकृत्वा शब्दार्थ उक्त आचार्यशब्दार्थस्तु —

'आचिनोति च शास्त्रार्थानाचारे स्थापयिष्यति । स्वयमाचरते यस्मात्तस्मादाचार्य उच्यते ॥'

इति अजितहृषीकवायुभिः । न जितानि हृषीकाणीन्द्रियाणि । वायुः प्राणश्च । यैस्ते । तैरदान्तं दुर्दमत्वसाम्यान्मन एव स्तमिह संसारे । यन्तुं नियमयितुं यतन्ति यतन्ते । कीदृशम् । अतिलोलं चञ्चलम् । तदुक्तं गीतायाम् —

'चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।' इति । हे अज ! ते व्यसनशतान्विताः पदिष्टबाह्येन्द्रियनियमनोपायभूतशमादिसम्पदभावादनेकव्यसनैराकुलाः तन्नियमने असमर्थाः । केवलमुपायखिदः तरक्लेशभाजः सन्तः । इह संसारे एव सन्ति तिष्ठन्ति । के इव । जलधौ अकृतकर्णधरा अलब्धकर्णधारा वणिजः । कर्णधारं ना स्वयमेव समुद्रपारं न लभन्ते तथा आचार्यसमाश्रयणं विना संसारसमुद्रपाररूपं मोक्षं न लभन्त इत्यर्थः । तथा चोक्तं भगवता कादशे —

'नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् । मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत्स आत्महा ॥'

इति । विजितहृषीकवायुभिरित्यपि पाठस्तत्र ईदृशैरपीन्द्रियादिभिरित्यर्थः ॥३३॥

कृष्णप्रिया

प्राण इन्द्रियों को जीतने वाले योगी से जिसका दमन नहि हो सकता एसे अतिचंचल मनरूपी तुरंग के नियमन करने को जो गुरु के चरणको छोडकर अन्य साधनोमें क्लेश करते हुए यत्न करते है वे अनेक दुःखे से कुल होकर संसारमें ही डुब जाते है ॥३३॥

स्वजनसुतात्मदारधनधाममधरासुरथैस्त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे ।
इति सदजानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते[1] स्वनिरस्तभगे ॥३४॥

कर्दमक्षमा

नृणां, मध्ये, त्वां, श्रुतयः, पुंसः, सर्वरसे, आत्मनि, त्वयि, सति, स्वजनसुतात्मदारधनधामधरासुरथैः, किं, फलम्, इति, अजानतां, मिथुनतः, रतये, चरतां, स्वविहते, स्वनिरस्तभगे, इह, संसारे, कः, नु, सुखयति ॥३४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन' तथा 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' इत्याद्या वैराग्यमङ्गं विदधतीत्याह-स्वजनसुतेति । आत्मा देहः धाम गृहम् असुः स्वजनादिभिः किम् 'सर्वरसे सर्वे रसाः सुखानि विद्यन्ते यस्मिंस्तस्मिंस्त्वयि परमानन्दे एतस्यैवानन्दस्यान्यानि भूतानि नुपजीवन्ति' इति श्रुतेः । श्रयतस्त्वां सेवमानस्य पुंसः आत्मनि सति नृणां तुच्छैरेतैः किं क उपयोग इति सत् सत्यं र्यसुखमजानतामत एव मिथुनतः स्त्रिया मिथुनीभूय रतये मायासुखाय चरतां प्रवर्तमानानां कर्मणि षष्ठ्यौ अजानतश्चरतः

पिहिते-वीर. ।

पुरुषान् कोन्वर्थः सुखयत्यानन्दयति न कोऽपीत्यर्थः । इह संसारे कथम्भूते स्वविहते स्वत एव नश्वरे स्वनिरस्तभगे स्वत एव गतसारे पाठान्तरे तु कोन्वित्यस्यैव विशेषणद्वयम् अतस्त्वद्भजनमेवोचितमित्यर्थः ॥

भजतो हि भवान् साक्षात् परमानन्दचिद्घनः ।
आत्मैव किमतः कृत्यं तुच्छदारसुतादिभिः ॥२१॥ ॥३४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — इदानीं भक्तेरङ्गं वैराग्यमाहुः परीक्ष्येत्याद्याः श्रुतयः-यदेति । व्याख्यातापि पुनरत्र व्याख्यानं सुखबोधाय । अस्य विदुषो ज्ञानात्प्राक् ये कामा वासनारूपेण हृदि मनसि स्थितौ ते सर्वे यदा प्रमुच्यन्तेऽथानन्तरं मर्त्योऽमृतो भवति तदाऽत्रैव दीपनिर्वाणवत्सर्वबन्धनोपशमात् ब्रह्म समश्नुते ब्रह्मैव भवतीति । कामास्तु मनस्येव स्थिता न त्वात्मनि । तथा च श्रुतिः-

"कामः सङ्कल्पो विचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति ॥"

किं किं प्रयोजनं न किमपीत्यर्थः । "रसः स्यात्पारदे सुखे" इति धरणिः । परमानन्दत्वे पूर्णां श्रुतिमाह, यथा-

"स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोग्यैः सम्पन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दाः स एकः पितृलोक आनन्दोऽथ ये शतं पितृणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोकानामानन्दाः स एकः कर्मदेवानामानन्दोऽथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दोऽथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दोऽथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मण आनन्दोऽथैष एव परम आनन्द एषोऽस्य परमानन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥" इति ॥

आजानदेवा अधिकारिण इन्द्राद्याः । कर्मदेवाः कर्मणा देवभावं प्राणाः । मात्रा अंशः । स्पष्टमन्यत् । आत्मनि त्वयि अत एव ज्ञानाभावादेव पाठान्तरे स्वविहितः स्वनिरस्तभग इति पाठे यतोऽज्ञानां सुखाभावोऽतो हेतोः । इत्यर्थ इति-तव ज्ञानार्थं तव भजनमेव योग्यम् "अयुज्यमानया भक्त्या" इत्याद्युक्तेरिति भावः । स्वामिनाम्-भजत इति । हि यतो भजतो जनस्य साक्षादात्मैव भवान्भवति अतस्तुच्छैर्दारादिभिः किं कृत्यं न किमपि अवाप्तावाप्तव्यत्वात् ॥★॥

श्रीधरानुयायिनी — इदानीं भक्तौ वैराग्यमङ्गमाहुः-स्वजनेति । नृणां भारतखण्डवासिनां मनुष्याणांमध्ये श्रयतः अनेकजन्मसाधितपुण्यपुञ्जस्य कस्यापि विरलस्य गोप्यादेरिव यज्ञपत्न्यादेरिव वा त्वामनन्यभक्त्या सेवमानस्य सर्वरसे सर्वसुखस्वरूपे सर्वेषां सुखानां बिम्बभूते "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेरात्मनि जीवनिदाने च त्वयि सति सन्निहिते सति वा तुच्छैः स्वजनसुतशरीरप्राणपत्नीपतिधनधामादिभिश्चिन्तामणौ लब्धे काचादिभिरिव किमपि तु न किमपि प्रयोजनमिति यत्तत्सत्सत्यमेव अत एव स्वाम्यादिभिर्निरोधिता अपि श्रीरासलीलादिविलासार्थं गोप्यस्त्वद्दर्शनार्थं यज्ञपत्न्यो वा त्वामेवाभिययुः । किञ्चाजानतां चरतामिति कर्मणि षष्ठ्यौ । अजानतः प्रागुक्तमिदं सत्यतया ये न जानन्ति तान् स्वत एव नश्वरे गतसारे च इह देहादिसंसारे मिथ्याभूताय मिथुनीभूय कामसुखलेशलवाय कृतव्यर्थश्रमान् त्वद्दयां विना कोऽर्थः स्वजनादिः सुखयत्यपि तु न कोऽपि क्वचिच्चक्रवर्तिनामप्याधिव्याध्यादिना स्वजनसुतविरोधादिना वा सुखलेशादर्शनात् । यद्वा-भगवद्भजनमेव सदित्यजानतो दीक्षितविप्रादीन् मिथुनतो रतये स्वर्गादावुर्वश्यादिभिर्मिथुनीभूय रतये कामसुखाय चरतो यज्ञादिकर्म कुर्वतः स्वत एव नश्वरे गतसारे च इह ऐहिकविषयतुल्ये यज्ञादिफलीभूते स्वर्गादौ कः पदार्थः सुखयति अपि तु न कोऽपि स्वर्गादिपतीनामपीन्द्रादीनां विपत्सहस्रश्रवणात्तत्रापि तवानुग्रहं विना न किमपि सुखमतस्त्वद्भजनमेवोचितमित्याशयः ॥★॥

विश्वनाथी — अत एव वयमन्यासक्तिं निन्दामः किन्तु केवला भक्तिरेव कार्येति वदामः । नृणां श्रयतां मध्ये श्रयतः सेवमानस्य । त्वय्यात्मनि परमात्मनि प्राप्तव्ये । सति । स्वजनाः स्वीयसेवकजनाः । सुता गुणवन्तः पुत्रा । आत्मा सुन्दरं शरीरम् । दाराः सुन्दर्यः कामिन्यः । धनानि स्वर्णादिरत्नादिसम्पदः । धामानि दिव्या गृहा । धरा भूयसी पृथ्वी । असवः शारीरबलानि ।

रथास्तदुपलिक्षिता
प्रियं भवति ।" इति
नीलकण्ठी
तत्र 'अभ्या
खिलीक्रियते अभ्या
किमित्यन्वयः । आत्
"भगवन्नस्थि
कामोपभोगैः कामक्र
कामोपभोगैः ॥" इति
अथान्यत्राप्यु
"शरीरमिदं
विण्मूत्रपित्तकफमज्जा
कोशो जरठको
आत्मनि त्वां ध्यायतः प्र
"यथा कृताय
इत्यात्मविद्यायां
स्वजनादिभिः किमपि प्र
सुखाय चरतामितस्ततो धा
क्षयिष्णु यथेमे दंशमशका
"शोषणं महार्णवा
इति मैत्रायणीये
लोकानामसकृदावृत्तिश्रवणा
"महानदीषूर्मय इ
बद्धबन्धनस्थस्येवास्वातन्त्र्य
प्राम्यमाणम् । महोरगदष्टमि
कदलीगर्भ इवासारम् । नट इ
एवं बाह्यविषयसङ्
सुखयति न कोऽपीत्यर्थः । त
यदयमात्मा ।" इति ॥
अन्यत्रापि- "न व
सर्वं प्रियं भवत्यात्मनस्तु का
वा अरे दर्शनेन श्रवणेन मत्या

तदुपलिक्षिता हस्त्यश्वादयः । एतैः कामितैः किं फलमित्यर्थः । अन्यत्सर्वं स्वामिचरणोक्तिवत् । "आत्मनस्तु कामाय सर्वं भवति ।" इति ब्राह्मणमत्रानुसन्धेयम् (२१) ॥३४॥

नीलकण्ठी —

तत्र 'अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।' इति स्मृतेर्गुरुमनोजयाभ्यासवैराग्ये उपदिशति तत्र वैराग्येण विषयस्रोतः क्रियते अभ्यासेन कल्याणस्रोत उद्घाट्यते । तद्द्वयं क्रमेण द्वाभ्यामाह-स्वजनसुतेति । नृणां त्वयि सति स्वजनादिभिः त्यन्वयः । आत्मा देहः, स च द्विविधो विदितो मैत्रायणीये —

"भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिकाविण्मूत्रवातपित्तकफसङ्घाते दुर्गन्धे निःसारेऽस्मिञ्छरीरे किं पभोगैः कामक्रोधलोभमोहभयविषादेर्ष्येष्टवियोगानिष्टसम्प्रयोगक्षुत्पिपासाजरामृत्युरोगशोकाद्यैरभिहतेऽस्मिञ्छरीरे किं पभोगैः ॥" इति ।

अथान्यत्राप्युक्तम् —

"शरीरमिदं मैथुनादेवोद्भूतं संवृद्ध्युपेतं निरयेऽथ मूत्रद्वारेण निष्क्रान्तमस्थिभिश्चितं मासेनानुलिप्तं चर्मणावनद्धं मूत्रपित्तकफमज्जामेदोवसाभिरन्यैश्चामयैर्बहुभिः परिपूर्णं कोश इव सुनेति ॥" इति च ॥

कोशो जरठकोशातकी । सुना तन्तुजालेन । धाम गृहम् । असुः प्राणः । रथो गजादेरुपलक्षणम् । कीदृशे त्वयि श्रयत नि त्वां ध्यायतः प्रत्यग्भूते अत एव सर्वरसे "सद्वैतत्सुकृतम् । रसो वै सः । रसं ह्येवायं लब्ध्वानन्दीभवति ।" इति श्रुतेः ।

"यथा कृताय विजितायाधरे याः संयन्त्येवमेवैनं सर्वं तदभिसमैति यत्किञ्च । प्रजाः साधु कुर्वन्ति यस्तद्वेद ॥"

इत्यात्मविद्यायां सर्वसाधुक्रियाफलान्तर्भावश्रुतेश्च निरुपाधिप्रेमगोचरत्वाल्लिङ्गाच्च सर्वसुखस्वरूपे अत एव त्वयि लब्धे नादिभिः किमपि प्रयोजनं नास्ति । इत्येवंप्रकारेण सत्प्रत्यगात्मैव परं ब्रह्मेत्यजानतामत एव मिथुनतो विषयसम्बन्धेन रतये चरतामितस्ततो धावताम् । कर्मणि षष्ठ्यौ । तानिह संसारे को नु स्वजनादिष्वन्यतमः स्वविहिते स्वतो नश्वरे "सर्वं चेदं णु यथेमे दंशमशकादयः" इत्युपक्रम्य —

"शोषणं महार्णवानां शिखरिणां प्रपतनं ध्रुवस्य प्रचलनं व्रश्चनं वातरज्जूनां निमज्जनं पृथिव्याः स्थानादपसरणं सुराणाम् ॥"

इति मैत्रायणीये सर्वस्य क्षयिष्णुत्वोपपादनात् "आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन" इति ब्रह्मलोकसहितानां नामसकृदावृत्तिश्रवणाच्च । स्वनिरस्तभगे निरस्तैश्वर्ये । एतदपि । तत्रैव श्रूयते —

"महानदीषूर्मय इवानिवर्कस्य यत्पुरा कृतं समुद्रवेलेव दुर्निवार्यमस्य मृत्योरागमनं सदसत्फलमयैः पाशैः । पङ्गुमिव न्धनस्थस्येवास्वातन्त्र्यम् । यमविषयस्वरूपस्येव बहुभयावस्थम् । मदिरोन्मत्त इव मोहमदिरोन्मत्तम् । पाप्मना गृहीत इव माणम् । महोरगदष्टमिव विषयाविष्ट । महान्धकारमिव रागान्धमिन्द्रजालमिव मायामयम् । स्वप्न इव मिथ्यादर्शनम् । र्भ इवासारम् । नट इव क्षणवेषम् । चित्तभित्तिरिव मिथ्यामनोरमम् ॥" इति ॥

एवं बाह्यविषयसङ्गेन सुखप्रेप्सून्नरापसदानिह संसारे स्वविहिते स्वनिरस्तभगे च स्वजनादिष्वन्यतमः को नु न कोऽपीत्यर्थः । तस्मादात्मैव सर्वरस इत्यन्वेष्टव्यः । तथा च श्रुतिः- "तदेतत्प्रेयः पुत्रात्प्रेयोऽन्यस्मात्सर्वस्मादनन्तरतरं त्मा ।" इति ॥

अन्यत्रापि- "न वा अरे पत्युः कामाय पतिः प्रियो भवति ।" इत्युपक्रम्य "न वा अरे सर्वस्य कामाय भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो नेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् ॥" इति (२१) ॥३४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अत एव वयमन्यासक्तिं निन्दाम इत्यपरा आहुः-स्वजनेति। श्रयतो भजत आत्मनि सर्वेषां परमस्वरूपत्वेनावगतत्वान्निरुपाधि परमप्रेष्ठत्वेन स्फुरतीत्यर्थः। न केवलं सामान्यतस्तादृशी स्फूर्तिः किन्तु विशेषतः सर्वे प्रेममया रसाः शान्तादयो यस्मात् तस्मिन् मिथुनत इति ल्यब्लोपे पञ्चम्या मिथुनीभूयेत्येवार्थः। अन्यत्तैः। श्रुतयस्तु अमृतत्वस्य तु नाशास्ति वित्तेनेत्यारभ्य न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवतीत्युपक्रम्य न वा अरे सर्वस्य कामाय सर्वं प्रियं भवतीत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेदं ब्रह्म तं परादाद्योन्य आत्मनो ब्रह्म वेद। क्षेत्रं तं परादित्याद्याः। तदेवं साधारणात्मनो निरुपाधिप्रियत्वेन परमात्मैव परमनिरुपाधिप्रिय एव स एव द्रष्टव्य इति श्रुतिवाक्यार्थः। सर्वविज्ञानस्य सर्वप्रतिज्ञास्यमानत्वात्

कृष्णमेनमवेहि त्वमात्मानमखिलात्मनामिति शुकोक्तेश्च ॥२१॥३४॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

स्वजना बान्धवाः। यद्वा, स्वा ज्ञातयो जना भृत्याः। सुता अपत्यानि। दाराः कलत्रम्। केवलं ते त्वदवेक्षणप्रयासमात्रमित्यर्थः। रथ इत्युपलक्षणं वाहनादिभविभूतीनाम्, श्रयतो जनस्य, सर्वरसे सर्वसुखरूपे किंवा सर्वे रसाः सान्द्रपरमानन्दा यस्मात्तस्मिंस्त्वयि सति। एतैः स्वजनादिभिः किं को न्वर्थः ? अपि तु न कोऽपीत्यर्थः। तत्र हेतुः-स्वेत्यादिपदद्वयम्। अनेन नश्वरतया शोकावहत्वं वर्तमानेऽप्यतितुच्छतया तत्त्वतः सुखराहित्यं चोक्तम्। सप्तम्यन्तपाठेऽपि स एवार्थः। अन्यत्तैर्व्याख्यातम्। तत्र चार्थो वस्त्वित्यर्थः। यद्वा, ननु कथं व्यसनशतान्विताः सन्तीत्युच्यते ? स्वस्ववैभवैरेव नृणां सुखित्वमननेन व्यसनित्वाभावादित्यत आहुः-स्वजनेति। आत्मा यत्नः (श)परीरादिपालनप्रयत्नः, सुरथः शोभनरथः, नृणामात्मनि सर्वजीवानामन्तर्य्यामिरूपे। यद्वा, नृणां सदजनितामित्युत्तरेणान्वयः। इत्येतत् सत् तत्त्वम्, मिथुनतो मिथुनभावात्, रतये स्त्रीसम्भोगाय। अर्थः पदार्थः ॥३४॥

[व्रजवासिनां गुणवर्णने तावदतृप्त्या पुनरपि तेषामेव भावमाहुः-स्वजनेति। त्वय्यात्मनि प्रिये। यद्वा, आत्मनि स्वविषये व्रजवासिजनविषय इत्यर्थः। सर्व्वरसे सम्पूर्णपरमानन्दरूपे सति विराजमाने नृणां व्रजवासिनां स्वजनसुतात्मदारधनधामेति द्वन्द्वैकत्वम्। किं श्रयते ? किं करोतीत्यर्थः। अपि तु न किञ्चिदपि। कथम्भूतम् ? धराश्च गिरयो गोष्ठाश्रया नन्दीश्वरादयः, असवश्च प्राणाः, रथाश्च श्रेष्ठशकटानि, तैर्विशिष्टम्। एषामात्मार्थमेतैः कृत्यं नास्ति, किन्तु भवदर्थमेव तत् सर्वमिति भावः। तथा ब्रह्मणाऽप्युक्तम् (भा० १०/१४/३५) —

"यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते।" इति।

इति एवंविधं त्वद्व्रजनं सत् सत्यमजानतो जनान् को न्वर्थः सुखयति, त्वद्व्रजनमन्तरेणान्यत् किमपि सुखं नास्ति,-विषयसुखस्य प्रान्तविरसत्वान्नश्वरत्वाच्चेत्यर्थः ॥३४॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भगवत्प्रवणानां सुखान्तरनैरपेक्ष्यं भगवद्विमुखानां सुखदुर्लभत्वं चाह-स्वजनेति। धाम गृहम्। धरा भूमिः। सर्वरसे सर्वविधसुगमे सदजानताम् अर्थतत्त्वमजानतां स्वपिहिते प्रकृतिसम्बन्धेन तिरोहिते। अत एव निरस्तभगे ज्ञानैश्वर्यादिहीने स्वरूपे सति इह संसारेऽसुखरूपे सति कः सुखयतीत्यन्वयः। नश्वरे स्वपिहिते इति पाठे नन्वात्मा चिदानन्दरूपः तर्हि विषयासङ्गेऽपि किं तथा न प्रतीयते। तत्राह-स्वपिहिते अज्ञानेनावृते। अत एव सुनिरस्तभगे सुष्ठु। निरस्तो भगो आनन्दस्वरूपो यस्य तस्मिन्। अतस्त्वद्व्रजनमेवोचितमित्यर्थः ॥३४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ननु मयि भृशं भावं विदधतु ततः किमित्यपेक्षायां निरतिशयानन्दजलधिमग्नानां वैषयिकसुखान्तरनैरपेक्ष्यमितरेषां तु सुखं श्रपयःपानतुल्यमित्यभिप्रेत्याहुः–स्वजनेति। सर्वरसे सर्वविधसुखमये आत्मनि च त्वयि —

'सरो वै सः रस ७ह्येवायं लब्ध्वानन्दी भवति। को ह्येवान्यात्कः प्राण्याद्यदेषआकाश आनन्दो न स्यात्' ॥

इत्युक्तरीत्या निरतिशयसुखस्वरूपे तदावहे च प्रयतमे त्वयि सति विद्यमाने नृणां श्रयतः नृणां मध्ये कस्यचिदुक्तविधं त्वां पुंसः स्वजनादिभिः किम् ? न किञ्चिदपि सुखम् इत्यर्थः। आत्मा देहः धाम गृहं धरा भूमिः असुः प्राणः रथशब्दो पलक्षकः। इतीत्थं सत् निरतिशयपुरुषार्थभूतत्वत्स्वरूपमजानतामत रतये रतिसुखार्थं मिथुनतश्चरतां मिथुनीभूय वर्तमानानां हिते स्वप्रकृतिसम्बन्धतिरोहितेऽत एव स्वनिरस्तभगे स्वसाधारणो निरस्तो भगः ज्ञानैश्वर्यादिः यस्य तस्मिन् स्वरूपे सतीहलोके अर्थकामेषु सुखयति। अर्थकामान्यतरो न कोऽपि सुखयतीत्यर्थः। स्वविहतिस्वनिरस्तभगे इति पाठान्तरं तदा स्वविहतिः त्म्यानुभवविघातस्तेन स्वनिरस्तस्वाभाविकज्ञानैश्वर्यस्वस्वरूपे सतीत्यर्थः ॥३४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

"इति सदजानतां मिथुनतो रतये चरतां सुखयति कोन्विहाद्य विजने स्वनिरस्तभगे। भुवि पुण्यतीर्थसदना ह्यृषयो शान्यतस्त्वानुभवतः पदाम्बुजं हृदाघभिदं दधति। सकृन्मनस्त्वयि चिदात्मनि नित्यसुखे न पुनरुपासतं सारहरावसथम् ॥३६॥२२॥"

ब्रह्म ज्ञात्वेति लोकप्रवृत्तिप्रवर्ततां को नु मोक्षं ददाति। अतो ब्रह्मोपासते। साधुधीरा नाहम्भावस्तेषु रुद्राधिवासः। इति श्रुतेः।

"महाभाग्यं तु कैवल्यमज्ञानां कः प्रदास्यति। अतः सन्तो विजानन्ति हरिं ते त्वनहङ्कृताः ॥"

इति स्मृत्यर्थसङ्ग्राहिण्या अर्थरूपस्य इति सदजानतामित्यस्य श्लोकस्यायमर्थः।

इतिशब्दप्रकारवचनः इति लोके दृश्यमानप्रकारेण सद्ब्रह्म अजानतां ब्रह्मज्ञानिनां मिथुनतः स्त्रीपुंसभावेन रतये र्माय चरतां प्रवर्तमानानां को नु पुरुषः अद्य इह विजने मोक्षविषये सुखयति। न कोऽपि मोक्षं ददातीत्यर्थः। विजने स्वनिरस्तभगे सुष्ठु अनिरस्तः भग ऐश्वर्यादिगुणो यस्मिन् स तथा तस्मिन्। यतस्त्वदज्ञानिनां परमानन्दलक्षणमोक्षभावः भुवि स्थाने पुण्यं शुद्धिकरं तीर्थं शास्त्रमेव सदनं शरणं येषां ते तथा ते ऋषयो देवादयः त्वामेव सन्तं ज्ञात्वा भवतः हृदा निविशन्ति। कीदृशम्। अघभिदं पापनाशनम्। किञ्च। मनोमननसमर्थमन्तःकरणं नित्यसुखे चिदात्मनि यति च। अत्र प्रधानसाधनमाहुः। हे पुरुषसार ! पुरुषोत्तम ! पुनश्च पश्चात् हरस्य रुद्रस्यावसथम् अहङ्कारं सकृदपि न कुर्वन्ति इत्यर्थः ॥२२॥३६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अत एव वयमप्यन्यासक्तिं निन्दाम इत्यपरा आहुः। स्वजनेति ॥३४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

पदेशो हि संसारे वैराग्यं जनयित्वा त्वयि भावमुत्पादयतीत्याहुः–स्वजनसुतेत्यादि। श्रयतः सेवमानस्य जनस्य सुहृदि सर्वरसे सर्वसुखस्वरूपे त्वयि सति नृणां स्वजनादिभिः किं न किमपीत्यर्थः। त्वयि सति नित्य इति वा अनित्याः इति हि सत्यमेव तदेतदजानताम् एतत्सत्यत्वेनाज्ञात्वा मिथुनतो मिथुनीभूय रतये चरतां इह लोके को नु सुखं करोति न कोऽपीत्यर्थः। ये तु सत्यमिति ज्ञात्वा त्वां भजन्ते तान् सर्वं सुखयतीत्यर्थः। इह किम्भूते। स्वविहते स्वेनैव निरस्तभगे प्रथमान्तपाठे क इत्यस्य विशेषणम् ॥३४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

गुरोरुपदेशो हि प्रथमं वैराग्यमेव जनयति तच्च भगवद्भक्तेरपि परिपोषकमित्याहुः- स्वजनेत्यादि । श्रयतो भजतो भक्तजनस्य आत्मनि आत्मस्वरूपे त्वयि सति नृणां स्वजनादिभिर्न किमपि प्रयोजनमिति भावः । कीदृशे ? सर्वसरे सर्वे रसाः सुखानि यत्र, एकत्र चेत् सर्वाणि सुखानि लभ्यन्ते, तदा किं पृथक् पृथगन्वेष्टव्यानि, वस्तुतस्तु तानि सुखान्येव न भवन्ति सुखाभासान्येव, तेन किं तैरिति सत् सत्यमजानतां मिथुनतो मिथुनीभूय रतये चरतां जनानामिह संसारे को नु सुखयति ? न कोऽपीत्यर्थः । कर्मणि षष्ठी । ये तु सदिति जानन्ति, तान् सुखयत्येव । इह किम्भूते ? स्वविहते स्वयमेव विहते स्वनिरस्तभगे स्वयमेव निरस्तभगे । प्रथमान्तपाठे को न्विहेत्यत्र विशेषणद्वयम् ॥३४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदेवं योगाद्यमिश्रा केवलैव भक्तिर्वैष्णवानामित्युक्तम् । इदानीं सा खलु कामनान्तररहितैव भवितुर्महतीत्युपपादयति-स्वजनेति । नृणां मध्ये श्रयतस्त्वां सेवमानस्य जनस्य त्वयि सति आत्मनि परमात्मनि त्वय्यवश्यप्राप्तये सति स्वजनादिभिः किं स्वजनाः स्वकीयसेवकजनाः । सुता गुणवन्तः पुत्राः । आत्मा सुन्दरं शरीरम् । दाराः सुन्दर्य्यः कामिन्यः । धनानि स्वर्णरत्नादिसम्पदः । धामानि दिव्यदिव्या गृहाः । धरा भूयसी पृथ्वी । असवः शरीरबलानि । रथास्तदुपलक्षिता हस्त्यश्वादयः । एतैः कामितैः किं फलमित्यर्थः । त्वयि कीदृशे । सर्वे रसाः आनन्दा यत्र तस्मिन् एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः इति सत् सत्यं परमार्थसुखमजानताम् अत एव मिथुनतः मिथुनीभूय रतये रत्यर्थं चरतां जनानाम् इह संसारे को नु अर्थः । स्वजनादिकः सुखयति सुखदायको भवतीत्यर्थः । ननु कथमर्थस्य सुखदत्वाभावस्तत्राह-स्वविहतः स्वत स्वत एव विहतः कालग्रस्तत्वान्नश्वर इत्यर्थः । तथा स्वनिरस्तभगः उत्पत्तिसमयमारभ्यैव स्वत एव माहात्म्यरहितः "भगं श्रीज्ञानमाहात्म्यवीर्ययत्नार्ककीर्तिषु ।" इत्यमरः । परिणामदर्शिभिः साधुभिर्विगीतत्वादिति भावः । स्वविहते स्वनिरस्तभगे इति सप्तम्यन्तपाठे इहेत्यस्य विशेषणद्वयम् । अत्र श्रुतयः —

"भक्तिरस्य भजनं तदिहामुत्र उपाधिनैराश्येनामुष्मिन्मनःकल्पनमेतदेव नैष्कर्म्यमि"त्याद्या उपाधिः सकामत्वम् ॥३४॥

गूढार्थदीपिनी

गुरूपदेशो हि संसारे वैराग्यं जनयित्वा त्वयि भावम् उत्पादयति, तच्च वैराग्यं भक्तेरङ्गमित्याहुः श्रुतयः स्वजनेति ॥

(वैराग्यबोधनपरेयम्)

पद्यानुवादः

तव पदं श्रयतो हृदयं गते भवति किं फलमस्य धनादिभिः ।

विषयिणः किमु वस्त्विह तेषयेदसदजासदजानदनात्मनः ★॥२१॥

★ [अससी या अजा माया तया सत् परमार्थसुखम् अजानन्तो ये अनात्मनो देहाभिमानिनो जीवास्तान् विषयिणः इह जगति किमु वस्तु तोषयेत् किमपीत्यन्वयः ।]

सङ्क्षिप्तसार्थान्वयः — हे भगवन् ! श्रयतः त्वामाश्रयतः पुंसः त्वयि आत्मनि परमात्मनि सति हृदि स्फुरिते सति नृणामेतैः तुच्छैः स्वजनादिभिः किं फलं किं प्रयोजनम् ? न किमपि । इति सत् त्वन्नित्यसुखमजानतां मिथुनतो [ल्यब्लोपे पञ्चमी ।] मिथुनीभूय रतये रत्यर्थं चरताम् अजानतः चरतः पुरुषान् इह संसारे स्वजनादिषु मध्ये को नु अर्थः विषमः सुखयति ? न कोऽपि । कथम्भूते इह संसारे ? स्वविहते स्वत एव नश्वरे । पुनः । स्वनिरस्तभगे गतसारे च ॥

हे भगवन् ! त्वां श्रयतः आश्रयतः सेवमानस्य पुंसः त्वयि आत्मनि परमात्मनिश्रीकृष्णे सति हृदि स्फुरिते सति नृणां तुच्छैरेतैः स्वजनादिभिः किं प्रयोजनम् ? न किमपीत्यर्थः । कथम्भूते त्वयि ? सर्वरसे सर्वे रसाः सुखानि विद्यन्ते यस्मिन् तस्मिन्

सर्वसुखनिधाने । इति
मिथुनीभूय रतये विष
संसारे स्वजनादिषु म
इत्यर्थः । कथम्भूते
इति श्रुतेः । पुनश्च । स
प्रथमान्तपाठे तु कोऽ
स्वजनाः बन्धुमित्रादय
असवः प्राणाः । रथश
श्रयतः इत्यन्वयमाहुः ।

नु इति सभ्रूभ
रोगग्रस्तश्च । येषां विषय
व्यञ्जिता । एतेन ज्ञाना
विश्वासाभावश्च पूर्वं स्फुर
विलम्ब इत्यालोडयतां भ
"यो यच्छ्रद्धः स एव सः
ध्वनितः ॥२१॥३५॥

गुरूपसृतौ वैराग्य
"परीक्ष्यलोकान्क
'अथ मर्त्योऽमृतो
भगवति पुरुषार्थचतुष्टय
अपरिच्छिन्नपरमानन्दे —
'रसो वै सः । रसं
इत्यादिश्रुतेः । चिन्त
सर्वज्ञं सद्रूपं त्वामजानताम्
कर्मणि षष्ठ्यौ । अजानत
प्रथमे श्रीनारदेन — 'को वा
जडत्वादिना निरस्तसारः ॥३४

एवं भजने प्रकारान्त
स्वजनानां प्रयोजनमावश्यकं
ज्ञानोत्तरमेव वैराग्यम् । स पक्ष
निराकुर्वन्ति । यथाकथञ्चिल्लोक
। स्वजनानामिह लोके उप

सुखनिधाने। इति इत्थं सत् त्वत्सम्बन्धि नित्यसुखम्। यद्वा। सत् परमार्थस्वरूपं त्वामजानताम् अत एव मिथुनतः स्त्रिया सह भूय रतये विषयोपभोगाय गृहे चरतां वर्तमानानां नृणामत्रापि योज्यम्। उभयत्र कर्मणि षष्ठ्यौ। अजानतः चरतः नॄन् इह स्वजनादिषु मध्ये अन्यतमः को नु अर्थः सुखयति आनन्दयति ? न कोऽपीत्यन्वयः। तस्मादात्मैव सर्वरस इत्यन्वेष्टव्या। कथम्भूते संसारे ? स्वविहते स्वत एव विहते कालग्रस्तत्वान्नश्वरे। "सर्वं चेदं क्षयिष्णु यथेमे दंशमशकादयः" तेः। पुनश्च। स्वनिरस्तभगे गतसारे च। यद्वा स्वेन निरस्तं भगमैश्वर्यादि यस्मात् तथाभूते। स्वविहतः स्वनिरस्तभग इति पाठे तु कोऽर्थ इत्यस्य विशेषणद्वयम्। स्वेनैव परिणामादिमत्त्वेन विहतः। स्वरूपेणैव जडत्वादिना निरस्तसारश्च। बन्धुमित्रादयः। सुताः पुत्राः पुत्र्यश्च। आत्मा देहः। दारा भार्या। धनं स्वर्णरत्नादिसम्पत्। धाम गृहम्। धरा पृथ्वी। प्राणाः। रथशब्दो वाहनोपलक्षकः हस्त्यश्वादिश्च तैः। चक्रवर्ती तु असवः शारीरबलानीत्याह। केचित्तु नृणां मध्ये त्वां इत्यन्वयमाहुः। मिथुनत इति ल्यब्लोपे पञ्चमी।

नु इति सभ्रूभङ्गे। रे मूढाः ! एतद्विचारयत यस्मिन् संसारे सोऽपि कालग्रस्तत्वान्नश्वरः येन देहादिना सोऽपि जडत्वान्नश्वरो। येषां विषयाणामुपभोगस्तेऽप्यापातरमणीयत्वेन परिणामविरसाश्चेत्यतोऽत्र केन कस्य भोगः ? इति भ्रूभङ्गेन भर्त्सना। एतेन ज्ञानादिप्रयासं विहाय त्वद्भजनमेव मुख्यतयोचितं तत्र च प्रथमं भक्तानां झटिति फलाभावेन व्यग्रता तत्र भावश्च पूर्वं स्फुरति तेषामाश्वासनं भगवत्या श्रुत्या क्रियते त्वयि सतीति। भगवान् सन्निहित एव धैर्यं मा त्यजत परीक्षणार्थमेवैष इत्यालोडयतां भक्तानामुपर्याशु भगवत्कृपाशक्तिः आविर्भवति, तया च भक्तेर्दार्ढ्ये ततो भगवद्रसानुभूतिः स्वस्वमतानुसारेणेति यच्छ्रद्धः स एव सः" इति गीतोक्तेः सर्वाचार्यमतानां सामञ्जस्यान्न पारस्परिकविरोधलेशोऽपीति सङ्क्षिप्य भागवतसिद्धान्तो ॥२१॥३५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गुरूपसृतौ वैराग्यस्य कारणत्वात्तदेव विदधति।

"परीक्ष्यलोकान्कर्मचितान् ब्राह्मणो निर्वेदमायात्। नास्त्यकृतः कृतेन। सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः॥"

'अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।' इत्याद्याः श्रुतयः। नृणां मध्ये त्वां श्रयतः पुंसः त्वय्यात्मन्यन्तर्यामिणि पुरुषार्थचतुष्टयदातरि विद्यमाने सति स्वजनादिभिः किं कार्य्यम्; न किमपीत्यर्थः। कथम्भूते। सर्वरसे च्छिन्नपरमानन्दे —

'रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति। एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति।'

इत्यादिश्रुतेः। चिन्तामणिभूषितानां काचादिभिर्न किञ्चित् प्रयोजनम्। यथा तद्वत्। इति सदजानताम् एवम्भूतपरमानन्दस्वरूपं सद्रूपं त्वामजानताम्। अत एव मिथुनतो रतये चरताम्। स्त्रिया मिथुनीभूय ग्राम्यसुखायेन्द्रियप्रीतये चरताम्। षष्ठ्यौ। अजानतश्चरतो जनान् कोऽर्थः सुखयति आनन्दयति। इह भजनहीने वर्णाश्रमधर्मे। तथा चोक्तं श्रीनारदेन — 'को वार्थ आप्तोऽभजतां स्वधर्मतः।' अर्थस्य विशेषणद्वयम्। स्वेनैव परिणामादिवत्त्वेन विहतः स्वरूपेणैव दिना निरस्तसारः ॥३४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भजने प्रकारान्तरं निराकृत्य वैराग्यमोहापगमाभावे भक्तिर्न सेत्स्यतीति वैराग्यमुपदिशन्त्य आहुः-स्वजनसुतात्मेति। प्रयोजनमावश्यकं तदर्थं स्वजनानामपेक्षा कर्तव्यैव। अपेक्षापरित्यागस्तु स्वात्मस्थितिव्यतिरेकेण न भवति। अतो वैराग्यम्। स पक्षः प्रकृते नोपपद्यते। अतः प्रयोजनमङ्गीकृत्यैव साधनान्तरेण तत्सेत्स्यतीति पूर्वसिद्धसाधनान्येव। यथाकथञ्चिल्लोकसिद्धसाधननिवृत्तौ प्रयोजनं भगवता क्रियमाणमलौकिकमेव भवतीति मुख्यतुल्यमेवैतदपि वैराग्यम् नामिह लोके उपयोगः ऐहिकप्रतिष्ठादिस्तैरेव सिद्ध्यतीति सुतस्य परलोकोपयोगः। आत्मनो देहस्य

तु परलोकफलसाधककर्मकरणार्थमैहिकभोगार्थं चोपयोगः । दाराणां बाधककामनिवृत्त्यर्थं सुखार्थं ततो धनधामधराः धनगृहभूमयः मुख्यस्थितिनिर्वाहकाः । एत एव असवः प्राणभूताः । एतद्विघाते प्राणांस्त्यजन्तीति 'अश्वरथैः' इति वा पाठः । गतिसाधनान्येतानि सुखकरणानि । अष्टविधान्येतानि यावन्तमुपकारं करिष्यन्ति स सर्वोऽप्युपकारः कोटिगुणितो भगवता क्रियते । यदि सुखमेवापेक्ष्यते तदा स्वयमेव सुखं प्रयच्छति । यदि साधनपुरःसरमपेक्ष्यते तदा ह्यलौकिककानि साधनान्यपि प्रयच्छतीति भावः । नृणामिति काममयत्वं विवेकवत्त्वं च प्रतिपादितम् । ननु कदाचिद्भगवान् न कुर्यात्तदा का गतिरिति चेत्तत्राह-श्रयत आत्मनीति । यस्त्वाश्रयते तस्यात्मत्वेनैव प्रकाशते, यथा स्वस्य हितं स्वयं करोति तथा भगवानपि करोतीत्यर्थः । ननु विषयांश्चेद्भगवान् दद्यात् तदोपस्थितपरित्यागे किं कारणमिति चेत्तत्राह-सर्वरस इति । सर्वे रसाः कीर्त्यादयो भगवत्येव भवन्ति । एते च रसाः प्रकटा एव, न तु भधुनीवाव्यक्ताः । ननु किमत्र युक्तं भगवति विद्यमाना रसाः किं भोक्तव्याः स्वसिद्धा वेति । अत्रावश्यकत्वाल्लाघवात् भार्यादिभिः सहैव भगवद्भजनं कर्तव्यं न तु सर्वपरित्यागेनेति चेत्तत्राह-इति सदजानतामिति । अत्र पूर्वोक्तौ न भगवान् स्वजनाश्च समतया निरूपिताः किं त्वेते दुःखदाः भ्रमादेव सुखाभाससम्पादकाः, भगवांस्तु निर्दोषानन्दसम्पादक इति । एवं वैलक्षण्ये ज्ञाते सन्देह एव नोत्पद्यते । अतो वैलक्षण्यज्ञानार्थं सुतादीनां स्वरूपं निरूपयन्ति । इत्येवं प्रकारेण सत्परमार्थतत्त्वं ये न जानन्ति स्वजनादेर्भगवतश्च तारतम्यम्, रतये च मिथुनतश्चरन्ति ग्राम्यसुखाय सर्वत्र मिथुनीभूय चरन्ति । यथा स्वोपवेशनार्थं कश्चित् स्थूलं मञ्चकं नयति पथिकस्तथायं निमिषार्धमात्ररत्यर्थं सर्वथा शृङ्खलाबद्धा इव तया सह चरन्ति । एवमतिक्लिष्टानां को वा अर्थः सुखयेत् ? । न ह्यत्यन्तपीडितविषयाः सुखयन्ति । स्वजनानां तु सुखजनितवार्तापि दूरे । साधनान्तरेणापि भगवतापि तेषां सुखं न भवतीत्यर्थः । नु इति वितर्के । अस्माभिः सर्वमन्विष्टं तादृशस्य कापि न सुखदातोपलब्धः । किञ्च कश्चित्सुखं दास्यतीति शङ्का न कर्तव्या, यतोऽस्मिन् जगति स्वत एव विहते पतितगृह इव विशीर्णे तत्रापि निरस्तभगे उत्कृष्टपदार्थरहिते शून्ये अमेध्यादियुक्त इव को वा सुखदातापि तादृशे स्थाने सुखं ददातीत्यर्थः । अत्र परित्यागावस्था अधिकरणत्वेन विवक्षिता, जगत्पक्षेऽपि भगवत्सेवकः । अत्र क्वचिदपि सेवमानो वैकुण्ठे एव सेवते, न तु जगतीति ज्ञातव्यम् ।

"पुत्रादीन् सम्परित्यज्य कृष्णः सेव्यो न तैः सह ॥ तत्सुखं भगवान् दाता ते तु क्लिष्टेतिदुःखदाः ॥" ॥२१॥३४॥

श्रीसुबोधिनीसारः

स्वजनो मित्रादिः सुतः पुत्र आत्मा देहो दारा स्त्रियः धनं प्रसिद्धं धाम गेहं धरा भूः असुः प्राणो रथो वाहनादिः तैः श्रयतः त्वां सेवमानस्य पुंसः सर्वे रसाः सुखानि विद्यन्ते यस्मिंस्तस्मिन् परमानन्दे त्वयि आत्मनि सति किं क उपयोगः इत्येवं सत्यसत्यमजानतां मिथुनतो मिथुनीभूय रतये मायासुखाय चरतां प्रवर्तमानानां पुंसाम् । कर्मणि षष्ठ्यः । को नु अर्थ आनन्दयति । न कोऽपि । स्वत एव विहते नश्वरे स्वत एव गतसारे इह संसारे ॥२१॥३४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु सर्वथा भगवत्येव मनसो भावविधाने स्वजनादिसुखं न स्यात्, इत्याशङ्क्याहुः-स्वजनेति । त्वयि श्रयतः त्वां सेवमानस्य पुंसः स्वजनादिभिः किं क उपयोगः ? न किमपीत्यर्थः । आत्मा देहः, धाम गृहम्, धरा भूमिः, असवः प्राणः इन्द्रियाणि च, रथा इत्युपलक्षणमन्येषामपि सुखसामग्रीतया प्रसिद्धानाम् । कुतो नान्यैरुपयोग, इत्यपेक्षायाम्, "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीजीवन्ति" इति श्रुतेः । परमानन्दरूपत्वत्सेवयैव पूर्णानन्दत्वात् इत्याशयेनाहुः-सर्वरस इति । सर्वे रसाः सुखानि विद्यन्ते यस्मिंस्तस्मिन्नित्यर्थः । न हि परमार्थसद्रूपं त्वां सेवमानस्य नश्वरैः स्वजनादिभिः कश्चिदुपयोगः सम्भवति, इत्याशयेनाहुः-सतीति । आत्मत्वात्त्वत्सेवापि सुकरा, इत्याशयेनाहुः-आत्मनीति । इत्येवं सत् परमार्थसत्यं सुखरूपं त्वामजानतः अत एव मिथुनतः स्त्रिया मिथुनीभूय रतये रतिसुखाय चरतो गृहेषु वर्तमानान् नॄन् इह संसारे को नु स्वजनाद्यर्थः सुखयति आनन्दयति ? न कोऽपीत्यर्थः । तत्र हेतुमाहुः-स्वविहत इति, स्वत एव नश्वर इत्यर्थः । स्वनिरस्तभग इति, स्वत एव निरस्तो ज्ञानैश्वर्यादिभगो यस्य स इत्यर्थः । सप्तम्यन्तपाठे तु संसारविशेषणम् । अतः स्वजनादीनुपेक्ष्य त्वद्भजनमेवोचितमित्याशयः ॥३४॥२१॥

अन्वितार्थप्रकाशिका

वैराग्यमात्मज्ञानभक्त्योरङ्गं श्रुतयो विदधति-स्वजनेति ॥ नृणां मध्ये त्वां श्रुतयः पुंसः सर्वरसे आत्मनि त्वयि सति जनसुतात्मदारधनधामधरासुरथैः किं फलम् इति सत् अजानतां मिथुनतो रतये चरतां स्वविहते स्वनिरस्तभगे इह संसारे को नु खयति न कोऽपीत्यन्वयः ।

नृणां मध्ये त्वां श्रयतः पुंसः सर्वे रसाः सुखानि यत्र तादृशे आत्मनि त्वयि स्फुरति सति स्वजनादिभिः किं फलं न मपि । आत्मा देहः धाम गृहं

धरा भूमिः असवः प्राणा इन्द्रियाणि च रथा इत्युपलक्षणमन्येषामपि सुखसामग्रीतया प्रसिद्धानाम् इत्येवं सत् परमार्थ सुखरूपं त्वामजानताम् अजानतः अत एव मिथुनतः स्त्रियं मिथुनीकृत्य । ल्यब्लोपे पञ्चमी । रतये रतिसुखाय चरतां गृहेषु मानान् । कर्मणि षष्ठ्यौ । स्वविहते स्वत एव नाशशीले स्वत एव निरस्तं भगमैश्वर्यादि यस्य तस्मिन्निह संसारे । प्रथमान्तपाठे विशेषणं को नु स्वजनसुतादिरर्थः सुखयति न कोऽपीति । तथा च श्रुतिः —

"परीक्ष्य लोकान्कर्मचितान् ब्रह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन" इत्यादि ॥३४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गुरुसेवनेन भगवद्भक्तिं प्राप्तानां विवेकवतां भगवत्येव सुखं नान्यत्र । विषयभोगासक्तैरविवेकिभिश्च प्राकृता जनाः पदार्थाश्च खकरा मता अपि दुःखदा भवन्तीत्यूचुः ॥ स्वजनेति ॥ नृणां जीवानां मध्ये श्रयतः द्विविधं गुरुमाश्रयतः सेवमानस्य पुरुषस्येति वत् ॥ सर्वरसे सर्वानन्दे आत्मनि चरमात्मनि वा चिदचिदात्मनि त्वयि सति स्वजनसुतात्मदारधनधामधरासुरथैः । जनाः पित्रादयः ॥ सुताः पुत्राः ॥ आत्मा देहः ॥ आप्तेति पाठे आप्ताः सखायः ॥ दाराः पत्न्यः ॥ धनादि सुवर्णादीनि ॥ धामानि नि ॥ धरा भूः ॥ क्षेत्रादिरूपा ॥ असवः प्राणाः ॥ रथः स्यन्दनः ॥ आप्तपाठपक्षे शरीरं वा ॥ रथस्तु स्यन्दने काये इति विश्वः ॥ षामितरेतरद्वन्द्वः तैः किं किञ्चिदपि सुखं न भवति तज्जनितसुखलेशे क्लेशबहुलत्वादिति भावः ॥ इति उक्तप्रकारं त्वय्येव खम् । त्वत्तोऽन्यत्रासुखम् इत्थं सत् सत्यं विवेकम् अजानतां अत एव मिथुनतः मिथुनीभूय रतये परस्परविषयसुखाय चरतां र्तमानानां तापत्रयदग्धदेहानामन्तकाजगरगिलितोत्तमाङ्गानामाधितव्याधिलकुटकोटिप्रहारजर्जरिताङ्गानां विषयपाशशतैराबध्यमकेतनेनेतस्ततो विकृष्यमाणानां नृणां स्वविहते स्वत एव नश्वरे स्वनिरस्तभगे स्वत एव त्यक्तमहत्त्वे ॥ भगः काममाहात्म्यवीर्ययत्नार्ककीर्तिषु इत्यमरः ॥ इह संसारनरके को नु जनः पदार्थो वा सुखयति सुखं करोति न कोऽपीत्यर्थः ॥ दुःखतत्क्रियायामिति स्वार्थे णिजन्तात्कर्तरि लट् ॥३४॥२१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ननु मयि भृशं भावं विदधतु ततः किमित्यपेक्षायां निरतिशयानन्दजलधिमग्नानां वैषयिकसुखान्तरनैरपेक्ष्यमितरेषां तु सुखं मिश्रपयःपानतुल्यमित्यभिप्रेयाहुः ॥ स्वजनेति ॥ सर्वसरे सर्वविधसुखमये, आत्मन्यन्तरात्मनि च, त्वयि सति,

'सरो वै सः रस ह्ये ह्येवायं लब्ध्वानन्दी भवति । को ह्येवान्यात्कः प्राण्यादेषआकाश आनन्दो न स्यात्' ॥

इत्युक्तरीत्या निरतिशयसुखस्वरूपे तदावहे च त्वयि विद्यमाने सतीत्यर्थः । नृणां मध्ये, श्रयतः उक्तविधं त्वां भजतः पुंसः, स्वजनसुतात्मदारधनधामधरासुरथैः, किम् । न किञ्चिदपि सुखमित्यर्थः । तत्र स्वजनाः पित्रादयः, सुताः पुत्राः, देहः, दाराः पत्न्यः, धनानि हिरण्यादीनि, धामानि गृहाणि, धरा भूमिः, असवः प्राणाः, रथाः स्यन्दनाः । रथशब्दो पलक्षकः । इति इत्थं, सत् निरतिशयपुरुषार्थभूतत्वत्स्वरूपमित्यर्थः । अजानताम् अत एव, रतये रतिसुखार्थं, मिथुनतः मिथुनीभूय वर्तमानानामित्यर्थः । स्वपिहिते स्वत एव प्रकृतितिरोहिते, अत एव स्वनिरस्तभगे स्वत एव निरस्तज्ञानैश्वर्यादिस्वरूपे, लोके, कः नु अर्थः, सुखयति । अर्थकामान्यतरो न कोऽपि सुखयतीत्यर्थः । स्वविहते इति पाठे स्वविहते स्वत एव नश्वरे, स्तभगे स्वत एव त्यक्तमहत्त्वे, इह संसारे, को नु अर्थः सुखयति न कोऽपीत्यर्थः ॥२१॥ ३५॥

योगिरामानुजाचार्यकृतसरला व्याख्या

भगवन्तमाश्रितस्य संसारस्य तुच्छत्वेनानुपादेयत्वमाहु:-स्वजनेति। सर्वरसे। सर्वे रसा: विद्यन्ते यस्मिन् स:। परमानन्दरूपे नृणामात्मनि सर्वचेतनानामन्तरात्मभूते त्वयि परमात्मनि विद्यमाने सति श्रयत:। एवम्भूतं त्वां सेवमानस्य पुंस: स्वजनसुतात्मदारधनधामधरासुरथै:। स्वजना: बन्धुमित्रादय:। सुता:। आत्मा देह:। दारा: कलत्राणि। धनं धाम गृहम्। धरा भूमि:। असु: प्राण:। रथ: यानाद्युपलक्षणम्। एतै: किं तुच्छै: किं प्रयोजनम् इति। इत्थं सदजानतां निरतिशयपुरुषार्थरूपं त्वत्स्वरूपमजानताम्। अत एव मिथुनत: स्त्रिया मिथुनीभूय रतये सुखाय चरतां गृहेषु वर्तमानानाम् इति। कर्मणि षष्ठ्यौ। वर्तमानान् इह संसारे स्वविहत:। स्वत एव नश्वर:। स्वनिरस्तभग: स्वत एव निरस्त: गत: भग: ज्ञानैश्वर्यादिर्यस्य स:। एवम्भूत: को नु स्वजनादि: कोऽपीत्यर्थ:। स्वविहते स्वनिरस्तभगे इति सप्तम्यन्तपाठे तु एतद्द्वयम् इहेत्यस्य संसारस्य विशेषणम्। सर्वरसे नृणामात्मनि त्वयि सति श्रयत: स्वजनसुतात्मदारधनधामधरासुरथै: किम्, इति सदजानतां मिथुनतो रतये चरताम् इह स्वविहत: स्वनिरस्तभग: को नु सुखयतीत्यन्वय: ॥३४॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

लोकान् भोगान् परीत्यानित्यतया ज्ञात्वा। परीक्ष्येति पाठेऽपि स एवार्थ:। निर्वेदं वैराग्यम् अकृतो नित्यो मोक्ष: कृतेन कर्मणा न स्यात्। अस्य विदुष: प्रमुच्यन्ते नश्यन्ति। अथ तथा मर्त्योऽमृतो मुक्तो भवति। अत्रेहैव जन्मनि ब्रह्म प्राप्नोति। अतो ब्रह्मैव भवति एव-परमार्थसुखाज्ञानादेव स्वविहत:। स्वनिरस्तभग इति पाठान्तरम्। अत: यतो विषयसेवनेन किमपि सुखमत: ॥३४॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

भक्तेर्वैराग्यमङ्गं विदधतीत्याह-स्वजनेति। इह संसारे त्वयि सति स्वजनसुतादिभि: एतैर्तुच्छैर्नृणां किं क: उपयोग:। कथम्भूते त्वयि। सर्वरसे। सर्वे रसा: सुखानि विद्यन्ते यस्मिन् परमानन्दे। पुनश्च। श्रयत आत्मनि श्रयतस्त्वां सेवमानस्य पुंस: आत्मनि आत्मरूपे एवम्भूते त्वयि स्थिते स्वजनादिभि: किम् इति सत् सत्यमजानताम् अत एव मिथुनतो रतये चरतां नृणां को नु अर्थ: सुखयति। न कोऽपि। स्त्रिया मिथुनीभूय रतये मायासुखाय चरतां प्रवर्तमानानामित्यर्थ:। कर्मणि षष्ठी। इह कथम्भूते। स्वविहते। स्वत एव गतसारे अतस्त्वद्भजनमेवोचितमिति। स्वजनेति। आत्मा देह: धाम गृहम्। असु: प्राण: इति ज्ञेयम्। स्वविहत: स्वनिरस्तभग: इति पाठे को नु इत्यस्य विशेषणम्। वैराग्यप्रतिपादनत्वे श्रुति: -

"परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात् नास्त्यकृत: कृतेन।" पूर्वलिखितायाः श्रुते: पूर्वार्धमिदं ज्ञेयम्। तथा

यदा सस्वे प्रमुच्यन्ते अर्थानन्तरं मर्त्य: अमृतो भवति। तत्र अत्रैव दीपिर्वाणवत्सर्वबन्धनोपशमात् ब्रह्म समश्नुते ब्रह्मैव भवतीति कामास्तु मनस्यवस्थिता न त्वात्मनि। तथा च श्रुति:-

"काम: सङ्कल्पे विवित्सा श्रद्धाऽश्रद्धा धृतिरधृर्तीर्धीर्भीरित्येतत्सर्वे मन एवेति त्वयि सर्वरसे परमानन्दे" इत्यत्र पूर्णाश्रुतिर्लिख्यते —

"स यो मनुष्याणां राद्ध: समृद्धो भवत्यन्येषामधिपति: सर्वैर्मानुष्यकैर्भोग्यै: सम्पन्नतम: स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दा: स एक: पितृलोक आनन्दोऽथ ये शतं पितृणां जितलोकानामानन्दा: स एको गन्धर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोकानामानन्दा: स एक: कर्मदेवानामानन्दोऽथ ये शतं कर्मदेवानामानन्दा: स एक आजानदेवानामानन्दोऽथ ये शतमाजानदेवानामानन्दा: स एक: प्रजापतिलोक आनन्दोऽथ ये शतं प्रजापतिलोक आनन्दा: स एको ब्रह्मण आनन्दोऽथैष एव परम आनन्द एषोऽस्य परमानन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ॥" इति ॥

अर्थस्तु सुगम:।

स्वामिनाम् —

भजतो हि भवान् साक्षात् परमानन्दचिद्घनः ।
आत्मैव किमतः कृत्यं तुच्छदारसुतादिभिः ॥

परमानन्दचिद्घनो भवानिह यस्माद्भजतो जनस्य साक्षादात्मैव भवति । अतः तुच्छदारादिभिः किं कृत्यं भवति ॥३४॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवत्प्रवणानां सुखान्तरनैरपेक्ष्यं भगवद्विमुखानां सुखदुर्लभत्वं चाह–स्वजनेति । आत्मा देहः । धाम गृहम् । धरा ः। असुः प्राणः । हे भगवन् ! आत्मनि सर्वरसे सर्वविधसुगमे आनन्दकन्दे श्रयतः पुरुषस्य त्वय्यात्मनि सति स्वजनादिभिः प्रयोजनम्; न किमपीत्यर्थः । नृणामिति द्वितीयार्थे षष्ठी । नृन् कोऽर्थः सुखयति, न कोऽपीत्यर्थः । कथम्भूताना नृणाम् । त्मैव सुखरूप इत्येवमजानताम् । तत्त्वज्ञानमजानतामित्यर्थः । अत एव मिथुनतो योषिता मिथुनीभूय रतये चरतां दुःखात्मके सुखे वर्तमानानां तापत्रयदग्धदेहानां अन्ते कालाजगरगिलितोत्तमाङ्गानाम् । आधिव्याधिलकुटकोटिप्रहारजर्जरिताङ्गानां पाशशतैराबध्यमकरकेतनेतस्ततो विकृष्यमाणानाम् । को न्विति । नु वितर्के । इह संसारे नरकरूपे कोऽर्थः सुखयति । जानतां चरतामिति द्वितीयार्थे षष्ठ्यौ । अजानतश्चरतो नसदजानताम् नृन् कः सुखयतीति । तथा भगवद्वाक्यमेकादशे —

'मय्यर्पितात्मनः सभ्यनिरपेक्षस्य सर्वतः । भयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनाम् ॥'

इति । कीदृशे संसारे । स्वविहते । स्वत एव नश्वरे स्वपिहिते इति पाठे नन्वात्मा चिदानन्दरूपः तर्हि विषयासङ्गेऽपि किं न प्रतीयते । तत्राह–स्वपिहिते अज्ञानेनावृते । तदुक्तं भगवता – 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।' इति । अत एव स्तभगे सुष्ठु । अतिशयेन निरस्तो भग आत्मनो ज्ञानानन्दैश्वर्यो यस्मिन् तथाभूते । अतस्त्वद्भजनम निरुपाधिकसुखकरम् । देवं कर्तुमुचितमित्यर्थः ॥३४॥

कृष्णप्रिया

सर्व प्रकार निरवधिक आनन्द स्वरूप सवने अन्तरात्मा आपके वीद्यमान रहने पर मनुष्यों के मध्य जो कोइ भजन करने वाला मनुष्य है उसको अपने कुटुम्बी पुत्रदेह स्त्रीधन गृहभूमि प्राणरथ आदि वाहन इत्यादि के पदार्थो से कुछ भी सुख नहि होता । इस प्रकार निरवधिक परमानन्द स्वरुप अन्य को नहि जानते है इस निरवधिक परमानन्द स्वरूप अन्य को नहि जानते है इसीसे स्त्री सुखके अर्थ स्त्री पुरुषरूप मिथुन होकर संसारि जीवों को अपने यथावत् अनुभव के विधान होने से आत्मा के स्वाभाविक ऐश्वर्य का निरास होने आप आत्मा के विद्यमान रहने पर भी संसार के पदार्थों के मध्यमें कोई भी पदार्थ सुखी नहिं कर सकता

भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदास्त उत भवत्पदाम्बुजहृदोऽघभिदङ्घ्रिजलाः ।
दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान् ॥३५॥

कर्दमक्षमा

ये ऋषयः, विमदाः, भवत्पदाम्बुजहृदः, च, ते, अघभिदङ्घ्रिजलाः, उत, तादृशा, अपि, भुवि, पुरुपुण्यतीर्थसदनानि, यतः, ये, नित्यसुखे, त्वयि, सकृत्, अपि, मनः, दधति, ते, पुनः, पुरुषसारहरावसथान्, न, उपासते ॥३५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं गुरूपदेशेन तत्त्वमवगम्य सारासारविवेकेन च सर्वतो निर्विद्य तदेव महत्सङ्गेनोपपत्तिभिः सम्यगवधारयितुं तीर्थसदनानि यन्तीति श्रोतव्यो मन्तव्य इत्यादि श्रुत्यर्थमाह–भुवि पुरुपुण्यतीर्थसदनानीति । ते उक्तलक्षणा ऋषयो विमदा निरहङ्कारा

यतो भगवत्पादाम्बुजहृदः भवतः पदाम्बुजं हृदि येषां तेऽतः स्वयमेवाघभिदङ्घ्रिजलं येषां ते उत अपि तथाविधा अपि पुरूणि बहूनि पुण्यानि तीर्थानि सदनानि च क्षेत्राणि तान्येवोपासते सेवन्ते प्रायस्तत्रैव महत्सङ्गो भवतीति अथवा पुरु अधिकं भगवद्भजनलक्षणं पुण्यं येषां तानि च तानि तीर्थानि च गुरवो महान्त इत्यर्थः। तेषां सदनान्याश्रमान् यथाहामरसिंहः "निपानागमयोस्तीर्थमृषिजुष्टे जले गुरौ" इति न पुनः पुरुषसारहरावसथानुपासते पुरुषाणां सारं विवेकस्थैर्यधैर्यक्षमाशान्तिप्रमुखं हरन्तीति तथा ते च ते आवसथा गृहास्तान् न च तेषां गृहाहिभवकुत्सितसुखापेक्षेत्याह-दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुख इति। सकृदपि त्वयि ये मनो दधतीति तेऽपि गृहाद्यासक्ता न भवन्ति किं पुनरेवम्भूता इत्यर्थः॥

मुञ्चन्नङ्गतदङ्गसङ्गमनिशं त्वामेव सञ्चिन्तयन्
सन्तः सन्ति यतो यतो गतमदास्तानाश्रमानावसन्।
नित्यं तन्मुखपङ्कजाद्विगलितत्वत्पुण्यगाथामृत-
स्रोतः सम्प्लवसम्प्लुतो नरहरे न स्यामहं देहभृत्॥२२॥ ॥३५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — इत्थं तदेव गुरूपदेशाप्ततत्त्वम् उपपत्तिभिरुपपादनयुक्तिभिः। श्रुतिस्तु "श्रोतव्यः" इत्यादि। तथा- "तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति" इत्यादि। अर्थस्तु — हे गार्गि! तदेतदक्षरं ब्रह्माद्यैरदृष्टं स्वयं सर्वेषां द्रष्टृ तथाऽश्रुतं श्रोतृ अमतं मननाविषयं स्वयं मन्तृ अन्यैरविज्ञातं स्वयं विज्ञातृ अतोऽन्यत्किञ्चिदपि वस्तु द्रष्टृश्रोत्रादि नास्तीति एतन्मननार्थं पर्यटन्तीत्युक्तम्। उक्तलक्षणा गुरूपदेशावाप्तविद्याः। तथाविधा निजाङ्घ्रिजलस्पर्शिपापनाशका अपि प्रायो बाहुल्येन तत्रैव तीर्थक्षेत्रेष्वेव। प्रायःपदेनास्वरसादाह-अथवेति। इत्यर्थ इति-तीर्यते संसारो यैरित्यर्थसाम्यान्महान्तोऽपि तीर्थान्येवेति भावः। तीर्थपदस्य गुरुवाचकत्वे प्रमाणमाह-यथेति। एवम्भूताः सदा भक्ताः। इत्यर्थ इति-सदा हरिभक्तिपराणां तु गृहद्यासक्तिः कदापि न सम्भवतीति। स्वामिनाम्-मुञ्चन्निति। अङ्गेन स्वाङ्गेन तेषां पुरुषसारहरावसथानां सङ्गं मुञ्चन् तन्मुखपङ्कजात्सत् मुखकमलात्। विगलिते त्वत्पुण्यगाथामृतस्रोतसि यः सम्प्लवः स्नानं तेन सम्प्लुतो युतः, पुनरहं देहभृन्न स्यां भवेयम्॥★॥

श्रीधरानुयायिनी—

गुरूपदिष्टतत्त्वनिश्चायकसत्सङ्गार्थं तीर्थसेवामुपदिशन्ति-भुवीति। हृद्गतभगवत्पादप्रभावेन स्वत एव पापापनोदकपादोदका अपि निरहङ्काराः प्रागुक्ताः भगवद्भक्ताः सत्सङ्गार्थं बहूनि बहुपुण्यजनकानि श्रीगङ्गादितीर्थानि श्रीवृन्दावनादिक्षेत्राणि च सेवन्ते। यद्वा-भगवद्भजनाभिधबहुपुण्यशालिनां महतामाश्रमान्सेवन्ते न पुनः पुरुषसाररूपविवेकधैर्यादिहरान् गृहान्। यतो ये त्वय्यात्मनि नित्यसुखे सकृदपि मनो धारयन्ति तेऽपि गृहाद्यासक्ता न भवन्ति किं पुनः प्रागुक्ता मुक्ता भगवद्भक्ताः। यद्वा-तदेवं याज्ञिकविप्रप्रसङ्गेनाभक्ता योगिनोऽर्थपराश्च निन्दिताः। अथ परमनिर्भयश्रीकृष्णचन्द्रदर्शनार्थं कुतोऽपि मिषात् क्रोशचतुष्टयमात्रव्यवहिततद्विहारभूमौ वासमसाधितवतस्तानेव पुनर्निन्दन्ति-एतेन प्रकटीभूय श्रीकृष्णदर्शनार्थमस्मद्गमने कंसस्त श्रीकृष्णं निश्चित्यापकारं करिष्यतीति भगवति कंसकृतानिष्टभयं कंसदत्तजीविकोच्छेदादिभयं च निरस्तम्। भुवीति-ये त्वयि स्वस्वरूपं नित्यसुखस्वरूपे च सकृदपि मनो धारयन्ति तेन ते स्वमनसि त्वत्पदाम्बुजं दधाना अत एव स्वयमघभिदङ्घ्रिजला भूत्वाऽत एव ऋषयः परमपूज्या निरहङ्काराश्च भूत्वा भुवि सर्वतोऽपि पुरुपुण्यानां सार्धं विजह्रुः। कृतपुण्यपुञ्जा इत्युक्तमहिम्नां श्रीगोपानां तीर्थरूपाणि सदनानि गृहान् तथा श्रीकृष्णविहारमहिष्ठानि चोपासते न पुनः पुरुषसारहराणां कंसादिदुष्टानामावसथान् तत्पालितनगरगृहादीनित्यर्थः। अतस्तत्पराङ्मुखा याज्ञिकविप्रादयो मन्दभाग्या एवेत्युपसंहारः। यद्वा-पुरुषसार! हे पुरुषोत्तम! ये एकवारमपि त्वयि मनो धारयन्ति ते पुनर्जन्मान्तरे हरस्य श्रीरुद्रस्यावसथान् श्मशानभूमीर्न सेवन्ते जन्ममरणशून्या भवन्तीत्यर्थः।

"महाभाग्यन्तु कैवल्यमज्ञानां कः प्रदास्यति। अतः सन्तो विजानन्ति हरिन्ते त्वनहङ्कृताः"

इति विमदपदार्थः। अङ्गं शरीरं तदङ्गानि सुतदारधनादीनि तेषु सङ्गमासक्तिं मुञ्चन्निति स्वामिश्लोकपदार्थः॥★॥

तथाविधा अपि पुरूणि
अधिकं भगवद्भजनलक्षणं
पानागमयोस्तीर्थमृषिजुष्टे
ति तथा ते च ते आवसथा
। । सकृदपि त्वयि ये मनो

भिः । श्रुतिस्तु "श्रोतव्यः"
ादि । अर्थस्तु — हे गार्गि !
ं विज्ञातृ अतोऽन्यत्किञ्चिदपि
नजाङ्घ्रिजलस्पर्शिपापनाशका
रो यैरित्यर्थसाम्यान्महान्तोऽपि
इति–सदा हरिभक्तिपराणां तु
सङ्गं मुञ्चन् तन्मुखपङ्कजात्सतां
हभृन्न स्यां भवेयम् ॥★॥

स्वत एव पापापनोदकपादोदका
वृन्दावनादिक्षेत्राणि च सेवन्ते।
रान् गृहान् । यतो ये त्वय्यात्मनि
क्ता भगवद्भक्ताः । यद्वा-तदेवं
द्दर्शनार्थं कुतोऽपि मिषात्
कृष्णदर्शनार्थमस्मद्गमने कंसस्तत्र
च निरस्तम् । भुवीति-ये त्वयि
अत एव स्वयमघभिदङ्घ्रिजलाश्च
ः । कृतपुण्यपुञ्जा इत्युक्तमहिम्नां
ारहराणां कंसादिदुष्टानामावसथान्
यद्वा-पुरुषसार! हे पुरुषोत्तम! ये
न्ते जन्ममरणशून्या भवन्तीत्यर्थः।

स्कृताः"
न्निति स्वामिश्लोकपदार्थः ॥★॥

विश्वनाथी — स्वजनादींस्त्यक्त्वा साधवो भजनानुकूलेषु तीर्थेषु वसन्तीत्याहुः-भुवि पुरुपुण्यानि तीर्थानि गङ्गादीनि सदनानि वृन्दावनादिक्षेत्राणि भगवद्धामानि ऋषयो भक्ता अधिवसन्तीति शेषः । विमदा विगतगर्वाः । उत यतस्ततः भवत्पदाम्बुदहृदः मनसि त्वत्पदाम्बुजं दधानाः अत एवाघं भिन्दन्ति अङ्घ्रिजलानि येषां ते तादृशाः कदापि स्वजनसुतात्मदारगृहान्नोपासते इति किं वक्तव्यम् । ये जनाः सकृदपि त्वयि नित्यसुखमयस्वरूपे मनो दधति तेऽपि पुनः पुरुषाणां सारं विवेकधैर्यक्षान्त्यादिकं हरन्तीति तथाभूतानावसथान् गृहान्नोपासते । अत्र श्रुतयः —

"सकाम्या मेरोः शृङ्गे यथा सप्तपुर्यो भवन्ति तथा सकाम्या निष्काम्याश्च भूगोलचक्रे सप्तपुर्यो भवन्ति ।

तासां मध्ये साक्षाद्ब्रह्म गोपालपुरी हि ॥" इति ।

"मथुरायां स्थितिर्ब्रह्मन् सर्वदा मे भविष्यति । चीत्स्वरूपं परं ज्योतिःस्वरूपं रूपवर्जितम् ॥

हृदि मां संस्मरन्ब्रह्मन् मत्पदं याति निश्चितम् ॥" इति श्रीगोपालतापन्याम् (२२) ॥३५॥

नीलकण्ठी —

एवं वैराग्यमुक्त्वा यान्येव विद्वल्लक्षणानि तान्येव ज्ञानसाधनानीति मत्वा विद्वदाचारप्रदर्शनेनाभ्यासं विधत्ते-भुवीति । ये त्वयि नित्यसुखे आत्मनि प्रतीचि सकृन्मनो दधति त एव भुवि कर्मभूमौ पुरुपुण्यादिमन्तः सन्तः पुनः ज्ञानोत्पत्त्यनन्तरं पुरुषसारहरावसथान् पुरुषाणां सारं बुद्धिवैभवं हरन्ति तादृशान् गृहान् न एवोपासते ।

"दृष्टाऽऽनुश्रविकविषयवितृष्णस्य विशीकारसंज्ञा वैराग्यम् ।"

"तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ।" इति योगोक्तदिशा साधकदशायामेव विरक्तस्य सिद्धदशायां ज्ञातविषयवैरस्य यस्य सुतरां तेषु वैतृष्ण्यं भवतीति भावः । अत्र पुरूणि पुष्कलानि पुण्यानि इष्टापूर्तव्रतजपादीनि चित्तशुद्धिद्वारा आत्मविविदिषोत्पादकानि —

"तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन ।" इत्यादिश्रुतेः तीर्थसदनं गुरूपसदनं तेन तद्द्वारके श्रवणमनने लक्ष्येते ।

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।"

इत्यात्मदर्शनार्थत्वेन वेदान्तश्रवणादिविधानात् पुरुपुण्यतीर्थसदनानि कृतवन्तः इत्यध्याहारः । अत एव ऋषयः ऋषन्ति प्राप्नुवन्त्यात्मानमित्यृषयः । पारोक्ष्येण ज्ञातात्मतत्त्वा भूत्वा विमदाः, अत्र मदाभावेन शमादिषट्कमुच्यते । तथा च श्रुतिः —

"तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत् ।" इति ।

"श्रद्धान्वितो भूत्वा" इति शाखान्तरम् । श्रवणादिप्रणाड्या परोक्षज्ञानवत आत्मापरोक्षार्थं शमादीन्विधत्ते । प्रणाड्यन्तरमाह-त्रापि च भगवतो विष्णोः पदं पदनीयं "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।" इति श्रुत्युक्तं कृष्णादिमूर्तेः पदं वा अम्बुजवदभिरामं तत्रैव हृन्मनो येषां ते निर्गुणस्य सगुणस्य ब्रह्मण उपासका इत्यर्थः । तेऽप्यावसथान्नोपासत इत्यावर्तते उभयेऽपि अघभिदङ्घ्रिजलाः शुद्ध्यादिकामैराराधनीया इत्यर्थः ।

"यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते ।

यांश्च कामान् तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥" इति श्रुतेः (२२) ॥३५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवान्याः सदाचारेण दृढयन्ति-भुवीति । ये ऋषयः सर्ववेदार्थतत्त्वं जानन्तः त्वयि सकृदपि मनो दधति ते पुनः स्वजनादिमयान् पुरुषसारहरावसथान् नोपासते । तेषु न रमन्ते कीदृशे त्वयि आत्मनि परमात्मनि अत एव रुपाधिपरमप्रेमास्पदत्वान्नित्यसुखे निरवधिसुखस्वरूपे । कथम्भूताः सन्तः । भवत्पदाम्बुजहृदः तदवधानवच्छिन्नतत्स्फूर्तयः

सन्तः ततः अघभिदङ्घ्रिजलाः सन्तः । ततः स्वयमेव भुवि पुरुपुण्यतीर्थसददानि सन्तः उत अपि तथापि विमदा विगतगर्वाः सन्तः इति । यद्वा । तादृशा अपि विगतवर्वास्सन्तः तादृशावसथान् नोपासते । तत्सम्बन्धेनैतेऽपि तीर्थत्वमापन्ना इति तत्रैव न तिष्ठन्ति किन्तु भुवि वर्तमानानि पुरुपुण्यतीर्थसदनान्येवोपासते इति उभयथाऽपि तीर्थपादत्वात्तवेति भावः । एवं तीर्थमहिमश्रुतीरपि सन्महिमप्रतिपादकेषु पर्यवसाययन्ति श्रुतयश्च ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

नमः परमर्षिभ्यो नमः परमर्थिभ्य इत्याद्याः ॥२२॥३५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अधुना वैराग्यसिद्धये सत्सङ्गार्थं महातीर्थसेवामुपदिशन्ति–भुवीति । प्रायः पृथिव्यामेव तादृशतीर्थादिसद्भावात् । ऋषयः सर्व्वशास्त्रार्थतत्त्वज्ञा विप्राः, अतो निमदाः, अत एव भवत्पदाम्बुजहृदः, आत्मनि स्वतः प्रेष्ठे नित्यसुखस्वरूपे च, किंवा, अतो नित्यमव्याहतं सुखं यस्मात्तस्मिन् । पुनरिति वाक्यालङ्कारे, किंवा तीर्थादिसेवनां पश्चात् । अन्यत्तैर्व्याख्यातम् । यद्वा, ते महाभागवता ऋषयो भूमण्डले पुरुषपुण्यतीर्थसदनानि महापुण्यहेतुतीर्थरूपाणि सदनान्याश्रमान् अर्थात् महापुण्यार्थिनो दधति, पोषणार्थोऽत्र धा–धातुः, पुष्णन्ति दुष्टजनसङ्गमालिन्यनिरासेन संवर्द्धयन्तीत्यर्थः । पोषणे सामर्थ्यमाहुः–भवत्पदाम्बुजहृदः । (भा० १/१३/१०) "तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता" इत्युक्तेः । अत एवाघभिदङ्घ्रिजलाः, विमदाः सर्वाभिमानशून्याः । यद्वा, भुवि पुरुपुण्यतीर्थसदनानि दधाति धारयन्ति कुर्वन्तीत्यर्थः;– ऋषिजुष्टजलादीनामेव तीर्थत्वात् । ये च सकृदपि त्वयि मनो दधति, तेऽपि पुरुषाणां सारं शान्तिज्ञानादिकं हरन्तीति पुरुषसारहराः, ते च ते आवसथाश्च नृप–धनि–प्रभृतीनामालयास्तत्रोपासते, तत्र न गच्छन्तीत्यर्थः; किमुत भवत्पदाम्बुजहृदः । यद्वा, पुरुषसार ! हे पुरुषोत्तम ! हरावसथान् रुद्रस्याप्यालयान् न सेवन्ते, रुद्रमन्दिरसेवां न कुर्व्वन्तीत्यर्थः, किमुत प्राकृतदैवतनृपादीनाम् । ननु श्रीरुद्रेण श्रीविष्णोर्भेदे कृते शास्त्रे दोषः श्रूयते । तथा च पुराणवचनम्-

"यो विष्णुः स वै रुद्रः स हरिर्यस्तु रुद्रकः । भेदकृत् नरकं याति यावदाहूतसम्प्लवम् ॥" इत्यादि बहुलम् ।

न कृते भेदे गुणश्च । तथा तत्रैव –

"त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । सर्व्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति ॥" इति ।

सत्यम्, तौ गुणदोषौ त्रैगुण्यधर्मनिष्ठतया वैष्णवदीक्षारहितेषु साम्येनैव देवत्रयं जानत्सु वैदिकेषु स्मार्तादिषु च विज्ञेयौ, न तु परमभागवतेष्वेकान्तिषु । तथा च पद्मपुराणादिषु —

"यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः । समत्वेनैव वीक्षेत स पाषण्डी भवेत् सदा ॥" इत्यादीनि बहूनि वचनानि ।

एतदेवाष्टाशीतितमाध्याये वृकासुरोपाख्याने सारस्वतमुन्युपाख्याने च श्रीविष्णोः सर्व्वातिशायिमहिमानिरूपणात् स्फुटीभविष्यति । श्रीविष्णुधर्मोत्तरे च लिङ्गस्फोटनृसिंहोपाख्यानमेवात्र प्रमाणम् । तथा हि विष्वक्सेननामानमेकान्तिनं प्रति ग्रामाध्यक्षपुत्रवचनम् —

"देवकर्म्मणाशक्तिर्मे तात पूजय शङ्करम् । देवतायतनं गत्वा यत्र तात प्रतिष्ठितम् ।
लिङ्गमस्ति सुरेशस्य महादेवस्य निर्मलम् (निर्मितम् [क, ग] ॥
एतदुक्तः प्रत्युवाच वयमेकान्तिनः श्रुताः । चतुरात्मा हरिः पूज्यः प्रादुर्भावं गतोऽथवा ।
पूजयामश्च नैवान्यं तस्मात्त्वं गच्छ मा चिरम् ॥" इत्यादि ।

ततो ग्रामाध्यक्षंपुत्रे तस्य विष्वक्सेनस्य शिरश्छेत्तुमुद्यते लिङ्गं स्फोटयित्वा निर्गतेन श्रीनृसिंहेन सपरिवारस्य ग्रामाध्यक्षपुत्रस्य

रांसि छिन्नानीति, किन्तु (भा० १२/१३/१६) 'वैष्णवानां यथा शम्भुः' इत्यत्रैवोक्तत्वादस्मिन्नेकान्तिभिरपि प्रणामादिभिरादरः र्तव्यः। निन्दा तु सर्व्वथा परिहर्तव्या।

'यो मां समर्च्चयेन्नित्यमेकान्तं भावमाश्रितः।
विनिन्दन् देवमीशानं स याति नरकं ध्रुवम् ॥' इत्यादि-पुराणवचनेभ्य इति ॥३५॥

[अज्ञा दुःमेव लभन्त इत्युक्तम्, त्वद्भक्तास्तु त्वन्नित्यप्रियास्पदं परमप्रेमवर्धनं माथुरमण्डलमेव सेवन्त इत्याहुः-भुवीति। भुविषये पुरुपुण्यानि तीर्थानि विश्रान्त्यादीनि, सदनानि च श्रीकृष्णजन्मगृहादीनि। यद्वा, पुरु सर्व्वतोऽधिकं भवद्भजनलक्षणं पुण्यं स्मात्तत् पुरुपुण्यं तच्च तत्तीर्थं च मथुराख्यम्। तथा च पाद्मे —

"अन्येषु पुण्यतीर्थेषु मुक्तिरेव महाफलम्। मुक्तैः प्रार्थ्या हरेर्भक्तिर्मथुरायां तु लभ्यते ॥" इति।

तत्र सदनान्याश्रमान्, ते प्रसिद्धा ऋषयः श्रीनारदादयः उत भवत्पदाम्बुदहृदः सदा हृदि भवत्पादपद्ममनुभवन्तोऽपि पासते, इत्युत्तरेणान्वयः। इति श्रीमथुराया माधुरी दर्शिता। तथा च माथुरखण्डे नारदवाक्यम् —

"तस्मिन् वृन्दावने पुण्यं (रम्यं [ख]।) श्रीगोविन्दनिकेतनम्। तत्सेवकसमाकीर्णं तत्रैव स्थीयते मया ॥" इति।

किंवा पुरुपुण्याः कृतपुण्यपुञ्जा महाभाग्यवन्तः श्रीनन्दव्रजौकसो गोपादयः। तथा चात्रैवोक्तम् (भा० १०/१२/११) सार्द्धं विजह्रुः कृतपुण्यपुञ्जाः' इति। (भा० १०/१२/१२) 'किं वर्ण्यते दिष्टमहो व्रजौकसाम्' इत्यादि। तेषां तीर्थानि गोकुलजलपानार्थं यमुनाघट्टान्, सदनानि च श्रीव्रजेन्द्रगृहादीनि, यतः भवतः पदं स्थानं मथुराख्यम्, तदेव मण्डलाकारतया सकलतापहरत्वादिना पद्मसादृश्यादम्बुजम्, मथुरामण्डलस्य पद्माकरत्वेन शास्त्रे कथितत्वात्, तस्मिन् हृद्भावो येषां ते। कथम्भूताः? अघभिदङ्घ्रिजलाः, अघभिदस्तवाङ्घ्र्योर्जलं येषु ते, सदा त्वत्पादतीर्थधारिण इत्यर्थः। अत एव विमदाः सर्वप्रकारकमदशून्याः, तादृशानां तु नेदं चित्रम्, किन्तु त्वयि श्रीव्रजेन्द्रनन्दने ये सकृदपि मनो दधति। कथम्भूते? आत्मनि नित्यसुखे मनोधायकरूपे स्वस्मिन् विषये। नित्यसुखे' इति व्यधिकरणे सप्तम्यौ, स्वात्मानं प्रति स्मृतिमात्रेण नित्यपरमानन्दप्रदे। तेऽपि पाद्मकार्तिकमाहात्म्योक्ताः सत्यव्रतादयः, पुरुषसारहरानावसथान्नोपासते, किन्तु श्रीवृन्दावनमेव। ये त्वय्यभक्ता याज्ञिकद्विजादयस्त एव गृहसक्ता इति भावः ॥३५॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भगवद्भक्तानां प्रभावमाह-भुवीति। पुरुपुण्यतीर्थसदनानि उपासते इत्याकृष्यान्वयः। भवत्पदाम्बुजहृदः भवत्पदाम्बुजन्यस्तहृदयाः अघभिदङ्घ्रिजलाः भगवद्भक्तानां पादोदकमपि पावनमित्यर्थः। दधति विदधति नित्यसुखे नित्यानन्दनिधौ पुरुषसारहरावसथान् न उत ते पुरुषाणां सारो ज्ञानवैराग्यादिस्तदपहरान् गृहान् न सेवन्त इत्यर्थः ॥३५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

नन्वित्थमात्मानं सर्वरसं मामाश्रयन्ते ते किं मिथुनतो न चरन्तीत्यत आहुः-भुवीति। ये त्वयि नित्यसुखस्वरूपे आत्मनि सकृदपिमनः दधति ते पुनः पुरुषाः पुरुषाणां सारं ज्ञानवैराग्यादिरूपं हरन्तीति तथा तानावसथान् गृहान् नोपासते न सेवन्ते न तु मिथुनतश्चरन्तीत्यर्थः। अपि तु भुवि पृथ्व्यां पुण्यानि तीर्थानि गङ्गादीनि सदनानि क्षेत्राणि च उपासते। तीर्थान्यपि तीर्थीकर्तुं क्षेत्राण्यपि निरतिशयपुण्ययुक्तानि कर्तुं तान्युपासत इति भावः। तत्र हेतुत्वेन तान् विशिषन्ति-ऋषयः द्रष्टारः परमात्मयाथात्म्यविद इत्यर्थः। अत एव विमदाः देहाभिमानस्वतन्त्रत्वाभिमानादिरूपमदरहिताः उतापि च भवतः पदाम्बुजं येषां ते भवतः पदाम्बुजे हृत् हृदयं येषां त इति वा। अत एवाघं भिन्दन्तीति तथा तान्यङ्घ्रिजलानि येषां ते अनेन भगवद्भक्तानां स्पर्शोऽपि पावन इत्यभिप्रेतम्।। आत्मनीत्यनेन कृत्स्नस्य चिदचिदात्मकप्रपञ्चरूपकार्यस्य तच्छरीरत्वमत एव परमार्थत्वं सूचितं न हि मिथ्याभूतं किञ्चित् कस्यचिच्छरीरभूतं दृष्टमित्यर्थः ॥३५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

इदमप्यथो वदन्ति चेन्नु तर्काव्यभिचरन्ति क्वचित्क्वचिदमृषा च ।
ततोभयदृग्व्यवहितये विकल्प उषितोन्वहमन्धपरम्परया भ्रमति भारती च तवोरुवृत्तिभिरूढजवा ॥२३॥३७॥

"यज्जीवमीशं प्रवदन्ति तर्कैस्तच्चेश्वरो वचनं सन्दधाति ।
नासीदादौ मरणे नो भविष्यन् मृषा ततो हीशितृत्वं स्वपेष्वि"ति ॥

न मत्तोऽन्य ईश्वरश्चेतनत्वादित्यादितर्कैर्वदन्ति चेदथो तस्मात् कुतः सर्वात्मना स्यादिति तत्राह–नन्विति । तर्काव्यभिचरन्ति नन्वित्यन्वयः । अत्र व्यभिचारित्वं पक्षधर्मत्वादिलक्षणाभावः । तथा हि विशिष्टपक्षीकारस्य सिद्धान्तविरुद्धत्वादनुपपत्तिः निर्विशेषेश्वरपक्षीकारे हेतोरसिद्धिरित्यादिदूषणमुपेक्ष्याचार्यैः कालात्ययापदिष्टत्वं प्रादर्शि । वेदोक्तो जीवव्यतिरिक्तेश्वरो न तर्कैरपनेतुं शक्यः । यतस्तर्काव्यभिचारिण इति "अनश्नन्नन्यो अभिचाकशीति" इति श्रुतेः जीवेश्वरौ विरुद्धधर्माक्रान्तत्वेन भिन्नौ छायातपवदित्यादेश्च दूषणान्तरमाह–क्वचिदिति । अभेदस्य सिद्धावसिद्धौ च तर्कस्य विशेषणानापादकत्वेनाप्रयोजकत्वात् अपिपासोः पयःपानवत् भोजनस्येष्टसाधनत्वतर्कोज्वरितादौ व्यभिचार्यत्वेन व्यर्थश्च सर्वशरीरसमवेतसुखदुःखानुसन्धातृत्वेन कायपरिमाणो जीव इति क्षपणकदर्शनपरिकल्पितस्तर्कोऽपि मृषैव अणुशरीरस्थस्य कर्मादिवशाद्धस्त्वादिशरीरप्राप्तौ विकारित्वापत्तेः । ननु तर्हि तर्केभ्यः किं प्रयोजनमत्राह–तत इति । यतो दुष्टास्तवोभयदृग्व्यवहितये भयबुद्धीनां बुद्धिव्यवधानाय तर्का भवन्ति न तु धीराणां विदुषाम् । ननु किमिति प्रवृत्ता इति तत्राह–विकल्प इति । विर्निषेधे पृथग्भावे इति वचनात् विकल्पो वेदविरुद्धकल्पना जगतो मिथ्यात्वं जीवस्य ब्रह्मणोऽभेदो जगत् क्षणिकं षड्गुण ईश्वर इत्यादिलक्षणान्धपरम्परयैवान्वहमुषितः प्रवर्तितः "अन्धेनैव नीयमाना यथान्धाः" इति श्रुतिः । अन्धपरम्परायाश्च कोऽवलम्ब इति तत्राह–भ्रमतीति । भारती वेदवाणी च भ्रमति । बहुधा वक्ति । तात्पर्यार्थावबोधाकुशलानज्ञानुद्दिश्येति शेषः । इति यस्मात्तस्मादन्धपरम्परा —

"बहूक्तिरन्यथा ज्ञप्तिः परिवृत्तिश्च कथ्यते । भ्राम इत्येव विद्वद्भिस्तथा चङ्क्रमणं क्वचित् ॥"

इत्यतो भ्रमस्य बहूक्तित्वं सिद्धं वेदस्य बहुधोक्तेः । किं कारणमत्राह–तवोर्विति । उरुशब्देनानन्तत्वं वृत्तिशब्देन गुणकर्माणि विवक्ष्यन्ते । भवतो गुणकर्मणामनन्तत्वात्तानिवक्तुं मूढजवा त्वरावती वेदवाणी अतो वेदेऽपि बहुधा वचनात्तदर्थनिर्णयशक्त्यभावात् योग्यतावशाद्विपरीतप्रतीतेश्च विरुद्धकल्पनायुक्ता अन्धपरम्पराऽसुराणाम् ॥२३॥३७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवान्याः सदाचारेण दृढयन्ति–भुवि पुरुपुण्येति ॥३५॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

गुरवस्तु द्वेधा भवन्ति दीक्षागुरवः शिक्षागुरवश्च । आद्यास्तु मदभिज्ञं गुरुम् इत्यादिना वक्ष्यमाणाः । द्वितीये तु भागवतास्तेषामुपासनैव प्रथमं कार्य्येति सदाचारं दर्शयन्ति–भुवि पुर्वित्यादि । ऋषयोऽपि विमदाः सन्तः पुरुपुण्यतीर्थसदनानि क्षेत्राणि उपासते । सन्तु तावत्प्रवृत्तमात्राः पुरुपुण्या भगवद्भक्तास्त एव तीर्थानि गुरवः 'तीर्थं त्वृषिजुष्टजले गुरा'वित्यनुशासनं तेषां सदनानि । यद्वा । पुरूणि पुण्यानि तीर्थानि सदनानि क्षेत्राणि । यद्वा । पुरुपुण्यतीर्थानां सदनं गतिर्येषु तानि वृन्दावनमथुराद्वारकाख्यानि तेषु तेषु महाभागवताः प्रायशः सन्तीति तान्युपास्यानीत्यर्थः । ते प्रसिद्धा अपि उतशद्बोप्यर्थः । ते के इत्याहुः- ये भगवत्पादाम्बुजसुहृदः । षष्ठीतत्पुरुषो बहुव्रीहिर्वा अघभिदङ्घ्रिजलं येषाम् । एवम्भूतास्त्वयि मनो दधति । अथवा ये त्वयि सकृत् एकवारमपि मनो दधति ते अघभिदङ्घ्रिजलाः । त्वयि कीदृशे । आत्मनि परमसुहृदि नित्यसुखे नित्यं सुखं यस्मात् तेन पुनः पुरुषसारहरावसथान् न उपासत इति द्विरावर्तनीयम् । अथवा सकृदपि ये त्वयि मनो दधति ते पुरुषसारहरान् गृहान् न उपासते

किम्पुनर्भगवत्पदा
अन्ये तु ऋषयो न

गुरूपदेशा
इत्यादिना वक्ष्यमाण
भुवीत्यादि । ऋषयो
तीर्थानि गुरवस्तेषां स
तेषु तेषु महान्तः प्राय
येषाम्, ततोऽघभिद
तत्राहुः- दधतीत्यादि
किम् ? त्वयि कीदृशे
सत्सङ्ग एव कार्यः, न

अत एव स्वज
सदनानि वृन्दावनादिक्षेत्र
मनसि त्वत्पदाम्बुजं दध
वक्तव्यम् । ये जनाः सकृ
तथाभूतानावसथान् गृहा

"सकाम्या मेरो
तासां मध्ये साक्ष
"मथुरायां स्थिति
हृदि मां संस्मरन्

एवं गुरूपदिष्टत
श्रुतयः भुवीति ॥

(तीर्थसेवनपरेयम्)

पद्यानुवादः

सकृदपि त्वयि ये
मुनिवरा भवदङ्घ्रिह

★ [गुरुः तीर्थं
अलौकिकभोगसम्पत्तीः ।]

द्धजवा ॥२३॥३७॥

न्विति। तर्काव्यभिचरन्ति
द्धान्तविरुद्धत्वादनुपपत्तिः
व्यतिरिक्तेश्वरो न तर्कैरपनेतुं
रुद्धधर्माक्रान्तत्वेन भिन्नौ
नाप्रयोजकत्वात् अपिपासोः
ग्रातृत्वेन कायपरिमाणो जीव
रत्वापत्तेः। ननु तर्हि तर्केभ्यः
न्ति न तु धीराणां विदुषाम्।
द्धकल्पना जगतो मिथ्यात्वं
अन्धेनैव नीयमाना यथान्धाः"
भ्रमति । बहुधा वक्ति ।

मणं क्वचित् ॥"
नन्तत्वं वृत्तिशब्देन गुणकर्माणि
वचनात्तदर्थनिर्णयशक्त्यभावात्

दिना वक्ष्यमाणाः । द्वितीये तु
नदाः सन्तः पुरुपुण्यतीर्थसदनानि
षजुष्टजले गुरा'वित्यनुशासनं तेषां
षु तानि वृन्दावनमथुराद्वारकाख्यानि
तशब्दोप्यर्थः । ते के इत्याहुः-
यि मनो दधति । अथवा ये त्वयि
त्यसुखे नित्यं सुखं यस्मात् तेन पुनः
ते पुरुषसारहरान् गृहान् न उपासते

र्भगवत्पदाम्बुजसुहृदोऽघभिदङ्घ्रिजलाः । ते तु पुरुपुण्यतीर्थानि तानि त्वत्स्वरूपाणि । यत ऋषयः ऋषिरिति ख्याताः । तु ऋषयो न भवन्ति । विमदाः विगतो मदो येभ्यः यद्दर्शनादन्येषामपि मदो यातीति भावः ॥३५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

गुरूपदेशादेव वैराग्यमुत्पद्यते, गुरवश्च द्वेधा- दीक्षागुरवश्च शिक्षागुरवश्च। आद्यास्तु (भा० ११/१०/५) "मदभिज्ञं गुरुम्" दिना वक्ष्यमाणाः, द्वितीये तु महद्रूपा यदृच्छया उपसन्ना भगवद्भक्ता ये केचित् तेषामुपासनेनैव कार्येति सदाचारं प्रमाणयन्ति- त्यादि। ऋषयोऽपि विमदाः सन्तः पुरुषपुण्यतीर्थसदनानि उपासते, सन्तु तावत् प्रवृत्तमात्राः । पुरुपुण्या भगवदुक्ता स्तव नि गुरवस्तेषां सदनानि- "निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ" इत्यमरः । अथवा पुरूणि पुण्यानि तीर्थानि सदनानि क्षेत्राणि तु महान्तः प्रायशः सन्तीति कृत्वा उपासते । ते प्रसिद्धा अपि उत शब्दोऽप्यर्थः । स्वयं किम्भूताः ? भवत्पदाम्बुजे हृद् ततोऽघभिदङ्घ्रिजला येषामङ्घ्रिजलमन्येषामघं भिनन्ति । कथमेवम्भूता भगवद्भावे सीद्धप्राया अपि महत् एवोपासते ? - दधतीत्यादि । ये पुनस्त्वयि सकृदेव मनो दधति, तेऽपि पुरुषस्यसारहरावसथान् हित्वा पुरुषपुण्यतीर्थसदनान्युपासते । तत् ? त्वयि कीदृशे ? आत्मनि आत्मस्वरूपे नित्यस्वरूपे नित्यशुद्धे, अतोऽसत्सङ्गे हि सिद्धानां साधकानां च त्याज्य एव, एव कार्यः, न स्वातन्त्र्येण कुत्रापि स्थातव्यं गुरूपसत्तिं विनेत्यर्थः ॥३५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अत एव स्वजनसुतात्मदारगृहांस्त्यक्त्वा साधवो भजनानुकूलेषु तीर्थेषु वसन्तीत्याहुः-भुवि पुरुपुण्यानि तीर्थानि गङ्गादीनि वृन्दावनादिक्षेत्राणि भगवद्धामानि ऋषयो भक्ता अधिवसन्तीति शेषः । विमदा विगतगर्वाः । उत यतस्ततः भवत्पदाम्बुदहृदः वत्पदाम्बुजं दधानाः अत एवाघं भिन्दन्ति अङ्घ्रिजलानि येषां ते तादृशाः कदापि स्वजनसुतात्मदारगृहान्नोपासते इति किं म्। ये जनाः सकृदपि त्वयि नित्यसुखमयस्वरूपे मनो दधति तेऽपि पुनः पुरुषाणां सारं विवेकधैर्यक्षान्त्यादिकं हरन्तीति तानावसथान् गृहान्नोपासते । अत्र श्रुतयः —

"सकाम्या मेरोः शृङ्गे यथा सप्तपुर्यो भवन्ति तथा सकाम्या निष्काम्याश्च भूगोलचक्रे सप्तपुर्यो भवन्ति ।

तासां मध्ये साक्षाद्ब्रह्म गोपालपुरी हि ॥" इति ।

"मथुरायां स्थितिर्ब्रह्मन् सर्वदा मे भविष्यति । चीत्स्वरूपं परं ज्योतिःस्वरूपं रूपवर्जितम् ॥

हृदि मां संस्मरन्ब्रह्मन् मत्पदं याति निश्चितम् ॥" इति श्रीगोपालतापन्यः ॥३५॥

गूढार्थदीपिनी

एवं गुरूपदिष्टतत्त्वनिश्चायकः सत्सङ्गः सन्तश्च प्रायस्तीर्थेषु निवसन्ति अतः साधकहितार्थं तीर्थसेवामेवोपदिशन्ति भुवीति ॥

(तीर्थसेवनपरेयम्)

पद्यानुवादः

सकृदपि त्वयि ये दधते मनोऽगृहरता गुरुतीर्थपरायणाः★ ।
मुनिवरा भवदङ्घ्रिहृदोऽमला दिवि★★ भवान् विभवानुपभुञ्जते ॥२२॥

★[गुरुः तीर्थं च परमम् अयनमाश्रयो येषां ते । यद्वा । गुरुरेव तीर्थम् ।] ★★[दिवि वैकुण्ठे । विभवान् भोगसम्पत्तीः ।]

सङ्क्षिप्तसार्थान्वयः — हे भगवन् ! नित्यसुखे आत्मनि परमात्मनि त्वयि ये सकृदपि मनो दधति धारयन्ति ते पुनः पुरुषसारहरावसथान् पुरुषस्य सारहरान् विवेकादिलोकपान् आवसथान् गृहान् न उपासते। उत किन्तु ते भुवि पुरुपुण्यतीर्थसदनानि नानापुण्यतीर्थानि क्षेत्राणि च उपासते सेवन्ते । एवम् ऋषयो भक्ताः भूत्वा विमदाः विगतदेहाहङ्काराः सन्तः जीवन्मुक्त भवन्तीत्यर्थः । कथम्भूतास्ते ? भवत्पदाम्बुजहृदः । पुनश्च । अघभिदङ्घ्रिजला अघभित् पापनिवर्तकम् अङ्घ्रिजलं येषां ते इति पदाभ्यां क्रमेण भक्तलक्षणं भक्तमहत्त्वं च द्योतितम् ॥

हे भगवन् ! नित्यसुखे परमानन्दचिन्मूर्तौ आत्मनि परमात्मनि त्वयि सकृदपि एकवारमपि ये मनो दधति धारयन्ति ते पुरुषस्य सारहरान् विवेकादिलोपकान् गृहान् पुनर्न उपासते न सेवन्ते किन्तु ते उत ते एव ऋषयो भक्ताः सन्तः भुवि कर्मभूमौ यानि पुरूणि बहूनि पुण्यतीर्थानि गङ्गायमुनादीनि सदनानि क्षेत्राणि काशीवृन्दावनादीनि तान्येव उपासते तत्र निवसन्ति प्रायस्तत्रैव सत्सङ्गो भवतीति। यद्वा। पुरु अधिकं पुण्यं भजनलक्षणं येषां तानि तीर्थानि गुरवो महान्तस्तेषां सदनानि आश्रमानित्यर्थः। तीर्यते संसारो यैरित्यर्थसाम्यात् महान्तोऽपि तीर्थानि। कथम्भूता ऋषयः ? विमदाः विगतगर्वाः । तत्कुतः ? भवतः पदाम्बुजं हृदि येषां ते। अत एव स्वयमपि ते अघभिदङ्घ्रिजलाः अघानि पापानि भिनत्तीति अघभित् तादृशम् अङ्घ्रिजलं येषां ते तथाभूताः ॥

यद्वा। हे पुरुषसार! हे पुरुषोत्तम ! ये मनो दधति ते तीर्थसदनानि उपासते किन्तु हरावसथान् रुद्राधिष्ठितान् क्रधाहङ्कारादीन् न उपासते तद्वशा नैव भवन्ति पुनश्च जन्मान्तरे हरस्य रुद्रस्य आवसथान् श्मशानभूमीश्च न सेवन्ते जन्ममरणशून्या भवन्तीत्यर्थः। यद्वा। ये मनो दधति ते गृहान् नोपासते किन्तु सदनानि क्षेत्राणि अधिवसन्तः ऋषयो भूत्वा विमदा मदहेतुभूतदेहादिसंस्कारान्मुक्ता भवन्तीत्यर्थः ॥२२॥३६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तीर्थवासादेरपि परम्परया परमार्थपरतत्त्वात्तदेव प्रतिपादयन्ति।

'मथुरायां विशेषेण मां ध्यायन्मोक्षमश्नुते ।' इत्यादिश्रुतयः । ऋषयः पुरीः पुण्यतीर्थसदनानि उपासते सेवन्ते। पुरीः श्रीमथुरादीः । पुण्यतीर्थानि गङ्गादीनि सदनानि वृन्दावनादीनि । कथम्भूताः । विमदाः जातिविद्याद्यहङ्काररहीनाः । अत्र हेतुः- भगवत्पदाम्बुजहृदः । भगवतश्चरणाम्बुजं हृदि येषाम् । अनन्यचरणाश्रयाः । एतत्फलगर्भितविशेषणमाह । अघभिदङ्घ्रिजलाः अघनाशकमङ्घ्रिजलं येषां ते । 'मद्भक्तियुक्तो भुवनं पुनाती'ति भगवद्वाक्याद्युक्तमेवैतत् । इत्याहुः-य आत्मनि भगवति त्वयि सकृदपि मनो दधते ते हरावसथान् रुद्राधिष्ठितांस्तमःकार्य्यभूतान् क्रोधाहङ्कारादीन् नोपासते न सेवन्ते। तद्वशा न भवन्तीत्यर्थः। हे पुरुषसार हे पुरुषोत्तम !। कथम्भूते नित्यसुखे। सदानन्दे श्रीकृष्ण इति यावत् —

'कृषिर्भूवाचकः शब्दः णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥'

इति निर्वचनात् । सदानन्दं प्राप्तानां न पुनर्दुःखरूपे गृहादौ प्रवृत्तिसम्भावनापीत्यर्थः ॥३५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं सर्वपरित्यागेन भगवद्भजनं कर्तव्यमिति निरूपितम्। तत्र प्रथमं किं कर्तव्यमित्याकाङ्क्षायां क्रमं निरूपयन्त्य आहुः- भुवि पुरुषपुण्यतीर्थसदनानीति। आदौ भूमिसमाश्रयणं कर्तव्यम्। भूमिर्हि भगवच्चरणारविन्दरूपा। तत्र मञ्चकपादुकादिपरित्यागेन भूमावेव निरन्तरं तिष्ठतेत् । अनेन सर्व एव भोगा व्यावर्तिताः । ततस्तीर्थाश्रयणं कर्तव्यं विशेषतश्चरणारविन्दस्फूर्त्यर्थम्। गङ्गा सर्वतीर्थानां मुख्या चरणारविन्द एव तिष्ठतीति गङ्गातीरे चरणारविन्दस्फूर्तिः आधिदैविकपक्षे आवेशपक्षे च स्फुटा। तत्रापि पुरुषपुण्यानि तीर्थानि सेव्यानि कुरुक्षेत्रादीनि। न केवलं तान्येव तीर्थानि सेव्यानि, किन्तु गुरुरूपाण्यपीत्याह-तीर्थसदनानीति। तीर्थानां गुरूणां सदनानि गृहाणि भुवि वर्तन्ते, अतस्तानि सेव्यानीत्यर्थः । ननु के ते इत्याकाङ्क्षायामाह-ऋषय इति। ते हि मन्त्रद्रष्टारः तदुद्धारका अलौकिकप्रकारं जानन्ति। अतस्तेषु गत्वा मन्त्राद्यलौकिकं भगवद्भजनसाधनं शिक्षणीयमित्यर्थः। ननु तेषु को विशेष इति चेत्तत्राह-विमदा इति। मदो गर्वः येन स्वपरज्ञानं न भवति अनेन ऋषीणामभिज्ञानमपि निरूपितम्। ननु केवलं

मदाभावे सात्त्वि
निरूप्यते। अत

''सर्वल

अत ए
तद्धृदयस्थभगवच
भवेत् तदा न कावि
दधति सकृन्मन इ
निवर्तते, तथा स्नेहे
दृष्टपूर्वस्तु न सेवेत
पुरुषसारहरावसथा

''परिभ्रमंस

उक्तलक्षणा
उतापि पुरूणि बहूनि
तीर्थानि गुरवः तेषां स
आनन्दरूपे आत्मनि
पुनर्न उपासते गृहाद्यास

असदाचारं प्र
पुरुषाणां सारं विवेकधैर
बहुपुण्यावहानि तीर्थानि
इत्याहुः-भवतः पदाम्बु
निवृत्ताहंममाभिमाना इत
भगवत्प्रेरणया तीर्थादिनि

''साधवो न्यासि

इत्याशयेनाहुः-
अपीत्यर्थः ॥३५॥२२॥

भुवीति ॥ ये ऋ
सदनान्युपासते। यतः ये नित
निरहङ्काराः भवतः पदाम्बुजं
बहूनि पुण्यानि तीर्थानि तथा स
ते पुनः पुरुषाणां सारं विवेकधै

धारयन्ति ते पुन:
पुण्यतीर्थसदनानि
सन्त: जीवन्मुक्त
घ्रजलं येषां ते इति

दधति धारयन्ति ते
भुवि कर्मभूमौ यानि
वसन्ति प्रायस्तत्रैव
श्रमानित्यर्थ: । तीर्यते
: पदाम्बुजं हृदि येषां
ां ते तथाभूता: ॥
ष्ठतान् क्रधाहङ्कारादीन
शून्या भवन्तीत्यर्थ: ।
तदेहादिसंस्कारान्मुक्ता

उपासते सेवन्ते । पुरी:
ङ्कारहीना: । अत्र हेतु:-
ह । अघभिदङ्घ्रिजला:
आत्मनि भगवति त्वयि
दृशा न भवन्तीत्यर्थ: । हे

धीयते ॥'
यर्थ: ॥३५॥

क्रमं निरूपयन्त्य आहु:-
मञ्चकपादुकादिपरित्यागेन
णारविन्दस्फूर्त्यर्थम् । गङ्गा
शपक्षे च स्फुटं । तत्रापि
यपीत्याह-तीर्थसदनानीति ।
यामाह-ऋषय इति । ते हि
शिक्षणीयमित्यर्थ: । ननु तेषु
पि निरूपितम् । ननु केवलं

भावे सात्त्विका: कर्मिणोऽपि सेव्या भवेयुर्देवतान्तरोपासका वा तत्राह-तु पुन: भवत्पदाम्बुजहृदो भवन्ति । तेषामन्तर्बहिर्माहात्म्यं रूप्यते । अतस्तेषां हृदये भगवान् भवति भक्तिमार्गप्रकारेण । बहिश्च ते भगवदाज्ञाकारिणो भवन्ति ।

"सर्वलोकोपकारार्थं कृष्णेन सहितास्तु ते । परिभ्रमन्ति लोकानां निस्ताराय महाशया: ॥"

अत एव सर्वेषामघं भिनत्ति यदङ्घ्रिजलं तादृशं येषाम् । ततस्तच्चरणारविन्दजलेन पापक्षय: । तदुपदेशेन हृदयस्थभगवच्चरणारविन्दं सङ्क्रमतीति सूचितम् । ननु सत्सेवायां कृतायां भगवति च हृदये निविष्टे यदि शीघ्रमेव देहपातो वेत् तदा न काचिच्चिन्ता । यदि विलम्ब: तदा कालादिना बुद्धिभ्रंशे पुनर्गृहासक्ति: स्यात्, तत: कृतं सर्वं व्यर्थं भवेदित्याशङ्क्याह-धति सकृन्मन इति । ये गुरूपदेशादिना त्वयि सकृदपि मनो दधति । यथा कामिनां स्त्रीविशेषे सकृच्चित्तं तत्सर्वथा अननुभूय न वर्तते, तथा स्नेहे जाते भगवद्रसाभिनिवेशे यदा भगवति चित्तं भवति तादृश: कदाचिदपि गृहं न सेवते । अदृष्टपूर्व: सेवेतापि, पूर्वस्तु न सेवेत एवेत्यर्थ: । ननु तादृश: पूर्णार्थ: गृहेऽपि समागत: भगवन्तं न त्यक्ष्यतीति गृहे समागते को दोष इति चेत्तत्राह-षसारहरावसथानिति । विवेकधैर्यादिकं पूर्वावस्थां च सर्वमेव गृहा हरन्तीत्यर्थ: ।

"परिभ्रमंस्तीर्थनिष्ठो गुरुलब्धहरिस्मृति: ॥ न सेवते गृहान् दुष्टान् सद्धर्मात्यन्तनाशकान् ॥" ॥२२॥३५॥

श्रीसुबोधिनीसार:

उक्तलक्षणा ऋषयो विमदा निरहङ्कारा भवतस्तव पदाम्बुजं हृदि येषां ते अघभित् पापनिवर्तकमङ्घ्रिजलं पादोदकं येषां ते पि पुरूणि बहूनि पुण्यानि तीर्थानि सदनानि क्षेत्राणि उपासते सेवन्ते । यद्वा । पुरु अधिकं पुण्यं भगवद्भजनलक्षणं येषां तानि तीर्थानि गुरव: तेषां सदनानि आश्रमान् "निषानागमयोस्तीर्थमृषिजुष्टे जले गुरौ" इत्यमरोक्ते: । सकृदेकवारमपि त्वयि नित्यसुखे नन्दरूपे आत्मनि ये मनो दधति तेऽपि पुरुषाणां सारं विवेकस्थैर्यधैर्यक्षान्तिप्रमुखं हरन्तीति तथा ते च ते आवसथा गृहास्तान् उपासते गृहाद्यासक्ता न भवन्ति ॥२२॥३५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

असदाचारं प्रमाणयन्ति-भुवीति । ये ऋषय: स्वार्थे निपुणा नित्यसुखरूपे आत्मभूते त्वयि सकृदपि मनो दधति ते पुन: षाणां सारं विवेकधैर्यक्षमाशान्तिप्रमुखं हरन्ति निराकुर्वन्तीति तथा ये आवसथा गृहास्तान्न उपासते, किन्तु भुवि यानि पुरुपुण्यानि पुण्यावहानि तीर्थानि तथा सदनानि भगवन्मन्दिराणि तद्भक्तगृहांश्चोपासते इत्यन्वय: । तत्रैव स्थिता भगवद्भजनं कुर्वन्ति त्याहु:-भवत: पदाम्बुजं हृदि येषां त इति । न चैतादृशानां कैश्चिदपि किञ्चित्प्रयोजनमस्ति, कृतार्थत्वात्, इत्याहु:- विमदा इति । वृत्ताहंममाभिमाना इत्यर्थ: । एतादृशानां तीर्थादिसेवयापि किम्, इत्यपेक्षायां हृदिस्थभगवच्चरणसम्बन्धेन स्वयं निर्मला अपि भवत्प्रेरणया तीर्थादिनिर्मलीकरणार्थमेव तत्र निवसन्ति इति निश्चय:, यथोक्तं नवमस्कन्धे भगीरथेन —

"साधवो न्यासिन: शान्ता ब्रह्मिष्ठा लोकपावना: । हरन्त्यघं तेऽङ्गसङ्गात्तेष्वास्ते ह्यघभिद्धरि: ॥"

इत्याशयेनाहु:- अघभिदङ्घ्रिजला इति । अघं भिनत्तीत्यघभित् अङ्घ्रिजलं येषां ते उत अपि एवम्भूता त्यर्थ: ॥३५॥२२॥

अन्वितार्थप्रकाशिका

भुवीति ॥ ये ऋषय: विमदा: भवत्पदाम्बुजहृदश्च ते अघभिदङ्घ्रिजला उत तादृशा अपि भुवि पुरुपुण्यतीर्थ-न्नुपासते । यत: ये नित्यसुखे त्वयि सकृदपि मन: दधति ते पुन: पुरुषसारहरावसथान् न उपासते इत्यन्वय: । ये ऋषय: विमदा: ङ्कारा: भवत: पदाम्बुजं हृदि येषां ते च अघानि भिनत्ति इत्यघभित् तादृगङ्घ्रिजलं येषां त उत तादृशा अपि भुवि यानि पुरूणि पुण्यानि तीर्थानि तथा सदनानि क्षेत्राणि च उपासते प्रायस्तत्रैव महत्सङ्गात् ये नित्यसुखरूपे आत्मभूते त्वयि सकृदपि मनो दधति पुरुषाणां सारं विवेकधैर्यक्षमाशान्तिप्रमुखं हरन्ति निराकुर्वन्ति तथा ये आवसथा गृहास्तान्नोपासते ॥३५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

गृहाश्रमेऽत्यक्तसुखासक्तेषु जनेषु क्लेशबहुलत्वं ज्ञात्वा अनवधिकातिशयानन्दपुरुषोत्तमप्रापकसत्समागमाऽत्यासक्ता विवेकिनो गृहस्थाश्रमे न वसन्तीत्यूचुः भुवीति ॥ हे भगवन् ! ऋषयो मुनयः मुवि धरायाम् ॥ पुरुपुण्यतीर्थसदनानि ॥ पुरूणि बहूनि पुण्यतीर्थानि गङ्गायमुनादीनि पुण्यसदनानि च द्वारिकादीनि ॥ जलप्रधानं तीर्थं भूमिप्रधानं क्षेत्रमिति तीर्थक्षेत्रयोर्भेदः ॥ तत्र सत्समागमस्यावश्यम्भावित्वात् ॥ यद्वा ॥ पुरु अधिकं भगवदाराधनलक्षणं पुण्यं येषाम् ॥ तानि च तानि तीर्थानि गुरवश्च महान्त इत्यर्थः ॥ तेषां सदनानि आश्रमान् ॥ निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ इत्यमरः ॥ विमदाः गतविद्यादिजनितमदाः सन्तः ॥ अत्र मदग्रहणं सर्वदोषोपलक्षणम् । तेन सर्वदोषरहिता इत्यर्थो ज्ञेयः ॥ उपासते सेवन्ते ॥ न तु प्राकृतसुखदातृन् त उत ते पुनः ॥ भवत्पदाम्बुजरुहः महत्सदनसेवनेन भवतः पदाम्बुजं हृदि मनसि येषां ते त्वत्पादपद्ममनसः ॥ सप्तमीपूर्वपदः सप्तम्युत्तरपदो वा बहुव्रीहिः ॥ अत एव अघभिदङ्घ्रिजलं येषां ते पापनाशकपादावनेजना भवन्ति ॥ गङ्गादितीर्थद्वारकादिक्षेत्रसेवनं विनापि भवत्भवदीयसमागमेन पवित्रितानां तेषां तन्निराकाङ्क्षत्वेऽपि लोकसङ्ग्रहार्थं तीर्थक्षेत्रसेवनं तत्स्थजनतीर्थयोः पवित्रीकरणार्थमिति भावः ॥ तीर्थीकुर्वन्ति तीर्थानीति स्मृतेः ॥ उक्तमर्थं दृढयति ॥ ये पुमांसः ॥ नित्यसुखे अखण्डानन्दे आत्मनि परमात्मनि त्वयि अगणितगुणनिधौ सकृदपि मनो दधति स्थिरीकुर्वन्ति तेऽपि ईषदास्वादितपरमात्मसुखा अपि पुरुषसारहरावसथान् पुरुषाणां सारो भक्तिज्ञानादिबलम् ॥ तद्हरान् ॥ सारो बलेऽस्थिरांसे चेति विश्वः ॥ मोक्षसाधनध्वंसहेतून् आवसथान् गृहाश्रमात् पुनः नोपासते न सेवन्त इत्यर्थः ॥ अत्रायम्भावः —

यदि सकृदास्वादितपरमात्मसुखानां गृहाश्रमानादरस्तर्हि निरन्तरतदास्वादवतां तु तदनादरः स्यात्तत्र किमुतेति युक्तमेव विरक्तानामृषीणां तीर्थसेवनमिति भावः ॥३५॥२२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नन्वित्थं सर्वरसमात्मानं ये समाश्रयन्ते ते किं मिथुनतो न चरन्तीत्यत आहुः ॥ भुवीति ॥ ये नित्यसुखे नित्यंसुखस्वरूपे, आत्मनि परमात्मनि च त्वयि, सकृदेकवारमपि, मनः दधति । ते पुरुषाः, पुनः पुरुषाणां सारं ज्ञानवैराग्यादिरूपं हरन्तीति तथाभूता ते आवसथा गृहास्तान्, न उपासते न सेवन्ते । 'तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता' इत्युक्तेस्तीर्थान्यपि तीर्थीकर्तुं पुण्यक्षेत्राण्यपि निरतिशयपुरुषार्थावहानि च कर्तुं तान्यप्युपासत इति भावः । तत्र हेतुत्वेन यच्छब्दोपात्तांस्तान् विशिंषन्ति । ऋषयः द्रष्टारः, स्वात्मपरमात्मयाथात्म्यविद इति वा । अत एव विमदाः देहाभिमानस्वतन्त्रत्वाभिमानादिरूपमदरहिताः, उतापि च, भवतः पदाम्बुजं हृदि येषां ते भवतः पदाम्बुजे हृत् हृदयं येषां त इति वा । अत एव । अघं भिन्दन्तीति तथाभूतान्यङ्घ्रिजलानि येषां ते, अनेन भगवद्भक्तानां पादस्पर्शोऽप्यतिपावन इत्यपि सूचितम् । आत्मनीत्यनेन कृत्स्नस्य चिदचिदात्मकप्रपञ्चरूपकार्यस्य तच्छरीरत्वमत एव तस्य परमार्थत्वं चाभिप्रेतं, न हि मिथ्याभूतं किञ्चित् कस्यचिच्छरीरभूतं दृष्टमिति भावः ॥२२॥ ॥३६॥

योगिरामानुजाचार्यकृतसरला व्याख्या

भगवद्भजनपराः भजनप्रतिबनधकान् गृहान्न सेवन्ते । तदनुकूलान् पुण्यतीर्थादीनेव सेवन्ते इत्याहुः-भुवीति । ते भगवद्भजनमाहात्म्येन प्रसिद्धाः ऋषयः ज्ञानिनः भवत्पदाम्बुजहृदो भवतः मोक्षप्रदस्य पदाम्बुजं चरणकमलं हृदि येषां ते । अत एवाघभिदङ्घ्रिजलाः स्वयमेवाघभित् चेतनानां पापहरम् अङ्घ्रिजलं चरणोदकं येषां ते । उत इत्यप्यर्थे । उत तथापि स्वयमेव जगत्पावना अपि विमदाः कुलधनविद्यासम्बन्धमदत्रयरहिताः सन्तः भुवि धरायां पुरुपुण्यतीर्थसदनानि पुरूणि बहूनि पुण्यानि पुण्योत्पादकानि तीर्थानि गङ्गादीनि सदनानि भगवत्स्थानानि बदर्य्यादीनि क्षेत्राणि तान्येवोपासते सेवन्ते । प्रायः तत्रैव महत्सङ्गप्राप्तेः पुनः भगवति मनोनिवेशनानन्तरं पुरुषसारहरावसथान् पुरुषाणां सारं सारभूतं विज्ञानं 'तद्गुणसारत्वाव्द्यपदेशः' इति सूत्रवचनात् । तं हरन्तीति तथा । ते आवसथाः गृहाः तान् नोपासते नैव सेवन्ते । ते गृहान्नोपासत इत्यत्र किम्पुनर्न्यायेन दृष्टान्तमाहुः-दधतीति । ये किञ्चित् किञ्चित् भगवदुपासनाभ्यासपराः आत्मनि अन्तरात्मभूते नित्यसुखे नित्यानन्दरूपे त्वयि भगवति सकृदपि सकृत्कालेऽपि

त्समागमाऽत्यासक्ता
र्थसदनानि ॥ पुरूणि
ीर्थक्षेत्रयोर्भेदः ॥ तत्र
ोर्थानि गुरवश्च महान्त
{जनितमदाः सन्तः ॥
ातृन् त उत ते पुनः ॥
पदः ससम्युत्तरपदो वा
ासेवनं विनापि भवत्-
ः पवित्रीकरणार्थमिति
त्मनि परमात्मनि त्वयि
ावसथान् पुरुषाणां सारो
ाश्रमात् पुनः नोपासते न

ात्तत्र किमुतेति युक्तमेव

त्यसुखे नित्यंसुखस्वरूपे,
ादिरूपं हरन्तीति तथाभूता
युक्तेस्तीर्थान्यपि तीर्थीकर्तुं
ांस्तान् विशिषन्ति । ऋषयः
रूपमदरहिताः, उतापि च,
तथाभूतान्यङ्घ्रिजलानि येषां
चिदात्मकप्रपञ्चरूपकार्यस्य
भावः ॥२२॥ ॥३६॥

सेवन्ते इत्याहुः-भुवीति । ते
त्ररणकमलं हृदि येषां ते । अत
ग्यप्यर्थे । उत तथापि स्वयमेव
दनानि पुरूणि बहूनि पुण्यानि
न्ते । प्रायः तत्रैव महत्सङ्गप्राप्तेः
व्यपदेशः' इति सूत्रवचनात् । तं
ायेन दृष्टान्तमाहुः-दधतीति । ये
भगवति सकृदपि सकृत्कालेऽपि

मनो निवेशयन्ति तेऽपि पुरुषसारहरावसथान् न सेवन्ते । किम्पुनः ऋषयः न सेवन्ते इत्यत्र वक्तव्यमित्यर्थः । ते ऋषयः त्पदाम्बुजहृदो अत एवाघभिदङ्घ्रिजला उत विमदाः भुवि पुरुपुण्यतीर्थसदनानि उपासते । पुनः पुरुषसारहरावसथान् पासते ये आत्मनि नित्यसुखे त्वयि सकृदपि मनो दधति तेऽपि पुरुषसारहरावसथान् नोपासते ऋषयः नोपासते इति मुनः इत्यन्वयः ॥३५॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

तीर्थानि गङ्गादीनि । सदनानि वृन्दावनादीनि । क्षेत्राणि तत्रैव तीर्थसनदेष्वेव । पूर्वार्थे । प्रकृतमहत्सङ्गस्याक्षेपादेवोपलब्धिर्न भिधयाऽतोऽथवेति । तेषां महत्सङ्गवताम् । एवम्भूताः विमदत्वादिविशेषणविशिष्टाः । अङ्गं शरीरम् । तदङ्गानि कलत्रादीनि । तेषु सङ्गमासक्तिं मुञ्चन्निति विमदशब्दस्याभिप्रायः । यतो यत इत्यादि । पुण्यतीर्थसदनानीत्यस्याभिप्रायः । नित्यं सुखेत्यादिकमुपासत इत्यस्य शिष्टं फलोपदेशपरमित्यनुसन्धेयम् ॥३५॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

एवं गुरूपदेशेन तत्त्वमवगम्य सारासारविवेकेन सर्वतो निर्विद्य तदैव महत्सङ्गेनोपपत्तिभिः सम्यगवधारयितुं तीर्थसदनानि यः पर्य्यटन्तीत्याहुः-भुवीति । ये मुनयः पुरुपुण्यतीर्थसदनानि भुवि उपासते सेवन्ते ते न पुनः पुरुषसारहरावसथान् उपासते । षाणां सारं विवेकधर्य्यक्षान्तिप्रमुखं हरन्तीति तथा ते च आवसथागृहास्तान् । पुरूणि बहूनि तीर्थानि सदनानि क्षेत्राणि आश्रमान् पानागमयोस्तीर्थमृषिजुष्टजले गुरौ ।' इत्यमरः । तीर्थपदेन गुरुरुच्यते । कथम्भूता ऋषयः । विमदा निरहङ्काराः यतो त्पदाम्बुजहृदः भवत्पदाम्बुजं हृदि येषां ते । उत अपि तथाविधा अपि तीर्थानि उपासते । न च तेषां दिभवकुत्सितसुखापेक्षास्तीत्याह-दधतीति नित्यसुखे आत्मनि त्वयि सकृदपि मनो ये दधति तेऽपि पुरुषसारहरावसथान्न पासते । किमुत मुनयः इति यदर्थमनना ये मुनयः पर्यटन्ति । तथा हि श्रुतिः -

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" इत्यादि । तथा

"तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदस्ति" इत्यादि ।

अर्थः — हे गार्गि ! तदेतदक्षरं ब्रह्मान्यैरदृष्टं स्वयं सर्वेषां द्रष्टृ तथाऽश्रुतं श्रोतृ अमतं मननाविषयं स्वयं मन्तृ अन्यैरविज्ञातं विज्ञातृ अतोऽन्यत्किञ्चिदपि वस्तु द्रष्टृश्रोत्रादि नास्तीति एतन्मननार्थं पर्यटन्ति

स्वामिनाम्-

मुञ्चन्नङ्गतदङ्गसङ्गमनिशं त्वामेव सञ्चिन्तयन् सन्तः सन्ति यतो यतो गतमदास्तानाश्रमानावसन् ।
नित्यं तन्मुखपङ्कजाद्विगलितत्वत्पुण्यगाथामृत-स्त्रोतः सम्प्लवसम्प्लुतो नरहरे न स्यामहं देहभृत् ॥

अङ्ग ! तदङ्गसङ्गमिति तत्तेषां पुरुषसारहरावसथानां जायापत्यादीनाम् अङ्गसङ्गं स्वाङ्गेन मुञ्चन्नित्यर्थः । तन्मुखपङ्कजात् सतां मुखपङ्कजात् । अन्यत् सुगमम् ॥३५॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवद्भक्तानां प्रभावमाह-भुवीति । ये ऋषयः सूक्ष्मदर्शिनो विमदा देहादिष्वहङ्काररहितास्ते उत भुवि पुरुपुण्यतीर्थसदनान्युपासते इत्याकृष्यान्वयः । पुरुपुण्यतीर्थसदनानीति । पुरुपुण्यरूपं पादतीर्थं गङ्गादि पुरुपुण्यतीर्थो हरिः । तदुक्तं —

'यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्नि विधृतेन शिवः शिवोऽभूत् ॥' इति ।

तस्य सदनानि मन्दिराणि भगवद्भक्तास्तानित्यर्थः । तथा चोक्तं भगीरथेन गङ्गां प्रति —

'साधवो न्यासिनः शान्ता ब्रह्मिष्ठा लोकपावनाः । हरन्त्यघं तेऽङ्गसङ्गात्तेष्वास्ते ह्यघभिद्धरिः ॥'

इति । तथा भगवद्वाक्यं दुर्वाससं प्रति —

'ये दारागारपुत्राप्तान् प्राणान् वित्तमिमं परम् । हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥'

इति । ये त्वयि नित्यसुखे नित्यानन्दनिधौ आत्मनि जीवान्तरात्मनि सकृदपि मनो दधति निदधति । तेऽपि पुरुषसारहरावसथान् । पुरुषाणां सारो ज्ञानवैराग्यादि । तदपहरान् । न उपासते न सेवन्ते । किं पुनः सर्वकाले तन्निष्ठा ऋषय इत्यर्थः । कथम्भूतास्ते । भवत्पदाम्बुजहृदः । भवत्पदाम्बुजे हृदि येषां ते । भवत्पदाम्बुजन्यस्तहृदया इति यावत् । पुनः कीदृशाः । अघभिदङ्घ्रिजलाः । अघभिदङ्घ्रिजले येषां तेषां भगवद्भक्तानां पादोदकमपि पावनमित्यर्थः । ईदृशप्रभावयुक्तानामेव सङ्गः संसारनिवर्तक इति । तथा च तृतीये भगवद्वाक्यं देवहूतिं प्रति —

'प्रसङ्गमजरं पाशमात्मनः कवयो विदुः । स एव साधुषु कृतो मोक्षद्वारमपावृतम् ॥' इति ॥३५॥

कृष्णप्रिया

नित्यसुख स्वरूप सर्वान्तरात्मा आप के विषयमें जो एक बार भी मनकी धारणा करते है ये विवेकी जन फिर पुरुष के ज्ञान वैराग्यादि सार धनको नाश करनेवाले गृहन का सेवन नहि करते है, किन्तु पृथ्वी में अनेक गंगादि तीर्थ का तथा अयोध्या मथुरा आदि पुण्यक्षेत्रोंका सेवन करते है वे महात्मा जीवात्मा और परमात्मा के तत्त्व का साक्षात् करनेवाले होते है और देहमें आत्माभिमान आदि मद रहित होते है । और आपके चरणारविन्द को सदा निज हृदयमें धारण करते है और उनके चरण को सदा निज हृदयमें धारण करते है और उनके चरणके जब संसारी जीवों के पाप का नाश करते है ॥३५॥

सत इदमुत्थितं सदिति चेन्ननु तर्कहतं व्यभिचरति क्व च क्व च मृषा न तथोभयभुक् ।
व्यवहृतये विकल्प इषितोऽन्धपरम्परया भ्रमयति भारती त उरुवृत्तिभिरुक्थजडान् ॥३६॥

कर्दमक्षमा

इदं, जगत्, यतः, सतः, उत्थितम्, अतः, सत्, इति, चेत्, तर्कहतम्, यतः, क्वचित्, पितृपुत्रादौ, व्यभिचरति, क्व, च, रज्जुसर्पादौ, मृषा, भवति, (अत्र, अपि, तथा, नास्ति, किन्तु) उभययुक्, अतः, न, सत्, व्यवहृतये, तु, विकल्पः, इषितः, सः, तु, अन्धपरम्परया, अपि, भवति ।, ते, भारती, उरुवृत्तिभिः, उक्थजडान्, भ्रमयति ॥३६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

नन्वाम्नायस्य क्रियार्थक्यमतदर्थानां तद्भूतानां क्रियार्थेन समन्वय इति तत्र तत्र जैमिनिना वेदस्य क्रियापरत्वादुपनिषदामपि तदेव युक्तं यथोक्तं तन्त्रवार्तिककृता 'एतेन क्रत्वर्थकर्तृप्रतिपादनेनोपनिषदां नैराकाङ्क्ष्यं व्याख्यातम्' इति न "एकमेवाद्वितीयं ब्रह्म विज्ञानमानन्दं ब्रह्म अचक्षुरश्रोत्रम्" इत्येव तद्विपरीतात्मप्रतिपादनात् न ह्यद्वितीयपरमानन्दरूपस्य कर्माङ्गत्वं युज्यते अननुमतं चेतद्वार्तिककृतः कथम्–सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते । पराङ्गञ्चात्मविज्ञानादन्यत्रेत्यवधार्यताम् ॥ इति तेनैवोक्तत्वात् एतदर्थमेव मननाय मुनयः पर्यटन्तीत्युक्तं तत्र तावत् । द्वैतस्य सत्यत्वे भवेदप्येवं तदेव तु न सम्भवतीति प्रश्नोत्तराभ्यां मननेन तत्त्वावधारणप्रकारमाह–स्वत इदमुत्थितं सदिति । चेदिति इदं विश्वं धर्मि सदिति साध्यो धर्मः सत उत्पन्नत्वाद्धेतुः यद्यत उत्पन्नं तत्तदात्मकमेव दृष्टं यथा कनकादुत्पन्नं कुण्डलादि तदात्मकम् तद्वदिति तत्र यदि सदभेदः साध्यते तदापादानत्वनिर्देशेनैव भेदप्रतीतेर्विरुद्धो हेतुरित्याह–ननु तर्कहतमिति ननु नाभेदं साधयामः किन्तु तदुत्पन्नत्वेन कुण्डलादिवद्भेदं प्रतिषेधयामः तत्राभेद एव स्यादित्याशङ्क्यानैकान्तिकत्वेन दूषयति व्यभिचरति क्व चेति । पितृपुत्रादिषु मुद्गरघटप्रध्वंसादिषु च तथा दर्शनादिति भावः ।

॥'

।'

। तेऽपि पुरुषसारहरावसथान्
य इत्यर्थः । कथम्भूतास्ते ।
शाः । अघभिदङ्घ्रिजलाः ।
: संसारनिवर्तक इति । तथा

३५॥

करते है ये विवेकी जन
है, किन्तु पृथ्वी में अनेक
वात्मा और परमात्मा के
और आपके चरणारविन्द
रते है और उनके चरणके

तथोभयभुक् ।
जडान् ॥३६॥

पुत्रादौ, व्यभिचरति, क्व, च,
तु, विकल्पः, इषितः, सः, तु,

स्य क्रियापरत्वादुपनिषदामपि
इति न "एकमेवाद्वितीयं ब्रह्म
कर्माङ्गत्वं युज्यते अननुमतं
ार्यताम् ॥ इति तेनैवोक्तत्वात्
भवतीति प्रश्नोत्तराभ्यां मननेन
त उत्पन्नत्वाद्धेतुः यद्यत उत्पन्नं
ाध्यते तदापादानत्वनिर्देशेनैव
देवद्भेदं प्रतिषेधयामः तत्राभेद
षु च तथा दर्शनादिति भावः ।

तदुपपन्नत्वं नाम तदुपादानत्वं न तु तन्निमित्तत्वमतो नानेकान्तिकत्वमित्याशङ्क्य दूषयति क्व च मृषेति गुणोपादानस्यापि णिनो न गुणत्वं किन्तु मिथ्यात्वम् अन्यथा कुण्डलादिवदबाधप्रसङ्गात् अतः पुनरप्यनेकान्तिकत्वमेवेति भावः । ननु न तत्र लं गुणमात्रं फणिन उपादानं किन्त्वविद्यायुक्तं तथाभूतस्यावस्तुत्वाद्युक्तं फणिनो मिथ्यात्वमित्याशङ्क्य तत्तुल्यमत्रापीति दूषयति णोभययुगिति अयमर्थः अत्राप्यविद्यायुक्तस्यैव सत उपादानत्वम् एवम्भूतस्य च न वस्तुसत्त्वम् अतः सदुपादानत्वमसिद्धमिति वस्तुसत्त्वं प्रपञ्चस्येति ननु मा भूदनेन हेतुना प्रपञ्चस्य सत्त्वं हेत्वन्तरेण तु साधयामः तथा हि सदिदमर्थक्रियाकारित्वात् न यदेवं देवं यथा शुक्तिरजतमिति तत्राह–व्यवहृतये विकल्प इषित इति । व्यवहारायार्थक्रियार्थं विकल्पो भ्रम इषित इष्ट एव कार्षापणादिनापि क्वचिद्व्यवहारदर्शनात् नन्वेकत्र सतोऽन्यत्रारोपो भ्रमः प्रसिद्धोऽत्यन्तासत्त्वे कथं प्रपञ्चो भ्रमः स्यात् सत्त्वे वा द्वैतसिद्धिः उक्तं च भट्टैः 'अध्यस्यते खपुष्पत्वमसत्कथमवस्तुनि प्रज्ञातगुणसत्ताकमध्यारोप्येत वा न वा नेत्याह– न्धपरम्परयेति । अन्धपरम्परया यो विकल्प इत्यन्वयः अयम्भावः संस्कारजन्यो भ्रमः संस्कारसिद्धये पूर्वप्रतीतिमात्रमपेक्षते न स्तुसत्त्वं प्रतीतौ सत्यां वस्तुसत्त्वाभावेन ब्रह्मव्यतिरेकादर्शनात् अतोऽनादित्वात्पूर्वपूर्वभ्रमदृष्टस्योत्तरोत्तर आरोपो भविष्यति न्धपरम्परान्यायेन व्यवहारः सेत्स्यतीत्यप्रयोजको हेतुरिति 'नन्वक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपामसोमममृता मूम' इत्यादिभिः कर्मफलस्य नित्यत्वप्रतिपादनादसत्त्वं न घटते न हि नित्यं वस्त्वसद्भवति तस्माद्वेदप्रतिपादितत्वाद्द्वैतं वेत्याशङ्क्याऽऽह–भ्रमयतीति । हे भगवंस्ते भारती भेदलक्षणा उरुवृत्तिभिर्बह्वीभिर्गौणलक्षणादिवृत्तिभिरुक्थजडान् र्मश्रद्धाभराक्रान्तमन्दमतीन् भ्रमयति म्होहयति अयम्भावः न हि वेदः कर्मफलं नित्यमभिप्रैति किन्तु लक्षणया प्राशस्त्यमात्रं थ्येकवाक्यत्वात् अन्यथा वाक्यभेदप्रसङ्गात् 'यद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति यायोपबृंहितश्रुत्यन्तरविरोधाच्च अतः कर्मजडानामिदं भ्रममात्रमिति एतेनैव तस्माद्वा एतस्मादात्मन आकाशः सम्भूत त्यादीनामप्यन्यपरत्वं दर्शितं भवति ॥

उद्भूतं भवतः सतोऽपि भवनं सन्नैव सर्पः स्त्रजः कुर्वत्कार्यमपीह कूटकनकं वेदापि नैवम्परः ।
अद्वैतं तव सत्परं तु परमानन्दं पदं तन्मुदा वन्दे सुन्दरमिन्दिरानुतहरे मा मुञ्च मामानतम् ॥२३॥ ॥३६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — मीमांसका हि कर्मण एव स्वर्गादिरूपपुरुषार्थहेतुत्वं निश्चित्य सर्वस्य वेदस्य क्रियापरत्वं यज्ञादिकर्तुर्यजमानस्य कर्माङ्गस्य स्तावकत्वेनोपनिषदामपि क्रियारत्वं वर्णयन्तीति तन्मताभिप्रायेणाक्षिपति–नन्विति ।

"आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥"

इति पूर्वपक्षसूत्रम् । अस्यार्थः —

"चोदनालक्षणोऽर्थो धर्मः ।" इत्युपक्रमात् "तस्य ज्ञानमुपदेशः ।" इति मध्ये परामर्शात् "तद्भूतानां क्रियार्थेन न्वयः ।" इत्युपसंहाराच्चाम्नायस्य क्रियार्थत्वमवगतम् । ततश्चायमर्थः — आम्नायस्य वेदस्य क्रियार्थत्वात् यज्ञादिक्रियापरत्वात् तदर्थानामक्रियार्थानां वेदानामानर्थक्यमनर्थता —

"सोऽरोदीत्तद्रुद्रस्य रुद्रत्वं प्रजापतिरात्मनो वपामुदखिदद्देवा वै देवयजनमध्यवसाय दिशो न प्राजानन् ॥"

इत्येवमादीनामानर्थक्यं धर्माधर्मरूपार्थप्रतिपादकत्वराहित्यं तस्मादेवं जातीयकं वाक्यजातमनित्यमुच्यतेऽनित्यमिव न नित्यमेव अपौरुषेयत्वेन तन्निरासात् । एवमादिवाक्यानामक्रियार्थत्वं तु रोदनवपोत्खातदिगज्ञानादिरूपसिद्धार्थबोधकत्वेनेति व्यम् ।

अथ सिद्धान्तसूत्रमाह —

"तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् ।" इति सूत्रम् ।

अस्यार्थः — तेषु पदार्थेषु रोदनवपोत्खातदिगज्ञानादिषु भूतानां वर्तमानानां पदानां सोऽरोदिदित्यादीनां क्रियार्थेन पदेन यजेतेत्यादिना समाम्नायः समुच्चारणं सम्बन्ध इत्यर्थः । कुतः । अर्थस्य पदार्थस्य तन्निमित्तत्वात् तस्य वाक्यार्थप्रत्ययस्य निमित्तत्वात् पदानि तावत्स्वार्थानभिदधति पश्चात्ते पदार्था आकाङ्क्षायोग्यतासन्निधिमत्त्वाद्वाक्यार्थमवगमयन्ति । अत आकाङ्क्षादिमहिम्ना रोदनादिवाक्यानां कथञ्चिद्विध्येकवाक्यता कल्पनीयेति तस्माद्यथाशक्ति आवेशेन क्रिया कर्तव्येत्यर्थः । "कल्प्यते —" इत्यादिसूत्रैर्मीमांसायां तत्रतत्र जैमिनिना वेदस्य क्रियापरस्याभिधानादुपनिषदामपि क्रियापरत्वमेव युक्तं यथोक्तमिति क्रत्वर्थः यज्ञाङ्गभूतो यः कर्ता यजमानस्तस्य प्रतिपादनं तत्त्वमसीत्यादिवाक्यैरीश्वराभेदेन स्तुत्यत्वेन निरूपणम् । एतेनोपनिषदां नैराकाङ्क्ष्यं सार्थकत्वं ब्रह्मप्रतिपादनरूपं प्रत्याख्यातमपास्तम् । उपनिषद्भिर्यजमानः स्तूयते न तु निर्विशेषं ब्रह्म प्रतिपाद्यत इति भावः । तदेवं वेदस्य क्रियापरत्वाभिधानमुपनिषदां नैराकाङ्क्ष्यमीश्वरस्य कर्माङ्गत्वं न भवतीत्याह-नेति । एकमेवाद्वितीयमित्यादिश्रुतिभिस्तदुक्ताद्विपरीतस्यात्मनः प्रतिपादनात् न ह्यद्वितीयपरमानन्दरूपात्मनः कर्माङ्गत्वं युज्यतेऽतो न भवति कर्तुः स्तुतिरियमित्यर्थः । कथं तर्हि वार्तिककृता तथा व्याख्यातम्, सत्यम्, एतव्द्याख्यानं तस्य वार्तिककृतोऽप्यननुमतमसम्मतमस्ति कथमिति चेदाह-सर्वत्रेति । असंसार्यात्मज्ञानं विना हि सर्वत्र विज्ञानं यत् किञ्चिद्विधज्ञानजातं संस्कारत्वेन गम्यते ज्ञायते परेषां कर्मणामङ्गं पराङ्गं ज्ञानं च प्राक्कृतस्यानुप्रवर्तकः संस्कारः जातमात्रस्य स्तनपानादिज्ञानं संस्कारवशादेव जायते औपनिषदं परमात्मज्ञानं तु गुरूपदेशं विना न भवतीति तात्पर्यम् । तेनैव वार्तिककृतैव एतदर्थमेवात्मज्ञानार्थमेव पूर्वोक्तश्रुतिसमूहविरोधनिवृत्त्यर्थं मननस्योपयोगोऽस्तीत्युक्तमेतदर्थं मननायेति । तत्र तावत्तव मतेऽपि द्वैतस्य स्वर्गादिविश्वस्य सत्यत्वे भवेदेवम्, उपनिषदां यजमानस्तुतिपरत्वं स्यात् । तदेव, उपनिषदां यजमानस्तुतिपरत्वमेव न सम्भवतीति प्रश्नत्तराभ्यां मननेन विचारेण तत्त्वावधारणस्य परमार्थनिश्चयस्य प्रकारं रीतिमाह-सत इति । धर्मिपक्षः, सतः परमेश्वरात् इदमनुमानं मीमांसकानाम् तत्र तस्मिन् सदभेदः साध्यते चेत्तदा दोषामाह-वेदान्ती-तर्कहतमिति । भेदसाधकेन हेतुनाऽभेदसाधनं युक्तिविरुद्धं हेतौ सत इति पञ्चम्या अपादानार्थकाया भेदप्रतीतेर्विरुद्धो हेतुरित्यर्थः । साध्याभावव्याप्तो हेतुर्विरुद्धः, यथा-शब्दो नित्यः कृतकत्वादित्यत्र कृतकत्वहेतुः साध्याभावेनानित्यत्वेन व्याप्तस्तथात्रापि सत उत्पन्नत्वरूपो हेतुरभेदरूपसाध्यस्याभावेन भेदेन व्याप्तः, वृक्षात्पत्रं पततीत्यादाविव यत्रापादाननिर्देशस्तत्र भेद इति नियमात् न । नन्वत्राभेदं पुनर्भङ्ग्यन्तरेणाक्षिपति-नन्विति । साधयामः किन्तु तदुत्पन्नत्वेन कुण्डलादिवद्भेदं प्रतिषेधामः तद्भेदनिषेधे च जगति सत्यत्वमेव सिद्ध्येत् एवं चापादाननिर्देशेन जातापि भेदप्रतीतिर्न भेदनिषेधस्य विरोधिनी, यथा-कनकात्कुण्डलमुत्पन्नमिति पञ्चम्या जातापि भेदप्रतीति कारणकार्ययोः कनककुण्डलयोः सुवर्णत्वेन भेदनिषेधसाधने विरुद्धा न, तथा-सत उत्पन्नत्वादित्यपादानपञ्चम्या जातापि भेदप्रतीतिर्ब्रह्मजगतोः सत्यत्वेन भेदनिषेधसाधने विरुद्धा नेति । तथा चेदमनुमानं विश्वं सद्भिन्नं न सत उत्पन्नत्वात्, यत् यत उत्पन्नं तत्ततो भिन्नं न, यथा-कनकादुत्पन्नं कुण्डलं कनकान्न भिन्नम् अत्र हेतोः साध्याभावव्याप्तत्वाभावान्न विरुद्धो हेतुरित्यभिप्रेत्याहुः स्वामिचरणाः-तत्राभेद एवेत्यादि । तत्र भेदनिषेधे अनैकान्तिकत्वेन व्यभिचारित्वेनेति व्यभिचरति-क्व चेति । हेतुमति साध्याभावो व्यभिचारः । यथा-पर्वतो वह्निमान्द्रव्यत्वादित्यत्र जलादौ द्रव्यत्वरूपहेतोः सत्त्वेऽपि वह्निरूपसाध्यस्यासत्त्वाद्व्यभिचारस्तथात्रापि पितुरुत्पन्ने पुत्रे मुद्गरप्रहारादुत्पन्ने घटध्वंसे च तत उत्पन्नत्वरूपहेतोः सत्त्वेऽपि तद्भेदाभावरूपसाध्यस्यासत्त्वाव्द्यभिचारः । पुत्रे पितृभेदस्याभावरूपे घटध्वंसे भावरूपमुद्गरप्रहारभेदस्य च प्रसिद्धत्वात् । आदिना चक्रघटादिग्रहः । तथादर्शनाद्भेददर्शनात् । इति भाव इति-भावादभावस्याभावाद्भावस्योत्पत्तिदर्शनात्र नियतं कार्यकारणाभेदमभावादप्यविद्यानाशाद्भावरूपस्य ज्ञानस्योत्पत्तेरिति तात्पर्यम् । पुनराक्षिपति-नन्विति । तदुत्पन्नत्वं तदुपादानकत्वं तथा चेत्थमनुमानं विश्वं सतो भिन्नं न सदुपादानकत्वात्, यद्यदुपादानकं तत्तत्ततो न भिन्नमिति, अतो नात्र व्यभिचारः । पुत्रे पितृभेदाभावरूपस्य घटध्वंसे च मुद्गरभेदाभावरूपस्य साध्यस्यासत्त्वे तदुपादानकत्वरूपहेतोरप्यसत्त्वात् । न हि पुत्रस्य पिता घटध्वंसस्य मुद्गरो वोपादानकारणं किन्तु पिता मुद्गरश्च । तत्र निमित्तकारणमेव पुत्रोपादानं वीर्यं घटध्वंसोपादानं कपालादीत्याशङ्क्याह-क्व च मृषेति । क्वचिदुपादानकार्यं मिथ्या भवतीत्यर्थः । तथा च रज्जूपादानके सर्पे पुनरपि व्यभिचारः, अत्र सर्पे रज्जूपादानकत्वरूपहेतोः सत्त्वेऽपि रज्जोर्भिन्ने सर्पे रज्जुभेदाभावरूपसाध्यस्यासत्त्वात्, रज्जोर्व्यावहारिकसत्यत्वात्सर्पस्य च प्रातीतिकत्वात् तत्र सर्पे रज्जुतो भेदो निराबाध एव, अन्यथा रज्जुज्ञाने जाते सर्पस्य बोधो न स्यात् । ननु सन्मात्रोपादानकत्वं हेतुः

च विश्वं सतो भिन्नं न सन्मात्रोपादानकत्वात् यत्तन्मात्रोपादानकं तत्ततो न भिन्नमित्यनुमानम्। तथा च न रज्जुसर्पे व्यभिचारः,
भेदाभावस्तदसाध्याभाववति मिथ्याभूते रज्जुसर्पेऽज्ञानयुक्तरज्जूत्पादके रज्जुमात्रोपादानकत्वरूपहेतोरभावादित्याशङ्क्य
त्यमत्रापीत्याह-न तथेति । उभाभ्यां सदविद्याभ्यां उभययुक् उभययुगपीदं जगन्न तथा सदित्यर्थः । अविद्यासंवलितस्यैव
णो जगदुपादानत्वं न सन्मात्रस्येति सन्मात्रोपादानकत्वरूपो हेतुर्विश्वस्मिन्पक्षे नास्तीति स्वरूपासिद्धो हेतुः, पक्षे हेत्वभावः
रूपासिद्धः। एवं च रज्जुसर्पादेरिव विश्वस्यापि कल्पनमध्यासमूलकमेव। अध्यस्तस्य च मिथ्यात्वाद्विश्वं मथ्यैवेति सिद्धम्।
मेवार्थोऽयमर्थ इत्यारभ्य न वस्तुसत्त्वं प्रपञ्चस्येत्यन्तेनोक्तं स्वामिचरणैः । पुनरत्राशङ्कते-नन्वित्यादिना । अनेन हेतुना सत
त्वादित्यनेन हेतुना हेत्वन्तरेणान्यहेतुना। तथा हि-विश्वं सत्, अर्थक्रियाकारित्वात्। न यदेवं न तदेवम् यथा शुक्तिरजतमित्यनुमानेन
सत्यत्वं साधयाम इत्याशङ्क्यात्रापि व्यभिचारमाह-व्यवहृतय इति । व्यवहृतयेऽर्थक्रियार्थं विकल्पो भ्रम इषित इष्ट एव
कार्षापणादिनेति । मिथ्याभूतकृत्रिमरजतसुवर्णादेरप्यर्थक्रियाकारित्वात्, आदिना मिथ्यागजागमने सत्यस्य भयाङ्गकम्पादेः
नाङ्गमसङ्गमसर्पादिनाऽसत्येन सुखभयादेर्भाविशुभाशुभस्य च ग्रहणम्, एवं चात्र सर्वत्र मिथ्याभूते
त्वरूपसाध्यस्यानधिकरणेऽर्थक्रियाकारित्वरूपहेतोः सत्त्वाद्व्यभिचार इत्याशयः । पुनरत्राक्षिपति-नन्विति। एकत्र सत्यत्वेन
विषयीभूतस्यान्यत्रारोपो भ्रमः। यथा-हट्टपत्तनादौ बिलादौ च सत्यत्वेन प्रमाविषयीभूतस्य रजतसर्पादेरन्यत्र शुक्तिरज्ज्वादावारोपो
स चात्र न सङ्गच्छते ब्रह्मणोऽन्यत्राधिष्ठाने प्रपञ्चस्य सत्त्वे तव द्वैतापत्तिः असत्त्वे च क्वाप्यदृष्टत्वेनाकाशपुष्पतुल्यस्य विश्वस्य
कथमारोपः तस्माद्विश्वं सत्यमेव न तु मिथ्येत्यभिप्रेत्यैवोक्तं भट्टैर्मीमांसकैः खपुष्पत्वमसत् अवस्तु तस्मिन् कथमध्यस्यतेऽध्यासः
सुगन्धादेः प्रज्ञाता गुणसत्ता यस्य रजतादेस्तत्प्रज्ञातगुणसत्ताकं शुक्त्यादावप्यारोप्येत भ्रमादि स्याच्चेत्तदभावेनाध्यारोपो
तीत्यर्थः । तथा च विश्वस्मिन्पक्षे सत्यत्वरूपसाध्यवत्येवार्थक्रियाकारित्वरूपहेतुरस्तीति न व्यभिचार इत्याशङ्क्य
भिचारतादवस्थ्यमेव वदन् हेतोः साध्यासाधकत्वरूपमप्रयोजकत्वमप्याह-अन्धेति । अन्धपरम्परया विकल्प इत्यन्वयः ।
शयमाह-अयम्भाव इति-संस्कारजन्यो भ्रमः स्वजनकसंस्कारसिद्धये पूर्वकालिकं ज्ञानमात्रमपेक्षते न तु यथार्थज्ञानं विषयसत्यत्वं
प्रतिज्ञानेनापि संस्कारसिद्धेः, तादृशसंस्कारमात्रेण चोत्तरत्र भ्रमसिद्धिः। यथा-यक्षशून्ये एव वटे ततोऽन्यत्र तत्प्रमायामजातायामपि
वटे यक्षो दृष्ट इति केनचिदन्धेनान्ध उपदिष्टस्तेनान्यस्तेनान्य इत्यन्धपरम्पराभ्रमसिद्धस्य मिथ्यारोपितस्यापि यक्षस्य
मरणाद्यर्थक्रियाकारित्वं दृष्टमेव तत्र, तथात्रापि। एवं च विश्वस्मिन्पक्षे सत्यत्वरूपसाध्यासाधकतयाऽर्थक्रियाकारित्वरूपो
प्रयोजकः, पक्षे हेतुरस्तु साध्यं मास्त्वित्युक्तेऽनुकूलतर्काभावात् तथा च प्रागुक्तव्यभिचारोऽपि तदवस्थ एव ।
शङ्कते-ननु —

"अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति । अपाम सोमममृता अभूम ॥"

इत्यादिश्रुत्यनुगृहीतस्य विश्वस्मिन् यदि सत्यत्वं न स्यात्तदा सर्वेषामर्थक्रियाकारित्वं न स्यादित्यनुकूलतर्कस्य सत्त्वाद्विश्वं
मेव तथा चात्र कूटकार्षापणमिथ्यायक्षादिनार्थक्रिया च महामूढानामेव न तु विज्ञानामपि विश्वस्मिञ्छरावादिना
रणजलपानाद्यर्थक्रिया तु महामूढानामिव नारददत्तात्रेयादीनां ज्ञानिनामपि समानैव ज्ञानिनामपि यदर्थक्रियाकर्तरि तत्सत्यमेवेति
द्विश्वं सत्यमेवेति हेतोरप्रयोजकत्वं व्यभिचारो वा नैवेत्याशङ्क्याह-भ्रमयतीति । हे हर ! तव वेदलक्षणा भारती
तिभिर्मुख्यालक्षणागौण्यादिवृत्तिभिः आदिनाऽऽसां भेदग्रहः । उत्तिष्ठति स्वर्गादिफलं यस्मात्तदुक्थं कर्म तत्र
कर्मश्रद्धाभराक्रान्तमतीन् वेदतात्पर्यानभिज्ञान् भ्रमयति मोहयति । अत्राशयमाह-अयम्भाव इत्यादि । तथा हि
र्थवादवाक्यस्थाक्षय्यामृतपदयोर्यागप्राशस्त्ये जहल्लक्षणा यतश्चातुर्मास्ययागः प्रशस्तस्तस्माच्चातुर्मास्ययागेनेष्टं
त्येवमक्षय्यमित्याद्युक्तार्थवादयोश्चातुर्मास्येन यजेतेति विधिनैकवाक्यत्वात्। यतो मीमांसकमतेऽर्थवादानां प्राशस्त्ये लक्षणा
स्वार्थपरित्यागेनैव विधिवाक्येऽन्वयश्च अन्यथा वाक्यभेदप्रसङ्गात् । एकोद्देशेनानेकविधानं वाक्यभेदः ।
यागजनितस्वर्गादिफलमुद्दिश्य चातुर्मास्यनामा यागो विधीयते, इत्येकं स्वर्गादिफलस्य नित्यत्वं चेति द्वितीयमित्युभयविधाने
वाक्यभेदः । स च वाक्यगतत्वान्महादोषः । लक्षणा चामृतादिपदगतत्वादल्पदोषरूपा । तस्मादक्षय्यामृतपदयोः
मात्रलक्षणया प्रशस्तयागमात्रमेव कर्म स्वर्गादिफलोद्देशेन विधीयते इत्येकस्यैव विधानान्न वाक्यभेद इत्यर्थः ।

ननु वेदान्तसिद्धान्ते "इन्द्रो वृत्राय वज्रमुदयच्छत्" इत्याद्यर्थवादानामपि स्वार्थे प्रामाण्यमङ्गीकृतं तद्वदय्यादिवाक्येष्वप्यस्त्विति चेन्न, स्वर्गादिः क्षयिष्णुः यागादिकर्मसम्पादितत्वात् कृष्यादि कर्मसम्पादितसस्यादिवदित्यनुमानगर्भितेन "तद्यथेह कर्मचितो लोकः क्षीयते" इत्यादिश्रुत्यन्तरेण विरोधात् दृष्टान्तदार्ष्टान्तिकयोरुक्तार्थवादयोर्महावैषम्याच्च । तथा चोक्तम् —

"विरोधे गुणवादः स्यादणुवादोऽधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ॥"

अयमर्थः — प्रमाणान्तरप्रविरोधे सत्यर्थवादो गुणवादः यत्राक्षय्यमिति "अमृता अभूम" इत्यादि च कर्मजन्यस्वर्गादिः सत्यत्वस्य तद्यथेहेत्यादिश्रुतिभिर्युक्तिभिश्च बाधितत्वात् । ऐहिकापेक्षया चिरकालसत्त्वपरत्वेनैव तद्वाक्यानां निर्वाहात् । प्रमाणान्तरावगतार्थबोधकोऽनुवादः यथा-अग्निर्हिमस्य भेषजमित्यादि हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वात् । प्रमाणान्तराविरुद्धार्थबोधको भूतार्थवादः । यथा- "इन्द्रो वृत्राय वज्रमुदयच्छत् ।" इत्यादि स्वर्गादिकं तथा च कर्मफलं यतः प्राशस्त्यपरत्वश्रुत्यन्तरविरोधवतो हेतोरित्यभिप्रेत्याह-नित्यमिति । कर्मजडानां भ्रममात्रम् एतेन जगतोऽनित्यत्वसाधनेनान्यपरत्वमद्वैतपरत्वमित्यन्तस्य तात्पर्यमाह तथा "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुतयोऽपि "नेह नानास्ति किञ्चन" इत्यादिनिषेधकश्रुत्यपेक्षितनिषेध्यसमर्पिका ब्रह्मोपादानकत्वोक्त्या जगतो ब्रह्मण्येवोत्पत्तिप्रलयावित्यद्वैतसाधिका वा न तु नानाविधद्वैतप्रतिपादनपराः । एवं च कूटकार्षापणादावुक्तदोषेऽप्यादिप-दोपात्तमिथ्याभूतस्यापि स्वप्नाङ्गनादेः स्वप्नाध्यायवाक्यैर्मूढ इव ज्ञानिन्यपि यावच्छरीरं भाविशुभाशुभफलोत्पादकत्वात् वीर्यपातादिजनकत्वाच्चार्थक्रियाकारित्वं दृश्यत एव । तथा च ज्ञानिनामपि यदर्थक्रिया तत्सत्यमेवेति नियमो भग्न एव तस्मादर्थक्रियाकारित्वरूपहेतावप्रयोजकत्वं व्यभिचारश्च तदवस्थ एवेति नानेनानुमानेन विश्वस्मिन्पक्षे सत्यत्वरूपं साध्यं सिद्ध्यति प्रत्युतानुमानगर्भितप्रागुक्तश्रुतिभिर्मिथ्यात्वमेवेति निश्चितं विश्वस्येति सङ्क्षेपः । किञ्च कर्मिणां गतागतप्रकारस्य श्रुत्या वर्णितत्वेनानित्यत्वमेव कर्मफलस्य । तथा च श्रुतित —

"अथ ये यज्ञेन दानेन तपसा लोकान् जयन्ति ते धूममभिसम्भवन्ति । धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान् षण्मासान् दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रलोकं प्राप्यान्नं भवन्ति तांस्तत्रैव देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेतांस्तत्र भक्षयन्ति । तेषां यदा तत्पर्यवेत्यथेममाकाशमभिनिष्पद्यन्ते आकाशाद्वायुर्वायोर्वृष्टिर्वृष्टेः पृथिवीं प्राप्यान्नं भवति एवमेवानुपरिवर्तन्ते ॥" इति ॥

स्फुटोऽर्थः कथ्यते-धूममभिसम्भवन्ति प्रथमं धूममभिमानिनीं देवतां प्राप्नुवन्ति । एवमुत्तरोत्तरं ज्ञेयम् । अपक्षीयमाणपक्षं कृष्णपक्षं यान् दक्षिणादित्य एति तान्षण्मासान् कर्कादिचापान्तानित्यर्थः । अन्नं देवानामन्नं तत्रस्था देवा यथा चन्द्रं चन्द्रादमृतं पिबन्ति तथा तान्भक्षयन्ति तेभ्यः पुण्यफलमन्नं भक्षयन्तीत्यर्थः । तेषां तत्पुण्यं यदा पर्यवैति नाशं गच्छति तदा सोमलोकादिममाकाशमभिनिष्पद्यन्ते प्राप्नुवन्ति । पृथिवीं प्राप्य मनुष्यादीनामन्नं भवति, इति अन्नाद्वीर्यरूपेण परिणतात्पुनर्जायन्ते इति । प्रवृतिमार्गपरेयं श्रुतिः । स्वामिनां तु-उद्भूतमिति । सतोऽपि भवतः सकाशात् उद्भूतं भुवनं न सत् यथा स्रजो मालातः उद्भूतः सर्पो न सत् तद्वत् कार्यव्यवहारं कुर्वदपि न सत् कूटकनकमिव, वेदोऽप्येवम्परः कर्मफलप्रतिपादनपरो न भवति किन्तु परमानन्दाद्वैतपर एवेत्याह तवाद्वैतं मद्द्वैतापादकं परमानन्दं सत्पदं तत्ततोऽहं वन्दे हे इन्दिरानुत ! स्पष्टमन्यत् । केचिदिदं पद्यं माथुरविप्रस्तुतिं पुरस्कृत्य कृष्णभक्तपरत्वेन योजयन्ति । तथा हि ननु —

"माथुरा मम पूज्या हि माथुरा मम वल्लभाः । माथुरे परितुष्टे हि तुष्टोऽहं नात्र संशयः ॥"

इति वाराहोक्त्या माथुराणां मद्भक्तत्वात्तत्कुलोत्पन्ना इमेऽपि विप्राः सन्त एवेति कुतो निन्दन्त इत्याशङ्क्याहुः-सत् इति । इदं दीक्षितविप्रवृन्दं सत् सतो दीक्षितकुलादुत्थितमुत्पन्नमिति चेन्न । नु इति वितर्के । यत इदं तर्कहतं युक्तिबाधितं तदेवाहुः-व्यभिचरति क्व चेति । त्रयीमयात्त्वत्प्रिययमुनाजनकात्सतः सूर्यादुत्पन्नस्यापि कर्णस्य दुष्टत्वदर्शनाव्द्यभिचार इत्यर्थः । किञ्च क्व च मृषेति-यथा श्रीवेदव्यासादुत्पन्नेऽप्यन्तर्निगूढदुष्टभावे धृतराष्ट्रे दृश्यमानादपि बहिःसाधुता मिथ्यैवेत्यर्थः । ननु "ईश्वरस्य विधिं को नु विधुनोत्यन्यथा पुमान्" इत्युक्त्या धृतराष्ट्रस्य श्रीकृष्णेच्छावशवर्तित्वान्न दुष्टत्वमित्याशङ्क्याहुः-न तथेति । तथापि यथा

ादिवाक्येष्वप्यस्त्विति
न "तद्यथेह कर्मचितो
कम् —
तः ॥"
दे च कर्मजन्यस्वर्गादिः
द्वाक्यानां निर्वाहात्।
प्रत्यक्षावगतत्वात्।
तथा च कर्मफलं यतः
भ्रममात्रम् एतेन
आकाशः सम्भूतः"
दानकत्वोक्त्या जगतो
गादावुक्तदोषेऽप्यादिप-
नाशुभफलोत्पादकत्वात्
वेति नियमो भग्न एव
यत्वरूपं साध्यं सिद्ध्यति
गतागतप्रकारस्य श्रुत्या

पक्षमपक्षीयमाणपक्षाद्यान
स्तत्रैव देवा यथा सोमं
भाकाशाद्वायुर्वायोर्वृष्टिवृष्टेः

ज्ञेयम्। अपक्षीयमाणपक्षं
देवा यथा चन्द्रं चन्द्रादमृतं
वैति नाशं गच्छति तदा
रूपेण परिणतात्पुनर्जायन्ते
यथा स्रजो मालातः उद्भूतः
भवति किन्तु परमानन्दाद्वैतपर
चदिदं पद्यं माथुरविप्रस्तुति

त इत्याशङ्क्याहुः-सत् इति।
हतं युक्तिबाधितं तदेवाहुः-
व्यभिचार इत्यर्थः। किञ्च क्व
त्यर्थः। ननु "ईश्वरस्य विधि
हुः-न तथेति। तथापि यथा

दयस्त्वयि भक्तास्तथा नायमन्तर्निगूढधूर्तभावत्वात्। ननु कर्णस्य सूर्योत्पन्नत्वेऽपि सहस्रकवचाख्यदैत्यावतारत्वाद्युक्तमेव ं दीक्षितानां विप्रत्वात्कथं दौष्ट्यमित्याकाङ्क्षायामाहुः-उभययुगिति। दीक्षितवृन्दमुभाभ्यां खलत्वब्राह्मणत्वाभ्यां युक्तं णत्वेऽपि कंसस्याहिताशंसनात्तदन्नवृत्तिभोगाच्च खलत्वम्। ननु तर्हि तथाविधास्ते कथं मद्भक्तैर्गोपैः प्रणतास्तत्राहुः-व्यवहृतये। दुष्टेष्वपि विप्रेष्वन्धपरम्परया विकल्पो विविधो नमस्कारादिकल्पनारूपो व्यवहार इष्ट एव खलेष्वपि तेषु ब्राह्मणत्वेन स्तथा व्यवहृतमित्यर्थः। ननु सर्ववेदवेद्ये मयि वेदविदोऽपि ते कथमभक्तास्तत्राहुः-भ्रमयतीति। अत्रापि पूर्व एवार्थः। एवं च तब्राह्मणनिन्दायां न तात्पर्यं किन्तु यदीदृशा वेदविदो विप्रा अपि श्रीकृष्णानुरागरहिता निन्द्या एव तदा किमु वक्तव्यम्। विधा इतर इति श्रेयोऽर्थिभिः सर्वथा श्रीकृष्णानुराग एव कार्य इत्यत्रैव तदित्याशयः ॥★॥

श्रीधरानुयायिनी — सत इदमित्यादेर्दीक्षितविप्रपक्षे प्रसिद्धपक्षे च व्याख्यानं पूर्वव्याख्यानेषु लिखितमतस्तत्रैव व्यम्॥ विश्वनाथी — समाम्नायस्येति पूर्वपक्षसूत्रं तद्भूतानामिति सिद्धान्तसूत्रम् तत्र प्रथमसूत्रस्य तस्मादनित्यमुच्यत इति शेषः।

"सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं प्रजापतिरात्मनो वपामुदखिदत्। देवा वै देवयजनमध्यवसाय दिशो न प्रजानन्॥"

इत्येवमादीनामतदर्थानां न सांशयत्रयवती भावनाऽर्था येषां पुरुषास्वाधीनत्वेन विधौ पर्यवसाययितुमशक्यानामानर्थक्यं । सोऽरोदीदिति यव्द्यशीर्यत तद्रजतमभूत् प्रजापतिरात्मनो वपामुदखिददिति इत्यादेरर्थस्तु तेषु रोदनवपोत्खातदिगज्ञानादिषु नां सिद्धार्थप्रतिपादकत्वेन वर्तमानानां विधिप्रत्ययशून्यानां क्रियार्थेन क्रियाप्रतिपादकेन "बर्हिषि रजतं न देयम्। यजेत। वायव्यं श्वेतमालभेत ॥" इत्यादिनासमाम्नायसमुच्चारणसम्बन्ध इत्यर्थः। कर्मपरवाक्येन सम्बन्धेऽयं प्रकारः-यतो रूपामङ्गलजन्यं तद्रजतमतो बर्हिषि योगे न देयमिति। यतो वायुः क्षिप्रकार्यकारी देवोऽतो वायव्यं वायुसम्प्रदानकं श्वेतमजमालभेत तो ब्रह्मणा निजवपया मेदसा पशुर्निर्मितो विशिष्टफलत्वात्पशुना यजेत, यतो देवानामपि देवयजनाधिष्ठाने नमतोऽन्यत्रानासक्त्या यजेतेत्येवं विधिनिषेधवाक्योपक्षिप्तप्राशस्त्यनिन्दान्यतरपूरणेनान्वये कृते सर्ववेदस्य क्रियापरत्वसिद्ध्या र्थकत्वनिरासेन प्रामाण्यं सिद्धम्। "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविध्युपात्ते सर्वस्मिन्वेदे न कस्यापि स्यानर्थक्यासम्भवान्निरर्थकाध्ययनविध्यनुपपत्तेरित्यर्थः। कथितसिद्धान्तसूत्रशेषस्यार्थमाह-अर्थस्य रोदनादेस्तन्निमित्तत्वात् स्यैवार्थः फलं यस्य तस्य भावतस्तत्त्वं तस्माद्यतः स रोदनादिरूपोऽर्थो निन्दाप्राशस्त्यद्वारा क्रियायामेवान्वितो बभूव तस्मादन्यैरपि शक्त्यावेशेन क्रियैव कर्तव्येति यत्र यत्र वेदस्य क्रियापरत्वं न दृश्यते तत्र तत्रेत्यर्थः। उपनिषदां तत्त्वमस्यादिवाक्यानामपि विधित्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरिति द्वितीयपादोक्तसूत्रसिद्धान्तेनोपनिषदां नैराकाङ्क्ष्यं वयं कर्मपराः कथं स्याम काङ्क्षयाराहित्यं क्रियापरत्वेन सार्थकत्वमिति यावत्। केन प्रकारेण व्याख्यातमित्यपेक्षायामाह-क्रत्वर्थो यज्ञाङ्गरूपो यः कर्ता मानस्तस्येश्वराभेदेन स्तुत्या वर्णनम्। यथादित्यो यूपः, इह स्तुत्या यूपः पशुनियोजनक्रियायामन्वेति यजमानः प्रस्तरः, प्रस्तरः लपुत्तल इति स्तुत्या क्रियानिष्पत्तावन्वेति तत्त्वमस्यादीनां तद्वैपरीत्यान्न क्रियापरत्वं यदुक्तमानर्थक्यमतदर्थानां तन्न विधिना प्रयोजनवदर्थपर्यवसायित्वं गमयता सहैकवाक्यत्वादर्थवादवाक्यानि स्तुत्यर्थेन स्तुत्यङ्गत्वेन विधीनां स्युर्विधिशेषाणि भवन्तीति । वैपरीत्यं स्फुटयति-एकं सजातीयभेदशून्यं यजमानसजातीया बहवो यजमानास्तिष्ठन्ति, अद्वितीयं विजातीयभेदशून्यं विजातीयाः शूद्राद्या बहवः सन्ति। ब्रह्म व्यापकं यजमानो हि परिच्छिन्नः कोष्ठैकदेशस्थत्वात् विज्ञानं चिन्मात्रं यजमानो हि जडग्रन्थ्यहङ्कारवत्त्वेन न ज्ञानमात्रं ब्रह्म हि आनन्दमात्रं यजमानो हि दुःखात्मककर्मकारणाद्दुःखी ब्रह्म हि चक्षुःश्रोत्रादिशून्यं तादृक्त्वेऽन्धबधिरादिदोषवत्त्वाद्यज्ञानधिकाराद्यजमानत्वमेव हीयते —

"अर्थी समर्थी विद्वान्यजेत" इत्यादिश्रुतेः। इत्थं सुखस्वरूपस्यात्मनः क्षुद्रस्वर्गादिसुखार्थं प्रवृत्त्यसम्भवात् न हि सम्राट मनोद्धर्तुरधिकारिणोऽधिकारं स्वप्नेऽपि नेच्छति यथा तद्वत्। ननु भवतु वेदान्तमत इत्थं परन्त्वस्माभिर्निर्जाचार्यवार्तिककृत मनःकर्माङ्गतालक्षणा पाल्यैवेत्याशङ्क्याह-अननुमतमिति। तदाह एतदात्मनः कर्माङ्गत्वं सर्वत्रैव हीति सर्वस्मिन्नेव वेदे यं द्रव्यदेवतावघातादिविषयं ज्ञानं "व्रीहिभिर्यजेत" "वैश्वदेव्यामिक्षा" "व्रीहीनवहन्यात्" इत्यादिवाक्यजन्यं संस्कारत्वेन स्वरूपत्वेन गम्यते ज्ञायते यथा प्रोक्षणादिसंस्कारादेवापूर्वोत्पत्तिस्था वेदवाक्यजन्य एव व्रीहिज्ञाने कश्चन फलप्रापको

भवति न तु पौरुषवाक्यजन्ये तदेव संस्काररूपं विज्ञानं परस्य यागादिकर्मणोऽङ्गं च संस्कारस्य स्वतः फलत्वाभावात्, किन्त्वात्मज्ञानादन्यत्र उपनिषज्जन्यात्मज्ञानं विना आत्मज्ञानं च न संस्काररूपं न कस्यापि कर्मणोऽङ्गं तस्य स्वयम्प्रकाशत्वात् परमानन्दरूपत्वेन परमाङ्गिकत्वात्। पराभिमतोपनिषद्वाक्यानां क्रियापरत्वं तन्निवृत्तये यन्मननं विधिनिषेधप्रत्ययरहितानामे-वोपनिषद्वाक्यानां युक्तिभिः सिद्धे ब्रह्मणि तात्पर्यावधारणं तदर्थं तत्र मीमांसकमत एवं भवेदात्मना कर्माङ्गत्वं भवेद् द्वैतस्य सत्यत्वं चेति प्रश्नोत्तराभ्यां मीमांसकस्य प्रश्नो वेदान्तिनामुत्तरं ताभ्यां यन्मननं श्रुत्यर्थस्य युक्तिभिर्मनस्यवस्थापनं तेनेत्यर्थः ॥ (२३) ॥३६॥

नीलकण्ठी —

एवं गुरुमुपासीनः श्रुतोपनिषत्कः शास्त्रात्प्रपञ्चस्य ब्रह्मविवर्तत्वमज्ञानपरिणामत्वमज्ञानस्य च तुच्छत्वमित्यवगच्छति अत्रापि "यत उदयास्तमयौ विकृतेर्मृदि वा विकृतात्" "भिदा यदबोधकृता" "असदामनुजात्" इति तत्त्रयमुक्तं तत्राशङ्कते-सत इदमिति। इदं सत् सदुत्थत्वात् यद्यदुत्थं तत्तदात्मकं यथा कनकोत्थं कुण्डलं कनकात्मकम्। यद्वा-इदं सदुत्थम् अनात्मत्वे सति सत्त्वात् यद्यदात्मकं तत्तदुत्थं यथा कनकात्मकं कुण्डलं कनकोत्थमिति। अत्र कारणस्य श्रुतिसिद्धं सत्यत्वमाश्रित्य प्रपञ्चस्य सत्यत्वं साध्यत इत्येकः पूर्वपक्षः। प्रपञ्चस्य रज्जुभुजङ्गादिवद्बाधादर्शनात्तत्सत्यत्वमाश्रित्य तत्कारणस्य प्रधानादेः सत्यत्वं साध्यत इत्यन्वयः। तदेतद्द्वयं तन्त्रेण निरस्यति-ननु तर्कहतमिति। सर्वथापि निर्युक्तिकमेतदित्यर्थः। तथा हि-सुदत्थत्वं सद्विवर्तत्वं सत्परिणामत्वं वा आद्ये इष्टापत्तिः द्वितीये परिणामिनः सतः क्षीरादिवदनित्यत्वेन कारणत्वासिद्धिरित्याह-व्यभिचरति क्व चेति। ननु दध्यादावपि प्रधानगतं सुखदुःखमोहात्मत्वमस्त्येव कुण्डलादाविव कनकात्मत्वमतः कनकवदस्य नित्यत्वं स्यादत आह-क्व च मृषेति। सुखाद्यात्मकस्यापि स्वप्नाङ्गनादेः कार्यस्य मृषात्वात्तत्कारणस्यापि मृषात्वं दुर्वारमित्यर्थः। अस्तु तर्हि कार्यस्यासत्यत्वमत आह-न तथोभययुगिति। स्वप्नाङ्गना हि न स्वघटादिवदबाध्या अनुभवविरोधात्। नाप्यत्यन्तमसती शशशृङ्गवत् चरमधातुविसर्गान्तार्थक्रियाकारिरित्यादिसुखहेतुत्वात्, न च तादृशपरस्परविरुद्धधर्मद्वययोगि एकं वस्त्विति वक्तुं शक्यमतो न सत्या किन्त्वनिर्वाच्या। यच्चास्या उपादानं निद्रादिरूपमज्ञानं पराभिमतं प्रधानं वा तदप्यनिर्वाच्यं वाच्यं कार्यकारणयोः साजात्यनियमात्। एवं द्वितीयानुमानेऽप्येतैरेव श्लोकपदैर्हेत्वसिद्धिर्वक्तव्या। तथा हि-कार्यस्य सत्त्वात्कारणमपि सदिति चेत् ननु तर्कहतं सत्यस्यापिभयकम्पादेर्हेतौ रज्जुसर्पे मृषात्वदर्शनात्। न चायं सन् सत्त्वे ह्यस्य विज्ञानमात्रं देशान्तरस्थत्वं स्मर्यमाणत्वं वा वाच्यम्, नायं सर्प इति स्वाधिष्ठाने बाधितत्वात्। किञ्चिद्विज्ञानं सद्विषयं किञ्चिदसद्विषयम् इन्द्रियाणि किञ्चित्सन्निकृष्टमर्थं गृह्णन्ति कंचिदसन्निकृष्टं स्मर्यमाणं किञ्चिदिदन्तया गृह्यते किञ्चिदनिदन्तयेति पक्षत्रयेऽपि व्यभिचार इत्याह-व्यभिचरति क्व चेति। तस्मात् रज्जुसर्पः सत्यः नापि शशशृङ्गवदत्यन्तमसन्नित्याह-क्व च न मृषा नेति। असत्त्वपक्षे अलीकमपि नेत्यर्थः। शशशृङ्गरज्जुसर्पयोर्निःस्वरूपत्वे समानेऽपि, अन्त्यो दृश्यत्वाद्भयादिकार्यजनकत्वाच्च नात्यन्तमसन् शशशृङ्ग तद्विपरीतत्वादत्यन्तमसदित्यर्थः। नन्वत्यन्तसत्त्वे अत्यन्तासत्त्वे चासिद्धे अस्तूभयात्मेत्याशङ्क्याह-तथोभययुगिति। यथा मृषा न तथा सदसदात्मापि न विरोधादित्यर्थः। तस्मात्सत्त्वेनासत्त्वेन सदसदात्मत्वेन वा निर्वक्तुमशक्यत्वेनानिर्वाच्यत्वात् मिथ्याभूतमपि रज्जुसर्पशङ्काविषादिकं व्यवहारकालाबाध्यभयमरणाद्यर्थक्रियाकारि दृष्टम्, तथा वियदाद्यपि स्वरूपेणेन्द्रजालवन्मिथ्याभूतमपि स्वर्गनरकबन्धमोक्षगुरुशिष्यादिव्यवहारकालाबाध्यव्यवस्थाहेतुर्भविष्यति स्वप्नाङ्गनासङ्गमवदबाधितार्थक्रियाकारित्वेऽप्यनिर्वाच्यं वियदादि तादृशाज्ञानोपादानकमिति सिद्धं प्रधानादेरनिर्वाच्यत्वम्। नन्विदं सत्यमिदं मिथ्येति सत्यसर्परज्जुसर्पयोः कथं विविक्ताकारेण कल्पनं सर्वस्य तुल्यवन्मिथ्यात्वे तदनुपपत्तेरित्याशङ्क्याह-व्यवहृतये विकल्प इति। स्वप्नदृष्टरज्जुरज्जुभुजङ्गयोर्मिथ्यात्वाविशेषेऽपि रज्जुः सत्या रज्जुभुजङ्गो मिथ्येति स्वाप्नव्यवहारमात्रालम्बनो विकल्पो न वस्तुतत्त्वावलम्बनः। एवं जाग्रत्यपि भविष्यति न हि गरुडभावनाशङ्काविषादेरसत्याज्जातो विषदेहवियोगस्तत्प्रतियोगी वर्तमानो वा विषदेहसंयोगः परमार्थसत्य इति वक्तुं शक्यं शून्यभावनयापि पारमार्थिकं नैरात्म्यं सेत्स्यतीति जितं माध्यमिकेनेति भावः। ननु जाग्रद्दृष्टौ सत्यमिथ्यारूपौ स्वप्नेऽपि संस्कारवशात्तेन रूपेण भात इति युक्तं तत्र द्वयोरपि मिथ्यात्वम्। तर्हि जाग्रत्यपि प्राग्भवीयभ्रमसंस्कारवशादेतद्युज्यते अनादित्वाच्च भ्रमतत्संस्कारपरम्परायाः न क्वचिद्दृश्येषु सत्यासत्यविभागोऽस्तीत्याह-इषितोऽन्धपरम्परयेति। आरोपे हि

स्वतः फलत्वाभावात्,
तस्य स्वयम्प्रकाशत्वात्
ङ्तानामे-वोपनिषद्वाक्यानां
त्यत्वं चेति प्रश्नोत्तराभ्यां
३६॥

तुच्छत्वमित्यवगच्छति
त्रयमुक्तं तत्राशङ्कते-सत
सदुत्थम् अनात्मत्वे सति
त्यत्वमाश्रित्य प्रपञ्चस्य
धानादेः सत्यत्वं साध्यत
हि-सुदत्थत्वं सद्विवर्तत्वं
-व्यभिचरति क्व चेति।
नेत्यत्वं स्यादत आह-क्व
तर्हि कार्यस्यासत्यत्वमत
यन्तमसती शशशृङ्गवत्
त वक्तुं शक्यमतो न सत्या
वाच्यं कार्यकारणयोः
ारणमपि सदिति चेत् ननु,
तरस्थत्वं स्मर्यमाणत्वं वा
कश्चित्सन्निकृष्टमर्थं गृह्णन्ति
भचरति क्व चेति। तस्मात्
अलीकमपि नेत्यर्थः।
नात्यन्तमसन् शशशृङ्गं
भययुगिति। यथा मृषा न
र्वाच्यत्वात् मिथ्याभूतमपि
णेन्द्रजालवन्मिथ्याभूतमपि
क्रियाकारित्वेऽप्यनिर्वाच्यं
सर्पयोः कथं विविधाकारेण
जङ्गयोर्मिथ्यात्वाविशेषेऽपि
जाग्रत्यपि भविष्यति न हि
ार्थसत्य इति वक्तुं शक्यं
सत्यमिथ्यारूपौ स्वप्नेऽपि
शादेतद्युज्यते अनादित्वाच्च
रम्परयेति। आरोपे हि

र्वप्रतीतिमात्रमुपयुज्यते। ननु प्रतीतस्य स्वरूपसत्त्वमपि तेन विनापि संस्कारमात्रादुत्तरभ्रमसम्भवात् मूर्खपरम्परयायं सत्यासत्यविकल्प षितोऽभ्युपगतो न शास्त्रदृग्भिरित्यर्थः। नन्वेतदेव शास्त्रतत्त्वं सर्वेऽपि कुतो न जानन्तीत्याशङ्क्याह-भ्रमयतीति। ते तव भारती निःश्वासरूपा वेदवाणी- "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इति। "अपामसोमममृता" "प्रजामनु प्रजायसे तदु ते मर्त्यामृतं नापुत्रस्य लोकोऽस्ति" इत्यादिका उक्थजडान् उत्तिष्ठति स्वर्गादिफलं यस्मात्तदुक्थं कर्म प्रतीकोपास्तिश्च तत्र विषये श्रद्धाजडान् उरुवृत्तिभिः बह्वीभिर्गौणलक्षणादिशब्दवृत्तिभिः भ्रमयति मोहयति यस्मादतस्ते शास्त्रतत्त्वं न जानन्तीत्यर्थः। अत्र शब्दवृत्तिस्तावत्त्रिविधा-मुख्या गौणी लक्षणा च। आद्या-जातिसङ्केतयोगैस्त्रिधा। तत्र जातिशब्दाः-गौः, घटः अश्वकर्ण इत्यादयः। सङ्केतशब्दाः-डित्थ डवित्थ इत्याद्याः। योगस्त्रेधा-कृत्तद्धितसमासभेदात्। आद्यौ प्रकृतिप्रत्यययोगौ द्वौ, अन्त्यः पदद्वययोगः, पाठकः औपगवः पङ्कजम्। गौणी तु-लक्ष्यमाणगुणयोगात्परशब्दस्य परत्र प्रवृत्तिः, यथा यजमानः प्रस्तरः सिंहो देवदत्तः। अत्र हि यजमानशब्देन यजमानगतं क्रतुनिर्वर्तकत्वं तत्प्रस्तरेऽप्यस्ति एवं सिंहवत्क्रौर्यं देवदत्ते सेयं लक्षितलक्षणेत्युच्यते। लक्षणापि शब्दस्य स्वशक्यसम्बन्धे वृत्तिः। सा त्रिधा-जहत्स्वार्था अजहत्स्वार्था जहदजहत्स्वार्था च। गङ्गायां घोष इत्याद्या अत्र गङ्गापदशक्यस्य प्रवाहस्य घोषाधारत्वासम्भवात्तत्सम्बद्धे तीरे गङ्गापदस्य वृत्तिः। सोऽयं देवदत्त इति तृतीया-अत्र हि तद्देशकालविशिष्टो देवदत्तस्तच्छब्दार्थः, एतद्देशकालविशिष्ट इदम्-शब्दार्थः। तत्र विशिष्टयोरभेदासम्भवादुभयत्र विशेषणांशं त्यक्त्वा विशेष्ये देवदत्तस्वरूपमात्रे तदिदंशब्दयोर्वृत्तिः। एवं तत्त्वमस्यायमात्माब्रह्मेत्यादावप्येषैव लक्षणेति वक्ष्यते। क्वचिद्वाक्येऽपि लक्षणा भवति। यथा विषं भुङ्क्ष्वेति। अत्र हि विषभोजनरूपस्वार्थपरित्यागेन शत्रुगृहे न भोक्तव्यमित्यस्मिन्नर्थे वाक्यं वर्तते। एवं सति ये कर्मजडाः ते "अक्षय्यं ह वै अमृता अभूम" इत्यादावक्षय्यादिशब्दानां यत्कृतकं तदनित्यमिति न्यायेन तदनुगृहीतया "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुत्या च गम्यमानं कर्मफलस्यानित्यत्वं स्वयमप्रतिपद्यमानाः "आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते" इति स्मृत्या व्याख्यातमपि चिरकालतामात्रपरत्वं न पश्यन्ति तान्कर्मफलस्य नित्यत्वं मन्यमानान्भारती भ्रमयति। एवं ये उपासनाजडाः।

"अथ योऽन्यां देवतामुपास्तेऽन्योसावन्योऽहमस्मीति न स वेद। यथा पशुरेव स देवानां तदेव ब्रह्मत्वं विद्धि। नेदंयदिदमुपासते॥ यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति। सर्वं परादाद्योन्यत्रात्मनः सर्वं वेद॥"

इत्यादिभेददर्शननिन्दायां सत्यामपि एष ह्येव साधुकर्मेत्यादिशास्तृशास्यभेदश्रुतेरौपाधिकभेदपरत्वं सत्स्वपि नान्योऽतोऽस्ति द्रष्टा तत्त्वमस्यहं ब्रह्मास्मीति जीवब्रह्माभेदपरवाक्येषु अप्रतिपद्यमानाः भेदं सत्यं मन्वते तानपि भ्रमयति तानपि भ्रमयति भारती।

तथा च श्रुतिः —

"न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव। नीहारेण प्रावृता जल्प्याचासुतृप उक्थशासश्चरन्ति॥" इति।

स्मृतिरपि —

"यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः। वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥" इति॥

ये तु हार्दादिविद्याविदोऽहङ्ग्रहेण ब्रह्मोपासते ते भेददृष्ट्यभावान्मूर्धन्यनाड्यार्चिरादिमार्गेण ब्रह्मलोकं गत्वा तत्रैव लब्धात्मबोधा ब्रह्मणा सहैव मुच्यन्ते। तथा च श्रुतिः —

"शतं चैका च हृदयस्य नाड्यः।" इति। "ते ब्रह्मलोके तु परान्तकाले" इति। एवं च कर्मप्रजास्तुतिपरो वेदः कर्मणामक्षय्यफलत्वं प्रजायाश्चामृतत्वं ब्रवीति न तात्पर्येणेति भावः (२३) ॥३६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सत इदमित्यस्य टीकायां आम्नायस्येति पूर्वपक्षसूत्रं तद्भूतानामिति सिद्धान्तसूत्रम्। तत्र प्रथमसूत्रस्य तस्मादनित्यमुच्यत इति शेषः। अर्थश्च —

"सोरोदीत् यदरोदीत् तद्रुद्रस्य रुद्रत्वं प्रजापतिरात्मनो वपामुदखिदत्। देवा वै देवयजनमध्यवसायादिशो न प्रजानन्॥"

इत्येवमादीनामतदर्थार्थानां पुरुषास्वाधीनत्वेन विधौ पर्य्यवसाययितुमशक्यानामानर्थक्यं स्यात्। यत आम्नायस्य क्रियामात्रार्थ(त्व)तां विना फलासिद्धेः। तस्मादेवं जातीयं वाक्यजातमनित्यमुच्यते। धर्माधर्मप्रमिति रूपनित्यकार्य्यकर्तृत्वाभावात् न तु स्वतोऽप्यनित्यत्वम्। अपौरुषेयत्वात्। कथं तद्भूतानामिति सिद्धान्तसूत्रस्य तु अर्थस्य तन्निमित्तत्वादिशि शेषः। अर्थश्च तेष्वेव पदार्थेषु भूतानां वर्तमानानां वेदानां क्रियार्थेन कार्यार्थेन समाम्नायः समुच्चारणं सम्बन्ध इत्यर्थः। क्रियैव सर्वेषामर्थानां निमित्तं फलमिति यस्मात्ते क्रियायां तथा तथाविष्टा बभूवुः तस्मादन्यैरपि यथाशक्त्यावेशेन कर्तव्या सेति भट्टवार्तिके। प्रज्ञातो गुणो रूपं सत्ता च यस्येति विग्रहः। पुनः श्रुतौ चातुर्मास्ययाजिन इति चतुर्षु चतुर्षु मासेषु क्रियन्त इति चातुर्मास्यानि। प्रागुक्तानि वैश्वदेवादीनि। तैरिष्टवान् तस्येति तव्द्याख्यायां न तथोभययुगिति शिरश्चालन एव 'नञ्' सङ्गच्छते। स्वव्याख्यायां तु — ननु कथमावसथानां पुरुषसारहरत्वं विश्वस्य सच्चिदानन्दघनात् त्वत्त उत्थितत्वेन स्वर्णतद्विकारवत्तदेकरूपत्वात्। तदुत्थितत्वं च श्रूयते। 'यतो वा इमानि भूतानि जायन्ते' इत्यादौ। अतो नारोपितत्वमपि मन्तव्यम्। जनधातोः विवर्ते प्रयोगासिद्धेः। यदि वा गौणीवृत्तिमारोप्य युक्त्यन्तरेण मन्यते तदा विवर्तवादेऽद्वैतमात्रस्य मिथ्यात्वात्। पदाम्बुजह्रदमिति न घटते तस्यापि हेयत्वापातात्। तस्य तु मोक्षादप्यधिकपुरुषार्थत्वमुक्तं न परिलषन्ति केचिदित्यादौ ततो युक्त्यन्तरं चावश्यं हेयम्। तदेतदाशङ्क्य न तदेकरूपत्वं न चारोपितत्वं किन्तु नश्वरादिरूपत्वमिति वदन्त्यः पूर्व्वोक्तमेव स्वेषामपि दर्शयन्ति-सत इति। तत्र स्वमते पूर्वपक्षमनूद्यात्यन्ताभेदं निषेधयन्ति। सतः सदेव सौम्येदमग्र आसीदिति। सच्छब्देन कारणतया निर्दिष्टत्वात्सच्चिदानन्दरूपात् त्वत्त उत्थितं जातमिदं विश्वं सत्। तादृशत्वादभिन्नमिति चेत् तन्न घटते। नु वितर्के। तर्कहतं हि तत् अपादाननिर्देशेन स्वर्णतद्विकारादौ कारणत्वकार्यत्वरूपावस्थाभेददर्शनेन च भेदप्राप्तेः। न च सतो जगत्तादृशो विकारः सत्त्वविरोधादेवेत्यर्थः। तस्माच्चिन्नतामण्यादेर्नानापदार्थवदेव तस्मात्तदुत्थितमिति स्थिते तद्वदेव ततो विश्वस्य वैलक्षण्यमित्याहुः-व्यभिचरति क्व चेति। ततः सम्यक् त्वद्धर्माननुगतेर्न सच्चिदानन्दरूपत्वं विश्वस्येति स्थितम्। ननु तर्हि न कथं रज्जुसर्पादिवद्विवर्तरूपमेवास्तां तत्राहुः-क्व च रज्ज्वादौ सर्पादिकं मृषा आरोपितमेव न तु तस्मादुत्थितम्। विश्वस्य तदुत्थितत्वमेव धर्मीकृतम्। तच्च शास्त्रे श्रूयत इत्यर्थः। ननु शास्त्रमप्युत्थितत्वमेव वदतु तत्राहुः-न तथोभययुगिति। स तु न तथा आरोप्यारोपकाभ्यां युज्यते। अविषयत्वादित्यर्थः। तद्वा तत्रैव विवर्तो न्याय्यः यदध्यारोपापवादसामान्यांशे च प्रकटे सर्पत्वाध्यारोपभाक् स्यात्। पुनर्विशेषांशे व्यक्तत्वापवादभाक् स्यात्। न त्वेकस्मिन्नेवांशे विवर्तवादिनां तु नाशभेदस्वीकार इति। किञ्च। जलादिमयं जगदिदं न प्रातीतिकमात्रसत्ताकं यथा खं यावदर्थक्रियाकारित्वात् यन्नैवं तन्नैवं यथा मरीचिकाजलादि। एवमाहुः विकल्पः कूटकनकादिरूपोऽर्थस्तुन तथा किन्तु क्यविक्रयादिलक्षणव्यवहारमात्रायेष्टः न तु रसायनादिप्रयोगाय। दानतः पुण्याय वा स च व्यवहारो न तदभिज्ञेषु किं त्वन्धपरम्परयैव स्यादिति। यद्वा। व्यवहारसिद्धये विवर्तवादः। खल्वनादिसिद्धज्ञानपरम्परयैवेष्टः अद्वैतभङ्गभयात् स चेत् दोष एव। यथोक्तं शारीरकभाष्ये विज्ञानवादनिराकरणे। अनादित्वेऽप्यन्धपरम्परान्यायेनाप्रतिष्ठैवानवस्थाव्यवहारलोपिनी स्यात् नाभिप्रायसिद्धिरिति एतदुक्तं भवति। यथेदं सुवर्णं केन क्रीतमिति प्रश्ने कश्चिदाह अनेनान्धेनेति। अनेन कथं परिचितमिति पुनराह तेनान्धेन परिचायितं तेन च कथमित्याह केनाप्यपरेणान्धेनेत्यनवस्थान्धपरम्परयापि न सिद्ध्येव्द्यवहारः। किन्तु तत्रान्धपरम्परायां यद्येकोऽपि चक्षुष्मान् सर्वादिप्रवर्तको भवति तदैव सिद्ध्यति। यथा च तत्र सर्वेष्वपि चक्षुष्मत एव व्यवहारसाधकत्वम्। तथा कस्मिंश्चिदारोप्ये वस्तुनि सत्ये सत्येवान्यत्रारोपेण व्यवहारः सिद्ध्यति तदेवानुसन्धाय प्रवृत्तेः तद्विना भ्रमादर्शनव्यासेश्च प्रयोगश्च जगत्परम्पराभ्रमसिद्धम अनादिसिद्धद्रव्यवत् यद्भ्रमसिद्धं द्रव्यं तन्नानादिसिद्धम्। यथा शुक्तिरजतादीनि। किञ्च कुत्रापि वस्तुनः कल्पना न दृश्यते षष्ठभूतादीनां कल्पयितुमशक्यत्वात् किन्तु सम्बन्धकल्पनैव दृश्यते। सैव च मिथ्याशब्देनोच्यते। यथा शुक्त्यादौ रजतादेः। यथा अपामसोमममृता अभूमेत्यादिश्रुत्यवष्टम्भेन पुनरनीश्वरवादिनःप्रत्युत्तिष्ठन्ते। तान् प्रत्याहुः-भ्रमयतीति-उक्थाख्यान्मन्त्रविशेषान यज्ञे शस्यन्ते तदादिभिर्जडान्। भट्टेनापि सृष्ट्यादिकमङ्गीकृतम्। अथवेतिहासपुराणप्रामाण्यात् सृष्टिप्रलयावपीष्येते। इति तस्माद्विश्वमिदं न च सच्चिदानन्दरूपं न च विवर्तरूपं किन्तु नश्वरादिरूपमेवेति स्थितम्। श्रुतयश्च 'यथोर्णनाभिः सृजते यथा पृथिव्यामोषधयः सम्भवन्ति। यथासतः पुरुषात् केशलोमानि। तथाक्षरात्सम्भवन्तीह विश्व'मित्याद्याः। अत्राक्षरशब्दाद्दार्ष्टान्तिकस्य वैलक्षण्यं च दर्शितवत्यः ॥२३॥३६॥

वैराग्याथ
सत्यम्। तत्र हेतुः
चेत्। ननु भो त
मुहूर्तान्तरे विलयन
मृषेति। मरीचिको
चेन्न, नेदं युक्तमित्य
मरीचिकाजलदृष्टान
विविधानन्तवैचित्र
विविधकल्पनाशत
वेदार्थज्ञाः पण्डिता
युक्तिबाधितमिति चे
इति सदसद्रूपमित्य
आत्माद्यध्यासोऽसद्रू
प्रवाहसातत्यरूपत्वेन
व्यवहृतये केवललौ
भ्रमयतीति, उक्थजडा
इतोऽस्मिन्नर्थे भ्रमयत
लिखितः। सत्कार्यव
विकारित्वशङ्का, यत्
अप्राकृताचीन्त्यानन्तश

"सन्निधानाद्य

तथापि विव
तस्यासुरपक्षीयत्वेनोपेक्ष
केषाञ्चिद्भगवदैश्वर्य्यस्या
शारीरकभाष्ये —

"तदेवमविद्यात

केषाञ्चित्तु सा
प्रतिपाद्यते, यथा जीवः

[ननु — 'माथु
माथुराणां मद्भक्तत्वात्तत्कु
सत्, मद्भक्तमाथुरकुलोत्पन्न
व्यभिचरति क्व चेति। क
सदुत्पन्नस्य मृषात्वं च दृ
ज्ञातोऽपि मृषा साधुरेव, -

यामात्रार्थ(त्वं)
भावात् न तु
अर्थश्च तेष्वेव
मर्थानां निमित्तं
ज्ञातो गुणो रूपं
न । प्रागुक्तानि
यां तु — ननु
तदुत्थिततत्वं च
सिद्धेः । यदि वा
हेयत्वापातात्।
न तदेकरूपत्वं न
मनूद्यात्यन्ताभेदं
तं जातमिदं विश्वं
ारणत्वकार्यत्व-
देर्नानापदार्थवदेव
त्वद्धर्माननुगतेर्न
दौ सर्पादिकं मृषा
त्रमप्युत्थिततत्वमेव
व विवर्तो न्याय्यः
न त्वेकस्मिन्नेवांशे
र्थक्रियाकारित्वात्
णव्यवहारमात्रायेष्टः
द्वा । व्यवहारसिद्धये
ज्ञानवादनिराकरणे ।
। यथेदं सुवर्णं केन
न च कथमित्याह
मान् सर्वादिप्रवर्तको
ारोप्ये वस्तुनि सत्ये
ात्परम्पराभ्रमसिद्धम
: कल्पना न दृश्यते
त्यादौ रजतादेः । यथा
थाख्यान्मन्त्रविशेषान्
ते । इति तस्माद्विश्वमिदं
यथा पृथिव्यामोषधयः
न्तिकस्य वैलक्षण्यं च

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वैराग्यार्थं तीर्थसेवनमुक्तम्, तच्च वैराग्यादिकं प्रपञ्चस्य मिथ्यात्वे घटेतेति सन्यायं तदुपपादयन्ति-सत इति। इदं विश्वं सत् त्यम्। तत्र हेतुः-सतः सत्यात् त्वदवतारविशेषादुत्थितम्, सत्यादुत्पन्नं सत्यमेव दृश्यते, यथा ऊर्णनाभादुत्पन्नं तन्तुजालकमिति त्। ननु भो तर्कहतं युक्तिबाधितमिदम्, तदेवाहुः-व्यभिचरति क्वचिदिति । सत्यादैन्द्रजालिकादुत्पन्ने पदार्थे व्यभिचारः, र्यान्तरे विलयनात् । नन्वत्र निमित्तकारणोत्पन्नो व्यभिचार उक्तः, ऊर्णनाभिदृष्टान्तेन तूपादानोत्पन्नं दर्शितम्, तत्राहुः-क्व च ति। मरीचिकोपादाने जले मिथ्यात्वमेव। ननु तत्राज्ञानयोगादेव मरीचिकायां जलत्वं प्रतीयते, इह तदभावात् सत्यत्वमेव, इति त, नेदं युक्तमित्यर्थः । इहापि तथा-तथात्वमेवाहुः-उभययुगिति। मायासम्बन्धेन पुरुषादुत्पन्नत्वात् मायिकत्वेनासत्यमेव। ननु रीचिकाजलदृष्टान्तेनासत्यत्वं साध्यते, दृष्टान्तस्तु सादृश्ये सति प्रवर्तते, तेनानयोर्बहुवैसादृश्यात् दृष्टान्तो नोपपद्यते, विश्वं हि विधानन्तवैचित्रीभिर्विलक्षणम्, न तथा मरीचिकाद्युपादानं जलादिकमित्यत आहुः-व्यवहृतय इति । विकल्पो विधकल्पनाशतमप्यन्धा न पश्यन्तीत्यन्धपरम्परान्यायेन व्यवहारार्थमिषितः प्राप्तः, 'इष गतौ' इत्यस्मात् । ननु तर्हि कथं र्थज्ञाः पण्डिता अपि व्यवहारमात्रार्थेषु कर्मस्वासक्ता दृश्यन्ते ? तत्राहुः-भ्रमयतीति। यद्वा, इदं सत्यं सत उत्थिततत्वात्। ननु भो क्तिबाधितमिति चेत्, न क्व च व्यभिचरति, क्व च मृषा न स्यात्, तथानेन प्रकारेणोभययुक् उभयेन सत्तासत्तालक्षणेन युज्यत ति सदसद्रूपमित्यर्थः । प्रायः सद्रूपमेव क्वचिदसत् प्रतिभासत इति । तथा हि जीवे मुच्यमाने तस्य भूतपञ्चकादिसङ्घाते त्माद्यध्यासोऽसद्रूपत्वान्नश्यत्येव, भूतपञ्चकादिकं तु सद्रूपत्वादवशिष्यते वेति सदसद्रूपत्वं प्रपञ्चस्य। ननु तर्हि कथं केचित् हसातत्यरूपत्वेनैव नित्यत्वात् सत्यं मन्यन्ते, केचित् क्षणिकम्, केचित्तु मिथ्याभूतमपि प्रातीतिकसत्तयैव सत्यमिति चेत्तत्राहुः-वहृतये केवललौकिककृत्यनिर्व्वाहाय, अन्धपरम्परया विकल्पः कृतः । श्रुत्यादितात्पर्य्याज्ञानादन्धत्वम्, तदेव विशदयन्ति-मयतीति, उक्थजडान् निजदुराग्रहरक्षाव्यग्रतया पूर्व्वापरपरामर्शशून्यान्, भारती सरस्वती देवी तेषां हृदि तथा बहुधावर्तनैः स्फुरन्ती, ऽस्मिन्नर्थे भ्रमयतीति वैष्णवानां सम्मतस्तु सिद्धान्तः (२६ श-श्लो.) 'सदभिमृशन्त्यशेषमिदमात्मतयात्मविदः' इत्यत्र खितः। सत्कार्यवादिनो वैष्णवविशेषाः परमाभीष्टदैवतात् परमाचिन्त्यशक्तेराविर्भूतत्वात् सदेव विदन्ति । न च श्रीभगवतो कारित्वशङ्का, यत् प्राकृतस्यापि चिन्तामण्यादेः स्वर्णरत्नादिप्रसवेऽप्यविकारित्वेनाचिन्त्यशक्तित्वं दृश्यते, ततः किमुत कृताचीन्त्यानन्तशक्तेः श्रीभगवतः । तथा च श्रीविष्णुपुराणे —

"सन्निधानाद्यथाकाशकालाद्याः कारणं तरोः । तथैव परिणामेन विश्वस्य भगवान् हरिः ॥" इति ।

तथापि विवर्तवादिनस्तथा वैनाशिकादयश्चासदेव वदन्ति । तच्चासद्रूपत्वं श्रीभगवत एवासम्मतम्-सुरपक्षीयत्वेनोपेक्षाकक्षानिक्षिप्तत्वात्। तथा हि तस्य वचनं गीतासु (१६/८) 'असतामप्रतिष्ठं ते जगदाहुरनीश्वरम्' इति। तत्र श्चिद्भगवदैश्वर्य्यस्याप्यविद्याकल्पितमात्रत्वेनैव स्वीकारात्। तथोक्तं श्रीभगवदाज्ञया तत्सङ्गोपनपरैर्भगवद्भिः श्रीशङ्करपादपद्मैः कभाष्ये —

"तदेवमविद्यात्मकोपाधिक-परिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्व्वज्ञत्वं सर्व्वशक्तित्वं च, न परमार्थतः" इति ॥

केषाञ्चित्तु साङ्ख्यवैशेषिकवैनाशिकादीनामीश्वरस्यास्वीकारादनीश्वरत्वमिति, किन्तु क्वचिद्वैराग्यार्थमेव विश्वस्यासत्त्वं द्यते, यथा जीवः सर्वं मिथ्येति ज्ञानेन सर्व्वत्रानासक्तो भूत्वा श्रीभगवद्भजनोन्मुखः स्यादिति ॥३६॥

[ननु — 'माथुरा मम पूज्या हि माथुरा मम वल्लभाः । माथुरे परितुष्टे वै तुष्टोऽहं नात्र संशयः ॥' इति श्रीवाराहदेवोक्त्या णां मद्भक्तत्वात्तत्कुलोत्पन्नं दीक्षितब्राह्मणकुलं भक्तमेवेति चेदुच्यते, तदाकर्ण्यतामित्याहुः-सत इति। इदं दीक्षितद्विजकुलं मद्भक्तमाथुरकुलोत्पन्नत्वात्। यथा मद्भक्तपराशरकुलोत्पन्नः शुक इति चेत्, तर्हि तर्कहतं युक्तिशून्यमिदम्, व्यभिचारादित्याहुः-चरति क्व चेति। कर्णादौ व्यभिचारः, मत्प्रियसुग्रीवजनकात् परमभक्तात् सूर्य्यादुत्पन्नस्यापि कर्णस्य दुष्टतादर्शनात्, क्वचित्तु स्य मृषात्वं च दृश्यत इत्याहुः-क्वचिदिति । अन्तर्निगूढ-दुष्टभाव एव बहिः सर्वतः साधुताप्रकटनेन सर्व्वैः साधुत्वेन पि मृषा साधुरेव, - साधुतायाः कृत्रिमत्वात्, यथा द्वैपायनादुत्पन्नोऽपि धृतराष्ट्रः । ननु (भा० १०/४९/२८) —

"ईश्वरस्य विधिं को नु विधुनोत्यन्यथा पुमान्। भूमेर्भारावताराय योऽवतीर्णो यदोः कुले ॥" इति तदुक्तेः।

अथमभक्तो धृतराष्ट्र इत्यत आहुः-न तथेति। यथा श्रीविदुरादयस्त्वयि भक्तास्तथा नायं निगूढधूर्तभावत्वात्तदुक्तेः। ननु कर्णस्य सूर्य्योत्पन्नत्वेऽपि सहस्रकवचाख्यदैत्यत्वाद्युक्तमेव दुष्टत्वम्। दीक्षितानां तु विप्रत्वात् कथं तद्भटतामित्यत आहुः-उभययुगिति। दीक्षितेषु उभयस्य खलत्वस्य ब्राह्मण्यस्य च युग् योगो वर्तते, कंसस्य हिताशंसनात्, तद्दत्तवृत्तिभोगाच्चेत्यर्थः। ननु तर्हि (भा० १०/२३/५) "कृताञ्जलिपुटा विप्रान् दण्डवत् पतिता भुवि" इति मत्प्रियैर्गोपैः कथं तादृशास्तथा प्रणताः? तत्राहुः-व्यवहृतय इति। दृष्टेष्वपि विप्रेषु अयमन्धपरम्परया गड्डुरिकाप्रवाह-न्यायेन विकल्पो विविधकल्पना व्यवहारायैव, न तु परमार्थाय। खलेष्वपि तेषु ब्राह्मणजातित्वाद्गोपैस्तथा व्यवहृतमित्यर्थः। ननु श्रुत्या तत्सुकृतस्याक्षयत्वप्रतिपादनात्, अक्षयस्य चास्य मल्लोकनिर्विशेषलोकप्रापकत्वात्ते खलु निन्दां नार्हन्तीत्यत आहुः-भ्रमयतीति। शेषं समानम् ॥३६॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

उक्तकार्यसत्तापत्तिक्षेपेण कार्यमिथ्यात्ववादं चोद्यमुखेन प्रस्तुत्य प्रतिक्षिपति-सत इदमिति। सत उत्थितमिदं सदिति तर्कहतं सत उत्पत्तिवैधर्म्यादिति चोद्यमिदं ननुशब्देन सूच्यते। परिहरति क्व व्यभिचरतीति कार्यं सदित्ययमर्थः। क्व व्यभिचरति, न क्वचिदपि व्यभिचार इत्यर्थः। स्वाप्नार्थशुक्तिरजतादौ व्यभिचार इत्यत्राह-क्व च मृषेति। क्व मृषा न क्वचित् कार्यं मृषा। स्वाप्नानामपीश्वरसृष्टत्वान्न मृषात्वम्। शुक्तौ रजतसद्भावान्न मृषात्वमित्यभिप्रायः। पञ्चीकरणप्रक्रियया सर्वत्र सत्यत्वं निर्वाह्य सत उत्पत्तिवैयर्थ्यं परिहरति-न तथोभययुगिति। व्यभिचरति इत्यनुषङ्गः। क्वचिदपि मृत्सुवर्णादिद्रव्ये उभयावस्थादर्शनं न व्यभिचरति। कार्यत्वकारणत्वरूपावस्थावदेव मृत्सुवर्णादिकं न व्यभिचरति। कार्यत्वकारणत्वरूपावस्थावदेव मृत्सुवर्णादिकं सर्वं सर्वदा दृश्यते। अतः सतोऽवस्थान्तरप्राप्तिः सफलेत्यर्थः। अवस्थाविकल्पश्च व्यवहृतये उदकाहरणाद्यर्थव्यवहृतये इषित इष्टः। कार्यमिथ्यात्वविषया त्वद्भारती अन्धपरम्परयाऽऽगता। अन्धपरम्परया उक्थजडान् जडाकारकर्मपरम्परया जडान् अतत्त्वविदो भ्रमयतीति भावः ॥३६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थं कार्यस्य सत्यत्वाभ्युपगममभिप्रेत्य अथ यः कार्यसत्ताप्रतिक्षेपेण कार्यमिथ्यात्ववादस्तं चोद्यमुखेन प्रस्तुत्य प्रतिक्षिपन्ति-सत इदमिति। सत इत्यादिना तर्कहतं इत्यन्तेन कार्यमिथ्यात्ववादिमतानुवादः व्यभिचरतीत्यादिना तत्प्रतिक्षेप इति विभागः। तथा हि। सतः परमार्थभूतात्परस्माद्ब्रह्मणः सकाशादुत्पन्नम् इदं जगत् सत् परमार्थभूतं सत्यमिति यावत् न तु नैतद्युक्तमित्यर्थः। कुतः। यतस्तर्कहतमिति चेत् यद्यपि यद्यस्मादुत्पन्नं तत्तदात्मकमेव। यथा मृद्धिरण्यादेरुत्पन्नं घटमुकुटादिकार्यं तथापि चेतनात्पुरुषाज्जातानां केशदन्तनखलोम्नामचेतनत्वदर्शनादचेतनाद्गोमयाज्जातानां वृश्चिकानां चेतनत्वदर्शनाच्च कार्यकारणयोः सालक्षण्यव्याप्त्यभावात्। परमार्थस्वप्नादपरमार्थगजतुरगादीनां तथा परमार्थशुक्तिशकलात् अपरमार्थरजतस्य चोत्पत्तिदर्शनात् सतः सदुत्पत्तिर्वैयर्थ्याच्च कार्यं सदित्येतत्तर्कहतमतः कार्यं मिथ्यैवेति चेदित्यर्थः। तर्कश्चात्र युक्तिः। का पुनरयुक्तिरिति चेदुच्यते। मृद्द्रव्यमात्रस्यानुवर्तमानत्वं तदतिरिक्तस्य च मानत्वम्। रज्जुसर्पादिषु ह्यनुवर्तमानस्याधिष्ठानभूतस्य रज्ज्वादेस्सत्यताव्यावर्तमानस्य सर्पाभूदनलाम्बुधारादेरसत्यता दृष्टा। तथा अनुवर्तमानम् अधिष्ठानभूतं मृद्द्रव्यमेव सत्यं व्यावर्तमानास्तु घटशरावादयोऽसत्यभूताः। तथा निर्विशेषसन्मात्रात् सर्वाधिष्ठानभूताद्ब्रह्मणोऽन्योऽहङ्कारादिव्यवहारालम्बनः कृत्स्नः प्रपञ्चो मिथ्याकारणभूतं सन्मात्रं ब्रह्मैव सत्यम्। किं च सत आत्मनो विनाशायोगादसतः शशविषाणादेरुपलब्ध्यभावादुपलब्धिविनाशयोगे कार्यं सदसद्भ्यामनिर्वचनीयमिति गम्यते। अनिर्वचनीयं च शुक्तिकारजतादिवन्मृषैव तस्य चानिर्वचनीयत्वं प्रतीतिबाधाभ्यां सिद्धं प्रतीयते हि प्रपञ्चः प्रत्यक्षेण—

'ऐतदात्म्यमिदं सर्वं तत् सत्यम्। नेह नानास्ति किञ्चन' ॥ 'मृत्योः स मृत्युमाप्नोति यदिह नानेव पश्यति।' 'यत्र हि द्वैतमिव भवति। तदितर इतरं पश्यति।' 'यत्र त्वस्य सर्वमात्मैवाभूतत्केन कं पश्येत्।' 'इन्द्रो मायाभिः पुरुरूप ईयते' ॥

ति तदुक्तेः ।
गूढधूर्तभावत्वात्तदुक्तेः ।
तद्धटतामित्यत आहुः-
वृत्तिभोगाच्चेत्यर्थः । ननु
तादृशास्तथा प्रणताः ?
ल्पना व्यवहारायैव, न तु
वप्रतिपादनात्, अक्षयस्य
६॥]

सत उत्थितमिदं सदिति
यमर्थः । क्व व्यभिचरति,
। न क्वचित् कार्यं मृषा ।
सर्वत्र सत्यत्वं निर्वाह्य सत
व्ये उभयावस्थादर्शनं न
वस्थावदेव मृत्सुवर्णादिकं
उदकाहरणाद्यर्थव्यवहृतये
डाकारकर्मपरम्परया जडान्

मुखेन प्रस्तुत्य प्रतिक्षिपन्ति-
प्रतिक्षेप इति विभागः । तथा
त् न तु नैतद्युक्तमित्यर्थः ।
घटमुकुटादिकार्यं तथापि
वदर्शनाच्च कार्यकारणयोः
ार्थरजतस्य चोत्पत्तिदर्शनात्
का पुनरयुक्तिरिति चेदुच्यते।
ज्ज्वादेस्सत्यताव्यावर्तमानस्य
तु घटशरावादयोऽसत्यभूताः ।
थ्याकारणभूतं सन्मात्रं ब्रह्मैव
र्यं सदसद्भ्यामनिर्वचनीयमिति
ीयते हि प्रपञ्चः प्रत्यक्षेण —
ह नानेव पश्यति ।' 'यत्र हि
याभिः पुरुरूप ईयते' ॥

इत्यादिभिर्वेदान्तैर्बाध्यते चेति । ननु तर्कहतमिति पाठान्तरं तदा ननु सत इत्पन्नम् इदं सदिति चेत् तर्कहतमित्यन्वयः ।
नूदितं कार्यमिथ्यात्वपक्षं प्रतिक्षिपन्ति -व्यभिचरतीत्यादिना । कार्यं सदित्ययमर्थः । क्व च व्यभिचरति क्व चेति काकुः । न
व्यभिचार इत्यर्थः । केशपुरुषादिष्वपि अचेतनांश एव कार्यकारणभावादिति भावः । तथापि स्वप्नार्थे शुक्तिकारजतादौ
त्वेन व्यभिचार इत्यत्राहुः-क्व च मृषेति । क्व च मृषा न क्वचिदपि कार्यं मृषेत्यर्थः । स्वाप्नार्थानामपीश्वरसृष्टत्वान्न
त्वम् । शुक्तौ रजतसद्भावादन्यथाख्यानाद्वा न मृषात्वमित्यभिप्रायः । सत उत्पत्तेर्वैयर्थ्यं परिहरन्ति-न तथोभययुगिति ।
भिचरतीत्यनुषङ्गः । क्वचिदपि मृत्सुवर्णादिद्रव्ये उभयावस्थानदर्शनान्न व्यभिचरति । कार्यत्वकारणत्वरूपावस्थावदेव मृत्सुवर्णादिकं
ते। अतः सतोऽवस्थान्तरप्राप्तिः सफलेत्यर्थः । विकल्पो घटशरावाद्यवस्थाभेदः । स च व्यवहृतये घटेन जलमाहरेत्यादिवाक्यपूर्वकं
हारार्थमिषित इष्टः । यद्वा नन्वसच्चेन्न प्रतीयेत सच्चेन्न बाध्येत । प्रतीयते बाध्यते च शुक्तिकारजतवत्प्रपञ्चरूपं कार्यमतः
सद्भ्यामनिर्वचनीयं कार्यं मृषैवेत्यत आहुः-न तथोभययुगिति । तथा तथाभूतमनिर्वचनीयमुभययुक्
विलक्षणत्वधर्मद्वययोगिरूपद्रव्यं स नास्त्येवेत्यर्थः । ननु शुक्त्यादिषु रजतादिप्रतीतेः प्रतीतिकालेऽपि तन्नास्तीति बाधेन
स्यान्यथा भानायोगाच्च सदसदनिर्वचनीयमपूर्वमेवेदं रजतं दोषवशात्प्रतीयते इति कल्पनीयमिति चेन्न ।
कल्पनायामप्यन्यस्यान्यथाभानस्यावर्जनीयत्वादन्यथाभानाभ्युपगमादेव ख्यातिप्रवृत्तिबाधभ्रमत्वानामुपपत्तेरत्यन्तापरिदृष्टा-
कवस्तुकल्पनायोगात् कल्प्यमानं हीदमनिर्वचनीयं न तदानीमनिर्वचनीयमिति प्रतीयते । अपि तु परमार्थरजतमित्ये-
र्वचनीयमित्येव प्रतीतं चेद्भ्रान्तिबाधयोः प्रवृत्तेरप्यनुपपत्तिरतोऽन्यस्यान्यथाभानविरहे प्रतीतिप्रवृत्तिबाधभ्रमत्वानामनुपपत्तेः
परिहार्यत्वाच्च शुक्त्यादिरेव रजताद्याकारेणावभासत इति भवताऽभ्युपगन्तव्यम् । किञ्चानिर्वचनीयमपूर्वं रजतमत्र जातमिति
तस्य जन्मकारणं वक्तव्यम् । न तावत्प्रतीतिः तस्यास्तद्विषयत्वेन तदुत्पत्तेः प्रागात्मलाभायोगान्न विषया जाता तदुत्पाद्य
विषयीकरोतीति (चेत्) महतामिदमुपपादनम् । अथेन्द्रियादिगतो दोषः तन्न तस्य पुरुषाश्रयगतत्वेनार्थगतस्य कार्यस्य
कत्वायोगात् । नापीन्द्रियाणि तेषां ज्ञानकरणत्वात् । नापि दुष्टानीन्द्रियाणि तेषामपि स्वकार्यभूते ज्ञान एव
करत्वादनादिमिथ्याज्ञानोपादानत्वमनवस्थादिदोषनिरस्तम् । किञ्चापूर्वमनिर्वचनीयमिदं वस्तुजातं रजतादिबुद्धिशब्दाभ्यां
मिव विषयीक्रियते । न घटादिबुद्धिशब्दाभ्यां रजतादिसादृश्यादिति चेत्तर्हि तत्सदृशमित्येव प्रतीतिशब्दौ स्याताम् ।
त्वादिजातीयायोगादिति चेत्सापि किं परमार्थभूता उतापरमार्थभूता । न तावत्परमार्थभूता । तस्याः अपरमार्थान्वया-
प्यपरमार्थभूता परमार्थान्वयायोगात् । अपरमार्थे परमार्थबुद्धिशब्दयोर्निर्वाहकत्वायोगाच्च । यत्पुनरुक्तं रज्ज्वादिवन्मृण्मात्रस्य
स्यानुवर्तमानत्वात् पारमार्थ्यं सर्पादीनामिव घटशरावादिकार्याणां मिथो व्यावर्तमानत्वादपारमार्थ्यम् । एवं सन्मात्रस्य
ऽनुवर्तमानत्वात् पारमार्थ्यम् अहङ्कारादिव्यवहारालम्बनाः सर्वे पदार्थाः मिथो व्यावर्तमानत्वादत एव बाधितत्वादपरमार्था
तुच्छम् । द्वयोर्ज्ञानयोर्विरोधे हि बाध्यबाधकभावः बाधितस्यैव व्यावृत्तिः । अत्र घटपटादिषु देशकालभेदेन विरोध एव
। यस्मिन् देशे यस्मिन् काले यस्य सद्भावः प्रतिपन्नः तस्मिन् देशे तस्मिन् काले तस्याभावः प्रतिपन्नश्चेत् विरोधाद्बलवतो
त्वम् बाधितस्य च व्यावृत्तिः । देशान्तरकालान्तरसम्बन्धितयानुभूतस्यान्यदेशकालयोरभावप्रतीतौ न विरोध इति कथमत्र
बाधकभावः । अन्यत्र निवृत्तस्य अन्यत्र वृत्तिर्वा कथमुच्यते । रज्जुसर्पादिषु तु तद्देशकालसम्बन्धितयैवाभावप्रतीतेर्विरोधे
त्वं व्यावृत्तिश्चेति देशकालान्तरदृष्टस्य देशकालान्तरव्यावर्तमानत्वं मिथ्यात्वव्याप्तं न दृष्टमिति न व्यावर्तमानत्वमात्रं पारमार्थ्ये
त्वनुवर्तमानत्वात्परमार्थमिति तत्सिद्धिमेवेति न साधनमर्हति । अतो न सन्मात्रमेव वस्तु । सत उत्पत्तिवैयर्थ्यं परिहरन्ति ।
ये विकल्प इषित इति । अस्य यथोक्त एवार्थः । अतः सतोऽवस्थान्तरप्राप्तिः सफलेत्यर्थः । ननु तर्कहतत्वाभावेऽपि
त्यादि श्रुतिरेव कार्यमिथ्यात्वं प्रमापयतीत्यत आहुः-भ्रमयतीत्यादिना । ते तव भारती वाग्रूपा 'नेह नाना' इत्यादिश्रुतिः ।
भिरुक्थजडान्धपरम्परया भ्रमयतीति सम्बन्धः । उक्थजडाः कर्मजडाः अनादिपापदूषिताशेषशेमुषीकास्तानयम्भावः । न
कार्यमिथ्यात्वबोधनात्मिकैव नेह नानेत्यादित्वद्भारत्यावृत्तिः । अपि तु अब्रह्मात्मकस्वतन्त्रवस्तुनिषेधबोधनात्मिका
स्वरूपे देवमनुष्यादिभेदनिषेधादिबोधनाद्यात्मिकाश्च बह्व्यो वृत्तयः सन्ति । एवं तदर्थबुभुत्सवोऽप्युक्तजडास्तद्विपरीताश्च
कर्मजडास्तान् प्रथमबुभुत्सुकुबुद्धिपरिकल्पितकार्यमिथ्यात्वकारणसत्यत्वपरत्वादिरूपबहुवृत्तिभिः प्रथमप्रति-

पत्तृकुबुद्ध्यनुवर्तिनां कर्मजडानामन्धपरम्परया कार्यमिथ्यात्वभ्रमं जनयति। औपनिषदपरमपुरुषवरणीयताहेतुविशेषगुणविशिष्टानां तु अब्रह्मात्मकस्वतन्त्रवस्तुनिषेधादिविषयां प्रमितिं जनयतीति किमस्माभिर्विधेयमिति ॥३६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

न यदिदमग्र आसनभविष्यदतो निधनादनिमित्तकमन्तरा त्वयि विभाति मृषैकरसे।
अत उपगीयते द्रविणजातिविकल्पपथैर्वितथमनोविलासमित्यवयन्ति बुधाः ॥२४॥३८॥

जीवस्येश्वरत्वे बाधकमाह–नेति। इदमीश्वरत्वमग्रे उत्पत्तेः पूर्वं जीवेषु गर्भस्थेषु नास नास्ति न भविष्यत् यदि गर्भस्य ईशो भवेत्तर्थहि उत्तरत्रापि अभविष्यत् न च तथेति यस्मादतो निधनान्मरणादनन्तरमपि नरकादिगमनान्न विद्यत इत्यर्थः। ननु अस्येशोऽहमिति किन्निमित्ता प्रतीतिरत्राह–अनिमित्तकमिति। अः विष्णुर्निमित्तं यस्य तत् अनिमित्तकम्। भगवन्निमित्तकमेव तस्य जन्ममरणयोरन्तरा मध्ये त्वयि जीवे मृषैवेशितृत्वं भाति न तु वस्तुतः त्वं जीवः। कुतः। एकरसे प्रधानसारे न च वस्तुतः जीवः सर्वोत्तमसारः मृषैव तथा मन्यते अतो भ्रान्तिरेव तथाज्ञाने प्रयोजकेत्याह–अत इति। यतो जीवः सर्वसारो न भूयादतो द्रविणजातिविकल्पपथैर्जीव उपगीयत इत्यन्वयः। भ्रान्त्या जीवो द्रविणवान् अभिजातिमानित्यादिसाक्षिविरुद्धकल्पनामार्गैः कथ्यते अज्ञैरिति शेषः। विद्वद्भिस्तु भवानेव द्रविणादिमानित्युच्यते। कुतः। यतस्तपोदमाद्या अभिजन्मधकारणभूताः गुणाश्च भवत एव कथमेतदिति तत्राह–वितथेति। यतोभिजात्यादिगुणास्तव मुख्याः अत इदं जीवस्येश्वरत्वं बुधास्तत्त्वज्ञानिनो वितथमनोविलासं मिथ्यामनोविकारमित्यवयन्ति जानन्ति —

"गुणा एवाभिजात्याख्यास्तद्वानेवाभिजातिमान्। अतोऽभिजात्यवान्विष्णुस्तदन्ये तूपचारतः ॥"

इति वचनात् —

"ये जगत्प्रवदन्त्यज्ञाजीवादन्येशवर्जितम्। तेषामपि तु तां वाचमीश एव ददात्यजः ॥
न च तर्कैर्भवेदीशो जीवो वेदविरोधतः ॥" इत्यादिस्मृत्यर्थत्वेन श्रुत्यन्तरमप्यूह्यम् ॥२४॥३८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

एवं तीर्थमहिमश्रुतीरपि सन्महिमप्रतिपादकेषु स्वेषु पर्य्यवसाययन्ति श्रुतयश्च —

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥
नमः परमर्षिभ्यो नमः परमर्षिभ्य" इत्याद्याः ॥

ननु कथमावसथानां पुरुषसारहरत्वं विश्वस्य सच्चिदानन्दघनात् त्वत्त उत्थितत्वेन स्वर्णतद्विकारवत्तदेकरूपत्वात्। तदुत्थितत्वं च श्रूयते। 'यतो वा इमानि भूतानि जायन्ते' इत्यादौ। अतो नारोपितत्वमपि मन्तव्यम्। जनधातोः विवर्ते प्रयोगासिद्धेः। यदि वा गौणीवृत्तिमारोप्य युक्त्यन्तरेण मन्यते तदा विवर्तवादेऽद्वैतमात्रस्य मिथ्यात्वात्। पदाम्बुजहृदमिति न घटते तस्यापि हेयत्वापातात्। तस्य तु मोक्षादप्यधिकपुरुषार्थत्वमुक्तं न परिलषन्ति केचिदित्यादौ ततो युक्त्यन्तरं चावश्यं हेयम्। तदेतदाशङ्क्य न तदेकरूपत्वं न चारोपितत्वं किन्तु नश्वरादिरूपत्वमिति वदन्त्यः पूर्व्वोक्तमेव स्वेषामपि दर्शयन्ति सत इदमुत्थितम् ॥३६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

नन्वर्थवादोऽयं यत् मच्चरणसुहृदोऽघभिजञ्जला इति मैवामित्याहुः–सत इदमुत्थितमित्यादि। इदं भगवद्भक्तमाहात्म्यं सतः सत्यात् त्वत्तः सकाशादेव उत्थितम्। त्वन्महिम्नैव तेषां महिमा अतः सत् इति मतं चेत् चेतयतीति तथा सर्वा एव न प्रबोधयति। ननु भो भगवन्न तर्कहतं यो यद्भक्तः स एव सनादेवोदेवमर्चयेदिति सतर्कः तथा तेनैव प्रकारेण क्व च न व्यभिचरति

ाहेतुविशेषगुणविशिष्टनां

भविष्यत् यदि गर्भस्य ईशो
यर्थः। ननु अस्येशोऽहमिति
नेव तस्य जन्ममरणयोरन्तरा
जीवः सर्वोत्तमसारः मृषैव
विणजातिविकल्पपथैर्जीव
कथ्यते अज्ञैरिति शेषः।
श्च भवत एव कथमेतदिति
ानिनो वितथमनोविलासं

: ॥"

८॥

रवत्तदेकरूपत्वात्। तदुत्थितत्वं
विवर्ते प्रयोगासिद्धेः। यदि वा
न घटते तस्यापि हेयत्वापातात्।
तदेतदाशङ्क्य न तदेकरूपत्वं न
्॥३६॥

त्यादि। इदं भगवद्भक्तमाहात्म्यं
त् चेतयतीति तथा सर्वा एव न
व प्रकारेण क्व च न व्यभिचरति

च कुत्रापि मतेन मृषा नकार उभयत्र योज्यः। उभययुक् उभयं भेदाभेदौ तद्युनक्तीति तथा उपासकत्वेन भेदः महिम्ना भेदः। तत्र ये विकल्पयन्ति ते अन्धाः एवेत्याहुः-व्यवहृतय इत्यादि। अन्धपरम्परया हि विकल्प इषितः इष्टः। किमर्थम्। व्यवहृतये व्यवहाराय व्यवहारं दृष्ट्वेत्यर्थः। उपास्योपासकभाव एव व्यवहारः। कथं ते विकल्पयन्ति। भवत्य इव मज्जनमाहात्म्यं नानुवदन्तीत्याहुः-भ्रमयतीत्यादि। ते तव भारती उरुशक्तिभिर्विशिष्टा उक्थजडान् तान् भ्रमयति कर्मश्रद्धावतस्तु तव भक्ता न आद्रियन्ते तेन त एव विकल्पयन्तीति भावः। ते तु कर्मप्रतिपादिकया तव भारत्येव भ्रान्ताः ॥३६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

नन्वर्थवादोऽयं यदघभिदङ्घ्रिजला अपि भवत्पदाम्बुजहृदो गुरूपसत्तिमेव कुर्वन्तीति नैवमित्याहुः- सत इदमित्यादि। सत्रं सतः सच्छास्त्रादुत्थितम्, अतो न मृषा अर्थवादः न च क्वचिद् व्यभिचरति, अतो नु भोः! न तर्कहतं तर्कासिद्धम्, अतः न उभययुक् उभयस्मिन् उपासनकाण्डे च युज्यते इति युक्। अत्र अन्धैरिव विकल्पः क्रियते इत्याह- व्यवहृतय इत्यादि। अन्धपरम्परया विकल्प इषित इष्टः। कथमेषामान्ध्यम्? तत्राह- भ्रमयतीत्यादि, ते तव भारती कर्मकाण्डप्रतिपादकश्रुतिरूपा द्विधानामेकतमा व्यवहृतये यथार्थव्यवहाराय भ्रमयति, उपासनाकाण्डात् ज्ञानकाण्डाच्च भ्रमयति भ्रंशयति। कान्? उक्थजडान्। अन्योऽर्थः प्रसिद्ध एव ॥३६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

नन्वावसथानां पुरुषसारहरत्वसारप्रदत्वाभ्यां के इमे निन्दास्तुती। न हि मरीचिकाजलमिदं विरसं सुरसं वेत्युच्यत सत्कार्यवादिमताश्रयिणीभिः श्रुतिभिः सहसत्कार्यवादिमताश्रयिण्यः श्रुतयः। सत् यथा कारणगतमेव सत्त्वं स न घट इत्यत्र यनिष्ठतया भासते। तद्वदित्यर्थः। तत्र सतः कारणस्य कार्याभेदः साध्यते। यदि तदा अपादाननिर्देशेनैव भेदप्रतीतेर्विरुद्धो तुरित्यत आह-ननु तर्कहतमिति चिज्जडयोरभेदस्य सर्वप्रमाणबाधितत्वादिति भावः। ननु नाभेदं साधयामः किन्तु तदुत्पन्नत्वेन ण्डलादिवद्भेदं प्रतिषेधामः। न हि कारणसत्तातिरिक्ता क्वापि कार्यस्य सत्तेत्यत आह-व्यभिचरति क्व क्वचेति। पितृपुत्रादिषु स्यैव दर्शनात्। ननु यथा शुक्तिसत्तातिरिक्तसत्तारूप्यस्य अस्ति तथा अधिष्ठानरूपपरमेश्वरसत्तातिरिक्ता सत्ता प्रपञ्चस्य नास्तीत्यत आह-नेति। यथा शुक्तिरूप्यादि मृषा तथेदं विश्वं मृषा न भवति किन्तु सत्यम् उभययुक् कारणकार्ययोरुभयस्मिन् युज्यत नुभययुक् तत् सत्यमिति श्रुत्युक्तं सत्त्वम् उभयत्रास्तीत्यर्थः। किन्तु कारणस्य सत्त्वं सार्वकालिकं कार्यस्य सत्त्वं कैञ्चित्कालिकं दृष्टेरिति। कार्यस्य सत्यत्वं विना व्यवहारोऽपि न सिद्ध्यतीत्याह-व्यवहृतये व्यवहारसिद्ध्यर्थं विकल्पः। कार्यम् इषित इष्टः। च सत्य एव सत्येनैव घटादिना व्यवहरणादिसिद्धेः असता घटादिना जलाहरणाद्यसिद्धेः। ननु कूटकार्षापणादिनादि व्यवहारसिद्धिर्दृश्यत इत्यत आह-अन्धपरम्परयेति। सा सिद्धिरन्धपरम्परयैव। न तु विज्ञपरम्परया न हि भ्रान्तानामिव विज्ञानां कार्षापणाद्यैः क्रयविक्रयादिव्यवहारः सिध्यति। न च तैरसायनप्रयोगः। नापि पुण्यार्थिनां तद्दानादिकं सम्भवेत्। तस्माज्जगदिदं मेव। विज्ञानां नारददत्तात्रेयादीनामप्यर्थक्रियाकारित्वात् न यदेवं न तदेवम्। यथा शुक्तिरजतमित्यनुशासनेनैव सत्यमेव। किन्तु नश्वरत्वादनित्यम्। यत्तु कर्मिणः खल्वपामसोमममृता अभूम। इत्यादिभिर्वेदवाक्यैः कर्मफलस्य नित्यत्वप्रतिपादनात् नित्यमेव न कदाचिदनीदृशं जगदिति ब्रुवते। सृष्टिप्रलयौच न मन्यन्ते तन्मतमसदित्याहुः-भ्रमयतीति। हे ! तव भारती वेदलक्षणा उरुवृत्तिभिर्बह्वीभिर्मुख्यलक्षणादिवृत्तिभिरुक्थजडान् कर्मश्रद्धाजाड्याक्रान्तमतीन् भ्रमयति यति। अयम्भावः — न हि वेदः कर्मफलस्य नित्यत्वमभिप्रैति किन्तु लक्षणया प्राशस्त्यमात्रं विध्येकवाक्यत्वात्। अन्यथा भेदप्रसङ्गात् तत् —

"यथेह कर्मजितो लोकः क्षीयते" इति न्यायोपबृंहितश्रुत्यन्तरविरोधाच्च। अतः कर्मजडानामिदं भ्रममात्रमिति।

श्रुतयः —

"यथोर्णनाभिः सृजते यथा पृथिव्यामौषधयः सम्भवन्ति यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम्॥"

इत्याद्या: । अत्राक्षरशब्दाद्दार्ष्टान्तिकस्य कारणस्य नित्यत्वं कार्यस्य तु सत्यत्वमेव । न तु मिथ्यात्वम् । नापि नित्यत्वमिति वैष्णवानां मतमेवोक्तं श्रुतिभि: ॥३६॥

गूढार्थदीपिनी

एवं पूर्वं महत्सङ्गादिभिर्भगवद्भजनमुपपादितं तत्तु तदैव सङ्गच्छेत यदि वेदानां भगवत्परत्वं स्यात् । दृश्यतेऽत्र तेषां क्रियापरत्वं प्रतिपाद्यते च मीमांसकैस्तथैवातस्तन्मतखण्डनपूर्वकं वेदानां भगवत्परत्वमेव द्रढयन्त्य: स्तुवन्ति–सत इती ॥

(मीमांसकमतखण्डनपरेयम्)

पद्यानुवाद:

विश्वं सत् सत उत्थिताद्यदि★ तदाऽभेदो न हेतुर्हत: भेदो नेत्यनुमानतो व्यभिचरत्येतत्पितापुत्रयो: ।

शुक्राद्भेद इतेऽपि रज्जुभुजगोपादानकार्यं मृषेत्यज्ञानोत्थमसत्तु चेज्जगददोऽविद्यासदुत्थं न सत् ॥

व्यवहृतिर्भ्रमतो वटभूतवच्छ्रुतिषु रुच्युदयाय फलश्रुति: ।

सदिति कर्मजडभ्रमतो मतो जगदतो गदतो भवतो गिरा ॥२३॥

सङ्क्षिप्तसार्थान्वय: –– सत: परमेश्वरात् उत्थितम् उत्पन्नमिदं विश्वं सत् इति चेत् त्वं मन्यसे ? तदा ते इदमनुमानं ननु निश्चयेन तर्कहतं तर्केण हतं दूषितम् । भेदसाधनं युक्तिविरुद्धमित्यर्थ: । सत इति भेदे पञ्चमी । यदि च कनककुण्डलवद् यत् यत उत्पन्नं तत्र तद्भेदो न दृश्यते इति कृत्वा भेदनिषेध: साध्यते तेन चाभेदात् जगति सत्यत्वं सुस्थिरमेव तत्राहु:–क्व च क्वापि पुतापुत्रादौ व्यभिचरति । पितुरुत्पन्ने पुत्रे भेददर्शनात् त्वदुक्तं दोषग्रस्तं भवति अतो विश्वं न सदित्यर्थ: । यदि च उत्पन्नपदेन उपादानकारणजन्मत्वं गृह्यते तदुपादानं च वीर्यं तेन पित्रा सहाभेदात् पुनरपि जगत: सत्यत्वं तत्राहु:–क्व च मृषा । क्व च क्वचित् रज्जुसर्पादौ उपादानकार्यं मृषा दृश्यते । अत्र सर्पस्योपादानकारणं रज्जुस्तज्ज्ञाने सर्पस्य बाधात् रज्जुरेव शिष्यते तेनोपादानकार्यं मिथ्या भवतीत्यर्थ: । अतो विश्वं न सदिति । यदि च अज्ञानयुक्तोपादानकार्यं मृषा स्वीक्रियते तत्राहु: न तथोभययुक् । उभयेन अविद्यायुक्तेन ब्रह्मणा युज्यते क्रियते इत्युभययुक् अविद्यासंवलितसदुपादानकार्यमिदं विश्वमपि न तथा न सदित्यर्थ: । यदि चार्थक्रियाकारित्वरूपव्यवहारार्थं विश्वं सदिति चेत्, तदपि नेत्याहु: । व्यवहृतयेऽर्थक्रियार्थं तु अन्धपरम्परया कल्पितवटभूतवद् भ्रम इष्टोऽभिमत एव तेनैव कल्पितभूतभ्रमेण मूर्च्छामरणादिरूपार्थक्रिया दृश्यत एव अतो व्यवहारार्थमपि विश्वं न सदित्यर्थ: । यदि च "अक्षय्यं ह वै" इत्यादिश्रुत्या नित्यत्वप्रतिपादनाद्विश्वं सदेवेति तदपि नेत्याहु:–भ्रमयतीति । हे भगवन् ! ते भारती वेदलक्षणा वाणी उरुवृत्तिभिर्नानागौणलक्षणादिवृत्तिभि: उक्थजडान्मीमांसकान् भ्रमयति विपरीतार्थबुद्धिम् असत्ये सत्यबुद्धीं जनयति उत्पादयति तान् त्वमेवोद्बोधय, न हि तत्र नित्यत्वे तात्पर्यमपि तु प्रशंसायामतो विश्वं मिथ्यैवेति सिद्धम् । जगत्सत्यत्वखण्डनपरेयं वा ॥

अथ वेदान्तिमतसिद्धमेव हेतुं क्रीडाकृत्य मीमांसक: पूर्वपक्षमारभते इदं विश्वं सत् । कुत: ? सत: परमेश्वरात् उत्थितमुत्पन्नमत: इति सता जगदभेद: साध्यते तदा वेदान्ती दूषयति–हे मीमांसक ! इति मन्यसे चेत् तर्हि ते इदमनुमानं ननु निश्चयेन तर्केण हतं दूषितम् । भेदसाधकेन हेतुनाऽभेदसाधनं युक्तिविरुद्धमित्यर्थ: । यत्रापादाननिर्देशस्तत्र भेद इति नियमात् । पुनर्मीमांसक: आक्षिपति– ननु नाभेदं साधयाम: किन्तु यत् यत:उत्पन्नं तत्र तद्भेदो न दृश्यते इति कृत्वा भे प्रतिषेधाम:, एवं च भेदनिषेधे सति जगति सदभेदात् सत्यत्वमेव सिद्ध्येत्ततो वेदान्ती पुनरत्र व्यभिचारो ददाति–क्व च व्यभिचरतीति । क्व च क्वापि पितापुत्रादिषु मुद्गरघटप्रध्वंसादिषु च त्वदुक्तं व्यभिचरति दोषग्रस्तं भवति भेददर्शनादिति भाव: । त्वयोक्तं यत् यत उत्पन्नं तत्र भेदो न दृश्यते पितु: सकाशात्पुत्र उत्पन्न: मुद्गराद्घटप्रध्वंसो जात:, तत्र भेदो नास्ति किम् ? अस्त्येव । पितुर्द्विजत्वात् गौरत्वात् पुष्टत्वात् पुत्रस्य च तद्वैपरीत्यात् । एवं मुद्गरस्य भावरूपत्वात् घटप्रध्वंसस्याभावरूपत्वाद्भावाभावयोरैक्यानुपपत्तेरिति प्रत्यक्ष एव वेदो (देवो) दृश्यते अतो जगति न सत्यत्वम् ।

नित्यत्वमिति

दृश्यतेऽत्र तेषां
इती ॥

ति इदमनुमानं ननु
ण्डलवद् यत् यत
ु:-क्व च क्वापि
दि च उत्पन्नपदेन
ा। क्व च क्वचित
यते तेनोपादानकार्य
ोभययुक्। उभयेन
सदित्यर्थ:। यदि
कल्पितवटभूतवद
विश्वं न सदित्यर्थ:।
ति । हे भगवन्!
ोतार्थबुद्धिम् असत्ये
मिथ्यैवेति सिद्धम्।

ग्रात् उत्थितमुत्पन्नमतः
नु निश्चयेन तर्केण हतं
र्मीमांसकः आक्षिपति-
भेदनिषेधे सति जगति
क्वापि पितापुत्रादिषु
पन्नं तत्र भेदो न दृश्यतें
वात् पुष्टत्वात् पुत्रस्य च
एव वेदो (देवो) दृश्यते

पुनर्मीमांसक आक्षिपति-पितुः पुत्र उत्पन्नस्तत्र उत्पन्नत्वं तावत् किन्नाम ? उत्पन्नत्वं चात्र तदुपादानत्वं न तु मित्तत्वम्। अतो न व्यभिचारः। न हि पुत्रस्य पिता उपादानकारणं न वा घटध्वंसस्य मुद्गर उपादानकारणं किन्तु पिता मुद्गरश्च निमित्तकारणमेव पुत्रोपादानं वीर्यं घटध्वंसोपादानं तु कपालादि, तथा च व्यभिचाराभावात् जगति सत्यत्वं सुस्थिरमेव। दान्ती दूषयति-क्व च मृषेति। क्व च क्वचित् रज्जुसर्पादौ उपादानकार्यमपि मृषा मिथ्या भवतीत्यर्थः। तथा च रज्जूपादानके पुनरपि व्यभिचारः। यत्र रज्जौ अन्धकारे सर्पबुद्धिर्जाता तदुपादानकारणं रज्जुरेव, किन्तु तज्ज्ञाने सर्पबाधात् उपादानकार्यस्य भावात् तेनैवाभेदं संसाध्य जगति यत्सत्यत्वं स्थाप्यते तन्निर्मूलमेव। सुस्थिरं च जगति मिथ्यात्वम्। पुनर्मीमांसक आक्षिपति-तु अज्ञानाद् रज्जौ सर्पबुद्धिर्जाता, अतो यत्राज्ञानयुक्तमुपादानं तत्कार्यस्य सर्पस्य मिथ्यात्वं मयापि स्वीक्रियते कोऽत्र दोषः ? न्ती सहर्षं वदति सत्यं सत्यम् अस्मत्पक्ष एव त्वमायातोऽसि इत्यत आह न तथेति। अत्रापि अविद्यासंवलितस्यैव ब्रह्मणो ुपादानत्वं न केवलस्य सतः अतः उभाभ्यां सद्विद्याभ्यां युक् युक्तमिदं जगत् त्वन्मतेऽपि न तथा न सदित्यर्थः, इति स्वोक्त्यैव तो मीमांसकः॥

पुनरपि किञ्चिद्विचार्य अधोवदनः सन् मीमांसक आक्षिपति-ननु माभूदनेन हेतुना प्रपञ्चस्य सत्यत्वम् ? अन्यहेतुना यामः। तथा हि इदं विश्वं सत् अर्थक्रियाकारित्वात् न यदेवं न तदेवं यथा शुक्तिरजतमित्यनुमानेन विश्वस्य सत्यत्वं साधयामः वेदान्ती पुनर्दूषयति-व्यवहृतये इति। व्यवहृतये व्यवहाराय अर्थक्रियार्थं तु अन्धपरम्परान्यायेन विकल्पो भ्रम एव इष्टोऽभिमतः र्थक्रियाकारित्वरूपो व्यवहारः सम्पत्स्यते। यथा यक्षशून्येऽपि वटे श्रुत्वैव केनचिदन्धेन अन्ध उपदिष्टः अस्मिन् वटे स्तीति तेनान्यः तेनान्य इत्यन्धपरम्परया भ्रमेण सिद्धस्य मिथ्यारोपितस्यापि यक्षस्य मूर्च्छामरणादिरूपार्थक्रियाकारिता ते। स्वप्नाङ्गनादेर्दर्शनस्पर्शनादिना वीर्यपातादिरूपार्थक्रियाकारिता दृश्यते कूटकार्षापणादिनाऽपि क्वचिद्व्यवहारो दृश्यते, अर्थक्रियाकारित्वरूपो हेतुरप्रयोजक इति न तेन विश्वस्य सत्यत्वं सिद्धय्येत्, अतो विश्वं मिथ्यैवेति॥

अथ पुनरेकां युक्तिमादाय मीमांसकः आक्षिपति-ननु "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" पाम सोमममृता अभूम" इत्यादिभिः कर्मफलस्य नित्यत्वप्रतिपादनात् असत्त्वं न घटते, न हि नित्यं वस्तु असद्भवति, वेदप्रतिपादितत्वात् द्वैतं सत्यमेव इत्याशङ्क्य पुनर्वेदान्ती भगवन्तमालक्ष्य श्रुतिमुखेन खण्डयन्नुपसंहरति भ्रमयतीति। हे वन्! ते भारती वेदलक्षणा वाणी उरुवृत्तिभिः बह्वीभिः गौणलक्षणादिवृत्तिभिर्मीमांसकान् भ्रमयति मोहयति स्मान् त्वमेवोद्बोधयेति वाक्यशेषः। कथम्भूतान् ? उक्थजडान् उत्तिष्ठति स्वर्गादिफलं यस्मात्तत् उक्थं कर्म तत्र जडान् सरान् वेदतात्पर्यानभिज्ञानित्यर्थः। यथोक्तं श्रीवल्लभाचार्यैः क्रियासक्ताः पदार्थान्न विचारयन्तीति ते उक्थजडा उच्यन्ते इति। भिप्रायः। न हि वेदः कर्मफलस्य नित्यतां प्रतिपादयति, किन्तु लक्षणया तस्य प्राशस्त्यमात्रं बोयधति। कवाक्यत्वात्। यतो मीमांसकमतेऽर्थवादानां प्राशस्त्ये लक्षणा यतश्चातुर्मास्ययागः प्रशस्तस्तस्माच्चातुर्मास्ययागेनेष्टं त्येवमुक्तार्थवादयोश्चातुर्मास्येन यजेत इति विधिना एकवाक्यता। अन्यथा एकोद्देशेनानेकविधानरूपवाक्यभेदः स्यात्। चातुर्मास्ययागजनितस्वर्गादिफलमुद्दिश्य चातुर्मास्यनामा यागो विधीयते इत्येकम्। स्वर्गादिफलस्य नित्यत्वं नित्यत्वं द्वितीयमित्युभयविधानेस्पष्टतरो वाक्यभेदः। स च वाक्यगतत्वान्महान्दोषः। लक्षणा चामृतादिपदगतत्वादल्पदोषरूपा। क्षय्यामृतपदयोः प्राशस्त्यमात्रलक्षणया प्राशस्त्ययागमात्रमेव कर्म स्वर्गादिफलोद्देशेन विधीयते इत्येकस्यैव विधानान्न द इत्यर्थः॥

किञ्च—

"तथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते।"

इति श्रुत्यन्तरविरोधश्च तस्मान्नैतावतापि बिल्वस्य सत्यत्वमपि तूक्तरीत्या मिथ्यात्वमेवेति निश्चितम्। अत्राऽद्वैतवादे तावद्

यादृशमसत्यत्वं रज्जुसर्पवद् भ्रान्तिविषयत्वमङ्गीक्रियते तादृशमसत्यत्वं वैष्णवमते नाङ्गीक्रियते । किन्तु विनाशित्वरूपं सततैकस्यरूपाभाववत्त्वं वा असत्यत्वमिति । तस्माज्जगतोऽसत्यत्वप्रतिपादने न वैष्णवमतविरोधोऽपीत्यलम् । एतच्च बालसुबोधार्थमुक्तम् ।

विदुषां मुदेऽधस्तनं व्याख्यानमवलोकनीयम् —

इदं [इदं विश्वं पक्षः । सदिति साध्यो धर्मः । सत उत्पन्नत्वात् इति हेतुः । यत् यतः उत्पन्नं तत् तदात्मकमेव दृष्टं यथा कनकादुत्पन्नं कुण्डलादि तदात्मकं तद्वदिति दृष्टान्तः ।] विश्वं सत् सत उत्पन्नत्वात् यत् यत उत्पन्नं तत्तदात्मकमेव दृष्टं यथा कनकादुत्पन्नं कुण्डलादितदात्मकमेव तद्वत् । इदमनुमानं मीमांसकानां तत्र विश्वस्मिन् सदभेदः साध्यते चेत्तदा दोषमाह वेदान्ती तर्कहतमिति । भेदसाधकेन हेतुनाऽभेदसाधनं युक्तिविरुद्धम् । हेतौ सत इति पञ्चम्या अपादानार्थकाया भेदप्रतीतेर्विरुद्धो हेतुः । साध्याभावव्याप्तो हेतुर्विरुद्धः, यथा शब्दो नित्यः कृतकत्वादित्यत्र कृतकत्वहेतुः साधयाभावेनानित्यत्वेन व्याप्तस्तथाऽत्रापि सत उत्पन्नतत्ववरूपो हेतुरभेदरूपसाध्यस्याभावेन भेदेन व्याप्तः वृक्षात्पत्रं पततीत्यादाविव यत्रापादाननिर्देशस्तत्र भेद इति नियमात् ॥

पुनर्मीमांसक आक्षिपति ननु नाभेदं साधयामः किन्तु तदुत्पन्नत्वेन कुण्डलादिवद्भेदं प्रतिषेधामः, तद्भेदनिषेधे च जगति सत्यत्वं सिद्ध्येत्, एवं चापादाननिर्देशेन जाताऽपि भेदप्रतीतिर्न भेदनिषेधस्य विरोधिनी, यथा कनकात्कुण्डलमुत्पन्नमिति पञ्चम्या जाताऽपि भेदप्रतीतिः कार्यकारणयोः कनककुण्डलयोः सुवर्णत्वेन भेदनिषेधसाधने विरुद्धा न, तथा सत उत्पन्नत्वात् इत्यपादानपञ्चम्या जाताऽपि भेदप्रतीतिर्ब्रह्मजगतोः सत्यत्वेन भेदनिषेधसाधने विरुद्धा नेति ॥

तथा चेदमनुमानम् — विश्वं सद्भिन्नं न सत उत्पन्नत्वात् यत् यत उत्पन्नं तत्ततो भिन्नं न यथा कनकादुत्पन्नं कुण्डलं कनकाद्भिन्नं न अत्र हेतोः साध्याभावव्याप्तत्वाद्भावान्न विरुद्धो हेतुः, एवं चाभेद एव स्यादिति मीमांसकतर्कं पुनर्वेदान्ती अनैकान्तिकत्वेन दूषयति क्व च व्यभिचरति । सव्यभिचारोऽनैकान्तिकः । हेतुमति साध्याभावो व्यभिचारः । यथा पर्वतो वह्निमान्द्रव्यत्वादित्यत्र जलादौ द्रव्यत्वरूपहेतोः सत्त्वेऽपि वह्निरूपसाध्यस्यासत्त्वाद्व्यभिचारस्तथात्रापि पितुरुत्पन्ने पुत्रे मुद्गरप्रहारादुत्पन्ने घटध्वंसे च तत उत्पन्नत्वरूपहेतोः सत्त्वेऽपि तद्भेदाभावरूपमुद्गरप्रहारभेदस्य प्रसिद्धत्वाजगतो मिथ्यात्वं सुस्थिरमेव । पुनर्मीमांसक आक्षिपति ननु उत्पन्नत्वं नाम किम् ? तदुपादानकत्वं तथा चेत्यनुमानंविश्वं सतो भिन्नं न सदुपादानकत्वात् यद्यदुपादानकं तत्ततो भिन्नं न अतो नात्र व्यभिचारः । पुत्रे पितृभेदाभावरूपस्य घटध्वंसस्य मुद्गरभेदाभावरूप साध्यस्य सत्त्वे तदुपादानकत्वरूपहेतोरप्यसत्त्वात् । न हि पुत्रस्य पिता घटध्वंसस्य मुद्गरो वोपादानकारणं किन्तु पिता मुद्गरश्च तत्र निमित्तकारणमेव पुत्रोपादानं वीर्यं घटध्वंसोपादानकार्यं मृषा मिथ्यैव भवतीत्यर्थः । तथा च रज्जूपादानके सर्पे पुनरपि व्यभिचारः । अत्र रज्जूपादानके सर्पे पुनरपि व्यभिचारः । अत्र सर्पे रज्जूपादानकत्वरूपहेतोः सत्त्वेऽपि रज्जोर्भिन्ने सर्पे रज्जुभेदाभावरूपसाध्यस्यासत्त्वात्, रज्जोर्व्यावहारिकसत्यत्वात्सर्पस्य च प्रातीतिकत्वात् तत्र सर्पे रज्जुतो भेदो निराबाध एव अन्यथा रज्जुज्ञाने जाते सर्पस्य बोधो न स्यात् । इत्यतो जगति मिथ्यात्वं सिद्ध्येत् । पुनर्मीमांसक आक्षिपति नन्वत्र सन्मात्रोपादानकत्वं हेतुः ? तथा चेदमनुमानम् । विश्वं सतो भिन्नं न सन्मात्रोपादानकत्वात् यत्सन्मात्रोपादानकं तत्ततो भिन्नं न । तथा च न रज्जुसर्पे व्यभिचारः, रज्जुभेदाभावः तदसाध्याभाववति मिथ्याभूते रज्जुसर्पेऽज्ञानयुक्तरज्जूपादानके रज्जुमात्रोपादानकत्वरूपहेतोरभावादित् जगति सत्यत्वं सिद्धमेव । पुनर्वेदान्ती खण्डयन्नाह–न तथोभययुक् । उभाभ्यां सदविद्याभ्यां युज्यते इति उभययुक् । उभययुगपीदं जगन्न तथा सदित्यर्थः । अत्रापि अविद्यासंवलितस्यैव ब्रह्मणो जगदुपादानत्वं न सन्मात्रस्येति सन्मात्रोपादानकत्वरूपो हेतुर्विश्वस्मिन्पक्षे नास्तीति स्वरूपासिद्धो हेतुः, पक्षे हेत्वभावः स्वरूपासिद्धः । एवं च रज्जुसर्पादिवत् विश्वस्यापि कल्पनमध्यासमूलकमेव । अध्यस्तस्य च मिथ्यात्वाद्विश्वं मिथ्यैव इति सिद्धम् । इति स्वतर्केण परास्तो मीमांसकः । पुनरपि स किञ्चित् विचार्याधोवदनः सन् प्रलपति-ननु मा भूदनेन प्रपञ्चस्य सत्यत्वमन्यहेतुना साधयामः, तथा हि–इदं विश्वं सत्, अर्थक्रियाकारित्वात् । न यदेवं न तदेवम् यथा शुक्तिरजतम् इत्यतो जगति सत्यत्वं सिद्ध्येत् । पुनर्वेदान्ती व्यभिचारं ददाति–व्यवहृतये इति । अर्थक्रियार्थं विकल्पो भ्रम इषित इष्ट एव । मिथ्याभूतकृत्रिमरजतसुवर्णादेरप्यर्थक्रियाकारित्वात् । एवं चात्र सर्वत्र मिथ्याभूते सत्यस्वरूपसाध्यस्यानधिकरणे-

कियाकारित्वरूपहेतोः सत्त्वाव्द्यभिचारः । अतो विश्वं मिथ्यैव इति वंशीधरी । शेषं पुनर्मीमांसक आक्षिपतीत्यादि पूर्ववत् नीयम् ॥३७॥२३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तदेवं पूर्वोक्तं श्रुतिवाक्यानां सिद्धान्तं स्वोत्प्रेक्षिततर्कबलेनान्यथाकल्पमानानां वादनिरसनपूर्वकं निर्णीयते । इदं त् सत् । कुतः । सत उत्थितं सतो ब्रह्मण उत्थितत्वात् सत्कार्यत्वात् । कटककुण्डलादिवदिति सिद्धान्तः । तथा चोक्तं – न हि कृतिं त्यजन्ति कनकस्य तदात्मतया किन्तु तदभिमृशन्ति इत्यादिना ।

'सदेव सौम्येदमग्र आसीत् । तदैक्षत बहुस्यां प्रजायेय । सोऽसृजत । नारायणाज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं युर्ज्योतिरापः पृथिवी विश्वस्य धारिणी । नारायणाद्ब्रह्मा जायते । नारायणाद्रुद्रो जायते । नारायणात् द्वादशादित्याः ।' दिश्रुतेः ॥

'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।' 'यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ॥'

इत्यादिस्मृतेश्च । वैदिकसिद्धान्तमसहमानः शङ्कते । ननु तर्कहतमिति चेदिति । यदि सेश्वरं जगत् मिथ्या न तह्यद्वैतसिद्धान्तभङ्गः स्यादित्यादिभिस्तर्कैर्हतमिति चेत्तत्राह–क्व च क्व च व्यभिचरतीति । तर्कस्य तर्कैरेव यत्र तत्र भिचरितत्वात् । तथा हि अर्थापत्तिप्रमाणकब्रह्माद्वैतविषयकोऽयं भवतां सिद्धान्तः । सद्वा मिथ्या वा । सत्त्वे द्वैतापत्तिः । अन्त्ये द्धान्तबाधेन जगतः सत्यत्वम् । अपि च पूर्वोक्तसिद्धान्तेन किं प्रमाणं शास्त्रमिति चेत्प्रमाणरूपं शास्त्रं सत्यं वा मिथ्या वा । द्येऽद्वैतप्रतिज्ञाभङ्गः । द्वितीये च सम्प्रदायस्य तत्प्रवर्तकाचार्याणां च सत्यत्वं मिथ्यात्वं वा । प्रथमे द्वैतापत्तिः । अन्त्ये सिद्धान्तस्य शशृङ्गताडनोपमानत्वम् । यथा शशशृङ्गस्य मिथ्यात्वेन तत्ताडनस्य सुतरां तत्ता तथा प्रवर्तकानां मिथ्यात्वेन तत्प्रवर्त्यत्वेन तेषां द्धान्तस्य सुतरां तत्तुल्यतेति । ननु व्यवहारे सर्वमस्माभिरप्युपगम्यते । व्यवहारस्याविद्याकल्पिततत्वेन तन्निवृत्त्याऽद्वैतसिद्धौ न पि हानिरिति चेत् तत्र पृच्छ्यते भवतां मतेऽविद्याकृतद्वैताभ्युपगमेऽविद्याया ब्रह्मणोऽभिन्नत्वं भिन्नत्वं वा । आद्ये ह्मणोऽविद्याकृतद्वैताभ्युपगमेऽविद्यावत्त्वे सति तद्रूपत्वात् मोक्षेऽप्यविद्यानिवृत्तिर्न स्यात् । द्वितीये द्वैतापत्तिर्दुर्वारा । उभयथापि सारज्जुरित्यलं तर्कैः । किञ्च । तर्काणां शास्त्रादपि व्यभिचारः प्रसिद्धः । तथा हि – 'नैषा मतिस्तर्केणापनेया' इत्यादिश्रुतेः । र्काप्रतिष्ठानात् । इति परमार्षसूत्रात् ।

'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् ।' इत्यौषधरूपमनुवचनाच्च । अस्माकं तु वैदिकानां न तथेत्याहुः–न भययुक् मृषा उभययुक् श्रुतिस्मृत्युक्तः सिद्धान्तस्तथा मृषा न स्यात् यथा तर्कस्य मृषात्वम् । तथा न वैदिकस्येति भावः । था च श्रुतिः —

''यथोर्णनाभिः सृजते गृह्णते च यथासतः पुरुषात्केशलोमानि ।
यथा पृथिव्या ओषधयः सम्भवन्ति तथाक्षरात्सम्भवतीह विश्वम् ॥''

''सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा'' इति ।

ननु जगतः सत्कार्यत्वं भवतु परन्तु कार्यस्य सत्यत्वे किं प्रमाणमिति चेत् श्रुतिस्मृती एवास्माकं प्रमाणम् । तथा हि —

'ऊर्ध्वमूलोऽर्वाक्शाख एषोऽश्वत्थस्सनातनः ।' इति श्रुतेः । 'ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।'

इति भगवदुक्तेश्च । ननु सनातनाऽऽव्ययपदयोरनादिवाचकत्वेनाविद्यादेरनादित्वमभीष्टमेव । तथा चानादिसान्तत्वं णमस्माभिः प्रतिपाद्यत एवेति चेत्तथा सति आद्यविद्यादेर्भावत्वमप्यकामेनापि त्वया स्वीकार्यं प्राप्तम् । एवञ्च तन्नाशे न कापि ना । न तु प्रागभावदृष्टान्तेनानुमानस्यैवानादिसान्तत्वे निगमनात्वमिति चेन्न । प्रागभावस्यभावरूपत्वेन भावसाधन-विकलत्वात् । अलं विस्तरेण । अन्यत्र स्पष्टं कण्ठरवेण वक्ति श्रुतिः —

‘अथैनमाहुः सत्यकर्मेति । सत्यं ह्येवेदं विश्वसौ सृजते । अथैनमाहुः नित्यकर्मेति । नित्यं ह्येवायं कुरुते ।’

इत्यादि । ननु अत्यन्तप्रसिद्धतमस्य कथं प्रलापः क्रियते, तत्राहुः-व्यवहृतये विकल्प इषित इति अज्ञानाशास्त्राचार्यसंस्कारवर्ज्जितानां बुद्धिभ्रंशाय विकल्पः तर्कबलेन विविधनिरीश्वरवादकल्पनया इष्ट एव । यथा मन्दचक्षुषां वणिजामग्र एव कूटद्रव्यव्यवहारो न शुद्धचक्षुष्मताम् । तथाऽज्ञानमेव निरीश्वरभ्रंशो न वैदिकसम्प्रदायिनामिति । नन्वप्रामाण्यस्य कथं प्रवृत्तिस्तत्राहुः-अन्धपरम्परया । अन्धपरम्परान्यायेन प्रवृत्तिरिति शेषः । तथा च श्रुतिः —

‘अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः ।
जङ्घन्यमाना अपियन्ति मूढा अन्धैर्नीयमाना यथान्धाः ॥’

इति । तत्र कारणमाहुः-भ्रमयतीति । ते तव भारती उरुवृत्तिभिर्गौणीलक्षणादिभिः स्वोत्प्रेक्षिताभिरुक्थजडान् ईश्वरपराङ्मुखो न निरीश्वरवादिनस्तर्काभिनिवेशेन जडीभूतान् दुराग्रहेणोन्मत्तान् भ्रमयति । तव वचोऽपरिज्ञानात्तेषां तदैश्वर्यादौ भ्रान्तिस्तदनुगामिनां सुतरां भ्रम इति भावः ॥३६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं सर्वप्रकारैर्भगवद्भजनं निरूप्य सम्यङ्मार्गानुसारेण स्थिरीकृत्य भजननिर्द्धारार्थं यतमानाः सच्चिदानन्दो भगवान् भजनीय इति वक्तुं लोके सच्चिदानन्दा धर्मा एकत्र न सन्तीति किं वक्तव्यं प्रत्येकमपि क्वचिदपि धर्मा न सन्तीति कथनार्थं षड्भिः श्लोकैर्द्वाभ्यामेकैकस्य लोके जडे सत्त्वं चेतने चित्त्वं स्वर्गादावानन्दत्वं च नास्तीति निराकुर्वन्ति, तत्र प्रथमं द्वाभ्यां जगति सत्त्वं निराक्रियते । अन्यथा भगवानेव सन्नित्यर्थो नोपपद्यते, भजनीयनिर्धारे गौणसत्त्वस्याप्रयोजकत्वात् ॥ ज्ञानार्थं दोषाभावार्थं वा तदुपयोगः । असत्सेवया पूर्वं नाशो निरूपितः सत्सेवया कृतार्थता च । यदि जगत्यपि सत्त्वं स्यात्तदा तत्रापि भजनं भवेत् भजने वा दोषो न स्यादिति । तदवश्यं निराकर्तव्यम् । तत्र जगतः ये सत्त्वं वदन्ति तन्मतं वादमुद्रया निराकुर्वन्ति । अत्रैवं संशयः । यदस्य जगतः सत्त्वमुच्यते तत्किं प्रतीत्यनुरोधात् आहोस्विद्व्यवस्थापकं कारणमस्ति आहोस्वित् प्रमाणमस्तीति आशङ्क्य निराकुर्वन्ति । प्रथमतः कारणवशादस्य सत्त्वमिति पक्षो निराक्रियते । तदा जगतः सत्त्वमनुमानात्सेत्स्यति । तत्र पूर्वपक्षे अनुमानम् । इदं जगत्सदेव सत उत्पन्नत्वात् । यो यादृशादुत्पद्यते स तादृश एव भवति, यथा सुवर्णादुत्पन्नं कुण्डलं सुवर्णमेव भवति तथा ब्रह्मणोऽप्युत्पन्नं जगत्सदेव । ‘कथमसतः सज्जायते’ इति श्रुत्या सतः कारणत्वे कार्यमपि सदेव भवतीति निरूपितम् । तद्दूषयति-इति चेन्नेति । दूषणे प्रमाणं दूषणं चाह । नु इति वितर्के, अनेन तर्कबाध उक्तः । यतः पूर्वपक्षिणापि व्याप्तिबलं प्राप्तेन तर्केणैव पदार्थो निर्णीयते तर्कः शङ्कावधिरिति । तदेवाह-तर्कहतमिति । अयमर्थः । यज्जगति सत्त्वं साध्यते तत्किं कारणसत्त्वमेव कार्ये समायातीत्युच्यते आहोस्विदारम्भन्यायेन कार्ये सत्त्वान्तरं जन्यते । तत्र नाद्यः पक्षः साधीयान्, यतस्तर्केण हन्यते । यदि कारणत्वं कार्ये समागच्छेत् कारणमसत्स्यात् । स्वनाशे आशङ्कमाने कार्यमपि न जनयेत् । अतः स्वसत्त्वनाशशङ्कया भगवान् जगदपि न कुर्यात् । नापि सत्त्वलक्षणो गुणः क्वचित्कारणे स्थितः कार्ये समागत इति आवयोः सम्प्रतिपत्तिरस्ति । तस्मात् बहुतर्कपराहतत्वात् न कारणसत्त्वं कार्ये समायातीत्यर्थः । अथ द्वितीयः पक्षः । सत्त्वान्तरमारभ्यत इति तदप्यसत् व्यभिचारित्वात् सतोऽप्यङ्गाद्वेनः असन्नेव जातः । न च वक्तव्यं तत्रासदंशः सङ्घाते स्थित इति, तथा सति तावन्मात्रमेव कार्येऽप्यसत्स्यात् । न तु स्वभावादिः अतिरिक्तोऽपि । ननु बीजे स एव सङ्क्रान्त इति चेत्तर्हि ततः पृथोराविर्भावो न स्यात् । तस्मात् कार्यकारणयोर्वैलक्षण्यात् न कारणसत्त्वेन नियमेन कार्ये सत्त्वमुत्पाद्यते । ननु न कारणमात्रं कार्ये सत्त्वमुत्पादयति, किन्तु समवायिकारणमेव । बीजं तु निमित्तकारणम् । तत्र योनिदोषात् स्वभावदोषाच्च स तथा जातः । बीजं तु गुणभूतमपि बलवता दोषेण तिरोहितम् । समवायिकारणं तु तत्तदवयवाभिन्ना एवेति न व्यभिचार इति चेत्तत्राह-क्व च मृषेति । शुक्तिकातः भ्रान्तप्रतिपन्नं रजतमुत्पद्यते । शुक्तिकायाः सत्त्वेऽपि न तत्सत्यं भवति । शुक्तिकाश्रयत्वात्तद्रजतस्य शुक्तिकैव समवायिकारणं तस्माद्व्यभिचारः सिद्धः । ननु न केवला शुक्तिस्तोत्रोपादानं किन्तु दोषसहिता । चाकचक्यादिदोषाद्विशेषादर्शनसहकृताद्रजतं जायते । न तु केवलाश्रयात् । ननु तथापि

एकांशेन रजतं सत्
प्रतीयतां मनोदोषेण
एव सर्वत्र वक्तव्यः,
स्वरूपासिद्ध्या व्य
प्रतीयमानत्वात् ब्रह्म
परमार्थरूपा । व्यवह
सद्बुद्धिः, अतो ज्ञायते
महतां बुद्ध्या असदेवे
वाणी उक्थपरान् कम
भ्राम्यति जगद्गतमिति

“सद्बुद्ध्या स

सतः कारणादु
विषये व्यभिचरति अ
तत्त्वम् । कथं तर्हि सं
आरोपात् ते तव भारती
मोहयति । न हि वेदः क
प्रगर्जनात् ॥२३॥३६॥

एवं स्वजनादित्
निराकुर्वन्ति- सत इति ।
हेतुमाहुः-सत उत्थितमिति
तत्तदात्मकं भवति तथेदमि
व्यभिचरतीति । सदुत्पन्न
क्वचिन्मृषा मिथ्या भवति
तत्र न केवलं गुणमात्रं फ
उभययुगिति । उभाभ्यामुपा
तथा सत्यं न भवतीत्यर्थः
इत्याशङ्क्याहुः-व्यवहृतय इ
देहेन्द्रियादावहंममाभिमानल
देहाद्यभिमानस्य भ्रमत्वेऽन्धप
। दृश्यते च वैदिकव्यवहारस्य
उरुभिः बह्वीभिर्गौणमुख्यलक्ष
व्यवहारो लौकिकव्यवहारवदे

ं कुरुते।'
विकल्प इषित इति
ए एव। यथा मन्दचक्षुषां
नामिति। नन्वप्रामाण्यस्य

रुक्थजडान् ईश्वरपराङ्मुखो
र्यादौ भ्रान्तिस्तदनुगामिनां

नाः सच्चिदानन्दो भगवान्
धर्मा न सन्तीति कथनार्थं
न्ति, तत्र प्रथमं द्वाभ्यां जगति
त्॥ ज्ञानार्थं दोषाभावार्थं वा
त्रापि भजनं भवेत् भजने वा
न्ति। अत्रैवं संशयः। यदस्य
तीति आशङ्क्य निराकुर्वन्ति।
त्र पूर्वपक्षे अनुमानम्। इदं
डलं सुवर्णमेव भवति तथा
तीति निरूपितम्। तद्दूषयति-
पि व्याप्तिबलं प्राप्तेन तर्केणैव
ते तर्त्कि कारणसत्त्वमेव कार्ये
स्तर्केण हन्यते। यदि कारणत्वं
ाशशङ्क्या भगवान् जगदपि न
त। तस्मात् बहुतर्कपराहतत्वात्
यभिचारित्वात् सतोऽप्यङ्गाद्वेनः
यसत्स्यात्। न तु स्वभावादिः
त् कार्यकारणयोर्वैलक्षण्यात् न
समवायिकारणमेव। बीजं तु
षेण तिरोहितम्। समवायिकारणं
न्नं रजतमुत्पद्यते। शुक्तिकायाः
भिचारः सिद्धः। ननु न केवला
तु केवलाश्रयात्। ननु तथापि

शेन रजतं सत्यं स्यात्, न तु सर्वथा असत्यम्। तदाह-नेति। ननु सदंशो दोषवशात्तत्र तिरोहित इति चेत्तर्हि प्रकृतेऽपि तथा यतां मनोदोषेण जगदन्यथा प्रतीयत इति। अन्यथा जगत्सच्चिदानन्दरूपेण कथं न भासेत। किञ्च न केवलं ब्रह्मकारणवाद सर्वत्र वक्तव्यः, किन्तु प्रकृतिपुरुषकारणवादोऽपि। अत उभययोगात् जगत्सदसदात्मकम्, न केवलं सदित्यर्थः। एवं हेतुं कल्पासिद्ध्या व्यवहारेण च दूषयित्वा हेत्वन्तरमाशङ्क्य निराकुर्वन्ति-व्यवहृतये विकल्प इषित इति। इदं जगत्सत् सत्त्वेन यमानत्वात् ब्रह्मवदित्यनुमानम् तदपि दूषयन्ति। अयं विकल्पो विशिष्टकल्पना जगतः सत्त्वरूपा प्रातीतिकी, न तु र्थरूपा। व्यवहारमात्रत्वेनापि प्रतीतिसिद्धौ वास्तवसत्यत्वकल्पनायां प्रयोजनाभावात्। नन्वनादिरयं संसारः सर्वेषां चात्र वृद्धिः, अतो ज्ञायते सदेवेति तत्राह-अन्धपरम्परयेति। अन्धपरम्परापि परम्परा न चात्र चक्षुष्मत्परम्परेति प्रमाणमस्ति। प्रत्युत सतां बुद्ध्या असदेवेदमित्याभासते। ननु वेदानुरोधाज्जगतः सत्त्वमङ्गीक्रियते तत्राह-भ्रमयति भारतीति। भारती वेदरूपा त्वदीया णी उक्थपरान् कर्मजडान् भ्रामयति। भ्रामणप्रकारस्तु द्वितीयस्कन्धे निरूपितः। वेदोऽपि ब्रह्मगतमेव सर्वमाह लोकः परं यति जगद्गतमिति। क्रियासक्ताः पदार्थान् न विचारयन्तीति उक्थजडा उक्ताः।

"सद्बुद्ध्या सर्वथा सद्भिर्न सेव्यमखिलं जगत्॥ भ्रान्त्या सद्बुद्धिरत्रेति सन्तं कृष्णं भजेद्बुधः॥" ॥२३॥३६॥

श्रीसुबोधिनीसारः

सतः कारणादुत्थितमुत्पन्नम् इदं विश्वं सदिति चेत्तर्हि तर्केण हतं तत् प्रत्यक्षतो दृश्यमानस्य नाशोपलम्भात् क्व च क्वापि ध्ये व्यभिचरति असतः सज्जायते तथा उभययुक् सत्यासत्यात्मकं न सदसतोरेकाधिकरणत्वायोगात् अतो मृषा मिथ्येति तम्। कथं तर्हि संसाराडम्बरं तत्राह। व्यवहृतये व्यवहारार्थं विकल्पो भ्रम इषित इष्टोऽन्धपरम्परया पूर्वपूर्वभ्रमस्योत्तरोत्तरे पात् ते तव भारती वेदलक्षणा वाणी उरुभिर्बह्वीभिर्गौणलक्षणादिवृत्तिभिरुक्थजडान् कर्मश्रद्धाभराक्रान्तमन्दमतीन् भ्रमयति यति। न हि वेदः कर्मफलं नित्यं वदति तद्यथेह "कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादिश्रुतेः र्शनात्॥२३॥३६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं स्वजनादित्यागपूर्वकभगवद्भजनस्य वैराग्यं विना दुष्करत्वाद्वैराग्यार्थं स्वजनादिसम्बन्धस्य शङ्कासमाधानाभ्यां सत्यत्वं कुर्वन्ति- सत इति। ननु इदमात्मनि प्रतीयमानं स्वजनादिविषयकमहंममाभिमानलक्षणं तत्पूर्वकं सुखदुःखादिकं च सत्। तत्र हुः-सत उत्थितमिति। सतः आत्मनः उत्पन्नत्वादित्यर्थः। यद्यत उत्पन्नं तत्तदात्मकमेव दृष्टम्, यथा कनकादुत्पन्नं कटककुण्डलादि त्मकं भवति तथेदमपि। सत उत्पन्नत्वात्सदिति चेत् इदमनुमानं तर्केण विचारेण हतं बाधितं प्रतीयते। कथमित्यपेक्षायामाहुः- भिचरतीति। सदुत्पन्नत्वलक्षणो हेतुर्व्यभिचरति। व्यभिचारमेव स्पष्टयन्ति-क्व च क्व च मृषेति। सत उत्पन्नमपि क्वचित् वं मृषा मिथ्या भवति। गुणोपादानकस्यापि फणिनो न गुणत्वं न च तत्सत्तया सत्त्वम्, फणित्वमिथ्यात्वयोः प्रसिद्धत्वात्। ननु न केवलं गुणमात्रं फणिन उपादानम्, किन्त्वविद्यायुक्तमेव, इति चेत्तर्हि अत्राप्यविद्यायुक्त एवात्मोपादानम् इत्याशयेनाहुः- युगिति। उभाभ्यामुपादाननिमित्तकारणाभ्यां युनक्तीति तथा, अतो न तथेति। इदं मम, मनुष्योऽहं सुख्यहं दुःख्यहमित्यादि सत्यं न भवतीत्यर्थः। ननु सर्वस्य व्यवहारस्याहंममाभिमानपूर्वकत्वदर्शनात् तस्य मिथ्यात्वे व्यवहारः कथं सिद्ध्येत् शङ्क्याहुः-व्यवहृतय इति। संसारस्यानादित्वेन विचारं विनैव अन्धपरम्परया अन्धेन सहान्धभ्रमणवत् व्यवहाराय विकल्पो त्यादावहंममाभिमानलक्षणो भ्रम इषितः इष्टः अनुकूल एव न बाधकः, कूटकार्षापणादिनापि व्यवहारदर्शनात्। ननु भिमानस्य भ्रमत्वेऽन्धपरम्परान्यायेन कथञ्चिल्लौकिको व्यवहारो निर्वहतु, तत्पुरस्कारेण वेदव्यवहारो न स्यात्, वेदस्याप्तवाक्यत्वात् ते च वैदिकव्यवहारस्यापि तत्पूर्वकत्वमेवातो न तस्य मिथ्यात्वम्, इत्याशङ्क्याहुः-भ्रमयतीति। ते तव भारती वेदरूपा वाणी भिः बह्वीभिर्गौणमुख्यलक्षणादिभिर्वृत्तिभिः उक्थजडान् कर्मश्रद्धाभराक्रान्तमन्दमतीन् जनान् भ्रमयति मोहयतीति। सोऽपि वतो लौकिकव्यवहारवदेव निर्वहतीत्यर्थः॥३६॥२३॥

अन्वितार्थप्रकाशिका

सत इति ॥ इदं जगत् यतो हेतोः सतः उत्थितम् अतः सत् इति चेत् ननु इदमनुमानं तर्कहतं यतः क्वचित्पितृपुत्रादौ व्यभिचरति क्व च रज्जुसर्पादौ मृषा भवति। अत्रापि तथा नास्ति किन्तु उभययुक् अतो न सत्। व्यवहृतये तु विकल्प इषितः स तु अन्धपरम्परयापि भवति । ते भारती उरुवृत्तिभिः उक्थजडान् भ्रमयति इत्यन्वयः । इदं जगत् सतः सद्रूपात्परमात्मनः उत्थितमुत्पन्नमतः सत् सत्यमेव । तथा च इदं जगत् इति पक्षः सत् इति साध्यम् । सत उत्पन्नत्वात् इति हेतुः यद्यत उत्पन्नं तत्तदात्मकमेव दृष्टं यथा कनकादुत्पन्नं कटककुण्डलादि तदात्मकं भवति तथेदमपि सत उत्पन्नत्वात्सदिति चेत्। ननु इदमनुमानं तर्केण विचारेण हतं बाधितं प्रतीयते। तर्कहतत्वमाह व्यभिचरतीति। क्वचित्पुत्रादौ मुद्गरघटप्रध्वंसादौ च कार्यस्य कारणात्मकत्वं व्यभिचरति । ननु तदुत्पन्नत्वं तदुपादानकत्वं विवक्षितमिति चेत् सदुत्पन्नमपि क्व च क्वचित् मृषा मिथ्या भवति। यथा गुणोपादानकस्यापि फणिनो न गुणत्वं न च सत्त्वं किन्तु मिथ्यात्वमेव । अन्यथा बाधाभावप्रसङ्गात् । अतः पुनरपि व्यभिचरत्येव। ननु तत्र न गुणमात्रं फणिन उपादानं किन्तु अविद्यायुक्तस्यैव सत उपादानत्वम्। एवम्भूतस्य च न वस्तुसत्त्वं यद्वा अत्र द्वौ पूर्वपक्षौ इदं सत् सदुत्थत्वात् इति कारणसत्त्वमाश्रित्य कार्यस्य सत्त्वं साध्यते किंवा प्रपञ्चस्य बाधादर्शनजन्यं सत्त्वं हेतुमाश्रित्य प्रधानादेः सत्त्वं साध्यते। यथा इदं सत उत्थितं सत्त्वादिति तद्द्वयं तन्त्रेण निरस्यति। ननु तर्कहतं तथा हि सदुत्थत्वं सद्विवर्तत्वं सपरिणामत्वं वा। आद्ये इष्टापत्तिः। अन्त्ये परिणामिनः क्षीरादिवत् अनित्यत्वात्कारणत्वासिद्धिरित्याह व्यभिचरतीति। ननु दध्यादावपि प्रधानगतं सुखदुःखमोहात्मकत्वमस्त्येवातो नित्यत्वं कनकवदिति चेत्क्व च मृषेति सुखाद्यात्मकस्यापि स्वप्नाङ्गनादेः मृषात्वात्तत्कारणस्यापि मृषात्वं दुर्वारम्। अस्तु तर्हि कार्यस्य सदसदात्मकत्वमत आह न तथोभययुगिति। स्वप्नाङ्गना हि न घटादिवदबाध्यानाप्यत्यन्तासती शशशृङ्गवत् चरमधातुविसर्गान्तकार्यकारित्वात् अतो निर्वाच्या अतोऽस्याः कारणं निद्राप्रधानं वा अनिर्वाच्यमेव हेतुकार्ययोः साजात्यनियमात्। एवं द्वितीयानुमाने। तथा हि कार्यस्य सत्त्वात्कारणमपि सदिति चेन्नानु तर्कहतं सत्यस्यापि भयकम्पादेर्हेतौ रज्जुसर्पे मृषात्वदर्शनात् अतः व्यभिचरति क्व चेति। तस्मान्न रज्जुसर्पः सत्यः शशशृङ्गवदत्यन्तासदपि नेत्याह क्व च मृषा नेति। असत्त्वपक्षेऽलीकमपि नेत्यर्थः। शशशृङ्गरज्जुसर्पयोः निःस्वरूपत्वे समानेऽपि अन्त्यो दृश्यत्वात् भयादिकार्यजनकत्वाच्च नात्यन्तमसत्। शशशृङ्गं तु तद्विपरीतत्वादत्यन्तमसत् इत्यर्थः। अस्तूभयात्मकमिति चेन्न तथोभययुक् इति। यथा मृषा न तथा सदसदात्मकमपि नेत्यर्थः। विरोधादतोऽनिर्वाच्यमेव। ननु सदिदम् अर्थक्रियाकारत्वात् यन्नैवं तन्नैवं यथा शुक्तिरजतम् इति रीत्या प्रपञ्चस्य सत्यत्वं साधयाम इति चेत् व्यवहृतये अर्थक्रियार्थं विकल्पो भ्रम इषित इष्ट एव कूटकार्षापणादिनापि व्यवहारदर्शनात्। नन्वेकत्र सतोऽन्यत्रारोपो भ्रमः प्रसिद्धः अत्यन्तासत्त्वे तु कथं प्रपञ्चो भ्रमः स्यात् इति चेत् यतः स भ्रमः अन्धपरम्परयापि भवत्यतो न दोषः। अयम्भावः। संस्कारजन्यो भ्रमः संस्कारसिद्धये पूर्वप्रतीतिमात्रमपेक्षते न तु वस्तुसत्ताम्। अतोऽनादित्वात् पूर्वपूर्वभ्रमदृष्टस्योत्तरोत्तर आरोपो भविष्यति अन्धपरम्परान्यायेन व्यवहारः सेत्स्यतीत्यप्रयोजको हेतुरिति। ननु "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति॥ अपामसोमममृता अभूम" इत्यादिभिः कर्मफलस्य नित्यत्वप्रतिपादनादसत्त्वं न घटते। न हि नित्यं वस्तु असद्भवति तस्माद्वेदप्रतिपादितत्वात्। द्वैतं सदेवेत्याशङ्क्याह भ्रमयतीति। हे भगवन्! ते भारती वेदलक्षणा उरुवृत्तिभिर्बह्वीभिर्गौणीलक्षणादिवृत्तिभिरुक्थजडान् कर्मश्रद्धाभराक्रान्तमन्दमतीन् भ्रमयति मोहयति। अयम्भावः। न हि वेदः कर्मफलं नित्यमभिप्रैति किन्तु लक्षणया प्राशस्त्यमात्रं विध्येकवाक्यत्वात्। अन्यथा वाक्यभेदप्रसङ्गात् "तद्यथेह कर्मचितो लोकः क्षीयते। एवमेवामुत्र पुण्यचितो लोकः क्षीयते॥" इति न्यायोपबृंहितश्रुत्यन्तरविरोधाच्च। अतः कर्मजडानामिदं भ्रममात्रमिति एतेनैव "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः॥" इत्यादीनामप्यन्यपरत्वं दर्शितं भवति। कार्यं नासत् किन्त्वनित्यमिति वादिनस्तु इदं सत उत्थितं सदेव न तु स्वतः सत्। यथा कारणगतमेव सत्त्वं सन् घट इत्यत्र घटनिष्ठतया भासते तद्वत्। ननु तत्र कार्यकारणयोरभेदापत्तिरिति चेन्नेत्याहुः। ननु तर्कहतमिति चेज्जडयोरभेदस्य प्रमाणबाधितत्वात् यदि भेदप्रतिषेधद्वारा अभेदः साध्यते तत्र व्यभिचरति क्व चेति। पितृपुत्रादौ भेदस्यैव दर्शनात् न च अधिष्ठानरूपपरमेश्वरसत्तातिरिक्ता प्रपञ्चस्य सत्ता नास्तीति चेत्तत्राहुः-नेति। यथा शुक्तिरूप्यादि मृषा तथा इदं विश्वं मृषा न भवति किन्तु सत्यम्। उभययुक् कारणकार्ययोरुभययोर्युक्तं इत्युभययुक् श्रुत्युक्तं सत्त्वम् उभयत्रास्तीत्यर्थः। किन्तु कारणस्य सत्त्वं सार्वकालिकं कार्यस्याल्पकालिकं कार्यस्य सत्त्वं किन्तु

: क्वचित्पितृपुत्रादौ
तु विकल्प इषितः स
: सद्रूपात्परमात्मनः
ति हेतुः यद्यत उत्पन्नं
चेत्। ननु इदमनुमानं
ार्यस्य कारणात्मकत्वं
मिथ्या भवति। यथा
ङ्गात्। अतः पुनरपि
स्य च न वस्तुसत्त्वं यद्वा
बाधादर्शनजन्यं सत्त्वं
र्कहतं तथा हि सदुत्पत्त्वं
द्वरित्याह व्यभिचरतीति।
त्मकस्यापि स्वप्नाङ्गनादेः
गिति। स्वप्नाङ्गना हि न
याः कारणं निद्राप्रधानं वा
पि सदिति चेन्ननु तर्कहतं
: शशशृङ्गवदत्यन्तासदपि
मानेऽपि अन्त्यो दृश्यत्वात्
मकमिति चेन्न तथोभययुक्
ाकारत्वात् यत्रैवं तत्रैवं यथा
इष्ट एव कूटकार्षापणादिनापि
ात् इति चेत् यतः स भ्रमः
त्रमपेक्षते न तु वस्तुसत्ताम्।
तीत्यप्रयोजको हेतुरिति। ननु
स्य नित्यत्वप्रतिपादनादसत्त्वं
तीति। हे भगवन्! ते भारती
यति मोहयति। अयम्भावः।
ा वाक्यभेदप्रसङ्गात् "तद्यथेह
ाधाच्च। अतः कर्मजडानामिदं
दर्शितं भवति। कार्यं नासत्
न् घट इत्यत्र घटनिष्ठतया भासते
बाधितत्वात् यदि भेदप्रतिषेधद्वारा
मेश्वरसत्तातिरिक्ता प्रपञ्चस्य सत्ता
ययुक् कारणकार्ययोरुभययोर्युज्यते
ल्पकालिकं कार्यस्य सत्त्वं विना

वहारोऽपि न सिद्ध्यतीत्याह व्यवहृतये इति । व्यवहारसिद्ध्यर्थं विकल्पः कार्यम् इषित इष्ट एव सत्येनैव घटादिना
हरणादिसिद्धेः । कूटकार्षापणादिना व्यवहारस्तु अन्धपरम्परया भवति न तु विज्ञपरम्परया तस्माज्जगत् सत्यमेव किन्तु
त्यत्वान्नश्वरम् । यत्तु कर्मठाः कर्मफलस्य नित्यत्वमाहुस्तत्तु न युक्तमित्याहुः-भ्रमयतीति ॥३६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

क्लेशबहुलगृहाश्रमादिसहितं विश्वं किमर्थं कृतं तत्कीदृशं चेत्याशङ्क्य श्लोकद्वयेनाहुः ॥ सत इति ॥ इदं विश्वं
श्चिज्जडशरीरिणः पुरुषोत्तमादुत्थितमुत्पन्नमतः सदविनाशीति चेदित्युच्यते चेत्तर्हि तत्सत्त्वं तर्कहतं विचारदूषितम् ॥ ननु निश्चितमेव
: क्व च मृषा क्षेत्रज्ञानां भोग्यभोगोपकरणभोगस्थानानामशाश्वतिकत्वादेशे नश्वरमेव भवति ॥ यथा क्षेत्रज्ञानां भोग्यादयो
ास्तथा क्षेत्रज्ञानां नित्यत्वात् क्वचन व्यभिचरति क्षेत्रज्ञपक्षे सत्यमेव भवति ॥ तर्हीदं सद्वाऽसदसद्वातत्राहुः ॥ उभययुक्
चिन्मिश्रं भवति ॥ ननु तर्हीनमेतादृशं विचित्रतायुक्तं विश्वमीश्वरेण किमर्थं सृष्टम् ॥ तत्राहुः ॥ व्यवहृतय इति ॥ व्यवहृतये
विषयिमुमुक्षूणां धर्मार्थकाममोक्षप्रापणरूपव्यवहाराय विकल्पः करणकलेवरानेकजात्यादिरूपो भेदः इषितोऽभिमतः कृत
यावत् ॥ तत्रातिदुःखस्वरूपात्संसारात् ये मुमुक्षवस्ते तु मोक्षार्थमेव प्रयतन्ते । येऽन्ये संसारसुखासक्तः पामरा विषयिणश्च ते
ार्थमेव यतन्ते । उक्थजडांस्तास्तु ते भारती वेदलक्षणा वाणी उरुवृत्तिभिः स्वर्गप्राप्तिबोधकप्रवृत्तिवचस्ततिभिः
ानामुपनिषज्जन्यज्ञानदृष्टिहीनानां परम्परा तया भ्रमयति न तु मुमुक्षूनिति ॥३६॥२३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थं कार्यसत्यत्वाभ्युपगममभिप्रेत्य कार्यमिथ्यात्ववादं प्रस्तुत्य प्रतिक्षिपन्ति ॥ सत इदमिति ॥ सत इत्यादिना तर्कहतं
न कार्यमिथ्यात्ववादिमतानुवादः, व्यभिचरतीत्यादिना तत्प्रतिक्षेप इति विभागः । तथा हि । सतः परमार्थभूतात्परस्माद्ब्रह्मणः
ात्, उत्थितमुत्पन्नम्, इदं जगत्, सत् परमार्थभूतं सत्यमिति यावत्, न तु नैतद्युक्तमित्यर्थः । कुतः, यतः तर्कहतं युक्तिविरुद्धम्,
त् यद्यपि यद्यस्मादुत्पन्नं तत्तदात्मकमेव । यथा मृद्धिरण्यादेरुत्पन्नं घटमुकुटादिकार्यं ताभूतमेव, तथापि चेतनात्पुरुषाज्जातानां
तनखलोम्नामचेतनत्वदर्शनात्, अचेतनाद्गोमयाज्जातानां वृश्चिकादीनां चेतनत्वदर्शनात् सतः सदुत्पत्तेर्वैयर्थ्याच्च,
कारणादुत्पन्नं कार्यं सदित्येतत्तर्कहतमतः कार्यं मिथ्यैवेति चेदित्यर्थः । तर्कश्चात्र युक्तिः । का पुनरत्र युक्तिरिति चेदुच्यते ।
व्यस्य अनुवर्तमानत्वं तदतिरिक्तस्य व्यावर्तमानस्याधिष्ठानभूतं मृद्द्रव्यमेव सत्यं, व्यावर्तमाना घटशरावादयस्तु
भूताः । तथा निर्विशेषसन्मात्रात् सर्वाधिष्ठानभूताद्ब्रह्मणोऽन्योऽहङ्कारादिव्यवहारालम्बनः कृत्स्नः प्रपञ्चो मिथ्याकारणभूतं
ब्रह्मैव सत्यं, किं च सत आत्मनो विनाशायोगादसतः शशविषाणादेरुपलब्ध्यभावादुपलब्धिं विना प्रयोगे कार्यं
त्यामनिर्वचनीयमिति गम्यते । अनिर्वचनीयं च शुक्तिकारजतादिवन्मृषैव, तस्य चानिर्वचनीयत्वं प्रतीतिबाधाभ्यां सिद्धं
हि । प्रपञ्चः प्रत्यक्षेण —

'ऐतदात्म्यमिदं सर्वं तत् सत्यं नेह नानास्ति किञ्चन' ॥ 'मृत्योः स मृत्युमाप्नोति यदिह नानेव पश्यति' 'इन्द्रो मायाभिः
ईयते' ॥

इत्यादिभिर्वेदान्तैः बाध्यते चेति । इत्थमनूदितं कार्यमिथ्यात्वपक्षं प्रतिक्षिपन्ति । व्यभिचरतीत्यादिना । कार्यं
मर्थः । क्व च व्यभिचरति, क्व चेति काकुः । न क्वचिव्द्यभिचार इत्यर्थः । केशपुरुषगोमयवृश्चिकादिष्वप्यचेतनांशस्यैव
णभावादिति भावः । तथापि स्वप्नार्थे शुक्तिकारजतादौ मिथ्यात्वेन व्यभिचार इत्यत्राहुः । क्व मृषेति । क्व च मृषा ।
कार्यं मृषा नेत्यर्थः । स्वाप्नार्थानामपीश्वरस्त्रष्टृत्वान्न मृषात्वं, शुक्तौ रजतसद्भावादन्यथाख्यानाद्वा न मृषात्वमित्यभिप्रायः ।
प्रक्रियया सर्वत्र सत्त्वं निर्वाह्यम् । सत उत्पत्तेर्वैयर्थ्यं परिहरन्ति । न तथोभययुगिति । तथा सति उभययुक् कार्यत्वकारणत्वभाक्
व्यभिचरतीत्यनुषङ्गः । क्वचिदपि मृत्सुवर्णादिद्रव्ये उभयावस्थानदर्शनान्न व्यभिचरति । कार्यत्वकारणत्वरूपावस्थावदेव
दिकं दृश्यते, अतः सतोऽवस्थान्तरप्राप्तिः सफलेत्यर्थः । विकल्पः घटशरावाद्यवस्थाभेदः यः, स च व्यवहृतये घटेन

जलमाहरेत्यादिवाक्यपूर्वकं व्यवहारार्थं इषितः इष्टः । ननु 'नेह नानास्ति' इत्यादिश्रुतेरेव कार्यमिथ्यात्वं प्रमापयतीत्यत आहुः भ्रमयतीत्यादिना। ते तव, भारती 'नेह नाना' इत्यादिश्रुतिरूपा, उरुवृत्तिभिः नानाविधतया कथनप्रकारैः, उक्थजडान्, अन्धपरम्परया भ्रमयति । उक्थजडाः अनादिपापदूषिताः कर्मजडाः, नेह नानेति त्वद्भारतीवृत्तिः, न केवलं कार्यमिथ्यात्वबोधनात्मिकैवापि तु अब्रह्मात्मकस्वतन्त्रवस्तुनिषेधबोधनात्मिका ब्रह्मरूपेति देवमनुष्यादिभेदनिषेधादिबोधनाद्यात्मिकाश्च बह्व्यो वृत्तयः सन्ति, ताश्च कर्मजडानामन्धपरम्परया कार्यमिथ्यात्वभ्रमं जनयन्ति । औपनिषत्परमपुरुषवरणीयताहेतुभूतविशेषगुणविशिष्टानां तु अब्रह्मात्मकस्वतन्त्रवस्तुनिषेधादिविषयां प्रमितिं जनयन्तीति किमस्माभिर्विधेयमिति ॥२३॥ ॥३७॥

योगिरामानुजाचार्यकृतसरला व्याख्या

गृहस्थाश्रमसाधनीभूतकर्मणः उपादेयत्वं कथं वा तादृशकर्मोपयोगिगार्हस्थ्यस्य चोपादेयत्वं तथा च श्रुतिः -

'न कर्मणा न प्रजया धनेन त्यागेनैकेनामृतत्वमानशुः ।' इति । 'एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ।' इति भगवद्वचनाच्च । तस्मात् सर्वेषामपि कर्मणाम् भूर्भुवादिलोकप्राप्तेरेव फलत्वात् जगतः असद्रूपत्वेन स्थापिते तत्साधनीभूतकर्मणः असद्रूपत्वं स्वयमेव सिध्यतीति जगतः असद्रूपत्वमस्मिन् श्लोके निरूप्यते । तत्र च जगतः सत्यत्ववादी पूर्वपक्षी तदुक्तः जगतः सत्यत्वस्थापकानुमानप्रयोगः सत इदमुत्थितं सदितीत्यन्तं तदुपरि तत्खण्डनपूर्वकं जगतः असद्रूपत्वनिरूपणमिति अन्यश्लोकस्य इयमेव सङ्गतिः । परमरमणीया सतः इति । इदमिति विश्वम् । पक्षः सदिति । सत्त्वरूपस्साध्यः । सतः सद्रूपात् विश्वं पक्षः सदिति सत्त्वरूपधर्मस्साध्यः । सत इति इदमिति ईश्वरसकाशात् उत्थितमुत्पन्नम् । तथा च सतः उत्पन्नत्वादिति हेतुः । इति चेत् एवं वदसि चेदित्यन्तं पूर्वपक्ष्युपन्यस्त अनुमानप्रयोगानुवादः । तर्कहतमित्यनेन तत्खवण्डनम् । ननु इति आक्षेपे । तर्कहतम् । तर्केण त्वदुक्तानुमाननिरासकेन प्रतिकूलतर्केण हतं निरस्तम् । अतः त्वदुक्तमनुमानमसङ्गतमिति भावः । तर्कश्च युक्तायुक्तविचारणरूपः । स चैवंविधः कार्यकारणयोर्विजातीयत्वस्य बहुशो दृश्यमानत्वात् । सतः उत्पन्नत्वरूपहेतुरस्तु सत्त्वरूपसाध्यं मास्तु इति प्रतिकूलशङ्काजनकस्तर्कः । तादृशतर्केण हतमित्युक्ते तादशशङ्कानिवर्तकस्य अनुकूलतर्कस्य वास्तविकस्याभावात् । हतं त्वदुक्तानुमानमित्यर्थः । कार्यकारणयोर्विजातीयत्वं च गोमयवृश्चिकादिषु प्रसिद्धम् । अचेतनात् गोपयात् सचेतनं वृश्चिकमुत्पद्यते। तथा सचेतनात् शरीरात् अचेतनानि नखदन्तरोमाणि उत्पद्यन्ते । अतः कार्यकारणयोस्सजातीयत्वनियमो नास्तीति भावः । दोषान्तरमाह-व्यभिचरतीति । व्यभिचरति त्वदुक्तः सदुत्पन्नत्वहेतुः सत्त्वाभाववत्पदार्थेषु तिष्ठति । कुत्र व्यभिचरतीत्यत्राह-क्व च क्व चेति । तत्र बहुषु स्थलेष्वित्यर्थः । व्यभिचारदृष्टान्तो यथा सतः अङ्गराजात् असत् वेनः उत्पन्नः । सतः श्रीकृष्णात् असद्रूपाः यादवाः उत्पन्नाः । भूभारत्वेन तेषां प्रतिपादितत्वात् । सद्रूपात् खातीवर्षात् असद्रूपं सर्पगरलमुत्पद्यते । एवमन्यदप्यूह्यम् । एतद्व्यभिचारदोषस्य फलितमाह-मृषेति । व्यभिचारादिदोषग्रस्तत्वेन त्वदुक्तमनुमानं मृषा अयथार्थमित्यर्थः । मृषा मिथ्याऽसत्यशब्दानां तुल्यपर्यायकत्वात् । ''मिथ्यैव व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यती''ति भगवदुक्तेः ।

'मृषा मिथ्या च वितथे'त्यमरः । एतावत्पर्यन्तं परपक्षं निरस्य स्वसिद्धान्तमाहुः-न तथेति । तथा न त्वदुक्तरीत्या सत् न भवति किन्तु असत् सद्भिन्नम् असदेवेति भावः । असत्त्वे हेतुमाहुः-उभययुगिति । उभयेन उत्पत्तिविनाशद्वयेन युनक्ति युक्तं भवतीति उभययुक् । उत्पत्तिविनाशद्वयवदित्यर्थः । अत एव न तथा न सत् इत्यन्वयः । तथा च सत इदमुत्थितं सदित्यनुमानस्य खण्डनरूपं स्वपक्षस्थापकं चेदमनुमानं भवति । यथा वा इदं जगदिति पक्षनिर्देशः न तथेत्यनेन सद्भिन्नत्वम् । असत्स्वरूपं साध्यम् उभययुगित्यनेनोत्पत्तिविनाशोभयवत्त्वं हेतुः । यद्यदुत्पत्तिविनाशद्वयवत् तत्तदसत्यम् । यत्राऽसत्त्वं नास्ति तत्रोत्पत्तिविनाशोभयं नास्ति । यथा जीवे परमात्मनि चेति अन्वयव्यतिरेकी व्याप्तिः । ननु 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरमि'ति भगवद्वचनेन आसुराः जगदसत्यमिति वदन्तीत्युक्तत्वेन जगदसत्यमिति आसुरपक्षः कथमङ्गीक्रियते, इति चेन्न । तत्राऽनीश्वरमिति ईश्वररहितम् । अत एवासत्यम् । शून्यस्वरूपमिति गगनकुसुमवत् । अत्यन्तासत्त्वस्य नास्तिकमतस्य प्रतिपादितत्वात् । अत्र तु न तादृशम् शून्यत्वरूपमसत्त्वं

प्रतिपाद्यते । कि
कथं तद्विरुद्धं
विशिष्टाद्वैतीयश्री
'नासतो
अविनाशस्वभाव
'तस्मान्न
ज्ञानं यथ
प्रतिपादितम् । भ्रा
वाऽसत्यत्वमिति
असद्रूपतत्तल्लोकाऽ
प्रीणनं यज्ञप्रीतैः देवै
भेदः इषितः इष्टः ।
'चातुर्मास्य
इत्यादिवच
इषितः इति, तत्राहुः-
शक्तिलक्षणागौण्याख्
जडान् मन्दमतीन् छान्
क्वचित्प्रयोगदर्शनात्
'प्रवदन्त्यवि
अभियुक्तैरप्यु
अतः 'यस्त
मन्दमतीनित्यर्थः । यद्वा
कर्मिणि निमित्ते मन्दम
प्राशस्त्यमात्रं बोधयति ।
अस्य एवमन
सत्यस्वरूपम् इति चेत् ए
हतं निरस्तम् । क्व च
त्वदुक्तं मृषा सत इदमुत्थि
किन्त्वसदित्यर्थः । विकल
ईश्वरस्येति यावत् । ईश्व
शक्तिलक्षणागौण्याख्यवृत्ति
विपरीतबुद्धिं जनयतीति भा

प्रतिपाद्यते। किन्तु उत्पत्तिविनाशयोगित्वेन सततैकरूपत्वाऽभावरूपमसत्त्वमिति नैष दोषः। ननु विशिष्टाद्वैते जगतः सत्यत्वाङ्गीकारात् कथं तद्विरुद्धं जगतः असत्यत्वं व्याख्यायते इति चेत्तदसत्। स्वपक्षपरपक्षवाक्यतात्पर्यार्थाज्ञानहेतुकत्वात्। तदेवम्। विशिष्टाद्वैतीयश्रीगीताब्रह्मसूत्रभाष्यादिषु जगतः असत्यस्वरूपवत्त्वमेव प्रतिपादितम्। तद्यथा–

'नासतो विद्यते भावो नाभावो विद्यते सतः।' इत्येतच्छ्रीगीताश्लोकस्य विशिष्टाद्वैतभाष्ये विनाशस्वभावो ह्यसत्त्वम्। अविनाशस्वभावश्च सत्त्वम्। यथोक्तं भगवता पराशरेण —

'तस्मान्न विज्ञानमृतेस्ति किञ्चित् क्वचित्कदाचिन्नृप वस्तुजातम्।

ज्ञानं यथा सत्यमसत्यमन्यत्' इति तदेवसत्यासत्यव्यपदेशहेतुरिति गम्यते इत्यन्तेन ग्रन्थेन। जगत असत्यस्वरूपवत्त्वमेव प्रतिपादितम्। भ्रान्तिविषयत्वमङ्गीक्रियते तादृशमसत्यत्वं विशिष्टाद्वैते नाङ्गीक्रियते। किन्तु विनाशित्वरूपं सततैकस्वरूपाभावत्वं वाऽसत्यत्वमिति विशेषः। तस्मात् जगतः असत्यत्वप्रतिपादने न विशिष्टाद्वैतस्यापि विरोधः। ननु जगतः असत्त्वे असद्रूपतत्तल्लोकाऽवाप्त्यर्थम् कथं ज्योतिष्टोमादिनानाविधकर्म विधीयते इत्यत आहुः–व्यवहृतये इति। व्यवहृतये यज्ञैर्देवतानां प्रीणनं यज्ञप्रीतैः देवैः तत्तदिष्टभोगप्रदानेन प्रजानां प्रीणनं भूयादिति परस्परप्रीणनरूपसंसारव्यवहारनिर्वाहाय नानाविधकर्मणां विकल्पः भेदः इषितः इष्टः। ईश्वरस्येति यावत्। ननु

'चातुर्मास्ययाजिनाम् अक्षय्यं वै फलं भवति।' 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः।'

इत्यादिवचनैः कर्मणामक्षयफलसाधनत्वं श्रूयते। अक्षयफलं तु मोक्ष एव। अतः कथमुच्यते व्यवहारार्थमेव कर्मभेदः इषितः इति, तत्राहुः–भ्रमयतीति। हे भगवन्! ते तव भारती चातुर्मास्ययाजिनामक्षय्यं वै फलं भवतीत्यादिवेदवाक् उरुवृत्तिभिः शक्तिलक्षणागौण्याख्याभिः वृत्तिभिः अन्धपरम्परान्यायेन उक्थजडान्। उक्थेन न्यायादिशास्त्रसहकारमन्तराभ्यस्तेन केवलेन वेदेन जडान् मन्दमतीन् छान्दोग्ये तदेव 'ऋक् तद्यजुस्तदुक्थम्' इति उक्थशब्दस्य सामवेदपरत्वेन प्रयोगेऽपि विशेषवाचकानां सामान्येऽपि क्वचित्प्रयोगदर्शनात् इहोक्थशब्दः वेदसामान्यवाचकः। केवलवेदमात्राध्ययनशीलानां जडत्वं भगवताप्युक्तम् यथा–

'प्रवदन्त्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः।' इति।

अभियुक्तैरप्युक्तम् — 'वेदाभ्यासजडः कथं नु रचयेद्रूपं पुराणो मुनिः।' इति।

अतः 'यस्तर्क्केणानुसन्धत्ते स धर्मं वेद नेतरः।' इत्युक्तरीत्या न्यायादिसहायमन्तराभ्यस्तेन केवलवेदेन मन्दमतीनित्यर्थः। यद्वा। उक्थजडान् उक्थेन कर्मभारेण जडान् मन्दमतीनिति वा। तथा च अन्धपरम्पराऽऽगतेनासदुपदेशेन कर्मणि निमित्ते मन्दमतीनिति भावः। भ्रमयति मोहयति। अयम्भावः — न हि वेदः कर्मफलं नित्यमभिप्रैति किन्तु लक्षणया तात्पर्यमात्रं बोधयति। अतः कर्मजडाः एतद्भावमबुध्वा अन्धपरम्पराऽऽगतेनापार्थोपदेशेन मोहं प्राप्नुवन्ति।

अस्य एवमन्वयसङ्ग्रहार्थः — सतः सच्छब्ववाच्याद् भगवत्सकाशादुत्थितमुत्पन्नमत एव हेतोरिदं विश्वं सत् सत्स्वरूपम् इति चेत् एवं वदसि चेत् ननु नन्विति विरोधोक्तिः। 'ननु च स्याद्विरोधोक्ताक्वि'त्यमरः। तर्कहतं तर्केण पूर्वोक्तयुक्त्या निरस्तम्। क्व च तत्र तत्र व्यभिचरति साध्याभाववति हेतुर्वर्तते सत्त्वाऽभाववति सदुत्पन्नत्वं वर्तते इत्यर्थः। अतः इत्युक्तं मृषा सत इदमुत्थितं सदिति वाक्यं मृषेत्यर्थः। अत एवोभययुक् उत्पत्तिविनाशयोगि अत एव हेतोरिदं न तथा सत् न भवति किन्त्वसदित्यर्थः। विकल्पः ज्योतिष्टोमादिनानाविधकर्मभेदव्यवहृतये तत्तत्कर्मफलभोगार्थं तत्तल्लोकगमनागमनव्यवहाराय इषितः ईश्वरस्येति यावत्। ईश्वरस्य तव भारती 'चातुर्मास्ययाजिनामक्षय्यं वै फलं भवती'त्यादिवेदवाक्। उरुवृत्तिभिः शक्तिलक्षणागौण्याख्यवृत्तिभिः अन्धपरम्परया अज्ञानामुपदेशपरम्परया उक्थजडान् कर्मासक्तमन्दमतीन् भ्रमयति मोहयति। विपरीतबुद्धिं जनयतीति भावः। इत्यन्वयसङ्ग्रहार्थः ॥३६॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

पूर्वं महत्सङ्गादिभिर्भगवद्भजनमुपपादितम्। तत्तु तदैव सङ्गच्छेत यदि वेदानां तत्परत्वं स्यात्। तेषां तु क्रियापरत्वं दृश्यत इति पूर्वोक्तम् इति तु सर्वं हस्तिस्नानं जातम् इत्यभिप्रेत्याह–नन्वित्यादि।

'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्।' तस्मादनित्यमुच्यत इति हि परिपूर्णं पूर्वपक्षसूत्रम्।

तस्यायमर्थः — आम्नायस्य वेदस्य। क्रियार्थत्वादंशत्रयविशिष्टभावनाप्रतिपादकत्वात्। तत्त्वेननैव प्रयोजनवत्त्वावगमादित्यर्थः। अतदर्थानां न सांशत्रयवती भावना अर्थः प्रतिपाद्यः। एषां पुरुषास्वाधीनत्वेन विधौ पर्यवसाययितुमशक्यानामित्यर्थः। तेषां

"सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं यद्व्यशीर्यत तद्रजतमभूत्।

प्रजापतिरात्मनो वपामुदखिदत्। देवा वै देवयजनमध्यवसाय दिशो न प्रजानन्॥"

इत्यादीनामर्थवादादीनाम् आनर्थक्यं स्यात् निष्फलत्वं भवेत्। क्रियार्थत्वमन्तरा फलाऽसिद्धेः। तस्मादेवञ्जातीयं वाक्यमनित्यम्। लौकिकवाक्यतुल्यमुच्यते। धर्माधर्मज्ञानरूपनित्यकार्यकर्तृत्वाभावात्। न तु स्वतोऽप्यनित्यम् अपौरुषेयत्वात्। अथ तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वादिति सम्पूर्णं सिद्धान्तसूत्रम्। तस्यायमर्थः। तेषु रोदनवपोत्खातदिगज्ञानादिषु भूतानां वर्तमानांस सिद्धार्थप्रतिपादकानां विधिप्रत्ययशून्यानां 'सोऽरोदीदि'त्यादिवाक्यानां क्रियार्थेन क्रियाप्रतिपादकेन "बर्हिषि रजतं न देयम्। पशुना यजेत। वायव्यं श्वेतमालभेत॥" इत्यादिना समाम्नायः समुच्चारणसम्बन्ध इत्यर्थः। कर्मपरवाक्येन सम्बन्धेऽयं प्रकारः–यतो रोदनरूपामङ्गलजन्यं तद्रजतम्। अतो बर्हिषि रजतं देयमिति। यतो वायुः क्षिप्रकार्यकारी देवोऽतो वायव्यं श्वेतमजमालभेत इति। यतो ब्रह्मणा वपया निर्मितत्वाद्विशिष्टफदः पशुरतः पशुना यजेत इति। यतो देवानामपि देवयजनाधिष्ठाने दिगज्ञानम् यतोऽन्यत्रानासक्त्या यजेतेत्येवं विधिनिषेधवाक्योपक्षिप्तप्राशस्त्यनिन्दान्यतरपूरणेनान्वये कृते सर्वस्य वेदस्य क्रियापरत्वसिद्ध्या निरर्थकत्वनिरासेन प्रामाण्यं सिद्धम्। "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविध्युपात्ते सर्वस्मिन्नपि वेदे न कस्यापि वाक्यस्यानर्थक्यासम्भवान्निरर्थकाध्ययनविध्यनुपपत्तेरित्यर्थः। कथितसिद्धान्तसूत्रस्यार्थशेषमाह–अर्थस्येति। अर्थस्य रोदनादेस्तन्निमित्तत्वात् सा क्रियैवार्थो निमित्तं फलं यस्य तस्य भावतस्तत्त्वम्। तस्माद्यतः स रोदनादिरूपोऽर्थो निन्दाप्राशस्त्यद्वारा क्रियायामेव तथा तथान्वितो बभूव। तस्मादन्यैरपि यथाशक्त्यावेशेन क्रियैव कर्तव्येति तत्र तत्र यत्र यत्र वेदस्य क्रियापरत्वं न दृश्यते तत्र तत्र उपनिषदामपि तत्त्वमसीत्यादिवाक्यानामपि तदेवं क्रियापरत्वमेव। एतेन विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरिति द्वितीयपादोक्तसूत्रसिद्धान्तेनोपनिषदां तत्त्वमसीत्यादिवाक्यानां नैराकाङ्क्ष्यम्। वयं कर्मपराः कथं स्याम इत्याकाङ्क्षाराहित्यं क्रियापरत्वेन सार्थकत्वमिति यावत्। केन प्रकारेण व्याख्यातमित्यपेक्षायां प्रकारमाह–क्रत्वर्थकर्तृप्रतिपादनेन क्रत्वर्थो यज्ञाङ्गरूपो यः कर्ता यजमानस्तस्य यत्प्रतिपादनं ईश्वराभेदेन स्तुत्या वर्णनम्। तेन प्रकारेण यथादित्यो यूपः, प्रस्तरोऽयं यजमान इत्यादौ यूपः स्तुत्या यूपः पशुनियोजनक्रियायामन्वेति। यप्रस्तरश्च कुशलपुत्तलम् स्तुत्या क्रियानिष्पत्तावन्वेति। तथोपनिषद्वाक्यैरीश्वराभेदेन स्तुत्या यजमानोऽपि कर्तृत्वेन क्रियास्वन्वेतीति भावः। पूर्वोक्तसूत्रस्यायमर्थः — तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। यदुक्तमानर्थक्यमर्थवादानां, तन्न। विधिना स्वस्य प्रयोजनवदर्थपर्यवसायित्वं गमयता सह एकवाच्यत्वादर्थवादवाक्यानि स्तुत्यर्थेन स्तुत्यङ्गत्वेन विधीनां स्युः विकवधिशेषाणि भवन्तीति सङ्क्षेपः।

एवं मीमांसकपूर्वपक्षे श्लोकात् बहिरेव सिद्धान्तमाह–नेति। तत्त्वमसीत्यादिवाक्यानां यजमानस्तुतिद्वारा क्रियापरत्वं न सङ्गच्छते। एकमेवेत्यादिश्रुत्यैवं तद्विपरीतात्मप्रतिपादनात्। तस्मात्त्वदभिमताद्यजमानात्मनः सकाशाद्विपरीतस्य शुद्धात्मनः प्रतिपादनाद्धेतोः वैपरीत्यमेव स्फुटीकरोति– ब्रह्म एकं सजातीयभेदशून्यं यजमानसजातीया बहवो यजमानास्तिष्ठन्ति। अद्वितीयं विजातीयभेदशून्यं यजमानस्य हि विजातीयाः शूद्रादयो बहवस्तिष्ठन्ति। ब्रह्म व्यापकं यजमानो हि परिच्छिन्नः। ब्रह्म विज्ञानं

न्मात्रम् । यजमानो हि चिज्जडग्रन्थ्यहङ्कारवत्त्वेन ज्ञाता न ज्ञानमात्रम् । ब्रह्म हि आनन्दमात्रम्, यजमानो हि ःखात्मककर्मकारणाद्दुःखी । ब्रह्म हि चक्षुःश्रोत्रादिशून्यम् । तस्य हि तच्छून्यत्वेऽन्धबधिरादिदोषापत्त्या यज्ञानधिकाराद्यजमानत्वमेव वेतेत्येवं वैपरीत्यमनुसन्धेयम् ।

न ह्यद्वितीयेति भेदशून्यपरमानन्दरूपस्यात्मनः क्षुद्रसुखफलककर्माङ्गत्वं न युज्यते । आत्मनः परमानन्दरूपत्वबोधे द्रस्वर्गाद्यनन्दार्थं प्रवृत्त्यसम्भवादित्यर्थः ।

ननु भवतु वेदान्ते विपरीतात्मप्रतिपादनम् । अस्माभिस्तु स्वाचार्यस्य तन्त्रवार्तिककृत आत्मनः कर्माङ्गत्वप्रतिपादनरूपाज्ञा त्नीयैवेत्याशङ्क्याह–ननु मतिमिति । एतदात्मनः कर्माङ्गत्वं सर्वत्रैव हीति सर्वस्मिन्नेव वेदे विविधं द्रव्यदेवतावघातादिविषयं तं "व्रीहिभिर्यजेत" "वैश्वदेव्यामिक्षा" "व्रीहीनवहन्यादि"त्यादिवाक्यजन्यम् । संस्कारत्वेन संस्कारस्वरूपत्वेन गम्यते यते। यथा प्रोक्षणादिसंस्कारादेवापूर्वोत्पत्तिर्नान्यथा । तथा वेदवाक्यजन्ये एव व्रीहिज्ञाने कश्चन संस्कारः फलप्रापको भवति न तु दवाक्यजन्ये तदेव संस्काररूपं विज्ञानं परस्य यागादिकर्मणोऽङ्गं च संस्कारस्य स्वतः फलत्वाभावात् । किन्त्वात्मज्ञानादन्यत्र निषज्जन्यात्मज्ञानं विना आत्मज्ञानं तु न संस्काररूपं न च कस्यापि कर्मणोऽङ्गं तस्य स्वयम्प्रकाशत्वात् । परमानन्दरूपत्वेन समाङ्गिकत्वाच्चेत्यर्थः ।

व्याख्यानान्तरं तु चूडामणिचक्रवर्तिटीकायां दृश्यम् । तच्च वार्तिकाशयानभिज्ञानविलसितत्वात् प्रकृतानुपयोगित्वाच्च श्यम् । एतदर्थमेव पराभिमतस्योपनिषद्वाक्यानां क्रियापरत्वस्य निवर्तनार्थमेव यन्मननं विधिनिषेधप्रत्ययरहितानामेवोपनिषद्वाक्यानां युक्तिभिः सिद्धे ब्रह्मणि तात्पर्यावधारणं तदर्थं तत्र मीमांसकमते एवं भवेदात्मना कर्माङ्गत्वं भवेत् तदेव तु द्वैतस्य सत्यत्वमेव मनोत्तराभ्यामिति मीमांसकानां प्रश्नो वेदान्तिनामुत्तरं ताभ्यां यन्मननं श्रुतस्यार्थस्य युक्तिभिः मनस्यवस्थापनं तेनेत्यर्थः । धर्मिपक्षः स उत्थितमिति हेतुगर्भं विशेषणम् । तेन सत उत्पन्नत्वादिति हेतुः फलति । यद्यपि मीमांसकमते आकाशेदेः स्वर्गादेश्चोत्पत्तिर्नास्ति यपि परत्वादिप्रोक्तहेतोरेवाङ्गीकारेण पूर्वपक्षोत्थापनमित्यनुसन्धेयम् । यद्यत उत्पन्नमिति व्याप्तिनिदर्शनम् । तत्र विश्वस्मिन् सता ह्मणा भेदः साध्यते तदा सत इत्यपादानपञ्चम्या निर्देशेनैव भेदप्रतीतेः । यथा भूभृतोऽवतरति गङ्गा । वृक्षात्पत्रं पततीत्यादौ पञ्चमीनिर्देशेन भेदः प्रतीयते । इति विरुद्धो हेतुः । तल्लक्षणं यथा —

शब्दो नित्यः कृतकत्वात् इत्यत्र कृतकत्वं नित्यत्वाभावेनानित्यत्वव्याप्तम् । तथा सत उत्पन्नत्वम् अभेदाभावेन भेदेन प्तम् । यत्र अपादाननिर्देशस्तत्र भेद इति यावत् । तर्कहतमिति भेदसाधकेन हेतुना अभेदसाधनं युक्तिबाधितमित्यर्थः । असुरा सुरादिपदेषु यथा नञो विरोधार्थता । सुरविरोधी असुरो धर्मविरोधी चाधर्म इति । तथा भेदविरोधी अभेदः । कश्चन स्वरूपसम्बन्धविशेष ति मीमांसकः शङ्कते नन्विति । अभेदं भेदविरोधिनं स्वरूपसम्बन्धविशेषं वयं न साधयामः । सर्वथा द्वैतस्यात्यन्ताभावं न धयाम इत्यर्थः । किन्तु यथा कार्यकारणावस्तुतया भिन्नयोरपि स्वर्णकुण्डलयोस्स्वर्णत्वेन भेदो नास्ति तथा विश्वब्रह्मणोः कार्यकारणावस्थतया भेदोऽपि सत्यत्वेनांशेन भेदं प्रतिषेधामः । तत्र सद्भेदनिषेधे अभेद एव स्याज्जगति सत्यत्वमेव स्यादित्यर्थः । एवं चापादाननिर्देशेन जातापि कार्यकारणावस्थारूपा भेदप्रतीतिः सत्यत्वांशेन भेदनिषेधविरोधिनी नास्त्येवेति न रुद्धो हेतुरित्याशङ्क्य नैकान्तिकत्वेन दूषयति । सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः । ये पञ्च हेत्वाभासास्तेषां मध्ये मध्ये यः सव्यभिचारहेतुः स अनैकान्तिक इत्युच्यते । तेष्वपि त्रिविधेषु साधारणासाधारणानुपसंहारिषु मध्ये साधारणैकोऽत्र ग्राह्यः । तस्य भावः तत्त्वम् । तेन दूषयति–तल्लक्षणं साध्याभाववद्वृत्तिः साधारणैनैकान्तिकः । यथा पर्वतो धूमवान् प्रमेयत्वादिति । तथात्र विश्वं पक्षीकृत्य सदभेदः साध्यते । तत उपपन्नत्वादिति हेतुः । एवं च साध्यो भेदस्तदभावो स्थलान् पुत्रो घटप्रध्वंसश्च तत्रापि पितुरुत्पन्नत्वं मुद्गराच्चोत्पन्नत्वं वर्तत एवेति उत्पन्नत्वादिति हेतुर्व्यभिचरति । साध्याभावस्थलेऽपि वर्तते । पितृपुत्रयोस्तु भेदः प्रत्यक्ष एव । पितुर्ब्राह्मणत्वाद्गौरत्वात् पुष्टत्वात्पुत्रस्य तद्वैपरीत्यात् । एवं मुद्गरस्य रूपत्वाद्घटप्रध्वंसस्याभावरूपत्वाद्भावाभावयोरैक्यानुपपत्तेश्चेति । तथादर्शनाद्व्यभिचारदर्शनात् । अतो नानैकान्तिकत्वमिति तदुपादानत्वादिति हेतुः । न तु तन्निमित्तत्वादिति । अतस्तदुपादानत्वहेतोर्न व्यभिचारित्वमित्यर्थः ।

पुत्रस्य पित्रुपादानकत्वावाभाद्घटप्रध्वंसस्य च मुद्रोपादानकत्वाभावाद्विश्वस्य तु ब्रह्मोपादानकत्वादभेद एवेति भावः। तथा च तदुपादानत्वलक्षणस्य हेतोरभेदरूपसाध्याभाववति पुत्रे घटप्रध्वंसे च वृत्तित्वाभावाव्द्यभिचारलक्षणासम्भवेन न हेतोर्व्यभिचारित्वमिति। पुनरपि जगतः सत्यत्वमिति मीमांसकपूर्वपक्षमाशङ्क्य दूषयति–वेदः क्वच मृषेति। क्वचिदुपादानकार्यं मृषापि भवतीत्यन्वयः। गुणोपादानस्य रज्जूपादानकस्यापि फणिनस्सर्पस्य न गुणत्वं न रज्जुत्वम्। अन्यथा गुणत्वे मिथ्यात्वाभावे च सति अधिष्ठानज्ञानोत्तरकालेनायं सर्प इति बाधो न स्यात्। अत उपादानकार्यस्यापि क्वचिन्मिथ्यात्वात् अनैकान्तिकत्वमेवेति रज्ज्जाद्यभेदरूपसाध्याभाववत्यपि सर्पे तदसत्त्वात्पुनरपि व्यभिचारित्वादित्यर्थस्य विवक्षितत्वात्। यद्यतन्मात्रोपादानकं तत्ततो न भिन्नमिति व्याप्तेर्न रज्जुसर्पे व्यभिचारः। रज्जुसर्पस्याज्ञानयुक्तरज्जूपादानत्वेन रज्जुमात्रोपादानकत्वाभावाद्युक्तमेव मिथ्यात्वमिति। ननु तत्रेति। तत्र रज्जुसर्पदृष्टान्ते तथामृतस्याज्ञानयुक्तोपादानकारणस्य कार्यं यत्तस्याऽवस्तुत्वाद्भ्रान्तिमात्रविलसितत्वेन मिथ्यात्वात् तत्तुल्यमत्रापीति। अत्रापि विश्वस्मिन्नपि तत् अज्ञानयुक्तोपादानकार्यत्वं तुल्यम्। यथा प्रातीतिके सर्पे तथैवेत्यर्थः। अविद्यासंवलितस्यैव ब्रह्मणो जगदुपादानत्वात्तन्मात्रोपादानकत्वरूपो हेतुर्जगति स्वरूपासिद्ध इति। जगतो मिथ्यात्वमेव युक्तमिति भावः। अत्रापि विश्वस्मिन्नपि एवम्भूतस्याज्ञानयुक्तोपादानजातस्य अतः अज्ञानयुक्तोपादानकार्यस्य मिथ्यात्वात् सदुपादानत्वं सन्मात्रोपादानत्वमसिद्धं स्वरूपासिद्धम्। जगति पक्षे सन्मात्रोपादानकत्वस्य हेतोरसत्त्वाज्जगतो मिथ्यात्वमेवेत्यर्थः। मूलेन तथोभययुक् इत्यस्यायमन्वयः। उभाभ्यां सदविद्याकारणाभ्यां युक्तमिदं विश्वं तथा रज्जुसर्पादेव तस्मान्न सत्यं नेति निगमनम्। पुनर्मीमांसकः शङ्कते–नन्विति। अनेन सदुपादानकत्वेन हेतुना अर्थक्रियाकारित्वादिति अर्थः प्रयोजनम् उदकाहरणादि तस्य क्रियानिर्वाहस्तत्कारित्वात् न यदेवमित्यादिव्यतिरेकव्याप्तिनिदर्शनं न यत् सत्यं न तत् एवमर्थक्रियाकारि व्यवहारापादकमपि न। यथा शुक्तिरजतादि व्यतिरेकस्य चेदं लक्षणम्। साध्याभावे हेत्वभावो व्यतिरेकः। अन्वयव्याप्तिश्चेयं यदर्थक्रियाकारि तत्सत्यम्। यथाह–दुःस्थरजतम्। तत्राह–तस्मिन् पूर्वपक्षे वेदः समाधानमाह–कूटं छलेनान्तःपिहितपित्तलं कार्ष्यं दशमासादिपरिमितम् आपणम्। रजतस्वर्णमुद्रादि आदिना स्वप्नाङ्गनादिपरिग्रहः। तेनापि व्यवहारदर्शनात्। पुनर्मीमांसकः शङ्कते–नन्विति। एकत्र हट्टबिलादौ सतो वर्तमानस्य रजतसर्पादेः अन्यत्र शुक्तिरज्ज्वादौ आरोपोऽध्यवसायो भ्रमः अत्यन्तासत्त्वेन सर्वथा मिथ्यात्वे भट्टवार्तिकस्यायमर्थः। असत् सर्वथा मिथ्याभूतं क्वाप्यदृष्टं खपुष्पत्वम् अवस्तुनि शशशृङ्गादौ अधिष्ठाने कथमध्यस्यते आरोपयितुं शक्यते, न कथमपीत्यर्थः। तर्हि कथमध्यस्यते तत्राह–प्रज्ञातेति। प्रज्ञातोऽनुभूतो गुणो रूपादिः सत्ता च सद्भावो यस्य रजतादेस्तत्प्रज्ञातगुणसत्ताक एव शुक्तिकादौ दोषसद्भावेऽध्यारोप्येत एवेति तु नियमो नास्तीत्यर्थः। संस्कारजन्यो भ्रम इति संस्कारो हि स्वोत्पत्त्यर्थं पूर्वमनुभवमात्रमपेक्षते न त्वनुभवस्य सत्यत्वमसत्यत्वं वा। तस्मादेव हेतोः संस्कारजन्यो भ्रमः स्वजनकसंस्कारनिष्पत्तये पूर्वानुभवस्मृतिरूपमज्ञानमात्रमपेक्षते, न तु वस्तुनः पूर्वप्रतीतिविषयस्य सत्यत्वमपेक्षते। प्रतीतौ सत्यां भ्रमात्मके ज्ञाने सति वस्तुनः भ्रमविषयस्य सत्यत्वाभावेन भ्रमव्यतिरेकस्य भ्रमाभावस्याऽदर्शनाद्यतः संस्कारमात्रस्यैव भ्रमजनकत्वं न वस्तुसत्त्वस्य। अतो भ्रमस्यानादित्वात् तेन च मिथ्याभूतेनापि विश्वेन व्यवहारः सेत्स्यतीत्यप्रयोगको हेतुः अर्थक्रियाकारित्वादिति हेतुस्तावद्विश्वस्मिन्नस्ति। सत्यत्वं साध्यं मास्तु इत्यस्य तर्कस्यानुकूलत्वाभावादप्रयोजकः साध्यनिश्चयस्य प्रयोजककारणं न भवतीत्यर्थः। पुनः शङ्कते–नन्विति। चतुर्षु चतुर्षु मासेषु क्रियन्ते इति चातुर्मास्यानि। प्रागुक्तानि वैश्वदेवादीनि। तैरिष्टवानिति चातुर्मास्ययाजी। तस्य चातुर्मास्ययाजिनः सुकृतं तत्कर्मजं स्वर्गादिफलं भोगकालाभ्यां हेतुमशक्यम्। प्रलयाऽनभ्युपगमादिति भावः। अपामेति। सोमरसं यज्ञेषु पिबाम पानेन चामृताः नाशरहिताः जातास्स्मेति क्रमेण भोग्यभोक्तृत्वनित्यत्वप्रतिपादिके श्रुती लक्षणयेति चातुर्मास्ययाजिनस्सुकृतमक्षय्यमिति वाक्येऽक्षयपदस्यामृतपदस्य च यागप्राशस्त्येऽजहल्लक्षणतया प्राशस्त्यमात्रं वेदोऽभिप्रैति। कुतो विध्येकवाक्यत्वात् चातुर्मास्येन यजेतेत्येवंरूपेण विधिनैकवाक्यत्वात्। यतश्चातुर्मास्ययागः प्रशस्तोऽतश्चातुर्मास्ययागेनेष्टं भावयेदित्येव विध्येकवाक्यताहेतुमद्वाक्येन गम्या। अर्थवादानां प्राशस्त्ये लक्षणस्वार्थपरित्यागेनैव विधिवाक्यान्वयस्य मीमांसकैरभ्युपेतत्वात्। अन्यथा स्वार्थयागेन प्राशस्त्यमात्रे लक्षणया विध्येकवाक्यत्वानङ्गीकारे वाक्यभेदसंज्ञकदोषप्रसङ्गात् एकोद्देशेनानेकविधानं वाक्यभेदः। एकं

तुर्मास्ययागजनितस्वर्गादिफलमुद्दिश्य तन्नामा यागो विधीयते । तस्य फलस्य नित्यत्वं च विधीयते । इत्युभयविधाने सुदृढो यभेदः । स च वाक्यमतत्वान्महान् दोषः । लक्षणं तु पदगतत्वादल्पदोषरूपा तद्वरमक्षयपदस्य प्राशस्त्यमात्रलक्षणया त्ययागमात्रम् एककर्मफलोद्देशेन विधीयते इत्यैकस्यैव विधानान्न वाक्यभेदः । तदुक्तं भगवता जैमिनिना —

"विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरि"ति ।

व्याख्यातमिदं पूर्वम् । ननु वेदान्ते मन्त्रार्थवादानां देवताधिकरणे "भावन्तु बादरायण"(१/३/३२) इत्यत्र स्वार्थे ण्यमुपपादितमित्याशङ्क्याह–तद्यथेति । तयोर्द्वयोर्लोकयोर्मध्ये कर्मणा चितः सम्पादितः ऐहिको लोको भोगो यथा क्षीयते मुत्र स्वर्गेऽपि पुण्येनापूर्वेण चितः साधितो भोगः क्षीयत इति दृष्टान्तपोषितानुमानगर्भितश्रुत्यन्तरविरोधाच्च । अयं प्रयोगः क्षयिष्णुः पुण्यकर्मसम्पादितत्वात् । कृष्यादिकर्मसम्पादितसस्यादिवत् । यतः कर्मफलनित्यत्वप्रतिपादकं वाक्यं स्तुतिमात्रमतः स्वर्गादिफलस्य नित्यत्वम् । ऐतेनैव विश्वस्य मिथ्यात्वप्रतिपादनेनैव अन्यपरत्वम् अध्यारोपपरत्वम् । सतोऽपि भवतः उद्भूतं भुवनं विश्वं सन्नेव सत्यायाः स्रजः उत्पन्नः सर्प इव कूटकनकं कृत्रिमस्वर्णमपि कार्यं कुर्वत् व्यवहारापादकं भवत्येव वेदोऽपि परः मुख्यार्थपरो न भवति । शिष्टं स्पष्टम् ॥३६॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

अत्रादौ स्वामिचरणलिखितं मीमांसासूत्रादिकं लिख्यते–नन्वाम्नायस्य क्रियापरत्वादानर्थक्यमतदर्थानाम् । तद्भूतानां क्रियार्थेन म्नाय इति तत्र तत्र जैमिनिना वेदस्य क्रियापरत्वाभिधानादुपनिषदामपि । तदेव युक्तम्, यथोक्तं तन्त्रवार्तिककृता–एतेन र्थकर्तृप्रतिपादनेनोपनिषदां नैराकाङ्क्ष्यं व्याख्यातमिति । न एकेन 'एकमेवाद्वितीयं ब्रह्म । विज्ञानमानन्दम् अचक्षुरश्रोत्रम्' त्वं तद्विपरीतात्मप्रतिपादनात् न ह्यद्वितीयपरमानन्दरूपस्य कर्माङ्गत्वं युज्यते । अनुमतं चैतत् वार्तिककृतः । कथं सर्वत्रैव हि नं संस्कारत्वेन गम्यते । पराङ्गं चात्मविज्ञानादन्यत्वेत्यवधार्यतामिति तेनैवोक्तत्वात् । एतदर्थमेव मननाय मुनयः पर्यटन्तीत्युक्तं तावत् द्वैतस्य सत्यत्वे । भवेदप्येव तदेव न सम्भवतीति प्रश्नोत्तराभ्यां मननेन तत्त्वावधारणप्रकारमाह–सत इति । अस्या ख्या सङ्क्षेपेण क्रियते ।

"आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥"

तस्मादनित्यत्वमुच्यते इति पूर्वपक्षसूत्रम् । अस्यार्थः —

"चोदनालक्षणोऽर्थो धर्मः ।" इत्युपक्रमात् "तस्य ज्ञानमुपदेशः ।" इति मध्ये परामर्शात् "तद्भूतानां क्रियार्थेन समाम्नायः त्युपसंहाराच्च । आम्नायस्य क्रियार्थत्वमवगतम् । ततश्चायमर्थः — आम्नायस्य वेदस्य क्रियार्थत्वात् यज्ञादिक्रियापरत्वात् र्थानामक्रियार्थानां वेदानामानर्थक्यमनर्थता —

"सोऽरोदीत्तद्रुद्रस्य रुद्रत्वं प्रजापतिरात्मनो वपामुदखिदद्देवा वै देवयजनमध्यवसाय दिशो न प्रजानन् ॥"

इत्येवमादीनामानर्थक्यं धर्माधर्मरूपार्थप्रतिपादकत्वराहित्यं तस्मादेवं जातीयकं वाक्यजातमनित्यमुच्यते । अनित्यमिव नित्यमेव अपौरुषेयत्वेन तन्निरासात् । एवमादिवाक्यानामक्रियार्थत्वं तु रोदनवपोत्खातदिगज्ञानादिरूपसिद्धार्थबोधकत्वेनेति त्वम् ।

अस्य सिद्धान्तसूत्रमाह —

"तद्भूतानां क्रियार्थत्वेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् ।" इति सूत्रम् ।

अस्यार्थः — तत् तेषु पदार्थेषु रोदनवपोत्खातदिगज्ञानादिषु भूतानां वर्तमानानां पदानां सोऽरोदिदित्यादीनां क्रियार्थेन त्येत्यादिना समाम्नायः समुच्चारणं सम्बन्ध इत्यर्थः । कुतः । अर्थस्य पदार्थस्य तन्निमित्तत्वात् । वाक्यार्थप्रत्ययस्य त्वात् । पदानि तावत्स्वार्थानभिदधति । पश्चात्ते पदार्था आकाङ्क्षायोग्यतासन्निधिमत्त्वाद्वाक्यार्थमवगमयन्ति ।

अत आकाङ्क्षादिमहिम्ना रोदनादिवाक्यानां कथञ्चिद्विध्येकवाक्यता कल्पनीयेति। तस्माद्यथाशक्ति आवेशेन क्रिया कर्तव्येत्यर्थः। "कल्पते —" इत्यादिसूत्रैर्मीमांसायां तत्रतत्र जैमिनिना वेदस्य क्रियापरत्वाभिधानात्कथनात् उपनिषदामपि क्रियापरत्वमेव युक्तं यथोक्तं तन्त्रवार्तिककृता

एतेनक्रत्वर्थकर्तृप्रतिपादनेनोपनिषदां नैराकाङ्क्ष्यमिति। अस्यार्थः–क्रत्वर्थः यज्ञाङ्गभूतो यः कर्ता यजमानः तस्य प्रतिपादनं तत्त्वमस्यादिवाक्यैरीश्वराभेदेन स्तुत्यत्वेन निरूपणम्। तेन उपनिषदां निराकाङ्क्ष्यसार्थकत्वम्। उपनिषद्भिर्यजमानः स्तूयते न तु निर्विशेषं ब्रह्म प्रतिपाद्यत इति भावः। तदेवं वेदस्य क्रियापरत्वाभिधानमुपनिषदां नैराकाङ्क्ष्यम् ईश्वरस्य कर्माङ्गत्वं न भवतीत्याह-नेतीति। "एकमेवाद्वितीयं ब्रह्म। विज्ञानमानन्दमि"त्यादिभिः श्रुतिभिः तदुक्ताद्विपरीतस्यात्मनः प्रतिपादनात् न हि अद्वितीयपरमानन्दरूपात्मनः कर्माङ्गत्वं युज्यतेऽतो न भवतीत्यर्थः। कथं तर्हि वार्तिककृता तथा व्याख्यातम्, सत्यम्, एतत् तस्यानुमतं न भवति। तथा हि सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते पराङ्गश्चात्मविज्ञानादन्त्रेत्यवधार्यतामिति तेनैवोक्तत्वात्। अस्यार्थः — असंसार्यात्मज्ञानं विना हि सर्वत्र विज्ञानं यत् किञ्चिद्विधज्ञानजातं संस्कारत्वेन वासनात्वेन गम्यते ज्ञायते परेषां कर्मणामङ्गं पराङ्गं ज्ञानं प्राक्कृतस्यानुप्रवर्तकः संस्कारः। जातमात्रस्य स्तनपानादिज्ञानं संस्कारवशादेव जायते। औपनिषदं परमात्मज्ञानं तु गुरूपदेशं विना न भवतीति तात्पर्यम्। एतदर्थं मननाय मुनयः पर्यटन्तीत्युक्तं तत्र तावत् द्वैतस्य सत्यत्वे भवेदप्येवम्। तदेव न सम्भवति। इति प्रश्नोत्तराभ्यां मननेन तत्त्वावधारणप्रकारमाह–सत इति। इदं विश्वं सतः परमेश्वरादुत्थितम्। सतः यदुत्पन्नं तत्तदात्मकमेव दृष्टम्। यथा कनकादुत्पन्नं कुण्डलादिकं तद्वत्। एतद्दूषयति। ननु भो वादिन्! इति चेत्तर्हि तर्कहतं तत्र यदि सत्तासहाभेदः साध्यते तदा अपादानत्वनिर्देशेनैव भेदप्रतीतेर्विरुद्धो हेतुरिति तर्केण हतः। ननु भेदं साधयामः। किन्तु तदुत्पन्नत्वेन भेदं प्रतिषेधामः। यथा कनकादुत्पन्नं कुण्डलं कनकमेव भवति। ब्राह्मणादुत्पन्नो ब्राह्मण एव स्यात्। तद्वदत्राप्यभेद एव स्यात्। एवं स्यात्। एवं चेत् अनैकान्तिकत्वेन दूषयति–व्यभिचरति क्व चेति। पितृपुत्रादिषु मुद्गरघटध्वंसादिषु व्यभिचारदर्शनात्। पितुर्निमित्तादुत्पन्नः पुत्रः पितरि स्थिते पुत्रक्लेशमरणादिव्यभिचारः। तथा मृत्तिकायां स्थितायां मुद्गरपाताद्घटध्वंसो व्यभिचारः। एवं सन्निमित्ताज्जातस्य जगतो नाशादिव्यभिचारः। अतो नैकान्तिकत्वमिति। ननु तदुत्पन्नं नाम तदुपादानत्वं न तु तन्निमित्तम्। यथा मृत्पिण्डमादाय घटो भवति। घटस्य मृदुपादानत्वम्। अतो नैकान्तिकत्वं भवति। एतद्दूषयति–क्व च मृषेति। क्व च कुत्रचित् रज्जुसर्पादौ तदुपादानत्वं मृषा मिथ्या भवति। यथा गुणोपादानस्य फणिनो न गुणत्वं किन्तु मिथ्यात्वम्। गुणो रज्जुः। रज्जुमुपादाय फणी भवति। न हि फणिनो रज्जुत्वमस्ति। मिथ्यात्वमेव। अन्यथा कुण्डलादिवदबाधप्रसङ्गं स्यात्। अतः पुनरनैकान्तिकत्वमेव। ननु तं न केवलं गुणमात्रं फणिनः उपादानं न भवति किन्तु अविद्यायुक्तं तथाभूतस्यावस्तुत्वाद्युक्तं फणिनो मिथ्यात्वमिति। एवं चेत्तर्हि अत्रापि तत्तुल्यत्वमिति दूषयति–न तथोभययुगिति। उभाभ्याम् उपादानकारणाभ्यां सदविद्याभ्यां युनक्तीति उभययुक्। उभययुजापि इदं जगन्न तथा। न सत्। कुतः। तयोरुभयोरुपादानत्वं हि परस्पराध्यस्तत्वेनैव वक्तव्यम्। अतस्तस्य च मिथ्यात्वं सर्ववादिप्रसिद्धमेव। तस्मादत्रापि अविद्यायुक्तस्यैव सतः उपादानत्वम्। एवम्भूतस्य न वक्तव्यम्। वस्तुतः सत्यत्वम्। अतः सदुपादानत्वमसिद्धमिति हेतोः न वस्तुसत्त्वं प्रपञ्चस्येति। ननु मा भूदनेन हेतुना प्रपञ्चस्य सत्त्वं हेत्वन्तरेण साधयामः। तथा हि सदिदम् अर्थक्रियाकारित्वात्। न यदेवं न तदेवम्। यथा शुक्तिरजतमिति। अस्यार्थः। इदं जगत् सत् सत्यम्। अर्थक्रियाकारित्वात्। यत् एवं सत्यं न भवति तदेवमर्थक्रियाकारि न भवति। यथा शुक्तिरजतमिति अर्थक्रियाकारि न भवति। तद्वदिति। एतद्दूषयति। व्यवहृतय इति।

व्यवहृतये विकल्प ईषितोऽन्धपरम्परया। अन्धपरम्परया विकल्पो भ्रम स व्यवहाराय अर्थक्रियार्थम् इषित इष्टः। एतत्कूटकार्षापणादिनापि क्वचित् व्यवहारदर्शनात्। अत्र कूटं ताम्रमुद्रादिकम्। कार्षापणं वराटकः। कपर्दकः इति पर्यायः। अयम्भावः। संस्कारजन्यो भ्रमः संस्कारसिद्धये पूर्वप्रतीतिमात्रमपेक्षते न वस्तुसत्त्वम्। प्रतीतौ सत्यां वस्तुसत्त्वाभावेन भ्रमव्यतिरेकादर्शनात्। अतोऽनादित्वात् पूर्वपूर्वभ्रमदृष्टस्योत्तरोत्तर आरोपो भविष्यति इति अन्धपरम्परान्यायेन व्यवहारः सेत्स्यतीत्यप्रयोजको हेतुरिति। ननु

या कर्तव्येत्यर्थः।
क्रयापरत्वमेव युक्तं

ानः तस्य प्रतिपादनं
जमानः स्तूयते न तु
त्वं न भवतीत्याह-
प्रतिपादनात् न हि
ातम्, सत्यम्, एतत्
मति तेनैवोक्तत्वात्।
गम्यते ज्ञायते परेषां
ौपनिषदं परमात्मज्ञानं
भवेदप्येवम्। तदेव न
थतम्। सतः यदुत्पन्नं
त्तर्हि तर्कहतं तत्र यदि
ः। किन्तु तदुत्पन्नत्वेन
दत्राप्यभेद एव स्यात्।
दषु व्यभिचारदर्शनात्।
ाद्घटध्वंसो व्यभिचारः।
ानत्वं न तु तन्निमित्तम्।
क्व च मृषेति। क्व च
ध्यात्वम्। गुणो रज्जुः।
ाधप्रसङ्गं स्यात्। अतः
स्यावस्तुत्वाद्युक्तं फणिनो
कारणाभ्यां सदविद्याभ्यां
राध्यस्तत्वेनैव वक्तव्यम्।
एवम्भूतस्य न वक्तव्यम्।
ा प्रपञ्चस्य सत्त्वं हेत्वन्तरेण
अस्यार्थः। इदं जगत् सत
जतमिति अर्थक्रियाकारि न

अर्थक्रियार्थम् इषित इष्टः।
ः। कपर्दकः इति पर्यायः।
तौ सत्यां वस्तुसत्त्वाभावेन
न्धपरम्परान्यायेन व्यवहारः

"अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति ॥ अपामसोमममृता अभूम" इत्यादिभिः कर्मफलस्य त्यत्वप्रतिपादनादसत्त्वं न घटते। न हि नित्यं वस्तु असद्भवति तस्माद्वेदप्रतिपादितत्वात्। द्वैतं सदेवेत्याशङ्क्याह- भ्रमयतिभारती त वृत्तिभिरुक्थजडानिति। हे भगवन्! ते तव भारती वेदलक्षणा वाणी उरुवृत्तिभिर्बह्वीभिर्गौणीलक्षणलक्षणादिवृत्तिभिः उक्थजडान् र्मश्रद्धाभराक्रान्तमन्दमतीन् भ्रमयति मोहयति। अयम्भावः। न हि वेदः कर्मफलस्य नित्यमभिप्रैति। किन्तु लक्षणया प्राशस्त्यमात्र थ्येकवाक्यत्वात्। "तद्यथेह कर्मचितो लोकः क्षीयते। एवमेवामुत्र पुण्यचितो लोकः क्षीयते ॥" ति न्यायोपबृंहितश्रुत्यन्तरविरोधाच्च। अतः कर्मजडानामिदं भ्रममात्रमिति। अथ तेषां गतागतप्रकारं पुण्यफलक्षयप्रकारं र्शयति- श्रुतिः-

"अथ ये यज्ञेन दानेन तपसा लोकान् जयन्ति ते धूममभिसम्भवन्ति। धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान् ण्मासान् दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रलोकं प्राप्यान्नं भवन्ति तांस्तत्रैव देवा यथा सोमं जानमाप्यायस्वापक्षीयस्वेत्येवमेतांस्तत्र भक्षयन्ति। तेषां यदा तत्पर्यवेत्यथेममाकाशमभिनिष्पद्यन्ते आकाशाद्वायुर्वायोर्वृष्टिर्वृष्टेः पृथिवीं प्राप्यान्नं भवति एवमेवानुपरिवर्तन्ते ॥" इति ॥

सुगमोऽर्थः। धूममभिसम्भवन्ति प्रथमं धूममभिमानिनीं देवतां प्राप्नुवन्ति। एवमुत्तरोत्तरं ज्ञेयम्। अपक्षीयमाणपक्षं कृष्णपक्षं यान् दक्षिणादित्य एति तान्षण्मासान् कर्कादिचापान्तानित्यर्थः। अन्नं देवानामन्नं तत्रस्था देवा यथा चन्द्रं चन्द्रादमृतं भवन्ति तथा तान्भक्षयन्ति तेभ्यः पुण्यफलमन्नं भक्षयन्तीत्यर्थः। तेषां तत्पुण्यं यदा पर्यवैति नाशं गच्छति तदा सोमलोकात् स्माकाशमभिनिष्पद्यन्ते प्राप्नुवन्ति। पृथिवीं प्राप्य मनुष्यादीनामन्नं भवति, इति अन्नाद्वीर्यरूपेण परिणतात्पुनर्जायन्ते इति शेषार्थः वृतिमार्गपरेयम्। अथ स्वामिनाम्

उद्भूतं भवतः सतोऽपि भवनं सन्नैव सर्पः स्रजः कुर्वत्कार्यमपीह कूटकनकं वेदापि नैवम्परः।
अद्वैतं तव सत्परं तु परमानन्दं पदं तन्मुदा वन्दे सुन्दरमिन्दिरानुतहरे मा मुञ्च मामानतम् ॥

सतोऽपि भवतः सकाशात् उद्भूतं भुवनं न सत् यथा स्रजो मालातः उद्भूतः सर्पो न सत् तद्वत् कार्य्यं व्यवहारं कुर्वदपि सत् कूटकनकमिव वेदोऽपि एवं परः कर्मफलप्रतिपादनपरो न भवति। अद्वैतपरमानन्दपर एव। हे इन्दिरानुत! इन्दिरा लक्ष्मीः तथा नुतस्य सम्बोधनम् हरे तत् तस्मात् तव पदं मुदा वन्दे। अन्यत् स्पष्टम् ॥३६॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ न हि विकृतिं त्यजन्ति कनकस्य तदात्मतया उभययुजा भवन्त्यसुभृत त्याद्युक्तकार्यसत्ताप्रतिक्षेपेण कार्यमिथ्यात्ववादं यमुखेन प्रस्तुत्य प्रतिक्षिपति- सत इदमिति। सत उत्थितमिदं जगत् सदिति तर्कहतम्। कुतः। सतः उत्पत्तिवैधर्म्यात् न सत ति सङ्घटते। असत एव घटादेरुत्पत्तिदर्शनादिति चोद्यं ननुशब्देन सूच्यते। परिहरति क्व व्यभिचरतीति। कार्यं सदित्ययमर्थः। व्यभिचरति, न क्वचिदपि व्यभिचार इत्यर्थः।

कारणावस्थमृत्सुवर्णादिकमेव घटकुण्डोलादिकार्यावस्थ्यं दृश्यते। अतो जगत्कार्यमिथ्यात्ववाद असङ्गतः। ननु स्वप्नपदार्थेषु रजतादिषु न व्यभिचार इति चेन्नेत्याह- क्व च मृषेति। क्व मृषा न क्वचित् कार्यं मृषा। तत्रापि स्वप्नपदार्थानां पुरुषानुभाव्यानां तत्तत्कालावसानानामीश्वरसृष्टत्वान्न व्यभिचारः। तथा च श्रीभाष्ये स्वप्नविषया श्रुतिः —

'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजते ॥' इत्यादि।

स हि कर्तेत्यन्तं श्रीभाष्यकारैरुपन्यस्य यद्यपि सकलेतरपुरुषानुभाव्यतया तदानीं न भवन्त्यथापि तत्तत्पुरुषमात्रानुभाव्यतया र्थानीश्वरः सृजते। स हि कर्ता। तस्य सत्यसङ्कल्पस्याश्चर्यशक्तेस्तथाविधं कर्तृत्वं सम्भवतीत्यर्थः।

'य एषु सुप्तेषु जागर्ति कामं पुरुषो निर्मिमाणः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।
तस्मिँल्लोकाः सृताः सर्वे तदु नात्येति कश्चनेति।'

सूत्रकारेऽपि सन्ध्ये सृष्टिराह–हि निर्मातारं चैके पुत्रादयश्चेति सूत्रद्वयेन स्वाप्नेष्वर्थेषु जीवस्य स्रष्टृत्वमाशङ्क्य मायामात्रन्तु कात्स्न्येनानभिव्यक्तस्वरूपत्वादित्यादिना न जीवस्य सङ्कल्पमात्रेण स्रष्टृत्वमुपपद्यते । जीवस्य स्वाभाविकसत्यसङ्कल्पत्वादेः कृत्स्नस्य संसारदशायामनभिव्यक्तस्वरूपत्वादीश्वरस्यैव तत्तत्पुरुषानुभाव्यतया आश्चर्यभूता सृष्टिरियम् ।

'तस्मिल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेति ।' परमात्मैव स्रष्टेत्येवावगम्यते । इति निपुणतरं व्याख्यातमिति । किञ्च । यदि जीवः स्वाप्नपदार्थानां स्रष्टा तर्हि शुभानामेवार्थानां स्रष्टा भवेन्नाशुभानामिति । अत ईश्वर एव स्रष्टेति । न चेश्वरसृष्टं मिथ्येति वक्तुं शक्यत इति शुक्तिरजतादावपि न स्वरूपेण मिथ्यात्वम् । पञ्चीकरणप्रक्रियया तत्रापि तेजोंऽशस्य विद्यमानत्वात् । यथार्थं सर्वविज्ञानमिति वेदविदां मतमिति सर्वविज्ञानस्याभियुक्तैः सत्यत्वप्रतिपादनाच्च । ज्ञानस्य सत्यत्वे तद्विषयस्यापि सत्यत्वमवश्यमेवाङ्गीकार्यमिति । तथा च वैष्णवे पुराणे —

तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥

इति । सनत्कुमारसंहितायामपि — 'तस्माद्रामस्य रूपोऽयं सत्यं सत्यमिदं जगत् ।' इति । किञ्च । तत्त्वनिर्णयेऽपि – नन्वशेषविशेषप्रत्यनीकचिन्मात्रं ब्रह्मैव परमार्थभूतं तदतिरेकिनानाविधज्ञातृज्ञेयतत्कृतज्ञानादिसर्वं तस्मिन्नेव परिकल्पितं मिथ्याभूतम् ।

'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मे'त्यादिश्रुतिभिश्चिन्मात्रं ब्रह्मैव सत्यम् । तदन्यत्सर्वं मिथ्येत्यभिधानात्कूटस्थनित्यचैतन्यमात्रं ब्रह्मैवानाद्यविद्यया तिरोहितं स्वगतनानात्वं पश्यतीति चेत्तदसत् । नित्यमुक्ताखण्डैकरसस्य प्रकाशमात्रस्वरूपस्य निरंशस्य तिरोधानासम्भवात् । प्रकाशपर्यायस्य ज्ञानस्य तिरोधाने स्वरूपनाशप्रसङ्गः । तिरोधानं नामवस्तुस्वरूपे विद्यमाने तत्प्रकाशनिवृत्ति प्रकाश एव वस्तुस्वरूपमित्यङ्गीकारे तिरोधानाभावः । स्वरूपनाशो वा स्यात् । न च वाच्यं स्वरूपप्रकाशस्य नित्यत्वेऽपि तद्वैशद्यमात्रमविद्यातिरोहितमिति विकल्पासहत्वात् तद्वैशद्यं किं स्वरूपादनतिरिक्तं वा अनतिरिक्तत्वे प्रागुक्तदोषस्तदवस्थ एव । अतिरिक्तत्वे सविशेषत्वप्रसङ्ग इत्यादिना सविस्तरं प्रपञ्चितमिति । अतः सदिवेत्यादिश्रुतेरयमर्थः —

इदं विभक्तनामरूपबहुत्वावस्थापन्नं जगदग्रे सृष्टे प्रागेकमेवाविभक्तनामरूपतया एकत्वावस्थापन्नमेवाद्वितीयम् अधिष्ठानान्तरशून्यं च सदेवासीदित्यर्थः । मूलमनाधारमित्यादिभिरैक्यार्थ्यात् एवमेव श्रीभाष्ये श्रीभाष्यकारैरयमर्थो निर्णीतः । तथा हि सर्वदा चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्म तत्कदाचित्स्वस्माद्विभक्तनामरूपव्यपदेशानर्हातिसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तिष्ठति । तत्कारणावस्थं ब्रह्म । कदाचिच्च विभक्तनामरूपस्थूलचिदचिद्वस्तुशरीरम् । तच्च कार्यावस्थम् । तत्र कारणावस्थस्य कार्यावस्थापत्तावचिदंशस्य कारणावस्थायां शब्दादिविहीनस्य भोग्यत्वाय शब्दादिमत्तया स्वरूपान्यथाभावरूपविकारो भवति । चिदंशस्य च कर्मविशेषफलभोक्तृत्वाय तदनुरूपज्ञानविकासरूपविकारो भवति । उभयप्रकारविशिष्टे नियन्त्रंशे तदवस्थतदुभयविशिष्टतारूपविकारो भवति । कारणावस्थायाः अवस्थान्तरापत्तिरूपो विकारः प्रकारद्वये प्रकारिणि च समानः । अत एकस्यावस्थान्तरापत्तिरूपविकारापेक्षया येनाश्रुतं श्रुतमित्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृदादिदृष्टान्तो 'यथा सौम्यैकेने'त्यादिना निर्दिशति इति सिद्धान्तितमिति । न च कार्यावस्थे ब्रह्मणि तदवस्थारूपविकारप्रसङ्गः प्रकारभूतचिदचिद्वस्तुगतत्वादर्थपुरुषार्थस्वरूपपरिणामादेः ब्रह्म तु स्थूलसूक्ष्मावस्थचिदचिद्वस्तुशरीरं कार्यकारणोभयावस्थावस्थितमपि सर्वदा निरस्तनिखिलदोषगन्धं सत्यसङ्कल्पत्वादिकल्याणगुणाकरमेवावतिष्ठते । यथा मनुष्यशरीरस्य बालत्वादयः शरीर एव तिष्ठन्ति न तु शरीरिणि आत्मनि । तद्वदिति निरवद्यमिति । इदानीमुत्पत्तिवैधर्म्यं परिहरति–न तथोभययुगिति । व्यभिचरतीत्यनुषङ्गः । क्वचिदपि मृत्सुवर्णादिद्रव्ये उभयावस्थादर्शनं न व्यभिचरति । कारणत्वकार्यत्वरूपावस्था यदेव मृत्सुवर्णादिकं दृश्यते । अतः सतोऽवस्थान्तरप्राप्तिः सफलेत्यर्थः । तर्ह्यवस्थाविकल्पः किमर्थमिति चेत् उदकाहरणाद्यर्थव्यवहृतये अवस्थाविकल्प इषित इष्टः । अतः कार्यमिथ्यात्वविषया त्वद्भारती अन्धपरम्परयाऽऽगता अन्धपरम्परा जडाकारकर्मपरा उक्थजडान् कर्मजडान् अतत्त्वविदो भ्रमयति । तथा च पाद्मे शङ्करेणैवोक्तं पार्वतीं प्रति —

इस दृष्टान्त
का परस्परमें अभाव
नाश होकर कालान्त
का अभाव हो जाता
सर्वत्रशा कार्यमें एक
ब्रह्म सत्य और जगत्
स्वरूप हि होवे जैसे
अचेतन गोबरसे उत्पन्न
से उत्पन्न जगत् को सत
मिथ्या है। इस मतका
क्योंकि मिथ्या का यह
होती है जैसे रज्जु देश
रज्जुमें उसी रात्रि काल
होने से सर्प मिथ्या ठह
है फिर उसी मीट्टी का
उसी के कार्य एडे जैसी
वाला हो गया है। इस
विशिष्ट कार्यरूपसे परिण
नियम सर्वत्र देखा जाता
होती है। चेतन की नहि
नाखुन दांत की उत्पत्ति ह
है चेतनकी नहि होती क्य
विशिष्ट कारण स्वरूप ब्रह्
आदि व्यवहार के अर्थ य
अन्ध परम्परा से आप की
भक्ति शुद्ध जीवों को वेद

"मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा ॥
अपार्थं श्रुतिवाक्यानां दर्शयन् लोकगर्हितम् । कर्मस्वरूपत्यज्यत्वमत्र वै प्रतिपाद्यते ॥
ब्रह्मणोऽस्य परं रूपं निर्गुणं वक्ष्यते मया । सर्वस्य जगतोऽप्यत्र मोहनार्थं कलौ युगे ॥
अपार्थं वै महाशास्त्रं मायावादमवैदिकम् । मयैव वक्ष्यते देवि जगतां नाशकारणात् ॥"
इति । अतस्तत्प्रामाणिकैर्निःश्रेयसार्थिभिरनादरणीयमित्यलमतिपल्लवितेनेति ॥३६॥

कृष्णप्रिया

इस दृष्टान्तमें जोर मीट्टी के कार्य है उनमें केवल मीट्टी का मात्र हि वर्तमान रहती है और घटादि कार्य परस्परमें अभाव हो जाता है । जैसे एक मीट्टी से हि घडा नाश होकर उसी मीट्टी से सराब भरा उसका भी होकर कालान्तरमें उसी मीट्टी से इंट हो गई इसलीए मीट्टी तो सर्वत्र विद्यमान रहती है और घडे आदि कार्य अभाव हो जाता है । इसलिए मीट्टी ही सत्य है और इंट आदि कार्य मिथ्या है क्योंकि कारण स्वरूप ब्रह्म तो कार्यमें एक रूप वर्तमान है और प्रपंच रूप कार्य की उसी अधिष्ठानरूप ब्रह्ममें निवृत्ति होती है इसलीए सत्य और जगत् मिथ्या है और सर्वत्र यह भी नियम नहिं है कि जो जिससे उत्पन्न होता है वह निज कारण हि होवे जैसे मीट्टी स्वरूप होते है क्योंकि चेतन पुरुष से उत्पन्न नाखुन दांत अचेतन देख जाते है और गोबरसे उत्पन्न बिच्छु चेतन देखे जाते है । ऐसे ऐसे और भी अनेक दृष्टान्त है इसलीये सत्य स्वरूप ब्रह्म जगत् को सत्य कहना उपरोक्त तर्क रूप युक्ति से वाधित है अतः ब्रह्म हि सत्य है और ब्रह्म से उत्पन्न जगत् है । इस मतका आप हि श्रुति खंडन करती है कि सत्य स्वरूप ब्रह्म से उत्पन्न जगत् सत्य हि है असत्य नहि मिथ्या का यह स्वरूप है कि जिस देशमें जिस कालमें जिस का सद्भाव प्रतीत होता है वह वस्तु मिथ्या है जैसे रज्जु देशमें रात्रि काल में किसी को इस प्रकार का भ्रम हो गया कि यह सर्प है उसी पुरुष को उसी उसी रात्रि कालमें रस्सी देखनेसे यह यथार्थ ज्ञान होता है कि यर रस्सी है सर्प नहीं इस प्रका की प्रतीति सर्प मिथ्या ठहरता है और दृष्टान्त में मीट्टी देश और दिव आदि कालमें यह प्रतीति होती है कि यह घट उसी मीट्टी का घडा नहीं, किन्तु सर्वदा यहि यथार्थ ज्ञान रहता है कि यह घडा है । इसलिये मीट्टी और कार्य एडे जैसी वस्तु से बने सत्य है क्योंकि वह मीट्टी का हि जलादि लाने प्रयोजन के लीये घडा नामरूप हो गया है । इसी प्रकार प्रलयस्थ सूक्ष्मचेतना विशिष्ट कारणरूप ब्रह्म ही सृष्टिकालमें स्थूल चेनाचेतन कार्यरूपसे परिणत हो गया है परन्तु दृष्टान्त से दाष्टन्तमें इतना विशेष है कि ब्रह्म का रूप हि होता है यह सर्वत्र देखा जाता है । इसका कहीं भी बाध नहि है । क्योंकि दृष्टान्तमें पुरुष के अचेतन शरीरसे ही उत्पत्ति चेतन की नहि होती क्योंकि चेतन स्वरूप आत्मा नित्य है । पुरुषके अचेतन शरीर से ही अचेतन केश, दांत की उत्पत्ति होती है । चेतन से नहि होती और अचेतन गोबरसे बीच्छु के चेतन शरीर की उप्तत्ति होती नहि होती क्योंकी चेतन स्वरूप आत्मा नित्य है । उसकी उत्पत्ति हो नहीं सकती इसलीऐ सूक्ष्म चेतना कारण स्वरूप ब्रह्म से उप्तन्न स्थूल कार्यरूप ब्रह्म उकत कारण स्वरूप ब्रह्म ही है इसी से परमात्मा के लीला व्यवहार के अर्थ यह प्रपंच सत्यस्वरूप हि मान्योगयो है । परन्तु पुण्य पापरूप कर्म परवश जडजीवों को परम्परा से आप की वेद रूप वाणी अनेक प्रकार प्रतिपादन शक्ति करके भ्रमित कर रही है अर्थात् आप की जीवों को वेद के विपरीते अर्थ प्रतीत होते है ॥३६॥

न यदिदमग्र आस न भविष्यदतो निधनादनुमितमन्तरा त्वयि विभाति मृषैकरसे ।
अत उपमीयते द्रविणजातिविकल्पपथैर्वितथमोविलासमृतमित्यवयन्त्यबुधाः ॥३७॥

कर्दमक्षमा

यत्, यतः, इदम्, विश्वम्, अग्रे, न, आस, तथा, निधनात्, अनु, न, भविष्यत्, अतः, अन्तरा, अपि, एकरसे, त्वयि, मृषा, एव, विभाति, इति, मितम्, अतः, श्रुत्या, द्रविणजातिविकल्पपथैः, उपमीयते, तस्मात्, वितथमनोविलासम्, इमम्, ये, ऋतम्, इति, अवयन्ति, ते, अबुधाः ॥३७॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तदेवं प्रपञ्चस्य सत्त्वे साधकं नास्तीत्युक्तम् इदानीमसत्त्वे सृष्टिप्रलयश्रुतयः 'यतो वा इमानि भूतानि जायन्ते' इत्याद्यास्तन्मूलं चानुमानं प्रमाणमित्याह–न यदिदमिति । यद्यस्मादिदं विश्वमग्रे सृष्टेः पूर्वं न आस नाऽऽसीत् सदेव सौम्येदमग्र आसीत् आत्मा वा इदमेक एवाग्र आसीदित्यादिश्रुतेः न च निधनात्प्रलयादनु अनन्तरं भविष्यद्भविष्यति "नासदासीन्नो सदासीत्तदानीम्" इत्यादि श्रुतेः अतः कारणादन्तरा मध्येऽप्येकरसे केवले त्वयि मृषा मिथ्यारूपमेव विभातीति मितं निश्चितम् यत एवमतः श्रुत्या द्रविणजातिविकल्पपथैर्द्रविणजातीनां द्रव्यामात्राणां मृल्लोहकार्ष्णायसरूपाणां विकल्पाः भेदा घटकुण्डलादयस्तेषां पन्थानो मार्गाः प्रकारास्तैरुपमीयते सदृशतया निरूप्यते यथा तत्र कार्याकाराणांनामधेयमात्रताकारणं मृदाद्येव तु सत्यं तथाऽत्राप्याकाशादीनां नाममात्रता ब्रह्मैव सत्यं तथा च श्रुतिः 'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं भवति वाचारम्भणविकारो नामधेयं मृत्तिकेत्येव सत्यं यथा एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् यथा एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसम्' इत्यादि तस्मादस्य सत्त्वे प्रमाणाभावादसत्त्वे प्रमाणस्य विद्यमानत्वाद्वितथमनोविलासमृतं सत्यमिति ये अवयन्ति जानन्ति तेऽबुधाः अज्ञा इत्यर्थः । अत्रैवं प्रयोगः विवादाध्यासितं न सत् आद्यन्तयोरविद्यमानत्वाद्विकारित्वाद्दृश्यत्वाच्च शुक्तिरजतादिवत् इत्यन्वये दृष्टान्तः आत्मवच्चेति व्यतिरेके दृष्टान्तः ।

मुकुटकुण्डलकङ्कणकिङ्किणीपरिणतं कनकं परमार्थतः ।
महदहङ्कृतिखप्रमुखं तथा नरहरेर्न परं परमार्थतः ॥२४॥ ॥३७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — तदेवमुक्तरीत्या सत्त्वे सत्यत्वे सृष्टिप्रलययोः प्रतिपादकाः श्रुतयः सृष्टिप्रलयश्रुतयः । आदिना "नेह नानास्ति किञ्चन ।" इत्यादिग्रहः । तन्मूलं श्रुतिमूलकं चानुमानमत्रैवंप्रयोग इत्यादिनात्रैव वक्ष्यमाणं प्रमाणं मानम् । सदेवेत्याद्याः श्रुतयस्तु सुगमा एव । नासदिति । इदं जगत् अग्रे सृष्टेः पूर्वमात्मैवासीत् अखण्डैकरसो जगदधिष्ठानत्वेन वास्तवस्वरूपभूतः पदार्थ एवासीत् । न तु तत्कार्यभूतं नामरूपात्मकं जगदासीदित्यर्थः । तदानीं प्रलयानन्तरं सृष्टेः पूर्वमसत्कारणं नासीत् सत्कार्यं नो आसीदित्यर्थः । यत आद्यन्तयोर्नैवास्ति अतो हेतोः । यतो हेतोरेवं मिथ्याऽतो हेतोः । तत्र द्रविणविकल्पपथिषु अत्रापि ब्रह्मण्यपि अत्र प्रमाणं तथा चेति श्रुतीराह —

"यथा सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातं भवति ।

वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । तथैकेन लोहमणिना वा सर्वं लोहमयं विज्ञातं स्यात् ।

वाचारम्भणं विकारो नामधेयं लोहमित्यव सत्यम् । तथैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यात् ।

वाचारम्भणं विकारो नामधेयं कार्ष्णायसम् ॥" इत्येव सत्यमिति ।

अर्थस्तु — हे सोम्य यथैकेन घटादिकारणभूतेन मृत्पिण्डेन विज्ञातेन सर्वमन्यत्कुम्भशरावादिकं विज्ञातं स्यात् कारणानन्यत्वात्कार्यस्य । कथं तर्हि लोके इदं कारणमिदं कार्यमिति वदन्ति व्यवहरन्ति चेति तत्राह–वाचारम्भणमिति । वाचारम्भणं

यावद्वस्तु तत्सर्वं नामधे
तथा लोहमणिना मणिव
कार्ष्णायसं छुरिकादात्रा
मृण्मयादितुल्यत्वं तस्मा
अत्र जगदसत्यत्वे विवा
यथा शुक्तिरजतमिति ।
मुकुटेति । मुकुयादिरूपे
श्रीधरानुयायिनी —
गौतमस्स्वप्नविषयाभिमा

"गुणानां परमं रू

तथा — "आर

इदानीं विश्वस्यास
भविष्यति तस्मादादा
घटकुण्डलादिवत्प्रतीयमान
मनस्येव परमं प्रतिष्ठितम् ।

"यतो वा इमानि
च विवादास्पदं विश्वं मिथ्या
एव मुहुर्निन्द्यन्ते कथं कलभा
न यदिदमिति । यद्यस्मादिदं
पुनः पार्षदत्वप्राप्तेः । अतोन्तर
निश्चितं अत्यन्तापराधिनोरपि
यथा पूर्वं पश्चाच्च तयोस्तवा
दौरात्म्यं तयोरित्यर्थः । अतो ये
स्वामिनि वैरानुबन्धे हेतुमाहुः–
मनोविलासं जानन्ति न तु कंस
कश्चनेति विचार्य त्वयान्तर्यामि
अन्यथा वैकुण्ठस्थयोः पुना रा
समञ्जसा "ब्रह्मतेजः समर्थोऽ
स्वर्णमेव । तथामहदादिकं का

तोषिणी — तर्हि कथं
विश्वं निधनात्प्रलयं प्राप्याग्रे सृ
इदंशब्दवाच्यस्य विश्वस्य सूक्ष्मरू
प्राकट्यमेव निषेधति अतोऽनुमि
एकरसे शुद्धे त्वयि विभातीति य
तच्छक्तित्वेन त्वदन्यस्मात्त्वदुप

स्तु तत्सर्वं नामधेयमेव केवलं न तु विकारो नाम वस्त्वन्तरमस्ति परमार्थतो मृत्तिकेत्येव सत्यम्। एवमुत्तरत्रापि योज्यम्। लोहमणिना मणिकारणभूतेन सुवर्णपिण्डेन लोहमयं स्वर्णमयम् नखनिकृन्तनेन नखनिकृन्तनकारणभूतेन कार्ष्णायसपिण्डेन यसं छुरिकादात्रादिकम्। यथा विकारो न सत् कारणं सत्यं तथा विकारस्य प्रपञ्चस्य परमकारणं ब्रह्ममात्रत्वं सत्यमिति यतो दितुल्यत्वं तस्माद्धेतोः। इत्यर्थ इति–असतः सत्यत्वेन मननमज्ञधर्म एवेति भावः। श्रुतिमूलकमनुमानमाह–अत्रायमिति। गदसत्यत्वे विवादाध्यासितं विवादास्पदीभूतं जगत्, अन्वये दृष्टान्तः–यदाद्यन्तयोरविद्यमानं दृश्यं विकारि च तदसत्, शुक्तिरजतमिति। व्यतिरेके दृष्टान्तमाह–यदाद्यन्तयोरविद्यमानं न दृश्यं विकारि च न तदसदपि न यथात्मेति। स्वामिनाम्- ति। मुकुटादिरूपेण परिणतं परमार्थतः कनकमेव तथा महदादिप्रमुखं जगन्न किन्तु परमार्थतः परमेव ब्रह्मैवेति ॥★॥

नुयायिनी — तदेवं विश्वस्य सत्यत्वे वाद्युक्तजगत्सत्यत्वानुमानादिकं किमपि साधकं नास्ति, तथा च- स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः मायागन्धर्वनगरमृगतृष्णावद्वेति। साङ्ख्यवृद्धा अपि —

"गुणानां परमं रूपं न दृष्टिपथमृच्छति। यत्तु दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छकम्॥"

तथा — "आरम्भपरिणामाभ्यां पूर्वं सम्भावितं जगत्। पश्चाद्गौतमसाङ्ख्याभ्यां युक्त्या मिथ्येति निश्चितम्॥" इति।

इदानीं विश्वस्यासत्यत्वे साधकं श्रुत्यनुमानादिकं प्रमाणमस्तीत्याह–नेति। यस्माद्विश्वं सृष्टेः पूर्वं नासीत्प्रलयानन्तरं च न ष्यति तस्मादादावन्ते च यन्नास्ति वर्तमाने तत्तथेत्युक्तेर्मध्ये केवले त्वय्यधिष्ठाने मृत्सुवर्णादौ ण्डलादिवत्प्रतीयमानमप्याकाशादि नाममात्रं मिथ्यैव मृदादिवद्ब्रह्मैव सत्यमिति निश्चितम्। ये तु "मिथ्याभूतं सद्वा इदं व परमं प्रतिष्ठितम्। यदिदं किञ्च।" इति श्रुतेर्मनोविलासमात्रं विश्वं सत्यमिति जानन्ति ते मूढाः। अत्र प्रमाणं श्रुतयः —

"यतो वा इमानि भूतानि जायन्ते।" "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्।" इत्याद्याः तन्मूलकमनुमानं वादास्पदं विश्वं मिथ्याद्यन्तयोरसत्त्वाद्विकारित्वाद्दृश्यत्वाद्वा शुक्तिरजतादिवद्व्यतिरेके आत्मवद्वा। यद्वा–ननु दीक्षितविप्रादय नुनिन्द्यन्ते कथं कलभाषणमारभ्य मन्निन्दातत्परौ दुरात्मानौ शिशुपालदन्तवक्त्रावपि नेत्याशङ्क्य तयोर्दौरात्म्यं वास्तवं नेत्याहुः– दमिति। यद्यस्मादिदं दौरात्म्यमग्रे तयोर्जयविजयभावे नासीत् तथा निधनात् धतत्क्षत्रदेहनाशादनु च न भविष्यति तदा तयोः पार्षदत्वप्राप्तेः। अतोन्तरा मध्ये एव शिशुालदन्तवक्त्राख्यक्षत्रियजन्मन्येव त्वयि विषये तयोर्दौरात्म्यं विभाति तन्मृषैवेति मितं अत्यन्तापराधिनोरपि तयोः पुनः पार्षदीकरणे हेतुमाहुः–एकरस इति। सर्वदा प्रेमभक्तिविषयकपरमानुग्रहैकरस इत्यर्थः। पूर्वं पश्चाच्च तयोस्तवानुग्रहस्तथैवान्तरापीति यावत्, अन्यथा तदनुपपत्तेः। आद्यन्तयोरसत्त्वेऽपि मध्ये प्रतीयन्ते तद्वदेवेदं तयोरित्यर्थः। अतो ये शाल्वादय इदं वैरानुबन्धादिकम्, ऋतं सत्यमेवेत्यवयन्ति जानन्ति ते मूर्खा एव। ईदृशानन्यभक्तयोरपि वैरानुबन्धे हेतुमाहुः–वितथमनोविलासमिति। विशिष्टं तथा तथ्यं स्वस्मिन्निति वितथः सत्यवादी वैकुण्ठवासी श्रीविष्णुस्तस्य लासं जानन्ति न तु कंसादिवत्तयोः स्वमनोविलासरूपमिदं दौरात्म्यं किन्तु तव युयुत्सायां सत्यां मत्तुल्यबलावेतावेव नान्यः विचार्य त्वयान्तर्यामिणा प्रेरिताभ्यामेव ताभ्यां निरुद्धैः सनकादिभिर्दत्तं शापं निमित्तीकृत्य सर्वमिदं त्वयैव सम्पादितम्, वैकुण्ठस्थयोः पुना राक्षसजन्मानुपपत्तेरित्याशयः। तथा च- "शापो मयैव निर्मितस्तदवैत विप्राः" इति तृतीयोक्तिः "ब्रह्मतेजः समर्थोऽपि हन्तुं नेच्छते मतं तु मे॥" इति च। यथा मुकुटादिरूपेण तं विकारभावं प्राप्तं सर्वं परमार्थतः व। तथामहदादिकं कार्यजातं परमार्थतो वस्तुतो नरहरेः परमकारणात्परं भिन्नं नास्तीति स्वामिश्लोकार्थः ॥★॥

तोषिणी — तर्हि कथं न हि विकृतिं त्यजन्तीत्युक्तं तत्रान्याः सिद्धान्तयन्त्यः पूर्वार्थमेव द्रढयन्ति–नेति। यत् यदि इदं नात्प्रलयं प्राप्याग्रे सृष्ट्यादौ नासीत् तदा न भविष्यत् त्वत्तो नाभविष्यदेव सिकताभ्य इति तैलम् अतः सत्तादात्म्येन च्यस्य विश्वस्य सूक्ष्मरूपेण तदानीं स्थितिः श्रूयते- "सदेव सोम्येदमग्र आसीत्।" इत्यादौ "नासदासीत्" इत्यादिश्रुतिस्तु व निषेधति अतोऽनुमितं किम् अन्तरास्थितिसमयेऽपि त्वय्येव विभातीति "यद्भूतं भवच्च भविष्यच्च" इति श्रुतेः द्धे त्वयि विभातीति यत्तन्मृषैवाविवेकादेवेत्यर्थः। "अयमात्मापहतपाप्मा" इति श्रुतेः। अयम्भावः — विश्वं यज्जायते त्वेन त्वदन्यस्मात्त्वदुपहिताप्रधानादेव तदा स्थितिप्रलयावपि तत्रैव अतस्तव्द्यतिरेकेण तव्द्यतिरेकादेव हि त्वय्यच्युते,

स्वतस्तु त्वमन्तरङ्गया चिच्छक्त्या बहिरङ्गतदस्पृष्ट एवेति। तदुक्तं प्रथमे श्रीमदर्जुनेन —

"त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः। मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि॥" इति।

अतस्तदविवेकादेवेदं द्रविणजातिविकल्पपथैरुपमीयते न तु तद्विवेकात्। ततश्च तदात्मतयेति तन्मात्रदृष्ट्यैव न हि विकृतिं त्यजन्तीत्युक्तं न तु विकृतिदृष्ट्येति। तस्मादिदं वितथं मनोविलासं मनःसङ्कल्पमात्रसिद्धं ये वदन्ति ये च ऋतं त्वदत्यन्ताभिन्नमपि वदन्ति ते उभयेऽपि मूर्खा एव मनसोऽपि कार्यान्तःपातात् अनिर्मोक्षप्रसङ्गाच्च। श्रुतयो दर्शिता एव (२४) ॥३७॥

नीलकण्ठी —

जगतः सत्यत्वे युक्त्यभावमुक्त्वा मिथ्यात्वे युक्तिमाह-न यदिदमग्र इति। इदमन्तरामितं मृषेति सम्बन्धः। तथा चायं प्रयोगः। इदं प्रत्यक्षादिसिद्धं जगन्मृषा अन्तरा मितत्वात् स्वप्नवदिति हेतुं साधयति-न यदिति। यत् यतः इदं दृश्यमग्रे सृष्टेः प्राक् नाभूत् तथा निधनादनु विनाशादूर्ध्वं न भविष्यदभावं गमिष्यत् —

"तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति॥"

इति सर्वेषां भावानामुत्पत्तिप्रलययोः श्रवणाद्बहुवादिसम्मतत्वाच्चेदमन्तरामितमतो मृषेत्यर्थः। यदाहुः सम्प्रदायप्रवर्तकाचार्याः - "आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा।" इति। ये तु स्वरूपेणाद्यन्तयोरसन्नपि घटः सन्निति तार्किकाः प्राहुः, साङ्ख्याश्च स्थूलरूपेण सूक्ष्मरूपेण वा घटादिः सन्नेव सर्वदेत्याहुस्तान्प्रत्याह-त्वयि एकरसे विभातीति। यद्वि यत्रैकस्मिन्नविकृतेनेकं रूपं भाति तन्मृषा रज्ज्वां सर्पदण्डादिवत् तस्मात्स्वप्नवत्सर्वव्यवहारोपपत्तौ जगतः सत्यत्वं कल्प्यम् —

"मायामात्रमिदं द्वैतमद्वैतं परमार्थतः।" इति श्रुत्या सत्यत्वकल्पनाबाधात्। नापि प्रत्यक्षसिद्धं तत् रज्जुभुजङ्गादौ अनैकान्तत्वात्प्रत्यक्षस्य यत एकरसे इदं विभाति अतः द्रविणजातिविकल्पपथैरुपमीयते द्रविणं मृल्लोहादिस्तद्दृष्टान्तमार्गेण तथा जातिः ज्ञापयत्यर्थमिति जातिलिङ्गं युक्तिमार्गेण तथा विकल्पः शब्दज्ञानानुपाती वस्तुशून्यस्तन्मार्गेण चेदं जगद्वेदे उपमीयते। तत्र छान्दोग्ये तावत् —

"येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्।" इत्येकविज्ञानात्सर्वविज्ञानमुपक्षिप्य—

"कथं नु भगवः स आदेशो भवति यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्॥"

इत्याक्षेपपूर्वकं दृष्टान्तमुखेन समर्थितं सोऽयं द्रविणपथो द्वैतप्रतिपत्त्युपायः। यथोक्तं —

"मृल्लोहविस्फुलिङ्गैस्तु सृष्टिर्या चोदिता पुरा। उपायः सोऽवताराय नास्ति भेदः कथञ्चन॥"इति।

अस्मिन् मार्गे मृद्घटवत्कनककुण्डलवच्च ब्रह्मजगतोरुपादानोपादेयभावः सगुणोपास्त्यर्थं बन्धमोक्षादिव्यवस्थार्थमिष्टः। तथा "जात एव न जायते को न्वेनं जनयेत्पुनः।" इति श्रुतिः लोकदृष्ट्या जातो घटादिरेव नोत्पद्यते किन्तु "अजायमानो बहुधा विजायते" इति जन्माख्यं विकारमनश्नुवान एव परमात्मा बहुधा विजायत इति श्रुतेरध्यस्यत एव रज्जुभुजङ्गमवत् उपादानाभावात्। न च प्रधानं परमाणवो वास्त्युपादानमिति वाच्यम्। आद्यस्य पूर्वश्लोके निरस्तत्वात् अणोरपि दिग्दशकावच्छेद्यप्रदेशभेदवत्त्वाभ्युपगमेऽणुत्वव्याघातः, अन्यथा परमाणुव्योम्नोर्निःप्रदेशत्वाविशेषात्तुल्यपरिमाणतापत्तिः। संयुक्तयोरण्वोरणुमात्रत्ववत्तयोरप्यन्यतरमात्रत्वापत्त्यवश्यम्भावात्। तथा च व्योम्नोऽणुत्वमणोर्विभुत्वं चापद्येत निःप्रदेशस्यापि कल्पितैः प्रदेशैरवच्छेदकल्पने स्वप्नदृष्टेष्टकानिचयेनापि सत्यं गृहमारभ्येत करणवच्चेतनानधिष्ठितेषु तेष्वचेतनेषु प्रथमचरमसंयोगविभागासम्भवात्, व्द्यणुकोत्पत्तिनाशाद्ययोगेनारम्भवादासम्भवः क्षीरपरमाणोर्दधिपरमाणूत्पत्तौ अवयवसंयोगरूपस्यासमवायिकारणस्याभावेन केवलव्यावृत्तत्वेन केवलसमवायिकारणादेव कार्योत्पत्तेरवश्यवक्तव्यतया परिणामवादस्यैव ततो लघुत्वात्। एतेन निरवयवतया समवाय्यसमवायिकारणासम्भवाद्व्योमादीनामणूनां चानुत्पत्तिः परास्ता

माणुवत्केवला याः प्रकृतेरेव तदुत्पत्त्युपपत्तेः शब्दाद्यनित्यगुणाश्रयत्वेन च तेषां घटादिवत् कार्यत्वोपपत्तेश्च । एतेन तात्मवादोऽपि परास्तः । निर्गुणाद्वैतात्मवादिनस्तु नैते दोषाः प्रादुःष्युः । तस्मान्न वियदादि सत्यं नापि तत्कारणं प्रधानं सत्यं लोके तन्मिथ्यात्वस्योपपादितत्वात्, व्यावृत्तत्वादेव कार्यत्वात् । "तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम ।" इति स्मृतेश्च सत्यस्योपादानस्यासम्भवोऽनूद्यते श्रुत्या–को न्वेनमिति । सोऽयं जातिपथो ब्रह्मप्रपञ्चयोर्गुणभुजगयोरिवोपादानोपादेयभावं पति ब्रह्मणः कौटस्थसाधकः । तथा सः "यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरेऽयमात्मात्मानन्तरोऽबाह्यः प्रज्ञानघन एव ।" इति । यथा कनककुण्डलयोरज्जुभुजङ्गमयोर्वा उपादानस्वरूपमन्तरमुपादेयस्वरूपं बाह्यं नैवं तोरन्तर्बहिर्भावोऽस्ति यथा सैन्धवघनो बहिरन्तश्चैकरस एवमयमात्मा व्युत्थानसमाध्योः प्रज्ञानघन एव । तत्र या रणभावकल्पना सावन्ध्यायाः सुतः पुरुषस्य चैतन्यमितिवद्विकल्पमात्रम् । अत एव छान्दोग्ये मृदादिदृष्टान्तान्ते —

"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ।" इति विकाराणां वागालम्बनत्वात्परपर्यायं विकल्पमात्रत्वं श्रुतं विकल्पपथः त एते द्रविणजातिविकल्पपथास्तापनीयेऽप्युक्ताः "ओतानुज्ञात्रनुज्ञाविकल्पैः" इति —

"ओतत्वं कारणव्याप्तिः कार्ये यद्वन्मृदो घटे । सर्वं ब्रह्मेति तन्निष्ठा जानते परिणामतः ॥ (१)

कार्यस्यासमसत्त्वं यत्कारणे समुदीरितम् । तदनुज्ञातृशब्दार्थो मरौ वारिविवर्तनम् ॥ (२)

एतन्निष्ठास्ततो भूत्वा जगन्मिथ्येति जानते । अनुज्ञायां जगत्तुच्छं शशशृङ्गादिवन्मतम् ॥ (३)

तत्स्थास्त्वन्तर्बहिर्ब्रह्म सत्ता सामान्यमात्रकम् । दिक्कालाद्यनवच्छिन्नमेकमस्तीति जानते ॥ (४)

एवं सोपानरीत्यैव भूमित्रितयलङ्घनात् । अविकल्पं परं यत्तदहं ब्रह्मास्मि निर्भयम् ॥ (५)"

विवृतं चैतत्सर्वज्ञात्मगुरुभिरारोपदृष्टिरित्यादिना । यत एकरसे कनकशुक्तिशशस्थानीये त्वयि कुण्डलरजतशृङ्गस्थानीयमिदं रोपविकल्पैर्विविधं यथा स्यात्तथा विभाति, अतः द्रविणजातिविकल्पपथैर्मन्दमध्यमोत्तमाधिकारिणां क्रमेणाद्वस्तेप्रतिपत्तये इति निष्कर्षः । ततश्च —

"न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥"

इति श्रुत्युक्तमर्थं फलितमाह–वितथमनोविलसितमिति । "असतोऽधि मनोऽजायत मनः प्रजापतिमसृजत ।" मिथ्याज्ञानोपादानकमनोमात्रं जगदित्यर्थः । यतो द्रविणादिपथैरुपमीयतेऽतो वितथमनोविलासमात्रमिदम् ।

तथा च गौतमः —

"स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः मायागन्धर्वनगरमृगतृष्णावद्वा ॥" इति ।

साङ्ख्यवृद्धा अपि —

"गुणानां परमं रूपं न दृष्टिपथमृच्छति । यत्तु दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छ(क)म् ॥" इति ।

"आरम्भपरिणामाभ्यां पूर्वं सम्भावितं जगत् । पश्चाद्गौतमसाङ्ख्याभ्यां युक्त्या मिथ्येति निश्चितम् ॥" इति ।

एवंविधबोधशून्याननुक्रोशति–। ऋतमित्यवन्त्यबुधा इति । असदप्येतन्मूढाः सत्यमिति जानन्ति यथेन्द्रजालिकनिर्मिते हरतो वणिग्जनान् निरालम्बनव्यवहारतया पुरतत्त्वविदव्यहरन्नुपहसति तेऽप्येनं लाभद्वारानभिज्ञोऽयं निर्व्यापार इत्युपहसन्ति बुद्धौ परस्परमुपहसतः । तथोक्तं वार्तिके —

"बुद्धतत्त्वस्य लोकोऽयं जडोन्मत्तपिशाचवत् । बुद्धतत्त्वोऽपि लोकस्य जडोन्मत्तपिशाचवत् ॥" इति ।

गीतास्वपि — "या निशा सर्वभूतानाम्" इति

णामविवर्तविकल्पपथैर्जडमध्यमसत्तमपुंविषयैः । शिवमेकरसं प्रतिपद्य पुमानभयं पदद्वयमेति सुखम् ॥" (२४) ॥३७॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

न यदिदमित्यस्य टीकायां श्रुतौ असत् कारणं महदादि सत् कार्य्यं पृथिव्यादि: पूर्वोक्तौ हेतु: वाचारम्भणमिति लोहमणिना सुवर्णपिण्डेन। एतच्छ्रुत्यनन्तरमुत्तरश्रुत्यनन्तरं च वाचारम्भणमित्यादिकं च ज्ञेयम्। किन्तु लोहमित्येव सत्यमिति यथायथं वाक्यशेषो ज्ञेय: । व्याख्यायामात्मवच्चेति व्यतिरेके दृष्टान्त: । अथ स्वव्याख्यायां — ननु तर्हि कथं न हि विकृतिं त्यजन्तीत्युक्तं तत्राहु: सिद्धान्तयन्त्य: पूर्वार्थमेव द्रढयन्ति-नेति । यत् यदि इदं विश्वं निधनात्प्रलयं प्राप्याग्रे सृष्ट्यादौ नासीत् तदा न भविष्यत् त्वत्तो नाभविष्यदेव सिकताभ्य इति तैलम् अत: सत्तादात्म्येन इदंशब्दवाच्यस्य विश्वस्य सूक्ष्मरूपेण तदानीं स्थिति: श्रूयते- "सदेव सोम्येदमग्र आसीत्।" इत्यादौ "नासदासीत्" इत्यादिश्रुतिस्तु प्राकट्यमेव निषेधति अतोऽनुमितं किम् अन्तरास्थितिसमयेऽपि त्वय्येव विभातीति "यद्भूतं भवच्च भविष्यच्च" इति श्रुते: एकरसे शुद्धे त्वयि विभातीति यत्तन्मृषैवाविवेकादेवेत्यर्थ:। "अयमात्मापहतपाप्मा" इति श्रुते: । अयम्भाव: — विश्वं यज्जायते त्वच्छक्तित्वेन त्वदन्यस्मात्त्वदुपहिताप्रधानादेव तदा स्थितिप्रलयावपि तत्रैव अतस्तव्द्यतिरेकेण तव्द्यतिरेकादेव हि त्वय्यच्युते, स्वतस्तु त्वमन्तरङ्गया चिच्छक्त्या बहिरङ्गतदस्पृष्ट एवेति। तदुक्तं प्रथमे श्रीमदर्जुनेन —

"त्वमाद्य: पुरुष: साक्षादीश्वर: प्रकृते: पर: । मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥" इति।

अतस्तदविवेकादेवेदं द्रविणजातिविकल्पपथैरुपमीयते न तु तद्विवेकात्। ततश्च तदात्मतयेति तन्मात्रदृष्ट्यैव न हि विकृतिं त्यजन्तीत्युक्तं न तु विकृतिदृष्ट्येति। तस्मादिदं वितथं मनोविलासं मन:सङ्कल्पमात्रसिद्धं ये वदन्ति ये च ऋतं त्वदत्यन्ताभिन्नमपि वदन्ति ते उभयेऽपि मूर्खा एव मनसोऽपि कार्यान्त:पातात् अनिर्मोक्षप्रसङ्गाच्च। श्रुतयो दर्शिता एव ॥२४॥३७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एतत्पूर्व्वोक्तमेव विषदयन्ति-नेति । इदं विश्वं सृष्टे: पूर्व्वं त्वयि लीनत्वान्न आस, पृथङ् नासीदित्यर्थ: । त्वयि लयस्य भावित्वात् पृथङ् न भविष्यति । अतोऽन्तरा मध्ये एकरसे चिद्घने त्वयि यद्विभाति, विभिन्नतया भाति, तन्मृषा, अत इदं चित्तादात्म्यापन्नत्वाद्द्रविणजातिविकल्पपथैर्द्रविणजातय: सुवर्णरजतादयस्तद्विकल्पपथै: कटक-किरीटकुण्डलादिभिरुपमीयते तानि यथा सुवर्णादितादात्म्यापन्नत्वात् तद्रूपाण्येव, तथेदं विश्वमपीति। अतो हेतो:, ऋतमेवेदमबुधा मनोविलासमवयन्ति। यद्वा, ननु ते पाषण्डादय: शास्त्रयुक्त्यैव वदन्ति, तत् कथमन्धत्वं तेषाम् ? तत्राहु:-इदं जैनजङ्गमम्लेच्छादिशास्त्रम्। अग्रे कृतयुगादौ यस्मान्नासीत्, निधनादनु कल्किना करिष्यमाणात् पाषण्डिनां निधनादनन्तरं च न भविष्यति, अतोऽन्तरा मध्ये द्वापरान्तकलिसम्बन्धिनि त्वयि त्वद्विषये तेषां मितं मानं ज्ञानमिति यावत् मृषा विभाति, एकरसे एकस्मिन् वेद एव स्वमाहात्म्यबोधकत्वाद्रसो यस्य, अतो द्रविणजाति-विकल्पपथै:-द्रविणस्य स्वर्गादेर्जातये जन्मने सिद्धये धूर्तधातुवादिनां ये विकल्पा नानौषधादिभिर्विविधकल्पनास्तेषां पथिभिर्मार्गैरुपमीयते, तथा तेषां विविधकल्पना मृषा धातुवादेन वित्ताशाहताशान्तस्य दुर्मतेरिति प्रसिद्धे:, तथैतेषां शास्त्रमपीति। ननु तर्हि कथं सुबुद्धिप्राया अपि तत्पथानुवर्तितया तत्र सुष्ठु विश्वस्ता दृश्यन्ते ? तत्राहु:-वितथेति। मनोविलासं निर्मूलम्, अबुधा एव, न तु ते सुबुद्धय इत्यर्थ: ॥३७॥

[ननु दीक्षितविप्रादय एव मुहुर्निन्दान्ते, न तु कथं कलभाषणमारभ्य मन्त्रिन्द्रैकनिष्ठौ सुष्ठु दुरात्मानौ शिशुपालदन्तवक्त्रौ, इत्याशङ्क्य ताभ्यां कृतं दौरात्म्यं वास्तवं न स्यादित्याहु:-न यदिति। यद्यस्मादिदं दौरात्म्यम्, अग्रे तयोर्जयविजयभावे नासीत्, तथा निधनात्, एतत् क्षत्रदेहनाशादनु च न भविष्यति, पारिषदत्वप्राप्ते:, अतोऽन्तरा मध्ये एव तयोर्दौरात्म्यम्, एकरसे कदाप्यव्यभिचारिपरमानुग्रहैकरसे त्वयि मृषा विभातीति मितं ज्ञातम् । अतो द्रविणजातय: स्वर्णरूप्यादयस्तासां विकल्पा: कटककुण्डलादयस्तेषां पथिभि: प्रकारै:, यथा तत्राद्यन्तवर्तिवर्णादिकमेव सत्यम्, न तु कुण्डलादि, तथा तयोर्भक्तिरेव स्थायिनी, न तु दौरात्म्यमित्यर्थ: । वितथं मनोविलासमात्रं ब्रह्मशापेन कृत्रिमतया मनसि प्रकटितं दैरात्म्यं त्वयि द्वेषरूपम्, अबुधा: साल्वादयस्तत्सुहृद: सत्यमिति जानन्ति ॥३७॥]

मृत्पिण्डतत्काय
नास्ति कार्यम् अनुमित
उपमीयते । इति कुदृष्टीन
प्रामाणिकमिति अबुधा:

ननु 'सोम्यैकेन

इत्यादि मृदादि
वाचारम्भणमित्यनेन वा
पारमार्थ्यम्। कार्यस्य तु मि
रोचते । न विदुषामित्याहु
इति विभाग: । तथा हि य
आसीत्।' इतिश्रुतेरिति भ
भाव: । अत: कारणादन्त
द्रविणजातिविकल्पपथै:
प्रकारास्तैरुपमीयते सदृश
नामधेयमात्रता ब्रह्मैव सत्य
विकारो नामधेयं मृत्तिके
नखनिकृन्तनेन सर्वं
एतत्कार्यमिथ्यात्वपरत्वव
इत्यबुधा: । 'यथा सौम
अयम्भाव: —

अत्र हि न कार्यमि
हि न 'स्तब्धोऽस्युत्तमादेश

इति कृत्स्नस्य जग
विज्ञाने प्रतिज्ञाते सति कृत्स
अन्यस्य ज्ञातत्वासम्भवं चो
दर्शयति यथैकमृत्पिण्डारब्ध
बुद्धिशब्दान्तरादिभिर्द्रव्यान्त
स्पृश्यत इत्यारम्भणम् ।
वसतीतिवत् । घटेनोदक
पृथुबुध्नोदरत्वादिलक्षणो वि
मृद्द्रव्यमेव संस्थानान्तरना
इत्यर्थ: । न तु द्रव्यान्तर

चारम्भणमिति लोहमणिना
यमिति यथायथं वाक्यशेषो
र्ति त्यजन्तीत्युक्तं तत्रान्यः
त् तदा न भविष्यत् त्वत्तो
ं स्थितिः श्रूयते- "सदेव
म् अन्तरास्थितिसमयेऽपि
न्मृषैवाविवेकादेवेत्यर्थः ।
त्त्वदुपहिताप्रधानादेव तदा
चिच्छक्त्या बहिरङ्गतदस्पृष्ट

त्मनि ॥" इति ।
तन्मात्रदृष्ट्यैव न हि विकृति
च ऋतं त्वदत्यन्ताभिन्नमपि
॥२४॥३७॥

ासीदित्यर्थः । त्वयि लयस्य
या भाति, तन्मृषा, अत इदं
टकुण्डलादिभिरुपमीयते तानि
विलासमवयन्ति । यद्वा, ननु ते
अग्रे कृतयुगादौ यस्मान्नासीत्,
द्वापरान्तकलिसम्बन्धिनि त्वयि
म्यबोधकत्वाद्रसो यस्य, अतो
ौषधादिभिर्विविधकल्पनास्तेषां
प्रसिद्धेः, तथैतेषां शास्त्रमपीति ।
मनोविलासं निर्मूलम्, अबुधा

ु दुरात्मानौ शिशुपालदन्तवक्त्रौ,
अग्रे तयोर्जयविजयभावे नासीत्,
े एव तयोर्दौरात्म्यम्, एकरसे
स्वर्णरूप्यादयस्तासां विकल्पाः
द्, तथा तयोर्भक्तिरेव स्थायिनी, न
ात्म्यं त्वयि द्वेषरूपम्, अबुधाः

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

मृत्पिण्डतत्कार्यदृष्टान्तानां कार्यमिथ्यात्ववर्णनमविदुषामेव रोचते न विदुषामित्याह-न यदिति । पूर्वोत्तरकालयोरिव मध्यकाले कार्यम् अनुमितत्वात् दुर्निरूपकारणत्वात् । अन्तरा ब्रह्मणि कल्पितं मृषा भातीति ब्रह्म मृत्पिण्डलोहमण्यादिभिरिव मीयते । इति कुदृष्टीनां वितथं मनोविलसितं प्रतिपन्नोपाधौ बाधादर्शनात् कस्मात् कुदृष्टिः कुदृष्टाभिमतकार्यमिथ्यात्वम ऋतं णिकमिति अबुधाः अवयन्ति । न तु विद्वांस इत्यर्थः ॥३७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ननु 'सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ।'

इत्यादि मृदादिदृष्टान्तेषु मृदादिकारणानामेव मृत्तिकेत्येव सत्यमित्यादिभिः सत्यत्वप्रतीतेः विकाराणां नामधेयानां च चारम्भणमित्यनेन वागालम्बनं व्यवहारमात्रं न तु पारमार्थ्यमिति मिथ्यात्वप्रतिपादनाच्च दार्ष्टान्तिकेऽपि सन्मात्रस्य ब्रह्मणः मार्थ्यम् । कार्यस्य तु मिथ्यात्वमकामेनापि स्वीकार्यम् । इत्याशङ्कायां मृत्पिण्डकार्यादिदृष्टान्तानां कार्यमिथ्यात्वपरत्ववर्णनमविदुषामेव ते । न विदुषामित्याहुः-न यदिति ॥ अत्र विकल्पपथैरित्यन्तेन कार्यमिथ्यात्वपरत्ववर्णनानुवादः । वितथेत्यादिना तत्प्रतिक्षेप ति विभागः । तथा हि यद्यस्मादिदं विश्वम् अग्रे सृष्टेः पूर्वं नास नासीत् । 'सदेव सोम्येदमग्र आसीत्' 'आत्मा वा इदमेक एवाग्र सीत् ।' इतिश्रुतेरिति भावः । निधनात् प्रलयादनु अनन्तरं भविष्यन्न भविष्यति । 'नासदासीन्नो सदासीत्तदानीम्' इत्यादिश्रुतेरिति वः । अतः कारणादन्तरा मध्येऽपि एकरसे केवले त्वयि मृषा मिथ्यारूपमेवेदं विभातीति मितं निश्चितं यत एवमतः श्रुत्या विणजातिविकल्पपथैः द्रविणजातीनां द्रव्यमात्राणां मृल्लोहादिरूपाणां विकल्पानां भेदा घटकुण्डलादयस्तेषां पन्थानः मार्गाः कारास्तैरुपमीयते सदृशतया निरूप्यते यथा तत्र कार्यकारणानां नामधेयमात्रताकारणं मृदाद्येव सत्यं तथात्राप्याकाशादीनां मधेयमात्रता ब्रह्मैव सत्यम् इति व्यरूप्यथ इत्यर्थः । तथा च श्रुतिः 'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं कारो नामधेयं मृत्तिकेत्येव सत्यम् । यथा सौम्यैकेन लोहमणिनालोहमणिना विज्ञातेन सर्वं लोहमयं विज्ञातं स्यात्तथैकेन खनिकृन्तनेन सर्वं कार्ष्णायसम् इत्यादि । अथैतद्दूषयति-वितथेति । कुदृष्टीनां वितथमनोविलसितम् तत्कार्यमिथ्यात्वपरत्ववर्णनमित्यर्थः । प्रतिपन्नोपाधौ बाधादर्शनादिति भावः । तस्मात्कुदृष्ट्यभिमतं कार्यमिथ्यात्वमृतं प्रामाणिकम् बुधाः । 'यथा सौम्यैकेन मृत्पिण्डेन' इत्यादिदृष्टान्तवाक्यार्थानभिज्ञाः अवयन्ति जानन्ति न तदर्थाभिज्ञा इत्यर्थः । म्भावः —

अत्र हि न कार्यमिथ्यात्वं कारणसत्यत्वं च प्रतिपाद्यते । किं तु कार्यकारणयोरनन्यद्रव्यतया कारणात्कार्यस्यानन्यद्रव्यत्वंतथा 'स्तब्धोऽस्युत्तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतंमविज्ञातं विज्ञातं स्यात् ।'

इति कृत्स्नस्य जगतो ब्रह्मैककारणत्वं कारणात्कार्यस्यानन्यत्वं च हृदि निधाय कारणभूतब्रह्मविज्ञानेन कार्यभूतस्य सर्वस्य ने प्रतिज्ञाते सति कृत्स्नस्य सूक्ष्मचिदचिद्विशिष्टब्रह्मैककारणतामजानता शिष्येण 'कथं नु भगवः स आदेशः ।' इत्यन्यज्ञानेन स्य ज्ञातत्वासम्भवं चोदितो ब्रह्मैककारणतामुपदेक्ष्यन् लौकिकप्रतीतिसिद्धं कारणात्कार्यस्यानन्यत्वं तावद्यथा सौम्यैकेनेत्यादिना ति यथैकमृत्पिण्डारब्धानां घटशरावादीनां तस्मादनतिरिक्तद्रव्यतया तज्ज्ञानेन ज्ञाततेत्यर्थः । अत्र काणादवादेन कारणात्कार्यस्य शब्दान्तरादिभिर्द्रव्यान्तरत्वमाशङ्क्य लोकप्रतीत्यैव कारणात्कार्यस्यानन्यतोपपाद्यते । वाच्येत्यादिना आरभ्यते आलभ्यते । त इत्यारम्भणम् । कृत्यल्युट् इति कर्मणि ल्युट् । वाचा वाक्पूर्वकेण व्यवहारेण हेतुनेत्यर्थः । हेतुत्वं चात्राध्ययनेन तिवत् । घटेनोदकमाहरेत्यादिवाक्पूर्वको ह्युदकाहरणादिव्यवहारस्तस्य व्यवहारस्य सिद्धये तेनैव मृद्द्रव्येण ध्नोदरत्वादिलक्षणो विकारः । संस्थानविशेषः । तत्प्रयुक्तं च घट इत्यादिनामधेयं स्पृश्यते । उदकाहरणादिव्यवहारविशेषसिद्ध्यर्थं व्यमेव संस्थानान्तरनामधेयभाग्भवत्यतो घटाद्यपि मृत्तिकेत्येव सत्यम् । मृत्तिकाद्रव्यमित्येव सत्यम् । प्रमाणेनोपलभ्यत र्थः । न तु द्रव्यान्तरत्वेनापस्तस्यैव मृद्धिरण्यादेर्द्रव्यस्य संस्थानान्तरभाक्त्वमात्रेण बुद्धिशब्दान्तरादयः उपपद्यन्ते ।

यथैकस्यैव देवदत्तस्यावस्थाभेदैर्बालो युवा स्थविर इति बुद्धिशब्दान्तरादयः कार्यविशेषाश्च दृश्यन्ते । तद्वदिति । एवं चैकमेव चिदचिद्विशिष्टं ब्रह्म सृष्टेः प्राङ्निधनानन्तरं च नामरूपविभागानर्हसूक्ष्मचिदचिद्विशिष्टत्वेनावतिष्ठते । अन्तरा तु तद्विभागार्हस्थूलचिदचिदात्मकप्रपञ्चाकारेणावतिष्ठत्यवस्थानामनित्यत्वेऽपि । तदाश्रयस्य द्रव्यस्योभयावस्थायोगिनः पारमार्थ्यमेवेति बुधा अवयन्ति इति । 'नासदासीन्नो सदासीत् ।' इत्यस्य स्थूलावस्थमचिद्द्रव्यं चिद्द्रव्यं च प्रलयदशायां नासीत् । किन्तु तमः निरतिशयसूक्ष्मदशापन्नमचिद्द्रव्यं तमसा तमस्सदृशेनाचिद्द्रव्येण गूढं तिरोहितं प्रकेतं सूक्ष्मावस्थं चिद्द्रव्यं चासीदित्यर्थः । उक्थजडानबुधा इत्यनेन जीवानामज्ञत्वसम्भावना सूचिता ॥३७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

उदगात्पुमाननुगीतगुणांश्च जुषन् भजति सरूपतां तवदनु त्वमुत जहासि जिहासि ताम् ।
अहिरिव त्वचम्परमात्तभगां महसि महीयसेऽष्टगुणोऽपरिमेयभगः ॥२५॥३९॥

''स्मरन् ब्रह्मगुणान्नित्यं मुक्तौ ब्रह्मसरूपताम् । दुर्भगां प्रकृतिं त्यक्त्वा हत्वा चान्यां दुरन्वयाम् ॥
याति तच्च परेशानात्स हि पूज्योय पूजकः । तस्यैकस्य स्वतन्त्रत्वात्स चानन्तगुणो विभुः ॥''

इति श्रुत्यर्थरूपस्य उदगात्पुमानित्यस्यायमर्थः । अनुशब्दो विकल्पार्थः । श्रुतिष्वनुगीतगुणान् । चशब्दात्तव कर्माणि च जुषन् तदनुगुणस्मरणमनु उदगात्संसारादिति शेषः । अस्मात् संसारान्मुक्तो भवतीत्यर्थः । तव सरूपतां च भजति कश्चित् सायुज्यं कश्चित्सारूप्यं कश्चित्सालोक्यं च । यद्वा । गुणस्मरणमनुगुणाननुकूलान् प्रातरादिकालविशेषान् जुषन् यच्चायं पुमान् परमेण त्वयात्तभगां अपहृतप्रयत्नलक्षणशक्तिं प्रातिस्विकीं पूर्वोक्तां द्विविधां नीचां तां प्रकृतिं जहाति त्यजति जिहाति हन्ति च तदुभयमपि त्वमेव जहास्युत जिहासि च उत त्यागवधयोः समुच्चयार्थः जिहाति रावणं सङ्ख्ये राघवः परमास्त्रविदिति च —

''स्वातन्त्र्यात्प्रकृतित्यागकर्ता नारायणः परः । यद्यप्येषा जीवसंस्थाहन्ता च भगवान् प्रभुः ॥''

इति च । किञ्च । महसि असुरजनमोहनाय शिवादीन् पूजयसि महीयसे च सुरजनेन पूज्यसे च अणिमाद्यष्टगुणः व्याप्तगुणो वा अशूव्याप्ताविति धातुः अपरिमेयभगः दुर्ज्ञेयपरमैश्वर्यादिगुणः ॥२५॥३९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ननु तर्हि कथं न हि विकृतिं त्यजन्तीत्युक्तम् । तत्रान्याः सिद्धान्तयन्त्यः पूर्वार्थमेव दृढयन्ति-न यदिदम् ॥३७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

न केवलं त्वत्परिजनाः एव त्वदभिन्नाः अपि तु तव वृन्दावनादि धामकदम्बमपि तथेत्याहुः-न यदिदमित्यादि । इदं तव वृन्दावनमथुराद्वारकादिस्थलं यत् तन्न मृषा प्रपञ्चवत् न नश्वरम् । अग्र आस अग्रे सृष्टेः प्रागपि आसीत् । न भविष्यत् नष्टं भूत्वा पुनर्भविष्यतीति न । अतः कारणात् निधनात् महाप्रलयादपि अनु पश्चात् आसेत्यर्थः । सृष्टिप्रलययोर्मध्येऽपि मितं स्थितम् । कुत इत्याहुः-एकरसे एकावस्थे त्वयि विभाति चेत् यथा त्वमेकरसस्तथा तव धामापि । अहमेवासमेवाग्रे इत्यादिना यथा त्वं त्रैकालिके सिद्धस्तथा तदपि तत्रैवोक्तम् । एतच्च एतद्वैकुण्ठाख्यं मद्धामापि अहम् अतोऽस्या त्रैकालिकीसिद्धिरिति एतदेवाभिन्नत्वं दृष्टान्तेन स्पष्टयन्ति-अत उपमीयत इत्यादि । द्रविणजातीनां द्रव्यप्रकाराणां मृत्कनकादीनां ये विकल्पा भेदाः घटकुण्डलादयः आकारास्ते वस्तुतस्तु मृत्कनकाद्येव तेन त्वया सह तव लोकस्याकारमात्रेणैव भेदो न वस्तुतः इति एवं प्रकारेण ऋतं तव वृन्दावनादिकं लोकम् अबुधाः कुतर्कपराः वितथमनोऽभिलाषं वितथो यो मनोऽभिलाषस्तदनित्यो यः प्रपञ्चः तमिव अवयन्ति । बुधास्तु कैवल्यमिव मूर्तिमदित्याद्येव जानन्तीति भावः ॥३७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ननु भ्रमयति भारतीतीत्यादिना कर्मणो भ्रान्ता इत्यायातम्, उपासका एवाभ्रान्ताः, उपासनायां गुरूप्रसत्तिरवश्यकार्यैवेति यातम्। तत्रैवं विचार्यते – उपासना च कर्मैव तत्कृताः कथमभ्रान्ताः ? सत्यम् (भा० ११/२५/२७) "मत्सेवायां तु निर्गुणा" (भा० १०/२५/२५) "मन्निकेतन्तु निर्गुणम्" इत्यादीनां वक्ष्यमाणत्वात् त्वत्सम्बन्धि यत् तदेव निर्गुणमप्राकृतमिति तव धाम्नि कुण्ठादिकस्य प्रपञ्चवन्न मिथ्यात्वमेवेत्याहुः – न यदिदमित्यादि। अतः कारणात् द्रविणजातीनां द्रव्यकारणादीनां मृत्कनकादीनां विकल्पा भेदा घटकुण्डलादयः, तेषां पथिभिर्मार्गैरुपगीयते सदृशत्वेन निरूप्यते, यथा तेषां पथिषु घटकुण्डलादय आकारेण नाममात्रभेदाः, वस्तुतस्तु मृत्कनकाद्येव ऋतं सत्यम्, तव धाम वितथं मनोविलासमबुधा अवयन्ति, न तु बुधाः। बुधास्तु वितथमनोविलासात् पृथकं (भा० ३/१५/१६) "कैवल्यमिव मूर्तिमत्" इत्यादिना बहुशो निरूप्यमाणं तव धाम ऋतमित्येव वदन्ति। तदेव किमित्याह– न यदिदमित्यादि। यदिदं न मृषा, यतोऽग्रे आस आस्त इत्यर्थः। निधनात् अनु अनन्तरं च भविष्यत् दृष्टा पुनर्भविष्यतीति न सर्वदा भवेदेवेति भावः। अतोऽन्तरा सृष्टि-प्रलययोर्मध्ये च एकरसे समरसे त्वयि विभाति त्वदीयत्वेन शोभते, एकरसस्य रसान्तराभावात् तत्राप्येकरसत्वं तव तेन सत्यमेव तदिति भावः। मितं निश्चितमेवेदमिति ॥३७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उक्तमेवार्थं सत्कार्यवादिमताश्रयिण्यः श्रुतयः स्पष्टतया सोपपत्तिकमाहुः-नेति। यदिदं प्रसिद्धं विश्वं तत् अग्रे सृष्टेः प्राक् आसन् नासीत्। अतः अस्माद्भाविनः प्रलयात् अनु पश्चात् न भविष्यत् न भविष्यति। किन्तु अन्तरा मध्य एव मितं प्रमाणविषयीभूतं विभाति। कुत्र मृषति परामृषतीति मृषः। जगदेवं सृजामीति परामर्षवान् यः परमेश्वरस्तस्मिन् त्वयि। किञ्च। प्रागभावध्वंसवत्त्वादिदं यस्मान्नित्यत्वेन न प्रमितम्। अतो द्रविणजातीनां मृत्सुवर्णादीनां विकल्पा भेदा घटकुण्डलादयः। तेषां पन्थानो मार्गाः प्रकारास्तैरुपमीयते। तत्सदृशयतया सत्यत्वेनैव, न तु शुक्तिरजतरज्जुसर्पादिप्रकारैर्मिथ्यात्वेन निरूप्यत इत्यर्थः। अत एव विभातीति विशिष्टभानार्थं विशब्दः प्रयुक्तः। किञ्च। तथापि वितथमनोविलासमिदं मिथ्येति ये विगीतज्ञानिनः ये च ऋतं सार्वकालिकसत्ताकमिदमिति विगीतकर्मिणोऽवयन्ति जानन्ति ते अबुधाः अपण्डिताः ॥३७॥

गूढार्थदीपिनी

तदेव विश्वस्य सत्यत्वे युक्त्यभावमुक्त्वा मिथ्यात्वे युक्तिमाहुः-नेति।

(जगन्मिथ्यात्वबोधनपरेयम्)

पद्यानुवादः

जगदिदं न हि पूर्वमनन्तरं त्वयि विभाति मृषैकरसेऽन्तरा।
कनकवैकृतवन्न★ बुधा विदन्त्यवितथं वितथं★★ मनसो भ्रमम् ॥२४॥

★ [कनकस्य वैकृतं विकृतिसमूहः तद्वदित्यर्थः। ★★ वितथम् असत्यं जगत् अवितथं सत्यं न वदन्तीत्यन्वयः।]

सङ्क्षिप्तसार्थान्वयः। हे भगवन्! यत् यस्मात् इदं जगत् अग्रे न आस। तथा निधनादनु प्रलयानन्तरं च न भविष्यत्। अतः अन्तरा मध्येऽपि एकरसे केवले त्वयि मृषा एव विभातीति मितं निश्चितम्। यत एवम् अतः श्रुत्या इदं जगत् द्रविणजातिविकल्पपथैः द्रविणजातीनां विकल्पपथैः घटकुण्डलादिभेदैः उपमीयते तत्सदृशतया निरूप्यते। अथापि वितथं मिथ्याभूतमेव यतो मनोविलासम् इदं जगत् ऋतं सत्यमिति ये अवयन्ति जानन्ति तेऽबुधा अज्ञा एवेत्यन्वयः ॥

हे भगवन्! यत् यस्मात् इदं विश्वम् अग्रे सृष्टेः पूर्वं न आस न आसीत्। निधनात् अनु प्रलयानन्तरं च न भविष्यत् न भविष्यति। शत्रन्तं वा। अतः आद्यन्तयोरविद्यमानत्वात् अन्तरा मध्येऽपि एकरसे निर्विकारे त्वयि मृषा मिथ्यैव विभाति विकाररूपेण भातीति मितं निश्चितम्। "आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा।" इत्युक्तेः। शुक्तिरजतरज्जुरर्पादिवदित्यर्थः।

विशब्दोऽत्र विकारार्थकः । यत एवमतः इदं विश्वं द्रविणजातीनां मृत्युवर्णादीनां विकल्पपथैः घटकुण्डलादिभेदैरुपमीयते तत्सदृशतया निरूप्यते असदेवेति निश्चीयते । यथा घटकुण्डलादि नाममात्रं, मृदाद्येव सत्यम्, एवमाकाशादिरूपं जगत् नाममात्रं, ब्रह्मैव सत्यमित्यर्थः । अथापि ये वितथमसत्यं च तत् मनोविलासं मनःकल्पनारूपम् इदं जगत् ये ऋतं सत्यमिति अवयन्ति जानन्ति तेऽबुधा अपण्डिता एव ॥

उक्तं च योगवाशिष्ठे —

"दीर्घस्वप्नमिमं विद्धि दीर्घं वा चित्तविभ्रमम् । दीर्घं वापि मनोराज्यं संसारं रघुनन्दन ॥" इति ।

मिथ्याभूतं सद्वा इदं मनस्येव परमं प्रतिष्ठितं किञ्च 'वाचारम्भणं विकारो नामधेयं मृत्तकेत्येव सत्यम् ॥'

इत्यादिश्रुतिषु च । एतन्मूलकमनुमानमपि ज्ञेयम् । विवादास्पदं विश्वं मिथ्या आद्यन्तयोरसत्त्वात् विकारित्वात् दृश्यत्वाच्च शुक्तिरजतादिवत् । यत् आद्यन्तयोरविद्यमानं दृश्यं विकारि च तत् असदपि न यथाऽऽत्मेति व्यतिरेके दृष्टान्तश्च । अत्र मतान्तरेषुजगत्सत्यासत्यत्वविषये नानाविधो विवादः स च बुद्धेर्भ्रान्तिकरत्वाद्भक्तैर्नादरणीयः मन्तव्यं च तावदेतावदेव सर्वत्र भगवद्दृष्ट्या असदपि सर्वं जगत् सदेव । तव्द्यतिरिक्तदृष्ट्या तु सदपि सर्वमसदेत्यार्षसिद्धान्त इत्यलम् ॥२४॥३८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इदानीं जगत्कारणभूते ब्रह्मणि परमेश्वरे विकारादिशङ्का निराक्रियते । इदं जन्मादितत्सम्बन्धतत्कारणाविद्यातत्कार्य्यरागाभिनिवेशादि । यद्यस्मात्सृष्टेः पूर्वं त्वयि नास नासीत् । अतो निधनादनु अतोऽस्य विश्वस्य प्रलयानन्तरमपि न भविष्यन्न भविष्यति । तथा च श्रुतिः – 'यः सर्वज्ञः सर्ववित् । यस्य ज्ञानमयं तपः ।' इत्यादि ।

'वेदाहं समतीतानि वस्तमानानि चार्जुन । भविष्याणि च भूतानि मां तु वेद न कश्चन ॥'

इति भगवदुक्तेश्च । मध्येऽपि नैव । कुतः । तेषां विकारादीनां जडाभिमानवतः क्षेत्रज्ञस्य धर्मत्वादित्याहुः-एकरसे अप्रच्युतस्वरूपगुणशक्तौ । स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः । ननु 'यं देवं देवकी देवी वसुदेवादजीजनत् ।' इत्यादिशास्त्रस्य जन्मादौ प्रमाणत्वात्कथं निर्विकारत्वम् । तत्राहुः–मृषेति । अज्ञानां त्वत्तः पराङ्मुखानां त्वयि विकारादि मृषा भाति प्रतीयते । न च तत्प्रतिपादकपूर्वोक्तवाक्यविरोधः शङ्कनीयः । तस्य त्वाविर्भावादिपरत्वान्न बाधः । किञ्च । जन्मकारणीभूतकर्मणो भावात् कथं तदुद्भवः सम्भावनीय इत्येतत् स्वयमेव भगवता प्रतिपादितम् ।

'अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।' इत्यादि । 'जायमानो बहुधा विजायते' इति श्रुतेः ।

एतत्तव स्वरूपमस्माभिरेव श्रुतिभिर्मितं निर्णीतम् । न तर्काद्यवकाशः । 'य आत्माऽपहतपाप्मा' इत्यादिभिः । अत एव व्यतिरेकदृष्टान्तैर्द्रविणजातिविकल्पपथैर्विविधप्रकारैर्हर्षशोकादिना प्रणमन्ति–न तथा भवानिति भावः । ननु रामकृष्णादिप्रादुर्भावे क्षत्रियत्वादिजात्यादिरपि सुव्यक्तः । तथा चोक्तसिद्धान्तभग इति चेत्तत्राहुः–वितथमिति । मूलप्रमाणहीनम् अज्ञानां मनोविलासमात्रं त्वयि जात्यादिजीवधर्मं येऽबुधाः पाषण्डनिष्ठास्ते ऋतमिति मन्यन्ते न वैदिकसम्प्रदायानुकूलाः । सूर्ये तमः कालत्रयेऽपि न दृष्टिश्रुतिगोचरं तद्वदित्यर्थः । अथ चैवं योजना । इदं भूतभौतिकं कार्यम् अग्रे सृष्टेः प्राक् त्वयि साक्षान्नासीन्नापि प्रलयानन्तरं भविष्यति । यद्यस्मादेवं तस्मादन्तरा मध्येऽपि त्वयि मृषैव भाति । अयथार्थमेव प्रतीयते । कुतः । प्रकृतिकार्यस्य कालत्रयेऽपि स्वकारणरूपायां प्रकृतावेव निष्ठत्वात् कार्यस्य कारणे स्थितिनियमाच्च । बीजेऽङ्कुरादिवत् । तथा च श्रुतिः — 'नेह नानास्ति किञ्चन ।' इत्यादि । ब्रह्मणि कार्य्यसम्बन्धानुभावं द्योतयितुं विशिनष्टि–एकरसे जन्मादिविकारतत्सम्बन्धादिशून्ये । अत एवेदं द्रविणजातिविकल्पपथैरुपमीयते । द्रव्यस्य येविकल्पाः परिणामादयो जातेश्च विकल्पाः साङ्कर्यनानात्वादयस्तेषां प्रकारैरनित्यत्वपरिणामित्वादिभिस्तुल्यतया निरूप्यते । यथा द्रव्यजातयो नियतस्वरूपाभावतया परिणामादियुक्ता अनित्याश्च तथेदमपीत्यर्थः । ननु यदि परिणामादिमत्त्वं तर्ह्यसत्त्वमपि स्वीकार्यमिति चेत्तत्राहुः–ऋतं वस्तुभावरूपं पदार्थं ये वितथं मिथ्या मनोविलासं मनोमात्रकल्पितमित्येवमवयन्ति निश्चिन्वन्ति । तेऽबुधा मूर्खाः । तथा च श्रुतिः —

'असत्यमाहुर्जगदेतदज्ञाः शक्तिं हरेर्न विदुर्ये परां हि ।
यः सत्यरूपं जगदेतदीदृक् सृष्ट्वा त्वभूत् सत्यकर्मा महात्मा ॥' इति —
'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसम्भूतं किमन्यत् कामहेतुकम् ॥'

इति भगवदुक्तेश्च । व्यतिरेकेऽपि वितथत्वं निषिध्यते ।

'अनाद्यनन्तं जगदेतदीदृक् प्रवर्तते नात्र विचार्य्यमस्ति ।
न चान्यथा क्वापि च कस्य चेममभूत् पुरा नापि तथा भविष्यत् ॥'

इति श्रुत्या । 'ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।' इत्यादिस्मृतेश्च ।

नापि मनोमात्रविलसितमिदम् । ईश्वरसृष्टत्वात् ।

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः ॥ एतस्माज्जायते प्राणः सत्मूलाः सौम्येमाः सर्वाः प्रजा ॥

नारायणाज्जायते प्राण । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते ।"

इत्यादिश्रुतिप्रतिपादितत्वात् । अत्र केचिज्जगदभावं प्रतिपादयन्ति ते विवेककुशलैः सर्वतोपेक्ष्याः । उक्तशास्त्रविरोधात् । 'मोघज्ञाना विचेतस' इति भगवतैवोपेक्ष्यत्वेनोक्तत्वात् । असत्कार्य्यवादाभ्युपगमे बौद्धमताविशेषाश्चेत्यलं विस्तरेण ॥३७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु जगतः सत्यत्वं मास्तु । तेन विशेषतः सेवमाना न सेविष्यन्ति । ये तु पुनः स्वभावतः सेवन्ते तेषां निषेधः केन वा सिद्ध्येत् । सत्त्ववत् असत्त्वस्यापि जगत्यभावात् । यथा सत्त्वमस्य साधयितुं न शक्यं तथा असत्त्वमपि तैरेव हेतुभिः । तस्माज्जगत्सदसद्विलक्षणमेवास्तु । ततस्तत्सेवायां न गुणो नापि दोषः । ततो जगत्परित्यागः कथं सिद्ध्येदित्याशङ्क्याह-न यदिदमग्र आसेति । यद्यसत्त्वसाधकमत्र न भवेत् तदैवं वक्तुं शक्येतापि । असत्त्वसाधकं तु वर्तते । इदं जगदसत्कादाचित्कत्वात्, यन्नैवं तन्नैवं यथा ब्रह्मेति । केवलव्यतिरेकी हेतुरस्तीति निरूपयन्ति-न यदिति । कादाचित्कत्वमेव निरूप्यते । यद्यस्मादिदं जगदग्रे सृष्टेः पूर्वं नास । न वा अतो निधनात् प्रलयानन्तरं च न भविष्यति । अतो मध्ये कदाचिदेव जातं तेन ज्ञायते असदिति । यद्धि सत् तत् कालत्रयेऽपि भवति, न हि सत् कदाचिदसद्भवति । अन्यथा कदाचिद्घटेऽपि पटः स्यात् । तस्मादान्तरालिकत्वात् असज्जगत् । नन्वनेन हेतुना सत्त्वाभाव एव सेत्स्यति न त्वसत्त्वम्, व्यतिरेकिणापि तदभाव एव साध्यते न तु धर्मान्तरमिति चेत्तत्राह-अनुमितमन्तरा त्वयि विभाति मृषेति । इदं जगन्मृषैव भाति । तत्र हेतुस्त्वयीति । यद्धि यस्मिन् विद्यमाने अतिरिक्तो भासते तत्त्वेन तन्मिथ्येति सिद्धम् । यथा शुक्तिकायां रजतम् । तथा सर्वमिदं ब्रह्म श्रुत्या ब्रह्मविद्भिश्च निर्णीतम् । तथापि तदन्यथा भासते जगत्त्वेन तन्मृषैव भवितुमर्हतीत्यर्थः । हेत्वन्तरमप्याह-अनुमितमन्तरेति । प्रत्यक्षे तु रजतं न दृश्यते, इन्द्रियार्थसन्निकर्षस्य शुक्तिविषयत्वात् । न हि रजतेन सह सन्निकर्षोऽस्ति सतोरेव संयोगात् । सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्यतत्प्रत्यक्षमिति प्रत्यक्षलक्षणम् । रजतं तु तदनन्तरं बुद्ध्या जन्यते विषयीक्रियते च । तत्र सा बुद्धिरेव कारणं तेन ज्ञानकरणकं ज्ञानमनुमानमिति जतमनुमितिविषयं भवति । किञ्च अन्तरा विभाति । इन्द्रियार्थयोर्मध्ये भाति तन्मृषा । तथाऽत्रापि प्रमातृचैतन्यब्रह्मचैतन्ययोर्मध्ये गद्भातीति यावदेतयोर्न सम्यक् परीक्षा तावत्प्रतिभासते । अतोऽन्तरैव विभाति । एतस्मिन्नुभयस्मिन् विचारिते तत्त्वमसीति वाक्ये अवगते पश्चात्सर्वत्र ब्रह्मैव भासते । किञ्च एकरसत्वेऽपि यन्नानाप्रकारेण भाति तन्मृषैवेति ज्ञातव्यम्, यथैकस्मिन् चन्द्रे तप्रतीतिर्भ्रान्त्या । ननु तथाप्यसत्त्वं कथं सेत्स्यति ? न ह्यसतः प्रतीतिरस्तीति चेदत आह-अत उपमीयत इति । असत्सादृश्याज्जगदसदित्युपमीयते । यथा द्रविणजातिविकल्पमार्गैः पदार्था उपमीयन्ते । यथा गोसदृशो गवय इति वाक्यं श्रुत्वा अरण्ये गवयं पश्यन् सादृश्यं वाक्यावगतं स्मृत्वा तद्गवये पश्यन् गवयोऽयं गोसदृशत्वादिति मन्यते । द्रविणानां गवादीनां या जातिः त्वादिस्तासां विकल्पोऽवान्तरभेदः स एवोपमाने मार्गः अन्यथा गौरित्येव प्रतीयते । एतस्मादेव विशेषात्रानुमानविषयता ।

वह्निस्तु व्याप्त्यादौ सर्वत्रैकजातिरेव सादृश्यज्ञानं तु भिन्नजातीयं ज्ञापयति । तथा ये असन्तो दृष्टास्ते विचारे क्रियमाणे न सम्भवन्तीत्येतद्धर्मसाम्याज्जगदप्यसदेवेति निश्चीयते । भानं तु शशशृङ्गस्यापि भवतीति नासत्त्वं निराकरोति सत्त्वमपि भासते असत्त्वमपि भासते। परं विचारसहिष्णुगुणयुक्तप्रमाणेन सद्भासते, विचारासहिष्णुदोषसहितकरणेन असदिति विशेषः। ननु वैदिकानां महतामपि जगति सद्बुद्धिः अन्यथाऽस्यासत्त्वे स्थैर्याभावात् विश्रम्भेण सर्वे व्यवहारा न भवेयुः। तस्मादसत्त्वं सदसद्विलक्षणत्वं वा वक्तव्यमिति चेत्तत्राह–वितथमनोविलासमिति। इदं जगत्सर्वं वितथमेव मिथ्याभूतमेव। यतो मनोविलासम्। यो हि जगति मनसा यद्यथा मन्यते तं प्रति तत्तथा प्रतिभाति । इष्टं द्विष्टं शुद्धमशुद्धमात्मीयं परकीयं चेति । न हि निसर्गतः जगति कश्चित्पदार्थ एवम्भूतोऽस्ति, यः सर्वान् प्रति प्रियो भवति। अतो मनोविलासकृतमेवैतदिति मनोरथवन्मिथ्याभूतमेव। एतादृशमपि ये सत्यमिति मन्यन्ते ते अबुधाः न पण्डिताः विचाररहिता इत्यर्थः ।

"खपुष्पादिमसत्त्वाद्धि मिथ्याभूतं जगद्यतः । अधिष्ठानाच्च सद्भानं तं कृष्णं नियतं भजेत् ॥" ॥२४॥३७॥

श्रीसुबोधिनीसारः

आदावन्ते च यन्नास्ति मध्येऽपि च तथैव तदित्याहुः । यत् यस्मादिदं विश्वमग्रे सृष्टेः पूर्वं नास "आत्मा वा इदमग्र आसीत्" इति श्रुतेः। निधनात्प्रलयादनु अनन्तरं न भविष्यद्भविष्यति अतोऽन्तरा मध्येऽपि एकरसे त्वयि। मृषा विभाति प्रतीयते इति मितं निश्चितम् अतो द्रविणजातीनां द्रव्यमात्राणां मृत्तिकालोहकूटकार्षापणादीनां विकल्पा भेदा घटकुण्डलादयस्तेषां पन्थानो मार्गास्तैरुपमीयते सदृशतया निरूप्यते वितथम् असत्यं मनोविलासम् इदं विश्वम् ऋतं सत्यमित्यवन्ति ये जानन्ति तेऽबुधा मूढाः पामराः ॥२४॥३७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं स्वजनाद्यहंममाभिमानादेः सत्यत्वं निराकृत्य मिथ्यात्वमाहुः–न यदिति । यत् यस्मादिदमहंममाभिमानादि अग्रे सृष्टेः पूर्वं न आस न आसीत् । न च निधनात् लयादनन्तरं भविष्यत् भविष्यति । मनोविलासत्वेन मनसि लये सति सुषुप्त्यादावदर्शनात्। अतः कारणात् अन्तरा मध्ये त्वयि त्वदात्मके जीवात्मनि मृषा मिथ्याभूतत्वमेव विभातीत्यनुमितं भवति। अत एव श्रुत्यापि द्रविणजातीनां शुक्तिरजतादीनां ये विकल्पा भ्रमास्तेषां मार्गैर्विषयैरुपमीयते सदृशतया निरूप्यते। तस्मादस्य सत्त्वे प्रमाणाभावादसत्त्वे प्रमाणसद्भावाच्च मनोविलासं मनसा भ्रान्त्या कल्पितं वितथं मिथ्याभूतमात्मनि सुखदुःखादिकम् ऋतं सत्यमिति ये अवयन्ति जानन्ति अबुधा अज्ञा एवेत्यर्थः । अत्रैवं प्रयोगः —

"विवादाध्यासितं मिथ्या, मनोविलासत्वे सत्याद्यन्तयोरविद्यमानत्वात्। शुक्तिरजतादिवदित्यन्वये, व्यतिरेके चात्मवत्" इति ॥३७॥२४॥ एवं देहाद्यध्यासतद्राहित्यमप्रयुक्तमेव ।

अन्वितार्थप्रकाशिका

न यदिदमिति ॥ यत् यतः इदं विश्वम् अग्रे न आस तथा निधनादनु न भविष्यत्। अतः अन्तरापि एकरसे त्वयि मृषा एव विभातीति मितम् अतः श्रुत्या द्रविणजातिविकल्पपथैः उपमीयते तस्मात् वितथमनोविलासमिमं ये ऋतमित्यवयन्ति ते अबुधा इत्यन्वयः । "यस्मादिदं विश्वमग्रे सृष्टेः पूर्वं न आस न आसीत् । आत्मा वा इदमेकमेवाग्र आसीत् ।" इत्यादिश्रुतेः न च निधनात्प्रलयादनु अनन्तरं भविष्यद् भविष्यति। इलोप आर्षः। शत्रन्तं वा। "नासदासीन्नो सदासीत्तदानीम्" इत्यादिश्रुतेः। अतः कारणात् अन्तरा मध्येऽपि एकरसे केवले त्वयि मृषा मिथ्यारूपमेव विभातीति मितं निश्चितम् । यद्वा । अन्तरापि विभातीति अनुमितं तर्कितमित्यन्वयः । यत एवमतः श्रुत्या द्रविणजातिविकल्पपथैः द्रविणजातीनां द्रव्यमात्राणां मृल्लोहकार्ष्णायसरूपाणां विकल्पा भेदा घटकुण्डलादयः तेषां पन्थानो मार्गाः प्रकारास्तैरुपमीयते सदृशतया निरूप्यते। यथा तत्र कार्याकाराणां नामधेयमात्रता कारणं मृदाद्येव तु सत्यं तथाऽत्राप्याकाशादीनां नाममात्रता ब्रह्मैव सत्यं तथा च श्रुतिः —

चारे क्रियमाणे न
न सत्त्वमपि भासते
षः । ननु वैदिकानां
सदसद्विलक्षणत्वं वा
यो हि जगति मनसा
जगति कश्चित्पदार्थ
शमपि ये सत्यमिति

३॥३७॥

"आत्मा वा इदमग्र
मृषा विभाति प्रतीयते
डलादयस्तेषां पन्थानो
ानन्ति तेऽबुधा मूढाः

हंममाभिमानादि अग्रे
न मनसि लये सति
भातीत्यनुमितं भवति ।
निरूप्यते । तस्मादस्य
सुखदुःखादिकम् ऋतं

, व्यतिरेके चात्मवत्"

एकरसे त्वयि मृषा एव
तमित्यवयन्ति ते अबुधा
।" इत्यादिश्रुतेः न च
म्" इत्यादिश्रुतेः । अतः
। अन्तरापि विभातीति
मृल्लोहकार्ष्णायसरूपाणां
र्यकारणाणां नामधेयमात्रता

"यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं भवति । वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । यथा एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् । यथा एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसम् ॥" इत्यादि । तस्मादस्य सत्त्वे प्रमाणाभावादसत्त्वे प्रमाणस्य विद्यमानत्वात् वितथमनोविलासमिदमृतं सत्यमिति ये अवयन्ति जानन्ति ते अबुधा अज्ञा इत्यर्थः । अत्रैवं प्रयोगः । विवादाध्यासितं न सत् आद्यन्तयोरविद्यमानत्वात् । विकारित्वादृश्यत्वाच्च शुक्तिरजतादिवत् इत्यन्वये दृष्टान्तः । आत्मवच्चेति व्यतिरेके दृष्टान्तः । कार्यसत्यत्ववादिनस्तु यदिदमग्रे न आस अनु च न भविष्यत् किन्तु अन्तरा मध्य एव मृषति एवं भुञ्जामीत्यादिसङ्कल्पं करोति स मृषः । स चासावेकरसश्च तस्मिंस्त्वयि मितं निश्चितं सत्यं विभाति । किञ्च इदं सत्यमपि नित्यं नास्ति । अतो द्रविणजातिविकल्पपथैः घटकुण्डलादिप्रकारैः सत्यत्वेनैव उपमीयते न तु रज्जुसर्पादिप्रकारैर्मिथ्यात्वेन । अतः ऋतं सत्यमिदं विश्वं ये वितथमनोविलासं वदन्ति ते अबुधा इति व्याचख्युः ॥३७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

न यदिदमिति ॥ यस्मात् इदं स्वतः त्रिगुणात्वककर्मयुक्तानां नित्यक्षेत्रज्ञानां देवमनुष्यत्वादिफलरूपं तत्तत्कर्मानुगुणभोग्यादिरूपं न प्रत्यक्षतया वर्तमानं विश्वम् अग्रे सर्गकालात्प्राक् नासफलरूपेण नैवादृश्यत ॥ सूक्ष्मभावेन तु अवर्ततेत्यर्थः ॥ निधनात् प्रलयात् ॥ निधनं प्राप्य ॥ ल्यब्लोपे पञ्चमी न ॥ भविष्यत्स्थूलरूपेण न भविष्यतीत्यर्थः ॥ इकारलोप आर्षः ॥ अत आद्यन्तयोः स्थूलरूपेणासत्त्वादन्तरा मध्ये सर्गावस्थायां स्थूलरूपेण सर्वैर्दृश्यमानं सत्यतया अज्ञानिभिरनुमितं ज्ञातमपि एकरसे-आनन्दमयोऽभ्यासादित्यादिसूत्रैः सर्वानन्दशेषितयोक्ते स्वस्वरूपैकानन्दे त्वयि आनन्दपराकाष्ठारूपेण ज्ञाते सति आद्यन्तयोः सूक्ष्मरूपं मध्ये स्थूलरूपं च विश्वं मृषा विभाति ॥ दुःखस्वरूपत्वात् सुतरामनालोकनीयं भवतीत्यर्थः ॥ अतो विश्वस्य क्षेत्रज्ञकर्मफलरूपत्वाद्धेतोः ॥ अस्माभिरिति शेषः ॥ श्रुतिभिः द्रविणजातिविकल्पपथैः ॥ द्रविणं द्रव्यं तस्य जातयः सुवर्णरूप्यताम्राख्याः ॥ तासां विकल्पाः कटककार्षापणघटादयस्तेषां पन्थानो भेदास्तैरुपमीयते सदृशतया निरूप्यते ॥ तत्र सिद्धान्तद्रविणस्थानिया स्वरूपावरणकारिणी क्षेत्रज्ञानाद्यविद्या तस्याः स्वरूपभूता जातयः सत्त्वरजस्तमांसि ॥ तासां विकल्पादेवमनुष्यतिर्यग्देहरूपास्तेषां पन्थानोऽवान्तरतारतम्योत्कृष्टनिकृष्टत्वरूपा भेदाः ॥ तत्सदृशत्वेन केवलमनुमितमित्यर्थः ॥ वितथा नश्वरा मनोविलासा मनःसङ्कल्पा यस्मिन् तथाभूतमपि विश्वम् अबुधा अज्ञानिनः सत्यं सुखस्वरूपं भगवन्तं त्वां विहाय कृतं तदेव सत्यं सुखपमित्यवयन्ति जानन्ति ॥३७॥२४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

शुष्कवेदान्तिभिर्नानायुक्तिभिः कृतं कार्यमिथ्यात्ववर्णनमविदुषामेव रोचते न विदुषामित्याहुः ॥ न यदिति ॥ अत्र विकल्पपथैरित्यन्तेन कार्यमिथ्यात्ववर्णनानुवादः । वितथेत्यादिना तत्प्रतिक्षेप इति विभागः । तथा हि । यद्यस्मात्, इदं विश्वम्, अग्रे पूर्वं, न आस । 'सदेव सोम्येदमग्र आसीत्' इत्यादिश्रुतेः । निधनात् प्रलयात्, अन्वनन्तरं, न भविष्यन्न भविष्यति । नासदासीन्नो सदासीत्' इत्यादिश्रुतेः । अतः कारणात्, अन्तरा मध्ये, एकरसे केवले त्वयि, मृषा मिथ्यारूपं सदेवेदं विभाति, इति मितं निश्चितं, यत एवम्, अतः श्रुत्या, द्रविणजातिविकल्पपथैः द्रविणजातीनां द्रव्यमात्राणां मृल्लोहादिरूपाणां विकल्पानां घटादीनां च पन्थानो मार्गास्तैः, उपमीयते, सदृशतया निरूप्यते । इत्यन्तं कार्यमिथ्यात्ववादिमतमथैतद्दूषयन्ति वितथेति । कुदृष्टीनामिति [illegible]। वितथमनोविलासं मिथ्याभूतमनोविलसितम्, एतत् कार्यमिथ्यात्ववर्णनमित्यर्थः । ऋतं सत्यमेव प्रामाणिकमित्यर्थः । इति, अबुधा अवयन्ति जानन्ति । न तत्पारमार्थ्याभिज्ञा इत्यर्थः । अयम्भावः —

अत्र हि न कार्यमिथ्यात्वं कारणसत्यत्वं च प्रतिपाद्यते ।
किं तु कार्यकारणयोरनन्यद्रव्यतया कारणात्कार्यस्यानन्यतोपपाद्यते ॥२४॥ ३८॥

योगिरामानुजाचार्यकृतसरला व्याख्या

प्रपञ्चस्य नित्यत्वरूपासत्त्वे 'यतो वा इमानि भूतानि जायन्ते ।' इत्याद्याः श्रुतयः तन्मूलमनुमानं च प्रमाणमित्याहुः-न

यदिदमिति। यद्यस्मादिदं विश्वम् अग्रे सृष्टेः पूर्वं न आस नासीत्। 'सदेव सौम्येदमग्र आसीत्।' 'आत्मा वा इदमेक एवाग्र आसीत्।' इति श्रुतेः। निधनात् प्रलयात् अनु अनन्तरं न भविष्यत् न भविष्यति।

'नासदासीन्नो सदासीत्तदानी'मित्यादिश्रुतेः। अतः कारणादन्तरासृष्टिप्रलयकालयोर्मध्येऽप्येकरसे विकाराराहित्यादेकरूपे त्वयि मृषा असत्यस्वरूपमेव विभाति इति मितं निश्चितम्। असत्त्वासत्यमिथ्यामृषाशब्दानामेकार्थकत्वात् अत्र मृषाशब्दो असत्यत्वपरः। जगतः असत्वशब्दावाच्यत्वं विशिष्टाद्वैतभाष्ये प्रतिपादितमतस्तन्मतेऽप्यविरोधः। यतः एवंरूपमतः श्रुत्या द्रविणजातिविकल्पपथैः द्रविणजातीनां द्रव्यमात्राणां मृत्कनककार्ष्णायसरूपाणाम् विकल्पाः भेदाः घटकुण्डलादयः। तेषां पन्थानो मार्गाः प्रकाराः। तैरुपमीयते सदृशतया निरूप्यन्ते। यथा तत्र कार्याकाराणां नामधेयमात्राकारणं तु मृदाद्येव सत्यम्। तथात्रापि आकाशादीनां नाममात्रता ब्रह्मैव सत्यम्। तथा च श्रुतिः —

'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्। यथैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्। यथा एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसमि'त्यादि।

तस्मादस्य जगतः सत्त्वे प्रमाणाभावात् असत्त्वे प्रमाणस्य विद्यमानत्वात् वितथमनोविलासं मनसो भ्रान्त्या कल्पितम्। मनसो यादृशभ्रान्तिर्भवति तादृशाकारेण भासत इत्यर्थः। यथा रज्जुसर्पभूदलनाम्बुधारादिरूपेण यस्य यादृशभ्रान्तिर्भवति तस्य तथैव भासते। तद्यथा इष्टमनिष्टं शुद्धमशुद्धम् स्वीयं परकीयं चेति। यो यथा मनुते तस्य तथैव भासते। स्वभावतस्तु इष्टानिष्टादिरूपत्वं नास्त्येव स्वभावत एव इष्टानिष्टस्वरूपत्वे सर्वेषामेवेष्टत्वाद्याकारेण भासेत। अतः मनोविलसितम्। मनःकल्पनानुरूपं वितथमसत्यं च सत् मनोविलासं चेति वितथमनोविलासम्। एवमिदं विश्वम् अबुधाः अज्ञाः ऋतमिति सत्यमिति अवयन्ति जानन्ति। यस्मादिदं अग्रे नास निधनादनु न भविष्यत् अन्तरा एकरसे त्वयि मृषा विभातीति मितम् अतः द्रविणजातिविकल्पपथैः उपमीयते तस्माद्वितथमनोविलासम् इदमबुधाः कृतमित्यवयन्तीत्यन्वयः ॥३७॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

साधकं प्रमाणं तन्मूलं ताः श्रुतयो मूलं कारणं यस्य तत्तन्मूलम् अनुमानमपि प्रमाणमित्याह–वेदः तदानीं प्रलयेऽसत्कारणं महदादि सत्कार्यं पृथिव्यादि। अतः कारणादाद्यन्तयोरविद्यमानत्वात् यत एवं मिथ्यारूपत्वेन निश्चितम् अतः तत्र दृष्टान्ते कार्याकाराणां कार्यरूपा ये आकारास्सन्निवेशाः घटादयस्तेषाम् अत्रापि दार्ष्टान्तिकेऽपि तथा च कार्यस्य मिथ्यात्वे कारणस्य सत्यत्वे प्रमाणं श्रुतिः। विकारो घटादिः। यतो वाचैव केवलमारभ्यते व्यवह्रियते तथाभूतं नामैव नाममात्रं मिथ्येत्यर्थः। लोहमणिना सुस्वर्णपिण्डेन लोहमयं सुवर्णकार्यं कुण्डलादि। एतच्छ्रुत्यनन्तरमुत्तरश्रुत्यनन्तरं वाचारम्भणमित्यादिकं च ज्ञेयम्। किन्तु लोहमित्येव सत्यमिति यथायथं वाक्यशेषो ज्ञेयः। अत्र विश्वस्य मिथ्यात्वे एवं प्रयोगः इत्यनुमानस्योच्चारणम् आत्मवच्चेति व्यतिरेके दृष्टान्तव्यतिरेकव्याप्तिश्चेयं साध्याभावे हेत्वभावो व्यतिरेकः। यत् सन्न इति न किन्तु सत्यमेव तदाद्यन्तयोरविद्यमानं दृश्यं विकारि च न यथात्मेति। कनकमेव मुकुटादिरूपेण परिणतं परमार्थतः कनकमेव यथा तथा महदादिकं कार्यजातं परमार्थतः वस्तुतः नह्येः परमकारणात्परं भिन्नं नास्ति ॥३७॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

तदेवं प्रपञ्चस्य सत्त्वे साधकं नास्तीत्युक्तम्। इदानीम् असत्त्वे सृष्टिप्रलयश्रुतयस्तन्मूलं चानुमानप्रमाणमित्याह-न यदिदमिति। यद्यस्मादिदं विश्वम् अग्रे सृष्टेः पूर्वं नासीत्। न च निधनात् प्रलयादनु अनन्तरं भविष्यत् भविष्यति। अतः कारणात् अन्तरा मध्येऽपि एकरसे केवले त्वयि मृषा मिथ्यारूपमेव विभातीति मितं निश्चितम्। यतः एवमतः कारणात् श्रुत्या द्रविणजातिविकल्पपथैरुपमीयते। सदृशतया निरूप्यते। द्रविणजातीनां द्रव्यमात्राणां मृल्लोहकार्ष्णायसरूपाणां विकल्पाः भेदाः घटकुण्डलनखनिकृन्तनादयः। तेषां पन्थानो मार्गाः प्रकारास्तैरुपमीयते विश्वमित्यर्थः। यथा तत्र कार्याणां घटादीनां नामधेयतामात्रकरणं मृदादिकमेव तु सत्यम्। तथात्रापि आकाशादीनां नाममात्रता ब्रह्मैव तु सत्यमिति। तस्मादस्य सत्त्वे

माणाभावात् असत्त्वे प्रमाणस्य विद्यमानत्वात् वितथं मिथ्याभूतं मनोविलासम् ऋतं सत्यमिति ये वयन्ति जानन्ति ते अबुधा ज्ञा इत्यर्थः । अत्रैवम्प्रयोगः विवादाध्यासितम् । न सत् आद्यन्तयोरविद्यमानत्वात् विकारित्वाच्च । शुक्तिरजतादिवत् । देहे आत्मवच्चेति न यदिदमयं आसेत्यत्र श्रुतिः– 'आत्मा वा इदमेक एवाग्र आसीत् । नासदासीन्नोऽसदासीत्तदानी'मिति ।

अर्थः–इदं अग्रे सृष्टेः पूर्वमात्मैवासीत् अखण्डैकरसो जगदधिष्ठानत्वेन वास्तवस्वरूपभूतः पदार्थ एवासीत् । न तु कार्यभूतं नामरूपात्मकं जगदासीदित्यर्थः । तदानीं प्रलयानन्तरं सृष्टेः पूर्वमसत्कारणं नासीत् सत्कार्यं नो आसीदित्यर्थः विणविकल्पपथैरित्यत्र श्रुतयः —

"यथा सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातं भवति ।

वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । तथैकेन लोहमणिना वा सर्वं लोहमयं विज्ञातं स्यात् ।

वाचारम्भणं विकारो नामधेयं कार्ष्णायसमित्येव सत्य"मिति ।

अर्थश्च — हे सोम्य ! यथा एकेन घटादिकारणभूतेन मृत्पिण्डेन विज्ञातेन सर्वमन्यत्कुम्भशरावादिकं विज्ञातं स्यात् । कारणानन्यत्वात्कार्यस्य । कथं तर्हि लोके इदं कारणमिदं कार्यमिति वदन्ति व्यवहरन्ति चेत् तत्राह–वाचारम्भणमिति । वाचारम्भणं यावद्वस्तु तत्सर्वं नामधेयमेव केवलं न तु विकारो नाम वस्त्वन्तरमस्ति । परमार्थतो मृत्तिकेत्येव सत्यम् । एवमुत्तरत्रापि योज्यम् । तथा लोहमणिना मणिकारणभूतेन सुवर्णपिण्डेन लोहमयं स्वर्णमयम् नखनिकृन्तनेन नखनिकृन्तनकारणभूतेन कार्ष्णायसपिण्डेन कार्ष्णायसं छुरिकादात्रादिकम् । यथा विकारो न सत् कारणं सत्यं तथा विकारस्य प्रपञ्चस्य परमकारणं ब्रह्ममात्रत्वं सत्यमिति

स्वामिनाम्–

मुकुटकुण्डलकङ्कणकिङ्किणीपरिणतं कनकं परमार्थतः ।
महदहङ्कृतिखप्रमुखं तथा नरहरेर्न परं परमार्थतः ॥

सुगमम् ॥३७॥

श्रीनिवाससूरिकृततत्त्वदीपिका

मृत्पिण्डतत्कार्यदृष्टान्तानां कार्यमिथ्यात्ववर्णनमविदुषामेव रोचते न विदुषामित्याह–न यदिदमिति ।

यदिदं विश्वं सृष्टेरग्रे पूर्वकाले नास नासीत् । न च निधनात्प्रलयादनु अनन्तरं भविष्यद्भविष्यति । अत अन्तरा मध्ये कासे त्वयि मृषा मिथ्यारूपमेव विभातीति अनुमितं निश्चितम् । अतो ब्रह्मद्रविणजातिविकल्पपथैर्मृत्पिण्डलोहमण्यादिपथैः कारैरुपमीयते ।

"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । यथैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् ॥"

इत्यादिभिः । अतः पूर्वापरकालयोरिव मध्यकालेऽपि नास्ति कार्यम् । अनुमितत्वात् । दुर्निरूपकारणत्वादन्तरा ब्रह्मणि कल्पितं शुक्तिकादौ रजतादिवत् मृषा भीतति कुदृष्टीनां वितथं मनोविलसितम् । कुतः । प्रतिपन्नोपाधौ बाधादर्शनात् । था च श्रुतः —

'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो सुवः ॥'

इति स्मृतिरपि —

'यथास्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव तथाभावा युगादिषु ॥'

इति । तस्मात् कुदृष्ट्यभिमतं कार्यमिथ्यात्वम् ऋतं प्रामाणिकमिति अबुधाः अवयन्ति जानन्ति । न तु विद्वांस इत्यर्थः ।

क्तम् —

'या वेदबाह्याः स्मृतयः याश्च काश्च कुदृष्टयः । सर्वास्ता निखिलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥'

अप्रामाणिकं तु पूर्वमेवोक्तम् । अतः पूर्वापरप्रतिपादनविरोधात् प्रमाणान्तरविरोधाच्च एवमेव प्रामाणिकैरभ्युपगन्तव्यम्। ननु वाचारम्भणं विकारो नामधेयमित्यादिश्रुतिभिर्विकारनामधेयस्य वाचारम्भणमात्रत्वप्रतिपादनात् मृत्पिण्डस्थानीयस्य ब्रह्मण एव सत्यत्वात्कार्यस्य मिथ्यात्वं प्रतीयते इति चेदनभिज्ञो हि भवान् श्रुत्यभिप्रायस्य अत्रोपनिषद्वाक्यविवरणरूपायां विषयवाक्यदीपिकायां श्रीरङ्गरामानुजमुनिभिर्व्याख्यातेयं श्रुतिः । तथा हि उपक्रमे —

'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति ।'

अत्रान्यज्ञानेनान्यज्ञानासम्भवादेकविज्ञानेन सर्वविज्ञानासम्भवम्मन्वानश्चोदयति । 'कथं नु भगवः स आदेशो भवती'ति हे भगवः ईदृशआदेशः कथं भवतीत्यर्थः । उपादानोपादेययोरेकद्रव्यत्वे तद्भवतीत्यभिप्रायेणोत्तरमाह– 'यथा सौम्यैकेन मृत्पिण्डने सर्वं मृण्मयं विज्ञातं स्यात् ।' यथोपादानभूते मृत्पिण्डे ज्ञाते तदुपादेयघटशरावादिकं श्रुतं भवति । तद्वदित्यर्थः । नैय्यायिकरीत्या असदेव घटादिकं मृत्पिण्डेनोत्पद्यते । अतश्चोपादानोपादेययोर्भेदात्र मृत्पिण्डे ज्ञाते सर्वमृण्मयानां ज्ञातत्वं सम्भवतीति मन्वानं प्रत्याह–'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ।' आरभ्यते स्पृशते इत्यारम्भणम् । कर्मणि ल्युट् । तेनैव मृद्द्रव्येण घटशरावादिलक्षणो विकारो घटशरावादिनामधेयं च स्पृशते इत्यर्थः । वाचारम्भणशब्दस्य पुन्नपुंसकलिङ्गविकारनामधेयविशेषणत्वेऽपि नपुंसकैकशेषेण आरम्भणमिति नपुंसकैकवचननिर्देशः । मृद्द्रव्येण विकारनामधेये कस्मै प्रयोजनाय स्पृश्येते इत्यत्राह–वाचेति। प्रयोजनस्य हेतुत्वविवक्षया तृतीया । वाक्च्छब्दश्चाजहल्लक्षणया वागादिव्यवहारपरः । ततश्च वाक् पूर्वहानादिव्यवहारार्थं मृत्पिण्डेन नामरूपे स्पृश्येते । मृत्पिण्ड एव नामरूपभाग्भवतीत्यर्थः । अत्र यद्यपि मृत्पिण्डमृण्मयाभेददर्शनं वाचारम्भणं विकार इत्येतावन्मात्रेणापि सिद्ध्यति । न नामधेयस्यापि स्पृश्यत्वं वक्तव्यम् । तथापि संज्ञाभेदादुपादानोपादेययोर्भेदशङ्का स्यात् । तव्द्युदासाय नामापि मृद्द्रव्येण स्पृश्यते इत्युक्तिरपेक्षितेति द्रष्टव्यम् । कार्यकारणयोरेकद्रव्यत्वे प्रमाणमाह–मृत्तिकेत्येव सत्यमिति । मृण्मयं घटादिकं मृत्तिकेत्येव प्रमाणप्रतिपन्नं न तद्भिन्नत्वेनेत्यर्थः ।

''यथा सौम्यैकेन लोहमणिना वा सर्वं लोहमयं विज्ञातं स्यात् । वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ॥''

लोहमणिः सुवर्णपिण्डविशेषः ।

''यथा सौम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यात् ।

वाचारम्भणं विकारो नामधेयं कार्ष्णायसमित्येव सत्यम् ।''

नखनिकृन्तनशब्देन कृष्णायसपिण्डो लक्ष्यते । शिष्टं पूर्ववत् । एवं स आदेशो भवतीति मयोक्त आदेशो मृत्पिण्डादितुल्य इत्यर्थः । इति आदेशशब्दोऽपि तैरेव व्याख्यातः । तथा हि प्रकृत्यर्थः । शासनं प्रसिद्धिप्राचुर्यात् । अन्यथा स्वारस्यभङ्गात् आङ्पूर्वो दिशतिर्नियोक्तृत्वप्रयोजनवचनः । उपपूर्वस्तु नियोज्यप्रयोजनवचन इति न्यासकारः । नियोक्तरि प्रयोजनं यस्य तस्यार्थस्य वाचक इत्यर्थः । किञ्चोपदेश्यत्वं लौकिकालौकिकधर्मब्रह्मभागार्थसाधारणम् । प्रशासितृत्वं तु ब्रह्मणोऽसाधारणम् । 'अन्तःप्रविष्टः शास्ता जनानाम्' एतस्य वा अक्षरस्य प्रशासने 'गार्गि' इत्यादिभिर्निरुपाधिकप्रशासनस्य ब्रह्मसाधारणत्वश्रवणात् । घञ्प्रत्ययस्य करणे व्युत्पन्नत्वं विवक्षातः । कारकाणां प्रवृत्तिरतिशाब्दोक्तन्यायेन कर्तर्य्येव कारणान्तरनैरपेक्ष्येण साधकतमत्वविवक्षया तथा प्रयोग उपपद्यते । 'अकर्तरि च कारके संज्ञायाम् ।' (३-३-१९) इति सूत्रस्य प्रयोजनं कारणत्वविवक्षया विना कर्तर्य्यसाधुत्वेन प्रयोगनिवृत्तिः । उपदेशपक्षे प्रत्ययस्वारस्यमर्थानौचित्यं च । प्रशासनपक्षे प्रत्ययास्वारस्येऽपि प्रधानभूतप्रकृत्यर्थस्वारस्यमर्थौचित्यं चेति वैषम्यम् । अतः प्रशासनमेवादेशशब्दाभिधेयमिति स्वीकर्तुं युक्तमिति ।

'येनाश्रुतं श्रुतं भवती'त्यत्र 'कस्मिन्न भगवो विज्ञाते सर्वमिदं विज्ञातं भवति ।'

'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं भवति ।'

इति मुण्डकबृहदारण्यकवाक्यानुसारेण येन श्रुतेन मतेन विज्ञातेनाश्रुतममतमविज्ञातं श्रुतं मतं विज्ञातं भवतीति येनाश्रुतमिति स्य पर्यवसितार्थः । ब्रह्मस्वरूपसत्तामात्रस्याश्रुतत्वादिहेतुत्वाभावादिति द्रष्टव्यम् । अवस्थाविशिष्टतया अश्रुतं स्वरूपेण श्रुतं तीत्यर्थः । अत्र विज्ञातशब्दो निदिध्यासनपरः । श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति क्रमप्रत्यभिज्ञानादिति द्रष्टव्यमिति । त्कार्यसत्यत्वे प्रमाणभूयस्त्वात् असत्यत्वे प्रमाणाभावाच्च न कुदृष्ट्यभिमतं मिथ्यात्वं प्रामाणिकमिति प्रतिप्रयोगं च दाध्यासितं कार्यं सत् आद्यन्तयोर्विद्यमानत्वात् । मृत्सुवर्णादिवदिति ॥३७॥

कृष्णप्रिया

फीरभी प्रपंच को मिथ्या मानने वाला कहता है कि जिस कारणसे यह जगत् सृष्टि के पहले भी नहि रहा र प्रलय के अनन्तर भी नहि होगा इसीसे मध्यमें एक रस आप पर ब्रह्मस्वरूप आधारमें यह जगत् मिथ्याहि त होता है यह नश्चिय हि पा गया है इसीमें श्रुतियोमें मीट्टी आदि द्रव्य के कार्य घटादिको के दृष्टान्त मार्गो प्रपंच को घटादिकों के तुल्य निरूपण किया गया है । इसपर श्रुति कहती है कि उपरोक्त कु-युक्तियों से प्रपंच मिथ्या वर्णन करना यह उनका वृथा हि मन का विलास है क्योंकि उपरोक्त प्रकार से प्रपंच का बाध नहि खता किन्तु नाश दिखता है । नाशमान वस्तु मिथ्या नहि होती मिथ्या तो वह होता है कि जिसका किसी कालमें द्भाव न होवे जैसे आकाश में पुष्प शश के शंग, वन्ध्या का पुत्र आदि का कभी सद्भाव नहि है इसलिये जगत् मिथ्यापना सत्य है ऐसा कहनेवाले अविवेकी है ॥३७॥

स यदजया त्वजामनुशयीत गुणांश्च जुषन् भजति सरूपतां तदनु मृत्युमपेतभगः ।
त्वमुत जहासि तामहिरिव त्वचमात्तभगो महसि महीयसेऽष्टगुणितेऽपरिमेयभगः ॥३८॥

कर्दमक्षमा

स, यत्, अजया, अजाम्, अनुशयीत, ततः, गुणान्, च, जुषन्, तदनु, सरूपताम्, जुषन्, अपेतभगः, सन्, मृत्युम्, जति।, त्वम्, उत, त्वम्, तु, आत्तभगः, अपरिमेयभगश्च, अतः, ताम्, अजाम्, अहिः, त्वचम्, इव, जहासि, तथा, अष्टगुणिते, सि, महीयसे ॥३८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु यदि प्रपञ्चो नाम नास्त्येव तदाऽसता तेन न चैतन्यस्य सम्बन्धगन्धोऽपि तर्हि किमपराद्धं जीवेन यतोऽयं संसरति बहुपुण्यमीश्वरस्य यतो नित्यमुक्तः किं विषयं च तदा कर्मकाण्डमित्यपेक्षायां जीवेश्वरविशेषं "द्वा सुपर्णा सयुजा सखाया नं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वित्त्यनश्नन्नन्योऽभिचाकशीति । अजामेकां लोहितशुक्लकृष्णाम्" इत्याद्याः तीत्याह-स यदजयेति । स तु जीवो यद्यस्मात् अजया मायया अजामविद्यामनुशयीताऽऽलिङ्गेत्ततो गुणांश्च देहेन्द्रियादीन् जुषन् मानः आत्मतयाऽध्यस्यंस्तदनु तदनन्तरं सरूपतां तद्धर्मयोगञ्च जुषन्नपेतभगः पिहितानन्दादिगुणः सन् मृत्युं संसारं भजति ति तद्विषयमेव च कर्मकाण्डमिति भावः । त्वमुत त्वन्तु जहासि तामजां मायाम् ननु सा मय्येवास्ति कथं त्यागस्तत्राह रिव त्वचमिति । अयं भावः यथा भुजङ्गः स्वगतमपि कञ्चुकं गुणबुद्ध्या नाभिमन्यते तथात्वमजाम् न हि राह्लादिसम्वित्कामधेनुवृन्दपतेरजया कृत्यमिति तामुपेक्षस इति कुतः एतत्तदाह आत्तभगो नित्यप्राप्तैश्वर्यः महसि श्वर्येऽष्टगुणितेऽणिमाद्यष्टविभूतिमति महीयसे पूज्यसे विराजसे कथम्भूतः अपरिमेयभगोऽपरिमितैश्वर्यः न ह्यन्येषामिव कालादिपरिच्छिन्नं तवाष्टगुणितमैश्वर्यमपि तु परिपूर्णस्वरूपानुबन्धित्वदपरिमितमित्यर्थः ।

नृत्यन्ती तव वीक्षणाङ्गणयता कालस्वभावादिभि-
र्भावान् सत्त्वरजस्तमोगुणमयानुन्मीलयन्ती बहून् ।

मामाक्रम्य पदा शिरस्यतिभरं सम्मर्दयन्त्यातुरं
माया ते शरणं गतोऽस्मि नृहरे त्वामेव तां वारय ॥२५॥ ॥३८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — पुनराशङ्कते–नन्विति । असताऽसत्येन तेन प्रपञ्चेन सम्बन्धस्य गन्धो लेशः सम्बन्धगन्धः । अपराद्धमपकृतम्, अयं जीवः किंविषयः कोऽधिकारी जीवेश्वरयोर्विशेषं भेदं "द्वा सुपर्णा" इत्याद्या वदन्ति। तदर्थः — द्वौ सुपर्णौ "प्रथमद्विवचनस्याकारादेशः छन्दसि ।" एवमग्रेऽपि । शोभनगमनौ । सयुजौ बिम्बप्रतिबिम्बभावेन सदा संयुक्तौ सखायौ नित्योपकारकोपकार्यत्वेन वर्तमानौ समानमेकमेव वृक्षं देहं परिषस्वजाते परिष्वक्तावन्तौ नियामकनियम्याद्युपाधिमत्त्वेन परिगृह्य वर्तेते तयोर्द्वयोर्मध्येऽन्यः प्रतिबिम्बभूतो जीवः पिप्पलं कर्मफलं स्वादु विविधविषयास्वादनं यथा भवति तथा उपभुङ्क्ते, तस्मादन्यो बिम्बभूतः परमात्मेश्वरः पिप्पलमनश्नन्नभिचाकशीति स्वप्रकाशाखण्डवृत्तिमात्ररूपेणास्त इत्यर्थः । अत्र सुपर्णत्वं पक्षित्वं तयोर्नानाधिष्ठानस्वीकारपरित्यागसाम्यात् । "अजामेकां" इति पूर्वव्याख्याता । अजया तव मायया मोहित इति शेषः। ततस्तस्मात् गुणान् गुणपरिणामान् अध्यस्यन्मन्यमानः तद्धर्मयोगं देहेन्द्रियधर्माणां कार्श्यबाधिर्यशोकादिरूपाणां योगं सम्बन्धं तद्विषयमविद्यावद्विषयम् । इति भाव इति–अविद्यया देहाद्यध्यासेन च तत्तत्फलेच्छया कर्ममार्गप्रसक्तो भवतीति तात्पर्यम्। स्वगतस्य परित्यागोऽसम्भव इत्याक्षिपति–नन्विति। तत्त्यागो मायात्यागः। निर्गलितार्थमाह–अयम्भाव इति–निरन्तराह्लादिन्यो याः संवित्कामधेनवः स्वस्वरूपविद्याकामधेनवस्तासां वृन्दस्य सङ्घस्य पतेः । बहुत्वं वृत्त्यभिप्रायम् । अजया छागीसमया यथाऽपरिमितदुग्धप्रदधेनुवृन्दपतेः छाग्या कृत्यं न, तथा परमानन्दस्वरूपावस्थितस्य मायाया निवृत्तत्वात्तया सह कृत्यं सङ्गच्छेतेति भावः । एतन्मायोपेक्षणं कुतः तदाह–आत्मभग इति । अन्येषामिन्द्रादीनामिव । इत्यर्थ इति–अपरिमितैश्वर्यस्य तव परिमितैश्वर्याज्जीवान्महान्विशेष इति भावः। स्वामिनाम्–नृत्यन्तीति। भो नृहरे! त्वामेव शरणं गतोऽस्मि तां मायां वारय। का सा माया, त्वां किं करोतीत्यत आह–ते तव माया तव वीक्षणमेवाङ्गणं तत्र गता नृत्यन्ती तव दृष्टिलब्धसामर्थ्या नानाविधभावं कुर्वन्ती गुणमयान्भावान् शान्तघोरमूढलक्षणान् उन्मीलयन्ती प्रकाशयन्ती सती मां शिरसि पदा पादेनाक्रम्यातिभारं यथा स्यात्तथा सम्मर्दयन्ती तवैव माया त्वमेव तां वारय नान्यस्य तद्वारणे सामर्थ्यमस्ति —

"दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥" इति श्रीमुखोक्तेः ॥★॥

श्रीधरानुयायिनी —

नन्वविद्यातत्कार्यरूपसंसारस्यासत्त्वे तेनासता सम्बन्धाभावात् किन्निमित्तको [केनापराधेन।] जीवस्य संसारः कथं वा [केन पुण्यौघेन।] नित्यमुक्तत्वमीश्वरस्य कर्मकाण्डं च किंविषयमित्याकाङ्क्षायां संसारे निमित्तं जीवेश्वरविशेषं चाह–स इति। स च जीवो यस्मान्मायया मोहितः स्थूलसूक्ष्मदेहाकारेण परिणतामविद्यामालिङ्ग्य देहेन्द्रियादीनात्मतयाध्यस्य तदनन्तरमेव तत्तद्धर्मानात्मन्यध्यस्य भोग्यविषयान्प्रीत्या सेवमानस्तेनैव हेतुना मनसा भोग्याकारतां सम्प्राप्याविद्यया पिहितानन्दादिगुणः संसरति एतद्विषयकमेव कर्मकाण्डम्। किञ्च–यथा सर्पः स्वगतमपि कञ्चुकं गुणबुद्ध्या नाभिमन्यते किन्तु स्वेच्छया तं दूरतस्त्यजत्येव तथैव नित्यप्राप्तापरिमितैश्वर्यत्वं तामविद्यां मायां वा दूरतस्त्यक्त्वाऽणिमाद्यष्टविभूतिमति परमैश्वर्ये सदा विराजसे। न हि कोटिकामधेनुपतेश्छाग्या कृत्यं किमपीति प्रसिद्धतरम्। अयमाशयः —तेजोंऽशं सुवर्णादिकं तम इव त्वदंशं जीवमविद्यावृणोत्येव तेजःपुञ्जं भास्करमिव चिद्घनं त्वां तमोरूपाविद्या कदापि नावृणोति चिद्रूपत्वाविशेषेऽपि न त्वय्यविद्यासम्बन्धगन्धोऽपि, अत एव न मायासम्बन्धगन्धोऽपीति ध्येयम्। यद्वा–चैद्यादिप्रसङ्गेन स्मारितस्य कंसस्य व्यवस्थामाहुः–स यदिति। स प्रसिद्धो महावैरी कंसः यद्यस्मात् इतगुणान् इतान् देवक्यामागतान्गुणान् त्वदवतारसूचकप्रभावान् जुषंश्च अनुभवन्नपि सरूपतां तदवस्थामेव दुष्टतां भजति स्म। "इतः कर्बुर आगते" इति मेदिनी। अतस्तवाजया माययाऽजामविद्यां मोहमनुशयी त्वदवतारावसरे सपरिजनः कंसो निद्रामवाप त्वमुत त्वं तु श्रीगोकुलमागत्य तां मायां जहासि भगिनीत्वेनाङ्गीकृतामपि कंसं प्रत्येव प्रस्थापयसि। तत्रानासक्तो

न्धस्य गन्धो लेशः
" इत्याद्या वदन्ति ।
प्रतिबिम्बभावेन सदा
नियम्याद्युपाधिमत्त्वेन
भवति तथा उपभुङ्क्ते,
र्थः । अत्र सुपर्णत्वं
या मोहित इति शेषः ।
रूपाणां योगं सम्बन्धं
भवतीति तात्पर्यम् ।
त-निरन्तराह्लादिन्यो याः
। अजया छागीसमया
सह कृत्यं सङ्गच्छेतेति
-अपरिमितैश्वर्यस्य तव
तां मायां वारय । का सा
र्या नानाविधभावं कुर्वन्ती
यथा स्यात्तथा सम्मर्दयन्ती

मुखोक्तेः ॥★॥

] जीवस्य संसारः कथं वा
विशेषं चाह-स इति । स च
त्मतयाध्यस्य तदनन्तरमेव
पिहितानन्दादिगुणः संसरति
स्वेच्छया तं दूरतस्त्यजत्येव
र्ये सदा विराजसे । न हि
त्वदंशं जीवमविद्यावृणोत्येव
द्यासम्बन्धगन्धोऽपि, अत एव
यदिति । स प्रसिद्धो महावैरी
सरूपतां तदवस्थामेव दुष्टतां
दवतारावसरे सपरिजनः कंसो
एव प्रस्थापयसि । तत्रानासक्तौ

त्तमाहुः-अहिरिवेति । तदनु तदनन्तरं स कंसो मृत्युं भजति स्म यतः स कंसः अपेतभगः हतभाग्यः त्वं तु आत्तभगः प्राप्तपरिपूर्णैश्वर्योऽसि तत्राप्यष्टभिः श्रीराधादिप्रियाभिर्महालक्ष्म्यवतारनिजकान्तिभिः श्रीरुक्मिण्यादिभिर्वा गुणिते शोभिते महसि विहारजलविहाररासविहारान्तःपुरविहारमहोत्सवे महीयसे विराजसे वैमानिकादिभिः कुसुमवर्षणादिभिः पूज्यसे वा यपरिमेयभगोऽसि ॥★॥

विश्वनाथी — अथ श्रीमदीश्वरस्य प्रधानास्पृष्टत्वमेव जीववैलक्षण्येन दर्शयन्त्यः काश्चित्तदनुगताः स्तुवन्ति किञ्च ननु तु जगतो मद्वैलक्षण्यं तादृशजाड्यादितः जीवस्य तु अनाशचिद्रूपत्वात्सालक्षण्यमेव तर्हि कथं ममैव भजनीयत्वं र्भिर्दर्शितमित्याशङ्क्य तदर्थमेव जीवश्वरस्वरूपवैलक्षण्यं प्रतिपादयन्त्यः स्तुवन्ति-स इति । तैर्व्याख्यातम् । पिहितानन्दादिगुणत्वेन तोऽपि जीवस्य सविशेषत्वं प्राप्तं तच्च युक्तमेवेश्वरांशत्वात्, एतद्विवरणं श्रीभागवतसन्दर्भतट्टीकयोर्दृश्यम् । यद्वा-जीवो यद्यस्मादजया माययाऽजां स्वरूपाज्ञानमनुलक्ष्यीकृत्य शयीत मुह्यति तत्तस्मादपेतस्वरूपसामर्थ्यः सरूपतां मायाकार्योपाधिसामर्थ्यं भजन् गुणांश्च विषयान् जुषन् अनुमृत्युं संसारं भजतीति । तत्रैकेनोपाधिना स्वस्मिन् स्थितेन चित्स्पर्शः कस्यचिन्नेति सामर्थ्यवैलक्षण्यात्स्वरूपवैलक्षण्यमवगम्यते तच्च ब्रह्मस्तवे दर्शितम् । अत्र श्रुतयो "द्वा सुपर्णा" याः (२५) ॥३८॥

नीलकण्ठी —

एवं परिणामविवर्तविकल्पमार्गा अद्वैतप्रतिपत्तिसोपानरूपा मन्दमध्यमोत्तमाधिकारिगम्या उक्ताः । तत्र द्वितीये जीवैक्यं त्वव्यवहारः एकमुक्तौ सर्वमुक्तिरिति न बन्धमोक्षव्यस्थास्ति । नतरां तृतीये सर्वापवादरूपत्वात् । प्रथमे तु तत्सर्वं भवतीत्यभिप्रेत्य "तद्योयो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम् ॥" इति श्रुत्युक्तां बन्धमोक्षव्यवस्थामाह-यदजयेति । यदिति क्लीबत्वमार्षम् । यः त्वमजयाऽजामनुशयीत स त्वम् उत अपरिमेयभगोऽसीति सम्बन्धः । यस्त्वं अजया मूलविद्ययाऽजां स्थूलसूक्ष्मदेहद्वयाकारेण परिणतां मायामनुशयीत तद्धर्मानात्मन्यध्यस्यासीत च ततोऽध्यासानन्तरं भोग्यजातं जुषन्प्रीत्या सेवमानः । हेतौ शतृप्रत्ययः । सेवनाद्धेतोः सरूपतां भोग्याकारतां मनसा भजति तदनु भोग्यसारूप्यमनु संसारं भजतीत्यनुषज्यते । कुत एवं यतोऽपेतभगः अविद्यया तिरस्कृतैश्वर्यः य एवंविधः संसारी स त्वमुत त्वमेव कथम् गः उपात्तवैराग्यादिसाधनसम्पत्तिः सन् तामुक्तविधामविद्यां शास्त्राचार्यप्रसादलब्धसन्मार्गो भूत्वा जहासि त्यजसि । पर्यायेनाविद्यातः सकृत्पृथग्भूय न पूर्ववत्तदैक्यमनुकरोषि । अत्र दृष्टान्तः-अहिरिव त्वचमिति । यथा सर्पः पूर्वमात्मतयोपात्तं त्यक्त्वा पुनर्वल्मीकबिले शयानायां तस्यां सञ्चरन्नपि न तामात्मत्वेनाभिमन्यते, एवं त्वमपि देहादावभिमानमिति । तथा च —

"तद्यथाहिनिर्ल्वयिनी वल्मीके मृतो प्रत्यस्तां शयीत एवमेवेदं शरीरं शेतेऽथायमशरीरो मृतः प्राणो ब्रह्मैव तेज एव चक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव ॥" इति ॥

अयम्भावः — रज्ज्वादीनामकेनतूलाज्ञानविषयत्वात्तत्र निवृत्तोऽपि सर्पभ्रमः पुनरुदेति न त्वेकमूलाज्ञानविषये प्रतीचि निवृत्तस्य देहात्मभ्रमस्य पुनः सम्भवोऽस्ति कारणाभावात् । तत्त्वपक्षपातित्वाच्च बुद्धेः । यदाहुर्बाह्या अपि —

"निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः । न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥" इति ॥

तस्मात्सुष्ठूक्तमहिरिव त्वचमिति । एवमनर्थनिवृत्तिं विद्याफलमुक्त्वानन्दावाप्तिमप्याह-महसि महीयस इति । अजां हित्वा प्रतिष्ठिते चित्प्रकाशे स्वरूपभूते विद्योतस इत्यर्थः । कीदृशे महसि, अष्टगुणिते ।

"य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघित्सोऽपिपासः ।
सत्यकामः सत्यसङ्कल्पः ॥"

इति श्रुत्युक्तैः अपिमामहिमालघिमागरिमाप्रतिप्राकाम्येशित्ववशित्वाख्यैर्वाऽष्टभिर्गुणैर्युक्ते । अत एव त्वमपरिमेयभगः अनन्तैश्वर्यः । अत्र —

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥"

इति श्रुतेरजानुशयी बद्धः तत्त्यागी मुक्त इत्युक्तम् । तत्र- "कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ।" इति श्रुतेरनेकतरङ्गप्रतिबिम्बचन्द्राभा अनेके जीवाः । जलाशयप्रतिबिम्बाभ एक ईश्वरः । तत्र यस्तरङ्गो जलाशये लीनस्तत्प्रतिबिम्बो जलाशयप्रतिबिम्बत्वमेति नान्यः । एवं यदन्तःकरणं विद्यया जीवोपाधिभूतं स्वकारणे मायायां लीयते तदुपहितचितिरीशत्वमेति नान्योपहिता । ततो मायाया अपि बाधे शुद्धचिन्मात्रत्वमिति युज्यते —

"लवणं सलिलद्वारा तेजोऽभ्येति न तु स्वतः । एवं जीवशिवद्वारा याति विष्णोः परं पदम् ॥" (२५) ॥३८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स यदित्यस्य टीकायां श्रुतौ द्वेतिद्वावित्यर्थः । एवमुत्तरत्रापि सुपर्णत्वं पक्षित्वम् । तच्च नानाधिष्ठानस्वीकारपरित्यागसाम्यात् । तत्रैकस्य भोक्तृत्वेनान्यस्य भोजयितृत्वेनेति ज्ञेयम् । सयुजेति संयुक्तौ मिथो व्यभिचारशून्यावित्यर्थः । पिप्पलं कर्मफलमिति । स्वव्याख्यायां तु — अथ श्रीमदीश्वरस्य प्रधानास्पृष्टत्वमेव जीववैलक्षण्येन दर्शयन्त्यः काश्चित्तदनुगताः स्तुवन्ति किञ्च ननु भवतु जगतो मद्वैलक्षण्यं तादृशजाड्यादितः जीवस्य तु अनाशचिद्रूपत्वात्सालक्षण्यमेव तर्हि कथं ममैव भजनीयत्वं पूर्वाभिर्दर्शितमित्याशङ्क्य तदर्थमेव जीवश्वरस्वरूपवैलक्षण्यं प्रतिपादयन्त्यः स्तुवन्ति-स इति । तैर्व्याख्यातम् । पिहितानन्दादिगुणत्वेन स्वतोऽपि जीवस्य सविशेषत्वं प्राप्तं तच्च युक्तमेवेश्वरांशत्वात्, एतद्विवरणं श्रीभागवतसन्दर्भतट्टीकयोर्दृश्यम् । यद्वा-स जीवो यद्यस्मादजया मायया‌ऽजां स्वरूपाज्ञानमनुलक्ष्यीकृत्य शयीत मुह्यति तत्तस्मादपेतस्वरूपसामर्थ्यः सन् सरूपतां मायाकार्योपाधिसामर्थ्यं भजन् गुणांश्च विषयान् जुषन् अनुमृत्युं संसारं भजतीति । तत्रैकेनोपाधिना स्वस्मिन् स्थितेन कस्यचित्स्पर्शः कस्यचिन्नेति सामर्थ्यवैलक्षण्यात्स्वरूपवैलक्षण्यमवगम्यते तच्च ब्रह्मस्तवे दर्शितम् । अत्र श्रुतयो "द्वा सुपर्णा" इत्याद्याः ॥२५॥३८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं प्रपञ्चस्य मिथ्यारूपत्वेऽपि निजदुर्वासनया मायिकविषयभोगाभिनिवेन जीवो विविधदुःखं प्राप्नोतीत्याहुः-स इति । यया अजया । ननु मायया बहिरङ्गश्क्त्या कथं चिद्रूपस्य मदंशस्य तस्येदृशोऽनर्थः सम्भवेत् ? मायोपेक्षके त्वयि तद्वैपरीत्येनानर्थस्य मायिकशक्त्येकहेतुकत्वावगमादिति व्यतिरेकमुखेनाहुः-त्वमिति । जहासि उपेक्षसे नाद्रियस इत्यर्थः । स्वकीयया अपि दोषावहत्वात् त्यागे दृष्टान्तः-अहिरिवेति । अतो मायासम्बन्धेन महादोषं मायोपेक्षया महागुणं च विचार्य्य मिथ्याभूतेऽपि मायिकविषभोगादौ कथमपि बुधैरासक्तिर्नैव कार्येति तात्पर्यम् । अन्यत्तैर्व्याख्यातम् । यद्वा, यद्यस्मादनुशयीत भोगार्थमनुवर्तते, तत् तस्माद् गुणान् विषयान् जुषन्नपेतभगो ध्वस्तनिजज्ञानः सन्, किंवा त्वद्भक्तिभाग्यरहितः सरूपतां प्रपञ्चातीतोऽपि प्रपञ्चसाम्यम्, अतोऽनु वारंवारं मृत्युं च भजति । यद्वा, प्रपञ्चस्यासद्रूपत्वेऽपि मिथ्यैव जीवो दुःखं प्राप्नोतीत्याहुः-स इति । हे अज ! जीववज्जन्मरहित ! स जीवोऽजामविद्यां यातु प्राप्नोतु नाम, यद् यस्माद्गुणान् जुषन् जोषितुम् । हेतौ शतृप्रत्ययः । तामनु शयीत तत्र परमासक्तिं कुर्वीत, तदनु सरूपतां जन्मेत्यर्थः । तदनु जन्मानन्तरमपेतभगो हतनिजज्ञानः सन् मृत्युं भजति, सर्वदा जन्ममरणप्रवाहे पततीत्यर्थः । ननु प्रपञ्चमध्ये कृतावतारस्य ममापि तत्सम्बन्धे सम्भावनास्तु, तत्राहुः-त्वमुत त्वं तु तामविद्याम् । आविद्यकसृष्टिं जहासि, दूरतः परिहरसि । अहिरिव कञ्चुकम् । यथा त्यक्ते कञ्चुके सर्पो दृशमपि नार्पयति, तथा त्वमाविद्यकसृष्टावित्यर्थः । परमचित्प्रकाशरूपे ब्रह्मतादात्म्यापन्ने वैकुण्ठलोकेऽष्टगुणितेऽष्टैश्वर्यपूर्णे आत्तभगः प्रकटितसर्व्वैश्वर्य्यो महीयसे शोभसे । ननु सत्यलोकादिविभूतिवत्तदैश्वर्यस्यापि गुणविलासतास्तु, तत्राहुः-अपरिमेयभग इति । तदैश्वर्यस्यानन्त्यात् सर्वगुणातीतमेवेत्यर्थः ॥३८॥

[ननु भवतु तयोः संसारित्वस्य मिथ्यात्वम्, निद्रादिरूपां प्रापञ्चिकजीवावस्थां भजतो मे जीवनिर्विशेषत्वेन कथं रित्वाभाव इत्याशङ्क्य साधारणजीवानामेव दुःखभरस्याविच्छेदं वर्णयन्त्यः श्रीभगवतो नित्यनिर्भरपरमानन्दास्वादमाहुः–स ता। स जीवः। जातावेकवचनम्। अजया अविद्यया अजामजाकार्य्यभूतां निद्राम्, दुःखमयस्वप्नं यद्यस्मात्तत्रैव स्वाप्निकविषयान् मानः सरूपतां सुरनरतिर्य्यक्समानरूपतां भजति, तदनु कदाचिन्मृत्युं मृत्युतुल्यां सुषुप्तिमपि भजति, ततश्चापेतभगः सर्वथा मृतनिजसाध्यसाधनभावः स्यात्, इति घोरसंसारधर्म्ममज्जनेन सदा दुःखमेवानुभवेदित्युक्तं भवति, त्वं पुनस्तां निद्रां जहासि, तः परिहरसि। श्रीभवतो जीववद्रजःकार्य्यभूता निद्रा नास्त्येव, किन्तु शक्तिविशेषविलासभूता सा योगनिद्रेत्युच्यते। तथापि ब्देन तस्याः परामर्शो बहिर्वृत्त्यभावेन द्वयोः साम्यात्। योगनिद्रायामप्यात्तभगः प्रकटितपरमैश्वर्य्यः। तथाभूताया अपि हारः सर्वासु रात्रिषु रासादिमहालीलास्वभिनिवेशेन निद्राया अवसराभावात्, तथा तादृशबहिर्लीलातोऽन्तर्लीलाया गौणत्वात्। त्तामेवाह–महसि रासादिरूपे महोत्सवेऽपरिमेयभगः सन् युगपत् सर्व्वव्रजसुन्दरीगणपार्श्ववर्तित्वादप्रकटितपूर्व्वाणां गुणरूपमाधुरीविशेषाणां प्राकट्याच्च, परमाद्भुतस्वरूपो विराजसे। कथम्भूते ? अष्टगुणिते अष्टभिर्मुख्यभूताभिः प्रेयसीभिः धादिभिर्गुणिते परिशीलिते ॥३८॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

प्रकृत्यन्तरवस्थाने तुल्येऽपि जीवस्य तत्परवशत्वम्। परस्य तदभावत्वं चाह–स यदजयेति। सरूपत लत्वादिधर्मताम्। अपेतभगः अपेतज्ञानैश्वर्यादिः। जहासि नियमेन तत्परतन्त्रतया सम्बन्धरहितोऽसीत्यर्थः ॥३८॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ननु भगवत इव तेषामपि नित्यत्वैकरसत्वप्रकृतिस्थत्वाद्यविशेषेऽपि कथं तेषां तत्सम्भावना तव तत्सम्भावनाया अप्यभाव शङ्कायां प्रकृतिवश्यत्वतदसम्भवाभ्यामेवेत्याहुः–स यदिति। स जीवो यद्यस्मात् अजया त्वन्मायया मोहित इति शेषः। अजां कृतिपरिणामात्मिकां देवमनुष्यत्वादिमूर्तिमनुशयिताम् आलिङ्गति बिभर्तीति यावत्। ततो गुणान् शब्दादिविषयान् जुषन् सेवमानः पतां सूक्ष्मत्वस्थूलत्वादिदेहधर्मतां भजति। देहात्माभिमानी भवतीत्यर्थः। तदनु तदनन्तरं मृत्युं मरणं भजति प्राप्नोति। इत्थं मरणादिरूपसंसृतिभोक्तृत्वादपेतो भगो ज्ञानैश्वर्यादिर्यस्य तथाभूत इव भवतीति। त्वमुत त्वं तु अहिः सर्पः त्वचं कञ्चुकम् इव जां जहासि नियमेन तत्परतन्त्रतया सम्बन्धरहितोऽसि। अहिदृष्टान्तस्त्यागमात्राभिप्रायकः। अत एवान्तः नित्यं परिगृहीतः गो येन तथाभूतः

'ऐश्वर्यस्य समस्तस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥'

इति भगशब्दार्थोऽवगन्तव्यः। अथापि किं जीववदेवाहमपि परिच्छिन्नभगः। नेत्याहुः–अपरिमेयभगः रिच्छिन्नैश्वर्यादिमान्। अष्टगुणितेऽपहतपाप्मत्वादयोऽष्टौ गुणाः तेऽस्य नित्यं सञ्जाता इत्यष्टगुणितम्। तारकादित्वादितच्। नित्याविर्भूतापहतपाप्मत्वादिगुणकाष्टयुक्ते महस्यपरिच्छिन्ने स्वयंप्रकाशरूपे महीयसे महसि स्थित्वा पूज्यसे इत्यर्थः ॥३८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

यदि न समुच्चरन्ति यततोऽपि हृदि कामजडा दुरधिगमोऽसतां हृदि गतोऽस्मृतकण्ठमणिः।
अनुतृप्तयोगिनामभवो भगवन्ननवगतान्तकादनधिरूढपदाद्भवतः ॥२६॥४०॥

यदि न समुच्चरन्तीत्यस्यायमर्थः। यदि यतयोऽपि हृदि कामजडात् जडशरीराविष्टकामात् न समुच्चरन्ति सम्यङ्नोद्गच्छन्ति ता भवन्ति विषयकामाः स्युरित्यर्थः। तर्हि हृदि गतोऽपि तेषामसतामप्रशस्तकर्मणां पुंसां दुरधिगमो दुर्ज्ञेयः। अस्मृतकण्ठमणिरिति मा। विस्मृतकण्ठमणिः पुरुषो यथा कण्ठस्थितं मणिं न जानाति तथेत्यर्थः। अनेन स यथाकामो भवति तत्क्रतुर्भवति

तत्कर्म कुरुते तदभिसम्पद्यते। इति तु कामयमान इत्येतद्विवृतं हे भगवन्! अनुतृपयोगिनां अनुतृप्तानां विद्ययालम्बुद्धिं प्राप्तानां निष्कामानामित्यर्थः। निवृत्तिमार्गस्थानां पुंसां भवतोऽधीनादनधिरूढपदात् अनारूढवैकुण्ठादिब्रह्मस्थानादज्ञानामनवगतादज्ञातादन्तकात् कालादिलक्षणादभयोऽभयप्रदः पूर्णानन्दादिलक्षणां मुक्तिं ददातीत्यर्थः। इन्द्रियाभिमानिदेवानां वियोगाभावलक्षणाच्च अमुना च यथा कामयमानो यो कामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतिव्याख्यानम् अस्याः श्रुतेः विशेषार्थः —

"निषिद्धकामयुक्तानामसतां तु विशेषतः। दुर्ज्ञेयो भगवान्विष्णुर्हृदिस्थोऽस्मृतहारवत्॥"

इत्यादिवाक्यादेव अवगन्तव्यः देवाश्च ऋषयश्चैव सुभक्त्या कामिनोऽपि तु

इत्यादिना कामित्वे यतित्वमप्रयोजकमित्युक्तम्॥२६॥४०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

अथ श्रीमदीश्वरस्य प्रधानास्पृष्टत्ववैलक्षण्यं दर्शयन्त्यः काश्चित्तदनुगताः स्तुवन्ति–किञ्चानुभवतु जगतो महद्वैलक्षण्यं नाशजाड्यादितो जीवस्य त्वनाशचिद्रूपत्वात् सालक्षण्यमेव। ततः कथं ममैव भजनीयत्वं पूर्व्वाभिः दर्शितम् इत्याशङ्क्य तदर्थमेव जीवेश्वररूपवैलक्षण्यं प्रतिपादयन्त्यः स्तुवन्ति। स यदजयात्मजामिति॥३८॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

एवं श्रीकृष्णलोकस्य नित्यत्वमानन्दमयत्वमुक्त्वा पुनस्तत्पार्षदानां जीवातिरिक्तं दर्शयन्त्यो जीवनिरूपणं कुर्वन्ति-स यदजयेत्यादि। स जीवः यत् यस्मात् अविद्यां गुणादींश्च तत्कृतान् धर्मांश्च अनुशयीत भक्तस्तु भजति अर्थात् भवन्तं तेषां तेनाविद्यासम्बन्धो नास्ति तदनु भजनानन्तरं सरूपतां भजति रूपं शुद्धचैतन्यत्वं तेन सह वर्तमानस्तथा तस्य भावं शुद्धचैतन्यत्वमासाद्य त्वां भजतीत्यर्थः। उक्तं च —

"यथाऽग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपम्।" इत्यादि।

स तु जीवः। तदनु अजानुशयनादनु। मृत्युं भजति। कुतः। अपेतभगः त्वद्भजनादपास्तसौभगः। ननु कथं भजनपरोऽजया न बाध्यत इत्याहुः–त्वमुतेत्यादि। त्वमुत त्वं तु ताम् अजां जहासि हापयसि। अन्तर्भूतण्यर्थः। भजनात् स्वयमेव भजतो जनान् जहतीम् अजां त्वं हापयसि अनुकूलः सन् त्याजयसि। अहिरिव त्वचं वस्तुतस्त्वहिं स्वयमेव त्वक् प्रथमतो जहाति शिथिलभावेन पश्चादहिस्त्यजति कालस्तत्रानुकूलो भवति। अहिस्थानीयो भक्तस्त्वक्स्थानीया अविद्याकालस्थानीयस्त्वं कालस्यानुकूलत्वात्। त्वं कीदृशः। आत्तभगः आत्तमाहात्म्यः तथैव ते माहात्म्यं यद्भजतः प्रत्यनुकूलो भवति अतः स्वमहसि महीयसे ब्रह्मस्वरूपे तेजसि महीयसे भासि तर्हि निर्विशेषब्रह्माहं नेत्याहुः। अष्टगुणितेऽणिमाद्यष्टमहैश्वर्य्येऽपरिमेयभगः। अन्यो योगी तु अष्टगुणितवैभवेऽपरिमेयभग एव भवति त्वं तु न तथा। इदमेव भगवत्त्वं तवेति वाक्यार्थः॥३८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

एवं तस्य धाम्नो नित्यत्वमुक्त्वा जीवेभ्यः पार्षदानामपि सर्वोत्कर्षत्वेन वर्तमानत्वं च विचारणीयमित्याहुः- स यदजयेत्यादि। स जीवो यद्य यस्मादजया मायया अजामविद्यामनुशयीत, न केवलमजां गुणांश्च तत्कृतधर्मांश्च तदनुमृत्युमनुशयीत मृत्युमुपैत्यपेतभगो गतैश्वर्यः। सरूपतां जुषन् भक्तस्तु भजति न मायामनुशेते, न च तद्गुणांश्च अनुशेते, सदा भजत्येव। कथं भक्तो मायावशो न भवति? तत्राह- त्वमित्यादि। त्वमुत त्वं तु तामविद्यां जहासि हापयसि अन्तर्भूतण्यर्थः। अहिरिव जहतीं तां हापयसि। त्वद्भजनेन कुण्ठिततया स्वयं निर्गच्छन्तीं मायामनुकूलः सन् त्वमपि हापयसीत्यर्थः। यतो मायामुक्तस्तव भक्त इत्यर्थः। उक्तं च (गी० ७/१४)

"मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति।

अतो जीवोऽपेतभगः, भक्तस्तु आत्तभगः, व्यवहितत्वान्न दोषो वास्मिन् ग्रन्थे ग्राह्यः । अतस्त्वं कर्तुमकर्तुमन्यथा कर्तुं समर्थ इत्याहुः- महसीत्यादि । अपरिमेयभगोऽपरिमेयैश्वर्यस्त्वमष्टगुणितैरणिमाद्यष्टविभूतिमति महसि महीयसे पूजितो भवसि । ष्टगुणिते महसि अपरिमेयभगः सन् महीयसे इत्येवार्थः । अन्येषां योगिनामष्टविभूतयः सन्ति, त्वं तु अष्टस्वेव विभूतिष्वपरिमेयभगः, न तथा ॥३८॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदेवमिदङ्कारास्पदस्य मायिकगुणमयस्य जगतः सत्यत्वमुक्त्वा तद्वर्तिनो जीवस्य चिद्रूपस्यापि मायाग्रस्तत्वादेव तथा गुणमयतो रूपमनुत्तमत्वमित्याहुः-स तु जीवः । यत् यस्मात् । अजया अविद्यया । अजां मायाम् । अनुशयीत आलिङ्गेत । आधिलिप्तो भवेदित्यर्थः । अत एव गुणानां देहेन्द्रियादींश्च जुषन् सरूपतां तत्साधर्म्यं भजति । तदनु तदनन्तरम् । अपेतभगः हितानन्दादिगुणः सन् मृत्युं संसारं भजति प्राप्नोति । ननु चिद्रूपत्वाविशेषादहमपि कथमविद्ययाऽऽलिङ्गितो न भवेयमिति चेत् वं जीवः खलु चित्कणः त्वं तु चिन्महापुञ्जः ताम्रपित्तलस्वर्णादितेन एव तमसा आवृतं भवेन्न तु सूर्यतेज इत्याहुः-त्वमुत । त्वं स्तां जहासि । अयमर्थः — मायाशक्तिर्हि तव स्वरूपभूतयोगमायोत्था तद्विभूतिरेव यदुक्तं नारदपञ्चरात्रे श्रुतिविद्यासंवादे —

"अस्या आवरिका शक्तिर्महामायाऽखिलेश्वरी । यया मुग्धं जगत् सर्वं सर्वे देहाभिमानिनः ॥" इति ।

सा अंशभूता तया स्वस्वरूपत्वेनानभिमन्यमाना स्वतः पृथक्कृत्य त्यक्ता भवति । सैव बहिरङ्गा माया शक्तिरित्युच्यते । तत्र न्तः-अहिरिव त्वचम् । अहिर्यथा स्वतः पृथक्कृत्य त्यक्तां त्वचं कञ्चुकाख्यां स्वस्वरूपत्वेन नैवाभिमन्यते तथैव तां त्वं जहासि त आत्तभगः नित्यप्राप्तैश्वर्यः । एतदेवोक्तपोषन्यायेनाहुः-महसि परमैश्वर्ये अष्टगुणिते स्वतः सिद्धाणिमाद्यष्टविभूतिमति महीयसे ज्यसे । कथम्भूतः । अपरिमेयभगः अपरिमितैश्वर्य्यः । न ह्यन्येषामिव देशकालादिपरिच्छिन्नं तवैश्वर्यम् अपि तु स्वरूपानुबन्धित्वादपरिमितमित्यर्थः । अत्र श्रुतयः —

"अजो ह्येकः जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥" इत्याद्याः ॥३८॥

गूढार्थदीपिनी

नन्वविद्याकार्यरूपस्य जगतोऽसत्त्वे तेन सम्बन्धाभावाज्जीवस्य किन्निमित्तं संसारः ? कथं वा ईश्वरस्यैव नित्यमुक्तता ? त्यपेक्षायां जीवेश्वरविषयं दर्शयन्त्यः स्तुवन्ति-स यदेति ॥

(जीवेश्वरवैलक्षण्यपरेयम्)

पद्यानुवादः

यदजयाऽनुभजन् विषयान् जनो भजति जन्ममृती विवशस्ततः ।
अहिरिव त्वचमत्र विहाय तामुपरि मेऽपरिमेय विराजसे ॥२५॥

सङ्क्षिप्तसार्थान्वयः — स तु जीवः यत् यदा अजया अविद्यया अजां मायां देहरूपाम् अनुशयीत आश्रयेत तत् तदा गुणान् षयान् जुषन् सरूपतां देहसाधर्म्यं भजति प्राप्नोति । तदनु अपेतभगः तिरोहितज्ञानः सन् मृत्युं संसारं च भजति । त्वम् उत त्वं तु हिः त्वचमिव तामजां जहासि । यतः त्वम् आत्तभगः नित्यप्राप्तैश्वर्यः तत्रापि अपरिमेयभगः अपरिच्छिन्नैश्वर्यश्च सन् महसि स्वरूपे महीयसे विराजसे । कथम्भूते महसि ? अष्टगुणिते अष्टसिद्धियुक्ते । यद्वा । यत् यस्मात् ततो गुणानिति योजना ॥

हे भगवन् ! स तु त्वदंशो जीवः यत् यदा अजया मोहितः सन् अजां प्रकृतिपरिणामरूपां देवमनुष्यादितनुम् अनुशयीत ङ्गीकृति बिभर्तीत्यर्थः । तत्तदा गुणान् विषयान् जुषन् सेवमानः सरूपतां देहसाधर्म्यं भजति प्राप्नोति देहाभिमानी भवतीत्यर्थः स्तु तदनन्तरं मृत्युं जन्ममरणादिलक्षणं च भजतीति चकारस्यान्वयः । एवं संसारभाक्त्वात् अपेतः अपगतः भगो ज्ञानैश्वर्यादिर्यस्य त इव तिरोहितज्ञानो भवति । त्वमुत त्वं तु तामजां मायां जहासि उपेक्षस इत्यर्थः । यथा अहिः सर्पः त्वचं कञ्चुकं जहाति

तद्वत् । यतः नित्यप्राप्तैश्वर्यः तत्राऽपि अपरिमेयभगः अपरिमितैश्वर्यः न जीववत्परिच्छिन्नैश्वर्य इत्यर्थः । महसि स्वरूपे महीयसे विराजसे । कथम्भूते ? अष्टगुणिते अणिमाद्यष्टसिद्धियुक्ते । अष्टौ गुणास्ते नित्यं सञ्जाता अस्येति तारकादित्वादितच् ॥

भावुकास्तु आत्मभगो नित्यप्राप्तैश्वर्यः महसि गौरतेजसि श्रीराधाविग्रहे एकीभूय विराजसे अत एव अपरिमेयभगस्त्वमिति सूचनार्थं पुनरुपादानम् । कीदृशे ? अष्टा व्याप्ता गुणा वात्सल्यादयो नित्यं सञ्जाता अस्येति "अश व्याप्तौ" इत्यस्मात् । अपरिमितैश्वर्यस्य तव परिमितैश्वर्याज्जीवान्महान् विशेष उक्त इति भावः । तुशब्देन उभयत्र जीवस्य नित्यबद्धता ईश्वरस्य च नित्यमुक्तता सूचिता। आत्मगुणाननादृत्य परकीयमायागुणान् जुषते इति द्योतनार्थं जुषन्निति परस्मैपदम् । केचित्तु यत् यदा अजया हेतुभूतया अपेतभगो भवति तदैव अजामविद्यामनुशयीतेत्यन्वयमाहुः । भगशब्दार्थस्तु —

"ऐश्वर्यस्य समस्तस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीतरणा ॥"

इत्युक्तरूपो ज्ञेयः ॥२५॥३९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

प्रकारान्तरेण जीवेश्वरयोर्वैलक्षण्यमाहुः —

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥'

'ज्ञाज्ञौ द्वावजावीशानीशावि'त्यादिश्रुतयः । यद्यदा स जीवात्माऽजया हेतुभूतयाऽपेतभगः अपेत आवृतो भगो भगवदीयषाड्गुण्यं यस्य तथाभूतो भवति । तदेवाजामविद्याम् अनुशयीत स्वाज्ञानसङ्कोचेनान्याभिनिविष्टः तद्गुणानविद्याकार्य्यभूतान् देहादींश्च जुषन्नहङ्कारविषयीकुर्वन् तदनु सरूपतां सुखदुःखजन्मादिरूपतां च जुषन् अहं सुख्यहं जातो मरिष्य इत्याद्यनुकुर्वन् तदनुमृत्युं भजते निरतिशयप्रमादतां प्राप्नोति ।

'प्रमादं वै मृत्युमहं ब्रवीमी'ति सनत्सुजातीयः । किञ्च । त्वमुतेति ईश्वरस्यात्यन्तवैलक्षण्यद्योतक उतशब्दः । त्वं तु तां जहासि । अनादरविषये दृष्टान्तः । अहिरिव त्वचमिति । तत्र हेतुः-आत्तभगः । नित्यप्राप्तस्वाभाविकाचिन्त्यानन्तैश्वर्यः । अत एव महसि सर्वैरभिपूज्येऽष्टगुणिते अणिमाद्यष्टविभूतिमति स्वासाधारणैश्वर्ये महीयसे ब्रह्मरुद्रेन्द्रादिभिरीश्वरकल्पैः पूज्यसे ।

"बलिं हरद्भिश्चिरलोकपालैः किरीटकोटीडितपादपीठः ।

स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठ" इत्यादिवचनात् ।

तदैश्वर्यस्य सातिशयत्वं वारयति-अपरिमेयभगः । अपरिमेय इत्यपरिच्छेदशून्यो भगोऽचिन्त्यमैश्वर्य्यं यस्य सः ।

'तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् ।'

'न तत्समश्चाभ्यधिकश्च दृश्यते ॥'

'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानकलक्रिया च ॥' इत्यादिश्रुतेः ।

"न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव" इति स्मृतेश्च ॥३८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं द्वाभ्यां भजनार्थमन्यत्र सत्यत्वं निराकृत्य परमार्थेन सत्यत्वे तदेव भजनीयमिति सदंशं विचार्य द्वाभ्यां चिदंशं विचारयन्ति-स यदजयेति । चित्सेव्येति पक्षेऽपि भगवानेव सेव्यो न तु जीवाः । स्वरूपस्थितो हि सेव्यः, जीवास्तु स्वरूपात् प्रच्युताः । तत्र हेतुमाह । स एव भगवद्रूपोऽपि जीवः यदा यद्यस्मात्कारणाद्वा अजया भगवन्मायया कृत्वा अजामविद्यां प्रकृतिं वा अनुशयीत । तामनुसृत्य जीवभावं प्राप्नुयात् । तदा तस्या गुणान् जुषन् स्वानन्दं परित्यज्य जडेभ्यः आनन्दं प्राप्स्यामीति यदा जडानुभवं करोति तदा स्वयमपि स्वचैतन्यं परित्यज्य तत्स्वरूपतां भजति जडभावं प्राप्नोतीत्यर्थः ।

वमविद्यासम्बन्धादानन्दांशश्चिदंशोऽप्यपगच्छति। केवलं जडतामापद्यते। जडस्योपास्यता पूर्वमेव निषिद्धा। ननु जडभावे को दोषः रत्नादेर्महतोऽपि जडभावात् तत्राह–तदनु मृत्युमपेतभग इति। कालो हि जडान् गुणान् क्षोभयति अन्नप्रायांश्च भक्षयति। तथा नमपि कालो भक्षयतीति तदनु जडतामनु मृत्युमपि प्राप्नोति। नाप्येतावदेवानिष्टं यथा राजा यावज्जीवं सुखं जीवति, अन्ते मृत्युं प्राप्नोति। ततोऽप्यस्य जीवस्याधिकं दुःखमित्याह। अपेता भगा ऐश्वर्यादिभाग्यानि यस्य। एवं लोष्ठप्रायो मृत्युग्रस्तश्च यो जतः स कथं सेव्यो भवेदित्यर्थः। ननु भगवतोऽपि मायासम्बन्धोऽस्ति, 'मम माया दुरत्यया' इति वाक्यात्। ततः सोऽपि तथा भवेदित्याशङ्क्याह–त्वमुत जहासि तामिति। त्वं तु तां मोहिकां जहासि, 'जहात्येनां भुक्तभोगामजोऽन्यः' इति श्रुतेः। इदमेव जीवाद्वैलक्षण्यम्। एतन्मूलकमन्यदाह–आत्मभग इति। ऐश्वर्यादिभगाश्च स्वीकृता एव भवन्ति, नाशककारणाभावात्। ननु तया सह स किमीरितः स्थितः तांश्चेत्त्यजेत् विशिष्टं तस्य स्वरूपमेवापगच्छेदिति कथं तां जह्यात्तत्राह–अहिरिव त्वचमिति। सर्पाः कालेन कृत्वा जीर्यन्तो मन्यन्ते। ततः क स नीरस्तेषां मुख्यः काद्रवेयः कांश्चिन्मन्त्रान् भूमिर्भूम्नेत्यादीन् दृष्ट्वा तैः सर्वे सर्पा जीर्णास्तनूरपाघ्नत। तथा भगवानपि सहजसम्बद्धामपि त्वग्रूपामखण्ड एव स्वैश्वर्येण स्थितपूर्वावस्थस्तां जहातीत्यर्थः। ननु सर्पाणां त्वक्परित्यागेऽपि न कोऽपि विशेषो जायते तथा भगवतोऽपि मायाग्रहणपरित्यागावस्थयोः कोऽपि विशेषो न स्यात्। ततः परित्यागो व्यर्थ इति चेत्तत्राह–महसि महीयस इति। महसि पूर्णे तेजोरूपे अष्टैश्वर्यसहिते महीयसे विराजसे। सत्यं तस्यां विद्यमानायामविद्यमानायां न कोऽप्युपचयोऽपचयो वा सर्वदैव स्वरूपानन्दे परमप्रकाशमाने अष्टैश्वर्ययुक्ते विराजस्येव, तथापि लोकदृष्ट्या तत्सम्बन्धे दोषप्रतिभाने एतदुच्यते–तां जहासीति। वस्तुतस्तु ताः सर्वा भवत्येव वर्तन्ते, न ताभिः कापि क्षणिः, पृथग्भूतानामेव ताभिरनिष्टश्रवणात्। त्वं तु अपरिमेयभगः मातुं योग्या हि क्रियया निवर्त्यते अमेयास्तु क्रियाशक्त्यापि किं नष्टा भवेयुः।

'तस्मात्सर्वसद्गुणमाहात्म्यः सर्वदोषविवर्जितः। भगवानेव सेव्यो हि न तु जीवाः कदाचन॥' इत्यर्थः।

"कालादितृणपर्यन्ता न सेव्या मुक्तिमिच्छता॥ दोषात्याजनशक्तो हि सेव्यो दाता गुणस्य च॥" ॥२५॥३८॥

श्रीसुबोधिनीसारः

यत् यस्मात्स जीवोऽजया माययाऽजामविद्यामनु शयीतालिङ्गेत् ततो गुणान्देहेन्द्रियादीन् जुषन् सेवमान आत्मतयाध्यस्यन् तदनु तदनन्तरं सरूपतां तद्धर्मयोगं च जुषन् अपेतभगो पिहितानन्दादिगुणो मृत्युं संसारं भजति प्राप्नोति। त्वमुत त्वं तु तामजां मायां जहासि त्यजसि त्वचं कञ्चुकमहिः सर्प इव तया पूर्णस्य कृत्याभावात् कुत एतत्तदाह आत्तभगो नित्यप्राप्तैश्वर्यः अष्टगुणितेऽणिमाद्यष्टविभूतिमति महसि परमैश्वर्ये महीयसे विराजते वस्तुतोऽपरिमेयभगः अनन्तैश्वर्यः ॥२५॥३८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति" ॥

इति श्रुत्युक्तं जीवेश्वरविशेषमाहुः– स इति। स जीवो यत् यस्मात् अजया त्वन्मायया मोहित इति शेषः। अत एव तु अजां प्रकृतिपरिणामात्मिकां देवमनुष्यादिमूर्तिमनुशयीत आलिङ्गति बिभर्तीति यावत्, ततस्तत्सरूपतां भजति देवमनुष्याद्यात्माभिमानं करोति। तदनु ततश्च गुणान् शब्दादीन् विषयांश्च जुषन् सेवमानः अपेतभगः तिरोहितज्ञानैश्वर्यानन्दादिगुणः सन् मृत्युं संसारं भजति प्राप्नोति। त्वं तु तामजां मायां जहासि। ननु द्वयोर्व्यापकत्वात्कथं तत्त्यागः सम्भवति इत्याशङ्क्य तत्र दृष्टान्तमाह–अहिरिव त्वचमिति। यथा भुजङ्गः स्वगतमपि कञ्चुकं बुद्ध्या नाभिमन्यते तथा त्वमजामुपेक्षसे इत्यर्थः। तत्र हेतुमाहुः–आत्तेति। नित्यप्राप्तज्ञानादिगुणः अष्टगुणिते अणिमाद्यष्टविभूतिमति महसि परमानन्दस्वरूपे महीयसे पूज्यसे विराजसे। अतो न ह्यजया कृत्यमस्तीत्याशयः। अन्येऽपि भगवच्छब्दवाच्या भवन्ति, परन्तु तेषां देशकालादिवपरिच्छिन्नमेवैश्वर्यादि, तव तु 'ऐश्वर्यस्य समग्रस्य' इति वचनादपरिमित मेव तत्, इत्याहुः–अपरिमेयभग इति ॥३८॥२५॥

अन्वितार्थप्रकाशिका

ननु यदि प्रपञ्चो नास्त्येव तदा असता तेन सम्बन्धस्याप्यभावात्कुतो जीवः संसरति कुतो वा ईश्वरो नित्यमुक्तः किंविषयं च तदा कर्मकाण्डमित्याशङ्क्याहुः-स इति ॥ स जीवः यत् यतः अजया अजाम् अनुशयीत ततः गुणांश्च जुषन् तदनु सरूपतां जुषन् अपेतभगः सन्मृत्युं भजति । त्वमुत त्वं तु आत्तभगः अपरिमेयभगश्च अतस्तामजाम् अहिस्त्वचमिव जहासि तथा अष्टगुणिते महसि महीयसे इत्यन्वयः । स जीवो यत् यस्मात् अजया मायया अजामविद्यामनुशयीत आलिङ्गेत् उपाधिलिप्तो भवेदित्यर्थः। ततो गुणांश्च देहेन्द्रियादिकान् जुषन् सेवमानः आत्मतया अध्यस्यन् तदनु अनन्तरं सरूपतां तद्धर्मयोगं जुषन् अपेतभगः तिरोहितज्ञानैश्वर्यानन्दादिगुणः सन्मृत्युं संसारं भजति प्राप्नोति । त्वमुत त्वं तु आत्तभगः नित्यसिद्धज्ञानैश्वर्यादिः अपरिमेयभगः अनन्तैश्वर्यादियुक्तश्च न ह्यन्येषामिव परिच्छिन्नं तवैश्वर्यम् अतः ताम् अजां जहासि । ननु सा मय्येवास्ति कथं तस्यास्त्यागस्तत्राह। यथा अहिर्भुजङ्गः स्वगतमपि कञ्चुकं जहाति गुणबुद्ध्या नाभिमन्यते तथा त्वमजामुपेक्षसे न हि निरन्तराह्लादिसंवित्कामधेनुवृन्दपतेरजया कृत्यमिति तथा अष्टगुणिते अणिमाद्यष्टविभूतिमति महसि परमानन्दस्वरूपे महीयसे पूज्यसे विराजसे । अनेन जीवेश्वरयोर्वैलक्षण्यमुक्तम् ।

"द्वा सुपर्णा सयुजा सखाया । अजामेकां लोहितशुक्लकृष्णाम् ।" इत्यादयः श्रुतयश्च ॥३८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अस्मिन् जगति त्रिविधाः पुरुषाः ॥ तत्राद्याः कर्मपरतन्त्रा अबुधाः ॥ द्वितीयाः स्वतन्त्राः पुरुषोत्तमावताराः ॥ तृतीया निष्कामसकामास्तद्भक्ताश्च तेषां वर्ण कुर्वन्त्यः श्लोकत्रयेण भगवन्तं स्तुवन्ति ॥ स यदजयेति ॥ हे भगवन् ! सः पूर्वोक्त अबुधः संसारी जीवस्तु ॥ अत्र जातित्वादेकवचनम् ॥ यद्यस्मात् ॥ अजया इन्द्रियरूपेण परिणतया मायया गुणान् ॥ तामसराजसमलिनसात्त्विकान् विषयान् जुषन् सेवमानः सन् सरूपतां भजति ॥ मनसेति शेषः ॥तामसादिभावसमानरूपत्वं प्राप्नोतीत्यर्थः ॥ तदनु तदनन्तरम् ॥ अपेतभगः नष्टस्थूलदेहैश्वर्यः सन् मृत्युं भजति प्राप्नोति ॥ नष्टस्थूलशरीरो भवतीति भावः ॥ चकार आनन्तर्ये ॥ स्थूलदेहक्षयानन्तरमित्यर्थः ॥ अजां मनुष्यमायां लक्षीकृत्य ॥ अनोरत्र कर्मप्रवचनीयत्वात्तद्योगे द्वितीया ॥ शयीत तत्र सुप्तो भवेत् ॥ तामसादिभावरूपो भवेदित्यर्थः ॥ यद्वा ॥ अजया अनाद्यविद्ययाऽनादिबद्ध इति शेषः ॥ अबुधस्तु यद् यस्मात् गुणान् जुषन् ॥ शेषं पूर्ववत् ॥ विषयभोगेन पुनः पुनः संसरतीति भावः ॥ तथा चोक्तमष्टमे —

अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुरा इति ॥

अनादिकालतो जीवो मायया परिवेष्टितः ॥ इति नारदपञ्चरात्रे च ॥

त्वमुत अपहतपाप्मत्वादिगुणयुक्तस्त्वं तु परमदयया जनकल्याणार्थं देवमनुष्यादिषु प्रादुर्भूयात्यक्तस्वभावः सन् तदनुरूपस्वरूपस्वभावं कृत्वा भक्तजनैर्दत्तान् प्राकृतभोगान् भुक्त्वा भुक्तभोगान्तां देवमनुष्याद्यनुरूपस्वभावरूपां प्रकृतिं मायामहिः सर्पस्त्वचमिव जहासि त्यजसि ॥ किञ्च ॥ आत्तभगः स्वीकृतसमस्तैश्वर्यः सन् अपरिमेयभगः अचिन्त्यमहिमा च सन् ॥ अष्टगुणिते अपहतपाप्मत्वाद्यष्टगुणसम्पन्ने ॥

य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प इति भगवत्यष्टमहागुणाः छान्दोग्ये वा ॥

अष्टगुणिते अणिमाद्यष्टगुणसम्पन्न इति केचित् ॥

महसि तेजसि प्रभावे महिम्नि वा पराक्रमे इति यावत् ॥ तथा हि ॥ महो भवेदुत्सवतेजसोश्चेति विश्वः ॥ तेजो धाम्नि पराक्रमे प्रभावतेजसोश्चापीति विश्वः ॥ श्वेतो धावतीतिवदत्र महसि इति पदे गुणिनोरभेदोपचारः ॥ महीयसे राजसे ॥ महीयतेः कण्ड्वादित्वात् यक्यात्मनेपदम् ॥ तथा च श्रुतिः —

अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् ॥ अजो ह्येको जुषमाणोऽनुशेते जहात्येनां क्तभोगामजोऽन्यः ॥ इति ॥

मायाधिष्ठातुरक्षरपुरुषस्य मायासेवनत्यागौ घटेते ॥ पुरुषोत्तमस्य तु मनुष्यादिषु प्रादुर्भावं विना मायासम्बन्धस्यात्यसम्भवादयमर्थस्तत्परो युक्त एव विवृतः ॥ पुरुषरूपस्त्वं जहासीत्यर्थस्तु पुरुषे अपरिमेयभगस्यासम्भवान्न तः ॥ अत्राद्ये कर्मपरतन्त्राबुधपरमात्मावतारयोर्वर्णनं कृतम् ॥३८॥२५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

उक्थजडानित्यनेन जीवानामज्ञत्वसम्भावना सूचिता परं तु, तेषामपि भवत इव नित्यत्वैकरसत्वप्रकृतिस्थत्वाद्यविशेषात् कथमज्ञत्वसम्भावना इत्याशङ्कायां प्रकृतिवश्यत्वतदसम्भवाभ्यामेवेत्याहुः ॥ स यदिति ॥ स जीवः, यद्यस्मात्, अजया त्वन्मायया, मोहित इति शेषः । अतः अजां प्रकृतिपरिणामात्मिकां, देवमनुष्यत्वादिमूर्तिम्, अनुशयीत आलिङ्गति बिभर्तीति यावत् । तु ततः, गुणान् शब्दादिविषयान्, जुषंश्च सेवमानः सन्नेव, सरूपतां सूक्ष्मत्वस्थूलत्वादिदेहधर्मतां भजति । देहात्माभिमानी भवतीत्यर्थः । तदनु तदनन्तरं, मृत्युं मरणमपि, भजति । इत्थं जन्ममरणादिरूपसंसृतिभोक्तृत्वादिति शेषः । अपेतो भगो ज्ञानैश्वर्यादिर्यस्य सः तथाभूत इव भवतीति शेषः । त्वमुत त्वं तु, अहिः सर्पः, त्वचं कञ्चुकम् इव, तामजां, जहासि । अहिदृष्टान्तस्त्या- मात्राभिप्रायकः । आत्तभगः सर्वदा महैश्वर्यसम्पन्नः, अपरिमेयभगः अचिन्त्यमहिमा सन्, अष्टगुणिते अष्टावपहतपाप्मत्वादयो गुणाः नित्यं सञ्जाता अस्येति तस्मिन् । तारकादित्वादितच् । महसि स्वयंप्रकाशरूपे, महीयसे महसि स्थित्वा पूज्यसे इत्यर्थः ॥२५॥ ॥३९॥

योगिरामानुजाचार्यकृतसरला व्याख्या

'द्वासुपर्णा'विति श्रुत्युक्तं जीवाद्विलक्षणं भगवत्स्वरूपमाहुः-स इति । यद्यस्मात् सः जीवः अजया त्वन्मायया । मोहित इति शेषः । अत एव तु अजां प्रकृतिपरिणामात्मिकां देवमनुष्यादिमूर्तिम् अनुशयीत आलिङ्गति । बिभर्तीति यावत् । ततः तत्सरूपतां भजति । देवमनुष्यादिदेहात्माभिमानं करोति । तदनु तत्पश्चात् गुणान् शब्दादीन् विषयांश्च जुषन् सेवमानः अपेतभगः तिरोहितज्ञानैश्वर्यानन्दादिगुणस्सन् मृत्युं संसारं भजति प्राप्नोति । त्वमुत त्वं तु अहिः भुजङ्गः त्वचमिव कञ्चुकमिव तामजां जहासि । यथा भुजङ्गः स्वगतमपि कञ्चुकं बुद्ध्या नाभिमन्यते तथा त्वमजामुपेक्षसे इत्यर्थः । तत्र हेतुमाहुः-आत्तेति । आत्तभगः नित्यप्राप्तज्ञानादिगुणः ज्ञानादिगुणत्वं जीवानामप्यस्तीत्यत आह-अपरिमेयभगः इति । ते तु परिच्छिन्नैश्वर्यवन्तः त्वपरिच्छिन्नैश्वर्यः । अष्टगुणिते अणिमाद्यष्टविभूतियुक्ते अपहतपाप्मत्वादिगुणयुक्ते वा महसि तेजोरूपे स्वपरमानन्दस्वरूपे महीयसे पूज्यसे विराजसे । अनन्याश्रयो भवसीति भावः । यद्यस्मात् सः अजया तु अजामनुशयीत ततः तत्सरूपतां भजति । तद्गुणान् जुषन् अपेतभगः मृत्युं भजति । त्वमुत तामहिस्त्वचमिव जहासि आत्तभगः अपरिमेयभगः त्वमष्टगुणिते महसि महीयसे इत्यन्वयः ॥३८॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

यतः अपराधात् पुनश्च यतो बहुपुण्यात् । यदा प्रपञ्चो नास्त्येव तदा कर्मकाण्डं किं विषयम् ? को विषयोऽधिकारी यस्य किं विषयं द्वेति द्वावित्यर्थः । सुपर्णौ पक्षिणौ । पक्षित्वं च नानावृक्षरूपदेहस्वीकारपरित्यागात् तत्रैकस्य भोक्तृत्वेन अन्यस्य नियन्तृत्वेनेति ज्ञेयम् । सयुजा संयुक्तौ मिथो व्यभिचारशून्यावित्यर्थः । समानमेकं वृक्षं वृश्च्यते छिद्यते इति नश्वरत्वेन दुःखादिबहुफलवत्त्वेन पापपुण्यादिबहुबीजवत्त्वेन च वृक्षसदृशं देहं परिषस्वजाते । भोक्तृत्वेन नियन्तृत्वेन चाधिष्ठित- तावित्यर्थः । तयोर्मध्येऽन्यो जीवः पिप्पलं कर्मफलम् अन्यो नित्यमुक्तो जीवान्तर्यामीश्वरः अभिचाकशीति साक्षितया प्रकाशते तमध्यासानन्तरं तविषयमेव चेति स संसारं प्राप्तो जीवो विषयेऽधिकारी यस्य तथाभूतमेव कर्मकाण्डमिति ॥३८॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

ननु यदि प्रपञ्चो नाम नास्त्येव तदा असता तेन सह चैतन्यस्य सम्बन्धगन्धोऽपि नास्ति तर्हि किमपराद्धं जीवेन। यतोऽसौ नित्यबद्धः संसरति। किं वा बहुपुण्यमीश्वरस्य यतो नित्यमुक्तः किंविषयं च तदा कर्मकाण्डमित्यपेक्षायां जीवेश्वरविशेषमाह-स यदजयेति ॥ स तु जीवः यतः यस्मादजया मायया अजाम् अविद्यामनुशयीत आलिङ्गेत् ततः गुणांश्च देहेन्द्रियादीन् जुषन् सेवमानः तदनु तदनन्तरं सरूपतां तद्धर्मयोगं च जुषन् अपेतभगः पिहितानन्दादिगुणः सन्मृत्युं संसारं भजति प्राप्नोति। तद्विषयमेव कर्मकाण्डमिति भावः। त्वमुत त्वं तु तामजां मायां गुणबुद्ध्या नाभिमन्यसे। कुत एतत्तदाह-आत्तभगो महसि महीयसेऽष्टगुणिते। अणिमाद्यष्टविभूतिमति महसि परमैश्वर्ये महीयसे पूज्यसे विराजसे। कथम्भूतस्त्वम्। अपरिमेयभगः अपरिमेयानि अपरिमितानि भगानि ऐश्वर्याणि यस्य सः। अपरिमितैश्वर्य इत्यर्थः। न ह्यन्येषामिव देशकालादिपरिच्छिन्नं तवाष्टगुणितमैश्वर्यम् अपि तु परिपूर्णस्वरूपानुबन्धित्वादपरिमितमिति। अतो जीवैश्वरयोर्महान् विशेषः। अत्र श्रुतिः।

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥"

'अजामेकां लोहितशुक्लकृष्णा'मित्यादि। तदर्थः —

द्वा द्वौ। सुपर्णा सुपर्णौ। सयुजौ। सखाया सखायौ। इति प्रतिपदानि ज्ञातव्यानि। द्वौ सुपर्णौ शोभनगमनौ। सयुजौ बिम्बाभावेन सदा संयुक्तौ। सखायौ नित्योपकारकोपकार्यत्वेन वर्तमानौ। समानमेकमेव वृक्षं देहम्। परिषस्वजाते परिष्वक्तावन्तौ। नियामकनियम्याद्युपाधिमत्त्वेन परिगृह्य वर्तेते। तयोर्द्वयोर्मध्येऽन्यः प्रतिबिम्बभूतो जीवः पिप्पलं कर्मफलं स्वादु विविधविषयास्वादनं यथा भवति तथा उपभुङ्क्ते। तस्मादन्यो बिम्बभूतः परमात्मेश्वरः पिप्पलमनश्नन्नभिचाकशीति स्वप्रकाशाखण्डवृत्तिमात्ररूपेणास्त इत्यर्थः। अत्र सुपर्णत्वं पक्षित्वं तयोर्नानाधिष्ठानस्वीकारपरित्यागसाम्यात्।

"अजामेका"मित्यादेर्व्याख्या प्रागेव कृता।

अथ स्वामिनाम्-

नृत्यन्ती तव वीक्षणाङ्गणयता कालस्वभावादिभि र्भावान् सत्त्वरजस्तमोगुणमयानुन्मीलयन्ती बहून्।
मामाक्रम्य पदा शिरस्यतिभरं सम्मर्दयन्त्यातुरं माया ते शरणं गतोऽस्मि नृहरे त्वामेव तां वारय ॥

भो नृहरे! त्वामेव शरणं गतोऽस्मि। तां मायां वारय। का सा माया ? त्वां किं करोतीत्यत आह-ते तव माया तव वीक्षणाङ्गणगता नृत्यन्ती कालस्वभावादिभिर्गुणमयान् भावानुन्मीयलन्ती सती मां शिरसि पदा पादेनाक्रम्यातिभारं यथा स्यात्तथा सम्मर्दयन्ती तवैव माया तां त्वमेव निवारयेति ॥३८॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ जीवेश्वरयोः प्रकृत्यन्तरवस्थाने तुल्ये तयोः को विशेषः किं विषयो विधिनिषेधविधिरित्यत्र जीवस्य तत्परवशत्वं परस्य तदभावत्वं चाह-स यदजयेति। स तु जीवः। यद्यस्मादजया भगवदधीनया मायया अजां प्रकृतिम् अनुशयीत आलिङ्गेत ततो गुणांश्च देहेन्द्रियादीन् जुषन् सेवमानः स्थूलोऽहं कृशोऽहमित्यात्मतया अध्यस्यन् सरूपतां स्थूलत्वादिसधर्मतां भजति। तदनु तदनन्तरं अपेतभगः सङ्कुचितज्ञानैश्वर्यादिः मृत्युं संसारं भजति प्राप्नोति। तद्विषयमेव विधिनिषेधरूपो विधिरिति भावः। त्वमुत त्वं तु। तामजाम्। प्रकृतिशब्दवाच्यां जहासि तिरस्कृत्य वर्तसे इत्यर्थः। ननु सा मच्छरीरतया मय्येव वर्तते, कथं तत्त्यागस्तत्राह-अहिरिव त्वचमिति। अयम्भावः — नित्यप्राप्तज्ञानैश्वर्य्योऽसि अत एव महसि परमोत्कृष्टैश्वर्य्ये अष्टगुणिते अणिमाद्यष्टविभूतिर्महीयसे पूज्यसे। कथम्भूतस्त्वम्। अपरिमेयभगः अनवच्छिन्नानन्तैश्वर्य्यः। न ह्यन्येषामिव देशकालादिपरिच्छिन्नं तवाष्टगुणितमैश्वर्य्यमस्ति अपि तु पूर्णस्वरूपानुबन्धित्वादपरिमितं स्वाभाविकं चेति।

'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रुतेः।

ं जीवेन। यतोऽसौ
त्रेश्वरविशेषमाह-स
ान् जुषन् सेवमानः
ोति । तद्विषयमेव
आत्तभगो महसि
भग: अपरिमेयानि
तवाष्टगुणितमैश्वर्यम्

कशीति ॥"

भनगमनौ । सयुजौ
म् । परिषस्वजाते
लं कर्मफलं स्वादु
श्नन्नभिचाकशीति

ः-ते तव माया तव
तभारं यथा स्यात्तथा

ीवस्य तत्परवशत्वं
नुशयीत आलिङ्गेत
र्मतां भजति। तदनु
ारिति भाव:। त्वमुत
कथं तत्त्यागस्तत्राह-
ाद्यष्टविभूतिर्महीयसे
ष्टगुणितमैश्वर्य्यमस्ति

अतो महद्वैषम्यमीश्वरजीवयोस्तथा च श्रुतय: —

'ज्ञाज्ञौ द्वावजावीशनीशौ ॥'

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्य: पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति'

'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्।' 'प्रधानक्षेत्रज्ञपतिर्गुणेश: ॥

पतिं विश्वस्यात्मेश्वरम्॥' ॥३८॥

कृष्णप्रिया

यह जीव जिस कारणसे आपकी माया से मोहित होकर माया का कार्य देव मनुष्यादि मूर्ति धारण कर हता है इसी से संसार के विषयन का सेवन करता देह के तुल्य धर्म को प्राप्त हो जाता है अर्थात् देह को हि आत्मा ानने लगता है उसके अनन्तर मरण को प्राप्त हो जाता है। इस प्रकार जन्म मरण आदि भागी होने से इस के ाभाविक ज्ञान ऐश्वर्यादि मानो नष्ट हो गए इस प्रकार का यह जीव हो जाता है। हे परमेश्वर ! आप तो जैसे र्प कांचली छोड देता है वैसे हि उस माया को छोड देते हो अर्थात् आप माया के परतंत्र नहि हो। इसी से ज्ञान क्ति बल का नित्य स्वीकार कर आप रहते हो और आप का उपरोक्त ऐश्वर्य नित्य निरवधि है। तादृश ऐश्वर्य सम्पन्न ोकर सदा पाप रहित जरा रहित मरण रहित शोक रहित भोजनेच्छा रहित सत्य काम सत्य सकल्परूप अष्ट गुण म्पन्न अनन्त स्वत: प्रकाशमान स्वरूप में स्थित होकर आप पूजित होते है ॥३८॥

यदि न समुद्धरन्ति यतयो हृदि कामजटा दुरधिमगोऽसतां हृदि गतोऽस्मृतकण्ठमणि:।
असुतृपयोगिनामुभयतोऽप्यसुखं भगवन्ननपगतान्तकादनधिरूढदाद्भवत: ॥३९॥

कर्दमक्षमा

हे भगवन्, !, यतय:, यदि, हृदि, स्थिता:, कामजटा:, न, समुद्धरन्ति, तदा, तेषाम्, असताम्, हृदि, गत:, अपि, त्वम्, स्मृतकण्ठमणि:, इव, दुरधिगम:, असि।, असुतृपयोगिनाम्, अनपगतान्तकात्, अनधिरूढपदात्, भवत:, च, इति, उभयत:, पि, असुखम् ॥३९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं तावदुक्तसाधनकदम्बेन ये भगवन्तं भजन्ति ते मृत्युं तरन्ति इतरे संसरन्तीत्युक्तम् इदानीं ये बहि: सङ्गं परित्यज्य वन्मार्गे प्रवृत्ता अपि कथञ्चिदन्तर्वान्तां शिन: कामान्नमुञ्चन्ति ते न भगवन्तं प्राप्नुवन्ति न चेह सुखं लभन्ते केवलं कुयोनीरेव नुवन्ति तान् शोचन् 'कामान्य: कामयते मन्यमान: स कर्मभिर्जायते तत्र तत्र' इत्यादिश्रुत्यर्थमाह-यदि न समुद्धरन्तीति। हे वन्! ये यतयो हृदि स्थिता: कामजटा: कामस्य मूलानि वासना यदि न समुद्धरन्ति नोत्पाटयन्ति तेषामसतां भवान् हृदि तोऽपि दुरधिगमो दुष्प्राप: कथम् अस्मृतकण्ठमणिर्विस्मृतो य: कण्ठमणिस्तत्तुल्य: स यथा कण्टे वर्तमानोऽप्यस्मृतश्चेदप्राप्त इव वति तद्वदिति न केवलमेतावत्किन्त्वसुतृपयोगिनामिन्द्रियतर्पणपराणां योगच्छद्मनामुभयतोऽप्यसुखमिहामुत्र च दु:खमेव तदाह नपगतान्तकादनिर्वृत्तान्मृत्यो: लोकाराधनधनार्जनादिक्लेशाद्भोगवैभवप्राकट्यभयाच्चेह तावद्दु:खम् भवत ईश्वरादपि दु:खम् यभूतात् अनधिरूढपदात् अनधिरूढं पदं स्वरूपं यस्य तस्मात् त्वत्स्वरूपप्राप्त्यभावादविद्यावद्विषयत्वेन निजधर्मातिक्रमनिबन्धनत्वद्दण्डरूपनरकप्राप्तेरमुत्राप्यसुखमित्यर्थ: ॥

दम्भन्यासमिषेण वञ्चितजनं भोगैकचिन्तातुरं

सम्मुह्यन्तमहर्निशं विरचितोद्योगक्लमैराकुलम्॥

आज्ञालङ्घिनमज्ञमज्ञजनतासम्माननासन्मदं
दीनानाथ दयानिधान परमानन्द प्रभो पाहि माम् ॥२६॥ ॥३१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — इतरे भक्तिविमुखाः । बहिःसङ्गं विषयसङ्गम् । अन्तर्वान्ताशिनश्चेतसि वान्ताशनवत्त्यक्तविषयध्यानं कुर्वन्तो ये तान्। श्रुतिं पूर्णां पठति —

“कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र ।
पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः ॥”

इति मुमुक्षोः कामत्याग एव प्रधानसाधनमिति दर्शयति-कामान्दृष्टादृष्टविषयान् यः कामयते मन्यमानस्तद्गुणांश्चिन्तयानः। सः तैः कामभिः सहजायते यत्र यत्र विषयप्राप्तिनिमित्तकामाः कर्मसु पुरुषं नियोजयन्ति तत्र तत्रेष्टविषयेषु तैरेव कामैर्वेष्टितो जायत, इत्यर्थः। कृतात्मनः परमात्मनि कृत आत्मा येन तस्य प्राप्तात्मत्त्वस्य तु इहैव सर्वे कामाः प्रविलीयन्ति विलयं गच्छन्ति। किम्भूतस्य-परमार्थतत्त्वविज्ञानात्परि समन्ततः प्राप्ताः कामा येन तस्य पर्याप्तकामस्येति। तदुक्तं गीतासु —

“आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
द्वत्कामाः यकप्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥” इति ।

नन्वयमात्मज्ञः कृतात्माऽयं कामीति कथं ज्ञायते तज्ज्ञानमाह श्रुतिः —

“आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनु सञ्चरेत् ॥” इति।

अर्थश्च — सच्चिदानन्दरूपः परमात्मा देहादिव्यतिरिक्तोऽयमहमस्मीति आत्मानं यः पुरुषश्चेति यदि जानीयात्तर्हि स किमिच्छन् किमात्मातिरिक्तं वस्त्वन्तरमस्ति तदिच्छन् कस्य कामाय आत्मनो व्यतिरिक्तस्य कस्य वस्तुनः कामाय प्राप्तये शरीरमनुसञ्चरेत् शरीरोपाधिकृतसुखदुःखरागद्वेषभयमानापमानादिभिः सन्तप्तो भवेत्स्वार्थाद्भ्रश्येत् तस्मादात्मज्ञानविमूढानां विषयासक्तचित्तानां कुयोगिनामुभयतोऽप्यसुखमित्युक्तम्। प्रकृतमनुसरामः-अस्मृतकण्ठमणिरिह लुप्तोपमा बोध्या, एतावत् अप्राप्तवदेव त्वं भवसीत्येतावन्मात्रमेव। तदाह उभयतो दुःखमाह। निजधर्मस्यातिक्रम उल्लङ्घनमेव निबन्धनं कारणं यस्यास्त्वद्दण्डरूपनरकप्राप्तेः। अमुत्रापि परलोकेऽपि। इत्यर्थ इति —

“कालिका भिक्षवो दृष्टा उभाभ्यां मार्गतो गताः। दुग्धश्रीफललोभेन हंसोद्दिष्टबको यथा ॥”

इति न्यायेनेह भोगप्राप्तेः परत्र सुखप्राप्तेश्च दुःखमेवेति भावः। न्यायार्थस्तु-मत्स्यान्निघ्नन्तं सुरूपं बकं दृष्ट्वा हसनं सुभोगेन लोभयित्वा निष्पापं कर्तुमिच्छन्नुवाच-अहो किमर्थं हिंसया जीविकां करोषि मया सार्धं गच्छ त्वामतिस्वादुतरं भोजनं पेयं च दास्यामि। स च भोगलोभेन तेन साकं गच्छंस्तत्तुल्यमुड्डयितुमशक्नुवन्नाह-त्वया साकं गन्तुं न शक्तोऽस्मीति। ततो हंसस्तं स्वपृष्टमारोप्य ययौ। स चोवाच मां क्षुधार्तं भोजनं देहीत्युक्तः सन् नारिकेलफलं चञ्च्वा निर्भिद्य तद्गतं दुग्धं बकाय पाययामास, स च तदेवातिस्वादु मत्वात्रैवाहं प्रतिदिनमिदं क्षीरं पीत्वा स्थास्यामीति विचार्य हंसमाह--नाहमितोऽग्रे यास्ये त्वं याहीति। एवं सत्सङ्गमिषेण स्वगृहं त्यक्त्वा भोगेष्वासक्तो हरिभजनमकुर्वाणोऽप्युभयभ्रष्टो भवतीत्यर्थः। स्वामिनाम्-दम्भेति। अत्रैतज्ज्ञातव्यं स्वयं परमहंसर्षभो निवृत्तसमस्तमायागुणेन्द्रियव्यापारोऽनवरतभगवद्गुणस्मरणकीर्तनादिभिर्निदिध्यासितपरमात्मतत्त्वोऽपि स्वस्य संन्यासित्वात्कुसंन्यासिनां दोषानात्मन्यारोप्य परमानन्दं श्रीकृष्णं प्रार्थयन्नाह-दम्भेन यो न्यासस्तस्य मिषेण छलेन। वञ्चिता जना येन तम्। दम्भन्यासत्वात् भोगेषु एका केवला या चिन्ता तयाऽऽतुरं दुःखितम्। अत एवाहर्निशं मुह्यन्तं मोहं प्राप्नुवन्तम्। विरचितो य उद्योगो मठनिर्माणादिव्यापारस्तत्र यः क्लम इतस्ततो धनाद्यर्थपरिश्रमस्तेनाकुलमवशम् अतोऽज्ञमतस्तवाज्ञालङ्घिनम्। “यावज्जीवमग्निहोत्रं जुहुयाच्छान्तो दान्तः” इत्याज्ञां विलङ्घ्य कृतसंन्यासम्। तत्रापि संन्यासधर्म

त्यज्य भोगाद्याकुलत्वादाज्ञालङ्घिनमिति । तत्कुतः यतः अज्ञानां जनतानां समूहानां सम्माननाभिः सत्कारैः मदोऽभिमानोऽहो एते मां सर्वोत्कृष्टं ज्ञात्वाऽर्चयन्तीत्येवंलक्षणो यस्य तम् एवम्भूतं माम् । हे दीनैरासमन्तान्नाथ्यते प्रार्थ्यते तथाभूत, दयैव निधानं धनं यस्य हे तथाभूत ! एतेनैवम्भूतं कुमार्गगामिनं समुद्धर्तुं श्रीकृष्ण एव प्रभुर्नान्य इति दर्शितं मिचरणैः ॥★॥

श्रीधरानुयायिनी — ये तु कपटभक्तास्तेषां न तव प्राप्तिर्न वा किमपीहामुत्र सुखमित्याहुः-यदीति । हे भगवन् ये च र्बकाकारा मिथ्यासंन्यासिनो वासनासहस्राक्रान्तान्तःकरणा देहेन्द्रियलालनपरा रहसि रात्रौ परस्त्रीबालभोगादिसुखभोक्तारस्तेषां हृदि स्थितोऽपि गुरूपदेशान्मनसि प्राप्तोऽपि वा विस्मृतकण्ठमणिरिव यथावदनुभवितुमशक्य एवासि । प्रत्युत तेषां कारधनार्जनादिक्लेशाद्भोगवैभवप्राकट्यभयाच्चैहिकं दुःखमेव, तथा तवेश्वरस्याज्ञानादज्ञत्वेनावश्यकर्तव्यसन्ध्योपासना-निजनित्यधर्मपरित्यागाच्च त्वत्तो दण्डरूपनरकप्राप्त्या पारलौकिकमपि दुःखमेव । यदि योगिनामप्येवं तदा किमु व्यमसतामित्याशयः ॥★॥

विश्वनाथी — तदेव सत्सन्ततभक्त्यर्थमेवान्यपरत्वमीषदपि वयं न सहामह इत्यन्या ज्ञानयोगमिश्रभक्तिप्रतिपादकश्रुतय हुः-यदीति । यतयो निर्जितबहिरिन्द्रियाः संन्यासिनोऽपि यदि हृदि कामवासनाः समस्ता एव नोन्मूलयन्ति तर्हि मसतामुत्तमावस्थानप्राप्तानां हृदि गतो ज्ञानसिद्ध्यर्थं मनस्याश्रितोऽपि भवान् दुरधिगमो यथाकथञ्चिदेव स्मृतिविषयः स्यात् भिरावृतचित्तत्वात् । ननु, परमदुर्लभोऽपि भाग्येन लब्धश्चेत्क इव तादृशः स्यात् । अस्मृतेति । कण्ठे परिहितोऽपि मणिः कामाद्यासक्तिसमये विस्मृतो दृश्यत इत्यर्थः । ये त्विन्द्रियतर्पणपरास्तेषां योगिनां योगसिद्ध्यर्थं पासनाप्रवृत्तानामप्युभयतोऽप्यसुखम् । तत्रानपगतान्तकान्मृत्युपरम्परामयसंसारादाध्यात्मिकादिदुःखं न अधिगतं नात्मोन्मुखीकृतं चरणारविन्दं यस्य तस्माद्भूतवस्तुपेक्ष्यरूपमिति । श्रुतयस्तद्दर्शिता एव (२६) ॥३९॥

नीलकण्ठी —

पूर्वस्मिन् श्लोके सत्त्वमित्यपेतभगस्य जीवस्यापरिमेयभगवत्त्वलक्षणमीश्वरत्वमुक्तं तस्य शशशृङ्गवद्विकल्पमात्रत्वे जतवत्प्रातिभासिकत्वे मनोरथवनितावत्प्रतिभामात्रत्वे वा मिथ्यात्वापत्त्या "तत्त्वमसि" "अहं ब्रह्मास्मि" "अयमात्मा " इति वाक्यजातमनर्थकं स्यात् । कीटभ्रमरवदुत्पाद्यत्वे दधिवद्विकारत्वे जन्यतया तस्यानित्यत्वापत्तिः नदीसिन्धुवदवाप्यत्वमपि गारवच्छेदेन घटाकाशमहाकाशवदभेदेन आद्ये वाक्यानर्थक्यम्, अन्त्ये जीवब्रह्मणोर्वास्तवांशांशिभावापत्तेः "निष्कलं निष्क्रियं निरवद्यं निरञ्जनम् ।" इति निरवयवत्वश्रुतिव्याकोपः काञ्चनशुद्धिवद्भावकत्वे [संस्कार्यत्वे ।] निरञ्जनत्वश्रुतिव्याकोपः सङ्गो ह्ययं पुरुषः" इति श्रुतेः, इत्यभिसन्धाय कण्ठमणिवन्नित्यप्राप्तमप्यावरणापगममात्रलभ्यं जीवस्येश्वरत्वमित्याह-यदि न रन्तीति । हृदि गत इत्युपलब्धिस्थानमुक्तम्, शेषग्रन्थेन वासनाक्षय उपलब्धिहेतुरुक्तः । एवं श्रुतयुक्तिभ्यां निश्चितेऽप्यात्मैक्ये सनाप्राबल्याद्विपरीतवासना न निवर्ततेऽतस्तन्निवृत्त्यर्थं निदिध्यासनमत्र श्लोके विधीयते इति तात्पर्यार्थः । अक्षरार्थस्तु-हे न्! यतयः संन्यासिनो यदि हृदि स्थिताः कामजटाः काममूलवासनाः न समुद्धरन्ति समूलं नोन्मूलयन्ति तर्हि त्वं तेषामसतां मो दुष्प्रापः, कामोन्मूलनकृतां तु हृदिगतः स्मृतकण्ठमणिरिव सुखलभ्यः ।

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥"

"प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ।" इति श्रुतिस्मृतिभ्याम् । ननु —

"अपि वृन्दावने शून्ये शृगालत्वं स इच्छति । न तु निर्विषयं मोक्षं कदाचिदपि गौतम ॥"

इति रागिगीतावचनात्कामोऽपि रागिणां सुखहेतुरेवातः कथं तस्य हेयत्वमुच्यते इत्याशङ्क्याह-असुतृपेति । इन्द्रियतृप्तिकामानां परिव्राडपसदानाम् उभयतोऽप्यसुखं भवति । अयम्भावः — वैराग्यपूर्वकं यमनियमाद्यष्टाङ्गोपेतमनुतिष्ठतां

पुरस्तादणिमादिसिद्धिषूपस्थितासु योगैश्वर्यासक्तास्तेऽसुतृपयोगिनः तेषां न सिद्धिजं सुखमनन्तवत्त्वात् नापि मोक्षसुखमवैराग्यात् किन्तु संसार एव। यदाह भगवान् पतञ्जलिः —

"स्थान्युपनिमन्त्रणोसङ्गस्मयाकरणपुनरनिष्टप्रसङ्गात्।" इति। स्थानिनो देवाः। किं तदुभयं यस्मादसुखं तदाह- अनपगतेति। अनपगतोऽनतिक्रान्तोऽन्तको बन्धको मृत्युरूपी कामः विषयाभिलाषः "अशनाया हि मृत्युः" इति श्रुतेः। अवैराग्यादेकं भयं यदाह भगवान् —

"बन्धुरात्माऽऽत्मनस्तस्य येनाऽऽत्मैवाऽऽत्मना जितः। अनात्मनस्तु शत्रेत्वे वर्तेतात्मैव शत्रुवत्॥" इति।

तथा भवतः श्रीविष्णोः अनधिरूढान्निदिध्यासनबलेनानधिगतात्पदात्पदनीयात्स्थानात् "सोऽध्वनः परमाप्नोति तद्विष्णोः परमं पदम्।" इति श्रुतिप्रसिद्धात् अज्ञातादात्मनो जन्ममरणप्रवाहपाताख्यं द्वितीयं भयमित्यर्थः। तस्माद्वैराग्यबलेन कामवासनानां समूलमुन्मूलने यतमानस्य योगिश्रेष्ठस्य स्वरूपानन्दलाभः कण्ठमणिवद्भवति नान्यस्येति तात्पर्यम् (२६) ॥३९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यदीत्यस्य टीकायां श्रुतौ कामान् विषयान् मन्यमानस्तद्गुणान् चन्तयन् कामभिस्तैरेव कामैर्धर्माधर्मप्रवृत्तिहेतुभिर्विषयेच्छारूपैः सह जायते। आदिशब्दात्पर्यासकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामा इति तेषां व्याख्येयं लोकाराधनेत्यादैरेतद्द्वयं मृत्युरूपमेवेति भावः। अथ स्वव्याख्यायां तदेव सत्सन्ततभक्त्यर्थमेवान्यपरत्वमीषदपि वयं न सहामह इत्यन्या ज्ञानयोगमिश्रभक्तिप्रतिपादकश्रुतय आहुः-यदीति। यतयो निर्जितबहिरिन्द्रियाः संन्यासिनोऽपि यदि हृदि कामवासनाः समस्ता एव नोन्मूलयन्ति तर्हि तेषामसतामुत्तमावस्थानप्राप्तानां हृदि गतो ज्ञानसिद्ध्यर्थं मनस्याश्रितोऽपि भवान् दुरधिगमो यथाकथञ्चिदेव स्मृतिविषयः स्यात् ताभिरावृतचित्तत्वात्। ननु, परमदुर्लभोऽपि भाग्येन लब्धश्चेत्क इव तादृशः स्यात्। अस्मृतेति। कण्ठे परिहितोऽपि महामणिः कामाद्यासक्तिसमये विस्मृतो दृश्यत इत्यर्थः। ये त्विन्द्रियतर्पणपरास्तेषां योगिनां योगसिद्ध्यर्थं त्वदुपासनाप्रवृत्तानामप्युभयतोऽप्यसुखम्। तत्रानपगतान्तकान्मृत्युपरम्परामयसंसारादाध्यात्मिकादिदुःखं न अधिगतं नात्मोन्मुखीकृतं पदं चरणारविन्दं यस्य तस्माद्भूतवस्तुपेक्ष्यरूपमिति। श्रुतयस्तद्दर्शिता एव ॥२६॥३९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इति विषयसेवाया महानर्थावहत्वेऽपि यतयः कृतसंन्यासा अपि न सम्यङ् निःशेषमुद्धरन्ति, हृदि गतः सामान्येन सर्व्वेषामन्तर्य्यामितया स्वस्य च हृदि वर्तमानोऽपि स्वस्मिन् वर्तमानस्याप्यप्राप्यत्वे दृष्टान्तः-अस्मृतेति। हे भगवन्निति परमेश्वरस्य तवाज्ञालङ्घनादिना तेषां तदुचितमेवेति उभयत्र दुःखमेवाहुः-अनपगतेति। अनपगतः संन्यासेन निवृत्त्युन्मुखोऽपि विरुद्धाचरणेनानपयातो योऽन्तको यमस्तस्मात्, अमुत्र नरकपातादिदुःखं तथा भवतः संसारात्। कथम्भूतात्? अनधिरूढपदात् अनधिरूढान्यलब्धानि पदानि वाञ्छितभोगवस्तूनि यत्र तस्मात्। भोगेच्छायामुत्कटायामपि लोकनिन्दाशङ्कया भोगार्थमुद्यमाकरणादिहापि दुःखमिति ॥३९॥

[साधारण्येनाविद्याभाजां दुःखमुक्त्वा तत्रैव दाम्भिकानां गतिमाहुः-यदीति। यतः परित्यक्तदारादिका अपि यदि हृदि स्थिताः कामस्य मन्मथस्य जटा दुःखसंस्कारान् नोन्मूलयन्ति गोकुललीलाश्रवणकीर्तनरूपया त्वद्भक्त्या न निरस्यन्ति, किन्तु (भा० १०/३३/३०)

"नैतत् समाचरेज्जातु मनसापि ह्यनीश्वरः। विनश्यत्याचरन्मौच्याद्यथाऽरुद्रोब्धिजं विषम्॥"

इत्यादिवाक्यमनाद्रियमाणाः, प्रत्युत वयं श्रीगोपालवन्निर्लेपाः कथमतिक्षुद्रकर्म्मणानेन बाधिता भवेमेति वदन्तः स्वच्छन्दं परदारसेवां कुर्व्वन्तीत्यर्थः। ततस्तेषामसतां त्वं साधारण्येन सर्व्वान्तर्य्यामित्वाद्धृदि गतोऽपि दुरधिगमो दुर्ब्बोधः। यद्वा, हृदि वृन्दावने गतोऽपि —

"वत्सैर्वत्सतरीभिश्च सरामो बालकैर्वृतः । वृन्दावनान्तरगतः सदा क्रीडति माधवः ॥" इति स्कान्दमथुराखण्डोक्तेः ।

सदा वृन्दावने विहरन्नवस्थितोऽपि दुरधिगमो दुर्ब्बोधः परमाश्रद्धोपहतान्तःकरणत्वात् (परमाशुद्धान्तःकरणत्वात् [ख] ।) तोरविषयस्त्वमित्यर्थः । अस्मृतकण्ठमणिरित्यनेन सर्व्वथैवास्मरणात् त्वद्वर्त्मवार्ताप्येषां दवीयसीति सुखाकृष्टनाकुश्य जैह्वसुखाकृष्टनाक्रोशन्ति–असुतृपेति । असुशब्दस्येन्द्रियवाचित्वेऽप्यत्र दुर्वशत्वेन मुख्यत्वाज्जिह्वाया ग्रहणम् ११/८/२१) —

"तावज्जितेन्द्रियो न स्याद् विजितान्येन्द्रियः पुमान् । न जयेद्रसनं यावज्जितं सर्व्वं जिते रसे ॥" इत्युक्तेः ।

भगवन् ! हे व्रजाविष्कृतविचित्रमधुरलीलैश्वर्य्य ! तदनादरेणैव जिह्वातर्पणार्थमेव प्रकटितदम्भयोगानामुभयतः परस्मिन् इह च दुःखमेव । तदेवाहुः–अनपगतान्तकादुपस्थितकृतान्तात् परत्र महानरकदुःखम्, स्वधर्मत्यागेन दम्भाचरणात् । किञ्च, तो भवात् संसारात् । कथम्भूतात् ? अनधिरूढपदादज्ञातदुःखमात्रस्वरूपात् । तेन जिह्वालौल्येन हिकपाक्षिकमासिकनिजसमाधिसूचनचातुर्य्योत्पन्नया प्रतिष्ठया द्वारभूतया तथा योगमठिकाध्यानगुहावासपूजादिच्छलेन च नै परमसङ्गोपनेन, तद्भोगे च इहापि महद्दुःखमेवेत्यर्थः ॥३९॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भगवत्प्रावण्ये सत्यपि कामहतानामनर्थमाह–यदि नेति । न समुद्धरन्ति संसारमिति शेषः । कण्ठस्थोऽप्यस्मर्यमाणो वि त्वं हृद्गतोऽपि न ज्ञायसे इत्यर्थः । असुतृपयोगिनां प्राणेन्द्रियतर्पणपराणां योगिनां न सुखम् । उभयत इहलोके परलोके र्थः । अनधिरूढपदात् अनधिरूढपदत्वात् । भावप्रधानो निर्देशः ॥३९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थमपेतभगस्य पुनस्तत्प्राप्तौ किं निदानमित्यपेक्षायामनन्यप्रयोजनं त्वदुपासनमेवेत्यभिप्रेत्य तावद्भगवत्प्रावण्ये सत्यपि हतानामनर्थमाहुः–यदीति ॥ यतयः मुनयः मनःप्रणिधानशीलाः अपि यदि हृदि स्थिताः कामजटाः कामानां मूलानि वासना वत् । न समुद्धरन्ति नोत्पाटयन्ति तर्हि तेषामसतां हृदि गतः स्थितोऽपि त्वं दुरधिगमः दुर्ज्ञेयः । अस्मृतकण्ठमणिः कण्ठे ऽप्यस्मर्यमाणो मणिरिव स यथा कण्ठे वर्तमानोऽप्यस्मृतश्चेदज्ञातप्राय एव हि भवति । किञ्च हे भगवन् ! तेषाम् असुतृपयोगिनां न्द्रियतर्पणपराणां योगिनामुभयतोऽप्यसुखम् इहामुत्र चासुखम् दुःखमेव । तदेवाहुः– अनपगतान्तकादनिवृत्तान्मृत्योः इह कल्येऽपि मरणभयजं दुःखमस्त्येवेति भावः । परलोके त्वनधिरूढपदाद्भवतः सकाशात् दुःखम् अनधिरूढम् अप्राप्तं पदं नं येन तस्मात् भावप्रधानो निर्देशः । अप्राप्तत्वत्पदत्वात्त्वत्पदाप्राप्तेरिति यावत् । भवतः निजकर्मातिलङ्घिनां शास्तुर्यमरूपात्त्वत्तो मित्यर्थः ॥३९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

तदवगमार्थसितासितयोर्गुणविगुणयोर्न हि देहभृतां सगिरः ।
अनुययुरत्र हंसकुलगीतपरम्परया न तुषावरणा इव रजांसि वान्ति ।
वयसा सह यच्छ्रुतयस्त्वयि सफलं पतन्ति न पतन्ति बन्धनाः ॥२७॥४१॥

सकलश्रुतिस्मृतिभावसङ्ग्रहात्मनस्तदवगमार्थसितासितयोरित्यस्यायं भावः — देहभृतां जीवानां सगिरः गिरा वाचा त्रादयः गुणविगुणयोस्तदवगमार्थसितासितयोर्नानुययुर्हीत्यन्वयः । द्वितीयार्थे षष्ठी । गुणरूपा श्रीः विगुणो निर्गुणो पूर्वं प्रस्तुतो विष्णुस्तच्छब्देन परामृश्यते तस्य हरेरवगमो यस्याः सा तदवगमा तया श्रियाऽर्थ्यते ज्ञायते सम्यगित्यर्थः । सिता बद्धा सर्वदा तदधीनत्वेन वर्तते इति श्रीः । असितोऽबद्धः नित्यमुक्तौ विष्णुस्तौ श्रीश्रीधरौ नानुययुः आनुकूल्येन

यथास्थितरूपगुणविषयत्वेन न प्रापुः तद्विषयीकरणोपायमाह–अत्रेति । अत्र जीवराशौ हंसकुलगीतपरम्परयेति हंसानां ब्राह्मणानां कुलेन गीतस्य उपदिष्टस्य परम्परया इन्द्रियाण्यनुययुश्च श्रुतयश्चानुययुरित्युपसङ्ख्यानं कर्तव्यम् । अत्र रजांसीति रजःशब्दोपादानाद्रजोगुणप्रधाना मनुष्या उपलक्ष्यन्ते । तुषा आवरणं कवचं येषां ते तुषावरणाः तुषावरणास्तण्डुलपदार्थाः रजांसीव यथा धूलीन्न वान्ति न स्पृशन्तीत्यर्थः । तथा च श्रुतयः वयसा महता कालेन सह रजोरूपान्मनुष्यान्न वान्ति रूपेण पुरुषं बध्नन्तीति बन्धनाः विधिनिषेधरूपेण पुरुषं बध्नन्त्यः श्रुतयः सात्त्विकानामर्थे त्वयि सफलं पतन्ति त्वद्गुणगणान् प्रकाश्य त्वदुपासकानां पुरुषार्थहेतवो भवन्ति । राजसानां बुद्धिव्यामोहकत्वेन त्वयि न पतन्ति पुरुषार्थहेतवो न स्युरित्यर्थः । अनेन —

"जानाति प्रकृतिर्विष्णुं ज्ञेयो विष्णुश्च निर्गुणः । तावुभौ न विजानन्ति ऋते ब्रह्मपरम्पराम् ॥"

इति महोपनिषद्विवृता —

"अन्ये सर्वे श्रिया बद्धाः श्रीर्बद्धा विष्णुनैव तु । बन्धश्च विष्णुतन्त्रत्वं मुक्तानां च श्रियस्तथा ॥"

इत्यादि गारुडपुराणार्थोऽपि सङ्गृहीतः ॥२७॥४१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवं तत् सन्ततभक्त्यर्थमेवान्यमीषदपि वयं न सहाम इत्यन्याः ज्ञानयोगप्रतिपादकश्रुतय आहुः । यदि न समुद्धरन्तीति । यतयो निर्जितबहिरिन्द्रियाः संन्यासिनोऽपि यदि हृदि कामवासनाः समस्ता एव नोन्मूलयन्ति तर्हि तेषां सतामुत्तमावस्थामप्राप्तानां हृदिगतो ज्ञानसिद्ध्यर्थं मनस्याश्रितोऽपि भवान् दुरधिगमो यथा कथञ्चिदेव स्मृतिविषयः स्यात् ताभिरावृतत्वात् । ननु परमदुर्ल्लभोऽपि भाग्येन लब्धश्चेत् क इव तादृशः स्यात् तत्राहुः–अस्मृतेति । कण्ठपरिहितोऽपि महामणिः कामाद्यासक्तिसमये विस्मृतो दृश्यते इत्यर्थः । ये त्विन्द्रियतर्पणतत्परास्तेषां योगिनां योगसिद्ध्यर्थम् । त्दुपासनाप्रवृत्तानामप्युभयतोऽप्यसुखं तत्रानपगतान्तकान्मृत्युपरम्परा संसारादाध्यात्मिकादिदुःखं तत्त्वधिगतं नात्मोन्मुखीकृतं पदं चरणारविन्दं यस्य तस्माद्भवतस्तूपेक्षारूपमिति । श्रुतयस्तु तद्दर्शिता एव तच्छ्रुत्वा तदेकपरायणाः सोल्लासमभीष्टं स्पष्टयन्ति ॥३९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

अतस्त्वद्भक्ता एव मायां तरन्ति । उक्तं च भगवतैव —

'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।' इति । अन्यथा यतयोऽपि नेत्याहुः यदीत्याहुः यतयो ज्ञानमार्गे यत्नशीला यदि त्वद्भजनेन हृदि कामजटा न समुद्धरन्ति नोन्मूलयेयुः तदा तेषां हृदि गतोऽपि त्वं दुरधिगमः दुष्प्रापः । तत्र दृष्टान्तः–अस्मृतकण्ठमणिः अस्मृतकण्ठमणिर्यथा कण्ठं स्थितोऽपि दुरधिगम एव । समासगा लुप्तोपमा । अतः असुतृपयोगिनां त्वद्भजनविमुखतया ये असूनेव तर्प्ययन्ति तेषाम् उभयत इहामुत्र च असुखं भजतां तूभयत्रैव सुखम् । हे भगवन् ! कुतोऽसुखं तत्राहुः अनपगतान्तकात् अनपगतो योऽन्तकः कालस्तस्मात् । कीदृशात् । भवतोऽनधिरूढपदात् भवतो हेतोः अनधिरूढं पदं येन त्वं यस्य सहायस्तत्र कालः पदं कर्तुं न शक्नोति अतो भजतामुभयतः सुखमिति भावः ॥३९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

अतस्त्वद्भक्ता मायां तरन्ति अन्ये तया संसरन्त्येवेति भक्त उत्कर्षं प्राप्त एव, ये तु यतयः केवलं दमिनोऽपि अन्तर्दुर्वासनां न त्यजन्ति, तदा ते निन्द्या एवेत्याहुः– यदीति । यतयो ज्ञानमार्गे यत्नशीलाः, अथ च हृदि कामजटा ये न समुद्धरन्ति सम्यङ् नोन्मूलयन्ति तेषामसतां हृदि गतोऽपि त्वं दुरवगमो दुर्ज्ञेयः । तत्र दृष्टान्तः– अस्मृतकण्ठमणिर्यथा कण्ठे स्थितोऽपि मणिरस्मृतश्चेद् दुरधिगम एव । अतः खलु असुतृप्–योगिनामसुतृप्तिपराणां योगच्छद्मनामुभयत एवासुखम् 'अपिरेवार्थः', हे भगवन् ! अनपगतात् अनिवृत्तात् अन्तकादितुल्यम् । एतेन यदि कदाचिद्भक्तानां दुर्वासना भवति, तदा स्वयमेव तां नाशयसीति भावः । (भा० ५/१९/२७) "धुनोति सर्वम्" इत्यादि ॥३९॥

त हंसानां ब्राह्मणानां
। अत्र रजांसीति
दुलपदार्थाः रजांसीव
षेण पुरुषं बध्नन्तीति
काश्य त्वदुपासकानां

यदि न समुद्धरन्तीति।
ामुत्तमावस्थामप्रासानां
। ननु परमदुर्ल्लभोऽपि
समये विस्मृतो दृश्यते
गतान्तकान्मृत्युपरम्पर
ति। श्रुतयस्तु तद्दर्शिता

ज्ञानमार्गे यत्नशीला यदि
न्तः-अस्मृतकण्ठमणिः
नविमुखतया ये असूनेव
पगतान्तकात् अनपगतो
हायस्तत्र कालः पदं कर्तुं

दमिनोऽपि अन्तर्दुर्वासनां
ये न समुद्धरन्ति सम्यड
स्थितोऽपि मणिरस्मृतश्चेद
', हे भगवन्! अनपगतात
ां नाशयसीति भावः।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदेवं श्लोकत्रयेण प्रतिपादितमावसथानां पुरुषसारहरत्वम्। तत्र ये ऋषय उक्तास्ते द्विविधाः। निर्गुणब्रह्मोपासकाः पदवाच्याः। सगुणब्रह्मोपासकाः भक्तपदवाच्याश्च। ते यदि विमदाः सदाचारास्स्युस्तदा ते उभये एव कृतार्थाः। यदि तु राः स्युस्तदा तेषां का गतिरित्यपेक्षायामाहुर्यदीति द्वयेन। हे भगवन्! यतयः संन्यासिनो निर्गुणब्रह्मोपासकाः हृदिस्थिताः जयः कामस्य मूलानि वासनाः यदि न समुद्धरन्ति नोत्पाटयन्ति तदा तेषामसतां भवान् हृदि गतोऽपि दुरधिगमो दुष्प्रापः। म्। अस्मृतकण्ठमणिः विस्मृतो यः कण्ठमणिस्तत्तुल्यः। स यथा कण्ठे वर्तमानोऽप्यस्मृतश्चेदप्राप्त इव भवति तद्वदिति। न लमेतावदेव किन्तु तेषामसृतृपयोगिनामिन्द्रियतर्पणपराणां योगच्छद्मनामुभयतोऽप्यसुखम् इहामुत्र च दुःखमेव। तत्रैहिकं खमाहुः-अनपगतोऽनिवृत्तो योऽन्तकस्तस्मात् लोकाराधनादिक्लेशधनार्जनादिक्लेशविषयभोगाच्छादनादि-रूपमृत्युत्रितयात् प्राप्तादित्यर्थः। पारत्रिकं दुःखमाहुर्न अधिरूढं पदं स्वरूपं यस्य तथाभूतात् भवतः सकाशात् यत् दुःखं तत् वरूपप्राप्त्यभावात्। प्रत्युत त्वद्दत्तनरकयातनातिशयाच्चेत्यर्थः। अत्र श्रुतयः —

"कामान् यः कामयते मन्यमानः स कामभिर्जायते। तत्र तत्रे"त्याद्याः।

मन्यमानः मननपरायणोऽपि यतिरित्यर्थः ॥३९॥

गूढार्थदीपिनी

एवं भगवतो भजनमेव मुख्यं तेनैव संसारनिवृत्तिरन्यथा तत्र परिभ्रमणमित्युक्तम्। इदानीं तु येसाधनार्थं त्यक्तगृहा अपि दिव्यापारासक्ता भवन्ति तान् शोचन्त्यो निन्दन्ति-यदि नेति ॥

(दाम्भिकसंन्यासिनिन्दापरेयम्)

पद्यानुवादः

विषयलम्पटयत्यतिदुर्गमो हृदिगतोऽस्मृतकण्ठमणिर्यथा।
इह मृतेर्नरकात्परतोऽसतामुभयतो भयतोऽप्यसुखं नृणाम् ॥२६॥

सङ्क्षिप्तसार्थान्वयः — हे भगवन्! ये यतयः हृदि वर्तमानाः कामजयः कामवासना यदि न समुद्धरन्ति नोत्पाटयन्ति न जन्ति तेषामसतां हृदि गतोऽपि भवान् दुरधिगमः दुष्प्रापः। क इव? अस्मृतकण्ठमणिरिव अतः असुतृपयोगिनाम् उभयतोऽपि खं दुःखमेव। अनपगतान्तकात् अनपगतश्चासौ अन्तकश्च तस्मात् इह मरणरूपम्। भवतोऽनधिरूढपदात् अप्राप्तपदात् परत्र रूपं च। असुतृपः इन्द्रियतर्पणपराः ॥

हे भगवन्! ये यतयः यतिवेषविडम्बकाः योगच्छद्मना मुण्डशिरस्काः हृदि स्थिताः कामवासनाः न समुद्धरन्ति यन्ति। अन्तर्भोगवासना न त्यजन्ति तेषामसतां दाम्भिकानां हृदि गतोऽपि भवान् दुरधिगमः दुष्प्रापः। अत्र तदनुरूपो ः-अस्मृतकण्ठमणिः। लुप्तोपमेयम्। कण्ठस्थोऽपि अस्मृतो विस्मृतो मणिरिव हृदि गतोऽपि विस्मृतः त्वं तैर्न ज्ञायस ः ॥

न केवलमियदेव, दुःखं किन्तु अन्यदपीत्याहुः-असुतृपेति। असूनेव तर्पयन्तीत्यसुतृपा इन्द्रियतर्पणपराः सक्तयोगिनस्तेषाम् उभयतोऽपि इह परत्र च असुखं दुःखमेव। क्रमेण दर्शयन्ति-अनपगतात् अनिवृत्तात् अन्तकात् लोकाराधनधनोपार्जनादिक्लेशात् इह तावत् मरणरूपं दुःखम्। भगवन्निष्ठाभावेन निजधर्मातिक्रमात् परत्र च नरकप्राप्तिरूपं खम्। कुतः? भवतः न अधिरूढं न प्राप्तं यत् पदं स्थानं तस्माद् हेतोः ॥

यद्वा। भवतोऽनधिरूढपदात् अप्राप्तपदत्वादिति बहुव्रीहेर्भावप्रधानो निर्देशः। तस्माद्भक्तिबलेन कामवासनानां समूलोन्मूलने स्यैव संन्यासिनो भगवत्स्मरणरूपस्वरूपानन्दलाभः कण्ठपाणिवद्भवति नान्यथेति तात्पर्यम्। विश्वनाथस्तु अनपगतान्तकात्

मृत्युपरम्परामयसंसारात् आध्यात्मिकादिदु:खम् । न अधिगतं नात्मोन्मुखीकृतं पदं चरणारविन्दं यस्य तस्मात् भवतस्तूपेक्षारूपमित्यत्याह । समुद्धरन्तीत्यत्र समुद्धरन्तीति समुपसर्गेण त्रिविधैषणायास्त्यागो विवक्षित: । ताश्च लोकैषणावित्तैषणापुत्रैषणाख्या ज्ञेया: । योगिनामित्यत्र अर्वाचीनयोगिनस्तु विषयेन्द्रियसंयोगो योग इत्यप्यण्डितै: इत्युक्तरूपा ज्ञेया: ॥२६॥४०॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

इदानीं पूर्वोक्तस्वरूपाद्भगवत: पराङ्मुखानां वान्ताशिनां निष्ठामाहु: श्रुतय: ।

'कामान् य: कामयते मन्यमान: । स कर्मभिर्जायते तत्र तत्रे'त्याद्या: । एवं सर्वभूतानां पतितानां पावने तवैव सामर्थ्यं शीलं चेति कृपामाविष्कारयन्त्य: सम्बोधयन्ति–हे भगवन्निति । ये यतय: यतिवेषविडम्बका: योगच्छद्मना मुण्डशिरस्का: हृदि कामजटा न समुद्धरन्ति अन्तर्भोगवासनां न मुञ्चन्ति । तेषामसतां हृदि गतोऽपि भगवान् दुरधिगम: दुष्प्राप्य: । तत्र दृष्टान्तगर्भितं विशेषणम्–अस्मृतकण्ठमणि: । अस्मृत: कण्ठे वर्तमानो मणिर्यथा तद्वदित्यर्थ: । न केवलमियदेव दु:खं किन्तु अपरमपीत्याह–असुतृपेति । असुतृपाणामिन्द्रियतृप्तिकामानां योगच्छद्मपरिच्छिन्नानां विषयाच्छादितबुद्धीनामुभयतोऽपि दु:खमेव । भवत: अनपगतान्तकात् अनिवृत्तकालरूपात् परलोके भयम् अनधिरूढपदात् अप्राप्तभोगसाधनादस्मिंल्लोकेऽपि दु:खमेवेति उभयत्र सुखाभावे सति कुतस्तरां संसारनिवृत्तिसाधनगन्धस्याशापीति भाव: ॥३९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु भगवत्सेवापेक्षया जीवभजनमेव मुख्यं जीवे भगवानप्यस्ति । अत: सांशो भगवांस्तत्र वर्तत इति तं परित्यज्य निरंश: केवल: कथं सेव्य इति चेत्तत्राहु:–यदि न समुद्धरन्तीति । यत्रांश: प्रकट: भगवांश्च प्रकट: तत्र तथैव । अत एव पूर्वं पुरुषेष्वेव भगवदाराधनमुक्तम् । यत्र पुन: स्वरूपं जडतामापन्नं भगवांश्च सर्वथा न प्रकट: तत्र किं स्यात् ? न हि काष्ठे वह्निरस्तीति शीतनिवृत्त्यर्थं होमार्थं वा काष्ठं सेव्यते । तस्मादप्रकटभगवत्स्वरूपा: सर्वथैव न सेव्या: । ननु कथं हृदि विद्यमान: स्वप्रकाशो भगवान् न प्रकाशते तत्राह–यतयोऽपि यदि हृदि स्थिता: कामजटा न समुद्धरन्ति तर्हि तेषामपि दुरधिगम: । यथा निखातोपरि वृक्षेष्वारोपितेषु तदुन्मूलनव्यतिरेकेण यथा खाता उद्घाटयितुं न शक्यन्ते एवमन्त: स्थितो भगवान् मायाजवनिकाच्छन्न: तदुपरि अविद्यया आच्छादित: ततो वासनाकामक्रोधादिवृक्षै: सर्वथा लुप्ताभिज्ञान: कथं दृश्येत ? तत्राप्यसतां देहाभिमानिनाम् । ननु तथापि वस्तुसामर्थ्यात् तत्र भगवानस्तीति फलं भविष्यतीति चेत्तत्राह–अस्मृतकण्ठमणिरिति । न स्मृतश्चासौ कण्ठमणिश्च तद्रूपो भगवानित्यर्थ: । यथा कण्ठमणि: कण्ठे स्थितोऽपि तं न सुखयति प्रत्युत विस्मृत्या स्वरूपमात्रे स्मृते दु:खमेव प्रयच्छति तथा भगवानपि तमेव न सुखयति, तत्पूजकं कुत: सुखयेत् । प्रत्युत यतीनां दु:खदोऽपि जात: यथा विस्मृतमणेस्तदन्वेषणपरस्य दु:खं भवति तथा आत्मान्वेषणार्थं सर्वस्वपरित्यागं कृत्वा गतानां यतीनां परमदु:खदो भवति । एतदामरणान्तं परित्यागधर्मपरिपालकानाम् । ये तु पुन: बहिरात्मोपलम्भाभावात् अतिदु: साधनै: क्लिष्टा यथाकथञ्चित् प्राणपोषणं कुर्वन्ति ते ह्यसुतृप: पूर्वं योगिनश्च । असुतर्पणार्थमेव योगिनो वा कृतेन सर्वेणापि जीवनमेव सम्पादयन्तीत्यर्थ: । तेषामुभयतोऽप्यसुखम् । तदुभयं निर्दिशति । अनपगतान्तकाद्भवतश्चेति । धर्मपरित्यागाद्यमसहित: कालोऽपि तेभ्यो दु:खं प्रयच्छति नरकं मृत्युं च प्रयच्छतीत्यर्थ: । अस्मृत्या भगवांश्च दु:खं प्रयच्छति । तेन जीवनदशायामपि दु:खम् । ननु भगवान् दु:खं कथं प्रयच्छेत् अप्राप्त: परं भवेदित्याशङ्क्याह–अनधिरूढपदादिति । अनधिरूढं पदं यस्येति । भगवत्पदं तैर्नारूढमिति चिन्ताकुला: क्लिश्यन्तीत्यर्थ: ।

"जीवेषु भगवानात्मा सञ्छन्नस्तेन तत्र न । भजनं सर्वथा कार्यं ततोऽन्यत्रैव पूजयेत् ॥" ॥२६॥३९॥

श्रीसुबोधिनीसारः

हे भगवन् हृदि चित्ते कामजटाः काममूलानि वासना यदि यतयः संन्यासिनो न समुद्धरन्ति नोत्पाटयन्ति । तेषामसतां मात्रोपजीविनां हृदि गतः प्राप्तः स्थितो वा भवान् दुरधिगमो दुष्प्रापः अस्मृतो विस्मृतो यः कण्ठे मणिस्तद्वत् असुतृपः पोषको येऽयोगिनो दम्भाचारास्तेषामुभयत इहामुत्र चापि असुखं दुःखम् अनपगतोऽनिवृत्तो योऽन्तको मृत्युस्तस्मात् नाधिरूढं पदं स्वरूपं यस्य तस्माद्भवतः ईश्वराच्च ॥२६॥३९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ननु यद्येवम्भूतो भगवानस्मिन् सङ्घात एवास्ति तर्हि कुतो न ज्ञायते इत्याशङ्क्य तत्र प्रतिबन्धकमाहुः-यदीति । गवन् ! यतयो मनइन्द्रियादिप्रणिधानशीला अपि यदि हृदिस्थिताः कामानां जटा वासना न समुद्धरन्ति नोत्पाटयन्ति न त्यजन्ति तर्हि तेषामसतां कामवासनाभिर्दुष्टान्तःकरणानां प्राणिनां हृदिगतो भवान् दुरधिगमो दुर्ज्ञेयः । तत्र दृष्टान्तमाहुः-यथा ठेस्थितो मणिर्विस्मृतश्चेद्दुरधिगमो भवति तथेति । तेषां तु भयं भवति, इत्याहुः-असुतृपयोगिनामिति । योगच्छद्मनेन्द्रियतर्पणपराणां यतोऽप्यसुखमिहामुत्र च दुःखमेवेत्यर्थः । को वा तेषां दुःखप्रदः इत्यपेक्षायामाहुः-अनपगतान्तकात् अनिवृत्तकालरूपाद्भवत । तत्र हेतुमाहुः-अनधिरूढमप्राप्तं पदं स्वरूपं स्थानं वा यस्य तस्मादिति । लोकाराधनधनार्जनादिप्रयासात् वैभवप्राकट्यभयाच्चेह तावन्महद्दुःखं भगवन्निष्ठाभावेनाविद्यावद्विषयत्वेन प्राप्तनिजधर्मातिक्रमनिबन्धन-दण्डरूपनरकादिप्राप्तेरमुत्र च दुःखमेवेत्यर्थः ॥३९॥२६॥

अन्वितार्थप्रकाशिका

यदीति ॥ हे भगवन् ! यतयो यदि हृदि स्थिताः कामजटाः न समुद्धरन्ति तदा तेषामसतां हृदि गतोऽपि त्वम् कण्ठमणिरिव दुरधिगमोऽसि । हे भगवन् ! असुतृपयोगिनाम् अनपगतान्तकात् अनधिरूढपदाद्भवतश्च इत्युभयतः अपि मित्यन्वयः । हे भगवन् ! यतयो मनइन्द्रियादिप्रणिधानशीला अपि यदि हृदिस्थिताः कामानां जटा वासना न समुद्धरन्ति यन्ति न परित्यजन्ति अन्तर्वान्ताशिनो भवन्ति तर्हि तेषामसतां कामवासनाभिर्दुष्टान्तःकरणानां प्राणिनां हृदिगतो भवान् कण्ठमणिरिव दुरधिगमो दुष्प्रापः । यथा कण्ठे स्थितो मणिर्विस्मृतश्चेद्दुरधिगमो भवति तथा असुतृपयोगिनां तु अनपगतान्तकात् तात् मृत्योः अनधिरूढमप्राप्तं पदं स्वरूपं स्थानं वा यस्य तस्माद्भवतश्चेत्युभयतोऽप्यसुखमिहामुत्र च दुःखमेवेत्यर्थः । न् यः कामयते मन्यमानः स कर्मभिर्जायते तत्र तत्र इत्यादिश्रुतेः ॥३९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भक्तिमतामपि सकामानां योगभ्रष्टत्वात् द्विविधं दुःखं तिष्ठतीत्याहुः ॥ यदीति ॥ हे भगवन् ! त्वदीयचरित्रश्रवणकीर्तनादिषु कृतप्रयत्ना मुनयः ॥ हृदिस्थिताः कामजटाः कामानां जटाः ॥ जटासदृशीः सन्ततीर्वासना ॥ वा जटामूलानि वासनाः यदि न समुद्धरन्ति नोन्मूलयन्ति तर्हि असताम् असत्कामासक्तत्वात् असच्छब्दवाच्यानां नां तेषां दुरधिगमो दुःप्रायस्त्वं सकामत्वेऽप्युपासकत्वात् ॥ हृदि गतोऽपि मनसि स्थितोऽपि ॥ अन्यत्रासक्तत्वादस्मृत-र्भवसि विषयभोगव्याकुलत्वात् विस्मृतकण्ठस्थमणितुल्यो भवसि ॥ सादृश्यादभेदोपचारः ॥ सन्निहितोऽपि दूरे वर्तमान सीत्यर्थः ॥

अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनम् ॥ इति प्रथमे ॥

अत एव असुतृपयोगिनाम् असून् प्राणान् तर्पयन्तीत्यसुतृपाः प्राणतर्पणेन देहेन्द्रियलालनपराः ॥ यद्वा ॥ सुखेन तृप्यन्त इति सुतृपा न भवन्तीत्यसुतृपाः ॥ कामोपभोगे तृप्तिवर्जिताः ॥ एवंविधा ये योगिनस्तेषामुभयतोऽपि उभाभ्यामपि ॥ सिलितितसिल् ॥ असुखं भवति तद्यथा ॥ अनधिरूढपदात् ॥ तैरनधिरूढमप्राप्तं पदमक्षरस्थानं यस्य स तथोक्तस्तस्माद्भवतः ॥ स्ति अक्षरसुखसदृशं सुखं यस्मिन् तत्तथाभूतम् ॥ परस्परेर्ष्यासूयामत्सराद्युपमर्दनेन दुःखबहुलं नरकतुल्यं स्वर्गस्थानं प्राप्तं

भवति ॥ ते योगभ्रष्टास्तव भक्तिप्रतापात्स्वर्गं प्राप्नुवन्तीति भावः ॥ अत्र स्वर्गे अनपगतान्तकात् अनिवृत्तान्मृत्योः असुखं भयं भवति ॥ भगवत्सुखज्ञानवतां तेषामनवधिकातिशयानन्दभगवत्पदसुखप्राप्त्यपेक्षया स्वर्गसुखं नरकसदृशमित्येकं दुःखं कालभयं द्वितीयं चेति द्विविधं दुःखमुक्तम् ॥ योगभ्रष्टानां स्वर्गप्राप्तौ स्वर्गस्य नरकतुल्यत्वे च प्रमाणानि ॥

अर्ज्जुन उवाच ॥

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ॥ अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥

श्रीभगवानुवाच ॥

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ॥ न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥

प्राप्य पुण्यकृताँल्लोकानुषित्वा शाश्वतीः समाः ॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥

मोक्षधर्मे च —

युधिष्ठिर उवाच ॥

कीदृशं निरयं याति जापको वर्णयस्व मे ॥ कौतूहलं हि राजन्मे तद्भवान्वक्तुमर्हति ॥

भीष्म उवाच ॥

अमूनि यानि स्थानानि देवानां परमात्मनाम् ॥ नानासंस्थानवर्णानि नानारूपकलानि च ॥

चतुर्ण्णां लोकपालानां शुक्रस्याथ बृहस्पतेः ॥ मरुतां विश्वदेवानां साध्यानामश्विनोरपि ॥

रुद्रादित्यवरूनां च तथान्येषां दिवौकसाम् ॥ एते वै निरयास्तात स्थानस्य परमात्मनः ॥ इत्यादिवाक्यानि ॥

अत्र द्वितीये सकामभक्तवर्णनम् ॥३९॥२६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थमपेतभगस्य पुनस्तत्प्राप्तौ किं निदानमित्यपेक्षायामनन्यप्रयोजनं त्वदुपासनमेवेत्यभिप्रेत्य तावद्भगवत्प्रावण्ये सत्यपि कामहतानामनर्थमाहुः ॥ यदीति ॥ हे भगवन् ! यतयः मनःप्रणिधानशीलाः अपि, यदि, हृदि स्थिताः कामजटाः कामानां मूलानि वासना इति यावत् । न समुद्धरन्ति नोत्पाटयन्ति, तर्हि असतां तेषां, हृदि गतः स्थितोऽपि, त्वं दुरधिगमः दुर्ज्ञेयः । क इव। अस्मृतकण्ठमणिः इवेति शेषः । कण्ठे स्थितोऽप्यस्मर्यमाणो मणिरिवेत्यर्थः । स यथा कण्ठे वर्तमानोऽप्यस्मृतश्चेदप्राप्त इव भाति तद्वदिति भावः । न केवलमेतावत् किं तु असुतृपयोगिनां प्राणेन्द्रियतर्पणपराणां योगच्छद्मनाम्, उभयतः अपि, असुखम् इहामुत्र च दुःखमेवेत्यर्थः । एतदेवाहुः । अनपगतान्तकात् इहानिवृत्तान्मृत्योरित्यर्थः । इह भोगपौष्कल्येऽपि मरणभयजं दुःखमस्त्येवेति भावः । परलोके तु, अनधिरूढपदात्, भवतः सकाशात् दुःखम्, अनधिरूढपदादिति भावप्रधानो निर्देशः । अप्राप्तत्वत्पदत्वादित्यर्थः । निजकर्मातिलङ्घिनां शास्तुर्यमरूपाद्भगवतस्त्वत्तोऽपि तेषां दुःखमिति भावः । कामवासनाच्छेदे तु मृत्युभयं निवर्त्तते भगवानपि दण्डं न प्रयोजयति । उक्तं च मार्कण्डेयपुराणे —

"कामः सर्वात्मना त्याज्यो यदि त्यक्तुं न शक्यते । मुमुक्षायां स कर्तव्यः सा हि तस्यैव भेषजम्" ॥२६॥ ॥४०॥

योगिरामानुजाचार्यकृतसरला व्याख्या

भगवत्प्रावण्ये सत्यपि कामहतानामनर्थमाहुः–यदीति । हे भगवन् ! ये यतयः मन इन्द्रियादिप्रणिधानशीलाः हृदि स्थिताः कामजटाः कामस्य मूलानि वासनाः न समुद्धरन्ति नोत्पाटयन्ति । यदि तेषामसतां कामवासनादुष्टान्तःकरणानाम् हृदिगतोऽपि हृदिस्थितोऽपि भगवान् अस्मृतकण्ठमणिरिव विस्मृतो यः कण्ठस्थमणिस्तद्वत् दुरधिगमः दुर्ज्ञेयः सः । यथा कण्ठे वर्तमानोऽपि

मृतश्चेदप्राप्त इव भवति तद्वदिति अर्थान्तरमाहुः–असुतृपेति। असुतृपयोगिनां योगच्छद्मना इन्द्रियतर्पणपराणाम् अनपगतान्तकात् वृतात् मृत्योः तथा अनधिरूढपदात् अनधिरूढम् अप्राप्तं पदं स्वरूपं स्थानं वा यस्य तस्मात् योगभ्रष्टैस्तैरप्राप्तरूपादित्यर्थः। एवम्भूताद्भवतः सकाशात् उभयतोऽपि इहामुत्र चासुखम्। दुःखमेव भवतीति शेषः। अनपगतान्तकादिह के दुःखम्। अनधिरूढपदात् भवतस्सकाशात् परलोके दुःखमित्यर्थः। अन्तकादिह लोके मरणरूपं दुःखं भवति। धिरूढपदादीश्वरात् निजधर्मातिक्रमणनिमित्तभगवद्दण्डनरूपनरकप्राप्तिरूपं दुःखम्। परलोके भवतीति भावः। हे भगवन्! ये हृदि स्थिताः कामजटाः न समुद्धरन्ति। यदि तेषामसतां हृदि गतोऽपि भवान् अस्मृतकण्ठमणिरिव दुरधिगमः असुतृपयोगिनाम् पगतान्तकात् अनधिरूढपदात् भवतश्चोभयतोऽप्यसुखं भवतीत्यन्वयः ॥३९॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

श्रुतौ कामान् विषयान्मन्यमानस्तद्गुणान् चिन्तयन् कामभिस्तैरेव कामैर्द्धर्माधर्मप्रवृत्तिहेतुभिर्विषयरूपैस्सह जायते शब्दात्पर्य्याप्तकामस्य कृतात्मनस्तु इहैव "सर्वे प्रविलीयन्ते कामा" इति एतावत्। भवत अप्राप्तिमात्रत्वेन तदाह–लोकद्वयेऽपि माह-लोकाराधनेन धनार्जनादिक्लेशो भोगवैभवप्राकट्यभयं चेत्येतद्द्वयं मृत्युरूपमेवेति मृत्युशब्देन द्वयं व्याख्यातम् अविद्या स्वरूपाज्ञानम्। तद्वन्तो विषया अधिकारिणो येषां निजधर्माणां तेषां भावस्तत्त्वम्। तेन हेतुना प्राप्ता ये निजाः वर्णाश्रमधर्मास्तेषामतिक्रमो दम्भन्यासाभिमानेनोल्लङ्घनं निबन्धनं कारणं यस्य। एवम्भूतो यस्त्वद्दण्डरूपी नरकस्तस्य परलोकेऽपि दुःखमित्यर्थः ॥३९॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

एवं तावदुक्तसाधनकदम्बेन ये भगवन्तं भजन्ति ते मृत्युं तरन्ति। इतरे संसरतीत्युक्तम्। इदानीं ये बहिः सङ्गं परित्यज्य मार्गे प्रवृत्ता अपि कथञ्चिदन्तर्वान्ताशिनः कामान् न मुञ्चन्ति ते भगवन्तं न प्राप्नुवन्ति न चेह सुखं लभन्ते। केवलं नैव प्राप्नुवन्तीति तान् शोचन्नाह–यदि नेति। हे भगवन्! ये यतयः संन्यासिनः हृदिस्थिताः कामजटाः कामवासनाः यदि न रन्ति नोत्पाटयन्ति तेषामसतां हृदिगतोऽपि भगवान् दुरधिगमः दुष्प्रापः। कथम् अस्मृतं कण्ठमणिः अस्मृतः विस्मृतः कण्ठे यो मणिस्तत्तुल्योऽसि। स यथा कण्ठे वर्तमानोऽपि विस्मृतश्चेदप्राप्त इव भवति तद्वत्। न केवलमेतावत् किन्तु पयोगिनामुभयतोऽप्यसुखम्। असुतृपाणामिन्द्रियतर्पणपराणां योगच्छलेन स्थितानामुभयत इहामुत्र च असुखम्। भवदुःखमेव। तदाह–अनपगतान्तकात् अनिवृतात् अन्तकात् मृत्योर्हेतोर्लोकाराधनधनार्जनादिक्लेशात् भोगवैभवप्राकट्यभयाच्चेह भवत ईश्वरादपि परत्र दुःखम्। कथम्भूतात्। अनधिरूढपदात्। अनधिरूढमप्राप्तं पदं स्वरूपं यस्य तस्मात्। रूपप्राप्त्यभावात्। अविद्यावद्विषयत्वेन प्राप्तनिजधर्मातिक्रमनिबन्धनात्। दण्डरूपनरकप्राप्तेरमुत्राप्यसुखमित्यर्थः। यदि न न्ति यतय इत्यत्र श्रुतिः —

"कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः ॥"

इति अर्थः–मुमुक्षोः कामत्याग एव प्रधानसाधनमिति दर्शयति–कामादृष्टं दृष्टेष्वेषु विषयान् यः कामयते मन्यमानस्तद्गुणान् ः। सः तैः कामभिः सह जायते। यत्र यत्र विषयप्राप्तिनिमित्तकामाः कर्मसु पुरुषं नियोजयन्ति तत्र तत्रेष्टविषयेषु तैरेव तो जायत इत्यर्थः। कृतात्मनस्तु इहैव सर्वे कामाः प्रविलीयन्ति विलयं गच्छन्ति। किम्भूतस्य–पर्याप्तकामस्य। त्वविज्ञानात्। परि समन्ततः। श्रीभगवद्गीतासु च —

पूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्। द्वत्कामाः यकप्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥" इति।

नु अयमात्मज्ञः कृतात्माऽयं कामीति कथं ज्ञायते तज्ज्ञानमाह श्रुतिः —

"आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनु सञ्चरेत् ॥" इति।

अर्थश्च — सच्चिदानन्दपरमात्मा देहादिव्यतिरिक्तोऽयमहमस्मीति आत्मानं यः पुरुषश्चेति यदि विजानीयात्तर्हि स किमिच्छन्

किमात्मातिरिक्तं वस्त्वन्तरमस्ति तदिच्छन् कस्य कामाय आत्मनो व्यतिरिक्तस्य कस्य वस्तुनः शरीरमनुसंज्वरेत्। शरीरोपाधिकृतसुखदुःखरागद्वेषभयाभिमानादिभिः सन्तप्तो भवेत्स्वार्थाद्भ्रश्येत् इति। तस्मादात्मज्ञानविमूढानां विषयासक्तचित्तानां कुयोगिनामुभयतो दुःखमित्युक्तम्।

अथ स्वामिचरणानाम्- अत्रैतज्ज्ञातव्यं स्वयं परमहंसर्षभो निवृत्तसमस्तमायागुणेन्द्रियव्यापारोऽनवरतभगवद्गुणस्मरण-कीर्तनादिभिः निदिध्यासितपरमात्मतत्त्वोऽपि स्वस्य संन्यासित्वात्कुसंन्यासिनां दोषानात्मन्यारोप्य परमानन्दं श्रीकृष्णं प्रार्थयन्नाह-

दम्भन्यासेति।

दम्भन्यासमिषेण वञ्चितजनं भोगैकचिन्तातुरं सम्मुह्यन्तमहर्निशं विरचितोद्योगक्लमैराकुलम्॥

आज्ञालङ्घिनमज्ञमज्ञजनतासम्माननासन्मदं दीनानाथ दयानिधान परमानन्द प्रभो पाहि माम्॥

भो प्रभो ! परमानन्द ! मां पाहि। मां कथम्भूतम्। दम्भन्यासमिषेण वञ्चितजनम्। दम्भेन यो न्यासस्तस्य मिषेण छलेन। वञ्चिता जना येन दम्भन्यासत्वात् भोगेषु एकया चिन्तायाऽऽतुरं दुःखितम्। अत एवाहर्निशं मुह्यन्तं मोहं प्राप्नुवन्तम्। यतो विरचितोद्योगक्लमैराकुलम्। विरचितो य उद्योगः मठनिर्माणादिव्यापारस्तत्र यः क्लमः। इतस्ततो धनाद्यर्थपरिश्रमस्तेनाकुलमवशम्। अतः अज्ञमतस्तवाज्ञालङ्घिनम्। "यावज्जीवमग्निहोत्रं जुहोति शान्तो दान्तः" इत्याज्ञां विलङ्घ्य कृतसंन्यासम्। तत्रापि संन्यासधर्मं परित्यज्य भोगाद्याकुलत्वादाज्ञालङ्घिनमिति। तत्कुतः। यतः अज्ञजनतासम्माननासन्मदम्। अज्ञानां जनतानां जनसमूहानां सम्माननाभिः सत्कारैः सम्यग्मदो यस्य तम्। एवम्भूतं माम्। हे दीननाथ ! पाहि। इति एतेन एवम्भूतं जनं समुद्धर्तुं श्रीकृष्ण एव प्रभुर्भवतीति दर्शितम्॥३९॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवत्प्रावण्ये सत्यपि कामहतानामनर्थमाह-यदि नेति। हे भगवन् ! यतयो यतनशीला अपि यदि न समुद्धरन्ति संसारमिति शेषः। कथम्भूताः। हृदि कामजटाः विषयवासनावासितचित्ता इत्यर्थः। नदा तेषां हृदि गतोऽपि त्वम् असुतृपयोगिनामिन्द्रियपोषणपराणामत एवासताम्। विषयाविष्टचित्तानामस्मृतकण्ठस्थोऽप्यस्मर्यमाणो मणिरिव दुरधिगमो दुष्प्राप्यः न ज्ञायसे। तैरित्यर्थः। अतस्तेषां दाम्भिकानां विषयाभिज्ञानेन योगच्छद्मना जगद्वञ्चकानामुभयतः इहलोके परलोके च न सुखम्। तदुक्तं प्रह्लादेन —

"मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः।

प्रायः परं पुरुष ते त्वजितेन्द्रियाणां वार्ता भवन्त्यत न वात्र तु दाम्भिकानाम्॥"

इति। अथा अभियुक्तैरप्युक्तम् —

'हरति परधनं निहन्ति जन्तून् वदति तथाऽनृतनिष्ठुरादयश्च।

अशुभजनतदुर्मदस्य पुंसः कलुषमतेर्हृदि तस्य नास्त्यनन्तः॥'

'रागादिदूषिते चित्ते न हृदि मधुसूदनः। न बध्नाति रतिं हंसः कादाचित्कर्दमाम्भसि॥'

इति। उभयत्र सुखाभावे हेतुमाह-अनपगतान्तकादनधिरूढपदाद्भवत इति। लोकरञ्जनपूर्वकधनार्जनक्लेशात् स्वमहत्त्वलज्जया भोगप्रसिद्ध्यभावाच्च इह लोके तावत्सुखं नास्ति न दुःखनिवृत्तिनापगतोऽन्तको मृत्युस्तस्मात्। निष्कापट्यभगवद्भजनाभावेन भवतोऽनधिरूढपदात् अनधिरूढपदत्वात् भावप्रधानो निर्देशः। भगवत्पदाप्राप्तेरित्यर्थः। यदि न समुद्धरन्तीति पाठे हृदि कामजटा न समुद्धरन्ति नोत्पाटयन्ति चेत्तदा तेषां दुरधिगम इत्यर्थः। तथा सति विभक्तिपरिणामः हृदयादित्यर्थः॥३९॥

यत्न शि
भी है मणी परन
हो तथापि उनक
परायण कुयोगिय
निवृत्त भए मृत्यु
दण्ड देने वाले य

त्वदवगम
अनुयुगम

हे सगुण, !,
देहभृतां, गिरः, न, वे

ननु, यतेर्न कि
च "एष नित्यो महिम
त्वदवगमी त्वज्ज्ञानवान्
फलभूतान् गुणविगुणान
विधिनिषेधलक्षणा न वे
श्रवणभृतः अनुदिनं श्रव
उपदेशसन्ततिस्तया सत
चानवरतं त्वत्कथाश्रवणा
सुखमिति॥

भावार्थदीपिकाप्रक
विषयसुखास्वादनेन। अपह
श्रुत्यापि तथैव प्रोक्तमित्याह
"एको नित्यो महिम
तस्यैव स्यात्पदवित्तं
विरजो विचिकित्सो ब्राह्मणो

१.स्तर्हि न देह-वीर।

कृष्णप्रिया

यत्न शील योगिजन निज हृदयमें स्थित विषय वासना को यदि नहि उखाडते है तो जीस कण्ठमें स्थित भी है मणी परन्तु उसके स्मरण न होने से अप्राप्त के हि समान है । वैसे ही आप उन असत्पुरुषोंके हृदयमें स्थित हो तथापि उनको दू:खसे भी प्राप्ति के योग्य आप नहि हो इतना हि नहि है किन्तु प्राण इन्द्रयो की तृप्ति करनेमें परायण कुयोगियो को इस लोकमें तथा परलोकमें दु:खही होता है सुख नहि होता क्योंकि इस लोकमें तो नहि निवृत्त भए मृत्यु से मरण के भयसे दु:ख हि रहता है और आप के पद की प्राप्ति न होने से परलोक में कर्मानुसार दण्ड देने वाले यम रूप आप को दू:ख ही होता है ।।३९।।

त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि[1] देहभृतां च गिरः ।
अनुयुगमन्वहं सगुण गीतपरम्परया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ।।४०।।

कर्दमक्षमा

हे सगुण, !, त्वदवगमी, भवतः, कर्मफलदातुः, ईश्वरात्, उत्थयोः, शुभाशुभयोः, गुणविगुणान्वयान्, न, वेत्ति, तर्हि, देहभृतां, गिरः, न, वेत्ति, अनुयुगं, तव, गीतपरम्परया, अन्वहम्, श्रवणभृतः, त्वम्, मनुजैः, अपवर्गगतिः ।।४०।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ननु, यतेर्न किमपि कृत्यमस्ति प्रारब्धमेव सुखोपभोगेनापक्षय्यते अतः किमिति वृथा शप्यते उभयतोऽप्यसुखमिति श्रूयते च "एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान्" इत्यादि तत्राह त्वदवगमीति । हे सगुण षड्गुणैश्वर्ययुक्त ! त्वदवगमी त्वज्ज्ञानवान् भवदुत्थशुभाशुभयोर्भवतः कर्मफलदातुरीश्वराद्धेतोरुत्थयोराविर्भूतयोः शुभाशुभयोः प्राचीनपुण्यापुण्यकर्मणोः फलभूतान् गुणविगुणान्वयान् सुखदुःखसम्बन्धान्न वेत्ति नानुसन्धत्ते तर्हि तदानीं च देहभृतां देहाभिमानिनां प्रवृत्तिनिवृत्तिकरीर्गिरो विधिनिषेधलक्षणा न वेत्ति विगतदेहाभिमानतया कार्याकार्यबोधाभावान्न नियुज्यत इत्यर्थः । युक्तञ्चैतत् यतः कारणान्मनुजैरन्वहं श्रवणभृतः अनुदिनं श्रवणेन चेतसि धृतस्त्वं तेषामपवर्गगतिरपवर्गरूपा गतिर्भवसि कथं श्रवणमृतः अनुयुगं प्रतियुगं या गीतपरम्परा उपदेशसन्ततिस्तया सत्सम्प्रदायानुसारेणेत्यर्थः । एतदुक्तं भवति ये तावत्तत्त्वज्ञानिनो न तेषां कर्माधिकारशङ्काऽपि ये चानवरतं त्वत्कथाश्रवणादिनिष्ठास्तेषमप्यासन्नभवत्पदानां न विधिनिषेधबाधः इतरेषान्तु योगच्छद्मनेन्द्रियलालसानामुभयतोऽप्यसुखमिति ।।

अवगमं तव मे दिश माधव स्फुरति यन्न सुखासुखसङ्गमः ।

श्रवणवर्णनभावमथापि वा न हि भवामि यथाविधि किङ्करः ।।२७।। ।।४०।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — अत्राक्षिपति-नन्विति । यतेः संन्यासिनः । कृत्यं कर्तव्यम् । सुखोपभोगेन विषयसुखास्वादनेन । अपक्षय्यतेऽपाक्रियते । यतोऽतो हेतोः स यतिः शप्यते उपालभ्यते उभयतोऽप्यसुखम् इत्येवंरूपेण । श्रुत्यापि तथैव प्रोक्तमित्याह-श्रूयते चेति —

"एको नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् ।।

तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेन नैनं पाप्मा तरति सर्वं पाप्मानं तरति । नैनं पाप्मा तपति । विपापो विरजो विचिकित्सो ब्राह्मणो भवति ।।" इति ।

---

[1] स्तर्हि न देह-वीर. ।

अर्थः — ब्राह्मणस्य ब्रह्मविदः एष महिमा माहात्म्यं नित्यमतः कर्मणा शुभेन न वर्धते वृद्धिं न याति, तथाऽशुभेन कर्मणा नो कनीयान् क्षीयते अन्ये तु महिमानः कर्मकृता अनित्याः अतस्तं महिमानं विदित्वा यस्यैष महिमा तस्यैव परमात्मनः पदवित्स्वरूपवित् स्यात् स पापकेन शुभाशुभलक्षणेन कर्मणा ज्ञानाज्ञानकृतेन न लिप्यते इति । ततः किमत आह श्रुतिः-एनं ब्रह्मविदं पाप्मा पापं न तरति नातिक्रामति स तु सर्वं भूतं भवद्भविष्यत्पापं तरति अतिक्रम्य वर्तते एवं योज्यं न तपति न तापयति स तु सर्वं तपति भस्मसात्करोति इति । तदानीं त्वदवगमावसरे । इत्यर्थ इति-देहाभिमानिनामेव विधिनिषेधे प्रवृत्तिरस्ति तद्धीनानां न सास्तीति भावः । एतद्विधिनिषेधराहित्यं युक्तमुचितम् । इत्यर्थ इति-एतेन काल्पनिकासत्यसम्प्रदायप्रवृत्तानां स्वप्नेऽपि भगवत्प्राप्तिर्न सम्भवतीति भावः । फलितमाह-एतदुक्तं भवतीत्यादिना । इतरेषां त्वदवगमत्वद्भक्तिरहितानाम् । स्वामिनाम्-अवगममिति । अवगमं ज्ञानम् । यद्येन त्वदवगमेन । सुखासुखयोः सङ्गमो न स्फुरति भासते । अथापि यद्वा । यथा येन । विधिकिङ्कर: प्रवृत्तिमार्गानुयायी ॥★॥

श्रीधरानुयायिनी — इदमेव स्पष्टीकरोति-त्वदिति । यतस्तव यथार्थसाक्षात्कारवानत एव देहाभिमानशून्यः, अत एव स कर्मफलप्रदपरमेश्वरप्रेरितप्राचीनधर्माधर्मकर्मफलीभूतसुखदुःखसम्बन्धान् देहाध्यासप्रयुक्तकर्मादिकर्तव्यताबोधकवेदवाचश्च नानुसन्धत्ते । ये वा परम्परागतसनातनसत्सम्प्रदायानुरोधेनानुक्षणप्रवर्तमानत्वत्कथाश्रवणादिनिष्ठया त्वां चित्ते धारयन्ति तेषामपि त्वत्पादपद्मासन्नतया मिथ्यासंन्यासिनामिव न विधिनिषेधाधिकारो दुःखं वा किन्तु तस्य तेषां च मोक्षाख्या तुल्यैव गतिस्त्वमेव भवसि । यद्वा-युगे युगे प्रतिदिनं मनुजैः कृता या सगुणस्याप्राकृतगुणाढ्यस्य तव या गीतपरम्परा त्वन्नामकीर्तनादिप्रवाहरूपा तया त्वं श्रवणभृतस्तत्कर्णयोः परिपूर्णः सन्नपवर्गगतिर्भवसि । अपकृष्टा वर्गा धर्मार्थकाममोक्षाख्याश्चत्वारः पुरुषार्था यतस्तथाभूता गतिर्भवसि प्रेमभक्तिप्रद इति यावत्- "कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ।" इत्याद्युक्तेः ॥★॥

तोषिणी — तच्छ्रुत्वा तदेकपरायणाः सोल्लासमभिस्पष्टयन्ति-त्वदिति । त्वद्याथार्थ्यानुभवी तु भवदुत्थयोर्भवद्भक्तिप्रभावेण स्थातुमसमर्थयोरपि साधनबाहुल्याय तद्देहं रिरक्षूणां भवतैव तदाभासत्वेन स्थापितयोः शुभाशुभयोः प्रारब्धरूपयोर्गुणविगुणौ सुखदुःखे तयोरन्वया अनुवृत्तयस्तान्न वेत्ति ते सन्ति न वेति न जानात्यपि, यदा तान्न वेत्ति तदा देहभृतां देहाभिमानिनां विधिनिषेधरूपा गिरः सुतरां न वेत्ति । यद्वा-गिरः स्तुतिनिन्दारूपाश्च न वेत्तीति । अथवा भवत् उद्भवत् उत्थमुत्थितं च देहभृतां तयोर्जायमानोत्थितयोः देहभृद्भिः क्रियमाणयोः कृतयोरिति यावत्, तयोः शुभाशुभयोः पुण्यपापयोर्गुणविगुणान्वयान् गुणदोषसम्बन्धान्न वेत्ति कः किं करोति कृतवान् वा । ततो वा भद्राभद्रं किं जातं तत्सर्वं न जानातीत्यर्थः । तर्हि तेषां स्तुतिनिन्दारूपाः स्वविषयिका गिरश्च न वेत्ति, त्वदनुभवानन्दाविष्टत्वादेवेत्यर्थः । तर्हि किं करोतीत्यपेक्षायां तत्सम्प्रदायप्रवर्तकमहाजनदृष्टान्तेन दर्शयति-अन्विति । यतोऽनुगमाद्धेतोः स्वभक्त्येकवशत्वं मनुजैः श्रीस्वायम्भुवमनुतुल्यैः प्राणिभिरनुयुगं तत्राप्यन्वहं गुणगीतपरम्परया श्रवणद्वारा चेतसि धृतो भवसि । तदुक्तं तृतीये श्रीमनुमुद्दिश्य —

"अयातयामास्तस्यासन् यामाः स्वान्तरयापनाः । शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ॥" इति ।

तत्र हेतुः-अपवर्गस्यापि गतिराश्रयो दशमपदार्थस्त्वं परमपुरुषार्थत्वादेवेति भावः । तदेवं —

"यावत्त्वच्छ्रवणादेरेवम्भूतं महिमानं न जानन्ति तावदेव साधनान्तरे प्रवर्तन्ते ॥"

इति च "तावत्कर्माणि कुर्वीत" "मत्कथाश्रवणादौ च श्रद्धा यावन्न जायते ।" इत्यादेः ॥★॥

विश्वनाथस्तु — अपवर्गगतिः पञ्चमस्कन्धगद्यदृष्ट्या प्रेमभक्तिप्रदः । अपकृष्टा वर्गाश्चत्वारोऽपि यतस्तथाभूतो वा गतिर्भवसीत्याह-अत्र श्रुतयः —

"तैरहं पूजनीयो वै भद्र कृष्णनिवासिभिः । तद्धर्मगतिहीना ये तस्यां मयि परायणाः ॥
कलिना ग्रसिता ये वै तेषां तस्यामवस्थितिः । यथा त्वं सह पुत्रैश्च यथा रुद्रो गणैः सह ॥
यथा श्रियाभियुक्तोऽहं तथा भक्तो मम प्रियः ॥"

गोपालतापन्यः ॥ तद्धर्मगतिहीना इति कलिना ग्रसिता इति च दुराचारत्वव्यञ्जकम् । तस्यां मथुरायां तदेव दुराचारे सति द्वयोरुपासकयोर्मध्ये —

"यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः । ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति ॥

सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा । अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ॥" इति भगवता यतिर्निन्दितः ।

"अपि चेत्सुदुराचारः भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥"

इति स्वभक्तोऽभिनन्दितो यथा तथैव स्वस्तवान्ते श्रुतिभिरपि त्वदनुवर्तिनीभिः समवादीति ज्ञेयम् । (२७) ॥४०॥

नीलकण्ठी —

एवं श्रवणमनननिदिध्यासनाभ्यासेन साक्षात्कृतात्मतत्त्वस्य स्थितप्रज्ञस्य द्वे अवस्थे समाधिर्व्युत्थानं च क्रमेण पूर्वोत्तरार्धाभ्यामाह-त्वदवगमीति । त्वदवगमी त्वां साक्षाद्विद्वान् भवतो विदुषः सकाशादुत्थे उत्थिते दूरीभूते "तत्सुकृतदुष्कृते विधुनुते" "तदा विद्वान् पुण्यपापे विधूय" इत्यादिश्रुतिभ्यः त्वत्तो दूरीभूतयोः शुभाशुभयोः सुखदुःखयोः । कर्मणि षष्ठी । न वेत्ति न जानाति । समूलमुन्मूलितवासनो विद्वान् समाधौ दुःखं न वेत्ति "यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ।" इति स्मृतेः । अत्र हेतुः, यस्मात्तर्हि समाधिकाले देहभृतां प्राणिनां गुणविगुणान्वयानुत्तमत्वाधमत्वसम्बन्धान्न वेत्तीत्यनुषज्यते । तथा गिरः शब्दादीन्विषयांश्च न वेत्ति । "अत्र पिताऽपिता भवति माताऽमाता-लोका अलोका वेदा अवेदाः" इत्यादि-श्रुतेः ।

"यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् ॥

तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् । अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ ॥" इत्यादि च ।

उत्तमाधमजात्यादिव्यवस्था वेदशास्त्रादिप्रामाण्यं च प्रबोधात्प्रागेव न तदूर्ध्वमिति भावः । एवं स्थितप्रज्ञस्य समाध्यवस्थामुक्त्वा व्युत्थानावस्थामाह-अनुयुगमिति । युगं मिथुनं चिज्जडैक्यं प्रमातृत्वमनुसृत्येत्यर्थः । अन्वहम् अहङ्कारममकारावनुसृत्येति । अनुयुगमन्वहं सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः तं दग्धपटवदनुवर्तमानमनुसृत्य स्थितो योगी सगुणस्य श्रीकृष्णादेर्गीतं यशोवर्णनं तस्य परम्परया सातत्येन पूर्वोक्तं सर्वं न वेत्तीत्यनुवर्तते । समाहितो योगी ज्ञेयाभानात्सुखदुःखादिकं न वेत्तीति । "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् ।" इति श्रुतेः । व्युत्थितश्च भगवद्गुणगानानन्दनिमग्नो न द्वैतातपसन्तापकणिकामनुभवति- "स चक्षुरचक्षुरिव" इत्यादिश्रुतेः ।

"देहं विनश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपम् ।

दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः ॥" इति स्मृतेश्च ।

अयम्भावः — "उभे उ हैवैष एते तरति" इति विदुषः पूर्वपुण्यपापतरणस्य "तस्य पुत्रादायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्" इत्यागामिपुण्यपापासम्बन्धस्य च श्रवणान्न तदुत्थसुखादिप्रसक्तिरस्ति, अस्ति तु प्रारब्धकर्मोत्थयोस्तयोः "विमुक्तश्च विमुच्यते" "भूयश्चान्ते विश्वमायानिवृत्तिः" इति द्विर्विमुक्तिश्रवणेन प्रारब्धकर्मणामनष्टत्वावगमात् । तथाप्युक्तविधो योगी नान्यवत्सुखदुःखे विन्दतीति । ननु विद्वदविदुषोर्व्यवहारः समानः- "पश्वादिभिश्चाविशेषात्" इति न्यायात् । तथा च व्युत्थितो योगी कर्म वा देहपुत्राद्यभिमानं वा कुतो नानुसरतीत्यत आह-श्रवणेति । यतो हेतोरपवर्गगतिस्त्वं मोक्षलक्षणः प्राप्यात्मानं मनुजैरधिकारिभिः श्रवणेन भगवत्कथाश्रवणादिप्रणाड्या भृतो धृतः साधकदशायामतः सिद्धदशायामपि तदेव अव्यवहितपूर्वसंस्कारदार्ढ्यादनुतिष्ठन्ति न कर्मादीत्यर्थः । अन्यदपि जीवन्मुक्तलक्षणम् —

"अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च । निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥"

इत्यादिशास्त्रादवगन्तव्यम् ॥ (२७) ॥४०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तच्छ्रुत्वा तदेकपरायणाः सोल्लासमभिस्पष्टयन्ति–त्वदिति । त्वद्याथार्थ्यानुभवी तु भवदुत्थयोर्भवद्भक्तिप्रभावेण स्थातुमसमर्थयोरपि साधनबाहुल्याय तद्देहं रिरक्षूणां भवतैव तदाभासत्वेन स्थापितयोः शुभाशुभयोः प्रारब्धरूपयोर्गुणविगुणौ सुखदुःखे तयोरन्वया अनुवृत्तयस्तान्न वेत्ति ते सन्ति न वेति न जानात्यपि, यदा तान्न वेत्ति तदा देहभृतां देहाभिमानिनां विधिनिषेधरूपा गिरः सुतरां न वेत्ति। यद्वा–गिरः स्तुतिनिन्दारूपाश्च न वेत्तीति। अथवा भवत् उद्भवत् उत्थमुत्थितं च देहभृतां तयोर्जायमानोत्थितयोः देहभृद्भिः क्रियमाणयोः कृतयोरिति यावत्, तयोः शुभाशुभयोः पुण्यपापयोर्गुणविगुणान्वयान् गुणदोषसम्बन्धान्न वेत्ति कः किं करोति कृतवान् वा। ततो वा भद्राभद्रं किं जातं तत्सर्वं न जानातीत्यर्थः। तर्हि तेषां स्तुतिनिन्दारूपाः स्वविषयिका गिरश्च न वेत्ति, त्वदनुभवानन्दाविष्टत्वादेवेत्यर्थः। तर्हि किं करोतीत्यपेक्षायां तत्सम्प्रदायप्रवर्तकमहाजनदृष्टान्तेन दर्शयति–अन्विति। यतोऽनुगमाद्धेतोः स्वभक्त्येकवशत्वं मनुजैः श्रीस्वायम्भुवमनुतुल्यैः प्राणिभिरनुयुगं तत्राप्यन्वहं गुणगीतपरम्परया श्रवणद्वारा चेतसि धृतो भवसि। तदुक्तं तृतीये श्रीमनुमुद्दिश्य —

"अयातयामास्तस्यासन् यामाः स्वान्तरयापनाः । शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ॥" इति।

तत्र हेतुः–अपवर्गस्यापि गतिराश्रयो दशमपदार्थस्त्वं परमपुरुषार्थत्वादेवेति भावः। तदेवं —

"यावत्त्वच्छ्रवणादेरेवम्भूतं महिमानं न जानन्ति तावदेव साधनान्तरे प्रवर्तन्ते ॥"

इति च "तावत्कर्माणि कुर्वीते"त्यादेः। अथवा कथं तादृशमदवगमित्वं स्यात्। तत्र तथैव सदाचारं दर्शयन्ति–अनुयुगमन्वहमिति। सर्वदेवेत्यर्थः। यत इति यदर्थमित्यर्थः। अतः पूर्ववन्नास्य साधनस्य दौर्बल्यमिति भावः। श्रुतयस्तु दर्शिता एव ॥२७॥४०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एतच्चाशेषं त्वदभक्तविषयकमेव, त्वद्भक्तस्य तु दैवापतितविषयभोगेनापि न कुत्रापि दुःखम्, किन्तु सर्व्वत्रैव महत् सुखमित्याहुः–त्वदवगमीति। सर्व्वथा सर्व्वोत्कृष्टतया यस्त्वां जानाति, स इत्यर्थः। किंवा तवागमो ध्यानादिलक्षणः। यद्वा, असम्भावनादिनिरासकयुक्त्या स्फोरणं तद्वान्, भवदुत्थयोर्विचित्रविनोदार्थं भवदिच्छयोद्भुतयोरिति विशेषणं गुणविगुणान्वयावेदने हेत्वन्तरमपि ज्ञेयम्। भक्तैरीश्वरेच्छायाः परिपाल्यत्वाद् गभीरभक्तवात्सल्यजातत्वादत एव प्रीत्यानुमोद्यत्वाच्च। कथं भक्त इत्यपेक्षायामाहुः–अनुयुगमिति। प्रतियुगमन्वहं च। मनुजैः सर्व्वमनुष्यैर्द्वारभूतैषा गीतपरम्परा तन्माहात्म्यसम्बन्धिपीतश्रेणीतया त्वं श्रवणभृतः, किंवा श्रवणयोर्भृतः, ते परिपूर्णधृतः सदैव श्रुत इत्यर्थः। हे सगुणेति, तच्च त्वत्कारुण्यप्रभावादेवेति भावः। किंवा हे सर्वसद्गुणार्णवेति गीतपरम्पराया अपि तादृशत्वमभिप्रेतम्। न च तस्य त्वां विना किञ्चिदन्यत् साध्यमित्याहुः–अपवर्गगतिः, अपवर्गस्यापि गतिराश्रयः, किंवा अपवर्गेण गतिर्गम्योऽपि त्वमेवेत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, भवदुत्थयोर्भवदिच्छोद्भूतयोः शुभाशुभयोः सदसत्कर्म्मणोर्गुणदोषसम्बन्धान् न वेति न मन्यते, नापेक्षत इत्यर्थः। तत्र भवदुत्थेत्येष एव हेतुः– 'यथा नियुक्तोऽस्मि तथा करोमि' इति सर्व्वत्रेश्वरेच्छामननात्। अतस्तर्हि त्वद्भक्तिप्रवृत्तिकाल एव देहभृतां गिरो न वेत्ति, तत्रानधिकारात्, तथा चोक्तं श्रीभगवता (भा० ११/२०/९) —

"तावत्कर्माणि कुर्व्वीत न विर्व्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥" इति। अत एवोक्तं करभाजनेन (भा० ११/५/४१) 'देवर्षिभूतासनृणां पितृणाम्' इत्यादि–सगुणा सर्व्वसद्गुणालङ्कृता या गीतपरम्परा तया। यद्वा, त्वद्भक्तस्तु सदा परमात्यन्तसुखे मग्न एवेत्याहुः–त्वदवगमी त्वयि मग्नमनाः परमभक्तो भवदुत्थशुभाशुभयोर्भवज्जायमानमुत्थमुत्थितं च तयोर्जायमानोत्थितयोः, देहभृतां देहभृद्भिः क्रियमाणकृतयोरिति यावत्, शुभाशुभयोः पुण्यपापयोर्गुणविगुणान्वयान् गुणदोषसम्बन्धान् न वेत्ति। कः किं करोति कृतवान् वा, ततो वा भद्राभद्रं किं जातं तत् सर्व्वं न जानातीत्यर्थः। तर्हि तेषां स्वविषयका गिरश्च न वेत्ति। किञ्च, यैर्मनुजैर्युगे युगे सगुणा त्वदीयुणसहिता या गीतपरम्परा तया श्रवणभृतः कर्णयोर्धृतस्त्वम्,

तेषामपवर्गगतिः प्राप्त्युपायो यस्य तथाभूतस्त्वम्, तेषामपवर्गगतिः प्राप्त्युपायो यस्य तथाभूतस्त्वं भवसि, संसारध्वंसेन निजसामीप्यप्रदो भवसीत्यर्थः ॥४०॥

[अभक्तानाक्षिप्य भक्तानां वर्णनस्य श्रीभगवतः स्तुतौ पर्य्यवसानात् सिद्धान्, साधकांश्च भक्तान् वर्णयन्ति-त्वदवगमीति। त्वामात्मकोटेरपि प्रेष्ठं जानन् प्रेमभरेण त्वयि कन्दर्पवृन्दनिन्दि-पादनखसौन्दर्य्ये रासादिमधुरविविधलीलाशालिनि मनचित्त इत्यर्थः। भवदाविर्भूतपुण्यपापयोः फलरूपसुखदुःखसम्बन्धान्न वेति, तदा प्रेमाब्धिमज्जने देहिनामन्येषां कर्म्मपराणां 'भो इदं कुरु, भो इदं मा कृथाः' इत्यादिलक्षणा गिरश्च न वेत्ति, त्वद्व्यततिरिक्तसंवेदनाभावात्। इति सिद्धानुक्त्वा साधकानाहुः-अनुयुगमिति। गुणाः सौन्दर्य्य-माधुर्य्य-भक्तवात्सल्यवैदग्ध्यादयस्तैः सहिता प्रतियुगमनुवर्तमाना या गीतपरम्परा गीतगोविन्दादितुल्या गानावली तया, मनुजैः प्रत्यहं श्रवणेषु भृतः सन् मोक्षस्य प्रभुरपि त्वम्। यतः संयतः हृदीति शेषः। श्रवणेन्द्रियद्वारा हृदि बद्ध इत्यर्थः ॥४०॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भगवत्पदाप्रासेः भगवज्ज्ञानवतां सम्पत्तिमाह-त्वदवगमीति। भवदुत्थयोः संसारोत्थयोः शुभाशुभयोः पुण्यापुण्ययोर्गुणविगुणान्वयात् देहभृतां गिरश्च स्तुतिनिन्दावाक्यानि। त्वदनुगमी त्वदनुभववान् न वेत्ति। मनुजैः सहास्मत्कुलगीतपरम्परया श्रवणभृतः श्रोत्रेणावगतः चेतसि धृतः त्वं तेषाम् अपवर्गगतिः अपवर्गरूपा गतिर्भवसि। सत्सम्प्रदायानुसारेण गीतः ॥४०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अथानन्यप्रयोजनानां भगवद्भक्तानां तूभयतः सुखमेवेत्याहुः- त्वदवगमीति। त्वामवगच्छतीति त्वदवगमी त्वद्याथात्म्यज्ञानवान्। 'आर्तो जिज्ञासुरर्थार्थी ज्ञानी च' इत्युक्तेषु तुरीय इत्यर्थः। भवतीति भवः संसारः तस्मिन्नुत्थयोरुपस्थितयोः फलजननाय समुत्थितयोरित्यर्थः। तयोः शुभाशुभयोः पुण्यपापात्मके कर्मणोर्गुणविगुणान्वयान् फलरूपसुखदुःखसंबन्धांस्तर्हि तदानीं च देहभृतां गिरः स्तुतिनिन्दावाक्यान्यपि न वेत्ति नानुसन्धत्ते। कुतः। यतस्त्वमपवर्गगतिः तस्य देहान्तेऽपवर्गसाधनभूतः अनेन परलोके सुखमुक्तम्। इह तु मनुजैस्तावकैः सहानुयुगं प्रतियुगानुवर्तिन्या सगुणगीतपरम्परया सगुणस्यानन्तकल्याणगुणयुक्तस्य तव गीतपरम्पराया कथामृतपरम्परायान्वहं श्रवणभृतः श्रवणेन चेतसि धृतः यतस्त्वत्कथामृतपानमत्तस्ततोऽयं न वेत्तीत्यर्थः ॥४०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

पूर्वं व्याख्यातचरम्। पाठभेदत्वात्।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

त्वदिति-त्वद्याथार्थ्यानुभवोनुभवदुत्थयोः भवत् उद्भवत् उत्थमुत्थितं च। देहभृतां तयोः जायमानोत्थितयोर्देहवद्भिः क्रियमाणकृतयोरिति यावत्। तयोः शुभाशुभयोः पुण्यपापयोः गुणविगुणान्वयात् गुणदोषसम्बन्धात् न वेत्ति कः किं करोति कृतवान् वा ततो वा भद्राभद्रं किं जातं तत् सर्व्वं न जानातीत्यर्थः। तर्हि तेषां स्तुतिनिन्दारूपाः स्वविषयिकाः गिरश्च न वेत्ति। त्वदनुभवानन्दाविष्टत्वादेवेति वेत्यर्थः। तर्हि किं करोति तत्राहुरनुयुगमिति। यतोऽवगमाद्धेतोः स्वभक्त्येकवशस्त्वं मनुजैः श्रीस्वायम्भुवमनुतुल्यैः प्राणिभिरनुयुगं तत्राप्यन्वहं तृतीये श्रीमनुमेवोद्दिश्य —

"अयातयामास्तस्यासन् यामाः स्वान्तरयापनाः। शृण्वतो ध्यायतो विष्णोः कुर्व्वतो ब्रुवतः कथाः ॥" इति ॥

तत्र हेतुः अपवर्गस्यापि गतिराश्रयो दशमपदार्थस्त्वमिति ॥४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

इममेवार्थं पुनः प्रपञ्चयन्त्य आहुः-त्वदवगमीत्यादि। त्वाम् उपगन्तुं शीलं यस्य। तव उपगमो यथार्थज्ञानं

नित्यलीलसच्चिदानन्दविग्रहत्वादिज्ञानं वर्तते यस्येति नित्ययोगे इण् वा त्वदेकान्तभक्त इति यावत्। भवतः भवच्छक्तिरूपादैवात् उत्थयोः शुभाशुभयोर्गुणविगुणान्वयान् न वेत्ति तस्य शुभाशुभजनकप्रारब्धाभावात्। तर्हि तदा देहभृतां प्राकृतदेहिनां गिरश्च न जानाति अतः प्राकृतदेहिवार्तापि न तस्य कर्णगोचरा अथवा तर्हि तदा तत इति यावत्। देहभृतां गिरो वार्तापि तत्र नास्तीति नकार एवानुवर्तनीयः। तदिदं युक्तमेवेत्याहुः-यतस्त्वं मनुजैर्यैः कैश्चिदेव जनैः श्रवणभृतः श्रुतमात्र एव सन् अपवर्गगतिर्भवसीति शेषः। स पुनस्त्वदवगमी अनुयुगं कल्पकल्पम् अनु तत्रापि अन्वहं गुणगीतपरम्परया गुणगानपरम्परया विशिष्टः अतस्तस्य शुभाशुभजनकप्रारब्धाभाव इति यत् तत् किं चित्रमित्यर्थः। अनुयुगमिति नित्यत्वात् ॥४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

इममेवार्थं प्रपञ्चयति- त्वदवगमीत्यादि। तव अवगम उपास्यत्वेन यथार्थज्ञानं यस्य तत् सत्तायां 'नित्ययोगे इन्'। अथवा, त्वामुपगन्तुं शीलं यस्य। गमिनगामिनप्रभृति द्वितीयातत्पुरुषः, त्वदेकान्तभक्त इत्यर्थः। भवदुःखयोः शुभाशुभयोर्गुणविगुणान्वयान् सुखदुःखपरम्परा न वेत्ति। दुरवगमानन्देन विस्मृत-देहादिः। प्रारब्धशुभाशुभजन्यसुखदुःखं न जानाति, तर्हि तदा न च देहभृतां प्राकृतानां गिरः। युक्तमिदम् यतस्त्वं मनुजैः सामान्यैरपि जनैः श्रवणभृतः श्रवणे पूरितोऽपवर्गगतिर्भवसि। हे सगुण ! सच्चिदानन्दगुणमय श्रीकृष्ण ! तस्य तु त्वदनुगमिनोऽनुयुगं प्रतियुगमविनाशित्वादन्वहम्, गीतपरम्परया तु किम् ? सद्यदनुयुगम् अनुदिनं त्वां गायति, तेन त्वं तस्य किं न भविष्यसीति भावः। तेभ्यः केवलं प्रेमानन्दमेव ददासीति भावः ॥४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ये तु ऋषयो भक्ताः दुराचारास्ते यतय इव नोभयलोकभ्रष्टाः किन्तु कृतार्था एवेत्याहुः-त्वदवगमी त्वां भजनीयत्वेन अवगन्तुं शीलं यस्य सः। भवदुत्थशुभाशुभयोर्गुणविगुणान्वयान् न वेत्ति। भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनामुष्मिन् मनःकल्पनमेतदेव नैष्कर्म्यमिति श्रुतेर्भक्तस्य भजने सत्येव नैष्कर्म्ये जातेऽपि ये शुभाशुभे दृश्येते ते खलु न कर्मफले किन्तु भवदुत्थ एव स्वभक्तियोगस्य रहस्यत्वरक्षणार्थं बहिर्मुखमतोत्खाताभावार्थं च भक्तौत्कण्ठावर्धनार्थं वा भवतैव कल्पिते स्वभक्त्यपराधफले एव वा ते भवता कर्मफले इव दर्शिते इति भावः। तयोर्गुणविगुणान्वयान् गुणदोषसम्बन्धान् न वेत्ति अयं भक्तो दयालुः क्षमाशीलो वदान्यः इत्यादि गुणानामन्वयान् अयं भक्तो विषयासक्तो धनलुब्धो दम्भीत्यादिदोषाणामप्यन्वयांश्च लोकैरुक्तान् स्वस्मिन्न जानाति नाधिकमनुसन्धत्त इत्यर्थः। तर्हि तस्मिंस्तस्मिन् समये देहभृतां मनुष्याणामुत्तमाधमानां गिरश्च स्तुतिनिन्दावतीर्वाचश्च नानुसन्धत्ते माममी जना मिथ्या गुणदृष्ट्यैव स्तुवन्ति चेत् स्तुवन्तु माममी जनाः विषयासक्त्यादीन् मयि सत्यानेव दृष्ट्वा निन्दन्ति चेदेतदुचितमेव निन्दन्त्विति मनसि विमृशतीति भावः। तत्र हेतुः-अनुयुगं युगे युगे अवतीर्णस्य तवेत्यर्थः। अन्वहमहन्यहनि मनुजैर्या सगुणस्य अप्राकृतगुणसिन्धोस्तव गीतपरम्परा तादृशानामगुणसङ्कीर्तनप्रवाहः तया त्वं श्रवणभृतः तत्करणयोः पूर्णः सन् अपवर्गगतिः पञ्चमस्कन्धगद्यदृष्ट्या प्रेमभक्तिप्रदः। अपकृष्टा वर्गाश्चत्वारोऽपि यतस्तथाभूतो वा गतिर्भवसीत्याह-अत्र श्रुतयः —

"तैरहं पूजनीयो वै भद्र कृष्णनिवासिभिः। तद्धर्मगतिहीना ये तस्यां मयि परायणाः ॥

कलिना ग्रसिता ये वै तेषां तस्यामवस्थितिः। यथा त्वं सह पुत्रैश्च यथा रुद्रो गणैः सह ॥

यथा श्रियाभियुक्तोऽहं तथा भक्तो मम प्रियः ॥" गोपालतापन्यः ॥ तद्धर्मगतिहीना इति कलिना ग्रसिता इति च दुराचारत्वव्यञ्जकम्। तस्यां मथुरायां तदेव दुराचारे सति द्वयोरुपासकयोर्मध्ये —

"यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः। ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति ॥

सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा। अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ॥'' इति भगवता यतिर्निन्दितः।

''अपि चेत्सुदुराचारः भजते मामनन्यभाक्। साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥''

इति स्वभक्तोऽभिनन्दितो यथा तथैव स्वस्तवान्ते श्रुतिभिरपि त्वदनुवर्तिनीभिः समवादीति ज्ञेयम् ॥४०॥

गूढार्थदीपिनी

अनन्यभक्तानां तु तत्र सांसारिकनानाविधदुःखाद्यभावः, परत्र मोक्षश्चेत्युभयतः सुखमेवेत्याहुः-त्वदवगमीति ॥

(भक्तसौख्यबोधनपरेयम्)

पद्यानुवादः

इह न वेद शुभाशुभयोः फलं विविधनिषेधगिरश्च भवत्परः।

श्रवणतश्च परत्र विमुक्तिदः सगुण हे गुणहेयतया धृतः ॥२७॥

सङ्क्षिप्तसार्थान्वयः — हे सगुण ! त्वदवगमी त्वज्ज्ञानवान् पुरुषः भवदुत्थशुभाशुभयोः गुणविगुणान्वयान् सुखदुःखसम्बन्धान् न वेत्ति। तर्हि देहभृतां गिरश्च निन्दास्तुतिवाक्यानि च न वेत्ति इति का कथा। यतः अनुयुगं तत्रापि अन्वहं प्रतिदिनं मनुजैः भक्तैः गीतपरम्परया श्रवणभृतः त्वं तेषाम् अपवर्गगतिर्भवसि गिरो न वेत्तीत्यनेन ऐहिकं सुखम्। अपवर्गगतिरित्यनेन पारलौकिकसुखं चेतिभक्तानामुभयतोऽपि सुखमुक्तमिति विशेषः ॥

हे सगुण ! हे वात्सल्यादिगुणयुक्त भगवन्! त्वामवगच्छति जानातीति त्वदवगमी त्वद्भक्तः भवतः कर्मफलदातुः त्वत्तः ईश्वरात् हेतोः उत्थयोराविर्भूतयोः शुभाशुभयोः प्राचीनपुण्यपापकर्मणोः फलभृतान् गुणविगुणान्वयान् सुखदुःखसम्बन्धान न वेत्ति नास्य तेषां स्फूर्तिरिति भावः। यद्येवं तर्हि देहभृतां देहाभिमानिनां गिरः विधिनिषेधलक्षणाः निन्दास्तुतिलक्षणा वा न वेत्तीति का कथा! कुतः ? यतोऽनुयुगं प्रतियुगं मनुजैः भक्तैः सह सगुणस्य अनन्तकल्याणगुणगणस्य तव या गीतपरम्परा उपदेशसन्ततिः तया अन्वहं प्रतिदिनं त्वं श्रवणभृतः श्रवणेन चेतसि भृतः धृतः अतः कथं तत्स्फूर्तिरित्यैहिकं सुखमुक्तम्। परत्र च तेषां त्वम् अपवर्गगतिः मोक्षप्रदश्चेति परलोकेऽपि सुखं तेन भक्तानां हस्तद्वयेऽपि मोदक इति लोकोक्तिः चरितार्था ॥

सगुणेति पृथक् पदं समागतं च। त्वां भजनीयत्वेन अवगन्तुं ज्ञातुं शीलं यस्येति त्वदवगमी त्वल्लीलारसज्ञ इति वा। चक्रवर्ती तु अपकृष्टा वर्गा धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्था यतस्तथाभूता गतिर्भवसि प्रेमभक्तिप्रद इत्यर्थः। ''कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ।'' इत्युक्तेरित्याह। यद्वा। स सर्वप्रसिद्धः त्वदवगमी न वेत्ति यतः सगुणगीतपरम्परया श्रवणभृत इत्यन्वयः ॥२७॥४१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

''नन्वेषमहिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीया''नित्यादिश्रुतिभिः स्तुत्यानां यतीनां न गुणदोषभाक्त्वम्। किमिति निन्देत्याशङ्क्य न वयं यतीन्निन्दामः किन्त्वसुतृपाणामिति तत् भ्रान्तिवारणाय तल्लक्षणमाहुः-तव भगवतो ब्रह्मणः परमेश्वरस्यावगमो ज्ञानं जगत्कारणत्वशास्त्रयोनित्वसर्वनियन्तृत्वस्वप्रकाशत्वादिगुणवतो ज्ञानं विद्यतेऽस्येति त्वदवगमी। 'यतो वा इमानि भूतानि जायन्ते।' 'सर्वे वेदा यत्पदमामनन्ति।' 'यः सर्वज्ञः सर्ववित्। सर्वस्य वशी सर्वस्येशानः।' 'तमेव भान्तमनुभाति सर्वम्।'

इत्यादिश्रुतेः भवदुत्थशुभाशुभयोर्गुणविगुणान्वयान्न वेत्ति। भवतः परमेश्वरादाविर्भूतयोरनादिपुण्यापुण्यकर्मणो र्गुणविगुणान्वयान् सुखदुःखात्मकफलसम्बन्धान्न जानाति। नास्य तत्स्फूर्तिरिति भावः। यद्येवं तर्हि देहभृतां गिरो निन्दास्तुतिलक्षणा वेत्ति इति का कथा। न चात्रानुपपत्तिशङ्कागन्ध इत्याहुः-यद्यस्मान्मनुजैरनुयुगं तत्रान्वहम् अव्युच्छिन्नसम्प्रदायं यथा स्यात्तथा श्रवणभृतस्त्वं श्रवणमार्गेण हृदि प्रवेश्य ध्यातस्त्वं सर्वज्ञो भगवान्। तेषां ध्यातॄणामपवर्गगतिर्भवसि। अपवर्गस्य गतिर्मोक्षमार्गः ज्ञापको दातेति यावत्। कयेत्याशङ्क्यावैदिकत्वव्यावृत्त्यर्थं सम्प्रदायस्वरूपमाहुः-सगुणगीतपरम्परयेति। सगुणस्य

स्वाभाविकाचिन्त्यषड्गुणादिगुणवतस्तव गीतं गानं ध्येयगेयतया कीर्तनं यस्यां सा चासौ परम्परा चेति तथा। मच्छिष्यैः सनकादिभिरित्यादि स्वयमेव साभिमानवाक्येन श्रीभगवतोद्धवं प्रति वक्ष्यमाणयेत्यर्थः ॥४०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं चिदंशा न पूज्या इति निरूप्य लौकिका आनन्दा अपि न सेव्याः, किन्तु भगवदानन्द एव सेव्य इति निरूपयन्ति द्वाभ्याम्-त्वदवगमीति। स्वभावत एव स्मृत्यादिषु सर्व एव आनन्दा निषिद्धाः यथेह साधारणस्त्रियो न सेव्यास्तथा अप्सरसोऽपि यथात्र कालादिनियमव्यतिरेकेण भोगेषु भुज्यमानेषु सर्वश्रुतिस्मृतिविरोधो भवति। एवं स्वर्लोकेष्वपि ज्ञातव्यम्। यथात्रापकीर्तिस्तथा तत्रापि। अतः सर्व एव सुखानुभवो निषिद्धः। ततो निषिद्धाचरणे सर्वथा दुःखमिति सर्वमेव सुखं दुःखानुविद्धम्। अतः कथं सेव्यं स्यात्। भगवदानन्दस्तु सर्वैः न तत्र पूर्वोक्ता दोषा सम्भवन्ति यतोऽत्रैव भगवत्स्वरूपज्ञाने भोगादिनापि न दुःखे निन्दाचिन्तादयो भवन्ति तदाह। त्वदवगमी त्वत्स्वरूपाभिज्ञः भवदुत्थशुभाशुभयोस्त्वनिमित्तं प्राप्तसुखदुःखयोः यदि गुणविगुणान्वयान्न वेद। यथा परमस्निग्धे जारे तदर्थं क्लिष्टापि कामिनी न क्लेशं बुद्ध्यते यथा वा राजसेवकः कस्तूर्यादिना राजोद्वर्तने स्वयं लिप्तोऽपि न सुखं मन्यते, एवं भगवतो महावैभवं सह सेवकत्वेनानुभवं कुर्वन्नपि तत्सुखं न मन्यते। यथा सेवार्थं महदपि दुःखं प्राप्नुवत् तदपि न मन्यते। यदि तदा विधिनिषेधचिन्तापकीर्त्यादिप्रतिपादकवाक्यान्यपि न प्राप्नोति। वस्तुतस्तानि वाक्यानि देहभृतां भवन्ति। अत इहलोक एव भगवत्सम्बन्धे तस्य सर्वोपद्रवनिवृत्तिरुक्ता। अन्यस्य तु साधारणेऽपि सुखदुःखानुभवे रागद्वेषयोर्जायमानत्वात् प्राणिनां सम्बन्धिविधिनिषेधवाक्यान्यपि तस्य भवन्तीति सुखानुभवे दुःखानुविद्ध इति शेष एव भगवत्सम्बन्ध एव सुखम्, नान्यथेति स्पष्टम्। ननु कथं वा त्वदवगमी सुखदुःखयोः रागद्वेषौ न प्राप्नोति, कथं वा तस्यापकीर्त्यादिकं न भवति इत्याशङ्कायामाहुः-अनुयुगमन्वहमिति। मनुजैरनुयुगमन्वहं त्वं श्रवणभृतः यतस्त्वमपवर्गगतिः। अयमर्थः। भगवद्गुणानुश्रवणं नित्यं कर्म, देशकालविशेषनियमाभावात्। यत्कालोपाधिना प्रवर्तते तत्सर्वं काम्यं कर्मेति पूर्वमेवोक्तम्। अतो भगवतः गुणगीतपरम्परा गुणानां यानि गीतानि व्यासादिभिः कृतानि तेषां परम्परया तच्छ्रवणद्वारा भगवान् श्रवणभृतः तेनान्यन्निषेधादिकं न शृणोति भगवतैव श्रवणस्य पूरितत्वात् नित्यकर्मणा भगवता च सर्वपापक्षयात् न दुःखजनकमपकीर्त्यादिकं प्राप्नोति। यतो भगवान् मोक्षद इति मोक्षस्तस्य सिद्ध एव। सर्वदैवायं धर्म इति न कालधर्मा बाधन्ते। भगवांश्च सुप्रसिद्धः भक्तहितकर्ता। मनुजैः सर्वैरेव भगवान् धृत इति भगवत्सेवका भगवदैक्यं प्राप्ता इति न कोऽपि निन्दां करिष्यतीति। अतो भगवत्सेवक एव निर्दोषसुखभोक्ता, न त्वन्य इति निरूपितम्।

"सुखसेवापरो यस्तु स आनन्दं हरिं भजेत्। अन्यथा सुखसम्प्रेप्सुः सर्वथा दुःखमाप्नुयात्॥" ॥२७॥४०॥

श्रीसुबोधिनीसारः

त्वदवगमी त्वज्ज्ञानवान् भवतः कर्मफलदातुरीश्वराद्धेतोः उत्थयोराविर्भूतयोः शुभाशुभयोः प्राक्तनपुण्यापुण्ययोः फलभूतान् गुणविगुणयोः सुखदुःखयोरन्वयान्सम्बन्धान् न वेत्ति नानुसन्धत्ते न चिन्तयति। तर्हि तस्मिन् काले देहभृतां तदभिमानिनांगिरः प्रवृत्तिनिवृत्तिकरीर्विधिनिषेधलक्षणा गिरो वाचो न वेत्ति न भजते गुणातीतत्वात्। हे सगुण षड्गुणसम्पन्न! यतो हेतोः मनुजैर्भक्तैरन्वहं प्रतिदिनं श्रवणेन भृतः चित्ते धृतस्त्वम् अपवर्गगतिर्मोक्षरूपा गतिरसि। अनुयुगं प्रतियुगं गीतायाः परम्परा उपदेशसन्ततिः तया सत्सम्प्रदायानुसारेण ॥२७॥४०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सकामानां दुःखरूपं फलं निरूप्य निष्कामाणां फलमाह-त्वदवगमीति। त्वामवगच्छति जानातीति त्वदवगमी तर्हि तदा ज्ञानदशायां भवतः कर्मफलदातुरीश्वराद्धेतोरुत्थयोः फलजननाय समुपस्थितयोः शुभाशुभयोः प्राचीनपुण्यपापात्मककर्मणोर्गुणविगुणान्वयान् फलभूतसुखदुःखसम्बन्धान् न वेत्ति नानुसन्धत्ते, तथा देहभृतां देहाभिमानिनां गिरः निन्दास्तुतिवाक्यानि यद्वा, प्रवृत्तिनिवृत्तिकरीर्विधिनिषेधलक्षणाः न वेत्ति। विगतदेहाद्यभिमानतया कार्याकार्यबोधाभावात्

ज्यत इत्यर्थः । युक्तं चैतत् यतः अनुयुगं प्रतियुगं या सगुणस्य तव गीतपरम्परा उपदेशसन्ततिस्तया सत्सम्प्रदायानुसारेण न्वहमनुदिनं श्रवणेन भृतः चेतसि धृतस्त्वं तेषामपवर्गगतिर्मोक्षरूपा गतिर्भवसि। एतदुक्तं भवति, ये तावत्तत्त्वज्ञा जीवन्मुक्ता सुदाद्यनुसन्धानरहितास्तेषां तु न कर्माधिकारः । ये च निरन्तरं भगवत्कथाश्रवणादिनिष्ठास्तेषामप्यासन्नभवत्पदानां न निषेधकिङ्करता । ये च मर्यादायां स्थितास्ते कर्माधिकारिणः । ये च वेदोक्तमर्यादां हित्वा च्छलेनेन्द्रियलालनलालसास्तेषामुभयतो दुःखमिति ॥४०॥२७॥

अन्वितार्थप्रकाशिका

ननु "एष नित्यो महिमा ब्राह्मणस्य न कर्मभिर्वर्धते नो कनीयान्" इत्यादिश्रुत्या यतेः किमपि कृत्यं नास्तीति किमिति न्धते तत्राह–त्वदवगमीति। हे सगुण ! त्वामवगच्छति जानातीति त्वदवगमी भवतः कर्मफलदातुरीश्वराद्धेतोरुत्थयोः फलजननाय स्थितयोः शुभाशुभयोः प्राचीनपुण्यपापात्मककर्मणोर्गुणविगुणान्वयान् फलभूतसुखदुःखसम्बन्धान् न वेत्ति नानुसन्धत्ते तथा देहभृतां देहाभिमानिनां गिरः निन्दास्तुतिवाक्यानि । यद्वा । प्रवृत्तिनिवृत्तिकरीर्विधिनिषेधलक्षणाः गिरः न वेत्ति देहाद्यभिमानतया कार्याकार्यबोधाभावान्न नियुज्यत इत्यर्थः। युक्तं चैतत् यतः अनुयुगं प्रतियुगं या सगुणस्य तव गीतपरम्परा सन्ततिस्तया सत्सम्प्रदायानुसारेण मनुजैरन्वहमनुदिनं श्रवणेन भृतः चेतसि धृतस्त्वं तेषामपवर्गगतिर्मोक्षरूपा गतिर्भवसि। क्तं भवति ये तावत्तत्त्वज्ञा जीवन्मुक्ता दुःखसुदाद्यनुसन्धानरहितास्तेषां तु न कर्माधिकारः । ये च निरन्तरं त्कथाश्रवणादिनिष्ठास्तेषामप्यासन्नभवत्पदानां न विधिनिषेधकिङ्करता। ये तु मर्यादास्थितौ योग्या अपि वेदोक्तमर्यादां हित्वा च्छलेनेन्द्रियलालनलालसास्तेषामुभयतो दुःखमिति ॥४०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

निष्कामभक्त आत्यन्तिकं सुखं प्राप्नोतीत्याहुः ॥ त्वदवगमीति ॥ हे एकान्तिकभक्तपालक ! त्वदवगमी ॥ तव त्मकर्मणोः। भवतः अवगमः सम्यक् ज्ञानमस्यास्तीति तथोक्तः ॥ तव स्वरूपस्वभावगुणविभूतियथार्थज्ञानवानित्यर्थः ॥ न्तिकभक्तः भवदुत्थशुभाशुभयोः भवतः कर्मफलदातुरीश्वराद्धेतोरुत्थे प्रारब्धत्वेनाविर्भूते ये शुभे स्वकृतप्राचीनपुण्यापुण्यकर्मणी ॥ गुणविगुणान्वयान् ॥ फलरूपसुखदुःखसम्बन्धान्न वेत्ति न जानाति आत्मपरमात्मनोर्दैहिकयोश्च नित्यत्वानित्यत्वज्ञानात् खानि न गणयतीति भावः ॥ किञ्च ॥ तरहि तदा–छान्दसम् ॥ रेफस्य साकारत्वम् ॥ देहभृतो देहाभिमानिनां गिरो वाणीश्च मत्वाभिमानेन प्रोक्तानि स्तुतिनिन्दारूपाणि वचांसीत्यर्थः ॥ वेत्ति किं न वेत्ति न गणयति ॥ देहेऽहंममत्वा-रहितत्वादिति भावः ॥

रोरूयमाणान् बहुशो यथा क्रोष्टून् मृगाधिपः ॥ तृणवन्मन्यते धीरो विष्णुभक्तस्तथा बुधान् ॥ इति विष्णुधर्मोत्तरोक्तेः ॥

यतः यस्माद्धेतोः । अनुयुगं युगे युगे इत्यनुयुगम् । प्रादुर्भूतानां भगवदवताराणाम् ॥ तथा चोक्तम् —

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥ धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ इति ॥

सगुणगीतपरम्परया गुणैः सच्छास्त्रप्रोक्तैः सत्यशौचादिभिः सह वर्तमानानि यानि गीतानि कथास्तेषां परम्परया मालया ॥ अहनि अहनि प्रतिदिनम् ॥ मनुजैर्मुमुक्षुभिः साधुभिः इति शेषः ॥ श्रवणभृतः श्रवणयोर्धृतः श्रोत्रेन्द्रियेण श्रुत इत्यर्थः ॥ अपवर्गगतिः अपवर्गरूपा गतिः प्राप्तिर्यस्मात् तथाभूतो भवसि ॥

शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः ॥ हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् ॥ इति भागवते ॥

तस्माद्धेतोस्त्वदवगमी पूर्वोक्तान्नगणयतीति योजनीयम् ॥ अस्यायम्भावः —

र्हि सांसारिकसुखदुःखाद्यगणनेन भगवदवतारकथाः शृण्वतां मुमुक्षुजनानां मोक्षो भवति तर्हि भगवत्स्वरूपस्वभावादीनां ज्ञानवत एकान्तिकभक्तस्य प्रारब्धकर्मजनितदुःखाद्यगणनं मोक्षादप्यधिकतमं भवत आत्यन्तिकसुखं च स्यात्तत्र किमु ॥ तथा चोक्तम् —

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ॥

सहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥

शान्तिम् आत्यन्तिकं भगवत्सुखमित्यर्थः ॥

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ॥

त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ इति ॥ ममात्यन्तिकसुखरूपमित्यर्थः ॥

तृतीयश्लोके निष्कामभक्तवर्णनम् ॥

स यदजयेत्यारभ्य त्वदवगमीत्यन्तैस्त्रिभिर्बद्धा जीवा भगवदवताराः

सकामनिष्कामभगवद्भक्ताश्चोक्ताः ॥४०॥२७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथानन्यप्रयोजनानां भगवद्भक्तानां तूभयतः सुखमेवेत्याहुः ॥ त्वदवगमीति ॥ हे भगवन्! त्वामवगच्छतीति त्वदवगमी त्वद्याथात्म्यज्ञानवान्, 'आर्तो जिज्ञासुरर्थार्थी ज्ञानी च' इत्युक्तेषु तुरीय इत्यर्थः । भवतीति भवन् संसारस्तस्मिन्नुत्थे फलजननाय समुत्थिते शुभाशुभे पुण्यपापात्मके कर्मणी तयोः, गुणविगुणान्वयान् फलरूपसुखदुःखसंबन्धान्, न वेत्ति नानुसन्धत्ते। तरहि तर्हि, छान्दसं रेफस्य साकारत्वम्। देहभृतां प्राणिनां, गिरः च स्तुतिनिन्दावाक्यान्यपि, न वेत्ति तत्र किमु वक्तव्यं नानुसन्धत्त एवेत्यर्थः। कुतः । यतः, त्वम् अपवर्गगतिः तस्य देहान्ते अपवर्गसाधनभूतः, अनेनास्य परलोके सुखमुक्तम् । इह तु मनुजैस्तावकैः सह, अनुयुगं प्रतियुगानुवर्तिन्येत्यर्थः । सगुणस्यानन्तकल्याणगुणयुक्तस्य तव या गीतपरम्परा कथामृतपरम्परा तया, अन्वहं श्रवणभृतः श्रवणेन चेतसि धृतः, यतस्त्वत्कथाश्रवणपानमत्तस्ततोऽयं न वेत्तीत्यर्थः । सत्सङ्गस्य भगवत्प्राप्तिसाधनत्वात्तथात्वमिति भावः। सत्सङ्गमाहात्म्यमुक्तं मार्कण्डेयपुराणे —

''सङ्गः सर्वात्मना त्याज्यो यदि त्यक्तुं न शक्यते ।

स सद्भिः सह कर्तव्यः सन्तः सङ्गस्य भेषजम् ॥'' इति ॥२७॥ ॥४१॥

योगिरामानुजाचार्यकृतसरला व्याख्या

अनन्यप्रयोजनानां भगवद्भक्तानामुभयत्रापि सुखमेवेत्याहुः-त्वदवगमीति । त्वामवगच्छतीति त्वदवगमी। त्वद्यथार्थज्ञानवान्। 'ज्ञानी त्वात्मैव मे मतमि'त्युक्तेः। तर्हि तदा ज्ञानदशायां भवदुत्थशुभाशुभयोः भवतः कर्मफलदातुरीश्वराद्धेतोः उत्थितयोः फलजननायोपस्थितयोः शुभाशुभयोः प्राचीनशुभाऽशुभात्मककर्मणोः गुणविगुणान्वयान् सुखदुःखसम्बन्धान् न वेत्ति नानुसन्धत्ते।

'दुःखेष्वनुद्विग्नमनास्सुखेषु विगतस्पृहः ।' इत्युक्तरीत्या सुखदुःखयोर्निर्विकारो भवतीत्यर्थः । तथा देहभृताम् देहाभिमानिनाम् गिरः निन्दास्तुतिवाक्यानि। यद्वा। प्रवृत्तिनिवृत्तिकारीणि विधिनिषेधरूपाणि वाक्यानि न वेत्ति। गतदेहाद्यभिमानतया कार्याकार्यादिबोधाभावान्न नियुज्यत इत्यर्थः । युक्तं चैतत् । यतः अनुयुगं प्रतियुगं या सगुणस्य तव उपदेशपरम्परा तया सत्सम्प्रदायानुसारेण मनुजैरन्वहम् अनुदिनं श्रवणेन भृतः चेतसि धृतस्त्वं तेषामपवर्गगतिः मोक्षसाधनं भवसि। एतदुक्तं भवति। मोक्षप्रदं त्वां श्रवणमननादिभिः ये हृदि धारयन्ति योजनमित्यर्थः । तदुक्तं श्रीभगवता —

'नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन । न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥' इति ।

त्वदवगमी तदा भवदुत्थशुभाशुभयोर्गुणविगुणान्वयं देहभृतां गिरश्च न वेत्ति। यतः अनुयुगं सगुणगीतपरम्परया मनुजैरन्वहं श्रवणभृतस्त्वम् अपवर्गगतिर्भवसीत्यन्वयः ॥४०॥

अतः प्रा

एकरूप अविकृतो

नियोज्यते विधिना

मे मह्यं दिश देहि।

ननु यतेर्न वि

तत्राह-त्वदवगमीति।

भो सगुण!

तर्हि देहभृतां च गिरो न

गुणविगुणान्वयान् सुख

वेत्ति विगतदेहाद्यभिमा

गीतपरम्परया सत्सम्प्रदा

न तेषां कार्याधिकारशङ्क

इन्द्रियलालनलालसाना

''एष नित्यो म

तस्यैव स्यात्पद

अर्थः — ब्राह्म

कर्मणा नो कनीयान् क्षीयते

स पापकेन शुभाशुभलक्षणे

'नैनं पाम्मा पापो

अर्थः - एनं ब्रह्म

योज्यं न तपति न तापयति

अवगमं तव मे दि

श्रवणवर्णनभावमथ

अवगमं ज्ञानम्। सु

अथ भगवज्ज्ञानवतां

भगवदादिशब्दवाच्यो हेयप्रत्य

ज्ञानवानित्यर्थः । भवदुत्थशुभा

शुभाशुभौ सुखदुःखौ न वेत्ति ना

''अवश्यमेव भोक्तव्यं

तस्यां तस्यामवस्थायां

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

अतः प्रारब्धमात्रभोगेन यतेरन्यकृत्याभावात् ब्राह्मणस्य ब्रह्मविदः एष स्वस्वरूपानुभवलक्षणः महिमा माहात्म्यं नित्य रूप अविकृतोऽस्ति। यतः पुण्यकर्मणा न वर्द्धते पापकर्मणा च कनीयान् क्षीणो न भवतीति। तर्हि तदानीं त्वदनुभवकालेन ष्यते विधिना न प्रवर्तते निषेधेन च न निवर्त्यते, एतत् सुखदुःखाद्यज्ञानम्। युक्तं च युक्तमेव तव अवगमं त्वदनुभवरूपं ज्ञानं मां दिश देहि। यद्यतः अवगमात् ॥४०॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

ननु यतेर्न किमपि कृत्यमस्ति। प्रारब्धमेव सुखोपभोगेनाक्षिप्यते। अतः किमिति वृथा शङ्क्यते। सः उभयतोऽप्यसुखमिति ाह-त्वदवगमीति।

भो सगुण ! षड्गुणैश्वर्ययुक्त ! त्वदवगमी त्वद्ध्यानवान् पुरुषः भवदुत्थशुभाशुभयोर्गुणविगुणान्वयान् न वेत्ति। नानुसन्धत्ते देहभृतां च गिरो न वेत्ति। भवतः कर्मफलदातुरीश्वराद्धेतोरुत्थयोराविर्भूतयोः शुभाशुभयोः प्राचीनपुण्यपापकर्मणोः फलभूतान् विगुणान्वयान् सुखदुःखसम्बन्धान्न वेत्ति तर्हि तदानीं देहभृतां देहाभिमानिनां प्रवृत्तिनिवृत्तिकरीर्विधिनिषेधलक्षणाः गिरः न विगतदेहाद्यभिमानतया कार्याकार्यबोधाभावान्न नियुज्यत इत्यर्थः। युक्तं चैतदित्याह-अनुयुगमिति। यतः कारणादनुयुगं म्परया सत्सम्प्रदायानुसारेण उपदेशधारणया श्रवणेन चेतसि धृतः अपवर्गरूपा गतिरित्यर्थः। एतदुक्तं भवति। एतावत्तत्त्वज्ञानिनः तेषां कार्याधिकारशङ्कापि। ये चानवरतं त्वत्कथाश्रवणादिनिष्ठाः न तेषामप्यासन्नभवत्पदानां विधिनिषेधबाध इतरेषां योगच्छद्मना लालनलालसानामुभयतोऽप्यसुखमिति त्वदवगमीत्यत्र श्रुतिः-

"एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् ॥

तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति।

अर्थः — ब्राह्मणस्य ब्रह्मविदः एष महिमा माहात्म्यं नित्यमतः कर्मणा शुभेन न वर्धते वृद्धिं न याति, तथाऽशुभेन ना नो कनीयान् क्षीयते अन्ये तु महिमानः कर्मकृता अनित्याः अतस्तं महिमानं विदित्वा यस्यैष परमात्मनः पदवित्स्वरूपवित् पापकेन शुभाशुभलक्षणेन कर्मणा ज्ञानाज्ञानकृतेन न लिप्यते इति। ततः किमपि आह श्रुतिः-

'नैनं पाम्मा पापो न तरति नातिक्रामति प्रतिसर्वं पाप्मानं तपति। विपापो रजोऽविचिकित्सो ब्राह्मणो भवतीति ॥'

अर्थः - एनं ब्रह्मविदं पाप्मा पापं न तरति नातिक्रामति। स तु सर्वं भूतं भवद्भविष्यत्पापं तरति अतिक्रम्य वर्तते। एवं नं तपति न तापयति स तु सर्वं तपति भस्मसात्करोति। सुगममन्यत्। स्वामिनाम् -

अवगमं तव मे दिश माधव स्फुरति यन्न सुखासुखसङ्गमः।

श्रवणवर्णनभावमथापि वा न हि भवामि यथाविधि किङ्करः ॥

अवगमं ज्ञानम्। सुगममन्यत् ॥४०॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवज्ज्ञानवतां सम्पत्तिमाह-त्वदवगमीति। हे सगुण ! निरुपाधिकज्ञानादिषड्गुणैश्वर्ययुक्त ! यस्त्वदवगमी त्वज्ज्ञानवान् दिशब्दवाच्यो हेयप्रत्यनीककल्याणगुणाकरः परमात्मैव सर्वशेषी सर्वोत्पादकः सर्वहर्ता सर्वाधारश्चिदचिच्छरीरीति त्यर्थः। भवदुत्थशुभाशुभयोश्चेति द्वितीयार्थे षष्ठी। चेतनानां स्वस्वकर्मानुगुणफलदातुर्भवतस्तव सङ्कल्पेन संसारोत्थौ सुखदुःखौ न वेत्ति नानुसन्धत्ते। तर्हि किमुत गुणविगुणान्वयाः गिरः स्तुतिनिन्दाप्रयुक्तवाक्यानि न वेत्तीति —

"अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। यस्यां यस्यामवस्थाय यद्यत्कर्म करोति यः ॥

तस्यां तस्यामवस्थायां तत्तत्फलमवाप्नुयात्। मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम् ॥

वाचैव वाचिकं कर्म कायेनैव तु कायिकम्। हरिर्दुःखानि भक्तेभ्यो हितबुद्ध्या करोति हि ॥
क्षाराग्निशस्त्रकर्माणि पुत्रस्य च पिता याथ ॥'' इत्यादिप्रमाणानुसन्धानान्न वेत्तीति भावः ॥

कुतो न वेत्तीत्यत आह-यतः यस्मात्कारणान्मनुजैस्त्वद्भक्तैरन्वहं प्रतिदिनं त्वं श्रवणभृतः श्रवणद्वारा चेतसि धृतस्त्वं तेषां स्वभक्तानाम् अपवर्गगतिरपवर्गरूपा गतिर्भवसि। कथं श्रवणभृतः इत्यपेक्षायामाह-अनुयुगमिति। अनुयुगं प्रतियुगम्। या गीतपरम्परा तया सत्सम्प्रदायानुसारेणेत्यर्थः। तथा च भगवतैवोक्तम्—

'मच्चिता मद्गतप्राणा बोधयन्तः परस्परम्। कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥' इति ॥

तथा तृतीये कपिलवाक्यम्—

'विसृज्य सर्वानन्यांश्च मामेवं विश्वतो मुखम्। भजन्त्यनन्यया भक्त्या तान्मृत्योरतिपारये ॥'

अतस्त्वदवगमी शुभाशुभौ न वेत्तीति सुष्ठूक्तमिति ॥४०॥

कृष्णप्रिया

आप को यथार्थ जानने वाला भक्तजन संसारमें उत्पन्न पाप के फल सुख दुःखों के सम्बन्धन को नहि जानता और उस काल में देहधारी अज्ञानी जीवों की कहीं भी निन्दा स्तुति वाणीयों का भी अनुसन्धान हि करता यों कि उनको मुक्ति देनेवाले आप हो इस लोकमें सर्व युगमें रहनेवाली अनन्त कल्याण सम्पन्न आप की कथा सुधा के परम्परा से आप के भक्तजन मनुष्यों के साथ आप की कथा के श्रवण करने से उन्होंने अपने मनमें आपको धारण किया है ॥४०॥

द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि यदन्तराण्डनिचया ननु सावरणाः ।
ख इव रजांसि वान्ति वयसा सह यच्छ्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः ॥४१॥

कर्दमक्षमा

द्युपतयः, एव, ते, अन्तं, न, ययुः, तथा, अनन्ततया, हेतुना, त्वम्, अपि, अन्तम्, न, ययिथ ।, ननु, अहो, यदन्तरा, सावरणाः, अण्डनिचयाः, वयसा, कालेन, खे, रजांसि, इव, सह, एव, वान्ति, न, तु, पर्यायेण ।, यत्, यतः, भवन्निधनाः, श्रुतयोऽपि, अतन्निरसनेन, त्वयि, हि, फलन्ति ॥४१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

त्वदवगमी न वेत्ति सुखदुःखे न च विधिनिषेधावित्युक्तं तत्र ननु कथमवगन्तुं शक्यते दुरधिगमत्वस्योक्तत्वादित्येवमाशङ्क्य सत्यमेवमनवगाह्यमहिम्नोऽवाङ्मनसा गोचरत्वादविषयत्वादविषयत्वेनैव ज्ञानमिति दर्शयन् यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं भवच्च भविष्यच्च'' इत्यादिश्रुतिप्रतिपादितमपरिमितं महिमानमाह-द्युपतय एवेति। हे भगवंस्ते अन्तं द्युपतयः स्वर्गादिलोकपतयो ब्रह्मादयो न ययुर्न प्रापुः तत्कुतः यदन्तवद्वस्तु तत्किमपि त्वं न भवसि आस्तां द्युपतयो न ययुरिति यद्यस्मात्त्वमप्यात्मनोऽन्तं न यासि कुतस्तर्हि सर्वज्ञता सर्वशक्तिता वाऽत आह-अनन्ततया अन्ताभावेन न हि शशविषाणज्ञानं सार्वज्ञ्यं तदप्राप्तिर्वा शक्तिवैभवं विहन्ति अन्तत्वमेवाह-यदन्तरेति। यस्य तवान्तरा मध्ये ननु अहो सावरणा उत्तरोत्तरं दशगुणसप्तावरणयुक्ताः अण्डनिचया ब्रह्माण्डसमूहा वान्ति परिभ्रमन्ति वयसा कालचक्रेण खे रजांसीव सह एकदैव न तु पर्यायेण हि यस्मादेवमतः श्रुतयस्त्वयि फलन्ति तात्पर्यवृत्त्या पर्यवस्यन्ति न तु साक्षाद्वदन्त्ययमेतावानिति सगुणस्य गुणानन्त्यान्निर्गुणस्य चागोचरत्वात्कथं तर्ह्यपदार्थे तात्पर्यमिति तत्र विधिमुखवाक्ये भवेदयं नियमः पदार्थस्यैव वाक्यार्थत्वमिति निषेधमुखे तु नायं

नियम इत्याह-
अस्थूलमनण्विव
भवन्ति त्वयि नि

भावार्थदी
न्विति। अवगन्तुं

अर्थः —
अधोऽण्डकपालात् य
भवितव्यं तच्च यत्सू
त्रिष्वपि लोकेषु वर्तत
कुतस्तर्हीति। विद्यमान
अतो हेतोः। पुनराशङ्क
चेदाह-पदार्थस्यैवेति।

''अन्यदेव तद्वि
तद्वद ॥'' इति। अर्थः -
अविदितादधि अथो अप
भवति तद्धि तस्मादन्या
भूतादतिक्रान्तात्कालाद्भाव
नचिकेतसः प्रश्नः। अत्रैव

''यस्मिन्नाकाशे

इति गार्गिप्रश्ने या

''स होवाचैतद्वै
ऽमतमोऽवाय्वानाकाशमस
न तदश्नोति कश्चन ॥'' इति

''यो वा एतदक्षरं गा

सुगमत्वात् किञ्चिद
अस्थूलमित्यादि। अलोहितम्
तर्हि तमः, न अतमः। अमुख
बाह्यम्, न अबाह्यम्। इति।

यम इत्याह-अतन्निरसनेनेति । अन्यदेव तद्विदितादथो अविदितादधि अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृतकृतात् स्थूलमनण्वित्यादिप्रकारेण लक्ष्णया च तत्त्वमसीत्यादयः पर्यवस्यन्ति न च वाच्यं निषेधैः शून्यमेव ज्ञाप्यते इति यतो भवन्निधनाः न्ति त्वयि निधनं समाप्तिर्यासां तास्तथा न हि निरवधिर्निषेधः सम्भवत्यतोऽवधिभूते त्वयि फलन्तीत्यर्थः ॥

द्युपतयो विदुरन्तमनन्ते ते न च भावान्न गिरः श्रुतिमौलयः ॥

त्वयि फलन्ति यतो नम इत्यतो जयजयेति भजे तव तत्पदम् ॥२८॥ ॥४१-४२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — पुनराक्षिपत्यत्र-त्वदवगमीति । पूर्वोक्तपद्ये त्वदवगमीत्यादि यदुक्तं तत्राशङ्कते-मीति । अवगन्तुं ज्ञातुम् । दुरधिगमत्वस्य दुर्ज्ञेयत्वस्य अनवगाह्यमहिम्नो दुर्ज्ञेयमाहात्म्यस्य । तथा हि श्रुतिः —

"स होवाच यदूर्ध्वं गार्गि यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे ॥

यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते । आकाशे तदोतं प्रोतं च ॥ इति ॥

अर्थः — स ह याज्ञवल्क्य उवाच-हे गार्गि ! त्वयोक्तं यत् ऊर्ध्वं उपरि दिवः अण्डकपालात् यच्चार्वागधः पृथिव्या ध्योऽण्डकपालात् यच्चान्तर्मध्ये द्यावापृथिवी द्यावापृथिव्योरण्डकपालयोरिमे द्यावापृथिवी यद्भूतमतीतं भवच्च वर्तमानं भविष्यच्च र्तितव्यं तच्च यत्सूत्रमाचक्षते तत्सूत्रमाकाशे ओतं प्रोतं च, यद्वै व्याकृतं सूत्रात्मकं जगत् अव्याकृताकाशे ब्रह्मरूपे वस्तुमात्रं र्वापि लोकेषु वर्तत इत्यर्थः । अनन्तत्वपरे यदप्रापणे हेतुं पृच्छति-तत्कुत इति । अन्ताज्ञाने सर्वज्ञता तव कथं स्यादित्याशयेनाह-र्हीति । विद्यमानवस्तुनो ज्ञानाग्रहणे हि सार्वज्ञं शक्तिवैभवं च विहन्ति न त्वविद्यमानस्यापीति भावः । हि यस्मादेवमनन्तोऽसि तो हेतोः । पुनराशङ्कते-कथमिति । अपदार्थे पदाशक्ये । तत्र तात्पर्यनिर्णये । विधिमुखे वाक्ये तत्त्वमसीत्यादिके । अयं क इति त्याह-पदार्थस्यैवेति । अतन्निरसनेन आरोपितापवादेनेति । तदाह श्रुत्या —

"अन्यदेव तद्विदितादथो अविदितादधि । अन्यत्र धर्मादन्यत्राधर्मादन्यस्मात्कृताकृतात् । अन्यत्र भूताद्भव्याच्च यत्पश्यसि सि ॥" इति । अर्थः — तद्वस्तु विदितात् ज्ञानात् वस्तुनोऽन्यत् पृथगेव भवति । तर्हि, अवच्छिन्नमज्ञातं प्राप्तमत आह-अथो विदितादधि अथो अप्यर्थे अविदितात् अज्ञातादपि वस्तुनो अधि उपरि तद्वर्तते उपर्यर्थलक्षणयाऽन्यदित्यर्थः । यद्धि यस्मादुपरि ति तद्धि तस्मादन्यदिति प्रसिद्धम् । धर्माच्छास्त्रीयादन्यत्र तथाऽधर्मादन्यत्र तथा कृतं कार्यमकृतं कारणं तस्मादन्यत्र र्तिक्रान्तात्कालाद्भाव्याद्भविष्यतश्चकाराद्वर्तमानाच्चान्यत्र यदीदृशं सर्वव्यवहारगोचरातीतं पश्यसि जानासि तदेति यमं प्रति चिकेतसः प्रश्नः । अत्रैव श्रुत्यन्तरम् —

"यस्मिन्नाकाशे सर्वमोतं प्रोतं स कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च ॥"

इति गार्गिप्रश्ने याज्ञवल्क्यो वदतीत्याह —

"स होवाचैतद्वै तदक्षरं परमं गार्गि ब्राह्मणा अभिवदन्ति । अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमला-णोऽवाय्वानाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन श्नाति कश्चन ॥" इति ।

"यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः ॥" इति ॥

सुगमत्वात् किञ्चिद्व्याख्यायते-हे गार्गि ! यदेतत्कथितं तदक्षरं परमं परं ब्रह्म ब्राह्मणा ब्रह्मविदोऽभिवदन्ति तदाह-र्घमित्यादि । अलोहितम् अग्नेर्गुणो लोहितः अपां स्नेहस्ताभ्यामन्यत् सर्वथाप्यनिर्देश्यम् । लाञ्छः छाया तद्रहितमच्छायम् । मः, न अतमः । अमुखमद्वारम् । मीयन्ते येन तन्मात्रं रूपं तदस्य नास्तीत्यमात्रम् । छिद्रवदन्तरं नास्तीत्यनन्तरम् । तर्हि न अबाह्यम् । इति । अतन्निरसनेन ब्राह्मणास्तदक्षरं वदन्ति-तदक्षरं किञ्चन वस्तु नाश्नाति नोपभुङ्क्ते कश्चन कोऽपि

पुमाँस्तन्नाश्नोति नानुभवतीति पर्यवस्यन्ति प्रतिपादयन्ति । इत्यर्थ इति-निरवधिकनिषेधादर्शनात्तदवधिभूतं त्वामेव प्रतिपादयन्तीति भावः । स्वामिनां द्युपतय इति । हे अनन्त ! ते तवान्तं द्युपतयो न विदुर्भवाँश्च न वेत्ति । श्रुतीनां वेदानां मौलयो मुकुटीभूता गिरो वेदान्तवाक्यानि न विदुः किन्तु-यतस्ता गिरस्त्वयि नमो जय जयेतीत्युक्त्वा फलन्ति निवृत्तव्यापारा भवन्ति अतोऽहं त्वत्पदं नमो जय जयेति ब्रुवन् भजे ।।★।।

श्रीधरानुयायिनी — निर्विषयत्वेन ब्रह्मणः साक्षात्कारासम्भवमाशङ्क्य वागाद्यगोचरं ब्रह्मेति ज्ञानमेव ब्रह्मसाक्षात्कार इत्याहुः-द्युपतय इति । उत्तरोत्तरदशगुणभूम्यादिसप्तावरणसंयुता ब्रह्माण्डकोट्योऽपि त्वय्याकाशे रजांसीवैकदैव न तु क्रमेण कालचक्रेण परिभ्रमन्तीति । यद्वा-सृष्ट्यादौ लब्धप्राकट्या निष्क्रामन्ति प्रलयादौ लब्धाप्राकट्याः प्रविशन्तीत्यर्थः । यद्वा-अहो कियदस्माकं वाग्वैभवं येन त्वदीयवैभवं विषयीकृत्य स्तोष्याम इत्युपसंहरन्ति-द्युपतय इति । यदन्तरा यस्य तवैकैकरोमकूपमध्ये कालचक्रेण सहैव सावरणासङ्ख्यब्रह्माण्डानि द्युपतयो ब्रह्मादयो देवताश्च गवाक्षेषु परमाणव इव परिभ्रमन्ति, अत एव ते ब्रह्मविदादयस्तवान्तं न ययुरेव । तथा तवान्ताभावात्त्वमपि स्वस्यान्तं न यासि यत् यद्यप्येवं तथापि विषयेऽस्मदाद्याः श्रुतयः फलन्त्येव त्वां विषयीकृत्य सफला भवन्त्येव, त्वदीयवास्तवस्वरूपनिरूपणासामर्थ्येऽपि श्रुतयः खलु भगवद्विषयिण्य इति प्रथयैवास्माकं साफल्यमिति भावः । अथ कथमेवं विषण्णा भवथेति चेत्तत्राहुः-अतन्निरसनेनेति । अतत् मिथ्याभूतं विश्वं तस्य "नेह नानास्ति किञ्चन ।" "अस्थूलमनणु" इत्यादिना निरसनेन बाधेनैव भवतीति भवद्वर्तमानं प्राप्तं निधनं मरणं यासां ता वयमित्यर्थः, आसन्नमरणा इति यावत् । अयम्भावः — यथा सुवर्णवज्रादिक्षेत्रे मृत्पाषाणजलादिषु महता यत्नेन दूरीकृतेष्वेव सुवर्णवज्रादिकं लभ्यते तथात्रापि मिथ्याभूतप्रपञ्चान्तर्गतानन्तवस्तूनां निरासे कृत एव तत्पदलक्ष्यार्थप्राप्तिर्नान्यथा । एवं च सृष्ट्यारम्भकालमारभ्य प्रलयकालपर्यन्तमप्यतद्वस्तूनां गणनमप्यशक्यं किं वक्तव्यं तन्निरसनमशक्यमिति । तन्निरसनेन विना च तव ज्ञानमशक्यं तद्विना तु सुतरां त्वद्वर्णनमशक्यमिति कृत्वाऽत्यन्तासाध्ये कार्ये प्रवृत्तानामस्माकमन्ततो मरणमेव प्राप्तमित्याशयः । यद्वा-नन्वेवं दुर्गमश्चेदहं तदा भवतीभिर्वृत्त्यन्तरमेवाङ्गीकार्यमिति चेत्तत्राहुः-भवन्निधना इति । भवानेव नितरां धनं यासां ता वयमित्यर्थः । त्वां विनाक्षणमप्यस्माकं न निर्वाहस्तस्मात्तव जागरणलक्षणप्रकाश एवास्माकं जीवनमतो जागृहीत्याशयः । तस्माद्यदा तवानुकम्पां वयं लभेमहि अन्यो वा कश्चन लभेत तदैव दुष्प्रापमपि तव तत्त्वं सुगमं भवेदिति-अखिलशक्त्यवबोधकेति । प्रथमश्रुत्युक्तमेवात्राप्यनुसन्धेयमिति सङ्क्षेपः ।।★।। विश्वनाथी — तदेवं स्तुतौ सङ्क्षेपदर्शितनिजनिजार्थाः सर्वविधश्रुतीर्मुख्यया लक्षणया च वृत्त्या तत्स्वरूपनिरूपणद्वारा तत्स्वरूपवैभवनिरूपणद्वारा च तत्र चरन्तीरपि पर्याप्तिमनाप्तवतीर्दृष्ट्वा लब्धसमयास्तथैव स्वेषां तत्र चरणं युक्तमित्युपसंहरन्त्यः काश्चिदुपक्रमश्रुतीनां संवादेनाहुः-द्युपतय इति । अनादिकालपरम्परासम्बन्धिनोऽनन्तब्रह्माण्डसम्बन्धिनश्च नानाब्रह्मरुद्रादयोऽपि त्वं सर्वकालदेशव्यापकोऽपि अनन्ततयेति द्युपतय इत्यस्य च तत्त्वाप्राप्तौ हेतुः । इदमेव टीकायां यदन्तरेत्यादिना पूर्वत्रापि योजितम् । यस्य तवांशेनाविर्भूतस्य कारणार्णवशायिरूपस्याप्यन्तरा एकैकरोमकूपमध्ये ब्रह्माण्डनिचया असङ्ख्येया वान्ति सृष्ट्यादौ लब्धप्राकट्या निष्क्रामन्ति प्रलयादौ लब्धाप्राकट्याः प्रविशन्ति चेत्यर्थः । गवाक्षे परमाणव इवेति भावः । वयसा तेषां परिच्छेदकेन कालचक्रेण सह इति देशकालानन्त्यं दर्शितम् । तस्य स्वरूपवैभवाभ्यामेव तत्तदीयतत्तत्सर्वाश्रयत्वात् यद्यस्मादानन्त्याद्धेतोः श्रुतयोऽप्यतन्निरसनेन अनन्तादनन्तवैभवाच्च त्वत्तोऽन्येषां सान्तानां सान्तवैभवानां चानुवादपूर्वकत्यागेन भवत्येवानन्तेऽनन्तवैभवे पाराप्राप्त्या निधनं समाप्तिर्यासां तथाभूताः सत्यः सर्वा अपि श्रुतयः फलन्ति सफला भवन्ति, अनन्तपुरुषार्थप्राप्त्या सार्थका जायन्ते । एतदुक्तं भवति-यस्माच्छ्रुतयः सर्ववाक्यान्वयेन त्वय्येव सार्थका जायन्ते, तस्मात्तासामेकदेशवाक्यरूपस्तत्तदनुवादोऽपि तत्तन्निरसनपूर्वकत्वदुपदेशवाक्यार्थपर्यवसान एव । अतन्निरसनवाक्यमपि त्वदधिकमेव साक्षात्त्वदुपदेशवाक्यमपि तथैवातन्निरसनपूर्वकमेवेति लक्ष्यो वाच्यो वा भवसि । अस्मादेकप्रामाण्येन सर्वथैवाप्राकृतानन्तस्वरूपवैभवतया निर्णीयमानस्त्वमस्माकं परमपुरुषार्थोऽसि । एतदेवोक्तमुपक्रमवाक्येऽपि जय जय जह्यजामित्यादीति । तत्रानन्ततया प्रतिपादिकाः श्रुतयोऽपि "यतो वाचो निवर्तन्ते" इत्याद्याः सर्वब्रह्माण्डाद्याश्रयत्वस्य, "यदूर्ध्वं गार्गि दिवः" इत्याद्याः सर्वकालाश्रयत्वस्य, "सर्वे निमिषा जज्ञिरे विद्युतः पुरुषादधि" इत्याद्याः सर्वश्रुत्यर्थरूपस्य, "सर्वे वेदा यत्पदमामनन्ति" इत्याद्या अतन्निरसनपूर्वकश्रुत्यर्थत्वस्य, "न तस्य कार्यम्" इत्याद्याः । अतन्निरसनं तु

द्विविधमसाक्षाद्वृत्त्या तात्पर्यवृत्त्या चेति। यथा- "न तस्य कार्यम्" इत्यादिषु, "इन्द्रो यातोऽवसितस्य राजा" "सर्वं खल्विदं" इत्यादिषु। तत्पुनश्चतुर्विधम्-शान्तस्वरूपनिरसनं स्वाभाविकानन्तगुणत्वेन प्राकृतनियतसान्तवैभवनिरसनं फलसाधनसाध्यत्वनिरसनं सान्तसम्बन्धेनानृजुमार्गमयतत्प्रतिपादननिरसनं चेति। तत्राद्यम् — "अन्यदेव तद्विदितात्" इत्यादौ, यम् — "अस्थूलमनणु" इत्यादौ "न तस्य कार्यम्" इत्यादौ च, तृतीयम् — "अन्यत्र धर्मादन्यत्राधर्मात्" इत्यादौ, यम् — "नैषा तर्केण मतिरापनेया" "नैवाभ्यसेद्बहूञ्छब्दान् वाचो विग्लापनं हि तत्।" इत्यादाविति ॥ (२८) ॥४१॥

नीलकण्ठी — एवं ब्रह्मविदः "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति ब्रह्मैव सन् ब्रह्माप्येति" इत्यादिश्रुतेः भावस्य "य एवं वेद" "अहं ब्रह्मास्मि" इति "स इदं सर्वं भवति" "सलिल एको द्रष्टाद्वैतो भवति" "तत्केन कं" इत्यादिश्रुतिसिद्धौ सार्वात्म्यनिर्विशेषभावौ तयोराद्यो विशेषानन्त्यात्परो निर्विशेषत्वाच्च वाङ्मनसातीत इत्यस्य नन्तत्वमाह-द्युपतय इति। ते तव ज्ञातात्मतत्त्वस्य "स एकधा भवति त्रिधा भवति" इत्यादिश्रुतेः

"आत्मनां तु सहस्राणि बहूनि भरतर्षभ। योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत् ॥
प्राप्नुयाद्विषयान् कैश्चित्कैश्चिदुग्रं तपश्चरेत्। सङ्क्षिपेच्च पुनस्तानि सूर्यो रश्मिगणानिव ॥" इत्यादिस्मृतेश्च।

"प्रदीपवदावेशस्तथा हि दर्शयति" इति न्यायाच्च योगबलेन प्रदीपवदनेकधा भावं गतस्य अन्तमवसानं द्युपतय ये सर्वज्ञत्वेन प्रसिद्धाः ब्रह्मेन्द्रादयस्त एव न ययुर्न प्रापुः किमुतान्येऽल्पज्ञाः। किञ्च त्वमपि ते अन्तं न यासीति णामेनानुषञ्जनीयम्। अतः अनन्ततया यथा एकस्मिन् बीजे कृत्स्नो वटस्तत्रानन्तानि बीजानि तेषु प्रत्येकं वटा इत्येवं परम्परया तवाप्यानन्त्यमस्तीत्यर्थः। कुतोऽनन्तत्वमत आह-यदिति। यद्यस्माद्धेतोः ते इत्यनुकृष्यते ते तवान्तरा मध्ये काशे अण्डनिचयाः प्रत्येकं परितः पञ्चाशत्कोटियोजनप्रमिताः ब्रह्माण्डसमूहाः सावरणाः स्वापे क्षयोत्तरोत्तरदशगुणैः तेजोवाय्वाकाशमनोबुद्धिप्रकृत्यावरणैः सहिताः खे आकाशे रजांसीव धूलिकणा इव वयसा भूतभविष्यद्वर्तमानकालेन सह भ्रमन्ति। तथा च श्रुतिः — "यावान्वा अयमाकाशस्तावानेषोन्तर्हृदय आकाशः" इत्युक्त्वा "यच्चास्येहास्ति यच्च सर्वं तदस्मिन्समाहितम्" इति हार्दाकाशे सर्वसद्भावं दर्शयति। स्मृतिरपि —

"अनागतमतीतं च भविष्यत्स्थूलमण्वपि। तथा दूरमदूरं च निमेषः कल्प इत्यपि ॥
चिदात्मनि स्थितान्येव पश्य मायाविजृम्भितम्।" इति।

ननु, माया तु काचिन्मरुमरीचिमहाह्रदतरङ्गतुल्यानां विशेषाणामन्तं भूतुल्यस्याधिष्ठानभूतस्य सत्यस्य त्वन्तं वेत्याशङ्क्याह-यच्छ्रुतय इति। यत् यस्मिन् त्वयि विषये हि यस्मात् श्रुतयः "सत्यं ज्ञानमनन्तं ब्रह्म" "तत्त्वमसि" स्थूलमनण्वह्रस्वमदीर्घम्" इत्यादयः अतन्निरसनेन अनृतत्वजडत्वपरिच्छिन्नत्वादीनां पारोक्ष्यसद्वितीयत्वयोर्वा भूतयोर्मायाविद्ययोर्वा स्थूलत्वाणुत्वादीनां चानात्मभूतानां क्रमेण व्यावर्तनेन फलन्ति ब्रह्म ज्ञापयन्ति न विधिमुखेन, अतस्तव गोचरत्वादनन्तत्वमिति भावः। एवं सर्वनिषेधे शून्यतापत्तिं वारयति-भवन्निधना इति। भातीति भवान् चिज्ज्योतिःस्वरूपः त्वयि निधनं तात्पर्येण पर्यवसानं यासां तास्तथा निरवधिकनिषेधासम्भवात्सर्वनिषेधेन त्वामेव चिन्मात्रं श्रुतयोऽवशेषयन्तीत्यर्थः। अयम्भावः — यद्यपि-

"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति।" "सत्यं न्तं ब्रह्म" इत्यादिवाक्यानि विधिमुखेन ब्रह्म प्रतिपादयन्तीव भान्ति तथाप्यतन्निरसनेनैव तान्यपि पर्यवस्यन्ति। तथा हि त्यन्तःकरणोपाधेर्जीवस्य मायोपाधिना ईश्वरेणाभेदः श्रूयते स च विशिष्टयोर्न सम्भवतीति उभयत्राप्युपाध्यंशप्रहाणेन शुद्धं लक्षणया प्रतिपाद्यते वाक्येन तत्त्वमिति सामानाधिकरण्यात् सोऽयं देवदत्त इतिवत्। अत्र पदद्वयेऽपि लक्षणा लक्षितनिष्कृष्टस्येतरपदोक्तविशिष्टेनाभेदायोगात्। अंशांशिभावेनाभेदोपगमे तु "त्वमहमस्मि भगवो देव ते अहं वै ।" इति श्रुतिव्यतिहारसङ्कोचापत्तेः कनककुण्डलतुल्ययोः श्रुतिरजततुल्ययोर्वा जीवेशयोरंशांशिभावायोगात्, अन्यथा

कण्ठमणिदृष्टान्तबाधः स्यात्। तथा च-तत्त्वमसिवाक्येन एकवाक्यतामापादितं यतो वेत्यादिवाक्यं कारणत्वनिरसनेनैव ब्रह्मणि पर्यवस्यति, राधेयः कौन्तेय इतिवद्वा राधेयत्वबाधेन च कौन्तेयत्व इव जीवत्वबाधेन ब्रह्मणि पर्यवस्यति। एवं सत्यादिवाक्यमपि प्रकृष्टप्रकाशादिवाक्यवत्। अत्र हि असतोऽज्ञानस्य शून्यतापत्तेरचितः सतो भानायोगाच्च सत्त्वे सति चित्त्वमज्ञातब्रह्मज्ञापकं प्रकृष्टत्वे सति प्रकाशत्वमिव चन्द्रस्य। न च चन्द्रमसीव ब्रह्मणि वैशिष्ट्यं प्रत्यक्षं नापि शाब्दं शब्दस्याज्ञातज्ञापनार्थस्य वैशिष्ट्याप्रतिपादकात्। नापि लक्षणवैशिष्ट्यानुमेयम् अनन्तमिति विशेषणेनानुमानबाधात्। एवं च सत्यं ज्ञानमित्यपर्यायपदाभ्यामप्यखण्डं वस्तु सिद्धं तच्च परमप्रेमास्पदत्वानन्दरूपम् अर्थाच्चानृतजडदुःखादेर्व्यावृत्तिः। एवं च यथा तरङ्गचन्द्रघटाकाशानुगताभ्यां चन्द्रत्वाकाशत्वाभ्यां लक्ष्यमाणौ मुख्यचन्द्राकाशौ चन्द्रत्वाकाशत्वे न त्यजतः। एवं ब्रह्माध्यस्तघटाद्यनुगतसत्त्वेन चित्तवृत्त्युपाधिभेदभिन्नचिद्व्यक्त्यनुगतचित्त्वेन च लक्ष्यमाणं ब्रह्मापि सत्त्वचित्त्वे न त्यजति नाप्यखण्डत्वं सत्ताजातिवत्, सा हि स्वतो व्यावृत्तैरपि गोत्वादिभिर्न विशेष्टुं शक्या नीलत्वादिनेवोत्पलम्। अथ च तदात्मिका एवं ब्रह्मापीत्यत्र विस्तरः। तथा च-सत्यादिपदानां विशिष्टप्रतिपादकत्वादनृतादिव्यावर्तनेनैव ब्रह्मप्रमापकत्वं पर्यवस्यति। नेति नेत्यस्थूलादिवाक्यानां तु स्पष्टमेव मूर्तप्रपञ्चतद्गतस्थौल्यादिनिषेधेनाखण्डे ब्रह्मणि पर्यवसानं ततश्च ब्रह्मणो जन्मादिहेतुत्वं जन्मादिसापेक्षत्वादौपाधिकं सत्तटस्थतया शुद्धं लक्षयति शाखाग्रमिव चन्द्रम्। एवं परापरविद्याधिकारस्थानां सविशेषवाक्यानां तत्त्वप्रपत्त्युपास्तिविधिशेषतया देवताधिकरणन्यायेनावान्तरतात्पर्यवत्त्वेऽपि न परमतात्पर्यविषयत्वमुभयत्र तत्कल्पने वाक्यभेदापत्तेः। ये तु कृत्स्नं शास्त्रं सविशेषपरमित्याहुः तेषां सर्वविशेषवति तस्मिन्नस्थूलमित्यादिनिषेधवाक्यानामत्यन्तानर्थक्यं तस्मान्नित्यशुद्धबुद्धमुक्तस्वभावं निरस्ताशेषविशेषमेकरसं प्रत्यगभिन्नं ब्रह्माशेषविशेषनिषेधमुखेन श्रुतयः प्रतिपादयन्तीति सिद्धम्॥ (२८) ॥४१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

द्युपतय इत्यस्य टीकायाम् अनन्तयेत्युभयलक्षणत्वान्निर्गुणस्य चेति व्याख्यातम्। श्रुतौ अविदितादधीति अव्याकृतादपि अनादीत्यर्थः। कृताकृतात्कार्य्यकारणाभ्याम् अस्थूलमित्यादिकापीदृशी "अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमलाच्छमतमोऽवाय्वानाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यम्॥" इत्यादि तत्रालोहितमाग्नेयगुणरहितम् अस्नेहं वारिगुणरहितम् अमात्रमनंशं सर्वविशेषरहितमित्यर्थः। स्वव्याख्यायान्तु तदेवं (श्रु)स्तुतयः सङ्क्षेपदर्शितनिजनिजार्थाः सर्वविधश्रुतीर्मुख्यया लक्षणया च वृत्त्या तत्स्वरूपनिरूपणद्वारा तत्स्वरूपवैभवनिरूपणद्वारा च त चरन्तीरपि पर्याप्तिमनाप्तवतीर्दृष्ट्वा लब्धसमयास्तथैव स्वेषां तत्र चरणं युक्तमित्युपसंहरन्त्यः काश्चिदुपक्रमश्रुतीनां संवादेनाहुः-द्युपतय इति। अनादिकालपरम्परासम्बन्धिनोऽनन्तब्रह्माण्डसम्बन्धिनश्च नानाब्रह्मरुद्रादयोऽपि त्वं सर्वकालदेशव्यापकोऽपि अनन्ततयै द्युपतय इत्यस्य च तत्त्वाप्राप्तौ हेतुः। इदमेव टीकायां यदन्तरेत्यादिना पूर्वत्रापि योजितम्। यस्य तवांशेनाविर्भूतस्य कारणार्णवशायिरूपस्याप्यन्तरा एकैकरोमकूपमध्ये ब्रह्माण्डनिचया असङ्ख्येया वान्ति सृष्ट्यादौ लब्धप्राकट्या निष्क्रामन्ति प्रलयादौ लब्धाप्राकट्याः प्रविशन्ति चेत्यर्थः। गवाक्षे परमाणव इवेति भावः। वयसा तेषां परिच्छेदकेन कालचक्रेण सह इति देशकालानन्त्यं दर्शितम्। तस्य स्वरूपवैभवाभ्यामेव तत्तदीयतत्तत्सर्वाश्रयत्वात् यद्यस्मादानन्त्याद्धेतोः श्रुतयोऽप्यतन्निरसनेन अनन्तादनन्तवैभवाच्च त्वत्तोऽन्येषां सान्तानां सान्तवैभवानां चानुवादपूर्वकत्यागेन भवत्येवानन्तेऽनन्तवैभवे पाराप्राप्त्या निधनं समाप्तिर्यासां तथाभूताः सत्यः सर्वा अपि श्रुतयः फलन्ति सफला भवन्ति, अनन्तपुरुषार्थप्राप्त्या सार्थका जायन्ते। एतदुक्तं भवति-यस्माच्छ्रुतयः सर्ववाक्यान्वयेन त्वय्येव सार्थका जायन्ते, तस्मात्तासामेकदेशवाक्यरूपस्तत्तदनुवादोऽपि तत्तन्निरसनपूर्वकत्वदुपदेशवाक्यार्थपर्यवसान एव। अतन्निरसनवाक्यमपि त्वदधिकमेव साक्षात्त्वदुपदेशवाक्यमपि तथैवातन्निरसनपूर्वकमेवेति लक्ष्यो वाच्यो वा भवसि। अस्मादेकप्रामाण्येन सर्वथैवाप्राकृतानन्तस्वरूपवैभवतया निर्णीयमानस्त्वमस्माकं परमपुरुषार्थोऽसि। एतदेवोक्तमुपक्रमवाक्येऽपि जय जय जह्यजामित्यादीति। तत्रानन्ततया प्रतिपादिकाः श्रुतयोऽपि "यतो वाचो निवर्तन्ते" इत्याद्याः सर्वब्रह्माण्डाद्याश्रयत्वस्य, "यदूर्ध्वं गार्गि दिवः" इत्याद्याः सर्वकालाश्रयत्वस्य, "सर्वे निमिषा जज्ञिरे विद्युतः पुरुषादधि" इत्याद्याः सर्वश्रुत्यर्थरूपस्य, "सर्वे वेदा यत्पदमामनन्ति" इत्याद्या अतन्निरसनपूर्वकश्रुत्यर्थत्वस्य, "न तस्य कार्यम्" इत्याद्याः। अतन्निरसनं तु

तावद्द्विविधमसाक्षाद्वृत्त्या तात्पर्यवृत्त्या चेति। यथा- "न तस्य कार्यम्" इत्यादिषु, "इन्द्रो यातोऽवसितस्य राजा" "सर्वं खल्विदं ब्रह्म" इत्यादिषु । तत्पुनश्चतुर्विधम्-शान्तस्वरूपनिरसनं स्वाभाविकानन्तगुणत्वेन प्राकृतनियतसान्तवैभवनिरसनं सान्तफलसाधनसाध्यत्वनिरसनं सान्तसम्बन्धेनानृजुमार्गमयतत्प्रतिपादननिरसनं चेति। तत्राद्यम् — "अन्यदेव तद्विदितात्" इत्यादौ, द्वितीयम् — "अस्थूलमनणु" इत्यादौ "न तस्य कार्यम्" इत्यादौ च, तृतीयम् — "अन्यत्र धर्मादन्यत्राधर्मात्" इत्यादौ, चतुर्थम् — "नैषा तर्केण मतिरापनेया" "नैवाभ्यसेद्बहूञ्छब्दान् वाचो विग्लापनं हि तत् ।" इत्यादाविति । इति एवम् एतच्छ्रुत्युक्तमात्मानुशासनं जीवहितोपदेशं सर्वमूलस्वरूपस्वयं भगवत्सम्बन्ध्युपदेशं वा आ सम्यक् श्रुत्वा अथ अत एव आत्मना जीवस्य गतिं गम्यं तादृशभगवतो ज्ञानप्रकारं वा ज्ञात्वा भगवद्वैभववर्णनस्य तादृशस्वभावत्वादपूर्ववदनुभूय सिद्धा अपि किं वा पूर्णमनोरथाः सन्तः ॥२८॥४१॥ ॥४२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवमनन्तमहिम्नो भगवतो माहात्म्यं वर्णयन्त्यः शक्तिरहिता इव तथैव स्तुतिमुपसंहरन्ति-द्युपतय इति । एव अपि, द्युपतयोऽपि, तेऽन्तं त्वन्माहात्म्यावधिम्, यस्य श्रीचतुर्भुजमूर्तेस्तवान्तरा एकरोमकूपमध्ये सह वान्ति। तथा चोक्तं षष्ठे चित्रकेतुना (भा० ६/१६/३७) —

"क्षित्यादिभिरेष किलावृतः, सप्तभिर्दशगुणोत्तरैरण्डकोषः । यत्र पतत्यनुकल्पः, सहाण्डकोटिकोटिभिस्तदनन्तः ॥"इति ।

एवं परिच्छिन्नत्वेऽप्यपरिच्छिन्नत्वमपरिच्छिन्नत्वेऽपि परिच्छिन्नत्वमित्येवं परमदुर्वितर्क्य-स्वरूपत्वेनानन्तमाहात्म्यभरत्वमेव दर्शितम्। वयसेति-कालस्य नित्यत्वेन सदा तेषां परिभ्रमणं सूचितम्। यच्छब्दस्य पूर्व्वेणैवान्वयः। तच्च तैरपि व्याख्यातमेव। यद्यस्मात् त्वमपीत्यादि, अतन्निरसनेन त्वद्व्यतिरिक्तनिवारणमात्रद्वारा। अन्यत्तैर्व्याख्यातम्। यद्वा, हि अतो हेतोः, मद्विधाः श्रुतयस्त्वयि फलन्ति, त्वद्भजनेन त्वां प्राप्नुवन्तीत्यर्थः। एवं परब्रह्मणि कथं श्रुतयश्चरन्तीत्यस्य प्रश्नोत्तरमन्तेऽत्राप्युक्तमिति, ज्ञानकाण्डश्रुतयस्तु अतन्निरसनेन भवन्निधना भवति ब्रह्मरूपे निधनं पर्य्यवसानं यासां ताः । यद्वा, श्लेषणान्ते प्रार्थितमिदं यद्यस्मादीदृशस्त्वन्महिमा, अतःश्रुतयो मद्विधा भवानेव नितरां धनं यासां तथाभूताः सत्यः, अतन्निरसनेन अन्यसर्व्वपरित्यागेन त्वयि फलन्ति, सफलमनोरथा भवन्ति। यद्वा, अकारो विष्णुः, अ ! हे विष्णो ! तस्यास्मन्मनोरथस्य निरसनेन निराकरणेन भवत् सद्यो जायमानं निधनं मरणं यासां तथाभूता भविष्यन्तीति । वयमित्यनुक्तिर्लज्जादिना, ततश्च श्रीभगवत्कृपया काले श्रीनन्दगोकुलेऽत्र गोप्यस्ता बभूवुरित्युपाख्यानं प्रसिद्धमेव ॥४१॥

[भक्तानामेवम्भूतोऽपि त्वं ब्रह्मलोकाद्यधीश्वराणामप्यविज्ञातपारोऽसीति श्रीभगवन्महिमवर्णनेनैवोपसंहरन्ति-द्युपतय इति। द्युपतयो ब्रह्म-रुद्र-शक्रादयोऽपि तवान्तं नैव ययुः, वत्सपालादिहरणाद्यवसरे रासक्रीडाद्युत्सवे च तव वैभवान्तं न प्रापुरिति, - अनन्ततया तासां त्वन्मूर्तीनां पार्श्वे युगपद्ब्रह्माण्डकोटिदर्शनात्, तथा कोटिसङ्ख्यव्रजसुन्दरीणां प्रत्येकं पार्श्ववर्तित्वेन च त्वद्वैभवस्यान्ताभावेन त्वमपि तदानीमात्मवैभवं चिद्विलासपर्य्यवसानं न लब्धवानसीति यस्य तवान्तरा त्वल्लोमविवराणां मध्ये सावरणा ब्रह्माण्डसमूहा द्विपरार्धकालचक्रेण सह घूर्णन्ति। तथा ब्रह्मणाऽप्युक्तम् (भा० १०/१४/११) —

"क्वेदृग्विधाविगणिताण्डपराणुचर्य्या वाताध्वरोमविवरस्य" इति । अतोऽपरिच्छिन्नत्वात् ज्ञानकाण्डश्रुतयोऽतन्निरसनेन त्वयि फलन्ति, लक्षणया त्वयि पर्य्यवस्यन्ति, वयं तु प्रेमनिष्ठत्वाद्भवदेकपरायणतया भवन्निधनास्तन्मात्रमग्नात्मानस्त्वां विनान्यन्न जानीम इत्यर्थः । तस्मादस्मत्कृपया त्वं जागृहीति ॥४१॥]

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भगवतो माहात्म्यस्यापरिच्छेद्यत्वमाह-द्युपतय इति। द्युपतयः इन्द्रादयः। अन्तम् अवधिम्। यदन्तरा यस्यान्तं खे वयसा पक्षिभिः सह । रजांसि इव यदन्तरा सावरणाः त्वत्पर्यवसायिन्यः श्रुतयः अतन्निरसनेन । फलन्ति सफलानि भवन्ति । समस्तचेतनसाजात्यनिरसनेन त्वद्वैलक्षण्यं बोधयन्तीत्यर्थः ॥४१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थं यथामति संस्तुत्याथ त्वन्माहात्म्यस्यापरिच्छिन्नत्वात् साकल्येन स्तोतुं न शक्नुम इति निगमयन्ति-द्युपतय इति। द्युपतयः स्वर्गादिलोकपतयः महेन्द्रब्रह्मादय एव ते तवान्तं स्वरूपस्वभावपारं न ययुः न जानीयुरित्यर्थः। किं पुनर्मनुजादय इति भावः। किं बहुना। त्वमपि न यासि। कुतः। अनन्ततया स्वरूपस्वभावयोरपरिच्छिन्नतया। न चैतावता तव सर्वज्ञत्वभङ्गः। यथावस्थितवस्तुविषयज्ञानस्यैव सर्वज्ञतावहत्वात्। अपरिच्छिन्नस्य परिच्छिन्नत्वज्ञानस्याज्ञत्वावहत्वाच्चेति भावः। महिम्नोऽपरिच्छिन्नत्वमेव प्रतिपादयन्ति-यदन्तरेत्यादिना। यस्य तवान्तरा मध्ये एकैकस्मिन् रोमकूपे सावरणाः सप्तभिरावरणैः सहिताः अण्डानां ब्रह्माण्डानां निचयाः समूहाः वान्ति सञ्चरन्ति। यथा खे आकाशे रजांसि वयसेति जात्यभिप्रायमेकवचनम्। पक्षिभिः सह। वान्ति तद्वत् वान्ति सञ्चरन्ति। यद्यस्मात् एवं हि ततः श्रुतयः पारोक्ष्यनिर्देशः। स्तुतेरन्यगतत्वाभिप्रायकः। त्वय्यतन्निरसनेन तस्मादपारमहिम्नस्त्वत्तोऽन्यत्प्रकृतिपुरुषादि वस्तु तन्निरसनेन तत्साजात्यप्रतिषेधेन तत्पूर्वकमित्यर्थः। भवन्निधनाः भवति निधनं निष्ठा पर्यवसानमिति यावत्। तद्यासां ताः शब्दवृत्त्या तत्पर्यवृत्त्या च प्रकृतिपुरुषसाजात्यनिरसनेन तद्विलक्षणं त्वां बोधयन्तीत्यर्थः। फलन्ति सफला भवन्ति। कृतार्थानि भवन्तीत्यर्थः। समस्तचेतनाचेतनसाजात्यनिरसनेन तद्वैलक्षण्यमात्रं बोधयन्ति। न तु साकल्येन त्वत्स्वरूपस्वभावादिकं बोधयितुं शक्नुवन्तीति भावः ॥४१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

पाठभेदत्वात् पूर्वं व्याख्यातचरमेव।

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

नद स्तुतौ सङ्क्षेपदर्शितनिजानिजार्थाः सर्वविधश्रुतीर्मुख्यया लक्षणया वृत्त्या तत्स्वरूपनिरूपणद्वारा तत्स्वरूपवैभवनिरूपणद्वारा च तत्र चरन्तीरपि पर्याप्तिमनाप्नुवतीर्दृष्ट्वा लब्धसमया साऽप्येव स्वेषां तत्र चरणयुक्तमित्युपसंहरन्त्यः काश्चिदुपक्रमश्रुतीनां संवादेनाहुः-द्युपतय इति ॥४१॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

हे नाथ! तर्हि त्वन्महिमानं न कोऽपि जानीयादित्युपसंहरन्ति-द्युपतय इत्यादि। द्युपतयो ब्रह्मादयो देवाः ते तव अन्तं न ययुः। किं बहुना त्वमपि ते अन्तं न यासीः तर्हि किमहमसर्वज्ञः। नेत्याहुः-अनन्ततया अनन्तस्यान्ताज्ञानेन न सर्वज्ञत्वहानिः अनन्ततामेवाहुः यत् यस्य तवांशरूपस्य सहस्रशिरसः श्रीनारायणस्य अन्तरा मध्ये अण्डनिचया ब्रह्माण्डसमूहाः सावरणा एव वान्ति सञ्चरन्ति। ननु भोः कृष्ण! कस्मिन् क इव खे रजांसीव अतस्त्वमनन्त एव वयसा कालचक्रेण सह यत् यस्मात् श्रुतयो वयं त्वयि अतन्निरसनेन निद्रानिरासेन फलन्ति पर्य्यवस्यन्ति तज्जागरणम् अतन्निद्रा। कथम्भूताः श्रुतयः। भवन्निधनाः। त्वन्निद्रया भवत्सम्पत्यमानं निधनमिव निधनमप्रकाशो यासां त्वयि जागरितेऽस्माकमुत्साहः स्यादिति जागृहीति भावः। अथवा। भवानेव निःशेषं धनं यासाम् अतस्तव जागरणमेवास्माकं श्रेय इति ॥४१-४५॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

तर्हि हे नाथ! त्वन्महिमानं केऽपि न जानन्तीत्युपसंहरन्ति- द्युपतय इत्यादि। तुल्यमेव सर्वम्। यत् श्रुतयो मद्विधास्त्वय्येव फलन्ति, सफला भवन्ति। भवति निधनं पर्याप्तिर्यासाम् ॥४१॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदेवं सच्चिदानन्दमहासमुद्रस्य स्तुतिमिषेण तत्त्वं निरूपयितुं प्रवृत्ताः श्रुतयः इयत्तामप्राप्य परावृत्तास्तत्र स्वासामर्थ्यमभिव्यञ्जयन्त्यः स्तुतिमुपसंहरन्ति-द्युपतयः इति। स्वर्गादिलोकपतयो ब्रह्माद्या अपि ते तवान्तं न ययुः न प्रापुः। तत्र वयं काः। ननु यूयं तेभ्यः सकाशादपि सूक्ष्मदर्शिन्योऽन्तं प्राप्यथ मा विरमत तत्राहुः-त्वमपि तवान्तं न यासि। आसतां दूरे

वदन्ये इति भावः । कुतस्तर्हि सर्वज्ञता सर्वशक्तिता वा तत्राहुः-अनन्ततया । अन्ताभावेन न हि शशविषाणाज्ञानं सार्वज्ञ्यं प्राप्तिर्वा शक्तिवैभवं. विहन्ति । अनन्तत्वमेवाहुः-यदन्तरेति । यस्य तव अन्तरा मध्ये । ननु अहो । सावरणा उत्तरोत्तरं गुणप्राप्तावरणयुक्ता अण्डनिचयाः ब्रह्माण्डसमूहाः वान्ति परिभ्रमन्ति वयसा कालचक्रेण खे रजांसीव सह एकदैव न तु र्यायेण, यद्यस्मादेव तस्मात् त्वयि विषये श्रुतयोऽस्मदाद्याः फलन्ति । त्वां स्वविषयीकृत्य सफला भवन्ति । तत्त्वनिरूपणासामर्थ्येऽपि श्रुतयः खलु भगवद्विषयिण्य इति प्रथयैवास्माकं साफल्यमभूदित भावः । कथमेवमतिविषण्णा वथेति तत्राहुः-अतन्निरसनेन भवन्निधना इति । ब्रह्मतत्त्वपरमात्मतत्त्वभगवत्तत्त्वानि समासेनोक्त्वा पुनर्व्यासेन विवरीतव्यानां तेषां मध्ये यद्ब्रह्म तस्मिंस्तत्पदार्थे प्रथमं निरूपयितव्ये आदावतन्निरसनं कार्यं तत्र एतत्पदार्थो माया मायिकवस्तुनि वेत्यत्राप्यभ्यापतन्तो नाना नानावादाः समाहिता एव । यथा मणिक्षेत्रे मृत्पाषाणजलादिषु दूरीकृतेष्वेव मणिलाभस्तथैवातत्पदार्थेषु दूरीकृतेष्वेव ब्रह्मलाभः । अतोऽत्र मायिकवस्तूनां निरसनेनैव भवद्वर्तमानं निधनं मरणं यासां ताः वयं सृष्टिकालमारभ्य लयकालपर्यन्तमपि अतद्वस्तूनां स्थावरजङ्गमानां प्रत्येकं जातिव्यक्तिगुणकर्मणामेतावती सङ्ख्येति गणयितुमप्यशक्यत्वात् न्निरसनानन्तरं ब्रह्मपरमात्मभगवत्त्वानि ततोऽप्यतिदुर्गमानि ततोऽप्यनन्तानि कथं विवृत्य निरूपयितुं प्रभवेमेति भावः । तस्मात् दि त्वत्कृपां वयं लभेमहि अन्यो वा कश्चनापि लभेत तदैव दुर्गममपि तत्त्वं सुगमं भवेदिति प्रथम एव श्लोके अखिलशक्त्यवबोधक इति तदनन्तरमपि तव परि ये चरन्तीत्यत्र नृषु तव माययेत्यत्रापि बुद्धीन्द्रियेत्यत्रापि व्यञ्जितमेव । अत्रातन्निरसने श्रुतयः —

"अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमलाञ्छमतमोऽवाय्वानाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवाग- मनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्य"मित्याद्याः ॥४१॥

गूढार्थदीपिनी

तदेवमानन्दसमुद्रस्य भगवतः स्तुतिव्याजेन लोकोपकाराथं गूढतत्त्वं निरूप्य तदानन्दस्यापरिच्छिन्नतामनुभवन्त्यो वोद्रेकात्तदङ्घ्रिगा एव जाताः । तत्स्पर्शजन्यदिव्यसुखाद्विह्वलाः सत्यो भगवतोऽपरिमितमहिमानं निरूपयन्त्यः स्तुतिमुपसंहरन्ति- द्युपतय इति ।

(भगवत्सुखानन्त्यपरेयम्)

पद्यानुवादः —

न ययुरीशतवान्तमजादयस्त्वमपि नैषि यतोऽण्डनिचयाः कणाः ।
ख इव रोमसु वान्ति वयं जगन्निरसने रसनेन तवाङ्घ्रिगाः ॥२८॥

सङ्क्षिप्तसार्थान्वयः — हे भगवन् ! द्युपतयः स्वर्गादिलोकपतयः ते अन्तं न ययुः । किं बहुना अनन्ततया त्वमपि त्मनोऽन्तं न यासि । ननु अहो यदन्तरा यस्य तव अन्तरा मध्ये सावरणाः सप्तावरणयुक्ताः अण्डनिचयाः ब्रह्माण्डसमूहाः वयसा लचक्रेण सह एकदैव वान्ति परिभ्रमन्ति खे रजांसि इव । यत् यस्मात् तस्मात् श्रुतयः अतन्निरसनेन नेति नेति कृत्वा त्खण्डनद्वारा त्वयि हि त्वय्येव फलन्ति पर्यवस्यन्ति तात्पर्यवृत्त्या त्वामेव प्रतिपादयन्ति न तु साक्षात् । कथम्भूताः ? भवन्निधनाः र्यवसायिन्यः ॥

हे भगवन् ! द्युपतयः स्वर्गादिलोकपतयः इन्द्रब्रह्मादयः ते तव स्वरूपानन्दस्य अन्तमवधिं पारं वा न ययुः न प्रापुः । तत्र काः ? किं बहुना त्वमपि सर्वज्ञः आत्मनोऽन्तं न यासि न जानासि । तत्र हेतुमाहुः-अनन्ततया अन्ताभावेन । न हि विषाणखपुष्पाद्यज्ञानं सार्वज्ञ्यं तदप्राप्तिर्वा सर्वशक्तिमत्तां वा निहन्ति । अनन्तत्वमेवाहुः-यस्य तव अन्तरा प्रत्येकरोमकूपमध्ये अहो सावरणाः उत्तरोत्तरदशगुणितपृथिव्यादिसप्तावरणसहिता अण्डनिचया ब्रह्माण्डसमूहा वयसा कालचक्रेण सह एकदैव न र्यायेण वान्ति परिभ्रमन्ति । कस्मिन् कानीव ? खे आकाशे रजांसि इव परमाणव इव । यस्मादेवं तस्मात् । कथम् ? निरसनेन । तद्ब्रह्म न भवतीति अतत् मिथ्याभूतं जगत् तस्य निरसनेन खण्डनद्वारा । "सर्वं खल्विदं ब्रह्म । नेह नानास्ति किञ्चन ।"

इत्यादिश्रुतिकदम्बेनेत्यर्थः । यतो भवन्निधनाः भवन्निःश्वासभूतत्वाद्भवत्येव सर्वकारणरूपे त्वय्येव निधनं लयः पर्यवसानं यासां ताः । निरवधिकनिषेधाभावादवधिभूतं त्वामेव लक्षयन्तीत्यर्थः । "सर्वे वेदा यत्पदमामनन्ति । वेदैश्च सर्वैरहमेव वेद्य" इत्यादिवचनात् ॥

अयम्भावः — यथा सुवर्णहीरकादिक्षेत्रे मृत्पाषाणजलादिषु महता यत्नेन दूरीकृतेष्वेव सुवर्णहिरकादिकमुपलभ्यते एवमत्रापि मिथ्याभूतप्रपञ्चान्तर्गतविविधवस्तुनां निरासे कृते एव तत्पदार्थप्राप्तिर्जायते नान्यथेति । केचित्तु 'वयमपि ते समाः' इत्युक्तेर्गोप्य इव तादृगिच्छासम्पन्नत्वाद्दिव्यातिदिव्यविग्रहधारिण्यः सत्यः त्वय्येव कन्दर्पकोटिलावण्ये श्रीकृष्ण एव फलन्ति समन्विता जाताः सफलमनोरथा बभूवुः । वर्तमानसामीप्ये भूते लट् । केन हेतुना ? ओ वासुदेवः स एव तत् पूर्णं ब्रह्म तस्य नि नितरां रसनेन आस्वादनेन हेतुना । यतो भवानेव नि निश्चितं धनं पतिरूपं यासां ताः श्रुतयः इति श्लिष्टोऽर्थः । अत्रार्थे प्रमाणं तु "निभृतमरुन्मनोक्षे"ति श्रुतिव्याख्यायामवगन्तव्यम् । एतेन निर्गुणे श्रुतयः कथं चरन्तीति प्रश्नोपक्रमस्य त्वयि हि फलन्तीत्युपसंहारवाक्येन सोपपत्तिकं समाधानमप्युक्तं भवति । हिशब्दोऽत्र साक्षादर्थकः । कथं चरन्ति इति ? प्रश्नस्य समाधानपरेयं श्रुतिः । सप्तावरणस्य उत्तरोत्तरदशगुणत्वे मानं तु वैष्णवे पराशरोक्तं द्रष्टव्यम् । तथा हि —

"एते सप्त मया लोका मैत्रेय कथितास्तव । पातालानि च सप्तैव ब्रह्माण्डस्यैव विस्तरः ॥१॥
एतदण्डकटाहेन तिर्यगूर्ध्वमधस्तथा । कपित्थस्य यथा बीजं सर्वतो वै समावृतम् ॥२॥
दशोत्तरेण पयसा मैत्रेयाण्डं च तद् वृतम् । स चाम्बुपरिधानोऽसौ वह्निना वेष्टितो बहिः ॥३॥
वह्निश्च वायुना वायुर्मैत्रेय नभसा वृतः । भूतादिना नभः सोऽपि महता परिवेष्टितः ॥४॥
दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै । महान्तं च समावृत्य प्रधानं समवस्थितम् ॥५॥
अनन्तस्य न तस्यान्तः संस्थानं चापि विद्यते । तदनन्तमसङ्ख्यानं प्रमाणं चापि वै यतः ।
हेतुभूतमशेषस्य प्रकृतिः सा परा मुने ॥६॥" इति ॥२८॥४२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

इदानीं श्रीभगवतोऽपरिमितैश्वर्यं प्रतिपाद्योपसंहरति श्रुतयः —

'य ऊर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यत् भूतं च भवच्च भविष्यं च कोऽद्धा वेद । यतः आबभूव योऽस्याध्यक्षः परमे व्योमन् सोऽङ्ग वेद यदिवा न वेद ॥ न तस्य कश्चित्पतिरस्ति लोके न न वेदिता नैव च तस्य लिङ्गम् ॥'

इत्याद्याः । द्युपतयो ब्रह्मरुद्रेन्द्रादयो लोकपालास्तव सर्वेश्वरस्यान्तं न ययुः । भवतः स्वरूपगुणशक्तिनाम्नामन्तमियत्तां न प्रापुः । 'न तं विष्णोर्जायमानो न जातो वेदस्य महिम्नः परमं तमाप ॥' 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि ॥'

इत्यादिश्रुतिभ्यः । 'मां तु वेद न कश्चन ।' इति भगवदुक्तेश्च । आस्तां ब्रह्मादीनां वार्ता त्वमपि स्वस्यान्तं न वेत्सि तर्हि पूर्वोक्तसर्वज्ञत्वादीनां हानेरज्ञत्वाद्यापत्तेश्च निन्दैव भवतीभिः क्रियते इति चेत्तत्राहुः अनन्ततयेति । अन्तस्यात्यन्ताभावतया शशविषाणताडनक्षतादर्शने गगनकुसुमगन्धघ्राणे च न चक्षुर्घ्राणयोर्हानिर्यथा तद्वत् । तथाभूतस्यैश्वर्यलेशगन्धस्य दिग्दर्शनेनानन्तत्वं लक्षयन्ति-यदन्तरा यस्य भगवत अत्यल्पैकदेशविशेषे सावरणा उत्तरोत्तरदशगुणसप्तावरणयुक्ताः तथा च —

"एते सप्त मया लोका मैत्रेय कथितास्तव । पातालानि च सप्तैव ब्रह्माण्डस्यैव विस्तरः ॥१॥
एतदण्डकटाहेन तिर्यगूर्ध्वमधस्तथा । कपित्थस्य यथा बीजं सर्वतो वै समावृतम् ॥२॥
दशोत्तरेण पयसा मैत्रेयाण्डं च तद् वृतम् । स चाम्बुपरिधानोऽसौ वह्निना वेष्टितो बहिः ॥३॥

इत्यादि
प्रेरिताः परिभ्रमन्ति
एकदैवेत्यर्थः । तदे
"अण्डानां
इति रामाय
'साण्डं स
इति यस्मादे
ब्रह्म ।' 'यः सर्वज्ञः स
स्वरूपेतरपदार्थस्य स्व
। त्वय्येव फलन्तीति
यासां ताः भगवद्विषय
। एतच्च समन्वयाध्या

किञ्च तदेव
। द्युपतय एव ते न ययु
। ब्रह्मानन्दपर्यन्तस्यापि
ज्ञातो वाऽज्ञातो वा विद्य
दूषणं तेषामसार्वज्ञं च त
सार्वज्ञप्रतिबन्धकं न त्व
भगवतः अन्तः मध्ये अ
अनेनैकस्य ब्रह्माण्डाधि
आनन्त्यं नोपपद्यत इति
ब्रह्माण्डानीति केचित् ।
परिभ्रमन्तीत्यर्थः । ननु
वायुस्थानीयो वा कालः
यद्यस्माद्धान्ति । ब्रह्माण्डा
एवं सति सर्वप्रमाणाना
पर्यवसानवृत्त्या, न तु वा
स्वरीत्या त्वशक्यं माहात्म
भवन्ति । एवमनन्तवृक्षाण

वह्निश्च वायुना वायुर्मैत्रेय नभसा वृतः । भूतादिना नभः सोऽपि महता परिवेष्टितः ॥४॥

दशोत्तराण्यशेषाणि मैत्रेयैतानि सप्त वै । महान्तं च समावृत्य प्रधानं समवस्थितम् ॥५॥

अनन्तस्य न तस्यान्तः संस्थानं चापि विद्यते । तदनन्तमसङ्ख्यानं प्रमाणं चापि वै यतः ।

हेतुभूतमशेषस्य प्रकृतिः सा परा मुने ॥६॥''

इत्यादि वैष्णवे पराशरोक्तिः । अण्डनिचयाः उक्तप्रकाराणां ब्रह्माण्डानां समूहाः । वयसा वान्ति । त्वत्कालरूपया शक्त्या ताः परिभ्रमन्ति । तत्र दृष्टान्तः – खे रजांसीव आकाशे परमाणव इव । ननु कालभेदेनैतत् सङ्गच्छत इति चेत्तत्राहुः-सहेति र्वेत्यर्थः । तदेवाह श्रीपराशरः —

"अण्डानां तु सहस्राणां सहस्राण्ययुतानि च । ईदृशानां तथा तत्र कोटिकोटिशतानि च ॥"

इति रामायणेऽपि सुन्दरकाण्डे त्रिजटावाक्यम् —

'साण्डं सर्वं त्रिभुवनं सर्वतः सचराचरम् । सर्वं ग्रस्तं मया दृष्टं रामेणाक्लिष्टकारिणा ॥'

इति यस्मादेवमपरिमितैश्वर्य्यस्त्वमसि । अतः श्रुतयस्त्वय्येव फलन्ति त्वयि समन्वयन्तीत्यर्थः । कानिचित् 'सत्यं ज्ञानमनन्तं ' 'यः सर्वज्ञः सर्ववित् ।' इत्यादीनि वाक्यानि मुख्यया वृत्त्या स्वरूपप्रतिपादनेन कानिचिदस्थूलमनण्वित्यादीनि चातन्निरसनेन पेतरपदार्थस्य स्वरूपत्वनिषेधेन आकाशो नामरूपयोर्निर्वहितेत्यादीनि रूढ्यान्यत्र प्रसिद्धान्यपि योगेन त्वयि समन्वयन्तीत्यर्थः व्येव फलन्तीति को नियम इति चेत्तत्राहुः-भवन्निधना भवेत्येव सर्वज्ञे सर्वकारणकारणे स्वयं कारणशून्ये निधानमवसानं सां ताः भगवद्विषयका एव सर्वाः श्रुतय इत्यर्थः । 'सर्वे वेदा यत्पदमामनन्ति ।' 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिशास्त्रवचनात् च्च समन्वयाध्याये निपुणं प्रपञ्चितम् । विस्तरभयादुपरम्यते ॥४१॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

किञ्च तदेव सुखं सेव्यं यन्नश्वरं न भवति । सुतरां देशकालपरिच्छिन्नं न सेव्यमिति वक्तुं भगवदानन्दस्य देशकालापरिच्छेदमाह तय एव ते न ययुरिति । द्युपयतः स्वर्गपतयो देवेन्द्रादयः ते सुखतारतम्यं जानन्ति तेऽपि भगवतः स्वरूपानन्दस्य अन्तं न ययुः नन्दपर्यन्तस्यापि शतसङ्ख्यया आनन्दपरिमाणस्य ज्ञातत्वादानन्दमयस्यैव परमन्तो न ज्ञायते । नन्वन्तोऽस्ति चेत्किमज्ञानेन वाऽज्ञातो वा विद्यमानः स्वसमाप्तौ दुःखानुभवं कारयत्येवेत्याशङ्क्याह-अनन्ततयेति । विद्यमाने अन्ते यदि न जानीयुस्तदैवेदं तेषामसार्वज्ञं च तदेव तु नास्ति । किञ्च त्वमपि न वेत्सि, नापि सर्वज्ञो भगवान् कथं न जानातीति मन्तव्यम् । विद्यमानस्यैवाज्ञानं प्रतिबन्धकं न त्वविद्यमानस्य । एवं कालपरिच्छेदमुक्त्वा देशापरिच्छेदमाह-यदन्तराण्डनिचया ननु सावरणा इति । यस्य अन्तः मध्ये आण्डनिचया अण्डसमूहाः अन्तरा अण्डनिचया वा तेऽपि सावरणाः प्रकृतिपर्यन्तमुत्तरोत्तरं दशगुणावरणयुक्ताः कस्य ब्रह्माण्डाधिपतेः ब्रह्मानन्दो गणित इति भगवदानन्दस्य अनन्तता समर्थिता । ननु तथापि ब्रह्माण्डानां सङ्ख्यावत्त्वे त्वं नोपपद्यत इति चेत्तत्राह-ख इव रजांसि वान्तीति । यथा जालार्करश्मिषु कोटिशो रेणव उत्पतन्ति एवं भगवद्रोमकूपेषु नीति केचित् । वस्तुतस्तु एकं रोमकूमस्थानं अतिविशालमाकाशवत् तत्र यथा भूरेणवः कोटिशो वान्ति तथा ब्रह्माण्डानि न्तीत्यर्थः । ननु तर्हि कालो महान् भविष्यतीत्याशङ्क्याह-वयसा सहेति । काला अपि तत्र कोटिशः परिभ्रमन्तीत्यर्थः । नीयो वा कालः । ननु तथापि प्रमाणेन परिच्छेदो भविष्यति । अनन्तादिशब्दवाच्यत्वादित्यत आह-यदन्तरा श्रुतयोऽपि न्ति । ब्रह्माण्डानन्त्यवत् वेदानन्त्यमपि तेनैकस्यैव ब्रह्माण्डस्य वार्तामेको वेदो वदतीति न वेदैरपि परिच्छेत्तुं शक्यते । ननु सति सर्वप्रमाणानामगम्ये भगवति तादृशानन्दे किं प्रमाणमिति चेत्तत्राह-त्वयि हि फलन्तीति । श्रुतय एव प्रमाणं परं वृत्या, न तु वाच्यवृत्त्या । यथा अनन्तवृक्षाः भूमौ फलन्ति तत उच्चस्थितान्यपि फलानि भूमावेव पतन्ति । एवं सर्वे वेदाः त्वशक्यं माहात्म्यं भगवतो वदन्ति तानि ज्ञानानि फलान्युच्यन्ते । तेषां क्वापि पर्यवसानाभावाद्भगवत्येव पतन्ति पर्यवसिता एवमनन्तवृक्षाणां अनन्तानि फलानि भूमौ पतन्त्यपि भूमेः सहस्रांशमपि न पूरयन्तीति मेरुसर्षपन्यायेनार्थात् भगवन्माहात्म्यं

ज्ञापयन्तीत्यर्थः। एवं विधिमुखतया भगवत्स्वरूपबोधकत्वमुक्त्वा निषेधमुखेनापि भगवद्बोधकत्वामाहुः–अतन्निरसनेन भगन्निधना इति। यत् किञ्चिद्वेदप्रतिपाद्यं तत्सर्वमनूद्य योऽस्मात्सर्वस्मात् पर इति भगवतस्तदतिरिक्ततां बोधयन्ति। 'न तदश्नोति कश्चन' 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिसहस्रैः प्रतिपाद्यपदार्थनिषेधकैः निषेधस्य सावधित्वेन पर्यवसानाभावात् पदार्थस्य चावधिभूतस्य परिज्ञानाभावात् वाचकशक्तौ कुण्ठितायां अप्रमाणभावमिव प्राप्नुवन्तः भगवत्येव निधनं प्राप्नुवन्तीत्यर्थः। तस्मादेतादृशः परमानन्दरूपः कृष्ण एव सेव्यो नान्य इति सर्वेषां वेदानां पर्यवसितोऽर्थ इति सूचितम्। वेदाश्च तमेवं बोधयन्ति। एवं ज्ञातुं भगवता बुद्धिरुत्पाद्यते इति सूक्ष्मेक्षिकया सर्वे वेदा एवं भगवन्तं प्रतिपादयन्तीति जानीयादिति अनिर्देश्येऽपि ब्रह्मणि गुणवृत्तीनामपि साक्षात्प्रतिपादनमिति निरूपितम्। अत्र सर्वत्र श्रुतयो मूलभूताः स्वयं द्रष्टव्याः विवादविषयाश्च अतिविस्तारशङ्कया न लिखिताः। एवं श्रुतिभिः प्रतिपादितोऽर्थः गूढोऽप्युपनिबद्धः —

"कृष्णानन्दः परानन्दो नान्यानन्दस्तथाविधः ॥ वेदा अपि न तच्छक्ताः प्रतिपादयितुं स्वतः ॥" ॥२८॥४१॥

श्रीसुबोधिनीसारः

अनन्तत्वाद्दुर्ज्ञेयत्वमवाङ्मनसगोचरत्वाच्चेत्याह। द्युपतयः स्वर्गादिलोकपतयो ब्रह्मादयस्ते तवान्तं न ययुर्न प्रापुः यत् यस्मात्त्वमपि आत्मनोऽन्तं न यासि अनन्ततयाऽन्ताभावेन "अज्ञानं शशशृङ्गस्य न सार्वज्ञं हिनस्तकि" इत्युक्तेः। यस्य तवान्तरा मध्ये ननु सावरणा उत्तरोत्तरं दशगुणसप्तावरणयुक्ता अण्डनिचया ब्रह्माण्डसमूहाः वान्ति परिवर्तन्ते वयसा कालचक्रेण खे आकाशे रजांसि इव सह एकदैव न तु क्रमेण हि यस्मादेवमतः श्रुतयः त्वयि फलन्ति तात्पर्यवृत्त्या पर्यवस्यन्ति न तु साक्षाद्वदन्ति अतन्निरसनेन अन्यदेव तद्विदितादथो अविदितादपि अन्यत्र धर्मादन्यत्राधर्मात् अन्यत्रास्मात्कृताकृतात् अस्थूलमनण्वित्यादिना शून्यशेषनिरासमाह। भवन्निधनाः त्वन्निष्ठा न हि निरवधिर्निषेधः क्वापि दृष्टिचर इति नियमात् ॥२८॥४१॥

"श्रुतिभिः पद्यरूपाभिः कृष्णेन च समुद्धृतः। षट्शास्त्रसारसारांशस्तस्मै नित्यं नमो नमः" ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं यथामति स्तुत्वा त्वदवगमीत्यत्राध्यासनिवर्तकं सर्वात्मत्वज्ञानं विवक्षितम्, अपरिमितमाहात्म्यस्य साकल्येन ज्ञानं ह्यशक्यमेव, इति निगमयन्ति- द्युपतय इति। द्युपतयः स्वर्गलोकपतयो ब्रह्मादयोऽपि ते तव गुणानामन्तं पारं नैव ययुः नैव प्रापुः। आस्तां ब्रह्मादीनां वार्ता, यतस्त्वमप्यात्ममहिम्नोऽन्तं न यासि। तत्र हेतुमाहुः–अनन्ततयेति। अनन्तभावेन। न च तर्हि कथं सर्वज्ञता इति शङ्क्यम्, अनन्तस्यानन्ततया ज्ञानमेव सर्वज्ञत्वावहम्। तस्य परिच्छिन्नतया ज्ञानस्य भ्रमत्वे ज्ञानत्वावहत्वादिति भावः। अनन्तत्वमेवोपपादयन्ति- यदन्तरेति। यस्य तवान्तरा मध्ये सावरणाः उत्तरोत्तरं दशगुणपृथ्व्यादिसप्तावरणयुक्ता अण्डनिचयाः ब्रह्माण्डसमूहाः वयसा कालेन वान्ति परिभ्रमन्ति। तत्रापि सहैकदैव, न तु पर्यायेण। आश्चर्यं द्योतयति- नन्विति। तत्र दृष्टान्तमाहुः- खे आकाशे यथा वायुना रजांसि परिभ्रमन्ति तथेति। अत एव हि श्रुतयोऽप्यतत्स्थूलत्वादिनिरसनेन त्वयि फलन्ति तात्पर्यवृत्त्या पर्यवस्यन्ति, न त्वयमेतावानेतावद्गुण इति साक्षात्प्रतिपादयन्ति। तथा च श्रुतयः —

"अन्यदेव तद्विदितादथो अविदितादपि।

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृतात् अकृतात् ॥

अस्थूलमनणु" इत्यादयः।

ननु एवं निषेधैः शून्यमेव ज्ञाप्यते इत्याशङ्क्याहुः- भवन्निधना इति। भवति त्वयि निधनं समाप्तिर्यासां तास्तथा। निरवधिकनिषेधासम्भवादवधिभूते त्वयि पर्यवस्यन्तीत्यर्थः ॥४१॥२८॥

अन्वितार्थप्रकाशिका

तदेवं स्तुतिमुपसंहरन्त्यः भगवतोऽपरिमितमहत्त्वं च बोधयन्त्यः श्रुतयस्तादृशस्य विभोरवाङ्मनसगोचरत्वादविषयत्वेनैव

न्तमाहुः-द्युपयत इति ॥ द्युपतय एव ते अन्तं न ययुः तथा अनन्ततया हेतुना त्वमपि अन्तं न ययिथ। ननु अहो यदन्तरा सावरणाः ण्डनिचयाः वयसा कालेन खे रजांसि इव सहैव वान्ति न तु पर्यायेण। यत् यतः भवन्निधनाः श्रुतयोऽपि अतन्निरसनेन त्वयि हि फलन्ति इति पिण्डान्वयः। एवेत्यप्यर्थे। द्युपतयः स्वर्गलोकपतयो ब्रह्मादयोऽपि ते तव अन्तं पारं नैव ययुः नैव प्रापुः। किम्बहुना नन्ततया हेतुना त्वमप्यमहिम्नोऽन्तं न यासि। न च तर्हि कथं सर्वज्ञतेति शङ्क्यम्। अनन्तस्यानन्ततया ज्ञानमेव सर्वज्ञत्वावहं स्य परिच्छिन्नतया ज्ञानस्य भ्रमत्वेनाज्ञानत्वावहत्वादिति भावः। ननु अहो यस्य तवान्तरा मध्ये सावरणाः उत्तरोत्तरं गुणपृथ्व्यादिसप्तावरणयुक्ता अण्डनिचयाः ब्रह्माण्डसमूहाः वयसा कालेन वान्ति परिभ्रमन्ति तत्रापि सहैकदैव न तु पर्यायेण। था खे आकाशे यथा वायुना रजांसि परिभ्रमन्ति तथा अत एव हि श्रुतयोऽप्यतत्स्थूलत्वादिनिरसनेन त्वयि फलन्ति तात्पर्यवृत्त्या र्यवस्यन्ति, न त्वयमेतावानेतावद्गुण इति साक्षात्प्रतिपादयन्ति। तथा च श्रुतयः —

"यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं भवच्च भविष्यच्च" इत्यादि।

अत एव भवति त्वयि निधनं समाप्तिर्यासां तास्तथा निरवधिकनिषेधासम्भवादवधिभूतं त्वां लक्षयन्त्यः श्रुतयोऽप्यतत्स्थूलत्वादिनिरसनेन त्वयि फलन्ति तात्पर्यवृत्त्या पर्यवस्यन्ति न तु साक्षात्प्रतिपादयन्ति। अतन्निरसनश्रुतयश्च —

"अस्थूलमनणु ह्रस्वदीर्घमलोहितमस्नेहमच्छायमतमोवाय्वनाकाशम्" इत्याद्याः ॥४१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भवद्गुणानामानन्त्यान्निःशेषतद्वर्णनस्य दुष्करत्वात्स्तुत्युपसंहारं कुर्वन्त्य ऊचुः ॥ द्युपतय एवेति ॥ हे अपरिमितगुणगण! तव स्वरूपस्य गुणादीनां च अनन्ततया अन्तविधुरत्वात् ॥ द्युपतयः सुरलोकस्य व्योम्नो वा ॥ सुरलोको द्यौर्दिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥ इति ॥ द्यौ दिवौ द्वे स्त्रियामभ्रं व्योमपुष्करमम्बरम् ॥ इत्युभयत्राप्यमरः ॥ पतयः प्रभवः पतिः प्रभौ गते मूले इति श्वः ॥ सुरलोकवासिनो ब्रह्मादयो देवाधिपाः ॥ चिद्व्योमस्था अक्षरपुरुषादयो मुक्तकोटयश्च ॥ एवेति निश्चये ॥ अन्तं न ययुः न पुः ॥ किम्बहुना ॥ सर्वदेवमुक्ताधिपस्त्वमप्यन्तं न ययिथ अर्थवशात्पुरुषवचनविपरिणामः ते गुणादीनां स्वरूपस्य न्तरहितत्वात्सर्वशक्तित्वे च न बाधः ॥ यदन्तरायस्य तव अक्षरशरीरस्य ॥ अन्तरा मध्ये ॥ सावरणाः अष्टभिः पृथिव्याद्यावरणैः हिताः अण्डनिचयाः ब्रह्माण्डसमूहाः वयसा आयुष्योपलक्षणकालेन सह खे आकाशे रजांसि रेणव इव वान्ति व्रजन्ति भ्रमन्तीति वत् ॥ तथा चोक्तम् —

दोशत्तराधिकैर्यत्र प्रविष्टः परमाणुवत्। लक्ष्यन्तेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः ॥

तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् ॥ विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मन इति ॥

यस्मात्त्वमेतादृश अतः कारणात् श्रुतयोऽस्माकं वेदानां गिरो वयं वा स्वरूपस्वरूपस्वभावादिभिस्तव सर्वोत्कृष्टत्वात् तन्निरसनेन तस्मात् पुरुषोत्तमादन्ये अतदः अतच्छब्दवाच्या ये प्रकृतिपुरुषकालाक्षरधामक्षराक्षरसंज्ञबद्धमुक्तेश्वरज्ञास्तेषामुत्कृष्टत्वनिरसनेन त्वदपेक्षया तेषामुत्कर्षत्वनिषेधेन भवन्निधनाः भवति निधनं पर्यवसानं यासां ताः भवत्स्वरूपे वसं प्राप्ताः सत्यः ॥ फलन्ति सफला भवन्ति ॥ हि सर्वोत्कृष्टत्वं चोक्तं पञ्चमे —

कोऽर्हति पुमान् प्रकृतिगुणव्यतिकरमतिरनीश ईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभिः स्वरूपनिरूपणमिति ॥

प्रथमे च —

कुतः पुनर्गृणतो नाम तस्य महत्तमैकान्तपरायणस्य। योऽनन्तशक्तिर्भगवाननन्तो महद्गुणत्वाद्यमनन्तमाहुः ॥ इति ॥

तथा च श्रुतयः —

यः कालकालो गुणीति अक्षरात्परतः पर इति ॥ योऽक्षरे तिष्ठन्नक्षरमन्तरो यमक्षरं न वेद ॥ यस्याक्षरं शरीरम् ॥

इत्यन्तर्यामिब्राह्मणे बृहदारण्यस्य च ॥

ऋग्वेदाष्टमाष्टके च —

परात्परतो ब्रह्मतत्परात्परतो हरिरिति न तत्समश्चाभ्यधिकश्च दृश्यत इति ॥

सर्व्वस्याधिपतिरिति सर्वमिदं प्रशास्ति ॥ यदिदं किञ्च ॥ सनसाधुनाकर्म्मणा भूयान्नो एवासाधुनाकनीयानिति ॥

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ इति भगवद्वाक्यम् ॥

अष्टमे च —

एवं विमृश्याऽव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतोऽगुणाश्रयम् ॥
वव्रे वरं सर्वगुणैरपेक्षितं रमामुकुन्दं निरपेक्षमीक्षितम् ॥ इति ॥
न वासुदेवात्परमस्ति पावनं न वासुदेवात्परमस्ति मङ्गलम् ॥
न वासुदेवात्परमस्ति दैवतं न वासुदेवात्परमस्ति वाञ्छितम् ॥ इति ॥ स्कान्दे च ॥

अनेन श्लोकेन भगवतोऽद्वितीयत्वमुक्तम् ॥ तत्प्राकार उच्यते ॥ स्वरूपस्वभावगुणविभूतिरलोकभोगशक्तिक्रियाभोग्यपार्षदा आधुनिका भक्ताश्चाक्षरस्थानपतेर्धर्मनन्दनस्य यादृशाः दिव्याः सन्ति तादृशास्तदितराक्षरपुरुषादीनां च न सन्ति तस्मात्स्वरूपादिभिर्भगवानद्वितीयः । स्वरूपादिभिर्नास्ति द्वितीयस्तुल्योऽधिकश्च यस्य यस्माद्वा सोऽद्वितीयः ॥ तथा चोक्तं श्रुतिस्मृत्योः —

न तत्समश्चाभ्यधिकश्च दृश्यत इति ॥

निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥ इति ॥

तथा चोक्तं नारायणमुनिनापि —

दिव्यं कृष्णस्य रूपं भवति च सततं तस्य लोकोऽपि दिव्यो दिव्या भोगाश्च सर्वे जगति यदुपतेः सन्ति दिव्याः क्रियाश्च ॥
इत्थं निर्दोषरूपं सकलगुणगणालङ्कृतं दिव्यमूर्तिं ज्ञात्वा श्रीवासुदेवं भजत भुवि सदा मुक्तये भो मदीयाः ॥
एकस्मिन्नद्वितीये भगवति च परब्रह्मणि द्वैतबुद्धिः कर्तव्या नैव तस्मिन्नणुरपि च कुधीः सच्चिदानन्दरूपे ॥

जय जयेत्यारभ्य द्युपतय इत्यन्तैर्वेदवचनैर्योऽर्थ उक्तः स सङ्क्षेपेण निगद्यते ॥ तत्र जीवसमूहेश्वरसमूहाक्षरपुरुषसमूहानामविनाशित्वं नित्यत्वमनादित्वं परमेश्वराधीनत्वं च ॥ तत्र जीवसमूहानामल्पज्ञत्वं परतन्त्रत्वं कर्माधीनत्वमनाद्यविद्यावशत्वं च ॥ प्रकृतेश्चानादित्वं सान्तत्वं च ॥ परमेश्वरोपासकाक्षरपुरुषाणां करणकलेवरानाशित्वं चाक्षरस्थानपतेः पुरुषोत्तमस्य स्वरूपनिरूपणं दिव्यत्वं मनुष्यत्वं चान्वयव्यतिरेकत्वं च सर्वप्रेरकप्रवर्तकत्वं च सर्वज्ञत्वाद्यनन्तकल्याणगुणवत्त्वं च ॥ तदुपासकानां स्वरूपं च तेषां प्राप्यं वस्तु च तदन्योपासकानां स्वरूपं प्राप्यं च ॥ भयवद्भजनहीनानां निन्दनं कालभयं च ॥ प्राकृतभोगसक्तजनैः प्राप्तदेहभोगलोकसुखानां सदुःखत्वं प्रलयेषु नश्वरत्वं च ॥ भगवदेकान्तिकभक्तसद्गुरप्राप्तिमन्तरा जीवकृतकल्याणसाधनानामल्पफलत्वं चोक्तम् ॥४१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इत्थं यथामति संस्तुत्य त्वन्माहात्म्यस्यापरिच्छिन्नत्वात् साकल्येन स्तोतुं न शक्नुम इति निगमयन्ति ॥ द्युपतयः स्वर्गादिलोकपतयः महेन्द्रब्रह्मादयः एव, ते तव, अन्तं स्वरूपस्वभावादिपारं, न ययुः न जानीयुरित्यर्थः । किं पुनर्मनुजादय इति

किं बहुना । त्वमपि, न यासि । कुतः । अनन्ततया स्वरूपस्वभावयोरपरिच्छिन्नतया, त्वत्स्वरूपस्वभावादेरनन्ततया हेतुना तदन्तं न यासीत्यर्थः । न चैतावता तव सर्वज्ञत्वभङ्गः । यथावस्थितवस्तुविषयज्ञानस्यैव सर्वज्ञतावहत्वात् । यदन्तरा यस्य मध्ये, एकैकस्मिन् रोमकूपे इत्यर्थः ।

'क्वेदृग्विधाऽविगणिताण्डपराणुचर्या वाताध्वरोमविवरस्य' इति ब्रह्मोक्तेः ॥

सावरणाः सप्तभिरावरणैः सहिताः, अण्डनिचयाः ब्रह्माण्डानां समूहाः, खे आकाशे, वयसा सह, वयसेति भिप्रायमेकवचनम् । पक्षिभिः सहेत्यर्थः । रजांसि इव यथा वान्ति, तद्वत् वान्ति सञ्चरन्ति ननु । यद्यस्मात्, एवं हि ततः, त्वयि, अतन्निरसनेन तस्मादपारमहिम्नस्त्वत्तः अन्यत्प्रकृतिपुरुषादि वस्तु तन्निरसनेन तत्साजात्यप्रतिषेधेन, भवति निधनं पर्यवसानमिति यावत् । यद्यासां ताः तथाभूताः, सत्यः, फलन्ति सफला भवन्ति । शब्दवृत्त्या तत्पर्यवृत्त्या च पुरुषसाजात्यनिरसनेन तद्विलक्षणं त्वां बोधयन्त्यः कृतार्था भवन्तीत्यर्थः । समस्तचेतनाचेतनसाजात्यनिरसनेन तद्वैलक्षण्यमात्रं न्ति, न तु साकल्येन त्वत्स्वरूपस्वभावादिकं बोधयितुं शक्नुवन्तीति भावः ॥२८॥ ॥४२॥

योगिरामानुजाचार्यकृतसरला व्याख्या

एवं भगवन्तं यथामति स्तुत्वा त्वन्माहात्म्यस्यापरिच्छिन्नत्वेन साकल्येन स्तोतुं न शक्नुम इति निगमयन्ति-द्युपतय इति । स्वर्गादिलोकपालाः महेन्द्रब्रह्मादयः । ते अपरिच्छिन्नमहिम्नस्तव स्वरूपस्वभावयोरन्तरं पारं न ययुर्न प्रापुः । आस्तां वार्ता । त्वमपि सर्वज्ञस्त्वमपि त्वन्महिम्नोऽन्तं न यासि न जानासि । तत्र हेतुमाहुः-अनन्ततयेति । अन्ताभावेन न च तर्हि सर्वज्ञतेति विशङ्क्य अनन्तस्यान्ततया ज्ञानमेव सर्वज्ञत्वादहं तस्य परिच्छिन्नतया ज्ञानस्याज्ञत्वाद्वहत्त्वादिति भावः । अन्यथा स्यान्यथाज्ञानमेव हि अज्ञत्वापादकम् अनन्तत्वमेवोपपादयन्ति-यदन्तरेति । यस्य तवान्तरा मध्ये सावरणाः दशगुणपृथिव्यादिसप्तावरणयुक्ताः अण्डनिचयाः ब्रह्माण्डसमूहाः वयसा कालेन निमित्तेन सह एकदैव; न तु पर्य्यायेण भ्रमति । नन्विति आश्चर्ये । तत्र दृष्टान्तमाहुः-खे आकाशे वयसा वायुनेति श्लेषार्थः । रजांसि यथा परिभ्रमन्ति तथेति । यत् कारणात् अवाङ्मनसगोचरमहिमत्वात् श्रुतयः वेदाः अतन्निरसनेन न तत् अतत् परमात्मभिन्नं प्रकृतिपुरुषतत्स्वभावरूपं च वस्तु तन्निधनाः । भवति निधनं समाप्तिः यासां ताः । शब्दवृत्त्या च प्रकृतिपुरुषसाजात्यविरसनेन तद्विलक्षणं त्वां सत्यः त्वयि फलन्ति सफलाः भवन्ति कृतार्था भवन्ति । तात्पर्य्यवृत्त्या पर्यवस्यन्तीत्यर्थः । न त्वयमेतावान् एतावद्गुण साक्षात्प्रतिपादयन्ति । तथा च श्रुतयः —

'अन्यदेव तद्विदितादथोऽविदितादपि ।' अन्यत्र धर्मादन्यत्रास्मात् कृतादकृतात् । 'अस्थूलमनण्वि'त्यादयः । द्युपतयोऽपि ते अन्तं नैव ययुः । त्वमपि अन्तं न यासि । यतः यदन्तराः सावरणाः अण्डनिचयाः खे रजांसीव वयसा सह वान्ति । ननु स्मात् श्रुतयः अतन्निरसनेन भवन्निधनाः सत्यः त्वयि फलन्तीत्यन्वयः ॥४१॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

आभासे तत्र इत्युक्तौ शङ्कते नन्वित्यादि । अविषयत्वेनैव ज्ञानमिति ब्रह्म वागादिविषयं न भवतीति ज्ञानमेव ब्रह्मणो र्थः । यदूर्ध्वमिति गार्गीं प्रति याज्ञवल्क्यस्योक्तिः । हे गार्गि ! यद्ब्रह्म दिवः ऊर्ध्वाण्डकटाहभागादप्यूर्वं वर्तते । एवं पृथिव्या ब्रह्माण्डकटाहादाप्यधो वस्तते यद्ब्रह्म । इमे द्यावापृथिवी अनयोर्द्यावापृथिव्योरन्तरा मध्येऽस्ति । यद्भूतमतीतं यद्भवद्वर्तमानं भविष्यत् तत्सर्वं यदायत्तं वर्तते यद्ब्रह्म इति अनन्ततयेत्युपलक्षणत्वान्निर्गुणस्य चेति व्याख्यातं श्रुतौ-अविदितादधि अव्याकृतादुपरि र्थः । अन्यत्रेति । धर्माधर्मास्पृष्टं कृताकृतात् कार्यकारणाभ्यां भिन्नं यत् अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यन्ति तद्वदेति । अस्थूलमित्यादिका त्वीदृशी —

"अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमलाच्छमतमोऽवाय्वानाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्रा-
ममात्रमनन्तरमबाह्यम् ॥"

इत्यादि । तत्रालोहितमाग्नेयं गुणरहितम् अस्नेहं वारिगुणरहितम् अमात्रमनंशं सर्वविशेषरहितमित्यर्थः । घटोऽस्ति पटोऽस्तीत्यस्तिमुखेन वर्तमानं वाक्यं विधिमुखवाक्यं नास्तीति व्यतिरेकमुखेन वर्तमानं वाक्यं निषेधमुखवाक्यम् । हे अनन्त ! द्युपतयो ब्रह्मादयस्तेऽन्तं न विदुः । भवानपि स्वस्यान्तं न याति । श्रुतिमौलयः श्रुतिशिरोभूषणभूताः गिरः उपनिषदोऽपि तेऽन्तं न विदुः । यतो नम इति नमस्कारोपलक्षितया भक्त्यैव त्वयि फलन्ति तात्पर्यवृत्त्या पर्यवस्यन्ति । अतो जय जयेति प्रकारेण तव तत् प्रसिद्धं पदं चरणं स्वरूपं वा अहं भजे ॥४१॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

त्वदवगमी सुखदुःखे न वेत्ति न च विधिनिषेधावित्युक्तम् । तत्र ननु कथमवगन्तुं शक्यते । दुरधिगमत्वस्योक्तत्वादित्याशङ्क्य सत्यमेवमनवगाह्यमहिम्नोऽवाङ्मनसागोचरत्वादविषयत्वेनैव ज्ञानमिति दर्शयन् श्रुतिप्रतिपादितमपरिमितमहिमानमाह-द्युपतय इति । ननु भो भगवन् ! ते तव अन्तं द्युपतयः स्वर्गलोकपतयो ब्रह्मादयो न ययुः न प्रापुरेव । त्वमपि आत्मनोऽन्तं न यासि । कुतः । अनन्ततया । अनन्ताभावेन न हि खपुष्पशशविषाणादेरज्ञानम् अप्राप्तिर्वा शक्तिवैभवं विहन्ति । अनन्तत्वमेवाह-यदन्तरेति । यद्यस्य तव अन्तरा मध्ये सावरणाः सप्तावरणसहिता अण्डनिचयाः ब्रह्माण्डसमूहाः सह एकदैव वयसा कालचक्रेण वान्ति परिभ्रमन्ति । खे आकाशे रजांसीव यतः यस्मादेवमतः श्रुतयो निश्चितम् अतन्निरसनेन त्वयि फलन्ति । निषेधमुखेन तात्पर्यवृत्त्या पर्यवर्यन्ति । न तु साक्षादयमेतावानिति वदन्ति । सगुणस्य गुणानन्त्यान्निर्गुणस्य गुणागोचरत्वात् । न च वाच्यं निषेधैः शून्यमेव ज्ञाप्यते इति । यतो भवन्निधनाः । भवति त्वयि निधनं समाप्तिर्यासां ताः । न हि निरवधिर्निषेधः सम्भवति । अतोऽवधिभूते त्वयि फलन्तीत्यर्थः । अपरिमितमहिमानमाह श्रुतिः—

"स होवाच यदूर्ध्वं गार्गि यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे ॥

यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते । आकाशे तदोतं प्रोतं चे"ति ॥

अर्थः — स ह याज्ञवल्क्य उवाच-हे गार्गि ! त्वयोक्तं यत् ऊर्ध्वं उपरि दिवः अण्डकपालाद्यच्चावार्गधः पृथिव्या अधोऽण्डकपालात् यच्चान्तरामध्ये द्यावापृथिवी द्यावापृथिव्योरण्डकपालयोरिमे द्यावापृथिवी यद्भूतमतीतं भवच्च वर्तमानं भविष्यच्च भवितव्यं तच्च यत्सूत्रमाचक्षते तत्सूत्रमाकाशे ओतं प्रोतं च । यद्वै व्याकृतं सूत्रात्मकं जगत् अव्याकृताकाशे ब्रह्मरूपे वस्तुमात्रे त्रिष्वपि लोकेषु वर्तत इत्यर्थः । अनन्तत्वपरेयं श्रुतिः ।

अतन्निरसनेनेत्यत्र श्रुतिः —

"अन्यदेव तद्विदितादथो अविदितादधि । अन्यत्र धर्मादन्यत्राधर्मादन्यस्मात्कृताकृतात् । अन्यत्र भूताद्भव्याच्च यत्पश्यसि तद्वदे" ति ।

अर्थः — तद्वस्तु विदितात् ज्ञातात् वस्तुनोऽन्यत् पृथगेव भवेत् । तर्हि, अवच्छिन्नमज्ञातं प्राप्तमत आह-अथो अविदितादधि । अथो अप्यर्थे । अविदितात् अज्ञातादपि वस्तुनो अधि उपरि वर्तते उपर्यर्थलक्षणया अन्यदित्यर्थः । यद्धि यस्मादुपरि भवति तद्धि तस्मादन्यदिति प्रसिद्धम् । धर्माच्छास्त्रीयादन्यत्र तथाऽधर्मादन्यत्र तथा कृतं कार्यमकृतं कारणं तस्मादन्यत्र भूतादतिक्रान्ताकालाद्भाव्याद्भविष्यतः । चकाराद्वर्तमानाच्च । अन्यत्र यदीदृशं वस्तु सर्वव्यवहारगोचरातीतं पश्यसि जानासि तद्वदेति यमं प्रति नचिकेतसः प्रश्नः । अत्रैव श्रुत्यन्तरम् —

"यस्मिन्नाकाशे सर्वमोतं प्रोतं स कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चे"ति ॥

गार्गिप्रश्ने याज्ञवल्क्यो वदतीत्याह —

"स होवाचैतद्वै तदक्षरं परमं गार्गि ब्राह्मणा अभिवदन्ति । अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमलाच्छमतमोऽवाय्वानाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नोति कश्चन ॥" इति ।

"यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः ॥" इति ॥

सुगमत्वान्न व्याख्यायते-हे गार्गि ! यदेतत्कथितं तत् अक्षरं परमपरं ब्रह्म ब्राह्मणा ब्रह्मविदोऽभिवदन्ति । तत्राह-स्थूलमित्यादि । अलोहितम् अग्नेः गुणो लोहितः । अपां गुणः स्नेहः । ताभ्यामन्यत् सर्वथाप्यनिर्देश्यलाञ्छः छाया तद्रहितम् च्छायम् । तर्हि तमो न अतमः । अमुखम् अद्वारम् । मीयते येन तन्मात्रं रूपं तदस्य नास्तीत्यमात्रम् । छिद्रवदन्तरं नास्ति नन्तरम् । तर्हि बाह्यम्, न अबाह्यम् । इति । अतन्निरसनेन ब्राह्मणास्तदक्षरं वदन्ति-तदक्षरं किञ्चन वस्तु नाश्नाति नोपभुङ्क्ते । कोऽपि पुमान् तन्नाश्नोति नानुभवति । सुगममन्यत् ।

स्वामिनाम् —

द्युपतयो विदुरन्तमनन्ते ते न च भावान्न गिरः श्रुतिमौलयः ॥
त्वयि फलन्ति यतो नम इत्यतो जयजयेति भजे तव तत्पदम् ॥

हे अनन्त ! ते तवान्तं द्युपतयो न च भवान् वेत्ति । न च श्रुतिमौलयो गिरो विदुः । किन्तु यतस्ता गिरस्त्वयि नमो जयेत्युक्त्वा फलन्ति । अतोऽहं त्वत्पदं नमो जय जयेति ब्रुवन् भजे ॥४१॥

श्रीनिवाससूरिकृततत्त्वदीपिका

अथ भगवतः परमात्मनो माहात्म्यस्यापरिच्छेद्यत्वमाह-द्युपतय इति । हे भगवन् ! ते अन्तम् अवधिम् । द्युपतयो तयोऽपि न ययुः न प्रापुः । तथा च ब्रह्मवाक्यं नारदं प्रति —

'नान्तं विदाम्यहममी मुनयोऽग्रजातास्ते मायाबलस्य पुरुषस्य कुतोऽपरे ये ।
गायन् गुणान् दशशतानन आदिदेवः शेषोऽधुनापि समवस्यति नास्य पारम् ॥'

इति । किञ्चास्तां ते द्युपतयो न ययुरिति यतस्त एव न ययुरिति न ब्रूमो वयम्, किन्तु त्वमपि स्वस्यान्तं न यासि । तथा भगवता स्वेनैवोक्तं विभूत्युपदेशे —

'सङ्ख्यानं परमाणूनां कालेन क्रियते मया । न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः ॥'

इति । न चैतावता सर्वज्ञनताहानिः । यत अनन्तस्यानन्तत्वेन ज्ञातत्वात् । यद्यनन्तत्वास्यान्तत्वेन जानाति तदा ताहानिः स्यात् । अतो यथावद्वस्तुज्ञानात्तव न सर्वज्ञत्वं गतमिति तदेवानन्तत्वं प्रतिपादयति-कुतो यत् यस्मात् राण्डनिचयाननुसारवणा इति यस्य तवान्तरा मध्ये रोमकूपेष्विति यावत् । नन्वित्याश्चर्ये । सावरणा दशगुणितसप्तावरणैरावृता अण्डनिचया ब्रह्माण्डसमूहाः । वयसा पक्षिभिः सह, कालेन वा । खे आकाशे । रजांसीव । परिभ्रमन्ति । यदा भगवदुदरगतब्रह्माण्डानां सङ्ख्या नास्ति तदा तद्गतविभूतीनां सङ्ख्या नास्तीति किं वक्तव्यमिति भावः । हि म् अत एव श्रुतयस्त्वय्यनिरसनेन त्वय्येव फलन्ति सफलीभवन्ति । समस्तचेतनाचेतनसजात्या सह निरसनेन त्वद्वैलक्षण्यं तीत्यर्थः । अत एव भवन्निधना भवत्येव निधनं पर्यवसानं यासां ताः । तथा च श्रुतयः —

"भोक्ता भोग्यं प्रेरितारं च मत्वा प्रधानक्षेत्रज्ञपतिर्गुणेशः ।" "अजामेकां लोहितशुक्लकृष्णाम् ।" "तयोरन्यः पिप्पलं नश्नन्नन्योऽभिचाकशीति ।" "यस्यात्मा शरीरम् । य आत्मानमन्तरो यमयति । यस्य पृथिवी शरीरम् । यस्याक्षरं शरीरम् । र्वभूतान्तरात्मापहतपाप्मे"त्याद्याः ॥ तथा —

"ज्ञानानन्दमयस्त्वात्मा शेषोऽयं परमात्मनः । स्वत्वादयो न सन्तीशे यत्र च प्राकृता गुणाः ॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥"

इत्याद्याः स्मृतयश्चेति । अतः कथं चरन्ति । साक्षात् । श्रुतयः सदसतः परे इति विष्णुरातप्रश्नस्य चिदचिद्वस्तुशरीरकस्य णः स्वरूपतो गुणतो विग्रहतश्चानन्त्यादिति वेदस्तुतिं प्रमाणीकृत्य श्रीशुकाचार्यैश्चिदचिद्वस्तुविशिष्टे ब्रह्मणि

साक्षात्प्रतिपादयितुमशक्यत्वाच्चिदचिद्द्वारा श्रुतीनां तत्प्रतिपादकत्वं सद्वारकं सम्भवतीति प्रत्युत्तरं दत्तमिति पर्य्यवसितोऽर्थः। इति अत्रेदं तत्त्वम् —

"उपक्रमोपसंहारावभ्यासो पूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥"

इत्युक्तप्रकारेण षड्विधतात्पर्यलिङ्गेन सर्वैरपि प्रामाणिकैस्तत्त्वं निश्चीयते । तत्र वेदस्तुतौ तावदुपक्रमे 'जय जय जह्यजामि'त्यस्मिन् श्लोके अजामिति पदेन प्रकृतेः स्वरूपम् । अगजगदोकसामित्यनेन जीवानाम् अजयाऽऽत्मना च चरतोऽनुचरेन्निगम इत्यनेन वाक्यने ईश्वरस्य च परस्परस्वरूपभेद एव प्रतिपादितः । पुनः श्रुतीनामीश्वरस्य च प्रतिपाद्यप्रतिपादकसम्बन्धोऽप्युक्तः । तथोपसंहारेऽपि द्युपतय इत्यनेन पदेन जीवानां अण्डनिचया इत्यनेन ब्रह्माण्डरूपविकारकारणभूतप्रकृतेः त्वमपि त्वयीति पदाभ्यामीश्वरस्य च स्वरूपभेद एवोक्तः । अभ्यासोऽपि तथैव श्रूयते। तथा हि 'बृहदुपलब्धमि'त्यादिना सूक्ष्मचिदचिद्विशिष्टं कारणभूतं ब्रह्मैव स्थूलचिदचिद्विशिष्टं कार्यावस्थमिति सदृष्टान्तेनोक्तम्। तदनन्तरम 'इति तव सूरय' इत्यनेन जीवानां स्वरूपं 'त्र्यधिपते'रित्यनेन प्रकृतेरीश्वरस्य च स्वरूपमुक्तम्। तदनन्तरं 'दृतय' इत्यत्र 'असुभृत' इति पदेन जीवस्वरूपम्। 'महदहमादय' इत्यनेन प्रकृतिस्वरूपम्। 'ते पुरुषविधान्वयः चरमः सदसतः परमशेषम् ऋतमि'त्येतैः परस्वरूपमुक्तम्। तदनन्तरम् 'उदरमुपासत' इत्यस्मिन् 'उपासत' इत्युपासककथनेन चेतनस्वरूपम्। 'हृदयं दहर'मित्येतैः पदैः परस्वरूपम्। पदानामर्थस्तु पूर्वमेवोक्तः। 'कृतान्तमुखे' इत्यनेनाचित्स्वरूपमुक्तम्। ततः परं 'स्वकृते'त्यत्र 'स्व'शब्देन परस्य 'योनिष्वि'त्यनेन प्रकृतेः 'विरजधिय' इति चेतनानां स्वरूपमुक्तम्। ततः परं 'स्वकृतपुरेष्वि'त्यत्रापि स्वशब्देन 'अखिलशक्तिधृत' इत्यनेन 'भवत' इत्यनेन च परस्य 'पुरेष्वि'त्यनेनाचितः 'बहिरन्तरसंवरणमि'त्यनेन 'पुरुषम् अंशकृतं न' इत्येतैश्चितः स्वरूपमुक्तम्। ततश्च 'दुरवगमात्मतत्त्वनिगमाये'त्यत्र 'तव' इत्यनेन 'ईश्वर'पदेन च परमात्मनः 'परिश्रमणा' इत्युपासकवाचकेन चेतनानां ते सशरीरत्वेन प्रकृतेरपि स्वरूपभेद एवोक्तः । ततः उत्तरत्र 'त्वदनुपथमि'त्यत्र 'त्वयि हिते प्रिये' इत्यादिपदेषु परमात्मस्वरूपम्। 'न बत रमन्ति आत्महन' इत्यादिपदैश्चेतनानां स्वरूपम्। 'असदुपासनया' इति पदेन प्रकृतेः स्वरूपं चावदत वेदः। ततः परं 'निभृत' इत्यत्रापि 'निभृतमरुन्मनोक्षदृढयोगयुज' इत्यनेन प्रकृतेः। 'दृढयोगयुजः मुनयः अरयः स्त्रियः वयमि'त्येतैः पदैश्चेतनानाम्। 'हृदयं ते' इति पदाभ्यांपरस्य च स्वरूपमुक्तम्। ततश्च 'क इह नु वेद' इत्यत्रापि 'अग्रसरमि'त्यनेनेश्वर उक्तः। 'ऋषिर्देवा' इत्यनेन जीवा उक्ताः । 'कालजव' इत्यनेनाचितः स्वरूपमुक्तम् । ततश्च 'जनिमि'त्यत्र 'सदसच्छ'ब्देन 'त्रिगुणमय' इत्यनेन च परस्य स्वरूपमवादीत् । ये तदनन्तरं तव परि ततोऽप्यन्तरं सदिव मन इत्यत्र 'अशेषमिद'मित्यनेन चिदचित्स्वरूपमुक्तम्। 'त्वयी'ति पदेन परस्वरूपम्। 'आत्मविद' इत्यनेन जीवा उक्ताः। 'चरन्तीत्यत्राप्यखिलसत्त्वनिकेततया' इत्यनेन चिदचिदात्मकं जगत् भगवच्छरीरमिति निर्णीतम्। ततोऽप्यनन्तरं 'त्वमकरण' इत्यत्र 'अखिलकारकशक्तिधरस्तव भवत्' इत्येतैः परस्वरूपम् । 'अजया' इत्यचित्स्वरूपम् । 'विश्वसृजः अधिकृताश्चकिता' इत्येतैस्तु जीवानां स्वरूपमभाणि। 'चिदचिद्वस्तुस्वरूपं परस्य परमस्य तव' इत्येतैश्च परमात्मस्वरूपमुक्तम्। तदनन्तरम् 'अपरिमिता' इत्यत्रापि 'तनुभृत' इत्यनेन चिदचितोः स्वरूपम् । 'शासिता नियन्तृ भवेदि'त्यनेन चेश्वरस्वरूपं व्याजहार । ततोऽप्यनन्तरं 'न घटत उद्भव' इत्यत्र 'प्रकृतिपूरुषयोरजयोरि'त्यनेन चिदचितोः स्वरूपम्। 'त्वयि परमे' इति पदाभ्यामीश्वरस्य चोक्तम्। तदनन्तरं 'नृषु तवे'त्यत्रापि 'नृषु तव मायया' इत्यादिभिश्चिदचिदीश्वराणां परस्परस्वरूपभेदं पुनः स्वाश्रितानां चाभयदानेन परस्य स्वतन्त्रत्वं चोक्तम्। तत उत्तरस्मिन् 'अजित हृषीकवायुभिरि'त्यत्र 'हृषीकवायुभिरि'त्यनेन प्रकृतिरुक्ता। 'उपायखिदः व्यसनशतान्विता' इत्याभ्यां जीवा उक्ताः । 'अज' इति पदेन परमात्मोक्तः । ततः परस्मिन् 'स्वजनसुतात्मदार' इत्यत्र 'त्वयी'त्यादिपदैरीश्वरस्वरूपम्। 'नृणा'मित्यादिपदैः जीवानां स्वरूपम् । 'इह' इति पदेन संसृतिकारणभूतप्रकृतेः स्वरूपमुक्तं भवति । तदनन्तरं 'भुवि पुरुपुण्यतीर्थसदनानी'त्यत्र 'ऋषय' इत्यादिपदैश्चेतनानां 'मन' इत्युपलक्षणेन प्रकृतेः 'त्वयि नित्यसुखे' इति पदाभ्यामीश्वरस्य च स्वरूपमवोचत्। तत उत्तरत्र 'सत इदमि'त्यत्र 'इद'मित्यनेन चेतनाचेतनमिश्रं जगन्निर्दिश्य 'त्वयि एकरसे' इत्याभ्यां पदाभ्यां भगवत्स्वरूपमवदन् । तदनन्तरं 'स यदजये'त्यत्र 'अजया' इत्यनेन प्रकृतिरुक्ता । 'स अनुशयीत जुषन् अपेतभग' इत्येतैः

पदैर्जीवा उक्ताः
इत्यनेन वासनारू
पदाभ्यां परमात
'शुभाशुभयो'रित्य
'अण्डनिचया' इत्य

इत् अपूर्व
'शास्त्रयोनित्वा'दिति
पुनरिह —

इत्यादिभिस्त

अत्र तु 'निभृत
कुर्वन्तस्त्वां ययुः प्रापुि
चिदचिच्छरीरं परं ब्रह्मैव
ब्रह्म।' 'आत्मैवेदं सर्वम
युवा लोहिताक्ष इति श्या
निष्क्रियं शान्तमि'त्याद्याः
स्वाभाविकी ज्ञानबलक्रिय

स्वर्ग आदि लोव
पार पाते है इसमें तो कह
आप भी अपने अन्त को
क्या है । पृथ्वी जल तेज
एक रोमकूपमें सहित पृथ्
भिन्न जीव माया के सजा
करनेवाली होती है अर्थात्
है केवल इतना मात्र हि श्रु
प्रतिपादन करनेमें वेद सम

र्जीवा उक्ताः । 'त्वम् आत्तभगः अपरिमेयभग' इत्येतैः पदैःपर उक्तः । तदनन्तरमपि 'यदि न समुत्तरन्ती'त्यत्र 'कामजटा' इत्यनेन वासनारूपायाः प्रकृतेः स्वरूपम् । 'असताम् असुतृपयोगिनामि'तिपदाभ्यां चेतनानां स्वरूपम् । 'भगवन् भवत' इति पदाभ्यां परमात्मनः स्वरूपं व्याजह्रुः । तत उत्तरत्र 'त्वदवगमी'त्यस्मिन् 'त्वदवगमी'त्यनेनेश्वरजीवावुक्तौ । 'शुभाशुभयो'रित्यनेनाचित्स्वरूपमुक्तम् । तदनन्तरं 'द्युपतय' इत्यनेन जीवा उक्ताः । 'त्व'मित्यनेन 'त्वयी'ति पदेन चेश्वर उक्तः । 'अण्डनिचया' इत्यनेन तत्कारणरूपा प्रकृतिरुक्ता ॥

इत् अपूर्वतानामप्रमाणान्तराप्राप्तिः । न हि चिदचिच्छरीरकं परं ब्रह्म शास्त्रं विना प्राप्यते । तथा च सूत्रकारः – 'शास्त्रयोनित्वा'दिति । अतश्चिदचिदीश्वराणां परस्परं स्वरूपभेदः शास्त्रेणैव ज्ञायते । फलमपि परमसाम्यरूपो मोक्षः । सोऽपि पुनरिह—

''यत्समेत्य न पतन्ति कृतान्तमुखे मुनय उपासते तदरयोऽपि ययुः स्मरणात् ।
त उत पदा क्रमन्त्यविगणय्य शिरो निर्ऋतेः विरह उदीक्षया यदि परास्य विमुक्ततत‌ः ॥
कथमनुवर्ततां भवभयं गीतपरम्परया श्रवणभृतो यतस्त्वमपवर्गगतिः ॥''

इत्यादिभिस्तत्र तत्रोक्तः अर्थवादस्तु त्रिविधः । तथा चोक्तम् —

'विरोधे गुणवादः स्यादनुवादोऽवधारि ते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ॥'

अत्र तु 'निभृतमरुन्मनोक्षदृढयोगयुजो हृदयमि'त्यस्मिन् श्लोके यस्मात्कारणादरयोऽपि स्मरणात् द्वेषेणापि तव स्मरणं न्तस्त्वां ययुः प्रापुरिति भूतार्थवादमुक्त्वा अतस्तस्मान्मुनयस्त्वामुपासते इत्युपपत्तिरुक्तेति । अतोऽत्र षड्विधतात्पर्यलिङ्गेन चिदचिच्छरीरं परं ब्रह्मैव प्रतिपादितं श्रुतिभिरिति न केचिदपि निर्विशेषकूटस्थचिन्मात्रप्रतिपत्तिरिति अभेदश्रुतीनां तु 'सर्वं खल्विदं ब्रह्म।' 'आत्मैवेदं सर्वम् ।' 'तत्त्वमसी'त्यादीनां समानाधिकरणतया चिदचिच्छरीरके ब्रह्मणि तात्पर्यम् । यथा देवदत्तः श्यामो युवा लोहिताक्ष इति श्यामत्वादिविशिष्ट एक एव तद्वदिति निर्गुणश्रुतयोऽपि ब्रह्मणि हेयगुणराहित्यं प्रतिपादयन्ति । 'निष्कलं निष्क्रियं शान्तमि'त्याद्याः । अन्यथा निरुपाधिकसर्वज्ञत्वादिप्रतिपादकानां 'यः सर्वज्ञः सर्ववित् ।' 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।' 'यस्य ज्ञानमयं तपः ।' 'विज्ञातार'मित्यादिश्रुतीनां विरोधः स्यादिति ॥४१॥

कृष्णप्रिया

स्वर्ग आदि लोक के पति ब्रह्मा शिव आदि हि आप के अन्त को नहि प्राप्त हुए फिर मनुष्यादिक नहि पाते है इसमें तो कहना हि क्या ? बहुत कहने से क्या है आप का स्वरूप रूपगुण विभूति अनन्त है इस वास्ते आप भी अपने अन्त को नहि प्राप्त होते प्रथम तो आप की विभूति हि अनन्त है स्वरूप रूप गुणो तो कथा हि क्या है। पृथ्वी जल तेज पवन आकश अहंकार यह तत्त्व रुप सात आवरण वाले ब्रह्मण्ड के समूह आपके एक रोमकूपमें सहित पृथ्वी की रज उडी डोलती है । इस प्रकार अपार महिमा सम्पन्न आप हो इसी से आप से जीव माया के सजाति भाव का आपके बीचमें निषेध कर जीव माया से विलक्षण आप को प्रतिपादन करनेवाली होती है अर्थात् परमात्मा जीव के सजाति नहि आप के सजाति किन्तु उन दोनो से विलक्षण पुरुषोत्तम केवल इतना मात्र हि श्रुति प्रतिपादन करती है और परमात्मा का इतना हि विभूति है इस प्रकार परिच्छेद करके प्रतिपादन करनेमें वेद समर्थ नहि है ॥४१॥

श्रीभगवानुवाच

इत्येतद् ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनम् । सनन्दनमथानर्चुः सिद्धा ज्ञात्वाऽऽत्मनो गतिम् ॥४२॥
इत्यशेषसमाम्नायपुराणोपनिषद्रसः । समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः ॥४३॥
त्वं चैतद् ब्रह्मदायाद श्रद्धयाऽऽत्मानुशासनम् । धा[1]रयंश्चर गां कामं कामानां भर्जनं नृणाम् ॥४४॥

श्रीशुक उवाच

एवं स [2]गुरुणाऽऽदिष्टं[3] गृहीत्वा श्रद्धयाऽऽत्मवान् । पूर्णः [4]श्रुतधरो राजन्नाह वीरव्रतो मुनिः[5] ॥४५॥

नारद उवाच

नमस्तस्मै भगवते कृष्णायामलमूर्तये[6] । यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥४६॥
इत्याद्यमृषिमानम्य[7] तच्छिष्यांश्च महात्मनः । ततोऽगादाश्रमं साक्षात् पितुर्द्वैपायनस्य मे ॥४७॥
सभाजितो भगवता कृतासनपरिग्रहः । तस्मै तद्वर्णयामास नारायण[8]मुखाच्छ्रुतम् ॥४८॥
इत्येतद्वर्णितं राजन्[9] यन्नः प्रश्नः कृतस्त्वया । [10]यथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत् ॥४९॥

कर्दमक्षमा

ब्रह्मणः, पुत्राः, सनकादयः, एतत्, आत्मानुशासनम्, आश्रुत्य, आत्मनः, गतिम्, ज्ञात्वा, सिद्धाः, कृतार्थाः, अथ, गुरुरूपं, सनन्दनम्, आनर्चुः ॥४२॥ इति, अशेषसमाम्नायपुराणोपनिषद्रसः, पूर्वजातैः, व्योमयानैः, महात्मभिः, समुद्धृतः ॥४३॥ ब्रह्मदायाद, त्वम्, च, एतत्, नृणाम्, कामानाम्, भर्जनम्, आत्मानुशासनम्, श्रद्धया, धारयन्, गाम्, चर ॥४४॥ श्रीशुकः, उवाच। राजन्, एवं, सः, आत्मवान्, गुरुणा, आदिष्टम्, गृहीत्वा, पूर्णः, श्रुतधरः, वीरव्रतः, मुनिः, आह ॥४५॥ नारदः, उवाच। यः, सर्वभूतानाम्, अभवाय, उशतीः, कलाः, धत्ते, तस्मै, अमलमूर्तये, भगवते, कृष्णाय, नमः ॥४६॥ इति, आद्यम्, ऋषिम्, तच्छिष्यान्, च, आनम्य, ततः, महात्मनः, मे, साक्षात्पितुः, द्वैपायनस्य, आश्रमम्, अगात् ॥४७॥ भगवता, सभाजितः, कृतासनपरिग्रहः, नारायणमुखात्, श्रुतम्, तत्, तस्मै, वर्णयामास ॥४८॥ राजन्, त्वया, यत्, नः, प्रश्नः, कृतः, इति, एतत्, वर्णितम् ।, यथा, अनिर्देश्ये, निर्गुणे, अपि, ब्रह्मणि, मनः, चरेत् ॥४९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

॥४१-४२॥

इत्यशेषसमाम्नायपुराणोपनिषद्रस इति सर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः ॥४३॥ ब्रह्मदायादेति ब्रह्मैव दायमिवायत्नप्राप्यमत्ति सेवत इति तथा ब्रह्मपुत्रेति वा ॥४४॥ पूर्णः कृतकृत्यः श्रुतधरः श्रुतमर्थं मनसि धारयन् वीरव्रतो नैष्ठिकः ॥४५॥ नम इति श्रीकृष्णावतारतया नारायणं नमस्यति-उक्तं हि 'एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमि'ति ॥४६॥ साक्षात्पितुरिति योनिव्यवधानं विना जनकस्य अग्निमथनावसरे कथञ्चिदरणौ रेतः पतितं ममन्थ व्यासस्तदैवं तत उत्पन्नः शुक इति हि वदन्ति ॥४७-४९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — इत्यनेन प्रकारेणोक्तमेतदात्मनोर्जीवब्रह्मणोरैक्यरूपस्यानुशासनम् । अथ श्रवणोत्तरमानर्चुः । आत्मनो गतिं स्वरूपम् ॥★॥

---

१. धारयन्भज मे कामं कामानां निधनं नृणां-विज. । २. स गुरुणा-वीर. विज. ; स ऋषिणा-श्रीधर. वंशी. । ३. ऽऽदिष्टो-विज. । ४. सद्यसतो राजन्-विज. । ५. गुरुं-विज. । ६. मलमूर्तये-विज. ; कीर्तये-श्रीधर. वंशी. वीर. । ७. मामन्त्रय-वीर. विज. । ८. मुखाच्च्युतं-वीर. । ९. यन्न-विज. । १०. येन-विज. ।

श्रीधरानुयायिनी — श्रीभगवानुवाच-एवं श्रुतिकृतं ब्रह्मोपदेशं श्रुत्वा ज्ञात्वा कृतकृत्याः सन्तः सनकादयः समानर्चुः ॥★॥ विश्वनाथी — इत्येवमष्टाविंशतिवेदस्तवपद्यैर्बुद्धीन्द्रियमनःप्राणानिति ब्रह्मोपनिषद्विवरणमयमात्मानुशासनं हितोपदेशं सर्वमूलस्वरूपस्वयम्भगवत्सम्बन्ध्युपदेशं वा आ सम्यक् श्रुत्वा अथ अत एवात्मनो जीवस्य गतिं गम्यं तादृशभगवतो कारं वा ज्ञात्वा भगवद्वैभववर्णनस्य तादृशस्वभावत्वादपूर्ववदनुभूय सिद्धा अपि किं वा पूर्णमनोरथाः सन्तः ॥४२॥

नीलकण्ठी —

आख्यायिकामनुसरति श्रीभगवानुवाचेत्यादिना-इत्येतदिति ॥४२॥

भावार्थदीपिकाप्रकाशः वंशीधरी — इतीत्थम्। पूर्वजातैः सनकादिभिः। व्योम्नाऽऽकाशेन यानं येषां तैः ॥★॥

श्रीधरानुयायिनी — हे ब्रह्मणो मानसपुत्र नारद ! तव ज्येष्ठभ्रातृभिः व्योमयानैः "खं ब्रह्म" इति श्रुतेर्ब्रह्मानन्दविहारैः णैर्वा समुद्धृतं नृणां सर्वकामवासनाबाधकं यदिदमशेषवेदोपनिषत्पुराणरहस्यतात्पर्यं तच्छ्रद्धया मनसि धारयंस्त्वं यथेच्छं चरेति ॥★॥ विश्वनाथी — इत्येवं समाम्नायादिरसः। पूर्वजातैः सर्वादौ ब्रह्मणः प्रादुर्भूतत्वात्सर्वतः श्रेष्ठैरित्यर्थः। अतो नैः सर्वत्रानासक्त्या चरद्भिरत एव महात्मभिरुदारमतिभिस्तैः रम्यगुद्धृतः गुरुकृताभ्यस्ताभ्य एव श्रुतिभ्य इति शेषः, इति दर्शिता। अत्र समाम्नायः सामान्यत उक्तः, पुराणं च तदुपलक्षणत्वेनेतिहासश्च। तत्त्रयं च वक्ष्यमाणावशिष्टत्वेन कर्मोपासनारूपं धमेव ग्राह्यम्। उपनिषत्तु-तत्र तत्र च्छान्दोग्यादिरूपो भगवद्गीतादिरूपो वा ज्ञानभागः। पुराणस्य मध्ये दभेदविवक्षया। "यद्ब्राह्मणानितिहासान्पुराणानि" इति स्वाध्यायोपदेशश्रुतेः। एवम् —

"वा अरे अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासपुराणम्" ॥

इत्यादितः सोदरत्वश्रुतेः।

"ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम्॥" इति ॥

इति छान्दोग्योपनिषदि। एतदेवानून्दते पुराणेषु- "इतिहासपुराणानि पञ्चमो वेद उच्यते।" इत्यादिना। तथाप्यत्र सूताधिकारो मादिवद्विधिबलादेव लभ्यते- "वर्षासु रथकारोऽग्नीनादधति" इत्यादिवत् तेषां रसः "पिबत भागवतं रसम्" इत्यादिदृष्ट्या किरसमयं तात्पर्यम्। तच्च त्रिविधम्-प्रत्येकवाक्यगतमवान्तरवाक्यगतं महाप्रकरणगतं च। तत्राद्ययोः पूर्वपूर्वदर्शितम्, स्य तु —

"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥" इति षड्भिरङ्गैः। तच्च द्यन्तस्थितस्य सृष्ट्याद्यनुवादेन दर्शितप्रणवार्थस्य प्रकाशकेनाप्रसिद्धानां प्रसिद्धानामपि श्रुतीनामैक्यार्थेन मूलपद्यैरे- ते। यथा जय जयेति। "द्युपतयः" इत्युपसंहारोपक्रमयोरैक्येन "स यदजया त्वजाम्" इत्यादिभिरभ्यासेन। "अनुचरेन्निगमः" स्त्वयि हि फलन्ति" इत्याद्या अपूर्वतया। "न परिलषन्ति केचित्" इत्यादिभिः फलेन। "त्वमकरणः स्वराट्" दिभिरर्थवादेन। "दृतय इव श्वसन्त्यसुभृतः" इत्यादिभिरुपपत्त्या यथोक्तलक्षणः श्रीभगवानेव विवक्षित इति। अस्य श्रीकृष्णत्वं र्वोक्तयुक्त्या ज्ञेयम् ॥४३॥

नीलकण्ठी — ॥०॥४३॥

भावार्थदीपिकाप्रकाशः वंशीधरी — एतत् आत्मानुशासनम्। कामानां कर्मवासनानाम्। भर्जनं दाहकम्। यथा दयो ब्रह्मदायादा ब्रह्मपुत्रास्तथा त्वमपीत्याह-ब्रह्मपुत्रेति। यथा त एतद्गृहीत्वा चरन्ति तथा त्वमप्येतद्गृहीत्वैव चरेति भावः ॥ श्रीधरानुयायिनी — ॥०॥★॥ विश्वनाथी — ब्रह्मदायादेति योग्यतोक्ता। धारयन् हृदि मुखे च। "वर्जनम्" "भर्जनम्" पाठद्वयस्यैक एवार्थः। एतच्छ्रवणेन श्रीमद्भगवद्भक्त्युत्पत्त्या नृणां कामा विनश्यन्त्वेतदर्थमपीत्यर्थः ॥४४॥

नीलकण्ठी — ब्रह्मदायादः ब्रह्मणो मानसः पुत्रः ॥४४॥

भावार्थदीपिकाप्रकाश: वंशीधरी — स मुनिर्नारदः । ऋषिणा नारायणेन । एवमादिष्टम् इत्थं प्रोक्तं तत्त्वम् । श्रद्धया गृहीत्वाऽऽह ॥★॥

श्रीधरानुयायिनी — श्रीशुक एवं नारायणोपदिष्टं श्रद्धया श्रुत्वा मनसि धारयन्नविस्मरन् कृतकृत्यो भूत्वा नैष्ठिको नारद उवाच ॥★॥ विश्वनाथी — यतो वीरव्रतो नैष्ठिकत्वादविक्षिप्तचित्तोऽतः श्रुतधरः सकृच्छ्रवणमात्रेण शब्दस्तद्धरः । यतश्च मुनिर्मननशील आत्मवान् भगवन्निष्ठश्चातस्तत्क्षणादर्थतोऽपि श्रद्धया निश्चयात्मिकया बुद्ध्या गुरुणा नारायणेनादिष्टं गृहीत्वा पूर्णः प्राप्तस्वमनोरथपूर्तिः सन्नाह-राजन्निति । एतदुत्तरश्रवणेन स्वाराज्याप्त्या त्वं सर्वतो दीप्तिमान् जातोऽसीति भावः ॥४५॥

नीलकण्ठी —

श्रुतधरः श्रुतमात्रं धारयति न बहुकृत्व उपदेशमपेक्षते । श्वेतकेतुवद्धीरव्रतो नैष्ठिकः ॥४५॥

भावार्थदीपिकाप्रकाश: वंशीधरी — सर्वाः श्रुतयस्तावच्छ्रीकृष्णमेव स्तुवन्तीति ज्ञात्वा सप्रेमश्रीकृष्णस्यावतारतया नारायणं प्रणमति-नम इति । कोऽसौ कृष्णः यः अभवाय संसारनिवृत्तये उशतीः कमनीयाः कला अवतारान् । तच्चोक्तं प्रथमे-"एते चांशकलाः" इत्यादिना "रक्षाभूमिकृपामूर्तिषोडशांशे कला मता ।" इति वारतन्तविः ।

"वंशैश्वर्ये धने लेशे सम्भृतौ खत्रिभागके । मेषादीनां तथा वीर्ये सतालव्योंऽश ईरितः ॥" इति च ॥★॥

श्रीधरानुयायिनी — भक्तानां संसारनिवृत्त्यर्थं गृहीतनानाकमनीयावताराय विमलकीर्तये श्रीकृष्णरूपाय नारायणाय तुभ्यं नमः ॥★॥ विश्वनाथी — सर्वश्रुतितात्पर्यं श्रीकृष्ण एवावधार्य तस्यैवोत्कर्षं व्यञ्जयति-नमस्तस्मा इति । अत्र मार्गेषु ज्ञानयोगभक्तिषु मध्ये भक्तिरेव श्रेष्ठा । उपासकेषु ज्ञानिप्रभृतिषु भक्त एव श्रेष्ठः । उपास्येषु ब्रह्मस्वरूपादिषु भगवानेव श्रेष्ठ इति सकलश्रुतिवाक्यैरेव निर्धारितम् । भगवत्यपि "सदसतः परं त्वमथ यदेष्वशेषम्" इति "स्त्रिय उरगेन्द्रभोग" इति वाक्याभ्यां कृष्ण एव श्रेष्ठो निश्चित इत्यभिज्ञायैव साक्षादपरोक्षस्य श्रीनारायणस्याग्रेऽपि नमस्तुभ्यं नारायणायेत्यप्रयुज्य नमस्तस्मै कृष्णायेत्युच्चैरुच्चारयामास । अमला असुरेभ्योऽपि मोक्षप्रदत्वादविद्यामालिन्यनिवर्तिका कीर्तिरेव यस्य तस्मै । ननु, किं पुरः सन्तं मां स्वगुरुं हित्वा तमेव प्रणमसि तत्राह-य इति । अभवाय भवनिवृत्तये उशतीः कमनीयाः कला भवद्विधानवतारान्धत्ते इति तन्नमस्कारेणैव त्वन्नमस्कारोऽप्यभूदिति भावः । वर्तमाननिर्देशेन तस्य नित्यत्वमपि स्पष्टीकृतम् । तथा च श्रुतिः —

"तस्मात् कृष्ण एव परो देवस्तं धारयेत्तं रसयेत्तं भजेत्तं यजेत् ॐ तत्सत् ॥" इति गोपालतापनी ॥४६॥

नीलकण्ठी — अभवाय मोक्षाय । उशतीः कमनीयाः । कलाः अवतारान् ॥४६॥

भावार्थदीपिकाप्रकाश: वंशीधरी — इत्यनेन श्लोकेनर्षिं नारायणं तच्छिष्यांश्चानम्य ॥★॥

श्रीधरानुयायिनी — एवं श्रीकृष्णं सशिष्यं नारायणं च । नारदस्तदाश्रमात्साक्षाद्योनिव्यवधानमन्तरेण पितुर्व्यासस्याश्रममगात् ॥★॥ विश्वनाथी — ब्रह्मवैवर्ते तु श्रीशुकजन्मकथा प्रकारान्तरेणोक्ता । सा च नवमस्कन्धे वर्णिता । परंत्वत्र साक्षात्पितुरित्युक्तेररणिसम्भूतशुकेनैव श्रीपरिक्षिते श्रीमद्भागवतं श्रावितमित्यवसीयते ॥४७॥

नीलकण्ठी — आद्यमृषिं नारायणम् । साक्षात् पितुः योनिव्यवधानं विना जनकस्य । अग्निमथनावसरे कथञ्चिदरणौ रेतः पतितं ममन्थ व्यासस्तदेव तत उत्पन्नः शुक इति हि वदन्तीति श्रीधराचार्याः ॥४७॥

भावार्थदीपिकाप्रकाश: वंशीधरी — सभाजितोऽर्चितः । तस्मै मत्पित्रे ॥★॥

श्रीधरानुयायिनी — स च व्यासेनातिथ्यरीत्यादृतो व्यासाय नारायणाच्छ्रुतं सर्वं वर्णयामास । अनेन श्रीनारायणान्नारदस्ततो व्यासस्तस्मादहं मत्तश्च त्वं प्राप्तवानसीति गुरूपदेशपरम्परा सूचिता ॥★॥ विश्वनाथी — भगवतेति । भगवच्छब्दनिर्देशात्सनकादिवत्तस्यापि तद्विज्ञानादिसामर्थ्येऽपि तच्छ्रवणम् । "अचार्यवान् पुरुषो वेद" इति श्रुतिसामञ्जस्याय लोकसङ्ग्रहणाय चेति ज्ञेयम् ॥४८॥

नीलकण्ठी — सभाजितः पूजितः ॥४८॥

भावार्थदीपिकाप्रकाशः वंशीधरी — यथा मनःश्रुतिः तथा हि- "प्राणन्नेव प्राणो नाम भवति वदन्वाक्पश्यंश्चक्षुः" इत्यादिश्रुतेर्वाक्प्रबन्धरूपायाः श्रुतेर्मनोरूपत्वान्मन इत्युक्तम् । "मनः पूर्वरूपं वागुत्तररूपम् ।" इति श्रुतेर्वा । ब्रह्मणि यथा चेत्प्रविशति तथा वर्णितम् ॥★॥

श्रीधरानुयायिनी — हे राजंस्त्वया कृतस्य प्रश्नस्य सर्वमिदमुत्तरं मया दत्तम् । तत्किमित्यपेक्षायामाह-यथा सगुणालम्बनेन प्रकारेण चरन्तीनां श्रुतीनां द्वारा निर्गुणे ब्रह्मणि मनोऽपि प्रचरेत् किमुत श्रुतयः ॥★॥ विश्वनाथी — उपसंहरति-इतीति । नोऽस्मान् प्रति यः प्रश्नः कृत इत्यत्रैतद्वर्णितम् । तदेतत् इति पाठे तु तत्तत्र किम्, इत्यपेक्षायामाह-यथेति । यथा भगवत्त्वाद्यवलम्बनेन भगवत्प्रसादोत्थभक्तिप्रकारेण वा चरन्तीनां श्रुतीनां द्वारा मनोऽपि चरेत्प्रविशेत् किमुत श्रुतय इत्यर्थः । एता हि "तत्तु समन्वयात् ।" इति न्यायेन तदेकपर्यवसानतया पूर्वं दर्शिताः । "शब्दब्रह्मपरब्रह्म ममोभे शाश्वती तनू" इति न्यायेन तदेकरूपत्वात्तादृशशक्तयश्च । यथोक्तं स्वयं भगवति श्रीकृष्णे श्रुतीर्विनापि शक्तिप्रागल्भ्यं "निभृतमरुन्मनोक्ष" इत्यादौ "तदरयोऽपि ययुः स्मरणात्" इत्यत्र ॥४९॥

नीलकण्ठी — तदेवमनिर्देश्ये ब्रह्मणि कथं चरन्तीत्याक्षेपस्य "बुद्धीन्द्रियमनःप्राणान्" इति श्लोकेन बुद्ध्यादीनां वस्तुतत्त्वावधारणाद्यर्थत्वोक्त्या तासां शब्दादिप्रमाणजन्यत्वेनास्ति ब्रह्मण्यपि शब्दप्रवृत्तिरिति सङ्क्षेपेणोत्तरं दत्तम् । तदेव पुनः श्रीभगवन्नारदसंवादरूपाख्यायिकामुखेन विस्तरतः प्रतिपाद्याख्यायिकां च समाप्योपसंहरति-इत्येतदिति । मन इति बुद्ध्यादिचतुष्टयोपलक्षणम् ।

"मनसा ह्येव पश्यति मनसा शृणोति ॥

कामः सङ्कल्पो विचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव ॥" इति दर्शनादिकरणानामिन्द्रियाणां धीशब्दिताया बुद्धेश्च मनोऽनतिरिक्तत्वश्रवणात् । प्राणस्याप्यत्रैवान्तर्भावः । "स एष इह प्रविष्ट आनखाग्रेभ्यः" इति पूर्वप्रकृतस्य बुद्ध्यादिसङ्घातप्रविष्टस्य —

"स प्राणन्नेव प्राणो नाम भवति वदन् वाक्पश्यंश्चक्षुः शृण्वञ्छ्रोत्रं मन्वानो मनः तान्यस्यैतानि कर्मनामान्येव ॥" इति प्राणाद्यात्मत्वश्रुतेः ।

तत्रापि बुद्धिरेव प्राणाद्यात्मत्वं युक्तं न चित इति युक्तोऽत्र मनसैवेतरसङ्ग्रहः । एवं च निर्मृष्टनिखिलानर्थव्रातनिरतिशयानन्दप्रत्यगात्मज्योतिःस्वरूपे ब्रह्मणि प्रमातृत्वाद्यनर्थमूलस्तम्भभूताज्ञानध्वान्तविध्वंसिनी तत्त्वमस्यादिवाक्यकरणिका मनोवृत्तिः सम्भवतीति युज्यत एवानिर्देश्येऽपि ब्रह्मणि वाचः सञ्चार इति सिद्धम् ॥४९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

॥४१॥ ॥४२॥

इत्येवं समाम्नायादिरसः । पूर्वजातैः सर्वादौ ब्रह्मणः प्रादुर्भूतत्वात्सर्वतः श्रेष्ठैरित्यर्थः । अतो व्योयानैः सर्वत्रानासक्त्या चाद्भिरत एव महात्मभिरुदारमतिभिस्तैः रम्यगुद्धृतः गुरुकृताभ्यस्ताभ्य एव श्रुतिभ्य इति शेषः, इति योग्यता दर्शिता । अत्र समाम्नायः सामान्यत उक्तः, पुराणं च तदुपलक्षणत्वेनेतिहासश्च । तत्रयं च वक्ष्यमाणावशिष्टत्वेन कर्मोपासनारूपं द्विविधमेव ग्राह्यम् । उपनिषत्तु-तत्र तत्र च्छान्दोग्यादिरूपो भगवद्गीतादिरूपो वा ज्ञानभागः । पुराणस्य मध्ये पाठस्तदभेदविवक्षया । "यद्ब्राह्मणानितिहासान्पुराणानि" इति स्वाध्यायोपदेशश्रुतेः । एवम् —

"वा अरे अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासपुराणम्" ॥

इत्यादितः सोदरत्वश्रुतेः ।

"ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम् ॥" इति ॥

इति छान्दोग्योपनिषदि। एतदेवानूदते पुराणेषु- "इतिहासपुराणानि पञ्चमो वेद उच्यते।" इत्यादिना। तथाप्यत्र सूताधिकारो भगवन्नामादिवद्विधिबलादेव लभ्यते- "वर्षासु रथकारोऽग्नीनादधति" इत्यादिवत् तेषां रसः "पिबत भागवतं रसम्" इत्यादिदृष्ट्या भगवद्भक्तिरसमयं तात्पर्यम्। तच्च त्रिविधम्-प्रत्येकवाक्यगतमवान्तरवाक्यगतं महाप्रकरणगतं च। तत्राद्ययोः पूर्वपूर्वदर्शितम्, अन्यस्य तु —

"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥" इति षड्भिरङ्गैः। तच्च सर्ववेदाद्यन्तस्थितस्य सृष्ट्याद्यनुवादेन दर्शितप्रणवार्थस्य प्रकाशकेनाप्रसिद्धानां प्रसिद्धानामपि श्रुतीनामैक्यार्थेन मूलपद्यैरेवोदाह्रियते। यथा जय जयेति। "द्युपतयः" इत्युपसंहारोपक्रमयोरैक्येन "स यदजया त्वजाम्" इत्यादिभिरभ्यासेन। "अनुचरेन्निगमः" "श्रुतयस्त्वयि हि फलन्ति" इत्याद्या अपूर्वतया। "न परिलषन्ति केचित्" इत्यादिभिः फलेन। "त्वमकरणः स्वराट्" इत्यादिभिरर्थवादेन। "दृतय इव श्वसन्त्यसुभृतः" इत्यादिभिरुपपत्त्या यथोक्तलक्षणः श्रीभगवानेव विवक्षित इति। अस्य श्रीकृष्णत्वं तु पूर्वोक्तयुक्त्या ज्ञेयम् ॥४३॥

ब्रह्मदायादेति योग्यब्रह्मपुत्रतोक्त्यापि योग्यतोक्ता। धारयन् हृदि मुखे च कामं यथेच्छं गां चर। पृथिव्यां परिभ्रमेत्यर्थः। किमर्थं नृणां कामानां वर्जनं निवारणरूपं भर्जनमिति पाठेऽपि स एवार्थः। एतच्छ्रवणेन श्रीभगवद्भक्त्युपपत्त्या नृणां कामा विनश्यन्तु एतदर्थमपीत्यर्थः ॥४४॥

यतो वीरव्रतो नैष्ठिकब्रह्मचारित्वादविक्षिप्तचित्तः। अतः श्रुतधरः सकृच्छ्रवणमात्रेण शब्दस्तद्धरः। यतश्च मुनिर्मननशीलः आत्मवान् श्रीभगवन्निष्ठश्च अतस्तत्क्षणादर्थतोऽपि श्रद्धया निश्चयात्मिकया बुद्ध्या स्वगुरुणा श्रीनारायणेनादिष्टं गृहीत्वा पूर्णः प्राप्तस्वमनोरथपूर्तिः सन्नाह। स ऋषिणेति पाठः क्वचित्। राजन्निति तदभीष्टमुत्तरयित्वा प्रोत्साहयति ॥४५॥

तन्मनोरथपूर्तिमेव दर्शयितुमाह श्रीनारद उवाचेति। अथ सर्वश्रुतितात्पर्यं श्रीकृष्ण एवावधार्य तस्यैवोत्कर्षं व्यञ्जयति- नमस्तस्मा इति। अत्र मार्गेषु ज्ञानयोगभक्तिषु मध्ये भक्तिरेव श्रेष्ठा। उपासकेषु ज्ञानिप्रभृतिषु भक्त एव श्रेष्ठः। उपास्येषु ब्रह्मस्वरूपादिषु भगवानेव श्रेष्ठ इति सकलश्रुतिवाक्यैरेव निर्धारितम्। भगवत्यपि "सदसतः परं त्वमथ यदेष्वशेषम्" इति "स्त्रिय उरगेन्द्रभोग" इति वाक्याभ्यां कृष्ण एव श्रेष्ठो निश्चित इत्यभिज्ञायैव साक्षादपरोक्षस्य श्रीनारायणस्याग्रेऽपि नमस्तुभ्यं नारायणायेत्यप्रयुज्य नमस्तस्मै कृष्णायेत्युच्चैरुच्चारयामास। अमला असुरेभ्योऽपि मोक्षप्रदत्वादविद्यामालिन्यनिवर्तिका कीर्तिर्यस्य तस्मै। ननु, किं पुरः सन्तं मां स्वगुरुं हित्वा तमेव प्रणमसि तत्राह–य इति। अभवाय भवनिवृत्तये उशतीः कमनीयाः कला भवद्विधानवतारान्धत्ते इति तन्नमस्कारेणैव त्वन्नमस्कारोऽप्यभूदिति भावः। वर्तमाननिर्देशेन तस्य नित्यत्वमपि स्पष्टीकृतम्। तथा च श्रुतिः —

"तस्मात् कृष्ण एव परो देवस्तं धारयेत्तं रसयेत्तं भजेत्तं यजेत् ॐ तत्सत् ॥" इति गोपालतापनी ॥४६॥

साक्षादव्यवहितं तदानीं तेनास्थितमाश्रमं ब्रह्मवैवर्ते तु श्रीशुकजन्मकथेयं श्रीद्वैपायनपत्न्या उदरे जातः श्रीशुकदेवो बहूनि वर्षाणि योगबलेन स्थितः। पित्रा मुहुः प्रार्थितोऽपि न निष्क्रान्तवानुक्तवांश्च, कथं निष्क्रमाणि। निष्क्रममात्रेण श्रीभगवन्मायाव्याप्तो भविष्यामि। इति तच्छ्रुत्वा तदुपदेशेन द्वारकां गत्वा द्वैपायनेनानीतः स्वयं भगवान् श्रीकृष्णस्तमुवाच। तव मातेयं दुःखितास्ति। कथं न निष्क्रामसीति। तच्छ्रुत्वा तेन प्रार्थितम्, यदि भवता माया दूरीक्रियते तदाहं निष्क्रमाणीति भगवता तथाङ्गीकृतेऽसौ निष्क्रान्त एव प्रव्रजितवानिति ॥४७॥

भगवता श्रीद्वैपायनेन भगवच्छब्दनिर्देशेन सनकादिवत्तस्यापि तद्विज्ञानादिसामर्थ्येऽपि तच्छ्रवणं सूचितम्।

तस्मिन् स्वभक्तिश्च ॥४८॥

उपसंहरति-इतीति। नोऽस्मान् प्रति यः प्रश्नः कृत इत्यत्रैतद्वर्णितम्। तदेतत् इति पाठे तु तत्तत्र किम्, इत्यपेक्षायामाह-यथेति। यथा भगवत्त्वाद्यवलम्बनेन भगवत्प्रसादोत्थभक्तिप्रकारेण वा चरन्तीनां श्रुतीनां द्वारा मनोऽपि चरेत्प्रविशेत् किमुत श्रुतय इत्यर्थः। एता हि "तत्तु समन्वयात्।" इति न्यायेन तदेकपर्यवसानतया पूर्वं दर्शिताः। "शब्दब्रह्मपरब्रह्म ममोभे शाश्वती तनू" इति न्यायेन तदेकरूपत्वात्तादृशशक्तयश्च। यथोक्तं स्वयं भगवति श्रीकृष्णे श्रुतीर्विनापि शक्तिप्रागल्भ्यं "निभृतमरुन्मनोक्ष" इत्यादौ "तदरयोऽपि ययुः स्मरणात्" इत्यत्र ॥४९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

इति एवमीदृशं वा एते पूर्व्वोक्ताः श्रीसनकादयः, एतदिति पाठे पाठान्तरे एतच्छुत्युक्तम्, आत्मानुशासनं जीवहितोपदेशम्, न सम्यक् श्रुत्वा, तथा त एवात्मनो हरेर्गतिं ज्ञात्वा सिद्धा अपि योगेन, किंवा पूर्णमनोरथाः सन्तः ॥४२॥ इत्ययं रसो मधुरसारभागः सम्यगुद्धृतः प्रकटितः आकृष्य गृहीतो वा यतः पूर्वजातैः सर्वादौ श्रीब्रह्मणा प्रादुर्भूतैः सर्वज्येष्ठैः श्रीभगवदवतारैरित्यर्थः। अतो व्योमयानैः सर्वत्रानासक्त्या चरद्भिरपि, किंवा सिद्धैः, अत एव महात्मभिरुदारमतिभिश्च, तु त्वन्तु, हे ब्रह्मदायादेति ब्रह्मपुत्रत्वेन तथापि तैः साम्यादत्र योग्यतास्तीति भावः। धारयन् हृदि मुखे च कामं यथेच्छं गां चर, पृथ्व्यां परिभ्रमेत्यर्थः। किमर्थम्? नृणां मनुष्याणां कामा विषयभोगादीच्छास्तासां वर्ज्जनं निवारणम्, पाठान्तरेऽपि स एवार्थः ॥ एतच्छ्रवणेन श्रीभगवद्भक्त्युत्पत्त्या नृणां कामा विनश्यन्त्विति त्वेतदर्थमित्यर्थः। च-शब्दोक्तोऽयं तेभ्यो विशेषः ॥४३-४४॥ एवमित्थमेतद्वा आदिष्टं प्रयोजनम्। गुरुणेति पाठे पूर्वत एव तस्य श्रीनारायणशिष्यत्वात्, किंवा अधुना तादृशोपदेशात् श्रद्धया गृहीत्वा ओमित्यादरेण स्वीकृता। यद्वा, उपदिष्टमात्मानुशासनं शिक्षित्वा, यत आत्मवान् बुद्धिमान्। किञ्च, मुनिर्मननशीलः, यतो वीरव्रतः, अतः श्रुतधरः पूर्णश्च सन्। हे राजन्निति परमगुरुत्वेनात्मनोऽपि धन्यतां गृहीत्वा हृदि धृत्वा पूर्णः सन्। अन्यत्तैर्व्याख्यातम्। यद्वा, गृहीत्वा हृदि धृत्वा पूर्णः सन्। ननु कथं सद्य एव गृहीतम्? तत्राह-आत्मवानिति। अतः श्रुतधरः श्रुतं धरतीति तथा सः। अन्यत् समानम् ॥४५॥ श्रीकृष्णबुद्ध्या माहात्म्यविशेषसम्पत्त्या श्रीनारायणं नितरां प्रीणयन्नमति-नम इति। प्रत्यक्षेऽपि परोक्षोक्तिरत्यन्तगौरवात्। यद्वा, अवतारिश्रीकृष्णं प्रति नत्यैव तस्य सा सम्पद्यते सन्तोषश्चेति। श्रीकृष्णमेव भक्त्या प्रणमति-भगवते साक्षात् परमेश्वराय, तत्रापि कृष्णाय निजाशेषैश्वर्यप्रकटनेन सर्वचित्ताकर्षकाय, अत एवामलकीर्तये। भगवत्त्वमेवाह-य इति। सर्वभूतानामित्यधिकारापेक्षा निरस्ता। अभवाय संसारदुःखनिवृत्तये, कलाः रूपाणि, नारायणाद्यवतारानित्यर्थः। कथम्भूताः? उशतीर्जगन्मङ्गला इति सुखप्रापकत्वादिकं चोक्तम्। यद्वा, अमलकीर्तित्वमेवाह-य इति। कला रासक्रीडावैदग्धीर्धत्ते पुष्णाति ॥४६॥ इत्येवमानम्य पृष्ट्वा अनुज्ञां प्रार्थ्येत्यर्थः। आमन्त्र्येति पाठेऽपि स एवार्थः। पाठन्तरं स्पष्टम्। तस्य शिष्यान् कलापग्रामवासिप्रमुखान्। श्रीब्रह्मपुत्रेणापि तेन तेषामामन्त्रणे हेतुः-महात्मनस्तदेकभक्तिपरानित्यर्थः। ततस्तत्पश्चादेवेति परमो विनय उक्तः। यद्वा, तस्मात् श्रीनारायणाश्रमात् नारद इति शेषः। अन्यत्तैर्व्याख्यातम्। यद्वा, साक्षात् प्रकटं सुप्रसिद्धमाश्रमं श्रीबदर्य्याख्यम्, तत्सम्बन्धेनैव श्रीबादरायणत्वख्यातेः ॥४७॥ भगवता श्रीद्वैपायनेन भगवच्छब्देन तु तस्यापि तद्विज्ञानादि-सामर्थ्यं सूचितम्। तस्मै भगवते इति तस्य श्रीनारदशिष्यतापि सूचिता ॥४८॥ नोऽस्मान् प्रति यः प्रश्नः कृतः, इत्यत्र एतद्वर्णितम्, पाठान्तरेऽपि। तत्तत्र किमित्यपेक्षायामाह-यथेति। मनश्चरेत्, श्रुतिद्वारा चित्तं प्रविशतीत्यर्थः। यद्वा, मानयति ज्ञापयतीति मनो वेदः, हे राजन्नितीदृशं प्रश्नं कर्तुं त्वमेवार्हसि, सदुत्तरपात्रं च त्वमेवेति भावः। तस्य तादृशप्रश्नविषयत्वेनात्मनो बहुमानान्त इति बहुत्वमिति ॥४९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

इति वेदस्तुतिम् आश्रुत्य। आत्मनो गतिम् आत्मतत्त्वम् ॥४२॥

इति सर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः ॥४३॥

ब्रह्मदायादेति। ब्रह्मै दायमिव अयत्नप्राप्यम्। अत्ति सेवत इति वा ब्रह्मपुत्र इति वा ॥४४॥

पूर्णः कृतकृत्यः। श्रुतधरः श्रुतमर्थं मनसि धारयन्। वीराणामिव व्रतं यस्य सः ॥४५॥

अभवाय अपवर्गाय । कलाः मूर्तीः ॥४६-४९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इतीत्थं श्रुतिगीतिसंवादेन सनन्दनेनोक्तमुत्तरमवधार्य तं बहु मेनिरे । इत्याह भगवान्नारायणः-इतीति । इति श्रुत्युक्तप्रकारेणैवंविधं सनन्दनेनोक्तमात्मानुशासनम् । आत्मा अनुशिष्यते येन आत्मानुशासनमुत्तरमाश्रुत्य ब्रह्मणश्चतुर्मुखस्य पुत्राः मरीच्यादयः सिद्धाः आत्मनः परमात्मनो गतिं प्रकारं याथात्म्यं ज्ञात्वा निश्चित्याथ सनन्दनमानर्चुः ॥४२॥

इतीति । सर्वश्रुतिपुराणोपनिषतात्पर्यमेवं समुद्धृतम् इति प्रकृतवेदस्तुतिप्रशंसा ॥४३॥

त्वमिति । हे ब्रह्मदायाद ब्रह्मपुत्र ! दायभोक्तृत्वात्पुत्रस्य तस्मिन् दायादशब्दः उपचर्यते । एतदात्मानुशासनम् । नृणां ये कामास्तेषां भर्जनं दाहकं श्रुतिस्तवनं धारयन् कामं यथेष्टं गां भूमिं तदुपलक्षितान् लोकान् चर पर्यट ॥४४॥

कथमेतत्त्वयाऽधिगतम् इत्यपेक्षायां तद्वक्तुं प्रस्तौति मुनिः चतुर्भिः-एवमिति । गुरुणा बदर्याश्रमवासिना । श्रीनारायणेनादिष्टमुपदिष्टम् । श्रद्धया गृहीत्वा तस्मिन्नवहितमनाः पूर्णः निवृत्तसंशयत्वात्पूर्णमनाः श्रुतं यथाश्रुतं धरतीति तथाभूतः । वीराणां जितेन्द्रियाणां व्रतं यस्य सः । नैष्ठिको नारदः । हे राजन् ! गुरुं श्रीनारायणं प्राह ॥४५॥

उक्तिमेवाह-नम इति । कृष्णाय सर्वलोकसुखकराय तदुपयुक्ता अमला अकर्मवश्या मूर्तिर्यस्य तस्मै तुभ्यं नमः । केन कारणेन । कृष्ण इत्यतस्तं विशिनष्टि-य इति । यः भगवान् सर्वभूतानामभवायापवर्गाय उशतीः कमनीयाः निर्मला इति यावत् । कलाः विद्याः धत्तेऽपेक्षितविद्योपदेशेन सुखकर इति भावः ॥४६॥

इतीत्थमाद्यमृषिं नारायणममलमन्तःकरणं येषां तांस्तस्य शिष्यांश्चामन्त्र्य प्रणामपूर्वकमाप्रष्टाऽऽपृच्छ्य । साक्षात् स्वयम् । द्वैपायनस्याश्रममगाज्जगाम ॥४७॥

सभाजित इति । ततो भगवता द्वैपायनेन सभाजितः पूजितः । कृतः आसनस्य परिग्रहो येन सः तस्मै द्वैपायनाय । नारायणस्य मुखाच्च्युतं निर्गतं श्रुतिस्मृत्यात्मकं वचो वर्णयामास उपदिदेशेत्यर्थः । स तु मह्यमुपदिष्टवान् इति तु प्रसिद्धत्वान्नोक्तम् ॥४८॥

एवं च त्वत्प्रश्नस्योत्तरमुक्तम् इत्याह-तदिति । हे राजन् ! नोऽस्मान् प्रति यः प्रश्नः त्वया कृतः तत्तत्र प्रश्ने एतच्छ्रुतिवचो वर्णितम् । उत्तरत्वेन कथितमित्यर्थः । येनोपवर्णितेनानिर्देश्ये निर्गुणेऽपि ब्रह्मणि श्रुतयश्चरेयुरिति मनश्चरेत्प्रसरेत्संशयं मनो भवेदित्यर्थः ॥४९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम्

“इत्येतद्ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनम् । सनन्दनमथानर्चुः सिद्धा ज्ञात्वाऽऽत्मनो गतिम् ॥४२॥”

इतिशब्द आदिवचनः । एवमादि श्रुत्या गीतमात्मानुशासनं ब्रह्मज्ञानमाश्रुत्य श्रुत्वा हृदिकृत्वा आत्मनः परमात्मनो गतिं स्वरूपस्थितिं ज्ञात्वा ॥४२॥ व्योमयानमहात्मभिः ब्रह्माश्रयेषूत्तमैः तैः पूर्वजैः सनकादिभिः अशेषाणां समीचीनानाम् आम्नायानां पुराणामनामुपनिषदां च रसः सार इति समुद्धृतः ॥४३॥ ब्रह्मदायाद ब्रह्मपुत्र नारद ! काम्यानां निधनं नाशकरम् । यद्वा । कामानामभीष्टानां फलानां निधनं कुलं गृहं वा निधनो स्त्री कुले नाशे ‘निर्स्त्रिशो क्रूरखड्गयो’रिति यादवः ॥४४॥ पूर्णः स्वतस्तृप्तः ॥४५॥ सर्वभूतानां धाता धृतिपोषणयोः कर्ता यः सर्वभूतानामिति प्रस्तुतास्ते जीवाः यस्य तव कलाः प्रतिबिम्बांशाः ॥४६॥ ऋषिस्त्रपत्वादृषिः ॥४७॥ भगवता व्यासेन । तस्मै व्यासाय ॥४८॥ यथा भगवत्प्रसादोत्थभक्तिप्रभावेनेत्यर्थः ॥४९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

आत्मानुशासनं जीवहितोपदेशं सर्व्वमूलस्वरूपस्वयम्भगवत्सम्बन्ध्युपदेशं वा आत्मनो जीवस्य गतिर्गम्यं तादृशभगवतो कारं वा ज्ञात्वा यथा स्वयमवधारितवन्तस्तथैवावधार्य्येत्यर्थः । समाम्नायादीनां रसः भगवद्भक्तिरसमयं तात्पर्य्यम् । अथ श्रुतितात्पर्य्ये स्वयं भगवति श्रीकृष्ण एवावधार्य्ये सन्तोषात्तद्रूपनिजेष्टदेवाभेदेन तदवतारं स्वगुरुं श्रीनारायणर्षिं नमस्यति- नम ति ॥४२-५०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

॥४१-४५॥

नमस्तस्मै भगवते कृष्णायेत्यादि कृष्णायेति कृष्णनमस्कारेणैव कृष्णपरैव श्रुतिस्तुतिरियमुपपद्यते ॥४६-५०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥४२-४५॥

नमस्तस्मै भगवत इति- कृष्णनमस्कारादेव कृष्णपरा स्तुतिरियमुपपद्यते ॥४६॥

॥४७-५०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

इत्येतदष्टाविंशत्या वेदस्तवश्लोकैः बुद्धीन्द्रियमनःप्राणानिति ब्रह्मोपनिषद्विवरणमयमात्मानुशासनम् आत्मनः स्वस्य गतिं य भगवत्प्रेमाणम् ॥४२-४३॥ ब्रह्मदायाद ! ब्रह्मात्मज ! ॥४४॥ श्रुतधरः श्रुतमर्थं मनसि धारयन् वीरव्रतः वीरस्येव व्रतं प्रतिज्ञा स सः ॥४५॥ वेदस्तुत्यर्थतात्पर्यम् निर्धार्य सप्रतिज्ञमेव श्रीकृष्णस्यैवसर्वोत्कर्षम् अभिव्यञ्जयति-नमस्तस्मै इति । अत्र मार्गेषु योगभक्तिषु मध्ये भक्तिरेव श्रेष्ठा । उपासकेषु ज्ञानिप्रभृतिषु भक्त एव श्रेष्ठः । उपास्येषु ब्रह्मस्वरूपादिषु भगवानेव श्रेष्ठ इति कलश्रुतिवाक्यैरेव निर्धारितम् । भगवत्यपि ''सदसतः परं त्वमथ यदेष्वशेषम्'' इति ''स्त्रिय उरगेन्द्रभोगभुजदण्डे''ति वाक्याभ्यां कृष्ण एव श्रेष्ठो निश्चित इत्यभिज्ञायैव साक्षादपरोक्षस्य श्रीनारायणस्याग्रेऽपि नमस्तुभ्यं नारायणायेत्यप्रयुज्य नमस्तस्मै कृष्णायेत्युच्चैरुच्चारयामास । अमला असुरेभ्योऽपि मोक्षप्रदत्वादविद्यामालिन्यनिवर्तिका कीर्तिरेव यस्य तस्मै । ननु, किं पुरः मां स्वगुरुं हित्वा तमेव प्रणमसि तत्राह-य इति । अभवाय भवनिवृत्तये उशतीः कमनीयाः कला भवद्विधानवतारान्धत्ते इति नमस्कारेणैव त्वन्नमस्कारोऽप्यभूदिति भावः । वर्तमाननिर्देशेन तस्य नित्यत्वमपि स्पष्टीकृतम् । तथा च श्रुतिः —

''तस्मात् कृष्ण एव परो देवस्तं धारयेत्तं रसयेत्तं भजेत्तं यजेत् ॐ तत्सत् ॥'' इति गोपालतापनी ॥४६॥ इतिशब्दः प्रकारे मतो वा । इति प्रकारेणैव अद्यम् आनम्य आनतो भूत्वा । यद्वा इति । कृष्णप्रणामसमाप्तौ वृत्तायाम् आद्यं तमृषिमानम्य । ततो णाश्रमात् ॥४७॥ भगवता व्यासेन । तस्मै व्यासाय ॥४८॥ यथा भगवत्प्रसादोत्थभक्तिप्रभावेणेत्यर्थः ॥४९॥

गूढार्थदीपिनी

इति इत्थम् ब्रह्मणः पुत्राः सनकादयः एतत् श्रुत्युक्तम् आत्मा जीवात्मा अनुशिष्यते अनुशिक्ष्यते येन तत् आत्मानुशासनम् हितोपदेशं श्रीकृष्णसम्बन्ध्युपदेशं वा आ सम्यक् श्रुत्वा अथ अतः अस्मादेव आत्मनः श्रीकृष्णस्य गतिं स्वरूपं च ज्ञात्वा पूर्णमनोरथाः सन्तः गुरुरूपं सनन्दनमानर्चुः पूजयामासुः । यद्वा । आत्मनः श्रीकृष्णस्य अनुशासनं लीलोपदेशमेव नो जीवस्य गतिं निस्तारहेतुमाश्रुत्य उपपत्त्वा निश्चित्य च सिद्धाः सन्तः । यद्वा । आ सम्यक् श्रुतिभिः कृतं नुशासनं तदेव गतिर्जीवस्य भगवत्प्राप्त्युपायस्तमेव ज्ञात्वा सनन्दनम् अथ श्रीकृष्णं च आनर्चुः । इत्येतदिति नारदं प्रति वाक्यम् ॥४३॥

इति इत्थं पूर्वजातैः सनकादिभिः अशेषसमाम्नायानां समस्तवेदानां पुराणानाम् उपनिषदां च रसः सारः समृद्धृतः निर्णीय निष्कासितः तेषां सर्वेषामेव भगवद्यदभाक्तिरसमयं तात्पर्यमित्युद्धाटितमित्यर्थः । कथम्भूतैः महात्मभिः ? महान् अत्युदार आत्मा स्वभावः महति श्रीकृष्णे वा आत्मा चित्तं येषां तैः । ब्रह्मपारङ्गतैर्वा इति तेषां सामर्थ्यं द्योतितम् । पुराणस्य वेदोपनिषदयोर्मध्यपातित्वे न तेन विना तयोस्तात्पर्यावगतिरतस्तदालोडनमपि नितान्तमावश्यकम् । किञ्च —

"ऋचो यजूंषि सामानि पुराणं यजुषा सह । उच्छिष्टाज्जज्ञिरे" इत्यथर्ववेदीयश्रुत्या वेदवत्पुराणस्याप्यपौरुषेयत्वं विवक्षितम् । यजुषेत्यप्रधाने तृतीयया च वेदापेक्षया पुराणस्य प्राधान्यमाधिक्यं च द्योतितम् । स्कान्दप्रभाखण्डेऽपि —

"वेदवन्निश्चलं मन्ये पुराणार्थं द्विजोत्तम । वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः ॥१॥
बिभेत्यल्पश्रुताद्वेदो मामयं चालयिष्यति । इतिहासपुराणैस्तु निश्चलोऽयं कृतः पुरा ॥२॥
यन्न दृष्टं हि वेदेषु तद्दृष्टं स्मृतिषु द्विजाः । उभयोर्यन्न दृष्टं हि तत्पुराणैः प्रगीयते ॥३॥
यो वेद चतुरो वेदान् साङ्गोपनिषदो द्विजाः । पुराणं नैव जानाति न च स स्याद्विचक्षणः ॥४॥"

इत्यलमतिविस्तरेण । 'समृद्धृत इति' अर्थः स्थलत्रये गूढः पराणोपनिषच्छ्रुतौ । सर्वतः सारमेतद्धि समुद्धृतमिहोच्यते ॥ इति तद्विवरणम् ॥४४॥

हे ब्रह्मदायाद ! ब्रह्मपुत्र नारद ! त्वं च त्वमपि एतत् वेदस्तुतिरूपम् आत्मानुशासनं ब्रह्मसम्बन्ध्युपदेशं श्रद्धया हृदि मुखे च धारयन् कामं यथेच्छं गां पृथ्वीं तदुपलक्षितान् लोकान् चर विचर । कीदृशमात्मानुशासनम् ? नृणां ये कामा नाना वासनाः तेषां भर्जनं दाहकं निवर्तकमित्यर्थः । ब्रह्मणो दायं भागस्तमत्तीति कर्मण्यण् । आदत्ते वा आतश्चोपसर्गे इति कः । 'दायादौ सुतबान्धवौ' इत्यमरः । यद्वा । ब्रह्मैव श्रीकृष्णभक्तिरसमेव अयत्नप्राप्तदायमिव अत्ति सेवते इति ब्रह्मदायादशब्दो विवृतः ॥४५॥

हे राजन् ! एवम् ऋषिणा श्रीनारायणेनोपदिष्टं तत्त्वं श्रद्धया गृहीत्वा पूर्णः निवृत्तसंशयः सन् स नारदः आह नारायणमिति शेषः । कथम्भूतः ? वीराणामिव, जितेन्द्रियाणामिव नैष्ठिकं ब्रह्मचर्यं व्रतं यस्य स वीरव्रतः । वीरस्येव व्रतं दृढप्रतिज्ञा यस्येति वा । नैष्ठिकब्रह्मचारित्वात् स्थिरचित्तः अत एव श्रुतधरः श्रुतमात्रं शब्दतोऽर्थतश्च धारयतीति तथाभूतः न बहुकृत्व उपदेशमपेक्षते इत्यर्थः । यतो मुनिर्मननशीलः । तत्कुतः ? आत्मवान् भगवन्निष्ठश्च ॥४६॥

यः सर्वभूतानां सर्वजीवानाम् अभवाय संसारनिवृत्तये मोक्षाय उशतीः कमनीयाः कलाः मूर्तीर्धत्ते तस्मै कृष्णाय नम इत्यन्वयः । कथम्भूताय ? अमला निर्दोषा कीर्तिर्यस्य तस्मै यतो भगवते पूर्णैश्वर्याय । कर्षति अरीनपि स्वपदं प्रतीति कृष्णः । यद्वा । स्वगुणैर्वात्सल्यादिभिः कर्षति आकर्षति वशीकरोति भक्तानिति कृष्णः । तन्नमस्कारेण कृष्णपरैवेयं वेदस्तुतिरिति निश्चीयते । अमला असुरेभ्योऽपि मोक्षप्रदत्वादविद्याजन्यमालिन्यनिवर्तिका कीर्तिर्यस्येति वा ॥४७॥

इति इत्थं आद्यम् ऋषिं श्रीनारायणं, महात्मनः मृदुस्वभावा भगवन्निष्ठान् तच्छिष्यांश्च आनम्य प्रणम्य ततो नारायणाश्रमात् मे साक्षात् पितुः कृष्णद्वैपायनस्य श्रीव्यासस्य आश्रममगात् नारद इति शेषः । अग्निमथनावसरे कथञ्चिदरणिपतितस्य स्वरेतसो मथनादेव व्यासाच्छुको जातः तेन योनिव्यवधानं विनैव जनकत्वात् स्य साक्षात्पितृत्वमुपपद्यते ॥

ब्रह्मवैवर्ते तु श्रीशुकजन्मकथा प्रकारान्तरेणोक्ता । तथा हि । श्रीव्यासपत्न्या उदरे श्रीशुको बहुकालं योगबलेन स्थितः पित्रा च मुहुर्मुहुः प्रार्थितोऽपि ततो न निर्गत उवाच च । हे भगवन्नहमितो न निर्गमिष्यामि निर्गते च मायाच्छन्नो कृष्णश्चेदत्रागत्यैव कथयेत् यत् शुकोपरि नैव मायाक्रमणं स्यादिति तदैव अहं निर्गमिष्यामीति तच्छ्रुत्वा श्रीव्यासेन द्वारकात आनीतः श्रीकृष्णस्तमुवाच वत्स ! मा भैषीः शीघ्रं निर्गच्छ, तव माता दुःखिता मायालिप्तश्च त्वं न भविष्यसीति तच्छ्रुत्वा श्रीशुकः तत्क्षणाद्बहिर्निर्गत्य श्रीकृष्णं पितरौ च प्रणम्य परित्यज्य च सर्वं वनं जगामेति, अतः कल्पान्तरमाश्रित्योभयमपि समञ्जसमेव न विरोधः । वस्तुतस्तु अरणिरिति नाम्ना प्रसिद्धा व्यासपत्न्येव अतः सर्वमनवद्यम् । अत्र पक्षे साक्षादित्यस्य स्वयं नारद इत्यर्थः । यद्वा । साक्षादाश्रमं बदरीषण्डमण्डितमित्यत्रान्वेति ॥४८॥

भगवता
साक्षाद्ब्रह्मणि श्रीकृ
त्वं प्राप्तवानसीति ग

उपसंहरति
किमित्यपेक्षायामाह
वासुदेवस्तेन रूपेण

अशेषसमा

श्रीनारदश्च
स्वाभाविकाचिन्त्यान

'शुद्धे महावि

इति अमलक
कला लीलावताराख्य

इत्येवं श्रुतिग
सनन्दनोऽनुवादमात्रं कृ
तस्यावबोधमाह-इत्येत
आत्मानुशासनमिति आ
इति गुरोः पूजनं कृत
इति वाक्यात् इदानीं तु
इदमुपाख्यानमुक्तवान् ।
विशेषतः पूजां न कुर्युः
नातः परं श्रोतव्यमस्ति
ज्ञातवन्तः सिद्धा इत्यर्थः

नारदस्यात्रैवं जि

"अर्थः स्थलत्रये

अतो नान्योऽस्ति
निर्गलित इति रसः स पूर्वं
प्रयोजनमिति चेत्तत्राह-मह

एवं श्रुतिगीताया
तु ब्रह्मण्येव दायं प्राप्तवानि
श्रद्धया आत्मानुशासनं तवा
शास्त्रार्थस्य सम्भवात् आत्म

भगवता श्रीव्यासेन सभाजितः पूजितः कृतः आसनस्य परिग्रहः स्वीकारो येन तथाभूतः स नारदः यत् श्रुतं श्रुतीनां साक्षाद्ब्रह्मणि श्रीकृष्णे पर्यवसानं तत्सर्वं तस्मै मत्पित्रे व्यासाय वर्णयामास । एतेन श्रीनारायणान्नारदस्ततो व्यासस्तस्मादहं मत्तश्च त्वं प्राप्तवानसीति गुरूपदेशपरम्परा सूचिता तयैव स्फूर्तिर्नान्यथेति ॥४९॥

उपसंहरति-इतीति । हे राजन् ! नोऽस्मान् प्रति त्वया यत् यः प्रश्नः कृतः तत्र प्रश्ने एतदुत्तरं मया वर्णितम् । किमित्यपेक्षायामाह-यथा साक्षात् ब्रह्मणि श्रीकृष्णेऽपि श्रुतिश्चरेत् तथा इत्येतत् वर्णितम् । कीदृशे, वेदान्तिनामनिर्देश्ये । यद्वा । ओ वासुदेवस्तेन रूपेण अङ्गुल्या निर्देश्ये । निर्गुणे प्राकृतगुणरहितत्वाद्भक्तवत्सल्यादिदिव्यगुणगणविशिष्टे च ॥५०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अशेषसमाम्नायेति । अशेषवेदपुराणादीनां सारः ॥४३-४५॥

श्रीनारदश्च श्रीमन्नारायणोपदिष्टं वेदविषयं स्वानुभवेन वक्ति-नम इति । कृष्णाय सदानन्दघनाय भगवते स्वाभाविकाचिन्त्यानन्तं भगं विद्यतेऽस्य तस्मै । "स्वाभाविकी ज्ञानबलक्रिया चे"ति श्रुतेः । तथा च वैष्णवे —

'शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्तते । मैत्रेय भगवच्छब्दः सर्वकारणकारणे ॥'

इति अमलकीर्तये अमला जगत्पावनी कीर्तिर्यस्येति तस्मै । तदेव विवृणोति । यो भूतानां संसारनिवृत्तये मोक्षप्रदानायोशतीः कला लीलावताराख्याः धत्ते । इत्यनेन प्रथमस्कन्धोक्तस्य 'श्रीकृष्णस्तु भगवान् स्वयम्' इत्यस्योपसंहारो ज्ञापितः ॥४६-४९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

इत्येवं श्रुतिगीतायाः सङ्क्षेपेण निरूपितः अर्थराशिः समुद्रो हि यथाऽङ्गुल्या निरूप्यते श्रुतिभिरुक्तानि वाक्यानि सनन्दनोऽनुवादमात्रं कृतवान् ततो व्याख्यानव्यतिरेकेण तदर्थावगतिरस्ति न वेति सन्दिह्य औत्पत्तिकमनीषयैतत् ज्ञायत इति ज्ञापयितुं तस्यावबोधमाह-इत्येतदिति । नारदं प्रति नारायणवाक्यं श्रोतारो ब्रह्मणः पुत्राः सम्पूर्णश्रुतिगीतायाः सङ्क्षेपेणार्थम् आहुः । आत्मानुशासनमिति आत्मनां जीवानामनुशासनमुपदेशः भगवानेव सेव्य एवेति च एतावानेव श्रुतिगीतार्थः स तेषां हृदये समागत इति गुरोः पूजनं कृतवन्त इत्याह-सनन्दनमिति । अथेति भिन्नप्रक्रमेण पूर्वं सर्वे समाः स्थिताः तुल्यश्रुततपःशीलाः इति वाक्यात् इदानीं तु श्रुतिगीतारूपोऽर्थः तेनैव विशेषतो ज्ञायत इति प्रवचनाधिकारे दत्ते यत्सर्वैर्न ज्ञायते तदेव वक्तव्यमिति तदुपाख्यानमुक्तवान् । यदि तेषामयमर्थो न ज्ञातः स्यात् विशेषाकारेण तदा श्रुत्वाऽप्येनं वेद न चैव कश्चिदिति न्यायेन विशेषाज्ञानात् विशेषतः पूजां न कुर्युः । अतोऽयमर्थः अपूर्वः जनवासिनामपि दुर्लभः केवलमिदानीमेव प्रकट इति ज्ञापितं ततः सिद्धाश्च जाताः अतः परं श्रोतव्यमस्ति पूर्वमपि तैरात्मा ज्ञातः परं तस्य गतिरेतादृशी केवलं भगवानेव सेव्यो नान्योऽस्त्युपाय इति इदानीमेव भगवन्तः सिद्धा इत्यर्थः ॥४२॥

नारदस्यात्रैवं जिज्ञासोत्पन्ना एतादृशोऽर्थोऽन्योऽपि भविष्यतीति तत्राह-इत्यशेषसमाम्नायेति —

"अर्थः स्थलत्रये गूढः पराणोपनिषच्छ्रुतौ । सर्वतः सारमेतद्धि समुद्धृतमिहोच्यते ॥"

अतो नान्योऽस्ति सारांश इति वक्तुं निरूपयति अशेषाः सर्व एव वेदाः पुराणानि उपनिषदश्च तेषां निर्मथनेनायमर्थो विलोलित इति रसः स पूर्वं तत्रैव स्थितः पश्चात्पूर्वजातैर्व्योमयानैः सनकादिभिस्ततः समुद्धृत्य पृथक् स्थापितः नन्वेतत्समुद्धारे किं साधनमिति चेत्तत्राह-महात्मभिरिति । महान्तस्ते सर्वोपकारकाः ॥४३॥

एवं श्रुतिगीताया माहात्म्यमुक्त्वा नारदे विशेषमुपदिशति । त्वं चैतद्ब्रह्मदायादेति । ब्रह्मणः पुत्रो ब्रह्मदायादो भवति । अत्र ब्रह्मण्येव दायं प्राप्तवानिति विशेषतो वचनम् अधिकारनिरूपणार्थं वा यस्तु ब्रह्मणि दायभाक् तस्य हृदये अयमर्थः स्फुरति अतः अस्या आत्मानुशासनं तवात्यन्तोपदेशरूपम् । अतो धारयन् इममर्थं सर्वदा विचारयन् गां चर सर्वत्र परिभ्रमणं कुरु । परित्यागेनैवास्य अनर्थस्य सम्भवात् आत्मानुशासनेनैव निरन्तरं भगवत्स्मरणं प्राप्तं नारदस्य सिद्धमप्यस्ति । एकमेव बाधकं महतो भगवत्स्मरणे

काम इति कश्चिन्महान् तस्य न कामनिर्जय इति वाक्यात् तस्यैतत्कामभर्जनसाधनं कामानामिति बहुवचनं सर्वाकाङ्क्षानिवर्तकमिदमिति सूचयति नृणामिति मनुष्याणां विशेषतो हितकारी इत्युक्तम् ॥४४॥

अयमुपदेशो नारदस्य हृदये समायात इति ज्ञापयितुं तस्य कथामाह-एवं स गुरुणादिष्ट इति। यद्यपि बहून्येव व्याख्यानानि श्रुतानि तथाऽप्यत्र विशेषतः श्रद्धावान् जातः। आत्मवानित्यधिकारी पूर्ण इति तस्यार्थावबोधो जात इति सूचितम्। श्रुतधर इति श्रवणमात्रेणैव शब्दतोऽर्थश्च धारयतीति नित्यस्मरणमुक्तम्। अभ्यासापेक्षा च निवारिता। राजन्निति अयमर्थो ग्राह्य इति बोधनार्थम्। सोऽर्थस्तेन इति ज्ञात इति ज्ञापयितुं गुरुं प्रति किञ्चिदाह-यतो वीरव्रतः। वीरवत् व्रतं यस्येति। वीरः सकृदेव कार्यं करोति न तु विलम्बं सहते इति एवं क्रियाशक्त्याधिक्यमुक्त्वा ज्ञानशक्त्याधिक्यमाह-मुनिरिति ॥४५॥

स्वगुरुं नमस्यति-नमस्तस्मै भगवत इति। नारायणस्य स्वरूपं कृष्णः। कृष्ण एव नारायणरूपेणावतीर्ण इति कृष्णो मूलं भवति। यद्यपि लोके नारायणस्यैवांशः कृष्ण इति प्रसिद्धिः 'ताविमौ वै भगवतो हरेरंशाविहागतौ।' इति वाक्यात् तथापि श्रुतिगीतशिक्षया विपरीतं ज्ञातवान्। तत्र हि स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधिय इति श्रुतितुल्या निरूपिताः। तादृश्यः कृष्ण एव भवन्ति गोपिकाद्याः नान्यावतारेष्विति स एव भजनीयः श्रुतिगीतासु निरूपित इति ज्ञातवान् —

"माहात्म्यं बहुधा ज्ञात्वा जीवानां च गतिं पराम्। सर्वं त्यक्त्वा विधायैतन्नित्यं कृष्णं स्मरंश्चरेत् ॥"

एतावानेवोपाख्यानार्थ इति ज्ञात्वा कृष्णमेव नमस्यति अवतारेण दोषप्रतिभानं वारयति अमलमूर्तय इति। अमलेषु वा मूर्तिर्यस्येति भगवत्प्राप्त्युपायो वा निरूपितः। नन्वयं साक्षात् गुरुर्नारायणस्तस्य चावतारः तं प्रत्यक्षं विहाय तस्मा इति परोक्षः कृष्णः कथं नमस्कृत इति चेत्तत्राह-यो धत्ते सर्वभूतानामिति। स एव भगवानस्मदादिसर्वभूतमोक्षार्थं उशतीः कलाः धत्ते ॥४६॥

स एवैतद्रूपेणास्मदुद्धारार्थं समागतः तथा सत्ययं मूलभूतो न भवतीति तस्यैव चायमुपकार इति स एव नमस्कृत इति अर्थः। ननु गुरुनमस्कारः कर्तव्यः स कथं न कृत इति चेत्तत्राह-इत्याद्यमृषिमामन्त्र्येति। इत्येव सः नमस्कृतः यतः स आद्यो ऋषि स्वस्वरूपं जानाति कृष्णोऽहमिति। तच्छिष्याश्च तं जानन्ति यतो महात्मानः वस्तुस्वरूपं जानन्ति न तु बहिर्मुखा इत्यर्थः। केवलपरमतत्त्वव्युदासाय व्याससम्बन्धमाह-ततोऽगादाश्रममिति। यद्यपि व्यासस्य बहून्येव स्थानानि सन्ति तथापि साक्षात्र देवस्थानम्। ननु व्यासः साक्षात् भगवान् कथं स्वतो न ज्ञातवांस्तत्राह-द्वैपायनस्येति। ततस्तेन सभाजितः महता पूजितः सन् आसनं च तद्दत्तं गृहीत्वा नारायणमुखाच्छ्रुतं यदूढं तद्वर्णयामास। ततः परम्परया प्राप्तं मयाऽपि ते वर्णितम् इति ॥ एतद्विचारप्रकारेणैव यथा निर्गुणे मनः प्रविशति तथा कर्तव्यं भगवता चेत्तादृशी बुद्धिस्त्वयि कृता तदा तया मनः प्रवेक्ष्यतीति भावः। एतदर्थानवबोधात् पृष्टमन्यदुत्तरं चान्यद्दत्तवानिति न मन्तव्यमित्येतदर्थमाह-यः प्रश्नः नोऽस्मान् प्रति त्वया कृतः तस्यैवैतदुत्तरमिति। वेदास्तु निर्गुणं प्रतिपादयन्ति। तत्केन प्रकारेणेति सन्देहे अनेनैव प्रकारेण प्रतिपादयन्तीति ज्ञातवतः निर्गुणेऽपि ब्रह्मणि मनश्चरेत्। श्रीशुकोऽपि श्रुतिगीताप्रतिपादितमर्थं पुनः स्वयं सङ्क्षेपेणाह प्रतिपत्तिसौकर्याय योऽस्योत्प्रेक्षक इति माहात्म्यं ज्ञात्वा भगवन्तं भजेदिति अर्थद्वयं श्रुतिगीतार्थः। माहात्म्यं भजनं चेति तत्र भजनप्रतिपादिकाः सर्वा एकीकृत्याह-ध्यायेदजस्रमिति। अन्तर्भगवन्तं स्थापयित्वा तत्र सेवां कुर्यादिति अर्थः तस्य फलत्वायाह-अजस्रं सुखरूपं सर्वदुःखहर्तारं चेति तत्र भगवतो माहात्म्यं गुणरूपं दोषाभावरूपं च ॥४७-४९॥

श्रीसुबोधिनीसारः

नारायणोक्तिः। इत्येतदात्मानुशासनं ब्रह्मज्ञानमाश्रुत्याथात्मनो गतिं ज्ञात्वा ब्रह्मणः पुत्राः सिद्धासनं सनन्दनमानर्चुः ॥४२॥ इति सर्ववेदपुराणवेदान्तरहस्यतात्पर्यं समुद्धृतं व्योमयानैराकाशचारिभिर्महात्मभिः पूर्वजैः ॥४३॥ हे ब्रह्मदायाद! एतदात्मानुशासनं नृणां कामानां भर्जनं दाहकं श्रद्धया धारयन् कामं यथेच्छं गां पृथिवीं त्वं चर ॥४४॥ शुकोक्तिः। एवमृषिणा नारायणेनादिष्टं श्रद्धया गृहीत्वात्मवान् वशी श्रुतधरः पूर्णः वीरव्रतो नैष्ठिको मुनिर्नारद आह हे राजन्! ॥४५॥ नमः तस्मै शुद्धकीर्तये भगवते कृष्णाय नमः। यः सर्वभूतानामभवाय समृद्धये मोक्षार्थं वा उशतीः

काङ्क्षानिवर्तकमिदमिति

बहून्येव व्याख्यानानि
ात इति सूचितम् ।
ति अयमर्थो ग्राह्य इति
। वीरः सकृदेव कार्यं

वतीर्ण इति कृष्णो मूलं
इति वाक्यात् तथापि
ाः । तादृश्यः कृष्ण एव

॥"
नूर्तय इति । अमलेषु वा
त्रहाय तस्मा इति परोक्षः
शतीः कलाः धत्ते ॥४६॥
ति स एव नमस्कृत इति
नमस्कृतः यतः स आद्यो
न तु बहिर्मुखा इत्यर्थः ।
नि सन्ति तथापि साक्षान्न
जितः महता पूजितः सन्
इति ॥ एतद्विचारप्रकारेणैव
भावः । एतदर्थानवबोधात्
दुत्तरमिति । वेदास्तु निर्गुणं
णि मनश्चरेत् । श्रीशुकोऽपि
भगवन्तं भजेदिति अर्थद्वयं
जस्रमिति । अन्तर्भगवन्तं
भगवतो माहात्म्यं गुणरूपं

ब्रह्मणः पुत्राः सिद्धासनं
र्महात्मभिः पूर्वजैः ॥४३॥
गां पृथिवीं त्वं चर ॥४४॥
ीरव्रतो नैष्ठिको मुनिर्नारद
समृद्धये मोक्षार्थं वा उशतीः

नीयाः कला मूर्तीः धत्ते ॥४६॥ इत्येवमाद्यमृषिं नारायणं महात्मनः तच्छिष्यान् चानम्य प्रणम्य ततो द्वैपायनस्य व्यासस्य पितुराश्रमम् अगात् नारदः ॥४७॥ भगवता व्यासेन कृतासनपरिग्रहः सभाजितो नारायणस्य मुखाच्छ्रुतं ज्ञानं तत् तस्मै वर्णयाञ्चक्रे ॥४८॥ शुकोक्तिः । हे राजन् ! यत् प्रश्नः त्वया कृतः नोऽस्मान् प्रति एतत् इत्येवं वर्णितम् अनिर्देश्ये व्यानर्हे निर्गुणे ब्रह्मणि श्रुतिर्वेदो यथाचरेत् ॥४९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भगवान्नारायण आह- इतीति । ब्रह्मणः पुत्राः सनकादय इत्यनेन प्रकारेणैतत् आत्मानुशिष्यते शिक्ष्यते येन तदात्मानुशासनं स्तुत्यात्मकस्य श्रुत्याऽऽत्मनो गतिं तत्त्वं ज्ञात्वा सिद्धाः कृतार्थाः सन्तः अथानन्तरं गुरुरूपं सनन्दनमानर्चुः यामासुः ॥४२॥ इत्येवम्भूत उक्तप्रकारकः अशेषाणां सर्वेषां समाम्नायानां वेदानां पूर्वकाण्डानां पुराणानामुपनिषदां च रसः रस सारभूतोऽर्थः पूर्वजातैर्वृद्धैः सनकादिभिः समुद्धृतः निर्णीतः । तन्निर्णयस्य प्रामाण्यं सूचयन्नाह- महात्मभिरिति । महान् विवेके आत्मान्तःकरणं येषां तैः । अत एव व्योमयानैः सर्वनिरपेक्षतयाऽऽकाशचारिभिः ॥४३॥ हे ब्रह्मदायाद ! ब्रह्मैव दायमिव प्राप्यमत्ति सेवते इति तथा, ब्रह्मपुत्रेति वा । त्वं च त्वमपि एतत् नृणां जीवानां ये कामाः —

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥"

इति श्रुत्युक्तमोक्षप्रतिबन्धकीभूता अन्तःकरणवृत्तिविशेषास्तेषां भर्जनं निवर्तकमात्मानुशासनं श्रद्धया विश्वासेन चित्ते यन् कामं यथेष्टं गां भूमिं तदुपलक्षितान् लोकान् चर पर्यट ॥४४॥ स मुनिर्नारदः एवमृषिणा श्रीनारायणेनादिष्टमुपदिष्टमात्मतत्त्वं गृहीत्वा आनन्देन पूर्णः श्रीनारायणं प्रत्याहेत्यन्वयः । त्वयापि श्रुतत्वादेतद्धार्यम्, इति सूचयन् सम्बोधयति- राजन्निति । हेतुमाह- आत्मवानिति । कृतात्मसाक्षात्कारः । तत्र हेतुमाह- श्रुतं धरतीति तथा स इति । तत्र योग्यतामाह-वीरव्रत इति । जितेन्द्रियः ॥४५॥ तदुक्तिमाह- नम इति । 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्' इति वचनात् श्रीकृष्णस्य अभिप्रेत्य तदवतारतया श्रीनारायणं प्रणमति- यो भगवान् सर्वभूतानामभवाय संसारदुःखनिरासाय उशतीः कमनीयाः कला तस्मै भगवते कृष्णाय नमः । संसारदुःखनिवर्तकं कथम् इत्यपेक्षायां कीर्तिश्रवणादिना इत्यभिप्रेत्याह-अमला सर्वदोषनिवर्तिका तस्मै ॥४६॥ त्वया चैतत्कथमवगतम्, इत्यपेक्षायामाह-इतीति । महामनाः आनन्दितचित्तो नारदः इत्येवमाद्यमृषिं णं तथा तस्य शिष्यांश्चानम्य ततः स्थानात् मे मम साक्षात् पितुः द्वैपायनस्याश्रममगादित्यन्वयः । अग्निमथनावसरे व्यासस्य रेतोऽरणौ पतितं स च तं ममन्थ ततस्तदैव शुक उत्पन्नः, अतो योनिव्यवधानाभावात् साक्षात्पितुरित्युक्तम् ॥४७॥ आसनस्य परिग्रहः स्वीकारो येन स भगवता व्यासेन सभाजितः पूजितः तस्मै द्वैपायनाय नारायणस्य मुखात् श्रुतं श्रुतिगीतं मास, स तु मह्यमुपदिष्टवानित्यर्थाज्ज्ञेयम् ॥४८॥ हे राजन् ! नोऽस्मान् प्रति त्वया अनिर्देश्ये निर्गुणे ब्रह्मणि श्रुतयः कथं यः प्रश्नः कृतस्तदुत्तरतया यथा अनिर्देश्ये निर्गुणे ब्रह्मणि मनश्चरेत्तथेत्येतत् श्रुतिगीतं मया वर्णितमित्यन्वयः । अत्र प्राकृतगुणपारतन्त्र्यराहित्यम्, स्वाभाविकगुणानां मूले स्पष्टोक्तेः । अनिर्देश्यत्वं च साकल्येन निरूपणाशक्यत्वम् ॥ कथं चरन्तीति प्रश्नेऽपि मनश्चरेदित्युत्तरं तु "मनः पूर्वरूपं वागुत्तररूपम्" इति श्रुतेरभेदाभिप्रायेणेति ज्ञेयम् ॥४९॥

अन्वितार्थप्रकाशिका

इतीति । ब्रह्मणः पुत्राः सनकादय इत्यनेन प्रकारेणैतत् आत्मानुशिष्यते शिक्ष्यते येन तदात्मानुशासनं स्तुत्यात्मकमाश्रुत्याऽऽत्मनो गतिं तत्त्वं ज्ञात्वा सिद्धाः कृतार्थाः सन्तः अथानन्तरं गुरुरूपं सनन्दनमानर्चुः पूजयामासुः ॥४२॥ इत्येवम्भूत उक्तप्रकारकः अशेषाणां सर्वेषां समाम्नायानां वेदानां पूर्वकाण्डानां पुराणानामुपनिषदामुत्तरकाण्डानां च रसः सारभूतोऽर्थः पूर्वजातैर्वृद्धैः सनकादिभिः समुद्धृतः निर्णीतः ॥४३॥ त्वामिति ॥ हे ब्रह्मदायाद ! ब्रह्मैव दायमिव अयत्नप्राप्यमत्ति इति तथा ब्रह्मपुत्रेति वा त्वं च त्वमपि एतत् नृणां जीवानां ये कामाः वासनाविशेषाः मोक्षप्रतिबन्धकाः तेषां भर्जनं कमात्मानुशासनं श्रद्धया विश्वासेन चित्ते धारयन् कामं यथेष्टं गां भूमिं तदुपलक्षितान् लोकान् चर पर्यट ॥४४॥

एवमिति ॥ हे राजन् ! आत्मवान् आत्मानुभाववान् श्रुतधरः श्रुतस्यानुसन्धानपरः वीरव्रतो नैष्ठिकः स मुनिर्नारदः एवमृषिणा श्रीनारायणेनादिष्टमुपदिष्टमात्मतत्त्वं श्रद्धया गृहीत्वा आनन्देन पूर्णः श्रीनारायणं प्रत्याह स्म ॥४५॥ सर्वश्रुतितात्पर्यं श्रीकृष्णेऽवधार्य तुष्टः श्रीकृष्णाभेदेन तदवतारं स्वगुरुं नारायणं नमस्यति–नम इति ॥ यो भगवान् सर्वभूतानामभवाय संसारदुःखनिरासाय उशतीः कमनीयाः कला मूर्तीर्धत्ते तस्मै अमलकीर्तये भगवते कृष्णाय श्रीकृष्णरूपाय तुभ्यं नमः ॥४६॥ इतीति ॥ महामनाः आनन्दितचित्तो नारदः इत्येवमाद्यमृषिं श्रीनारायणं तथा तस्य शिष्यांश्चानम्य ततः स्थानात् मे मम साक्षात् पितुः द्वैपायनस्याश्रममगात्। साक्षात्पितुरिति योनिव्यवधानं विना अग्निमथनावसरे कथञ्चिदरणिपतितरेतस उत्पन्नत्वात्। ब्रह्मवैवर्ते तु —

“व्यासपत्न्या उदरे बहुवर्षाणि स्थितः व्यासेनार्थितोऽपि मायाभिया न निर्गतः । ततः कृष्णेन मातेयं ते बहुदुःखिताऽतो निर्गच्छेत्युक्त उवाच । यदि त्वया माया दूरीक्रियते तदा निर्गच्छेयम् ॥” ॥ इति ॥

श्रीकृष्णेन तथाङ्गीकृते निष्क्रम्य प्रव्रजति इत्युक्तम्। तत्पक्षे साक्षादधुनाऽधिष्ठितमाश्रमम् ॥४७॥ सभाजित इति ॥ कृतः आसनस्य परिग्रहः स्वीकारो येन स भगवता व्यासेन सभाजितः पूजितः तस्मै द्वैपायनाय तत् नारायणस्य मुखात् श्रुतं श्रुतिगीतं वर्णयामास। स तु मह्यमुपदिष्टवानित्यर्थाज्ज्ञेयम् ॥४८॥ इतीति ॥ हे राजन् ! नोऽस्मान् प्रति त्वया अनिर्देश्ये निर्गुणे ब्रह्मणि श्रुतयः कथं चरन्तीति यः प्रश्नः कृतस्तदुत्तरतया यथाऽनिर्देश्ये निर्गुणे ब्रह्मणि मनः श्रुतिश्च चरेत्तथेत्येतत् श्रुतिगीतं मया वर्णितम्। मनःशब्दाभिप्राय उक्तः ॥४९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्रीभगवानुवाच ॥ प्रकृतमर्थं नारदं प्रतीति शेषः ॥ इत्येतदिति ॥ अथ सिद्धाः सिद्धगतिं प्राप्ता ब्रह्मणः पद्मजातस्य पुत्राः सनकादयः ॥ इति ॥ अनेकविधवर्णनप्रकारविशिष्टम् एतत् वेदस्तुतिरूपम् आत्मानुशासनं स्वात्मबोधकशास्त्रम् आश्रुत्य आसमन्ताद्भावेन श्रुत्वा ॥ आत्मनो गतिं परमात्मनः साक्षात्प्राप्तिं च ज्ञात्वा ॥ आत्मा जीवे धृतौ देहे स्वभावे परमात्मनीति विश्वः ॥ प्राप्तज्ञानस्य ज्ञानोक्तिर्लोकसङ्ग्रहार्थमिति बोध्यम् ॥ सनन्दनम् ॥ वदितृरूपेण स्थापितं हिरण्यगर्भात्मजं सनन्दनाख्यमृषिमानर्चुः ॥ धन्योऽसीत्यादिवचनैः प्रशशंसुरित्यर्थः ॥४२॥

इत्यशेषेति ॥ इत्युक्तप्रकारेण पूर्वजातैर्ब्रह्मसृष्टेषु प्रथमोत्पन्नैः व्योमयानैः योगबलेन खेऽप्यव्याहतगतिभिः ॥ महात्मभिः महाबुद्धिभिः हिरण्यगर्भात्मजैः अशेषसमाम्नायपुराणोपनिषद्रसः ॥ अशेषाणां समाम्नायानां वेदानां पुराणानां पाद्मादीनाम् उपनिषदां बृहदारण्यादीनां च रसः सारः सिद्धान्त इत्यर्थः ॥ यद्यप्युपनिषदां समाम्नायग्रहणेन ग्रहणं भवति तथाप्यध्यात्मविद्योपलक्षणार्थं गोबलीवर्दन्यायेन पुनर्ग्रहणम्। समुद्धृतः प्रश्नत्तराभ्यां निर्मथ्य निष्कासतिः ॥४३॥

त्वमिति ॥ हे ब्रह्मदायाद ! हे विधिसुत ! दायादशब्दः प्रधानतया पुत्रवाचको भारतादिषु बहुशः प्रोक्तः परम्परया भ्रात्रादिबाधकोऽपि ॥ तथा चोक्तम् —

विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिणः ॥ दायमाददते ये तु दायादास्ते सुतादयः ॥ इति ॥

त्वं च त्वमपि श्रद्धया विश्वासपूर्वकत्वरया नृणां कामविक्षिप्तानां पुरुषाणां कामानां विषयवासनानाम् ॥ भर्जनं दहनम् ॥ भृजिः पाकार्थोऽप्यत्र दहनार्थः धातूनामनेकार्थत्वात् ॥ एतद्वेदस्तवनरूपम् आत्मानुशासनं ज्ञानशास्त्रं धारयन् गां पृथ्वीं चर कामं यथेष्टं व्रज ॥ लोककल्याणार्थमिति भावः ॥४४॥

प्रश्नस्योत्तरमुपसंहरन् बादरायणिरुवाच ॥ एवं स इति ॥ आत्मवान् ॥ आत्मवान् परब्रह्मनिष्ठः इन्द्रियाधीन्यरहितो वा ॥ श्रुतधरः श्रुतस्य धरो विस्मृतिरहितः वीरव्रतः ब्रह्मचर्यवान् स मुनिः नारदः ऋषिणा नारायणर्षिणा ॥ एवं पूर्वोक्तप्रकारेणादिष्टमुक्तम् आत्मानुशासनम् आत्मपरमात्मबोधकशास्त्रं श्रद्धया विश्वासपूर्वकत्वरयायुक्तया बुद्ध्या ग्रहणं कृत्वा पूर्णः ज्ञानपरिपूर्णः सन्नाहकृष्णस्य प्रशंसां चकार ॥४५॥ तामेवाह ॥ नम इति ॥ भगवते ॥ भगोऽस्यास्तीति भगवांस्तस्मै ॥ भगवच्छब्दोऽत्र यौगिकः कृष्णभेदकत्वात् ॥ भातीति भः गच्छतीति गः भश्चासौ गश्चेति भगः ॥ अनेकविधं गुणङ्कषं भगशब्दनिरुक्तिरुक्ता वायुपुराणे—

भासनाद्गमनाच्चैव भग इत्यभिधीयते ॥

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णां भग इतीतरणा ॥ इति चार्थादर्थोऽपि तत्रैव ॥

भगवता पराशरेण चोक्तं विष्णुपुराणे —

ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ॥ भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥

एवमेष महाशब्दो मैत्रेयभगवानितीति ॥ वायुपुराणे च —

सर्वज्ञता तृप्तिरमादिबोधः स्वतन्त्रता नित्यमलुप्तदृष्टिः ॥ अनन्तशक्तिश्च विभोर्विभुज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥ इति ॥

क्वचित्तु —

उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् ॥ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

भगशब्देन गुणषट्कम् । कृष्णस्य तद्वत्त्वाद्भगवच्छब्दः कृष्णवाचक इत्युक्तम् –

अमलकीर्तये मलनिवर्तनयशसे तस्मै उक्तमहिम्ने कृष्णाय वसुदेवपुत्राय परब्रह्मणे नमः ॥ नमनमस्तु ॥ कृष्णशब्दस्य ब्रह्मवाचकतायां श्रुतिः —

कृषिर्भूवाचकः शब्दो नश्च निर्वृत्तिवाचकः ॥ तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥ इति ॥

निर्वृत्तिशब्दवाच्यपरमआनन्दक्षेत्रत्वात्कृष्णाभिधानेन भगवतः परमानन्ददायकत्वमुक्तम् ॥ यः कृष्णः सर्वभूतानां र्वजनानामभवाय भवनिवारणाय उशतीः उशन्ति वशीकुर्वन्तीत्युशत्यस्ता उशतीः अतिसुन्दराः कलाः अवताररूपमूर्तीः धत्ते आविर्भावयति ॥ तथा गीतायां चोक्तम् —

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ इति ॥४६॥

इत्याद्यमिति ॥ महामनाः नारद इति ॥ स्तुत्वेति शेषः ॥ आद्यमृषिं धर्मपुत्रं तच्छिष्यांश्च तत्रोपनिषण्णानानम्य नमस्कारं कृत्वा ततो नारायणर्षेराश्रमात् मे साक्षात्पितुः जनकस्य पितृव्यादीनामपि पितृशब्देन व्यवहारात् साक्षादित्युक्तम् ॥ यद्वा ॥ सम्भवान्तरायमृत एवोत्पादकस्येत्यर्थः ॥ अग्निमन्थनसलग्रस्य द्वैपायनस्य घृताचीदर्शनादरण्यां स्खलितं वीर्य्यं सुतो बभूवेति ॥ शुकोत्पत्तिर्भारतीयमोक्षधर्मप्रोक्तानुसन्धेया ॥ द्विपे जातो द्वैपायनः तत्र जात इत्यर्थे नडादित्वात्फक् प्रत्ययः ॥ द्वा ॥ द्वीपे भवं द्वैपं द्वपमयनं यस्य तस्य ॥ अत्रापि भारतोक्ता रेवाखण्डोक्ता च कथाऽनुसन्धेया ॥ आश्रममगात्तं गदितुं त्यर्थः ॥४७॥ सभाजित इति ॥ भगवता व्यासेन सभाजितः पूजितः ॥ सभाजप्रीतिदर्शनयोः ॥ प्रीतिसेवनयोरित्येके ॥ सभाजयतेश्चौरादिकात्पूजार्थात्कर्मणि क्तः ॥ कृतासनपरिग्रहः कृतासनादानश्च ॥ पत्नीपरिजनादानमूलपाशाः परिग्रहा इत्यमरः ॥ पुरुषस्तस्मै द्वैपायनाय नारायणमुखाच्छ्रुतं तन्निर्गुणेऽनिर्देश्ये परमात्मनि श्रुतिप्रवर्तनं वर्णयामास विस्तरेण कथयामास ॥४८॥ तेदिति ॥ हे राजन् त्वया यथा श्रुतयः कथं चरन्तीत्येवम्प्रकारेण नोऽस्मान् प्रतीति शेषः ॥ यत् यः प्रश्नः कृतः इति प्रकारेण ॥ एतदनिर्देश्ये निर्गुणे परब्रह्मणि वेदप्रवर्तनं मया वर्णितं सविस्तरं कथितम् ॥ निर्गुणेऽनिर्देश्ये ब्रह्मणि पुरुषोत्तमे कानां मनोऽपि चरेत् प्रवर्तेत ॥ तर्हि तत्र वेदप्रवर्तने को वा शङ्कावकाशः ॥४९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

इतीति ॥ इतीत्थं, श्रुतिगीतिसंवादेनोक्तमित्यर्थः । एतत् आत्माऽनुशिष्यते शिक्षयते येन तदात्मानुशासनमुत्तरम्, आश्रुत्य अवधार्य, सिद्धाः सिद्धिमन्तः, ब्रह्मणः पुत्राः, आत्मनः गतिं, परमात्मनो याथात्म्यमित्यर्थः । ज्ञात्वा निश्चित्य, अथ सनन्दनम्, अन्वगुः ॥४३॥ इतीति ॥ इत्युक्तप्रकारेण, पूर्वजातैः सृष्टेः प्रागुत्पन्नैः, व्योमयानैर्योगशक्त्या विहायस्यप्यव्याहतगतिभिः, भिर्बुद्धिमत्तरैर्ब्रह्मपुत्रैः, अशेषसमाम्नायपुराणोपनिषद्रसः अशेषऋगादिदेवपद्मादिपुराणकठवल्ल्याद्युपनिषदां सारः, समुद्धृतः तराभ्यां निर्मथ्य सङ्गृहीतः, अनेन प्रकृतवेदस्तुतिप्रशंसा कृता ॥४४॥ त्वमिति ॥ हे ब्रह्मदायाद ब्रह्मपुत्र ! त्वं च त्वमपि, नृणां

कामानां भर्जनम्, एतत् आत्मानुशासनम् एतच्छ्रुतिस्तवनमित्यर्थः । श्रद्धया, धारयन् कामं यथेष्टं, गां भूमिं, तदुपलक्षितान् लोकानित्यर्थः । च पर्यट ॥४५॥ कथमेतत्त्वयाधिगतमित्यपेक्षायां तद्वक्तुं प्रस्तौति चतुर्भिः ॥ एवमिति ॥ एवम् ऋषिणा बदर्याश्रमवासिना श्रीनारायणेन, आदिष्टमुपदिष्टं, श्रद्धया गृहीत्वा, आत्मवांस्तस्मिन्नवहितमनाः, श्रुतधरः यथा श्रुतं तथा धारकः, वीराणां जितेन्द्रियाणां व्रतं यस्य स नैष्ठिक इत्यर्थः । पूर्णः, स नारदः, हे राजन् ! गुरुं श्रीनारायणम्, आह ॥४६॥ तदेवाह ॥ नम इति ॥ कृष्णाय सर्वलोकसुखकराय, अमला अकर्मवश्या मूर्तिर्यस्य तस्मै, भगवते तस्मै तुभ्यं, नमः । यो भगवान्, सर्वभूतानाम् अभवाय भवापवर्गाय, उशतीः कमनीयाः निर्मला इति यावत् । कलाः विद्याः, धत्ते अपेक्षितविद्योपदेशेन सुखकर इति भावः ॥४७॥ इतीति ॥ इतीत्थम्, आद्यम् ऋषिं श्रीनारायणं स्तुत्वा, आनम्य तच्छिष्यांश्च आनम्य, महामनाः नारदः, ततः सकाशात्, मे मम, पितुः साक्षात् द्वैपायनस्य व्यासस्य, आश्रमम्, अगात् ॥४८॥ सभाजित इति ॥ भगवता द्वैपायनेन, सभाजितः पूजितः, कृत आसनस्य परिग्रहो येन तथाभूतः सन्, तस्मै द्वैपायनाय, नारायणमुखात्, यत् श्रुतं, तत् वर्णयामास । स तु मह्यमुपदिष्टवानिति तु प्रसिद्धत्वान्नोक्तम् ॥४९॥ एवं च त्वत्प्रश्नत्तरमुक्तमित्याह ॥ इतीति ॥ हे राजन् ! नोऽस्मान् प्रति, यद्यः, प्रश्नः त्वया कृतः, तत्र प्रश्ने, एतत् श्रुतिवचः, वर्णितम् । उत्तरत्वेन कथितमित्यर्थः । यथा येनोपवर्णितेनेत्यर्थः । अनिर्देश्ये निर्गुणेऽपि, ब्रह्मणि मनः, चरेत् प्रसरेत् । निःसंशयं मनो भवेदित्यर्थः । श्रुतिश्चरेदित्यपि पाठः । तस्मिन् सत्येवोपक्रमोपसंहारयोस्तुल्यता । यद्वा मन इति श्रुतेरप्युपलक्षणं 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।' इति द्वयोरप्युपादानात् ॥५०॥

योगिरामानुजाचार्यकृतसरला व्याख्या

आत्माऽनुशिष्यते शिक्ष्यते निरूप्यते येन तदात्मानुशासनम् । आत्मनः परमात्मनः गतिं प्रकारं स्वरूपम् ॥४२॥ व्योमयानैः सर्वनिरपेक्षतयाकाशचारिभिः ॥४३॥ भर्जनं निवर्तकम् ॥४४॥ वीरव्रतो नैष्ठिको जितेन्द्रियः ॥४५॥ अभवाय संसारनिरसनाय । उशतीः रमणीयाः कलाः मूर्तीः धत्ते ॥४६॥ महामनाः आनन्दितचित्तो नारदः ॥४७॥ सभाजितः पूजितः ॥४८॥ अत्र निर्गुणत्वं प्राकृतगुणपारतन्त्र्यराहित्यं स्वाभाविकगुणानां मूले स्पष्टोक्तेः । अनिर्देश्यत्वं च साकल्येन निरूपणाशक्यत्वम् । मनश्चरेदित्युत्तरं तु 'मनःपूर्वरूपम् । वागुत्तररूपमि'ति श्रुतेः । वाङ्मनसयोः पूर्वोत्तरयोरभेदाभिप्रायेणेति ज्ञेयम् ॥४९॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

इति एवम् एतच्छ्रुत्युक्तम् आत्मानुशासनं परब्रह्मसम्बन्ध्युपदेशम् आ सम्यक् श्रुत्वा । अथ अत एव । आत्मनो ब्रह्मणः । गतिं स्वरूपम् । ज्ञात्वा । सिद्धाः पूर्णमनोरथाः सन्तः सनन्दनमानर्चुः ॥४२॥ इति अयं रसशब्दस्य तात्पर्य्यमिति व्याख्या । समुद्धृतः गुरुकृताभ्यस्ताभ्य एव श्रुतिभ्य इति शेषः । विशेषजिज्ञासा चेच्छ्रीवैष्णवतोषिणी दृश्या ॥४३॥ कृष्णावतारतयेति कृष्णस्यावतारः कृष्णावतारस्तस्य भावस्तत्ता । तया । कलाः शक्तीर्धत्ते ॥४६॥ तदैव रेतोमथनकाल एव । ततः मथिताद्रेतसः ॥४७॥ तच्छ्रुतीनां ब्रह्मणि पर्यवसानम् ॥४८॥ उपसंहरति–इतीति । यद्यः प्रश्नस्त्वया कृतः इति अस्मिन् प्रश्ने एतदुत्तरं मया वर्णितम् । किमित्यपेक्षायामाह–यथेति । यथा सगुणालम्बनेन प्रकारेण चरन्तीनां श्रुतीनां द्वारा निर्गुणे ब्रह्मणि मनोऽपि चरेत्प्रचरेत् किमुत श्रुतय इत्यर्थः ॥४९॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

ब्रह्मणः पुत्राः सनकादयः इत्यनेन प्रकारोक्तमेतदात्मानुशासनमाश्रुत्य आत्मनो गतिं ज्ञात्वा सनन्दनमानर्चुः पूजयामासुः ॥४२॥ अशेषाणां समाम्नायानां वेदानां पुराणानामुपनिषदामिति रसस्तात्पर्यं पूर्वजातैः सनकादिभिः समुद्धृतः । व्योमयानैः व्योमाकाशस्तेन यानं गमनं येषां ते ॥४३॥ हे ब्रह्मदायाद ! ब्रह्मपुत्र त्वं चैतदात्मानुशासनं श्रद्धया धारयन् कामं यथेष्टं गां पृथ्वीं चर विचर । कथम्भूतम् । नृणां कामानां भर्जनं कामकर्मवासनानां दाहकं ब्रह्मदायादेति । ब्रह्मैव दायमिवायत्नप्राप्यमत्ति सेवते इति तथा । यथा सनकादयो ब्रह्मदायादा ब्रह्मणः पुत्राश्च भवन्ति तथा त्वमपि अत एतद्गृहीत्वा चरेति ॥४४॥ स मुनिर्नारदः । ऋषिणा एवमादिष्टं श्रद्धया गृहीत्वाह । कथम्भूतः । पूर्णः कृतकृत्यः इदानीं मननेन पूर्णोऽभूदित्यर्थः । श्रुतधरः श्रुतमर्थं मनसि

र्मि, तदुपलक्षितान
णा बदर्याश्रमवासिना
ोराणां जितेन्द्रियाणां
म इति ॥ कृष्णाय
र्वभूतानाम् अभवाय
इति भावः ॥४७॥
सकाशात्, मे मम,
जितः पूजितः, कृत
ह्यमुपदिष्टवानिति तु
नः त्वया कृतः, तत्र
, ब्रह्मणि मनः, चरेत
न इति श्रुतेरप्युपलक्षणं

पम् ॥४२॥ व्योमयानैः
त्राय संसारनिरसनाय ।
॥४८॥ अत्र निर्गुणत्वं
त्रम् । मनश्चरेदित्युत्तरं तु

अत एव । आत्मनो
सशब्दस्य तात्पर्य्यमिति
॥४३॥ कृष्णावतारतयेति
व । ततः मथिताद्रेतसः
मन् प्रश्ने एतदुत्तरं मया
ह्मणि मनोऽपि चरेत्प्रचरेत्

ज्ञात्वा सनन्दनमानर्चुः
सनकादिभिः समूद्धतः ।
श्रद्धया धारयन् कामं यथेष्टं
व दायमिवायत्नप्राप्यमत्ति
रति ॥४४॥ स मुनिर्नारदः ।
। श्रुतधरः श्रुतमर्थं मनसि

तीति तथा । वीरव्रतो नैष्ठिकः ॥४५॥ सर्वाः श्रुतयस्तावत् श्रीकृष्णमेव स्तुवन्तीति ज्ञात्वा सप्रेम श्रीकृष्णावतारतया श्रीनारायणं णमति-नम इति । तस्मै श्रीकृष्णाय नम इति । कोऽसौ । यः सर्वभूतानामभवाय संसारनिवृत्तये उशतीः कमनीयाः कलाः वतारान् धत्ते तस्मै । उक्तं हि-

"एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।" इति ।

इत्यनेन श्लोकेन ऋषिमानम्य महात्मनस्तच्छिष्यांश्चानम्य ततो मे मम साक्षात्पितुर्व्यासस्याश्रममगात् । साक्षात्पितुरिति निव्यवधानं विना जनकस्य अग्निमथनावसरे कथञ्चिदरणौ पतितं रेतो ममन्थ व्यासः । तदैव तत उत्पन्नः शुक इति वदन्ति ७॥ भगवता व्यासेन सभाजितः सत्कृतो नारदः श्रीनारायणमुखाद् यत् श्रुतं तत्तस्मै वर्णयामास ॥४८॥ हे राजन् ! त्वया स्मान् यः प्रश्नः कृत इत्येतद्वर्णितं यथा निर्गुणेऽपि ब्रह्मणि मनश्चरेत्प्रविशति तथा वर्णितम् ॥४९॥

श्रीनिवाससूरिकृततत्त्वदीपिका

इति सर्वशास्त्रसारार्थवेदस्तुतिम् आश्रुत्य एकाग्रमनसा श्रुत्वा । आत्मनो गतिं चिदचिच्छरीरकपरमात्मतत्त्वम् । ज्ञात्वा । न्दनमानर्चुः प्रणिपातपुरस्सरं पूजयामासुरित्यर्थः ॥४२॥ इति सर्वश्रुतिस्मृतिपुराणेतिहासरहस्यतात्पर्यमित्यर्थः । स्पष्टमन्यत् ॥४३॥ दायादेति । ब्रह्मैव दायमिवायत्नप्राप्यम् । अत्ति सेवते । इति वा ब्रह्मपुत्रेति वा ॥४४॥ पूर्णः कृतकृत्यः । श्रुतधरः श्रुतमर्थं यन् । वीराणामिव व्रतं यस्य स नैष्ठिक इत्यर्थः । मुनिर्नारदः ॥४५॥ अभवाय अपवर्गाय । कलाः मूर्तीः । उशतीः कमनीयाः । धत्ते तस्मै । कृष्णायेति । कर्षत्यरीनपि स्वपदं प्रतीति कृष्णः । अथवा स्वगुणैर्वात्सल्यादिभिः कर्षति आकर्षति वशीकरोति णानिति कृष्णः । श्रीनारायणः । तथा च भारते —

'एष नारायणः साक्षात् क्षीरार्णवनिकेतनः । नागपर्यङ्कमुत्सृज्य ह्यागतो मथुरां पुरीम् ॥'

इति तूक्तं कैश्चित् । नम इति कृष्णावतारतया नारायणं नमस्यति । उक्तं हि —

'एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमि'तीति तत्स्वमतिविजृम्भितं प्रमाणान्तरविरोधात् । तथा च न ते वागनृता काचिदत्र भविष्यतीति ब्रह्मदत्तवरवाल्मीकिरामायणे —

'व्यक्तमेष महायोगी परमात्मा सनातनः । अनादिमध्यनिधनो महतः परमो महान् ॥
तमसः परमो धाता शङ्खचक्रगदाधरः । श्रीवत्सवक्षा: नित्यश्रीरजेयः शाश्वतो ध्रुवः ॥
मानुषं वपुरास्थाय विष्णुः सत्यपराक्रमः । भवान्नारायणो देवः श्रीमांश्चक्रायुधो विभुः ॥
एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित् । सीता लक्ष्मीः भवान् विष्णुर्देवः कृष्णः प्रजापतिः ॥
अक्षय्यं मधुहन्तारं जानामि त्वां सुरोत्तमम् ॥'

इत्यादीनि बहूनि प्रमाणानि श्रीरामचन्द्रस्यैव परत्वं प्रतिपादयन्ति । एवमेव नृसिंहवामनाद्यवताराणां श्रीकृष्णांशत्वं न श्रुतम् । एते चांशकला इत्यस्य त्वयमर्थः —

'मनवो मनुपुत्राश्च ऋषयश्च महौजसः । एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ॥
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥'

इत्यत्र मन्वादयः श्रीकृष्णस्यांशकला एवेन्द्रारिव्याकुलं लोकं मृडयन्ति । कृष्णस्तु भगवान् स्वयमेवावतीर्य त्यर्थः । तथा च भगवद्वाक्यम् —

'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥' इति ॥४६॥ साक्षात्पितुरिति व्यवधानं विना जनकस्य अग्निमथनावसरे अरणौ पतितं रेतस्तदैव तत उत्पन्नः शुक इति वदन्त्याचार्याः । अथवा । व्यासस्य

भार्या अरणिरिति प्रसिद्धिः । अथवा । मत्पितुर्द्वैपायनस्य साक्षादाश्रममङ्गात् बदरीवृक्षैः सहितं साक्षात्स्वकीयमाश्रममगादित्यर्थः ।।४७।। सभाजित इति स्पष्टम् ।।४८।। ब्रह्मणि बृहद्गुणविशिष्टे अनिर्देश्ये चिदचिद्वस्तुसजातीयत्वेन वक्तुमशक्ये निर्गुणे हेयप्रतिभटे। ईदृशे ब्रह्मणि यथा मनश्चरेत् तं विषयीकुर्यात्। मनसा तु विशुद्धेनेत्यादिश्रुतेर्विशुद्धमनोग्राह्यमित्यर्थः ।।४९।।

कृष्णप्रिया

इस प्रकार श्रुतियों के वाद को लेकर सनंदन के कहे हुए परमात्मा के उपदेश को श्रवण कर ब्रह्मा के पुत्र सनकादिक सिद्ध और मरीचि आदि प्रजापति परमात्मा के तत्त्व का निश्चय करके अनन्तर सनंदन की पूजा करने लगे ।।४२।। सब से पहले उत्पन्न और आकाशचारी सनंदादी महात्माओंने कर्मकांड की सब श्रुतियों उपनिषद् श्रुतियों का और इतिहास पुराणों का तात्त्पर्य इस प्रकार उद्धृत किया है ।।४३।। हे ब्रह्मदायाद नारन मनुष्यों के सब विषयको नाश करनेवाले परमात्माके इस उपदेश को मनमें श्रद्धा से धारण कर आप अपनी इच्छानुसार लोकनमें विचरते रहो ।।४४।। श्रीशुक उवाच ! हे राजन् ! इस प्रकार नारयण ऋषि के उपदेश भरे तत्त्व को श्रद्धा से ग्रहण कर समाहित मन वाले गुरुन से श्रवण किए अर्थ को धारण करनेवाले ज्ञान भक्ति से परिपूर्ण जितेन्द्रियों के व्रतको धारण करने नारदजी निजगुरु नारायण ऋषिजी के प्रति बोले ।।४५।। सब लोक को सुख देने वाले नित्यनिर्दोष निरबधि ज्ञानादि ऐश्वर्य संपन्न अप्रकृत शुद्ध सत्वगण प्रचुर मूर्तियुत आपके अर्थ मेरा प्रणाम जो कि आप सर्व प्राणियोको मोक्ष के अर्थ प्रकाशमान विद्या को धरण करते हो ।।४६।। इस प्रकार पृथ ऋषि नारायण को और उनके शिष्यन् को प्रणाम कर उदार बुद्धि नारदजी साक्षात् आप हि हमारे पिता व्यासजी के आश्रमको जाए ।।४७।। श्रीव्यासजी भगवान् से पूजित होकर आसन को स्वीकार कर नारदजी जो नारायण के मुखसे श्रवण किया उसका व्यासजीको अर्थवर्णन करने गए ।।४८।। हे राजन् ! हमारे प्रति आपने जो प्रश्न किया था उसका उत्तर इस प्रकार वर्णन किया गया है । देव मनुष्यवत् निर्देश के योग्य माथिक गुण रहित ब्रह्म के विषय में जैसे श्रुति वर्तती है वैसे ही मन भी परमात्मा के विषयमें वर्त सकता है ।।४९।।

[1]योस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो
यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे [2]पुरः शास्ति ताः ।
यं सम्पद्य जहात्यजामनुशयी सुप्तः कुलायं[3] यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ।।५०।।

।। इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे नारदनारायणसंवादे
वेदस्तुतिर्नाम [5]सप्ताशीतितमोऽध्यायः ।।८७।।

कर्दमक्षमा

यः, आदिमध्यनिधने, अस्य, उत्प्रेक्षकः, यः, अव्यक्तजीवेश्वरः, यः, इदम्, सृष्ट्वा, अनुप्रविश्य, ऋषिणा, पुरः, चक्रे, ताः, शास्ति। यम्, सम्पद्य, यथा, सुप्तः, कुलायम्, अनुशयी, अजाम्, जहाति, तम्, कैवल्यनिरस्तयोनिम्, अभयम्, हरिम्, अजस्रम्, ध्यायेत् ।।५०।। ।।

श्रीमद्भागवते, दशमस्कन्धे, उत्तरार्धे, सप्ताशीतितमाऽध्यायाऽन्वयनिरूपणम् ।।८७।।

---

[1]. यो ह्यात्मा जगदादिमध्यनिधनो-विज.। [2].पुनः संहितां-विज. । [3]. तथा-विज. । [4]. पारमहंस्यां संहितायां उत्तरार्धे-गो. प्रे. पु.।
[5]. चतुर्नवतितमोऽध्यायः-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

समस्तवेदस्तुत्यर्थं सङ्गृह्यानुस्मारयति-योऽस्योत्प्रेक्षक इति । योऽस्य विश्वस्योत्प्रेक्षकः एवमेतदनुशायिनां स्तपुरुषार्थसिद्धये सृष्टिस्थितिप्रलयादिप्रापणीयमित्यालोचक इत्यर्थः । अनेन निमित्तत्वमुक्तम् एवमालोक्यास्यादिमध्यनिधने र्जन्म मध्यः पालनं निधनमन्तः एतेषु कर्मसु यो वर्तते अनेनोपादानत्वमुक्तम् । ननु प्रकृतिपुरुषयोरुपादाननिमित्तत्वे प्रसिद्धे तयोरपि तत एवोद्भूतत्वान्मूलकारणं स एवेत्याह-योऽव्यक्तजीवेश्वर इति प्रवेशनियमने दर्शयति-य इति । पूर्वोक्तप्रकारेणेदं यदर्थमेतत्सृष्टं तेन ऋषिणा सृष्टे कार्येऽहमिति दर्शनात् ऋषिर्जीवस्तेन सहानुप्रविष्टः पुरः शरीराणि तस्य भोगायतनानि चक्रे पुरः शास्ति तस्य भोगं ददत्परिपालयति उपासकस्य च कैवल्यरूपो भवतीत्याह-यं सम्पद्येति । यं सम्पाद्य प्राप्यानुशयी नु दण्डवत्प्रणामैश्चरणमूले शेते इति तथा स जीवोऽजां कार्यकारणरूपामविद्यां त्यजति । ननु ब्रह्मसम्पन्नस्यापि जीवस्य बन्धो दृश्यतेऽत आह-सुप्तः कुलायं यथेति । अयं भावः यथा सुप्तं शरीरवन्तमन्ये पश्यन्ति स तु नात्मानं तथा पश्यति एवं मुक्तमप्यन्ये देहवन्तं पश्यन्ति स तु न किञ्चित्पश्यतीति तं हरिमजस्रमनवरतं ध्यायेत् किमित्यत आह-अभयं न भयं द्वयनिवर्तकमित्यर्थः । कुत एतत् कैवल्यनिरस्तयोनिं कैवल्येनाप्रच्युतस्वरूपावस्थानेन निरस्ता तिरस्कृता योनिर्मूलकारणं या येन तम् ॥

सर्वश्रुतिशिरोरत्ननीराजितपदाम्बुजम् । भोगयोगप्रदं वन्दे माधवं कर्मिनम्रयोः ॥५०॥

इति सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

भावार्थदीपिकाप्रकाशः वंशीधरी — इदं विश्वम् । इत्यर्थ इति- भगवदिच्छापूर्वकत्वात्सृष्ट्यादेः "स ऐक्षत" इत्यादिश्रुतेरिति । अनेनालोचकत्वकथनेन । अनेनादिमध्यान्तेषु वर्तनेन तथा चाभिन्ननिमित्तोपादानत्वमुक्तं भगवतः सृष्ट्यादेः । पुनराशङ्कते- । सत्यमित्यर्द्धाङ्गीकारे । तयोः प्रकृतिपुरुषयोः । ततो भगवत एव । स भगवानेव । अव्यक्तं प्रकृतिः जीवः पुरुषस्तयोरीश्वरः शरूपेणाश्रयः । यदर्थं यस्य भोगाद्यर्थम् । एतद्विश्वम् । अहमिति दर्शनात् सोऽहमिति ज्ञानात् । यमीशम् । बन्धोऽविद्यासम्बन्धः । अतोऽत्र । अत्राशयमाह-अयम्भाव इति । किं तद्ध्यानेनेति चेदाह-अभयमिति । इत्यर्थ इति- नो मम सेवाया ऋते दुःखं निवर्तते" इत्याद्युक्तेरिति भावः । अत्र हेतुमाशङ्कते-कुत एतदिति । योऽस्योत्प्रेक्षक इत्याद्यर्थे माह —

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तमीश्वराणां परमं महेश्वरं तद्देवानां परमं तु दैवतम् ॥
तमात्मस्थं ये तु पश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥"

इति । सर्वेश्वरपरेयम् । सुगमत्वान्न व्याख्याता । यः सृष्ट्वेत्यत्र सृष्टे कार्ये सोऽहमिति दर्शनादृषिर्जीवः । तथा च श्रुतिः —

"अत्मैवेदमग आसीत्पुरुषविधः । सोऽनु वीक्ष्य नान्यदात्मनोऽपश्यत्सोऽहमस्मीत्यग्रे
व्याहरत्ततोऽहंनामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र उक्त्वाऽथान्यान्नाम प्रब्रूत ॥" इति ॥

अर्थः — अग्रे सृष्टेः कार्यं प्रथमं पुरुषविधः पुरुषाकारो जीवात्मा एवासीत् । स अनु अनन्तरं सर्वतो तः स्वस्मादन्यन्नापश्यत्सोऽहमस्मीति व्याहरत् प्रथममुक्तवान् ततः कारणादहंनामाभवत् तस्मात्कारणादेतर्हीदानीमपि मन्त्रितः सन्नग्रे प्रथमं अहमयमित्येवमुक्त्वाऽथानन्तरमन्यन्नाम ब्रूते कस्त्वमित्युक्तः अहममुकोऽस्मीति ।

सुप्तः कुलायमित्यत्र श्रुतिः तद्यथा —

"प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम् ॥" इति ।

सम्भोगकाले मरणकाले वा प्रिययाऽऽलिङ्गितः प्राज्ञेन सुषुप्तिसाक्षिणा विशुद्धात्मना सम्परिष्वक्त एकीभूत इति श्रुतिपदार्थः । स्वामिनाम्-सर्वेति । सर्वश्रुतीनां शिरोरत्नैरुपनिषद्भिर्दीपस्थानीयैर्निराजितं निर्मंछनीकृतं पदाम्बुजं यस्य तम्। "सुदीपैर्विविधैर्विष्णोश्चालनेन यतस्ततः । प्रोक्तं निर्मंछनं तद्धि नीराजनमिति स्मृतम् ॥" इति संहितोक्तेः । पुनश्च कर्मिणां भोगप्रदं नम्राणां भक्तानां भक्तियोगप्रदम् । यद्वा-योगः सायुज्यं तत्प्रदमित्यर्थः ॥५०॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे वेदस्तुतिर्नाम सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीधरानुयायिनी — समस्तवेदश्रुत्यर्थं स्मारयन्भोगमोक्षप्रदत्वेन हरिरेव भजनीय इत्याह-योऽस्येति । जीवानां सर्वपुरुषार्थसिद्धय एवमिदं सृष्ट्यादिकं करिष्यामीत्यालोच्य तथैव तत्र प्रवृत्तः सन् यो हरिः प्रकृतिपुरुषयोः प्रवर्तकोऽपि वियदादि विराडन्तं विश्वं तदन्तर्गतानि जीवभोगायतनानि देवमनुष्यतिर्यगादिशरीराणि च सृष्ट्वा तेषु शरीराभिमानिना सह साक्षिरूपेण प्रविश्य तानीन्द्रियादिरूपशरीराणि तत्तदिन्द्रियगोलकाधिष्ठातृदेवतारूपेण शास्ति स्वस्वविषयग्रहणे प्रवर्तयति जीवं च नानाभोगसुखदानेन पालयति । तथा येन हरिणा पालितोऽविद्याश्लिष्टो जीवो यं सम्प्राप्यानुक्षणं यच्चरणमूले दण्डवत्पतितश्चेत्तदानाद्यविद्यां तथा परैर्दृश्यमानेऽप्याविद्यके शरीरेसुप्त इवाभिमानं च यदनुकम्पया त्यजति तं भक्तभयहरं नित्यानन्दस्वरूपमहिम्ना दूरतोऽपास्तमायं च हरिं ध्यानोत्तरभाविनोपाधित्वाविशेषेण स्वस्वेतरोपाधिविरोधिना चरमसाक्षात्कारेण सत्कार्यमज्ञानं हरतीत्येकः परमात्मैव हरिस्तं प्रतिक्षणं ध्यायेत् । अनात्मप्रत्ययतिरस्कारपूर्वकात्मैकाकारप्रत्ययप्रवाहात्मकं तद्ध्यानं कुर्यादिति वेदस्तुतिसारम् ॥

"पुत्रस्यानन्वितालापैः पितराविव तुष्यतः । मम श्रीराधिकाकृष्णौ वेदगोलार्थभाषया ॥"

॥ इति श्रीमद्भागवते श्रीधरानुयायिन्यां टीकायां वेदस्तुतौ सप्ताशीतितमोऽध्यायः ॥८७॥★॥

विश्वनाथी — उक्तं सर्वं सङ्गृह्यानुस्मारयति-य एवास्य विश्वस्योत्प्रेक्षकः मयाऽनुशयानिं जीवानां कर्मिणां कर्म प्रोद्बोध्य कर्मफलस्य साधनार्थं भोगार्थं च तथा ज्ञानिनां ज्ञानफलस्य सायुज्यस्य साधनार्थं तथाभक्तानां भक्तिफलस्य प्रेमवत्पारिषदत्वस्य साधनार्थं बुद्धीन्द्रियादिकं सृष्ट्वा एवमेवं तत्र तत्र प्रेरयिष्यामीत्यालोचक इत्यर्थः । त्रैकालिकीं सत्तामाह-अस्य विश्वस्यादिमध्यनिधनेषु य एव वर्तते इति । विश्वसृष्टेः पूर्वं विश्वमध्ये विश्वनाशेऽपि । यदुक्तं भगवतैव —

"अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् । पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥" इति ।

सर्वकारणत्वं सर्वनियन्तृत्वं चाह-योऽव्यक्तेति । सर्वं जगदिदं यन्मयं तयोः मायाजीवयोरपि य एवेश्वरः कारणं नियन्ता च तयोस्तच्छक्तित्वाच्छक्तीनां च शक्तिमतोऽनन्यत्वादव्यक्तजीवावपि स एवेत्यतस्तस्यैवोपादानत्वं निमित्तत्वं नियन्तृत्वं च सिद्धम्। प्रवेशविसर्गावपि करोतीत्याह-य एवेदं सृष्ट्वानुप्रविश्य ऋषिणा ब्रह्मणा पुरः देवमनुष्यतिर्यगादिशरीराणि चक्रे । तथा ऋषिणेति। ऋषिवन्निर्लेपत्वादृषिरन्तर्यामी तेन स्वरूपभूतांशेन ताः पुरः शास्ति । यद्भक्त्यैव जीवः संसारं तरन्तीत्याह-यं सम्पद्यानुशयी अविद्याश्लिष्टो जीवः अन्वनु दण्डवत्प्रणामैश्चरणमूले शेत इति तैर्व्याख्यातम् । अजां कार्यकारणरूपां मायां त्यजति । ननु भगवत्प्रपन्नस्यापि मायिकं शरीरं दृश्यत एव तत्राह-सुप्ते जनः कुलायं स्वशरीरं जहाति यथा वर्तमानमपि तन्नानुसन्धत्ते तद्वत् भगवत्प्रपन्नानां शरीराभिमानत्याग एवाविद्यात्याग उच्यत इत्यर्थः । क्वचित्तदत्यागस्तु सम्यक्प्रपत्त्यभावमूलक एव ज्ञेयः । किञ्चसाधननिरपेक्षमपि तस्य क्वचित्संसारनिस्तारकत्वमाह-कैवलस्य भावः कैवल्यमेकाकित्वं तेन जीवानुष्ठितमोक्षसाधनविनाभूतेनापि निरस्ता दूरीकृता योनिर्जीवाविद्या येन तम् । "यमिह निरीक्ष्य हता गताः स्वरूपम्" इति भीष्मोक्तेरघबककेश्यादीनामन्येषां बहूनां मोक्षसाधनं विनापि मोक्षदर्शनादिति भावः । विशेषणेनानेन स्वयं भगवाञ्छ्रीकृष्ण एव द्योतितः । हरिं स्वमाधुर्येण प्रेमवतां

मोहारकस्तम्। अभयं यथा स्यात्तथा स्वीयकर्मकालकूटविविधवादिभ्यो भयं परित्यज्यैव निरन्तरं ध्यायेदिति विधिरुक्तः। यद्वा-स्त्रादिपरित्यागेन परिगृहीतवेणुत्वात्सर्वतो निर्भयं सर्वेश्वरत्वादिति भावः ॥५०॥

॥ इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे विश्वनाथीटीकायां वेदस्तुतिर्नाम सप्ताशीतितमोऽध्यायः ॥८७॥

नीलकण्ठी —

तमिमं सर्वोपनिषदर्थं सङ्गृह्य स्मारयति-योऽस्योत्प्रेक्षक इति। यो हरिः समूलसंसारदुःखसंहर्ता अस्य चेतनाचेतनस्य गतः आदिमध्यनिधने सर्गस्थित्यन्तविषये उत्प्रेक्षकः कल्पकः रज्जुरिव भुजङ्गस्य तेन जगद्विवर्ताधिष्ठानत्वरूपमुपादान-मुक्तम्। अत्र हेतुः-योऽव्यक्तजीवेश्वरः अव्यक्तं माया जीवश्चिदाभासस्तयोरीश्वरः प्रवर्तकः "प्रधानक्षेत्रज्ञपतिर्गुणेशः" इति श्रुतेः। अज्ञानविषयीकृता शुक्तिर्यथा रजताभासस्य रजतज्ञानाभासस्य च प्रवर्तिका एवं ब्रह्माप्यनादौ जीवेश्वरविभागे वाश्रिताज्ञानविषयीकृतं सत्सदाभासस्य कार्यकारणस्य चिदाभासस्य प्रवर्तकमितो युक्तमस्योपादानत्वमित्यर्थः। अज्ञानाश्रयविषयभेदाच्चेतनभेदः प्राप्तः स्त्रष्टृप्रवेष्ट्रोरैक्यादौपाधिक इत्याशयवानाह-यः सृष्ट्वेदमनुप्रविश्येति। इदं वियदादिविराडन्तं ष्ट्वाऽनुप्रविश्य च ऋषिणा। इत्थम्भावे तृतीया। ब्रह्मरूपेण पुरः जरायुजाण्डजस्वेदजोद्भिज्जानि चतुर्विधानि शरीराणि चक्रे निर्ममे। तत्र दृष्टान्तः-सुप्तः कुलायं यथेति। यथा-सुषुप्तः स्थूलसूक्ष्मदेहौ त्यजति एवं समाहितः कारणदेहमपीत्यर्थः।

"द्वैतस्याग्रहणे तुल्यमुभयोः प्राज्ञतुल्ययोः। बीजनिद्रायुतः प्राज्ञः सा तु तुर्ये न विद्यते ॥"

इति श्रुतिसिद्धोऽयं दृष्टान्तः। अत एव तं हरिं कैवल्येन निरुपाधिकत्वेन निरस्तं योनिर्मूलाज्ञानं येन स तथा। एतेन ब्रह्मैव संसरति ब्रह्मैव मुच्यत इत्यपि दर्शितम्। अत एवाभयं संसारभयशून्यं द्वितीयाभावात्- "द्वितीयाद्वै भयं भवति" इति श्रुतेः। अजस्रं सन्ततं ध्यायेत् अनात्मप्रत्ययतिरस्कारेणात्मैकाकारं प्रत्ययप्रवाहं कुर्यात् आत्मनो वृत्तिव्याप्यत्वाद्ध्यायेदित्युक्तं न तु पश्येदिति प्रत्ययब्रह्मप्रकाशस्य स्वरूपत्वादिति भावः ॥५०॥

व्याचक्रतुः श्रीधररामचन्द्रौ वेदस्तुतिं गामिव सूर्यचन्द्रौ।

व्याचक्र चान्यः कवितारकामः सुलोचनानां पदवीप्रसिद्ध्यै ॥१॥

पारावारश्रितकचकविर्ज्येष्ठगङ्गाप्रतीची सेव्या चातुर्धरकुलभृतां कूर्परग्रामवासात्।

काश्यां तेषां हरिहरपरः कोऽपि गोविन्दसूनुः फुल्लाम्बाजः श्रुतिनुतिमसौ व्याकरोन्नीलकण्ठः ॥२॥

॥ इति श्रीमन्नीलकण्ठीये वेदान्तकतके वेदस्तुतितात्पर्यपरिशुद्धिर्नाम सप्ताशीतितमोऽध्यायः ॥८७॥

॥ समाप्तेयं वेदस्तुतिः ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

योस्योत्प्रेक्षकः आदिमध्यनिधन इति त्रिष्वपि कालेषु परमसाक्षित्वमुक्तम्। योऽव्यक्तजीवेश्वर इति कारणान्तर्यामित्वं शक्तिद्वयद्वारैव चैताना(चेतन)सर्गोपादानत्वं च यः सृष्ट्वेदमिति सृष्ट्युपलक्षितत्वेन समष्टिस्थितिप्रलयकर्तृत्वम् अनुप्रविश्येति लीलासमष्ट्यन्तर्यामित्वं च ज्ञेयम्। ऋषिणा ब्रह्मणा द्वारभूतेन पुरो व्यष्टिशरीराणि च चक्रे इति विसर्गकर्तृत्वम्। ताः शास्ति व्यष्ट्यन्तर्यामित्वम्। तदेवं मायावैभवप्रवर्तकत्वेन तस्य स्वरूपशक्तिं दर्शयित्वा तदुच्छेदकत्वेनापि दर्शयति-यं सम्पद्येति। मायावृत्तिमविद्याम् अनुशयी सोपाधिर्जीव इति मोचनलीलादर्शिता। तदेवं यथाक्रमतटस्थलक्षणेन स्वरूपशक्तिवैभवतया तं साक्षादपि व्यञ्जयति-तमिति। तत्र हरिमिति प्रसिद्धनाम्ना प्रसिद्धस्वरूपत्वमभिहितम्। यं सम्पद्येत्यादौ स्थिते स्वतस्तु मेव कैवल्येन शुद्धशक्तिवैभवैकाश्रयशुद्धस्वरूपत्वेन निरस्ता नित्यमेव दूरे क्षिप्ता योनिर्जगत्कारणं माया यस्मात्तमिति। य म्भूतः स एव परम शुद्धस्वपत्वात्तादृशपरमशक्तित्वाज्जीवहितार्थतत्तत्कर्तृत्वावगतपरमकारुण्यत्वात् ध्यानादिभक्तियोग्य वाक्यार्थः।

अत्र मायावैभवमनूद्य निरसनात् शुद्धशक्तिविलासवैभवपुरःसरश्रीभगवतस्स्थापनात्तस्य च ध्यानोपलक्षितभक्तिसाध्यत्वव्यञ्जनाद्ध्यानादेश्च वेदोपदेशसापेक्षत्वात् प्राचीनस्तवेनैकार्थ्यं दर्शितम्। तत्तद्विशेषेण च द्रष्यव्यम्। एतत्तात्पर्यकमेव जन्माद्यस्य यत इत्यादिकम्। अत्र सर्गो विसर्गश्चेत्यादिकं चेति ॥५०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अतः सर्वथा श्रीभगवन्तं प्रेम्णा भजेदिति सर्वश्रुतिस्तुतिफलितमित्यशेषसमाम्नायेत्याद्युक्तं निरूपयन् कृपाभरेण भक्त्युद्रेकेण वा लोकान् उपदिशति–य इति। अस्योत्प्रेक्षक इत्यादिना जगत्कारणत्वम्, योऽव्यक्तजीवेश्वर इति परमेश्वरत्वम्, यः सृष्ट्वेत्यादिना सहजकारुण्यम्, यमित्यादिना भक्तवात्सल्यम्, कैवल्याय मोक्षसुखाय निरस्ता योनिर्जीवानामविद्या येन तम्। यद्वा, केवला एकान्तिनस्तेषां चोक्तम् (सूचितम् [ग])। हरिमिति परमसौन्दर्य्यादिना मनोहरत्वमपि सूचितम्। एषां यथोत्तरं ध्यानहेतुत्वे श्रैष्ठ्यम्। अतोऽजस्त्रं ध्यायेच्चिन्तयेत्, यद्वा, प्रेम्णा भजेदित्यर्थः। प्रेमभजनस्यैव सदा स्वतो ध्यानकारित्वात्, किंवा सदा ध्यानेनैव प्रेमसम्पत्त्या तस्यैव परमापेक्ष्यत्वादिति दिक् ॥५०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रीश्रीलसनातनगोस्वामिपादकृतायां श्रीबृहद्वैष्णवतोषण्यां श्रीदशमटिप्पण्यां सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

आत्मैक्षिकः स्वयमेवात्मनां साक्षात्कर्ता। यद्वा। आत्मनां शुभाशुभसाक्षी। ऋषिणा चतुर्मुखेन सह संहिताश्चक्रे प्रावर्तयत्। अनुशयी कर्मवश्यः। कैवल्यनिरस्तयोनिं संसारिणां मोक्षप्रदानेन निरस्तः योनिं निरस्तयोनिप्रभवदुःखम्। वितीर्य पर्याय। कर्हिचित् कदाचित् ॥५०॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अशेषसमाम्नायपुराणोपनिषद्रस इत्युक्तम्। कोऽसौ समाम्नायादीनां रसः यः श्रुतिगीत्या समुद्धृत इत्यपेक्षायाम्—

‘आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः। इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥’

इत्युक्तरीत्या जगदुदयविभवलयलीलः सर्वान्तरात्मा बन्धमोक्षदो भगवानुपास्य इत्येष एवेति वक्तुं स्रष्टृत्वाद्युपयुक्तगुणैर्भगवन्तं विशिंषंस्तद्ध्यानं विधत्ते। योऽस्येति। अस्य जगतः आदिमध्यनिधने सृष्टिस्थितिलये निमित्ते उत्प्रेक्षकः ‘तदैक्षत बहु स्याम्’ इत्युक्तविधेक्षिता। यच्छब्दानां ‘तं कैवल्यनिरस्तयोनि’मित्यनेन सम्बन्धः। यश्च अव्यक्तजीवयोः प्रकृतिपुरुषयोः कारणावस्थयोरीश्वरः अन्तः प्रविश्य नियन्ता। अनेन कारणावस्थायां सूक्ष्मचिदचिद्वैशिष्ट्यं तस्यैवोपादानत्वं तदुपयुक्तं सर्वशक्तित्वं च फलितम्। उत्प्रेक्षक इत्यनेन निमित्तत्वं तदुपयुक्तं सार्वज्ञ्यं च। यश्च इदं महदादिपृथिव्यन्तसमष्टितत्त्वजातं सृष्ट्वा ऋषिणा चतुर्मुखाख्यजीवेनानुप्रविश्य जीवद्वारा अनुप्रविश्येत्यर्थः। पुरःशरीराणि चक्रे निर्ममे। ततस्ताः पुरः शास्ति नियमयति। पुरशब्दोऽत्र सजीवदेवादिशरीरपरः। ‘ऋषिणा चक्रे पुरः संहिताः’ इति पाठान्तरं तदा पुरः प्रथमम् ऋषिणा चतुर्मुखेन संहिता वेदसंहिताश्चक्रे प्रावर्तयदित्यर्थः। अनेन हितकृत्त्वमुक्तम्। शास्त्रप्रवर्तनं हि हितार्थम्। अनुशयो भुक्तावशिष्टं कर्म सोऽस्यास्तीत्यनुशयी कर्मवश्यो जीवः। यं सम्पद्याजां जहाति प्रकृतिसम्बन्धं त्यजति। आविर्भूतगुणाष्टको भवति मुक्तो भवतीति यावत्। तथा च श्रूयते—

‘परं ज्योतिरुपसम्पद्य स्वेन रूपेण अभिनिष्पद्यते ॥’ इति तत्र दृष्टान्तः। सुप्तः कुलायं यथेति। यथा शकुनिर्नीडे

चित्कालं सुप्तः तद्विहायोड्डीयते तद्वदजायां स्थितोऽनुशयी जीवो यं सम्पद्य तां जहातीत्यर्थः । कैवल्यनिरस्तयोनिं संसारिणां मोक्षप्रदानेन निरस्ता योनिप्रभवदुःखं येन तम् । न विद्यते भयं यस्मात्तम् । हरिमार्तार्तिहरं, तमजस्रं नित्यं ध्यायेदिति ॥५०॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

उपासनार्थं स्वलक्षणैर्लक्षयति–यो हीति । आत्मा जगदादिमध्यनिधनानि उत्पत्तिस्थितिसंहाराः यस्मात् स तथा । व्यक्तजीवयोः प्रकृतिचेतनयोरीश्वरः । यश्चेदं सृष्ट्वाऽनुप्रविष्टः यश्च ऋषिणा ऋषिरूपेण पुराणसंहितां चक्रे । अनुशयी जीवः यं सम्पद्य प्राप्य अजां बन्धकशक्तिं जहाति । सुप्तः कुलायं शरीरादावभिमानं च यथा त्यजति । तं कैवल्यनिरस्तयोनिं माधिकाभावेन निराकृतकारणं तं हरिम् अजस्रं निरन्तरं ध्यायेदित्यन्वयः ॥५०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां सप्ताशीतितमोऽध्यायः ॥८७॥

(श्रीविजयध्वजतीर्थरीत्या चतुर्णवतितमोऽध्यायः ॥९४॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥४२-५०॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

नमस्तस्मै भगवते कृष्णायेत्यादि कृष्णायेति कृष्णनमस्कारेणैव कृष्णपरैव श्रुतिस्तुतिरियमुपपद्यते ॥४६-५०॥

॥इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

॥४७-५०॥

॥इति श्रीमद्भागवते महापुराणे श्रीनाथचक्रवर्तिविरचितायां चैतन्यमञ्जूषायां सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

समस्तवेदस्तुत्यर्थं सङ्गृह्यानुस्मारयति–य एवास्य विश्वस्योत्प्रेक्षकः मयाऽनुशयानिां जीवानां कर्मिणां कर्म प्रोद्बोध्य फलस्य साधनार्थं भोगार्थं च तथा ज्ञानिनां ज्ञानफलस्य सायुज्यस्य साधनार्थं तथाभक्तानां भक्तिफलस्य प्रेमवत्पारिषदत्वस्य नार्थं बुद्धीन्द्रियादिकं सृष्ट्वा एवमेवं तत्र तत्र प्रेरयिष्यामीत्यालोचक इत्यर्थः । त्रैकालिकीं सत्तामाह–अस्य विश्वस्यादिमध्यनिधनेषु वर्तते इति । विश्वसृष्टेः पूर्वं विश्वमध्ये विश्वनाशेऽपि । यदुक्तं भगवतैव —

"अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् । पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥" इति ।

सर्वकारणत्वं सर्वनियन्तृत्वं चाह–योऽव्यक्तेति । सर्वं जगदिदं यन्मयं तयोः मायाजीवयोरपि य एवेश्वरः कारणं नियन्ता च च्छक्तित्वाच्छक्तीनां च शक्तिमतोऽनन्यत्वादव्यक्तजीवावपि स एवेत्यतस्तस्यैवोपादानत्वं निमित्तत्वं नियन्तृत्वं च सिद्धम् । विसर्गावपि करोतीत्याह–य एवेदं सृष्ट्वानुप्रविश्य ऋषिणा ब्रह्मणा पुरः देवमनुष्यतिर्यगादिशरीराणि चक्रे । तथा ऋषिणेति । निर्लेपत्वादृषिरन्तर्यामी तेन स्वरूपभूतांशेन ताः पुरः शास्ति । यद्भक्त्यैव जीवः संसारं तरन्तीत्याह–यं सम्पद्यानुशयी

अविद्याश्लिष्टो जीवः अन्वनु दण्डवत्प्रणामैश्चरणमूले शेत इति तैर्व्याख्यातम् । अजां कार्यकारणरूपां मायां त्यजति । ननु भगवत्प्रपन्नस्यापि मायिकं शरीरं दृश्यत एव तत्राह–सुप्ते जनः कुलायं स्वशरीरं जहाति यथा वर्तमानमपि तन्नानुसन्धत्ते तद्वत भगवत्प्रपन्नानां शरीराभिमानत्याग एवाविद्यात्याग उच्यत इत्यर्थः । क्वचित्तदत्यागस्तु सम्यक्प्रपत्त्यभावमूलक एव ज्ञेयः । किञ्च-साधननिरपेक्षमपि तस्य क्वचित्संसारनिस्तारकत्वमाह–कैवलस्य भावः कैवल्यमेकाकित्वं तेन जीवानुष्ठितमोक्षसाधनविनाभूतेनापि निरस्ता दूरीकृता योनिर्जीवाविद्या येन तम् । "यमिह निरीक्ष्य हता गताः स्वरूपम्" इति भीष्मोक्तेरघबककेश्यादीनामन्येषां बहूनां मोक्षसाधनं विनापि मोक्षदर्शनादिति भावः । विशेषणेनानेन स्वयं भगवाञ्छ्रीकृष्ण एव द्योतितः । हरिं स्वमाधुर्येण प्रेमवतां मनोहारकस्तम् । अभयं यथा स्यात्तथा स्वीयकर्मकालकूटविविधवादिभ्यो भयं परित्यज्यैव निरन्तरं ध्यायेदिति विधिरुक्तः ।

"हे भक्ताद्वार्ययञ्चञ्चद्वालधी रौति वो मनाक् । प्रसादं लभतां यस्माद्विशिष्टः श्वेव नाथति ॥"

इति चञ्चती चञ्चला वाला जडा धीर्यस्य स । पक्षे चञ्चलबालधीः पुच्छो यस्य सः । बालहस्तस्तु वालधीरित्यमरः । इति विश्वनाथपदव्यत्पत्तिः ॥५०॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । सप्ताशीतितमोऽध्यायो दशमेऽजनि सङ्गतः ॥८७॥

गूढार्थदीपिनी

सङ्क्षिप्तसार्थान्वयः —

योऽस्य विश्वस्य आदिमध्यनिधने सृष्टिस्थितिप्रलये निमित्ते उत्प्रेक्षकः उत्प्रेक्षणेन निरीक्षणमात्रेण कर्ता । सङ्कल्पमात्रेण वा । 'तदैक्षत बहु स्याम् प्रजायेय' इत्यादिश्रुतेः । यश्च अव्यक्तजीवेश्वरः प्रकृतिपुरुषयोर्नियन्ता । किञ्च यः ऋषिणा ब्रह्मणा सह इदं जगत् सृष्ट्वा अनुप्रविश्य च पुरः सर्वजीवशरीराणि चक्रे निर्ममे । पुनस्ताः सर्वाः पुरः शास्ति भोगं ददत्स्वयं परिपालयति ।

किञ्च सुप्तो जनः यथा कुलायं देहाभिमानं त्यजति तथा यं सम्पद्य अनुशयी जीवः अजामविद्यां जहाति तमभयं भयनिवर्तकं हरिमजस्रं नित्यं ध्यायेत् । कथम्भूतम् । कैवल्येन स्वरूपावस्थानेन निरस्ता दूरतः क्षिप्ता योनिर्मूलकारणमविद्या मायाशक्तिः येन तं कैवल्यनिरस्तयोनिम् ।

तं हरिम् अजस्रं निरन्तरं ध्यायेत् । तं कम् । यः अस्य सर्वस्य जगत उत्प्रेक्षक उत् ऊर्ध्वमुत्कृष्टं प्रेक्षते इत्युत्प्रेक्षकः कथमेते उद्धरणीया इत्युत्कृष्टविचारकः । कुतः । योऽस्य जगतः आदिमध्यावसाने वर्तमानः तत्रादौ कारणत्वेन मध्ये आश्रयत्वेन अन्तेऽवधित्वेन च वर्तते इत्यर्थः । किञ्च यः अव्यक्तजीवेश्वरः । अव्यक्तं प्रकृतिः जीवः पुरुषश्च तयोरपि ईश्वरः नियन्ता । एतेन यः सर्वोद्धारकत्वेन ज्ञानप्रदः । यश्च सर्वकारणभूतः यश्च सर्वनियन्ता स एव ध्येय इत्येव श्रुतीनां निष्कर्षः । किञ्च यः इदं विश्वं चक्रे सृष्टवान् सृष्ट्वा च पुनः ऋषिणा अन्तर्यामिरूपेण इदं विश्वं स्थावरजङ्गमात्मकमनुप्रविश्य ताः पुरः शरीराणि शास्ति भोगं ददत्परिपालयति । यद्वा । यश्चेदं सूक्ष्मसमष्टिरूपं ब्रह्मशरीरं सृष्ट्वाऽनुप्रविश्य च ऋषिणा ब्रह्मणा द्वारभूतेन पुरो विविधशरीराणि स्थूलानि चक्रे पुनस्ताः शास्ति च । यद्वा । यः ऋषिणा ब्रह्मणा सह इदं जगत् सृष्ट्वा पुरः जीवस्य भोगायतनानि चक्रे स्वयमन्तर्यामिरूपेण चानुप्रविश्य ताः शास्ति च । किञ्च यं सम्पद्य प्राप्य अनुशयी जीवः अजामविद्यां जहाति त्यजति संसारान्मुच्यते इत्यर्थः । अनु अनु पुनः पुनः दण्डवत्प्राणामैर्भगवतश्चरणमूले शेते इति अनुशयी भक्तिमान् जीवः । त्यागे दृष्टान्तः । यथा सुप्तः पुरुषः कौ पृथिव्यां लीयते इति कुलायं स्थूलशरीरं जहाति सन्निहितमपि तन्न स्मरति तद्वत् । य एवम्भूतस्तं ध्यायेदिति विधिः । 'निदिध्यासितव्यः' इति श्रुतेः । कथम्भूतम् । कैवल्यसाधनीभूतया भक्त्या निरस्ता दूरीकृता योनिर्भक्तानामविद्या येन तम् । यद्वा । कैवल्येन शुद्धस्वरूपत्वेन हेतुना निरस्ता दूरे क्षिप्ता योनिर्जगत्कारणं माया यस्मात् । केचित्तु निरस्ता योनिः कारणं यस्य कारणशून्यः कैवल्यश्चासौ निरस्तयोनिश्चेति तम् । 'न तस्य कश्चिज्जनिता न चाधिपः' 'केवलो निर्गुणश्च' इत्यादिश्रुतेरित्याहुः । अत एव अभयं मृत्युभयनिवर्तकम् । भक्तार्तिहरणशीलत्वाद् हरिरिति ।

अत्र अस्योत्प्रेक्षक इत्यादिना जगत्कारणत्वं योऽव्यक्तजीवेश्वर इत्यनेन परमेश्वरत्वं यः सृष्ट्वेत्यादिना स्वाभाविकदयालुत्वं मित्यादिना भक्तवात्सल्यं हरिमिति परमसौन्दर्यादिना चित्ताकर्षकत्वं ध्यायेदिति लिङा मुख्यविधिना भगवत्प्राप्त्युपायश्च र्शितः। तेन च सर्वशास्त्रनिष्कर्षऽप्येतावानेवेत्यपि ध्वनितम्। उक्तं च —

"आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः। इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा॥" इति।

केचित्तु अत्राभिन्ननिमित्तोपादानकारणत्वप्रतिपादनेन समन्वयाविरोधाध्यायार्थः सङ्गृहीतः। अजस्रं ध्यायेदित्यनेन धनाध्यायार्थः। जहात्यजामित्यनेन फलाध्यायार्थश्चेति सम्पूर्णा चतुरध्यायी ब्रह्ममीमांसा श्रीशुकेनैकस्मिन् श्लोके ख्याता इत्याहुः॥५१॥

इति वेदस्तुतेर्व्याख्या सर्वसन्देहभञ्जनी। कृता पौराणिकेनैषा भक्तिदा भक्ततोषिणी॥१॥
वेदस्तुतिर्यथा क्लिष्टा तथैव सरलीकृता। यत्करग्रहलेखन्या तं नमामि गजाननम्॥२॥
काश्यां भागीरथीतीरे ललितासन्निधौ मया। कृतेयं सरला व्याख्या प्रीयतां तेन मे प्रियः॥३॥
सततचिन्तनवीतभयाऽऽमया हरिदयाऽऽगतया सुधिया मया।
इयमनन्तगले ग्रथिताऽर्पिताऽमुकुलिता स्रगिवाऽत्र विराजताम्॥४॥
नियमतो यमतो यमतो निजकर्मतो मननतो भगवत्यनुरागतः।
श्रुतिगणेन निरुक्तमनुत्तमं ★द्रुतविलम्बित★ ★वृत्तमिहाप्यते॥५॥

[★ द्रुतं गतं विलम्बितं विलम्बो यस्य एवम्भूतं यत् वृत्तं वर्तते सर्वत्र इति वृत्तं ब्रह्म श्रीकृष्णरूपमिहैव अस्मिन्नेव स्मिन आप्यते प्राप्यते। किं कृत्वा। यमनियमादिसाधनैर्भगवति अनुरागमुत्पाद्येत्यर्थः। ल्यब्लोपे पञ्चमी।

★★ गत्यार्थाकर्मकेति कर्तरि क्तः।]

॥इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे नारायणनारदसंवादे वेदस्तुतिर्नाम सप्ताशीतितमोऽध्यायः॥८७॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सर्वश्रुतिसमन्वितार्थगास्योपसंहारात्मकेनैकेनैव श्लोकेन सञ्चिनोति श्रीशुकः-य इति। योऽस्योत्प्रेक्षकः जीवानां र्थसिद्धये विश्वस्य सृष्टिस्थितिलयादिप्रापणीयत्वेनालोचकः। 'स ऐक्षत। बहुस्यां प्रजायेयेति' श्रुतेः। यश्चास्यादिमध्यनिधने न्तो व्यभिचारिसत्ताक इति। तत्रादौ कारणत्वेन मध्ये चाश्रयत्वेन अन्ते ह्यवधित्वेनेति विवेकः।

"सर्वांल्लोकान्नीशते ईशिनीभिः य एवैक उद्भवे सम्भवे च य एतद्विदुरमृतास्ते भवन्ती"त्यादिमन्त्रः।

किञ्चाव्यक्तजीवेश्वरः। प्रकृतिजीवयोर्नियन्ता पुरुषोत्तमः 'प्रधानक्षेत्रज्ञपतिर्गुणेश' इति मन्त्रः —

'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥'

इति भगवदुक्तेश्च। अयमर्थः —

चिदचिच्छक्तिमत्स्वरूपतो निर्विकारः शक्तितो विकृतः विश्वस्य अभिन्ननिमित्तोपादानहेतुरिति। यश्च ऋषिणा चतुर्मुखरूपेणेदं र्यामिसर्वज्ञरूपेण च शास्ति। जीवस्य भोगं सम्पादयन् स्वयं पालयतीत्यर्थः। "अन्तः प्रविष्टः शास्ता जनानाम्।"

इत्यादिश्रुतेः– शरणापन्नानां तु गतिरेवेत्याह–यं सम्पद्य प्राप्य अनुशयनशीलः परिचार्यापरायणो जीवात्मा अजां जहाति। 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।' इति भगवदुक्तेः। 'न स पुनरावर्तत' इति श्रुतेः। अनावृत्तिः शब्दादिति चरमन्यायाच्च। इतः पूर्वं च प्रपन्नस्यापि प्रारब्धकर्मसम्बन्धतया सर्वथा प्रकृसिम्बन्धानिवृत्तौ सत्यामपि नेतरेषामिव तत् तन्त्रत्वेन संसरणम्। किन्तु तत दुःखसुखादिभोगवत्त्वस्यान्यदृष्ट्यैव तथाभातम्। आत्मनो स्वातन्त्र्यकर्तृत्वादिलक्षणस्यावरणस्य भङ्गेन भगवत्प्रयोज्यत्वज्ञानवत्त्वादित्येतदर्थं बुद्धौ निधाय एतत् देहपातात् प्राक् तस्य वर्तने निदर्शनमाह–सुप्तः कुलायं यथा। यथा सुप्तः स्थूलशरीरं त्यजति तद्वत्।। यावच्छरीरसम्पात अनभिनिविष्टो वर्तत इति भावः। 'तस्य तावदेव चिरं यावन्न विमोक्षे अथ सम्पत्स्य' इति श्रुतेः। तं परमेश्वरम्। ध्यायेदिति विधिः। 'निदिध्यासितव्य' इति श्रुतेः। कथम्भूतम्। कैवल्यनिरस्तयोनिम्। निरस्ता योनिः कारणं यस्य सः। कारणशून्यः। कैवल्यश्चासौ निरस्तयोनिश्चेति तथा ' न तस्य कश्चित् जनिता न चाधिपः।' 'केवलो निर्गुणश्च।' इत्यादिश्रुतेः। अभयं 'न भयं यस्मात् संसाररूपभयनाशकं संसारबन्धस्थितिमोक्षहेतुः' इति श्रुतेः। अजस्रं शाश्वतम्। क्रियाविशेषणम्। हरिम्। स्मृतिमात्रेण सर्वपापनिवर्तकं तथा चाह–श्रीपराशरः —

'अपि पापप्रयुक्तोऽपि ध्यायन्निमिषमच्युतम्। भूयस्तपस्वी भवति पङ्क्तिपावनपावनः॥'

इति। अत्र चाभिन्ननिमित्तोपादानकारणत्वप्रतिपादनेन समन्वयाध्यायाविरोधाध्यायार्थः सङ्गृहीतः। अजस्रं ध्यायेदित्यनेन साधनाऽध्यायार्थः। सम्पद्य जहात्यजामित्यनेन फलाध्यायार्थश्चेति सम्पूर्णा चतुरध्यायिनी ब्रह्ममीमांसा श्रीशुकेनैकस्मिन् श्लोके व्याख्याता इति भावः ॥५०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे सप्ताशीतितमाध्यायार्थप्रकाशः ॥८७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्र गुणरूपं द्वादशधा निरूपयति। यो भगवान् अस्य सर्वस्यापि जगतः उत्प्रेक्षकः ऊर्ध्वं प्रेक्षते कथमेते जीवसङ्घा निस्तीर्णा भविष्यन्तीति विचार्य एवं भविष्यन्तीति तेषां हि चिन्तयतीत्यर्थः। अयमेको भजनीयगुणः आवेश्यकत्वाय गुणत्रयमाह-अस्य जगतः आदिमध्यावसानरूपः एवं चतुष्टयमेकं सृष्टिकारणरूपं माहात्म्यत्रयमाह। यः अव्यक्तं प्रकृतिः जीवः पुरुषः ईश्वरः कालो नियन्ता त्रितयरूप इत्यर्थः। एवं सप्तगुणाः निरूपिताः। अवशिष्टान् पञ्चगुणानाह। यो भगवानिदं सृष्ट्वेत्येकम्। अनुप्रवेशो द्वितीयः। ब्रह्माण्डं सृष्ट्वा ब्रह्माण्डमध्ये प्रविष्ट इत्यर्थः। ततो देवतिर्यगादि पुरः चक्रे चतुर्थोऽयं शास्ति ता इति पञ्चमः। दोषत्रयाभावमाह-यं सम्पद्येति। जीवा अपि यं प्राप्य मनसा भावनयापि लब्ध्वा अजां जहाति अविद्यां दूरीकुर्वन्ति। ननु स्मरणेनैवं तर्हि मुक्ताः स्युस्तथा सति पुनर्देहग्रहणं न स्यात् तत्राह सुप्तः कुलायं यथेति। न हि सर्वात्मना अजापरित्यागः किन्त्वेवं भगवतो माहात्म्यं निरूप्यते। यत्सम्बन्धमात्रेणैव अजां सकार्यां पुरुषो जहाति सर्वथा न स्मरतीत्यर्थः। यथा सुप्तः पुरुषः शरीरं न स्मरति एवं प परस्यापि दोषाभावो निरुक्तः साक्षादाह कैवल्येन केवलभावेन निरस्ता योनिः कारणभूता येनेति सर्वमेव भगवानिति योनिरधिका कुतः स्यात् अभयमिति तृतीयो दोषो निवार्यते स्वयं भयरहितः सर्वेषामपि भयनिवर्तक इति एवं निर्दोषपूर्णगुणरूपो भगवानिति स्वत एव परमानन्दं प्रयच्छति दुःखं च दूरीकरोतीति तमेव सर्वोऽपि भजेदित्यर्थः ॥५०॥

॥ इति श्रीमद्भागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धविवरणे
अष्टत्रिंशाध्यायविवरणम् ॥३८॥८७॥

श्रीसुबोधिनीसारः

सर्वस्तुत्यर्थं स्मारयन्नुपदिशति। योऽस्य विश्वस्योत्प्रेक्षकः सृष्ट्याद्यालोचकः "स ऐक्षत इमाँल्लोकानुत्सृजा" इति श्रुतेः। आदिर्जन्म मध्यं पालनं निधनमन्तः तस्मिन् समाहारे एकत्वम्। योऽस्ति अव्यक्तजीवयोः पुंप्रकृत्योरीश्वरो नियन्ता य इदं जगत

सृष्ट्वाऽनुप्रविश्य पुनः शरीराणि चक्रे ताः पुनः ऋषीणांन्तर्यामिरूपेण शास्ति नियमयति । यं सम्पद्य प्राप्यानुशयी जीवोऽजाम् अविद्यां जहाति त्यजति सुप्तो जनः कुलायं शरीरमिव कैवल्येन निरस्ता तिरस्कृता योनिर्मूलकारणं माया येन तमभयम् एकं हरिमजस्रं सन्ततं ध्यायेत् मुमुक्षुः चिन्तयेत् ॥५०॥

॥ इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायां सप्ताशीतितमोऽध्यायः ॥८७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

समस्तवेदस्तुत्यर्थं सङ्गृह्यानुस्मारयति–योऽस्योत्प्रेक्षक इति । यः अस्य विश्वस्य उत्प्रेक्षकः जीवानां समर्तपुरुषार्थसिद्धये इदं सृष्टिस्थितिप्रलयादिप्रापणीयमित्यालोचक इत्यर्थः । अनेन निमित्तत्वमुक्तम् । एवमालोच्यास्यादिमध्यनिधने आदिर्जन्म, मध्यं पालनम्, निधनम् अन्तः, एतेषु कर्मसु यो वर्तते । अनेनोपादानत्वमुक्तम् । ननु प्रकृतिपुरुषयोरुपादाननिमित्तत्वे प्रसिद्धे, सत्यम्, तयोरपि तत एवोद्भूतत्वान्मूलकारणं स एव इत्याह–योऽव्यक्तजीवेश्वर इति । प्रवेशनियमने दर्शयति– यः इदं ब्रह्माण्डं सृष्ट्वा ऋषिणान्तर्यामिरूपेण तदनुप्रविश्य पुरः शरीराणि जीवानां भोगायतनानि चक्रे । ततश्च ताः पुरः शास्ति तेषां भोगान् ददत् परिपालयति । उपासकानां च मोक्षरूपोऽपि भवति, इत्याह–यं सम्पद्येति । यं सम्पद्य प्राप्य अनुशयी अन्वनुदण्डवत्प्रणामैश्चरणमूले शेत इति तथा स जीवः अजां कार्यकारणलक्षणां प्रकृतिं जहाति परित्यजति । ननु ब्रह्मसम्पन्नस्यापि जीवतो देहादिरूपप्रकृतिसम्बन्धो दृश्यते एव इत्याशङ्क्याह– सुप्तः कुलायं यथेति । यथा सुप्तं शरीरवन्तमन्ये पश्यन्ति स तु नात्मानं तथा पश्यति, एवं जीवन्मुक्तमप्यन्ये देहवन्तं पश्यन्ति, स तु न किञ्चिदपि पश्यतीत्यर्थः । तं हरिमजस्रमनवरतं ध्यायेत् । तत एव संसारभयनिवृत्तिः, नान्यथा इत्याशयेनाह– अभयमिति । न भयं यस्मात्तम्, भयनिवर्तकमित्यर्थः । तत्र हेत्वपेक्षायां यो हि स्वयं निर्भयो भवति स एवान्यभयनिरासे समर्थः, नान्य, इत्याशयेन तस्य निर्भयत्वमाह– कैवल्यनिरस्तयोनिमिति । कैवल्येन अप्रच्युतस्वरूपानन्दावस्थानेन निरस्ता तिरस्कृता योनिः मूलकारणं माया येन तम् । अत्र चाभिन्ननिमित्तोपादानत्वोक्त्या समन्वयाविरोधाध्यायार्थः, हरिं ध्यायेदिति साधनाध्यायार्थः, यं सम्पद्य जहात्यजामिति फलाध्यायार्थश्च प्रदर्शितः ॥५०॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र भगवद्गुणवर्णने । सप्ताशीतितमो यातो वेदस्तुतिनिरूपकः ॥३॥ ॥८७॥

अन्वितार्थप्रकाशिका

समस्तवेदस्तुत्यर्थं सङ्गृह्यानुस्मारयति–य इति ॥ यः अस्य विश्वस्य उत्प्रेक्षकः एवमनुशायिनां समस्तपुरुषार्थसिद्धये सृष्टिस्थितिलयादिप्रापणीयमिति सङ्कल्पकः इति निमित्तत्वमुक्तम् । सङ्कल्पस्य तदनुसारि व्यापारं विना व्यर्थत्वात्परमेश्वरस्य सत्यसङ्कल्पत्वात् । एवमालोच्य अस्य आदिमध्यनिधनेषु कार्येषु यो वर्तते एतेन उपादानत्वमुक्तम् । ननु प्रकृतिपुरुषावुपादाननिमित्ते प्रसिद्धे इति चेत्तत्राह । यश्चाव्यक्तजीवेश्वरयोरीश्वरः तयोरपि मूलकारणं स एव इत्यर्थः । प्रवेशनियमने दर्शयति । य इदं ब्रह्माण्डं सृष्ट्वा ऋषिणा यदर्थमेतत्सृष्टं तेन ऋषिणा सृष्टे कार्ये अहमिति दर्शनादृषिर्जीवः तेन सह तदनुप्रविश्य पुरः शरीराणि जीवानां भोगायतनानि चक्रे । ततश्च ताः पुरः शास्ति तेषां भोगान् ददत् परिपालयति । उपासकानां च कैवल्यरूपोऽपि भवति इत्याह । यं सम्पद्य प्राप्यानुशयी जीवः अजां कार्यकारणरूपाम् अविद्यां जहाति । यथा कौ लीयत इति कुलायं सुप्तशरीरवन्तमन्ये पश्यन्ति स तु न सुप्तः न शरीरं पश्यति एवं जीवन्मुक्तमन्ये देहवन्तं पश्यन्ति स तु न किञ्चित् पश्यति । तं कैवल्येन अप्रच्युतस्वरूपावस्थानेन निरस्ता तिरस्कृता योनिः मूलकारणं माया येन तम् अभयं भयनिवर्तकं हरिम् अजस्रमनवरतं ध्यायेत् । अत्र चाभिन्ननिमित्तोपादानत्वोक्त्या समन्वयाविरोधाध्यायार्थः । हरिं ध्यायेदिति साधनाध्यायार्थः । यं सम्पद्य जहात्यजामिति फलाध्यायार्थश्च दर्शितः ॥५०॥

स्वान्तर्गताप्रमितसत्त्वनिकायनानाक्षोभैरपि क्वचन न क्षुभितस्वरूपम् ॥ आक्रान्तसर्वजगतीकमगाधमच्छं किञ्चित्तदस्तु ममामृताय वस्तु ॥१॥

इतिश्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे सप्ताशीतितमे व्यधात् ॥१॥

इति श्रीमद्भागवते महापुराणे दशमेऽन्वितार्थप्रकाशिकायां सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनेन व्याख्यानेन विस्तरतो गदितमर्थं सङ्क्षिप्य परीक्षितं बोधयन्नाह ॥ योऽस्येति ॥ यः अस्य ॥ अनन्तकोटिब्रह्माण्डरूपस्य जगतः ॥ आदिमध्यनिधने अत्र समाहारद्वन्द्वः ॥ उत्पत्तिस्थितिलयेषु ॥ उत्प्रेक्षकः आधिक्येनावलोककः उत्पत्त्यादीनां दृष्टिमात्रेण कर्ता न तु प्रयासेनेति भावः ॥ तथा च श्रुतिस्मृतयः —

स ऐक्षतेति ॥ स इमाँल्लोकानसृजदिति ॥

स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहरउदीक्षयेति ॥

तां कालशकत्मादाय वासुदेवोऽक्षरात्मना ॥ सिसृक्षयैक्षत यदा सा चुक्षोभ तदैव हि ॥

तस्याः प्रधानपुरुषकोट्यो जज्ञिरे मुने इति ॥ यद्वा ॥

उत्प्रेक्षकः क्षेत्रज्ञानां यथा कर्मद्रष्टा विश्वस्योत्पत्त्यादिषु दृष्टिमात्रेण जीवेश्वराणां स्वस्वकर्मानुसारेण कारणकलेवरभोगभोगस्थानादिदाता रक्षको विनाशकश्चेति भावः ॥

ईशाभिसृष्टं ह्यवरुन्ध्महेऽङ्ग दुःखं सुखंवा गुणकर्मसङ्गात् ॥ आस्थाय तत्तद्यदयुङ्क्तनाथश्चक्षुष्मतान्धा इव नीयमानाः ॥ इति ब्रह्मवचनम् ॥

ननूत्पत्त्यादिषु प्रकृतिपुरुषयोः कर्तृत्वं न परमेश्वरस्येतीमां शङ्कां निरस्यन्नाह ॥ योऽव्यक्तजीवेश्वरः ॥ इति ॥ यश्च प्रकृतिपुरुषयोरीश्वरः प्रभुत्वेन सृष्ट्यादिकार्ये प्रवर्तक इत्यर्थः ॥ यः सङ्कल्पेनेति शेषः ॥ इदं रचनाभेदवर्जितं ब्रह्माण्डसमूहं पूर्वं सृष्ट्वा ऋषिणा पुरुषरूपेणानुप्रविश्य तदनन्तरं पुरः ईरणां जीवानां च ब्रह्माण्डरूपान् अल्परूपांश्च देहान् रचनाविशेषयुक्तान् चक्रे कृतवान् ॥ ऋषिशब्दस्य जीवशब्दस्य च पुरुषवाचकत्वे निदर्शनम् ॥

यत उदगादृषिर्यमनुदेवगणा उभये इति ॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ॥ जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ इति जीवमजीवयत् ॥

हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ॥ इत्यादिश्रुतिस्मृतिवाक्येषु ऋषिशब्दजीवशब्दौ मायाधिष्ठात्रक्षरपुरुषकावुक्तौ ॥ अक्षरपुरुषं विनाऽन्यजीवस्य विश्वानुप्रवेशेन सर्वधारकत्वोत्पादकत्वासम्भवात् ॥ तथा चोक्तम् —

पुरुषेणात्मभूतेन वीर्य्यमाधत्त वीर्यवान् ॥ अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ॥

प्रत्यग्धामा स्वयञ्ज्योतिर्विश्वं येन समन्वितम् ॥ इति ॥

स्कान्दे च —

तां कालशक्तिमादाय वासुदेवोऽक्षरात्मना ॥ सिसृक्षयैक्षत यदा सा चुक्षोभ तदैव हि ॥

इत्यादिभिः ताः पुरः क्षेत्रज्ञानां यथाकर्म शास्ति शासनं नाम तत्तत्कर्मानुगुणं फलप्रदानम् ॥ सम्पद्य प्राप्य ॥ अनुशयी ॥ अनुशेते मायामनुप्रविश्य शेते इत्यनुशयी ॥ अविद्यया अनादिबद्धो जीवः ॥ बन्धोऽस्याविद्ययानादिविद्यया च तथेतरः ॥ इति भगवद्वाक्यम् ॥

अजां देहदैहिकयोरहंताममताहेतुभूतां मायाम् ॥ सुप्तो निद्रां प्राप्तः जनः कुलायं स्थूलशरीरं यथा तथा जहाति त्यजति प्रचुरानन्दस्वरूपध्यानैकाग्रतया विस्मरतीत्यर्थः ॥ यद्वा ॥ सुप्तो मृत्युरूपां दीर्घनिद्रां प्राप्तः जनः कुलायं स्वफलेवरं यथा तथा जहाति त्यागं करोति ॥ कैवल्यनिरस्तयोनिं कैवल्येन निजानां कैवल्यप्रदानेनाक्षरधामप्रदानेन इति यावत् ॥ निरस्ता योनिर्योनिसम्भवो येन तम् ॥ अभयं भयविनाशकं स्वकीयानामिति शेषः ॥ तं हरिं परमेश्वरम् अजस्त्रं सततम् ॥ ध्यायेत् चिन्तयेत् ॥५०॥

"जीवेशब्रह्ममायास्तदवनककरो यः परब्रह्मसंज्ञश्चेत्थं योऽनादिभेदः सनिगमगदितः पञ्चधा वेद्य एव ॥
सत्यस्तत्रापि जीवावरणगुणयुताऽनाद्यविद्या जनानां नश्येद्भक्त्येति वेदस्तुतिकथकशुकः प्राह कृष्णस्य योगी ॥" ॥१॥

नन्वेकमेवाद्वितीयं ब्रह्म ॥ सर्वं खल्विदं ब्रह्म ॥ बहु स्यामित्यादिकासु कासुचिच्छ्रुतिषु तु पूर्वमेकमद्वितीयादिशब्दवाच्
ब्रह्म तदेव चेतनाचेतनात्मकबहुरूपेण जातमस्तीति आधुनिकविद्वद्भिः सिद्धान्तितं भवद्भस्त्वत्र जीवेश्वरादिपञ्चविधो
ऽनादित्वमालम्ब्य पारमार्थिकः ॥ कथमुक्त इति चेदत्रोच्यते – एकमेवाद्वितीयमित्यादिब्रह्मस्वरूपनिरूपकश्रुतीनामेकादिपदैः
तीयादिभेदत्रयरहितं ब्रह्मेत्येवंरूपेऽर्थे क्रियमाणे सच्छब्देनाविनाशित्वं चिच्छब्देन च प्रकाशरूपत्वम् आनन्दशब्देन च
रूपत्वमित्येवं स्वगतभेदप्राप्तिर्दुर्वारैव अतो निर्भेदब्रह्मेति श्रुत्यर्थविधानमनुभवरहिताधुनातनाज्ञानिकृतमित्यवधेयम् ॥ न च
जडदुःखरूपमायासम्बन्धेन सच्चिदानन्देति त्रीणि विशेषणानि सन्तीति वाच्यं तथा सति एतद्विशेषणत्रयरूपब्रह्मलक्षणात्पृथग्भूतं
किं वस्त्वस्ति तत्कथयत यद्युच्यध्वे सच्चिदानन्देत्येतद्धर्मत्रयरूपमेव ब्रह्मेतति तदापि भवन्मते धर्मत्रिकत्वेन ब्रह्मत्रिकत्वं
अथ च ब्रह्मणो धर्मरूपत्वेन कथने धर्माणां निराधारतयावस्थानाभावात् धर्मत्रयाधारभूतब्रह्मास्तीति ब्रूत ॥ तथा सति
र्मिणोर्नित्यसम्बन्धात्त्वदुक्त्यैव ब्रह्मणो धर्मित्वप्राप्तावागतोऽसि मदीयं पन्थानम् अथ च यदि कथञ्चिद्ब्रह्मणो निर्धर्मतायां
दितायां सत्यामपि – स ऐक्षत । तदैक्षत । तत्तेजोऽसृजत सिसृक्षयैक्षत । यदा सा चुक्षोभ । तदैव हि तस्यापि द्रष्टुरीशस्य विहर
या । ईक्षतेर्ना शब्दमित्यादिश्रुतिस्मृतिन्यायेषु ब्रह्मण ईक्षणादिधर्मविधानादीक्षणादेश्च नेत्रादिसाध्यत्वान्नेत्रादेश्च मूर्तिस्थत्वान्मूर्तिमदेव
ति सिद्धम् ईक्षमाणस्य वस्तुन आत्मनः सकाशात् पृथग्भूतत्वात्सृष्ट्यर्थं ब्रह्मेक्ष्यमाया अप्यनादित्वेन मायाब्रह्म चेत्येवं
यस्वीकारावश्यकत्वेन विजातीय भेदस्यापि दुर्निवार्यत्वमेव ॥ अथ च बहुस्यामिति श्रुतावपि ब्रह्मणो
नसङ्कल्पकर्तृकत्वात्सङ्कल्पस्य चान्तःकरणाधारहृदयादिसाध्यत्वान्मनःकर्तृकत्वाच्च मनोहृदयादिविशिष्टं सङ्कल्पादिक्रियाकर्तृ
ति सिद्धान्तः ॥ एवं च सत्येकदेशस्थस्य स्वस्य स्वपृथग्भूतान्यदेशावस्थितवस्तुसमीक्षणसम्बन्धान्मायानादित्वं च अथ
वदिष्यथैकमेव ब्रह्म बहुजीवरूपेण जातमिति तदापि सदाज्ञानवतः स्वतन्त्रस्य निर्मायस्याक्षराच्युतादिशब्दवाच्यस्य निर्बन्धस्य
ऽप्यज्ञानादिविपरीतधर्मप्रादुर्भावादिनाऽज्ञानित्वपरतन्त्रत्वसमायत्वक्षरत्वसम्बन्धत्वयुक्तत्वं जातमेव ॥ एवं च सति
नादिनात्मबन्धनस्य यानि वृत्तिचिकीर्षा सा तु दुरापास्तैवसम्बन्धब्रह्मसेवया सम्बन्धनस्यानाश्यत्वात् यदि ब्रवीष्यथ
सम्बन्धेनैतस्मिन्नेते दोषाः सन्ति न स्वत इति चेत्तत्रोच्यते ब्रह्मणो मायासम्बन्धः स्वेच्छया मायेच्छया वोभयनियन्तृपरेच्छया
ऽपि सम्भवति न ह्यनुन्मत्तः स्वेच्छया स्वैश्वर्यविघातकं स्वदुःखजनकं च कर्म करोति तथा च "यद्गत्वा न निवर्तन्ते तद्धाम
मम"ति भगवद्वाक्याद्यद्धाम गतानामप्यपुनरावृत्तिरस्तीह तु तद्धामस्वामिनोऽप्यनादिजीवबन्धनकर्त्र्या जडदुःखमिथ्यादिधर्मवत्या
ः सम्बन्धेन स्थाल्यधोगताग्निसम्बन्धेन तत्स्थजलान्तर्गततन्दूलविक्लित्तिभाववत् घर्मतप्तदेहस्य देहिनो व्याकुलत्वादिवच्च
स्तद्धर्माः स्वदुःखकर्तारो जीवानामिवात्मसंसृतिदाश्च भवेयुः ॥ एवं च सति चतुःसाधनैः प्रत्यक्षीकर्तव्यस्य तस्य
स्यानीश्वरत्वप्राप्त्यादिनान्यबन्धनान्निराकर्तृत्वात् तत् साक्षात्काराय जनानां साधनाविधानप्राप्तिश्च ॥ नापि द्वितीयः ॥ मायेच्छया
ब्रह्मसम्बन्धोक्तौ भवन्मते जडादिगुणवत्या मायाया इच्छाद्यनुपपत्तेस्तत्कृतोऽपि स्वेच्छया ब्रह्मसम्बन्धो न सङ्गच्छते कथं
तासिद्धौ सत्यामपि पूर्वोक्तात्तत्स्वतन्त्रतानाशत्वमायाधीनत्वभजनाविधेयत्वादयो ब्रह्मणि दोषा दुर्वाराः स्युः ॥ यदि तृतीयपक्षे
योभयनियन्तुः परस्येच्छयैवायं ब्रह्मणो मायासम्बन्ध इति चेत् अजां ध्रुवाम् अनादी उभावपि अजामेकाम्०
विद्योपहतात्मसंविदः० बन्धोऽस्याविद्ययानादिः० अनाद्यविद्यायुक्तस्य० अजो नित्यः शाश्वतोऽयम्० अक्षरात्परतः परः०
रात्मा पुरुषः० अक्षरादपि चोत्तमः० त्वत्तः पुमान् समधिगम्य० ययास्यवीस्यमित्यादिवाक्यै रज-
जीवेश्वराणामनादिबन्धनावरणकारिणी त्रिगुणमयी माया तदन्यत्तन्नियन्त्रक्षरब्रह्म च ॥ तस्य मायासम्मुखीभावविधायकः
ता सर्वस्रष्टा सर्वकारणं पुरुषोत्तमश्चैषा मनादिविद्यमानत्वात् त्वन्मते ब्रह्मव्यतिरिक्तान्यपदार्थासत्त्वाच्च स्वमतविघातविधानपूर्वं
सत्यतारूपं मत्पन्थानं पुनरागताः स्थ ॥ एवं च सति चैतन्यजात्या जीवेश्वरब्रह्मपरब्रह्मणामच्छेद्यादिधर्मसाम्यात्
त्वम् ॥ अतः सजातीयभेदोऽप्यागतः अथवा यदि वदिष्यध्वे नाहं सर्वसत्यतां ब्रवीमि किन्तु जलसम्भृतमृत्पात्रेषु

प्रतिबिम्बितसूर्यप्रतिबिम्बवत् मायाप्रतिबिम्बितं ब्रह्मैव बहुजीवेश्वररूपेण जातमवभासते इति कुतः सर्वेषां सत्यता स्यादिति चेद्गगनैकदेशस्थितार्कस्य स्वव्यतिरिक्तान्यदेशवर्तिमृत्पात्राणां तद्गतजलस्य चापेक्ष्यत्वात्त्वन्मते च ब्रह्मातिरिक्तवस्तुमात्राभावात्प्रतिबिम्बपतनमेव न सङ्गच्छते दुराग्रहेणैतत् सत्यताविधानेऽपि विजातीयभेदप्राप्तिर्विजातीयपात्रादि-स्थानीयप्रकृत्यभावे प्रतिबिम्बासङ्गतिश्च ब्रह्मणो व्यापकत्वहानिरन्धकाररूपमायायां प्रतिबिम्बपतनासङ्गतिश्च तस्मान्न शक्यः प्रतिबिम्बवादोऽपि वक्तुम् ॥ अथ यदि गदिष्यथ घटमठोपाधिना यथैक आकाशस्तद्रूपो जातस्तथा कारणाव्याकृतदेहयोगोपाधिनैकं ब्रह्मैव जीवेश्वरादिरूपं जातमिति तदानीमद्वितीयत्वहानिः कारणाव्याकृतसत्तया विजातीयभेदापत्तिश्च दुर्वारा स्यात् ॥ एवं च सति आकाशपृथिवीतत्कृतमठादितद्रूपापाध्युत्पादककुलालादिचतुर्भेदसम्भवः ॥ तत्राकाशादित्रिकं च शून्यं जडात्मकं चास्ति ॥ घटादिकर्तुः कुलालस्य तु साकारसचेतनत्वादिकं च यदा दृष्टान्ते विद्यते तदा दार्ष्टान्तिके आकाशस्थानापन्नमेकाद्वितीयाकर्तृ चैतन्यात्मकं ब्रह्म माया च पृथ्वीस्थानापन्नाकारणादिशरीराणि घटादिस्थानीयानि सम्मितानि परन्तु घटमठाद्युपाधिस्थानीयकारणादिशरीरत्रिकनिर्मातृकुलालस्थानीयश्चतुर्थः क इति भण्यताम् अभणनेऽयं दृष्टान्त एव मिथ्याभूतः ॥ न च घटमठयोः कुलाल इव कारणाव्याकृतशरीरयोः कर्तृकानादिजीवकर्मयुतान मायैवास्तीति वाच्यम् ॥ जडत्वेन मायादेरकर्तृत्वात् न हि कुत्रापि जडं वस्तु चेतनकर्तृ दृष्टम् ॥ ननु यथा रज्जुशुक्तिस्था एवादिषु सर्परूप्यचौरादिभ्रमवन्मिथ्यैव ब्रह्मणि जीवेश्वरादिरूपः सर्वेषां भ्रमो जातोऽस्ति ॥ तस्माद्विश्वनिर्मातुः साकारस्यापेक्षैव नास्ति ॥ किमनेनाग्रहेणेति चेन्मयोच्यते स्थानान्तरे सत्यत्वेन दृष्टानां सर्परूप्यचौराणां रज्ज्वादिषु भ्रमस्तु नराणां ध्वान्ततेजआदिदोषेणाभिजायते भवत्सिद्धान्ते तु जगतः कल्पितत्वेन मिथ्यात्वात् न दृष्टान्तसिद्धान्तसङ्गतिः ॥ यदि सा सङ्गतिः स्यात्तर्हि मायादिरूपं जगत्स्थानान्तरे सत्यं भवेत् ॥ त्वन्मते तु ब्रह्मातिरिक्तत्वाज्जीवानामप ब्रह्मानतिरिक्तत्वाच्च सदाज्ञानवतो ब्रह्मणोभ्रमासम्भवाद्विश्वादिरूपोऽपि ब्रह्मणि न शक्यते वक्तुम् ॥ ननु स्थलान्तरे सत्यसर्पदर्शनेन रज्जौ तद्भ्रान्तिरस्ति तथैवान्यत्र विद्यमानवस्त्वभावेऽपि तथा दर्शनात् ॥ यथा चन्द्रस्य द्वित्वाभावेऽपि तद्द्रष्टुर्द्विचन्द्रज्ञानं कस्यचिज्जायते तत्र कार्योत्पत्तौ कारणसत्यतायाः किं प्रयोजनमिति चेदुच्यते चन्द्रान्यजनानां चन्द्रद्विदर्शनं तु द्रष्टुर्नेत्रस्थदोषेणैवास्ति न तु स्थलान्तरे ॥ सत्यत्वेन दृष्टां सर्पस्य रज्जौ भ्रमवदस्ति । भवन्मते तु ब्रह्मभिन्नवस्तुमात्राभावादविद्याकृतं जगद्रूपं द्वित्वं मिथ्या स्यात् ॥ अतो बन्धमोक्षयोर्धर्माधर्मयोस्तत्प्रतिपादकशास्त्रस्य चासत्यत्वाद्दुःसिद्धान्तापत्तिः ॥ अथ च कनककुण्डलदृष्टान्तेनांशांशिवादोऽपि न शक्यो भवता ब्रवितुम् ॥ यदि ब्रह्मणः स्वेच्छयैव जीवेश्वरादिरूपेण जातत्वाद्ब्रह्मशकला जीवा इति दुराग्रहो भवतां सम्पाद्यः स्यात्तदा तत्पक्षोऽपि विकारिणश्छेद्यस्य सुवर्णस्य कटकाद्याकारविभागान् भवन्तः कथयन्तु परन्तु निर्विकारस्याच्छेद्यादिधर्मवतो ब्रह्मणः खण्डानर्हत्वात् निर्विकल्पकस्याकर्तुस्तस्य विकारप्राप्त्या जीवरूपविभागकल्पना सुतरां न घटते ॥ तथा च कनकात् कुण्डलकटकयोरपृथक्त्ववज्जीवब्रह्मणोरेकीभावोऽपि न वक्तव्यः ॥ एकीभावे च सति जीवेष्वजध्रुवनित्यशब्दकृविशेषणासङ्गतिरित्यपरोऽपि दोषः सङ्गतः ॥ अथ च मुहुर्मुहुर्ब्रह्म स्वेच्छया जीवरूपजातमित्युक्तौ युष्माकं लज्जापि कथं नायाति ॥ कुतः धीमन्तोऽधीमन्तश्च यथात्मनो दुःखैश्वर्यादिनाशप्रसङ्गः स्यात्तादृशं कर्म न कुर्वन्त्येव तर्हि सर्वज्ञं सत्यसङ्कल्पं सर्वनियन्तृ ब्रह्म स्वेच्छयाऽपि जीवभावं प्राप्य पशुमनुष्यादिदेहेषु मलसम्भृतेषु तिष्ठेत् ॥ तथा समस्तनरकान् चतुरशीतिलक्षयोनिषु जन्ममरणादिदुःखानि च कथमनुभवेत् ॥ तथा च ब्रह्मणो यदान्यजीवभावेन दुःखभाक्त्वं तदानादिबन्धमुक्तये बदरिकाश्रमादिस्थानस्थानामृषीणां वेदाध्ययनसाधनसम्पत्तिविधानादिनापि किं प्रयोजनम् ॥ तस्मादनादी अजन्मानौ नित्यौ चैतन्यधर्मेण ब्रह्मसजातीयब्रह्मभिन्नावेव जीवेश्वरौ बोद्धव्यौ ॥ एतद्ब्रह्मत्वेन अनवधिकातिशयोत्कृष्टगुणयोगात् परमेश्वरपरब्रह्माख्यं ताभ्यां भिन्नमेव ॥ अथ च यदि वदिष्यथ यावदज्ञानदशा तावज्जीवेश्वरमाया गुरुशिष्याद्यनेकभेदावच्छिन्नं जगत्सत्यं भासते तद्दशानिवृत्तौ चिन्मात्रमेकं ब्रह्मैव सत्यमन्यत्सर्वं मिथ्यैवेति चेत्तत्रोच्यते ॥ उपदेष्टृज्ञानिगुरूणां प्राचीनानामाधुनिकानां चेदं ज्ञानं जातमस्ति न वा जातमस्तीति चेद्ब्रह्मरूपात्स्वतोऽन्याभावज्ञानाच्छिष्योपदेशासङ्गतिः शिष्टदर्शनपूर्वकोपदेष्टृकतोपदेशविधानात् ॥ न तस्य ज्ञानं जातमित्युक्तावप्यज्ञानिकृतोपदेशेनाज्ञानिगताज्ञाननाशाभावादज्ञानिगुरुकृतोपदेशेनाज्ञशिष्यस्य का वार्थसिद्धिः ॥ षण्ढयोर्योगेन प्रजोत्पत्त्यभाववत्समानयोस्तयोर्योगेन ज्ञानोत्पत्तेरसम्भवः ॥ ननु गुरोर्ज्ञानित्वेऽपि बाधितानुवृत्त्या शिष्यस्य दृश्यत्वात्तत्कृतमुपदेशविधानयुक्तमेवेति चेदुच्यते तर्हि गुरोः सम्यक्-ज्ञानप्रवृत्तिवेलायां बोधिता नु तिष्ठति न वा ? तिष्ठतीति चे

सत्यता स्यादिति
रिक्तवस्तुमात्रा-
ानीयप्रकृत्यभावे
तिबिम्बवादोऽपि
व जीवेश्वरादिरूपं
। एवं च सति
स्ति ॥ घटादिकर्तुः
चैतन्यात्मकं ब्रह्म
स्थानीयकारणा-
ठयोः कुलाल इव
कुत्रापि जडं वस्तु
रूपः सर्वेषां भ्रमो
नां सर्परूप्यचौराणां
न मिथ्यात्वात् न
रिक्तत्वाज्जीवानामप
न्तरे सत्यसर्पदर्शनेन
ज्ञानं कस्यचिज्जायते
थदोषेणैवास्ति न तु
कृतं जगद्रूपं द्वित्वं
कनककुण्डलदृष्टान्ते-
ा जीवा इति दुराग्रहो
न्तः कथयन्तु परन्तु
भागकल्पना सुतरां न
एकीभावे च सति
जातमित्युक्तौ युष्माकं
कुर्वन्त्येव तर्हि सर्वज्ञं
। तथा समस्तनरकान्
त्वं तदानादिबन्धमुक्तये
ादी अजन्मानौ नित्यौ
गात् परमेश्वरपरब्रह्माख्यं
च्छन्नं जगत्सत्यं भासते
ामाधुनिकानां चेदं ज्ञानं
कतोपदेशविधानात् ॥ न
स्य का वार्थसिद्धिः ॥
ाधितानुवृत्त्या शिष्यस्य
ति न वा ? तिष्ठतीति चेत्

तु तदज्ञानं येषां नाशितमि"त्यादिप्रमाणविरोधोऽनुभवविरोधश्च ॥ रज्जुसाक्षात्कारदशायां सर्पभूतभ्रमानुपलम्भात् न तिष्ठतीति देशेन सम्यक्-ज्ञानप्रवृत्त्याबाधितानुवृत्तिसम्भावनाया अविद्यामानत्वान्न द्वैतदर्शनपूर्वकमुपदेशविधानं युक्तं स्यात् ॥ किञ्च ॥ सत्यतामूलकै रज्जुसर्पादिदृष्टान्तैर्दुःसाध्यापीयं बाधितानुवृत्तिः कथञ्चिदुच्यते तर्हि पूर्वोक्तो दोषः कथं न परामर्शनीयः स्यात् ॥ बहुबाधमेतादृशं ब्रह्मनिरूपणं न महद्भिहितमवधेयम् ॥ यदि विदध्युस्तर्हि वेदार्थपरमार्थघ्नास्ते वेदान्तावलम्बेन सासाद्यासक्ता नूनमेव वेदितव्याः ॥

इदानीं पूर्वोक्तरीत्या ब्रह्मनिरूपणे बाधबाहुल्याद्यत्परमार्थं परमार्थज्ञान्याचार्यकृतं तदुच्यते ॥

तत्र परमार्थज्ञान्यार्यबाहुल्येऽपि तच्छेषावतारश्रीरामानुजाचार्यकृतव्याससूत्रश्रीभाष्यगीताभाष्ययोः च्छास्त्रोदितवाक्यजालयुक्तियुक्तं तदस्ति ॥ तत्रापि प्रोक्ताचार्यज्ञानान्तःप्रेरकश्रीपरब्रह्मनिराकृतिप्रत्यक्षपुरुषोत्तम-ज्ञानन्दस्वामिचरणैरुद्धवाध्वसम्पोषकैः कारितसत्सङ्गिजीवनहरिवाक्यसुधासिन्ध्वोर्ब्रह्मस्वरूपनिरूपणं यदस्ति तस्यैव हितकारित्वात्तदनुसारेणैतदुच्यते ॥ यथा सर्वशास्त्रश्रुतिस्मृतिन्यायेषु भगवतः सर्वोत्कृष्टानवधिकातिशय-वाद्यनेकगुणगणयुक्तैश्वर्याणां बाहुल्येन महत्त्वात् पूर्वोक्तगुणैर्बृंहते वर्द्धते तद्ब्रह्मेति ब्रह्मशब्दार्थवाच्यो दिव्यमूर्तिश्रीपुरुषोत्तमः धामैकदेशारूढः सन्नपि लयावस्थावस्थितक्षेत्रज्ञनिकरेषु स्वीयसङ्कुचितान्तर्यामिशक्त्या प्रलये यथा वर्तते तथा त्यवस्थितसर्वक्षेत्रज्ञवृन्दानां यथाकर्मफलप्रदानाय विकसितान्तर्यामिशक्त्या बहुत्वं प्राप्यान्तर्यामिशब्दवाच्योऽस्ति ॥ कावयवरहितदिव्यावयवयुक्तस्वदिव्यमूर्तिस्फुरिततेजःपुञ्जाच्छादिताङ्गत्वात्केवलात्मज्ञान्यदृश्याङ्गोऽपि कीभक्तियुक्तभगवन्निष्ठज्ञानिदृश्यदिव्यमूर्तिर्मनोहरावयववान् भक्तनेत्रचकोरचन्द्रः सदादिव्याकार एव सोऽस्ति मायिकगुणानामात्मन्यभावात् तत्कृताञ्जनाभावाच्च निर्गुणनिरञ्जनादिशब्दवाच्यश्च सङ्कल्पत्वनिरतिशयज्ञानैश्वर्यतेजोबल-नन्तकल्याणकारिदिव्यनित्यगुणयोगात् सगुणोऽप्यस्ति ॥ ततो जीवेश्वरादीनामुत्पत्तेरुक्तौ सत्यां भगवद्गीतादिभणिता-सनातनत्वनित्यत्वध्रुवत्वानादिमायासम्बन्धित्वादीनि जीवेश्वरविशेषणानि न युज्येरन् ॥ अतो जीवेशब्रह्ममायापुरुषोत्तमानां मप्यनादित्वमेवास्ति ॥ तत्र जीवलक्षणानि जीवात्मनोऽल्पज्ञा अतिसूक्ष्मरूपा अनाद्यविद्या बन्धनवन्तः प्राकृतगुणवन्तः नादिकर्मणा प्राकृतज्ञानसङ्कोचविकाशप्राप्तिमन्तः कालमायाकर्माधीना उत्पत्त्यवस्थायामन्तर्यामिणा स्वकर्मानुगुणं प्राकृतदेहं : प्रलयकालेऽनादिकारणदेहेन सह प्रकृतौ लीनताभाजः क्षीरघृतकाष्ठान्तःस्थाग्नितिलतैलवद्दैवादिदेहान् व्याप्य भाजस्तत्तद्देहाभिमानिनस्तदुचितकर्माणि कुर्वाणास्तदगुणसुखदुःखोपभोगरूपसंसारप्रवाहमामोक्षं प्राप्नुवन्तोऽच्छेद्यादिधर्मिणः णाविनाशिनः क्षेत्रज्ञसंज्ञाः सन्ति ॥ तत्र श्रुतिस्मृतयः —

ज्ञाज्ञौ द्वावजावीशानीशाविति ॥

वालाग्रशतभागस्य शतधा कल्पितस्य च ॥ भागो जीवः स विज्ञेयः इति ॥

तिलेषुतैलं दधनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः ॥

एवमेवात्मात्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति ॥ इति ॥

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान इति ॥ अजो ह्येको जुषमाणोऽनुशेते ॥ इति ॥

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ॥ इति ॥

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ॥ एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ इति ॥

स्थूलादिदेहत्रितयमानखादाशिखं च यः व्याप्येन्द्रियान्तःकरणैः करोति विविधाः क्रियाः ॥ इति ॥

अजो नित्यः शाश्वतश्च निरंशश्च प्रकाशकः सोऽच्छेद्यादिगुणो ज्ञेयो जीवात्मावर्णितः स मे ॥ इति ॥

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ॥ इति ॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ॥ नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ इति ॥

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ॥

तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ इति ॥

योजागरे बहिरनुक्षणधर्मिणोऽर्थान् भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् ॥

स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयान् त्रिगुणवृत्तिदृगिन्द्रियेश इति ॥

जाग्रत्स्वप्नसुषुप्तं च गुणतो बुद्धिवृत्तयः ॥ तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥ इति ॥

भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया ॥ लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः ॥ इति ॥

देही नित्यमवध्योऽयं देहे सर्वस्येति ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुरा इति ॥

अनाद्यविद्यायुक्तस्य पुरुषस्य ॥ इति ॥ बन्धोऽस्याविद्ययानादिरिति पञ्चरात्रे ॥

अनादिकालतो जीवो मायया चरिवेष्टितः ॥ अनुग्रहाद्धरेरेव मुच्यते नात्र संशयः ॥ इति ॥

अथेश्वरलक्षणानि —

ईश्वरात्मानो विराडादिशरीरत्रयवन्त उत्पत्तिकाले चतुर्दशलोकयुक्तब्रह्माण्डरूपदेहान् व्याप्य स्थिताः ॥ ब्रह्माण्डस्थसर्ववस्तुज्ञानवत्त्वात्सर्वज्ञाः प्राकृतप्रलये प्रकृतिप्रविष्टा व्याकृतदेहेन सह प्रकृतिमनुशायिनः स्वरूपेणाविनाशिनो ब्रह्माण्डाख्यक्षेत्रज्ञानयुक्तत्वात्क्षेत्रज्ञसंज्ञाः सन्ति ॥ तत्र श्रुतिस्मृतयः —

पुरुष एवेदं सर्वमित्यादि पुरुषसूक्तश्रुतयः ॥

देहत्रये विराडादौ व्याप्यौत्पत्तिस्थितिक्षयान् ॥ करोति जगतां यस्तु सर्वज्ञो ज्ञेय ईश्वरः ॥ इति ॥

आण्डकोशशरीरेऽस्मिन् सप्तावरणसंयुते ॥ वैराजः पुरुषो योऽसौ भगवान् ॥ इति ॥

एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया ॥ मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम् ॥ इति ॥

एतावानेव सङ्ख्यातो ब्रह्मणः सगुणः सहसन्निवेशो मया प्रोक्त इति ॥

ततस्तेनोनुविद्धेभ्यो युक्तेभ्योण्डमचेतन उत्थितं पुरुषो यस्मादुत्तिष्ठतदौ विराडिति ॥

एतदण्डं विशेषाख्यमित्यादि ॥ यत्र लोकवितानोऽयंरूपं भगवतो हरेरिति —

भूर्लोकः कल्पितः पश्चाद्भुवर्लोकोऽस्य नाभितः ॥ स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ॥ इति॥

क्ष्माम्भोऽनलानिलवियन्मनइन्द्रियार्थभूतादिभिः परिवृतं प्रतिसञ्जिहीर्षुः ॥

अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनुभूय परः स्वयम्भूः ॥ इति ॥

श्रीमद्भागवतद्वितीयस्कन्धे तस्य समग्रं निरूपणमस्ति ॥ एवं प्रतिब्रह्माण्डमीश्वरात्मानो ज्ञेयाः ॥

अजत्वाविनाशित्वादयस्तद्धर्मा जीवात्मनामिव ज्ञातव्याः ॥

अथ प्रकृतिशब्दवाच्याया अनादेर्मायाया लक्षणानि —

सा च गुणमय्यजाख्या त्रिविधा ॥ तत्र जीवावरणकारिण्यविद्यारूपा ईश्वरावरणकारिणी प्रधानरूपा पुरुषोत्तमप्रेरिताक्षरपुरुषेक्षणेन जीवेश्वरदेहोत्पत्तिहेतुर्मूलप्रकृतिरूपेति ॥ तत्र श्रुतिस्मृतयः —

विकारजननीं मायामष्टरूपामजां ध्रुवाम् ॥ अस्मान्मायी सृजते विश्वमेतत् ॥

अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्-
जोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ इति ॥

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ॥ इति ॥

सकार्यमूलप्रकृतिः सकालाक्षरतेजसि ॥ प्रकाशेऽकस्य रात्रीव तिरोभूता तदाभवत् ॥

सिसृक्षाऽथाऽभवत्तस्य ब्रह्माण्डानां यदा तदा ॥ सकालाविर्बभूवादौ महामाया ततो हि सा ॥

तां कालशक्तिमादाय वासुदेवोऽक्षरात्मना ॥ सिसृक्षयैक्षत यदा सा चुक्षोभ तदैव हि ॥ इति ॥

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ॥ षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ इति ॥

सा वा एतस्य सन्द्रष्टुः शक्तिः सदसदात्मिका ॥ मायानाममहाभाग ययेदं निर्ममे विभुः ॥

यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ॥ प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥ इति ॥

जन्मक्षेत्रं च जीवानामनादिश्चिज्जडात्मिका ॥ तमोमयी हरेः शक्तिः कार्यकारणरूपिणी ॥

गुणत्रयात्मिका चाजा या चोक्ता ज्ञानसंज्ञिका ॥ सा मायेति त्वया ज्ञेया यां तरन्त्याश्रिता हरेः ॥ इति ॥

अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् ॥ इति ॥ अनाद्यविद्योपहतात्मसंविदः ॥ इति ॥

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ॥ इति ॥

अथाक्षरब्रह्मलक्षणानि —

अक्षरब्रह्मसंज्ञास्त्रयः सन्ति ॥ तत्राद्यं प्रकृतिसम्बन्धरहितपुरुषोत्तमस्य निवासभूतमक्षरब्रह्माभिधं ब्रह्मपुरं धाम बोध्यम् ॥ तीयं पुरुषोत्तमोपासकं तद्धामस्थं मुक्तकोटिवृन्दं च ॥ तृतीयः पुरुषोत्तमेच्छयात्र ब्रह्माण्डोत्पादकः प्रकृत्यधिष्ठाताक्षरपुरुषश्च ॥ प्रमाणभूताः श्रुतिस्मृतयः —

दिव्ये ब्रह्मपुरे ह्येष सव्योमा(म्ना)ऽऽत्मा प्रतिष्ठितः ॥ इति ॥ एतत्सत्तं ब्रह्मपुरम् ॥ इति ॥ अक्षरे परमे व्योमन्यस्मिन्देवा विश्वेनिषेदुः ॥ इति ॥

दिव्ये ब्रह्मपुरे विरजं निष्कलम् ॥ इति ॥ तस्यै(यो)ष आत्मा विशते ब्रह्मधाम ॥ इति ॥ यदर्चिमद्यदणुभ्योऽणु च ल्लोका निहिता लोकिनश्च तदेतदक्षरं ब्रह्म ॥ इति ॥ देवा(व)ब्रह्मणो रूपे मूर्तं चेति ॥ यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो रागाः ॥ इति ॥

यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ इति ॥

मायापरैत्यभिमुखे च विलज्जमाना तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति ॥

यद्विदुरिति॰विलज्जमानया यस्य स्थातुमीक्षापथेऽमुयेति ॥

तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् ॥ विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ॥ इति ॥

स्वधामनि ब्रह्मणि रंस्यते नमः ॥ इति ॥ ब्रह्माख्यं धाम ते येऽतिशान्ताः संन्यासिनोऽमलाः ॥ इति ॥

बहवो ज्ञानतपसा युता मद्भावमागताः ॥ इति ॥ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥

सर्गेऽपि नोपजायन्ते प्रलयेन व्यथन्ति च ॥ इति ॥ गच्छन्त्यमूढाः पदमव्ययं तत् ॥ इति ॥

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ॥ स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ इति ॥

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ॥ मद्भक्तिं लभते पराम् इति ॥

तथा स्कान्दे च —

अक्षराख्या: पुमांसस्ते स्वतन्त्राश्च कालमायाभयोज्झिता: इति ॥

तथा भागवते च —

न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिता: ॥ इति ॥

नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृता: ॥ कृष्णं च तत्र छन्दोभि: स्तूयमानं सुविस्मिता: ॥ इति ॥

इत्थं हरिधाममुक्तवृन्दयोर्निरूपणमुक्त्वा इदानीमक्षरब्रह्माभिधपुरुषनिरूपणमाह —

जहात्येनां भुक्तभोगामजोऽन्य: इति ॥

अनादिरात्मा पुरुषो निर्गुण: प्रकृते: पर: ॥ प्रत्यग्धामा स्वयञ्ज्योतिर्विश्वं येन समन्वितम् ॥

स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभु: ॥ मदिच्छयैवोपगतामभ्यपद्यत लीलया ॥ इति ॥

त्वत्त: पुमान् समधिगम्य यया स्ववीर्यं धत्ते ॥ इति ॥

सा वा एतस्य सन्द्रष्टु: शक्ति: सदसदात्मिका ॥ मायानामेति ॥

नघटत उद्धव: प्रकृतिपूरुषयोरजयो: ॥ इति ॥

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि इति ॥ स्कान्दे च —

सिसृक्षयाऽथाभवत्तस्य ब्रह्माण्डानां यदा तदा ॥ स कालाविर्बभूवादौ महामाया ततो हि सा ॥

तां कालशक्तिमादाय वासुदेवोऽक्षरात्मना ॥ सिसृक्षयैक्षत यदा सा चुक्षोभ तदैव हि ॥ इति ॥

अथ पुरुषोत्तमस्वरूपनिरूपणमाह —

य: पुरुषोत्तमो नारायणहरिकृष्णादिनामा सनातनपुरुषाकृति: जीवेश्वरमायाकालब्रह्मणां नियन्ता ॥ तेभ्य: स्वरूपस्वभावादिभि: श्रेष्ठस्तदुपास्यश्च ब्रह्मपुरस्थानस्थ: स्वतोऽन्यत्रान्तर्यामिशक्त्या व्याप्तोऽनवधिकातिशयसर्वज्ञत्वाद्य-प्राकृतगुणपणवान् प्राकृतगुणहीनत्वान्निर्गुणश्च स्वतन्त्र: स्वप्रकाशश्च स परमात्मपरमेश्वरशब्द-वाच्योऽस्ति ॥

तत्र प्रमाणभूता: श्रुतिस्मृतय: —

परात्परतरो ब्रह्म तत्परात्परतो हरि: ॥ इति ॥ अथाहपुरुषो वै नारायण: इति ॥

आकृष्णेन रजसा वर्तमानो निवेशयन् इति ॥ आत्मैवेदमग्र आसीत् पुरुषविध इति ॥ य आत्मानमन्तरोयतीति ॥ य: सर्वभूतान्यन्तरोऽयमयतीति ॥ प्रकृतिमन्तरोऽयमयतीति ॥ कालमन्तरोयमयतीति ॥ एष ते आत्मान्तर्याम्यमृत इति ॥ स व अयमात्मा सर्वस्य वशी सर्वस्येशान: ॥ सर्वस्याधिपति: ॥ सर्वमिदं प्रशास्ति ॥ यदिदं किञ्च ॥ स न साधुना कर्मणा भूयान् एवासाधुनाकनीयानिति ॥ अक्षरात्परत: पर इति ॥ न तत्समश्चाभ्यधिकश्च दृश्यते इति ॥

तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् ॥ पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम् ॥ इति ॥

न तस्य कश्चित्पतिरस्ति लोके न चेशितेति ॥ वृक इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ इति ॥

योऽक्षरे सञ्चरतीति ॥ य: सर्वज्ञ: सर्वविद्यस्यैषमहिमा भुवि दिव्ये ब्रह्मपुरे ह्येष स व्योम्न्यात्मा प्रतिष्ठित इति ॥

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ॥

तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्ति: शाश्वती नेतरेषाम् ॥ इति ॥

सर्वभूतान्तरात्मा सदा जनानां हृदये सन्निविष्ट इति ॥

निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः ॥

आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा ॥ इति ॥

यः कालकालो गुणीति ॥ साक्षीचेता केवलो निर्गुणश्च इति ॥ यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः ॥ इति ॥

अत्रायं पुरुषः स्वयञ्ज्योतिरिति यत्र देवः क्रतुभिर्भूतभावनः स्वयं विभूत्या विरजःप्रकाशते इति ॥

सत्यसङ्कल्पो महारजनं वास इति ॥ अपहतपाप्मा विजरो विमृत्युर्विविजिघत्सोऽपिपासस्सत्यकामः सप्तसङ्कल्प इति ॥

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ इति ॥

प्रकृतिपुरुषयोः परस्यशन्नस्तनोतु चरणः पुरुषोत्तमस्येति ॥ यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ॥ इति ॥

नारायणपरा वेदा नारायणपरा मखा इति ॥ हरिर्हि साक्षाद्भगवत्त्वाच्छरीरिणामात्मा झषाणामिव तोयमीप्सितम् ॥ इति ॥

शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः ॥ हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् ॥ इति ॥

पुरुषविधोऽन्वयोऽत्रचरमोऽन्नमयादिषु यः ॥ इति ॥ यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ॥ इति ॥

त्वमादिदेवः पुरुषः पुराण इति ॥ स वै किलायं पुरुषः पुरातन इति ॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ॥ इति ॥

स्कान्दे —

वासुदेवः परब्रह्म (व)हत्यक्षरधामनि ॥ आदावेकोद्वितीयोभून्निर्गुणो दिव्यविग्रहः ॥

नारायणो वासुदेवः स्वतन्त्रः स्वप्रकाशकः ॥ आनन्ददिव्यमूर्तिश्च विष्णुः श्रीकृष्णश्चाच्युतोऽव्ययः ॥

सर्वत्रैवान्वितः शक्त्या व्यतिरिक्तः स्वतः स्थितः ॥ नियन्ता कालमायादेः सर्वकारणकारणम् ॥

परमात्मेति यत्प्राहुस्तत्परं ब्रह्म कथ्यते ॥ उपासनीयं सर्वेषामेतदेव मुमुक्षताम् ॥

स्वतन्त्रः सत्यसङ्कल्पः सर्वकर्मफलप्रदः ॥ अन्तर्यामी सर्वशक्तिसेवितः परमेश्वरः ॥ इति ॥

ये सत्यशौदाचयो भागवतोक्तास्तस्य गुणास्तेऽत्र बोध्याः ॥

वायुपुराणे च —

सर्वज्ञतातृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तकृष्टिः ॥ अनन्तशक्तिश्च विभोर्विभुज्ञा षडाहुरङ्गानि महेश्वरस्य ॥ इति ॥

भागवते च —

मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् ॥ नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ॥

अव्ययस्यास्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ इति ॥

विष्णुपुराणे च —

सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः ॥ स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु ॥

सगुणो निर्गुणो विष्णुर्ज्ञानगम्यो ह्यसौ स्मृतः ॥ न हि तस्य गुणाः सर्वे सर्वैस्मुनिगणैरपि ॥

वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः ॥ इति ॥

मार्कण्डेये च —

एका मूर्तिरनिर्देश्या शुक्लां पश्यन्ति तां बुधाः ॥ ज्वालामालोपरुद्धाङ्गी निष्ठा सा योगिनां परा ॥

दूरस्था चान्तिकस्था च विज्ञेया सा गुणातिगा ॥ वासुदेवाभिधानासौ निर्ममत्वेन दृश्यते ॥

इति सत्यः स्वयञ्ज्योतिरजः परेश इति ॥ **गीतायाम् —**

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥ इति ॥

एकान्तिकभक्तात्मज्ञानिदृश्यत्वे केवलात्मज्ञान्यदृश्यत्वे च प्रमाणानि **ब्रह्मवैवर्ते स्कान्दे च —**

ददर्शकृष्णं ग्रीष्मस्य कोटिसूर्यसमप्रभम् ॥ द्विभुजं मुरलीहस्तं किशोरं गोपवेशकम् ॥

परमात्मानमीशं च भक्तानुग्रहविग्रहम् ॥ स्वेच्छामयं परं ब्रह्म परिपूर्णतमं विभुम् ॥

ब्रह्मविष्णुशिवाद्यैश्च स्तुतं मुनिगणैर्नुतम् ॥ इति ॥

सहोदितार्कायुतवद्भास्वरे तत्र तेजसि ॥ वासुदेवं ददर्शासौ रम्यदिव्यासिताकृतिम् ॥

कृष्णस्यानुग्रहो यस्मिन् स तेजसि तमीक्षते ॥ केवलं तेज एवान्ये पश्यन्ति न तु तं मुने ॥ इति ॥

पूर्वोक्तैः श्रुतिस्मृतिवाक्यैर्निरूपितः पुरुषोत्तमनारायणोऽसङ्ख्यजीवकल्याणाय दयया कृत्वा रामकृष्णाद्यवतारैरत्र प्रादुर्भवति ॥ ये जनास्तदवतारान् ज्ञात्वैकान्तभावेन भजन्ति ते एव गुणमयीं मायां तीर्त्वा मरणकाले सच्चिदानन्दब्रह्ममयीं तनुं प्राप्य स्वधामस्थस्य हरेः सेवायां तिष्ठन्तीति समस्तसच्छास्त्रसिद्धान्तोऽस्ति ॥

तथा च श्रुतिस्मृतयः —

दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ॥ स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ इति ॥

ब्राह्मीं संविशते तनुम् इति ॥ गुणापाये ब्रह्मशरीरमेति ॥ इति ॥

प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् ॥ आरब्धकर्मनिर्माणो न्यपतत्पाञ्चभौतिकः ॥ इति ॥

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ॥ त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ इत्याद्याः ॥

नारायणमुनिं नत्वा कृता व्याख्यार्थदीपिका ॥ वेदस्तुतेर्हि गोपालानन्देन तस्य तुष्टये ॥१॥

यथाश्रुत्यर्थव्याख्यानात्स्वपदानां च वर्णनात् ॥ टीका भाष्यमिति द्वे स्तः संज्ञे ह्यस्य विभाव्यताम् ॥२॥

॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने वेदस्तुतिर्नाम सप्ताशीतितमोऽध्यायः ॥८७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

'अशेषसमाम्नायपुराणोपनिषद्रसः' इति यदुक्तं कोऽसौ समाम्नायादीनां रसः, यः श्रुतिगीत्या समुद्धृतः इत्यपेक्षायाम् —

'आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥'

इत्युक्तरीत्या जगदुदयविभवलयलीलः सर्वान्तरात्मा बन्धमोक्षदो भगवानेवोपास्य इत्येष एवेति वक्तुं स्रष्टृत्वाद्युपयुक्तगुणैर्भगवन्तं विशिंषंस्तद्ध्यानं विधत्ते ॥ य इति ॥ यः, अस्य जगतः, आदिमध्यनिधने सृष्टिस्थितिलये निमित्ते, उत्प्रेक्षकः 'तदैक्षत बहु स्याम्' इत्युक्तविधेक्षिता । यच्छब्दानां 'तं कैवल्यनिरस्तयोनिं' इत्यनेन सम्बन्धः । यश्च अव्यक्तजीवयोः प्रकृतिपुरुषयोः कारणावस्थयोरीश्वरोऽन्तः प्रविश्य नियन्ता, अनेन कारणावस्थायां सूक्ष्मचिदचिद्वैशिष्ट्यं तस्यैवोपादानत्वं तदुपयुक्तं सर्वशक्तित्वं च फलितम् । उत्प्रेक्षक इत्यनेन निमित्तत्वं तदुपयुक्तं सर्वज्ञत्वं चापि फलितम् । यश्च इदं महदादिपृथिव्यन्तसमष्टितत्त्वजातं सृष्ट्वा, ऋषिणा जीवेन, अनुप्रविश्य, वैराजपुरुषे तज्जीवद्वाराऽनुप्रवेशं कृत्वेत्यर्थः । पुरःशरीराणि, चक्रे निर्ममे । ततः, ताः पुरः,

शास्ति नियमयति । पुरशब्दोऽत्र सजीवशरीरपरः । 'ऋषिणा चक्रे पुरः संहिताः' इति पाठान्तरं तदा, पुरः प्रथमम्, ऋषिणा चतुर्मुखेन, संहिता वेदसंहिताः, चक्रे प्रावर्तयदित्यर्थः । अनेन हितकृत्त्वमुक्तम् । शास्त्रप्रवर्तनं हि हितार्थम् । अनुशयो भुक्तावशिष्टं कर्म सोऽस्यास्तीत्यनुशयी कर्मवश्यो जीवः, यं सम्पद्य, अजां जहाति प्रकृतिसम्बन्धं त्यजति । आविर्भूतगुणाष्टकः सन्मुक्तो भवतीत्यर्थः । तथा च श्रूयते —

'परं ज्योतिरुपसम्पद्य स्वेन रूपेण अभिनिष्पद्यते ॥' इति । यथायमजां जहाति तत्र दृष्टान्तः, सुप्तः पक्षी, कुलायं यथेति । यथा शकुनिः नीडे कंचित्कालं सुप्तः सन्नपि, काले तं विरहयन्नुड्डीयते तद्वदजायां स्थितोऽनुशयी जीवो यं सम्पद्य तां जहातीत्यर्थः । कैवल्यनिरस्तयोनिं संसारिणां मोक्षप्रदानेन निरस्ता योनिर्योनिप्रभवदुःखं येन तं, न विद्यते भयं यस्मात्तं, हरिमार्तार्तिहरं, तं भगवन्तम्, अजस्रं नित्यं, ध्यायेत् नित्यं स्मरेत् ।

'भक्तिर्ज्ञानाय सर्वज्ञे मोक्षायाधोक्षजे नृप । कर्मकाण्डफलप्राप्त्यै ब्रह्मणो भक्तिरिष्यते ॥' इति वायुपुराणोक्तेः ॥५१॥

श्रीस्वामिबोधितधिया रचिता मयैषा वेदस्तुतेर्निजपथानुपथं सदिष्टा ।
व्याख्या विलोक्य मयि तां कलभाषिणीशाः कृत्वा कृपां मम हृदीश्वरमीरयन्तु ॥१॥

॥ इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनु-भगवत्प्रसादविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धे सप्ताशीतितमोऽध्यायः ॥८७॥

योगिरामानुजाचार्यकृतसरला व्याख्या

समस्तवेदस्मृत्यर्थं सङ्गृह्यानुस्मारयति-योस्येति । यः परमपुरुषः अस्य विश्वस्य आदिमध्यनिधने सृष्टिस्थितिप्रलयेषु करणीयेषु उत्प्रेक्षकः सङ्कल्परूपेक्षणकारी ।

'स ऐक्षत । बहु स्यां प्रजायेये'ति श्रुतेः । अनेन जगत्कारणत्वमुक्तम् । ननु प्रकृतिपुरुषौ हि जगदुपादाननिमित्तकारणीभूतौ कथं भगवतः कारणत्वमुच्यते, इति चेन्न । तयोरपि तत एवोद्भूतत्वात् मूलकारणं स एवेत्याह-योऽव्यक्तजीवेश्वरः । इति अन्तःप्रवेशनियमने दर्शयति-यः इदं विश्वं सृष्ट्वा ऋषिणा जीवेनानुप्रविश्य पुरः शरीराणि पृथिव्यादीनि क्षेत्राणि चक्रे । 'यस्य पृथिवी शरीरम् । यस्यापः शरीरमि'त्यादिश्रुतेः ॥

ततः ताः पृथिव्यादिक्षेत्राणि शरीराणीति यावत् । शास्ति नियमयति । 'यः पृथिवीमन्तरो यमयती'ति श्रुतेः । अनुशयी शयान इव शरीरात्मविवेकराहित्येन शरीररूपप्रकृतिपरिष्वक्तो जीवः

'अजो ह्येको जुषमाणो नु शेते' इति श्रुतेः । यं सम्पद्य । यं परमात्मानं शरणं गत्वा अजां मायां जहाति । 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।' इति वचनात् । मायां कथं त्यजतीत्यत आह-सुप्तः पुरुषः कुलायं गृहमिव । यथा गृहे सुप्तः पुरुषः पश्यतां अत्यक्तगृह इव भाति । स तु परित्यक्तगृहाभिमानी एव । एवं भगवत्प्रपन्नाः अपरित्यक्तगृहाद्यभिमाना इव दृश्यन्ते । ते तु जीवन्मुक्तत्वेन परित्यक्तगृहाद्यभिमाना एव । अभिमानत्याग एव हि त्यागः । यथा राज्ये स्थितस्यापि अभिमानत्यागेन जनकराज्यव्यवहारः तद्वत् । कैवल्यनिरस्तयोनिः । कैवल्येन प्रकृतिपुरुषविलक्षणस्वाप्रच्युतस्वभावेन निरस्ता तिरस्कृता योनिः कारणम् अविद्या येन तम् । अभयम् । नास्ति भयं यस्मादभयम् । स्वाश्रितानां भयनिवर्तकं हरिं स्वाश्रितानामशेषपापहारिणं तं भगवन्तम् अजस्रं सर्वदा ध्यायेत् ॥५०॥

योगिरामानुजार्येण श्रीवृन्दावनवासिना । व्याख्या वेदस्तुतेरेषा श्रीकृष्णचरणेऽर्पिता ॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे योगिरामानुजाचार्यकृतसरलाव्याख्यायां सप्ताशीतितमोऽध्यायः ॥८७॥

॥ श्रीकृष्णाय नमः ॥

श्रीराधारमणदासगोस्वामिकृतदीपिकादीपिनी

सङ्गृह्य सङ्क्षिप्य । अनुशायिनामनुशय उपाधिस्तद्वताम् । अनेन उत्प्रेक्षक इति विशेषणेन एतेषु जन्मादिकर्मसु। अनेन जन्मादिषु वर्तनेन तयोरपि प्रकृतिपुरुषयोरपि तत एव हरेरेव यदर्थं जीवार्थम् । ऋच्छति कार्यं देहादिकमहमिति जानाति अभिमन्यत इति ऋषिर्जीवस्तेन सह सर्वासां श्रुतीनां शिरोरत्नतुल्याभिरुपनिषद्भिर्नीराजिते पदाम्बुजे यस्य तम्। कर्मिणो भजनेन भोगप्रदं नम्रस्य योगप्रदम् ।

'ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।' इति गीतोक्तेः ॥५०॥

गोवर्द्धनोपलालस्य पुत्रः श्रुत्यर्थसम्भवम् । राधारमणदासोऽयं व्याख्यानमकरोन्मुदा ॥

कृष्णगोविन्दमित्रेण राधारमणसेविना । राधारमणदासेन दीपिकादीपनं कृतम् ॥

श्रीकृष्णाय नमः ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे श्रुतिस्तुतौ भावार्थदीपिकाया व्याख्याने दीपिकादीपने सप्ताशीतितमोऽध्यायः ॥८७॥

श्रीकविचूडामणिचक्रवर्तिकृताऽन्वयबोधिनी

समस्तवेदस्तुत्यर्थं सङ्गृह्यानुस्मारयति-योऽस्योत्प्रेक्षकेति । तं हरिमजस्रं ध्यायेत् । कोऽसौ । हरिस्तमाह-योऽस्योत्प्रेक्षकः अस्य विश्वस्य उत्प्रेक्षकः जीवानामेवमिदं करिष्यामीत्यालोचकस्तम् । इदं सृष्ट्वा ऋषिणा जीवेन सह अदनुप्रविश्य पुरः शरीराणि चक्रे । ताः पुरः शास्ति । तस्य भोगं ददात्पालयति यस्तम् । तेषां भोगान् ददत् परिपालयति ।

अनुशयी जीवः यं सम्पद्य प्राप्य अजामविद्यां जहाति तम् । अत्र दृष्टान्तः-सुप्तः कुलायं यथा ।

यथा सुप्तः पुरुषः कुलायं शरीरं न पश्यति एवं जीवन्मुक्तमप्यन्ये देहवन्तं पश्यन्ति स तु न किञ्चित् पश्यतीति कैवल्यनिरस्तयोनिं कैवल्येनाप्रच्युतस्वरूपावस्थानेन निरस्ता तिरस्कृता योनिश्रमूलकारणं माया येन तम् । अभयं भयनिवर्तकम्। एवम्भूतं हरिं ध्यायेदिति । यास्योत्प्रेक्षक इत्यादिश्रुतिः —

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तमीश्वराणां परमं महेश्वरं तद्देवानां परमं तु दैवतम्॥

तमात्मस्थं ये तु पश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥" इति सुगमोऽर्थः । सर्वेश्वरपरेयम् । ऋषिणेति सृष्टिकार्ये सोऽहमिति दर्शनात् । ऋषिर्जीवः । तथा च श्रुतिः —

"अत्मैवेदमग्र आसीत्पुरुषविधः । सोऽनु वीक्ष्य नान्यदात्मनोऽपश्यत्सोहमस्मीत्यग्रे
व्याहरत्ततोऽहंनामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र उक्त्वाऽथान्यान्नाम प्रब्रूत ॥" इति ॥

अर्थश्च — अग्रे सृष्टेः कार्ये प्रथमम्पुरुषविधः पुरुषाकारो जीवात्मा एवासीत् । स अनु अनन्तरं सर्वतो वीक्ष्यात्मनः स्वस्मादन्यन्नापश्यत्सोऽहमस्मीति व्याहरत् उक्तवान् । ततः कारणादहंनामाऽभवत् । तस्मात्कारणादेतर्हीदानीमपि केनाप्यामन्त्रितः सन्नग्रे प्रथमं अहमपि त्वेवमुक्त्वाऽथानन्तरमन्यन्नामा ब्रूते । कस्त्वमित्युक्तः अहममुकोऽस्मीति वक्ति ।

सुप्तः कुलायं यथेत्यत्र श्रुतिः —

"तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवायं पुरुषः

प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमि"ति ।

सुगमोऽर्थः । स सम्भोगकाले मरणकाले वा प्रिययाऽऽलिङ्गितः प्राज्ञेन सुषुप्तिसाक्षिणा विशुद्धात्मना सम्परिष्वक्तः एकीभूतः । अथ स्वामिचरणानाम्-

सर्वश्रुतिशिरोरत्ननीराजितपदाम्बुजम् । भोगयोगप्रदं वन्दे माधवं कर्मिनम्रयोः ॥५०॥

श्रीमाधवमहं वन्दे । कथम्भूतम् । सर्वश्रुतिशिरोरत्नैर्नीराजितं निर्मछनीकृतं पादाम्बुजं यस्य तम् । पुनश्च । कर्मिनम्रयोर्भोगप्रदं नम्राणां भक्तानां भक्तियोगप्रदमित्यर्थः ॥५०॥

वृन्दारण्यनिकुञ्जस्थ कविचूडामणिर्द्विजः । श्रुतिस्तुतिश्रुतिव्याख्यामकरोत्सर्वसम्मताम् ॥

ननु श्रीभगवतः तस्य श्रुतेश्च दुर्विज्ञेयमर्थं कथं ज्ञातवानसि । सत्यम् । श्रीमच्चरणारविन्ददर्शितमार्गेणेत्याह-

हरिणा श्रीधराख्येन रचितां भावदीपिकाम् । गृह्णन् भक्त्यजडोप्येसे परमार्थं न मत्सरी ॥

अन्यच्च —

यथोपदिष्टं गुरुणा बुद्धौ श्रीनन्दसूनुना । तथैव कृतवानस्मि न मे दोषा नु वा गुणाः ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे श्रीकविचूडामणिचक्रवर्तिविरचितायाम्

अन्वयबोधिन्यां टीकायां सप्ताऽशीतितमोऽध्यायः ॥८७॥

श्रीनिवाससूरिकृततत्त्वदीपिका

समस्तवेदस्तुत्यर्थं सङ्गृह्यानुस्मरति-यस्यात्मैक्षक इति । तं हरिम् । अजस्रं ध्यायेदिति । तं कम् ? यः अस्य विश्वस्य आदिमध्यनिधने उत्पत्तिस्थितिसंहारेषु आत्मैक्षकः स्वयमेवात्मना साक्षात्कर्ता निमित्तान्तरानपेक्षः । 'तदैक्षत तत्तेजोऽसृजत ।' इत्यादिश्रुतेः । यद्वा । आत्मैक्षकः आत्मनां शुभाशुभसाक्षी । तथा चोक्तमष्टमे गजेन्द्रेण —

'क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे । पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥' इति ।

ननु प्रकृतिपुरुषयोः परस्पराध्यासाज्जगदुत्पत्तिं वदन्ति साङ्ख्या इति तत्राह-योऽव्यक्तजीवेश्वरः प्रकृतिपुरुषयोरपि नियन्ता । हेत्वन्तरमाह-यः ऋषिणा चतुर्मुखेन सह पुरः सर्वं संहिताश्चक्रे प्रावर्तयदित्यर्थः । ननु अन्येऽपि ध्येया उक्ताः । किमयं हरिरेव ध्येय इत्यत आह-यं सम्पद्य ज्ञात्वा गत्यर्थास्ते ज्ञानार्था इत्युक्तेः । अथवा यं सम्पद्य शरणं प्राप्य अनुशयी कर्मवश्यो जीवः अजां स्थूलसूक्ष्मरूपां प्रकृतिं जहाति त्यजति । कथम् । सुप्तः कुलायं यथेति । यथा सुषुप्तौ जाग्रत्स्वप्नानुभूतसुखदुःखाभावादानन्दप्राप्तिस्तद्वदित्यर्थः । तदेवाह-कैवल्यनिरस्तयोनिमिति । संसारिणां मोक्षप्रदानेन निरस्ता योनिः संसारो येन तमिति । न हि अन्यस्य कस्यचिदपि मोक्षप्रदाने शक्तिरस्ति । कुतः इति चेत्तेषामविद्यान्तर्गतत्वात् तथा श्रीशौनकेनोक्तम् —

'आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः । प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥
यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः ॥' इति ॥

अतः स एव मोक्षप्रदः तदुक्तं देवैर्मुचुकुन्दं प्रति —

'वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः । एक एवेश्वरस्तस्य भगवान् विष्णुरव्ययः ॥' इति ॥

'आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥'

इति च व्यासः अतः स एव ध्येयो मोक्षप्रदाता चेति तमेव हि ध्यायेदीति शुकाचार्याभिप्राय इति । किञ्चात्र शुकोक्तयोरुपक्रमोपसंहाररूपयोरपि श्लोकयोस्तत्त्वत्रयमेव प्रतीयते न क्वचित्सन्मात्रमिति । तथा हि उपक्रमे तावत् द्धीन्द्रियमनःप्राणानित्यनेन पदेन प्रकृतेः स्वरूपमुक्तम् । जनानामिति जीवानां स्वरूपं प्रभुरितीश्वरस्य चेति ।

न हि तदितराभावे तस्य प्रभुत्वं सम्भवति। उपसंहारेऽपि योव्यक्तजीवेश्वर इत्यनेनैवोक्तमिति। अतः सन्मात्रस्य ब्रह्मणः प्रमाणाभावात् चिदचिदीश्वराणां स्वरूपभेदे सामानाधिकरण्येन चाभेदे प्रमाणसद्भावाच्च व्यासपराशरादीनां चिदचिच्छरीरकं तद्विलक्षणमेव परं ब्रह्मेत्यभिमतम्। यत्तु क्वचित् श्रुतौ सन्मात्रं श्रूयते तत्तु मात्रचाजडांशं व्यावर्त्यते। ब्रह्मणि न पुनः सर्वज्ञत्वसर्वशक्तित्वादिकमपि। 'स्वाभाविकी ज्ञानबलक्रिया चे'ति श्रवणात्। अतः सर्वं निरवद्यमिति —

"चिदचिव्द्यापकं ब्रह्म तव्द्याप्यगुणवर्जितम्। हेयैर्गुणैश्च राहित्यान्निर्गुणं हि तदुच्यते ॥
अप्रमेयमनाद्यन्तमप्राकृतगुणार्णवम्। श्रुतिसूत्रपुराणादौ निश्चितं मुनिभिः स्फुटम् ॥" तथा श्रीभाष्ये समुदाहृतम्—
"अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत्। अहं बुद्ध्या परागर्वात् प्रत्यगर्थो भिद्यते ॥
निरस्ताखिलदुःखोऽहमनन्तानन्दभाक् स्वराट्। भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते ॥
अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति। अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः ॥
मयि नष्टेऽपि मत्तोऽन्या काचिज्ज्ञप्तिरवस्थिता। इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥
स्वससम्बन्धितया ह्यस्य सत्तापि ज्ञप्तितादि च। स्वसम्बन्धवियोगे तु ज्ञप्तिरेव न सिध्यति ॥
छेत्तुश्छेद्यस्य चाभावे छेदनादेरसिद्धिवत्। अतोऽहमर्थो ज्ञातैव प्रत्यगात्मेति निश्चितम् ॥
विज्ञातारमरे केन विजानीयादिति श्रुतिः। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति च स्मृतिः ॥
ज्ञात(ज्ञेय) एवेत्यतो नात्मा ज्ञप्तिमात्रमिति स्थितिः। एवं प्रमाणैः प्रबलैर्निरस्तं मायिनिश्चितम् ॥
तत्त्वत्रयात्मकं विश्वं चिदचिच्छेषिसंयुतम्। औपाधिकं वदन्त्येके वञ्चितं तैरिदं जगत् ॥
प्रामाणिकैरतो ग्राह्यं वैदिकैर्न कदाचन ॥" इति ॥५०॥
श्रीगोवर्धनधारिणो गुणनिधेर्मूर्तेर्हि साक्षाद्धरेः श्रीमद्वेङ्कटदेशिकस्य करुणापीयूषतत्त्वार्थवित्।
श्रीरङ्गाधिपपादपद्ममधुपः श्र्यावासदासाभिधः तेनेयं रचिता हरेर्गुणयुता व्याख्या हि वेदस्तुतेः ॥
वाधूलान्वयक्षीराब्धिचन्द्रमा निष्कलङ्ककः। सोऽयं श्रीवेङ्कटाचार्यः सन्निधत्तां सदा हृदि ॥

॥ इति श्रीमद्भागवते दशमस्कन्धे श्रीगोवर्धनकृतवासश्रीवेङ्कटाचार्यदासदासेन श्रीनिवासदासेन विरचिता वेदस्तुतिव्याख्यायां सप्ताशीतितमोऽध्यायः ॥८७॥

॥ श्रीमते रामानुजाय नमः ॥

कृष्णप्रिया

जो इस जगत के सृष्टि पालन संहार के निमित्त संकल्प करने वाले है और जो जीव माया का नियमन करने वाले है और जो महदादि तत्त्व को उत्पन्न कर के चतुर्मुख जीव के द्वारा प्रवेश करके देव मनुष्यादि शरीरों को निर्माण करने वाले जो सब जीवो को नियमन करने वाले और जैसे पक्षी घोंसलेमें कुछ काल पर्यन्त शयन कर पश्चात् उसको छोड कर उड जाते है वैसे यह कर्म परवश जीव अनादि काल से माया रूपी घोंसलेमें शयन करके उपासना से जिसे प्राप्त कर माया को छोड देता है एताद्रश परब्रह्म हरि का निरन्तर ध्यान करना हि कल्याण का साधन है क्योंकि मोक्ष प्रदान करने से सर्व योनियों को निराश करनेवाले परमात्मा है। इसीसे उस के आश्रय करने से जीव को फिर संसार से भय नहीं होता ॥५०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे **सप्ताशी**तितमाध्यायस्य भाषाटीका समाप्ता ॥८७॥

★★★★★★

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ अष्टाशीतितमोऽध्यायः ॥

लोकाः	अनु.	वंश.	मि.उ.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
५०	३७	१	२	७	१३४४	४३	४१	१४२८	४४॥	४

राजोवाच

देवासुरमनुष्येषु ये भजन्त्यशिवं शिवम् । प्रायस्ते धनिनो भोजा [1]न तु लक्ष्म्याः पतिं हरिम् ॥१॥
एतद्वेदितुमिच्छामः सन्देहोऽत्रमहान् हि नः । विरुद्धशीलयोः प्रभ्वोर्विरुद्धा भजतां गतिः ॥२॥

कर्दमक्षमा

राजा, उवाच ।

देवासुरमनुष्येषु, ये, अशिवम्, शिवम्, भजन्ति, ते, प्रायः, धनिनः, भोजाः, न, तु, लक्ष्म्याः, पतिं, हरिम् ॥१॥ विरुद्धशीलयोः, भ्वोः, , भजताम्, विरुद्धा, गतिः, अत्र, हि, महान्, सन्देहः, एतत्, वेदितुम्, इच्छामः ॥२॥

श्रीधरस्वामिकृतभावार्थदीपिका

अष्टाशीतितमे विष्णुभक्तः कैवल्यमश्नुते । ततोऽर्वाग्देवभक्तस्तु विभूतिमिति वर्ण्यते ॥

हरिर्भजताम्मुक्तिद इत्युक्तमभयं ध्यायेदजस्रं हरिमिति तत्र शङ्कते-देवासुरेति । अशिवमवधीरितभोगम् भोजा भोगिनः क्ष्म्याः पतिं सर्वभोगयुक्तम् ॥१-२॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो विष्णोर्वाचामर्वाचीनानां देवानां भक्तो विभूतिमैश्वर्यमेव न तु कैवल्यम् (१) । तत्र हरिदत्तमुक्तौ । प्रायःशब्देन न वलं धनप्रदत्वमेव शिवस्य किन्तु सर्वाभीष्टप्रदत्वमपीति ध्वनितम् । एवं विष्णावपि न केवलमोक्षप्रदत्वमेव विष्णोर्भक्तेच्छानुसारेण र्पदत्वमेवेति बोध्यम् । हरिं ये भजन्ति ते धनिनो नेति योज्यम् ॥★॥ तोषिणी-एवं सर्वथा सर्वतः श्रीकृष्णस्योत्कर्षमाकर्ण्यापि दसन्तुष्टान् केवलत्रिदेवीमात्रदृष्टीन् ऐहिककामिनः शैवान् कटाक्षविषयीकुर्वन्नेव कृपया शिक्षयन् पृच्छति-देवेति द्वाभ्याम् । इति । प्राय इति प्रायिकत्वात्तयोः कदाचिद्व्यभिचारश्चेन्न तेन सन्देहापगम इति भावः । अत्र विश्वनाथः-

"निर्गुणौ विष्णुतद्भक्तौ मिथोऽवाप्तमुदौ सदा । सगुणेषु मिथः क्लेशो महेशवृकयोरिव" ॥

ब्रह्मपरमात्मभगवत्स्वरूपेषु भगवत्स्वरूपस्यैव तदुपासकस्य च श्रुतिवाक्यैरेव सर्वोत्कर्षमुक्त्वा इदानीं सार्धाध्यायेन ष्णुरुद्रेष्वपि मध्ये विष्णोरेव सर्वोत्कर्षात् सेव्यत्वमाह-ननु 'ध्यायेदजस्रं हरिम्' इति ॥ त्वं हरिभजनमेव विदधासि तदपि

---

[1] ब्रह्मत्रतु-विज. ।

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

हरिभजने दारिद्र्यमाशङ्क्य किमिति सर्वे हरमेव भजन्तीति पृच्छति-देवेति । अशिवं चिताभस्मकपालपात्रादियोगाद्बहिर्दर्शिजनैरमङ्गलत्वेन प्रतीयमानम् । लक्ष्म्याः पतिं तु भजन्तो न धनिनो नापि भोगवन्तो भवन्ति कुत इत्यर्थः ॥१॥ एतद्विरुद्धफलदातृत्वम् । अत्र विरुद्धफलदाने । विरुद्धशीलयोः श्मशानाटनभूतगणपरीतत्वादि रुद्रस्य, देवगणपरीतत्वेन शुद्धभूम्यटनादि सुशीलं विष्णोः । यद्वा-सविभूतिकत्वनिर्विभूतिकत्वस्वभावयोः विरुद्धा गतिर्लक्ष्मीपतिभक्तानां धनराहित्यं निर्भक्तानां धनिकत्वं चेत्यर्थः ॥★॥ तोषिणी—एतदिति । अत्र किं कारणं तदित्यर्थः । इच्छामः इति बहुत्वं तत्र वर्तमानानां तेषां सकटाक्षसङ्ग्रहात् । अत्र पूर्वोक्तविरोधे तमेवाह- विरुद्धं शीलं पूर्वोक्तस्वभावो ययोस्तयोः । प्रभ्वोरिति कर्मणि षष्ठी । भजतां विरुद्धातत्स्वभावविपरीता क्रमाद्धनभोगप्राप्तितन्नाशलक्षणा । गतिः फलम् । अतः श्रीशिवभक्तानां साक्षाद्धनादिविभूतिदर्शनाद्धरेः पत्न्यपि लक्ष्मीः श्रीशिवस्याधीनेति तस्यैवोत्कर्षो घटेतेति भावः । साक्षात्तथानुक्तिस्तु सङ्कोचादेवेति भावः ॥ अत्र विश्वनाथः—विरुद्धेति । भिक्षुकं शिवं भजन्तः सम्पन्नाः स्युः लक्ष्मीपतिं विष्णुं भजन्तस्तु भिक्षवो भवन्तीति वैपरीत्यमनुचितमिति भावः ॥२॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

एतदिति । अत्र किं कारणं तदित्यर्थः । इच्छामः इति बहुत्वं तत्र वर्तमानानां शैवानां तेषां सकटाक्षसङ्ग्रहात् अत्र पूर्वोक्तविरोधे तमेव व्यञ्जयति विरुद्धेति । विरुद्धं शीलं क्रमाद्भोगत्यागस्वीकारलक्षणः स्वभावो ययोस्तयोः प्रभ्वोरिति कर्मणि षष्ठी । तौ भजतां विरुद्धात्तत्तत्स्वभावविपरीता क्रमाद्धनभोगप्राप्तितन्नाशलक्षणा गतिः फलम् अतः श्रीशिवभक्तानां साक्षाद्धनादिविभूतिदर्शनाद्धरेः पत्न्यपि लक्ष्मीः श्रीशिवस्याधीनेति तस्यैवोत्कर्षो घटेतेति भावः । साक्षात्तथानुक्तिस्तु सङ्कोचादेवेति ज्ञेयम् ॥२॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं सर्वथा सर्वतः श्रीहरेरुत्कर्षमाकर्ण्य कांश्चिदसहमानान् शैवानालक्ष्य तेषां प्रबोधनाय तं सुदृढं विख्यापयितुं पृच्छति-देवेति द्वाभ्याम् । भोजाश्च भजन्ति हरिमिति भजतम्, पूर्ववृत्तस्यापि धनादेर्हरणाभिप्रायेणा, तच्चाग्रे व्यक्तं भावि । प्राय इति कदाचित् कस्यापि श्रीशिवभक्तस्य परमपदप्राप्तेः, श्रीहरिभक्तस्याप्यत्र धनादिसिद्धेः । एतदिति-अत्र किं कारणं तदित्यर्थः । इच्छाम इति बहुत्वं तत्र वर्तमानानां तेषां सङ्ग्रहात् । ननु श्रीशिवः प्राय ऐहिकसुखदाता, श्रीहरिश्च परमपदप्रद इति सर्वत्र प्रसिद्धमेव । सत्यम् । साक्षाद्विरोधदर्शनादस्माभिरेतन्निश्चेतुं न शक्यत इत्याह-सन्देह इति । तत्रैव हेतुमाह-विरुद्धेति । शीलं क्रमाद्भोगत्यागस्वीकारस्वभावः । प्रभ्वोरिति कर्मणि षष्ठी, प्रभू स्वकीयौ, भजतामिति स्वामित्वेनोभयेषामपि भजने साम्यमभिप्रेतम्, गतिः फलम् । अतः श्रीशिवभक्तानां साक्षाद्धनादिविभूतिदर्शनाच्छ्रीशिवस्यैवोत्कर्षो घटेतेति भावः ॥१-२॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-२॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

"यं सम्पद्य जहात्यजाम् । तं कैवल्यनिरस्तयोनिम्" इति जगत्कारणत्वादिवन्मोक्षदत्वमपि रेरेवासाधारणो धर्म इत्युक्तम् अनेन रुद्रादीनां न मोक्षदत्वं किन्त्वर्थकामादिप्रदत्वमिति सूचितम् । तत्र सन्दिहानः पृच्छति राजा-देवासुरमनुष्येष्विति । देवादीनां मध्ये ये जना अशिवममङ्गलरूपमपि शिवं भजन्ति ते प्रायशः प्रायेन धनिनः आढ्या भवन्ति भोजा इति पाठे भोगिनो भवन्ति इत्यर्थः । हे ब्रह्मन् ! लक्ष्म्याः पतिं हरिं तु ये भजन्ति न तु नाढ्याः लक्ष्म्याः पतिम् इत्यनेन विपरीतमिदमित्यभिप्रेतं लक्ष्मीपतिभक्तैरेवाढ्यैर्भवितव्यमित्यभिप्रायः ॥१॥ एतदिति । एतद्वैपरीत्यनिदानम् वेदितुम् इच्छामः अत्र वैपरीत्ये नोऽस्माकं महान् सन्देहो वर्तते विरुद्धं शालं स्वभावो ययोस्तयोः प्रभ्वोर्हरिहरयोः कर्मणि षष्ठी तौ भजतां गतिः फलं विरुद्धा विसदृशीत्यर्थः । एकस्वामी भजतां कथं विसदृशं फलमिति शङ्कार्थः ॥२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

शिवं भजंस्तामसाद्यन्यतमं विष्णुं निषेवमाणः सात्त्विक एष शिवस्याप्यन्यापरिहार्यापत्तिसमुच्छित्तिकरो नारायणः तरेषामित्यर्थसारं वृकासुराख्यायिकयाख्यापयति । तत्र राजा आख्यायिकामुत्थापयितुं पृच्छति-देवासुरेति । दिगम्बरत्वेन दृष्ट्या शिवगशुद्धवत्प्रतीयमानं निर्धनं वा "शिवो लोके पद्मरागे हरे काले शिवे जले" इत्यतः पद्मरागराहित्येन निर्धनत्वं ते। अशिवमकीलम् अनर्गलं सर्ववरप्रदमित्यर्थः । लक्ष्मीपतिमित्यनेन धनित्वमुपलक्षयति । तथापि तद्भक्ता धनिनो न भवन्ति एतद्धनित्वाधनित्वसन्देहे तन्निरासप्रयत्नो घटते तदभावे व्यर्थ इत्यत्राह-सन्देह इति । न चायमौपचारिक इत्याह-महानिति । बीजान्तरमाह-विरुद्धेति । श्मशाने पिशाचगणैः परिवृतत्वेनाटनशीलं रुद्रस्य इन्द्रादिदेवैः परितत्वेनावस्थानं हरेः असुरादीनामपि च्छवत्वेन गतित्वमाश्रयत्वम् ईशानस्य देवादीनां समृद्धिचिकीर्षुत्वेन हरेः तथाचात्र प्रभ्वोः समर्थयोर्विषये महानस्माकं ऽस्ति हि यस्मात्तन्निरसनप्रयासः सार्थक इत्यर्थः ॥२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

एवं तत्त्वविचारेण श्रीकृष्णमेव निर्धार्योपास्य विचारेणापि निर्धारयन् श्रीकृष्णांशविशेषस्य श्रीविष्णोर्माहात्म्येन निर्धारयन्ति वाचेत्यादिना । अशिवम् अस्वीकृतधनभोगं शिवम् ॥१-५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

अष्टाशीतितमे विष्णुरेव सेव्यः स निर्गुणः । सगुणस्तु वृकाच्छम्भुः स्वभक्तादाप सङ्कटम् ॥१॥

निर्गुणौ विष्णुतद्भक्तौ मिथोऽवाप्तमुदौ सदा । सगुणेषु मिथः क्लेशो महेशवृकयोरिव ॥२॥

ब्रह्मपरमात्मभगवत्स्वरूपेषु मध्ये भगवत्स्वरूपस्यैव तदुपासकस्य च श्रुतिवाक्यैरेव सर्वोत्कर्षमुक्त्वा इदानीं ध्यायेन ब्रह्मविष्णुरुद्रेष्वपि मध्ये विष्णोरेव सर्वोत्कर्षात् तस्यैव सेव्यत्वमाह-ननु ध्यायेदजस्रं हरिमिति । त्वं हरिभजनमेव सि तदपि हरिभजने दारिद्र्यमाशङ्क्य किमिति हरमेव सर्वे भजन्तीति पृच्छति-देवेति । अशिवं स्मकपालपात्रादियोगाद्बहिर्दर्शिजनैरमङ्गलत्वेन प्रतीयमानं भोजा भोगवन्तश्च ते भवन्ति नन्विति लक्ष्म्याः पतिं भजन्तस्तु नो नापि भोगवन्तो भवन्ति कुत इत्यर्थः ॥१॥ विरुद्धेति । भिक्षुकं शिवं भजन्तः सम्पन्नाः स्युः लक्ष्मीपतिं विष्णुं स्तु भिक्षवो भवन्तीति वैपरीत्यमनुचितमिति भावः ॥२॥

गूढार्थदीपिनी

अष्टाशीतितमे शम्भुः कृष्णस्योत्कर्षमीरयन् । वृकक्लेशादिवेशेन मोचितश्चेति वर्ण्यते ॥१॥

अशिवमुपेक्षितभोगम् । भोजा भोगसम्पन्नाश्च भवन्ति । प्रायःशब्देन न केवलं धनप्रदत्वमेव अपि तु शिवस्य त्वमपीति ध्वनितम् । ये हरिं भजन्ति ते तु प्रायः न धनिनो न च भोजाः भोगसम्पन्नाः किन्तु निर्धना निर्भोगाश्च भवन्ति विरुद्धं त्यागभोगलक्षणं सविभूतिकत्वं निर्विभूतिकत्वं वा स्वभावो ययोस्तयोः विरुद्धशीलयोः चरणौ इति शेषः । विरुद्धा गतिः धनिकत्वनिर्धनत्वरूपा ॥२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पूर्वाध्यायान्ते यं सम्पद्य जहात्यजामनुशयीत्यनेन भगवान् वासुदेव एव स्वानुवर्तिना कार्यकारणरूपप्रकृतिसम्बन्धं ति-न तु प्राकृतपदार्थदानेन स्वानुगान् संसारे क्षिपति किन्तु स्वप्राप्तिलक्षणं मोक्षं ददातीत्युक्तं तदेव पुनः श्रीशुकमुखेन

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

दृढीकारयितुं पृच्छति देवासुरेति अशिवं तामसं निर्भोगं ये भजन्ति ते प्रायो धनिनो भोजाः भोगिनः लक्ष्म्याः पतिं परमैश्वर्याधिष्ठात्र्याः श्रियः पतिं हरिं सर्वक्लेशहर्तारं ये भजन्ति तेषु प्रायः धनिनो भोजा नेत्यन्वयः ॥१-२॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

एवं कृष्णस्य मूलत्वे सन्दिहानस्य संशयः । निवारितोऽतियत्नेन येन कृष्णः परः स्मृतः ॥१॥
व्यवहारस्तथैवात्र कृष्णे पर्यवसानतः । सर्वेन्द्रियाणां ग्राह्यत्वं श्रुतीनां तु यथोदितम् ॥२॥
भजनीयगुणेत्वत्र सन्देहः कश्चिदुद्गतः । तन्निवारयितुं प्रश्नः पुनाराज्ञा निरूप्यते ॥३॥
पूर्वाध्याये यशोक्त्यैव श्रियै चायमुदीरितः । अतः श्रियं सदा कृष्णे नित्यामाहाव्ययां क्वचित् ॥४॥
तथाऽऽनन्दो न सर्वत्र तथा श्रीरपि देवता । तथात्वं दूषणं लोके भ्रान्तबुद्ध्या निरूपितम् ॥५॥
अतोऽत्र भजनीयार्थं लक्ष्मीनिर्णय उच्यते । एकोनचत्वारिंशे च तत्प्रसङ्गात्कथान्तरम् ॥६॥
शिवादिसर्वदेवानां दातृत्वमविचारतः । अविचारितदानेन स्वयं दातापि नश्यति ॥७॥
सम्प्रदानस्य का वार्ता तस्माच्छ्रीशो न तत्प्रदः । दुष्टैव श्रीरन्यगता शुद्धा कृष्णैकतत्परा ।
कृष्णमेव ततो वाञ्छेन्न श्रियं बुद्धिमान् क्वचित् ॥८,१/२॥

पूर्वाध्याये परब्रह्मरूपे भगवति प्रमाणविषयदोषान् परिहृत्य प्रमेयविषये भगवद्दोषपरिहारार्थमध्यायान्तरमारभते तत्र राजा भगवति दातृत्वे सन्दिहानः अदातृत्वस्य च लोके निन्दाश्रवणात् निर्णयार्थं पृच्छति-देवासुरमनुष्येष्विति द्वाभ्याम् । त्रिविधा जीवाः उपासनसमर्थाः तेषां भगवदुपासनं विधीयते अन्योपासनव्यावृत्तिपूर्वकं तत्रान्येषामैहिकदातृत्वे कथं व्यावृत्तिः स्यात् इति महादेव उपक्षिप्यते त्रिविधेषु जीवेषु ये अशिवं लक्ष्मीकृतशोभारहितं नाम्ना शिवं कल्याणरूपं वा ये भजन्ति ते प्रायेण धनिनः ज्ञानार्थिनस्तु ततो धनं न वाञ्छन्ति इति प्रायेणोक्तं भोजा भोक्तारश्च दानभोगक्षमं धनं शिवः प्रयच्छतीति यदि भगवानपि प्रयच्छेत् तदोक्तं दूषणं न सङ्गच्छतीति प्रकृते निषेधति न तु लक्ष्म्याः पतिमिति विद्यते लक्ष्मीः स्वयं परदुःखहर्ता च ये लक्ष्मीपतिपुमासते ते न धनिनो न वा भोजा इत्यर्थः । गुणानां तारतम्यमत्र विचार्यत इति तुल्यता ॥१॥ नन्वेवमेव स्वभाव इति चेत्तत्राह-एतद्वेदितुमिच्छाम इति। एतदत्रत्यसन्देहनिवर्तकं यतोऽत्र महान् सन्देहः हि युक्तश्चायमर्थः भक्तत्वाद्भजनीयगुणसन्देहो वारणीय इति नोऽस्माकं सर्वेषामेव यतोऽत्र कौतुकाविष्टानामपि सन्देहनिवृत्त्यर्थं प्रयत्न इति ज्ञापयितुमाह-विरुद्धशीलयोः प्रभ्वोरिति । एको लक्ष्म्या सहितः अपरो विहीनः तत्सेवकस्तु लक्ष्मीरहितः सहितश्चेति यस्य हि यद्रोचते स स्वभक्ताय प्रयच्छति प्रकृते तु तदभाव इत्यर्थः । अत्र सन्दिग्धः प्रष्टव्यः शिवः कथं स्वयं न भुङ्क्ते कथं प्रयच्छतीति अत्र किं विषया राज्यादयः उत्कृष्टाः आहोस्विदपकृष्टा इति उत्कृष्टाश्चेत् शिवः कथं स्वयं न भुङ्क्ते अपकृष्टाश्चेत् कथं प्रयच्छतीति तत्रोत्तरमपकृष्टा एवेति अतस्तस्य भोगाभावः समर्थितः तादृशं कथं ददातीति चेत उपासकानामेव दोषादिति वक्तुं ये धनार्थं शिवमुपासते ते साहङ्काराः सन्तः अहङ्काराभिमानिनमेव शिवमुपासते न तु शैवतन्त्रसिद्धं सदाशिवं वा साधारणत्वात् ज्ञानाधिकाराभावाच्च ॥२॥

सुबोधिनीसारः

राजप्रश्नः । देवदैत्यमनुष्येषु मध्ये येऽशिवं त्यक्तभोगं शिवं भजन्ति उपलक्षणमन्येषामपि विभूतिदातृणां प्रायस्ते धनाढ्या भोजा भोगशीलाः सन्ति लक्ष्म्याः पतिं विष्णुं ये भजन्ति ते न तु धनिनो भोजास्तत्र को हेतुः ॥१॥ अत्र प्रकरणे नोऽस्माकं महान्सन्देहः । विरुद्धशीलयोः समृद्धिदानादानस्वभावयोः प्रभ्वोर्हरिशिवयोः । कर्मणि षष्ठी । भजतां पुंसां गतिर्विरुद्धास्ति एतेन विष्णुशिवयोर्भेद इति प्रश्नान्तरम् ॥२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अष्टाशीतितमे विष्णुभक्तः कैवल्यमश्नुते । ब्रह्मादिदेवभक्तस्तु विभूतिमिति वर्ण्यते ॥१॥

अत्र प्रायेन शिवभक्तानां धनाढ्यतां विष्णुभक्तानां धनादिराहित्यं च दृष्ट्वा श्रुत्वा च राजा तत्र सन्दिहानः पृच्छति- सुरमनुष्येष्विति । देवादीनां मध्ये ये जनाः अशिवं जटाभस्मभुजङ्गादिधारणेन भूषणादिवैभवत्यागेन च तत्कृतशोभारहितं शिवं न्ति ते प्रायशो धनिनो भोजाः भोगिनश्च भवन्ति । विरक्तानां मुनीनां तथात्वाभावात् प्राय-ग्रहणम् । ये तु लक्ष्म्याः पतिं लसम्पद्भोगादिविशिष्टं हरिं भजन्ति ते तु न धनादिसम्पन्ना भवन्ति किन्तु प्रायेण दरिद्रा एव भवन्तीत्याशयः ॥१॥ एतद्वैपरीत्यनिदानं तुमिच्छामः, अत्र वैमरीत्ये नोऽस्माकं महान् एव सन्देहो वर्तते । वैपरीत्यमेव स्पष्टयति । कर्मणि षष्ठी । विरुद्धं शीलं स्वभावो स्तौ प्रभू हरिहरौ भजतां गतिर्विरुद्धा फलं विरुद्धं भवति । त्यक्तविभूतित्वाच्छिवस्य तद्भक्तानामेव दरिद्रिता युक्ता विष्णोस्तु कृतविभूतित्वात्तद्भक्तानामपि विभूतमिमत्त्वमेव युक्तम् । तद्वैपरीत्ये किं कारणमित्यर्थः ॥२॥

अन्वितार्थप्रकाशिका

अष्टाशीतितमे विष्णुर्मुक्तिं दिशति सेवितः । विभूतिमन्यो देवोऽत्र श्लोकाः सार्धाः खवार्धयः (४०॥) ॥१॥

सप्तोवाचेति वाचो द्वाचत्वारिंशदनुष्टुभः (४२) ॥८८॥

देवेति । देवादीनां मध्ये ये जनाः अशिवं भुजगादिधारणेनामङ्गलवेषं शिवं भजन्ति ते प्रायः धनिनो भोजाः भाजश्च भवन्ति । विरक्तानां मुनीनां तथात्वाभावात् प्रायग्रहणम् । ये तु लक्ष्म्याः सम्पदधिष्ठात्र्याः पतिं लसम्पद्भोगादिविशिष्टं हरिं भजन्ति । ते तु धनादिसम्पन्ना न भवन्ति किन्तु प्रायेण दरिद्रा निर्भोगाश्च भवन्तीत्याशयः ॥ एतदिति । विरुद्धेति शेषे कर्मणि षष्ठ्यौ विरुद्धं शीलं स्वभावो ययोस्तौ प्रभू हरिहरौ भजतां गतिर्विरुद्धा फलं द्धं भवति । योग्यं त्वन्यथेत्याशयः । स्फुटं शेषम् ॥२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अष्टाशीतितमेऽजेशौ सद्यः शापवरप्रदौ । न विष्णुश्च शिवं कष्टात्सोऽरक्षदिति वर्ण्यते ॥१॥ शापेति । ईशाः नियामकास्तेषु सद्यः शापः प्रसादश्च यस्य तथाभूतोऽस्ति तथाविधो ब्रह्मा च अच्युतस्तु तादृशो नास्ति ॥१-२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अष्टाशीतितमे भक्तो विष्णोः कैवल्यमेति हि । भक्तोऽर्वाग्देवतायास्तु विभूतिमिति चोच्यते ॥१॥

'यं सम्पद्य जहात्यजाम्' इति 'तं कैवल्यनिरस्तयोनिम्' इत्यादिना जगत्कारणत्वादिवत् मोक्षदत्वमपि हरेरेवासाधारणो त्युक्तम् । अनेन रुद्रादीनां न मोक्षदत्वं किं त्वर्थकामादिप्रदत्वमिति सूचितम्, तत्र सन्दिहानः पृच्छति राजा ॥ देवासुरमनुष्वेष्विति ब्रह्मन् ! लक्ष्म्याः पतिं हरिं ये भजन्ति ते तु धनिनः धनाढ्याः न नैव भवन्तीतत्यर्थः । देवासुरमनुष्येषु मध्ये, ये जनाः मममङ्गलरूपमपि शिवं भजन्ति, ते तु प्रायः धनिनः आढ्याः भवन्ति । सम्बोधनस्थाने भोजा इति पाठे, भोजा भोगिनश्च तीत्यर्थः । लक्ष्म्याः पतिमित्यनेनेदं विपरीतत्वं कथं, यतो लक्ष्मीपतिभक्तैरेवाढ्यैर्भवितव्यमित्यभिप्रायः ॥१॥ एतदिति ॥ रीत्यनिदानं, वेदितुम् इच्छामः । अत्र वैपरीत्ये नोऽस्माकं महान् सन्देहः संशयः, वर्तते हि । विरुद्धं शीलं स्वभावो ययोस्तौ भ्वोः हरिहरयोः, कर्मणि षष्ठी । विरुद्धशीलौ प्रभू इत्यर्थः । भजतां गतिः फलं, विरुद्धा विसदृशा कथम् ॥२॥

कृष्णप्रिया

राजा बोले देव मनुष्य और असुरोंमें जो भक्तजन आशिव ऐसे शिवजी को भजते है वे लोग धनादि साधन न होते है (ऐसा देखा गया है) लेकिन लक्ष्मीवर विष्णु के भक्त ऐश्वर्य सम्पन्न (क्यों) नहीं होते ॥१॥ परस्पर

कृष्णप्रिया

विरूद्ध स्वभाव वाले दोनों समर्थ इश्वर की भक्ति (सेवा) करने वालो की गति विरूद्ध है। ऐसा हमारा महान् संदेह है अत: ये सब जानने के लिए इच्छुक है ॥२॥

श्रीशुक उवाच

शिवः शक्तियुतः शश्वत् त्रिलिङ्गो गुणसंवृतः । वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥३॥
ततो विकारा अभवन् षोडशामीषु [1]कञ्चन । [2]उपाधावन् विभूतीनां सर्वासामश्नुते गतिम् ॥४॥
[3]हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः । स सर्वदृगुपद्रष्टा तं भजन् निर्गुणो भवेत् ॥५॥
निवृत्तेष्वश्वमेधेषु राजा युष्मत्पितामहः । शृण्वन् भगवतो धर्मानपृच्छदिदमच्युतम् ॥६॥
स आह भगवांस्तस्मै प्रीतः शुश्रूषवे प्रभुः । नृणां निःश्रेयसार्थाय योऽवतीर्णो यदोः कुले ॥७॥

कर्दमक्षमा

शिवः, शक्तियुतः, त्रिलिङ्गः, शश्वत्, गुणसंवृतः, वैकारिकः, तेजसः, तामसः, च, इति, अहम्, त्रिधा ॥३॥ ततः, विकाराः, षोडश, अभवन्, अमीषु, कञ्चन, उपाधावन्, सर्वासाम्, विभूतीनाम्, गतिम्, अश्नुते ॥४॥ हरिः, निर्गुणः, प्रकृतेः, परः, साक्षात्, पुरुषः, सः, सर्वदृक्, उपद्रष्टा, तम्, भजन्, निर्गुणः, भवेत् ॥५॥ अश्वमेधेषु, निवृत्तेषु, सत्सु, राजा, युष्मत्पितामहः, भगवतः, धर्मान्, शृण्वन्, अच्युतम्(इदम्), अपृच्छत् ॥६॥ यः, नृणाम्, निःश्रेयसार्थाय, यदोः, कुले, अवतीर्णः, सः, भगवान्, प्रभुः, प्रीतः, तस्मै, शुश्रूषवे, आह ॥७॥

श्रीधरस्वामिकृतभावार्थदीपिका

अन्योन्योपमर्देन तमसस्त्रैविध्यात्त्रिलिङ्गः त्रिलिङ्गत्वमाह-वैकारिक इति। अहमहङ्कार इति ॥३॥ विकारा मनइन्द्रियभूतरूपाः षोडशेतीन्द्रियदेवानामभेदविवक्षया कथञ्चन यत्किञ्चिद्विकारोपाधिकं भजन्नुपाध्यनुरूपाणां विभूतीनां स्वरूपं प्राप्नोतीति ॥४॥

उपद्रष्टा साक्षी सन् यतः सर्वदृक् सर्वं पश्यति अतः प्रकृतेः पर इति अत्रेदं तत्त्वम् —

वस्तुनो गुणसम्बन्धे रूपद्वयमिहेष्यते । तद्धर्मायोगयोगाभ्यां बिम्बवत्प्रतिबिम्बवत् ॥
गुणाः सत्त्वादयः शान्तघोरमूढाः स्वभावतः । विष्णुब्रह्मशिवानां च गुणयन्तृस्वरूपिणाम् ॥
नातिभेदो भवेद्भेदो गुणधर्मैरिहांशतः । सत्त्वस्य शान्त्या नो जातु विष्णोर्विक्षेपमूढते ॥
रजस्तमोगुणाभ्यान्तु भवेतां ब्रह्मरुद्रयोः । गुणोपमर्दतो भूयस्तदंशानां च भिन्नता ॥
अतः समग्रसत्त्वस्य विष्णोर्मोक्षकरी मतिः । अंशतो भूतिहेतुश्च तथाऽऽनन्दमयी स्वतः ॥
अंशतस्तारतम्येन ब्रह्मरुद्रादिसेविनाम् । विभूतयो भवन्त्येव शनैर्मोक्षोऽप्यनंशतः ॥

इदमेवाभिप्रेत्य तत्रतत्रोच्यते श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युरिति तथा सत्त्वं यस्य प्रिया मूर्तिरिति तथा सत्त्वं तत्तीर्थसाधनमिति तथा "त्रयाणामेकभावानां यो न पश्यति वै भिदाम्" इति तथा "न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते" इत्यादि एवञ्च सति न किञ्चिदसमञ्जसम्। तत्तद्भक्तानान्तु कलहो मोहमात्रमिति ॥५-७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्रोत्तरं तु सत्त्वादिगुणतारतम्यसम्बद्धदेवसेवनेन तदनुकूलैव फलावाप्तिरित्याह-शिवः शक्त्याहङ्काररूपया युक्तः। शश्वत् सदैव । स चाहङ्कारः-अन्योन्योपमर्देनान्योन्यगुणसम्बन्धेन च तमसः- "तमःप्रधानस्त्वद्भवद्योऽहङ्कारः प्रमोहनः" इत्युक्तः।

---

१. पञ्चसु-विज. । २. उपधावन्-श्रीधर. वंशी. वीर. विश्व. ; उपाधावन्-विज. । ३. विरिस्तु-विज. ।

हमारा महान् संहेद

त्यहं त्रिधा ॥३॥
श्नुते गतिम् ॥४॥
र्णो भवेत् ॥५॥
दमच्युतम् ॥६॥
यदोः कुले ॥७॥

हम्, त्रिधा ॥३॥ ततः,
रिः, निर्गुणः, प्रकृतेः,
राजा, युष्मत्पितामहः,
कुले, अवतीर्णः, सः,

कारा मनइन्द्रियभूतरूपाः
रूपं प्राप्नोतीति ॥४॥

म्बवत् ॥
पिणाम् ॥
पमूढते ॥
भिन्नता ॥
स्वतः ॥
नंशतः ॥
या मूर्तिरिति तथा सत्त्वं
च भिदामण्वपि चक्षते"

ङ्कारूपया युक्तः। शश्वत
रः प्रमोहनः" इत्युक्तेः।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तमोगुणप्रधानस्याहङ्कारस्यैव शुद्धतमोरजोमिश्रतमःसत्त्वमिश्रतमोरूपभेदत्रयवत्त्वात्, त्रिलिङ्गत्वम्। तदेवाह-कारिक इति ॥★॥ तत्र—

"सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः। विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥"

इत्यादिकस्य द्वितीयादौ श्रीब्रह्माद्युक्तस्यानुसारेण शास्त्रान्तरविलक्षणं सर्वदेवेतिहासवेदान्तसारं श्रीभागवतसिद्धान्तं वदंस्तत्र त्तां तावत्स्वयं भगवच्छ्रीकृष्णमाहात्म्यं तदंशांशस्यापि कृतगुणाधिष्ठातृत्वलीलस्य श्रीविष्णोर्वैलक्षण्यं श्रूयतामिति यंस्तच्चाभेदश्रवणेऽपि शिवविष्ण्वोरुपाधिधर्मयुक्तत्वायुक्तत्वे निर्दिश्य प्रतिबिम्बवन्न्यूनाधिकशक्तित्वव्यञ्जनया स्थापयंस्तदुत्प्रेक्षिते एव दोषत्वं दोष एव गुणत्वं च प्रतिपादयंस्तद्विधानामतिमूर्खत्वं व्यञ्जयति-शिव इति। यावदध्यायसमाप्ति। तत्रैव स्योपाधिधर्मयुक्तत्वं दर्शयंस्तादृशविभूतिहेतुत्वं बोधयति द्वाभ्याम्। शश्वच्छक्तियुतक्रमेणाविर्भवन् प्रथस्तावन्नित्यमेव शक्त्या साम्यावस्थप्रकृतिरूपोपाधिना युक्तः गुणक्षोभे सति त्रिलिङ्गो गुणत्रयोपाधिः प्रकटैश्च सद्भिस्तैर्गुणैः संवृतश्च। ननु तम उपाधित्वमेव श्रूयते कथं तत्तदुपाधित्वं तत्राह-वैकारिक इति। अहमहंत्वं हि तत्तद्रूपेण त्रिधा स च तदधिष्ठातेत्यर्थं मुख्यं त्रस्थगुणद्वयमप्युपाधत्ते तस्य त्रिगुणत्वादित्यर्थः। विश्वनाथस्तु—शक्त्या युतः संसृष्टः तिलतण्डुलवन्मिश्रित एवं न तु ताद्रूप्यं । गुणैः संवृतः अस्मान् कृपया स्वीकुर्विति वृतत्वात् त्रिलिङ्गस्त्रिगुणमयः न तु जीव इव तैर्बद्ध इति भावः। त्रिगुणमयत्वं णोति-अहं त्रिधेति। अहङ्कारात्मकः स एव त्रिविधो भवत्येवेति ॥३॥ ततस्त्रिविधाहङ्कारात्। नन्विद्रियाधिष्ठातृदेवानामपि विकाहङ्कारकार्यत्वेनाधिकानां दिग्वातादीनां सत्त्वात्कथं षोडशेति चेदत्राह-अतीन्द्रियदेवानामिति। अमीषु षोडशसु काशादिष्वधिष्ठानप्रकारेषु कञ्चनाकाशाद्युपाधिकं "भवायाकाशमूर्तये नमः" इत्यादिमन्त्रोक्तमूर्तिकं शिवमुपाधावन् भजन् भूतीनामुपाध्यनुरूपाणां सर्वासां गतिं स्वरूपं प्राप्नोति। आकाशोपाधिकसेवनात्सर्वशब्दज्ञानं विषयेष्वसङ्गं च जलोपाधिकसेवनेन स्यादिसामर्थ्यं रसपरावर्तनसामर्थ्यं च, तेजउपाधिकसेवनेनाग्न्याद्यवगाहनतत्स्तम्भनादिसामर्थ्यं च लभते। एवं यथायथं योज्यम् ★॥ ननु भवत्वेवं सोपाधिरसौ प्रस्तुते किमागतं तत्राह-तत इति। ततस्तेन भगवत्प्रतिनिधीभूतेनाधिष्ठितादहंतत्त्वात् षोडशविकारा भवन् अमीषु विकारेषु मध्ये सर्वासां विभूतीनां सम्बन्धे किञ्चनोपाधावन् तदुपाधिकत्वेन तमुपासीनो गतिं प्राप्यं फलं लभते इन्द्रियाणां देवानां चाभेदात्तानि दश, मन एकं, भूतानि पञ्चेति षोडश। किञ्चनेति जैह्व्यमौपस्थ्यं मानसं वा सुखमुद्दिश्य धावन् शिवं भजन् सर्वासां विभूतीनां सम्पत्तीनां गतिं स्वरूपं प्राप्नोति तेषां परस्परसापेक्षत्वादेकप्राप्तावपि सर्वविषयसुखानि नोति तत् सुख एव सर्वसम्पत्तीनां पर्याप्तेर्भजनतारतम्यात् तत्तारतम्यं प्राप्नोति। अतः शिवस्य गुणमयत्वात् सम्पदामपि गुणमयत्वात्तद्भजने तत्प्राप्तिरिति। न त्वदुक्तो विरोध इति भावः। शिवविष्ण्वादिभेदाभेदविचारस्तु प्रथमस्कन्धे- 'सत्त्वं रजस्तमः' पद्यव्याख्याने कृतः स तत्रैव दृश्यः ॥४॥ तत्र उपाख्याने। इदं तत्त्वं तात्पर्यम्। वस्तुनः चितः। गुणसम्बन्धे सति एकस्यैव द्वयं भवति। तद्धर्माणां गुणधर्माणाम्। योगेन सगुणत्वमन्यथा निर्गुणत्वमिति। निर्गुणं बिम्बसमं सगुणं तु प्रतिबिम्बसममिति स्वभावतः स्वभावेन रूपेणेति यावत्। गुणनियन्तृत्वं स्वरूपं येषां तेषां नियन्त्रिति भावप्रधानो निर्देशः। वस्तुतो भेदो ब्रह्मादीनां नास्ति। गुणधर्मकृतो भेदोऽपि न सर्वथा किन्त्वंशत एवेत्याह-नातिभेद इत्यादि। ब्रह्मरुद्रयो रजस्तमोगुणकृते विक्षेपमूढते तां स्तः। सत्त्वगुणसम्बन्धेनांशतो ब्रह्मापि विष्णुरेव। तथा रुद्रोऽपि । तमआदिगुणसम्बन्धेन विष्णो रुद्रता ब्रह्मता च ष्वेवेत्याह-गुणोपमर्दत इत्यादि। समग्रसत्त्वस्य विष्णोः सम्बन्धिनी मतिर्बुद्धिरुपासनारूपा मोक्षकरी, अंशतो रजआदिसम्बन्धेन सा विभूत्यादिहेतुरपि। स्वतः स्वभावतः। सात्त्विकीत्वेनानन्दमय्येवेति। एवं ब्रह्मरुद्रभक्ता अपि रजस्तम उपाधितया ये पासते ते विभूत्यादि लभन्ते। ये शुद्धसत्त्वरूपत्वेन तावुपासते ते मोक्षमपीत्यभिप्रेत्योक्तं स्वामिनांशतस्तारतम्येनेत्यादि। भिप्रेत्य समग्रसत्त्वरूपत्वं विचार्य। तत्र तत्राख्याने। एवं च सति त्रयाणां वास्तवाभेदे सति। न किञ्चन समञ्जसम्। न मन्यतमस्य न्यूनतेति तत्तद्भक्तानां विष्णुशिवादिभक्तानां कलह एकस्य वैशिष्ट्यापादनमन्यस्य हीनतापादनं च

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मोहमात्रमज्ञानमेवेत्यर्थः। अथ चात्र प्रकृतोपयोगिविशेषोऽपि शास्त्रान्तरविचारितो लिख्यते। तथाहि–ब्रह्मादीनामेकरूपत्वं चेत्तर्हि तत्तन्माहात्म्यपरपुराणादिष्वितरनिन्दा न स्यात्, दृश्यते च सा, तथा च–तदन्यथानुपपत्त्या साम्यमपि दुर्लभमैक्यस्य तु का कथा। तथा च 'पतन्तमनुधावतो बद्धोऽपि गतः' इति न्यायापात इति चेदत्राहु–श्यालशुनकन्यायेन भेदवादिनः कोपोत्पादनाय तदिष्टदेवस्यान्यपरपुराणेष्वपकर्षवर्णनमिति । परे तु कल्पभेदमाश्रित्य स्वेच्छया परस्परस्माज्जन्मनिमित्तकं क्वचिदुत्कर्षापकर्षवर्णनमित्याहुः– 'न हि निन्द्यानिद्यं निन्दितुं प्रवर्ततेऽपि तु विधेयं स्तोतुम्' इति न्यायाद्विधेयं हि स्तूयते वस्तु, इति न्यायप्राप्ततत्तद्विग्रहावच्छिन्नेशध्यानादिस्तुतये तदन्यविग्रहावच्छिन्ने शापकर्षवर्णनम्। तच्च 'यत्परः शब्दः' इति न्यायात्स्तुतिपरमेव । योऽर्थः परस्तात्पर्यविषयो यस्य स यत्परः इति । न त्वन्यनिन्दापरमपि फलाभावात् उभयपरत्वे वाक्यभेदापत्तेश्च। अन्यत्रापि ह्येवं दृश्यते। तद्यथा– 'सर्वशाखाप्रत्ययमेकं कर्म' इति न्यायान्नानाशाखाभिहितमप्यग्निहोत्रं न भिद्यते इति स्थिते, केचित् 'उदिते जुहोति' इति श्रुतिमाश्रित्योदितेऽर्के होमं कुर्वन्ति, केचित् 'अनुदिते जुहोति' इति श्रुतिमवलम्ब्यानुदिते जुह्वति। तत्र ये शाखिन उदये जुह्वति ते ———

'उदयन्न खलु वा आदित्य आहवनीये तु रश्मीन् सन्दधाति' इत्युपक्रम्य

'प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति॥

येऽग्निहोत्रं दिवा कीर्त्यमदिवः कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषाम्' ॥

इत्यनुदितहोमं निन्दन्ति। ये त्वनुदये जुह्वति ते ———

'आदित्यो वा अस्तं यन्नग्निमनुप्रविशति' इति श्रुतिमुपजीव्य;

'यदुदिते सूर्ये प्रातर्जुहुयाद्यथातिथये प्रद्रुताय शून्यायावसथाहार्यं हरति तादृगेव तत्' इत्युदित होमं निन्दन्ति॥

अनयोः स्वार्थतात्पर्यकल्पने रागप्राप्तसुरापानादिवत् कालद्वये त्याज्यस्य शेषिणो होमस्यैव बाधः। तथा च —

"**यावज्जीवमग्निहोत्रं जुहुयात्**" इत्यादयश्चोदना उपरुध्येरन्। एवं च कालभेदेनाग्निहोत्रमिव गुणभेदेन विग्रहभेदेन वा नेशो भिद्यते ततश्चैकस्मिन्नीशे यो गुणादिभेदेन भेदं प्रकल्प्यैकविग्रहावच्छिन्नमुपासीनोऽन्यं निन्दति स ईशविमुखः स्वामिद्रोहान्नरकमेतीति ज्ञेयम्। तस्मान्नैतावता सर्वविग्रहावच्छिन्नेशैक्यविघातः शङ्क्य इत्यलं प्रपञ्चेन प्रकृतमनुसरामः ॥★॥ अथ विष्णोरुपाधिराहित्यं दर्शयंस्तादृशपरमपुमर्थहेतुत्वं स्थापयति–हरिर्हीति। हि–प्रसिद्धौ हेतौ वा। प्रकृतेरुपाधितः परः तद्धर्मैरस्पृष्टः, अत एव निर्गुणोऽपि कुतस्त्रिलिङ्गत्वादिकमिति भावः । अत्र हेतुः–साक्षादेव पुरुष ईश्वरः न तु प्रतिबिम्बवद्व्यवधानेनेत्यर्थः। अतो– 'विद्याविद्ये मम तनू' इतिवत् तनुशब्दोपादानात् कुत्रचित्सत्त्वशक्तित्वश्रवणमपि प्रेक्षादिमात्रेणोपकारित्वादिति भावः। अत एव सर्वेषां शिवब्रह्मादीनां दृक् ज्ञानं यस्मात्तथाभूतः सन् उपद्रष्टा तदादिसाक्षी भवति । अतस्तं भजन्निर्गुणो भवेत् गुणातीतफलभाग्भवति । अतो यस्या लक्ष्म्याः पतिरसौ सापि स्वरूपभूतैवशक्तिर्न तु शिवाद्यधीना प्रतीता। प्राकृतविभूतिं खण्डयत्येव। यथैव वक्ष्यते 'यतः शान्तिर्यतोऽभयं' —

"**धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्वितम्। ऐश्वर्यं चाष्टधा यस्माद्यशश्चात्ममलापहम्**" ॥ इति ॥

अतो गुणो वा दोषो वा विचार्यताम् इति भावः। विश्वनाथस्तु — कुतो निर्गुणः यतः प्रकृतेः परः स्वत एव गुणानतिक्रम्य स्थितः। अतो गुणातीतस्य भजनात् कथं गुणमयीं सम्पदं प्राप्नुयुरिति भावः। सर्वेषां शिवादीनामपि ज्ञानं यतः स इति तं भजन् ज्ञानचक्षुः प्राप्नोति न तु सम्पदुद्भूतमज्ञानान्ध्यमिति भावः। उपद्रष्टा गुणलेपाभावादौदासीन्येन केवलं साक्षीति तं भजन्नपि गुणलेपरहितो निर्गुणो भवेत् अत एव 'यतः शान्तिः' इत्याद्यग्रे वक्ष्यते ॥५॥ अश्वमेधेष्विति । दक्षिणाभेदेनैकाश्वमेधस्य त्रिरूपत्वाद्बहुत्वमविरुद्धम्। युष्मत्पितामहो युधिष्ठिरः। इदं लक्ष्मीशोपासकनैर्धन्यतद्धीनरुद्राद्युपासकधनिकत्वलक्षणवैपरीत्यम्

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

★॥ न केवलं तस्य स्वभावोऽयं किन्तु विचारश्चेति । तद्योग्यं तद्वाक्यमयमितिहासमुपक्षिपति-समासेष्विति । नामतमुनिसभायां श्रीभगवतैव निर्णीतमस्तीति भावः । तदेवं शास्त्रान्तरविरोधस्य दौर्बल्यं दर्शितम् । राजा युधिष्ठिरः । ष्मत्पितामह इति । तादृशभगवदात्मीयपौत्रत्वेन तस्य प्रोत्साहनार्थमत्र प्रश्ने योग्ताव्यञ्जनार्थं च । अत एव रवाद्युष्मदित्युक्तम् । भगवतस्तस्मादेव भागवतधर्माञ्छृण्वन् इदं त्वत्पृष्टमेव तदेवं च द्वयोर्माहात्म्यमुक्तम् । अच्युतमिति । सर्वैश्वर्येण भक्तवश्यतादिसद्गुणैरपि परिपूर्णं किंवा तस्य गृहे सदा वर्तमानमिति भावः ॥६॥ स ष्णः निःश्रेयसायेत्युक्तेर्न केवलं भूभारहरणमेवावतारप्रयोजनमपि तु लोकनिःश्रेयसकरणमपीत्यपि ज्ञेयम् ॥★॥ हेत्यत्र हेतुः प्रीतः स्वभावत एव तत्रापि शुश्रूषवे श्रोतुमिच्छवे किंवा यतो भक्ताय ननु तथापि निजोत्कर्ष दृशविनयादिसद्गुणगणार्णवो वक्तुं नार्हति तत्राहुः-यः प्रभुः स्वतन्त्र एव सन् नृणामित्यादिलक्षणं निजोत्कर्षताप्रकाशनं विना वभक्त्यसम्पत्त्या लोकानां मङ्गलासिद्धेरित्यर्थः । तदेवमपि यस्तादृशं तदुपदेशं न गृह्णीत तस्यैव दौर्भाग्यमिति भावः ॥७॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

तत्र —— "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥" इत्यादिकस्य तीयादौ श्रीब्रह्माद्युक्तस्यानुसारेण शास्त्रान्तरविलक्षणं सर्वदेवेतिहासवेदान्तसारश्रीभागवतसिद्धान्तं वदंस्तत्र चास्तां तावत्पूर्वोक्तस्वयं गवच्छ्रीकृष्णमाहात्म्यं तदंशांशस्यापि (तद्वत्साहित्येन) तद्द्वयराहित्येन कृतगुणाधिष्ठातृलीलस्यापि श्रीविष्णोर्वैलक्षण्यं श्रूयतामिति धयंस्तच्चाभेदश्रवणेऽपि शिवविष्ण्वोरुपाधिधर्मयुक्तत्वा(त्तद)युक्तत्वे निर्दिश्य प्रतिबिम्बवन्न्यूनाधिकशक्तित्वव्यञ्जनया पयंस्तदुत्प्रेक्षितगुण एव दोषत्वं दोष एव च गुणत्वं प्रतिपादयंस्तेन तद्विधानामतिमूर्खत्वं व्यञ्जयन्नाह-शिव इति । यावदध्यायसमाप्ति तैव शिवस्योपाधिधर्मयुक्तत्वं दर्शयंस्तादृशविभूतिहेतुत्वम् । योजयति द्वाभ्याम् । शश्वच्छक्तियुतः क्रमेणाविर्भवन् प्रथस्तावन्नित्यमेव स्त्या गुणसाम्यावस्था प्रकृतिरूपोपाधिना युक्तः गुणक्षोभे सति त्रिलिङ्गो गुणत्रयोपाधिः प्रकटैश्च सद्भिस्तैर्गुणैः संवृतश्च ननु तम धित्वमेव तस्य श्रूयते कथं तत्तदुपाधित्वं तत्राह-वैकारिक इति । अहमहंत्वं हि तत्तद्रूपेण त्रिधा स च तदधिष्ठातेत्यर्थः । ख्यतया नास्तां नाम अन्यद्गुणद्वयं गौणतया त्वास्त एवेत्यर्थः ॥३॥ ननु भवत्वेवं सोपाधिरसौ प्रस्तुते किमायातं तत्राह-तत इति । स्तेन भगवत्प्रतिनिधिरूपेणाधिष्ठितादहंतत्त्वात् षोडशविकारा ये अभवन् अमीषु विकारेषु मध्ये सर्वासां विभूतीनां सम्बन्धे श्चन उपाधावन् तदुपाधित्वेन तमुपासीनो गतिं प्राप्यं फलं लभते इति ॥४॥ अथ विष्णोरुपाधिराहित्यं दर्शयंस्तादृशपरमपुरुषार्थहेतुत्वं पयति-हरिर्हीति । हि-प्रसिद्धौ हेतौ वा । प्रकृतेरुपाधितः परं तद्धर्मैरस्पृष्टः अत एव निर्गुणोऽपि कुतस्त्रिलिङ्गत्वादिकमिति वः । तत्र हेतुः साक्षादेव पुरुष ईश्वरः न तु प्रतिबिम्बवद्व्यवधानेनेत्यर्थः । अतो विद्याविद्ये मम तनू इतिवत् तनुशब्दोपादानात् चित्सत्त्वशक्तित्वश्रवणमपि प्रेक्षादिमात्रेणोपकारित्वादिति भावः । अत एव सर्वेषां शिवब्रह्मादीनां दृक् ज्ञानं यस्मात्तथाभूतः न् उपद्रष्टा तदादिसाक्षी भवति । अतस्तं भजन्निर्गुणो भवेत् गुणातीतफलभाग्भवति अतो यस्या लक्ष्म्याः पतिरसौ सापि पभूतैवशक्तिर्न तु शिवाद्यधीना प्रतीत्यप्राकृतविभूतिं खण्डयत्येव यथैव वक्ष्यते यतः शान्तिर्यतोऽभयं —

"धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्वितम् । ऐश्वर्यं चाष्टधा यस्माद्यशश्चात्ममलापहम्" ॥ इति ॥

अतो गुणो वा दोषो वा विचार्यताम् इति भावः ॥५॥ न केवलं तस्य स्वभावोऽयं किन्तु विचारश्चेति तद्योग्यं यमयमितिहासमुपक्षिपति-निवृत्तेष्विति । समासेषु इति नानामतमुनिसभायां श्रीभगवतैव निर्णीतमस्तीति प्रसिद्धमपीदमिदमिति वः । तदेवं शास्त्रान्तरविरोधस्य दौर्बल्यं दर्शितम् । राजा युधिष्ठिरः युष्मत्पितामह इति तादृशभगवदात्मीयपौत्रत्वेन तस्य हनार्थमत्र प्रश्ने योग्ताव्यञ्जनार्थं च अत एव गौरवाद्युष्मदित्युक्तम् । भगवतस्तस्मादेव भागवतधर्मान् शृण्वन् इदं त्वत्पृष्टमेव च द्वयोर्माहात्म्यमुक्तम् अच्युतमिति । सर्वैश्वर्येण भक्तवश्यतादिसद्गुणैर्वा परिपूर्णं किंवा तस्य गृहे सदा वर्तमानमिति भावः ॥ आहेत्यत्र हेतुः प्रीतः स्वभावत एव तत्रापि शुश्रूषवे श्रोतुमिच्छवे किंवा यतो भक्ताय ननु तथापि निजोत्कर्ष

रूपत्वं चेत्तर्हि
तु का कथा ।
कोपोत्पादनाय
न्मनिमित्तकं
यं हि स्तूयते
: शब्दः' इति
त् उभयपरत्वे
मप्यग्निहोत्रं न
जुहोति' इति

न्ति ॥
ा च —
न विग्रहभेदेन वा
स ईशविमुखः
रामः ॥★॥ अथ
परः तद्धर्मैरस्पृष्टः,
द्व्यवधानेनेत्यर्थः ।
रित्वादिति भावः ।
भजन्निर्गुणो भवेत्
ा । प्राकृतविभूतिं

ति ॥
एव गुणानतिक्रम्य
तः स इति तं भजन्
ाक्षीति तं भजन्नपि
णाभेदेनैकाश्वमेधस्य
वलक्षणवैपरीत्यम्

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

तादृशविनयादिसद्गुणगणार्णवो वक्तुं नार्हति तत्राहुः–यः प्रभुः स्वतन्त्र एव सन् नृणामित्यादिलक्षणं निजोत्कर्षताप्रकाशनं विना स्वभक्त्यसम्पत्त्या लोकानां मङ्गलासिद्धेरित्यर्थः। तदेवमपि यस्तादृशं तदुपदेशं न गृह्णीत तस्यैव दौर्भाग्यमिति भावः ॥७॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

श्रीशिवस्य श्रीभगवद्गुणावतारत्वेन तदभिन्नत्वेऽपि सद्यो भक्तकामपूरणाय मायागुणस्वीकारेण तद्भक्तानां यथाकामं विभूतिप्राप्तिः, श्रीहरेश्च परमदयालुतया स्वभक्तेभ्यः कामिभ्योऽपि धनादिदोषदृष्ट्या प्रायः कामप्रदानम्, किन्तु क्रमेण क्षीणकामेभ्यस्तेभ्यो निजमाहात्म्यानुरूपं गुणातीतपदप्रदानमेवेत्युत्तरमाह–शिवेति त्रिभिः। शश्वन्नित्यं यक्तियुतः श्रीभगवदवतारत्वेन सर्वसामर्थ्ययुक्तः, यतोऽगुणसंवृतः, त्रिगुणैरसंवृतोऽव्याप्तः, तथापि त्रिलिङ्गो भक्तकामपूरणार्थं त्रिविधो भवति। कथम्? तदाह–वैकारिक इति। वैकारिकत्वादौ हेतुः–अहमिति। यद्वा, शक्तियुतो भक्तकामपूरणाय स्वीकृतमायः, अतस्त्रिगुणव्याप्तः। यद्वा, यतो भक्तवात्सल्यगुणवशीकृतः अत एव त्रिलिङ्गः। अन्यत्तैर्व्याख्यातम्। यद्वा, त्रिलिङ्गत्वे हेतुः–वैकारिक इति। त्रिविधाहङ्काराधीशितृत्वादित्यर्थः ॥३॥ ततोऽहङ्कारादनुभवन्नुत्पन्नाः, अत एवामीषु विकारेषु मध्ये किञ्चन सामान्यतो विकारात्मकं किञ्चित् तद्विकाराधिष्ठातृतया तद्रूपं श्रीशिवमुपधावन्नित्यर्थः। सर्वासां विभूतीनां गतिमश्नुत इति येनोपाधिना भजते, तदुपाध्यनुरूपमिति यथेच्छं सर्वविभूतिसिद्धेः। एवं स्ववासनानुसारेण सोपाधिकश्रीशिवभजनात् प्रायो विभूतय एव सिध्यन्ति, न तु परमपदमिति भावः ॥४॥ हि तु, हरिस्तु, निर्गुणो गुणातीतः साक्षात् स्वयमेवेति तस्य साक्षादीश्वरत्वात् श्रीशिवादीनां च तदवतारत्वादिना परस्पर्यादिवेत्यर्थः। यतः पुरुषः सर्वान्तर्यामी। यद्वा, साक्षात् पुरुषः ईश्वरः यतः प्रकृतेः परो दूरे वर्तमानः अतः स एवोपद्रष्टा। अन्यत्तैर्व्याख्यातम्। यद्वा, निर्गुणत्वे हेतुः–प्रकृतेः परः पुरुषः पुमान्, एवं पुरुषाख्यया प्रसिद्धाभ्यां श्रीशिवब्रह्मभ्यां वैलक्षण्यमुक्तम्, – तयोः प्रकृतिसंवलितत्वात्। तदुक्तमेव शक्तियुत इत्यादि, अतः सर्वासां सर्वस्य वा दृशां ज्ञानानामुपरि द्रष्टा, अन्योऽधिकज्ञाता। यद्वा, सर्वा दृक् ज्ञानं येभ्यस्तेषां ज्ञानेन्द्रियादीनामुपद्रष्टा अन्तर्यामितया निकटे दृष्टिमात्रेण प्रवर्तक इत्यर्थः। इति मायासम्बन्धराहित्यमतो गुणातीतत्वं च साधितम्। अतो लक्ष्मीपतित्वेन सर्वभोगयुक्तत्वेऽपि तस्य प्रकृतिसम्बन्धराहित्यमेव सिद्धम्, श्रीवैकुण्ठादिवर्तिविभूतीनामपि सच्चिदानन्दरूपत्वेनाप्राकृतत्वात्, ततश्चोक्तमेव (भा.२/९/१०) ———

'न यत्र माया किमुतापरे' इत्यादि।

अतस्तं भजन् सकामोऽपि क्रमेण क्षीणकामो भूत्वा निर्गुणो भवेत्, गुणातीतपदं प्राप्नोतीत्यर्थः। एवं श्रीहरेः सर्वत उत्कर्षः प्रायः परमपददायित्वात् सर्वावतारबीजत्वात्, सर्वेश्वरत्वाच्च, शिवस्य च तद्भक्तिप्रवर्तकप्रियावतारत्वे साम्येऽपि प्रायो विभूतिदातृत्वेन, तद्गुणावतारत्वेन, तदधीनत्वेन च तस्मात् न्यूनत्वं युज्यत एवेति सुसिद्धम् ॥५॥ इदमेव साक्षात् श्रीभगवन्मुखवाक्येन द्रढयंस्तत्प्रसङ्गमाह–निवृत्तेष्विति समासेषु। पाठान्तरेऽपि स एवार्थः। राजा श्रीयुधिष्ठिरे युष्मत्पितामह इत्यनेन तत्पौत्रत्वेन श्रीपरीक्षितः परमधन्यत्वम्, तेन साक्षात् श्रीभगवति तादृशप्रश्नयोग्यत्वं च बोधयति, अत एव गौरवाद्युष्मदिति च। भगवतः श्रीकृष्णाद्धर्मान् सर्वान्। यद्वा, तस्मादेव भागवतधर्मान् शृण्वन्, तच्च भविष्योत्तरादौ प्रसिद्धम्। इदं देवासुरइत्यादिना त्वत्पृष्टमेव, अच्युतमिति सर्वैश्वर्येण भक्तवश्यतादिसद्गुणैर्वापरिपूर्णम्, किंवा तस्य गृहे सदा वर्तमानमिति भावः ॥६॥ भगवान् परमदयालुः, तत्र च प्रीतः, तादृशप्रश्नेन सन्तुष्टः, किंवा, स्वभावत एव तं प्रति प्रेमवान्, तत्रापि शुश्रूषवे श्रोतुमिच्छवे, किंवा यतो भक्ताय। किञ्च, प्रभुः स्वत एव तदीश्वरः, अत एवाह। ननु तथापि तात्पर्येणायान्तं निजोत्कर्षं तादृशविनयादिसद्गुणगणार्णवो वक्तुं किल नार्हति, तत्राह–नृणामिति। निजोत्कर्षप्रकाशनं विना स्वभक्त्यसम्पत्त्या लोकानां मङ्गलासिद्धेरित्यर्थः। यद्वा, भगवत्त्वादौ हेतुः–नृणामिति। अत एव निजाशेषैश्वर्यप्रकटनेन प्रभवतीति प्रभुः, वक्तुमयोग्यमति परमदयालुत्वादिनाहेति भावः ॥७॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

॥१-४॥

जोत्कर्षताप्रकाशनं विना
मिति भावः ॥७॥

रेण तद्भक्तानां यथाकामं
प्रदानम्, किन्तु क्रमेण
युतः श्रीभगवदवतारवत्त्वेन
भवति। कथम्? तदाह-
स्त्रिगुणव्यासः। यद्वा, यतो
हेतुः-वैकारिक इति।
न सामान्यतो विकारात्मकं
भजते, तदुपाध्यनुरूपमिति
ध्यन्ति, न तु परमपदमिति
दीनां च तदवतारत्वादिना
मानः अतः स एवोपद्रष्टा।
वब्रह्मभ्यां वैलक्षण्यमुक्तम्,
रि द्रष्टा, अन्योऽधिकज्ञाता।
इति मायासम्बन्धराहित्यमतो
सिद्धम्, श्रीवैकुण्ठादिवर्ति-

ीत्यर्थः। एवं श्रीहरेः सर्वत
प्रायावतारत्वे साम्येऽपि प्रायो
साक्षात् श्रीभगवन्मुखवाक्येन
त्यनेन तत्पौत्रत्वेन श्रीपरीक्षितः
च। भगवतः श्रीकृष्णाद्धर्मान्
दना त्वत्पृष्टमेव, अच्युतमिति
न् परमदयालुः, तत्र च प्रीतः,
तो भक्ताय। किञ्च, प्रभुः स्वत
वक्तुं किल नार्हति, तत्राह-
त्त्वादौ हेतुः-नृणामिति। अत

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

त्रिलिङ्गः विक्ष्यमाणाधिष्ठेयत्रैविध्यात् । त्रिलिङ्गः वैकारिकः इति त्रिविधाहङ्काररूपइत्यर्थः । अहं शमध्यात्मम् अहं न्तव्यमधिभूतं रुद्रस्तत्राधिदैवतम् इति श्रुतिः । आत्म इत्यहङ्कारतत्त्वमात्रं विवक्षितम् अमीषु षोडशसु कञ्चन उपधावनविकाराभिमानी वेषु। कञ्चन इन्द्रादिकं भजत इत्यर्थः ॥३-४॥ उपद्रष्टा सर्वज्ञत्वाद्गुणदोषानुमन्ता ॥५-१०॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

एकस्वभावतैव नास्ति तत्कुतः फलम् एकरूपं स्यादिति परिहरति-शिव इत्यादिभिस्त्रिभिः । शिवः शक्त्योमया युक्तः श्वत् सदा त्रिलिङ्गः वक्ष्यमाणाधिष्ठेयत्रैविध्यात् त्रिलिङ्गः त्रिविधाहङ्कारप्रचुरमूर्तिः गुणेन तमोगुणेन संवृतः तमःस्वभाव इत्यर्थः अधिष्ठेयस्य त्रैविध्यमाह-वैकारिक इति। अहङ्कारः वैकारिभेदेन त्रिधा ॥३॥ ततस्त्रिविधादहङ्कारात्षोडश विकाराः एकादशेन्द्रियाणि भूतानि सतन्मात्राणि इति षोडशविकारा जाता इत्यर्थः । तत्र तामसादहङ्कारात्सतन्मात्राणि पञ्चमहाभूतानि वैकारिकात्तु कादशेन्द्रियाणि राजसाहङ्कारस्तूभयोरनुग्राहक इति विवेकः । त्रिविधोऽप्यहङ्कारो रुद्राधिष्ठेय इत्यर्थः । "अहङ्कारोऽध्यात्ममहं न्तव्यमधिभूतं रुद्रस्तत्राधिदैवतम्" इति हि श्रुतिः अस्त्वेवं ततः किमत आह-अमीष्विति । अमीष्वहङ्कारतद्विकाराधिदेवेषु दिगभिमानिवातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रप्रजापत्यादिषु मध्ये कञ्चनान्ततममधिदैवतम् उपधावन् भजन्पुरुषः सर्वासां विभूतीनाम् ऐश्वर्याणाम् नतिं प्रकारमश्नुते नानाविधानि तत्तदधिदैवतेन दातुं शक्यान्यैश्वर्याणि प्राप्नोतीत्यर्थः ॥४॥ हरिर्हीति । निर्गुणः त्त्वादिप्राकृतगुणवश्यतारहितः साक्षाद्भगवान् समग्रज्ञानैश्वर्यादिषाड्गुण्यपूर्णः प्रकृतेः भूमिरापोनलोवायुः अपरेयमितिस्त्वन्याम् तिश्लोकद्वयोक्तोभयविधायाः प्रकृतेर्विलक्षणः सर्वदृक् सर्वज्ञः अत एवोपद्रष्टा गुणदोषानुमन्ता रुद्रादयस्तूक्तविपरीतस्वभावा इति वः। हि यस्मादेवं तस्मात् तं भजन्निर्गुणो भवेत्प्राकृतगुणसम्बन्धरहितो मुक्तो भवेदित्यर्थः । अयं भावः । ब्रह्मरुद्रादीनां जस्तमःप्रचुरस्वभावत्वाद्गुणवश्यत्वादषाड्गुण्यपूर्णत्वाज्जीवत्वादसर्वज्ञत्वाच्च न मोक्षप्रदाने सामर्थ्यं किन्तु क्त्यनुसारेणार्थकामादिप्रदान एव भगवतस्तु यद्यपि चतुर्विधपुरुषार्थप्रदत्वशक्तिरस्त्येव तथापि स भगवान् सर्वज्ञः परमकारुणिको द्यहं स्वभक्ताय त्रैवर्गिकफलं प्रच्छेयं तर्ह्ययं तदन्ते पुनः पुनर्याचमानो मां नित्यदरिद्र एवावतिष्ठते अतस्तमनुगृह्णामीत्यालोच्य यशः स्वभक्तेभ्यो मुक्तिमेव प्रयच्छतीति कस्मै चिन्निर्बन्धात्त्रैवर्गिकमपि प्रयच्छतीति ॥५॥ न केवलमयं त्वत्प्रश्नस्य हारोऽस्मद्बुद्धिकल्पितः किन्तु भगवतैवोक्त इति वक्तुं प्रस्तौति निर्वृत्तेषु परिसमाप्तेषु सत्सु राजा युधिष्ठिरः भगवतः कृष्णात्सकाशाद्धर्मान् शृण्वंस्तमच्युतं प्रतीदं त्वत्पृष्टमपृच्छत् ॥६॥ स इति । स पृष्टो भगवान् श्रोतुम् इच्छवे तस्मै युधिष्ठिराय तः प्राह-तत्र हेतुत्वेन तं विशिनष्टि-नृणाम् इति । निःश्रेयसार्थाय निरतिशयपुरुषार्थप्रदानं तत्साधनाज्ञापनायेत्यर्थः ॥७॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

जीवानां त्रैविध्यं केनाप्यनभिभूतं प्रमितं देवासुरमनुष्येष्वित्यनेन सूचितं तत्र शिवः स्वल्पसम्पृक्तसत्त्वेन बहुलेन तमसा स्पृष्टत्वेन तदनुसृतस्वभावत्वेन हरिनियतबद्धप्रकृतित्वेन तत्प्राणिस्वभावसेवानुगुणफलदानक्लृप्तत्वेनावश इव तादृशं फलं ति हरिस्तु स्वाधीनसत्त्वादिगुणत्वेन तत्प्रवर्तकत्वेन तच्छक्त्यनुपहतशक्तित्वेन प्रकृतिपरत्वेन तन्निर्मितशरीररहितत्वेन तत्स्वभावेन ष्टत्वेन नित्यनिर्दोषज्ञानानन्दतनुत्वेन स्वसेवकेभ्यः स्वानुगुणं फलं प्रयच्छतीति भावेन परिहरति शिव इत्यादिना । शक्तियुतः तिसम्बद्धः अत एव शश्वत् त्रीणि लिङ्गानि वैकारिकत्वादीनि यस्य स तथा ननु प्रकृतेरेकत्वेन तत्सम्बन्धेनैकविध्यमेवोचितं न ध्यम् अन्यथा चातुर्विध्यं किं नस्यादित्यत उक्तम्-गुणसंवृत इति । गुणानां त्रित्वात्तत्सम्बन्धेन त्रित्वं युक्तं न चातुर्विध्यादिकं तम्। त्रैविध्यं सूचयति वैकारिक इति । अहम् अहङ्कारात्मको रुद्रः ॥३॥ ततः अहङ्कारात् षोडश विकारा अभवन्निति शेषः । भूतानि दशेन्द्रियाणि एकं मनः ननु किमायातं प्रकृत इति तत्राह-अमीष्विति । यो भूतानां मध्ये अमीषु काशादिष्वधिष्ठानप्रकारेषु निधाय्य शिवमुपाधावत् सेवमानो भवति स पुरुषस्तस्मात् सर्वासां विभूतीनां गतिं सेवानुसारेण श्नुते। अत्र ग्रन्थबाहुल्यभयात् विशेषविशदीकरणादुपरम्यते ॥४॥ तु-शब्देन सत्त्वादिगुणराहित्यमेव न तु ज्ञानादिगुणराहित्यं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

विवक्ष्यते। तथात्वे सर्वदृगित्याद्यनुपपन्नं स्यात्। हरिरविनश्वरम् अनन्तकालीनां फलं ददाति रुद्रस्त्वनित्यं दु:खोदर्कं ददातीत्यादि विशेषं वा दर्शयति-उपद्रष्टा साक्षी सर्वेभ्यो द्रष्टृभ्योऽधिकद्रष्टा नान्यो वा नान्योऽतोस्ति द्रष्टेति श्रुतेः ।।५।। न धनित्वं फलं ददातीत्यस्य कथं परिहार आगत: तं वक्तुमुपक्रमते-निवृत्तेष्विति ।।६।। भूभारहरणाय प्रवृत्तेन धर्मकथनं क्वोपयुज्यत इत्यत्राह-नृणामिति। अनेन न केवलमवतारप्रयोजनं भूभारहरणमपि तु नृणां संसारनिर्मूलनलक्षणनि:श्रेयसं चेत्युक्तं भवति ।।७।।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

न केवलं तस्य स्वभावोऽयं किञ्च विचारश्चेति तद्योग्यं तद्वाक्यमितिहासमुपक्षिपति-निवृत्तेष्विति। अतो मामित्यस्य पूर्वार्धे तद्ब्रह्मेति। कथम्भूतम्। तत्तस्मात्प्रसिद्धात् ब्रह्मतोऽपि परमोऽतः सूक्ष्मं दुर्ज्ञेयं चिद्रूपा मात्रा शक्तिर्यस्य तम्। सच्च अनन्तं च यत् कं परमानन्दस्तत्स्वरूपम् ।।६-२६।।

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।।१-८।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ।।१-८।।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

शक्त्या मायया युत: संसृष्ट: गुणै: संवृत: अस्मान् कृपया स्वीकुर्विति वृतत्वात् त्रिलिङ्ग: त्रिगुणमय: न तु जीव इव तैर्बलाद्बद्ध इति भाव:। त्रिगुणमयत्वं विवृणोति वैकारिक इति अहं त्रिधेति अहङ्कारात्मक: स एव त्रिविधो भवत्येवेत्यर्थ: ।।३।। विकारा: षोडशेति इन्द्रियाणां देवानां चाभेदात्तानि दश मन एकं भूतानि पञ्चेति षोडश। अमीषु मध्ये किञ्चनेति औपस्थ्यं जैह्वं मानसं वा सुखमुद्दिश्य उपधावन् शिवं भजन् सर्वासामेव विभूतीनां सम्पत्तीनां गतिं स्वरूपं प्राप्नोति तेषां परस्परसापेक्षत्वादेकप्राप्तावपि सर्वविषयसुखानि प्राप्नोतीत्यर्थ:। तत् सुख एव सर्वसम्पत्तीनां पर्याप्तिर्भजनतारतम्यात् तत्तारतम्यं प्राप्नोति अत: शिवस्य गुणमयत्वात् सम्पदामपि त्रिगुणमयत्वात्तद्भजने तत्प्राप्तिरिति न त्वदुक्तो विरोध इति भाव: ।।४।। कुतो निर्गुण: यत: प्रकृते: पर: स्वत एव गुणानतिक्रम्य स्थित: अतो गुणातीतस्य भजनात् कथं गुणमयीं सम्पदं प्राप्नुयुरिति भाव:। सर्वेषां शिवादीनामपि ज्ञानं यत: स इति तं भजन् ज्ञानचक्षु: प्राप्नोति न तु सम्पदुद्भूतमज्ञानान्ध्यमिति भाव:। उपद्रष्टा गुणलेपाभावादौदासीन्येन केवलं साक्षीति तं भजन्नपि गुणलेपरहितो निर्गुणो भवेत् अत एवाग्रे वक्ष्यते यत: शान्तिर्यतोऽभयं धर्म: साक्षात् यतो ज्ञानं वैराग्यं च तदन्वितमित्यादि ।।५-७।।

गूढार्थदीपिनी

शिव: शक्तियुत: तद्गुणै: संवृतश्च अत एव त्रिलिङ्ग: त्रिविधाहङ्कारस्य अधिष्ठाता शिव:। ततोऽहङ्कारादेव षोडश विकारा भवन्ति। वैकारिकात् मन: राजसात् इन्द्रियाणि तामसात् भूतानि इत्येवं षोडश। अत: शिवस्य गुणमयत्वात् सम्पदामपि त्रिगुणमयत्वात् अमीषु सात्त्विकादिपदार्थेषु मध्ये यत् किञ्चन किमपि सुखमुद्दिश्य शिवम् उपधावन् भजन् सर्वासां विभूतीनां गतिं फलमश्नुते प्राप्नोति अतो न विरो: न च सन्देहावसर: ।।४।। हरि: विष्णुस्तं निर्गुण: साक्षात् प्रकृते: पर: स सर्वदृक् सर्वज्ञ: उपद्रष्टा साक्षी च तं भजन् निर्गुण: गुणातीत: सन् मुक्त एव न च किञ्चिदिच्छति ध्रुवादेरिव संस्कारवशात् क्वचिदापतिता विभूतिरपि न तस्य बाधिका सत्त्वगुणस्यानावरकत्वादन्ते मुक्तिर्निश्चितमेवेति ।।५।। अश्वमेधेषु। एकस्यैवाश्वमेधस्य त्रिगुणितदक्षिणादानाद्बहुत्वं न विरुद्धम्। युष्मत्पितामहो युधिष्ठिर:। इदं शिवविष्णूपासकानां क्रमेण धनित्वं दरिद्रत्वं च सूचितम् ।।६।। तस्मै युधिष्ठिराय। योऽवतीर्ण: स आहेत्यन्वय: ।।७।।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

शक्तियुतः उमापतिः शिवः गुणेन तमोगुणेन संवृतः तदधिष्ठेयस्याहङ्कारस्य त्रिविधत्वात् त्रिविधाहङ्कारमयमूर्तिः अहङ्कारस्य त्रैविध्यमाह-वैकारिक इत्यादिना अहङ्कारस्य रुद्राधिष्ठितत्वमाह-श्रुतिः अहङ्कारोध्यात्ममहङ्करणमधिभूतं रुद्रस्तत्राधिदैवतमिति ॥३॥ ततः शिवाधिष्ठितादहङ्कारात् एकादशेन्द्रियाणि पञ्चभूतानीति षोडशविकारा अभवन्। अमीषु विकारेषु कञ्चन यत्किंचिद्विकारं शिवदृष्ट्योपधावन् भजन् सर्वासां तत्तद्विकारानुरूपाणां विभूतीनामैश्वर्याणां गतिं स्वरूपमश्नुते प्राप्नोति धनी भोजश्च भवतीत्यर्थः ॥४॥ हरिस्तु निर्गुणः समस्तप्राकृतगुणरहितः केवलो निर्गुणश्चेति श्रुतेः यतः पुरुषः पूर्णः भगवान् समस्तस्वाभाविकषड्गुणनिधिः स्वाभाविकी ज्ञानबलक्रिया च इति श्रुतेः । प्रकृतिरिति जातावेकवचनं परापरप्रकृतिभ्यां परः विलक्षणवद्ध्यबन्धनाभ्यां जीवमायाभ्यामन्यः तयोर्नियन्तेत्यर्थः । अक्षरात्परतः परः प्रधानक्षेत्रपतिरित्यादिश्रुतेः —

"यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥" इति स्मृतेश्च ॥

सर्वदृक् सर्वज्ञः उपद्रष्टा साक्षी किम्बहुना य एव साक्षात्सर्वरूपः सर्वात्मा तं भजन् निर्गुणो निर्बन्धनः मुक्त एव भवेदित्यर्थः । सप्राकृतं धनादिकं तुच्छं प्रायो न ददातीति भावः ॥५-७॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

अतस्तान् प्रति शिवस्तादृश एवेति तन्निरूपयति-शिवः शक्तियुत इति । अहङ्काराभिमानेऽपि शिवस्य तादृशत्वे हेतुः शक्तियुत इति शक्त्या युक्तो विचरति घोरया भगवान् भव इति वाक्यात् प्रलयकर्त्रीं शक्तिं यदि शिवः शान्तात्मा क्षणमपि परित्यजेत् तदा सा प्रलयं कुर्यात् । यदि वा कण्ठे कालकूटं न स्थापयेत् तदा सर्ववस्तूनां दोषस्याधिकं रूपमिति तत्परित्यागे सर्ववस्तुषु दोषोद्गमे सर्वोऽप्यन्नादिभक्षणेन म्रियते यदि वा सर्पान्न धारयेत् तदा सर्व एव पुरुषाः कुण्डलिनीव्याप्तास्तयैव हताः स्युः तदाधिदैविकान्निरुध्य स्थापयतीति न कुण्डलिनी कमपि हन्तीति सूचितम्। एवमग्नेर्धारणम् अन्यथा सर्वं दहेदिति एवं चन्द्रमसोऽपि अन्यथा सर्वं क्षीणं कुर्यादिति वस्त्राणां सर्वदेवतामयत्वान्न बाधकत्वमिति न तद्धारणं शार्दूलचर्म तु मृत्योर्वा एष वर्णो यच्छार्दूलमिति श्रुतेः प्राणिनां मृत्युनिवारणार्थं बिभर्ति गङ्गां च बिभर्ति सापि स्पर्शमात्रेणैव पूर्वदेहं दोषरूपं निवर्त्य भगवदीयं देहं सम्पादयति जटाश्च बिभर्ति । अन्यथा वायुना हृता मेघाः गच्छेयुः एव न त्वागत्य वृष्टिं कुर्युः एवं सर्वेषां प्रयोजनानि शैवतन्त्रे निरूपितानि निर्दोषपूर्णगुणविग्रहप्रस्तावे एवं परमकृपालुरपि उपासकानुरोधात् त्रिलिङ्गो जातः ततो गुणैरपि सत्त्वरजस्तमोभिः संवेष्टितः ननु तस्य त्रिलिङ्गत्वे वा गुणवैनष्टत्वे वा को हेतुरिति चेत्तत्राह-वैकारिकस्तैजसश्चेति । वैकारिकः सात्त्विकः तैजसो राजसः अहमहङ्कारः तदधिष्ठाता जाता इति तस्य त्रिलिङ्गत्वात् गुणसंवृतत्वाच्च स्वयं चापि तथा जातः ततः सहिता शक्तिः पुरुषसम्बन्धाम् ॥३॥ प्रलयकर्तृत्वं परित्यज्य वृष्टिं कृतवतीत्याह-ततो विकारा अभवन्निति । भूतानीन्द्रियाणि च विकाराः षोडश महादेवः षोडशरूपो जात इत्यर्थः । षोडशकलोऽयं पुरुष इति श्रुतेः । ततोऽमीषु भगवन्मूर्तिषु कञ्चनापि महादेवम् उपाधावन् सर्वासामेकविभूतीनां गतिमश्नुते यतः स विभूतिपतिः ऐश्वर्याण्यक्षयरूपाणि कृत्वा बिभर्तीति अनेन तस्य विभूत्यभावो निराकृतः । एवं महादेवे दोषं निराकृत्य भक्तानुरोधेन विकारजातं प्रयच्छतीति निरूपितम्। भगवति च वादी प्रष्टव्यः । किं लक्ष्मीरूपा विषयाः उत्तमा अधमा वेति। उत्तमत्वे कथं न प्रयच्छति। अधमत्वे कथं स्वयं भुङ्क्ते इति सन्देहः । तत्र हि-शब्दः पूर्वपक्षोक्तं प्रकारं वारयति लक्ष्मीरूपविषया उत्तमाः अतो भगवान् बिभर्तीति युक्तम्। दोषरूपपक्षस्थापनार्थं भगवता शिवरूपमेव कृतमिति नात्र पुनस्तत्पूर्वपक्षाः समायान्ति ॥४॥ तत्र भक्तेभ्यः कथं न प्रयच्छतीति आशङ्कायामाह-हरिरिति । प्रयच्छत्येव न तु दुःखरूपान् यथा हरिर्गजेन्द्राय पूर्वावस्थास्थितदेहभार्यैश्वर्यादिकं त्याजयित्वा परमानन्दरूपान् तानेव दत्तवान् युक्तश्चायमर्थः । ननु शिववत् कथं न प्रयच्छतीति चेत्तत्राह-निर्गुण इति । गुणार्थं तदेवरूपं जातमिति तेनैव रूपेण तत्कार्यं सिद्ध्यतीति स्वयं गुणातीतः अत्र रूपे गुणग्रहणे प्रयोजनं नास्तीत्याह-साक्षात्पुरुष इति । अयं सर्वेषामुपासकानामात्मा अतस्तद्धितमेव विचारयति न तूपासनाविरोधं करोति । किञ्च अस्य तादृशी कापि शक्तिर्नास्ति यदनुरोधात्तां परिगृह्य सगुणो भवेत् ननु पुरुषत्वात् प्रकृतिरायात्तीति चेत् अत आह-प्रकृतेः पर इति । ननु तथापि भक्ते क्लेशं दृष्ट्वा कथं न सम्पादयतीति चेत्तत्राह-स सर्वदृगिति । सः प्रसिद्धः आत्मा हितकारी सर्वस्यापि सर्वं पश्यति ।

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

किञ्च । अन्तर्यामित्वान्निकटेऽपि स्थितः पश्यति । ततो यदैव यद्विना कार्यं न भवतीति जानाति तदैव तत्प्रयच्छतीति भावः। अत एवैतादृशं परमाविलक्षणं भजन् स्वयमपि निर्गुण एव भवेत् गुणप्रयोजनाभावात् भगवांश्च तेनैव रूपेण प्रकट इति न भक्तोऽपेक्षते नापि भगवान् प्रयच्छतीत्यर्थः ॥५॥ प्रत्युत दोषरूपान् विषयान् भक्तेषु पश्यन् अपहरतीति विष्णूपाख्यानमाह-निवृत्तेष्वश्वमेधेष्विति । अश्वमेधत्रयं कृत्वा पश्चादन्ते धर्मश्रवस्य विहतत्वात् भगवान् धर्मान् शृण्वन् भगवान् भक्तानां सम्पदो न वर्धयतीति तत्र सन्दिहानः इदमेवार्थम् अच्युतमपृच्छत् । स च भगवान् तत्रैव स्थितः स्वधर्मान् शृणोतीति प्रीतः सन् गुह्यमपि सिद्धान्तं शुश्रूषवे प्रभुत्वात् निःशङ्कतामाह-ननु व्यासादयोऽपि भगवद्रूपास्तिष्ठन्तीति अतः क एवमुक्तवानित्याशङ्क्याह-नृणां निःश्रेयसार्थायेति व्यासस्यापि शास्त्रद्वारा निःश्रेयसत्वसाधकत्वमाशङ्क्य योऽवतीर्ण इति रामव्यावृत्त्यर्थं पूर्वपदम् ॥६-७॥

सुबोधिनीसारः

“समाधत्ते शुको भेदो गुणतो न तु वस्तुतः । सिद्धिं शीघ्रमभीप्सन्तो भजन्ते येऽन्यदेवताः ॥
हरिर्मोक्षप्रदस्तेन तद्भक्ता निस्पृहाः स्फुटाः । दत्त्वा विभूतिं केषांचित्पुरुषार्थाय योजयेत्” इति ॥

मदीयः सङ्ग्रहः शिवः शक्तिविशिष्टः त्रिमूर्तिः गुणयुक्तो यतः सात्त्विको राजसस्तामसश्चेति ॥३॥ ततस्तेभ्यः षोडशविकारा आसन् अमीषु मध्ये किञ्चनविकारोऽपाधिं भजन् सर्वासां विभूतीनां गतिं प्राप्नोति ॥४॥ हरिर्निर्गुणः साक्षात् प्रकृतेः परः पुरुषः स सर्वदृक् सर्वं पश्यति यत उपद्रष्टा साक्षी तं भजन् निर्गुणो गुणातीतो भवेत् ॥५॥ अत्राप्तवाक्यं प्रमाणमिति । अश्वमेधेषु समाप्तेषु युष्माकं पिता महो राजा युधिष्ठिरो भगवतो धर्मान् शृण्वन् अच्युतं श्रीकृष्णम् इदमेवापृच्छत् ॥६॥ शुश्रूषवे श्रोतुमिच्छते तस्मै राज्ञे स भगवान् प्रभुराह । स क इत्यत आह यदोः कुलेऽवतीर्णः यः पुंसां क्षेमाय ॥७॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

शश्वत् नित्यानन्दरूपपुरुष एव शिवः शक्त्या प्रकृत्या युतः त्रिलिङ्गो भवति । अतः प्रकृतिगुणैः संवृत इति । त्रिलिङ्गत्वमेव स्पष्टयति-वैकारिकः सात्त्विकः, तैजसो राजसः, तामसश्चेत्यहङ्कारस्त्रिधा । अतस्तदधिष्ठाता सोऽपि गुणयुक्तः । अतो विभूतीनां त्रिगुणकार्यत्वात्तद्भजनाद्विभूतिप्राप्तिरित्याशयः । तस्यैव सात्त्विकत्वेन निर्गुणत्वेन भजनात् ज्ञानमोक्षावपि भवतः ॥३॥ अत एव देवतान्तरभजनेऽपि विभूतिलाभः इत्याह-तत इति । ततोऽहङ्कारात् वैकारिकान्मनः, तैजसात् दशेन्द्रियाणि, तामसात्पञ्चमहाभूतानि, इत्येवं षोडशविकारा अभवन् । अत्रेन्द्रियादिदेवानां तदभेदो विवक्षितः । अतः अमीषु अहङ्कारकार्येषु दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकप्राजापत्यादिषु मध्ये कञ्चनापि तमधिदेवमुपधावन् भजन् पुरुषः सर्वासां विभूतीनां मध्ये गतिं तेनाधिदैवतेन दातुं शक्यम् ऐश्वर्यादिफलमश्नुते प्राप्नोतीत्यर्थः ॥४॥ हरिर्हि विष्णुस्तु निर्गुणः प्राकृतगुणपारतन्त्र्यरहितः यतः प्रकृतेः परः तन्नियन्ता । तत्र हेतुः-साक्षाद्भगवान् ज्ञानैश्वर्यादिगुणपूर्णः । अत एव स सर्वदृक् सर्वज्ञः । तस्य सर्वज्ञत्वे विकारित्वामाशङ्क्याह-उपद्रष्टेति, साक्षिमात्रमित्यर्थः । तं भजन् पुरुषो निर्गुणो भवेत् मुक्त एव भवेत् । क्वचिच्चित्तमालिन्यवशाद्भक्तजनाभिप्रायानुसारेण ध्रुवबलिप्रभृतिषु तद्दत्ता विभूतिरपि प्रसिद्धा । तथापि सत्त्वगुणस्य तदुपाधेराश्रयानावरकत्वादन्ततो विवेकेन तत्त्यागेन मुक्तौ न सन्देहः । नान्यभक्तानां दैत्यादीनामिव मोहः ‘यो यच्छ्रद्धः स एव सः’ इति सिद्धान्तात् । अत एव तत्र तत्रोक्तम्- ‘श्रेयांसति तत्र खलु सत्त्वतनोर्नृणां स्युः’ इति ‘सत्त्वं यस्य प्रिया मूर्तिः’ इति, तथा ‘सत्त्वं तत्तीर्थसाधनम्’ इत्यादि ॥५॥ न चायं त्वत्प्रश्नपरिहारो मया कल्पितः किन्तु भगवतैवोक्तः इत्याह-निवृत्तेष्विति । अश्वमेधेषु निवृत्तेषु सत्सु युष्मत्पितामहो राजा युधिष्ठिरः भगवतः कृष्णात्सकाशात् धर्मान् शृण्वन् तमच्युतं परिपूर्णज्ञानं प्रतीदं त्वत्पृष्टमेवापृच्छत् ॥६॥ स कृष्णस्तस्मै शुश्रूषवे युधिष्ठिरायाह । अन्यथा कथनं वारयन्नाह-प्रीत इति । उपदेशयोग्यतामाह-प्रभुरिति । तत्र हेतुः-भगवानिति । कोऽसौ भगवान् इत्यपेक्षायामाह-नृणामिति ॥७॥

अन्वितार्थप्रकाशिका

शिव इति । शश्वत् शक्त्या युतः गुणसाम्यावस्थप्रकृत्युपाधिना नित्यमुक्तेश्वराविर्भावविशेषः नित्यानन्दरूपपुरुष एव शिवः ईश्वरोऽपि गुणक्षोभे त्रिलिङ्गो भवति । अन्योन्योपमर्देन गुणत्रैविध्यात् । अतः प्रकृतिगुणैः संवृत इति अहम् अहङ्कारः श्रीशिवाधिष्ठेयः वैकारिकः सात्त्विकः तैजसो राजसः तामसश्चेत्येवं त्रिधा तामसाहङ्काराद्यधिष्ठातैव शिवादिनामकः अतस्तदधिष्ठाता सोऽपि गुणयुक्तः । अतो विभूतीनां त्रिगुणकार्यत्वात्तद्भजनाद्विभूतिप्राप्तिरित्याशयः । तस्यैव सात्त्विकत्वेन निर्गुणत्वेन भजनात् ज्ञानमोक्षावपि भवतः । श्रीकृष्णवन्निरुपाधिक एव शिव इति वादे तु नाममूर्तिमात्रे विवाद इति भावः ॥३॥ तत इति । ततोऽहङ्कारात् वैकारिकान्मनः तैजसात् दशेन्द्रियाणि तामसात्पञ्च महाभूतानि इत्येवं षोडशविकारा अभवन् । अत्रेन्द्रियादिदेवानां तदभेदो विवक्षितः । अतः अमीषु अहङ्कारकार्येषु 'दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः' इति प्राजापत्यादिषु मध्ये कञ्चनापि तमधिदेवमुपधावन् भजन् पुरुषः सर्वासां विभूतीनां मध्ये गतिं तेनाधिदैवतेन दातुं शक्यम् ऐश्वर्यादिफलमश्नुते प्राप्नोति । यद्वा अमीषु मध्ये किञ्चन औपस्थ्यं जैह्व्यं मानसं वा सुखमुद्दिश्य शिवं भजन् सर्वासामेव विभूतीनां गतिं स्वरूपं प्राप्नोति तेषां परस्परसापेक्षत्वात् । एकप्राप्तावपि सर्वविषयसुखानि प्राप्नोतीत्यर्थः । अतः शिवस्य गुणमयत्वात् सम्पदामपि त्रिगुणमयत्वात्तद्भजने तत्प्राप्तिरिति न तदुक्तो विरोधः । अत्र कञ्चन इत्यत्र किञ्चनेति नपुंसकपाठः ॥४॥ हरिरिति । हरिर्हि विष्णुस्तु निर्गुणः प्रकृतेः परः साक्षाद्भगवान् स सर्वदृक् सर्वज्ञः उपद्रष्टा साक्षिमात्रं तं भजन् पुरुषो निर्गुणो मुक्त एव भवेत् । क्वचित्संस्कारवशात् ध्रुवादौ विभूतिरपि तथापि सत्त्वगुणस्यानावरकत्वादन्ततो विवेकेन मुक्तौ न सन्देहः । अत्र श्रीस्वामिपादानां कारिकाः —

"वस्तुनो गुणसम्बन्धे रूपद्वयमिहेष्यते । तद्धर्मायोगयोगाभ्यां बिम्बवत्प्रतिबिम्बवत् ॥
गुणाः सत्त्वादयः शान्तघोरमूढाः स्वभावतः । विष्णुब्रह्मशिवानां च गुणयन्तृस्वरूपिणाम् ॥
नातिभेदो भवेद्भेदो गुणधर्मैरिहांशतः । सत्त्वस्य शान्त्या नो जातु विष्णोर्विक्षेपमूढते ॥
रजस्तमोगुणाभ्यान्तु भवेतां ब्रह्मरुद्रयोः । गुणोपमर्दतो भूयस्तदंशानां च भिन्नता ॥
अतः समग्रसत्त्वस्य विष्णोर्मोक्षकरी मतिः । अंशतो भूतिहेतुश्च तथाऽऽनन्दमयी स्वतः ॥
अंशतस्तारतम्येन ब्रह्मरुद्रादिसेविनाम् । विभूतयो भवन्त्येव शनैर्मोक्षोऽप्यनंशतः ॥" इति ॥
इदमेवाभिप्रेत्योच्यते । 'श्रेयांसति तत्र खलु सत्त्वतनोर्नृणां स्युः, सत्त्वं यस्य प्रिया मूर्तिः' इति ।
"त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ।" इत्यादि ॥

इति सर्वं समञ्जसम् । तत्तद्भक्तानां तु कलहो द्रोहमात्रम् ॥५॥ निवृत्तेष्विति । अश्वमेधेषु निवृत्तेषु समाप्तेषु सत्सु युष्मत्पितामहो राजा युधिष्ठिरः भगवतः कृष्णात्सकाशात् धर्मान् शृण्वन् तमच्युतं परिपूर्णज्ञानं प्रतीदं त्वत्पृष्टमेवापृच्छत् ॥६॥ स इति । प्रीतः प्रभुर्भगवान् स कृष्णः तस्मै शुश्रूषवे युधिष्ठिरायाह स्म । यो नृणां निःश्रेयसार्थाय यदोः कुलेऽवतीर्णः ॥७॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

शकुनेस्तन्नाम्नोऽसुरस्य पुत्रः आशुतोषं सद्यो वरदम् ॥३॥ उपाधाव तस्योपासनं कुरु आशु सिध्यति तव मनोरथ आशु सिद्धो भविष्यति सिध्यसीति पाठे तु त्वमाशु सिद्धमनोरथो भविष्यसि ॥४॥ दशास्यो रावणः ततस्ताभ्यां सुसङ्कटमत्यन्तं दुःखमाप रावणात्कैलासोत्पाटनरूपम् । बाणासुराच्छोणितपुरपालनरूपं भवगता सह युद्धरूपं च ॥५॥ इत्यादिष्टः एवं नारदेनोपदिष्टः केदारे केदाराख्ये शिवक्षेत्रे । तं स्वगात्रतः उपाधावत् स्वाङ्गैरुपास्यत् कथं तत्राह–आत्मक्रव्येण स्वमांसेन अग्निमुखं हरं जुह्वानो जुह्वन् अग्नौ शिवमावाह्य होमं कुर्वाण इत्यर्थः ॥६॥ स्वधितिना स्वखड्गेन शिरोऽवृश्चन्मस्तकृन्तनोद्योगं चकार ॥७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

परिहरति शिव इति त्रिभिः ॥ शिव इति ॥ शक्तियुतः उमया युक्तः शश्वत् सदा त्रिलिङ्गः वक्ष्यमाणाधिष्ठेयत्रैविध्याल्लङ्गत्रययुक्तः

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

त्रविधाहङ्कारप्रचुरमूर्तिरित्यर्थः । गुणसंवृतस्तमोगुणेन वृतः तमःस्वभाव इत्यर्थः । अधिष्ठेयस्य त्रैविध्यमाह । वैकारिक इति। वैकारिकः सात्त्विकः, तैजसो राजसश्च, तामसश्च इत्येवम् अहमधिष्ठेयापरनामाहङ्कारः त्रिधा वैकारिकादिभेदत्रयेण त्रिप्रकारः ॥३॥ तत इति ॥ ततस्त्रिविधाहङ्कारात्, षोडश विकाराः अभवन् । एकादशेन्द्रियाणि तन्मात्रासहितानि पञ्चभूतानीति षोडश विकारा जाता इत्यर्थः । तत्रायं विवेकः । तामसाहङ्कारात् सतन्मात्राणि पञ्च भूतानि, वैकारिकात्तु इन्द्रियदेवताः, राजसादिन्द्रियाण्यभवन्निति। केचित्तु तामसात्सतन्मात्राणि भूतानि वैकारिकात्सदैवतैकादशेन्द्रियाणि राजसस्तूभयोरनुग्राहक इत्याहुः । त्रिविधोऽप्यहङ्कारो रुद्राधिष्ठेय इत्यर्थः । 'अहङ्कारोऽध्याममहङ्कर्तव्यमधिभूतं रुद्रस्तत्राधिदैवतम्' इति श्रुतेः । अस्त्वेवं, ततः किमत आहामीष्विति । अमीषु अहङ्कारतद्विकाराधिदैवेषु दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रप्रजापत्यादिषुमध्ये इवेत्यर्थः । कञ्चनान्यतममधिदैवतम्, उपाधावन् भजन् पुरुषः, सर्वासां विभूतीनामैश्वर्याणां गतिं प्रकारम् अश्नुते । नानाविधानि तत्तदधिदैवतेन दातुं शक्यानि ऐश्वर्याणि प्राप्नोतीत्यर्थः ॥४॥ हरिरिति ॥ सः सर्वकारणत्वेन प्रसिद्धः हरिः, निर्गुणः सत्त्वादिप्राकृतगुणरहितः, साक्षात् भगवान् समग्रज्ञानैश्वर्यादिषाड्गुण्यपूर्णः, प्रकृतेः 'भूमिरापोऽनलो वायुः' इत्यादि 'अपरेयमितस्त्वन्याम्' इत्यादिश्लोकद्वयोक्तोभयविधायाः प्रकृतेः, परो विलक्षणः सर्वदृक् सर्वज्ञः अत एव उपद्रष्टा गुणदोषानुमन्ता रुद्रादयस्तूक्तविपरीतस्वभावा इत्यर्थः । हि यस्मादेवं ततः तं श्रीहरिं भजन् निर्गुणो भवेत्। प्राकृतगुणसम्बन्धरहितो मुक्तो भवेदित्यर्थः । अयम्भावः । ब्रह्मरुद्रादीनां रजस्तमःप्रचुरस्वभावत्वाद्गुण-वशादषाड्गुण्यपूर्णत्वादसर्वज्ञत्वाच्च न मोक्षदाने सामर्थ्यं, किं तु स्वशक्त्यनुसारेणार्थकामादिप्रदान एव समर्थत्वं भगवतो हरेस्तु यद्यपि चतुर्विधपुरुषार्थप्रदत्वे शक्तिरस्त्येव तथापि सर्वज्ञः परमकारुणिकः स भगवान् यद्यहं मद्भक्ताय त्रिवर्गफलं प्रयच्छेयं यर्ह्ययं तदन्ते पुनः पुनर्मां याचमानो दरिद्र एवावस्थास्यतीति तमहमनुगृह्णामीत्यालोच्य प्रायशः स्वभक्तेभ्यो मुक्तिमेव प्रयच्छति कस्मैचित्तन्निर्बन्धमालोच्य त्रैवर्गिकमपि प्रयच्छतीति ॥५॥ न केवलमयं त्वत्प्रश्नस्य परिहारोऽस्मद्बुद्धिकल्पितः किन्तु भगवतैवोक्त इति वक्तुं प्रस्तौति ॥ निवृत्तेष्विति ॥ अश्वमेधेषु निवृत्तेषु परिसमाप्तेषु सत्सु युष्मत्पितामहः राजा युधिष्ठिरः भगवतः श्रीकृष्णात् सकाशात् धर्मान् शृण्वन् श्रोतुमित्यर्थः । अच्युतं श्रीकृष्णं प्रति इदं त्वत्पृष्टम् अपृच्छत् ॥६॥ स इति ॥ नृणां निःश्रेयसार्थाय निरतिशयपुरुषार्थप्रदानाय तत्साधनप्रदानाय च यदोः कुले यः अवतीर्णः प्रभुः परमेश्वरः स राजा संपृष्टः भगवान् श्रीकृष्णः शुश्रूषवे श्रोतुमिच्छवे तस्मै युधिष्ठिराय प्रीतः सन् आह ॥७॥

कृष्णप्रिया

श्रीशुकदेवजी महाराजने कहा ! हे राजन् ! शिवजी अपनी शक्ति (पार्वती) युक्त है शिवजी शाश्वत् है । और सत्व-रज-तम इति तीनों गुणों के अधिष्ठाता है । अतः त्रिलिंग और अहंकार भाव भी है (किन्तु जीववत् नही) अतः वैकारिक, तामस, तेजस ऐसे तीन भेद है ॥३॥ त्रिगुणात्मक अहंकारमें से)दश इन्द्रियों, पञ्च महाभूत और मन) ऐसे षोडश विकार उत्पन्न हुए । यह सोह देवताओंमें से किसी एक का भी आश्रय करनेवाला सर्व भिभूतिओंके कल को प्राप्त करता है ॥४॥ श्रीहरि केवल निर्गुण है । और प्रकृति से पर है । साक्षात् पूर्ण पुरुषोत्तम और सब के सभी कार्योके दृष्टा भी है । अतः उसका भजन करने वाला भक्त निर्गुण हो जाता है ॥५॥ हे राजन् परीक्षित् ! आपके पितामह (धर्मराज युधिष्ठिर) ने अश्वमेध यज्ञोंकी पूर्णाहूति (समाप्ति) होते ही वह भगवद् धर्मो का श्रवण कर रहे थे तब (परिप्रश्न) एसा ही प्रश्न भगवान विष्णु से किया ॥६॥ मनुष्यों के कल्या के लिए हि उन्होंने यदुकुल में अवतार धारण किया था । वह हि भगवान् प्रभु युधिष्ठिर की सुनने की इच्छा और प्रश्न को सुनकर प्रसन्न हुए भगवान ने इस प्रकार उत्तर दिया था ॥७॥

श्रीभगवानुवाच

यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः । ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितम् ॥८॥
स [1]यदा वितथोद्योगो निर्विण्णः स्याद्धनेहया । मत्परैः कृतमैत्रस्य करिष्ये [2]मदनुग्रहम् ॥९॥
[3]तद्ब्रह्म परमं सूक्ष्मं चिन्मात्रं सदनन्तकम् । अतो मां सुदराराध्यं हित्वान्यान् भजते जनः ॥१०॥
ततस्त आशुतोषेभ्यो लब्धराज्यश्रियोद्धताः । [4]मत्ताः प्रमत्ता वरदान् विस्मरन्त्यवजानते ॥११॥

कर्दमक्षमा

श्रीभगवान्, उवाच ।

यस्य, अहम्, अनुगृह्णामि, तद्धनम्, शनैः, हरिष्ये, ततः, अस्य, स्वजनाः, दुःखदुःखितम्, अधनम्, त्यजन्ति ॥८॥ यदा, सः, वितथोद्योगः, धनेहया, निर्विण्णः, स्यात्(तदा), मत्परैः, कृतमैत्रस्य, मदनुग्रहम्, करिष्ये ॥९॥ तत्, परमम्, सूक्ष्मम्, चिन्मात्रम्, सत्, अनन्तकम्, ब्रह्म, अतः, माम्, सुदुराराध्यम्, हित्वा, जनः, अन्यान्, भजते ॥१०॥ ततः(ये), आशुतोषेभ्यः, लब्धराज्यश्रिया, उद्धताः, मत्ताः, प्रमत्ताः, विस्मरन्ति, ते, वरदान्, अवजानते ॥११॥

श्रीधरस्वामिकृता भावार्थदीपिका

यस्याहमनुगृह्णामीति अयमर्थः यो विषयान् परिजिहीर्षुरपि कथञ्चिद्विद्यमानेषु विषयेषु सज्जते क्लिश्यति च तस्य विषयापहार एवानुग्रह इति यथा श्रुतत्वे ध्रुवादीनामैश्वर्यविरोधात् अथवा प्रथमं विभूतीः कामानुरूपा दत्त्वा शनैर्विषयभोगावसाने तस्य निर्वेदमुत्पाद्य हरिष्यामि परमानुग्रहं कर्तुमिति तदुक्तं भगवतैव 'न मय्यावेशितधियां कामः कामाय कल्पते' इति दुःखदुःखितमिति दुःखादनु पुनर्दुःखितमिव प्रतीयमानमित्यर्थः ॥८॥ स पुनर्बन्धूनामाग्रहेण धनेहया प्रवृत्तोऽपि मदनुग्रहेण यदा निष्फलोद्यमो निर्विण्णः स्यात्तदा मदनुग्रहमिति ममासाधारणमनुग्रहम् ॥९॥ तमेवाऽऽह–तद्ब्रह्मेति । अतः पश्चादपि मोक्षमरोचयन् अत्यासक्तो जन इत्यर्थः ॥१०-११॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अनुगृह्णामि अनुग्रहं कर्तुम् इच्छामि । ननु धनहरणं कोऽयमनुग्रह इति चेदत्राशयमाह–अयमर्थ इति । विद्यमानेषु विषयेषु । दत्तापहारित्वदोषमाशङ्क्याह–अथवेति । प्रथमं भोगेच्छावसरे । तस्य निजभक्तस्य । परमानुग्रहं स्वावाप्तिलक्षणम् । तच्च चीरहरणोपाख्याने श्रीकृष्णेनैवोक्तमित्याह–तदुक्तमित्यादि । ततो मत्कृतधननाशोत्तरम् । अधनं निर्धनम् । अस्य निर्धनस्य । स्वजनाः पुत्रादयः । त्यजन्त्यनादरं कुर्वन्ति । इत्यर्थ इति–धनहान्यातीव दुःखितमिति भावः ॥★॥ अथ किमाहेत्यपेक्षायां स तु न देवासुरेत्यादिना पृष्टस्योत्तरं सस्मितं तदभिप्रायविपरीतमेवाहेत्याह–श्रीभगवानुवाचेति । यमुपासकमनुगृह्णामि यं तु कामयमानं नुगृह्णामि किन्तु तदभिरुचिमात्रमापाततः सम्पादयामि तस्मा एव धनं ददामीति भावः । हरिष्य इति लृट्प्रयोगोऽक्षमायाम् । 'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपी'ति स्मरणात् । तद्धनदर्शनाक्षमापूर्वकं हरामीत्यर्थः । शनैरिति । सहसा हरणे तस्य सर्वाच्छादकः भ्रम एव स्याच्छनैर्हरणे तु क्रमेण धनादुदासिनीभूतः सत्सङ्गे रतिः स्यादित्यभिप्रेत्येति भावः । ततः किं तत्राह–तत इति । नीत्यस्य त्यजन्तीत्यनेनाप्यन्वयः । अत एव दुःखे वीप्सा । क्रमाद्दारिद्र्यातिशयं प्राप्तमित्यर्थः । अत्र विश्वनाथः—दुःखात् धनविगमजन्यादपि पुनर्दुःखितं स्वजनककर्तृकत्यागात् । दुःखमिदं भगवद्दत्तत्वात् तस्य न कर्मफलं सुखमपि भगवद्भक्तानां न कर्मफलं किन्तु भक्तेरननुसंहितं फलमिति प्रथमस्कन्धे 'धर्मस्य ह्यापवर्गस्ये'त्यत्र भीष्मोक्तावपि प्रतिपादितम् । भक्तानां भक्तिमात्रे तु एवाप्रारब्धकूटबीजप्रारब्धकर्मणां क्रमेण नाशः 'उत्पलसहस्रजलभेदवदि'ति भक्तिशास्त्रमतम् । तथा च श्रुतिर्गोपालतापनी

---

[1] स तदा–वीर. । [2] तदनुग्रहं–विज. । [3] तस्मै ब्रह्म–वीर. । [4] प्रमत्ता वरदान्देवान्–विज. ; मदात् प्रमत्ता–इति च. पु. टी. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

''भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनामुष्मिन् मनः कल्पनमेतदेव नैष्कर्म्यम्'' इति ॥

अर्थश्च–उपाधिनैराश्येन कामनाराहित्येन मनःकल्पनं कृष्णे मनआदिसर्वेन्द्रियविनियोगो यस्तदेव भजनम् एतदेव भजनमेव नैष्कर्म्यमिति । भवति हि तात्पर्यात्ताच्छब्द्यमतः सामानाधिकरण्याद्भजने प्रवृत्ते एव भक्तानां नैष्कर्म्यं सर्वकर्मध्वंसो भवति। देहस्थितिस्तु भजनाधिक्यतत्फलप्रतिपादकभगवदचिन्त्यशक्तेरेवेति । ये तु प्रारब्धे फले इव सुखदुःखे दृश्येते ते भगवद्दत्ते एव। यदुक्तं श्रुतिभिः भवदुत्थशुभाशुभयोः इति । भक्तवत्सलो भगवान् भक्तेभ्यः कथं दुःखं ददातीति चेत् सत्यं पुत्रवत्सलोऽपि पितापुत्रेभ्यो भोगदूरीकरणेनाध्ययनादिकृच्छ्रं यद्ददाति तद्वात्सल्यं स एव जानाति न तु तदानीं तत्पुत्रोऽपीति । न च प्रह्लादध्रुवादिभ्यो भोगसम्पत्तिसुखमात्रदानात् साधकेभ्य एव हितार्थिना भगवता दुःखं दीयत इति वाच्यं, सिद्धशिरोमणीनां युधिष्ठिरादीनामपि 'यत्र धर्मसुतो राजे'त्यत्र 'सुहृत्कृष्णस्ततो विपदि'ति भीष्मोक्तौ दुःखश्रवणात् । तस्मान्न ———

''ह्यस्य किहिचिद्राजन् पुमान् वेदविधित्सितमि''ति ।

भीष्मोक्तेतस्य विधित्सितं स एव भक्तवत्सलो वेद नान्य इति सिद्धान्तः । किञ्चित्तत्र समाहितं तदपि तत्रैव दृश्यम्। ननु च स्वकार्योत्थयोर्भयवदुत्थयोश्च सुखदुःखयोर्भोग्यत्वेन तुल्यत्वात् को विशेषः, उच्यते, कर्मोत्थानां सुखदुःखानां भोगेनापि तद्बीजं तिष्ठत्येव तद्वतां नरकपातश्च कर्मतारतम्यवतां सुखदुःखतारतम्यं चेति त्रितयं भवेत् । भगवदुत्थानां तु भगवदिच्छैव बीजं सा च प्रयोजनपर्यन्तैव न तदुत्तरा 'जिह्वा न वक्ति भगवद्गुणनामधेयमि'त्यादि यमोक्तेस्तद्वतां न नरकपातः भगवतः स्नेहपात्रत्वात् न दुःखातिशयश्चेति । कर्मोत्थभगवदुत्थयोः शत्रुकृतमातृकृतगात्रताडनोत्थयोरिव दुःखयोर्विषामृतयोरिव कुतस्तुल्यतेति विवेचनीयम् । ननु च, सर्वसमर्थस्य भगवतो भक्तदुःखदानं विना किं तत् प्रयोजनं न सिध्येत् सत्यं लीलानिधेस्तस्यैव सिध्येदेव। भक्तियोगस्य रहस्यत्वरक्षार्थं नानान्यमतानुमुत्थानाभावार्थं भक्त्यौत्कण्ठ्यादिवर्धनार्थं च क्वचित् प्रियेभ्यो दुःखदानमपि तत्सुखोदर्कमेव, यथा नयनाभ्यां कटुतराञ्जनदानमिति । तथाहि यदि भक्ताः सदा सुखिन एव कृताः स्युस्तदा 'परित्राणाय साधूनां विनाशाय च दुष्कृतामि'ति गीतोक्तनिमित्ताभावे सति कृष्णरामाद्यवतारा अपि न स्युस्तदा रासादिलीलामृतसिन्धौ भक्तानां खेलनं कथं स्यादिति । ननु च दुःखत्राणात्मकं निमित्तं विनापि तस्यावतारे को दोषः स्यात् सत्यं भो भ्रातस्त्वं न रसाभिज्ञोऽसि । श्रूयतां, यामिन्यां सत्यामेव चन्द्रादयः शोभन्ते ग्रीष्मे सत्येव शीतलाम्भः सुखदं शीते सत्येवोष्णाम्भः तमस्येव दीपः शोभते न तु प्रकाशे क्षुत्पीडायां सत्यामेवान्नमतिस्वादु भवतीत्यलमतिविस्तरेण ॥८॥ पत्परैर्मत्परायणैः सह । कृतमैत्रस्य कृतप्रीतेः । असाधारणं मुक्तिलक्षणमनुग्रहम ॥★॥ 'करिष्ये मदनुग्रहम्' इति द्वितीयोऽयमनुग्रहोऽसाधारणो भक्तिरसामृतवर्षी यदर्थमेव मे प्रथमोऽनुग्रहो दुःखसन्तापफलोऽभूदिति भावः । अत एवानुग्रहं करिष्य इत्यप्रयुज्य मदनुग्रहमिति मामिवानुग्रहं करिष्य इत्यर्थः ॥९॥ तमेवानुग्रहमेव यत्सूक्ष्मं परमं ब्रह्म तन्मां हित्वा । अतः पश्चाद्धननाशोत्तरकालेऽन्यं भजते । इत्यर्थ इति–धनादिनाशेऽपि सद्वासनानाशाभावाद्देवतान्तरमेवं 'वसुकामो वसून्रुद्रान्' इत्यादिवाक्यैर्धनादिप्रदं मत्वाऽऽराधयतीति भावः ॥★॥ अत एवानुग्रहं स्वतुल्यत्वेन विशिनष्टि–तद्ब्रह्मेति। बृहत्तमत्वात् बहिरङ्गलोकदुर्लक्ष्यत्वाच्च ब्रह्मतुल्यं परमं सर्वोत्कृष्टम् । अनुग्राह्यस्य भक्तस्याप्यगम्यत्वात् सूक्ष्मं प्रेमरसानुभावकत्वात् चिन्मात्रम् । प्राकृतसुखराहित्यात् मात्रपदप्रयोगः सत् सर्वकालसत्ताकम् । अनन्तकं नास्त्यन्तकभयं यत इत्यननुसंहितफलरूपः संसारक्षयश्चोक्तः । क्वचिदत्र विज्ञाय इत्यर्धकमस्ति तदसाम्प्रदायिकमिति । अत इत्यर्धकम् । अतो धनाप्राप्तेर्हेतोः । जनः साधारणः । 'यस्याहमनुगृह्णामी'त्युक्ताभिप्रायेण 'अकामः सर्वकामो वा' इत्युक्तरीत्या च त्वमपि धनं ददासि तर्हि कथमन्यान् भजंते तत्राह–सुदुराराध्यमिति । तस्याराधनतत्त्वाज्ञानाच्छ्रीभगवतश्च सुविचार्यैव फलदातृत्वात् इति भावः । तथोक्तं तृतीये—

''तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः । कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः ॥'' इति ॥

अथवा तदज्ञानस्य हेतुत्वमेव व्यञ्जयन् स्वविशेषणत्वेन तद्ब्रह्मेत्याद्यर्धमुक्तम् । तस्माद्ब्रह्मतोऽपि परमं 'ब्रह्मणो हि प्रतिष्ठाह'मित्यादिप्रसिद्धम् । अतः सूक्ष्मं दुर्ज्ञेयं यतश्चित्स्वरूपं ब्रह्म च मात्रा अंशो यस्य, यद्वा, चिद्रूपा मात्रा शक्तिर्यस्य तम्।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

च्च अनन्तं च यत् कं परमानन्दस्तत्स्वरूपमिति ॥१०॥ यतो मां विहायान्यमुपासते ततो हेतोस्ते तान् वरदातॄनेवावजानते षामेव देवानामवज्ञां कुर्वत इत्यर्थः । तत्र हेतुः-लब्धराज्येत्यादि । मत्ता मद्यादिना । प्रमत्तास्तामसादिदेवाराधनादिना ॥ तच्च तेषां भजनं प्राप्ते फले वैपरीत्यायैव स्यादित्याह-तत इति । आशुतोषेभ्यो विचारं विनैव तुष्यद्भ्योऽन्येभ्यः । द्धताः अतिक्रान्तमर्यादाः मत्ता गर्विताः प्रमत्ताश्च अनवहिताः सन्तः वरदानपि तान् कालेन विस्मरन्त्येव थञ्चित्स्मरणेऽप्यवजानते च अवज्ञाविषयीकुर्वते च ॥११॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ किमाहेत्यपेक्षायां स तु तेन देवासुरेत्यादिना प्रष्टस्योत्तरं सविस्मितं तदभिप्रायविपरीतमेवाहेत्याह-भगवानुवाचेति । यमुपासकमनुगृह्णामीति यं तु कामयमानं नानुगृह्णामि किन्तु यदभिरुचिमात्रमापाततः सम्पादयामि स्मा एव धनं ददामीति भावः । हरिष्य इति लृट्प्रयोगोऽक्षमायाम् । 'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपी'ति स्मरणात् दर्शनाक्षमापूर्वकं हरामीत्यर्थः । शनैरिति । सहसा हरणे तस्य सर्वाच्छादकः क्षोभ एव स्याच्छनैर्हरणे तु क्रमेण धनादुदासिनीभूतः सङ्गे रतिः स्यादित्यभिप्रेत्येति भावः । ततः किं तत्राह-तत इति । शनैरित्यस्य त्यजन्तीत्यनेनाप्यन्वयः । अत एव दुःखेऽतिवीप्सा क्रमाद्दारिद्र्यातिशयं प्राप्तमित्यर्थः ॥८॥ ततोऽपि किं तत्राह-स इति सार्धकेन । निर्विण्णो विरक्तः ततश्च दीनदयया मत्परैर्जनैः तं मैत्रं हितं यस्य तस्य मदनुग्रहं ममाभिरुचितमनुग्रहं करिष्ये तत्र तु लृट्प्रयोगो 'वर्तमानसामिप्ये वर्तमानवद्वा' इति स्मरणात् ग्रमेव करोमीत्यर्थः । तदेवं सवासनान् प्रत्येवोक्तं न तु निर्वासनान् श्रीमत्प्रह्लादादीन् प्रतीति लभ्यते तेभ्यो राज्यादिदानं तु महिमव्यञ्जनार्थमेव असाधारणतत्प्राप्तेस्तथाप्यनासक्तेश्च अनुग्रहस्य तादृशत्वमे ब्रह्मसाम्येन व्यञ्जयति-तदिति । दनिर्वचनीयवस्तुस्वरूपं यतो ब्रह्म सर्वतो बृहत्तमं परमं सर्वत उत्कृष्टं दुर्लभं दुर्ज्ञेयं च सत् अनादिभक्तपरम्परास्वनादित एव द्धम् अनन्तरमुत्तरकालेऽप्यरिच्छेद्यं सर्वत्र हेतुः चिन्मात्रं तच्छक्तिविलासमिति विज्ञायेत्यर्धपद्यमधिकमसाम्प्रदायिकम् । नुग्रहफलत्वेन सर्वतत्त्वस्य भगवता सामान्यतयैव निर्देशः कृतः तद्विशेषतया तु ज्ञेयः अत इत्यर्धकम् अतो धनाप्राप्तेर्हेतोः जनः धारणः ननु यस्याहमनुगृह्णामीत्युक्ताभिप्रायेण अकामः सर्वकामो वा इत्युक्तरीत्या च त्वमपि धनं ददासि तर्हि कथमन्यान् भजते ह-सुदुराराध्यमिति । तस्याराधनतत्त्वाज्ञानाच्छ्रीभगवतश्च सुविचार्यैव फलदातृत्वात् इति भावः । तथोक्तं तृतीये —

"तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः । कृतज्ञः को नु सेवेत दुराराध्यमसाधुभिः ॥" इति ॥

अथवा तदज्ञानस्य हेतुत्वमेव व्यञ्जयन् स्वविशेषणत्वेन तद्ब्रह्मेत्यादिकं पूर्वार्धमुक्तं तस्माद्ब्रह्मतोऽपि परमं ब्रह्मणो हि तिष्ठाहमित्यादिप्रसिद्धम् अतः सूक्ष्मं दुर्ज्ञेयं यतश्चित्स्वरूपं ब्रह्म च मात्रा अंशो यस्य यद्वा, चिद्रूपा मात्रा शक्तिर्यस्य तं सच्च नन्तं च कं परमानन्दस्तत्स्वरूपमिति ॥९-१०॥ तच्च तेषां भजनं प्राप्ते फले वैपरीत्यायैव स्यादित्याह-तत इति । आशुतोषेभ्यः चारं विनैव तुष्यद्भ्योऽन्येभ्यः उद्धताः अतिक्रान्तमर्यादाः मत्ता गर्विताः प्रमत्ताश्चानवहिताः सन्तः वरदानपि तान् कालेन स्मरन्त्येव कथञ्चित्स्मरणेऽप्यवजानते च ॥११॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

हरिष्य इति भविष्यन्निर्देशः, हरणावश्यकताबोधनार्थं ध्रुवं हरेयमित्यर्थः । एवमग्रे करिष्य इति चाधनस्यापि स्वजनैस्त्यागे -दुःखेति । वारंवारं दत्तस्यापि धनस्य मुहुर्हरणेनासकृद्दुःखितस्य दुःखनिरसनाशक्तेरित्यर्थः ॥८॥ निर्विण्णो विरक्तः, मत्परैर्जनैः मैत्रं यस्य । यद्वा, मत्परैः सह कृतं मैत्रं सौहृदं येन तस्य ॥९॥ तदनिर्वचनीयम्, यतः परमं सूक्ष्ममत्यन्ताव्यक्तम् । तत्र हेतुः-मात्रं ज्ञानस्वरूपम् । अतः सत् नित्यमनन्तं चापरिच्छिन्नम्, इति सर्वथा प्रपञ्चाद्वैलक्षण्यमुक्तम् । यद्वा, निर्विशेषत्वादावपि धर्मविशेषवत्त्वादिनानिर्वचनीयम्, अत एव सूक्ष्मं दुर्वितर्क्यं परमं ब्रह्म श्रीवैकुण्ठलोकमित्यर्थः । यतश्चिन्मात्रं ज्ञानघनम्, सत् मनन्तं च तत् कञ्चेति-अपरिच्छिन्नसुखस्वरूपं चेत्यर्थः । यद्वा, अनन्तं कं यस्मिंस्तत्, अथवा तत् सर्वश्रेष्ठतमतया सुप्रसिद्धं

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

निगूढं वा वस्तु मप्रेमलक्षणम्, ब्रह्म सर्वव्यापकम्, किंवा परमं ब्रह्म । तस्यापि सच्चिदानन्दघनत्वात्, अत एव सूक्ष्ममित्यादि। अन्यत्तैर्व्याख्यातम् । तत्र तमेवाहेति कार्य-रणयोरभेदाभिप्रायेण । यद्वा, श्रीभगवतो गुणानामपि सच्चिदानन्दरूपत्वेन तादृशत्वादिति, अथवा तत्तस्मान्मदनुग्रहात्, किंवा, ततः पश्चात् प्राप्नोतीति भवतीति वा शेषः । विज्ञायेत्याद्यर्धपद्यसद्भावे चात्मतया निजस्वरूपेण विज्ञायानुभूय धीरः सद्भक्तः सन् श्रीवैकुण्ठलोकं लब्ध्वा संसारात् परितो मुच्यते, अतो धनक्षयादेर्हेतोर्मां हित्वानुग्रहविधानेऽपि सुदुराराध्यं बहुप्रयासैश्चिरकालेनैव प्रसाद्यमित्यर्थः । इदमपि त्यागे हेत्वन्तरम् ॥१०॥ तत्तस्माद्भजनाद्धेतोः, अनन्तरं वा ते धनादिकामेनान्यभक्ताः तन्नामग्रहणं विनयात्, उद्धता अतिक्रान्तमर्यादाः, मत्ता गर्विताः, प्रमत्ताश्चानवहिताः सन्तः ॥११॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥५-१०॥

मत्ताः गर्विताः प्रमत्ताः अनवहिताः ॥११-१३॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

यस्येति यमित्यर्थः कर्मणः शेषत्वविवक्षया षष्ठी ननु धनापहारो नानुग्रहः प्रत्युत निग्रह एव स्यादत आह-तत इति। अधनमितिच्छेदः ततो धनापहारादधनन्निर्धनमत एव दुःखपरम्पराग्रस्तमस्य ये स्वजनास्ते त्यजन्ति ॥८॥ ततोऽप्ययं महान्निग्रह इत्यत आह-स इति । वितथोद्योगः व्यर्थोद्यमः निर्धनस्य सर्वोऽप्युद्योगो व्यर्थ एवेति भावः । अत एव निर्विण्णो भवेत् तदाऽनीहया निराशया वैषयिकं सुखं सर्वथा मम दुर्लभम् इत्येवं तत्राशामपोह्येति भावः । मत्परैर्मद्भक्तैः सह कृतं मैत्रं यस्य तस्य मदनुग्रहं करिष्ये मदसाधारणोऽनुग्रहः तमतो तमपौनरुक्त्यम् ॥९ज्ञ। तमेवानुग्रहं दर्शयति-तस्मा इति । तस्मै मत्परैः कृतमैत्राय यद्ब्रह्म तद्दर्शयामीति शेषः । विलक्षणं सूक्ष्मं सर्वान्तःप्रवेशयोग्यं चिन्मात्रं ज्ञानस्वरूपमात्रं मात्रशब्देन क्वचिदपि जडत्वव्यावृत्तिः अनन्तकं त्रिविधपरिच्छेदमत्र सत्यज्ञानादिवाक्यार्थ उपलक्षितः अतस्तावद्दुःखावहत्वात्सुदुराराध्यं मोहित्वा 'हि गतौ' गत्यर्थाबुद्ध्यर्थाः ज्ञात्वेत्यर्थः । अन्यान् रुद्रादींस्तावत् सुखदान् ततस्तु दुःखदान्स्वयमपि दुःखितान् ज्ञात्वा केवलं सुखदानित्येवं बुद्ध्वा भजत इत्यर्थः ॥१०॥ तत इति । ततो भजनानन्तरं ते भक्ताः आशु तुष्यन्तीति आशुतोषाः तेभ्यो रुद्रादिभ्यः सकाशात् अनेनात्मनि चिरात्तोषत्वं सूचितं लब्धं राज्यं यैस्ते श्रिया सम्पदा उद्धृताः उत्पथाः मत्ताः गर्विताः प्रमत्ता अनवहिताश्च वरदान्देवाननेव विस्मरन्त्यवजानतेऽवज्ञां कुर्वन्ति च इत्थं स्वोक्तपरिहारो भगवदुक्त्या संवादितः ॥११॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अनुग्रहं कर्तुं शनैः यावत् यावत्प्रेम वर्धते तावत्तावद्धरिष्ये धनस्य मदहेतुत्वादेतद्धरणं तत्फलमाह-तत इति। अस्याधनस्य स्वजनाः दुःखदुःखितं दुःखातिशयोपेतम् एवमधनं त्यजन्ति ॥८॥ ततो धनाभावात्स यदा धनेहया वितथोद्योगो निर्विण्णः स्यात्तदा मत्परैः कृतमैत्रस्य तस्यानुग्रहं मुक्तिलक्षणं करिष्य इत्यन्वयः ॥९॥ यतोऽहं भजमानस्य धनं हरिष्यामि अतस्तत्परमं ब्रह्म वेदान्तवेद्यं सूक्ष्मं नित्याव्यक्तं चिन्मात्रं प्रकृतिप्राकृतवैकृतज्ञानशून्यं सत्प्रशस्तम् अनन्तकम् अन्तत्रयवर्जितं सुदुराराध्यं मां हित्वा अन्यान् भजते परं ब्रह्मत्वादयः सुदुराराध्यत्वे हेतवः ॥१०॥ अन्योपासकास्ते मद्ध्यानतस्तान् देवानपि जहतीति भावेनाह-तत इति । यतो मामवज्ञायान्यानुपासते अत एव दोषात् ॥११॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥६-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

मत्पैरैरित्यादि । करिष्ये मदनुग्रहमिति मम अनुग्रहो यस्मिन् स मदनुग्रहस्तं मद्भक्तं करिष्यामीत्यर्थः । अन्यथा यस्याहमनुगृह्णामीत्यनेनैव पूर्वमेवानुग्रहोक्तेरुक्तोक्तदोषः स्यात् ॥९॥ मत्परः सह कृतमैत्रत्वस्यानन्तरं भक्तत्वकृतौ सत्यां यद्भवति तदाह-तद्ब्रह्मेति सार्धेन अतः कारणात् मां सुदुराराध्यं सुखाराध्यं दुःखाराध्यं च द्वन्द्वात् परश्रूयमाणः शब्दः प्रत्येकमभिसम्बध्यते

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

त्वाऽन्यान् देवान् भजते मोक्षाकाङ्क्षिणां सुलभं प्रेमाकाङ्क्षिणां दुर्लभं मोक्षप्रदत्वेन सुलभं प्रेमप्रदत्वेन दुर्लभम् उभयत्वेन विशेषणं शेष्यं च तत्र मोक्षप्रदतया सुलभत्वे विशेषणं तद्ब्रह्मेति परमं सूक्ष्मं चिन्मात्रं चिदेकात्मकं सत् सत्तामात्रम् अनन्तकं व्यापकं प्रदतया दुर्लभत्वेऽपेतानि तद्यथा तद्ब्रह्म परमं तत्प्रसिद्धं यद्ब्रह्म निर्विशेषं निष्क्रियं ततोऽपि परा उत्कृष्टा या शोभा यस्य सूक्ष्मं सुष्ठु क्षमा यस्मात् धरणी भारापहरकं सुशब्दस्य दीर्घत्वमार्षम्। पाणिनीयं सूयवसदित्यादिवत्। चिन्मात्रं चित् चैतन्यमात्राशक्तिर्यस्य न्तकं सतां भक्तानाम् अनन्तं कं यस्मात् इति मामित्यस्य विशेषणानि इति मोक्षतोऽपि प्रेम्णो दुर्लभत्वं दर्शितम् ॥१०-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

मत्परैः कृतमैत्रस्येत्यादि । कोऽसौ मदनुग्रहः ? एकस्तूक्त एव (८मश्लो०) "यस्याहमनुगृह्णामि" इत्यादि । तेनैवं ख्येयम्-अनुगृह्यते इत्यनुग्रहो भक्तः, मदनुग्रहः मद्भक्तं करिष्ये ॥९॥ तद्ब्रह्मेत्यादि । मां दुराराध्यं हित्वा तत्तस्मात् शिवादीन् जते। मां कीदृशम् ? सुदुराराध्यं सुखाराध्यं दुराराध्यं च-मोक्षाकाङ्क्षिणां सुलभम्, प्रेमाकाङ्क्षिणां तु दुर्लभम्, सुलभत्वेन मोक्षदम् लभत्वेन प्रेमदम्। अथवा मोक्षदत्वेन सुलभम्, प्रेमदत्वेन दुर्लभमतः सुलभत्वेन ब्रह्मेत्यादि-प्रागुक्तानि विशेषणानि, दुर्लभत्वेन मित्यङ्गुल्या निर्दिष्टत्वेन विशेष्यपदम् ॥१०-११॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

दुःखात् धनविगमजन्यादपि पुनर्दुःखितं स्वजनककर्तृकत्यागात् दुःखमिदं भगवद्दत्तत्वात् तस्य न कर्मफलं सुखमपि वद्भक्तानां न कर्मफलं किन्तु भक्तेरननुसंहितं फलमिति प्रथमस्कन्धे धर्मस्य ह्यापवर्गस्येत्यत्र भीष्मोक्तावपि प्रतिपादितं भक्तानां क्तिमात्रे प्रवृत्त एवाप्रारब्धकूटबीजप्रारब्धकर्मणां क्रमेण नाश उत्पलसहस्रजलभेदनवदिति भक्तिशास्त्रमतं तथा च श्रुतिर्गोपालतापनी स्य भजनं तदिहामुत्रोपाधिनैराश्येनामुष्मिन् मनः कल्पनमेतदेव नैष्कर्म्यम् इति अर्थश्च उपाधिनैराश्येन कामनाराहित्येन नःकल्पनम् कृष्णे मनआदिसर्वेन्द्रियविनियोगो यत्तदेव भजनम् एतदेव भजनमेव नैष्कर्म्यमिति भवति हि तात्पर्यात्ताच्छब्द्यमतः मानाधिकरण्याद्भजने प्रवृत्ते एव भक्तानां नैष्कर्म्यं सर्वकर्मध्वंसो भवति देहस्थितिस्तु भजनाधिक्यतत्फल-तिपादकभगवदचिन्त्यशक्तेरेवेति ये तु प्रारब्धे फले इव सुखदुःखे दृश्येते ते भगवद्दत्ते एव यदुक्तं श्रुतिभिभवदुत्थशुभाशुभयोरिति क्तवत्सलो भगवान् भक्तेभ्यः कथं दुःखं ददातीति चेत् सत्यं पुत्रवत्सलोऽपि पितापुत्रेभ्यो भोगदूरीकरणेनाध्ययनादिकृच्छ्रं दाति तद्वात्सल्यं स एव जानाति न तु तदानीं तत्पुत्रा अपीति न च प्रह्लादध्रुवादिभ्यो भोगसम्पत्तिसुखमात्रदानात् साधकेभ्य एव र्थना भगवता दुःखं दीयत इति वाच्यं सिद्धशिरोमणीनां युधिष्ठिरादीनामपि यत्र धर्मसुतो राजेत्यत्र सुहृत्कृष्णस्ततो विपदिति ष्मोक्तौ दुःखश्रवणात् तस्मान्न ह्यस्य किहिचिद्राजन् पुमान् वेदविधित्सितमिति भीष्मोक्तेतस्य विधित्सितं समाहितं यत्तदपि दृश्यं ननु च स्वकार्योत्थयोर्भयवदुत्थयोश्च सुखदुःखयोर्भोग्यत्वेन तुल्यत्वात् को विशेषः उच्यते धर्मोत्थानां सुखदुःखानां नापि तद्बीजं तिष्ठत्येव तद्वतां नरकपातश्च कर्मतारतम्यवतां सुखदुःखतारतम्यं चेति त्रितयं भवेत् भगवदुत्थानां तु भगवदिच्छैव सा च प्रयोजनपर्यन्तैव न तदुत्तरा जिह्वा न वक्ति भगवद्गुणनामधेयमित्यादि यमोक्तेस्तद्वतां न नरकपातः भगवतः स्नेहपात्रत्वात् दुःखातिशयश्चेति कर्मोत्थभगवदुत्थयोः शत्रुकृतमातृकृतगात्रताडनोत्थयोरिव दुःखयोर्विषामृतयोरिव कुतस्तुल्यतेति वेचनीयम्। ननु च सर्वसमर्थस्य भगवतो भक्तदुःखदानं विना किं तत् प्रयोजनं न सिध्येत् सत्यं लीलानिधेस्तस्यैव ध्येदेव भक्तियोगस्य रहस्यत्वरक्षार्थं नानान्यमतानुमुत्खाताभावार्थं भक्त्यौत्कण्ठ्यादिवर्धनार्थं च क्वचित् प्रियेभ्यो दुःखदानमपि खोदर्कमेव यथा नयनाभ्यां कटुतराञ्जनदानमिति तथाहि यदि भक्ताः सदा सुखिन एव कृताः स्युस्तदा परित्राणाय साधूनां नाशाय च दुष्कृतामिति गीतोक्तनिमित्ताभावे सति कृष्णरामाद्यवतारा अपि न स्युः यदि च न स्युस्तदा रासादिलीलामृतसिन्धौ नां खेलनं कथं स्यादिति ननु च साधु दुःखत्राणात्मकनिमित्तं विनापि तस्यावतारे को दोषः स्यात् सत्यं भो भ्रातस्त्वं न ज्ञोऽसि। श्रूयतां यामिन्यां सत्यामेव सूर्योदयः शोभते ग्रीष्मे सत्येव शीतलाम्भः सुखदं शीते सत्येवोष्णाम्भः तमस्येव दीपः न तु प्रकाशे क्षुत्पीडायां सत्यामेवान्नमति स्वादु भवतीत्यलमतिविस्तरेण ॥८॥ करिष्ये मदनुग्रहमिति द्वितीयोऽयमनुग्रहोऽसाधारणो

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

भक्तिरसामृतवर्षी यदर्थमेव मे प्रथमोऽनुग्रहो दुःखसन्तापफलोऽभूदिति भावः । अत एवानुग्रहं करिष्ये इत्यप्रयुज्य मदनुग्रहमिति मामिवानुग्रहं करिष्य इत्यर्थः ॥९॥ अत एवानुग्रहं स्वतुल्यत्वेन विशिनष्टि–तद्ब्रह्मेति । बृहत्तमत्वात् बहिरङ्गलोकदुर्लक्ष्यत्वाच्च ब्रह्मतुल्यं परमं सर्वोत्कृष्टम् अनुग्राह्यस्य भक्तस्याप्यगम्यत्वात् सूक्ष्मं प्रेमरसानुभावकत्वात् चिन्मात्रं प्राकृतसुखराहित्यात् मात्रपदप्रयोगः सत् सर्वकालसत्ताकम् अनन्तकं नास्त्यन्तकभयं यत इत्यननुसंहितफलरूपः संसारक्षयश्चोक्तः । क्वचिदत्र विज्ञायेत्यर्धपद्यमधिकं तदसाम्प्रदायिकमिति श्रीवैष्णवतोषणी व्यावहारिकसुखविनाशकत्वात् सुदुराराध्यम् ॥१०॥ प्रमत्ताः परामर्शशून्याः ॥११-१५॥

गूढार्थदीपिनी

अनुगृह्णामि अनुग्रहं मर्तुमिच्छामि । त्यजन्ति अनादरं कुर्वन्ति । स्वजनाः पुत्रादयः । दुःखदुःखितमतीवदुःखितम् ॥८॥ वितथोद्योगः निष्फलोद्यमः । निर्विण्णः विरक्तो भवति । मत् मत्तः सकाशात् योऽनुग्रहः तम् । यद्वा । मम असाधारणमनुग्रहं करिष्ये करोमि । मत्परैः मद्भक्तैः ॥९॥ यत् सूक्ष्मं परमं ब्रह्म तन्मां हित्वा जनः अन्यान् देवान् भजते इत्यन्वयः । कथम्भूतम् । सच्च अनन्तरं च यत् कं सुखं तद्रूपम् ॥१०॥ यतो अन्यान् भजते ततो हेतोः ते वरदातॄन् विस्मरन्ति अवजानते च अवज्ञाविषयीकुर्वते । आशु तुष्यन्तीति आशुतोषाः रुद्रादयः तेभ्यः लब्धराजश्रिया उद्धताः उत्पथाः अतिक्रान्तमर्यादाः । मत्ताः गर्विताः प्रमत्ताः विवेकरहिताः ॥११॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तमनुगृह्णामि कम् यस्य धनं हरिष्ये ततः धनहरणानन्तरमड्डुधनं स्वजनास्त्यजन्ति भजनकण्डकधनादिवियोगहेतुरेको मदनुग्रह इत्यर्थः ॥८॥ उद्धताः उत्पथाः मत्ताः अनवहिताः प्रमत्ता युक्तायुक्तविवेकरहिताः वरदान् विस्मरन्ति अवजानन्ते अवज्ञां कुर्वन्ति कृतघ्ना भवन्तीत्यर्थः ॥११॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

भगावनाह–यस्याहमनुगृह्णामीति । केवलं यमनुगृह्णामि तं नु ततोऽन्यत्र नीत्वा भक्तैः संयोज्य कृतार्थमेव मुख्यं करोमि न तत्र हरणादिप्रयासः । यस्य तु सम्बन्धिनः सर्वानेवानुगृह्णामि सर्वापकारित्वात्तस्य धनं हरिष्ये । क्षिप्रवचने लृट् । तत्रापि शनैः यद्यल्पे ह्रियमाणे विवेको भवेत् तं न हरिष्यामीति ज्ञापयन् ननु धने हृते किं स्यादत आह–अतोऽधनं तस्य जनाः सम्बन्धिनस्त्यजन्ति तत्र हेतुः दुःखदुःखितमिति । अधनत्वेऽपि समर्थश्चेन्न त्यजन्ति । तदीया दुःखिताः तेभ्योऽप्ययमत्यन्तं दुःखित इति तेभ्यश्चेदन्नादिकं वाञ्छतीत्यर्थः । सर्वथा अप्रवृत्तस्येयं व्यवस्था । बीजसंस्कारश्च यस्य जातः ॥८॥ ननु बन्धुपरित्यागे किं स्यादत आह–स यदा वितथोद्योग इति । यदा स त्यक्तबन्धुस्तदा धनमुपार्ज्य बन्धून् वशीकरिष्यामीति निश्चित्य धनार्थं यतते । ततस्तस्य धनवर्द्धनकारणमपि नाशयामीत्याह–वितथोद्योग इति । वितथाः उद्योगाः धनार्जनोपाया यस्य तदा केवलधनेहया उपायरहितया क्लिष्टः सन् निर्विण्णो भवति । विरक्तो भवति । तदा योग्यं योग्येन सम्बध्यत इति मत्परैः कृतमैत्रो भवति तदा मत् मत्त एव स्वत एवाहम् अनुग्रहं करिष्ये ॥९॥ कोऽनुग्रह इति चेत्तत्राह–तद्ब्रह्मेति । ममानुग्रहो ब्रह्मभावः पश्चान्मत्सेवया सर्वसुखमिति अत्रायं क्रमः; सेवकैः सह मैत्र्या सेवकसमानव्यसनत्वे सेवकतुल्यता ततस्तैर्मया अन्येन वा तस्य ज्ञानोदयः ततो ज्ञानपूर्णः केवल एव मां भजते शब्दब्रह्मव्यावृत्त्यर्थं परमं कायव्यावृत्त्यर्थं सूक्ष्मं सगुणव्यावृत्त्यर्थं चिन्मात्रम् असज्जीवभावव्यावृत्त्यर्थम् अनन्तमिति । एवं सत्यं ज्ञानमनन्तं ब्रह्मेति यल्लक्षणमुक्तं तत्त्वं करोमीत्यर्थः । नन्वेवं कृते कः पुरुषार्थः सिध्येत् कथं ज्ञानमेव प्रथमतो नोपदिश्यते, सत्यम् अन्यदपि प्रयोजनमस्तीत्याह–अतो मां सुदुराराध्यमिति स्वयं न प्रयच्छति स्थितमपि हरति मुक्तिमेव प्रयच्छतीति नन्वैहिकं प्राप्यमानमपि इति दुराराध्यता अत एव ऐहिकाः मां हित्वा अन्यान् भजन्ते । अन्यथा मद्भक्ता नानाविधाः दुष्टाः शिष्टा अपि भवेयुरिति तद्व्यावृत्त्यर्थं तथाकरणमित्यर्थः ॥१०॥ अन्योऽप्येवं चेत् को विशेष इत्यत आह–तत इति । सर्वे बाह्या आशुतोषा यथा यथा सूक्ष्मो बाह्यः तथा तथा शीघ्रं परितुष्यतीति लोकसिद्धोऽयमर्थः ततस्तेभ्यो राज्यादिकं लब्ध्वा राज्यश्रिया उद्धताः सन्तः आदौ

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

ता भवन्ति स्वात्मानमेव न जानन्ति ततः प्रमत्ताः असावधानाः सन्तः धर्मादिकार्येषु विमुखाः भवन्ति तत उपजीव्यानपि न यन्तीत्याह-वरदान् स्मरन्तीति। स्मरन्त्येव न अथ यदि प्रमादात्स्वयमेव स्मृतिपथारूढा भवेयुः वरदास्तथाप्यवजानते तस्मादग्रे नर्थः पर्यवस्यतीति भगवान् प्रथमत एव निवर्तत इत्यर्थः ॥११॥

सुबोधिनीसारः

यस्योपरि अहं तुष्यामि तस्य शनैर्धनं हरिष्येऽर्थस्यानर्थमूलत्वात् ततो निर्धनत्वादधनं दुःखादुःखितम् अस्य स्वजना पुत्रादयस्त्यजन्ति ॥८॥ निष्फलोद्यमो धनचेष्टया स निर्विण्णो यदा स्यात्तदा मत्परैर्भक्तैः कृतमैत्रस्य पुंस उपरि मसाधारणमनुग्रहं नैजां कृपामहं करिष्यामि ॥९॥ तमेवाह ॥ परमं सूक्ष्मं चिन्मात्रं सत् अनन्तं तद्ब्रह्मेति अतः सुदुराराध्यं मां त्वा त्यक्त्वा जनोऽन्यान् देवान् उपास्ते। 'क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा' इति स्मृतेः ॥१०॥ ततोऽनन्तरमाशुतोषेभ्यः प्रसादेभ्यो देवेभ्यो लब्धा प्राप्ता या राज्यश्रीः तया उद्धता उत्पथं गताः मत्ताः सुरापानात् प्रमत्ता भूतादिवेशेन वरदान् वानवजानते तिरःकुर्वन्ति विस्मरन्ति च ॥११॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तदुक्तिमाह-यस्येति। यस्याहमनुगृह्णामि अनुग्रहं कर्तुमिच्छामि तस्य धनं हरिष्ये हरामि। ततो धनापहारात् दुःखदुःखितं ःखपरम्पराग्रस्तम्, तत्र हेतुः-अधनं तं स्वजनास्त्यजन्ति तिरस्कुर्वन्तीत्यर्थः ॥८॥ ततश्च स बन्धुभिस्तिरस्कृतोऽपि यदा पुनर्धनं माद्य बन्धून् वशीकरिष्यामीत्यभिप्रायेण धनार्थं यतते तदाप्यहं तस्य तदुद्यमं नाशयामि। ततश्च स वितथोद्योगो धनेहया नर्थव्यापारेणापि निर्विण्णः विरक्तो भवति। तस्य च मत्परैः मद्भक्तैः सह कृतं मैत्रं येन तस्य मदनुग्रहं करिष्ये करोमि ॥९॥ सावनुग्रहस्तत्राह-तदिति। यत्सकलवेदप्रतिपाद्यं परमं ब्रह्म तस्मै दर्शयामीति शेषः। असावेव मदनुग्रह इति भावः। तद्विशिनष्टि- मात्रं सन्मात्रम्। अनन्तं देशकालवस्तुपरिच्छेदरहितम्, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः। तथापि सूक्ष्मं दुर्ज्ञेयम्। अत्र वदनुगृहीतत्वेन प्रसिद्धानां ध्रुवप्रह्लादाम्बरीषादीनां धनाढ्यतादर्शनात् परमदरिद्राणामपि जनानां भगवदनुग्रहादर्शनाच्च न केवलेन रिद्र्येण भगवदनुग्रहोऽनुमातुं शक्यः, किन्तु —

"त्रैविर्गकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र ततोऽनुमेयो भगवत्प्रसादः.." इति।

वृत्रवचनात् धनादिसत्त्वे तदभावे वा यत्र त्रैवर्गिकायासराहित्येन भगवत्परता तत्र भगवदनुग्रः। यत्र तु तत्प्रयासस्तत्र शुभप्रारब्धभोग इति ज्ञेयम्। अतो मद्भजने मदनुग्रहेण वैभवनाशात् सूक्ष्मत्वेन दुर्ज्ञेयत्वाच्च मां दुराराध्यं हित्वा जनोऽयं देवं जते ॥१०॥ ततो भजनात् आशु तुष्यन्तीत्याशुतोषास्तेभ्यो रुद्रादिभ्यो लब्धं राज्यं यैस्ते श्रिया सम्पदा उद्धताः उत्पथाः मत्ताः ताः प्रमत्ताः अनवहिताश्च सन्तस्तान् वरदान् विस्मरन्ति अवजानते तदवज्ञां च कुर्वन्ति ॥११॥

अन्वितार्थप्रकाशिका

यस्येति। यस्याहमनुगृह्णामि तस्य धनं शनैः हरिष्ये हरामि। यं नानुगृह्णामि तस्मै ददामि अयमर्थः। यो विषयान् जिहीर्षुरपि कथञ्चित् विषयेषु विषज्जते क्लिश्यति च तस्य विषयापहार एवानुग्रहः। यथा श्रुते ध्रुवादीनामैश्वर्ये विरोधात्। वा प्रथमं कामानुरूपा विभूतीर्दत्त्वा शनैर्विषयभोगावसाने निर्वेदमुत्पाद्य हरिष्यामि। अनुग्रहं कर्तुमिति शनैरिति सहसा हरणे कष्टं स्यादित्याशयः। शनैर्हरणे तु क्रमेणोदासीनः स्यादित्याशयः। ततो धनापहारात् दुःखदुःखितं परम्पराग्रस्तम् अधनं तं जनास्त्यजन्ति तिरस्कुर्वन्ति ॥८॥ स इति। स बन्धूनामाग्रहादिना पुनरपि धनाय यतते तदाप्यहं तस्य तदुद्यमं नाशयामि। ततश्च नुग्रहेण वितथोद्योगो निष्फलोद्यमः धनेहया धनार्थव्यापारेणापि निर्विण्णः स्यात् विरक्तो भवति। तस्य च मत्परैः मद्भक्तैः कृतं मैत्रं येन तस्य मदनुग्रहं करिष्ये करोमि ॥९॥ तदिति। तद्ब्रह्म परममत्यन्तं सूक्ष्मं चिन्मात्रं सन्मात्रम् अनन्तकं कालवस्तुपरिच्छेदरहितम्। अतो मद्भजने मदनुग्रहेण वैभवनाशात् सूक्ष्मत्वेन दुर्ज्ञेयत्वाच्च मां दुराराध्यं हित्वा मोक्षमरोचयन्

अन्वितार्थप्रकाशिका

अत्यसक्तो जनोऽन्यान् देवान् भजते । यद्वा । स यदेति सार्धश्लोकमेकान्वयम् । तत्र स यदेत्यादि प्राग्वत् । मदनुग्रहं मद्रूपमनुग्रहं करिष्ये । मद्रूपमाह-तद्ब्रह्मेत्यादि । अत इत्याद्यर्धं प्राग्वत् ॥१०॥ तत इति । ततो भजनात् आशु तुष्यन्तीत्याशुतोषास्तेभ्यो रुद्रादिभ्यो लब्धया राज्यादिश्रियो नानासम्पदा उद्धता: उत्पथा: मत्ता: गर्विता: प्रमत्ता: अनवहिताश्च सन्तस्तान् वरदान् विस्मरन्ति अवजानते तदवज्ञां च कुर्वन्ति ॥११॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अनलादुत्थितो विग्रहवानग्निरिव स: धूर्जटि: रुद्र: दोर्भ्यां भुजयोर्निगृह्य न्यवारयत् । यथा वयं मरणायोद्यतं दु:खितं नरं निवारयाम: । तद्वत् तस्य शिवस्य स्पर्शनात् भूय: उपस्कृताकृति: । परिपूर्णशरीरो बभूव ॥८॥ हे अङ्ग! हे वृक! अलम् अलम् एतावता परिपूर्णं मे मत्त: वरं वृणीष्व यथाभिकामं यथामनोरथं तव वरं वितरामि अहं ददामि प्रपद्यतां शरणागतानां नृणां तोयेन जलेनापि । प्रीयेय प्रसन्नो भवेयम् । त्वया तु आत्मा शरीरं वृथा अर्द्यते दु:खीक्रियते ॥९-१०॥ अहे: सर्पस्यामृतमिव तस्मै वरं ददे ॥११॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यस्येति ॥ हे युधिष्ठिर! यस्य यमित्यर्थ: । कर्मण: शेषत्वविवक्षया षष्ठी । अहम् अनुगृह्णामि तद्धनं शनै: हरिष्ये । ननु धनापहारो नानुग्रह: प्रत्युत निग्रह एव स्यात् अत आह तत इति । ततो धनापहरणात् अधनं निर्धनम् अत एव दु:खदु:खितं दु:खपरंपराग्रस्तं तं जनम् अस्य दु:खदु:खितस्य ये स्वजना: ते त्यजन्ति ॥८॥ ततोऽप्ययं महान्निग्रह इत्यत आह ॥ स इति ॥ यदा वितथोद्योग: व्यर्थोद्यम: निर्धनस्य सर्वोऽप्युद्योगो व्यर्थ एवेति भाव: । स पुमान् निर्विण्ण: स्याद्भवेत् तदा अनीहया निराशया विषयिकं सुखं सर्वथा मम दुर्लभमित्येदवं तत्राशामपोह्यैवेति भाव: । मत्परैर्मद्भक्तै: सह कृतं मैत्रं येन तस्य मदनुग्रहं करिष्ये ॥९॥ तमेवानुग्रहं दर्शयति ॥ तस्मै इति ॥ तस्मै मत्परै: कृतमैत्राय परं प्रकृतिपुरुषाभ्यां विलक्षणं सूक्ष्मं सर्वान्त:प्रवेशयोग्यं चिन्मात्रं ज्ञानस्वरूपमात्रं च अन्तकं त्रविधपरिच्छेदशून्यं सत् सद्रूपं अनेन 'सत्यं ज्ञानमनन्तम्' इति वाक्यार्थ उपक्षिप्त: । इत्थम्भूतं यत् ब्रह्म, ब्रह्मात्मकमेतन्मत्स्वरूपमित्यर्थ: । तत् दर्शयामीति शेष: । असावेव मदनुग्रह इति भाव: । अतस्तावत् सुदुराराध्यं मां हित्वा 'हि गतौ' ये गत्यर्थास्ते बुद्ध्यर्थ: । ज्ञात्वा इत्यर्थ: । जन: अन्यान् रुद्रादीन् भजते । रुद्रादीन् तावत् सुखदान् ततो दु:खदानपि केवलं सुखदानित्येवं बुद्ध्वा जन: भजते इति भाव: ॥१०॥ तत इति ॥ ततस्तद्भजनानन्तरं ते तद्भक्ता: आशु तुष्यन्तीति आशुतोषा रुद्रादयस्तेभ्य: सकाशात्, लब्धस्य राज्यस्य या श्री: सम्पत् तया उद्धता: उत्पथा: मत्ता गर्विता: प्रमत्ता अनवहिताश्च सन्त: वरदान् देवानेव विस्मरन्ति । अवजानते अवज्ञां कुर्वन्ति च । एवं स्वोक्तपरिहारो भगवदुक्त्या संवादित: ॥११॥

कृष्णप्रिया

जिस के उपर मैं अनुग्रह करता हूं उस के धन को धीरे धीरे नाश करता जाता हूं । धना नाशा होने के अनन्तर उस के बन्धुजन उस अति दु:खी को छोड देते हैं ॥८॥ जब अपना भक्त धन की इच्छा से निष्फल उद्यम करता हैं निष्प्रयोजन उद्योग करता हुआ श्रान्त हो जाता है तब जब वह मेरी शरण में आता है तो उस के उपर में अनुग्रह की वृष्टि करता हूं ॥९॥ वह ब्रह्मपद अतीव सूक्ष्म और चित्स्वरुप और परम है; जिसका अन्त मात्र सत् ही है । अत: इस दुर्गम और दुष्प्राप मेरे स्वरूप को देखते हुए मनुष्य मुझे छोडकर अन्य प्राकृत देवों की आराधना करता है ॥१०॥ तत्पश्चात् शीघ्र प्रसन्न होने वाले अन्य देवताओंने मीली हुए राज-वैभव दुर्मार्ग गामी और घमंडी असावधान होकर जिन देवताओं से यह राज-वैभव मीला है उन्हीं को भूलकर वे अज्ञजन उन इष्टदेवों का अपमान करते हैं ॥११॥

श्रीशुक उवाच

[1]शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः । सद्यः शापप्रसादोऽङ्ग शिवो ब्रह्मा न चाच्युतः ॥१२॥
[2]अत्र चोदाहरन्तीममितिहासं [3]पुराविदः । वृकासुराय गिरिशं परं दत्त्वाऽऽप सङ्कटम् ॥१३॥
वृको नामासुरः पुत्रः शकुनेः पथि नारदम् । दृष्ट्वाऽऽशुतोषं पप्रच्छ देवेषु त्रिषु दुर्मतिः ॥१४॥
स [4]आदिदेश गिरिशमुपा[5]धावाशु सिद्ध्यति[6] । [7]सोऽल्पाभ्यां गुणदोषाभ्यामाशु तुष्यति कुप्यति ॥१५॥

कर्दमक्षमा

श्रीशुकः, उवाच ।

अङ्ग, ब्रह्मविष्णुशिवादयः, शापप्रसादयोः, ईशाः, शिवः, ब्रह्मा, च, सद्यः, शापप्रसादः, अच्युतः, न ॥१२॥ अत्र, च, राविदः, इमम्, इतिहासम्, उदाहरन्ति, गिरिशः, वृकासुराय, वरम्, दत्त्वा, सङ्कटम्, आप ॥१३॥ शकुनेः, पुत्रः, वृकः, नाम, सुरः, पथि, नारदम्, दृष्ट्वा, त्रिषु, देवेषु, आशुतोषम्, दुर्मतिः, पप्रच्छ ॥१४॥ देवम्, गिरिशम्, उपाधाव, आशु, सिध्यसि, यः, ल्पाभ्यां, गुणदोषाभ्याम्, आशु, तुष्यति, कुप्यति, इति, सः, आदिदेश ॥१५॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एतदेवेतिहासेन स्पष्टयितुमाह शापप्रसादयोरिति ब्रह्मा चेत्यन्वयः ॥१२-१३॥ शकुनेः पुत्रः ॥१४-१५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आदिनेन्द्रादिग्रहः । सद्यो झटित्येवेषदप्यपराधे । शापस्तथेषदप्यर्चने प्रसादो यस्य स तथा शिवो ब्रह्मा चेति द्वावेतादृशौ च्युत इत्यर्थः ॥★॥ श्रीभगवदुक्तरीत्या तेषामाशुतोषताप्राप्ताविचारत्वम् । तथापि श्रीभगवदाश्रयबलेन सर्वसिद्धिम् । श्रीभगवतस्तु दुराराध्यताप्राप्तसुविचारत्वं तेषां श्रीभगवदाश्रयमूलानां सदाङ्गीकारं चेतिहासेन दर्शयितुमुपन्यस्यति-शापेति । शापे प्रसादे वरदाने ईशाः समर्थाः आदिशब्दादिन्द्रादयः । अङ्ग भो राजन् ! इति सत्यमेवेदमिति भावः । अच्युत इति निजतत्तद्गुणच्युतिराहित्यात् १२॥ अत्र शिवस्य सद्यःप्रसादत्वे ॥★॥ पुराविदः पूर्ववृत्तान्तज्ञाः पौराणिका इत्यर्थः । पुरातनमिति क्वाचित्कः ॥१३॥०॥★॥ दृष्ट्वेति काकतालीयेनैव सङ्गमेन तस्य दुष्टत्वं तत्रैवापृच्छदिति सद्व्यवसायानभिज्ञत्वं च दर्शितम् । त्रिषु ब्रह्मादिषु । आशुतोषं प्रसादम् । दुर्मतित्वं च अग्रे प्रकटीभविष्यति ॥१४॥ स नारदः । सिध्यति कृतार्थो भविष्यति । वर्तमानसमीपे भविष्यति लट् । गिरिशः । आशु उपाधाव सेवस्व । ततश्च सिध्यसि समीप एव सेत्स्यसि सिद्धस्पष्टार्थो भविष्यसीत्यर्थः । अल्पाभ्यामिति अल्पेन न तुष्यति । अल्पेन दोषेण कुप्यतीत्यर्थः ॥१५॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रीभगवदुक्तरीत्या तेषामाशुतोषताप्राप्ताविचारत्वं तथापि श्रीभगवदाश्रयबलेन सर्वसिद्धिं श्रीभगवतस्तु राध्यताप्राप्त-सुविचारत्वं तेषां श्रीभगवदाश्रय(मूलानाम्)भूतानां सदाङ्गीकारं चेतिहासेन दर्शयितुमुपन्यस्यति-शापेति । प्रसादे वरदाने च ईशाः समर्थाः आदिशब्दादिन्द्रादयः अङ्ग भो राजन् ! इति सत्यमेवेदमिति भावः । अच्युत इति तत्तद्गुणच्युतिराहित्यात् ॥१२॥ पुराविदः पूर्ववृत्तान्तज्ञाः पौराणिका इत्यर्थः । पुरातनमिति क्वाचित्कम् ॥१३॥ पथि बुद्धिपूर्वकत्वाभावेनैव ततश्च सङ्गमेन तस्य दुष्टत्वं तत्रैवापृच्छदिति सद्व्यवसायानभिज्ञत्वं च दर्शितं त्रिषु ब्रह्मादिषु आशुतोषम् ॥१४॥ आशु उपाधाव ततश्च सिध्यसि समीप एव सेत्स्यसि सद्धे स्पष्टार्थो भविष्यतीत्यर्थः । अल्पाभ्यमिति गुणेन तुष्यति अल्पदोषेण कुप्यति चेत्यर्थः ॥१५॥

---

१. कोप-वीर. । २. अत्रैबो-वीर. विज. । ३. पुरातनम्-श्रीधर. वंशी. वीर. विज. ; पुराविद-जीव. । ४. आह देवं-श्रीधर. वंशी. विज. । ५. मुपधावस्व-विज. । ६. सिद्धये-विज. ; सिद्धयसि-गो. प्रे. पु. ; सिध्यसि-श्रीधर. वंशी. वीर. । ७. योऽल्पाभ्यां-श्रीधर. ; सोल्पाभ्यां-वीर. विज. ।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

एवं सुसिद्धं श्रीशिवतः श्रीहरेरुत्कर्षमेवेतिहासेन द्रढयति-शापेत्यादिना । शापे प्रसादे च वरदाने ईशाः समर्थाः, किंवा तयोः स्वामिनः, आदि-शब्दादिन्द्रादयः, अङ्ग ! भो राजन्निति सत्यमेवेदमिति भावः । अच्युत इति निजकारुण्यधैर्यादिगुणविच्युतराहित्यात् ॥१२॥ पुराविदः पूर्ववृत्तान्तज्ञाः पौराणिका इत्यर्थः ॥१३॥ पतिं दृष्ट्वा त्रिषु श्रीब्रह्मादिषु मध्ये आशुतोषम्, दुर्मतिरिति वक्ष्यमाणदुष्टवरेच्छया ॥१४॥ सिध्यसि, सामीप्ये वर्तमाना, सेत्स्यसि सिद्धेष्टार्थो भविष्यतीत्यर्थः । अल्पाभ्यामिति अल्पगुणेन तुष्यति, अल्पदोषेण कुप्यति चेत्यर्थः । अपृष्टस्याप्याशुकोपस्योक्तिः, आशुतोषस्यैव दृष्टान्ततया दार्ढ्यार्थम् ॥१५-२६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

त्रिषु देवेषु आशुदेवं पप्रच्छेत्यन्वयः ॥१४-१९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अथ ——"अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः क्षणे रुष्टः क्षणे तुष्टः" ॥ इति न्यायेन ॥

देवतान्तराणामव्यवस्थितचित्तानां भजनमात्मघातायैव पर्यवस्यतीतीहासेन स्पष्टयितुमाह-कोपेति । यद्यपि ब्रह्मादयः सर्वे देवाः कोपप्रसादयोर्निग्रहानुग्रहयोः दक्षास्तथाप्यङ्ग हे राजन् ! शिवो ब्रह्मा च सद्य एव शापः प्रसादश्च यस्य तथाभूतः अच्युतस्तु नैवंविधः किन्त्वनुग्रहैकस्वभावः क्वचिन्निग्रहोऽप्यन्ततो वरेणैव तुल्य इति भावः ॥१२॥ अत्रेति । सद्यः शापप्रसादत्वे निदर्शनतयेतिहासमुदाहरन्तीत्यर्थः । कोसावित्यतस्तं वर्णयति-वृकासुरायेति । सङ्कटं दुःखमवापेत्यर्थः ॥१३॥ कथं तदित्यतो विस्तरतो वर्णयति-वृक इति । शकुनेः पुत्रः त्रिषु देवेषु मध्ये शीघ्रसन्तोषं पप्रच्छ यतः स दुर्मतिः ॥१४॥ स नारदः आदिदेश शशंस किमिति गुरिशमुपाधाव भज स आशु तुष्यति किञ्च स इति स गिरिरः ॥१५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

देवेषु के शापप्रसादसमर्थास्तत्राऽपि सद्यः शापप्रसादाः क इति तत्राह-शापेति ॥१२॥ शिवः सद्यः शापप्रसाद इत्येतत्कथमित्यत्र इतिहासं वक्ति अत्रेति ॥१३-१६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥६-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१०-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

॥११-१५॥

गूढार्थदीपिनी

शापे प्रसादे च ईशाः समर्थाः । ब्रह्म चेत्यन्वयः । अङ्ग हे राजन् ! ॥१२॥ अत्र शिवस्य सद्यः प्रसादत्वे । आप प्रासवान् ॥१३॥ शकुनेः पुत्रः वृकः पथि नारदं दृष्ट्वा त्रिषु देवेषु आशुतोषं पप्रच्छेत्यन्वयः ॥१४॥ स नारदः । उपाधाव सेवस्व । तुष्यति । वर्तमानसमीपे भविष्यति लट् ॥१५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

वासुदेवेतरप्रसादस्यानर्थहेतुभूतस्य सुलभत्वं वासुदेवप्रसादस्यामृतत्वहेतुभूतस्य च दुर्लभत्वमाह-शापप्रसादयोरिति ॥१२॥ वसुदेतरेषामाशुतोषत्वं तद्भजनस्यानर्थहेतुत्वमितिहासेन स्फुटीकरोति-अत्रैवेति ॥१३-१४-१५॥

आ
शापप्रसादयो
न प्रयच्छति ।
नन्वसमर्थो भ
विद्यमाने सद्यः
ब्रह्मेत्येव अच्यु
अत्राविचारदानं
सङ्क्षेपेण फलमा
सर्वमेव वृत्तान्त
मूलतो नाशयिष्
मन्यन्त इति तत्
नारदो देवसूत्रक
नारदः कदाचिद
सेवां कुरु शीघ्रमे
गुणेन तुष्यति अल

शुकोक्ति
क्षिप्रवरशापदाता न
तथाहि । शकुनेः
गिरिशं देवं त्वं भज

एवं स्वोत्
समर्थाः । तत्र सद्य
चिन्निग्रहोऽपि फल
शेषः । कोऽसावितिह
पुत्रः वृको नामासुरः
तस्य स्वोत्कर्षार्थं पर
गिरिशं शिवमुपाधाव
तुष्यति । अपराधस्तु

एतदेवेति हा

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

आस्तां धनादिवार्ता शापप्रसादावेव भगवान् न करोति आत्मत्वात् दानवार्ता दूर इति निरूपयितुमुपाख्यानान्तरमारभते-पप्रसादयोरिति। अत्यन्तापराधेऽपि कृते भगवान् शापं न प्रयच्छति यथा शिशुपालाय आत्मत्वं तत्र हेतुः अत्यन्तसेवायां वरमपि प्रयच्छति। सुखरूपत्वं तत्र हेतुः न हि कामिनी उपभोगेन सेव्यमाना कदाचिदपि वरं प्रयच्छति तस्माद्भगवत्सेवैव परमपुरुषार्थरूपेति समर्थो भविष्यतीति चेत्तत्राह-शापप्रसादयोः ब्रह्मशिवादयः सर्व एव ईशाः आदिशब्देन दुर्गागणेशादयोऽपि सामर्थ्येऽपि द्यमाने सद्यः शापप्रसाददः शिवो ब्रह्मा च अत्रैकस्य दकारस्य लोपश्छान्दसः अङ्गेति पाठे अन्यदा तु शापप्रसाददस्तु शिवो त्येव अच्युतस्तु नैवंविधः स हि पुरुषस्य स्वरूपं भावि अग्रे कार्यं विचार्यैव शापं वरं वा प्रयच्छति न त्वन्यथा ॥१२॥ अविचारदानं वक्तुम् उपाख्यानमुपक्षिपति-अत्र चोदाहरन्तीममिति। इयमपि परमतभाषा अत आह-पुराविद इति। अविचारदानस्य रूपेण फलमाह-वृकासुरायेति। गिरिशो महादेवः स्वयमेव वरं दत्त्वा पश्चात् सङ्कटं परमक्लेशं प्राप्तवान् ॥१३॥ कथमित्याकाङ्क्षायां मेव वृत्तान्तमाह-वृको नामेति। कर्मणापि वृक इति तस्य वृक एव नाम शकुनेः हरण्याक्षपुत्रस्य पुत्रः स हि दुरात्मा सर्वान् तो नाशयिष्यामीति विचार्य तेषां मूलभूतास्त्रय इति तन्निराकरणव्यतिरेकेण निराकर्तुमशक्या इति ते चैकस्यापि वाक्यं सर्वे ष्यन्त इति तत्कृतोपायेन ते मारणीया इति निश्चित्य तेषामन्यतमप्रसादे एवमर्थं साधयिष्यामीति तदभिज्ञं नारदं पप्रच्छ। सोऽपि रदो देवसूत्रकर्ता पथि दैवगत्या मिलितः त्रयाणां मध्ये क आशुतोष इति पृष्टः सन् गिरिशमादिदेश। स च दुर्मतिर्वृकः न हि रदः कदाचिदपि देवनाशोपायम् उपदेक्ष्यति नाप्यज्ञः एवं ज्ञात्वापि पृष्टवानपि दुर्मतिरेव नारदस्य वाक्यम् उपाधाव आशु सिध्यतीति नं कुरु शीघ्रमेव फलसिद्धिर्भविष्यतीत्यर्थः। तत्र हेतुमाह-सोऽल्पाभ्यामिति। स शिवः अल्पाभ्यामेव गुणदोषाभ्यामल्पेन णेन तुष्यति अल्पेनापि दोषेण कुप्यति ॥१४-१५॥

श्रीसुबोधिनीसारः

शुकोक्तिः। शापवरप्रदाने ईशाः समर्था ब्रह्मविष्णुशिवादयः हे अङ्ग! सद्यः शीघ्रं शापप्रसादो भवो ब्रह्मा च अच्युतः घ्रवरशापदाता न ॥१२॥ अत्र प्रस्तावे इमम् इतिहासं पुरातनं वर्णयन्ति। वृकासुराय वरं दत्त्वा गिरिशः शिवः सङ्कटम् आप ॥१३॥ याहि। शकुनेः पुत्रो वृको नामासुरः पथि मार्गे नारदं दृष्ट्वा त्रिषु देवेषु ब्रह्मविष्णुशिवेषु आशुतोषं देवं पप्रच्छ कुबुद्धिः ॥१४॥ रिशं देवं त्वं भजस्वाशु सिध्यति स नारद इत्याह। यः शिवोऽल्पाभ्यां गुणदोषाभ्याम् आशु प्रसीदति कुप्यति ॥१५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं स्वोक्तपरिहारे भगवद्वचनं संवाद्येममेवार्थमितिहासान्तरेण दृढयति-शापेति। हे अङ्ग! शापप्रसादयोर्ब्रह्मादय ईशाः मर्थाः। तत्र सद्य एव शापः प्रसादश्च यस्य तथाभूतः शिवो ब्रह्मा च, अच्युतः विष्णुश्च नैवंविधः किन्त्वनुग्रहैकस्वभावः। न्निग्रहोऽपि फलतोऽनुग्रह एवेत्याशयः ॥१२॥ अत्रैव सद्यः शापप्रसादत्वे निदर्शनतयेमं पुरातनमितिहासमुदाहरन्ति, वृद्धा इति र। कोऽसावितिहासः इत्यपेक्षायामाह-वृकासुरायेति ॥१३॥ कथमित्यपेक्षायां तद्विस्तरतो वर्णयति-वृको नामेति। शकुन्याख्यस्य तः वृको नामासुरः पथि नारदं दृष्ट्वा त्रिषु ब्रह्मविष्णुरुद्रेषु देवेषु आशुतोषम् आशु शीघ्रं कस्तुष्यति प्रसीदतीति पप्रच्छ। तत्प्रसादेन स्य स्वोत्कर्षार्थं परोपद्रव एव वाञ्छितः इति सूचयन्नाह-दुर्मतिरिति ॥१४॥ तदा स नारदस्तमाह शशंस। किमित्यपेक्षायामाह-रिशं शिवमुपाधाव आराधय। आशु सिद्ध्यसि शीघ्रमेव फलभाग्भविष्यसि। तत्र हेतुमाह-स गिरिशः अल्पेनैव गुणेनाराधनेन ष्यति। अपराधस्तु सावधानतया वर्जनीय एव इत्याशयेनाह-अल्पेनैव दोषेणापराधेन कुप्यति चेति ॥१५॥

अन्वितार्थप्रकाशिका

एतदेवेति हासेन स्फुटयितुं शुक आह-शापेति। हे अङ्ग! हे राजन्! शापप्रसादयोर्ब्रह्मादय ईशाः समर्थाः। तत्र सद्य एव

अन्वितार्थप्रकाशिका

शापः प्रसादश्च यस्य तथाभूतः शिवो ब्रह्मा चेति । अच्युतः विष्णुस्तु नैवंविधः किन्त्वनुग्रहैकस्वभावः । क्वचिन्निग्रहोऽपि फलतोऽनुग्रह एवेत्याशयः ॥१२॥ अत्रेति । अत्रैव सद्यः शापप्रसादत्वे निदर्शनतयेमं पुरातनमितिहासमुदाहरन्ति वृद्धाः । शेषं स्पष्टम् ॥१३॥ वृक इति । दुर्मतिः शकुनेः पुत्रः वृको नामासुरः पथि नारदं दृष्ट्वा त्रिषु ब्रह्मविष्णुरुद्रेषु देवेषु आशुतोषम् आशु शीघ्रं कस्तुष्यति प्रसीदतीति पप्रच्छ ॥१४॥ स इति । स नारदः तमादिदेश शशंस । गिरिशं शिवमुपाधाव आराधय । आशु सिद्ध्यसि शीघ्रमेव फलभाग्भविष्यसि । तत्र हेतुमाह । स गिरिशः अल्पेनैव गुणेनाराधनेन तुष्यति अल्पेनैव दोषेणापराधेन कुप्यति च अतोऽपराधो वर्जनीय एव ॥१५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स शिवः स्वकृतात् स्वेन कृतात् वरदानात् । अबिभ्यत् अबिभेत् । अबिभेदिति वक्तव्ये अबिभ्यदित्युच्चारणमार्षम् ॥१२॥ उपसृष्टः अनुगतः सवेपथुः सकम्पः भूम्यादीनां यावदन्तं तावत्पराधावत् ततः उदक् उत्तरदिशम् उदगात् ययौ ॥१३॥ तत्र प्रतिविधिं प्रतिक्रियाम् अजानन्तः सुरेश्वराः ब्रह्मादयः ततस्तदनन्तरं वैकुण्ठं श्वेतद्वीपम् अगमत् ॥१४॥ परमा गतिः परमप्राप्यः यत्र नारायणः स्थितः ॥१५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथ 'क्षरे रुष्टाः क्षणे तुष्टा रुष्टास्तुष्टाः क्षणे क्षणे । अव्यवस्थितचित्तानां प्रसादोऽपि भयङ्करः' इति वचनेन अव्यवस्थितचित्तानां देवतान्तराणां भजनमात्मघातायैव पर्यवस्यतीति इतिहासेन स्पष्टयितुमाह ॥ शापेति ॥ यद्यपि ब्रह्मविष्णुशिवादयः सर्वे देवाः, शापप्रसादयोः ईशाः निग्रहानुग्रहयोः समर्थाः । क्वचिन्निग्रहोऽप्यन्ततो वरेणैव तुल्य इति भावः ॥१२॥ अत्रैवेति ॥ अत्र एव सद्यः शापत्रसादत्वे एवेत्यर्थः । पुरातनम्, इमम् इतिहासम् उदाहरन्ति । निदर्शनतयेतिहासमुदाहरन्तीत्यर्थः । कोऽसावित्यतस्तं वर्णयति वृकासुरायेति । गिरिशः शिवः, वृकासुराय वरं दत्त्वा सङ्कटं दुःखम् आप ॥१३॥ कथं तदित्यतो विस्तरतो वर्णयति ॥ वृक इति ॥ शकुनेः पुत्रः वृकः नाम दुर्मतिः असुरः पथि नारदं दृष्ट्वा त्रिषु देवेषु ब्रह्मादिजगदीश्वरदेवत्रय इत्यर्थः । आशुतोषं शीघ्रतोषं पप्रच्छ ॥१४॥ स इति ॥ स नारदः, हे वृकासुर ! गिरिशं शिवम् उपाधाव भज । सः आशु तुष्यति इति आदिदेश । कथम्भूतः गिरिशः । यो गिरिशः अल्पाभ्यां गुणदोषाभ्याम् आशु तुष्यति कुप्यति च ॥१५॥

कृष्णप्रिया

श्रीशुकदेवजी बोले –

हे राजन् ! ब्रह्मा विष्णु शिव आदि देव शाप और अनुग्रह करने में समर्थ हैं । उन में ब्रह्मा और शिव यह दोनो शीघ्र शाप देते हैं और शीघ्र हि प्रसन्न भी हो जाते हैं । परन्तु विष्णु भगवान् ऐसे नहीं हैं । परन्तु उनका तो केवल कृपा करने का हि स्वभाव है और किसी को दण्ड भी देते हैं तब भी उसका परिणाम तो अनुग्रयुक्त और कल्याणकारी ही होता है ॥१२॥ इस विषय में प्राचीन इतिहास को दृष्टान्त रूप से ऋषि जन कहते हैं । वृकासुर को वदरदान देकर श्रीशिवजी संकट को प्राप्त हुए ॥१३॥ शकुनि का पुत्र वृकनाम असुर दुर्बुद्धि ने मार्ग में नारदजी को देख कर तीदों देवों में जल्दी प्रसन्न हो जाने वाले के विषय में प्रश्न किया ॥१४॥ नारदजी बोले की आप श्रीशिवजी का पूजन करके सत्वर ही सिद्धि को प्राप्त करेंगे । क्योंकी शिवजी आशुतोष हैं, थोडे ही गुणों से शीघ्र ही प्रसन्न हो जाते हैं ॥१५॥

दशास्यबाणयोस्तुष्टः स्तुवतोर्वन्दिनोरिव । ऐश्वर्यमतुलं दत्त्वा तत आप सुसङ्कटम् ॥१६॥
इत्यादिष्टस्तमसुर उपाधावत्[1] स्वगात्रतः । केदार आत्मक्रव्येण [2]जुह्वानोऽग्निमुखं हरम् ॥१७॥
देवोपलब्धिमप्राप्य निर्वेदात् सप्तमेऽहनि । [3]शिरोऽवृश्चत् स्वधितिना तत्तीर्थक्लिन्नमूर्धजम् ॥१८॥
तदा महाकारुणिकः स धूर्जटिर्यथा [4]वयं चाग्निरिवोत्थितोऽनलात् ।
निगृह्य दोर्भ्यां भुजयोर्न्यवारयत् तत्स्पर्शनाद्भूय [5]उपस्कृताकृतिः ॥१९॥

कर्दमक्षमा

स्तुवतोः, वन्दिनोः, इव, दशास्यबाणयोः, तुष्टः, अतुलम्, ऐश्वर्यम्, दत्त्वा, ततः, सङ्कटम्, आप ॥१६॥ इति, आदिष्टः, असुरः, अग्निमुखम्, हरम्, स्वगात्रतः, आत्मक्रव्येण, जुह्वानः, केदारम्, उपाधावत् ॥१७॥ देवोपलब्धिम्, अप्राप्य, निर्देदात्, सप्तमे, अहनि, तत्तीर्थे, क्लिन्नमूर्धजम्, शिरः, स्वधितिना, अवृश्चत् ॥१८॥ तदा, अग्निः, इव, सः, महाकारुणिकः, धूर्जटिः, अनलात्, उत्थितः, दोर्भ्याम्, भुजयोः, निगृह्य, च, तत्स्पर्शनात्, उपस्कृताकृतिः, न्यवारयत् ॥१९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

सुसङ्कटमाप कैलासोत्पाटनं पुरपालनं च ॥१६॥ स्वगात्रत उपाधावत् कथम् आत्मक्रव्येण स्वमांसेन जुह्वान इति ॥१७॥ अवृश्चच्छेत्तुमुद्यतः ॥१८॥ मूर्तिमानग्निरिव देदीप्यमानः वयमधुनातना यथाकिञ्चिद्दुःखेन मर्तुकामं वारयामस्तद्वदिति स च उपस्कृताकृतिः परिपूर्णदेहोऽभवत् तं न्यवारयदेवमाह च ॥१९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

दशास्यबाणयोः रावणबाणासुरयोः । ततस्तदुपरितोषात् ॥★॥ नन्वेवं चेत् तर्हि बिभेमि चेति नाशङ्क्यं यतो हराल्लब्धवरस्य त्वासौ न किमपि कर्तुं शक्ष्यतीत्याह दृष्टान्तद्वारा-दशेति । सकामत्वात् बन्दिनोरिव स्तुवतोस्तुष्टः सन् सुसङ्कटं बहुसङ्कटं क्रमेण कैलासोत्पाटनं पुरपालनरूपं चापेति तैर्व्याख्यातम् ॥१६॥ इतीत्थम् । तं रुद्रम् । अग्निर्मुखं यस्य तम् । केदारे तन्नामकक्षेत्रे । स्वगात्रतो निजशरीरेण । उपाधावदसेवत ॥★॥ केदाराख्ये शिवक्षेत्रे । अग्निर्मुखं यस्येति सर्वदेवानामग्निमुखत्वात्तमुद्दिश्याग्नौ होमं कुर्वन्नित्यर्थः । स्वगात्रतः सकाशात् । आत्मना छिन्नं क्रव्यं मांसमात्मक्रव्यमिति मध्यमपदलोपी समासः । तेन ॥१७॥ स्वधितिना छुरिकया । 'स्वधितिश्छुरिका मता' इति कोशात् । तत्तीर्थेन केदारपादोदकेन क्लिन्नान्यार्द्राणि मूर्धजानि शिरोरुहाणि यस्य तच्छिरः ॥★॥ देवस्य निजाराध्यस्य शिवस्योपलब्धिं दर्शनम् । निर्वेदात् दुःखात् । स्वधितिना खड्गेन परश्वधेन वा । 'स्वधितिश्छेदनार्हशस्त्रे' इति कोशकाराः । नित्यं त्रिषवणपरत्वात्क्लिन्नकेशं छेदनार्थं सद्यः स्नानाद्वा ॥१८॥ तदा शिरश्छेदनावसरे । र्जितः स धूर्जटिः रुद्रः । तमिति शेषः ॥★॥ त्रिलिङ्गत्वात्सत्त्वगुणोदयमप्याह-तदेति । तदा सद्य एव महाकारुणिकः विचारं कारुण्योदयात् । यथा वयमिति अजहल्लक्षणया साधारणजनप्राप्तिः । दृष्टान्तत्वं च महाकारुणिकतयेश्वरत्वत्यागेन लौकिकसादृश्यप्राप्तेः । अन्यथान्तःप्रेरणयैव तद्वारणसम्भवात् ॥१९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

नन्वेवं चेत् तर्हि बिभेमि चेति नाशङ्क्यं यतो हराल्लब्धवरस्य तव न किञ्चित्कर्तुमसौ शक्ष्यतीति दृष्टान्तद्वारा दर्शयति-शेति । बन्दिनोरिव स्तुवतोः सकामत्वात् । अत्र बाणासुरात् सुसङ्कटप्राप्तिः स्वेन युद्धप्रार्थनारूपा श्रीभगवता सह युद्धादिदुःखरूपा ज्ञेया । प्राचीनकल्पानुसारेणेदमुदाहृतम् ॥१६॥ एवमुभयोस्तोषकयो राजसत्वं दर्शयित्वा तमोमिश्रत्वं दर्शयति-इतीति याम् । केदाराख्ये शिवक्षेत्रे अग्निर्मुखं यस्येति सर्वदेवानामग्निमुखत्वात्तमुद्दिश्याग्नौ होमं कुर्वन्नित्यर्थः ॥१७॥ देवस्य निजाराध्यस्य

१.वत्सुयन्त्रितः-विज. । २. जुह्वन्नग्नि-विज. । ३. शिरोजिहीर्षुरसिना स तीर्थक्लिन्नमूर्धजः-विजः-विज. । ४. यथाऽरणावग्नि-वीर. ; वरिष्ठे-इति च. पु. टी. । ५. उपाकृता-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

शिवस्योपलब्धिं समीपे प्राप्तिं दर्शनं वा निर्वेदात् दु:खात् स्वधितिना खड्गेन परश्वधेन वा तस्य तीर्थेन आ सर्वत: क्लिन्ना आर्द्रा मूर्धजा यस्मिन् तत् नित्यं त्रिषवणपरत्वात् किंवा, छेदनार्थं सद्य: स्नानात् ॥१८॥ त्रिलिङ्गत्वात्सत्त्वगुणोदयमप्याह–तदेति। सद्य एव स चेत्यन्वय: । दुष्टेऽपि कारुण्योदयात् महाकारुणिक: यथा वयमिति जहल्लक्षणया साधारणजनप्राप्ति: तद्दृष्टान्तत्वं च महाकारुणिकतयेश्वरत्वत्यागेन लौकिकसादृश्यप्राप्ते: ॥१९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी ॥१५-२६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१४-१९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तथाहि दशास्यबाणयो: रावणबाणासुरयोरिव स्तुवतोरतुलमैश्वर्यं दत्त्वा ताभ्यां सकाशादेव सङ्कटं कैलासोत्पाटनपुरपालनात्मकं दु:खमवापेत्यर्थ: ॥१६॥ इतीति ॥ इत्थमादिष्टोऽसुर: सुष्ठु मन्त्रित: प्रचोदितश्च तं गिरिशमेवोपाधावदाराधितवान्। स्वगात्रत इति पाठे स्वदेहेन स्वदेहमांसहोमेनाराधितवानिति यावत् आत्मन: स्वस्य क्रव्यं मांसं तेन हविषाऽग्निमुखस्थं हरं जुह्वानोऽपि ॥१७॥ देवस्य हरस्योपलब्धिं दर्शनमप्राप्य सप्तमेऽहनि(दिवसे) क्लिन्ना आर्द्रा मूर्धजा: केशा: यस्मिंस्तदात्मन: शिर: स्वधितिनाऽवृश्चच्छेत्तुमारब्धवानित्यर्थ: । स्वधिति: पशुपुरोडाशादिच्छेदनार्थ: खड्गविशेष: ॥१८॥ तदेति । स धूर्जटि: रुद्र: मूर्तिमानग्निरिव देदीप्यमानोऽग्नेरुत्थित: स्वदोर्भ्यां तद्भुजयो: प्रगृह्य न्यवारयत्तस्य धूर्जटे: स्पर्शनात्प्रभावात्पुनरुपस्कृता निर्व्रणा आकृति: शरीरं यस्य तथाभूतो बभूवेत्यर्थ: ॥१९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अग्निमुखमुद्दिश्य जुह्वन्नितिच्छान्दस: जुह्वन् होमं कुर्वन् ॥१७॥ देवोपलब्धिं देवदर्शनम् असिना शिरोहर्तुकामोऽभूत ॥१८॥ करचरणाद्यवयवी उपाकृताकृति: उत्पन्नस्वरूप: ॥१९॥

श्रीमज्जीवगोस्वामिकृत: क्रमसन्दर्भ: ॥६-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भ: ॥१०-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सुसङ्कटं क्रमेण कैलासोत्पाटनं पुरपालनं च ॥१६॥ स्वगात्रत: सकाशात् आत्मक्रव्येण आत्मनैव छिन्नेन मांसेनेत्यर्थ: ॥१७॥ अवृश्चत् छेत्तुमुद्यत: सुधितिना खड्गेन तत्तीर्थ एव आक्लिन्ना: सम्यगार्द्रीभूता मूर्धजा: यत् तत् ॥१८॥ वयमधुना यातना यथा दु:खेन मर्तुकामं जनं वारयामस्तद्वत् स च उपस्कृताकृति: परिपूर्णदेहोऽभूत् ॥१९॥

गूढार्थदीपिनी

बन्दिनोरिव स्तुवतो: तयो: तुष्ट: सन् ससङ्कटं बहुसङ्कटं कैलासोत्पाटनं पुरपालनरूपं च ॥१६॥ इति आदिष्ट: असुर: तं शिवमुपाधावत् आराधितवान्। किं कुर्वन् सन्। केदारक्षेत्रे स्वगात्रत: आत्मक्रव्येण आत्मच्छिन्नमांसेन हरं जुह्वान: । अग्निर्मुखं यस्य तम्। सर्वदेवानामग्निमुखत्वात् तमुद्दिश्य अग्नौ होमं कुर्वन्नित्यर्थ: । आत्मना छिन्नं क्रव्यमात्मक्रव्यं तेन। मध्यमपदलोपी समास: ॥१७॥ निर्वेदात् दु:खात् स्वधितिना (स्वधितिश्छुरिका मता।) छुरिकया शिरोऽवृश्चत् छेत्तुमद्यतोऽभूत्। तत्तीर्थेन क्लिन्ना आर्द्रा: मूर्धजा: केशा यस्य तम् ॥१८॥ तदा अनलात् अग्निकुण्डात् मूर्तिमान् अग्निरिव उत्थित: स धूर्जटि: (धूर्गङ्गा जटिषु

गूढार्थदीपिनी

स्येति। जटिर्जटा इति द्विरूपकोशः ।) शिवः दोर्भ्यां तं भुजयोः निगृह्य न्यवारयदित्यन्वयः । यथा वयं कञ्चित् मर्तुकामं निवारयामः तद्वत्। स च शिवस्पर्शात् उपस्कृताकृतिः परिपूर्णदेहोऽभवत् ॥१९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यश्च सुतुष्टः ऐश्वर्यं दत्त्वापि ततः ताभ्यां सकाशात् सुसङ्कटमतिदुःखं कैलाशोत्पाटनं पुरपालनं चाप ॥१६॥ आत्मक्रव्येण स्वमांसेन जुह्वानः स्वगात्रतः सार्वविभक्तिकस्तसिः स्वकीयैर्गात्रैः स्तुत्यादिपरैर्वागादिभिश्च तं गिरिशम् उपाधावदाराधितवान् ॥१७॥ स्वधितिना खड्गेन अवृश्चत् छेत्तुमुद्यतः ॥१८॥ वयं यथा भक्तं मर्तुकामं निवारयामस्तद्वत् न्यवारयत् स च तस्य स्पर्शनात् उपस्कृता परिपूर्णा आकृतिर्यस्य स तथा अभवत् ॥१९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

त्वदभिलषितं जानामीति ज्ञापयन् दृष्टान्तमाह-दशास्यबाणयोस्तुष्ट इति । का तेषामुपासनेत्याकाङ्क्षायामाह-स्तुवतोरिति । स्तोत्रमात्रेणैव सन्तुष्टस्तदपि स्तोत्रं नैव भक्त्या किन्तु जिघृक्षयेति वक्तुं दृष्टान्तमाह-वन्दिनोरिवेति। यथा वैतालिकाः स्तुवन्ति तत्तस्तयोरैश्वर्यमतुलं दत्त्वा ततः स्वदत्तैश्वर्येणैव सङ्कटमाप तयोः सुरपालो जात इत्यर्थः ॥१६॥ एवं स्वहितं श्रुत्वा तथा कृतवानित्याह-इत्यादिष्ट इति । तं महादेवम् असुरः स उपाधावत् । उपाधावनमेवाह-स्वगात्रतः स्वशरीरादेव स्वस्य क्रव्यं मांसमुद्धृत्य अग्नौ महादेवं मन्त्रेण भावयित्वा केदारे अतिशुद्धे हिमालये अग्निमुखं क्रव्येण उपाधावदित्यनेन महादेवोद्देशेन स्वमांसमजुहोदिति ज्ञापितम्। एवं सप्तदिनपर्यन्तं कृतवान्। महादेवः वृकोऽपि भगवत्प्रतीक्षया सप्तदिवसानङ्गीकृतवन्तौ। ततो भगवान् न फलदो जात इति निश्चित्य देवस्योपलब्धिमप्राप्य सप्तमेऽहनि मरणं वा फलं वा साधयिष्यामीति निश्चित्य स्वधितिना शिरः अवृश्चत् सङ्कल्पपूर्वकं तथा कृतवानिति ज्ञापयितुमाह-तत्तीर्थक्लिन्नमूर्धजः । तत्र केदारोदकतीर्थं प्रसिद्धम्। यस्मिन् पीते उदरे लिङ्गानि भवन्ति तेन क्लिन्ना मूर्धजा केशा यस्य ॥१७-१८॥ एवं तस्य साहसं दृष्ट्वा महादेवो मूलकारणाच्छङ्कितमनाः प्रसन्नो जात इत्याह-तदा महाकारुणिक इति । परदुःखं दृष्ट्वा यो दुःखितो भवति स कारुणिक इति भगवांस्तु परमकारुणिकः दुःखोत्पत्तिसम्भावनायामपि दुःखितो भवति तत्र हेतुभूतं विशेषणमाह-स धूर्जटिरिति । श्मशाने वृथा मृतान् दृष्ट्वा दुःखितः तत्पांसुषु लोटनाद्धूसरवर्णा जटा जाता इति यथाह्वयमिति आहूयाह्वानम् आगच्छ रुद्र इमं बलिं गृहाण स्वाहेत्यत्र यदैव शीघ्रमागच्छेत्याह्वानं कृतं तथैव समागतः सन्देहाभावाय प्रत्यक्षदृष्टं दृष्टान्तीकरोति-अग्निरिवेति। चकारान्मानसाह्वानं सभावनेनैव समागत इति ज्ञापितं तदा भगवानालिङ्गनेन निष्पीड्य न्यवारयत् शिरश्छेदनं न कर्तव्यमिति। नन्वेवं चेद्दयया प्रथमं गात्रच्छेद एव कथं न निवारित इति चेत्तत्राह-तत्स्पर्शनाद्भूय उपस्कृताकृतिरिति । महादेवस्य स्पर्शमात्रेण भूयः उपस्कृता पूर्ववत्पुष्टा आकृतिर्देहो यस्य स्पर्शमात्रेणैव पूर्ववज्जात इत्यर्थः । एवं सति तस्य प्रत्यापत्तिरुक्ता ॥१९॥

श्रीसुबोधिनीसारः

बन्दिनोरिव स्तुवतो रावणबाणासुरयोः तुष्टोऽतुलमेश्वर्यं समृद्धिं दत्त्वा ततोऽतिसङ्कटम् आप शिवः ॥१६॥ इत्यादिष्टो नारदेनाज्ञप्तोऽसुरः स्वगात्रतः शरीरयत्नतः तं शिवमुपास्त केदारे क्षेत्रे आत्मनः क्रव्येण मांसेनाग्निमुखं हरं जुह्वानः ॥१७॥ देवस्योपलब्धिं प्राप्तिम् अप्राप्य सप्तमे दिने निर्वेदादुदासीनाद्धेतोः स्वधितिना खड्गेन तत्तीर्थे जलेन क्लिन्नमार्द्रीभूतं मूर्धजं केशवृन्दो यस्मिंस्तच्छिरोऽच्छिनत् ॥१८॥ तस्मिन्काले परमकृपालुः स धूर्जटिर्महादेवोऽनलात्कुंडाग्नेरुत्थितो जातोऽग्निरिव दोर्भ्यां पाणिभ्यां भुजयोर्निगृह्य वृकं न्यवारयत् । दुःखेन मर्तुकामं वयं यथा वारयामस्तथा तस्य शिवस्य स्पर्शनाद्भूयः पुनरुपस्कृताकृतिः परिपूर्णदेहोऽभवत् ॥१९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

दशास्यो रावणः रावणबाणयोरतुलमनुपममैश्वर्यं दत्त्वा ततः ताभ्यामेव सुसङ्कटं तिरस्कारमाप। तत्र रावणेन तस्यैव

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कैलासोत्पाटनं कृतम् । बाणेन तु पुरपालकत्वेन वृतस्तच्चकारेति ज्ञेयम् ॥१६॥ इत्येवं नारदेनादिष्टः सोऽसुरो वृकः केदारक्षेत्रे स्वगात्रतो मांसं छित्त्वा तेनात्मनः क्रव्येण मांसेन हविषा जुह्वानस्तमग्निमुखं हरमुपाधावत् आराधितवान् ॥१७॥ एवं प्रतिदिनं जुह्वानोऽपि देवस्य तस्योपलब्धिं दर्शनमप्राप्य निर्वेदाद्वैराग्यान्मरिष्यामि कार्यं वा साधयिष्यामीति निश्चित्य सप्तमे दिने तस्मिन् केदारकुण्डे स्नात्वा तेन तीर्थजलेन क्लिन्ना मूर्धजा यस्य तस्य तत्स्वशिरः स्वधितिना शस्त्रविशेषेण अवृश्चत् छेत्तुमारब्धवानित्यर्थः ॥१८॥ तदा स धूर्जटिः शिवः अनलात् मूर्तिमानग्निरिवोत्थितो देदीप्यमानः स्वदोर्भ्यां तद्भुजयोर्निगृह्य शिरश्छेदं न्यवारयत्। तत्र हेतुमाह–महाकारुणिक इति। स च तस्य धूर्जटेः स्पर्शनादेव भूयः पुनः उपस्कृता निर्व्रणा आकृतिः शरीरं यस्य तथाभूतो बभूव। कारुणिकत्वेन निवारणे दृष्टान्तमाह–यथा वयमिति। वयं यथा किञ्चिद्दुःखेन मर्तुकामं वारयामस्तथेत्यर्थः ॥१९॥

अन्वितार्थप्रकाशिका

दशास्येति । बन्दिनोरिव स्तुवतोर्दशास्यबाणयोरतुलमनुपममैश्वर्यं दत्त्वा ततः ताभ्यामेव सुसङ्कटं तिरस्कारमाप। तत्र रावणेन तस्यैव कैलासोत्पाटनं कृतं बाणेन तु पुरपालकत्वेन वृतस्तच्चकारेति ज्ञेयम् ॥१६॥ इतीति। इत्येवं नारदेनादिष्टः सोऽसुरो वृकः केदारक्षेत्रे स्वगात्रतो मांसं छित्त्वा तेनात्मनः क्रव्येण मांसेन हविषा जुह्वानः । शानजार्षश्चानश्वा । तमग्निमुखं हरमुपाधावत् आराधितवान् ॥१७॥ देवेति । एवं प्रतिदिनं जुह्वानोऽपि देवस्य तस्योपलब्धिं दर्शनमप्राप्य निर्वेदाद्वैराग्यान्मरिष्यामि कार्यं वा साधयिष्यामीति निश्चित्य सप्तमे दिने तस्मिन् केदारकुण्डे स्नात्वा तेन तीर्थजलेन क्लिन्ना मूर्धजा यस्य तत्स्वशिरः स्वधितिना शस्त्रविशेषेण अवृश्च्यत् छेत्तुमारब्धवान् ॥१८॥ तदेति। तदा महाकारुणिकः स धूर्जटिः शिवः अनलात् मूर्तिमानग्निरिवोत्थितो देदीप्यमानः स्वदोर्भ्यां तद्भुजयोर्निगृह्य शिरश्छेदं न्यवारयत् । यथा वयं कश्चिद्दुःखेन मर्तुकामं वारयामस्तथेत्यर्थः । स च वृकः तस्य धूर्जटेः स्पर्शनादेव भूयः पुनः उपस्कृता निर्व्रणा आकृतिः शरीरं यस्य तथाभूतो बभूव ॥१९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

दूरात् वैकुण्ठात् बहिः तं वृकासुरं तथा व्यसनं तादृशं व्यसनं दुःखं यस्य तं रुद्रं च दृष्ट्वा वृजिनार्दनः कष्टहन्ता योगमायया योगैश्वर्येण बटुको बालो ब्रह्मचारी भूत्वा प्रत्युदियात् सन्मुखम् आयात् ॥१६-१७॥ व्यक्तं निश्चितं श्रान्तः श्रमयुक्तो जातोऽसि किं किमर्थं दूरमागतः यतः पुंसो नरस्यायम् आत्मा देहः सर्वकामान् पुरुषार्थान् दोग्धीति सः तद्धेतुरित्यर्थः ॥१८॥ हे विभो! युष्मद्व्यवसितं त्वन्निश्चितं यदि नः श्रवणायालं योग्यम् अस्ति चेत्तर्हि भण्यतां यतः प्रायशः धृतैः वशीकृतैः पुम्भिर्नरैः जनः स्वार्थान् समीहते साधयति अतो नः कथ्यताम् ॥१९-२०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

दशास्येति ॥ यः बन्दिनोः इव स्तुवतोः दशास्यबाणयोः रावणबाणासुरयोः तुष्टः अतुलम् ऐश्वर्यं दत्त्वा ततः सः सङ्कटम् आप। कैलासोत्पाटपुरपालनात्मकं दुःखमवापेत्यर्थः । तुमुपाधावेति सम्बन्धः ॥१६॥ इतीति ॥ इतीत्थम् आदिष्टः नारदेन प्रोक्तः सुयन्त्रितस्तद्वचनविश्वसितः असुरः स्वगात्रत इति पाठे स्वगात्रतः स्वशरीरात् उत्कृत्तेन आत्मक्रव्येण स्वेनैव मांसेन अग्निर्मुखं यस्य तं हरम् उद्दिश्य केदारे कुण्डे जुह्वन् सन् उपाधावत् तं समाराधितवान् । केदारे शिवक्षेत्रे इत्यन्ये ॥१७॥ देवेति ॥ ततः सः देवस्य शिवस्योपलब्धिः सम्प्राप्तिस्ताम् अप्राप्य निर्वेदाद्धेतोः सप्तमे अहनि तत्तीर्थे क्लिन्ना मूर्धजाः केशा यस्य तत् शिरः स्वमूर्धानं स्वधितिना स्वकीयपरशुना अवृश्चत् छेत्तुमारब्धवानित्यर्थः ॥१८॥ तदेति ॥ तदा अरणेः सकाशात् अग्निः इव, अनलात् कुण्डाग्नेः सकाशात्, यथा मूर्तिमान् सन्नेव उत्थितः महाकारुणिकः सः धूर्जटिः शिवः दोर्भिश्चतुर्भिर्भुजैः, दोर्भ्यामिति पाठे द्वाभ्यां भुजाभ्यां भुजयोस्तद्बाह्वोः निगृह्य प्रगृह्य न्यवारयत् । तस्य धूर्जटेः स्पर्शनं तस्मात् प्रभावात् भूयः पुनः उपस्कृता निर्व्रणा आकृतिः शरीरं यस्य तथाभूतश्च बभूव । अत्र यथा वयं चाग्निरिवोत्थित इति यथावयव्यग्निरिवेत्यादयो बहवः पाठाः । तत्राद्यपाठे वयं यथा मर्तुमुद्यतं निवारयामस्तथा न्यवारयत् इति । द्वितीयपाठे यथार्था अवयवाः सन्त्यस्येति तथाभूतः ॥१९॥

कृष्णप्रिया

स्तुतिपाठकों के तुल्य स्तुति करने वाले रावण और बाणासुर के उपर शीघ्र ही प्रसन्न होकर उन दोनों को असीम ऐश्वरस्य देकर शिवजी उल्टेही संकटको प्राप्त हुए ॥१६॥ श्रीनारदजी के श्रीमुखसे उपदेश पाकर वृत्तासुर केदार क्षेत्रमें गया और अग्नि को भगवान शंकर का मुख्र मानकर अपने शरीर का मांस काट काटकर उसमे हवन करने लगा ॥१७॥ इस प्रकार छः दिनों तक घोर उपासना करने पर भी भगवान शिव के दर्शन न हुए तब वह अत्यन्त हताश होकर सातवे दिन केदारतीर्थमें स्नान करके उसने जलसे भीगे हुए अपने मस्तक को कुल्हाडे से काटकर हवन करना चाहा ॥१८॥ हे राजन् ! जैसे संसारमें कोई दुःख्र संतप्त व्यक्ति आत्महत्या करने जाता है, तो हमलोग दयावश उसे बचा लेते है, वैसे ही परम कृपालु भगवान धूर्जटि शिवे वृकासुर के आत्मघात के पहले ही यज्ञकुण्ड से अग्निदेव के समान प्रकट होकर अपने दोनों हस्तकमलसे उनके दोनों हाथों को पकड लिये और (गला काटने से) रोक लिया । उनका स्पर्श होते ही वृकासुर के अंग प्रत्यंग पूर्ववत् अच्छे हो गये ॥१९॥

श्रीभगवानुवाच

तमाह चाङ्गालमलं वृणीष्व मे यथा [1]निकामं वितरामि ते वरम् ।
[2]प्रीयेय तोयेन नृणां प्रपद्यतामहो त्वयाऽऽत्मा [3]परितप्यते वृथा ॥२०॥
देवं स वव्रे पापीयान् वरं भूतभयावहम् । [4]यस्य यस्य करं शीर्ष्णि धास्ये स म्रियतामिति ॥२१॥
तच्छ्रुत्वा भगवान् रुद्रो दुर्मना इव भारत । ओमिति प्रहसंस्तस्मै ददेऽहेर[5]मृतं यथा ॥२२॥[6]
स तद्वरपरीक्षार्थं शम्भोर्मूर्ध्नि[8] किलासुरः । स्वहस्तं धातुमारेभे [9]सोऽबिभ्यत् स्वकृताच्छिवः ॥२३॥

कर्दमक्षमा

तम्, आह, अङ्ग, अलम्, अलम्, मे, यथानिकामम्, वरम्, वृणीष्व, ते, वितरामि, प्रपद्यताम्, नृणां, तोयेन, प्रीयेय, अहो, त्वया, वृथा, आत्मा, परितप्यते ॥२०॥ सः, पापीयान्, भूतभयावहम्, देवम्, वरम्, वव्रे, यस्य, यस्य, शीर्ष्णि, करम्, धास्ये, सः, म्रियताम्, इति ॥२१॥ भारत, तत्, श्रुत्वा, भगवान्, रुद्रः, दुर्मनाः, इव, प्रहन्, तस्मै, ओम्, , यथा, अहेः, अमृतम्, इव, ददे ॥२२॥ सः, असुरः, किल, तद्वरपरीक्षार्थम्, शम्भोः, मूर्ध्नि, स्वहस्तम्, धातुम्, आरेभे, सः, शिवः, स्वकृतत्, अबिभ्यत् ॥२३॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तोयेनापि भजतां प्रीतः स्यां त्वया तु देहो वृथापीड्यत इति ॥२०-२१॥ दातुमनर्हमपि दत्तवान् सर्पाय क्षीरमिव ॥२२-२३॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तं वृकासुरम् । यथा निकामं नितरां काममनतिक्रम्य यथाभीष्टमित्यर्थः । प्रीयेय प्रीतो भवेयम् ॥★॥ अङ्गेति लालनसम्बोधनम् । अलं स्वशिरश्छेदनेन प्रयोजनं नास्तीत्यर्थः । वीप्सा तु वैयग्र्यात् । मे मत्तः । यथा निष्कामं स्वाखिलेच्छानुसारेण अभिकाममित्यपि पाठः । वरमित्युभयत्रान्वेति । अहो खेदे । देवात्सर्वसद्वरप्रदादपि श्रीशिवात् । देवमिति वा पाठः ॥२०॥ स वव्रे देवं देवादित्यर्थः ॥★॥ तादृशवरणे हेतुः पापीयानिति । चतुर्थकोटिकेनेयसुना तस्यातीव पापित्वं ध्वनितम् । यस्य यस्येति वीप्सया तस्य सकृत्त्वं च वारयति । देवादिकं च सर्वं परामृशति ॥२१॥ तद्वचः । दुर्मना अपि प्रहसन्निव स्वदौर्मनस्यमप्रकाशयन्निव ।

---

१. यथाभिकामां-श्रीधर. वंशी. ; यथा निकामं-वीर. विज. जीव. । २. शिवेन जीवेन-विज. । ३. भूशमर्द्यते-श्रीधर. वंशी. वीर. जीव. । ४. देवात्सवव्रे-वीर. विज. । ५. यस्य पुंसः-विज. । ६. ददो वरमृतं यथा-विज. । ७. इदमर्ध नास्ति-श्रीधर. वंशी. वीर. विज. ; वृकः **सोऽसुरो नूनं गौरीहरणलालसः**-इति कस्यचित् । ८. शीर्ष्णि वृकासुरः-विज. । ९. सोऽबिभेत्-इति कस्यचित् ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्मै वृकाय। ओमित्युक्त्वा ददे। अपात्रायादेयदाने दृष्टान्तः-अहेरहयेऽमृतं दुग्धमिव। 'घृतक्षीरजलेऽमृतम्' इति व्याडिः ॥★॥ तच्छ्रवणात् दुर्मनाः दुःखितचित्तः। इवेति श्रीभगवतस्तत्प्रतीकारसम्भावनया दौर्मनस्यहासात्। तत्र हेतुः भगवानिति। सर्वज्ञ इत्यर्थः। तस्य दुर्मतित्वेन प्रहसन्। अमृतत्वसाम्यं वरमात्रांशे। हे भारतेति भरतवंशबीजभूतो भवान्, यथा श्रीभगवता रक्षितस्तथा तद्भयाज्जगद्रक्षिष्यत इति भवता कापि चिन्ता न कार्येति भावः ॥२२॥ इत्थमुक्तः स वृको गौरीहरणलालसोऽभूदिति। ततश्च तस्य वरस्य परीक्षार्थं विश्वासार्थम् ॥★॥ किल वार्तायाम् ॥२३॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अङ्गेति सलालनसम्बोधनम् अलं स्वशिरश्छेदेन प्रयोजनं नास्तीत्यर्थः। वीप्सा वैयग्र्यात् मे मत्तो यथा निष्कामं स्वाखिलेच्छानुसारेण अभिकाममिति वा पाठः वरमित्युभयतोऽप्यन्वयः। अहो खेदे ॥२०॥ देवात् सर्वसद्वरप्रदादपि श्रीशिवात् देवमिति वा पाठः तादृशवरणे हेतुः पापीयानिति यस्य यस्येति वीप्सया तस्य सकृत्त्वं च निवारयति देवादिकं सर्वमेव परामृशति च ॥२१॥ तच्छ्रवणात् दुर्मनाः दुःखितचित्त इवेति। श्रीभगवतस्तत्प्रतीकारसम्भावनया दौर्मनस्यहासात् तत्र हेतुः भगवान् सर्वज्ञ इति तस्य दुर्मतित्वेन प्रहसन् अमृतसाम्यं वरत्वमात्रांशे हे भारतेति भरतवंशबीजभूतो भवान् यथा श्रीभगवता रक्षितस्तथा तद्भयाज्जगद्रक्षिष्यत इति भवता कापि चिन्ता न कार्येति भावः ॥२२॥ किल वार्तायाम्। स्वकृतात् स्वयं दत्तवरात् अबिभेत् भयं प्राप्तः अबिभ्यदिति पाठश्छान्दसः। ततश्च पराङ्मुखोऽधावदिति ज्ञेयम्। शिव इत्यात्मनोऽन्येषां च सर्वभूतानां मङ्गलेच्छुरिति भावः ॥२३॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी ॥१५-२६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

अर्द्यते क्लिश्यते ॥२०-२४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तमिति। तं वृकासुरमाह च किमिति हे अङ्ग हे वृक ! अलमलं होमेनेति शेषः यथा निकामं यथेच्छं वरं वृणीष्व तुभ्यं वितरामि प्रयच्छामि तोयेनापति प्रपद्यतां भजतां नृणां प्रीतः स्यां त्वया तु वृथा आत्मा देहो भृशमर्दितः पीडितः ॥२०-२४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

यथा निकामं नितरां काममनतिक्रम्य नृणां यत्प्रियतमं वस्तु स जीवः जीवनं प्राणधारणं तेन जीवेन प्रपद्यता प्रपन्नो भवतु भवानिति शेषः। केनेत्यत उक्तम्-शिवेन मयेति। किञ्च जीवो सुधारहणतत्परः अनेन पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेदिति वचनात्। जीवनं सर्वस्मादभीष्टमित्युक्तं भवति। किञ्चात इति तत्राह-अहो इति। आत्मा शरीरम् अर्द्यते हिंस्यते अहो यस्मात्तस्मात् ॥२०-२१॥ ओमित्युक्त्वा प्रहसन् आत्मनो दैन्यमप्रकाशयन् ॥२२॥ अबिभेत् भीतवान् ॥२३॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥६-२६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१०-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अलमलं शिरश्छेदेनेत्यर्थः ॥२०-२२॥ स्वकृतात् स्वदत्तवरात् अबिभेत् भयं प्राप्तः अबिभ्यदिति पाठः आर्षः ॥२३॥

तं
वरं वृणीष्व।
पीड्यते। अ
प्राणिनां भयम
इति व्याडिः।
वरदानात्। इवे

अङ्ग
वृथा अर्द्यते पी

अधि
यथाभिकामं य
कारणमिति चेत्त
। ननु प्रतिपत्तिमा
प्रीत इत्यर्थः।
आत्महानमपुरुष
याचितवानित्याह
पापमेव निरन्तरं
याचितवानित्यर्थः
प्रयत्नान्तरव्यतिरेके
रोदिति इति ततो
परमेश्वरेणायं वञ्चि
त्वमेव मरिष्यसी
यथेति। अहेरिव प
। किलेति। महतो
ततस्तस्योद्योगं ज्ञात

तं वृकम
भजतां नृणामुपरि
भूतभयङ्करं वरं वव्रे
भगवान् रुद्रो दुर्मना
वृको नूनं निश्चयेन गौ

गूढार्थदीपिनी

तं वृकासुरमाह-अङ्ग हे वृकोदर ! अलमलं शिश्छेदनेन न किञ्चित्प्रयोजनमस्तीत्यर्थः । यथाभिकामं यथाभीष्टं मे मत्तो वरं वृणीष्व । अहं ते तुभ्यम् । अहं तु तोयेन जलमात्रेणापि प्रपद्यतां पूजयतां पुंसा प्रीयेय प्रीतो भवेयम् । त्वया तु वृथैव आत्मा देहः पीड्यते । अहो खेदे ॥२०॥ देवं प्रतीति योज्यम् । पापीयानिति चतुर्थकोटिगतेन ईयसुना तस्य महापापित्वं ध्वनितम् । भूतानां प्राणिनां भयम् आवहति प्रापयतीति तथा ॥२१॥ ओमिति स्वीकारार्थेऽव्ययम् । तथास्तु इति वरं ददे । अमृतं (घृतक्षीरजलेऽमृतम इति व्याडिः ।) दुग्धम् ॥२२॥ इतीति सार्धम् । गौराहरणे लालसा उत्कण्ठा यस्य सः । धातुं धर्तुम् । अबिभेत् इति पाठः । स्वकृतात् वरदानात् । इवेत्यनेन दोर्मनस्याभाव एव सूचितः ॥२३॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अङ्ग हे वृक अलमलं शिरश्छेदेन अहं तु प्रपद्यतामुपासकानां तोयेनापि प्रीयेय प्रीतः स्याम् त्वया तु आत्मा देहः वृथा अर्द्यते पीड्यते ॥२०-२३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अधिकं दातुमाह-तमाहेति । वचनेनापि निराकृतवानित्यर्थः । तदेववचनमाह-हे अङ्ग ! अलमलमिति मे मत्तो वृणीष्व यथाभिकामं यथेच्छं ते तुभ्यं वरं वितरामि दास्यामि । ननु किमिति दास्यतीति चेत्तत्राह-यतः प्रीये प्रीतो भवामि प्रीतावेव किं कारणमिति चेत्तत्राह-नृणां प्रपद्यतामिति । येन कारणेन प्रपन्ना भवन्ति प्राणिनस्ततः तेन कारणेन प्रीय इत्यर्थः । प्रपत्तिः प्रीतिहेतुर्निरूपिता ननु प्रतिपत्तिमात्रेण कथं वाञ्छितं दास्यतीत्याशङ्कायामाह-अहो इति । न ह्येतादृशी प्रतिपत्तिः क्वचिद्दृष्टा वर्तते अत आश्चर्यरूपत्वात् प्रीत इत्यर्थः । एवं प्रसादानन्तरमपि क्लेशं कुर्वन् वृथैवात्मा त्वया परितप्यते आत्मा देहो वृथैव खेदं प्राप्यते आत्मपदेन आत्महानमपुरुषार्थ इति च ज्ञापितम् । त्वयैव केवलमेवं क्रियते न त्वन्येनेति ॥२०॥ एवं स्वाभिलषितं सिद्धमिति वरं याचितवानित्याह-देवं स वव्र इति । नन्वत्र न स्वस्य सुखं नापि दुःखाभावः किमित्येवं प्रार्थयति इति चेत्तत्राह-पापीयानिति । पापमेव निरन्तरं कर्तुं वाञ्छन्ति । वधादिरूपं पापं क्लेशेनैव सिध्यतीति अक्लेशार्थं मारणजनितदोषसम्पादनाय तादृशं वरं याचितवानित्यर्थः । वरश्च श्रवणमात्रेणैव भूतानां भयमावहति । वरस्य स्वरूपमाह-यस्य यस्य करं शीर्ष्णि इति । स्थापनमात्रेणैव प्रयत्नान्तरव्यतिरेकेणापि स म्रियतामिति ॥२१॥ ततो महादेवस्य शङ्का उत्पन्नेत्याह-तच्छ्रुत्वेति । यतो रुद्रः प्राणिनो दुःखं दृष्ट्वा रोदिति इति ततो दुर्मना इव जातः । ततः किं कर्तव्यमिति विचार्य वरे दत्ते किं भविष्यतीत्यग्रिमं विचारितवान् । ततो भगवान् परमेश्वरेणायं वञ्चयित्वा मारणीय इति अग्रिमं सूत्रं विचारितवान् । ततः ओमिति तथैवास्त्विति प्रहसन्नाह-अन्यानिष्टं विचारयन् त्वमेव मरिष्यसीति भारतेति विश्वासार्थं सम्बोधनम् । ननु दानमात्रेणैव स्वानिष्टं करिष्यतीति किमज्ञात्वा दत्तवानित्याह-अहेरमृतं येति । अहेरिव पापः पोषकस्याप्यनर्थकृदिति स्वानिष्टं ज्ञात्वाऽपि दत्तवानित्यर्थः ॥२२॥ ततो यज्जातं तदाह-स तद्वरपरीक्षार्थमिति किलेति । महतोऽनिष्टं न वक्तव्यमिति न करिष्यतीति शङ्कां वारयति-असुर इति । अतः स्वहस्तं धातुमारेभे उद्योगं कृतवानिति ततस्तस्योद्योगं ज्ञात्वा अधिदेवः देवानामधिपतिरपि शिवः अबिभेत् भीतवान् शिवत्वात् परमार्थतो भयं न भविष्यतीत्यर्थः ॥२३॥

श्रीसुबोधिनीसारः

तं वृकमाह । हे अङ्ग । अलम् अलं पर्याप्तं वृणीष्व ते तुभ्यम् अभिकामं वाञ्छितं वरं ददामि तोयेन जलेनापि प्रपद्यतां सतां नृणामुपरि प्रीयेयाहमहो त्वया येन हेतुनात्मा देहो भृशमत्यर्थं वृथाऽर्द्यते क्लिश्यते ॥ २०॥ पापीयान्सोऽसुरो देवं शिवं भयङ्करं वरं वव्रे तथाहि यस्य यस्य जनस्य शिरसि करं हस्तं धास्ये धरिष्यामि स म्रियतामिति ॥२१॥ हे भारत ! तच्छ्रुत्वा भगवान् रुद्रो दुर्मना इवातुष्ट इव ओमङ्गीकृतमिति प्रहसंस्तस्मै असुराय ददौ अहेः सर्पायामृतं दुग्धमिव ॥२२॥ एवमुक्तोऽसुरः स सो नूनं निश्चयेन गौरीहरणेच्छुः तद्वरस्य परीक्षार्थं शिरसि सोऽसुरः किलैव ॥२३॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तं वृकासुरमाह च। स्वप्रसन्नतां सूचयन् सम्बोधयति-अङ्गेति। शिरश्छेदनेनालमलं पूर्णम्, न तत्प्रयोजनमस्तीत्यर्थः। मे मत्तो यथाभिकामं यथाभिलषितं वरं वृणीष्व, अहं ते तुभ्यं वितरामि ददामि। अहं तु तोयेन जलमात्रेणापि प्रपद्यतां भक्तानां प्रीयेय प्रीतो भवामि, त्वया वृथैवात्मा देहो भृशमर्द्यते पीड्यते ॥२०॥ स चैवमुक्तो देवं प्रति भूतभयावहं प्राणिभयङ्करं वरं वव्रे। तदेव दर्शयति-यस्य यस्येति। एवं वरणे हेतुमाह-पापीयानिति, अतिशयेन पापेन भ्रष्टबुद्धित्वात्। अन्यथेश्वरं प्रसाद्य स्वकल्याणमेव वृणीत ॥२१॥ हे भारत ! तत्तस्य वचनं श्रुत्वा लोकभयङ्करत्वात् रुद्रो दुर्मना इव प्रहसन् ओम् तथास्त्विति तस्मै वरं ददे। तत्र हेतुमाह-भगवानिति। कथं प्राण्युपद्रवेण दुःखितो न स्यात् कथं वा प्रतिश्रुत्य प्रत्याख्यानं कुर्यादित्याशयः। तथापि तद्दानमयुक्तमेव कृतम् इति दृष्टान्तेनाह-अहेरमृतं यथेति। ईश्वरत्वादस्मदादिवद्दुर्मनस्कत्वं नास्ति इति सूचयन्नाह-इवेति ॥२२॥ इति शिवेनोक्तः स असुरः तस्य वरस्य परीक्षणार्थं सत्यमुक्तमनृतं वेति निश्चयार्थं शम्भोर्मूर्ध्न्येव स्वहस्तं धातुमारेभे। ननु परीक्षा कर्तव्या चेत्तर्ह्यन्यत्र कर्तव्या, तत्र तत्करणं तु न युक्तं तत्कथं कृतवांस्तत्राह-नूनमिति। निश्चयेन गौर्या हरणे लालसा औत्सुक्यं यस्य सः। एतदपि नैव युक्तम् इत्याशङ्क्याह-सोऽसुर इति। असुरत्वात्तस्यायुक्तत्वं न प्रतिभातीत्याशयः। स च शिवः स्वकृताद्वरदानात् अबिभ्यत्, अन्यथा स्ववचनमनृतं स्यादित्याशयः ॥२३॥

अन्वितार्थप्रकाशिका

तमिति। तं वृकासुरमाह स्म च। अङ्ग हे वृक ! शिरश्छेदनेनालमलं पूर्णं न तत्प्रयोजनमस्तीत्यर्थः। मे मत्तो यथाभिकामं यथाभिलषितं वरं वृणीष्वाहं ते तुभ्यं वितरामि ददामि। अहं तु तोयेन जलमात्रेणापि प्रपद्यतां भक्तानाम्। शतार्षः। प्रीयेय प्रीतो भवामि। त्वया वृथैवात्मा देहो भृशमर्द्यते पीड्यते ॥२०॥ देवमिति। पापीयान् स चैवमुक्तो देवं प्रति भूतभयावहं प्राणिभयङ्करं वरं वव्रे। यस्येत्यादि स्पष्टम्। वीप्सया देवादिसर्वसङ्ग्रहः सकृत्त्वनिरासश्च ॥२१॥ तदिति। हे भारत ! तत्तस्य वचनं श्रुत्वा लोकभयङ्करत्वात् रुद्रो दुर्मना इव। इव एवार्थे। अहेरमृतं सर्पाय क्षीरं यथा प्रहसन् ओम् तथास्त्विति तस्मै वरं ददे ॥२२॥ इतीति अर्धम्। इति शिवेनोक्तः नूनं गौर्या हरणे लालसः साभिलाषो बभूव। स इति। स असुरः तस्य वरस्य परीक्षार्थं सत्यमुक्तमनृतं वेति निश्चयार्थं शम्भोर्मूर्ध्न्येव स्वहस्तं धातुमारेभे। स च शिवः सर्वभूतमङ्गलाशंसी स्वकृताद्वरदानात् अबिभेत्। लोकानां कष्टं विचिन्त्य भीतोऽभूत्। अन्यथा अन्तर्हितोऽभविष्यदिति भावः। अबिभ्यत् इति पाठस्त्वार्षः ॥२३॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

न श्रद्दधीमहि न श्रद्दध्मः। पैशाच्यं पिशाचवर्तनम् ॥२१-२२॥ कथञ्चित् एकांशेनापि यदि असत्यं चेत्तदा असद्वाचम् एनं जहि यद्यतः पुनः अनृतं न वक्ता न वदिष्यति ॥२३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तमिति ॥ अङ्ग हे वृक अलकलंहोमेनेति शेषः। यथाभिकामं यथेच्छं मे मत्तः वरं वृणीष्व। ते तुभ्यं वितरामि प्रयच्छामि। अहो वृक यतः अहं येन येन केनापि प्रकारेणेत्यर्थः। प्रपद्यतां भजतां नृणां प्रीये प्रीतः स्याम्। ततः त्वया तु आत्मा देहः भृशं वृथा अर्द्यते पीडित इत्यर्थः ॥२०॥ देवादिति ॥ पापीयानतिपापरूपः, स वृकासुरः यस्य यस्य शीर्ष्णि मूर्ध्नि करं धास्ये सः म्रियताम्। इत्येवम्भूतं भूतभयावहं प्राणीमात्रभयोत्पादकं वरं देवात् रुद्रात् वव्रे देवमित्यपि पाठः ॥२१॥ तदिति ॥ हे भारत! तत श्रुत्वा दुर्मना इव जातः भगवान् रुद्रः ओमिति अङ्गीकृत्य प्रहसन्सन् अहेः सर्पस्य अमृतं यथा तथा तस्मै वृकासुराय ददे। वरमिति शेषः ॥२२॥ स इति ॥ सः असुरः तस्य शम्भोर्यो वरस्तस्य परीक्षार्थं किमयं वरः सत्यः उत मिथ्या वेति परीक्षार्थमित्यर्थः। शम्भोः मूर्ध्नि स्वहस्तं धातुम् आरेभे किल। सः शिवः स्वकृतात् अबिभ्यत् ॥२३॥

कृष्णप्रिया

भगवान भोलेनाथने वृकासुर से कहा प्यारे वृकासुर ! बस करो, बस करो, बहुत हो गया । मैं तुझे वर देना ता हूं । तुम मुंहमांगा वर मांग लो । अरे मैं तो शरणागत भक्तो के केवल जल पढाने से हि सन्तुष्ट हो जाता । भक्त तुम व्यर्थ अपने शरीर को क्यों पीडा दे रहे वो ? ।।२०।। हे परीक्षित् ! पाप वृकासुरने समस्त प्राणियोंको भीत करनेवाला यह वर मांगा की मैं जिसके मस्तक पर हाथ रखदुं वह मर जाय ।।२१।। हे भारत परीक्षित् ! की यह याचना सुनकर भगवान रूद्र पहले तो कुछ अनमनसे हो गये । बादमें हंसकर कहा । अच्छा ऐसा ही । ऐसा करके मानो सांको अमृत पिला दिया ।।२२।। भगवान सदाशिव के वरदान देने के बाद वृकासुर के में लालसा हो आई कि पहले स्वयं स्वयंभू शम्भू पर ही हाथ साफ करुं ईससे वरदान की परीक्षा भी हो जायगी यह सोचकर शिवजी के मस्तक पर हाथ रखने आया तो भगवान शंकर अपने दिये हुए वरदान से मानो डर हो ऐसा दिखावा करने लगे ।।२३।।

तेनोपसृष्टः संत्रस्तः [१]पराधावन् सवेपथुः । यावदन्तं [२]दिवो भूमेः [३]काष्ठानामुदगादुदक् ।।२४।।
अजानन्तः प्रतिविधिं तूष्णीमासन् सुरेश्वराः । ततो वैकुण्ठमगमद्भास्वरं तमसः परम् ।।२५।।
यत्र नारायणः साक्षान्न्यासिनां परमा गतिः । शान्तानां न्यस्तदण्डानां यतो नावर्तते गतः ।।२६।।
तं यथा व्यसनं दृष्ट्वा भगवान् वृजिनार्दनः । [४]दूरात् प्रत्युदियाद्भूत्वा बटुको योगमायया ।।२७।।
मेखलाजिनदण्डा[५]क्षैस्तेजसाग्निरिव ज्वलन् । [६]अभिवादयामास च तं कुशापाणिर्विनीतवत् ।।२८।।

कर्दमक्षमा

तेन, उपसृष्टः, सन्त्रस्तः, सवेपथुः, पराधावन्, दिवः, भूमेः, काष्ठानाम्, अन्तम्, यावत्, उदक्, उदगात् ।।२४।। राः, प्रतिविधिम्, अजानन्तः, तूष्णीम्, आसन्, ततः, तमसः, परम्, भास्वरम्, वैकुण्ठम्, अगमत् ।।२५।। यत्र, न्यासिनाम्, तानाम्, न्यस्तदण्डानाम्, परमा, गतिः, साक्षात्, नारायणः, यतः, गतः, न, आवर्तते ।।२६।। तम्, भगवान्, वृजिनार्दनः, व्यसनम्, दृष्ट्वा, योगमायया, बटुकःभूत्वा, दूरात्, प्रत्युदियात् ।।२७।। मेखलाजिनदण्डाक्षैः, तेजसा, ज्वलन्, अग्निः, च, कुशपाणिः, विनीतवत्, तम्, अभिवादयामास ।।२८।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

उपसृष्टोऽनुगतः सन् उदगादावत् उदगुत्तरतः ।।२४।। वैकुण्ठं श्वेतद्वीपम् ।।२५-२६।। तं वृकासुरं तथाव्यसनं तादृग्व्यसनं तम् वृजिनार्दनो दुःखहन्ता दूरतएव दृष्ट्वा मेखलादिभिरुपलक्षितः प्रत्युदियात्सम्मुखमागतः ।।२७-२८।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स शिवः । स्वकृताद्वरादबिभ्यत् अबिभेत् । तेन असुरेण । यावद्दिवः आद्यन्तं तावत् ।।★।। स्वकृतात् स्वयं दत्तवरात भेत् भयं प्राप्तः । अबिभ्यदिति पाठस्त्वार्षः । ततश्च पराङ्मुखोऽधावदिति ज्ञेयम् । शिव आत्मनोऽन्येषां च मङ्गलेप्सुरिति । द्युप्रभृतीनामन्तमवधिं यावत्पराधावन् पलायमानः सन् । पराधावदिति पाठे उदगिति श्वेतद्वीपजिगमिषया ।।२४।। प्रतिविधिं याम् । ततः सर्वदेवलोकगमनोत्तरम् । तमसस्तत्कार्याद्ब्रह्माण्डात्परम् । यद्वा-वैकुण्ठं श्वेतद्वीपम् । तमसः परं तेजोरूपम्, अत भास्वरम् ।।★।। प्रतिविधिं तत्प्रतीकारम् । सुरेश्वराः श्रीब्रह्मादयः । अगमच्छ्रीशिवः । भास्वरं सदा स्वयमेव प्रकाशमानं, कुतः

---

१. पराधावत्-श्रीधर. वंशी. वीर. विज. । २. दिशो-च. पु. टी. । ३. कोष्ठनाममुदरं भुवः-विज. । ४. दूरात्प्रत्युदितो भूप दारको यया-विज. । ५. दण्डाद्यै-विज. । ६. तमाशीर्वादयामास-वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तमसः प्रकृतेः परम् । महावैकुण्ठावतारस्य श्वेतद्वीपाख्यस्यास्य पृथिवीगतत्वेऽपि ततः परत्वम् । श्रीभगवानिव विकारावर्ति च। 'तथा हि दर्शयती'ति न्यायेन ॥२५॥ यत्र वैकुण्ठे । यतो यत्र ॥★॥ तत्रैव हेतुमाह-यत्रेति । साक्षाद्वर्तते न्यासिनां भगवदर्थे त्यक्ताशेषाणाम् । अतः शान्तानां रागद्वेषादिरहितानां भगवन्निष्ठचित्तानां वा अत एव न्यस्तदण्डानां हिंसारहितानाम् । परमा सर्वोत्तमा गतिः प्राप्यः । अत एव यतो यत्र गतो नावर्तते पुनः संसारे न पतति । 'अनावृत्तिः शब्दात्' इति न्यायात् ॥२६॥ बटुको ब्रह्मचारी ॥★॥ तमिति सार्धकम् । व्यसनं क्रोधजदोषाभिनिवेशो वा । भगवानिति । तत्तत्सर्ववृत्तान्तज्ञत्वस्य वक्ष्यमाणतत्तच्छक्तिमत्त्वस्य च वृजिनार्दन इति । श्रीशिवस्यापि दुःखमोचनस्याभिप्रायेण । दूरादिति । श्रीवैकुण्ठाद्बहिरित्यर्थः। प्रति तदभिमुखतः । उदियात् आविर्भूत इत्यर्थः । योगमायया स्वभक्तिविशेषेण । बटुको बालब्रह्मचारी भूत्वा ॥२७॥ अभिवादयामास कथयामास । तम् असुरम् । वातिना वस्तुतो विनीतत्वाभावो द्योतितो वञ्चनप्रवृत्तत्वात् ॥★॥ अक्षम् अक्षमाला । अत्र बटुकत्वमादरस्नेहयोरुदयार्थम् । तत्र च तेजसेति दृष्टिमात्रेणैव तद्बुद्ध्याद्यभिभव उक्तः । अभीत्यर्धकम् । तं वृकासुरमभिवादयामास आशिषं ब्रुवन् तमात्मानमभिवादयामास स्वं नमस्कारयामास । यद्वा अस्माकं ब्रह्मदर्शिनां सर्वभूतान्येवाभिवाद्यानि भवांस्तु शकुनेः पुत्रो ज्ञानी तपस्वी मम बटोरभिवाद्य एवेति द्योतयामास । वतिना वास्तवविनयाभावो दर्शितोऽत्र ॥२८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

द्युप्रभृतीनामन्तमवधिं यावत्पराधावन् पलायमानः सन् पराधावदिति पाठे वाक्यभेदः उदगिति श्वेतद्वीपजिगमिषया ॥२४॥ प्रतिविधिं तत्प्रतीकारं सुरेश्वराः श्रीब्रह्मादयः अगमच्छ्रीशिवः भास्वरं सदा स्वयमेव प्रकाशमानं कुतः तमसः प्रकृतेः परं महावैकुण्ठावतारस्य श्वेतद्वीपाख्यस्यास्य पृथिवीगतत्वेऽपि ततः परत्वं श्रीभगवद्वदेव विकारवर्ति च तथा हि दर्शयतीति न्यायेन ॥२५॥ तत्रैव हेतुमाह-यत्रेति । साक्षाद्वर्तते न्यासिनां भगवदर्थे त्यक्ताशेषाणाम् अतः शान्तानां रागद्वेषादिरहितानां भगवन्निष्ठचित्तानां वा अत एव न्यस्तदण्डानां हिंसारहितानां परमा सर्वोत्तमा गतिः प्राप्यः अत एव यतो यत्र गतो नावर्तते पुनः संसारे न पतति अनावृत्तिः शब्दादिति न्यायेन ॥२६॥ तमिति सार्धकम् । व्यसनं क्रोधजदोषाभिनिवेशो वा भगवानिति तत्तत्सर्ववृत्तान्तज्ञत्वस्य वक्ष्यमाणतत्तच्छक्तिमत्त्वस्य च वृजिनार्दन इति श्रीशिवस्यापि दुःखमोचनस्याभिप्रायेण दूरादिति श्रीवैकुण्ठाद्बहिरित्यर्थः । प्रति तदभिमुखत उदियात् आविर्भूत इत्यर्थः । योगमायया स्वभक्तिविशेषेण बटुको बालब्रह्मचारी भूत्वा अक्षम् अक्षमाला तत्र बटुकत्वमादरस्नेहयोरुदयार्थम् । तत्र च तेजसेति दृष्टिमात्रेणैव तद्बुद्ध्याद्यभिभवः उक्तः तस्मिन्नादरोत्पत्त्यतिशयश्च ॥२७॥ अभीत्यर्धकम् । तं च वृकासुरम् अभिवादयामास आशिषं ब्रुवन् तमात्मानमभिवादयामासेत्यर्थः । विनीतवदिति तत्त्वतो विनयाभावात् ॥२८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बटुकः श्रीकृष्ण एवाभिप्रेतः, तस्यैव पूतनावधादावप्लुतमहाशक्तेः, तथा सर्वथा सर्वेषां सर्वदुःखहरत्वाच्च । अतः श्रीशिवस्य सङ्कटान्मोचनमेतत् किन्नामाद्भुतमिति भावः ॥२७-३९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

वैकुण्ठं विष्णुलोकं न तु परमस्थानं मुक्तप्राप्यम् ॥२५॥ यतः नारायणात् यत इति पदस्य देशपरत्वेऽपि विष्णुगतानां श्वेतद्वीपवासिनां पुनर्जन्माभाव इत्यविरोधः ॥२६-२९॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

काष्ठानां दिशां च यावदन्तम् उदगात् उत्तरतः अगात् ऊर्ध्वमगच्छद्वा उदक् ऊर्ध्वमञ्चन् ॥२५॥ अजानन्त इति। सुरश्वराश्चतुर्मुखेन्द्रादयः प्रतिविधिं प्रतिक्रियामजानन्तः ततः वैकुण्ठमण्डलान्तर्वर्तिनं कञ्चिद्विष्णुलोकं न तु परमस्थानं मुक्तप्राप्यं भास्वरं प्रकाशबहुलं तमः परं प्रकृतिकार्यरहितं यत्र वैकुण्ठे गतिः प्राप्तः न्यस्तदण्डानां भूतद्रोहरहितानां सर्वभूतसुहृदाम् इत्यर्थः।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ते यतो नावर्तते श्रीविष्णुलोकगतानां श्वेतद्वीपवासिनां च पुनर्जन्माभावात् तं वैकुण्ठमगमदिति सम्बन्धः ॥२६॥ मिति। तं वृकासुरं तथा तादृशं व्यसनं दुःखं यस्य तं रुद्रं च दृष्ट्वा वृजिनार्दनो दुःखापहारी भगवान् योगमायया त्मीयाश्चर्यशक्त्या बटुको भूत्वा मेखलादिभिरुपलक्षितः तेजसा विग्रहकान्त्याऽग्निरिव ज्वलन् दूरादेव त्युदियादभिसुमुखमागजाम ॥२७॥ कुशपाणिः पवित्रपाणिरभिवादयामासाह चेति शेषः ॥२८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

उपसृष्टः उपद्रुतः दिवोऽन्तमवसानं यावदस्ति भूमेः काष्ठानां विवराणाम् अवसानं च यावत् भुवो धरमधःस्थलं तालं च यावत्तावत्पर्यन्तं पराधावत् ॥२४॥ तल्लोकवासिनः शून्यप्रायाः किमत्राह–अजानन्त इति। प्रतिविधिं प्रतिक्रियाम् -२६॥ दारको बालब्रह्मचारी ॥२७-२८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

दूरादिति। श्रीवैकुण्ठाद्बहिरित्यर्थः। प्रति तदभिमुखतः उदियात् आविर्भूत इत्यर्थः ॥२७॥ अभिवादयामासेति। भिवादनमुद्रावस्थानेनाभिवादनं कारयामासेत्यर्थः ॥२८-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१०-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तेनासुरेण उपसृष्टः अनुद्रुतः पराधावन् पलायमानः सन् दिवो भूमेः काष्ठानां च यावदन्तं अन्तपर्यन्तं उदगात् उत्कर्षेणागात् यावत् उदक् उत्तरतो दिशः सकाशात् ॥२४॥ सुरेश्वरा ब्रह्माद्याः तपसः प्रकृतेः पारम् ॥२५-२६॥ प्रत्युदियात् सम्मुखमागतः ७॥ अभिवादयामास आशिषं ब्रुवन् स्वयं नमस्कारयामास यद्वा अभिवादयामासेति अस्माकं ब्रह्मदर्शिनां सर्वभूतान्येवाभिवाद्यानि भवांस्तु शकुनेः पुत्रो ज्ञानी तपस्वी मम बटोरभिवाद्य एवेति द्योतयामास ॥२८॥

गूढार्थदीपिनी

तेन असुरेण उपसृष्टः अनुगतः स शिवः दिवो भूमेश्च यावदन्तं तावत्पर्यन्तं पराधावन् पलायमानः सन् काष्ठानां दिशाम् ततः सकाशात् उदगात् त्वरया जगाम श्वेतद्वीपेच्छयेत्यर्थः। सवेपथुः सकम्पः इति तु लीलासौन्दर्याय ॥२४॥ प्रतिविधिं प्रतीकारम्। तमसः प्रकृतेः परं वैकुण्ठं श्वेतद्वीपम्। अस्य पृथ्वीगतत्वेऽपि श्रीकृष्णविग्रहवदिति तोषिणी ॥२५॥ यत्र वैकुण्ठे। तः यत्र न्यस्तदण्डानां हिंसारहितानाम् ॥२६॥ तथा तादृशं व्यसनं यस्य तम्। शिवं दूरादेव दृष्ट्वा मायया बटुको बालब्रह्मचारी त्वा प्रत्युदियात् तत्सम्मुखमाजगाम। वृजिनार्दनः दुःखनाशकः मेखलादिभिः उपलक्षितः स तं वृकासुरम् अभि निर्भयं ष्यात्तथा वादयामास कथयामासेत्यन्वयः। अजिनं मृगचर्म। अक्षम् अक्षमाला। वतिना विनीतत्वाभावो द्योतितः वञ्चनप्रवृत्तत्वात् द्वा। आशिषं ब्रुवन् तमात्मानम् अभिवादयामास स्वं नमस्कारयामासेत्यर्थः ॥२७-२८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तेन वृकेण उपसृष्टः अनुगतः पराधावत् पलायमानः सन् उदक् उत्तरतः उदगात् पुनः दिवो भूमेः काष्ठानां च यावदन्तं तत्पर्यन्तमुदगात् ॥२४॥ वैकुण्ठं श्वेतद्वीपादिरूपं विष्णुलोकं तमसः परं प्राकृतपदार्थविलक्षणम् ॥२५॥ तं वृकं तथा तादृशं व्यसनं खं यस्य तं रुद्रं च दूरादेव दृष्ट्वा वृजिनं दुःखमर्दयति नाशयतीति तथा सः। प्रत्युदियात् वृकसम्मुखमाजगाम ॥२६-२७॥ खलादिभिः उपलक्षितः तं वृकम् अभिवादयामास अपूज्यस्य अभिवादनरूपया पूजया आयुरादिकं हृतवानित्यर्थः ॥२८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः पलायित इत्याह–तेनोपसृष्टमिति। तेन वृकेण उपसृष्टः निकटे समागतः तदा सन्त्रस्तो जातः ततोऽत्यन्तमधावत् ततः कम्पमानोऽपि जातः ततः दिवः यावदन्तं भूमेश्च यावत्काष्ठानामपि पूर्वमूर्ध्वं निर्गमः ततोऽर्वाक् ततो दिक्चतुष्टये गत्वा व्याधुद्य पश्चादुदग्दिशं प्रति गतः तस्य खेदार्थं यावत्परिभ्रमणम् ॥२४॥ ननु तत्रत्यैः कथं महादेवसाहाय्यं न कृतमिति चेत्तत्राह–अजानन्तः प्रतिविधिमिति । सुरेश्वरा अति तूष्णीमेव स्थिताः । ततो महादेवो वैकुण्ठमागमत् । इदं वैकुण्ठस्थानं बदर्यां नारायणपर्वतपश्चिमभागस्थं प्रसिद्धमेव। तत्र तस्यापि मूलवैकुण्ठधर्मसम्बन्धमाह– भास्वरं तमसः परमिति। वैकुण्ठावेशात् तत्रापि भास्वरत्वं प्रकृतेः परत्वं च तत्किं वैकुण्ठस्थानमित्याकाङ्क्षायामाह–यत्र नारायणः साक्षादिति । नारायणो बदरीनाथः साक्षात् संन्यासिनां परमा गतिः वैणवदण्डादिधारणेन परमहंसत्वात् साक्षान्न्यासिनाम् आधारभूतो भवति सजातीयत्वाच्च। किञ्च शान्तानां न्यस्तदण्डानाम् अन्तर्बहिः साधनयुक्तानां विशेषतः परमा गतिः तत्रापि पूर्ववदेव भविष्यतीत्याशङ्क्याह-यतो नावर्तते गत इति। यत्र गतस्ततो नावर्तते अनेन वृकोऽपि नावर्तिष्यत इति सूचितम्। ततो यज्जातं तदाह–तं तथाव्यसनं दृष्ट्वेति। अशक्ये हरिरेवास्तीति भगवतैव तत्कर्तव्यमिति भगवान् यतो वृजिनार्दनः सर्वदुःखनाशकः अतो महादेवस्यापि दुःखं दूरीकरिष्यामीति दूरादेव प्रत्युदियात् आभिमुख्येन गतः । ननु क्रूरस्याग्रे कथं गत इत्याशङ्क्याह–योगमायया बटुको भूत्वेति। अल्पो बटुर्बटुकः । अतिसूक्ष्मब्रह्मचारी भूत्वा पूर्वविद्यां स्मृत्वा माययैव दैत्या मारणीया इति योगमायाकृतत्वात् मोहमेव प्राप्स्यति न तूपद्रवयं करिष्यति इति प्रत्युद्गतः ॥२५–२७॥ भगवतो वेषं वर्णयन् वाक्यैर्मोहितवानित्याह–मेखलाजिनदण्डाक्षैरिति। मेखला मौञ्जी अजिनमुत्तरीयं दण्डः पलाशः अक्षमाला जपार्था एतैः कृत्वा अन्तःस्थितेन तेजसा च साक्षादग्निरिव सर्वप्राणिनामधृष्यः ज्वलन् देदीप्यमानः कुशपाणिर्भूत्वा तं हिरण्याक्षपौत्रम् अतिश्रोत्रियं विनीतवदभिवादयामास। अभिवादनेन तस्य आयुर्हृतवान्। कुशैस्तत्पुण्यं मेखलादिभिश्चतुर्विधपुरुषार्थान् तेजसा तत्तेजः अग्निस्तुल्यतया तद्गतबलादिकम्॥२८॥

श्रीसुबोधिनीसारः

स्वहस्तं धातुं न्यसितुम् आरेभे। स शिवः स्वकृताद्वरादबिभेत्। तेन वृकेणोपसंसृष्टोऽनुगतः संत्रस्तो भीतः सवेपथुः सकम्पः दिवो भूमेः काष्ठानां दिशाम् अन्तं यावत् उदक् उत्तरतः पराधावत् शिवः प्रतिविधिं तन्निवृत्त्युपायमजानन्तो ब्रह्माद्याः तूष्णीमभवन् ततो भास्वरं तेजोमयं दिव्यं तमसः परं वैकुण्ठं श्वेतद्वीपमगात् ॥२४–२५॥ यत्र वैकुण्ठे त्यक्तदण्डानां शान्तानां न्यासिनां परमा गतिः साक्षान्नारायणोऽस्ति आगतः प्राप्तो जनो यतः स्थानान्नावर्त्तते न पुनरन्यवज्जायते ॥२६॥ तथा व्यसनं दुःखं यस्य तं शिवं दृष्ट्वा वृजिनार्दनो दुःखहन्ता भगवान् योगमायया बटुको ब्रह्मचारी भूत्वा दूरत एव सम्मुखमागतः ॥२७॥ मेखलामृगचर्मदण्डरुद्राक्षैः सह तेजसाग्निरिव ज्वलन् प्रकाशमानः कुशपाणिर्दर्भहस्तः विनीत इव तं वृकासुरं प्रशशंस॥२८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अतस्तेनासुरेणोपसृष्टः अनुगतः सन्त्रस्तः अत एव सवेपथुः सकम्पश्च सन् दिवो भूमेश्च यावदन्तं तावत् पराधावत्। ततश्च काष्ठानां दिशामुदक् उत्तरतः उदगात् जगाम ॥२४॥ सुरेश्वरा ब्रह्मादयश्च प्रतिनिधिं तद्भयनिवृत्त्युपायमजानन्तस्तूष्णीमासन्, ततश्च शिवस्तमसः परम् अविद्यावरणरहितम् अत एव भास्वरं प्रकाशबहुलं वैकुण्ठं भगवतः स्थानं बदरिकाश्रममगमत् ॥२५॥ कोऽसौ वैकुण्ठ इत्यपेक्षायामाह–यत्र साक्षान्नारायण आस्ते । कोऽसौ नारायणः इत्यपेक्षायामाह–न्यस्तदण्डानां त्यक्तपरद्रोहाणां परमा गतिः परमफलभूतः । द्रोहत्यागे हेतुमाह–न्यासिनामिति, त्यक्तसर्वस्वानाम्। तत्र हेतुमाह-शान्तानां रागलोभादिरहितानामिति। तस्य परमफलत्वमेवाह–गतः यं प्राप्तो जनो यतः सकाशात् पुनः संसारे नावर्तते इति ॥२६॥ तथा तादृशं व्यसनं दुःखं यस्य तं रुद्रं दृष्ट्वा वृजिनार्दनो दुःखापहारी भगवान्नारायणः योगमायया स्वशक्त्या बटुको ब्रह्मचारी भूत्वा मेखलादिभिरुपलक्षितः तेजसाऽग्निरिव ज्वलन् देदीप्यमानः कुशपाणिर्दूरादेव प्रत्युदियात् प्रत्युदीय तदभिमुखमाजगाम। ततश्च विनीतवत् भिक्षुवत् सावधानो भवेत्युक्त्वा अभिवादयामास, स्वयं चाहेति शेषः ॥२७–२८॥

अन्वितार्थप्रकाशिका

तेनेति । अतस्तेनासुरेणोपसृष्टः अनुगतः सन्त्रस्तः अत एव सवेपथुः सकम्पश्च सन् दिवो भूमेश्च यावदन्तं तावत् धावत्। ततश्च काष्ठानां दिशामुदक् उत्तरतः श्वेतद्वीपगमनेच्छया उदगात् जगाम ॥२४॥ अजानन्त इति । सुरेश्वरा ब्रह्मादयश्च तिविधिं तद्भयनिवृत्त्युपायमजानन्तस्तूष्णीमासन् । ततश्च शिवस्तमसः परम् अविद्यारहितम् अत एव भास्वरं प्रकाशबहुलं कुण्ठं श्वेतद्वीपम् अगमत् । बदरिकाश्रममित्येके । श्वेतद्वीपस्य भूगतत्वेऽपि तमसः परत्वं श्रीकृष्णमूर्तिवदेवेति तोषिणी ॥२५॥ यत्रेति । यत्र श्वेतद्वीपे न्यस्तदण्डानां त्यक्तभूतद्रोहाणां शान्तानां न्यासिनां परमा गतिः परमफलभूतः साक्षान्नारायण स्ते। यं नारायणं गतो जनो यतः सकाशात् पुनः संसारे नावर्तत इति ॥२६॥ तमिति द्वयम् । तथा तादृशं व्यसनं दुःखं यस्य दृष्ट्वा वृजिनार्दनो दुःखापहारी भगवान्नारायणः योगमायया स्वशक्त्या बटुको ब्रह्मचारी भूत्वा मेखलादिभिरुपलक्षितः साऽग्निरिव ज्वलन् देदीप्यमानः कुशपाणिर्दूरादेव वैकुण्ठात् प्रत्युदियात् तदभिमुखमाविर्भूतः । ततश्च विनीतवत् भिक्षुकवत् वधानो भवेत्युक्त्वा अभिवादयामास स्वस्याभिवादनं कारयामास । यद्वा । अस्माकं ब्रह्मदर्शिनां सर्वभूतान्येवाभिवाद्यानि वांस्तु ज्ञानी तपस्वी चेति बटोर्ममाभिवाद्य एवेति द्योतयामास । स्वयं चाह स्मेति शेषः ॥२७-२८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

चित्रैः भ्रामकैः सुपेशलैः विनयादिना मनोहरैः भिन्नधीः भ्रमितबुद्धिः ॥२४-२५-२६॥ स्वेन पाप्मना हतः ॥२७॥ महत्सु कृतकिल्बिषो जन्तुः कः क्षेमी स्यात् न स्यात् तर्हि विश्वेशे त्वयि कृतागस्कः कृतापराधो जनः किं क्षेमी त् न स्यादेव ॥२८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तेनेति ॥ तेन असुरेण उपसृष्टः अनुगतः संत्रस्तः शम्भुः सवेपथुः कम्पितगात्रः सन् दिवः भूमेः काष्ठानां दिशां च न्तं पराधावत् । उदगुत्तरतः उदगात् पराधावत् । सोऽपि पृष्ठतः अन्वधावदित्यनुक्तमपि योज्यम् ॥२४॥ अजानन्त इति ॥ शिवो यत्र गतस्तत्र तत्रेति शेषः । सुरश्वराः देवाः प्रतिविधिं तत्प्रतिक्रियाम् अजानन्तः सन्तः तूष्णीं आसन् । ततः भास्वरं तमसः परं कुण्ठमण्डलान्तर्वर्तिनं कं चिद्विष्णुलोकं न तु मुक्तप्राप्यं परमस्थानम् अगमत् । एनं श्वेतद्वीपमिति केचिद्वदन्ति ॥२५॥ यत्रेति ॥ यत्र कुण्ठे शान्तानां न्यस्तदण्डानां भूतद्रोहरहितानां सर्वभूतसुहृदामित्यर्थः । न्यासिनां परमा गतिः परमगतिरूपः साक्षात् नारायणः । यतः गतः यं लोकं प्राप्तः न आवर्तते । श्रीविष्णुलोकगतानां श्वेतद्वीपवासिनां च पुनर्गमनाभावादिति भावः । तं वैकुण्ठमगमदिति न्वयः ॥२६॥ तमिति ॥ मेखलेति च ॥ तमुक्तविधं वृकासुरं तथा तादृग् व्यसनं यस्य तं रुद्रं च दृष्ट्वा वृजिनार्दनः दुःखापहारी वान् योगमायया स्वकीयाश्चर्यशक्त्या मेखलाजिनदण्डाद्यैः उपलक्षितः तेजसा अग्निः इव ज्वलन् बटुकः भूत्वा दूरात् प्रत्युदियात् मुखं जगाम । ततः कुशपाणिर्बटुः तं वृकं विनीतवत् अभिवादयामास । चादुवाच ॥२७-२८॥

कृष्णप्रिया

वह उनका पीछा करने लगा और वे उससे भयभीत होकर कांपे हुए भागने लगे । वे पृथ्वी, स्वर्ग और शाओं के अनन्त तक पलायन करने हुए उत्तर दिशाकी और आगे बढे ॥२४॥ बडे बडे देव इस संकटसे बचाने उपाय न देखकर चुप रह गये । फिर शिवजी अन्धकार से पर याने नित्य प्रकाशमान वैकुण्ठ लोकमें पधारे ॥ वैकुण्ठमें स्वयं भगवान नारायण बिराजन्ते है ! वे हि शान्त स्वभाव वाले दण्डी परमहंस सन्यासियों की त्र परम गति है । वैकुण्ठमें आने के बाद व्यक्ति पुनरपि जननं पुनरपी मरणं रुप आवागमन से मुक्त हो जाता ॥२६॥भक्तो के दुःख को हरनेवाले भगवान नारायण ने देखा कि भोलेनाथ को संकटमें देखकर वे अपनी

कृष्णप्रिया

योगमाया से ब्रह्मचारी के रूपमें बटुक बनकर दूर से ही धीरे-धीरे वृकासुर के रास्ते में सामने आये ॥२७॥ भगवान ने मूंजकी मेखला, काला मृगचर्म दण्ड और रुद्राक्ष की मालम से अलंकृत थे । तेजसे इतने देदीप्यमान थे मानो स्वयं अग्नि प्रकट हुइ हो । उनके हाथमें दर्भ मानो वृकासुर के लिए वज्र हो । उसको देखकर भगवानने विनयपूर्वक नमस्कार किया ॥२८॥

श्रीभगवानुवाच

शाकुनेय भवान् व्यक्तं श्रान्तः किं दूरमागतः । क्षणं विश्रम्यतां [1]पुंसामात्मायं सर्वकामधुक् ॥२९॥
यदि नः श्रवणायालं युष्मद्व्यवसितं विभो । भण्यतां पुरुषव्याघ्र [2]पुम्भिः स्वार्थान् समीहते ॥३०॥

श्रीशुक उवाच

एवं भगवता पृष्टो वचसामृतवर्षिणा । [3]गतश्रमोऽब्रवीत्तस्मै यथापूर्वमनुष्ठितम् ॥३१॥

कर्दमक्षमा

श्रीभगवान्, उवाच ।

शाकुनेय, भवान्, किम्, दूरम्, आगतः, श्रान्तः, व्यक्तम्, क्षणम्, विश्रम्यताम्, पुंसाम्, अयम्, आत्मा, सर्वकामधुक् ॥२९॥ विभो, युष्मव्द्यवसितम्, यदि, नः, श्रवणाय, अलम्, भण्यताम्, पुरुषव्याघ्र, पुम्भिः, धृतैः, स्वार्थान्, समीहते ॥३०॥

श्रीशुकः, उवाच ।

अमृतवर्षिणा, वचसा, भगवता, एवम्, पृष्टः, गतश्रमः, यथा, पूर्वम्, अनुष्ठितम्, तस्मै, अब्रवीत् ॥३१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

द्विजेरितं साधु साध्विति घोषं श्रुत्वा हार्दमभिप्रायम् ॥२६-३१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतः सर्वपुरुषार्थहेतुः, अतो हेतोर्मा पीडयेति शेषः । विश्वासोत्पादनार्थं पितृनाम्ना सम्बोधयति-शाकुनेयेति ॥★॥ हे शाकुनेय ! शकुनिनन्दनेति पितृतः परिचिततया विश्वासनार्थं तत्सन्तोषणार्थं च भवानित्यादरार्थम् । ननु न विश्रामसमयोऽयं तत्राह-पुंस इति । यस्य कस्यापि पुरुषस्यायं निजभाग्यप्राप्तः किं पुनर्महापुरुषस्य तवेत्यर्थः । यद्वा, पुंसस्तव अयं सर्वसद्गुणवान् देहः सर्वेषामन्येषामपि कामधुक् मनोरथपूरकः ॥२९॥ विरिव भाति । झटितिगमनेनेति विभुः तत्सम्बुद्धौ तथा । धृतैर्निजत्वेन स्वीकृतैः । अहमैवातादृश इति चेदर्थान्तरमाह-अथवेति । जनः सर्वः प्राणिजातः यतः सहायैः कार्याणि साधयति अतो हेतोः नोऽस्मभ्यं तव पितृपितामहादिसंगिभ्यस्त्वया कथ्यतामिति भावः ॥★॥ विश्रान्तं प्रत्याह-यदीति । अलं योग्यम् । युष्मदित्यादरात् । न इति तद्विश्वासनार्थमात्मनो गौरवाय । विभो ! हे सर्वं कर्तुं समर्थेति । तद्व्यवसितं सेत्स्यत्येवेति भावः । धृतैः वशीकृतैः । हे पुरुषव्याघ्रेति महापुरुषस्यान्यपुरुषद्वारा स्वार्थसाधनं किल योग्यमिति भावः । टीकायां धृतैः सहायैः । प्रायश इति पदत्रयमध्याहृतमेव । पाठान्तरे तु धृतैरित्यस्य टीका पतिता ज्ञेया । तेन मां प्रति स्वव्यवसितमुच्यताम् । यथा मयापि ब्रह्मतेजोबलेनापि तत्र साहाय्यं कर्तुं शक्यं स्यादिति भावः ॥३०॥ एवमुक्तरीत्या वचसामृतेति वाच्येव मृदुत्वं नान्तरीत्याह । तस्मै भगवते ॥★॥ अमृतमिव वर्षितुं शीलं यस्य । तात्पर्यतोऽन्यथोक्तत्वेऽपि स्वरूपगुणो न हीयत इति भावः ॥३१॥

---

[1] पुंस आत्मार्य-श्रीधर. वंशी. । [2] प्रायशः पुम्भिर्धृ तैः-श्रीधर. वंशी. वीर. विश्व. शुक. ; पुरुषः साधो पुंभिः स्वार्थं समीहते-विज. ; प्रायशः पुम्भिर्भवान्-इति कस्यचित । [3] गतक्लमो-श्रीधर. वंशी. वीर. विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

शाकुनेय ! हे शकुनिनन्दनेति पितृतः परिचिततया विश्वासनार्थं सन्तोषणार्थं च भवानिति त्वादरज्ञापनार्थम् । ननु न श्रामसमयोऽयं तत्राह-पुंस इति । यस्य कस्यापि पुरुषस्य अयं निजभाग्यप्राप्तः किं पुनर्महापुरुषस्य तवेत्यर्थः । अन्यत्तैः । यद्वा, स्तव अयं सर्वसद्गुणवान् देहः सर्वेषामन्येषामपि कामधुक् मनोरथपूरकः ॥२९॥ विश्रान्तं प्रत्याह-यदीति । अलं योग्यं ष्मदित्यादरात् । नः इति तद्विश्वासनार्थमात्मनो गौरवाय विभो ! हे सर्वं कर्तुं समर्थेति तद्व्यवसितं सेत्स्यत्येवेति अन्यत्तैः । तत्र धृतैः कृतैरित्यर्थः । अत एव पुरुषव्याघ्रेति । महापुरुषस्यान्यपुरुषद्वारा स्वार्थसाधनं किल योग्यमिति भावः । टीकायां प्रायशो धृतैः यैरिति पदत्रयमध्याहृतमेव पाठान्तरे तु धृतैरित्यस्य टीका पतिता ज्ञेया ॥३०॥ अमृतमिवं वर्षितुं शीलं यस्येति । र्षतोऽन्यथोक्तत्वेऽपि स्वरूपगुणो न हीयत इति भावः । तेन गतक्लमः श्रमापगमेन प्रीतः सन् ॥३१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

बटुकः श्रीकृष्ण एवाभिप्रेतः, तस्यैव पूतनावधादावप्लुतमहाशक्तेः, तथा सर्वथा सर्वेषां सर्वदुःखहरत्वाच्च । अतः शिवस्य सङ्कटान्मोचनमेतत् किन्नामाद्भुतमिति भावः ॥२७-३९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

स्वार्थः स्वप्रयोजनं पुम्भिः पुरुषैः साधयितुमीयते भवान् इत्यर्थः ॥३०-४०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह द्वाभ्याम् । शकुनेः सुतं व्यक्तं नूनमयमात्मा देहः पुंसः सर्वान् कामान् दोग्धीति तथाभूतः किं किमर्थं दूरमागतः श्रान्तस्त्वमतो मायासयेति भावः ॥२९॥ यदीति । युष्मद्व्यवसितं यदि नोऽस्माकं श्रवणायालं श्रोतुं योग्यं तर्हि हे प्रभो ! ण्यताम् उच्यतां पुमान् स्वार्थं चिकीर्षितं स्वप्रयोजनं पुम्भिराप्तैः सह समीहते आलोच्य करोत्यतो भण्यताम् इत्यर्थः ॥३०॥ मिति । तस्मै भगवते अब्रवीत् कथयामास ॥३१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

आत्मा शरीरम् ॥२९॥ पुम्भिरर्थितम् ॥३०-३१॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२८-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१०-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

आत्मा देहः सर्वकामप्रपूरकः अतस्तदभिद्रवश्रमेण मा पीडय ॥२९॥ धृतैः पुम्भिः स्वसहायीकृतैः)पुरुषैः स्वार्थान् समीहते साधयति तेन मां प्रति स्वस्वव्यवसितमुच्यतां यथा मयापि ब्रह्मतेजोबलेनापि तत्र ाय्यं कर्तुं शक्यं स्यादिति भावः ॥३०-३३॥

गूढार्थदीपिनी

हे शाकुनेय ! शकुनिनन्दन ! । व्यक्तं निश्चितम् । किं किमर्थम् । पुंसः अयम् आत्मा देहः सर्वान् कामान् दोग्धि पूरयतीति अतो मा पीडयेति वाक्यशेषः ॥२९॥ युष्माकं व्यवसितमभीष्टं निश्चितं वा यदि नोऽस्माकं श्रवणाय अलं योग्यं स्यात् तर्हि ताम् । यतो जनः धृतैः सहायकैः पुम्भिः स्वार्थात् स्वकार्याणि समीहते सम्पादयितुं शक्नोति ॥३०॥ अमृतमिव वर्षितुं शीलं तेन । गवक्लमो गतश्रमः ॥३१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे शाकुनेय ! किं किमर्थं दूरमागतः व्यक्तं निश्चितं भवान् श्रान्तः अतः क्षणं विश्रम्यताम् यतः पुंसः आत्मा देहः सर्वकामधुक् पीडितुं योग्यो नेत्यर्थः ॥२९॥ प्रायशः मन्त्रित्वेन धृतैः पुम्भिः स्वार्थान् स्वकार्याणि समीहते साधयति जन इति शेषः यदि नः श्रवणायालं युष्मद्व्यवसितं तर्हि भण्यताम् ॥३०-३३॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं सर्वं हत्वा वाक्येन बुद्धिं मोहयति-शाकुनेयेति द्वाभ्याम् । हे शकुनेः पुत्र ! भवान् व्यक्तं श्रान्तः प्रस्वेददर्शनात् अनेन दुःखानुवादेन कुशलमिवाऽपृच्छत् । किं कर्तव्यमिति चेत्तत्राह-किं दूरमागत इति किं धावता दूरे समागतं प्रयोजनाभावाद्व्यर्थमागमनमित्यर्थः । प्रश्नो वा अस्तु यदर्थं तदर्थम् अस्मदाश्रमे क्षणं विश्रम्यताम् । ननु शीघ्रं स्वकार्यं कर्तव्यमिति चेत्तत्राह-पुंसां स्वतन्त्राणां प्राणिनामयमात्मा देहः सर्वकामधुक् श्रमेण देहः पतिष्यतीति प्रतिभाति गते च देहे किं कार्यं सेत्स्यतीति अतः कार्यं परित्यज्य शरीररक्षार्थं विश्रामः कर्तव्य इति भावः ॥२९॥ किञ्च कार्यमेतादृशं येनैतादृशश्रमो जात इति पृच्छति-यदि नः श्रवणायालमिति । गुप्तं चेन्न वक्तव्यम् । अस्मच्छ्रवणाय योग्यं चेत्तदा युष्मद्व्यवसितम् । एवं प्रयत्नं कर्तुमभीष्टं भण्यतां पुरुषव्याघ्रेति स्तुत्या सम्बोधनं कथनार्थं ननूक्तं भविष्यतीति चेत्तत्राह-पुम्भिः स्वार्थान् समीहत इति । सर्वोऽपि पुरुषः स्वमित्रैः पुरुषैः स्वकार्यं साधयतीत्यर्थः ॥३०-३१॥

श्रीसुबोधिनीसारः

सांत्वपूर्वसुवाचेत्यन्ये हे शाकुनेय ! भवान् व्यक्तं ध्रुवं श्रान्तः अजानन्निव पृच्छति दूरं दूरादागतः किम् । क्षणं त्वया विश्रांतिः कार्या तत्र हेतुः । अयमात्मा देहः पुंसः सर्वकामसाधकोऽस्ति ॥२९॥ हे विभो ! युष्माकं व्यवसितं सङ्कल्पितं कार्यं यदि नोऽस्माकं श्रवणायाऽलं योग्यं तर्हि भण्यतां कथ्यताम् । प्रायशः पुम्भिर्भक्तैर्धृतो जनो वा हरिः स्वार्थान् संपादयति ॥३०॥ शुकोक्तिः । एवं भगवता कर्त्राऽमृतवर्षिणा वचसाऽतिमधुरवाक्येन पृष्टो गतः क्लमः खेदो यस्य स वृको यथापूर्वमात्मनाऽनुष्ठितं तथा तस्मै बटुरूपिणेऽब्रवीत् ॥३१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तत्पितृनामग्रहणपूर्वकसम्बोधनेन स्वस्य सर्वज्ञत्वं सूचयति-शाकुनेयेति । व्यक्तं निश्चितं भवान् श्रान्तोऽस्ति, किं किमर्थं दूरमागतः ? अतः क्षणं विश्रम्यताम् । यतोऽयमात्मा देहः पुंसः सर्वकामधुक् सर्वपुरुषार्थहेतुः, अतो मा पीडयेति ॥२९॥ युष्मद्व्यवसितं युष्माभिर्निश्चितं कार्यं यदि नोऽस्माकं श्रवणायालं योग्यं तर्हि हे प्रभो ! भण्यताम् । यतो धृतैः सहायतया गृहीतैः पुम्भिः सहैव जनः प्रायशः स्वार्थान् समीहते साधयति । एकाकिना कार्यं न सिद्ध्यति अतो यथाशक्ति तत्रोपकारमहमपि करिष्यामीति भावः ॥३०॥ गतक्लमो गतश्रमः । तत्र हेतुः--अमृतवर्षिणेति । अन्यत्स्पष्टम् ॥३१॥

अन्वितार्थप्रकाशिका

शाकुनेयेति । हे शाकुनेय ! व्यक्तं निश्चितं भवान् श्रान्तोऽस्ति । किं किमर्थं दूरमागतः । अतः क्षणं विश्रम्यताम् । यतोऽयमात्मा देहः पुंसः सर्वकामधुक् सर्वपुरुषार्थहेतुः अतो मा पीडयेति । यदीति । युष्मद्व्यवसितं युष्माभिर्निश्चितं कार्यं यदि नोऽस्माकं श्रवणायालं योग्यं तर्हि हे प्रभो ! भण्यताम् । यतो धृतैः सहायतया गृहीतैः पुम्भिः सहैव जनः प्रायशः स्वार्थान् समीहते साधयति । एकाकिना कार्यं न सिद्ध्यति । अतो यथाशक्ति तत्रोपकारमहमपि करिष्यामीति भावः । एवमिति । स्पष्टम् ॥२९-३१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यच्चरित्रश्रवणेन दुःखहानिः स्यात्तर्हि साक्षात्समागमेन सङ्कटनिवर्तने किमु विक्तव्यमित्याशयेनाह-य इति । अव्याकृतशक्त्युदन्वतः अव्याकृतानां स्पष्टतया सर्वजनतर्कागोचराणां शक्तीनामनवधिकाशयासङ्ख्यैश्वर्याणामुदन्वतः सागरस्य अतः

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स्य बद्धमुक्तक्षेत्रज्ञकलापात् स्वरूपस्वभावगुणविभूतिभिरत्यन्तोत्कृष्टस्य परमात्मनः परा सर्वोत्कृष्टा मा लक्ष्मीर्यस्य स सौ आत्मा चेतनाचेतनव्यापकान्तर्यामित्वेन नियामकश्च तस्य हरेः गिरित्रमोक्षं गिरित्रस्य शिवस्य मोक्षः कासुरजनितदुःखान्मोचनं यस्मिन्नेवम्भूतं चरित्रम् ॥२९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदेवाह द्वाभ्याम् ॥ शाकुनेयेति ॥ हे शाकुनेय शकुनेः पुत्र ! व्यक्तं नूनम् अयम् आत्मा देहः पुंसः सर्वान् कामान् यतीति तथाभूतः अस्ति । अतः भवान् क्षणं विश्रम्यताम् । दूरमेतावद्दूरप्रदेशं किमर्थम् आगतः । अहो श्रान्तः त्वं भासीति मः ॥२९॥ यदीति ॥ युष्मद्व्यवसितं युष्माकमिष्टं यदि नोऽस्माकं श्रवणाय अलं श्रोतुं योग्यमित्यर्थः । तर्हि हे प्रभो ! समर्थ ! ण्यतामस्मान् प्रति कथ्यतां पुमान् स्वार्थं चिकीर्षितं स्वप्रयोजनमिति यावत् । आप्तैः पुम्भिः सह प्रायशः समीहते । आलोच्य लोच्यतो भण्यतामित्यर्थः ॥३०॥ एवमिति ॥ एवं भगवता अमृतवर्षिणा वचसा पृष्टः अत एव गतक्लमः सन् यथा पूर्वम् नुष्ठितं स्वयमनुष्ठितं सकलं तस्मै भगवते अब्रवीत् कथयामास ॥३१॥

कृष्णप्रिया

हे शकुनिनन्दन वृकासुरजी !आप बहुत थके से जान पडते है । आप बहुत दूरसे आ रहे है क्या ? क्षणभर विश्राम कर लीजिये ।सुनो यह शरीर ही सारे सुखों की जड है । इससे हमारी सभी मनःकामनाएं पूरी होती है ॥२९॥ हे समर्थवृकासुर यदि मेरे सुनने योग्य कोइ बात हो, आपको कुछ हरकत न हो, और गुप्त न हो तो मुझे सुनाइये की आप क्या करने निकले है । पुरुषो में व्याघ्र के समान हे वीरपुरुष वृकासुरजी । संसारमें देखा जाता है कि सहायको के द्वारा लोगो के बहुत से काम बन जाया करते है ॥३०॥ श्रीशुकदेवजी कहते है - हे राजन् ! भगवान के शब्दो से अमृत बरस रहा था । उस प्रकार पूछने पर पहले तो उसने तनिक ठहरकर अपनी थकावट दूर की । तत्पश्चाद् उसने क्रमशः तपस्या वरप्राप्ति तथा शिवजी के पीछे दौडने कि बात शुरूसे कह सुनायी ॥३१॥

श्रीभगवानुवाच

एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि । यो दक्षशापात् पैशाच्यं प्राप्तः प्रेतपिशाचराट् ॥३२॥[1]
यदि वस्तत्र विश्रम्भो दानवेन्द्र जगद्गुरो । तर्ह्यङ्गाशु[2] स्वशिरसि [3]हस्तं न्यस्य प्रतीयताम् [4]॥३३॥
यद्यसत्यं वचः शम्भोः कथञ्चिद्दानवर्षभ । [5]तदन्ते जह्यसद्वाचं न [6]यद्वक्तानृतं पुनः ॥३४॥
इत्थं भगवतश्चित्रैर्वचोभिः[7] स सुपेशलैः । भिन्नधीर्विस्मृतः शीर्ष्णि स्वहस्तं कुमतिर्व्यधात् ॥३५॥

कर्दमक्षमा

श्रीभगवान्, उवाच । एवं, चेत्, तद्वाक्यम्, वयम्, न, श्रद्दधीमहि, यः, प्रेतपिशाचराट्, दक्षशापात्, पैशाच्यम्, प्राप्तः ॥३२॥ दानवेन्द्र, यदि, वः, तत्र, जगद्गुरौ, विश्रम्भः, तर्हि, स्वशीरसि, आशु, हस्तम्, न्यस्य, प्रतीयताम् ॥३३॥ दानवर्षभ, शम्भोः, वचः, यदि, कथञ्चित्, असत्यम्, तदा, एनम्, जहि, पुनः, यत्, असद्वाचम्, अनृतम्, न, वक्ता ॥३४॥ इत्थम्, सः, कुमतिः, सुपेशलैः, भगवतः, चित्रैः, वचोभिः, विस्मृतः, भिन्नधीः, स्वहस्तम्, शीर्ष्णि, व्यधात् ॥३५॥

---

१. "**स्मा क्रान्तशरीरोऽसौ न सत्यं वदते हरः । क्रोधयुक्ते कुतः सत्यं मूढोऽसि त्वं महासुर ।**" - एकः श्लोकोऽधिकः विज. ।
२. अङ्गापि-इति कस्यचित् । ३. हस्तन्यासः प्रदीयतां-विज. । ४. प्रतीक्ष्यताम् - च. पु. टी. । ५. तदैनं-श्रीधर. वंशी. वीर. विज. ; न्ते-जीव. । ६. न यद्वक्ता-वीर. ; न च वक्ता-विज. । ७. वचोभिः स्मयपेशलैः -वीर. ; वचोभिश्च सुपेशलैः-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

पैशाच्यं पिशाचानामिव वृत्तिम् ॥३२-३३॥ यद्यथा वक्ता वदिष्यति ॥३४॥ चित्रैर्भ्रामकैः सुपेशलैरतिरम्यैः भिन्नधीर्भ्रंशितमतिः ॥३५-३८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवं चेत् शिवेन त्वां प्रति वरं दत्तं यदि । तद्वाक्यं शिवोक्तिम् । यः शिवः पैशाच्यवृत्तित्वाद्वक्तव्यावक्तव्यं नानुसन्धत्ते । तत्र हेतुः दक्षशापादिति । तत्साहित्याद्वेत्याह–प्रेतेत्यादि ॥★॥ एवं चेत् महादेवेन यदि तुभ्यं वरं दत्तं चेत् । पैशाच्यम् अनवमृश्य वक्तृत्वम् ॥३२॥ तत्र शिवे जगत्सर्वं गृणातीति जगद्गुरुः । अपरिमितवक्तरि दैत्यमोहके । दानवेन्द्रेति तद्बुद्धिमत्ताम्, अङ्गेति निजतां च द्योतयितुं सम्बुद्धिद्वयं तद्व्यामोहार्थमेव ॥★॥ जगद्गुराविति तत्तया भवद्भिः प्रतीते इत्यर्थः । प्रतीयतां तद्वाक्यस्यामिथ्यात्वं मिथ्यात्वं त्वयैव ज्ञायताम् । दानवेन्द्रेति । दानवा अपि देवानां नैसर्गिकशत्रुत्वेन तद्वाक्येषु श्रद्धां न कुर्वन्ति त्वं तु दानवेन्द्रः सन् कथं तत्र श्रद्धां कुरुष इति भावः ॥३३॥ यदीति । सर्वथा शिवस्य सत्यवक्तृतां सूचयति । कथञ्चिच्च एनं शिवम् । दानवर्षभ ! तद्धननसामर्थ्यं द्योतयति ॥★॥ शम्भोरिति । तदेतत्पर्यन्तं सुखेन युक्तस्याप्यधुना सुखं न भविष्यतीति बोधनाय कथञ्चिदपीति तदेकांशस्यापि विघातेनेत्यर्थः । यद्वा, कथञ्चिदप्येनं जहि इति योज्यम् । तदन्ते तत्पश्चात् स्वरूपार्थो वान्तशब्दः तदानीमेवेत्यर्थः । क्वचित् तदेनमिति पाठः । न यदिति । वधात् पश्चात् वचनाभावात् । यद्वा योगबलेन क्वचिदुत्पद्यापि न वदिष्यति । हे दानवर्षभेति सर्वं कर्तुं समर्थोऽसीति भावः ॥३४॥ भ्रामकैर्भ्रमोत्पादकैः । सोऽसुरः । विगता स्मृतिर्योग्यायोग्यविचारो यस्य स विस्मृतः । कुमतिर्वरदात्रवहेलकत्वात् । न्यधात् स्थापितवान् ॥★॥ चित्रैश्चातुरीयोगतो मोहनमन्त्ररूपतश्च विस्माप्य भ्रामकैरित्यर्थः । विनयादिना सुपेशलैश्च तैर्भिन्ना अन्यथात्वं नीता धीर्यस्य सः । विस्मितो भिन्नधीत्वादेवानुसन्धानरहितः सन् । सर्वत्र हेतुः दुर्मतिरिति । दुर्मतीनां न किमपि हिताहितज्ञानं भवतीत्यर्थः ॥३५-३६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रेतपिशाचराडिति पैशाच्यस्यैव गौरवं व्यक्तं वा द्योतयति ॥३२॥ जगद्गुराविति तत्त(या)था भवद्भिः प्रतीत इत्यर्थः । अपि एव स्वशिरस्येव आश्विति पाठः क्वचित् प्रतीयतां तद्वाक्यस्य अमिथ्यात्वं मद्वाक्यस्य मिथ्यात्वं वा ज्ञायताम् ॥३३॥ शम्भोरिति । तदेतत्पर्यन्तं सुखेन वर्तमानस्येति व्यञ्जना । तस्याधुना तु सुखं न भविष्यतीति बोधनाय कथञ्चिदपीति तदेकांशस्यापि विघातेनेत्यर्थः । यद्वा, कथञ्चिदप्येनं जहीत्यन्वयः । तदन्ते तत्पश्चाद्यद्वा स्वरूपार्थोऽन्तशब्दः तदानीमेवेत्यर्थः । तदेनमिति पाठः क्वचित् । न यदिति वधात् पश्चात् वचनाभावात् हे दानवर्षभेति तत्र त्वं शक्नोष्येवेति भावः ॥३४॥ चित्रैश्चातुरीयोगतो मोहनमन्त्ररूपतश्च विस्माप्य भ्रामकैरित्यर्थः । विनयादिना सुपेशलैश्च तैर्भिन्ना अन्यथात्वं गता धीर्यस्य सः विस्मृतः भिन्नधीत्वादेवानुसन्धानरहितः सन्नित्यर्थः । सर्वत्र मूलकारणं तु कुमतिरिति ॥३५॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी ॥२७-३९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥३०-४०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमुक्तः प्राह भगवान्–एवं चेदति । अङ्ग हे वृक ! तद्वाक्यं रुद्रवचः वरदानात्मकं न श्रद्दधीमहि न विश्वसिमः । तत्र हेतुत्वेन रुद्रं विशिनष्टि–यः रुद्रः दक्षशापात् पिशाचतां प्राप्तः प्रेतानां पिशाचानां च राडधिपतिर्बभूव न हि पिशाचवचो विश्वसनीयमिति भावः ॥३२॥ यदिति । हे दानवेन्द्र ! जगद्गुरौ अगद्गुरुतया त्वदभिमानविषये तत्र रुद्रे यदि वो युष्माकं विस्रम्भो विश्वासस्तर्हि अङ्ग हे वृक ! स्वस्य शिरसि न्यस्य निधाय प्रतीयतां प्रतीक्ष्यताम् ॥३३॥ हे दानवर्षभ ! यदि शम्भोः वचः कथञ्चिदसत्यं स्यात्तर्हि तदने

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदनन्तरमसद्वचनामनृतवाचं रुद्रं जहि नाशय अन्यथा रुद्रः पुनस्तथाऽनृतं वक्ता वक्ष्यति त्वामिवान्यानपि अनृतं वदन् वञ्चयिष्यत्यतस्तं जहीत्यर्थः ॥३४॥ इत्थमिति । चित्रैर्भ्रामकैः स्मयेन पेशलैरतिरम्यैर्वचोभिर्भिन्नधीर्भ्रंशितमतिः कुमतिरसुरः विस्मृतः स्वशिरसि स्वहस्तं न्यधान्निहितवान् ॥३५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

तस्य रुद्रस्य वाक्यं पैशाच्यं कर्म श्मशानाटनलक्षणम् ॥३२-३८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२८-४०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१०-४०॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१२-४०॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यत् यथा न वक्ता क्वापि योगबलेनोत्पाद्यापि न वदिष्यति ॥३४॥ विस्मृतः विस्मृतियुक्तः ॥३५-३६-३७-३८॥

गूढार्थदीपिनी

पैशाच्यं पिशाचभावं प्राप्तः । न तद्वचः विश्वासार्हम् ॥३२॥ तत्र शिवे विस्रम्भः विश्वासः । अङ्ग हे दानवेन्द्र ! प्रतीयतां परीक्ष्यताम् ॥३३॥ असद्वाचं मिथ्यावादिनम् । यत् यतः पुनः अमृतं न वक्ता न वक्ष्यति ॥३४॥ चित्रैः भ्रमोत्पादकैः सुपेशलैः मनोहरैः विस्मृतः विस्मृतवरदानः यतो भिन्नधीः भ्रंशतिमतिः । न्यधात् स्थापितवान् ॥३५॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

यत् यथाऽनृतं पुनर्न वक्ता वदिष्यति ॥३४॥ चित्रैरद्भुतैः सुपेशलैः रम्यावयवैः भिन्नधीः भ्रंशितबुद्धिः ॥३५-३९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवमाकृत्वा विनयवचनैश्च तेषां प्रापितः भगवद्वाक्यसामर्थ्यादेव गतश्रमो भूत्वा स्वाभिप्रायं स्वकृतं च भगवानिति बुद्ध्वा तस्मै अब्रवीत् यथा पूर्वं नरदप्रश्नप्रभृति अनुष्ठितं तपस्यादि ज्ञातार्थ एव भगवाननन्तविश्वस्तं कृत्वा पश्चान्मदुक्तं ग्रहीष्यतीति निश्चित्य महादेवमोक्षार्थमुपायमाह-एवञ्चेदिति । अस्माभिर्ज्ञातं किञ्चित्कार्यान्तरं महदस्तीति एवं चेन्महादेववाक्यपरीक्षामात्रं कर्तव्यं चेत् तदा मयाऽपि उपाय उच्यते यदि मद्वाक्ये विश्वासस्तदा तद्वाक्यं न किञ्चिद्भविष्यतीत्यर्थः । अनेन दत्तोऽपि वरः भगवता निषिद्ध इति भवति । तथा सति न तस्य मरणं न वा लोके अनिष्टं न वा महादेवस्य पीडा यदि वृकोऽङ्गीकुर्यात् एवं निश्चित्याह-न वयं श्रद्धीमहीति । ननु महानयं महादेवः कथमश्रद्धेय इति चेत्तत्राह-यो दक्षशापात्पैशाच्यमिति । पूर्वं दक्षः शापं ददौ देवैः सह भागं न लभतां देवगणेषु अधमश्च भवतु तत्र पिशाचा एव अधमाः अतः पैशाच्यं प्राप्तः दृश्यते च पैशाच्यम् । श्मशानादिषु परिभ्रमणात् । किञ्च प्रेतपिशाचराट् स्वभावतोऽपि प्रेतानां पिशाचानां राजा पिशाचराजः पिशाच एव भवति अतस्त्वमपि चेत् मद्बुद्ध्या गृहीतमङ्गीकरिष्यसि तदा तस्य दत्तो वरः मिथ्याभूत इति अनङ्गीकृत्य निश्चितो भव ॥३२॥ अथ यदि तव विश्वासः तदा मदुक्तप्रकारेण परीक्षा कर्तव्येत्याह-यदि वस्तत्र विश्रम्भ इति । व इति गौरवार्थं बहुवचनम् । हे दानवेन्द्रेति सम्बोधनं च । एवं पुरस्कृतः स्वमाहात्म्यमेव स्मरति न तु परमाहात्म्यमिति । विश्वासे हेतुमाह-जगद्गुराविति । तर्हि विश्वासे किं कर्तव्यमिति चेत्तत्राह-तर्ह्यनङ्गेति । मद्विश्वासे तव जीवनं वा भविष्यति महादेवविश्वासे तु नाशमेव यास्यतीति भावः । अङ्गेति सम्बोधनं विश्वासाय आशु शीघ्रमेव विचारमकृत्वा स्वशिरसि हस्तं न्यस्य प्रतीयतां सत्यं वा मिथ्या वेति सत्यत्वे तस्य परीक्षा उत्तमैव भविष्यति ॥३३॥ असत्यत्वे तु दण्डं करिष्यामीत्याह-यद्यसत्यमिति । कथञ्चित् केनाप्यंशेन यस्य यस्येति वीप्सया अन्यश्चेदभिप्रेतः स्यात् मया वा

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

नाङ्गीकृतमिति तदा असत्यं भवति। दानवर्षभेति। पूर्ववदपराधव्यतिरेकेण मारयितुं न शक्य इति असत्यवादत्वेनापराधे जाते तदन्ते अपराधान्ते असद्वाचं जहि तथा सति तव वधदोषोऽपि नास्तीत्याह–न यद्वक्तानृतं पुनरिति। यद्यस्मात् पुनरयमनृतं न वक्ता यद्दोषात्पुरुषोऽधो याति अनेन तद्वधस्तस्य हि श्रेय इति तत्पक्ष उक्तः ॥३४॥ ततो यज्जातं तदाह–इत्थमिति। भगवतश्चित्रैर्वचोभिरिति दृष्टादृष्टप्रकारेण वचनेन मोहकत्वमुक्तम्। स्वरूपतोऽपि मोहकत्वमाह–सुपेशलैरिति। यथा कश्चित् रूपविशेषे मुह्यति एवं भगवद्वाक्यसौन्दर्येणापि मुग्धः स्वतो भिन्नधीर्भूत्वा भगवद्वाक्यमनृतमपि भविष्यतीत्यपि पक्षः तद्धृदये स्फुरितः अतः पक्षद्वये बुद्धिर्व्यापृतेति भिन्नत्वं न तु द्वितीयपक्षे स्वक्रियाव्याघातः यदि महादेववाक्यं शतांशेनाप्यनृतं स्यात् स्वयमेतादृशं क्लेशं कथं कुर्यात् ततश्च कथं तस्य बुद्धिभेदो जात इति चेत्तत्राह–विस्मृत इति। पूर्वभावं विस्मृतवान् विस्मित इति वा भगवद्वाक्यात् न वयं श्रद्धीमहीति। कथमुक्तवानिति। अतः स्वशीर्ष्ण्येव हस्तं व्यधात्। ननु पाक्षिकोऽपि दोषः परिहरणीय इति द्वैतीये स्वनाशलक्षणो महादोष इति कथमेवमङ्गीकृतवानिति चेत्तत्राह–कुमतिरिति ॥३५॥

श्रीसुबोधिनीसारः

विष्णूक्तिः। चेदेवमस्ति तर्हि तस्य शिवस्य वाक्यं वयं न श्रद्धां कुर्मः। नन्वीश्वरत्वात्तद्वाक्यं कथं नाद्रियसे तत्राह। यः शिवः प्रेतपिशाचराजः दक्षस्य शापात् पैशाच्यं पिशाचतां प्राप्तः ॥३२॥ यदि जगयद्गुरौ रुद्रै तत्र तस्मिन् वो युष्माकं यदि विश्रम्भो विश्वासः तर्हि आशु शीघ्रं स्वशिरसि हस्तं न्यस्य धृत्वा प्रतीयतां त्वया निश्चीयतां हे दानवेन्द्रि ! हे अङ्ग ! ॥३३॥ हे दानवर्षभ ! शम्भोः शिवस्य वचः केनापि प्रकारेणाऽसत्यं स्यात्तर्हि असद्वाचं मिथ्याभाषिणम् एनं शिवं त्वं जहि मारय। यत् यतो हि पुनरनृतं मिथ्या न वक्ता न वदिष्यति ॥३४॥ इत्थमेव भगवतः चित्रैर्वचोभिः सुपेशलैरतिरम्यैर्भिन्ना चेयं प्राप्ता बुद्धिर्यस्य स वृको विस्मृतोऽपस्मृतिः कुमतिः शीर्ष्णि शिरसि व्यधात् स्थापतिवान् ॥३५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तद्वाक्यं रुद्रवाक्यं वरदानात्मकं वयं न श्रद्धीमहि सत्यमिति न विश्वसिमः। तत्र हेतुः–य इति। तत्र ज्ञापकमाह–प्रेतपिशाचराडिति। न ह्येवम्भूतस्य वचनं विश्वसनीयमिति भावः ॥३२॥ विचारेणैव तव प्रवृत्तिरुचिता इति सूचयन् सम्बोधयति–दानवेन्द्रेति। अहं तु स्नेहाद्यथार्थमेव वदामि इति सूचयन् सम्बोधयति–अङ्गेति। वो युष्माकं यदि तत्र जगद्गुरौ विस्रम्भः जगत्पूज्यत्वात्तद्वचने विश्वासोऽस्ति तर्हि आशु स्वशिरसि हस्तं न्यस्य प्रतीयतां तद्वचनं परीक्ष्यताम् ॥३३॥ एवमाशुपरीक्षाप्रयोजनमाह–यदीति। यदि शम्भोर्वचः कथञ्चित् असत्यम् अनृतं स्यात् तदा हे दानवर्षभ ! असद्वाचमेनं रुद्रं जहि ताडय, यत् यतस्ताडनात् पुनरनृतं न वक्ता न वक्ष्यति। अन्यथाऽन्यानप्यनृतं वदन् वञ्चयिष्यतीत्यर्थः ॥३४॥ एवम्भूतैश्चित्रैर्भ्रामकैः सुपेशलैरतिरम्यैर्भगवतो वचोभिर्भिन्ना भ्रंशिता धीर्यस्य अत एव विस्मृतः विस्मृतवरदानार्थः सोऽसुरः स्वशीर्ष्णि स्वहस्तं व्यधात् निहितवान्। वस्तुतस्तु स परद्रोहसङ्कल्पेनैव नष्टः इति सूचयन्नाह–कुमतिरिति ॥३५॥

अन्वितार्थप्रकाशिका

एवं चेदिति। एवं चेत् तद्वाक्यं वरदानात्मकं वयं न श्रद्धीमहि सत्यमिति न विश्वसिमः। प्रेतपिशाचराट् यः शिवः दक्षशापात् पैशाच्यं पिशाचानामिव वृत्तिं प्राप्तः ॥३२॥ यदीति। अङ्ग हे दानवेन्द्र ! वो युष्माकं यदि तत्र जगद्गुरौ विस्रम्भः जगत्पूज्यत्वात्तद्वचने विश्वासोऽस्ति तर्हि आशु स्वशिरसि हस्तं न्यस्य प्रतीयतां तद्वचनं परीक्ष्यताम् ॥३३॥ यदीति। यदि शम्भोर्वचः कथञ्चित् असत्यम् अनृतं स्यात् तदा हे दानवर्षभ ! असद्वाचमेनं रुद्रं जहि ताडय। यत् यतस्ताडनात् स पुनरनृतं न वक्ता न वक्ष्यति। अन्यथाऽन्यानप्यनृतं वदन् वञ्चयिष्यत इत्यर्थः ॥३४॥ इत्थमिति। एवम्भूतैश्चित्रैर्भ्रामकैः सुपेशलैरतिरम्यैर्भगवतो वचोभिर्भिन्ना भ्रंशिता धीर्यस्य अत एव विस्मृतः विस्मृतवरदानार्थः कुमतिः सोऽसुरः स्वशीर्ष्णि स्वहस्तं व्यधात् निहितवान्। शीर्षन्नार्षः ॥३५॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्   ॥२९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एवं चेदिति ॥ हे वृक ! एवं चेत्तर्हि तद्वाक्यं न श्रद्दधीमहि । यतः योऽयं रुद्रः प्रेतपिशाचराट् तत्रापि दक्षशापात् शाच्यं प्राप्तः । एवंविधस्य वच एव न विश्वसनीयमिति भावः ॥३२॥ यदीति ॥ हे दानवेन्द्र ! दानववर्य ! जगद्गुरौ जगद्गुरुतया वदभिमानविषये तत्र रुद्रे वो युष्माकं विश्रम्भो विश्वासः तर्हि अङ्ग हे वृक ! स्वशिरसि हस्तं न्यस्य आशु प्रतीयतां प्रतीक्ष्यताम् ३३॥ यद्यसत्यमिति । हे दानवर्षभ ! यदि शम्भोः वचः असत्यं कथञ्चिदनृतं स्यात्, तर्हि तदन्ते तदनन्तरम् असद्वाचम् एनं हि नाशय । अन्यथा पुनः सः तथा अनृतं वक्ता वक्ष्यति । त्वामिवान्यानपि अनृतं वदन् वञ्चयिष्यत्यतस्तं जहीत्यर्थः ॥३४॥ त्थमिति ॥ भगवतः इत्थम्भूतैः चित्रैर्भ्रामकैः सुपेशलैः अतिरम्यैः वचोभिः भिन्नधीर्भ्रंशितमतिः कुमतिः स असुरः विस्मितः न् स्वहस्तं शीर्ष्णि स्वशिरसि व्यधात् निहितवान् ॥३५॥

कृष्णप्रिया

श्रीभगवानने कहा - अच्छा तो ऐसी बात है ? तब तो भाई ! हम उसकी बात पर विश्वास नहीं करते । या आप नहीं जानते है । वह तो दक्ष प्रजापति के शापसे पिशाचभाव को प्राप्त हो गया है । इतना ही नहिं आजकल तो वही प्रेतो और पिशाचो के स्वामी सम्राट हो गये है । ऐसी स्थितिमें उसके वचन पर कौन विश्वास या श्रद्धा रख सकता है ॥३२॥ हे दानवराज ! आप ऐसी बातों पर विश्वास कर लेते है ? आप अभी भी उसे जगद्गुरु मानते हो और उसकी बात पर विश्वास करते हो, तो झटपट अपने मस्तक पर हाथ रखकर परीक्षा कर लीजिये ॥३३॥ हे दानवशिरोमणि, यदि शिवकी बात असत्य साबित हो तो उस असत्यवादी को मार डालिये, जिससे वह फिर कभी भी झठ न बोल सके ॥३४॥ हे राजन् ! भगवान के विचित्र और मनमोहक मीठे वचनों ं वृकासुर की बुद्धि भ्रमित हो गइ । उस दुर्बुद्धि ने भूलकर अपने ही मस्तक पर हाथ रख दिया ॥३५॥

अथापतद्भिन्नशिरा वज्राहत इव क्षणात् । जयशब्दो नमःशब्दः साधुशब्दोऽभवद्दिवि ॥३६॥
मुमुचुः पुष्पवर्षाणि हते पापे वृकासुरे । देवर्षिपितृगन्धर्वा मोचितः सङ्कटाच्छिवः ॥३७॥
मुक्तं गिरिशमभ्याह भगवान् पुरुषोत्तमः । अहो देव महादेव पापोऽयं स्वेन पाप्मना ॥३८॥
हतः को नु [1]महत्स्वीश जन्तुर्वै कृतकिल्बिषः । क्षेमी स्यात् किमु विश्वेशे [2]कृतागस्को जगद्गुरौ ॥३९॥
य एवमव्याकृतशक्त्युदन्वतः परस्य साक्षात् परमात्मनो हरेः ।
गिरित्रमोक्षं [3]कथयेच्छृणोति वा विमुच्यते संसृतिभिस्तथारिभिः ॥४०॥

॥इति श्रीमद्भागवते महापुराणे[4] दशमस्कन्धे रुद्रमोक्षणं [5]नामाष्टाशीतितमोऽध्यायः ॥८८॥

कर्दमक्षमा

अथ, भिन्नशिराः, वज्राहतः, इव, क्षणात्, अपतत्, दिवि, जयशब्दः, नमःशब्दः, साधुशब्दः, अभवत् ॥३६॥ पापे, कासुरे, हते, देवर्षिपितृगन्धर्वाः, पुष्पवर्षाणि, मुमुचुः, शिवः, सङ्कटात्, मोचितः ॥३७॥ मुक्तम्, गिरिशम्, भगवान्, पुरुषोत्तमः, याह, अहो, देव, महादेव, अयम्, पापः, स्वेन, पाप्मना, हतः ॥३८॥ ईश, महत्सु, कृतकिल्बिषः, जन्तुः, वै, को, नु, क्षेमी, यात्, जगद्गुरौ, विश्वेशे, कृतागस्कः, किमु ॥३९॥ अव्याकृतशक्त्युदन्वतः, परस्य, साक्षात्, परमात्मनः, हरेः, एवम्, यः, गिरिशमोक्षम्, थयेत्, शृणोति, वा, संसृतिभिः, तथा, अरिभिः, विमुच्यते ॥४०॥

॥इति, श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धेऽष्टाशीतितमाध्यायेऽन्वयाः ॥८८॥

---

१. कुतश्चापि जन्तुर्वै-विज. । २. कृतपापो-विज. । ३. गिरीश-विज. । ४. पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. पु. । ५. तितमोऽध्यायः-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

किमु वक्तव्यं विश्वेशे त्वयि कृतागस्कः कृतापराध इति ॥३९॥ अव्याकृतशक्त्युदन्वतो वाङ्मनसागोचरशक्तिसमुद्रस्य गिरित्रमोक्षं शिवमोचनरूपं चरितम् संसृतिभिर्नानायोनिसञ्चारैः ॥४०॥

भक्तसङ्कटमालोक्य कृपापूर्णहृदम्बुजः । गिरित्रं चित्रवाक्यात्तु मोक्षयामास केशवः ॥१॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायामष्टाशीतितमोऽध्ययः ॥८८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथ शिरसि हस्तस्थापनोत्तरमेव ॥★॥ अथानन्तरम् । क्षणात्तत्क्षणमतिक्रम्येत्यर्थः । तस्मात्सदा भीतैर्देवैस्तन्मरणनिर्धारणार्थम् । जयशब्दादौ क्षणविलम्बात् जयशब्दोऽत्युल्लासस्य नम इति भक्तेः साध्विति विस्मयस्य व्यञ्जनार्थः ॥३६॥ सङ्कटाच्छिवे मोचिते सति । सप्तम्यर्थे प्रथमे । यद्वा-इत्थं पदशेषेणान्वयः कार्यः ॥★॥०॥३७॥०॥★॥ अहो देवेत्यर्धकम् । देव जगत्पूज्य । तत्र हेतुः-हे महादेव ! सर्वदेवश्रेष्ठ । स्वेनैव पाप्मना न तु मयेत्यर्थः । हे ईशेति । तं स्वयं हन्तुं शक्तोऽपि केवलं निजाराधनापेक्षयोपेक्षितवानित्यर्थः ॥★॥ विश्वनाथस्तु-पुरुषोत्तमो विनयादिगुणैस्तेभ्यः सर्वेभ्य उत्तमः । अहो देवेति भो अपरिणामदर्शिन् ऋजुबुद्धे ! दुष्टेभ्यो एवं वरो न देयः यत्स्वमृत्युहेतुवरमपि न परामृशसि अद्य तु त्वामरक्षमपरस्मिन् दिने किं भविष्यतीत्युपालम्भोऽपि मया महादेवत्वादेव न दत्त इति ॥३८॥ हत इति पूर्वान्वयि । महत्सु साधुषु । जगद्गुरौ सर्वपूज्ये शास्तरि वा ॥★॥०॥३९॥ चरितकथनादिफलमाह-य इति । संसृतिभिः संसरणहेतुभिः कामादिभिः ॥★॥ श्रीशिवस्य सङ्कटान्मोचनेन साक्षात् श्रीभगवन्माहात्म्यमिदं नासम्भवं यतस्तस्यैतच्चरितकथनेनापि सर्वेषां सर्वसंसारदुःखाद्विमुक्तिर्भवतीत्याह-य इति । अधिकारापेक्षा निरस्ता । यः कश्चिदित्यर्थः । एवमीदृशम् । अव्याकृतानां प्रपञ्चातीतानां शक्तीनां स्वरूपशक्तिवृत्तीनां नदीरूपाणाम् । समुद्रस्य सर्वसमावेशाश्रयस्य साक्षात्परस्य निरुपाधिकतया स्वयं परमेश्वरस्य न तु शिवादिवत् सोपाधिकतया । तत्प्रतिरूपत्वेनैव तद्रूपस्येत्यर्थः । यतः परमात्मनः तेषामपि मूलस्वरूपतया सर्वशक्तिप्रवर्तकस्येत्यर्थः । अत एव हरेः तत्तत्सर्वाकर्षकतया तन्नाम्न इत्यर्थः । एवं निष्कामस्य कथनादिफलमुक्त्वा सकामस्याप्याह-तथेति समुच्चये । कथं संसृतिभिर्विमुच्यते तदाह-षड्वर्गरूपारिभिर्विशेषेण समूलतया मुच्यते ॥४०॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धेऽष्टाशीतितमोऽध्यायः ॥८८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथानन्तरक्षणमेवासाद्य यद्वा, क्षणादभवदिति परेणान्वयः । तं क्षणमतिक्रम्येत्यर्थः । तस्मात्सदा भीतैर्देवादिभिः तन्मरणनिर्धारणार्थं जयशब्दादौ क्षणं विलम्बात् जयेत्युल्लासस्य व्यञ्जकं नम इति भक्तैः साध्विति विस्मयस्य ॥३६॥ जयशब्दे हेतुर्मोचितो भगवतेति । यद्वा, एवं मोचित इत्युपसंहारः ॥३७॥ मुक्तमित्यर्धकम् । एत्य वैकुण्ठान्तर्निर्हृत्य स्थितं तं सङ्कल्प्य वक्ष्यमाणतादृशोक्तौ हेतुः भगवानपि पुरुषोत्तमः विनयादिभिः पुरुषगुणैस्तेभ्यः सर्वेभ्य उत्तमः ॥३८॥ अहो इति सार्धकम् । अहो आश्चर्यर्यम् । हे देव ! जगत्पूज्य ! तत्र हेतुः- महादेव ! हे सर्वश्रेष्ठेति स्वेनैव पाप्मना न तु मयेत्यर्थः । हे ईशेति तमपि त्वं स्वयमेव हन्तुं शक्तोऽपि केवलं निजाराधनापेक्षयोपेक्षितवानित्यर्थः । किल्बिषमपराधम् ॥३९॥ श्रीशिवस्य सङ्कटान्मोचनेन साक्षात् श्रीभगवन्माहात्म्यमिदं नासम्भवं यतस्तस्यैतच्चरितकथनेनापि सर्वेषां सर्वसंसारदुःखाद्विमुक्तिर्भवतीत्याह-य इति । अधिकारापेक्षा निरस्ता । यः कश्चिदित्यर्थः । एवमीदृशम् अव्याकृतानां प्रपञ्चातीतानां शक्तीनां स्वरूपशक्तिवृत्तीनां नदीरूपाणां समुद्रस्य सर्वसमावेशाश्रयस्य साक्षात्परस्य निरुपाधिकतया स्वयं परमेश्वरस्य न तु शिवादिवत् सोपाधिकतया तत्प्रतिरूपत्वेनैव तद्रूपस्येत्यर्थः । यतः परमात्मनः तेषामपि मूलस्वरूपतया सर्वशक्तिप्रवर्तकस्येत्यर्थः । अत एव हरेः तत्तत्सर्वाकर्षकशक्तितया तन्नाम्न इत्यर्थः । एवं निष्कामस्य कथनादिफलमुक्त्वा सकामस्याप्याह-तथेति । समुच्चये एतच्च कामिलोकरोचनार्थं यद्वा, कथं संसृतिभिर्विमुच्यते तदाह-तेनाप्रयासेन प्रकारेणारिभिः षड्वर्गैर्विशेषेण समूलतया मुच्यत इति ॥४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् अष्टाशीतितमोऽध्यायः ॥८८॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

वा-शब्दो बहुधा स्वपरानन्दकथनात् केवलश्रवणस्य न्यूनताभिप्रायेण । संसृतिभिरिति बहुत्वं संसारदुःखस्य बाहुल्यात्, तत्रापि प्रत्येकं वैविध्यात्, स विशेषेण मुच्यत इति वि-शब्देन श्रीवैकुण्ठलोकप्राप्तिः सूचितैव,- तत एव सर्वदुःखनिवृत्तेः । एवं निष्कामस्य कथनादिफलमुक्त्वा सकामस्याप्याह । तथा च अरिभिश्च विमुच्यत इति, एतच्च कामिलोकरोचनार्थम् । यद्वा, कथं संसृतिभिर्विमुच्यते ? तदाह तेनाप्रयासेन प्रकारेणारिभिर्वैरिषड्वर्गेण विशेषतः समूलत्वादिना मुच्यत इति ।।४०।।

।।इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिण्याम् अष्टाशीतितमोऽध्यायः ।।८६।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ।।३०-४०।।

।। इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये अष्टाशीतितमोऽध्यायः ।।८८।।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अथ निधानानन्तरमेव वज्रेणाहत इव भिन्नं शिरो यस्य सः क्षणादपतत् जयशब्द इति स्पष्टार्थः ।।३६।। देवादयः पुष्पवर्षाणि मुमुचुः इत्थं शिवः सङ्कटात् युक्त्या उपायेन मोचितः ।।३७।। ततो भगवान् गिरिशमभ्येत्य प्राह-तदेवाह-अहो पापोऽयं वृकासुरः स्वेनैव पाप्मना पापेन हतः किल ।।३८।। हे ईश ! महत्सु कृतकिल्बिषः कृतापराधः को वा जन्तुः क्षेमी स्यात् किमुत जगद्यगुरौ जगद्धितकारिणी विश्वेशे त्वयि कृतापराधः क्षेमी स्यादिति महादेवत्वेशत्वविश्वेश्वरत्वजगद्गुरत्वव्यपदेशास्तदन्तरात्मभूत-स्वात्माभिप्रायापन्नाः ।।३९।। प्रकृतेतिहासप्रवचनश्रवणादिफलमाह-य इति । एवमित्थं वाङ्मनसावेद्यविविधविचित्रानन्तशक्तिपरस्य प्रकृतिपुरुषविलक्षणस्यान्तःप्रवेशनियमन-व्याप्यगतदोषास्पर्शैर्लोकत्रयधारकस्य आश्रितार्तिहरस्य भगवतो गिरित्रकर्ममोक्षणप्रतिपादकमितिहासं यः पुमान् कथयेद्यो वा शृणोति स संसृतिभिः सांसारिकदुःखैश्शत्रुभिश्च मुच्यते ।।४०।।

।।इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवकृतभागवतचन्द्रचन्द्रकायाम् अष्टाशीतितमोऽध्यायः ।।८८।।

श्रीमद्विजयध्वजकृता पदरत्नावली

जगद्गुरौ जगद्गिरणशीले ।।३९।। आख्यायिकाकथनादिफलमाह-य इति । अव्याकृतनित्यशक्तिसमुद्रस्य संसृतिभिः शत्रुमित्रादिबन्धनलक्षणाभिः ।।४०।।

।।इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् अष्टाशीतितमोऽध्यायः ।।८८।।

(श्रीविजयध्वजतीर्थरीत्या द्विनवतितमोऽध्यायः ।।९२।।)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ।।२८-४०।।

।।इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे अष्टाशीतितमोऽध्यायः ।।८८।।

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ।।१०-४०।।

।।इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे अष्टाशीतितमोऽध्यायः ।।८८।।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ।।१२-४०।।

।। इति श्रीमद्भागवते महापुराणे श्रीनाथचक्रवर्तिविरचितायां चैतन्यमञ्जूषायामष्टाशीतितमोऽध्यायः ।।८८।।

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अहो देवेति भो अपरिणामदर्शिन् ऋजुबुद्धे ! एवं दुष्टेभ्यो वरो न देयः स्वयं यन्मरिष्यसि तदपि न परामृशसि त्वामहमरक्षमपरस्मिन् दिने किं भविष्यतीत्युपालम्भो यत्नतः एतत् खलु भगवत एव महत्तत्त्वमसाधारणमिति दर्शितम् ॥३९॥ अव्याकृतानां प्रपञ्चातीतानां शक्तीनां स्वरूपशक्तिवृत्तीनां नदीरूपाणामुदन्वतः समुद्रस्य ॥४०॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । अष्टाशीतितमोऽध्यायो दशमेऽजनि सङ्गतः ॥८८॥

गूढार्थदीपिनी

अथ तत्क्षणमेव । साधु कृतं साधु कृतमिति हर्षसूचकाः शब्दाः अभवन् ॥३६॥ पापे पापिनि अर्श अजाघ्नन्तः ॥३७॥ मुक्तमिति युग्मम् । अभ्याह सम्मुखमागत्य आह । पूर्ववदच् प्रत्ययः पापः हत इति योज्यम् । हे ईश ! महत्सु त्वद्भक्तेष्वपि कृतापराधः क्षेमी न स्यात् जगद्गुरौ त्वयि न स्यादिति किमुत वक्तव्यम् ॥३८-३९॥ यः एवं गिरित्रमोक्षणरूपं हरेश्चरितं श्रोतरि सति कथयेत् वक्तरि सति शृणुयाच्च स संसृतिभिः नानायोनिसञ्चारैः तथा कामादिभिः अरिभिश्च विमुच्यते इत्यन्वयः । कथम्भूतस्य हरेः । अव्याकृतानां प्रपञ्चातीतानां दिव्यशक्तीनाम् उदन्वतः समुद्रस्य समुद्रवदाधारस्य । परस्य प्रकृतेः परस्य । गिरिस्थः सन् विश्वं त्रायते इति गिरित्रशब्दार्थः ॥४०॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे गूढार्थदीपिन्यामष्टाशीतितमोऽध्यायः ॥८८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अव्याकृतशक्त्युदन्वतः स्वाभाविकनित्यानन्तशक्तिसमुद्रस्य ''परस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'' इत्यादिश्रुतिः । गिरित्रमोक्षं शिवमोचनात्मकं चेष्टितम् संसृतिभिः देवमनुष्यतिर्यगादिजन्मभिः अरिभिः कामक्रोधादिभिश्च विमुच्यते ॥४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे अष्टाशीतितमाध्यायार्थप्रकाशः ॥८८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो यज्जातं तदाह-अथापतदिति । भिन्नं शिरो यस्य तादृशो भूत्वा भूमावपतत् । अथेति भिन्नप्रक्रमः । न भगवद्वाक्यानुसारेण तद्वाक्यानृतत्वं नापि सन्देहः किन्तु सत्यमेव जातमिति ननु भगवान् भक्तवत्सलः किमित्येवं कृतवानित्याशङ्क्याह-वज्राहत इवेति । वज्राहतः पर्वत इव तूष्णीं भूतो वा जगदपकारित्वात् मारित इत्यर्थः । ततो भगवदनुभावं दृष्ट्वा जयशब्दः महादेवो मोचित इति नमःशब्दः भगवतो मोहकवाक्यानि श्रुत्वा साधुशब्दः ॥३६॥ एवं त्रिविधः शब्दो दिव्यभवत् सात्त्विकराजसतामसानां दिवीति देवानुमोदनेन वञ्चनेन मारणं महादेवनिन्दां स्वयं न मन्यते इत्यन्यथावचनं च न दोषाय भवतीति सूचितम् । कायिकमाह-मुमुचुः पुष्पवर्षाणीति । देवर्षिपितृगन्धर्वाः सर्व एव देवगणाः नन्वत्र किं भगवच्चरित्रं जातमित्याशङ्कायामाह-मोचितः सङ्कटाच्छिव इति । स्वस्याजरामरत्वं स्ववाक्येन विरुध्यत इति तन्मध्ये पतितो महादेवः सङ्कटे पतितः यत्रैव पक्षद्वयमपि विरुद्धं तत्सङ्कटस्थानमिति वदति लोकः इतो व्याघ्रस्ततो दरीतिवत् ॥३७॥ ततो भगवान् महादेवस्य लज्जा खेदो भविष्यतीति तन्निवारणार्थं महादेवं स्तौतीत्याह-मुक्तं गिरिशमभ्याहेति । पुरुषोत्तमत्वादतुल्यातिशयः ततो न केनापि कर्मणा न्यूनो भवतीति सूचितं भगवतस्स्तोत्रमाह-अहो महादेवेति । अमरत्वं सर्वपूज्यत्वं च वदन् तस्य मृत्युसम्भावनामेव निराकृतवान् उपकारेण स कदाचिद्व्याप्तो भवेदिति तन्निराकरणार्थम् अन्यथैव तन्मरणं निरूपयति-पापोऽयमिति । अयं केवलपापरूपः अतः स्वेनैव पाप्मना हतः किञ्च सर्वं पापमेकत्र ईश्वरवज्ञा चैकत्रेति तत्कृतवानित्याह-को नु महत्सु कृतकिल्बिषः क्षेमी स्यात् । महादेवसेवकेष्वप्यपकारकर्ता न क्षेमं प्राप्नोति । ईशेति

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

म्बोधनात्तं भवानेव हन्तीति सूचितम् ॥३८-३९॥ मतान्तरत्वादस्य चरित्रस्य प्रकृतोपयोगित्वं कैमुतिकन्यायेन वदन् चरित्रश्रवणादेः फलमाह-य एवमिति । अव्याकृतीनां शक्तीनाम् उदन्वान् समुद्रो भगवान् तेनानन्तशक्तेश्चरित्राणामानन्त्यं सूचितम् । तस्यैकमेतत् गिरित्रमोक्षलक्षणं चरित्रं न केवलं शक्तिसम्बन्धादेव भगवच्चरित्रं किन्तु गुणातीतस्यापि चरित्रानन्त्यमस्तीत्याह-परस्येति । प्रकृतेरपि नियन्तुः भगवान् चरित्रकरणेन महानित्येव न किन्तु सर्वेषामात्मापीत्याह-परमात्मन इति । एवं प्रकारत्रयेण न हितमेव करोतीत्येव न किन्तु हरेः किन्तु सर्वेषां दुःखमपि दूरीकरोति शास्त्रदृष्ट्या सर्वेषामपि रमात्मत्वमस्तीत्याशङ्क्याह-साक्षादिति । वृकाद्गिरित्रस्य मोचनं ननु लोकसिद्धमोक्षः तं यः शृणोति कथयेद्वा श्रावयति वा संसारबन्धनैरपि मुच्यते अज्ञानवासनाभिः कामादिभिः शत्रुभिर्वा अहङ्कारनिवर्तनद्वारा सर्वान् मोचयति सोऽपि चेत् सङ्कटान्मोचितः दा तच्चरित्रं महादेवादप्यधिकं संसारात् शत्रुभ्यो वा न मोचयेदिति भगवतो विवेकनिधेः श्रीप्रस्तावे दानस्वरूपं निरूपितम् । लोकानां दाता महादेवः तेनानर्थे जाते तस्यापि मोक्षदो भगवानिति ॥४०॥

॥इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धविवरणे

एकोनचत्वारिंशाध्यायविवरणम् ॥३९॥ ॥८८॥

श्रीसुबोधिनीसारः

अथातः स्वहस्तन्यासाद्धेतोर्भिन्नशिराः स्फुटितमस्तकः छिन्नशिरस्कः क्षणात् अपतत् वज्राहत इव जयादिशब्दो दिवि अभूत् ॥३६॥ पापे वृकासुरे हते सति देवर्षिपितृगन्धर्वाः पुष्पवर्षाणि मुमुचुः । शिवः सङ्कटात् मोचितो विष्णुना ॥३७॥ कृच्छ्रान्मुक्तं गिरिशं पुरुषोत्तमो भगवान् विष्णुराह । अहो हे देव ! महादेव ! पापोऽयं स्वेन पापेन हतः युक्तमेतदित्याह-महत्सु कृतपापः को नु जन्तुः प्राणी क्षेमी कुशली स्यान्न कोऽपि, विश्वेशे जगद्गुरौ कृतागस्कः कृतापराधः किमु क्षेमी स्यात् इति कैमुतिकन्यायसिद्धम् ॥३८-३९॥ अव्याकृताऽलौकिकी शक्तिस्तस्मादुदन्वतः समुद्रात्तस्य परस्य साक्षात् परमात्मनो हरेः सकाशात् एवं गिरित्रमोक्षं विमोचनं कर्म यः कथयेत् शृणोति वा सोऽरिभिः शत्रुभिर्विमुच्यते तथा संसृतिभिर्नानायोनिसञ्चारैर्विमुक्तो भवति ॥४०॥

॥ इति श्रीमद्भा० दशमस्कन्धे उ० सुबोधिन्यां टीकायामष्टाशीतितमोऽध्यायः ॥८८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

अथ शिरसि हस्तस्थापनानन्तरं तत्क्षण एव वज्रेणाहत इव भिन्नशिरा अपतत् । तदा च दिवि नमआदिशब्दा अभवन् ॥३६॥ पापे पापाचारे वृकासुरे हते सति भगवति देवादयः पुष्पवर्षाणि मुमुचुः । एवं च भगवता शिवः सङ्कटान्मोचितः ॥३७॥ सङ्कटान्मुक्तं शिवं भगवानभ्याह । अहो देव ! हे महादेव ! स्वेन पाप्मनैवायं पापः पापाचारो हतः ॥३८॥ हे ईश ! महत्सु त्वद्भक्तेष्वपि कृतकिल्बिषः कृतापराधः को नु जन्तुः क्षेमी स्यात् ? सुखी न स्यादेव । जगद्गुरौ जगत्पूज्ये विश्वेशे त्वयि कृतागस्को जन्तुः क्षेमी नस्यादिति तु किमु वक्तव्यम् ? ॥३९॥ प्रकृतेतिहासश्रवणादिफलमाह-य इति । य एवं वर्णितप्रकारकं गिरित्रमोक्षं चरितं कथयेत् शृणोति वा स संसृतिभिर्जन्ममरणसंसारहेतुभिः कर्मबन्धैस्तथा अरिभिः शत्रुभिश्च विमुच्यते । कथं हरिचरितश्रवणादिना मोक्षः इत्यपेक्षायाम् अनन्तशक्तेस्तत्प्रसादादेव इत्याशयेनाह-अव्याकृतशक्त्युदन्वत इति । अप्राकृतशक्तिसमुद्रस्येत्यर्थः ॥ तत्र हेतुमाह-साक्षात्परमात्मन इति । तत्रापि हेतुमाह-परस्येति । प्रकृतिनियन्तुरित्यर्थः ॥४०॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र भगवद्गुणवर्णने । अष्टाशीतितमो यातः शिवमोक्षनिरूपकः ॥३॥ ॥८८॥

अन्वितार्थप्रकाशिका

अथेति । अथ तत्क्षण एव वज्रेणाहत इव भिन्नशिरा अपतत् । तदा च दिवि नमआदिशब्दा अभवन् ॥३६॥ मुमुचुरिति। पापे पापाचारे वृकासुरे हते सति भगवति देवादयः पुष्पवर्षाणि मुमुचुः । एवं च भगवता शिवः सङ्कटान्मोचितः ॥३७॥ मुक्तमिति युग्मम् । सङ्कटान्मुक्तं च गिरिशं भगवानभ्याह स्म । अहो देव ! हे महादेव ! स्वेन पाप्मनैवायं पापः पापाचारो हतः हे ईश ! महत्सु त्वद्भक्तेष्वपि कृतकिल्बिषः कृतापराधः को नु जन्तुः क्षेमी स्यात् सुखी न स्यादेव । जगद्गुरौ जगत्पूज्ये विश्वेशे त्वयि कृतागस्को जन्तुः क्षेमी नस्यादिति तु किमु वक्तव्यम् ॥३८-३९॥ य इति । अव्याकृतशक्त्युदन्वतः अप्राकृतशक्तिसमुद्रस्य साक्षात्परमात्मनः परस्य हरेश्चरित्रम् एवंप्रकारकं गिरित्रमोक्षं यः कथयेच्छृणोति वा संसृतिभिर्नानायोनिसञ्चारैः तथा अरिभिः संसारकारणैः कामादिभिः शत्रुभिश्च विमुच्यते ॥४०॥

॥ इति श्रीमद्भागवते महापुराणे दशमेऽन्वितार्थप्रकाशिकायामष्टाशीतितमोऽध्यायः ॥८८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

॥२९॥

॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने शिवमोचननामाष्टाशीतितमोऽध्यायः ॥८८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अथेति ॥ अथ स्वशीर्ष्णि स्वहस्तनिधानानन्तरं वज्राहतः इव भिन्नं शिरो यस्य तथाभूतः सन् क्षणात् अपतत् । तदा दिवि जयशब्दः नमःशब्दः साधुशब्दः अभवत् ॥३६॥ मुमुचुरिति ॥ पापे वृकासुरे हते देवर्षिपितृगन्धर्वाः पुष्पवर्षाणि मुमुचुः शिवः सङ्कयत् मोचितः ॥३७॥ मुक्तमिति ॥ हत इति ॥ ततः पुरुषोत्तमः भगवान् मुक्तं वृकभयादिति शेषः । गिरिशं शिवम् अभ्येत्य अहो हे देव ! हे महादेव ! पापः पापरूपः अयं वृकासुरः स्वेन एव पाप्मना पापेन हतः इति आह । हे ईश ! महत्सु भवादृशेषु कृतकिल्बिषः विहितापराधः को नु जन्तुः प्राणी क्षेमी स्यात् । तत्रापि विश्वेशे विश्वशास्तरि जगद्गुरौ जगद्धितकारिणि त्वयि कृतागस्कः क्षेमी स्यात् किमु वै । न स्यादेवेत्यर्थः । इति च, आह । महादवेवत्वेशत्वविश्वेश्वरत्वजगद्गुरत्वव्यपदेशास्तदन्तरात्मभूतस्वात्माभिप्रायकाः ॥३८-३९॥ प्रकृतेतिहासप्रवचनश्रवणादिफलमाह ॥ य इति ॥ यः पुमान् एवमित्थम्भूतम् अव्याकृतशक्त्युदन्वतः वाङ्मनसावेद्यविविधविचित्रानन्तशक्तिसमुद्रस्य, परस्य प्रकृतिपुरुषविलक्षणस्य साक्षात् परमात्मनः अन्तःप्रवेशनियमनव्याप्यगतदोषास्पर्शैर्लोकत्रयधारकस्य हरेराश्रितार्तिहरस्य भगवतः गिरित्रमोक्षं गिरित्रकर्मकमोक्षणप्रतिपादकमिहासमित्यर्थः । कथयेत् यो वा शृणोति, सः संसृतिभिः सांसारिकदुःखैः तथा अरिभिश्च विमुच्यते ॥४०॥

आलोक्य भक्तसङ्कष्टं करुणापूर्णहृत्कजः । चित्रैर्वचोभिर्दैत्यात्तु शम्भुमामोचयद्धरिः ॥१॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनुभगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्धे अष्टाशीतितमोऽध्यायः ॥८८॥

कृष्णप्रिया

बस, उसी क्षण उसका सिर फट गया और वह धरती पर गिर पडा मानो वज्र के परहार से पर्वत चूर्ण हो के गिरा हो ऐसी उसके मस्तक के हाल थे । इस वक्त आकाशमें देवतालोग जय जय, नमो नमः, साधु साधु के नारे लगाने लगे ॥३६॥ पापी वृकासुर की मृत्यु से देवता, ऋषि, पितर और गन्धर्व अत्यन्त प्रसन्न होकर पुष्पवृष्टि करने लगे और भगवान शिवजी उस विकट संकट से मुक्त हो गये ॥३७॥ पुरुषोमें उत्तम भगवान् विष्णुने

कृष्णप्रिया

भयमुक्त शिवजी से कहा कि हे देवाधिदेव महादेव यह दुष्ट अपने ही पापों से मरा है ।।३८।। हे परमेश्वर ! भला, सा कौन प्राणी है जो महापुरुषों का अपराध करता है या महापुरुषोमें पापाचार करता है । उनका कल्याण नहीं ता तो फिर हे जगद्गुरु विश्वेश्वर शंकरजी आपका अपराध करके तो कोई सुखी कैसे हो सकता है ।।३९।। भगवान् अनन्त शक्तियों के समुद्र है । उनकी एक एक शक्ति मन और वाणी की सीमा के परे है । वे प्रकृति से अतीत स्वयं परमात्मा है । ऐसे परम पुरुष साक्षात् श्रीहरि का शंकरजी को संकट से छुडाने की यह लीला चरित्र को सुना ता है या कहता है वह संसार के बन्धनों और शत्रू के भयसे मुक्त हो जाता है ।।४०।।

।। इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे अष्टाशीतितमाध्यायस्य भाषाटीका समाप्ता ।।८८।।

॥ श्रीहरिः ॥

★श्रीगणेशाय नमः★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ नवाशीतितमोऽध्यायः ॥

श्लोकाः	अनु.	मि.उ.	वंश.	प्र.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.	सं. श्लो.	अ.
६६	५६	८	१	१	७	२३०७	४१	४९	२३९३	७४॥	५

श्रीशुक उवाच

सरस्वत्यास्तटे राजन्नृषयः सत्रमासत । वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ॥१॥

कर्दमक्षमा

श्रीशुकः, उवाच । राजन्, सरस्वत्याः, तटे, ऋषयः, सत्रम्, आसत, तेषाम्, त्रिष्वधीशेषु, कः, महान्, वितर्कः, समभूत् ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

नवाशीतितमे देवः को महानिति संशये । परीक्ष्यविष्णोरुत्कर्षं मुनिभ्योऽवर्णयद्भृगुः ॥१-३॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

उत्कर्षं महत्त्वम् (१) । वितर्कः संशयः । "तर्काभावे वितर्कः स्यात् संशये च विचारणे" इति निरुक्तिः ॥ त्रिषु ब्रह्माविष्णुरुद्रेषु महानुत्तमः ॥★॥ तदेवं सोपाधिकरूपादाशुतोषकोपाच्च शिवात् शुद्धस्वरूपतयोदर्कशुद्धाङ्गीकारमय-परमार्थदातृविचारतया च श्रीविष्णोरुत्कर्षमुक्त्वा परमापराधेऽपि विनयपूर्वक-परमाङ्गीकारमयकरुणया च वदंस्तत्प्रसङ्गे ब्रह्मणोऽपि दर्यशति-सरस्वत्येति । आसत इति । लटा सदा सत्रपरत्वेनाद्याप्यस्त्येव सत्रमिति बोध्यते । तेषां कर्माविष्टत्वमेवानिर्णये हेतुरुक्तः । वितर्को विचारः ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

तदेवं सोपाधिकरूपादाशुतोषकोपाच्छुद्धस्वरूपतयोदर्कशुद्धाङ्गीकारमयपरमार्थदातृविचारतया च श्रीब्रह्मणो-रुत्कर्षमुक्त्वा परमापराधेऽपि विनयपूर्वकपरमाङ्गीकारमयकरुणया च वदंस्तत्प्रसङ्गे ब्रह्मणोऽपि दर्यशति-सरस्वत्या इत्यादि। आसत इति । लट् सदा सत्रपरत्वेनाद्यापि सन्तीत्युपचारात् इति तेषां कर्माविष्टत्वमनिर्णये हेतुरुक्तः को महानिति विचारो वितर्कः सम्यक् शास्त्रतर्कविचारेणाभूत् ॥१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

ऋषयो भृग्वादयोऽन्ये च सारस्वताः । यद्वा, ते कथम्भूताः ? सारस्वताः सरस्वतीतीरनिवासिनः । असत इति वर्तमानाः, सदा सत्रपरत्वात् । पाठान्तरं स्पष्टम्, अधीशेषु सर्वलोकानां परमसेव्येषु वरशापस्वामिषु वा । श्रीब्रह्मादिषु त्रिषु को महानिति

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

तर्को विचारः सम्यक्-शास्त्रार्थविचारणादिनाभूत् । यद्वा, असम्भाव्योऽपि सम्भावनां प्राप्तः । हे राजन्निति सर्वत्र सर्वथा विष्णोरुत्कर्षे विराजमानेऽपि सर्वज्ञानां तेषां वितर्केण विस्मयोदयात् ॥१॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-५॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

इत्थं मोक्षप्रदत्वसर्वशक्तित्वादिभिर्भगवतः सर्वोत्कृष्टत्वं प्रदर्शितम् । किं बहुना ब्रह्मर्षिभरेव भगवतः परत्वं निर्णीतम् । भिप्रेत्य तद्विषयकम इतिहासान्तरं प्रस्तौति एकोननवतितमेन-सरस्वत्या इति । हे राजन् ! सरस्वत्याः नद्यास्तटे सत्रमासते नुष्ठानार्थमुपविविशुरित्यर्थः । अधीशेषु इन्द्रादिभ्योऽधिकेषु ब्रह्मविष्णुरुद्रेष्वपि को महानभ्यधिक इति तेषामृषीणां वितर्को वादः समभूत् । यद्यप्यधिगतपरावरतत्त्वविदां न वितर्कस्तथापि लोकान् ग्राहयितुमभूदित्यर्थः । यद्वेदानीम् इव तदापि दिपरत्वाभिमानिनां दुर्वासः प्रभृतीनां सत्त्वाद्वितर्को बभूवेत्यर्थः ॥१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

विष्णोः समोऽधिकोऽस्तीति संशयनिरासाय तस्य भक्तानुकम्पित्वप्रकटनाय च मुमुक्षुभिः क्षमागुण एवापाद्यस्तत्प्रसादः क इति द्योतनाय च तस्मिन्निरतिशयभक्तिजननाय चास्याध्यायस्य प्रारम्भः । तत्रादौ मुनीनां सत्रसमये जिज्ञासप्रकारं वक्ति-स्वत्या इति । वितर्को जिज्ञासा । त्रिषु ब्रह्मादिषु अधीशेषु अधिकेश्वरेषु च महानुत्तमः ॥१॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

नवाशीतितमे विष्णोः श्रैष्ठ्यं भृगुपरीक्षया । त्रिषु तत्रापि विप्रार्भाहृतेः कृष्णार्य भूमतः ॥१॥

विष्णोरेव सर्वोत्कर्षात् सेव्यत्वे इतिहासान्तरमाह-सरस्वत्या इति ॥१॥

गूढार्थदीपिनी

नवाशीतितमे विष्णोः श्रेष्ठत्वं भृगुणेरितम् । कृष्णोर्जुनस्य रथार्थं मृतान् पुत्रानथाऽऽनयत् ॥१॥

आसते इति लटा अद्यापि सत्रमस्त्येवेति बोध्यते । इति वंशीधरी । वितर्कः (तर्काभावे वितर्कः स्यात्संशये च रणे । इति निरुक्तिः ।) संशयो विचारो वा ॥१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पूर्वाध्याये मोक्षप्रदत्वं श्रीविष्णोरेवेत्युक्तमथास्मिन्नध्याये तत्र कारणत्वेन भृग्वादिमहर्षिनिश्चितं तच्छ्रैष्ठ्यं वर्णयति-सरस्वत्या सत्रं बहुकर्तृकं यागम् । कर्तुमासत उपविविशुः । तेषां त्रिषु ब्रह्मविष्णुरुद्रेषु को महानिति वितर्को विवादः समभूत् ॥१॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

एवं दातृत्वसन्देहः कृष्णस्य विनिवारितः । अनेनैव महत्त्वं च हरौ निर्धारितं भवेत् ॥१॥
तथापि स्पष्टमध्याये चत्वारिंशे निरूप्यते । माहात्म्यं द्विविधं लोके प्रमाणाच्च प्रमेयतः ॥२॥
वेदानां मूलरूपेण प्रथमं विनिरूप्यते । द्वितीयं च प्रमेयेण हरिणैव निरूपितम् ॥३॥

हानशक्तिश्च पूर्णात्र क्रियापर्यवसायिनी । मूलत्वात्सर्वसहनं जनकस्येव रूप्यते ॥४॥

यद्वा गुणा भगवतश्चत्वारो विनिरूपिताः । तदावशिष्टद्वितयं स्वयमेवावदच्छुकः ॥५॥

महत्त्वलक्षणज्ञानशक्तिनिरूपणार्थं शुकः स्वयमेव पूर्वसिद्धनिर्णयरूपां कथामारभते–सरस्वत्यास्तट इति । सरस्वतीतीरे पूर्वम् ऋषयः सत्रं कुर्वाणा जाताः । देशाधिकारिकर्मणां प्रासङ्गिकानामुत्कर्षो निरूपितः । तदा तेषां कर्मफलसमर्पणार्थं जिज्ञासा उत्पन्ना । क्व कर्मफलं समर्पणीयमिति । ततः पितृत्वात् ब्रह्मणि समर्पणीयमिति केचित् यज्ञात्मकत्वात् विष्णौ समर्पणीयमिति । परे ज्ञानोपदेष्टृत्वात् गुरौ महादेवे समर्पणीयमित्यपरे । ततः प्रयोजकाणां त्रयाणाम् एकशेषनिर्णयः कर्तुमशक्य इति महत्त्वं व्यवस्थापितं प्रयोजकत्वेन । तच्च महत्त्वं सद्गुणैर्भवतीति सद्गुणानां मध्ये सर्वावस्थासु क्षोभाभावो महानिति । को वा क्षोभ्य इति विचारार्थं महत्त्वासाधनाय वितर्को जात इत्याह–वितर्कः समभूदिति । वितर्कशरीरमाह–त्रिष्वधीशेषु को महान् इति ॥१॥

सुबोधिनीसारः

शुकोक्तिः । हे राजन् ! सरस्त्वत्याः तटे ऋषयः सत्रं यज्ञमकुर्वन्त तेषां वितर्कः सञ्जातः । तेषु अधीशेषु ब्रह्मविष्णुशिवेषु महान् क इति ॥१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नवाशीतितमे देवः को महानिति संशये । मुनिभिर्निश्चितो विष्णोरुत्कर्षो विनिरूप्यते ॥१॥

अत्रैव इतिहासान्तरमाह–सरस्वत्या इति । हे राजन् ! सरस्त्वया नद्यास्तटे ऋषयः सत्रमासत सत्रानुष्ठानार्थमुपविविशुरित्यर्थः । तेषां त्रिषु ब्रह्मविष्णुरुद्रेषु को महानिति वर्तर्कः संशयः समभूत् ॥१॥

अन्वितार्थप्रकाशिका

नवाशीतितमेऽन्येभ्यो देवेभ्यो हरिमुत्तमम् । भृगुर्निरचिनोदत्र श्लोकाः पर्वतषण्मिताः (६७)॥१॥

सप्तोवाचेति (७) वाक्यानि द्वासप्ततिरनुष्टुभः (७०) ॥८९॥

सरस्वत्या इति । हे राजन् ! सरस्त्वया नद्यास्तटे ऋषयः सत्रमासत । सत्रानुष्ठानार्थमुपविविशुरित्यर्थः । तेषां त्रिषु ब्रह्मविष्णुरुद्रेषु को महानिति वर्तर्कः संशयः समभूत् ॥१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथेदानीमेकोननवतितमेऽध्याये त्रिवेदेषु उत्कृष्टैकदेवजातसंशयानां महर्षीणां कृतपरीक्षणेन संशयनिवर्तनम् अर्जुनरक्षणार्थं भूमापुरुषलोकात् श्रीकृष्णकृतद्विजपुत्रानयनं च कथ्यते–सरस्वत्या इति । सत्रमासते यज्ञे उपविष्टा इत्यर्थः ॥ त्रिषु उत्पत्त्यादिकर्तृषु ॥१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

को महानिति सन्देहे नवाशीतितमे सुरः । मुनिभ्योऽवर्णयद्विष्णोः परीक्ष्य श्रेष्ठतां भृगुः ॥१॥

इत्थं मोक्षप्रदत्वसर्वशक्तिमत्त्वादिभिर्भगवतः सर्वोत्कृष्टत्वं प्रदर्शितं, किं बहुना ब्रह्मर्षिभिरेव भगवतः परमत्वं निर्णीतमित्यभिप्रेत्य तद्विषयकमितिहासान्तरं प्रस्तौति । सरस्वत्या इति ॥ हे राजन् ! सरस्वत्याः नद्याः तटे, ऋषयः, सत्रं ब्रह्मसत्रं आत्मविचारमित्यर्थः । आसत समकुर्वत । सत्रार्थमुपविविशुरित्यर्थः । तेषामृषीणाम् अधीशेषु इन्द्रादिभ्योऽप्यधिकेषु त्रिषु ब्रह्मविष्णुरुद्रेषु कः महानधिकः इति वितर्को विवादः समभूत् । यद्यप्यधिगतपरावरतत्त्वविदां, न वितर्कः सम्भवति, तथापि लोकान् ग्राहयितुमभूदित्यर्थः ॥१॥

कृष्णप्रिया

शुकदेवजी बोले - हे राजन् ! एकबार सरस्वती नदी के पावन पट पर बडे बडे ऋषि मुनि एकत्रित हो कर ज्ञानसत्र का आरम्भ किया था । उन महर्षि लोगोने इस विषय पर वाद - विवाद हुआ कि ब्रह्मा शिव और विष्णुमें सबसे महान् कौन है ॥१॥

तस्य जिज्ञासया ते वै भृगुं ब्रह्मसुतं नृप । तज्ज्ञप्त्यै प्रेषयामासुः सोऽभ्यगाद् ब्राह्मणः सभाम् ॥२॥
न तस्मै [1]प्रह्वणं स्तोत्रं चक्रे सत्त्वपरीक्षया । तस्मै चुक्रोध भगवान् प्रज्वलन् स्वेन तेजसा ॥३॥
स आत्मन्युत्थितं मन्युमात्मजायात्मना प्रभुः । अशीशमद्यथा वह्निं स्वयोन्या [2]वारिणाऽऽत्मभूः[3] ॥४॥
ततः कैलासमगमत् स तं देवो महेश्वरः । परिरब्धुं समारेभे उत्थाय भ्रातरं मुदा ॥५॥

कर्दमक्षमा

नृप, तस्य, जिज्ञासया, ते, भृगुं, वै, ब्रह्मसुतम्, तज्ज्ञप्त्यै, प्रेषयामास, सः, ब्राह्मणः, सभाम्, अभ्यगात् ॥२॥ सत्त्वपरीक्षया, तस्मै, प्रह्वणं, स्तोत्रं, न, चक्रे, स्वेन, तेजसा, प्रज्वलन्, भगवान्, तस्मै, चुक्रोध ॥३॥ सः, आत्मनि, उत्थितम्, मन्युम्, यथा, वह्निम्, स्वयोन्या, वारिणा, प्रभुः, आत्मभूः, आत्मना, आत्मजाय, अशीशमत् ॥४॥ ततः, सः, कैलासम्, अगमत्, देवः, महेश्वरः, उत्थाय, तम्, भ्रातरम्, परिरब्धुम्, समारेभे ॥५॥

श्रीधरस्वामिकृतभावार्थदीपिका

स्वयोन्या स्वस्यैव रूपान्तरेणाभिव्यक्तिस्थानेन स्वकार्येणेत्यर्थः । तेन यथा कश्चिद्वह्निं शमयति तथा स्वकार्येण पुत्रेण निमित्तेन क्रोधं शमयामासेत्यर्थः ॥४-१०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तस्य महत्त्वस्य । स्वयं जिज्ञासया लोकेषु तज्ज्ञप्त्यै आधिक्यज्ञापनाय । स भृगुः ॥★॥ तस्य महत्त्वस्य 'महर्षीणां भृगुरहम्' इति तस्यैव तत्र योग्यत्वादिति भावः । ब्रह्मणि लाल्यत्वस्य शिवे भ्रातृत्वस्य ब्रह्मण्यदेवे श्रीविष्णौ तु ब्रह्मण्यत्वस्यातिशयस्फूर्तेः । सोऽपि भृगुरपि । तस्य महत्त्वस्य । ज्ञापनाय अभि निर्णयमाभिमुख्येन वा ॥२॥ तस्मै ब्रह्मणे । प्रह्वणं नमनम् । सत्त्वस्य महत्त्वहेतुत्वात् कार्ये कारणप्रयोगः । तस्मै भृगवे ॥★॥ सत्त्वं महत्त्वं तद्धेतुः सत्त्वगुणो वा । तस्य परीक्षया हेतोः । प्रह्वणं प्रणामं स्तोत्रं च न चक्रे । एवमुत्तरत्रापि । भगवान् सर्वपूज्यः ॥३॥ स ब्रह्मा । आत्मजायात्मजमुद्दिश्य । इत्यर्थ इति- 'अग्नेरापः' इति श्रुतेर्वारिणो वह्निकार्यत्वावगमादिति भावः । तेन वारिणा । इत्यर्थ इति-पुत्रोऽयमिति मत्वा शान्ति ययाविति भावः ॥★॥ आत्मनि मनसि । स्वयमेव क्षमापणां विनैवेत्यर्थः । यतः प्रभुर्विचारणक्षमः । । तत्र हेतुः-आत्मनः शुद्धसत्त्वमयहरेः सकाशाद्भवतीत्यात्मभूः । विचारमेवाह-स्वयोन्येति । स्वं वह्निरेव योनिरुत्पत्तिस्थानं यस्य तेन वारिणा 'अग्नेरापः' इति श्रुतेः । यथा वह्निकार्येण वारिणा वह्निं शमयति । यद्वा । स्वस्य वह्नेर्योन्या कारणेन वारिणेव क्रोधस्यकारणेनात्मनैव क्रोधं शमयामास । 'कृपीटयोनिर्ज्वलनः' इत्यमरात् । जलादपि वह्निर्जायत इति प्रसिद्धे ॥४॥ ततो ब्रह्मलोकगमनोत्तरम् । स भृगुः । तं भ्रातरम् । तस्यापि ब्रह्मललाटोद्भूतत्वेन भ्रातृतेति । महः पूज्यश्चासावीश्वरश्चेति महेश्वरः । परिरब्धुमालिङ्गितुम् ॥★॥ एवं ब्रह्मण्यवज्ञारूपं मानसमपराधं कृत्वा तत्र रजोगुणं दृष्ट्वा ततोऽपि श्रेष्ठे महेश्वरे मानसादिकं वाचिकमपराधं कृतवानित्याह-तत इति । केलतः क्रीडत इति केलौ पार्वतीशिवौ । 'किल श्वैत्यक्रीडनयोः ।' इतः पचाद्यच् । तावासाते अत्रेति केलासः । स एव कैलासः । स्वार्थिकोऽण् । ब्रह्मणः सत्त्वबाध्यं रजो दृष्ट्वा शिवस्य तमोबाध्यं सत्त्वं पार्वत्यां तदर्धाङ्गीभूतायां सत्त्वबाध्यं तमश्च दर्शयति । देवो जगत्पूज्यः यतो महेश्वरः महदहङ्काराधिष्ठातृत्वात् । तथापि मुदा परिरब्धुं सम्यक् बाहुप्रसारादिनाऽऽरेभे । यतः भ्रातरं ब्रह्मपुत्रत्वेन भ्रातृभावेनाङ्गीकृतम् ॥५॥

ब्रह्मणे स्तोत्रं-विज. । २. विशमयेद्वारिणा प्रभुः-विज. । ३. आत्मनः-इति कस्यचित् ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

भृगुमिति ॥ महर्षीणां भृगुरहमिति महिम्ना तस्यैव योग्यत्वादिति भावः । ब्रह्मसुतमिति तदभिमानाक्रान्तचित्तत्वेन तत्रासङ्कोचश्च तस्य दर्शितः ब्रह्मणि स्वस्य लाल्यत्वस्य शिवे भ्रातृत्वस्य ब्रह्मण्यदेवे श्रीविष्णौ तु ब्राह्मणत्वस्यातिशयस्फूर्तेः अत एव सोऽपि तज्ज्ञप्त्यै तस्य महत्त्वस्य ज्ञापनाय अभितत्तदाभिमुख्येन अभयं यथा स्यात्तथा अगात् गतः ॥२॥ यतो न तस्मा इत्यादि सत्त्वं महत्त्वापरपर्यायमुत्कृष्टत्वं तस्य परीक्षया हेतुना प्रह्वणं प्रणामस्तोत्रं च न चक्रे एवमुत्तरत्रापि भगवान् जगत्सृष्ट्यादिना सर्वपूज्यः श्रीब्रह्मेत्यर्थः कढरोधविकारभरमाह-स्वेनासाधारणतेजसा प्रकर्षेण ज्वलन्निति ॥३॥ आत्मनि मनसि आत्मना स्वयमेव क्षमापणां विनैवेत्यर्थः । अशीशमत् शमयामास यतः प्रभुर्विचारसमर्थः तत्र हेतुः आत्मनः श्रीहरेः सकाशाद्भवतीति तथा सः विचारमेवाह-स्वयोन्या स्वकार्यत्वात्स्वाभिव्यक्तिस्थानेन तद्रूपत्वेन पुत्रोऽयमिति भावेनेत्यर्थः । तत्र दृष्टान्तः यथा कथञ्चिद्वारिणा वह्निं शमयतीति ॥४॥ तदेवं ब्रह्मणः सत्त्वबाध्यं रजोदर्शितं शिवस्य तमोबाध्यं सत्त्वं सत्त्वबाध्यं तमश्च दर्शयति-तत इति सार्धद्वाभ्याम् । देवो जगत्पूज्यः यतो महेश्वरः सर्वाहङ्काराधिष्ठातृत्वादिति भावः । तथापि मुदा परिरब्धुं सम्यक् बाहुप्रसारादिनारेभे यतो भ्रातरम्भ्रातृत्वेनाङ्गीकृतम् ॥५॥

श्रीसनातनगोस्वामिपादकृता बृहद्वैष्णवतोषिणी

तस्य महत्त्वस्य, वै अपि, भृगुं प्रेषयामासुरपि, किं वक्तव्यं वितर्कः समभूदिति । अतो महाविस्मयात् पुनः सम्बोधयति-नृपेति । ब्रह्मसुतमिति तस्य तद्योग्यतोक्ता, स स भृगुस्तस्य महत्त्वस्य ज्ञप्तौ ज्ञानाय, किंवा तेषु ज्ञापनार्थम् अभितोऽगात् । यद्वा, अभि अभयं यथा स्यात् ॥२॥ सत्त्वं महत्त्वं स्वभावो वा, तस्य परीक्षया हेतुना प्रह्वणं प्रणामं स्तोत्रं च न चक्रे । भगवान् जगत्सृष्ट्यादिना सर्वपूज्यः श्रीब्रह्मेत्यर्थः । कोपविकारभरमाह-स्वेनासाधारणेन तेजसा प्रकर्षेण ज्वलन्निति ॥३॥ आत्मनि मनसि आत्मना स्वयमेव बुद्ध्या वा अशीशमत्, यतः प्रभुः समर्थः । तत्रैव हेतुः-आत्मभूः स्वयमेव स्वशक्त्या भवतीति, किंवा आत्मनः श्रीहरेः सकाशाद्भवतीति तथा सः । स्वयोन्येति वह्निशमनयोग्यतोक्ता । अन्यत्तैर्व्याख्यातम् । यद्वा, कथमशीशमत्तदाह-यथेति, समूलतया निःशेषेणेत्यर्थः ॥४॥ ततस्तत्पश्चात्, तस्या वा ब्रह्मसभायाः सकाशात् । देवो जगत्पूज्यः, यतो महेश्वरः, तथापि मुदा परिरब्धुं सम्यग्बाहुप्रसारणादिनारेभे, यतो भ्रातरम् ॥५॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-५॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

तस्येति तस्य महत्त्वस्य जिज्ञासया ते ऋषयः हे नृप ! ब्रह्मणश्चतुर्मुखस्य सुतं भृगुं तज्ज्ञप्त्यै महत्त्वं वेत्तुम् इत्यर्थः । प्रेषयामासुः । स भृगुस्तावद्ब्रह्मणश्चतुर्मुखस्य सभामभ्यगात् ॥३॥ स इति । स ब्रह्माऽऽत्मजाय भृगवे आत्मनि मनस्युत्थिते मन्युं क्रोधमात्मना विवेकात्मिकया बुद्ध्याऽशामयत् यथा स्वयोन्या स्वस्यैव स्वरूपान्तरेणाभिव्यक्तिस्थानेन स्वकार्येणेति यावत् तेन वारिणा यथा कश्चिद्वह्निं शमयति तथा स्वकार्येण पुत्रेण निमित्तेन क्रोधं शमयामासेत्यर्थः । यद्वा स्वस्याग्रेयोनिररणिस्तस्या उत्थितं वह्निं जलेन कश्चिच्छामयति तथा भृगोरुत्पत्तिथानभूतात् स्वस्मात्तदुत्थितं क्रोधं बुद्ध्याऽशामयदित्यर्थः ॥४॥ तत इति । स भृगुः कैलासं जगाम । तं भृगुं परिरब्धुमालिङ्गितुम् ॥५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

तस्याधिकस्य वा इत्यनेन लोकसंशयनिरासाय मन्दाधिकारिणां दृढनिश्चयाय न स्वार्थं परिज्ञातवेदान्तार्थत्वात्स्वेषामिति निर्धारयति ॥२-३॥ आत्मनः स्वस्यात्मनि मनस्यात्मजाय भृगवे उत्थितं मन्युमशीशमत् शान्तं कृतवान् । प्रभुः समर्थः । प्रभुः भृगोः पितृत्वेन स्वामी ॥४॥ महेश्वर इति सांकेतिकं नाम । अन्वर्थाङ्गीकारे प्राकृतानुपपत्तेः । भ्रातरं मुदेति भ्रातृशब्दप्रयोगाच्च ॥५॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-६॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

तज्ज्ञप्त्यै स अभ्यागादित्यन्वयः । प्रह्वणं नतिं सत्त्वस्य महत्त्वस्य तद्धेतोः सत्त्वगुणस्य वा परीक्षार्थम् ॥२-३॥ आत्मजाय आत्मजं तं हन्तुमित्यर्थः । स्वयोन्या खं वह्निरेव योनिरुत्पत्तिकारणं यस्य तेन वारिणा । स्त्रीत्वमार्षम् । वारिणा वह्निकार्येण यथा वह्निं शमयति तथा स्वकार्येण पुत्रेण निमित्तेन स्वाकारीभूतं क्रोधं शमयामास । यद्वा स्वस्य वह्नेर्योन्या कारणेन वारिणेव क्रोधस्य कारणेनात्मनैव क्रोधं शमयामास । अंशुयोनिः कृपीटयोनिरित्यादिवह्निनामदर्शनात् । क्वचिज्जलादपि वह्निर्जायत इति प्रसिद्धेः ॥४॥ एवं ब्रह्मण्यवज्ञारूपं मानसमपराधं कृत्वा तत्र रजोगुणं दृष्ट्वा तं परीक्षया वस्तुतस्त्वनुत्तीर्णं ज्ञात्वा ततोऽपि श्रेष्ठे महेश्वरे मानसादिकं वाचिकमपराधमकरोदित्याह-तत इति द्वाभ्याम् ॥५-७॥

गूढार्थदीपिनी

वै एवार्थे ते ऋषयः तस्य महत्त्वस्य जिज्ञासया भृगुमेव (महर्षिणां भृगुरहम् इत्युक्तेः तस्यैव तत्र योग्यत्वात् ।) षयामासुरित्यन्वयः । किमर्थम् । लोकेषु तज्ज्ञप्त्यै महत्त्वख्यापनाय ॥२॥ तस्मै ब्रह्मणे प्रह्वणं (प्रह्वशब्दाचारक्विबन्तात् ल्युट्) मस्कारं न चक्रे । सत्त्वं महत्त्वं गुणो वा । तेजसा ब्रह्मतेजसा ॥३॥ स आत्मभूः ब्रह्मा आत्मनि मनसि उत्थितं मन्युम् आत्मना विवेकवत्या बुद्ध्या शमयामास । यथा वारिणा वह्निं शमयति । कथम्भूतेन वारिणा । स्वः वह्निः योनिः उत्पत्तिकारणं यस्य तेन स्वयोनिना । स्त्रीत्वमार्षम् । 'अग्नेरापः' इति श्रुतेः ॥४॥ तत इति सार्धम् । परिरब्धुम् आलिङ्गितुम् समारेभे स च भृगुः तत् नैच्छत् त्वमुत्पथगः कुमार्गगामी असि मां मा स्पृश इति ब्रुवन् सन् । ह विषादे रुद्रस्यापि ब्रह्मललाटभूतत्वेन भ्रातृतेति ॥५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

ते ऋषयः तस्य महत्त्वस्य जिज्ञासया भृगुं प्रेषयामासुः । स भृगुरपि तज्ज्ञप्त्यै महत्त्वज्ञानार्थं ब्रह्मणः सभामभ्यगादित्यन्वयः ॥२॥ प्रह्वणं नतिं च न चक्रे । ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः; इति स्मृतेः सतो ब्रह्मतो भावः सत्त्वं तत्परीक्षार्थम् ॥३॥ स ब्रह्मा आत्मजाय आत्मजम् हन्तुम् आत्मनि उत्थितं मन्युमात्मनैव अशीशमच्छमयामास । यथा प्रभुः सूर्यः स्वयोन्या वारिणा स्वप्रवर्तितवृष्ट्या यद्वारि तेन निदाघसन्तापरूपं वह्निं स्वप्रजानाशकरं शमयति तद्वत् । मिश्रितरजआप्लुतो ब्रह्मा नरं ब्रह्मेति भावः ॥४॥ हन्तुम् आरेभे इति भ्रातृविषयकस्नेहेन रजोमूलेन परिरब्धुं प्रवृत्तोऽपि त्वमस्युत्पथग इति प्रतिकूलवचनमात्रश्रवणेन तमोजन्येन क्रोधेन तं भ्रातरं हन्तुं प्रवृत्तः । रजोमिश्रितेन तमसा वृतो हर इत्यर्थः । देवी सान्त्वयामासेति पतिप्रकृतिनिरोधाचरणेन तद्भ्रातृरक्षार्थकेन रजसा वृता भवानीति द्योत्यते ॥५-६॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

तर्हि एतन्महत्त्वं कथं ज्ञातव्यमिति जिज्ञासायां विचारेणैव तज्ज्ञानं भवतीति निश्चित्य विचारार्थं प्रत्यक्षमेव प्रमाणमङ्गीकृतवन्तः । ततः प्रत्यक्षसंवादी योऽर्थः स एव निर्णायक इति तदर्थं प्रवृत्ता इत्याह-तस्य जिज्ञासयेति । सर्वेषां ब्रह्मशक्तिः ज्ञानात्मिका महत्त्वाद्भृगौ समारोपिता तदा भृगुः साक्षात् परब्रह्माविष्टो जातः । ततो विस्मृतदेहसम्बन्धः अक्षोभ्यपरीक्षार्थं सर्वैर्ब्राह्मणैः प्रेषितः । पूर्वं यावन्तः समायान्ति ते नमस्कृत्य स्तुत्वा अवतिष्ठन्ते । भृगुस्तु तं गुणं न कृतवान् अनेन मानसी अवज्ञा सूचिता । ननु कर्तव्यं न कथं कृतवान् । तत्राह-सत्त्वपरीक्षयेति । ब्रह्मशब्दवाच्योऽपि तस्य सत्त्वं विवेकधैर्यादिकं परीक्षणीयमिति अतः स्वभावतः अकरणं न भवतीति न तस्य दोषः । प्राप्तसेवापरित्यागो द्वेषमूलमिदं स्मृतमिति, न्यायाद्ब्रह्मणः क्रोधो जात इत्याह-तस्मै चुक्रोधेति । ननु ब्रह्मणः सोऽपि महान् तत्राह-भगवानिति । नन्विदं तत्रापि तुल्यं प्रज्वलन्निति वेदगर्भत्वात् ब्रह्मतेजसा प्रज्वलन्नास्ते भृगावप्येवमस्तीति चेत् तत्राह-स्वेन तेजसेति । भृगौ तु ब्राह्मणैः स्वतेजः स्थापितमिति विशेषः ॥२-३॥ ततः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

सहजकृत्रिमयोः रूपं तुल्यमिति ब्रह्मास्त्रयोरिव स्वत एव तेजः शान्तमित्याह–स आत्मन्युत्थितमिति । आत्मजोऽपि स्वत उत्पन्नः मन्युरपि अतस्तुल्यबलत्वेन कलहः परं भविष्यतीति एतावन्मात्रं विचार्य आत्मनैव स्वेनैव स्वतेजः अशीशमत्। वस्तुतस्तु भृगुतेजसैव तच्छान्तमिति वक्तुं दृष्टान्तमाह–स्वयोन्या वारिणेति । यथा वह्निं कश्चिच्छामयति वह्नेरेवोत्पन्नेन जलेन अग्नेराप इति श्रुतेः कारणेन कार्यनाशः प्रायेण सर्वत्र स्वतो धर्मतो वा ॥४॥ एवं तस्य क्षोभं दृष्ट्वा अयं महान्न भवतीति निश्चित्य महादेवो लोकानां ज्ञानोपदेष्टा कदाचिदेवं भविष्यतीति तत् जिज्ञासार्थं भगवन्तं भोगाविष्टं मत्वा तं परित्यज्य प्रथमतः कैलासमगमत् । तस्य भ्रातृत्वेन तुल्यत्वात् तूष्णीं भावो न क्षोभक इति वाचनिकोपराधः कृत इति वक्तुं तस्य प्रसङ्गमाह–स तं देवो महेश्वर इति । तुल्यत्वेऽपि तस्य तेजो दृष्ट्वा दैवोऽपि ज्ञानशक्तियुतोऽपि ऐश्वर्ययुक्तोऽपि सन्माननार्थं परिरब्धुं समारेभे। तत्राप्युत्थाय तत्रापि मुदा अनेन मानसः कायिकः ऐन्द्रियकश्च पुरस्कार उक्तः ॥५॥

सुबोधिनीसारः

तस्यैकस्य जिज्ञासयाधिक्येन ज्ञातुमिच्छया ब्रह्मणः सुतं भृगुं प्रेषयामासुः ते ऋषयः । ते नृप स भृगुः तज्ज्ञप्त्यै तज्ज्ञानार्थं ब्रह्मणः सभामभ्यगात् प्राप्तः ॥२॥ तस्मै ब्रह्मणे प्रह्वणं नतिं स्तोत्रं स्तुतिं न चकार सत्त्वस्य परीक्षया स्वेन तेजसा प्रज्वलन् भगवान् ब्रह्मा तस्मै भृगवे चुकोप ॥३॥ स प्रभुर्ब्रह्मात्मजाय पुत्रमुद्दिश्योत्थितं मन्युं क्रोधम् आत्मनः स्वस्यात्मना पुत्रेण निमित्तेनाशीशमत् सोऽग्निर्योनिर्यस्य तेन। स्त्रीत्वमार्षम्। वारिणा 'अग्नेरापः' इति श्रुतेः। अग्निमिव ॥४॥ ततः स्थानात्कैलासमगात स भृगुः महेश्वरो देवः शिव उत्थाय मुदा हर्षेण तं भ्रातरं परिरब्धुमालिङ्गितुमुद्यतोऽभूत् ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तस्य महत्त्वस्य जिज्ञासया ते ऋषयस्तस्य महत्त्वस्य ज्ञप्त्यै ज्ञानार्थं भृगुं प्रेषयामासुः । परीक्षणे तस्य सामर्थ्यं सूचयन्नाह–ब्रह्मस्तुतिमिति । इयमति राजनीतिः इति सूचयन् सम्बोधयति–नृपेति । स च भृगुः परीक्षार्थं प्रथमः ब्रह्मणः सभामभ्यगात् ॥२॥ सत्त्वगुणोऽस्यास्ति न वेति परीक्षार्थं तस्मै ब्रह्मणे प्रह्वणं नमस्कारं स्तोत्रं च कृतवान् । ततश्च तत्कृतामवज्ञां ज्ञात्वा भगवान् ब्रह्मा स्वेन तेजसा प्रज्वलंस्तस्मै भृगवे चुक्रोध ॥३॥ ततश्च स ब्रह्माऽऽत्मजाय भृगवे आत्मनि मनसि उत्थितं मन्युं क्रोधमात्मना विवेकात्मिकया बुद्ध्या अशीशमत् शान्तं कृतवान् । प्रभुः विवेके समर्थः । तत्र दृष्टान्तमाह–यथेति । यथा स्वयोन्या अरणेरुत्थितं वह्निं कश्चित् प्रभुर्वारिणा शमयति तद्वदित्यर्थः ॥४॥ ततश्च स भृगुः केलासमगमत् । तदा देवो महेश्वरः उत्थाय तं भृगुं मुदा परिरब्धुम् आलिङ्गितुं समारेभे । आलिङ्गने हेतुः–भ्रातरमिति । स च भृगुस्त्वं चिताभस्मादिधारी उत्पथगोऽसीति वदन् तत्परिरम्भणं नैच्छत् । तच्छ्रुत्वा महादेवश्चुकोप । ब्रह्मिष्ठस्याप्येवं कोप आश्चर्यम् इति सूचयति–हेति ॥५॥

अन्वितार्थप्रकाशिका

तस्येति । तस्य महत्त्वस्य जिज्ञासया ते ऋषयस्तस्य महत्त्वस्य ज्ञप्त्यै ज्ञानार्थं भृगुं प्रेषयामासुः । पितृत्वभ्रातृभ्यां ब्रह्मशिवपक्षपातिनमेव प्रेषितवन्तः । स च भृगुः परीक्षार्थं प्रथमः ब्रह्मणः सभामभ्यगात् ॥२॥ नेति । सत्त्वगुणोऽस्यास्ति न वेति परीक्षार्थं तस्मै ब्रह्मणे प्रह्वणं नमस्कारम् । प्रह्वशब्दादाचारे क्विप् ततो ल्युट् । स्तोत्रं च कृतवान् । ततश्च तत्कृतामवज्ञां ज्ञात्वा भगवान् ब्रह्मा स्वेन तेजसा प्रज्वलंस्तस्मै भृगवे चुक्रोध ॥३॥ स इति । प्रभुर्विवेकी स आत्मभूः ब्रह्माऽऽत्मजाय भृगवे आत्मनि मनसि उत्थितं मन्युं क्रोधमात्मना विवेकात्मिकया बुद्ध्या अशीशमत् शान्तं कृतवान् । यथा स्वयोन्या अग्निकारणात् अरणेरुत्थितं वह्निं कश्चित् प्रभुर्वारिणा शमयति तद्वदित्यर्थः । यद्वा स्वं वह्निः योनिः कारणं यस्य तेन वारिणा । स्त्रीत्वमार्षम् । यद्वा । स्वस्यैव योन्या रूपान्तरेणाभिव्यक्तिस्थानेन स्वकार्येणेत्यर्थः । तेन यथा कश्चिद्वह्निं शमयति तथा स्वकार्येण पुत्रेण निमित्तेन क्रोधं शमयामासेत्यर्थः । यद्वा । स्वस्य वह्नेर्योन्या कारणेन वारिणेव क्रोधस्य कारणेन आत्मनै क्रोधं शमयामास 'अग्नेराप' इति श्रुतेः । वारि वह्नेः कार्यम् अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमिति श्रुतेर्वारि वह्नेः कार्यमप्यच्युत इति उभयार्थः । अत्र ब्रह्मणि मानसमपराधं कृतवान् ततोऽपि श्रीमहेश्वरे

अन्वितार्थप्रकाशिका

वाचिकमपराधं ततोऽपि श्रीविष्णौ शारीरमपराधं कृतवान् ॥ तत इति ॥ ततश्च स भृगुः केलासमगमत्। महेश्वरः देवः भ्रातरं तं भृगुं मुदा परिरब्धुमालिङ्गितुं समारेभे । स च भृगुस्त्वं चिताभस्मादिधारी उत्पथगोऽसीति वदन् तत्परिरम्भणं नैच्छत् । तच्छ्रुत्वा महादेवश्चुकोप ॥ शूलमिति । कोपात्तिग्मलोचनः सन् शूलमुद्यम्य तं भृगुं हन्तुमारेभे । देवी पार्वती पादयोः पतित्वा गिरा स्तुत्यादिरूपया तं प्रसादयामास । अथो इति । अथो यत्र देवो जनार्दनः अस्ति तद् वैकुण्ठलोकं जगाम । तत्र श्रिय उत्सङ्गे शयानं जनार्दनं वक्षसि पदा अताडयत् । अत्र शयानं तत्रापि पत्न्या उत्सङ्गे तत्रापि वक्षसि मर्मणि तत्रापि तदा न तु हस्तादिनेत्यपराधस्याधिक्यम् । वैकुण्ठलोकश्चायं विकुण्ठासुतनिर्मितः । "वैकुण्ठः कल्पितो येन लोको लोकनमस्कृतः ।" इति प्रागुक्तेः। न तु महावैकुण्ठः ॥ तत इति ॥ ततः लक्ष्म्या सह सतां गतिर्भगवान् उत्थाय स्वतल्पादवरुह्य मुनिं शिरसा ननाम ॥४-८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तद्गत्यै तस्योत्कृष्टदेवस्य गत्यै ज्ञानाय ॥२॥ प्रह्वणं नमस्कारं स्तोत्रं स्तुतिम् । सतः परब्रह्मणो भावः सत्त्वं तस्य परीक्षया ॥३॥ आत्मजाय पुत्रनिमित्तम् आत्मनि मनसि उत्थितम् आगतं मन्युमात्मना बुद्ध्या अशीशमत् शमयामास । यथा स्वयोन्या स्वस्याग्नेर्योनिरुत्पत्तिकारणं काष्ठं तस्मादुत्पन्नं भूमौ स्थितं वह्निं वारिणा यथा कश्चिन्नरः शमयति तथा पुत्रान्निमित्तभूतादुत्पन्नं क्रोधं बुद्ध्या शमयामासेत्यर्थः ॥ इति दष्टान्तसङ्गतिः ॥४-५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्येति ॥ तस्य तन्महत्त्वस्य, जिज्ञासया, हे नृप, ते महर्षयः, ब्रह्मणश्चतुर्मुखस्य सुतः पुत्रस्तं भृगुं, तज्ज्ञप्त्यै महत्त्वं वेत्तुमित्यर्थः । प्रेषयामासुः वै । सः भृगुः, तावत् ब्रह्मणश्चतुर्मुखस्य सभाम् अभ्यगात् ॥२॥ नेति ॥ सत्त्वपरीक्षया सत्त्वपरीक्षार्थमित्यर्थः । तस्मै ब्रह्मणे प्रह्वणं नमस्कारादिकं स्तोत्रं स्तवनं च भृगुः न चर्के न कृतवान्। ततः तस्मै भृगवे स्वेन स्वकीयेन तेजसा क्रोधाग्निना प्रज्वलन् भगवान् ब्रह्मा चुक्रोध ॥३॥ स इति ॥ ततः प्रभुः स ब्रह्मा आत्मजाय भृगवे भृगुं संताडयितुमित्यर्थः । आत्मनि स्वमनसि उत्थितमुत्पन्नं मन्युं क्रोधम् आत्मना विवेकात्मिकया बुद्ध्या अशीशमत् शमयामास कथमिव। यथा प्रभुः कश्चित् स्वयोन्या वारिणा जलेन वह्निं शमयति, तथा स्वस्यैव रूपान्तरेण, 'आत्मा वै पुत्रः' इति श्रुतेः स्ववीर्यभूतपुत्रेण निमित्तेन क्रोधं शमयामासेत्यर्थः ॥४॥ तत इति ॥ ततः, स भृगुः कैलासम् अगमज्जगाम। तं भृगुं दृष्ट्वा महेश्वरः देवः शिवः भ्रातरम् आगतं ज्ञात्वेति शेषः । उत्थाय मुदा परिरब्धुं समारेभे ॥५॥

कृष्णप्रिया

हे परीक्षित ! उन ऋषियोंने इस बातकी परीक्षा लेने के उद्देश्य से ब्रह्माजी के पुत्र भृगुऋषि को उनके पास भेजा। वह सबसे पहले ब्रह्माजी की सभामें गये ॥२॥ महान् पुरुषोंकी देवाधिदेवोंकी और राजाकी सभा का नियम है कि जो कोई सभामें आता है तब सभामें विराजमान अधिपति की स्तुति या नमस्कार करके सभामें बैठते है, किन्तु ब्रह्माजी के धैर्य आदि सत्व की परीक्षा करके के लिए न उन्हें नमस्कार किया और न तो उनकी स्तुति ही कि। भृगु के इस प्रकार के अविनयसे अपना अपमान समझकर ब्रह्माजी अपने तेज से दहक रहे थे । और भृगुऋषि पर क्रोध भी आ गया ॥३॥ कुपुत्रो जाये इस न्याय के अनुसार ब्रह्माजी ने देखा की यह तो मेरा लालन है, तब अपने मनमें उठे हुए क्रोध को भीतर ही भीतर दबा लिया, जैसे अग्नि को शान्त करनेमें अग्नि से उत्पन्न जल ही कारणरूप है । वैसे ही ब्रह्माजी के रोष को शान्त करनेमें भृगुऋषि के प्रति ब्रह्माजी का पुत्रवात्सल्य ही कारणरूप बना ॥४॥ वहां से भृगुऋषि कैलास में गये । देवाधिदेव महादेवने देखा कि मेरे भाई भ्रृगुजी आये है, तब उन्होंने बडे आनन्द से खडे हो कर उनका आलिंगन करने के लिऐ भुजाएं फैला दी ॥५॥

[1]नैच्छत्त्वमस्युत्पथग इति देवश्चुकोप ह । शूलमुद्यम्य तं हन्तुमारेभे तिग्मलोचनः ॥६॥
पतित्वा पादयोर्देवी सान्त्वयामास तं गिरा [2]। अथो[3] जगाम वैकुण्ठं यत्र देवो जनार्दनः ॥७॥
शयानं श्रिय उत्संगे पदा वक्षस्यताडयत् । तत उत्थाय भगवान् सह लक्ष्म्या सतां गतिः ॥८॥
स्वतल्पादवरुह्याशु[4] ननाम शिरसा मुनिम् । [5]आह ते स्वागतं ब्रह्मन् निषीदात्रासने क्षणम् ।
अजानता[6]मागतान् वः क्षन्तुमर्हथ नः प्रभो ॥९॥

कर्दमक्षमा

त्वम्, उत्पथगः, असि, इति, नैच्छत्, ह, तिग्मलोचनः, देवः, चुकोप, शूलम्, उद्यम्य, तम्, हन्तुम्, आरेभे ॥६॥ पादयोः, पतित्वा, देवी, गिरा, तम्, सान्त्वयामास, अथो, यत्र, देवः, जनार्दनः, वैकुण्ठम्, जगाम ॥७॥ श्रियः, उत्सङ्गे, शयानम्, पदा, वक्षसि, अताडयत्, ततः, सताम्, गतिः, भगवान्, लक्ष्म्या, सह, उत्थाय, स्वतल्पात्, आशु, अवरुह्य, शिरसा, मुनिम्, ननाम, ब्रह्मन्, ते, स्वागतम्, अत्र, आसने, क्षणम्, निषीद, आह, प्रभो, अजानताम्, वः, आगतान्, , नः, क्षन्तुम्, अर्हथ ॥८-९॥

श्रीधरस्वामिकृता भावार्थदीपिका ॥४-१०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आलिङ्गितुं नैच्छत् । श्मशानवासित्वादिनोत्पथगो लोकविरुद्धमार्गगाम्यशुभाचारोऽस्यतो मा मां स्पृशेति भावः । इति इत्युक्तः । तं भृगुम् । तिग्मलोचनो रक्तनेत्रस्त्रिलोचनो वह्निनेत्रो वा । "तिग्मं तीक्ष्णत्रिरक्षाग्नितमोव्याप्तजनेषु च" इति निरुक्तिः । तं शिवम् ॥★॥ उत्पथगोऽसि । श्मशानभस्मादिधारणेन पाखण्डमार्गं प्राप्तोऽसीति परिवदंस्तत्परिरम्भं नैच्छदति। तिग्मलोचनः क्रोधान्नेत्राग्निप्रसर्पणात् ॥६॥ अथो रुद्रदक्षिणोत्तरम् । यत्र वैकुण्ठे ॥★॥ सान्त्वयामास गिरा सामपूर्वकन्यायोक्त्या । रुद्रादप्तिश्रेष्ठे विष्णौ वाचिकादप्यधिकं कायिकमपराधमाह-अथो इति । वैकुण्ठं प्रपञ्चान्तर्विकण्ठसुनिर्मितं विष्णुलोकविशेषम् । एवं ब्रुवति वैकुण्ठे, इति वक्ष्यमाणात् —

"पत्नी विकुण्ठासुभ्रस्य वैकुण्ठैः सुरसत्तमैः । तयोस्तु कलया जज्ञे वैकुण्ठो भगवान् स्वयम् ॥

वैकुण्ठो निर्मितो येन लोको लोकनमस्कृतः" ॥ इत्यष्टमस्कन्धाच्च ॥७॥ ततः पादप्रहारोत्तरम् ॥★॥ श्रिय उत्सङ्गे शयानमिति तयोस्तदागमनाज्ञाने हेतुः मिथः प्रेमावृतज्ञानत्वात् । तदेवं तदानीं तादृशदारुणकर्मणोऽत्यन्तायोग्यत्वमुत्तरोत्तरमविनयाधिक्यं च तस्योक्तम् । वैष्णवत्वं त्वेतदुत्तरकाले तादृशभगवद्गुणदर्शनेनैव जातमिति ज्ञेयम् । ततस्तस्मात्ताडनानन्तरं तं दृष्ट्वेत्यर्थः । सहसा सम्भ्रमेण लक्ष्म्या सहोत्थाय । लक्ष्म्या अपि तादृशसमयेऽपि तादृशविविक्तेऽप्यागन्तरि स्वाङ्गावलोकनसम्भविष्णावपि तस्मिन् मुनौ न कोपगन्धोऽपीति ॥८॥०॥★॥ स्वशब्देन तल्पस्य परमधिष्ण्यत्वमुक्तम् । ते त्वया सुखेनागतम् । यद्वा तव स्वागतं शोभनमागमनम् । हे ब्रह्मन् ! हे वेदस्वरूपेति परमपूज्यत्वमुक्तम् । अत्र मत्तल्परूपे किंवा, विप्रार्थं पृथक्स्थापिते किंवा, मयार्पिते अस्मिन्नासने । एवं च स्वयमेव सत्वरमासनमानीतमिति ज्ञेयम् ॥९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

उत्पथगः श्मशानभस्मादिधारणेन पाषण्डमार्गं प्राप्तोऽसीति वदंस्तत्परिरम्भणं नेच्छदित्यर्थः । ततश्चुक्रोध तदेवाह-शूलमिति । तिग्मलोचन इति क्रोधान्नेत्राग्निप्रसरणाभिप्रायेण ॥६॥ पतित्वेत्यर्धकम् । गिरा सामपूर्वकसन्न्यायोक्त्या वैकुण्ठं प्रपञ्चान्तर्विकण्ठसुनिर्मितं विष्णुलोकविशेषंम् एवं ब्रुवति वैकुण्ठ इति वक्ष्यमाणात् —

---

१. नैच्छत्तमशुभाचार इति-विज. ; नैच्छत्त्वमशुभाचार स्तलो-च. पु. टी. । २. इति कृच्छ्रात्ततो मुक्तः कैलासाद्रजताचलात् - इदमर्धमधिकं-विज. । ३. मुनिर्जगाम-विज. । ४. ह्याथ-श्रीधर. वंशी. वीर. विज. । ५. अहो ते-गो. प्रे. टी. । ६. अजानतामागतं नः क्षन्तुमर्हसि मानद-विज. ; अजानतामागमनं क्षन्तु०-गो. प्रे. टी. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

"पत्नीविकुण्ठासुभ्रस्य वैकुण्ठैः सुरसत्तमैः । तयोः स कलया जज्ञे वैकुण्ठो भगवान् स्वयम् ॥

वैकुण्ठो निर्मितो येन लोको लोकनमस्कृतः" ॥ इत्यष्टमस्कन्धाच्च ॥७॥

श्रिय उत्सङ्गे शयानमिति तयोस्तदागमनाज्ञाने हेतुः मिथः प्रेमावृतज्ञानत्वात् तदेवं तदानीं तादृशदारुणकर्मणोऽत्यन्तायोग्यत्व-मुत्तरोत्तरमविनयाधिक्यं च तस्योक्तं वैष्णवत्वं त्वेतदुत्तरकाले तादृशभगवद्गुणेनैव जातमिति ज्ञेयम् । तथापि तस्य तत्र गमनं श्रीभगवतो लोककृपार्थस्वगुणव्यञ्जनेच्छयैवेति च ततस्तस्मात्ताडनानन्तरं तं दृष्ट्वेत्यर्थः । सहसा सम्भ्रमेण लक्ष्म्या सहोत्थाय स्वतल्पादिति स्वशब्देन तल्पस्य परमधिष्ण्यत्वं सूचयति । ततोऽप्यवरुह्य आश्वित्यस्य यथोपेक्षं सर्वैरप्यन्वयः उत्थानादौ हेतुः सतां साधूनां गतिः सद्धर्माश्रयः तत्रैव हेतुर्भगवान् सर्वसद्गुणयुक्त इति यद्वा भगवान् साक्षात्परमेश्वरोऽपि ॥८॥ ते त्वया सुखेनागतं किमित्यर्थः । यद्वा तव स्वागतं शोभनमागमनं ब्रह्मन् ! हे वेदस्वरूपेति परमपूज्यत्वं सूचयति । अत्र मत्तल्परूपे किंवा, विप्रायार्थं पृथक्स्थापिते किंवा, मयार्पिते अस्मिन्नासने एवं च स्वयमेव सत्वरमासनमानीतमिति ज्ञेयम् । ननु त्वया अभिगमनादिना न सम्मानितोऽहमित्यासनं न स्वीकरोमीति चेत्तत्राह-अजानतामिति । वो युष्मान् । बहुत्वं गौरवात् । नोऽस्माकमिति लक्ष्म्याद्यपेक्षया ॥९-१०॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

उत्पथग आचारभ्रष्टोऽसीति वदन् नैच्छत्तत्परिरम्भणम्, ततश्च चुकोप । ह स्फुटम् । तदेवाह-शूलमिति । तिग्मलोचन इति कायान्नेत्राग्निप्रसर्पणाभिप्रायेण ॥६॥ तं तिग्मलोचनम्, गिरा सामपूर्वक-सन्यायोक्त्या, अथो अनन्तरम् । जनार्दन इति जनैर्भक्तैः सर्वलोकैर्वा अर्द्यते सर्वसद्गुणरूपवत्त्वादिना दर्शनाद्यर्थं याच्यत इति तथा सः ॥७॥ श्रिय उत्सङ्गे शयानमिति तदानीं तादृशदारुणकर्मणोऽत्यन्तायोग्यत्वम्, एवमुत्तरोत्तरमविनयाधिक्यं च तस्योक्तम्, तथा ताडनन्तत्यन्तपरीक्षार्थम्, किंवा तस्य माहात्म्यविशेषप्रदर्शनार्थम् । यद्वा, सर्वथा सर्वतोऽभिव्यक्तेऽपि तन्माहात्म्ये तादृशजिज्ञासया ऋषिभिरात्मनः प्रेषणेन (गी.१०/२५) 'महर्षीणां भृगुरहम्' इति भगवन्महाविभूतितया ख्यातस्य लक्ष्मीपितुः परमभागवतस्य तस्य महाकोपदुःखोत्पत्तेरिति दिक् । ततस्तदनन्तरं सद्य एवेत्यर्थः । यद्वा, तस्मात् सहसा ताडनाद्धेतोः लक्ष्म्या सहोत्थाय स्वस्य तल्पादिति, स्व-शब्देन तल्पस्य परमुत्कृष्टत्वमुच्चत्वं च सूचयति, तथाप्यवरुह्य । आश्वित्यस्य यथोपेक्षं सर्वैरप्यन्वयः । उत्थानादौ हेतुः-सतां साधूनां गतिः शरणम् । तत्रैव हेतुः-भगवान् सर्वसद्गुणयुक्त इति । यद्वा, भगवान् साक्षात् परमेश्वरोऽपि सतां स्वभक्तानां तदादीनां गतिरपि ॥८॥ ते त्वया, सु सुखेनागतं किमित्यर्थः । यद्वा, तव स्वागतं शोभनमागमनम् । ब्रह्मन् ! हे वेदस्वरूपेति परमपूज्यत्वं सूचयति । अत्र मत्तल्परूपे, किंवा विप्रार्थं पृथक् स्थापिते, किंवा मयार्पितेऽस्मिन् आसने । एवं च स्वयमेव सत्वरमासनमानीतमिति ज्ञेयम् । ननु त्वयाभिगमनादिना न तस्मानितोऽहमित्यासनं न स्वीकरोमीति चेत्, तत्राह-अजानतामिति, वो युष्मान्, बहुत्वं गैरवात् । नोऽस्माकमिति लक्ष्म्याद्यपेक्षया ॥९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

चुकोपेति उक्तोऽथ वैकुण्ठशब्दः पूर्ववत् ॥६-१४॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

नैच्छदिति । त्वमुत्पथगः इति वदन् परिरम्भणं नैच्छदित्यर्थः । देवो रुद्रः तस्मै चुकोप । किञ्च तीक्ष्णदृष्टिः सन् समुद्यम्य तं भृगुं हन्तुमारब्धवात् ॥६॥ पतित्वेति । देवी गिरा सान्त्वोक्त्या तं रुद्रम् अथेति वैकुण्ठशब्दः पूर्ववद्विष्णुलोकपरः । श्रियो लक्ष्म्याः उत्सङ्गे शयानं वक्षसि पादेनाताडयत् तत इति सतां गतिरिति हेतुगर्भम् ॥७-८॥ अतः स तल्पादाश्ववरुह्य मुनिं सहसा ननामाह च किमिति । हे ब्रह्मन् ! ते त्वया स्वागतं कुशलमागतं खलु अत्रास्मिन् आसने क्षणं निषीद उपविश । हे प्रभो ! स्वागतानजानतान्नोऽस्माकमपराधमिति शेषः । क्षन्तुमर्हथ ॥९-१०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

श्मशानवासित्वेनाशुभाचार इति मत्वा ॥६-८॥ ते तुभ्यम् । निषीदोपविश । आगतसमपराधम् ॥९-१०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

वैकुण्ठं प्रपञ्चन्तर्वर्तिविकुण्ठासुतनिर्मितं विष्णुलोकविशेषम् ॥७॥ शयानमिति तादृशदारुणकर्मणोत्पत्त्या योग्यत्वमविनयाधिक्यं च तस्योक्तं वैष्णवत्वं त्वेतद्युत्तरकाले तादृशभगवद्गुणेनैव जातमिति ज्ञेयम् । तथापि तस्य तत्र गमनं श्रीभगवतो लोककृतार्थस्वगुणव्यञ्जनेच्छयैव इति च ॥८-१५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

महेश्वरे तमोगुणं दृष्ट्वा तदर्धभूतायां पार्वत्यां सत्त्वगुणं च दृष्ट्वा तमपि परीक्षया वस्तुतस्त्वनुत्तीर्णं दृष्ट्वाततोऽप्यतिश्रेष्ठे विष्णौ वाचिकादप्यधिकं कायिकमपराधमकरोदित्याह-अथो इति पुष्पपर्यङ्कोपरि शयानमपि तत्रापि श्रियः स्वपत्न्या उत्सङ्गे । तत्रापि वक्षसि । तत्रापि पदा न तु हस्तादिनेत्यपराधपरावधिः कृत इति भावः ॥८॥ विष्णौ तावानपराधः सत्त्वगुणदिदृक्षया कृतः । वस्तुतस्तु तत्र विष्णौ शुद्धसत्त्वमेव दृष्टं न तु सत्त्वमपीत्याह-तत इति चतुर्भिः । सह लक्ष्म्येति लक्ष्म्या अपीति तादृशसमयेऽपि तादृशविविक्तेऽप्यागन्तरि स्वाङ्गावलोकनसम्भविष्णावपि तस्मिन्मुनौ न कोपगन्धोऽपीति सत्त्वगुणधर्मप्रियतमचित्ताभिप्रायज्ञत्वेन तत्तिरस्कारदर्शनेऽपि शुद्धसत्त्वधर्मः सतां गतिरिति वैकुण्ठानाम्पार्षदानामपि ताद्धर्म्यमेव ॥९॥

गूढार्थदीपिनी

तं भृगुं तिग्मलोचनः (अग्निनेत्रो वा । तिग्मं तीक्ष्णत्रिरक्ताग्नितमोव्यासजनेषु च । इति निरुक्तिः ।) रक्तलोचनः सन् हन्तुमारेभे । तं शिवम् ॥६-७॥ अत्र शयाने तत्रापि उत्सङ्गे तत्रापि वक्षसि तत्रापि पदा न तु हस्तादिना इत्यपराधस्य पराकाष्ठा दर्शिता ॥८॥ वः युष्मान् आगतान् अजानतां नोऽस्माकमपराधं क्षन्तुमर्हसि । आसने निषीद उपविश ॥९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

श्रिय उत्सङ्गे शयानमित्यनेन रजस्तमोभिभूतेषु तादृशी क्षमा कदाचिदपि लेशतोऽपि न सम्भवतीति द्योत्यते ॥७॥ सह लक्ष्म्येत्यनेन लक्ष्मीः पतिस्वभाववती गम्यते तत उत्थाय इत्यादिना भगवत्पादहतांहस इत्यनेन ग्रन्थेन विष्णुः क्रमात्सत्त्वगुणवश्य इति नैवोच्यते । यतः सत्त्वावृताः प्रत्युत्थानादिना गुर्वादीन् पूजयन्ति न तु पादत्राणावलम्बिनं भृत्यम् । तस्मादनेन ग्रन्थेन प्रकृतितद्गुणादावृतनिखिलजीवनियन्तुः सर्वात्मनः सर्वेश्वरस्याचिन्त्यचेष्टितस्य श्रीविष्णोः सर्वदोषवर्जित्वश्रेष्ठत्वख्यापनाय स्वभक्तभक्तिमत्त्वं प्रतिपाद्यते । अहं भक्तपराधीनः ह्यस्वतन्त्र इव द्विज । भगवान् भक्तभक्तिमानित्युक्तिः ॥८-१०॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

अतिक्रममाह-नैच्छदिति । इच्छाभावो मानसः तेन सहितवाचनिकमाह-त्वमुत्पथगोऽसीति । एवं वाचनिकातिक्रमे जाते देवत्वात् स्वच्छन्दचारित्वं न दोषायेति चुकोप । हेत्याश्चर्ये । ज्ञानिनः कथमेवं क्रोध इति ततः पूर्वापेक्षया अस्य दण्डोऽप्यधिको जात इत्याह-शूलमुद्यम्येति । तिग्मानि लोचनानि यस्येति ज्ञानशक्तितिरोभावः ॥६॥ तदा पार्वतीज्ञानशक्तिः तत्स्वरूपं ज्ञात्वा स्वक्रियया तद्दण्डे प्रतिबन्धरूपा जातेत्याह-पतित्वा पादयोरिति । गिरा जिज्ञासाप्रवृत्तिरूपया एवं तत्तद्गुणपुरःसरं उभयोः स्थाने गत्वा स्वरूपेणैव भिन्नप्रक्रमेण विष्णोः स्थाने गत इत्याह-अथाजगामेति । स हि जामाता भृगोर्भवति लक्ष्मीपतिः । अतो द्वारपालैररुद्ध एव श्रिय उत्सङ्गे शयानं परमेश्वरम् अत्यन्तातिक्रमं पूर्वापेक्षयापि कुर्वाणः वक्षसि पदा अताडयत् । स हि परीक्षार्थमागतः विलम्बं न सहते । भगवांश्च शेते शयाने न कोऽप्यस्मादन्यः । अतिक्रमो भवति अतः प्रबोधनमतिक्रमं च सहैव कृतवान् अयं

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

कायिकोऽतिक्रमस्तत्रापि महान् देशकालावस्थासन्निधिकरणक्रियाफलानां षण्णामपि दुष्टत्वात् यदि भगवान् गुणैः प्रत्येकेन मिलितैर्वा भगवान् स्यात् तदा क्षोभं प्राप्नुयादेव । भगवांस्तु स्वभावतोऽपि भगवान् मूलभूतः अतः सहजान् स्वषड्गुणान् तत्र प्रकाशयामासेत्याह-तत उत्थायेति चतुर्भिः । मानसान् षड्गुणानाह-यतो भगवान् अत ऐश्वर्यविरुद्धं मारणानन्तरमुत्थानं कृतवान् तत्रापि सह लक्ष्म्या वीर्यविरुद्धमेतत् न हि सामर्थ्ये विद्यमाने कश्चित् सुखं परित्यजति । यशो विरुद्धं चैतत् । यतः सतां गतिः एवं सति सन्तः कथं भजेरन् अपकर्षख्यापनात् स्वतल्पादवरुह्येति श्रीविरुद्धं तस्या शोभायाविरोधानात् । आश्विति विकलतया विरोधः समर्थितः ननामेति ज्ञानविरुद्धं हीनो हि नमस्करोति तत्रापि शिरसा शिरो हि ब्रह्मादीनामपि स्थानं वैराग्यविरुद्धं चैतत् मुनिमिति मुनित्वादयं क्रोधं करिष्यतीति तदभावापेक्षा न विरुक्तता इति । कायिकभगवद्धर्मविरुद्धानाह-आहेति । ते स्वागतं कुशलेनागमनं किं कृतमिति कुशलप्रश्नः । समतामापादयन् ऐश्वर्यविरुद्धो भवति ब्रह्मन्निति तस्योत्कर्षेण सम्बोधनं वीर्यविरुद्धं च । अत्रासने क्षणं निषीदेति प्रार्थना कीर्तिविरुद्धा । क्षणमित्यतिदैन्यात् श्रीविरुद्धा च अजानतामागतान्व इति स्पष्टो ज्ञानविरोधः । नोपराधं क्षन्तुमर्हथेति अपराधक्षमापनं सापेक्ष्यत्वं ज्ञापयतीति वैराग्यविरुद्धम् । प्रभो इति सम्बोधनम् ॥७-९॥

सुबोधिनीसारः

त्वमुत्पथगः श्मशानवासित्वादसीति हेतोर्भृगुर्नैच्छत् । तदा देवश्चुक्रोध । ह स्फुटं शूलमुद्यम्य उद्वृह्य क्रूरनेत्रः तं भृगुं हन्तुमारेभे ॥६॥ पादयोः पतित्वा देवी पार्वती गिरा वाण्या तं शिवं सान्त्वयामास । अथो अनन्तरं मृगुर्वैकुण्ठं जगाम यत्र जनार्दनो विष्णुर्देवोऽस्ति ॥७॥ श्रियो लक्ष्म्या उत्सङ्गेऽन्तिके शयानं हरिं पदा लत्तया वक्षसि अताडयत् ततः पादप्रहारादुत्थाय सतां गतिर्भगवान् लक्ष्म्या सह स्वतल्पात् शय्यातोऽवरुह्य शिरसा मुनिं भृगुं ननाम ॥८॥ आह हे ब्रह्मन् ! ते त्वया स्वागतं सुष्ठु आगमनं कृतम् । अत्रासने क्षणं निषीद तिष्ठ आगतान् वो युष्मानजानतां नोऽस्माकम् उपरि क्षन्तुमर्हथ यूयं हे प्रभो बहुवचनमादरार्थम् ॥९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कोपाच्च तीक्ष्णदृष्टिः सन् शूलमुद्यम्य तं भृगुं हन्तुमारब्धवान् । गिरा स्तुत्यादिरूपया तं देवी सान्त्वयामास ॥६॥ अथानन्तरं वैकुण्ठं भगवतः स्थानं भृगुर्जगाम । स्पष्टम् ॥७॥ ततो लक्ष्म्या सह भगवानुत्थाय शिरसा मुनिं ननाम । तत्र हेतुमाह-सतां गतिरिति । सतां शिक्षयितुमित्यर्थः ॥८॥ आह च हे ब्रह्मन् ! ते त्वया स्वागतम् । अत्रास्मिन्नासने क्षणं निषीद उपविश । हे प्रभो ! वो यष्मानागतान् अजानतां नोऽस्माकमपराधं क्षन्तुमर्हसि ॥९॥

अन्वितार्थप्रकाशिका

आहेति ॥ आह स्म च हे ब्रह्मन् ! ते तव स्वागतम् । अत्रास्मिन्नासने क्षणं निषीद उपविश । हे प्रभो ! वो यष्मानागतान् अजानतां नोऽस्माकमपराधं क्षन्तुमर्हसि ॥ पुनीहीति ॥ तीर्थानां गङ्गादीनामपि तीर्थकारिणा पावित्र्यकारिणा परमपवित्रेण स्वपादोदकेन स्वलोकं लोकेन वैकुण्ठेन चतुर्दशलोकैर्वा सहितं मां मद्गतान् लोकपालांश्च पुनीहि ॥९-१०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उत्पथगो वेदविरुद्धमार्गगस्त्वमसीत्युक्त्वा आलिङ्गनं भृगुर्नैच्छत् इति हेतोः देवः शिवः ॥६-७-८-९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

नैच्छदिति ॥ त्वम् उत्पथगः असि इति वदन् परिरम्भणं भृगुः न ऐच्छत् । तदा देवः शिवः ह सुतरामित्यर्थः । चुकोप । तिग्मलोचनः तीक्ष्णदृष्टिः सन् शूलम् उद्यम्य तं भृगुं हन्तुम् आरेभे । तदा देवी गिरिजा, पादयोः पतित्वा तं शिवं गिरा मृदुवाचा सान्त्वयामास ॥६॥ अथो इति ॥ सः अथो अनन्तरं यत्र वैकुण्ठे जनार्दनः देवः तत्र जगाम । तत्र श्रियो लक्ष्म्याः उत्सङ्गे शयानं भगवन्तं दृष्ट्वा वक्षसि पदा अताडयत् ॥७॥ तत इति ॥ ततः सतां गतिः भगवान् उत्थाय लक्ष्म्या सह स्वतल्पात् अवरुह्य

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आशु मुनिं शिरसा ननाम। आह चेत्युत्तरस्मादपकृष्यते ॥८॥ यदाह तदाह आहेति त्रिभिः ॥ आहेति ॥ हे ब्रह्मन्! ते तव, स्वागतम्। अत्र आसने, क्षणं निषीद। हे प्रभो! आगतान् वो युष्मान् अजानतां नोऽस्माकम् अपराधमिति शेषः। क्षन्तुम् अर्हथ ॥९॥

कृष्णप्रिया

किंतु भृगऋषिने आलंगन स्वीकार न करते हुए कहा उत्पथगामी हो - वामपंथी हो याने लोक और वेद की मर्यादा का उल्लंघन किया है, इसलिए मैं आपसे नहिं भेट सकता। यह सुनकर भगवान शिवजी क्रोध से तिलमिला उठे। उनकी आंखे चढ गयी। उन्होंने त्रिशूल लेकर भृगु को मारना चाहा ॥६॥ परन्तु उसी समय भगवती देवी पार्वतीने उनके पैरों पर गीरकर बहुत अनुनय विनय द्वारा शिवजी का क्रोध शान्त किया। तत्पश्चात् भृगुऋषि भगवान् विष्णु के निवासस्थान वैकुण्ठमें गये ॥७॥ उस वक्त भगवान् विष्णु लक्ष्मीजी की गोदमें अपना सिर रखकर लेटे हुए थे। भृगुजी ने जा कर उनके वक्षः स्थलपर लात लगा दी। सज्जनों के आश्रय भगवान लक्ष्मीनाथ ने लक्ष्मीदेवी के साथ उठ बैठे ॥८॥ झटपट अपनी शय्या से नीचे उतरकर मुनि को सिर झुकाकर प्रणाम किया। भगवान ने कहा। भो ब्रह्मदेवता।' आपका स्वागत है भले पधारे। इस आसन पर विराजमान होकर कुछ क्षण आपराम कीजिये। हे ब्रह्मदेव आपके शुभागवमन का पता नथ। इसलिये मैं आपकी अगवानी न कर सका इसलिए आप मेरे अपराध को क्षमा करने के लिए योग्य है ॥९॥

[1]अतीव कोमलौ तात चरणौ ते महामुने। इत्युक्त्वा विप्रचरणौ मर्दयन् स्वेन पाणिना ॥१०॥
पुनीहि सह लोकं मां लोकपालांश्च मद्गतात्। पादोदकेन[2] भवतस्तीर्थानां तीर्थकारिणा ॥११॥
अद्याहं भगवँल्लक्ष्म्या आसमेकान्तभाजनम्। वत्स्यत्युरसि मे [3]भूतिर्भवत्पादहतांहसः ॥१२॥

कर्दमक्षमा

तात, महामुने, ते, चरणौअतीव, कोमलौ, इति, उक्त्वा, स्वेन, पाणिना, विप्रचरणौ, मर्दयन् ॥१०॥ भवतः, तीर्थानाम्, तीर्थकारिणा, पादोदकेन, सह, लोकम्, मद्गतान्, लोकपालान्, च, पुनीहि ॥११॥ भगवन्, अद्य, अहम्, लक्ष्म्याः, एकान्तभाजनम्, आसम्, भवत्पादहतांहसः, भूतिः, मे, उरसि, वत्स्यति ॥१२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तीर्थकारिणा तीर्थत्वनिमित्तेन ॥११-१२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अजानतां नः। तात पूज्य!। अहो अतीवकठोरदैत्यप्रेषितगदादीनामपि निजस्पर्शेन विदारकस्य मदुरसो व्याघातेनातीव कोमलौ ते चरणौ भग्नावित्युक्त्वा ॥★॥ ननु, त्वयाभिगमनाभ्युत्थानादिना मत्संमाननाकरणादहं तवेदमासनं न स्वीकरोमीति चेत्सत्यम्। मन्महापराधः खल्वभूदेव तत्र त्वत्कृपैव मे गतिरित्याह-अजानतामिति। वो युष्मान् बहुत्वं गौरवात्। नोऽस्माकमिति लक्ष्म्याद्यपेक्षया ॥१०॥ तीर्थत्वनिमित्तेन पावकेन। 'तीर्थं शास्त्राम्बुपावने' इति यादवः ॥★॥ रक्षणोपवेशे प्रयोजनं च मम सुखमेवेत्येवमतिस्तुत्या प्रतिपादयति-पुनीहि इति द्वाभ्याम्। सहलोकं श्रीवैकुण्ठलोकेन चतुर्दशभुवन्या च सहितम्। लोकपालान् श्रीब्रह्मरुद्रादीन् मद्गतान् मयि वर्तमानान्। तस्य विश्वोदरत्वात्तेषां तदंशत्वाद्वा। भगवान् हे परमपूज्य! अतः क्षणमुपविष्टस्य ते पादौ प्रक्षाल्य तज्जलं धारयामीति भावः। अत्र विश्वनाथः— यदि चेमं महापराधमपि क्षान्तवानेवासि तर्हि देहि पादोदकमित्याह-

---

[1]. अयं श्लोको नास्ति-वीर. विज.। [2]. भगवंस्तीर्थानां-विज.। [3]. नो भूतिर्भवत्पाद हतांहसि-विज.।

, स्वागतम्। अत्र
।।९।।

लोक और वेद
शिवजी क्रोध से
न्तु उसी समय
या। तत्पश्चात्
ी गोदमें अपना
आश्रय भगवान
ी सिर झुकाकर
पर विराजमान
ापकी अगवानी

ना ।।१०।।
र्णा ।।११।।
: ।।१२।।

भवत:, तीर्थानाम्,
, एकान्तभाजनम्,

सो व्याघातेनातीव
ं न स्वीकरोमीति
। नोऽस्माकमिति
। प्रयोजनं च मम
तम्। लोकपालान्
मुपविष्टस्य ते पादौ
दोदकमित्याह-

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ुनीहीति। तीर्थानां गङ्गादीनामपि तीर्थत्वकारणेति एतत् प्राप्त्यैव गङ्गादीनि तीर्थान्यभूवन्नित्यर्थः। अत्र भृगुकृते एतावत्यपराधे मैव सत्त्वगुणधर्मः प्रत्युत स्वस्यापराधित्वमननेन तत्प्रसादनं यदेतत् शुद्धसत्त्वधर्मो ज्ञेयः ।।११।। "नित्यं मे वसतिर्देव प्रपादाङ्कितस्थले।" इति लक्ष्मीवाक्यादधुना मां लक्ष्मीर्न हास्यतीत्याह-अद्येति। भवति सर्वदा तिष्ठतीति भवन्स चासौ दस्तेन हतांहसो नष्टकिल्बिषस्य। लोकसङ्ग्रहार्थेयमुक्तिः। एतेनैतद्भवत्पादचिह्नं सर्वदा श्रीस्थैर्यायाहं न त्यक्ष्य इति ध्वनितम् एतदेव श्रीवत्सपदेनापि वर्ण्यते कैश्चिदति "श्रीवत्समिति नामापि जायतां पादलक्षणम्" इति। एतच्च तृतीयस्कन्धे बहुधा र्णितम्। 'भूतिः श्रीजन्मभस्मसु' इति यादवः ।।★।। ननु मनोदुःखभरेण मया महापराधः कृतः लज्जया कथमत्रोपवेष्टव्यमित्याशङ्क्य महाननुग्रह एव भवता कृत इत्याह-अद्येति। एकान्तं परमं भाजनमाश्रयः तत्र च त्वमेव मर्थोऽसीत्याह-भगवन् हे सर्वशक्तियुक्तेति। अतो भूतिर्लक्ष्मीर्मे वक्षसि सदा वत्स्यतीत्यर्थः। तद्धेतुमेवाभिव्यञ्जयति-ादिति। तदेवमस्मिन् श्रीविकुण्ठासुते लक्ष्मीरेवाप्येतदनन्तरमेव भविष्यतीति गम्यते ।।१२।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

क्षणोपवेशे प्रयोजनं च मम सुखमेवेत्येवमतिस्तुत्या प्रतिपादयति-पुनीहि इति द्वाभ्याम्। सह लोकं श्रीवैकुण्ठलोकेन तुर्दशभुवन्या च सहितं लोकपालान् श्रीब्रह्मरुद्रादीन् मद्गतान् मयि वर्तमानानित्यर्थः। तस्य विश्वोदरत्वात्तेषां तदंशत्वाद्वा। ावान् हे परमपूज्य ! अतः क्षणमुपविष्टस्य ते पादौ प्रक्षाल्य तज्जलं धारयामीति भावः ।।११।। ननु मनोदुःखभरेण मया हापराधः कृतः लज्जया कथमत्रोपवेष्टव्यमित्याशङ्क्य महाननुग्रह एव भवता कृत इत्याह-अद्येति। एकान्तं परमं भाजनमाश्रयः त्र च त्वमेव समर्थोऽसीत्याह-भगवन् हे सर्वशक्तियुक्तेति। अतो भूतिर्लक्ष्मीर्मे वक्षसि सदा वत्स्यतीत्यर्थः। तद्धेतुमेवाभिव्यञ्जयति-ादिति। तदेवमस्मिन् श्रीविकुण्ठासुते लक्ष्मीरेवाप्येतदनन्तरमेव भविष्यतीति गम्यते ।।१२।।

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

क्षणोपदेशे प्रयोजनं चाह-पुनीहीति। सहलोकं श्रीवैकुण्ठलोकेन चतुर्दशभुवनैर्वा सहितम्, लोकपालान् श्रीब्रह्मरुद्रादीन् मद्गतान् मयि वर्तमानानित्यर्थः। विश्वोदरत्वात्त्वदंशत्वाद्वा। हे भगवन् ! हे परमपूज्येत्यर्थः। अतः णमुपविष्टस्य सतस्ते पादौ प्रक्षाल्य तज्जलं धारयामीति भावः ।।१०।। ननु मनोदुःखभरेण मया महापराधः कृतः, ज्जया कथमत्रोवेष्टव्यमित्याशङ्क्य महानुग्रह एव भवता कृत इत्याह-अद्येति। एकान्ततः परमनिष्ठाया भाजनम्, अत्र च मेव समर्थोऽसीत्याह-भगवन् ! हे सर्वशक्तियुक्तेति। अतो भूतिस्त्वत्पुत्री लक्ष्मीर्मे वक्षसि सदा वत्स्यतीत्यर्थः। द्धेतुमेवाभिव्यञ्जयति-भवदिति। एतेन लक्ष्म्या माहात्म्यं तज्जनकत्वेन तस्य चाधिक्यं सूचितम् ।।११।। वैकुण्ठे श्रीविकुण्ठानन्दने श्रीवैकुण्ठेश्वर इति तस्य तादृश्युक्तिर्युक्तैवेति भावः। किञ्च लक्ष्मीप्रीत्या प्रपञ्चान्तर्निर्मिते वैकुण्ठलोके ोर्गमनं ज्ञेयम्। आत्मजाया लक्ष्म्यास्तत्र सौभाग्यभरप्राकट्येनात्मनोऽप्यादरादिसम्भावनया गत्यत्वात्, प्रपञ्चातीत एव हसा परीक्षार्थगमनाद्यसम्भवादिति। निर्वृतः स्वस्थचित्तः, यतस्तर्पितः प्रीणितः, अतो भक्तौ उत्कण्ठ उत्सुकः सन्, वा भक्त्या प्रेम्णा उद्गतः कण्ठो यस्य स बाष्परुद्धकण्ठ इत्यर्थः ।।१२।।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ।।६-१४।।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

पुनीहीति। सह लोकं सवैकुण्ठं मां मद्गतान् मदावेशितचित्तान् मद्धार्यान् इति वा लोकपालांश्च हे भगवन् ! पादोदकेन ीहि। कथम्भूतेन तीर्थानां गङ्गादीनामपि तीर्थकारिणा पवित्रकारिणा ।।११।। अद्येति। हे भगवन्नद्याधुनाऽहं लक्ष्म्या एकान्तभाजनं यताश्रय आसम्। तत्र हतुत्वेनात्मानं विशिषन्नाह-भवतः पादेन पादपाडनेन हतमंहः पापं यस्य तस्य ममोरसि भूतिर्लक्ष्मीर्वसत्यनपायितया वर्तिष्यतीति ।।१२।।

श्रीमद्विजयध्वजकृता पदरत्नावली

अहमेव गतं गतिः आश्रयो येषां ते मद्गतास्तान् तीर्थकारिणा शुद्धिकारिणा । तीर्थं शास्त्रेष्वम्भसि पावने इति यादवः ॥११॥ असुरजनमोहनार्थमाह-अद्येति । अद्याहं लक्ष्म्याः श्रियः कान्तेन नियमेन भाजनं पात्रमासम् । भूतिर्लक्ष्मीः । भूतिः श्रीजन्मभस्मस्विति च नित्यकृतवासापि अद्यप्रभृति वत्स्यति स्पष्टवासं करिष्यति भवता नित्यशक्तेन पादेन ज्ञानेन हतं नष्टम् अंहो यस्मिस्तत्तथा । नित्यसत्ताज्ञानात्मकत्वेन दोषरहितमिति वा तस्मिन्निति तथा बाह्यार्थः । कथा यदि वाक्यार्थः ॥१२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥८-१५॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

त्वया अभिगमनाभ्युत्थानादिना मत्सम्माननाकरणात्तवेदमासनं न स्वीकरोमीति चेत् सत्यम् । मन्महापराधः खल्वभूदेव । तत्र त्वत्कृपैव मे गतिरित्याह-अजानतामिति ॥१०॥ यदि चेमं महापराधमपि क्षान्तवानेवासि तर्हि देहि पादोदकमित्याह-पुनीहीति । तीर्थानां गङ्गादीनामपि तीर्थत्वकारणेति एतत् प्राप्त्यैव गङ्गादीनि तीर्थान्यभूवन्नित्यर्थः । अत्र भृगुकृते एतावत्यपराधे क्षमैव सत्त्वगुणधर्मः प्रत्युत स्वस्यापराधित्वमननेन तत्प्रसादनं यदेतत् शुद्धसत्त्वधर्मो ज्ञेयः ॥११॥ ननु च तुभ्यं त्वत्प्रियायै प्रेमवत्यै लक्ष्म्यै च दुःखं ददानस्य ममाकल्पं नरकेष्वेव वासो भविष्यति । यदद्य पामरविप्रस्य महापापिनो ममापवित्रपादस्त्वद्वक्षसि अगन् इत्यनुतापजजरे सति तस्मिन् भो मुने ! कृपासिन्धो आवयोस्त्वं परममुत्सवमेव कृतवानसीत्याह-अद्येति ॥१२॥

गूढार्थदीपिनी

तीर्थानां गङ्गादीनामपि तीर्थकारिणा पवित्रत्वकारिणा पादोदकेन मां पुनीहीति योज्यम् ॥१०॥ अतीव कोमलौ चरणौ वज्रवत्कठोरमद्वक्षःस्पर्शेन पीडिताविति शेषः । मर्दयन् सन् आहेति योज्यम् ॥११॥ एकान्तभाजनं मुख्यपात्रं निवासस्थानमित्यर्थः । यतः मे उरसि भूतिः लक्ष्मीः सदा वत्स्यति । भवत्पादेन हतमंहः पापं यस्य मे । एतच्च लोकसङ्ग्रहार्थमिति ज्ञेयम् ॥१२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तीर्थानामपि तीर्थकारिणा पवित्रत्वकारिणा ॥११-१२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स्वगुणान् भगवांस्तत्र स्थापयतीति सूचयति, अमानी मानदो भगवानिति परीक्षायां निर्णयः सिद्धो भविष्यतीति एवं वचसा स्वापकर्षं ख्यापितवान् अपराधकर्तुः स्तोत्रं च वचसैव कायिकान् पूर्ववद्विरुद्धान् प्रतिपादयति-पुनीहीति द्वाभ्याम् । परमपवित्ररूपे भगवान् पावित्र्ये परमैश्वर्यं प्राप्तः । अत एव नखोदकरूपायां गङ्गायाम् आज्ञया पावित्र्यं स्थापितवान् अन्यथा कथं शास्त्रनिषिद्धे पावित्र्यं भवेत् । तद्विरुद्धमेतत् पुनीहि मामिति लोकसहितत्वेन सुतरां स्वस्यापावित्र्यस्थापनं विरुद्धं भगवान् स्वधर्मान् तत्र स्थापयित्वा तद्धर्मान् स्वयं गृहीत्वा सर्वमेवमाह-अन्यथा ब्राह्मणस्य नाशो भवेत् । प्रमेयबलेन सन्मार्ग एव नाशितः स्यात् तथा महति राजद्रोहे कृते राजकीयास्तन्नाशयेयुरेव । स चेद्राजा तमपराधकर्तारं स्वसिंहासने निवेशयेत् तदा बाधकाः सर्वे साधका भूत्वा न पीडां कुर्युः अन्यथा यथा कथञ्चिदपि तन्नाशयेयुरेव । अतो भगवानेवं प्रघट्टकेन स्तोत्रं करोति स्वधर्मान् स्थापयितुं तुल्यत्वाभावाय च तद्धर्मान् गृह्णाति मोहिकैषा लीला हीनत्वप्रतिपादिका ज्ञातव्या । अतिदैन्यं ख्यापयन् वीर्यविरुद्धमाह-मद्गतान् लोकपालांश्च पुनीहीति । स्वस्मिन् विद्यमानानां तस्य सम्बन्धाभाव एव पावनं दूरे तत्रापि पादोदकेन पावनं सुतरां कीर्तिविरुद्धं तीर्थानां तीर्थकारिणेति गङ्गादीनामप्यनेनैव तीर्थत्वमिति सहेतुकं तस्य पावनकर्तृत्वं निरूपितम् । लक्ष्मीविरुद्धमाह-अद्याहं भगवान्

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

क्ष्म्या आसमेकान्तभाजनमिति । असिद्धा भगवति लक्ष्मीराधिदैविकी इयं चाधिभौतिकी । सापि नित्या लक्ष्मीस्वरूपेण स्वरूपेण चैतद्विरुद्ध्यते । ज्ञानविरुद्धमाह-वत्स्यत्युरसि मे भूतिरिति । न हि क्रियाशक्तिर्ज्ञानपूर्णे तिष्ठति । तत्राप्यन्तरङ्गा त्वा वत्स्यतीत्याशंसनात् वैराग्यविरोधोऽपि भवत्पादहतांहस इति त्वच्चरणारविन्दसम्बन्धेन स्वस्य पापक्षयकथनं धर्मिविरुद्धमपि वं सर्वमात्मानं स्थापयित्वा तदीयं स्वस्मिन् गृहीत्वा तथोक्तवान् । अनेनैव तस्य प्रायश्चित्तमप्युपदिष्टम् । यदा कदाचिदपि च्चरणसेवां करिष्यसि तदा तव पापक्षयो भविष्यतीति ॥१०-१२॥

श्रीसुबोधिनीसारः

हे तात ! हे महामुने ! ते चरणौ अतीव कोमलौ इत्येवमुक्त्वा स्वहस्तेन विप्रस्य चरणौ संस्पृशन् ॥१०॥ हलोकं मां मयि गतान् लोकपालांश्च तीर्थानां तीर्थकारिणा पवित्रसम्पादकेन भवतस्तव पादोदकेन त्वं पुनीहि इति ॥११॥ भगवन् ! अद्य इदानीं लक्ष्म्या एकान्तभाजनम् एको योग्योऽहमासं बभूव । भवतस्तव पादेन हतमंहः पापं यस्य तस्य ममोरसि हृदये भूतिर्लक्ष्मीर्वत्स्यति निश्चला स्थास्यति ॥१२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भवतः पादोदकेन सहलोकं लोकेन वैकुण्ठेन सहितं मां मद्गतान् लोकपालांश्च पुनीहि । पादोदकमाहात्म्यमाह-तीर्थानां ङ्गादीनामपि तीर्थकारिणा पावित्र्यकारिणेति ॥१०॥ स्नेहं सूचयन् सम्बोधयति-तातेति । स्वापराधं सूचयन् महत्त्वेन सम्बोधयति-हामुन इति । ते चरणावतीव कोमलौ वज्रकर्कशमद्वक्षःस्पर्शेन परिपीडितौ इति शेषो ज्ञेयः । क्वचित्पुस्तके ईदृशः पाठ एवास्तीति यम् । इत्युक्त्वा स्वेन पाणिना विप्रचरणौ मर्दयन् पुनराह ॥११॥ हे भगवन् ! अद्याहं लक्ष्म्या एकान्तभाजनं नियताश्रय आसम् । त्र हेतुमाह-भवत्पादस्पर्शेन हतमंहः पापं यस्य तस्य मे वक्षसि भूतिर्लक्ष्मीर्वत्स्यतीति ॥१२॥

अन्वितार्थप्रकाशिका

अतीवेति । हे तात ! हे महामुने ! ते चरणावतीव कोमलौ वज्रकर्कशमद्वक्षःस्पर्शेन परिपीडितौ इति शेषो ज्ञेयः । चित्पुस्तके ईदृशः पाठ एवास्तीति क्वापि अतीवेत्यर्धमपि नास्ति । इत्युक्त्वा स्वेन पाणिना विप्रचरणौ मर्दयन् पुनराह स्म ११॥ अद्येति ॥ हे भगवन् ! अद्याहं लक्ष्म्या एकान्तभाजनं नियताश्रय आसं यतः भवत्पादस्पर्शेन हतमंहः पापं यस्य तस्य मे क्षसि भूतिर्लक्ष्मीः सदा वत्स्यतीति ॥१२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे भगवन् भवतः इत्यपि पाठः ॥१०॥ हे भगवन् समर्थ ! अहमद्य लक्ष्म्या एकान्तभाजनं नियताश्रयणो योग्यम् सम् । यतः भवत्पादस्पर्शेन हतांहसो हतपापस्य मे उरसि भूतिर्लक्ष्मीर्वत्स्यति स्थिरा भविष्यति ॥११॥ तस्य भगवतः द्रया गम्भीरया गिरा तर्पितः तूष्णीमभूत् ॥१२-१३॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पुनीहि इति ॥ हे भगवन् ! तीर्थानां तीर्थकारिणा पादोदकेन भवत्पादप्रक्षालनजलेन सहलोकं लोकसहितं मां मद्गतान् कपालांश्च पुनीहि ॥१०॥ अद्येति ॥ हे भगवन् ! अद्याधुना अहं लक्ष्म्यास्त्वत्सुतायाः श्रियः, एकान्तभाजनं नियताश्रयः सम् । तत्र हेतुनात्मानं विशंषन्नाह । भगवतः पादेन पादकृतताडनेन हतमंहः पापं यस्य तस्य, मे मम, उरसि भूतिर्लक्ष्मीः, स्यति । अनपायितया वासं करिष्यति ॥११॥ एवमिति ॥ वैकुण्ठे भगवति, एवमुक्तप्रकारेण, ब्रुवति ब्रुवाणे सति, भृगुः, द्रया तस्य भगवतोऽतिगम्भीरया गूढाशयगर्भया गिरा वाचा, निर्वृतः सुखितः तर्पितः भक्त्युत्कण्ठया भक्त्युद्रेकेण श्रूणि लोचनयोर्यस्य स तथाभूतः सन् तूष्णीम् आस ॥१२॥

कृष्णाप्रिया

हे महामुने आपके श्रीचरण अत्यन्त कोमल है । मुझे भय है कि मेरे कठोर वक्ष::स्थल से आपके चरणकमल को चोट लगी होगी । इतना कहकर भगवान श्रीकृष्ण भृगुमुनि के चरण को गोदमें लेकर अपने हाथों से सहलाने लगे ।।१०।। भृगुऋषिजी महाराज तीर्थो को भी तीर्थ बनानेवाले आपके चरणोदल याने चरणके जलसे वैकुण्ठलोक और मेरे अन्दर रहनेवाले लोकपालों को और मुझे पावन कीजिये ।।११।। ऋषिवर्य ! सही श्रीहरि: आज से ही, आपकी कृपासे सच्चे रूपमें श्रीनिवास बना हुं । क्योंकी आपके चरणकमल के स्पर्श से मेरे हृदय के मनके पाप प्रक्षालिय हो गये है । अब आपके चरणों से चिन्हित मेरे वक्ष: स्थल पर लक्ष्मी सदा सर्वदा निवास करेगी ।।१२।।**ीशुक उवाच**

[१]एवं ब्रुवाणे वैकुण्ठे [२]भृगुस्तन्मन्द्रया गिरा । निर्वृतस्तर्पितस्तूष्णीं भक्त्युत्कण्ठोऽश्रुलोचनः ॥१३॥
[३]पुनः स्वसत्रमाव्रज्य मुनीनां ब्रह्मवादिनाम् । स्वानुभूतमशेषेण राजन् भृगुरवर्णयत् ॥१४॥
तन्निशम्याथ मुनयो विस्मिता मुक्तसंशयाः । भूयांसं श्रद्दधुर्विष्णुं यतः शान्तिर्यतोऽभयम् ॥१५॥
धर्मः साक्षाद् यतो ज्ञानं वैराग्यं च [४]तदन्वितम् । ऐश्वर्यं चाष्टधा यस्माद् यशश्चात्ममलापहम् ॥१६॥

कर्दमक्षमा

श्रीशुकः, उवाच ।

वैकुण्ठे, एवं, ब्रुवाणे, भृगुः, तत्, मन्द्रया, गिरा, निर्वृतः, तर्पितः, तूष्णीम्, भक्त्युत्कण्ठः, अश्रुलोचनः ॥१३॥ राजन्, भृगुः, पुनः, स्वसत्रम्, आव्रज्य, ब्रह्मवादिनाम्, मुनीनाम्, स्वानुभूतम्, अशेषेण, अवर्णयत् ॥१४॥ विस्मिताः, मुनयः, मुक्तसंशयाः, तत्, निशम्य, यतः, शान्तिः, यतः, अभयम्, भूयांसम्, विष्णुं, श्रद्दधुः ॥१५॥ यतः, याक्षात्, धर्मः, ज्ञानम्, वैराग्यम्, च, तदन्वितम्, ऐश्वर्यम्, च, अष्टधा, यस्मात्, आत्ममलापहम्, यशः, च ॥१६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्य मन्द्रया गम्भीरया गिरा निर्वृत्तस्तूष्णीं बभूवेति शेषः ॥१३-१४॥ विस्मिता अपराधातिरेकेऽपि निर्विकारित्वेन भूयांसं श्रद्दधुः महत्तमं निश्चितवन्तः यतो यस्मिन् ॥१५॥ वैराग्यं च चतुर्विधमिति पाठे तच्चातुर्विध्यमेवं द्रष्टव्यम् । विषयांस्त्यक्तुमशक्नुवतोऽपि सम्मानेच्छात्याग आद्यं वैराग्यं विषयाणां मध्ये लवणादिव्यतिरेकेणापि वृत्तिर्द्वितीयम् तथा वृत्तावपि मनसि रागशैथिल्येन बाह्येन्द्रियैरेव विषयसेवनं तृतीयम् तत्राप्यौदासीन्यं चतुर्थम् यथाऽऽहुः -

वैराग्यमाद्यं यतमानसंज्ञं क्वचिद्विरागो व्यतिरेकसंज्ञः ।
एकेन्द्रियाख्यं हृदि रागसौक्ष्म्यं तस्याप्यभावस्तु वशीकृताख्यम् ।। इति ॥१६-१८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्र विश्वनाथः-ननु च तुभ्यं त्वत्प्रियायै प्रेमवत्यै लक्ष्म्यै च दुःखं ददानस्य ममाकल्पं नरकेष्वेव वासो भविष्यति । यदद्य पामरविप्रस्य महापापिनो ममापवित्रपादस्त्वद्वक्षसि अग्न इत्यनुतापजजरे सति तस्मिन् भो मुने ! कृपासिन्धो आवयोस्त्वं परममुत्सवमेव कृतवानसीत्याह-अद्येति । 'यत्सेवया चरणपद्मपवित्ररेणुं न श्रीर्विरक्तमपि मां विजहाति यस्याः । प्रेक्षालवार्थमितरे नियमान् वहन्ति' इति तृतीयोक्ते ॥१२॥ एवमुक्तविधया । तस्य विष्णोः । मन्द्रया गम्भीरया । 'मन्द्रस्तु गम्भीरे' इत्यमरः ।

---

[१] "श्रीवत्समिति नामापि जायतां पादलक्षणः ।"-इदमर्धमधिकं विज. । [२] भृगुस्तत्सार्द्रया गिरा-विज. ; भृगुस्तं सान्द्रया-गो. प्रे. टी. । [३] पुनश्च-श्रीधर. वंशी. वीर. विज. । [४] चतुर्विधं-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

र्पितस्तृप्तिं प्रापितः ॥★॥ तूष्णीमित्यश्रुरुद्धकण्ठत्वेन स्तुत्यसामर्थ्यात् । अत्र भगवल्लीलाविनोदसूत्रधारनर्तितस्य भृगोरेतत्कर्मणि पराधो वाच्य इति प्राञ्च ॥१३॥ ॥०॥ ॥★॥ ॥०॥ ॥१४॥ तद्धृगूक्तम् । अथ श्रवणोत्तरम् । अतिरेक आधिक्यम् । अभयं भयनिवर्तकता ॥★॥ विष्णुं स्वमाहात्म्येन विश्वव्यापकं भूयांसे त्रिष्वप्यधीशेष्वतिशयेन महान्तं न तु महन्मात्रं तच्च युक्तमेवेति तेषां वाक्यमप्यनुवदति-यत इत्यादिना - तत्तीर्थसाधनमित्यन्तेन । यतो हेतोरन्येषामपि भृगोरिव शान्तिरक्षोभो भवति किमुत स्वस्यैव तस्येत्यर्थः । स्वल्पं प्रदीपादावेव क्षोभो दृश्यते न तु महति सूर्यादाविति तेन महत्तमत्वमनुमितमिति भावः । अतः सापराधतयाऽप्युपसन्नानां यतो भृगोरिव भयाभावोऽपि भवति ॥१५॥ भगवच्छब्दार्थतां वर्णयंस्तत्राह-धर्म इति । साक्षात्पूर्णः । तदन्वितम् । आद्यं यतमानाख्यम् । तत आद्यावाप्तेरनन्तरम् । लवणादीत्यत्रादिना घृतादिसङ्ग्रहः । द्वितीयं व्यतिरेकाख्यम् । तथा वृत्तावपि कस्यचिद्विषयत्यागे सत्यपि तृतीयमेकेन्द्रियाख्यम् । तत्रापि बाह्येन्द्रियविषयसेवनेऽपि । औदासीन्यमिच्छाराहित्यं चतुर्थं वशीकाराख्यम् । अत्रार्थे साङ्ख्यवृद्धसम्मतिमाह-तत्राहुरिति । तस्यापि हृदि रागमोक्षस्यापि । यस्माद्यस्य ॥★॥ तदेवं महत्तमत्वस्य विहमुक्तं हेतुमपि कैमुत्येन दर्शयंस्ततोऽप्राकृतमहासम्पत्तिमपि दर्शयति-धर्म इति त्रिभिः । साक्षाद्धर्मो भगवद्धर्मे यतः साक्षात्पदस्य सर्वैरप्यन्वयः । तेन साक्षात् ज्ञाते श्रीभगवदनुभवः तदन्वितं त्रिक एककालः भक्तिर्विरक्तिर्भगवत्प्रबोधः इत्येकादशोक्तरीत्या सप्रेमतदनुभवान्वितमेव न तु शुष्कं चतुर्विधमिति पाठस्तैर्व्याख्यातः । तत्र यतमानसंज्ञमिति यतः संयतो मानः सम्मानेच्छा यत्रेत्यर्थः । क्वचिदिति लवणादौ विरागो नाम व्यतिरेकसंज्ञं वैराग्यमित्यन्वयः । एकेति । एकानि एकमुखीकृतानि इन्द्रियाणि यस्मिन् तत् रागसौक्ष्म्यं रागस्याल्पतयावसानमिति ज्ञेयम् । यद्वा, भक्त्येकरागतश्चतुर्वर्गत्यागेन चतुर्विधं ततश्चाष्टधाणिमादिभेदै-श्वर्यमप्राकृतं तदप्रार्थितमपीति भावः । यथगाा तृतीये भक्तिरन्विच्छतो मे गतिमण्वीं प्रयुङ्क्ते इत्युक्त्वा श्रीकपिलदेवोऽप्याह ——

'अथो विभूतिं मम मायया चितामैश्वर्यमष्टाङ्गमनुप्रवृत्ताम् ।
श्रियं भागवतीं वा स्पृहयन्ति भद्रां परस्य मे तेऽश्नुवते हि लोके ॥' इति ॥

यत इति मुहुर्निर्देशः शान्त्यादीनां तदेकनिष्ठतां बोधयति । यस्माच्चात्मनः सर्वेषां मनसः मलं चाञ्चल्यादिदोषं श्रवणादिना अपहन्ति दूरादेव नाशयतीति तथा तत् ॥★॥ अत्र विश्वनाथोऽपि :- तदन्वितमित्यस्य ज्ञानेऽप्यन्वयात् 'भक्तिः परेशानुभवो विरक्तिः' इति त्रिकस्य यौगपद्यमेकादशोक्तमिवात्रापि द्रष्टव्यम् ॥१६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वैकुण्ठे श्रीविकुण्ठनन्दने निर्वृतः स्वस्थचित्तः यतस्तर्पितः प्रीणितः अतो भक्त्या सादरप्रेम्णा बाष्परुद्धकण्ठ-त्वात्तदुद्भूतकण्ठस्तदीयस्वरो यस्य सः तादृशः सन्नश्रुलोचनो बभूव ॥१३॥ मुनीनां ब्रह्मवादिनां दीर्घसत्र एव मननार्थं वेदाभ्यासपराणां न तु निर्णीतवेदार्थानामित्यर्थः ॥१४॥ विष्णुं स्वमाहात्म्येन विश्वव्यापकं भूयांसे त्रिष्वप्यधीशेष्वतिशयेन महान्तं न तु महन्मात्रं तच्च युक्तमेवेति तेषां वाक्यमप्यनुवदति-यत इत्यादिना - तत्तीर्थसाधनमित्यन्तेन । यतो हेतोरन्येषामपि भृगोरिव शान्तिरक्षोभो भवति किमुत स्वस्यैव तस्येत्यर्थः । स्वल्पं प्रदीपादावेव क्षोभो दृश्यते न तु महति सूर्यादाविति तेन महत्तमत्वमनुमितमिति भावः । अतः सापराधतयाऽप्युपसन्नानां यतो भृगोरिव भयाभावोऽपि भवति ॥१५॥ तदेवं महत्तमत्वस्य विहमुक्तं हेतुमपि कैमुत्येन दर्शयंस्ततोऽप्राकृतमहासम्पत्तिमपि दर्शयति-धर्म इति त्रिभिः । साक्षाद्धर्मो भगवद्धर्मे यतः साक्षात्पदस्य सर्वैरप्यन्वयः । तेन साक्षात् ज्ञाते श्रीभगवदनुभवः तदन्वितं त्रिक एककालः भक्तिर्विरक्तिर्भगवत्प्रबोधः इत्येकादशोक्तरीत्या सप्रेमतदनुभवान्वितमेव न तु शुष्कं चतुर्विधमिति पाठस्तैर्व्याख्यातः । तत्र यतमानसंज्ञमिति यतः संयतो मानः सम्मानेच्छा यत्रेत्यर्थः । क्वचिदिति लवणादौ विरागो नाम व्यतिरेकसंज्ञं वैराग्यमित्यन्वयः । एकेति । एकानि एकमुखीकृतानि इन्द्रियाणि यस्मिन् तत् रागसौक्ष्म्यं रागस्याल्पतयावसानमिति ज्ञेयम् । यद्वा, भक्त्येकरागतश्चतुर्वर्गत्यागेन चतुर्विधं ततश्चाष्टधाणिमादिभेदैरैश्वर्यमप्राकृतं तदप्रार्थितमपीति भावः । यथगाा तृतीये भक्तिरन्विच्छतो मे गतिमण्वीं प्रयुङ्क्ते इत्युक्त्वा श्रीकपिलदेवोऽप्याह ——

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

'अथो विभूतिं मम मायया चितामैश्वर्यमष्टाङ्गमनुप्रवृत्ताम् ।
श्रियं भागवतीं वा स्पृहयन्ति भद्रां परस्य मे तेश्नुवते हि लोके ॥' इति ॥

यत इति मुहुर्निर्देशः शान्त्यादीनां तदेकनिष्ठतां बोधयति । यस्माच्चात्मनः सर्वेषां मनसः मलं चाञ्चल्यादिदोषं श्रवणादिना अपहन्ति दूरादेव नाशयतीति तथा तत् ॥१६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

मुनीनां ज्ञानपराणाम्, अतो ब्रह्मवादिनां सदा ब्रह्मनिरूपणशीलानाम् । यद्वा, वेदार्थतत्त्वनिर्धारणपराणामित्यर्थः । यतो मुनीनां मननशीलानाम् । हे राजन्निति श्रीभगवदुत्कर्षसम्पत्त्या प्रहर्षोदयात् । यद्वा तेनैव राजमानः ॥१३॥ विष्णुं स्वमाहात्म्येन विश्वव्यापकम्, तत्त्वयुक्तमेवेत्याह-यत इत्यादि-सपादैस्त्रिभिः । यस्मिन् वर्तते । यद्वा, यस्मादन्येषामपि शान्त्यादिकं भवति । अभयं भयाभावः । य इति मुहुर्निर्देशतः शान्त्यादीनां तदेकनिष्ठताम्, पक्षान्तरे च तत्प्रसादैकलभ्यतां बोधयति । साक्षात् स्वयमेव धर्मः, पक्षान्तरे च प्रत्यक्षमेवेत्यर्थः । ततश्चास्य सर्वैरप्यन्वयः । तेनानिर्वचनीयेन वस्तुना भक्त्याख्येनान्वितम्, - सर्वत्र दृढवैराग्ये सति स्वत एव भकक्त्युदयात् । पाठान्तरे तैर्व्याख्यातमेव । यद्वा, भक्त्येकरागतश्चतुर्वर्गवैराग्येण चतुर्विध इति पारमार्थिकमुक्त्वा लौकिकमप्याह-ऐश्वर्यमिति । अष्टधेति अणिमाद्यष्टभेदैः, आत्मनः सर्वेषां मानसो मलं चाञ्चल्यादिदोषं श्रवणादिनापहन्ति, दूरादेव नाशयतीति तथा तत् ॥१४-१५॥ शान्त्यादिनापि स एव साध्य इत्याह-मुनीनामिति समचेतसां सर्वत्र तुल्यबुद्धीनामकिञ्चनानां निरहङ्काराणां साधूनां वैष्णवानाम् । विशेषणानामेषां यथोत्तरं हेतुत्वं हेतुमत्त्वं वा । गतिमाश्रयं गम्यं बाहुः शास्त्रज्ञा इति ममुक्षुभ्यो मोक्षदत्वं स्वतः परमपुरुषार्थं चोक्तम् ॥१६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

विकृतत्वात् ब्रह्मादयः प्रकृतिवश्याः परमपुरुषस्त्वत्प्रकृतिवश्यः अपि तु परः । ततः इन्द्रस्वतो हेयप्रत्यनीकः अतः प्रकृतिवश्येभ्यश्चेतनेभ्यः पर इति निश्चितवन्त इत्यर्थः ॥१५॥ तदेव प्रपञ्चयति-धर्मः साक्षादिति । मायया प्रकृत्या गुणाः सत्त्वादयः विषमावस्थिताः ॥१६-२५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमिति । तस्य भवतो मन्द्रया गम्भीरया आशयगर्भया गिरा निर्वृतः सुखितः तर्पितश्च भक्त्युत्कण्ठया भक्त्युद्रेकेणाश्रूणि लोचनयोर्यस्य तूष्णीमास ॥१३॥ पुनरिति ॥ आव्रज्यागत्य हे राजन् ! स्वेनात्मनाऽनुभूतमशेषेणावर्णयत ॥१४॥ तदिति । तद्भृगुणोपवर्णितं निशम्य मुक्तसंशयाः अत एव निर्वृताः सुखिताः विष्णुमेव सर्वोत्कृष्टं श्रद्दधुर्निश्चितवन्तः । परत्वोपयुक्तगुणाविष्कारपूर्वकनिश्चयप्रकारानेवाह-यतः शान्तिरित्यादिना यच्छब्दानां त्रिविधाकृतयस्तस्येत्युपरिष्टात्सम्बन्धः । यतः यस्मिन् शान्तिः यतः सेव्यमानादभयं मुक्तिः यद्वा यतो यस्मादुपासनादेव शान्तिरिति एवमुत्तरत्रापि ॥१५॥ धर्मोऽत्र ब्रह्मण्यताज्ञानं सर्वविषयकं वैराग्यं विषयानभिलाषः । तदन्वितं शान्त्यादिभिः सहितमष्टधाणिमादिभेदेनाष्टविधमैश्वर्यं चात्मनः पुंसः मलमपहन्तीति तथा तद्यशो यस्मिन्नित्यर्थः ॥१६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

श्रिया सहितवत्सरमुरः श्रीवत्सम् उरो वत्सं च वक्षश्च भुजान्तरमुदीर्यत इति उत्पलमालाभिधानं पादलक्षणः पादां कः श्रीवत्समिति नाम जायतामित्यन्वयः ॥१३-१४॥ भूयांसमत्युत्तमम् । यतो यस्माद्धरेः शान्तिर्मोक्षो मङ्गलं वा पुंस इति शेषः ॥१५॥ एकान्तभक्तानां धर्मादिष्वनपेक्षालक्षणं वैराग्यमात्मनो मनसो मलनाशनम् ॥१६-१७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

यद्यपि पूर्वं श्रीविष्णौ विनयाख्या एव गुणोपलक्षितस्तथापि स खलु गुणः सर्वं पूरयितुमेव स्पर्धादिविषयराहित्यात्

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

पूर्णतया सम्भवतीति तेनान्येऽपि तस्य गुणा लक्षिता इत्याह- धर्म इति ॥१६-५४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मन्द्रया गम्भीरया तूष्णीमित्यश्रुरुद्धकण्ठत्वेन स्तुत्यसामर्थ्यात् अत्र भगवल्लीलाविनोदसूत्रधारनर्तितस्य भृगोरेतत्कर्मणि पराधो वाच्य इति प्राञ्चः ॥१३-१५॥ साक्षाद्धर्मः श्रवणकीर्तनादिलक्षणो यतः साक्षात्पदस्य सर्वत्रान्वयात्। ज्ञानं भगवदनुभवः न्वितमित्यस्य ज्ञानेऽप्यन्वयात् भक्तिः परेशानुभवो विरक्तिरिति त्रिकस्य यौगपद्यमेकादशोक्तमिवात्रापि द्रष्टव्यम्। चतुर्विधमिति ठे चतुर्वर्गोपेक्षालक्षणमेव चतुर्विधवैराग्यम्। न तु शुष्कम् अष्टधैश्वर्यमिति। भक्तेरननुसंहितं फलं यदुक्तं श्रीकपिलदेवेन —

"अथो विभूतिं मम माययाचितामैश्वर्यमष्टाङ्गमनुप्रवृत्तम्।
श्रियं भागवतीं वा स्पृहयन्ति भद्रां परस्य मे तेश्नुवते हि लोके" ॥ इति ॥

यशश्च श्रोतुर्जनस्यात्मनो मनसो मलं मत्सरमपहन्तीति तत् ॥१६॥

गूढार्थदीपिनी

तस्य विष्णोः मन्द्रया गम्भीरया गिरा तर्पितः तृप्तिं प्रापितः सन् तूष्णीं बभूवेत्यन्वयः। एतत्कर्मणि भृगोरपधारस्तु न च्यः। भगवदिच्छयैवैतल्लीलायां तस्य सहकारित्वात् ॥१३॥ सत्रं यज्ञस्थलम् ॥१४॥ भूयांसं सर्वोत्तमं श्रद्दधुः निश्चितवन्तः। यतो तो: अन्येषामपि शान्तिः अभयं भयाभावश्च ॥१५॥ यतो यस्मात् धर्मः प्रवर्तते। यं परमां गतिमाहुः-यस्य सत्त्वं प्रिया मूर्तिरस्ति ह्मणाश्च इष्टदेवताः तस्य त्रिविधा आकृतयः मूर्तयः सन्ति। तासु तत् सत्त्वं सत्त्वमूर्तिः प्राप्तिसाधनमस्तीति चतुर्णामेकान्वयः। क्षसाः तामस्यः असुरा राजस्यः सुराः सात्त्विक्यः। अजाशिषः निष्कामाः अष्टधा ऐश्वर्यम् अणिमादिभेदेन। यशः चरिं च त्मनो मनसो मलं चाञ्चल्यमपहन्ति निवर्तयतीति तथा ॥१६-१७-१८-१९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तस्य विष्णोः मन्द्रया गम्भीरया गिरा निर्वृतः सुखितः तमेव सर्वश्रेष्ठमवधार्य लब्धपरमानन्द इत्यर्थः। लब्धमनोरथत्वेन र्पितश्च भक्त्युत्कण्ठः अश्रुलोचनः सन् तूष्णीं बभूवेति शेषः ॥१३-१४॥ भूयांसं महत्तमं परं ब्रह्मशिवयोरपि जनकं तथोक्तं ष्णुपुराणे ब्रह्मणैव —

"यस्य प्रसादादहमच्युतस्य भूतप्रजासृष्टिकरोऽन्तकारी।
क्रोधाच्च रुद्रः स्थितिहेतुभूतो यस्माच्च मध्ये पुरुषः पुरस्तात् ॥" इति श्रद्दधुः ॥१५॥

यतः कृष्णात् सेव्यात्साक्षाद्धर्मः तद्भक्तिः ज्ञानं तत्स्वरूपादिविषयकं तदितरस्मिन् च वैराग्यं तदन्वितं तद्भावापत्तिलक्षणं षं च अष्टधा अणिमादिकम् ऐश्वर्यं च आत्ममलापहं यशश्च भवति। यच्छब्दानां विविधाकृतयस्तस्येत्यनेन सम्बन्धः ॥१६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवममानित्वं मानददत्वं च स्वस्य प्रकटीकुर्वता भगवता सन्मार्गः समर्थितः। ततो यज्जातं तदाह-एवं ब्रुवाण इति। स परीक्षार्थमागत इति तेन भगवति हीनभावो न मतः किन्तु गुणत्वेन कायवाङ्मनश्चरित्रं स्वीकृतवान्। अत एव सर्वभावेन सन्तुष्ट त्याह-आदौ तन्मन्द्रया गिरा निर्वृतः भगवता च तर्पितः स्वधर्मारोपणेन अतः सनकादिवत् प्रत्युत्तरसन्देहादिकं न कृतवान् किन्तु ष्णीमास। किञ्च भगवानद्भुतकर्मा भक्तिविरुद्धकर्मणा तस्मै भक्तिं दत्तवानित्याह- भक्त्युत्कण्ठोऽश्रुलोचन इति। भक्त्या

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

प्रेमलक्षणया भगवति परमोत्कण्ठावान् जातः ॥१३॥ अहो भगवच्चरित्रमित्याश्चर्येणाश्रुलोचनोऽपि भगवन्माहात्म्यं ज्ञात्वा निर्णयकथनार्थमागत इत्याह-पुनः स्वसत्रमाव्रज्येति। मुनीनां ब्रह्मवादिनामिति ज्ञानक्रियावैशिष्ट्यं तेन विश्वासो ज्ञानं च भविष्यतीति अतो निःशङ्कम् अशेषप्रकारेण स्वानुभूतमवर्णयत् उपसंहारे भृगुपदं तस्य वैष्णवत्वं ख्यापयति। ततोऽपि किम्पुनः सन्देहस्थितो न वेति शङ्काव्युदासपूर्वकं निस्सन्देहं ख्यापयितुमाह-तन्निशम्येति। आदौ भगवच्चरित्रश्रवणाद्विस्मिताः अल्पोत्कर्षज्ञानार्थं प्रवृत्ताः परमोत्कर्षं ज्ञातवन्त इति ततो मुक्तसंशयाः भगवानेव महानिति निश्चयात् एवमपि सति भूयांसो विष्णुमेव महानिति पदार्थे श्रद्धां कृतवन्तः। ये तु पुनः पितृत्वेन अन्यत्रापि श्रद्धायुक्तास्तेषामन्याभिनिविष्टानां प्रमाणमपि बोधयितुमसमर्थमिति ते स्वसेव्यसदृशमेव भगवन्तं ज्ञातवन्त इति। तद्व्युदासार्थं भूयांस इत्युक्तं सन्मार्गे भगवानेवोत्कृष्टो मन्तव्य इति ख्यापयितुं सन्मार्गोपयोगिनः सर्वानेव गुणान् भगवत्याह-यतः शान्तिरिति तत्तीर्थसाधनमित्यन्तेन। आदौ सन्मार्गे गुणक्षोभनिवृत्तिरपेक्ष्यते। ततो भगवद्धर्मः मार्गरक्षा चेति। तत्रापि षड् गुणा भगवांश्च वक्तव्यः। एवं षोडशकलो भगवान् मार्गे निरुक्तो भविष्यति। शान्तिरान्तरो धर्मः इन्द्रियाणां रजोगुणक्षोभाभावः अनेन भवति। यतः अभयं भयाभावः। सत्त्वक्षोभनिवृत्तिः धर्मस्तामसाभावः। ततो भगवद्धर्माः यस्मात् सर्वेषां प्राणिनां साक्षात् ज्ञानं निरुपाधिकं वैराग्यं च। तद्विधमेव दयान्वितमित्युभयत्र विशेषणम्। ज्ञाने वैराग्ये च प्राणिनां पीडा सम्भवतीति तदर्थमेतदुक्तम्। दयाभावार्थं हि भगवानर्जुनमुपदिदेश। वैराग्ये च स्वकीयानां पीडा लोकसिद्धा तदन्वितमिति क्वचित्पाठः। तदा ज्ञानसहितं वैराग्यं न तु मर्कटवैराग्यमित्यर्थः। यतो भगवतः सकाशात् अष्टधा ऐश्वर्यं भवति। अणिमादिप्रभेदभिन्नं यशश्च भवति। आत्मान्तःकरणस्य मलं दूरीकरोतीति यशसो विशेषणम्। अनेनासत्प्रकारेण नटविटादिभ्यो दानेन यद्यशस्तद्व्यावृत्तम्। श्रीः वीर्यं च प्रकृते तथा नोपयुज्यत इति दयायां वीर्यान्तर्भावम् अष्टधा ऐश्वर्ये श्रियश्च मन्यते ॥१४-१६॥

श्रीसुबोधिनीसारः

शुकोक्तिः। वैकुण्ठे विष्णौ एवं ब्रुवाणे वदति सति तस्य मन्द्रया गम्भीरया गिरा निर्वृतः तृप्तो भृगुरश्रुलोचनो भक्तौ उत्कण्ठा यस्य स तूष्णीमासेति शेषः ॥१३॥ पुनः सत्रमागत्य वेदवादिनां मुनीनां स्वेनानुभूतं सम्प्रति दृष्टम् अशेषेण सामस्तेन भृगुरवदत्। हे राजन्! ॥१४॥ तत् श्रुत्वा विस्मिताः त्यक्तसन्देहा मुनयो भूयांसं महान्तं विष्णुं निश्चितवन्तः। यतो यस्मिन् शान्तिः क्षमाऽस्ति। यतः सकाशादभयं मोक्षः ॥१५॥ यतः साक्षाद्धर्मः ज्ञानं तद्युक्तं वैराग्यं च। अष्टधा ऐश्वरर्यमणिमादिसिद्धयो यस्माद्भवन्ति शुद्धात्मकीर्तिश्च ॥१६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वैकुण्ठे विष्णावेवं ब्रुवति सति तस्य मन्द्रया गम्भीरया गिरा निर्वृतः सुखितः अत एव तर्पितः भक्त्या उत्कण्ठः बाष्परुद्धकण्ठः अश्रूणि लोचनयोर्यस्य स भृगुस्तूष्णीं बभूव ॥१३॥ ब्रह्मवादिनां मुनीनां सत्रं पुनराव्रज्य हे राजन्! स्वेन यदनुभूतं दृष्टं ब्रह्मादित्रयाणां वृत्तं तद्भृगुस्तेभ्योऽवर्णयत् ॥१४॥ तत् भृगुणा वर्णितं निशम्य अथानन्तरं विस्मिताः भगवतो नम्रीभावेनाश्चर्ययुक्ताश्छिन्नसंशया महत्त्वे संयशरहिता मुनयो विष्णुमेव भूयांसं श्रद्दधुः सर्वोत्कृष्टत्वेन निश्चितवन्तः। निश्चयप्रकारमाह-यत इति। यच्छब्दानां तत्सत्त्वं तीर्थसाधनम् इत्युत्तरेणान्वयः। यतः यस्मिन् शान्तिः क्रोधलोभादिराहित्यम्। यतः सेव्यमानात्सेवकानामभयं संसारभयनिवृत्तिरूपा मुक्तिर्भवति ॥१५॥ यस्मात् प्रवर्तते। साक्षात्कारात्मकं ज्ञानं तदन्वितं विराग्यं च भवति, अणिमादिभेदेनाष्टविधमैश्वर्यं च भवति। आत्मनः श्रोतृजनान्तःकरणस्य क्रोधलोभादितत्कारणपापात्मकं मलमपहन्तीति तथाभूतं यस्य यशः ॥१६॥

अन्वितार्थप्रकाशिका

एवमति ॥ वैकुण्ठे विष्णावेवं ब्रुवति सति तस्य मन्द्रया गम्भीरया गिरा निर्वृतः सुखितः अत एव तर्पितः भक्त्या उत्कण्ठः बाष्परुद्धकण्ठः अश्रूणि लोचनयोर्यस्य स भृगुस्तूष्णीं बभूवेति शेषः ॥१३॥ पुनरिति ॥ हे राजन्! ब्रह्मवादिनां मुनीनां

अन्वितार्थप्रकाशिका

सत्रं पुनराव्रज्य स्वेन यदनुभूतं दृष्टं ब्रह्मादित्रयाणां वृत्तं तद्भृगुस्तेभ्योऽवर्णयत् ॥१४॥ तदिति । तद्भृगुणा वर्णितं निशम्याथानन्तरं विस्मिताः अपराधातिरेकेऽपि भगवतो निर्विकारत्वेन नम्रीभावेन चाश्चर्ययुक्ताश्छिन्नसंशया महत्त्वे संयशरहिता मुनयो विष्णुमेव भूयांसं श्रद्धुः सर्वोत्कृष्टत्वेन निश्चितवन्तः । तच्च युक्तमेव । यतः यस्मिन् विष्णौ शान्तिः क्रोधलोभादिराहित्यं संसारभयनिवृत्तिर्भवति ॥१५॥ पुनर्विष्णुं विशिनष्टि- धर्म इत्यादिभिः ॥ यस्मात् धर्मः प्रवर्तते साक्षात्कारात्मकं ज्ञानं तदन्वितं वैराग्यं च भवति । वैराग्यं च चतुर्विधमिति पाठे तच्चातुर्विध्यमेवं द्रष्टव्यम् । विषयांस्त्यक्तुमिच्छतोऽप्यशक्नुवतः विषयसम्मानेच्छात्यागो यतमानाख्यमाद्यम् । विषयाणां लवणादिव्यतिरेकेणापि वृत्तिर्व्यतैरकाख्यं द्वितीयम् । तत्रापि मनसि रागशैथिल्ये बाह्येन्द्रियैरेव विषयसेवनमेकेन्द्रियाख्यं तृतीयम् । तत्राप्यौदासीन्यं वशीकरणाख्यं तुर्यम् । अन्ये तु चतुर्विधपुरुषार्थानामुपेक्षारूपं चतुर्विधं वैराग्यमाहुः । तथा यस्मात् अणिमादिभेदेन अष्टवधा ऐश्वर्यं च भवति । आत्मनः श्रोतृजनान्तःकरणस्य पापात्मकं मलमपहन्तीति तथाभूतं यस्य यशः अस्ति ॥१६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भूयांसमपराधाधिक्येऽपि क्रोधराहित्येन श्रेष्ठतमं श्रद्धुः निश्चितवन्तः । यतो यस्माज्जनानां शान्तिः परमसुखं यतोऽभयं मोक्षश्च ॥१४॥ तेन (सन्नेह)हरिमाहात्म्यज्ञानेन अन्वितं सहितं वैराग्यादि यद्भवेत् अष्टधा अणिमाद्यष्टप्रकारम् आत्मनः अन्तःकरणस्य मलापहं वासनानिवर्तक आत्मा मलापहमिति ज्ञानवैराग्ययशसां पृथक् पृथक् विशेषणं बोध्यम् ॥१५॥ परमां गतिं परमं प्राप्यम् ॥१६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

पुनरिति ॥ हे राजन् ! भृगुः पुनः सत्रं समाव्रज्य ब्रह्मवादिनां मुनीनां पुरः स्वानुभूतम् अशेषेण अवर्णयत् ॥१३॥ तदिति ॥ तद्भृगुणोपवर्णितं निशम्य मुक्तसंशयाः गतसन्देहाः विस्मिताः मुनयः अथातः परं विष्णुमेव भूयांसं श्रद्धुः निश्चितवन्तः । परत्वोपयुक्तगुणाविष्कारपूर्वकनिश्चयप्रकारानेवाह । यतः यस्मिन्, यद्वा । यतो यस्माद्यदुपासनादेव शान्तिः, यतः सेव्यमानात्, अभयं मुक्तिः ॥१४॥ धर्म इति ॥ यतः साक्षात् धर्मः ब्रह्मण्यतादिरूपो वृष इत्यर्थः । ज्ञानं सर्वयाथात्म्यावबोधः, तदन्वितं शान्त्यादिसहितं वैराग्यं च यस्मात् अष्टधा अणिमादिभेदेनाष्टविधम् ऐश्वर्यं च यत आत्मनो भजतः पुंसो मलमपहन्तीति तथाविधं यशश्च । अत्र केचिद्वैराग्यं च चतुर्विधमिति पठन्ति । तच्चातुर्विध्यमेवं द्रष्टव्यम् । विषयांस्त्यक्तुमशक्नुवतोऽपि सम्मानेच्छात्याग आद्यं वैराग्यम्, विषयाणां मध्ये लवणादिव्यतिरेकेणापि वृत्तिर्द्वितीयम्, तथा वृत्तावपि मनसि रागशैथिल्येन बाह्येन्द्रियैरेव विषयसेवनं तृतीयम्, तत्राप्यौदासीन्यं चतुर्थमिति । यथाहुः —

"वैराग्यमाद्यं यतमानसंज्ञं क्वचिद्विरागो व्यतिरेकसंज्ञः ।
एकेन्द्रियाख्यं हृदि रागसौक्ष्म्यं तस्याप्यभावस्तु वशीकृताख्यम् ॥" इति ॥१५॥

मुनीनामिति ॥ न्यस्तदण्डानां भूतद्रोहरहितानां शान्तानां शमपराणां समचेतसां सर्वेष्वात्मसु परमात्मान्तर्यामितैकमतिमताम् अकिञ्चनानां प्रयोजनान्तररहितानां साधूनां मुनीनां परोपकारशीलानां सतां परमां गतिं प्राप्यं यम् आहुः ॥१६॥

कृष्णप्रिया

शुकदेवजी महाराजने कहा की । जब भगवान इस प्रकारसे कह रहे थे तब मुनिवर्य भृगु भगवान के मधुर भाव गम्भीर वचनों को सुनकर आनंद सागरमें गोता लगाते हुए तृप्त हो गये और कुछ न बोल पाये । भगवान के प्रति भक्ति उमड आई और आंखे प्रेमाश्रु छलक आये ॥१३॥ हे परीक्षित् ! फिर से भृगुमुनि ब्रह्मवादी मुनियों के सत्संगसत्रमें आ पहुंचे और अपना स्वानुभव कह सुनाया ॥१४॥ सत्रमें विराजमान समस्तमुनियोंने श्रीभृगुऋषि के

कृष्णप्रिया

मुखारविन्द से भगवान का चरित्र सुनकर सब आश्चर्यमुग्ध हो गये । और सब प्रकारके संशयों से मुक्त हो गये । और तबसे वे भगवान विष्णु को ही सर्वश्रेष्ठ मानने लगे । क्योंकि वे ही शान्ति और अभयके उद्गमस्थान है ॥१५॥ भगवान् विष्णु से ही साक्षात् धर्म ज्ञान वैराग्य और उसके साथ आठ प्रकार के ऐश्वर्य और चित्त को शुद्ध करने वाला यश प्राप्त होता है ॥१६॥

मुनीनां न्यस्तदण्डानां शान्तानां समचेतसाम् । अकिंचनानां साधूनां यमाहुः परमां गतिम् ॥१७॥
सत्त्वं यस्य प्रिया मूर्तिर्ब्राह्मणास्त्विष्टदेवताः । भजन्त्यनाशिषः शान्ता यं वा निपुणबुद्धयः ॥१८॥
त्रिविधा[1]कृतयस्तस्य राक्षसा असुरा सुराः । [2]गुणिन्या मायया सृष्टाः सत्त्वं [3]तत्तीर्थसाधनम् ॥१९॥

कर्दमक्षमा

न्यस्तदण्डानाम्, शान्तानाम्, समचेतसाम्, अकिञ्चनानाम्, साधूनाम्, मुनीनाम्, यम्, परमाम्, गतिम्, आहुः ॥१७॥ सत्त्वम्, यस्य, प्रिया, मूर्तिः, ब्राह्मणाः, तु, इष्टदेवताः, अनाशिषः, शान्ताः, निपुणबुद्धयः, वा, यम्, भजन्ति ॥१८॥ राक्षसाः, असुराः, सुराः, तस्य, त्रिविधा, आकृतयः, गुणिन्या, मायया, सृष्टाः, सत्त्वम्, तत्, तीर्थसाधनम् ॥१९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्य भगवत एव यद्यपि त्रिविधा आकृतयः तत्तासु सत्त्वमेव तीर्थसाधनं पुरुषार्थहेतुः ॥१९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

मुनीनामित्यादिना शमादिषट्कोपेतानामित्यर्थः॥★॥ तदेवमैश्वर्यप्रदत्वेऽप्युनपद्रवहेतुत्वान्मुनीनामित्यादि प्रथमतो मननशीलानां ततो भगवच्चिन्तनार्थं परित्यक्तमहादोषात्मकभूतद्वेषाणां ततो भगवच्चित्ततया यदृच्छालाभतुष्टानां ततो भगवदेकस्पृहत्वेनान्यत्र स्वर्गापवर्गनरकेषु तुल्यदर्शिनाम् अत एव भगवन्तं विनान्यत्र ममताशून्यानाम् अत एव प्रोज्झितकैतवानामिति क्रमेणार्थः ॥★॥ विश्वनातस्तु :- मुनिशान्तसाधुशब्दैरेकैकविशेषणयुक्तैर्मुमुक्षुमुक्तभक्ता उक्ता इत्याह ॥१७॥ तुरवधारणे । यं विष्णुम् । अनाशिष इति यस्येत्यस्य विशेषणम् ब्राह्मणानां वा ॥★॥ एवमप्राकृतशुद्धसत्त्वात्मकवैभवत्वेऽपि प्राकृतसत्त्वे यस्यानुग्रहदृष्टिरिति तत्रैव गुणविशेषं दर्शयति मूर्तिरिव मूर्तिरधिष्ठानं प्रिया कृपादृष्टियोग्या तन्मयेष्वपि विशेषतो ब्राह्मणा इष्टदेवतावदाराध्यमानाः तादृशगुणाकृष्टत्वादेव यं वा यं च निपुणबुद्धयो भजन्ति यद्यप्यनाशिषः शान्ताः सर्वत्र रागद्वेषरहिता। वा चार्थे एवार्थे वा ॥१८॥ तस्य विष्णोः । यद्वा-तीर्थस्य हरेः साधनं प्राप्त्युपायम् ॥★॥ सत्त्वं प्रिया मूर्तिरित्युक्तं तत्रान्या वा का मूर्तय इत्यपेक्षायां विविच्य त्रिविधा आह-त्रीति । तत्र राक्षसास्तामस्यः असुरा राजस्यः सुराः सात्त्विकाः । तत्तदुपलक्षणत्वेनान्येऽपि तत्तद्रूपा ज्ञेयाः । ननु मायानासक्तस्य तस्य मायिकसत्त्वगुणे कथं रतिस्तत्राह-सत्त्वं खलु तस्य भगवतो यस्तीर्थमागमस्तद्भक्तिप्रतिपादकशास्त्रं तस्य साधनमवगमद्वारभूतं भवति । परम्परया भक्तिसम्बन्धादेवेति भावः ॥★॥ विश्वनाथस्तु-जगत्पालकस्य कृपालोस्तस्य जीवहितदृष्ट्येव सत्त्वं प्रियवद्भासमानत्वादेव प्रियं न तु वस्तुत इति गुणेष्वौदासीन्यमेव ॥१९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवमैश्वर्यप्रदत्वेऽप्युनपद्रवहेतुत्वान्मुनीनामित्यादि प्रथमतो मननशीलानां ततो भगवच्चिन्तनार्थं परित्यक्तमहादोषात्मकभूतद्वेषाणां ततो भगवच्चित्ततया यदृच्छालाभतुष्टानां ततो भगवदेकस्पृहत्वेनान्यत्र स्वर्गापवर्गनरकेषु तुल्यदर्शिनाम् अत एव भगवन्तं विनान्यत्र ममताशून्यानाम् अत एव प्रोज्झितकैतवानामिति क्रमेणार्थः ॥१७॥ एवमप्राकृतशुद्धसत्त्वात्मकवैभवत्वेऽपि

---

[1] मूर्तयस्तस्य-विज. । [2] गुणास्तन्मायया सृष्टाः सत्त्वं तत्रार्यदर्शनं-विज. । [3] तत्रार्थ-च. पु. टी. ।

ीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्राकृतसत्त्वे यस्यानुग्रहदृष्टिरिति तत्रैव गुणविशेषं दर्शयति मूर्तिरिव मूर्तिरधिष्ठानं प्रिया कृपादृष्टियोग्या तन्मयेष्वपि विशेषतो ब्राह्मणा इष्टदेवतावदाराध्यमानाः तादृशगुणाकृष्टत्वादेव यं वा यं च निपुणबुद्धयो भजन्ति यद्यप्यनाशिषः शान्ताः सर्वत्र रागद्वेषरहिता इत्यर्थः ॥१८॥ सत्त्वं प्रिया मूर्तिरित्युक्तं तत्रान्या वा का मूर्तय इत्यपेक्षायां विविच्य त्रिविधा आह-त्रीति। तत्र राक्षसास्तामस्यः असुरा राजस्यः सुराः सात्त्विकाः। तत्तदुपलक्षणत्वेनान्येऽपि तत्तद्रूपा ज्ञेयाः। ननु मायानासक्तस्य तस्य मायिकसत्त्वगुणे कथं रतिस्तत्राह-सत्त्वं खलु तस्य भगवतो यस्तीर्थमागमस्तद्भक्तिप्रतिपादकशास्त्रं तस्य साधनमवगमद्वारभूतं भवति। परम्परया भक्तिसम्बन्धादेवेति भावः ॥१९॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

भक्तिनिष्ठानां च मोक्षाद्युपेक्षया केवलं भक्त्येकापेक्षया स एव सेव्य इत्याह-सत्त्वमिति। सत्त्वगुणः सत्तामात्रं ब्रह्म-वा, तु च, अतो ब्राह्मणाश्च यस्येष्टदेवता नित्यसम्पूज्याः, शुद्धसात्त्विकत्वेन देवपरत्वाद्ब्रह्मनिष्ठत्वाच्च। अत एवानाशिषो निष्कामा यं भजन्ति सेवन्ते। वा समुच्चये। अनाशिव इत्यनेन भजनस्यैव साध्यत्वमभिप्रेतम्। अनाशिष्ट्वे हेतुः-निपुणेति, विचारचातुर्योक्षाद्यशेषत्यागेन तद्भजनैकापेक्षणादित्यर्थः ॥१७॥ सर्वेश्वरस्यापि तस्य सत्त्वप्रियमूर्तिहेतुमाह-त्रिविधेति। आकृतयो रूपाण्यधिष्ठानानीत्यर्थः। अन्यत्तैर्व्याख्यातम्। यद्वा, तत्तेषु गुणेषु मध्ये, अतो भृग्वपराधसहनादिकमिदं किं नाम तस्य माहात्म्यम्, तद्भक्ते सज्जनेऽपि कस्मिंश्चित् तत्सम्भवात्, किन्तु शान्त्यादिकमेतत् सर्वं तस्मिन् वा साधारणम्। पठान्तरे च तत्प्रसादेनान्यैरपि लभ्येतेति स एव सर्वोत्कर्षसेवित इति तात्पर्यम् ॥१८॥ नृणामन्येषां संशयस्य नुत्तये निरसनाय, अनेन सर्वतः। श्रीभगवदुत्कर्षे तेषां सन्देहो नास्त्येवेति भावः। पुरुषस्येति तस्मिन्नेव परमेश्वरबुद्ध्युत्पत्तेः पदाम्भोजयोः सेवयेति प्रेमभक्तिरुक्ता। अतस्तस्य तां वाऽनिर्वचनीयां गतिं किंवा तस्याः सेवायां गतिं गम्यस्थानं सर्वदा श्रीवैकुण्ठलोमित्यर्थः। गता इति तन्निर्धारेण गतप्राया इत्यर्थः। भृग्वादफनां प्रजापतीनामभ्यधिकारिणां महाप्रलयान्तस्थायित्वात्। यद्वा, तेभ्योऽन्ये तत्रत्या विप्रा इति ज्ञेयम्। अत एव तैरपि व्याख्यातम्-तरस्वतीतीरवासिन इति ॥१९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१६-२५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

मुनीनामिति। न्यस्तदण्डानां भूतद्रोरहितानां समचेतसां सर्वात्मब्रह्मबुद्धीनामकिञ्चनानां प्रयोजनान्तररहितानां परोपकारशीलानां यं परमां गतिं प्राप्यमाहुः ॥१७॥ सत्त्वमिति। सत्त्वं रजस्तमोभ्यामननुविद्धं शुद्धसत्त्वं यस्य प्रिया मूर्तिः शरीरं यस्य चेष्टदेवताः ब्राह्मणा अनाशिषः निष्कामाः शान्ताः जितेन्द्रियाः निपुणा बुद्धिर्येषां ते यं भजन्ति ॥१८॥ त्रिविधेति। तस्येत्थम्भूतस्य निःसमाभ्यधिकस्य गुणिन्या सत्वादित्रिगुणमय्या मायया सृष्टा राक्षसा असुराः सुराश्चेति त्रिविधा अप्याकृतयः तस्यैव शरीरभूता इत्यर्थः। तत्र देवाः सत्त्वप्रचुराः असुरास्तु रजःप्रचुराः राक्षसास्तमःप्रचुराः देवादिषु त्रिष्वप्यासुरमानुषदैवसम्पत्तिभिरभिजाताः सन्त्येवेति भगवद्गीतासूक्तम्। एवं च सर्वेऽप्येते नोपास्या इति भावः। तथा चोक्तं शौनकेन —

"आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः। प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥
यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः। अविद्यान्तर्गताः सर्वे ते हि संसारगोचराः ॥
पश्चादुद्भूतबोधाश्च ध्यानेनैवोपकारकाः। नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः ॥
तस्मात्तदमलं ब्रह्म निसर्गादेवबोधवत् ॥" इति ॥

एतदेवाह-सत्त्वं तत्तीर्थसाधनमिति। यत्सत्त्वं शुद्धसत्त्वमयं भगवच्छरीरं तदेव तीर्थसाधनम् उपास्यमानं सन्निरशेषप्रकृतिसम्बन्धक्षपणद्वारा आत्मशुद्धिसाधनमित्यर्थः ॥१९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

यस्य हरेः सत्त्वगुणः प्रियामूर्तीः प्रेष्ठप्रतिमा । यस्य ब्राह्मणाः अनाशिषो निष्कामाः ॥१८॥ तत्र तेषु गुणेषु सत्त्वं नाम गुणः आर्यं सर्वपूज्यं श्रीहरिं दर्शयतीत्यर्थः ॥१९-२२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१६-५४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

मुनीनामिति । अत्र मुनिशान्तसाधव एकैकविशेषणयुक्ता मुमुक्षुमुक्तभक्ता ज्ञेयाः ॥१७॥ तस्य त्रिगुणातीतत्वेऽपि सत्त्वं प्रिया मूर्तिः सात्त्विकलोकाः प्रिया इत्यर्थः । तत्रापि ब्राह्मणाः प्रियतराः इष्टदेवतुल्यत्वेनादरणीयाः यं वा यमेव ये भजन्तीत्यर्थः ॥१८॥ ननु निर्गुणस्य तस्य गुणे कथं प्रीतिः सम्भवेत्तत्र तस्यौदासीन्यमेवोचितम् । तत्राह-त्रिविधा यद्यपि तस्यैव सम्यक्तया कृतया सृज्याः तत्तदपि सत्त्वं तीर्थसाधनं पुरुषार्थहेतुरिति श्रीस्वामिचरणाः जगत्पालकस्य कृपालोस्तस्य जीवहितदृष्ट्येव सत्त्वं प्रियवद्भासमानत्वादेव प्रियं न तु वस्तुत इति गुणेष्वौदासीन्यमेव ॥१९॥

गूढार्थदीपिनी

॥१६-१७-१८-१९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

गम्यते अनयेति करणव्युत्पत्त्या गम्यते प्राप्यते इति व्युत्पत्त्या यम् गतिमुपायोपेयमाहुरित्यर्थः ॥१७॥ सत्त्वं यस्य प्रिया मूर्तिः यत्र सत्त्वगुणस्तत्र यस्योपलब्धिरित्यर्थः ॥१८॥ यस्य तत्तदन्तर्यामिणो यद्यपि राक्षसाः तामसाः असुरा राजसाः सुराः सात्त्विकाः इति त्रिविधा आकृतयः शरीराणि तथापि सत्त्वं सात्त्विकी आकृतिः तस्य विष्णोरुपासनारूपं यत्तीर्थं तत्साधनतदुपाय इत्यर्थः ॥१९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं भगवतः सकाशात् प्राणिनामेवं भवतीति निरूप्य मार्गानुसारिणि भगवति मार्गसिद्ध्यर्थं गुणानाह-मुनीनामिति त्रिभिः । यस्तु भगवान् षड्गुणयुक्तानामपि परमा गतिः फलरूप इत्यर्थः । आहुरिति प्रमाणं परमत्वं यतो नावर्तते यस्मादग्रे गन्तव्यं च नास्ति षड्गुणान् मुनीनां वर्णयति-तेषामेव भगवान् फलमिति ज्ञानार्थं मननं ज्ञानसिद्धिः । दण्डन्यासो वैराग्यं शान्तिः कीर्तिफ समचित्तता श्रीः अकिञ्चनानामिति वीर्यं सम्भवति । अपेक्षायां च तदग्रहणात् साधूनामिति सदाचाराणाम् अनेनैश्वर्यं निरूपितम ॥१७॥ लौकिकसामग्र्यावैदिकत्वसम्पादनात् एवं फलरूपता एको गुणः सन्मार्गे साधनोत्कर्षमाह-सत्त्वं यस्य प्रियामूर्तिरिति। सत्वगुण एव भगवन्निरूपकः । सत्त्वोत्पादका अपि तत्र दुर्लभा इत्याह-ब्राह्मणास्त्विष्टदेवता इति । यस्य भगवतः इष्टदेवता ब्राह्मणाः । अनेन प्रमाणप्रतिबन्धकता निवारिता । किञ्च यस्मिन् मार्गे गुणत्रययुक्ता भवन्ति अनाशिषः फलाकाङ्क्षारहिताः शान्ताः साधनदोषरहिताः निपुणबुद्धयः विवेकज्ञानयुक्ता इति साध्योत्कर्षः । वेत्यनादरे । भगवद्भजने निपुणा बुद्धिर्नात्यन्तं प्रयोजिकेति ॥१८॥ एवं गुणचतुष्टयं निरूपितं द्वयमाह त्रिविधाकृत इति । भगवतः आकृतयो रूपाणि त्रिविधानि तानि गणयति । राक्षसास्तामसाः आसुरा राजसाः सात्त्विकाः सुराः अने सर्वरूपो भगवानिति सर्वत्र भगवद्बुद्धिरेको गुणः तत्रापि सत्त्वं तीर्थानां पवित्रहेतूनां साधनमिति । इदं वैराग्यस्थानीयम् । ततः पूर्वं भजनं श्रीः ब्राह्मणाः कीर्तिः सत्त्वं बलं गतिरैश्वर्यमिति यस्मादिति भगवानिति धर्मी निर्दिष्टः तस्मात् कृष्ण एव महान् सर्वप्रकारेणेति निरूपितम् ॥१९॥

श्रीसुबोधिनीसारः

समदृष्टीनां मुनीनां शान्तानां निष्किंचनानां साधूनां यं हरिं परमां गतिमाहुः ॥१७॥ सत्त्वं यस्य विष्णोः प्रिया मूर्तिः ष्टदेवता ब्राह्मणाः सन्ति अनाशिषो निस्पृहाः शान्ताः पण्डिताः यं वा भजन्ति ॥१८॥ तस्य हरेर्गुणिन्या गुणमय्या मायया सृष्टा रचिता राक्षसा असुराः सुरा इति त्रिविधाकृतयः तिस्रो मूर्तयः सन्ति तत्तासु सत्त्वमेव तीर्थसाधनं पुरुषार्थहेतुः ॥१९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

मुनीनां मननशीलानां त्यक्तप्राणिद्रोहानां शान्तानां रागलोभादिरहितानां समचेतसां समं ब्रह्म पश्यताम् अकिञ्चनानां सर्वतो विरक्तानां प्रयोजनरहितानां साधूनां परोपकारशीलानां यं परमां गतिमाहुः सर्वोत्कृष्टं प्राप्यं फलं वदन्ति ॥१७॥ अनाशिषो निष्कामाः । तत्र हेतुः-शान्ताः रागादिरहिताः । तत्र हेतुः- निपुणबुद्धयः विवेकिन इति । वाशब्दोऽनादरे । अन्यान् अनादृत्य यं भजन्ति ॥१८॥ यस्य त्रिविधा आकृतयो मूर्तयः । ता दर्शयति-राक्षसास्तामसाः, असुराः राजसाः सुराः सात्त्विकाः । त्रैविध्ये हेतुमाह-गुणिन्या त्रिगुणात्मिकया मायया सृष्टा इति । तत्तस्य सत्त्वं सत्त्वमूर्तिस्तीर्थसाधनम् उपास्यमानमुपासकानां मोक्षप्रतिबन्धकपापनिरासेनात्मविशुद्धेः कारणम् ॥१९॥

अन्वितार्थप्रकाशिका

मुनीनामिति । मुनीनां मननशीलानां न्यस्तदण्डानां त्यक्तप्राणिद्रोहानां शान्तानां समचेतसाम् अकिञ्चनानां सर्वतो विरक्तानां साधूनां यं विष्णुं परमां गतिमाहुः ॥१७॥ सत्त्वमिति । यस्य विष्णोः सत्त्वं प्रिया मूर्तिः ब्राह्मणास्तु इष्टदेवताः । यं च अनाशिषः निष्कामाः शान्ता निपुणबुद्धयो भजन्ति ॥१८॥ त्रिविधेति । यद्यपि तस्य भगवतः गुणिन्या मायया सृष्टा राक्षसा असुराः सुरा इति त्रिविधा आकृतयो मूर्तयः सन्ति । तथापि तस्य सत्त्वं सत्त्वमूर्तिस्तीर्थसाधनं पुरुषार्थ हेतुः ॥१९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

सत्त्वं सत्त्वगुणसम्पत्तिविशिष्टा मूर्तिराकृतिर्यस्य विष्णोः प्रियाऽस्ति अत इष्टदेवता अतिमान्याः ॥१७॥ गुणिन्या त्रिगुणमय्या तस्य विष्णोर्मायया त्रिविधाकृतयः सृष्टाः तत्तासां तीर्थनिर्वासनतया पवित्रकरं यत्साधनं तत्सत्त्वं शुद्धसत्त्वगुणोऽस्ति ॥१८॥ एवं नृणां संशयनुत्तये सारस्वताः सरस्वतीतीरे स्थिताः तस्य गतिं स्थानं प्राप्ताः गम्यते भक्तैः प्राप्यते सा गतिः प्राप्यं स्थानमित्यर्थः ॥१९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सत्त्वमिति ॥ सत्त्वं रजस्तमोभ्यामननुविद्धं शुद्धसत्त्वं, यस्य प्रिया, मूर्तिः शरीरम् । यस्य ब्राह्मणास्तु, इष्टदेवता ष्टदेववन्मान्याः, अनाशिषो निष्कामाः शान्ताः जितेन्द्रियाः, निपुणा बुद्धिर्येषां तथाविधास्तु यं भजन्ति वाऽवधारणे ॥१७॥ त्रिविधा इति ॥ तस्येत्थम्भूतस्य निःसमाभ्यधिकस्य भगवतः गुणिन्या सत्त्वादित्रिगुणमय्या मायया सृष्टाः राक्षसाः असुराः सुराश्चेति त्रिविधाः अपि आकृतयः तस्यैव शरीरभूता इति शेषः । तत्र यत्सत्त्वं शुद्धसत्त्वमयं भगवच्छरीरं तत्तदेव तीर्थसाधनम् उपास्यमानं सन्निःशेषप्रकृतिसम्बन्धक्षपणद्वारा आत्मशुद्धिसाधनमित्यर्थः । तत्रात्र त्रिविधाकृतावयमेव विवेकः । देवाः सत्त्वप्रचुराः असुरा रजःप्रचुराः राक्षसास्तमःप्रचुराः देवादिषु त्रिष्वपि दैवासुरसम्पद्भ्यामभिजाताः सन्त्येवेति भगवद्गीतासूक्तमेवं च सर्वेऽप्येते नोपास्या इति भावः । तथा चोक्तं भगवता शौनकेन —

"आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः । प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥
यतस्ततो न ते ध्याने ज्ञानिनामुपकारकाः । अविद्यान्तर्गताः सर्वे ते हि संसारगोचराः ॥
पश्चादुद्भूतबोधाश्च ध्यानेनैवोपकारकाः । नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः ॥
तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवत् ॥" इति ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अत एवात्रोक्तं सत्त्वं तत्तीर्थसाधनमिति ॥१८॥ इत्थमिति ॥ सारस्वताः सरस्वतीतीरवासिनः विप्रा मुनयः नृणां संशयनुत्तये इत्थमनेन प्रकारेण निश्चित्य पुरुषस्य परमपुरुषस्य पदाम्भोजसेवया तद्गतिं गताः प्राप्ता इत्यर्थः ॥१९॥

कृष्णप्रिया

शान्त समचित अकंचन और सब को अभय देनेवाले साधु मुनियोंकी वे ही एकमात्र परम गति है ।ऐसा समस्त शास्त्र कहते है ॥१७॥ भगवान को तो सत्वमूर्ति सर्वथा प्रिय है और ब्राह्मणोको इष्टदेव मानते है । जो निष्काम शान्त और विवेकसम्पन्न बुद्धिवाले लोग होते है वे ही भगवान् का भजन करते है ॥१८॥ भगवान की सात्विक राजस और तामस ऐसी त्रिगुणात्मिका मायासे सुर असुर और राक्षस ऐसी तीन प्रका की आकृतिवाली सृष्टि बनाई है । इस तीनमें जो सत्वस्वरुप है उसको भगवान की मूर्ति मनने में आई है । वही सत्वमूर्ति की उसको परमपुरुषार्थरुप परमात्मा ही प्राप्ति का साधन है ॥१९॥

श्रीशुक[1] उवाच

[2]इत्थं सारस्वता विप्र नृणां संशयनुत्तये । पुरुषस्य पदाम्भोजसेवया सद्गतिं गताः ॥२०॥

सूत उवाच

इत्येतन्मुनितनयास्य[3]पद्मगन्धपीयूषं भवभयभित् परस्य पुंसः ।
[4]सुश्लोकं श्रवणपुटैः [5]पिबत्यभीक्ष्णं [6]पान्थोऽध्वभ्रमणपरिश्रमं जहाति ॥२१॥[7]

कर्दमक्षमा

श्रीशुकः, उवाच । विप्र, इत्थम्, सारस्वताः, नृणाम्, संशयनुत्तये, पुरुषस्य, पदाम्भोजसेवया, सद्गतिम्, गताः ॥२०॥

सूतः, उवाच । इति, एतत्, मुनितनयस्य, भवभयभित्, आस्यपद्मगन्धपीयूषम्, परस्य, पुंसः, सुश्लोकम्, श्रवणपुटैः, अभीक्ष्णम्, पिबति, पान्थः, अध्वभ्रमणपरिश्रमम्, जहाति ॥२१॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

इत्थं निश्चित्य सरस्वतीतीरवासिनो विप्रा हरिसेवया मुक्तिं प्रापुरिति ॥२०॥ व्यासनन्दनस्य मुखपङ्कजादुद्गतं गन्धयुक्तपीयूषतुल्यं हरेः प्रशस्तं यशो यः संसारी सेवते स मुक्तो भवतीति ॥२१॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सारस्वताः सरस्वतीतीरवासिनः ॥★॥ नृणां संशयनुत्तये निश्चित्येति योज्यम् । तदेवं शास्त्रद्वारा तु ते स्वयं निश्चिन्वन्तः एवेति गम्यते । तद्गतिं वा गताः तमुपलब्धवन्तः । यद्वा, तच्चान्येषां नृणां संशयनाशाय जातमिति भावः ॥२०॥ इत्येतत् पूर्वोक्तरीत्या वर्णितं विष्णुमहत्त्वोपाख्यानम् । गन्धपीयूषं सुगन्धिवन्मनोहरं पीयूषवत्स्वादु भवभयं भिनत्तीति तथा । सुश्लोकैराकलितं सुश्लोकमाख्यानं यशो वा । अभीक्ष्णं पौनःपुन्येन । पथि संसारमार्गे वर्तमानः पान्थः 'पथि-गतौ' अतोऽच् पुनः स्वार्थिकोऽण् । अध्वभ्रमणपरिश्रमम् इदं श्रेयोऽदो वेति भ्रमणेनेतस्ततः पर्यटनेन प्राप्तं परिश्रमम् ॥★॥ तदेतच्छास्त्रविदामपि महासंशयापनोदनं श्रीगुरुचरणोपदेशं परमसन्तुष्टः श्लाघते । तेनान्यानप्यतीव श्रद्धापयति इतीति । प्रेमप्रकारकमेतत्पूर्वक्तं मुनितनयेति ।

---

१. बादरायणिरुवाच-गो. प्रे. टी. । २. एवं श्रीधर. वंशी. जीव. ; इत्थं-वीर. विज. । ३. पद्मगन्धि-वीर. ; पद्मगर्भ-विज. । ४. सुश्लोक्यं-च. पु. टी. । ५. पिबन्नभीक्ष्णं-वीर. विज. । ६. पान्थोऽथ-विज. ; संसार-च. पु. टी. । ७. अत्र त्रिणवतितमोऽध्यायः-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

साक्षादुभयनामाग्रहणं भक्त्युद्रेकात् । तदास्यपद्मस्य गन्धः सौरभ्यमिवानुभवनीय-आमोदविशेषो यत्र तादृशं पीयूषतुल्यं च तदेतत्स्वतः पुरुषार्थत्वम् । तत आनुषङ्गिकतया जरामरणाद्यात्मकभवभयच्छेदकं च सुश्लोकमिति समृद्ध्यर्थेऽव्ययीभावः । सुशोभनः श्लोकः कीर्तिर्यत्र तदेतच्चरितं वा श्रवणपुटैरिति बहुत्वं तच्छ्रवणाय बहुलीकृतत्वादिव । पान्थः संसारपथिकः अध्वपरिश्रमं जहाति तदानन्देन प्राचीनदुःखविस्मृतेः । ततः परं भ्रमणाभावाच्चेति तदेवं श्रीभागवतेन श्रीविष्णोरेव सर्वोत्कर्षे स्पष्टे शास्त्रान्तरेषु श्रीविष्णुशिवयोर्भेदमननेन दोषो यच्छ्रूयते तदनेकान्तिवैष्णवशास्त्रत्वादनेकान्तिवैष्णवपरमेव । तद्विपरीतं हि श्रूयते वैष्णवशास्त्रे यथा पाद्मादौ —

"यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः । समत्वेनैव वीक्षेत स पाषण्डी भवेद्ध्रुवम् ॥" इत्यादौ ॥

तथा च विष्णुधर्मोत्तरान्ते लिङ्गस्फोटननृसिंहोपाख्यानं विष्वक्सेननामा विप्रः कश्चिदेकान्तविष्णुभक्त आसीत् । तस्य पृथिवीं भ्रमतो दैवात्केनचिद्ग्रामाध्यक्षपुत्रेण मिलनमभूत् । तयोः सङ्कथा चेयम् —

"देवकर्मण्यशक्तिर्मे तात पूजय शङ्करम् । देवतायतनं गत्वा यत्र तात प्रतिष्ठितम् ॥
लिङ्गमस्ति सुरेशस्य महादेवस्य निर्मलम् । एवमुक्तः प्रत्युवाच वयमेकान्तिनः श्रुताः ॥
पूजयामश्च नैवान्यं तस्मात्त्वं गच्छ माचिरम् ॥" इत्यादिका ॥

ततो ग्रामाध्यक्षपुत्रे तस्य विष्वक्सेनस्य शिरश्छेत्तुमुद्यते तद्धस्तेन मृत्युमनभीप्सन् स इदं विचारयामास । भवतु तत्रैव गच्छाम इति । ततो लिङ्गसमीपं गत्वा तस्मिन्नधिष्ठाने नृसिंहाय नमः इति पुष्पाञ्जलौ विक्षिप्ते तच्छ्रुत्वा पुनः शिरश्छेत्तुमुद्यतस्य तल्लिङ्गं स्फोटयित्वा निर्गतेन श्रीनृसिंहेन सपरिवारस्य ग्रामाध्यक्षपुत्रस्य शिरांसि छिन्नानीति । तदेतदुक्तं स्कान्दे श्रीशिवेन "शिवशास्त्रेषु तद्ग्राह्यं भगवच्छास्त्रयोगि यत्" इति ॥ श्रीहरिवंशेऽपि —

"हरिरेव सदा ध्येयो भवद्भिः सत्त्वसंश्रयैः । विष्णुमन्त्रं सदा विप्राः पठध्वं ध्यात केशवम् ॥" इति ॥

यत्तु श्रीभागवतमेव —

"त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति ॥" इत्यादि ॥

तत् खलु श्रीविष्णोः सकाशात् अन्यास्वातन्त्र्यापेक्षयैव तदुक्तं श्रीब्रह्मणा —

"सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्" ॥ इति ॥

अत्रैवोक्तं श्रीसङ्कर्षणेन ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः इति —

"यत्पादनिःसृतसरित्प्रवरोदकेन । तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ॥" इति ।

एतदभिप्रेत्यैवोक्तं पाद्मेऽपि –

'शिवस्य विष्णोर्य इह गुणनामादि सकलं धियाभिन्नं पश्येत्स खलु हरिनामाहितकरः ॥' इति ।

अत्र श्रीविष्णुनेति तृतीयाया अनिर्देशादत्रैव श्रीशब्दाच्च श्रीमतः सर्वशक्तियुताद्विष्णोः सर्वव्यापकत्वेन तन्नाम्नस्तस्माद्यः शिवस्य गुणनामादिसकलं धिया भिन्नं स्वतन्त्रं पश्येदित्यर्थः । अतो मार्कण्डेयं प्रति श्रीशिववाक्यं चेदमेवमेव—

"न ते मय्यच्युतेये च भिदामण्वपि चक्षते । नात्मनश्च (जन) परस्यापि तद्युष्मान् वृमीमहि ॥" इति ॥

तत्तेभ्योऽपि सर्वसमदृष्टिभ्यो वयं युष्मानेव ईमहि । प्रियत्वेन जानीम इति ———

"अथ भागवता यूयं प्रियाः स्थ भगवान् यथा । न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥"

इति चतुर्थे तस्यैवोक्तेः ॥ अत्र एवापि तत्पूर्वम् —

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाश:

''नैवेच्छत्याशिष: क्वापि ब्रह्मर्षिर्मोक्षमप्युत । भक्तिं परां भगवति लब्धवान् पुरुषेऽव्यये ॥'' इति ॥

शिवोक्तमहिमभक्त्या भगवति समाधिस्थस्य तस्य देव्यै महिमदर्शनार्थं हृदि छलेन स्वयं शिवे प्रविष्टे विरतिर्जाता यथोक्तं 'किमिदं कुत एवेति समाधेर्विरतोमुनिरि'ति । तच्चान्यथा न सम्भवतीति अत: श्रीविष्णावेव सर्वोत्कर्षे सिद्धे श्रीविष्वक्सेनमार्कण्डेयादिवत्तदीयत्वेनैव वैष्णवै: स आरदणीय: वैष्णवानां यथा शम्भुरिति द्वादशान्तवचनात्परमवैष्णवत्वेन तु सुतरां बत एवोक्तम् आदिवाराहे —

''जन्मान्तरसहस्त्रेण समाराध्य वृषध्वजम् । वैष्णवत्वं लभेद्धीमान् सर्वपापक्षये सति ॥'' इति ।

निन्दादिकं तु सर्वथा परिहर्तव्यम् —

''यो मां समर्थयेन्नित्यमेकान्तं भावमास्थित: । विनिन्दन् देवमीशानं स याति नरकं ध्रुवम् ॥''

इत्यादि श्रीभगवद्वाक्यदिभ्य: ।

अत्र श्रुतय: यं कामयेतमुग्रं कृणोमि तं ब्रह्माणं तं सुमेधां मम योनिरश्वन्तरिति महाशक्तिवचने मध्ये वामनमासीनं विश्वेदेवा उपासत इति तैत्तिरीयोपनिषंदि ।

''रुद्रजापकशतमेकमथर्वाङ्गिरसशिखाध्यापकेन तत्समम् अथर्वाङ्गिरसशिवाध्यापकशतमेकं मन्त्राजाध्यापकेन तत्समम्''

इति श्रीनृसिंहतापन्याम् । तदेतच्छ्रीभागवतसन्दर्भपरमात्मभक्तिसन्दर्भयो: विस्तृतमस्तीत्यलमतिविस्तरेण ॥२१॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं तेषां निर्णयमनूद्य स्वयमेवाहेत्याह-श्रीशुक उवाचेति । इत्थं निश्चित्येति तैर्व्याख्यातम् । तच्च नृणां संशयनुत्तये निश्चित्येति योज्यम् । तदेवं शास्त्रद्वारा तु ते स्वयं निश्चिन्वन्त: एवेति गम्यते । तद्गतिं वा गता: तमुपलब्धवन्त: । यद्वा, तच्चान्येषां नृणां संशयनाशाय जातमित्यर्थ: ॥२०॥ तदेतच्छास्त्रविदामपि महासंशयापनोदनं श्रीगुरुचरणोपदेशं परमसन्तुष्ट: श्लाघते । तेनान्यानप्यतीव श्रद्धापयन्ति इतीति । प्रेमप्रकारकमेतत्पूर्वक्तं मुनितनयेति । साक्षादुभयनामाग्रहणं भक्त्युद्रेकात् । तदास्यपद्मस्य गन्ध: सौरभ्यमिवानुभवनीय-आमोदविशेषो यत्र तादृशं पीयूषतुल्यं च तदेतत्स्वत: पुरुषार्थत्वम् । तत आनुषङ्गिकतया जरामरणाद्यात्मकभवभयच्छेदकं च सुश्लोकमिति समृद्ध्यर्थेऽव्ययीभाव: । सुशोभन: श्लोक: कीर्तिर्यत्र तदेतच्चरितं वा श्रवणपुटैरिति बहुत्वं तच्छ्रवणाय बहुलीकृतत्वादिव । पान्थ: संसारपथिक: अध्वपरिश्रमं जहाति तदानन्देन प्राचीनदु:खविस्मृते: । तत: परं भ्रमणाभावाच्चेति तदेवं श्रीभागवतेन श्रीविष्णोरेव सर्वोत्कर्षे स्पष्टे शास्त्रान्तरेषु श्रीविष्णुशिवयोर्भेदमनेन दोषो यच्छ्रूयते तदनेकान्तिवैष्णवशास्त्रत्वादनेकान्तिवैष्णवपरमेव । तद्विपरीतं हि श्रूयते वैष्णवशास्त्रे यथा पाद्मादौ —

''यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतै: । समत्वेनैव वीक्षेत स पाषण्डी भवेद्ध्रुवम् ॥'' इत्यादौ ॥

तथा च विष्णुधर्मोत्तरान्ते लिङ्गस्फोटननृसिंहोपाख्यानं विष्वक्सेननामा विप्र: कश्चिदेकान्तविष्णुभक्त आसीत् । तस्य पृथिवीं भ्रमतो दैवात्केनचिद्ग्रामाध्यक्षपुत्रेण मिलनमभूत् । तयो: सङ्कथा चेयम् —

''देवकर्मण्यशक्तिर्मे तात पूजय शङ्करम् । देवतायतनं गत्वा यत्र तात प्रतिष्ठितम् ॥

लिङ्गमस्ति सुरेशस्य महादेवस्य निर्मलम् । एवमुक्त: प्रत्युवाच वयमेकान्तिन: श्रुता: ॥

पूजयामश्च नैवान्यं तस्मात्त्वं गच्छ माचिरम् ॥'' इत्यादिका ॥

ततो ग्रामाध्यक्षपुत्रे तस्य विष्वक्सेनस्य शिरश्छेत्तुमुद्यते तद्धस्तेन मृत्युमनभीप्सन् स इदं विचारयामास । भवतु तत्रैव गच्छाम इति । ततो लिङ्गसमीपं गत्वा तस्मिन्नधिष्ठाने नृसिंहाय नम: इति पुष्पाञ्जलौ विक्षिप्ते तच्छ्रुत्वा पुन: शिरश्छेत्तुमुद्यतस्य

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तल्लिङ्गं स्फोटयित्वा निर्गतेन श्रीनृसिंहेन सपरिवारस्य ग्रामाध्यक्षपुत्रस्य शिरांसि छिन्नानीति। तदेतदुक्तं स्कान्दे श्रीशिवेन "शिवशास्त्रेषु तद्ग्राह्यं भगवच्छास्त्रयोगि यत्" इति ॥ श्रीहरिवंशेऽपि —

"हरिरेव सदा ध्येयो भवद्भिः सत्त्वसंश्रयैः । विष्णुमन्त्रं सदा विप्राः पठध्वं ध्यात केशवम् ॥" इति ॥

यत्तु श्रीभागवतमेव —

"त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति ॥" इत्यादि ॥

तत् खलु श्रीविष्णोः सकाशात् अन्यास्वातन्त्र्यापेक्षयैव तदुक्तं श्रीब्रह्मणा —

"सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्" ॥ इति ॥

अत्रैवोक्तं श्रीसङ्कर्षणेन ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः इति -

"यत्पादनिःसृतसरित्प्रवरोदकेन । तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ॥" इति ।

एतदभिप्रेत्यैवोक्तं पाद्मेऽपि -

'शिवस्य विष्णोर्य इह गुणनामादि सकलं धियाभिन्नं पश्येत्स खलु हरिनामाहितकरः ॥' इति ।

अत्र श्रीविष्णुनेति तृतीयाया अनिर्देशादत्रैव श्रीशब्दाच्च श्रीमतः सर्वशक्तियुताद्विष्णोः सर्वव्यापकत्वेन तन्नाम्नस्तस्माद्यः शिवस्य गुणनामादिसकलं धिया भिन्नं स्वतन्त्रं पश्येदित्यर्थः । अतो मार्कण्डेयं प्रति श्रीशिववाक्यं चेदमेवमेव—

"न ते मय्यच्युतेये च भिदामण्वपि चक्षते । नात्मनश्च (जन) परस्यापि तद्युष्मान् वृमीमहि ॥" इति ॥

तत्तेभ्योऽपि सर्वसमदृष्टिभ्यो वयं युष्मानेव ईमहि। प्रियत्वेन जानीम इति -

"अथ भागवता यूयं प्रियाः स्थ भगवान् यथा। न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥"

इति चतुर्थे तस्यैवोक्तेः ॥ अत्र एवापि तत्पूर्वम् —

"नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत । भक्तिं परां भगवति लब्धवान् पुरुषेऽव्यये ॥" इति ॥

शिवोक्तमहिमभक्त्या भगवति समाधिस्थस्य तस्य देव्यै महिमदर्शनार्थं हृदि छलेन स्वयं शिवे प्रविष्टे विरतिर्जाता यथोक्तं 'किमिदं कुत एवेति समाधेर्विरतोमुनिरि'ति । तच्चान्यथा न सम्भवतीति अतः श्रीविष्णावेव सर्वोत्कर्षे सिद्धे श्रीविष्वक्सेनमार्कण्डेयादिवत्तदीयत्वेनैव वैष्णवैः स आरदणीयः वैष्णवानां यथा शम्भुरिति द्वादशान्तवचनात्परमवैष्णवत्वेन तु सुतरां बत एवोक्तम् आदिवाराहे —

"जन्मान्तरसहस्रेण समाराध्य वृषध्वजम्। वैष्णवत्वं लभेद्धीमान् सर्वपापक्षये सति ॥" इति।

निन्दादिकं तु सर्वथा परिहर्तव्यम् —

"यो मां समर्थयेन्नित्यमेकान्तं भावमास्थितः। विनिन्दन् देवमीशानं स याति नरकं ध्रुवम् ॥"

इत्यादिश्रीभगवद्वाक्यदिभ्यः ।

अत्र श्रुतयः यं कामयेतमुग्रं कृणोमि तं ब्रह्माणं तं सुमेधां मम योनिरश्वन्तरिति महाशक्तिवचने मध्ये वामनमासीनं विश्वेदेवा उपासत इति तैत्तिरीयोपनिषदि, रुद्रजापकशतमेकमथर्वाङ्गिरसशिखाध्यापकेन तत्समम् अथर्वाङ्गिरसशिवाध्यापकशतमेकं मन्त्राजाध्यापकेन तत्सममिति श्रीनृसिंहतापन्याम् । तदेतच्छ्रीभागवतसन्दर्भपरमात्मसन्दर्भभक्तिसन्दर्भेषु विस्तृतमस्तीत्यलमतिविस्तरेण ॥२१॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

अहो किं वक्तव्यं तत्सेवया तद्गतिं प्राप्ता इति, तदुपाख्यानश्रवणेऽपि संसारदुःखाद्विमुक्तो भवतीति श्रीशुकदेवाभिप्रायमालक्ष्य तन्मुखाब्जादेव तच्चरितमाधुरीं चापेक्ष्य सुप्रीतः श्रीलोमहर्षणिर्गायत्रिवाह–इतीति। एवमेतदिति नपुंसकीं पीयूषविशेषणत्वात्। यद्वा, इति ईदृशमेतस्य श्रीभगवत्प्रियतमत्वेन सर्वैरनुभूयमानस्य मुनितनयस्यास्य पद्मगन्धपीयूषं पद्मरूपकेण गन्धेत्यनेन च पीयूषस्य शैत्यसौरभ्यादिनात्यन्तोत्कृष्टता ध्वनिता। इति महामधुरतया तस्यैव परमफलत्वमभिप्रेतम्। भवभयं भिन्दन्तीति तथा तत्। एतच्चानुषंगिकफलमुक्तम्। यद्वा, भवभिच्चासौ परः सर्वोत्कृष्टश्चेति। तथा तस्येति सुश्लोकस्य तादृशत्वमभिप्रेतम्। अभीक्ष्णं श्रवणपुटैः शिवति, सदा प्रीत्या परमाभिनिवेशेन शृणोतीत्यर्थः, तादृशपीयूषत्वेन त्यागाशक्तेरिति स्वरूपमात्रनिर्देशः। कथञ्चित् सकृच्छ्रवणेनापि संसारदुःखध्वंसात्। पुटैरिति बहुत्वं तत्पानेन तद्बहुमानात्। पान्थः संसारमार्गपतितोऽपि स श्रीवैकुण्ठलोकप्राप्त्या संसारदुःखरहितो भवति ॥२०॥

"नमो भगवते श्रीमदर्जुनप्रियसखाय"

इत्यमुक्तः श्रीविष्णोरुत्कर्षस्त्ववतारिणि निजाशेषभगवत्ताप्रकटके श्रीकृष्ण एव पर्यवस्यतीत्याशयेन साक्षात्तन्माहात्म्यमेव विशेषतो निरूपयितुं प्रसङ्गान्तरमारभते–एकदेति। भारतयुद्धात् प्राक् कस्मिंश्चित्काले। तु–शब्दः पूर्वोक्ताद्विशेषापेक्षया। कुमारक इत्यल्पार्थे कः, अतिबालक इत्यर्थः। तदेवाह–जातमात्र इति। तच्चैवाह–भुवं स्पृष्ट्वेति किल प्रसिद्ध्या, सर्वत्र सुविख्यातमेवैतत्। अतः साक्षात् श्रीभगवन्निवासश्रीद्वारकासमीपवासिविप्रबालमरणेऽत्रासम्भावना न कार्येति भावः। हे भारतेति-परमाश्चर्याख्यानश्रवणार्थमधिकमवधापयति। यद्वा, भरतवंशमूलरक्षाद्यर्थं ब्रह्मास्त्राद्गर्भमध्ये त्वं रक्षितवतो भगवतस्तस्य निजद्वारकावासिविप्रबालकरक्षाप्रयोजनमिदं कतरत् स्यात्, किन्तु प्रियजनप्रीतिविवर्धनलीलाविशेषार्थमेव तत्सर्वं विद्धीति भावः। तच्चाग्रे व्यक्तं भावि ॥२१॥ स कुमारक–पिता विप्रः। राज्ञ उग्रसेनस्य द्वारि, प्रजानां राज्ञ्येव दुःखनिवेदनेनास्य वक्ष्यमाणदोषारोपणस्य च योग्यत्वात्, उपाधाय समीपे धृत्वा, निधायेति वा, प्रकर्षेण गीतवदार्तस्वरादिनोवाच, सकाकु चुक्रोशेत्यर्थः। कथम्? विलपन्, विविधं विलापं कुर्वन्, यत आतुरः शोकविवशः, अत एव दीनमानसो दुःखितचित्तः। यद्वा, ००००००००००००००

(सनातनगोस्वामिपादविरचितबृहद्वैष्णवतोषण्याम् एतावत्येव टीका समुपलब्धास्माभिः)

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१६-२५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्थम् इति। सारस्वताः सरस्वतीतीतरवासिनो विप्राः नृणां संशयनिवृत्तये इत्थं निश्चित्य परमपुरुषस्य पदाम्भोजसेवया तद्गतिं मुक्तिं प्राप्ताः ॥२०॥ प्रकृतेतिहासश्रवणफलमाह सूतः–इतीति। मुनेर्द्वैपायनस्य यस्तनयः शुकस्तस्यास्यपद्मं मुखपद्मं तस्य गन्धो यस्मिन् तत्पीयूषममृतमेतद्भगवतः तरत्वप्रकाशकेतिहासात्मकम्। भयं संसृतिभयं भिनत्तीति तथा। सुश्लोक्यं बहुमन्तव्यं प्रसिद्धासृतं तु नैव विधमिति भावः। अभीक्ष्णं पुनः पुनः कर्णपुटैः श्रोत्रचषकैः पिबन् पान्थः संसाराध्वगः अध्वभ्रमणपरिश्रमं प्रकृतिमण्डलपरिभ्रमणजं श्रमं जहाति मुक्तो भवतीत्यर्थः ॥२१॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥१९-२२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१६-५४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पद्मगन्धपीयूषमित्युपाख्यानस्यास्य पीयूषत्वाद्भवरोगनिवर्तकत्वम्। पद्मगन्धवत्वात् भक्तमधुकराकर्षकत्वं च ॥२१॥

गूढार्थदीपिनी

सारस्वताः सरस्वतीतीरवासिनः। संशयः को महानिति तस्य नुत्तये निवृत्तये विष्णुं निर्णीयेति योज्यम्। तद्गतिं मुक्तिं प्रापुरिति ॥२०॥ यः पान्थः संसारपथिकः परस्य पुंसः विष्णोः सुश्लोक्यं प्रशस्तमेतत् यशः श्रवणपुटैः कर्णरन्ध्रैः इत्थं पिबति शृणोति स अध्वभ्रमणं नानायोनिषु गमनं तत्परिश्रमं च यातयातजन्यं जहाति मुक्तोभवतीत्यर्थः। कथम्भूतं यशः। मुनितनयः श्रीशुकः तस्य आस्यपद्मं मुखकमलं तस्य गन्धः सम्बन्धो यस्मिन् तत् पीयूषममृतमिव स्वादु। पुनश्च। भवभयं भिनत्तीति तथा। अभीक्ष्णं पुनः पुनः ॥२१॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सारस्वताः विप्राः एवं नृणामुपासकानां संशयनुत्तये त्रिषु देवेषु कः महानिति सन्देहानिवृत्तये बभूवुरित्यर्थः। न केवलं संशयनिवृत्त्यर्थमेव ते बभूवुरपि तु पुरुषस्य पुरुषोत्तमस्य पदाम्भोजसेवया तद्गतिं तस्य पदं गताः प्राप्ताः ॥२०॥ सुश्लोकं सुयशः ॥२१॥ स च सर्वश्रेष्ठः पुरुषः श्रीकृष्ण एवेति दार्ढ्यार्थमितिहासान्तरमाह एकदेति ॥२१-२२-२३-२४-२५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एतत्प्रासङ्गिकमुक्त्वा निर्णयकर्तॄणां किं जातमित्याकाङ्क्षायामाह-इत्थं सारस्वता विप्रा इति। सरस्वतीतीरस्था मुनयः प्रमाणोत्कर्षमापन्नाः वाक्यमात्रेण नृणां संशयो न गच्छतीति संशयनिवृत्त्यर्थं स्वयं भजनं कृत्वा ततस्तयैव सेवया गन्तुं योग्यं भगवन्तं गताः —

"भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित्। स एव मुक्तिदाता च भक्तिस्तत्रैव कारणम् ॥" इति वाक्यात् ॥२०॥ कृतेतिहासश्रवणफलमाह सूतः-एवमुपाख्यानस्य फलपर्यन्ततामुक्त्वा तस्य च फलं सर्वदैव ज्ञापयितुं सूतः फलश्रुतिमाह-त्येतदिति। इतीति कथासमाप्तिः। एतदित्यनुवादः यतः कुतश्चिदपि श्रुतं भगवच्चरित्रं कार्यं साधयत्येव फलरूपता तु साधारणानामपि भक्तमुखश्रवणादेवभगवन्तं ज्ञापयितुं विशेषणं मुनितनयस्यापद्मगन्धपीयूषमिति मुनितनयत्वेनान्यथा ज्ञानं निवर्तयति-आस्यपद्ममिति। पद्मे क्लेशाभाव उक्तः अधः स्थितपद्मे तु निम्नतासम्पादनक्लेश इति गन्धयुक्तं पीयूषमिति भक्तिरसालोडितं चरित्रमुक्तम्। अनेन अतः पुरुषार्थता निरूपिता। साधकत्वमप्याह-भवभयभिदिति। संसारभयं निवर्तयति-भवपदं भयस्यानिवर्त्यत्वं ज्ञापयति कीर्ते तत्साधकत्वे हेतुमाह-परस्य पुंस इति। न हि प्रकृतिमध्यस्थितस्य चरित्रमेतादृशं भवतीति शब्दतोऽप्युत्तमतामाह-सुश्लोकमिति। शोभनाः श्लोका व्यासादिकृता यस्मिन् श्रवणपुटैरित्युत्तम्भितकर्णपुटैरिति। बहुवचनेन वरत्वेन प्राप्तैः विधत्स्वकर्णायुतमिति वाक्यात्। एवं यः भूत्वा अभीक्ष्णं पिबति तस्य साधनदशास्थितोऽपि क्लेशो निवर्तते इत्यर्थः ॥२१॥

श्रीसुबोधिनीसारः

शुकोक्तिः ॥ एवं सारस्वताः सरस्वतीतीरवासिनो न तु जात्याक्रान्ता विप्रा नृणां पामराणां सन्देहनाशनार्थं पुरुषस्य श्रीविष्णोः पदाम्भोजयोः पादपद्मयोः सेवया तस्यैव गतिं प्राप्ताः ॥२०॥ सूतोक्तिः ॥ मुनितनयस्य व्यासपुत्रस्यास्यपद्मान्मुखपङ्कजात् उत्पन्नं गन्धयुक्तपीयूषममृततुल्यं भवभयभित् संसारभयहरं परस्य पुंसः श्रीहरेः सुश्लोक्यं प्रशस्तं यश एतत् अभीक्ष्णमसकृत् यः संसारी श्रवणपुटैः पिबति। सोऽध्वभ्रमणपरिश्रमं त्यजति मुक्तो भवति ॥२१॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं सारस्वता: सरस्वतीतीरवासिनो विप्रा नृणां संशयनुत्तये विष्णोर्महत्त्वं निर्णीय तस्य पुरुषस्य पदाम्भोजसेवया तद्गतिं गतास्तत्स्वरूपं प्राप्ता: ॥२०॥ प्रकृतेतिहासश्रवणादिफलमाह-इत्येतदिति । मुनेर्व्यासस्य तनय: शुकस्तस्यास्यपद्मं मुखकमलं तस्य गन्धो यथार्थत्वं यस्मिंस्तत्पीयूषम् अमृतमिव स्वादु भवभयं भिनत्तीति भवभयभित् इत्येवं पूर्ववर्णितमेतत् परमस्य पुंसो विष्णो: सुश्लोक्यं प्रशंसायोग्यं महत्त्वं य: पान्थ: संसारपथि वर्तमान: श्रवणपुटैरभीक्ष्णं पुन: पुन: पिबति आदरेण श्रुत्वाऽन्त: स्थापयति, सोऽध्वभ्रमणपरिश्रमं जन्ममरणादिसंसारपरिभ्रमणजनिततापत्रयं जहाति ॥२१॥

अन्वितार्थप्रकाशिका

कथोपसंहाराय श्रीशुक उवाच केचित्तु भूयांसं श्रद्दधुर्विष्णुमित्यत: परं यत: शान्तिरित्यादितीर्थसाधनमित्यन्तं सरस्वतीतीरवासिनां मुनीनां वचस्तदनन्तरं शुक उवाचेत्याहु:-एवमिति ॥ एवं सारस्वता: सरस्वतीतीरवासिनो विप्रा नृणां संशयनुत्तये निवृत्तये विष्णोर्महत्त्वं निर्णीय तस्य पुरुषस्य पदाम्भोजसेवया तद्गतिं गतास्तत्स्वरूपं प्राप्ता: ॥२०॥ इत्येतदिति । मुनेर्व्यासस्य तनय: शुकस्तस्यास्यपद्मं मुखकमलं तस्य गन्धो यथार्थत्वं यस्मिंस्तत्पीयूषम् अमृतमिव स्वादु "गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयो: ।" इति कोष: । भवभयं भिनत्तीति भवभयभित् इत्येवं पूर्ववर्णितमेतत् परमस्य पुंसो विष्णो: सुश्लोक्यं प्रशंसायोग्यं महत्त्वं य: पान्थ: संसारपथे वर्तमान: श्रवणपुटैरभीक्ष्णं पुन: पुन: पिबति सेवते सोऽध्वभ्रमणपरिश्रमं तत्तपरिश्रमं च जहाति। तत: परं भ्रमणाभावात् तदानन्तेद प्राचीनदु:खविस्मृतेश्च ॥२१॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

उपद्रष्टा साक्षी ॥२०॥ मुनितनयस्य व्यासपुत्रस्य मुखपद्मान्नि:सृतं गन्धपीयूषं सुगन्धयुतामृततुल्यं प्रसिद्धं यश: य: पिबति स अध्वभ्रमणस्य संसाररूपमार्गभ्रमणस्य परिश्रमं जहाति ॥२१॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रकृतेतिहासश्रवणफलमाह ॥ इतीति ॥ इत्येवंविधं मुनेर्द्वैपायनस्य यस्तनय: शुकस्तस्य यदास्यपद्मं मुखकमलं तस्य गन्धो यस्मिंस्तत्पीयूषममृतरूपं भवभयभिच्छ्रोतृवक्तृभवभयभेदकं, सुश्लोक्यं बहुमन्तव्यम् एतत् परस्य पुंस: इतिहासं य: श्रवणपुटै: पिबति पान्थ: सांसारिके पथि वर्तमान: स एतदितिहासश्रावको जन: अध्वभ्रमणपरिश्रमं सांसारिकाध्वपरिभ्रमणजं श्रमं जहाति मुक्तो भवति ॥२०॥ केचित्त्वत्रैवाध्यायं समापयन्ति ॥ अथ योऽसावुक्तविध: परमपुरुष: स एव श्रीकृष्ण इति दर्शयितुमितिहासान्तरं प्रस्तौति ॥ एकदेति ॥ हे भारत ! एकदा कदाचित्, द्वारवत्यां तु द्वारकायामेव विप्रपत्न्या: कस्याचिद्ब्राह्मणस्य स्त्रिया: कुमारक: बालक: जातमात्र: भुवं स्पृष्ट्वा ममार किल ॥२१॥

कृष्णप्रिया

श्रीशुकदेवजी ने कहा हे परीक्षित् ! भगवती सरस्वती के तट पर सारस्वत ऋषियोंने लोगोंके संशय मिटाने के लिये ही ऐसी युक्ति रची थी । ऋषिवर्यों ने भगवान् विष्णु के चरणकमलोंकी सेवा करके परमपद की याने वैष्णवी गति प्राप्त की ॥२०॥ सूतमहर्षि कहते है - हे शोनकादि ऋषियों ! जो यह व्यासनन्दन श्रीसुकदेवजी के मुखारविन्द से निकली हुई सुरभीमय सुधाधारा को श्रवण करेंगे उनका संसारमय दूर हो जायगा और यह श्लोकबद्ध कथा जो अपने कानों से निरन्तर पान करता रहेगा उसकी सारी थकावट जो संसार रणमें इधर उधर भटकने से होती है, वह दूर हो जाती है ॥२१॥

श्रीशुक उवाच

[1]एकदा द्वारवत्यां तु विप्रपत्न्याः कुमारकः । जातमात्रो भुवं स्पृष्ट्वा ममार किल भारत ॥२२॥
विप्रो गृहीत्वा मृतकं राजद्वार्युपधाय सः । [2]इदं प्रोवाच विलपन्नातुरो दीनमानसः ॥२३॥
ब्रह्मद्विषः शठधियो [3]लुब्धस्य विषयात्मनः । क्षत्रबन्धोः कर्मदोषात् पंचत्वं मे [4]गतोऽर्भकः ॥२४॥
हिंसाविहारं नृपतिं दुःशीलमजितेन्द्रियम् । प्रजा भजन्त्यः सीदन्ति दरिद्रा नित्यदुःखिताः ॥२५॥
एवं द्वितीयं विप्रर्षिस्तृतीयं त्वेवमेव च । [5]विसृज्य स नृपद्वारि तां गाथां समगायत ॥२६॥

कर्दमक्षमा

श्रीशुकः, उवाच ।

भारत, एकदा, द्वारवत्याम्, विप्रपत्न्याः, कुमारकः, तु, जातमात्रः, भुवम्, स्पृष्ट्वा, किल, ममार ॥२२॥ सः, विप्रः, मृतकम्, गृहीत्वा, राजद्वारि, उपधाय, दीनमानसः, आतुरः, विलपन्, इदम्, प्रोवाच ॥२३॥ ब्रह्मद्विषः, शठधियः, लुब्धस्य, विषयात्मनः, क्षत्रबन्धोः, कर्मदोषात्, मे, अर्भकः, पञ्चत्वम्, गतः ॥२४॥ हिंसाविहारम्, दुःशीलम्, अजितेन्द्रियम्, नृपतिम्, भजन्त्यः, नित्यदुःखिताः, दरिद्राः, प्रजाः, सीदन्ति ॥२५॥ एवम्, द्वितीयम्, एवमेव, तृतीयम्, च, राजद्वारि, विसृज्य, सः, विप्रर्षिः, तु, ताम्, गाथाम्, समगायत ॥२६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

स चोक्तलक्षणो भगवान् कृष्ण एवेति दर्शयितुमाख्यानान्तरमाह-एकदेति ॥२२-२५॥ ब्रह्मद्विष इत्यादिकां तां गाथां वाक्यम् मयि न कश्चिद्दोषोऽतो राजदोषेणैव मत्पुत्रा म्रियन्त इति वारं वारं चुक्रोशेत्यर्थः ॥२६-२७॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स च भृगुपरीक्षित उक्तलक्षणो नित्यधर्मज्ञानादिरूपः श्रीकृष्ण एवेत्याह-एकदा श्रीकृष्णस्य यज्ञकाले ॥★॥ इत्थमुक्तः श्रीविष्णोरुत्कर्षः स्वयं भगवति श्रीकृष्ण एव पर्यवस्यतीत्याशयेन साक्षात्तन्माहात्म्यमेव विशेषतो निरूपयितुं प्रसङ्गान्तरमारभते-एकदेति । तु-शब्दः पूर्वोक्ताद्विशेषापेक्षया । किल प्रसिद्धौ । प्रसिद्धमेवैतदित्यर्थः । हे भारतेति । यथा नष्टो भरतवंशस्त्वज्जीवनेन भगवतोद्धृतस्तथास्य विप्रस्य वंशमप्येतत्पुत्रजीवनेनोद्धरिष्यतीति भावः । यद्वा भरतवंशयशोवृद्ध्यर्थमेव भगवता तदा जीवित इति भावः ॥२२॥ इदं वक्ष्यमाणम् ॥★॥ यस्य सा पत्नी स विप्रः राज्ञ उग्रसेनस्य द्वारि प्रोवाच सकाकु चुक्रोशेत्यर्थः ॥२३॥ ब्रह्मद्विषः वेदविष्णुविप्रविरोद्धुः । शठधियो वञ्चनापरस्य ॥★॥ ब्रह्म वेदो ब्राह्मणजातिर्वा तद्द्वेष्टीति तथा तस्य । ब्राह्मणमरणेऽप्यौदासीन्यादिति भावः । यतः शठा धर्मरहिता धीर्यस्य तस्य । तत्र हेतुर्विशेषयेष्वात्मा बुद्धिर्यस्य । तत्रापि हेतुः क्षत्रबन्धोरिति क्षत्रियधामस्य ॥२४॥ दुःशीलं धर्मद्वेष्टारम् । सीदन्ति क्लिश्यन्ति ॥★॥ राजदोषेण स्वबालमरणे शास्त्रं प्रमाणयति-हिंसेति । हिंसाविहारे हेतुः-दुःशीलं दुष्टस्वभावम् । तत्र चे हेतुः-अजितेन्द्रियम् । सीदन्ति विषण्णा भवन्ति ॥२५॥ इत्यर्थ इति-अधर्मवर्तिनां राज्ञां विषये कुतः प्रजानां सुखमिति भावः ॥★॥ विप्रर्षिरिति । तस्य स्वतो दोषेऽभावे आदरणीये च योग्यता दर्शितेति ॥२६॥

---

१. एतदारभ्य अर्धत्रयं नास्ति-विज. । २. अत्र सार्धत्रयोदशश्लोकाः अधिकाः-विज. । ते च विजयध्वजटीकायां कुण्डले () दत्ताः । ३. लुब्धस्याविजितात्मनः-वीर. । ४. गताः सुताः-विज. । ५. एतदादिसार्धश्लोकस्य स्थाने चत्वारः श्लोका वर्तन्ते । ते च विजयध्वजटीकायां कुण्डले () दत्ताः ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्थमुक्तः श्रीविष्णोरुत्कर्षः स्वयं भगवति श्रीकृष्ण एव पर्यवस्यतीत्याशयेन साक्षात्तन्माहात्म्यमेव विशेषतो निरूपयितुं प्रसङ्गान्तरमारभते-एकदेति। तु-शब्दः पूर्वोक्ताद्विशेषापेक्षया। किल प्रसिद्धौ। सर्वत्र सुविख्यातमेवैतदित्यर्थः। अतो भगवन्निवासेऽपि तदसम्भावितमिति न मन्तव्यमिति भावः ॥२२॥ यस्य पत्नी सा स विप्रः राज्ञ उग्रसेनस्य द्वारि प्रोवाच। सकाकु चुक्रोशेत्यर्थः। कथं विलपन् विलापं कुर्वन् यत आतुरः शोकपीडितः अत एव दीनमानसो दुःखितचित्तः ॥२३॥ ब्रह्म वेदः ब्राह्मणजातिर्वा तद्द्वेष्टीति तथा ब्राह्मणमरणेऽप्यौदासीन्यादिति भावः। यतः शठा धीर्यस्य तस्य तत्र हेतुः विषयेषु आत्मा मनो यस्य तस्य। तत्रापि हेतुः क्षत्रबन्धोः क्षत्रियाधमस्य ॥२४॥ राजदोषेणात्मनो बालकमरणे शास्त्रं प्रमाणयति-हिंसेति। हिंसाविहारत्वे हेतुः दुःशीलं दुष्टस्वभावम्। तत्र च हेतुः अजितेन्द्रियं भजन्त्यः सीदन्ति। कीदृशाः दरिद्राः नित्यं दुःखिताश्च विविधशोकार्ताः सत्यः ॥२५॥ तु-च तृतीये च चकारादन्यमपि नवमान्तं विप्रर्षिरिति तस्य स्वतो दोषाभावे चादरे च योग्यत्वं दर्शितम्। तां गाथामिति तस्याभिधेयत्वेन ब्रह्मद्विष इत्यादिका तत्पोषकत्वेन हिंसेत्यादिका ज्ञेया ॥२६॥

श्रीसनातनगोस्वामिकृता बृहद्वैष्णवतोषिणी

(सनातनगोस्वामिपादविरचितबृहद्वैष्णवतोषण्याम् एतावत्येव टीका समुपलब्धास्माभिः)

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

द्वितीयं तृतीयपर्यायम् ॥२६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

अत्र केचिदध्यायं समापयन्ति अथ योऽसावुक्तविधः परमपुरुषः स एव श्रीकृष्ण इति दर्शयितुमितिहासान्तरं प्रस्तौति एकदेत्यादिना। विप्रस्य कस्यचित्पत्न्याः कुमारो हे भारत! जातमात्रस्तदैव भुवं स्पृष्ट्वा ममार ॥२२॥ विप्र इति। स विप्रः राजद्वारे उपाधाय निधायेदं वक्ष्यमाणं प्रोवाच ॥२३॥ इदमिति। विवक्षितमेवाह द्वाभ्याम्-ब्रह्मद्विष इति। ब्रह्म ब्राह्मणान् द्वेष्टीति तथा तस्य शठस्य मूर्खस्येव धीर्यस्य लुब्धस्य निषादतुल्यस्याजितेन्द्रियस्य क्षत्रबन्धोः क्षत्रियाभासस्य राज्ञः कर्मदोषात् दुर्व्यापारदोषान्ममार्भकः पञ्चत्वं मरणं प्राप्तः। मयि तु न कश्चिद्दोष इति भावः ॥२४॥ क्षत्रबन्धोः कर्मदोषात्पञ्चत्वं मे गतोऽर्भकः। इत्युक्तं तदेव दृढीकरोति। हिंसैव विहारो यस्य तं दुष्टं शीलं वृत्तिर्यस्य तमजितेन्द्रियं नृपं भजन्त्यः प्रजाः सीदन्ति दुःख्यन्ति नित्यं दरिद्रा दुःखिताश्च भवन्ति ॥२५॥ एवमिति। एवमेव चाष्टकृत्वः स विप्रो नृपद्वारि मृतकं विसृज्य तां गाथां ब्रह्मद्विष इत्यादिवाक्यमगायत प्रोवाच ॥२६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

(कदाचिद्वाजिमेधेन यष्टुमुद्यम्य केशवः। मही प्रदक्षिणीकर्तुं प्राहिणोत्प्रोक्षितं हयम् ॥१॥
हार्दिक्यं कृतवर्माणं युयुधानं च सात्यकिम्। चारुदेष्णं सुदेष्णं च प्रद्युम्नं साम्बमेव च ॥२॥
अंशुमन्तं सुभानुं च बहुसैन्यांश्च यादवान्। रक्षणार्थं तुरङ्गस्य प्राहिणोद्यदुनन्दनः ॥३॥
ते वै प्रदक्षिणं कृत्वा वसुधां प्रोक्षितं हयम्। उपानिन्युरदीर्घेण कालेन भरतर्षभ ॥४॥
यष्टुकामं हरिं श्रुत्वा हयमेधेन भारत। आजग्मुर्दीर्घतपसो मुनयः शंसितव्रताः ॥५॥
होतारं च तथाऽध्वर्युमुद्गातारं च केशवः। कल्पयित्वा यथान्यायं तथान्यानपि ऋत्विजः ॥६॥
ऋषिभिर्ब्राह्मणश्रेष्ठैर्यज्ञविद्याविचक्षणैः। दीक्षां प्रपेदे भगवान् कृतपुण्याहमङ्गलः ॥७॥

श्रीमद्विजयध्वजकृता पदरत्नावली

तमुपास्तुं महीपाला नानाजनपदेश्वराः । आजग्मुर्देवसङ्काशाः किरीटमुकुटोज्ज्वलाः ॥८॥
पाण्डवाश्च महीपाल यज्ञदर्शमिच्छवः । आहूता वासुदेवेन द्वारकामाययुर्नृप ॥९॥
तस्मिंस्तथा वर्तमाने हयमेधमहोत्सवे । आसंस्तृप्ता द्विजा भोज्यवस्त्रगोभूमिकाञ्चनैः ॥१०॥
दीक्षां प्रविश्य गोविन्दः कामैस्तर्पयति द्विजान् । भुञ्जानेषु द्विजाग्र्येषु प्रत्यगृह्णत्सुवाञ्छितम् ॥११॥
आसीनेषु यथायोगं भूपालेषु समन्ततः । वदत्सु मा शब्द इति वेत्रझर्झरपाणिषु ॥१२॥
तृणमूलधरः कश्चिद्ब्राह्मोऽभ्येत्य सत्वरः । चुक्रोश आर्त उद्यबाहुर्यज्ञवाटमुखे स्थितः ॥१३॥
क्षुत्क्षामकण्ठः शुष्कास्यो गलद्बाष्पाकुलेक्षणः ।)

(लोकसङ्ग्रहायाश्वमेधयज्ञकरणमन्यासाध्यमृतविप्रपुत्रानयनमाहात्म्यं च निरूपयत्यस्मिन्नध्याये । तत्रादौ हयस्य प्रदक्षिणाप्रकारं वक्ति-कदाचिदिति । उद्यम्य उद्योगं विधाय ॥१-२॥ बहवः सैन्याः सेनानायकाः येषां ते तथा तान् यदून्नन्दयतीति यदुनन्दनः ॥३-४॥ हयमेधेनाश्वमेधेन । दीर्घकालं तपो येषां ते तथा ॥५-७॥ उपास्तुं निषेवितुम् । किरीटैः सुवर्णैश्चोज्ज्वलाः ॥८-११॥ वेत्रेण झर्झराः कर्कशाः पाणयो येषां ते तथा तेषु ॥१२॥ तृणमूलधराः तृणानां मूलं चूडां धारयतीति तृणमूलं यष्टिं च धारयतीति वा ॥१३॥)

॥२३-२४॥

(इत्युक्त्वा स पुनश्चैव चुक्रोश भृशदुःखितः । तदाकर्ण्यार्जुनो मानी समुत्थाय वरासनात् ॥०॥
अपृच्छत्स्वयमासाद्य ब्राह्मणं केशवान्तिकात् । किमासन्नर्भका ब्रह्मंस्तव केनासि दुःखितः ॥०॥
ब्रूहि तत्त्वमशेषेण त्वामद्य सुखयाम्यहम् । इत्युक्तो ब्राह्मणः प्राह जातो जातोऽर्भको मम ॥०॥
नीयते तात केनापि तत्क्षणे सूतिकागृहात् ॥०॥)

हिंसाविहारादिकर्मयुक्तं नृपतिं भजन्त्यः सीदन्ति ॥२५॥ द्वितीयवारं द्विवारम् । तृतीयं त्रिवारम् । पुनश्चतुर्वारम् ॥२६-२७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥१६-५४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तदेवं भगवत एव सर्वोत्कर्षमुक्त्वा भगवत्त्वेऽपि कृष्णस्य सर्वमहोत्कर्षं वक्तुं किमपि तच्चरितमाह-एकदेति ॥२२-३॥ क्षत्रबन्धोरिति मयि न कोऽपि दोषः अतो राजदोषेणैव मत्पुत्रो मृतः ॥२४-२५॥ तां ब्रह्मद्विष इत्यादिकां गाथाम् ॥२६-२७॥

गूढार्थदीपिनी

हे भारत ! परीक्षित् ! ॥२२॥ राज्ञः उग्रसेनस्य द्वारि ॥२३॥ शठा वञ्चनपरा धर्मरहिता वा धीर्यस्य । क्षत्रबन्धो क्षत्रियाधमस्य कर्मदोषात् अनाचारात् । पञ्चत्वं मृत्युम् ॥२४॥ सीदन्ति क्लिश्यन्ति ॥२५॥ विसृज्य संस्थाप्य गाथां चर्चां राजन्यदोषरूपाम् ॥२६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तां गाथां ब्रह्मद्विष इत्यादिवाक्यम् ॥२६-२७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं प्रमाणबलेन भगवतो ज्ञानशक्तिर्निरूपिता । प्रमेयबलेन निरूपयितुमुपाख्यानान्तरमारभते शुकः स्वयमेव-एकदेति। इतीदृशानीत्यन्तेन । प्रमेयबलेन पूर्वपक्षे कालस्यापि बलं निरूपणीयम् । ततो न देशादीनां बलेन सह विरोधः एते दशलीलारूपाः प्राणरूपा वा निर्गुणया भक्त्या सह भक्तिरूपा वा येषाम् अर्थे भगवान् गच्छतीति तेजसः प्रत्यापत्तिरपि कर्तव्येति भगवतो गमनमित्येके । अनिरुद्धचरित्रत्वादर्जुनेन सह गमन अर्जुने सर्वदेवतानामस्त्राणि वर्तन्त इति तत्सामर्थ्ये निराकृते सर्वेषामेव सामर्थ्यं निराकृतं भवतीति ज्ञापयितुं तत्कथा । एकदा यस्मिन् काले भगवतः स्वसामर्थ्यप्रदर्शनेच्छा । तु-शब्दो वैकुण्ठे कथमेवमिति शङ्काव्यावृत्तयर्थः । कस्याश्चिद्विप्रपत्न्याः कुमारकः पुत्रः जातमात्र एव तदानीं कालो भूमौ तिष्ठतीति भूमिस्पर्शमात्रेणैव मृतः किलेति प्रसिद्ध्या । शुकः स्वदोषं परिहरति-भारतेति विश्वासार्थम् ॥२२॥ ततो ब्राह्मणः अभूतपूर्वोऽयमर्थ इति भगवता कालस्य पूर्वं भोगोऽपि व्यावर्तित इति विद्यमानेऽपि भगवति यत्पुत्रमरणं तच्छम्बुकन्यायेन जातमिति प्रत्यापत्तिर्भविष्यतीति राजदोषेणैवमिति तान् ज्ञापयन् बालकं गृहीत्वा राजद्वारि गत इत्याह-विप्रो गृहीत्वेति । उपचारव्यावृत्त्यर्थं मृतकमिति । राजद्वारि स्थापयित्वेति विचारार्थं शबवाहकस्य वचनम् उपाधाय इदं प्रोवाचेत्याह-विलपन्निति । कृत्रिमताव्युदासाय बाह्यो भाव उक्तः । दीनमानस इत्यान्तरः ॥२३॥ बोधनार्थमाह-ब्रह्मद्विष इति द्वाभ्याम् । प्रकृताप्रकृतभेदात् द्वारकायां तादृशो राजा मृग्यते तादृशोऽयमुग्रसेनो न भवतीति तद्दोषः प्रायेण भविष्यतीति आशयेनाह-राज्ञो दोषत्रयं महत् । ब्रह्मद्वेषो जडबुद्धिः लोभश्चेति । विषयात्मकता च चतुर्थः । साधारणः चतुर्विधेऽपि प्रायेणायं राजा ब्रह्मद्वेषेण तस्य धर्माभावः शठबुद्ध्या नार्थः । लोभान्न कामः । विषयासक्त्या न मोक्ष इति । स राजा सर्वपुरुषार्थवञ्चितो भवति । तादृशस्य कर्माणि तस्य पुरुषार्थाभावात् तत्रापकारं कर्तुं समर्थानि मदुपरि पतितानीत्याह-पञ्चत्वं मे गतोऽर्भक इति । चतुष्टं स एव गतः तस्यैव पञ्चत्वे क्षत्रबन्धुत्वाद्रक्षा न भविष्यतीति ब्राह्मणास्तदीया इति तेषु पतति ॥२४॥ ननु पुरोहितविषयमेतत् गुरौ शिष्यश्च याज्यश्चेति वाक्यात् । साधारणश्च ब्राह्मणस्त्वं तादृशः कथं दुःखी जात इति चेत्तत्राह-हिंसाविहारमिति । राज्ञो महान् त्रिदोषः सर्वानेव व्याप्नोति । राज्यस्थितान् निषिद्धस्य कर्ता विहितस्याकर्ता दुष्टपोषकश्चेति दोषत्रयं क्रमेणाह-हिंसायामेव विहारो यस्य दुष्टं शीलं यस्य न जितानीन्द्रियाणि येनेति तादृशं नृपतिं भजन्त्यः प्रजाः क्रमेण तत्तद्दोषं प्राप्नुवन्ति । आदाववसादं हिंसाफलं मृतप्राया भवन्तीत्यर्थः । दुःशीलत्वात् धर्माभावात् दरिद्रा भवन्तीत्यर्थः । ततः शत्रुजयाभावात् नित्यदुःखिताः एवमुपदेशार्थमुक्त्वा बालकं गृहीत्वा गच्छति ॥२५॥ एवमेकवारकथामुक्त्वा पर्यायान्तरेष्वप्युपदिशति । एवं द्वितीयमिति । द्वितीयमप्येवमेव बालकमानीयैव वदति । ततो लोकानां प्रतीतिर्जातेति पश्चात् षट् पुत्रा नानीताः परं स्वयमेवागत्य वाक्यं वदति । तृतीयं तु तत्रैव त्यक्तवानिति लक्ष्यते । द्वारकायां भगवान् मुख्यः । स तूष्णीं तिष्ठति । तत्रत्याः सर्वे एव तूष्णीं तिष्ठन्ति । यथा कायिकोऽपराधः ब्राह्मणस्य सोढव्यः । एवंवाचनिकोऽपीति यथा ब्रह्मविचारार्थं प्रवृत्तस्य तथेति ब्राह्मणः कार्यं तथात्रापि भगवता नीयन्त इति तूष्णीं भावः ॥२६॥

श्रीसुबोधिनीसारः

शुकोक्तिः ॥ चरित्रान्तरमाह ॥ एकदा द्वारकायामिति मन्दाः सप्तम्याः सामीप्यार्थत्वात् । इति स्पष्टं भारते । विप्रपत्न्या ब्राह्मण्याः कुमारकः शिशुर्जात एव भूमिं स्पृष्ट्वा ममार किलैव । हे भारत ! ॥२२॥ मृतं बालमादाय राज्ञो द्वारि उपधाय न्यस्य दीनचित्तः स विप्रः तत्पितातुरो दुःखितो विलापं कुर्वन्निदमाह ॥२३॥ विप्रद्वेषिणः शठा परवञ्चनी धीर्यस्य तस्य । तदुक्तम् —

"मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यद्दुरात्मनाम् । मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ॥" इति ।

लुब्धस्य भोगचित्तस्य क्षत्रबन्धोः कर्मदोषात् मेऽर्भको बालो मृत्युं प्राप्तः ॥२४॥ दुःस्वभावम् अजितेन्द्रियं लम्पटं हिंसारामं नृपं भजन्त्यः सेवमानाः प्रजा दरिद्रा नित्यदुःखिताः तपन्ते ॥२५॥ एवं द्वितीयं बालं तृतीयं च नृपद्वारि विसृज्य त्यक्त्वा तां गाथां विप्रर्षिरगायत ॥२६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सोऽसावुक्तविधपरमपुरुषः श्रीकृष्ण एव इति सूचयन्नितिहासान्तरमाह-एकदेति । भारतेति सम्बोधनं विश्वासार्थम् ॥२२॥ पुत्रमरणात् दीनं दुःखितं मानसं यस्य सः अत एवातुरो व्याकुलचित्तः स विप्रो मृतकं पुत्रं गृहीत्वा राजद्वार्युपधार्येदं प्रोवाच ॥२३॥ तद्वचनमाह-ब्रह्मद्विष इति द्वयेन । ब्राह्मणान् द्वेष्टीति तथा तस्य, शठा लुब्धकस्येव वञ्चनपरा द्रव्यग्रहणतात्पर्यवती धीर्यस्य तस्य, तत्र हेतुमाह-लुब्धस्येति । तत्रापि हेतुमाह-विषये आत्मान्तःकरणं यस्य तस्य क्षत्रबन्धोः क्षत्रियाधमस्य अस्य राज्ञः कर्मदोषान्मे अर्भकः पुत्रः पञ्चत्वं गतः मरणं प्राप्तः ॥२४॥ हिंसायामेव विहारो यस्य तं दुष्टं शीलं स्वभावो यस्य तम् अजितेन्द्रियं नृपतिं भजन्त्यः प्रजा दरिद्रा अत एव नित्यदुःखिताश्च सत्यः सीदन्ति क्लिश्यन्तीत्यर्थः ॥२५॥ एवमेव चाष्टकृत्वः स विप्रर्षिर्मृतं बालं नृपद्वारि विसृज्य संस्थाप्य तां ब्रह्मद्विषः इति पूर्वोक्तां गाथामगायत ॥२६॥

अन्वितार्थप्रकाशिका

एकदेति स्पष्टम् ॥२२॥ विप्र इति ॥ पुत्रमरणाद्दीनं दुःखितं मानसं यस्य सः अत एवातुरो व्याकुलचित्तः स विप्रो मृतकं पुत्रं गृहीत्वा राजद्वार्युपधार्येदं प्रोवाच ॥२३॥ ब्रह्मेति । ब्राह्मणान् द्वेष्टीति तथा तस्य शठा वञ्चनपरा धीर्यस्य तस्य लुब्धस्य विषयेषु आत्म यस्य तस्य क्षत्रबन्धोः क्षत्रियाधमस्य अस्य राज्ञः कर्मदोषान्मे अर्भकः पुत्रः पञ्चत्वं गतो मरणं प्राप्तः ॥२४॥ हिंसेति ॥ हिंसैव विहारो यस्य तं दुष्टं शीलं स्वभावो यस्य तम् अजितेन्द्रियं नृपतिं भजन्त्यः प्रजा दरिद्रा अत एव नित्यदुःखिताश्च सत्यः सीदन्ति क्लिश्यन्तीत्यर्थः ॥२५॥ एवमिति ॥ स विप्रर्षिः एवमेव द्वितीयं तृतीयादिं च मृतं बालं नृपद्वारि विसृज्य संस्थाप्य तां ब्रह्मद्विषः इति पूर्वोक्तां गाथां वाक्यमगायत । तदर्थः । मयि न कश्चिद्दोषः अतो राजदोषेणैव मे पुत्रा म्रियन्त इति वारंवारं चुक्रोशेत्यर्थः ॥२६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्रीकृष्णस्य माहात्म्यं बोधयितुमाख्यानान्तरमारभते-एकदेति ॥२२-२३-२४-२५॥ तां ब्रह्मद्विष इत्यादिनिन्दारूपां गाथां वचनततिं समगायत पुनः पुनश्चुक्रोश । परेते मृते सति ॥२६-२७॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विप्र इति ॥ सः विप्रः मृतकं पुत्रशवं गृहीत्वा राजद्वारि नृपगोपुरान्तः निधाय आतुरः दीनमानसः विलपन् संश्च इदं वक्ष्यमाणं प्रोवाच ॥२२॥ इदमिति विवक्षितमेवाह द्वाभ्याम् ॥ ब्रह्मद्विष इति ॥ ब्रह्म ब्राह्मणं द्वेष्टीति ब्रह्मद्विट् तस्य, शठस्य मूर्खस्येव धीर्यस्य तस्य लुब्धस्य निषादतुल्यस्य विषयात्मनोऽजितेन्द्रियस्य क्षत्रबन्धोः क्षित्रियाभासस्य राज्ञः कर्मदोषात् दुर्व्यापारदोषात् मे मम अर्भकः पञ्चत्वं मरणं गतः प्राप्तः । पितुर्मम न कश्चिद्दोष इति भावः ॥२३॥ 'क्षत्रबन्धोः कर्मदोषात् पञ्चत्वं

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मे गतोऽर्भकः' इत्येतत् दृढीकरोति ॥ हिंसाविहारमिति ॥ हिंसैव विहारो यस्य तं दुष्टं शीलं वृत्तिर्यस्य तम् अजितेन्द्रियं विषयासक्तं नृपतिं राजानं भजन्त्यः सेवमानाः प्रजाः सीदन्ति खिद्यन्ति । दरिद्राः नित्यदुःखिताश्च भवन्ति ॥२४॥ एवमिति ॥ विप्रर्षिः ब्रह्मर्षिः स विप्रः एवं द्वितीयं वारं तु पुनः तृतीयं वारम् एवमेवेत्थमेव अष्टवारान् नृपद्वारि विसृज्य मृतपुत्रं निधाय पूर्वोक्तां गाथां समगायत प्रोवाच ॥२५॥ तामिति ॥ नवमे बाले परेते सति तां पूर्ववद्विप्रेण गीतां गाथां कर्हिचित् केशवान्तिके उपविष्ट इति शेषः । अर्जुनः उपश्रुत्य ब्राह्मणं समभाषत ॥२६॥

कृष्णप्रिया

शुकदेवजी कहते है कि हे भारत ! एव वक्त ऐसा हुआ की, द्वारिकापुरीमें किसी ब्राह्मण की पत्नी से एक पुत्र को जन्म दिया परन्तु वह उसी समय पृथ्वी का स्पर्श होते ही मर गाय ॥२२॥ पुत्र के मृत्यु से खुःखग्रस्त ब्राह्मणदेव अपने बालकका मृतदेह लेकर राजमहल के द्वारा पर गाय और वहां उसे रखकर अत्यन्त आतूरता से दुःखीमन से विलाप करता हुआ यह कहने लगा ॥२३॥ इसमें कोई शंका का स्थान नहीं है कि ब्राह्मण द्रोही धूर्त कृपण विषयलंपट केवल नाधारी राजा के कर्मदोष से ही मेरे बालककी मृत्यु हुई है ॥२४॥ जो राजा हिंसापरायण खराबचरित्रवाला और असंयमी होता है, ऐसे बाज की सेवा करनेवाली परजा हंमेश के लिये दरिद्र और दुःख भोगती रहती है ॥२५॥ वह ब्राहंमदेवता द्वितीय पुत्र को भी द्वार पर लाकर ऐसा ही किया । किन्तु तृतीय बालक को तो राज के द्वार पर डाल गया और वही बात कह गया ॥२६॥

तमर्जुन उपश्रुत्य कर्हिचित् केशवान्तिके । परेते नवमे बाले ब्राह्मणं समभाषत ॥२७॥
किंस्विद्[1] ब्रह्मंस्त्वन्निवासे इह नास्ति धनुर्धरः । राजन्य[2]बन्धवो ह्येते ब्राह्मणाः सत्र[3]मासते ॥२८॥
[4]धनदारात्मजापृक्ता यत्र शोचन्ति ब्राह्मणाः । ते वै राजन्यवेषेण नटा जीवन्त्यसुम्भराः ॥२९॥
अहं [5]प्रजा वां भगवन् रक्षिष्ये दीनयोरिह । अनिस्तीर्णप्रतिज्ञोऽग्निं प्रवेक्ष्ये हतकल्मषः ॥३०॥

कर्दमक्षमा

कर्हिचित्, केशवान्तिके, अर्जुनः, तम्, उपश्रुत्य, नवमे, बाले, परेते, ब्राह्मणम्, समभाषत ॥२७॥ ब्रह्मन्, किंस्वित्, त्वन्निवासे, इह, धनुर्धरः, नास्ति, हि, एते, राजन्यबन्धवः, ब्राह्मणाः, सत्रम्, आसते ॥२८॥ यत्र, धनदारात्मजापृक्ताः, ब्राह्मणाः, शोचन्ति, ते, वै, राजन्यवेषेण, असुम्भराः, नटाः, इव, जीवन्ति ॥२९॥ भगवन्, इह, दीनयोः, वां, प्रजाः, अहम्, रक्षिष्ये, अनिस्तीर्णप्रतिज्ञः, हतकल्मषः, अग्निम्, प्रवेक्ष्ये ॥३०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ब्रह्मन् ! किं स्विदिति किमर्थं वृथा रोदिषि यतस्त्वन्निवासे धनुर्धरमात्रोऽपि राजन्यबन्धुरपि नास्ति ब्रह्मण्यस्य तु का वार्ता एते तु सत्रे याग इव ब्राह्मणा मिलिता भवितुमर्हन्तीत्यर्थः ॥२८॥ तदेवाह-धनदारात्मजापृक्ता यत्रेति धनादिभिर्वियुक्ताः सन्तो यत्र येषु जीवत्सु राजन्येषु शोचन्ति ते जीविकां सम्पादयन्ति ॥२९॥ हतकल्मष इति अग्निप्रवेशेन ब्राह्मणविलापनश्रवणपातकात्पूतो भवेयमित्यर्थः । अहतकल्मष इति वा ॥३०-३१॥

---

१. किं ब्राह्मण त्वन्निवासे-विज. । २. राजन्यबन्धुरेते वै-श्रीधर. वंशी. वीर. विश्व. शुक. ; राजन्यबन्धोरेवैते-विज. । ३. आसते-गो. प्रे. पु. ; मासते-श्रीधर. वंशी. वीर. विज. विश्व. । ४. त्मजैर्भृत्या-विज. । ५. प्रजानां-च. पु. टी. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परेते मृते ॥★॥ केशवान्तिक इति पार्थस्याधार्ष्ट्यबोधनार्थम्। केशौ जगत्स्रष्टृसंहर्तारावपि यस्य वशे तस्य तद्रक्षणं किं दुर्घटमित्यविचारात् ॥२७॥ एते यदवस्तु। इत्यर्थ इति-यागे यथा भोजनाद्यर्थमितस्ततो ब्राह्मणा आगत्य तिष्ठन्ति एवं यादवा अपि विषयसुखलम्पटत्वारक्षणाद्ब्राह्मणादिकं नानुसन्दधत इति भावः ॥★॥ ब्रह्मन्निति सगौरवसम्बोधनं तत्सान्त्वनार्थं विश्वासार्थं तदुपेक्षादोषव्यञ्जनार्थं च । वै उत्प्रेक्षायाम् ॥२८॥ तदेव ब्राह्मणरक्षणमेव । येषु क्षत्रियेषु । ते क्षत्रियविडम्बना नटा इव प्राणादिधारणार्थं शस्त्रादि बिभ्रतीत्यर्थः ॥★॥ परमनीचत्वेनैव वितर्क्या इत्याह-धनेति ॥२९॥ इह द्वारकायाम्। वां युवयोः स्त्रीपुंसयोः। इत्यर्थ इति-ब्राह्मणदुःखं समर्थेनापाकार्यमन्यथा पातकी स्यादिति भावः। अहतकल्मषश्चेत्तर्हि मिथ्याप्रतिज्ञत्वादग्निं प्रवेक्ष्य इत्यर्थः ॥★॥ वां युवयोरिति महाशोकेन ब्राह्मण्या अपि तत्रागमनात् । किंवा, तस्य सङ्ग्रहो दुःखव्यञ्जनार्थम् । अन्यत्तैः। यद्वा, अग्निप्रवेशे प्रयोजनमाह-हतकल्मष इति ॥३०॥०॥★॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

केशवस्यैवान्तिके वर्तमानस्तां गाथाम् उपश्रुत्य पारम्पर्येण श्रुत्वा ब्राह्मणमुपेत्य सम्यक् साश्वासनमुच्चैरुवाच ॥२७॥ ब्रह्मन्नित्यादि सगौरवसम्बोधनं तस्य सान्त्वनार्थं विश्वासनार्थं च तत्रत्यानां तदुपेक्षादोषव्यञ्जनार्थं च राजन्यबन्धुरपि किमुत राजन्य इत्यर्थः। वै उत्प्रेक्षायाम् ॥२८॥ किंवा, परमनीचत्वेनैव वितर्क्या इत्याह-धनेति। धनादीनां यथोत्तरं श्रैष्ठ्यम् ॥२९॥ वां युवयोरिति महाशोकेन ब्राह्मण्या अपि तत्रागमनात्। किंवा, तस्य सङ्ग्रहो दुःखव्यञ्जनार्थम्। अन्यत्तैः। यद्वा, अग्निप्रवेशे प्रयोजनमाह-हतकल्मष इति स्यामिति शेषः ॥३०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

कर्हिचित् कदाचित् ॥२७-४०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तामिति। परेते मृते सति नवमे बाले पूर्ववद्विप्रेण गीतां तां गाथां श्रुत्वा ॥२७॥ भाषणमेवाह-किं स्विदिति। त्रिभिः हे ब्रह्मन्! इह त्वन्निवासभूते पुरे धनुर्धरः कोऽपि नास्ति किं स्वित्। धनुर्धरमात्रो राजन्यबन्धुरपि नास्ति किमित्यर्थः। ब्रह्मण्यो नास्त्येवेति भावः। एते तु सत्रमासते ये ब्राह्मणाः सत्रयागे ब्रह्मणा इव मिलिताः धनादिभिर्युक्ताः सुखमासत इत्यर्थः ॥२८॥ यत्र येषु जीवत्सु ब्राह्मणाः धनदारात्मजैः अयुक्ताः एवं शोचन्ति ते वै राजन्यरूपेण क्षत्रियवेषेण नटा इव असुम्भरा स्वप्राणपोषणपराः जीवन्ति। ते जीवच्छवप्राया इति भावः ॥२९॥ अहमिति। दीनयोर्वां युवयोः प्रजां जनिष्यमाणं पुत्रमहम् इहैव स्थित्वा रक्षिष्ये। यद्यहमनिस्तीर्णप्रतिज्ञः अनिष्पादितप्रतिज्ञः स्यां तर्ह्यग्निं प्रवेक्ष्ये । ततो हतकल्मषः ब्राह्मणविलापश्रवणपातकादनृतभाषणाच्च पातकान्मुक्तो भवेयम्। अपहतकल्मष इति वा च्छेदः। यद्यनिस्तीर्णप्रतिज्ञस्तर्ह्यनिरस्तपापस्तदपनोदनाय प्रवेक्ष्य इत्यर्थः ॥३०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

(केनापि पुंसा नीयते ॥०॥)

किमाहेत्यत्र किं ब्राह्मणेति । इह त्वन्निवासस्थाने धनुर्धरो नास्ति किमित्यब्रवीत् । धनुर्धरेण किं कार्यमत्राह-राजन्यबन्धोरिति। एते ब्राह्मणा राजन्यबन्धोर्हेतोः सत्रमासते वै ॥२८॥ राजपि स एव श्रेयानितरो दुःखहेतुरित्याह-धनदारेति। यत्र यस्मिन् देशे राजन्यवेषेणासुम्भरा नरा जीवन्ति तस्मिन् देशे स्थितास्ते भृत्या राज्ञा भरतीयाः ब्राह्मणाः धनदारात्मजैः सह शोचन्तीत्यन्वयः । यद्वा यत्र येषु राजसु सत्सु ब्राह्मणा धनादिभिः सह शोचन्ति ते राजन्यवेषेण नटा एव जीवन्ति न तु सद्वंश्याः कुतः असुं सुराः स्वप्राणपोषणपरायणा वै यस्मात्तस्माद्दीनयोर्युवयोः अहतकल्मषः मिथ्याप्रतिज्ञत्वात् ॥२९-३०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१६-५४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

राजन्यबन्धुरिति निकृष्टः क्षत्रियोऽपि किं नास्ति ब्रह्मण्यस्य का वार्तेति गर्वात् तत्रत्यान् प्रति कटाक्षः । ननु राजन्या अत्र सङ्कटे वद किं कर्तुमर्हन्ति । तत्र तर्जन्या दर्शयन्नाह-एते ब्राह्मणा अत्र सत्रयागमासते कुर्वन्त्येव तत् किल पाल्यमाना इमे एव नाशमर्हन्तीति वक्रोक्तिः ॥२८॥ अत्रत्यानां राजन्यबन्धुत्वे प्रमाणं शृण्वित्याह-धनादिभिरपृक्ता वियुक्ताः । यत्र येषु जीवत्सु शोचन्ति ॥२९॥ वामिति महाशोकेन ब्राह्मण्या अपि मौनवत्यास्तत्रागमनात् । न निस्तीर्णा किन्तु भग्नैव प्रतिज्ञा यस्य तथाभूतश्चेदहं स्याम् अग्निं प्रवेक्ष्यामीति । तत एव हतकल्मषः प्रतिज्ञाभङ्गलक्षणदोषरहितः स्याम् ॥३०-३१॥

गूढार्थदीपिनी

परेते मृते सति । तां गाथाम् ॥२७॥ हे ब्रह्मन् ! त्वन्निवासे इह स्थाने किं कश्चित् धनुर्धरः राजन्यबन्धुः क्षत्रियाधमोऽपि नास्ति । स्वित् इति वितर्के । यथा सत्रे समाजे भोजनार्थं मिलिता ब्राह्मणा आसते एवमेते यदवोऽपि भोगमुद्दिश्यैव तिष्ठन्ति न च रक्षन्त्यहो कष्टमित्यर्थः । वै इवार्थे ॥२८॥ येषु जीवन्ति जीविकां कुर्वन्ति न च स्वधर्मं पालयन्ति । कथम्भूता ब्राह्मणाः । धनादिभिः अपृक्ता वियुक्ताः ॥२९॥ इह द्वारकायां वां युवयोः स्त्रीपुंसयोः । अनिस्तीर्णप्रतिज्ञः अपूर्णप्रतिज्ञश्चेदहमग्निं प्रवेक्ष्ये इत्यन्वयः । एवं सति हतकल्मषः प्रतिज्ञाभङ्गदोषरहितः स्याम् । अहतेति वा पाठः । मिथ्याप्रतिज्ञत्वात् ॥३०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

धनुर्धरः राजन्यबन्धुः । निकृष्टक्षत्रियोऽपि किं स्विन्नास्ति । एते राजन्यनामकाः । वै निश्चितम् । सत्रमासते यागमुद्दिश्य तिष्ठन्ति ॥२८॥ किं बहुना यत्र येषु सत्सु धनादिभिः पृक्ता वियुक्ताः ब्राह्मणाः शोचन्ति ते असुम्भराः नटा एव राजन्यवेषेण जीवन्ति ॥२९॥ दैवादनिस्तीर्णप्रतिज्ञश्चेत्तदा अग्निं प्रवेक्ष्ये । ततः हतकल्मषः प्रतिज्ञाया अपालनेन भविष्यति यत्पातकं तद्विमुक्तो भविष्यमीत्यर्थः ॥३०-३४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो भिन्नस्वभावः जीवभावमेवापन्न इति द्वारकायामपि गतो लौकिकबुद्ध्याऽऽविष्टः साभिमानः किञ्चिदुवाचेत्याह-तामर्जुन इति । केशवान्तिक एवोपविश्य उपश्रुत्य ब्राह्मणं समभाषतेति सम्बन्धः । भगवान् भक्तार्थमेव सर्वं करोतीति ज्ञापयितुं तत्र विलम्बाभावाय परेते नवमे बाल इत्युक्तं गुणानां कार्ये जाते अहङ्कारदेवता असहमाना तथा प्रोवाच दृशैव पुत्रा मर्यादायामेकस्यां दशास्यां पुत्रानाधेहीति श्रुतेः । अत एक एवावशिष्यते । अतो विलम्बमकृत्वा ब्राह्मणं समभाषत अर्जुनोऽप्येवं मन्यते मृत्युर्नं नयतीति । समृत्युर्ब्राह्मणक्षत्रिययोर्मित्रं तदुपपादितं यस्य ब्रह्म च क्षत्रं च उभे भव ओदनः । मृत्युर्यस्योपसेचनमित्यत्र तुल्यव्यसनत्वान्मित्रत्वम् । तत्रोभौ स्वधर्मपरौ मृग्येते न तु जातिमात्रपराविति तदाह-राजन्यबन्धवो ह्येतेति । एतेनोत्तमाः क्षत्रियाः एतेषां पूर्वजाः परं राजन्या स्थिता इत्यर्थः । न तु ब्राह्मणानामेव दोषः कुतो न भवतीतत्याकाङ्क्षायामाह-ब्राह्मणास्तु सत्रमासत एव। अतः अलौकिकदोषेण बालकानां मरणं किन्तु क्षत्रियाणां दोषेणेत्याह-धनदारात्मजायुक्ता इति । धनदारात्मजैः सर्वथा अपेक्षितैः अयुक्ताः रहिता एकाकिन इत्यर्थः । यत्र ब्राह्मणाः एवं दुःखं प्राप्नुवन्ति ते वै निश्चयेन राजन्या नटा एव राजन्यवेषं कृत्वा लोकेभ्योऽन्नं प्राप्य जीवन्तीत्यसुम्भरा । ब्राह्मणश्चद्रक्षितो भवेत् सोऽन्यं रक्षयेत् न त्वात्मानं स पालयितुं शक्तः । तथा सति

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

क्षत्रियनिर्माणं व्यस्थं स्यात् अतो ह्यन्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षतस्तत्त्राणायासृजच्चास्मानिति च तस्मादवश्यमत्र क्षत्रियेण रक्षा कर्तव्या। अतोऽहं करिष्यामीत्याह-अहमिति वां स्त्रीपुरुषयोः तस्मिन् रक्षिते उभयोरुपकार इति तस्य दयावत्त्वं सूचयितुमाह-अनिस्तीर्णप्रतिज्ञ इति। नन्वग्निप्रवेशे किं स्यात् बालकस्तु न जीविष्यत्येवेत्याशयेनाह-हतकल्मष इति। तदा तस्य पापं न भवति। क्षत्रियदेहस्य परित्यागात् तदा ब्राह्मतस्तमुपदिशति-अज्ञं मत्वा मित्रत्वात् ॥२७-३०॥

श्रीसुबोधिनीसारः

तां गाथां कदाचित् कृष्णसमीपमर्जुन उपश्रुत्य नवमे बाले इति बालाः वस्तुतस्त्रयाणामेवोत्पत्तिरिति भारते स्पष्टम्। तन्मतेऽनवमे पितुः तुल्ये बाले मृते सति ब्राह्मणमब्रवीत् ॥२७॥ हे ब्रह्मन्! त्वन्निवासे ग्रामे इह पुरि वा धनुर्धरः क्षत्रियो राजा वा नास्ति। किंस्वित् एते ब्राह्मणाः सत्रं यागमास्थिताः ॥२८॥ यत्र देशे धनदारात्मजैरपृक्ता वियुक्ता ब्राह्मणाः शोचन्ति ते राजन्यवेषेणासुम्भराः उदरंभरिणो नटा जीविकां सम्पादयन्ति ॥२९॥ हे भगवन्! दीनयोर्वां युवयोः प्रजां सन्तानमहं रक्षिष्यामि। विपक्षे प्रतिजानीते न निस्तीर्णा प्रतिज्ञा येन सोऽहमग्निं प्रवेक्ष्यामि यतो हतकल्मषः पूतो भवेयमिह ॥३०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

कर्हिचिन्नवमे बाले परेते मृते सति केशवान्तिके स्थितोऽर्जुनस्तां गाथामुपश्रुत्य एकान्ते ब्राह्मणं समभाषत ॥२७॥ तद्भाषणमेवाह-किमिति त्रिभिः। हे ब्रह्मन्! किंस्वित् किमर्थं वृथा विकत्थसि? यतस्त्वन्निवासे धनुर्धरो राजन्यबन्धुः क्षत्रियाभासोऽपि नास्ति, ब्रह्मण्यस्य शूरस्य तु का वार्तेत्यर्थः। एते तु सत्रयागे मिलिता ब्राह्मणा इव आसते तिष्ठन्ति ॥२८॥ यत्र जीवेषु जीवत्सु सत्सु धनादिभिर्वियुक्ता ब्राह्मणाः शोचन्ति ते वै राजन्यरूपेण नटा इव असुम्भराः केवलं स्वप्राणपोषणपरा एव जीवन्ति ॥२९॥ हे ब्रह्मन्! इह स्थितोऽहं वां युवयोः प्रजां जनिष्यमाणं पुत्रं रक्षिष्ये। तत्र हेतुं स्वदयां सूचयन्नाह-दीनयोरिति। ननु त्वद्वाक्ये को विश्वासः इत्याशङ्क्याह-यद्यनिस्तीर्णप्रतिज्ञः स्यां तदाग्निं प्रवेक्ष्ये। तेन हतः कल्मषः अनृतभाषणं पातकं यस्य तथाभूतो भवेयम् ॥३०॥

अन्वितार्थप्रकाशिका

कर्हिचिन्नवमे बाले परेते मृते सति केशवान्तिके स्थितोऽर्जुनस्तां गाथामुपश्रुत्य एकान्ते ब्राह्मणं समभाषत ॥२७॥ किमिति। हे ब्रह्मन्! किंस्वित् किमर्थं वृथा रोदिषि। यतस्त्वन्निवासे धनुर्धरो राजन्यबन्धुः क्षत्रियाभासोऽपि नास्ति। ब्रह्मण्यस्य शूरस्य तु का वार्तेत्यर्थः। एते तु सत्रं समाजे मिलिता मिलिता ब्राह्मणा इव आसते तिष्ठन्ति ॥२८॥ तदेवाह-धनेति। यत्र जीवेषु जीवत्सु सत्सु धनादिभिर्वियुक्ता ब्राह्मणाः शोचन्ति। ते वै राजन्यरूपेण नटा इव असुम्भराः केवलं स्वप्राणपोषणपरा एव जीवन्ति जीविकां सम्पादयन्ति ॥२९॥ अहमिति ॥ हे ब्रह्मन्! इह स्थितोऽहं दीनयोर्वां युवयोः प्रजां जनिष्यमाणं पुत्रं रक्षिष्ये। यद्यनिस्तीर्णप्रतिज्ञः स्यां तदाग्निं प्रवेक्ष्ये। तेन हतं कल्मषम् अनृतभाषणपातकं यस्य तथाभूतो भवेयम्। तत्पुत्रारक्षणादहतकल्मषः अग्निं प्रवेक्ष्ये इति वा ॥३०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

हे ब्रह्मन्! किंस्वित् किमर्थं वृथा क्लिश्यसि अस्मात्त्वन्निवासे द्वारकायां धनुर्धरश्चापधारी राजन्यबन्धुः क्षत्रियजातिमात्रोऽपि नास्ति तर्हि ब्राह्मणपालनस्वधर्मवर्तिक्षत्रियस्तु कुतो भवेत्। ननु तर्हि बलदेवश्रीकृष्णादयो ब्रह्मण्याः क्षत्रिया न सन्ति किमिति चेत्तत्र न हि न हीत्यभिप्रायेणाह-एते कृष्णादयस्तु वै इति निश्चये न ब्राह्मणाः सत्रमासते॥ यज्ञदीक्षादिक्षिता ब्राह्मणा एवासीना इत्यर्थः ॥२८॥ नन्वेवं कुत उच्यते इति चेत्तत्राह-धनेति। धनादिभिः सहापृक्ता वियोगं प्राप्ताः ब्राह्मणाः यत्र येषु क्षत्रियेषु जीवत्सु सत्सु शोचन्ति ते क्षत्रियाः जीवन्ति जीविकामात्रं कुर्वन्ति ॥२९॥ वां युवयोः स्त्रीपुंसयोः हतकल्मषः अग्निप्रवेशेन ब्राह्मणारक्षणपापात्पूतः स्यामिति शेषः ॥३०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

किं स्विदिति ॥ हे ब्रह्मन् ! किं स्वित्किमर्थं वृथा रोदिषि । इह त्वन्निवासे भगवन्निवासभूते पुरे कोऽपि धनुर्धरः न अस्ति । किं च धनुर्धरमात्रः राजन्यबन्धुः अपि नास्ति । ब्रह्मण्यस्य तु का वार्तेति भावः । तर्हि एते वै ब्राह्मणाः सत्रम् आसते । यज्ञदीक्षादीक्षिताः क्षत्रियवत् प्रतीयमाना ब्राह्मणा एव आसीनाः सन्ति किमित्यर्थः ॥२७॥ न हि न हि एते तु क्षत्रिया इति चेत्तत्राह ॥ धनेति ॥ यत्र येषु क्षत्रियेषु जीवत्सु सत्सु धनदारात्मजापृक्ता धनादीभिर्वियोगं प्राप्ताः ब्राह्मणाः एवं शोचन्ति । ते क्षत्रियाः राजन्यवेषेण क्षत्रियसमानवेषधारित्वेन असुंभरा:क स्वप्राणपोषणपराः नटाः इव जीवन्ति वै । जीवन्तोऽपि शवप्राया इति भावः ॥२८॥ अहमिति ॥ हे भगवन् ! विप्र ! दीनयोः पुत्रमरणदुःखितयोः वां युवयोः स्त्रीपुंसयोः प्रजाः अहम् इह रक्षिष्ये । इह स्थित्वैव रक्षणं करिष्यामीत्यर्थः । यदि अहम् अनिस्तीर्णप्रतिज्ञः अनिष्पादितप्रतिज्ञः स्यां तर्हि अग्निं प्रवेक्ष्ये । ततः हतकल्मषः ब्राह्मणविलापश्रवणादनृतभाषणाच्च पातकान्मुक्तो भवेयम् । अहतकल्मष इति च्छेदे, यदि अनिस्तीर्णप्रतिज्ञः स्यां तर्हि अनिरस्तपापस्तदपनोदायाग्निं प्रवेक्ष्ये इत्यर्थः ॥२९॥ एवमुक्तः प्राह विप्रो द्वाभ्याम् ॥ सङ्कर्षण इति ॥ सङ्कर्षणो बलदेवः वासुदेवः श्रीकृष्णः धन्विनां धनुर्धारिणां वरः प्रद्युम्नः न विद्यते प्रतिरथः समबलो यस्य स अनिरुद्धश्च एते यन्मदपत्यं त्रातुं न शक्नुवन्ति ॥३०॥

कृष्णाप्रिया

नवें बालक के मरने पर जब हा वहां आया तब उस समय भगवान के पास अर्जुन भी विराजमान था । ब्राह्मण की बात सुनकर ब्राह्मण से कहा ॥२७॥ हे ब्राह्मन् ! आपके निवासस्थान द्वारिकामें कोई धनुर्धर वीर क्षत्रीय नहीं है क्या ? मालूम होता है कि ये यदुवंशी ब्राह्मण है और प्रजापालन का परित्याग करके किसी यज्ञमें बैठे हुए है ॥२८॥ जिनके राज्यमें धन, स्त्री या पुत्रो से वियुक्त होकर ब्राह्मण दुःखी होते है, वे क्षत्रीय नहीं है । क्षत्रीय के वेशभूषामें केवल पेर पटकनेवाले नट है ॥२९॥ हे ब्राह्मण देवता ! मे समझता हुं कि आप दम्पत्ति अपने पुत्रों की मृत्यु से दुःखी है । में आपकी सन्तान की रक्षा करुंगा । यदि में मेरा प्रण पूरा न कर सका, तो अग्नी में प्रवेश करके जल मरुंगा और इस प्रकार मेरे पाप को प्रायश्चित हो जायेगा ॥३०॥

ब्राह्मण उवाच

संकर्षणो वासुदेवः प्रद्युम्नो धन्विनां वरः । अनिरुद्धोऽप्रतिरथो न त्रातुं शक्नुवन्ति यत् ॥३१॥
तत् कथं नु भवान् कर्म दुष्करं जगदीश्वरैः । चिकीर्षसि त्वं बालिश्यात् तन्न श्रद्दध्महे वयम् ॥३२॥

कर्दमक्षमा

ब्राह्मणः, उवाच ।

सङ्कर्षणः, वासुदेवः, धन्विनां, वरः, प्रद्युम्नः, अनिरुद्धः, अप्रतिरथः, यत्, त्रातुम्, न, शक्नुवन्ति ॥३१॥ तत्, जगदीश्वरैः, दुष्करम्, कर्म, भवान्, कथम्, नु, त्वम्, बालिश्यात्, त्वम्, चिकीर्षसि, इति, वयम्, श्रद्दध्महे ॥३२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

न श्रद्दध्महे न सम्प्रतीमः ॥३२-३४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सङ्कर्षेति युग्मकम् । तत्र सङ्कर्षणादिचतुर्णां नामव्युत्पत्त्यैव स्पष्टमहिमतया साम्येऽपि उत्तरयोर्विशेषणदानेन सामान्यमभिप्रैति । यत् मदपत्यरक्षणरूपं कर्म । त्रातुं निर्विघ्नीकर्तुं न शक्नुवन्ति ॥ नो सहन्ते ॥३१॥ बालिश्यान्मौर्ख्यात् । 'बालिशो बालमूर्खयोः' इति हलधरः ॥★॥ ॥०॥ ॥३२॥ ॥०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सङ्कर्षण इति युग्मकम् । तत्र सङ्कर्षणादिचतुर्णां नाम व्यत्पत्त्येव स्पष्टमहिमत्त्साम्येऽप्युत्तरयोर्विशेषणदानेन पूर्वाभ्यां साम्यमभिप्रैति । यत् मदपत्यरक्षणरूपं कर्म त्रातुं निर्विघ्नीकर्तुं न शक्नुवन्ति नोत्सहन्ते तत्खलु जगदीश्वरैस्तैरपि दुष्करं कर्म भवान् कथन्नु त्रातुं शक्नोति । तस्माद्बालिश्यादेव त्वं तच्चिकीर्षसि तत एव वयं न श्रद्दध्महे ॥३१-३२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२७-४०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

एवमुक्तः प्राह विप्रः सङ्कर्षण इति द्वाभ्याम् । सङ्कर्षणो बलदेवः वासुदेवः कृष्णः धन्विनां श्रेष्ठः प्रद्युम्नः न विद्यते प्रतिरथः समबलो यस्य सोऽनिरुद्धश्चेत्येते यन्मदपत्यं त्रातुं न शक्नुवन्ति ॥३१॥ इत्थमुक्तः प्राहार्जुनं तज्जगदीश्वरैः अपि कर्तुमशक्यं मदपत्यत्राणात्मकं कर्म कथं भवान् कर्तुं शक्नोति । यतस्त्वं बालिश्यादज्ञानान्मौर्ख्याद्वा चिकीर्षसि ततस्माद्वयं न श्रद्दध्महे न विश्वसिमः ॥३२॥

श्रीमद्विजयध्वजकृता पदरत्नावली

तत्रार्जुनस्याहङ्काराविष्करणाय ब्राह्मणो वक्ति-सङ्कर्षण इति । सङ्कर्षणादयस्त्रातुं न शक्नुवन्ति यद्यस्मात्तस्माज्जगदीश्वरैर्दुष्करं कर्म कथं चिकीर्षति बालिशो बालमूर्खयोरिति वचनात् बालिश्यात् आत्मशक्त्यनभिज्ञानात् इह कर्मणि तव वाक्यं न श्रद्दध्महे ॥३१-३२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१६-५४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

न श्रद्दध्महे न विश्वसिमः ॥३२॥

गूढार्थदीपिनी

सङ्कर्षण इति युग्मम् । सङ्कर्षणादयः यत् मदपत्यं त्रातुं न शक्नुवन्ति तत् कर्म भवान् कर्तुं कथं नु शक्नुयात् किन्तु बालिश्यात् त्वं चिकीर्षसि तत् वयं न श्रद्दध्महे न विश्वसिम इति द्वयोरन्वयः । बालिशो बालमूर्खयोः इति हलधरः । नास्ति प्रतिरथः प्रतियोद्धा यस्य ॥३१-३२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ॥३०-३४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सङ्कर्षणो वासुदेव इति चतुर्मूर्तिं भगवन्तं सर्वथा स्वभावतोऽपि रक्षकं निर्दिशति-सङ्कर्षण इति । धन्विनां वर इति लौकिकमपि सामर्थ्यं सूचितम् । पूर्वयोस्तु सामर्थ्यं दृष्टचरम् अनिरुद्धस्त्वप्रतिरथः न केनापि रुद्ध इति सार्थकता तस्य निरूपिता । एवं मिलिता अपि अस्मत्पुत्रं त्रातुं न शक्नुवन्ति । यस्मात्कारणात् अस्ति किञ्चित् कारणं येन तेऽपि न शक्नुवन्तीत्यर्थः ॥३१॥ तावता किमित्यत आह-तत्कथमिति । एते जगदीश्वराः भगवदवतारत्वात् असाध्यं बाल एव वदन्तीति त्वं बालिशः अतस्तव वाक्यं न श्रद्दध्महे । अर्जुनस्त्वेवं मन्यते चतुर्मूर्तिर्भगवान् प्रतिनियतकार्यकर्ता तदंशोऽपि तत्रैव निविशते यस्तु तदनंशोऽपि भूत्वा विशेषकार्यार्थम् उत्पन्नः स एवं कर्तुं शक्नोतीति ॥३२॥

श्रीसुबोधिनीसारः

विप्रोक्तिः । बलदेवः श्रीकृष्णो धन्विनां वरो धनुर्धराणां श्रेष्ठो प्रद्युम्नोऽप्रतिरथोऽद्वन्द्वी अप्रतिरथो यत् यं त्रातुं रक्षितुं न समर्था भवन्ति ॥३१॥ तत् भवान् कथं त्रातुमर्हति । जगदीश्वरैरेभिर्दुष्करं कर्म बालिश्यान्मौर्ख्यात्त्वं कर्तुमिच्छसि तत् वयं न प्रतीमः ॥३२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

यत् मदपत्यं सङ्कर्षणादयस्त्रातुं न शक्नुवन्ति ॥३१॥ तज्जगदीश्वरैरेतैरपि कर्तुमशक्यं मदपत्यत्राणात्मकं कर्म कथं नु भवान् कर्तुं शक्नुयादिति शेषः । किन्त्वर्जुनो नाम महाबलपराक्रमवत्तया प्रसिद्धोऽहम् । यस्य मम गाण्डीवं नाम धनुरस्ति ॥३३॥

अन्वितार्थप्रकाशिका

सङ्कर्षण इति युग्मम् । यत् मदपत्यं सङ्कर्षणादयस्त्रातुं न शक्नुवन्ति तज्जगदीश्वरैरेतैरपि कर्तुमशक्यं मदपत्यत्राणात्मकं कर्म कथं नु भवान् कर्तुं शक्नुयादिति शेषः । अतो बालिश्यान्मौखर्यादेव त्वं तच्चिकीर्षसि । अतो वयं न श्रद्दध्महे न विश्वसिमः ॥३१-३२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अप्रतिरथः अविद्यमानतुल्यभटः यत् मदपत्यं त्रातुम् ॥ एते सङ्कर्षणादयो न शक्नुवन्ति ॥३१॥ तदपत्यरक्षणरूपं कर्म भवान् कथं करिष्यति बालिश्यात् मूढत्वात् ॥ यत्त्वं कर्तुमिच्छसि अतः तत्तत्र त्वया कर्तुमिष्टे न श्रद्दध्महे न विश्वासं कुर्मः ॥ कार्ष्णिरेव प्रद्युम्नोऽपि चकारादनिरुद्धोऽपि ॥३२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तदिति ॥ जगदीश्वरैः अपि दुष्करमशक्यं कर्तुमसम्भाव्यमित्यर्थः । कर्म मदपत्यत्राणात्मकं तत् कर्म भवान् कथं नु कर्तुं शक्नोति । यतः त्वं बालिश्यात् मौर्ख्यात् अज्ञानात् चिकीर्षसि । तत्तस्मात् वयं न श्रद्दध्महे श्रद्धां न कुर्महे ॥३१॥ इत्थं विप्रोक्तः प्राहार्जुनः नाहमिति द्वाभ्याम् ॥ नाहमिति ॥ हे ब्रह्मन् ! अहं सङ्कर्षणः न, कृष्णः न, कार्ष्णिरेव च प्रद्युम्नोऽपि नैव । चकारादनिरुद्धोऽपि, न भवामि । किन्तु तेभ्योऽप्यतिशयितशक्तिः अहं वै अहं तु अर्जुनः नाम, यस्य मे मम धनुश्चापं गाण्डीवं नाम अस्ति ॥३२॥

कृष्णप्रिया

ब्राह्मणने कहा ! यहां बलरामजी भगवान श्रीकृष्ण धनुर्धरोमें श्रेष्ठ प्रद्युम्न अद्वितीय योद्धा अनिरुद्ध भी जब मेरे बालककी रक्षा करनेमें समर्थ नहीं है । इन जगदीश्वरों से भी जो काम नहीं हो सका । उक कार्य के लिये तुम जो कटिबद्ध हुए हो सचमुच इसमें मुझे आपकी बालिशता का दर्शन होता है । आपके कथन पर मैं बिलकुल विश्वास नहीं करता ॥३१-३२॥

अर्जुन उवाच

नाहं संकर्षणो ब्रह्मन् न कृष्णः कार्ष्णिरेव वा[१] । अहं[२] वा अर्जुनो नाम गाण्डीवं [३]यस्य वै धनुः ॥३३॥
मावमंस्था मम ब्रह्मन् वीर्यं त्र्यम्बकतोषणम् । मृत्युं विजित्य प्रधने[४] आनेष्ये ते प्रजां [५]प्रभुः ॥३४॥
[६]एवं विश्रम्भितो विप्रः फाल्गुनेन परंतप । [७]जगाम स्वगृहं प्रीतः पार्थवीर्यं निशामयन् ॥३५॥
प्रसूतिकाल आसन्ने भार्याया द्विजसत्तमः । [८]पाहि पाहि प्रजां मृत्योरित्याहार्जुनमातुरः ॥३६॥

---

[१] च-श्रीधर. वंशी. वीर. विज. । [२] पार्थोऽ-च. पु. टी. । [३] पश्य कार्मुकं-विज. । [४] प्यानयिष्ये तव प्रजाः-विज. । [५] प्रभो-श्रीधर. वंशी. वीर. विज. । [६] अत्र दश श्लोकाः अधिकाः-विज. । ते च विज.टीकायां कुण्डले () दत्ताः । [७] जगाम स्वगृहे प्रीत्या पार्थवीर्यं निशाम्य तत्-विज. । [८] प्रोवाच द्रुतमभ्येत्य पार्थं शस्त्रभृतां वरम् । एहि पार्थ महाबाहो यत्तो भव युधां वर । अत्र पूर्वकृतानां हि पौरुषाणां निदर्शनम् ॥

कर्दमक्षमा

अर्जुनः, उवाच । ब्रह्मन्, न, अहम्, सङ्कर्षणः, न, कार्ष्णिः, एव, वा, अहम्, वै, अर्जुनः, यस्य, गाण्डीवम्, नाम, वै, धनुः ॥३३॥ ब्रह्मन्, त्र्यम्बकतोषणम्, मम, वीर्यम्, मा, अवमंस्थाः, प्रभुः, प्रधने, मृत्युम्, विजित्य, ते, प्रजाम्, आनेष्ये ॥३४॥ परंतप, त्वम्, फाल्गुनेन, विश्रम्भितः, प्रीतः, विप्रः, पार्थवीर्यम्, निशामयन्, स्वगृहम्, जगाम ॥३५॥ प्रसूतिकाले, आसन्ने, द्विजसत्तमः, भार्यया, मृत्योः, प्रजाम्, पाहि, पाहि, इति, आतुरः, अर्जुनम्, आह ॥३६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवं प्रौढिवादैर्विश्रम्भितो विश्वासं प्रापितः निशामयन् शृण्वन् ॥३५-३६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

॥★॥ सङ्कर्षण इति गर्भसङ्कर्षणस्य । कृष्णश्चेति सुश्यामत्वमात्रस्याभिप्रायेण । नञः पुनः प्रयोगो निषेधदार्ढ्याय । कार्ष्णिरेव प्रद्युम्नोऽपि । अत्यन्तावज्ञयानिरुद्धस्य नामापि न प्रस्तुतम् ॥३३॥ मृत्युं यमराजम् । प्रधने युद्धे ॥★॥ त्र्यम्बकस्य किरात(त्व)च्छद्मनस्तोषणं तत्तुल्यतया प्रीतिकरं तथा भारताख्यानात् । अथ विप्राश्वासनार्थं प्रतिजानीते-मृत्युमिति । प्रधने रणमध्ये विशेषेण मारणादिना जित्वा प्रजाः सर्वानपि पुत्रान् न केवलमेतां प्रजामिति पाठो बहुत्र श्रीमदर्जुनस्यापीदृशी गर्वोक्तिर्ब्रह्मण्यदेवस्य विप्रोपेक्षया सख्येन क्रोधभवमनोदुःखविशेषोत्पत्तेः तेन तदुपेक्षा च द्विजात्मजा मे युवयोर्दिदृक्षुणेति श्रीमहाकालपुराधिपवक्ष्यमाणानुसारेण तदुत्कण्ठाप्रतिपालनाय । तत उभयमपि समञ्जसम् ॥३४॥ एवमुक्तरीत्या । प्रौढिवादैः साहङ्कारवाक्यैः ॥★॥ ॥०॥ ॥३५॥ ॥०॥ ॥★॥ हे परन्तपेति । हे परन्तपेति । हे शत्रुनाशन त्वदेतादृशत्वकरणस्य त्वत्पितामहस्योक्तौ वीर्ये वा विप्रस्य विश्वासो युक्त एवेति भावः । प्रसूतिकाल इत्यनेन तदर्थं द्वारकायामेकाब्दमर्जुनस्य वासो ज्ञेयः । आतुरो भयपीडितः सन्नाह-रात्रावर्जुनान्तिकमागत्येति शेषः । एवमग्रेऽपि तद्विप्रगृहं गतः सन्निति शेषः । तथा च हरिवंशेऽर्जुनवाक्ये —

"गतेऽर्धरात्रसमये ब्राह्मणो भयविक्लवः । उपागम्य भयादस्मानिदं वचनमब्रवीत् ॥" इत्यादि ॥

"मुहूर्तेन वयं ग्रामं तं प्राप्य भरतर्षभ । विश्रान्तवाहनाः सर्वे निवासायोपसंस्थिताः ॥" इति च ॥३६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सङ्कर्षण इति गर्भसङ्कर्षणस्य कृष्णश्चेति सुश्यामत्वमात्रस्याभिप्रायेण नञः पुनः प्रयोगो निषेधदार्ढ्यार्थं कार्ष्णिरेव च प्रद्युम्नोऽपि अत्यन्तावज्ञया अनिरुद्धस्य नामापि न प्रस्तुतम् ॥३३॥ त्र्यम्बकस्य किरात(त्व)च्छद्मनस्तोषणं तत्तुल्यतया प्रीतिकरं तथा भारताख्यानात् । अथ विप्राश्वासनार्थं प्रतिजानीते-मृत्युमिति । प्रधने रणमध्ये विशेषेण मारणादिना जित्वा प्रजाः सर्वानपि पुत्रान् न केवलमेतां प्रजामिति पाठो बहुत्र श्रीमदर्जुनस्यापीदृशी गर्वोक्तिर्ब्रह्मण्यदेवस्य विप्रोपेक्षया सख्येन क्रोधभवमनोदुःखविशेषोत्पत्तेः तेन तदुपेक्षा च द्विजात्मजा मे युवयोर्दिदृक्षुणेति श्रीमहाकालपुराधिपवक्ष्यमाणानुसारेण तदुत्कण्ठाप्रतिपालनाय । तत उभयमपि समञ्जसम् ॥३४॥ निशामयन् पश्यन् अनुभवन् शृण्वन्निति यावत् परन्तप ! हे शत्रुनाशनेति त्वदेतादृशत्वकारणस्य त्वत्पितामहस्य तस्योक्तौ वीर्ये वा विप्रस्य विश्वासो युक्त एवेति भावः ॥३५॥ प्रसूतिकाल इत्यनेन तदर्थं द्वारकायामेकाब्दमर्जुनस्य वासो ज्ञेयः । आतुरो भयपीडितः सन्नाह-रात्रावर्जुनान्तिकमागत्येति शेषः । एवमग्रेऽपि तद्विप्रगृहं गतः सन्निति शेषः । तथा च हरिवंशेऽर्जुनवाक्ये —

"गतेऽर्धरात्रसमये ब्राह्मणो भयविक्लवः । उपागम्य भयादस्मानिदं वचनमब्रवीत् ॥" इत्यादि ॥

"मुहूर्तेन वयं ग्रामं तं प्राप्य भरतर्षभ । विश्रान्तवाहनाः सर्वे निवासायोपसंस्थिताः ॥" इति च ॥३६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२७-४०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इत्युक्तः प्राहार्जुनः-नाहमिति द्वाभ्याम्। कार्ष्णिः कृष्णस्यापत्यं पुमान् प्रद्युम्नः चकारादनिरुद्धश्च न भवामि। किन्तु तेभ्योऽप्यतिशयशक्तिरर्जुनोऽहं यस्य अर्जुनस्य गाण्डीवं नाम धनुरस्ति ॥३३॥ हे ब्रह्मन्! मम वीर्यं मावमंस्थाः अवहेलनं मा कार्षीः। तत्र हेतुत्वेन विशिनष्टि-त्र्यम्बको रुद्रः सन्तुष्यतेऽनेनेति तथा तत् अतो हे प्रभो! मृत्युमपि युद्धे विजित्य तव प्रजामानेष्ये ॥३४॥ एवमिति। इत्थं फाल्गुनेनार्जुनेन विस्रम्भितः विश्वासं प्रापितः विप्रः प्रीतः स्वगृहं जगाम। ततो हे परन्तप! पार्थस्य वीर्यं निशामयन्नास्ते इति शेषः ॥३५॥ प्रसूतीति। भार्यायाः प्रसूतिकाले आसन्ने सति तदा द्विजसत्तमः आतुरः सन्नर्जुनं प्रतीत्थमाह-कथं मम प्रजां मृत्योः पाहि पाहीति ॥३६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

इति विस्रम्भयित्वा तं कृष्णमाहार्जुनो नृप। अनुज्ञां देहि भगवन् ब्राह्मणार्थे प्रयास्यतः ॥ क ॥
यजतां वाजिमेधेन भवानेभिर्महात्मभिः। इति ब्रुवन्तं बीभत्सुमनुज्ञां प्रेप्सुमच्युतः ॥ ख ॥
बद्धतूणं सगाण्डीवं स्मयमानोऽब्रवीद्वचः।

श्रीभगवानुवाच

अहमेवागमिष्यामि न त्वया शक्यतेऽर्जुन। तमसाधारणं भूतं मन्ये येन हतोऽर्भकः ॥ ग ॥

अर्जुन उवाच

सलोकपालो देवेन्द्रः खाण्डवे विजितो मया। किरातरूपी युद्धेन तोषितश्च त्रियंबकः ॥ घ ॥
निवातकवचाश्चैव वासवेनापि दुर्जयाः। मयैव निहताः सङ्ख्ये हिरण्युरवासिनः ॥ ङ ॥
तेभ्योऽधिकतरं भूतं किन्नु दानवसूदन। विभीषयसि मां कस्मादनुज्ञां देहि साम्प्रतम् ॥ च ॥

श्रीशुक उवाच

इत्युक्तः प्रददौ कृष्णस्त्वनुज्ञां सव्यसाचिने। निर्ययौ यज्ञशालायाः स गृहीतशरासनः ॥ छ ॥
रथमास्थाय विपुलं समुच्छ्रितकपिध्वजम्। अग्रे ब्राह्मणमारोप्य तद्ग्राममभितो ययौ ॥ ज ॥
तत्र गत्वा प्रविष्टायां तत्पत्न्यां सूतिकागृहम्। ब्राह्मणं प्राह बीभत्सुरवरोप्य रथान्नृप ॥ झ ॥

अर्जुन उवाच

याहि स्वभवनं ब्रह्मन्नभयं तव सर्वतः दत्तं मयाद्य तद्भीतां पत्नीमाश्वासयाऽऽशु ते ॥ ञ ॥
प्रोवाचद्रुतमभ्येत्य पार्थं शस्त्रभृतां वरम्। एहि पार्थ महाबाहो यत्तो भव युधांवर ॥
अत्रपूर्वकृतानां हि पौरुषाणां निदर्शनम् ॥

श्रीशुक उवाच

इत्युक्तो रथमारुह्य सज्जं कृत्वा तु गाण्डीवम्। त्वरञ्जगाम बीभत्सुः सूतिकाभवनान्तिकम् ॥१॥
ब्रह्मणोऽपि प्रविश्याह मुहूर्ते सूतिकागृहे ॥

अत्रार्जुनः स्वगर्गमुद्गलयति अर्जुन इति धनञ्जयरणे रण इति श्रुतिप्रसिद्धेः अहं धनञ्जयो नाम प्रख्यातः धनुष्मत्ता चेदृशीत्याह-गाण्डीवमिति ॥३३॥ मावमंस्था अवमानं न कुरु। मृत्युं यमम् ॥३४-३५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

(ततः किं फलितमत्राह-इतीति ॥ क ॥ तत्र कृष्णोऽहङ्कारिणो देवप्रसादो न स्यादिति भाववानर्जुनं निवारयन्निव वक्ति-तीति। बद्धतूणं पृष्ठबद्धतूणीरम् ॥ ख ॥ अल्पकार्यहेतोस्त्वद्गमनं किमर्थमित्यत्राह-तमसाधारणमिति। भूतं देवयोनिम् ॥ ग ॥ र्जुनः स्वगर्वमुद्गलयति सलोकपाल इति ॥ घ-ङ॥ भूतं देवयोनिम् ॥ च-छ ॥ अभित उद्दिश्य ॥ ज-ञ ॥)

युधांवर युध्यन्तीति युधो योधास्तेषां वर पौरुषाणां पुरुषपराक्रमाणां निदर्शनं दृष्टान्तः ॥३६-३७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः　　॥१६-५४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः　　॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा　　॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

गाण्डीवमिति तद्धनुर्दर्शयति ॥३३-३५॥ प्रसूतिकाल इति तदर्थमेकाब्दमर्जुनस्य द्वारकायामेव वासः खपुरादेव गर्भपूर्तिं त्वा पुनस्तत्रागमो वा ज्ञेयः। आजयार्जुनमिति भार्यावचनाद्रात्रावायत्याह-पाहीति ॥३६॥

गूढार्थदीपिनी

कार्ष्णिः कृष्णपुत्रः प्रद्युम्नः अनिरुद्धश्च। वै द्वयं प्रसिद्धार्थे। एकोऽर्जुनेन द्वितीयो धनुषा सम्बध्यते ॥३३॥ मम वीर्यं क्रमं मावमंस्थाः मा निन्द। अविश्वासं मा कार्षीरित्यर्थः। त्रीणि अम्बकानि लोचनानि यस्य स त्र्यम्बकः शिवः। प्रधने ङ्ग्रामे ॥३४॥ विस्रम्भितः विश्वासं प्रापितः। फल्गुनी नक्षत्रं तत्र भवः फाल्गुनोऽर्जुनः। निशामयन् शृण्वन् श्रावयन् उभयार्थकः ५॥ आसन्ने सन्निकटे। आतुरः भयाक्रान्तः ॥३६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

विस्रम्भितः विश्वासं नीतः। पार्थवीर्यं निशामयन् शृण्वन् स्वगृहमगात् ॥३५-३६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अतो निषेधति-नाहं सङ्कर्षण इति। जगदीश्वरत्वमप्रयोजकं प्रतिनियतकार्यकर्तृत्वस्य प्रतिबन्धकत्वात्। कार्ष्णिः द्युम्नः वेत्यनादरः। स्वस्यानिरुद्धांशाद्वा न साक्षान्निषेधं करोति अन्यथा अनृतवादी स्यात्। अहं निश्चयेन अर्जुनः येन गावः त्यानीताः। मम चासाधारणं साधनं कार्यं चेत्याह-गाण्डीवं वै यस्य धनुरिति। साधनोत्कर्षो निरूपितः; त्र्यम्बकतोषणमिति र्योत्कर्षः। स हि मृत्युञ्जयः न ह्यन्येन मृत्युर्जेतुं शक्यः। सोऽपि चेन्मद्वीर्येण तुष्यति तदा मम मृत्युजये कः सन्देह इति वः। यदि मृत्युः प्रार्थितश्चेत् दास्यति तदा न काचिच्चिन्ता। यदि वा कलहं करिष्यति तथापि प्रधने मृत्युं विजित्य ते प्रजाम् नेष्ये। यतोऽहं प्रभुः ॥३३-३४॥ एवं सोपपत्त्या निरूपणे ब्राह्मणस्य विश्वासो जात इत्याह-एवं विश्रम्भित इति। विश्रम्भो श्वासः यतोऽयं विप्रः। विप्राः पश्चिमबुद्धय इति परन्तपेति विश्वासार्थं सम्बोधनम्। फाल्गुनपदं लोके विद्युन्निवारकत्वेन सिद्धमिति तद्वाच्यः, कथं मृत्युं न निवारयेदिति विश्वासः। ततो ग्राममध्ये सर्वत्र पार्थवीर्यं श्रावयन् स्वगृहं गतः। ततो पर्यन्तं प्रीतः स्थितः ॥३५॥ ततो यज्जातं तदाह-प्रसूतिकाल आसन्न इति। द्विजसत्तमो महान् अन्यथा शापं दद्यात् मृत्योः काशात् प्रजां पाहि आतुरः इति शरीरेऽपि दैन्यं प्रतिभातीत्युक्तम् ॥३६॥

श्रीसुबोधिनीसारः

अर्जुनोक्तिः। हे ब्रह्मन्! सङ्कर्षणो नाहं कृष्णो न कार्ष्णिः तत्पुत्रो न। यस्य गाण्डीवं धनुरस्ति सोऽहमर्जुनो नामास्मि ३॥ हे ब्रह्मन्! शिवतुष्टिकरं मम वीर्यं बलं त्वं मावमंस्थाः। प्रधने सङ्ग्रामे मृत्युं जित्वा ते प्रजामानेष्यामि हे प्रभो! ॥३४॥

श्रीसुबोधिनीसारः

शुकोक्तिः । हे परंतप ! एवं फाल्गुनेनार्जुनेनैवं दत्तविश्वासो विप्रः प्रीतः पार्थस्य वीर्यं प्रख्यापयन् स्वगृहं जगाम ॥३५॥ भार्यायाः स्त्रियाः प्रसवसमये आगते सति विप्रोत्तम आतुरो दीनो मृत्योः सकाशात् प्रजां त्वं पाहि पाहि इत्यर्जुनमाह ॥३६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे ब्रह्मन् ! मम वीर्यं पराक्रमं मावमंस्थाः तत्राविश्वासं मा कार्षीः । तन्माहात्म्यमाह–त्र्यम्बकतोषणमिति । येन वीर्येण त्र्यम्बको मया तोषितस्तेन मृत्युजये कः सन्देहः ? । अतः प्रधने युद्धे मृत्युं विजित्य ते प्रजामानेष्ये । ब्राह्मणत्वात्त्वं मम पूज्यः अतस्तव कार्यसम्पादनं सेवकस्य ममावश्यकम् इति सूचयन् सम्बोधयति–प्रभो इति ॥३४॥ हे परंतप ! फाल्गुनेनार्जुनेनैवं विश्रम्भितो विश्वासं प्रापितो विप्रः प्रीतः संस्तत्र पार्थस्यार्जुनस्य वीर्यं निशामयन् श्रावयन् गृहं जगामेत्यन्वयः ॥३६॥

अन्वितार्थप्रकाशिका

नेति ॥ कार्ष्णिरेव प्रद्युम्नोऽपि चकारादनिरुद्धश्च अहं सङ्कर्षणादयो न भवामि किन्त्वर्जुनो नाम महाबलपराक्रमवत्तया प्रसिद्धोऽस्मि । यस्य मम गाण्डीवं नाम धनुरस्ति ॥३३॥ मेति ॥ हे ब्रह्मन् ! त्र्यम्बकस्य शिवस्य मृत्युञ्जयस्यापि तोषणं मम वीर्यं पराक्रमं मावमंस्थाः तत्राविश्वासं मा कार्षीः । अतो मृत्युञ्जयतुल्यत्वात् । हे प्रभो ! अतः प्रधने युद्धे मृत्युं विजित्य ते प्रजामानेष्ये। अर्जुनस्यापीदृशी गर्वोक्तिर्ब्रह्मण्यदेवस्य विप्रोपेक्षया क्रोधेन दुःखविशेषात् । तेन तदुपेक्षा च "द्विजात्मजा मे युवयोर्दिदृक्षुणा" इति वक्ष्यमाणतदुत्कण्ठाप्रतिपालनाय ॥३४॥ एवमिति ॥ हे परंतप ! फाल्गुनेनार्जुनेनैवं विश्रम्भितो विश्वासं प्रापितो विप्रः प्रीतः संस्तत्र पार्थस्यार्जुनस्य वीर्यं निशामयन् शृण्वन्नित्यर्थः । श्रावयन् इति वा स्वगृहं जगामेत्यन्वयः ॥३५॥ प्रसूतीति । भार्यायाः प्रसूतिकाले आसन्ने समीपमागते सति आतुरः चिन्ताव्याकुलो द्विजसत्तमो मृत्योः सकाशात् प्रजां पाहि पाहीत्यर्थुनं प्रत्याह स्म। तदर्थमेकाब्दमर्जुनस्य द्वारकायामेव वासः स्वपुरादेव गर्भपूर्तिं ज्ञात्वा पुनस्तत्रागमो वा ज्ञेयः ॥३६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

त्र्यम्बकस्य किरातरूपिणः शिवस्य तोषणं येन भवति तत् मम वीर्यं मावमंस्थाः मा तुच्छीकुरु । प्रधने रणे ॥३४॥ एवं स्वश्लाघावादैः विस्रम्भितो विश्वासं प्रापितः पार्थवीर्यं निशामयन् शृण्वन् ॥३५-३६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मावमंस्था इति ॥ हे ब्रह्मन् ! मम वीर्यं मावमंस्थाः मम वीर्यावहेलनं मा कार्षीरित्यर्थः । तत्र हेतुत्वेन तद्विशिनष्टि। यतः त्र्यम्बको रुद्रस्तुष्यते येन तथाविधमस्ति । अतः हे प्रभो ! प्रधने सङ्ग्रामे मृत्युमपि विजित्य ते तव प्रजाम् आनेष्ये आनयिष्यामि ॥३३॥ एवमिति ॥ हे परंतप ! एवमित्थं फाल्गुनेनार्जुनेन विश्रम्भितो विश्वासं प्रापितः विप्रः पार्थवीर्यमर्जुनसामर्थ्यं निशामयन् शृण्वन् प्रीतः सन् स्वगृहं जगाम ॥३४॥ प्रसूतीति ॥ द्विजसत्तमः स ब्राह्मणोत्तमः, भार्यायाः प्रसूतिकाले आसन्ने समीपागते सति आतुरः भूत्वा हे अर्जुन ! मृत्योः सकाशात् मे मम प्रजां पाहि पाहि इति अर्जुनम् आह ॥३५॥ स इति ॥ ततः सोऽर्जुनः शुच्यमः पवित्रं सलिलं उपस्पृश्य हस्तौ पादौ प्रक्षाल्येत्यर्थः । महेश्वरं शिवं नमस्कृत्य ब्राह्मणोपेक्षकत्वेन कृष्णावज्ञया महेश्वरं नमस्कृत्येत्यर्थः। दिव्यास्त्राणि संस्मृत्य च सज्यं गाण्डीवम् आददे ॥३६॥

कृष्णप्रिया

अर्जुनने कहा ! में बलराम, श्रीकृष्ण या प्रद्युम्न नहीं हूं । जिसका गाण्डीव नामक धनुष्य प्रसिद्ध है व में अर्जुन हुं ॥३३॥ है ब्राह्मणदेवता ! आप मेरे बल का तिरस्कार मत कीजिये । मैं वह अर्जुन हुं जिसने भगवा

कृष्णप्रिया

शंकर को संतुष्ट किया है । मैं और क्या कहुं, में युद्धमें साक्षात् यमराज को भी जीतकर आपकी सन्तान ला दूंगा ॥३४॥ हे परीक्षित् ! जब अर्जुनने उस ब्राह्मण को इस प्रकार विश्वास दिलाया । तब वह लोगों से उनके बलकी प्रशंसा करता हुआ प्रसन्नतापूर्वक अपने घर लौट गया ॥३५॥ विप्रर्षि की पत्नी का प्रसूतिकाल निकट आने पर ब्राह्मण आतूर होकर अर्जुन के पास आया और कहने लगा - हे अर्जुनजी इस बार तुम मेरे बच्चे की रक्षा करके, बच्चे को मृत्यु से बचा लो ॥३६॥

[1]स उपस्पृश्य शुच्यम्भो नमस्कृत्य महेश्वरम् । [2]दिव्यास्त्राणि यः संस्मृत्य सज्यं गाण्डीवमाददे ॥३७॥
न्यरुणत् सूतिकागारं शरैर्नानास्त्रयोजितैः । तिर्यगूर्ध्वमधः पार्थश्चकार शरपञ्जरम् ॥३८॥
ततः कुमारः संजातो विप्रपत्न्या [3]रुदन् मुहुः । सद्योऽदर्शनमापेदे सशरीरो विहायसा ॥३९॥
तदाऽऽह विप्रो विजयं विनिन्दन् कृष्णसन्निधौ । [4]मौढ्यं पश्यत मे योऽहं श्रद्दधे क्लीबकत्थनम् ॥४०॥

कर्दमक्षमा

सः, शुच्यम्भः, उपस्पृश्य, महेश्वरम्, नमस्कृत्य, यः, दिव्यास्त्राणि, संस्मृत्य, सज्यम्, गाण्डीवम्, आददे ॥३७॥ नानास्त्रयोजितैः, शरैः, सूतिकागारम्, न्यरुणत्, तिर्यगूर्ध्वमधः, पार्थः, शरपञ्जरम्, चकार ॥३८॥ ततः, विप्रपत्न्याः, मुहुः, रुदन्, कुमारः, सञ्जातः, सशरीरः, विहायसा, सद्यः, अदर्शनम्, आपेदे ॥३९॥ तदा, विप्रः, विजयम्, कृष्णसन्निधौ, विनिन्दन्, आह, यः, अहम्, क्लीबकत्थनम्, श्रद्दधे, मे, मौढ्यम्, पश्यत ॥४०॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ब्राह्मणोपेक्षकत्वेन कृष्णावज्ञया महेश्वरं नमस्कृत्य ॥३७॥ न्यरुणदावृतवान् तदेवाऽऽह तिर्यगूर्ध्वमिति ॥३८॥ अदर्शनमापेदे देहोऽपि नावशिष्ट इत्यर्थः ॥३९-४०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

सोऽर्जुनः । दिव्यानि देवेभ्यो लब्धानि ॥★॥ सोऽर्जुनः । महेश्वरं न तु कृष्णं तत्र सख्यादेव ब्राह्मणोपेक्षकत्वेन दोषदर्शनात् । परन्तु भगवदवज्ञया शिवभजनमकिञ्चित्करमिति द्योतितम् ॥३७॥ ॥०॥★॥ नानास्त्रैर्ब्रह्मास्त्रादिविधानेन योजितैः प्रयुक्तैः ॥३८॥ ततः शरपञ्जरकरणानन्तरम् । इत्यर्थ इति- '**हठाद्यत्क्रियते कर्म तन्न सिद्ध्यति कर्हिचित्**' इत्युक्तेरीश्वरावज्ञया प्रवृत्तत्वादतीव वैषम्यं जातमिति भावः ॥★॥ विहायसा आकाशमार्गणादर्शनमापेदे । तथा च तत्रैव —

'अथाकाशे पुनर्वाचमश्रौषं बालकस्य वै । हुंहेति ह्रियमाणस्य न च श्यामि राक्षसम् ॥' इति ।

कृष्णेच्छया विना दिव्यास्त्राणि स महेश्वरश्च बालकस्य शरीरमपि रक्षितुं नाशकन्निति भावः ॥३९॥ तदा बालशरीरदर्शनाभावकाले ॥★॥ तदा ततः । विजयमिति । सर्वविजयशीलस्य निन्दा त्वतिदुःसहेति भावः । कृष्णसन्निधाविति । गृहान्तिके रहसि तन्निन्दने रसालाभादिति भावः ॥४०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

सोऽर्जुनः नमस्कृत्य महेश्वरमिति । श्रीभगवदवज्ञायां शिवभजनमकिञ्चित्करमिति द्योतितम् ॥३७॥ नानास्त्रैर्ब्रह्मास्त्रादिविधानैर्योजितैः प्रयुक्तैः ॥३८॥ विहायसा आकाशमार्गणादर्शनमापेदे । तथा च तत्रैव —

---

[1] अत्र श्लोकद्वयमधिकं-विज. । तच्च पूर्वश्लोकविजयध्वजटीकायां कुण्डले () दत्तम् । [2] दिव्यान्यस्त्राणि-श्रीधर. वंशी. वीर. । [3] रुदन्मृतः-वीर. । [4] मौढ्याद्यस्य तवाहं वै श्रद्दधे-विज. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

'अथाकाशे पुनर्वाचमश्रौषं बालकस्य वै। हुंहेति ह्रियमाणस्य न च श्यामि राक्षसम्॥' इति ॥३९॥

तदा ततः विजयमिति सर्वविजयशीलस्य तस्य निन्दात्वतिदुःसहेति भावः ॥४०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥२७-४०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स इति। सोऽर्जुनः शुचि शुद्धमम्बु जलम् उपस्पृश्याचम्य ॥३७॥ न्यरुणदिति। न्यरुणदावृतवान्। तदेवाह तिर्यगूर्ध्वमिति ॥३८॥ तत इति। विप्रपत्न्याः सञ्जातः कुमारो रुदन्नेव मृतः अदर्शनमापेदे। देहोऽपि नावशिष्ट इत्यर्थः ॥३९॥ तदेति। अहो मम मौढ्यं पश्यत। योऽहं क्लीबस्य षण्ढस्यार्जुनस्य कत्थनं प्रगल्भभाषणं श्रद्दधे विश्रब्धवानस्म्यतोऽहं मूढः ॥४०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

सूतिकागारं सूतिकागृहं शरैर्न्यरुणत् आवृतवान् ॥३८॥ भगवदनुग्रहरहितस्य साधनबाहुल्येन किं फलमिति भावेनाह-तत इति ॥३९॥ तदनन्तरं किमभूदित्यत्राह-तदेति। अथार्जुनं विनिन्दति तवेति ॥४०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१६-५४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

महेश्वरं न तु कृष्णमिति तत्र सख्यादेव ब्राह्मणोपेक्षकत्वदोषदर्शनात् ॥३७-३८॥ सशरीरमिति। कृष्णेच्छया विना दिव्यास्त्राणि तानि स महेश्वरश्च बालकस्य शरीरमपि रक्षितुं नाशकन्निति भावः ॥३९॥ कृष्णसन्निधाविति स्वगृहान्तिके रहसि तन्निन्दने रसालाभादिति भावः ॥४०॥

गूढार्थदीपिनी

शुचि अम्भः मन्त्रपूतजलम् उपस्पृश्य आचम्य गाण्डीवम् आददे जग्राह ॥३७॥ अस्त्रं मन्त्राभिमन्त्रितम्। न्यरुणत् समन्तादावृतवान्। रुधिर आवरणे धातुः ॥३८॥ विहायसा आकाशमार्गेण अदर्शनमापेदे देहोऽपि नावशिष्ट इत्यर्थः ॥३९॥ विजयमर्जुनम्। क्लीबस्य अर्जुनस्य कत्थनमात्मप्रशंसनं श्रद्दधे विश्वसितवान् ॥४०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

महेश्वरं नमस्कृत्य वक्ष्यमाणहेतुना गीतोपदेशाभावेन तदानीं श्रीकृष्णतत्त्वज्ञानाभावात् ॥३७॥ न्यरुणत् आवृतवान् ॥३८-४०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततोऽर्जुनस्य रक्षाप्रकारमाह-स उपस्पृश्येति। अर्जुनो महादेवबलेन सर्वं करिष्यामीति सर्वदेवाविष्टस्तथा करोति। उपस्पर्शनं देवतासान्निध्यार्थं शुच्यम्भ इति मन्त्रपूतं देवताप्रार्थनार्थं नमस्कारः दिव्यास्त्राणां सर्वेषां संस्मरणम्। सर्वत्र सर्वसम्बन्धार्थं सज्यम् आरूढं प्रत्यञ्चं गाण्डीवमादद इति तस्य दृष्टसामग्री निरूपिता। नाना ब्रह्मास्त्रयोजितैः शरैरिति देवतान्तरप्रवेशाय। ततः सर्वतः शरपञ्चरं चकार। ततः पञ्जरमध्य एव कुमारः सञ्जातः। विप्रपत्न्याः सकाशात् भूमिर्पर्शाभावात् कठिनमार्गेण गतः आकाशं भित्त्वा कालं मायां च भगवत्स्थाने गत्वा भगवता सह लोकालोकात्परभागे आविर्भूत इत्यर्थः।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

दा भार्यया वृत्तान्ते कथिते भगवत्सन्निधाने समागत्य अर्जुनं विशेषेण निन्दन् क्षोभजनकं वाक्यमाह-सार्धाभ्यां निन्दति। र्जुनो निर्दिष्टः अहमेव भ्रान्तः तत्कथमित्याकाङ्क्षायामाह-मौढ्यं पश्यत ममैव योऽहं क्लीबस्य कत्थनं श्रद्दधे। यदि तस्मिन् र्यसम्भावनापि स्यात् तर्हि तत्र क्लीबत्वं न भवेत् ॥३७-४०॥

श्रीसुबोधिनीसारः

सोऽर्जनः शुचि पूतमम्भो वारुपस्पृश्याचान्तः महादेवं नमस्कृत्य दिव्यानि अस्त्राणि सञ्चिन्त्य सज्यम् आरोपितगुणं ण्डीवं जग्राह ॥३७॥ नानास्त्रमन्त्रमन्त्रितैः शरैर्बाणैः तिर्यक् ऊर्ध्वमधः सूतिकाया आगारं गृहं न्यरुणत्। पार्थोऽर्जुन आवृतवान् रपञ्जरं चकार ॥३८॥ ततो विप्रपत्न्याः कुमारो बालः सञ्जातः। सदेह आकाशमार्गेण सद्यः तत्क्षणेऽदर्शनं प्राप। मुहु मुहुः पुना न् विप्रपत्नी आरुददिति साधुः ॥३९॥ तदा कृष्णस्य सन्निधौ समक्षं विजयमर्जुनं विनिन्दन् विप्र आ। क्लीबस्य षण्ढस्य कत्थनं ऽहं श्रद्दधे तस्य मे मम मौढ्यं मूढतां यूयं पश्यत ॥४०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सोऽर्जुनः शुचि शुद्धमम्भो जलमुपस्पृश्य हस्तपादादिप्रक्षालनं कृत्वाचम्य महेश्वरम् इष्टदेवं नमस्कृत्य दिव्यानि स्त्राणि मन्त्रान् संस्मृत्य धनुराददे गृहीतवान् ॥३७॥ ततश्च नानास्त्रैर्मन्त्रैर्योजितैः शरैः सूतिकागृहं न्यरुणत्। तत्प्रकारमाह-र्यगूर्ध्वमध इति। एवं पार्थोऽर्जुनः शरपञ्जरं चकार ॥३८॥ ततश्च विप्रपत्न्याः कुमारः सञ्जातः। स च महुः रुदन्नपि द्यस्तत्क्षणमेव विहायसा आकाशमार्गेण सशरीरः अदर्शनमापेदे। अपत्यान्तरस्य मृतदेहलाभोऽप्यभूत्। अस्य तु देहोऽपि वशिष्ट इत्यर्थः ॥३९॥ तदा च स विप्रः कृष्णसन्निधौ विजयमर्जुनं विनिन्दन्नाह। योऽहं क्लीबस्य षण्ढस्यार्जुनस्य कत्थनं थाप्रगल्भभाषणं श्रद्दधे विश्वसितवांस्तस्य मे मौढ्यं मौर्ख्यं पश्यत ॥४०॥

अन्वितार्थप्रकाशिका

स इति ॥ सोऽर्जुनः शुचि शुद्धमम्भो जलमुपस्पृश्याचम्य ब्राह्मणोपेक्षकत्वेन कृष्णावज्ञया महेश्वरम् इष्टदेवं नमस्कृत्य व्यानि अस्त्राणि मन्त्रान् संस्मृत्य सज्जीकृतं गाण्डीवं धनुराददे गृहीतवान् ॥३७॥ न्यरुणदिति ॥ ततश्च नानास्त्रैर्मन्त्रैर्योजितैः शरैः र्यगूर्ध्वमधश्च पार्थः शरपञ्जरं चकार। तेन च सूतिकागृहं न्यरुणत् आवृतवान् ॥३८॥ तत इति ॥ ततश्च विप्रपत्न्याः कुमारः ञ्जातः। स च महुः रुदन्नपि सद्यस्तत्क्षणमेव विहायसा आकाशमार्गेण सशरीरः अदर्शनमापेदे। अपत्यान्तरस्य तदेहलाभोऽप्यभूत्। अस्य तु देहोऽपि नावशिष्ट इत्यर्थः ॥३९॥ तदा च स विप्रः कृष्णसन्निधौ विजयमर्जुनं विनिन्दन्नाह स्म। हं क्लीबस्य षण्ढस्यार्जुनस्य कत्थनं वृथाप्रगल्भभाषणं श्रद्दधे विश्वसितवांस्तस्य मे मौढ्यं मौर्ख्यं पश्यत ॥४०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स विप्रगृहं गतोऽर्जुनः क्षात्रत्वाभिमानजातश्रीकृष्णापमानेन महेश्वरं शिवम् ॥३९॥ न्यरुणत् आवेष्टयत् तदाह-तिर्यगिति ८॥ विहायसा गगनवर्त्मना अदर्शनम् आपेदे प्राप ॥३९-४०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न्यरुणदिति ॥ ततः सः पार्थः नानास्त्रयोजितैः विविधास्त्रमन्त्रमन्त्रितैः, शरेर्बाणैः सूतिकागारं न्यरुणदावृतवान्। तिर्यक् र्ध्वम् अधश्च शरपञ्जरं चकार ॥३७॥ तत इति ॥ ततः विप्रपत्न्याः सञ्जातः कुमारः मुहुः रुदन् सन् सद्यः सशरीर एव विहायसा ञ्जरस्थाकाशमार्गेण अदर्शनम् आपेदे ॥ देहोऽपि नावशिष्ट इत्यर्थः ॥३८॥ तदेति ॥ तदा विप्रः कृष्णसन्निधौ स्थितमिति शेषः।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

विजयमर्जुनं विनिन्दन् सन् आह अहो मे मम मौढ्यं पश्यत । यः अहं क्लीबकत्थनं क्लीबस्यार्जुनस्य भाषणं श्रद्दधे विश्रब्धवान् अस्मि । अतोऽहमेव मूढ इति भावः ॥३९॥ नेति ॥ यस्य मम अपत्यं परित्रातुं केशवः कृष्णः न शेके । रामोऽपि न च नैव शेके। प्रद्युम्नः न शेके । अनिरुद्धः न शेके । एवं प्रद्युम्नादयो यत्परित्रातुं न शेकुः तदविता तद्रक्षकः अन्यः कः ईश्वरः समर्थः ॥४०॥

कृष्णप्रिया

यह सुनकर अर्जुनने शुद्ध जलसे आचमन किया तथा भगवान शिवको प्रणाम किया बादमें दिव्य अस्त्रों का स्मरण कर गाण्डिव धनुष्य सजाकर हाथमें धारण किया ॥३७॥ अर्जुनने बाणों को अनेक प्रकारके अस्त्र मन्त्रों से अभिमन्त्रित करके प्रसवगृह को चारों और से घेर लिया । इस प्रकार उन्होंने सूतिकागृह के उपर नीचे अगल बगल बाणों का एक पिंजडा सा बना दिया ॥३८॥ यह विधि पूर्ण होते ही, ब्राह्मण की पत्नी से प्रसव हुआ, वह पुत्र बार बार रो रहा था किंतु जन्म लेते ही बालक शरीर सहित आकाशमार्ग से विदा हो गया और किसी के देखनेमें नहीं आया ॥३९॥ इस वक्त वह ब्राह्मण भगवान श्रीकृष्ण की उपस्थितिमें ही अर्जुन की निन्दा करने लगा मेरी मूर्खता तो देखो मेने इस निर्वीर्य नीर्माल्य अर्जुन की डींगभरी बातों पर विश्वास कर लिया ॥४०॥

न प्रद्युम्नो नानिरुद्धो न रामो न च केशवः । [1]यस्य शेकुः परित्रातुं [2]कोऽन्यस्त्रातुमधीश्वरः ॥४१॥
धिगर्जुनं मृषावादं धिगात्मश्लाघिनो धनुः ।[3] दैवोपसृष्टं यो मौढ्यादानिनीषति दुर्मतिः ॥४२॥
एवं शपति विप्रर्षौ विद्यामास्थाय फाल्गुनः । ययौ संयमनीमाशु यत्रास्ते भगवान् यमः ॥४३॥
विप्रापत्यमचक्षाणस्तत ऐन्द्रीमगात् पुरीम् । आग्नेयीं नैर्ऋतीं सौम्यां वायव्यां वारुणीमथ ॥४४॥

कर्दमक्षमा

न, प्रद्युम्नः, न, अनिरुद्धः, न, रामः, केशवः, च, यस्य, परित्रातुम्, न, शेकुः, त्रातुम्, अन्यः, कः, अधीश्वरः ॥४१॥ यः, दुर्मतिः, मौढ्यात्, दैवोपसृष्टम्, आनिनीषति, मृषावादम्, अर्जुनम्, धिक्, आत्मश्लाघिनः, धनुः, धिक् ॥४२॥ विप्रर्षौ, एवम्, शपति, फाल्गुनः, विद्याम्, आस्थाय, यत्र, भगवान्, यमः, आस्ते, आशु, संयमनीम्, ययौ ॥४३॥ विप्रापत्यम्, अचक्षाणः, ततः, ऐन्द्रीम्, आग्नेयीम्, निर्ऋतीम्, सौम्याम्, वायव्याम्, अथ, वारुणीम्, पुरीम्, अगात् ॥४४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

यस्य प्रजाः तत्तत्र ॥४१-४४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यस्य मम प्रजा इति शेषः ॥★॥ यस्य यम् । तत्तस्मादन्यः क ईश्वरोऽस्ति तेषां चतुर्णामेकात्वत्वाद्वितीयेश्वराभावाद नास्तीत्यर्थः ॥४१॥ दैवेनोपसृष्टं नाशितम् । आनिनीषत्यानेतुमिच्छति ॥★॥ दैवेन प्रारब्धकर्मणा ईश्वरेच्छया वा । उपसृष्टं हतम्। केवलं मूर्ख एव दुर्मतिर्दुष्टबुद्धिरपीत्यर्थः । नाहं सङ्कर्षण इत्याद्युक्ते ॥४२॥ शपति आक्रोशति सति । संयमनीं यमपुरीम्। विद्या मनुष्यागम्यगमनसामर्थ्यकरीम् ॥★॥ भगवान् भूतानां प्रवृत्तिनिवृत्त्यादिवेत्ता तद्बालकानयनेऽतियोग्य इत्यर्थः । अत एवादौ तत्रैव गमनमिति भावः ॥४३॥ ततो यमपुरान्वेषणोत्तरम् । अन्यानि धिष्ण्यानि यक्षकिम्पुरुषादिस्थानानि ॥★॥ विप्रेति सार्धकम् अचक्षाणः अपश्यन् । वद्याबलादवगतस्य तद्रूपस्यादृष्टेः सौम्यामुत्तरदिग्वर्तिसोमपुरीमिति वारुणवायव्यपुरीद्वयातिक्रमेण प्राक् तस्यां गमनं सर्वद्रष्टुः सर्वदेशभ्रमणशीलस्य तस्य निजादिपुरुषस्य पृच्छेच्छया । ततश्च मया न दृष्टं तथाप्यन्विष्यतामित्युक्तेः

---

१. यं न शेकुः-वीर. । २. स्तदवितेश्वरः-श्रीधर. वंशी. वीर. जीव. ; स्तदधिकेश्वरः-विज. । ३. दैवोपसादितं मौढ्या-वीर. दैवोपसृष्टयोर्मौढ्या-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पश्चाच्चेत्क्रमेण वायव्यां वारुणीमपि ऐशान्यामगमनं च स्वगुरुणा श्रीशिवेन तन्नयनासम्भवात् धिष्ण्यानि श्रीब्रह्मादिस्थानानि उदायुध: उद्यतशस्त्रास्त्र इत्यस्य पूर्वैरप्यन्वय: ॥४४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

यस्य यं तस्याविताऽन्य: क ईश्वरोऽस्ति तेषां चतुर्णामेकात्वत्वाद्द्वितीयेश्वराभावादन्यो नास्त्येवेत्यर्थ: ॥४१॥ दैवेन प्रारब्धकर्मणा ईश्वरेच्छया वा उपसृष्टं हतं मौर्ख्यात् मूर्खत्वात् न केवलं मूर्ख: दुर्मतिर्दुष्टबुद्धिरपीत्यर्थ: । नाहं सङ्कर्षण इत्याद्युक्ते: ॥४२॥ भगवान् भूतानां प्रवृत्तिनिवृत्त्यादिवेत्ता तद्बालकानयनेऽतियोग्य इत्यर्थ: । अत एवादौ तत्रैव गमनमिति भाव: ॥४३॥ विप्रेति सार्धकम् । अचक्षाण: अपश्यन्निति विद्याबलादवगतस्य तद्रूपस्यादृष्टे: सौम्यामुत्तरदिग्वर्तिसोमपुरीमिति वारुणवायव्यपुरीद्वयातिक्रमेण प्राक् तस्यां गमनं सर्वद्रष्टु: सर्वदेशभ्रमणशीलस्य तस्य निजादिपुरुषस्य पृच्छेच्छया । ततश्च मया न दृष्टं तथाप्यन्विष्यतामित्युक्ते: पश्चाच्चेत्क्रमेण वायव्यां वारुणीमपि ऐशान्यामगमनं च स्वगुरुणा श्रीशिवेन तन्नयनासम्भवात् धिष्ण्यानि श्रीब्रह्मादिस्थानानि उदायुध: उद्यतशस्त्रास्त्र इत्यस्य पूर्वैरप्यन्वय: ॥४४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

यस्य यम् । अविता रक्षक: ॥४१-६६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

प्रद्युम्नादय एव यत्परित्रातुं न शेकु: न प्रबभूवु: मदपत्यमवितुं त्रातुं को वा ईश्वर: समर्थ: ॥४१॥ अतोऽर्जुनं धिक् । स निन्द्य इत्यर्थ: । 'उभसर्वतसो:' इति द्वितीया । तत्र हेतुर्मृषा वदतीति तथा तमात्मस्तुतिशीलस्यास्य धनुर्गाण्डीवमपि धिक् । तत्र हेतुर्योऽर्जुन: दुष्टा मतिर्यस्य स तथाभूतस्सन् दैवोपसादितं लोकान्तरप्रापितं मौढ्यादानिनीषत्यानेतुमिच्छतीति ॥४२॥ एवमिति । एवं विप्रर्षौ शपति निन्दति सति स फाल्गुनोऽर्जुन: विद्यां सर्वलोकसञ्चारावहां योगविद्यामाश्रित्य तावत्संयमिनीं यमपुरीं प्रति ययौ । यत्र संयमन्यां भगवान् यम आस्ते ताम् इत्यर्थ: ॥४३॥ तत्र विप्रस्यापत्यमचक्षाणोऽपश्यन् एवं क्रमेणैन्द्र्यादिपुरीस्तत्र तत्राचक्षाणो ययौ । याम्या पुरी संयमन्या अन्यैव यमस्यैव सम्बन्धिनी दक्षिणादिक्स्था । रसातलं पातालम् । नाकपृष्ठं नाकस्य स्वर्गस्य पृष्टम् उपरितनं लोकम् । किं बहुना सर्वांश्च लोकान्वायुवच्चचार ॥४४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

यस्य ममार्भकं परित्रातुं न शेकु: सोऽहं कृष्णस्य सन्निधौ यस्य तव विकत्थनं श्रद्धधैवैतं त्वां धिक् । आत्मश्लाघिन: स्वस्य तव धनुश्च धिक् । तदधिकेश्वर: तेभ्य: प्रद्युम्नादिभ्योऽधिकेश्वरश्च क: ॥४१॥ किमित्येवं निन्दसीति तत्राह-दैवेति । दैवेनोपसृष्टयोरुपद्रुतयोरावयो: पुत्रमानिनीषति आनेतुमिच्छति ॥४२॥ विद्यां मनुष्यागम्यगमनसामर्थ्यकरीम् ॥४३॥ नैर्ऋतीं निर्ऋतेर्विद्यमानां दिशम् । सौम्यां सोमस्य वायव्यां वायो: वारुणीं वरुणस्य ॥४४॥

श्रीमज्जीवगोस्वामिकृत: क्रमसन्दर्भ: ॥१६-५४॥

श्रीमज्जीवगोस्वामिकृत: बृहत्क्रमसन्दर्भ: ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यस्य यम् ॥४१-४३॥ सौम्यामुत्तरदिग्वर्तिनीं चन्द्रपुरीम् । ऐशान्यामगमनं स्वगुरुणा शिवेन तन्नयनासम्भवमननात् ॥४४॥

गूढार्थदीपिनी

यस्य प्रजा: परित्रातुं न शेकु: न समर्था बभूवु: तत् तत्र अन्य: कोऽविता रक्षक: ईश्वर: समर्थ: स्यात् न कोऽपीत्यन्वय: ॥४१॥ य: दैवेन उपसृष्टं नाशितम् आनिनीषति आनेतुमिच्छति ॥४२॥ विद्याम् सर्वसामर्थ्यदाम् । शपति आक्रोशति सति । शप आक्रोशे धातु: । संयम्यन्ते प्रताड्यन्ते पापिनोऽत्रेति संयमनी यमपुरी । अधिकरणे ल्युट् टित्वात् डीप् ॥४३॥ सौम्याम् उत्तरदिग्वर्तिनीम् अचक्षाण: अपश्यन् । धिष्ण्यानि ब्रह्मादिस्थानानि । अगात् उदायुध: उद्यतशस्त्र: सन् ॥४४॥

श्रीमच्छुकदेवकृत: सिद्धान्तप्रदीप:

यस्य यं परित्रातुं प्रद्युम्नो न शशाक अनिरुद्धो न शशाक न चान्य उग्रसेनादि: शशाक तं परित्रातुं क ईश्वर: समर्थ: न कोऽपि । भगवत्प्रभावं संस्मृत्याह-केशव: अवितेति पदयोजना ॥४१॥ दैवोपसृष्टं देवेन लोकान्तरं नीतम् ॥४२-४५॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

यदक्लीबानामप्यसाध्यं तत् क्लीब: कथं कुर्यात् इत्याह-न प्रद्युम्न इति । यदि धनदानेन पुत्रा रक्षितुं शक्या: स्यु: तर्हि प्रद्युम्न: पालयेत् । यदि बलेन तदाऽनिरुद्ध: यदि रत्युत्पादनेन तदा राम: यदि सृष्टिप्रलयाभ्यां तदा केशव: । एतेषां पुरे वासात् शक्तौ सत्यां पालनमावश्यकम् । यदेतैरप्यशक्यपरिपालनं तेन ज्ञायते कश्चिदन्य एवोपायो नास्तीति तथा सति कोऽन्यस्त्रातुमधीश्वर: । धर्मेण चेद्रक्षा तर्हि मय्येव रक्षित: स्यादिति चत्वारो गणिता: । एवं साधनपञ्चकरहितोऽपि अर्जुन: यद्रक्षार्थमुक्तवान् तेनार्जुनं धिक् । यतो मृषावादमिति । तस्य धनुरपिधनु: ज्याल्पताम् । ननु धनुष: कोऽपराध इति चेत्तत्राह-आत्मश्लाघिन इति । य आत्मानं वृथैव श्लाघते न तु शूरा: प्रतिजानते । तत: कदाचित् प्रतिज्ञा पूरिता भवति कदाचिन्नैतावता प्रतिज्ञाकर्तुर्दोष इति चेत्तत्राह-दैवोपसृष्टमिति । आनिनीषति आनेतुमिच्छति । सन्दिग्धेऽर्थे प्रतिज्ञा युक्ता न तु निश्चित इति भाव: । एवमप्रतिज्ञां कुर्वन् दुर्मति: ॥४१-४२॥ ततो यज्जातं तदाह-एवं शपतीति । विद्यामास्थाय देवानां विद्यामैच्छिकगतिप्रदां तत: फाल्गुन: अतिनिर्भय: संयमिनीं यमस्य पुरं ययौ । संयमनी यातनाभूमिरूपा यमराजधानी च भवति । तत्र द्वारकायां ब्राह्मणगृहे उत्पन्न: यातनास्थाने न गमिष्यतीति निश्चित्य यत्रास्ते भगवान् यम इत्युक्तम् । ततस्तत्राप्यदृष्ट्वा पूर्वादिक्रमेण दशदिश: अन्विष्टा: । सौम्या उत्तरा दिक् रसातलम् अध: नाकपृष्ठमुपरि अन्यानि गन्धर्वादीनां स्थानानि । तस्य सर्वत्र निर्भयतया गमने हेतु: उदायुध इति ॥४३-४४॥

श्रीसुबोधिनीसार:

पश्य यं परित्रातुं रक्षितुं प्रद्युम्नो न शशाक नानिरुद्धो न रामो न कृष्ण: तस्याविता रक्षकोऽन्य ईश्वर: प्रभु: क: सर्वेऽप्येते युगपन्न शेकुरिति क्रियाबहुत्वार्थ: । 'न क्रोधो न च मात्सर्यम्' इति वत् ॥४१॥ एवं विप्रर्षौ शपति सति विद्यामास्थाय विद्याबलेन फाल्गुनोऽर्जुनोऽरं संयमनीं पुरीं ययौ । यत्र पुर्यां भगवान् यम आस्ते ॥४३॥ विप्रस्याऽपत्यं पुत्रं तत्राऽपश्यन् ऐंन्द्रीं पुरीमगात् ततोऽग्न्यादीनां पुरीं पातालं स्वर्गम् अन्यानि धिष्ण्यानि स्थानानि उदायुध उद्यतास्त्रोऽर्जुनोऽगात् ॥४४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतदेव स्पष्टयति-यस्य ममापत्यं प्रद्युम्नादय: परित्रातुं न शेकुर्न समर्था जातास्तस्यान्य: को वेश्वर: समर्थोऽविता रक्षक: ॥४१॥ अतो मृषावादम् अनृतवक्तारमर्जुनं धिक् । आत्मश्लाघिन: आत्मस्तुतिशीलस्य धनुर्गाण्डीवमपि धिक् । तत्र हेतुमाह-यो दुर्मतिरर्जुनो दैवेनेश्वरेणोपसृष्टमन्यत्र नीतं मदपत्यं मौढ्यादानिनीषति आनेतुमिच्छति ॥४२॥ विप्रर्षावेवं शपति निन्दति सति फाल्गुनोऽर्जुन: विद्यामङ्गीकृत्याशु संयमनीं ययौ ॥४३॥ तत्र विप्रापत्यमचक्षाण: अपश्यन् इन्द्रादिपुरी: ययौ । नाकपृष्ठं स्वर्गोपरितनं लोकं किम्बहुनाऽन्यान्यपि गन्तुमशक्यानि धिष्ण्यानि स्थानानि उदायुध: सन् ययौ ॥४४॥

अन्वितार्थप्रकाशिका

नेति ॥ यस्य ममापत्यं प्रद्युम्नादयः परित्रातुं न शेकुर्न समर्था जातास्तस्यान्यः को वेश्वरः समर्थोऽविता रक्षकः । अत्रापि "नेमं विरञ्च्यो न भव" इत्यादिवदन्वयो योज्यः ॥४१॥ धिगिति । अतो मृषावादम् अनृतवक्तारमर्जुनं धिक् । आत्मश्लाघिनः आत्मस्तुतिशीलस्य धनुर्गाण्डीवमपि धिक् । यो दुर्मतिरर्जुनो दैवेनेश्वरेणोपसृष्टमन्यत्र नीतं मदपत्यं मौढ्यादानिनीषति आनेतुमिच्छति ॥४२॥ एवमिति ॥ विप्रर्षावेवं शपति निन्दति सति फाल्गुनोऽर्जुनः विद्यामङ्गीकृत्याशु संयमनीं ययौ यत्र भगवान् यम आस्ते ॥४३॥ विप्रेति सार्धम् । तत्र विप्रापत्यमचक्षाणः अपश्यन् इन्द्रादिपुरीः ययौ । नाकपृष्ठं स्वर्गोपरितनं लोकं किम्बहुनाऽन्यान्यपि गन्तुमशक्यानि धिष्ण्यानि स्थानानि उदायुधः सन् ययौ । अत्र ऐशान्यां गमनमपि ज्ञेयम् । ऐन्द्र्यादिनिर्देशस्योपलक्षणत्वात् । केचित्तु स्वगुरुणा शिवेनापि तन्नयनासम्भवमननात्तत्र न गमनमित्याहुः ॥४४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

यस्य यं परित्रातुं तस्य बालस्य अविता ॥४१॥ यतः दैवेनेश्वरेण उपसृष्टं सदेहं गृहीतं मत्पुत्रम् आनिनीषति अतस्तं धिगिति सम्बन्धः ॥४२॥ फाल्गुनः अर्जुनः विद्यां देवकलाम् ॥४३॥ अचक्षाणः अपश्यन् अन्यानि धिष्ण्यानि लोकान् ॥ उदायुधः उद्यतशस्त्रास्त्रः ॥४४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

धिगिति ॥ अतः मृषावादम् अर्जुनं, धिक् । स निन्द्य इत्यर्थः । आत्मश्लाघिनः आत्मस्तुतिशीलस्यार्जुनस्य धनुर्गाण्डीवमपि धिक् । दुर्मतिः योऽर्जुनः दैवोपसृष्टं दैवेन लोकान्तरं प्रापितं मदपत्यं मौढ्यात् मूढभावतः आनिनीषति समानेतुमिच्छति ॥४१॥ एवमिति ॥ एवं विप्रर्षौ तस्मिन् ब्राह्मणे शपति निन्दयति, फाल्गुनोऽर्जुनः विद्यां सर्वलोकसञ्चारावहां योगविद्याम् आस्थायाश्रित्य यत्र भगवान् यमः आस्ते तां संयमनीं प्रति, आशु ययौ ॥४२॥ विप्रेति ॥ तत्र विप्रापत्यं अचक्षाणः अपश्यन् सन् ततः संयमन्याः सकाशात् ऐन्द्रीं पुरीम् अगात् । एवम् आग्नेयीमग्नेः पुरीं नैर्ऋतीं सौम्यां कौबेरीं वारुणीं वायव्याम् अथ उदायुधः सन् रसातलं नाकपृष्ठं स्वर्गोपरितनलोकान् अन्यानि धिष्ण्यानि अगात् । किं बहुना वायुवत् सर्वान् लोकांश्चचारेत्यथशब्देन ज्ञाप्यते ॥४३॥ तत इति ॥ ततस्तत्र सर्वत्रापि न लब्धो द्विजसुतो येन सः अत एव अनिस्तीर्णप्रतिश्रुतः अनिस्तीर्णप्रतिज्ञः अत एव अग्निं विविक्षुः प्रवेष्टुमिच्छुरर्जुनः प्रतिषेधता सामोक्तिभिः प्रतिषेधं कुर्वता, कृष्णेन प्रत्युक्तो निवारितः हि ॥४४॥

कृष्णप्रिया

मेरे बालकों की रक्षा जो श्रीप्रद्युम्नजी, अनीरुद्धजी श्रीबलरामजी और स्वयं भगवान केशव भी नहीं कर सके तो फिर दूसरा कौन उसकी रक्षा कर सकता है इतनी अक्कल भी मुझे न आइ ॥४१॥ मिथ्याभाषी अर्जु को धिक्का र है । अपने मुं से अपनी बडाई करनेवाले अर्जुन के धनुष को धिक्कार है । इसकी दुर्बुद्धि तो देखो । यह मूढता वश उस बालकको लौटा लाना चाहता है, जिसे प्रारब्धने हमसे अलग कर दिया है ॥४२॥ जब वह ब्राह्मण इस प्रकार उन्हें भला बुरा कहने लगा, तब अर्जुन योगबलसे तत्काल संयमनीपुरीमें गये, जहां भगवान निवास करते है ॥४३॥ वहां उन्हें विप्र का बालक नहीं मिला । फिर वह शस्त्र लेकर क्रमशः इन्द्र, अग्नि, नियति, सोम वायु और वरुण आदि की नगरियोंमें अतलादि नीचे के लोकमें स्वर्गसे उपरके महर्लोकादिमें एवं अन्य सभी स्थलोमें गये ॥४४॥

ततोऽलब्धद्विजसुतो ह्यनिस्तीर्णप्रतिश्रुतः । अग्निं विवक्षुः कृष्णेन प्रत्युक्तः प्रतिषेधता[1] ॥४५॥
दर्शये द्विजसूनूंस्ते [2]मावज्ञामात्मनः कृथाः । ये ते[3] नः कीर्तिं[4] विपुलां [5]मनुष्याः स्थापयिष्यन्ति ॥४६॥
इति सम्भाष्य [6]भगवानर्जुनेन सहेश्वरः ।[7] दिव्यं स्वरथमास्थाय प्रतीचीं दिशमाविशत् ॥४७॥
सप्त द्वीपान् सप्तसिन्धून् सप्तसप्तगिरीनथ । लोकालोकं तथातीत्य विवेश सुमहत्तमः ॥४८॥

कर्दमक्षमा

ततः, अलब्धद्विजसुतः, अनिस्तीर्णप्रतिश्रुतः, हि, अग्निम्, विवक्षुः, निषेधता, कृष्णेन, प्रत्युक्तः ॥४५॥ आत्मनः, अवज्ञाम्, मा, कृथाः, ते, द्विजसूनुम्, दर्शये, ये, मनुष्याः, ये, मनुष्याः, ते, नः, विपुलाम्, कीर्तिम्, स्थापयिष्यन्ति ॥४६॥ इति, सम्भाष्य, भगवान्, ईश्वरः, अर्जुनेन, सह, दिव्यम्, स्वरथम्, आस्थाय, प्रतीचीम्, दिशम्, आविशत् ॥४७॥ सप्त, द्वीपान्, सप्तसिन्धून्, अथ, सप्त, सप्तगिरीन्, तथा, लोकालोकम्, अतीत्य, सुमहत्, तमः, विवेश ॥४८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

प्रत्युक्तो वारितः उपपत्तिभिः प्रतिषेधं कुर्वता ॥४५॥ मावज्ञ माऽवजानीहि ये निन्दन्ति त एव मनुष्या नः कीर्तिं स्थापयिष्यन्ति निश्चलां करिष्यन्ति पाठान्तरं तु छन्दोभङ्गभयादागन्तुकमिति ॥४६-४७॥ सप्त सप्तसङ्ख्या गिरयो येषु द्वीपेषु तान् ॥४८-५०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततः सर्वत्र गमनोत्तरम् । न लब्धो द्विजसुतो येन स तथा । न निस्तीर्णं प्रतिश्रुतं ब्राह्मणाऽपत्यानयनलक्षणं येन स तथा ॥★॥ ततस्तेष्वलब्धद्विजसुतः सन् । हि निश्चितम् । प्रत्युक्तस्तन्मुमूर्षाप्रातिकूल्येन मा विशाऽग्निं प्राप्स्यति द्विजापत्यमित्येवंरूपेणोक्तः ॥४५॥ ते तुभ्यम् । आत्मना स्वमात्मानम् । पाठान्तरं तु स्थापयिष्यन्तीति पाठस्तु आगन्तुकम् आयास्यत्येव । स्थापयिष्यन्तीति बहुत्वं तु अन्वययोजनायां वाच्यमेवेत्यर्थः । "कीर्तिं त एते विपुलां स्थापयिष्यन्ति मानवाः" इति पाठस्तु सुगम एव । यद्वा-स्थापयिष्यतीत्येवकत्वमार्षम् ॥★॥ ॥०॥ ॥४६॥ इति इत्थम् ॥★॥ ॥०॥ ॥४७॥ तथा सप्तद्वीपलङ्घनरीत्या । अथ लोकालोकलङ्घनोत्तरम् ॥★॥ ॥०॥ ॥४८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तेष्वलब्धद्विजसुतः सन् हि निश्चितं प्रतिषेधता निवारयता तन्मुमूर्षा प्रातिकूल्येनोक्तः ॥४५॥ दर्शय इति । समाश्वासनार्थं सामीप्ये वर्तमानत्वं नोऽस्माकमिति सख्येनात्मना सह तस्याभेदं द्योतयन्नाश्वासयति-विमलां प्रतिज्ञाहान्यादिसर्वदोषरहितां मनुष्या इति । देवादयो विदन्त्येव केवलं तत्त्वज्ञानेन मनुष्या एवाज्ञात्वा निन्दका अपि नः कीर्तिं स्थापयिष्यन्तीत्यर्थः । प्रियसखमहार्त्या कातर्येण जातभगवद्वाग्विकारावेशात् कवेरपि छन्दोभङ्गः येनेह कीर्तिं विमलां मनुष्या स्थापयन्ति न इति तु पाठन्तरम् । अन्यत्तैः । यद्वा, ये त इति सर्व एवेत्यर्थः ॥४६॥ सम्यक् प्रतिज्ञापूर्वकं भाषित्वा भगवान् अत एवेश्वरः इच्छामात्रेण बालाद्यानयनसमर्थोऽपि दिव्याश्वं रथमेवास्थाय अधिष्ठाय प्रतीचीं दिशमेवाविशदित्यर्जुनवत्तत्कौतुकार्थम् । ततोऽप्यधिका नरवीरवर्यलीला चमत्कारिदिव्यविद्यैव प्रकटिता न त्वैश्वर्यमपि ज्ञापितम् । अत एव परमदेवलीलस्य स्वाविर्भावविशेषस्याग्रे बद्धाञ्जलित्वादिकमपि प्रपञ्चयितव्यम् । साक्षाद्वैकुण्ठादागतानामप्यश्वानां तमसि भ्रष्टगतित्वादिकं चक्रादिनैव तदादिप्रतिकारश्चेति ज्ञेयम् । दिव्यं स्वरथमिति पाठः क्वचित् ॥४७॥ च अपि ससिन्धून् सप्तसमुद्रसहितानपि सप्तसिन्धूनिति पाठः स्पष्टः अथानन्तरं लोकालोकपर्वतं च ॥४८॥

---

[1] षेधितः-गो. प्रे. टी. । [2] मावध्या मानमात्मना-विज. ; मावज्ञामात्मनः कृथाः-वीर. ; मावज्ञात्मानमात्मना-श्रीधर. वंशी. । [3] एतेन-वीर. विज. ; एते हि-च. पु. ; **मानवा स्थापयिष्यन्ति कीर्तिं निन्दन्ति ये हि न** -इति कस्यचित् । [4] विमलां-श्रीधर. वंशी. वीर. विज. । [5] मनुष्याः स्थापयन्ति ते-वीर. ; मानुष्यं स्थापयिष्यसि-विज. । [6] नर्जुनेन महेश्वरः-वीर. ; नर्जुनं स महेश्वरः-विज. । [7] सहैव रथ-विज. ।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४१-६६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ततस्तत्र सर्वत्राप्यलब्धो द्विजसुतो येन सः अत एवानिर्तीर्णप्रतिज्ञः अत एवाग्निं प्रवेष्टुम् इच्छुः प्रतिषेधता सामोक्तिभिः प्रतिषेधं कुर्वता श्रीकृष्णेन प्रत्युक्तो निवारितः ॥४५॥ प्रितषेधपूर्वकनिवारणप्रकारमेवाह-दर्शय इति । द्विजस्य सूनूंस्ते तुभ्यं दर्शये दर्शयिष्यामि । आत्मनः स्वस्यावज्ञां मा कृथाः । एवं चेत्तवामलां कीर्तिम् एते मनुष्याः स्थापयन्ति निश्चलां करिष्यन्ति । दूषयन्तीति पाठान्तरम् । तदात्मनोऽवज्ञां मा कृथाश्चोत्कीर्तिं दूषयिष्यन्तीत्यर्थः ॥४६॥ इतीति । सम्भाष्य सम्भाषणेन प्रतिबोध्य भगवान्महेश्वरः श्रीकृष्णोऽर्जुनेन सह स्वकीयं रथमारुह्य पश्चिमां दिशमाविशत् ॥४७॥ सप्तद्वीपानिति । सप्तसप्तगिरयो येषु तान् द्वीपांश्च ततो लोकालोकं पर्वतमतीत्य सुमहन्निबिडं तमोऽन्धकारं विवेश ॥४८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अनिस्तीर्णप्रतिश्रुतः असाधितप्रतिज्ञः प्रत्युक्तः नेत्युक्तः । प्रतिषेधता निषेधं कुर्वता । कथं नेत्युक्त इति तत्राह-दर्शय इति ।आत्मनैव स्वयम् आत्मानं मावधीर्मा हिंसीः । सन्धिरार्षः । एतेन पुत्रादानादीनां त्वन्निमित्तेन मानुषीं मनुष्यलोकस्थां यथास्यात्तथा ईश्वरादपि महानुत्तमः ॥४५-४८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१६-५४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

प्रत्युक्तः वादितः । प्रतिषेधं कुर्वता ॥४५॥ मावज्ञ मावजानीहि । ननु मावारय लोका मां क्षत्रियं निन्दिष्यन्ति तत्राहुः-ये निन्दिष्यन्ति ते एव नः आवयोः कीर्तिं स्थापयिष्यन्ति । यद्वा ये तेऽपि मनुष्याः आवयोः कीर्तिमेव स्थापयिष्यन्ति । येनेह कीर्तिं विमलां मनुष्याः स्थापयन्ति । न इति पाठान्तरं छन्दोभङ्गभयादागन्तुकमिति स्वामिचरणाः ॥४६-४८॥

गूढार्थदीपिनी

अनिस्तीर्णप्रतिश्रुतः अपूर्णीकृतप्रतिज्ञः । प्रतिषेधतां निषेधं कुर्वता भगवता प्रयुक्तः निवारितः ॥४५॥ आत्मना स्वयमात्मानं मावज्ञ मावमानं कुरु । आर्षोऽयम् । यद्वा । आत्मना आत्मानं प्रति अवज्ञा मा भवितुमर्हतीति योज्यम् । अत्र ।'कीर्तिं त एते विपुलां स्थापयिष्यन्ति मानवाः' इति पाठस्तु सुगम इति वंशीधरी । मूले छन्दोभङ्गपाठस्तु नादरणीयः ॥४६॥ ईश्वरः श्रीकृष्णः प्रतीचीं पश्चिमाम् ॥४७॥ सप्त सप्त सङ्ख्याकाः गिरयो मर्यादापर्वता येषु तान् सप्तद्वीपानित्यस्य विशेषणम् । अतीत्य अतिक्रम्य ॥४८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

माऽवज्ञ माऽवजानीहि ॥४६॥ शिष्टानां नु का कथा ये ते ये केचिदपि मनुष्या नोऽस्माकं कीर्तिं स्थापयिष्यन्ति ॥४७॥ सप्तसप्त पञ्चमस्कन्धसिद्धाः गिरयो येषु तान् सप्तद्वीपान् सुमहत् अति निबिडम् । तमोऽन्धकारम् ॥४८-४९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततः किं कृतवान् इत्याकाङ्क्षायामाह-तत इति ॥ न लब्धो द्विजसुतो येन अत एव न निस्तीर्णा प्रतिश्रुतं प्रतिज्ञा यस्य ततो द्वितीयां प्रतिज्ञां कर्तुमुद्यतः । अग्निं विविक्षुः तामपि प्रतिज्ञां कर्तुं न शेक इत्याह-कृष्णेन प्रत्युक्त इति । अग्निप्रवेशं प्रतिषेधता प्रत्युक्तः प्रतिकूलतया उक्तः ॥४५॥ तदेव भगवद्वचनमाह-दर्शये द्विजसूनून् इति । ब्राह्मणपुत्रांस्तुभ्यं दर्शयिष्यामीति । ततो हेतोः

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

आत्मनैव स्वस्यावज्ञां मा कृथाः अपकीर्तिशङ्कया तव मरणं तन्मृतेः अधिकाप्यपकीर्तिर्भविष्यति । मुदक्तप्रकारेण चेज्जीविष्यसि तर्ह्येतेन जीवनेन ते कीर्तिं विपुलामपि मनुष्याः स्थापयिष्यन्तीत्यर्थः । मनुष्यादिदृष्टपराः न परमार्थं जानन्ति अतः पुत्रानयनं दृष्ट्वा कीर्तिमेव वक्ष्यन्तीत्यर्थः । एवमुक्त्वा भगवान् अप्रतिहतः सर्वज्ञः तेनैव सह स्वस्य गरुडध्वजं रथं दिव्यं आधिदैविकरूपं स्वभावतो वा आलौकिकं पश्चिमां दिशमभिप्रस्थितः ॥४६-४७॥ ततो बहुदूरे गत इत्याह-सप्तद्वीपानिति । जम्बूद्वीपादिसप्तद्वीपान् लवणादीन् समुद्रान् प्रत्येकं द्वीपेषु सप्तसप्तगिरीन् मर्यादापर्वतान् उल्लङ्घ्य अथ सर्वान्ते सुवर्णभूम्यनन्तरं लोकालोकपर्वतमप्यतीत्य तत्परभागे यत्तमः तत्प्रविष्टवान् ॥४८॥

१७ श्रीसुबोधिनीसारः

ततोऽप्राप्तविप्रपुत्रः न विस्तीर्णं प्रतिश्रुतं येन सोऽग्निं प्रवेष्टुमिच्छुः प्रतिषेधता वर्जयता कृष्णेन प्रत्युक्तः ॥४५॥ द्विजस्य सूनून् पुत्रान् ते तुभ्यमहं दर्शयिष्यामि आत्मना स्वयमात्मानं मावज्ञ मावजानीहि । ये मनुष्यास्त्वां निन्दन्ति ते हि विमलां कीर्तिं स्थापयिष्यन्ति ॥४६॥ इत्येवं भगवानर्जुनेन सह सम्भाष्य संवादं कृत्वा ईश्वरो दिव्यं स्वरथमास्थायाऽऽरुह्य प्रतीचीं पश्चिमां दिशमगात् ॥४७॥ सप्त सप्त द्वीपान् सिन्धून् गिरीन् तथा लोकालोकं पर्वतमतीत्यातिक्रम्य सुमहद्गाढं तमो विवेश ॥४८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततस्तस्मादेवं सर्वत्रान्वेषणादपि न लब्धो द्विजसुतो येन अत एव न निस्तीर्णं न सम्पादितं प्रतिश्रुतं येन सः अग्निं प्रवेष्टुमिच्छुः प्रतिषेधिता युक्तिभिः प्रतिषेधं कुर्वता कृष्णेन प्रत्युक्तः निवारितो जातः ॥४५॥ वारणप्रकारमेवाह-दर्शय इति । आत्मनैवात्मानं माऽवज्ञ मावजानीहि । द्विजपुत्रार्थं त्वया म्रियते तांस्ते तुभ्यं दर्शयामि । एतेन द्विजपुत्रानयनेन मनुष्यास्ते विपुलां कीर्तिं स्थापयिष्यन्ति । विलम्बाभावं द्योतयितुं वर्तमानप्रयोगः ॥४६॥ भगवानीश्वरः सर्वं सर्वथा कर्तुं समर्थः कृष्णोऽर्जुनेन सह दिव्यं स्वरथमारुह्य प्रतीचीं दिशमाविशत् प्रययौ ॥४७॥ सप्तसप्तसङ्ख्याका गिरयो मर्यादापर्वता येषु तान् सप्तद्वीपान् तथा लोकालोकं च पर्वतमतीत्य सुमहत् निबिडं तमः अन्धकारं विवेश, ततोऽग्रे सूर्यादिप्रकाशाभावात् ॥४८॥

अन्वितार्थप्रकाशिका

तत इति । ततस्तस्मादेवं सर्वत्रान्वेषणादपि न लब्धो द्विजसुतो येन अत एव न निस्तीर्णं न सम्पादितं प्रतिश्रुतं येन सः अग्निं प्रवेष्टुमिच्छुः प्रतिषेधिता युक्तिभिः प्रतिषेधं कुर्वता कृष्णेन प्रत्युक्तः निवारितो जातः ॥४५॥ दर्शये इति । आत्मनैवात्मानं माऽवज्ञ मावजानीहि । आर्षः प्रयोगः । द्विजपुत्रार्थं त्वया म्रियते तांस्ते तुभ्यं दर्शयामि । अधुना ये निन्दन्ति त एव मनुष्याः ते कीर्तिं स्थापयन्ति स्थिरां कुर्वन्ति । वर्तमानसामीप्ये लट् । देवादयस्तु विदन्त्येवेति भावः । ''येनेह कीर्तिं विमलां मनुष्याः स्थापयन्ति न'' इति पाठान्तरम् । स्वामिनां मते तु ''ये ते हि कीर्तिं विमलां मनुष्याः स्थापयिष्यन्ति ।'' इति छन्दोभङ्गवान् लृट्पाठ एव सम्मतो भाति । पाठान्तरं तु छन्दोभङ्गभयादागन्तुकमिति तदुक्तेः । छन्दोभङ्गभयात्कल्पितमिति तदर्थात् ॥४६॥ इतीति ॥ भगवानीश्वरः कृष्णोऽर्जुनेन सह दिव्यं स्वरथमारुह्य प्रतीचीं दिशमाविशत् प्रययौ ॥४७॥ सप्तेति ॥ सप्त सप्तसङ्ख्याका गिरयो मर्यादापर्वता येषु तान् सप्तद्वीपान् तथा लोकालोकं च पर्वतमतीत्य सुमहत् निबिडं तमः अन्धकारं विवेश ततोऽग्रे सूर्यादिप्रकाशाभावात् । एवं च भगवल्लीलावैभवात् अर्जुनादीनां द्रष्टृश्रोतृणां चमत्कारपोषणार्थमेव ॥४८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

न निस्तीर्णं प्रतिश्रुतं प्रतिज्ञा यस्य सः विविक्षुः प्रवेष्टुमिच्छुः अर्जुनः प्रतिषेधतानिवारयताप्रत्युक्तो युक्तियुक्तवचनैर्निवारितः ॥४५॥ आत्मना स्वेन आत्मानं स्वदेहं मावज्ञाः माऽवजानीहि देहस्य अपमानं मा कुर्वित्यर्थः । माऽवज्ञा माऽऽत्मनः कृथा इति पाठे तु स्पष्टं ये त्वाम् अपमन्यन्ते त एव मनुष्याः नोऽस्माकं कीर्तिं स्थापयिष्यन्ति अचलां करिष्यन्ति ॥४६-४७॥ सप्त सप्तसङ्ख्याकाः गिरयो येषु तान् द्वीपान् ॥४८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रतिषेधपूर्वकनिवारणप्रकारमेवाह ॥ दर्शय इति ॥ हे अर्जुन ! ते तुभ्यं द्विजसूनून् ब्राह्मणतनयान् दर्शये दर्शयिष्यामि । आत्मनः स्वस्य आत्मानं मा अवज्ञ स्वावज्ञां मा कृथा इत्यर्थः । एवं चेत् ते तव विमलां कीर्तिं एते हि एते एव मनुष्याः स्थापयिष्यन्ति निश्चलां करिष्यन्ति हि। दूषयन्तीति पाठे आत्मनः अवज्ञां कृथाश्चेत् ते कीर्तिं दूषयिष्यन्तीत्यर्थः ॥४५॥ इतीति ॥ ईश्वरः परमेश्वरः भगवान् श्रीकृष्णः इत्यक्तप्रकारेण सम्भाष्य सम्भाषणेन प्रतिबोध्य अर्जुनेन सह दिव्यमायिकं स्वं स्वकीयं रथम् आस्थाय आरुह्य प्रतीचीं पश्चिमाशाम् आविशत् ॥४६॥ सप्तेति ॥ सप्त सप्त गिरयो येषु तान् अथ सप्त द्वीपान् सप्त सिन्धून् तथा ततः लोकालोकं पर्वतम् अतीत्य सुमहन्निबिडं तमोऽन्धकारं विवेश ॥४७॥ तत्रेति ॥ हे भरतर्षभ ! तत्र तमसि शैब्यसुग्रीवमेघपुष्पबलाहकाः अश्वाः भ्रष्टगतयः प्रतिहतगतयः बभूवुः ॥४८॥

कृष्णप्रिया

परन्तु कहीं भी उन्हें ब्राह्मण बालक प्राप्त नहीं हुआ। प्रतिज्ञा पूरी न हो सकी। इसलिए उन्होंने अग्निमें प्रवेश की इच्छा की। किंतु श्रीकृष्णने उन्हें ऐसा करने से रोकते हुए कहा ॥४५॥ हे अर्जुन ! तुम अपने आप अपना तिरस्कार मत करो। मैं तुम्हें विप्रर्षि के सभी पुत्रो को अभी दिखाये देता हूं। आज जो निन्दा करते है वे हि फिर हमलोगोंकी निर्मल कीर्ती की स्थापना करेंगे ॥४६॥ सर्वशक्तिमान भगवान् श्रीकृष्ण इस प्रकार समजा बुझा कर अर्जुन के साथ अपने दिव्य रथ पर सवार हुए और पशिचम दिशा को प्रस्थान किया ॥४७॥ उन्होंने प्रथम तो सात द्विपों को सात समुद्र सात पर्वतों और लोकालोक पर्वत को लांघकर अत्यन्त गाढ अन्धकारमें प्रवेश किया ॥४८॥

तत्राश्वाः शैब्यसुग्रीवमेघपुष्पबलाहकाः । तमसि भ्रष्टगतयो बभूवुर्भरतर्षभ ॥४९॥
तान् दृष्ट्वा भगवान् कृष्णो महायोगेश्वरेश्वरः । सहस्रादित्यसंकाशं स्वचक्रं प्राहिणोत् पुरः ॥५०॥
तमः सुघोरं [1]गहनं कृतं महद्विदारयद्भूरितरेण रोचिषा ।
मनोजवं निर्विविशे सुदर्शनं गुणच्युतो रामशरो यथा [2]चमूः ॥५१॥
द्वारेण चक्रानुपथेन [3]उत्तमः [4]परं परं ज्योतिरनन्तपारम् ।
समश्नुवानं प्रसमीक्ष्य फाल्गुनः [5]प्रताडिताक्षोऽपिदधेऽक्षिणी उभे ॥५२॥

कर्दमक्षमा

भरतर्षभ, तत्र, शैब्यसुग्रीवमेघपुष्पबलाहकाः, अश्वाः, तमसि, भ्रष्टगतयः, बभूवुः ॥४९॥ महायोगेश्वरेश्वरः, भगवान्, कृष्णः, तान्, दृष्ट्वा, पुरः, सहस्रादित्यसङ्काशम्, स्वचक्रम्, प्राहिणोत् ॥५०॥ भूरितरेण, रोचिषा, महत्, कृतम्, तमः, विदारयत्, यथा, गुणच्युतः, रामशरः, चमूः, मनोजवम्, सुदर्शनम्, सुघोरम्, गहनम्, निर्विविशे ॥५१॥ उत्तमः, चक्रानुपथेन, द्वारेण, परम्, परम्, अनन्तपारम्, ज्योतिः, समश्नुवानम्, प्रसमीक्ष्य, प्रताडिताक्षः, फाल्गुनः, उभे, अक्षिणी, पिदधे ॥५२॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

कृतमिति प्रकृतिपरिणामरूपं नालोकाभावमात्रम् ॥५१॥ चक्रानुपथेन चक्रमनुगतेन द्वारेण तत्तमःपरं तस्मात्तमसः परं दूरे वर्तमानं श्रेष्ठं भागवतं ज्योतिः समश्नुवानं व्याप्नुवत्प्रसमीक्ष्य प्रताडिताक्षो नेत्रे न्यमीलयदिति ॥५२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तत्र तमसि ॥★॥ ॥०॥ ॥४९॥ तानश्वान्भ्रष्टगतीन् ॥★॥ ॥०॥ ॥५०॥ गुणाज्ज्यायाश्च्युतम् । आलोकाभावमात्रं तम इत्येवं वदन्तस्तार्किकाः कृतमित्युक्त्या परास्ताः ॥★॥ गहनं निबिडं महत् विततं च यथा स्यात्तथा कृतं सम्पादितं

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तमोभूमिगतमित्यर्थः । तथोक्तं हरिवंशे पङ्कभूतं हि तिमिरं स्पर्शाद्विज्ञायतेऽनघ इत्यादि ॥५१॥ अनन्तपारमन्तपाररहितम् ॥★॥ चक्रानुपथेनैव द्वारेण सप्तावरणभेदेन तमसः प्रकृतेः परं पारभूतं तत् वेदान्तादिप्रसिद्धं परं परब्रह्मभूतं भागवतं ज्योतिः प्रसमीक्ष्य चिच्छक्तिमयतया साक्षाच्चक्षुषा दृष्ट्वा परत्वमेवाह-अनन्तेति । तत्रैव हेतुः सम्यगश्नुवानं सदा सर्वव्यापकं तत्रादर्शनं तु मायावृतदृष्टित्वादेवेति भावः । तथा च हरिवंशे श्रीमदर्जुनवाक्यम् —

"ततस्तेजःप्रज्वलितमपश्यं तत्तदम्बरे। सर्वलोकं समाविश्य स्थितं पुरुषविग्रहम् ॥" इति ॥

तच्चरितसमाप्तौ तत्प्रश्नानन्तरं श्रीकृष्णोपदेशश्च —

"ब्रह्मतेजोमयं दिव्यं महद्यद्दृष्टवानसि । अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् ॥
प्रकृतिः सा मम परा व्यक्ताव्यक्ता सनातनी । तां प्रविश्य भवन्तीह मुक्ता योगविदुत्तमाः ॥
सा साङ्ख्यानां गतिः पार्थ योगिनां च तपस्विनाम् । तत्परं परमं ब्रह्म सर्वं विभजते जगत् ॥
ममैव तद्घनन्तेजो ज्ञातुमर्हसि भारत ॥" इति ॥

अत्राह-स इति तेजस्तेजस्विनोरभेदविवक्षया प्रकृतिः सा मम परेति तत्तेजसस्तत्स्वरूपशक्तिरूपत्वात् परेति मायातीतत्वात् व्यक्ताव्यक्तेति सर्वमूलत्वात् । अत एव तामित्यादि ममैवेत्यैवकारस्तन्मध्यस्थेनाष्टभुजेन स्वाभेदापेक्षयेति ज्ञेयम् ॥५२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

आश्चर्येण सम्बोधयति-हे भरतर्षभेति ॥४९॥ तान् तथाभूतान् यतो भगवानतो योगेश्वरेश्वरः तथाभूतोऽपि पूर्ववच्चक्रनामकमस्त्रमेव प्राहिणोत् न तु स्वतेज आदिकं प्रकटयामासेत्यर्थः ॥५०॥ गहनं निबिडं महत् विततं च यथास्यात्तथा कृतं परमेश्वरेणैव सम्पादितं तमोभूमिगतमित्यर्थः । तथोक्तं हरिवंशे पङ्कभूतं हि तिमिरं स्पर्शाद्विज्ञायतेऽनघ इत्यादि ॥५१॥

ततश्चक्रानुपथेनैव द्वारेण सप्तावरणभेदेन तमसः प्रकृतेः परं पारभूतं तत् वेदान्तादिप्रसिद्धं परं परब्रह्मभूतं भागवतं ज्योतिः प्रसमीक्ष्य चिच्छक्तिमयतया साक्षाच्चक्षुषा दृष्ट्वा परत्वमेवाह-अनन्तेति । तत्रैव हेतुः सम्यगश्नुवानं सदा सर्वव्यापकं तत्रादर्शनं तु मायावृतदृष्टित्वादेवेति भावः । तथा च हरिवंशे श्रीमदर्जुनवाक्यम् —

"ततस्तेजःप्रज्वलितमपश्यं तत्तदम्बरे। सर्वलोकं समाविश्य स्थितं पुरुषविग्रहम् ॥" इति ॥

तच्चरितसमाप्तौ तत्प्रश्नानन्तरं श्रीकृष्णोपदेशश्च —

"ब्रह्मतेजोमयं दिव्यं महद्यद्दृष्टवानसि । अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् ॥
प्रकृतिः सा मम परा व्यक्ताव्यक्ता सनातनी । तां प्रविश्य भवन्तीह मुक्ता योगविदुत्तमाः ॥
सा साङ्ख्यानां गतिः पार्थ योगिनां च तपस्विनाम् । तत्परं परमं ब्रह्म सर्वं विभजते जगत् ॥
ममैव तद्घनन्तेजो ज्ञातुमर्हसि भारत ॥" इति ॥

अत्राह-स इति तेजस्तेजस्विनोरभेदविवक्षया प्रकृतिः सा मम परेति तत्तेजसस्तत्स्वरूपशक्तिरूपत्वात् परेति मायातीतत्वात् व्यक्ताव्यक्तेति सर्वमूलत्वात् । अत एव तामित्यादि ममैवेत्यैवकारस्तन्मध्यस्थेनाष्टभुजेन स्वाभेदापेक्षयेति ज्ञेयम् ॥५२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४१-६६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तत्र तमसि शैब्यादयोऽश्वाः प्रतिहतगतयो बभूवुः । हे भरतर्षभ ! ॥४९॥ तानिति । तान् भ्रष्टगतीनश्वान् दृष्ट्वा श्रीकृष्णः स्वचक्रं सुदर्शनं पुरोऽश्वानां पुरतः प्राहिणोत्प्रायुङ्क्त ॥५०॥ तम इति । गहनं दुष्प्रवेशं सुघोरं भयङ्करं महदपारं कृतं भगवतैव सृष्टं तमो

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

भूरितरेण बहुतरेण स्वतेजसा विदारयन्मनोजवं सुदर्शनं विवेश यथा रामस्य दाशरथेः शरो गुणान्मौर्व्याश्च्युतः चमूं रावणसेनां विवेश तद्वत् ॥५१॥ द्वारेणेति । चक्रानुपथेन चक्रमनुगतेन द्वारेण तस्मात्तमसः परं दूरे वर्तमानं भागवतमनन्तपारं ज्योतिः समश्नुवानं प्राप्नुवच्चक्रं प्रसमीक्ष्य फाल्गुनोऽर्जुनः प्रताडिते प्रतिहते अक्षिणी दृष्टी यस्य सः उभे अप्यक्षिणी पिदधे न्यमीलयत् ॥५२॥

श्रीमद्विजयध्वजकृता पदरत्नावली

॥४९-५०॥ गगनं छादयतीति गगनच्छदम् । गुणच्युतः मौर्व्या मुक्तः ॥५१॥ चक्रानुपथे सुदर्शनगतानुकूलमार्गे । कृतद्वारेण समश्नुवानं गच्छन्तं यदूत्तमं प्रसमीक्ष्य अक्षिणी पिदध इत्यन्वयः । अनन्तपारम् अन्तपारवर्जितम् ॥५२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१६-५४॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तमसि भ्रष्टगतय इति वैकुण्ठीयानामश्वानां गुणातीतानामपि तेषां यत्तमसि भ्रष्टगतित्वं तद्भगवतो तल्लीलत्ववत्तेषामप्यश्लीलत्वमर्जुनादीनां द्रष्टृश्रोतॄणां चमत्कारपोषणार्थमेव ज्ञेयम् ॥४९-५०॥ गहनं निबिडम् । कृतं प्रकृतिपरिणामरूपम् ॥५१॥ चक्रानुपथेन चक्रमनुगतेन द्वारेणेति चक्रेणैव सप्तावरणभेदो ज्ञेयः । यत्तदनन्तरं गच्छन् फाल्गुनः तमःपरं तमसः प्रकृतेः परं प्रकृत्यावरणादष्टमात् परमित्यर्थः । परं श्रेष्ठं चिन्मयं ज्योतिः समश्नुवानमतिव्यापकं वीक्ष्य तेन प्रताडिताक्षो नेत्रे न्यमीलयत् । तथा च हरिवंशे एतच्चरितसमाप्तौ —

"ब्रह्मतेजोमयं दिव्यं महद्यद्दृष्टवानसि । अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् ॥

प्रकृतिः सा मम परा व्यक्ताव्यक्ता सनातनी । तां प्रविश्य भवन्तीह मुक्ता योगविदुत्तमाः ॥

सा साङ्ख्यानां गतिः पार्थ योगिनां च तपस्विनाम् । तत्परं परमं ब्रह्म सर्वं विभजते जगत् ॥

ममैव तद्घनन्तेजो ज्ञातुमर्हसि भारत ॥" इति ॥

अत्र मत्तेज इति तद्ब्रह्म मत्तेजोऽपि अहं स इति सोऽहमेव । तद्ब्रह्मतेजस्तेजस्विनोरभेदात् । प्रकृतिः सा मम परेति तच्चिन्मयं ब्रह्म ममैव स्वरूपशक्तिः परेति मायातीता व्यक्ता चिन्मयनेत्रग्राह्या अन्यथा अव्यक्तेत्यर्थः ॥५२॥

गूढार्थदीपिनी

तत्र तमसि अश्वा भ्रष्टगतयः भ्रष्टमार्गा बभूवुरित्यन्वयः । शैब्यादीनामानः चत्वारः अश्वाः ॥४९॥ तान् भ्रष्टगतीन् अश्वान् । सङ्काशं सदृशम् । चक्रं प्राहिणोत् चिक्षेप ॥५०॥ सुदर्शनं चक्रं भूरितरेण रोचिषा प्रकाशेन तमो विदारयत् तत्र निर्विविशे इत्यन्वयः । चमूः रावणसेनाः । सुघोरं भयानकं गहनं दुष्प्रदेशम् । महत् विस्तृतं कृतं भगवतैव प्रकृतिपरिणामरूपम् अत्र कृतमित्युक्त्वा आलोकाभावमात्रं तमः इत्येवं वदन्तस्तार्किकाः परास्ताः । गुणः प्रत्यञ्चासंज्ञकः ॥५१॥ चक्रानुपथेन चक्रमनुगतेन द्वारेण (चक्रेणैव सप्तावरणभेदो ज्ञेयः) रन्ध्रभूतेन तमसः प्रकृतेः प्रकृत्यावरणात् (आवरणात् अष्टमात्) परं दूरे वर्तमानं परं श्रेष्ठं तत् भागवतं ज्योतिः समश्नुवानं सर्वत्र व्याप्नुवत् समीक्ष्य तेनैव प्रताडिताक्षः फाल्गुनोऽर्जुनः अक्षिणी पिदधे न्यमीलयदित्यन्वयः । कीदृशं ज्योतिः । अनन्तपारम् अन्तपाररहितम् ॥५२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पुर अश्वानामग्रतः प्राहिणोत्प्रायुङ्क ॥५०॥ सुघोरम् अतिभयङ्करम् । गहनं दुर्गमम् । महन्निबिडम् कृतं भगवतैव सृष्टनम् । न त्वालोकाभावमात्रम् । रामस्य दाशरथेः शरः यथा चमू राक्षससेनाः विवेश तद्वत् ॥५१॥ चक्रानुपथेन चक्रमनुगतेन द्वारेण छिद्रेण । तमसः परं तस्मात्तमसः परे दूरे वर्तमानं परं श्रेष्ठं समश्नुवानं व्याप्नुवत् अनन्तपारं ज्योतिः। फाल्गुनः प्रसमीक्ष्य प्रताडिताक्षो नेत्रे न्यमीलयत् ॥५२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तत्र तमसो माहात्म्यमाह–तत्राश्वा इति । भगवतश्चत्वारोऽपि प्रसिद्धा अश्वास्तमसि भ्रष्टगतयो बभूवुः । विश्वासार्थं सम्बोधनम् । तदा भगवान् अश्वानां तदगमनं दृष्ट्वा महायोगीश्वराणां ब्रह्मादीनामपि ईश्वरः समर्थः सर्वथा गन्तव्यमेवेति निश्चित्य सहस्रादित्यसङ्काशं स्वचक्रं सुदर्शनमग्रे प्राहिणोत् ॥४९-५०॥ ततस्तस्मिन्नन्धकारे सुदर्शनस्य गतिमाह–सुघोरं तमः विदारयन् निर्विविश इति सम्बन्धः । तमसः स्पर्शोऽपि निराकरणार्थं कठिन इति वक्तुं सुघोरत्वमुक्तम् । अतिभयानकमित्यर्थः। गहनमतिगम्भीरं महत्कृतम् आलोकापेक्षयापि अधिकपरिमाणतो बलाच्च आगमनप्रतिषेधार्थं वा महत्कृतं नन्वेतादृशमन्धकारं कथं दूरीकृत्य निर्विशेत्तत्राह–भूरितरेण रोचिषेति । ततोऽप्यधिकेन तेजसा । ननु भूयान् देशो वर्तते इति गमनेऽपि यावज्जन्म स्यात् ततो व्यर्थः प्रयास इति चेत्तत्राह–मनोजवमिति । ननु गन्तव्यदेशः कस्मिन् भागे इति सुदर्शनस्य ज्ञानाभावात् तस्य कथमग्रं तद्देशगमनमित्याशङ्क्य दृष्टान्तमाह–गुणच्युत इति । यथा दाशरथेः बाणः यं देशमुद्दिश्य त्यज्यते तमेव देशं प्राप्नोति अचेतनोऽपि चेतनवत् प्रेरणागतिसामर्थ्यात् रेखामात्रमपि नान्यत्र गच्छति तथा तदैव भगवान् सुदर्शनं प्रक्षिप्तवान् तदा तद्देशसम्मुखमेव चिक्षेपेति । यथा शरः गुणाद्विमोकमेवापेक्षते तथा चक्रमपि हस्ताद्विमोकमेवापेक्षते । इष्टदेशगमनार्थं नान्यदित्यर्थः ॥५१॥ ततः चक्रेणैव मार्गः कृतः इति तेनैव मार्गेण रथो गत इत्याह–द्वारेणेति । चक्रानुपथेन द्वारेण चक्रनिर्मितमार्गेणैव तादृशमपि तमः कर्मपरमुत्कृष्टं ज्योतिर्यस्य तादृशं सुदर्शनं परं ब्रह्म तेजोरूपमनन्तपारमित्युभयविशेषणं तमस्तेजश्च उभयं सम्यगश्नुवानम् अग्रपश्चाद्भावेन तमसा तेजसा च व्याप्तं रथं दृष्ट्वा फाल्गुनः विद्युन्निवारकोऽपि प्रकर्षेण ताडिताक्षो विद्युता प्रतिहताक्ष इव भीतो जात इत्यर्थः । अगाधे मार्गे गच्छन् अग्रे पश्चाच्च रथदर्शनार्थं च चलदृष्टिः उभयोस्तुल्यत्वं दृष्ट्वा महान्धकारे विद्युर्शीव मायात् अक्षिणी अपिदधे मुद्रितवान् । अनेन अर्जुनस्य ज्ञानगमने शङ्कापि परिहृता ॥५२॥

श्रीसुबोधिनीसारः

तत्र तमसि शैब्यादयोऽश्वा भ्रष्टगतयो बभूवुर्हे भरतर्षभ ! ॥४९॥ तान् गन्तुमशक्तान् अश्वान् दृष्ट्वा महायोगेश्वरेश्वरो भगवान् कृष्णः सहस्रार्कतुल्यतेजः स्वचक्रं सुदर्शनं पुरोऽग्रे प्राहिणोत् ॥५०॥ सुघोरं भयङ्करं गहनं गम्भीरं कृतमित्यव्ययं वा महत् भूरितरेण बहुलेन रोचिषा दीप्त्या विदारयत् विनाशयत् निरवयवस्य तमसो विदारणानुपपत्तेः मनोजवमतिगतिशालि सुदर्शनं निर्विवेश। गुणाच्च्युतो रामस्य शरो बाणः चमूः सेना इव ॥५१॥ चक्रमनुगतेन द्वारेण तस्य तमसः परं दूरे वर्तमानं परं ज्योतिः अनन्तपारं समश्नुवानं व्याप्नुवत् प्रसमीक्ष्य दृष्ट्वा प्रताडिते अक्षिणी येन सोऽप्यर्जुनः उभे अक्षिणी नेत्रे अपिदधे निमीलयामास ॥५२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे भरतर्षभ ! तत्र तमसि शैब्दायोऽश्वा भ्रष्टगतयो बभूवुः ॥४९॥ महायोगेश्वराणामपीश्वरः सर्वोपायसमर्थो भगवान् कृष्णः तान् प्रतिहतगतीनश्वान् दृष्ट्वा सहस्रसूर्यसदृशप्रकाशं स्वायुधं सुदर्शनचक्रं तेषां पुरः अग्रे प्राहिणोत् प्रायुङ्क ॥५०॥ गहनं दुःप्रवेशं सुघोरं भयङ्करं कृतं प्रकृतिकार्यं महत् अपारं तमः भूरितरेण रोचिषा विदारयत् मनोजवं सुदर्शनं निर्विवेश । तत्र दृष्टान्तमाह-यथा गुणात् मौर्व्याश्च्युतो रामस्य शरो रावणचमूः सेना विवेश तथेति ॥५१॥ चक्रानुपथेन चक्रानुगतद्वारेण तस्मात्तमसः परं दूरे

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वर्तमानम् अनन्तपारं समश्नुवानं व्याप्नुवत् परं ज्योति:क परमप्रकाशरूपं सुदर्शनं प्रसमीक्ष्य प्रताडिते प्रतिहते अक्षिणी यस्य स: फाल्गुन: उभे अक्षिणी पिदधे न्यमीलयत् ॥५२॥

अन्वितार्थप्रकाशिका

तत्रेति ॥ हे भरतर्षभ ! तत्र तमसि शैब्दायोऽश्वा भ्रष्टगतयो बभूवु: ॥४९॥ तानिति ॥ महायोगेश्वराणामपीश्वर: सर्वोपायसमर्थो भगवान् कृष्ण: तान् प्रतिहतगतीनश्वान् दृष्ट्वा सहस्रसूर्यसदृशप्रकाशं स्वायुधं सुदर्शनचक्रं तेषां पुर: अग्रे प्राहिणोत् प्रायुङ्क ॥५०॥ तम इति ॥ गहनं दु:प्रवेशं सुघोरं भयङ्करं कृतं प्रकृतिकार्यं महत् अपारं तम: भूरितरेण रोचिषा विदारयत् मनोजवं सुदर्शनं निर्विविशे । तडार्ष: । यथा गुणात् मौर्व्याश्च्युतो रामस्य शरो रावणचमू: सेना विवेश तथेति ॥५१॥ द्वारेणेति ॥ चक्रानुपथेन चक्रानुगतेन द्वारेण चक्रेणैव सप्तावरणभेदनात्तद्रन्ध्रभूतद्वारेण तत्तम: परं तस्मात्तमस: प्रकृत्यावरणात् अष्टमात् परं दूरे वर्तमानम् अनन्तपारं समश्नुवानं व्याप्नुवत् परं श्रेष्ठं भागवतं ज्योति: परमप्रकाशरूपं प्रसमीक्ष्य प्रताडिते प्रतिहते नेत्रे यस्य स: फाल्गुन: उभे अक्षिणी पिदधे न्यमीलयत् । आदौ सप्तावरणानि भित्त्वा अष्टमं महान्धकारं प्रकृत्यावरणमपि चक्रेण भिन्नं तत: परं भागवतं ज्योतिर्महाप्रकाशं दृष्ट्वा प्रतिहते नेत्रे अर्जुनो न्यमीलयदिति भाव: ॥५२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

तान् तथाभूतान् अश्वान् ॥ सहस्रसूर्याणां सङ्काशं सदृशम् ॥५०॥ गहनं निबिडं महत् विततं च यथास्यात्तथा कृतम् ईश्वरेण निर्मितं प्राकृतं तम: ॥५१॥ तत: चक्रानुपथेन चक्रानुगतमार्गेणैव द्वारेण तत्तम: परं तस्मात्तमस: परं दूरे स्थितं परम् उत्तमं समश्नुवानं व्याप्नुवत् ज्योति: भौमं तेज: समीक्ष्य प्रताडिताक्ष: प्रतिहतनेत्र: उभे लोचने पिदधे पिहितवान् ॥५२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तानिति ॥ तान् भ्रष्टगतीनश्वान् दृष्ट्वा महायोगेश्वरेश्वर: भगवान् कृष्ण: सहस्रादित्यसङ्काशं स्वचक्रं सुदर्शनं पुरोऽश्वानां पुरत: प्राहिणोत् ॥४९॥ तम इति ॥ तत: सुघोरं सुतरां भयङ्करं महदपारं कृतं भगवतैव सृष्टं गहनं निबिडं तम: प्रकृतिपरिणामात्मकध्वान्तं भूरितरेण रोचिषा विदारयत् सुदर्शनं गुणच्युतो मौर्व्याश्च्युत: रामशरो दाशरथेर्बाण: चमूं यथा रावणसेनामिव मनोजवं मन:समानवेगवत् सत् निर्विविशे ॥५०॥ द्वारेणेति ॥ तत: चक्रानुपथेन चक्रमनुगेत द्वारेण तत्तम:परं तस्मात्तमसो दूरे वर्तमानं परं श्रेष्ठम् अनन्तपारं ज्योति: भागवतं तेज: समश्नुवानं व्याप्नुवच्चक्रं प्रसमीक्ष्य, फाल्गुनोऽर्जुन: प्रताडिते प्रतिहते अक्षिणी यस्य तथाभूत: सन् उभे अपि अक्षिणी पिदधे न्यमीलयत् ॥५१॥ तत इति ॥ ततस्तमस: परत: बलीयसा अतिबलवता प्रचण्डेनेति यावत् । नभस्वता वायुना एजन्त: उच्चलन्त: बृहन्तो वृद्धिमन्तो ये ऊर्मय: कल्लोलास्तैर्भीषणं सलिलं जलं प्रविष्ट: सन् तत्र जलस्याधस्तात् द्युमत्तमं अतितेजोमयमित्यर्थ: । भ्राजन्तो ये मणिस्तम्भा: मणिमया: स्तम्भास्तेषां सहस्रेणोपशोभितम् अद्भुतं भवनं प्रविष्ट: वै ॥५२॥

कृष्णप्रिया

हे परीक्षित् ! अन्धकार इतना गाढ था कि उसमें शैब्य, सुग्रीव, मेघपुष्प और बलाहक नामके चारों घोडे अपना मार्ग इधर उधर भटकने लगे । उन्हें कुछ मालुम ही नहीं पडता था ॥४९॥ योगेश्वरों के भी परमेश्वर भगवान श्रीकृष्ण ने अश्वो की यह दशा देखकर हजारों सूर्यों के समान प्रकाशमान अपने सुदर्शनचक्र को आगे चलने की आज्ञा दी ॥५०॥ सुदर्शन पक्र अपने तेजसे स्वयं भगवानके द्वारा उत्पन्न उस अत्यन्त गाढ अन्धकारको चीरता हुआ मन के समान तीव्र गति से आगे गलने लगा । उस वक्त ऐसा जान पडता था, माने भगवान रामचन्द्रजी का बाण धनुष से छुटकर राक्षसो की सेनामें प्रवेश कर रहा हो ॥५१॥ इस प्रकार सुदर्शनचक्र के द्वारा बतलाये हुए मार्गसे चलकर रथ अन्धकार की अन्तिम सीमा पर पहुंचा । उस अन्धकार के पार परम ज्याजल्यमान ज्योति जगमगा देखनेमें आई । उससे अर्जुन की आंखे चौंधिया गयी तेज सहन न होने के कारण आंखे बन्ध कर दी ॥५२॥

ततः प्रविष्टः सलिलं नभस्वता बलीयसैजद्बृहदूर्मिभीषणम् [1]।
तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणिस्तम्भसहस्रशोभितम् ॥५३॥
तस्मिन् महाभीममनन्तमद्भुतं सहस्रमूर्धन्यफणामणिद्युभिः[2] ।
विभ्राजमानं [3]द्विगुणेक्षणोल्बणं [4]सिताचलाभं शितिकण्ठजिह्वम् [5]॥५४॥
ददर्श तद्भोगसुखासनं विभुं महानुभावं पुरुषोत्तमाख्यम् ।
सान्द्राम्बुदाभं सुपिशंगवाससं प्रसन्नवक्त्रं [6]रुचिरायतेक्षणम् ॥५५॥
महामणिव्रातकिरीटकुण्डल[7]प्रभापरिक्षिप्तसहस्रकुन्तलम् ।
प्रलम्बचार्वष्टभुजं [8]सकौस्तुभं श्रीवत्सलक्ष्मं[9] वनमालया वृतम् ॥५६॥

कर्दमक्षमा

ततः, बलीयसा, नभस्वता, बृहदूर्मिभीषणम्, सलिलम्, प्रविष्टः, तत्र, वै, भ्राजन्मणिस्तम्भसहस्रशोभितम्, द्युमत्तमम्, भ्राजत्, अद्भुतम्, भवनम् ॥५३॥ तस्मिन्, सहस्रमूर्धन्यफणामणिद्युभिः, महाभीमम्, अनन्तम्, अद्भुतम्, विभ्राजमानम्, द्विगुणेक्षणोल्बणम्, सिताचलाभम्, शितिकण्ठजिह्वम् ॥५४॥ तद्भोगसुखासनम्, विभुम्, महानुभावम्, पुरुषोत्तमाख्यम्, सान्द्राम्बुदाभम्, सुपिशङ्गवाससम्, प्रन्नवक्त्रम्, रुचिरायतेक्षणम्, महामणिव्रातकिरीटकुण्डलप्रभापरिक्षिप्तसहस्रकुन्तलम्, प्रलम्बचार्वष्टभुजं, सकौस्तुभं, श्रीवत्सलक्ष्मम्, वनमालया, वृतम्, ददर्श ॥५५-५६॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

एजन्त उच्चलन्तो बृहन्तो महान्त ऊर्मयो भूषणं यस्य तत् तत्र सलिले भवनं महाकालपुरम् द्युमत्तमं द्युतिमत्सु श्रेष्ठम् ॥५३॥ सहस्रं मूर्ध्नि भवाः फणास्तु मणयस्तेषां द्युतिभिः द्विसहस्रनेत्रैरूर्जितं स्फटिकगिरिसङ्काशम् शितिकण्ठजिह्वम् कण्ठाश्च कण्ठजिह्वाः शितयो नीलाः कण्ठजिह्वाः यस्य तम् ॥५४॥ तद्भोगसुखासनं तस्यानन्तस्य भोगो देहः सुखकरमासनं यस्य तम् ॥५५॥ महान्तो मणिव्राता येषु तेषां किरीटकुण्डलानां प्रभातया परिक्षिप्ताः सर्वतः स्फुरन्तः सहस्रमपरिमिताः कुन्तला यस्य तम् ॥५६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ततो ज्योतिषो दर्शनोत्तरम् । रथेन सलिलं प्रविष्टं जले रथः प्रविष्ट इत्यर्थः ॥★॥ ततस्तत्रैव वर्तमानं सलिलं विरजानदीरूपं प्रधानपरमव्योम्नोरन्तरे विरजानदीति पाद्मोत्तरखण्डात् । प्रविष्टः फाल्गुन इति पूर्वतोऽनुषज्जनीयः । नभस्वता हेतुना अद्भुतं सर्वलोकातीतम् । वै प्रसिद्धौ । द्युमत्तममिति पूर्वोक्ततेजसोऽप्याधिक्यमभिप्रेतम् । तत्रैव हेतुः-भ्राजतां सदा स्वयमेव प्रकाशमानानां मणिमयस्तम्भानां सहस्रेण शोभितम् । एवं भवनस्यातिवविस्तारश्चोक्तः । तैरुद्दिष्टं महाकार(रूप)पुरं चेदं मृत्युञ्जयतन्त्राल्लभ्यते यतः———

“ब्रह्माण्डस्योर्ध्वतो देवि ब्रह्मणः सदनं महत् । तदूर्ध्वं देवि विष्णूनां तदूर्ध्वं रुद्ररूपिणाम् ॥
तदूर्ध्वं च महाविष्णोर्महादेव्यास्तदूर्ध्वगम् । कालातिकालयोश्चाथ परमानन्दयोस्ततः ॥
पारे पुरी महादेव्याः कालः सर्वभयावहः । ततः श्रीब्रह्मपीयूषवारिधिर्नित्यनूतनः ॥
तस्य तीरे महाकालः सर्वग्राहकरूपधृक् । तस्यान्तरे समुद्भासी रत्नद्वीपः शिवाह्वयः ॥

---

१. गगनच्छदं मह-विज. । २. चमूं-वीर. । ३. तत्तमः-श्रीधर. वंशी. वीर. विज. ; द्विसहस्रनेत्रैः-च. पु. टी. । ४. सत्ताम्बराभं शितिकण्ठजिह्मगं-विज. । ५. कण्ठभूषणं-गो. प्रे. टी. । ६. रुचिरस्मितेक्षणं-विज. । ७. प्रभापरिष्वक्त-विज. । ८. सुकौस्तुभं-वीर. । ९. लक्ष्म्या-इति कस्यचित् ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ध्यायेत्तत्र परानन्दं रामोपास्यं परं महत् । स्मरेद्वृन्दावने रम्ये मोहयन्तमनारतम् ॥

वल्लवीवल्लभं कृष्णं गोपकन्यासहस्रशः ॥'' इत्येवमन्तं बहुविस्तृतमस्ति । तत्र ब्रह्मणः सदनं सत्यलोकः । विष्णूनां विकुण्ठासुतानां वैकुण्ठः । रुद्ररूपिणामिति अहङ्कारावरणस्थो रुद्रलोकः । महाविष्णोरिति महत्तत्त्वावरणस्थो महाविष्णुलोकः । महादेव्या इति प्रकृत्यावरणस्थो महादेवीलोकः । ब्रह्मपीयूषवारिधिः कारणार्णवः । महाकालः परमव्योमस्थो महावैकुण्ठनाथः । तस्यैव कारणार्णवजलान्तर्गतं भवनं महाकालपुरं फाल्गुनो ददर्शेति पूर्वस्योत्तरस्य चानुषङ्गः ॥५३॥ तस्मिन् भवनेऽनन्तं ददर्श । तथा तद्भोगसुखासनं विभुं च ददर्श । नोत्तरेणान्वयः । महाभीममतिभयङ्करम् ॥★॥ तस्मिन्निति चतुष्कम् । महान् फलादिभिरपिच्छिन्नो भोगो देहो यस्य तम् । 'शिती धवलमेचकौ' इत्यमरः ॥५४॥ ॥०॥ ॥★॥ पुरुषेषु त्रिषु उत्तमो विष्णुस्तेभ्य उत्तमो गर्भोदशायी आदिपुरुषो वा तस्मादप्युत्तमम् ॥५५॥ ॥०॥ ॥★॥ ॥०॥ ॥५६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततस्तत्रैव वर्तमानं सलिलं विरजानदीरूपं प्रधानपरमव्योम्नोरन्तरे विरजानदीति पाद्मोत्तरखण्डात् । प्रविष्टः फाल्गुन इति पूर्वतोऽनुषज्जनीयः । नभस्वता हेतुना अद्भुतं सर्वलोकातीतम् । वै प्रसिद्धौ । द्युमत्तममिति पूर्वोक्ततेजसोऽप्याधिक्यमभिप्रेतम् । तत्रैव हेतुः-भ्राजतां सदा स्वयमेव प्रकाशमानानां मणिमयस्तम्भानां सहस्रेण शोभितम् । एवं भवनस्यातिवविस्तारश्चोक्तः । तैरुद्दिष्टं महाकार(रूप)पुरं चेदं मृत्युञ्जयतन्त्राल्लभ्यते यतः-

''ब्रह्माण्डस्योर्ध्वतो देवि ब्रह्मणः सदनं महत् । तदूर्ध्वं देवि विष्णूनां तदूर्ध्वं रुद्ररूपिणाम् ॥
तदूर्ध्वं च महाविष्णोर्महादेव्यास्तदूर्ध्वगम् । कालातिकालयोश्चाथ परमानन्दयोस्ततः ॥
पारे पुरी महादेव्याः कालः सर्वभयावहः । ततः श्रीब्रह्मपीयूषवारिधिर्नित्यनूतनः ॥
तस्य तीरे महाकालः सर्वग्राहकरूपधृक् । तस्यान्तरे समुद्भासी रत्नद्वीपः शिवाह्वयः ॥
ध्यायेत्तत्र परानन्दं रामोपास्यं परं महत् । स्मरेद्वृन्दावने रम्ये मोहयन्तमनारतम् ॥
वल्लवीवल्लभं कृष्णं गोपकन्यासहस्रशः ॥'' इत्येवमन्तं बहुविस्तृतमस्ति ॥५३॥

तस्मिन्निति चतुष्कम् । महान् फलादिभिरपिच्छिन्नो भोगो देहो यस्य तम् । अतोऽद्भुतम् । लोकातीतम् इति कारणार्णवशायिनः शेषादपि विशेष उक्तः । सहस्रशब्दोऽत्रासङ्ख्यपरः । मूर्धन्याः मूर्धनि भवाः विशेषेण तद्भवनादप्याधिक्येन भ्राजमानम् ॥५४॥ ददर्श फाल्गुन इत्येव प्रकरणलब्धं तस्यैव चमत्कृतेर्वर्णनीयत्वात् तस्य भोग एव सुखकरमासनं यस्य तं च ददर्श विभुं स्वतेजसा ततसर्वव्यापकं यतो महान् अपरिच्छिन्नोऽनुभावः प्रभावो यस्य तं कुतः पुरुषेषु त्रिषूत्तमः श्रीविष्णुस्तेभ्य उत्तमो गर्भोदशाय्यादिपुरुषो वा तस्मादप्युत्तमम् । सान्द्रेति सार्धं तैर्व्याख्यातम् ॥५५-५६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४१-६६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तत इति । ततस्तमसः परतो जलं प्रविष्टः । कथम्भूतः बलीयसा प्रचण्डेन नभस्वता वायुना एवजन्तः उच्चलन्तः बृहन्तः ऊर्मयस्तरङ्गाः तैर्भीषणं भूषणमिति पाठान्तरम् । तदा ऊर्मय एव भूषणं यस्य तथाभूतं तत्र जलस्याधस्तादद्भुतं भवनं प्रविष्ट त्यनुषङ्गः । कथम्भूतं द्युमत्तमं द्युतिमच्छ्रेष्ठं भ्राजतां मणिमयस्तम्भानां सहस्रेणोपशोभितम् ॥५३॥ तस्मिन्निति । तस्मिन् भवने तं सिद्धमनन्ताख्यं महान्तमहिं ददर्शेत्युत्तरेण सम्बन्धः । कथम्भूतमद्भुतं विस्मयनीयं सहस्रं मूर्धानः फणाः तेषु भवास्तेषां महतां णीनां द्युभिर्दीप्तिभिर्विशेषेण भ्राजमानम् । द्विगुणैः द्विसहस्रसङ्ख्यैरीक्षणैरुल्बणमुग्रम् । सिताचलः स्फटिकपर्वतः तस्याऽऽभा वाऽऽभा यस्य तं शितिः नीलः कण्ठो जिह्वाश्च यस्य तम् इति ॥५४॥ ददृशेति । तस्यानन्तरस्य ोभगः शरीरमेव सुखासनं यस्य तं

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

विभुं भगवन्तं ददर्श । कथम्भूतम् । महाननुभावः प्रभावो यस्य तम् । पुरुषोत्तमानां ब्रह्मादीनामप्युत्तमं सान्द्रस्याम्बुदस्येवाभा यस्य शोभने पिशङ्गे वाससी यस्य प्रसन्नं वक्त्रं च यस्य रुचिरे सुन्दरे आयते चेक्षणे यस्य तम् ॥५५॥ महान्तो मणिव्राता येषु तेषां किरीटकुण्डलानां प्रभया परिक्षिप्ताः सर्वतः स्फुरन्तः अनन्ताः कुन्तलाः यस्य तं प्रलम्बाश्च दीर्घाश्चारवो वर्तुलाश्चाष्टौ भुजा यस्य शोभनः कौस्तुभो यस्य श्रीवत्सं लक्ष्म चिह्नं यस्य तं वनमालया अलंकृतं च ॥५६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

ततः सलिलं प्रविश्य गतो भवनं ददर्शेत्यन्वयः । बलीयसा नभस्वता वायुना एजद्भिः कम्पमानैर्बृहद्भिरूर्मिभिः तरङ्गैर्भीषणम् । तत्र सलिले ॥५३॥ तस्मिन् भवने अनन्तं ददर्श । सिताम्बराभं श्वेताकाशवत् शोभमानम् । शितिः नीलः कण्ठो यस्य सः शितिकण्ठः जिह्मगः नम्रगात्रस्तम् ॥५४॥ तस्यानन्तस्य भोगे सुखमासनं यस्य स तथा । तद्भोगसुखासनः तम् ॥५५-५६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

॥१६-५४॥ ददर्श तद्भोगसुखासनमित्यादिप्रकरणम् ॥५५॥ एतद्वाक्यव्याख्यानान्तरप्रघट्टके ॥५६-६६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥१-५७॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-५६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

सलिलमिति कारणार्णवोदकम् । एजन्त उच्चलन्तो बृहदूर्मय एव भूषणं यस्य तत् अद्भुतं भवनमिति महाकालपुरमिति श्रीस्वामिचरणास्तच्च मृत्युञ्जयतन्त्रात् ज्ञेयम् ।

"ब्रह्माण्डस्योर्ध्वतो देवि ब्रह्मणः सदनं महत् । तदूर्ध्वं देवि विष्णूनां तदूर्ध्वं रुद्ररूपिणाम् ॥
तदूर्ध्वं च महाविष्णोर्महादेव्यास्तदूर्ध्वगम् । कालातिकालयोश्चाथ परमानन्दयोस्ततः ॥
पारे पुरी महादेव्याः कालः सर्वभयावहः । ततः श्रीब्रह्मपीयूषवारिधिर्नित्यनूतनः ॥
तस्य तीरे महाकालः सर्वग्राहकरूपधृक् ।"

इति अत्र ब्रह्मणः सदनं सत्यलोकः विष्णूनां विकुण्ठासुतानां वैकुण्ठः । रुद्ररूपिणामित्यहङ्कारावर्णस्थो रुद्रलोकः । महाविष्णोरिति । महत्तत्त्वस्थो महाविष्णुलोकः । महादेव्या इति प्रकृत्यावरणस्थो महादेवीलोकः ब्रह्मपीयूषवारिधिः कारणार्णवः । महाकालः परव्योमस्थो महावैकुण्ठनाथस्तयस्यैव कारणार्णवजलान्तर्गतं भवनं महाकालपुरम् । फाल्गुनो ददर्शेति पूर्वस्योत्तरस्य चानुषङ्गः । तद्वर्णयति द्युमत्तमं द्युतिमत्सु श्रेष्ठम् ॥५३॥ तस्मिन् भवने प्रथमं महाभोगमनन्तं ददर्श । सिताचलः कैलासस्तद्वदाभम् । शितयो नीलाः कण्ठा जिह्वाश्च यस्य तं शितीधवलमेचकावित्यमरः ॥५४॥ तस्यानन्तस्य भोगो देह एव सुखकरमासनं यस्य तम् । त्रिषु पुरुषेषूत्तमो महत्स्रष्टा तस्मादपीति पुरुषोत्तमोत्तमम् ॥५५-५६॥

गूढार्थदीपिनी

ततो ज्योतिर्दर्शनोत्तरम् । सोऽर्जुनो भगवान् सलिलं प्रविष्टः तत्र सलिले अद्भुतमलौकिकं भवनं प्रविष्टः तस्मिन् भवने अनन्तं शेषं तथा तद्भोगसुखासनं विभुं नारायणं च ददर्शेति तृतीयेनान्वयः । कथम्भूतं सलिलम् । बलीयसा प्रचण्डेन वायुना एजद्भिः कम्पमानैः उच्चलद्भिः बृहद्भिः विशालैः तरङ्गैः भीषणम् (भीषणमिति पाठः प्रशस्तः) । कथम्भूतं भवनम् । द्युतिमत्सु दीप्तिमत्सु मध्ये श्रेष्ठतमम् । पुनश्च । भ्राजता मणिस्तम्भसहस्रेण उपशोभितम् । कथम्भूतमनन्तम् । सहस्रं मूर्ध्नि भवा ये फलामणयस्तेषां द्युतिभिः विभ्राजमानम् । पुनश्च । द्विगुणानि द्विसहस्रसङ्ख्याकानि उल्बणानि भयङ्कराणि नेत्राणि यस्य । सिताचलः

गूढार्थदीपिनी

स्फटिकपर्वतः तस्या आभा इव आभा यस्य तम्। पुनश्च। शितयो नीलाः कण्ठा जिह्वाश्च यस्य तम्। कथम्भूतं विभुम्। सान्द्रस्य सघनस्य अम्बुदस्य आभा इव आभा यस्य। तस्य अनन्तस्य भोगो देह (अहेः शरीरं भोगः स्यात्, इत्यमरः।) एव सुखकरम् आसनं यस्य। रुचिरे आयते विशाले ईक्षणे यस्य। पुनः कीदृशं विभुम्। पुरुषेषु त्रिषु उत्तमो विष्णुः तस्मादपि उत्तमआदिपुरुषो नारायणस्तम् ॥५३-५४-५५॥ पुनश्च। महामणिसमूहा येषु ते किरीटकुण्डलास्तेषां प्रभाभिः परिक्षिप्ता अलंकृताः सहस्रपरिमिता कुन्तलाः केशा यस्य। पुनश्च। प्रलम्बाः चारवो मनोहरा अष्टौ भुजा यस्य। श्रीवत्सु भृगुलत्ता ॥५६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

ततस्तमसः परतो सलिलं प्रविष्टः अच्युतः तत्र भवनं तस्मिन्ननन्तं तद्भोगसुखासनं विभुं च ददर्श। तं चात्मानं स्वमूर्तिभूतं ववन्दे। जिष्णुश्च ववन्दे। तौ भूमापि आहेति षण्णामन्वयः। सलिलं विशिनष्टि। एजन्तः उच्चलन्तः बृहन्तो महान्तः ऊर्मयो भूषणं यस्य तत्। तत्र सलिले द्युमत्तमं द्युतिमत्सु श्रेष्ठं भवनम् ॥५३॥ अद्भुतं विस्मापनीयम्। सहस्रमूर्ध्निभवाः फणाः तासु ये मणयस्तेषु द्युभिर्दीप्तिभिर्विभ्राजमानम्। द्विगुणेक्षणैर्द्विसहस्रनेत्रैरुल्बणमुग्रम्। सिताचलस्य स्फटिकगिरेराभेवाभा यस्य तम्। शितयो नीलाः कण्ठजिह्वाः यस्य तम् ॥५४॥ तद्भोगसुखासनम्। तद्भोगः अनन्तदेहः। सुखासनं यस्य तम्। पुरुषोत्तमेभ्यः ब्रह्मादिभ्योऽप्युत्तमं तेषां पूज्यमित्यर्थः ॥५५॥ महान्तः अमौल्यः मणिव्राताः येषु तेषां किरीटकुण्डलानां प्रभया दीप्त्या परिक्षिप्ताः सर्वतः स्फुरन्तः सहस्रपरिमिताः कुन्तला यस्य तम्। प्रलम्बाः चारवः अष्टौ भुजा यस्य तम् ॥५६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो भगवदिच्छया ब्रह्माण्डमतिक्रम्य आवरणे जले रथः प्रविष्ट इत्याह-ततः प्रविष्टाविति। तदा जलमध्ये रथे प्रविष्टे रथस्थावपि जले प्रविष्टौ। तत्सलिलं वर्णयति-बलीयसा नभस्वता एजदिति। महावायुना कम्पमानम् अत एव बृहदूर्मिभिः स्थूलतरङ्गैर्विशेषेण भीषणं भयानकम्। अनेन अर्जुनस्य मनसाप्यगम्यो देश इति सूचितम्। एतादृशजलमध्ये एवं गृहमस्ति। तत्प्रविष्टाविति वक्तुं तद्गृहं वर्णयति-यत्राद्भुतं वै भवनमिति। द्युमत्तममतितेजोयुक्तं स्वतेजसैव प्रकाशमानं सूर्यादीनां प्रकाशकानामभावात् भ्राजन्तो ये मणिस्तम्भास्तेषां सहस्रेण शोभितम्। अनेनैव सर्वोत्कर्षो भवनस्य वर्णितः ॥५३॥ तन्मध्ये एकः शेषं दृष्टवानित्याह-तस्मिन् महाभीममिति। सलिलं प्रविष्टौ गृहमपि प्रविष्टौ ततो भगवान् कृष्णः तस्मिन् महाभीममनन्तं ददर्श। तद्भोगसुखासनं भगवन्तमपि ददर्शेति सम्बन्धः। सर्वमर्जुनस्य भयोत्पादनार्थम् आश्चर्योत्पादनार्थं च वर्णनम्। महाभीममिति भयानकसर्पविशेषम्। अद्भुतं कदाप्यदृष्टपूर्वम्। एवं स्वरूपभूतं गुणत्रयमुक्त्वा विशेषतो वर्णयति-सहस्रसङ्ख्यायुक्तेषु मूर्धसु यानि रत्नानि तानि मूर्धन्यानि फणानां सम्बन्धिनो मणयः फणामणयः। फणाशब्दः अकारान्तः। मूर्धन्यानां फणामणीनां द्युभिः कान्तिभिः कृत्वा विशेषेण भ्राजमानम्। अन्यथा तस्यादर्शने तथा भयं न भवेदिति दर्शनोपाय उक्तः। यदर्थमेतदुक्तं तदाह-द्विगुणानीक्षणानि सहस्रद्वयमितानि चक्षूंषि तेनोल्बणमतिक्रूरं तादृशस्यापि महत्त्वमाह-सिताचलाभमिति। सिताचलः श्वेतपर्वतः कैलासो वा हिमालयो वा। तत्सदृशमिति नीलवर्णः कण्ठो जिह्वा च यस्य नीलकण्ठो नीलजिह्वश्चेत्यर्थः। महादेवस्य तदाधिदैविकं रूपम्। तेन जिह्वायां मृत्युः कण्ठे कालकूट इति उभयोर्नीलं रूपं वर्णितम्। एतादृशे अतिभयानके सर्पशरीरे सुखासीनं भगवन्तं ददर्श। ननु सर्पे स्थितः कथं सुखेन तिष्ठतीति आह-विभुमिति। लोकानामेव स भयानकः न तु तस्यापि नियामकस्येत्यर्थः। किञ्च महानुभावं महाननुभावो यस्येति तादृशोऽपि क्रूरः भगवत्स्थित्या भगवदनुभावेन अति ऋजुरित्यर्थः। तत्र स्थितं भगवन्तं वर्णयति-पुरुषोत्तमोत्तममिति आदिभिः। पुरुषोत्तमा ये सर्वे पुरुषेष्वतिसुन्दराः सर्वलक्षणसम्पन्नाः तेभ्योऽप्यत्युत्तमः सौन्दर्यमुक्त्वा रूपमाह-सान्द्राम्बुदाभमिति। अतिनिबिडो योऽयमम्बुदस्तद्वत् आभा कान्तिर्यस्येति नीलमेघश्यामम्। इदं भगवतः सहजं रूपमिति सत्त्वगुणेन वा पर्यवसानेन वा इन्द्रियाणां दर्शनसामर्थ्याभावेन वा शृङ्गारेण वा कामेन वा आनन्दस्वभावेन वा भगवद्रुच्या वा लक्ष्मीरुच्या वा तादृशस्यैव सहजत्वेन वा नीलरूपो भगवानिति ज्ञातव्यम्। सुष्ठु पिशङ्गं पीतवर्णं वासो यस्य एवं रूपवस्त्रयोः परब्रह्मशब्दब्रह्मता निरूपिता।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं प्रमेयप्रमाणे निरूप्य साधनं भक्तिं निरूपयति-प्रसन्नं वक्त्रं यस्य ज्ञानविज्ञाने साधनान्तरं निरूपयति-रुचिरे आयते ईक्षणे यस्येति ॥५४-५५॥ एवं सर्वसाधनसहितं भगवन्तं निरूप्य फलत्वाय प्रथमतो बहिः शोभामाह-महामणिव्रातेति। महामणीनां समूहः येषु तादृशाः किरीटकुण्डलमुकुटादयः तेषां प्रभाभिः परितः क्षिप्ताः सहस्रं कुन्तला यस्य कुन्तलानां मध्ये रत्नानां मध्ये तेजःप्रवेशात् नीलमणिखचितपदकवत् भगवति उपरिभागो वर्णितः । मध्यभागं वर्णयति-प्रकर्षेण लम्बाः चारवः अष्ट भुजा यस्य जानुपर्यन्तं लम्बाः तादृशा अपि न केनाप्यंशेन विकृताः ये भगवतः अष्टौ गुणा अणिमादिप्रकृतिरूपाः तेषां मूलभूता ये योगाः क्रियाशक्तिरूपाः तेषामाधारभूताः भगवतो बाहवः कौस्तुभसहितः कण्ठभागः श्रीवत्स एव लक्ष्म चिह्नं यस्य वनमालया च वृत इति जीवमायाकीर्तय उक्ताः ॥५६॥

श्रीसुबोधिनीसारः

बलीयसा नभस्वता वायुना एजन्तः उच्चलन्तो बृहन्तो महान्त ऊर्मयस्तरङ्गा भूषणं यस्य तैर्भूषितं वा इति पाठोऽपि सलिलं जलं प्रविष्टः तत्र सलिलेऽद्भुतं द्युमत्तमं द्युतिमत्सु श्रेष्ठं मणिमयैः स्तम्भानां सहस्रैः शोभितं भवनं महाकालपुरं प्रविष्टस्ततः ॥५३॥ तस्मिन् भवने महाभीममनन्तं शेषं ददर्श । तद्विशेषणानि अद्भुं सहस्रं मूर्धन्या मस्तकोद्भवाः फणासु मणयस्तेषां द्युभिर्दीप्तिभिर्विभ्राजमानं द्विगुणं द्विसहस्रमुल्बणानीक्षणानि यस्य तं सितोऽचलः श्वेतपर्वतः स्फटिकमयः कैलासः तद्वदाभा कान्तिर्यस्य तं शितयो मेचकवर्णा नीलाः कण्ठजिह्वाः यस्य तम् ॥५४॥ तस्य शेषस्य भोगः शरीरं सुखम् आसनं यस्य तं महानुभावं विभुं पुरुषोत्तमोत्तमं श्रीहरिं ददर्श ववन्द इति चतुर्थेनान्वयो वा अच्युतः श्रीकृष्णो विजयोऽर्जुश्च तस्य दर्शनेन जात उत्पन्नः साध्वसः सम्भ्रमो यस्य स इत्यर्जुनविशेषणम् । श्रीहरिं विशिनष्टि । सान्द्रोऽम्बुदो मेघस्तद्वदाभा यस्य तं नीलमेघवर्णं पीताम्बरं प्रसन्नमुखं सुन्दरविशालनेत्रम् ॥५५॥ महान्तो मणिव्राता तेषु तेषां किरीटकुण्डलानां प्रभया परिक्षिप्ताः सर्वतः स्फुरन्तः सहस्रमपरिमिताः कुन्तलाः केशा यस्य तं प्रलम्बाःचारवः सुन्दरा अष्टौ भुजा यस्य तं कौस्तुभेन सहितं श्रीवत्सेन लक्ष्म्या वनमालया चावृतं युक्तम् ॥५६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ततस्तमसः परतो बलीयसा प्रचण्डेन नभस्वता वायुना एजन्तः उच्चलन्तो बृहन्तः ऊर्मयस्तरङ्गा भूषणं यस्य तथाभूतं सलिलं प्रविष्टः सोऽर्जुनो भगवान् तत्र सलिलस्याधस्तात् अद्भुतं भवनं प्रविष्ट इत्यनुषङ्गः । द्युमत्तमं द्युतिमत्सु श्रेष्ठम् । भ्राजतां मणिमयस्तम्भानां सहस्रेणोपशोभितं कालपुराख्यम् ॥५३॥ तस्मिन् भवने महाभीमम् अतिभयङ्करम्, अद्भुतं विस्मयकारकम्, सहस्रं मूर्धानस्तेषु भवाः फणास्तासु ये मणयस्तेषां द्युभिः कान्तिभिर्विराजमानम्, द्विगुणानि द्विसहस्रसङ्ख्याकानि उल्बणानि भयङ्कराणि अरुणानीक्षणानि यस्य तम्, सिताचलः स्फटिकपर्वतस्तस्या भा इवाभा यस्य तम्, शितयो नीलाः कण्ठो जिह्वाश्च यस्य तम्, एवम्भूतमनन्ताख्यं शेषं ददर्शेत्यन्वयः ॥५४॥ तस्यानन्तस्य भोगः शरीरमेव सुखकरमासनं यस्य तं पुरुषोत्तमोत्तमं भगवन्तं ददर्श । तमेव विशिनष्टि-विभुं व्यापकम् । तस्यैकदेशे दर्शनं कथम्, इत्यपेक्षायामाह-महानुभावमिति । अचिन्त्यानन्तशक्तिभिरित्यर्थः । सान्द्रस्य निबिडस्य अम्बुदस्य मेघस्येवाभा यस्य तम् । शोभने पिशङ्गे वाससी यस्य तम् । प्रसन्नं वक्त्रं यस्य तम् । रुचिरे सुन्दरे आयते दीर्घे ईक्षणे यस्य तम् ॥५५॥ महान्तो मणिव्राता येषु तेषां किरीटकुण्डलानां या प्रभा तया परिक्षिप्ताः सर्वतः स्फुरन्तः सहस्रम् अनन्ताः कुन्तला यस्य तम् । प्रलम्बा दीर्घाश्चारवो वर्तुलाश्चाष्टौ भुजा यस्य तम् । कण्ठस्थेन कौस्तुभेन सहितम् । श्रीवत्सो लक्ष्म चिह्नं यस्य तम् । श्रीवत्सलक्ष्म्येति पाठे श्रीवत्सस्य लक्ष्म्या शोभया वनमालया चावृतं युक्तमित्यर्थः ॥५६॥

अन्वितार्थप्रकाशिका

तत इति ॥ ततस्तमसः परतो बलीयसा प्रचण्डेन नभस्वता वायुना एजन्तः उच्चलन्तो बृहन्तः ऊर्मयस्तरङ्गा भूषणं यस्य भीषणमिति च पाठः । तथाभूतं सलिलं प्रविष्टः सोऽर्जुनो भगवान् तत्र सलिलस्याधस्तात् द्युमत्तमं द्युतिमत्सु श्रेष्ठं भ्राजतां

अन्वितार्थप्रकाशिका

मणिमयस्तम्भानां सहस्रेणोपशोभितं कालपुराख्यम् अद्भुतं भुवनं प्रविष्टः । इदं च महाकालपुरं मृत्युञ्जयतन्त्रे ज्ञेयम् ।

"ब्रह्माण्डस्योर्ध्वतो देवि ब्रह्मणः सदनं महत् । तदूर्ध्वं देवि विष्णूनां तदूर्ध्वं रुद्ररूपिणाम् ॥
तदूर्वं च महाविष्णोर्महादेव्यास्तदूर्ध्वगम् । पारे परिमहादेव्याः कालः सर्वभयावहः ॥
ततः श्रीब्रह्मपीयूषवारिधिर्नित्यनूतनः । तस्य तीरे महाकालः सर्वग्राहकरूपधृक् ॥" तत इत्युक्त्वा —
"तस्यान्तरे समुद्भासी रत्नद्वीपः शिवाह्वयः । ध्यायेत्तत्र परानन्दं रामोपास्यं परं महः ॥
वल्लवीवल्लभं कृष्णं गोपकन्याः सहस्रशः ॥" इत्यादि ॥

अत्र ब्रह्मणः सदनं सत्यलोकः विष्णूनां विकुण्ठसुतानां रुद्ररूपिणामित्यहङ्कारावरणस्थो रुद्रलोकः महाविष्णोरिति महत्तत्त्वावरणस्थो महादेव्या इति प्रकृत्यावरणस्थो महादेवीलोकः ब्रह्मपीयूषवारिधिः कारणार्णवः महाकालः परव्योमस्थो महावैकुण्ठनाथस्तस्यैव कारणार्णवजलान्तर्गतं भवनं महाकालपुरम् ॥५३॥ तस्मिन्निति । तस्मिन् भवने महाभीमम् अतिभयङ्करम् अद्भुतं विस्मयकारकं सहस्रं मूर्धानस्तेषु भवाः फणास्तासु ये मणयस्तेषां द्युभिः कान्तिभिर्विराजमानं द्विगुणानि द्विसहस्रसङ्ख्याकानि उल्बणानि भयङ्कराणि अरुणानि नेत्राणि यस्य तं सिताचलः स्फटिकपर्वतस्तस्याभा इवाभा यस्य तं शितयोऽनीलाः कण्ठो जिह्वाश्च यस्य तमेवम्भूतमनन्ताख्यं शेषं ददर्श ॥५४॥ ददर्शेति ॥ तस्यानन्तस्य भोगः शरीरमेव सुखकरमासनं यस्य पुरुषोत्तमाः सङ्कर्षणादयस्तेभ्योऽप्युत्तमं महानुभावं सान्द्रस्य निबिडस्य अम्बुदस्य मेघस्येवाभा यस्य तं शोभने पिशङ्गे पीते वाससी यस्य तं प्रसन्नं वक्त्रं यस्य तं रुचिरे सुन्दरे आयते दीर्घे ईक्षणे यस्य तं विभुं ददर्श फाल्गुन इति प्रकरणाल्लब्धम् ॥५५॥ महेति ॥ महान्तो मणिव्राता येषु तेषां किरीटकुण्डलानां या प्रभा तया परिक्षिप्ताः सर्वतः स्फुरन्तः सहस्रम् अनन्ताः कुन्तला यस्य तं प्रलम्बा दीर्घाश्चारवो वर्तुलाश्चाष्टौ भुजा यस्य तं कण्ठस्थेन कौस्तुभेन सहितं श्रीवत्सो लक्ष्म चिह्नं यस्य तं श्रीवत्सलक्ष्म्येति पाठे श्रीवत्सस्य लक्ष्म्या शोभया वनमालया चावृतं युक्तमित्यर्थः । विभुं ददर्शेत्यनुषङ्गः ॥५६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एजन्तः कम्पमानाः बृहतो महान्तः ऊर्मय एव भूषणानि यस्य तत् सलिलं प्रविष्टः तत्र सलिले द्युमत्तमम् अतिशयप्रकाशमानं भवनं महाकालपुरुषपुरं फाल्गुनः ददर्शेति तृतीयेन सम्बन्धः ॥५३॥ तस्मिन् पुरे सहस्रसङ्ख्याका मूर्धन्याः ॥ मूर्ध्नि मस्तके भवाः फणाः तासु मणयस्तेषां द्युतिभिर्विभ्राजमानं द्विगुणैर्द्विसहस्रैः ईक्षणैर्नेत्रैः उल्बणमसह्यं सिताचलाभं श्वेतपर्वततुल्यं शितयो नीलाः कंठाः जिह्वाश्च यस्य तं महाभोगं महादेहम् अनन्तशेषं ददर्शेत्युत्तरेण सम्बन्धः ॥५४॥ तद्भोगसुखासनं तस्य शेषस्य भोगः शरीरसुखजनकम् आसनं यस्य तम् । पुरुषोत्तमं पुरुषाः इन्द्रादिदेवमनुष्याः तेभ्य उत्तमाः ॥ ब्रह्मविष्णुशिवाः तेभ्योऽपि उत्तमं महाकालपुरुषं तमेव सान्द्राम्बुदाभमित्यादिविशेषणैर्विशिनष्टि ॥५५॥ महान्तो मणीनां व्राताः समूहाः येषु तेषां किरीटकुण्डलानां प्रभया परिक्षिप्ताः परितो व्याप्ताः सहस्रकुन्तलाः असङ्ख्यकेशाः यस्य तम् ॥५६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तस्मिन्निति ॥ तस्मिन् भवने सहस्रं सहस्रसङ्ख्याका ये मूर्धानस्तद्भवा ये फणामणयः तेषां द्युभिर्दीप्तिभिः विशेषेण भ्राजमानं द्विगुणानि उल्बणानि ईक्षणानि यस्य तम् अरुणेक्षणमित्यपि पाठः । सिताचलस्य स्फटिकपर्वतस्याभेवाभा यस्य तं शितिर्नीलः कण्ठो जिह्वाश्च यस्य तं, तं प्रसिद्धम् अनन्तमनन्ताख्यं महाहिं ददर्शेत्युत्तरेण सम्बन्धः ॥५३॥ ददर्शेति ॥ तस्यानन्तस्य भोगो देहः सुखं सुखमरमासनं यस्य तं, महाननुभावः प्रभावो यस्य तं पुरुषोत्तमानां ब्रह्मादीनामप्युत्तमस्तं, यद्वा । पुरुषोत्तमः श्रीकृष्णः उत्तमो यस्माद्यस्य वा तं सान्द्रस्याम्बुदस्येवाभा यस्य तं, सु शोभने पिशङ्गे पीतवर्णे वाससी यस्य तम्, प्रसन्नं वक्त्रं मुखं यस्य तम्, रुचिरे सुन्दरे आयते आकर्णान्तविश्रान्ते च ईक्षणे यस्य तम्, विभुं भूमाख्यभगवन्तं ददर्श ॥५४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तं विशिनष्टि द्वाभ्याम् ॥ महेति ॥ महान्तो मणिव्राता येषु तेषां किरीटकुण्डलानां प्रभया परिक्षिप्ताः सर्वतः स्फुरन्तः सहस्रमपरिमिताः कुन्तलाः शिरोरुहा यस्य तम्, प्रलम्बा दीर्घाश्चारवो वर्तुलाश्चाष्टौ भुजा यस्य तम्, सुशोभनः कौस्तुभो मणिर्यस्य तम्, श्रवत्सं लक्ष्म चिह्नं यस्य तम्, वनमालया, वृतम् ॥५५॥ सुनन्देति ॥ सुनन्दश्च नन्दश्च प्रमुखौ येषां तैः पार्षदैः चक्रादिभिः मूर्तधरैर्मूर्तिमद्भिः निजायुधैः पुष्ट्या श्रिया कीर्त्यजया कीर्तिसहितया अजया अखिलर्द्धिभिरणिमादिभिः च, निषेव्यमाणं परमेष्ठिनां ब्रह्मादीनां पतिम् ॥५६॥

कृष्णप्रिया

रथ आगे बढा वहां अगाध जल आया। अगाध जलमें रथ अपनी तीव्र गति से चलता रहा था। बडी तेज आंधी के चलने के कारण जलमें बडी बडी तरंगे उठ रही थी ऐसी भयानक स्थितिमें भी रथ वप्रतिहतगति से चल रहा था। उस समय अपार जल के बीचमें हजारो मणिस्थंभो (खम्भो) से सुशोभित पूर्ण प्रकाशमान एक राजभगवन के दर्शन हुए ॥५३॥ उसी दिव्य भवनमें भगवान शेष विराजमान थे। उनके हजार शिर थे और प्रत्येक फणपर सुन्दर सुन्दर मणियां जगमगा रही थी। प्रत्येक फणामें द दो आंखे थी और वह बडे भयंकर दीख रहे थे। उनका सम्पूर्ण शरीर कैलास के समान श्वेत वर्ण का था। गला तीया जीभ नीले रंग की थी ॥५४॥ भगवान श्रीशेषजी के श्रीअंगोकी सुखशय्या पर सुखपूर्वक लेटे हुए सर्वव्यापक महान् प्रभावशाली परम पुरुषोत्तम भगवान के दर्शन हुए। उनके शरीर की कान्ति वर्षाकालीन भेघ के समान शयामल है। सुन्दर पीला वस्त्र धारण किये हुए है। मुख पर प्रसन्नता की झलक दीखाई रही थी और बडे बडे नेत्र बहुत ही सुहावने लगते थे ॥५५॥ बहुमूल्य मणियोंसे जडित मुकुट और कुण्डलोकी कान्ति से सहस्त्रो घुघराली अलक चमक रही थी। भगवान आजानबाहु और अष्टभुजावाले है। कण्ठमें कौस्तुभ मणि शोभायमान था। वक्षः स्थलपर श्रीवत्स का विढ था। घुटनो तक वनमाला लटक रही थी ॥५६॥

सुनन्दनन्दप्रमुखैः[१] स्वपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः।
पुष्ट्या श्रिया कीर्त्यजयाखिलर्द्धिभिर्निषेव्यमाणं परमेष्ठिनां पतिम् ॥५७॥
ववन्द आत्मानमनन्तमच्युतो[२] जिष्णुश्च तद्दर्शनजातसाध्वसः।
[३]तावाह भूमा परमेष्ठिनां प्रभु[४]र्बद्धांजली सस्मितमूर्जया गिरा ॥५८॥
द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये।
[५]कलावतीर्णाववनेर्भरासुरान् हत्वेह [६]भूयस्त्वरयेतमन्ति मे ॥५९॥
पूर्णकामावपि युवां नरनारायणावृषी। धर्ममाचरतां स्थित्यै ऋषभौ लोकसंग्रहम् ॥६०॥

कर्दमक्षमा

सुनन्दनन्दप्रमुखैः, स्वपार्षदैः, चक्रादिभिः, मूर्तिधरैः, निजायुधैः, पुष्ट्या, श्रिया, कीर्त्यजया, अखिलर्द्धिभिः, निषेव्यमाणम्, परमेष्ठिनाम्, पतिम्, ददर्श ॥५७॥ आत्मानम्, अनन्तम्, तद्दर्शनजातसाध्वसः, जिष्णुः, अच्युतः, च, ववन्दे, परमेष्ठिनाम्, प्रभुः, भूमा, सस्मितम्, ऊर्जया, गिरा, बद्धाञ्जली, तौ, आह ॥५८॥ भुवि, धर्मगुप्तये, युवयोः, दिदृक्षुणा, मया, द्विजात्मजाः, मे, कलावतीर्णौ, अवनेः, भरासुरान्, त्वरया, हत्वा, इह, मे, अन्ति, उपनीताः ॥५९॥ नरनारायणौ, ऋषी, धर्मम्, आचरताम्, स्थित्यै, लोकसङ्ग्रहम्, युवाम्, अपि, पूर्णकामौ ॥६०॥

---

[१] श्च पार्षदैः-वीर. विज.। [२] जं तमच्युतं-गो. प्रे. टी.। [३] स चाह भूमा-विज. ; स चाह भूम्नां-गो. प्रे. टी.। [४] बद्धाञ्जली-विज.। [५] वतीर्णोस्य वने-विज.। [६] त्वरयैहि मेन्तिकं-विज.।

श्रीधरस्वामिविरचिता भावार्थदीपिका

कीर्त्यजया कीर्तिसहितया अजया अखिलर्द्धिभिरणिमादिविभूतिभिर्मूर्तिधराभिः ॥५७॥ ऊर्जया ऊर्जितया गिरा ॥५८॥ मे कलावतीर्णाविति सम्बोधनम् शीघ्रं मे अन्ति सकाशमित आगच्छतम् ॥५९॥ आचरमाचरतम् इदं भारतयुद्धात्पूर्वमेव कृतमपि श्रेष्ठ्यकथनप्रस्तावेनात्रोक्तम् ॥६०-६६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

परमेष्ठिनां ब्रह्मादिदेवानाम् । छत्रिणो यान्तीतिवद्बहुत्वम् ॥★॥ स्वैरसाधारणैः पार्षदैः मूर्तिधरैः स्वमस्तकोपरि तत्तच्चिह्नशोभितदेहैः निजैः स्वाभाविकैरायुधैः । आदिशब्देन शङ्खगदाखड्गचर्मशरचापपाशाः, अष्टभुजत्वात् । श्रीर्महिषी पुष्ट्याद्याः शक्तयो मूर्तिमत्य एव परमेष्ठिनां पतिं द्वपरार्धान्तं मुक्तानां ब्रह्मणां तत्र कूटीभूतानां पतिं मुक्तिप्रदत्वात्तस्य पदस्य ॥५७॥ तमात्मानं स्वस्वरूपमेवाच्युतो जिष्णुश्च ववन्दे 'अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् । ब्रह्मतेजोमयं दिव्यं महद्यद्दृष्टवानसि ॥' इति हरिवंशाच्छ्रीकृष्णेनात्मैवार्जुनाय मायया दर्शित इति । तद्दर्शनेन महाकालपुरेशेक्षणन जातं साध्वसं सम्भ्रमो यस्येति तथा द्वयोर्विशेषणमिदम् । भूमा सर्वेश्वरः । तौ कृष्णार्जुनौ । ऊर्जितया प्रगल्भया ॥★॥ आत्मानमिति । श्रीगोवर्धनपूजायां "तस्मै नमो व्रजजनैः सह चक्रेणाऽऽत्मनात्मने" (अत्राऽऽकारलोपसंधिरार्षः)इतिवल्लीलाकौतुकमात्रार्थं तत्तदीति ज्ञापितम् । अनन्तमित्यपरिच्छिन्नतेजोमयत्वादिना अच्युत इति तत्रापि स्वयं भगवत्त्वेन तत्रापि व्यापकत्वादिच्युतिरहितः स्वीयनरलीलाच्युतिरहितोऽपीत्यर्थः । जिष्णुस्तु तादृशोऽपि तस्य दर्शनाज्जातसाध्वसः सन् ववन्दे । तावङ्गीकृतात्मनरलीलौ । श्रीकृष्णोऽसौ ब्रह्माक्रूरादीन् प्रति तादृशवैभवानि कदाचिदेव प्रकाशयति-गोवर्धनपूजनलीलायामिव सदा तु कौतुकेन सतावदङ्गीकृतात्मनरलील एव तदनुसारेणार्जुनाद्या अपीति भावः । स तु भूमा श्रीगोवर्धनबलिभुग्वत्ततोऽपि दर्शितात्ममहत्त्वः तत्सहायश्च तादृशा इत्याह-परमेष्ठिनां प्रभुरिति । यत ऊर्जायां श्रीकृष्णेच्छानुसारेणैवार्जुनस्य स्ववाक्यादराद्युत्पत्तये ऊर्जितया सप्रागल्भ्ययेत्यर्थः । सस्मितमिति स्वप्रसादव्यञ्जनार्थम् ॥★॥ विश्वनाथस्तु :- श्रीकृष्णस्य नरलीलत्वरक्षणार्थमेव सोऽष्टभुज ईश्वरलील एतदंशोऽपि तं न वन्दितवानिति भावः । जातसाध्वसः प्राप्तसम्भ्रम इति कृष्णादप्ययमधिकैश्वर्यवानिति लब्धप्रतीतिक इत्यर्थः । भूमेति श्रीगोवर्धनपूजाग्राही यः कृष्णः स इव कृष्णादप्याधिक्येन दर्शितात्ममहत्त्व इत्यर्थः । परमेष्ठिनां कोटिब्रह्माण्डस्थचतुर्मुखानाम् ऊर्जया प्रगल्भयेति श्रीकृष्णाभिप्रायानुरूपया तयैवार्जुनं मोहयितुमिति भावः । सस्मितमिति त्वदभिप्रायेणैव त्वदंशोऽप्यहं स्वस्वाधिक्यं स्ववाक्येन प्रकटीकरोमि । वस्तुतस्तु तस्मिन्नेव वाक्ये तवैव रूपगुणैश्वर्याधिक्यं मदंशित्वं च द्योतयामि । पश्य मे चातुर्यम् । त्वयापि पश्चादर्जुनाय स्वतत्त्वमवश्यज्ञाप्यमिति स्मितेन प्रार्थना च द्योतिता ॥५८॥ मे कलावतीर्णाविति द्वयोः सम्बोधनमर्जुनाभिप्रायकमेव लिङ्गसमवायन्यायेन । यद्वा--कं सुखं लाति ददातीति कला रक्षा तदर्थमवतीर्णौ मे ममावनेर्भूमेर्भरासुरान्हत्वा इहात्र मे ममान्ति समीपं युवामितमागच्छतमिति योज्यम् । अन्यथा 'कृष्णस्तु भगवान्स्वयम्' इति 'ववन्द आत्मानमजं तमच्युतः' इति पूर्वश्लोकोक्तं च कथं सङ्गच्छेतेति ॥★॥ तथापि तस्य मुखात्तयोः स्वतोऽप्यधिकं माहात्म्यमुद्गतमिति तादृशं तद्वाक्यमेवाह-द्विजेति । हे धर्मगुप्तये कलावतीर्णो धर्मस्य ब्राह्मणत्वादिगुप्तये रक्षणाय कलाभिः सर्वाभिः शक्तिभिर्युक्तावेवावतीर्णौ सर्वांशसंवलिततया प्रकटौ मध्यमपदलोपी समासः । युवयोर्युवां दिदृक्षुणा मया मे मम भुवि धाम्नि द्विजात्मजा उपनीता आनीताः एवमेव वक्ष्यतेऽर्जुनेन तत्तत्त्वे पृष्टे श्रीकृष्णेनापि श्रीहरिवंशे

'मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना । विप्रार्थमेष्यते कृष्णाो मत्समीपं न चान्यथे'ति । तदेतच्च नापूर्वम् —

"यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम् ।
विस्मापनं स्वस्य च सौभगर्द्धेः परम्पदं भूषणभूषणाङ्गम् ॥" इति ॥

तृतीयेऽपि श्रीमदुद्धवोक्तेः । तदेवं यद्यपि तत्र तस्य स्पृहयालुत्वं तथा सर्वत्रापि करतलमणिवत्सर्वदर्शित्वं सर्वाकर्षित्वं च तथापि तेन स्वेच्छया निकटमागत्य दर्शनदानं विना स तं द्रष्टुं न शक्नोतीति कष्टकल्पनयैव तत्सम्पादितवानिति च

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

शक्त्याधिक्यमप्यायातम्। किमुत सौन्दर्यादिगुणाधिक्यमिति स्थितम्। हरिवंशादत्र त्वयं विशेषः यः खल्वर्जुनं प्रत्यपि तथा तस्य दिदृक्षेति युक्तं चैतत् —

"ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः। तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित्॥" इति न्यायेन॥

तदुक्तं विष्णुधर्मे श्रीकृष्णेनैव तं प्रति —

"यस्त्वां वेत्ति स मां वेत्ति यस्त्वामनु समामनु। अभेदेनात्मनो वेद्मि त्वामहं पाण्डुनन्दन॥" इति॥

प्रस्तुतपदावशेषो व्याख्यायते। नन्वेवमपि जातमधुना तु किं कर्तव्यं तत्राह- भूयः पुनरपि अवशिष्टानवनेर्भरासुरान् हत्वा मे मम अन्ति अन्तिकाय समीपमागन्तुं त्वरयेतं त्वरयतं शीघ्रं प्रस्थापयतं मोचयतमित्यर्थः। तद्धाम्नो मुक्तगम्यत्वेन हरिवंशोक्तत्वात् अन्तीत्यव्ययाच्चतुर्थ्या लुक्। चतुर्थी च क्रियार्थोपपदस्य च कर्मणि स्थानिन इति स्मरणात् एधोभ्यो व्रजतीतिवत् त्वरयेतमिति हेतुर्णिजन्तस्य त्वरोर्लिङि रूपं व्याख्यातान्तक्रिययोरेककर्मत्वं च कटं कृत्वा प्रथापयेतिवत् अर्थान्तरे मे कलावतीर्णाविति व्यवहितान्वयः तथा त्वरयेतमिति सोपसर्गमेव प्रयुज्येत। स्वनिकटप्रापणादेशे तथा व्यवहारात् आस्तां तावदस्मन्मतं श्रीकृष्णस्य स्वयं भगवत्त्वं नित्यलीलत्वं चेति ॥५९॥ पूर्णकामावपि लोकसङ्ग्रहार्थं धर्ममाचरतं युवाम्। इदं ब्राह्मणपुत्रानयनादि। श्रैष्ठ्यं प्राशस्त्यम्। प्रस्तावः प्रसङ्गः ॥★॥ नन्वावां सर्वतः परिपूर्णौ कथं ब्रह्मण्यण्वादिधर्मपरौ स्याव इत्याशङ्क्य केवलकरुणया धर्मसंस्थापनार्थमेवेति सिद्धान्तयन्नुदाहरणं दर्शयति- पूर्णेति। युवामृषभौ सर्वाविर्भावश्रेष्ठावपि तत एव पूर्णकामावपि स्थित्यै सर्वपालनाय लोकसङ्ग्रहं धर्ममाचरतां मध्ये नरनारायणावृषी तौ युवयोर्विभूतिरूपावंशावित्यर्थः। वक्ष्यते ह्युद्धवं प्रति श्रीकृष्णेनैव विभूतिप्रसङ्गे नारायणो मुनीनां चेति। अतस्तावपि यदि तादृशौ तदा किमुत साक्षाद्भगवन्ताविति भावः। अत्र चाचरतमित्यर्थे खल्वाचरतामिति न प्रसिद्धमित्यपि तथा न व्याख्यातमिति ज्ञेयम्। किञ्च मदन्तिकमागच्छतमिति नरनारायणौ भुत्वा धर्ममाचरतमिति पारम्परिकविरोधश्च ज्ञेयः ॥६०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

स्वैः असाधारणैः पार्षदैः मूर्तिधरैः स्वमस्तकोपरि तत्तच्चिह्नशोभितदेहैः निजैः स्वाभाविकैरायुधैः। आदिशब्देन शङ्खगदाखड्गचर्मशरचापपाशाः, अष्टभुजत्वात्। श्रीर्महिषी पुष्ट्याद्याः शक्तयो मूर्तिमत्य एव परमेष्ठिनां पतिं द्वपरार्धान्तं मुक्तानां ब्रह्मणां तत्र कूटीभूतानां पतिं मुक्तिप्रदत्वात्तस्य पदस्य ॥५७॥ आत्मानमिति। श्रीगोवर्धनपूजायां "तस्मै नमो व्रजजनैः सह चक्रे णाऽऽत्मनात्मने" इतिवल्लीलाकौतुकमात्रार्थं तत्तदीति ज्ञापितम्। अनन्तमित्यपरिच्छिन्नतेजोमयत्वादिना अच्युत इति तत्रापि स्वयं भगवत्त्वेन तत्रापि व्यापकत्वादिच्युतिरहितः स्वीयनरलीलाच्युतिरहितोऽपीत्यर्थः। जिष्णुस्तु तादृशोऽपि तस्य दर्शनाज्जातसाध्वसः सन् ववन्दे। तावङ्गीकृतात्मनरलीलौ। श्रीकृष्णोऽसौ ब्रह्माक्रूरादीन् प्रति तादृशवैभवानि कदाचिदेव प्रकाशयति- गोवर्धनपूजनलीलायामिव सदा तु कौतुकेन सतावदङ्गीकृतात्मनरलील एव तदनुसारेणार्जुनाद्या अपीति भावः। स तु भूमा श्रीगोवर्धनबलिभुग्वत्ततोऽपि दर्शितात्ममहत्त्वः तत्सहायश्च तादृशा इत्याह- परमेष्ठिनां प्रभुरिति। यत ऊर्जायां श्रीकृष्णेच्छानुसारेणैवार्जुनस्य स्ववाक्यादराद्युत्पत्तये ऊर्जितया सप्रागल्भ्ययेत्यर्थः। सस्मितमिति स्वप्रसादव्यञ्जनार्थम् ॥५८॥ तथापि तस्य मुखात्तयोः स्वतोऽप्यधिकं माहात्म्यमुद्गतमिति तादृशं तद्वाक्यमेवाह- द्विजेति। हे धर्मगुप्तये कलावतीर्णौ धर्मस्य ब्राह्मणत्वादिगुप्तये रक्षणाय कलाभिः सर्वाभिः शक्तिभिर्युक्तावेवावतीर्णौ सर्वांशसंवलिततया प्रकटौ मध्यमपदलोपी समासः। युवयोर्युवां दिदृक्षुणा मया मे मम भुवि धाम्नि द्विजात्मजा उपनीता आनीताः एवमेव वक्ष्यतेऽर्जुनेन तत्तत्त्वे पृष्टे श्रीकृष्णेनापि श्रीहरिवंशे ——

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

'मद्दर्शनार्थं ते बाला हतास्तेन महात्मना। विप्रार्थमेष्यते कृष्णाो मत्समीपं न चान्यथे'ति। तदेतच्च नापूर्वम् —

''यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम्।
विस्मापनं स्वस्य च सौभगर्द्धेः परम्पदं भूषणभूषणाङ्गम्॥'' इति॥

तृतीयेऽपि श्रीमदुद्धवोक्तेः। तदेवं यद्यपि तत्र तस्य स्पृहयालुत्वं तथा सर्वत्रापि करतलमणिवत्सर्वदर्शित्वं सर्वाकर्षित्वं च तथापि तेन स्वेच्छया निकटमागत्य दर्शनदानं विना स तं द्रष्टुं न शक्नोतीति कष्टकल्पनयैव तत्सम्पादितवानिति च शक्त्याधिक्यमप्यायातम्। किमुत सौन्दर्यादिगुणाधिक्यमिति स्थितम्। हरिवंशादत्र त्वयं विशेषः यः खल्वर्जुनं प्रत्यपि तथा तस्य दिदृक्षेति युक्तं चैतत् —

''ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः। तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित्॥'' इति न्यायेन॥

तदुक्तं विष्णुधर्मे श्रीकृष्णेनैव तं प्रति ———

''यस्त्वां वेत्ति स मां वेत्ति यस्त्वामनु समामनु। अभेदेनात्मनो वेद्मि त्वामहं पाण्डुनन्दन॥'' इति॥

प्रस्तुतपदावशेषो व्याख्यायते। नन्वेवमपि जातमधुना तु किं कर्तव्यं तत्राह–भूयः पुनरपि अवशिष्टानवनेर्भरासुरान् हत्वा मे मम अन्ति अन्तिकाय समीपमागन्तुं त्वरयेतं त्वरयतं शीघ्रं प्रस्थापयतं मोचयतमित्यर्थः। तद्धाम्नो मुक्तगम्यत्वेन हरिवंशोक्तत्वात् अन्तीत्यव्ययाच्चतुर्थ्या लुक्। चतुर्थी च क्रियार्थोपपदस्य च कर्मणि स्थानिन इति स्मरणात् एधोभ्यो व्रजतीतिवत् त्वरयेतमिति हेतुर्णिजन्तस्य त्वरोर्लिङि रूपं व्याख्यातान्तक्रिययोरेककर्मत्वं च कटं कृत्वा प्रथापयेतिवत् अर्थान्तरे मे कलावतीर्णाविति व्यवहितान्वयः तथा त्वरयेतमिति सोपसर्गमेव प्रयुज्येत। स्वनिकटप्रापणादेशे तथा व्यवहारात् आस्तां तावदस्मन्मतं श्रीकृष्णस्य स्वयं भगवत्त्वं नित्यलीलत्वं चेति॥५९॥ नन्वावां सर्वतः परिपूर्णौ कथं ब्रह्ढमण्यत्वादिधर्मतत्परौ स्यावेत्याशङ्क्य केवलं करुणया धर्मस्थापनार्थमेवेति सिद्धान्तयन्नुदाहरणं दर्शयति–पूर्णेति। युवामृषभौ सर्वाविर्भावश्रेष्ठावपि तत एव पूर्णकामावपि स्थित्यै सर्वपालनाय लोकसङ्ग्रहं धर्ममाचरतां मध्ये नरनारायणावृषी तौ युवयोर्विभूतिरूपावंशावित्यर्थः। वक्ष्यते ह्युदुद्धवं प्रति श्रीकृष्णेनैव विभूतिप्रसङ्गे नारायणो मुनीनां चेति। अतस्तावपि यदि तादृशौ तदा किमुत साक्षाद्भगवन्ताविति भावः। अत्र चाचरतमित्यर्थे खल्वाचरतामिति न प्रसिद्धमित्यपि तथा न व्याख्यातमिति ज्ञेयम्। किञ्च मदन्तिकमागच्छतमिति नरनारायणौ भुत्वा धर्ममाचरतमिति पारम्परिकविरोधश्च ज्ञेयः॥६०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४१-६६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

सुनन्दनादिभिः पार्षदैर्विग्रहधरैश्चक्रादिभिः स्वासाधारणैरायुधैश्च पुष्ट्यादिभिः शक्तिभिः मूर्तिमतीभिस्तथा-ऽखिलर्द्धिभिरणिमादिभिः सेव्यमानं परमेष्ठिनां ब्रह्मादीनां पतिम्॥५७॥ ववन्द इति। अजं हेयप्रतिभटं स्वस्मादनन्यं तमच्युतो ववन्दे ननाम। तथा जिष्णुरर्जुनश्च तस्य भगवतो दर्शनेन जातं साध्वसं भक्तिपूर्वकभयं यस्य सः ववन्दे। ततो बद्धाञ्जली तौ कृष्णार्जुनौ प्रति परमेष्ठिनां पतिः प्रभुर्भगवान् ऊर्जितया गम्भीरया गिरा प्राह॥५८॥ उक्तिमेवाह द्वाभ्याम्–द्विजात्मजा इति। युवयोर्युवां दिदृक्षुणा द्रष्टुमिच्छता मया द्विजात्मजा उपनीताः मदन्तिकं प्रापिताः। किमावयोर्दर्शनेनेत्यत आह–धर्मगुप्तये। भुवि कलया अवतीर्णौ कलावतीर्णाविति छत्रिन्यायेनोक्तम्। कृष्णस्तु भगवान् स्वयम् इत्युपक्रमे पूर्णावतारत्वोक्तेः। अतो मदवतारत्वान्मम दिदृक्षा जातेति भावः। अर्जुनस्य नरांशत्वप्रसिद्धिमुपजीव्येत्यमुक्तम्। नरस्य नारायणांशावतारत्वात् अवनेः भूमेर्भारायितानसुरान्

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

हत्वा भूयस्त्वरया मे ममान्तिकं समीपम् इतमागच्छतम् 'इण्गतौ इत्यस्य रूपम्' ॥५९॥ किञ्च, पूर्णकामाविति युवां पूर्वं नरनारायणावृषी भूत्वेति शेषः। ऋषभौ श्रेष्ठौ हेतुगर्भमिदम्। अतः पूर्णकामावपि स्थस्त्यै जगद्रक्षणार्थं लोकसङ्ग्रहं धर्ममाचेरतुराचरितवन्तौ । लोकोऽर्वाचीनो जनः सङ्गृह्यते प्रवर्त्यतेनेनेति तथा तम् अत्र यद्यदा चरति श्रेष्ठ इत्यादिगीतावचनार्थ उपक्षिप्तः ॥६०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

परमेष्ठिनां ब्रह्मणां पतिम् ॥५७॥ अच्युतः कृष्णः जिष्णुरर्जुनः ॥५८॥ युवयोः कृष्णार्जुनयोः ॥५९॥ जगतः स्थित्यै लोकसङ्ग्रहं धर्मम् ॥६०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५६-६६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ववन्द आत्मानमित्यादि । अच्युतः श्रीकृष्णः आत्मानं देहं मूर्तिविशेषम् अंशमिति यावत् । कीदृशम् । अनन्तम् अनन्तरहितम् अंशत्वेऽपि तथात्वं स्वाभाविकमेव। जिष्णुश्च ववन्दे। कीदृशः। तद्दर्शनजातसम्भ्रमः। तस्य श्रीकृष्णकृतनमस्कारस्य दर्शनेन जातं साध्वसं यस्य। अयं सर्वेश्वरः कथममुमंशरूपिणं नमस्करोतीति विस्मयं कृत्वा ववन्द इत्यत्र साध्वसशब्दो विस्मयवाची । साधुः असः असनं दीप्तिर्यत्र चमत्कार इत्यर्थः। स भूमा नारायणः। परमेष्ठिनां योगीन्द्राणां प्रभुः। तौ आह बद्धाञ्जली इति श्रीकृष्णस्यापि बद्धाञ्जलित्वं कौतुकपरं स्वांशं प्रति सम्मानाधिक्यं स्वस्यैव यथा गोवर्धनोद्धरणलीलायां मूर्त्यन्तरमाविर्भाव्य तद्वन्दनादिना कौतुकप्रकटनम् ॥५८॥ द्विजात्मजा इत्यादि। द्विजात्मजाः मया उपनीताः। कुतः। दिदृक्षुणा। कुत्र दिदृक्षुत्वम्भवत इत्याशङ्क्य तदेव प्रकटयति। युवयोर्मध्ये भुवि ममोत्पत्तिस्थले श्रीकृष्णे दिदृक्षुत्वमित्यर्थः। भवत्यस्मादिति भूः। अपादाने क्विप् । तथा च अहं सर्वस्य प्रभवः इति श्रीमुखोक्तेः। ननु दिदृक्षुश्चेत् तत्रैव कथं नागाः ? अत्राह-धर्मगुप्तये धर्मरक्षायै। कुत्र धर्मरक्षेत्याह-कलावतीर्णौ कलानामस्मदादीनामवतीर्णिरवतारो यस्मात् तस्मिन् श्रीकृष्णे एतस्मिन् या धर्मगुप्तिः तदर्थम्। अहं चेत्तत्र गत्वा द्रक्ष्ये तदा द्विजबालानामरिष्यन्। तदानयनप्रकारेण तत्कृतप्रयत्नेन चास्य धर्मोऽयमभविष्यत्। अत एषा धर्मरक्षाऽस्य भूयादिति मया तत्र न गतम्। अथवा दिदृक्षुत्वे हेतुः धर्मगुप्तय इति अंशो हि अंशिनं दिदृक्षतीत्येष एव धर्मः। अतः परं कृतार्थोऽस्मि। तदधुना अवनेर्भारायमाणानसुरान् हत्वा अन्ति मे चरमे कर्मणि स्वधामगमने त्वरयेतं त्वरां कुरुतम् इह भूमौ भूयः प्रकृष्टं यथा भवति तथा हत्वेत्यनुषङ्गः ॥५९॥ नन्वावां नारायणौ त्वमादिनारायणः, कथमावयोर्दिदृक्षुरसि, तत्राह-पूर्णकामावपीत्यादि । अपि सम्बोधने भो भगवन् श्रीकृष्ण ! युवां पूर्णकामौ ईश्वरौ यद्यपि श्रीकृष्ण एवेश्वरः तथापि तत्सखित्वेनायमर्जुनोऽपि मे त्वत्सदृशः। तवात्र यावान् स्नेहस्तावान् आत्मानं विना नान्यत्र भवति। तेन तुल्यं मे द्वयोर्दिदृक्षुत्वमिति युवामिति द्विवचनम्। तर्हि नरनारायणौ कावित्याह-नरनारायणावृषी। मुनीभूत्वा लोकसङ्ग्रहं धर्मम् आचरताम्। कीदृशौ। धस्थित्यै स्थितिमर्यादा तन्निमित्तम् । ऋषभौ श्रेष्ठौ। यद्वा-स्थित्यै लोकसङ्ग्रहं धर्मम् आचरतां मुनीनाम् ऋषभौ ऋष्यवतारौ अर्थात्तवैव। उक्तं च चतुर्थे धर्मकलासर्गे-नरनारायणावृषी इति। अन्यथा एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमित्युक्तस्यासङ्गतिः ॥६०-६६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

ववन्द आत्मानमित्यादि। अच्युतः श्रीकृष्ण आत्मानं ववन्दे। यथा गोवर्धनोपरि मूर्त्यन्तरमाविर्भाव्य स्वयं वन्दितवान् तथार्जुनस्यानुग्रहार्थं मोहार्थं च स्वविभूतिं दर्शयित्वा स्वयमपि ववन्दे । जिष्णुरर्जुनश्च तद्दर्शनजातसम्भ्रमः सन् ववन्दे। स परमेष्ठिनां परमे पदे तिष्ठन्तीति परमेष्ठिनस्तेषां भूमा तौ आह-बद्धाञ्जली इति अर्जुनं मोहयन् स्वयमपि बद्धाञ्जलिर्बभूव, वस्तुतस्तु स्वविभूतेर्महिमवर्धनं स्वस्यैवेति ॥५७॥ द्विजात्मजा इत्यादि। युवयोर्दिदृक्षुणा मया द्विजात्मजा उपनीताः दिदृक्षुश्चेत् स्वयमेव तत्र कथं न गतः ? तत्राह-मुनिधर्मगुप्यते पृथिव्यां धर्मरक्षार्थम्। अयमर्थः-विना भवदिच्छामनेन रूपेण भुवि गन्तुमसमर्थोऽहम्।

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

युवयोरिति किं द्वित्वनिर्देशनपरात्परत्वात् श्रीकृष्णस्यैव दर्शने समुचितमौत्कण्ठ्यम् ? तत्राह-कलावतीर्णौ कला अर्जुनोऽवतीर्णः परिपूर्णः श्रीकृष्णस्वरूपेणैवावतीर्णस्तौ तत्कलाहेतोस्तद्दर्शनेऽप्युत्कण्ठा अर्जुनस्तस्यातिशयप्रेमपात्रमिति कृत्वा वा। अथवा, कलाभिः सर्वाभिरेव शक्तिभिरवतीर्णौ। यद्वा, कं सुखं लातीति कलं सुखदमवतीर्णमवतारो ययोः 'भावे क्तः'। यद्वा, कलामवतीति तथा तीर्णं तरणं याभ्यामयुवामसुरहननकार्यं सङ्कल्प्य मेऽन्ति निकटे इतमागच्छतमिति कृत्वा द्विजसुता उपनीताः। असुरहननात् पूर्वं नोपनीतास्तदा तत्कार्यबाधः स्यात्, अन्यथा युवयोर्दर्शनं मे कथं स्यादिति दिदृक्षुत्वम्। तस्य श्रीकृष्णांशत्वे हरिवंशोक्तिः — (विष्णु-प०-११३/२५)

"ततस्तेजः प्रज्वलितमपश्यन्त महामुने। सर्वं लोकं समाविश्य स्थितं पुरुषविग्रहम्॥
तं प्रविष्टो हृषीकेशाद्दीपतेजोनिधिस्तदा" ॥ इति ॥

ततोऽर्जुनप्रश्ने भगवद्वाक्यम् — (हरिवंशे विष्णु-प० ११४/९,१०)

"ब्रह्मतेजोमयं दिव्यं महत् यद्दृष्टवानसि। अहं भागवतश्रेष्ठ मत्तेजस्तत् सनातनम्॥
प्रकृतिः सा मम परा व्यक्ताव्यक्ता सनातनी। तां प्रविश्य भवन्तीह मुक्ता योगविदुत्तमाः ॥" इति ॥

अथाहं स इति तादात्म्यसन्देहे पुनराह-मत्तेतस्तत् सनातनम्। तथापि तेजस्त्वे सन्देहमवतार्य 'प्रकृतिः सा मम' इति प्रकृतिः परात्परा शक्तिरिति यावत्। यत्रैव पुनराह — (विष्णु-प० ११४/११)

"सा साङ्ख्यानां गतिः पार्थ योगिनां च तपस्विनाम्॥" इति ॥

भक्तानां त्वहमेवेति वाक्यशेषः। अतस्तेन सह वाक्यैकवाक्यतायां श्रीकृष्णस्यैव विभूतिविशेषोऽयमिति सुसमञ्जसम् ॥५८॥ नन्वावां नरनारायणौ भवान् परिपूर्णः, तत् कथमावां दिदृक्षुरसि, नैवमित्याह-पूर्णकामा वयमित्यादि। युवां पूर्णकामौ ईश्वरावपि सम्बोधने नरनारायणौ तु ऋषी मुनी धर्माचरणमकुरुतां 'ह्यस्तनी द्विवचनम्' स्थित्यै धर्मसंस्थापनाय ऋषभौ श्रेष्ठौ धर्ममाचरतां श्रेष्ठाविति। धर्मं विशिनष्टि लोकसङ्ग्रहम् ॥५९॥ ॥६०-६५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

चक्रादिभिर्मूर्तिधरैरिति। स्वस्वमस्तकोपरि तत्तच्चिह्नयुक्तैः ॥५७॥ आत्मानं ववन्द इति गोवर्धनपूजायां "तस्मै नमो व्रजजनैः सह चक्रेणाऽऽत्मनात्मने" इतिवल्लीलाकौतुकमात्रार्थमेव। अनन्तमित्यात्मनोऽसङ्ख्यस्वरोपेणानन्त्यात्। सोऽप्यष्टभुज एक आत्मेत्यर्थः। अच्युत इति नरलीलत्वरक्षणार्थमेव। सोऽष्टभुज ईश्वरलील एतदंशोऽपि तं न वन्दितवानिति भावः। जातसाध्वसः प्राप्तसम्भ्रम इति कृष्णादप्ययमधिकैश्वर्यवानिति लब्धप्रतीतिक इत्यर्थः। भूमेति श्रीगोवर्धनपूजाग्राही यः कृष्णः स इव कृष्णादप्याधिक्येन दर्शितात्ममहत्त्व इत्यर्थः। परमेष्ठिनां कोटिब्रह्माण्डस्थचतुर्मुखानाम् ऊर्जया प्रगल्भयेति श्रीकृष्णाभिप्रायानुरूपया तयैवार्जुनं मोहयितुमिति भावः। सस्मितमिति त्वदभिप्रायेणैव त्वदंशोऽप्यहं स्वस्वाधिक्यं स्ववाक्येन प्रकटीकरोमि। वस्तुतस्तु तस्मिन्नेव वाक्ये तवैव रूपगुणैश्वर्याधिक्यं मदंशित्वं च द्योतयामि। पश्य मे चातुर्यम्। त्वयापि पश्चादर्जुनाय स्वतत्त्वमवश्यज्ञाप्यमिति स्मितेन प्रार्थना च द्योतिता ॥५८॥ युवयोर्वां मे कलया अवतीर्णाविति सम्बोधनम्। शीघ्रं मे अन्ति समीपे इत आगच्छतमित्यर्जुनमोहप्रयोजकोऽर्थः। वास्तवार्थस्तु हे कलावतीर्णौ कलाभिः स्वशक्तिभिः सहैवावतीर्णौ भूयः पुनरपि युवाम् अवनेर्भारान् असुरान् हत्वा मे अन्ति ममान्तिके तान् प्रस्थापयितुं त्वरयेतम्। ण्यन्ताल्लिङि रूपम्। अन्तीत्यव्ययं चतुर्थ्यन्तम्। अत्रागत्य ते मुक्ता भवन्त्विति तद्धाम्नो मुक्तगम्यत्वेन हरिवंशोक्तत्वात्। द्वितीयस्कन्धेऽपि क्रममुक्तिसृतौ अष्टावरणभेदानन्तरमेव मोक्षश्रवणात् ॥५९॥ आचरताम् आचरतम् ॥६०-६२॥

गूढार्थदीपिनी

पुनश्च स्वपार्षदैः मूर्तिमद्भिः आयुधैः पुष्ट्यादिभिः शक्तिभिः अखिलर्द्धिभिः अणिमादिभिश्च नितरां सेव्यमानम्। पुनश्च परमेष्ठिनां द्विपरार्धान्ते मुक्तानां समस्तब्रह्मणां पतिम् ॥५७॥ अच्युत आत्मानं ववन्दे। जिष्णुः अर्जुनोऽपि ववन्दे। ततो भूमा सर्वेश्वरः बद्धाञ्जली तौ ऊर्जया गम्भीरया गिरा सस्मितम् आहेत्यन्वयः। कथम्भूतः। तस्य दर्शनेन जातं साध्वसं हर्षोद्रेको यस्य ॥५८॥ धर्मगुप्तये भुवि हे कलावतीर्णौ। युवयोः दिदृक्षुणा मया द्विजात्मजा उपनीताः समीपमानीताः। अतो मे मम पादभूताया अवनेः भरासुरान् भारभूतान् असुरान् हत्वा युवां त्वरया झटिति मे अन्ति मम समीपम् आगच्छतम्। 'इण धातोर्लोट्' मध्यमपुरुषद्विवचनम्। यद्वा। त्वरेर्ण्यन्तात् लिङि रूपं मित्त्वात् ह्रस्वत्वम्। कलाभिः शक्तिभिः। यद्वा। कं सुखं लाति ददातीति कला रक्षा तदर्थमवतीर्णौ। मे कलेत्यन्वयो न कार्यः अन्यथा 'कृष्णस्तु भगवान् स्वयम्' ववन्द आत्मानम् इत्यनेन च विरोधः स्यादित्यवधेयम् ॥५९॥ स्थित्यै रक्षणाय युवां धर्ममाचरतम्। इत्येव पाठः। कीदृशम्। लोकाः जनाः सङ्गृह्यन्ते प्रवर्त्यन्तेतेन तथा। ऋषभौ श्रेष्ठौ ॥६०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

कीर्तिसहिता अजा तया अखिलाभिः पूर्णस्वपाभिः ऋद्धिभिः अणिमादिमहाविभूतिभिः। परमेष्ठिनां ब्रह्मादीनाम् ॥५७॥ अच्युतः सर्वादाऽखण्डस्वपगुणविग्रहः। श्रीकृष्णः आत्मानं स्वमूर्तिभूतं भूमानम् अनन्तं च ववन्दे ननाम। यथा गोवर्धनपूजने तस्मै नमो व्रजजनैः सह चक्रेणाऽऽत्मने इति नमश्चकार तद्वत्। तद्दर्शनजातसाध्वसः उत्पन्नसम्भ्रमः जिष्णुश्च ववन्दे ॥५८॥ युवयोर्युवाम्। दिदृक्षुणा मया द्विजात्मजाः उपनीताः स्वनिकटे नीताः धर्मगुप्तये कलाभिः स्वशक्तिभिः सह भुवि अवतीर्णौ अवनेर्भरासुरान् हत्वा भूयः पुनः युवां मे अन्ति सकाशमितमागच्छतम्। असुरान् हत्वेत्युक्त्या च कतिपयासुरवधाद्गीतोपदेशाच्च पूर्वमियं लीला कृतेति गम्यते ॥५९॥ स्थित्यै लोकरक्षणार्थं धर्ममाचरताम् आचरतम् ॥६०-६२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

भगवदवलम्बा एव भगवत्स्वरूपमुक्त्वा एकाकी कदाचिद्भगवान् तत्र तिष्ठतीति शङ्कां वारयितुं सुनन्दादीन् पार्षदप्रवरान् वर्णयति-सुनन्दनन्दप्रमुखैरिति। स्वपार्षदैरनिरुद्धसेवकः एतैर्निषेव्यमाणमिति सम्बन्धः। मूर्तिधराश्चक्रादयः आधिदैविकाः—

"चक्रं शङ्खस्तथा खड्गः चर्म शार्ङ्गं गदा तथा। बाणः पद्मं तथान्यानि मुशलाद्यायुधानि हि॥
मूर्तिमन्तो हरेः पार्श्वे तिष्ठन्ति परितः सदा॥"

निजायुधान्यनिरुद्धायुधानि ततः पुष्ट्यादिशक्तयश्चतस्रोऽनिरुद्धस्य वर्ण्यन्ते। पुष्टिः श्रीः कीर्तिः अजाप्रकृतिरिति अखिलाश्च ऋद्धयः धनधान्यादिसम्पत्तीनामाधिदैविकरूपाणि। तैः सर्वैरेव निषेव्यमाणं एतावतापि साधारणमेवैश्वर्यमायातीति असाधारणब्रह्माण्डकोट्यैश्वर्यार्थमाह-परमेष्ठिनां पतिः एकैकस्य ब्राह्मण्डस्यैकैकः परमेष्ठी तादृशानां सहस्राणां पतिः ॥५७॥ तादृशं स्वांशस्य मूलभूतं दृष्ट्वा भगवता लोकशिक्षार्थं यत् कृतं तदाह-ववन्द इति। आत्मानमेव भगवान् कृष्णो ववन्दे। ननु मूर्तिभेदस्य प्रत्यक्षतो दर्शनात् कथमात्मत्वमत आह-अनन्तमिति। अनन्तमूर्तिर्भगवान् एक इत्यर्थः। तर्हि खण्डशोऽनन्ता स्यादत आह-अच्युत इति। स्वपात् केनापि प्रकारेण न च्युतः। जिष्णुरर्जुनश्च भगवद्दर्शनेन जातसाध्वसः ववन्द इति सम्बन्धः। चकारात्तस्यापि भगवानात्मा। ततो भगवान् अनिरुद्धः किंचिदुक्तवानित्याह-तावाहेति। भूमा यो वै वाचो भूमा तं न्यर्बुदमित्यत्र वाक्सम्बन्धिनं भूमानमुद्दिश्य न्यर्बुदत्वं विधीयते। अनिरुद्धो हि मानसः पुरुष इति शब्दात्मकत्वं तस्य सिद्धमिति अनिरुद्धमिति। अनिरुद्धस्य प्रभुत्वमिति परमेष्ठिनां प्रभुरिति ब्रह्माण्डे समागच्छति तं प्रति तस्याज्ञा चलतीति पुत्राणां नयने निर्भयतया तथा कथने च हेतुरुक्तः। बद्धाञ्जली कृष्णार्जुनौ अर्जुनं वञ्चयितुं भगवानपि तथा नाट्यं करोति। अत एव कृष्णो भूमा च सर्वथैक इति अर्जुनाहङ्कारभङ्गार्थमेव निरोधमध्यापयत्। प्रपञ्चविस्मृत्यर्थं तथा करोतीति सूचितम्। ऊर्जया गिरा लोकसिद्धवाक्यापेक्षयापि महत्या यथाकथञ्चित् कौतुकं

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

वक्तव्यमिति किञ्चिदाह-द्विजात्मजानिति सन्धिरार्षः। अर्जुनं प्रति सम्बोधनं वा अदीर्घदर्शिनं ज्ञापयितुं व्यामुख्यायनत्वात् परम्परया व्यासात्मजत्वाच्च द्विजशब्दस्य च ब्राह्मणपरत्वेऽपि न दोषः। युवयोर्दिदृक्षुणेति प्रयोजनं तयोर्महत्त्वात् साक्षादाकर्षणं न सम्भवति अतो द्विजात्मजा एव मया समानीताः। अनु आवां कौ किमर्थं वा तव दिदृक्षा तत्राह-द्विजधर्मगुप्तये इति एको द्विजगुप्तये अपरो धर्मगुप्तय इति उभयमुभयत्र वा अनिरुद्धस्य धर्मरक्षा प्रयोजनमिति द्विजैः स्वभावत एव धर्मः कर्तव्यः। तत्रावयोः किं कर्तव्यमिति चेत्तत्राह-भूमेर्भाररूपान् असुरान् हत्वेति त्वरया इहैतम् आगच्छन्तं मे मम अन्ति समीपे अनेनेदानीं स्थितिर्निषिद्धा ॥५८-५९॥ न केवलं धर्मरक्षैव कर्तव्या अपि तु धर्मः प्रवर्तनीय इत्याह-पूर्णकामाविति। स्वतो धर्मप्रयोजनाभावेऽपि करणावश्यकत्वाय पूर्णकामत्वं धर्मकरणसामर्थ्ये निःस्पृहत्वे च हेतुः नरनारायणावृषीति। तथापि 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति प्रयोजनं वक्तव्यमिति चेत्तत्राह-स्थितावनिरुद्धः पालक इति जगतः स्थित्यर्थं धर्मकरणम्। ननु नारायणेनैव स्थितिः सम्पाद्यते इति भूभारहरणार्थमेव समागतयोः किं धर्मेणेत्यत आह-लोकसङ्ग्रहमिति ॥६०॥

श्रीसुबोधिनीसारः

सुनन्दनन्दमुख्यैः स्वपार्षदैः मूर्तिमद्भिः स्वायुधैः सुदर्शनादिभिः पुष्ट्या श्रिया कीर्तिसहितयाऽजया माययाऽखिलर्द्धिभिरणिमादिविभूतिभिः निषेव्यमाणं परमेष्ठिनां ब्रह्मादीनां पतिम् ॥५७॥ अनन्तमात्मानं कृताञ्जली तौ कृष्णार्जुनौ सर्वेश्वरो भूमाहमस्मितं यथा स्यात्तथा शुभवाण्या ॥५८॥ युवयोर्द्रष्टुमिच्छुना मया द्विजस्यात्मजाः पुत्रा इहानीताः। हे कलावतीर्णौ भुवि भूमौ धर्मरक्षार्थम् अवनेर्भारभूतान् असुरान् हत्वा भूयः पुनर्मेऽन्ति समीपं त्वरया शीघ्रं युवामीतम् आगच्छतम् ॥५९॥ आप्तकामौ नरनारायणौ ऋषी युवाम् ऋषभौ श्रेष्ठौ स्थित्यर्थं लोकसङ्ग्रहं धर्ममाचरताम् ॥६०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सुनन्दादिभिः स्वपार्षदैः तथा मूर्तिमद्भिश्चक्रादिभिर्निजायुधैश्च तथा मूर्तिमतीभिः पुष्ट्यादिभिः शक्तिभिश्च निषेव्यमाणं परमेष्ठिनां ब्रह्मादीनां पतिं ददर्श। कीर्त्यजया कीर्तिसहितया अजया मायया अखिलर्द्धिभिरणिमादिविभूतिभिः ॥५७॥ तमजं जन्मादिविकारशून्यमात्मानं स्वस्यैव मूर्त्यन्तरमच्युतः श्रीकृष्णो ववन्दे ननाम, तथा तस्य दर्शनेन जातं साध्वसं सम्भ्रमो यस्य सः जिष्णुरर्जुनश्च तं ननाम। ततो बद्धाञ्जली तौ कृष्णार्जुनौ प्रति परमेष्ठिनां प्रभुर्भूमा पुरुषः ऊर्जितया गम्भीरया गिरा प्राह ॥५८॥ तदुक्तिमेवाह-द्विजात्मजा इति। युवयोर्युवां द्रष्टुमिच्छुना मया द्विजात्मजा उपनीताः स्वसमीपमानीताः। कथमावयोर्दिदृक्षा तत्राह-धर्मस्य गुप्तये यतो युवां मे कलयावतीर्णाविति। अर्जुनवञ्चनार्थं यथा भगवांस्तं ननाम तथा सोऽपि छत्रिन्यायेन कलावतीर्णावित्युक्तवान्, वस्तुतस्तु कृष्णः पूर्ण एवात्मेत्युक्तत्वात्। अतो धर्मरक्षार्थं अवनेर्भारभूतान् असुरान् हत्वा त्वरया झटिति मे अन्ति मम समीपमिह इतम् आगच्छतम् ॥५९॥ युवां पूर्णकामावपि स्थित्यै जगतो रक्षार्थं धर्ममाचरताम् आचरतम्। पूर्णकामत्वे हेतुमाह-नरनारायणाविति। धर्मानुष्ठानेन कथं जगद्रक्षा स्यात् इत्याशङ्क्याह-लोकसङ्ग्रहमिति। लोका जनाः सङ्गृह्यन्ते धर्मे प्रवर्त्यन्तेऽनेनेति तथा तम्। ननु आवयोरनुष्ठानेन कथं लोकसङ्ग्रहः इत्याशङ्क्य 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति वचनाद्युवयोः श्रुष्ठत्वादित्याह-ऋषभाविति ॥६०॥

अन्वितार्थप्रकाशिका

सुनन्देति ॥ सुनन्दादिभिः स्वपार्षदैः तथा मूर्तिमद्भिश्चक्रादिभिर्निजायुधैश्च तथा मूर्तिमतीभिः कीर्तिसहितया अजया मायया अखिलर्द्धिभिरणिमादिविभूतिभिः शक्तिभिश्च निषेव्यमाणं परमेष्ठिनां द्विपरार्धान्ते मुक्तानां ब्राह्मणानां पतिं विभुं ददर्श ॥५७॥ ववन्द इति ॥ तमजं जन्मादिविकारशून्यमात्मानं स्वस्यैव मूर्त्यन्तरमच्युतः श्रीकृष्णो ववन्दे ननाम। तथा तस्य दर्शनेन जातं साध्वसं सम्भ्रमो यस्य सः जिष्णुरर्जुनश्च तं ननाम। ततो बद्धाञ्जली तौ कृष्णार्जुनौ प्रति परमेष्ठिनां प्रभुर्भूमा पुरुषः ऊर्जया गम्भीरया गिरा आह स्म। अत्र गोवर्धनपूजायां "**तस्मै व्रजजनैः सहचक्रेत्मनात्मने।**" इति वल्लीलाकौतुकमात्रार्थमेव ॥५८॥

अन्वितार्थप्रकाशिका

द्विजेति । युवयोर्युवां दिदृक्षुणा द्रष्टुमिच्छता मया द्विजात्मजा उपनीताः स्वसमीपमानीताः । यतो धर्मस्य गुप्तये युवां मे कलयावतीर्णाविति अर्जुनवञ्चनार्थं यथा भगवांस्तं ननाम तथा सोऽपि छत्रिन्यायेन कलावतीर्णावित्युक्तवान् । अतो धर्मरक्षार्थं अवनेर्भारभूतान् असुरान् हत्वा त्वरया झटिति मे अन्ति मम समीपमिह इतम् आगच्छतम् । वार्तवोऽर्थस्तु हे कलावतीर्णौ कलाभिः स्वशक्तिभिः सहैवावतीर्णौ ! भूयः पुनरपि युवाम् अवनेर्भरान् अवनेर्भारभूतान् असुरान् हत्वा मे अन्ति ममान्तिकं तान् प्रस्थापयितुं त्वरयेतम् । त्वरेर्ण्यन्ताल्लिङि रूपं मित्त्वात् ह्रस्वत्वम् । अन्तीत्यव्ययं 'क्रियार्थोपपदस्य' इति चतुर्थ्यन्तम् अव्ययत्वाच्चतुर्थ्या लुक् । अत्रागत्य ते मुक्ता भवन्त्विति तधाम्नो मुक्तगम्यत्वेन हरिवंशोक्तत्वात् । द्वितीयस्कन्धेऽपि क्रममुक्तौ अष्टावरणभेदानन्तरमेव मोक्षश्रवणात् ॥५९॥ पूर्णेति ॥ ऋषभौ श्रेष्ठौ नरनारायणावृषी युवां पूर्णकामावपि स्थित्यै जगतो रक्षार्थं लोका जनाः सङ्गृह्यन्ते धर्मे प्रवर्त्यन्तेऽनेन तथा तं धर्ममाचरताम् । प्रथमपुरुष आर्षः । आचरतमित्यपि पाठः । इदं भारतयुद्धात्पूर्वं कृतमपि श्रैष्ठ्यकथनप्रस्तावेनात्रोक्तम् ॥६०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्रिया शोभया कीर्त्यजया कीर्तिसहितया अजया महामायया अखिलर्द्धिभिः अणिमादिसिद्धिभिः निषेव्यमाणम् ॥५७॥ अच्युतः ॥ अक्षरधामनिवासी पुरुषोत्तमोत्तमः ॥ श्रीकृष्णः आत्मानं स्वावतारभूतमजं भूमानं पुरुषं ववन्दे मनुष्यदेहधृतत्वाद्विनयेन नमश्चकार । जिष्णुरर्जुनश्च तस्य भूम्नः पुरुषस्य दर्शनेन जातसाध्वसः ॥ सन् ववन्दे परमेष्ठिनां ब्रह्मादिदेवानां प्रभुः ॥ भूमा पुरुषः बद्धाञ्जलिः ॥ सन् सस्मितं यथा भवति तथा ऊर्जया अतिनम्रत्वेन प्रकाशमानया गिरा तौ श्रीकृष्णार्जुनौ आह ॥५८॥ युवयोः युवां दिदृक्षुणा द्रष्टुमिच्छुना मया द्विजात्मजाः उपनीता इहानीताः एवं हरिवंशेऽप्यर्जुनं प्रति श्रीकृष्णस्योक्तिः "मद्दर्शनार्थं ते बाला हृतास्तेन महात्मने"ति भुवि धर्मस्य एकान्तिकधर्मस्य गुप्तये रक्षणाय संस्थापनायेति यावत् कृपावतीर्णौ जनोपरि परमकृपया अवतीर्णौ भरतखण्डे प्रादुर्भूतौ युवाम् ॥ अवनेर्भारभूतान् असुरान् हत्वा सर्वोपरि राजथः हत्वेह भूयस्त्वरयेतमन्ति मे इति पाठे तु भूयः पुनरपि अवशिष्टान् भूमेर्भारभूतान् हत्वा मे अन्ति समीपायतात् मत्समीपं प्रापयितुं त्वरयेतं त्वरयतं त्वरतेर्हेतुमण्णिजन्ताल्लिङ् । शीघ्रं तान् । अक्षरपुरुषस्य मम तेजः ॥ प्रापयतमित्यर्थः ॥ अन्तिरत्यव्ययातत्क्रियार्थोपपदस्य च कर्मणि स्थानिन इति सूत्रेण क्रियार्थायां क्रियायां विहितायाश्चतुर्थ्या लुक् ॥५९-६०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ववन्द इति ॥ अच्युतोऽक्षरधामाधिपतिः स्वयं श्रीकृष्णः आत्मानं स्वावतारत्वात् स्वस्मादनन्यम् अजं तं भूमभगवते ववन्दे ननाम । तथा तस्य भूमभगवतो दर्शनेन जातं साध्वसं भक्तिपूर्वं भयं यस्य तथाभूतः जिष्णुरर्जुनश्च ववन्दे । तदा परमेष्ठिनां ब्रह्मादीनां प्रभुः भूमा, बद्धाञ्जलिः सन् सस्मितं यथा तथा ऊर्जया अतिनम्रीभावेन प्रकाशमानया ।गिरा वाचा तौ श्रीकृष्णार्जुनौ प्रति आह । केचित्तु भगवतः श्रीकृष्णस्य नृत्यनाट्यशोभां सम्भावयितुं बद्धाञ्जली इति कृष्णार्जुनयोर्विशेषणं कुर्वन्ति ॥५७॥ उक्तिमेवाह द्वाभ्याम् ॥ द्विजात्मजा इति ॥ युवयोर्युवां दिदृक्षुणा द्रष्टुमिच्छता मया द्विजात्मजाः उपनीता मदन्तिकं प्रापिताः वै। परमेश्वरस्य भवतः किमावयोर्दर्शनेनेत्यत आह । भुवि धर्मगुप्तये धर्मं रक्षितुं त्वरया कलावतीर्णौ कलया ज्ञानपूर्णांशेन अवतीर्णौ स्तः । 'कल गतौ सङ्ख्याने च' इति धातोः पचाद्यच् गत्यर्थत्वात् ज्ञानार्थत्वम् । अतः अवनेः भरासुरान् भारभूतानसुरान् हत्वा, स्वधामव्रजनकाले इति शेषः । इह मत्स्थाने भूयः पुनरपि मह्यं दर्शनं दातुमिति शेषः । मे मम अन्ति मदन्तिकम् इतमागच्छतम्। उपक्रमे कृष्णस्य पूर्णावतारत्वोक्तेरेवं व्याख्यातम् । वाल्मीकीये रामायणे उत्तरकाण्डे त्रिपञ्चाशत्तमे सर्गे द्वाविंशे श्लोके नृगनृपशापप्रदविप्रयोर्वाक्ये —

> 'भरावतरणार्थं हि नरनारायणावुभौ । उत्पत्स्येते महावीर्यौ कलौ युग उपस्थिते ॥' इति ।

कलियुगेऽपि तत्प्रादुर्भावे प्रमाणम् । तदा कलावतीर्णावित्यस्येत्थं व्याख्या । कलौ अतीर्णौ इति च्छेदः । कलौ कलियुगे

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अतीर्णौ एतदवतारसदृशावेव प्रादुर्भूतौ इह नञर्थः सादृश्यम् । अन्यत्समानम् ॥५८॥ ननु तौ तु नरनारायणौ नावां तत्राहुः ॥ पूर्णकामाविति ॥ ऋषभौ सर्वोत्तमौ पुरुषोत्तमत्वात् पूर्णकामौ अपि छत्रिन्यायेनार्जुनस्यापि पूर्णकामत्वम् । युवाम् ऋषी ऋष्याकृतिधरौ नरनारायणौ आत्मसात् कृत्वेति शेषः । स्थित्यै जगद्रक्षणार्थं लोकोऽर्वाचीनो जनः सङ्गृह्यते प्रवर्त्यतेऽनेनेति लोकसङ्ग्रहं लोकसङ्ग्रहो यथा भवति तथेत्यर्थः । धर्मम् आचेरतुः । ननु —

'धर्मपुत्रौ हरेरंशौ नरनारायणाभिधौ । चन्द्रवंशमनुप्राप्य जातौ कृष्णार्जुनावुभौ ॥' इति ।

स्कान्दोक्तेः —

'ताविमौ वै भगवतो हरेरंशाविहागतौ । भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥' इति चतुर्थस्कन्धेऽत्रैवोक्तेश्च कथमत्रान्यथा व्याख्यानमिति चेल्लघुभागवतामृते कृष्णस्यैव पूर्णावतारसिद्ध्यर्थं कृष्णार्जुनौ कर्तारौ, धर्मपुत्रौ नरनारायणौ कर्मणी, प्राप्यात्मसात्कृत्य चन्द्रवयंशमनुजातौ स्वयं भगवत्यवतीर्णे तदंशास्तस्मिन् प्रविशन्तीति निर्णयात् । इति स्कान्दश्लोकार्थः । हरेः पुरुषोत्तमस्य कृष्णस्य अंशौ नरनारायणौ इह भूर्लोके आगतौ तौ हरेरंशौ नरनारायणौ कर्तारौ द्वापरान्ते इह आगतौ कृष्णौ प्रविष्टौ वासुदेवे नारायणः अर्जुने तु नरः प्राविशत् इत्यर्थः कृतोऽस्ति तेन च 'कृष्णस्तु भगवान् स्वयम्' इति यथार्थतामापन्नम् ॥५९॥ इतीति ॥ परमेष्ठिना भगवता इतीत्थम् आदिष्टौ तौ कृष्णौ ओमिति तदाज्ञामङ्गीकृत्य भूमानम् आनम्य प्रणम्य द्विजदारकान् आदाय ॥६०॥

कृष्णप्रिया

अर्जुनने देखा कि उनके नन्द सुनन्द आदि अपने पार्षद चक्र सुदर्शन आदि अपने मूर्तिमान आयुध तथा पुष्टि, श्री, कीर्ति और अजा ये चारों शक्तियां एवं सम्पूर्ण ऋद्धियां ब्रह्मादि लोकपालों के अधीश्वर भगवान की सेवा कर रही है ।।५७।। भगवान श्रीकृष्णने अपने ही स्वरूप श्रीअनन्त भगवान को प्रणाम किया । अर्जु उनके दर्शनसे कुछ भयभीत हो गये थे । श्रीकृष्ण के बाद उन्होंने भी उनको प्रणाम किया और वे दोनों हाथ जोडकर खडे हो गये । अब ब्रह्मादिलोकपालों के स्वामि थूमा पुरुषने स्मितपूर्वक मधुर एवं गम्भीर वाणी से कहा ।।५८।। हे श्रीकृष्ण, हे अर्जुन ! आप दोनों को देखने के लिये ही मैनं ब्राह्मण बालक को अपनी पास लाया हूं । तुम दोनों ने धर्म की रक्षा के लिये मेरी कलाओं के साथ पृथ्वी पर अवतार ग्रहण किया है । पृथ्वी के भाररूप दैत्यों का संहार करके शीघ्र तुम मेरे पास लौट आओ ।।५९।। तुम दोनों ऋषिवर नर और नारायण हो । यद्यपि तुम पूर्णकाम और सर्वश्रेष्ठ हो, फिर भी जगत् की स्थिति और लोकसंग्रह के लिये धर्म का आचरण करो ।।६०।।

इत्यादिष्टौ भगवता तौ कृष्णौ [1]परमेष्ठिना । ओमित्यानम्[2] भूमानमादाय द्विजदारकान् ॥६१॥
न्यवर्ततां स्वकं धाम सम्प्रहृष्टौ यथागतम् । विप्राय ददतुः पुत्रान् [3]यथास्वं यथा प्रभू ॥६२॥
निशाम्य वैष्णवं धाम पार्थः परमविस्मितः । यत्किंचित् पौरुषं पुंसां मेने कृष्णानुकम्पितम् ॥६३॥
[4]इतीदृशान्यनेकानि वीर्याणीह प्रदर्शयन् । बुभुजे विषयान् ग्राम्यानीजे चात्यूर्जितैर्मखैः ॥६४॥

---

१. नौ-गो. प्रे. टी. । २. त्यानन्दभूमान-विज. । ३. यथारूपं यथावयः-श्रीधर. वंशी. ; यथारूपांस्तदा प्रभू-विज. ; यथारूपं सूयतां-वीर. ; यथारूपं तथा प्रभू-गो. प्रे. टी. । ४. चत्वारः श्लोका अत्र अधिकाः ते च विजयध्वजीयटीकायां कुण्डले लिखिताः व्याख्याताश्च व द्रष्टव्याः । तथा एतदादिश्लोकत्रयं नास्ति-विज. ।

कर्दमक्षमा

परमेष्ठिना, भगवता, इति, आदिष्टौ, तौ, कृष्णौ, ओम्, इति, भूमानम्, आनम्य, द्विजदारकान्, आदाय, सम्प्रहृष्टौ, यथा, आगतम्, स्वकम्, धाम, न्यवर्तताम्, यथा, प्रभू, यथारूपम्, विप्राय, पुत्रान्, ददतुः ॥६१-६२॥ वैष्णवं, धाम, निशाम्य, पार्थः, परमविस्मितः, यत्, किञ्चित्, पुंसाम्, पौरुषम्, कृष्णानुकम्पितम्, मेने ॥६३॥ इति, ईदृशानि, अनेकानि, वीर्याणि, इह, प्रदर्शयन्, ग्राम्यान्, विषयान्, बुभुजे, अत्यूर्जितैः, मखैः, ईजे, च ॥६४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ॥६०-६६॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इतीत्थम् । आदिष्टावाज्ञप्तौ । द्विजपुत्रानादाय स्वकं धाम न्यवर्ततामिति द्वयोः सम्बन्धः ॥।★॥ इतीत्यर्धकम् । इति पूर्वोक्तप्रकारेण गोवर्धनमखवल्लीलाविशेषसम्पादनाभिप्रायेण आदिष्टौ आदिष्टावादिमुद्रयोक्तौ तत्र भगवदादिशब्दः स्पष्टैश्वर्यादिव्यपेक्षया । कृष्णशब्दश्च स्वयं भगवति 'कृषिर्भूवाचकः शब्द' इत्यादिप्रामाण्येन परब्रह्मत्वापेक्षया । श्रीमदर्जुनेऽपि तत्सनामत्वेन निर्देशः । पूर्ववत्समशीलत्वापेक्षया उभयत्र तादृशत्वेऽपि नराकृतिपरब्रह्मेत्यादिप्रसिद्ध्या नरलीलावित्यर्थः ॥६१॥ इत्यादिष्टावित्यारभ्य यथावय इत्यन्ते द्वे पद्ये सन्तत्यर्थं सपादनियुते जप्ये तेनावश्यं सन्ततिलाभ इति, लिखित्वा धारणादपीति मन्त्रशास्त्रादवसेयम् ।

अस्य श्लोकद्वयात्मकमन्त्रस्य व्यास ऋषिः । कृष्णो देवताऽनुष्टुप् छन्दः । सन्तत्यवाप्तये जपे विनियोगः । ध्यानं तु -

"विजयेन युतो रथास्तितः प्रसमानीय समुद्रमध्यतः । अददत्तनयान्द्विजन्मने स्मरणीयो वसुदेवनन्दनः ॥"

जपश्च - स्मरबीजसम्पुटितः कार्यः जीवपुत्रकमालया ।

"जीवपुत्रस्य बीजैश्च दशांशं होममाचरेत् । अस्य धारणमपि स्त्रिया कार्यं वामभुजे इति" ॥

॥★॥ स्वकं धामेति । यथा तस्य तन्नित्यं धाम तथास्य च द्वारकाख्यमिति भावः । वक्ष्यते ह्येकादशान्ते-नित्यं सन्निहितस्तत्र भगवान्मधुसूदन इति । सम्प्रहृष्टावित्यर्जुनस्याभीष्टसिद्धेः श्रीभगवतस्तु तत एवेति तथागतमिति पूर्वव्युत्क्रमेण ज्योतिरादिभेदक्रमादित्यर्थः ॥६१॥ विप्रायेत्यर्धकम् । यथारूपं तत्पित्रादिदृष्टरूपानतिक्रमेणेत्यर्थः । तत्र योग्यतामाह-प्रभू दुर्घटघटनासमर्थौ इत्यर्जुनस्यापि तादृशत्वं व्यक्तम् ॥६२॥ ॥०॥ ॥★॥ एतच्चरितस्य फलितमाह-वैष्णवं धाम महाकालपुराख्यं तदीयपुरं तदीयप्रभावं वा निशाम्य (निशाम्येति पाठः प्राचीनः ।) दृष्ट्वा परमविस्मितोऽपि पुंसा सर्वेषामेव जीवानाम् ईश्वरः प्रादुर्भावनां च यत् किञ्चित्पौरुषं शक्तिस्तत्कृष्णस्यैव अनुकम्पितं कृपासम्पादितं मेने । तादृशेनापि तेन तस्यावसरप्रार्थनात् स्वस्य च 'द्विजात्मजा मे युवयोर्दिदृक्षुणा' इत्यादिद्वयेन तादृशतयोक्तेः । यद्वा-पूर्वोक्तप्रकारेण तत्पर्यन्तव्यापकतया विष्णुः कृष्णस्तस्य धाम प्रभावं तद्गतं स्वगतं च निशम्य 'द्विजात्मजा मे युवयोर्दिदृक्षुणा' इत्यादिना तन्मुखाच्छ्रुत्वेत्यादि हरिवंशेऽप्यर्जुने तत्तत्त्वं पृष्टवति श्रीकृष्णं सर्वं तन्महापुरुषपर्यन्तं स्वस्यैव वैभवतया ज्ञापितवानिति तत्रैव दृश्यम्, तदेतद्व्याख्याकारणं मूलम् 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्' इत्येव प्रथमस्कन्धतृतीयाध्याये सर्वभगवदाविर्भावसूत्ररूपे तत्परिभाषारूपत्वात् सूत्र्यते । विवरणीयार्थः सङ्क्षेपेण दर्श्यते येन तद्धि सूत्रम् । तत्र चानियमे नियमकारिणी परिभाषा । शास्त्रारम्भे सकृदेव पश्यमाना सर्वमेव व्याप्नोति तस्मात्तदधीनान्येवैतदाख्यानवाक्यान्यपि तथा श्रीभगवतस्तस्य सर्वदेवेतिहाससारभूतत्वादन्यशास्त्रवृन्दान्यपि प्रतिज्ञावाक्यमात्रस्यान्यत्रापि सर्वोपमर्दकत्वं दृश्यते । यथा आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीतत्यादिवाक्यमाकाशादीनामुत्पत्तिवाक्यमन्यथयति । किञ्च श्रुतिलिङ्गवाक्यस्थानप्रकरणसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षादिति पूर्वमीमांसानिर्णयः । श्रुत्यादिबलीयस्त्वाच्च न बाधेत्युत्तरमीमांसासम्मतिश्च तत्र साक्षाच्छब्देनोपदेशः श्रुतिः । यथा एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति । अन्यानि तु श्रीकृष्णसन्दर्भे विवृतानि तेषां परपरं ुर्बलम् अर्थस्य दूरदूरप्रतीतेरिति सर्वश्रीभगवतोपदेशप्रवृत्तस्य भगवतः श्रीसूतस्य सर्वनिर्णयार्थं साक्षात्स्वयं भगवच्छब्देनोपदेशोऽयं सर्वतो बतावानेवेति इत्थमेव सर्वत्रैव तैरिदमेव वाक्यं प्रमाणीक्रियते । लीलायां च नानाकौतुकिनः श्रीभगवतो लाघवदर्शनं न तत्प्रमापकम् । गोवर्धनबलिभुक्परेऽपि नारदादावपि लघुतया व्यवहारादिति च

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

स्थिते साध्वेवोपन्यस्तम्। इत्थमुक्तं श्रीविष्णोरुत्कर्षः स्वयं भगवति श्रीकृष्ण एव पर्यवस्यतीति तथैव हि तेषामप्युपन्यासः सङ्गच्छते। स चोक्तलक्षणो भगवान् श्रीकृष्ण एवेति दिक्॥★॥ अत्र विश्वनाथः :- परमविस्मित इति प्रथममात्यन्तिकमहैश्वर्यदर्शनेनाहो तावदहं पाण्डुपुत्रो मर्त्योऽपि कृष्णप्रसादादेव सर्वमूलभूतं परमेश्वरमिममपश्यमिति विस्मितः यतः क्षणं परामृश्याहो तेन कथं युवयोर्दिदृक्षुणेत्युक्तम्। सर्वादिपरमेश्वरस्य तस्य स्वांशे कृष्णे दिदृक्षा कथं सम्भवेत्। सम्भवतु वा सा कदाचित् किन्तु दिदृक्षतेत्यनुक्त्वा दिदृक्षुणेति ताच्छील्यप्रत्ययेन दिदृक्षायाः सार्वदिकत्वं बुध्यते। भवतु वा सार्वदिकी दिदृक्षा द्वारकास्थं कृष्णं विभुत्वात् स्वसृज्यविश्वस्य करामलकतुल्यत्वाच्च तत्र स्थित्यैव कथं न पश्यति, मास्तु वा विभुत्वं विप्रापत्याहरणार्थं प्रतिवर्षं द्वारकां गच्छत्येव तत्रैत्य तैलिकताम्बूलकादिभिः परिदृश्यमानं कृष्णं कथं न पश्यति। कृष्णस्येच्छां विना कृष्णदर्शनं न भवेदिति चेन्मास्तु कृष्णदर्शनम्, ब्रह्मण्यदेवो भूत्वापि ब्राह्मणं प्रतिवर्षं कथं दुःखयति, तन्मन्ये कृष्णदर्शनौत्कण्ठ्यं त्यक्तुमपि न शक्नोति। यदर्थमकृत्यमपि कुरुते, करोत्वकृत्यमपि तदर्थं किन्तु विप्रापत्याहरणार्थं कमपि सेवकं किं न प्रहिणोति स्वयं कथं याति। तन्मन्ये द्वारकातस्तदाहरणमप्यन्यैर्दुःशकं तस्मात् कृष्णनगरस्थं विप्रं तथा दुःखयामि यथा तद्दुःखं सोढुमसमर्थः कृष्णो मह्यं दर्शनं दास्यतीति तदभिप्रायोऽवगम्यते। अत एवान्तर्यामिरूपेण तेनैव प्रेरितो मुखरो विप्रः कृष्णसन्निधावेवागत्य प्रतिबालकनाशान्ते तां गाथां गायति। तस्मात् ततोऽप्यस्य कृष्णस्यैव पारमैश्वर्यमधिकमनुमीयत इति विभाव्य परमविस्मितः ततश्च कृष्णमेव पृष्ट्वा तत्त्वमत्रावधारयामिति विमृश्यार्जुनेन पृष्टे सति कृष्णेनोक्तं यथा हरिवंशे —

> मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना। विप्रार्थमेष्यते कृष्णो मत्समीपं न चान्यथेति॥

मया तु विप्रार्थमपि न गतं तत्समीपं किन्तु सख्युस्तव प्राणरक्षार्थमेव यदि विप्रार्थमहमगमिष्यंस्तदा प्रथमबालहरणानन्तरमेव खल्वगमिष्यम्। नवमे बाले हते सत्येव यस्मादगमम्। तस्मान्न तस्यानुरोधात् किन्तु त्वदनुरोधादेवेति सर्वं तत्त्वं कृष्णमुखात् श्रुत्वाऽर्जुनो यत् किञ्चित् पौरुषं पुंसां परव्योमनाथपर्यन्तानामापि पुरुषाणां तत्सर्वं कृष्णानुकम्पितं कृष्णानुकम्पासम्पादितमेव मेने। इत्येवं वेदस्तवमारभ्यैव तत्कथापर्यन्तमत्र दशमस्कन्धान्ते दशमस्याश्रयत्वस्य कृष्णस्यैव सर्वोत्कर्षविवरणमभूदिति ज्ञेयम्॥६३॥ अथ श्रीकृष्णकर्मणामानन्त्यमाह-इतीति। नरलोकविडम्बनमाह-बुभुज इति। अत्यूर्जितैरन्येन कर्तुमशक्यैर्मखैरश्वमेधादिभिः ॥★॥ तथैतत्प्रसङ्गेनान्यान्यपि तच्चरितानि स्मृत्वा सास्रगद्गदमाह-तानि च सर्वाणि विवक्षन्नपि श्रीपरीक्षिदायूःस्वतापतासङ्कोचेन सदुःखमुपसंहरन्नेव चाह-इतीति त्रिभिः। इति पूर्वोक्तप्रकारेण। ईदृशानि पूर्वोक्ततुल्यानि वीर्याणि अद्भुतकर्माणि इह लोके प्रकर्षेण दर्शयन् प्रकटयन्नपि लीलया ग्राम्यान् लौकिकानपि सर्वान् विषयान् बुभुजे। ईजे च अत्यूर्जितैर्महासंविधानसम्पन्नैः॥६४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इतीति सार्धकम्। इति पूर्वोक्तप्रकारेण गोवर्धनमखवल्लीलाविशेषसम्पादनाभिप्रायेण आदिष्टौ आदिष्टावादिमुद्रयोक्तौ तत्र भगवदादिशब्दः स्पष्टैश्वर्यादिव्यपेक्षया। कृष्णशब्दश्च स्वयं भगवति कृषिर्भूवाचकः शब्द इत्यादिप्रामाण्येन परब्रह्मत्वापेक्षया श्रीमदर्जुनेऽपि तत्सनामत्वेन निर्देशः। पूर्ववत्समशीलत्वापेक्षया उभयत्र तादृशत्वेऽपि नराकृतिपरब्रह्मेत्यादिप्रसिद्ध्या नरलीलावित्यर्थः।स्वकं धामेति यथा तस्य तन्नित्यं धाम तथास्य च द्वारकाख्यमिति भावः। वक्ष्यते ह्येकादशान्ते-नित्यं सन्निहितस्तत्र भगवान्मधुसूदन इति। सम्प्रहृष्टावित्यर्जुनस्याभीष्टसिद्धेः श्रीभगवतस्तु तत एवेति तथागतमिति पूर्वव्युत्क्रमेण ज्योतिरादिभेदक्रमादित्यर्थः॥६१॥ विप्रायेत्यर्धकम्। यथारूपं तत्पित्रादिदृष्टरूपानतिक्रमेणेत्यर्थः। तत्र योग्यतामाह-प्रभू दुर्घटघटनासमर्थौ इत्यर्जुनस्यापि तादृशत्वं व्यक्तम्॥६२॥ भगवान् स्वमित्येव प्रथमस्कन्धतृतीयाध्याये सर्वभगवदाविर्भावस्वरूपे तस्य परिभाषारूपत्वात् सूत्र्यते विवरणीयार्थः सङ्क्षेपेण दर्श्यते येन तद्धि सूत्रम्। तत्र चानियमे नियमकारिणी परिभाषा। शास्त्रारम्भे सकृदेव पश्यमाना सर्वमेव व्याप्नोति तस्मात्तदधीनान्येवैतदाख्यानवाक्यान्यपि तथा श्रीभगवतस्तस्य सर्ववेदेतिहाससारभूतत्वादन्यशास्त्रवृन्दान्यपि प्रतिज्ञावाक्यमात्रस्यान्यत्रापि सर्वोपमर्दकत्वं दृश्यते। यथा आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीतत्यादिवाक्यमाकाशादीनामुत्पत्तिवाक्यमन्यथयति। किञ्च श्रुतिलिङ्गवाक्यस्थानप्रकरणसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षादिति पूर्वमीमांसानिर्णयः।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

श्रुत्यादिबलीयस्त्वाच्च न बाधेत्युत्तरमीमांसासम्मतिश्च तत्र साक्षाच्छब्देनोपदेशः श्रुतिः । यथा एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति । अन्यानि तु श्रीकृष्णसन्दर्भे विवृतानि तेषां परपरं् बलम् अर्थस्य दूरदूरप्रतीतेरिति सर्वश्रीभगवतोपदेशप्रवृत्तस्य भगवतः श्रीसूतस्य सर्वनिर्णयार्थं साक्षात्स्वयं भगवच्छब्देनोपदेशोऽयं सर्वतो बतावानेवेति इत्थमेव सर्वत्रैव तैरिदमेव वाक्यं प्रमाणीक्रियते । लीलायां च नानाकौतुकिनः श्रीभगवतो लाघवदर्शनं न तत्प्रमापकम् । गोवर्धनबलिभुक्परेऽपि नारदादावपि लघुतया व्यवहारादिति च स्थिते साध्वेवोपन्यस्तम् । इत्थमुक्तं श्रीविष्णोरुत्कर्षः स्वयं भगवति श्रीकृष्ण एव पर्यवस्यतीति तथैव हि तेषामप्युपन्यासः सङ्गच्छते । स चोक्तलक्षणो भगवान् श्रीकृष्ण एवेति दिक् ॥६३॥ अथैतत्प्रसङ्गेनान्यान्यपि तच्चरितानि स्मृत्वा सास्रगद्गदमाह-तानि च सर्वाणि विवक्षन्नपि श्रीपरीक्षिदायूःस्वतापतासङ्कोचेन सदुःखमुपसंहरन्नेव चाह-इतीति त्रिभिः । इति पूर्वोक्तप्रकारेण ईदृशानि पूर्वोक्ततुल्यानि वीर्याणि अद्भुतकर्माणि इह लोके प्रकर्षेण दर्शयन् प्रकटयन्नपि लीलया ग्राम्यान् लौकिकानपि सर्वान् विषयान् बुभुजे तथैजे चेति अत्यूर्जितैः परमोद्भटैः ॥६४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४१-६६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इतीति । भगवता परमेष्ठिना इत्थमादिष्टौ तौ कृष्णौ श्रीकृष्णार्जुनौ ओमिति तदाज्ञामङ्गीकृत्य भूमानं भगवन्तं प्रणम्य द्विजपुत्रानादाय सम्प्रहृष्टौ धाम स्वगृहं प्रति यथागतं न्यवर्ततामाजग्मतुः । विप्रायेति । यथारूपाननतिक्रान्तस्वपूर्वरूपान् प्रभू कृष्णार्जुनौ ददतुः ॥६१-६२॥ निशम्येति । विष्णोः सम्बन्धि धाम स्थानं निशम्य दृष्ट्वा पुंसां यत्किंचित्पौरुषमस्ति तत्सर्वं कृष्णानुकम्पितं श्रीकृष्णकृपालब्धमेवेति मेने । शब्दः खे पौरुषं नृष्विति गीतं दृष्टान्तमुखेन निश्चितवानित्यर्थः ॥६३॥ इतीति । ईदृशानि अतिदैवमानुषाणि चरित्राणि दर्शयन्नखिलेश्वरो भगवान् ग्राम्यान् विषयान् भोगान् बुभुजे । अखिलेश्वर इत्यनेन भोगप्रयुक्तकर्मवश्यत्वं व्युदस्य ऊर्जितैः पुष्कलदक्षिणैर्मखैर्यज्ञैरीजे इष्टवान् ॥६४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

कृष्णौ यदूत्तमार्जुनौ । आनन्दभूमानं पूर्णानन्दम् ॥६१॥ प्रसूयतां प्रसवं गच्छतां रूपं यथा प्रसूतिकाले यद्रूपं तादृशं रूपं दधानान् ॥६२॥

(तथा प्रविश्य गोविन्दो यज्ञवाटं पुनः स्वयम् । पूर्णं पूरोहितैर्विप्रैर्ऋत्विग्भिः क्षत्रियर्षभैः ॥ क ॥
प्रायश्चित्तं तु चलने दीक्षायां य उदाहृतः । तं चकार यथान्यायं ब्राह्मणैरनुमोदितः ॥ ख ॥
समाप्य यज्ञं विधिवत्तर्पयित्वाऽर्थिनो द्विजान् । ऋत्विग्भिः पूजयीत्वाऽन्यानृषींश्च कुरुसत्तम ॥ ग ॥
यमुनायां महानद्यां कृत्वाऽवभृथमज्जनम् । विजहार यथाकामं महर्षिभिर्यदूत्तमः ॥ घ ॥)

पुंसां यत् किञ्चित् पौरुषं कृष्णानुकम्पितं मेने ॥६३-६६-क॥ दीक्षायां मध्ये चलने तत उत्थाय गमने प्रायश्चित्तमुद्दिश्य यः कर्मविशेष उदहृतः तं चकार ॥ ख-ग ॥ अवभृथनिमित्तमज्जनम् ॥ घ ॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५६-६६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥६०-६६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥६०-६५॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

परमविस्मित इति प्रथममात्यन्तिकमहैश्वर्यदर्शनेनाहो तावदहं पाण्डुपुत्रो मर्त्योऽपि कृष्णप्रसादादेव सर्वमूलभूतं परमेश्वरमिममपश्यमिति विस्मितः यतः क्षणं परामृश्याहो तेन कथं युवयोर्दिदृक्षुणेत्युक्तम्। सर्वादिपरमेश्वरस्य तस्य स्वांशे कृष्णे दिदृक्षा कथं सम्भवेत्। सम्भवतु वा सा कदाचित् किन्तु दिदृक्षतेत्यनुक्त्वा दिदृक्षुणेति ताच्छील्यप्रत्ययेन दिदृक्षायाः सार्वदिकत्वं बुध्यते। भवतु वा सार्वदिकी दिदृक्षा द्वारकास्थं कृष्णं विभुत्वात् स्वसृज्यविश्वस्य करामलकतुल्यत्वाच्च तत्र स्थित्यैव कथं न पश्यति, मास्तु वा विभुत्वं विप्रापत्याहरणार्थं प्रतिवर्षं द्वारकां गच्छत्येव तत्रैत्य तैलिकताम्बूलकादिभिः परिदृश्यमानं कृष्णं कथं न पश्यति। कृष्णस्येच्छां विना कृष्णदर्शनं न भवेदिति चेन्मास्तु कृष्णदर्शनम्, ब्रह्मण्यदेवो भूत्वापि ब्राह्मणं प्रतिवर्षं कथं दुःखयति, तन्मन्ये कृष्णदर्शनौत्कण्ठ्यं त्यक्तुमपि न शक्नोति। यदर्थमकृत्यमपि कुरुते, करोत्वकृत्यमपि तदर्थं किन्तु विप्रापत्याहरणार्थं कमपि सेवकं किं न प्रहिणोति स्वयं कथं याति। तन्मन्ये द्वारकातस्तदाहरणमप्यन्यैर्दुःशकं तस्मात् कृष्णनगरस्थं विप्रं तथा दुःखयामि यथा तद्दुःखं सोढुमसमर्थः कृष्णो मह्यं दर्शनं दास्यतीति तदभिप्रायोऽवगम्यते। अत एवान्तर्यामिरूपेण तेनैव प्रेरितो मुखरो विप्रः कृष्णसन्निधावेवागत्य प्रतिबालकनाशान्ते तां गाथां गायति। तस्मात् ततोऽप्यस्य कृष्णस्यैव पारमैश्वर्यमधिकमनुमीयत इति विभाव्य परमविस्मितः ततश्च कृष्णमेव पृष्ट्वा तत्त्वमत्रावधारयामिति विमृश्यार्जुनेन पृष्टे सति कृष्णेनोक्तं यथा हरिवंशे —

मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना। विप्रार्थमेष्यते कृष्णो मत्समीपं न चान्यथेति ॥

मया तु विप्रार्थमपि न गतं तत्समीपं किन्तु सख्युस्तव प्राणरक्षार्थमेव यदि विप्रार्थमहमगमिष्यंस्तदा प्रथमबालहरणानन्तरमेव खल्वगमिष्यम्। नवमे बाले हते सत्येव यस्मादगमम्। तस्मान्न तस्यानुरोधात् किन्तु त्वदनुरोधादेवेति सर्वं तत्त्वं कृष्णमुखात् श्रुत्वाऽर्जुनो यत् किञ्चित् पौरुषं पुंसां परव्योमनाथपर्यन्तानामापि पुरुषाणां तत्सर्वं कृष्णानुकम्पितं कृष्णानुकम्पासम्पादितमेव मेने। इत्येवं वेदस्तवमारभ्यैव तत्कथापर्यन्तमत्र दशमस्कन्धान्ते दशमस्याश्रयत्वस्य कृष्णस्यैव सर्वोत्कर्षविवरणमभूदिति ज्ञेयम्। इदं तु भारतयुद्धात्पूर्वमेव कृतमपि श्रैष्ठ्यकथनप्रस्तावेनात्रोक्तमिति श्रीस्वामिचरणाः ॥६३-६६॥

गूढार्थदीपिनी

इतीति युग्मकम्। कृष्णौ कृष्णार्जुनौ। ओमिति तदाज्ञामङ्गीकृत्य दारकान् बालान् आदाय यथा आगतं तथा स्वकं धाम न्यवर्ततामित्यन्वयः ॥६१-६२॥ धाम महाकालपुरं निशाम्य दृष्ट्वा यत् किञ्चित् पौरुषं तत्सर्वं कृष्णानुकम्पाजनितमेव मेने ॥६३॥ वीर्याणि चरितानि। ग्राम्यान् लौकिकान्। ऊर्जितैः समृद्धैः ॥६४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

पार्थः पृथायाः श्रकृष्णकृपापात्रभूतायाः पुत्रः स्वयं च नरावतारः वैष्णवं विष्णोः श्रीकृष्णस्यैव धाम स्थानं भूमाख्यं रूपं च निशम्य दृष्ट्वा विस्मितः अष्टभुजेन रूपान्तरेण विप्रदारकान् दत्तान् मम प्राक्षरक्षणार्थम् आनीय अभिमानिनो मेऽभिमानमपहत्य पुनः सखित्वे च वर्तते —

नाहं सङ्कर्षणो ब्रह्मन्न कृष्णः कार्ष्णिरेव च। अहं वै अर्जुनो नाम गाण्डीवं यस्य वै धनुः ॥

इत्येवं विकत्थमानमपि मामतिस्निग्धस्वभावत्वान्नतिरश्चकार। अहो एवम्भूतोऽयं भक्तवत्सलः इत्येवं विस्मयं प्राप्तः सन् पुंसां यत् किञ्चित् पौरुषं तत्सर्वं कृष्णानुकम्पितं कृष्णप्रसादलब्धं मेनिरे। कृष्णस्यैव सर्वपौरुहेतुत्वात् ॥६३-६६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततो यज्जातं तदाह-इत्यादिष्टाविति। उभयोः कृष्णनामत्वं समानांशत्वाय। ननु भगवान् कथं भगवन्तमाज्ञापयति त्राह-परमेष्ठिनेति। अयं भगवान् ब्रह्माण्डरक्षार्थं प्रवृत्त अतः स्वांशान् सर्वानेव तथा बोधयति अतःस्वस्य रूपं तथैवेति ओमिति दुक्तं स्वीकृत्य भूमानं भगवन्तम् आनम्य यदर्थं गतो तान् बालकानादाय स्वकं धाम द्वारकां न्यवर्तताम्। व्याधुद्य समागतौ ततो

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

निःशङ्कौ प्रहृष्टौ गमनमार्गेणैव समागतौ। इयं च लीला अन्यैः समहतां हीनतां च बोधयति। ततः प्रतिज्ञासिद्ध्यर्थं विप्राय ददतुः पुत्रान्। एकप्रार्थितो रक्षार्थं सर्व एव च दत्ता इति महत्त्वं यथारूपं रूपमनतिक्रम्य रूपशब्देन वयःस्वभावादिकमपि जन्मकालीनं गृह्यते। यथा यथावत् अन्यूनातिरिक्तं सान्दीपनिपुत्रवदेषामपि व्यवस्था। ननु कथमेवं प्रतिज्ञाय गतौ तत्राह-प्रभू इति। तथाकरणे वा हेतुः एवमुभयोश्चरित्रमुक्त्वा तुल्यत्वमाशङ्क्य परिहरति-निशम्येति। अर्जुनस्तु यावद्गत्वा समागतः तावत्किमपि न ज्ञातवान् पश्चाद्भगवता स्वरूपे निरूपिते पश्चात् तद्वैष्णवं धाम ज्ञातवान् ॥६१-६२॥ तदाह-निशम्येति। परमविस्मयं प्राप्तः विष्णोरेतादृशं स्थानमिति स हि जानाति यथेन्द्रादीनां स्थानं तथा विष्णोरपीति पश्चान्मेरुसर्षपयोरिवान्तरं ज्ञात्वा अत्यन्तं विस्मितः। नन्वेतावता किमर्जुनस्य सम्पन्नमित्याकाङ्क्षायामाह-यत्किञ्चित् पौरुषमिति। स्वतः करणेऽहङ्कारो भवति अतो यत्किञ्चित्पूर्वं कृतवान् तदन्यत्कृतं तत्सर्वं कृष्णानुकम्पितमेव मेने। एवं निरोधे नन्दप्रभृति अर्जुनान्ता निरुद्धाः। फल्गुनान्ताश्चावेशाः अतस्तस्मिन् निरुद्धे निरोधान्तरस्य वक्तव्यत्वाभावात् ॥६३॥ उक्तमात्रपरत्वं दूरीकर्तुं प्रकारमतिदिशति-इतीदृशान्यानेकानीति। ज्ञानरूपाणि निरोधरूपाणि वा वीर्याण्यलौकिकसामर्थ्यानि। इह भूमौ माहात्म्यार्थं च स्वासक्त्यर्थं प्रदर्शयन् ग्राम्यान् विषयान् बुभुजे। अन्यथा लोकसमानधर्माभावे नाद्यं न भवेत् विश्वासश्च न भवेत् सर्वमुक्तिश्च स्यात्। अतो लौकिकं वैदिकं च लोकवत् कृतवान् तदाह-ग्राम्यान् विषयान् बुभुजे। अत्यूर्जितैर्मखैश्च ईजेति षड्वर्गपर्यन्तं सर्वानेव यज्ञान् कृतवानिति प्रसिद्धः दानमपि यज्ञसदृशम् इति। तस्यापि लोके उत्कर्षहेतुत्वात् विशेषेणाह-प्रववर्षाखिलान् कामानिति। प्राणिमात्रस्य कामनां पूरितवान्। विशेषतो ब्राह्मणादिषु छतत्रापि यथाकामं यावता तासां कामः पूर्णो भवति एतत्पूरणाभावे तदानीन्तना लोकाः सर्वे नष्टा एव भवेयुः। इति ज्ञापयितुं दृष्टान्तमाह-यथैवेन्द्र इति। सर्वे प्राणिनः अन्नैरेव जीवन्ति तदन्नं वृष्ट्यधीनम्। ततः पर्जन्यश्चेत् क्षणमात्रमप्युदासीनः स्यात् तदा प्राणिनः नष्टा एव भवेयुः तथैव भगवानित्यर्थः। भजनार्थं पर्जन्याद्विशेषमाह-भगवान् श्रैष्ठ्यमास्थित इति। सर्वतः श्रैष्ठ्यं ज्ञापयन्नेव अखिलान् कामान् प्रववर्ष येन कृतार्थता भवति। एवं प्रजापालनमुक्त्वा विशेषतः स्वावतारकृत्यमुपसंहरन् आह-हत्वा नृपानधर्मिष्ठानिति। नृपाणां वधे न दोषायेति ज्ञापयितुं विशेषणं ते नृपाः कंसादयः अर्जुनादिभिः भीष्मार्जुनभीमादिभिः कांश्चित् घातयित्वा दुर्योधनादीन् ततो निःकण्टकभूमौ अञ्जसा सामस्त्येन धर्मं प्रवर्तयामास। तत्र हेतवो युधिष्ठिरादयः। भगवतः करणद्वयं दुष्टनिवारणो अर्जुनादिः। धर्मकरणे युधिष्ठिरादिरिति ॥६४-६६॥

श्रीसुबोधिनीसारः

परमेष्ठिना एवमाज्ञप्तौ तौ कृष्णौ ओमङ्गीकृत्य आनम्य भूमानं विप्रपुत्रान् आदाय ॥६१॥ स्वकं धाम द्वारकां न्यवर्ततां प्रत्याययतुः यथागतं तथा सम्प्रहृष्टौ यथारूपं यथावयः विप्राय पुत्रान् ददतुः ॥६२॥ वैष्णवं धाम प्रभावं निशम्य दृष्ट्वा चेति वा पार्थोऽर्जुनोऽतिविस्मितः। पुंसां यत् किञ्चित् पौरुषं तेजः कृष्णानुकम्पितं मेने ॥६३॥ एवम्भूतान्यनेकानि वीर्याणि प्रदर्शयन् इह लोके ग्राम्यान् विषयान् बुभुजेऽत्यूर्जितैः समृद्धैर्मखैरीजे च ॥६४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तौ कृष्णौ कृष्णार्जुनावित्येवं भगवता परमेष्ठिना भूमपुरुषेणादिष्टौ ओमिति तदाज्ञामङ्गीकृत्य तं भूमानं प्रणम्य द्विजपुत्रानादाय संप्रहृष्टौ यथागतं तथा स्वकं धाम न्यवर्ततामित्यन्वयः ॥६१॥ यथारूपं यथावयः पूर्वरूपवयआदिसम्पन्नान् पुत्रान् विप्राय ददतुः ॥६२॥ वैष्णवं धाम निशाम्य दृष्ट्वा परमविस्मयम् अत्याश्चर्यं प्राप्तः पार्थोऽर्जुनः पुंसां यत् किञ्चित्पौरुषं प्रभावस्तत्सर्वं कृष्णानुकम्पितं श्रीकृष्णकृपालब्धमेवेति मेने ॥६३॥ इत्येवमीदृशान्यनेकानि वीर्याणि अतिमानुषान् पराक्रमान् इह भूलोके प्रदर्शयन् भगवान् कृष्णो ग्राम्यान् विषयान् बुभुजे, ऊर्जितैः पुष्कलदक्षिणमखैर्देवादीन् ईजे च ॥६४॥

अन्वितार्थप्रकाशिका

इतीति युग्मम् ॥ तौ कृष्णौ कृष्णार्जुनावित्येवं भगवता परमेष्ठिना भूमपुरुषेणादिष्टौ ओमिति तदाज्ञामङ्गीकृत्य तं भूमानं प्रणम्य द्विजपुत्रानादाय संप्रहृष्टौ यथागतं तथा स्वकं धाम न्यवर्तताम् । तडभाव आर्षः । ततश्च यथारूपं यथावयः पूर्वरूपवयआदिसम्पन्नान् पुत्रान् विप्राय ददतुः ॥६२-६३॥ निशाम्येति । वैष्णवं धाम महाकालपुरादिकं निशाम्य दृष्ट्वा परमविस्मयम् अत्याश्चर्यं प्राप्तः पार्थोऽर्जुनः पुंसां यत् किञ्चित्पौरुषं प्रभावस्तत्सर्वं कृष्णानुकम्पितं श्रीकृष्णकृपालब्धमेवेति मेने अत्रायमाशयः । भूमरूपेण श्रीकृष्णदर्शनार्थमेव ब्राह्मणानां स्वस्थानानयनं श्रीकृष्णेनाप्यर्जुनमदाहरणाय ब्राह्मणपुत्रमरणं सोढम् । अतः श्रीकृष्णेच्छाप्रेरितो मुखरो विप्रः कृष्णसन्निधावेव निष्ठुरां गाथामगायत । अर्जुनोऽपि सम्यग् विचार्य भूमपुरुषादधिकं श्रीकृष्णैश्वर्यं विलोक्य परमविस्मितोऽभूत् । हरिवंशे चोक्तम् —

"मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना" । इत्यादि । एतच्चरितसमाप्तौ च "ब्रह्मतेजोमयं दिव्यं महद्यद्दृष्टवानसि । अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् ॥" इत्यादि ॥६३॥ इतीति ॥ इत्येवमीदृशान्यनेकानि वीर्याणि अतिमानुषान् पराक्रमान् इह भूलोके प्रदर्शयन् भगवान् कृष्णो ग्राम्यान् विषयान् बुभुजे । ऊर्जितैः पुष्कलदक्षिणमखैर्देवादीन् ईजे च ॥६४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ॐ सत्यमिति उक्त्वा ॥ भूमानमानम्य सदाचारानुसारेण नत्वा ॥६१॥ स्वकं धाम द्वारकाम् ॥६२॥ वैष्णवं धाम ॥ मूलप्रकृतिपतेः अक्षरपुरुषसंज्ञस्य महाकालपुरुषस्य विष्णोरिदं धाम पुरम् ॥ निशाम्य दृष्ट्वा ॥ पुंसां महाकालपुरुषादीनां महेश्वराणाम् ॥ पौरुषं सामर्थ्यम् ॥ कृष्णानुकम्पितं श्रीकृष्णसम्पादितं मेने अन्ये चांशकला पुंसः कृष्णस्तु भगवान् स्वयमित्युक्तेः ॥६३॥ अत्यूर्जितैः हिंसारहिततया अतिशुद्धैः ॥६४-६५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न्यवर्तेतामिति ॥ सम्प्रहृष्टौ सन्तौ स्वकं धाम प्रति यथागतं तथा न्यवर्तेतामाजग्मतुः । प्रभू श्रीकृष्णार्जुनौ यथारूपाननतिक्रान्तस्वस्वपूर्वरूपान् पुत्रान् द्विजसुतान् विप्राय ददतुः द्वयोरेकसम्बन्धः ॥६१॥ निशम्येति ॥ पार्थोऽर्जुनः वैष्णवं विष्णोः सम्बन्धि धाम स्थानं निशम्य दृष्ट्वा परमविस्मितोऽत्यन्तं विस्मययुक्तः सन् पुंसां यत् किञ्चित् पौरुषम् अस्ति तत् सर्वं कृष्णानुकम्पितं श्रीकृष्णकृपालब्धमेवास्तीति मेने ॥६२॥ इतीति ॥ इतीत्थम् ईदृशानि अनेकानि वीर्याणि इह प्रदर्शयन् श्रीकृष्णः ग्राम्यान् विषयान् भोगान् बुभुजे । अत्यूर्जितैः पुष्कलदक्षिणैः मखैर्यज्ञैः ईजे इष्टवांश्च ॥६३॥ प्रववर्षेति ॥ ब्राह्मण आदिर्यासां तासु प्रजासु अखिलान् कामानभिलषितार्थान् प्रववर्ष । केन प्रकारेणेत्यत आह । यथा इन्द्रः यथाकालं वर्षर्तुमनतिक्रम्य वर्षति तथैव श्रैष्ठ्यं आस्थितः भगवान् ववर्षः ॥६४॥

कृष्णप्रिया

जब भगवान भूमा पुरुषोत्तमने श्रीकृष्ण और अर्जुन को इस प्रकार आदेश दिया तब उन्होंने स्वीकार किया और नमस्कार किया और अत्यन्त आनन्द के साथ ब्राह्मण बालको को लेकर जिस राह से जिस प्रकार आये थे उसीसे वैसे ही द्वारिका में लौट आये । ब्राह्मण के बालक अपनी आयु के अनुसार बडे बडे हो गये थे । उनका रूप और आकृति वैसी ही थी जैसी उनकी जन्म के वक्त थी । उन्हें भगवान श्रीकृष्ण और अर्जुनने उनकी पिता को सोंप दिया ॥६१-६२॥ भगवान विष्णु के उस परमधाम को देखकर अर्जु के आश्चर्य की सीमा न रही । उन्होंने एसा अनुभव किया कि जीवोमें जो कुछ बल पौरुष है, वह सब भगवान श्रीकृष्ण की ही कृपा का फल है ॥६३॥ इस प्रकार अनन्त पराक्रमों के दर्शन कराते हुए भगवान श्रीकृष्ण ने अनेक ग्राम्य भोगो को भोगा और बडे बडे महाराजओं के समान बडे बडे श्रेष्ठ यज्ञ कीये ॥६४॥

प्रववर्षाखिलान् कामान् प्रजासु ब्राह्मणादिषु । यथाकालं यथैवेन्द्रो भगवाञ्छ्रैष्ठ्यमास्थितः ॥६५॥
हत्वा नृपानधर्मिष्ठान् घातयित्वार्जुनादिभिः । अंजसा वर्तयामास धर्मं धर्मसुतादिभिः ॥६६॥

॥ इति श्रीमद्भागवते महापुराणे[1] दशमस्कन्धे[2] द्विजकुमारानयनं नाम [3]एकोननवतितमोऽध्यायः ॥८९॥

कर्दमक्षमा

यथा, इन्द्रः, इव, भगवान्, श्रैष्ठ्यम्, आस्थितः, यथाकालम्, ब्राह्मणादिषु, प्रजासु, अखिलान्, कामान्, प्रववर्ष ॥६५॥ अधर्मिष्ठान्, नृपान्, हत्वा, अर्जुनादिभिः, घातयित्वा, अञ्जसा, धर्मसुतादिभिः, धर्मम्, वर्तयामास ॥६६॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे नवाशीतितमाध्यायेऽन्वयाः ॥८९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

॥६०-६६॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां नवाशीतितमोऽध्ययः ॥८९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

श्रैष्ठ्यं गृहस्थधर्मौत्कृष्ट्यम् ॥★॥ प्रववर्ष अविच्छेदेन पूरयामास । कामान् दृष्टार्थान् । आदिशब्दादन्त्यजा अपि ज्ञेयाः । तच्च यथाकालम् अवसरोचितं तत्रापि बाहुल्ये दृष्टान्तः । यथेति इन्द्रो यथा जलानि वर्षति तथैवेत्यर्थः । यतो भगवान् परिपूर्णैश्वर्यादिः यत एव च सर्वावतारावतारिभ्यः । श्रैष्ठ्यमास्थितः नित्यमेव तत्प्राप्तः । भारतयुद्धादित्यादि स्वामिचरणैर्युक्तमेवोक्तम् । 'वीर्यं त्र्यम्बकतोषणम्' इत्यर्जुनोक्तत्वात् यद्यप्यज्ञातवासानन्तरमेवार्जुनस्य तदिदं चरितं लभ्यते तथापि तदन्तराभिमन्युविवाहपरीक्षिदाधानयोरन्तराले कालबाहुल्यमुपलभ्यते । तदन्तरान्तरा चार्जुनस्य द्वारकागमनं सम्भाव्यत इति ॥६५॥ स्वयं कंसादीन् । अर्जुनस्यादिः प्रथमो भीमसेनोऽर्जुनादिः । तैरिति बहुत्वं धनञ्जयादिग्रहार्थम् । दुर्योधनादीन्घातयित्वा । यद्वा-अर्जुनसदृशैर्वीरैः । धर्मुतात्यित्रोक्तादिना जारासन्धिसहदेवादिग्रहः ॥★॥ ॥६६॥

॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्ध उत्तरार्ध एकोननवतितमोऽध्यायः ॥८९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

प्रकर्षेण ववर्ष अविच्छेदेन पूरयामास । कामान् दृष्टार्थान् । आदिशब्दादन्त्यजा अपि ज्ञेयाः । तच्च यथाकालम् अवसरोचितं तत्रापि बाहुल्ये दृष्टान्तः । यथेति इन्द्रो यथा जलानि वर्षति तथैवेत्यर्थः । यतो भगवान् परिपूर्णैश्वर्यादिः यत एव च सर्वावतारावतारिभ्यः । श्रैष्ठ्यमास्थितः नित्यमेव तत्प्राप्त इति ॥६५॥ स्वयं हत्वा अर्जुनादिभिर्घातयित्वा च धर्मं स्वभक्तिपर्यन्तं वर्तयामास प्रावर्तयत् । एवं भगवतः श्रीकृष्णस्य सर्वसुखकर्तृत्वं स्मृत्वा क्षणं रुदितवानिति ज्ञेयम् । टीकायामिदन्त्विति वीर्यं त्र्यम्बकतोषणमित्यर्जुनेनोक्तत्वाद्यप्यज्ञातवासानन्तरमेवार्जुनस्य तदिदं चरितं लभ्यते तथापि तदनन्तराभिमन्युविवाहपरीक्षिदाधानयोरन्तराले कालबाहुल्यमुपलभ्यते । तदन्तरान्तरा चार्जुनस्य द्वारकागमनं सम्भाव्यत इति ॥६६॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्याम् एकोननवतितमोऽध्याय्रः ॥८९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥४१-६६॥

॥ इति श्रीमद्भागवतव्याख्याने दशमस्कन्धे श्रीसुदर्शनसूरिकृतशुकपक्षीये एकोननवतितमोऽध्यायः ॥८९॥

---

[1] पारमहंस्यां संहितायां दशमस्कन्धे उत्तरार्धे-गो. प्रे. पु. । [2] दशमस्कन्धे द्विजकुमाराहरणं-गो. प्रे. टी. । [3] शततमोऽध्यायः-विज. ।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

प्रववर्षेति । ब्राह्मणा आदिर्यासां तासु प्रजास्वखिलानभिलषितान् कामान् प्रववर्ष । यथाकाले वर्षर्तुमनतिक्रम्य वर्षति तथा भगवानपि श्रैष्ठ्यं परत्वमाश्रितः कामान् ववर्ष ॥६५॥ हत्वेति । कांश्चिदधर्मिष्ठान् स्वयं हत्वा कांश्चिदर्जुनादिभिर्घातयित्वा धर्मसुतादिभिः युधिष्ठिरादिभिरञ्जसा ऋजुमार्गेण सुखेन वा धर्मं वर्णाश्रमाद्यनुगुणं प्रवर्तयामास ॥६६॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्वीरराघवाचार्यकृत
भागवतचन्द्रचन्द्रिकायाम् एकोननवतितमोऽध्यायः ॥८९॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥६३-६६॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् एकोननवतितमोऽध्यायः ॥८९॥

(श्रीविजयध्वजतीर्थरीत्या शततमोऽध्यायः ॥१००॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥५६-६६॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे एकोननवतितमोऽध्यायः ॥८९॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥६०-६६॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे एकोननवतितमोऽध्यायः ॥८९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥६०-६५॥

॥ इति श्रीमद्भागवते महापुराणे श्रीनाथचक्रवर्तिविरचितायां चैतन्यमञ्जूषायामेकोननवतितमोऽध्यायः ॥८९॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ॥६३-६६॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । ऊननवतितमोऽध्यायो दशमेऽजनि सङ्गतः ॥८९॥

गूढार्थदीपिनी

यथाकालं कामान् प्रववर्ष सम्दयामास यथा इन्द्रो वर्षति तथा । श्रैष्ठ्यं सर्वावतारेभ्यः श्रैष्ठ्यमाधिक्यं कर्मज्ञानोपदेशयुद्धादिकमाश्रित्य स्थितः ॥६५॥ अञ्जसा अनायासेन धर्मं प्रवर्तयामास । आदिना जरासन्धिसहदेवादयः ॥६६॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धोत्तरार्धे गूढार्थदीपिन्यां नवाशीतितमोऽध्यायः ॥८९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ॥६३-६६॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमच्छुकदेवसिद्धान्तप्रदीपे एकोननवतितमाध्यायार्थप्रकाशः ॥८९॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी ॥६४-६६॥

॥ इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां दशमस्कन्धे उत्तरार्धे
चत्वारिंशाध्यायविवरणम् ॥४०॥ ॥८९॥

श्रीसुबोधिनीसारः

ब्राह्मणादिषु प्रजासु अखिलान् सर्वान् कामान् प्रववर्ष । यथासमयं श्रैष्ठ्यम् उत्तमत्वमास्थितो भगवान् इन्द्र इव ॥६५॥ अधर्मिष्ठान् पापिनो नृपान् हत्वा स्वयमर्जुनादिभिर्घातयित्वा धर्मसुतादिभिर्युधिष्ठिरादिभिरञ्जसा सुखेन धर्मं वर्तयामास ॥६६॥

॥ इति श्रीमद्भा० दश० उत्त० सुबो० टी० नवाशीतितमोऽध्यायः ॥८९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

श्रैष्ठ्यं श्रेष्ठत्वमास्थितो भगवान् ब्राह्मणादिषु प्रजासु अखिलान् कामान् अभिलषितान् विषयान् यथाकालं तत्तदवसरे प्रववर्ष सम्पादयामास । तत्र दृष्टान्तमाह-इन्द्रो यथा यथाकालं जलं वर्षति तथेति ॥६५॥ अधर्मिष्ठान्नृपान् कांश्चित् स्वयं हत्वा कांश्चिच्चार्जुनादिभिर्घातयित्वा धर्मसुतादिभिर्युधिष्ठिरादिभिरञ्जसा अनायासेन वर्णाश्रमधर्मप्रयुक्तं धर्मं वर्तयामास ॥६६॥

॥ इति श्रीवल्लभाचार्यवंश्यगोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र भगवद्गुणवर्णने । नवाशीतितमो यातो भगवच्छ्रैष्ठ्यनिरूपकः ॥३॥ ॥८९॥

अन्वितार्थप्रकाशिका

प्रववर्षेति ॥ श्रैष्ठ्यं श्रेष्ठत्वमास्थितो भगवान् ब्राह्मणादिषु प्रजासु अखिलान् कामान् अभिलषितान् विषयान् यथाकालं तत्तदवसरे प्रववर्ष सम्पादयामास । तत्र दृष्टान्तमाह । यथैव इन्द्रो यथाकालं जलं वर्षति तथेति ॥६५॥ हत्वेति ॥ अधर्मिष्ठान्नृपान् कांश्चित् स्वयं हत्वा कांश्चिच्चार्जुनादिभिर्घातयित्वा धर्मसुतादिभिर्युधिष्ठिरादिभिरञ्जसा अनायासेन वर्णाश्रमधर्मप्रयुक्तं धर्मं वर्तयामास ॥६६॥

॥ इति श्रीभागवते दशमे उत्तरार्धेऽन्वितार्थप्रकाशिकायामेकोननवतितमोऽध्यायः ॥८९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

धर्मसुतादिभिः युधिष्ठिरादिस्वभक्तैः । आदिशब्देन व्यासादिविप्रैश्च धर्मं वर्णाश्रमविहितं वेदपुराणपठनपाठनरूपं च अञ्जसा अनायासेन प्रवर्तयामास ॥६६॥।

॥ इति श्रीशुद्धैकान्तधर्मप्रवर्तकगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्यगोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके श्रीमद्भागवतस्थदशमस्कन्धव्याख्याने द्विजपुत्रानयनं नाम नवाशीतितमोऽध्यायः ॥८९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

हत्वेति ॥ श्रीकृष्णः कांश्चित् अधर्मिष्ठान् नृपान् स्वयं हत्वा कांश्चित् अर्जुनादिभिः घातयित्वा धर्मसुतादिभिः युधिष्ठिरादिभिः धर्मं वर्णाश्रमादिवेदोदितसदाचारम् अञ्जसा ऋजुमार्गेण सुखेन वा, वर्तयामास प्रवर्तयामास ॥६५॥

इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनु-भगवत्प्रसादाचार्यविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धे उत्तरार्धे एकोनाशीतितमोऽध्यायः ॥८९॥

कृष्णप्रिया

भगवान श्रीकृष्णने आदर्श महापुरुषों का सा आचरण करते हुए ब्राह्मण आदि समस्त प्रजावर्गो के सारे मनोरथ पूर्ण किये, जैसे समय समय पर इन्द्र प्रजा के लिए वृष्टि करते है ॥६५॥ भगवान कृष्णने बहुत से अधर्मी राजा ओं को स्वयं मार डाला और बहुतो को अर्जुन आदि के द्वारा मरवा डाला । इस प्रकार धर्मराज युधिष्ठि आदि धार्मिक राजाओं से उन्होंने अनायास ही सारी पृथ्वी में धर्ममर्यादा की स्थापना करा दी ॥६६॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे नवाशीतितमाध्यायस्य भाषाटीका समाप्ता ॥८९॥

॥ श्रीहरिः ॥

★ श्रीगणेशाय नमः ★

—अनेकव्याख्यासमलङ्कृतम्—

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः उत्तरार्धः

—:-★★-:—

॥ अथ नवतितमोऽध्यायः ॥

श्लोकाः	अनु.	मि.उ.	व.	मा.	मं	वि.	पु.	शा.	स्त्र.	उ.	श्लो. अ.	उ. अ.	अ. अ.	सं. श्लो. अ.
५०	३५	१	७	२	१	१	१	१	१	२	१९९९	११	८४	२०९४

सं. श्लो.	अक्ष.
६५।	६

श्रीशुक उवाच

सुखं स्वपुर्यां[1] निवसन् द्वारकायां श्रियः पतिः । सर्वसम्पत्समृद्धायां [2]जुष्टायां वृष्णिपुंगवैः ॥१॥

कर्दमक्षमा

श्रीशुकः, उवाच ।

श्रियः, पतिः, सर्वसम्पत्समृद्धायाम्, वृष्णिपुङ्गवैः, जुष्टायाम्, स्वपुर्याम्, द्वारकायाम्, सुखम्, निवसन्, रेमे ॥१॥

श्रीधरस्वामिकृतभावार्थदीपिका

चरमे तु पुनः प्रोक्ता कृष्णलीला समासतः । यदुवंशप्रसूतानामानन्त्यञ्च सकारणम् ॥

श्रीकृष्णविभूतिं समासेन दर्शयति–सुखं स्वपुर्यामिति । सर्वसम्पदादिविशिष्टायां श्रियःपतिः षोडशसहस्रपत्नीनामेकवल्लभः संस्तासां गेहेषु रेमे इत्यन्वयः ॥१–५॥

श्रीवशीधरकृतो भावार्थदीपिकाप्रकाशः

चरमे नवतितमे । स्कन्धसमाप्त्यपेक्षं चरमपदम् । सकारणम्–कारणं चात्र भगवत्प्रसादो दैतेयनिग्रहश्च 'देवासुराहवहता' इत्यादिश्लोकद्वयेनात्रैव तथोक्तेः (१) स्वपुर्यां स्वत्वेन स्वीकृतायाम् ॥★॥ ततश्च चित्तं समाधाय समाप्तौ परमसुखमयं लीलाविशेषं स्मरन्नाह–सुखमित्यादिना श्रिय इत्यन्तेन । तत्राद्यं षट्कं स्वस्य स्वयं भगवतः पुर्याम् इति स्वभाविकता स्वलीलासुखनिवासयोग्यता चोक्ता अत एव नितरां वसन्निति वैकुण्ठादिभ्योऽप्याधिक्यम् अतस्तदीयासाधारणलक्ष्म्या रुक्मिणीरूपाया अपि तथैव तत्र वास इत्याह–श्रियः पतिरिति । अत एवामुत्तरोत्तरत्रापि वैशिष्ट्यमेवोह्यम् ॥१॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

ततश्च चित्तं समाधाय समाप्तौ परमसुखमयं लीलाविशेषं स्मरन्नाह–सुखमित्यादिना श्रिय इत्यन्तेन । तत्राद्यं षट्कं स्वस्य

---

[1] न्यवसद्द्वारकायां–विज. । [2] संवृतो–च. पु. टी. ।

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी

स्वयं भगवतः पुर्याम् इति स्वभाविकता स्वलीलासुखनिवासयोग्यता चोक्ता अत एव नितरां वसन्निति वैकुण्ठादिभ्योऽप्याधिक्यम् अतस्तदीयासाधारणलक्ष्म्या रुक्मिणीरूपाया अपि तथैव तत्र वास इत्याह–श्रियः पतिरिति । अत एवामुत्तरोत्तरत्रापि वैशिष्ट्यमेवोह्यम् । नवं नित्यमेव पूर्वपूर्वताविलक्षणं यौवनं कान्तिश्च यासां ताभिः एवं वेषवयःकान्तीरुक्त्वा वैदग्ध्यादिकमाह–कन्दुकेति । आदिशब्दाद्गीतनृत्यादयः । तत्र चेतस्ततः कन्दुकादिक्रीडया चलन्तीनां तडितामिव द्यौः शोभा यासां ताभिः । एवमुत्तरीणां सम्पदमुक्त्वा बाह्यं वदन् सदा चतुरङ्गसेनासेवितत्वमाह–नित्यमिति । सङ्कुलाः सङ्कीर्णा मार्गा यस्यास्तस्याम् अलङ्कृतैरित्यस्य मतङ्गजादिभिः सर्वैरप्यन्वयः । तत्रापि रथैः कनकोज्ज्वलैः सौवर्णचित्रमयैः अधुना तद्बाह्यमप्याह–उद्यानेति । नादितायामिति भृङ्गादिभिर्हेतुभिः सञ्जातनादायामित्यर्थः रेमे बहुधा चिक्रीड । कथं तदाह–षोडशेति । एकोऽपि वल्लभः सन् युगपत्प्रीतिदानपूर्वकमिति भावः । न च तदसम्भाव्यं तस्य शक्तिविशेषादित्याह–तावन्तीति । रूपाण्येकस्यैव विग्रहस्य सर्वत्र स्फुरणानि चित्रं बतैतदेकेन वपुषेत्यादि श्रीनारदोक्तेः अत एवोक्तं श्रीहरिवंशे जलक्रीडाप्रसङ्गे ——

> "अहमिष्टा मया सार्द्धं जले वसति केशवः । इति ता मेनिरे सर्वा मुदा नारायणस्त्रियः ॥
> सर्वाः सुरतचिह्नाङ्ग्यः सर्वाः सुरततर्पिताः । मानमूहुश्च ताः सर्वा गोविन्दबहुमानजम् ।
> अहमिष्टाहमिष्टेति स्निग्धे परिजने तदा । नारायणस्त्रियः सर्वा मुदा शंश्लाघिरे शुभाः ॥" किञ्च —
> "एकार्पितमनोदृष्ट्योर्नर्ष्यान्ताश्चकुरङ्गनाः ॥ नारायणेन देवेन तर्प्यमाणमनोरथाः ॥
> शिरांसि गर्वितान्यूहः सर्वा निरवशेषतः । बाल्लभ्यङ्के शिवमयं वहन्त्यश्चारुदर्शनाः ॥" इति ॥

महत्यस्तादृशमपि पुर्यामुक्त्कृष्टा ऋद्धयो येषु तेषु कह्लारं सौगन्धिकम् उत्पलकुमुदयोः श्वेतरक्तत्वेन भेदः ॥१-६॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-१६॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

अथ भगवतः श्रीकृष्णस्य स्वपत्नीभिः सह क्रीडाप्रकारं तासां तस्मिन्ननुरागातिशयं पुत्रपौत्रादिसन्ततीः प्रकृतस्कन्धार्थश्रवणादिफलं च वर्णयति नवतितमेन सुखं स्वपुर्यामित्यादिना । श्रियः पतिरित्यस्य रेमे षोडशसाहस्रपत्नीनामेकवल्लभः इत्युपरिष्टात्सम्बन्धः । वृष्णिपुङ्गवैः स्त्रीभिश्च जुष्टायां सेवतायाम् इति सम्बन्धः ॥१॥

श्रीमद्विजयध्वजकृता पदरत्नावली

अनेनाध्यायद्वयेन गृहस्थधर्मानुकरणलक्षणं हरेः सन्निधानात्सर्वतीर्थोत्तमत्वं द्वारकायाश्च कथ्यते । तत्र प्रथमं द्वारकापुरं वर्णयति सुखमिति ॥१॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-७॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥१-४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१-४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

नवतितमे जलकेलौ महिषीणां प्रेमवैचित्री । यादवगणनाशक्तिर्लीलानां नित्यता चोक्ता ॥१॥

अथ मधुरेण समापयेदितिन्यायेन कृष्णस्य जलविहारं वर्णयन् प्रथममुद्दीपनत्वेन नगररामणीयकमाह–सुखमित्यादिना। तद्गृहेषु तासां गृहेषु रेमे इत्यन्वयः । गृहेषु रमणमाह–प्रोत्फुल्लेति । वासितान्यमलानि यानि तोयानि तेष्वित्यर्थः ॥१-६॥

गूढार्थदीपिनी

अध्याये चरमे स्त्रीभिः क्रीडा तत्प्रेमसूक्तयः । यादवानां च लीलानामानन्त्यं चात्र वर्ण्यते ॥१॥

सुखमिति षट्कम् । असौ श्रियः पतिः द्वारकायां निवसन् पत्नीनामेकवल्लभोऽपि तावद्विचत्ररूपः सन् तद्गृहेषु ताभिः सह रेमे इति पञ्चमेनान्वयः । कथम्भूतायां द्वारकायाम् । वृष्णिपुङ्गवैः यदुवंशीयैः स्त्रीभिश्च जुष्टायां सेवितायाम् । पुनश्च । मदच्युद्भिः मतङ्गजैः भटादिभिश्च व्याप्तमार्गायाम् । पुनश्च । पुष्पितद्रुमपङ्क्तिषु निर्विशद्भिः भृङ्गैः विहगैश्च समन्तात् नादितायाम् । कथम्भूताभिः स्त्रीभिः । नवयौवनेन कान्तिर्यासां ताभिः । पुनश्च । तडितामिव द्यौः द्युतिर्यासां ताभिः । कन्दुकादिभिः हर्म्येषु क्रीडन्तीभिः । कथम्भूतेषु गृहेषु । ऋद्धिसिद्धियुक्तेषु । पुनश्च । प्रोत्फुल्लानां विकसितानामुत्पलादीनां रेणुभिः परागैः वासितानि निर्मलतोयानि येषु तेषु । पुनश्च । कूजन्ति पक्षिकुलानि सरस्सम्बन्धीनि येषु तेषु । उत्पलेति । क्रमेण सन्ध्यारात्रिदिनविकासीनि कमलानि ॥१-२-३-४-५-६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

सङ्क्षेपतः श्रीकृष्णलीलां माधवीनां श्रीकृष्णे परमभक्तिं तया तासां मुक्तिं यदुवंशप्रसूतानामानन्त्यं श्रीकृष्णलीलाश्रवणादिफलं च नवतितमेनाध्यायेन वर्णयति-सुखमिति । श्रियः पतिः स्वपुर्यां सुखं निवसन् षोडशसहस्रपत्नीनामेकवल्लभस्तद्गृहेषु रेमे इति पञ्चमेनान्वयः ॥१॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

एवं सर्वान् समुद्धृत्य क्रीडत्यस्माकमीश्वरः । क्रीडायां प्राप्तसंसारस्त्रीणामपि निवार्यते ॥१॥

ज्ञानं निरूप्य वैराग्यं निरूपयितमुद्यतः । अद्भुतत्वाच्चरित्रस्य रागलीला निरूप्यते ॥२॥

स्वार्थं रतिः पूर्वमेव भगवत्त्वान्निरूपिता । स्त्रीणां तु रागसम्प्राप्तिस्ततोऽत्र विनिवार्यते ॥३॥

एकचत्वारिंशेऽध्याये भक्तानां सुखसिद्धये । परमोत्सवलीलां हि श्रीशुको वर्णयन्मुदा ॥४॥

पूर्वाध्याये सर्वलोकार्थं चरित्रमुक्तमुपसंहृतम् । इदानीं भक्तानां भगवति मनस्स्थैर्यार्थं परमानन्दलीलां निरूपयति-सुखं स्वपुर्यामिति । स्वभावतोऽपि सर्वचिन्ताभावः स्वपुर्यां भवति तत्रापि द्वारकायां श्रियः पतिरिति विलाससाधनसम्पत्तिरुक्ता । लौकिकीमपि सम्पत्तिमाह-सर्वसम्पत्समृद्धायामिति । कदाचित्साधारणोपद्रवसम्भावनायामपि न स्वप्रयत्नोऽपेक्ष्यते वृष्णिश्रेष्ठैरेव तन्निवृत्तिसम्भवात् असाधारणानां पूर्वमेव निवृत्तत्वान्मुख्यभोगसाधनानि निर्दिशति । स्त्रीभिश्च जुष्टायामिति पुरुषश्चेतन्यात्मकः काममयः । इन्द्रियाणि तद्दुःखनिवर्तकानि प्रवृत्त्यर्थं तेभ्यः सुखवानं नान्तरीयकम् । तत्रात्मकामः स्त्रीभिरेव पूर्यते । तत्र स्त्रीणां षडिन्द्रियसुखदातृत्वाय विशेषणानि । उत्तमवेषाभिरित्यादीनि अलौकिकवेषेण मनोदृष्टिप्रीतिः । नवयौवनकान्तिभिरिति स्पर्शरसयोः हर्म्येषु कन्दुकादिभिः क्रीडन्तीभिरिति शब्दघ्राणयोः चित्तचक्षुषोः वा तदा आद्येन व्यत्यासः । अनेन विभावा अनुभावाश्चोक्ताः ॥१-२॥

सुबोधिनीसारः

शुकोक्तिः । सर्वसम्पद्भिः समृद्धायां वृष्णिपुङ्गवैर्यादवश्रेष्ठैर्जुष्टायाम् । तृतीयान्तानामत्रान्वयः । नवेन यौवनेन कान्तिः शोभा यासां ताभिरुत्तमवेषाभिः चञ्चलादीप्तिभिर्हर्म्येषु मन्दिरेषु क्रीडन्तीभिः कन्दुकादभिः साधनैः मदस्राविभिर्हस्तिभिः अश्वैः रथैः स्वर्णपरिष्कृतैः स्वलङ्कृतैर्भटैः शूरैः नित्यं सङ्कुला व्याप्ता मार्गा यस्यां तस्याम् उद्योनोपवनैराढ्यायां पुष्पितासु द्रुमराजिषु निर्विशद्भिर्भृङ्गैरन्यैर्विहङ्गैः पक्षिभिः समन्ततः सर्वतो नादितायाम् उद्घुष्टायां द्वारकायां स्वपुर्यां निवसन् श्रियो लक्ष्म्याः पतिः श्रीकृष्णः सुखं यथा स्यात्तथा रेमे ॥१-२-३-४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

नवतितम अध्याये पत्नभी रमणं हरेः । यदुवंशप्रसूतानामानन्त्यं च निरूप्यते ॥१॥

श्रियः पतिः श्रीकृष्णो द्वारकायां स्वपुर्यां सुखं यथा स्यात्तथा निवसन् यतः षोडशसाहस्रपत्नीनामेक एव वल्लभः प्रियः अतस्तावद्विचित्ररूपोऽसौ महासमृद्धियुक्तेषु गृहेषु रेम इति पञ्चानामन्वयः । द्वारकां वर्णयति–सर्वाभिः सम्पद्भिः समृद्धायामिति। वृष्णिपुङ्गवैर्यादवश्रेष्ठैः स्त्रीभिश्च जुष्टायां निवसितायाम् ॥१॥

अन्वितार्थप्रकाशिका

चरमे क्रीडनं स्त्रीभिस्तासां प्रेमरसा गिरः । विस्तृतिर्यादवानां च श्लोकास्तत्राऽभ्रमार्गणाः (५०) ॥

उवाचद्वितयं (२) सार्धा स्या द्वाषष्टिरनुष्टुभाम् (६२॥) ॥

"मधुरेण समापयेत्" इति न्यायेन लीलाकथनान्ते कृष्णस्य जलविहारवर्णनम् । तत्र प्रथममुद्दीपकत्वेन नगररमणीयतामाह-सुखमिति षट्कम् ॥ सर्वाभिः सम्पद्भिः समृद्धायां वृष्णिपुङ्गवैर्यादवश्रेष्ठैः स्त्रीभिश्च जुष्टायाम् उत्तमो वेषो वस्त्राभरणाद्यलङ्कारो यासां ताभिः नवयौवनेन कान्तिर्यासां ताभिः कन्दुकादिभिर्हर्म्येषु क्रीडन्तीभिः तडितामिव द्यौर्द्युतिर्यासां ताभिः स्त्रीभिश्च जुष्टायां मदच्युद्भिर्मतङ्गजैर्नित्यं सङ्कुला व्याप्ता मार्गा यस्यां तस्यां द्वारकायां स्वलङ्कृतैर्भटैरश्वैः कनकेनोज्ज्वलै रथैश्च नित्यं सङ्कुलमार्गायाम् उद्यानैः पुष्पप्रधानैः उपवनैः फलप्रधानैश्चारामैराढ्यायां सम्पन्नायां पुष्पिता ये द्रुमास्तेषां राजिषु पङ्क्तिषु निर्विशद्भिर्भृङ्गैर्भ्रमरैः विहङ्गैः पक्षिभिश्च समन्ततः सर्वतो नादितायां द्वारकायां स्वपुर्यां सुखं निवसन् यतः षोडशसाहस्रपत्नीनामेक एव वल्लभः अतस्तावद्विचित्ररूपोऽसौ श्रियः पतिः श्रीकृष्णः महर्द्धिषु महासमृद्धियुक्तेषु प्रोत्फुल्लानां सन्ध्यारात्रिदिनविकासयुक्तानामुत्पलादीनां रेणुभिर्वासितानि अमलानि तोयानि येषु तेषु तथा कूजन्ति द्विजानां पक्षिणां कुलानि येषु तेषु तथा कूजन्ति द्विजानां पक्षिणां कुलानि गृहारामवाप्यादिसम्बन्धीनि येषु तेषु तासां गुहेषु रेमे ॥१-२-३-४-५-६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

कृष्णस्य नवतितमे तोयक्रीडाथ वर्ण्यते । प्रेम्णा कृष्णप्रसक्तानां स्त्रीणां गीतं प्रमत्तवत् ॥

यदुवंशोद्भवानामप्यानन्त्यं च सहेतुकम् ॥१॥

तत्रादौ कृष्णविभूतिं सङ्क्षेपतो वर्णयितुकामः श्रीशुकः पुरीं वर्णयति चतुर्भिः सुखमिति ॥१-२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

लीला समासतः कार्ष्णी चरमे पुनरीरिता । प्रसूतानां यदोर्वंशे ह्यानन्त्यं च सहेतुकम् ॥१॥

अथ भगवतः श्रीकृष्णस्य स्वपत्नीभिः सह क्रीडाप्रकारं तासां तस्मिन्ननुरागातिशयं पुत्रपौरादिसन्ततीः प्रकृतस्कन्धार्थप्रवणादिफलं च वर्णयति सुखं स्वपुर्यामित्यादि ॥ सुखमिति ॥ स्त्रीभिरिति ॥ नित्यमिति ॥ उद्यानेति ॥ रेम इति च॥ श्रियः पतिरित्यस्य 'रेमे षोडशसाहस्रपत्नीनामेकवल्लभः' इत्युपरिष्टात् सम्बन्धः । श्रियो रुक्मिणीरूपायाः लक्ष्म्याः पतिः श्रीकृष्णः सर्वसम्पत्समृद्धायां वृष्णिपुङ्गवैर्यादवश्रेष्ठैः जुष्टायाम् उत्तमवेषाभिः नवयौवनकान्तिभिः हर्म्येषु कन्दुकादिभिः क्रीडन्तीभिः तडिद्द्युभिर्विद्युत्समानकान्तिभिः स्त्रीभिश्च जुष्टायां मदच्युद्भिर्मदस्राविभिः मतङ्गजैः नित्यं सङ्कुलमार्गायां स्वलङ्कृतैः भटैः अश्वैः कनकोज्ज्वलैः रथैश्च सङ्कुलमार्गायाम् उद्यानोपवनाढ्यायां पुष्पिता ये द्रुमास्तेषां राजयः पङ्क्तयस्तासु निर्विशन्तो ये भृङ्गाः भ्रमराः विहगाः पक्षिणश्च तैः समन्ततः नादितायां स्वपुर्यां द्वारकायां सुखं यथा तथा निवसन् षोडशसाहस्रपत्नीनाम् एकवल्लभः अत एव असौ तावन्ति विचित्राणि रूपाणि यस्य तथाविधः सन्, महर्द्धिषु महासम्पत्तिषु तद्गृहेषु रेमे इति पञ्चानामेकसम्बन्धः ॥१॥ ॥२॥ ॥३॥ ॥४॥ ॥५॥

कृष्णप्रिया

शुकदेवजी कहते है - हे राजन् हे परीक्षित् ! श्रीपति भगवान श्रीद्वारिकाधीश सर्व प्रकारकी समृद्धि से फूलीफाली अपनी द्वारिकापुरीमें विराजमान थे । द्वारिकापुरीमें विराजमान थे । द्वारिका नगरी श्रेष्ठ वृष्णिकुल के कुलिन लोगों से सेवित थी ॥१॥

स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकान्तिभिः ।[1] कन्दुकादिभिर्हर्म्येषु क्रीडन्तीभिस्तडिद्द्युभिः ॥२॥
नित्यं संकुलमार्गायां मदच्युद्भिर्मतंगजैः । स्वलंकृतैर्भटैरश्वै रथैश्च [2]कनकोज्ज्वलैः ॥३॥
उद्यानोपवनाढ्यायां पुष्पितद्रुमराजिषु । निर्विशद्भृंगविहगैर्नादितायां समन्ततः ॥४॥
रेमे षोडशसाहस्रपत्नीनामेकवल्लभः ।[3] तावन्ति बिभ्रद्रूपाणि तद्गृहेषु महर्द्धिषु ॥५॥

कर्दमक्षमा

उत्तमवेषाभिः नवयौवनकान्तिभिः तडिद्द्युभिः च स्त्रीभिः हर्म्येषु कन्दुकादिभिः रेमे ॥२॥ नित्यम् मदच्युद्भिः मतङ्गजैः कनकोज्ज्वलैः स्वलङ्कृतैः भटैः अश्वैः सङ्कुलमार्गायाम् रेमे ॥३॥ उद्यानोपवनाढ्यायाम् पुष्पितद्रुमराजिषु निर्विशद्भृङ्गविहगैः समन्ततः नादितायाम् रेमे ॥४॥ षोडशसहस्रपत्नीनाम् एकवल्लभः तावन्ति रूपाणि बिभ्रत् महर्द्धिषु तद्गृहेषु रेमे ॥५॥

श्रीधरस्वामिकृतभावार्थदीपिका ॥१-५॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

आदिना लीलान्तरग्रहः । हर्म्येषु धनिनां योग्येषु समुन्नतगृहेषु ॥★॥ नवं नित्यमेव पूर्वपूर्वताविलक्षणं यौवनं कान्तिश्च यासां ताभिः एवं वेषवयःकान्तीरुक्त्वा वैदग्ध्यादिकमाह-कन्दुकेति । आदिशब्दाद्गीतनृत्यादयः । तत्र चेतस्ततः कन्दुकादिक्रीडया चलन्तीनां तडितामिव द्यौः शोभा यासां ताभिः ॥२॥ ॥०॥ ॥★॥ एवमान्तरीणां सम्पदमुक्त्वा बाह्यं वदन् सदा चतुरङ्गसेनासेवितत्वमाह-नित्यमिति । सङ्कुलाः सङ्कीर्णा मार्गा यस्यास्तस्याम् अलङ्कृतैरित्यस्य मतङ्गजादिभिरप्यन्वयः । तत्रापि रथैः कनकोज्ज्वलैः सौवर्णचित्रमयैः ॥३॥ निर्विशद्भिर्मध्वादि भुञ्जानैर्भृङ्गैर्विहगैश्च घोषवत्कृतायाम् ॥★॥ अधुना तद्बाह्यमप्याह-उद्यानेति । नादितायामिति भृङ्गादिभिर्हेतुभिः सञ्जातनादायामित्यर्थः ॥४॥ श्रियः पतिरिति कर्तृपदमाद्यपद्यगतमत्र सम्बध्यते । तावन्ति स्त्रीसमसङ्ख्यानि विचित्राणि रूपाणि यस्यासौ । महत्य ऋद्धयो येषु तेषु ॥★॥ रेमे बहुधा चिक्रीड । कथं तदाह-षोडशेति । एकोऽपि वल्लभः सन् युगपत्प्रीतिदानपूर्वकमिति भावः । न च तदसम्भाव्यं तस्य शक्तिविशेषादित्याह-तावन्तीति । रूपाण्येकस्यैव विग्रहस्य सर्वत्र स्फुरणानि चित्रं बतैतदेकेन वपुषेत्यादि श्रीनारदोक्तेः अत एवोक्तं श्रीहरिवंशे जलक्रीडाप्रसङ्गे —

"अहमिष्टा मया सार्द्धं जले वसति केशवः । इति ता मेनिरे सर्वा मुदा नारायणस्त्रियः ॥
सर्वाः सुरतचिह्नाङ्ग्यः सर्वाः सुरततर्पिताः । मानमूहुश्च ताः सर्वा गोविन्दबहुमानजम् ।
अहमिष्टाहमिष्टेति स्निग्धे परिजने तदा । नारायणस्त्रियः सर्वा मुदा शंश्लाघिरे शुभाः ॥" किञ्च —
"एकार्पितमनोदृष्ट्योर्नर्ष्यान्ताश्चकुरङ्गनाः ॥ नारायणेन देवेन तर्प्यमाणमनोरथाः ॥
शिरांसि गर्वितान्यूहः सर्वा निरवशेषतः । बाल्लभ्यङ्के शिवमयं वहन्त्यश्चारुदर्शनाः ॥" इति ॥
महत्यस्तादृशमपि पुर्यामुक्तकृष्टा ऋद्धयो येषु ॥५॥

श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिणी ॥१-६॥

---

१. कन्दुकैर्हर्म्यसौधेषु-विज. । २. कवचो-च. पु. टी. । ३. तावद्विचित्ररूपोऽसौ-श्रीधर. वंशी. वीर. ; तावन्ति बिभ्रद्रूपाणि-विज. ।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ॥१-१६॥

श्रीमद्वीरराघवकृतभगवच्चन्द्रचन्द्रिका

कथम्भूताभिः नवयौवनेन कान्तिर्यासां ताभिः । तडितामिवद्युतिर्यासां ताभिः ॥२॥ नित्यमिति । सङ्कुला सङ्कीर्णा मार्गा यस्यां द्वारकायाम् इति पूर्वेण सम्बन्धः । मदच्युद्भिर्मदजलस्राविभिः मतङ्गजैर्गजैः सुष्ठ्वलङ्कृतैर्भटैः कनकेनोज्ज्वलै रथैश्च ॥३॥ किञ्च उद्यानैरुपवनैश्चाढ्यायाम् । कथम्भूतैः । पुष्पिता ये द्रुमास्तेषां राजिषु पङ्क्तिषु निर्विशन्तो भृङ्गाणां निवहाः समूहाः येषु तैः । नादितायाम् इत्यस्य मतङ्गजादिभिरिति शेषः । यद्वा, निर्विशतां भृङ्गाणां निवहैर्नादितायाम् ॥४॥ रेम इति । षोडशसहस्रपत्नीनामेक एव वल्लभः पतिस्सन् तावन्ति षोडशसहस्राणि रूपाणि मूर्तीर्बिभ्राणः । तासां गृहेषु रेम इति सम्बन्धः । कथम्भूतेषु । महत्यः ऋद्धयः भोग्यभोगोपकरणादिसमृद्धयः येषु ॥५॥

श्रीमद्विजयध्वजकृता पदरत्नावली

हर्म्येषु धनिनां योग्येषु समुन्नतगृहेषु सौधेषु सुधाधवलितेषूत्तमगृहेषु ॥२-३॥ निर्विशद्भिः मिथ उपभुञ्जानैः भृङ्गविहङ्गैः नादितायां घोषवत्कृतायाम् ॥४-५॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ॥१-७॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

रेमे षोडशेत्यादि । षोडशसहस्रं रूपाणि बिभ्रदपि पत्नीनां मध्ये एकवल्लभः एकश्चासौ वल्लभश्चेति तथा एक एव समषोडशसहस्रधा भासमानो रेम इत्यर्थः । न तु कायव्यूहेन कायव्यूहस्तु सामान्ययोगिनामेव सम्भवति अयं तु योगेश्वरेश्वरः एक एव षोडशगृहेषु रमितवान् नैतत्तर्कसहमित्यपि न व्यामकत्वात्तस्य वपुषः परिछिन्नत्वेऽपि व्यापकत्वमिति ॥५-९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

रेमे षोडशसहस्रपत्नीनामित्यादि । तावन्ति बिभ्रद्रूपाणि बिभ्रदपि एक एव वल्लभ एकश्चासौ वल्लभश्चेति इदमेव ऐश्वर्यम्, न तु कायव्यूहः स तस्य, स तु सामान्य-योगिनामपि सम्भवति, नापि स्फुरद्रूपत्वेन तासां तथा मानम्, केवलस्फूर्तेस्तथाव्यवहाराभावात् अपि तु मध्याह्नकालीय-सूर्यवत् वस्तुमहिमैवायम् ॥५॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥१-६॥

गूढार्थदीपिनी

॥१-२-३-४-५-६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

स्त्रीभिश्च जुष्टायामिति पूर्वेण सम्बन्धः ॥२-५॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

तडिद्द्युभिरिति । इतररागविस्मारणं धर्मादिफलरूपत्वं वा तासां निरूपितम् । एवं सर्वपुरुषार्थरूपाः स्त्रियः भगवदर्थं निरूपिताः । साधारणानां नागरीणां वा वर्णनं ततः केवलभोगस्थानत्वे गन्धर्वादिविमानवत् लोकोत्कर्षस्तथा न भविष्यतीति सेनां वर्णयति-नित्यं सङ्कुलमार्गायामिति । आस्रवन्मदैर्गजैः सर्वदैव सङ्कुला मार्गा यस्याः ततो भटा अपि स्वलङ्कृता अश्वरथाश्च एवं चत्वार्यङ्गानि उत्कृष्टानि निरूपितानि ॥३॥ एवं शौर्यसिद्ध्यर्थं सेनां निरूप्य भोगसिद्ध्यर्थमुद्यानानि निरूपयति । उद्यानं पुष्पप्रधानम् उपवनं फलप्रधानं तैराढ्या सम्पन्ना कोमलायां गन्धोत्कर्षमुक्त्वा शब्दोत्कर्षमाह-पुष्पितद्रुमराजिषु निविशन्तो ये

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

भृङ्गाः विहङ्गाश्च तैर्नादितायाम् । राजिपदेन एकस्यां पङ्क्तौ एकजातीया एव विहगाः विशन्तीति ज्ञापितम् । अन्यथा विजातीयशब्दसाङ्कर्ये कोलाहलः स्यात् । समन्तत इति पूर्वोक्ताः सर्वत्र ज्ञातव्याः । तादृशस्थाने षोडशसहस्राणाम् एक एव वल्लभो रेमे । सर्वासामेकत्रैव स्नेहः । षोडशविकारेषु प्रतिविकारं मनसः सहस्रधा सुखसिद्ध्यर्थं षोडशसहस्राणि तावतीनामपि धर्मसाधकत्वमपीत्याह-पत्नीनामिति । ननु भगवान् स्वकामनापूर्त्यर्थं बह्व्योऽपेक्ष्यन्ते । अष्टगुणकामानां तु कथमेकेन पूर्तिः । तत्रापि बह्वीनामेक इति दोषं व्यावर्तयितुमाह-तावन्ति बिभ्रद्रूपाणीति । यावत्यः स्त्रियः तावन्ति रूपाणि कृत्वा रेमे । तासां कामनापूर्त्यर्थमेव तानि रूपाणि जातानीति एकस्याः कामः अष्टगुणोऽप्येकेन पूर्यते तदर्थमेव प्राकट्यात् । सर्वासामेकत्र रमणे मात्सर्गकृतः क्लेशो भवेत् तदर्थमाह-तद्गृहेषु महर्द्धिषु इति तासामेव गृहेषु सर्वसमृद्धियुक्तेषु एकैकं हर्म्यं एकस्यै दत्त्वा तत्र सर्वसमृद्धिं सम्पाद्य स्वयमेकरूपेण तत्र प्रविष्टः । सम्यग् यावता सुखस्फूर्तिर्भवति तथा रेमे इत्यर्थः ॥४-५॥

सुबोधिनीसारः

षोडशसाहस्रपत्नीनां १६१०८ एकप्रियः तावत् विचित्रमूर्तिरसौ महत्य ऋद्धयो येषु तेषु तासां गृहेषु ॥५॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

ताः स्त्रीर्वर्णयति-उत्तमो वेषो वस्त्राभरणाद्यलङ्कारो यासां ताभिः । नवयौवनेन कान्तिर्यासां ताभिः । कन्दुकादिभिर्हर्म्येषु क्रीडन्तीभिः । तडितामिव द्यौर्द्युतिर्यासां ताभिः ॥२॥ मदच्युद्भिर्मतङ्गजैर्नित्यं सङ्कुला व्याप्ता मार्गा यस्यां तस्यां द्वारकायां स्वलङ्कृतैर्भटैरश्वैः कनकेनोज्ज्वलै रथैश्च नित्यं सङ्कुलमार्गायामित्यन्वयः ॥३॥ उद्यानैः पुष्पप्रधानैः उपवनैः फलप्रधानैश्चारामैराढ्यायां सम्पन्नायाम् । पुष्पिता ये द्रुमास्तेषां राजिषु निर्विशद्भिर्भृङ्गैर्भ्रमरैः विहङ्गैः पक्षिभिश्च समन्ततः सर्वतो नादितायाम् ॥४-५॥

अन्वितार्थप्रकाशिका ॥१-२-३-४-५-६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

नित्यं सङ्कुलः सङ्कीर्णो मार्गो यस्यास्तस्यां स्वपुर्यां निवसन्निति पूर्वेण सम्बन्धः ॥३-४॥ षोडशसहस्रपत्नीनाम् एकवल्लभ एकपतिरपि तासां गृहेषु तावन्ति षोडशसहस्राणि विचित्राणि आश्चर्यकराणि रूपाणि यस्य एवम्भूतः सन् ॥ असौ श्रीकृष्णः रेमे तावन्ति बिभ्रद्रूपाणीत्यपि पाठः ॥५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

॥१॥ ॥२॥ ॥३॥ ॥४॥ ॥५॥

कृष्णप्रिया

द्वारिकापुरी की सन्नरीयां नवयौवन से युक्त दिव्य कान्ति से सुशोभित थी । जब यौवन के मद से सम्त अंगनाये करकमलोंमें कन्दक लेकर आंगनमें खेलती थी तब मानो चारों दिशाओंमें बिजलीयां चमकती हो ॥२॥ द्वारकानगरी की छटा अलौकिक थी । उसकी सडकें मद चूते हुए मतवाले हाथियों, सुसज्जित योद्धाओं घोडों और स्वर्णमय रथों की भीड से सदा-सर्वदा भरी रहती थी ॥३॥ जिधर देखिये, उधर ही हरे भरे उपवन और उद्यान लहरा रहे है । वृक्षोंकी पत्त्यों फुलों से लदे हुए थे । वृक्षोमें भौंरे के गुनगुनाहट और पक्षीयों के कलरव सुनाई पडता था ॥४॥ भगवान श्रीकृष्ण सोलह हजार से अधिक पत्नियों के एकमात्र प्राणवल्लभ थे । उन पत्नियों के परम वैभव से सम्पन्न महल थे । महल एक एक के लिए अलग थे । जितनी पत्नियां थी उतने स्वरूप धारण करके समृद्ध महलोमें रमानाथ सदा रमण करते थे ॥५॥

प्रोत्फुल्लोत्पलकह्लारकुमुदाम्भोजरेणुभिः । वासितामलतोयेषु कूजद्द्विजकुलेषु च[1] ॥६॥
विजहार विगाह्याम्भो ह्रदिनीषु महोदयः । कुचकुंकुमलिप्तांगः[2] परिरब्धश्च योषिताम् ॥७॥
उपगीयमानो गन्धर्वैर्मृदंगपणवानकान् [3]। वादयद्भिर्मुदा [4]वीणां सूतमागधवन्दिभिः ॥८॥
[5]सिच्यमानोऽच्युतस्ताभिर्हसन्तीभिः स्म रेचकैः ।[6] प्रतिसिञ्चन् विचिक्रीडे [7] यक्षीभिर्यक्षराडिव ॥९॥

कर्दमक्षमा

प्रोत्फुल्लोत्पलकह्लारकुमुदाम्भोजरेणुभिः वासितामलतोयेषु कूजद्द्विजकुलेषु ह्रदिनीषु अम्भो विगाह्य कुचकुङ्कुमलिप्ताङ्गः योषिताम् च परिरब्धः महोदयः विजहार ॥६-७॥ मृदङ्गपणवानकान् वादयद्भिः गन्धर्वैः वीणाम् वादयद्भिः सूतमागधवन्दिभिः उपगीयमानः ताभिः हसन्तीभिः रेचकैः स्म सिच्यमानः अच्युतः यक्षीभिः यक्षराट् इव प्रतिषिञ्चन् विचिक्रीडे ॥८-९॥

श्रीधरस्वामिकृता भावार्थदीपिका

गेहविशेषणं प्रोत्फुल्लेत्यादि श्लोकेन ॥६॥ तथा ह्रादिनीषु चाम्भो विगाह्य विजहार महानुदयो वैभवं यस्य सः योषितां कुचकुङ्कमैर्लिप्ताङ्गः यतस्ताभिः परिरब्धः ॥७॥ सूतमागधवन्दिभिश्चोपगीयमानः ॥८-९॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

वासितानि परिमलीकृतानि तोयानि येषु गृहेषु ॥★॥ तेषु कह्लारं सौगन्धिकम् उत्पलकुमुदयोः श्वेतरक्तत्वेन भेदः ॥★॥ अत्र विश्वनाथः — अथ मधुरेण समापयेदितिन्यायेन कृष्णस्य जलविहारं वर्णयन् प्रथममुद्दीपनत्वेन नगररामणीयकमाह-सुखमित्यादिना । तद्गृहेषु तासां गृहेषु रेमे इत्यन्वयः । गृहेषु रमणमाह-प्रोत्फुल्लेति युग्मकम् ॥६॥ ह्रदिनीषु नदीषु । 'ह्रदिनी तटिनी नदी' इत्युत्पलोक्तेः । ताभिर्योषिद्भिः ॥★॥ जलविहारप्रकारमाह विगाह्येति । ह्रदिनीष्वित्युपलक्षणम्, हरिवंशानुसारेण सागरेऽपि ज्ञेयम् । महोदय इति जलक्रीडोपकरणवर्गसम्पत्तिरपि महती सूचिता सा चोक्ता तत्रैव —

"काश्चित्काष्ठमयैस्तेरु प्लवैः सर्वाङ्गशोभनाः । क्रौञ्चबर्हिणनागानामाकारसदृशैस्त्रियः ॥
मकराकृतिभिश्चान्या मीनाभैरपि चापराः । बहुरूपाकृतिधरैः पुप्लुवुश्चापराः स्त्रियः ॥"

किञ्च —

"नौभिर्गृहप्रकाशाभिश्चिक्रीडुरपराजिताः । स्नातानुलिप्ता मुदिताः सायाह्नेऽन्धकवृष्णयः ॥
आयाताश्चतुरास्त्रश्च वृत्ताश्च स्वस्तिकास्तथा । प्रासादा नौषु कौरव्य विहिता विश्वकर्मणा ॥"

किञ्च —

"भक्ष्यभोज्यानि पेयानि चोष्यं लेह्यं तथैव च । बहुप्रकारं मनसा ध्यातं तेषां भवत्युत ॥"

किञ्च —

"नारायणाज्ञया वृक्षाः पुष्पाणि मुमुचुर्भृशम् । ऋतवश्चानुरूपाणि विहायसि गतास्तथा ॥
ववौ मनोरहो वातो रतिखेदहरः सुखः । रजोभिः सर्वपुष्पाणां युक्तश्चन्दनशैत्यभृत् ॥
शीतोष्णमिच्छतां तत्र बभूव वसुधापते । वासुदेवप्रसादेन भौमानां क्रीडतां तदा ॥"

किञ्च —

"उवाह सर्वगन्धाढ्यं स्वच्छं वीर महोदधिः । तीयं चालवणं वीर वासुदेवस्य शासनात् ॥
गुल्फदघ्नं जानुदघ्नमूरुदघ्नं तथैव च । नारीणां स्तनदघ्नं च जलं समभिकाङ्क्षितम् ॥"

---

१. कुलादिभिः-विज. । २. परिरब्धस्वयोषितां-विज. । ३. वादिभिः-गो. प्रे. टी. । ४. वीणाः-वीर. विज. । ५. सेव्यमानो-वीर. विज. । ६. प्रतिषिञ्चन्-गो. प्रे. पु. ; पत्नीः सिञ्चन्-च. पु. टी. ; प्रतिसिञ्चन्-श्रीधर. वंशी. वीर. विज. । ७. मुखरः शक्तिभिः स्वयं-विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यादि ॥७॥ ॥०॥ ॥★॥ उपेति युग्मकम् । गीतगानोपकरणत्वेन गन्धर्वैर्मृदङ्गादीन् वादयद्भिः सूतादिभिस्तु पुराणगानाद्युपकारणत्वेन वीणामिति ज्ञेयम् एते च जलं परितः पटप्राकाराद्बहिर्ज्ञेयाः ॥८॥ रेचकैः चर्मादिनिर्मितसेचनयन्त्रैः । 'यन्त्रे चर्मादिरचिते सेचनार्थं तथौषधे । द्रावके रेचकः शिश्ने' इति धरणिः । विचिक्रीडे स्म । यक्षराट् कुबेरः । यक्षाणामणीवकामित्वेन तत्साम्यमुक्तम् ॥★॥ रेचकैर्जलक्षेपकयन्त्रविशेषैः विविधं चिक्रीडे चिक्रीड। अच्युत इति सर्वासां प्रत्येकं पार्श्वस्थित्यभिप्रायेण। तत्र धाष्ट्यांशे दृष्टान्तः-पक्षीभिरति। यक्षराट् कुबेरः ॥९॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

विजहारेति। तैर्व्याख्यातम्। यद्वा, सुखमित्यादिकं पञ्चकमेव। प्रोत्फुल्लेति युग्मकम्। वासितेष्वामलेषु च तोयेषु च विजहार। तत्प्रविगाह्येति ह्रदिनीष्वित्युपलक्षणं श्रीहरिवंशोक्तानुसारेण सागरेऽपि ज्ञेयम्। महोदय इति जलक्रीडोपकरणवर्गसम्पत्तिरपि महती सूचिता सा चोक्ता तत्रैव —

"काश्चित्काष्ठमयैस्तेरुः प्लवैः सर्वाङ्गशोभनाः। क्रौञ्चबर्हिणनागानामाकारसदृशैस्त्रियः॥
मकराकृतिभिश्चान्या मीनाभैरपि चापराः। बहुरूपाकृतिधरैः पुप्लुवुश्चापराः स्त्रियः॥" किञ्च —
"नौभिर्गृहप्रकाशाभिश्चिक्रीडुरपराजिताः। स्नातानुलिप्ता मुदिताः सायाह्नेन्धकवृष्णयः॥
आयाताश्चतुरास्रश्च वृत्ताश्च स्वस्तिकास्तथा। प्रासादा नौषु कौरव्य विहिता विश्वकर्मणा॥" किञ्च —
"भक्ष्यभोज्यानि पेयानि चोष्यं लेह्यं तथैव च। बहुप्रकारं मनसा ध्यातं तेषां भवत्युत॥" किञ्च —
"नारायणाज्ञया वृक्षाः पुष्पाणि मुमुचुर्भृशम्। ऋतवश्चानुरूपाणि विहायसि गतास्तथा॥
ववौ मनोरहो वातो रतिखेदहरः सुखः। रजोभिः सर्वपुष्पाणां युक्तश्चन्दनशैत्यभृत्॥
शीतोष्णमिच्छतां तत्र बभूव वसुधापते। वासुदेवप्रसादेन भौमानां क्रीडतां तदा॥" किञ्च —
"उवाह सर्वगन्धाढ्यं स्वच्छं वीर महोदधिः। तीयं चालवणं वीर वासुदेवस्य शासनात्॥
गुल्फदघ्नं जानुदघ्नमूरुदघ्नं तथैव च। नारीणां स्तनदघ्नं च जलं समभिकाङ्क्षितम्॥" इत्यादि ॥७॥ उपेति युग्मकम्।

गीतगानोपकरणत्वेन गन्धर्वैर्मृदङ्गादीन् वादयद्भिः सूतादिभिस्तु पुराणगानाद्युपकारणत्वेन वीणामिति ज्ञेयम् एते च जलं परितः पटप्राकाराद्बहिर्ज्ञेयाः। रेचकैर्जलक्षेपकयन्त्रविशेषैः विविधं चिक्रीडे चिक्रीड। अच्युत इति सर्वासां प्रत्येकं पार्श्वस्थित्यभिप्रायेण। तत्र धाष्ट्यांशे दृष्टान्तः-पक्षीभिरति। यक्षराट् कुबेरः ॥८-९॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-१६॥

अर्चायां देवचक्षुषां प्रतिमामेव देवतां मन्वानानां किं न किञ्चित् प्रतिमादर्शनादिकं नोद्देश्यमित्यर्थः ॥१०-११॥ उपासितास्तत्कालसेविताः भूजलादिशब्दाः देवतापराः भेदकृतः आत्मनि देहिनि देहगतभेदं कुर्वाणस्य मन्यमानस्य ते मुहूर्तसेवया विपश्चितस्तु हरन्तीत्यर्थः ॥१२॥ कुणपे शरीरे त्रिधातुके वातपित्तश्लेष्ममये स्वधीः मदीयत्वबुद्धिः भौमे पार्थिवप्रतिमादाविज्यबुद्धिः गोखरः गोखरप्राय अत्त अभिज्ञेषु जनेषु सत्स्वपिताननादृत्य देवतादिषु पूज्यबुद्धिं कुर्वन्त इत्यर्थः। एते श्लोकाः साधुजनप्रशंसापराः ॥१३-१५॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

प्रोत्फुल्लानाम् उत्पलानां रेणुभिर्वासितान्यमलानि तोयानि येषु तेषु। कूजन्ति द्विजानां पक्षिणां कुलानि समूहा येषु तेषु ॥६॥ विजहारेति। ह्रदिनीष्वम्भो विगाह्य विजहार। कथम्भूतः। महानुदयो वैभवं यस्य सः योषितां योषिद्भिः परिरब्धः। कुचो

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

हेतावत एव कुङ्कुमेन लिप्तमङ्गं वक्षो यस्य सः ॥७॥ किञ्चोपगीयमान इति । सूताः पौराणिकाः मागधाः वंशावलीपाठकाः । कथम्भूतैर्वीणादीन्वादयद्भिः ॥८॥ सेव्यमान इति । ताभिर्योषिद्भिः सेचनैः जलसेचनैः । हसन्तीभिः सेव्यमानः स्वयमपि ताः प्रतिषिञ्चन् यक्षीभिः यक्षराट् कुबेर इव चिक्रीडे विक्रीडितवान् ॥९॥

श्रीमद्विजयध्वजकृता पदरत्नावली

वासितामलतोयेषु परिमलीकृतजलेषु ॥६॥ ह्रदिनीषु स्वयोषितामिति षष्ठी तृतीयार्थे ॥७॥ वीणा इति द्वितीया ॥८॥ रेचकैः जलप्रक्षेपणचर्मपात्रैः शक्तिभिर्भार्यादिभिः सह ॥९॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

गन्धर्वादयः पटप्राकाराद्बहिः स्थिताः ज्ञेयाः ॥८-१२॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ॥५-९॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥६-९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

तडागादितोयसामान्येषु रमणमुक्त्वा नदीषु रमणमाह-विजहारेति । परिरब्धश्च अर्थात्ताभिः ॥७-८॥ रेचकैर्जलक्षेपकयन्त्रविशेषैः यक्षीभिरिति धार्ष्ट्यांशे दृष्टान्तः ॥९॥

गूढार्थदीपिनी

किञ्च कृष्णः ह्रदिनीषु (ह्रदिनी तरिनी नदी । इत्युत्पलोक्तेः ।) नदीषु अम्भो जलं निगाह्य आलोड्य विजहार । गाहू विलोडने धातुः । योषितां योषिद्भिः आलिङ्गितः । उदयः उत्कर्षः ॥७॥ उपेति युग्मम् । मृदङ्गादीन् तथा वीणां च वादयद्भिः सूतादिभिः उपगीयमानः स्त्रीभिश्च रेचकैः सिच्यमानः अच्युतः स्वयमपि अप्यर्थे ॥८-९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

गृहे रमणमुक्तमुपवनादिगतजलाशयक्रीडामाह-प्रोत्फुल्लेति । प्रोत्फुल्लानामुत्पलादीनां रेणुभिः वासितानि यान्यमलानि जलानि तेषु कूजन्ति द्विजकुलानि पक्षिसमूहा येषु तेषु रेमे ॥६॥ नदीषु विहारमाह-विजहारेति पञ्चभिः । महोदधेः महानुदयो यस्माद्व्रजतां स भक्तमनोरथपूरकः श्रियः पतिः ह्रदिनीषु नदीषु अम्भो विगाह्य विजहार । योषितां कुचकुङ्कुमैर्लिप्ताङ्गः यस्मात्ताभिः परिरब्धः ॥७-८॥ रेचकैः जलप्रक्षेपकयन्त्रैः ॥९॥

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

एवं प्रत्येकरमणमुक्त्वा गृहस्थतुल्यता जातेति विशेषरमणकथनार्थं समुदायेनापि रमणमाह-प्रोत्फुल्लेति सप्तभिः । प्रकर्षेणोत्फुल्लाः जलपुष्पजातयः कह्लारकुमुदाम्भोजजातयः सन्ध्यारात्रिदिनविकासयुक्ताः तासां रेणुभिः वासितानि यान्यमलतोयानि तद्युक्तेषु भगवान् रेमे इति सम्बन्धः । कूजतां द्विजानां कुलानि यत्र गन्धसम्पत्तिः शब्दसम्पत्तिश्च तत्रोक्ता । स्पर्शरसौ तत्र सहजौ । रूपं तु सिद्धमेव अत्राम्भो विगाह्य विजहार जलक्रीडां कृतवान् । ननु जलक्रीडायाः क्वोपयोग इति चेत्तत्राह-महोदय इति । महानभ्युदयो यस्य तेनैवं कर्तव्यमित्यर्थः । तत्रापि शोभामाह-कुचकुङ्कुमैरालिप्ताङ्ग इति । दूरीकरणार्थं वा जलावगाहनं तत्रत्यरसस्य स्वरूपमाह-योषितां परिरब्ध इति योषितां सम्बन्धी ताभिश्च परिरब्ध इत्यर्थः ॥६-७॥ तदा प्राकाराद्बहिः स्थितैः । रसोत्पादनार्थं गानस्तोत्रादिकं कर्तव्यम् । तदपि कृतवानित्याह-उपगीयमानो गन्धर्वैरिति । उपगानं तन्नामगीतानां गानम् । वाद्यमप्याह-मृदङ्गपणवानकान् वीणाश्च वादयद्भिरिति । अन्येषामपि प्रशंसामाह-सूतमागधवन्दिभिरिति । एवं बहिरुद्दीपनादिकमुक्त्वा स्त्रीणां स्वैरलीलामाह-सिच्यमानोऽच्युतस्ताभिरिति । अच्युतत्वात् बह्वीभिरपि न भगवतः कामस्य कापि हानिरिति । रेचकैः

श्रीमद्वल्लभाचार्यकृतसुबोधिनी

चर्मवंशनिर्मितैः । स्वभावतोऽपि हास्यं जयाद्वा उभयथापि तासां परमसन्तोष उक्तः । अत्यन्तं स्पष्टः कामः ईश्वरस्य निरूपयितुम् अनुचितेति स्मेत्याह-ताः प्रति सिञ्चन् विशेषेण चिक्रीडे । यक्षाः कामरसकलहे निपुणाः तथा स्त्रीणां भगवतश्चेति एकदेशप्रसिद्धिः माहात्म्यं सूचयतीति अयुक्तोऽपि कुबेरयक्षिणीनां दृष्टान्तभावो निरूप्यते यथा समुद्र इव गाम्भीर्ये धैर्येण हिमवानिवेति वाक्यानि ॥८-९॥

सुबोधिनीसारः

प्रोत्फुल्लानामुत्पलादीनां रेणुभिर्वासितं सुगन्धितममलं तोयं येषु कूजन्ति द्विजकुलानि येषु तेषु गृहविशेषणम् ॥६॥ ह्रदिनीषु अम्भो वार्विगाह्य महानुदयो यस्य स कुचकुङ्कुमेन लिप्तान्यङ्गानि यस्य स योषितां स्त्रीणां ताभिः परिरब्धः सङ्गतो विजहार ॥७॥ मृदङ्गपणवानकान् वादयद्भिर्गन्धर्वैः उपगीयमानो वीणां च वादयद्भिः ॥८॥ हसन्तीभिः ताभिः स्त्रीभिः सिच्यमानो हरिः रेचकैः प्रतिषिञ्चन् विचिक्रीडे यक्षीभिर्यक्षराट् कुबेर इव ॥९॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

प्रोत्फुल्लानां सन्ध्यारात्रिदिनविकासयुक्तानामुत्पलादीनां रेणुभिर्वासितानि अमलानि तोयानि येषु तेषु, तथा कूजन्ति द्विजानां पक्षिणां कुलानि येषु तेषु सरस्सु च रेमे ॥६॥ तथा ह्रदिनीषु अम्भो विगाह्य महानुदयो वैभवं यस्य सः योषितां योषिद्भिश्च परिरब्ध आलिङ्गितः अत एव कुचकुङ्कुमेन लिप्ताङ्गो विजहारेत्यन्वयः ॥७॥ मृदङ्गादीनि वादयद्भिरुपगीयमानः ॥८॥ हसन्तीभिस्ताभिर्योषिद्भिः स्मरेचकैः सिच्यमानः स्वयमपि ताः प्रतिषिञ्चन् अच्युतः कृष्णः यक्षीभिः सह यक्षराट् कुबेर इव चिक्रीडे विक्रीडितवान् ॥९॥

अन्वितार्थप्रकाशिका

विजहारेति ॥ तथा ह्रदिनीषु अम्भो विगाह्य महानुदयो वैभवं यस्य सः योषितां योषिद्भिश्च परिरब्ध आलिङ्गितः अत एव कुचकुङ्कुमेन लिप्ताङ्गो विजहार ॥७॥ उपेति द्वयम् । मृदङ्गादीनि वादयद्भिर्गन्धर्वैस्तथा सूतादिभिश्चोपगीयमानः अच्युतोऽपि जलक्रीडायामस्माभिः पराभूत इति मत्वा हसन्तीभिस्ताभिर्योषिद्भिः स्मरेचकैः सेचनपात्रैः पिचकारीति प्रसिद्धैः । स्मेति पादपूर्तौ । रेचक एव तद्वाची तैः सिच्यमानः स्वयमपि ताः प्रतिषिञ्चन् अच्युतः कृष्णः यक्षीभिः सह यक्षराट् कुबेर इव चिक्रीडे विक्रीडितवान् । कर्मव्यतिहारे तङ् ॥८-९॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

प्रोत्फुल्लोत्पलादीनां रेणुभिः वासितानि अमलतोयानि निर्मलजलानि वाप्यादिजलस्थानानि येषु तेषु कूजद्द्विजकुलेषु तद्गृहेषु रेमे इति पूर्वेणान्वयः ॥६॥ श्रीकृष्णस्य जलक्रीडामाह-पञ्चभिः । तथा ह्रदिनीषु च नदीतडागेषु स्थितम् अम्भोज जलं विगाह्य प्रविश्य ॥ श्रीकृष्णो विजहार । स कथम्भूतः । महानुदयः क्रीडासामग्री यस्य सः । योषितां कुचकुङ्कुमैर्लिप्ताङ्गः यतस्ताभिः परिरब्ध आलिङ्गितश्च ॥ अतो लिप्ताङ्गः ॥७-८॥ ताभिः रेचकैर्जलसेचनयन्त्रैः भाषायां पिचकारीति प्रसिद्धैः ॥९॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

प्रोत्फुल्लेति ॥ विजहारेति च ॥ प्रोत्फुल्लानि यानि उत्पलानि कह्लाराणि कुमुदानि अम्भोजानि च तेषां रेणवस्तैः वासितान्यमलानि तोयानि येषु तेषु कूजन्ति द्विजानां पक्षिणां कुलानि समूहा येषु तेषु ह्रदिनीषु च अम्भः विगाह्य महानुदयो वैभवं यस्य स कृष्णः योषितां कुचकुङ्कुमलिप्ताङ्गः ताभिरेव परिरब्धः आलिङ्गितः संश्च विजहार ॥६-७॥ उपगीयमान इति ॥ मृदङ्गपणवानकान् तथा वीणां वादयद्भिः गन्धर्वैः सूतमागधबन्दिभिश्च मुदा उपगीयमानः ॥८॥ सिच्यमान इति ॥ हसन्तीभिः ताभिः स्त्रीभिः रेचकैर्जलसेचनयन्त्रैः सिच्यमानः स्वयं प्रतिषिञ्चंश्च अच्युतः यक्षीभिः यक्षराट् कुबेरः इव विचिक्रीडे द्वयोरेकसम्बन्धः ॥९॥

कृष्णप्रिया

सभी पत्नियों के महलोमें मनोहर सरोवर थे । उनका निर्मलजल खिलेहुए, नीले, पीले, श्वे लाल आदि भांति भांति के कमलों के पराग से महकता रहता था । उनमें झुंड के झुंड हंस सारस आदि सुन्दर सुन्दर पक्षियों के मधुर मधुर कल्लोल श्रवणपथमें आते थे । भगवान श्रीकृष्ण उन जलाशयोमें तथा कभी कभी नदियों के जलमें भी प्रवे शर अपनी पत्नीयों के साथ जलक्रीडा करते थे । भगवान के साथ विहार करनेवाली पत्नियां जब उन्हें अपने भुजापाशमें बांध लेती थी, आलिंगन करती, तब भगवान के श्रीअंगोमें उनके वक्षःस्थलकी केसर लग जाती थी ॥६-७॥ उस वक्त गन्धर्व उनके यश का ग्ञामान करने लगते, सूत, मागध एवं वन्दीजन बडे आनन्दसे मृदंग, ढोल, नगारे और वीणा का गान और बाजे बजाने लगते ॥८॥ भगवान की पत्नियां कभी कभी हास्य के साथ पिचकारियों से उन्हें भीगो देती थी । वे भी उनको तर कर देते । इस प्रकार भगवान अपनी निज वनिताओं को स्नेह से आर्द्र करते थे उनका दर्शन करने से ऐसा मालूम पडडता था मानो यक्षराज कुबेर यक्षिणियों के साथ जलक्रीडा करते हो ॥९।

ताः क्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः सिञ्चन्त्य उद्धृतबृहत्कबरप्रसूनाः ।
[1]कान्तं स्म रेचकजिहीरषयोपगुह्य जातस्मरोत्सवलसद्वदना विरेजुः ॥१०॥
कृष्णस्तु तत्स्तनविषज्जितकुङ्कुमस्रक् [2]क्रीडाभिषङ्गधुतकुन्तलवृन्दबन्धः ।
सिञ्चन् मुहुर्युवतिभिः प्रतिषिच्यमानो रेमे करेणुभिरिवेभपतिः परीतः ॥११॥
[3]नटानां [4]नर्तकीनां च गीतवाद्योपजीविनाम् । क्रीडालङ्कारवासांसि कृष्णोऽदात्तस्य च स्त्रियः ॥१२॥
कृष्णस्यैवं विहरतो गत्यालापेक्षितस्मितैः ।[5] नर्मकेलिपरिष्वङ्गैः स्त्रीणां किल हृता धियः ॥१३॥
ऊचुर्मुकुन्दैकधियोऽगिर उन्मत्तवज्जडम् । चिन्तयन्त्योऽरविन्दाक्षं तानि मे गदतः शृणु ॥१४॥

कर्दमक्षमा

ताः क्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः उद्धृतबृहत्कबरप्रसूनाः सिञ्चन्त्यः कान्तम् रेचकजिहीरषया उपगुह्य जातस्मरोत्सवलसद्वदनाः विरेजुः स्म ॥१०॥ तत्स्तनविषज्जितकुङ्कुमस्रक् क्रीडाभिषङ्गधुतकुन्तलवृन्दबन्धः कृष्णः तु सिञ्चन् युवतिभिः प्रतिषिच्यमानः करेणुभिः परीतः इभपतिः इव रेमे ॥११॥ नटानाम् नर्तकीनाम् गीतवाद्योपजीविनाम् च कृष्णः क्रीडालङ्कारवासांसि तस्य स्त्रियः च अदात् ॥१२॥ एवं विहरतः कृष्णस्य गत्यालापेक्षितस्मितैः नर्मकेलिपरिष्वङ्गैः स्त्रीणाम् धियः किल हृताः ॥१३॥ मुकुन्दैकधियः अरविन्दाक्षम् चिन्तयन्त्यः उन्मत्तवत् जडम् गिर ऊचुः तानि गदतः मे शृणु ॥ १४॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ताः क्लिन्नवस्त्राः अत एव विवृतोरुकुचप्रदेशाः उद्धृतानि विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः जातेन स्मरेण य उत्सवस्तेन लसन्ति वदनानि यासां ताः ॥१०॥तासां स्तनेभ्यो विषज्जितकुङ्कुमा स्रग्यस्य क्रीडाया अभिषङ्गेणाभिनिवेशेन धुतः कम्पितः कुन्तलवृन्दबन्धो यस्य सः ॥११-१३॥ मुकुन्दैकधियः समाहिता इव क्षणमगिरः सत्यः पुनस्तमेवेशं चिन्तयन्त्यो जडं यथा भवति तथा यानि वाक्यानि ऊचुस्तानि मे मत्तो गदतः शृण्वित्यर्थः ॥१४॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ताः स्त्रियो विरेजुः स्मेति सम्बन्धः । अत एव क्लिन्नवस्त्रत्वादेव विवृताः प्रत्यक्षीभूताः ऊरुप्रदेशाः कटिप्रदेशाश्च यासां

---

[1] कान्तं स्वसेचनजिहीर्षुतयोप-वीर. ; कान्तस्य चेतनजिहीर्षुतयोप-विज. । [2] क्रीडाभिसङ्गतसकुन्तलकुन्दगन्धः-विज. । [3] एतं श्लोकमारभ्य सप्तविंशतिशललोक पर्यन्ताः १६ श्लोका न सन्ति-विज. । [4] नर्तकानां-च. पु. टी. । [5] नर्मक्ष्वेलि-श्रीधर. वंशी. वीर. विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

ताः ॥★॥ ततश्च ता अधिकशोभन्तेत्याह-ता इति । कान्तं सिञ्चन्त्यः स्मेति विस्मये जिहीर्षया तन्मिषेणेत्यर्थः । उत्स्मयः कमप्युत्कर्षं प्राप्तवत्स्मितम् । उत्सवेति पाठे उत्स्मयः कमप्युत्कर्षं प्राप्तवत्स्मितम् ॥१०॥ विषज्जितकुङ्कुमा लग्नकाश्मीररागस्रक् माला ॥★॥ श्रीभगवांस्तु परमानन्दं प्रापेत्याह-कृष्णस्त्विति । तु-शब्दो विशेषे तमेव दर्शयति । तदित्यादिविशेषणैः जलक्रीडायां स्तनकुङ्कुमलेपोपायेऽपि तद्विषज्जितस्रक्त्वम् । प्रागेव स्रजि संलग्नत्वेन तदानीमपि तस्यानपगमात् सिञ्चन्त्यस्ता मुहुरित्यस्योभयतोऽप्यन्वयः । परीतः युवतिभिरेव वेष्टितः स्वच्छन्दतया जलक्रीडासुखे दृष्टान्तः करेणुभिरिति ॥११॥ क्रीडासमकालिकानि वस्त्रादीनि । तस्य श्रीकृष्णस्य ॥★॥ अतो नर्तकादीनप्यानन्दयदित्याह-नटानामिति । षष्ठ्यश्चतुर्थीषु स्त्रियश्चाहुः ॥१२॥ 'क्ष्वेलिर्हास्योक्तिरुच्यते' इति ॥★॥ तत्रैवाश्चर्यविशेषं वक्तुमाह-कृष्णस्येति द्वाभ्याम् । एवं पूर्वोक्तप्रकारेण विहरतः कदाचिद्गृहे कदाचिज्जले च क्रीडतः कृष्णस्य गत्यादिभिः स्त्रीणां स्वभावत एवोल्लङ्घितविचारप्रेम्णान्धियो हृताः स्ववशीकृताः । तत्र क्ष्वेलीस्तनालभनादि(भिः) गत्यादीनां यथोत्तरं धीहरणे श्रैष्ठ्यम् । किल वार्तायाम् । इदमाश्चर्यवृत्तं श्रूयतामित्यर्थः ॥१३॥ इत्यर्थ इति-या गिर इति बहुवचनेन पदसमूहात्मकवाक्यानि लक्ष्यन्त इति भावः ॥★॥ तत्र कदाचिदुन्मत्तवत् धुस्तूरादिविक्षिप्तचित्ताः इव तत्रैववागिरः मोहप्राप्त्या क्षणं निद्राणा इव च तूष्णीं स्थिताः सत्यः अरविन्दाक्षं परोक्षमपरोक्षं वा स्थितं चिन्तयन्त्यः परोक्षतया भावयन्त्यो जडं विचारशून्यं यथा स्यात्तथोचुः स्वप्न इव प्रलेपुः । उन्मादेऽपि तच्चिन्तने हेतुः मुकुन्दे निजसर्वदुःखविमोचके तस्मिन्नेव एका अव्यभिचारिणी धीर्यासां ताः तत्रापरोक्षत्वपक्षे श्रीभगवांस्तु तच्छ्रवणकौतुकाय तत्र तूष्णीं स्थित इति ज्ञेयम् । वैचित्यविप्रलम्भाख्यो हि भावोऽयं मुक्ताफलादौ वोपदेवादिभिः स्वीकृतः वर्णितश्च श्रीहर्षमिश्रादिभिरिति ॥★॥ अत्र विश्वनाथस्तु-इयं प्रेम्णः षष्ठी भूमिका । अनुरागभेदः प्रेमवैचित्र्याख्यस्तल्लक्षणमुज्ज्वलनीलमणावुक्तम् यथा —

"प्रियस्य सन्निकर्षेऽपि प्रेमोत्कर्षस्वभावतः । या विश्लेषधियार्तिस्तत् प्रेमवैचित्र्यमुच्यते" ॥ इति ॥१४॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ततश्च ता अधिकशोभन्तेत्याह-ता इति । कान्तं सिञ्चन्त्यः स्मेति विस्मये जिहीर्षया तन्मिषेणेत्यर्थः । उत्स्मयः कमप्युत्कर्षं प्राप्तवत्स्मितम् । उत्सवेति पाठः क्वचित् ॥१०॥ श्रीभगवांस्तु परमानन्दं प्रापेत्याह-कृष्णस्त्विति । तु-शब्दो विशेषे तमेव दर्शयति । तदित्यादिविशेषणैः जलक्रीडायां स्तनकुङ्कुमलेपोपायेऽपि तद्विषज्जितस्रक्त्वम् । प्रागेव स्रजि संलग्नत्वेन तदानीमपि तस्यानपगमात् सिञ्चन्त्यस्ता मुहुरित्यस्योभयतोऽप्यन्वयः । परीतः युवतिभिरेव वेष्टितः स्वच्छन्दतया जलक्रीडासुखे दृष्टान्तः करेणुभिरिवेति ॥११॥ अतो नर्तकादीनप्यानन्दयदित्याह-नटानामिति । षष्ठ्यश्चतुर्थीषु स्त्रियश्चाहुः ॥१२॥ तत्रैवाश्चर्यविशेषं वक्तुमाह-कृष्णस्येति द्वाभ्याम् । एवं पूर्वोक्तप्रकारेण विहरतः कदाचिद्गृहे कदाचिज्जले च क्रीडतः कृष्णस्य गत्यादिभिः स्त्रीणां स्वभावत एवोल्लङ्घितविचारप्रेम्णान्धियो हृताः स्ववशीकृताः । तत्र क्ष्वेलीस्तनालभनादि(भिः) गत्यादीनां यथोत्तरं धीहरणे श्रैष्ठ्यम् । किल वार्तायाम् । इदमाश्चर्यवृत्तं श्रूयतामित्यर्थः ॥१३॥ तत्र कदाचिदुन्मत्तवत् धुस्तूरादिविक्षिप्तचित्ताः इव तत्रैववागिरः मोहप्राप्त्या क्षणं निद्राणा इव च तूष्णीं स्थिताः सत्यः अरविन्दाक्षं परोक्षमपरोक्षं वा स्थितं चिन्तयन्त्यः परोक्षतया भावयन्त्यो जडं विचारशून्यं यथा स्यात्तथोचुः स्वप्न इव प्रलेपुः । उन्मादेऽपि तच्चिन्तने हेतुः मुकुन्दे निजसर्वदुःखविमोचके तस्मिन्नेव एका अव्यभिचारिणी धीर्यासां ताः तत्रापरोक्षत्वपक्षे श्रीभगवांस्तु तच्छ्रवणकौतुकाय तत्र तूष्णीं स्थित इति ज्ञेयम् । वैचित्यविप्रलम्भाख्यो हि भावोऽयं मुक्ताफलादौ वोपदेवादिभिः स्वीकृतः वर्णितश्च श्रीहर्षमिश्रादिभिरिति ॥१४॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१-१६॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

ता इति । क्लिन्नानि सिक्तानि वस्त्राणि यासां ताः अत एव विवृतोरुकुचप्रदेशाः । ताश्च उद्धृतानि विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः योषितः कान्तं भगवन्तं सिञ्चन्त्यः स्वसेचनजिहीर्षुतया । स्वशब्दः कान्तपरः । तस्य सेचनपरिहारेच्छया

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तमेवोपगूह्यालिङ्ग्य तेन जातेन स्मरेण उत्स्मय: उत्कृष्टहास: तेन लसन्ति वदनानि यासां ता विरेजु: ॥१०॥ कृष्णस्त्वित‍ि । तासां स्तनेभ्य: विषज्जिता कुङ्कुमस्त्रग्यस्य स: क्रीडायामभिषङ्गेणाभिनिवेशेन धुत: कम्पित: कुन्तलवृन्दबन्धो यस्य स: स्वयं मुहु: सिञ्चन् युवतिभि: परिषिच्यमानश्च करेणुभिर्गजीभि: परिवृतो गजराडिव रेजे ॥११॥ नटानामिति । गीतैर्वाद्यैश्चोपजीवन्तीति तथा तेषां नटादीनां नटादिभ्य: क्रीडार्थं येऽलङ्कारा भूषणानि वासांसि च तानि प्रादात्प्रायच्छत् । तथा तस्य स्त्रियोऽपि नर्तकीभ्य: प्रायच्छन् ॥१२॥ कृष्णस्येति कर्तरि षष्ठी । गत्यादिभिरेवं विहरता कृष्णेन स्त्रीणां धिय: हृता: ॥१३॥ अत एव मुकुन्द एवैकस्मिन् धीर्यासां तास्तमरविन्दाक्षं चिन्तयन्त्यस्तत्सान्निध्याभावदशायामिति शेष: । अगिर इतिच्छेद: । क्षणमगिर: धृतमौना इत्यर्थ: । तत उन्मत्त इव जडं यथा तथा यानि वाक्यान्यूचुस्तानि सम्यगादरत: कथयतो मत्त: शृणु ॥१४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

क्लिन्नान्यार्द्राणि वस्त्राणि यासां ता: । विवृता उरुप्रदेशा: कुचप्रदेशाश्च यासां ता: । बृहन्ति कबराणि बृहत्कबराणि उद्धृतानि उन्मुक्तानि बृहत्कबरपूरितानि प्रसूनानि यासां ता: । कान्तस्य कमनीयस्य कृष्णस्य चेतनजिहीर्षया चित्तवशीकरणेच्छया उपगूहनक्रियया जातेनाविर्भूतेन स्मरोत्स्मयेन उत्कृष्टेन मन्दस्मितेन लसन्ति वदनानि यासां ता: ॥१०॥ तासां स्तनेभ्य: विषज्जितानि सङ्क्रान्तानि कुङ्कुमानि तत्स्तनविषज्जितकुङ्कुमानि तैर्मिश्रा स्त्रग्यस्य स तथा कुन्तलै: सह वर्तमान: सकुन्तल: क्रीडायामतिसङ्गतश्चायं सकुन्तलश्च कुन्दगन्धश्च तथा कुन्दपुष्पवत् गन्धो यस्य स तथा सिञ्चन् जलमिति शेष: ॥११-२७॥

श्रीमज्जीवगोस्वामिकृत: क्रमसन्दर्भ:

कृष्णस्यैवं विहरत इत्यादि ॥१३-२४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भ:

ता: क्लिन्नवस्त्रेत्यादि उद्धृतेषु बृहत्सु कबरेषु प्रसूनानि यासां जलक्लेदनभिया उद्धृत्या बद्धा ये कबरास्तेष्वित्यर्थ: । कान्तं श्रीकृष्णम् उपगुह्य दोर्भिरापीड्य रेचकयन्त्रं तस्य जिहीर्षया रेजु: न तु जहु: विजिहीर्षया रमणाभिनयनमेव चक्रुरित्यर्थ: ॥१०-१३॥ऊचुरित्यादि । उन्मत्तवत् उन्मत्ता इव जडं यथा भवति तथा ऊचु: । मुकुन्दे एका एकाग्रा धीर्यासाम् । अथवा पूर्वम् अगिर: सत्य: जडं यथा भवति तथा स्थिता: पश्चात् ऊचु: । तत्र कस्याश्चिद्दिनेऽपि रात्रिशेषभ्रम: । तत्रैव कस्याश्चित् कृष्णपक्षभ्रम: । कस्याश्चिदकालेऽपि जलदागमभ्रम इत्यादि असति विप्रलम्भेऽपि विप्रलम्भवदनुरागसागरस्योन्मर्यादतायां समीपस्थमपि श्रीकृष्णमालिङ्गतीनां तथा भाषणादुन्मत्ता । सा तु वैचित्र्याख्यभावव्यञ्जिका न तून्मादवैचित्र्यम् । यथा सम्भोगेऽपि वियोगाभगाढोत्कण्ठानवस्थित: । असम्बन्धं यदाचष्टे तद्वैचित्यं प्रकीर्त्यते तत्तु अतिशयप्रेमवैह्वल्यम् ॥१४॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

उद्धृतेषु बृहत्सु कबरेषु प्रसूनानि यासां जलक्लेदनभिया कबरा ऊर्ध्वं कृत्वा बद्धा इत्यर्थ: । कान्तं श्रीकृष्णं रेचको जलयन्त्रं हर्तुमिच्छया उपगुह्य विरेजु: ॥१०॥ ॥११-१३॥ ऊचुर्मुकुन्दैकधिय इत्यादि । उन्मत्तवद्यथा भवति, जडं यथा भवति, तथा गिर ऊचु: । यद्वा, पूर्वमगिर: सत्यश्चिन्तयामासु: पश्चादुन्मत्तवदूचु: । तत्र कस्याश्चिद्दिने रात्रिशेषभ्रम:, कस्याश्चित्तत्रैव कृष्णपक्षरात्रिशेषभ्रम:, कस्याश्चिदकाले जलदभ्रम: कस्याश्चित्तत्रैव वसन्तभ्रम इत्यादिभिरसति विप्रलम्भेऽपि विप्रलम्भवदनुरागसागरस्योन्मर्यादतया समीपस्थमपि श्रीकृष्णमाश्लिष्यमाणमपि समुद्दिश्य तथावचनादुन्मत्तता । अयं तु वैचित्र्याख्यो भाव: । तथा च ———

"सम्भोगे च वियोगे च गोढोत्कण्ठानवस्थिता । असम्बन्धं यदाचष्टे तद्वैचित्र्यं विदुर्बुधा: ॥" इति ॥

तत्तु अतिशयप्रेमचमत्कारफलम् ॥१४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

उद्धृतानि विस्रतानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः ॥१०॥ तासां स्तनेभ्यो विषज्जितकुङ्कुमा स्रक् यस्य सः ॥११॥ नटानामिति चतुर्थ्यर्थे षष्ठ्यः ॥१२-१३॥ अन्मत्तवत् हृतबुद्धित्वात् धूस्तुरादिविक्षिप्तचित्ता इव अरविन्दाक्षमपरोक्षमपि परोक्षणया चिन्तयन्त्यो जडं विचारशून्यं यथा स्यात्तथा यान्यूचुस्तानि मे मत्तः शृणु । इयं प्रेम्णः षष्ठी भूमिका । अनुरागभेदः प्रेमवैचित्र्याख्यस्तल्लक्षणमुज्ज्वलनीलमणावुक्तम् यथा —

"प्रियस्य सन्निकर्षेऽपि प्रेमोत्कर्षस्वभावतः । या विश्लेषधियार्तिस्तत् प्रेमवैचित्र्यमुच्यते" ॥ इति ॥१४॥

गूढार्थदीपिनी

सिञ्चन्त्यः ताः स्त्रियः विरेजुः स्मेति सम्बन्धः । कथम्भूताः स्त्रियः । क्लिन्नानि आर्द्राणि वस्त्राणि यासाम् अत एव विवृता प्रकटिता दृष्टिगोचरीभूता ऊरुकुचप्रदेशा यासां ताश्च ताश्च ताः । पुनश्च । उद्धृतानि विगलितानि बृहत्केशपाशेभ्यः प्रसूनानि यासां ताः । पुनश्च । रेचकजिहीर्षया कान्तमुपगुह्य आलिङ्ग्य जातस्मरेण य उत्सवः आनन्दः तेन लसन्ति शोभमानानि मुख्यानि यासां ताः । स्म विस्मये ॥१०॥ युवतिभिः मुहुः प्रतिषिच्यमानः कृष्णस्तु स्वयं ताः सिञ्चन् सन् रेमे इत्यन्वयः । यथा करेणुभिः गजीभिः परीतो वेष्टित इभपतिः गजेन्द्रो रमते तथा । कथम्भूतः कृष्णः । तासां स्तनेभ्यः विषज्जिता संस्पृष्टा अत एव कुङ्कुमरागयुक्ता स्रक् यस्य । पुनश्च । क्रीडाया अभिषङ्गेण आसक्त्या धुतः कम्पितः शिथिलो वा केशकलापबन्धो यस्य सः ॥११॥ नटानामिति चतुर्थ्यर्थे षष्ठ्यः । नटादिभ्यः क्रीडाकालिकानि वस्त्रादीनि । अप्यर्थे चकारः स्त्रियोऽपि ददुरिति वचनव्यत्ययेनान्वयः ॥१२॥ कृष्णस्य गत्यादिभिः स्त्रीणां धियः आकृष्टा इत्यन्वयः । आलापो रतिसम्बन्धी ईक्षितं कटाक्षपातः तत्पूर्वकं स्मितं च तैः । नर्म दूरतः परिहासः । क्ष्वेलिः (क्ष्वेलिर्हास्योक्तिरुच्यते ।) आकृष्य चुम्बनपूर्वकं हास इति भेदः । परिष्वङ्गः आलिङ्गनं तैः ॥१३॥ प्रत्यक्षमपि कृष्णं प्रेमावेशात् परोक्षमिव चिन्तयन्त्यः क्षणमगिरः धृतमौनाः सत्यः पुनः उन्मत्तवत् जडमसम्बद्धमिव वाक्यानि ऊचुः तानि मे मत्तः सकाशात् शृणु ॥१४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

क्लिन्नानि आर्द्राणि वस्त्राणि यासां ता अतः विवृता ऊरुकुचप्रदेशा यासां ताः । कान्तं श्रीकृष्णं सिञ्चन्त्यः स्मरे च कस्य जिहीर्षया हरणेच्छया तमेवोपगुह्य जातेन स्मरेण यः उत्सवः तेन विलसन्ति वदनानि यासां ता विरेजुः ॥१०॥ कृष्णस्तु करेणुभिः गजीभिः परीतः इभपतिः जगपतिरिव युवतिभिः परिसिच्यमानः स्वयं मुहुः सिञ्चन् रेजे । कथम्भूतः । तत्स्तनेभ्यः विषज्जितकुङ्कुमाः स्रजो यस्य सः क्रीडायां य अभिषङ्गः अभिनिवेशः तेन धुतः कम्पितः कुन्तलवृन्दबन्धो यस्य सः ॥११॥ गीतैर्वाद्यैश्चोपजीवन्तीति ते तथा तेषां नटादीनां नटादिभ्यः क्रीडार्थानि यान्यलङ्कारवासांसि तानि ॥१२॥ हृताः कृष्णैकविषयाः बभूवुः ॥१३॥ मुकुन्दे एकस्मिन् धियो यासां ताः । सन्निधिभावेऽपि तमेवारविन्दाक्षं चिन्तयन्त्यः अत एव क्षणमगिरः धृतमौनाः भूत्वा तत उन्मत्त इव जडं विवेकशून्यं यथा भवति तथा यानि वाक्यानि ऊचुः तानि मे मत्तो गदतः शृणु ॥१४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ततस्तासां रसाभिनिवेशेन विस्मृतदेहानां कर्मलीलामाह-ताः क्लिन्नवस्त्रेति । क्लिन्नवस्त्रेण कृत्वा विवृता उद्घाटिताः ऊरुकुचप्रदेशा यासां तादृश्योऽपि सिञ्चन्त्यः । उद्धतानि बृहत्कबरेभ्यः प्रसूनानि यासां यथा ताः प्रसूनार्थं भगवत्समीपमायान्ति । तथा भगवान् विवृतावयवा अपि सिञ्चन् एव आसक्ता जाताः तदा केशपाशेभ्यः पुष्पाणि गृहीतवानित्यर्थः । अनेन रेचकान्यपि गृहीतवानिति लक्ष्यते । ततो भगवान् उच्चहस्तः पुष्परेचकानि गृहीत्वा यदा स्थितः तदा रेचकजिहीर्षया कान्तमुपगुह्य मध्ये जातस्मरेण य उत्सव आसीत् परमानन्दस्तेन लसद्वदनाः सत्यः मध्ये नीलमणेः परितः पद्मरागाणीव विरेजुः ॥१०॥ एवं तासां सुखार्थमतिक्रमेऽपि तासां सौन्दर्यमिव भगवतोऽपि सुखमेव जातमित्याह-कृष्णस्त्विवति । तासां स्तनेषु विषज्जितं कुङ्कुमं तद्युक्ता स्रक् माला यस्य तादृशो जातः । ततः क्रीडायां योऽभिषङ्गः आसक्तिस्तेन धुता मुक्ताः कुन्तलवृन्दानां बन्धाः यस्य ।

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

नानाविधकौतुकार्थं कृत इति प्रतिभाति। यथा तासामवयवप्राकट्यं तथा भगवतोऽपि कुङ्कुमसम्बन्धः केशविमोचकं च। एवं तुल्यतया स्वयं सिञ्चयन् अविचारार्थं तादृशदशायुक्ताभिः परिषिच्यमानः रेमे। अमर्यादया रमणं प्रतिपादयन् गोपीष्विव दृष्टान्तमाह-करेणुभिरिवेभपतिरिति। करेणुभिर्वेष्टितो यथा गजेन्द्रो भवति ॥११॥ एवं समुदायवर्णनमुक्त्वा एतस्या लीलायाः षड्गुणवत्त्वं प्रतिपाद्य तत्रोपजीविनां दानेन तदुपसंहरति-नटानां नर्तकीनां चेति। गीततालानुसारेण ये नृत्यन्ति ते नटाः केवलनृत्ये रसाभिनयकर्त्र्यः नर्तक्यः। नटा एव स्त्रीपुरुषा वा। चकारात्तत्सम्बन्धिभ्योऽपि भगवान् दत्तवान्। गीतवाद्योपजीविनोऽन्ये क्रीडासाधनानि अलङ्काराः वासांसि च। क्रीडार्थमेव वा योऽलङ्कारः तदर्थं च यानि वासांसि तानि कामशास्त्रे निरूपितानि। सर्वाणि कालान्तरोपभोगार्थं न स्थापितानि किन्तु वन्दिभ्यः अदात् भगवान् दत्तवान्। तथा तत्स्त्रियोऽप्यदुः। एवं साधारणासाधारणलीला निरूपिताः ॥१२॥ एतन्निरूपणस्य लौकिकफलव्यावृत्त्यर्थं फलान्तरमाह-कृष्णस्यैवं विहरत इति। एवं सामान्यविशेषप्रकारेण चित्तं हरतो विहारं कुर्वतः चतुर्विधैर्भावैः स्त्रीणामन्तःकरणचतुष्टयं हृतमित्याह-आदौ गतिः सम्मुखमागमनम्। तत आलापः। ततो जाते वाग्वैधे कामकलाभिरीक्षणम्। ततो भावप्रकाशकानि अष्टविधानि वा। एवं सर्वप्रकारै स्त्रीणां धियः अन्तःकरणानि हृतानि। किलेति प्रसिद्धिः। पूर्ववत् एतानि प्रपञ्चविस्मृतौ साधनान्येव जातानि न तु प्रपञ्चे भावहावसाधकानीत्यर्थः ॥१३॥ अस्मिन्नर्थे प्रमाणत्वेन तासां वाक्यानि निरूपयितुमाह-ऊचुर्मुकुन्दैकधिय इति। प्रपञ्चं विस्मृत्य कायमपि विस्मृत्य मुकुन्दे मोक्षदातर्येव एका धीर्यासां तादृश्यो भूत्वा गिर ऊचुः। यथा स्वहृदयख्यापिकाः तर्हि ब्रह्मविदामिव तासां वाक्यानि भवन्तीत्याशङ्क्याह-उन्मत्तवदिति। असम्बद्धानि वाक्यानि उन्मत्तो गन्धर्वगृहीतः तथा भगवद्गृहीताः न तु लौकिकाः स्वस्थाः। तत्रापि जडं यथा भवति। अचेतनादिषु चेतनधर्मारोपात्। ननु केवलप्रपञ्चविस्मृतिः जगति जडवन्निन्दाहेतुरत आह-चिन्तयन्त्योऽरविन्दाक्षमिति। अनेन पूर्णो हेतुः सिद्ध इत्युक्तं भवति। तानि निरोधार्थं गदतः कथयतो मे मत्तः शृणु। कदाचित्प्राकृतत्वशङ्का स्यात् तदर्थं सर्वथा श्रोतव्यमित्यर्थः ॥१४॥

श्रीसुबोधिनीसारः

क्लिन्नानि आर्द्राणि वस्त्राणि यासां विवृता उरवः कुचप्रदेशा यासां ताः उद्धृतानि विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि पुष्पाणि यासां ताः स्त्रियः सिञ्चन्त्यः रेचकस्य हर्तुमिच्छया कान्तं श्रीकृष्णमुपगुह्य जातेन स्मरोत्सवेन लसन्ति वदनानि यासां ताः शुशुभिरे ॥१०॥ तासां स्तनेभ्यो विषज्जितैः कुङ्कुमैः युक्ता स्रक् माला यस्य क्रीडाया अभिषङ्गेणाभिनिवेशेन धुतः कम्पितः केशानां वृन्दस्य बन्धो यस्य स सिञ्चन् कृष्णो मुहुरसकृत् स्त्रीभिः प्रतिषिच्यमानो रेमे करेणुभिर्गजीभिः परीतः परिवेष्टितः इभपतिर्हस्तिराज इव ॥११॥ गीतेन वाद्येन वर्तमानानां नटानां तत्स्त्रीणां च कृष्णः तस्य स्त्रियश्च क्रीडोपयोगी भूषावस्त्राणि अदात् ॥१२॥ एवं विहरतः कृष्णस्य गमनभाषणदर्शनहास्यालिङ्गनादिभिः स्त्रीणां धियो हृताः चित्तान्याकृष्टानि किलैव ॥१३॥ कृष्णैकचित्तास्ता अरविन्दाक्षं चिन्तयन्त्यो जडं यथास्यात्तथोन्मत्तवत् गिरो वाच ऊचुः। तानि वाक्यानि गदतो मे मत्तः शृणु ॥१४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

क्लिन्नानि सिक्तानि वस्त्राणि यासां ताः अत एव विवृता ऊरुकुचप्रदेशा यासां ताश्च, उद्धृतानि विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः, स्मरेचकस्य सेचनसाधनस्य जिहीर्षतया हरणेच्छया तं कान्तमुपगुह्यालिङ्ग्य तेन जातस्मरेण य उत्सवः उत्कृष्टो हासस्तेन लसन्ति वदनानि यासां ता विरेजुः ॥१०॥ कृष्णस्तु तासां स्तनेभ्यो विषज्जितकुङ्कुमा स्रग्यस्य सः क्रीडायामभिषङ्गेणाभिनिवेशेन धुतः कम्पितः कुन्तलवृन्दबन्धो यस्य सः स्वयं मुहुस्ताः सिञ्चन् युवतिभिः प्रतिषिच्यमानः करेणुभिर्गजीभिः परिवृतो गजराडिव रेमे ॥११॥ क्रीडार्थं यानि स्वयं धृतान्यलङ्कारवासांसि तानि गीतैर्वाद्यैश्चोपजीवन्ति तेषां तेभ्यो नटादिभ्यः कृष्णोऽदात् तथा तस्य स्त्रियश्च ददुः ॥१२॥ एवं विहरतः कृष्णस्य गत्यादिभिः स्त्रीणां धियो हृताः। अत्र सन्देहो न कार्य इति सूचयति-किलेति ॥१३॥ अत एव मुकुन्द एवैकस्मिन् धीर्यासां तास्तत्सान्निध्याभावदशायां तमेवारविन्दाक्षं चिन्तयन्त्यः अगिरः क्षणं धृतमौनाः सत्यः तत उन्मत्त इव जडम् अनन्वितं यथा भवति तथा यानि वाक्यानि ऊचुस्तानि गदतः कथयतो मे मत्तः शृणु ॥१४॥

अन्वितार्थप्रकाशिका

ता इति । क्लिन्नानि सिक्तानि वस्त्राणि यासां ताः अत एव विवृता ऊरुकुचप्रदेशा यासां ताश्च उद्धृतानि विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः स्मरेचकस्य जिहीर्षतया हरणेच्छया तं कान्तमुपगूह्यालिङ्ग्य तेन जातस्मरेण य उत्सवः उत्कृष्टो हासस्तेन लसन्ति वदनानि यासां ता विरेजुः ॥१०॥ कृष्ण इति ॥ कृष्णस्तु तासां स्तनेभ्यो विषज्जितकुङ्कुमा स्रग्यस्य स क्रीडायामभिषङ्गेणाभिनिवेशेन धुतः कम्पितः कुन्तलवृन्दबन्धो यस्य सः स्वयं मुहुस्ताः सिञ्चन् युवतिभिः प्रतिषिच्यमानः करेणुभिर्गजीभिः परिवृतो गजराडिव रेमे ॥११॥ नटानामिति ॥ क्रीडार्थं यानि स्वयं धृतान्यलङ्कारवासांसि तानि गीतैर्वाद्यैश्चोपजीवन्ति तेषां तेभ्यो नटादिभ्यः कृष्णोऽदात् तथा तस्य स्त्रियश्च ददुः ॥१२॥ कृष्णस्येति ॥ एवं विहरतः कृष्णस्य गत्यादिभिः स्त्रीणां धियो हृताः ॥१३॥ ऊचुरिति ॥ मुकुन्द एवैकस्मिन् धीर्यासां तास्तत्सान्निध्यदशायामपि कामोन्मादात्परोक्षतया तमेवारविन्दाक्षं चिन्तयन्त्यः अगिरः क्षणं धृतमौनाः सत्यः तत उन्मत्ता इव जडम् अनन्वितं यथा भवति तथा यानि वाक्यानि ऊचुस्तानि गदतः कथयतो मे मत्तः शृणु । अत्रापरोक्षपक्षे भगवांस्तच्छ्रवणकौतुकाय तत्रैव स्थित इति ज्ञेयम् । वैचित्र्यविप्रलम्भाख्योऽयं भावः । बोपदेवेन मुक्ताफलग्रन्थे प्रकटीकृतः इयं प्रेम्णः षष्ठी भूमिका ॥१४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

ता इति । क्लिन्नैरार्द्रैः वस्त्रैः विवृताः जनदृश्याः ऊरुकुचप्रदेशा यासां ताः उद्धृतानि पतितानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः रेचकजिहीर्षया रेचकं काचनमयं जलसेचनयन्त्रं हर्तुमिच्छया कान्तं श्रीकृष्णमुपगूह्य गाढालिङ्गनेन गृहीत्वा जातेन स्मरेण य उत्सवस्तेन लसन्ति वदनानि यासां ताः रुक्मिण्यादयो विरेजुः ॥१०॥ तासां स्तनेभ्यो विषज्जितं संलग्नं कुङ्कुमं यस्यां सा चासौ स्रक् यस्य सः क्रीडाया अभिसङ्गेनात्यासक्त्या धुतः कम्पितः कुन्तलवृन्दबन्धो यस्य सः सिञ्चन् युवतिभिर्मुहुः प्रतिषिच्यमानः श्रीकृष्णो रेमे ॥११॥ नाटनामित्यादिषु चतुर्थर्थे षष्ठी ॥१२॥ स्त्रीणां धियो हृताः श्रीकृष्णेन वशीकृताः ॥१३॥ मुकुन्दैकधियो मुकुन्दे एव एकाग्रधीरन्तःकरणं यासां ताः । अत एव गिरः बहुवेले तूर्ष्णी भूत्वा ॥ अरविन्दाक्षं चिन्तयन्त्यः स्त्रियः जडं विचारशून्यं यथा भवति तथा उन्मत्तवत् यानि वाक्यानि ऊचुः तानि गदतो मे मत्तः शृणु ॥१४॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

ता इति ॥ क्लिन्नानि सिक्तानि वस्त्राणि यासां ता अत एव विवृता अभिज्ञाता गुरुकुचप्रदेशा यासां ताः उद्धृतानि विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः कान्तं श्रीकृष्णं सिञ्चन्त्यः ताः स्त्रियः स्वसेचनजिहीर्षतया स्वशब्दोऽत्र स्वकान्तपरः स्वपतिकरगतजलसेचनयन्त्रजिहीर्षयेत्यर्थः । तं कृष्णम् उपगुह्यालिङ्ग्य जातश्चासौ स्मरोत्सवश्च तेन लसन्ति वदनानि यासां तथाभूताः सत्यः विरेजुः ॥१०॥ कृष्णस्त्विवति ॥ तासां स्तनेभ्यो विषज्जितकुङ्कुमा स्रग्यस्य सः, क्रीडायां योऽभिषङ्गोऽभिनिवेशस्तेन धुतः कम्पितः कुन्तलवृन्दबन्धो यस्य तथाभूतः कृष्णस्तु मुहुः सिञ्चन् युवतिभिः स्वाङ्गनाभिः प्रतिषिच्यमानः संश्च करेणुभिर्गजीभिः परीतः परिवृतः इभपतिर्गजराजः इव रेमे ॥११॥ नट्यनामिति ॥ ततः कृष्णः नटानां नर्तकीनां गीतवाद्योपजीविनां च क्रीडालङ्कारवासांसि अदात् । तस्य कृष्णस्य स्त्रियोऽङ्गनाश्च अदुः । कृष्णो नटादिपुरुषेभ्यस्तत्स्त्रियश्च नर्तक्यादिभ्यः प्रायच्छन्नित्यर्थः ॥१२॥ कृष्णस्येति ॥ एवं विहरतः कृष्णस्य, कर्तरि षष्ठी । गतिश्चालापश्चेक्षितानि च स्मितानि च तैः नर्म च क्ष्वेलयश्च परिष्वङ्गश्च तैश्च स्त्रीणां धियः हृताः कृष्णेनात्मसात् कृताः किल ॥१३॥ ऊचुरिति ॥ अत एव मुकुन्दे एव एकस्मिन् धीर्यासां ताः, अत एव अरविन्दाक्षं कमलनयनं श्रीकृष्णं चिन्तयन्तः तत्सान्निध्याभावदशायामिति शेषः । अगिरः क्षणमगिरः धृतमौना इत्यर्थः । ततः उन्मत्तवत् जढं यथा तथा च, यानि वाक्यानि, ऊचुः, तानि वाक्यानि गदतः कथयतः मे मत्तः शृणु ॥१४॥

कृष्णप्रिया

जलसे वस्त्र भिग जाने के कारण वक्षः स्थल, जांघ आदि की अंगलज्जा को सम्भालती कुलंगनाये भगवान का आकर्षण केन्द्र बन जाती थी । उनकी बडी बडी चोटियों और जूडोमें से गुंथे हुए फूल गिरने लगते,

कृष्णप्रिया

वे उन्हें भिगोते भिगोते पिचकारी छीन लेने केलिये उनके पास पहुंच जाती और इस बहाने अपने प्रियतमका आलिंगन कर लेती । तब प्रकट होते मदनोत्सव से कृष्णवनितायों का मुखकमल खिल उठता था ॥१०॥ उस वक्त भगवान श्रीकृष्ण की वनमाला उन रानियों के वक्षःस्थल पर लगी हुइ केसर के रंगसे रंग जाती । विहारमें अत्यन्त मग्न हो जाने के कारण घुंघराली अलकें उन्मुक्त भाव से लहराने लगती । वे अपनी रानियों कोबार बार भीगो देते और रानियां भी उन्हें सराबोर कर देती । भगवान श्रीकृष्ण उनके साथ इस प्रकार विहार करते, मानो कोई गजराज हाथिनियों से घिर गया हो ॥११॥ भगवान श्रीकृष्ण और उनकी पत्नियां क्रिडा करने के बाद अपने अपने वस्त्राभूषण नटों और नर्तकियों को भेंट न्योच्छावर के रूपमें दिये जिनकी जीविका केवल गाना-बजाना ही है ॥१२॥ विहारविलासनिपुण श्रीकृष्ण भगवान ने मधुर भाषण लचकती चाल स्नेहपूर्ण द्रष्टि और मन्द मन्द मुसकान हास परिहास और आलिंगन आदि विनोद से वनितावृन्द की मति द्वारिकापतिने हर ली थी ॥१३॥ मुकुन्दमें निमग्नमनवाली मुकुन्दनारियां कमल लोचन श्रीकृष्ण का ही चिंतन स्मरण करते करते जड और उन्मत्त की तरह गाने लगी । हे राजन यह मधुर आलाप आपको मैं सुनाता हुं कृपया सावधान हो कर सुनो ॥१४॥

महिष्य[1] ऊचुः

कुररि विलपसि त्वं वीतनिद्रा न शेषे स्वपिति जगति [2]रात्र्यामीश्वरो गुप्तबोधः ।
वयमिव सखि कच्चिद् गाढनिर्भिन्नचेता नलिननयनहासोदारलीलेक्षितेन ॥१५॥
नेत्रे निमीलयसि नक्तमदृष्टबन्धुस्त्वं रोरवीषि[3] कणं बत चक्रवाकि ।
दास्यं गता वयमिवाच्युतपादजुष्टां किं वा स्त्रजं स्पृहयसे कबरेण वोढुम् ॥१६॥
भो भोः सदा निष्टनसे उदन्वन्नलब्धनिद्रोऽधिगतप्रजागरः ।
किं वा मुकुन्दापहृतात्मलाञ्छनः प्रातां दशां त्वं च गतो दुरत्ययाम् ॥१७॥
त्वं यक्ष्मणा बलवतासि गृहीत इन्दो क्षीणस्तमो न निजदीधितिभिः क्षिणोषि ।
कच्चिन्मुकुन्दगदितानि यथा वयं त्वं विस्मृत्य भोः स्थगितगीरुपलक्ष्यसे नः ॥१८॥

कर्दमक्षमा

महिष्यः ऊचुः ।

हे, कुररि, त्वम्, रात्र्याम्, न, शेषे, जगति, गुप्तबोधः, अधीश्वरः, स्वपिति, सखि, कच्चित्, नलिननयनहासोदारलीलेक्षितेन, वयम्, इव, गाढनिर्भिन्नचेताः ॥१५॥ चक्रवाकि, नक्तम्, अदृष्टबन्धुः, त्वम्, बत, करुणम्, रोरवीषि, नेत्रे, निमीलयसि, वयम्, इव, दास्यम्, गता, अच्युतपादजुष्टाम्, स्त्रजम्, वा, कबरेण, वोढुम्, स्पृहयसे ॥१६॥ भोः, भोः, उदन्वन्, अलब्धनिद्रः, अधिगतप्रजागरः, सदा, निष्टनसे, किम्, वा, त्वम्, मुकुन्दापहृतात्मलाञ्छनः, प्रान्ताम्, दुरत्ययाम्, च, दशाम्, गतः ॥१७॥ इन्दो, त्वम्, बलवता, यक्ष्मणा, गृहीतः, क्षीणः, असि, निजदीधितिभिः, तमः, न, क्षिणोषि, कच्चित्, यथा, वयम्, त्वम्, मुकुन्दगदितानि, विस्मृत्य, स्थगितगीः, नः, उपलक्ष्यसे ॥१८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

ईश्वरः श्रीकृष्णः स्वपिति त्वन्तु निद्राभङ्गं कुर्वती विलपसि न शेषे न स्वपिषि तदनुचितमित्यर्थः । अथवा नापराधस्तवापीत्याशयेनाऽऽहुः-नलिननयनस्य भगवतो हासेन सहितमुदारं यल्लीलेक्षितं तेन कच्चिद्गाढन्निर्विद्धचेतास्त्वमिति ॥१५॥

---

१. स्त्रिय ऊचुः-गो. प्रे. टी. । २. मीश्वरो ग्रस्तबोधः-वीर. ; मीश्वरग्रस्तबोधे-च. पु. टी. । ३. वीति-ह. लि. टी. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

नक्तं रात्रावदृष्टबन्धुः सती रोरवीषि किम्वा नैतावत् अपि तु वयमिव स्पृहयसे ॥१६॥ अलब्धनिद्रः सदा निष्ठनसे क्रोशसि किम्वा अस्माभिः प्राप्तां दशां त्वमपि गतोऽसि अहो कष्टं यथा वयं सम्भोगेन मुकुन्दापहृतकुचकुङ्कुमादिलाञ्छनास्तथा त्वमपि यतोऽपहृतश्रीकौस्तुभादिलाञ्छनो लक्ष्यसे ॥१७॥ मुकुन्दगदितानि रहस्यानि विस्मृत्य तदेकचिन्तया कच्चित्त्वं क्षीणोऽसि वयमिव स्थगितगीस्तनुवाक् हे इन्दो नस्तथैवोपलक्ष्यसे ॥१८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

'उत्क्रोशकुररौ समौ' इत्यमरः । हे कुररि उत्क्रोशपक्षिभार्ये । इत्यर्थ इति– "निद्राभङ्गः कथाच्छेदो दम्पत्योः प्रतिभेदनम् । शिशुमातृविभेदश्च ब्रह्महत्यासमः स्मृतः ॥" इति स्मृतेरनुचितं करोषीति भावः । किं त्वमप्यस्मत्सदृशत्वान्न स्वपिष्याकुलत्वादित्याहुः-अथवेत्यादिना । कच्चिदिष्टप्रश्ने । नलिननयनस्य कमलनेत्रस्य । आर्तानां निद्रा न भवतीति भावः ॥★॥ ततश्चात्मनो भावमुन्मादवशात् प्रायः सर्वत्र पश्यन्त्यः कुरर्य्यादीनाहुर्दशभिः । हे कुररि ! यस्य विहरेण त्वं विलपसि वीतनिद्रा गतनिद्रा सती स तु त्वयि प्रेमशून्यः ईश्वरोऽस्माकं पतिः स्वपिति अतस्त्वद्विलापं न शृणोति । तत एव त्वद्विलापश्रवणोत्था कृपाप्यस्य सम्भवेत् न यतस्त्वत्सङ्गं कुर्यात् किं युष्माभिः सह स्वपिति । न हि न हि गुप्तबोधः अस्माभिरज्ञाततत्त्व एव जगत्यस्मिन् क्वापि रात्र्यां तदन्वेषणविरोधिन्यां शेते । अतस्त्वं या किं करिष्यसि । वयं वा किं कुर्मः इति भावः । शिवशिव त्वं पक्षिजातिरपि हे सखि ! वयमिव गाढनिर्विद्धचेता अभूरवश्यमेवमेतत्सङ्गो भवत्विति निर्बन्धे हेतुः-नलिनेति । तवोच्चैर्विलापोऽयमस्माकमपि साचिव्याय स्यादिति भावः ॥१५॥ एतावत् बन्धुवियोगमात्रमेव स्पृहयसे इच्छसि । कबरेण केशविन्यासेन ॥★॥ तस्या अप्यधिकमार्तनादं चक्रवाक्याः श्रुत्वा तथैवाहुः-नेत्रे इति । बन्धुः प्रियतमः करुणं यथा स्यात्तथा रोरवीषि भृशमार्तनादं तनोषि । बत खेदे । अस्मत्समैव त्वमपीति भावः । अहो बत ईदृश आर्तनादः स्वपत्यदर्शनमात्रेण न स्यात् किन्तु श्रीभगवति भावविशेषेणैवेति पक्षान्तरमाहुः-दास्यमिति । वयमिव दास्यं गता दासी सती अच्युतस्य सदा सर्वगुणरूपादिपरिपूर्णस्य भगवतः पादाभ्यां जुष्टामुपभुक्तां चरणोपधानीकृतां वोढुं स्पृहयसे स्पृहयसि । भावविशेषेण परम्परयापि तच्चरणस्पर्शं कामयस इत्यर्थः । पादशब्दोऽत्र पातिव्रत्योचितभक्त्या श्रीभगवत्स्पृष्टतामात्रे तु तात्पर्यम् । यद्वा । वयमिव दास्यं गतासीति तां तथा वोढुं स्पृहयसीति कान्ता भूत्वा तदुचितसौभाग्यमिच्छसीत्यर्थः । स्पष्टतयाऽनुक्तिस्तु शालीन्यात् । यथोक्तं यज्ञपत्नीभिः "प्राप्ता वयं तुलसिदामपदावसृष्टं केशैर्निवोढुम्" इति ॥१६॥ निष्टनसे 'ष्टन शब्दे' निपूर्वः । दुरत्ययां दुर्लङ्घ्याम् ॥★॥ तस्या अप्यधिकतरमाक्रोशन्तं समुद्रं तथैवाहुः-भो इति । श्रीभगवन्महाविभूतित्वेन सादरसम्बोधनम् । वीप्सातिखेदात् । अलब्धनिद्रत्वादेवाधिगतः अधिकं प्राप्तः प्रकृष्टो जागरो येन तथाभूतः सन् किं निष्टनसे अस्माकं केनापि दुःखेन भवतु नाम तत्तत् भवतु तद्विनापि कथमिति भावः । क्षणं विमृश्याहुः-किंवेति । मुकुन्देन सर्वदुःखविमोचकेनापि अपहृतम् आत्मलाञ्छनं स्वभावसिद्धस्थैर्यगाम्भीर्यादिरूपलक्षणं यस्य तथाभूतः सन् त्वं च अस्मद्विधवत्त्वमपि दुरत्ययामनतिक्रम्यां दशां तदप्राप्तिदुरवस्थां गतोऽसि । हा कष्टमिति भावः ॥★॥ विश्वनाथस्तु — भो उदन्वन् ! गाम्भीर्यं परित्यज्यातितरललोक इति निष्टनसे शब्दायसे निर्निद्रः सन्नुच्चैः फूत्कृत्य रोदिषि । अत्र कारणं वद । अथवा अलं कारणकथनेन । ज्ञातमस्माभिरित्याहुः-किंवेति । यथा सम्भोगमिषेणापहृतास्मत्कुङ्कुमहारमालाकः स चोरः तथैव त्वमपि तेनैवापहृतश्रीकौतुभादिलाञ्छनः ॥१७॥ यक्ष्मणा क्षयोगेण "यक्ष्मा तु क्षयरोगे स्याद्ग्रहे च बालवृद्धयोः" इति नाममाला । दीधितिः घृणिः । तदेकचिन्तया मुकुन्दैकचिन्तया स्थगिताऽऽच्छादिता । गीर्यस्य स तथा । 'स्थगे-आच्छादने' ततः क्ते स्थगितेति सिद्धेः । नोऽस्माभिः । तथैवास्मत्तुल्य एव ॥★॥ नन्वहो यद्यप्येते तिर्यगाद्याः समुद्रान्तास्तद्भावादुत्तरोत्तराधिक्येन क्रोशन्ति । तर्ह्ययं सर्वसद्गुणश्चन्द्रमाः कथं मौनी वर्तते । ज्ञातं चेदमपीति भङ्गीपूर्वकमाहुः-भो इन्दो ! त्वं बलवता सुधामूर्तेरपि तव पराभवात् प्रशस्तबलेन यक्ष्मणा निगृहीतोऽसि । यतः क्षीणः हीनः सन् निजा यावत्यो दीधितयस्ताभिः पूर्णिमायामपि तमो न क्षिणोषि सूर्यवत् क्षयं प्रापयितुं न शक्नोषि । यथा वयं श्रीमुकुन्दविरहेण

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

क्षीणा निजदुःखहरणेऽप्यसमर्थास्तथा त्वमपीत्यहो त्वय्यधिककष्टमेवेति भावः। क्षणं परामृश्येवाहुः-कच्चिदति। किंवा मुकुन्दस्य गदितानि विश्लेषारम्भे समयबन्धादीनि विस्मृत्य तद्विरहभवप्रागल्भ्येनापस्मृत्य तदनिश्चयेनैव क्षीणस्सन् तमो न क्षिणोषि। यतो वयमिव त्वं स्थगितगीश्च नोऽस्माभिरुपलक्ष्यसे। कुरर्यादिवदाक्रोशनादेतत् प्रश्नेऽप्युत्तरादानादिति भावः ॥१८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तत्र सर्वासामेवैकजातीयभावत्वात्कुरर्य्यादिवाक्श्रवणेन वक्ष्यमाणा वाचो जाता इत्याह-श्रीमहिष्य ऊचुरिति। तत्र स्वभावत एव रुवतीं कुररीं प्रत्याहुः- हे कुररि! जगति त्वमेवैका वीतनिद्रा सती न शेषे शयनेच्छामपि न कुरुष इत्यर्थः। यतो विलपसि उच्चैः परिदेवनामेव कुरुषे। ईश्वरोऽस्माकं पतिस्तु रात्र्यां तदन्वेषणशक्तिविरोधिन्यां गुप्तबोधः कुत्राप्याच्छन्नः सन् शेते। यद्वा जगतीत्यस्यैवात्रैवान्वयः। कुत्रापीत्येवार्थः तस्मादिदमनुमीमह इत्याहुः-वयमिवेति। तस्मात् हे सखि! सादृश्यात् सख्यं प्राप्ते: युक्तमेव ममेदमिति तवोच्चैर्विलापोऽयमस्मास्वपि साचिव्याय स्यादिति भावः ॥१५॥ तस्या अप्यधिकमार्तनादं चक्रवाक्याः श्रुत्वा तथैवाहुः-नेत्रे इति। बन्धुः प्रियतमः करुणं यथा स्यात्तथा रोरवीषि भृशमार्तनादं तनोषि। बत खेदे। अस्मत्समैव त्वमपीति भावः। अहो बत ईदृश आर्तनादः स्वपत्यदर्शनमात्रेण न स्यात् किन्तु श्रीभगवति भावविशेषेणैवेति पक्षान्तरमाहुः-दास्यमिति। वयमिव दास्यं गता दासी सती अच्युतस्य सदा सर्वगुणरूपादिपरिपूर्णस्य भगवतः पादाभ्यां जुष्टामुपभुक्तां चरणोपधानीकृतां वोढुं स्पृहयसे स्पृहयसि। भावविशेषेण परम्परयापि तच्चरणस्पर्शं कामयस इत्यर्थः। पादशब्दोऽत्र पातिव्रत्योचितभक्त्या श्रीभगवत्स्पृष्टतामात्रे तु तात्पर्यम्। यद्वा। वयमिव दास्यं गतासीति तां तथा वोढुं स्पृहयसीति कान्ता भूत्वा तदुचितसौभाग्यमिच्छसीत्यर्थः। स्पष्टतयाऽनुक्तिस्तु शालीन्यात्। यथोक्तं यज्ञपत्नीभिः "प्राप्ता वयं तुलसिदामपदावसृष्टं केशैर्निवोढुम्" इति ॥१६॥ तस्या अप्यधिकतरमाक्रोशन्तं समुद्रं तथैवाहुः-भो इति। श्रीभगवन्महाविभूतित्वेन सादरसम्बोधनम्। वीप्सातिखेदात्। अलब्धनिद्रत्वादेवाधिगतः अधिकं प्राप्तः प्रकृष्टो जागरो येन तथाभूतः सन् किं निष्टनसे अस्माकं केनापि दुःखेन भवतु नाम तत्तत् भवतु तद्विनापि कथमिति भावः। क्षणं विमृश्याहुः-किंवेति। मुकुन्देन सर्वदुःखविमोचकेनापि अपहृतम् आत्मलाञ्छनं स्वभावसिद्धस्थैर्यगाम्भीर्यादिरूपलक्षणं यस्य तथाभूतः सन् त्वं च अस्मद्विधवत्त्वमपि दुरत्ययामनतिक्रम्यां दशां तदप्राप्तिदुरवस्थां गतोऽसि। हा कष्टमिति भावः ॥१७॥ नन्वहो यद्यप्येते तिर्यगाद्याः समुद्रान्तास्तद्भावादुत्तरोत्तराधिक्येन क्रोशन्ति। तर्ह्ययं सर्वसद्गुणश्चन्द्रमाः कथं मौनी वर्तते। ज्ञातं चेदमपीति भङ्गीपूर्वकमाहुः-भो इन्दो! त्वं बलवता सुधामूर्तेरपि तव पराभवात् प्रशस्तबलेन यक्ष्मणा निगृहीतोऽसि। यतः क्षीणः हीनः सन् निजा यावत्यो दीधितयस्ताभिः पूर्णिमायामपि तमो न क्षिणोषि सूर्यवत् क्षयं प्रापयितुं न शक्नोषि। यथा वयं श्रीमुकुन्दविरहेण क्षीणा निजदुःखहरणेऽप्यसमर्थास्तथा त्वमपीत्यहो त्वय्यधिककष्टमेवेति भावः। क्षणं परामृश्येवाहुः-कच्चिदति। किंवा मुकुन्दस्य गदितानि विश्लेषारम्भे समयबन्धादीनि विस्मृत्य तद्विरहभवप्रागल्भ्येनापस्मृत्य तदनिश्चयेनैव क्षीणस्सन् तमो न क्षिणोषि। यतो वयमिव त्वं स्थगितगीश्च नोऽस्माभिरुपलक्ष्यसे। कुरर्यादिवदाक्रोशनादेतत् प्रश्नेऽप्युत्तरादानादिति भावः ॥१८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्

भो भो इति। तथा वयं मुकुन्दाहृतलाञ्छनाः तदपहृतगाम्भीर्यादिगुणः स्थगितगीः स्थगितबुद्धिः। अपियमितिपदम् ॥१७-५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

कानि पुनस्तानीत्यत्राह-कुररीत्यादिना। इतीदृशेनेत्यतः प्राक्तनेन। तत्रैकस्या वाक्यमाह-हे कुररि! अस्मिन् जगति रात्र्यामीश्वरः कृष्णः ग्रस्त[गुप्त]बोधः विलुप्तबाह्यविषयज्ञानः सन् स्वपिति शेते। त्वं तु विगतनिद्रा सती विलपसि न तु शेषे न स्वपिषि। अनुचितं तन्निद्राभङ्गं करोषीति भावः। अथवा नापराधस्तवापीत्याशयेनाहुः-नलिननयनस्य हासेन सहितमुदारं यल्लीलयेक्षितं तेन हे सखि! वयमिव त्वमपि गाढं यथा तथा निर्भिन्नं चित्तं यस्याः सा कच्चित् किमिति प्रश्नः ॥१५॥ अन्यस्या वाक्यमाह-नेत्र

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

इति। एवमग्रेऽपि ज्ञेयम्। हे चक्रवाकि ! नक्तं रात्रौ अदृष्टबन्धुरदृष्टपतिः सती नेत्रे निमीलयसि किम्, किंवा करुणं यथा तथा रोरवीषि। बतेति खेदेऽव्ययम्। नैतावदपि तु वयमिव दास्यं प्राप्ता सती अच्युतपादेन जुष्टां सेवितां स्रजं कबरेण वोढुं स्पृहयसे किंवा ! ॥१६॥ क्वचिदुदन्वन्तं प्राप्याह-भो भो इति। हे उदन्वन् समुद्र ! अलब्धनिद्रः अधिगतप्रजागरश्च सदा निष्टनसे नितरां ध्वनसि। ष्वन शब्दे इतिधातुः। किंवाऽस्माभिः प्राप्तां दुरत्ययदशामवस्थां त्वमपि गतोऽसि। अहो कष्टं, यथा वयं स भोगेन मुकुन्दापहृतकुचकुङ्कुमाद्यात्मलाञ्छनस्तथा त्वमपि, यतोऽपहृतश्रीकौस्तुभादिलाञ्छनो लक्ष्यसे अतस्त्वां पृच्छामीत्यर्थः ॥१७॥ त्वमिति। हे इन्दो ! त्वं बलवता यक्ष्मणा क्षयरोगेण नितरां गृहीतः अत एव क्षीणः सन् स्वकान्तिभिः तमोऽन्धकारं न क्षिणोषि न विनाशयसि। किं यथा वयं तथा त्वमपि मुकुन्दगदितानि रहस्यानि विस्मृत्य तदेकचित्ततया स्थगितगीः स्तब्धवाक् सन्नोऽस्माभिरुपलक्ष्यसे ॥१८॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥११-२७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१३-२४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

तदेवाह-कुररीत्यादि। सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः इत्यादिदिशा आत्मनो भगवति यो भावस्तं सर्वभूतेषु पश्यन्तीनां प्रणयरशनाय धृताङ्घ्रिपद्म इत्यादिना विव्रियमाणाम् उत्तमभागवतदशामारूढानां महर्षीणां पृथक्पृथक् भासमानमिदं हे कुररि ! ईश्वरः श्रीकृष्णः स्वपिति। त्वं वलपसि। केयं ते रीतिः। तन्निद्राभङ्गे भयं न करोषि। ननु स्वपन् कथमसौ मद्विलापं श्रोष्यतीत्याह-अगुप्तबोधः निद्रायामपि अगुप्तः प्रकटो बोधो यस्य। अतः श्रोष्यत्येव ततो मा विलपेति शेषे। अथवा किमिति त्वमाक्षिप्यसे हे सखि ! वयमिव हि त्वं मय्येव किं तत् वीतनिद्रा कथं ज्ञातमित्याह-न शेषे न स्वपिषि। तस्य कारणमाह-नलिननयनेत्यादि। वयं यथा तस्य हासोदारलीलेक्षितेन निर्भिन्नचित्ताः सत्यो वीतनिद्रा भूत्वा न शयामहे तथा त्वमपीति ॥१५॥ प्रत्युवाच हे सखि ! कुरर्येव प्रलपतु कथमियं चक्रवाकी रौतीत्याह-नेत्र इत्यादि। हे चक्रवाकि ! त्वं किमिति रोरवीषि तवापीश्वरनिद्राभङ्गभयं नास्ति ! अज्ञातं वयमिव दास्यं गता सती अच्युतपादजुष्टां स्रजं कबरेण वोढुं स्पृहयसे तद्युक्तमेवेदं ते समाक्रन्दनम्। अत एव नेत्रे निमीलयसि ध्यायसि न त्वहं चक्रवाकादर्शनेन रोरवीमि तवापीश्वरनिद्राभङ्गभयं न तदित्यत्राशङ्क्स इत्याह-न आदृष्टबन्धुरेव भवति। अस्यां पुरि कस्याप्यभीष्टविच्छेदो नास्ति। ईश्वरस्य प्रभावात्तथापि यदेव रोरवीषि तेन यदनुमितं तदेव सत्यमिति भावः ॥१६॥ त्वादृशीनां स्त्रीत्वाद्धैर्याभावे समुचितमेवैतत् कथनम्। अयं तूच्चैर्गभीरोऽपि समुद्रः कथं स्तनतीति काचिदपराऽऽह भो भो इत्यादि।

हे उदन्वन् ! जलधे ! सदैव निष्टनसे ईश्वरनिद्राभङ्गभयं किं कुरुषे। स्वयमलब्धनिद्र निद्रां च न यासि आं ज्ञातम्; किंवा मुकुन्दापहृतात्मलाञ्छनः सन्निधगतप्रजागरो दुरत्ययां दशां गतः प्राप्ता स्यमेवोत्पन्ना मुकुन्देनापहृतो य आत्मा स एव लाञ्छनमुद्वेगचिह्नं यस्य तदुचितमेवैतदिति शेषः ॥१७॥ भवतु आत्मापहरणादस्य तथा विधा दशा इन्दुः कथं क्षीयमाणः आस्त इत्याशङ्क्य काचिदाहऽऽह-त्वं यक्ष्मणेत्यादि। हे इन्दो ! बलवता यक्ष्मणा क्षीण इव कथं दीधितिभिस्तमो न क्षिणोषि। यक्ष्मबाधितो जनो यथा किमपि कर्तुं न शक्नोति तद्वत् कोऽर्थः। आम्, ज्ञातं कच्चित् भो यथा वयं मुकुन्दगदितानि विस्मृत्य मुकुन्देन रहसि यदुक्तं तद्विस्मृत्य स्थगितास्तथा त्वमपि स्थगितगीर्नोऽस्माभिरुपलक्ष्यसे। तत्स्मरणे ध्यायन् क्षिणोषि वयं यथा अग्रे आनन्देन विस्मृतं पश्चात्तदनुस्मरणे क्षीणाः स्मस्तथा त्वमपि तद्युक्तमेवैतत् ॥१८॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

कुररीत्यादि। (भा० ११/२/४५) "**सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।**" इत्यादिदिशा आत्मनो भगवद्भावं सर्वभूतेषु यः पश्यति, स भागवतोत्तमो भवति। तथा च (भा० १/२/५५) "प्रणयरसनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधानः" इति॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

वक्ष्यमाणभागवतोत्तमत्वं गोपीनामासां चेति दर्शयन् प्रतिश्लोकमेव स्वौपम्येनोपसंहारमाह–हे कुररि! ईश्वरः स्वपिति, त्वं विलपसि, तन्निद्राभङ्गे भयं न करोषि। नन्वीश्वरः सर्वदा जागर्त्येव कथं तस्य निद्रा ? तत्राह–असुप्तबोधः स्फुटज्ञानोऽव्याहत-ज्ञानः निद्रयापि तस्य बोधो हर्तुं न शक्यते। किंवा त्वमनुयुज्यसे–हे सखि! वयमिव कच्चिदेवं त्वयापि यतो वीतनिद्रा यतो न शेषे ॥१५॥ भवतु त्वमेवं प्रलप, चक्रवाकी कथं रोरवीतीति तामाक्षिप्य आहुः–नेत्र इत्यादि। हे चक्रवाकि ! त्वं कथं रोरवीषि, आर्तनादं पुनः पुनः कुरुषे ? तथापीश्वर-निद्राभङ्गे भयं नास्ते ! आं ज्ञातम्, वयं यथा तथा त्वमप्यच्युतपादजुष्टां स्रजं वोढुं स्पृहयसे, अत एव नेत्रे निमीलयसि ध्यायसि ध्यानानन्तरं रोरवीषि । रात्रौ चक्रवाकादर्शनेनाहं रोरवीमि ? तत्राह–न अदृष्टबन्धुः, दृष्टबन्धुरेव त्वम्। अस्यामुपरि कस्यापि कालकृतदोषो नास्ति, ईश्वरप्रासादात्। तथापि चेदेवं तवानुमितमिदं वयमिवेति ॥१६॥ तादृशीनां स्त्रीत्वात् धैर्याभावे समुचितमेवैतत् अयं त्वतिगम्भीरोऽपि समुद्रम् उच्चैस्तरामाक्रोशति किमित्याहुः–भो भो इत्यादि। हे उदन्वन्! समुद्र! सदा सदैव निष्टनसे, ईश्वरनिद्राभङ्गभयं न करोषि, किमिदम् ? स्वयमलब्धनिद्र ईश्वरस्यापि निद्राभङ्गं करोषि। आं ज्ञातम्, किंवा मुकुन्दापहृतात्मलाञ्छनः सन् दुरत्ययां दशां त्वं च प्राप्तः वयं तु दुरत्ययां दशां प्राप्ता एव त्वञ्चेति च-कारस्याक्षेपः मुकुन्देनापहृतो य आत्मा स एव लाञ्छनमुद्वेगव्यञ्जकं यस्य ॥१७॥ इन्दुमुद्दिश्य काश्चिदाहुः–त्वं यक्ष्मणेत्यादि । हे इन्दो ! क्षीणः सन् निजदीधितिभिस्तमो न क्षिणोषि, को हेतुः ? तत्राहुः–कच्चिदित्यादि । यथा वयं तथा त्वमपि स्थगितगीरुपलक्ष्यसे नो अस्माभिः । यतो बलवता यक्ष्मणा गृहीतः, चिन्तायां क्षयव्याधिर्भवति, सा पूर्वरागस्य दशादशकान्तर्वर्तिनी व्याधिनाम्नी दशा। तत्र हेतुः–मुकुन्दगदितानि विस्मृत्य विशेषेण स्मृत्वा रहसि गदितं तद्विस्मृत्येति वा, आनन्देन प्राग् विस्मृतं पश्चात्तदनुतापो जात इति स्वानुभवप्रकटनम्, एभिः सह कथोपकथने स्वास्थ्यं न ददासि, तत् किं तेऽस्माभिरप्रियमाचरितमित्याहुः–किं न्वित्यादि। अस्मद्विधो वयमिव सादृश्ये विध-प्रत्ययः । तत्र काश्चित् पिकरवमाकर्ण्य कृष्णस्वरं स्मृत्वा वदन्ति–प्रियरावेत्यादि । प्रियस्य श्रीकृष्णस्य राववद्रावो यस्य । रावपदानीत्येकं वा पदम् । अन्याः ऊचुः–न चलसीत्यादि, त्वं सावधाना अपि यदेवं करोषि तदवगतम्, वयमिवेति स्तनप्रायैः शृङ्गैः । एवं 'शुष्यद्ध्रदाः' इत्यादि। युष्माकं भर्तापि निष्टनसे, यूयमपि विरहकर्शिता इत्यर्थः ॥१८-२३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

ततश्च आत्मनो भावमुन्मादवशात् प्रायः सर्वत्र पश्यन्त्यः कुरर्य्यादीनाहुर्दशभिः । हे कुररि ! यस्य विहरेण त्वं विलपसि वीतनिद्रा गतनिद्रा सती स तु त्वयि प्रेमशून्यः ईश्वरोऽस्माकं पतिः स्वपिति अतस्त्वद्विलापं न शृणोति। तत एव त्वद्विलापश्रवणोत्था कृपाप्यस्य सम्भवेत् न यतस्त्वत्सङ्गं कुर्यात् किं युष्माभिः सह स्वपिति । न हि न हि गुप्तबोधः अस्माभिरज्ञाततत्त्व एव जगत्यस्मिन् क्वापि रात्र्यां तदन्वेषणविरोधिन्यां शेते। अतस्त्वं या किं करिष्यसि। वयं वा किं कुर्मः इति भावः । शिवशिव त्वं पक्षिजातिरपि हे सखि ! वयमिव गाढनिर्विद्धचेता अभूरवश्यमेवमेतत्सङ्गो भवत्विति निर्बन्धे हेतुर्नलिनेत्यादि ॥१५॥ अदृष्टबन्धुः किमदृष्टस्वभर्तृकासि। अहो बत ईदृश आर्तनादः स्वापत्यादर्शनेन सम्भवेदिति पक्षान्तरमाहुः-दास्यं गता इति ॥१६॥ भो उदन्वन् ! गाम्भीर्यं परित्यज्यातितरललोक इति निष्टनसे शब्दायसे निर्निद्रः सन्नुच्चैः फूत्कृत्य रोदिषि । अत्र कारणं वद । अथवा अलं कारणकथनेन । ज्ञातमस्माभिरित्याहुः–किं वेति । यथा सम्भोगमिषेणापहृतास्मत्कुङ्कुमहारमालाकः स चोरः तथैव त्वमपि तेनैवापहृतश्रीकौतुभादिलाञ्छनः ॥१७॥ त्वं यक्ष्मणेति। अथवा नेदं कारणम् । कारणं तु ज्ञातमस्माभिरित्याहुः–मुकुन्दगदितानि विस्मृत्येति । तस्य विश्लेषारम्भे तेन यः खल्ववधिः समयः सचाटु सबहुशपथमुक्तस्तत्र तदानीं वैक्लव्यातिशयात्त्वया मनो न दत्तमत इदानीं तानि मुकुन्दगदितानि विस्मृत्य महानुतापादेव स्थिगतगीर्नोऽस्माभिरुपलक्ष्यसे । कुरर्य्यादिवदाक्रोशना-देतत्प्रश्नेऽप्युत्तरादानादिति भावः । यथा वयमिति वयमपि तद्विश्लेषात्तथातद्वचनविस्मरणोत्थानुतापात् स्थगितगिरो विशीर्याम इति भावः ॥१८॥

गूढार्थदीपिनी

हे कुररि ! ईश्वरः श्रीकृष्णः रात्र्यां गुप्तबोधः निवृत्तबाह्यज्ञानः सन् स्वपिति । त्वं तु वीतनिद्रा सती विलपसि निद्राभङ्गं करोषि न च शेषे अनुचित(निद्राभङ्गं कथोच्छेदः दम्पत्योः प्रीतिभेदनम् । शिशुमातृविभेदश्च ब्रह्महत्यासमः स्मृतः ॥ इति स्मृतेः ॥)मेतत् । अथवा हे सखि ! वयमिव त्वमपि कच्चित् गाढमत्यन्तं विद्धचित्ता असि किम् । केन । नलिननयनस्य श्रीकृष्णस्य सहासमुदारं तीव्रं यत् लीलेक्षितं कटाक्षपातस्तेन । जगति त्वमेवेत्यत्र सम्बध्यते नान्या काचिदिति । अगुप्तो वा पदच्छेदः । मालिनीवृत्तम् ॥१५॥ हे चक्रवाकि ! नक्तं रात्रौ त्वमदृष्टप्रियतमा सती नेत्रे निमीलयसि । करुणं यथा स्यात्तथा रोरवीषि भृशमार्तनादं करोषि । बत खेदे । किं वा वयमिव त्वमपि दास्यं गता सती अच्युतपादसेवितां स्रजं कबरेण केशपाशेन वोढुं धर्तुं स्पृहयसे न च प्राप्नोषि अतो व्यग्रचित्ताऽसीत्युचितमेतत् । वंशस्थवृत्तम् ॥१६॥ हे उदन्वन् समुद्र ! त्वं प्राप्तजागरणः अथापि अलब्धनिद्रः सन् सदा निष्टनसे शब्दं करोषि । ष्टन् शब्दे धातुः । किंवा अस्माभिः प्राप्तां दशां त्वमपि गतोऽसि । यथा सम्भोगेन वयं मुकुन्दापहृतकुचकुङ्कुमादिलाञ्छनास्तथा त्वमपि अपहृतश्रीकौस्तुभादिलाञ्छनः प्रतीयसे । दुरत्ययां दुर्लङ्घ्याम् । भो भोः इति खेदाधिक्यात् वीप्सा ॥१७॥ हे इन्दो ! त्वं यक्ष्मणा क्षयरोगेण गृहीतोऽसि अत एव त्वं क्षीणः सन् निजदीधितिभिः किरणैः तमो न क्षिणोषि न विनायशसि । कच्चित् किं वा मुकुन्दस्य गदितानि विश्लेषारम्भे समयनिर्देशादीनि विस्मृत्य तद्विरहेण स्थगितगीः निरुद्धवाक् सन् तिष्ठसि यथा वयम् । नोऽस्माभिः तथैव त्वं लक्ष्यसे प्रतीयसे स्थगिता आच्छादिता गीर्यस्य । 'स्थगे आच्छादने' धातुः ततः क्ते रूपसिद्धेः ॥१८॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे कुररि ! ईश्वरः श्रीकृष्णः प्रपन्नभयभञ्जनः जगति इहैव मनुष्यलोके गुप्तबोधः गूढबोधः रात्र्यां स्वपिति शेते । अत्र कश्चिद्विलापहेतुर्नास्तीति भावः । तथापि त्वं वीतनद्रा सती विलपसि न शेषे न स्वपिषीत्यतिचित्रम् । अथवा नैतच्चित्रम् । नलिननयनस्य हासेन सहितमुदारं यल्लीलेक्षितं तेन वयमिव गाढनिर्भिन्नचेता कच्चित् त्वमसि ॥१५॥ हे चक्रवाकि ! नेत्रे न मीलयसि बत अहो कष्टं करुणं यथा तथा रोरवीषि च । यतो नक्तं रात्रौ अदृष्टबन्धुः न दृष्टः बन्धुः पतिर्यया सा पतिवियुक्तेत्यर्थः । किम्वा वयमिव दास्यं गता सती अच्युतपादेन जुष्टां सेवितां स्रजं कबरेण वोढुं स्पृहयसे ॥१६॥ भो भो उदन्वन् समुद्र ! सदा सर्वदा स्वभावादेव अलब्धनिद्रः अधिगतप्रजागरः त्वं निष्टनसे । ष्टन शब्दे । शब्दं करोषि । किं वा मुकुन्दापहृतसर्वस्वाभिः अस्माभिः प्राप्तां दशां मुकुन्दैकचिन्तनात् त्वमपि मुकुन्दापहृतात्मलाञ्छनः मुकुन्दापहृतश्रीकौस्तुभादिसर्वस्वः गतः प्राप्तः ॥१७॥ हे इन्दो ! त्वं यक्ष्मणा गृहीतोऽसि । अतः क्षीणः सन् तमो न क्षिणोषि । कश्चित् किंवा यथा वयं तद्वत्त्वमपि मुकुन्दगदितानि रहस्यानि विस्मृत्य तदेकचिन्तया क्षीणोऽसि भो इन्दो ! यतो नोऽस्माभिः स्थगितगीस्तब्धवाक् च त्वं तथैवोपलक्ष्यसे ॥१८॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तान्याह-दशभिः । कुररीति ——

"कुरी चक्रवाकोऽब्धिश्चन्द्रमा मलयानिलः । मेघकोकिलकेल्यद्रितन्नद्यो हंस एव च ॥
दशधा भगवत्स्नेहैस्त्क्तः स्त्रीभिः स्वभावतः । मनसैवतिरोधानमुक्तौ चोक्तं न पूर्ववत् ॥
वाचिकेऽपि तिरोधानं वाक्यैरेव निरूपितम् । विद्यमानेऽपि सम्भोगः सौख्यदेऽपि विशेषतः ॥
तत्सङ्गलालसाः प्रोक्ता दृढासक्तिप्रसीद्धये । आसक्तिगृहकार्यादिविनिद्रादिनिवृत्तये ॥
स्वधर्मान् स्वप्रियं चापि कल्पयित्वाखिलेषु हि । बहिस्तत्त्वन्निरीक्ष्यैवं प्रलपन्त्यस्तथा जगुः ॥"

प्रथमं स्वाभिलषितलीलानन्तरं भगवति शयनलीलायामारब्धायां बहिः स्वाभाविकं कुररीविलापं श्रुत्वा राजसभावाप्ना महिष्यः कुररीविलापेन भगवत्प्रबोधमाशङ्कमानाः स्वकामलीलां परित्यज्य भगवति परमस्नेहेन निद्राभङ्गो मा भवत्विति कुररीनिवारणार्थं

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

प्रवृत्ताः । दुःखितां कुररीं दृष्ट्वा आश्वासनार्थं सम्बोधनं कुर्वन्त्य ऊचुः-हे कुररीति । भगवव्द्यतिरिक्तं सर्वं जगत् स्त्रीरूपमेवेति ताः पश्यन्ति । अत एव सर्वासां भगवानेवैकपतिरिति अतो या काचित् दुःखं प्राप्नोति तत्र भगवद्विरह एव हेतुः । अन्यदुःखं भगवतैव दूरीक्रियते इति । अत इयमपि स्त्री भगवद्विरहाकुला भगवता सम्भोगार्थमानीय कटाक्षविशेषैर्हृता । अतो विलापं करोतीति निश्चित्य तां प्रत्याहुः-हे कुररि ! अस्माभिर्ज्ञातं त्वं कोलाहलं करोषि तदयुक्तमिति निवारयितुमागताः । त्वं किं विलपसि । हा कष्टमित्यर्थः । विलापो निवारयितुं न शक्यते । कारणदुःखस्य सञ्जन्यमानत्वात् वेदनावदिति भावः । निद्राभावशयनाभावो स्वतुल्यतया अनुवदन्ति-त्वं किं वीतनिद्रा नापि शयनमपि करोषि । निद्राभावे कश्चित् पतित्वा तिष्ठति तदपि तव नास्तीत्यर्थः —

''यदा देहेतिचिन्ता स्यात् धातुवैषम्यमेव वा । भयादिना विशेषेण तदा निद्रा न जायते ॥''

भगवान् दुराराध्यः कथं वश्यो भविष्यतीति महतीति चिन्ता —

''यदाङ्गेषु समस्तेषु तापो निर्वृतिरेव वा । तदैकत्र जनः स्थातुं न शक्नोति कथञ्चन ॥''

तापश्च विरहात् एतावपि स्वधर्मौ तर्हि अस्मद्दुःखं भगवति निवेदयन्त्विति चेत्तत्राहुः-स्वपितीति । अयं च स्वापः विहितकाले तस्मादावश्यकत्वान्न निषेद्धुं शक्यः तदाह-रात्र्यामिति । ननु भगवान् गतनिद्रः परब्रह्मरूपः कथं निद्रां प्राप्नोतीति चेत् तत्राहुः-जगतीति । सर्वत्र जगति भगवानेव शेते, न नह्यन्यो निद्रासुखभोक्ता भवति । सर्वेषां प्राणिनां सुखार्थं वा जगति जगन्निमित्तं निद्रां न विस्तारयतीत्यर्थः । तर्हि तन्निद्रया लोकार्थं स्वीकृतया स्वात्मापि मुह्येदत आह-अगुप्तबोध इति । निद्रायामपि न गुप्तो बोधो यस्य । तर्हि कथं तत्प्राप्यते इत्याशङ्कायामाहुः-ईश्वर इति । ईश्वरोऽपि लीलया सुप्तो बोधयितुम् अशक्यः । तस्मादस्माभिः सहेष्टगोष्ठ्या दुःखं दूरीकुर्वित्याहुः-वयमिति । हे सखि ! तुल्यव्यसने कच्चिदिति कोपप्रश्ने गाढनिर्भिन्नचेता इति दुःखानुसारेण हेतुं महान्तं कल्पयन्ति । पीडा कामकृतैवेति । कामः पुष्पायुध इति । भगवन्नेत्रमपि नलिनमुच्यते । नन्वविकसितं पुष्पं किं करिष्यतीत्याशङ्क्याह-नलिनसदृशे नयने यो हाससहित इति । ननु हृदये वेधव्यतिरेकेण पीडा न भवतीत्याशङ्क्याह-ईक्षणेनेति । ईक्षणं तीक्ष्णबाणस्थानीयम् । ननु तथापि दयया न मारयिष्यतीति चेत्तत्राह-उदारेति । अत ऊर्ध्वं आरा यस्य उद्गता वा दाराः अतः स्वयं पीडितः अन्यानपि पीडयिष्यति । किञ्च लीलायुक्तं निरीक्षणं क्रीडायामासक्तौ न कस्यापि सुखं विचारयति । अतस्तेन गाढं यथा भवति तथा निर्भिन्नम् —

''ज्ञानशक्तिः क्रियाशक्तिर्भक्तियोगस्तथैव च । मायावैभवकालौ च सतां हितकरौ तथा ॥
पञ्चैते हरिसम्बद्धाः यस्यान्तर्हृदये सदा । विराजन्ते स्वभक्तेषु भक्तो निर्वृत उच्यते'' ॥ इति ॥ ॥१५॥

एवं तस्या दुःखं अनुवादेन शमीकृतं अन्याः पुनः राजससात्त्विक्यः चक्रवाकं पूर्ववन्निवारयितुं प्रवृत्ता आहुः-नेत्रे निमीलयसीति । तासामवयवविशेषे खेलनार्थं चक्रवाकौ स्थापिताविति मत्वा तौ प्रष्टुं काचिच्चक्रवाकी समागता । ततस्तां निकटे दृष्ट्वा सापि रोदितीति विचार्य तस्या अपि दुःखं दूरीकर्तुं क्लेशमनुवदन्ति । निद्राभावेऽपि कश्चिन्नेत्रे निमील्य तिष्ठति । त्वं तु तदपि न करोषीति किमिति निमीलयसीति प्रश्नः । नक्तमिति निमीलनस्यैवायं काल इति निरूपितं स्वास्थ्ये सति निमीलति प्राणी त्वं चादृष्टबन्धुः मम भर्ता क्व वर्तते इति तत् द्रष्टुं न निमीलनं करोषि । अत एव त्वं रोरवीषि अत्यन्तं शब्दं करोषि । करुणं यथा भवति तथा । बतेति खेदे । तत्रेदानीं द्वितीयमपि तथैवागतं चक्रवाकमुपलभ्य प्रायेणायं भक्ता भर्ता त्वस्या वर्तते वेति इयं भगवतो दासी भवति । ततो दिनान्ते सेवां कृत्वा यथा दास्यो जाताः तथेयमपि सेवाफलं वाञ्छति । तच्च फलं प्रसादरूपम् । प्रसादश्च स्वचरणसमर्पितमालां चेत् प्रयच्छति तदा भगवान् सेवां स्वीकृतवान् इति निश्चित्य तां भक्तिरूपां मालां शिरसि कृत्वा कृतार्थतामापद्यते । इयं च तत्र प्राप्तवती । अतस्तत्कामनया खेदं करोतीत्याहुः-वयमिव अच्युतपादजुष्टां स्रजं कबरेण वोढुमिच्छति । कबरादयः स्वधर्माः राजसतामस्यस्तु समुद्रध्वनिं श्रुत्वा तमपि पूर्ववत्सम्बोधयन्ति । द्विरुक्ति श्रवणार्थम् ॥१६॥ त्वं यत् सदा निष्टनसे । स्तन-शब्दे । नितरां शब्दं करोषि । तेन ज्ञायते रात्रौ त्वमि न शेषे । तत्र शयनाभावे हेतुः-हे उदन्वन्निति । यस्तु जलवान् भवति स शीतार्तो

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

भवति। अत एव अलब्धनिद्रः न कुतश्चित् ते न निद्रा प्राप्ता। प्रत्युत प्रजागर एव प्राप्तः। यत्र हि जलं तिष्ठति तत्र लक्ष्म्याः उत्तमं रमणं न भवतीति। इन्द्रश्चेन्द्राणी च न ततस्तत्र भोगं कुर्वतः। अतस्तादर्थ्याभावात् प्रजागर एव प्राप्तः, न तु निद्रा। ते न प्राप्ताः। ननु तथाप्याक्रोशे को हेतुस्तत्राहुः-किं वा मुकुन्देति। पूर्वं यथा भगवान् अस्मद्धृदये शेते एवं समुद्रेऽपि शेषपर्यङ्के शयानः स्थितः। तत इदानीमत्रावतीर्णस्तिष्ठति। तथैवास्मद्धृदयाच्च तिरोहितः। अत एव सर्वस्वे गते आक्रोशो युक्त एव। मुकुन्देन मोक्षदात्रा अपहृतम् आत्मन इति लाञ्छनं चिह्नं यस्य। अतो मोक्षोऽपि नास्ति, संशयोऽपि नास्ति। अत उभयाद्भ्रष्टतया अस्माभिर्या दशा प्राप्ता तां दशां त्वमपि गतोऽसि। एवं दुःखमनूद्य न दुःखं पञ्चभिः सहेति न्यायेन परिहृतं प्रकारान्तरेणापि परिहरन्ति-दुरत्ययामिति। इयं दशा अस्माकमिव तवापि नित्यैव जाता। अतोऽस्य प्रतीकाराभावात् दुःखं न कर्तव्यमिति भावः ॥१७॥ तामसतामस्यस्तु कालं शपन्त्यः रात्रिश्चेदपगच्छति तदा अस्माकं दुःखनिवृत्तिरपि निश्चित्य चन्द्रास्तमये प्रातःकालो भवतीति चन्द्रस्य गतौ दत्तदृष्टयः ज्योतिषां गतिरदृश्येति शनैश्चलति न चलतीति वा निश्चित्य अतिकामेनान्धा इव जाताः। सर्वं तमसा व्याप्तं पश्यन्त्य आहुः-त्वं यक्ष्मणेति। यक्ष्मा क्षयरोगः। सोऽपि बलवान् दक्षशापात् प्राप्त इति। अत एव तेन गृहीतः अतो न चलसीति युक्तम्। इदं त्वत्याश्चर्यं यतो निजदीधिभिस्तमः क्षिणोषि। अत्रास्मदनुभव एव प्रमाणंम्। एवं चन्द्रमसि दोषमनूद्य प्रायेणास्यायं दोषः न स्वाभाविक इति निश्चित्योभयत्र हेतुं कल्पयन्ति-कच्चिति। मुकुन्दो मोक्षोपदेशार्थं कानिचिद्वाक्यानि उक्तवान् इति तानि दुर्लभानि मत्वा विस्मृत्य पश्चात्परमचिन्तया स्थगितगीर्जातः। मुखाद्वाक्यमपि न निस्सरति। चन्द्रमसो वाक्यमेव गोत्वात् किरणरूपम् इन्द्रियरूपत्वेन चरणरूपत्वं च तदभावादुभयमपि तव न जायते। शीघ्रं गमनमन्धकारदूरीकरणं च भो इति सम्बोधनं प्रश्नार्थे। अस्माभिरुच्यमानमेवं भवतीति नवेति भवतीभिः कथं ज्ञातम् इति चेत् तत्राहुः-एवं नोऽस्माभिरुपलक्ष्यसेति ॥१८॥

श्रीसुबोधिनीसारः

राज्युक्तिः। हे कुररि! गुप्तबोधो गूढज्ञान ईश्वरः कृष्णो रात्र्यां स्वपिति। वीता गता निद्रा यस्याः सा त्वं न शेषे शयनं न करोषि विलपसि। हे सखि! नलिननयनस्य पद्मनेत्रस्य हरेर्हासेन सहितमुदारं यल्लीलेक्षितं तेन गाढं निर्भिन्नं चेतो यस्याः सा त्वं कच्चित् किं वयमिव ॥१५॥ हे चक्रवाकि! नक्तं रात्रौ न दृष्टो बन्धुः प्रियो यया सा त्वं नेत्रे निमीलयसि करुणं यथा भवति तथा रोरवीषि बत खेदे अच्युतस्य चरणसेवितां मालां दास्यं गता सती वयमिव कबरेण केशवन्धनेन वोढुं धर्तुमिच्छसि किं वा ॥१६॥ भो भो उदन्वन्! समुद्र! न लब्धा प्राप्ता निद्रा येनात एवाधिगतः प्रजागरो येन स त्वं सदा निष्टनसे क्रोशसि किंवा मुकुन्देन हृतम् आत्मलांछनं श्रीकौस्तुभादिर्यस्य स त्वं दुरत्ययां कष्टां दशां गतः प्राप्तोऽसि। वयमिवेत्यनुषङ्गः ॥१७॥ हे इन्दो! बलवता यक्ष्मणा क्षयरोगेण त्वं ग्रस्तोऽसि यतो निजदीधितिभिः स्वकिरणैः तमोऽन्धकारं न क्षिणोषि। यथा वयं तथा मुकुन्दगदितानि विस्मृत्य स्थगिता रुद्धा गीर्वाक् यस्य स त्वं नोऽस्माभिर्लक्ष्यसे कच्चित् किम् ॥१८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं प्रतिज्ञायतान्याह-कुररीत्यादिदशभिः-हे कुररि! अस्मिन् जगति रात्र्यामीश्वरः श्रीकृष्णः गुप्तः बाह्यविषयादान्तरीकृतो बोधो ज्ञानं यस्य तथाभूतः सन् स्वपिति। त्वं तु विगतनिद्रा सती विलपसि तन्निद्राभङ्गं कुर्वती आक्रोशसि न शेषे तत्र किं कारणमिति शेषः। तत्स्वयमेव तर्कयति-हे सखि! वयमिव नलिननयनस्य कृष्णस्य हासेन हसितेन यदुदारं लीलयेक्षितं तेन गाढं यथा भवति तथा निर्भिन्नं चेतो यस्याः तथाभूता कच्चत्त्वमसि? ॥१५॥ हे चक्रवाकि! नक्तं रात्रौ त्वं नेत्रे न मीलयसि करुणं यथा यात्तथा रोरवीषि च तत्किमदृष्टबन्धुः अदृष्टपतिरसि?। किंवा वयमिव दास्यं गता सती अच्युतस्य पादजुष्टां स्रजं कबरेण वोढुं स्पृहयसे ततो व्यग्रतित्तासीति? बतेति खेदे ॥१६॥ भो भो उदन्वन् समुद्र! अलब्धनिद्रः अधिगतप्रजागरः प्राप्तजागरश्च त्वं सदा निष्टनसे शब्दं करोषि तत्किमस्माभिः प्राप्तां दुरत्ययामनिवर्त्यां दशां मोहरूपां त्वमपि गतोऽसि?। वा-शब्द उपमार्थे। यथा वयं

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सम्भोगेन मुकुन्दापहृतकुङ्कुमादिलाञ्छनास्तथा त्वमप्यपहृतश्रीकौस्तुभादिलाञ्छनो लक्ष्यसे ॥१७॥ हे इन्दो ! त्वं बलवता यक्ष्मणा क्षयरोगेण गृहीतः, अत एव क्षीणः सन् निजदीधितिभिः स्वकान्तिभिस्तमोऽन्धकारं न क्षिणोषि न विनाशयसि ? कच्चित् किम्वा यथा वयं तथा त्वमपि मुकुन्दगदितानि रहस्यानि विस्मृत्य तदेकचिन्तया स्थगितगीः स्तब्धवाक् स्थितोऽसि ? अस्माभिस्तथैवोपलक्ष्यसे ॥१८॥

अन्वितार्थप्रकाशिका

कुररीति ॥ हे कुररि ! अस्मिन् जगति रात्र्यामीश्वरः श्रीकृष्णः गुप्तः बाह्यविषयादान्तरीकृतो बोधो ज्ञानं यस्य तथाभूतः सन् स्वपिति । त्वं तु विगतनिद्रा सती विलपसि तन्निद्राभङ्गं कुर्वती आक्रोशसि न तु शेषे । तत्र किं कारणमित्यर्थः । अथवा तव नापराधः इत्याहुः । हे सखि ! वयमिव नलिननयनस्य कृष्णस्य हासेन हसितेन यदुदारं लीलयेक्षितं तेन गाढं यथा भवति तथा निर्भिन्नं चेतो यस्याः तथाभूता कच्चत्त्वमसि ॥१५॥ नेत्र इति ॥ हे चक्रवाकि ! नक्तं रात्रौ त्वं नेत्रे न मीलयसि । करुणं यथा स्यात्तथा रोरवीषि पुनः पुनः रौषि । च तत्किमदृष्टबन्धुः अदृष्टपतिरसि किंवा वयमिव दास्यं गता सती अच्युतस्य पादजुष्टां स्रजं कबरेण वोढुं स्पृहयसे ततो व्यग्रतित्तासीति ॥१६॥ भो इति ॥ भो भो उदन्वन् समुद्र ! अलब्धनिद्रः अधिगतप्रजागरः प्राप्तजागरणश्च त्वं सदा निष्टनसे शब्दं करोषि । तडार्षः । तत्किमस्माभिः प्राप्तां दुरत्ययामनिवर्त्यां दशां मोहरूपां त्वमपि गतोऽसि । वाशब्द उपमार्थे । यथा वयं सम्भोगेन मुकुन्दापहृतकुङ्कुमादिलाञ्छनास्तथा त्वमप्यपहृतश्रीकौस्तुभादिलाञ्छनो लक्ष्यसे ॥१७॥ त्वमिति ॥ हे इन्दो ! त्वं बलवता यक्ष्मणा क्षयरोगेण गृहीतः अत एव क्षीणः सन् निजदीधितिभिः स्वकान्तिभिस्तमोऽन्धकारं न क्षिणोषि न विनाशयसि कच्चित् । किं वा यथा वयं तथा त्वमपि मुकुन्दगदितानि रहस्यानि विस्मृत्य तदेकचिन्तया स्थगितगीः स्तब्धवाक् स्थितोऽसि । नः अस्माभिस्तथैवोपलक्ष्यसे ॥१८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

अथ महिषीगीतमाह दशभिः । तत्रादौ स्वभावत एव रुवतीं टिट्टिभीमालक्ष्य काश्चिदाहुः-कुररीति । हे कुररि ! टिट्टिभि ! त्वं विलपसि जगति त्वमेका एव वीतनिद्रा सती न शेषे शयनं न करोषि ॥ नन्वहं शयनं करोमि तत्र युष्माकं किं प्रयोजनमिति चेत्तत्रोच्यते ॥ गुप्तबोधः मनुष्यनाट्येन गुप्तस्वरूपज्ञानः ईश्वरः श्रीकृष्णः रात्र्यां स्वपिति । सुप्त इत्यर्थः ॥ तस्य निद्राभङ्गो भवेदतो विलापो न कर्तव्य इति भावः ॥ एवमुक्तामपि पुनर्विलपन्तीं प्राहुः-कच्चिदिति प्रश्ने । हे सखि ! नलिननयनस्य पद्मनेत्रस्य हासेन सहितम् उदारं यल्लीलेक्षितं तेन वयमिव गाढमत्यन्तं निर्भिन्नं विद्धं चेतश्चित्तं यस्या एवम्भूता त्वमसि । अतो वीतनिद्रा सती विलपसि । अत्र न तवापराधः ॥१५॥ ततोऽप्यधिकं चक्रवाक्या आर्तशब्दमाकर्ण्याहुः-नेत्रे इति । हे चक्रवाकि ! नक्तं रजन्याम् अदृष्टबन्धुः अनवलोकितप्रियतमा सती करुणं यथा तथा रोरवीषि अतिशयेन रोदनं करोषि । बत इति खेदे ॥ वा अथवा वयमिव अच्युतपादजुष्टां स्रजं कबरेण केशपाशेन वोढुं न स्पृहयसे किम् ॥१६॥ गर्जन्तं समुद्रमालक्ष्याहुः-भो इति । भो भो उदन्वन् हे समुद्र ! भो भो इति अतिखेदे वीप्सा ॥ अलब्धनिद्रत्वादेव अधिगतः अधिकं प्राप्तः प्रजागरो येन सः ॥ त्वं सदा निरन्तरं निष्टनसे आक्रोशं करोषि । वा अथवा मुकुन्देन अपहृतानि आत्मनः स्वस्यलाञ्नानि धैर्यगाम्भीर्यलक्ष्मीकौस्तुभादिशोभाचिह्नानि यस्यैवम्भूतः त्वं मुकुन्दकृतसम्भोगेनहृतकुचकुङ्कुमादिशृङ्गारशोभाभिः अस्माभिः प्राप्तां दुरत्ययां दशां सवकीयवस्तुवियोगपीडां गतोसि । अतो निष्टनसे इत्यस्माकं प्रति भाति ॥१७॥ अहो पशुपक्ष्यादयोऽपि प्रजल्पन्ति । अयं सर्वसद्गुणाकरश्चन्द्रः अनाशितध्वान्तः सन् कथं तूष्णीम् आस्ते इति विचार्य ज्ञातं चेदमपीत्याहुः-त्वमिति । हे इन्दो ! त्वं यज्ञमणा क्षयरोगेण गृहीतोऽसि अतः क्षीणः सन् निजदीधितिभिः स्वीयांशुभिः तमः अन्तधारं न क्षिणोषि ॥ पतिविरहेण वयं यथा क्षीणाः स्वदुःखहरणेऽप्यसमर्थाः तथा त्वमपि यक्ष्मणा क्षीणः तमोध्वंसनेऽसमर्थश्चेति भावः । अत्राप्यसन्तोषं प्राप्य पक्षान्तरमाहुः-कच्चिदिति प्रश्ने । भो चन्द्र ! यथा वयं तथा

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

मुकुन्दस्य गदितानि समयसंकेतवचनानि विशेषेण स्मृत्वा सदैकचिन्तनपरः सन् तमः न क्षिणोषि । स्थगितगीः मौनः त्वं नोऽस्माभिरुपलक्ष्यसे ॥१८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

कानि पुनस्तानीत्यत्राह-कुररीत्यादिना इतीदृशेनेत्यतः प्राक्तनेन ग्रन्थेन ॥ कुररीति ॥ हे कुररि ! अस्मिन् जगति रात्र्याम् ईश्वरः श्रीकृष्णः गुप्तबोधः ग्रस्तबोधः इत्यपि पाठः । प्रच्छन्नबाह्यविषयज्ञानः सन्नित्यर्थः । स्वपिति शेते । त्वं तु वीतनिद्रा सती न शेषे । प्रत्युत तन्निद्राभङ्गं कुर्वती सती विलपसि । एतत्तवानुचितमित्यर्थः । अथवा नापराधस्तवापीत्याशयेनाहुः । हे सखि ! नलिननयनस्य कमलनयनस्य हासेन सहितमुदारं यल्लीलयेक्षितं तेन वयम् इव त्वमपि गाढं यथा तथा निर्भिन्नं चेतो यस्यास्तथाभूतासि कच्चित् । इति प्रश्नः । यद्यस्मद्दशां प्राप्ता सती वीतनिद्रा भूत्वा विलपसि चेदत्र न तवापराध इति भावः ॥१५॥ ततोऽप्यधिकं चक्रवाक्या आर्तशब्दमाकर्ण्यापरा आहुः ॥ नेत्रे इति ॥ हे चक्रवाकि ! नक्तं रात्रौ अदृष्टबन्धुः अदृष्टपतिका सती त्वं करुणं यथा तथा रोरवीषि नेत्रे निमीलयसि च । रुदतां प्रायो नेत्रनिमीलनं प्रसिद्धमेव । अथवा बतेति खेदार्थकमव्ययम् । हे सखि ! नैतावच्चेत् तर्हि, वयम् इव, अस्मत्सदृशतयेत्यर्थः । दास्यं दासीभावं गता प्राप्ता सती अच्युतपादजुष्टाम् अच्युतेन बहुवारं पादेन सेवितां स्रजं पुष्पमालिकां कबरेण केशपाशेन वोढुं स्पृहयसे किं वा । तथा चेत्तत्तु युक्तमेव, यतो बहुवारं भगवच्चरणसंस्पर्शवत्याः पुष्पस्रजः कबरेण धारणस्यातिदुर्लभत्वादिति भावः ॥१६॥ काश्चित्तु गर्जन्तमुदन्वन्तं व्यालक्ष्य तं प्रत्याहुः ॥ भो भो इति ॥ भो भो इति खेदे वीप्सा । हे उदन्वन् समुद्र ! अलब्धनिद्रः अत एव अधिगतः प्रजागरो येन तथाभूतः सन् सदा निष्टनसे नितरां ध्वनसि । केनचिदेवंविधेन व्याधिनैव निष्टनसे इत्यर्थः । 'ष्टन शब्दे' इति धातो रूपम् । अथवा अस्माभिः प्राप्तां दुरत्ययामवस्थां त्वं च भवानपि गतः असि । किं वा का सेति विशेषणतामाहुः । मुकुन्दापहृतात्मलाञ्छनः, यथा वयं मुकुन्देन सम्भोगेन हृतकुङ्कुमाद्यात्मकलाञ्ना जातास्तथा त्वमपि तदपहृतलक्ष्मीकौस्तुभादिलाञ्छनः लक्ष्यसेऽतस्त्वामेवं पृच्छाम इति भावः ॥१७॥ अहो पशुपक्ष्यादयोऽपि प्रजल्पन्ति अयंसर्वसद्गुणाकरोऽपि चन्द्रोऽनाशितध्वान्तः कथं तूष्णीमास्ते इति चद्रं दृष्ट्वा वितर्क्य विचार्य च ज्ञातं ज्ञातमिदमपीत्याहुः ॥ त्वमिति ॥ हे इन्दो ! त्वं बलवताऽतिबलवत्तरेण यक्ष्मणा क्षयरोगेण गृहीतः असि । अत एव क्षीणः सन् निजदीधितिभिः स्वमयूखैः तमोऽन्धकारं न क्षिणोषि न विनाशयसि । किं वा पतिविरहेण महता दुःखेन वयं यथा क्षीणाः स्वदुःखहरणेऽप्यसमर्थास्तथा त्वमपि यक्ष्मणा क्षीतस्तमोविनाशनेऽप्यसमर्थश्च जातोऽसीति भावः । अत्राप्यसन्तोषं प्राप्य पुनः पक्षान्तरमाहुः कच्चिदिति । अथवा भो इन्दो ! यथा वयं तथा त्वमपि मुकुन्दगदितानि रहस्यानि विस्मृत्य तदेकस्मरणासक्तचित्ततया स्थगितगीः स्तब्धवाक् जातः असि कच्चित् । इति नोऽस्माभिः उपलक्ष्यसे ॥१८॥

कृष्णप्रिया

रानियां कहती - अरी फुररी ! अब तो बडी रात हो गयी है संसारमें सब और सन्नाटा छा गया है देख न ईस समय स्वयं भगवान् अपना सखण्ड बोध छिपाकर सो रहे है । अरे नींद ही नहीं आती ? तु ईस तरह रात रातभर जगकर विभाप क्यों कर रही है ? सरनी ! कहीं कमलनयन भगवान के मधुर हास्य और लीलाभरी उदार (स्वीवृतिसूचक) चितवनसे तेरा हृदय भी हमारी ही तरह बिंध तो नही गया है ? ॥१५॥ अरी चकष् ! तुने रातके समय अपने नेत्र क्यों बंध कर लिये है ? क्या तेरे पतिदेव कहीं वीदेश चले गये है कि तुं ईस प्रकार करुण स्वरसे पुकार रही है ? हाय हाय ! तब तो तु बडी दुःखीनी है । परन्तु हो नहीं तेरे हृदयमें भी हमारी ही समान भगवान की दासी होने का भाव जग गया है । क्या तुं उनके चरणों पर चढाई हुई पुष्पोकी माला अपनी चोटीयोमें धारण करना

कृष्णप्रिया

चाहती है ।।१६।। अहो समुद्र तुम निरन्तर गरतने हि रहते हो । तुम्हें निंद नहीं आती क्या । जान पडता है तुम्हें सदा जागते रहने का रोग लग गया है । परन्तु नहीं नहीं हम समझ गयीहमारे प्यारे श्यामसुदरने तुम्हारे धैर्य गाम्भीर्य आदि स्वाभाविक गुण छीन लीये है । क्या ईसीसे तुम हमारे ही समान ऐसी व्याधि के शिकार हो गये हो जिसकी कोई दवा नहीं है ? ।।१७।। चन्द्रदेव ! तुम्हें बहुत बडा रोग राज्यक्षमा हो गया है ईसीसे तुम ईतने क्षीण हो रहे हो । अरे राम-राम अब तुम अपनी किरणों से अंधेरा भी नहीं हटा सकते क्या हमारी हि भूति हमारे प्यारे श्यामसुदरकी मीठी मीठी रहस्यकी बाते भूल वाने के कारण तुम्हारी बोलती बंध हो गई है, क्या उसी की चिन्ता से तुम मौन हो रहे हो ? ।।१८।।

[1]किं वा चरितमस्माभिर्मलयानिल तेऽप्रियम् । गोविन्दापांगनिर्भिन्ने हृदीरयसि नः स्मरम् ।।१९।।
[2]मेघ श्रीमंस्त्वमसि दयितो यादवेन्द्रस्य नूनं
श्रीवत्सांकं वयमिव भवान् ध्यायति प्रेमबद्धः ।
[3]अत्युत्कण्ठः शबलहृदयोऽस्मद्धियो बाष्पधाराः
स्मृत्वा स्मृत्वा विसृजसि मुहुर्दुःखदस्तत्प्रसंगः ।।२०।।
प्रियरावपदानि भाषसे मृतसंजीविकयानया गिरा ।
करवाणि किमद्य ते प्रियं वद मे वल्गितकण्ठ कोकिल ।।२१।।
[4]न चलसि न वदस्युदारबुद्धे क्षितिधर चिन्तयसे महान्तमर्थम् ।
अपि बत वसुदेवनन्दनाङ्घ्रिं वयमिव कामयसे स्तनैर्विधर्तुम् ।।२२।।

कर्दमक्षमा

मलयानिल अस्माभिः ते किम् वा अप्रियम् आचरितम् गोविन्दापाङ्गनिर्भिन्ने नः हृदि स्मरम् ईरयसि ।।१९।। श्रीमन् मेघ त्वम् नूनम् यादवेन्द्रस्य दयितः असि वयम् इव भवान् प्रेमबद्धः श्रीवत्साङ्कम् ध्यायति अत्युत्कण्ठः अस्मद्धियः स्मृत्वा स्मृत्वा मुहुः बाष्पधाराः विसृजसि तत्प्रसङ्गः दुःखदः ।।२०।। कोकिल मृतसञ्जीविकया अनया गिरा प्रियरावपदानि भाषसे वल्गितकण्ठ अद्य ते किम् प्रियम् करवाणि मे वद ।।२१।। उदारबुद्धे क्षितिधर न चलसि न वदसि महान्तम् अर्थम् चिन्तयसे अपि वयम् इव बत वसुदेवनन्दनाङ्घ्रिम् स्तनैः विधर्तुम् कामयसे ।।२२।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

अप्रियाचरणं विना स्मरोदीरणेन व्यथाजननं हे मलयानिल ! तवानुचितमित्यर्थः ।।१९।। मेघेति । आतपार्तिहरणादिसाम्यात्त्वं यादवेन्द्रस्य नूनं दयितः सखाऽसि अतो भवांस्तं ध्यायति ध्यानं लिङ्गान्याहुः अत्युत्कण्ठ इत्यादि अहो किमितित्वया तेन सख्यं कृतं यतो दुःखदस्तत्प्रसङ्ग इति ।।२०।। हे कोकिल ! मे प्रियरावस्य प्रियम्वदस्य श्रीकृष्णस्य पदानीव पदानि शब्दांस्त्वं मृतान् सञ्जीवयतीति तथा तयाऽनया कोमलया गिरा वल्गितकण्ठ रमणीयकण्ठ मे कथय किं तव प्रियं करवाणीति ।।२१।। हे क्षितिधर! त्वं न वदसि न चलसि अतो नूनं महान्तमर्थं चिन्तयसे बत तर्हि अपि किं यथा स्तनैर्विधर्तुं वयं कामयामहे तथा त्वं स्तनतुल्यैः शृङ्गैर्वोढुं कामयसे ओमिति चेत्तर्हि तवाप्यस्मदवस्था भविष्यतीति भावः ।।२२।।

---

[1] किन्त्वा-श्रीधर. वंशी. वीर. विज. । [2] अयं श्लोकोऽधिकः-वीर. । स च वीरराघवटीकायां कुण्डले () द्रष्टव्यः । [3] अत्युत्कण्ठं सजलहृदयो-वीर. । [4] शुकराज...श्लोकः वीरराघवटीकायाम् ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्यर्थ इति–कृष्णकटाक्षपातेषु निर्भिन्नचेतसामार्तानामस्माकमकृतत्वदपराधानां पुनरन्यत्कामव्यथोत्पादनं न योग्यमिति भावः ॥★॥ रात्रिशेषे मृदुद्वहन्तं स्मरोद्दीपनं स्तुतिव्याजेन निन्दन्त्य आहुः–किं न्वति । तत्र स्तुतिर्यथा हे मलयानिल मलयस्य परमार्थतः श्रीमदगस्त्यनिवासस्य व्यवहारतश्चन्दनाकरस्यानिल ते तव प्रियमस्माभिर्नु अहो किमाचरितम् । यतो गोविन्दस्य पृथिव्या भारहरणाय पृथिव्यामवतीर्णस्येत्यर्थः । तस्यापाङ्गेन निर्भेदकत्वात् बाणरूपेण निःशेषेण भिन्ने हृदि जीवाधारकोशे स्मरं स्मृतिं चैतन्यमीरयसि पुनः प्रवेशयसि । यद्वा स्मरं काममपीरयसि किमुत चैतन्यमिति भावः । यद्वा अनिलेन त्वयेरणान्निजानुभवाच्च स्मरस्य वह्नित्वमवगम्यते । ततस्तन्निर्भिन्नत्वान्मृतकत्वं प्राप्ते हृदि यदन्तिमक्रियोचितं तद्रूपवह्निमीरयसि ददसि । तस्मात् किन्त्वाचरितमित्यादि । अथ निन्दा, यथा हे तादृश ! अस्माभिरेव तवाप्रियं किमाचरितं तद्वदेत्यर्थः । नु वितर्के । विचारेणापि नास्मद्बुद्धिगोचरस्तदित्यर्थः । कथं तदाह–तादृशगोविन्दापाङ्गनिर्भिन्नेऽप्यस्माकं तादृशेत्यादि । तादृशं स्मरमीरयसि तत्तु विनाप्यप्रियाचरणमन्यहतस्य तत्रापि म्रियमाणस्य दाहनं तादृशस्य तव नोचितं तथा क्षणविलम्बासहत्वात्परमचापल्यं चेति भावः । यद्वा तादृशेऽपि हृदि काममीरयसि । अहो तव मूर्खत्वं वृथा विडम्बनकर्तृत्वं चेति भावः ॥१९॥ किञ्च–मेघ जलसेक्तृत्वेन सर्वतापापनोदक श्रीमन् विद्युद्युक्तत्वात् अतः सखित्वात् । तं यादवेन्द्रम् । लिङ्गानि ज्ञापकानि । अत्युत्कण्ठस्तद्द्रष्टुमतीवेच्छावान् । शबलहृदयो विह्वलः । यथा वयं ध्यायामस्तथा भवानप्यस्मद्विधोऽस्मत्तुल्य एवार्तः । बाष्पधारा अश्रुप्रवाहान् । तत्प्रसङ्गः श्रीकृष्णप्रसङ्गः । वस्तुतस्तु त्वं प्रेमभक्तोऽसि प्रह्लादादिवत्तद्धर्माणाम् ‘वाग्गद्गदा द्रवते यस्य चित्तम्’ इत्यादीनां त्वयि दर्शनात् । तथा च श्रीकृष्णसङ्गः दुःखानां सांसारिकतापानां दश्छेदक एवात एव सर्वस्वत्यागपुरःसरं तद्यशःश्रवणमात्रेण महान्तोऽरण्यमाप्य तद्ध्यानयन्तस्तमिताः । तदुक्तम् — “कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् । सत्सङ्गान्मुक्तदुःसङ्गो हातुं नोत्सहते बुधः ॥” इति ॥★॥ अथ समुद्रान्तिके वर्षन्तं मेघं श्रीभगवद्विरहार्त्या रुदन्तं मत्वा तत्सारूप्यदर्शनजातेनाकृत्रिमसौहृद्येनाहुः–मेघेति । नूनं वितर्के इति सर्वत्र वाक्ये योज्यम् । हे मेघ ! त्वं यादवेन्द्रस्य नूनं दयितः प्रियसखोऽसि । यतः हे श्रीमन् ! प्राप्ततत्सारूप्यलक्ष्मीकः । ततः किं तत्राहुः–प्राप्तसारूप्यादपि भवद्विधाद्विलक्षणलक्ष्मीकममुं भवान् नूनं ध्यायति । ननु प्राप्ते पर्यन्तफले फलस्य वा न्यूनत्वे किं तद्ध्यानेन, तत्राहुः–प्रेमबद्ध इति । तच्छ्रीमूर्तेस्तथा स्वभावो यथा तत्र प्रेमैव ज्ञायते, नौदासीन्यं न चेर्ष्येति भावः । तत्रोभयत्रापि दृष्टान्तः वयमिवेति । यस्मादेवं प्रेमबद्धस्तस्मात् नूनमत्युत्कण्ठस्तेन निर्वेदादिनानाभावशबलचित्तोऽप्यसि । तत्रापि हेतुः–अस्मद्विध इति । प्रेमबद्धतादृश्यात्स्वानुभवेन ज्ञायस इत्यर्थः । यद्वा, अत्युत्कण्ठत्वेन लक्षणं शबलहृदयः शबलं वैवर्ण्येन नानावर्णं हृदयं मध्यभागो यस्य तथाभूतोऽसीति । तच्च युक्तमित्याहुः–अस्मद्विध इति । अहो नूनमत एव तं स्मृत्वा स्मृत्वा वृष्टिरूपा बाष्पधारा मुहुः सृजसि सर्वत्र विकिरसि । युक्तं च तदित्याहुः–दुःखद इति । प्रसङ्ग आसक्तिः प्रस्तावमात्रं वा ॥★॥ विश्वनाथोऽपि — दयितः सखा त्वमसि प्रेमबद्धः प्राप्तबन्धनः सन् तं ध्यायति श्रीवत्साङ्कमिति तस्य च वर्णेन साम्येऽपि तस्य श्रीवत्साङ्कोऽधिक इति तत्र तवाशक्तिकारणमवगतमिति भावः । शबलहृदयः विषादमलिनचेताः वृष्टिमिषेण बाष्पधाराः विसृजसि वृष्टिमिषेण रोदिषि । अहो किमिति त्वया तत्रासक्तिः कृता यतस्तत्प्रसङ्गोऽपि दुःखद एव ॥२०॥ प्रियं रौति वदतीति प्रियरावस्तस्य । ‘वल्गितं प्रियरम्ययोः’ इति ॥★॥ रात्र्यवसाने कूजन्तं कोकिलं पूर्ववत् स्तुतिनिन्दाभ्यामाहुः–प्रियरावेति । तत्र स्तुतिः हे कोकिल ! पञ्चमगानप्रसिद्ध ! तत्रापि वल्गितः प्रियेणैव शिक्षाविशेषाद्वल्गुकृतः कण्ठो यस्य हे तथाविध ! प्रियस्य राव इव रावः पञ्चमस्वरो यत्र तादृशानि पदानि गीतनिबद्धान् शब्दान् भाषसे । यद्वा प्रियस्य रावः शिक्षावचनं येषु तादृशानि पदानि दूत्यानुरूपान् शब्दान् भाषसे । ततस्तन्नैकट्यबोधनेन तद्विरहमृतान् सम्यग् जीवयतीति तथा तथा गिरा हेतुना किं प्रियं करवाणि तन्मे मह्यं वद । कृपया ज्ञापय । अत्रैकवचनं प्रत्येकमपि तत्क्षमताविवक्षया पृथगुक्तेः । अथ निन्दा । हे चञ्चलकण्ठ ! कोकिल ! मृतसञ्जीविकया तथा गिरा हेतुना प्रियस्य रावः शिक्षा यत्र तादृशानि पदानि भाषसे । मया तद्विरहासहिष्णुत्वाज्जीवनान्मरणमेव वरं मन्यते तत्तु स इव त्वमप्यापाततोऽमृतायमानवचनेन मध्ये मध्ये विघातयन् दुःखद एवासीदिति भावः । तस्मात्तवाप्रियं तुण्डत्रोटनादिकमत्रापराधे किं करवाणि तत्त्वमेव वद स्वदण्डविशेषं स्वयमेवानुमन्यस्व अन्यथाऽपराधक्षयो न भवेदिति भावः ॥★॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अत्र विश्वनाथः — हे प्रियराव कोकिल ! अनया पदानि अस्मद्विरहदुःखत्राणान्येव भाषसे '**पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु**' इत्यमरः । वल्गितः वल्गूकृतः कण्ठो येन हे तादृश ! अत्र विरहे कोकिलशब्दस्य दुःखदत्वात् प्रियरावेत्याद्याः सर्वा एव विपरीतलक्षणया वक्रोक्तय एव । तेन स्वशब्देन मां ज्वालयतस्तव किं प्रियं करवाणि तुण्डमेव धक्ष्यामीति भावः ॥२१॥ स्तनतुल्यैस्तीक्ष्णाग्रैः । ओमिति चेत्सत्यं तं धर्तुमिच्छामीति यदि वदसि । इति भाव इति-यथा वयं निरस्तसमस्तैहिकामुष्मिकाः सत्यस्तदेकतानास्तथा त्वमपि कृतार्थो भविष्यसीत्याशयः ॥★॥ महास्थिरं रात्रौ प्रायः शयितसर्वजन्तुत्वात्तूर्ष्णीं स्थितं चारुणोदये श्रीरैवतकं दृष्ट्वाहुः-नेति । हे क्षितिधर ! यद्यपि पञ्चाशत्कोटियोजनविस्तीर्णां पृथ्वीं धरसि तथापि न चलसि न च वदसि । तस्मादेव हे उदारबुद्धे ! महाचित्त ! तदेव दर्शयन्ति-कमपि महान्तमर्थं पुरुषार्थं चिन्तयसे चिन्तयसि कामयसे इति । तत्रापि सशङ्कमाहुः । अपि प्रश्ने । बत खेदे । स च महार्थो मतभेदान्नानाविध इति तत्र देवस्यास्मत्पूज्यस्य श्वशुरस्य यो नन्दनः प्रधानपुत्रोऽस्मत्पतिरित्यर्थः । आर्यपुत्र इति वत् स्पष्टतया अनुक्तिर्लज्जया । तस्य वसु परमधनरूपमङ्घ्रि वयमपि स्तनैर्विधत्तुं स्वयं नारीयमाणः स्तनीकृतैः शृङ्गैरालिङ्गितुं किं कामयसे यदि कामयसे तदास्माकमिव तवापि बुद्धिहीनत्वं स्वप्राणमात्रेऽपि धारणासामर्थ्यं भविष्यतीत्यर्थः । स्तनानां बहुत्वनिर्देशस्तु तस्य लोभातिशयं द्योतयति । अत्र वसुदेवपदयोर्भिन्नक्रमतया प्रयुक्तयोरप्येकत्र सन्तापेन श्वशुरनामोच्चारणप्रमाद उन्मादोक्त्या न दोषायेति ज्ञेयम् । टीकायां न चलसि न वदस्यनयोर्व्युत्क्रमनिर्देशः प्रायो लेखकभ्रमादिति ॥२२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

रात्रिशेषे मृदुद्वहन्तं स्मरोद्दीपनं स्तुतिव्याजेन निन्दन्त्य आहुः-किं न्वति । तत्र स्तुतिर्यथा हे मलयानिल मलयस्य परमार्थतः श्रीमदगस्त्यनिवासस्य व्यवहारतश्चन्दनाकरस्यानिल ते तव प्रियमस्माभिर्नु अहो किमाचरितम् । यतो गोविन्दस्य पृथिव्या भारहरणाय पृथिव्यामवतीर्णस्येत्यर्थः । तस्यापाङ्गेन निर्भेदकत्वात् बाणरूपेण निःशेषेण भिन्ने हृदि जीवाधारकोशे स्मरं स्मृतिं चैतन्यमीरयसि पुनः प्रवेशयसि । यद्वा स्मरं काममपीरयसि किमुत चैतन्यमिति भावः । यद्वा अनिलेन त्वयेरणान्निजानुभवाच्च स्मरस्य वह्नित्वमवगम्यते । ततस्तन्निर्भिन्नत्वान्मृतकत्वं प्राप्ते हृदि यदन्तिमक्रियोचितं तद्रूपवह्निमीरयसि ददसि । तस्मात् किन्त्वाचरितमित्यादि । अथ निन्दा, यथा हे तादृश ! अस्माभिरेव तवाप्रियं किमाचरितं तद्वदेत्यर्थः । नु वितर्के । विचारेणापि नास्मद्बुद्धिगोचरस्तदित्यर्थः । कथं तदाह-तादृशगोविन्दापाङ्गनिर्भिन्नेऽप्यस्माकं तादृशेत्यादि । तादृशं स्मरमीरयसि तत्तु विनाप्यप्रियाचरणमन्यहतस्य तत्रापि म्रियमाणस्य दाहनं तादृशस्य तव नोचितं तथा क्षणविलम्बासहत्वात्परमचापल्यं चेति भावः । यद्वा तादृशेऽपि हृदि काममीरयसि । अहो तव मूर्खत्वं वृथा विडम्बनकर्तृत्वं चेति भावः ॥१९॥ अथ समुद्रान्तिके वर्षन्तं मेघं श्रीभगवद्विरहार्त्या रुदन्तं मत्वा तत्सारूप्यदर्शनजातेनाकृत्रिमसौहृद्येनाहुः-मेघेति । नूनं वितर्के इति सर्वत्र वाक्ये योज्यम् । हे मेघ ! त्वं यादवेन्द्रस्य नूनं दयितः प्रियसखोऽसि । यतः हे श्रीमन् ! प्राप्ततत्सारूप्यलक्ष्मीकः । ततः किं तत्राहुः-प्राप्तसारूप्यादपि भवद्विधाद्विलक्षणलक्ष्मीकममुं भवान् नूनं ध्यायति । ननु प्राप्ते पर्यन्तफले फलस्य वा न्यूनत्वे किं तद्ध्यानेन, तत्राहुः-प्रेमबद्ध इति । तच्छ्रीमूर्तेस्तथा स्वभावो यथा तत्र प्रेमैव ज्ञायते, नौदासीन्यं न चेर्ष्येति भावः । तत्रोभयत्रापि दृष्टान्तः वयमिवेति । यस्मादेवं प्रेमबद्धस्तस्मात् नूनमत्युत्कण्ठस्तेन निर्वेदादिनानाभावशबलचित्तोऽप्यसि । तत्रापि हेतुः-अस्मद्विध इति । प्रेमबद्धतादृश्यात्स्वानुभवेन ज्ञायस इत्यर्थः । यद्वा, अत्युत्कण्ठत्वेन लक्षणं शबलहृदयः शबलं वैवर्ण्येन नानावर्णं हृदयं मध्यभागो यस्य तथाभूतोऽसीति । तच्च युक्तमित्याहुः-अस्मद्विध इति । अहो नूनमत एव तं स्मृत्वा स्मृत्वा वृष्टिरूपा बाष्पधारा मुहुः सृजसि सर्वत्र विकिरसि । युक्तं च तदित्याहुः-दुःखद इति । प्रसङ्ग आसक्तिः प्रस्तावमात्रं वा ॥२०॥ अथ रात्र्यवसाने कूजन्तं कोकिलं पूर्ववत् स्तुतिनिन्दाभ्यामाहुः-प्रियरावेति । तत्र स्तुतिः हे कोकिल ! पञ्चमगानप्रसिद्ध ! तत्रापि वल्गितः प्रियेणैव शिक्षाविशेषाद्वल्गुकृतः कण्ठो यस्य हे तथाविध ! प्रियस्य राव इव रावः पञ्चमस्वरो यत्र तादृशानि पदानि गीतनिबद्धान् शब्दान् भाषसे । यद्वा प्रियस्य रावः शिक्षावचनं येषु तादृशानि पदानि दूत्यानुरूपान् शब्दान् भाषसे । ततस्तन्नैकट्यबोधनेन तद्विरहमृतान् सम्यग् जीवयतीति तथा तथा

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

गिरा हेतुना किं प्रियं करवाणि तन्मे मह्यं वद । कृपया ज्ञापय । अत्रैकवचनं प्रत्येकमपि तत्क्षमताविवक्षया पृथगुक्तेः । अथ निन्दा । हे चञ्चलकण्ठ ! कोकिल ! मृतसञ्जीविकया तथा गिरा हेतुना प्रियस्य रावः शिक्षा यत्र तादृशानि पदानि भाषसे । मया तद्विरहासहिष्णुत्वाज्जीवनान्मरणमेव वरं मन्यते तत्तु स इव त्वमप्यापाततोऽमृतायमानवचनेन मध्ये मध्ये विघातयन् दुःखद एवासीदिति भावः । तस्मात्तवाप्रियं तुण्डत्रोटनादिकमत्रापराधे किं करवाणि तत्त्वमेव वद स्वदण्डविशेषं स्वयमेवानुमन्यस्व अन्यथाऽपराधक्षयो न भवेदिति भावः ॥२१॥ महास्थिरं रात्रौ प्रायः शयितसर्वजन्तुत्वात्तूष्णीं स्थितं चारुणोदये श्रीरैवतकं दृष्ट्वाहुः-नेति । हे क्षितिधर ! यद्यपि पञ्चाशत्कोटियोजनविस्तीर्णां पृथ्वीं धरसि तथापि न चलसि न च वदसि । तस्मादेव हे उदारबुद्धे ! महाचित्त ! तदेव दर्शयन्ति-कमपि महान्तमर्थं पुरुषार्थं चिन्तयसे चिन्तयसि कामयसे इति । तत्रापि सशङ्कमाहुः । अपि प्रश्ने । बत खेदे । स च महार्थो मतभेदान्नानाविध इति तत्र देवस्यास्मत्पूज्यस्य श्वशुरस्य यो नन्दनः प्रधानपुत्रोऽस्मत्पतिरित्यर्थः । आर्यपुत्र इति वत् स्पष्टतया अनुक्तिर्लज्जया । तस्य वसु परमधनरूपमङ्घ्रिं वयमपि स्तनैर्विधत्तुं स्वयं नारीयमाणः स्तनीकृतैः शृङ्गैरलिङ्गितुं किं कामयसे यदि कामयसे तदास्माकमिव तवापि बुद्धिहीनत्वं स्वप्राणमात्रेऽपि धारणासामर्थ्यं भविष्यतीत्यर्थः । स्तनानां बहुत्वनिर्देशस्तु तस्य लोभातिशयं द्योतयति । अत्र वसुदेवपदयोर्भिन्नक्रमतया प्रयुक्तयोरप्येकत्र सन्तापेन श्वशुरनामोच्चारणप्रमाद उन्मादोक्त्या न दोषायेति ज्ञेयम् । टीकायां न चलसि न वदस्यनयोर्व्युत्क्रमनिर्देशः प्रायो लेखकभ्रमादिति ॥२२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१७-५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

किं वेति । हे मलयानिल ! ते तुभ्यमस्माभिः किंवाऽप्रियमाचरितं कृतम्, यतस्त्वं गोविन्दस्यापाङ्गैर्नितरां भिन्ने नोऽस्माकं हृदि हृदये स्मरं काममीरयसि । अप्रियाचरणं विना स्मरोदीरणेन व्यथाजननं तवानुचितमित्यर्थः ॥१९॥

(मुग्धे ध्यायसि किं गृहाण पुरतः कुन्दं विकासोन्मुखं किं कुन्देन ममामुना सुमनसः कीदृग्विधास्त्वत्प्रियाः ।

पुन्नागं मृगये सखि श्रुतिशिरो भूषाविशेषायितं गावोऽप्युज्झितसूनमासत तदामोदप्रकर्षोन्मुखाः ॥१॥)

(काञ्चित्प्रियमन्वेषयन्ती पुष्पाण्यन्वेषयन्तीमिवालक्ष्य कस्याश्चिदुत्तरप्रत्युत्तररूपं वाक्यमाह-मुग्धेति । हे मुग्धे ! किं ध्यायसि ? पुरतः स्थितं विकासोन्मुखं कुन्दं गृहाण । एवमुक्ता प्राह-किं कुन्देन ममामुनेति । अमुना वर्णरहितेन कुन्देन किम्, न किञ्चिदपि प्रयोजनम्, किन्तु मुकुन्दमेवान्वेषयामीत्यभिसन्धिः । सा पुनः प्राह-त्वत्प्रियाः सुमनसः पुष्पाणि कीदृग्विधा इति सा पुनः प्राह-पुन्नागं मृगये सखि ! श्रुतिशिरोभूषायितमिति हे सखि ! श्रुतिशिरोभूषाविशेषायितं श्रोत्रयोः शिरसि च भूषणविशेषवदाचरन्तं पुन्नागं मृगये । श्रुतिशिरस्सु वेदान्तेषु भूषाविशेषायितं पुन्नागम्पुरुषश्रेष्ठं मृगय इत्यभिसन्धिः । ननु किम्बह्वीषु सुमनस्सु सतीषु विशेषेण पुन्नागमेव मृगयसे इत्यत्राह-गावोऽपीति । उज्झितं गलितं सूनं पुन्नागं कुसुमं तदा मोदप्रकर्षेण उन्मुखा आसत मृगयन्त्योऽवतिष्ठन्ते पशवोऽप्येवं किम्पुनरहमिति भावः । पक्षान्तरे गावः वेदान्तवाचोऽपि उज्झितसूनं त्यक्तजन्मानमजमित्यर्थः । पुरुषश्रेष्ठं तदामोदप्रकर्षेण तत्कल्याणगुणप्रकर्षे उन्मुखाः प्रतिपादनोन्मुखाः औन्मुख्यतामात्रमेव तासां न तु कार्त्स्न्येन तत्प्रतिपादनमानन्त्यादिति भावः । असत केवलं मृगयन्त्यः समासत इत्यर्थः ॥०॥) मेघेति । हे मेघ ! त्वं यादवेन्द्रस्य यदूत्तमस्य त्वं दयितः प्रियोऽसि । नूनम् आतपार्तिहरणादिसाम्यात्त्वां तत्सखमालक्षये इति भावः । अतो भवान् वयमिव श्रीवत्सांकं तद्विषयप्रेम्णा बद्धो निश्चलो ध्यायति किम् । ध्यानलिङ्गान्याह-अत्युत्कण्ठमित्यादि । अस्मद्विधः वयमिवेत्यर्थः । अत्युत्कण्ठं यथा तथा सजलहृदयः बाष्पधाराः सृजसि मुञ्चसि । युक्तं चैतदित्याह-दुःखदस्तत्प्रसङ्ग इति ॥२०॥ प्रियेति । हे कोकिल ! प्रियरावस्य प्रियंवदस्य श्रीकृष्णस्य पदानीवपदानि शब्दान् भाषसे । मृतान् सञ्जीवयतीति तथा कोमलया गिरा वल्गितकण्ठ रमणीयकण्ठ मे कथय किं तेऽद्य प्रियं करवाणि इति ॥२१॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

(१५. कुशराज गाय यदुदेवसत्कथां कुर्मस्तवाङ्ग पयसोपसेचनम्। विरहाग्नितप्तहृदयेष्वलं रमा रमणाभिधानसुधया स सिञ्चनः ॥२॥) (शुकराजेति। शुकराज! यदुदेवस्य सत्कथां गाय कथय 'गै शब्दे' लटो मध्यमैकवचनम्। अङ्ग हे शुक! तव पयसा क्षीरेण उपसेचनमभिषेकं कुर्मः। त्वं नोऽस्माकं विरहाग्निना तप्तेषु हृदयेषु रममाणस्य लक्ष्मीकान्तस्याभिधानसुधया कथामृतेनालं नितरां सिञ्च ॥०॥)

न चलसीति। हे क्षितिधर! त्वं न चलसि न वदसि च, किन्तु महान्तमर्थं चिन्तयसे। तर्हि किं वयं यथा स्तनैर्वसुदेवनन्दनस्य श्रीकृष्णस्याङ्घ्रिं विधर्तुं कामयामहे तथा त्वमपि स्तनतुल्यैः शृङ्गैरुद्धर्तुं कामयसे किम् ॥२२॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥११-२७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥१३-२४॥

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः

काचित्तत्रैव समये मेदुरं वहन्तमनिलमभिमृश्य तद्बाधितेव सासूयमाह-किं वाचरितमित्यादि। हे मलयानिल अस्माभिस्ते किमप्रियमाचरितं, न किमपीति चेत्, कथमेवं पीडयसीत्याह-गोविन्दापाङ्गनिर्भिन्ने किं स्मरं ईरयसि प्रेरयसि क्षेत्रेजमीररसमिवेति शेषः। असूयाव्यभिचारी ॥१९॥ तत्रैव काचिन्मेघमालोक्यैव निगदति-मेघ श्रीमन्नित्यादि। हे मेघ! श्रीमन् श्रीयुक्त! त्वं यादवेन्द्रस्य दयितोऽसि मित्रमसि सावर्ण्यात् श्रीमत्त्वाच्च। स श्रीमान् लक्ष्मीवान् त्वमपि शोभावानित्यर्थः। नूनं मन्ये वयमिव भवानपि श्रीवत्सांकं प्रेमबद्धः सन् ध्यायसि। प्रेमबद्धत्वं व्याकरोति-अपीत्यादि। अपि-सम्भावनायाम् उत्कण्ठ उत्कण्ठावान् उद्ग्रीवो वा शबलहृदयो नानाभावशाबल्यवलितमना भूत्वा बाष्पधारां विसृजसि मुहुः अस्मद्विधः अस्मत्सदृशः सादृश्ये विधप्रत्ययः किं कृत्वा स्मृत्वा तत् प्रेमानुक्षणस्मरणेन उचितमेवैतत्। कथमित्याह-दुःखदस्तत्प्रसङ्गः। तत्प्रस्तावमात्रमपि दुःखदं किमुत निरन्तरानुस्मरणमिति ॥२०॥ तत्रैव काचित्पिकरवमाकर्ण्य प्रीयमाणाह-प्रियरावेत्यादि। हे कोकिल! अद्य किं ते प्रिय करवाणि, वद कथमकाण्डे नः प्रियं भवत्या कार्यमित्याह-हे प्रियराव! प्रयस्य राव इव रावो यस्य स तथा हे तथाभूत! मृतसञ्जीविकया मृतसञ्जीविन्या अनया गिरा पदानि भाषसे यद्वा प्रियस्य श्रीकृष्णस्य राववत् पदानीरयसे कथमत्र पदं हे वलितकण्ठ चञ्चलकण्ठ ॥२१॥ तदैव काचित् रैवतमनुस्मृत्य निगदति-न चलसीत्यादि। हे उदारबुद्धे! क्षितिधर! न चलसि न वदसि कोऽर्थः, आम् ज्ञातं महान्तम् अर्थं प्रयोजनं किमपि चिन्तयसे तदेव ब्रूहीत्याह अपि बतेत्यादि। अपि सम्भावने। बत खेदे। वसुदेवनन्दनाङ्घ्रिं स्तनैः स्तनप्रायैः शिखरैर्विधर्तुं कामयसे वयमिव वयं यथा स्तनैर्वोढुं कामयमाना निरन्तरं कमप्यर्थं चिन्तयामः त्वं पुरुषो भूत्वाऽपि स्त्रीभावमासाद्य कामयस इति निगर्वः ॥२२॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥१८-२३॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

हे मलयानिल ते किम् अप्रियं वैरम् अस्माभिराचरितम्। यदस्मिन् विपत्समये त्वं वैरपरिशोधनं करोषीत्याहुः-गोविन्देति ॥१९॥ दयितः सखा त्वमसि प्रेमबद्धः प्राप्तबन्धनः सन् तं ध्यायति श्रीवत्साङ्कमिति तस्य च वर्णेन साम्येऽपि तस्य श्रीवत्साङ्कोऽधिक इति तत्र तवाशक्तिकारणमवगतमिति भावः। शबलहृदयः विषादमलिनचेताः वृष्टिमिषेण बाष्पधाराः विसृजसि वृष्टिमिषेण रोदिषि। अहो किमिति त्वया तत्रासक्तिः कृता यतस्तत्प्रसङ्गोऽपि दुःखद एव ॥२०॥ हे प्रियराव कोकिल! अनया पदानि अस्मद्विरहदुःखत्राणान्येव भाषसे 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। वल्गितः वल्गूकृतः कण्ठो येन हे तादृश! अत्र विरहे कोकिलशब्दस्य दुःखदत्वात् प्रियरावेत्याद्याः सर्वा एव विपरीतलक्षणया वक्रोक्तय एव। तेन

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

स्वशब्देन मां ज्वालयतस्तव किं प्रियं करवाणि तुण्डमेव धक्ष्यामीति भावः ॥२१॥ हे क्षितिधर ! रैवतकपर्वत ! नूनं त्वं महान्तमर्थं स्वाभीप्सितं चिन्तयसि अतो बतेति [बत] इदं वा तवाभीप्सितमित्यर्थः । वयं यथा स्तनैर्धर्तुं कामयामहे तथा त्वं स्तनैः किं वोढुं कामयसे । ओमिति चेत्तर्हि तवाप्यस्मदवस्था भविष्यतीति भावः ॥२२॥

गूढार्थदीपिनी

हे मलयानिल ! कामोद्दीपक नु अहो ते किम् अप्रियमाचरितं कृतं न किमपि अथापि त्वं नोऽस्माकं हृदि कामम् ईरयसि प्रेरयसि उद्बोधयसीत्यर्थः । तद्विरहे तु नोचितम् । कथम्भूते हृदि । गोविन्दस्य अपाङ्गैः कटाक्षपातैर्नितरां भिन्ने विदीर्णे । वा न्वर्थे ॥१९॥ हे मेघ ! आतपार्तिहरणश्यामत्वादिसाम्यात् त्वमपि श्रीकृष्णस्य दयितः प्रियः सखा असि । अतो भवान् प्रेमबद्धः सन् तं ध्यायति यथा वयम् । ध्याने लिङ्गान्याहुः । अत्युत्कण्ठः दर्शनोत्सुकः । कुतः । शबलहृदयः विह्वलहृदयः अस्मत्सदृशो भवान् अश्रुधारां मुञ्चति । किं कुर्मः सुखदोऽपि तत्प्रसङ्गः विरहे दुःखप्रदो भवतीति । मन्दाक्रान्तावृत्तम् ॥२०॥ हे वल्गितकण्ठ सुन्दरकण्ठ ! कोकिल अनया मधुरया गिरा प्रियरावस्य प्रियंवदस्य कृष्णस्य पदानीव मधुरशब्दान् भाषसे । यद्वा । हे प्रियराव कोकिलविशेषणम् । पदानि (पदं व्यवसितत्राणस्थानलक्ष्याङ्घ्रिवस्तुषु । इत्यमरात्) दुःखत्राणोपायानेव वदसि । अतस्ते किं प्रियं करवाणीति निःसङ्कोचं वद । प्रियं रौतीति प्रियरावः । मृतान् सञ्जीवयतीति तया । वल्गुशब्दात् तत्करोतीति णिजन्तात् क्तः । 'वल्गितं प्लुतरम्ययोः' इति कोशात् । अत्र विरहे कोकिलशब्दस्य दुःखप्रदत्वात् प्रियरावेत्याद्याः सर्वा एव विपरीतलक्षणया वक्रोक्तय एव ज्ञेयाः तेन स्वशब्देन मां ज्वालयतस्तव किं प्रियं करवाणि तव तुण्डमेव धक्ष्यामीति भावः । पद्यद्वये वैतालीयं वृत्तम् ॥२१॥ उदाराः परोपकारनिष्ठा बुद्धिर्यस्य । हे क्षितिधर ! त्वं न चलसि न च किञ्चित् वदसि अतो नूनं त्वं कमपि महान्तमर्थं चिन्तयसे । अपि किं वयमिव भगवदङ्घ्रि स्तनतुल्यैः शिखरैर्विधर्तुं कामयसे । तथा सति त्वमपि तप्यसे इत्यर्थः ॥२२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

हे मलयानिल ! ते तुभ्यं अप्रियमस्माभिः किमाचरितमनुष्ठितम् । गोविन्दापाङ्गैर्नितरां भिन्ने नोऽस्माकं हृदि स्मरं व्यथाजनकं काममीरयसि ॥१९॥ हे मेघ हे श्रीमन् ! त्वं श्यामत्वेन विद्युद्धरत्वेन तापाहरत्वेन श्यामसुन्दरस्य पीतपट्टादिश्रीयुक्तस्य त्रिविधतापहरस्य यादवेन्द्रस्य नूनं दयितः प्रियोऽसि । भवान् प्रेमबद्धः वयमिव श्रीवत्सांकं ध्यायति । यतः अस्मद्विधः । वयमिव अत्युत्कण्ठः शबलहृदयः सन् तमेव स्मृत्वा स्मृत्वा बाष्पधाराः मुहुः विसृजसि एवमवस्थापादकत्वात्तत्प्रसङ्गो दुःखदः ॥२०॥ मृतान् सञ्जीवयतीति तथा तया अनया कोमलया गिरा हे वल्गितकण्ठ ! त्वं प्रियरावस्य प्रियंवदस्य श्रीकृष्णस्य पदानीव पदानि शब्दान् भाषसे अतः ते किं प्रियं करवाणि तन्मे कथय आदिश ॥२१॥ हे क्षितिधर ! उदारबुद्धे ! त्वं महान्तमर्थं कमपि चिन्तयसे । यतः न चलसि न वदसि । अपि किं वा वयमिव वसुदेवनन्दनाङ्घ्रिं स्तनैर्विधर्तुं कामयसे । बत इति खेदे । अहो कष्टं, त्वमसि श्रीकृष्णेन लोकव्यवहारात् चलितोऽसीति भावः ॥२२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तामसराजस्यः कामेन पीडिताः मलयानिलं शपन्त्य आहुः-किं वाचरतमस्माभिरिति । हे मलयानिल ! तुभ्यमस्माभिः किम्वा अप्रियमाचरितम् । मलयानिलस्य शीतलस्य अप्रियमुष्णत्वापादकं यदा भगवता सह स्थितं तदा स्वहृदयचन्दनादिभिः त्वस्माभिरतिशीतलः कृतः । एवमुपरि कथं त्वमपकारं करोषि । कोऽपकारः कृत इति चेत्तत्राहुः-गोविन्दस्य अपाङ्गेनैव स्मृतेन निर्भिन्ने हृदये स्मरं प्रेरयसि । यथा कश्चित् कोटर अग्निं प्रयच्छति येन सर्वोऽपि वृक्षः आर्द्रोऽपि दग्धो भवेत् तथा त्वमस्मान् करोषीत्यर्थः । गोविन्दपदेन गोकुलगतस्य भगवतो लीला स्मृता । अत एव महत् दुःखं जातमिति सूचितम् ॥१९॥ तामससात्त्विक्यस्तु मेघं भगवत्सदृशं दृष्ट्वा चन्द्रव्यवधायको जात इति क्षणं शैत्यं प्राप्ता इव तं स्तुत्वा पश्चात् स्वधमारोपेण तमपि दुःखितं कल्पयित्वा

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

तद्दुःखापनोदनं साम्येन कुर्वन्ति । अथ यदि साम्प्रतं वयं तप्ता इति तव रोषस्तथापि मलयानिलः सर्पादिभिर्ग्रस्तः समायाति तादृशस्य केनापकारः कर्तव्य इति सूचितम् । मेघ ! श्रीमन्निति मेघे परमशोभाविद्युदादिरूपा वर्तत इति श्रीमान् भवति तादृशं तं सम्भावयन्ति । त्वं भगवतः दयितोऽसि । श्यामत्वात्पीतवसनत्वात् प्राणिभ्यो जीवनदातृत्वात् तापहारकत्वाच्चेति । अत एव दयितः । ननु तर्ह्यहं सुखी युष्मानपि सुखयुक्तान् करिष्यामीत्याशङ्क्याहुः-श्रीवत्स एवांकं चिह्नं यस्येति ब्राह्मणास्तस्यातिक्रमं कुर्वन्तीति चिन्तया दुःखमित्यर्थः । यथास्माकं श्रीवत्से लक्ष्मीस्तिष्ठतीति साम्प्रतं तया सह स्थितोऽस्मान्न गणयतीति दुःखम् । तस्मादेकस्यैव श्रीवत्सस्य उभयोः दुःखे निमित्तत्वमिति वयमिवेत्युक्तम् । विस्मरणं क्रियातामित्याहुः-प्रेमबद्ध इति । प्रेम्णा अन्तःकरणे बद्धो विस्मर्तुमशक्यः । नन्वहं सुखी दुःखितधर्मा मयि भवतीभिः के दृष्टा इत्याकाङ्क्षायामाहुः-अत्युत्कण्ठ इति । पञ्चविधः क्लेशस्त्वय्युपलभ्यते । आदावुत्कण्ठातिशयस्त्वयि मानसः शब्दबलहृदय इति शब्दबलं लौकिककर्मणि वाच्यत्वेनोपस्थिते हृदयं यस्येति । अत एव समागतमपि गर्जनं न्यवारयदिति । अतोऽस्मद्विधः धूसरो गतिहीनो विच्छायश्च जातः । उपर्यासीनं दृष्ट्वा वदन्ति, एतस्य सर्वस्यापि नियामकं दुःखमाहुः-बाष्पधारा विसृजसीति । पुनः पुनः विरम्य वर्षणं जायत इति स्मृत्वा स्मृत्वोक्तं पुनः पुनः स्मरणं चातिदुःखदम् । नन्वस्माभिः कोऽपराधः कृतः येनास्माकं दुःखं भवेदित्याशङ्क्याहुः-दुःखदस्तत्प्रसङ्ग इति । तस्य प्रसङ्गमात्रमेव दुःखहेतुः । प्रकृष्टः सङ्गः सुतरामेव अन्यथाऽस्माभिर्वा कोऽपराधः कृतः । जगति च कोऽप्येतादृशो न दृश्यते यो भगवत्सम्बन्धं प्राप्य क्षणं वा स्वस्थो भवति । इदं च दूषणं प्रसङ्गानन्तरमिती अननुभूतो न जानातीति न बाधकत्वम् ॥२०॥ सात्त्विकसात्त्विक्यो निरूपयन्ति, प्रियरावपदानि भाषसे इति । ताः कोकिलशब्दं श्रुत्वा भगवानस्मानाकारयतीति क्षणं परमानन्दमनुभूय एतादृशं सुखमस्मभ्यं कोकिलवाक्याज्जातमिति तं स्तुवन्ति-प्रियस्य राव इव रावोऽ(य)स्य हे प्रियरावेति । भगवत्सम्बन्धोऽस्मिन् वर्तत इति त्वया सह आलापेऽपि न किञ्चित् दूषणमस्ति । ननु कथमेतदवगतं भगवद्वाक्यमेतन्न भवति किन्तु कोकिलवाक्यमिति तत्राहुः-पदानि भाषस इति । तदुच्चारिते वाक्यार्थो नावगम्य इति न तदुच्चरितस्य वाक्यत्वं किन्तु भगवदुक्तपदानि सादृश्यात्पदत्वं तर्ह्येतादृशवाण्याः क्वोपयोग इति चेत्तत्राहुः-मृतसञ्जीविकयाऽनया गिरेति । पूर्वं भगवद्विरहेण मृतप्राया जाताः यदि क्षणमयं शब्दो न श्रुतः स्यात् तदा मृता एव भवाम इति इयं वाणी मृतसञ्जीविका । अनया कृत्वा उपलक्षिताय किं प्रियं करवाम प्रत्युपकारेणापि तस्याहेतुत्वाद्वा तृतीया । तत्रैका विशेषतो वदति-मे वदेति । मम स्थाने एकान्ते कथय क्षीरोदनं दास्यामीति भावः । परं त्वया एतादृशः शब्दः पुनः पुनर्वाच्य इति अभिप्रायेणाहुः-वल्गितकण्ठेति । वल्गितः कण्ठो यस्य शब्दोच्चारणार्थं प्रयत्नं करोषि परं न वदसीति कथनबोधनार्थं सम्बोधनं कोकिलेति सम्बोधनम् ॥२१॥ तस्य शब्दप्राधान्यत्वाय सात्त्विकराजस्याह-न चलसि न वदसीति । अयमपि पर्वतः भगवच्चरणारविन्दधारणाद्भक्तो भवतीति निर्णीयते । तादृशोऽपि यन्नामोच्चारणं न करोति अतस्तत्र कारणं पृच्छति-भ्रान्तत्वं निवारयन्त्येव । हे उदारबुद्धे ! इति उदारा बुद्धिर्यस्येति तस्य बुद्धिरेवं विचारयति । किं नामोच्चारणेन आश्रयमात्रेणैव कृतार्थता भविष्यति तथोपायः कर्तव्यः येन विश्वमेव कृतार्थं भवतीति विचारयति । अतः सर्व एव पुरुषार्थयुक्ता भवन्त्विति बुद्धिरुदारा भवति । अत एव महान्तमर्थं चिन्तयसे । अतो मनो निश्चलमिति कायोऽपि वागपि निश्चला । तदाह-न चलसि न वदसीति । अस्य सौबुद्ध्ये उपपत्तिरस्तीत्याहुः-अपिबतेति वसुदेवनन्दनस्यैव अङ्घ्रिरेतादृशो भवति तमेकोऽपि चिन्तयन् विश्वं मोचयितुं शक्नोति । अतोऽङ्घ्रिचिन्तनमेव प्रायेण तवाभिलषितम् । नन्वेतत्कथं ज्ञायते । न हि साधारणोऽपि इममर्थं जानातीति चेत्तत्राहुः-वयमिव कामयस इति । अस्मांकमप्येषैव कामना । स्तनोपरि भगवच्चरणः स्थायनीय इति । इदं तु शयाने भगवति अस्माकं पादसंवाहेन सिद्ध्यति । भवतु त्वदुपरि भ्रमेण स्तनाः प्रत्यन्तभागाः पर्वतस्य विशेषेण साधारणसम्बन्धादौ तस्य च सात्त्विकभावोद्रेकेण प्रस्तरादिषु चरणाकृतिधारणे यथा गयायाम् एतावान् विशेष इत्यर्थः ॥२२॥

श्रीसुबोधिनीसारः

हे मलयानिल ! ते तव किमप्रियमस्माभिः आचरितं कृतं यतः गोविन्दस्यापाङ्गेन कटाक्षेण निर्भिन्ने विद्धे हृदि चित्ते नोऽस्माकं स्मरं कामं त्वमीरयसि उद्दीपयसि ॥१९॥ हे मेघ ! श्रीमन् ! यादवेन्द्रस्य श्रीकृष्णस्य त्वं दयितः प्रियोऽसि

श्रीसुबोधिनीसारः

आतपादौछत्रकरणात् । वयमिव प्रेमबद्धो भवान् श्रीवत्सांकं ध्यायति श्रीकृष्णं चिन्तयति । अत्युत्कण्ठा स्य सबलं प्रेमक्लिन्नं हृदयं यस्य सोऽस्मद्विधः अस्माकं तुल्यो भवान् स्मृत्वा स्मृत्वा बाष्पमिव धारा जलबिन्दून् सृजति त्यजति अहो किमर्थं तत्सख्यं कृतमित्याह । तत्प्रसङ्गो दुःखदोऽस्ति ॥२०॥ वल्गितं रमणीयः कण्ठो यस्य तत्सम्बुद्धौ हे कोकिल ! हे प्रियराव मिष्टभाषिणः श्रीकृष्णस्यैव पदानि शब्दान् त्वं वदसि मृतान् सञ्जीवयतीति तयाऽनया गिराऽमृतसञ्जीविकया वा अद्य इदानीं ते तव किं प्रियं करवाणि मे मह्यं त्वं वद ॥२१॥ हे उदारबुद्धे ! हे क्षितिधर ! त्वं न चलसि एकत्र तिष्ठसि न वदसि चातो महान्तमर्थं चिन्तयसे ध्यायसे वयमिव वसुदेवस्य नन्दनः श्रीकृष्णस्तस्याङ्घ्रि चरणं स्तनैः स्तनतुल्यैः शृङ्गैर्विधर्तुं वोढुम् इच्छसि अपि किं बत हर्षे ॥२२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे मलयानिल ! अस्माभिस्ते तव किं वा अप्रियमनिष्टमाचरितम्, यतस्त्वं गोविन्दस्यापाङ्गैर्नितरां भिन्नो नोऽस्माकं हृदि हृदये काममीरयसि प्रेरयसि । वद प्रियाचरणं विना स्मरोदीरणेनास्मव्द्यथाजननं तवानुचितमित्यर्थः ॥१९॥ हे मेघ आतपहरण ! श्यामत्वादिसाम्यात्त्वं नूनं यादवेन्द्रस्य कृष्णस्य दयितः प्रियोऽसि । अत एव वयमिव तद्विषयकेण प्रेम्णा बद्धो निश्चलः सन् भवांस्तमेव श्रीवत्सांकं ध्यायति । ध्याने लिङ्गमाहुः-अस्मद्विधो वयमिव अत्युत्कण्ठः तद्दर्शनाद्युत्साहयुक्तः । तत्र हेतुः-शबलहृदयः प्रेम्णार्द्रीकृतचित्तस्तं स्मृत्वा स्मृत्वा मुहुर्बाष्पाणामश्रूणां धारा विसृजसि विमुञ्चसि । युक्तं चैतत् यतस्तस्य प्रकृष्टः सङ्गः विरक्तानां सुखदोऽपि संसारिणां दुःखद इति ॥२०॥ हे कोकिल ! हे वल्गितकण्ठ हे रमणीयकण्ठ ! प्रियरावस्य प्रियंवदस्य श्रीकृष्णस्य पदानीव पदानि शब्दान् त्वं भाषसे अतो मृतान् सञ्जीवयतीति तथाभूतयाऽनया मधुरया गिरा त्वं मे वद, अद्य ते तव किं प्रियं करवाणीति ॥२१॥ हे क्षितिधर हे पर्वत ! हे उदारबुद्धे महाबुद्धे ! त्वं न चलसि न च किञ्चिद्वदसि अतो नूनं महान्तं कञ्चिदर्थं चिन्तयसे । बत तर्हि अपि किं वयं यथा वसुदेवनन्दनस्याङ्घ्रिं स्तनैर्विधर्तुं कामयामहे तथा त्वमपि स्तनतुल्यैः शृङ्गैर्वोढुं कामयसे ? । एवं चेत्तर्हि तवाप्यस्मदवस्था भविष्यतीति भावः ॥२२॥

अन्वितार्थप्रकाशिका

किमिति ॥ हे मलयानिल ! अस्माभिस्ते तव किंवा अप्रियमनिष्टमाचरितं यतस्त्वं गोविन्दस्यापाङ्गैर्नितरां भिन्ने नोऽस्माकं हृदि हृदये काममीरयसि प्रेरयसि । अतः अप्रियाचरणं विना स्मरोदीरणेनास्मद्व्यथाजननं तवानुचितमित्यर्थः ॥१९॥ मेघेति ॥ हे मेघ ! आतपहरणश्यामत्वादिसाम्यात् त्वं नूनं यादवेन्द्रस्य कृष्णस्य दयितः प्रियोऽसि । अत एव वयमिव तद्विषयकेण प्रेम्णा बद्धो निश्चलः सन् भवांस्तमेव श्रीवत्सांकं ध्यायति । ध्याने लिङ्गमाहुः । अस्मद्विधो वयमिव अत्युत्कण्ठः तद्दर्शनाद्युत्साहयुक्तः तत्र हेतुः शबलहृदयः प्रेम्णार्द्रीकृतचित्तस्तं स्मृत्वा स्मृत्वा मुहुर्बाष्पाणामश्रूणां धारा विसृजसि विमुञ्चसि । अहो किमिति तेन यतस्तस्य प्रकृष्टः सङ्गः दुःखद इति ॥२०॥ प्रियेति ॥ हे कोकिलवल्गितकण्ठ ! वल्गुः कृतः कण्ठो येन तत्सम्बुद्धिः । वल्गुशब्दात्तत्करोतीति णिजन्तात् क्तः । प्रियरावस्य प्रियंवदस्य श्रीकृष्णस्य पदानीव पदानि शब्दान् त्वं भाषसे । यद्वा । हे प्रियराव कोकिल ! अनया गिरा पदानि अस्मद्विरहदुःखत्राणान्येव भाषसे । "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु ।" इत्यमरः । अतो मृतान् सञ्जीवयतीति तथाभूतयाऽनया मधुरया गिरा त्वं मे वद । अद्य ते तव किं प्रियं करवाणीति । अत्र विरहे कोकिलशब्दस्य दुःखदत्वात् प्रियरावेत्याद्याः सर्वा एव विपरीतलक्षणया वक्रोक्तय एव । तेन शब्देन मां दुःखयतस्तव तुण्डमेव एक्ष्यामीति ॥२१॥ नेति ॥ हे क्षितिधर ! हे पर्वत ! हे उदारबुद्धे महाबुद्धे ! त्वं न चलसि न च किञ्चिद्वदसि । अतो नूनं महान्तं कञ्चिदर्थं चिन्तयसे । बत तर्हि अपि किं वयं तथा वसुदेवनन्दनस्याङ्घ्रिं स्तनैर्विधर्तुं कामयामहे तथा त्वमपि स्तनतुल्यैः शृङ्गैर्वोढुं कामयसे । एवं चेत्तर्हि तवाप्यस्मदवस्था भविष्यतीति भावः ॥२२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

किमिति । हे मलयानिल ! ते तवाऽप्रियं किमाचरितम् ॥१९॥ वर्षन्तं मेघं भगवद्विरहाद्रुदन्तं मत्वाऽऽहुः-मेघेति ॥ हे मेघ ! यादवेन्द्रस्य श्रीकृष्णस्य नूनं दयितः जनक्लेशहरणादिकर्मसादृश्यात् सखा त्वमसि । यतः प्रेमबद्धः ॥ भवान् श्रीवत्साकं श्रीकष्णं ध्यायति ॥ ध्यानचिह्नानि आहुः-अत्युत्कण्ठः आलिङ्गनाभिलाषुकः शबलहृदयः आर्द्रान्तःकरणः । अस्मद्विधः । त्वं बाष्पधारा विसृजसि मुञ्चसि । यतः तत्प्रसङ्गः दुःखदः । अतस्त्वया तेन सह मैत्री कुतः कृतेत्याशयः ॥२०॥ कोकिलं कूजन्तमालक्ष्याहुः-प्रियेति । हे वल्गितकण्ठ ! रमणीयरव ! हे कोकिल ! प्रियस्य श्रीकृष्णस्य रावो मधुरकोमलस्वरः तद्वत् पदानि शब्दान् मृतसञ्जीविकया मृतान् सञ्जीवयतीति तया अनया कमनीयया गिरा भाषसे वदसि । ते अद्य किं प्रियं करवाणि मे मम वद ब्रूहि ॥२१॥ पर्वतस्थितं स्वेक्षितवस्तु चिन्तयन्तं मत्वा प्राहुः-नेति ॥ हे क्षितिधर पर्वत ! त्वं न चलसि न वदसि च अतो निश्चितं महान्तं कमप्यर्थं मनोरथं चिन्तयसे । सः कः । तमेवार्थमाहुः-वयमिव त्वं वसुदेवनन्दनाङ्घ्रिं स्तनैः स्तनसदृशैः शिखरैः विधर्तुं निर्वोढुं कामयसे ॥२२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

मलयानिलप्राप्त्यैव जातस्मरोदयव्यथा मलयानिलमुपालभमाना आहुः ॥ किं वेति ॥ हे मलयानिल ! अस्माभिः ते तव किं वा अप्रियम् आचरितम् । येन गोविन्दापाङ्गनिर्भिन्ने नोऽस्माकं हृदि स्मरं कामम् ईरयसि । अप्रियाचरणं विना स्मरोदीरणेन व्यथाजननं सर्वशान्तिकरस्य मलयानिलस्य तव नोचितमित्यर्थः ॥१९॥ वर्षन्तं मेघं भगवद्विरहाद्रुदन्तं मत्वाऽऽहुः ॥ मेघेति ॥ हे श्रीमन् हे मेघ ! त्वं यादवेन्द्रस्य यदूत्तमस्य दयितः प्रियः असि नूनम् । आतपार्तिहरणसाम्यात्त्वं कृष्णस्य प्रियः सखा भवसीत्यर्थः । अतः भवान् अपि वयम् इव प्रेमबद्धः तद्विषयकप्रेम्णाऽदसितः सन् श्रीवत्साकं श्रीकृष्णं ध्यायति किम् । नन्वहं श्रीवत्साकं ध्यायामीति भवतीभिर्मत्स्थेन केन लिङ्गेन ज्ञातमित्यत्राहुः । अस्मद्विधः वयमिव दृश्यमानः अत्युत्कण्ठः, पाठान्तरेऽत्युत्कण्ठं यथा तथा, सजलहृदयः द्रवीभूतहृदयः शबलहृदय इत्यपि पाठस्तदाप्यार्द्रहृदय इत्येवार्थः । एवंविधः सन् मृत्वा स्मृत्वा तं स्मृतिपक्षमानीयानीयेत्यर्थः । बाष्पधाराः मुहुः विसृजसि मुञ्चसि । अनेन लिङ्गेनास्माभिर्ज्ञातमिति भावः । अहो अतिधीमता त्वया तेन किमिति सख्यं कृतम् । यतः तप्रसङ्गः दुःखदः अस्ति ॥२०॥ प्रयवाचा कूजन्तं कोकिलमालक्ष्याहुः ॥ प्रियरावेति ॥ हे वल्गितकण्ठ रमणीयकण्ठ हे कोकिल ! प्रियरावस्य प्रियंवदस्य श्रीकृष्णस्य पदानीव पदानि शब्दान् भाषसे त्वं वदसि । मृतान् सञ्जीवयतीति तथाविधया अनया गिरा कोमलवाण्या प्रीताभ्यः नोऽस्मभ्यं वद । वद मे इति पाठे, एकस्या वाक्यम् । अद्य ते तव किं प्रियं करवाणि ॥२१॥ निश्चलतयाऽवस्थितं पर्वतं वीक्ष्य स्वेप्सितवस्तुचिन्तनं कुर्वन्तमिव मत्वान्या आहुः ॥ न चलसीति ॥ हे क्षितिधर हे उदारबुद्धे ! त्वं न चलसि न वदसि च । अतः कश्चित् महान्तम् अर्थं चिन्तयसे अपि । किं वा यदि तथा न चेत् तर्हि वयम् इव स्तनैः वसुदेवनन्दनः श्रीकृष्णस्तस्य योऽङ्घ्रिस्तं विधर्तुं कामयामहे । तथा स्तनतुल्यैः शृङ्गैः त्वमपि तदङ्घ्रिं धर्तुं कामयसे । बत किं वा, नो चेत् कथमेवंविधोऽसीति भावः ॥२२॥

कृष्णप्रिया

भलयानिक ! हमने तेरा क्या बिगाडा है जो तुं हमारे हृदयमें काम का संचार कररहा है ? अरे तुं नहीं जानता भगवान की तिरछी चितवनसे हमारा हृदय तो पहले से ही घायल हो गया है ॥१९॥ श्रीमन् मेघ ! तुम्हारे शरीर का सौन्दर्य तो हमारे प्रियतम जैसा ही है अनस्याहितुम यदुवंश शिरोमणी भगवान के परम प्यारे हो, नभी हमारी भाती प्रेम पाशमें बंधकर उनका ध्यान कर रहे हो - देखो देखो तुम्हारा हृदय चिन्ता से भर रहा है तुम उनके लिये अत्यंत उत्कण्ठित हो रहे हो तभी तो बार बार उनको याद करके हमारी ही भांती आंसू की धारा बहा रहे हो । रायामघन ! सचमूच घनश्यामसे नाता जोडना घर बैठे पीडा भोग लेना है ॥२०॥ री कोयल तेरा गला बडी ही सुरीला है । मीठी बोली बोलने वाले हमारे प्राणप्यारे के समानी ही मधुर स्वरसे तुं बोलती है । सचमुच तेरी बोली में सुधा धोली हुई है जो प्यारे के विरह से भरे हुए प्रेमियों को मिलाने वाली है । तुं हि बता इस समय

कृष्णप्रिया

हम तेरा क्या प्रिय करें ? ।।२१।। प्रिय पर्वत ! तुम तो बडे उदार विचार के हो । तुमने ही पृथ्वी को भी धारण कर रखा है । न तुम हिलते हो न तुम डोलते हो और न कुछ कहते हो जान पडता है कि किसी बातकी चिन्ततामें मग्न हो रहे हो ठीक है ठिक है हम समझ गई तुम हमारी हि भांती चाहते हो कि अपने स्तनों के समान बहुत से शिखरों पर मैं भी भगवान श्याम शंकर के चरण धारण करुं ।।२२।।

शुष्यद्ध्रदाः करशिता[1] बत सिन्धुपत्न्यः सम्प्रत्यपास्तकमलश्रिय इष्टभर्तुः ।
यद्वद्वयं [2]यदुपतेः प्रणयावलोकमप्राप्य मुष्टहृदयाः पुरुकर्शिताः स्म ।।२३।।
हंस स्वागतमास्यतां पिब पयो ब्रूह्यंग शौरेः कथां
दूत त्वां नु विदाम कच्चिदजितः स्वस्त्यास्त उक्तं पुरा ।
किं वा नश्चलसौहृदः स्मरति तं कस्माद्भजामो वयं
क्षौद्रालापय कामदं श्रियमृते सेवैकनिष्ठा स्त्रियः[3] ।।२४।।
इतीदृशेन भावेन कृष्णे योगेश्वरेश्वरे । क्रियमाणेन माधव्यो लेभिरे [4]परमां गतिम् ।।२५।।
श्रुतमात्रोऽपि यः [5]स्त्रीणां [6]प्रसह्याकर्षते मनः । उरुगायोरुजीवानां पश्यन्तीनां कुतः पुनः ।।२६।।

कर्दमक्षमा

सिन्धुपत्न्यः सम्प्रति शुष्यद्ध्रदाः अपास्तकमलश्रियः बत करशिताः यद्वत् वयम् इष्टभर्तुः यदुपतेः प्रणयावलोकमप्राप्य मुष्टहृदयाः पुरुकर्शिताः स्म ।।२३।। अङ्ग हंस स्वागतम् आस्यताम् पयः पिब त्वाम् नु दूतम् विदाम शौरेः कथाम् ब्रूहि कच्चित् अजितः स्वस्ति आस्ते पुरा उक्तम् चलसौहृदः किम् नः स्मरति वा वयम् तम् कस्मात् भजामः क्षौद्र कामदम् आलापय श्रियम् ऋते स्त्रियः सेवैकनिष्ठा ।।२४।। इति योगेश्वरेश्वरे कृष्णे ईदृशेन भावेन क्रियमाणेन माधव्यः परमाम् गतिम् लेभिरे ।।२५।। यः श्रुतमात्रः अपि स्त्रीणाम् मनः प्रसह्य आकर्षते पुनः उरुगायोरुजीवानाम् पश्यन्तीनाम् कुतः ।।२६।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

भोः सिन्धुपत्न्यो नद्यः सम्प्रति ग्रीष्मे सिन्धुर्मेघद्वारा अमृतवृष्ट्या युष्मान्नानन्दयति बत अहो कष्टम् अतः शुष्यन्तो ह्रदा यासां ताः अपगतकमलशोभाः कृशाश्च वयं यथा प्रियतमस्य भर्तुर्मधुपतेः स्म प्रसिद्धम् ।।२३।। तदैव दैवादागतं हंसं दूतं कल्पयित्वाऽऽहुः-हंसेति । नोऽस्मान् प्रति पुरा रहस्युक्तं किम्वा चलसौहृदः स्मरति स्मृत्वैव मां प्रस्थापितवानिति चेदत आहुः हे क्षौद्र क्षुद्रस्य दूत कस्मात्तं वयं भजामः कामार्थमाह्वयति युष्मानिति चेदत आहुः अहो तर्हि तमालापयाऽकारय ओमिति गच्छन्तमिव तं पुनराहुः याऽस्मान्वञ्चयित्वा एकाकिनी सेवते तां श्रियमृते तमेवाऽलापय सा तदेकनिष्ठा कथं परिहर्तुं शक्यत इति चेदत आहुः स्त्रियाम् जातावेकवचनम् । अस्मासु स्त्रीषु मध्ये किं सेवैकनिष्ठा न तु वयमित्यर्थः । पाठान्तरे तु क्षौद्रं मधु तद्वन्मधुरालापमात्रं यस्य तमकामदमरतिप्रदं श्रियमृते वयं कस्माद्भजामः किन्त्वनादृताऽपि सती पुनः पुनः सैव भवतु यतोऽस्मादृश्यो मानिन्यः स्त्रिय एकनिष्ठा एकत्रैव स्वसम्मानसिद्धौ निष्ठा यासामिति ।।२४-२५।। तासां कृष्णे एवम्भूतो भावो नातिचित्रमित्याह- श्रुतमात्रोऽपीति । उरुभिर्गायैर्गीतैरुरुधा गीतो वा यैः कैश्चिदपि गीतैः कथाभिः कथञ्चिदपि गीतो वेत्यर्थः ।।२६-२७।।

---

[1] कर्शिता-गो. प्रे. पु. जीव. शुक. ; करशिता-श्रीधर. वंशी. विज. ; कृशतरा-वीर. । [2] मधुपतेः-श्रीधर. वंशी. विज. जीव. ; यदुपतेः-वीर. विश्व. शुक. । [3] स्त्रियाम्-श्रीधर. वंशी. वीर. विज. विश्व. शुक. । [4] वैष्णवीं-वीर. । [5] पुंसां-च. पु. टी. । [6] गीतो वा-श्रीधर. वंशी. वीर. विज. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

कृशानि तटानि कूलानि यासां ताः । क्वचित् 'करशिता' इति पाठे तु गुणादेशस्त्वार्ष एव । अत आनन्दाभावात् । शुष्यत्तोया विगतजला ह्रदा स्नानाद्यर्थं जनावतरणस्थानानि । मधुपतेर्यदुपतेः मुष्टहृदयाः हृष्टचेतसः । पुरु अधिकम् "पुरुः पुरोगे प्रचुरे स्वर्लोकनृपभेदयोः" इति हैमः ॥★॥ अथ निदाघे क्षुद्रा नदीर्दूरतो दृष्ट्वा ताश्च मूर्च्छिता मत्वा पूर्वपूर्ववदसम्बोध्य मिथ आहुः-शुष्यदिति । बत विस्मये खेदे वा । सिन्धोरपि पत्न्यः एताः सम्प्रति अपेतकमलमिवमुखश्रियो जाताः तथा शुष्यन्तो ह्रदास्तद्रूपहृदयानि यासां तथाभूताश्च जाताः । किं कृत्वा । इष्टो भर्ता च यः सिन्धुस्तस्य प्रणयावलोकं विरहात्मना निदाघेनैव विच्छेदनादप्राप्य तदहो अस्मत्सादृश्यमेता अपि गता इति म्लानमुखमाहुः, यद्वद्वयमिति । ततः पुरुकर्शिता इति पुरुशब्देनापेतमुखश्रीत्वमप्यन्तर्भावितम् ॥२३॥ स्वागतं सुष्ट्वागमनं जातम्, आस्यतामुपविश्यताम् । पयः क्षीरम् । चलसौहृदः क्षणिकमैत्रीकः । युष्माकमाज्ञा केति शेषः । यद्वा-युष्मास्वाज्ञा युष्मदाज्ञेति इहापि तस्येति, पदशेषेणैव शोभनं भातीति । अतोऽत्राहुः-तं शौरिम् । इत्यर्थ इति-वयमपि तदेकनिष्ठा एवेति । तस्येहागमनमुचितमेव भक्तवात्सल्यादिति भावः । पाठान्तरे 'क्षौद्रालापमकामदम्' इति पाठे तु क्षुद्रा मधुमक्षिकास्ताभिर्निष्पादितं क्षौद्रम् ॥★॥ प्रातरागतं हंसं दूतं मत्वाहुः-हे हंसेति । स्वागतमिति । सुष्ठु आगतं किमित्यर्थः । यद्वा, सदवसरे यत् स्वयमागतं तच्छोभनमित्यर्थः । ततश्चास्यतामुपविश्यतां पयः क्षीरं पिब एवमातिथ्येन सम्भाव्य प्रार्थयन्ते-ब्रूहीति । अङ्गेति सादरसम्बोधने । किं वास्माकमङ्गतुल्य ! हे परमात्मीयेत्यर्थः । शौरेः शूरस्य वंशे केनापि सर्वेषां भाग्येन जातस्यास्मद्भर्तुः कथां समुदाचारं ब्रूहि । तच्च युक्तमेवेत्याहुः-नु निश्चितं त्वा त्वां दूतं विदाम विद्म इति । तत्रादौ कुशलं पृच्छन्ति कच्चिदिति । स्वस्ति सुखम् अजितः प्रेम्णा न केनचिदपि वशीकृत इत्यर्थः । इत्यन्तरीर्ष्याभिव्यक्तिः । ननु देव्यो भवतीनां विरहेणासौ कथं सुखमास्तामिति चेत् तर्हि पुरा पूर्वमनुनयादिसमये नः प्रत्युक्तं किंवा स्मरति किम्वेत्येकपदमेव वा । सभ्रूभङ्गप्रश्ने किं न्वित्यादिवत् । यद्वा पुरोक्तं नोऽस्मान् वा किं स्मरति । ननु तदेकसेवापरा युष्मान् कृतज्ञोऽसौ स्मरत्येवेति चेत्तत्र न विश्वसिम इत्याहुः-चलसौहृदः अस्थिरप्रेमेति । ननु तत्तत्प्रियतमाः स्थिरसौहृदोऽसौ युष्मान् किल कामयते । तत्र समानमाहुः-तमिति । ननु तद्विरहार्तः कामदोऽसौ भजनीय एवेति चेत्तर्हि तमत्रैवालापय । अत्र तद्धितान्तत्वेनान्यथा प्राप्तत्वान्न साक्षाच्छ्वशुरपितुर्नामग्रहणं शङ्क्यम् अन्यत्तु तत्रैकनिष्ठेति एकस्मिन्नेव निष्ठा दृढस्थिरता यस्याः सेति काकूक्तिः युष्मदाज्ञेति अत्र यथा युष्माकमाज्ञा स्यादित्यर्थः । यद्वा युष्मानिति लेख्ये लेखकभ्रम इति ॥★॥ विश्वनाथस्तु — हंसेति । ननु भवतीर्विना स कथं स्वस्त्यास्तामिति चेत् उक्तं पुरेति । 'न त्वादृशीं प्रणयिनीं गृहिणीं गृहेषु पश्यामी'त्यादि स्वप्रेमवाक्यं स्मरति किम् । किं वा चलसौहृदः सन् स्मरति । ननु स्मृत्वैव मां प्रस्थापितवानतस्तदन्तिकं चलत । तं भजतेति तत्राहुः-कस्मादिति । स चेदस्मान् न भजेत नाप्यवगच्छति तर्हि वयं कस्माद्व्रजामः कस्माद्वा यामः । भोः करुणासिन्धवस्तर्हि कामपीडितस्य तस्य कथं निस्तारस्तत्राहुः-हे क्षौद्र ! क्षुद्रस्य दूत ! आलापय अत्रैव तं कामदं कामपीडितमपि दर्शनमात्रेणैव कामपीडाप्रदम् आकारय । स अस्मान् आयातु न तु गर्ववत्यो वयं तं याम इति भावः । ओमिति गच्छन्तं तं मत्वा पुनराहुः-याह्यस्मान् वञ्चयित्वा एकाकिनी रमते तां श्रियमृते तमेवकेवलमाकारय । ननु सा तदेकनिष्ठा कथं परिहर्तुं शक्या स्यादत आहुः-स्त्रियामिति जातावेकवचनम् । स्त्रीष्वस्मासु मध्ये सैवैकनिष्ठा न तु वयमित्यर्थः । अन्यत्तैः ॥२४॥ इति इत्थम् । भावेन प्रेम्णा । माधव्यो माधवभार्याः । अतीवप्रेमवशविवशानां क्षणिकवियोगेऽपि चित्तविभ्रमो भवत्येवेति भावः ॥★॥ इत्थं भणितम् । ततादृशप्रेमवतीनां तासां माहात्म्यमाह-इतीति । अनेनोक्तरीतिकेन ईदृशेन चान्येनान्येन कृष्णे स्वयं भगवति अत एव योगेश्वरे परमदुर्लभे इत्यर्थः । क्रियमाणेन सदा विधीयमानेनेति तस्मिस्तासामतृप्तिर्भावानिवृत्तिश्च सूचिता । मधव्यः मधुवंशोद्भवस्य तस्य पत्न्यः विष्णुः स्वयं भगवत्त्वात्सर्वव्यापकः श्रीकृष्ण एव तदीयां गतिं दशां लेभिरे यादृश एवासौ स्यात्ता अपि तादृश्य एव भवेयुरित्यर्थः । यद्वा स यथा सर्वव्यापकस्तथा ता अपि तस्य व्यापिका जाता इत्यर्थः । परममिति पाठे त्वप्रकटरूपामलौकिकीमित्यर्थः । शानचः प्रयोगेण व्यवधानावगत्या कासांचिदर्जुनपराजयानन्तरं गत्यन्तरं तु मायिकमात्रमित्यभ्युपगतम् । तच्च युक्तं विवाहप्रसङ्गे तासां तत्स्वरूपशक्तित्वेन दर्शितत्वात् ॥★॥ विश्वनाथस्तु — तासामेतादृशश्रीकृष्णविषयकभाववतीनां किं प्राप्यं वस्त्वित्यपेक्षायामाहुः-इतीति । वैष्णवीं वैष्णवप्राप्यां प्रेमभक्तिमेव तासामप्राकृतीनां भगवन्नित्यप्रेयसीनां सच्चिदानन्दवपुषां ब्रह्मरसास्वादाधिकभगवन्माधुर्यास्वादवतीनां पुनर्मोक्षादिफलप्राप्त्यभावसम्भवात् प्रेमाधिक्यमेवेत्यर्थः । यद्वा वैष्णवीं विष्णोस्तस्यैव कृष्णस्य भावोन्मादप्रौढिम्ना तादात्म्यमयीं

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

रासान्तर्धाने व्रजसुन्दर्यो नानाप्रश्नाद्यनन्तरमुन्मादस्य प्रौढिम्ना यथा कृष्णोऽहं पश्यत गतिमिति कृष्णतादात्म्यमयीं लेभिरे तथैवैता अपि कुरर्य्यादिप्रश्नानन्तरं तामेवेत्यर्थः। प्रेमवैचित्र्यादिकृष्णतादात्म्यादिदशा अनुरागविलासा एव यदुमहिषीणामनुरागपर्यन्ता दशा श्रीमदुज्ज्वलनीलमणौ व्याख्याता एव ॥२५॥ एवम्भूतश्चित्तविभ्रमकरः। भावः प्रेमा। उरुभिरनन्तैः। उरुधाऽनेकधा। इत्यर्थ इति-येन केनचित् संस्कृतेन प्राकृतेन वा गीतेन गीतोऽपि श्रीकृष्णश्चेच्चेतआकर्षणं करोति, तदा किमु वक्तव्यं पश्यतां चेतआकर्षणं वृत्तमिति कैमुत्यमुक्तम् ॥★॥ तत्र तस्यापि माहात्म्यमाह-श्रुतमात्रोऽपि यः स्त्रीणां मना आकर्षति उरुभिर्गायैर्गीतैः प्रबन्धैरुरु यथा स्यात्तथा गीतस्तद्विषयीकृतो वा किं पुनः तत्रापि साक्षात्पश्यन्तीनां तु किम्पुनर्वक्तव्यमित्यर्थः। 'कुतः पुनः' इति पाठेऽपि स एवार्थः। अतस्तत्पत्नीनां स्वाभाविकमहाप्रेमवतीनां सदा तेन सह विहरन्तीनां तासां तादृश एव भावो युक्तः क्वचिदन्यथा श्रवणं तु मुनीनामपि मोहश्रवणादेव 'इत्यङ्गोपदिशन्त्येके' इत्यादेः ॥२६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अथ निदाघे क्षुद्रा नदीर्दूरतो दृष्ट्वा ताश्च मूर्च्छिता मत्वा पूर्वपूर्ववदसम्बोध्य मिथ आहुः-शुष्यदिति। बत विस्मये खेदे वा। सिन्धोरपि पत्न्यः एताः सम्प्रति अपेतकमलमिवमुखश्रियो जाताः तथा शुष्यन्तो ह्रदास्तद्रूपहृदयानि यासां तथाभूताश्च जाताः। किं कृत्वा। इष्टो भर्ता च यः सिन्धुस्तस्य प्रणयावलोकं विरहात्मना निदाघेनैव विच्छेदनादप्राप्य तदहो अस्मत्सादृश्यमेता अपि गता इति म्लानमुखमाहुः, यद्वद्वयमिति। ततः पुरुकर्शिता इति पुरुशब्देनापेतमुखश्रीत्वमप्यन्तर्भावितम् ॥२३॥ प्रातरागतं हंसं दूतं मत्वाहुः-हे हंसेति। स्वागतमिति। सुष्ठु आगतं किमित्यर्थः। यद्वा, सदवसरे यत् स्वयमागतं तच्छोभनमित्यर्थः। ततश्चास्यतामुपविश्यतां पयः क्षीरं पिब एवमातिथ्येन सम्भाव्य प्रार्थयन्ते-ब्रूहीति। अङ्गेति सादरसम्बोधने। किं वास्माकमङ्गतुल्य ! हे परमात्मीयेत्यर्थः। शौरेः शूरस्य वंशे केनापि सर्वेषां भाग्येन जातस्यास्मद्भर्तुः कथां समुदाचारं ब्रूहि। तच्च युक्तमेवेत्याहुः-नु निश्चितं त्वा त्वां दूतं विदाम विद्म इति। तत्रादौ कुशलं पृच्छन्ति कच्चिदिति। स्वस्ति सुखम अजितः प्रेम्णा न केनचिदपि वशीकृत इत्यर्थः। इत्यन्तरीर्ष्याभिव्यक्तिः। ननु देव्यो भवतीनां विरहेणासौ कथं सुखमास्तामिति चेत् तर्हि पुरा पूर्वमनुनयादिसमये नः प्रत्युक्तं किंवा स्मरति किम्वेत्येकपदमेव वा। सभ्रूभङ्गप्रश्ने किं न्वित्यादिवत्। यद्वा पुरोक्तं नोऽस्मान् वा किं स्मरति। ननु तदेकसेवापरा युष्मान् कृतज्ञोऽसौ स्मरत्येवेति चेत्तत्र न विश्वसिम इत्याहुः-चलसौहृदः अस्थिरप्रेमेति। ननु तत्तत्प्रियतमाः स्थिरसौहृदोऽसौ युष्मान् किल कामयते। तत्र समानमाहुः-तमिति। ननु तद्विरहार्तः कामदोऽसौ भजनीय एवेति चेत्तर्हि तमत्रैवालापय। अत्र तद्धितान्तत्वेनान्यथा प्राप्तत्वान्न साक्षाच्छ्वशुरपितुर्नामग्रहणं शङ्क्यम् अन्यत्तु तत्रैकनिष्ठेति एकस्मिन्नेव निष्ठा दृढस्थिरता यस्याः सेति काकूक्तिः युष्मदाज्ञेति अत्र यथा युष्माकमाज्ञा स्यादित्यर्थः। यद्वा युष्मानिति लेख्ये लेखकभ्रम इति ॥२४॥ इत्थं (भणितं) फलिततादृशप्रेमवतीनां तासां माहात्म्यमाह-इतीति। अनेनोक्तरीतिकेन ईदृशेन चान्येनान्येन कृष्णे स्वयं भगवति अत एव योगेश्वरे परमदुर्लभे इत्यर्थः। क्रियमाणेन सदा विधीयमानेनेति तस्मिंस्तासामतृप्तिर्भावानिवृत्तिश्च सूचिता। मधव्यः मधुवंशोद्भवस्य तस्य पत्न्यः विष्णुः स्वयं भगवत्त्वात्सर्वव्यापकः श्रीकृष्ण एव तदीयां गतिं दशां लेभिरे यादृश एवासौ स्यात्ता अपि तादृश्य एव भवेयुरित्यर्थः। यद्वा स यथा सर्वव्यापकस्तथा ता अपि तस्य व्यापिका जाता इत्यर्थः। परममिति पाठे त्वप्रकटरूपामलौकिकीमित्यर्थः। शानचः प्रयोगेण व्यवधानावगत्या कासांचिदर्जुनपराजयानन्तरं गत्यन्तरं तु मायिकमात्रमित्यभ्युपगतम्। तच्च युक्तं विवाहप्रसङ्गे तासां तत्स्वरूपशक्तित्वेन दर्शितत्वात् ॥२५॥ तत्र तस्यापि माहात्म्यमाह-श्रुतमात्रोऽपि यः स्त्रीणां मना आकर्षति उरुभिर्गायैर्गीतैः प्रबन्धैरुरु यथा स्यात्तथा गीतस्तद्विषयीकृतो वा किं पुनः तत्रापि साक्षात्पश्यन्तीनां तु किम्पुनर्वक्तव्यमित्यर्थः। कुतः पुनरिति पाठेऽपि स एवार्थः। अतस्तत्पत्नीनां स्वाभाविकमहाप्रेमवतीनां सदा तेन सह विहरन्तीनां तासां तादृश एव भावो युक्तः क्वचिदन्यथा श्रवणं तु मुनीनामपि मोहश्रवणादेव 'इत्यङ्गोपदिशन्त्येके विस्मृत्य प्रागुदाहृतमि'ति(वदिति) भावः ॥२६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१७-५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

शुष्यद्ध्रदा इति । हे सिन्धुपत्न्यः नद्यः ! यद्यद्यथा वयं यदुपतेः प्रणयावलोकमप्राप्य तेन मुष्टान्यपहृतानि हृदयानि यासां ताश्च उरु नितरां कर्शिताः स्म तथा यूयमपि सम्प्रति ग्रीष्मे शुष्यन्तो ह्रदा यासां ताः अपगतकमलशोभाश्च इष्टस्य भर्तुः सिन्धोः प्रणयावलोकमप्राप्य कर्शिताः स्थ इत्यर्थः । बतेति खेदेऽव्ययम् ॥२३॥ हंसं प्रत्याह-हंसेति । हे हंस ! आस्यताम् उपविश्यताम् । पयः क्षीरं पिब । अङ्ग हे हंस ! शौरेः श्रीकृष्णस्य कथां वार्तां ब्रूहि । नु इति वितर्के । त्वां शौरेर्दूतं विदामः । अजितः श्रीकृष्णः स्वस्त्यास्ते कच्चित् । पुरा रहस्ययुक्तं चलसौहृदः हेतुगर्भमिदम् अतः स्मरति किम् । ननु स्मृत्वैव मां प्रस्थापितवानित्यत आह-हे क्षौद्र(स्य तस्य) क्षुद्रदूत ! कस्मात्तं वयं भजामः कामार्थमाह्वयतीत्यत्राह-अहो तर्हि तमिहालापयाकारय । ओमिति गच्छन्तं तं पुनराह-या अस्मान् वञ्चयित्वा एकाकिनी रमते तां श्रियमृते विना तमेवालापय । सा तदेकनिष्ठा कथं परिहर्तुं शक्येत्यत्राह-स्त्रियामिति । जातावेकवचनम् अस्मासु स्त्रीषु मध्ये किं सेवैकनिष्ठा न तु वयमित्यर्थः ॥२४॥ इतीति । माधव्यो माधवस्य[कृष्णस्य]स्त्रियः योगेश्वरेश्वरे कृष्णे क्रियमाणेनेत्थम्भूतेन भावेन वैष्णवीं गतिं मुक्तिं लेभिरे ॥२५॥ कृष्णे तासामित्थम्भूतो भावो तानि चित्रमित्याह-श्रुतमात्रोऽपीति । उरुभिर्बहुभिर्गायैर्गीतैरुरु बहुधा गीतो वा उरुगाय इति पृथक् पदं वा सन्धिस्त्वार्षः । किं बहुना यथा कथञ्चिच्छ्रुतमात्रोऽपि वा स्त्रीणां मनः प्रसह्य बलादाकर्षते किं पुनः साक्षात्पश्यन्तीनां स्त्रीणां मन आकर्षति इति ॥२६॥

श्रीमद्विजयध्वजकृता पदरत्नावली ॥११-२७॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

इतीदृशेन वैष्णवीं सर्वत्र परिपूर्णस्य श्रीकृष्णस्य गतिं लेभिरे । तत्र क्रियमाणैरिति वर्तमानप्रयोगेण व्यवधानं च निरस्तम् । अतः कासांचिदर्जुनपराजयानन्तरगत्यन्तरं मायिकमेवेत्यभ्युपगतम् ॥२५-४२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

ननु भो नद्यः ! क्षितिधरो ग्रावमयोऽपि पुरुषः सन्नपि यदङ्घ्रिं स्तनैर्वोढुं कामयते स्त्रीभावमुररीकृत्य वक्षसि कर्तुमभिलषसि तदनु चिन्तया स्त्रियो भवत्यो यदीदृशां दुर्दशां यास्यन्ति तत् किं चित्रमित्यत्राहुः-शुष्यद्ध्रदा इत्यादिः । यतः भो सिन्धुपन्त्यः ! महाजनगृहिण्यः इष्टभर्तुः श्रीकृष्णस्य सिन्धुस्तावदुपपतिमात्रम् इष्टभर्ता तु वो नूनं श्रीकृष्ण एव । अतस्तस्य मधुपतेः प्रणयावलोकम् अप्राप्य मुष्टहृदयाः पुरुकर्शिताः खिन्ना अत्यन्तकृशा भवत्यस्सन्ति । यत् शुष्यद्ध्रदा शुष्यन् ह्रद इव ह्रदो गम्भीरतरं हृदयं यासाम् अत एव कर्शिताः खिन्नाः खेदलिङ्गमाह-सम्प्रति इदानीम् अपेताः कमलानां कमलप्रायाणां मुखानां श्रियो यासाम् । का इवेत्याह यद्वद्वयं स्मः वयं यथा शुष्यन्मनसो म्लानाननाः खिन्ना पुरु कृशाश्चेत्यर्थः ॥२३॥ अत्रैव काचित् पुरतः समागच्छन्तं हंसमालोक्याह-हंसेत्यादि । हे हंस ! स्वागतं सुखेनागतम् आस्यताम् । एहि एहि पयः क्षीरं पिब । ननु कथमकाण्डे मयि तवायमादर इत्याह-ब्रूहि इति । हे अङ्ग ! शौरेः कथां ब्रूहि । तत्कथामहं न जानामि । कथं ब्रूयामित्याह-दूतमित्यादि । नु भो त्वां दूतं विदाम सत्यं दूत एवास्मि कं वक्तव्यं ब्रूहीत्याह-कच्चिदित्यादि । अजितः कच्चित् स्वस्ति आस्ते । आस्त इति । यद्यपि पुरा आस्ते इति पूर्वोक्तम्, तथापि भूयो वदेति भावः । किंवा नोऽस्मान् स्मरति, तत्र कः सन्देहः इत्याह-चलसौहृदः अस्थिरप्रेमाननुस्मरत्येव तस्माद्यूयं तं भजतेत्याह-कस्मात्तं भजामो वयम् । ननु कस्तस्यापराध इत्याह-क्षौरालापं क्षौद्रं मधु तद्वत् आलाप एव यस्य न तु मधुराशयं तत्रापि अकामदम् अनभिलषितप्रदम् । ननु श्रीर्यं नित्यमनुभजते तं प्रति कथमेवं परुषभाषिण्यो भवत्य इत्याह-श्रियमृते श्रियं विना तद्वार्ता दूरेत्यतामित्यर्थः । श्रीस्तावत् तस्य दोषं न पश्यसि स्वकार्यमात्रसाधिका सैव स्त्रियस्तावदस्मादृश्य एकनिष्ठाः एकस्मिन् प्रेमण्येव निष्ठा याासं अतः क्षीणप्रेमाणं कथं केन प्रकारेण भजाम इत्यसूया व्यभिचारी भावः ॥२४॥ उपसंहरतीत्यादि। एवं प्रकारेण भावेन वैचित्र्याख्येन भावेन । कीदृशेन । कृष्णे क्रियमाणेन । कृष्णे कीदृशे । योगेश्वराणामपीश्वरे माधव्यो महिष्यः

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

वैष्णवीं गतिं लेभिरे वैष्णवीयां गतिं रुक्मिणीसादृश्यं रुक्मिणी यथा नित्यप्रिया तथैवाभवन्नित्यर्थः । विष्णुः श्रीकृष्णः तत्स्वरूपा वैष्णवी तस्येयमिति वा वैष्णवीह रुक्मिणी वैष्णवीयामित्यर्थे वैष्णवीति छान्दसम् । अथवा विष्णुः श्रीकृष्णः वैष्णवीं विष्णुदेवताकां गतिं प्रेम ॥२५॥ ननु तासां यदीदृक् दशा भविष्यति तत् किमित्याह–श्रुतमात्रोऽपीत्यादि । यः श्रीकृष्णः श्रुतमात्रोऽपि स्त्रीणां मनः प्रसह्य आकर्षते स एव पश्यन्तीनां यदाकर्षिष्यति तत् किम् । तत्रापियाभिः सह सततं विहरति तासां तु यदेवं भविष्यति तत् किं वक्तव्यमिति शेषः । कीदृशः । उरुगायैः पुण्यश्लोकैः उरु यथा स्यात्तथा गीतो । वा इत्याश्चर्ये ॥२६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

काश्चित् सम्मुखे दैवादागतं हंसमालोक्य दूतत्वेन परिभाव्य वदन्ति–हंसेत्यादि । हे हंस ! स्वागतमास्यताम्, गमनागमनाभ्यां श्रान्तोऽसि, पयः पिब, पीत्वा विश्रम्य शौरेः कथां ब्रूहि, त्वां दूतमनुविदाम । कच्चिदजितः स्वस्त्यास्ते, उक्तं पुरा यद्यपि स्वस्त्यास्ते इति, पूर्वोक्तम्, तथाप्युत्कण्ठया पृच्छाम इति भावः । किंवा नोऽस्मान् स्मरति, तत्र कः सन्देहः ? तत्राहुः–चलसौहृद इति स्मरणाद्भावव्यञ्जकं तं चलसौहृदं वयं भजामः । कस्मादिति स्वयमेव हेतुमुपन्यस्य स्त्रियोऽनभिज्ञाश्चेदिति सिद्धान्तयन्ति–श्रीरपि, श्रीः सा कथं भजति ? तत्राहुः–श्रियमृते श्रियं विना श्रियो वार्ता त्यज्यताम्, सा तु केवलमेकनिष्ठा एकस्मिन् वक्षसि स्थाने निष्ठा नितरामवस्थानं यस्या, अतः सा स्त्री न भवति, अङ्गविशेष एव सेति तात्पर्यम् । क्षौद्रं मधु तदिवालाप एव यस्य अकामदमनभीप्सितदं क्षौद्रालापयेति पाठे स्वामिकृतो वाऽर्थः । उन्मादभावोऽयं वैचित्र्यभावान्तर्गतः ॥२४॥ इतीदृशेनेत्यादि । ईदृशेन एवम्विधेन भावेन माधवे क्रियमाणेन वैष्णवीं गतिं भागवतीं भक्तिं लेभिरे । (भा०३/२५/२३) —

"अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी" इति ॥

यस्या लक्षणम् तेनासां परमभागवतत्वमायातम्, तेन सत्स्वपि बहुषु उपासनाशरीरेषु प्रेममात्रैकनिष्ठायामुपासनायां पतिभावेन भजनक्षमं शरीरमेव स्वरूपयोग्यम्, तत्तु श्रीकृष्णोपासनायामेव तस्य परमानन्दमूर्तित्वात्, तासां चानन्यसाधारणानुरागवत्त्वात्, सर्वेन्द्रियप्रवृत्त्या तत्र प्रवेशात् ॥२५॥ एवं स्त्रीणामेव तत्करणक-सुखाकर्षणवत्तां दर्शयन्नाह–श्रुतमात्रोऽपीत्यादि । श्रवणमनन-निदिध्यासनैर्हि भगवति मनोलयो भवति, आसां तु श्रवणमात्रेणैव कथमेतत्तत्राह-यः स्वयमेव श्रीकृष्णः प्रसह्य बलाद्बलात्कारेण तासां मन आकर्षयति श्रवणमननादिवतां तु मनो मदीयमानसमपि कदाचिद्वशीकरोति न वा, पश्यन्तीनां तु यन्मन आकृष्यते, तत् पुनः किम् ? ॥२६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

भोः सिन्धुपत्न्यो नद्यः सम्प्रति यूयं शुष्यद्ध्रदाः स्थ । तत्र कारणमाहुः–इष्टभर्तुः सिन्धुपत्नीनामपि योऽभीष्टसुखप्रदो भर्ता यदुपतिस्तस्य प्रणयावलोकमप्राप्यैव यद्वद्वयं प्रणयावलोकमप्राप्य मुष्टहृदयाः वञ्चितचित्ताः स्म तद्वदेव यूयम् ॥२३॥ कमपि हंसं दूतं प्रकल्प्याहुः हंसेति । ननु भवतीर्विना स कथं स्वस्त्यास्तामिति चेत् उक्तं पुरेति । न त्वादृशीं प्रणयिनीं गृहिणीं गृहेषु पश्यामीत्यादि स्वप्रेमवाक्यं स्मरति किम् । किं वा चलसौहृदः सन् स्मरति । ननु स्मृत्वैव मां प्रस्थापितवानतस्तदन्तिकं चलत । तं भजतेति तत्राहुः–कस्मादिति । स चेदस्मान् न भजेत नाप्यवगच्छति तर्हि वयं कस्माद्व्रजामः कस्माद्वा यामः । भोः करुणासिन्धवस्तर्हि कामपीडितस्य तस्य कथं निस्तारस्तत्राहुः–हे क्षौद्र ! क्षुद्रस्य दूत ! आलापय अत्रैव तं कामदं कामपीडितमपि दर्शनमात्रेणैव कामपीडाप्रदम् आकारय । स अस्मान् आयातु न तु गर्ववत्यो वयं तं याम इति भावः । ओमिति गच्छन्तं तं मत्वा पुनराहुः–याह्यस्मान् वञ्चयित्वा एकाकिनी रमते तां श्रियमृते तमेवकेवलमाकारय । ननु सा तदेकनिष्ठा कथं परिहर्तुं शक्या स्यादत आहुः–स्त्रियामिति जातावेकवचनम् । स्त्रीष्वस्मासु मध्ये सा एव किमेकनिष्ठा ऐकान्तिकी न तु वयमित्यर्थः । क्षौद्रालापमकामदमिति पाठे क्षौद्रं मधु तद्वन्मधुरालापमात्रं यस्य तम् अकामदम् अरतिप्रदं तं श्रियमृते वयं कस्माद्व्रजामः । किन्त्वनादृता सती सैव पुनः पुनर्भजतु । यतोऽस्मादृश्यो मानिन्यः स्त्रियः स्त्रियां स्त्रीषु मध्ये एकनिष्ठाः एकत्रैव स्वमानसिद्धौ निष्ठा यासां ताः ॥२४॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तासामेतादृशश्रीकृष्णविषयकभाववतीनां किं प्राप्यं वस्त्वित्यपेक्षायामाहुः-इतीति। वैष्णवीं वैष्णवप्राप्यां प्रेमभक्तिमेव तासामप्राकृतीनां भगवन्नित्यप्रेयसीनां सच्चिदानन्दवपुषां ब्रह्मरसास्वादाधिकभगवन्माधुर्यास्वादवतीनां पुनर्मोक्षादिफलप्राप्त्यभावसम्भवात् प्रेमाधिक्यमेवेत्यर्थः । यद्वा वैष्णवीं विष्णोस्तस्यैव कृष्णस्य भावोन्मादप्रौढिम्ना तादात्म्यमयीं रासान्तर्धाने व्रजसुन्दर्यो नानाप्रश्नाद्यनन्तरमुन्मादस्य प्रौढिम्ना यथा कृष्णोऽहं पश्यत गतिमिति कृष्णतादात्म्यमयीं लेभिरे तथैवैता अपि कुरर्य्यादिप्रश्नानन्तरं तामेवेत्यर्थः । प्रेमवैचित्र्यादिकृष्णतादात्म्यादिदशा अनुरागविलासा एव यदुमहिषीणामनुरागपर्यन्ता दशा श्रीमदुज्ज्वलनीलमणौ व्याख्याता एव ॥२५॥ उरुभिर्गानप्रबन्धैरुरु यथा स्यात्तथा गीतः स पश्यन्तीनां तु कुत इति शब्दस्त्वर्थे ॥२६॥

गूढार्थदीपिनी

हे सिन्धुपत्न्यो नद्यः । यद्वत् यथा वयं यदुपतेः श्रीकृष्णस्य प्रेमावलोकमप्राप्य मुष्टहृदयाः हृतचेतसः अत एव पुरु अधिकं कर्शिता जाताः तथा किं यूयमपि सम्प्रति ग्रीष्मे इष्टस्य भर्तुः सिन्धोः प्रणयावलोकं मेघद्वारा वर्षाजलमप्राप्य कृशतराः (कृशतरा इत्येव प्राचीनपाठः ।) जाताः स्थ। कथम्भूताः । शुष्यन्तो ह्रदास्तटस्य भर्तुः सिन्धोः प्रणयावलोकं मेघद्वारा वर्षाजलमप्राप्य कृशतरा (कृशतरा इत्येव प्राचीनपाठः ।) जाताः स्थ । कथम्भूताः । शुष्यन्तो ह्रदाः तटानि यासां ताः । पुनश्च । अपास्ता नष्टा कमलश्रीः यासां तास्तथाभूताः ॥२३॥ तदानीमेव दैवादागतं हंसं दूतं कल्पयित्वाऽऽहुः । अङ्ग हे हंस ! ते स्वागतम् । अत्र आस्यतामुपविश्यताम्। पयः क्षीरं पिब। शौरेः श्रीकृष्णस्य कथां वार्तां ब्रूहि। नु अहो त्वां तु दूतं विद्मः। अतः अजितः श्रीकृष्णः स्वस्ति कुशलमास्ते कच्चित्। नोऽस्मान् प्रति पुरा सम्भोगादौ यदुक्तं न त्वादृशीं प्रणयिनीमित्यादि तत् किं स्मरति नैव यतश्चलसौहृदः । अतो वयमपि कस्मात् भजामः । हे क्षौद्र ! क्षुद्रस्य कृष्णस्य दूत । यदि तस्य इच्छा चेत्तर्हि तमेव कामदं रतिप्रदम् आलापय आकारय श्रियमृते न वयं यास्यामः । सा तदेकनिष्ठा कथं परिहर्तुं शक्यते चेत् तत्राहुः । स्त्रियां स्त्रीषु मध्ये सैव एकनिष्ठा न वयं किम् अतः समत्वेन व्यवहर्तव्यमिति त्वया कथनीयमिति भावः । स्त्रियामिति जातावेकवचनम्। शार्दूलविक्रीडितं छन्दः ॥२४॥ माधव्यः माधवस्य स्त्रियः इति ईदृशेन निरुपमेन। परमां गतिं सामीप्यमुक्तिम् ॥२५॥ उरुभिर्गायैः गानप्रबन्धैः उरु बहुधा गीतस्तु यः कृष्णः प्रसह्य मनः आकर्षते साक्षात्पश्यन्तीनां मनः आकर्षते इति किं पुनर्वक्तव्यमित्यर्थः ॥२६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

भोः सिन्धुपत्न्यः नद्यः ! यद्वत् यथा वयं यदुपतेः प्रणयावलोकमप्राप्य मुष्टहृदयाः मुष्टानि हृदयानि यासां ताः स्मः। प्रसिद्धं पुरुकर्शिताः तथा यूयमपि सम्प्रति ग्रीष्मे इष्टभर्तुः सिन्धोः प्रणयावलोकमप्राप्य तत्कृपादृष्टिफलं मेघद्वाराऽमृतवर्षमलब्ध्वा शुष्यन्तो ह्रदा यासां ताः अपास्ताऽपगता कमलश्रीः याभ्यस्ताः । बत अहो कष्टं, कर्शिताः स्थ ॥२३॥ हे हंस ! स्वागतं शोभनमागमनं जातम्। आस्यतामुपविश्यताम्। पयः क्षीरं पिब। हे अङ्ग ! त्वां तु शौरेः दूतं विदाम। अतः शौरेः कथां वार्तां ब्रूहि। कच्चित् अजितः स्वस्त्यास्ते। किम्वा नः अस्मान् प्रति पुरा उक्तं स्मरति। ननु तत्र कः सन्देह इत्यत्राहुः-चलसौहृद इति । नैव स्मरतीति भावः । तर्हि तं चलसौहृदं कस्माद्भजामः । नैव भजाम इत्यर्थः । एवं प्रेमसंरम्भवशादुक्त्वापि तद्विरहमसहमानाः आहुः-हे क्षौद्र क्षुद्रकर्मन् ! दूत ! अकामदं तं श्रीकृष्णं श्रियमृते आलापय । ननु सा तदेकनिष्ठा कथं निवारणीयेत्यत्राहुः-स्त्रियां जातावेकवचनम्। स्त्रीषु मध्ये सैवैकनिष्ठा अपि तु सर्वा वयं तदेकनिष्ठा इति भावः ॥२४॥ माधव्यः माधवस्त्रियः ॥२५॥ उरुभिर्गायैर्गीतैरुरुधा गीतैः उरुगायो गीतः यः श्रुतमात्रोऽपि स्त्रीणां मनः प्रसह्य बलात् आकर्षते सः पश्यन्तीनां माधवीनां मनोहरोऽभूदिति कुतः पुनर्वक्तव्यम् ॥२६-२७॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

सात्त्विकतामस्य आहुः-शुष्यद्ध्रदा इति। क्रीडापर्वतानां या नद्यः ता अन्तःपुरे स्थिताः । पूर्वम् अगाधजलाः वर्षासु ततः क्रमेण क्षीणतायां निदाघे ह्रदानामपि शोषो जातः । एतन्निरूपणं स्वस्यातिकृशत्वज्ञापनार्थम् । बतेति खेदे । कियत्कालानन्तरं

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

स्वरूपमपि गमिष्यतीति । ननु कया उपपत्त्या नद्यो गृह्यन्ते । कोऽपि धर्मो भगवदीयस्तासु नास्ति तत्राहुः-सिन्धुपत्न्य इति । सिन्धोः अम्बुराशेरपि पत्न्यो भूत्वा यथैताः परमक्षीणाः तथा वयमपि कोटिब्रह्माण्डाधिपतेरानन्दमूर्तेः पत्न्योऽपि परमखेदं प्राप्नुयाम इति निरूपयितुं तासां कथा । शरीरक्लेशेऽपि यदि चिन्ता न भवेत् तदाप्यन्ततो गत्वा मुखवैवर्ण्यं न स्यात् । तदपि नास्तीति ज्ञापयितुमाहुः-सम्प्रत्यपेतकमलश्रिय इति । एवमन्तःकरणक्लेशश्च कुतो जायत इत्याकाङ्क्षायां स्वयमेव हेतुं कल्पयन्ति । इष्टभर्तुर्यदुपतेः प्रणयावलोकमप्राप्येति इष्टाप्राप्त्या मनसि क्लेशः संवर्धकदृष्ट्यभावात् कृशत्वम् । यद्यपि नदीनां भर्ता समुद्रोऽस्ति तथापि न स इष्टः भगवांस्तु सर्वपतिरिति इष्टो भर्ता भवति । अत्र भर्तृपदं परिपालकपरम् । दृष्टान्ते व्यावृत्त्यप्रसिद्धेः यद्वद्वयं इष्टस्य भर्तुः साम्प्रतमेव प्रणयावलोको नास्तीति क्षणमात्रेणैव कर्शिताः सजातीयस्य सजातीयो भर्ता भवति महांश्चेत्तत्रापि स्नेहं कुर्यात् । एतत् ज्ञापयितुमाहुः-यदुपतेरिति । अवलोको बाह्यस्नेहः आभ्यन्तरः उभयमप्राप्येव अन्तर्बहिश्च पुरुकर्शिताः नन्वन्येन कथं पुष्टा जायन्ते यथा मिष्टान्नाभावे यादृशेनापि पुष्टो भवति लोकस्तत्राह-मुष्टहृदया इति । हृदयस्य मोषः पूर्वमेव जात इति येन साधनेन कश्चित् गृह्यते तत् भगवतैवापहृतं नातः परमन्येन पुष्टा भविष्यन्तीत्यर्थः ॥२३॥ एवं बहिर्विचारयन्त्यः काश्चिद्गुणातीताः दूरे गताः ततोऽन्तःपुर एव नद्यास्तीरे वर्तमानं हंसं दृष्ट्वाहुः हंस ! स्वागतमिति । तास्तु भगवति शुद्धाः सर्वथा दोषरहिताः स्वहितमात्रमेव भावयन्ति स्वस्य च हितं भगवत्सम्बन्धादेव । स च सम्बन्धः मानवतीनां मानापनोदव्यतिरेकेण स्वतो न भवति । ततो भगवान् मानापनोदनार्थमेनम्प्रस्थापितवान् । अयं हि हंसः सदसद्विवेकं जानाति । अतोऽस्मान् गुणातीताः भगवत्पार्श्वं नेष्यन्तीति निश्चित्य सम्बोधयन्ति हंसेति । स्वार्थमागत इति कुशलं पृच्छन्ति । शीघ्रं वयं साध्या न भविष्याम इति ज्ञापयितुम् आस्यतामित्याहुः-नन्वस्माकं पक्षिणां नित्यं क्षुधितानां तन्निवृत्त्यर्थमुपायः कर्तव्यः । अतो गन्तव्यमिति चेत्तत्राहुः-पिब पय इति । अनेनैतदपि ज्ञापयन्ति । अत्र स्थितो दुग्धमिव अस्मानेष्यति । अन्यत्र यतो जलमिव अव्यक्तमधुराः नेष्टासीति । ननु स्थित्वा किं कर्तव्यमिति चेत्तत्राहुः-ब्रूह्यङ्ग ! शौरेः कथामिति पितृनाम्ना शौर्यमुपपादयन्त्यः कथासत्त्वमाहुः-न जान इति । न वक्तव्यमित्याहुः-दूतं त्वां नु विदामेति । नु इति वितर्के । पूर्वमपि हंसा दूता भवन्ति अतस्त्वमपि हंस इति आगते प्रयोजनान्तराभावात् दूतत्वमेव निर्धार्यत इत्यर्थः । अतो दूतत्वनिर्धारार्थं कथां कथय न त्वपृष्टं नोच्यत इति चेत्तत्राहुः-कच्चिदजितः स्वस्त्यास्त इति । अजितत्वात् कुशलमस्त्येव परं सर्वान् मारयन् व्यग्रो भवेत् तदस्ति न वेति प्रश्नः । अथवा स्वस्तिकल्याणरूपेण शुद्धरूपेण किमस्ति । शयनादुत्थिता नारी शुची स्यादशुचिः पुमान् इति वाक्यात्सम्बन्धे जाते अन्यथाभावो भवतीति तथा सति स्वस्य तदानीं गमनं व्यर्थमेवेति अजितत्वात् पराजयाभावोऽपीति सन्देहात्प्रश्ने कुशलेन वर्तत इत्यङ्गीकारेणैवोत्तरसिद्धो प्रष्टव्यान्तरमाहुः उक्तं पुरा किं वा नश्चलसौहृदः स्मरतीति पुरा यदुक्तं न त्वादृशीं प्रणयिनीं गृहिणीं गृहेषु पश्यामीति यत् पुरोक्तं तत्किं स्मरति नवेति अर्थः । ननु सर्वज्ञास्मरणे को हेतुरिति चेत्तत्राहुः-चलसौहृद इति । न हि कोऽपि सर्वदा कमपि स्मरति सौहार्दे सति स्मरणं भगवांश्चलसौहृदः सर्वथा न स्मरति । समागन्तव्यमिति चेत्तत्राहुः-तं कस्माद्वयं भजाम इति । कार्यान्तराणि निवर्तान्येव सौहार्देऽपि सन्देहः । तस्मात् कारणाभावात् किमर्थं भजामः तत्रापि वयं प्रसिद्धाः तथापि क्रोधस्त्याज्यः । समागन्तव्यमिति चेत्तत्राहुः-हे क्षौद्रालापेति । क्षौद्रवत् शर्करावत् मिष्ट आलापो यस्य तव केवलं वाङ्माधुर्यं क्षौद्रालापं यातीति क्षौद्रालापयः तस्य सम्बोधनेऽपि मिष्टता व्यक्ता क्षुद्रस्य सम्बन्धीति निन्दापरतायां केचिदाहुः-तमेव भगवन्तं आलापय कथय कामदम्भगवन्तम् आलापय । नानेन आलापनं कुरु । कामदं भगवन्तं प्रति वा क्षौद्रालापयोर्भवान् परमालापे लक्ष्म्या आलापो न कर्तव्यः सदाहुः-श्रियमृत इति । ननु सा परमभक्ता भगवदेवपरायणा कथं सह न गीयते, इति चेत्तत्राहुः-सेवैकनिष्ठाः स्त्रिय इति । सैव किं एकनिष्ठा अपि तु सर्वाः स्त्रियः स्त्रीणां मध्य इति षष्ठी वा जात्यपेक्षया चैकवचनमिति केचित् । एवम्भावाः स्त्रियः पर्यवसितनिरोधा वर्णिताः ॥२४॥ एवं स्त्रीणां क्रीडायां प्राप्तः संसारः निवारितः । ततो भगवद्भाव एवाविकल इति फलमुच्यते-इतीदृशेनेति । ईदृशो भावः सर्वप्रकारः लोकातीतः भगवतैव भ्रान्ततामापादितः एतस्य मोक्षसाधकत्वं प्रमेयबलेनेति ज्ञापयितुमाह-कृष्णे योगेश्वरेश्वर इति । योगादयोऽपि फलं प्रयच्छन्ति भगवदनुग्रहात् स एव भगवान् कृष्ण इति तासां परमानन्दप्राप्तौ कः सन्देह इत्यर्थः । योगेश्वरा महादेवादयः तेषामपि नियन्ता

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

साधनेषु योगो महानिति स एवोक्तः भक्तियोगादयोऽपि योगवाच्याद्योगा एव। माधव्यो माधवस्त्रियः परमा गतिर्भगवत्प्राप्तिः। यदपिताना भगवत्सम्बद्धाः तस्मिन्नपि क्षणे भगवन्तं प्राप्तवत्य इत्यर्थः। नियमविधिवत् आसां फलसम्बन्धो व्याख्येयः अन्यथा शरीरात्मादिविकल्पानां माधव्यादिपदैः सह विरोध आपद्येत ॥२५॥ ननु बहिर्मुखानां संसाराविष्टचित्तानां संसाराप्रकारेणैव भगवन्तमपि प्रपन्नानां कथमेवं सर्वसङ्घातस्य भगवति प्रवेशस्तत्राह-श्रुतमात्रोऽपीति। भगवान् स्त्रीणामेवार्थेऽपि प्रादुर्भूत इत्युक्तम्। अतस्तदर्थमेवावतारात् तत्कार्यमावश्यकमिति सम्बन्धमात्रमपेक्ष्यते। तत्र श्रवणमात्रमतिसुलभः सम्बन्ध इति स एवोक्तः। मात्रशब्देन विचारादिव्युदासः। प्रमेयबलमेवात्रमुख्यम् इति स्वयं प्रसह्य मनः आकर्षते सर्वतः आकृष्य स्वस्मिन्नेव स्थापयिष्यतीत्यर्थः। तदपेक्षया कीर्तनकर्तृणां विशेषमाह-उरुगायोरुगीतानामिति। उरुगायो भगवान् उरु गीतो याभिः प्रहतत्वायाविगीतत्वाय वोरुगायपदं तेषामपि मनः प्रसह्य आकर्षत इत्यर्थः। यद्यप्यत्रापि कैमुतिकन्यायो वक्तव्यः। ताण्य एवोक्तः अत्राप्यनुसन्धेयः। पुनरेकादशे स्थिताः पश्यन्ति तासां मनः आकर्षत इति कुतः सिद्धमेव भगवति मनस्तिष्ठतीत्यर्थः। विषयसौन्दर्येणैव मनसो वशीकरणात् न प्रमेयबलमप्यपेक्ष्यत इत्यर्थः ॥२६॥

श्रीसुबोधिनीसारः

हे सिन्धुपन्त्यो नद्यः! शुष्यन्तो ह्रदा यासां ताः सम्प्रति प्रत्यक्षम् अपास्ता गताः कमलानां श्रियः शोभा यासां ताः करशिताः (आर्षं रूपम्।) कर्शिता कृशा बत खेदे इष्टभर्तुर्वाञ्छितप्रदस्य यदुपतेः श्रीकृष्णस्य प्रणयावलोकं कृपाकटाक्षमप्राप्य वयं यद्वत यथा मुष्टहृदया अनियतचित्ताः पुरु कर्शिताः स्मः तद्वत् ॥२३॥ हे हंस सुष्ठु आगमनं त्वया कृतम् आस्यतां त्वया स्थीयतां पयः पिब। हे अङ्ग! शौरेः कथां त्वं ब्रूहि वद तस्य दूतं त्वां वयं विदामो विद्मः अजितः श्रीकृष्णः स्वस्त्यास्ते कुशली वर्तते कच्चित् किं नोऽस्मान् प्रति पुरा पूर्वमुक्तं चलसौहृदः चञ्चलचित्तः किं वा स्मरति हे क्षौद्र! तं वयं कस्माद्धेतोर्भजामः। पाठान्तरे क्षौद्रं मधुरं वच आलापय कामदं हरिं प्रति ब्रूहि श्रियमृते तां विना एकान्ते इत्यर्थः। किं वाच्यं तत्राह। स्त्रियां मध्यं सा एव एकनिष्ठा किं भवत्परायणा न वयमिति सापत्न्यदोषस्य दुःसहत्वमुच्यते ॥२४॥ योगेश्वराणाम् ईश्वरे कृष्णे एवं प्रकारेण क्रियमाणेन भावेन प्रेम्णा भक्त्या वा माधव्यः कृष्णपत्न्यो मोक्षमापुः ॥२५॥ युक्तमित्याह। श्रुतमात्रोऽपि यः श्रीकृष्णः उरुभिर्गायैर्गीतैरुरुधा गीतो वा स्त्रीणां मन आकर्षते प्रसह्य बलात्। पश्यन्तीनां मन आकर्षत इति कुतः किं पुनः ॥२६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे सिन्धुपत्न्यो नद्यः! यद्वत् यथा वयं मधुपतेः कृष्णस्य प्रणयावलोकमप्राप्य मुष्टानि अपहृतानि हृदयानि यासां ताः पुरुकर्शितास्तथा किं यूयमपि सम्प्रति ग्रीष्मे इष्टस्य भर्तुः प्रणयावलोकं मेघद्वारा प्रवाहपूर्तिमप्राप्य शुष्यन्तो ह्रदा यासां ताः तथा अपास्ता निर्गता कमलश्रीः कमलशोभा यासां ताः कर्शिताः स्थ?। बतेति खेदे ॥२३॥ तदानीमेव दैवादागतं हंसं दूतं कल्पयित्वाऽऽहुः-हंसेति। हे हंस! ते स्वागतम्। अत्रास्यतामुपविश्यताम्। पयः क्षीरं पिब। स्वस्नेहं सूचयन्त्यः सम्बोधयन्ति-अङ्गेति। एवं सत्कारे किं प्रयोजनम् इत्यपेक्षायामाहुः-शौरेः कृष्णस्य कथां वार्तां ब्रूहि। अहं तत्कथं जानीयाम् इत्याशङ्क्याहुः-त्वां तु तस्य दूतं विदामेति। अत अजितः किं स्वस्त्यास्ते? यच्च नोऽस्मान् प्रति 'न त्वादृशीं प्रणयिनीं पश्यामि' इत्यादि पुरोक्तं तत्किं स्मरति? ननु स्मरणे कथं सन्देह इत्याशङ्क्याहुः-चलमस्थिरं सौहृदं प्रेम यस्य स इति। स्मृत्वैव युष्मानानेतुं मां प्रस्थापितवानिति चेत्तत्राहुः-हे क्षौद्र क्षुद्रस्य दूत! तं वयं कस्माद्व्रजामः? ननु स तु युष्मान् सारदमाकारयति, युष्माभिः कथमनाद्रियते इत्याशङ्क्याहुः-श्रियमृते इति। या अस्मान् वञ्चयित्वा एकाकिनी रमते तां श्रियं हित्वा कामदं तमेवालापय इहाकारय। ननु सा तदेकनिष्ठा कथं परिहर्तुं शक्यत इति चेत्तत्राहुः-स्त्रियामिति। जातावेकवचनम्। अस्मासु स्त्रीषु मध्ये किं सा एव एकनिष्ठा? न तु वयं तथेत्यर्थः। क्षौद्रालापमकामदम् इति 'स्त्रिय' इति च पाठान्तरे क्षौद्रं मधु तद्वन्मधुरालापमात्रं यस्य तम् अकामदम् अरतिप्रदं श्रियमृते वयं कस्माद्व्रजामः? किं त्वनादृता अपि सती सैव तं भजतु। एकनिष्ठा एकत्रैव स्वसंमानसिद्धौ निष्ठा यासां तथाभूता मानिन्यः स्त्रियो

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

वयमिति ॥२४॥ माधव्यो माधवस्य स्त्रियः इत्येवं योगेश्वरेश्वरे कृष्णे क्रियमाणेन ईदृशेनानुपमेयेन भावेन प्रेम्णा परमां गतिं वैष्णवीं मुक्तिं लेभिरे ॥२५॥ तासां कृष्णे एवं भावो नातिचित्रम् इत्याहुः-श्रुतमात्र इति । उरुभिर्गायैर्गीतैरुरुधा गीतः, अत एव कथञ्चिच्छ्रुतमात्रोऽपि वा यः प्रसह्य बलात् स्त्रीणां मन आकर्षते । साक्षात्पश्यन्तीनां स्वपत्नीनां मनआकर्षणे पुनः किं कर्तव्यमित्यर्थः ॥२६॥

अन्वितार्थप्रकाशिका

शुष्यदिति ॥ हे सिन्धुपत्न्यो नद्यः ! यद्वत् यथा वयं मधुपतेः कृष्णस्य प्रणयावलोकमप्राप्य मुष्टानि अपहृतानि हृदयानि यासां ताः पुरुकर्शितास्तथा किं यूयमपि सम्प्रति ग्रीष्मे इष्टस्य भर्तुः प्रणयावलोकं मेघद्वारा प्रवाहपूर्तिमप्राप्य शुष्यन्तो ह्रदा यासां ताः तथा अपास्ता निर्गता कमलश्रीः कमलशोभा यासां ताः कर्शिताः स्थ ॥२३॥ तदानीमेव दैवादागतं हंसं दूतं कल्पयित्वाऽऽहुः-हंसेति । अङ्ग हे हंस ! ते स्वागतम् । अत्रास्यतामुपविश्यतां पयः क्षीरं पिब शौरेः कृष्णस्य कथां वार्तां ब्रूहि । त्वां तु तस्य दूतं विदाम विद्मः । आर्षोऽयम् । अतः चलं सौहृदं यस्य सः अजितः किं स्वस्त्यास्ते । यं च नोऽस्मान् प्रति न त्वादृशीं प्रणयिनीं पश्यामीत्यादि पुरोक्तं तत्किं स्मरति । हे क्षौद्र क्षुद्रस्य दूत ! तं वयं कस्माद्भजामः श्रियमृते इति । या अस्मान् वञ्चयित्वा एकाकिनी रमते तां श्रियं हित्वा कामदं तमेवालापय इहाकारय । स्त्रियामिति जातावेकवचनम् । अस्मासु स्त्रीषु मध्ये किं सौवैकनिष्ठा न तु वयं तथेत्यर्थः । क्षौद्रालापमकामदमिति स्त्रिय इति च पाठान्तरे । क्षौद्रं मधु तद्वन्मधुरालापमात्रं यस्य तम् अकामदम् अरतिप्रदं श्रियमृते वयं कस्माद्भजामः किं त्वनादृता अपि सती सैव तं भजतु । एकनिष्ठा एकत्रैव स्वसंमानसिद्धौ निष्ठा यासां तथाभूता मानिन्यः स्त्रियो वयमिति ॥२४॥ इतीति ॥ माधव्यो माधवस्य स्त्रियः इत्येवं योगेश्वरेश्वरे कृष्णे क्रियमाणेन ईदृशेनानुपमेयेन भावेन प्रेम्णा परमां गतिं वैष्णवीं मुक्तिं लेभिरे ॥२५॥ श्रुतमात्र इति । उरुभिर्गायैर्गीतैरुरु बहु गीतोऽत एव कथञ्चिच्छ्रुतमात्रोऽपि वा यः प्रसह्य बलात् स्त्रीणां मन आकर्षते । तडार्षः । साक्षात्पश्यन्तीनां स्वपत्नीनां मनआकर्षणे पुनः किं कर्तव्यमित्यर्थः ॥२६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

भो सिन्धुपत्न्यः ! सम्प्रति ग्रीष्मकाले शुष्यद्ध्रदाः शुष्यन्तो ह्रदा यासां ताः अत एवापास्तकमलश्रियः गतपद्मशोभाः यूयं वर्षाजलद्वारेण सिन्धोः इष्टभर्तुः समागमम् अप्राप्य कर्शिताः स्म । यथा वयम् इष्टभर्तुः प्रियपतेः अयदुपतेः प्रणयावलोकं प्रेमपूर्वकमवलोकम् अप्राप्य मुष्टहृदयाः सङ्कुचिततान्तःकरणाः भवाम । बताहो महत्कष्टम् ॥२३॥ तदैवेश्वरेच्छयाऽऽगतं हंसं पतत्रिणां दूतं मत्वा प्रोचुः-हंसेति । अङ्ग हे हंस ! स्वागतम् अत्रास्यतामुपविश्यताम् । पयः क्षीरं पिब । कथां ब्रूहि । वयं त्वां शौरेः दूतं विदाम अतः अजितः कच्चित् स्वस्त्यास्ते सुखी भवति । एतत्त्वं ब्रूहि । नोऽस्मान् प्रति पुरा एकान्तस्थले उक्तं वचनं चलसौहृदः किं वा स्मरति । युष्मान् मृत्वैवात्र मां प्रेषितवानिति चेत्तत्राहुः-वयं तं कस्माद्भजामः । हे क्षौद्र ! क्षुद्रस्य दूत ! अस्माकं तस्य प्रयोजनं नास्ति तस्यास्मत्प्रयोजनं चेत्तर्हि श्रियमृते लक्ष्मीं विना तमेकमेवेहालापय आह्वय । ननु स एकनिष्ठां लक्ष्मीं विहाय कथमायास्यतीति चेत्तत्राहुः-स्त्रियां स्त्रीषु मध्ये सा लक्ष्मी एका एव एकनिष्ठा एकस्मिन् श्रीकृष्णे एव निष्ठा दृढस्थितिर्यस्या एवम्भूतास्ति । वयं किं न । तस्यागमने इच्छा चेत्तर्हि तं शीघ्रमानयेति भावः ॥२४॥ परमां गतिं परमं प्राप्यं हरेर्धाम ॥२५॥ स्त्रीणां देवकीपुत्रे एवम्भूतः स्नेहोऽस्ति एतन्नाश्चर्यमित्याह-श्रुतेति ॥ उरुभिः गायैः गीतिकाभिः कृत्वा उरु बहु यथा स्यात्तथा भक्तजनैः गीतो यः श्रीकृष्णः श्रुतमात्रोऽपि स्त्रीणां मनः प्रसह्य बलेनाऽऽकर्षते ॥ यद्वा श्रुतमात्रोऽपि यः मन आकर्षते । उरुगायैर्बहुगीतिकाभिः गीतो वा मन आकर्षते तर्हि पश्यन्तीनां तासां मनः आकर्षतेऽत्र पुनः किं वक्तव्यम् ॥२६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सन्धुपत्नीरालक्ष्याहुः ॥ शुष्यदिति ॥ हे सिन्धुपत्न्यो नद्यः ! यद्वद्यथा वयं यदुपतेः श्रीकृष्णस्य, प्रणयावलोकं प्रेमपूर्वकमवलोकनम् अप्राप्य मुष्टानि तेनापहृतानि हृदयानि यासां ताः पुरु नितरां कर्शिताः स्मः । तथा बतेति खेदे ॥ यूयमपि

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

सम्प्रति ग्रीष्मकाले शुष्यन्तो ह्रदा यासां ताः अपास्तकमलश्रियः अपगतकमलशोभाश्च स्थ । अतः इष्टभर्तुः सिन्धोः प्रणयावलोकम् अप्राप्य कर्शिताः स्थ ॥२३॥ तदानीमेवेश्वरेच्छयाऽलक्ष्यपथं प्राप्तं पतत्र्युत्तमं हंसं भगवत्प्रेषितं दूतं मत्वा प्रोचुः ॥ हंसेति ॥ हे हंस! ते स्वागतम् । आस्यतामस्मिन्नासने उपविश्यताम् । पय इदं क्षीरं पिब । अङ्ग हे हंस ! शौरेः श्रीकृष्णस्य कथां वार्तां ब्रूहि । नु इति वितर्के । अथवा त्वर्थे । तदा त्वां त्वित्यर्थः । शौरेः दूतं विदाम । अतः ब्रूहि । अजितः श्रीकृष्णः स्वस्ति आस्ते कच्चित् । पुरा पूर्वं रहसि नोऽस्मान् प्रति उक्तं चलसौहृदः, हेतुगर्भमिदम् । तत्त्वात् स्मरति किम् । ननु स्मृत्वैव मां प्रस्थापितवान् इत्यत आहुः । हे क्षौद्र ! क्षुद्रस्य तस्य दूत कस्मात् तं वयं भजामः । कामार्थमाह्वयतीत्यत्राहुः । अहो तर्हि कामदं तम् इह आलापयाकारय । ओमिति गच्छन्तं पुनराहुः । या अस्मान् वञ्चयित्वा एकाकिनी रमते तां श्रियम् ऋते श्रियं विनेकाकिनं तमेवालापयेत्यर्थः । सा तदेकनिष्ठा कथं परिहर्तुं शक्येत्यत आहुः । स्त्रियां मध्ये जातावेकवचनम् । अस्मासु स्त्रीषु मध्ये इत्यर्थः । किं सा एवैकनिष्ठा, न तु वयमित्यर्थः ॥२४॥ इतीति ॥ माधव्यः श्रीकृष्णाङ्गनाः, योगेश्वरेश्वरे कृष्णे क्रियमाणेन इतीत्थम्भूतेन ईदृशेन भावेन वैष्णवीं गतिं लेभिरे । मुक्तिं प्रापुरित्यर्थः ॥२५॥ तासां श्रीकृष्णे इत्थम्भूतो भावो नातिचित्रमित्याह ॥ श्रुतमात्रोऽपीति ॥ उरुभिर्बहुभिर्गायैर्गीतैः उरुर्बहुधा गीतः यैः कैश्चिदपि गीतैः कथञ्चिदपि गीतो वेत्यर्थः । उरुगायः इति प्रथमान्तं पदम्, तदा सन्धिरार्षः । वाऽथवा, यः श्रुतमात्रः सन्नपि स्त्रीणां मनः प्रसह्य आकर्षते । तं पुनः पुनः पश्यन्तीनां मनः आकर्षते, तत्र किमु वक्तव्यम् । उरुगायोरुगीतमिति पाठे उगुगायस्य श्रीकृष्णस्योरुगीतं शृण्वन्तीनां पुनः पुनः पश्यन्तीनां चेत्यर्थः ॥२६॥

कृष्णप्रिया

समुद्रपत्नी नदियों ! यह ग्रीष्म ऋतु है । तुम्हारे कुण्ड सूख गये है । अब तुम्हारे अंदर खिले हुए कमलो का सौन्दर्य नहीं दीखता तुम बहुत दुबली पतली हो गयी हो । जान पडता है जैसे हम अपने प्रियतम श्याम सुन्दर की प्रेमभरी चितवन न पाकर अपना हृदय खो बैठी है और अत्यन्त दुबली पतली हो गयी है वैसे ही तुम भी मेघों के द्वारा अपने प्रियतम समुद्र का जल न पाकर ऐसी दीन हिन हो गयी हो ॥२३॥ हंस ! आओ आओ ! भले आये स्वागत रे । आसन पर बैठो लो दुध पियो । प्रिय हंस ! श्यामसुन्दर की कोई बात तो सुनाओ । हम समझती है कि तुम उनके दूत हो किसी के वशमें न होनेवाले श्याम सुन्दर सकुशल तो है न ? अरे भाई ! उनकी मित्रता तो बडी अस्थिर है क्षणभंगुर है । एक बात तो बतलाओ उन्होंने हमसे कहा था कि तुम्ही हमारी परम प्रियतमा हो क्या ? अब उन्हें यह बात याद है ? जाओ जाओ हम तुम्हारी अनुनय विनय नहीं सुनती । एक वे हमारी परवा नहीं करते तो हम उनके पीछे क्यों मरे क्षद्र के दुत ! हम उनके पास नहीं जाती । क्या कहा वे हमारी ईच्छा पूर्ण करने के लिये ही आना चाहते है अच्छा तब उन्हें तो यहां बुला आना हमसे बाते करना परन्तु कहईं लक्ष्मी को साथ न ले आना । तब क्या वे लक्ष्मी को छोडकर यहां नहीं आना चाहते ? यह कैसी बात है क्या स्त्रीयोंमें लक्ष्मी ही एक ऐसी है जिनका भगवान से अनन्य प्रेम है ? क्या हम मैंसे कोई एक भी वैसी नहीं है ॥२४॥ परीक्षित ! श्रीकृष्ण पत्नियां योगेश्वरेश्वर भगवान श्रीकृष्ण में ऐसा हिअनन्य प्रेमभाव रखतीथी ईसीसे ईसीसे उन्होंने परमपद प्राप्त किया ॥२५॥ भगवान श्रीकृष्ण की लीलाऐं अनेको प्रकारसे अनेको गीतो द्वारा गान की गई है वे ईतनी मधुर ईतनी मनोहर है कि उनके सुनने मात्रसे स्त्रीयों का मन बलात उनकी और खिंच जाता है । फिर जो स्त्री उन्हो अपने नेत्रो से देखती थी उनके सम्बन्धमें तो कहना ही क्या ॥२६॥

या:[1] सम्पर्यचरन् प्रेम्णा पाद[2]संवाहनादिभिः । जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः ॥२७॥[3]
एवं वेदोदितं[4] धर्ममनुतिष्ठन् सतां गतिः । गृहं धर्मार्थकामानां मुहुश्चादर्शयत् पदम् ॥२८॥[5]
आस्थितस्य परं धर्मं कृष्णस्य गृहमेधिनाम्[6]। आसन् षोडशसाहस्रं महिष्यास्तु [7]शताधिकम् ॥२९॥
तासां स्त्रीरत्न[8]भूतानामष्टौ याः प्रागुदाहृताः । रुक्मिणीप्रमुखा राजंस्त[9]त्पुत्राश्चानुपूर्वशः ॥३०॥

कर्दमक्षमा

प्रेम्णा पादसंवाहनादिभिः याः जगद्गुरुम् भर्तृबुद्ध्या सम्पर्यचरन् तासाम् तपः किम् वर्ण्यते ॥२७॥ सताम् गतिः एवम् मुहुः वेदोदितम् धर्मम् अनुतिष्ठन् धर्मार्थकामानाम् पदम् गृहम् च अदर्शयत् ॥२८॥ गृहमेधिनाम् परम् धर्मम् आस्थितस्य कृष्णस्य तु महिष्याः शताधिकम् षोडशसहस्रम् आसन् ॥२९॥ राजन् याः प्राक् उदाहृताः तासाम् स्त्रीरत्नभूतानाम् अष्टौ रुक्मिणीप्रमुखाः अनुपूर्वशः तत्पुत्राः च ॥३०॥ वसुदेवः, उवाच ।

ऋषयः, सर्वदेवेभ्यः, वः, नमः, श्रोतुम्, अर्हथ, यथा, कर्मणा, कर्मनिर्हारः, स्यात्, तत्, उच्यताम् ॥२९॥

श्रीधरस्वामिविरचिता भावार्थदीपिका

पदं स्थानम् ॥२८-२९॥ या रुक्मिणीप्रमुखा अष्टावुदाहृताः प्राक् ॥३०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

या रुक्मिण्याद्याः । किंशब्दस्तपोमहत्त्वं वक्ति ॥★॥ अतस्ता एव धन्या न त्वन्ये केचनेति भावविशेषोदयेनाह-या इति । याः काश्चिदन्या अपि भर्तृबुद्ध्या भावनामात्रगम्येनापि भर्तृत्वेन न तु साक्षाद्भर्तृत्वेन यः प्रेमा तेन यानि पादसंवाहनादीनि मानसरूपाणि तैर्जगद्गुरुं परमपुरुषोत्तमं सम्यक् तदेकनिष्ठतया पर्यचरन् असेवन्त इत्यर्थः । तासां तपस्तदुपासनाभाग्यं किं वर्ण्यते अपि तु वर्णयितुं न शक्यत इत्यर्थः । साक्षाद्भर्तृत्वेन नित्यमेव तथा सेवमानानां तासां वार्ता दूरत एवेति भावः ॥२७॥ गृहं गृहस्थम् । पदं स्थानम् ॥★॥ तदेवं तस्य क्रीडात्वेनैव स्फुटं प्रतीयमानं चरितं वर्णयित्वा तादृशत्वमेव वैधकर्मण्यप्यतिदिशन् सर्वेषामपि शर्मदत्वमाह-एवं सताङ्गतिः तत्क्रीडैकपरमभक्तानां गतिः सन् वेदोदितं धर्मं यज्ञादिकं च मुहुरनुतिष्ठन् गृहं खलु धर्मार्थकामानां पदमित्यप्यदर्शयत् । अन्येभ्य उपादिशदिति यतः सतां तत्क्रीडैकजीवानां धर्मादिपराणां च गतिराश्रयः ॥२८॥ परम अतिथिपूजनादिनोत्कृष्टम् ॥★॥ तथा तद्गार्हस्थ्यभूतानां श्रीभगवत्पुत्रादीनां सर्वेषां यादवानामपि माहात्म्यमुक्त्वानुवादपूर्वकं वर्णयति-आस्थितस्येत्यादीनां परमुत्कृष्टं प्रायः सर्वेषामप्याश्रमिणामाश्रयत्वात् । तदुक्तम् —

"भक्षाभुजश्च ये केचित्परिव्राड्ब्रह्मचारिणः । तेऽप्यत्रैव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै वरम् ॥" इति ॥

यद्वा । परं मुख्यं मुख्यकल्पत्वेन कृतत्वात् कृष्णस्य अशेषैश्वर्यप्रकटनार्थमवतीर्णस्य स्वयं भगवतः यद्वा, तद्धर्मानुष्ठानमाधुर्येणापि सर्वचित्ताकर्षकस्य । तु-शब्दो भेदे । महामहिष्यस्तावदष्टावासन्नेव षोडशसाहस्रं महिष्यस्तु शताधिकं यथा स्यात्तथाऽऽसन् ॥२९॥ तासां सर्वासांमध्ये तत्पुत्रा रुक्मिण्याद्यष्टमहिष्यात्मजाः ॥★॥ ॥०॥ ॥३०॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

अतस्ता एव धन्या न त्वन्ये केचनेति भावविशेषोदयेनाह-या इति । याः काश्चिदन्या अपि भर्तृबुद्ध्या भावनामात्रगम्येनापि भर्तृत्वेन न तु साक्षाद्भर्तृत्वेन यः प्रेमा तेन यानि पादसंवाहनादीनि मानसरूपाणि तैर्जगद्गुरुं परमपुरुषोत्तमं सम्यक् तदेकनिष्ठतया

---

[1] यास्तं-वीर. । [2] संघट्टनादिभिः-वीर. । [3] श्लोकद्वयमधिकम् अत्र-विज. अत्र व्यधिकशततमाध्यायविच्छेदश्च दृश्यते । गृहेषु तासा.... श्लोकद्वयं टीकायाम् । [4] त्र्यधिकशततमोऽयमध्यायः ॥१०३॥-विज. । [5] अत्र त्रयोदश श्लोका अधिकाः-विज. । एवं शासति भूचक्रं ... इति टीकायाम् । [6] गृहेमधिनः-विज. । [7] साहस्रामहिष्योष्टशता-वीर. ; साहस्रमहिष्यस्तुशता-विज. ; साहस्रं महिष्यश्च शता-श्रीधर. वंशी. । [8] रूपाणां-वीर. । [9] राजन्सहपुत्राश्च सर्वशः-वीर. ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पर्यचरन् असेवन्त इत्यर्थः । तासां तपस्तदुपासनाभाग्यं किं वर्ण्यते अपि तु वर्णयितुं न शक्यत इत्यर्थः । साक्षाद्भर्तृत्वेन नित्यमेव तथा सेवमानानां तासां वार्ता दूरत एवेति भावः ॥२७॥ तदेवं तस्य क्रीडात्वेनैव स्फुटं प्रतीयमानं चरितं वर्णयित्वा तादृशत्वमेव वैधकर्मण्यप्यतिदिशन् सर्वेषामपि शर्मदत्वमाह–एवं सताङ्गतिः तत्क्रीडैकपरमभक्तानां गतिः सन् वेदोदितं धर्मं यज्ञादिकं च मुहुरनुतिष्ठन् गृहं खलु धर्मार्थकामानां पदमित्यप्यदर्शयत् । अन्येभ्य उपादिशदिति यतः सतां तत्क्रीडैकजीवानां धर्मादिपराणां च गतिराश्रयः ॥२८॥ तथा तद्गार्हस्थ्यभूतानां श्रीभगवत्पुत्रादीनां सर्वेषां यादवानामपि माहात्म्यमुक्त्वानुवादपूर्वकं वर्णयति- आस्थितस्येत्यादीनां परमुत्कृष्टं प्रायः सर्वेषामप्याश्रमिणामाश्रयत्वात् । तदुक्तम् —

“भक्षाभुजश्च ये केचित्परिव्राड्ब्रह्मचारिणः । तेऽप्यत्रैव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै वरम् ॥” इति ॥

यद्वा । परं मुख्यं मुख्यकल्पत्वेन कृतत्वात् कृष्णस्य अशेषैश्वर्यप्रकटनार्थमवतीर्णस्य स्वयं भगवतः यद्वा, तद्धर्मानुष्ठानमाधुर्येणापि सर्वचित्ताकर्षकस्य । तु-शब्दो भेदे । महामहिष्यस्तावदष्टावासन्नेव षोडशसाहस्रं महिष्यस्तु शताधिकं यथा स्यात्तथाऽऽसन् । महिष्यश्चेति पाठेऽपि स एवार्थः ॥२९॥ स्त्रीषु तज्जातिषु रत्नानां श्रेष्ठतमानां तासां पुत्राश्चानुक्रमेणोदाहृता एव ॥३०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१७-५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

यतस्तासामित्थम्भूतो भावोऽतस्ता अनुमोदते । या इति तं कृष्णं जगद्गुरुं सर्वोत्तमं परमपुरुषमपि भर्तृबुद्ध्या याः पादसङ्घट्टनादिभिः प्रेम्णा पर्यचरन् असेवन्त । तासां तपः किं वर्ण्यते कथं वर्ण्यत इत्यर्थः ॥२७॥ एवमिति । सतां गतिः स्वप्राप्त्युपायभूतोऽप्यनुतिष्ठन् गृहान् धर्मादीनां पदं स्थानमित्यदर्शयन् । पदमिति दर्शयितुमन्वतिष्ठदित्यर्थः ॥२८॥ अथ भगवतः स्वपत्नीषु सन्तानमनुवर्णयितुं प्रस्तौति आस्थितस्येति । परं गृहमेधिकनां धर्ममास्थितस्यानुतिष्ठतः कृष्णस्य महिष्यः पत्न्यः आसन् ॥२९॥ तासां स्त्रीरत्नरूपाणां मध्येऽष्टौ रुक्मिणीप्रमुखाः याः पूर्वं कथिताः । सर्वशः सर्वाश्च सहपुत्राः पुत्रवत्य एवेत्यर्थः । तासां पुत्रास्तु लक्षमेकमशीत्युत्तरैकषष्टिसहस्राणि भवन्ति ॥३०॥

श्रीमद्विजयध्वजकृता पदरत्नावली

मूलम् ——

गृहेषु तासामनिवार्य ईश्वरो निरस्तसाम्यातिशयो व्यवस्थितः ।
रेमे रमाभिर्निजसौख्यसम्प्लुतो यथेतरो गार्हकमेधियांश्चरन् ॥ क ॥

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि पदवीं न विदुर्यदीयाम् ।
भेजुर्मुदाऽविरतमेधितयाऽनुरागहासावलोकनवसङ्गमलज्जयैव ॥ ख ॥

अनिवार्य इत्यस्य विवरणमीश्वर इति । रमाभीरामाभिर्लक्ष्मीसन्निधानयुक्ताभिर्वा निजसौख्यसम्प्लुतः स्वरूपानन्दमग्नः गार्हकमेधिकान् गृहस्थाश्रमयोग्यधर्मांश्चरन् कुर्वन् ॥ क ॥ नवसङ्गमे या लज्जा सैव स्थिता तया अनुरागादियुक्तया ॥ ख ॥

[अत्र विजयध्वजरीत्या द्व्यधिकशततमोऽध्यायस्समाप्यते । अग्रे सप्तविंशतिश्लोकावधि श्लोका न विद्यन्ते अष्टाविंशतितमश्लोकमारभ्य त्र्यधिकशततमाध्यायत्वेन पठ्यते च]

धर्मार्थकामानां पदं विषयं सन्दर्शयन् त्रिवर्गाणामाश्रयो गृहस्थ इति सम्यक् दर्शयन् द्वारकामावसति । श्रीकृष्ण इति शेषः ॥२८॥

११. अत्र एते त्रयोदशश्लोका अधिकाः-विज. ———

एवं शासति भूचक्रं चक्रपाणौ जनार्दने । द्वारका वृष्णिनिलया योजनद्वादशायता ॥ क ॥
मुनिभिर्ब्राह्मणैश्चैव क्षत्रियैश्चापि वन्दिभिः । आसीत्पूर्णा कुरुश्रेष्ठ सततं समलङ्कृता ॥ ख ॥
पिण्डारकात्कुरुक्षेत्राच्छालग्रामाच्च पुष्करात् । वाराणस्याः प्रयागाच्च वेङ्कटाच्छ्रीगिरेरपि ॥ ग ॥
स्यानन्दूराच्च गोकर्णाच्चन्द्रतीर्थाच्च शोभनात् । सह्यादेश्च भृगुक्षेत्रात्कुमारनिलयादपि ॥ घ ॥
गोदावरीतटात्पुण्यान्नर्मदानिकटादपि । शूर्पाकारात्प्रभासाच्च पुण्याद्बदरिकाश्रमात् ॥ ङ ॥
पावनान्नैमिशारण्याद्ब्रह्मदुर्गाच्च दुर्गमात् । आययुर्मुनयः शान्ता नित्यव्रतपरायणाः ॥ च ॥
अब्भक्षा वायुभक्षाश्च निराहारा दृढव्रताः । वल्कलाजिनसंवीता जटिनश्चापि मुण्डिनः ॥ छ ॥
त्रिकालस्नायिनश्चैव मौनव्रतपरायणाः । वेदस्वाध्यायनिरताः स्तुतिस्तोत्रपरायणाः ॥ ज ॥
ध्यानैकतानमनसः समाधौ कृतनिश्चयाः । त्वगस्थिमात्रावयवाः शिराधमनिसन्तताः ॥ झ ॥
आगत्य मुनयो राजन् सर्वतः शान्तचेतसः । उपासत महाराज नित्यं तत्त्वैकचिन्तकाः ॥ ञ ॥
क्षत्रियैश्च महावीर्यैर्ब्राह्मणैश्च तपोधनैः । सूतैश्च मागधैश्चैव लोकस्तुतिपरायणैः ॥ ट ॥
पूर्णा मङ्गलघोषैश्च वादित्राणां च निःस्वनैः । निर्घुष्टा ब्रह्मघोषैश्च द्वारका कुलनन्दन ॥ ठ ॥
क्षेत्राणाममपि सर्वेषां तीर्थानां चाघहारिणाम् । देवदेवस्य सान्निध्यादग्रण्या च बभूव सा ॥ ड ॥

ततः परं किमत्रेत्याह-एवमिति । भूचक्रं भूमण्डलम् । द्वारका मुन्यादिभिः पूर्णा निबिडा आसीदित्यन्वयः ॥ क-ख ॥ पिण्डारकादितीर्थक्षेत्रेभ्यो द्वारकोत्तमतीर्थमित्याह-पिण्डारकादित्यादिना ॥ ग ॥ कुमारनिलयात् कुमारपर्वतात् ॥ घ-ङ॥ द्वारकामिति शेषः ॥ च-छ ॥ स्तुतिस्तोत्रपरायणाः स्तुतिप्रबन्धरूपा स्तोत्रप्रबन्धरूपम् । तज्जपैकपरायणाः ॥ ज ॥ ध्यानैकतानमनसः श्रीहरिगुणगणसञ्चिन्तनायामेव विस्तृतमनसः समाधौ चित्तनिग्रहे कृतनिश्चयाः समीचीनाधिष्ठानलक्षणमुक्तौ वा शिरा रेखाः ॥ झ ॥ सर्वत आगत्य ॥ ञ-ठ ॥ अग्रण्या अग्रण्येतिच्छान्दसः । उत्तमोत्तमाश्रया ॥ ड ॥

कृष्णस्य षोडशसहस्रमहिष्यः ॥२९॥ तासां मध्ये या रुक्मिणीप्रमुखा अष्टौ महिष्यः प्रागुक्ताः अनुपूर्वशः तत्पुत्राश्चोक्ताः ॥३०॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२५-४२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

तदेवाह गाः सम्पर्यचरन्नित्यादि । या माधव्यः जगद्गुरुं श्रीकृष्णं भर्तृबुद्ध्या सम्यक् पर्यचरंस्तत्रापि प्रेम्णा । ननु कामेन पादसंवाहनादिभिः क्रियाभिः तासां तपः किं वर्ण्यते तद्वर्णनीयं न भवति अन्यस्यान्यद्वर्णयितुं शक्यते न तदिति भावः । अतो ये मां भजन्ति दाम्पत्ये तपसा व्रतचर्ययेति पूर्वं यद्व्याख्यातं तत्साधु ॥२७-४६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

एवं सामान्यतः स्त्रीणां भजने स्वरूपयोग्यतामुक्त्वा विशेषमाह-या इत्यादि । या पुनर्भर्तृभावेन प्रेम्णा पादसंवाहनादिभिः पर्यचरन्, तासां तपः किं वर्ण्यते ? अन्येषां तु भावान्तरेण भजतां तपो वर्णयितुं शक्यत एवेति भावः । अतः सर्वज्ञजनेभ्यो भर्तृभावेन भजनमेव श्रेय इति रहस्यम् ॥२७॥ ॥२८-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

तासां किं तपो वर्ण्यते, नैव वर्ण्यते किन्तु नित्यसिद्धा एव ता इति भावः। यद्वा तासु मध्ये कासांचित् साधनसिद्धानां कीदृशं प्राक्तनं तप इति चेदत्राह–या इति ॥२७॥ पदं स्थानम् ॥२८-२९॥ या रुक्मिणीप्रमुखा अष्टौ ता उदाहृता उक्ताः। तत्पुत्राश्च उदाहृता उक्ताः प्रागेव ॥३०॥

गूढार्थदीपिनी

या सम्पर्यचरन् सेवितवत्यः तासां तपः किं वर्ण्यते कथं वक्तुं शक्यते। संवाहनं मर्दनम् ॥२७॥ धर्मादीनां पदं स्थानं गृहं गृहस्थमेवेति अदर्शयत् लोकेभ्य इति शेषः ॥२८॥ अष्टोत्तरशताधिकं पत्न्यः आसन्निति शेषः ॥२९॥ तत्पुत्रा अपि उदाहृताः पूर्वं कथिता इत्यन्वयः ॥३०॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

मुहुरनुतिष्ठन् आचरन् धर्मादीनां पदं स्थानमदर्शयन् ॥२८॥ चकारादष्टाधिकाश्च ॥२९॥ तासां अष्टोत्तरशत-कषोडशसहस्रसङ्ख्याकानां मध्ये याः रुक्मिणीप्रमुखा अष्टौ ताः तत्पुत्राश्च प्राधान्यविवक्षया उदाहृताः प्रागेव ॥३०-३२॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एताः त्रिविधाः सगुणा निरूपिताः गुणातीताः कैमुतिकन्यायेन सुतरां स्तौति–याः सम्पर्यचरन्निति। साक्षाद्देहसम्बन्धः सर्वभावेन यासां तत्रापि प्रेम्णेति आन्तरः सम्बन्धः। पादसंवाहनादिभिरिति बाह्यः जगद्गुरुमिति क्रिययापि विहितप्रकारेणापि तासां फलसिद्धावुपाय उक्तः। भर्तृबुद्ध्येति तासां बुद्धिरप्युत्तमा निरूपिता, न तु गोपिकावज्जारबुद्धिरिति भावः —

''बुद्धिः प्रपत्तिः सम्बन्धो द्विविधोऽपि विधेर्बलम्। प्रमेयबलमित्यासां षोढा कृष्णे निरूपिताः॥

एकैकोऽपि महत्पुण्यसाध्यः षण्णां तु का कथा। अतस्तपः प्रशंसां हि तासां वक्तुं क ईश ते॥''

तदाह–तासां किं वर्ण्यते तप इति ॥२७॥ एवं सर्वासां निरोधमुक्त्वा प्रसङ्गादपि कृतं भगवतोपेक्षितमेवेति ज्ञापयितुम् उपसंहारे निरूपयति–एवं वेदोदितं धर्ममिति। यथा निरोधोऽभिप्रेतः एवं वेदोदितोऽपि धर्मः लोकशिक्षार्थं भगवतोऽभिप्रेतः। तत्र हेतुः सतां गतिरिति। अन्यथा मार्गव्यवस्था न स्यात् इति सतां रक्षा न स्यादिति न केवलं वैदिकधर्म एव भगवतोऽभिप्रेतः। किन्तु स्मार्तोऽपि त्रिवर्गः तदासक्तानां बुद्धिसङ्ग्रहार्थम् अभिप्रेत इत्याह–गृहं धर्मार्थकामानामिति। त्रिवर्गास्पदं स्थानभूतं गृहमिति मुहुर्मुहुर्वारंवारं षोडशप्रकारेण अदर्शयत् लोकेभ्यः अदर्शयामास ॥२८॥ एवं भगवतो धर्मपरत्वमुक्त्वा स्त्रीणामतथात्वे गार्हस्थ्यं धर्मविरुद्धमिति तासामपि धर्मपरत्वं वक्तुमाह–आस्थितस्येति। परमोत्कर्षापन्नं धर्ममास्थितस्य कृष्णस्य स्वरूपत एकस्य गृहमेधिनां गृहस्थत्वेन नानारूपस्य षोडशसाहस्रं महिषामासीत्। महिष्य इति षष्ठ्येकवचनं यथा एकः कृष्णः बहवो गृहस्थाः तथैव महिषीषोडशसहस्रसङ्ख्या युक्तेत्यर्थः। तु-शब्दः प्रकारान्तरं वारयति। शताधिकमिति सहस्रस्य विशेषणं शतसङ्ख्या-युक्ताभ्योऽप्यधिकादित्यर्थः। एकापि शतस्त्रीभ्योऽप्यधिका सर्वभावेनेति ॥२९॥ एवं धर्मार्थतां निरूप्य प्रजासम्पत्त्यर्थतापि तासां मुख्येति उपसंहारे तदप्याह–तासां स्त्रीरत्नभूतानामिति। यद्यपि सर्वासामेव दशपुत्रास्तथापि मुख्या एव कथिता इति उपसंहारे ता एवानुवदति। तासां स्त्ररत्नभूतानां सर्वा एव सर्वतोत्कृष्टा इति रत्नपदप्रयोगः। तत्रापि अष्टौ याः प्रागुदाहृताः रुक्मिणीप्रमुखाः —

''रुक्मिणी सत्यभामा च कालिन्दी ऋक्षकन्यका। सत्या भद्रा मित्रविन्दा लक्ष्मणेत्यष्टनायिकाः॥''

राजन्निति सम्बोधनं स्त्रीत्वबाहुल्यरसाभिज्ञानार्थम्। तत्पुत्राश्च उदाहृताः आनुपूर्वशः ज्येष्ठानुक्रमेण। चकारात्पौत्रोऽप्युक्त इति ज्ञापितम् ॥३०॥

श्रीसुबोधिनीसारः

जगतां गुरुं श्रीहरिं पतिबुद्ध्या प्रेम्णा पादसंवाहनादिभिः याः सेवामकुर्वन् तासां स्त्रीणां किं तपो वर्ण्यते ॥२७॥ एवं वेदोक्तं धर्ममाचरन् सतां गतिः कृष्णो धर्मार्थकामानां त्रिवर्गस्य पदं स्थानं गृहं मुहुरसकृददर्शयत् ॥२८॥ गृहमेधिनां परं धर्ममास्थितस्य कृष्णस्य षोडशसाहस्रं शताधिकं महिष्यः पट्टराज्ञ्योऽभवन् ॥२९॥ स्त्रीरत्नभूतानां तासां मध्ये रुक्मिणी मुख्या अष्टौ याः पूर्वमुक्ताः अनुक्रमेण तासां पुत्राश्चोक्ताः ॥३०॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

याः स्त्रियः जगद्गुरुं ब्रह्मादिसर्वपूज्यं श्रीकृष्णं भर्तृबुद्ध्या पादसंवाहनादिभिः प्रेम्णा पर्यचरन् सेवितवत्यस्तासां तपः पुण्यमस्माभिः किं वर्ण्यते कथं वक्तुं शक्यत इत्यर्थः ॥२७॥ सताङ्गतिः कृष्णः एवं वेदोक्तं धर्मं मुहुरनुतिष्ठन् गृहं धर्मादीनां पदमित्यदर्शयत् ॥२८॥ गृहस्थानां परंधर्ममास्थितस्य अनुतिष्ठतः कृष्णस्य अष्टोत्तरेति शेषः, अष्टोत्तरशताधिकं षोडशसाहस्रं महिष्य आसन् ॥२९॥ तासां मध्ये रुक्मिणीप्रमुखा या अष्टौ प्रागुदाहृताः पूर्वं कथितास्तासां पुत्राश्चानुपूर्वशो विशेषतः कथिताः ॥३०॥

अन्वितार्थप्रकाशिका

या इति ॥ याः जगद्गुरुं श्रीकृष्णं भर्तृबुद्ध्या पादसंवाहनादिभिः प्रेम्णा पर्यचरन् सेवितवत्यस्तासां तपः पुण्यमस्माभिः किं वर्ण्यते कथं वक्तुं शक्यते ॥२७॥ एवमिति ॥ सतां गतिः कृष्णः एवं वेदोक्तं धर्मं मुहुरनुतिष्ठन् गृहं धर्मादीनां पदमित्यदर्शयत् ॥२८॥ आस्थितस्येति ॥ गृहस्थानां परंधर्ममास्थितस्य अनुतिष्ठतः कृष्णस्य षोडशेति अत्र अष्टोत्तरेति शेषः । अतः अष्टोत्तरशताधिकं षोडशसाहस्रं महिष्य आसन् ॥२९॥ तासामिति ॥ स्त्रीरत्नभूतानां तासां मध्ये रुक्मिणीप्रमुखा या अष्टौ प्रागुदाहृताः पूर्वं कथितास्तासां पुत्राश्चानुपूर्वशो विशेषतः कथिताः ॥३०॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

याः स्त्रियो भर्तृबुद्ध्या हेतुना प्रेम्णा कृतैः ॥२७॥ गृहधर्मादित्रयाणां पदं स्थानरूपं जनान् अदर्शयत् ॥२८-२९॥ तासां सर्वस्त्रीणां याः वैदर्भीप्रभृतयोऽष्टौ महामहिष्यः प्रागुदाहृताः कथिताः तथा तासामष्टानां पुत्राश्चानुक्रमेणोदाहृताः ॥३०॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

यतस्तासामित्थम्भूतो भावोऽतस्ता अनुमोदते ॥ या इति ॥ जगद्गुरुं सर्वोत्तमं तं श्रीकृष्णं परमपुरुषं सन्तमपीति शेषः । भर्तृबुद्ध्या याः पादसंवाहनादिभिः प्रेम्णा पर्यचरन् समसेवन्त । तासां तपः किं वर्ण्यते ॥२७॥ एवमिति ॥ सतां गतिः श्रीकृष्णः एवमुक्तप्रकारेण वेदोदितं धर्मम् अनुतिष्ठन् गृहं गृहाश्रमं धर्मार्थकामानां पदम् इति मुहुः अदर्शयत् । चोऽवधारणे ॥२८॥ आस्थितस्येति ॥ गृहमेधिनां गृहाश्रमिणां परं धर्मम् आस्थितस्य कृष्णस्य शताधिकं षोडशसाहस्रं, चकारात्तदुपर्यष्टौ च महिष्यः पत्न्यः आसन् ॥२९॥ तासामिति ॥ हे राजन् ! स्त्रीरत्नभूतानां तासां स्त्रीणां मध्ये याः अष्टौ रुक्मिणीप्रमुखाः रुक्मिण्यादयः प्राक् उदाहृताः कथिताः ताः सर्वशः सर्वा अपि सहपुत्राः पुत्रैः सह वर्तमानाः पुत्रवत्यः एवासन्नित्यर्थः । तत्पुत्राश्चानुपूर्वश इति पाठे तासां पुत्राश्च अनुपूर्वशः अभवन्निति शेषः ॥३०॥

कृष्णप्रिया

जिन बडभागीनी स्त्रीयोनें जगद्गुरु भगवान श्रीकृष्ण को अपना पति मानकर परम प्रेमसे उनके चरण कमलोको सहलाया उन्हें नहलाया बुलाया खिलाया पिलाया तरह तरह से उनकस सेवा की उनकी तपस्या का

कृष्णप्रिया

वर्णन तो भला किया ही कैसे जा सकता है ।।२७।। परीक्षित ! भगवान श्रीकृष्ण सत्पुरुषो के एकमात्र आश्रय है । उन्होंने वेदोक्त धर्मका बार बार आपरण करके लोगो को यह बात दिखला दी कि घर ही धर्म अर्थ और काम साधन का स्थान है ।।२८।। ईसीलिये वे गृहस्थोचित श्रेष्ठ धर्म का आश्रय लेकर व्यवहार कर रहे थे । परीक्षित ! मैं तुमसे कह ही चुका हुं कि उनकी रानियों की संख्या थी सोलह हजार एक सौ आठ।।२९।। उन श्रेष्ठ स्त्रियोंमें से रुक्मिणी आदी आठ पटरानीयों और उनके पुत्रो का तो में पहले ही क्रमसे वर्णन कर चुका हुं ।।३०।।

एकैकस्यां दश दश कृष्णोऽजीजनदात्मजान् । यावत्य आत्मनो भार्या अमोघगतिरीश्वरः ।।३१।।
तेषामुद्दामवीर्याणामष्टादश महारथाः । आसन्नुदारयशसस्तेषां नामानि मे शृणु ।।३२।।
प्रद्युम्नश्चारुदेष्णश्च[1] दीप्तिमान् भानुरेव च । साम्बो मधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः ।।३३।।
पुष्करो वेदबाहुश्च [2]श्रुतदेवः सुनन्दनः । [3]चित्रबाहुर्विरूपश्च कविर्न्यग्रोध एव च ।।३४।।

कर्दमक्षमा

अमोघगतिः ईश्वरः कृष्णः आत्मनः यावत्यः भार्याः एकैकस्याम् दश दश आत्मजान् अजीजनत् ।।३१।। उद्दामवीर्याणाम् तेषाम् अष्टादश महारथाः उदारयशसः आसन् तेषाम् नामानि मे शृणु ।।३२।। प्रद्युम्नः चारुदेष्णः च दीप्तिमान् भानुः एव च साम्बः मधुः बृहद्भानुः चित्रभानुः वृकः अरुणः पुष्करः वेदबाहुः श्रुतदेवः सुनन्दनः च चित्रबाहुः विरूपः च कविः एव च न्यग्रोधः ।।३३-३४।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

एवमष्टोत्तरशताधिकषोडशसहस्रमहिषीणां पुत्रा लक्षमेकमशीत्युत्तरैकषष्टिसहस्राणि च भवन्ति ।।३१-३२।। अनिरुद्धश्चेति अतः पुत्राणां मध्ये सप्तदशैव महारथाः ज्ञेयाः अथवा अनिरुद्धनामापि कश्चित्पुत्र एवेति ।।३३-४०।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

तासां सर्वासां पुत्रसङ्ख्यां निगमयति-एवमिति । अमोघरतिरिति सर्वासामवन्ध्यात्वमाह ।।★।। अमोघरतिः अव्यर्थसुरतवृत्तान्तः अव्यर्थसङ्कल्पः ।।३१।। तेषामेकलक्षाशीत्युत्तरषष्टिसहस्राणां मध्ये तेषामष्टादशानाम् ।।★।। ।।०।। ।।३२।। यतोऽनिरुद्धोऽपि महारथत्वेनोक्तोऽतो हेतोः । एवं चाष्टादशमहारथा एतदादौ तेषामुद्दामेत्यादीनां पुत्राणां प्रकृतत्वात्तत्र पौत्रस्वीकारेणास्वारस्यं प्रतीयते तन्निवृत्त्यर्थमाह-अथ वेति ।।★।। ।।०।। ।।३३।। ।।०।। ।।★।। ।।०।। ।।३४।।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवानुस्मारयति एकैकस्यामिति । यावत्यो भार्यास्तावतीष्वेव एकैकस्यां दशदशैवात्मजान् स्वानुरूपान् पुत्रानित्यर्थः । हि यतः अमोघरतिः अव्यर्थसुरतवृत्तान्तः एवं तासु सर्वप्राकट्यसमयं दशैव ऋतवो दशैव च स्वेच्छया तदीयपरमज्योतिर्गमचरमधात्वाधानानि जज्ञिरे इति ज्ञेयम् । तत्र हेतुरीश्वरः इति । तस्येश्वरत्वान्नैतावदेवाश्चर्यमिति भावः ।।३१।। उद्दामवीर्याणामिति यद्यपि सर्वे एव ते महाप्रभावास्तथापि तेषां मध्येऽष्टादशेत्यर्थः । महारथा महाबलविक्रमाः । अत एवोदारयशसः यद्वा महारथा इति वीरत्वे श्रैष्ठ्यं सत्कर्मादावप्याह-उदारेति । मे मत्तः शृण्विति । अन्ये केचित् तेषां नामान्तराण्यप्याहुः । श्रैष्ठ्यनिर्धारणात् मया तु सर्वं निर्धार्यैव कथ्यत इति भावः ।।३२।। प्रद्युम्न इति युग्मकम् । अनिरुद्धादयः केचित्प्रागेकषष्टितमाध्याये उक्ता अपि दीप्तिमांस्ताम्रतप्ताद्या रोहिण्यास्तनया हरेरित्याद्यशब्दाद्गृहीताः । किञ्चनान्यासां कासांचित्पुत्रेषु मुख्या ज्ञेयाः । चित्रबर्हिस्थाने चित्रबाहुः क्वचित् वरूथस्थाने विरूपः क्वचित् ।।३३-३४।।

---

[1] श्चानिरुद्धश्च-श्रीधर. वंशी. वीर. जीव. विश्व ; श्चारुदेष्णश्च-विज. । [2] चक्रदेवः-विज. । [3] चित्रभानुर्वरूथश्च-विज. ।

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१७-५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तदेवाह-एकैकस्याम् इति । अजीजनज्जनयामास । आत्मनः स्वस्य यावत्यो भार्यास्तासामेकैकस्याम् इति सम्बन्धः । तत्र हेतुत्वेन कृष्णं विशिनष्टि-अमोघगतिरप्रतिहतसङ्कल्पः ॥३१॥ तेषामुक्तसङ्ख्यानां पुत्राणां मध्ये उदारयशसः विपुलयशस्विनः ॥३२॥ प्रद्युम्नश्चेति । अनिरुद्धनामापि कश्चित्पौत्रानन्यः पुत्रः ॥३३-३४॥

श्रीमद्विजयध्वजकृता पदरत्नावली

आत्मनो यावत्यो भार्याः तास्वेकस्यामेकस्यां भार्यायां दशदशानात्मजानजीजनत् ॥३१॥ तेषां पुत्राणां मध्ये अष्टादश महारथाः आसन् ॥३३-३४॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२५-४२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२७-४६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२८-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

अमोघरतिः अव्यर्थकामः अव्यर्थसङ्कल्प इति यावत् ॥३१-३२॥ अनिरुद्धनामापि कश्चित्पुत्र एव ज्ञेयः, पुत्रप्रकरणात् ॥३३-४०॥

गूढार्थदीपिनी

ईश्वरः कृष्णः आत्मनो यावत्यो भार्याः तासु एकैकस्यां दश दश पुत्रान् अजीजनदित्यन्वयः । दशास्यां पुत्रानाधेहि इति श्रुतेः । एवं सर्वस्त्रीणां पुत्रसङ्ख्या एकलक्षमशीत्युत्तरैकषष्टिसहस्राणि च सङ्ख्या भवन्ति । १६१०८० इति । अमोघरतिः इति पाठः न तु गतिरिति ॥३१॥ उद्दामवीर्याणां महापराक्रमाणाम् ॥३२॥ प्रद्युम्न इति युग्मम् । अनिरुद्धनामा कश्चिदन्यः पुत्रः एव तदैवाष्टादशसङ्ख्यापूर्तिरनिरुद्धस्य प्रद्युम्नपुत्रत्वात् ॥३३-३४॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

अनिरुद्ध इति । तन्नामापि कृष्णपुत्र एव कश्चिदासीदिति बुध्यते ॥३३-४०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अनुक्तानां सर्वासां तुल्यत्वाय पुत्रादिसम्पत्तिमाह-एकैकस्यां दशदशेति । इच्छया पुत्रत्वव्यावृत्त्यर्थम् आत्मजपदं प्रायिकव्यावृत्त्यर्थं यावत्य इति दश भावा भवन्तीति सर्वेष्वपि भावेषु भगवान् अमोघरतीः फलपर्यवसाने अमोघत्वम् । ननु दशदशैव कथमुत्पादिताः दशास्यां पुत्रानाधेहीति श्रुतेरिति चेत्तथापि नैतल्लोके नियतं तत्राह-ईश्वर इति । अशक्तः श्रुत्यर्थपरिपालनं मा कुर्वन्तु नाम शक्ताः कुर्वन्तीत्यर्थः ॥३१॥ धर्मार्थमेव भगवता पुत्रा उत्पादिता इति अष्टादशविद्यास्थानीयाः अष्टादशपुत्राः महावीर्या निरूप्यन्ते-तेषामुद्दामवीर्याणामिति —

''लक्षं षष्टिसहस्राणि तथाशीतिर्निरूपिताः । केचित्सहस्रमधिकं प्राहुर्नैतन्मतं सताम् ॥''

तेषां पुत्राणां मध्ये अष्टादश महारथाः । सर्व एव च उद्दामवीर्याः वस्तुतस्तु सर्व एव महारथाः । तथापि तावद्भिर्महारथत्वं प्रकटीकृतमिति ज्ञापयति । आसन्निति विद्यानां प्रामाण्यसिद्ध्यर्थं तावद्भिरेव वीर्यं प्रकटीकृतम् । भगवति विद्यमानानां त्वेषां न प्रयोजनम् ॥३२॥ अतो लोकप्रसिद्ध्यर्थं तेषां नामान्याह-प्रद्युम्न इति । द्वितीयश्चारुदेष्णः अनिरुद्ध इति पाठेऽपि पुत्र एव

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

कश्चिदनिरुद्धः । तेषाम् अपि पुत्राः शतश इति पौत्राणां मध्ये एकेनैव महारथत्वं प्रकटीकृतमिति तमाह-एतेषामपीति। मधुद्विषस्तनुजानामिति अत्यन्तं सामर्थ्यं निरूपितम् । तत्रापि प्रथमस्य विशेषमाह-प्रद्युम्न आसीत् प्रथम इति । तस्य विशेषतो निरूपणस्य प्रयोजनमाह-पितृवदिति । वैशिष्ट्ये हेतुमाह-प्रथमो रुक्मिणीसुत इति रुक्मिणी श्रेष्ठा तत्रापि प्रथमो वीर्यवत्तरो भवति ॥३३-३५॥

श्रीसुबोधिनीसारः

सर्वपुत्रसङ्ख्यामाह । यावत्यः आत्मनः स्वस्य भार्याः पत्न्यः तासु एकैकस्यां प्रत्येकं दशदशात्मजान् अचिन्त्यलीलः कृष्णो भगवान् अजीजनत् । लक्षमेकमशीत्युत्तरैकषटिसहस्राणि पुत्रा इति भावः ॥३१॥ उद्दामवीर्याणां महाबलानां तेषां मध्येऽष्टादशमहारथा उदारकीर्तय आसन् तेषां नामानि मे मत्तः शृणु ॥३२॥ स्पष्टं पाठस्यैवार्थत्वात् ॥३३-३४॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

सामान्यतस्तु यावन्त्यः आत्मनो भार्यास्तासु एकैकस्यां दश दश पुत्रान् कृष्णोऽजीजनत् । तत्र हेतुमाह-अमोघरतिरिति । सत्यसङ्कल्पः ॥ तत्र हेतुमाह-ईश्वर इति । तथा चैकं लक्षमशीत्युत्तरैकषष्टिसहस्राणि पुत्रा जाताः ॥३१॥ तेषां पुत्राणां मध्ये अष्टादश पुत्रा महारथाः, अत एव उदारयशसो विपुलकीर्तयः आसन् ॥३२॥ तेषां नामान्याह-प्रद्युम्नश्चेति द्वाभ्याम् । अनिरुद्धनामापि कश्चित्पुत्र एव पौत्रस्य पृथक्कथनात् ॥३३-३४॥

अन्वितार्थप्रकाशिका

एकेति ॥ अमोघरतिः अव्यर्थसुरतान्तः "दशास्यां पुत्रानाधेहि" इतिश्रुत्यनुसारिसत्यसङ्कल्प इति भावः । ईश्वरः कृष्णः यावन्त्य आत्मनो भार्यास्तासु एकैकस्यां दश दश पुत्रान् अजीजनत् तथा चैकं लक्षमशीत्युत्तरैकषष्टिसहस्राणि पुत्रा जाताः ॥३१॥ तेषामिति ॥ तेषां पुत्राणां मध्ये अष्टादश पुत्रा महारथा अत एव उदारयशसो विपुलकीर्तयः आसन् तेषां नामानि शृणु ॥३२॥ प्रद्युम्नश्चेति द्वयम् ॥ अनिरुद्धस्यापि गणनात्पुत्रेषु सप्तदशैव महारथा ज्ञेयाः । अथवा अनिरुद्धनामापि कश्चित्पुत्र एव पौत्रस्य पृथक्कथनात् । विरूप इति पूर्वं वरूथनाम्नोक्त इति तोषिणी ॥३३-३४॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

आत्मनः स्वस्य श्रीकृष्णस्य यावत्यो भार्याः सन्ति तासां मध्ये पृथक् पृथक् एकैकस्यां भार्यायां श्रीकृष्णः दश दश आत्मजानजीजनत् अष्टोत्तरशताधिकषोडशसहस्रपत्नीनां सुताः एकलक्षमशीत्यधिकैकषष्टिसहस्राणि च अभवन् ॥३१॥ महारथाः महावीराः उदारयशसः सत्कर्मतत्पराः ॥३२॥ अनिरुद्धः प्रद्युम्नपुत्रोऽपि रुक्मिणीपौत्रत्वात् पुत्र एव महारथत्वात्कृष्णपत्नीनां महारथाष्टादशपुत्रगणनायां गणितः ॥३३-३४-३५॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एकैकस्यामिति ॥ अमोघगतिरप्रतिहतसङ्कल्पः ईश्वरः परमेश्वरः कृष्णः आत्मनः स्वस्य यावत्यः भार्याः तासां मध्ये एकैकस्यां भार्यायां दश दश आत्मजान् अजीजनज्जनयामास । एवमष्टोत्तरशताधिकषोडशसहस्रमहिषीणां पुत्राः लक्षमेकमशीत्युत्तरैकषष्टिसहस्राणि च भवन्ति ॥३१॥ तेषामिति ॥ उद्दामवीर्याणां महावीर्यवतां तेषां पुत्राणां मध्ये उदारयशसः विपुलयशस्विनः अष्टादश महारथाः आसन् । तेषां नामानि मे मत्तः शृणु 'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्रशास्त्रप्रवणश्च स महारथ उच्यते' इति महारथलक्षणम् ॥३२॥ प्रद्युम्न इति ॥ प्रद्युम्नः चकारस्तेष्वस्य महत्त्वबोधकः । अनिरुद्धः चकार एतन्नामा पौत्रादनिरुद्धादन्य एवायं कश्चित् कृष्णपुत्र इति ज्ञापयति । केचित्त्वस्य पौत्रत्वेऽपि रुक्मिणीपुत्रपुत्रोऽपि प्रतापातिशयात् तत्पुत्रत्वे गणित इत्याहुः । दीप्तिमान्, भानुः एवेत्यवधारणमस्यासमानताद्योतकम् । साम्बः च, चकारोऽस्य सौन्दर्यातिशयत्वद्योतनार्थकः । धनुः चित्रभानुः बृहद्भानुः वृकः अरुणः ॥३३॥ पुष्कर इति ॥ पुष्करः वेदबाहुः चकारोऽस्य

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

वेदोक्तकर्मादरातिशयं गमयति । श्रुतदेवः सुनन्दनः चित्रबाहुः विरूपः चकारो विरूपनामत्वेऽपि सरूपतावगमकत्वार्थकः । कविः एव, एवकारोऽस्यान्वर्थनामतां गमयति । न्यग्रोधः, चकारोऽस्य वैरिन्यक्करणतावगमनार्थकः ॥३४॥

कृष्णप्रिया

उनके अतिरिक्त भगवान श्रीकृष्ण की और जितनी पत्नीयां थी उनसे भी प्रत्येक के दस दस पुत्र उत्पन्न किये । यह कोई आश्चर्य की बात नहीं है । क्योंकि भगवान सर्व शक्तीमान और सत्व संकल्प है ॥३१॥ भगवान के परम पराक्रमी पुत्रोमें अठारह तो महारथी थे जिनका यश सारे जगत में फैला हुआ था । उनके नाम मुझसे सुनो ॥३२॥ प्रद्युम्न, अनिरुद्ध, दीप्तिमान, कानु, साम्ब, मधु, चित्रभानु, वृक, अरुण, पुष्कर, वेदबाहु, श्रृतदेव, समन्दन, चित्रबाह, क्ष्क, अरुणपुश्कर, विरुप कवि और व्यग्रोघ ॥३३-३४॥

[1]एतेषामपि राजेन्द्र तनुजानां मधुद्विषः । प्रद्युम्न आसीत् प्रथमः पितृवद् रुक्मिणीसुः ॥३५॥
स रुक्मिणो दुहितरमुपयेमे महारथः । [2]तस्मात् सुतोऽनिरुद्धोऽभून्नागायुतबलान्वितः ॥३६॥
स चापि रुक्मिणः पुत्रीं दौहित्रो जगृहे ततः । वज्रस्तस्यामभूद् [3]यस्तु मौसलादवशेषितः ॥३७॥
प्रतिबाहुरभूत्तस्य[4] सुबाहुस्तस्य चात्मजः । सुबाहोः [5]शान्तसेनोऽभूच्छतसेनस्तु तत्सुतः ॥३८॥

कर्दमक्षमा

राजेन्द्र मधुद्विषः एतेषाम् तनुजानाम् अपि रुक्मिणीसुतः प्रद्युम्नः पितृवत् प्रथमः आसीत् ॥३५॥ सः महारथः रुक्मिणः दुहितरम् उपयेमे तस्मात् नागायुतबलान्वितः सुतः अनिरुद्धः अभूत् ॥३६॥ स अपि दौहित्रः च रुक्मिणः पुत्रीम् जगृहे ततः तस्याम् यः तु मौसलात् अवशेषितः वज्रः अभूत् ॥३७॥ तस्य प्रतिबाहुः अभूत् तस्य च आत्मजः सुबाहुः सुबाहोः शान्तसेनः तत्सुतः तु शतसेनः अभूत् ॥३८॥

श्रीधरस्वामिविरचिता भावार्थदीपिका ॥३३-४०॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतेषामुक्तानुक्तानां मध्ये प्रथमः सर्वज्येष्ठः पितृवत्सर्वकर्माणीति ॥★॥ हे राजेन्द्रेति । राजकुले सर्वत्र प्रसिद्ध्या त्वया विज्ञायत एवेति भावः । यद्वा-अल्पराज्ञां स्वकृत्याविष्टचेतस्त्वाच्छ्रीकृष्णलीलाश्रवणावकाशो न भवति तव तु त एव किंकरत्वात् सर्वं कुर्वन्त्यतः श्रीकृष्णलीलालब्धावकाशत्वात्त्वं राजेन्द्रोऽसीति भावः । "बालक्रीडनकैश्चापि कृष्णलीलां य आददे" इत्याद्युक्तेः ॥३५॥ स प्रद्युम्नः । तस्मात्प्रद्युम्नात् ॥★॥ महारथ इति राजवर्गनिर्जयेन युद्धमध्ये रुक्मवतीहरणात् । ततस्तस्मात् प्रद्युम्नात् नागायुतस्य बलेनान्वित इति च लोकलीलानुकरणरीत्यैव वस्तुतस्त्वीश्वर एवेति ॥३६॥ स चाप्यनिरुद्धोऽपि । ततस्तदनन्तरम् । तस्यानिरुद्धस्य यो वज्रः । मौसलान्मुसलकृतादुपप्लवात् ॥★॥ न केवलं श्रीप्रद्युम्न एव मातुलेयीमुपयेमे किन्त्वनिरुद्धोऽपीति चापि-शब्दार्थः । दौहित्रो रुक्मिण इत्यन्वेति ॥३७॥ तस्माद्वज्रात् । तस्य च प्रतिबाहोः । तत्सुतः शान्तसेनसुतः ॥★॥ भद्रसेनस्य पुत्रादीनामनुक्तिः प्रायः साङ्कर्यादिवंशलोपारम्भात् । श्रुतसेनस्त्विति क्वचित्पाठः ॥३८॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

मधुद्विष इति । पितृपराक्रमवत्पुत्राणामपि पराक्रमः सूचितः । तथापि तेषां मध्ये प्रथमः श्रेष्ठः । तत्र हेतुः-पितृवदिति ।

---

१. श्लोकद्वयमधिकं-वीर. विज. । त्रिवक्राया .....

२. तस्यां ततो-विज. । ३. भवद्-श्रीधर. वंशी. वीर. विज. । ४. स्मात्-श्रीधर. वंशी. वीर. विज. । ५. धर्मसेनोऽभू-वीर. ; उग्रसेनोऽभू-विज. ; भद्रसेन-इति कस्यचित् ।

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

पितृतुल्यत्वादित्यर्थः । तत्रापि हेतुः-रुक्मिणीसुत इति । सर्वमहिषीश्रेष्ठाया: श्रेष्ठपुत्रत्वादित्यर्थः । हे राजेन्द्रेति राजकुले सर्वत्र प्रसिद्ध्या त्वया विज्ञायत एवेति भावः ॥३५॥ महारथ इति राजवर्गनिर्जयेन युद्धमध्ये रुक्मवतीहरणात् । ततस्तस्मात् प्रद्युम्नात् नागायुतस्य बलेनान्वित इति च लोकलीलानुकरणरीत्यैव वस्तुतस्त्वीश्वर एवेति ॥३६॥ न केवलं श्रीप्रद्युम्न एव मातुलेयीमुपयेमे किन्त्वनिरुद्धोऽपीति चापि-शब्दार्थः । दौहित्रो रुक्मिण एव ततस्तस्मादनिरुद्धात् ॥३७॥ भद्रसेनस्य पुत्रादीनामनुक्तिः प्रायः साङ्कर्यादिवंशलोपारम्भात् । श्रुतसेनस्त्विति पाठः क्वचित् ॥३८॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१७-५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

(१. श्लोकद्वयमधिकं वीर. विज. ———

त्रिवक्राया °विशोकश्च पुत्रः कृष्णमनुव्रतः । °°आसीच्छिष्यो नारदस्य ददौ चित्तमखण्डितम् ॥ क ॥

येनोक्तं सात्वतं तन्त्रं यज्ज्ञात्वा *मूर्तिमान् भवेत् । यत्र स्त्रीशूद्रदासानां संस्कारो वैष्णवः स्मृतः ॥ ख ॥

तत्र वीरः – ०. उपक्रोशः । ००. शिष्यः साक्षान्नारदस्य दधौ । ★. मुक्तिमान् भवेत् ।)

(त्रिवक्राया इति । उपक्रोशो नाम त्रिवक्रायाः पुत्रः । स तु कृष्णमनुव्रतः अनुवर्तमानः साक्षान्नारदस्य शिष्यो भूत्वा अखण्डितमविच्छिन्नं यथा तथा चित्तं दधौ भगवत्समानिधिनष्ठो बभूवेत्यर्थः ॥ क ॥ तमेव विशिनष्टि-तवेति । सात्वतं पञ्चरात्रम् उक्तं सात्वतमन्त्रार्थविषयः कश्चिद्ग्रन्थविशेषः । प्रतिपत्तिसौकर्याय सङ्ग्रहविस्तररूपेण कृत इत्यर्थः । तस्यानादिशास्त्रस्यार्वाचीनत्वायोगात्तन्त्रं विशिनष्टि-यदिति । स्त्रीशूद्रादीनामपि वैष्णवः विष्णुप्रापकः संस्कारस्तापपुण्ड्रादिसंस्कारः स्मृत ॥ ख ॥)

एतेषामपीति । मधुद्विषः श्रीकृष्णस्य तनूजानां पुत्राणामेतेषामष्टादशानां मध्ये यः प्रद्युम्नः रुक्मिणीपुत्रः पितृवद्रूपेण गुणैश्च पितृतुल्यः सर्वेषां प्रथमः आसीत् ॥३५॥ स प्रद्युम्नः रुक्मिणो मातुलस्य दुहितरमुपयेमे परिणीतवान् । तस्यां भार्यायां ततः प्रद्युम्नादनिरुद्धो नाम नागायुतबलः तस्य बले पुत्रोऽभूत् ॥३६॥ स चाप्यनिरुद्धोऽपि रुक्मिणो दौहित्रः तस्य पौत्रीं जगृहे उपयेमे । ततोऽनिरुद्धात्तस्यां वज्रो नाम पुत्रो बभूव । तं वज्रं विशिनष्टि-यस्त्विति । (मोसलात्(ब्राह्मण)शापप्रयुक्त-यदुकुलक्षयकारान्मुशलादवशेषित इत्यर्थः । कृष्णेनेति शेषः ॥३७॥ तस्माद्वज्रात्प्रतिबाहुः तस्य प्रतिबाहोरात्मजः सुबाहुः तत्सुतः धर्मसेनसुतः श्रुतसेनः ॥३८॥

श्रीमद्विजयध्वजकृता पदरत्नावली

त्रिवक्रायाः सैरन्ध्र्याः स नारदस्तस्मै स्वशिष्याय अखण्डितं चित्तं पूर्वानुभवस्मरणसमर्थं ज्ञानं ददौ ॥ क ॥ येन नारदेन सात्वतं तन्त्रं पञ्चरात्रसंहिता । यत् यं ज्ञात्वा पुमान् मूर्तिमान् निजरूपाभिव्यक्तिमान् भवेत् । यत्र यस्मिंस्तन्त्रे स्त्रीशूद्रादीनां विष्णवः संस्कारः स्मृतः विष्णुविषयानुष्ठानेन शरीरशुद्धिः कथिता ॥ ख ॥

तनुजानां पुत्राणाम् ॥३५-३६॥ पौत्रीं पुत्रपुत्रीम् । दौहित्रः दुहितुः पुत्रः अनिरुद्धः—

''निहते रुक्मिणीश्याले नाब्रवीत् साध्वसाधु वा । रुक्मिणीबलयो राजन् स्नेहभङ्गभयाद्धरिः ॥''

इत्यनेन सर्वसमस्य हरेः स्नेहभङ्गभयमुच्यते तत्कथं घटत इतीयमाशङ्का —

''न स्नेहभङ्गो देव्यास्तु न भयं केशवस्य च । स्नेहभीत इवाथापि नोचे रुक्मिवधे हरिः ॥''

इत्यादिना परिहर्तव्या । अत्र श्रीमद्भगवत्पादैः सिंहावलोकनन्यायेनाध्यायेयत्तासूचनाय चेदं प्रमाणमुक्तम् । मौसलान्मुसलयुद्धात् ॥३७-३८॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२५-४२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२७-४६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२८-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी ॥३३-४०॥

गूढार्थदीपिनी

मधुद्विषः कृष्णस्य तनुजानां पुत्राणां मध्ये । रूपेण गुणैश्च पितृवत् ॥३५॥ रुक्मिणो मातुलस्य दुहितरम् उपयेमे विवाहितवान् । नागानां गजानामयुतं दशसहस्रं तस्य बलेन अन्वितः ॥३६॥ स चापि अनिरुद्धः रुक्मिणोऽपि दौहित्रोऽपि तस्यैव पौत्रीं जगृहे उपयेमे । यस्तु वज्रो मौसलात् मुसलनिमित्तकयदुकुलक्षयात् भगवता अवशेषितः ॥३७-३८-३९॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः ॥३३-४०॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

वंशनिरूपणप्रस्तावे नवमस्कन्धशेषे भगवन्निरूपित इति मध्ये प्रश्नानुरोधेन वीर्याण्यपि निरूप्य तदन्ते शिष्टं वंशमाह-स रुक्मिणो दुहितरमिति । महारथ इति जित्वा हरणं द्योतितम् । ततः प्रद्युम्नात् अनिरुद्धोऽभूत् । तस्य विशेषतो निरूपणे प्रयोजनमाह-नागायुतबलान्वित इति भावः ॥३६॥ ततोऽपि वंशमाह-स चापीति । रुक्मिणः पौत्रीं दौहित्र इति पदत्रयेण मूलदोषसंसर्गदोषौ निरूप्य तादृश्य एव कलौ स्थास्यन्तीति ज्ञापितं तदाह-वज्रस्तस्यामभूदिति । मौशलबुद्धादवशेषितः उर्वरितः । ततोऽपि वंशमाह-प्रतिबाहुरभूत्तस्येति । तस्य वज्रनाभस्य प्रतिबाहुः पुत्रोऽभूत् । तस्य च सुबाहुः सुबाहोः शान्तिसेनः तस्य च श्रुतसेन इति चतुर्विधपुरुषार्थसाधकाश्चत्वारो निरूपिताः ॥३७-३८॥

श्रीसुबोधिनीसारः

हे राजेन्द्र ! मधुद्विषः श्रीकृष्णयैतेषां तनुजानां पुत्राणां मध्ये रुक्मिण्याः सुतः प्रद्युम्नः प्रथम आसीत् पितृवत् पितेव ॥३५॥ महारथः स रुक्मिणो दुहितरं पुत्रीम् उपयेमे परिणीतवान् तस्मादनिरुद्धः सुतोऽभूत् नागायुतस्य दशसहस्रगजानां बलेनान्वितो युक्तः ॥३६॥ दौहित्रोऽपि सोऽनिरुद्धो रुक्मिणः पौत्रीं जगृहे । परिणिन्ये । ततः तस्य वज्रो वज्रनाभः सुतोऽभूत् यश्च मौसलात् मुसलजनितयुदकुलनाशादवशेषित उर्वरितः ॥३७॥ तस्मात् वज्रात् प्रतिबाहुरभूत् तस्यात्मजः सुबाहुः सुबाहोः शान्तसेनोऽभूत् तस्य सुतः शतसेनः ॥३८॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

हे राजेन्द्र ! एतेषां मधुद्विषः कृष्णस्य पुत्राणां मध्ये प्रथमः पुत्रः रुक्मिणीसुतः प्रद्युम्नः पितृवत् रूपेण गुणैश्च पितृतुल्य आसीदित्यन्वयः ॥३५॥ स च महारथः प्रद्युम्नः रुक्मिणो मातुलस्य दुहितरमुपयेमे । तस्मात् प्रद्युम्नात् नागानां हस्तिनां यदयुतं दशसहस्रं तस्य तद्बलं तेनान्वितो युक्तः अनिरुद्धाख्यः पुत्रोऽभूत् ॥३६॥ स चाप्यनिरुद्धो रुक्मिणो दौहित्रोऽपि तस्यैव पौत्रीं जगृहे उपयेमे । ततोऽनिरुद्धात् तस्यां वज्रो नाम पुत्रोऽभूत् यस्तु वज्रो मौसलात् मुसलनिमित्तयदुकुलक्षयात् भगवता अवशेषितः ॥३७॥ तस्मात् वज्रात् प्रतिबाहुरभूत्, तस्य प्रतिबाहोरात्मजः सुबाहुः, सुबाहोर्धर्मसेनाख्यः सुतः अभूत्, तस्य च सुतः श्रुतसेनोऽभूत् ॥३८॥

अन्वितार्थप्रकाशिका

एतेषामिति ॥ हे राजेन्द्र ! एतेषां मधुद्विषः कृष्णस्य पुत्राणां मध्ये प्रथमः पुत्रः रुक्मिणीसुतः प्रद्युम्नः पितृवत् रूपेण गुणैश्च पितृतुल्य आसीत् ॥३५॥ स इति ॥ स च महारथः प्रद्युम्नः रुक्मिणो मातुलस्य दुहितरमुपयेमे तस्मात् प्रद्युम्नात् नागानां हस्तिनां यदयुतं दशसहस्रं तस्य तद्बलं तेनान्वितो युक्तः अनिरुद्धाख्यः पुत्रोऽभूत् ॥३६॥ स इति ॥ स चाप्यनिरुद्धो रुक्मिणो

अन्वितार्थप्रकाशिका

दौहित्रोऽपि तस्यैव पौत्रीं जगृहे उपयेमे। ततोऽनिरुद्धात् तस्यां वज्रो नाम पुत्रोऽभूत्। यस्तु वज्रो मौसलात् मुसलनिमित्तयदुकुलक्षयात् भगवता अवशेषितः ॥३७॥ प्रतीति ॥ तस्माद्वज्रात् प्रतिबाहुरभूत् तस्य प्रतिबाहोरात्मजः सुबाहुः सुबाहोर्धर्मसेनाख्यः सुतः अभूत्। तस्य च सुतः श्रुतसेनोऽभूत्। अग्रे वंशानुक्तिः साङ्कर्यादिना वंशलोपारम्भात् इति तोषिणीसारे ॥३८॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

स चापि अनिरुद्धोऽपि दौहित्रः पुत्रीपुत्रः पौत्रीं पुत्रपुत्रीम्। वज्रो वज्रनाभसंज्ञः ॥३७-३८॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

एतेषामिति ॥ हे राजेन्द्र ! मधुद्विषः श्रीकृष्णस्य एतेषामष्टादशानाम् अपि तनूजानां पुत्राणां मध्ये रुक्मिणीसुतः प्रद्युम्नः पितृवत् रूपेण गुणैश्च पितृतुल्यः अत एव प्रथमः जन्मना गुणादिभिश्च मुख्य एव आसीत् ॥३५॥ स इति ॥ महारथः सः प्रद्युम्नः रुक्मिणः मातुलस्य दुहितरम् उपयेमे परिणीतवान्। तस्यां रुक्मिणः पुत्र्यां प्रद्युम्नादिति शेषः। नागायुतबलान्वितः अनिरुद्धः सुतः अभूत् ॥३६॥ स चेति ॥ स च सोऽनिरुद्धोऽपि रुक्मिणः दौहित्रः सन्नपि, तस्य रुक्मिणः पुत्रसुतां जगृहे उपयेमे। ततोऽनिरुद्धात् तस्यां रुक्मिणः पौत्र्यां वज्रः अभवत्। वज्रं विशिनष्टि। यो वज्रस्तु मौसलात् ब्राह्मणशापप्रयुक्तयदुकुलक्षपणकरात् मुसलात् अवशेषितः। श्रीकृष्णेन स एक एवावशेषितः इति भावः ॥३७॥ प्रतिबाहुरिति ॥ तस्माद्वज्रनाभात् प्रतिबाहुः, तस्य प्रतिबाहोः, चोऽप्यर्थे। आत्मजः सुबाहुः, सुबाहोः धर्मसेनः, क्वचित् शान्तसेन इति पाठः। अभूत्। तत्सुतो धर्मसेनसुतः श्रुतसेनः, तुरवधारणार्थः। अत्र क्वचित् शतसेन इति पाठः ॥३८॥

कृष्णप्रिया

राजेन्द्र भगवान श्रीकृष्ण इन पुत्रोमें भी सबसे श्रेष्ठ रुक्मिणीनन्दन प्रद्युम्नजी थे। वे सभी गुणोमें अपने पिताके समान ही थे ॥३५॥ महारथी प्रद्युम्नने रुक्मी की कन्यासे अपना विवाह किया था। उसी के गर्भ से अनिरुद्धजी का जन्म हुआ उनमें दश हजार हाथीओका बल था ॥३६॥रुक्मी के दौहित्र अनिरुद्धजी ने अपने नानी के पोती से विवाह किया था उसके गर्भ से वज्र का जन्म हुआ ब्राह्मणो के श्रापसे पैदा हुओ मुसल के द्वारा यह वंशका नाश हो जाने पर एकमात्र वे ही बच रहे थे ॥३७॥ वज्र के पुत्र है प्रतिबाहु, प्रतिबाहु के सुबाहु सुबाहु के शान्तसेन और शान्तसेन के शतसेन ॥३८॥

न ह्येतस्मिन् कुले [1]राजन् अधना अबहुप्रजाः। अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे ॥३९॥
यदुवंशप्रसूतानां पुंसां विख्यातकर्मणाम्। संख्या न शक्यते कर्तुमपि वर्षायुतैर्नृप ॥४०॥
तिस्रः कोट्यः सहस्राणामष्टाशीतिशतानि च। आसन् यदुकुलाचार्याः कुमाराणामिति [2]श्रुतम् ॥४१॥
संख्यानं यादवानां कः करिष्यति महात्मनाम्। यत्राहुतानाम[3]युतलक्षेणास्ते स [4]आहुकः ॥४२॥

कर्दमक्षमा

राजन्, एतस्मिन्, कुले, हि, अधनाः, अबहुप्रजाः, अल्पायुषः, अल्पवीर्याः, अब्रह्मण्याः, न, जज्ञिरे ॥३९॥ नृप, यदुवंशप्रसूतानाम्, विख्यातकर्मणाम्, पुंसाम्, वर्षायुतैः, अपि, सङ्ख्या, कर्तुम्, न, शक्यते ॥४०॥ सहस्राणाम्, तिस्रः, कोट्यः, अशीतिशतानि, च, कुमाराणाम्, यदुकुलाचार्याः, आसन्, इति, श्रुतम् ॥४१॥ यत्र, आहुतानाम्, सः, आहुकः, आस्ते, महात्मनाम्, यादवानाम्, सङ्ख्यानम्, कः, करिष्यति ॥४२॥

---

१. जाता-श्रीधर. वंशी. वीर. विज.। २. श्रुतिः-इति कस्यचित्। ३. मयुतलक्षपुत्रः स-वीर. ; मयुतं रक्षन्नास्ते स-विज.। ४. सदाहुकः-इति कस्यचित्।

श्रीधरस्वामिविरचिता भावार्थदीपिका

सहस्राणामपरिमितानां कुमाराणामित्यन्वयः ॥४१॥ यदा प्रत्येकं बहूनध्यापयतामाचार्याणामियं सङ्ख्या तदपि श्रुतमात्रं तु न तु सम्यग् ज्ञायते तदा कुमाराणामेवं सङ्ख्यानं कर्तुं न शक्यते कुतः पुनः सर्वयादवानामिति ॥४२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एतस्मिन् कुले श्रीकृष्णकुले ॥★॥ अस्मिन्भगवत्कुले । शुद्धक्षत्रियपितृमातृपर्यन्तमधनादयो नासन्निति ज्ञेयम् ॥३९॥ ॥०॥ ॥★॥ विख्यातकर्मणामपि किम्पुनरन्येषामित्यर्थः । अत एव श्रीमाथुरेषु प्रसिद्धिरियं बद्धमुकुटा राजान एव यादवाः षट्पञ्चाशत्कोटय इति ॥४०॥ यदूनां सङ्ख्याया अभावेऽपि पद्बालाचार्याणां कामपि सङ्ख्यां श्रावयामीत्याह–तिस्र इति । यदुकुले सहस्राणामनन्तानां कुमाराणां तिस्रः कोट्योऽष्टाशीतिशतानि चाचार्या आसन्नित्यन्वयः । अत्र यदुकुले आचार्या इति च्छेदः यलोपस्यासिद्धत्वेऽपि सन्धिर्त्वार्षः । तीर्थस्तु – "आसन्यदुकुमाराणामाचार्या इति नः श्रुतम्" इति पाठमाह । इति श्रुतिरिति पाठे, इत्थं श्रूयत इत्यर्थः ॥★॥ सङ्ख्यऽशक्तौ हेतुमाह–तिस्र इति । एकम् एकम् सहस्रमेकस्याचार्यस्येत्याचार्यसङ्ख्यैव अस्य पद्यस्य योजना पूर्वमेवास्माभिरलेखि समञ्जसा ॥४१॥ यत्र येषां यदूनामयुतानामयुतलक्षेण पद्मपरिमितेन सैन्येन सदास्ते इति । आस्तां तावत्सर्वेषां सङ्ख्या नित्यराजसेवकानामपि सा किलाशक्येत्याह–सङ्ख्यानमिति । महात्म्नां मुख्यानामपि । अयुतानामिति बहुत्वं कपिञ्जलाधिकरणन्यायेन त्रित्वविशिष्टायां सङ्ख्यायां पर्यवसायितम् । अयुतानामयुतलक्षेण बिन्दुत्रयोदशयुक्तेनाङ्कत्रयेण शङ्कत्रयेणेत्यर्थः । आसीदिति वक्तव्ये आस्त इति नित्यलीलास्फूर्त्योक्तम् । सा चाग्रे स्थापयिष्यते ॥४२॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

एतस्मिन् भगवत्कुले । शुद्धक्षत्रियपितृमातृपर्यन्ते अधनाः धनहीनाः ॥३९॥ विख्यातकर्मणामपि किम्पुनरन्येषामित्यर्थः । अत एव श्रीमाथुरेषु प्रसिद्धिरियं बद्धमुकुटा राजान·एव यादवाः षट्पञ्चाशत्कोटय इति ॥४०॥ सङ्ख्यानाशक्तौ हेतुमाह–तिस्र इति । यदुकुलस्याचार्याः अध्यापकाः सहस्राणां कुमाराणाम् इत्यन्वयादेकमेकं सहस्रमेकस्याचार्यस्य शिष्यमित्याचार्यसङ्ख्यैव सहस्रगुणिता कुमाराणां सङ्ख्येति भावः । इत्येतच्छ्रुतं प्रसिद्धमेवेत्यर्थः । श्रुतिरिति पाठः क्वचित् ॥४१॥ अहो आस्तां तावत् सर्वेषां सङ्ख्या नित्यराजसेवकानामपि सा किलाशक्येत्याह–सङ्ख्यानमिति । महात्मनां मुख्यानामपि यत्र येषु मध्ये अयुतेनायुतलक्षेण बिन्दुत्रयोदशयुक्तैनैकांकेन सङ्ख्याख्येन सह अयुतानामिति बहुत्वेन त्रित्वं चेत् शङ्कत्रयेणेत्यर्थः । स इति पाठः क्वचित् । आसीदिति वक्तव्ये आस्त इति नित्यलीलास्फूर्त्या । सा चाग्रे स्थापयिष्यते ॥४२॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१७-५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

सर्वान् वंश्यान् विशिनष्टि–न हीति । अधना निर्धनाः ॥३९॥ तेषामानन्त्यमाह–यदुवंशप्रसूतानामिति ॥४०॥ तदेव कैमुत्यनयाभिप्रायेणाह–तिस्रः कोट्य इति । यदुकुलस्याचार्यास्तत्कुमाराणामनुशिक्षका अध्यापकाः तिस्रः कोट्यः सहस्राणाम् अष्टाशीतिः शतानि च सहस्राण्यध्यापका एवैतावन्तः, किम्पुनस्त इत्यर्थः ॥४१॥ एकस्य वसुदेवस्यैव वंशजानां सङ्ख्यैवम्भूता किं पुनः सर्वेषां सम्भूतानामित्याह–सङ्ख्यानमिति । यत्र यदूनां वंशजो य आहुको वसुदेवः स एवायुतानामयुतलक्षपुत्रः ॥४२॥

श्रीमद्विजयध्वजकृता पदरत्नावली

एतस्मिन् कुले अधनादिदोषयुक्ता न जज्ञिर इत्यन्वयः ॥३९॥ तेषां यदुवंशप्रसूतानाम् ॥४०॥ सङ्ख्याज्ञानाभावेऽपि तदाचार्याणां सङ्ख्या कामपि श्रवयामीत्याह–तिस्र इति ॥४१॥ यत्र येषाम् ॥४२॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः ॥२५-४२॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२७-४६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२८-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

यदुकुलस्था आचार्याः अध्यापकाः अष्टाशीतिशताधिकाः तिस्रः कोट्यः सहस्राणामसङ्ख्यानां कुमाराणामित्यर्थः ॥४१॥ अयुतानामिति बहुवचनं कपिञ्जलाधिकरणन्यायेन । त्रित्वविशिष्टायां सङ्ख्यायां पर्यवसायितम् अयुतानाम् अयुतलक्षेण बिन्दुत्रयोदशयुक्तेन त्रयेण शङ्खत्रयेणेत्यर्थः । आसीदिति वक्तव्ये आस्त इति नित्यलीलास्फूर्त्या उक्तम् ॥४२-४३॥

गूढार्थदीपिनी

बद्धमुकुटा राजान एव यादवाः षट्पञ्चाशत्कोटय आसन् ॥४०॥ सहस्राणामनन्तानां कुमाराणामित्यत्रान्वेति । श्रुतं श्रुतमात्रं न तु ज्ञायते ॥४१॥ यत्र येषु मध्ये । आहुकः उग्रसेन आस्ते । अत्रायुतानामिति बहुत्वे सङ्ख्या त्रित्वे पर्यवस्यति कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते इति न्यायात् । तेन अयुतानामयुतलक्षेण बिन्दुत्रयोदशयुक्तेनाङ्कत्रयेण शङ्खत्रयेणेत्यर्थः ॥ ३०००००००००००००० ॥४२॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

सहस्राणां बहूनां कुमाराणाम् ॥४१-४४॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

अन्येषां पुरुषार्थपर्यवसानं न भविष्यतीत्याशङ्क्य तन्निराकरणार्थमाह- न ह्येतस्मिन् कुल इति । यादवकुले । राजन्निति सम्बोधनं सम्मत्यर्थम् । अधना दरिद्राः अबहुप्रजाः यष्टव्या बहवः पुत्रा इति वाक्यात् न केऽप्यपेक्षितपुत्रविहीना इत्यर्थः । एतद्बहिरङ्गद्वयम् । आन्तरमाह-अल्पायुषोऽल्पवीर्याश्चेति । एवं चतुर्भिर्गार्हस्थ्यं निरूप्य ब्रह्मचर्यमिव निरूपयन्नाह-अब्रह्मण्याश्चेति ॥३९॥

"अर्थकामौ तथा धर्मश्चिरजीवित्वमेव च । एतत्साधारणं प्रोक्तं वीर्यं तु क्षत्रियत्वतः ॥"

ज्ञानार्थं तेषां सङ्ख्यावक्तव्येत्याह-यदुवंशप्रसूतानामिति । सङ्ख्या वर्तते परं कर्तुम् अशक्या अज्ञानमेव महत्त्वसूचकमिति न योगजधर्मेण ज्ञात्वा कथनम् एकेन पुरुषेण मार्कण्डेयवच्चिरजीविनामपि वर्षायुतैरपि तेषां सङ्ख्या कर्तुम् अशक्येत्यर्थः । तर्हि कथं परिज्ञानं कोट्यर्बुदसङ्ख्याया बुद्धिः पर्यवसितेति चेत्तत्राह-तिस्रः कोट्य इति । आदौ सहस्राणां तिस्रः कोट्यः त्रिंशदर्बुदानि । तत अष्टाशीतिशतानि च अष्टाधिकान्यशीतिशतानि लक्षसङ्ख्या भगवत्पुत्रेष्वेव निरूपितेति कोटिसङ्ख्यां सहस्रसङ्ख्यां शतसङ्ख्यां ततो न्यूनसङ्ख्यां चोक्तवान् । एतावन्तः यदुकुलाचार्याः यदुकुलोद्भवा एव आचार्याः तत्कुमाराणामिति श्रुतमिति प्रमाणं बहूनां मध्ये कश्चिदाचार्यो भवितुमर्हति । बालकाश्चैकस्य स्थाने बहवोऽपि पठन्ति । अनेनैव तेषां बहुत्वं ज्ञातव्यमित्यर्थः ॥४०-४१॥ तर्ह्यनेनैव प्रकारेण यादवानां सङ्ख्यां वदेत्याशङ्क्याह-सङ्ख्यानं यादवानां कः करिष्यतीति । यादवाः स्वरूपतोऽपि सङ्ख्यातुमशक्याः आनन्त्यात् । तत्रापि विशेषमाह-महात्मनामिति । एकैकस्य कोटिशः सेवकाः सन्तीति प्रधानगुणभावेन गणनायां सुतरामेवानन्त्यमित्यर्थः । अत एव मुख्ये सेवकानन्त्यं निरूपयति-यत्रायुतानामिति । अयुतानामयुतस्य लक्षेण न्यर्बुदसहस्रेण सेवकवर्गेण सह स आहुक उग्रसेनो राजा अस्ति । एवम् अन्येषामपि सेवकवर्गो ज्ञातव्यः । ननु जीवा उत्तमाः केचन एवोत्पद्यन्ते एतावतां कथमेकदोत्पत्तिरिति चेत्तत्राह-देवासुराहवहता इति । देवानामसुराणां च पूर्वं बहव एव आहवाः सङ्ग्रामा जाताः । तत्र ये दैतेयाः सुदारुणाः देवानां मूलभूतब्राह्मणनाशार्थं मनुष्येषु उत्पन्नाः । चकारात् अन्येऽपि तत्सम्बन्धिनः । तेषामुत्पत्तौ पूर्वधर्माः

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

समागता इति ज्ञापनार्थमाह-प्रजा दृप्ता बबाधिरे इति । ततो जगद्रक्षार्थं प्रवृत्तो भगवान् तेषां दैत्यानां निग्रहार्थं देवाः प्रोक्ता आज्ञप्ताः । ततस्ते कोटिशो देवगणाः क्वचित्क्वचिदवतीर्णाः । यदोः कुले तेषां मध्ये कुलानां शतमवतीर्णम् एकमधिकं च । तत्रापि नायकरूपं नृपेति सम्बोधनं तत्सन्तोषाय ॥४२-४४॥

श्रीसुबोधिनीसारः

एतस्मिन् यादवे कुले जाता निर्धना अल्पप्रजाः अल्पायुषो ब्रह्मद्वेषिणो न जज्ञिरे न बभूवुः ॥३९॥ यदुवंशे प्रसूतानाम् उत्पन्नानां प्रसिद्धकर्मणां पुंसां वर्षाणामयुतैः सङ्ख्या कर्तुं न शक्यते हे नृप ! ॥४०॥ सहस्राणां कुमाराणां बालानां तिस्रः कोट्योऽष्टशीतिततानि यदुकुलानामाचार्या अध्यापका आसन् इति श्रुतमस्माभिः एकमेकं सहस्रमेकैकस्य शिष्यमिति आचार्यसङ्ख्यैव सहस्रगुणिता कुमाराणां सङ्ख्येति तत्त्वम् ॥४१॥ महात्मनां यादवानां सङ्ख्यां कः करिष्यति न कोऽपि तत्र हेतुः यत्र येषु मध्ये अयुतानाम् अयुतलक्षेण विश्वबिन्दुयुतेनैकांकेन शङ्खाख्येन सह स आहुक उग्रसेन आस्ते ॥४२॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एतस्मिन् कुले अधना निर्धना दरिद्रादयो न जाताः, किन्तु धनादिसम्पन्ना एव जाताः ॥३९॥ ननु यदवः कतिसङ्ख्याका इत्यपेक्षायामाह-यदुवंशप्रसूतानामिति । विख्यातकर्मणां कर्मभिः प्रसिद्धानामपि यादवानां चिरजीविनां पुरुषेण वर्षायुतैरपि सङ्ख्या कर्तुं न शक्यते ॥४०॥ तत्र कैमुत्यन्यायमाह-तिस्र इति । सहस्राणामसङ्ख्यातानां कुमाराणां पाठकाः यदुकुलाचार्याः तिस्रः कोट्यः अष्टाशीतिशतानि चासन्निति श्रुतिः श्रवणमस्ति ॥४१॥ यदा प्रत्येकं बहूनध्यापयतामाचार्याणामियं सङ्ख्याता तदपि श्रुतिमात्रं न तु सम्यक् ज्ञायते तदा कुमाराणामेव सङ्ख्या कर्तुं न शक्यते, कुतः पुनः सर्वेषां यादवानामिति । यत्र यदुकुले अयुतानामयुतलक्षेण सह स राजतया प्रसिद्धः आहुक उग्रसेन आस्ते ॥४२॥

अन्वितार्थप्रकाशिका

नेति ॥ एतस्मिन्कुले अधना निर्धनाः दरिद्रादयो न जाताः किन्तु धनादिसम्पन्ना एव जाताः ॥३९॥ यदुवंशेति । हे नृप ! विख्यातकर्मणां कर्मभिः प्रसिद्धानामपि यादवानां चिरजीविनां पुरुषेण वर्षायुतैरपि सङ्ख्या कर्तुं न शक्यते ॥४०॥ तिस्र इति ॥ सहस्राणामसङ्ख्यातानां कुमाराणां पाठकाः यदुकुलाचार्याः तिस्रः कोट्यः अष्टाशीतिशतानि चासन्निति श्रुतिः श्रवणमस्ति । तोषिणी तु सहस्राणामिति एकैकं सहस्रमेकैकस्याचार्यस्य शिष्या इति सहस्रगुणिताचार्यसङ्ख्यैव कुमारसङ्ख्येत्याह ॥४१॥ नित्यराजसेवकसङ्ख्यामाह-सङ्ख्यानमिति ॥ यदा प्रत्येकं बहूनध्यापयतामाचार्याणामियं सङ्ख्या तदपि श्रुतिमात्रं न तु सम्यक् ज्ञायते । तदा कुमाराणामेव सङ्ख्या कर्तुं न शक्यते कुतः पुनः सर्वेषां यादवानामिति । यत्र येषु मध्ये अयुतानामयुतलक्षेण सह सः राजतया प्रसिद्ध आहुक उग्रसेन आस्ते । अत्रायुतानामिति बहुत्वं कपिञ्जलाधिकरणन्यायेन त्रित्वविशिष्टायां सङ्ख्यायां पर्यवस्यति । तेन अयुतानामयुतलक्षेण शङ्खत्रयेणेत्यर्थः । आस्ते इति लट् । नित्यं लीलास्फूर्त्या ॥४२॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

एतस्मिन् कुले श्रीकृष्णकुले जाताः अधनादिविशेषणविशिष्टाः न सन्ति । केऽपि अब्रह्मण्या न जज्ञिरे । बहुधनादिविशेषणविशिष्टाः बभूवुरिति भावः ॥३९-४०॥ सहस्राणामसङ्ख्यातानां कुमाराणां यदुपुत्राणाम् अध्यापकाः यदुकुलस्य आचार्याः तिस्रः आसन् । अष्टाशीतिशतानि चासन् । अष्टसहस्राणि अष्टशतानि चाभवन्नित्यर्थः ॥४१॥ यत्र द्वारकायाम् अयुतानामयुतानि तेषां लक्षेण सह वर्तमानः अपरिमितयदुभिर्वृतः स आहुकः उग्रसेनः आस्ते ॥४२॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

न हीति ॥ एतस्मिन् कुले अधनाः निर्धनाः अबहुप्रजाः न हि नैव जाताः अल्पायुषः अल्पवीर्याः, चकारोऽप्यर्थे ।

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

अब्रह्मण्या ब्राह्मणानामपरिपालकाश्च न जज्ञिरे ।।३९।। यदुवंशेति ।। हे नृप ! यदुवंशप्रसूतानां विख्यातानि कर्माणि येषां तेषां पुंसां वर्षायुतैः अपि सङ्ख्या कर्तुं न शक्यते ।।४०।। तदेव कैमुत्यनयाभिप्रायेणाह ।। तिस्रः कोट्य इति । सहस्राणामपरिमितानां कुमाराणां यदुकुलाचार्या अध्यापकाः तिस्रः कोट्यः अष्टाशीति शतानि च, आसन् । कोटित्रयाधिकाष्टसहस्राणि तदुपर्यष्टशतानि चेत्यर्थः । इति श्रुतिः, इयं सङ्ख्यापि श्रुतमात्रेव न तु सम्यक् ज्ञातेति भावः ।।४१।। यदा प्रत्येकं बहूनध्यापयतामाचार्याणामियं सङ्ख्या तदपि श्रुतमात्रं न तु सम्यक् ज्ञायते तदा कुमाराणामेव सङ्ख्यानं कर्तुं न शक्यते, कुतः सर्वेषां यादवानामित्याह ।। सङ्ख्यानमिति ।। महात्मनां यादवानां सङ्ख्यानं कः करिष्यति । यत्र येषु यादवेषु मध्ये यदूनामेव वंशज इति शेषः । यः आहुकः वसुदेवः सः एव अयुतानाम् अयुतलक्षेण आस्ते । अयुतायुतलक्षपुत्रः सन्नवर्ततेत्यर्थः । केचित्तु आहुक उग्रसेन इत्याहुः ।।४२।।

कृष्णप्रिया

परीक्षित ! युवंशमें ऐसे ऐसे यशस्वी ओर पराक्रमी पुरुष हुअे है जीन की गीनती भी हजारो वर्षोमें परी नहीं हो सकती ।।३९।। मैने ऐसा सुना है कि यदुवंश के बालको को शिक्षा देने के लिये तीन करोड अट्ठासी कारण आचार्य थे हे राजन् यदुवंशमें उत्पन्न और कर्म से विख्यात पराक्रमी यादवों की संख्या लाखो वर्षो में भी गीन नहीं सकते ।।४०।। हे राजन् ! ऐसा सुना हैकि यदुकुलकुमारों को पढानेवाले आचर्यो की संया तीन करोड आठ हजार आठसो की थी प्रत्येक आचार्य एक हजार शिष्यो को पढा सकनेमें समर्थ थे ।।४१।। महात्मा यादवों की संख्या का कौन वर्ण कर सकता है ? या कौन कह सकता है ? दश हजारकी संख्याको एकम गीने और ऐसे दस हजार और एक लाख की संख्या जो हो सके इतनी स्वयं महाराज उग्रसेन के साथ एक नल (१०००००००००००००) के लगभग सैनिक थे ।।४२।।

देवासुराहवहता दैतेया ये सुदारुणाः । ते चोत्पन्ना मनुष्येषु प्रजा दृप्ता बबाधिरे ।।४३।।
तन्निग्रहाय हरिणा प्रोक्ता देवा यदोः कुले । अवतीर्णाः[1] कुलशतं तेषामेकाधिकं नृप ।।४४।।
तेषां प्रमाणं भगवान् प्रभुत्वे [2]चाभवद्धरिः । ये चानुवर्तिनस्तस्य ववृधुः सर्वयादवाः ।।४५।।
शय्यासनाटनालापक्रीडास्नानासनादिषु[3] । न विदुः सन्त[4]मात्मानं वृष्णयः कृष्णचेतसः ।।४६।।

कर्दमक्षमा

ये, सुदारुणाः, दैतेयाः, देवासुराहवहताः, ते, च, मनुष्येषु, उत्पन्नाः, दृप्ताः, प्रजाः, बबाधिरे ।।४३।। नृप, तन्निग्रहाय, हरिणा, प्रोक्ताः, देवाः, यदोः, कुले, अवतीर्णाः, तेषाम्, एकाधिकम्, कुलशतम् ।।४४।। ये, च, तस्य, अनुवर्तिनः, सर्वे, यादवाः, ववृधुः, तेषाम्, प्रभुत्वे, च, भगवान्, हरिः, प्रमाणम्, अभवत् ।।४५।। कृष्णचेतसः, वृष्णयः, शय्यासनाटनालापक्रीडास्नानासनादिषु, आत्मानम्, सन्तम्, न, विदुः ।।४६।।

श्रीधरस्वामिविरचिता भावार्थदीपिका

ते चोत्पन्ना इति प्रत्ययेकं बहुभी रूपैरिति ज्ञेयम् ।।४३।। एवमेव यदुकुलेऽपि देवा इति तथा चोक्तम् सहस्रशः समुद्भूता देवा यदुकुले पृथगिति ।।४४-४६।।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

देवासुराहवे देवासुरसङ्ग्रामे हता ये त एव मनुष्येषु राजसु प्रत्येकमिति एकैकस्यानेके देहा आसन्नित्यर्थः ।।★।। ते च

---

१. शतमेषा-वीर. विज. । २. ना-श्रीधर. वंशी. वीर. विज. । ३. दिकर्मसु-श्रीधर. वंशी. वीर. विज. । ४. स्वान्तरात्मानं-वीर. ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यावदाः द्विविधाः । देवा नित्यपार्षदाश्च । तत्र देवानां यदुकुलावतीर्णत्वमसङ्ख्यातत्वं च । सहेतुकमाह-देवेति द्वाभ्याम् । सुदारुणा अत्युग्राः अत उत्तरजन्मन्यपि दृप्ताः सन्तः प्रजाः बबाधिरे ॥४३॥ तन्निग्रहाय तेषां दण्डप्रदानाय । तेषां यदूनाम् । यदुकुले देवा अवतीर्णा इह प्रमाणमाह-पुराणान्तरवाक्यम् — तथा चेति ॥ 'भवद्भिरंशैर्यदुषूपजन्यताम्' इति ब्रह्मणापि भूम्यर्तिनिवेदनोत्तरविष्णुवाक्यश्रवणान्ते उक्तत्वात् ॥★॥ अत एव तेषां निग्रहाय क्वचित् तद्द्वारा सहयोगेन च तद्वधकोपायः । यदोः कुलेऽवतीर्णाः । क्वचित्प्रवेशेन क्वचित्पार्थक्येन च जाताः 'एकाधिकं कुलशतम्' इति यदुवृष्णिमधुकुकुरान्धकादिनाम्नः कुलस्यैव सङ्ख्या कृता न तु व्यक्तीनामसङ्ख्यत्वादिति भावः ॥४४॥ तेषामेकोत्तरशतकुलानां प्रभुत्वे नायमेवास्माकं प्रभुरित्येवंरूपेण ज्ञानेन हरिरेव प्रमाणं नान्य उग्रसेनादिः । यद्वा-भगवतो नारायणरूपत्वेन देवदेवत्वात् यादवानां देवत्वे तु श्रीकृष्णप्रभुत्वमेव प्रमाणमिति । तस्य श्रीकृष्णस्य ॥★॥ ये च ये तु तस्य भगवतोऽनुवर्तिनो नित्यपार्षदा ववृधुरुत्तरोत्तरसङ्ख्यातो वैभवतश्च वृद्धिं प्राप्तास्तेषां विभुत्वे चात्सङ्ख्यायां भगवान् हरिरेव प्रमाणं साक्षी बभूव न त्वन्यः ब्रह्माद्यगोचरत्वात् । ते च देवगणतो विभिन्नाः । यथोक्तं हरिवंशे श्रीमदक्रूरेण- "देवानां च हितार्थाय वयं याता मनुष्यताम्" इति । अत्र हरिर्बहिरन्तश्च सर्वसमाहरणशक्तः । यतो भगवान् पूर्णैश्वर्यादिषट्कसम्पन्न इति नामद्वयतात्पर्यम् ॥४५॥ ॥०॥ ॥★॥ तेषां च वृष्णीनां परमेव माहात्म्यमित्याह-शय्येति । शय्यादिषु सन्तं जाग्रतमप्यात्मानं न विदुः श्रीभगवत्प्रेरणयैव सर्वं कुर्वन्ति न तु स्वयमनुसन्धातुं शक्नुवन्तीत्यर्थः । यतः कृष्णचेतसः क्रीडा द्यूतादिः । आदिशब्दात्तु सौरतादयः इति यद्यादवं कुलमहो अविषह्य आस्ते इत्यादिकं नान्यादृशत्वख्यापकम् । किन्तु तद्विरहोन्मादभयख्यापकमेव । वक्ष्यते च- "ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम्" इत्यादि ॥४६॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

ते च यावदाः द्विविधाः । देवा नित्यपार्षदाश्च । तत्र देवानां यदुकुलावतीर्णत्वमसङ्ख्यातत्वं च । सहेतुकमाह-देवेति द्वाभ्याम् । सुदारुणा अत्युग्राः अत उत्तरजन्मन्यपि दृप्ताः सन्तः प्रजाः बबाधिरे ॥४३॥ अत एव तेषां निग्रहाय क्वचित् तद्द्वारा सहयोगेन च तद्वधकोपायः । यदोः कुलेऽवतीर्णाः । क्वचित्प्रवेशेन क्वचित्पार्थक्येन च जाताः एकाधिकं कुलशतमिति तत्तव्द्यक्तीनां त्वस्माभिरपि दुस्सङ्ख्यानत्वमिति भावः ॥४४॥ नित्यपार्षदानां तु ततोऽपि सङ्ख्यावैभवे श्रीभगवदेकगम्य इत्याह-तेषामिति । ये च ये तु तस्य श्रीभगवतोऽनुवर्तिनो नित्यपार्षदाः सर्वयादवा ववृधुः उत्तरोत्तरं सङ्ख्यातो वैभवतश्च वृद्धिं प्राप्ताः । तेषां विभुत्वे च चेति च-कारात्सङ्ख्यायां विभुत्वे भगवान् हरिरेव प्रमाणं साक्षी बभूव न त्वन्यः । ब्रह्मादिबुद्ध्यगोचरत्वात् ते च देवगणतो विभिद्य यथोक्तं हरिवंशे- श्रीमदक्रूरेण- देवानां च हितार्थाय वयं याता मनुष्यतामिति । अत्र हरिर्बहिरन्तश्च सर्वसमाहरणशक्तः । यतो भगवान् पूर्णैश्वर्यादिषट्कसम्पन्न इति नामद्वयतात्पर्यम् ॥४५॥ तेषां च वृष्णीनां परमेव माहात्म्यमित्याह-शय्येति । शय्यादिषु सन्तं जाग्रतमप्यात्मानं न विदुः श्रीभगवत्प्रेरणयैव सर्वं कुर्वन्ति न तु स्वयमनुसन्धातुं शक्नुवन्तीत्यर्थः । यतः कृष्णचेतसः क्रीडा द्यूतादिः । आदिशब्दात्तु सौरतादयः इति यद्यादवं कुलमहो अविषह्य आस्ते इत्यादिकं नान्यादृशत्वख्यापकम् । किन्तु तद्विरहोन्मादभयख्यापकमेव । वक्ष्यते ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनामित्यादि ॥४६॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम् ॥१७-५०॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

तेषां वीर्यशौर्यादिगुणनिरूपणायाह-देवेति । देवासुराहवे देवासुरयुद्धे हता ये अतिदारुणा दैतेयाः ते मनुष्येषु चैद्यमागधादिरूपेण जाताः दृप्ताः सन्तः प्रजा इति द्वितीयान्तम् । बबाधिरे पीडां कृतवन्तः ॥४३॥ तन्निग्रहायेति । तेषां निग्रहं कर्तुं प्रोक्ता आदिष्टाः देवाः यदोः कुलेऽवतीर्णाः । येषामवतीर्णानां कुलमेकाधिकशतं वृष्ण्यन्धकदाशार्हादिरूपेण एकाधिकशतभेदभिन्नमित्यर्थः ॥४४॥ तेषामिति । तेषां कुलानां प्रभुत्वे निमित्ते भगवान् श्रीकृष्णरूपेण अभवदवततार । ये सर्वे यादवास्ते तस्य श्रीकृष्णस्यानुबर्तिनः । हेतुगर्भमिदम् । ववृधुरेधाञ्चक्रिरे ॥४५॥ किन्त्वेते परमात्मबुद्ध्यान्ववर्तन्तेत्याह-शय्येति ।

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

वृष्णयो यदवः शय्यासनादिषु कृष्णे एव चेतो येषां तथाभूता अपि तं श्रीकृष्णं स्वमात्मानं स्वान्तरात्मानं परमात्मानमित्यर्थः। न विदुः। किन्तु यादवविशेषं विदुरिति भावः ॥४६॥

श्रीमद्विजयध्वजकृता पदरत्नावली

देवांशानां यादवानाम् अवन्यामुत्पत्तुं निमित्तमाह-देवेति द्वाभ्याम्। नित्यपार्षदानां तु ततोऽपि सङ्ख्यावैभवे श्रीभगवदेकगम्ये इत्याह ॥४३-४४॥ कृष्णो भगवान् तेषां प्रभुत्वे सामर्थ्ये दैवे प्रमाणम्। यतः श्रीकृष्णो नारायणावतारः प्रसिद्धः तेषाममानुषसामर्थ्ये हेतुश्च। ततो यादवा देवा इति सिद्धम्। एतदेव दृढीकरणाय पुनर्वक्ति ये चेति ॥४५॥ स्वामिनं न विदुः। शय्यादिषु सन्तं सह वर्तमानम् आत्मानं स्वरूपभूतं श्रीनारायणम् ॥४६॥

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

ते च यादवा द्विविधाः। देवाः नित्यपार्षदाश्च। तत्र देवानां यदुकुलावतीर्णत्वमसङ्ख्यातत्वं च सहेतुकमाह-देवेति द्वाभ्याम्। नित्यपार्षदानां तु ततोऽपि सङ्ख्यावैभवे श्रीभगवदेकगम्ये इत्याह ॥४३-४४॥ तेषामिति। येच ये तु तस्य श्रीभगवतोऽनुवर्तिनो नित्यपार्षदाः सर्वयादवा ववृधुस्तेषां तु प्रभुत्वे, चकारात् सङ्ख्यायां च भगवान् हरिरेव प्रमाणं साक्षी साक्षाद्द्रष्टा बभूव न त्वन्यः ॥४५-४६॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः ॥२७-४६॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा ॥२८-४६॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

एकाधिकं कुलशतमिति कुलस्यैव सङ्ख्या कृता न तु व्यक्तीनामसङ्ख्यातत्वादिति भावः। ये च तस्य भगवतः अनुवर्तिनः नित्यपार्षदाः सर्वयादवरूपा ववृधुः तेषां सङ्ख्यानस्य प्रभुत्वे भगवान् हरिरेव प्रमाणमभूदित्यर्थः। तत्सङ्ख्याया ब्रह्मादीनामपि बुद्ध्यगोचरत्वादिति भावः ॥४४-४६॥

गूढार्थदीपिनी

देवासुराहवे दुवासुरसङ्ग्रामे ये हताः ते मनुष्येषु प्रत्येकं बहुभिः रूपैरुत्पन्नाः दृप्ता गर्विताश्च ते प्रजाः कर्मभूता बबाधिरे पीडयामासुः ॥४३॥ तेषां निग्रहाय विनाशाय। कुलशतं प्रमाणं ज्ञाता प्रभुत्वेन स्वामित्वेन भगवान् हरिरेव अभवत् नान्यः कश्चित् ॥४५॥ वृष्णयः शय्यासनादिषु सन्तं जाग्रतमपि आत्मानं स्वदेहमपि न विदुः। भगवत्प्रेरणयैव सर्वं कुर्वन्ति यतः कृष्णचेतसः ॥४६॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

तेषां कुलानां प्रभुत्वेन नियन्तृत्वेन प्रमाणां प्रवर्तकः भगवान् श्रीकृष्णः अभवत्। यतो ये देवा यादवास्तस्य भगवतः अनुवर्तिनस्ते ववृधुः। असुराः कंसदुर्योधनादयस्ते ववृधुरिति भावः ॥४५॥ यादवानां कृतार्थतामाह-शय्यासनेति ॥४६॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ननु देवा एवावतीर्णास्तावन्त इत्यत्र किं प्रमाणमिति चेत्तत्राह-तेषां प्रमाणं भगवानिति। तेषां देवत्वे भगवानेव प्रमाणम्। कथं भगवतः प्रामाण्यमिति चेत्तत्राह-प्रभुत्वे चाभवदिति। यतस्तेषां प्रभोर्जातो भगवानतो ज्ञायते ते देवा इति। न ह्यन्येषां भगवान् प्रभुर्भवति। प्रभुसेवकयोः सजातीयत्वापेक्षणात्। ननु त एव प्रेषणीयाः कीमिति तैः सह भगवानागत इति चेत्तत्राह-हरिरिति। तेषां दुःखापनोदनार्थमागतः अत एव कालादिकृतप्रतिबन्धाभावात् सर्व एव यादवास्तदीयाः। अन्येऽपि भगवतो ये अनुवर्तिनः ते सर्वेऽत्यन्तं ववृधुरित्याह-ये चानुवर्तिनस्तस्येति। प्रायिकत्वव्युदासाय सर्वपदं वृत्तिर्हि वटबीजाद्वटवत्

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

ज्ञातव्या । एवं प्रसङ्गात्तेषां माहात्म्यमानन्त्यं च भगवत्सम्बन्धान्निरूपितम् ॥४५॥ अत एव ते सर्वे सपरिकरा निरोधे निरूपिताः । तत्र तेषामधिकारापन्नानां वैराग्यसम्भवात् बहिर्मुखत्वसम्भवाच्च निरोधः सम्पन्नो न भवेदिति शङ्कां निराकर्तुमाह-शय्यासनाटनालापेति । सप्त पदार्थाः भगवान् षड्गुण एव तेषां तथा जात इति ज्ञापयितुं निरूपिताः । शय्या अशनं भोजनम् । अटनं परिभ्रमः । आलापः वार्ता । क्रीडा द्यूतादि । स्नानम् आसनं च । एते सप्त पदार्थाः प्रकारपराफ । तत्रैश्वर्यादिधर्माः योजनीयाः । तथा सति प्रकारतामापद्यन्ते । किं बहुना सर्वावस्थासु आत्मानं यथा स्थानस्थितं न विदुः । अनेन प्रपञ्चविस्मृतिरुक्ता । भगवदासक्तिमाह-कृष्णचेतस इति । कृष्ण एव चेतो येषाम् । गोकुलस्थानां तु पूर्वमेव निरूपितं स्त्रीणां च राजसानां सात्त्विकानां चायं निरोध इति सम्पूर्णा निरोधलीला ॥४६॥

श्रीसुबोधिनीसारः

देवासुराणामाहवे सङ्ग्रामे हताः ये दारुणा महाक्रूरा दैतेयाः ते मनुष्येषु उत्पन्ना जाता दृप्ता गर्विताः प्रजा बबाधिरे ॥४३॥ तेषां निग्रहार्थं हरिणा प्रोक्ता देवा यदोः कुलेऽवतीर्णाः तेषामेकाधिकं कुलानां शतमस्ति हे नृप ! ॥४४। सर्वेषामैकमत्यमाह । तेषां यादवानां प्रभुत्वेन स्वामित्वेन प्रमाणं भगवान् हरिरभवत् तस्यानुवर्तिनो ये यादवास्ते ववृधिरे ॥४५॥ शयानादिषु सन्तं सहवर्तमानम् आत्मानं कृष्णचित्ता अपि वृष्णयो न विदुः ॥४६॥

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

तेषां बहुत्वे सप्रयोजनं देवावतारत्वं हेतुमाह-देवासुरेति द्वाभ्याम् । देवासुराहवे अमृतार्थं देवासुरसङ्ग्रामे सुदारुणा अतिभयङ्करा ये दैतेया हतास्ते मनुष्येषु चैद्यमागधादिरूपेणोत्पन्ना दृप्ता गर्विताश्च सन्तः प्रजा बबाधिरे ॥४३॥ तेषां निग्रहाय विनाशाय हरिणा प्रोक्ता आदिष्टा देवाः यदोः कुले अवतीर्णाः । तेषां वृष्ण्यन्धकदाशार्हादिरूपेणैकाधिकं शतं कुलं प्रवृत्तम् ॥४४॥ तेषां यादवानां प्रभुत्वेन स्वामित्वेन निमित्तेन हरिर्भक्तदुःखहर्ता भगवानवतीर्णोऽभवत् । अत एव तेषां प्रमाणं चाभवत् । ये च तस्य भगवतोऽनुवर्तिनः आज्ञानुसारिणः सेवकास्ते सर्वे यादवा ववृधुः धनधामबलादिवृद्धिं प्राप्ताः ॥४५॥ तेषां भगवदासक्त्या संसारदुःखविस्मृतिमाह-शय्येति । वृष्णयः शय्यादिषु सन्तं वर्तमानमात्मानं स्वदेहमपि न विदुः, अन्यविस्मृतेः का वार्ता ? । तत्र हेतुमाह-कृष्णचेतस इति ॥४६॥

अन्वितार्थप्रकाशिका

यादवा द्विविधाः देवाः नित्यपार्षदाश्च । तत्र देवानामवतीर्णत्वसङ्ख्यत्वं च सहेतुकमाह-देवेति ॥ देवासुराहवे अमृतार्थं देवासुरसङ्ग्रामे सुदारुणा अतिभयङ्करा ये दैतेया हतास्ते मनुष्येषु प्रत्येकं बहुभी रूपैरुत्पन्ना दृप्ता गर्विताश्च सन्तः प्रजाः बबाधिरे ॥४३॥ तदिति ॥ हे नृप ! तेषां निग्रहाय विनाशाय हरिणा प्रोक्ता आदिष्टा देवाः यदोः कुले अवतीर्णाः । तेषां वृष्ण्यन्धकदाशार्हादिरूपेणैकाधिकं शतं कुलं प्रकृतम् । व्यक्तीनामानन्त्यात्कुलस्यैव सङ्ख्या कृता ॥४४॥ नित्यपार्षदानां ततोऽप्याधिक्यमाह-तेषामिति ॥ ये च तस्य भगवतोऽनुवर्तिनः आज्ञानुसारिणः सेवकास्ते सर्वे यादवा ववृधुः । धनधामबलादिवृद्धिं प्राप्ताः । तङ्भाव आर्षः । तेषां यादवानां सङ्ख्यायाः प्रभुत्वेन स्वामित्वेन भगवान् हरिरेव प्रमाणं साक्षी अभवत् ॥४५॥ शय्येति । कृष्णचेतसः वृष्णयः शय्यादिषु सन्तं वर्तमानमात्मानं स्वदेहमपि न विदुरन्यविस्मृतेः का वार्ता ॥४६॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

देवासुरयोः आहवे युद्धे हताः दृप्ताः सन्तः प्रजाः जनान् ॥४३॥ प्रोक्ताः आज्ञप्ताः सहस्रशः उद्भूता देवा यदुकुले पृथगित्युक्तेः ॥४४॥ तेषां यादवानां प्रभुत्वेन समर्थत्वेन च-कारात्सङ्ख्यायां च हरिरेव प्रमाणं साक्षी अभवत् ॥ तस्य श्रीकृष्णस्य । अनुवर्तिनः सन्तः ववृधुः ववृधिरे ॥४५॥ तेषां वष्णीनां माहात्म्यमाह-शय्येति ॥ शय्यादिषु सन्तं वर्तमानम् । आत्मानं देहम् ॥४६॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

तेषां वीर्यशौर्यादिगुणवर्णनायाह ॥ देवेति ॥ देवासुराहवे देवासुरयुद्धे हताः सुदारुणाः ये दैतेयाः ते च मनुष्येषु उत्पन्नाश्चैद्यमागधादिरूपेण जाताः, दृप्ताः सन्तः, प्रजाः बबाधिरे पीडितवन्तः । प्रजा इति द्वितीयाबहुवचनम् ॥४३॥ तन्निग्रहायेति ॥ हे नृप ! तन्निग्रहाय तेषां निग्रहं कर्तुं हरिणा प्रोक्ताः समादिष्टाः देवाः यदोः कुले अवतीर्णाः तेषां ये यदोः कुलेऽवतीर्णास्तेषामित्यर्थः । कुलशतम् एकाधिकं वृष्ण्यन्धकदाशार्हादिरूपेणैकाधिकशतभेदभिन्नमित्यर्थः । आसीदिति शेषः ॥४४॥ तेषामिति ॥ भगवान् हरिः श्रीकृष्णः प्रभुत्वेन तेषां प्रमाणम् अभवत् । ये च तस्य श्रीकृष्णस्य अनुवर्तिनः ते सर्वयादवाः ववृधुश्च । यादवानां प्रभुत्वे सङ्ख्यायां चैकः श्रीहरिरेव साक्षी समभवन्नान्य इति भावः ॥४५॥ किं ते तं परात्मबुद्ध्या अन्ववर्तन्त नेत्याह ॥ शय्येति ॥ शय्यासनाटनालापक्रीडास्नानाशनादिषु, सन्तं सर्वदा वर्तमानं कृष्णं कृष्णे एव चेतो येषं तथाभूता अपि वृष्णयः आत्मानं परमात्मानं न विदुः । कश्चिदयं महान् यादवविशेष इत्येव विदुरिति भावः ॥४६॥

कृष्णप्रिया

देव और असुरो के संग्राममें जो भयानक दैत्य मारे गये वे सब मनुष्यों की जन्म लेकर मदोन्मत्त होकर निर्दोष प्रजा को परेशान करने लगे ॥४३॥ इस प्रकार दीनजनों को परेशान करनेवाले और दमन करनेवालोंके लिये भगवान की आज्ञासे ही देव लोग यदुकुलमें अवतार लिया था उन यादवों के एकसोने एक (१०१) कुल थे ॥४४॥ ये सभी यादव भगवान श्रीकृष्ण को अप,ना स्वामी मानते थे और भगवान की आज्ञा को सर्त्र प्रमाण के रूपमें स्वीकारते थे । जो यादव भगवान के अनुगामी रहे थे वे सभी सर्व प्रकारसे विकासशील हो रहे थे ॥४५॥ हे राजन् ! यादवों का मन शयन करते करते चलते फिरते बोलते वक्त स्नान करते करते क्रीडा करते करते या कोई भी कार्य करते समय केवलश्रीकृष्ण में ही तन्मय रहते थे इसलिए आपको देह या गेह का भान ही नहीं रहता था ॥४६॥

[1]तीर्थं चक्रे नृपोनं[2] यदजनि यदुषु स्वःसरित्पादशौचं
[3]विद्विट्स्निग्धाः स्वरूपं ययुरजितपरा श्रीर्यदर्थेऽन्ययत्नः ।
[4]यन्नामामंगलघ्नं श्रुतमथ गदितं यत्कृतो गोत्रधर्मः
कृष्णस्यैतन्न चित्रं क्षितिभरहरणं कालचक्रायुधस्य ॥४७॥
जयति जननिवासो देवकीजन्मवादो [5]यदुवरपर्षत्स्वैर्दोर्भिरस्यन्नधर्मम् ।
[6]स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्धयन् कामदेवम् ॥४८॥
[7]इत्थं परस्य निजधर्म[8]रिरक्षयाऽऽत्तलीलातनोस्तदनुरूपविडम्बनानि ।
कर्माणि कर्मकषणानि यदूत्तमस्य [9]श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन् ॥४९॥

---

[1] श्लोकद्वयमधिकं-विज. । (तच्च टीकायां द्रष्टव्यम्) [2] नृणां यो-विज. । [3] षड्भिश्चात्तं स्वरूपं पर उरसि रमा सर्वदा यस्य चास्ते । [4] यच्छास्त्रं च प्रमाणं यदनु च सदसव्द्यक्तयो यत्र धर्माः । [5] यदुवरपरिषद्भिर्दोर्भि-वीर. ; नियमकृतपदाब्जैर्दस्युपीडां स्वदोर्भिः-विज. । [6] मुदमुभयदशीनां श्रीनिकेतात्ममूर्त्या स्मरवपुरबलानां स्निग्धहासेक्षया च-विज. । [7] एकः श्लोकोऽधिकः-विज. ।
यो ह्यात्मा...... । [8] वर्त्म-श्रीधर. वंशी. वीर. विज. । [9] गायेदमृष्य-विज. ।

मर्त्यस्तया [१०]तनुसमेधितया मुकुन्दश्रीमत्कथाश्रवणकीर्तनचिन्तयैति ।
तद्धाम [११]दुस्तरकृतान्तजवापवर्गं ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः ॥५०॥

॥ इति श्रीमद्भागवते महापुराणे वैयासिक्यामष्टादशसाहस्त्र्यां पारमहंस्यां संहितायां दशमस्कन्धे श्रीकृष्णचरितानुवर्णनं नाम [१२]नवतितमोऽध्यायः ॥९०॥

इति दशमः स्कन्धः सम्पूर्णः

श्रीकृष्णार्पणमस्तु

★★★★

कर्दमक्षमा

हे नृप ! यत्, यदुषु, अजनि, तत्, स्वःसरित्पादशौचम्, तीर्थम्, ऊनम्, चक्रे, विद्विट्स्निग्धाः, यदर्थे, अन्ययत्नः, अजितपरा, श्रीः, स्वरूपम्, ययुः, यन्नाम, श्रुतम्, अथ, गदितम्, अमङ्गलघ्नम्, गोत्रधर्मः, यत्कृतः, कालचक्रायुधस्य, कृष्णस्य, एतत्, क्षितिभरहरणम्, चित्रम्, न ॥४७॥ जननिवासः, देवकीजन्मवादः, यदुवरपर्षत्, स्वैः, दोर्भिः, अधर्मम्, अस्यन्, सुस्मितश्रीमुखेन, व्रजपुरवनितानाम्, कामदेवम्, वर्धयन्, स्थिरचरवृजिनघ्नः, जयति ॥४८॥ इत्थम्, निजधर्मरिरक्षया, आत्तलीलातनोः, परस्य, अमुष्य, पदयोः, अनुवृत्तिम्, इच्छन्, यदूत्तमस्य, तदनुरूपविडम्बनानि, कर्मकषणानि, कर्माणि, श्रूयात् ॥४९॥ यदर्थाः, क्षितिभुजः, अपि, ग्रामात्, दुस्तरकृतान्तजवापवर्गम्, वनम्, ययुः, तया, तनुसमेधितया, मुकुन्दश्रीमत्कथाश्रवणकीर्तनचिन्तया, मर्त्यः, तद्धाम, एति ॥५०॥

॥ श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे नवतितमाऽध्यायाऽन्वयनिरूपणम् ॥९०॥

इति दशमः स्कन्धः सम्पूर्णः

श्रीकृष्णार्पणमस्तु

★★★

श्रीधरस्वामिविरचिता भावार्थदीपिका

तस्मात्कृष्णकीर्तेः सर्वतीर्थोत्तमत्वं कृष्णस्य च सर्वदेवोत्तमत्वं न चित्रमित्याह-तीर्थञ्चक्र इति । इतः पूर्वं स्वस्सरिदेव सर्वतोऽधिकं तीर्थमित्यासीत् इदानीं तु यदुषु यदजनि जातं तीर्थं श्रीकृष्णकीर्तिरूपमेतत्स्वस्सरिद्रूपं पादशौचं तीर्थमूनमल्पं चक्रे स्वयमेव सर्वतीर्थोपरि विराजत इत्यर्थः । श्रीकृष्णस्य विद्वेषः स्निग्धाश्च तत्सारूप्यं ययुरित्यपि नातिचित्रम् तस्य परमाकारुणिकत्वात् तथेदञ्च न चित्रम् किं तत् अजितपरा अजिता कैश्चिदप्यप्राप्ता परा सर्वतः परिपूर्णा श्रीः कृष्णस्यैव नान्यस्येति तदेवाह-यदर्थेऽन्येषां ब्रह्मादीनां यत्न इति ननु निरपेक्षं तमेव लक्ष्मीः श्रयत इति चेत्रमेवेति चेन्न हि परममङ्गलानामधेयत्वात्तस्येत्याह, यन्नामेति तदपि नार्थस्मरणापेक्षमित्याह, श्रुतमथ गदितमिति । सर्वधर्माश्रयत्वादपीत्याह, यत्कृतो गोत्रधर्म इति गोत्रेषु तत्तदृषिवंशेषु धर्मो यत्कृतो येन प्रवर्तितः तस्य क्षितिभरहरणं नैवचित्रमित्याह, कृष्णस्यैतदिति कालचक्रायुधस्येति सर्वसंहारककालमूर्तेर्विशेषतो दुरन्तप्रभावचक्रायुधस्य कियदेतदित्यर्थः ॥४७॥ यत एवम्भूतः श्रीकृष्णस्ततः स एव सर्वोत्तम इत्याह-जयतीति । जनानां जीवानां यो निवासः आश्रयस्तेषु वा निवसत्यन्तर्यामितया तथा स कृष्णो जयति देवक्यां जन्मेति वादमात्रं यस्य सः वस्तुतः अजन्मा यदुवराः पर्षत्सभा सेवकरूपा यस्य इच्छामात्रेण निरसनसमर्थोऽपि क्रीडार्थं दोर्भिरधर्ममस्यन् क्षिपन् स्थिरचरवृजिनघ्नोऽधिकारी विशेषानपेक्षमेव वृन्दावनगततरुतृणलतादीनां संसारदुःखहन्ता तथा विलासवैदग्ध्यानपेक्षं व्रजवनितानां पुरवनितानां च सुस्मितेन

---

[१०]. नु सव-श्रीधर. वंशी. वीर. विज. । [११]. दुस्तरकृतं जनतापवर्गं-विज. । [१२]. त्र्यधिकशततमोऽध्यायः ॥१०३॥-विज. ।

श्रीधरस्वामिविरचिता भावार्थदीपिका

शोभनहास्ययुतेन श्रीमता मुखेनैव कामदेवं वर्धयन् कामश्चासौ दीव्यति विजिगीषति संसारमिति देवस्तम् भोगद्वारा मोक्षप्रदमित्यर्थः ॥४८॥ तत्तत्कार्यविशेषैः स्वीकृतमत्स्यकूर्मादिनानामूर्तेर्विशेषतो यदूत्तमस्य सतः परस्य तदनुरूपानुकारीणि कर्माणि चरितानि श्रूयात् शृणुयादित्यर्थः ॥४९॥ अनुवृत्तेः फलमाह-मर्त्य इति। श्रीमत्याः कथायाः श्रवणकीर्तनयुक्तया चिन्तया संवर्धितयाऽनुवृत्त्या तया तन्निष्ठत्वेन तस्य धाम लोकमेति लोकत्वेऽपि कालानाकलितत्वमित्याह, दुस्तरेति। दुर्लभपुरुषार्थतामाह, ग्रामादिति ॥५०॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां नवतितमोऽध्ययः ॥९०॥

समाप्तोऽयं दशमस्कन्धः ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यतो यादवा देवाः श्रीकृष्णश्च तेषामीश्वरस्तस्माद्धेतोः। इत्यर्थ इति-सूर्योदये दीपस्येव तुच्छत्वमेवेति भावः। तत्सारूप्यं कृष्णसारूप्यम्। तस्य कृष्णस्य। यथा विद्विट्स्निग्धानां सारूप्यदानं न चित्रं तथैवेदं वक्ष्यमाणमपि। तत्पृच्छति-किं तदिति। अन्यस्य कृष्णेतरस्य तदेव श्रियाः कृष्णपरत्वमेव यदर्थे यस्याः श्रियो निमित्तम्। अत्राशङ्कते-नन्विति। तमेव श्रीकृष्णमेव। शङ्कोद्धारमाह-नहीति। तस्य श्रीकृष्णस्य। यन्नाम यस्य श्रीकृष्णस्य नाम। तदपि नामापि। अर्थस्मरणं नापेक्षत इत्याह-श्रुतमथेति। यद्वा-नन्वन्येऽप्यग्निहोत्रादयो धर्माः सन्ति तान्विहाय कथं तत्र प्रवृत्तिः स्यादिति चेत्तत्राह-सर्वधर्मेति। धर्मोऽग्निहोत्रादिः। येन कृष्णेन तस्येत्यर्थः। इत्यर्थ इति-इच्छयैव सर्वसंहर्तुश्चक्रधारणे तु भूभारावतारणं न किञ्चिदिति भावः ॥★॥ तदेवं ब्रह्मकुलरूपमधिष्ठानं प्रशस्य श्रीकृष्णरूपमधिष्ठातारं प्रशंसति-तीर्थमिति। कृष्णस्य स्वयं भगवत एतत्पूर्ववर्णितं क्षितिभारहरणं न चित्रं विबुधहृदयविस्मयावहं न भवति। यतः परमाण्वादिद्विपरार्धान्तरूपो यः कालः स एव चक्रं चक्रवद्विच्छिद्य परिवर्तमानत्वात्। तदेव चायुधं सर्वसंहारसाधनं यस्य तस्य स्वतःसिद्धत्वात्तदर्थोद्यमेनालमिति भावः। तदचित्रताबोधनाय तमेव चित्रविशेषणैर्विशिनष्टि-यत् यतस्तादृशोऽपि यदुषु लोककृपया अजनि जातः य एव स्वःसरिदाख्यं श्रीवामनपादशौचरूपं तीर्थमूनं चक्रे। निजचरणरजःसम्बन्धियमुनादिभिरिति भावः —

> "गङ्गा शतगुणा पुण्या माथुरे मम मण्डले। यमुना विश्रुता देवि नात्र कार्या विचारणा ॥" इत्यादि वाराहात् :-
>
> "यत्पादसंश्रयाः सूत मुनयः प्रशमाय नः। सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥
>
> को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः। शुद्धिकामो न शृणुयाद्यशः कलिमलापहम् ॥" इति।

श्रीशौनकस्य तत्प्रश्नकरणाच्च किञ्च विभक्तिविपरिणामात् यत् येन हेतुना स्निग्धा इव विद्विषः पूतनादयः यद्वा, विद्विषः स्निग्धाः पितृभ्रात्रादयोऽपि स्वरूपं सर्वमूलभूतं श्रीभगवन्तमेव ययुः। सद्वेषादिव पूतनापि सकुला त्वामेव देवापितेत्यादेः यत् यत्र श्रीः रूपादिसम्पत्तिरपरा सर्वोत्कृष्टा अजिता अन्यास्पृष्टाचेत्यर्थः। यथोक्तं यन्मर्त्यलीलौपयिकमित्यादि। अदृष्ट्वाऽन्यतमं लोके इत्युपक्रम्य तृतीयेऽस्मिन् भवेऽहं वै इत्यादि यदर्थे यस्य दर्शनादिरूपार्थे अन्येषां महाकालपुराधिपादीनामपि यत्नः परमब्रह्मण्यदेवत्वेऽपि मुहुर्मुहुर्ब्राह्मबालहरणब्राह्मणदुःखातिशयदानदोषानादरपूर्वकः प्रयासः। यथोक्तं द्विजात्मजा मे युवयोर्दिदृक्षुणा इत्यादि। श्रीहरिवंशे च —

> "त्वद्दर्शनार्थं ते बाला हृतास्तेन महात्मना। विप्रार्थमेष्यते कृष्णो नागच्छेदन्यदेति हि ॥" इति।

अत एव यस्यैव नाम अथ कात्स्न्येन सर्वतोऽपि सामस्त्येन तदतिरिक्तसर्वपरित्याजनादिना अमङ्गलघ्नं तदुपलक्षणतया सर्वमङ्गलत्वादातृ च यथोक्तं ब्रह्माण्डपुराणे तन्नामाष्टोत्तरशतप्रसङ्गे —

> "सहस्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत्फलम्। एकावृत्त्या तु कृष्णस्य नामैकं तत्प्रयच्छति ॥" इति।

तत्रापि विशेषः श्रुतं किमुत गदितमित्यर्थः। किञ्च यत्कृतो येनैवोपदिष्टो गोत्रधर्मः अनाद्यृषिपरम्पराप्राप्तो भगवद्धर्मः

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

यथोक्तमेकादशे स्वयमेव —

"मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥

किम्पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥" इति हि गीतासु यद्वा -

अत्र जगति तादृशधर्मः सदा सर्वत्रागः स्थिरः यथा द्वितीये न ह्यतोऽन्यः शिवः पन्था इत्युपक्रम्य तदुपसंहारे —

"तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥" इति।

यद्वा-गां पृथ्वीमपि त्रायते गोत्रः स चासौ धर्मश्च "अपि चेत्सुदुराचार" इत्यादिकं हि श्रीगीतासु "मद्भक्तियुक्तो भुवनं पुनाती"त्येकादशे च। यद्वा प्रसिद्ध्या योग्यवृत्त्या च गोत्रस्य श्रीगोवर्धनस्य धर्मो मखरूपो येनैव कृतः भक्तवात्सल्यं दर्शयतेन्द्रमपि तुच्छीकृत्य प्रकाशितः। यद्वा तदेव दर्शयता बलिमाददानेन गोत्रधर्मः स्वदेहसम्बन्धभावनारूपो धर्मो यस्मिन् कृतो विहितः न कर्हिचिन्मत्परा इत्यादौ येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्ट,मित्यादि च। यद्वा, श्रीनन्दादौ श्रीवसुदेवादौ श्रीयुधिष्ठिरादौ च गोत्रधर्मः स्वस्वसम्बन्धपुरस्कृतप्रेमा येन कृतो यत्र वा तैः कृतः। यद्वा गास्त्रायन्ते इति गोत्राः श्रीगोपाः तेषां धर्मः स्वभावः असमर्द्धप्रेमा येन यत्र वा कृतः। यद्वा गोत्रधर्मः सर्वरूपातिक्रमिपरमरूपं गोपत्वं येन प्रकाशितमिति। यद्वा गा दिशः त्रायन्ते रक्षन्तीति गोत्रा दिक्पालास्तैर्धर्मः स्वस्वकर्म वर्षणदहनादिरूपं यतः कृतः "वर्षतीन्द्रो दहत्यग्निर्वातश्चरति यद्भयात्" इत्याद्युक्तेः "भीषास्माद्वातः पवते" इत्यादिश्रुतेश्च। गवा वाचा त्रायन्त इति गोत्रा विप्रास्तेषां धर्मः सन्ध्योपासनादिः येन 'वेदो नारायणः साक्षात्' इति न्यायेन वेदरूपेण भगवतैव कृतः "अहरहः सन्ध्यामुपासीत" इति श्रुतेः, "यावज्जीवमग्निहोत्रं जुहुयात्" इति श्रुतेश्च। यद्वा-यत्र यस्मिन् कृतः समर्पितो धर्मोऽत्र जगति अगः कर्हिचिन्न गच्छति न केनाप्यपहर्तुं शक्यते 'धर्मोऽर्पितः कर्हिचिद्ध्रियते न यत्र' इति तृतीये ब्रह्मोक्तेः। यद्वा गोत्रस्य यदुकुलस्य धर्मो राज्यासनाग्रहणरूपो येन कृतः अपाकृतः 'कृ-हिंसायाम्' तच्चोग्रसेनाय राज्यदानलक्षणमिति। यद्वा-स एव येन स्वयं कृतः स्वीकृत इति दिक् ॥★॥ विश्वनाथस्तु — श्रीकृष्णनित्यलीलारत्नाकरं श्रीदशमस्कन्धमुपसंहरन् श्रीकृष्णस्यान्यावतारवैलक्षण्यपञ्चकमाह-तीर्थमिति। यत् यदुषु अजनि जातं तीर्थं कृष्णकीर्तनरूपं तत् कर्तुं स्वःसरिद्रूपं पादशौचं तीर्थम् ऊनं चक्रे। इतः पूर्वं गङ्गैव सर्वतीर्थाधिका आसीत् अतः परन्तु कृष्णकीर्तिरेव ततोऽप्यधिका अभूदिति भावः। इदमेकं चित्रं तथा यत् यस्य विद्विषः कंसादयः स्निग्धा गोप्यादयश्च स्वरूपं क्रमेण सायुज्यं प्रापुः तदीयश्रीविग्रहश्च सम्भोक्तुं प्रापुः। इदं द्वितीयं चित्रं यदर्थे यस्याः कृपालवप्राप्त्यर्थम् अन्येषां ब्रह्मादीनां परिचारकाणां यत्नः। सा श्रीरजित-जयाभावस्तत्परैव अभूत्। बहुतपोभिरपि व्रजस्त्रीश्रेणिरिव यत्, यं जेतुं वशीकृत्य रासादिभिः रमयितुं न शशाकेत्यर्थः। इदं तृतीयं चित्रं यत् यस्य नाम कृष्णेति व्यक्षरं नारायणादिनिखिलतदंशनामोत्कृष्टम् अमङ्गलमविद्यापर्यन्तं हन्तीति तत् श्रुतान् अविशेषेण सर्वसाधनफलोत्कर्षेण मथ्नातीति स्वीयसर्वोत्कर्षेण सर्वसाधनफलोत्कर्षेण मथ्नातीति स्वीयसर्वोत्कर्षेण विलोडयति श्रुतमथ गदितं यस्य तत् नारायणादिनिखिलतदंशनामोत्कृष्टमित्यर्थः।

"सहस्रनाम्नां पुण्यानां त्रिरावृत्या तु यत् फलम्। एकावृत्त्यैव कृष्णस्य नामैकं तत् प्रयच्छति" ॥

इति ब्रह्माण्डपुराणोक्तम् ॥

इदं चतुर्थं चित्रं गां सर्वामपि पृथ्वीं त्रायते चतुर्भिरेव पादैर्निरन्तरं सर्वत्रैवाभिद्रुत्य वा पालयतीति स चासौ धर्मश्चेति स तादृशो येनैव कृतः द्वापरान्ते त्रिपादहीनोऽपि धर्मो येन चतुष्पादेव कृत इत्यर्थः। 'चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहै'रिति पृथिव्युक्तेः। इदं पञ्चमं चित्रं विस्मयावहं वैलक्षण्यं तस्य कृष्णस्य तत्क्षितिभरहरणं तु न चित्रं येनैव लोका विस्मिता भवन्तीति भावः ॥४७॥ एवम्भूतः 'तीर्थं चक्रे' इत्यादिपद्यप्रतिपादितवैभवैकदेशो यतस्ततो हेतोः। स एव श्रीकृष्ण एव आश्रयोऽधिष्ठानम्। अधिष्ठानत्वं तु पृथिव्यादेरप्यस्तीत्यत आह-तेषु जीवेषु। वादमात्रं न वस्तुतः 'न जायते म्रियते वा' इति स्मृतेः। यद्यपि वृक्षादियोनिमतः संसृतिनिवृत्तावधिकारो नास्ति तथापि परमदयालोः श्रीकृष्णस्य न तदपेक्षेत्याह-अधिकारिविशेषेति। तथैव

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

विलासे वैदग्ध्यं दाक्षिण्यं नापेक्षते यत्र तत्तथेति। इत्यर्थ इति-वर्धयन्नतीवोद्दीपयन्निति-तथा च तासामतीव भोगान् सम्पादयंस्तेषु च विरक्तिद्वारा मोक्षं सम्पादयामास। "विरज्येत तथा चित्तं कामानामतिसेवया 'पुंसोऽयं संसृतेर्हेतुरसन्तोषोऽर्थकामयोः' 'न ह्यङ्गाजातनिर्वेदो देहबन्धं जिहासति' इत्याद्युक्तेरिति भावः ॥★॥ एवं तस्य सर्वोत्कृष्टत्वं श्रुत्वा सुखं प्राप्नुवतोऽपि श्रोतॄंस्तदवस्थत्वमतीतमिवाशङ्क्या म्लायतः स्वानुभावेन सान्त्वयन्नाह-जयतीति। देवक्यां जन्म जननलीलानुकरणेन प्रादुर्भावो वादस्तत्त्वबुभुत्सुकथा न तु छलजात्यादिरूपा यस्य। यद्वा देवक्यां जन्मनो वादः ख्यातिर्नन्दस्त्वात्मज उत्पन्न इत्यत्र व्याख्यातरीत्या तु श्रीयशोदायामपि तर्क्यम्। जन्म यस्येत्यर्थः। स प्रसिद्धः श्रीकृष्णो जयति। सर्वदेवस्वरूपरूपगुणलीलापरिकरस्थानगतेन सर्वोत्कर्षेण विराजते। अत्र च लोडर्थत्वं न सम्भवति। सदोत्कृष्टतापराकाष्ठामहिष्ठे श्रीभगवति तद्विज्ञानां तादृशानामाशीर्वादायोगात्। यदि वा तद्योगः कथञ्चित्कल्प्स्तथाप्याशीर्वादविषयस्य सविशेषणस्य तस्य तदपि तथैवावस्थितिप्राप्तेर्विवक्षितार्थ एव लभ्येत। धार्मिकसभ्यादिसम्पन्नो विष्णुमित्रो वर्धतामितिवत्। अथ कथम्भूतः सन् जयतीत्यपेक्षायां विशेषणानि वदन् परिकरविशिष्टतयाऽऽह-तेन च तादृशतन्नित्यजये विद्वत्प्रत्यक्षलक्षणं प्रमाणमप्याह-जनेषु सालोक्येत्यादिपद्ये जना इतिवत् तदीयेष्वन्तरङ्गेषु श्रीयादवगोपादिषु साक्षान्निवासोऽन्येषु च तत्स्फूर्तिरूपो यस्य सः तत्र चान्यार्थतां परिहरंस्तस्मिन् जये विवृत्यैव तैर्जनैः विशिष्टतामाह-यदुवरेत्यादिना। तत्रान्तरङ्गैर्विशिनष्टि-यदुवराः क्षत्रिया गोपाश्च। परिषत् सभारूपा यस्य सः। बहिरङ्गैश्च विशिनष्टि-स्वे भक्तजना एव दोषो भुजा इव भुजास्तैरधर्ममेतादृशार्थं नास्तिक्यादिकं जगति चास्यन् दूरीकुर्वन् अतस्तत्तत्सम्बन्धेन स्थिरचराणामन्तरङ्गाणां स्ववियोगदुःखहन्ता बहिरङ्गाणां संसारहन्तापि सन् अथ तत्रापि परमान्तरङ्गैर्विशिनष्टि-सुस्मितेनेति। शोभनं स्मितं तदुपलक्षितप्रसादविलासादिकं यत्र तेन स्वभावत एव श्रीयुक्तेन च मुखेनैव प्राधान्यतः प्रथमोक्तानां व्रजवनितानां तदनन्तराणां पुरवनितानां जनितात्यर्थानुरागाणां तासां योषितां यः कामः स एव दीव्यति परमप्रेमरूपत्वात् सर्वतोऽपि विराजतीति देवः तं वर्धयन् सदैवोद्दीपयन् इति स्वरूपुणलीलास्थानविशिष्टतापि दर्शिता। तदेवं सर्वस्यापि विशेषणस्य विधेयेन जयत्यर्थेनानुगतत्वात्तादृशोऽसौ स्वयमेव तादृशैः परिकरैः सह तादृशविलासादिविशिष्टो व्रजे पुरद्वये च सदा सर्वोत्कर्षेण विराजत एवेति स्थितम्। युक्तमेव च तत् स्वयं भगवत्त्वात् आगन्तुकतादृशत्वे स्वयं भगवत्त्वहानेः तस्मादविचारेणैवास्य कानिचिद्वचनानि प्रतिकूलायन्ते वस्तुतस्तु अनुकूलान्येव तत्र दशमस्कन्धस्य तत्र तत्र व्याख्यातान्येव तत्स्वरूपनित्यवे प्रथमस्कन्धस्य ययाहरद्भुवोभारमित्यादिद्वयं तु यथा तनुरूपकलेवरशब्दा भाववाचिन एव। यथा तृतीयस्कन्धे विसर्गप्रसङ्गे ब्रह्मणि तत्पर्यायशब्दस्य एवार्थः स्वीकृतः अनुपपत्तेः। तत्र यदि सा तर्हि कथं स्वयं भगवति न स्यात्। स च भावोऽत्र भूभारजिहीर्षालक्षणः मायाकार्यसम्बन्धित्वात्तदाभास एव च ततः साम्ये कण्ठकदृष्टान्तत्वं सुसङ्गतमेव। नटदृष्टान्तत्वं च श्रव्यरूपकाभिर्नेतुर्नटस्य स्वरूपवेषाभ्यामेव स्थितस्य तत्तद्भावाभासस्वीकारपरित्यागमात्राभ्यामिति एव स्थितस्य तत्तद्भावभासस्वीकारपरित्यागमात्राभ्यामिति। एवमन्यत्राप्याकृतिदेहशब्दौ व्याख्येयौ। अथवा त्यागस्वीकारौ नामान्तर्ध्यापनाविर्भावने एव यथा श्रीमध्वाचार्यधृतं तन्त्रभागवतवचनं पूर्वमुदाहृतम् —

"अहेयमनुपादेयं तद्रूपं नित्यमव्ययम्। स एवापेक्ष्यरूपाणां व्यक्तिमेव जनार्दनः ॥
अगृह्णाव्द्यसृजच्चेति कृष्णरामादिकां तनुम्। पठ्यते भगवानीशो मूढबुद्धिव्यपेक्षया ॥" इति ॥

एवं प्रथमस्य द्वादशे विधूयेत्यादि पद्ये स्वामिभिरप्युक्तं यत्र दृष्टस्तत्रैवान्तर्हितः न त्वन्यत्र गतः। यतो विभुः सर्वगत इति अत एव तृतीये —

"प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम्। आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम् ॥"

इत्यत्रापि लोकलोचनरूपं स्वबिम्बं निजमूर्तिं प्रदर्श्य पुनरादायैव चान्तरदधात्। न तु त्यक्त्वेत्युक्तम्। यथा मत्स्यादिरूपाणीत्यनन्तरमपि तथोक्तं यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वेति त्यागोऽत्र स्वतनुकरणक इति सर्वान्ते तल्लोकभगनं च सर्वांशमाकृष्यावतीर्णस्य तस्य तत्तदंशेनैव तथैकादशस्कन्धस्य लोकाभिरामामित्यादिकं सयुक्तिकं टीकाकृद्भिरेव व्याख्यातम्।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अथात्रानुकूलवचनानि तत्र सर्वावतारगतानि । यथा नृसिंहपुराणे —

"युगे युगे विष्णुरनादिमूर्तिमास्थाय शिष्टं परिपाति दुष्टहा" इति ।

अत एव तत्तदाराधनं शास्त्रं च मिथ्या न स्यात् तत एव च जलेषु मां रक्षतु मत्स्यमूर्तिरित्यादि श्रीनारायणवर्मादौ । तथा नित्यत्व एव शालग्रामशिलादिषु नरसिंहत्वादिभेदः सङ्गच्छते । तत्तत्सान्निध्यादेव हि तत्तद्भेदः श्रूयते चैवं नवस्वपि वर्षेषु साक्षात्तत्तदुपासनादि यथोक्तं नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि सन्निधीयत इति । श्रीप्रद्युम्नादीनां नतिविलासादिकं च तत्र तत्र वर्णितम् । तत्र श्रीप्रद्युम्नस्य तावद्दृश्यते अतीव सुललितगतिविलासरुचिरहासावलोकलीलयेत्यादि रमां रमयन्नित्यादि च । अत एवोक्तं तत्र तत्र सङ्कर्षणसंज्ञामात्मसमाधिरूपेण सन्निधाप्येति । ब्राह्मपाद्मोत्तरखण्डादौ श्रीमत्स्यादीनां वैकुण्ठे पृथक् पृथक् लोकाश्च श्रूयन्ते । तथा मध्वभाष्यप्रमाणिता श्रुतिश्च वासुदेवः सङ्कर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मो वराहो नृसिंहो वामनो रामो रामः कृष्णो बुद्धः कल्किरहं शतधाहं सहस्रधाहम् अमितोऽहमनन्तोऽहम् । नैवैते जायन्ते नैतेषामनुज्ञानबन्धो न मुक्तिः सर्व एव ह्येते पूर्णा अजरा अमृताः परमाः परमानन्दा इति । अथ विशेषतः श्रीकृष्णगतानि यथा तत्रैकादशान्ते धारणाध्यानमङ्गलमित्यत्र च श्रीस्वामिभिर्व्याख्यातम् । धारणाया ध्यानस्य च मङ्गलं शोभनं विषयम् इतरथा तयोर्निर्विषयत्वं दृश्यते चाद्याप्युपासकानां साक्षात्कारस्तत्फलप्राप्तिश्चेति तथा च त्रैलोक्यसम्मोहनतन्त्रे श्रीमदष्टादशाक्षरप्रसङ्गे —

"अहर्निशं जपेद्यस्तु मन्त्री नियतमानसः । स पश्यति न सन्देहो गोपवेषधरं हरिम् ॥" इति ॥

एवं गौतमीये च सदाचारप्रसङ्गे —

"अहर्निशं जपेन्मन्त्रं मन्त्री नियतमानसः । स पश्यति न सन्देहो गोपवेषधरं हरिम् ॥" इति ॥"

वृन्दावने वसेद्धीमान् यावत्कृष्णस्य दर्शनमिति च, तथा च श्रीकृष्णसहस्रनामप्रारम्भे —

"तस्य हृष्टाशयः स्तुत्या वृष्णिगोपाङ्गनावृतः । तापिञ्छश्यामलं रूपं पिञ्छोत्तंसमदर्शयत् ॥" इति ।

अग्रे च तद्वाक्यम् —

"मामवेहि महाभाग कृष्ण कृत्यविदांवर । पुरस्कृतोऽस्मि त्वद्भक्त्या पूर्णास्ते स्युर्मनोरथाः ॥" इति ।

तथा पाद्मनिर्माणखण्डे "पश्य त्वं दर्शयिष्यामि स्वरूपं वेदगोपितम्" इति श्रीभगवद्वाक्यानन्तरं ब्रह्मवाक्यम् —

"ततोऽपश्यमहं भूप बालं कालाम्बुदप्रभम् । गोपकन्यावृतं गोपं हसन्तं गोपबालकैः ॥
कदम्बमूलआसीनं पीतवाससमद्भुतम् । वनं वृन्दावनं नाम नवपल्लवमण्डितम् ॥" इत्यादि ॥

श्रीगोपालतापनी चैवं ———

"तदुहोवाच ब्राह्मणोऽसावनवरतं मेध्यातः स्तुतः परार्धान्ते सोऽबुध्यत गोपवेषो मे पुरस्तादाविर्बभूव ।"

इति सिद्धनिर्देशमपि श्रूयते । बृहन्नारदीयमङ्गलाचरणे, वन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरम् ॥ इति । स्कान्दद्वारकामाहात्म्ये श्रीबलिं प्रति प्रह्लादवाक्ये —

"गृहे सन्तिष्ठते यस्य माहात्म्यं दैत्यनायक । द्वारकायाः समुद्भूतं सान्निध्यं केशवस्य च ॥
रुक्मिणीसहितः कृष्णो नित्यं निवसते गृहे ॥" इति ॥

पाद्कार्तिकमाहात्म्ये तत्प्रातः स्नानार्घ्यमन्त्रे —

"व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम । गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥" इति ॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

एवं नाना मन्त्रा अपि तथैव तं साक्षान्निर्दिशन्ति । अत एव गोपालतापिन्यां गोविन्दं सच्चिदानन्दविग्रहं वृन्दावनसुरभूरुहतलासीनं सततम् । समद्गणोऽहं परया स्तुत्या तोषयामीति ॥ तदेवमभिप्रेत्य श्रीशुकदेवोऽपि निजीभीष्टदैवतत्वेनाह —

"पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सताम्पतिः ॥" इति ।

प्रीयान्न इन्दो गवामिति च श्रीमन्त्रराकृतिमेवाधिकृतस्य नारायणवर्मण्यप्याह-

"मां केशवो गदया प्रातरव्याद्गोविन्द आसङ्गव आत्तवेणुः" इति ।

एवं श्रीमन्त्रराकारे वा येषां वा भ्रान्तिः सा तेषामपि निरस्ता । यथोक्तम् —

"यत्पादपासुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यलभ्यः ॥
स एव यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमहो व्रजौकसाम् ॥"

एवं न चान्तर्बहिर्यस्येत्यादि । नौमीड्यते इत्यादि । सकृद्यदङ्गप्रतिमेत्यादि । अहोभाग्यमहोभाग्यमित्यादि च । श्रीकृष्णाष्टोत्तरशतनामस्तोत्रे श्रीमन्त्रराकृतित्वमेवाधिकृत्य —

"नन्दव्रजजनानन्दी सच्चिदानन्दविग्रहः । नवनीतविलिप्ताङ्गो नवनीतनटोऽनघः ॥" इति ।

श्रीगोपालतापिन्यामपि —

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तं पीठगं ये तु यजन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥" इति ।

विषयश्चोक्तः गोप्यस्तपः किमचरन् यदमुष्येत्यादौ । तथा च पाद्मनिर्माणखण्डे श्रीवेदव्यासवाक्यम् —

"दृष्ट्वातिहृष्टो ह्यभवं सर्वभूषणभूषणम् । गोपालमबलासङ्गमुदितं वेणुवादिनम् ॥
ततो मामाह भगवान् वृन्दावनचरः स्मयन् । यदिदं मे त्वया दृष्टं रूपं दिव्यं सनातनम् ॥
निष्कलं निष्क्रियं शान्तं सच्चिदानन्दविग्रहम् । पूर्णपद्मपलाशाक्षं नातः परतरं मम ॥
इदमेव वदन्त्येते वेदाःय् कारणकारणम् ॥" इत्यादि ॥

अथ तस्य मानसानां शारीराणां च गुणानां स्वाभाविकत्वमव्यभिचारित्वं चोक्तम् । प्रथमे सत्यं शौचं दया क्षान्तिरित्यादिना -

"एते चान्ये च भगवन्नित्या यत्र महागुणाः । प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित् ॥" इत्यन्तेन ॥

अथ तत्तत्परिकरनित्यत्वे प्रतिकूलायमानानि यथार्थं व्याख्यायन्ते । तत्र देवावतरणवाक्यमेकदेशप्रस्तावमयमिति पूर्वपूर्वादशतमस्ति । मौशलादिकं च ब्रह्मशापमर्यादारक्षार्थं मायिकमेव । आह स्म च तदानीमेव दारुकम् इति श्रीभगवान् —

"त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः । मन्मायारचितामेतां विज्ञायोपशमं व्रज ॥" इति ।

अस्यार्थः — त्वं तु दारुको ज्ञाननिष्ठो मदीयलीलातत्त्वज्ञः मद्धर्मं मम स्वभक्तपालयितृत्वरूपं स्वतुल्यपरिकरसङ्गित्वरूपं च स्वभावम् आस्थाय विस्रभ्य एतामधुना प्रकाशितां सर्वामेव मौशलादिलीलां मम माययैवेन्दजालवद्रचितां विज्ञाय उपेक्षको बहिर्दृष्ट्या जातं शोकमुपेक्षमाणः उपशमं चित्तक्षोभान्निवृत्तं व्रजेति । अत्र दारुकस्य स्वयमेव तल्लोकादवतीर्णत्वेन सिद्धत्वादेतामित्यत्रातिसन्निहितार्थलाभाच्चान्यथा व्याख्यानमेव प्रथमप्रतीत्यविषय इति विवेक्तव्यम् । तथा चैकादशान्ते पद्यत्रयं तत्र प्रथमं यथा —

"राजन् परस्य तनुभृज्जननाप्ययेहा माया विडम्बनमवेहि यथा नटस्य ।
सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिनो परतः स आस्ते ॥" इति ।

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

अस्यार्थः — परस्य श्रीकृष्णस्य तदुभृतः पार्षदा यादवादयस्तेषां जननाप्ययरूपा ईहाश्चेष्टाः केवलं परस्यैव मायया विडम्बनमनुकरणमेवावेहि। यथेन्द्रजालविद्यावेत्ता नटः कश्चित् जीवत एव मारयित्वेव पुनश्च तद्देहं जनयित्वेव दर्शयति। तस्येव विश्वसर्गादिहेत्वचिन्त्यशक्तेस्तस्य तादृशशक्तित्वं न च चित्रमित्याह–सृष्टेति। एवमेव दृश्यते चाद्याप्युपासकानामित्यादि तव्द्याख्यानं सुसङ्गच्छते। तत्तत्परिकरेणैव सार्धं तेषु तत्सत्कार इति। एवं सति श्रीसङ्कर्षणादौ मुग्धानामन्यथा हेतूदाहरणाभासः सुतरामेव मायिकः। स्कान्दायोध्याखण्डे श्रीलक्ष्मणस्यापि तादृशत्वं न सम्प्रतिपन्नं तथा हि तदन्तिमदशानुकरणलीलायां —

''ततः शेषात्मतां जातं लक्ष्मणं सत्यसङ्गरम्। उवाच मधुरं शक्रः सर्वस्य च स पश्यतः ॥

इन्द्र उवाच

लक्ष्मणोत्तिष्ठ शीघ्रं त्वमारोहस्य पदं स्वकम्। देवकार्यं कृतं वीर त्वया रिपुनिषूदन ॥
वैष्णवं परमं स्थानं प्राप्नुहि त्वं सनातनम्। भगवन्मूर्तिः समायाता शेषोऽपि विलसत्फणः ॥'' इत्यादि। ततश्च —

''इत्युक्त्वा सुरराजेन्द्रो लक्ष्मणं सुरसङ्गतः। शेषं प्रस्थाप्य पाताले भूभारधरणक्षमम् ॥
लक्ष्मणं यानमारोप्य प्रतस्थे दिवमादरात् ॥'' इति ॥

अत एव जरासन्धवाक्ये, तव यदि श्रद्धेत्यत्र श्रीस्वमिभिरपीत्थं वास्तवार्थो व्यञ्जितः। अच्छेद्यदेहोऽसाविति। स्वयमेव मत्वा अपरितोषात्पक्षान्तरमाह–यद्वा मां जहीति। अथा द्वितीयं यथा अप्राकृतानां तेषां तत्र सम्भवतीत्यास्तां श्रीकृष्णपल्यत्वेनैव न सम्भवतीत्याह ————

''मर्त्येन यो गुरुसुतं यमलोकनीतं त्वं चानयच्छरणदः परमास्त्रदग्धम्।
जिग्येऽन्तकान्तकमपीशमसावनीशः किं स्वावने त्वरनयन्मृगयुं सदेहम्'' ॥इति॥

अस्यार्थः —

यः श्रीकृष्णः यमलोकं गतमपि गुरुसुतं गुरोर्जातेन पञ्चजनभिक्षितेन तेन मर्त्येन देहेनैवानयत्। न च ब्रह्मतेजसो बलवत्त्वं मन्तव्यं त्वां च परमास्त्रदग्धं ब्रह्मास्त्रेण दग्धुमारब्धं यस्तस्माद्ब्रह्मास्त्रादानयत् रक्षितवानित्यर्थः। किमन्यद्वक्तव्यं यश्चान्तकानामन्तकमीशं श्रीरुद्रमपि बाणसङ्ग्रामे जितवान् अहो यश्च तं जराख्यं मृगयुमपि स्ववैंकुण्ठविशेषं सशरीरमेव प्रापितवान्। स कथं स्वानां यदूनाम् अवने ईशो न भवति तस्मात्ते स्वन्यथादर्शनं न तात्त्विकलीलानुगतं सशरीरं तु तेषां स्वलोकगमनमतीव युक्तमित्यर्थः।

अथ तृतीयं यथा ननु गच्छन्तु तादृशशरीरा एव स्वं धाम तत्रापि स्वयं भगवान् विराजत एवेति न तेषां तद्विरहदुःखमपि। श्रीभगवांस्तु तथा सामर्थ्यं चेत्तर्हि कथमन्यांस्तादृशान्निर्माय तैः सह मर्त्यलोकानुग्रहार्थमपरमपि कियन्तं कालं मर्त्यलोके प्रकटो नासीत्। इत्यत्र सिद्धान्तयन् तेषां श्रीभगवतश्च सौहार्दभारेणापि परस्परमव्यभिचारित्वमाह —

''तथाप्यशेषस्थितिसम्भवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक्।
नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् ॥'' इति।

अस्यार्थः —

यद्यप्युक्तप्रकारेणाशेषस्थितिसम्भवाप्ययेषु अनन्यहेतुः यद्यस्मात्तदूर्ध्वमप्यनन्ततादृशशक्तिधृक् तथापि यादवानन्तर्धाप्य निजं वपुः अत्र शेषितं प्रणेतुं किञ्चित्कालं स्थापयितुं नैच्छत्। किन्तु स्वयमेव लोकमनयत्। तत्र हेतुः तान् विना मर्त्येन लोकेन किं मम प्रयोजनमिति स्वःस्थानां तद्धामगतानां तेषां गतिमेव स्वस्याभिरुचितत्वेन प्रकृष्टां दर्शयन्निति अतस्तेषां श्रीभगवद्वदनन्तर्धानमेव न त्वन्यदस्तीति श्रीभगवदभिप्रायकथनेनापि श्रीमानुद्धव आह तृतीये —

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

"मिथो यदैषां भविता विवादो मध्वासवाताम्रविलोचनानाम्।
नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेऽन्तर्दधते स्वयं स्म ॥" इति ॥

अस्यार्थः ———

एषां यदूनां यदा मिथो विवादस्तदाप्येषां पृथिवीपरित्याजने वधरूप उपायो न विद्यते। किमुतान्येन विवादने। स न स्यादिति तर्हि तेषां मयाभिलषिते पृथ्वीपरित्याजकत्वे कतम उपायो भवेत् तत्र पुनः परामृशति- अतो वधादन्य एव इयानेतावानेवोपायो वर्तते । कोऽसौ । मयि उद्यते ममेच्छया एते स्वयमन्तर्दधत इति यः स्मेति निश्चये, तेन कूर्मपुराणोक्तश्रीसीताहरणवत् पुरस्त्रीहरणमपि मायिकं ज्ञेयम्। तथैवासां विवाहप्रसङ्गे स्वरूपशक्तित्वं प्रमाणितम्। किञ्च तेषु यच्चान्यच्छस्त्राघातमूर्च्छातत्त्वबुभुत्सादिकं श्रूयते तद्भवेदत इव नरलीलौपयिकतया प्रपञ्चितमिति क्वचिच्च प्रकटलीलायाः प्रापञ्चिकमिश्रत्वाद्यथार्थमेव च तत्तत् यथा शतधन्ववधादौ । अन्तरङ्गाणां तु भगवत्साधारण्यमेव तत्तन्नित्यपरिकरत्वेन दर्शितत्वाद्युक्तम्। तदनुकूलानि चैतानिवाक्यानि यथा पाद्मकार्तिकमाहात्म्ये श्रीसत्यभामां प्रति श्रीभगवद्वाक्यम् —

"एते हि यादवाः सर्वे मद्गणा एव भाविनि। सर्वदा मत्प्रिया देवि मत्तुल्यगुणशालिनः ॥" इति। पाद्मोत्तरखण्डे —

"यथा सौमित्रिभरतौ यथा सङ्कर्षणादयः। तथा तेनैव जायन्ते निजलोकाद्यदृच्छया ॥
पुनस्तेनैव गच्छन्ति तत्पदं शाश्वतं परम्। न कर्मबन्धनं जन्म वैष्णवानां च विद्यते ॥" इति ॥

श्रीगोपालतापिन्यां जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयम्। योऽसौ सौर्ये तिष्ठति। योऽसौ गोषु तिष्ठति। सोऽसौ गोपान् पालयति। योऽसौ गोपेषु तिष्ठतीत्यादि। सौर्य्य इति सौर्य्यां यमुनायास्तीरे श्रीवृन्दावने सहस्रनाम्नि सुयामुन इति हि तद्भाष्ये व्याख्यातम् । अथ प्रपञ्चे प्रकटाप्रकटरूपेण प्रकाशभेदेन स्थितानि श्रीवृन्दावनादीन्येव नित्यस्थानानीति च पूर्वोदाहरणजातेन व्यक्तमेवास्ति। यथोक्तं पाद्मनिर्माणखण्डे श्रीभगवद्वाक्यम् —

"नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा। ममावतारो नित्योऽयमत्र मा संशयं कृथाः ॥" इति ॥

तथा च बृहद्गौतमीये **श्रीकृष्ण उवाच —**

"इदं वृन्दावनं रम्यं मम धामैव केवलम्। अत्र ये पशवः पक्षिवृक्षाः कीटा नरामराः ॥
ये वसन्ति ममाधिष्ण्ये मृता यान्ति ममालयम्। अत्र या गोपकन्याश्च निवसन्ति ममालये ॥
योगिन्यस्ता मया नित्यं मम सेवापरायणाः। पञ्चयोजनमेवास्ति वनं मे देहरूपकम् ॥
कालिन्दीयं सुषुम्णाख्या परमामृतवाहिनी। अत्र देवाश्च भूतानि वर्तन्ते सूक्ष्मरूपतः ॥
सर्वदेवमयश्चाहं न त्यजामि वनं क्वचित्। आविर्भावस्तिरोभावो भवेदत्र युगे युगे ॥
तेजोमयमिदं रम्यमदृश्यं चर्मचक्षुषा।" इति ॥

यथैकादशस्कन्धान्ते —

"द्वारकां हरिणा त्यक्तां समुद्रो प्लावयन् क्षणात्। वर्जयित्वा महाराजं श्रीमद्भगवदालयम् ॥
नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः। स्मृत्याशेषाशुभहरं सर्वमङ्गलमङ्गलम् ॥" इति ॥

एवमेव विष्णुपुराणे —

"प्लावयामास तां शून्यां द्वारकां च महोदधिः। यदुदेवगृहन्त्वेकं नाप्लावयत सागरः ॥
नात्यक्रमेत्ततो ब्रह्मंस्तदद्यापि महोदधिः। नित्यं सन्निहितस्तत्र भगवान् केशवो यतः ॥" इति दिक् ॥४८॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

इत्थं परस्य भूम्नः श्रीकृष्णस्य तदनुरूपानुकारीणि स्वीकृतलीलातनोरुचितानि कर्मकषणानि दुष्कर्महरणसमर्थानि मोक्षोपयोगीनि । वा अमुष्यबुद्धिष्ठस्य अनुवृत्तिं सन्ततप्रवाहम् । यद्वा-पदयोरैहिकामुष्मिकस्थानयोरनुवृत्तिं निवृत्तिम् । उपसर्गाणामनेकार्थत्वादनु निषेधेऽपि एतेनैहिकामुष्मिकभोगविरक्तिरुक्ता भगवन्निष्ठावतः । इत्यर्थ इति-पुरुषेण निजकल्याणार्थं हरिकथैव सर्वधर्मान्परित्यज्य श्राव्या "ज्ञानं यदा प्रतिनिवृत्तिगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसङ्गः । कैवल्यसम्मतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात्" ॥ इत्याद्युक्तेरिति भावः ॥★॥ हन्तैतादृशपरधाम्नस्तस्यानुगतिं जनः कथं लभेत । उच्यते नेदं मदुक्तं श्रीभगवल्लीलावर्णनशास्त्रं शास्त्रान्तरमिव स्वाभिहितार्थानुष्ठानेनैव फलप्रदं किन्तु श्रवणमात्रेणापीत्याह-इत्थमिति । यद्वा, तेषां तन्नित्यपार्षदानां नित्या तदेकधामस्थितिः किं वर्ण्यतां तैः सह या लीलास्ताः शृण्वतामपि सा नित्यैव स्यादित्याह-इत्थमिति । अनेन पूर्वोक्तप्रकारेण परस्य सर्वागोचरगतेरपि कृपया निजधर्मस्य स्वभक्तिरूपस्य रिरक्षया रिरक्षेषया आत्ता प्रपञ्चं प्रत्यानीता प्रकटिता लीलाप्रधाना तनुर्निजविग्रहो येन तस्य कर्माण्यमुष्य पदयोरनुवृत्तिमनुगतिमिच्छन् जनः शृणुयात् परस्येति विशिनष्टि । यदूत्तमस्य पूर्वपूर्वप्रमामाण्येन यदुषु पुरस्थेषु वनस्थेषु च उत्तमस्य तत्तदाश्रयस्य तत्तथैव नित्यलीलस्येति यावत्कर्माणि विशिंनष्टि तदनुरूपाणि लीलातनुयोग्यानि च तानि विडम्बनानि अन्यसादृश्यातिक्रमीणि च तानीति । यद्वा, तदनुरूपाणि तत्सदृशानि अवतारान्तरकर्माणि तान्यपि विडम्बयन्ति । हीनोपमात्वं प्रापयन्ति यानि तानि असमोर्ध्ववैभवानीत्यर्थः । अत एवोक्तं द्वितीये-कर्माणि चात्ममहिमोपनिबन्धनानीति । तथा कर्मरूपाण्यपि कर्मकषणानि जगतां कर्मविलोपकानीति ॥४९॥ तया पदयोरनुवृत्त्या । तन्निष्ठत्वेन भगवन्निष्ठत्वेन । लोकं वैकुण्ठादि स्वरूपं वा कालेनानाकलितमस्पृष्टम् । दुस्तरश्चासौ कृतान्तजवस्तस्यापवर्गस्त्यागो यस्मिंस्तत्तथा । यदर्थं यस्य हरेर्धामैवार्थो येषां ते क्षितिभुजो ग्रामाद्वनं ग्रामं विहाय वनं ययुः । एतेन राज्यादपि तत्र सुखातिशयो व्यज्यत इति ध्वनितम् (५०) क्वचित्पुस्तकेषु चित्रं (चित्रं न चैतदुरुगायविचित्रलीलाविध्वस्तकल्मषकदम्बकमुक्तिरूपम् । स्त्रीणां सुदुस्त्यजकृतान्तजवापवर्गं ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः ॥१॥) न चेत्यादिकोऽधिकः श्लोकोऽप्यस्ति तस्य चायमर्थः-गोप्यादिस्त्रीणां यदुरुगायस्य पवित्रलीलया विध्वस्तः कल्मषाणां कदम्बको यस्मिन्मुक्तिरूपे तद्यज्जातमेतच्चित्रं न चेत्यन्वयः । अन्यत्पूर्ववत् ॥

स्वाम्यभिप्रायदौर्बोध्याद्यन्मया साहसं कृतम् । तन्मे क्षाम्यन्तु विद्वांसो ह्ययुक्तं शोधयन्तु ते ॥१॥

कलिंदजातीरविहारशालिनं गोपाङ्गनाभिर्धृतवेणुवादिनम् । सदा नमस्ये निजचेतसा धृतं श्रीनन्दसूनुं सुरराजवन्द्यम् ॥२॥

॥ इति श्रीखरडपत्तनवास्तव्यपंण्डितवंशीधरशर्मविरचिते श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे नवतितमोऽध्यायः ॥९०॥★॥ तथा तच्छ्रवणेन तदनुवृत्तिप्राप्तिः स्यात्तथा विवृणोति-मर्त्य इति । ननु हे राजन्! मर्त्यो मरणधर्मा यः कोऽपि तया पूर्वोक्तमाहात्म्यया मुकुन्दश्रीमत्कथाश्रवणकीर्तनचिन्तया मुकुन्दस्य सर्वदुःखविमोचकत्वेन महाकारुणिकस्य स्वयं भगवतो या श्रीमती सर्वसम्पदां धात्री च कथा तस्याः श्रवणेन जातं यत्कीर्तनं स्वयमुल्लासतो गानं तत्र या चिन्ता तत्प्राप्त्युत्कण्ठामयी स्मृतिस्तया समेधितया नित्यमेव तेन गानेन वर्द्धितया सत्या पूर्वोक्तं श्रीवृन्दावनादिप्रकाशविशेषरूपं तद्धाम एति वासनानुसारेण तदेकतरं प्राप्नोति । तदेव विशिनष्टि-दुस्तरः ब्रह्मादिभिरपि स्वतोऽपरिहार्यो यः कृतान्तः कृतः सर्वस्यान्तो येन स कालः तस्यापि जवस्य विक्रमस्य अपवर्गः समाप्तिर्यत्र । तत् यदुक्तं 'न यत्र माया न च कालविक्रमः' इति 'दर्शयामास लोकं स्वं गोपानां तमसः परम्' इति च, तच्च परमविषयान्धानामपि लोभनीयशोभम् । किमुत मुमुक्षुमुक्तभक्तानामुत्तरोत्तरपरमदृशामित्याह-ग्रामादिति । क्षितिः सप्तद्वीपवती पृथ्वी तां भुञ्जते ये तेऽपि बहवो यदेव परमपुरुषार्थो येषां तथाभूताः सन्तो ग्रामात् अन्यसर्वारोचकतया जनस्थानमात्रं त्यक्त्वा वनं जनमात्रशून्यप्रदेशं भाग्यवशात् द्वादशवनात्मकं श्रीमथुरामण्डलं वा ययुः । तत्र गत्वा नित्यमवसन् । श्रीमन्मथुरामण्डलस्यैव परमसाधनसाध्यरूपत्वा त् । तथा हि आदिवाराहे —

"न पापेभ्यो भयं यत्र न भयं यत्र वै यमात् । न गर्भवासभीर्यत्र यत्क्षेत्रं को न संश्रयेत् ॥
मथुरां च परित्यज्य योऽन्यत्र कुरुते रतिम् । मूढो भ्रमति संसारे मम मायाविमोहितः ॥" इति ॥

किञ्च स्कान्दे —

"तन्मण्डलं माथुरं हि विष्णुचक्रोपरि स्थितम्। पद्माकारं सदा तत्र वर्तते शाश्वतं नृप ॥" इति ॥

किञ्च वाराहे —

"लाभानां मथुरालाभो ज्ञानानां ज्ञानमुत्तमम्। प्रीतीनां परमा प्रीतिर्गतीनां गतिरुत्तमः ॥" इति ॥

एत एवोक्तं पाद्मपातालखण्डे 'अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी'त्यादि ॥५०॥ इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे जीवगोस्वामिकृतवैष्णवतोषिण्यां नवतितमोऽध्यायः ॥९०॥ समाप्तश्चायं दशमस्कन्धः ॥१०॥

अथास्य श्रवणमाहात्म्यं पाद्मे ———

"**हरिस्त्वाच ॥**

शृणु ब्रह्मन्ममाङ्गेषु दशमो ब्रह्मरन्ध्रकम्। तं श्रुत्वा च महापापान्मुच्यते नात्र संशयः ॥१॥
चमत्कारपुरे विप्रो वामनाख्योऽभवत्पुरा। पठनार्थं स काश्यां हि जगाम बलवत्तरः ॥२॥
श्रीकण्ठकादिद्वजात्तत्र पपाठ निगमं द्विजः। गुरुपत्नीं रूपवतीं दृष्ट्वा रन्तुमियेष सः ॥३॥
बहुशः प्रार्थयामास रत्यर्थं कामपीडितः। तदप्रीतिं विचार्याशु मनसा चिन्तयंश्च सः ॥४॥
इत्थं पापं चकारासौ तच्छृणुष्व महामते। हत्वास्याः स्वामिनं पश्चादेषा यब्धुमिहार्हति ॥५॥
एकदा गुरुणा सार्धं गतो देशान्तरं द्विजः। मार्गे गुरुं नाशयित्वा पाशास्त्रादिभिरेव सः ॥६॥
गुरुगेहे रुरोदोच्चैर्हा गुरो क्व गतो भवान्। सा पप्रच्छ तदा शिष्यं कथं रोदिषि पुत्रक ॥७॥
प्रोवाच शृणु देवि त्वं सर्पदष्टो मृतो गुरुः। तद्दाहादिककर्माणि कृत्वा चात्र समागमम् ॥८॥
हर्षयुक्तो महापापी गुरुगेहेऽवसत्तदा। मद्यं पीत्वैकदा रात्रौ हेतुं स्मृत्वा गुरोर्वधे ॥९॥
सुरतं कृतवान् पापो हठाद्गृह्य गुरुस्त्रियम्। सुरतान्ते रुदित्वोच्चैर्नष्टसंज्ञा व्यजायत ॥१०॥
गृहीत्वा गेहगं द्रव्यं प्रदुद्राव स वामनः। चतुष्टयं पातकानां कृत्वा स्वगृहमाविशत् ॥११॥
स्वविवाहं चकाराशु वामनोऽथ प्रजाशया। पत्नीं प्राप्य वरारोहां नाम्ना राजीं खलस्तदा ॥१२॥
तस्यामुत्पादयामास कन्यां कमललोचनाम्। षोडशाब्दा यदा कन्या तदा पत्नी मृता शुभा ॥१३॥
स मद्यपो महापापी सुतया रतिमाचरत्। तदा ज्ञातं ज्ञातिजनैस्ततो निष्कासितः कुलात् ॥१४॥
यदा सुता मृता तस्य तदा स वनमध्यगात्। हत्वा पक्षिगणांस्तत्र कालक्षेपं चकार ह ॥१५॥
कदाचिद्गोमतीतीरे स ययौ हिंसनाशया। तत्र शाशं (मांसम्।) भक्षितवान् सर्पगर्भसमन्वितम् ॥१६॥
स तेन मूर्च्छितो भूत्वा पपात दिनविंशतिम्। तत्र गाथा मुनिकृता दशमस्कन्धसम्भवा ॥१७॥
किञ्चित्संज्ञेन तेनाथ श्रुता पञ्चदिनं विधे। ततो मरणकालेऽस्य चागता यमकिङ्कराः ॥१८॥
विष्णुदूतास्तथायाता ब्रुवन्तो मुच्यतामिति। इति श्रुत्वा वचो याम्याः प्रत्यूचुर्वैष्णवान्प्रति ॥१९॥
कथं समागता यूयं पापोऽयं खलु सर्वथा। अहो मूढतमा यूयं विष्णुना प्रेषिता वयम् ॥२०॥
दशमश्रुतिमात्रेण सन्तुष्टोऽस्य जनार्दनः। इत्युक्त्वा वैष्णवास्तं हि विमाने स्थाप्य वामनम् ॥२१॥
वैकुण्ठमनयँल्लोकं सुरेड्यं (लोकविशेषणम्।) ब्राह्मणाधमम्। सुरापं गुरुहन्तारं सुवर्णस्तेयकारिणम् ॥२२॥

श्रीवंशीधरकृतो भावार्थदीपिकाप्रकाशः

पुत्रीरतं गुरुस्त्रीषु संसक्तं सर्वगर्हितम् । निवृत्य यमदूतास्ते यमराज्ञे न्यवेदयन् ॥२३॥
श्रुत्वा यमः प्रत्युवाच स्वदूताञ्छृणु तद्विधे । दशमाक्षराकर्णनेन मुक्तः स्यात्पापकोटिभिः ॥
किं श्रुतं निखिलं येन कृष्णरूपमिदं यतः ॥२४॥"

॥ इति श्रीदशमस्कन्धश्रवणमाहात्म्यं समाप्तम् ॥

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तदेवं ब्रह्मकुलरूपमधिष्ठानं प्रशस्य श्रीकृष्णरूपमधिष्ठातारं प्रशंसति–तीर्थमिति। कृष्णस्य स्वयं भगवत एतत्पूर्ववर्णितं क्षितिभारहरणं न चित्रं विबुधहृदयविस्मयावहं न भवति। यतः परमाण्वादिद्विपरार्धान्तरूपो यः कालः स एव चक्रं चक्रवद्विच्छिद्य परिवर्तमानत्वात्। तदेव चायुधं सर्वसंहारसाधनं यस्य तस्य स्वतःसिद्धत्वात्तदर्थोद्यमेनालमिति भावः। तदचित्रताबोधनाय तमेव चित्रविशेषणैर्विशिनष्टि–यत् यतस्तादृशोऽपि यदुषु लोककृपया अजनि जातः य एव स्वःसरिदाख्यं श्रीवामनपादशौचरूपं तीर्थमूनं चक्रे। निजचरणरजःसम्बन्धियमुनादिभिरिति भावः —

"गङ्गा शतगुणा पुण्या माथुरे मम मण्डले। यमुना विश्रुता देवि नात्र कार्या विचारणा॥" इत्यादि वाराहात् :-

"यत्पादसंश्रयाः सूत मुनयः प्रशमाय नः। सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया॥

को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः। शुद्धिकामो न शृणुयाद्यशः कलिमलापहम्॥" इति।

श्रीशौनकस्य तत्प्रश्नकरणाच्च किञ्च विभक्तिविपरिणामात् यत् येन हेतुना स्निग्धा इव विद्विषः पूतनादयः यद्वा, विद्विषः स्निग्धाः पितृभ्रात्रादयोऽपि स्वरूपं सर्वमूलभूतं श्रीभगवन्तमेव ययुः। सद्वेषादिव पूतनापि सकुला त्वामेव देवापितेत्यादेः यत् यत्र श्रीः रूपादिसम्पत्तिरपरा सर्वोत्कृष्टा अजिता अन्यास्पृष्टाचेत्यर्थः। यथोक्तं यन्मर्त्यलीलौपयिकमित्यादि। अदृष्ट्वाऽन्यतमं लोके इत्युपक्रम्य तृतीयेऽस्मिन् भवेऽहं वै इत्यादि यदर्थे यस्य दर्शनादिरूपार्थे अन्येषां महाकालपुराधिपादीनामपि यत्नः परमब्रह्मण्यदेवत्वेऽपि मुहुर्मुहुर्ब्राह्मबालहरणब्राह्मणदुःखातिशयदानदोषानादरपूर्वकः प्रयासः। यथोक्तं द्विजात्मजा मे युवयोर्दिदृक्षुणा इत्यादि। श्रीहरिवंशे च —

"त्वद्दर्शनार्थं ते बाला हृतास्तेन महात्मना। विप्रार्थमेष्यते कृष्णो नागच्छेदन्यदेति हि॥" इति।

अत एव यस्यैव नाम अथ कात्स्र्न्येन सर्वतोऽपि सामस्त्येन तदतिरिक्तसर्वपरित्याजनादिना अमङ्गलघ्नं तदुपलक्षणतया सर्वमङ्गलत्वादातृ च यथोक्तं ब्रह्माण्डपुराणे तन्नामाष्टोत्तरशतप्रसङ्गे —

"सहस्त्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत्फलम्। एकावृत्त्या तु कृष्णस्य नामैकं तत्प्रयच्छति॥" इति।

तत्रापि विशेषः श्रुतं किमुत गदितमित्यर्थः। किञ्च यत्कृतो येनैवोपदिष्टो गोत्रधर्मः अनाद्यृषिपरम्पराप्राप्तो भगवद्धर्मः यथोक्तमेकादशे स्वयमेव —

"मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥
किम्पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा॥" इति हि गीतासु यद्वा —

अत्र जगति तादृशधर्मः सदा सर्वत्रागः स्थिरः यथा द्वितीये न ह्यतोऽन्यः शिवः पन्था इत्युपक्रम्य तदुपसंहारे —

"तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम्॥" इति।

यद्वा। गां पृथ्वीमपि त्रायते गोत्रः स चासौ धर्मश्च "अपि चेत्सुदुराचार" इत्यादिकं हि श्रीगीतासु "मद्भक्तियुक्तो भुवनं पुनाती"त्येकादशे च यद्वा प्रसिद्ध्या योग्यवृत्त्या च गोत्रस्य श्रीगोवर्धनस्य धर्मो मखरूपो येनैव कृतः भक्तवात्सल्यं दर्शयतेन्द्रमपि

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

तुच्छीकृत्य प्रकाशितः । यद्वा तदेव दर्शयता बलिमाददानेन गोत्रधर्मः स्वदेहसम्बन्धभावनारूपो धर्मो यस्मिन् कृतो विहितः न कर्हिचिन्मत्परा इत्यादौ येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्ट,मित्यादि च । यद्वा, श्रीनन्दादौ श्रीवसुदेवादौ श्रीयुधिष्ठिरादौ च गोत्रधर्मः स्वस्वसम्बन्धपुरस्कृतप्रेमा येन कृतो यत्र वा तैः कृतः यद्वा गास्त्रायन्ते इति गोत्राः श्रीगोपाः तेषां धर्मः स्वभावः असमर्द्धप्रेमा येन यत्र वा कृतः । यद्वा गोत्रधर्मः सर्वरूपातिक्रमिपरमरूपं गोपत्वं येन प्रकाशितमिति दिक् । यच्छब्दस्तेस्यैति लभ्यं अथ व्यास्यान्तरं स्वःसरित् पादशौचमूनं चक्र इत्येतन्न चित्रं यतः विद्विट्स्निग्धा अपि स्वरूपं ययुः तथा तदपि न चित्रं यतोऽजितपरेत्यादिकं परपरत्र योज्यम् । अतः क्षितिभरहरणं नैव चित्रमित्यर्थः । तत्र च हेतुविशेषः कालेति । सर्वत्र हेतुः कृष्णस्येत्येवम् ॥४७॥ एवं तस्य सर्वोत्कृष्टत्वं श्रुत्वा सुखं प्राप्नुवतोऽपि श्रोतृंस्तदवस्थत्वमतीतमिवाशङ्क्या म्लायतः स्वानुभावेन सान्त्वयन्नाह- जयतीति । देवक्यां जन्म जननलीलानुकरणेन प्रादुर्भावो वादस्तत्त्वबुभुत्सुकथा न तु छलजात्यादिरूपा यस्य । यद्वा देवक्यां जन्मनो वादः ख्यातिर्नन्दस्त्वात्मज उत्पन्न इत्यत्र व्याख्यातरीत्या तु श्रीयशोदायामपि तर्क्यम् । जन्म यस्येत्यर्थः । स प्रसिद्धः श्रीकृष्णो जयति । सर्वदेवस्वरूपरूपगुणलीलापरिकरस्थानगतेन सर्वोत्कर्षेण विराजते । अत्र च लोडर्थत्वं न सम्भवति । सदोत्कृष्टतापराकाष्ठामहिष्ठे श्रीभगवति तद्विज्ञानां तादृशानामाशीर्वादायोगात् । यदि वा तद्योगः कथञ्चित्कल्प्स्तथाप्याशीर्वादविषयस्य सविशेषणस्य तस्य तदपि तथैवावस्थितिप्राप्तेर्विवक्षितार्थ एव लभ्येत । धार्मिकसभ्यादिसम्पन्नो विष्णुमित्रो वर्धतामितिवत् । अथ कथम्भूतः सन् जयतीत्यपेक्षायां विशेषणानि वदन् परिकरविशिष्टतयाऽऽह-तेन च तादृशतन्नित्यजये विद्वत्प्रत्यक्षलक्षणं प्रमाणमप्याह- जनेषु सालोक्येत्यादिपद्ये जना इतिवत् तदीयेष्वन्तरङ्गेषु श्रीयादवगोपादिषु साक्षान्निवासोऽन्येषु च तत्स्फूर्तिरूपो यस्य सः तत्र चान्यार्थतां परिहरंस्तस्मिन् जये विवृत्यैव तैर्जनैः विशिष्टतामाह-यदुवरेत्यादिना । तत्रान्तरङ्गैर्विशिनष्टि-यदुवराः क्षत्रिया गोपाश्च । परिषत् सभारूपा यस्य सः । बहिरङ्गैश्च विशिनष्टि-स्वे भक्तजना एव दोषो भुजा इव भुजास्तैरधर्ममेतादृशार्थं नास्तिक्यादिकं जगति चास्यन् दूरीकुर्वन् अतस्तत्तत्सम्बन्धेन स्थिरचराणामन्तरङ्गाणां स्ववियोगदुःखहन्ता बहिरङ्गाणां संसारहन्तापि सन् अथ तत्रापि परमान्तरङ्गैर्विशिनष्टि-सुस्मितेनेति । शोभनं स्मितं तदुपलक्षितप्रसादविलासादिकं यत्र तेन स्वभावत एव श्रीयुक्तेन च मुखेनैव प्राधान्यतः प्रथमोक्तानां व्रजवनितानां तदनन्तराणां पुरवनितानां जनितात्यर्थानुरागाणां तासां योषितां यः कामः स एव दीव्यति परमप्रेमरूपत्वात् सर्वतोऽपि विराजतीति देवः तं वर्धयन् सदैवोद्दीपयन् इति स्वरूपुणलीलास्थानविशिष्टतापि दर्शिता । तदेवं सर्वस्यापि विशेषणस्य विधेयेन जयत्यर्थेनानुगतत्वात्तादृशोऽसौ स्वयमेव तादृशैः परिकरैः सह तादृशविलासादिविशिष्टो व्रजे पुरद्वये च सदा सर्वोत्कर्षेण विराजत एवेति स्थितम् । युक्तमेव च तत् स्वयं भगवत्त्वात् आगन्तुकतादृशत्वे स्वयं भगवत्त्वहानेः तस्मादविचारेणैवास्य कानिचिद्वचनानि प्रतिकूलायन्ते वस्तुतस्तु अनुकूलान्येव तत्र दशमस्कन्धस्य तत्र तत्र व्याख्यातान्येव तत्स्वरूपनित्यवे प्रथमस्कन्धस्य ययाहरद्भुवोभारमित्यादिद्वयं तु यथा तनुरूपकलेवरशब्दा भाववाचिन एव । यथा तृतीयस्कन्धे विसर्गप्रसङ्गे ब्रह्मणि तत्पर्यायशब्दस्य एवार्थः स्वीकृतः अनुपपत्तेः । तत्र यदि सा तर्हि कथं स्वयं भगवति न स्यात् । स च भावोऽत्र भूभारजिहीर्षालक्षणः मायाकार्यसम्बन्धित्वात्तदाभास एव च ततः साम्ये कण्ठकदृष्टान्तत्वं सुसङ्गतमेव । नटदृष्टान्तत्वं च श्रव्यरूपकाभिर्नेतुर्नटस्य स्वरूपवेषाभ्यामेव स्थितस्य तत्तद्भावाभासस्वीकारपरित्यागमात्राभ्यामिति एव स्थितस्य तत्तद्भावभासस्वीकारपरित्यागमात्राभ्यामिति । एवमन्यत्राप्याकृतिदेहशब्दौ व्याख्येयौ । अथवा त्यागस्वीकारौ नामान्तर्ध्यापनाविर्भावने एव यथा श्रीमध्वाचार्यधृतं तन्त्रभागवतवचनं पूर्वमुदाहृतम् —

"अहेयमनुपादेयं तद्रूपं नित्यमव्ययम् । स एवापेक्ष्यरूपाणां व्यक्तिमेव जनार्दनः ॥
अगृह्णाव्द्यसृजच्चेति कृष्णरामादिकां तनुम् । पठ्यते भगवानीशो मूढबुद्धिव्यपेक्षया ॥" इति ॥

एवं प्रथमस्य द्वादशे विधूयेत्यादि पद्ये स्वामिभिरप्युक्तं यत्र दृष्टस्तत्रैवान्तर्हितः न त्वन्यत्र गतः । यतो विभुः सर्वगत इति अत एव तृतीये —

"प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् । आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम् ॥"

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

इत्यत्रापि लोकलोचनरूपं स्वबिम्बं निजमूर्तिं प्रदर्श्य पुनरादायैव चान्तरदधात् । न तु त्यक्त्वेत्युक्तम् । यथा मत्स्यादिरूपाणीत्यनन्तरमपि तथोक्तं यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वेति त्यागोऽत्र स्वतनुकरणक इति सर्वान्ते तल्लोकभगनं च सर्वांशमाकृष्यावतीर्णस्य तस्य तत्तदंशेनैव तथैकादशस्कन्धस्य लोकाभिरामामित्यादिकं सयुक्तिकं टीकाकृद्भिरेव व्याख्यातम्। अथात्रानुकूलवचनानि तत्र सर्वावतारगतानि। यथा नृसिंहपुराणे —

"युगे युगे विष्णुरनादिमूर्तिमास्थाय शिष्टं परिपाति दुष्टहा" इति ।

अत एव तत्तदाराधनं शास्त्रं च मिथ्या न स्यात् तत एव च जलेषु मां रक्षतु मत्स्यमूर्तिरित्यादि श्रीनारायणवर्मादौ। तथा नित्यत्व एव शालग्रामशिलादिषु नरसिंहत्वादिभेदः सङ्गच्छते । तत्तत्सान्निध्यादेव हि तत्तद्भेदः श्रूयते चैवं नवस्वपि वर्षेषु साक्षात्तत्तदुपासनादि यथोक्तं नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि सन्निधीयत इति । श्रीप्रद्युम्नादीनां नतिविलासादिकं च तत्र तत्र वर्णितम् । तत्र श्रीप्रद्युम्नस्य तावद्दृश्यते अतीव सुललितगतिविलासरुचिरहासावलोकलीलयेत्यादि रमां रमयन्नित्यादि च। अत एवोक्तं तत्र तत्र सङ्कर्षणसंज्ञामात्मसमाधिरूपेण सन्निधाप्येति। ब्राह्मपाद्मोत्तरखण्डादौ श्रीमत्स्यादीनां वैकुण्ठे पृथक् पृथक् लोकाश्च श्रूयन्ते। तथा मध्वभाष्यप्रमाणिता श्रुतिश्च वासुदेवः सङ्कर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मो वराहो नृसिंहो वामनो रामो रामः कृष्णो बुद्धः कल्किरहं शतधाहं सहस्रधाहम् अमितोऽहमनन्तोऽहम्। नैवैते जायन्ते नैतेषामनुज्ञानबन्धो न मुक्तिः सर्व एव ह्येते पूर्णा अजरा अमृताः परमाः परमानन्दा इति । अथ विशेषतः श्रीकृष्णगतानि यथा तत्रैकादशान्ते धारणाध्यानमङ्गलमित्यत्र च श्रीस्वामिभिर्व्याख्यातम् । धारणाया ध्यानस्य च मङ्गलं शोभनं विषयम् इतरथा तयोर्निर्विषयत्वं दृश्यते चाद्याप्युपासकानां साक्षात्कारस्तत्फलप्राप्तिश्चेति तथा च त्रैलोक्यसम्मोहनतन्त्रे श्रीमदष्टादशाक्षरप्रसङ्गे —

"अहर्निशं जपेद्यस्तु मन्त्री नियतमानसः। स पश्यति न सन्देहो गोपवेषधरं हरिम् ॥" इति ॥

एवं गौतमीये च सदाचारप्रसङ्गे —

"अहर्निशं जपेन्मन्त्रं मन्त्री नियतमानसः। स पश्यति न सन्देहो गोपवेषधरं हरिम् ॥" इति ॥"

वृन्दावने वसेद्धीमान् यावत्कृष्णस्य दर्शनमिति च, तथा च श्रीकृष्णसहस्रनामप्रारम्भे —

"तस्य हृष्टाशयः स्तुत्या वृष्णिगोपाङ्गनावृतः। तापिञ्छश्यामलं रूपं पिञ्छोत्तंसमदर्शयत् ॥" इति।

अग्रे च तद्वाक्यम् —

"मामवेहि महाभाग कृष्ण कृत्यविदांवर। पुरस्कृतोऽस्मि त्वद्भक्त्या पूर्णास्ते स्युर्मनोरथाः ॥" इति।

तथा पाद्मनिर्माणखण्डे "पश्य त्वं दर्शयिष्यामि स्वरूपं वेदगोपितम्" इति श्रीभगवद्वाक्यानन्तरं ब्रह्मवाक्यम् —

"ततोऽपश्यमहं भूप बालं कालाम्बुदप्रभम्। गोपकन्यावृतं गोपं हसन्तं गोपबालकैः ॥

कदम्बमूलआसीनं पीतवाससमद्भुतम्। वनं वृन्दावनं नाम नवपल्लवमण्डितम् ॥" इत्यादि ॥

श्रीगोपालतापनी चैवं "तदुहोवाच ब्राह्मणोऽसावनवरतं मेध्यातः स्तुतः परार्धान्ते सोऽबुध्यत गोपवेषो मे पुरस्तादाविर्बभूव ।" इति सिद्धनिर्देशमपि श्रूयते । बृहन्नारदीयमङ्गलाचरणे, वन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरम् ॥ इति। स्कान्दद्वारकामाहात्म्ये श्रीबलिं प्रति प्रह्लादवाक्ये —

"गृहे सन्तिष्ठते यस्य माहात्म्यं दैत्यनायक। द्वारकायाः समुद्भूतं सान्निध्यं केशवस्य च ॥

रुक्मिणीसहितः कृष्णो नित्यं निवसते गृहे ॥" इति ॥

पाद्कार्तिकमाहात्म्ये तत्प्रात: स्नानार्घ्यमन्त्रे —

"व्रतिन: कार्तिके मासि स्नातस्य विधिवन्मम। गृहाणार्घ्यं मया दत्तं राधया सहितो हरे॥" इति॥

एवं नाना मन्त्रा अपि तथैव तं साक्षान्निर्दिशन्ति। अत एव गोपालतापिन्यां गोविन्दं सच्चिदानन्दविग्रहं वृन्दावनसुरभूरुहतलासीनं सततम्। समद्गणोऽहं परया स्तुत्या तोषयामीति॥ तदेवमभिप्रेत्य श्रीशुकदेवोऽपि निजीभीष्टदैवतत्वेनाह —

"पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सताम्पति:॥" इति।

प्रीयात्र इन्दो गवामिति च श्रीमन्नराकृतिमेवाधिकृतस्य नारायणवर्मण्यप्याह-

"मां केशवो गदया प्रातरव्याद्गोविन्द आसङ्गव आत्तवेणु:" इति।

एवं श्रीमन्नराकारे वा येषां वा भ्रान्ति: सा तेषामपि निरस्ता। यथोक्तम् —

"यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यलभ्य:॥ स एव यद्दृग्विषय: स्वयं स्थित: किं वर्ण्यते दिष्टमहो व्रजौकसाम्॥" एवं न चान्तर्बहिर्यस्येत्यादि। नौमीड्यते इत्यादि। सकृद्यदङ्गप्रतिमेत्यादि। अहोभाग्यमहोभाग्यमित्यादि च। श्रीकृष्णाष्टोत्तरशतनामस्तोत्रे श्रीमन्नराकृतित्वमेवाधिकृत्य —

"नन्दव्रजजनानन्दी सच्चिदानन्दविग्रह:। नवनीतविलिप्ताङ्गो नवनीतनटोऽनघ:॥" इति।

श्रीगोपालतापिन्यामपि —

"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।
तं पीठगं ये तु यजन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्॥" इति।

विषयश्चोक्त: गोप्यस्तप: किमचरन् यदमुष्येत्यादौ। तथा च पाद्मनिर्माणखण्डे श्रीवेदव्यासवाक्यम् —

"दृष्ट्वातिहृष्टो ह्यभवं सर्वभूषणभूषणम्। गोपालमबलासङ्गमुदितं वेणुवादिनम्॥
ततो मामाह भगवान् वृन्दावनचर: स्मयन्। यदिदं मे त्वया दृष्टं रूपं दिव्यं सनातनम्॥
निष्कलं निष्क्रियं शान्तं सच्चिदानन्दविग्रहम्। पूर्णपद्मपलाशाक्षं नात: परतरं मम॥
इदमेव वदन्त्येते वेदा:य् कारणकारणम्॥" इत्यादि॥

अथ तस्य मानसानां शारीराणां च गुणानां स्वाभाविकत्वमव्यभिचारित्वं चोक्तम्। प्रथमे सत्यं शौचं दया क्षान्तिरित्यादिना —

"एते चान्ये च भगवन्नित्या यत्र महागुणा:। प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित्॥" इत्यन्तेन॥

अथ तत्तत्परिकरनित्यत्वे प्रतिकूलायमानानि यथार्थं व्याख्यायन्ते। तत्र देवावतरणवाक्यमेकदेशप्रस्तावमयमिति पूर्वपूर्वादशतमस्ति। मौशलादिकं च ब्रह्मशापमर्यादारक्षार्थं मायिकमेव। आह स्म च तदानीमेव दारुकम् इति श्रीभगवान् —

"त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षक:। मन्मायारचितामेतां विज्ञायोपशमं व्रज॥" इति।

अस्यार्थ: त्वं तु दारुको ज्ञाननिष्ठो मदीयलीलातत्त्वज्ञ: मद्धर्मं मम स्वभक्तपालयितृत्वरूपं स्वतुल्यपरिकरसङ्गित्वरूपं च स्वभावम् आस्थाय विस्रभ्य एतामधुना प्रकाशितां सर्वामेव मौशलादिलीलां मम माययैवेन्द्रजालवद्रचितां विज्ञाय उपेक्षको बहिर्दृष्ट्या जातं शोकमुपेक्षमाण: उपशमं चित्तक्षोभान्निवृत्तं व्रजेति। अत्र दारुकस्य स्वयमेव तल्लोकादवतीर्णत्वेन सिद्धत्वादेतामित्यत्रातिसन्निहितार्थलाभाच्चान्यथा व्याख्यानमेव प्रथमप्रतीत्यविषय इति विवेक्तव्यम्। तथा चैकादशान्ते पद्यत्रयं तत्र प्रथमं यथा —

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

"राजन् परस्य तनुभृज्जननाप्ययेहा माया विडम्बनमवेहि यथा नटस्य।
सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिनो परतः स आस्ते॥" इति।

अस्यार्थः - परस्य श्रीकृष्णस्य तदुभृतः पार्षदा यादवादयस्तेषां जननाप्ययरूपा ईहाश्चेष्टाः केवलं परस्यैव मायया विडम्बनमनुकरणमेवावेहि। यथेन्द्रजालविद्यावेत्ता नटः कश्चित् जीवत एव मारयित्वेव पुनश्च तद्देहं जनयित्वेव दर्शयति। तस्येव विश्वसर्गादिहेत्वचिन्त्यशक्तेस्तस्य तादृशशक्तित्वं न च चित्रमित्याह-सृष्ट्वेति। एवमेव दृश्यते चाद्याप्युपासकानामित्यादि तव्द्याख्यानं सुसङ्गच्छते। तत्तत्परिकरेणैव सार्धं तेषु तत्सत्कार इति। एवं सति श्रीसङ्कर्षणादौ मुग्धानामन्यथा हेतूदाहरणाभासः सुतरामेव मायिकः। स्कान्दायोध्याखण्डे श्रीलक्ष्मणस्यापि तादृशत्वं न सम्प्रतिपन्नं तथा हि तदन्तिमदशानुकरणलीलायां —

"ततः शेषात्मतां जातं लक्ष्मणं सत्यसङ्गरम्। उवाच मधुरं शक्रः सर्वस्य च स पश्यतः॥
इन्द्र उवाच॥

लक्ष्मणोत्तिष्ठ शीघ्रं त्वमारोहस्य पदं स्वकम्। देवकार्यं कृतं वीर त्वया रिपुनिषूदन॥
वैष्णवं परमं स्थानं प्राप्नुहि त्वं सनातनम्। भगवन्मूर्तिः समायाता शेषोऽपि विलसत्फणः॥" इत्यादि। ततश्च —
"इत्युक्त्वा सुरराजेन्द्रो लक्ष्मणं सुरसङ्गतः। शेषं प्रस्थाप्य पाताले भूभारधरणक्षमम्॥
लक्ष्मणं यानमारोप्य प्रतस्थे दिवमादरात्॥" इति॥

अत एव जरासन्धवाक्ये, तव यदि श्रद्धेत्यत्र श्रीस्वमिभिरपीत्थं वास्तवार्थो व्यञ्जितः। अच्छेद्यदेहोऽसाविति। स्वयमेव मत्वा अपरितोषात्पक्षान्तरमाह-यद्वा मां जहीति। अथा द्वितीयं यथा अप्राकृतानां तेषां तत्र सम्भवतीत्यास्तां श्रीकृष्णपल्यत्वेनैव न सम्भवतीत्याह —

"मर्त्येन यो गुरुसुतं यमलोकनीतं त्वं चानयच्छरणदः परमास्त्रदग्धम्।
जिग्येऽन्तकान्तकमपीशमसावनीशः किं स्वावने त्वरनयन्मृगयुं सदेहम्" ॥इति॥

अस्यार्थः — यः श्रीकृष्णः यमलोकं गतमपि गुरुसुतं गुरोर्जातिन पञ्चजनभिक्षितेन तेन मर्त्येन देहेनैवानयत्। न च ब्रह्मतेजसो बलवत्त्वं मन्तव्यं त्वां च परमास्त्रदग्धं ब्रह्मास्त्रेण दग्धुमारब्धं यस्तस्माद्ब्रह्मास्त्रादानयत् रक्षितवानित्यर्थः। किमन्यद्वक्तव्यं यश्चान्तकानामन्तकमीशं श्रीरुद्रमपि बाणसङ्ग्रामे जितवान् अहो यश्च तं जराख्यं मृगयुमपि स्ववैंकुण्ठविशेषं सशरीरमेव प्रापितवान्। स कथं स्वानां यदूनाम् अवने ईशो न भवति तस्मात्ते स्वन्यथादर्शनं न तात्त्विकलीलानुगतं सशरीरं तु तेषां स्वलोकगमनमतीव युक्तमित्यर्थः।

अथ तृतीयं यथा ननु गच्छन्तु तादृशशरीरा एव स्वं धाम तत्रापि स्वयं भगवान् विराजत एवेति न तेषां तद्विरहदुःखमपि। श्रीभगवांस्तु तथा सामर्थ्यं चेत्तर्हि कथमन्यांस्तादृशान्निर्माय तैः सह मर्त्यलोकानुग्रहार्थमपरमपि कियन्तं कालं मर्त्यलोके प्रकटो नासीत्। इत्यत्र सिद्धान्तयन् तेषां श्रीभगवतश्च सौहार्दभारेणापि परस्परमव्यभिचारित्वमाह —

"तथाप्यशेषस्थितिसम्भवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक्।
नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन्॥" इति।

अस्यार्थः — यद्यप्युक्तप्रकारेणाशेषस्थितिसम्भवाप्ययेषु अनन्यहेतुः यद्यस्मात्तदूर्ध्वमप्यनन्ततादृशशक्तिधृक् तथापि यादवानन्तर्धाप्य निजं वपुः अत्र शेषितं प्रणेतुं किञ्चित्कालं स्थापयितुं नैच्छत्। किन्तु स्वयमेव लोकमनयत्। तत्र हेतुः तान् विना मर्त्येन लोकेन किं मम प्रयोजनमिति स्वःस्थानां तद्धामगतानां तेषां गतिमेव स्वस्याभिरुचितत्वेन प्रकृष्टां दर्शयन्निति अतस्तेषां श्रीभगवद्वदनन्तर्धानमेव न त्वन्यदस्तीति श्रीभगवदभिप्रायकथनेनापि श्रीमानुद्धव आह तृतीये —

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

"मिथो यदैषां भविता विवादो मध्वासवाताम्रविलोचनानाम्। नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेऽन्तर्दधते स्वयं स्म ॥" इति ॥ अस्यार्थः — एषां यदूनां यदा मिथो विवादस्तदाप्येषां पृथिवीपरित्याजने वधरूप उपायो न विद्यते। किमुतान्येन विवादने। स न स्यादिति तर्हि तेषां मयाभिलषिते पृथ्वीपरित्याजकत्वे कतम उपायो भवेत् तत्र पुनः परामृशति-अतो वधादन्य एव इयानेतावानेवोपायो वर्तते। कोऽसौ। मयि उद्यते ममेच्छया एते स्वयमन्तर्दधत इति यः स्मेति निश्चये, तेन कूर्मपुराणोक्तश्रीसीताहरणवत् पुरस्त्रीहरणमपि मायिकं ज्ञेयम्। तथैवासां विवाहप्रसङ्गे स्वरूपशक्तित्वं प्रमाणितम्। किञ्च तेषु यच्चान्यच्छस्त्राघात-मूर्च्छातत्त्वबुभुत्सादिकं श्रूयते तद्भवेदत इव नरलीलौपयिकतया प्रपञ्चितमिति क्वचिच्च प्रकटलीलायाः प्रापञ्चिकमिश्रत्वाद्यथार्थमेव च तत्तत् यथा शतधन्ववधादौ। अन्तरङ्गाणां तु भगवत्साधारण्यमेव तत्तन्नित्यपरिकरत्वेन दर्शितत्वाद्युक्तम्। तदनुकूलानि चैतानिवाक्यानि यथा पाद्मकार्तिकमाहात्म्ये श्रीसत्यभामां प्रति श्रीभगवद्वाक्यम् —

"एते हि यादवाः सर्वे मद्गणा एव भाविनि। सर्वदा मत्प्रिया देवि मत्तुल्यगुणशालिनः ॥" इति। पाद्मोत्तरखण्डे —

"यथा सौमित्रिभरतौ यथा सङ्कर्षणादयः। तथा तेनैव जायन्ते निजलोकाद्यदृच्छया ॥
पुनस्तेनैव गच्छन्ति तत्पदं शाश्वतं परम्। न कर्मबन्धनं जन्म वैष्णवानां च विद्यते ॥" इति ॥

श्रीगोपालतापिन्यां जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयम्। योऽसौ सौर्ये तिष्ठति। योऽसौ गोषु तिष्ठति। सोऽसौ गोपान् पालयति। योऽसौ गोपेषु तिष्ठतीत्यादि। सौर्य्य इति सौर्य्यां यमुनायास्तीरे श्रीवृन्दावने सहस्रनाम्नि सुयामुन इति हि तद्भाष्ये व्याख्यातम्। अथ प्रपञ्चे प्रकटाप्रकटरूपेण प्रकाशभेदेन स्थितानि श्रीवृन्दावनादीन्येव नित्यस्थानानीति च पूर्वोदाहरणजातेन व्यक्तमेवास्ति। यथोक्तं पाद्मनिर्माणखण्डे श्रीभगवद्वाक्यम् —

"नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा। ममावतारो नित्योऽयमत्र मा संशयं कृथाः ॥" इति ॥

तथा च बृहद्गौतमीये श्रीकृष्ण उवाच —

"इदं वृन्दावनं रम्यं मम धामैव केवलम्। अत्र ये पशवः पक्षिवृक्षाः कीटा नरामराः ॥
ये वसन्ति ममाधिष्ण्ये मृता यान्ति ममालयम्। अत्र या गोपकन्याश्च निवसन्ति ममालये ॥
योगिन्यस्ता मया नित्यं मम सेवापरायणाः। पञ्चयोजनमेवास्ति वनं मे देहरूपकम् ॥
कालिन्दीयं सुषुम्णाख्या परमामृतवाहिनी। अत्र देवाश्च भूतानि वर्तन्ते सूक्ष्मरूपतः ॥
सर्वदेवमयश्चाहं न त्यजामि वनं क्वचित्। आविर्भावस्तिरोभावो भवेदत्र युगे युगे ॥
तेजोमयमिदं रम्यमदृश्यं चर्मचक्षुषा।" इति ॥

यथैकादशस्कन्धान्ते —

"द्वारकां हरिणा त्यक्तां समुद्रो प्लावयन् क्षणात्। वर्जयित्वा महाराजं श्रीमद्भगवदालयम् ॥
नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः। स्मृत्याशेषाशुभहरं सर्वमङ्गलमङ्गलम् ॥" इति ॥

एवमेव विष्णुपुराणे —

"प्लावयामास तां शून्यां द्वारकां च महोदधिः। यदुदेवगृहन्त्वेकं नाप्लावयत सागरः ॥
नात्यक्रमेत्ततो ब्रह्मंस्तदद्यापि महोदधिः। नित्यं सन्निहितस्तत्र भगवान् केशवो यतः ॥" इति दिक् ॥४८॥

हन्तैतादृशपरधाम्नस्तस्यानुगतिं जनः कथं लभेत। उच्यते नेदं मदुक्तं श्रीभगवल्लीलावर्णनशास्त्रं शास्त्रान्तरमिव स्वाभिहितार्थानुष्ठानेनैव फलप्रदं किन्तु श्रवणमात्रेणापीत्याह-इत्थमिति। यद्वा, तेषां तन्नित्यपार्षदानां नित्या तदेकधामस्थितिः किं

श्रीमज्जीवगोस्वामिकृता वैष्णवतोषिणी

वर्ण्यतां तैः सह या लीलास्ताः शृण्वतामपि सा नित्यैव स्यादित्याह-इत्थमिति । अनेन पूर्वोक्तप्रकारेण परस्य सर्वागोचरगतेरपि कृपया निजधर्मस्य स्वभक्तिरूपस्य रिरक्षया रिरक्षेषया आत्ता प्रपञ्चं प्रत्यानीता प्रकटिता लीलाप्रधाना तनुर्निजविग्रहो येन तस्य कर्माण्यमुष्य पदयोरनुवृत्तिमनुगतिमिच्छन् जनः शृणुयात् परस्येति विशिनष्टि । यदूत्तमस्य पूर्वपूर्वप्रमामाण्येन यदुषु पुरस्थेषु वनस्थेषु च उत्तमस्य तत्तदाश्रयस्य तत्तयैव नित्यलीलस्येति यावत्कर्माणि विशिनष्टि तदनुरूपाणि लीलातनुयोग्यानि च तानि विडम्बनानि अन्यसादृश्यातिक्रमीणि च तानीति । यद्वा, तदनुरूपाणि तत्सदृशानि अवतारान्तरकर्माणि तान्यपि विडम्बयन्ति । हीनोपमात्वं प्रापयन्ति यानि तानि असमोर्ध्ववैभवानीत्यर्थः । अत एवोक्तं द्वितीये-कर्माणि चात्ममहिमोपनिबन्धनानीति । तथा कर्मरूपाण्यपि कर्मकषणानि जगतां कर्मविलोपकानीति ॥४९॥ तथा तच्छ्रवणेन तदनुवृत्तिप्राप्तिः स्यात्तथा विवृणोति-मर्त्य इति । ननु हे राजन् ! मर्त्यो मरणधर्मा यः कोऽपि तया पूर्वोक्तमाहात्म्यया मुकुन्दश्रीमत्कथाश्रवणकीर्तनचिन्तया मुकुन्दस्य सर्वदुःखविमोचकत्वेन महाकारुणिकस्य स्वयं भगवतो या श्रीमती सर्वसम्पदां धात्री च कथा तस्याः श्रवणेन जातं यत्कीर्तनं स्वयमुल्लासतो गानं तत्र या चिन्ता तत्प्राप्त्युत्कण्ठामयी स्मृतिस्तया समेधितया नित्यमेव तेन गानेन वर्द्धितया सत्या पूर्वोक्तं श्रीवृन्दावनादिप्रकाशविशेषरूपं तद्धाम एति वासनानुसारेण तदेकतरं प्राप्नोति । तदेव विशिनष्टि-दुस्तरः ब्रह्मादिभिरपि स्वतोऽपरिहार्यो यः कृतान्तः कृतः सर्वस्यान्तो येन स कालः तस्यापि जवस्य विक्रमस्य अपवर्गः समाप्तिर्यत्र । तत् यदुक्तं 'न यत्र माया न च कालविक्रमः' इति 'दर्शयामास लोकं स्वं गोपानां तमसः परम्' इति च, तच्च परमविषयान्धानामपि लोभनीयशोभम् । किमुत मुमुक्षुमुक्तभक्तानामुत्तरोत्तरपरमदृशामित्याह-ग्रामादिति । क्षितिः सप्तद्वीपवती पृथ्वी तां भुञ्जते ये तेऽपि बहवो यदेव परमपुरुषार्थो येषां तथाभूताः सन्तो ग्रामात् अन्यसर्वारोचकतया जनस्थानमात्रं त्यक्त्वा वनं जनमात्रशून्यप्रदेशं भाग्यवशात् द्वादशवनात्मकं श्रीमथुरामण्डलं वा ययुः । तत्र गत्वा नित्यमवसन् । श्रीमन्मथुरामण्डलस्यैव परमसाधनसाध्यरूपत्वा त् । तथा हि आदिवाराहे —

> "न पापेभ्यो भयं यत्र न भयं यत्र वै यमात् । न गर्भवासभीर्यत्र यत्क्षेत्रं को न संश्रयेत् ॥
> मथुरां च परित्यज्य योऽन्यत्र कुरुते रतिम् । मूढो भ्रमति संसारे मम मायाविमोहितः ॥" इति ॥ किञ्च स्कान्दे —
> "तन्मण्डलं माथुरं हि विष्णुचक्रोपरि स्थितम् । पद्माकारं सदा तत्र वर्तते शाश्वतं नृप ॥" इति ॥ किञ्च वाराहे —
> "लाभानां मथुरालाभो ज्ञानानां ज्ञानमुत्तमम् । प्रीतीनां परमा प्रीतिर्गतीनां गतिरुत्तमः ॥" इति ॥

एत एवोक्तं पाद्मपातालखण्डे 'अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी'त्यादि ॥५०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतवैष्णवतोषिण्यां नवतितमोऽध्यायः ॥९०॥

श्रीसुदर्शनसूरिकृतं शुकपक्षीयम्　॥१७-५०॥

"मस्त्यस्तयानुसवमेधितया मुकुन्दश्रीमत्कथाश्रवणवर्णनचिन्तयैति ।
तद्धाम दुस्त्यजकृतान्तजवापवर्गं ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः ॥"

यद्भगः यस्य भगः उभयदृशीनां मनुष्यभावम् ईश्वरत्वं च पश्यन्तीनाम् अनुसवं अनुसन्ध्यं दुस्तरकृतान्तजवापवर्गम् । दुस्तरः कृतान्तो येषां तेषां जनानां दुःखापवर्गहेतुं धाम स्थानम् ॥

"चित्रं न चैतदुरुगायपवित्रलीलाविष्टब्धकल्मषकदम्बकमुक्तिरूपम् ।
स्त्रीणां सुदुस्त्यजकृतान्तजवापवर्गं ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः ॥"

इति श्रीहारीतकुलतिलकवाग्विजयसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयश्रीसुदर्शनसूरिणाभिहिते श्रीमद्भागवतमहापुराणे व्याख्याने श्रीशुकपक्षीये दशमस्कन्धे नवतितमोऽध्यायः ॥९०॥

श्रीमते रामानुजाय नमः ॥

श्रीमद्वीरराघवाचार्यकृता भगवच्चन्द्रचन्द्रिका

स्वात्मानं न विदुरित्यनेन तन्माहात्म्यं विदुरिति सूचितम् । तदेवानितरसाधारणं वदन्नत्याश्चर्यमेतद्भूभारापहरणमिति विस्मयमपनुदन्नाह–तीर्थमिति । हे नृप ! इतः पूर्वं स्वःसरित्स्वर्णदी गङ्गैव सर्वतोऽधिकं तीर्थमासीदिदानीं तु यदुषु यदजनि जातं तेषु जातं श्रीकृष्णकीर्तिरूपं तत्कर्तृस्वःसरिद्रूपं पादशौचं तीर्थमूनमल्पं चक्रे । यशोरूपं तीर्थमेव सर्वतीर्थोपरि विराजत इति भावः । तथा द्विषन्तः शत्रवः स्निग्धा अनुरक्ताश्च तत्स्वरूपं ययुः प्रापुः । स्वमसाधारणं रूपमाकृतिः तत्साधर्म्यमिति यावत् । तत्प्रापुः । प्रीत्यप्रीत्यात्मकस्य स्वविषयस्य ज्ञानस्य साधर्म्यप्रापणस्वाभाव्यादिति भावः । तथा अजितपदाः कैश्चिदप्यप्राप्तपदा श्रीश्च यस्यैवेति शेषः । यस्यैवानन्यार्हशेषभूतेत्यर्थः । तां श्रियं विशिनष्टि–यदर्थेऽन्ययत्न इति । यदर्थेऽन्ययत्नः यच्छ्रीकटाक्षलेशप्रसरणार्थम् अन्येषां ब्रह्मादीनां यत्नः श्रमः भवति इत्यर्थः । किञ्च, यस्य भगवतो नाम श्रुतमधिगतं (वक्तरि सति अथवा) गदितम् उच्चरितं श्रोतरि सति अर्थज्ञानरहितमपि अमङ्गलघ्नं कृतनाशनम् । किञ्च गोत्रेषु तत्तद्वृष्णिवंशेषु धर्मो यत्कृतः येन प्रवर्तितः तस्यैतस्य श्रीकृष्णस्यैतन्न चित्रम् । किं तत् । यत् क्षितिभरहरणम् । तत्र हेतुत्वेन पुनस्तं विशिनष्टि–कालचक्रायुधस्येति । कालचक्रं कालाभिमानिसुदर्शनाख्यं चक्रमायुधं यस्य तस्य कालायत्तं हि सर्वमिति भावः ॥४७॥ उक्तिविधासाधारणप्रभावनिर्वाहकं परत्वमाह–जयतीति । सर्वोत्कर्षेण वर्तते को जयतीत्यत आह–जननिवास इति । जनानां स्थावरजङ्गमानां निवासो धारकः जनेषु निवसति धारकतयेत्यर्थः । तर्हि परमात्मनः कथं प्राकृतेषु जन्मेत्यत्राह–देवकीति । देवक्यां जन्मेति वादमात्रं यस्य सः तस्य प्राकृतस्यैव कर्मायत्तं जन्म अपि तु स्वेच्छामूलकं तदिति भावः । तदपि किमर्थमित्यत्राह–यदुवराः यदुश्रेष्ठास्तेषां परिषदः सङ्घास्ताभिरेव दोर्भिर्भुजैरधर्ममस्यन् लक्षणहेत्वोरित्यत्र शता प्रतिक्षेप्तुमित्यर्थः । न केवलं तदेव तस्य सङ्कल्पमात्रेणापि सुशकत्वात् । किन्त्वेतदेवावतारकृत्यं मुखमित्यभिप्रेत्य विशिनष्टि–स्थिरचरवृजिनघ्नः अधिकारमनपेक्ष्य स्थिराणां वृन्दावनादिगतानां तरुगुल्मादिरूपाणां स्थिराणां चराणां पशुशकुनिप्रभृतीनां केन चित्स्वसम्बन्धेन वृजिनं प्राप्तिप्रतिबन्धकं पापं हन्तीति तथा तदेवोदाहर्तुं विशिनष्टि–शोभनं स्मितं यस्मिंस्तेन श्रीमुखेन व्रजवनितानां पुरवनितानां च कामदेवं वर्धयन् ताः कामस्वभावाः वनिताः स्वेनैव स्वभावेन स्वविषयकेण मुच्येरन्निति तं तासां वर्धयन्निति भावः । वर्धयन् जयतीति सम्बन्धः । यद्वा अयमपि लक्षणहेत्वोरिति शता वर्धयितुं देवकीजन्मवादो जयतीति सम्बन्धः ॥४८॥ प्रस्तुतस्कन्धार्थश्रवणफलं तदधिकारिणं चाह–इत्थमिति । निजधर्मरिरक्षया स्वनिगमोक्तधर्मरक्षणेच्छया आत्ता परिगृहीता लीलार्था तनुर्येन । लीलापदेन तन्वाः कर्मफलभोगार्थव्युदासः । तस्य यदूत्तमस्य परमपुरुषस्येत्थम्भुतानि तदनुरूपाणि अवतारानुरूपाणि धर्मरिरक्षानुरूपाणि वा विडम्बनानि मर्त्यचेष्टानुकाराणि कर्मनिकषाणि शृण्वतां कीर्तयतां च भक्तियोगोत्पत्तिमिच्छन् कामयमानः ॥४९॥ ननु किमनुवृत्तेरित्यत आह–मर्त्य इति । अनुसवमनुसन्ध्यं मुकुन्दस्य श्रीमत्याः कथायाः श्रवणकीर्तनचिन्तया श्रवणकीर्तनयुक्ता या चिन्ता तया समेधितयाऽनुवृत्त्या दुस्तरकृतान्तजनापवर्गं दुस्तरः कृतान्तो यैस्तेषां जनानामपवर्गं दुःखावसानहेतुभूतं तस्य भगवतो धाम स्थानमेति प्राप्नोति । दुस्तरेत्यादिविशेषणेन दुर्लभत्वं सूचितम् । तत्स्पष्टमेवाह–ग्रामादिति । यदर्थाः यद्धाम अर्थः प्रयोजनं येषां ते यद्धामप्राप्तिकामा इत्यर्थः । ग्रामाद्वनं ययुः यान्ति तपस इति शेषः । यद्वा, यदनुवृत्तिकामाः दुस्त्यजकृतान्तभवापवर्गमिति पाठान्तरम् । दुस्तरः कृतान्तो मृत्युस्तत्तुल्यो भवः संसारः तस्यापवर्गोऽवसानं यस्मात्तद्धाम एतीति सम्बन्धः ॥५०॥

॥ इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोस्तनयेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघवविदुषा विलिखितायां श्रीमद्भागवतचन्द्रचन्द्रिकायां श्रीमद्भागवतव्याख्यायां दशमस्कन्धे नवतितमोऽध्यायः ॥९०॥

विभुर्विजयतेतरां विविधविश्वजन्मोदयस्थितिप्रभृतिनोदयोनिरवधिस्वरूपः स्वतः ।
निरस्तनिखिलाशुभः सकलशोभनोपाश्रयश्रियः सहचरः पुमान् श्रुतिदृशाम्मनोज्ञाकृतिः ॥
क्षाम्यन्त्वतिक्रमन्त्वत्र शब्दार्थविषयं मम । निर्मत्सराः सुमनसो गुणान् गृह्णन्तु सर्वशः ॥

समाप्तोऽयं दशमस्कन्धः ॥

श्रीमद्विजयध्वजकृता पदरत्नावली

"ईजे क्रतुभिरात्मानं सर्ववेदार्थसङ्ग्रहम् । स्वयोगमायारचितैः कुरुक्षेत्रे द्विषट्समाः ॥

कृष्णगाध्यसितावन्ति रामाचार्योद्धवेश्वरः । दीक्षितोऽग्रण्यपत्नीभिः पुण्यश्लोकसहाग्रणीः" ॥

सर्ववेदार्थत्वेन सर्ववेदविषयत्वेन सम्यग्रहो ग्रहणं यस्य स तथा तम् । स्वयोगमायया स्वरूपसामर्थ्येन रचितैरुत्पादितैः । कृष्णो वेदव्यासः । गाधिर्विश्वामित्रः । असितः आवन्तिः सान्दीपनिः रामः एत आचार्या यस्य कृष्णस्य सः उद्धवस्य ईश्वरः उद्धवेश्वरः कृष्णगाध्वसितावन्तिराचार्यश्चासौ उद्धवेश्वरश्च तथा अग्रण्यपत्नीभिः रुक्मिण्यादिश्रेष्ठपत्नीभिः सह सन्दीक्षितः अग्रणीः सर्वोत्तमः ॥ श्रीकृष्णस्मरणार्थं सङ्क्षिप्य तान् गुणान् कथयति-तीर्थमिति । तीर्थं कीर्तिलक्षणम् । नृणां चक्रे यत् यः यदुष्वजनि प्रादुर्भूतः यस्य पादशौचं पादप्रक्षालनजलं स्वःसरित्स्वर्गनदी गङ्गाऽभूत् । यस्य स्वरूपम् ऐश्वर्यादिषड्गुणैराप्तं पूर्णं यस्य उरसि वक्ष उपरि रमा सर्वदाऽऽस्ते । यस्य शास्त्रं शासकं वचनं तत्प्रमाणं लोकस्येति शेषः । यच्छास्त्रं वेदादिशास्त्रं तत्प्रमाणमिति वा सदसव्द्यक्तयः । कार्यकारणव्यक्तयः । सम्पद्यमाना यदनुकूलत्वेन सत्तासम्बन्धिन्यः । धर्मा यत्र यद्विषयत्वेन वर्तन्ते तस्य कृष्णस्यैतत् क्षितिभारहरणं न चित्रं किन्त्वस्माकमेव । हेत्वन्तरमाह-कालेति ॥४७-४८॥

जयति जननिवासो देवकीजन्मवादो नियमकृतपदाब्जैर्दस्युपीडां स्वदोर्भिः ।

मुदमुभयदृशीनां श्रीनिकेतात्ममूर्त्या स्मरवपुरबलानां स्निग्धहासेक्षया च ॥ क ॥

देवकीजन्मवादः देवकीपुत्रत्वेन वादः कीर्तिर्यस्य स तथा स जननिवासः जगन्निवासो जयति । कथमत्राह-नियमेति । भूभारक्षपणार्थं नियमेन भूमौ कृतानि पदाब्जानि पादन्यासपद्मानि यानि तैः स्वदोर्भिश्च दस्युपीडां कुर्वन्निति शेषः । उभयदृशीनाम् अन्तर्बहिः स्थितरूपस्य दृशि दर्शनं येषां तेषां मुदं कुर्वन् अबलानां स्त्रीणां श्रीनिकेतात्ममूर्त्या लक्ष्मीमन्दिरात्मस्वरूपेण स्निग्धहासेक्षया स्निग्धमन्दस्मितशोभितरूपकटाक्षनिरीक्षणेन च स्मरवपुः काममूर्तिरिव स्थितः ॥ क ॥

यो ह्यात्मा जगदादिमध्यनिधनो योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविष्ट ऋषिणा चक्रे पुनः संहिताम् ।

यं सम्पद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ॥ ख ॥

जगतः आदौ मध्ये निधने वर्तत इति जगदादिमध्यनिधनः जगदुत्पत्तिस्थितिसंहारकर्ता । अव्यक्तजीवयोरीश्वरः । ऋषिणा व्यासात्मना । भागवतीं संहिताम् । अनुशयी जीवः । यं सम्पाद्य प्राप्य । अजां बन्धकशक्तिं जहाति, 'सता सोम्य तदा सम्पन्नो भवती'ति श्रुतेः । सुप्तः परमात्मानं प्राज्ञं प्राप्तः । यथा कुलायं शरीराभिमानं त्यक्त्वास्ते तथा कैवल्येन सच्चिदानन्दस्वरूपस्थित्या निरस्तयोनिं नित्यनिरस्तप्रकृतिम् ॥ ख ॥

इत्थम् एवंविधस्य यदूत्तमस्य कर्माणि विक्रमलक्षणानि गायेदित्यन्वयः । निजधर्मरिरक्षया स्वकल्पितधर्मरक्षणेच्छया तस्यानुकूलविडम्बनानि कर्मकषणानि दुष्कर्मनिराकरणसमर्थानि अनुवृत्तिम् अनुगमनमिच्छन् ॥४९॥ मर्त्यः तयाऽनुवृत्त्या तस्य हरेर्धाम लोकमेति । कीदृश्या । श्रीमत्याः कथायाः श्रवणकीर्तनचिन्तनलक्षणया दुष्करेण तपसा कृतं साधितं जनतायाः क्रियासिद्ध्यफलरूपं जनतापवर्गं यस्य हरेर्धर्मार्थे क्षितिभुजोऽपि ग्रामाद्वनं ग्रामं विहाय वनं ययुः यान्ति किं पुनरन्य इति ॥५०॥

मूलम् —

सूत उवाच ।

य इदमनुशृणोति श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ।

जगदघभिदलं तद्भक्तकर्णावतंसं भगवति कृतचित्तो याति तत्क्षेमधाम ॥

स्कन्धार्थमुपसंहरति-य इदमिति । व्यासपुत्रैः शुकादिभिः । जगतोऽघं पापं भिनत्तीति जगदघभित् । तद्भक्तानां कर्णालङ्कारायमानं श्रवणादिफलमाह-भगवतीति । क्षेमधाम मोक्षलक्षणं स्थानं श्रवणादिकुर्वता इत्थं भाव्यमित्यत

श्रीमद्विजयध्वजकृता पदरत्नावली

उक्तं भवतीति —

"सर्वोत्तमोऽपि भगवान् गुणभावं जनार्दनः । दर्शयेद्वासुदेवोऽपि ह्यात्मनो जीवतामपि ॥
अज्ञाशक्तादिभावस्तु कुतस्तस्याखिलेशितुः । कुतश्च जीवता तस्य प्रधानपुरुषेशितुः ॥
कुतो दोषाः सर्वगुणपूर्णस्यानन्दवारिधेः" ॥

इत्येतत् प्रमाणम् अज्ञजनेन कृष्णे क्रियमाणसर्वशङ्कानिराकरणार्थं भगवत्पादैः स्कन्धान्ते दर्शितमिति ज्ञातव्यमिति —

योऽयाचि त्रिदशैः कुमारहृतये वातारि येन क्षितौ जघ्ने येन सुरासुहृत्समुदयो येन त्रिलोक्यापि सा ।
येनाज्ञायि युधिष्ठिरो निजपदे धर्मोऽपि येनाङ्कुरि श्रीकृष्णं तमकृष्णकृष्णदयितं वन्दामहे सन्ततम् ॥
पदरत्नावलिर्नाम दशमस्कन्धसङ्गता । कृष्णप्रीत्या समाप्तेयं विद्वन्मानसहर्षिणी ॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् नवतितमोऽध्यायः ॥९०॥

(श्रीविजयध्वजतीर्थरीत्या त्र्यधिकशततमोऽध्यायः ॥१०३॥)

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

तदेवं यदुकुलरूपमधिष्ठानं प्रशस्य श्रीकृष्णरूपमधिष्ठातारं प्रशंसति । कृष्णस्य स्वयं भगवत एतत् पूर्ववर्णितं क्षितिभारहरणं न चित्रम् । विबुधहृदयविस्मयावहं न भवति । यतः परमाण्वादिद्विपरार्धान्तरूपो यः कालः स एव चक्रं चक्रवव्द्यवच्छेद्ये परिवर्तगतित्वात् तदेव चायुधम् ——

तदेव चायुधं सर्वसंहारसाधनं यस्य तस्य स्वतःसिद्धत्वात्तदर्थोद्यमेनालमिति भावः ।

तदचित्रताबोधनाय तमेव चित्रविशेषणैर्विशिनष्टि । यत् यतस्तादृशोऽपि यदुषु लोककृपया अजनि जातः य एव स्वस्सरिदाख्यं श्रीवामनपादशौचरूपं तीर्थमूनं चक्रे । निजचरणरजःसम्बन्धियमुनादिभिरिति भावः "गङ्गा शतगुणा पुण्या माथुरे मम मण्डले । यमुना विश्रुता देवि नात्र कार्या विचारणा ॥" इत्यादि वाराहात् । "यत्पादसंश्रयाः सूत मुनयः प्रशमाय नः । सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥

को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः । शुद्धिकामो न शृणुयाद्यशः कलिमलापहम् ॥" इति ।

श्रीशौनकस्य तत्प्रश्नकरणाच्च किञ्च विभक्तिविपरिणामात् यत् येन हेतुना स्निग्धा इव विद्विषः पूतनादयः यद्वा विद्विषः स्निग्धाः पितृभ्रात्रादयोऽपि स्वरूपं सर्वमूलभूतं श्रीभगवत्त्वमेव ययुः । सद्वेषादिव पूतनापि सकुला त्वामेव देवापितेत्यादेः । यत् यत्र श्रीरूपादिसम्पत्तिः अजिता अन्यास्पृष्टा परा सर्वोत्कृष्टा चेत्यर्थः । यथोक्तं यन्मर्त्यलीलौपयिकमित्यादि । यदर्थे यस्य दर्शनादिरूपार्थे अन्येषां महाकालपुराधिपादीनामपि यत्नः यथोक्तं द्विजात्मजा मे युवयोर्दिदृक्षुणेत्यादि । अत एव यस्यैव नाम अथ कार्त्स्न्येन सर्वतोऽपि सामस्त्येन तदतिरिक्तसर्वपरित्याजनादिना अमङ्गलघ्नं तदुपलक्षणतया सर्वमङ्गलत्वादातृ च यथोक्तं ब्रह्माण्डपुराणे तन्नामाष्टोत्तरशतप्रसङ्गे "सहस्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत्फलम् । एकावृत्त्या तु कृष्णस्य नामैकं तत्प्रयच्छतीति । तत्रापि विशेषः श्रुतं किमुत गदितमित्यर्थः । किञ्च यत्कृतो येनैव दिष्टो गोत्रधर्मः । गां पृथ्वीमपि त्रायते स चासौ धर्मश्च "अपि चेत्सुदुराचार" इत्यादिकं हि श्रीगीतादिभ्यः । यद्वा गोत्रस्य श्रीगोवर्धनस्य धर्मो मखरूपो येनैव कृतः भक्तवात्सल्यं दर्शयतेन्द्रमपि तुच्छीकृत्य प्रकाशितः । यद्वा गास्त्रायन्ते इति गोत्राः श्रीगोपाः तेषां धर्मः स्वभावः असमार्द्धप्रेमा येन यत्र वा कृतः इति दिक् ॥४७॥ एवं तस्य सर्वोत्कृष्टत्वं श्रुत्वा सुखं प्राप्नुवतोऽपि श्रोतॄंस्तदवस्थत्वमतीतमिवाशङ्क्य म्लायतः स्वानुभवेन सान्त्वयन्नाह-जयेति ॥४८॥ तेषां नित्यपार्षदानां नित्या तदेकधामस्थितेः किं वर्ण्यताम् । यतस्तैः सह या लीलास्ताः शृण्वतामपि सा नित्यैव स्यादित्याह–इत्थमिति । पूर्वप्रकारेण परस्य सर्वगोचरगतेरपि कृपया निजधर्मस्य स्वभक्तिस्वरूपस्य रिरक्षिषया आत्ता प्रपञ्चं

श्रीमज्जीवगोस्वामिकृतः क्रमसन्दर्भः

प्रत्यानीता प्रकटिता लीलाप्रधाना तनुर्निजविग्रहो येन तस्य । तदनुरूपाणि यानि तस्य तत्सदृशानि अवतारान्तरकर्माणि तान्यपि विडम्बयन्ति हीनोपमात् प्रापयन्ति यानि तानि असमोर्द्धवैभवानीत्यर्थः । यथा तच्छ्रवणेन तदनुवृत्तिप्राप्तिः स्यात्तथा विवृणोति-मर्त्याः इति । यद्धाम श्रीवृन्दावनादिरूपेषु वासनानुसारेणैकतरं प्राप्नोति ॥४९॥ तदेव विशिनष्टि-सुदुस्तरेण ॥५०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे नवतितमोऽध्यायः ॥९०॥

श्रीमज्जीवगोस्वामिकृतः बृहत्क्रमसन्दर्भः

जगद्गुरुत्वं प्रपञ्चयति-तीर्थं चक्र इत्यादि । हे नृप ! यदुषु यादवमध्ये श्रीकृष्णलीलारूपं तीर्थं यदजनि जातं तत् स्वःसरितदेव यत् पादशौचं पादोदकम् ऊनं चक्रे । अस्य श्रवणमात्रेणैव सद्य एव निःश्रेयसावाप्तेः । गङ्गायास्त दर्शनस्पर्शनावगाहनैरेव तत्रापि चिरेणैव तथोकंत स्वर्धुन्यापोऽनुसेवयेति । किञ्च श्रीकृष्णस्य विद्विट्स्निग्धाः विद्विषश्च स्निग्धाश्च स्वरूपं ययुः । विद्विषः स्वरूपं मोक्षं स्निग्धाः स्वेषां पार्षदानां रूपं यस्य श्रीर्विभूतिः अजितपरा अजिता अन्यैरनभिभूता अत एव परा उत्कृष्टा पश्चात्कर्मधारयः । यदर्थे यस्याः श्रियोऽर्थे अन्येषां ब्रह्मादीनां यत्नः अथवा श्रीर्महालक्ष्मीः अजिता सती अबाधिता सती परा परायणा यस्य यत् यस्य नाम अमङ्गलघ्नं संसारबन्धहरं श्रुतं वा गदितं वेत्यर्थः । यत् येन गोत्रधर्मः कृतः गां पृथिवीं त्रायतीति गोत्रः स चासौ धर्मश्चेति तथा एतत् क्षितिभरहरणं श्रीकृष्णस्य न चित्रम् । कुत इत्याह-कालचक्रायुधस्य । कालचक्रं सुदर्शनमेवास्त्रं यस्य ॥४७॥

उपसंहरति-इत्थमित्यादि । अनेन प्रकारेण नित्यलीलत्वेनेति-यावत् यदूत्तमस्य कर्माणि श्रूयात् शृणुयात् निजधर्मरिरक्षया निजधर्मो वैष्णवधर्मस्तस्य रिरक्षया तदेवधर्मरक्षणम् । कीदृशस्य । आत्तलीलातनोः आत्ता गृहीता आलिङ्गिता लीलाया लीलास्वरूपाया राधाया रुक्मिण्याश्च तनुर्येन तदनुरूपविडम्बनानि । तस्य लीलायाः अनुरूपमनुकरणं येषां किं कुर्वन् शृणुयात् अमुष्य श्रीकृष्णस्य पदयोरनुवृत्तिं परिचर्याम् इच्छन् ॥४९॥ तस्यानुवृत्तिस्तद्धामलब्ध्यैव स्यात् । सा कथं भवेत् मर्त्यानामित्याह-मर्त्य इत्यादि । ननु भो राजन् पूर्वोक्तया समेधितया वर्धमानया मुकुन्दश्रीमत्त्वश्रवणे यार्चिता तया तद्धाम तन्निवासं परमवैकुण्ठं दुस्तरो यः कृतान्तजवः कालवेगस्तस्यापवर्गो यदर्था यत्प्राप्तिकामाः ग्रामात् निजराज्यतः क्षितिभुजोऽपि ययुः । तद्यत्र तत्र स्थित्वा तत्कथाश्रवणेनैव भवाभावः ॥५०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भे ननवतितमोऽध्यायः ॥९०॥

समाप्तोऽयं दशमस्कन्धः ॥

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

तीर्थं चक्र इत्यादि । हे नृप परीक्षित् ! यदुषु यदजनि यदेतं क्रीडनकादिरूपमर्थज्ञातं तत् स्वः सरितत्गङ्गा तत्स्वरूपं पादशौचमूनं चक्रे-स्मरणमात्रेणैव सद्यः पावनत्वात् । यद्यपि गङ्गाया अपि 'गङ्गा गङ्गेति यो ब्रूयात्' इत्यादिना श्रवणकीर्तनाभ्यामपि सद्यः पापहारित्वम्, तथाप्यस्य परमानन्दप्रदत्वादाधिक्यमिति भावः । यद्यतः श्रीअजितपरा 'अजगतौ अजितं गतिर्भावे क्तः' अनुगतिपरा यदर्थे यस्या अर्थे अन्येषां ब्रह्मादीनामपि यत्नः । यत् यस्य नाम अमङ्गलघ्नं संसारतापघ्नम्, यत्कृतो गोत्रधर्मः-गां पृथिवीं त्रातीति गोत्रः, स चासौ धर्मश्चेति तथा तस्य श्रीकृष्णस्य एतत् क्षितिभरहरणं न चित्रम् । काल एव चक्ररूपमायुधं यस्य, कालचक्रेणैव क्षितिभरहरणं कृतमित्यर्थः । तस्य तु विद्विट्स्निग्धाः समाना एव फलगततौल्यात् ॥४७॥ अतः श्रीकृष्णो नाम पदार्थः सर्वोत्कृष्ट एवेत्याह-जयतीत्यादि । जना जनमनांसि तेषां निवास आश्रयः, अथवा, जननी यशोदा तस्यां तदंके वासो यस्य । देवक्यां जन्मेति वादः प्रसिद्धिमात्रं यस्य, वस्तुतस्तु अज एव न कस्य अपि गर्भोद्भवः यदुवरा एव परिषत् सभा यस्य । यद्वा, यदुभ्यो वरास्तेभ्योऽपि श्रेष्ठा गोपालबालास्त एव परिषद्यस्य । स्वैर्दोर्भिरिति बहुचरणञ्चतुर्भुजत्वपरम् । व्रजपुरवनितानां व्रजवनितानां पुरवनितानां च कामदेवं वर्धयन् जयति सर्वोत्कर्षेण वर्तते । यद्वा, कामोऽभिलाषः स एव देवः सर्वविजिगीषाशालित्वात्, अतो

श्रीनाथचक्रवर्तिपादविरचिता चैतन्यमञ्जूषा

वर्तमानो शतृ-प्रत्ययात् पुरव्रजयोर्वनितानामेव युगमपदेवाभिलाषपूरकत्वेन श्रीवृन्दावनलीलाद्वारकालीलयोरपि वर्तमानता। तथा च नित्यत्वं लीलयोः स्वस्य च व्यापकत्वमुपपन्नम् ॥४८॥ इत्थमित्यादि। आत्ता गृहीता या लीला तत्प्रधाना तनुर्यस्य तस्य श्रीकृष्णस्य यद्वा, आत्ता लीलानाम-प्रेयस्यास्तनुर्येन- (सीतो प०८) 'श्रीर्भूलीला' इत्यादेरन्यत्रोक्तत्वात्। ननु भर्तृभावेन भजन्तीनां माधवीनां परिणामे किं मोक्षः ? किमथवा तद्रूपैरिव विग्रहैर्नीत्यतया वर्तमानैस्तथैव भजनेन स्थितिः ? नाद्यः, रतिमतां मोक्षप्रसङ्गाभावात्। तथाहि-रतिर्हि प्रणयवती मतीर्वासनापरपर्याया। सा च हेया किमुपादेयेति प्रथमतो विचारणीयम्। हेया चेत् कर्तुमेव नोचिता, प्रत्युत तस्या विधेयत्वेन शतशः प्रतिपाद्यमानत्वम्, (भा३/७/१९) ''रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः'' इति (भा० १/८/४२) ''रतिमुद्वहतां नित्यं गङ्गेवोघमुदन्वति'' इत्यादि तत्र दिक्। अतो न हेया तर्ह्युपादेयत्वे किमनित्यानित्या वा ? नाद्यः पक्षः, यतो (भा० १/६/२५)

''मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित्। प्रजासर्गनिरोधेऽपि स्मृतिश्च मदनुग्रहात् ॥'' इत्याद्यसङ्गतेः।

द्वितीयश्चेत् किं नाम नित्यत्वम् ? त्रैकालिकसत्त्वमिति चेत् मुक्तौ तदभावात् कथंतथात्वमतो रतिमतां मोक्षो नास्ति, निर्वासनानामेव सः। उक्तं च — (भा० १०/१४/४६) ''भावो हि भवकारणम्'' ॥४९॥ इति।

इति श्रीकृष्णविषयकभावेन शुद्धभागवतविग्रह एव भवः स च नित्य एवं चेत्तासां रतिमत्त्वं कथं ज्ञातं येन मोक्षो न भविष्यति ? एवं चेत्तासामेव तथोक्तिः — (भा० १०/८३/४१)

'न वयं साध्वि ! साम्राज्यं स्वाराज्यं भौज्यम्' इत्यारभ्य 'आनन्त्यं वा हरेः पदम्' इत्यन्तम्।

तर्हि किं कामयन्ते ? तत्राहुः — (भा० १०/८३/४३) ''व्रजस्त्रियः'' इत्यादि, ता एव किं वाञ्छन्तीति चेत् चरणाम्बुजमेव। तथा च श्रुतयः (भा० १०/८७/३३) ''स्त्रिय उरगेन्द्र'' इत्यादि। एतेनाह ईदृशो नेत्यादि। तस्य व्याख्या प्रागेव कृतेति सर्वं समञ्जसम्। श्रियां विग्रहेणैव तासां स्थितिरिति ॥४९॥ ॥५०॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे श्रीनाथचक्रवर्तिकृतायां चैतन्यमञ्जूषायां नवतितमोऽध्यायः ॥९०॥

॥ समाप्तश्चायं दशमः स्कन्धः ॥

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

श्रीकृष्णलीलारत्नाकरं श्रीदशमस्कन्धमुपसंहरन् श्रीकृष्णस्यान्यावतारवैलक्षण्यपञ्चकमाह-तीर्थमिति। यत् यदुषु अजनि जातं तीर्थं कृष्णकीर्तनरूपं तत् कर्तुं स्वःसरिद्रूपं पादशौचं तीर्थम् ऊनं चक्रे। इतः पूर्वं गङ्गैव सर्वतीर्थाधिका आसीत् अतः परन्तु कृष्णकीर्तिरेव ततोऽप्यधिका अभूदिति भावः। इदमेकं चित्रं तथा यत् यस्य विद्विषः कंसादयः स्निग्धा गोप्यादयश्च स्वरूपं क्रमेण सायुज्यं प्रापुः तदीयश्रीविग्रहश्च सम्भोक्तुं प्रापुः। इदं द्वितीयं चित्रं यदर्थे यस्याः कृपालवप्राप्त्यर्थम् अन्येषां ब्रह्मादीनां परिचारकाणां यत्नः। सा श्रीरजित-जयाभावस्तत्परैव अभूत्। बहुतपोभिरपि व्रजस्त्रीश्रेणिरिव यत्, यं जेतुं वशीकृत्य रासादिभिः रमयितुं न शशाकेत्यर्थः। इदं तृतीयं चित्रं यत् यस्य नाम कृष्णेति व्यक्षरं नारायणादिनिखिलतदंशनामोत्कृष्टम् अमङ्गलमविद्यापर्यन्तं हन्तीति तत् श्रुतान् अविशेषेण सर्वसाधनफलोत्कर्षेण मथ्नातीति स्वीयसर्वोत्कर्षेण सर्वसाधनफलोत्कर्षेण मथ्नातीति स्वीयसर्वोत्कर्षेण विलोडयति श्रुतमथ गदितं यस्य तत् नारायणादिनिखिलतदंशनामोत्कृष्टमित्यर्थः।

''सहस्रनाम्नां पुण्यानां त्रिरावृत्या तु यत् फलम्। एकावृत्त्यैव कृष्णस्य नामैकं तत् प्रयच्छति'' ॥

इति ब्रह्माण्डपुराणोक्तम् ॥

इदं चतुर्थं चित्रं गां सर्वामपि पृथ्वीं त्रायते चतुर्भिरेव पादैर्निरन्तरं सर्वत्रैवाभिद्रुत्य वा पालयतीति स चासौ धर्मश्चेति स तादृशो येनैव कृतः द्वापरान्ते त्रिपादहीनोऽपि धर्मो येन चतुष्पादेव कृत इत्यर्थः। 'चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहै'रिति

श्रीमद्विश्वनाथचक्रवर्तिकृता सारार्थदर्शिनी

पृथिव्युक्तेः। इदं पञ्चमं चित्रं विस्मयावहं वैलक्षण्यं तस्य कृष्णस्य तत्क्षितिभरहरणं तु न चित्रं येनैव लोका विस्मिता भवन्तीति भावः ॥४७॥ हन्त हन्तैतादृशः कृष्ण एतावत्कालपर्यन्तं न तस्थाविति मा शोचेत्याह–जयतीति। जनेषु मनुष्येषु गोपयादवादिमध्येष्वेव निवासो यस्य सः जयति सर्वोत्कर्षेण वर्तते। वर्तमाननिर्देशः सविशेषणस्यैव कृष्णस्य सार्वकालिकीं स्थितिं वक्ति। शुकस्य तद्भक्तत्वात् तत्राशीर्वादायोगाल्लोट् प्रयोगो नैवाशङ्क्यः। आशीर्वादेऽपि तदाशिषः सार्वदिकसन्त्यत्वाद्विवक्षितसिद्धिरेव देवक्योर्नन्दवसुदेवगृहिण्योर्जन्मैव वादः सिद्धान्तो यत्र सः। तथा च द्वे नाम्नी नन्दभार्याया यशोदा देवकी चेत्यादिपुराणं देवक्यामिव यशोदायां शुकोक्तेःवादः प्रवदतामहमिति भवदुक्तिः। आरम्भवादपरिणामवादादिष्वपि वादशब्दस्य सिद्धान्तवाचित्वं दृष्टम्। यदुवरा गोपाः व्रजस्थाः क्षत्रियाः पुरस्थाश्च परिषत् सभारूपा स्य सः स्वैर्दोर्भिः अधर्मं धर्मप्रतिपक्षमसुरसङ्घं निरस्यन् निघ्नन् दोस्तुल्यैरर्जुनादिभिर्वा अत एव स्थिरचराणां वृजिनं संसारदुःखं व्रजपुरस्थानां तेषां स्ववियोगदुःखं च हन्तीति सः। व्रजवनितानां पुरवनितानां मुथराद्वारकापुरस्थानुरागिणीनां सुस्मितेन श्रीमता मुखेनैव कामदेवं कामश्चासौ ददीव्यतीति देवाऽप्राकृतेस्तत्स्वरूपभूतस्तं वर्धयन् सन् जयतीति व्रजमथुराद्वारकास्थलीलानां सर्वासामेव दशमस्कन्धवर्णितानां नित्यत्वमुक्तम्। एतत्प्रकारश्च सप्रमाणकः सर्व एवोज्ज्वलनीलमणिटीकायां साधु विवृत एव। अत्राप्येकादशान्ते भगवदन्तर्धानप्रसङ्गे व्याख्यास्यत एव ॥४८॥ कृष्णचरितस्य नित्यतां व्यवस्थाप्य तच्छ्रवणं विधत्ते–इत्थमिति। निजधर्मो भक्तिर्धर्मस्तस्य रिरक्षिषया प्रकल्पितलीलामयतनोस्तदनुरूपाणि तत्सदृशानि यान्यवतारान्तरकर्माणि तान्यपि विडम्बयन्ति स्वस्मादतिहीनीकुर्वन्ति कर्माणि श्रूयात् शृणुयात्। कर्मकषणानि नैष्कर्म्यप्रतिपादकानि ॥४९॥ अनुवृत्तेः फलमाह–तया अनुवृत्त्या तद्धाम एति। कीदृश्या। श्रीमत्कथाश्रवणकीर्तनाभ्यां जनिता चिन्ता। केन प्रकारेण, कदा वा। कृष्णं प्राश्यामीति या भावना तया एधितया वर्द्धितया धाम्नः कालानाकलितत्वमाह। दुरन्तो यो कृतान्तजवस्तस्यापवर्गो नाशो यत्र तत् तत्प्राप्तिकरमपि कमप्याह–ग्रामादिति। क्षितिभुजो मनुप्रियव्रताद्या अपि ॥५०॥

नवतितमोऽत्राध्यायो दशमे सारार्थदर्शिन्याम्। सङ्गत एव स्कन्धोऽप्यस्तु सतां सङ्गतो हृदि मे ॥९०॥

मद्गवीरपि गोपालः स्वीकुर्यात् कृपया यदि। तदैवासां पयः पीत्वा हृष्येयुस्तत्प्रिया जनाः ॥

माघस्य कृष्णद्वादश्यां राधाकृष्णसरित्तटे। दशमस्कन्धटीकेयमपूरि कृपया प्रभो ॥

समाप्तोऽयं दशमस्कन्धः ॥

गूढार्थदीपिनी

हे नृप यदुषु यत् अजनि जातं कृष्णरूपं तीर्थं तत् कर्तृ पादशौचं पादप्रक्षालनरूपं स्वःसरित् गङ्गाख्यं तीर्थम् ऊनं न्यूनमल्पं चक्रे। इत्येकं चित्रम्। विद्विषः शत्रवः स्निग्धा भक्ताश्च स्वरूपं ययुः इति द्वितीयं चित्रम्। यस्या लक्ष्म्या अर्थे अन्येषां ब्रह्मादीनां यत्नो भवति सा श्रीः अजितपरा कृष्णसेवापरायणा इति तृतीयम्। तया श्रुतम् अथवा गदितमुच्चारितं यस्य नाम अमङ्गलनाशकम् इति चतुर्थम्। तथा गोत्रेषु तत्तदृषिवंशेषु धर्मः यत्कृतो येन प्रवर्तितो भवति इति पञ्चमम्। यद्वा। गां पृथ्वीं त्रायते गोत्री धर्मः चतुष्पात् यत्कृतो भवति तस्य क्षितेर्भारहरणं चित्रमसम्भावितमाश्चर्यकरं न भवति। कथम्भूतस्य। कालचक्रं सुदर्शनमायुधं यस्य। स्रग्धरावृत्तम् ॥४७॥ अत्र विशेष्यमध्याहार्यम्। श्रीकृष्णो जयति। कथम्भूतः। देवक्यां जन्मेति वादमात्रं यस्य। वस्तुतोऽजन्मा। पुनश्च। जनानां निवासः आधारभूतः। जनेषु अन्तर्यामितया निवासो यस्येति वा। पुनश्च। यदुवराः पर्षत् सभा सेवकरूपा यस्य। पुनश्च। स्थिरचराणां स्थावरजङ्गमानां सर्वेषामेव प्राणिजातानाम् अधिकारिविशेषानपेक्षमेव वृजिनं संसारदुःखं हन्तीति तथा। किं कुर्वन् सन् जयति। स्वैः दोर्भिः भुजैः अधर्मम् अस्यन् निराकुर्वन्। 'असु क्षेपणे' धातुः शत्रन्तः। पुनश्च। सुस्मितेन श्रीमुखेन वनितानां कामं वर्धयन्। यद्वा। दीव्यति विजिगीषति संसारमिति देवः कामश्चासौ देवस्तं वर्धयन्। दमयंश्च जयति भोगद्वाराऽपि मोक्षप्रदत्वमित्यैश्वर्यमस्य व्यंजितमित्यर्थः ॥४८॥ इत्थममुष्यपदयोरनुवृत्तिमासक्तिमिच्छन् जनः परस्य परमेश्वरस्य कर्माणि चरितानि श्रूयादित्यन्वयः। कथम्भूतस्य। निजवर्त्म वेदमार्गः तस्य रिरक्षया आत्ता गृहीता लीलातनुर्येन तस्य। कथम्भूतानि

गूढार्थदीपिनी

चरितानि। तदनुरूपाणि लीलातनुयोग्यानि विडम्बनानि अन्यातिक्रमीणि च तानि। पुनश्च। कर्मकर्षणानि पापनिवर्तकानि ॥४९॥ मर्त्यः तया पदयोः अनुवृत्त्या प्रेमासक्त्या तत् धाम एति प्राप्नोतीत्यन्वयः। कथम्भूतया तया। मुकुन्दस्य श्रीमत्कथायाः श्रवणकीर्तनयोः चिन्तया अनुसवमनुक्षणम् एधितया वर्धितया। कथम्भूतं धाम। दुस्तरस्य कृतान्तजवस्य कालवेगस्य अपवर्गो निवृत्तिर्यस्मात् तत्। यदर्थाः युद्धमिच्छवः क्षितिभुजोऽपि ग्रामात् ग्रामं राज्यं परित्यज्य वनं ययुरित्यन्वयः। ल्यब्लोपे पञ्चमीयम्। यत् धामैव अर्थः प्रयोजनं येषां ते तथोक्ताः ॥५०॥

राधाकृष्णाङ्घ्र्यनुध्यानात्कृता सन्देहभञ्जनी। सद्भिरासेव्यतामेषा बुधैर्गूढार्थदीपिनी ॥१॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे सनाढ्यवंशावतंसपण्डितप्रवरश्रीराममूर्तिशास्त्रिपौराणिकविरचितायां गूढार्थदीपिन्यां नवतितमोऽध्यायः ॥९०॥

॥ समाप्तोऽयं दशमस्कन्धः ॥ श्रीकृष्णार्पणमस्तु ॥

श्रीमच्छुकदेवकृतः सिद्धान्तप्रदीपः

निरतिशयाद्भुतकीर्तिभिः सर्वश्रेष्ठस्य श्रीकृष्णस्य क्षितिभरहरणं कियदित्याह-तीर्थमिति। हे नृप ! यत् अजनि जातं कीर्तिरूपं तीर्थं तत् स्वःसरिद्रूपं पादशौचं तीर्थं श्रेष्ठतया विख्यातमप्यूनमल्पं चक्रे। यत्कीर्तिरूपं तीर्थमेव सर्वतीर्थोपरि विराजत इति भावः। विद्विषतः प्रातिकूल्येन स्मरन्तः स्निग्धाः आनुकूल्येन स्मरन्तः यस्य स्वरूपं ययुः। अजितः यस्य स्वरूपं स एव परः आश्रयो यस्याः शक्तिभूतायाः सा यदर्थे यदवलोकनार्थम् अन्येषां यत्नः तपोव्रतादिश्रमः सा श्रीः यस्यैव श्रेष्ठाशक्तिरित्यर्थः। यस्य श्रुतमथवा गदितं नाम अमङ्गलघ्नम्। यत् येन। गोत्रेषु तत्तदृषिवंशेषु। धर्मः कृतः प्रवर्तितः। कालः सर्वसंहारकः शक्तिरूपः। चक्रं सुदर्शनाख्यपार्षदः। ते आयुधे यस्य तस्य सर्वेश्वरस्य श्रीकृष्णस्य भूभरहरणं अतिदुष्करतया वर्णितमपि न चित्रं नाद्भुतम् ॥४७॥ उक्तलीलस्य भगवतो बहुशो वर्णितं परत्वं सङ्क्षेपत आह-जयतीति। जनानां सर्वेषां निवासः धारकः तदपि भक्तवश्यस्य देवक्यां जन्मेति वादः कथा यस्य सः। यदुवराः परिषत्सभा सेवकरूपा यस्य सः दोर्भिः भुजैः अधर्मम् अस्यन् क्षिपन् स्थिराणां चराणां च वृजिनं पापं हन्तीति तथा। शोभनं स्मितं यस्मिन् तेन श्रीमता मुखेन व्रजवनितानां पुरवनितानां च। दीव्यति विजिगीषति संसारमिति देवः कामश्चासौ देवस्तं वर्धयन् भक्तमनोरथपूरणार्थं तत्तद्भक्तानुगुणं चेष्टितं कुर्वन्नित्यर्थः। जयत्यतिशयेनोत्कर्षेण वर्तते ॥४८॥ परस्य सर्वश्रेष्ठस्य निजधर्मस्य स्वप्रापकस्य धर्मस्य भक्तेः रक्षितुमिच्छया अत्ता प्रकटीकृता लीलार्था तनुः श्रीमूर्तिर्येन तस्य तदनुरूपाणि लीलानुरूपाणि वा विडम्बनानि नरचेष्टितानुकरणानि येषु तानि श्रूयात् शृणुयात्। किं कुर्वन्। अमुष्य श्रीकृष्णस्य पदयोः अनुवृत्तिमिच्छन् ॥४९॥ किं तयेत्याकाङ्क्षायामाह-मर्त्यस्तयेति। मर्त्यः तया अनुवृत्त्या तस्य श्रीकृष्णधाम लोकमेति। कीदृशं धाम। दुस्तरस्य कृतान्तजवस्य मृत्युवेगस्य अपवर्गः नाशः अभावो यस्मिन् तत्। कथम्भूतया। मुकुन्दश्रीमत्कथाश्रवणकीर्तनचिन्तया अनुसवमेधितया अनुसन्ध्यं वर्धितया यदर्थाः अनुवृत्तिकामाः ॥५०॥

श्रीकृष्णप्रीतये सम्यक् शुकेन सुधिया कृतः। सम्प्रदायानुसारेण प्रदीपो दशमेऽर्थदः ॥

॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धीये श्रीमन्निम्बार्कचरणचिन्तकश्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे नवतितमाध्यायार्थप्रकाशः ॥९०॥

श्रीमन्निम्बार्काय नमः ॥

समाप्तोऽयं दशमस्कन्धः ॥

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

एवं लीलायामुपपादितायां भारतवत् भूभारहरणं विशेषाकारेण न निरूपितमिति शङ्कां व्यापर्तयितुं कैमुतिकन्यायनिरूपणाय भगवतो नानाविधानि माहात्म्यानि निरूपयति-तीर्थं चक्रे नृपोनमिति । किं भगवतो माहात्म्यं वक्तव्यम् । यत् किञ्चित् सर्वमेव प्रत्येकं तीर्थमूनं चक्रे । तत्किं तीर्थमित्याकाङ्क्षायामाह-स्वस्सरिदिति । गङ्गेत्यर्थः । यदुकुलावतीर्णभगवत्सम्बन्धि यत्सर्वमेव प्रत्येकं पदार्थमात्रमपि गङ्गातोऽप्युत्तममित्यर्थः । एतस्य तथात्वं भगवतैव कृतमिति ज्ञापयति-चक्र इति । स्वयं तस्य चरित्रस्य तथा माहात्म्यं दत्त्वानित्यर्थः । ननु, तथापि ये युक्त्यैव पदार्थानङ्गीकुर्वन्ति तेषामत्र कथं बुद्धिर्भविष्यति इत्याशङ्क्याह-स्वःसरिदपि पादशौचमिति । प्राणिनः सर्वसम्बन्धिपदार्थापेक्षया पादशौचमपकृष्टं तत्पुरुषः पुनर्न स्पृशति । स्वःसरिदिति भूमिष्ठायाः पातालस्थायाश्च तत्रत्यदोषसम्बन्धात् कदाचिद्दोषोऽपि भवेदिति । एवमेकं माहात्म्यं निरूपितम् । सामान्यरूपं जडसाधारणं जीवेषु विशेषमाह-विद्विट् स्निग्धाः स्वरूपं ययुरिति । द्वेषरागयोरपि मोक्षसाधकत्वं जातमित्यर्थः । तस्मात् कृष्णावतारे यः कश्चन धर्मः मोक्षं दास्यतीति निरूपितम् । भगवतः सकाशादैहिकसिद्धौ हेतुमाह-अजितपरा श्रीरिति । लक्ष्मीर्भगवत्परा । अतः स्वामी सेवकेभ्य एव दास्यति नान्येभ्य इति अनायासेनाप्यैहिकसिद्धिः । इदं तृतीयमाहात्म्यं परम्पराप्रकारेणागतम् । प्रसङ्गात् भगवत्सम्बन्धिन्या लक्ष्म्या माहात्म्यमाह-येनान्येषु माहात्म्यं निराकृतं भवति, यदर्थे अन्ययत्नः इति यस्याः लक्ष्म्याः सम्बन्ध्यर्थे अर्थरूपे पुरुषार्थे अन्येषां महान् यत्न एव । प्राप्तिस्तु सन्दिग्धेत्यर्थः । यत्रार्थ एव पुरुषार्थो हीनोऽप्येषां सन्दिग्धः तत्र धर्मादिषु का वार्ता इत्युक्तम् । एवं भगवत्सम्बन्धिपदार्थमात्रस्य जीवानां शक्तेश्च माहात्म्यं निरूप्य नाम्नो माहात्म्यमाह-यन्नामामङ्गलघ्नमिति । यस्य नाम अमङ्गलं नाशयति सम्बन्धनात्रमपेक्ष्यते इति वक्तुं श्रुतमिति गदितं तु ततोऽपि भिन्नप्रकारेण हेतुसहितमपि अमङ्गलं नाशयतीत्यर्थः । ननु ऋषिपरम्परागतस्य धर्मस्य माहात्म्यं भविष्यतीत्याशङ्क्याह-येनैव भगवता कृत ऋषिपरम्परासु वर्तमानो धर्मः । एवं षड्विधमाहात्म्यम् उक्तम् । यस्यैतावन्माहात्म्यं तस्य एतद्भूभारहरणलक्षणं तदर्जुनादिभिः कृतं तच्चित्रं न भवति, जीवधर्मत्वात् । ननु कश्चिद्धर्मः सेवकैरेव कर्तुं शक्यते न प्रभुणेति भूभारहरणलक्षणं भगवतः अशक्यमेव कुतो न भवतीत्याशङ्क्याह-कालचक्रायुधस्येति । कालरूपं चक्रमायुधं यस्येति कालसहस्रांशेनापि भूभारो हर्तुं शक्यः । तत्र पूर्णः कालः भगवतः सुदृशनमेकम् आयुधमिति कः सन्देहो भूभारहरणेऽपि ॥४७॥ एतादृशोऽपि भगवान् साम्प्रतं क्वास्तीत्याकाङ्क्षायामाह-जयति जननिवास इति । स कृष्णो भगवानिदानीमपि तत्सम्बन्धिजनेषु सर्वेष्वेव जयति सर्वोत्कर्षेण वर्तते । यतोऽयं जननिवासः स्वभावतोऽपि सर्वेषु जनेषु निवसति । परमात्मा सर्वान्तरः । ननु देवकीपुत्रं पृच्छामि देवक्यां जातः सः क्व वर्तत इति तत्राऽऽह-देवकीजन्मवाद इति । देवक्यां जन्मवादमात्रं लोकविवादे सति भगवान् क्वापि नास्तीत्युक्तौ सिद्धान्तनिरूपणप्रस्तावे वीतरागाः देवक्यां जातोऽसीत्याहुः-न तु तावन्मात्ररूपत्वं तस्येत्यर्थः । ननु सर्वत्र किं कुर्वन् तिष्ठतीत्याकाङ्क्षायां तस्य त्रिविधं कर्माह-तत्र सात्त्विकं निरूपयति । यदुवराणां परिषदि सभायामपि केवललौकिकपरा अपि ये स्वे स्वकीयाः सेवकाः सन्ति तैरपि अधर्मजातं सर्वमेव दैत्यादिरूपम् अस्यन् क्षिपन् अद्यापि भगवान् द्वारकायां यादवसभायां सेवकैः सह विराजते । यदि कश्चिदेतन्मध्ये दैत्यः प्रकटो भवेत् तदा तत एव कञ्चित् प्रेषयित्वा तं मारयतीत्यर्थः । तामसं चरित्रमाह । स्थिरचरवृजिनघ्नः इति । द्वारकाव्यतिरिक्तस्थाने सर्वत्रैव यत्र यत्र परिभ्रमणं कृतवान् तेषां सर्वेषामेव प्रसङ्गादपि वृजिनं पापं दूरीकरोति । ये वा पुरुषा ये वा वृक्षाः वृजिनस्यैव वा स्थिरचरभेदौ प्रकारवासनारूपौ अनेन सर्वत्रैव भगवानस्ति । यदि भक्तो भवेदिति निरूपितम् । राजसमाह । सस्मितश्रीमुखेन व्रजपुरवनितानां वर्धयन् कामदेवमिति । सस्मितं शोभायुक्तं यन्मुखारविन्दं तेनैव व्रजे गोकुले पुरे मथुरायां द्वारकायां च याः स्त्रियः गोपिकाः कुब्जाप्रभृतयो महिष्यश्च, तासां हृदये कामदेवं वर्धयन्नास्ते । कामस्य देवत्वं मोक्षपर्यवसानात् । योऽस्त्येव सर्वेषु तमेव वर्धयन् स्वसम्बन्धमात्रेणैव मोक्षं प्रयच्छतीत्यर्थः । एषा पूर्वकथा पूर्वं यादृशी तादृश्येवेदानीमपि । तथैव तेषु स्थानेषु करोति । अत्रार्थान्तरोऽपि ध्वन्यते । अत्यन्तमोहिकया लोके परमसौन्दर्यं प्राप्तया भक्त्या व्रजस्थितानां पुरस्थितानां च ग्रामेऽरण्ये च निवसतां काममुद्बोधयन्नास्त इति तस्य देवत्वं मन्तव्यम् ॥४८॥ एवं चरित्रमुपपाद्य तत्र शुकः श्रवणादिकं विधत्ते-नित्यत्वाय इत्थं परस्येति । पूर्वोक्तप्रकारापन्नम् अन्यदपि भगवच्चरित्रम् इत्थमित्यनेन परिगृह्यते अक्षरादपि परः निजधर्मा ये भक्तास्तेषां रिरक्षया आत्ता लीलातनुर्येन तादृशस्य परमकृपालोस्तदनुरूपविडम्बनानि यन्नामाद्यानुरूपतया लोकप्रकारं विडम्बयन्ति यानि कर्माणि भोजनशयनादीन्यपि तानि

श्रीमद्वल्लभाचार्यकृता सुबोधिनी

शृणुयादिति विधिः। अश्रवणे प्रत्यवाय इत्यर्थः। यद्यप्यवतारान्तरचरित्रमपि पापनिवर्तकं भवति तथापि यदूत्तमस्य शृणुयात्। को विशेष इति चेत्तत्राह–अमुष्य पदयोरनुवृत्तिमिच्छन्निति। कृष्णचरणारविन्दयोश्चेदनुवृत्तिं वाञ्छति तदेतदेव श्रोतव्यमित्यर्थः ॥४९॥ नन्वेवं नित्यतया श्रवणे चरणानुवृत्तौ वा किं भविष्यतीत्याकाङ्क्षायामाह–मर्त्यस्तयेति। तया चरणानुवृत्त्या मरणधर्माप्ययं पुरुषः तेनैव शरीरेण तद्धाम इति। ननु तदानीमेव तस्य वैकुण्ठागमनं नोपलभ्यत इति चेत्तत्राह–तनुसमेधितयेति। तनु अल्पम् अल्पं समेधितया तैलधारावदच्छिन्नश्रवणादिभिः क्रमेण यदा पुष्टा भवति। तनौ शरीरे वा समेधितया। नन्विति पाठे अप्रतारणार्थं सम्बोधनम्। तस्या अनुवृत्तेः पोषार्थं त्रीण्यङ्गानि निरूपयति–श्रीमत्कथायाः श्रवणं कीर्तनं चिन्ता च यस्यामिति। श्रीमदित्यनेन पामराणां वक्तुमजानतां सम्बन्धिनी कथा व्यावर्तिता। भगवद्धाम्नः सर्वोत्कृष्टफलत्वाय विशेषमाह–दुस्तरकृतान्तजवापवर्गमिति। दुस्तरः सर्वप्रकारैरपि निराकर्तुमशक्यः कृतान्तस्य जवस्य वेगस्य मारणार्थं धावनरूपस्य अपवर्गसमाप्तिर्यत्र मृत्युस्तावदेव धावति। यावदक्षणम् अक्षरपर्यन्तमेव कालनिरूपणात्। तेनाक्षरात्मकं व्यापि वैकुण्ठं यातीत्यर्थः। एतत्फलं ज्ञानमार्गेऽपि दुर्लभमिति ज्ञापयितुमाह–ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्था इति। पूर्वं क्षितिभुजः राज्ये स्थित्वा राज्यपरिपालनधर्मेण परिपक्वाः सन्तः नगरादिकं विहाय ग्रामे कलापग्रामादौ ज्ञाननिष्ठाः सन्तः तिष्ठन्ति ततोऽपि भगवन्माहात्म्यमवगत्य तदपि विहाय वनं सर्वं गूढस्थानं ययुरित्यर्थः। ग्रामशब्दो ग्राम्यपरो वा। यस्य श्रवणमात्रमेव राज्यापेक्षयापि सर्वोत्कृष्टम् अन्यथा स्थितं विहाय कथं ते विवेकिनः वनं गच्छेयुः। यदेव पदम् अर्थः पुरुषार्थो येषां ते पदार्थाः ॥५०॥

इत्येवं दशमस्कन्धे सङ्क्षेपेणात्र लेशतः। अर्थो मयातियत्नेन स्वभावेन निरूपितः ॥

अनेकयुक्तिसन्दर्भमालाकारेण योजितः। कृष्णपादाम्बुजे न्यस्तो वाक्पुष्पाञ्जलिरुज्ज्वलः ॥

सिद्धान्ताः सकलागमाश्च वितता लोकेऽधुना सर्वतस्ते प्रायेण निरूपिताः सुबहुशो भक्त्यै मुकुन्दाङ्घ्रये।

विस्तारस्तु गणाय कृष्णचरणे चित्तं भवेद्विस्तृतं तेनाहं हृदयस्थितेन हरिणा यावद्यथा रूपितम् ॥

॥ इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजश्रीवल्लभदीक्षितविरचितायां श्रीभागवतसुबोधिन्यां दशमस्कन्धे उत्तरार्धविवरणे एकचत्वारिंशाध्यायविवरणम् ॥४१॥ ॥९०॥

समाप्तोऽयं दशमस्कन्धः ॥

श्रीसुबोधिनीसारः

हे नृप! पूर्वं स्वः सरित् गङ्गारूपं पादशौचम् एव तीर्थम् इदानीं यदुषु यदजनि जातं कृष्णकीर्तिरूपं कर्तृ ऊनमल्पं चक्रे विद्विषः स्निग्धाः प्रयाश्च यत्स्वरूपं ययुः प्रापुः यदर्थे यत्कृतेऽन्येषां ब्रह्मादीनां यत्नोऽस्ति सा श्रीरजितपरा विष्णुनिष्ठा श्रुतमथ गदितमुक्तं यस्य नामामङ्गलघ्नं पापादिहन्तृ ऋषीणां गोत्रेषु धर्मो येन कृतः प्रवर्तितः कालचक्रमायुधं यस्य तस्य कृष्णस्यैतत् क्षितेर्भरहरणं भारोत्तारणं चित्रं नास्ति ॥४७॥ जनानां जीवानां निवास आश्रयो जनेषु निवासो यस्यान्तर्यामितया वा स देवक्यां जन्मेति वादः कथनमात्रं यस्य स यदुवरा यादवश्रेष्ठाः परिषत्सभा परिषदि वा यस्य स स्वैर्दोर्भिर्भुजैरधर्मं पापमस्यन् क्षिपन् स्थिरचराणां वृजिनघ्नो मूलाज्ञाननाशनः सुष्ठु स्मितमस्ति यस्मिन् तेन श्रीमुखेन व्रजपुरवनितानां व्रजस्त्रीणां पुरस्त्रीणां माथुरीणां कौशस्थलीयानां कामदेवं वर्धयन् श्रीकृष्णो जयति इति मङ्गलं वस्तुनिर्देशात्मकमन्ते निरुक्तम् ॥४८॥ सदा तच्चरित्रं श्राव्यं श्रोतव्यं च मुमुक्षुभिरित्याह। इत्थमिति एवं निजवर्त्म सनातनधर्ममार्गं रक्षितुमिच्छयात्ता स्वीकृता लीलातनुः लीलया तनुर्मूर्तिर्वा येन तस्य यदूत्तमस्य परस्य हरेः कर्मकषणानि कर्मबन्धनघ्नानि तत्तदनुरूपाणि विडम्बयन्तीति तानि कर्माणि श्रूयात् शृणुयात्

श्रीसुबोधिनीसारः

अमुष्यास्य पदयोः चरणयोरनुवृत्तिर्दासभावस्ताम् इच्छन् सन् ।।४९।। मुकुन्दस्य श्रीमत्याः कथायाः श्रवणकीर्तनयोः चिन्तयानुसवं त्रिकालम् एधितया संवर्द्धितया तयाऽनुवृत्त्या दुस्तरस्य कृतान्तस्य कालस्य जवो वेगस्तस्यापवर्गो नाशो यस्मिंस्तत्तस्य धाम लोकं मर्त्य एति प्राप्नोति फलं प्रदर्शितम्। अस्य दुर्लभत्वं पुरुषार्थत्वं चाह। यदर्था यदिच्छन्तः क्षितिभुजो नृपा ग्रामाद्वनं ययुः ।।५०।।

।। इति श्रीमद्भा० महापुराणे दश० उ० सुबो० टी० नवतितमोऽध्यायः ।।९०।।

रामप्रतापरचिता टीकेयं हि सुबोधिनी । श्रीमद्भागवतस्कन्धदशमस्येष्टदा विदाम् ।।१।।

पठन्तु बाला विवदन्तु पण्डिता विमत्सराश्चिन्तयतं कुविज्ञाः । ज्वलन्तु तापैरहिता व्रजन्तु मित्राणि हर्षं परिशोधयन्तु ।।२।।

श्रीराधिकाकृष्णपदाब्जभक्त्या कृता सुटीका हि सुबोधिनीयम् । तत्रार्पिता वै युगलं पिपर्तु प्रीणातु मां तेन निजेरितेरम् ।।३।।

।। इति श्रीमद्राधारमणचरणारविन्दद्वन्द्वसेवाप्तसर्वमनोरथगुरुश्रीजयगोविन्दजिच्चरणप्रसाद-प्राप्तसकलविद्यासारपण्डितरामप्रतापविरचितायां श्रीमद्भागवतसुबोधिनीटीकायां दशमस्कन्धः समाप्तः ।।

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

एवं देवानवतार्य स्वयं चावतीर्य तेभ्यः सामर्थ्यं दत्त्वा तैः कांश्चिद्घातितवान्, कांश्चिच्च स्वयमेव हतवान्, एवं सर्वोऽपि भूमिभारो भगवता हृत इत्युक्तम्। तत्राश्चर्यं कुर्वत आलक्ष्य तन्माहात्म्यवर्णनपूर्वकं तन्निराकरोति-तीर्थमिति। इतः पूर्वं स्वःसरित् स्वर्गनदी गङ्गैव सर्वतोऽधिकं तीर्थमासीत्। तदाधिक्येऽपि भगवच्चरणसम्बन्ध एव हेतुः इत्याशयेनाह-पादशौचमिति। इदानीं तु यदुषु यदजनि जातं श्रीकृष्णकीर्तिरूपं तीर्थं तदेतत् कर्तृ स्वःसरिद्रूपं तीर्थमूनम् अल्पं चक्रे स्वयमेव सर्वतीर्थोपरि विराजते, सर्वत्र सुलभत्वात् प्रभावाधिक्याच्चेत्यर्थः। इत्येकं माहात्म्यम्। तस्य श्रीकृष्णस्य परमकारुणिकत्वाद्विद्विषः शत्रवः स्निग्धा भक्ताश्च तत्स्वरूपं तत्सायुज्यं ययुरिति द्वितीयं माहात्म्यम्। श्रीर्लक्ष्मीरप्यजितपरा श्रीकृष्णसेवापरायणा तदधीनेत्यर्थः। लक्ष्मीसेव्यत्वेऽपि किम् इत्यपेक्षायां लक्ष्मीमाहात्म्यमाह-यदर्थे लक्ष्म्याः कृपावलोकनार्थमन्येषां ब्रह्मादीनां तप आदि यत्नो भवति। अतो भगवद्भक्तस्यैव लक्ष्मीप्रसादेन ऐहिकामुष्मिकभोगसमृद्धिर्नान्यस्येति तृतीयं माहात्म्यम्। श्रुतम् अथवा गदितम् उच्चारितम् अर्थानुसन्धानं विनापि यस्य नाम अमङ्गलं धर्मादिचतुर्विधपुरुषार्थप्रतिबन्धकं पापं हन्तीति तथाभूतमिति चतुर्थं माहात्म्यम्। यत्कृतो गोत्रधर्म इति। गोत्रेषु तत्तदृषिवंशेषु धर्मो यत्कृतो येन प्रवर्तितो वर्तते इति पञ्चमं माहात्म्यम्। तस्य कालचक्रं सर्वसंहारककालाभिमानि चक्रं सुदर्शनमायुधं यस्येति षष्ठं माहात्म्यम्। तस्य कृष्णस्यैतत् क्षितेर्भरहरणं चित्रमसम्भावितत्तयाश्चर्यकरं न भवतीत्यर्थः। तवाप्येतत्सम्मतमेव विवेकित्वात् इत्याशयेन सम्बोधयति-नृपेति ।।४७।। दशमस्कन्धोक्तां लीलां सङ्क्षेपतः स्मारयन् भगवतः उत्कर्षमाह-जयतीति। जनानां निवास आश्रयः, यद्वा जनेष्वन्तर्यामितया निवसतीति जननिवासः श्रीकृष्णो जयति सर्वत उत्कर्षेण वर्तत इत्यर्थः। ननु देवकीपुत्रस्य कथं जननिवासत्वम् इत्याशङ्क्याह-देवक्यां जन्मेति वादमात्रं यस्य स इति। 'क्व जयति' इत्यपेक्षायामाह-यदुवराः पर्षत् सभा यस्य स इति, यादवसभायामित्यर्थः। एवम्भूतस्य किमर्थमवतार, इत्यपेक्षायामाह-स्वैर्दोर्भिर्भुजैरधर्ममस्यन्निराकुर्वन्नित्यर्थः। अधर्मनिरासस्येच्छामात्रेणापि सुकरत्वात् प्रयोजनान्तरमप्याह-स्थिरचरवृजिनघ्न इति। अधिकारिविशेषमनपेक्ष्यैव स्थिराणां वृन्दावनादिगततरुगुल्मादीनां चराणां पशुपक्ष्यादीनामपि दर्शनादिना वृजिनघ्नः संसारदुःखहन्तेत्यर्थः। प्रयोजनान्तरमप्याह-सुस्मितेति। शोभनं स्मितं यस्मिंस्तेन श्रीमुखेन व्रजवनितानां गोपीनां पुरवनितानां कुब्जादीनां च कामदेवं वर्धयन् जयतीति। कामश्चासौ दीव्यति विजिगीषति संसारमिति देवश्च तं भोगद्वारा मोक्षप्रदमित्यर्थः। वर्तमाननिर्देशेनादृश्यरूपेण भगवान् सर्वत्रास्तीति सूचितम् ।।४८।। प्रकृतस्कन्धार्थश्रवणं विधत्ते-इत्थमिति। इत्थमुक्तप्रकारेण निजवर्त्यरिरक्षया स्वकृतवेदमार्गरक्षणेच्छया आत्ता गृहीता लीलातनुर्येन तस्य परस्य परमेश्वरस्य यदूत्तमस्य तदनुरूपविडम्बनानि मनुष्यावतारयोग्यचेष्टानुकारीणि कर्माणि श्रूयात् शृणुयात्। तच्छ्रवणे किं फलं तत्राह-कर्मकषणानीति। पापात्मककर्मनिवर्तकानीत्यर्थः। तन्निवृत्तेः किं फलम्? इत्यत्राह-अमुष्य कृष्णस्य पदयोरनुवृत्तिमासक्तिमिच्छन्। प्रतिबन्धकपापनिवृत्तिद्वारा तच्चरणासक्तिर्भवतीति

गोस्वामिश्रीगिरिधरलालकृता बालप्रबोधिनी

भाव: ॥४९॥ तदासक्तेः किं फलम् ? इत्यपेक्षायामाह–मर्त्य इति। मर्त्यो मनुष्यस्तया मुकुन्दस्य मुक्तिदातुः श्रीकृष्णस्य श्रीमत्याः कथायाः श्रवणकीर्तनोत्पन्नया चिन्तया आसक्त्या अनुसवं प्रतिक्षणमेधितया तस्य धाम एति प्राप्नोति। धामत्वेऽपि तस्य माहात्म्यमाह–दुस्तरेति। दुस्तरो यः कृतान्तस्य कालस्य जवो वेगस्तस्यापवर्गो निवृत्तिर्यस्मात्तत्। अतो दुर्लभत्वात् यदर्थाः यत् धाम यानुवृत्तिर्वा अर्थः प्रयोजनं येषां ते क्षितिभुजः सकलभूमिपतयोऽपि ग्रामात् राज्यादिकं परित्यज्य श्रवणादिसाधनानुष्ठानार्थं वनं ययुः। गृहे गिषयासक्त्या तदसम्भवादित्याशयः ॥५०॥

इति श्रीवल्लभाचार्यवंश्य**गोपालसूनुना । श्रीमन्मुकुन्दरायाणां पादसेवाधिकारिणा ॥१॥**
श्रीमद्गिरिधराख्येन भजनानन्दसिद्धये । श्रीमद्भागवतस्येयं टीका बालप्रबोधिनी ॥२॥
रचिता दशमे तत्र भगवद्गुणवर्णने । विवृतश्चरमोऽध्यायः कृष्णक्रीडानिरूपकः ॥३॥
यत्कृपालवलेशेन दशमो विवृतिं गतः । स तुष्यतु दयासिन्धुर्मुकुन्दो दीनवत्सलः ॥४॥

समाप्तोऽयं दशमः स्कन्धः ॥

अन्वितार्थप्रकाशिका

श्रीकृष्णलीलारत्नाकरं दशमस्कन्धं समापयन् श्रीकृष्णस्यान्यावतारवैलक्षण्यपञ्चकमाह–सर्वतीर्थमिति ॥ हे नृप ! इतः पूर्वं गङ्गैव तीर्थमासीत्। अधुना तु यदुषु यदजनि जातं श्रीकृष्णकीर्तिरूपं तीर्थं तदेतत् कर्तृ पादशौचरूपं स्वःसरित् गङ्गाख्यं तीर्थमूनं चक्रे। श्रीकृष्णकीर्तिरेव सर्वतीर्थोपरि विराजते। इत्येकं चित्रम्। तथा तस्य श्रीकृष्णस्य परमकारुणिकत्वाद्द्विद्विषः शत्रवः स्निग्धा भक्ताश्च तत्स्वरूपं तत्सायुज्यं ययुः इति द्वितीयम्। तथा यदर्थे लक्ष्म्याः कृपावलोकनार्थमन्येषां ब्रह्मादीनां तप आदि यत्नो भवति सा श्रीर्लक्ष्मीरप्यजितपरा श्रीकृष्णसेवापरायणा तदधीनेत्यर्थः। इति तृतीयम्। तथा श्रुतम् अथवा गदितम् उच्चारितम् अर्थानुसन्धानं विनापि यस्य नाम अमङ्गलघ्नमिति तुर्यम्। तथा गोत्रेषु तत्तदृषिवंशेषु धर्मो यत्कृतो येन प्रवर्तितो वर्तते। यद्वा। गां सर्वां पृथ्वीं त्रायत इति गोत्रस्तादृशश्चतुष्पाद्धर्मो यत्कृतः चतुर्भिर्वर्तसे येन पादैरिति प्रागुक्तेः। इति पञ्चमम्। तस्य कालचक्रं सर्वसंहारककालाभिमतिचक्रं सुदर्शनमायुधं यस्य श्रीकृष्णस्यैतत् क्षितेर्भरहरणं चित्रमसंभावितमाश्चर्यकरं न भवति ॥४७॥ जयतीति ॥ जनानां निवास आश्रयभूतः जनेष्वन्तर्यामितया निवसो यस्येति वा देवक्यां जन्मेति वादमात्रं यस्य स यदुवराः पर्षत्सभा यस्य सः दोर्भिर्भुजैरधर्मम् अस्यन्निराकुर्वन् स्थिरचराणां अधिकारिविशेषमनपेक्षमेव वृन्दावनादिगततरुगुल्मादीनां सर्वेषां वृजिनघ्नः संसारदुःखहन्ता तथा शोभनं स्मितं यस्मिंस्तेन श्रीमुखेन व्रजवनितानां गोपीनां पुरवनितानां कुब्जादीनां च कामदेवं कामश्चासौ दीव्यति जिगीषति संसारमिति देवस्तं भोगद्वारा मोक्षप्रदमित्यर्थः। यद्वा। कामश्चासौ दीव्यति विराजते कामदेवः प्रेमरूपस्तं वर्धयन् श्रीकृष्णो जयति ॥४८॥ इत्थमिति ॥ अमुष्य कृष्णस्य पदयोरनुवृत्तिमासक्तिमिच्छन् जनः इत्थमुक्तप्रकारेण निजवर्त्यरिरक्षया स्वकृतवेदमार्गरक्षणेच्छया। अडभाव आर्षः। आत्ता गृहीता लीलातनुर्येन तस्य परस्य परमेश्वरस्य यदूत्तमस्य तदनुरूपविडम्बनानि मनुष्यावतारयोग्यचेष्टानुकारीणि कर्मकषणानि पापनिवर्तकानि कर्माणि श्रूयात् शृणुयात् ॥४९॥ मर्त्य इति ॥ मर्त्यो मनुष्यस्तया मुकुन्दस्य श्रीमत्याः कथायाः श्रवणकीर्तनोत्पन्नया चिन्तया आसक्त्या अनुसवं प्रतिक्षणमेधितया दुस्तरो यः कृतान्तस्य कालस्य जवो वेगस्तस्यापवर्गो निवृत्तिर्यस्मात्तत् तस्य धाम एति। यदर्था यत् धाम यानुवृत्तिर्वा अर्थः प्रयोजनं येषां ते क्षितिभुजः सकलभूमिपतयोऽपि राज्यादिकं परित्यज्य ग्रामात् श्रवणादिसाधनानुष्ठानार्थं वनं ययुः ॥५०॥

मामेकमेव शरणं व्रज मा स्म शोचीरित्यर्जुनं जिगदिषोः परमस्य पुंसः ॥
तत्कालजातकरुणोद्गतगद्गदत्वह्रस्वाक्षरा जयति मा शुच इत्यसौ वाक् ॥१॥
इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्। गङ्गासहायो दशमस्याध्याये चरमे व्यधात् ॥

॥ इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धेऽन्वितार्थप्रकाशिकायां नवतितमोऽध्यायः ॥९०॥

समाप्तोऽयं दशमस्कन्धः ॥

श्रीगोपालानन्दमुनिविरचितं निगूढार्थप्रकाशव्याख्यानम्

श्रीकृष्णस्य सर्वोत्तमत्वं दर्शयन्नाह युग्मेन तीर्थमिति ॥ यदुषु यदजनि उत्पन्नं देवकीनन्दनयशोरूपम्। यद्वा। देवकीनन्दनरूपं तीर्थम् एतत्तीर्थद्यं पादशौचं हरिपादप्रक्षालनजलम् । स्वःसरित् गङ्गारूपं तीर्थमूनं न्यूनं चक्रे । तीर्थद्वयमेव सर्वतीर्थोपरि वर्तमानमित्यर्थः । विद्विट्स्निग्धाः देवकीनन्दनस्य विद्विषः कंसादयः स्निग्धाः गोपादयश्च तत्स्वरूपं ययुः परमकृपालुत्वात्प्रापुः । यदर्थे यस्या लक्ष्म्याः अर्थे तत्प्राप्त्यर्थम् अन्येषां यत्नः प्रयासोऽस्ति सा श्रीः अजितपरा श्रीकृष्णाधीना वर्तते । यस्य श्रीकृष्णस्य नाम गदितम् अथ वा श्रुतं सत् । अमङ्गलघ्नम् अमङ्गलं अशुभं हन्तीति तथाभूतं भवति । गोत्रधर्मः गोत्रेषु ऋषिदेवमनुष्यवंशे स्थितो धर्मः वर्णाश्रमस्थापनपूर्वकभगवदुपासनरूपः । यद्वा । गोत्रस्य अच्युतगोत्रस्य वैष्णववृन्दस्य धर्मः एकान्तिकभक्तिरूपो धर्मः येन श्रीकृष्णेन कृतः कालचक्रायुधस्य परमेश्वरस्य श्रीकृष्णस्य क्षितिभारहरणम् एतत्पूर्वोक्तं समग्रं सामर्थ्यमस्ति तत्र चित्रं नाश्चर्यं ज्ञातव्यम् ।।४९।। ग्रन्थान्ते स्वेष्टदेव वस्तुनिर्देशात्मकं मङ्गलं निरूपयति-जयतीति ॥ हे राजन्! जनानां निवासः आश्रयणीयतया स्थानरूपः । यद्वा । जनेषु एकातिकभक्तजनेषु निवासो यस्य । यद्वा । जनेषु चराचरनिवासः तेषां यथाकर्मफलप्रदानाय विकसितान्तर्यामिशक्त्यन्तरमतः अवस्थितिर्यस्य सः देवक्यां वसुदेवभार्यायां जन्मास्तीति वादो लोकोक्तिर्यस्य सः ॥ यदुवराः उद्धवसात्यकिप्रमुखाः परिषदः सभासदो यस्य स्वसम्बन्धं प्राप्तानां जनानां स्थिरचराणां वृजिनघ्नः संसृतिसङ्कटनाशकः धर्ममूर्तिर्वसुदेवनन्दनः स्वैः स्वकीयैरर्जुनद्वैपायनादिस्वजनरूपैः दोर्भिर्भुजैः कृत्वा स्वयं च अधर्मं, व्यभिचारापेयपानाभक्ष्यभक्षणचौर्यहिंसादिधर्मशास्त्रविरुद्धाचारमस्यन् दूरे क्षिपन् अर्जुनादिकृतदुष्टजनहननेन व्यासादिकृत सच्छास्त्रबोधनेन च नाशयन्नित्यर्थः । सुस्मितश्रीमुखेन व्रजो गोकुलं पुरं द्वारिका च तयोर्वनिताः गोप्यः स्वमहिष्यश्च तासां कामदेवं तीव्रालिङ्गनस्पृहां वर्धयन् जयति । सदैकान्तिकभक्तजनेषु सर्वोत्कर्षेण वर्तते ।।४८।। एवम्भूतस्य सेवकत्वप्राप्त्युपायमाह-इत्थमिति ॥ इत्थम् उक्तप्रकारेण निजधर्मस्य स्वकीयैकान्तिकधर्मस्य रिरक्षया रिरक्षिषया स्थापनपूर्वकरक्षणेच्छया आत्ताः गृहीताः लीलातनवो रमणीयविलासजनकदेहाः येन तस्य । धृतकपिलर्षभाद्यवतारस्येत्यर्थः ॥ परस्य सर्वोत्कृष्टस्य यदूत्तमस्य श्रीकृष्णस्य तदनुरूपाणि लीलातनुयोग्यानि विडम्बनानि भक्ताऽनुग्रहकरनाट्यानि येषु तानि कर्मकषणानि आश्रितजनकर्मनिवर्तकानि कर्माणि चरित्राणि अमुष्य श्रीकृष्णस्य पादयोरनुवृत्तिं तदनुकूलसेवामिच्छन् सन् श्रूयात् ।।४९।। यथा तच्छ्रवणेन तदनुवृत्तिः स्यात्तथा विवृणोति-मर्त्य इति । मुकुन्दस्य या श्रीमती कथा तस्याः श्रवणकीर्तनयुतया चिन्तया स्मृत्या कृत्वा अनुसवं प्रतिकालम् एधितया तया अनुवृत्त्या दुस्तरो दुर्निवार्यो यः कृतान्तजवः कालवेगस्तस्याऽपवर्गो नाशो यस्मिन्नेवम्भूतं तद्धाम श्रीकृष्णस्य ब्रह्मपुराख्यमक्षरस्थानम् एति प्राप्नोति । तद्धाम विशिनष्टि-यदर्थाः यत् धाम अर्थः प्राप्यपदार्थो येषामेवम्भूता महाविषयिणो राजानोऽपि वनं ययुस्तर्हि मुक्तमुमुक्षूणां का कथेति भावः ।।५०।।

दशमस्कन्धव्याख्यानं पञ्चमासैः कृतं मया । तेन तुष्यन्तु भगवान् तदीया ये च सज्जनाः ।।१।।

श्रीमद्दिव्यनराकृतिर्मुनिवरैरुन्मत्तगङ्गातटे श्रीमद्दुर्गपुरे मुदा विजयते श्रीस्वामिनारायणः ।।

तत्तुष्ट्यै रचितं मया निवसता तत्रैव तत्प्रेरणाद्धर्मोपासनदार्ढ्यताकरमिदं जीवेशयोर्भेदकृत् ।।२।।

नौमि श्रीसहजानन्दस्वामिपादाम्बुजद्वयम् । गोपालानन्दनामाहं तत्सेवाप्त्यै स्वकं गुरुम् ।।३।।

।। इति श्रीशुद्धैकान्तधर्मप्रवर्तकानन्तकोटिजनसंसारसमुद्रोद्धारकदर्शनभजनकर्तृजनब्रह्मपुरादिस्वधामदर्शक-
सज्जनपद्मविकाशनाधर्मध्वांतनाशकदिनमणिगुरुराजेन्द्रश्रीसहजानन्दस्वामिशिष्य-
गोपालानन्दमुनिविरचिते निगूढार्थप्रकाशके पुराणार्कश्रीमद्भागवतस्थदशमस्कन्धव्याख्याने
श्रीकृष्णक्रीडावर्णननामा नवतितमोऽध्यायः ।।९०।।

गोपालानन्दनाम्ना कृतमिति दशमस्कन्धगूढार्थबोधव्याख्यानम् । जीवमायासमहिमभगवद्भेदबोधप्रकाशम् ॥ दुर्गाख्ये पत्तने सद्धितकरमपि यत्कृष्णभक्तिप्रपुष्टिकर्तृ प्रेष्ठं सदा मां परिचरणविधौ रक्षतात्स्वामिनाथः ।।१।।

संवत् १९२४ वैशाखशुक्लैकादशी (११) ॥ समाप्तोऽयं दशमस्कन्धः ॥

भगवत्प्रसादाचार्यविरचिता भक्तमनोरञ्जनी

आत्मानं न विदुरित्यनेन तन्माहात्म्यं न विदुरिति सूचितं तदेवानितरसाधारणं वदन्नत्याश्चर्यमेतद्भूभारापहरणमिति विस्मयमनुवदन्नाह ॥ तीर्थमिति ॥ हे नृप ! इतः पूर्वं पादशौचं भगवतोऽङ्घ्र्यवनेजनजलरूपा स्वःसरित् गङ्गैव सर्वतोऽधिकं तीर्थमासीत् । तदानीं तु यदुषु यत् अजनि श्रीकृष्णकीर्तिरूपं यादवेषु जातं तीर्थं कर्तृ गङ्गारूपं तीर्थम् ऊनं चक्रे । अल्पं चकारेत्यर्थः । तद्यशोरूपं तीर्थमेव सर्वतीर्थोपरि विराजितमिति भावः । विद्विट्स्निग्धाः शत्रवोऽनुरक्ताश्चेत्यर्थः । स्वरूपं ययुः । कंसादयो द्विषो गोप्यः स्निग्धाश्च तत्साधर्म्यमापुरित्यर्थः । तथा अजितः श्रीकृष्णः परः प्रधानीभूतो यस्याः सा यदर्थे यत्प्राप्त्यर्थम् अन्ययत्नः यत्कटाक्षलेशप्रसरणार्थमन्येषां ब्रह्मादीनामपि महान् श्रमो भवति तथाभूतेत्यर्थः । श्रीश्च, यस्यैवेति शेषः । यमेकमेवाश्रित्य सर्वदा तिष्ठतीत्यर्थः । किं च यन्नाम यस्य भगवतः कृष्णाद्यभिधानं श्रुतं वक्तरि सत्याकर्णितम् अथाथवा गदितं श्रोतरि सत्युच्चारितं तच्चार्थज्ञानरहितं सदपीति शेषः । अमङ्गलघ्नं दुष्कृतिविनाशयं, किं च गोत्रधर्मः तत्तद्वृष्णिवंशेषु श्रूयमाणो धर्मः यत्कृतः येन प्रवर्तित इत्यर्थः । केचित्तु गोत्रेषु तत्तदृषिवंशेषु धर्मः यत्कृत इत्याहुः । अन्ये तु गोत्रधर्मोऽच्युतगोत्रवत् साधुजनधर्मः यत्कृतो येन प्रवर्तित इत्याहुः । कालचक्रं कालाभिमानिसुदर्शनाख्यं चक्रमायुधं यस्य तस्य कृष्णस्य क्षितिभरहरणं यत् एतत् चित्रमाश्चर्यं न । सर्वसंहारककालमूर्तेर्विशेषतो दुरन्तप्रभावचक्रायुधस्य कियदेतदिति भावः ॥४७॥ उक्तविधासाधारणप्रभावनिर्वाहकं परत्वमाह ॥ जयतीति ॥ निवसन्त्यस्मिन्निति निवासः जनानां निवास आश्रयः जनेषु निवसत्यन्तर्यामितयेति जननिवास इति वा । श्रीकृष्णः जयति सर्वोत्कर्षेण वर्तते । कथम्भूतः देवक्यां जन्मेति वादमात्रं यस्य सः यदुवरा यदुश्रेष्ठाः तेषां पार्षदः सङ्घस्ताभिरेव स्वैः दोर्भिर्भुजैः अधर्मम् अस्यन् । यद्वा । यदुवराः पर्षत्सभा सेवकरूपा यस्य सः, इच्छामात्रणाधर्मनिरसनसमर्थोऽपि क्रीडार्थं स्वैः दोर्भिः अधर्मम् अस्यन् क्षिपन् स्थिराश्च चराश्च तेषां वृजिनानि हन्तीति अधिकारिविशेषानपेक्षमेव वृन्दावनगततरुतृणलतादिस्थावराणां पशुशकुनिप्रभृतीनां चराणां जातीनामपि संसारदुःखहन्ता, तथा विलासवैदग्ध्यानपेक्षमेव व्रजपुरवनितानां व्रजवनितानां पुरवनितानां च सु शोभनं स्मितं यस्मिंस्तच्च तच्छ्रीमुखं तेन कामदेवं दर्धयन् भोगद्वारापि तासां मोक्षप्रद इत्यर्थः । एवम्भूतो जयतीति सम्बन्धः ॥४८॥ प्रकृतस्कन्धार्थश्रवणफलं तदधिकारिणं चाह ॥ इत्थमिति ॥ निजधर्मरिरक्षया स्वनिगमोक्तधर्मरक्षणेच्छया आत्ता परिगृहीता लीलार्था तनुर्येन तस्य लीलापदेन तन्वाः कर्मफलभोगार्थव्युदासः । यदूत्तमस्य परस्य परमपुरुषस्य इत्थमित्थम्भूतानि तदनुरूपं स्वावतारयोग्यं विडम्बनं मर्त्यचेष्टानुकरणं येषु तानि कर्मकषणानि सकलकर्मनिवर्तकानि कर्माणि अमुष्य कृष्णस्य पदयोः अनुवृत्तिम् इच्छन् कामयमानः सन् श्रूयात् । शृणुयादित्यर्थः ॥४९॥ अनुवृत्तेः फलमाह ॥ मर्त्य इति ॥ अनुसवमनुसन्ध्यं मुकुन्दस्य श्रीकृष्णस्य श्रीमती या कथा तस्याः ये श्रवणकीर्तने तयोश्चिन्ता तया एधितया संवर्धितया तया अनुवृत्त्या मर्त्यः दुस्तरः कृतान्तो यैस्ते ये जनास्तेषामपवर्गं दुःखावसानहेतुभूतं तद्धाम भगवतोऽक्षरं धाम एति प्राप्नोति । दुस्तरेत्यादिविशेषणेन दुर्लभत्वं सूचितं तत् स्पष्टमेवाह । यद्धाम अर्थः प्रयोजनं येषां ते यद्धामप्राप्तिकामा इत्यर्थः । क्षितिभुजः पृथ्वीपतयो राजान इति यावत् । अपि ग्रामात् वनं ययुः । ग्रामशब्दः पुरादेरुपलक्षणभूतः । दुस्तरकृतान्तभवापवर्गमिति पाठे दुस्तरो यः कृतान्तो मृत्युस्तत्तुल्यो भवः संसारस्तस्यापवर्गोऽवसानं यस्मात्तत्, तद्धाम एति ॥५०॥

नमामि श्रीहरेर्धार्मेः पादपद्मद्वयं सदा । यत्प्रसादं समासाद्य तीर्णोऽहं दशमाम्बुधिम् ॥१॥

धर्माङ्गभूर्धर्मधरः सदीशः श्रीस्वामिनारायणनामधारी । कृष्णावतारो धरणीतलाद्योऽधर्मं समूलं जयताद्धरन्वै ॥२॥

॥ इति श्रीधर्मधुरन्धरश्रीधर्मात्मजप्रत्यक्षपुरुषोत्तमश्रीसहजानन्दस्वामिसुतश्रीरघुवीराचार्यसूनु-
भगवत्प्रसादविरचितायामन्वयार्थावबोधिन्यां भक्तमनोरञ्जन्याख्यायां श्रीमद्भागवतटीकायां दशमस्कन्धोत्तरार्धटीकायां
नवतितमोऽध्यायः ॥९०॥

कृष्णप्रिया

हे परीक्षित भगवान के प्रभुचरणकमलोंसे प्रकट गंगाजी अवश्य समस्त तीर्थोमें महान् एवं पवित्र है । परन्तु जब स्वयं परमतीर्थ स्वरूप भगवान ने ही यदुवंशमें अवतार ग्रहण किया तब तो गंगाजलकी महिमा अपने आप ही उनके तीर्थ की अपेषा कमहो गइ । भगवान के स्वरुप की कितनी बडी महिमा है कि उनसे प्रेम करनेवाले भक्त और द्वेष करनेवाले शत्रु दोनों ही उनके स्वरूप को प्राप्त हुए । जिस लक्ष्मी को प्राप्त करने के लिये बडे बडे देवता यत्न करते रहते है; वे ही भगवान की नित्य निरन्तर लगी रहती है । भगवान का नाम एकबार उच्चारण करने से ही सारे अमंगलो को नष्ट कर देते है । ऋषियों के वंशजोमें जितना भी धर्म प्रचलित है, सब के संस्थापक प्रवर्तक भगवान श्रीकृष्ण ही है । वे अपने हाथमें फालस्वरूप चक्र लिये रहते है । हे परीक्षित ऐसी स्थितिमें वे पृथ्वी का भार उतार देते है, यह कौन बडी बात है ।।४७।। जनमात्रमें अखिल विश्वमें निवास करनेवाले भगवान श्रीकृष्ण का जन्म श्रीदेवकीमाता के गर्भ से हुआ यह तो केवल भगवान कहीं भी नहीं है यदि हो तो दिखता क्यों नहिं ऐसे बकवाद को प्रत्युत्तर देने के लिए देवकीजी के वहां साक्षात् प्रकट हुए है वह तो प्रत्युत्तर देने के लिऐ है । भगवान तो केवल इच्छा मात्र से हि अधर्म का निवारण कर सकते है ऐसे समर्थ है । ऐसे होते हुए भी यादवों की सभामें विराजते है और अपने ही बाहुस्वरूप अपना हि हस्त ऐसे सेवकों के द्वारा अधर्म का निवारण करते है । आप तो अपने स्मित हास्य से शोभित श्रीमुखकमलसे स्थावर जंगम के पापो को जो प्रभुप्राप्तिमें अन्तराय है उनको दूर करते है वही मुख श्रीसे श्रीवज्रपुर की व्रजनारीयों के अनुराग की समृध्दि को बढा रहे है ऐसे कृपासिंधु श्रीकृष्णका सर्वत्र जय हो ।।४८।। भगवान श्रीकृष्णने निज भक्तजनों की और धर्म की रक्षा के लिऐ दिव्य लीला शरीर धारण किया है ओर भक्तो की इच्छा के अनुरूप अद्भूत चरित्र किये है । यह श्रीहरि के चरित्र कर्मो के बन्धनों को काटनेवाले और भगवत्सेवादेनेवाले है । जो यदुवंश शिरोमणी भगवान श्रीकृष्ण के चरणकमलो की सेवा का मनोरथ की अभिलाषा रखते है उन भक्तजनों को पूर्ण पुरुषोत्तम श्रीकृष्ण भगवान की लीलाओं का श्रवण चरित्रमृत का पान करना चाहिए ।।४९।। हे परीक्षित् ! अन्ततोगत्वा यह शरीर एक दिन तो अवश्य मिट्टीमें मिलनेवाला है क्योंकि मरणधर्मा है । ऐसा मरणशील मानव श्रीमुकुन्द भगवान की श्रीपूर्ण, मंगलमय, कथा का श्रवण, किर्तन और नरन्तर मनन करता हुआ, तैलधारा की तरह शनैफ शनैः अपितु अखण्ड चलती सेववृत्तिमें वृद्धि करता रहे, उसकी यह भक्ति उसे भगवान के परमधाममें पहुंचा देती है । यद्यपि काल की गति के परे पहुंचना लोहे के चने चबाना जैसा बहुत ही कठिन है, परन्तु भगवान के धाममें काल की दाल नहीं गलती । उसी दिव्यधामकी प्राप्ति के लिये बडे बडे समर्थ अनेक सम्राटोने अपने राजपाट छोडकर तपस्या करनेके हेतु वनवासी बने है ।।५०।।

।। इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे नवतितमाध्यायस्य भाषाटीका समाप्ता ।।९०।।

समाप्तश्चायं दशमस्कन्धः

परिशिष्टम्

श्रीसत्यधर्मकृता श्रीभागवतटिप्पणी

एतट्टीकाकर्तृमतेनाध्याया:-९०-९४

सदैन्यं निवेदितं भवति यद्यावच्छक्यं प्राय: विजयध्वजमतमनुसरतोऽस्यटीकाकृत: येऽध्याया: ये च श्लोकार्था: पाठभेदान्विता आसंस्तेऽप्युपनिबद्धा: । यथात्र बलभद्रस्य यच्चरितं तदस्मन्मूले षट्षष्टितमाध्यायादिषु वरीवर्ति तदत्र नवतितमाध्यायरूपेणोल्लिखितम् । अस्मत्प्रकाशितदशमस्कन्धोत्तरार्धषट्षष्टितमाध्यायटीकायामिदं बलदेवचरितं सत्यधर्मरीत्या नोल्लिखितमतोऽत्र परिशिष्टे विलिख्यतें। कन्तु इत: परमेकान्तरैकाध्यायस्यास्मत्सम्मतपाठसङ्गते: रसभङ्गादिजनकत्वात् पाठकस्य सन्दर्भक्लेशनाशाय परिशिष्टरूपेणात्रावशिष्टानाम-ध्यायानां टिप्पणी विलिख्यते ।

अन्ते चैषा टीका यस्मादबद्धग्रन्थात्पत्रात्मकादुद्धृतास्ति तन्मुद्रकस्यान्तिमवचनेष्वपि सूचितं भविष्यद्यदेतत्परं टीका अलभ्यास्त्यतो यावती समुपलब्धास्ति तावत्येवात्र मुद्रितास्तीत्यवगन्तव्यमत्रभवद्भिर्भवद्भि: ॥

॥ अथ नवतितमोऽध्याय: ॥

॥ हरि: ॐ ॥ बलभद्रस्य शुक्लकेशसम्भवत्वात्तद्बलादिमहत्त्वं हरिमहत्त्वकवलितमित्यध्यायत्रयेण तन्माहात्म्यं प्रतिपाद्यते । तत्रादौ स्वविरहमसहमानान्गोपांल्लालयितुं गोकुलं गत इति वक्ति । बलभद्र: प्रलम्बघ्न: सुहृदस्तान्दिदृक्षुरुत्कण्ठ उत्कलिकावान् ॥१॥ गोपीभिर्गोपैश्च चिरमुत्कण्ठा यासां चिरमुत्कण्ठा येषां तत: । पुमान्स्त्रियेत्येकशेष: । ताश्च ते च तै: । ताभ्यामभिनन्दितस्तोषित: ॥२॥ तदभिनन्दनमभिनयेनाह ॥ चिरमित्यादिना । इत्यभिनन्द्याङ्कमारोप्य नैत्रैर्नेत्रोत्थैर्जलैरानन्दजै: । नेत्रैरित् पाठेऽवान्तरकर्तृभिर्नयनजलै: करणै: सिषिचथुरित्यर्थ: ॥३॥ स्वयं गोपवृद्धान् विधिवदभिमन्द्य कनिष्ठै: स्वतो वयोवरैरभिवादितो नमस्कृत: । आत्मन इति सख्यसम्बन्धसम्बन्धी ॥४॥

हास्येन विनोदेन हस्तग्रह आदिर्येषां परिरम्भणादीनां तै: परित उपासिता उपविष्टा ये तै: ॥५॥ स्वमात्रे स्वेषु गोपेष्वनामयं पृष्टस्तमकथयत् । ते च पुन: कमलपत्राक्षे कृष्णे संन्यस्तान्यलं समर्पितान्यखिलानि राधांसि सिद्धयो यैस्ते गोपा अपि पुनरितरानामयादिकं पृच्छन्तीत्याह । हे राम ! मन: सर्वेषां बान्धवा: कुशलं यथा तथाऽऽसते कच्चित् । हे राम ! यूयं दारसुतान्विता: न: स्मरथ कच्चिदिति विशेषाद्रामेऽपि द्विसम्बोधनम् । नोरामयूयमिति पदमेकं वा । नो न विद्यन्ते रामा: सुन्दर्यो भार्या येषां ते च ते यूयं च प्राक् । इदानीं दारसुतान्विता इति स्मरणमनुपपन्नमिवेति तद्विषय: प्रश्नो युक्त इति वा ॥६-७॥ रिपून् कांश्चित्तन्निर्जित्येत्याह । साल्वादीन्कांश्चिन्निर्जित्य । दुर्गं द्वारकाम् ॥८॥

सन्दर्शनेनादृतमादरणं यासां ता: । पुरस्त्रीजनवल्लभ: । अनेनासूया तेभ्यो ध्वन्यते । तत्रापि जनशब्दो न तासां पुंवच्छक्तिमत्त्वेन तन्निघ्नतां कृष्णस्य कटाक्षयन्तीति च ॥९॥ अनङ्गस्मरणादादौ पितरं मातरमिति वक्तव्ये बन्धूनित्युक्ति: । महाभुजोऽस्माकमनुसेवामपि वा स्मरते कच्चित् । महाभुज इत्युपदेशेनानुजकर्म न रहस्यं विविच्य प्रष्टव्यमित्यङ्गालिङ्गनं स्मरति । किमित्यन्तरभावाच्चित्तचाञ्चल्या चञ्चललोचना इति ज्ञेयम् ॥१०॥ धर्मशापेनास्थिरान्तरा: स्त्रिय इति योषित आच्छाद्यं प्रमेयं पृच्छन्ति । मातरमिति । पतीन् स्वान् पुत्रान्न स्मरत्पतिवृद्धभ्रातृपुत्रान् स्वसृरपि किञ्चिद्दुस्त्यजान् स्वजनानन्यांश्च । हे दाशार्ह ! बल ! यदर्थं वयमहिन्म । हिनोतेर्लङ्। उत्तमपुरुषबहुवचने श्नौ लोपश्चास्यान्यतरस्यां म्वोरिति प्रत्ययोकारलोपेऽडागमे चाहिनवम् अहिन्व अहिन्म । पक्षेऽहिनवम्, अहिनुमेति रूपाणि । अत्याक्ष्म । भर्तृत्याग एको मुख्य इतरस्तु ममतात्यागमात्ररूप इति विवेक: । प्रभविष्यत्यनेनैतत्परं वानुजं प्रेरयित्वा सन्मार्गं कर्तुं बलमस्ति बलस्येति सूचयन्ति ॥११॥

तास्तादृशीः सद्यः परित्यज्य सञ्छिंन्नसौहृदः । ननु कथं सञ्छिन्नसौहृद इति । हृद्भगसिन्ध्वन्ते चेत्युभयपदवृद्धौ सौहार्दमिति भाव्यमिति चेत् अत्राह दुर्घटवृत्तिकारः । संज्ञापूर्वकविधेरनित्यत्वाद्धृद्भगेत्युभयपदवृद्धेरप्राप्तेः । तद्धितेष्वचामादेरित्यादिवृद्धिरेवेति । अर्थवतो ग्रहणे नानर्थकस्येति परिभाषायाः स्वं रूपं शब्दस्याशब्दसंज्ञेत्यत्र रूपग्रहणेन ज्ञापितत्वाद्धृद्भगेति सूत्रेऽर्थवत एव हृच्छब्दस्योपादानात् सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातिते सुहृच्छब्दे समुदायस्यैवार्थवत्त्वेन तदवयवहृच्छब्दस्यानर्थकत्वात्तस्योभयपदवृद्धिर्न भवति किन्त्वादिवृद्धिरेवेति । चान्द्रास्तु हृद्भगेत्यत्र प्रतिपदोक्तहृच्छब्दस्यैव हृदयपर्यायस्य ग्रहणं न तु हृदयस्य हृल्लेखयदण्लासेष्वित्युक्तहृदादेशस्य सौहृदमित्यादौ हृदादेश एव मन्यन्ते । अत एव क्षणभिन्नसौहृद इति कुमारसम्भवप्रयोगः । सौहार्दं सौहृदं तथेति द्विरूपकोशः । छिन्नं सौहृदं सौहार्दं येन सः । वञ्चकवचः श्रुत्वा कथं यूयमनुयातास्तन्मार्गमित्यत आहुः-कथं न्विति । तादृशं भाषितं श्रीभिर्न श्रद्धीयेत । श्रदित्यव्ययपूर्वकाद्धाञः कर्मणि लिङ् न विश्वसनीयं स्यादित्यर्थः । स्त्रीभिरित्यनेनाधिकृद्वेदादिका वयमनिपुणा इति विश्वासः सम्भवतीति ध्वन्यते ॥१२॥

अनेका गोपिकास्तत्र काश्चित् काश्चित्प्रति प्रतिपादयन्ति-कथमिति । अपरस्त्रियोऽस्मदन्याः कामिन्योऽनुत्तमा इत्यान्तरङ्गिको भावः । अनवस्थित आत्मा चञ्चलं चेतो यस्य तस्य । असंलग्नो विषयेष्वात्मा यस्य तस्येति । कृतघ्नस्यानुपकृतिमतः । कृतमितरर्हिंसितं स्वयं हन्तीति समीकरोतीति यावत् । तस्य । कृतं युगेऽपि पर्याप्ते विहिन्ते हिंसिते फल इति विश्वः । मुधा वचः । कथं न गृह्णन्ति न कथञ्चिदपि स्वीकुर्वन्ति । न तदुदितमनुतिष्ठन्तीति यावत् । मुधा कथं गृह्णन्ति । निरर्थकमनृतमिति यावत् । कथं गृह्णन्ति । यथार्थमेव मन्वते तन्वङ्ग्य इति । ता अपि सुशीला ललना अप्येव मतेन भवेयुरित्यन्या आहुः-कृष्णस्येति । चित्रकथस्य बहुभाषिणो विचित्रकथस्य च कृष्णस्य तन्नाम्नो मलिनस्य सुन्दरस्मितावलोकनेनोच्छ्वसित उज्जृम्भितो यः स्मरस्तेनातुराः परस्त्रियः सुरनार्योऽपि कथं नु न गृह्णन्ति गृह्णीयुरेव । एवं सति वयं किं तरुपत्राणि च वा इति मुहुर्मुहुः सुरस्त्रिय इत्यादिप्रसिद्धिद्योतकः । सुन्दरस्मितावलोकोच्छ्वसित हे स्मर ! त्वं आः शतशः कृष्णः सुतम् अस्मादृश्यः परस्त्रियस्तत्परवशाः सत्यः । पूर्वश्लोकान्नञोऽनुकर्षः । नातुर्नान्वगच्छन्निति स्मरेति यासां वचस्तदपि मुधाऽभूदिति वा ॥१३॥

पुनः खण्डिता नायिक्यो नायकमलक्षयन्त्य इव वदन्ति । किमिति । हे गोप्यः ! तत्कथया नः किं प्रयोजनम् । अपराः सप्रयोजनाः कथाः कथयत । दुस्त्यजस्तत्कथेत्यत आहुः-यातीति । अस्माभिर्विना । पृथग्विनानानेत्यादिना तृतीया । तस्यास्मान् हित्वा स्थितस्य यदि कालो गच्छति । नोऽस्माकमपि तं विहाय स्थितानां कालो गच्छतीति किं तदाशयेत्याशयः । खण्डिताः प्रतिखण्डिताहङ्काराः कांचिदनेनैव श्लोकेनाहुरित्याह । तत्कथया कृष्णोऽस्मांस्त्यक्त्वा गत इत्यादिकया किम् । अपराः अः परोऽत्युत्तम इति यासां ता अपराः कथयत । नो विना भगवता सहैव । वृद्धो यूनेत्यादिवत् । कालो याति । तत्त्यागे त्यागः प्राणानां तत्क्षणे भवेदिति भावः । भवत्यनिर्वाहादस्माकं तत्सहभावो भामिन्यस्तस्य तु कथमित्यत आहुः । यथैव नस्तथैवेति । यदि तस्य याभिरस्माभिरितरस्य तस्यापि कालो याति । अन्यथा व्याप्त्याऽनवक्लृप्त्यापत्तेः ॥१४॥ एतावत्पर्यन्तं स्थगनमना विधाय तत्स्मरणपरवत्य एवञ्चकुरित्याह । इतीति । शौरेः प्रहसितं तथा जल्पितं चानुवीक्षितं वीक्षणं तथा गतिं प्रेमपरिवङ्गं परिस्मरन्त्यः स्त्रियो रुरुदुरित्यन्वयः ॥१५॥

हृदयङ्गमैर्मनोहरैः सन्देशैः स्वरतो वक्तुं योग्यैराज्ञावचनैर्नानानुनयकोविदः । अनेनोक्तमनुक्तं च हरिणोक्त्वा तत्समाधिविधानसमर्थस्यास्य द्योत्यते । अनुनयः सान्त्वया ॥१६॥ मधुं चैत्रं माधवं वैशाखमाहत्य ॠतुमेकम् । क्षपासु रात्रिषु ॥१७॥ कौमुदीनां कुमुद्वतीनां गन्धस्तेन सहायातो मातरिश्वा तेन सेवितो यमुनोपवने स्त्रीगणैः कृष्णास्पृष्टैस्तदा प्रेषितैरिति वा वृद्धतयोपेक्षितैर्वा वृतः सन् रेमे ॥१८॥ वारुणी सुधा सहोद्भूता मदिरासौरभेण स्वशोभनं गन्धेनाध्यवासयत् । सुरभिगन्धीचकार ॥१९॥ मधुधाराया मद्यधारायाः । तत्र तद्वृक्षकोटरे निकरे ॥२०॥ तद्वीर्यैः प्राकृतप्रलम्बरुक्मिवधादिसाधनैः ॥२१॥ क्षीबो मद्यपानमत्तः माहेन्द्रो वारण ऐरावणः ॥२२॥ प्रालेयं प्रलीयन्ते तत्र पदार्था इति प्रलयो हिममहीधरः ।

तत आगत इत्यण् । केकयेत्यादिना यादेरियादेशे गुणे च प्रालेयं मिहिका । प्रालेयं मिहिका चेत्यमरः । स्वदमिहिकया भूषितं स्मितमुखाम्बुजं बिभ्रत् ॥२३॥

सबल ईश्वरोऽनागतौ शिक्षादक्षतानेन कटाक्षयति । जलक्रीडार्थं यमुनामाजुहाव । मत्तोऽनादृत्य नादृत्यामापगां हलाग्रेण विचकर्षाऽऽहूता । यद्वा हु दानादनयोरस्मात् कप्रत्यये धातूनामनेकार्थताया आकरणार्थकता ॥२५॥ कामचारिणीं यथेष्टं चरन्तीं लाङ्गलाग्रेण शतधा नेष्ये । एवं निर्भर्त्सिता चकिता भीताऽभीता सम्मुखिता प्राप्ता पादयोः पतित्वा वाचमुवा । भीता चकिता प्रतिहर्तिं प्राप्तेति वा । यस्य तवैकांशेन शिरोरूपैकदेशेन जगती भूमिर्विधृता ॥२८॥

हे भगवंस्तव पराभवं महामाहात्म्यमजानतीं मां प्रपन्नां विश्वात्मन् ! भक्तवत्सल मोक्तुमर्हसि । इत्युवाचेत्यतीतेनान्वयः ॥२९॥ तत्प्रार्थनानन्तरं विजगाहे व्यलोडयत् ॥३०॥ असिताम्बरे । दातृप्रतिगृहीत्रानुकूल्यान्नीलचैले । असिता कृष्णा अम्बरे ददावित्यन्वयनेन शेषः । नीलत्वं च तयोरनुवादेन लभ्यत इति वा । कृष्णायाः कालियमित्यादेः । ददौ कान्तिः शुभां स्रजमित्यपि पाठः । तत्र कान्तिर्लक्ष्मीः । यथोक्तं विष्णुपुराणे ।

वरुणप्रहितां चास्मै मालामम्लानपङ्कजाम् । समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छतेति ॥

तथा हरिवंशे च बलं प्रति लक्ष्मीवचनम् —

जातरूपमयं चैकं कुण्डलं वज्रभूषणम् । आदिपद्मं च पद्माख्यं दिव्यं श्रवणभूषणम् ॥

देवेमां प्रतिगृह्णीष्व पौराणीं भूषणक्रियाम् । इत्यादि ॥

वस्त्रयोरुभयदातृकत्वसम्भवादविरोधः । काञ्चनीं स्वर्णमयीं वा चम्पकगुम्फितां वा । काञ्चनः काञ्चनारे स्याच्चम्पके नागकेसर इति विश्वः ॥३२॥ सूचयती सूचयन्ती । आगमशासनस्यानित्यत्वान्न नुम् । लटि तु न क्लेशः ॥३३॥ व्रजयोषितां माधुर्यैराक्षिप्तचित्तस्य रमतो रममाणस्य । सर्वा निशा मासद्वितयसम्बन्धिन्यो रात्र्य एकेव याताः सन्तोषातिशयेन ॥३४॥

॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे नवतितमोऽध्यायः ॥१०-९०॥

॥ अथैकनवतितमोऽध्यायः ॥

॥ हरिः ॐ ॥ प्रभू रामो यदन्यत्कृतवांस्तस्यानन्तस्य नाम्नाऽप्रमेयस्य सम्यग्ज्ञातुमयोग्यस्याद्भुतकर्मणो रामस्य तद्भूयः । त्वदीयतया भूय इत्युक्तिर्न तु प्राक् प्रोक्तस्यैव शश्रूषयेति ॥१॥ बलबलं लपन्नृपं प्रति तदुपयुक्तं वक्ति । हे नरविशिष्टमनुष्य ! देवांश भविष्यच्छेषांशेति वा । कस्य सखेत्यान्तरंगिकः प्रश्नः । तस्योत्तरं नरस्य सखेति । नरकस्येति । द्विविदो विविद इति नामनी । तत्र यथा वृत्ताविच्छित्तिते ज्ञेये ॥२॥ सख्युर्नरस्य । अपचितिमेवमपचारेण तदनृणताम् । राष्ट्रविप्लवमित्युक्तं विशदयति । पुरेत्यादिना ॥३॥ तैः शैलैः । तत्रापि सुतरामानर्तान् । तत्र तन्त्रं यत्र शत्रुहा हरिरिति । अशत्रुर्मित्रं नरकस्तं हन्तीत्यशत्रुहा हरिर्यत्रास्त इत्यानर्तदेशस्यार्तिदाननिदानमनेन सूचयतीति वा । शत्रुहेति छेदपक्षे तन्मौर्ख्यं निरवधीति द्योत्यते ॥४॥ तज्जलं समुद्रोदकं दोर्भ्यां तदानीन्तनः स इति महद्भ्यां नागायुतप्राणस्तत्समसामर्थ्यो वेलया नीरविकारेण सहितानि कूलानि तीराणि येषां तानि वा । वेला काले जलधरे तीरनीरविकारयोः । कूलं कूपे तटाके च सैन्यपृष्टप्रतीरयोरित्युभयत्र विश्वः । अमज्जयन्मज्जयामास ॥५॥ भग्ना वनस्पतयः पुष्पाणि विना फलवद्वृक्षा वृक्षमात्राणि वा येषां तान् वैतानिकान् सर्वसम्बन्धिनः ॥६॥ क्ष्माभृतां द्रोण्ये नितम्बास्तत्सम्बन्धिगुहासु निक्षिप्य शृंगैरप्यधात् । पिदधे । पेशस्करी भृंगविशेषः ॥७॥ रामसमीपे रामाभिः क्रियमाणं गीतम् ॥८॥

कमलमालोपेतम् ॥९॥ प्रभिन्नं दानोदकस्राविगण्डम् ॥१०॥ किलकिलाशब्दम् । एवं किलकिलादय इति प्रागुदाहृततात्पर्यतोऽयमनुकारशब्दो बोध्यः ॥११॥ धार्ष्ट्यं वैय्यात्यं बलदेवस्य परिग्रहो भार्याः ॥१२॥ गुरुप्रदर्शनीयमपानद्वारं निरीक्षतो निरीक्षमाणस्य ॥१३॥ ग्राव्णा पाषाणेन मदिराकलशं मद्यभाण्डम् ॥१४॥ हेलयामासानादृतवान् । तं बलम् । कलशं स्वनीतं वासांसि योषितां नीतानि । आस्फालयत् पटपटेति शब्दापयामास । बलाद्बलात्कारेण ॥१५॥ विप्रचक्रे विरुद्धं चक्रे । अपचकारेति यावत् । तस्या अविनयमपि दृष्ट्वा तदुपद्रुतान् देशांश्च दृष्ट्वा ॥१६॥

क्रुद्धो रामोऽरिजिघांसया मुसलं हलं चादत्त । स कपिरपि न पलायित इति आलपति ॥ विविदोऽपीति ॥ तथा हि कस्त्यक्ष्यति सिद्धविद्यामिति । पूर्वं सेतुहेतोर्धरो धरोत्पाटनपाटवांस्तदानीमिदानीमपि तदेवातनोदित्याह ॥ पाणिना शैलमुत्पाट्येति ॥१७॥ तरसा वेगेन बलेन वा ॥१८॥ तमचलं मुसलेन जग्राह तेनैवाहनदहन् । मुसलेनाहतं मस्तिष्कं शिरोमांसग्रन्थिविशेषः । मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियामित्यमरः । मसी परिमाणे क्तिन् । मस्क गतौ । पृषोदरादितः षत्वादि । गिरिः पर्वतो यथा । आगैरिकयारक्तधारयेति समस्तम् । धारयेति विश्लिष्टमन्वेतव्यम् । असम्यक् गैरिकं यस्याः स्रवकतया तया धारया राजत एवं रेज इत्यन्वयः । गैरिकं तु विशेषत इत्यमरः । गैरिकाडनकासीसालोहसीसासहिङ् गुला । गन्धकोऽभ्रक इत्याद्या धातवो गिरिसम्भवा इत्यादेर्गिरौ भवमित्यर्थेऽध्यात्मादिभ्यष्ठञ् । यद्वा गिरिरिव गिरिकः । अवेः क इतिवत्स्वार्थे ततोऽण् । गैरिकं धातुरुक्मयोरित्युक्तेर्धातुरिति वा । प्रहारं बलमुसलकलितं निष्पन्नं त्रुटितपत्रम् । अन्यथा मृदुलं तत्प्रहार आर्तिपूर्तिकृत्स्यादिदिति छदच्छेदनम् ॥२०॥ अरूरुजद्बभञ्ज ॥२४॥ मुसललांगलेत्युक्त्या स स्वायुधं न दधारातो मयाऽऽयुधधारणामधिरणमधर्मदमिति तत्त्याग इति भावः । जत्रौ शत्रुमताडयत् । स द्विविदो रुधिरं वमन् पपात मृत इति यावत् ॥२५॥

सकण्टकावनस्पतयो यस्मिन् स पर्वतो वायुना नौर्नौकेव चकम्पेऽकम्पत ॥२६॥ साधु साध्विति ॥ चशब्दः शब्दशब्दस्य विश्लेषान्वयसूचकः । कुसुमवर्षिणामित्यनेन तद्वर्षं जयादिशब्दं च चक्रुरिति सूच्यते ॥२७॥ जगतो व्यतिकरो नाशस्तमावहतीति तं स्वपुरं द्वारकाम् ॥२८॥

॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे एकनवतितमोऽध्यायः ॥९१॥

॥ अथ द्विनवतितमोऽध्यायः ॥

॥ हरिः ॐ ॥ समितिञ्जय आजिजेता जाम्बवतीसुतः साम्बः स्वयंवरस्थां दुर्योधनसुतां नाम्ना लक्षणामहरत् ॥१॥ स्वयंवरे कन्ययैव वरो वरणीयो नान्यथेत्ययमन्यथाकृतेति शिक्षणीय एतत्क्षण इति मुख्यामुख्यान् प्रतिवदन्तीति वदति ॥ कुरव इति ॥ दुर्विनीतोऽयमर्भकः साम्बो नः सर्वान् कदर्थीकृत्याकामां स्वमनाकाङ्क्षतीम् । यद्वक्ष्यति यत्प्रसादापचिता इति । बलादहरदिति कुपिता एनं बध्नीतेति कुरव ऊचुः ॥२॥ ननु वृष्णयः कुप्येरन्नस्मभ्य इत्यत आहुः ॥ य इति ॥ अस्मात्प्रसादादेवोपचितां अभिवृद्धा नोऽस्माभिर्दत्तां महीं भुञ्जते ते किं करिष्यन्ति ॥३॥ निगृहीतमस्माभिः सुतं श्रुत्वा यदि वृष्णय एष्यन्ति तर्हि शीर्णदन्ता अहयः सर्पा इव भग्नदर्पाः शमं यान्ति ॥४॥

कर्णं समालोक्य । एतेन सचैतदालोचनमध्ये वर्ततेति द्योत्यते । भूरिश्रवः शब्दपर्यायोऽयमकारान्तो भूरिश्रवशब्दः । दुःशासनश्च गान्धारश्च ताभ्यां सहितौ दुर्मन्त्रैकान्तशीलिनाविति भूरिश्रवसुयोधनविशेषणम् ॥५॥ वृद्धानामसम्मतमिदं बन्धनमिति दुर्मन्त्रोऽयमित्याह ॥ एत इति ॥ अन्यैः कुरुवृद्धैश्चासंगता अमिलिताः साम्बं बद्धुमारेभिरे आरब्धवन्तः । निरनुस्वारपाठः प्रामादिकः ॥६॥ महारथः साम्ब एकलोऽनुधावतः स्वपृष्ठतो धार्तराष्ट्रान् दृष्ट्वा चापं प्रगृह्य सिंह इव तस्थौ ॥ अनेन साम्बनिर्भीततैकैकं प्रतिपक्षिबहुसन्निपातोऽधर्म इति च ध्वन्यते ॥७॥ ते कर्णमुख्या धन्विनस्तमासाद्य प्राप्य तिष्ठ तिष्ठेति वादिनस्तं जिघृक्षवः क्रुद्धमवाकिरम्(न्) । तत्परिभवं तेभ्यः पराभवं स चासौ परिभवश्चेति वा तम् ॥९॥

सहिता हयाग्रणीषु सादिश्रेष्ठेषु भवास्तत्कूटघटितास्तैरिति सह या अग्रण्यस्तान् । दिगादियत्तावद्भिस्तेषां यावन्तस्तत्समसङ्ख्यैर्युगपत्पृथक् च सायकैर्विव्याध ॥१०॥ चतुर्भिरिति चतुर इति च । यो यस्य सुतः स तदीयं धनमर्हतीत्यत्र सार्वत्रिकव्यवहारौपयिकतावीप्सां यथा तथा चतुरश्चतुरश्चतुर्भिश्चतुर्भिरित्यर्थकम् । तथा सारथीनेकैकेनेति च ज्ञेयम् । ते तस्य तदभ्यपूजयन् ॥११॥ ते चत्वारश्चतुरो हयान् हत्वा तं विरथं चक्रुः । एकः सारथिं जघ्नेऽन्य एतत्पंचकान्यतमः शरासनं चिच्छेद । एतेन कर्णः भूरिश्रवाः सुयोधनो दुःशासनः सौबल इति पंचैवान्यः कः षष्ठ इति परास्तम् । एतद्भीतेरेव परः कर्णादीन् । षड्रथानिति पपाठ । भूरिशलसुयोधनाविति पाठेऽन्योऽन्य एवेति न क्लेशः ॥१२॥ विरथमित्युपलक्षणम् । विशरं विवाहं विसारथिं कृत्वा बहव एकं च । नानायासेनेत्याह ॥ कृच्छ्रेणेति ॥ गृह्यसङ्गृह्य कन्या च लक्षणां जयिनः स्वपुरीमविशन् ॥१३॥ भावे क्तः । नारदस्योक्तेन वचनेन । तत्साम्बबन्धादिकं श्रुत्वा ॥१४॥

तान् कुपितानुग्रसेनादीन् कुरूणां वृष्णीनां च कलिं युद्धं नैच्छत् । तत्र तन्त्रं कलहशङ्कित इति । अत्रोद्यमं श्रुत्वा पुनर्बालेन कलहं कुर्युरनार्या इति शङ्कितः । कलिरन्त्ययुगे युधीति विश्वः ॥१५॥ चन्द्रो ग्रहैर्यथा वृतस्तथा ब्राह्मणैः कुलवृद्धैश्च वृत आदित्यवर्चसा रथेन हस्तिनपुरं जगाम ॥१६॥ गत्वा सोऽभिवन्द्येति श्लोकद्वयमेकान्वयि । उद्धवं शान्तये समाधानार्थमम्बिकापुत्रं प्रति प्रेषयामासेत्यन्वयः । उद्धवो धृतराष्ट्रायाभिवन्द्य तमनुकूलयितुं तथा भीष्मादींश्चाभिवन्द्य इति धृतराष्ट्रायास्तैः शान्तिस्तस्यै वा । सकर्मकत्वान्न धृतराष्ट्रायेति चतुर्थीसम्भवो द्विकर्मकत्वाद्धृतराष्ट्रमिति च वक्तव्यमिति परास्तम् । दुर्योधन उद्धवतो वयोमहीयानिति सूच्यते ॥१८॥ तेऽपि बालकृतकलहा अपि तं तत आगतमुद्धवं मंगलं तत्साधनं पाणिषु येषां ते ॥१९॥ तेषां मध्ये ये तत्प्रभावज्ञास्ते प्रणेमुः । तत्प्रभावज्ञाः स चासौ प्रभुश्च तत्प्रभुस्तस्मिन् बलविषये येऽज्ज्ञास्ते न नेमुरित्यप्यर्थः । तेषां य इत्यनेन बोध्यते ॥२०॥ शिवं सुखं पृष्ट्वा । शिवं मोक्षे सुखे भद्रे सलिलेऽथेति विश्वः । अनामयमारोग्यं च परस्परं दृष्ट्वाऽविक्लवं वचो बभाषे ॥२१॥ क्षितीशेश उग्रसेनो यद्व आज्ञापयत्तदव्यग्रधियः श्रुत्वा मा विलम्बितं सत्वरं कुरुध्वम् ॥२२॥ यूयं बहवोऽधर्मेण धार्मिकं साम्बमेकं जित्वाऽबध्नीत तन्मृष्ये सहे । तत्र हेतुर्बन्धूनामिष्टकाम्ययेति ॥२३॥

आत्मशक्तिसमं वचनं न च तथा विरचनमिति नास्मीत्यात्मशक्त्यनुरूपम् । प्रकोपिता एतद्वाक्यायातकोपाः ॥२४॥ कालगत्या दुरत्ययं दुःसाधातिक्रमं महच्चित्रमिदमहोऽत्याश्चर्ये । मुकुटसेवितं शिर उपानत्पादत्राणमारुरुक्षत्यारोढुमिच्छति । होढ इत्यपवादेन नहोध इत्युपानत् । न हीत्युपधादीर्घः । णह बन्धने । उपानह्येति पादमित्युपादमित्युपानत् । पादूरुपानत्स्त्रीत्यमरः ॥२५॥ यौनेयो योनिसम्बन्धीयः सम्बन्धात् । इतश्चानिञ इति ठक् । सहशय्यासनाशनः । वोपसर्जनस्येत्युक्तेः । तुल्यतामस्माभिर्नीताः । अस्मद्दत्तनृपासनाश्च ॥२६॥ पाण्डुरमिति शंखातपत्रोभयविशेषणम् । मह्यां भूमौ । मह्यमिति पाठे महनीयमासनम् । ऋहलोर्ण्यदिति ण्यत् । वृद्ध्यभावश्छान्दसः । अवृत्तविच्छितेर्माह्यमिति सुपठम् । भुंजन्ति भुंजते । अस्तु नाम यतः सम्बन्धिन इत्युपेक्षया । भुजोनवन इति स्मरणात्पालयन्तीत्यर्थे परस्मैपदता वा ॥२७॥ नरदेवलाञ्छनै राजचिह्नैः फणिनां सर्पाणाममृतैः क्षीरैरिव दातृप्रतीपैर्वितरितृविरोधिभिर्विषयतया परिणतैर्गतत्रपा निर्लज्जाः ॥२८॥

इन्द्रोऽपि कुरुभिस्तानाह । भीष्मद्रोणार्जुनादिभिः । द्रोणस्य कौरवान्नभोक्तृत्वात्तत्वेनोक्तिः । यद्यप्यर्जुनो नेष्टः किन्तु द्विष्टस्तथाऽप्यन्यैः सह विरोधे तु वयं पंचोत्तरशतमितिवदुक्तिस्तथेति ज्ञेयम् । सिंहग्रस्तस्तत्कवलित उरणो मेषः पत्रादिकं यथा नावरुन्धते तथाऽधतं नावरुन्धीत न स्वीकुर्यात् । सिंहग्रस्तमिति पाठे उरणः सिंहग्रस्तं यथा नाद्यात्तथेति योजना ॥२९॥ जन्मना बन्धुभिश्च सहिता श्रीस्तया जन्मनैव बन्धुरिव भ्रातेव सहजेति यावत् तया सम्पदेति वा । उन्नद्धो मदो येषां ते दुर्वाक्यैरुक्तरूपाणि रामं श्रावयित्वा तदपि न पत्तनं नीत्वा किन्त्वटव्याम् । अधुना न समाधानाशा बलस्येत्याह ॥ पुरमाविशन्निति ॥३०॥ कुरूणां दौःशील्यं स्वयं दृष्ट्वा तथा वाच्यातिवाच्यतां वाच्यमिति शेषः । श्रुत्वाऽवाच्यानामर्थानामत्यन्तं वाच्यता यस्याः सा ताम् । दुष्प्रेक्ष्यः । तत्र तन्त्रं कोपसंरब्ध इति । मुहुः प्रहसन्नुपहसन्नवोचत् ॥३१॥

लकुटस्तत्ताडनं प्रशमः शान्तिकरः ॥३२॥ कृष्णं च कुपितं पुत्रधर्षणाच्छनैः सान्तयित्वा। एतेषाम् ॥३३॥ तमागतम् ॥३४॥ स्वयमप्युपहसति। यस्य शक्रादयो लोकपाला आदेशानुवर्तिनः स भोजवृष्ण्यन्धकेश्वर उग्रसेनो नाम्ना। उग्रा सेना यस्य स इत्यर्थश्च विभुर्निदेशसमर्थः किल ॥३५॥ अदत्तमवरुन्धीतेत्युत्तरयति ॥ सुधर्मेति। येन सुधर्मा देवसभाऽऽक्रम्यते। अमराङ्घ्रिपः पारिजात आनीय येन भुज्यते सोऽसौ कृष्णोऽध्यासनार्हको न किल ॥३६॥ यस्य पादयुगं साक्षाच्छ्रीरुपास्ते। किं तन्महत्त्वमित्यत आह ॥ अखिलेश्वरीति। श्रीशो नरदेवपरिच्छदान्नार्हति किल ॥३७॥

यस्यामङ्घ्रिपंकजरजोऽखिललोकपालानां मौल्युत्तमैर्मुकुटश्रेष्ठैर्धृतम्। उपासितानि यानि तीर्थानि तानि तीर्थयति पवित्रयतीति तत्तथा ब्रह्मा भवो रुद्रोऽहं च यस्य कलयांऽशस्य कलांशास्तदंशा भिन्ना यस्य तद्रजः श्रद्धामहे। न कण्डूतिवत्कण्डूयनवदित्याह। विश्वस्य वर्तामहे। अस्य तस्य नृपासनं क्व क्व भवेत् ॥३८॥

वृष्णिभिः कुरुभिर्दत्तं भूखण्डं भुज्यते किल। वयं चोपानहः किल। स्वयं तु कुरवः शिरः किल ॥३९॥ मत्तानां स्वभावत ऐश्वर्येण च मत्तानां मानिनामहंकारिणामसम्बद्धा रुक्षा गिरः कः सहेत। सहो न चेत्सह न मेऽवरो हलधरेत्यत आह ॥ अनुशासितमिति ॥ शिक्षकः। तृना च न शासनकर्तृता कादाचित्कीति सूचयति ॥४०॥ पृथ्वीं निष्कौरवां करिष्य इत्यमर्षितो हलं स्वायुधं जगत्त्रयं दहन्निव गृहीत्वा उत्तस्थौ ॥४१॥ विदार्य गंगायां प्रहरिष्यन् विचकर्ष ॥४२॥ घूर्णं चंचलं जलयानं नौकां पतदाकृष्यमाणं नगरं चावलोक्य। कौरवा जातसम्भ्रमा उत्पन्नभीतयः ॥४३॥

जिजीषवः। छन्दच्छेदभिया विकारलोपः। जिजीविषवो जीवितुमिच्छवः सलक्षणं लक्षणासहितं साम्बं पुरस्कृत्य परिणायनिर्णायकहरिद्रादिलेपनलक्षणसहितं वा ॥४४॥ हे राम राम ते प्रभावं न विदाम न जानीमः। कुटुम्बिनां मत्वर्थ इकारः। मप्रत्ययः। त्वमप्यस्मत्समः कुटुम्बवत्तयेत्यप्याहुः ॥ कुटुम्बीति। ईनां कामानां त्वदिच्छानां प्रभावं न विदामेत्यन्वयः। इममर्थविशेषं सूचयितुं कुटुम्बिनामिति वक्तव्ये कुटुम्बीनामित्युक्तिरिति ज्ञेयम्। नोऽपराधमेतदुपरोधनजम् ॥४५॥

अश्वासावाश्रयश्चेति आश्रयो नितरामाश्रयो यस्य सः। स्थित्यादिहेतुताऽऽवेशाशयनिवेशेनेति ज्ञेयम्। उत्पत्तिस्थितिलयानामिति वक्तव्ये पूर्वं सैवात्यावश्यकीति गृहीता स्थितिरिति वस्तुस्थितिः। हे ईश बहवो लोकांस्ते क्रीडनकान् वदन्ति। हीति न शतमिति नीतिरिति मानसिद्धत्वात्ते च प्रेक्षावन्त इति कटाक्षयन्ति क्रीडत इति तु सुगमार्थम् ॥४६॥ हे सहस्रमूर्धन् अनन्तः। मूर्ध्न्येकतमे शिरसि। इदं भूमण्डलं बिभर्षि तदपि लीलया। अन्ते प्रलयकाले स्वात्मनि स्वदेहे रुद्धं विश्वं जगद्यस्य सः। स्वात्मनिरुद्धविश्व इति पदमेकं वा। यश्चाद्वितीयः समाभ्यधिकशून्यः परिशिष्यमाणो निषेधशेषः। तेन हरिणा सह शेषे। सोऽपि सहितानितरस्तरुर्णी विनेत्यप्याहुः ॥ अचयोनिःसमूह इति ॥४७॥

हे भगवंस्तव कोपो द्वेषान्मत्सरान्न। सत्त्वं बिभ्रतः स्थितिपालनतत्परः। तत्तत्स्थितिः स्वभावस्तत्पालनासक्तः ॥४८॥ सर्वस्य रुद्रस्य या शक्तिस्तत्समशक्तिमन्। सर्वो ह्येष रुद्रः। सर्वः कालंजरा शिव इति नामनिधानम्। तथैव सर्वभूत आत्मा देहो येषां तैः ॥५०॥ द्वे दशसहस्रे येषां ते तान् कुञ्जरान् तुरंगमान्नियुतानि ॥५१॥ रुक्ममेव रौक्मं तदेषामस्तीति तेषां दुहितृवत्सलः। वर्णाधिक्यं वात्सल्याधिक्यं सूचयति ॥५२॥ सस्नुषः सलक्षणः ॥५३॥

बन्धून् उग्रसेनादीन् सभायां यदुपुंगवानां मध्ये कुरुषु स्वचेष्टितं सर्वं शशंस ॥५४॥ हे परीक्षित्परीक्षस्व तच्चिह्नमिति शंसति ॥ अद्यापीति। दक्षिणतः समुन्नतम्। रामविक्रमं सूचयद्धः पुरमद्यापि दृश्यते ननु। कृष्णस्यासीद्द्विजश्रेष्ठ इति पाठे ब्रह्मन्नित्यादिवक्ष्यमाणं लग्नमेतत्पाठे तु तद्वृत्तेस्तथोक्तिरित्यवधेयम् ॥५५॥

॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे द्विनवतितमोऽध्यायः ॥१०-९२॥

॥ अथ त्रिणवतितमोऽध्यायः ॥

॥ हरिः ॐ ॥ भक्तिमात्रलोभी भगवानिति श्रुतदेवबहुलाख्यायिकया शंसच्छुकस्तत्पीठमारचयति ॥ वृष्णिष्विति । ननु वृष्णयोऽपि यदुप्रभेदा एवातो यदुपदं न पदं योग्यस्यार्थस्येति चेत् । सत्यम् । ग्रन्थकृतोऽपि हृदयं ग्रन्थयति तव नवाक्षेपः । तथाऽऽपि वक्ष्यामः । न तु यदुशब्दस्तज्जात्यवच्छिन्नपरो येन तवावसरः स्यात् । किन्तु यदस्ति तत उच्चत्वाद्यदुरित्यृग्भाष्योक्तेर्विद्यमानसर्ववरो हरिः श्रेष्ठो यस्येति वक्ष्यमाणकृष्णैकभक्तियुक्तिमुपन्यस्य न्यस्यति सार्थक्यमिति विजानीहि । कृष्ण एका मुख्या भक्तिस्तया करणेन पूर्णोऽर्थो यस्य सः । कविः शान्तः समाधाननिधानमलम्पटो विषयाभिलाषशून्यः ॥१॥

स श्रुतदेवो विदेहेषु देशेषु तत्रापि मिथिलायां पत्तने देहाभिमानहीनजनेष्वेव गणनीय इत्यपि कटाक्षयति शुकः । मिथिलादयश्चेति निपातितः । गृहाश्रमी । गृहाश्रमे पाठे उत्तरत्रान्वयस्तस्य । अनीहयाऽनपेक्षया । आगतमहार्थं भोजढयमुपादेयं वा यस्य सः । तेन वर्तिता नितरामप्रवर्तिता जयक्रिया येन सः । निवर्तिता जयक्रिया बहुलवं बहुला येन सः । यद्वक्ष्यति क्रियाश्चक्रे यथोचिता इति वा ॥२॥ यावन्मात्रं यावदेव दैवाद्धरीच्छात उपनमति प्राप्तं भवति प्रवणं सत्तदेवाकाङ्क्षति नाधिकम् । तपस्यैव तुष्टो यथा सम्यक् उचिता वर्णाश्रमकालेषु ताः क्रियाः कर्माणि यस्य स उवासेत्यन्वयः । दैवाद्यावन्मात्रमुपनतमिति तदुद्दिश्यैव स्वयमयमप्युपनमति ओमिति शब्दयुतो भवतीति वा ॥३॥ तद्राष्ट्रपालो विदेहेशेशोऽहंममेति निर्गतो मानो यस्य सः । एवमुभौ श्रुतदेवबहुलाश्वौ ॥४॥ तयोस्तद्विषये तदुपरीति यावत् । विप्रैः सहकर्तव्यतया तद्धितसहित इति चेति न सहित इत्यतिरेकः । विदेहाय तं देशमुद्दिश्य ययौ ॥५-६॥

कीर्तयतामार्तिनाशनानि नामानि तेषामिति तान्युदाहरति ॥ नारद इति । कृष्णो मम पिता व्यासः । आरुणिरेवादिह्लस्वतायाम् । वयमरुणिरारुणेरितरो वा कश्चित् । अहं पराशरो मम पितामहः । तत्र गौतमेति पाणिनिप्रोक्तेः स्वार्थिकेऽणि ज्ञेयः । तथा हि सूत्रम् । अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभिश्चेति । श्रुतिरपि 'अभित्वा गोतमाङ्गिर' इति । अतो गोतमेति सम्पुटम् ॥७॥ तत्र तत्र स्वस्वदेश आयान्तं पौरा मुख्या उदितं सूर्यमुद्दिश्य लोका ज्ञानिनः सार्घ्यहस्ता उपस्थास्यन्तीव सार्घ्यादिहस्ता उपतस्थुः ॥८॥ तत्र तत्रेत्युक्तदेशानपि नामनिर्देशपूर्वकमाह ॥ आनर्तेति । टंकोऽपि देशविशेषः । केकयश्च अर्णो दशार्णः । तत्पदेन प्रवर्तकाप्रवर्तकास्तत्स्थाः ग्राह्याः । नृनार्यः । नरा इति भवितव्यमेकशेषेणेति न वाच्यम् । तल्लक्षणश्चेदेव विशेषविशेष इत्युक्तेर्नायं नृशब्दप्रकृतिरिति सम्भवात् । न च लाघवलंघनं श्लाघापादकमिति वाच्यम् । नृभिः सहिताश्च ता नार्यश्चेति विग्रहेणापत्रपाः पतिभिः सहैव ता मिलिता अन्यैः पृम्भिरेव वा तस्थुरिति द्योतयामास व्यास इति ज्ञेयम् । ततश्चापारपारपारवश्यं तन्मुखसरोजनिरीक्षणक्षणो सर्वेषामविशेषेण द्योत्यते । तथाऽन्ये चोदारहासस्निग्धेक्षणं तन्मुखसरोजं पपुः । अनेन तत्तन्नयनानां भ्रमरसमता ध्वन्यते ॥९॥

स्ववीक्षणनिरस्ततमिस्रदृग्भ्यः स्ववीक्षणेन स्वावलोकनेन निरस्तं तमिस्रमज्ञानं यस्याः सा दृक् परोक्षप्रेक्षा येषां ते । सु अत्यन्तमवीक्षणेनानवलोकनतो विषयाणामितरेषां निरस्तमित्यादिकमादिवत् । विनिष्टेनेति पाठोऽपीष्टः स्फुटार्थश्च । त्रिलोकगुरुरर्थदृशां शाश्वतिकार्थस्वापरोक्षप्रेक्षां यच्छन्ननन्तरं क्षेममत्र परत्र मोक्षं यच्छन्निति चैष्यन्नयत इति मन्तव्यम् । सुरैस्तथा नृभिर्गीतमशुभघ्नममंगलभंगदं स्वयशो दिगन्तधवलं दिशामन्ताः सर्वे धवला येन तत् । अनेनानुकृतं दिक्षु यानाद्यशो व्याप्तमिति छान्दोक्तभाष्योक्तं मानमिति मननीयम् । शृण्वन् विदेहान् शनकैरध्वनोर्मध्ये व्रजज्जनव्रजसमुत्साहहानिर्न भाविनीति नीतिविन्मन्दंमन्दं जगामेति शनकैरित्यनेन सूच्यते । अयादगच्छत् । तत्र तन्त्रमाह ॥ अयादिति । अयात्तदीयशुभावहदैवविशेषत इत्यप्यावृत्त्याऽर्थो बोध्यः ॥११॥ जनपदा जनाः प्रागेव चागच्य ग्रामगाः पौरास्तत्रत्यास्तस्मा अच्युतायार्हणपाणयः सभाजनभाजो हस्तन्यस्तवस्तुका मुद्रिता अभ्ययुः ॥१२॥

प्रीत्या स्नेहविशेषेण भक्त्येति यावत् । उत्फुल्लो विकसितस्तदीयो गुणग्राहकामल आशयोऽन्तःकरणं येषां त इत्याशयः । धृतांजलिभिः केषु शिरस्सु धृता अंजलयो यैस्तैः सहिता मुख्याश्रुतपूर्वं यथा नेमुः । यावन्नयनालिनसंचरणं तावतीमवनिमभिव्याप्यव्यापकावस्थानाव्द्याप्यानां नमनावन्यभावाच्छिरो विरोच्यमानांजलितयाऽवस्थानमिति तात्पर्यम् । विधृतांजलिभिरिति वा । उद्धतांजलिभिरिति पाठः । तथा मुनीन्नारदार्दींश्च नेमुः ॥१३॥ स्वानुग्रहाय तदर्थं सम्प्राप्तम् । सत्यभूतिं ज्ञानानन्दमूर्तिं जगद्गुरुं विध्यादियवसावधिजगत्स्वामिनं मिथिलो राजा श्रुतिदेवः कश्चिद्यादवः पादयोर्युगपत् ॥१४॥ मिथिलः श्रुतिदेवश्चेतौ सन्नतांजली सन्तौ द्विजैः सह दाशार्हमातिथ्येनातिथियोग्यकर्मणा युगपदेकदा निमन्त्रयेताम् । अद्य नः पितरस्तुष्टा इत्यादेरीक्षणक्षण एव क्षणं ददतुरित्यर्थः । अद्याष्टमी नवमी चाद्यायनं च विषुवं च दिनत्रयं चाद्यैव पिण्डपितृयज्ञमखस्य कालो दामोदरेण सहसा गृहमागतेनेति भारतोक्तेरावश्यकश्राद्धादौ दौहित्रादेः प्रवर्तनमिति व्याख्याततत्वात् ॥१५॥

तदपौर्वापर्येणागमनं तदुभयाभीप्सितम् । अभिप्रेत्य ज्ञात्वा तयोः प्रियचिकीर्षयोभयो रूपाभ्यां गेहमाविशत् । तदलक्षितस्ताभ्यां श्रुतदेवबहुलाश्वाभ्यामलक्षितः । तत्रात्रापि तेनात्रापि तत्र गत इत्यलक्षितोऽज्ञातः ॥१६॥ किमेकल एव हरिरगमदित्यतो मुनयोऽपि गता इति तन्महत्त्वमप्याह ॥ श्रोतुमिति । असतामयोग्यानां श्रोतुमपि दूरान्दूरगान् स्वगृहागतान् स्वकानीतेष्वासनाग्र्येष्वासनश्रेष्ठेषु सुखासीनान्सुखं यथा तथाऽऽसीनानुपविष्टान् ॥१७॥ प्रवृद्धाया भक्तेरुरुरुत्कर्षो महातिशयस्तेन सहितं हृदयं यस्य स चासावश्राविले आनन्दबाष्पकलिते ईक्षणे यस्य स च महामना नत्वा तदङ्घ्रीन् हरिहरिदासचरणान् प्रक्षाल्य तदपस्तदुदकानि । तत्स्वरूपं निरूपयति ॥ लोकपावनीरिति । लोकं पावयन्तीति तास्तथा ताः ॥१८॥

सकुटुम्बो मूर्ध्नि मूर्धनि वहन्सन्नीश्वरं पूजयांचक्रे । तत्साधनं बोधयति ॥ गन्धेति । गन्धाश्च तद्वद्द्रव्याण्याकल्पा अलंकारा गावो वृषाश्च तैर्गोश्रेष्ठैरिति वा ॥१९॥ अन्नतर्पितान् भुक्तवतः प्राणीन् प्रीणयन् विष्णोः पादावंकगतौ स्वोत्संगसङ्गिनौ शनकैर्मृजन् संवाहनं शनैः स्वयं रचयन्मुदेदं माधवं प्राह ॥२०॥ सर्वभावानां पदार्थानामात्मा स्वामी साक्षी साक्षाद्द्रष्टा सुहृदनिमित्तोपकर्ता विभुर्व्यापी । अयं त्वं त्वत्पदाम्भोजयुगं स्मरतां नो दर्शनं गतः । स्मरतां साक्षान्मन्मथ इति पूर्वोक्तेः सौन्दर्येण मन्मथत्वं गतस्त्वम् । ऋतं यथार्थं कर्तुमस्मद्दृग्गोचरो भवानभवत् ॥२२॥ शान्तानां निष्किञ्चनानां त्वद्विना तिलतुलं किञ्चन नास्ति येषां तेषां मुनीनां यस्त्वमात्मदः स्वदः सायुज्यद इति यावत् । एतादृशस्य तव चरणाम्भोजं को न्वेवंवित्को विसृजेन्न कोऽपि जह्यात् ॥२३॥ तच्छान्त्यै संसारशमाय त्रैलोक्यविकृतं त्रैलोक्यस्य दुष्कृतमपहन्तीति तद्यशो वितेने ॥२४॥ स्वशान्तं स्वस्वरूपसुखनिर्णायकं तपो येषां तैरीयुषे प्राप्ताय ॥२५॥ निजैः स्वदासैः समेतो हे सम इतस्तैर्युक्तः कतिचिद्दिनानि निवसन् पादरजसा निमेः कुलं वंशं प्रस्तुतं गृहं वा पुनीहि ॥२६॥ मिथिलानगरयोषितां कल्याणं कुर्वन्नुवास । श्रुत्वैतत्कः श्रुतदेवो द्विजदेव किमकार्षीदिति राजर्षिशंकावकाशमवितरन् कविः कारुणिकः स्वयमेवाह ॥ श्रुतदेव इति । यथा जनको बहुलाश्व आर्चिं च तथा श्रुतदेवः प्राप्तमच्युतं मत्वा यथा जनकः पिता वात्सल्यादायाति तथा प्राप्तमित्यप्यर्थः । मुनींश्च ते च भगवद्रूपविशेषास्तत्तदाकारा इति तान् । भगवन्तमेवम्भूतं विलोक्य स्वयं तेऽपि योगयोगेन तथेति । अत एव तदलक्षित इत्येवोक्तिः । वासो धुन्वन् । वासो विधूननं च सन्तोषविशेषवशात् । भवदपि वासांसि जीर्णानीत्यादेर्न मम ममताऽत्रेति तथा वस्त्रमित्यनुक्त्वा वास इति वचनं च । यो वासो गेहे तमपि धुन्वन्नयमिति देह इव गेहेऽपि नेहेति विशेषं ध्वनयतीति ध्येयम् । हेति भक्त्युत्कर्षमनुत्कर्षं धनस्य च सूचयति ॥२८॥

तृणपीठे बृश्यादौ अवनिजे अवनिनिजे । श्लौ लिटि च वक्तव्यमवनिनिज इति तथाप्येवं वदन् आगतेन भगवता समेतानेतांस्तृणपीठ उपवेश्य हे स्व स्वतन्त्रेति सम्बोध्यावनिजे । धरावतारधरे श्रीहरिविषयेऽप्यचरत्तथेऽप्यर्थं सूचयामासेति ज्ञेयम् ॥२९॥ महाभागोऽयं सगृहान्वयं गृहादिसहितमात्मानं तदम्भसा प्रक्षालनजलेन स्नापयांचक्रे । मित्वविकल्पाद्दीर्घोऽपि । उदुत्कृष्टो हर्षो यस्य सः ॥३०॥

सिद्धार्थाः सितसर्षण इति तच्छब्दपर्यायोऽयं सिद्धार्हणशब्दः । सिद्धार्हणानि सितसर्षपाश्चोसीराणि । शिवाऽऽमलकी शिवा । अभयामलकीत्यादिविश्वः । अमृताम्भसा मधुरोदकेन । सर्वो द्वन्द्वो विभाषयैकवद्भावः । उत्तरपदलोपी समासो वा । सुरभ्या मृदा कस्तूरिकादिकया सुरभ्या स्वाभाविक्या कयाचिन्मृदा वा । अनेन निःश्रीकस्य कथं कस्तूरिकाप्राप्तिरिति निरस्तम् । तुलसी च तुशाश्चाम्बुजानि च तैर्यथोपपन्नयाऽपूज्या यत्र पूज्यन्त इत्याद्युक्तानर्थानास्पदतया तत्तद्योग्यतानुरूपिण्येति यावत् । सत्त्वविवर्धमानया सत्त्वेन स्वसाधुभावेन विवर्धमानया सपर्ययाऽऽराधयामास । अमृताऽमरलता वा ॥३१॥ सर्वतीर्थास्पदौ यौ पादौ तयो रेणवो धूल्यस्तैः करणैः कृष्णेन तथाऽध्यात्माधिरथिकश्चासावात्मा च स एव निकेतं मन्दिरमाश्रय इति यावत् । येषां ते च ते भूसुराश्च तैः केतं ज्ञानं येषां ते तैरिति वा । केतं कृण्वन्नकेतव इत्यृक् टिप्पटे केतं चित्तं चितिरित्यादि तन्नामसुपाठादित्युक्तेः । पदं विप्रस्य दक्षिण इत्यादेः । सर्वतीर्थेत्यादिकं कृष्णेनेत्यनेन वाऽध्यात्मेत्यादिनाऽप्यन्वेति । गृहान्धकूपे पतितस्य मम यः संगमः स कुत आपतत् । इति स श्रुतदेवस्तर्कयामास । मयाचारि चारित्रं स तथाऽप्ययं संगमः सुमंगलः कथं सम्प्राप्त इत्यचिन्तयदिति भावः । अत एवापतदित्युक्तिः ॥३२॥

उपस्थित उपोपविष्टोऽङ्घ्रिरभिमर्शनं मर्दनं येन स सन्नुवाच । अङ्घ्र्यभिमर्शन इति पाठेऽङ्घ्रिं चरणं चक्रमभिमृशति तथा तम् । चक्रपाणिमुवाचेत्यर्थः । वासवनीलेत्यादिवत् । पादसंवाहनं कुर्वन्निति वा । सभार्यस्वजनापत्यो भार्यया सहितानि स्वजना अपत्यानि यस्य सः । भार्या जायेत्यमरः । डुभृञ् धारणपोषणयोरिति बिभर्तेस्त्र्यादेर्वा ऋहलोर्ण्यतेति भार्येति रूपम् । भृञो संज्ञायामित्यत्र तथा संज्ञायां समजनिषदेत्यत्र च तदनुबन्धकग्रहणे नातदनुबन्धकस्येति परिभाषया भृञ एव ग्रहणमित्युक्तेः ॥३३॥ यः शक्तिभिः कार्यवैचित्र्यात्कारणवैचित्र्यमिति बहुवचनम् । इदं जगत्सृष्ट्वोत्पाद्य विभजति स्वाधीनप्रवृत्त्यादिसत्तया वा विविधाकारं करोतीति वा । सः परः सर्वविलक्षणः परमपूरुषो क्षराक्षरपुरुषोत्तमः कदाऽपि दर्शनं नो प्राप्तः सोऽप्यद्य दर्शनं प्राप्तः । अनेनालभ्यलाभो जात इति ध्वनयति । शक्यत्वाच्छक्तयो भार्या इत्यादेरभिमन्यमानप्रकृत्यादिकार्यगुणमहदादिभिरात्मसत्तया स्वस्वातन्त्र्याद्यात्मिकया विभजति विलक्षणमस्वतन्त्रं करोतीति यावदिति वा ॥३४॥

सपक्षप्रदर्शनमुखेनास्वतन्त्र्यपक्षं दक्षीकरोति ॥ यथेति । शयानः स्वपन् पुरुषो जीवजातमात्ममाययाऽऽत्मनो भगवतो मायया न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजत इत्यादेस्तत्सर्जनेच्छया । वेत्येवार्थे । तदुद्बोधितेनैव मनसा तद्वासनया परं स्वविलक्षणं परं राजगतादिविलक्षणं लोकं स्वमात्रविलोक्यं स्वाप्नं तत्कालभवं लोकं गजादि सृष्ट्वा मुख्यः सर्जनकृद्धरिरेतत्कर्मनिमित्तं वासना चोपादानमेवं सत्त्वादुपचारत उक्तिः । अवरुद्ध्यायं गजादिरिति विषयीकृत्य भासते । दृश्यवैलक्षण्येन द्रष्टृत्वेन भासते तथा । स्वसृष्टजगद्विलक्षणत्वेन भासमानो नो दर्शनं प्राप्त इत्यतीतेनान्वयः ॥३५॥ तदेतद्रूपमस्ति वस्तु चेत्तर्हि किं दूर आरात्तत्रापि केषां केषां कथं कथमित्यत आह ॥ शृण्वतामिति । शृण्वतां स्वचरितं गदतां व्याख्यातवतामभिनन्दतामनुमोदमानानाम् । शश्वदिति विश्वान्वयि । दर्शिनाम् । एवं संवसताममलात्मनां सन्मनसां नृणां स्त्रियश्च नरश्चेति नृणामधिकारिणां नित्यं हृदि स्थितः । हृद्युभ्यामिति सप्तम्या अलुक् ॥३६॥

यस्तद्वन्तिक इत्यंशशंसितं प्रतिपाद्य यच्च दूरक इत्यंशार्थं प्रतिपादयति ॥ हृदिस्थ इति । तत्राधिकारिणोऽमलात्मप्रतियोगिन आह ॥ कर्मविक्षिप्तचेतसामिति । हृदिस्थोऽपि दूरस्थः । तर्ह्यमलात्मभिरपि तच्छक्त्या गम्य इति नेत्याह ॥ आत्मशक्तिभिरिति । आत्मनां जीवानां शक्तिभिः सामर्थ्यैः प्रयत्नैरिति यावत् । अग्राह्यः । कुत इत्यतस्तद्विग्रह एवंविध इत्याह ॥ अर्थाकार इति । ॥ अनुगुणात्मक इति च । अर्थत सर्वापेक्ष्य इति चानन्दादिः स एवाकारो मूर्तिर्यस्य । अगुणात्मकः सत्त्वाद्यविकृतदेहवान् । अकं दुःखम् । अरा इतरे च दोषास्तेषामर्थो यस्मान्निवृत्तिः स तथा गुणात्मक इति वा । अकस्याराद्दुःखप्रापका दोषास्तेषामर्थो निवृत्तिः । अर्थ उपयाञ्चायामित्यतः कर्मणि घञ् । अर्थोऽभिधेयैरवस्तुप्रयोजननिवृत्तिष्वित्यमरः । गुणा एवात्मा देहो यस्य सः । गुणप्रधाना आत्मान इतरे जीवा यस्मात्स तथा ॥३७॥

अध्यात्मविदां स्वापरोक्षप्रेक्षावतां परमात्मने मुख्यस्वामिने सर्वात्मने सर्वादानादिकर्त्रे स्वात्मनैव विभक्ता मूर्तयो विशेषतोयस्य स तस्मै । सकारणस्य सादेरकारणस्य नित्यस्य च लिङ्गं लिङ्गत्वमुदंचनोपचयहेतुतामीयुषे गतवते सकारणस्य लिङ्गं प्रादुर्भावादीनाम् । इदमाद्यावतारेऽकारणस्य कारणशून्यस्य लिङ्गं चिह्नं च । नृसिंहाद्यवतारे चेयुष इति वा । स्वमायया प्रकृत्याऽसंवृता दृष्टिर्ज्ञानं यस्य स तस्मै । स्वेच्छयैव संवृतानामज्ञानां दृष्टिर्यस्मात्स तस्मा इति वा । ते नमोऽस्तु । अधुना स्तुहि श्रुतिदेव किमुपरतवानित्यत आह ॥ अस्तुत इति । अ ईषदेव स्तुतिर्यस्य तत्सम्बुद्धिः । कियती सा चेन्नायतीं भजते गुणानां गणनातीतेरिति भावः ॥३८॥ सोऽस्मन्नतस्त्वं स्वभृत्यांस्त्वद्दासान् । भृञः क्यपि ह्रस्वस्य पिति कृति तुगिति तुकि भृत्येति भवति । नः शाधि शिक्षय । हे ईश ते किं करवाम । हे श्रुतदेव तव किमपेक्षितं वद तदनुपेक्षया कुर्म इत्यत आह ॥ एतदन्त इति । नृणां क्लेशः सांसारिक एषोऽन्तोऽवधिर्यस्य सः । स क इत्यतस्तमवधिमभिधत्ते ॥ यद्यदा भवानक्षिगोचरश्चक्षुर्विषय इति । अक्षगोचर इति पाठ इन्द्रियगोचर इत्यर्थः । दर्शनस्पर्शनादिस्तव्द्यापारो ज्ञेयः । त्वद्भृत्यानित्यनुक्त्वोक्त्वा स्वभृत्यानित्यात्मैव भृत्यो येषां ते वयम् । स्वयं दासास्तपस्विन इत्यादेरित्यप्यर्थ इति । याचना या च सा कार्याऽन्नविषयेऽन्येषामित्यप्याह ॥ स्वभृत्यान्न इति । स्वभृत्यानां विना प्रयत्नमन्नं यस्मादित्यर्थः ॥३९॥

प्रणतार्तिहा भगवान् । इति तदुक्तं श्रुतदेवोक्तमुपाकर्ण्य श्रुत्वा स्वपाणिना पाणिं तस्य गृहीत्वा हसन् । पूर्णस्य मम ते किं करवामेत्ययमूचिवानित्युपहसन्नुवाच ॥४०॥ मां शाधीत्युक्तस्तदादरतोऽपि स्वादरमुदारं निरीक्ष्य तेषामृषीणां लोके विवेकिप्रवेकमानवमाननीयतायै कैश्चित् श्लोकैर्द्विजपूजनं मम भजनमिति तदेव श्रुतं श्रुतदेव चरेति शिक्षयति ॥ ब्रह्मन्निति । यादवमध्ये वृत्त्या ब्राह्मणा अपि सन्तीति ब्रह्मन्नित्युक्तिः सूचयति । ब्राह्मण ते त्वदुपर्यनुग्रहार्था यदर्थममून्मुनीन्सम्प्राप्तान् विद्धि । मयाऽन्तर्निहितेन सह लोकान् पादरेणुभिः पुनन्तः संचरन्ति ॥४१॥ तीर्थक्षेत्रादिभिः पावित्र्यं सेवितैर्भवेत् किमेतैरित्यतोऽस्ति विशेष इत्यनुशास्ति । देवाः प्रतिमां प्रतिष्ठिताः क्षेत्राणि कुरुजांगलादीनि तीर्थानि गंगादीनि दर्शनस्पर्शनार्चनैः कालेन लोकानेतत्कुर्वाणान् पुनन्ति तत्तादृक् पावित्र्यमर्हत्तमानां नारदादीनामीक्षयाऽवलोकनेन केवलेन भवति । अपिस्तदधिकफलसमुच्चयार्थः ॥४२॥ विद्यमानगुणवर्णनेन तदुदीर्णतां वर्णयति ॥ ब्राह्मणा इति । जन्मन इव एव । ब्राह्मणोऽस्य मुखमासीदित्यादेर्जन्मनः सकाशाच्छ्रेष्ठाः जन्मत इत्यपि पठन्ति । सर्वेषां बाह्वादिजक्षत्रियादीनां प्राणिनां तन्मध्ये जात्युत्तमेष्विदमपि सुवर्णसौगन्ध्यन्यायेनास्ति चेत्किं गदनीयं तदाधिक्यमित्यभिधत्ते ॥ तपसेत्यादिना । तपसा विद्यया तुष्ट्या तदृच्छागततृप्त्या च श्रेष्ठा इति किम् । तत्रापि पुनर्मत्कथया । अतः श्रेष्ठा इति किं वाच्यमिति कैमुत्यद्वितयं ज्ञेयम् । क्रमादेकैकतः कैमुत्यानीति वा ॥४३॥

तदवज्ञां कुर्वन्तोऽज्ञा इति तेषां स्वस्य च स्वरूपं निरूप्य व्यवस्थापयन् वक्ति ॥ नेति । चत्वारो भुजा यस्येति तत् । अनेनागमनसमये भुजचतुष्टयवानायात इति ज्ञायत इति केऽपि । विद्यमानस्थितिर्विशेषवित्त्यैकस्थितेति केऽपि । रूपं मे । ब्राह्मणान्न दयितं प्रेमपात्रम् । छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिमित्युक्तेः । सर्ववेदमयो विप्र इति तदनवमानहेतुः । अहं सर्वदेवमय इत्यावयोः स्थितिः । मदीयसर्वदेवमयत्वं यद्वेदैकवेद्यं तन्मयत्वात्तद्वित्त्वात्ते मान्या इति भावो नान्य इति । हियोंऽन्यथा मे स दण्डभागिति तद्वचःसूचकः ॥४४॥ तेभ्योऽसूयवस्तान्दुष्प्रज्ञाः । एवं मन्मार्गप्रदर्शिको गुरुरित्यविदित्वा तं गुरुमवजानन्त्यपमानयन्ति । अर्चादौ प्रतिमादाविति हरिरेवेति दृष्टिर्येषां ते सन्तोऽसन्तो मामात्मानं स्वामिनमप्यवजानते । तत्तादृूप्यचिन्तनमेव ममावमानमिति भावः । अर्चादाविज्यदृष्टय इत्यपि पठन्ति ॥४५॥ चराचरं विश्वं यस्मिस्तं मा मामस्य विप्रस्य दैवतम् । अहं भावये । एतस्यां स्वतनुरूपश्रुतौ । एभिर्भूतैः सह विप्रो मेधावी मदीक्षया सर्वत्र वर्तते हरिरितीक्षाप्रेक्षतया मद्रूपाणि धत्ते तत्प्रतिपाद्यत्वनानुसन्धत्ते । अतस्तदवज्ञाऽनर्थकरीति नार्थिना साऽनुष्ठेयेति भावः । अहमितीक्षा दुरहं न सेति अमदाक्षा तयेत्यावृत्त्या योजयन्ति ॥४६॥

यदर्थमत्यर्थमुपन्यसनं तं भावमाविष्करोति ॥ तस्मादिति । एवंविधमाहात्म्यशालिन इति । हे ब्रह्म ब्रह्मञ्छ्रुतदेव । न च ब्रह्मा विप्रः प्रजापतिरित्यादेः पुँल्लिङ्गब्रह्मशब्दस्य ब्राह्मणवाचकत्वात्कथं नपुंसकब्रह्मशब्दस्य तद्वाचकत्वमिति वाच्यम् । यत्र ब्रह्म च क्षत्रं चोभे भवत ओदन इति नपुंसकलिङ्गस्य तस्य तद्वाचकत्वे श्रुतेः काऽत्र कथन्ता । एतान् ब्रह्मन्नृषीन्नारदादीन् श्रद्धयाऽर्चय । अनेन पश्चात्कश्चिद्विपश्चित्सपर्याविपर्यासोऽनेनाचारीति सूच्यते । एवंविदाऽनुसन्दधताऽर्चयाद्धा सम्यक् । अस्म्यहम् । अस्मीत्यव्ययम्, तदर्थोऽहमिति । अर्चितोऽन्यथा सुविभूतिभिरपि नार्चितोऽहं स्यामिति तात्पर्यम् ॥४७॥

प्रभुणा । अनेनान्यथा चेत्तच्छिक्षणदक्षतां ध्वनयति । इत्थमादिष्टः । स श्रुतदेव आज्ञप्तः । तदादेशमूलमप्यालपति । आ सम्यक् फलोपलम्भकं दिष्टं दैवं यस्य स इति । सहकृष्णान्द्विजोत्तमान्बहिरबहिरपि तत्सहिता इति द्योतयितुमेवमुक्तिरिति न सहयुक्त इत्युक्ताप्राधान्यं युक्तमिति मन्तव्यम् । एकान्तभावेनानन्यसाधारणभक्त्याऽऽराध्य मैथिलः श्रुतदेवश्च गतिं सद्गतिमापतुः । एष्यत्विति नीतेः ॥४८॥

त्वमप्येवं कुरु नेतरथेति कुरुनन्दनं प्रति सम्बोधनतोऽर्थाद्बोधयञ्छुकः उपसंहरन्नाह ॥ एवमिति । भक्तेषु भक्तिः प्रसादसौमुख्यहेतुः स्नेहस्तद्वान् । भक्तानां भक्तिमार्गस्तरतमभावस्तद्वान् । तदनुगुणगुणदातेति यावदिति वा । सृष्ट्वा विभजत्यात्मसत्तयेति प्राक्चोक्तेः । दिनानि कतिचिदित्यादिना तदर्थिते इति कानिचिद्दिनान्युषित्वा सन्मार्गमादिश्य पुनर्द्वारवतीमगात् । ननु श्रुतदेवादवसित एव वसतमन्वशासदिति ज्ञायते किं बहुलोश्वोऽतानीत्सभाजनव्यत्यासमथवा चरणेऽपि नायं योग्य इति तदनुक्तिरिति चेत् । चशब्देनेदं सर्वं समुच्चेयमिति सूचयामास । तथैवोपसंहरणं चेति सर्वं तत्राप्यनुसन्धेयम् । यद्वाऽयं विप्रो ब्रह्मन्नित्यादेस्तदुपदेशोऽनेन कारयितुं शक्य इत्यत्रोपदेश ईशेन कृत इति वा तत्रानुक्तिसम्भवात् । अत्र स्वयमेव गृहीततत्तदाकार आकारित आयात इति स्वेच्छेपोद्वलितेच्छोपात्तदेहा इमे मुनय इति वा ध्वनयितुमेतत्सदध्वोपदेश आवश्यक इति वा ज्ञेयम् ॥४९॥

॥ इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे त्रिनवतितमोऽध्यायः ॥१०-९३॥

॥ अथ चतुर्णवतितमोऽध्यायः ॥

॥ हरिः ॐ ॥ श्रुतश्रुतदेवसद्वर्त्मोपदेश इव श्रुतेश्वरप्रतचित्तः परीक्षित्स्वपरीक्षितकारणं तदाननतो निर्णिनीषुः पृच्छति । पृष्टः शुको वृषवाहवृषासुराख्यानेन समाधत्ते तमित्येतदध्याये प्रतिपाद्यते । तत्रादौ राजा वदतीति वदति ॥ राजेति । देवासुरमनुष्येष्वधिकारिषु येऽशिवं सर्वौत्तम्येनार्हणानर्हं श्मशानवासितत्वादेर्वा शिवं शिवं भजन्ति प्रायस्ते धनिनः । लक्ष्मीपतिं हरिं भजन्ति ते तु प्रायो न धनिनः । लक्ष्मीपतिमिति धनिकतां कटाक्षयति ॥ अशिवमिति । शिवं सुखं तन्न विद्यते यस्य स इत्यसम्पत्कतां लक्षयति । प्राय इति स्वस्मिन्न तथेति स्वयं स्वसदृशाश्च केचिव्द्यावर्त्या इत्यभिप्रैति ॥१॥

विरुद्धशीलयोः कपालवैजयन्तीमालयोरित्यादिविरुद्धस्वभावयोर्विरुद्धां गतिं सुरासुराद्यधिकारिवैशेष्येण विलक्षणक्षणगतिं भजतोः प्रभ्वोः समर्थयोरनयोरर्थे महानितरातार्यपरः सन्देहो न मदादीनां हि यतोऽस्ति तत एतद्वेदितुमिच्छामि ॥२॥ शिवेनैवंकरणे प्रयोजकमिदमित्याह ॥ शिव इति । शक्तिः प्रकृतिस्तया युतो युक्तस्तद्वद्ध इति यावत् । त्रीणि लिङ्गानि यस्य सः गुणसंवृतः सत्त्वादिगुणयुतः । इदं तूत्तरत्र वक्ष्यमाणप्रकारत्रयसम्भावकमिति मन्तव्यम् । मुक्तावेतस्य शेषतयाऽवशेषादित्युक्तिः । त्रैविध्यं शृङ्गिग्राहकयाऽऽह । अहमहंकारतत्त्वात्मा पदार्थो वैकारिकस्तैजसस्तामसश्चेति त्रिधेति । अतस्त्रिलिङ्गः शिव इति प्रकृत्यादिसंवृत इति सोऽशाश्वतिकैश्वर्यमीश्वरो वितरतीति तात्पर्यम् । अहंकार इत्याद्यनुक्त्वोक्त्वा चाहं त्रिधेति स्वस्य शिवात्मकतां स्फोरयतीत्यान्तरङ्गिकोऽर्थः ॥३॥ ततोऽहन्तत्त्वात् षोडशविकारा दशेन्द्रियाणि पंचभूतानि मन एकमिति । अमीष्वेतत्सम्बन्धिषु वर्त्मसु मार्गेषु संसार इति यावत् । उपधावन् विवशः शिवो धावन् सर्वासां विभूतीनां प्रति सम्पदां गतिमश्नुते । किञ्चित्सत्त्वेन तदधिकरजसा ततोऽधिकतमसा च सम्पृक्तो हर इति तमुपधावन् सेवमानो मानवोऽपि सर्वासां विभूतीनाम् । बहुवचनमाद्यर्थे ।

सुखदुःखादिप्रकृतिविलासानां गतिमश्नुते । ततस्तदनन्तरं तासां गतिं न वृत्तिमश्नुत इत्यावृत्त्या दातृप्रतिग्रहीतृस्वभावावेदनं कृतमिति ज्ञेयम् ॥४॥ न तु लक्ष्मीपतिं हरिमित्युत्तरयितुमुपोद्घातमभिधत्ते ॥ हरिस्त्विति । प्रकृतेः परः । मुक्ता अपि तथेत्यत उक्तं साक्षादिति । निर्गुणः स्वव्यतिरिक्तगुणा वा गुणाःसत्त्वाद्यास्तद्रहित इति वा । सर्वदृक् सर्वज्ञः । तं यो भजन्ननन्तरमुपद्रष्टाऽपरोक्षतो जानाति स निर्गुणः सत्त्वादिविकलो लिङ्गभंगयुक् मुक्त इति यावत् । भवेत् ॥५॥

युष्मत्पितामहो धर्मराजोऽश्वमेधेषु स्वकृतक्रतुषु निवृत्तेषु समाप्तेषु । ननु राजा वाजिमेधेनैकेनैव लोकप्रवेकमतादीप्सितेनेति वाजिमेधेन यक्ष्यामीत्यादिनाऽवसीयतेऽतः कथमिदमश्वमेधेष्वित्यभिधानमिति चेत् । अत्र केचित् । उत्तमकल्पजल्पितत्रिगुणद्रविणदक्षिणावितरणादेक एव यागोऽनेकफलयोगेन त्रितयात्मा जात इति तदुपपत्तेः । तथा ह्याश्वमेधपर्वणि । सत्यवत्यात्मनो मुनिः —

''युधिष्ठिरं समभ्येत्य वाग्मी वचनमब्रवीत् । अहीना नाम राजेन्द्र क्रतुस्तेऽयं च कल्प्यताम् ॥

बहुत्वात्कांचनस्यास्य ख्यातो बहुसुवर्णकः । एवमत्र महाराज त्रिगुणां दक्षिणां कुरु॥

त्रित्वं व्रजतु ते राजन् ब्राह्मणा ह्यत्र कारणम् । त्रीनश्वमेधानत्र त्वं सम्प्राप्य बहुदक्षिणात् ॥

ज्ञातिवध्या कृतं पापं प्रहास्यति नराधिप ॥'' इति ॥

एवं चेन्महाभारततात्पर्यनिर्णये —

''तद्यज्ञपंचकमजस्त्रिगुणं स एभ्यः सद्दक्षिणं क्रतुपतिर्निखिलामवाप्य ।

चक्रेऽश्वमेधत्रयमुत्तममेकमेकं तेषां हरिर्बहुसुवर्णकनामधेयम् ॥

स एव मह्या हरिदैवतः क्रतुः पंचाश्वमेधात्मक उच्चकल्पः ।

दिने दिने स्वृद्धगुणो बभूव मुदावहो वत्सरपंचकं त्रयम् ॥''

इत्युक्तेस्तद्दौर्मुख्यान्न तद्युक्तम् । तर्हि कथं कथयतोभयैककण्ठ्यमिति चेत् । शृणु । इदमत्राकूतम् । पंचक्रतवः पंचभिः कृताः पंचानां तरतमभावेन फलाभाक्त्वात् । एकैककृतः क्रतुः संवत्सरत्रिकसमाप्तिक इव त्रिगुणदक्षिणाकश्चेति पंचदशात्मा भवति । कालोऽपि तत्समसंवत्सरात्मा । चक्रेऽश्वमेधत्रयमुत्तममेकमेकं तेषां हरिरिति समेषामितरेषां ज्ञायते राज्ञ इवाधिकारः । तथा पंचेन्द्रा इव राजत्स्विति वचनाच्च । भारते तु राजत्वादेतदग्रजत्वात्स एक एवोक्तः । आचार्यास्तु —

'समस्तशास्त्रार्थविनिर्णयोऽयं विशेषतो भारतवर्त्मचारी ।'

इति स्वोक्तं सुष्मूर्षवो ग्रन्थान्तरस्थमितरचतुःसवं न्यभान्त्सुः । एकोऽपि गोविन्दकृतप्रणामो दशाश्वमेधावभृथेन तुल्य इत्यादेः । साक्षादधोक्षजेऽध्यक्षसिद्धे तद्बाहुविध्ये किमान्ध्यम् । दक्षिणादेस्तद्विलक्षणताकारणत्ववर्णनं तु स्थूलदृश्वविवक्षयेति सूचनार्थं तत्रानुक्तिः । न हि भारतभारतीविषय एकः सव इतरप्रतिषेधे सहः । तत्राप्येतदुपलक्षणसम्भवात् । एकवचनं तु क्वाचित्कं जात्यभिप्रायम् । वासुदेवैकदैवतकत्वाद्वोपपन्नम् । एवमेव यादवाचार्या अपि प्रथमस्कन्धस्याष्टमे दशमे चाध्याये याजयित्वाऽश्वमेधैस्तन्त्रिभिरुत्तमकल्पकैरिति श्लोकद्विकस्य त्रिभिस्त्रिगुणफलैः पंचभिरिति शेषः । पंचानां त्रिगुणफलत्वोपपादनायोत्तमकल्पकैरित्युक्तम् । दक्षिणादिविहितोत्तमकल्पयुतैरित्यर्थ इत्येतव्द्याख्यायैतत्समाख्यात्वेनास्माभिरुदाहृतश्लोकमुदाहृतवन्तः । न च तावत्या योजतृप्त्या किमु वद भगवन्राजसूयाश्वमेध इति वायुस्तुती राजसूयसहितमश्वमेधमेकमभिदधती कथमध्वनीना स्यादिति शङ्क्यम् । राजसूयाश्चाश्वमेधाश्च तेषां समाहारः स नपुंसकमिति नपुंसकतायां राजसूयाश्वमेधं तस्मिन्निति व्युत्पत्त्युपपत्त्या तस्याश्चैतत्सरण्यनुसरणसम्भवादित्यलम् ।

युष्मत्पितामह इत्यत्र युष्मदित्येकं विनेयं प्रत्युक्तिरनेकताऽस्यैकस्य गुणैरिति ध्वनयितुमिति ज्ञेयम् । भगवतः कृष्णाद्धर्मान् शृण्वन्नच्युतं प्रतीदं त्वत्पृष्टमेव प्रमेयमपृच्छत्पप्रच्छ ॥६॥ यश्च यदोः कुले नृणां निःश्रेयसार्थाय मुक्तयेऽवतीर्णः सः शुश्रूषवे श्रोतुकामाय सेवमानाय च तस्मै प्रीतः प्राहावदत् । अवतारप्रयोजनं भूभारहरणमिव सन्निःश्रेयसमिति चोक्तं भवत्यनेन ॥७॥ तदेव देववचनमाह ॥ यस्येति । अहं यस्येति शैषिकी षष्ठी । यमनुगृह्णाम्यनुग्रहं कर्तुं कामयामि तस्य शनैस्तद्धनं हरिष्ये । तद्धरणफलं लपति ॥ तत इति । ततो द्रविणहरणानन्तरमधनं तद्रहितम् । अस्य स्वजना भार्यादयो दुःखदुःखं संजातमस्येति तमतिदुःखं त्यजन्ति । द्रविणगणे सति गणो न चेज्जन(य)त्यजनमिति भावः । न चानेनैव हेया इत्यप्याह ॥ अस्य स्वजना इति । अस्या निरस्याश्च ते स्वजनाश्च ते ॥८॥

स यदा धनेहया वितथोद्योगस्तथा फलपर्यवसायी नेति वितथो व्यर्थ उद्योग उद्यमो यस्य स सन् । धनेहया द्रव्येच्छया निर्विण्णः स्यात्सम्पादितवैराग्यो भवेत् । तथा मत्परैरहं परो येषां ते मत्परा एकान्तिनस्तैः कृतमैत्रस्य तदनुग्रहं तेषां मत्पराणामुपरि क्रियमाणानुग्रहसदृशमनुग्रहं करिष्ये ॥९॥ यतोऽहं धनहर्ताऽतस्तव्द्यासं ब्रह्म गुणपूर्णं परमं सर्वोत्कृष्टं महामतिं बहुसम्पदं वा सूक्ष्ममणुतरं चिन्मात्रं ज्ञानघनं सत्तन्नामकं साधुभावोपेतं वाऽनन्तकमन्तत्रयातीतं सन्तोऽनन्तका अनसि विष्णुसुखा येन तं वा । इयत्या गुणायत्या सुदुराराध्यं मां हित्वाऽन्यान्मच्चेष्ट्यान् । अन्यान् क्षिप्रपदगच्छदनच्छसुखप्रदान्सदाशिवादीन् भजते पुनर्भजत एव ॥१०॥ एकवचनं जात्याभिप्रायमिति ममाभिप्राय इति तथा यथा मत्त्यागस्तथा तत्त्यागोऽपि मत्तो नासम्भवति तेषामित्याह ॥ तत इति । सदाशिवाद्युपासका आशुतोषेभ्यः सत्वरं तुष्यद्भ्यो लब्धराज्यश्रिया उद्धताः प्रमत्ताः सन्तोऽल्पीयसि सम्पत्कालेऽपि तान्वरदान्देवान्विस्मरन्ति । न केवलं तन्मात्रं किन्त्ववजानते च ॥११॥

शृंगग्राहिकया तान् वदेति वक्तुमवसरमवितरन् विलम्बासहनतः स्वयमेव शुको वक्ति ॥ शापेति । ब्रह्मविष्णुशिवादयो ब्रह्मा च विष्णुश्च शिवश्च ब्रह्मविष्णुशिवास्ते च आदयश्च कारणानीत्यर्थः । उत्तरत्र त्रिष्वधीशेष्वित्युक्तिस्वारस्यात् । बहुष्वनियम इत्युक्ते विष्णुशब्दो मध्ये निबद्धः । द्वन्द्वघ्यन्तत्वेन वाऽभ्यर्हितत्वेन वाऽऽदौ निर्देष्टव्यस्य विष्णुशब्दस्य निबन्धनोभयोरप्ययमुपजीव्यतया मध्यस्थतच्छब्दार्थो हरिरिति ध्वनयितुं वैवं निर्देशः । शापप्रसादयोरीशास्तद्दानस्वामिनः । प्रसादस्य पुरा प्रस्तुतत्वेऽपि शापपुरस्करणं तस्यैव भूयस्त्वख्यापनायेति ज्ञेयम् । तत्र विवेकमाह ॥ सद्य इति । शापप्रसादः सद्यः शापप्रमादौ यस्य सः । तात्कालिकशापप्रसादः शिवो ब्रह्मा च सद्यः शापप्रसादाविति निर्देशे हरहिरण्यगर्भसम्बन्धिनोः शापप्रसादयोः साम्यप्रतीतिः स्यात्सा च न सम्भवतीति ध्वनयितुं पृथङ् निर्देशः । अच्युतः सद्यः शापप्रसादकृन्न ॥१२॥ इत्येवं प्रकारेण हासोपहासो येन तमिति हासमित्यर्थः । पुरातनं पुरात्स्वपुरात्कैलासनगर्या अतनं तत्त्यक्त्वा भ्रमणं येन तम् । वरमित्यस्य विशेषणमिति न पुरातनपदातिरेकः । इतिहासपुरावृत्तमित्युक्तेः । वृकासुराय तस्यैव भस्मासुर इति नाम संकटं प्राणसंशयमाप । सद्यः शापप्रसादः सदाशिव इत्येतदितिहासमुखेन शंसति ॥ अत्रापीति । उदाहरन्तीति बहुसम्मतिमाचष्टे ॥१३॥

शकुनेस्तन्नाम्नो दनुजस्य पथि मार्गे नारदं सुरमुनिं दृष्ट्वा त्रिषु देवेषु हरिहरहिरण्यगर्भेषु । आशु तेषां सत्वरवरप्रदम् ॥१४॥ नारदः सिद्धये फलार्थं गिरिशमुपधावस्व स गिरिशोऽल्पाभ्यां गुणदोषाभ्यामाशु तुष्यति गुणेन दोषेण त्वमुष्मै दोषिणे कुप्यति चेति दिदेश । पूर्वं शापप्रसादेत्यानुपूर्व्यानुरोधेन गुणदोषाभ्यां तथा कुप्यति तुष्यति चेति वक्तव्यं तथाऽपि प्रस्तुतस्तु गुणव्यापार इति द्योतनायैवमुक्तिः ॥१५॥ विश्वेश्वरविश्वा....जननाय निदर्शनेन दर्शयति ॥ दशास्यबाणयोरिति । बन्दिनोरेव स्तुवतोर्दशास्यबाणयोरुपरि तुष्टो वरं दत्त्वा ततो वरदानात्संकटं कैलासोत्कीलनपुरपालनारूपमाप । महतां स्वात्मक्लेशं सोढ्वोढ्वा परप्रयोजनभरं स्वभाव इति द्योतयितुमेतदुपन्यसनमिति भावः । अपसंकटं वरं दत्त्वा संकटमापेत्यावृत्त्याऽन्वयः । नन्वेवं तर्हि रामायणे उत्तरकाण्डे कैलासोत्कीलनानन्तरं हरवरप्रदानोक्तिरेतद्विस्तर इति चेत् । तत्पूर्वमपि तपश्चर्यावरदानयोः पद्मपुराणोक्तिः । तथा हि तत् —

रावणः कुम्भकर्णश्च हिमवत्पर्वतोत्तमे । महोग्रतपसा मां तु पूजयामासतुः प्रिये ॥
रावणो दुष्टात्मा छित्त्वा नव शिरांसि माम् अर्चयन्दशमं मौलिं छेत्तुमैच्छत् ... ।
ततस्तमब्रुवंस्तुष्टो दृष्ट्वा तत्कर्म दारुणम् । वृणीष्व मे वरं वत्स यत्ते मनसि वर्तते ॥

इत्यादिस्तत आप संकटमितीति ॥१६॥

इत्यादिष्टो नारदेनासुरो वृकः सुयन्त्रितोऽतिगात्रसंकोचं प्राप्तः प्रह्वीभूत इति यावत् । तं हरं केदारे तन्नामकक्षेत्रेऽग्निर्मुखं यस्य तं हरमात्मक्रव्येण स्वमांसेन जुह्वन् । हु दानादनयोरस्माज्जुहोत्यादिभ्यः श्लुरिति श्लौ श्लाविति द्वित्वे कुहोश्चुरिति कुत्वेन जकारे जुहोतेः शतृ–प्रत्यये इति स्थिते हुश्ल्वोःसार्वधातुक इति यणादेशे जुह्वन्निति लोकेऽपि तमुद्दिश्य होमं कुर्वन्नुपधावदित्यन्वयः ॥१७॥ देवस्य महादेवस्योपलब्धिं दर्शनमप्राप्य षड्भिर्दिनैरिति शेषः । सप्तमेऽहनि तीर्थेन केदारतीरेणाक्लिन्ना मूर्धजाः केशा यस्य स शिरः स्वस्य जिहीर्षुर्हर्तुकामो यदाऽभूत् । एकपद्ये शिरो हर्तुमिच्छुर्जिहीर्षुः । न लोकेति षष्ठीनिषेधाद्भिन्नपदताऽपीहि सम्भाविनी ॥१८॥ महाकारुणिको धूर्जटिरनलादंगाररूपादवयवी करचरणादिमानग्निर्धृष्टद्युम्नादिरूपेणेव यथोत्थितो भवति तथोत्थितः । दोर्भ्यां स्वाभ्यां भुजयोर्निगृह्य न्यवारयत् शिरो न हरेति हरो निवारयामास । स च यथा पूर्वं तथा तत्स्पर्शनाद्भूय उपाकृताकृतिः सम्पन्नस्वकाकारसर्वस्वो वृक्णांगसम्पत्तिमान् वृकोऽभूदिति भावः ॥१९॥

तमुपाकृताकृतिमंग हे वृक अलमेतावत्या तवापचित्या पर्याप्तम् । मत्तोषस्य जातत्वादिति भावः । यथा यथापेक्षं वरं वृणीष्व ते वरं निकामं वितरामि । नृणां शिवेनौत्तरिकसुखसाधनेन जीवेन जीवनेन प्रपद्यतां भवान् प्रपन्नो भवतु ।

जीवन्नरो भद्रशतानि पश्यति ।

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे । एति जीवितमानन्दो नरं वर्षशतादपि ॥

इत्यादेः । त्वयाऽऽत्मदेहो वृथा इत उत भाविनः कार्यस्याभावात् । किमर्थं भृशमर्द्यते हिंस्यते । अहो इति महादेवो न्यवारयदित्यन्वयः ॥२०॥ स देवाद्भूतानां भयावहं हरं वव्रे । कुत एतादृशवरमवृणोत् स इत्यत आह ॥ पापीयानिति । तत्प्रकारमाह ॥ यस्येति । यस्य पुंसः शीर्ष्णि करं धास्ये स म्रियतामिति । पुंस इत्यनेनैतं हरं हत्वा तत्तरुणीं हर्तुकामोऽयमिति तद्दुर्भावो ध्वन्यते ॥२१॥ एवं वरवरणं दुर्मना इव सन् हसन्निति बहिः खेदोऽन्तः । ऋतं यथा स्यात्तथा तस्मै वरं ददौ ॥२२॥ स चासौ वरश्च तस्य परीक्षार्थं याथार्थ्यायाथार्थ्यनिर्णयार्थं शम्भोर्दातुः स्वहस्तं दातुमारेभे । स्वकृताद्वरवितरणरूपात्कर्मणः स सदाशिवो भूतोऽभूत् । अबिभेत् लङ् ॥२३॥ तेन वृकेणोपसृष्ट उपद्रुतः संत्रस्तः सवेपथुः सकम्पो दिवो भूमेश्च कोष्ठानां सुषिराणां यावदन्तं भवोऽधरं पातालं पराधावत् ॥२४–२५॥

तत्प्रतिनिधिं प्रतिक्रियामजानन्तः सुरेश्वराः ब्रह्माद्यास्तूष्णीमासन् । ततो वैकुण्ठं हरिमन्दिरं तमसः परं भास्वरमगमत् । हे अजेति ब्रह्माणं सम्बोध्य का गतिरिति मनस्यालुलोचानन्तरमनन्त इति प्रत्यभात् । अत एव वैकुण्ठगमनं संगच्छते । तन्माहात्म्यमाह ॥ यत्रेति । शान्तानां न्यस्तदण्डानां न्यासिनां संन्यासिनामकामानां वा परमा गतिः । नारायणो यत्रास्ते यतो गतश्च पुनर्नावर्तते पुमान् गतश्च यत्रैव वर्तते तं वैकुण्ठमगमदित्यन्वयः ॥२६॥ तथाव्यसनं यस्य तं हरं वृजिनार्दनो भगवान् दूरादेव दारको योगमायया बालः सन् प्रत्युदितोऽभूत् ॥२७॥ ब्रह्मचर्याकारसाहितीमाह ॥ मेखलेति । तं वृकं कुशपाणिर्विनीतवदभिवादयामास ॥२८॥

माधव आदौ मधुरया गिरा तं भ्रान्तं तन्वन् वक्ति ॥ इतश्चेति । शकुनिकुमार भवान् किं दूरमागतः । कथं मम दूरगमनं ज्ञातं भवतेत्यत आह ॥ व्यक्तं श्रान्त इति । क्षणं विश्रम्यताम् । भवतु भगवन् कायक्लेश इत्यत आह । अयमात्मा देहः सर्वकामं दोग्धीति स तथेति न श्रमणीय इत्यर्थः ॥२९॥

युष्मद्व्यवसितं भवन्निश्चितं प्रमेयं नः श्रवणाय श्रोतुमलं चेद्वर्ण्यताम्। किमेकस्य पुरतो वचनेन कर्तव्यं करिष्यामीत्यतो लोके लोक एव प्रवर्तत इति कीर्तयति। हे विभो साधो पुरुषः कार्यकर्ता पुम्भिः सहकारिभिः स्वार्थमुभयोः कलहे सति समीहते। अत उक्तं चेच्छृणु अशक्यं चेत्तथा घटयाम इत्याशयः ॥३०॥ अमृतवर्षिणा वचसैव पृष्टोऽत एव गतक्लमो विगततन्द्रो यथा पूर्वमनुष्ठितं तत्सर्वं तस्मै विष्णवे चोरमाणवकायेत्यप्यर्थः। न च तकारश्चागते चोर इति विश्वादिपठितेऽकारान्तोऽत्र तस्मै चोरयति [अत्रैका पङ्क्तिर्नष्टा टीकापत्रे अर्थानुसन्धानेनेत्थं भवितुमर्हति ....विश्ववन्द्य.. व्याख्याकरण....] कथमित्याशङ्क्य कस्मै देवाय हविषा विधेमेत्यृग्भाष्ये शब्दः कस्मै यथा भवेदित्युक्तेस्तत्रेवात्रापि तस्मा इति ज्ञेयम्। विस्तरस्तु तट्टीकाद्युदाहरणेन प्राक् षष्ठादौ कृतोऽनुसन्धेयः ॥३१॥ एवं चेद्वयं तद्वाक्यं गिरिशवाक्यं न श्रद्दधीमहि न विश्वसिमः। तत्र हेतुमाह ॥ य इति। दक्षशापात्पैशाच्यं पिशाचभावं प्राप्तः। आगन्तुकं चेत्कदाचिदनङ्कूरणमपि स्यादित्यत आह ॥ प्रेतपिशाचराडिति। सर्वदा तत्सहवासान्न तद्भावप्रच्युतिरिति ॥३२॥

रुषाक्रान्तशरीरो रुद्रश्च क्रोधसम्भव इत्यादेः। तदुद्भूतस्य भूतपतेः क्रोधान्ध्यं न दुर्घटमिति भावः। ततो हरो न सत्यं वदति भा... सन्वक्ति। कोपे सति सत्यवचन इत्यत आह। क्रोधयुक्तेऽसत्यं कुतो हेतोः स्यादतो न सत्यं वदेदिति। हे महासुर त्वमसत्ये सत्यमिति .. (बुद्धि)मानिति मूढोऽसि ॥३३॥ हे दानवेन्द्र यदि जगद्गुरौ तत्त्वेन नारदोपदिष्टे वो यदि विश्रम्भो विश्वासः। व इति तत्सुखीकरणे बहुवचनम्। वृक तर्हि स्वशिरसि हस्तन्यासः प्रदीयताम्। त्वं त्वच्छिरोन्यस्तहस्तो भव ॥३४॥ यदि शम्भोर्वचोऽसत्यं त्वज्जीवनज्ञापितासत्यवक्तं कथञ्चि...(त्स्यात्)दानवर्षभ। तदैवैनमसद्वाचं जहि। पुनरेतद्व्यावृतो यथाऽनृतं न च वक्ता तथेति। अनद्यतने लङ्। जहीत्युक्तहननानन्तरं तस्यैवाभावान्न च वक्ता.. पुनरित्यसंगतमिति परास्तमनेन ॥३५॥

भगवतश्चित्रैः सुपेशलैर्मनोहरैर्वचोभिर्भिन्नधीः कुमतिर्विस्मृतः। आदिकर्मणि कर्तरि चेति क्तः। स्मृतं भावं क्तः विगतं स्मृतं यस्मात्स सन् शीर्ष्णि स्वहस्तं व्यधात् ॥३६॥ वज्रहनः पर्वत इव वृत्रादिवद्वा क्षणाद्भिन्नशिरा अपतत्। जयशब्दो नमःशब्दः साधुशब्दः साध्विति शब्दस्य दिव्यभवत् ॥३७॥ देवर्षिपितृगन्धर्वाः पापे वृकेऽसुरे हते सति वृष्ट्यन्त इति वर्षाणि कुसुमानि च तानि तानि च मुमुचुः। संकटाच्छिवश्च मोचितः ॥३८-३९॥ हे महादेव स्वेन पाप्मनाऽयं हतः। अहो इति हे पर्यायः। अहो महादेव देवोऽयं स्वेन पाप्मना हतः। को नु पुमान् कृतकिल्बिषो यादृशतादृशजनागस्कृत्कुतः क्षेमी स्यात्। जगद्गुरौ विश्वेशे कृतागस्कः क्षेमी स्यात्किमु नेत्यन्वयः। अहो बतानुकम्पायां खेदे सम्बोधनेऽपि चेति विश्वः। एतेन कृतकिल्बिष इत्यादिना हेतूपन्यसनादाश्चर्यार्थकस्य तस्य न सरसावन्वयार्थाविति परास्तम्। न त्वच्छस्त्रहतो मच्छस्त्रहत इत्यहो इति वा। न ममाप्यायासो जात इत्यप्याह ॥ महादेवोत्सवादेवेति ॥४०॥

विना फललपनं न जनः प्रवर्तत इति तदाह ॥ य इति। अव्याकृतशक्त्युदन्वतः स्वरूपभूतयेति नित्यया शक्त्योदन्वतः समुद्रस्य। परस्य साक्षात्परमात्मनो हरेः सकाशाद्गिरीशमोक्षं कथयेत् शृणुयाद्वा संसृतिभिरागच्छन्तीभिस्तत्परम्पराभिस्तथाऽरिभिर्वैरिभिश्च विमुच्यते। एवं संसृतिभिर्द्रविणं येषां ते तैररिभिरित्यन्वयः ॥४१॥

॥ इति श्रीमद्भागवतटिप्पण्यां सत्यधर्मकृतायां दशम उत्तरार्धे चतुर्णवतितमोऽध्यायः ॥१०-९४॥

ॐॐॐ

(सूचनार्थमग्रिमपृष्ठमवलोकनीयम्)

सूचना :—

अयि महाशयाः, एषा पंचविंशतितमा श्रीमद्भागवतसञ्चिका प्रकाशनं नीता । एवं च यत्कार्यमस्माभिर्दशवर्षात्पूर्वमारब्धं तदद्य श्रीहरिगुर्वनुग्रहेणास्मद्ग्राहकाणामाश्रयं चालम्ब्य समापितमिति सादरेण प्रकटयितुमानन्दनिर्भराः स्मः । आसु सञ्चिकासु सुविख्यातविद्वत्कर्तृकटिप्पण्या दशकं तथा श्रीभागवतमूलं च मुद्रितम् । प्रकृतसञ्चिकायां श्रीसत्यधर्मीया व्याख्या दशमोत्तरार्धस्य प्रकाशिता । परं तत्र चतुर्ण्णवतितमाध्यायमारभ्याग्रिमदशाध्यायस्य व्याख्या नोपलब्धा । तदर्थं बह्वायासे कृतेऽपि निष्फलं जातम् । तारितोषिकदानव्याजेन पत्रद्वारा तथाऽस्मत्सञ्चरितस्थलेषु साक्षाद्विचरितम् । अथापि न यशो लब्धम् । इतःपरं केनापि महनीयेनोदारान्तःकरणेनैतद्दशाध्यायस्य तद्व्याख्यानं दीयेत तर्हि परमादरेण तन्मुद्रयित्वाऽस्मद्ग्राहकेभ्यो दातु प्रभवामः । तावदधुना प्रकाशितांशेन सन्तोष्टव्यमिति सविनयं प्रार्थयामः । अपि चोत्तरार्धे चतुर्विंशतितमेऽध्याये श्रीश्रुतिगीता वर्तते । ग्राहकाणां सौलभ्याय तदुपरि श्रीविजयध्वजतीर्थीय, श्रीव्यासतीर्थीय, श्रीछलारीति यद्व्याख्यानत्रिकं तदस्यां सञ्चिकायां प्रकाशितम् । अन्तेऽस्मिन् कार्ये स्वकुटुम्बभराक्रान्तैरप्यस्मद्ग्राहकैर्यन्महदाश्रयं दत्तं तदर्थं वयमुपकृताः स्मः । तेभ्य इहामुत्र च परमसुखं श्रीहरिर्ददात्विति कामयमानो विरमते ॥

सावनूरो गोविन्दः

प्रकाशकः ।

(यस्माद्ग्रन्थादियं मुद्रिता तदन्त एतल्लिखितं तस्माद्विलिखितम् ।

तत्र समयादिनिर्देशो नास्माकीनोऽपि तु तेषामेव)

॥ हरिः ॐ ॥